CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ श्रीपाद्मे महापुराणे प्रथमं सृष्टिखण्डं प्रारभ्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पु० २६८८

श्रीः ।

प्रस्तावना ।

"अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः । पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश ॥" इत्युक्तेषु चतुर्दशसु विद्यास्थानेषु प्रधानं धर्मस्थानं वेदाः । त एव परमं प्रमाणं वैदिकधर्मावलम्बिनामिति स्थितम् । ते च वेदाः, "इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् । बिभेत्यल्पश्रुताद्वेदो मामयं प्रतरिष्यति ॥" इत्युक्तरीत्या इतिहासपुराणैरनुपबृंहिता नाल्पज्ञानां सम्यग्ज्ञानाधानक्षमा इति इतिहासपुराणसाहाय्यमपेक्षितं प्रामाणिकानाम् । इतिहासपुराणयोर्वेदतुल्यतया परिगणनम्, "ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमम्" इत्यादिश्रुतिषु दृश्यते "पुराणं वेदसम्मितम्" इति च पुराणस्य वेदतुल्यत्वं प्रतिपाद्यते । पुराणलक्षणं च---"सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च । वंशानुचरितं चेति पुराणं पञ्चलक्षणम् ॥" इत्यादिषूक्तम् । अष्टादशमहापुराणान्यष्टादशोपपुराणानि च परिगण्यन्ते । तत्र महापुराणानि च---"ब्राह्मं पाद्मं वैष्णवं च शैवं भागवतं तथा । तथान्यन्नारदीयं च मार्कण्डेयं च सप्तमम् ॥ आग्नेयमष्टमं प्रोक्तं भविष्यं नवमं तथा । दशमं ब्रह्मवैवर्तं लैङ्गमेकादशं तथा ॥ वाराहं द्वादशं प्रोक्तं स्कान्दं चैव त्रयोदशम् । चतुर्दशं वामनं तु कौर्मं पञ्चदशं तथा ॥ मात्स्यं च गारुडं चैव ब्रह्माण्डं च ततः परम् ॥" इति नामतः परिगणितानि । पुराणानां सात्त्विकराजसतामसभेदेन त्रिविधत्वं मात्स्यादिपुराणवचनसिद्धम् । तामसापेक्षया राजसस्य राजसापेक्षया सात्त्विकस्य च प्राबल्यं न्यायप्राप्तं पुराणसिद्धं च वैष्णवं, नारदीयं, भागवतं, गारुडं पाद्मं, वाराहमिति षट् सात्त्विकपुराणानि । तेष्वपि पाद्मं पुराणमतिविस्तृतं षट्खण्डात्मकं नानाविधधर्मप्रतिपादकं बह्वितिहासगर्भितं च । तदेतदितः

CC-0. In Public Domain. Digitization by eGangotri

पूर्वमपि बहुषु स्थलेषु बहुभिर्विद्वद्भिः संशोधितं प्रकाशितं च। अथापि बह्वशुद्धिगर्भितं परस्परविसंवादिपाठक्रमयुतं च दृष्टम्। इदानीं चास्य संशोधनं, पुण्यपत्तनस्थानन्दाश्रममुद्रितं पुस्तकं, हस्तलिखितमपरं, स्वमुद्रणालयमुद्रितमितरत्, इति पुस्तकत्रयमासाद्य कृतम्। उत्तरखण्डे च वेङ्कलूरपत्तनमुद्रितान्ध्रपुस्तकानुसारेणापि क्वचित् क्वचित् प्रयतितं संशोधन एतस्य। वर्णविभक्ति–पद–वाक्य–पद्यानां विनिमयः क्वचिदर्थस्वारस्यानुसारेण कृतः। विभिन्नेषु च पाठेषु प्रकरणाद्यनुगुण एव पाठः समादृतः। एवमपि कृते शोधने यदि दैवात् क्वचनोपलभ्येताशुद्धिः सा क्षन्तव्या, स्वयं निर्माज्र्या। बहोः कालादिदमशुद्धमेव प्रायः प्रचरति स्म सर्वत्र पुराणमित्यत एवैवं पाठविनिमयकरणं सोढव्यम्। अस्य पुराणस्य संशोधने पाठादिविनिमये च प्रतिवादिभयङ्करैः श्रीमदनन्ताचार्यपादैरतीव श्रमो विहित इति धन्यवादाननेकान् वितरामः।

विनीताः–

क्षेमराज–श्रीकृष्णदास श्रेष्ठिनः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ श्रीः ॥

अथ पद्मपुराणस्थविषयानुक्रमणिका प्रारभ्यते ।

अथ सृष्टिखण्डम् ।

अ० प०	विषयाः
१—१	मङ्गलाचरणम्, लोमहर्षणेनोग्रश्रवसऋषीन्प्रति सर्वधर्मकथनायाज्ञादानम्, नैमिषारण्योत्पत्तिप्रस्तावः, नैमिषारण्यं प्रति गतस्योग्रश्रवसस्तत्रत्यमहर्षिभिः सह संवादः, पुराणश्रवणाय शौनकप्रार्थना, सूतोत्पत्तिवर्णनम्, व्यासजन्मकथानिरूपणम्, पुराणप्रशंसायां पाद्मपुराणस्याधिकप्रशंसावर्णनम्, तत्रत्यमुख्यविषयवर्णनम् । श्लोकाङ्काः ६७ ।
२—३	सूतकृतमंगलाचरणम्, सृष्टिखण्डस्थविषयवर्णनम्, पुराणप्रशंसा, गङ्गाद्वारे पुलस्त्यभीष्मसंवादः, पुलस्त्येन ब्रह्मणः सृष्टिप्रकारवर्णनम्, महदादिसकलसृष्टिवर्णनम् । श्लोकाङ्काः १२० ।
३—५	कालपरिमाणम्, प्रलये जलनिमग्नायाः पृथिव्या उद्धारणाय वाराहरूपस्य जलं प्रविष्टस्य भगवतः पृथ्वीकृतस्तुतिवर्णनम्, भगवत्कृतपृथिव्युद्धरणम्, ब्रह्मदेवकृतनवविधसृष्टीनां संक्षेपेण वर्णनम्, सुरादिस्थावरान्तचतुर्विधप्रजानां विस्तरेण सृष्टिवर्णनम्, मुखाद्यवयवविशेषाद्ब्राह्मणादिवर्णोत्पत्तिवर्णनपुरःसरं यज्ञनिष्पत्त्यर्थमोषध्यादिवर्णनम्, सृष्टप्राणिनां स्थानवर्णनम्, मानससृष्टिकथने भृग्वाद्युत्पत्तिः, रुद्रोत्पत्तिः, स्वायंभुवोत्पत्तिः, स्वायंभुवप्रजासर्गवर्णनम्, भृगोर्लक्ष्म्युत्पत्तिवर्णनम् । श्लोकाङ्काः २०६ ।
४—८	समुद्रमन्थनप्रस्तावे दुर्वाससा इन्द्राय शापप्रदानवर्णनम्, देवदैत्यैरेकत्र मिलित्वा समुद्रमन्थनम्, मथ्यमानात्समुद्रात्सुरभ्यादिरत्नोत्पत्तिः, लक्ष्म्युत्पत्तिसमनन्तरं लक्ष्म्या विष्णुवरणम्, अमृतोत्पत्तौ देवानाममृतप्राशनम्, पुनर्भृगोः ख्यात्यां लक्ष्म्युत्पत्तिः, नर्मदातीरे लक्ष्मीपुरयाचनावसरे भृगुणा विष्णोः शापदानम्, ब्रह्मणा पुनः सृष्टिकरणम्, नारदेन ब्रह्मणः सृष्टिस्वरूपवर्णनम्, ब्रह्मणा नारदाय वरप्रदानम् । श्लोकाङ्काः १३७ ।
५—११	दक्षयज्ञविध्वंसकथानकम्, तत्र दक्षेण यज्ञे समारब्धे सति सत्या दक्षेण सह संवादः, दक्षकृतसतीसान्त्वनम्, सत्या देहत्यागः, दक्षकृतशङ्करस्तुतिः, शिवेन दक्षाय वरप्रदानम्, सतीनिमित्तं शिवस्य गङ्गाद्वारे चिन्ताकरणम्, हिमवदुत्पन्नायाः पार्वत्याः शिवेन सह विवाहः । श्लोकाङ्काः ९५ ।
६—१३	दक्षात्प्राक्संकल्पदर्शनस्पर्शजन्या सृष्टिः, दक्षादूर्ध्वं मैथुनतः सृष्टिः, हर्यश्वानशबलाश्वानां च नारदोपदेशेन मोक्षपथाश्रयणम्, विश्वदेववसुरुद्रादित्यदैत्यानामुत्पत्तिः, तत्र दैत्योत्पत्तौ संक्षिप्तबाणचरित्रम्, दानवशुक्रादिगरुडादिसमुत्पत्तिः । श्लो० ७९ ।
७—१४	मरुदुत्पत्तिकथानकवर्णनम्, तत्र दितिव्रतकरणम्, कश्यपाद्गर्भप्राप्तिवर्णनम्, गर्भिणीधर्माः, व्रतलोपे सतीन्द्रेण दित्याः कुक्षौ प्रविश्य वज्रेण गर्भस्यैकोनपञ्चाशत्खण्डकरणम्, तेषां जीवतां गर्भखण्डानां मरुदित्यभिधाकरणम्, तन्निरुक्तिश्च, प्रतिसर्गवर्णने पृथुप्रभृतीनामाधिपत्यवर्णनम्, स्वारोचिषौत्तमितामसरैवतचाक्षुषववस्वतसावर्ण्यरौच्यमेरुसावर्णिऋभुऋतुधामविष्वक्सेनानां चतुर्दशमनूनामुद्देशेन तत्तदन्तरवर्णनम् । श्लोकाङ्काः ११५ ।
८—१६	पृथुराजाकथानकम्, तत्र संक्षिप्तपृथूत्पत्तिसमनन्तरं पृथुना वत्सपात्रपयोदोग्धृभेदेन पृथिवीदोहनम्, दोहनोत्तरं पुरग्रामादिव्यवस्थाकरणपूर्वकं पृथिव्याः पृथुदुहितृत्ववर्णनम् । सूर्यवंशवर्णनम्, यमयमुनोत्पत्तिः, सावर्णिमनूत्पत्तिः, छाया-

CC-0. In Public Domain. Digitization by eGangotri

अ० प०	विषयाः
	याः सूर्यपत्न्याः संक्षिप्तचरित्रम्, संज्ञाया वडवारूपधारणम्, सूर्यतेजःशातनम्, सूर्यमूर्त्तेः पादावयवाकरणे हेतुः, अश्विनीकुमारोत्पत्तिः, शनेर्ग्रहत्ववर्णनम्, यमुनातपत्योर्नदीत्वम्, विष्टिघोरयोः कालत्वम्, वैवस्वतमनुवंशवर्णनम्, वैवस्वतपुत्रस्यैलस्य शंभूपवनगमनात्स्त्रीत्वप्राप्तौ बुधेन सह संयोगः, इक्ष्वाक्वादीनामिलभ्रातॄणां शिवाराधनम्, तदाराधनतुष्टशङ्करेण वरप्रदानादिलस्य मासप्राप्यपुरुषत्वमासप्राप्यस्त्रीत्ववर्णनम्, इलात्पुत्रोत्पत्तिः, इलावृतवर्षनामधेयम्, इलस्य वंशवर्णनम्, इक्ष्वाकुवंशवर्णनम् । श्लोकाङ्काः १६३ ।
९—१९	पितृवंशानुचरितम्, तत्र मायाव्यभिचाराद्भूलोके मत्स्ययोनिजसत्यवतीत्वप्राप्तिः, पितॄणां श्राद्धश्राद्धीयद्रव्यश्राद्धकालश्राद्धस्थानश्राद्धविधिवर्णनम्, अनुपनीतविधुरयोः साधारणश्राद्धविधिः, शूद्रस्यामन्त्रकं श्राद्धम्, आभ्युदयिकश्राद्धम् । श्लोकाङ्काः १९२ ।
१०—२२	एकोद्दिष्टश्राद्धविधिः, वर्णानुपूर्व्येण जननाशौचशावाशौचनिर्णयः, अस्थिसञ्चयनादिप्रेतकर्म, लेपभाक्सपिण्डपितृगणनिर्णयः, विप्रादिभोजनेन पितृगणतृप्तिविषयकशङ्कानिराकरणम्, श्राद्धविषये कौशिकसुनुकथानकम्।श्लोकाङ्काः१२७।
११—२४	श्राद्धयोग्यप्रशस्तदेशवर्णनम्, सत्यदयेन्द्रियनिग्रहशमानामपि तीर्थत्वम्, श्राद्धयोग्यप्रशस्तकालवर्णनम् । श्लोकाङ्काः ९५ ।
१२—२६	सोमवंशवर्णनम्, तत्र चन्द्रोत्पत्तिः, चन्द्रकृतयज्ञवर्णनम्, चन्द्रेण ताराहरणे कृते सति बृहस्पतियाच्ञयाप्यदत्तायां तस्यां रुद्रकृतयुद्धोत्तरं चन्द्रेण बृहस्पतये तारादानम्, चन्द्रवीर्यात्तारायां बुधोत्पत्तिः,बुधात्पुरूरवसो जन्म,पुरूरवसश्चरित्रम्,पुरूरवसः पुत्रादिवंशवर्णनम्, बृहस्पतिकृतं रजिपुत्रमोहनम्, कार्तवीर्यनामस्मरणमाहात्म्यम् । श्लोकाङ्काः १४० ।
१३—२९	क्रोष्टुवंशविस्तारवर्णनम्, तत्र वंशानुवंशस्थस्त्रीपुरुषाणां संक्षिप्तचरित्रवर्णनपुरःसरं स्यमन्तकमणिसंक्षिप्तचरित्रम्,कुन्तीतः पाण्डवोत्पत्तिवर्णनम्, देवक्यां कृष्णोत्पत्तिवर्णनम्, वसुदेवदेवकीनन्दयशोदानां पूर्वजन्मवर्णनम्, कृष्णसन्तानवर्णनम्, पृथिव्यां भगवदवतारकारणवर्णने देवपराजितदैत्यप्रार्थितशुक्रकृतदैत्योत्कर्षार्थकतपश्चर्याकरणम्,दैत्यानां शुक्रमातृकृतरक्षणे विष्णुकृतशुक्रमातृवधवर्णनम्,भृगुणाविष्णवेशापदानम्,भृगुणा स्वपत्नीसञ्जीवनम्, इन्द्रेण स्वकन्यायाः, जयन्त्याः शुक्रसमीपे सेवार्थं प्रेषणम्,जयन्त्या शुक्रशुश्रूषणम्, शुक्रस्य शिवेन वरप्रदानम्, जयन्त्या सह शुक्रस्य शतवर्षपयन्तं गुप्तागारेऽदृश्यतया निवासः, बृहस्पतिना शुक्रवेषेण दैत्यमोहनम्, बृहस्पतिशुक्रयोः सरोषवचनानि, शुक्रस्य दैत्यान्प्रति शापः, गुरुणा दैत्यान्प्रति धर्मभ्रंशकरोपदेशदानम्, बृहस्पतिसाहाय्यार्थं विष्णुना मायामोहसमुत्पादनम्, दिगम्बरेण मायामोहेन दैत्यान्प्रति जैनधर्मोपदेशः, दानवानां मायामोहमोहितानां गुरुणा दिगम्बरजैनधर्मदीक्षादानम्, गुरोः देवलोकं प्रति गमनोत्तरमिन्द्रेण दैत्योपहासकरणम्, पुनः शुक्रेण दैत्यानां बोधनोत्तरं दैत्यानां त्रलोक्यहरणोद्योगः । श्लोकाङ्काः ४१३ ।
१४—३६	अर्जुनकर्णयोरुत्पत्तिकथनपुरःसरं वैरकारणकथनम्,तत्र शिवकृतशिरश्छेदक्रुद्धब्रह्मस्वेदात्पुरुषोत्पत्तिः, तस्माद्भीतस्य शिवस्य विष्णोः समीपे गमनं प्रार्थना च, स्वेदजविरूपाक्षयाचितेन विष्णुना स्वदक्षिणभुजसमर्पणम्, विरूपाक्षेण विष्णुभुजच्छेदनोत्तरं तद्रक्तेन तस्य भिक्षापात्रपूर्तिः, मथ्यमानात्तद्रक्तात्पुरुषोत्पत्तिः, स्वेदजरक्तजयोःपुरुषयोर्युद्धवर्णनम्, विष्णवाज्ञया सूर्यशुक्राभ्यां तयो रक्षणपुरःसरं द्वापरान्ते पृथायां, कर्णार्जुनरूपेणोत्पत्तिवर्णनम्, शिवकृतब्रह्मशिरश्छेदकारणम्, ब्रह्महत्याभीतशङ्करकृतब्रह्मस्तोत्रवर्णनम्, ब्रह्माज्ञया शिवकृतविष्णुस्तोत्रम् । शिवं प्रति विष्णुना ब्रह्महत्याप्रायश्चित्तकथनम्, शिवकृततीर्थक्षेत्रपर्यटनम्, पुष्करे शिवकृतकापालिकव्रतम् । ब्रह्मणा शिवाय वरप्रदानम्, कपालमोचनतीर्थस्योत्पत्तिः, संक्षेपतो वाराणसीक्षेत्रमाहात्म्यम् । शङ्करस्य वाराणसीं प्रति गमनम् । श्लोकाङ्काः २१३ ।
१५—३९	मेरोरुपरि वैराजभवने कान्तिमत्याख्यसभायां ब्रह्मदेवस्य चिन्ताकरणोत्तरं पृथिव्यां प्राक्स्थानं प्रति गत्वा तत्र वृक्षवरप्रदानप्रसङ्गेन तत्र वासवर्णनम्, विष्णुना सह सर्वदेवानां गमनम्, देवेभ्यो ब्रह्मणोपदेशकरणम्, पुष्करतीर्थोत्पत्तिकारणवर्णनम्, पुष्करक्षेत्रवासविधिवर्णनम्, त्रिविधभक्तिभेदवर्णनम्, पुष्करमरणानि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अ० प०	विषयाः
	वासफलम्, पुष्करस्थितानामाचारव्रतानुष्ठानवर्णनम्, ब्राह्मणानां लक्षणानि, आश्रमधर्मवर्णनम्। श्लोकाङ्काः ३९२।
१६—४६	ब्रह्मदेवकृतयज्ञवर्णनम्, तत्र ब्रह्मदेवकृतगोपकन्यारूपगायत्रीपरिणयनम्, तत्रेंद्रेण गोपकन्यानयनोत्तरं विष्णुसंमत्या ब्रह्मणा तत्परिणयनम्, ब्रह्मणः सहस्रयुगपर्यन्तयज्ञकरणम्। श्लोकाङ्काः १९०।
१७—५०	ब्रह्मदेवकृतयज्ञे शिवस्य भिक्षोद्देशेनागमनम्, सदस्यकृतोपहासक्रुद्धेन शिवेन कपालोद्धरणम्, तत्र भूयोभूयो भवनाश्चर्यम्, ब्रह्मरुद्रसंवादः, उपहासकरब्राह्मणेभ्यः शिवशापवर्णनम्, अन्येभ्यो वरप्रदानम्, गोपकन्यया सह यज्ञकुद्ब्रह्माणं प्रति सावित्रीकृतनिर्भर्त्सनम्, ब्रह्मणा सावित्रीसमीपे स्वापराधक्षमापनम्, ब्रह्मविष्ण्वादिदेवान्प्रति सावित्रीशापः, पर्वते साविञ्या निर्गमनम्, विष्णुना सावित्रीस्तोत्रकरणम्, साविञ्या विष्णवे वरदानम्, गायञ्या ब्रह्मव्रतकथनम्, सावित्रीदत्तशापस्योच्छापकरणं च, गायञ्या सर्वदेवेभ्यो देवीभ्यश्च वरप्रदानम्, रुद्रकृतगायत्रीस्तोत्रम्, गायञ्या रुद्राय वरदानम्। श्लोकाङ्काः। ३३९।
१८—५६	ब्रह्मदेवकृतयज्ञस्य विस्तरेण वर्णनम्, विष्णुदानववैरवर्णनम्, पुष्करस्नानादृषीणां मुख्यवैरूप्यनाशनपुरःसरं सुमुखत्वप्राप्तिः, प्राचीसरस्वतीचरित्रम्, तत्र मङ्कणकब्राह्मणस्य चरित्रम्, प्राचीसरस्वतीमाहात्म्यवर्णनम्, सर्वदेवप्रार्थनया वडवाग्निं गृहीत्वा नदीरूपेण सरस्वत्याः क्षारोदसमुद्रगमनेनान्तर्धानेन पुष्करं प्रति गमनम्, पुष्करस्थसरस्वतीमाहात्म्यम्, पुष्करक्षेत्रसंनिहितखर्जूरीवने सरस्वत्युद्भवः, तस्या नंदाभिधानकरणे प्रभञ्जनराजकथानकम्, खर्जूरीवनान्नंदाया गमनम्, सरस्वत्यां स्नानदानादिप्रशंसावर्णनम्। श्लोकाङ्काः ४७६।
१९—६४	ऋषिभिर्यज्ञोपवीतैः पुष्करस्य तीर्थविभागकरणम्, ब्रह्मणा ऋषिभ्यो वरप्रदानम्। पुष्करक्षेत्रस्य माहात्म्यवर्णनम्, पुष्करस्थब्रह्मर्ष्याद्याश्रमवर्णनम्, अगस्त्यप्रभावकथनम्, वृत्रासुरवधाश्रितकथानकम्, तत्र कालेयभीतदेवप्रार्थितब्रह्माज्ञया देवानां दध्यंचमृषिं प्रति प्रार्थना, दधीचा देवेभ्यो निजास्थिदानम्, तेनास्थ्ना वज्रनिर्माणम्, तेन वज्रेण शक्रेण वृत्रहननम्, वृत्रहत्याभीतस्य शक्रस्य सरःप्रवेशः, कालेयासुराणां देवत्रस्तानां समुद्रप्रवेशः, कालेयकृतोपद्रववर्णनम्, देवकृतविष्णुस्तोत्रम्, विष्णवाज्ञप्तदेवानामगस्त्याश्रमं गत्वागस्त्यप्रार्थनम्, अगस्त्येन विन्ध्यनामनवर्णनम्, अगस्त्यकृतसमुद्रप्राशनम्, देवकृतकालेयवधः, ब्रह्मणा भागीरथीकृतसमुद्रस्थलपूरणस्य कथनम्, पुष्करक्षेत्रे श्राद्धादिविधिवर्णनम्, अवर्षणदुर्भिक्षत्रस्तऋषिकुमारप्रेतपचने राज्ञः संवादः, प्रतिग्रहदोषः, सुवर्णपूर्णोदुंबरदर्शने तद्ग्रहणाविषये निषेधविषये च वसिष्ठप्रभृतिमुनीनामभिप्रायाः, शान्तिप्रशंसावर्णनम्, द्रव्यसंग्रहतृष्णयोर्दोषः, सन्तोषप्रशंसा, कामदोषवर्णनम्, अप्रतिग्रहफलम्, बुभुक्षितानामवस्थावर्णनम्, अन्नप्रशंसा, अन्नदानस्य प्रशंसावर्णनम्, दमादिवर्णनम्, शान्तस्य लक्षणानि, शान्तिक्षमाप्रशंसा, मध्यपुष्करप्रशंसा। श्लोकाङ्काः ३१९।
२०—७१	मध्यपुष्करमाहात्म्यवर्णनम्, तत्र पुष्पवाहननृपत्याख्यानम्, विभूतिद्वादश्यादिषष्ठिव्रतलक्षणकथनम्, स्नानतर्पणादिविधिः। श्लोकाङ्काः १७२।
२१—७४	धर्ममूर्तिराजकथानकम्, धान्यपर्वतादीनां दानविधिः, विशोकद्वादशीव्रतम्, गुडादिदशविधधेनुदानविधिः, धान्यादिदशविधशैलदानविधिः, सौरधर्मवर्णने विशोकशर्कराकमलमंदारशुभाङ्गानां सप्तमीनां व्रतविधानादिवर्णनम्। श्लोकाङ्काः ३१९।
२२—८०	भूरादिसप्तलोकानामाधिपत्यप्राप्त्युपायवर्णनप्रसङ्गेऽग्निमारुतयोरिन्द्रकृतसमुद्रशोषाज्ञाया अपरिपालनादिन्द्रदत्तशापेन पृथिव्यां जन्मवर्णनम्, संक्षिप्ततयागस्त्यचरित्रवर्णने ब्रह्मादिकृतवरप्रदानम्, अगस्त्यार्घ्यदानविधिः, पार्वत्या शिवं प्रत्यात्मनःसाविञ्यपेक्षयाधिक्यप्राप्तिप्रश्ने शिवोक्तरसकल्याणिनीपापनाशिनीगौरीतृतीयाव्रतविधानम्, रुद्रस्य गौरीसमाश्वासनोत्तरं ब्रह्मणो यज्ञं प्रति गमनम्, रुद्रं प्रति स्वधर्मख्यापनाय विष्णवाज्ञा, सारस्वतव्रतविधानवर्णनम्। श्लोकाङ्काः ९५।
२३—८३	वैष्णवधर्मवर्णनम्, भीमस्य वैष्णवधर्मप्रवर्तकत्ववर्णनम्, माघशुक्लपक्षे भीमद्वादशीव्रतविधानवर्णनम्, वर्णाश्रमोत्पत्तिवर्णनम्, तत्र वेश्याधर्मवर्णनप्रस्तावे श्रीकृष्णपत्नीनां दाशोपभुक्तानां द्वारिकायां दाल्भ्यमहर्षिणा सह संवादे दा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अ० प०	विषयाः
	लभ्येन समुद्रमन्थनसमुद्भूतवेश्याभ्यो भगवदुक्तकल्याणिनीवेश्याव्रतविधानवर्णनम् । श्लोकाङ्काः १४२ ।
२४--८६	श्रावणकृष्णपक्षीयद्वितीयायामशून्यशयनव्रतविधानवर्णनम्, अङ्गारकचतुर्थीव्रतविधानम्, तत्रादौ वीरभद्रस्य मंगलग्रहत्वप्राप्तिवर्णनपुरःसरंव्रतविधिवर्णनम् । श्लोकाङ्काः ६० ।
२५—८७	आदित्यशयनव्रतविधानवर्णनम्, तत्रोमामहेश्वरार्चाप्रकारः । श्लो० । ३७ ।
२६—८८	रोहिणीचन्द्रशयनव्रतविधानम् । श्लोकाङ्काः ३० ।
२७--८९	तटाकारामकूपवापीसरोवरादिविधानवर्णनम् । श्लो० । ६० ।
२८—९०	वृक्षारोपणविधिवर्णनम्, तत्राश्वत्थादिवृक्षाणां पृथक्पृथक्फलवर्णनम् । श्लो० ३२ ।
२९—९०	सौभाग्यशयनव्रतविधानवर्णनम्, तत्र सौभाग्याष्टकोत्पत्तिकथनपुरःसरं ललिताराधनविधानवर्णनम् । श्लो० । ५८ ।
३०--९१	पुष्करक्षेत्रे विष्णुपदपद्धतिकारणप्रश्ने वामनावतारचरित्रवर्णनम्, तत्र बाष्कलिदैत्यत्रस्तदेवप्रार्थितब्रह्मध्यातविष्णुना तद्भयनिवारणार्थमदितिगर्भप्रवेशे सत्यदित्या मुखान्निर्गतवाणीवर्णनम्, वामनोत्पत्तिसमारंभवर्णनम्, वामनस्य शुक्रेण सह बाष्कलिपुरं प्रति गमनम्, तत्र वामनार्येंद्रेण पादत्रयभूमियाचनायां बाष्कलीन्द्रसंवादः, वामनधृतबलिवञ्चनम्, बलेः पातालप्रवेशः । श्लोकाङ्काः २०३ ।
३१--९५	नागतीर्थवर्णनम्, तत्र ब्रह्मणा सर्पान्प्रति जनमेजयाद्दाहोभविष्यतीति शापदानम्, सर्पकृतप्रार्थनया ब्रह्मणा जरत्कन्यातनयादास्तीकाद्वो रक्षणं भविष्यतीत्युच्छापदानम्, पुष्करक्षेत्रे नागागमनतो नागतीर्थोत्पत्तिवर्णनम्, श्रावणपञ्चम्यां नागतीर्थे स्नानं श्राद्धादिमाहात्म्यम्, शिवदूतीचरित्रवर्णनम्, तत्र रुरुदैत्यत्रस्तदेवानां नीलगिरौ तपःस्थितां देवीं प्रति गमनम्, देवप्रार्थनया देवीवदनादनेकदेवीनामुत्पत्तिः, देवीगणदैत्यगणयुद्धवर्णनम्, ततो देव्याः शिवदूत्याः पुष्करे देवीगणैः सह स्थितौ बुभुक्षितदेवीगणप्रेरणया शिवदूतीप्रेरितरुद्रकृतस्वरूपवच्छागवृषणकल्पिततद्भोजनप्रकारवर्णनम्, शिवकृतशिवदूतीस्तोत्रम्, शिवदूत्या रुद्राय वरदानम्, स्तोत्रमहिमा च । श्लो० । १५४ ।
३२—९८	प्रेतपञ्चककथानकम्, तत्र पृथुब्राह्मणस्य पुष्करक्षेत्रे पञ्चप्रेतैः सह समागमे पृथुना प्रेतत्वनिवर्तककर्मकथनम्, प्रेतत्वकरकर्मकथनम्, पृथुसंभाषणात्प्रेतमुक्तिः, पञ्चप्रेतकथाफलम्, अंतरिक्षपुष्करस्थितौ दक्षिणापथस्थमहर्षिप्रार्थनया तस्य भूमावागमनम्, पुष्करे स्नानाद्यथ कार्तिकीपूर्णिमादिप्रशस्तयोगवर्णनम्, उदुम्बरवनादिभ्यः प्रादुर्भूतया सरस्वत्या पुष्करतीर्थपूरणम्, सरस्वत्याः पञ्चस्रोतोऽभिधानम्, सरस्वतीतीरमाहात्म्यवर्णनम्, सरस्वत्याः प्राङ्मुखत्वे कारणवर्णनम्, पुनः पश्चिमायां गमनम्, शुद्धावटतीर्थमाहात्म्यम्, प्राचीनेश्वरदेवाग्रत आदितीर्थमाहात्म्यम्, ब्रह्मादिभिरनेकसखीसमुत्पत्तिपुरःसरं ताभिः सह सरस्वत्याः पश्चिमायां गमनम् । श्लो० । १५६ ।
३३—१०१	मार्कण्डेयोत्पत्तिकथानकवर्णनम्, पुष्करक्षेत्रसमीपे मार्कण्डेयाश्रमवर्णनम्, अवियोगवापीं प्रति रामचन्द्रस्य गमने मार्कण्डेयेन सह समागमः, मार्कण्डेयाश्रमे रामस्य स्वप्ने दशरथदर्शनम्, ऋष्याज्ञया रामेण श्राद्धकरणम्, श्राद्धे समागतानां द्विजानामङ्गे सीतायाः प्रत्यक्षं दशरथदर्शनाल्लज्जाकारणकथनम्, रामादीनां ज्येष्ठपुष्करे गमनपूर्वकं मासपर्यन्तं स्थितिः, तत्र लक्ष्मणस्य मतिविपर्ययाल्लक्ष्मणकृतविरोधवर्णनम्, अजगन्धशिवं प्रति रामादीनां गमने रामकृताजगन्धशिवस्तोत्रवर्णनम्, अजगन्धरुद्रकृतरामप्रशंसा, लक्ष्मणस्य पश्चात्तापे रामेण पुष्करक्षेत्रस्थजनानां मतिवैपरीत्यपुरःसरस्वार्थतत्परतावर्णनम् । श्लो० । १९० ।
३४—१०४	ब्रह्मकृतयज्ञकालर्त्विग्दक्षिणादिसर्वकृत्यवर्णनम्, ब्रह्माज्ञया लक्ष्मीसहितविष्णुना सावित्रीमोहनम्, गौर्या सह शिवेन सावित्रीप्रार्थनम्, सावित्र्या ब्रह्मसमीपं प्रत्यागमनम्, गायत्रीसावित्र्योः संवादः, यज्ञान्तस्नाने ब्रह्मणा सर्वदेवेभ्यो वरप्रदानम्, विष्णुकृतब्रह्मस्तुतिः, रुद्रकृतब्रह्मस्तोत्रम्, ब्रह्मणा स्वस्य निवासस्थानकथनम्, ब्रह्मस्थानमाहात्म्यवर्णनम्, पुष्करादितीर्थे विविधदानमहिमा, पुष्करे गुरुदीक्षादिसविस्तरविधिवर्णनम्, पुष्करकर्तव्यविविधविधिकथनम् । श्लो० । २४३ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अ० प०	विषयाः
३५—१०९	क्षेमङ्कर्याख्यानारम्भः, तपन्त्याः क्षेमङ्कर्याः क्रोधात्कुमारीणामुत्पत्तिवर्णनम्, महिषासुरस्य नारदोपदिष्टरूपातिशयमोहात्तस्याः वशीकरणाय आदौ निर्जरैः सह युद्धवर्णनम्, प्रसङ्गान्महिषाऽसुरजननवर्णनम्, देवपराभवपूर्वकं महिषासुरस्य क्षेमङ्करीनिकटे आगमनम्, क्षेमङ्करीकृतमहिषासुरवधवर्णनम्, महिषवधसंतुष्टसकलदेवकृतक्षेमङ्करीस्तुतिवर्णनम्, क्षेमङ्करीस्तोत्रपठनपूजनफलकथनम्, ब्रह्मविष्णुरुद्रादिशक्तीनामनेकभेदकथनम् । श्लोकाङ्काः १९३ ।
३६—११२	वैष्णवीचामुण्डारूपरुद्रशक्तिविहितदैत्यवधवर्णनम्, महिषवधाख्यानस्य ज्ञानेनाज्ञाननाश इत्येवंरूपतात्पर्यवर्णनम्, पञ्चमहापातकनाशकब्रह्मपूजाकल्पकथनम्, नवग्रहव्रतविधानं तत्फलं च, तत्प्रसङ्गाच्छ्वेतनृपस्याख्यानम्, प्रसङ्गाददत्तवस्तुनोऽप्राप्तिवर्णनम्, ब्रह्माण्डदानविधानम् । श्लोकाङ्काः १९० ।
३७—११६	अन्नदानमाहात्म्यवर्णनप्रस्तावाद्रामकथानकवर्णनम्, तत्र रामेण रावणं निहत्य राज्यशासने क्रियमाणेऽगस्त्यादिकृतप्रशंसनम्, रामेण भीमनामकतपस्विशूद्रापचारान्मृतस्य ब्राह्मणपुत्रस्य संजीवनार्थं भीमशूद्रं हत्वा ब्राह्मणबालसंजीवनम् । श्लो० १०० ।
३८—११८	रामस्यागस्त्याश्रमं प्रति गमनम्, रामागस्त्यसंवादः, प्रतिग्रहविषयविवेके श्वेतराजकथानकम्, अगस्त्यदत्ताभरणस्य रामेण ग्रहणम्, अगस्त्यस्य आभरणरत्नादिप्राप्तिप्रश्नेऽगस्त्येन श्वेतराज्ञो निजशवभक्षणप्रभृतिवृत्तांतनिवेदनपुरःसरसंवादवर्णनम्, अगस्त्येन श्वेतराज्ञः सकाशाद्रत्नकङ्कणप्रतिग्रहवर्णनम् । श्लो० १३१ ।
३९—१२०	दण्डकारण्योत्पत्तिवर्णने दण्डराजकथानकम्, रामस्य सन्ध्योपासनादि, गृध्रोलूकयोर्गृहविषयकविवादे रामकृतनिर्णयवर्णनम्, गृध्रस्य पूर्वजन्मवृत्तान्तः, रामस्यायोध्यां प्रत्यागमनोत्तरं राजसूययज्ञविषयकविचारे प्रस्तूयमाने भरतेन युक्त्या तस्मान्निवर्तनम्, रामस्य कान्यकुब्जे वामनस्थापनप्रतिज्ञा । श्लो० १७१ ।
४०—१२३	विभीषणवृत्तजिज्ञासया भरतेन सह विमानमारुह्य रामचन्द्रस्य दक्षिणापथगमनम् तत्र च भरतपुत्रराष्ट्रनिरीक्षणानंतरं दक्षिणस्यां दिशि पूर्वं वनवासमयेऽध्युषितस्थलानां भरताय दर्शनम्, किष्किंधायां सुग्रीवादिसंगमः, ततः सुग्रीवं गृहीत्वा लंकां प्रति गमने समुद्रतीरादिप्रदेशेषु वृत्तवृत्तान्तवर्णनम्, लंकायां विभीषणसंगमः, चतुर्थे दिवसे केकसीनाम्न्या विभीषणमातृ रामदर्शने केकसीरामसंवादः, सरमारामसंवादः, रामेण विभीषणाय नीतिशिक्षणम्, विभीषणेन रामाय नानालंकारसमेतश्रीवामनमूर्तिसमर्पणम्, रामेण तां मूर्तिं गृहीत्वा विमाने स्थापयित्वाऽयोध्याभिमुखं गमनावसरे विभीषणप्रार्थनया समुद्रनिबद्धसेतोस्त्रिधा भङ्गकरणम्, रामेश्वरमहादेवस्य श्रीरामकृतस्तुतिः, शिवरामयोः संवादः, पुष्करे विमानप्रतिबन्धे जायमाने सुग्रीवेण प्रतिबंधकारणान्वेषणे विमानादुत्तीर्य श्रीरामेण ब्रह्मस्तवनम्, ब्रह्मरामसंवादः, ततो मथुरायां शत्रुघ्नराज्ये गमनम्, ततो महोदयपर्वणि गंगातीरे वामनं प्रतिष्ठाप्य तस्य द्रव्येण वृत्तिं कल्पयित्वा सुग्रीवस्य किष्किन्धां प्रति प्रेषणम्, इत्थं वामनप्रतिष्ठावर्णनम् । श्लो० १९४ ।
४१—१२७	भीष्मस्य पुलस्त्यं प्रति विष्णोर्नाभिपद्मोत्पत्तिपूर्वकं जगत्सृष्टिविषयप्रश्नकरणम्, पुलस्त्येन सृष्टिवर्णने प्रस्तूयमाने परब्रह्मतत्त्वनिर्देशपुरःसरं कृतादियुगतत्कालसन्ध्यंशादियुगधर्मादिसृष्टितत्संहारवर्णनम्, संहारकालीनभगवत्स्थितिवर्णनम्, एकार्णवे प्रसुप्तस्य भगवतो मुखं प्रविष्टेन मार्कण्डेयमुनिना भगवतो जठरेऽनेकविधप्रपञ्चदर्शनम्, भगवता सह मार्कण्डेयस्य संवादे भगवता स्वात्मनो माहात्म्यवर्णनम्, ततः परमेश्वराद्भूतसंभवः पद्मसंभवश्च । श्लो० १५८ ॥
४२—१३०	पद्ममध्याद्ब्रह्मण उत्पत्तिकथनम्, पद्मस्य पृथिवीत्ववर्णनपूर्वकं पद्मकेसराणां हिमवदादिपर्वतत्वम्, पद्मपत्रानुसारेण देशवर्णनम्, मधुकैटभोत्पत्तिः, मधुकैटभविनाशकथनम्, कपिलयोगाचार्योत्पत्तिपूर्वकदक्षादिप्रजापत्युत्पत्तिवर्णनम्, प्रजापतिभ्यः सकाशात्प्राजापत्यानामुत्पत्तिः, तारकामयसङ्ग्रामवर्णनम् । श्लो० १९८ ।
४३—१३३	देवसैन्यानां तारकासुरसैन्यैः सह तुमुलयुद्धे संप्रवृत्ते उर्वस्योरोः सकाशादौर्वानलोत्पत्तिकथानकवर्णनपुरःसरं कालनेमिवधवर्णनम्, कालनेमिप्रमुखदैत्यवधानंतरं ब्रह्मकृतविष्णुस्तुतिः, विष्णुनेन्द्रादिभ्यो वरदानादिपूर्वकब्रह्मलोकगमनवर्णनम् । श्लो० ३२६ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अ० प०	विषयाः
४४--१३९	शङ्करमाहात्म्यवर्णनारम्भः, तत्र दित्या वज्राङ्गपुत्रोत्पत्तिः, वज्राङ्गेन दित्याज्ञयेन्द्रं बद्ध्वा मातुः समीपं प्रत्यानयनोत्तरं ब्रह्मकश्यपवचनादिन्द्रमोचनम्, ब्रह्मणा तदर्थं वराङ्गीं नाम कन्यामुत्पाद्य वज्राङ्गाय पत्यर्थे कन्यादानम्, वज्राङ्गस्य वराङ्ग्या सह तपोवनं गत्वा तत्र ब्रह्मणः प्रीतये तपश्चरणम्, तत्तपस्तुष्टेन ब्रह्मणा तस्मै वरप्रदानम्, इन्द्रत्रस्तायां वराङ्ग्यां वज्राङ्गात्तारकासुरोत्पत्तिः, तपस्विने तारकासुराय ब्रह्मणा वरप्रदानम्, तारकासुरस्य देवैः सह महायुद्धम्, तत्र देवानां पराजयवर्णनम् । श्लो० ११३ ।
४५—१४१	इन्द्रविटम्बना, सर्वदेवकृतं ब्रह्मस्तोत्रम्, ततो ब्रह्मणा शङ्करसुतात्तारकासुरवधं कथयित्वा रात्रिदेवीं प्रति शङ्करसुरतभङ्गविषयेऽनुज्ञाकरणपुरःसरं वरप्रदानम्, हिमाचलपत्न्यां मेनायां पार्वतीजन्मकथनानन्तरं नारदेन पार्वत्याः सामुद्रिकलक्षणस्पष्टीकरणम्, देवराजाज्ञप्तमदनविद्धमहेश्वरकृतमदनदाहः, रतिकृतमहेशस्तोत्रम्, महेशेन मदनस्यानङ्गत्ववरदानम्, पार्वतीकृततपश्चर्या, ऋषिपार्वतीसंवादे शङ्करेतरं पतिं न करिष्यामीति पार्वतीप्रतिज्ञा, शिवपार्वतीविवाहः, गणेशवर्णनम्, वीरकगणस्य पार्वत्या पुत्रीकरणम्, पार्वतीशरीरे ब्रह्माज्ञप्तरात्र्याः प्रवेशः, पार्वत्या असिताङ्गत्ववर्णनम् । श्लो० ५३१ ।
४६—१५१	कृष्णवर्णायाः पार्वत्याः शङ्करेण विनोदकरणम्, पार्वत्या शङ्करभर्त्सना, शिवकृतभर्त्सनारुष्टायाः पार्वत्या हिमाचलं प्रति गमनम्, वीरकगणस्य द्वाररक्षार्थं नियोजनम्, शिवं प्रत्याडिदैत्यस्य पार्वतीरूपं धृत्वा योनौ वज्रदन्तं प्रवेश्य वीरकगणं सर्परूपेण वञ्चयित्वा गमनम्, तस्य पार्वतीरूपधरस्याडिदैत्यस्य वामपार्श्वे पार्वतीवामपार्श्ववत्पद्मचिह्नमनिरीक्ष्य पार्वत्यभावं निर्णीय शिवकृताडिदैत्यवधः, वायुमुखाच्छिवस्य पारदारिकत्वश्रवणतः क्रुद्धया तपःस्थितया पार्वत्या द्वारपालननियुक्तवीरकगणशापदानम्, क्रोधेन सिंहोत्पत्तिः, तन्मुखं प्रति प्रवेष्टुकामायाः पार्वत्या ब्रह्मणाविर्भूय निवारणम्, ब्रह्मवरेण पार्वत्या निजदेहकार्ष्ण्यकररात्रित्यागः, रात्रिदेव्याश्च ब्रह्मणा एकानंशेति कौशिकीति च नामकरणपूर्वकं विन्ध्याद्रिं प्रति प्रेषणम्, स्वमंदिरं प्रति प्राप्तायाः पार्वत्या वीरकेण निवारणे पार्वतीकृतवीरकशापपश्चात्तापः, वीरगणकृतपार्वतीस्तोत्रम्, पार्वतीशिवसमागमः, कार्त्तिकेयोत्पत्तिवर्णनम्, देवकृतकार्त्तिकेयस्तुतिः, कार्त्तिकेयकृततारकासुरवधः । श्लो० २१९ ।
४७—१५५	श्रीनृसिंहावतारवर्णनम्, तत्र हिरण्यकशिपुसभास्थानवर्णनम्, नृसिंहहिरण्यकशिपुयुद्धे महोत्पातवर्णनम्, नरहरिणा हिरण्यकशिपुविदारणम्, ब्रह्मकृतनरहरिस्तुतिः, क्षीरोदोत्तरकूले भगवता नृसिंहरूपं स्थापयित्वा स्वस्थानं प्रति गमनवर्णनम् । श्लो० १९६ ।
४८—१५८	अन्धकासुरकथानकम्, तत्र शिवकृतादित्यस्तुतिः, अन्धककृतं शिवस्तोत्रम्, अन्धकासुरस्य गणत्वप्राप्तिः, ब्रह्मकथितसंवादे ब्राह्मणानां प्रशस्तिः, ब्राह्मणलक्षणकथनम्, गायत्रीमाहात्म्यम्, गायत्रीजपविधिः, गायत्रीजपफलवर्णनम् । श्लो० २०८ ।
४९--१६२	अधमब्राह्मणलक्षणम्, पञ्चविधस्नानानि, अधमब्राह्मणवधेऽपि पापकथनम्, नष्टब्राह्मणपुनःप्राप्तिवर्णनम्, तत्रैकस्य ब्राह्मणपुत्रस्य कथा, तत्प्रसङ्गेन गरुडकथानकम्, प्रतिदिक्षु यवनोत्पत्तिवर्णनम्, यवनानामस्पृश्यत्वेऽपि कलौ यवनस्पर्शं करिष्यंतीति वर्णनम्, गरुडाय विष्णुदत्तवरदानादिप्रसङ्गवर्णनम्, मात्राज्ञया गरुडेनेन्द्रं पराजित्य स्वर्गादमृतानयनम्, कद्र्वै पीयूषं दत्त्वा मातुर्विनतादासीत्वान्मोचनम्, इन्द्रेण कद्र्वाः सकाशादमृताहरणम् । श्लो० १८९ ।
५०--१६६	कश्यपोपदेशेन चाण्डालपतितद्विजस्य सदाचाराचरणेन स्वर्गप्राप्तिः, ब्राह्मणपीडनादौ नानाविधदुःखप्राप्तिवर्णनम्, आततायय्यादिब्राह्मणवधेऽपापत्वम्, ब्राह्मणानामुपजीव्यवृत्तिवर्णनम्, स्ववृत्त्योपजीवनाभावे क्षत्रियादिवृत्त्यधिकारकथनम्, तुलायामसत्यकरणे नरकवर्णनम्, सत्यस्य स्तुतिः, वाणिज्यकष्टलब्धधनस्य दानेनाक्षयत्वप्राप्तिः, वैश्यवृत्त्योपजीवनाभावे कृषिकर्मतदाचारवर्णनम्, ब्रह्मणो मुखाद्वेदाग्निगोद्विजोत्पत्तिवर्णनपुरःसरं गोमाहात्म्यम्, गोपूजाविधिः, कपिलादिगोदानविधिः, गोदानस्य फलम् । श्लो० १९५ ।
५१--१६९	ब्रह्मतेजोवर्द्धनार्थं नित्यकर्मवर्णनम्, स्वर्गागतानां नरकागतानां च नराणां लक्षणम्, धर्मबीजपापबीजप्रसूतनरलक्षणम् । श्लो० १३५ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अ० प०	विषयाः
५२--१७१	पित्रर्चाप्रशंसायां मूकाख्यानम्, पित्रनादरे कृते सति पापम्, पत्यर्चाप्रशंसायां पतिव्रताख्यानम्, पतिव्रतालक्षणवर्णनम्, सर्वजनसमत्वप्रशंसायां तुलाधारकथानकम्, मित्राद्रोहप्रशंसायामद्रोहककथानकम्, विष्णुभक्तिप्रशंसायां वैष्णवाख्यानम्, पुत्रस्य कर्तव्यनिरूपणम्, श्राद्धस्य माहात्म्यं फलं च, वाराणस्यादिक्षेत्रेषु श्राद्धस्य विशेषफलकथनम्, पर्वविशेषेषु श्राद्धविधिः, नान्दीश्राद्धविधिः, गणेशस्याग्रपूजावर्णनम्, चूडामणियोगवर्णनम्, पितुःपुत्रेण कर्तव्यवर्णनम्, मृतस्य प्रथमादिदिनकर्तव्यकर्मनिर्णयः, आशौचकालनिर्णयः, श्राद्धप्रशंसा, श्राद्धासमर्थस्य कर्तव्यनिर्णयः । श्लो० ३२४ ।
५३--१७७	पतिव्रतामाहात्म्यवणनम्, तत्र सैव्यापतिव्रतायाः पतिशुश्रूषाकथानकम्, माण्डव्यमुनिकथा, सूर्यानुदयवित्रस्तब्रह्मादिदेवैस्तस्या सान्त्वनपूर्वकं तत्पतेः कामसुन्दररूपवरप्रदानाश्वासनात्तया सैव्यया सूर्योदयायानुमोदनम्, सूर्योदयः,तत्पतेरुज्जीवनम्, पतिव्रतामाहात्म्यश्रवणपठनफलम् । श्लो० ९० ।
५४--१७९	माण्डव्यस्य शूलारोपणे पतिव्रतापतेः कुष्ठप्राप्तौ च कारणवर्णनम्, दुष्टस्त्रीदोषवर्णनम्, कुलहीनस्त्रीविवाहनिषेधः, पतिव्रतास्त्रीत्यागेन निरयः, रजस्वलादिगमने नरकः,अगम्यागमने दोषः, पत्या सह गमनविषये निर्णयः, विधवाधर्माः, कन्यादानविधिफलवर्णनम्, शुल्कग्रहणनिषेधः, अपात्रवराय कन्यादाने दोषः, दासीदानविधिः । श्लो० १०५ ।
५५--१८१	तुलाधारचरित्रम्, सत्यस्य प्रशंसा, निर्लोभत्वप्रशंसायां शूद्रकथानकम्, वित्ताकामदयासंतोषलोभाहिंसाप्रशंसावर्णनम् । श्लो० ७८ ।
५६--१८२	कामस्य दुर्जयत्वकथनेऽहल्येन्द्रचरित्रम् । श्लो० ५५ ।
५७--१८३	कामदुर्जयत्वकथने परमहंसचरित्रम्, ब्रह्मणो रेतसः सकाशाल्लौहित्यस्योत्पत्तिपूर्वकं तीर्थराजत्ववर्णनम्, लौहित्यतीर्थे परशुरामस्य स्नानमात्रेण क्षत्रवधजनितपापक्षालनम् । श्लो० ५८ ।
५८--१८४	कामाख्याने गन्धर्वादिस्त्रीभिः सह शिवक्रीडा, क्षेमङ्कर्याख्यानम्, मूकादीनां वैकुण्ठागमनकथनम्, पश्चाख्यानसमाप्तिवर्णनम् । श्लो० ४९ ।
५९--१८५	जलदानमाहात्म्यवर्णनम्, निर्जलदेशेषु खातादिफलम्, जलदानविषये धनिसुतकथानकम् । श्लो० ४७ ।
६०--१८६	अश्वत्थादिवृक्षरोपणविधानफलवर्णनम्, प्रपाविधिः, धर्मघटदानविधिः । श्लो० ५६ ।
६१--१८७	सेतुबन्धनफलम्, पङ्कादौ निर्गमाय पाषाणादिमार्गकरणफलम्, कण्टकादिविद्धदुर्मार्गशोधनफलम्, तत्राख्यानफलम्, गोप्रचारफलम्, गोचारविघ्नकरस्य दण्डयत्ववर्णनम्, विष्ण्वादिदेवताप्रासादकरणफलम्, दीपाद्यनेकदानानि, देवलकविप्रवृत्तिवर्णनम्, स्वयंभूलिङ्गार्चनफलम्, देवमण्डपकरणफलम्, श्रोत्रियगृहनिर्माणफलम्, रुद्राक्षमाहात्म्यवर्णनपुरःसरं रुद्राक्षधारणविधिफलवर्णनम्, तत्र रुद्राक्षोत्पत्तिविषयकाख्यायिकाकथनम् । श्लो० २१६ ।
६२--१९१	धात्रीमाहात्म्यवर्णनम्, तत्रामलकीस्नानधात्रीफलभक्षणफलवर्णनम्, वारादिविशेषेण धात्रीफलभक्षणनिषेधः, प्रेताख्यायिका, तुलसीमाहात्म्यवर्णनम् । श्लो० १४३ ।
६३--१९३	तुलसीस्तोत्रवर्णनम् । श्लो० ४३ ।
६४--१९४	गङ्गामाहात्म्यकथनम्, तत्रगङ्गायां स्नानादिविधिवर्णनम्, गङ्गाया भुव्यागमनपूर्वकत्रिस्रोतस्त्वकारणवर्णनम् । श्लो० १२७ ।
६५--१९६	गणपतेरग्रपूज्यतावर्णनम्, तत्र पार्वतीप्रेमकथा, गणेशद्वादशनामस्तोत्रम् । श्लो० ३५ ।
६६--१९७	गणपतेरन्यत्स्तोत्रम् । श्लो० ११ ।
६७--१९७	नन्दीमुखादिषु प्रथमं गणेशपूजनवर्णनम्, गणेशपूजाविधिः, गणेशस्याग्रपूजाया अकरणाद्देवासुरसङ्ग्रामे देवानां पराजये देवानां शंकरसमीपं प्रत्यागमनम्, शंकरोपदेशेन देवैर्गणेशस्तोत्रपूर्वकपूजाकरणम्, देवेभ्यो गणेशेन वरप्रदानम्, गणेशाज्ञया देवानां विष्णुं प्रति गमनम्, विष्ण्वाज्ञया देवानामसुरैः सह संग्रामे चित्ररथकृतकालकेयवधवर्णनम् । श्लो० १३७ ।
६८--१९९	जयन्तेन कालेयवधः । श्लो० २२ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अ० प०	विषयाः
६९—२००	इन्द्रेण बलनमुचिवधः। श्लो० ५२।
७०—२०१	इन्द्रेण नमुचिवधः। श्लो० ९।
७१—२०१	षडाननेन तारेयवधः। श्लो० २३।
७२—२०२	यमेन देवान्तकदुर्धर्षदुर्मुखवधः। श्लो० २१।
७३—२०२	इन्द्रेणान्यनमुचिवधः। श्लो० ३०।
७४—२०२	विष्णुना मधुदैत्यवधः। श्लो० ३९।
७५—२०३	इन्द्रेण वृत्रासुरवधः। श्लो० ४२।
७६—२०४	गणेशेन त्रैपुरिवधः। श्लो० ४९।
७७—२०४	देवदैत्यानां द्वन्द्वयुद्धम्,तत्र हिरण्याक्षपराजितदेवप्रार्थनया विष्णोर्हिरण्याक्षेण सह युद्धम्, हिरण्याक्षस्य पातालगमने विष्णुना वाराहरूपं धृत्वा हिरण्याक्षस्य वधकरणम्, देवकृतविष्णुविजयस्तोत्रम्। श्लो० १०६।
७८—२०६	रणे मृतानां दैत्यानामुत्तमगतिप्राप्तिः, रणपराङ्मुखानां च नीचगतिप्राप्तिवर्णनम्, मनुष्ययोनिगतदैत्यानां स्वभावतो दैत्यत्ववर्णनम्, दैत्यवंश्यानामपि प्रह्लादादीनां सौम्यस्वभावत्वपूर्वकदेवत्वप्राप्तिवर्णनम्, एकेनापि वैष्णवपुत्रेण कोटिकुलोद्धारवर्णनप्रसङ्ग आख्यायिका, मनुष्येष्ववतीर्णानां देवानां लक्षणानि,मनुष्येष्ववतीर्णानां कर्णादीनां दैत्यत्ववर्णनम्, भीष्मद्रोणाश्वत्थामकृष्णधर्मभीमार्जुननकुलसहदेवगान्धारीकुन्तीद्रौपदीनां देवत्वम्, पृथिव्युद्धारपृथिवीक्षयकृतां च लक्षणवर्णनम्। श्लो० १४७।
७९—२०९	सूर्यमाहात्म्यवर्णनम्, तत्र सूर्यदर्शनात्पातकनिरसनम्, संक्रान्त्यादिषु दानादिविधिः, तुलाद्यनेकदानानि,सूर्यव्रतानि, अर्कसप्तमीव्रतविधिः। श्लो० १०६।
८०—२११	सूर्यस्यानेकव्रतवर्णनम्, सूर्यस्तोत्रम्। श्लो० ६५।
८१—२१२	सूर्यमाहात्म्यप्रसङ्गाद्भद्रेश्वरनामकमध्यदेशनृपतिकथानकम्। श्लो० ३८।
८२—२१३	सूर्यपूजाविधिः, सोमस्य च पूजाविधिः, चन्द्रार्थदानानि। श्लो० २९।
८३—२१४	शंभोः सकाशाद्भौमग्रहस्योत्पत्तिवर्णनम्, अङ्गारकचतुर्थ्यां भौमपूजनविधिवर्णनम्। श्लो० ४९।
८४—२१४	चण्डिकानुग्रहादवशिष्टदैत्यानां रसातलम्प्रति गमनम्, चण्डिकायाः पूजाफलनिरूपणम्, चण्डिकायाः पूजाविधेर्निरूपणम्, चाण्डिकोद्देशेन पञ्चगव्याद्यनेकद्रव्यादभिषेकवर्णनम्, पद्मजलेन चण्डिकाया अर्घ्यदानफलकथनम्, दुर्गाया दर्शनवन्दनस्पर्शनपूजनानुलेपनतर्पणमांसदानादिकर्मणां यथोत्तरं श्रेष्ठित्वकथनम्। श्लोकाङ्काः ११२।
८५—२१६	दुर्गायाः पूजाविधिनिरूपणम्,तदुद्देशेन नानाविधदानविधिनिरूपणम्, भगवत्या दुर्गायाः स्तुतिकथनम्। तस्याः स्तोत्रपाठादिफलवर्णनम्। श्लोकाङ्काः ७०।
८६—२१७	बुधगुरुशुक्रशनिराहुकेतूनां पूजाविधिवर्णनम्, नवग्रहमन्त्राः, कृतत्रेताद्वापरकलियुगानुक्रमेण तपोज्ञानयज्ञदानानां प्रशंसा, अभयदानस्य सर्वदानापेक्षया महत्त्वम्, शूद्रस्य मुख्यत्वेन दानवर्णनम्, पद्मपुराणसृष्टिखण्डपठनश्रवणफलम्। श्लो० ४६।

इति पद्मपुराणांतर्गतसृष्टिखण्डस्य विषयानुक्रमणिका संपूर्णा।

अथ भूमिखण्डम्।

अ० प०	विषयाः
१—१	ऋषीणां सूतं प्रति प्रह्लादचरित्रजिज्ञासया प्रश्नः, सूतेन सर्वानृषीन्प्रति ब्रह्मव्याससंवादवर्णनम्,ब्रह्मव्याससंवादे शिवशर्मब्राह्मणाख्यानवर्णनम्,शिवशर्मणा पुत्रपरीक्षणवर्णनम्, तत्र मायया पत्नीमरणे एकपुत्रद्वारा तस्याः खण्डकरणम्, द्वितीयपुत्रद्वारा मायाकल्पितान्यस्त्र्यानयनम्। श्लो० ५८।
२—२	तृतीयपुत्रद्वारा मृतपुत्रसंजीवनम्, चतुर्थपुत्राय स्वर्गलोकादमृतानयनायाज्ञाकरणम्। श्लो० २७।
३—२	इन्द्रलोकं प्रति गच्छतः शिवशर्मपुत्रस्य विष्णुशर्मणो मध्येमार्गमिन्द्रप्रेरणया मेनिकाकृतविघ्नज्ञानम्,मेनिकानिराशीकरणम्, इन्द्रकृतानेकविघ्नभस्मीकरणपूर्वकमिन्द्रं प्रति शापदानायोद्यमः, शापभयभीतेनेन्द्रेण विष्णुशर्मणेऽमृतकुम्भदानम्,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अ० प०	विषयाः
	कुम्भमादाय विष्णुशर्मणः पितरं प्रत्यागमनम्, शिवशर्मणा मायागोपितपत्न्या उज्जीवनमिषेण प्रकटीकरणम्, मातापितृसंतोषात्सुतानां तेषां चतुर्णामपि दाहवार्जितगोलोकप्राप्तिवर्णनम् । श्लो० ७१ ।
४--४	शिवशर्मद्विजेन कनिष्ठपुत्रस्य सोमशर्मणः सत्त्वपरीक्षणम्, तत्र सोमशर्मणः समीपे कुम्भं दत्त्वा तीर्थयात्रामिषेण बहिर्गत्वा दशवर्षपर्यन्तं पत्न्या सह तपश्चरित्वा मायया।ऽऽत्मनः पत्न्याश्च शरीरं कुष्ठरोगग्रस्तं विधाय पुत्रसमीपंप्रत्यागमनम्, सोमशर्मणा गृहागतमातापितृशरीरशुश्रूषणेन नानाविधिक्लेशसहनम् ,पित्राऽमृतकुण्डस्थामृतमपहृत्य पुत्रं प्रति पूर्वं स्वदत्तामृतकुण्डयाचनम्, पुत्रेण रिक्तकुम्भं दृष्ट्वा स्वतपोबलेन तस्मिन्नमृतमापूर्य पितुः समीपं प्रत्यानयनम् । श्लो० ६० ।
५—५	शिवशर्मकृता पुत्रप्रशंसा, शिवशर्मणः सभार्यस्य विष्णुलोकावाप्तिः, सोमशर्मणः शालिग्रामक्षेत्रे तपस्तपतो दैत्यभयेन मरणोत्तरं प्रह्लाददैत्यत्वप्राप्तिवर्णनम्, प्रह्लादस्य वासुदेवन सह युद्धे मरणम्, प्रह्लादहनने कमलानामतन्मातृरोदनम्, नारदेन कमलायाः सान्त्वनम्, प्रह्लादस्येन्द्रत्वप्राप्तिप्रभृतिचरितस्य संक्षेपतो वर्णनम् ,देवादिप्रार्थनया वासुदेवेन देवान्प्रति इन्द्रो भविष्यतीति कथनम्, कश्यपाद्दित्यामिन्द्रोत्पत्तिः, इन्द्राभिषेकः । श्लो० ११० ।
६--७	इन्द्रस्य स्वाराज्यश्रियं दृष्ट्वा दनुदुःखम्, दित्या विलापकरणं च, कश्यपेन दितिसान्त्वनम् । श्लो० ३३ ।
७—७	कश्यपेन दित्यै पञ्चमहाभूतेन्द्रियैः सहात्मनो मैत्र्या ज्ञानविवेकतिरस्कारपूर्वकं तैः सह गर्भागारं प्रतिप्रवेशवर्णनम् । श्लो० ८२ ।
८—९	देहदुःखानुभवोद्विग्नस्यात्मनो वैराग्येण सह समागमः, वैराग्यस्यात्मना सह संवादः, वीतरागोपदेशेनात्मनो विवेकप्रसङ्गः, विवेकद्वारा ज्ञानसमागमः, ज्ञानेनात्मानं प्रति स्वस्य प्राक्तनस्वरूपवर्णनम्,ध्यानादिसमाश्रये ज्ञानेनात्मन उपदेशकरणम् । श्लो० १०५ ।
९—११	ध्यानाश्रयेणात्मनो देहबन्धविनिर्मुक्तिपुरःसरं स्वरूपावगतिवर्णनम्, कश्यपेनेत्थमात्मोपदेशेन दित्याः सान्त्वनम् । श्लो० २१ ।
१०— ११	हिरण्यकशिप्वादिदैत्यानां पितरं कश्यपं प्रत्यागत्य स्वकष्टविनिवेदनम्, कश्यपेन तान्प्रति देवानां जयकारणवर्णनम्, दैत्यान्प्रति कश्यपेन तपस्याकरणायाज्ञाकरणम्, बलिप्रभृतिदैत्यानां परस्परं मन्त्रं कृत्वा तपःकरणम् । श्लो ५० ।
११— १२	सुव्रतचरित्रवर्णनम्,तत्र रेवातीरवर्तिवामनक्षेत्रवासिसोमशर्मब्राह्मणाय तस्य पत्न्या सुमनानाम्न्या सांसारिकदुःखप्रदर्शनोपदेशकरणपुरःसरमृणसंबन्ध्यादिचतुर्विधपुत्राणां लक्षणवर्णने प्रथमं न्यासापहारकपुत्रलक्षणकथनम् । श्लो० ४६ ।
१२—१३	ऋणसंबन्धिपुत्रलक्षणवर्णनम्, रिपुपुत्रलक्षणम्, लाभप्रदपुत्रलक्षणम्, उदासीनपुत्रलक्षणम्, सुमनयेत्थं पुत्रलक्षणकथनोत्तरं पतिसान्त्वनम्, पत्युः सोमशर्मणः पुत्रप्राप्त्यायेऽत्युत्कटेच्छां दृष्ट्वा सुमनया पत्ये पुत्रप्रशंसापूर्वकं धर्माख्यानकथने दुर्वासआख्यायिकावर्णनम्, दुर्वाससा धर्मस्य राजत्वदासीपुत्रत्वचाण्डालत्वरूपशापदानम्, दुर्वाससः शापेन धर्मस्य त्रिविधावतारवर्णनम् । श्लो० १२९ ।
१३—१५	ब्रह्मचर्यतपःसत्यदाननियमक्षमाशौचाहिंसाशान्त्यस्तेयदमशुश्रूषाणां लक्षणानि । श्लो० ३५ ।
१४—१६	सोमशर्मप्रश्नोत्तरं सुमनया स्ववृत्तान्तनिरूपणम्, धर्ममृत्युलक्षणवर्णनम् । श्लो० ४७ ।
१५—१७	पापिमरणलक्षणवर्णनम् । श्लो० २२ ।
१६—१७	पापिनां मरणोत्तरं नानाविधक्लेशयोनिवर्णनम् । श्लो० २१ ।
१७—१८	सुमनोपदेशेन सोमशर्मणः पुत्रप्राप्त्युपायजिज्ञासया वसिष्ठं प्रति गमनम्, वसिष्ठसोमशर्मसंवादे वसिष्ठेन सोमशर्मणः पूर्वजन्मवृत्तान्तवर्णनम् । श्लो० ५८ ।
१८—१९	सोमशर्मणो ब्राह्मणत्वकारणवर्णनम्,वसिष्ठोपदेशात्सोमशर्मणा गृहं प्रत्यागत्य भार्यायै निजमनोरथकथनम्, भार्यया तत्प्रशंसनम् । श्लो० ४२ ।
१९—१९	सुमनया सह सोमशर्मणो रेवाकपिलासंगमतीर्थे तपःकरणम्, तपोविघ्ने भीतेन सोमशर्मणा नृहरिस्मरणम्, भगवत आविर्भावः, सोमशर्मकृतविष्णुस्तोत्रम् । श्लो० ७५ ।
२०—२१	हरिणा सोमशर्मणे वंशतारकपुत्रवरप्रदानम्, अमरकण्टके आश्रमं विधाय

CC-0. In Public Domain. Digitization by eGangotri

अ० प०	विषयाः
	बहुकालपर्यंतमुभयोर्निवासः,कदाचिन्मुनौ स्नानं विधायाश्रामभिमुखे सति वक्रेण तदाश्रमाङ्गणं समागत्य सुमनायाः समर्हणवर्णनम्, आश्रमागतमुनिं प्रति सुमनया सर्वदेवदेवीगणकृतस्वसमर्हणचरित्रवर्णनम्, अनंतरं कियता कालेन सुमनायां सोमशर्मणः सकाशात्सुव्रतनाम पुत्रोत्पत्तिः, उभयोरपि सोमशर्मसुमनयोः पुत्रपौत्रधनसमृद्धिसौख्यवर्णनम् । श्लो० ६१ ।
२१—२२	सुव्रताख्यानकथनम्,तत्र बाल्यादारभ्य सुव्रतस्य क्रीडादिष्वपि कृष्णावधानम्, सुव्रतस्य नर्मदादक्षिणतटवर्तिसिद्धेश्वरमहादेवसमाश्रयपुरःसरं तपःकरणम् । श्लो० । ३७ ।
२२—२२	सुव्रतस्य पूर्वजन्मचरित्रवर्णनम्, तत्र प्राग्जन्मनि तस्य सुव्रतस्य रुक्माङ्गदराजस्य सन्ध्यावलीभार्यायां धर्मांगदनाम्ना प्रसिद्धिः, द्वितीयजन्मनि सोमशर्मणः सुमनायां सुव्रतनाम्ना प्रसिद्धिः तस्य च तपस्तुष्टेन विष्णुना वरप्रदानम्, सुव्रतेन विष्णुस्तोत्रकरणम्, सुव्रतस्येंद्रपदप्राप्तिः, व्यासेन धर्माङ्गदादिविषये समयसंशयापनुत्त्यथ प्रश्ने कृते ब्रह्मणा पुनः सृष्टिक्रमानुकथनेन तत्संशयनिराकरणम् । श्लो० ४९ ।
२३—२३	सृष्टिसंहारकारणवर्णनम्, तत्र हिरण्यकशिपोर्नृसिंहरूपेण वधः, वाराहरूपेण हिरण्याक्षवधः, पुत्रवधसंतप्तायाः दित्याः पतिसमीपे खेददर्शनपुरःसरं सर्वलक्षणसंपन्नपुत्रयाच्ञा, कश्यपवरेण दित्या गर्भधारणानन्तरं बलनामकपुत्रप्रसवः, बलस्य सर्वसामर्थ्यसंपन्नत्वं वीक्ष्य शक्रेण सागरोपकण्ठे सन्ध्यासनोपगतस्य तस्य वज्रेण हननम् । श्लो० ४५ ।
२४—२४	इन्द्रात्पुत्रवधं श्रुत्वा दुःखितया दित्या कश्यपाय पुत्रवधे निवेदिते कश्यपेन शक्रं प्रति क्रोधादग्निकुण्डे जटाप्रक्षेपाद्वृत्रासुरोत्पादनम्, वृत्रासुरमसह्यं मत्वा शक्रेण महर्षिद्वारा वृत्रासुरं प्रतिसन्धिकरणपुरःसरमर्धासनसमर्पणोत्तरं रम्भया समुन्मादनम् । श्लो० ५१ ।
२५—२५	रम्भासक्तस्य वृत्रस्य रम्भाऽऽग्रहेण मधुपानम्, मधुपानप्रमत्तस्य वृत्रस्य शक्रेण वज्रेण हननम् । श्लो० २६ ।
२६—२५	शक्रेण वृत्रवधाद्दुःखितया दित्या कश्यपप्रार्थनया शक्रवधार्थं गर्भं धृत्वा मेरुपर्वते कश्यपेन सह तपस्याकरणार्थं गमनम्, तत्रेन्द्रेण वेषान्तरं विधाय तत्तपश्छिद्रान्वेषणार्थं तस्याः शुश्रूषाकरणम्, पादाशौचरूपतत्तपश्छिद्रं समीक्ष्येन्द्रेण तदुदरे प्रविश्य वज्रेण तद्गर्भस्यैकोनपञ्चाशत्खण्डकरणम्, तेषां मरुन्नामकरणकारणवर्णनम् । श्लो० ३२ ।
२७—२६	पृथुना सर्ववर्गेषु राज्यासने राजवर्गस्थापनम् । श्लो० ३१ ।
२८—२७	पृथुचरित्रवर्णनम्, तत्र वेनस्यौद्धत्यवर्णनम्, ऋषिभिर्वेनस्य सव्योरुमन्थनम्, तस्मान्निषादोत्पत्तिः, वेनस्य दक्षिणपाणिमन्थनात्पृथूत्पत्तिः, सर्वैर्मिलित्वा पृथो राज्याभिषेककरणम्, पैतामहे यज्ञे सूतमागधयोः पृथुस्तवनायानुज्ञायां पृथुचरित्रसंबधं विदित्वा तत्कृतं पृथुस्तवनम्, पृथुना विविधोपायैः पृथिवीदमने पृथिव्याः पृथुप्रार्थनम् । श्लो० १२१ ।
२९—२९	धरणीप्रार्थनया पृथुना पृथिव्याः समीकरणपुरराष्ट्रादिप्रतिष्ठापनपुरःसरं विविधवत्सदोग्धृदुग्धकल्पनया दोहनम् । श्लो० ९१ ।
३०—३०	वेनस्य पापांशनिर्गमनानन्तरं शुद्धिविषये संशयानानां महर्षिणां प्रश्नोत्तरम्,सूतेन वेनस्य चरित्रवर्णनम्, तत्र सत्संगमाहात्म्यवर्णने लुब्धकशफरग्नोरितिहासवर्णनम्, मातामहदोषेण वेनस्य पापबुद्धित्ववर्णनम्, तत्र सुनीथाया वेनमातुः सुशङ्खनामकगन्धर्वतनयापचारेण पापाचारमयपुत्रप्राप्तिरूपशापप्राप्तिः, अत्रिपुत्रस्यङ्गस्येन्द्रसंपत्तिं दृष्ट्वा तत्सदृशपुत्रप्राप्तिविषयकाभिलाषवर्णनम् । श्लो० ८५ ।
३१—३२	अङ्गस्यात्र्युपदेनेन्द्रसदृशपुत्रावाप्तये तपस्याकरणाय मेरुपर्वतं प्रति गमनम् । श्लो० १९ ।
३२—३२	मेरुपर्वते गङ्गातीरेऽङ्गस्य तपःकरणात्प्रादुर्भूतवासुदेवस्याङ्गेन स्तोत्रकरणम्, तत्स्तुतिसंतुष्टेन भगवताङ्गाय शक्रसमपुत्रप्राप्तिरूपवरप्रदानम् । श्लो० ७५ ।
३३—३४	सुनीथाचरित्रम्, सुशङ्खगन्धर्वताडनाल्लब्धकुपुत्रशापया सुनीथया पितृकृतप्रतिबोधेन खिन्नया निर्जनवनं प्रति गमनम्, तत्र तत्सखीभिरागत्य चिन्तापरित्यागविषये तस्या उपदेशकरणम् । श्लो० ३५ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अ० प०	विषयाः
३४—३४	सुनीथया सखीभ्यो निजदुष्कर्मनिरूपणानन्तरं सखीभिर्ब्रह्मेन्द्रहरादित्यकृष्णचन्द्रयुधिष्ठिराणां दोषित्ववर्णनपुरःसरं सुनीथायाः प्रशंसाकरणपूर्वकं मोहनीविद्योपदेशकरणम्, सखीभिः सह भ्राम्यन्त्या सुनीथयानं द्रुतवने तपस्यतोऽत्रिपुत्रस्याङ्गस्य दर्शनम् । श्लो० ४६ ।
३५—३५	रम्भामुखादङ्गवृत्तं श्रुत्वा तदाप्तये सुनीथाया निश्चयः । श्लो० १५ ।
३६—३५	रम्भासहायेन मेरुपर्वते सुनीथया गानप्रभावादङ्गवशीकरणम्, अङ्गसुनीथयोर्गान्धर्वेण विधिना विवाहः, सुनीथायामङ्गाद्वेनाख्यपुत्रोत्पत्तिः, सुनीथया तस्यभाविदुष्कर्म विचिन्त्य मुहुर्मुहुस्तस्मै धर्मोपदेशकरणम् । श्लो० ५७ ।
३७—३६	धर्मेण प्रजां पालयतो वेनस्य पापोदयसमये छद्मलिङ्गधारिणा पापपुरुषेण सह संवादे धर्मश्रद्धाविध्वंसः । श्लो० ६१ ।
३८—३८	पापपुरुषोपदेशेन नास्तिक्यबुद्धिप्रादुर्भावाद्वेनस्य वैदिकधर्मकर्मपरित्यागपुरःसरसुन्मार्गवर्तने मातापित्रादिवन्द्यजनतिरस्करणम्, ऋषिभिर्धर्मोपदेशेन वेनबोधकरणम्, ऋषीणां वेनेन निरादरकरणम्, कुपितमहर्षिभयाद्वेनस्य वल्मीकि निलयनम्, ऋषिभिर्वेनं बलादानीय तस्मान्निषादपृथूत्पादनवर्णनम् । श्लो० ४१ ।
३९—३८	रेवातीरे तृणविन्दोराश्रमे वेनस्य तपस्याकरणम्, तत्तपस्यासंतुष्टवासुदेवेनाविर्भूय वेनाय स्वरूपकथनम्, दानमाहात्म्यवर्णनं च, दानोपयोगिकालदेशवर्णनम् । श्लो० ११७ ।
४०—४१	नित्यनैमित्तिकदानफलवर्णनम् । श्लो० ४६ ।
४१—४१	भार्यातीर्थवर्णनप्रस्तावे वाराणसीस्थकृकलवैश्यपत्न्याः सुकलानाम्न्याः पातिव्रत्यचरित्रवर्णनम्, तत्र पत्यौ तीर्थयात्रां प्रयाते सति सुकलया दृढतरपातिव्रत्यपालनम्, सखीभिः सुकलायाः शरीरशोषणान्निवर्तनाविषये विज्ञप्तिकरणेऽपि सुकलया ताभ्यः पतिव्रताधर्मकथनपूर्वकेतिहासकथनम् । श्लो० ८४ ।
४२—४३	पातिव्रत्यविषये सुदेवायाश्चरित्रवर्णनम्, तत्र सुदेवया पत्न्या सहेक्ष्वाकुभूपस्य मृगयार्थमरण्यगमने तत्र वराहयूथपतेः सपरिवारजनेन नृपेण सह योद्धुं रणभूमिं प्रत्यागत्य युद्धकरणार्थं परस्परमन्त्रकरणम् । श्लोकाङ्काः ७५ ।
४३—४४	इक्ष्वाकुभूपस्य सैनिकैः सह मेरुपर्वते गंगातीरे महायुद्धे लुब्धकसैनिकानां वराहाणां च महायुद्धे लुब्धकानां बहूनां वराहाणां च नाशः । श्लोकाङ्काः ८२ ।
४४—४६	इक्ष्वाकुणा वराहयूथपतिहननम्, श्लोकाङ्काः ११ ।
४५—४६	स्वपतिं हतं दृष्ट्वा तत्पत्न्या शूकर्या लुब्धकैः सह महायुद्धकरणे झार्झरेण तस्या अङ्गे शरवेधकरणम्, तया शूकर्या महावेगेन झार्झरवधकरणम्, झार्झरकृतखड्गघातेन शूकर्या मह्यां पतनम् । श्लोकाङ्काः ३२ ।
४६—४७	भूमौ पतितायाः श्वसन्त्याः शूकर्याः सुदेवया शीतलजलेन मुखसेचनम्, तत्सिक्तजलसंपर्कात्सूकया मानुषीवाण्या सुदेवाप्रशंसनम्, इक्ष्वाकुमतमादाय सुदेवया पृष्टे सति शूकर्या स्वभर्तुः शूकरस्यात्मनश्च पूर्वजन्मचरित्रवर्णनम्, तत्रादौ भर्तुश्चरित्रवर्णने तस्य पूर्वजन्मनि गन्धर्वस्य गीतपण्डितस्य पुलस्त्यमुनित्रासनाद्दृषिशापेन शूकरजन्मप्राप्तिवर्णनम् । श्लोकाङ्काः ६६ ।
४७—४८	शूकर्या आत्मनः पूर्वजन्मचरित्रवर्णने कलिङ्गदेशीयश्रीपुनरगरवास्तव्यवसुदत्तब्राह्मणतनयायाः सुदेवानाम्न्या दुराचारदूषितायाः पतिवञ्चनादिवर्णनम्, तत्पत्या शिवशर्मणा तस्याः परित्यागः, सुदेवामात्रा तत्पितरं वसुदत्तं प्रति अपत्यशिक्षणप्रकारवर्णनम् । श्लोकाङ्काः ६५ ।
४८—४९	वसुदत्तभार्यया भर्तारं प्रति निरर्गलकन्यादोषवर्णनप्रसङ्गेन वैदर्भदेशीयोग्रसेनराजतनयाया माथुरोग्रसेनराजभार्यायाः पद्मावतीनाम्न्याः पतिं विना पितृगृहमागताया उच्छृङ्खलतयोपवनभूमिषु विक्रीडनवर्णनम् । श्लोकाङ्काः २७ ।
४९—५०	कदाचिद्वनक्रीडाहृतचेतसस्तस्याः कस्यचित्सरसस्तीरे गोभिलेन दैत्येन दर्शनम्, तत्कामसंपरितप्तेन गोभिलेन मायया तत्प्रतिरूपं विधाय तस्या धर्षणवर्णनम् । श्लोकाङ्काः ५४ ।
५०—५१	दैत्यं प्रति शप्तुकामां तां प्रति गोभिलेन दैत्येन पतिव्रतानां पुंश्चलीनां च कर्मवर्णनपुरःसरं तस्याः पद्मावत्याः पुंश्चलीत्वनिर्णयकरणम्, उदरे गर्भस्थापनकथनं च । श्लोकाङ्काः ६३ ।
५१—५२	पित्रादिभिर्ज्ञातदोषायाः पद्मावत्याः पतिगृहं प्रति प्रेषणम्, तद्गर्भात्कंसोत्पत्तिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अ० प०	विषयाः
	एवं वसुदत्तेन पत्नीमुखात्कन्यादोषं श्रुत्वा सुदेवायाः कन्यायाः परित्यागः, सुदेवायाः पर्यटन्त्या अदृष्टवशात्पतिगृहं प्रति गमनम् । श्लोकाङ्काः ५४ ।
५२--५३	तत्र पतिगृहे मङ्गलानाम्न्याः स्वसपत्न्याः पातिव्रत्यदर्शनेन व्रीडितायाः सुदेवाया रात्रौ पश्चात्तापेन मरणम्, यमलोकेऽनेकदुःखप्राप्तिपूर्वकं शूकरीजन्मप्राप्तिवणनम्, शूकर्या सुदेवानाम्न्या इक्ष्वाकुराजभार्यायाः समीपे स्वोद्धारायैकदिनपातिव्रत्यपुण्ययाचनायामिक्ष्वाकुप्रेरणया सुदेवया तस्या एकदिनपातिव्रत्यपुण्यदानाच्छूकरीयोनित उद्धरणम्, सुदेवानाम्न्या ब्राह्मणकन्यायाः स्वर्गारोहणम् । श्लोकाङ्काः ४८ ।
५३--५३	सुकलायाः पातिव्रत्यभङ्गार्थं समुद्युक्तस्येन्द्रस्य श्रमवैफल्यम्, तत्र तन्मोहनायेन्द्रेणकन्दर्पायाज्ञाकरणम्,इन्द्रस्य पुरुषरूपं धृत्वा कन्दर्परतिप्रभृति मोहनवर्गमादाय सुकलासमीपं प्रत्यागत्य तन्मोहनाय विविधोपायविधानम्, इन्द्रप्रेषितया दूत्या सुकलां प्रति पातिव्रत्यभङ्गार्थं चातुर्येणोपदेशे कृतेऽपि तस्याः पुरुषान्तरेऽप्रीतिदर्शकशरीरविकारवर्णनम् । श्लोकाङ्काः १०९ ।
५४--५५	इन्द्रस्य स्वयं सह रतिकन्दर्पाभ्यां सुकलासमीपं प्रति गमने सुकलया तं दृष्ट्वा स्वगृहमध्ये प्रवेशकरणम् । श्लोकाङ्काः २५ ।
५५--५६	सुकलासाधने शक्रमदनयोः साध्यासाध्यत्वविषये विवादानन्तरं मदनेन सुकलां प्रति क्रीडादूतीप्रेषणम्,मदनस्य स्वयं शक्रेण सह गमनं च।श्लोकाङ्काः२५।
५६--५६	तन्मदनेन्द्रचरित्रं दृष्ट्वा सत्यधर्मादीनां परस्परं संवादः, धर्मेण सत्यसंरक्षणार्थमुपायचिन्तया भर्त्रागमनसूचकशकुनकरणाय प्रज्ञायाः प्रेषणम्, प्रज्ञया शकुनशब्दकरणोत्तरं शकुनार्थजिज्ञासया सुकलया ब्राह्मणसमीपं गत्वा ब्राह्मणमुखात्तन्निर्णयनम् । श्लोकाङ्काः ३७ ।
५७--५७	क्रीडया मदनदूत्या सुकलां प्रत्यागत्य तां वाक्यैर्मोहयित्वा तया सहोपवनं प्रति गमनम्, मदनस्येन्द्रदेहे प्रवेशः । श्लोकाङ्काः ३८ ।
५८--५८	इन्द्रसुकलयोः संवादे सुकलयेन्द्रस्य निराशीकरणम्, इन्द्रादीनां स्वस्वस्थानं प्रति गमनम् । श्लोकाङ्काः ४३ ।

अ० प०	विषयाः
५९--५९	तीर्थयात्रां कृत्वा गृहं प्रति प्रयातुकामस्य कृकलस्य मध्येमार्गं धर्मेण पितृबन्धदर्शनम्, धर्मकृकलसंवादे धर्मेण पतिव्रतामाहात्म्यकथनम् । श्लोकाङ्काः ३४ ।
६०--५९	कृकलवैश्येन धर्मोपदेशाद् गृहमागत्य पत्नीहस्तेनान्नं विपाच्य श्राद्धकरणे तत्पितृमुक्तिवर्णनम्, सुकलाचरित्रमाहात्म्यम् । श्लोकाङ्काः २२ ।
६१--६०	पितृतीर्थवर्णनम्, तत्र पितृभक्तस्य कुण्डलब्राह्मणपुत्रस्य सुकर्मणः कथानकवर्णनम्, पिप्पलब्राह्मणस्य तपस्यया विश्ववश्यत्वप्राप्त्या महागर्वः, सारसवचनात्पिप्पलस्य सुकर्माणं प्रत्यागमनम् । श्लोकाङ्काः ६० ।
६२--६१	सुकर्मपिप्पलसंवादः, सुकर्मणेन्द्रादिदेवानयनम्, अर्वाचीनपराचीनगतिज्ञानवर्णनम्, सुकर्मणा स्वकर्मवर्णनम्, पितृभक्तिमाहात्म्यवर्णनम् । श्लोकाङ्काः ८२ ।
६३--६३	मातापितृतीर्थमाहात्म्यम् । श्लोकाङ्काः २९ ।
६४--६३	मातापितृतीर्थमाहात्म्यवर्णने नहुषस्य ययातेश्च चरित्रवर्णनम्, इन्द्रेण स्वपदभ्रंशशङ्कया ययातिनृपं प्रति स्वर्गमानेतुं मातलिदूतप्रेषणम्, मातलिययातिसंवादः, शरीरोत्पत्तिविनाशादिवर्णनम् । श्लोकाङ्काः ९५ ।
६५--६५	शरीरदोषवर्णनम् । श्लोकाङ्काः ९ ।
६६--६५	प्रथमतः शरीरोत्पत्तिपूर्वकशरीरवर्णनम्, गर्भावस्थायां जीवचेष्टितम्,शरीरस्याशुचित्वम्, विविधसुखदुःखादिविवेकः । श्लोकाङ्काः २२५ ।
६७--६९	मर्त्यलोके मनुष्यकृतानां सुकृतदुष्कृतकर्मणां विपाकः । श्लोकाङ्काः ११४ ।
६८--७१	सुकृतकर्मफलकथनम् । श्लोकाङ्काः १७ ।
६९--७१	विविधशिवधर्मकथनम् । श्लोकाङ्काः ३९ ।
७०--७२	महादारुणयमलोकपीडावर्णनम् । श्लोकाङ्काः ११ ।
७१--७३	देवलोकसंस्थानवर्णनम् । श्लो० २७ ।
७२--७३	ययातिना स्वशरीरप्रशंसापूर्वकं स्वर्गागमनास्वीकरणम्, मातलेरिन्द्रं प्रति गमनम् । श्लो० ३३ ।
७३--७३	मातलौ स्वर्गं गते सति ययातिना स्वराज्ये विष्णुसेवाज्ञोद्घोषणम् । श्लो० १७।
७४--७४	नृपाज्ञाश्रवणोत्तरं सर्वैः प्रजाजनैर्भागवतधर्मस्वीकरणम् ।श्लो० २९ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अ० प०	विषयाः
७५--७५	वैष्णवधर्माचरणेन ययातेः सदा तारुण्यं तत्प्रजानां च मृत्युराहित्यवर्णनम्। श्लो० ३५।
७६—७५	अमृत्यु भूतलं दृष्ट्वा यमधर्मस्य स्वर्गं प्रति गमनोत्तरमिंद्राय ययातिकर्मनिवेदनपुरःसरं ययातेः स्वर्गानयनाय प्रार्थनम्, इन्द्राज्ञया कामदेवस्य गन्धर्वादिभिः सह नाटककरणार्थं ययातिं प्रति गमनोत्तरं तस्य सभास्थले सङ्गीतकारम्भणम्। श्लो० ३४।
७७—७६	नृत्यगीतपरवशतयाऽशौचलेशमात्रेण ययातेः शरीरे जराप्रवेशः, जरामजानतो ययातेर्मृगयार्थं कस्यचित्सरसस्तीरं प्रति गमनम्, तत्रातिमधुरगानश्रवणाकृष्टमनसो ययातेर्विशालानामसखीमुखादश्रुविन्दुमत्या वृत्तान्तश्रवणम्, आत्मनो भावं दर्शयितारं ययातिं प्रति विशालया जरागृहीतत्वकथनम्, जरापरित्यागं कृत्वाऽस्या मनोरथं पूरयिष्यामीति प्रतिज्ञाय ययातेः स्वपुरं प्रत्यागत्य पुत्रान्प्रत्याज्ञाकरणम्। श्लो० १११।
७८—७८	पितुराज्ञां श्रुत्वा त्रिभिः पुत्रैस्तदाज्ञाप्रत्याख्याने ययातिना तान्प्रति शापदानम्,,चतुर्थपुत्रात्पूरोः सकाशात्तारुण्यं गृहीत्वा जरां तस्मै दत्त्वा ययातेरश्रुबिन्दुमतीं प्रति गमनम्। श्लो० ६४।
७९--७९	शर्मिष्ठादेवयानीसपत्नीभ्यां क्लेशो न भविष्यति सर्वथा त्वन्मनोरथान्पूरयिष्यामीति प्रतिज्ञां कृत्वाऽश्रुबिन्दुमत्या गान्धर्वविवाहेन वरणम्, अश्रुबिन्दुमत्या दोहदपूरणकामनया ययातिना पूरुद्वारा संभारानानीयाश्वमेधयज्ञकरणम्, अश्रुबिन्दुमत्या ययातिसमीपे स्वर्गं प्रति जिगमिषया प्रार्थनाकरणम्। श्लो० ४०।
८०—८०	शर्मिष्ठादेवयान्योर्वर्तनवर्णनम्, सर्वलोकानां सर्वसुखावाप्तिवर्णनम्। श्लो०१९।
८१--८०	इन्द्राज्ञया मेनिकाप्सरसोऽश्रुबिन्दुमतीं प्रत्यागमनम् मेनिकाबोधितयाऽश्रुबिन्दुमत्या ययातिं प्रति स्वर्गगमनायाग्रहकरणम्, ययातिराज्ञोऽन्तर्मनसि चिन्ताकरणम्। श्लो० ७५।
८२—८१	अश्रुबिन्दुमत्याः स्वर्गगमनायात्याग्रहं दृष्ट्वा ययातिना पूरुपुत्राय नीत्युपदेशं कृत्वा राज्यं समर्प्य तस्मै तारुण्यं दत्त्वा जराग्रहणम्। श्लो० २८।
८३--८२	राज्ञो ययातेः सर्वप्रजाश्वासनपुरःसरं बहुभिः प्रजाजनैः सह तयाश्रुबिन्दुमत्या च सहेन्द्रादिलोकान्गत्वा पश्चाद्वैष्णवलोकं प्रति गमनम्, सहनीतप्रजाजनैः सह ययातेर्विष्णवाज्ञया विष्णुलोकावस्थानम्। श्लो० ८३।
८४--८३	एवं पितृसेवां कृत्वा पूरोराज्यप्राप्तिरूपफलावाप्तिः, सुकर्मणा निवेदितं पितृतीर्थमाहात्म्यं श्रुत्वा पिप्पलस्य विलज्ज्य गमनम्। श्लो० २२।
८५--८४	गुरुतीर्थमाहात्म्यवर्णने च्यवनचरित्रम्, च्यवनस्य द्विजस्य तीर्थयात्राप्रसङ्गेन पर्यटय नर्मदादक्षिणकूल ओङ्कारेश्वरं समागत्य वटच्छायायां स्थितिः,स्तत्र कुञ्जलनामशुकस्य चतुर्भिः पुत्रैः सह संवादः, तत्र ज्येष्ठपुत्रमुज्ज्वलं प्रति पित्रा वार्ताश्रवणाय प्रश्ने कृते सति तेन प्लक्षद्वीपस्थदिवोदासराजपुत्र्या दिव्यादेव्या विवाहसमये एकविंशत्यधिकशतभर्तृमरणदोषनिरूपणम्। श्लो० ७७।
८६—८५	कुञ्जलेन तस्या दिव्यादेव्याः पूर्वजन्माचरितदुष्कर्मकथनम्, राजपुत्रीत्वप्रापकसिद्धसेवनसुकर्मवर्णनं च, दिव्यादेवीवरजीवनाय तद्दुरितभङ्गाय च भगवद्वचनवर्णनम्। श्लो० ९६।
८७--८७	अशून्यशयनव्रतकथनम्, कृष्णशतनामाख्यस्तोत्रवर्णनम्। श्लो० ३७।
८८--८८	पित्राज्ञयोज्ज्वलपुत्रेण प्लक्षद्वीपं गत्वा दिव्यादेवीं प्रति पित्रुद्दिष्टव्रतस्तोत्रादिकथनम्, तदुक्तरीत्या दिव्यादेव्या व्रताचरणेन स्तोत्रजपेन च पापनिरसनपुरःसरं भगवत्प्रसादाद्दिव्यलोकावाप्तिवर्णनम्। श्लो० ५४।
८९--८९	द्वितीयपुत्रं समुज्ज्वलाख्यं प्रति वार्ताश्रवणाय कुञ्जलेन प्रश्ने कृते सति समुज्ज्वलेन नर्मदातीरे व्याधोद्धारपूर्वककृष्णहंसकथावर्णनम्। श्लो० ५१।
९०—८९	कुञ्जलेन कृष्णहंसकथानकावसरे तीर्थचरित्रवर्णनम्, तत्रेन्द्रेण सर्वतीर्थानि समाहूय प्रयागादीनां चतुर्णां महातीर्थानां प्रशंसाकरणम्। श्लो० ५४।
९१—९०	ब्रह्महत्याऽगम्यागमनदोषदूषितस्य शक्रस्य मालवदेशे सुरैः स्नापनं कृत्वा वाराणस्यादितीर्थेषु स्नापनेन शुद्ध्यनन्तरं शक्रेण मालवदेशाय चतुर्भ्यस्तीर्थेभ्यश्च वरप्रदानम्, विदुरक्षत्रियचन्द्रशर्मब्राह्मणवेदशर्मब्राह्मणवञ्जुलवैश्यानां चतुर्णां महापापकृतामेकत्र संघीभूय कालञ्जरगिरिं प्रति गमनम्। श्लो० ४०।

CC-0. In Public Domain. Digitization by eGangotri

अ० प०	विषयाः
९२--९१	तत्र कस्यचित्सिद्धस्योपदेशेनैतेषां चतुर्णां वाराणस्यादितीर्थेषु स्नानान्मुक्तिः, तेषां च पातकस्पर्शेन पुष्कराद्यतीर्थप्रयागवारायणसीतीर्थानां पापलेपेन कृष्णत्वप्राप्तिः, हंसरूपेण चात्मनः पावनेच्छया प्रतितीर्थं भ्रमणम्, तत्संपर्केण च सर्वेषामपि कृष्णवर्णत्वम्, तैः सह हंसरूपेण भ्रमणं च, सर्वेषां रेवाकुब्जासंगमे स्नानमात्रेण पातकान्मुक्तिः, ब्रह्महत्यागुरुहत्यासुरापानागम्यागमनानां हंसरूपाणां तत्र संगमे स्नानेन भस्मता, रेवाकुब्जासंगममाहात्म्यवर्णनम् । श्लो० ३७ ।
९३--९२	तृतीयपुत्रेण विज्वलेन निजवृत्तनिवेदनावसरे मेरुपृष्ठवर्त्यानन्दकानने कस्यचित्सिद्धस्य च सपत्नीकस्य विमानेनागत्य सरस्तीरवर्तिनिजनिजशवमांसभक्षणचमत्कारवर्णनम्, तद्भक्षणकाले च कयोश्चित्स्त्रियोस्तत्संमुखं स्थित्वा हास्यकरणवर्णनम् । श्लो० ४३ ।
९४--९३	कुञ्जलेन तदुत्तरकथनम्, तत्रादौ कर्ममाहात्म्यकथनम्, अनन्तरं चौलदेशीयसुबाहुराजवृत्तान्तवर्णनम्, सुबाहुना जैमिनिसमीपे धर्मश्रवणार्थं प्रश्ने कृते सति जैमिनिना दानधर्मकथनम् । श्लो० ६१ ।
९५--९४	जैमिनिना स्वर्गगुणवर्णनपुरःसरं दानस्यातिश्रैष्ठ्यवर्णनम् । श्लो० ३२ ।
९६--९४	नरकगामिनां स्वर्गगामिनां च वर्णनम् । श्लो० ५२ ।
९७--९५	भार्यया सह सुबाहुनृपस्य दानमकृत्वा तपस्तप्त्वा तत्तपःप्रभावेण विष्णुलोकं प्रति गमनेऽपि विष्णोरदर्शनम्, उभयोरपि क्षुधाव्याकुलत्वम्, वामदेवमहर्षिसमागमोत्तरं वामदेवेन दानमाहात्म्यकथनोत्तरं स्वंस्वं कायं नित्यपुष्टं भुक्त्वा कालमतिक्रमेथामिति कथनम्, विविधदानफलवर्णनं च, तद्वचनमाकर्ण्य सुबाहोः सहभार्यस्य स्वस्वशवभक्षणम्, तत्र प्रज्ञाश्रद्धयोः स्त्रियोर्हास्यकथनम् । श्लो० ११५ ।
९८--९७	कुञ्जलाद्वासुदेवस्तोत्रं गृहीत्वा विज्वलेन तत्र गत्वा सभार्यं सुबाहुं प्रति तस्य वासुदेवस्तोत्रस्य श्रावणम् । श्लो० ७८ ।
९९--९९	वासुदेवस्तोत्रश्रवणात्सभार्यस्य सुबाहोः क्षुत्तृण्निवृत्तिपूर्वकं विष्णुदर्शनपुरःसरं विष्णुलोकावाप्तिः, श्रीवासुदेवस्तोत्रस्य सविधानफलवर्णनम् । श्लो० ४५ ।
१००--१००	विज्वलेन पितरं प्रत्यागत्य स्तोत्रमाहात्म्यकथनम्, वेनेन राज्ञा विष्णुप्रशंसनम् । श्लो० १४ ।
१०१--१००	कुञ्जलस्य चतुर्थपुत्रेण निजवृत्तनिवेदने कैलासपर्वतपरिसरे गङ्गातीरस्थितस्त्रीनेत्राश्रुपतितबिन्दुसमुत्पद्यमानकमलानि समादाय केनचिन्मुनिवेषधारिणा पुरुषेण शिवार्चनकरणवर्णनम् । श्लो० ५७ ।
१०२--१०१	कुञ्जलेन कमलवृत्तवर्णनारम्भे पार्वतीदोहदपूरणेच्छया महादेवस्य पार्वत्या सह नन्दनवने कल्पवृक्षतले स्थितिः, पार्वतीं प्रति महादेवेन कल्पवृक्ष गुणवर्णनोत्तरं पार्वत्या चिन्तनमात्रे कृते सत्यकस्मात्स्त्रीरत्नोत्पत्तिः, पार्वत्या तस्याः स्त्रिया अशोकसुन्दरीनामकरणम्, नहुषपत्नीत्ववरदानं च । श्लो० ७४ ।
१०३--१०२	हुण्डदैत्येन कामुकतयाऽशोकसुन्दरीं प्रति पतिव्रतावेषच्छलेन वञ्चयित्वा स्वगृहं प्रत्यानयनम्, अशोकसुन्दर्या तद्विनाशाय गङ्गातीरे तपःकरणम्, आयुराजेन पुत्रप्राप्तये भार्यया सह अत्रिपुत्रस्य दत्तात्रेयस्य सेवाकरणम्, तत्सेवासंतुष्टाद्दत्तात्रेयात्पुत्रप्राप्तिरूपवरलाभः । श्लो० १३९ ॥
१०४--१०५	आयुराजादिन्दुमत्यां गर्भप्राप्तिः, गर्भिण्येन्दुमत्या सुस्वप्नप्रदर्शनम्, शौनकेन तस्य स्वप्नस्य शुभफलवर्णनम् । श्लो० २४ ।
१०५--१०६	इन्दुमत्याः प्रसवसमये तत्पुत्रं नहुषं प्रति हुण्डदैत्येनापहृत्य स्वगृहं प्रत्यानयनम्, तस्य सूदेन सैरन्ध्र्या च कृपालुतया तं न हत्वा रात्रावेव वसिष्ठाश्रमे पर्णकुटीद्वाराग्रे निक्षेपणम्, वसिष्ठेन प्रभाते तं स्वीकृत्य नहुषेतिनामकरणम्, नहुषेण वसिष्ठाद्धनुर्विद्याग्रहणम् । श्लो० ६४ ।
१०६--१०७	पुत्रापहरणेन आयुराजेन्दुमत्योः शोकवर्णनम् । श्लो० १९ ।
१०७--१०७	नारदेनागत्य नहुषवृत्तान्तं कथयित्वा आयुराजेन्दुमत्योः सान्त्वनम् । श्लो० १६ ।
१०८--१०७	वसिष्ठादेशेन नहुषस्य हुण्डदैत्यहननोद्यमः । श्लो० ३५ ।
१०९--१०८	नहुषवधाश्वासितमनसा हुंडेनाशोकसुन्दरीं प्रति गत्वा नहुषमरणवृत्तान्तनिरूपणादशोकसुन्दर्याः शोकवर्णनम्, विद्धरकिंनरेण तस्याः सान्त्वनम् । श्लो० ६३ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अ० प० विषयाः

११०—१०९ नहुषस्य वसिष्ठादिमहर्षिदत्ताशीर्ग्रहणपुरःसरं शक्रप्रहितरथमारुह्य सर्वदेवदत्तायुधानि गृहीत्वा हुण्डदैत्यनिवासं प्रत्यागमनम् । श्लो० २५ ।

१११—११० तत्रतत्र नहुषस्यागमेन मङ्गलगानाद्युत्सवः । श्लो० १५ ।

११२—११० गन्धर्वैर्नहुषमुद्दिश्य कृतं गानं श्रुत्वाऽशोकसुन्दर्यास्तपश्चलनम् । श्लो० ८ ।

११३—११० रम्भासखीं गृहीत्वाऽशोकसुन्दर्या नहुषदर्शनाय गमनम्, नहुषस्य हुण्डवधप्रतिज्ञां श्रुत्वाऽशोकसुन्दर्या हर्षः । श्लो० ४८ ।

११४—१११ नहुषेण सह योद्धुं हुण्डदैत्यस्य सैनिकैः सहागमनम् । श्लो० ३० ।

११५—११२ नहुषेण हुण्डसैनिकान्हत्वा हुण्डवधः । श्लो० ४५ ।

११६—११२ अशोकसुन्दरीं गृहीत्वा नहुषस्य वसिष्ठाश्रमं प्रत्यागमनम्, वसिष्ठेन तयोर्विवाहकरणोत्तरं पितृमन्दिरं प्रत्यागमनम्, मातापित्रोरत्यानन्दवर्णनम् । श्लो० ३१ ।

११७—११३ इन्द्रादिभिर्देवैर्नागपुरे नहुषस्य राज्याभिषेककरणम्, अङ्गेन्दुमत्योर्हरिलोकप्राप्तिः । श्लो० ३३ ।

११८—११४ अश्रुबिन्दुकमलाख्यानवर्णने हुण्डपुत्रस्य विहुण्डस्य कथानकवर्णनम्, तत्र विहुण्डेन पितृवधामर्षेण सुरमानवादिजगज्जिघांसयोपद्रवकरणम्, उपद्रुतदेवशरणवत्सलेन विष्णुना मोहिनीरूपं धृत्वा तं प्रति विमोहनम्, सप्तकोटिकामोदपुष्पाण्यानीय शिवपूजनं कुरु ततोऽहं ते भार्या भविष्यामीति विहुण्डस्य समीपे प्रतिज्ञाकरणम्, विहुण्डस्य शुक्रात्कामोदकुसुमसंभवमभिज्ञाय तदानयनायोद्यम वर्णनम् । श्लो० ४१ ।

११९—११४ कामोदायाः समुद्रमंथनादुत्पत्तिवृत्तान्तवर्णनम्, विष्णुप्रेषितनारदेन अहमेव कामोदपुष्पाणि तव हस्ते यथा पतिष्यन्ति तथा यतिष्य इत्युक्त्वा विहुण्डस्य कामोदां प्रति गमनप्रतिषेधनम् । श्लो० ४३ ।

१२०—११५ नारदस्य कामोदपुरं प्रति गत्वा कामोदया सह संभाषणावसरे स्वप्नावस्थावर्णनम् । श्लो० ५० ।

१२१—११६ विष्णोर्भृगोः शापतो दशावतारधारणकथावर्णनेन नारदेन तस्याः शोकोत्पादनम्, शोकनिर्विण्णायाः कामोदाया दुःखाश्रुबिन्दुभ्यो निर्गन्धपुष्पोत्पत्तिः, तैः पुष्पैर्विहुण्डकृतशिवार्चना, ब्राह्मणवेषधारिण्या देव्या हुंकारमात्रेण विहुण्डस्य वधः । श्लो० ५५ ।

१२२—११७ कुञ्जलपक्षिणा सह च्यवनब्राह्मणस्य संवादे कुञ्जलेनात्मवृत्तान्तवर्णनम्, तत्र काश्यपवंशप्रसूतविद्याधरब्राह्मणतृतीयपुत्रस्य धर्मशर्मणो मूर्खस्य यदृच्छया केनचित्सिद्धेन सह समागमवर्णनम् । श्लो० ३९ ।

१२३—११८ सिद्धाज्ज्ञानप्राप्तिः, शुकयोनिप्राप्तिकारणवर्णनम्, गुरुतीर्थमाहात्म्यवर्णनम्, वेनं प्रति विष्णुनेत्थमुक्तवेप्सितवरप्रदानपूर्वकमन्तर्धानवर्णनम् । श्लो० ६२ ।

१२४—११९ वेनकृतपृथुप्रशंसा, पृथुना प्रजाशासनम् । श्लो० २६ ।

१२५—१२० वेनस्याश्वमेधादियज्ञकरणपूर्वकं विष्णुलोकं प्रति गमनम्, पद्मपुराणपठनपाठनश्रवणविधिपूर्वकफलकथनम् । श्लो० ५२ ।

इति पाद्मपुराणान्तर्गतभूमिखण्डस्य विषयानुक्रमणिका संपूर्णा ।

अथ स्वर्गखण्डम् ।

१—१ नैमिषारण्यवासिशौनकादिमुनीन्प्रति सूतमहर्षिणाऽऽगत्याऽऽदिखण्डापरपर्यायस्वर्गखण्डकथनारम्भवर्णनम् । श्लो० ३३ ।

२—१ अव्याकृतब्रह्मणः सकाशात्सिसृक्षासमये महाभूतादिब्रह्माण्डोत्पत्तिवर्णनम् । श्लो० ३४ ।

३—२ द्वीपभूविभागवर्णने सुदर्शनद्वीपवर्णनम्, तत्र मेरुपर्वतपरिसरप्रांतवर्णनपुरःसरं दक्षिणप्रदेशवर्त्तिसमीपस्थद्वीपखण्डवर्षविभागवर्णनम् । श्लो० ७६ ।

४—३ मेरुपर्वतस्योत्तरप्रदेशवर्णनम् । श्लो० २६ ।

५—३ मेरुपर्वतस्य दक्षिणप्रदेशवर्णनम् । श्लो० १९ ।

६—४ विस्तरेण भारतवर्षवर्णनम्, तत्र भारतवर्षस्य कुलपर्वतमहानदीदेशवर्णनम् । श्लो० ६६ ।

७—५ भारतवर्षस्थकालनिर्णयपुरःसरं लोकस्थितिवर्णनम् । श्लो० १५ ।

८—५ जम्बूद्वीपविष्कम्भपरिमाणम्, शाकद्वीपवर्णनम् । श्लो० ५० ।

९—६ घृततोयसमुद्रप्रभृतिसर्वावशिष्टद्वीपविभागवर्णनम् । श्लो० ४२ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अ० प०	विषयाः
१०—७	पृथिवीस्थतीर्थवर्णनम्, तत्र नारदयुधिष्ठिरसंवादे नारदेन तीर्थमाहात्म्यविषये गङ्गाद्वारे दिलीपस्य वसिष्ठेन सह समागमकथनम्। श्लो० २६।
११—७	वसिष्ठदिलीपसंवादे वसिष्ठेन दिलीपं प्रति पुष्करतीर्थमाहात्म्यकथनम्।श्लो०३६।
१२—८	जम्बूमार्गदुलिकाश्रमगरूयाश्रमकन्याश्रमधर्मा-रण्यययातिपत्तनमहाकालकोटितीर्थभद्रवटतीर्थनर्मदातीर्थानां माहात्म्यकथनम्। श्लो० १३।
१३—८	नर्मदातीर्थमाहात्म्यविजिज्ञासया युधिष्ठिरप्रश्नोत्तरं नारदेन सविस्तरं तन्माहात्म्यवर्णनम्, तत्रामरकण्टके जनेश्वररुद्रकोटिमहेश्वरमाहात्म्यवर्णनम्, क्षेत्रपालमाहात्म्यम्, रुद्रकोटौ जालेश्वरमहिमा, नर्मदादक्षिणतीरवर्णनम्, तत्र कपिलाविशल्यकरणामाहात्म्यम्। श्लो० ५५।
१४—९	ज्वालेश्वरतीर्थोत्पत्तिवर्णनम्, तत्र बाणभयत्रस्तमहर्षिप्रार्थनया महादेवेन नारदस्य त्रिपुरं प्रति प्रेषणम्, नारदेन त्रिपुरे बाणासुरं प्रति गत्वानौपम्याख्याया बाणपत्न्या व्रतदानोपदेशेन मनो हृत्वा स्वस्थानं प्रति गमनम्। श्लो० ४०।
१५—१०	हरस्य प्रेरणया वह्निना त्रिपुरदहनम्, बाणासुरेण शिवस्तोत्रकरणोत्तरं शङ्करेण बाणासुराय वरप्रदानम्, दग्धयोः पुरयोर्मध्यादेकस्य पुरस्य श्रीशैले पातनम्, द्वितीयस्यामरकण्टके पातनम्, अमरकण्टकपतितपुराज्ज्वालेश्वरोत्पत्तिः, तन्माहात्म्यं च। श्लो० ८२।
१६—११	कावेरीनर्मदासंगममाहात्म्यवर्णनम्, तत्र कुबेराख्यानम्। श्लो० २२।
१७—१२	नर्मदोत्तरतीरस्थपत्रेश्वरतीर्थमाहात्म्यम्, गर्जनमेघरावब्रह्मावर्त्ताङ्गारेश्वरकपिलातीर्थकाश्वीतीर्थकुण्डलेश्वरपिप्पलेश्वरविमलेश्वरपुष्करिणीमाहात्म्यपूर्वकनर्मदास्तोत्रकथनम्। श्लो० २३।
१८—१२	शूलभेदतीर्थभीमेश्वरतीर्थादित्येश्वरमल्लिकेश्वरवरुणेश्वरनीराजेश्वरकोटितीर्थागस्त्येश्वररविस्तवशक्रतीर्थार्षितीर्थनारदतीर्थदेवतीर्थामरकण्टकतीर्थवामनेश्वरद्वितीयर्षितीर्थवटेश्वरभीमेश्वरवारणेश्वरसोमतीर्थपिङ्गलेश्वरसुरभिकेश्वरनारकेश्वरकोटिकेश्वरगङ्गावतरणनन्दितीर्थद्वीपेश्वरव्यासतीर्थैरण्डीतीर्थेक्षुनदीसंगमतीर्थस्कन्दतीर्थाङ्गिरसतीर्थलाङ्गलतीर्थवटेश्वरसंगमेश्वरभद्रतीर्थाङ्गारेश्वरायोनिसंगमपाण्डवेश्वरकम्बोतिकेश्वरचन्द्रभागाशक्रतीर्थब्रह्मावर्ततीर्थकपिलतीर्थनर्मदेश्वरतीर्थादित्यायतनतीर्थमाखेश्वरनागेश्वरतपोवनकुबेरभवनकालेश्वरतीर्थमत्तालयनारदतीर्थाहल्यातीर्थसोमतीर्थस्तम्भतीर्थयोधिनीपुरस्थविष्णुतीर्थतापसेश्वरामोहकतीर्थसिद्धेश्वरगणपतिलिङ्गजनार्दनकामतीर्थान्धोनतीथ--सिद्धश्वरक्षत्रपालदण्डपालकुसुमेश्वरमाहात्म्यवर्णनम्। श्लो० १२२।
१९—१४	भार्गवेश्वरतीर्थमाहात्म्यम्, शुक्लतीर्थोत्पत्तिवृत्तान्तमाहात्म्यवर्णनम्।श्लो०३६।
२०—१५	नरकतीर्थास्थिविलयतीर्थगोतीर्थकपिलातीर्थर्षितीर्थगङ्गावदनतीर्थगङ्गाराहकसंगमदशाश्वमेधिकतीर्थमाहात्म्यवर्णनम्, रुद्रवेदीतीर्थोत्पत्तिविषये भृगुकृतशिवस्तोत्रवर्णनम्, भृगुक्षेत्रमाहात्म्यम्, नर्मदास्थितवृषतीर्थमाहात्म्यम्, गौतमेश्वरतीर्थधौतपापतीर्थैरण्डीतीर्थहिरण्यद्वीपतीर्थकनखलतीर्थेशतीर्थवाराहतीर्थसोमतीर्थद्वीपेश्वररुद्रकन्यादेवतीर्थशिखितीर्थभृगुतीर्थमाहात्म्यवर्णनम्। श्लो० ८३।
२१—१६	विहगेश्वरं तीर्थनर्मदेश्वराश्वतीर्थपितामहतीर्थसावित्रीतीर्थमनोहरतीर्थमानसतीर्थक्रतुतीर्थत्रिदशद्योतिदशकन्यातीर्थस्वर्गविन्दुतीर्थाप्सरेशनरकतीथभारभूततीर्थाटवीतीर्थशृङ्गतीर्थैरण्डीनर्मदासंगमतीर्थ--नर्मदोदधिसंगमवर्तिजमदग्नितीर्थविमलेश्वरकेशिनीतीर्थसागरेश्वरमाहात्म्यवर्णनम्। श्लो० ५२।
२२—१७	नर्मदामाहात्म्यवर्णने प्रमोहिन्यादिगन्धर्वकन्यानामितिहासवर्णनम्, तत्र तासां गौरीसमाराधनायाच्छोदसरोवरं गत्वा गौरीमभ्यर्च्य स्नानार्थमागतस्य मुनिपुत्रस्य वीक्षणम्, तं दृष्ट्वा तासां कामावस्थावर्णनम्, तस्य मुनिपुत्रस्य स्वाश्रमगमनानन्तरं तासां विक्लवावस्थावर्णनम्, द्वितीयदिवसे पुनस्तस्मिन्सरोवरे तेन मुनिसूनुना सह तासां संगमे संवादे च गन्धर्वकन्याभिस्तदङ्गवेष्टनम्, तत्कृत्यक्रुद्धेन मुनिपुत्रेण गन्धर्वकन्यानां पिशाचत्वशापदानम्, ताभिश्च तस्य पिशाचत्वशापदानम्, तासां तस्य च पिशाचरूपेणावस्थानम्। श्लो० १०८।
२३—१९	यदृच्छागतलोमशमुनिना सह पिशाचीगणसहितस्य पिशाचस्य तस्य द्विजपुत्रस्य संवादः, लोमशेन नर्मदास्नानेन तस्य तासां च पैशाच्यान्मोचनम्। श्लो० ३४।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अ० प०	विषयाः
२४—२०	अन्यतीर्थमाहात्म्यवर्णनम्, तत्र दक्षिणसिन्धुचर्मण्वत्यर्बुदाचलपिंगातीर्थसरस्वतीसागरसंगमतीर्थवरदानतीर्थद्वारवतीपिण्डारकसिन्धुसागरसंगमशङ्कुकर्णेश्वरतिमितीर्थवसुधारासिंधूत्तमवसुतीर्थब्रह्मतुङ्गकुमारीतीर्थशक्रतीर्थरेणुकातीर्थ-पञ्चनदभीमास्थानगिरिकुञ्जविमलतीर्थमाहात्म्यवर्णनम्. । श्लो० ३८ ।
२५—२०	काश्मीरस्थतक्षकनागभवनवितस्तातीर्थमलदरुद्रास्पदतीर्थमणिमत्तीर्थदेविकातीर्थकामाख्यतीर्थयजनयाजनब्रह्मवालकतीर्थदीर्घसत्रविनाशनतीर्थ–चमसोद्भेदशिवोद्भेदनागोद्भेदशशयानकुमारकोटिरुद्रकोटिसरस्वतीसंगमतीर्थ-माहात्म्यवर्णनम् । श्लो० ३५ ।
२६—२१	कुरुक्षेत्रमत्तर्णकपारिप्लवतीर्थशाकिनीतीर्थ-सर्पनीवीपञ्चनदकोटितीर्थाश्विनीतीर्थवाराहतीर्थजयिनीस्थसोमतीर्थैकहंसतीर्थमुञ्जावट-जयानदीरामह्रदवंशमूलतीर्थलोकोद्धारतीर्थश्रीतीर्थकपिलातीर्थगोभवनतीर्थगङ्गातीर्थकवितीर्थ-लवणकद्वारपालब्रह्मावर्तसुतीर्थककाशीश्वरतीर्थ-मातृतीर्थशीतवनस्नानलोकातितीर्थस्वर्णलोमापनयनतीर्थदशाश्वमेधिकतीर्थमानुषतीर्थब्रह्मानुस्वरतीर्थ–सप्तर्षिकुण्डकपिलकेदारकपिष्ठलकेदारसर्वकतीर्थरुद्रकोटिकूपह्रदेलास्पदतीर्थकलशीतीर्थरामजन्मतीर्थपुण्डरीकतीर्थत्रिविष्टपतीर्थफलकीवनदृषत्पानसर्वदेवतीर्थ-पाणिख्यातमिश्रकतीर्थव्यासवनमनोजवतीर्थमधुवनीकौशिकीदृषद्वतीसंगमव्यासस्थलयणान्तकूपवेदीतीर्थाहःसुदिनतीर्थमृगधूमरुद्रपदशूलपाणिमहेश्वरकोटितीर्थवामनकतीर्थविष्णुपदपवनह्रदामरह्रदशालिसूर्यसरस्वतीस्थश्रीकुञ्जतीर्थनैमिषिकुञ्जमाहात्म्यवर्णनम् । श्लो० १०८ ।
२७—२३	कन्यातीर्थसोमतीर्थ सप्तसारस्वततीर्थौशनसतीर्थकपालमोचनतीर्थाग्नितीर्थविश्वामित्रतीर्थपृथूदकतीर्थमधुस्रवतीर्थसरस्वत्यरुणासंगमावकीर्णतीर्थशतसहस्रकतीथसाहस्रकतीर्थरेणुकातीर्थविमोचनतीर्थपञ्चवटतैजसवारुणतीर्थकुरुतीर्थस्वर्गद्वारनरकरुद्रवेदीतीर्थास्थिपुरस्थगङ्गह्रादतीर्थ–स्थाणुवटवदरीवनवसिष्ठाश्रमेन्द्रमार्गादित्याश्रमसोमतीर्थदधीचतीर्थकन्याश्रमसंनिहितीतीर्थमचक्रुकद्वारपालमाहात्म्यवर्णनम्, कुरुक्षेत्रसीमावर्णनं च । श्लो० ९७ ।
२८—२५	धर्मतीर्थकलापवनसौगन्धिकवनेशानाध्युषिततीर्थसुगन्धाशतकुम्भापञ्चयज्ञत्रिशूलपात्रतीर्थराजगृहशाकम्भरीदेवीसुवर्णतीर्थधूमायतीधारातीर्थगंगाद्वारसप्तगङ्गात्रिगङ्गाशक्रावर्तकनखलकपिलावटनागराजतीर्थ-कपिलतीर्थशंतनुस्थापितललितकातीर्थमाहात्म्यवर्णनम् । श्लो० ३५ ।
२९—२५	यमुनातीर्थस्नानमाहात्म्यवर्णनम् । श्लो० ५२ ।
३०—२६	यमुनातीर्थमाहात्म्यवर्णने हेमकुण्डलवैश्यपुत्रयोःश्रीकुण्डलविकुण्डलयोरितिहासवर्णनम्, तत्र तयोरुन्मार्गगामिनोर्मरणानन्तरमेकस्य नरकाज्ञापरस्य स्वर्गाज्ञाकथनम् । श्लो० ४१ ।
३१—२७	विकुण्डलपृष्टेन देवदूतेन विकुण्डलस्य पूर्वजन्मवृत्तान्तवर्णनम्, यमलोकाप्रापकानेकसत्कर्मकथनम, विकुण्डलेन भ्रातुः श्रीकुण्डलस्य नरकान्मुक्तिकामनया पृष्टे सति देवदूतेन तं प्रति स्वकीयातीताष्टमजन्मकृतपुण्यदानोपदेशे तज्जन्मवृत्तान्तवर्णनम्, विकुण्डलस्य श्रीकुण्डलं सुकृतदानेन संतार्य तेन सह स्वर्गे गमनम् । श्लो० २१३ ।
३२—३१	सुगन्धतीर्थरुद्रावर्ततीर्थगङ्गासरस्वतीसंगमकर्णह्रदकुब्जाम्रकारुन्धतीवटसामुद्रकब्रह्मावर्तयमुनाप्रभवदर्वीसंक्रमणतीर्थसिन्धुप्रभवदेवीतीर्थार्षिकुल्यावीरप्रमोक्षविद्यातीर्थ-माहेश्वरतीर्थवेतसिकासुन्दरिकातीर्थब्राह्मणिकातीर्थनैमिषतीर्थगङ्गोद्भेदसरस्वतीवाहुदारजनीविमलाशोकगोप्रतारसरयूगोमतीस्थरामतीर्थशतसाहस्रकतीर्थोध्वंस्थानकोटितीर्थकपिलाह्रदमार्कण्डेयतीर्थगोमतीगङ्गासंगममाहात्म्यम् । श्लो० ४४ ।
३३—३१	विस्तरेण वाराणसीमाहात्म्यवर्णनम्, तत्र मेरुशृङ्गेदेवीपृष्टेन महादेवेन वाराणसीक्षेत्रमाहात्म्यकथनम् । श्लो० ६५ ।
३४—३३	वाराणसीस्थानां विमलोङ्कारपञ्चायतनमत्स्योदरीतटस्थोङ्कारेश्वरकृत्तिवासेश्वरमध्यमेश्वरविश्वेश्वरोङ्कारेश्वरकन्दर्पेश्वराणां माहात्म्यवर्णनम् । श्लो० २५ ।
३५—३३	वाराणसीस्थकपर्दीश्वरपिशाचमोचनतीर्थमाहात्म्यकथनम् । श्लो० ५० ।
३६—३४	वाराणसीस्थमध्यमेश्वरमाहात्म्यम् । श्लो० १३ ।

CC-0. In Public Domain. Digitization by eGangotri

अ०	प०	विषयाः
३७	३४	वाराणसीस्थप्रयागतीर्थविश्वरूपतीर्थतालतीर्थाकाशतीर्थार्षभतीर्थसुनीलतीर्थगौरीतीर्थप्राजापत्यतीर्थस्वर्गद्वारतीर्थजम्बुकेश्वरधर्मतीर्थ-गयातीर्थमहानदीतीर्थनारायणतीर्थवायुतीर्थज्ञानतीर्थवाराहतीर्थयमतीर्थसंमूर्तिकतीर्थाग्नितीर्थकलशेश्वरनागतीर्थकापिलसोमेशब्रह्मतीर्थभूतेश्वरधर्मसमुद्भवतीर्थगन्धर्वतीर्थवाह्नेयतीर्थदौराखिकतीर्थव्योमतीर्थचन्द्रतीर्थचिताङ्गदेश्वरतीर्थविद्याधरेश्वरतीर्थकेदारतीर्थोग्रतीर्थकालञ्जरतीर्थ-सारस्वतप्रभासरुद्रकर्णह्रदकोकिलमहालयतीर्थहिरण्यगर्भतीर्थगोप्रेक्षतीर्थ-पशान्तेश्वरव्याघ्रेश्वरत्रिलोचनतीर्थलोलार्कोत्तरतीर्थकपालमोचनतीर्थशुक्रेश्वरतीर्थमाहात्म्यवर्णनम् । श्लो० १९ ।
३८	३५	गयातीर्थाक्षयवटब्रह्मारण्यस्थब्रह्मसरोवरब्रह्मयूपधेनुकतीर्थ-गृध्रवटोद्यत्पदसावित्रपदयोनिद्वारफल्गुतीर्थधर्मपृष्ठब्रह्मतीर्थराजगृहयक्षिणीतीर्थमणिनागतीर्थगौतमवनाहल्याह्रदश्रीतीर्थजनककूपविनाशनतीर्थ-गण्डकीतीर्थध्रुवतपोवनकर्मदानदीविशालानदीमाहेश्वरीधारामाहेशपदतीर्थकोटिनारायणशालग्रामस्थानवटेश्वरपुरवामनभरताश्रमकौशिकीनदीचम्पकारण्यगोविन्दतीर्थ-कन्यावसथनिष्ठावासतीर्थवसिष्ठाश्रमदेवकूटकौशिकह्रदवीराश्रमस्थकुमारनन्दिनीकूपकालिका-कौशिक्यरुणासंगमोर्वशीतीर्थकुम्भकर्णाश्रमकोकामुखर्षभद्वीपोद्यानकतीर्थ-ब्रह्मतीर्थचम्पातीर्थदण्डार्पणतीर्थलाविढिकातीर्थमाहात्म्यवर्णनम् । श्लो० ७३ ।
३९	३६	सन्ध्यातीर्थविद्यातीर्थलौहित्यतीर्थ-करतोयानदीगङ्गासागरसंगमगङ्गाद्वीपवैतरणीनदीविरजतीर्थशोणज्योतिरथ्यासंगमशोणनर्मदासंगमर्षभतीर्थ-कोशलास्थकालतीर्थपुष्पवतीवदरिकातीर्थमहेन्द्राचलस्थरामतीर्थ-मतङ्गकेदारश्रीपर्वततत्रत्यदेवह्रदर्षभपर्वतकावेरीसमुद्रतीरस्थकन्यातीर्थ-गोकर्णतीर्थ-गायत्रीस्थानसंवर्तवापीवेणानदीगोदावरीनदीवेणासंगमवरदासंगमब्रह्मस्थूणाकुब्जावनकृष्णावेणासंगमोद्भूतदेवह्रदजातिमात्रह्रदशरभङ्गाश्रमशूर्पारकरामतीर्थ—सप्तगोदावरीदेवपथतुङ्गकारण्यमेधावनकालञ्जरचित्रकूटस्थमन्दाकिनीगुहस्थानकोटितीर्थयशःस्थानस्थचतुःसमुद्रकूपशृङ्गवेरपुरमुञ्जवटप्रयागत्रिवेणीसंगमभोगावतीनामवासुकितीर्थ-हंसप्रपतनदशाश्वमेधिकगङ्गामाहात्म्यवर्णनानन्तरं वसिष्ठस्यान्तर्धानवर्णनम्, नारदस्य युधिष्ठिरं प्रति तीर्थमाहात्म्यं कथयित्वाऽन्तर्धानवर्णनम्, युधिष्ठिरस्य महर्षिभिः सह तीर्थयात्राकरणम् । श्लो० १२७ ।
४०	३८	प्रयागस्य विशेषमाहात्म्यजिज्ञासया शौनकादिकप्रश्ने सूतेन धर्ममार्कण्डेयसंवादवर्णनम् । श्लो० ४० ।
४१	३९	प्रयागक्षेत्रसीमादिमाहात्म्यकथनम् । श्लो० २२ ।
४२	३९	प्रयागतीर्थे मरणदानादिमहिमा । श्लो० २४ ।
४३	४०	तीर्थयात्राविधिपूर्वकप्रयागस्थतत्तत्स्थलमाहात्म्यवर्णनम्, तत्र वटमूले गंगायमुनासंगमे प्राणत्यागमाहात्म्यम्, कम्बलाश्वतरनागसामुद्रतीर्थप्रतिष्ठानहंसप्रपतनतीर्थोर्वशीपुलिनकोटितीर्थभोगवतीदशाश्वमेधिकतीर्थगंगामाहात्म्यवर्णनम् । श्लो० ५७ ।
४४	४१	प्रयागस्थमानसतीर्थर्णमोचनतीर्थमाहात्म्यम् । श्लो० २२ ।
४५	४१	प्रयागस्थगंगायमुनयोर्माहात्म्यम् । श्लो० ३५ ।
४६	४२	प्रयागस्य पूज्यत्वकथनम् । श्लो० । २६ ।
४७	४२	सर्वतीर्थेभ्यः प्रयागस्याधिक्यवर्णनम् । श्लो० २० ।
४८	४३	प्रयागस्य प्रजापतितीर्थत्वकथनम् । श्लो० १५ ।
४९	४३	युधिष्ठिरेण मार्कण्डेयाय महादानदानम्, मार्कण्डेयस्य स्वाश्रमं प्रति गमनम्, वासुदेवेन प्रयागमाहात्म्यानुमोदानम् । श्लो० १७ ।
५०	४३	विष्णुभक्तिप्रशंसनम् । श्लो० ३८ ।
५१	४४	कर्मयोगवर्णने वर्णाश्रमसामान्यधर्मकथनम् । श्लो० ५१ ।
५२	४५	कर्तव्यनिषिद्धकर्मकथनम् । श्लो० ४७ ।
५३	४६	ब्रह्मचारिधर्मकथनम् । श्लो० ९० ।
५४	४७	गृहस्थधर्मकथनम् । श्लो० ४० ।
५५	४८	गृहस्थाचारनीतिवर्णम् । श्लो० ९४ ।
५६	५०	भक्ष्याभक्ष्यनिर्णयः । श्लो० ४६ ।
५७	५१	दानधर्मवर्णनम्, विविधदानमाहात्म्यकथनम् । श्लो० ७८ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अ० प०	विषयाः
५८—५२	वानप्रस्थाश्रमाचारधर्मकथनम् । श्लो० ३६ ।
५९—५३	यतिधर्मकथनम् । श्लो० ३१ ।
६०—५३	यतिनियमविधानकथनम् । श्लो० ४३ ।
६१—५४	सर्वधर्मेभ्योऽपि संसारदुःखकथनपूर्वकं विष्णुभक्तेराधिक्यवर्णनम्। श्लो० १०३।
६२—५६	पाद्मपुराणमाहात्म्यवर्णनम् । श्लो० २७ ।
	इति पाद्मपुराणान्तर्गतस्वर्गखण्डस्य विषयनुक्रमणिका सम्पूर्णा ।

अथ ब्रह्मखण्डम् ।

अ० प०	विषयाः
१—१	कलिकालीनलोकोद्धरणाय प्रश्ने सूतेन व्यासजैमिनिसंवादवर्णनम्, विष्णुभक्तिवैष्णवलक्षणवर्णनम् । श्लोकाङ्काः ३४ ।
२—१	हरिमन्दिरलेपनमार्जनादिमाहात्म्यदण्डकनामकचौरवृत्तान्तकथनम्। श्लो० ३६।
३—२	कार्त्तिकमासमाहात्म्यवर्णनम् तत्र कार्त्तिकव्रतनियमकथनम्, दीपदानमाहात्म्ये वैकुण्ठब्राह्मणवृत्तान्तवर्णनम्, द्वीपप्रोद्बोधनेन मूषिकस्योद्धारवर्णनम् । श्लोकाङ्काः ३५ ।
४—३	जयन्तीव्रतमाहात्म्यकथनम्, तत्र जयन्तीषट्कम्, जयन्तीदिने भोजननिषेधः, जयन्तीव्रतकारिणां माहात्म्यम् । श्लोकाङ्काः ५३ ।
५—४	स्त्रीणां पुत्राराहित्यवन्ध्यात्वकन्याप्रसूत्वक्लीबसन्तानत्वमृतपत्रात्वकारणविषयकप्रश्ने तत्तत्प्रापककर्मविपाकवर्णनम्, श्रीधरब्राह्मणस्य चरितम् । श्लोकाङ्काः । ३८ ।
६—४	विष्णोर्ब्राह्मणस्य च मन्दिरलेपनादिमहिमा, तत्र वाराङ्गनायाश्चरित्रम् । श्लोकाङ्काः ३७ ।
७—५	भाद्रपदशुक्लपक्षे राधाजन्माष्टमीमाहात्म्यम्, तद्व्रतप्रभावेण छलावेश्यासमुद्धारः । श्लोकाङ्काः ४४ ।
८—६	समुद्रमथनकथावर्णनम्, तत्र शक्रं प्रति दुर्वाससः शापः, विष्णोरनुज्ञया देवकृतसमुद्रमथनारम्भवर्णनम् । श्लोकाङ्काः २३ ।
९—६	विष्णुना कूर्मरूपं धृत्वा मन्दरोद्धरणम्, विषोत्पत्तौ शङ्करेण विषप्राशनम्, अलक्ष्म्युत्पत्तिः, तस्या निवासाय स्थाननिर्देशः । श्लोकाङ्काः २२ ।
१०—७	ऐरावतादीनामुत्पत्तिः, द्वादश्यां महालक्ष्म्युत्पत्तिः, अलक्ष्म्युद्दालकविवाहानन्तरं विष्णुकृतलक्ष्मीपरिणयनम्, अमृतोत्पत्तौ विष्णुना मोहिनीरूपं धृत्वा दैत्यविमोहनं कृत्वा देवानाममृतदानम्, राहोः शिरश्छेदनम्, चन्द्रसूर्यग्रहणे स्नानदानादिमाहात्म्यवर्णनम् । श्लो० २५।
११—७	गुरुवारव्रतमाहात्म्यवर्णनम्, तत्र भद्रश्रवोराज्ञः श्यामलानाम्न्यास्तत्कन्यायाश्च वृत्तान्तकथनम् । श्लो० ८६ ।
१२—९	ब्राह्मणप्राणरक्षणपुण्यकथने दीननाथराजवृत्तान्तवर्णनम्, तत्र दीननाथराज्ञा गालवं प्रति पुत्रप्राप्त्युपायप्रश्ने गालवेन नरमेधयज्ञकथनम् । श्लो० ६४ ।
१३—१०	कृष्णजन्माष्टमीव्रतमाहात्म्यवर्णनम् । तत्र दिलीपं प्रति वसिष्ठेन संक्षेपतः श्रीकृष्णजन्मबाललीलादिकथनम्, जन्माष्टमीनिर्णयः, चित्रसेनराजवृत्तान्तवर्णनम् । श्लो० ८६ ।
१४—११	ब्राह्मणमाहात्म्यवर्णनम्, ब्राह्मणपादोदकमाहात्म्यम्, तत्र भीमनामकशूद्रवृत्तान्तवर्णनम् । श्लो० ३३ ।
१५—१२	एकादशीमाहात्म्यवर्णनम्, तत्रैकादशीदिनेऽन्नभोजने दोषः, एकादशीनिर्णयः, महारूपापत्नीसमेतस्य वल्लभनामकवैश्यस्य वृत्तान्तवर्णनम् । श्लो० ६० ।
१६—१३	पौर्णमासीदिने विष्णुपूजनमाहात्म्यम्, आश्विनपौर्णमास्यां विष्णोर्लाजादिदानम् । श्लो० २९ ।
१७—१४	विष्णुपादोदकमहात्म्यम्, तत्र सुदर्शनब्राह्मणवृत्तान्तवर्णनम् । श्लो० २८ ।
१८—१४	अगम्यागमनप्रायश्चित्तकथनम् । श्लो० २४ ।
१९—१५	अभक्ष्यभक्षणप्रायश्चित्तकथनम् । श्लो० ३१ ।
२०—१५	कार्त्तिकमाहात्म्यवर्णनम्, तत्र नानाप्रकारनियमकथनम्, राधादामोदरपूजनकथनम्, कलिप्रियासहितस्य शङ्करवृषलस्य वृत्तान्तवर्णनम् । श्लो० ३४ ।
२१—१६	कार्त्तिकमासव्रतविधाननियमकथनम् । श्लो० ३६ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अ० प०	विषयाः
२२--१७	तुलसीधात्रीमाहात्म्यकथनम् । श्लो० ४२ ।
२३--१७	विष्णुपञ्चकापरपर्यायकार्त्तिकान्तिमपञ्चदिनमाहात्म्यम्, तत्र दण्डकचौरवृत्तान्तवर्णनम् । श्लो० ३३ ।
२४--१८	पृथिव्याद्यनेकविधदानमाहात्म्यफलवर्णनम् । श्लो० ५८ ।
२५--१९	नारदसनत्कुमारसंवादे भगवन्नाममाहात्म्यवर्णनम् । नामापराधकथनम्, पुराणश्रवणफलकथनम् । श्लो० ३७ ।
२६--२०	प्रतिज्ञापालनस्य फलम्, प्रतिज्ञात्यागे दोषः, अत्रार्थे सुन्दरश्वपचवृत्तान्तवर्णनम् । श्लो० ४२ ।

इति पाद्मपुराणान्तर्गतब्रह्मखण्डस्य विषयानुक्रमणिका संपूर्णा ।

अथ पातालखण्डम् ।

अ० प०	विषयाः
१--१	शौनकादि-ऋषीन्प्रति सूतेन शेषवात्स्यायनसंवादद्वारा रामाश्वमेधचरित्रकथनारम्भः, तत्र रामस्य रावणं हत्वाऽयोध्यायामागमनाय लङ्कातो विमानमारुह्य परावृत्तिः, रामागमनाय भरतकृतसूर्यप्रार्थना, रामस्य विमानमध्यात् नन्दिग्रामदर्शनम् । श्लो० ४२ ।
२—१	रामप्रहितस्य मारुतेर्भरतं प्रत्यागमनम्, रामभरतसमागमः, रामस्यायोध्यां प्रत्यागमनम् । श्लो० ४० ।
३--२	रामस्यायोध्यायां प्रवेशः, मातृदर्शनम्, रामागमनप्रहृष्टपौरनारीणां परस्परं संवादः । श्लो० ३४ ।
४--३	रामवियोगाद्राममातुर्विलापकरणम्, रामेण मातृदर्शनपूर्वकं मातृभिः सह संवादकरणम्, रामचन्द्रस्य राज्याभिषेकः, राज्याभिषेके रामे प्रजानां सुखवृत्तवर्णनम् । श्लो० ५४ ।
५--४	सर्वदेवकृतरामस्तुतिः, देवेभ्यो रामकृतवरप्रदानम्, रामराज्यस्य व्यवस्थितिप्रकारकथनम् । श्लो० ५० ।
६-- ५	रामेणागस्तिस्वागतकरणम्, अगस्तिना रावणादिजन्मवृत्तान्तवर्णनम्, कुबेरजन्म, कुबेरसंपत्त्या परितप्तया रावणादिमात्रा रावणादीनां धिक्करणम्, रावणादिभिर्मातृसमीपे कुबेराधिकसंपत्तिप्राप्त्यर्थं प्रतिज्ञाकरणम् । श्लो० ४३ ।
७--६	रावणकुम्भकर्णविभीषणानामत्युग्रतपःकरणेन संतुष्टाद्ब्रह्मणः सकाशाद्वरप्राप्तिः, तत्प्रभावपरितप्तदेवैः कृतया प्रार्थनया भगवतो रामादिरूपेणावतरणकथनम्, रामस्य ब्राह्मणरावणवधश्रवणोत्तरं मूर्छाप्राप्तिः । श्लो० ३८ ।
८--६	ब्रह्मवधपरितप्तस्य रामस्य पश्चात्तापकरणम्, ब्रह्मवधविषण्णं रामं प्रति कुम्भयोनिना मुनिना सान्त्वनम्, अश्वमेधविधिजिज्ञासया रामस्यागस्तिं प्रति प्रश्नः । श्लो० ३७ ।
९--७	अगस्तिनाऽश्वलक्षणकथनम्, मन्दुरायां यज्ञयोग्याश्वपरीक्षणम्, अश्वमेधयज्ञाय महर्षिजनामन्त्रणम्, रामस्य महर्षीन्प्रति वर्णाश्रमधर्मविषयकप्रश्नकरणम्, ऋषिभिर्वर्णाश्रमधर्मकथनम् । श्लो० ६३ ।
१०—८	वसन्ततौं महर्षिगणैः सह रामस्य यज्ञमण्डपं प्रत्यागमनम्, यज्ञदीक्षास्वीकारः, दिग्विजयार्थमश्वस्य सज्जीकरणम्, सुवर्णनिर्मितसीतया सह रामस्य वसिष्ठाज्ञया कुण्डमण्डपादिकरणम्, अश्वमूर्धनि स्वमुद्राचिह्नितसुवर्णपत्रबन्धनम्, अश्वरक्षार्थं शत्रुघ्नं प्रत्याज्ञाकरणम्, प्रयाणावसरे शत्रुघ्नं प्रति रामकृतशिक्षाकथनम् । श्लो० ७४ ।
११—१०	पुष्कलाख्यस्य भरतपुत्रस्य भरतभ्रातुः शत्रुघ्नस्य पार्ष्णिग्राहरूपेण प्रेषणायाज्ञाकरणम्, शत्रुघ्नेन मातुराज्ञाग्रहणम्, जानकीभ्रात्रा लक्ष्मीनिधिना शत्रुघ्नमुद्दिश्य रामस्य विनोदकरणम्, शत्रुघ्नेन प्रयाणकालीनशुभशकुनदर्शनम्, प्रयाणावसरे पुष्कलस्य भार्यां प्रति शीलरक्षणोपदेशकरणम् । श्लो० ८३ ।
१२—११	पुष्कलपत्न्या स्वपतिं विजयमात्रोत्सुकं वीक्ष्य तदभिनन्दनम्, यज्ञियाश्वस्य परिजनैः सह नगरान्निःसृत्याहिच्छत्रापुरीं प्रत्यागमनम्, सुमन्त्रेणाहिच्छत्रापुरीवृत्तान्तकामाक्षादेवीचरित्रवर्णनपूर्वकं सुमदराजचरित्रवर्णनम्, तत्र सुमदस्य तपः कुर्वतस्तपोभङ्गायेन्द्रेण कामायाज्ञाकरणम्, रम्भया सह कामस्य सुमदतपोवनं प्रत्यागमनम्, सुमदस्य ताः स्वर्युवतीर्दृष्ट्वा चिन्ताकरणम् । श्लो० ८६ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अ० प०	विषयाः
१३—१३	सुमदाप्सरःसंभाषणम् रम्भाद्यप्सरसां, कामस्य च सामर्थ्यक्षयः, सुमदस्य कामाक्षादेवीदर्शनम्, सुमदकृतदेवीस्तुतिः कामाक्षादेव्या सुमदाय वरप्रदानम्, सुमदस्य शत्रुघ्नेन सह समागमः, अहिच्छत्रापुर्यां शत्रुघ्नस्य प्रवेशः सुमदेन शत्रुघ्नाय सर्वस्वसमर्पणम् । श्लो० ६७ ।
१४—१४	सुमदस्य शत्रुघ्नेन सह संवादः,अश्वेन सह शत्रुघ्नस्य च्यवनाश्रमं प्रति गमनम्, च्यवनसुकन्यावृत्तान्तवर्णनम्, तत्र तपः कुर्वतश्च्यवनस्य सुकन्याख्यया मनुकन्यया शलाकाभिरक्षिच्छेदः,मनुना च्यवनाय सुकन्यादानम् । श्लो० ६५ ।
१५—१५	सुकन्यया स्वपतिशुश्रूषणम्, अश्विनीकुमाराभ्यां सन्तुष्टाभ्यां च्यवनस्य सुरूपकरणम्, सुकन्यया सह च्यवनस्य विमानं निर्मायानेकविधभोगवर्णनम् । श्लो० ५४ ।
१६—१६	शर्यातियज्ञं प्रति गतयोः सुकन्याच्यवनयोः शर्यातिना सुकन्याभर्त्सनम्, सुकन्ययापतिसुरूपत्ववृत्तान्तकथनम्, शर्यातिकृतयज्ञेऽश्विनीकुमारयोश्च्यवनेन शक्रवज्रं स्तम्भयित्वा यज्ञभागदानवर्णनम्, शत्रुघ्नाश्वस्य च्यवनाश्रमं प्रति गमनम्, तदाश्रमस्थमहर्षिगणकृतरामप्रशंसा, शत्रुघ्नेन हनूमद्द्वारा च्यवनं प्रत्ययोध्यायां प्रेषणम्, रामेण च्यवनस्य स्वागतकरणम् । श्लो० ५४ ।
१७—१७	शत्रुघ्नस्याश्वेन सह वाजीपुरं प्रति गमनम्, वाजीपुरनरेशेन विमलेन शत्रुघ्नाय सर्वस्वसमर्पणम्, नीलपर्वतं प्रति गमनम्, नीलपर्वतमाहात्म्यकथनम्, तत्प्रसङ्गेन च रत्नग्रीवराजवृत्तान्तवर्णनम्, तत्र रत्नग्रीवं प्रति केनचिद्ब्राह्मणेन नीलपर्वतमाहात्म्यकथनम् । श्लो० ८२ ।
१८—	नीलपर्वतवासाच्चतुर्भुजस्वरूपप्राप्तिवर्णनम्, तत्र भिल्लवृत्तान्तः । श्लो० ३० ।
१९—१९	नीलगिरियात्राविधिवर्णनम्, रत्नग्रीवस्य नीलगिरिं प्रति गमनम्, श्लोकाङ्काः ६० ।
२०—२०	गण्डकीशालग्राममाहात्म्यवर्णनम्, तत्र पुल्कसशबरवृत्तान्तः । श्लो० ९३ ।
२१—२२	रत्नग्रीवेण नीलगिरिं गत्वा तत्र पुरुषोत्तमस्तोत्रकरणम्, तस्य स्तोत्रकरणानन्तरं केनचित्संन्यासिवेषिणागत्यागामिदिनेभगवद्दर्शनकथनम् । श्लो० ४८ ।
२२—२३	तस्मिन्दिने स्वप्ने रत्नग्रीवेण भगवद्दर्शनम्, अपरेद्युर्मध्याह्ने साक्षाद्भगवद्दर्शनम्, रत्नग्रीवेण भगवत्पूजापूर्वकं स्तुतिकरणम्, रत्नग्रीवाय भगवत्प्रसादाच्चतुर्भुजत्वप्राप्तिपूर्वकवैकुण्ठलोकप्राप्तिवर्णनम्, अश्वस्य नीलपर्वतसमीपे गमनम्, शत्रुघ्नकृतभगवद्दर्शनम् । श्लो० ६३ ।
२३—२४	हयस्य सुबाहुराजपालितचक्राङ्कनगरं प्रत्यागमनम्, सुबाहुराजात्मजेन दमनेनाश्वबन्धनम्, प्रतापाग्र्यदमनयोर्युद्धम्, दमनकृतप्रतापाग्र्यवधवर्णनम् । श्लो० ८९ ।
२४—२६	दमनपुष्कलयोर्युद्धम्, तत्र पुष्कलस्य जयवर्णनम् । श्लो० ६० ।
२५—२७	सुबाहोः सैन्येन सह युद्धभूमिं प्रत्यागमनम्, तत्सेनाध्यक्षेण निजसैन्यानां क्रौञ्चव्यूहविन्यासकरणम् । श्लो० ३५ ।
२६—२८	शत्रुघ्नं प्रति सुमतिनाम्ना मन्त्रिणा सुबाहुराजस्य बलपराक्रमकथनम्, लक्ष्मीनिधिसुकेत्वोर्युद्धे सुकेतोर्वधवर्णनम् । श्लो० ६९ ।
२७—२९	चित्राङ्गपुष्कलयोर्युद्धे चित्राङ्गवधवर्णनम् । श्लो० ४८ ।
२८—३०	चित्राङ्गवधात्सुबाहुराज्ञः पुत्रशोकः, सुबाहुहनूमतोर्युद्धम्, मूर्च्छां गतस्य सुबाहुराजस्य स्वप्ने रामदर्शनम्, सुबाहुना पूर्ववृत्तान्तस्मरणम् । श्लो० ७५ ।
२९—३१	सुबाहुशत्रुघ्नसमागमः, सुबाहुना सह अग्रेऽश्वस्य नानादेशेषु प्रयाणम्, श्लोकाङ्काः ५३ ।
३०—३२	अश्वसमेतस्य शत्रुघ्नस्य तेजःपुरं प्रति गमनम्, तत्रत्यस्य ऋतम्भरनृपस्य वृत्तान्तवर्णनम्, तस्यापत्यकामनया जाबालिं प्रति प्रश्नः, जाबालिना गोमाहात्म्यकथने जनकवृत्तान्तवर्णनम्, जनकेन नरकस्थप्राणिमोचनम् । श्लो० ७७ ।
३१—३३	जनकस्य नरकमार्गगमनकारणवर्णनम्, गोपूजाविधिकथनम्, ऋतम्भरर्तुपर्णसमागमः, ऋतुपर्णोपदेशादृतम्भरस्य रामस्मरणेन सुरभ्या पुत्रवरप्रदानम् । श्लो० ५७ ।
३२—३५	सत्यवद्राजवृत्तान्तवर्णनम्, शत्रुघ्नसत्यवतोः समागमवर्णनम् । श्लो० २६ ।

CC-0. In Public Domain. Digitization by eGangotri

अ० प०	विषयाः
३३—३५	विद्युन्मालिराक्षसेनाश्वहरणम्, विद्युन्मालिनो वधाय शत्रुघ्नसैनिकैः प्रतिज्ञाकरणम् । श्लो० ६३ ।
३४—३६	विद्युन्मालिनो वधः । श्लो० ८१ ।
३५—३८	रेवातीरे आरण्यकाश्रमेऽश्वस्यागमनम्, आरण्यकेन स्वचरित्रवर्णनम् । श्लोकाङ्काः ७१ ।
३६—३९	आरण्यकेन स्वस्मै लोमशमहर्षिप्रोक्तसमयसमेतरामचरित्रवर्णनम् श्लोकाङ्काः ९३ ।
३७—४१	आरण्यकस्यायोध्यामागत्य रामदर्शनं कृत्वा महानन्देन मस्तकस्फोटान्मुक्तिवर्णनम् । श्लो० ६७ ।
३८—४२	नर्मदाह्रदेऽश्वस्य निमज्जनम्, नर्मदाह्रदे शत्रुघ्नपुष्कलहनूमतां प्रवेशानन्तरं योगिन्या शत्रुघ्नाय मोहनास्त्रदानम्, जलमध्याद्वाहप्राप्तिवर्णनम् । श्लो० ६३ ।
३९—४३	अश्वस्य देवपुरं प्रति गमनम्, वीरमणिराजपुत्रेण रुक्माङ्गदेन हयग्रहणम्, शिवेन सह वीरमणेर्मन्त्रकरणम् । श्लो० ५६ ।
४०—४४	वीरमणिना सह युद्धाय शत्रुघ्नस्य निश्चयः, वीरमणिवृत्तान्तः । श्लो० ५७ ।
	रुक्माङ्गदस्य पुष्कलेन सह युद्धम्, तत्र पुष्कलस्य जयवर्णनम् । श्लोकाङ्काः ३३ ।
४२—४६	पुष्कलेन वीरमणिना सह तुमुलयुद्धकरणम्, वीरमणिपराभवः, पुष्कलस्य विजयश्च । श्लो० ७८ ।
४३—४७	वीरभद्रेण युद्धे पुष्कलस्य वधकरणम्, वीरभद्रशत्रुघ्नयुद्धम्, शत्रुघ्नस्य पराभववर्णनम् । श्लो० ६२ ।
४४—४८	शिवेन सह हनूमतो युद्धम्, हनूमत्संग्रामसंतुष्टेन शिवेन युद्धभूमिरक्षणे कृते सति हनूमता द्रोणाचलानयनाय गमनम्, द्रोणाचलसान्निधौ देवैः सह हनूमतो युद्धम् । श्लो० ८० ।
४५—५०	द्रोणाचलाद्देवदत्तमृतसंजीवनीमानीय युद्धे मृतानां पुष्कलादीनां संजीवनम्, पुनर्युद्धे शंकरकृतशत्रुघ्नपराभवे शत्रुघ्नेन रामस्मरणम्, युद्धभूमौ रामस्यागमनम् । श्लो० ६० ।
४६—५१	शंकरेण सह श्रीरामस्य समागमः, वीरमणिप्रभृतीनामानन्दवर्णनम्, वीरमणेः शत्रुघ्नेन सहाश्वरक्षणार्थं प्रयाणम् । श्लो० ३८ ।
४७—५२	हेमकूटपर्वतेऽश्वगमनम्, तत्र शिलायां वाहस्य गात्रस्तम्भः, शत्रुघ्नपृष्टेन शौनकेनाश्वगात्रस्तम्भकारणकथनम् । श्लो० ५५ ।
४८—५३	शत्रुघ्नाय शौनकेन नानाकर्मविपाकवर्णनम्, अश्वस्य मुक्तिवर्णनम् श्लोकाङ्काः ७६ ।
४९—५४	सुरथराजपालितकुण्डलपुरेऽश्वस्य गमनम्, सुरथेनाश्वस्य ग्रहणम्, सुरथराजस्य राज्यरीतिवर्णनपूर्वकसुरथवृत्तान्तवर्णनम् । श्लो० ६९ ।
५०—५५	शत्रुघ्नेन सुरथं प्रति दौत्येनाङ्गदप्रेषणम्, अङ्गदसुरथसंवादः । श्लो० ५७
५१—५६	चम्पकाख्येन राजपुत्रेण सह पुष्कलस्य युद्धम्, चम्पकेन पुष्कले बद्धे सति हनूमता युद्धे चम्पकं पराजित्य पुष्कलस्य मोचनम् । श्लो० ७१
५२—५७	सुरथहनूमतोः संवादपूर्वकं भयङ्करं युद्धम्, रामास्त्रेण सुरथकृतहनूमद्बन्धनम्, सुरथेन सह पुष्कलस्य युद्धम्, सुरथशत्रुघ्नयुद्धे शत्रुघ्नपराभववर्णनम् । श्लो० ६९ ।
५३—५९	सुरथकृतसर्वरामयोधबन्धनम्, बन्धनान्मुक्तये हनूमत्कृतरामस्तोत्रम्, श्रीरामस्यागमनम्, सुरथरामसमागमानन्तरं सर्वेषां मोचनम्, अश्वस्य वाल्मीक्याश्रमं प्रति गमनम् । श्लो० ३७ ।
५४—५९	वाल्मीक्याश्रमे लवेनाश्वबन्धनम्, लवेन शत्रुघ्नसैनिकानामश्वरक्षणकराणां हस्तच्छेदनम् । श्लो० ३७ ।
५५—६०	वात्स्यायनस्य सीतात्यागविविदिषया प्रश्ने शेषेण तद्विषयकवृत्तवर्णनम्, तत्र रामं प्रति सीतया दोहदकथनम्, प्रजाप्रेमजिज्ञासया नगरे रात्रौ चारगमनम्, चारैः पुरे जनमुखाद्यतस्ततो रामकीर्तिश्रवणम्, रजकमुखादपकीर्तिश्रवणम् च । श्लो० ७९ ।
५६—६२	प्रातःकाले चारैः सभामागत्य रामाय रजकोक्तिकथनम्, रामस्यापकीर्तिश्रवणजन्यमूर्छावर्णनम्, भरतेन सह संवादवर्णनम् । श्लो० ६४ ।
५७—६३	सीताया भर्त्रावियोगकारणकथनम्, रजकस्य पूर्वजन्मवृत्तान्तः । श्लो० ६७ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अ० प०	विषयाः
५८--६४	भरतस्य सीतात्यागाज्ञाऽस्वीकारे शत्रुघ्नायाज्ञाकरणम्, तेनाप्यस्वीकारे लक्ष्मणाय सीतात्यागाज्ञाकरणम्, दोहदपूरणं मिषं कृत्वा सीताया वने गमनम्, सीताकृतगंगादर्शनम् । श्लो० ७८ ।
५९--६५	गंगामुत्तीर्य परपारतीरे सीताया लक्ष्मणेन सह संवादः, सीतायास्त्यागः, सीताकृतशोकः, वाल्मीक्याश्रमं प्रति सीताया गमनम्, तस्मिन्नाश्रमे सीतायाः कुशलवपुत्रोत्पत्तिवर्णनम् । श्लो० ८६ ।
६०--६७	कालजिन्नाम्नः शत्रुघ्नसेनाध्यक्षस्य लवेन सह युद्धम्, युद्धे कालजितो मरणम् । श्लो० ६७ ।
६१--६८	लवस्य पुष्कलेन सह युद्धम्, हनूमता च सह युद्धे हनूमतो मूर्च्छया पतनम् । श्लो० ६२ ।
६२--६९	शत्रुघ्नेन सह घोरयुद्धे लवस्य मूर्च्छावर्णनम् । श्लो० ४७ ।
६३--७०	लवस्य पतनात्सीतया शोककरणम्, कुशस्य महाकालपुरादाश्रमं प्रत्यागमनम्, शत्रुघ्नकुशयोर्युद्धम्, शत्रुघ्नस्य मूर्छनाप्राप्तिवर्णनम् । श्लो० ८० ।
६४--७२	कुशेन हनूमत्सुग्रीवौ विजित्य बद्ध्वा स्वाश्रमं प्रति नीत्वा सीतायै तौ प्रदर्श्य युद्धवृत्तान्तनिवेदनम्, सीतया स्वकीयपातिव्रत्यप्रभावाद्रामसैन्यसञ्जीवनम्, सीतानुज्ञया कुशलवाभ्यां शत्रुघ्नाग्रेऽश्वस्य त्यागकरणम् । श्लो० ८० ।
६५--७३	अश्वेन सह शत्रुघ्नादीनामयोध्यां प्रत्यागमनम्, सुमतिमन्त्रिणा रामाय जैत्रयात्रावृत्तान्तकथनम् । श्लो० ८० ।
६६--७४	रामस्य वाल्मीकिमहर्षिणा सह संवादः, सीताया आनयनाय लक्ष्मणप्रेषणम्, सीतालक्ष्मणसंवादः, कुशलवयोः सीताज्ञया लक्ष्मणेन सहायोध्यायामागमनम्, वाल्मीकिप्रेरणया कुशलवाभ्यां श्रीरामचरित्रगानम्, रामेण तयोः स्वपुत्रौ ज्ञात्वाङ्कारोपणम्, वाल्मीकिपूर्ववृत्तान्तवर्णनम्, रामेण सीतायाः स्मरणम् । श्लो० १८४ ।
६७--७८	सीतामानेतुं पुनः प्रहितेन लक्ष्मणेन सह सीतायाः श्रीरामयज्ञमण्डपे आगमनम्, रामसीतासमागमानन्तरं सुवर्णसीतां परित्यज्य प्रत्यक्षसीतया सह यज्ञकर्मकरणम्, यज्ञपरिसमाप्तिवर्णनम्, तत्र यज्ञियाश्वस्य रामस्पर्शेनोद्धारे कर्पूरेण देवेभ्यो हविर्भागदानम् । श्लो० ८७ ।
६८—७९	रामस्य यज्ञान्तस्नानम्, रामाश्वमेधपठनश्रवणमाहात्म्यवर्णनम् । श्लो०३८ ।
६९—८०	श्रीकृष्णचरित्रवर्णनम्, तत्र वृन्दावनादिषोडशदलात्मकश्रीकृष्णक्रीडाकिञ्जल्ककथनपूर्वकक्रीडास्थानवर्णनम्, श्रीकृष्णस्य सौन्दर्यकथनम्, वृन्दावनमाहात्म्यकथनम् । श्लो० ११८ ।
७०--८२	श्रीकृष्णपार्षदगणवर्णनम्, ऋषीणां गोपीत्वप्राप्तिकारणकथनम्, जन्मान्तरीयपुण्यवर्णनं च, राधामाहात्म्यम्, राधाकृष्णपरिचरानेकगोपीवर्णनम्, गोपीगणमध्यवर्तिश्रीकृष्णस्वरूपवर्णनम् । श्लो० ६५ ।
७१--८३	नारदस्य राधाकृष्णयोर्वृंदावने दर्शनपूर्वकमाहात्म्यवर्णनम् । श्लो० १०३ ।
७२--८५	श्रीकृष्णस्य श्रेष्ठसुन्दरीगणकथनम् । श्लो० १५४ ।
७३--८८	श्रीकृष्णस्वरूपवर्णनपुरःसरं मथुरामाहात्म्यवर्णनम् । श्लो० ५६ ।
७४—८९	अर्जुनस्य राधास्वरूपदर्शनपूर्वकस्त्रीत्वप्राप्त्या श्रीकृष्णसंगवर्णनम्, भगवन्महिमवर्णनं च । श्लो० २०४ ।
७५--९३	नारदस्य स्त्रीत्वप्राप्तिवर्णनम् । श्लो० ५६ ।
७६--९४	श्रीकृष्णस्य संक्षिप्तं गद्यमयं मध्यत एव चरित्रम् । श्लो० ९ ।
७७—९४	श्रीकृष्णतीर्थवर्णनम्, श्रीकृष्णस्य स्वरूपवर्णनम्, गुणवर्णनं च । श्लो० ६५ ।
७८—९६	वैष्णवशुद्धिपूर्वकं शालग्रामशिलालक्षणादिकथनम् । श्लो० ४६ ।
७९—९६	वैष्णवानां तिलकधारणाद्यनेकविधिवर्णनम् । श्लो० ६८ ।
८०--९८	कलियुगे हरिनाममाहात्म्यवर्णनम्, हरिपूजाविधिवर्णनम् । श्लो० ६८ ।
८१—९९	श्रीकृष्णमन्त्रार्थवर्णनम् । श्लो० ६६ ।
८२--१००	मंत्रदीक्षाविधिवर्णनम् । श्लो० ९१ ।
८३—१०२	वृंदावनेश्रीकृष्णस्य दैनंदिनीयलीलावर्णनम्, तत्र राधया सह विलासादिवर्णनम्, वृंदावनमाहात्म्यपरिसमाप्तिः । श्लो० ११६ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अ० प०	विषयाः
८४—१०४	अथ वैशाखमाहात्म्यम्, तत्र नारदांबरीषसंवादः वैष्णवधर्मकथनम्, विष्णुध्यानप्रकारवर्णनं च। श्लो० १०८।
८५—१०६	भक्तिलक्षणभेदवर्णनम्, सर्वमासेषु वैशाखस्य महत्त्ववर्णनम्। श्लो० ७७।
८६—१०८	वैशाखमासव्रतविधानकथनम्। श्लो० ४७।
८७—१०९	वैशाखस्नानमाहात्म्ये देवशर्मब्राह्मणवृत्तांतवर्णनम्, तत्रसुमनया भार्ययाऽनपत्यत्वतप्तस्य पत्युः सांत्वनार्थं संसारस्वरूपवर्णनम्, अनेकविधपुत्रवर्णनम्। श्लो० ८०।
८८—११०	ऋणसंबन्ध्यादिपुत्रकथनपूर्वकं संसारनिःसारतावर्णनम्। श्लो० ३२।
८९—१११	पुत्रप्राप्तये सुमनया देवशर्माणं प्रति वसिष्ठसंनिधौ प्रेषणम्, देवशर्मणो वसिष्ठं प्रति गमनम्, वसिष्ठदेवशर्मसंवादे वसिष्ठेन देवशर्मणः पूर्वजन्मवृत्तान्तवर्णनम्। श्लो० ६९।
९०—११२	देवशर्मणो विप्रत्वप्राप्तिकारणवर्णनम्, संतानप्राप्तये वैशाखमासव्रतानुष्ठानोपदेशवर्णनम्, देवशर्मणः स्वगृहं प्रत्यागमनम्। श्लो० ५८।
९१—११३	सुमनया सह देवशर्मणः गंगावर्तिकनखलतीर्थवैशाखनियमसेवनतो विष्णुप्रीत्या सुतप्राप्तिः। श्लो० १४।
९२—११३	वैशाखसेवनफलम्, अत्र विषये दिवोदासराजपुत्र्या दिव्या देव्याः कथानकवर्णनम्, तत्र तस्या दिव्यादेव्या विधिधवरमरणानुतप्तेन दिवोदासेन जातूकर्ण्यं प्रति तत्पतिमरणकारणजिज्ञासया प्रश्ने कृते सति जातूकर्ण्येन तस्याः प्राक्तनजन्मचरित्रवर्णनम्, पूर्वजन्मनि दुश्चरित्रायास्तस्याः कस्यचित्सिद्धस्य सेवापुण्येन राजपुत्रीत्वप्राप्तिवर्णनम्। श्लो० १२३।
९३—११६	वैशाखमासे रेवास्नानोपदेशवर्णनम्। श्लो० १५।
९४—११६	पापप्रशमनस्तोत्रमाहात्म्यवर्णने मुनिशर्मणो ब्राह्मणस्य प्रेतपञ्चकस्य च कथानिरूपणम्, पापप्रणाशनस्तोत्रकथनं च। श्लो० १५८।
९५—११९	वैशाखमासीयसंक्षिप्ताघवर्णनम्, अम्बरीषस्य पूर्वजन्मवृत्तान्तवर्णनम्। श्लो० १५०।
९६—१२२	वैशाखे माधवार्चनमाहात्म्यम्, यमब्राह्मणसंवादे यमेन नारकिणां पापवर्णनम्, स्वर्गिणां पुण्यवर्णनंच। श्लो० १४२।
९७—१२५	विविधव्रतनियमस्नानदानादिवर्णनम्। श्लो० १०७।
९८—१२६	वैशाखमासे विष्णुपूजाविधानवर्णनम्, तत्र धनशर्मब्राह्मणस्य प्रेतोद्धारकथानकवर्णनम्, वैशाखस्याधिक्यवर्णनम्। श्लो० १२८।
९९—१२९	महीरथराजवृत्तान्तवर्णनम्, तत्र महीधरकश्यपसंवादे कश्यपेन शरीरानित्यतादिसविस्तरशरीरस्वरूपवर्णनम्। श्लो० ९३।
१००—१३१	कश्यपेन महीधरस्य वैशाखे स्नापनम्, स्तोत्रश्रावणं च, महीधरस्य नियमाचरणपुरःसरं मृत्युवर्णनम्। श्लो० ३१।
१०१—१३१	महीधरदेवदूतसंवादे यमलोकस्थानेकविधपापिपापविपाकनिरूपणम्। श्लो० ५७।
१०२—१३२	महीधरप्रदत्तेन वैशाखमासीयैकदिवसनियमानुष्ठानपुण्येन नारकिसमुद्धारवर्णनम्, महीधरस्य परमपदावाप्तिः। श्लो० ३२।
१०३—१३३	विष्णुमूर्तिध्यानवर्णनपुरःसरं वैशाखमाहात्म्यसमाप्तिवर्णनम्। श्लो० ५८।
१०४—१३४	अश्वमेधक्रतोरनन्तरं शंभुब्राह्मणरूपेण शङ्करस्यायोध्यां प्रत्यागमनम्, रामेण विभीषणबन्धवार्ताश्रवणम्, पौराणिकलक्षणवर्णनम्, शकुनयोग्यपुराणकथनम्, पुराणश्रवणविधिकथनम्, पुराणमध्याच्छकुनेन विभीषणबन्धनकारणज्ञानम्, रामेण विमानमारुह्य श्रीरङ्गे गत्वा विभीषणस्य मोचनम्, विप्रावज्ञापापजनितदुःखवर्णनम्। श्लो० १७०।
१०५—१३८	शंभुब्राह्मणमुखनिर्गतज्वालया कस्यांचिद्ब्राह्मण्यामुपद्रुतायां तन्मोचनमिषेण रामस्य लोकालोकात्परतो नारायणपुरं गत्वा तत्र नारायणेन सह संवादः, रामस्य लक्ष्म्या सह संवादः, रामस्य गौतमीतटवर्तिभरद्वाजाश्रमं प्रत्यागमनम्, तत्र श्राद्धदिने संप्राप्ते श्राद्धकर्तृभोक्तृनियमश्राद्धकालनिर्णयवर्णनम्, शिवलिङ्गस्थापनपूजनविधिवर्णनम्, शिवलिङ्गमाहात्म्यकथनम्, भस्ममाहात्म्यवर्णनम्, तत्र धनञ्जयब्राह्मणपुत्रस्य करुणस्य तत्पत्न्याः शुचिस्मितायाश्च वृत्तान्तवर्णनम्, भस्मस्नानमाहात्म्यवर्णनम्। श्लो० २३९।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अ० प०	विषयाः
१०६—१४२	भस्ममाहात्म्यवर्णने कस्यचिच्छुनो मुक्तिः, शुनः पूर्वजन्मवृत्तान्तवर्णनम्, पत्या सह गमनकर्तृस्त्रिया माहात्म्यवर्णनम्, तत्रान्ययाचरित्रम् । श्लो० ११२ ।
१०७—१४४	भस्ममाहात्म्यवर्णने कश्यपायृषिवृत्तान्तः, तत्र वीरभद्रचेष्टितम् । श्लो० ९५ ।
१०८—१४६	भस्मनिर्माणविधानम्, भस्मग्रहणधारणपुण्यनिरूपणम् । श्लो० ७९ ।
१०९—१४७	शिवलिङ्गार्चनमाहात्म्यवर्णनम्, तत्रेक्ष्वाकुब्राह्मणचरित्रवर्णनम्, शिवलिंगार्चननियमाः । श्लो० ११२ ।
११०—१५०	अग्निमुखाभिधशिवगणवृत्तान्तवर्णनम्, तत्राग्निमुखवीरभद्रसंवादे कराङ्किकराज्ञः कस्याश्चिद्वेश्यायाश्च वृत्तान्तवर्णनम् । श्लो० ९७ ।
१११—१५१	शिवनाममाहात्म्यवर्णनम्, तत्र विधृताभिधनृपचरित्रवर्णनम् । श्लो० ५४ ।
११२—१५२	शिवनाममाहात्म्यवर्णने देवरातसुतायाः कलाया वृत्तान्तवर्णनम्, गौरीकृतसोमवारव्रतवर्णनम्, तत्र शिवचेष्टितम् । श्लो० १४७ ।
११३—१५५	पुराणश्रवणमाहात्म्यम्, पौराणिकपूजाविधानवर्णनम्, तत्रदिलीपवृत्तान्तः । श्लो० ५६ ।
११४—१५६	रामेण विमानस्थविप्रवृत्तान्तजिज्ञासया प्रश्ने कृते सति गौतमगृहवृत्तान्तवर्णनम्, तत्र गौतमगृहे बाणादीनामागमनम्,ब्रह्मविष्णुशिवादीनां चागमनम्,विष्णुशिवकृतजलक्रीडा, गौतमगृहे सर्वदेवकृतभोजनम्, हनूमत्कृतशिवलिंगपूजाविधिः, चतुर्युगधर्माः, कलियुगे दानप्रशंसा, हरिकीर्तनपुराणश्रवणमाहात्म्यकथनम्, पुराणपठनश्रवणाधिकारिवर्णनम्, गौतमब्राह्मणवृत्तान्तः । श्लो० ४९४ ।
११५—१६६	पठनकर्तृणां लक्षणानि, पुराणश्रवणपुराणवाचनविधिः, पुराणसंख्यापूर्वकमहापुराणोपपुराणपरिगणनम् । श्लो० ९७ ।
११६—१६७	जाम्बवदुक्तपुराकल्पीयरामायणकथावर्णनम् । श्लो० ५९ ।
११७—१७४	भरद्वाजाश्रमात्सुदेवगृहं गत्वा तत्र सभायां स्थित्वा गौतमगृहचरित्रजिज्ञासया रामेण प्रश्ने कृते सति शंभुब्राह्मणेन रामं प्रति गौतमगृहवृत्तान्तकथनम्, तत्र न्यायार्जितधनेन देवपूजादिमाहात्म्यवर्णनम्, अत्र विषये मङ्कणकपुत्रस्याकथस्य वृत्तान्तवर्णनम्, रामकृतकौसल्यामासिकश्राद्धविधिः, श्राद्धकाले कस्यचिदभ्यागतस्यागमनम्, तेनातिथिना रामसीतयोः सत्त्वपरीक्षणम्, अन्यायार्जितद्रव्येण देवपूजाकर्तुः किल्बिषप्राप्तिः, अत्रार्थे रूपकराक्षसस्य वृत्तान्तवर्णनम्, उपहतद्रव्येण पूजानिषेधः, तत्र चेकितानिब्राह्मणवृत्तान्तः, उपहतघण्टाकारणवर्णनम्, तत्र मन्दस्य वृत्तान्तवर्णनम्, पातालखण्डश्रवणफलवर्णनम्, पुराणवाचकपूजाकथनम् । श्लो० २२६ ।

इति पाद्मपुराणान्तर्गतपातालखण्डस्थविषयानुक्रमणिका सम्पूर्णा ।

अथोत्तरखण्डम् ।

अ० प०	विषयाः
१—१	महेशनारदसंवादे धर्मबीजसमुच्चयवर्णनम् । श्लो० ७० ।
२—२	नारदोमापतिसंवादे बदरीनारायणमाहात्म्ये रुद्रप्रसादवर्णनम् । श्लो० १८ ।
३—२	युधिष्ठिरनारदसंवादे जालन्धरोत्पत्तिवर्णनम्, तत्र ब्रह्मण आगमनवर्णनम् । श्लो० ५३ ।
४—३	जालन्धरोपाख्याने वृन्दाविवाहः, जालन्धरस्याभिषेकवर्णनं च । श्लो० ५२ ।
५—४	क्षीरोदधेर्मन्थनकारणज्ञानाय जालन्धरेण शक्रं प्रति दूतप्रेषणम् । श्लो० २५ ।
६—५	दैत्यसैन्यानां देवसैन्यैः सह युद्धवर्णनम् । श्लो० ६८ ।
७—६	विष्णवादीनां कालनेम्यादिभिः सह द्वन्द्वयुद्धम्, इन्द्रवलयोर्द्वन्द्वयुद्धे इन्द्रकृतमुद्गरप्रहारेण बलदैत्यस्याङ्गविशरणम्, तेन तदङ्गेभ्यो रत्नाद्युत्पत्तिः, इन्द्रेण बलस्य वधकरणम्, तत्पत्न्याः प्रभावत्याः पत्याज्ञया नदीरूपप्राप्तिवर्णनम् । श्लो० ४७ ।
८—७	जालन्धरेणेन्द्रपराभवकरणम्, विष्णुजालन्धरयोर्युद्धम्, विष्णुकृतजालन्धरसेनावधः, जालन्धरेण द्रोणाचलानयनम्, जालन्धरकृतबाणप्रहारेण विष्णोर्मूर्च्छाप्राप्तिः, लक्ष्मीप्रेरणया कृतनमस्कारस्य जालन्धरस्य विष्णुना वरदानम्, जालन्धरप्रार्थनया विष्णुना तद्गृहे वासकरणम् । श्लो० ८७ ।
९—८	जालन्धरस्य सकलदेवपराजयपूर्वकं सौराज्यप्रतिष्ठापनम् । श्लो० २६ ।
१०—९	सर्वदेवप्रार्थनया शङ्करेण सर्वदेवतेजोमयचक्रनिर्माणम् । श्लो० ३८ ।

CC-0. In Public Domain. Digitization by eGangotri

अ० प०	विषयाः
११--१०	नारदमुखाज्जालन्धरेण पार्वतीसौन्दर्यं निशम्य शङ्करं प्रति राहुदूतप्रेषणम्, राहुणा शंभवे जालन्धरसंदेशकथनम्, अत्रान्तरे शिवजटाजूटात्कीर्तिमुखगणोत्पत्तिः, राहोः प्रत्यागमनम् । श्लो० ५३ ।
१२—११	जालन्धरस्य युद्धार्थयात्रावर्णनम् , नन्दिप्रमुखैः शिवगणैर्जालन्धरसैन्यपराभवकरणम् । श्लो० ६८ ।
१३--१२	शुम्भादीनां नन्द्यादिभिः सह युद्धम्, तत्र नन्द्यादीनां पराजयः, शङ्करेण दैत्यपराभवकरणम् । श्लो० ६५ ।
१४—१३	शिवजालन्धरयोर्घोरसंग्रामः,मायाशंकरस्य जालन्धरस्य पार्वतीं प्रत्यागमनम्, पार्वत्या सह तस्य संवादः, पार्वतीकृतचिन्तावर्णनम् । श्लो० ५१ ।
१५—१४	विष्णुना जालन्धरकृतपार्वतीच्छलं परिज्ञाय वृन्दाहरणविषयकोद्योगकरणम्, स्वप्ने वृन्दया कालीकृतपतिशिरोभक्षणदर्शनम्,दुःस्वप्नदर्शनानुतप्ताया वृन्दाया वनगमनम्, तत्र राक्षसदर्शनं च । श्लो० ७१ ।
१६--१५	विष्णुना तापसवेषधारणम्, राक्षससकाशाद्वृन्दायाः परिमोचनम्, व्याधभीताया वृन्दायास्तापसस्य विष्णोराश्रमगमनम्,विष्णुवचनाच्चित्रशालायां वृन्दाया गमनम्, मायाजालन्धरेण विष्णुना वृन्दारतिकरणम्, सुरतान्ते वृन्दया विष्णु ज्ञात्वा तद्भर्त्सनम्, वृन्दया विष्णवे भार्याहरणरूपशापदानम्, वृन्दया योगबलेन शरीरत्यागपूर्वकं ब्रह्मपदं प्रति गमनम्, वृन्दादेहस्य तत्सख्या दहनकरणम्, वृन्दादेहत्यागस्थलस्य वृन्दावनत्वप्राप्तिवर्णनम् । श्लो० ७२ ।
१७—१७	मायाशिवस्य जालन्धरस्य परीक्षार्थं पार्वत्याऽग्रे सखीप्रेषणम्, सखीदर्शनालिङ्गनमात्रेणैव जालन्धरवीर्यच्युतिं सखीमुखाज्ज्ञात्वा नायं शिव इति निश्चित्य पार्वत्याः कमलकोशे प्रवेशः, तत्सखीनां च भृङ्गरूपेण कमलपरिसरे भ्रमणम्, चण्डमुण्डप्रेषितरक्तलोचनदूतमुखात्स्वभार्याया वृन्दाया विष्णुकृतपातिव्रत्यभङ्गवार्ताश्रवणानन्तरं जालन्धरस्य संग्रामं प्रत्यागमनम् । श्लो० ३९ ।
१८—१७	जालन्धरस्य शंकरेण सह युद्धम्, जालन्धरसैनिकानां वीरभद्रादिभिः सह युद्धम्, शुक्रेण मृतदैत्यानां पुनरुज्जीवनम्, शंकरेण कृत्योत्पादनम्, कृत्यया स्वयोनौ शुक्रस्य स्थापनम् । श्लो० ८९ ॥
१९--१९	दैत्यानां शिवगणैः सह युद्धवर्णनम्, जालन्धरेण मायया पार्वतीं निर्माय तस्याः शिवसंमुखे वधकरणाच्छंकरस्य मोहप्राप्तिः, ब्रह्मकृतबोधेन शिवेन दैत्यमायां विज्ञाय जालन्धरस्य वधकरणम्, जालन्धरस्य शिवसायुज्यमुक्तिप्राप्तिः, कैलासोत्तरदिशि स्थितस्य नगरस्य जालंधररक्तपातेन शोणितपुरत्वप्राप्तिवर्णनम्, शंकरस्याज्ञया योगिनीभिस्तत्पुरपतितमांसभक्षणम्, शंकरेण योगिनीनां वरप्रदानम्, जालन्धरवधाख्यानश्रवणफलम्, वृन्दाप्रसङ्गेन तुलसीप्रशंसा । श्लो० १५५ ।
२०—२२	श्रीशैलमाहात्म्यवर्णनम् । श्लो० १८ ।
२१—२२	हरिद्वारमाहात्म्यवर्णनम्, तत्र गङ्गोत्पत्तिकथाप्रसङ्गेन सगरवृत्तान्तवर्णनम् । श्लो० ४३ ।
२२--२३	गङ्गायाः पृथिवीतले गमनवृत्तान्तवर्णनपुरःसरं हरिद्वारप्रशंसावर्णनम् । श्लो० २८ ।
२३—२४	गङ्गामाहात्म्यवर्णनम्, तत्र गङ्गायमुनाप्रयागकाशीस्तोत्राणि, गयाप्रशंसा । श्लो० ४९ ।
२४—२५	प्रयागतीर्थमाहात्म्यवर्णनम् । श्लो० २३ ।
२५—२५	तुलसीशालग्राममाहात्म्यवर्णनम् । श्लो० ४६ ।
२६—२६	तुलसीत्रिरात्रव्रतविधिमाहात्म्यवर्णनम् । श्लो० ४३ ।
२७—२७	दानेषु मुख्यस्यान्नदानस्य प्रशंसा, अन्नदाने पात्रापात्रनिरीक्षणप्रयोजनम् । श्लो० २१ ।
२८—२७	पानीयदानतडागाद्युत्सर्गवृक्षारोपणसत्यतपोऽध्ययनपात्रदानपृथ्व्यादिदानानां प्रशंसा, इतिहासपुराणपठनविधिफलवर्णनं च । श्लो० ५९ ।
२९--२९	इतिहासपुराणपठनप्रशंसावर्णने धरापालवृत्तान्तवर्णनम्. । श्लो० ४३ ।
३०—२९	गोपीचन्दनमाहात्म्यम्, तस्य विलेपनविधानवर्णनम् । श्लो० २६ ।
३१---३०	कार्त्तिकशुक्लैकादश्यां दीपव्रतविधानवर्णनम्, तत्फलवर्णनं च,तत्र सिद्धाश्रमस्थकपिलब्राह्मणस्य तद्गृहस्थमार्जारस्य च वृत्तान्तवर्णनम् । श्लो० १२० ।
३२--२२	हरिश्चन्द्रसनत्कुमारसंवादे जन्माष्टमीव्रतविधानवर्णनम् । श्लो० ४५ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अ० प०	विषयाः
७१—६९	भगवन्नाममाहात्म्यवर्णनम्, तत्र पार्वतीशिवसंवादे विष्णुसहस्रनामस्तोत्रवर्णनम् । श्लो० ३३३ ।
७२—७५	विष्णुसहस्रनाममाहात्म्यवर्णनम् । श्लो० १७ ।
७३—७६	रामरक्षास्तोत्रवर्णनम् । श्लो० ११ ।
७४—७६	धर्मप्रशंसापूर्वकदानधर्ममाहात्म्यवर्णनम् । श्लो० २६ ।
७५—७७	गण्डिकातीर्थमाहात्म्यम् । श्लो० २७ ।
७६—७७	आभ्युदयिकौर्ध्वदेहिकस्तोत्रवर्णनम् । श्लो० ४२ ।
७७—७८	ऋषिपञ्चमीव्रतविधानम्, तत्र देवशर्मब्राह्मणस्य बलीवर्दत्वप्राप्तिप्रभृत्याख्यायिकाकथनम् । श्लो० ६२ ।
७८—७९	अपामार्जनस्तोत्रवर्णनम् । श्लो० ९१ ।
७९—८१	अपामार्जनस्तोत्रपाठविधिकथनम्, तत्फलमाहात्म्यवर्णनं च । श्लो० १६ ।
८०—८१	विष्णुमाहात्म्यवर्णनम्, विष्णुमन्त्रमाहात्म्यवर्णनम्, पुण्डरीककथानकवर्णनम्, तत्र नारदेन सह पुण्डरीकस्य समागमः, नारदेन पुण्डरीकाय शास्त्रसिद्धान्तरहस्योपदेशकरणम्, पुण्डरीकस्य नारदोपदेशं श्रुत्वा भगवदाराधनेन भगवतः प्रत्यक्षदर्शनम्, पुण्डरीककृतभगवत्स्तुतिः, भगवतः प्रसादात्पुण्डरीकस्य मोक्षवर्णनम् । श्लो० १६९ ।
८१—८४	गङ्गामाहात्म्यवर्णनम् । श्लो० ४२ ।
८२—८५	वैष्णवलक्षणवर्णनम्, वैष्णवप्रशंसा, विष्णुमूर्तिपूजनफलवर्णनम्, शालग्रामपूजनफलवर्णनम् । श्लो० ३६ ।
८३-८५	सर्वमासविधिवर्णनम्, तत्र चैत्रशुक्लैकादश्यां दोलामहोत्सवविधिवर्णनम् । श्लो० ३४ ।
८४-८६	चैत्रशुक्लद्वादश्यां दमनकमहोत्सववर्णनम् । श्लो० ३१ ।
८५-८७	वैशाखज्येष्ठाषाढेषु भगवतो जलशयनमहोत्सववर्णनम् । श्लो० ३० ।
८६-८७	श्रावणे पवित्रारोपणविधिवर्णनम् । श्लो० ४२ ।
८७-८८	चैत्रादिमासक्रमेण चम्पकादिपुष्पैर्विष्णुपूजनवर्णनम्, तत्फलकथनं च । श्लो० २८ ।
८८-८९	कार्त्तिकमाहात्म्यारम्भः, तत्र नारदस्य कृष्णदिदृक्षया द्वारकायामागमनम्, नारदेन कृष्णाय कल्पवृक्षपुष्पोपहारदानम्, कृष्णेन सत्यभामां विस्मृत्यान्यस्त्रीभ्यो विभज्य पुष्पदानम्, पुष्पालाभरुष्टायाः सत्यभामायाः कल्पद्रुमदानाय तया सह गरुडमारुह्य स्वर्गं प्रति गत्वेन्द्रं विजित्य स्वर्गात्कल्पद्रुममानीय सत्यभामाया अङ्गणे तस्य रोपणम्, सत्यभामया तुलापुरुषदानकरणम्, श्रीकृष्णसत्यासंवादे सत्यभामया महाभाग्यशालित्वप्रापककारणजिज्ञासया प्रश्ने कृते सति कृष्णेन तस्याः पूर्वजन्मवृत्तान्तवर्णनम्, तत्र मायापुरीस्थदेवशर्मब्राह्मणकन्यायाश्चरित्रम् । श्लो० ४५ ।
८९—९०	तस्या गुणवत्याः कार्त्तिकसेवनात्सत्यात्वप्राप्तिवर्णनम् । श्लो० ३० ।
९०—९०	पृथुनारदसंवादे शङ्खासुराख्यानवर्णनम्, तत्र शङ्खासुरकृतवेदहरणवर्णनम्, विष्णुना कार्त्तिकप्रशंसाकरणम् । श्लो० ३१ ।
९१—९१	विष्णुना मत्स्यावतारं धृत्वा शङ्खासुरवधकरणम्, प्रयागोत्पत्तिमाहात्म्यवर्णनम् । श्लो० ३० ।
९२—९१	कार्त्तिकव्रतिनां नियमवर्णनम् । श्लो० ३१ ।
९३—९२	कार्त्तिकस्नानार्घ्यादिवर्णनम् । श्लो० ३४ ।
९४—९३	कार्त्तिकमास्यनुष्ठेयानां नियमानां वर्णनम्, कार्त्तिकव्रतवतां प्रशंसा । श्लो० ३१ ।
९५—९३	कार्त्तिकव्रतोद्यापनविधानवर्णनम् । श्लो० ३१ ।
९६—९४	तुलसीमाहात्म्यवर्णनप्रसङ्गेन जालन्धरोत्पत्तिवर्णनम् । श्लो० ३३ ।
९७—९५	जालन्धरदैत्यकृतदेवपराजयपूर्वकममरावतीविजयवर्णनम् । श्लो० ३३ ।
९८—९५	जालन्धरदैत्यभयत्रस्तदेवकृतसंकष्टनाशनविष्णुस्तोत्रम्, विष्णोर्जालन्धरेण सह युद्धम्, विष्णोर्जालन्धरेण सह युद्धे संतुष्टस्य तस्मै वरप्रदानम्, तद्याचितवरपूर्तये लक्ष्म्या सह विष्णुना जालन्धरगृहे वासकरणम्, जालन्धरस्य राज्यस्थितिवर्णनम् । श्लो० २९ ।
९९-९६	जालन्धरेण नारदमुखात्पार्वत्याः सौन्दर्यातिशयं निशम्य शिवं प्रति राहोर्दौत्येन प्रेषणम्, शिवभ्रूमध्यात्कीर्तिमुखगणोत्पत्तिवर्णनम्, कीर्तिमुखपूजावश्य-

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

अ० प०	विषयाः
३३—३३	पृथ्वीदानवस्त्रदानयोः प्रशंसा, गयागमनप्रशंसा, नीलवृषलक्षणकथनम्, दत्तायाः पृथिव्याः पुनर्हरणे दोषवर्णनम्, हिरण्यार्थेऽसत्यवचने ब्राह्मणधनहरणे च दुर्गतिप्राप्तिः, पात्रे दानस्य प्रशंसा, वाप्यादीनामुत्सर्गे फलम्, जलदानमाहात्म्यम्, भूमिधेनुस्त्रीणां बलाद्धृत्वा पुनरदाने ब्रह्महत्याप्राप्तिः, दीपदानस्य फलम्, विवाहयज्ञादिषु विघ्नकरस्य दुर्गतिवर्णनम्, फलमूलभक्षणप्रायोपवेशनतः स्वर्गलोकावाप्तिः, नित्यस्नानाग्निप्रवेशरसत्यागोपवासभूमिशयनकराणां तत्तत्फलावाप्तिवर्णनम्। श्लो० ७१।
३४—३४	दशरथेन वसिष्ठवचनाद्रथमारुह्य रोहिणीपृष्ठे स्थित्वा शनिसंमुखे संहारास्त्रे योजिते सति शनिना दशरथाय वरत्रयप्रदानम्, दशरथेन शनिस्तोत्रकरणम्, शनिस्तोत्रपठनफलवर्णनम्। श्लो० ५८।
३५—३५	माधवजाह्नवीसंवादे त्रिस्पृशैकादशीव्रतविधानम्, तत्र त्रिस्पृशैकादशीलक्षणकथनम्। श्लो० ९६।
३६—३७	उन्मीलिन्येकादशीव्रतविधानवर्णनम्। श्लो० ६८।
३७—३८	पक्षवर्द्धन्येकादशीव्रतविधानकथनम्। श्लो० ३२।
३८—३९	एकादश्यां जागरणस्य फलविधानलक्षणवर्णनम्। श्लो० ९२।
३९—४०	जयाविजयाजयन्त्येकादशीमाहात्म्यवर्णनम्, 'मार्गशीर्षकृष्णपक्षे एकादश्युत्पत्तिकथानकवर्णनम्, तत्र मुरदैत्यवधार्थं विष्णुदेहादेकादशीकन्याप्रादुर्भावः, तया मुरदैत्यवधकरणम्, विष्णुना तस्यै वरप्रदानवर्णनम्। श्लो० ११८।
४०—४२	मार्गशीर्षशुक्लपक्षमोक्षदैकादशीमाहात्म्यवर्णनम्। श्लो०। ४७।
४१—४३	पौषकृष्णपक्षसफलैकादशीमाहात्म्यवर्णनम्। श्लो० ४९।
४२—४४	पौषशुक्लपक्षपुत्रदैकादशीमाहात्म्यवर्णनम्। श्लो० ५३।
४३—४५	माघकृष्णपक्षषट्तिलैकादशीमाहात्म्यवर्णनम्। श्लो० ५५।
४४—४६	माघशुक्लपक्षजयैकादशीमाहात्म्यवर्णनम्। श्लो० ५४।
४५—४७	फाल्गुनकृष्णपक्षविजयामाहात्म्यवर्णनम्। श्लो० ३९।
४६—४८	फाल्गुनशुक्लपक्षामलक्येकादशीमाहात्म्यवर्णनम्। श्लो० ६४।
४७—४९	चैत्रकृष्णपक्षपापमोचन्येकादशीमाहात्म्यवर्णनम्। श्लो० ५०।
४८—५०	चैत्रशुक्लपक्षकामदैकादशीमाहात्म्यवर्णनम्। श्लो० ३९।
४९—५१	वैशाखकृष्णपक्षवरूथिन्येकादशीमाहात्म्यवर्णनम्। श्लो० २६।
५०—५१	वैशाखशुक्लपक्षमोहिन्येकादशीमाहात्म्यवर्णनम्। श्लो० ३९।
५१—५२	ज्येष्ठकृष्णपक्षापरैकादशीमाहात्म्यवर्णनम्। श्लो० २०।
५२—५३	ज्येष्ठशुक्लपक्षनिर्जलैकादशीमाहात्म्यवर्णनम्। श्लो० ६४।
५३—५४	आषाढकृष्णपक्षयोगिन्येकादशीमाहात्म्यवर्णनम्। श्लो० ३४।
५४—५४	आषाढशुक्लपक्षदेवशयन्येकादशीमाहात्म्यवर्णनम्। श्लो० ३७।
५५—५५	श्रावणकृष्णपक्षकामिकैकादशीमाहात्म्यवर्णनम्। श्लो० २९।
५६—५६	श्रावणशुक्लपक्षपवित्रारोपण्येकादशीमाहात्म्यवर्णनम्। श्लो० ४५।
५७—५६	भाद्रपदकृष्णपक्षाजैकादशीमाहात्म्यवर्णनम्। श्लो० २३।
५८—५७	भाद्रपदशुक्लपक्षपद्मैकादशीमाहात्म्यवर्णनम्। श्लो० ४१।
५९—५८	आश्विनकृष्णपक्षेन्दिरामाहात्म्यवर्णनम्। श्लो० ३६।
६०—५८	आश्विनशुक्लपक्षपाशाङ्कुशैकादशीमाहात्म्यवर्णनम्। श्लो० २८।
६१—५९	कार्त्तिककृष्णपक्षरमैकादशीमाहात्म्यवर्णनम्। श्लो० ५४।
६२—६०	कार्त्तिकशुक्लपक्षप्रबोधिन्येकादशीमाहात्म्यवर्णनम्। श्लो० ६८।
६३—६१	पुरुषोत्तममासकृष्णपक्षकमलैकादशीमाहात्म्यवर्णनम्। श्लो० ४३।
६४—६२	पुरुषोत्तममासशुक्लपक्षकामदैकादशीमाहात्म्यवर्णनम्। श्लो० २२।
६५—६२	चातुर्मास्यव्रतविधिमाहात्म्यवर्णनम्। श्लो० १२०।
६६—६५	चातुर्मास्यव्रतोद्यापनविधिवर्णनम्। श्लो० २०।
६७—६५	यमाराधनम्, वैतरणीव्रतम्, तत्र मुद्गलवृत्तान्तवर्णनम्, गोपीचन्दनमाहात्म्यकथनम्। श्लो० ९८।
६८—६७	वैष्णवलक्षणमाहात्म्यवर्णनम्। श्लो० २०।
६९—६७	श्रवणद्वादशीव्रतविधानकथनम्, तत्र मरुदेशस्थप्रेतकथानकवर्णनम्। श्लो० ७५।
७०—६८	नदीत्रिरात्रव्रतमाहात्म्यवर्णनम्। श्लो० ३२।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अ० प०	विषयाः
	कत्वकथनम्, कीर्तिमुखोत्सृष्टस्य राहोर्बर्वरदेशे पतनम् । श्लो० ३४ ।
१००-९७	शङ्करेण सर्वदेवतेजोभिः सुदर्शनचक्रनिर्माणम्, शिवगणानां दैत्यगणैः सह सङ्ग्रामः । श्लो० ३२ ।
१०१--९७	नन्द्यादीनां शिवगणानां कालनेम्यादिभिः सह द्वन्द्वयुद्धवर्णनम्, तत्र शिवगणानां पराजयवर्णनम् । श्लो० ३१ ।
१०२--९८	शिवेन दैत्यपराभवकरणम्, शिवजालन्धरयुद्धम्, जालन्धरेण गान्धर्वमायया शङ्करं मोहयित्वा शिवरूपं धृत्वा पार्वतीसमीपं प्रति गमनम्, पार्वत्या तस्य दानवत्वं परीक्ष्याकस्मादन्तर्धाय मानसोत्तरं प्रति गमनम्, पार्वतीमदृष्ट्वा जालन्धरस्य रणाङ्गणं प्रत्यागमनम्, पार्वतीकृतस्मरणेन विष्णोस्तत्समीपं प्रत्यागमनम्, तद्वृत्तान्तं श्रुत्वा विष्णुना वृन्दापातिव्रत्यभङ्गाय प्रतिज्ञाकरणम् । श्लो० ३२ ।
१०३-९८	वृन्दया दुःस्वप्नं दृष्ट्वोद्विग्नया वनान्तरे भ्रमणम्, तत्र राक्षसोपद्रुताया वृन्दायाः तापसवेषधारिणा विष्णुना राक्षसौ निवार्य रक्षणम्, मायया गगनात्कपिभ्यां जालन्धरशिरःकबन्धानयनम्, वृन्दायाः स्वपतिशिरःकबन्धनिरीक्षणेन शोककरणम्, विष्णोर्मायया जालन्धरवेषं धृत्वा वृन्दायाः पातिव्रत्यभङ्गकरणम्, कदाचिद्वृन्दया जालन्धररूपधारिणं विष्णुं विज्ञाय तस्य भार्याहरणरूपशापं दत्त्वाग्नौ प्रवेशनम्, विष्णोस्तच्चिताभस्मावगुण्ठनम् । श्लो० ३२ ।
१०४-९९	शङ्करेण युद्धे जालन्धरस्य वधकरणम्, जालन्धरस्य शिवसायुज्यप्राप्तिः, शिवाज्ञया देवैर्वृन्दामोहितविष्णुमोहविनाशायादिमायास्तोत्रकरणम्, आदिमायाज्ञया गौरीलक्ष्मीस्वराभिर्देवेभ्यः स्वस्वबीजदानम्, वृन्दाचितास्थाने देवैर्गौर्याज्ञया तद्बीजारोपणम् । श्लो० ३० ।
१०५—१००	तद्बीजत्रयोत्पन्नानां स्त्रीरूपधारिणीनां धात्रीमालतीतुलसीनां दर्शनेन विष्णोर्भ्रान्तिनिरासः, मालत्या बर्बरीनामप्राप्तिकारणवर्णनम्, धात्रीतुलस्योर्माहात्म्यम् । श्लो० २९ ।
१०६—१००	कलहाचरित्रवर्णनम्, धर्मदत्तब्राह्मणेन सह राक्षसीत्वं प्राप्तायाः कलहाया मध्येमार्गं समागमः, धर्मदत्तेन तस्या उपरि तुलसीमिश्रजलसेचनम्, कलहया धर्मदत्ताग्रे स्वपूर्वजन्मवृत्तान्तवर्णनम् । श्लो० ३१ ।
१०७—१०१	धर्मदत्तेन द्वादशाक्षरमन्त्रं जपित्वा तदङ्गे तुलसीमिश्रजलप्रक्षेपात्कलहाया दिव्यदेहावाप्तिवर्णनम्, वैकुण्ठं प्रति कलहां नेतुमागताभ्यां विष्णुदूताभ्यां धर्मदत्तं प्रति कलहयान्याभ्यां च स्त्रीभ्यां सह दशरथो भविष्यसीति वरप्रदानम् । श्लो० २९ ।
१०८---१०१	धर्मदत्तविष्णुगणसंवादे विष्णुव्रतमाहात्म्यवर्णनम् तत्र विष्णुदासविप्रचोलराजयोः कथानकवर्णनम् । श्लो० ३० ।
१०९—१०२	विष्णुदासविप्रचोलराजयोर्भगवन्निरतिशयभक्त्या वैकुण्ठप्राप्तिवर्णनम्, मुद्गलगोत्रोद्भवानां शिखाहीनत्वकारणवर्णनम् । श्लो० ३३ ।
११०—१०३	जयविजयद्वारपालयोः पूर्वजन्मवृत्तान्तवर्णनम्, कलहाया विष्णुगणैर्वैकुण्ठप्रापणम् । श्लो० ३२ ।
१११---१०३	कृष्णावेण्याद्यनेकनदीनां माहात्म्यवर्णनम्, तत्र कृष्णावेण्योरुत्पत्तिवर्णनम्, तत्र ब्रह्मदेवकृतयज्ञवर्णनम् । श्लो० ३२ ।
११२—१०४	एकादशीमाघकार्त्तिकतुलसीद्वारकानां भगवत्प्रियत्वम्, संसर्गवशात्पुण्यपापांशप्राप्तिवर्णनम् । श्लो० ३० ।
११३—१०५	कार्त्तिकव्रतप्रशंसायां धनेश्वरविप्रवृत्तान्तवर्णम्, धनेश्वरस्य कार्तिकव्रतिसंसर्गः । श्लो० ३७ ।
११४--१०५	धनेश्वराय यमेन नरकदर्शनानन्तरं धनेश्वरस्य धनयक्षेति नाम्ना कुबेरानुगत्वप्राप्तिवर्णनम् । श्लो० २९ ।
११५--१०६	सत्यभामायै कृष्णेन कार्त्तिकमाहात्म्यमुक्त्वा सायंसन्ध्योपासनार्थं जननीगृहं प्रति गमनम्, अश्वत्थवटप्रशंसाकरणम् । श्लो० २९ ।
११६—१०७	अश्वत्थवृक्षस्यास्पृश्यत्वकारणवर्णनेऽलक्ष्मीवृत्तान्तवर्णनम् । श्लो० ३० ।
११७—१०७	शिवषडाननसंवादे कार्त्तिकस्नानमाहात्म्यवर्णनम् । श्लो० ३२ ।
११८—१०८	कार्त्तिके तिलधेन्वादिदानवर्णनम्, कार्त्तिकव्रतिनां परान्नवर्जनादिविविधनियमवर्णनम्, विष्णुपूजनफलवर्णनम् । श्लो० ६० ।

CC-0. In Public Domain. Digitization by eGangotri

अ० प०	विषयाः
११९—१०९	माघमासस्नानमाहात्म्यम्, शूकरक्षेत्रमाहात्म्यवर्णनम्, मासोपवासव्रतविधानवर्णनम् । लो० ५३ ।
१२०—११०	शालग्रामशिलार्चनविधिमाहात्म्यवर्णनम्, शालग्रामशिलायां वासुदेवादिमूर्तिलक्षणवर्णनम्, कार्त्तिकमासे शालग्रामपूजाफलवर्णनम् । श्लो ९२ ।
१२१—११२	धात्रीवृक्षच्छायायां पिण्डदानमाहात्म्यवर्णनम्, केतकीप्रभृतिभिः पूजनस्य फलवर्णनम्, दीपदानविधिवर्णनम्, तत्र गोपवृत्तान्तवर्णनम् । श्लो० ३७ ।
१२२—११३	दीपावलीदिनपञ्चके त्रयोदश्यादिद्वितीयान्ते कर्तव्यकृत्यनिर्णयः, दीपावलीमहोत्साहे राज्ञां कर्तव्यवर्णनम्, यमद्वितीयामाहात्म्यवर्णनम् । श्लो० १०३ ।
१२३—११४	प्रबोधिन्येकादशीमाहात्म्यवर्णनम्, भीष्मपञ्चकव्रतमाहात्म्यवर्णनम्, कार्तिकमाहात्म्यश्रवणपठनफलवर्णनम् । श्लो० ९६ ।
१२४—११६	माघमासमाहात्म्यारम्भः, माघमाहात्म्यजिज्ञासया सूतं प्रति मुनीनां प्रश्नः, सूतेनोमामहेश्वरसंवादेन माघमाहात्म्यकथनम्, तत्र दिलीपस्य मृगयार्थं वनप्रवेशवर्णनम्, तत्प्रसङ्गेन वनशोभावर्णनम्, मृगयां विधाय पुरं प्रत्यावृत्तस्य दिलीपस्य हारीतेन मुनिना. सह समागमः, हारीतानुज्ञया दिलीपस्य वसिष्ठं प्रत्यागमनम्, वसिष्ठदिलीपसंवादः, माघमासे प्रातःस्नानदानमाहात्म्यवर्णनम्, तत्र मणिकूटपर्वतस्थव्याघ्रमुखविद्याधरस्य भृगुमहर्ष्युपदेशेन माघशुक्लैकादश्यां स्नानात्सुमुखत्वप्राप्तिवर्णनम्। श्लो० १७१ ।
१२५—१२०	माघस्नानमाहात्म्यवर्णने कार्तवीर्यदत्तात्रेयसंवादवर्णनम्, तत्र दत्तात्रेयेण शरीरानित्यतादिरहस्यकथनपुरःसरं माघस्नानमाहात्म्यवर्णनम्, तत्प्रसङ्गेन कुब्जिकाब्राह्मणीचरित्रसुन्दोपसुन्दवधवृत्तान्तवर्णनम् । श्लो० ८० ।
१२६—१२१	माघस्नानविधिवर्णनम्, तत्र काञ्चनमालिन्यप्सरसा राक्षसस्य धर्मोपदेशकरणम्, तदुपदेशेन राक्षसस्य स्वर्गप्राप्तिवर्णनम् । श्लो० १८१ ।
१२७—१२५	माघस्नानमाहात्म्यवर्णने गन्धर्वकन्यानां वेदनिधिमुनिपुत्रस्याग्निपस्य च परस्परं शापदानेन पिशाचत्वप्राप्तौ दैववशाल्लोमशसमागमः, लोमशेन माघमासस्नानमाहात्म्यकथनम्, तत्रावन्तिदेशस्थवीरसेनराजवृत्तान्तनिरूपणम्, पिशाचमोचनेतिहासवर्णने प्लक्षप्रस्रवणस्थदेवद्युतिविप्रचरित्रवर्णनम्, देवद्युतिना विष्णुस्तोत्रकरणम् । श्लो० २९७ ।
१२८—१३०	द्राविडदेशस्थचित्रनामकभूपतेरधर्माचारतया पैशाच्यप्राप्तौ देवद्युतिना सह समागमः, देवद्युतिना तस्य प्रयागे माघस्नानाज्ञाकरणपूर्वकं माघस्नानमाहात्म्यकथनम्, तत्र केरलस्थवसुनामकब्राह्मणवृत्तान्तकथनम्, तस्य वसुब्राह्मणस्य प्रेतत्वप्राप्तौ केनचित्कार्पटिकेन सह समागमः । कार्पटिकाय केरलपिशाचेन स्ववृत्तान्तनिवेदनम्, तत्र सारसवानरवृत्तान्तवर्णनम्, तत्र सारसेन वानराय निजवृत्तान्तकथनम्, प्रेतप्रार्थनया कार्पटिकेन मनसि विचार्य प्रेताय गङ्गाजलप्रदानम्, तेन गङ्गाजलप्राशनेन केरलवसुपिशाचस्य मुक्तिः, प्रयागमाहात्म्यश्रवणाद्द्राविडदेशपतेश्चित्रराजस्य मोक्षः, लोमशवचनात्पिशाचीनां पिशाचस्य च व्योममार्गेण भूगतलोमशेन सह प्रयागं प्रति गमनम्, लोमशेन तेभ्यः प्रयागदर्शनपूर्वकं प्रयागमाहात्म्यकथनम्, प्रयागे लोमशवचनाद्गन्धर्वकन्यानां मुनिपुत्रस्य पैशाच्यान्मुक्तिः, लोमशवचनेन तासां गन्धर्वकन्यानामग्निपेन सह विवाहः । श्लो० २९८ ।
१२९—१३६	विष्णुभक्तिमाहात्म्यवर्णनम् । श्लो० १९ ।
१३०—१३६	शालग्रामशिलामाहात्म्यवर्णनम् । श्लो० २९ ।
१३१—१३७	विष्णुस्मरणमाहात्म्यवर्णनम् । श्लो० १५३ ।
१३२—१४०	जम्बूद्वीपस्थविविधतीर्थवर्णनम् । श्लो० ४० ।
१३३—१४०	वेत्रवतीनदीमाहात्म्यवर्णनम् श्लो० ३१ ।
१३४—१४१	साभ्रमतीनदीमाहात्म्यवर्णनम्। श्लो० १३५ ।
१३५—१४३	साभ्रमतीप्रवाहागतनन्दिकुण्डकपालकुण्डमाहात्म्यवर्णनम् । श्लो० १९ ।
१३६—१४४	साभ्रमत्याः सप्तस्रोतोमाहात्म्यवर्णनम्, विकीर्णतीर्थमाहात्म्यवर्णनं च। श्लो० १४।
१३७—१४४	श्वेतातीर्थमाहात्म्यवर्णनम् । श्लो० ९ ।
१३८—१४४	वकुलासंगमे गणतीर्थमाहात्म्यवर्णनम् । श्लो० १५ ।
१३९—१४४	अग्निपालेश्वरमाहात्म्यवर्णनम् । श्लो० ४६ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अ० प०	विषयाः
१४०—१४५	साभ्रमतीहिरण्यासंगममाहात्म्यवर्णनम् । श्लो० १६ ।
१४१—१४५	मधुरादित्यमाहात्म्यवर्णनम् । श्लो० ४५ ।
१४२—१४६	कपितीर्थमाहात्म्यवर्णनम् । श्लो० १३ ।
१४३—१४७	सप्तधारतीर्थमाहात्म्यवर्णनम् । श्लो० २६ ।
१४४—१४७	ब्रह्मवल्लीतीर्थवृषतीर्थखण्डह्रदगोह्रदमाहात्म्यवर्णनम् । श्लो० ३० ।
१४५—१४८	साभ्रमतीहस्तिमतीसंगमेश्वरतीर्थमाहात्म्यवर्णनम्, तत्र सोमेश्वरमाहात्म्यकथनं च । श्लो० १६ ।
१४६—१४८	रुद्रमहालयतीर्थमाहात्म्यवर्णनम् । श्लो० ८ ।
१४७—१४८	खड्गतीर्थखड्गधारेश्वरमाहात्म्यवर्णनम् । श्लो० ७ ।
१४८—१४८	मालार्कतीर्थमाहात्म्यवर्णनम् । श्लो० ९ ।
१४९—१४८	चन्दनेश्वरमाहात्म्यवर्णनम् । श्लो० ११ ।
१५०—१४९	जाम्बवनतीर्थमाहात्म्यवर्णनम् । श्लो० १४ ।
१५१—१४९	इन्द्रग्रामतीर्थधवलेश्वरतीर्थमाहात्म्यवर्णनम् । श्लो० १०१ ।
१५२—१५१	बालापेन्द्रतीर्थमाहात्म्यवर्णनम् । श्लो० ४५ ।
१५३—१५१	दुर्धर्षेश्वरतीर्थमाहात्म्यवर्णनम् । श्लो० २३ ।
१५४—१५२	खड्गधारेश्वरतीर्थमाहात्म्यवर्णनम् । श्लो० ७२ ।
१५५—१५३	दुग्धेश्वरतीर्थमाहात्म्यवर्णनम् । श्लो० । ४०
१५६—१५४	चन्द्रभागानदीवर्तिचन्द्रेश्वरमाहात्म्यवर्णनम् । श्लो० १५ ।
१५७—१५४	पिप्पलादतीर्थमाहात्म्यवर्णनम् । श्लो० । ११ ।
१५८—१५५	पिचुमन्दार्कतीर्थमाहात्म्यवर्णनम् । श्लो० १४ ।
१५९—१५५	सिद्धक्षेत्रकोटराक्षीतीर्थमाहात्म्यवर्णनम् । श्लो० १३ ।
१६०—१५५	वामनतीर्थराजमाहात्म्यवर्णनम् । श्लो० ५ ।
१६१—१५५	सोमतीर्थमाहात्म्यवर्णनम् । श्लो० १७ ।
१६२—१५५	कापोतिकतीर्थमाहात्म्यवर्णनम् । श्लो० १८ ।
१६३—१५६	गोतीर्थमाहात्म्यवर्णनम् । श्लो० ५ ।

अ० प०	विषयाः
१६४-१५६	कश्यपह्रदमाहात्म्यवर्णनम् । श्लो० ९ ।
१६५-१५६	भूतेश्वरतीर्थघटेश्वरतीर्थवैद्यनाथतीर्थविजयीतीर्थमाहात्म्यवर्णनम् । श्लो० १० ।
१६६-१५६	पाण्डुरार्यातीर्थमाहात्म्यवर्णनम् । श्लो० ८ ।
१६७-१५६	चण्डेशतीर्थगाणपत्यतीर्थमाहात्म्यवर्णनम् । श्लो० ८ ।
१६८-१५७	वार्त्रघ्नीनदीमाहात्म्यवृत्तान्तवर्णनम् । श्लो० ७१ ।
१६९-१५८	वाराहतीर्थमाहात्म्यवर्णनम् । श्लो० ११ ।
१७०-१५८	साभ्रमतीसंगमतीर्थमाहात्म्यवर्णनम् । श्लो० ५ ।
१७१-१५८	संगमस्थछत्तीर्थमाहात्म्यवर्णनम् । श्लो० ४ ।
१७२-१५८	नीलकण्ठतीर्थमाहात्म्यवर्णनम् । श्लो० ४ ।
१७३-१५८	दुर्गासाभ्रमतीसमुद्रसंगमतीर्थमाहात्म्यवर्णनम् । श्लो० ६ ।
१७४-१५९	श्रीनृसिंहव्रतनृसिंहतीर्थमाहात्म्यवर्णनम् । श्लो० ९८ ।
१७५-१६०	भगवद्गीताप्रथमाध्यायमाहात्म्यवर्णनम्, तत्र विष्णुलक्ष्मीसंवादे सुशर्मवृत्तान्तवर्णनम् । श्लो० ५४ ।
१७६-१६१	गीताद्वितीयाध्यायमाहात्म्यम्, तत्र देवशर्मवृत्तान्तवर्णनम् । श्लो० ६२ ।
१७७-१६३	गीतातृतीयाध्यायमाहात्म्यवर्णने जडब्राह्मणवृत्तान्तवर्णनम् । श्लो० ६३ ।
१७८-१६४	गीताचतुर्थाध्यायमाहात्म्यवर्णने वाराणसीस्थभरतकृतावलम्बनतो बदर्याः कन्यात्वप्राप्तिवृत्तान्तवर्णनम् । श्लो० ३८ ।
१७९-१६५	गीतापञ्चमाध्यायमाहात्म्यवर्णने पुरुकुत्सपुरस्थपिंगलब्राह्मणतत्पत्नीवृत्तान्तवर्णनम् । श्लो० २४ ।
१८०-१६५	गीताषष्ठाध्यायमाहात्म्यवर्णने गोदावरीतीरवर्तिप्रतिष्ठानपुरस्थज्ञानश्रुतिराजरैक्वमहार्षिवृत्तान्तवर्णनम् । श्लो० १०५ ।
१८१-१६७	गीतासप्तमाध्यायमाहात्म्यवर्णने पाटलिपुत्रस्थशंकुकर्णब्राह्मणवृत्तान्तवर्णनम् । श्लो० ३४ ।
१८२-१६८	गीताष्टमाध्यायमाहात्म्यवर्णने आमर्दकपुरस्थभावशर्मब्राह्मणवृत्तान्तवर्णनम् । श्लो० ३२ ।

CC-0. In Public Domain. Digitization by eGangotri

अ० प०	विषयाः
१८३–१६८	गीतानवमाध्यायमाहात्म्यवर्णने माहिष्मतीपुरीस्थमाधवब्राह्मणवृत्तान्तवर्णनम् । श्लो० ६० ।
१८४–१६९	गीतादशमाध्यायमाहात्म्यवर्णने काशीपुरीस्थधीरधीविप्रवृत्तान्तवर्णनम् । श्लो० ९९ ।
१८५–१७१	गीतैकादशाध्यायमाहात्म्यवर्णने मेघकरनगरस्थसुनन्दब्राह्मणवृत्तान्तवर्णनम् । श्लो० ११५ ।
१८६–१७३	गीताद्वादशाध्यायमाहात्म्यवर्णने कोल्हापुरस्थसिद्धसमाधिवृत्तान्तवर्णनम् । श्लो० ६२ ।
१८७–१७४	गीतात्रयोदशाध्यायमाहात्म्यवर्णने तुङ्गभद्रानदीतीरवर्तिहरिपुरस्थहरिदीक्षित-ब्राह्मणपत्न्या दुराचाराया वृत्तान्तवर्णनम् । श्लो० ६३ ।
१८८–१७६	गीताचतुर्दशाध्यायमाहात्म्यवर्णने शशशुनीवृत्तान्तवर्णनम् । श्लो० ४५ ।
१८९–१७६	गीतापञ्चदशाध्यायमाहात्म्यवर्णने गौडदेशीयनरसिंहराजस्य तत्सैनिकस्य सरभभेरुण्डस्य च वृत्तान्तवर्णनम् । श्लो० ४८ ।
१९०–१७७	गीताषोडशाध्यायमाहात्म्यवर्णने गुर्जरमण्डलान्तर्गतसौराष्ट्रिकपुरस्थखड्गबाहु-राजवृत्तान्तवर्णनम् । श्लो० ३२ ।
१९१–१७८	गीतासप्तदशाध्यायमाहात्म्यवर्णने खड्गबाहुनृपसुतभृत्यस्य दुःशासनस्य वृत्तान्तवर्णनम् । श्लो० २७ ।
१९२–१७८	गीताष्टादशाध्यायमाहात्म्यवर्णने इन्द्रवृत्तान्तवर्णनम् । श्लो० ६३ ।
१९३–१८०	श्रीमद्भागवतमाहात्म्यवर्णनम्, तत्र सूतशौनकसंवादे नारदसनत्कुमारसंवादः, नारदेन भक्तिज्ञानवैराग्यवृत्तान्तकथनम्, तत्र कलिदोषेण ज्ञानवैराग्ययोर्वार्द्धक्यम्, भक्त्याश्च वृन्दावनप्रभावेण यौवनम्, भक्तिनारदसमागमे भक्त्या नारदाग्रे स्वदुःखवृत्तान्तनिवेदनम् । श्लो० ८४ ।
१९४–१८१	नारदेन भक्तिं सान्त्वयित्वा तद्दुःखनिवारणार्थमुपायं चिन्तयित्वा नारदस्य सनकादिसमीपं प्रत्यागमनम्, सनकादिभिर्ज्ञानवैराग्ययोर्बलप्राप्तये भागवतालापकरणोपदेशकरणम्, तत्र भागवतस्य श्रैष्ठ्यवर्णनम् । श्लो० ७५ ।
१९५–१८२	कुमाराणामुपदेशान्नारदस्य गङ्गाद्वारसमीपस्थकामदापुरे भृग्वादिभिः सह गमनम्, कुमारैर्भागवतमाहात्म्यवर्णनम्, भागवतसप्ताहपठनमाहात्म्यवर्णनम्, भगवतोद्धवाय भागवतोपदेशकरणम्, नारदाद्यैर्भागवतसप्ताहकरणम्, तत्र भक्तेरागमनम्, कुमारैर्भक्तेः स्थानदानम् । श्लो० ७८ ।
१९६–१८४	भागवतमाहात्म्यवर्णने गोकर्णवृत्तान्तवर्णनम्, तत्र तुङ्गभद्रानदीतीरवर्तिकोहलपुरस्थस्यात्मदेवब्राह्मणस्य पुत्राप्राप्तिखिन्नतया वनं गतस्य सिद्धेन सह समागमः, सिद्धेन तस्मै पुत्रप्राप्त्यर्थं फलदानम्, आत्मदेवेन धुन्धुलीनाम्न्यै स्वपत्न्यै फलसमर्पणम्, धुन्धुल्या प्रसूतिदुःखभीतया पतिं वञ्चयित्वा गुर्विणीवेषं विधाय अङ्गणस्थाया गोः फलदानम्, स्वभगिन्यां प्रसूतायां तस्याः पुत्रमादाय स्वस्याः प्रसूतिप्रसिद्धीकरणम्, तस्य पुत्रस्य धुन्धुकारिनामकरणम्, मासत्रयानन्तरं धेनोः सकाशाद्गोकर्णपुत्रप्रसूतिः, धुन्धुकारिणा पितृपीडनम्, गोकर्णपुत्रेणात्मदेवस्य सान्त्वनम्, गोकर्णोपदेशादात्मदेवस्य वनं गत्वा सत्सङ्गेन मुक्तिप्राप्तिः । श्लो० ८७ ।
१९७–१८६	धुन्धुकारिपीडिताया धुन्धुल्याः कूपे पतित्वा मरणम्, गोकर्णस्य तां निर्हृत्य तीर्थयात्रार्थं गमनम्, धुन्धुकारिणो वेश्याभिर्धनलोभेन वधकरणम्, तस्य पैशाच्यप्राप्तिश्च, कदाचित्तीर्थयात्रां विधाय गृहं प्रत्यागतेन गोकर्णेन स्वभ्रातुः पैशाच्यावस्थानिरीक्षणम्, तदुपरि गोकर्णेन तीर्थजलप्रक्षेपात्तस्य वागुत्पत्तौ पिशाचेनात्मवृत्तान्तवर्णनम्, धुन्धुकारिणो मुक्त्युपायार्थं गोकर्णेन ब्राह्मणविज्ञापनम्, ब्राह्मणस्तन्मुक्त्युपायचिन्तनाय सूर्यस्तुतिकरणम्, सूर्येण द्विजान्प्रति धुन्धुकारिणो विमुक्तये भागवतसप्ताहाज्ञाकरणम्, सूर्याज्ञया गोकर्णद्वारा भागवतसप्ताहे संपूर्णे धुन्धुकारिणो मोक्षप्राप्तिः, भागवतसप्ताहश्रवणायागतानामन्येषां द्विजानां विष्णुसारूप्यमुक्तिप्राप्तिपुरःसरं गोलोकप्राप्तिवर्णनम् । श्लो० ११६ ।
१९८–१८८	सप्ताहपठनश्रवणविधिवर्णनम्, नारदसनत्कुमारादिसंवादे प्रचलति सत्यकस्मात्तत्र शुकागमनम्, शुकागमनोत्तरं विष्णुशङ्करादीनामागमनम्, प्रह्लादादिकृतनृत्यगीतादिसमारम्भः, तत्र भक्तिज्ञानवैराग्याणां नवरूपप्राप्तिपुरःसरं नर्तनम्,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अ० प०	विषयाः
	सप्ताहयज्ञेन प्रसन्नेन भगवता वरप्रदानम्, शौनकस्य भागवतस्य निर्माणत आरभ्य सप्ताहप्रवृत्तिकालविषयकशङ्कायां निर्माणकालावधिसप्ताहप्रवृत्तिकालकथनम्, नैमिषारण्ये शौनकमहासत्रे तीर्थयात्रां पर्यटतो बलरामस्यागमनम्, बलरामेणोच्चासनस्थस्य सूतस्याविचार्य वधकरणम्, मुनीनां वचनमाकर्ण्य बलरामेण सूतपुत्रस्योग्रश्रवसः शास्त्रकथनविषयकसूचनम्, बलरामेण मुनीनां सुखाय बल्वलासुरस्य वधकरणम्, रोमहर्षणपुत्रेणोग्रश्रवसा सूतेनावशिष्टपुराणकथनम्, व्यासेन सप्तदशपुराणानि विरच्य्याप्यतुष्यद्धृदयेन नारदोपदेशाद्भागवतपुराणनिर्माणम्, भागवतमाहात्म्यवर्णनम् । श्लो० १२२ ।
१९९---१९०	कालिन्दीमाहात्म्यवर्णने नारदपर्वतयोः शिविराजस्य संवादे नारदेनेन्द्रकृतयज्ञवृत्तान्तवर्णनम् । श्लो० ४६ ।
२००---१९१	इन्द्रयागसमाप्तिवर्णनपूर्वकं शिवशर्मब्राह्मणगृहे इन्द्रजन्मवर्णनम्, तस्य विष्णुनामकरणम्, तस्य विष्णुशर्मणः पित्रा सहेन्द्रप्रस्थमागत्य तत्र पूर्वजन्मति कृतस्य यागस्य स्मरणम्, पित्रे सर्वपूर्ववृत्तान्तं निवेद्य तत्रत्यतीर्थदर्शनम्, इन्द्रवाक्याच्छिवशर्मणा निगमोद्बोधकतीर्थे स्नानार्थमुद्योगकरणम्, तत्र भिल्लसिंहयोर्मुक्तिदर्शनम्, इन्द्रप्रस्थक्षेत्रमाहाम्यम् । श्लो० ११७ ।
२०१—१९३	शिवशर्मणो निगमोद्बोधकतीर्थे स्नानमात्रेण जातिस्मरत्वप्राप्तिः, शिवशर्मणाऽऽत्मनः पूर्वजन्मवृत्तान्तवर्णनम्, तत्र शरभवैश्यस्य गृहे देवलर्षिगमनम्, देवलेन शरभं प्रति पुत्रप्राप्त्युपायकथनम् । श्लो० १०४ ।
२०२—१९५	दिलीपसुदक्षिणाभ्यां पुत्रप्राप्त्युपायजिज्ञासया वसिष्ठाश्रमं प्रति गमनम्, वसिष्ठेन तस्मै गोसेवाज्ञाकरणम् । श्लो० ५८ ।
२०३--१९६	दिलीपेन गोसेवाकरणम्, तत्कृतां सेवां गवा मायया सिंहमुत्पाद्य परीक्ष्य तस्मै पुत्रप्राप्तिकरवरप्रदानवर्णनम् । श्लो० ६९ ।
२०४—१९८	शरभस्य चण्डिकाराधनम्, चण्डिकावचनाच्छरभस्येन्द्रप्रस्थं प्रत्यागत्य निगमोद्बोधकतीर्थे स्नानदानादिना पुत्रप्राप्तिः, वार्द्धक्ये शरभस्येन्द्रप्रस्थं प्रति गमनम्, तत्र तस्य ज्वरप्राप्तौ केनचित्पान्थेन शिबिकामानाय्य तस्यामारुह्य तेनैव सह स्वगृहं प्रत्यागमने मध्येमार्गं केनचिद्राक्षसेन सह समागमः, तेन राक्षसेन तदीयवाहभक्षणम्, शरभसमीपवर्तिनिगमोद्बोधकतीर्थजलप्राशनेन तस्य राक्षसस्य पूर्वजन्मवृत्तान्तस्मरणम्, शरभराक्षसयोः संवादः, वाहानां पथिकस्य च कुबेरलोकावाप्तिः, राक्षसेन शरभं पृष्ठमारोप्येन्द्रप्रस्थं प्रति प्रत्यावृत्त्यागमनम्, इन्द्रप्रस्थे शरभं प्रति पुत्रस्यागमनम्, तत्र तीर्थे शरभवैश्यस्य मरणाद्वैकुण्ठलोकावाप्तिः, पुत्रस्य च रक्षसा सहेन्द्रप्रस्थे स्थितिकरणम् । श्लो० १४४ ।
२०५---२००	इन्द्रप्रस्थे निगमोद्बोधकतीर्थपङ्कनिमग्नाया गोरुद्धरणं कुर्वतो राक्षसस्याम्बुहस्तिना जलमध्ये नयनान्मृत्युप्राप्त्यनन्तरं मुक्तिः, शरभपुत्रस्य तत्र तीर्थे वासवर्णनम्, दुर्वासःशापाच्छरभपुत्रस्य शिवशर्मत्वप्राप्तिः शिवशर्मणो निगमोद्बोधकतीर्थे देहत्यागान्मुक्तिप्राप्तिः । श्लो० ५१ ।
२०६—२०१	इन्द्रप्रस्थस्थद्वारकामाहात्म्यवर्णनम्, तत्र काम्पिल्यनगरवासिपुष्पेषुब्राह्मणचरित्रम्, तद्रूपमुग्धपौरस्त्रीणां विषभक्षणात्पैशाच्यप्राप्त्यनन्तरं राक्षसीत्वप्राप्तिः । श्लो० ६३ ।
२०७—२०२	तासामुद्धारवर्णनप्रसङ्गेन विमलविप्रवृत्तान्तवर्णनम्, विमलस्येन्द्रप्रस्थस्थनिगमोद्बोधकतीर्थस्नानात्पुत्रवरप्राप्तिः, तत्तीर्थादाश्रमं जिगमिषोर्मध्येमार्गं मित्रप्राप्तिः । श्लो० ६८ ।
२०८—२०४	विमलस्य तेन मित्रेण सह पुनरिन्द्रप्रस्थस्थद्वारकां प्रति गत्वा स्नानेन विष्णुभक्तिप्राप्तिवर्णनम्, मार्गे व्रजतो विमलस्य कमण्डलुगतजलपानाद्राक्षसीनां मुक्तिवर्णनम् । श्लो० ६९ ।
२०९—२०५	इन्द्रप्रस्थस्थकोशलामाहात्म्यवर्णने मुकुन्दद्विजवृत्तान्तवर्णनम्, तत्र मुकुन्दस्य नापितचौरेण वधे कृते वेदायनस्य गुरोरागमनम्, वेदायनेन तन्मातुः शोकापनोदनायात्मस्वरूपवर्णनम् । श्लो० ५९ ।
२१०---२०६	मुकुन्दस्य कोशलातीर्थेऽस्थिपतनाद्विमानमारुह्य मार्गप्रसुप्तयोर्वेदायनगुरुकनिष्ठभ्रात्रोः समीपं प्रत्यागमनम्, गुरुप्रश्ने सति मुकुन्देन स्वानुभूतयमयातनावर्णनम्, कोशलातीर्थेऽस्थिपतनकारणवर्णनम् । श्लो० ७० ।

CC-0. In Public Domain. Digitization by eGangotri

अ० पृ०	विषयाः
२११—२०७	चण्डकनामकचौरनापितस्य ब्राह्मणवधाद्राजाज्ञया शिरश्छेदोनरं सर्पत्वप्राप्तिः, मातपित्रस्थिपेटकं गृहीत्वा गच्छतः कस्यचिद्ब्राह्मणस्य सर्पवासदेशस्थितौ सर्पेणास्थिपेटके प्रवेशकरणम्, ब्राह्मणेन कोशलायामस्थिविसर्जने कृते सति तत्साहचर्येण सर्पस्यापि विसर्जनम्, कोशलाप्रभावेण सर्पस्य मोक्षावाप्तिः। श्लो० ५०।
२१२—२०८	नारायणाश्रमगामिविटूनां तत्रैव वासः, कस्यचिद्विटोर्नारायणाश्रमं गच्छतो नारायणेन विप्रवेषं धृत्वा निवर्तनम्, तस्य विष्णुवचनात्कोशलातीर्थे परावृत्त्यागमनम्, तत्र तनुत्यजां तेषां भगवत्प्रसादान्मुक्तिप्राप्तिवर्णनम्। श्लो० ५५।
२१३—२०९	मधुवनस्थविश्रान्तितीर्थमाहात्म्यवर्णनम्, तत्र किरातनगरस्थकुशलब्राह्मणपत्नीवृत्तान्तवर्णनम्, तत्र तस्या दुश्चरित्रेण गोधात्वप्राप्तिः, तत्पुत्रस्य तदुद्धरणार्थं पितुराज्ञाग्रहणम्। श्लो० ८२।
२१४—२११	पितृवाक्यात्पुत्रेण मातरमुद्दिश्य श्राद्धकरणम्, तेन तस्य मातुः पितामहादीनां च मुक्तिप्राप्तिः, तस्य पितुर्विष्णुलोकगमनम्। श्लो० १११।
२१५—२१३	तस्य मुनिपुत्रस्य स्वैरिण्या जन्मग्रहणकारणवर्णनम्, तत्र चन्द्रकृतबृहस्पतिभार्याहरणवृत्तान्तवर्णनम्, तत्र बुधेन तस्य कुण्डत्वप्राप्तिरूपशापदानम्। श्लो० ५८।
२१६—२१४	मधुवनस्थबदरिकाश्रममाहात्म्यवर्णनम्, तत्र मगधदेशस्थदेवदासब्राह्मणचरित्रवर्णनम्, तत्र कलिङ्गराजवृत्तान्तवर्णनम्। श्लो० १०१।
२१७—२१६	इन्द्रप्रस्थान्तर्गतहरिद्वारमाहात्म्यम्, तत्र कालिङ्गश्वपचवृत्तान्तवर्णनम्। श्लो० ४९।
२१८—२१७	इन्द्रप्रस्थस्थपुष्करमाहात्म्यवर्णनम्, तत्र पुण्डरीकवृत्तान्तवर्णनम्, तद्भ्रातुर्भरतस्य पुष्करसेवया विमानावाप्तिवर्णनम्। श्लो० ५४।
२१९—२१८	भरतपुण्डरीकयोः संवादे भरतेनात्मपुण्यं वर्णयित्वा स्वर्गं प्रति गमनम्, पुण्डरीकस्य पुष्करसेवनप्रभावेण तद्गृहे विष्णोः स्थितिः, पुण्डरीकस्य मुक्तिप्राप्तिवर्णनम्। श्लो० ५२।
२२०—२१९	इन्द्रप्रस्थस्थप्रयागतीर्थमाहात्म्यवर्णने नर्मदातीरवर्त्तिमाहिष्मतीस्थमोहिनीवेश्यावृत्तान्तवर्णनम्, तस्याश्च मरणावसरे प्रयागजलपानाद् द्रविडदेशराजस्य वीरवर्मणो भार्यात्वप्राप्तिः। श्लो० ५४।
२२१—२२०	सखीगृहस्थितपुस्तकनिरीक्षणात्तस्याः पूर्वजन्मस्मृतौ भर्त्रा सहेन्द्रप्रस्थस्थप्रयागतीर्थगमनम्, तत्र वीरवर्मतत्पत्नीभ्यां हरिहरस्तोत्रकरणम्, तत्प्रभावात्तयोर्वैकुण्ठावाप्तिवर्णनम्। श्लो० ५३।
२२२—२२१	इन्द्रप्रस्थस्थकाशीमाहात्म्यवर्णनम्, तत्रत्यशिंशपातरुस्थितकाकसर्पयोर्वृत्तान्तवर्णनम्, इन्द्रप्रस्थस्थगोकर्णतीर्थमाहात्म्यवर्णने कर्कटभिल्लभार्याया जरानाम्न्याश्चरित्रकथनम्, इन्द्रप्रस्थस्थशिवकाञ्चीमाहात्म्यवर्णने हेरम्बनामकब्राह्मणवृत्तान्तवर्णनम् नारदस्य शिबिं प्रति शक्रप्रस्थमाहात्म्यमुक्त्वा स्वर्गे गमनम् इन्द्रप्रस्थमाहात्म्यश्रवणफलम्, युधिष्ठिरेणेन्द्रप्रस्थं गत्वा तत्र राजसूययज्ञकरणम्, भीमकुण्डमाहात्म्यकथनम्। श्लो० ९०।
२२३—२२३	नारायणमहामन्त्ररत्नोपदेशवर्णनम् श्लो० ८०।
२२४-२२४	शिवपार्वतीसंवादे भगवद्भक्तिमाहात्म्ये सुदर्शनादिमाहात्म्यवर्णनपूर्वकमङ्कनमाहात्म्यकथनम्। श्लो० ८१।
२२५-२२५	ऊर्ध्वपुण्ड्रमाहात्म्यविधिवर्णनम्। श्लो० ५९।
२२६-२२६	मन्त्रतदर्थोपदेशविधिमाहात्म्यवर्णनम्। श्लो ९३।
२२७-२२८	सविस्तरं मन्त्रार्थोपदेशवर्णने त्रिपाद्विभूतिवर्णनम्। श्लो० ८१।
२२८-२३०	सविस्तरं मन्त्रार्थोपदेशवर्णने परमव्योमादिवर्णनम्। श्लो० १०७।
२२९-२३२	देवसर्गवर्णने विष्णुव्यूहभेदवर्णनम्। श्लो० १८६।
२३०-२३५	विष्णोर्मत्स्यावतारकथावर्णनम्। श्लो० ३३।
२३१-२३५	कूर्मावतारकथावर्णनम्, तत्र दुर्वाससः शापादिन्द्रलक्ष्मीविनाशे विष्णुना देवान्प्रति समुद्रमथनायाज्ञाकरणम्। श्लो० ५१।
२३२-२३६	विष्णोराज्ञया देवदानवैर्मथने समारब्धे सति समुद्रान्महाविषप्रभृतिलक्ष्म्यन्तरत्नोत्पत्तिवर्णनम्। श्लो० ७५।
२३३-२३८	देवादिभिरेकादश्युपवासकरणवर्णनम्। श्लो० २२।
२३४-२३८	द्वादशीमाहात्म्यवर्णनम्। श्लो० ४३।

॥ १८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अ० प०	विषयाः
२३५—२३९	पाषण्डिलक्षणवर्णनम्, शिवस्य कपालभस्मास्थिधारणकारणवर्णनम्। श्लो० ६९।
२३६—२४०	तामसादिशास्त्रपरिगणनम्। श्लो० २७।
२३७—२४१	वराहावतारकथावर्णनम्। श्लो० ३१।
२३८—२४७	नृसिंहप्रादुर्भावकथावर्णनम्। श्लो० १५७।
२३९—२४४	वामनप्रादुर्भाववर्णनम्, तत्र बलिदैत्यपराभूतदेवप्रार्थनया भगवतोऽदितिगर्भप्रवेशः। श्लो० ३१।
२४०—२४५	वामनेन बलेर्भूग्रहणादिवृत्तान्तवर्णनम्। श्लो० ६१।
२४१—२४६	जामदग्न्यावतारकथावर्णनम्। श्लो० ८२।
२४२—२४७	श्रीरामावताररामायणकथावर्णनम्, तत्र रामस्य जन्मप्रभृतिरावणवधोत्तरकालिकायोध्याप्रवेशान्तकथावर्णनम्। श्लो० ३७०।
२४३—२५४	रामस्य राज्याभिषेकादिविश्वरूपदर्शनान्तचरित्रवर्णनम्। श्लो० ५३।
२४४—२५५	रामस्य राज्योपभोगपूर्वकसंपूर्णचरित्रवर्णनम्। श्लो० १००।
२४५—२५७	श्रीकृष्णावतारकथावर्णनम्, तत्र श्रीकृष्णस्य जन्मादिकंसवधान्तकथावर्णनम्। श्लो० ३९२।
२४६—२६४	कृष्णस्योपनयनादिवृत्तवर्णनपूर्वकं मुचुकुन्दमोक्षणान्तकथावर्णनम्। श्लो० ७१।
२४७—२६५	द्वारकाप्रवेशरुक्मिण्यादिहरणवैदर्भसेनाविध्वंसनवर्णनम्। श्लो० ४३।
२४८—२६६	रुक्मिणीविवाहवर्णनम्। श्लो० १९।
२४९—२६६	सत्यापरिणयनवृत्तान्तवर्णनम्। श्लो० ११०।
२५०—२६८	अनिरुद्धविवाहप्रसङ्गेन बाणासुरसङ्ग्रामवर्णनम्। श्लो० ६६।
२५१—२७०	पौण्ड्रकवासुदेवनिग्रहणम्, तत्सुतस्य दण्डपाणेः कृष्णमुद्दिश्य कृत्यापचारे सति कृष्णप्रेरितचक्रदर्शनेन कृत्यया परावृत्त्य वाराणसीनामकदण्डपाणिपुरीदहनम्। श्लो० ४।
२५२—२७१	जरासन्धं भीमद्वारा निहत्य तेन बन्दीकृतानां पार्थिवानां मोचनम्, इन्द्रप्रस्थे शिशुपालवधः, दन्तवक्रस्य युद्धे वधानन्तरं कृष्णस्य नन्दगोकुले सर्वेषां संगमः, पश्चाद्द्वारकायां प्रवेशः, सुदामसत्कारकरणम्, भारतयुद्धवृत्तान्तः, ब्राह्मणबालकसंजीवनम्, कृष्णसन्तानवर्णनम्, मौसलवृत्तान्तवर्णनम्, कृष्णस्य स्वधामगमनम्, कृष्णपत्नीनां चौरैर्हरणम् कृष्णमाहात्म्यवर्णनम्। श्लो० २२।
२५३—२७३	विष्णुपूजाविधानवैष्णवाचारवर्णनम्। श्लो० १८०।
२५४—२७६	रामनाममाहात्म्यवर्णनेऽष्टोत्तरशतनामस्तोत्रवर्णनम्। श्लो० ७२।
२५५—२७८	श्रेष्ठदेवपरीक्षासमये भृगुशापेन महादेवस्य योनिलिङ्गस्वरूपप्राप्तिवर्णनम्, ब्रह्मणोऽपूज्यत्वप्राप्तिवर्णनं च, सर्वदेवेषु विष्णोः श्रैष्ठ्यवर्णनम्, भृगुकृतभगवत्स्तुतिः, पद्मपुराणपठनफलवर्णनम्। श्लो० १३३।

इति पाद्मपुराणान्तर्गतोत्तरखण्डस्थविषयानुक्रमणिका संपूर्णा।

अथ क्रियायोगसारखण्डम्।

अ० प०	विषयाः
१—१	सूतशौनकसंवादे कलिकालिकलोकोद्दिधीर्षया प्रश्ने जैमिनिव्याससंवादवर्णनम्, व्यासेन जैमिनये क्रियायोगसारवर्णनोपक्रमवर्णनम्। श्लो० ३८।
२—१	भगवद्भक्तिवर्णने सृष्ट्यादिवर्णनम्, ब्रह्मकृतविष्णुस्तुतिः, भगवता ब्रह्मणे वैष्णवलक्षणकथनम्। श्लो० ११०।
३—३	गङ्गाद्वारमाहात्म्यवर्णने मनोभद्रराजपुत्रयोर्वृत्तान्तवर्णनम्, तत्र गृध्रेणागत्य तयोः पूर्वजन्मवृत्तान्तवर्णनम्। श्लो० ९८।
४—५	प्रयागमाहात्म्ये प्रणिधिवैश्यवृत्तान्तवर्णनम्, तत्र धनप्रशंसा, प्रणिधिवैश्यभार्याप्राप्तिकामस्य कस्यचिच्छ्वपचस्य प्रयागे स्नानात्प्रणिधिवैश्यरूपावाप्तिः, विष्णोराज्ञया पद्मावत्या एकाकारपतिद्वयेन सह वैकुण्ठगमनम्, तत्र पद्मावतीविष्णुदूतसंवादे बृहद्ध्वजराक्षसभीमकेशराजपत्न्योर्वृत्तान्तः। श्लो० ११४।
५—७	विक्रमराजपुत्रमाधववृत्तान्तवर्णनम्, माधवस्य मृगयार्थं वने गतस्य चन्द्रकलादर्शनम्, चन्द्रकलया प्लक्षद्वीपस्थगुणाकरराजपुत्रीसुलोचनवृत्तान्तवर्णनम्, चन्द्रकलावचनान्माधवस्य श्रेष्ठहयमारुह्य जलधिमुल्लङ्घ्य प्लक्षद्वीपं गत्वा तत्र गन्धिनीगृहेऽवस्थितिकरणम्, मालापुष्पेषु निजकार्यं विलिख्य गन्धिनीद्वारा सुलोचनायै साङ्गुलीयमालाप्रेषणम्, सुलोचनया राजपुत्रवृत्तान्तं पठित्वा स्वप्राप्तिसङ्केतं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अ० प०	विषयाः
	विलिख्य प्रेषणम्,स्नानव्याजेन गन्धिनीगृहमागत्य तत्र माधवदर्शनम्,सुलोचनाया यक्षप्रदक्षिणसङ्केतकाले माधवस्य निद्राप्राप्तिः, प्रचेष्टेन तयोः सङ्केतं विज्ञाय तस्मिन्काले तस्याः सुलोचनाया हरणम्,सुलोचनया प्रचेष्टं प्रति वचनेन वञ्चनम्, प्रचेष्टस्य तत्करकङ्कणं गृहीत्वा स्वगृहं प्रति गमनम्,सुलोचनाया गङ्गासागरसंगमे गमनम्, तत्र सुषेणराजसभायां पुरुषवेषं विधाय सुलोचनाया गमनम्, तत्र वीरवरनाम्ना प्रसिद्धिकरणपूर्वकं तस्य सेवाकरणवर्णनम् । श्लो० २०४ ।
६—११	तत्र वीरवरेण भीमनादनामकगण्डकनाशनम्, गण्डकस्य गङ्गासागरतीर्थे देहपाताद्दिव्यरूपावाप्तिः, वीरवरपृष्टेन गण्डकेन स्वकीयपूर्वजन्मवृत्तान्तं वर्णयित्वा स्वर्गमनम्, राज्ञा सुषेणेन वीरवरेण गण्डको हत इति श्रुत्वा तस्मै जयन्तीनामस्वकन्यादानम्, जयन्त्या सह वीरवरवेषधारिण्याः सुलोचनायास्तपः-करणम्, गङ्गायां तनुत्यागोद्यतस्य प्रचेष्टस्य वीरवराज्ञया कारायां स्थापनम्, गुणाकरेण राज्ञां कन्याहरणं दृष्ट्वा तत्कृते शोककरणम्, विद्याधरस्य सुलोचनाप्राप्तये गङ्गाब्धिसंगमे तनुत्यागोद्यतस्य वीरवरेण निवारणम्, तस्य तत्रैव स्थितिः, माधवस्य निद्रोत्थितस्य शोकपूर्वकं तदर्थं गङ्गासागरसंगमे तनुत्यागोद्यतस्य वीरवरेण सह संभाषणम्, पश्चात्तं तनुत्यागान्निवर्त्यान्तःपुरं गत्वा स्त्रीवेषं विधायात्मनो दर्शनम्, माधवेन तया सह गान्धर्वविवाहकरणम्, तेन सह सुलोचनायाः सुषेणसभां प्रति गमनम्, सुषेणेन माधवाय विवाहविधिना जयन्तीकन्यादानम्, तत्र माधवस्य किंचित्कालं स्थितिः, प्रचेष्टस्य दोषं विचार्य निरसनम्, माधवस्य सांसारिकभोगाननुपभुज्य विरागोत्पत्तौ विश्वकर्मतः शिलामयीं विष्णुमूर्तिं निर्माय तद्भक्तिकरणम्, माधवकृतविष्णुस्तुतिवर्णनम्, माधवस्य मोक्षप्राप्तिवर्णनम् । श्लो० २०४ ।
७—१५	गङ्गामाहात्म्यवर्णने धर्मस्वब्राह्मणवृत्तान्तवर्णनम्, तत्र धर्मस्वेन गङ्गाजलं गृहीत्वा पथि गच्छता बलीवर्दविषाणविदारितस्य कालकल्पस्य मरणं दृष्ट्वा तस्योपरि गङ्गाजलसेचनम्, अग्रे गत्वा यमदूतनिरीक्षणम्, तैः सह धर्मस्वस्य संवादः, यमदूतैर्निजवृत्तान्तनिवेदनम्, विष्णुदूतसंवादवर्णनपूर्वकगङ्गामाहात्म्यवर्णनम्, धर्मस्वेन गङ्गास्तोत्रकरणम्, गङ्गयाविर्भूय धर्मस्वाय वरप्रदानम्, धर्मस्वस्य मोक्षप्राप्तिः । श्लो० १२८ ।
८—१७	गङ्गामाहात्म्यवर्णने शक्रप्रियायाः पद्मगन्धाया वृत्तान्तवर्णनम्, गङ्गायामस्थिपतनात्तस्याः शक्रप्रियत्वकथनम् । श्लो० ११० ।
९—१९	गङ्गामाहात्म्यवर्णने यात्राविधिवर्णनम्, तत्र सत्यधर्मराजविजयाराज्ञ्योर्वृत्तान्तवर्णनम्, तयोर्भेकत्वप्राप्तौ सर्पेण भक्षणेऽपि गङ्गानामग्रहणमात्रेण मुक्तिवर्णनम् । श्लो० १६१ ।
१०—२२	विष्णुपूजामाहात्म्यवर्णनम्, तत्र पूजाविधानवर्णनम्, तत्रार्यावर्तस्थसुवर्णभूपचरित्रवर्णनम्, वेश्यादत्तं भूपतच्चम्पकपुष्पं निरीक्ष्येश्वरार्पणबुद्ध्या विमुञ्चतो मरणसमये विष्णुदूतैः सुवर्णस्य वैकुण्ठं प्रति नयनम् । श्लो० ७८ ।
११—२३	विष्णुपूजाविधिवर्णनम् । श्लो० १७० ।
१२—२६	फाल्गुनादिवैशाखान्तमासेषु श्रीकृष्णपूजाविधिमाहात्म्यवर्णनम्, अश्वत्थमाहात्म्यवर्णने धनञ्जयनामब्राह्मणवृत्तान्तवर्णनम् । श्लो० १२० ।
१३—२९	ज्येष्ठादिकार्तिकान्तमासेषु भगवत्पूजाविधिमाहात्म्यवर्णनम्, कार्त्तिके पद्मपुष्पमाहात्म्यवर्णने प्रजानामकब्राह्मणवृत्तान्तवर्णनम् । श्लो० १६९ ।
१४—३२	मार्गशीर्षादिमाघान्तमासेषु भगवत्पूजाविधिमाहात्म्यवर्णनम् । श्लो० ४१ ।
१५—३२	भगवन्नाममाहात्म्यवर्णने परशुवैश्यपत्न्या जीवन्त्याख्यायाश्चरित्रवर्णनम्, शुकपाठितरामनामप्रभावात्तस्या मुक्तिः,सर्वनामापेक्षया रामनाम्नो महत्त्ववर्णनम् । श्लो० १०७ ।
१६—३४	हरिभक्तिमाहात्म्यवर्णने चक्रिकनामकशबरवृत्तान्तवर्णनम्, तस्य हरये मुखस्थफलसमर्पणतीव्रभक्त्या हरिप्रसादान्मुक्तिप्राप्तिवर्णनम् । श्लो० ५८ ।
१७—३५	भगवद्भक्तिमाहात्म्यवर्णने भद्रतनुब्राह्मणवृत्तान्तवर्णनम्, तत्र तस्य वेश्यारक्तत्वम्, वेश्योपदेशेन वैराग्योत्पत्तौ मार्कण्डेयं प्रति शरणगमनम्, मार्कण्डेयेन दान्तसमीपे तस्य प्रेषणम्, दान्तेन भद्रतनोर्मोहादिलक्षणवर्णनम्, विष्णोरष्टोत्तरशतनामकथनं च, दान्तानुज्ञया भद्रतनुना हरिभक्तिकरणाद्धरेः प्रादु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अ० प०	विषयाः
	भावः, भद्रतनुना भगवत्स्तुतिकरणम्, भगवता भद्रतनोः सख्यकरणम्, दान्तेन गुरुणा भद्रतनोर्भर्त्सनायां कृतायां भद्रतनुना दान्ताय गुरवे भगवतो दर्शनकरणम्, भक्तिफलार्थं देवकृतभारतवर्षप्रशंसा । श्लो० २६५ ।
१८—४०	पुरुषोत्तमजगन्नाथक्षेत्रमाहात्म्यवर्णनम्, कृष्णबलरामसुभद्रादर्शनमहिमा । श्लो० ५५ ।
१९—४१	भगवदर्थे वस्तुसमर्पणमाहात्म्यवर्णने दस्युवृत्तेरुर्वीशुब्राह्मणस्य वृत्तान्तवर्णनम्, विष्णुनैवेद्यमाहात्म्यवर्णने सर्वजनिनामकब्राह्मणवृत्तान्तवर्णनम्, सर्वजनिना स्वप्ने विष्णुं दृष्ट्वा स्तोत्रकरणम्, भगवता सर्वजनेः पूर्वजन्मवृत्तान्तवर्णनम्, भगवता सर्वजनये स्वस्य रोषकराणां तोषकराणां च वर्णनम्, हरिपूजाकर्तृमाहात्म्यवर्णनम् । श्लो० ११७ ।
२०—४३	दानमाहात्म्यवर्णने हास्तिनपुरस्थरतिविदग्धावेश्याक्षेमङ्करीब्राह्मणीहरिशर्मब्राह्मणानां वृत्तान्तवर्णनम्, दानप्रभावात्तेषामुत्तमलोकावाप्तिः, हरिशर्मणोऽन्नदानाभावात्क्षुत्प्राप्तौ विष्णुना तस्य ब्रह्मसमीपे प्रेषणम्, ब्रह्मणा तस्मै विविधदानमाहात्म्यवर्णनम् । श्लो० १६० ।
२१—४६	ब्रह्मणा हरिशर्मणे विविधदानपात्रवर्णनम्, ब्राह्मणपादोदकमाहात्म्यवर्णने भद्रक्रियब्राह्मणचरणोदकस्पर्शात्कस्यचिच्छुनो मुक्तिवर्णनम्, तेन शुना भद्रक्रियायात्मनः पूर्वजन्मवृत्तान्तवर्णनम्, तत्र राजनीतिवर्णनम्, ब्रह्माज्ञया भद्रक्रियस्य दीक्षितं पुत्रं प्रति स्वप्न आविर्भूय दानानुज्ञाकरणम्, दीक्षितेन पुत्रेणान्नजलदानाद्भद्रक्रियस्य मुक्तिः, अन्नजलदानमाहात्म्यवर्णनम् । श्लो० १३४ ।
२२—४९	एकादशीमाहात्म्यवर्णनम्, तत्र पापपुरुषाङ्गविभागवर्णनम्, विष्णुनैकादशीं निर्माय यमलोकस्थपापिजनोद्धरणम्, पापपुरुषायैकादशीदिने निवासायान्नरूपस्थलदानम्, एकादशीव्रतस्य सर्वव्रतापेक्षया श्रेष्ठत्ववर्णनम्, संक्षेपेणैकादशीव्रतविधिवर्णनम् । श्लो० १४८ ॥
२३—५१	एकादशीव्रतमाहात्म्यवर्णने कोचरशनामकभूपतिसुप्राज्ञानामकतत्पत्न्योर्वृत्तान्तवर्णनम्, तत्र शौरिब्राह्मणपृष्ट्या सुप्राज्ञाराज्ञ्या तस्मै स्वस्या राज्ञश्च पूर्वजन्मवृत्तान्तवर्णनम्, पूर्वजन्मानि वेश्यायाः सुप्राज्ञाया जारस्य च कोचरशस्यैकादशीप्रभावाद्यमलोकं गत्वा यमेन सत्कारकरणम्, यमलोकस्थसुकृतिदुष्कृतिजनानुभूतसुखदुःखावस्थावर्णनम्, कोचरशसुप्राज्ञयोरेकादशीव्रतप्रभावाद्वैकुण्ठावाप्तिवर्णनम् । श्लो० १७७ ।
२४—५५	तुलसीवृक्षधात्रीवृक्षमाहात्म्यवर्णनम् । श्लो० ६७ ।
२५—५६	तुलसीमाहात्म्यवर्णने पवित्रब्राह्मणानपत्यब्राह्मणयोश्चरित्रवर्णनम्, तयोर्गृहे लोमशमुनेरागमनम्, ताभ्यां तस्यातिथ्यसत्कारकरणम् लोमशेनातिथिसपर्यामाहात्म्यकथनं, तत्र ज्ञानभद्रयोगिवृत्तान्तवर्णनम्, लोमशस्यपुरो बिलान्निर्गत्यागच्छतः कस्यचिन्मूषिकस्य पवित्रेण घातनम्, तदा लोमशेन तस्य मुखे कर्णयोः शीर्षे च तुलसीस्पर्शनम्, तेन तस्य मूषिकस्य मोक्षप्राप्तिः । श्लो० ८६ ।
२६—५८	कलियुगे वर्तमानानां जनानामवस्थावर्णनम्, कलौ मनःशुद्ध्या भगवते सर्वकर्मसमर्पणवर्णनम्, पाद्मपुराणमाहात्म्यवर्णनम् । श्लो० ५५ ।

इति पाद्मपुराणान्तर्गतक्रियायोगसारखण्डस्थविषयानुक्रमणिका संपूर्णा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति पद्मपुराणस्थविषयानुक्रमणिका समाप्ता ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ श्रीपाद्मे महापुराणे प्रथमं सृष्टिखण्डं प्रारभ्यते ।

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ॐश्रीविष्णवेनमः ॥ ॐस्वच्छंचंद्रावदातंकरिकरमकरक्षोभसंजातफेनं ब्रह्मोद्भूतिप्रसक्तैर्व्रतनियमपरैःसेवितंविप्रमुख्यैः ॥ ॐकारालंकृतेनत्रिभुवनगुरु
णाब्रह्मणादृष्टिपूतं संभोगाभोगरम्यंजलमशुभहरंपौष्करं वः पुनातु ॥ १ ॥ सूतमेकांतमासीनंव्यासशिष्यंमहामतिः॥लोमहर्षणनामावाउग्रश्रवसमाह
तत् ॥२॥ ऋषीणामाश्रमांस्तातगत्वाधर्मान्समासतः ॥ पृच्छतांविस्तराद्ब्रूहियन्मत्तःश्रुतवानसि॥३॥ वेदव्यासान्मयापुत्रपुराणान्यखिलानिच॥ तवा
ख्यातानिप्राप्तानिमुनिभ्योवदविस्तरात्॥४॥प्रयागेमुनिवर्यैश्चयथापृष्टःस्वयंप्रभुः॥ पृष्टेनचानुशिष्टास्तेमुनयोधर्मकांक्षिणः ॥५॥देशंपुण्यमभीप्संतो
विभुनाचहितैषिणा॥सुनाभंदिव्यरूपंचसत्यगंशुभविक्रमम् ॥६॥ अनौपम्यमिदंचक्रंवर्तमानमतंद्रिताः॥पृष्ठतोयातनियमात्पदंप्राप्स्यथयद्धितम्॥७॥
गच्छतोधर्मचक्रस्ययत्रनेमिर्विशीर्यते ॥ पुण्यःसदेशोमंतव्यइत्युवाचस्वयंप्रभुः ॥ ८ ॥ उक्त्वाचैवमृषीन्सर्वानदृश्यत्वमगात्पुनः ॥ गंगावर्तसमाहारो
नेमिर्यत्रव्यशीर्यत ॥९॥ ईजिरेदीर्घसत्रेणऋषयोनैमिषेतदा ॥ तत्रगत्वातुतान्ब्रूहिपृच्छतोधर्मसंशयान् ॥ १० ॥ उग्रश्रवास्ततोगत्वाज्ञानविन्मुनिपुंगवा
न्॥ अभिगम्योपसंगृह्यनमस्कृत्वाकृतांजलिः ॥ ११ ॥ तोषयामासमेधावीप्रणिपातेनतानृषीन् ॥ तचापिसत्रिणःप्रीताःससदस्यामहात्मने ॥ १२ ॥
तस्मैसमेत्यपूजांचयथावत्प्रतिपेदिरे ॥ ऋषयऊचुः ॥ कुतस्त्वमागतःसूतकस्माद्देशादिहागतः ॥ १३ ॥ कारणंचागमेब्रूहिवृंदारकसमद्युते ॥ सूत
उवाच ॥ पित्राहंतुसमादिष्टोव्यासशिष्येणधीमता ॥ १४॥ शुश्रूषस्वमुनीन्गत्वायत्तेपृच्छंतितद्वद ॥ वदंतुभगवंतोमांकथयामिकथांतुयाम् ॥१५॥
पुराणंचेतिहासंवाधर्मानथपृथग्विधान् ॥ तांगिरंमधुरांतस्यशुश्रुवुर्ऋषिसत्तमाः ॥ १६ ॥ अथतेषांपुराणस्यशुश्रूषासमपद्यत ॥ दृष्ट्वातमतिविश्वस्तं
विद्वांसंलौमहर्षणिम् ॥ १७ ॥ तस्मिन्सत्रेकुलपतिस्सर्वशास्त्रविशारदः ॥ शानकोनाममेधावीविज्ञानारण्यकेगुरुः ॥ १८ ॥ इत्थंतद्भावमालंब्यधर्मा
ञ्छुश्रूषुराहतम् ॥ त्वयासूतमहाबुद्धेभगवान्ब्रह्मवित्तमः ॥ १९ ॥ इतिहासपुराणार्थंव्यासःसम्यगुपासितः ॥ दुदोहिथमतिंतस्यत्वंपुराणाश्रयांशु
भाम् ॥ २० ॥ अमीषांविप्रमुख्यानांपुराणंप्रतिसम्प्रति ॥ शुश्रूषाऽऽस्तेमहाबुद्धेतच्छ्रावयितुमर्हसि ॥२१॥ सर्वेहीमेमहात्मानोनानागोत्राःसमागताः ॥
स्वान्स्वानंशान्पुराणोक्ताञ्छृण्वन्तुब्रह्मवादिनः ॥ २२ ॥ संपूर्णेदीर्घसत्रेस्मिंस्तांस्त्वंश्रावयवैमुनीन् ॥ पाद्मंपुराणंसर्वेषांकथयस्वमहामते ॥ २३ ॥
कथंपद्मंसमुद्भूतंब्रह्मातत्रकथंन्वभूत् ॥ प्रोद्भूतेनकथंसृष्टिःकृतातांतुतथावद ॥२४॥ एवंपृष्टस्ततस्तांस्तुप्रत्युवाचशुभांगिरम् ॥ सूक्ष्मंचन्यायसंयुक्तं
प्राब्रवीद्रौमहर्षणिः ॥ २५ ॥ प्रीतोऽस्म्यनुगृहीतोऽस्मिभवद्भिरिहचोदनात् ॥ पुराणाथपुराणज्ञैःसर्वधर्मपरायणैः ॥२६॥ यथाश्रुतंसुविख्यातंतत्सर्वं
कथयामिवः ॥ धर्मएषतुसूतस्यसद्भिर्दृष्टः सनातनः ॥ २७ ॥ देवतानामृषीणांचराज्ञांचामिततेजसाम् ॥ वंशानांधारणंकार्यंस्तुतीनांचमहात्मनाम्

CC-0. In Public Domain. Digitization by eGangotri

॥ २८ ॥ इतिहासपुराणेषुदृष्टायेब्रह्मवादिनः ॥ नहिवेदेष्वधीकारः कश्चित्सूतस्यदृश्यते ॥ २९ ॥ वैन्यस्यहिपृथोर्यज्ञेवर्त्तमानेमहात्मनः ॥
मागधश्चैवसूतश्चतमस्तौतांनरेश्वरम् ॥ ३० ॥ तुष्टेनाथतयोर्दत्तोवरोराज्ञामहात्मना ॥ सूतायसूतविषयोमगधोमागधायच ॥ ३१ ॥ तत्रसूत्यांस
मुत्पन्नः सूतोनामेहजायते ॥ ऐन्द्रेसत्रेप्रवृत्तेतुग्रहयुक्तेबृहस्पतौ ॥३२॥ तमेवेंद्रंबार्हस्पत्यतत्रसूतोव्यजायत ॥ शिष्यहस्तेनयत्पृक्तमभिभूतंगुरोर्हविः
॥ ३३ ॥ अधरोत्तरधारेणजज्ञेतद्वर्णसंकरम् ॥ येऽत्रक्षत्रात्समभवन्ब्राह्मण्याश्चवयोनितः ॥ ३४ ॥ पूर्वेणैवतुसाधर्म्याद्वैधर्मास्तेप्रकीर्तिताः ॥
मध्यमोह्येषसूतस्यधर्मः क्षेत्रोपजीविनः ॥ ३५ ॥ पुराणेष्वधिकारोमेविहितोब्राह्मणैरिह ॥ दृष्ट्वाधर्ममहंपृष्टोभवद्भिर्ब्रह्मवादिभिः ॥ ३६ ॥
तस्मात्सम्यग्भुविब्रूयांपुराणमृषिपूजितम् ॥ पितॄणांमानसीकन्यावासवंसमपद्यत ॥ ३७ ॥ अपध्याताचपितृभिर्मत्स्यगर्भेबभूवसा ॥ अरणीवहुताश
स्यनिमित्तंपुण्यजन्मनः ॥ ३८ ॥ तस्यांबभूवपूतात्मामहर्षिस्तुपराशरात् ॥ तस्मैभगवतेकृत्वानमः सत्याय वेधसे ॥ ३९ ॥ पुरुषायपुराणायब्रह्म
वाक्यानुवर्तिने ॥ मानवच्छद्मरूपायविष्णवेशंसितात्मने ॥ ४० ॥ जातमात्रंचयंवेदउपतस्थेससंग्रहः ॥ मतिमंथानमाविध्ययेनासौश्रुतिसागरात्॥
॥ ४१ ॥ प्रकाशोजनितोलोकेमहाभारतचंद्रमाः ॥ भारतंभानुमान्विष्णुर्यदिनस्युरमीत्रयः ॥ ४२ ॥ ततोऽज्ञानतमोंधस्यकावस्थाजगतोभवेत् ॥
कृष्णद्वैपायनंव्यासंविद्धिनारायणंप्रभुम् ॥ ४३ ॥ कोह्यन्यः पुंडरीकाक्षान्महाभारतकृद्भवेत् ॥ तस्मादहमुपाश्रौषंपुराणंब्रह्मवादिनः ॥ ४४ ॥
सर्वज्ञात्सर्वलोकेषुपूजितादीप्ततेजसः ॥ पुराणंसर्वशास्त्राणांप्रथमंब्रह्मणास्मृतम् ॥ ४५ ॥ उत्तमंसर्वलोकानांसर्वज्ञानोपपादकम् ॥ त्रिवर्गसाधनंपु
ण्यंशतकोटिप्रविस्तरम् ॥ ४६ ॥ निःशेषेषुचलोकेषुवाजिरूपेणकेशवः ॥ ब्रह्मणस्तुसमादेशाद्वेदानाहृतवानसौ ॥ ४७ ॥ अंगानिचतुरोवेदान्पुरा
णन्यायविस्तरम् ॥ असुरेणाखिलंशास्त्रमपहृत्यात्मसात्कृतम् ॥ ४८ ॥ मत्स्यरूपेणाजहारकल्पादावुदकार्णवे ॥ अशेषमेतदवददुदकांतर्गतो
विभुः ॥ ४९ ॥ श्रुत्वाजगादचमुनीन्प्रतिवेदांश्चतुर्मुखः ॥ प्रवृत्तिस्सर्वशास्त्राणांपुराणस्याभवत्तदा ॥ ५० ॥ कालेनाग्रहणंदृष्ट्वापुराणस्यतदाविभुः ॥
व्यासरूपस्तदाब्रह्मासंग्रहार्थंयुगेयुगे ॥ ५१ ॥ चतुर्लक्षप्रमाणेनद्वापरेद्वापरेजगौ ॥ तदाष्टादशधाकृत्वाभूलोकेऽस्मिन्प्रकाशितम् ॥ ५२ ॥ अद्या
पिदेवलोकेषुशतकोटिप्रविस्तरम् ॥ तदेवात्रचतुर्लक्षंसंक्षेपेणनिवेशितम् ॥ ५३ ॥ प्रवक्ष्यामिमहापुण्यंपुराणंपाद्मसंज्ञितम् ॥ सहस्रंपञ्चपञ्चाशत्पंच
खण्डैस्समन्वितम् ॥ ५४॥ तत्रादौसृष्टिखण्डंस्याद्भूमिखण्डंततः परम् ॥स्वर्गखण्डंततः पश्चात्ततः पातालखण्डकम् ॥ ५५॥ पञ्चमंचततः ख्यात
मुत्तरंखण्डमुत्तमम् ॥ एतदेवमहापद्ममुद्भूतंयन्मयंजगत् ॥५६॥ तद्वृत्तान्ताश्रयंयस्मात्पाद्ममित्युच्यतेततः ॥ एतत्पुराणममलंविष्णुमाहात्म्यनिर्मलम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ५७ ॥ देवदेवोहरिर्यद्वैब्रह्मणेप्रोक्तवान्पुरा ॥ ब्रह्मणाभिहितंपूर्वंयावन्मात्रमरीचये ॥ ५८ ॥ एतदेवचवैब्रह्मापाद्मंलोकेजगादवै ॥ सर्वभूताश्रयंतच्चपाद्म
मित्युच्यतेबुधैः ॥ ५९ ॥ पाद्मंतत्पंचपंचाशत्सहस्राणीहपठ्यते ॥ पंचभिःपर्वभिःप्रोक्तंसंक्षेपाद्व्यासकारितात् ॥ ६० ॥ पौष्करंप्रथमंपर्वयत्रो
त्पन्नः स्वयंविराट् ॥ द्वितीयंतीर्थपर्वस्यात्सर्वग्रहगणाश्रयम् ॥ ६१ ॥ तृतीयपर्वग्रहणाराजानोभूरिदक्षिणाः ॥ वंशानुचरितंचैवचतुर्थेपरिकीर्तितम्
॥ ६२ ॥ पंचमेमोक्षतत्वंचसर्वतत्वंनिगद्यते ॥ पौष्करेनवधासृष्टिः सर्वेषांब्रह्मकारिता ॥ ६३ ॥ देवतानांमुनीनांचपितृसर्गस्तथापरः ॥ द्वितीयेपर्व
ताश्चैवद्वीपाः सप्तससागराः ॥ ६४ ॥ तृतीयरुद्रसर्गस्तुदक्षशापस्तथैवच ॥ चतुर्थेसंभवोराज्ञांसर्ववंशानुकीर्त्तनम् ॥ ६५ ॥ अन्त्येऽपवर्गसंस्थानंमोक्ष
शास्त्रानुकीर्त्तनम् ॥ सर्वमेतत्पुराणेऽस्मिन्कथयिष्यामिवोद्विजाः ॥ ६६ ॥ इदंपवित्रंयशसोनिधानमिदंपितॄणामतिवल्लभंस्यात् ॥ इदंचदेवस्यसुखायनित्य
मिदंमहापातकभिच्चपुंसाम् ॥ ६७ ॥ इतिश्रीपद्मपुराणेप्रथमेसृष्टिखंडेपुराणावतारेप्रथमोऽध्यायः ॥ १ ॥ सूतउवाच ॥ नमस्येसर्वलोकानांविश्वस्यजगतः
पतिम् ॥ मइमंकुरुतेभावंसृष्टिरूपंप्रधानवित् ॥ १ ॥ लोककृल्लोकतत्वज्ञोयोगमास्थाययोगवित् ॥ असृजत्सर्वभूतानिस्थावराणिचराणिच ॥ २ ॥ तमजंविश्व
कर्माणंचित्पतिंलोकसाक्षिणम् ॥ पुराणाख्यानजिज्ञासुर्व्रजामिशरणंविभुम् ॥ ३ ॥ ब्रह्मविष्णुगिरीशेभ्योनमस्कृत्वासमाहितः ॥ इंद्रायलोकपालेभ्यः सवित्रे
चसमाधिना ॥ ४ ॥ मुनीनांचवरिष्ठायवसिष्ठायमहात्मने ॥ तद्वक्त्रे भाततपसेजातूकर्ण्यायचाक्षुषे ॥ ५ ॥ तस्मैभगवतेनत्वावेदव्यासायवेधसे ॥ पुरुषाय
पुराणायभृगुवाक्यानुवर्तिने ॥ ६ ॥ तस्मादहमुपाश्रौषंपुराणंब्रह्मवादिनः ॥ सर्वज्ञात्सर्वलोकेषुपूजिताद्दीप्ततेजसः ॥ ७ ॥ अव्यक्तंकारणंयत्तन्नित्यंसदसदा
त्मकम् ॥ महदादिविशेषांतंसृजतीतिविनिश्चयः ॥ ८ ॥ अण्डेहिरण्मयेपूर्वंब्रह्मणः सूतिरुत्तमा ॥ अंडस्यावरणंचाद्भिरपामपिचतेजसा ॥ ९ ॥ वायुनातस्य
वायोः खात्तद्भूतादितआवृतम् ॥ भूतादिर्महताचापिअव्यक्तेनावृतोमहान् ॥ १० ॥ प्रादुर्भावश्चलोकानामंडएवोपवर्णितः ॥ नदीनांपर्वतानांचप्रादुर्भावो
ऽनुवर्ण्यते ॥ ११ ॥ मन्वंतराणांसंक्षेपात्कल्पानांचोपवर्णनम् ॥ ब्रह्मवृक्षलयब्रह्मप्रजासर्गोपवर्णनम् ॥ १२ ॥ कल्पानांसंचरश्चैवजगतःस्थापनंतथा ॥
शयनंचहरेरप्सुपृथिव्युद्धरणंपुनः ॥ १३ ॥ दशधाजन्मसंचारोभृगुशापेनकेशवे ॥ सन्निवेशोयुगादीनांसर्वाश्रमविभाजनम् ॥ १४ ॥ स्वर्गस्थानविभा
गश्चमर्त्यानांस्वर्गचारिणाम् ॥ पशूनांपक्षिणांचैवसंभवः परिकीर्त्तितः ॥ १५ ॥ तथानिर्वचनंकल्पंस्वाध्यायस्यपरिग्रहः ॥ प्रतिसर्गाः पुनः प्रो
क्ता ब्रह्मणोबुद्धिपूर्वकाः ॥ १६ ॥ त्रयोऽन्येबुद्धिपूर्वास्तेतथालोकानकल्पयत् ॥ ब्रह्मणोवदनेभ्यश्चभृग्वादीनांसमुद्भवः ॥ १७ ॥ कल्पयोरंतरंप्रोक्तं
प्रतिसंधिश्चसर्गयोः ॥ भृग्वादीनामृषीणांचप्रजासर्गोपवर्णनम् ॥ १८ ॥ वसिष्ठस्यचब्रह्मर्षेर्ब्रह्मत्त्वंपरिकीर्तितम् ॥ स्वायंभुवस्यचमनोस्ततश्चाप्यनुकी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्तनम् ॥ १९ ॥ उक्तोनाभेर्विसर्गश्चरजसश्चमहात्मनः ॥ द्वीपानांचसमुद्राणांपर्वतानांचकीर्तनम् ॥ २० ॥ द्वीपभेदसमुद्राणामन्तर्भावश्चसप्तसु ॥
कीर्त्यन्तेयोजनाग्रेणयेचतत्रनिवासिनः ॥ २१ ॥ तदीयानिचवर्षाणिनदीभिःपर्वतैःसह ॥ जंबूद्वीपादयोद्वीपाःसमुद्रैःसप्तभिर्वृताः ॥२२॥ अंडस्यां
तस्त्विमेलोकाः सप्तद्वीपाचमेदिनी ॥ सूर्याचंद्रमसोश्चारोग्रहाणां ज्योतिषांतथा ॥ २३ ॥ कीर्त्यतेध्रुवसामर्थ्यात्प्रजानांचशुभाशुभम् ॥ ब्रह्मणानि
र्मितःसौरःस्यंदनोऽर्थवशात्स्वयम् ॥२४॥ कल्पितो भगवांस्तेनप्रसर्पतिदिवाकरः ॥ सूर्यादीनांस्यंदनानांध्रुवादेवप्रवर्त्तनम् ॥२५॥ कल्पितःशिंशु
मारश्चयस्यपुच्छेध्रुवःस्थितः॥संभवांतेचसंहारःसंहारांतेचसंभवः॥२६॥देवतानामृषीणांचमनोःपितृगणस्यच ॥नशक्यंविस्तराद्वक्तुमित्युक्तंचसमास
तः॥२७॥ अतीतानागतानांवैसमंस्वायंभुवेनतु ॥ मन्वंतरेषुदेवानांप्रजेशानांचकीर्तनम् ॥२८॥ नैमित्तिकःप्राकृतिकस्तथैवात्यंतिकः स्मृतः॥त्रिविधः
सर्वभूतानांकल्पितःप्रतिसंचरः ॥ २९ ॥ अनावृष्टिर्भास्कराच्च घोरः संवर्त्तकानलः ॥ मेघाश्चैकार्णवायेतुतथारात्रिर्महात्मनः ॥३०॥ संध्यालक्षणमु
द्दिष्टंतथाब्राह्मंविशेषतः॥ भूतानांचापिलोकानांसप्तानामनुवर्णनम् ॥३१॥ संकीर्त्यतेमयाचात्रपापानांरौरवादयः ॥ सर्वेषामेवसत्वानांपरिणामविनि
र्णयः ॥३२॥ ब्रह्मणःप्रतिसर्गश्चसर्वसंहारवर्णनम् ॥ कल्पेकल्पेचभूतानांमहतामपिसंक्षयः॥३३॥ सुसंख्यायचतुर्द्धावैब्रह्मणश्चाप्यनित्यताम् ॥ दौरात्म्यं
चैवभोगानांसंसारस्यचकष्टताम् ॥३४॥ दुर्लभत्वंचमोक्षस्यवैराग्याद्दोषदर्शनम् ॥ व्यक्ताव्यक्तंपरित्यज्य सत्त्वंब्रह्मणिसंस्थितम् ॥३५॥ नानात्वदर्श
नात्सुस्थस्ततस्तदभिवर्त्तते ॥ ततस्तापत्रयातीतोविरूपाख्योनिरंजनः ॥३६॥ यहांविचारणीयहै आनंदंब्रह्मणःप्राप्तोनबिभेतिकुतश्चन॥इतिकृत्यसमुद्दे
शःप्रमाणस्योपवर्णितः ॥३७॥ कीर्त्यतेजगतोयत्रसर्गप्रलयविक्रियाः ॥ प्रवृत्तिश्चापिभूतानांनिवृत्तीनांफलानिच ॥३८॥ प्रादुर्भावोवसिष्ठस्यशक्तेर्ज
न्मतथैवच ॥ सौदासान्निग्रहस्तस्यविश्वामित्रकृतेनच ॥ ३९ ॥ पराशरस्यचोत्पत्तिरदृश्यन्त्यांयथाविभोः ॥ जज्ञेपितॄणांकन्यायांव्यासश्चापियथा
मुनिः ॥४०॥ शुकस्यचयथाजन्मपुत्रस्यसहधीमतः ॥ पराशरस्यविद्वेषोविश्वामित्रकृतोयथा ॥४१॥ वसिष्ठसंभृतश्चाग्निर्विश्वामित्रजिघांसया ॥ संधा
नहेतोर्विभुनाजीर्णःकण्वेनधीमता ॥४२॥ देवेनविप्राविप्राणांविश्वामित्रहितैषिणा॥एकंवेदंचतुःपादंचतुर्धापुनरीश्वरः ॥४३॥ यथाबिभेदभगवान्व्या
सःसर्वेष्वनुग्रहात् तस्यशिष्यप्रशिष्यैश्चशाखाभेदाः पुनः कृताः ॥ ४४ ॥ प्रयागेमुनिवर्यैश्चयथापृष्टः स्वयंप्रभुः ॥ कृष्णेनचानुशिष्टास्ते ॥ ३ ॥
मुनयोधर्मकांक्षिणः ॥ ४५ ॥ एतत्सर्वंयथातत्वमाख्यातंद्विजसत्तमाः ॥ मुनीनांधर्मनित्यानांलोकतंत्रमनुत्तमम् ॥४६॥ ब्रह्मणायत्पुराप्रोक्तंपुलस्त्या
यमहात्मने ॥ पुलस्त्येनाथभीष्मायगंगाद्वारेप्रभाषितम् ॥ ४७ ॥ धन्यंयशस्यमायुष्यंसर्वपापप्रणाशनम् ॥ कीर्तनंश्रवणंचास्यधारणंचविशेषतः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ४८ ॥ सूतेनानुक्रमेणेदंपुराणंसंप्रकाशितम् ॥ ब्राह्मणेषुपुरायच्चब्रह्मणोक्तंसविस्तरम् ॥ ४९ ॥ पादमस्य विपन्सम्यग्योऽधीयीतजितेंद्रियः ॥
तेनाधीतंपुराणंस्यात्सर्वंनास्त्यत्रसंशयः ॥ ५० ॥ योविद्याच्चतुरोवेदान्सांगोपनिषदोद्विजः ॥ पुराणंचविजानाति यः सतस्माद्विचक्षणः ॥ ५१ ॥
इतिहासपुराणाभ्यांवेदंसमुपबृंहयेत्॥बिभेत्यल्पश्रुताद्वेदोमामयंप्रतरिष्यति ॥ ५२ ॥ अधीत्यचैकमध्यायंस्वयंप्रोक्तंस्वयंभुवा॥आपदःप्राप्यमुच्येतय
थेष्टांप्राप्नुयाद्गतिम् ॥ ५३ ॥ पुरापरंपरांवक्तिपुराणंतेनवैस्मृतम् ॥ निरुक्तिमस्ययोवेदसर्वपापैःप्रमुच्यते ॥ ५४ ॥ ऋषयोह्यब्रुवन्सूतंकथंभीष्मेणस
ङ्गतः ॥ ब्रह्मणोमानसःपुत्रः पुलस्त्योभगवानृषिः ॥ ५५ ॥ दुर्लभंदर्शनंयस्यनरैः पापसमन्वितैः ॥ अत्याश्चर्यमिदंसूतक्षत्रियेणकथंमुनिः ॥ ५६ ॥
आराधितोबृहद्भूतस्तन्नोवदमहामते ॥ कीदृशंवातपस्तेनकोवान्योनियमः कृतः ॥ ५७ ॥ येनतुष्टोमुनिर्ब्राह्मस्तथातेनप्रभाषितः॥पर्ववाप्यथपर्वार्धं
समग्रंवाप्रभाषितम् ॥ ५८ ॥ यस्मिन्स्थानेयथादृष्टःपुलस्त्योभगवानृषिः ॥ तन्नोवदमहाभाग कल्याः स्मश्रवणेवयम् ॥ ५९ ॥ ॥ सूतउवाच ॥
यत्रगंगामहाभागासाधूनांहितकारिणी ॥ विभिद्यपर्वतंवेगान्निःसृतालोकपावनी ॥ ६० ॥ गंगाद्वारेमहातीर्थे भीष्मः पितृपरायणः ॥ शुश्रूषुःसुचि
रंकालंमहतांनियमेस्थितः ॥ ६१ ॥ यावद्वर्षशतंसाग्रंपरमेणसमाधिना ॥ ध्यायमानः परंब्रह्मत्रिकालंस्नानमाचरत् ॥ ६२ ॥ पितॄन्देवांस्तर्पयतः
स्वाध्यायेनमहात्मनः ॥ आत्मानंकर्षतश्चास्यतुष्टोदेवःपितामहः ॥ ६३ ॥ उवाचततनयंब्रह्मापुलस्त्यमृषिसत्तमम् ॥ सत्वंदेवव्रतंभीष्मंवीरंकुरुकु
लोद्भवम् ॥ ६४ ॥ तपसःसंनिवर्तस्वकारणंचास्यकीर्त्तय ॥ पितॄन्भक्त्यामहाभागेध्यायमानस्समास्थितः ॥ ६५ ॥ योह्यस्यमनसःकामस्तंसंपादय
माचिरम् ॥ पितामहवचः श्रुत्वा पुलस्त्योमुनिसत्तमः ॥ ६६ ॥ गंगाद्वारमथागत्यभीष्मंवचनमब्रवीत् ॥ वरंवरयभद्रंतेयत्तेमनसिवर्तते ॥ ६७ ॥
तुष्टस्तेतपसावीरसाक्षाद्देवःपितामहः ॥ ब्रह्मणाप्रेषितस्तेऽहंवरान्दास्यामिकांक्षितान् ॥ ६८ ॥भीष्मोऽपितद्वचःश्रुत्वामनःश्रोत्रसुखावहम् ॥ उन्मील्य
नयनेदृष्ट्वापुलस्त्यंपुरतः स्थितम् ॥ ६९ ॥ अष्टांगप्रणिपातेननत्वातंमुनिसत्तमम् ॥ उवाचप्रणतोभूत्वासर्वांगालिंगितावनिः ॥ ७० ॥ अद्यमेसफ
लंजन्मदिनंचेदंसुशोभनम् ॥ भवतश्चरणौदृष्टौजगद्वंद्यौमयात्विह ॥ ७१ ॥ तपसश्चफलंप्राप्तंयद्दृष्टोभगवान्मया ॥ वरप्रदोविशेषेणसंप्राप्तश्चनदी
तटे ॥ ७२ ॥ इयंब्रसीमयाक्लृप्ताआस्यतां सुखदाकृता ॥ अर्घ्यपात्रेतुपालाशेदूर्वाक्षतशुभैःकुशैः ॥ ७३ ॥ सर्षपैश्चदधिक्षौद्रैर्यवैश्चपयसासह ॥ अष्टां
गोह्येपनिर्दिष्टोह्यर्घोहिमुनिभिःपुरा ॥ ७४ ॥ श्रुत्वैतद्वचनंतस्यभीष्मस्यामिततेजसः ॥ उपविष्टोब्रह्मसुतःपुलस्त्योभगवानृषिः ॥ ७५ ॥ विष्टरं
सहपाद्येनअर्घपात्रंमुदान्वितः ॥ जुजोषभगवान्प्रीतःसदाचारेणतेनतु ॥ ७६ ॥ पुलस्त्य उवाच ॥ सत्यवान्दानशीलोऽसिसत्यसंधिर्नरेश्वरः ॥ ह्री

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मान्मैत्रःक्षमाशीलोविक्रांतःशत्रुशासने ॥ ७७ ॥ धर्मज्ञस्त्वंकृतज्ञस्त्वंदयावान्प्रियभाषिता ॥ मान्यमानयिताविज्ञोब्रह्मण्यःसाधुवत्सलः ॥ ७८ ॥
तुष्टस्तेहंसदावत्सप्रणिपातपरस्यवै ॥ प्रब्रूहित्वंमहाभागकथनंतेवदाम्यहम् ॥७९॥ भीष्म उवाच ॥ भगवन्भगवान्ब्रह्माकस्मिन्कालेस्थितोविभुः ॥
सृष्टिंचकारवैपूर्वंदेवादीनांवदस्वमे ॥ ८० ॥ स्थितिंवाभगवान्विष्णुःकथंरुद्रस्तुनिर्मितः ॥ कथंवाऋषयोदेवास्सृष्टास्तेनमहात्मना ॥ ८१ ॥ कथं
पृथ्वीकथंव्योमकथंचेमेतुसागराः ॥ कथंद्वीपाःपर्वताश्चग्रामारण्यपुराणिच ॥८२॥ मुनीन्प्रजापतींश्चैवसप्तर्षीन्प्रवरानपि ॥ वर्णान्वायुंपुरास्थानंगं
धर्वान्यक्षराक्षसान् ॥८३॥ तीर्थानिसरितोवाथसूर्यादीन्ग्रहतारकान् ॥ यथाससर्जभगवांस्तथामेत्वंवदस्वह ॥ ८४ ॥ पुलस्त्य उवाच ॥ परःपराणां
परमःपरमात्मापितामहः ॥ रूपवर्णादिरहितोविशेषणविवर्जितः ॥ ८५ ॥ अपक्षयविनाशाभ्यांपरिणामर्द्धिजन्मभिः ॥ गुणैर्विवर्जितःसर्वैःसभाती
तिहिकेवलम् ॥ ८६ ॥ सर्वत्रासौसमश्चापिवसन्ननुपमोमतः ॥ भावयन्ब्रह्मरूपेणविद्वद्भिःपरिपठ्यते ॥ ८७ ॥ तंगुह्यंपरमंनित्यमजमक्षयमव्ययम् ॥
तथापुरुषरूपेणकालरूपेणसंस्थितम् ॥ ८८ ॥ तंनत्वाहंप्रवक्ष्यामियथासृष्टिंचकारह ॥ पूर्वंतुपद्मशयनादुत्थायजगतःप्रभुः ॥ ८९ ॥ गुणव्यंजनसं
भूतःसर्गकालेनराधिप ॥ सात्त्विकोराजसश्चैवतामसश्चत्रिधामहान् ॥ ९० ॥ प्रधानतत्वेनसमंतथाबीजादिभिर्वृतः ॥ वैकारिकस्तैजसश्चभूतादिश्चैव
तामसः ॥ ९१ ॥ त्रिविधोयमहंकारोमहत्तत्त्वादजायत ॥ भूतेंद्रियाणांपंचानांतथाकर्मेंद्रियैःसह ॥ ९२ ॥ पृथिव्यापस्तथातेजोवायुराकाशमेवच॥एकै
कशःस्वरूपेणकथयामियथोत्तरम् ॥९३॥ शब्दमात्रमथाकाशंभूतादिःखंसमावृणोत् ॥ अथाकाशंविकुर्वाणंस्पर्शमात्रंससर्जह ॥ ९४ ॥ बलवानेषवै
वायुस्तस्यस्पर्शोगुणोमतः॥आकाशंशब्दमात्रंतुस्पर्शमात्रंसमावृणोत् ॥ ९५ ॥ ततोवायुर्विकुर्वाणोरूपमात्रंससर्जह ॥ ज्योतीरूपन्तुतद्वायुस्तद्रूपगुणमु
च्यते ॥९६॥ स्पर्शरूपस्तुवैवायूरूपमात्रंसमावृणोत् ॥ ज्योतिश्चापिविकुर्वाणंरसमात्रंससर्जह ॥९७॥ संभवंतिततोंभांसिरूपमात्रंसमावृणोत् ॥ विकु
र्वाणानिचांभांसिगंधमात्रंससर्जिरे ॥ ९८ ॥ संघातोजायतेतस्मात्तस्यगंधोमतोगुणः ॥ तैजसानींद्रियाण्याहुर्देवावैकारिकादश ॥९९॥ एकादशम्मन
श्चात्रदेवावैकारिकाःस्मृताः॥त्वक्चक्षुर्नासिकाजिह्वाश्रोत्रमत्रचपंचमम् ॥१००॥एतेषांतुमतंकृत्यंशब्दादिग्रहणंपुनः ॥ वाक्पाणिपादपायूनिचोपस्थं
तत्रपञ्चमम्॥१०१॥विसर्गशिल्पगत्युक्तिर्गुणाएषांविपर्ययात्॥आकाशवायुतेजांसिसलिलंपृथिवीतथा १०२ शब्दादिभिर्गुणैर्वीरयुक्तानीत्युत्तरोत्तरैः
शांताघोराश्चमूढाश्चविशेषास्तेनतेस्मृताः ॥१०३॥ नानावीर्याःपृथग्भूतास्ततस्तेसंहतिंविना ॥ नाशक्नुवन्प्रजाःस्रष्टुमसमागम्यकृत्स्नशः ॥१०४॥
समेत्यान्योन्यसंयोगात्परस्परसमाश्रयात्॥एकसंघातलक्षाश्चसंप्राप्यैक्यमशेषतः॥१०५॥पुरुषाधिष्ठितत्वाच्चअव्यक्तानुग्रहणेतथा॥महदादयोविशेषां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ताह्यंडमुत्पादयंतिवै॥१०६॥तत्क्रमेणविवृत्तंतुजलबुद्बुदवत्समम्॥तत्राव्यक्तस्वरूपोऽसौव्यक्तरूपीजनार्दनः॥१०७॥ब्रह्माब्रह्मस्वरूपेणस्वयमेवव्यव
स्थितः ॥ मेरुरुल्वमभूत्तस्यजरायुश्चमहीधराः॥१०८॥गर्भोदकंसमुद्राश्चतस्यासंश्चमहात्मनः॥तत्रद्वीपास्समुद्राश्चसज्योतिर्लोकसंग्रहः ॥ १०९ ॥
तस्मिन्नंडेऽभवन्वीरसदेवासुरमानुषाः ॥ वारिवह्न्यनिलाकाशैर्वृतैर्भूतादिनाबहिः ॥११०॥ वृतंदशगुणैरंडंभूतादिर्महतातथा ॥ अव्यक्तेनावृतोराजंस्तैः
सर्वैःसहितोमहान् ॥ १११ ॥ एभिरावरणैःसर्वैःसर्वभूतैश्चसंयुतम् ॥ नारिकेलफलंयद्वद्वीजंबाह्यदलैरिव ॥ ११२ ॥ ब्रह्मास्वयंचजगतोविसृष्टौसंप्रवर्त्तते
॥ सृष्टिंचपात्यनुयुगंयावत्कल्पविकल्पना ॥ ११३॥ ससंज्ञांयातिभगवानेकएवजनार्दनः ॥ सत्वभुग्गुणवान्देवोह्यप्रमेयपराक्रमः ॥११४॥ तमोद्रेकंचक
ल्पांतेरूपंरौद्रंकरोतिच ॥ राजेंद्राखिलभूतानिभक्षयत्यतिभीषणः ॥ ११५ ॥ भक्षयित्वाचभूतानिजगत्येकार्णवीकृते ॥ नागपर्यंकशयनेशेतेसर्वस्व
रूपधृक् ॥ ११६ ॥ प्रबुद्धश्च पुनः सृष्टिंप्रकरोतिचरूपधृक् ॥ सृष्टिस्थित्यंतकरणाद्ब्रह्मविष्णुशिवात्मकः ॥ ११७ ॥ स्रष्टासृजतिचात्मानंविष्णुःपाल्यं
चपातिच ॥ उपसंह्रियतेचापिसंहर्त्ताचस्वयं प्रभुः ॥ ११८ ॥ पृथिव्यापस्तथातेजोवायुराकाशमेवच ॥ सएवसर्वभूतेशोविश्वरूपोयतोऽव्ययः॥
॥ ११९ ॥ सर्गादिकंततोऽस्यैवभूतस्थमुपकारकम् ॥ सएवसृज्यःसचसर्गकर्त्तासएवपाल्यंप्रतिपाल्यतेयतः ॥ ब्रह्माद्यवस्थाभिरशेषमूर्त्तिर्ब्रह्मावरिष्ठो
वरदोवरेण्यः ॥ १२० ॥ इतिश्रीपद्मपुराणेप्रथमेसृष्टिखंडे पुराणावतारेद्वितीयोऽध्यायः ॥२॥ भीष्म उवाच ॥ निर्गुणस्याप्रमेयस्यशुद्धस्याथमहा
त्मनः ॥ कथंसर्गादिकर्त्तृत्वंब्रह्मणोह्युपपद्यते ॥ १ ॥ पुलस्त्यउवाच ॥ शक्तयः सर्वभावानामचिंत्या ज्ञानगोचराः ॥ यत्ततोब्रह्मणस्तास्तुसर्गाद्या
भावशक्तयः ॥ २ ॥ उत्पन्नःप्रोच्यतेविद्वान्नित्यएवोपचारतः ॥ निजेनतस्यमानेनआयुर्वर्षशतं स्मृतम् ॥ ३ ॥ तत्पराख्यंपरार्द्धंचतदर्द्धंपरिकीर्ति
तम् ॥ काष्ठापंचदशाख्यातानिमेषानृपसत्तम ॥ ४ ॥ काष्ठास्त्रिंशत्कलात्रिंशत्कलामौहूर्त्तिकोविधिः ॥ तावत्संख्यैरहोरात्रंमुहूर्त्तैर्मानुषंस्मृतम् ॥
॥ ५ ॥ अहोरात्राणितावंति मासः पक्षद्वयात्मकः ॥ तैष्षड्भिरयनंवर्षमयनेदक्षिणोत्तरे ॥ ६ ॥ अयनंदक्षिणंरात्रिर्देवानामुत्तरं दिनम् ॥ दिव्यैर्व
र्षसहस्रैस्तुकृतत्रेतादिसंज्ञितम् ॥७॥ चतुर्युगंद्वादशभिस्तद्विभागंनिबोधमे ॥ चत्वारित्रीणिद्वेचैकंकृतादिषुयथाक्रमम् ॥ ८ ॥ दिव्याब्दानांसहस्राणि
युगेष्वाहुःपुराविदः ॥ तत्प्रमाणैःशतैःसंध्या पूर्वातत्राभिधीयते ॥ ९ ॥ संध्यांशकश्चतत्तुल्योयुगस्यानंतरोहियः ॥ संध्यासंध्यांशयोरंतःकालोयो
नृपसत्तम ॥१०॥युगाख्यःसतुविज्ञेयःकृतत्रेतादिसंज्ञितः॥ कृतंत्रेताद्वापरंचकलिश्चैवचतुर्युगम्॥११॥ प्रोच्यतेतत्सहस्रंतुब्रह्मणोदिवसंनृप॥ ब्रह्मणोदिव
सेराजन्मनवश्चचतुर्दश ॥१२ ॥भवंतिपरिमाणंचतेषांकालकृतंशृणु॥सप्तर्षयःसुराःशक्रोमनुस्तत्सूनवोनृप ॥१३॥एककालेहिसृज्यंतेसंह्रियंतेचपूर्ववत्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुर्युगानांसंख्यातासाधिकाह्येकसप्ततिः ॥ १४ ॥ मन्वंतरंमनोःकालःसुरादीनांचपार्थिव ॥ अष्टौशतसहस्राणिदिव्ययासंख्यया स्मृतः ॥ १५ ॥
द्विपंचाशत्तथान्यानिसहस्राण्यधिकानिच ॥ त्रिंशत्कोट्यस्तुसंपूर्णाःसंख्याताःसंख्ययानृप ॥ १६ ॥ सप्तषष्टिस्तथान्यानिनियुतानिमहामते ॥ विं
शतिश्चसहस्राणिकालोयमधिकंविना ॥ १७ ॥ मन्वंतरस्यसंख्येयंमानुषैरहिवत्सरैः ॥ चतुर्दशगुणोह्येषकालोब्राह्ममहःस्मृतम् ॥ १८ ॥ ब्राह्मोनैमि
त्तिको नाम तस्यांतेप्रतिसंचरः ॥ तदाहिदह्यतेसर्वंत्रैलोक्यंभूर्भुवादिकम् ॥ १९ ॥ जनंप्रयांतितापार्त्तामहर्लोकनिवासिनः ॥ एकार्णवेतुत्रैलोक्येब्र
ह्माब्रह्मविदांवरः ॥२०॥ भोगिशय्यागतःशेतेत्रैलोक्यग्रासबृंहितः ॥ जनस्थैर्योगिभिर्देवश्चित्यमानोजगद्विभुः ॥ २१ ॥ तत्प्रमाणांहितांरात्रिंतदंतेसृ
जतेपुनः ॥ एवंतुब्रह्मणोवर्षमेवंवर्षशतंचतत् ॥ २२ ॥ शतंहितस्यवर्षाणांपरमायुर्महात्मनः ॥ एकमस्यव्यतीतंतुपरार्धंब्रह्मणोऽनघ ॥ २३ ॥ तस्या
न्तेऽभून्महाकल्पः पाद्म इत्यभिविश्रुतः ॥ द्वितीयस्यपरार्धस्यवर्तमानस्यवैनृप॥ २४ ॥वाराहइतिकल्पोऽयंप्रथमःपरिकिल्पितः ॥ ब्रह्मानारायणाख्यो
ऽसौकल्पादौभगवान्यथा ॥ २५ ॥ ससर्जसर्वभूतानितदाचक्ष्वमहामुने ॥ पुलस्त्यउवाच ॥ प्रजाःससर्जभगवाननादिस्सर्वसंभवः ॥ २६ ॥ अ
तीतकल्पावसानेनिशासुप्तोत्थितःप्रभुः ॥ सत्वोद्रिक्तस्तथाब्रह्माशून्यंलोकमवैक्षत ॥ २७ ॥ तोयान्तस्समहींज्ञात्वानिमग्नांवारिसंप्लवे ॥ प्रवि
चिंत्यतदुद्धारंकर्तुकामःप्रजापतिः ॥ २८ ॥ विष्णुरूपंतदाज्ञात्वापृथ्वींवोढुंस्वतेजसा ॥ मत्स्यकूर्मादिकांचान्यांवाराहींतनुमाविशत् ॥ २९ ॥वे
दयज्ञमयंरूपमाश्रित्यजगतःस्थितौ ॥ स्थितःस्थिरात्मासर्वात्मा परमात्माप्रजापतिः ॥ ३० ॥ प्रविवेशतदातोयंतोयाधारेधराधरः ॥ निरीक्ष्यतं
तदादेवीपातालतलमागतम् ॥ ३१ ॥ तुष्टावप्रणताभूत्वाभक्तिनम्रावसुंधरा ॥ पृथिव्युवाच ॥ नमस्तेसर्वभूतायनमस्तेपरमात्मने ॥ ३२ ॥ मामु
द्धरास्मादद्यत्वंत्वत्तोऽहंपूर्वमुत्थिता ॥ परमात्मन्नमस्तेस्तुपुरुषात्मन्नमोस्तुते ॥ ३३ ॥ प्रधानव्यक्तरूपायकालभूतायतेनमः ॥ त्वंकर्त्तासर्वभूता
नांत्वंपातात्वंविनाशकृत् ॥ ३४ ॥ सर्गादौ यः परोब्रह्माविष्णुरुद्रात्मरूपधृक् ॥ भक्षयित्वाचसकलंजगत्येकार्णवीकृते ॥ ३५ ॥ शेषेत्व
मेवगोविन्दचिन्त्यमानोमनीषिभिः ॥ भवतोयत्परंरूपंतन्नजानातिकश्चन ॥ ३६ ॥ अवतारेषुयद्रूपंतदर्चन्तिदिवौकसः ॥ त्वामाराध्य परंब्रह्माया
ता मुक्तिंमुमुक्षवः ॥३७॥ वासुदेवमनाराध्यकोहिमोक्षमवाप्स्यति ॥ यद्रूपंमनसाग्राह्यंयद्ग्राह्यंचक्षुरादिभिः ॥३८॥ बुद्ध्याचयत्परिछेद्यंतद्रूपमखिलंत
व ॥ त्वन्मय्यहंत्वदाधारात्वत्सृष्टात्वामुपाश्रिता ॥ ३९ ॥ माधवीमितिलोकोऽयमभिधत्तेततोहिमाम् ॥ एवंसंस्तूयमानस्तुपृथिव्यापृथिवीधरः ॥४०॥ ॥ ५ ॥
सामस्वरध्वनिः श्रीमान्जगर्जपरिघर्घरम्॥ ततःसमुत्क्षिप्यधरांस्वदंष्ट्रयामहावराहःस्फुटपद्मलोचनः ॥ रसातलादुत्पलपत्रसन्निभःसमुत्थितोनीलइवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चलोमहान्॥४१॥ उत्तिष्ठतातेनमुखानिलाहतंतदाप्लवांभोजनलोकसंश्रयान्॥सनंदनादीनपकल्मषान्मुनींश्चकारभूयोऽपिपवित्रतास्पदम् ॥४२॥प्रयां
तितोयानिखुराग्रविक्षतेरसातलेऽधः कृतशब्दसंततिः॥बलाहकानांचततिस्तुतस्यश्वासानिलास्तेपरितःप्रयांति ॥ ४३ ॥उत्तिष्ठतस्तस्यजलार्द्रकुक्षेर्महा
वराहस्यमहींविदार्य॥ विधून्वतोवेदमयंशरीररोंमांतरस्थामुनयोजुषंति॥४४॥जनेश्वराणांपरमेशकेशवप्रभुर्गदाशंखदरासिचक्रधृक्॥प्रभूतिनाशस्थिति
हेतुरीश्वरस्त्वमेवनान्यत्परमंचयत्पदम् ॥४५॥पादेषुवेदास्तवयूपदंष्ट्रादन्तेषुयज्ञाःश्रुतयश्चवक्त्रे ॥हुताशजिह्वोसितनूरुहाणिदर्भाःप्रभोयज्ञपुमांस्त्वमेव
॥४६॥ द्यावापृथिव्योरतुलप्रभावयदंतरंतद्वपुषातवैव ॥ व्याप्तंजगद्व्यापिसमस्तमेतद्धितायविश्वस्यविभोभवत्वम्॥४७॥परमात्मात्वमेवैकोनान्योऽस्ति
जगतःपते ॥४८॥ तवैषमहिमायेनव्याप्तमेतच्चराचर ॥ ज्ञानस्वरूपमखिलंजगदेतदबुद्धयः ॥ ४९ ॥ अर्थस्वरूपंपश्यंतोभ्राम्यंतेतमसःप्लवे ॥ येतुज्ञान
विदश्शुद्धचेतसस्तेऽखिलंजगत् ॥ ५० ॥ ज्ञानात्मकंप्रपश्यंतित्वद्रूपंपरमेश्वर ॥ प्रसीदसर्वभूतात्मन्भवायजगतस्त्विमाम् ॥५१ ॥ उद्धरोर्वीममेयात्मन्नि
मग्नामब्जलोचन ॥ सत्वोद्रिक्तोऽसिभगवन्गोविंदपृथिवीमिमाम् ॥५२ ॥ समुद्धरभवायेशकुरुसर्वजगद्धितं॥एवंसंस्तूयमानश्चपरमात्मामहीधरः॥५३॥
उज्जहारक्षितिंक्षिप्रंन्यस्तवान्समहार्णवे ॥ तस्योपरिजलौघेऽस्यमहतीनौरिवस्थिता ॥५४॥ ततःक्षितिंसमांकृत्वापृथिव्यामचिनोद्गिरीन्॥यथाविभा
गंभगवाननादिःपुरुषोत्तमः ॥ ५५ ॥ भूविभागंततःकृत्वासप्तद्वीपान्यथातथम् ॥ भूराद्यांश्चतुरोलोकान्पूर्ववत्समकल्पयत् ॥५६॥ ॥ ब्रह्मणेविष्णुनापूर्व
मेतदेवप्रदर्शितम्॥तुष्टेनदेवदेवेनत्वंदेवःपुरुषोत्तमः ॥५७॥ त्वयामयाजगच्चेदंधार्यपाल्यंचयत्नतः॥येषांत्वसुरमुख्यानांवरोदत्तोमयाधुना ॥ ५८ ॥
देवानांहितकामेन हंतव्यास्तेत्वयाविभो ॥ अहंसृष्टिंकरिष्यामिसाचपाल्यात्वयाविभो ५९ ॥ एवमुक्तोगतोविष्णुर्देवादीनसृजद्विभुः ॥ अबुद्धिपूर्व
कस्तस्यप्रादुर्भूतस्तमोमयः ॥ ६० ॥ तमोमोहोमहामोहस्तामिस्रोह्यन्धसंज्ञकः ॥ पंचधावस्थितःसर्गोध्यायतस्तुमहात्मनः ॥ ६१ ॥ बहिरंतश्चाप्र
काशःसंवृतात्मानगात्मकः ॥ मुख्यानागायतश्चोक्तामुख्यसर्गस्ततस्त्वयम् ॥६२॥ तंदृष्ट्वासाधकंसर्गममन्यदपरंप्रभुः ॥ तस्याभिध्यायतस्सर्गस्तिर्य
क्स्रोतोऽभ्यवर्तत ॥ ६३ ॥ यस्मात्तिर्यक्प्रवृत्तिःस्यात्तिर्यक्स्रोतस्ततःस्मृतः ॥ पश्वादयस्तेविख्यातास्तमःप्रायाह्यवेदिनः ॥ ६४ ॥ उत्पथग्राहिण
श्चैवतेज्ञानेज्ञानमानिनः॥अहंकृतास्त्वहंमानाअष्टाविंशतिधात्मकाः ॥अंतःप्रकाशास्तेसर्वआवृतास्तेपरस्परम् ॥६५॥ तमप्यसाधकंमत्वाध्यायतोन्य
स्ततोऽभवत् ॥ ऊर्द्धस्रोतस्तृतीयस्तुसात्विकोर्ध्वमवर्तत ॥६६॥ तेसुखप्रीतिबहुलाबहिरंतरनावृताः॥प्रकाशाबहिरंतश्चऊर्द्धस्रोतास्ततःस्मृताः ॥६७॥
तुष्टात्मनस्तृतीयस्तुदेवसर्गस्तुसंस्मृतः ॥ तस्मिन्सर्गेभवत्प्रीतिर्निष्पन्नेब्रह्मणस्तदा ॥ ६८ ॥ ततोऽन्यंसतदादध्यौसाधकंसर्गमुत्तमम् ॥ असाधकां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तुतान्ज्ञात्वामुख्यसर्गादिसंभवान् ॥ ६९ ॥ तथाभिध्यायतस्तस्यसत्याभिध्यायिनस्ततः ॥ प्रादुर्भूतस्तदाव्यक्तादर्वाक्स्रोतस्तुसाधकः ॥ ७० ॥
यस्मादर्वाक्प्रवर्ततेततोऽर्वाक्स्रोतसस्तुते ॥ तेचप्रकाशबहुलास्तमोद्रिक्तारजोऽधिकाः ॥ ७१ ॥ तस्मात्तेदुःखबहुलाभूयोभूयश्चकारिणः ॥ प्रकाशा
बहिरंतश्चमनुष्याःसाधकाश्चते ॥ ७२॥ पंचमोऽनुग्रहःसर्गःसचतुर्द्धाव्यवस्थितः॥ विपर्ययेणसिद्धयाचशक्त्यातुष्टयातथैवच ॥ ७३ ॥ विवृत्तंवर्त्तमा
नंचतेनजानंतिवैपुनः ॥ भूतादिकानांभूतानांषष्ठःसर्गःसउच्यते ॥ ७४ ॥ तेपरिग्राहिणःसर्वेसंविभागरतास्तुते ॥ चोदनाजाप्यशीलाश्चज्ञेयाभूतादि
कास्तुते ॥ ७५ ॥ इत्येतेकथिताःसर्गाःषडत्रनृपसत्तम ॥ प्रथमोमहतस्सर्गोद्वितीयोब्रह्मणस्तुयः ॥ ७६॥ तन्मात्राणांद्वितीयस्तुभूतसर्गोहिसस्मृतः ॥
वैकारिकस्तृतीयस्तुसर्गश्चैन्द्रियकःस्मृतः ॥ ७७ ॥ इत्येषप्राकृतःसर्गःसंभूतोबुद्धिपूर्वकः ॥ मुख्यसर्गश्चतुर्थस्तुमुख्यावैस्थावराःस्मृताः ॥ ७८ ॥
तिर्यक्स्रोतश्चयःप्रोक्तस्तिर्यग्योन्यस्सउच्यते ॥ ततोर्ध्वस्रोतसांषष्ठोदेवसर्गस्तुसस्मृतः ॥७९॥ ततोर्वाक्स्रोतसांसर्गःसप्तमःसतुमानुषः ॥ अष्टमोऽनु
ग्रहःसर्गःसात्विकस्तामसस्तुसः ॥ ८० ॥ पंचैतेवैकृताःसर्गाःप्राकृतास्तुत्रयःस्मृताः ॥ प्राकृतोवैकृतश्चैवकौमारोनवमःस्मृतः ॥ ८१ ॥ एतेतवसमा
ख्यातानवसर्गाःप्रजापतेः ॥ प्राकृतावैकृताश्चैवजगतोमूलहेतवः ॥८२॥ सृजतोजगदीशस्यकिमन्यच्छ्रोतुमर्हसि ॥ भीष्मउवाच ॥ संक्षेपात्कथिताः
सर्गादेवादीनांगुरोस्तथा ॥८३॥ विस्तराच्छ्रोतुमिच्छामित्वत्तोमुनिवरोत्तम ॥ ॥ पुलस्त्यउवाच ॥ ॥ कर्मभिर्भाविताःसर्वेकुशलाकुशलैस्तुते ॥ ८४ ॥
ख्यात्यातयाह्यनिर्मुक्ताःसंहारेह्युपसंहृताः ॥ स्थावरान्तास्सुराद्यास्तुप्रजाराजंश्चतुर्विधाः ॥ ८५ ॥ ब्रह्मणःकुर्वतःसृष्टिंजज्ञिरेमानसाःस्मृताः ॥ ततो
देवासुरपितॄन्मानुषांस्तुचतुष्टयम् ॥ ८६ ॥ सिसृक्षुरंभांस्येतानिस्वमात्मानमयूयुजत् ॥ मुक्तात्मनस्ततोजातादुरात्मानः प्रजापतेः ॥ ८७ ॥ सिसृ
क्षोर्जघनात्पूर्वंजज्ञिरेत्वसुरास्ततः ॥ तत्याजतांततोदुष्टान्तमोमात्रात्मिकांतनुम् ॥८८॥ सातुत्यक्तातनुस्तेनराजेंद्राभूद्विभावरी ॥ सिसृक्षुरन्यदेहस्थः
प्रीतिमापुस्ततःसुराः ॥ ८९ ॥ सत्वोद्रिक्ताःसमुद्भूतामुखतोब्रह्मणोनृप ॥ त्यक्तासापितनुस्तेनसत्वप्रायमभूद्दिनम् ॥९०॥ ततोहिबलिनोरात्रावसुरा
देवतादिवा॥सत्वमात्रात्मिकांचैवततोऽन्यांजगृहेतनुम्॥९१॥ पितृवन्मन्यमानस्यपितरस्तस्यजज्ञिरे॥उत्ससर्जपितॄन्कृत्वाततस्तामपिसप्रभुः ॥९२॥
साचोत्सृष्टाभवत्संध्यादिननक्तांतरास्थितिः ॥ रजोमात्रात्मिकामन्यांजगृहेसतनुंततः ॥ ९३ ॥ रजोमात्रोत्कटाजातामनुष्याःकुरुसत्तम ॥ तामप्या ॥ ६ ॥
शुसतत्याजतनुमाद्यांप्रजापतिः ॥ ९४ ॥ ज्योत्सासमभवच्चापिप्राक्संध्यायाभिधीयते ॥ ज्योत्स्नागमेतुबलिनोमनुष्याःपितरस्तथा ॥ ९५ ॥
राजेंद्रसंध्यासमयेतस्मात्तेप्रभवंतिवै॥ज्योत्स्नारात्र्यहनीसन्ध्याचत्वार्येतानिवैविभोः ॥ ९६ ॥ ब्रह्मणस्तुशरीराणित्रिगुणोपाश्रयाणिच॥रजोमात्रात्मि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कामेवततोऽन्यांजगृहेतनुम् ॥९७॥ ततःक्षुद्ब्रह्मणोजाताजज्ञेकोपस्तयाकृतः॥ क्षुत्क्षामोऽधंधकारेतुसोऽसृजद्भगवांस्ततः ॥९८॥ विरूपाअत्तुकामास्ते सम
धावंततंप्रभुम् ॥ रक्षतामेषयैरुक्तंराक्षसास्तेततोऽभवन् ॥९९ ॥ऊचुःखादामइत्यन्येयेतेयक्षास्तुतेऽभवन् ॥अतिभीतस्यतान्दृष्ट्वाकेशाःशिर्यन्ति वेधसः
॥१००॥हीनाश्चशिरसोभूयःसमारोहंतिते शिरः॥सर्पणात्तेऽभवन्सर्पाहीनत्वादहयःस्मृताः॥१०१॥ततःक्रुद्धेनवैस्रष्ट्राक्रोधात्मानोविनिर्मिताः॥वर्णेनक
पिशेनोग्राभूतास्तेपिशिताशिनः ॥१०२॥ धयतोगांसमुद्भूतागंधर्वास्तस्यतत्क्षणात् ॥ पिबंतोजज्ञिरेवाचंगंधर्वास्तेनतेऽभवन् ॥१०३॥ एतानिसृष्ट्वाभ
गवान्ब्रह्मातच्छक्तिचोदितः॥ततःस्वच्छंदतोऽन्यानिवयांसिवयसोऽसृजत्॥१०४॥ अवयोवक्षसश्चक्रेमुखतोयांश्चसृष्टवान् ॥सृष्टवानुदराद्गाश्चमहिषांश्च
प्रजापतिः॥१०५॥पद्भ्यांचाश्वान्समातंगान्रासभान्गवयान्मृगान्॥उष्ट्रानश्वतरांश्चैवन्यंकूनन्याश्चजातयः॥१०६॥ओषध्यःफलमूलिन्योरोमभ्यस्त
स्यजज्ञिरे॥त्रेतायुगमुखेब्रह्माकल्पस्यादौनृपोत्तम ॥१०७ ॥ सृष्ट्वापश्वोषधीस्सम्यक्युयोजसतदाध्वरे॥ गामजंमहिषंमेषमश्वाश्वतरगर्दभान् ॥१०८॥
एतान्ग्राम्यपशूनाहुरारण्यांश्चनिबोधमे॥ श्वापदोद्विखुरोहस्तीवानरःपञ्चमःखगः ॥१०९॥ उष्ट्रकाःपशवष्षष्ठास्सप्तमास्तुसरीसृपाः॥गायत्रंचऋचश्चै
वत्रिवृत्सोमंरथन्तरम् ॥ ११० ॥ अग्निष्टोमंचयज्ञानां निर्ममेप्रथमान्मुखात् ॥ यजूंषित्रैष्टुभंछन्दःस्तोमंपञ्चदशंतथा ॥१११॥ बृहत्सामतथोक्थंचद
क्षिणादसृजन्मुखात् ॥ सामानिजगतीच्छन्दःस्तोमंसप्तदशंतथा ॥ ११२ ॥ वैरूपमतिरात्रंचपश्चिमादसृजन्मुखात् ॥ एकविंशमथर्वाणमप्तोर्यामाणमे
वच ॥ ११३ ॥ आनुष्टुभंसवैराजमुत्तरादसृजन्मुखात् ॥ उच्चावचानिभूतानिगात्रेभ्यस्तस्यजज्ञिरे ॥ ११४ ॥ सुरासुरपितॄन्सृष्ट्वामनुष्यांश्चप्रजाप
तिः ॥ ततःपुनःससर्जासौसकल्पादौपितामहः ॥ ११५ ॥ यक्षान्पिशाचान्गंधर्वांस्तथैवाप्सरसांगणान् ॥ सिद्धकिन्नररक्षांसिसिंहान्पक्षिमृगोरगान्
॥ ११६ ॥ अव्ययंचव्ययंचैवयदिदंस्थाणुजंगमम् ॥ तत्ससर्जतदाब्रह्माभगवानादिकृद्विभुः ॥ ११७ ॥ तेषांयेयानिकर्माणिप्राक्सृष्ट्यांप्रतिपेदिरे ॥
तान्येव प्रतिपद्यंते सृज्यमानाःपुनःपुनः ॥११८ ॥हिंस्राहिंस्रेमृदुक्रूरेधर्माधर्मावृतानृते ॥तद्भाविताःप्रपद्यंतेतस्मात्तत्तस्यरोचते ॥ ११९॥ इंन्द्रियार्थेषु
भूतेषुशरीरेषुचसप्रभुः ॥ नानात्त्वंविनियोगंचधातैवव्यसृजत्स्वयम् ॥ १२० ॥ नामरूपंचभूतानांकृत्यानांचप्रपंचनम् ॥ वेदशब्देभ्यएवादौदेवादी
नांचकारसः ॥ १२१ ॥ ऋषीणां नामधेयानियथावेदेश्रुतानिवै ॥ यथानियोगंयोग्यानिअन्येषामपिसोऽकरोत् ॥ १२२ ॥ यथर्तावृतुलिंगानिना
नारूपाणिपर्यये ॥ दृश्यंतेतानितान्येव तथाभावायुगादिषु॥ १२३ ॥ करोत्येवंविधांसृष्टिंकल्पादौसपुनःपुनः ॥सिसृक्षुश्शक्तियुक्तोऽसौसृज्यशक्ति
प्रचोदितः ॥ १२४ ॥ भीष्मउवाच ॥ अर्वाक्स्रोतास्तु कथितोभवतायस्तुमानुषः ॥ ब्रह्मन्विस्तरतोब्रूहिब्रह्मातमसृजद्यथा ॥ १२५ ॥ यथासवर्णा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नसृजद्गुणांश्चसमहामुने ॥ यच्चतेषांस्मृतंकर्मविप्रादीनां तदुच्यताम् ॥१२६॥ पुलस्त्यउवाच ॥ सत्वाभिध्यायिनःपूर्वंसिसृक्षोर्ब्रह्मणःप्रजाः ॥ अजा
यंतकुरुश्रेष्ठसत्वोद्रिक्तामुखात्प्रजाः ॥ १२७ ॥ वक्षसोरजसोद्रिक्तास्तथान्याब्रह्मणोऽभवन् ॥ रजसस्तमसश्चैवसमुद्रिक्तास्तथोरुतः ॥१२८॥ पद्भ्या
मन्याःप्रजाब्रह्मासससर्जकुरुसत्तम ॥ तमःप्रधानास्ताःसर्वाश्चातुर्वर्ण्यमिदंततः ॥ १२९ ॥ ब्राह्मणाःक्षत्रियावैश्याःशूद्राश्चनृपसत्तम ॥ पादोरुवक्ष
स्थलतोमुखतश्चसमुद्गताः ॥ १३० ॥ यज्ञनिष्पत्तयेसर्वमेतद्ब्रह्माचकारह ॥ चातुर्वर्ण्यं महाराजयज्ञसाधनमुत्तमम् ॥ १३१ ॥ यज्ञेनाप्यायितादेवा
वृष्ट्युत्सर्गेणमानवाः ॥ अप्यायंतेधर्मयज्ञायतःकल्याणहेतवः ॥१३२॥ निष्पद्यंतेनरैस्तेतुसुकर्मनिरतैःसदा ॥ विरुद्धाचरणापेतैःसद्भिःसन्मार्गगा
मिभिः ॥ १३३ ॥ स्वर्गापवर्गं मानुष्यात्प्राप्नुवंति नरान्नृप ॥ यच्चाभिरुचितंस्थानंतद्यांतिमनुजा विभो ॥ १३४ ॥ प्रजास्ताब्रह्मणासृष्टाश्चातुर्वर्ण्य
व्यवस्थितौ ॥ सम्यक्शुद्धाः समाचाराचरणा नृपसत्तम ॥ १३५ ॥ यथेच्छावासनिरताःसर्वबाधाविवर्जिताः ॥ शुद्धांतःकरणाःशुद्धाधर्मानुष्ठान
निर्मलाः ॥ १३६ ॥ शुद्धेचतासांमनसिशुद्धांतःसंस्थितेहरौ ॥ शुद्धज्ञानंप्रपश्यंतिब्रह्माख्यंयेनतत्पदं ॥ १३७ ॥ ततःकालात्मकोयोऽसौविरिंचावास
उच्यते ॥ संसारपातमत्यर्थंघोरमल्पाल्पसारवत् ॥ १३८ ॥ अधर्मबीजभूतंतत्तमोलोभसमुद्भतम् ॥ प्रजासुतासुराजेंद्ररागादिक्रमसाधनम् ॥
॥१३९॥ ततःसासहजासिद्धिस्तेषांनातीवजायते ॥ राजन्वश्यादयश्चान्याःसिद्धयोऽष्टौभवंतियाः ॥१४०॥ तासुक्षीणास्वशेषासुवर्द्धमानेचपातके ॥
द्वंद्वाभिभवदुःखार्तास्ताभवंतिततःप्रजाः ॥ १४१ ॥ ततोदुर्गाणिताश्चक्रुर्वार्क्षंपार्वतमौदकम् ॥ धान्वनंचतथादुर्गंपुरंखार्वटकादियत् ॥ १४२ ॥ गृहा
णिचयथान्यायं तेषुचक्रुःपुरादिषु ॥ शीततापादिबाधानांप्रशमायमहामते ॥ १४३ ॥ प्रतिहारमिमंकृत्वाशीतादेस्ताःप्रजाःपुनः ॥ वार्तोपायंत
तश्चक्रुर्हस्तसिद्धिं च कर्मजाम् ॥१४४॥ व्रीहयश्चयवाश्चैवगोधूमाअणवस्तिलाः ॥ प्रियंगुकोविदाराश्चकोरदूषाःसचीनकाः ॥ १४५ ॥ माषामुद्गाम
सूराश्चनिष्पावाःसकुलुत्थकाः ॥ अढकाश्चणकाश्चैवशणास्सप्तदशस्मृताः १४६ ॥ इत्येताओषधीनांतुग्राम्याणांजातयोनृप ॥ ओषध्योयज्ञिया
श्चैवग्राम्यावन्याश्चतुर्दश ॥ १४७ ॥ व्रीहयःसयवामाषागोधूमाअणवस्तिलाः ॥ प्रियंगुसप्तमाह्येताअष्टमास्तुकुलुत्थकाः ॥ १४८ ॥ श्यामाकस्त्व
थनीवारोवर्तुलस्सगवेधुकः ॥ अथवेणुयवाः प्रोक्तास्तद्वन्मर्कटकानृप ॥ १४९ ॥ ग्राम्यावन्याःस्मृताह्येताओषध्यश्चचतुर्दश ॥ यज्ञनिष्पत्तयेतद्व
त्तथासांहेतुरुत्तमः ॥ १५० ॥ एताश्चसहयज्ञेनप्रजानां कारणंपरम् ॥ परापरविदःप्राज्ञाःततोयज्ञान्वितन्वते ॥१५१॥ अहन्यहन्यनुष्ठानंयज्ञानांपा
र्थिवोत्तम ॥ उपकारकरंपुंसांक्रियमाणंफलार्थिनाम् ॥१५२॥ येषांचकालसृष्टोऽसौपपाबिंदुर्महामते ॥ मर्यादांस्थापयामासयथास्थानंयथागुणम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥१८३॥ वर्णानामाश्रमाणांचधर्मान्धर्मभृतांवर ॥ लोकांश्चसर्ववर्णानांसम्यग्धर्मानुपालिनाम् ॥१८४॥ प्राजापत्यंब्राह्मणानांस्मृतंस्थानंतुपार्थिव ॥
स्थानमैंद्रंक्षत्रियाणांसङ्ग्रामेष्वनिवर्तिनाम् ॥ १८५ ॥ वैश्यानाम्मारुतंस्थानंस्वधर्ममनुवर्तिनाम् ॥ गान्धर्वंशूद्रजातीनांपरिचर्यासुवर्तिनाम् ॥
॥१८६॥ अष्टाशीतिसहस्राणांयतीनामूर्ध्वरेतसाम् ॥ स्मृतंतेषांतुयत्स्थानं तदेवगुरुवासिनाम् ॥१८७॥ सप्तर्षीणांचयत्स्थानंस्मृतंतद्वैवनौकसाम् ॥
प्राजापत्यंगृहस्थानांन्यासिनांब्राह्मसंज्ञितम् ॥ १८८ ॥ योगिनाममृतस्थानंब्रह्मणःपरमंपदम् ॥ एकांतिनःसदोद्युक्ताध्यायिनोयोगिनोहि ये ॥
॥१८९॥ तेषांतत्परमंस्थानंयत्तत्पश्यंतिसूरयः ॥ गतागतानिवर्त्तंतेचंद्रादित्यादयो ग्रहाः ॥ १६० ॥ अद्यापिननिवर्तंतेनारायणपरायणाः ॥ ता
मिस्रमंधतामिस्रमहारौर वरौरवम् ॥ १६१ ॥ असिपत्रवनंघोरंकालसूत्रमवीचिमत् ॥ विनिंदकानांवेदस्ययज्ञव्याघातकारिणाम् ॥ १६२ ॥
स्थानमेतत्समाख्यातंस्वधर्मत्यागिनश्चये ॥ ततोऽभिध्यायतस्तस्यजज्ञिरेमानसाःप्रजाः ॥ १६३ ॥ तच्छरीरसमुत्पन्नैःकायस्थैःकरणैःसह ॥
क्षेत्रज्ञाःसमवर्त्तंतगात्रेभ्यस्तस्यधीमतः ॥ १६४ ॥ तेसर्वेसमवर्तंतयेमयाप्रागुदाहृताः ॥ देवाद्याःस्थावरांताश्चत्रैगुण्यविषयेस्थिताः ॥ १६५ ॥
एवंभूतानिसृष्टानिस्थावराणिचराणिच ॥ यदास्यताःप्रजाःसर्वानव्यवर्द्धंतधीमतः ॥ १६६ ॥ अथान्यान्मानसान्पुत्रान्सदृशानात्मनोऽसृजत् ॥
भृगुंमांपुलहंचैवक्रतुमंगिरसंतथा ॥ १६७ ॥ मरीचिंदक्षमत्रिंचवसिष्ठंचैववमानसान् ॥ नवब्रह्माणइत्येतेपुराणेनिश्चयंगताः ॥ १६८ ॥
सनंदनादयोयेचपूर्वंसृष्टास्तुवेधसा ॥ नतेलोकेष्वसज्जंतनिरपेक्षाःप्रजासुते ॥ १६९ ॥ सर्वेह्यागतविज्ञानावीतरागाविमत्सराः ॥ तेष्वेवंनिर
पेक्षेषुलोकसृष्टौमहात्मनः ॥ १७० ॥ ब्रह्मणोऽभून्महान्क्रोधस्त्रैलोक्यदहनक्षमः ॥ तस्यक्रोधात्समुद्भूतंज्वालामालावदीपितम् ॥ १७१ ॥
ब्रह्मणस्तुतदाज्योतिस्त्रैलोक्यमखिलंदहत् ॥ भ्रुकुटीकुटिलात्तस्यललाटात्क्रोधदीपितात् ॥ १७२ ॥ समुत्पन्नस्तदारुद्रोमध्याह्नार्कसमप्रभः ॥
अर्द्धनारीनरवपुःप्रचण्डोऽतिशरीरवान् ॥ १७३ ॥ विभजात्मानमित्युक्त्वातंब्रह्मांतर्दधेततः ॥ तथोक्तोसौद्विधास्त्रीत्वंपुरुषत्वंतथाकरोत्
॥ १७४ ॥ बिभेदपुरुषत्वंचदशधाचैकधाचसः ॥ सौम्यासौम्यस्तथारूपैःशांतैःस्त्रीत्वंचसप्रभुः ॥ १७५ ॥ बिभेदबहुधाचैवस्वरूपैरसितैःसितैः ॥
ततोब्रह्मास्वयंभूतंपूर्वंस्वायंभुवंप्रभुम् ॥ १७६ ॥ आत्मानमेवकृतवान्प्राजापत्येमनुंनृप ॥ शतरूपांचतांनारींतपोनिर्द्धूतकल्मषाम् ॥ १७७ ॥स्वायं
भुवोमनुर्नामपत्नीत्वेजगृहेप्रभुः ॥ तस्माच्चपुरुषाद्देवीशतरूपाव्यजायत ॥ १७८ ॥ प्रियव्रतोत्तानपादप्रसूत्याकूतिसंज्ञितम् ॥ ददौप्रसूतिंदक्षायआ
कूतिंरुचयेपुरा ॥ १७९ ॥ प्रजापतिःसजग्राहतयोर्जज्ञेसदक्षिणः ॥ पुत्रोयज्ञोमहाभागदंपत्योर्मिथुनंततः ॥१८०॥ यज्ञस्यदक्षिणायांतुपुत्राद्वादशज

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ञ्जिरे ॥ यामाइतिसमाख्यातादेवाः स्वायंभुवेमनौ ॥ १८१ ॥ प्रसूत्यांचतथादक्षश्चतस्रोविंशतिंतथा ॥ ससर्जकन्यास्तासांतुसम्यङ्नामानिमेशृणु
॥ १८२ ॥ श्रद्धालक्ष्मीर्धृतिःपुष्टिस्तुष्टिर्मेधाक्रियातथा ॥ बुद्धिर्लज्जा वपुःशांतिर्ऋद्धिःकीर्तिस्त्रयोदशी ॥१८३॥ पत्न्यर्थंप्रतिजग्राहधर्मोदाक्षायणी
प्रभुः ॥ ताभ्यः शिष्टायवीयस्यएकादशसुलोचनाः ॥ १८४ ॥ ख्यातिःसत्यथसंभूतिः स्मृतिःप्रीतिःक्षमातथा ॥ सन्नतिश्चानसूयाचऊर्ज्जास्वाहा
स्वधातथा ॥ १८५ ॥ भृगुर्भवोमरीचिश्चतथाचैवांगिरामुनिः ॥ अहंचपुलहश्चैवक्रतुर्मुनिवरस्तथा ॥१८६॥ अत्रिर्वसिष्ठोवह्निश्चपितरश्चयथाक्रमम्॥
ख्यात्याद्याजगृहुःकन्या मुनयोराजसत्तम ॥ १८७॥ श्रद्धाकामंबलंलक्ष्मीर्नियमंधृतिरात्मजम् ॥ संतोषंचतथातुष्टिर्लोभंपुष्टिरसूयत ॥ १८८ ॥
मेधाश्रुतंक्रियादण्डंनयंविनयमेवच ॥ बोधंबुद्धिस्तथालज्जाविनयंवपुरात्मजम् ॥१८९ ॥ व्यवसायंप्रजज्ञेवैक्षेमंशान्तिरसूयत ॥ सुखमृद्धिर्यशःकी
र्तिरित्येतेधर्मसूनवः ॥ १९० ॥ कामान्नंदीसुतंहर्षंधर्मपौत्रमसूयत ॥ हिंसाभार्यात्वधर्मस्यतस्यजज्ञेतदानृतम् ॥ १९१ ॥ कन्याचनिकृतिस्ता
भ्यांभयंनरकएवच ॥ मायाचवेदनाचैवमिथुनंद्वंद्वमेवच ॥१९२॥ तयोर्जज्ञेऽथवैमायामृत्युंभूतापहारिणम् ॥ वेदनायास्ततश्चापिदुःखंजज्ञेऽथरौरवा
त् ॥ १९३ ॥ मृत्योर्व्याधिजराशोकतृष्णाक्रोधाश्चजज्ञिरे ॥ दुःखोत्तराः स्मृताह्येतेसर्वेचाधर्मलक्षणाः ॥ १९४ ॥ नैषांभार्यास्तिपुत्रोवातेसर्वेह्यूर्द्ध
रेतसः ॥ रौद्राण्येतानिरूपाणिब्रह्मणोनृवरात्मज ॥ १९५ ॥ नित्यंप्रलयहेतुत्वंजगतोस्यऽप्रयांतिवै ॥ रुद्रसर्गंप्रवक्ष्यामियथाब्रह्माचकारह ॥१९६॥
कल्पादावात्मनस्तुल्यंसुतंप्रध्यायतस्ततः ॥ प्रादुरासीत्प्रभोरंकेकुमारोनीललोहितः ॥ १९७ ॥ रुदन्वैसुस्वरंसोऽथद्रवंश्चनृपसत्तम ॥ किंरोदिषीति
तंदेवोरुदंतंप्रत्युवाचह ॥१९८॥ नामधेहीतितंसोऽथप्रत्युवाचप्रजापतिम्॥रोदनाद्रुद्रनामासिमारोदीर्धैर्यमावह॥१९९॥ एवमुक्तःपुनस्सोऽथसप्तकृत्वोरु
रोदह ॥ ततोऽन्यानिददौतस्मैसप्तनामानिवैप्रभुः ॥२००॥ मूर्तीनांचैवमष्टानांस्थानान्यष्टौचकारह ॥ भवंशर्वमथेशानंतथापशुपतिंनृप ॥ २०१ ॥
भीममुग्रंमहादेवमुवाचसपितामहः ॥ सूर्योजलंमहीवह्निर्वायुराकाशमेवच ॥ २०२ ॥ दीक्षितोब्राह्मणः सोमइत्येतातनवः क्रमात् ॥ एवंप्रकारोरु
द्रोऽसौसतींभार्यामविंदत ॥ २०३ ॥ दक्षकोपाच्चतत्याजसासतीस्वंकलेवरम् ॥ हिमवद्दुहितासाभून्मेनायांनृपसत्तम ॥ २०४ ॥ उपयेमेपुनश्चैवया
चित्वाभगवान्भवः ॥ दाक्षीधातृविधातारौभृगोःख्यातिरसूयत ॥ २०५ ॥ श्रियंचदेवदेवस्यपत्नीनारायणस्यया ॥२०६॥ इतिश्रीपाद्मपुराणेप्रथ
मेसृष्टिखंडेतृतीयोऽध्यायः ॥३॥ भीष्म उवाच ॥ क्षीराब्धौतुतथालक्ष्मीः किलोत्पन्नामयाश्रुता ॥ ख्यात्यां भृगोः समुत्पन्नाएतदाहकथंभवान् ॥१॥
कथंचदक्षदुहितादेहंत्यक्तवतीशुभा ॥ मेनायांगर्भसंभूतिसुमायाजन्मएवच ॥२॥ किमर्थंदेवदेवेनपत्नीहैमवतीकृता ॥ विरोधंचाथदक्षेणभगवांस्तुत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वीतुमे ॥३॥ पुलस्त्यउवाच॥इदंचश्रृणुभूपालयत्पृष्टोऽहमिहत्वया ॥ श्रीसंबंधोमयाप्येषश्रुतआसीत्पितामहात् ॥ ४ ॥ अत्रिपुत्रस्तुदुर्वासाःपरिभ्राम्य
न्महीमिमाम् ॥ विद्याधरीकरेमालांदृष्ट्वासौगन्धिकींशुभाम् ॥५॥ याचयामाससमेदेहिजटाजूटेकरोम्यहम् ॥ इतिविद्याधरीतेनपृष्टासाकृषिणातथा ॥६॥
ददौतस्मैमुदायुक्ता तां मालांसतदानृप ॥ गृहीत्वासुचिरंकालंशिरोमालांबबंधह ॥७॥ उन्मत्तप्रेतवद्विप्रः शोभमानोऽब्रवीदिदम् ॥ इयंविद्याधरीकन्या
पीनोन्नतपयोधरा ॥ ८ ॥ शोभालंकारसौभाग्यैर्युक्तादृष्टाततोमनः ॥ क्षोभमायातिमेचाद्यनाहंकामेविचक्षणः ॥ ९ ॥ व्रजामितावदन्यत्रसौभाग्यं
स्वंप्रदर्शयन् ॥ एवमुक्त्वासराजेंद्रपरिबभ्राममेदिनीम् ॥ १० ॥ ऐरावतंसमारूढंराजानंत्रिदिवौकसाम् ॥ त्रैलोक्याधिपतिंशक्रंभ्राजमानंशचीपतिम्
॥ ११ ॥ तामात्मशिरसोमालांभ्रमदुन्मत्तषट्पदाम् ॥ आदायामरराजायचिक्षेपोन्मत्तवन्मुनिः ॥ १२ ॥ गृहीत्वादेवराजेनमालासागजमूर्द्धनि ॥
मुक्तारराजसामालाकैलासेजाह्नवीयथा ॥ १३ ॥ मदांधकारिताक्षोऽसौगंधाघ्राणेनवारणः ॥ करेणादायचिक्षेपतांमालांपृथिवीतले ॥ १४ ॥
ततस्तुक्रोधभगवान्दुर्वासामुनिपुंगवः ॥ राजेंद्रदेवराजानं क्रुद्धश्चेदमुवाचह ॥ १५ ॥ ऐश्वर्यमददुष्टात्मन्नतिस्तब्धोऽसिवासव ॥ श्रियोधाम
स्रजंयस्मान्मद्दत्तान्नाभिनंदसि ॥ १६ ॥ त्रैलोक्यश्रीरतोमूढविनाशमुपयास्यति ॥ मद्दत्ताभवतामालाक्षिप्तायस्मान्महीतले ॥ १७ ॥
तस्मात्प्रणष्टलक्ष्मीकं त्रैलोक्यंतेभविष्यति ॥ यस्यसंजातकोपस्यभयमेतिचराचरम् ॥ १८ ॥ तंमांत्वमतिगर्वेणदेवराजावमन्यसे ॥ महेंद्रो
वारणस्कंधादवतीर्यत्वरान्वितः ॥ १९ ॥ प्रसादयामासमुनिंदुर्वाससमकल्मषम् ॥ प्रसाद्यमानः सतदाप्रणिपातपुरःसरम् ॥ २० ॥
नाहंक्षमिष्येबहुनाकिमुक्तेनशतक्रतो ॥ इत्यक्त्वाप्रययौविप्रोदेवराजोऽपितंपुनः ॥ २१ ॥ आरुह्यैरावतंनागंप्रययावमरावतीम् ॥ ततः
प्रभृतिनिःश्रीकंसशक्रंभुवनत्रयम् ॥ २२ ॥ नयज्ञाः संप्रवर्ततेनतपस्यंतितापसाः ॥ नचदानानिदीयंतेनष्टप्रायमभूज्जगत् ॥ २३ ॥
एवमत्यंतनिःश्रीकेत्रैलोक्येसत्त्ववर्जिते ॥ देवान्प्रतिबलोद्योगंचक्रुर्दैतेयदानवाः ॥ २४ ॥ विजितास्त्रिदशादैत्यैरिंद्राद्याः शरणंययुः ॥ पितामहंम
हाभागंहुताशनपुरोगमाः ॥ २५ ॥ यथावत्कथितेदेवैर्ब्रह्माप्राहतथासुरान् ॥ क्षीरोदस्योत्तरंकूलंजगामसहितःसुरैः ॥ २६ ॥ गत्वाजगादभगवान्वा
सुदेवंपितामहः ॥ उत्तिष्ठविष्णोशीघ्रंत्वंदेवतानांहितंकुरु ॥ २७ ॥ त्वयाविनादानवैस्तुजिताःसर्वेपुनःपुनः ॥ इत्युक्तःपुंडरीकाक्षःपुरुषःपुरुषोत्तमः
॥ २८ ॥ अपूर्वरूपसंस्थानान्दृष्ट्वादेवानुवाचह ॥ तेजसोभवतांदेवाः करिष्याम्युपबृंहणम् ॥ २९ ॥ वदाम्यहंयत्क्रियतांभवद्भिस्तदिदंसुराः ॥
आनीयसहितादैत्यैः क्षीराब्धौसकलौषधीः ॥ ३० ॥ मंथानंमंदरंकृत्वानेत्रंकृत्वाचवासुकिम् ॥ मथ्यताममृतंदेवाः सहायेमय्यवस्थिते ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सामपूर्वंचदैतेयांस्तत्रसम्भाष्यकर्मणि ॥ समानफलभोक्तारोयूयंचात्रभविष्यथ ॥ ३२ ॥ मथ्यमानेचतत्राब्धौयत्समुत्पद्यतेऽमृतम् ॥ तत्पानाद्बलि
नोयूयममराः संभविष्यथ ॥ ३३ ॥ तथैवाहंकरिष्यामियथात्रिदशविद्विषः ॥ नप्राप्स्यंत्यमृतंदेवाः केवलंक्लेशभागिनः ॥ ३४ ॥ इत्युक्तादेवदे
वेनसर्वएवततःसुराः ॥ संधानमसुरैः कृत्वायत्नवन्तोऽमृतेभवन् ॥ ३५ ॥ सर्वौषधीः समानीयदेवदैतेयदानवाः ॥ क्षिप्त्वाक्षीराब्धिपयसिशरदभ्रा
मलत्विषि ॥ ३६ ॥ मंथानंमंदरंकृत्वानेत्रंकृत्वाचवासुकिम् ॥ ततो मथितुमारब्धाराजेंद्रतरसामृतम् ॥ ३७ ॥ विबुधाःसहिताःसर्वेयतःपुच्छंततः
स्थिताः ॥ विष्णुनावासुकेर्दैत्याःपूर्वकायनिवेशिताः ॥ ३८ ॥ तेतस्यप्राणवातेनवह्निनाचहतत्त्विषः॥ निस्तेजसोऽसुराःसर्वेबभूवुरमरद्युते ॥३९ ॥
तेनैवमुखनिःश्वासवायुनाथबलाहकैः ॥ पुच्छप्रदेशेवर्षद्भिस्तदाचाप्यायिताःसुराः ॥ ४० ॥ क्षीरोदमध्येभगवान्ब्रह्माब्रह्मविदांवरः ॥ महादेवोमहाते
जाविष्णुपृष्ठनिवासिनौ ॥ ४१ ॥ बाहुभ्यांमंदरंगृह्यपद्मवत्सपरंतपः ॥ शृंखलेचतंदाकृत्वागृहीत्वामंदराचलम् ॥ ४२ ॥ देवानांदानवानांचबलम
ध्येव्यवस्थितः ॥ क्षीरोदमध्येभगवान्कूर्मरूपीस्वयंहरिः ॥ ४३ ॥ अन्येनतेजसादेवानुपबृंहितवान्हरिः ॥ मथ्यमानेततस्तस्मिन्क्षीराब्धौदेवदानवैः
॥ ४४ ॥ हविर्धान्यभवत्पूर्वंसुरभिःसुरपूजिता ॥ जग्मुर्मुदंतदादेवादानवाश्चमहामते ॥ ४५ ॥ व्याक्षिप्तचेतसःसर्वेबभूवुस्तिमितेक्षणाः ॥ किमेतदि
तिसिद्धानांदिविचिंतयतांतदा ॥ ४६ ॥ बभूववारुणीदेवीमदाघूर्णितलोचना ॥ कृतावर्त्ताततस्तस्मात्प्रस्खलंतीपदेपदे ॥ ४७ ॥ एकवस्त्रामुक्तकेशीर
क्तांतस्तब्धलोचना ॥ अहंबलप्रदादेवीमांवागृह्णन्तुदानवाः ॥ ४८ ॥ अशुचिंवारुणींमत्वात्यक्तवंतस्तदासुराः ॥ जगृहुस्तांतदादैत्याग्रहणान्ते
सुराभवत् ॥ ४९ ॥ मंथनेपारिजातोऽभूद्देवश्रीनन्दनोद्रुमः ॥रूपौदार्य्यगुणोपेतास्ततश्चाप्सरसांगणाः ॥ ५० ॥ षष्टिकोट्यस्तदाजातास्सामान्या
देवदानवैः ॥ सर्वास्ताः कृतपूर्वास्तुसामान्याःपुण्यकर्मणा ॥ ५१ ॥ ततः शीतांशुरभवद्देवानांप्रीतिदायकः ॥ ययाचेशंकरोदेवोजटाभूषणकृन्मम
॥ ५२ ॥ भविष्यतिनसंदेहोगृहीतोऽयंमयाशशी ॥ अनुमेनेचतंब्रह्माभूषणायहरस्यतु ॥ ५३ ॥ततोविषंसमुत्पन्नंकालकूटंभयावहम् ॥ तेनचैवार्दिता
स्सर्वेदानवाःसहदैवतैः ॥ ५४ ॥ महादेवेनतत्पीतंविषंगृह्ययदृच्छया॥ तस्यपानान्नीलकंठस्तदाजातोमहेश्वरः ॥५५॥ पीतावशेषंनागास्तुक्षीराब्धेस्तु
समुत्थितम् ॥ ततोधन्वंतरिर्जातःश्वेतांबरधरःस्वयम् ॥ ५६ ॥ बिभ्रत्कमंडलुंपूर्णममृतस्यसमुत्थितः ॥ ततःस्वस्थमनस्कास्तेवैद्यराजस्यदर्शनात ॥ ९ ॥
॥ ५७ ॥ ततश्चाश्वःसमुत्पन्नोनागश्चैरावतस्तथा ॥ ततःस्फुरत्कांतमतिविकासिकमलेस्थिता ॥ ५८ ॥ श्रीर्देवीपयसस्तस्मादुत्थिताधृतपंकजा ॥
तांतुष्टुवुर्मुदायुक्ताःश्रीसूक्तेनमहर्षयः ॥ ५९ ॥ विश्वावसुमुखास्तस्यगंधर्वाःपुरतोजगुः ॥ घृताचीप्रमुखास्तत्रननृतुश्चाप्सरोगणाः ॥ ६० ॥ गंगाद्याः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सरितस्तोयैः स्नानार्थमुपतस्थिरे ॥ दिग्गजाहेमपात्रस्थमादायविमलंजलम् ॥ ६१ ॥ स्नापयांचक्रिरेदेवींसर्वलोकमहेश्वरीम् ॥ क्षीरोदस्तुस्वयं
तस्यैमालाममम्लानपंकजाम् ॥ ६२ ॥ ददौविभूषणान्यंगेविश्वकर्माचकारह ॥ दिव्यमाल्यांबरधरांस्नातांभूषणभूषिताम् ॥ ६३ ॥ इन्द्राद्याश्चामर
गणाविद्याधरमहोरगाः ॥ दानवाश्चमहादैत्याराक्षसाः सह गुह्यकैः ॥ ६४ ॥ कन्यामभिलषन्तिस्मततोब्रह्माउवाचह ॥ वासुदेवत्वमेवैनांमयादत्तां
गृहाणवै ॥६५॥ देवाश्चदानवाश्चैवप्रतिषिद्धामयात्विह ॥ तुष्टोऽहंभवतस्तावदलौल्येनेहकर्मणा ॥ ६६ ॥ सातुश्रीर्ब्रह्मणाप्रोक्तादेविगच्छस्वकेशवम्
मयादत्तंपतिंप्राप्यमोदस्वशाश्वतीःसमाः ॥ ६७ ॥ पश्यतांसर्वदेवानांगतावक्षस्थलंहरेः ॥ ततोवक्षस्थलंप्राप्यदेवंवचनमब्रवीत् ॥ ६८ ॥ नाहं
त्याज्यासदादेवसदैवादेशकारिणी ॥ वक्षस्थलेनिवत्स्यामिसर्वस्यजगतः प्रिय ॥ ६९ ॥ ततोऽवलोकितादेवाविष्णुवक्षस्थलस्थया ॥ लक्ष्म्याराजेंद्र
सहसापरांनिर्वृतिमागताः ॥ ७० ॥ उद्वेगंचपरंजग्मुर्दैत्याविष्णुपराङ्मुखाः ॥ त्यक्तास्तुदानवालक्ष्म्याविप्रचित्तिपुरोगमाः ॥ ७१ ॥ ततस्तेजगृहु
र्दैत्याधन्वन्तरिकरस्थितम् ॥ अमृतंतन्महावीर्य्यादैत्याः पापसमन्विताः ॥७२॥ माययालोभयित्वातुविष्णुःस्त्रीरूपसंश्रयः ॥ आगत्यदानवान्प्रा
हदीयतांमेकमंडलुः ॥ ७३ ॥ युष्माकंवशगाभूत्वास्थास्यामिभवतांगृहे ॥ तांदृष्ट्वारूपसपन्नांनारींत्रैलोक्यसुन्दरीम् ॥ ७४ ॥ प्रार्थयानास्सुवपुषंलो
भोपहतचेतसः ॥ दत्त्वामृतंतदातस्यैततोऽपश्यन्ततेऽग्रतः ॥ ७५ ॥ दानवेभ्यस्तदादायदेवेभ्यःप्रददेऽमृतम् ॥ ततःपपुःसुरगणाः शक्राद्यास्तत्तदा
मृतम् ॥ ७६ ॥ उद्यतायुधनिस्त्रिंशादैत्यास्तांस्तेसमभ्ययुः ॥ पीतेऽमृतेचबलिभिर्जितादैत्यचमूस्ततः ॥ ७७ ॥ वध्यमानादिशोभेजुः
पातालंविविशुश्चते ॥ ततोदेवामुदायुक्ताः शंखचक्रगदाधरम् ॥ ७८ ॥ प्रणिपत्यययथापूर्वंप्रययुस्तेत्रिविष्टपम् ॥ ततःप्रभृतितेभीष्म
स्त्रीलोलादानवाभवन् ॥ ७९ ॥ अपध्यातास्तुकृष्णेनगतास्तेतुरसातलम् ॥ ततःसूर्यःप्रसन्नाभःप्रययौस्वेनवर्त्मना ॥ ८० ॥ जज्वालभ
गवांश्चोच्चैश्चारुदीप्तिर्हुताशनः ॥ धर्मेचसर्वभूतानांतदामतिरजायत ॥ ८१ ॥ श्रियायुक्तंचत्रैलोक्यंविष्णुनाप्रतिपालितं ॥ देवास्तुतेतदा
प्रोक्ताब्रह्मणालोकधारिणा ॥ ८२ ॥ भवतांरक्षणार्थायमयाविष्णुर्नियोजितः ॥ उमापतिश्चदेवेशोयोगक्षेमंकरिष्यतः ॥ ८३ ॥ उपास्य
मानौस्ततंयुष्मत्क्षेमकरौयतः ॥ ततःक्षेम्यौसदाचैतौभविष्येतेवरप्रदौ ॥ ८४ ॥ एवमुक्त्वातुभगवान्जगामगतिमात्मनः ॥ अदर्शनंगतेदेवेसर्व
लोकपितामहे ॥८५॥ देवलोकंगतेशक्रेस्वंलोकंहरिशंकरौ ॥ प्राप्तौतुतत्क्षणाद्देवौस्थानंकैलासमेवच ॥ ८६ ॥ ततस्तुदेवराजेनपालितंभुवनत्रयम् ॥
एवंलक्ष्मीर्महाभागाउत्पन्नाक्षीरसागरात् ॥ ८७ ॥ पुनःख्यात्यांसमुत्पन्नाभृगोरेषासनातनी ॥ श्रियासहसमुत्पन्नाभृगुणाचमहर्षिणा ॥ ८८ ॥ स्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाम्नानगरीचैवकृतापूर्वंसरित्तटे ॥ नर्मदायांमहाराजब्रह्मणाचानुमोदिता ॥ ८९ ॥ लक्ष्मीःपुरंस्वपित्रेस्वंसहकुञ्चिकयाऽर्प्यच ॥ आगतादेवलोकं
साऽयाचतागत्यवैपुनः ॥ ९० ॥ लोभान्नदत्तंतुपरंप्रार्थयानायदापुनः ॥ भृगोःसकाशान्नावापतदाचैवाहकेशवम् ॥ ९१ ॥ परिभूतातुमित्राहंगृहीत
नगरंमम ॥ तस्यहस्तात्त्वमाक्षिप्यपुरंतच्चानयस्वयम् ॥ ९२ ॥ तंगत्वापुंडरीकाक्षोदेवश्चक्रगदाधरः ॥ भृगुंसानुनयंप्राहकन्यायैपुरमर्पय ॥ ९३ ॥
कुञ्चिकातालिकेचोभेदीयेतांचप्रसादतः ॥ भृगुस्तंकुपितःप्राहनार्पयिष्याम्यहंपुरम् ॥ ९४ ॥ नलक्ष्म्यास्तत्पुरंदेवमयाचेदंस्वयंकृतम् ॥ भगवन्नैव
दास्यामित्यजाक्षेपंतुकेशव ॥ ९५ ॥ तंप्राहदेवोभूयोऽपिलक्ष्म्यास्तत्पुरमर्पय॥सर्वथातुत्वयात्याज्यंवचनान्मेमहामुने ॥९६॥ ततःकोपसमाविष्टो
भृगुरप्याहकेशवम् ॥ पक्षपातेनमांसाधोभार्यायाबाधसेऽधुना ॥ ९७॥ नृलोकेदशजन्मानिलप्स्यसेमधुसूदन ॥ भार्यायास्तेवियोगेनदुःखान्यनुभ
विष्यसि ॥ ९८ ॥ एवंशापंददौतस्मैभृगुःपरमकोपनः ॥ विष्णुनाचपुनस्तस्यदत्तःशापोमहात्मना ॥ ९९ ॥ नचापत्यकृतांप्रीतिंप्राप्स्यसेमुनिपुं
गव ॥ शापंदत्त्वाऋषेस्तस्यब्रह्मलोकंजगामह ॥ १०० ॥ पद्मजन्मानमाहेदंदृष्ट्वादेवस्तुकेशवः ॥ भगवंस्तवपुत्रोसौभृगुःपरमकोपनः ॥ १०१ ॥
निष्कारणंचतेनाहंशप्तोजन्मानिमानुषे ॥ लप्स्यसेदशधात्वंहिततोदुःखान्यनेकशः ॥ १०२ ॥ भार्यानियोगजापीडाबलपौरुषनाशिनी ॥ त्यक्त्वा
चाहमिमंलोकंशयिष्येचमहोदधौ ॥ १०३ ॥ देवकार्येषुसर्वेषुपुनश्चावाहनंक्रियाः ॥ तथाब्रुवंतंतंदेवंब्रह्मालोकगुरुस्तदा ॥ १०४ ॥ प्रसादनार्थं
विष्णोस्तुस्तुतिमेतांचकारह ॥ त्वयासृष्टंजगदिदंपद्मनाभोविनिःसृतम् ॥ तत्रचाहंसमुत्पन्नस्तववश्यश्चकेशव ॥ १०५ ॥ त्वंत्रातासर्वलोकानांस्र
ष्टात्वंजगतःप्रभो ॥ त्रैलोक्यंनत्वयात्याज्यमेषएववरोमम ॥ १०६ ॥ दशजन्ममनुष्येषुलोकानांहितकाम्यया ॥ स्वयंकर्त्तानतेशक्तःशापदा
नायकोपिवा ॥ १०७ ॥ कोऽयंभृगुःकथंतेनशक्यंशप्तुंजनार्दन ॥ मानयस्वसदाविप्रान्ब्राह्मणास्तेतनुस्स्वयम् ॥१०८॥ योगनिद्रामुपास्वत्वंक्षीरा
ब्धौस्वपिहीश्वर ॥ कार्यकालेपुनस्त्वांतुबोधयिष्यामिमाधव ॥ १०९ ॥ भगवन्नेषतावत्तुत्वच्छक्त्याचोपबृंहितः ॥ सर्वकार्यकरःशक्रस्तवैवांशेनश
त्रुहा ॥ ११० ॥ त्रैलोक्यंपालयन्नेवत्वदाज्ञांसकरिष्यति ॥ एवंस्तुतस्तदाविष्णुर्ब्रह्माणमिदमुक्तवान् ॥ १११ ॥ सर्वमेतत्करिष्यामियन्मांज्ञापयसे
प्रभो ॥ अदर्शनंगतोदेवोब्रह्मातंनाभिजज्ञिवान् ॥ ११२ ॥ गतेदेवेतदाविष्णौब्रह्मालोकपितामहः ॥ भूयश्चकारवैसृष्टिंलोकानांप्रभवःप्रभुः ॥११३॥ ॥ १० ॥
तंदृष्ट्वानारदःप्राहवाक्यंवाक्यविदांवरः ॥ सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात् ॥ सर्वव्यापीभुवःस्पर्शादध्यतिष्ठद्दशांगुलम् ॥ ११४ ॥ यद्भूतंयच्च
वैभाव्यंसर्वमेवभवान्यतः ॥ ततोविश्वमिदंतातत्वत्तोभूतंभविष्यति ॥ ११५ ॥ त्वत्तोयज्ञःसर्वहुतःपृषदाज्यंपशुर्द्विधा ॥ ऋचस्त्वत्तोऽथसामानित्वत्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवाभिजज्ञिरे ॥११६॥ त्वत्तोयज्ञास्त्वजायंतत्वत्तोऽश्वाश्चैवदंतिनः ॥गावस्त्वत्तःसमुद्भूताःत्वत्तोजातावयोमृगाः ॥११७ ॥ त्वन्मुखाद्ब्राह्मणाजाता
स्त्वत्तःक्षत्रमजायत ॥ वैश्यास्तवोरुजाःशूद्रास्तवपद्भ्यांसमुद्गताः ११८॥ अक्ष्णोःसूर्योऽनिलःश्रोत्राच्चंद्रमामनसस्तव ॥ प्राणोंतःसुषिराज्जातोमुखा
दग्निरजायत ॥ ११९ ॥ नाभितोगगनंद्यौश्चशिरसःसमवर्त्तत ॥ दिशःश्रोत्रात्क्षितिःपद्भ्यांत्वत्तःसर्वमभूदिदम् ॥ १२० ॥ न्यग्रोधःसुमहानल्पेय
थाबीजेव्यवस्थितः ॥ ससर्ज्जविश्वमखिलंबीजभूतेतथात्वयि ॥ १२१ ॥ बीजांकुरसमुद्भूतोन्यग्रोधः समुपस्थितः ॥ विस्तारंचयथायातित्वत्तः
सृष्टौतथाजगत् ॥ १२२ ॥ यथाहिकदलीनान्यांत्वक्पत्रेभ्योऽभिदृश्यते ॥ एवंविश्वमिदंनान्यत्त्वत्स्थमीश्वरदृश्यते ॥ १२३ ॥ ह्लादिनीत्वयिश
क्तिस्सात्वय्येकासहभाविनी ॥ ह्लादतापकरीमिश्रात्वयिनोगुणवर्जिते ॥ १२४ ॥ पृथग्भूतैकभूतायसर्वभूतायतेनमः ॥ व्यक्तंप्रधानंपुरुषोविराट्स
म्राट्तथाभवान् ॥ १२५ ॥ सर्वस्मिन्सर्वभूतस्त्वंसर्वःसर्वस्वरूपधृक् ॥ सर्वंत्वत्तःसमुद्भूतंनमः सर्वात्मनेततः ॥ १२६ ॥ सर्वात्मकोऽसिसर्वेशसर्वभूतस्थि
तोयतः ॥ कथयामिततः किंतेसर्वंवेत्सिहृदिस्थितं ॥ १२७ ॥ योमेमनोरथोदेवसफलःसत्वयाकृतः ॥ ततंसुतत्तंसफलंयद्दृष्टोऽसिजगत्पते ॥१२८॥ ब्रह्मो
वाच ॥ तपसस्तत्फलंपुत्रयद्दृष्टोहंत्वयाधुना ॥ मद्दर्शनंहिविफलंनारदेहनजायते ॥१२९॥ वरंवरयतस्मात्त्वंयथाभिमतमात्मनः ॥ सर्वंसंपद्यतेतातमयि
दृष्टिपथंगते ॥ १३० ॥ नारदउवाच ॥ भगवन्सर्वभूतेशसर्वस्यास्तेभवान्हृदि ॥ किमज्ञातंतवस्वामिन्मनसायन्मयप्सितम् ॥ १३१ ॥ कृतात्वयायथासृ
ष्टिर्मयादृष्टातथाविभो ॥ तेनमेकौतुकंजातंदृष्ट्वादेवर्षिदानवान् ॥१३२॥ पुलस्त्यउवाच ॥ नारदस्यपितातुष्टोब्रह्मादेवोदिवस्पतिः ॥नारदायवरंप्रादादृषी
णामुत्तमोभवान् ॥ १३३ ॥ भवितामत्प्रसादेनकालिकोलिकथाप्रियः ॥ गतिश्चतेऽप्रतिहतादिविभूमौरसातले ॥ १३४ ॥ यज्ञोपवीतसूत्रेणयोगपट्टावलं
बिका ॥ छत्रिकाचतथावीणाअलंकारायतेनघ ॥ १३५ ॥ विष्णोः समीपे रुद्रस्यतथाशक्रस्यनारद ॥ द्वीपेषुपार्थिवानांतुसदाप्रीतिंचलप्स्य
से ॥ १३६ ॥ वर्णानांतुभवान्शास्तावरोदत्तोमयातव ॥ तिष्ठपुत्रयथाकामंसेव्यमानःसुरैर्दिवि ॥ १३७॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डे लक्ष्म्यु
त्पत्तिर्नामचतुर्थोऽध्यायः ॥ ४ ॥ भीष्मउवाच ॥ कथंसतीदक्षसुतादेहंत्यक्तवतीशुभा ॥ दक्षयज्ञस्तुरुद्रेणविध्वस्तःकेनहेतुना ॥ १ ॥ एतन्मेकौतुकं
ब्रह्मन्कथंदेवोमहेश्वरः ॥ जगामाथक्रोधवशंत्रिपुरारिर्महायशाः ॥ २ ॥ पुलस्त्य उवाच ॥ गंगाद्वारेपुराभीष्मदक्षोयज्ञमथारभत् ॥ तत्रदेवासुरगणाः
पितरोथमहर्षयः ॥ ३ ॥ समाजग्मुर्मुदायुक्ताः सर्वेदेवाःसवासवाः ॥ नागायक्षाःसुपर्णाश्चवीरुदोषधयस्तथा ॥ ४ ॥ कश्यपोभगवानत्रिः पुलस्त्यः
पुलहः क्रतुः ॥ प्रचेतसोंगिराश्चैववसिष्ठश्चमहातपाः ॥५॥ तत्रवेदींसमांकृत्वाचातुर्होत्रंन्यवेशयत् ॥ होतावसिष्ठस्तत्रासीदंगिराध्वर्युसत्तमः ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृहस्पतिरथोद्गाताब्रह्मावैनारदस्तथा ॥ यज्ञकर्मप्रवृत्तौतुहूयमानेषुचाग्निषु ॥ ७ ॥ आगतावसवः सर्वे आदित्याद्वादशैवतु ॥ अस्मिनौमरुतश्चैवमनव
श्चचतुर्दश ॥ ८ ॥ एवंयज्ञेप्रवृत्तेतुहूयमानेषुचाग्निषु ॥ विभूतिंतांपरांतत्रभक्ष्यभोज्यकृतांशुभाम् ॥९॥ आलोक्यसर्वतोभूमिंसमंताद्दशयोजनम् ॥ महा
वेदीकृतातत्रसर्वैस्तत्रसमन्वितैः ॥१०॥ सर्वान्देवान्शक्रमुख्यान्यज्ञेदृष्ट्वासतीशुभा ॥ तदासानुनयंवाक्यंप्रजापतिमभाषत ॥११॥ सत्युवाच ॥ ऐरा
वतंसमारूढो देवराजः शतक्रतुः ॥ पत्न्याशच्यासहायातः कृतावासःशतक्रतुः ॥१२॥ पापानांयोयमयिताधर्मेणाधर्मिणांप्रभुः॥ पत्न्याधूमोर्णया
सार्द्धमिहायातः स दृश्यते ॥१३॥ यादसांचपतिर्देवोवरुणोलोकभावनः॥ गौर्य्यापत्न्यासहायातः प्रचेतामंडपेत्विह ॥१४॥ सर्वयक्षाधिपोदेवः पुत्रो
विश्रवसोमुनेः॥ पत्न्यात्विहसमायातः सहदेव्याधनाधिपः ॥ १५॥ मुखं यः सर्वदेवानांजंतूनामुदरेस्थितः ॥ वेदायदर्थमुत्पन्नास्सोयंयज्ञमुपागतः॥
॥ १६ ॥ निऋतीराक्षसेन्द्रोऽसौदिक्पतित्वेनियोजितः ॥ सचत्विहागतस्तातपत्न्यासार्द्धंकृताविह ॥ १७ ॥ आयुःप्रदोजगत्यस्मिन्ब्रह्मणानिर्मितः
पुरा ॥ प्राणोऽपानोव्यानउदानस्समानाह्वयस्तथा ॥ १८ ॥ एकोनपंचाशत्केनगणेनपरिवारितः ॥ यज्ञेप्रजापतिश्चासौवायुर्देवः समागतः॥
॥ १९ ॥ द्वादशात्माग्रहाध्यक्षः चक्षुषी जगतस्त्विह ॥ पातिवैभुवनंसर्वंदेवानां यः परायणः ॥ २० ॥ आयुषश्चवनानांचदिवसानांपतिर्हियः ॥ सं
ज्ञापतिरिहायातो भास्करोलोकपावनः ॥ २१ ॥ अत्रिवंशसमुद्भूतोद्विजराजोमहायशाः ॥ नयनानंदजननोलोकनाथोधरातले ॥ २२ ॥ ओष
धीनांपतिश्चापिवीरुधामपिसर्वशः॥उडुनाथः सपत्नीकइहायातः शशीतव ॥ २३ ॥ वसवोऽष्टौसमायाताअश्विनौचसमागतौ॥वृक्षोवनस्पतिश्चापि
गंधर्वाप्सरसांगणाः ॥२४॥ विद्याधराभूतसंघावेताला यक्षराक्षसाः॥ पिशाचाश्चोग्रकर्माणस्तथान्येजीवहारकाः ॥ २५ ॥ नद्योनदाः समुद्राश्च द्वीपा
श्चसहपर्वतैः ॥ ग्राम्यारण्याश्चपशवोयदिङ्गंयच्चनेङ्गति ॥ २६ ॥ कश्यपोभगवानत्रिर्वसिष्ठश्चापरैःसह ॥ पुलस्त्यःपुलहश्चैवसनकाद्यामहर्षयः ॥ २७॥
पुण्याराजर्षयश्चैवपृथिव्यांयेचपार्थिवाः॥वर्णाश्चाश्रमिणश्चैवसर्वेयेकर्मकारिणः ॥२८॥ किमत्रबहुनोक्तेनब्राह्मीसृष्टिरिहागता ॥ भगिन्योभागिनेयाश्चभ
गिनीपतयस्त्विमे ॥ २९ ॥ स्वभार्यासहिताःसर्वेसपुत्रास्सहबांधवाः ॥ त्वयासमर्चिताःसर्वेदानमानपरिग्रहैः ॥ ३० ॥ आमंत्रणामंत्रितानांसर्वेषांमान
नाकृता ॥ एकएवात्रभगवान्पतिर्मेन समागतः ॥३१॥ विनातेनत्विदंसर्वंशून्यवत्प्रतिभातिमे ॥ मन्येचाहंतुभवतापतिर्मेननिमंत्रितः ॥३२॥ विस्मृतस्ते
भवेन्नूनंसर्वशंसतुमेभवान् ॥पुलस्त्यउवाच॥तस्यास्तदुक्तंवचनंश्रुत्वादक्षःप्रजापतिः ॥३३॥ पतिस्नेहसमायुक्तांप्राणेभ्योऽपिगरीयसीम्॥अंकमारोप्य
तांबालांसाध्वींपतिपरायणाम् ॥३४॥ पतिव्रतांमहाभागांपतिप्रियहितैषिणीम्॥ प्राहगंभीरभावेनशृणुवत्सेयथातथम् ॥३५॥ येनाद्यकारणेनेहपतिस्तेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निमंत्रितः ॥ कपालपात्रधृक्चर्मीभस्मावृततनुस्तथा ॥३६॥ शूलीमुण्डीचनग्नश्चश्मशानेरमतेसदा॥ विभूत्याङ्गानिसर्वाणिपरिमार्ष्टिचनित्यशः ॥३७॥
व्याघ्रचर्मपरीधानोहस्तिचर्मपरिच्छदः ॥कपालमालांशिरसिखट्वांगंचकरेस्थितम् ॥३८॥ कव्यांवैगोनसंबध्वालिंगेऽस्थनांवलयंतथा॥पन्नागानांतुराजा
नसुपवीतंचवासुकिम् ॥३९॥ कृत्वाभ्रमतिचानेनरूपेणसततंक्षितौ॥नग्नागणाःपिशाचाश्चभूतसंघाह्यनेकशः ॥४०॥ त्रिनेत्रश्चत्रिशूलीचगीतनृत्यरतस्स
दा ॥कुत्सितानि तथान्यानिसदातेकुरुतेपतिः ॥४१॥ त्रपाकरोभवेन्मह्यंदेवानांसंनिधिःकथम् ॥ कीदृक्चवसनंतस्यकेतनंप्रतिनार्हति ॥ ४२ ॥ एतैर्दोषै
र्मयावत्सेलोकानांचैवलज्जया ॥ नाह्वानंतुकृतंतस्यकारणेनमयासुते ॥ ४३ ॥ यज्ञस्यास्यसमाप्तौतुपूजांकृत्वात्वयासह ॥ आनीयतवभर्तारंत्वयासह
त्रिलोचनम् ॥ ४४ ॥ त्रैलोक्यस्याधिकांपूजांकरिष्यामिचसत्कृतैः ॥ एतत्तेसर्वमाख्यातंत्रपायाः कारणंमहत् ॥४५॥ नात्रमन्युस्त्वयाकार्यः सर्वस्वं
भागमर्हति ॥ अन्यजन्मनियैर्याहक्कृतंकर्मशुभाशुभम् ॥४६॥ इहजन्मनितेताहक्पुत्रिकेभुञ्जते फलम् ॥ परितापंमाकृथास्त्वंफलंभुक्ष्वपुराकृतम् ॥
॥ ४७ ॥ श्रियंपरगतां दृष्ट्वारूपसौभाग्यशोभनाम्॥रूपंचकांतिसौभाग्यंरम्याण्याभरणानिच ॥४८॥ कुलेमहतिवैजन्मवपुश्चातीवसुन्दरम् ॥पूर्वभाग्यै
स्तुलभ्यंते नरैरेतानिसुव्रते ॥ ४९ ॥ मात्मानंपरिनिंदेथामाचभाग्यानिसुव्रते ॥ फलंचैवंविधिकृतंदातुंकस्यतुकःक्षमः ॥५०॥ नास्तिवैबलवान्कश्चिन्न मू
ढो न चपण्डितः ॥ पांडित्यंचबलंचवजायतेपूर्वकर्मणा ॥५१॥ एतेदेवादिवंप्राप्ताः शोभमानाःस्थिताश्चिरम्॥पुण्येनतपसाचैवक्षेत्रेषुविविधेषुच ॥५२॥
यदेभिरार्जितंपुण्यंतस्यैतेफलभागिनः॥एवमुक्ता ततः सातुसतीभीष्मरूपान्विता॥५३॥विनिंदमानापितरंक्रोधेनारुणितेक्षणा॥एवमेतद्यथातात त्वया
चोक्तंममाग्रतः ॥ ५४ ॥ सर्वोजनः पुण्यभागी पुण्येनलभतेश्रियम्॥ पुण्येनलभतेजन्मपुण्येभोगाः प्रतिष्ठिताः ॥५५॥तदयंजगतामीशःसर्वेषामुत्त
मोत्तमः ॥ स्थानान्येतानिसर्वेषांदत्तान्येतेनधीमता ॥५६॥ येगुणास्तस्यदेवस्यवक्तुंजिह्वापिवेधसः॥नशक्ता ख्यापनेतस्यदेवस्यपरमेष्ठिनः ॥५७॥
भस्मास्थिचकपालानिश्मशानेवसतिस्तथा ॥ गोनसाद्याश्चयेसर्पाः सर्वेतभूषणीकृताः ॥ ५८ ॥ भूतप्रेतागणास्तस्यपिशाचागुह्यकास्तथा ॥ एषधा
ताविधाताचएषपालयितादिशः ॥ ५९ ॥ प्रसादेनचरुद्रस्यप्राप्तस्वर्गः पुरंदरः ॥ यदिरुद्रेऽस्तिदेवत्वंयदिसर्वगतः शिवः॥६०॥सत्येनतेनतेयज्ञंविध्वं
सयतुशंकरः ॥ यद्यस्तिमेतपःकिंचित्कश्चिद्धर्मोऽथवाकृतः ॥ ६१ ॥ फलेनतस्यधर्मस्ययज्ञस्तेनाशमर्हति ॥ प्रियाहंयदिदेवस्ययदिमांतारयिष्यति
॥ ६२ ॥ तेनसत्येनतेगर्वःसमाप्तिमभिगच्छतु ॥ इत्युक्त्वायोगमास्थायस्वदेहस्थेनतेजसा ॥ ६३ ॥ निर्ददाहतदात्मानंसदेवासुरपन्नगैः ॥ किंकि
मेतदितिप्रोक्तेगंधर्वगणगुह्यकैः ॥ ६४ ॥ गंगाकूलेतदामुक्तोदेहोवैक्रुद्धयातया ॥ सौनकंनामतत्तीर्थंगंगायाः पश्चिमेतटे ॥ ६५ ॥ श्रुत्वारुद्रस्तुतद्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्तांपत्न्यानाशसुदुःखितः ॥ हंतुंयज्ञंधीरभवत्देवानामिहपश्यताम् ॥ ६६ ॥ गणकोटिःसमादिष्टाग्रहावैनायकास्तथा ॥ भूतप्रेतपिशाचाश्चदक्षयज्ञ विनाशने ॥ ६७ ॥ तैर्गत्वाविबुधास्सर्वेयज्ञेनिर्जित्यनाशिताः ॥ हतेयज्ञेतदादक्षोनिरुत्साहोनिरुद्यमः ॥ ६८ ॥ उपगम्याब्रवीत्त्रस्तोदेवदेवंपिनाकिनम् ॥ नज्ञातोऽसिमयादेवदेवानांप्रभुरीश्वरः ॥ ६९ ॥ त्वमस्यजगतोऽधीशःसुरास्सर्वेत्वयाजिताः ॥ कृपांकुरुमहेशानगणान्सर्वान्निवर्त्तय ॥७०॥ गणैर्नानावि धैर्घोरैर्नानाभूषणभूषितैः ॥ नानावदनदंतौष्ठैर्नानाप्रहरणोद्यतैः ॥७१॥ नानानागेंद्रसंदष्टजटाभारोपशोभितैः ॥ सुदृढोद्धतदर्पाढ्यैर्घोरैर्घोरनिघातिभिः ॥७२॥ कामरूपैरकांतैश्चसर्वकामसमन्वितैः ॥ अनिवार्यबलैश्चोग्रैर्योगिभिर्योगगामिभिः ॥७३॥ व्यालोलकेसरजटैर्दंष्ट्रोत्कटहसन्मुखैः ॥ करींद्रकरटा टोपपाटवैःसिंहदेहिभिः ॥ ७४ ॥ केचित्परमदाघ्राणघूर्णद्दीपसमप्रभैः ॥ विचित्रचित्रवसनैर्द्धीरैर्धीरवरादिभिः ॥७५॥ मृगव्याघ्रसिंहरुरुतैस्तरक्ष्वजिनधारि भिः ॥ भुजंगहारवलयकृतयज्ञोपवीतकैः ॥ ७६ ॥ शूलासिपट्टिशधरैःपरशुप्रासहस्तकैः ॥ वज्रक्रकचकोदंडकालदंडास्त्रपाणिभिः ॥ ७७ ॥ गणेश्वरैःसुदु र्द्धर्षैर्वृतःसूर्योग्रहैरिव ॥ देवदेवमहादेवनष्टोयज्ञोदिवंगतः ॥ ७८ ॥ मृगरूपधरोभूत्वाभयभीतस्तुशंकर ॥ नमःशङ्खाभदेवायसगणायसनंदिने ॥७९॥ वृषासनायसोमायक्रतुकालांतकायच ॥नमोदिक्चर्मवस्त्रायनमस्तेतीव्रतेजसे ॥ ८० ॥ ब्रह्मणेब्रह्मदेहायब्रह्मण्यायामितायच ॥ गिरीशायसुरेशायई शानायनमोनमः ॥ ८१ ॥ रुद्रायप्रतिवज्रायशिवायक्रथनायच ॥ सुरासुराधिपतयेयतीनांपतयेनमः ॥ धूम्रोग्रायविरूपाययज्वनेघोररूपि णे ॥ ८२ ॥ विरूपाक्षशुभाक्षायसहस्राक्षायवैनमः ॥ मुंडायचंडमुण्डायवरखट्वाङ्गधारिणे ॥ कव्यरूपायहव्यायसर्वसंहारिणेनमः ॥ ८३ ॥ भक्तानु कंपिनेऽत्यथरुद्रजाप्यस्तुतायच ॥ विरूपायसुरूपायरूपाणांशतकारिणे ॥ ८४ ॥ पंचास्यायशुभास्यायचन्द्रस्यायनमोनमः ॥ वरदायवराहायकूर्मा यचमृगायच ॥ ८५ ॥ लीलालकशिखंडायकमंडलुधरायच ॥ विश्वनाम्नेऽथविश्वायविश्वेशायनमोनमः ॥ ८६ ॥ त्रिनेत्रत्राणमस्माकंत्रिपुरघ्नविधीय ताम् ॥वाङ्मनःकायभावैस्तुप्रपन्नस्यमहेश्वर ॥ ८७ ॥ एवंस्तुतस्तदादेवोदक्षेणापन्नदेहिना ॥ दिव्येनानेनस्तोत्रेणभृशमाराधितस्तदा ॥ ८८ ॥ समग्रं तेयज्ञफलंमयादत्तंप्रजापते ॥ सर्वकामप्रसिद्ध्यर्थंफलंप्राप्स्यस्यनुत्तमम् ॥८९॥ एवमुक्तोभगवताप्रणम्याथसुरेश्वरम् ॥ जगामस्वनिकेतंतुगणानामेव पश्यताम् ॥ ९० ॥ पत्न्याःशोकेनवैदेवोगंगाद्वारेतदास्थितः ॥ तांसतींचिंतयानस्तुकनुसामेक्वियागता ॥ ९१ ॥ तस्यशोकाभिभूतस्यनारदोभवसं न्निधौ ॥ सातेसतीयादेवेशभार्याप्राणसमामृता ॥९२॥ हिमवद्दुहितासाचमनागर्भसमुद्भवा ॥ जग्राहदेहमन्यंसावेदवेदार्थवेदिनी ॥ ९३ ॥ श्रुत्वादे वस्तदाध्यानमवतीर्णामपश्यत ॥ कृतकृत्यमथात्मानंकृत्वादेवस्तदास्थितः ॥ ९४ ॥ संप्राप्तयौवनादेवीपुनरेवविवाहिता ॥ एवंहिकथितंभीष्मय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

थायज्ञोहतःपुरा ॥ ९९ ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेदक्षयज्ञविध्वसोनामपञ्चमोऽध्यायः ॥ ५॥ ॥ भीष्मउवाच ॥ ॥ देवानांदानवानांचगं
धर्वोरगरक्षसाम् ॥ उत्पत्तिंविस्तरेणेमांगुरोब्रूहियथाविधि ॥ १ ॥ पुलस्त्य उवाच ॥ ॥ ॥ संकल्पाद्दर्शनात्स्पर्शात्पूर्वेषांसृष्टिरुच्यते ॥ दक्षात्प्रा
चेतसादूर्ध्वंसृष्टिर्मैथुनसंभवा ॥ २ ॥ यथाससर्जचैवासौतथैवशृणुकौरव॥यदातुसृजतस्तस्यदेवर्षिगणपन्नगान् ॥३॥ नवृद्धिमगमल्लोकस्तदामैथुनयो
गतः ॥ दक्षःपुत्रसहस्राणितदासिक्न्यामजीजनत् ॥ ४ ॥ तांस्तुदृष्ट्वामहाभागान्सिसृक्षून्विविधाःप्रजाः ॥ नारदःप्राहहर्यश्वान्दक्षपुत्रान्समागतान्
॥ ५ ॥ भुवःप्रमाणंसर्वंतुज्ञात्वोर्द्धमधएववा ॥ ततःसृष्टिविशेषेणकुरुध्वमृषिसत्तमाः ॥ ६ ॥ तेतुतद्वचनंश्रुत्वाप्रयाताःसर्वतोदिशम् ॥ अद्यापिनानि
वर्ततेसमुद्रादिवसिंधवः ॥ ७ ॥ हर्यश्वेषुप्रणष्टेषुपुनर्दक्षःप्रजापतिः ॥ वीरिण्यामेवपुत्राणांसहस्रमसृजत्प्रभुः ॥ ८॥ शबलाश्वानामतेचसमेताःसृष्टिक
र्मणि॥नारदोऽनुगतान्प्राहपुनस्तान्पूर्ववन्मुनिः ॥९॥ भुवःप्रमाणंसर्वंतुज्ञात्वाभ्रातॄनथोपुनः ॥ आगत्यचपुनःसृष्टिंकरिष्यथविशेषतः ॥ १० ॥ तेऽपि
तेनैवमार्गेणजग्मुर्भ्रात्रनुगास्तदा ॥ ततःप्रभृतिनभ्रातुःकनीयान्मार्गमिच्छति ॥ ११ ॥ अन्वेष्टादुःखमाप्नोतितेनतत्परिवर्जयेत् ॥ ततस्तेष्वपिन
ष्टेषुषष्टिंकन्याःप्रजापतिः ॥ १२ ॥ वीरिण्यांजनयामासदक्षःप्राचेतसस्तदा ॥ प्रादात्सदशधर्मायकश्यपायत्रयोदश ॥ १३ ॥ विंशतिंसप्तसोमाय
चतस्रोऽरिष्टनेमिने ॥ द्वेचैवभृगुपुत्रायद्वेकृशाश्वायधीमते ॥ १४ ॥ द्वेचैवांगिरसेप्रादात्तासांनामानिविस्तरात् ॥शृणुत्वंदेवमातॄणांप्रजाविस्तारमादितः
॥ १५ ॥ अरुंधतीवसुर्जामिर्लम्बाभानुर्मरुत्वती ॥ संकल्पाचमुहूर्ताचसाध्याविश्वाचभामिनी ॥ १६॥ धर्मपत्न्यःसमाख्यातास्तासांपुत्रान्निबोधमे
विश्वेदेवास्तुविश्वायाःसाध्यासाध्यानजीजनत् ॥१७॥ मरुत्वत्यांमरुत्वंतोवसोस्तुवसवस्तथा ॥ भानोस्तुभानवोजातामूहूर्त्तायामुहूर्तजाः ॥१८॥
लंबायांघोषनामानोनागवीथींतुजामिजा ॥पृथिवीतलसंभूतमरुंधत्यामजायत ॥ १९ ॥ संकल्पायास्तुसंकल्पावसुसृष्टिंनिधारय ॥ ज्योतिष्मंतश्च
येदेवाव्यापकाःसर्वतोदिशम् ॥२०॥ वसवस्तेसमाख्यातास्तेषांनामानिमेशृणु॥आपोध्रुवश्चसोमश्चधरश्चैवानिलोऽनलः॥२१॥प्रत्यूषश्चप्रभासश्चवसवो
ष्टौप्रकीर्तिताः ॥ आपस्यपुत्राश्चत्वारःश्रांतोवैतण्डएवच ॥ २२ ॥ अपिशांतोमनिर्बभ्रुर्यज्ञरक्षाधिकारिणः ॥ ध्रुवस्यकालःपुत्रस्तुवर्चाः सोमादजाय
त ॥ २३ ॥ द्रविणोहव्यवाहश्चधरपुत्राविमौस्मृतौ ॥ कल्पांतस्थस्ततःप्राणोरमणःशिशिरोऽपिच ॥२४॥ मनोहरोधवश्चाथशिवोवाथहरेःसुताः ॥
शिवोमनोजवंपुत्रमविज्ञातगतिप्रदम् ॥ २५ ॥ अवापचानलःपुत्रानग्निप्रायगुणांस्ततः ॥ तत्रशाखोविशाखश्चनिगमेषुस्वयंभुवः ॥ २६ ॥
अपत्यंकृत्तिकानांचकार्तिकेयस्ततःस्मृतः ॥ प्रत्यूषस्यऋभुःपुत्रोमुनिर्नामाथदेवलः ॥ २७ ॥ विश्वकर्माप्रभासस्यपुत्रःशिल्पीप्रजापतिः ॥ प्रासादभ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वनोद्यानप्रतिमाभूषणादिषु ॥ २८ ॥ तटाकारामकूपेषुत्रिदशानांचवर्द्धकिः ॥ अजैकपादहिर्बुध्न्योविरूपाक्षोऽथरैवतः ॥ २९ ॥ हरश्चबहुरूपश्च
त्र्यंबकश्चसुरेश्वरः ॥ सावित्रश्चजयंतश्चपिनाकीचापराजितः ॥ ३० ॥ एतेरुद्रास्समाख्याताएकादशगणेश्वराः ॥ एतेषांमानसानांतुत्रिशूलवर
धारिणाम् ॥ ३१ ॥ कोट्यश्चतुरशीतिस्तुतत्पुत्राश्चाक्षयामताः ॥ दिक्षुसर्वासुयेरक्षांप्रकुर्वंतिगणेश्वराः ॥ ३२ ॥ एतेवैपुत्रपौत्राश्चसुरभीगर्भसं
भवाः ॥ कश्यपस्यप्रवक्ष्यामिपुत्रपौत्रादिपत्निषु ॥ ३३ ॥ अदितिर्दितिर्दनुश्चैवअरिष्टासुरसातथा ॥ सुरभिर्विनताचैवताम्राक्रोधवशाइरा
॥ ३४॥ कद्रूखसामुनिस्तद्वत्तासुपुत्रान्निबोधमे ॥ तुपितानामयेदेवाश्चाक्षुषस्यांतरेमनोः ॥ ३५ ॥ वैवस्वतेंऽतरेचैवआदित्याद्वादशस्मृताः ॥ इन्द्रो
धाताभगस्त्वष्टामित्रोऽथवरुणोऽर्यमा ॥ ३६ ॥ विवस्वान्सवितापूषाअंशुमान्विष्णुरेवच ॥ एतेसहस्राकिरणाआदित्याद्वादशस्मृताः ॥ ३७ ॥
मारीचात्कश्यपाज्जाताः पुत्रास्तेऽदितिनंदनाः ॥ कृशाश्वस्यऋषेःपुत्रादेवप्रहरणाःस्मृताः ॥३८ ॥ एतेदेवगणास्तातप्रतिमन्वंतरेषुच ॥ उत्पद्यंतेवि
विलीयंतेकल्पेकल्पेतथैवच ॥ ३९॥ दितिःपुत्रद्वयंलेभेकश्यपादितिनःश्रुतम् ॥हिरण्यकशिपुंचैवहिरण्याक्षंतथैवच ॥४०॥ हिरण्यकशिपोस्तद्वज्जा
तंपुत्रचतुष्टयम्॥ प्रह्लादश्चानुह्लादश्चसंह्लादोह्लादएवच ॥ ४१ ॥ प्रह्लादपुत्राआयुष्मान्शिबिर्बाष्कलिरेवच ॥ विरोचनश्चतुर्थस्तुसबलिंपुत्रमाप्तवान्
॥ ४२ ॥ बलेःपुत्रशतंत्वासीद्बाणज्येष्ठंततोनृप ॥ धृतराष्ट्रस्तथासूर्य्योविवस्वानंशुतापनः ॥ ४३ ॥ निकुम्भनामागुर्वक्षःकुक्षिर्भौमोऽथभीषणः ॥
एवमन्येतुबहवोबाणोज्येष्ठोगुणाधिकः ॥ ४४ ॥ बाणस्सहस्रबाहुस्तु सर्वास्त्रगुणसंयुतः ॥ तपसातोषितोयस्यपुरेवसतिशूलधृत् ॥ ४५ ॥ महाका
लत्वमगमत्साथ्र्यंयस्यपिनाकिनः ॥ हिरण्याक्षस्यपुत्रोऽभूदंधकोनामनामतः ॥ ४६ ॥ भूतसंतापनश्चैवमहानागस्तथैवच ॥ एतेभ्यःपुत्रपौत्राणांको
टयः सप्तसप्ततिः ॥ ४७ ॥ महाबलामहाकायानानारूपामहौजसः ॥ दनुः पुत्रशतंलेभेकश्यपाद्वरदार्पितम् ॥ ४८ ॥ विप्रचित्तिःप्रधानोऽभूदेषांम
ध्येमहाबलः ॥ द्विरष्टमूर्द्धाशकुनिस्तथाशंकुशिरोधरः ॥ ४९ ॥ अयोमुखःशंबरश्चकपिलोवामनस्तथा ॥ मरीचिर्मागधश्चैवहरिर्गजशिरास्तथा
॥ ५० ॥ निद्राधरश्चकेतुश्चकेतुवीर्यःशतक्रतुः ॥ इन्द्रमित्रग्रहश्चैववज्रनाभस्तथैवच ॥ ५१ ॥ एकवस्त्रोमहाबाहुर्वज्राक्षस्तारकस्तथा ॥ असिलो
मापुलोमाचविकुर्वाणोमहासुरः ॥ ५२ ॥ स्वर्भानुर्वृषपर्वाचएवमाद्यादनोःसुताः॥स्वर्भानोःसुप्रभाकन्याशचीचैवपुलोमजा ॥ ५३ ॥ उपदानवीम
यस्यासीत्तथामंदोदरीकुहूः ॥ शर्मिष्ठासुन्दरीचैवचंडाचवृषपर्वणः ॥ ५४ ॥ पुलोमाकालकाचैववैश्वनरसुतेउभे ॥ बह्वपत्योमहासत्वोमारीचस्य
परिग्रहः ॥ ५५ ॥ तयोःषष्टिसहस्राणिदानवानांपुराभवन् ॥ पौलोमान्कालखंजांश्चमारीचोऽजनयत्पुरा ॥ ५६ ॥ अवध्यायेनराणांवैहिरण्यपुर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वासिनः ॥ चतुर्मुखाल्लब्धवरायेहताविजयेनतु ॥ ५७ ॥ विप्रचित्तिः सिंहिकायांनवपुत्रानजीजनत् ॥ हिरण्यकशिपोर्येवैभागिनेयास्त्रयोदश
॥ ५८ ॥ कंसःशंखश्चराजेंद्रनलोवातापिरेवच ॥ इल्वलोनमुचिश्चैवखसृमश्चांजनस्तथा ॥ ५९ ॥ नरकःकालनाभश्चपरमाणुस्तथैवच ॥ कल्प
वीर्यश्चविख्यातोदनुवंशविवर्द्धनः ॥ ६० ॥ संह्लादस्यतुदैत्यस्यनिवातकवचाःकुले ॥ अवध्याःसर्वदेवानांगंधर्वोरगरक्षसाम् ॥ ६१ ॥ येहताबल
माश्रित्यअर्जुनेनरणाजिरे ॥ षट्कन्याजनयामासताम्रामारीचवीर्यतः ॥ ६२ ॥ शुकींश्येनींचभासींचसुगृध्रींगृध्रिकांशुचिम् ॥ शुकीशुकानुलूकांश्च
जनयामासधर्मतः ॥ ६३ ॥ श्येनीश्येनांश्चभासीचकुररानप्यजीजनत् ॥ गृध्रीगृध्रान्सुगृध्रीचपारावतविहंगमान् ॥ ६४ ॥ हंससारसकारंडप्लवान्
शुचिरजीजनत् ॥ एतेताम्रासुताःप्रोक्ताविनतायानिशामय ॥ ६५ ॥ गरुडः पतगश्रेष्ठोऽरुणश्चेशःपतत्रिणाम् ॥ सौदामिनीतथाकन्यायेयंनभसि
विश्रुता ॥ ६६ ॥ संपातिश्चजटायुश्चअरुणस्यसुतावुभौ ॥ संपातिपुत्रोबभ्रुश्चशीघ्रगश्चातिविश्रुतः ॥ ६७ ॥ जटायोः कर्णिकारश्चशतगामीच
विश्रुतौ ॥ तेषामसंख्यमभवत्पक्षिणांपुत्रपौत्रकम् ॥ ६८ ॥ सुरसायांसहस्रंतुसर्पाणामभवत्पुरा ॥सहस्रशिरसांकद्रूःसहस्रंप्रापसुव्रता ॥ ६९ ॥ प्रधा
नास्तेषुविख्याताष्षड्विंशतिररिंदम ॥ शेषवासुकिकर्कोटशंखैरावतकंबलाः ॥ ७० ॥ धनंजयमहानीलपद्माश्वतरतक्षकाः ॥ एलापत्रमहापद्मधृतरा
ष्ट्रबलाहकाः ॥ ॥७१॥ शंखपालमहाशंखपुष्पदंष्ट्रशुभाननाः ॥ शंखरोमाचनहुषोरमणः पणिनस्तथा ॥७२ ॥ कपिलोदुर्मुखश्चापिपतंजलिमुखा
स्तथा ॥ एषामनंतमभवत्सर्वेषांपुत्रपौत्रकम् ॥ ७३ ॥ प्रायशोयत्पुरादग्धंजनमेजयमंदिरे ॥ रक्षोगणंक्रोधवशासुनामानमजीजनत् ॥ ७४ ॥
दंष्ट्रिणांनियुतंतेषांभीमसेनादगात्क्षयम् ॥ दंष्ट्रिगोमायुकाकादीन्महिषीगोंवराङ्गनाः ॥ ७५ ॥ सुरभिर्जनयामासकश्यपात्त्रितयंपुरा ॥ मुनिर्मुनी
नांचगणंगणमप्सरसांतथा ॥ ७६ ॥ तथाकिन्नरगंधर्वानरिष्टाजनयद्बहून् ॥ तृणवृक्षलतागुल्मानिरासर्वमजीजनत् ॥ ७७ ॥ खसातुयक्षरक्षांसिजन
यामासकोटिशः ॥ एतेकश्यपदायादाःशतशोऽथसहस्रशः ॥ ७८ ॥ एषमन्वंतरेभीष्मसर्गःस्वारोचिषेस्मृतः ॥ ततस्त्वेकोनपंचाशन्मरुतःकश्यपाद्दि
तेः॥ जनयामासधर्मज्ञसर्वानमरवल्लभान् ॥ ७९ ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखंडेषष्ठोऽध्यायः ॥ ६ ॥ भीष्मउवाच ॥ दितेःपुत्राःकथंजातामरु
तोदेववल्लभाः ॥ देवैर्जग्मुश्चसापत्नैः कस्मात्सख्यमनुत्तमम् ॥ १ ॥ पुलस्त्य उवाच ॥ पुरादैवासुरेयुद्धेहतेषुहरिणासुरैः ॥ पुत्रपौत्रे
षुशोकार्तागताभूलोकमुत्तमम् ॥ २ ॥ पुष्करेषुमहातीर्थेसरस्वत्यास्तटेशुभे ॥ भर्त्तुराराधनपरातपउग्रंचचारह ॥ ३ ॥ दितिर्वैदैत्यमा
तातुऋषिकार्येणसुव्रता ॥ फलाहारा तपस्तेपे कृच्छ्चांद्रायणादिभिः ॥ ४ ॥ यावद्वर्षशतंसाग्रंजराशोकसमाकुला ॥ ततःसातपसातप्ताव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सिष्ठादीनपृच्छत ॥ ५ ॥ कथयंतुभवन्तोमेपुत्रशोकविनाशनम् ॥ व्रतंसौभाग्यफलदमिहलोकेपरत्रच ॥ ६ ॥ ऊचुर्वसिष्ठप्रमुखाज्येष्ठस्य
पूर्णिमाव्रतम् ॥ यस्यप्रसादादभवत्सुतशोकविवर्जिता ॥ ७ ॥ भीष्मउवाच ॥ श्रोतुमिच्छाम्यहंब्रह्मन्ज्येष्ठस्यपूर्णिमाव्रतम् ॥ सुतानेकोन
पंचाशद्येनलेभेपुनर्दितिः ॥ ८ ॥ पुलस्त्यउवाच ॥ यद्वसिष्ठादिभिःपूर्वंदित्यै संकथितंव्रतम् ॥ विस्तरेणतदेवेदंमत्सकाशान्निशामय ॥ ९ ॥
ज्येष्ठेमासिसितेपक्षेपौर्णमास्यांयतव्रता ॥ स्थापयेदव्रणंकुंभंसिततण्डुलपूरितम् ॥ १० ॥ नानाफलयुतंतद्वदिक्षुदंडसमन्वितम् ॥ सितवस्त्रयुगच्छन्नं
सितचंदनचर्चितम् ॥ ११ ॥ नानाभक्ष्यसमोपेतंसहिरण्यंतुशक्तितः ॥ ताम्रपात्रंगुडोपेतंतस्योपरिनिवेशयेत् ॥ १२ ॥ तस्मादुपरिब्रह्माणंसौवर्णं
पद्मकोटरे ॥ कुर्याच्छर्करयोपेतांसावित्रींतस्यवामतः ॥ १३ ॥ गंधंधूपंतयोर्दद्याद्गीतंवाद्यंचकारयेत् ॥ तदभावेकथंकुर्याद्यथापद्मेपितामहः ॥१४॥
ब्रह्माह्वयांचप्रतिमांकृत्वागुडमयींशुभाम् ॥ शुक्लपुष्पाक्षततिलैरर्चयेत्पद्मसंभवम् ॥ १५ ॥ ब्राह्मायपादौसंपूज्यजंघेसौभाग्यदायच ॥ विरिंचायोरुयु
ग्मंचमन्मथायेतिवैकटिम् ॥ १६ ॥ स्वच्छोदरायेत्युदरमतन्द्रायेत्युरोविधेः ॥ मुखंपद्ममुखायेतिबाहूवैवेदपाणये ॥ १७ ॥ नमःसर्वात्मनेमौलिमर्च
येच्चापिपंकजम् ॥ ततःप्रभातेतत्कुंभंब्राह्मणायनिवेदयेत्॥१८॥ब्राह्मणंभोजयेद्भक्त्यास्वयंतुलवणंविना॥भक्त्याप्रदक्षिणंदद्यादिमंमंत्रमुदीरयेत्॥१९॥
प्रीयतामत्रभगवान्सर्वलोकपितामहः॥हृदयेसर्वलोकानांयस्त्वानंदोऽभिधीयते ॥२०॥ अनेनविधिनासर्वंमासिमासिसमाचरेत्॥उपवासीपौर्णमास्या
मर्चयेद्ब्राह्ममव्ययम्॥२१॥फलमेकंचसंप्राश्यशर्वर्यांभूतलेस्वपेत् ॥ततस्त्रयोदशेमासिघृतधेनुसमन्विताम्॥२२॥शय्यांदद्याद्विरिंचायसर्वोपस्करसंयुता
म् ॥ ब्रह्माणंकांचनंकृत्वासावित्रींरजतैस्तथा ॥२३॥ पद्मात्मकःसृष्टिकर्त्तासावित्रीमुपलभ्यतु ॥ वस्त्रैर्द्विजंसपत्नीकंपूज्यभक्त्याविभूषणैः ॥ २४ ॥
शक्त्यागवादिकंदद्यात्प्रीयतामित्युदीरयेत् ॥ होमंशुक्लैस्तिलैःकुर्याद्ब्रह्मनामानिकीर्तयेत् ॥ २५ ॥ गव्येनसर्पिषातद्वत्पायसेनचधर्मवित् ॥ विप्रे
भ्योऽथधनंदद्यात्पुष्पमालांचशक्तितः ॥ २६ ॥ यःकुर्याद्विधिनानेनपौर्णमास्यांस्त्रियोपिवा ॥ सर्वपापविनिर्मुक्तःप्राप्नोतिब्रह्मसात्म्यताम् ॥२७॥
इहलोकेवरान्पुत्रान्सौभाग्यंध्रुवमश्नुते ॥ योब्रह्मासस्मृतोविष्णुरानंदात्मामहेश्वरः ॥२८॥ सुखार्थीकामरूपेणस्मरेद्देवंपितामहम् ॥ एवंश्रुत्वाचकारा
सोदितिःसर्वमशेषतः ॥ ॥ २९ ॥ कश्यपोव्रतमाहात्म्यादागत्यपरयामुदा ॥ चकारकर्कशांभूयोरूपलावण्यसंयुताम् ॥ ३० ॥ वरैराछंदयामाससातु
वव्रेवरंवरम् ॥ पुत्रंशक्रवधार्थायसमर्थंचमहौजसम् ॥ ३१ ॥ वरयामिमहात्मानंसर्वामरनिषूदनम् ॥ उवाचकश्यपोवाक्यमिंद्रहंतारमूर्जितम् ॥३२॥
प्रदास्याम्यहमेतेनकिन्त्वेतत्क्रियतांशुभे ॥ आपस्तंबींतुकृत्वेष्टिंपुत्रीयामद्यसुस्तनि ॥ ३३ ॥ विधास्यामिततोगर्भंस्पृष्ट्वाहंतेस्तनौशुभे ॥ भविष्यति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुभोगभोंदेविशक्रनिषूदनः ॥३४॥ आपस्तंबींततश्चक्रेपुत्रेष्टिंद्रविणाधिकाम् ॥ इद्रशत्रोभवस्वेतिजुहावचहविस्त्वरन् ॥३५॥ देवाश्चमुमुहुर्दैत्याविमुखा
श्चैवदानवाः॥दित्यांगगर्भमथाधत्तकश्यपः प्राहताम्पुनः ॥३६॥ मुखंतेचंद्रप्रतिमंस्तनौबिल्वफलोपमौ॥अधरौविद्रुमाकारौवर्णश्चातीवशोभनः ॥३७॥
त्वांदृष्ट्वाहंविशालाक्षिविस्मरामिस्विकांतनुम् ॥ तदेवंगर्भःसुश्रोणिहस्तेनोप्तस्तनौतव ॥३८॥ त्वयायत्नोविधातव्योह्यस्मिन्गर्भेवरानने ॥ संवत्सरश
तंत्वेकमस्मिन्नेवतपोवने ॥ ३९ ॥ संध्यायांनैवभोक्तव्यंगर्भिण्यावरवर्णिनि ॥ नस्थातव्यंनगंतव्यंवृक्षमूलेषुसर्वदा ॥ ४० ॥ नोपस्करेषुनिविशेन्मुस
लोलूखलादिषु ॥ जलंचनावगाहेतशून्यागारंचवर्जयेत् ॥ ४१ ॥ वल्मीकेषुनतिष्ठेतनचोद्विग्नमनाभवेत् ॥ ननखेनलिखेद्भूमौनांगारेनचभस्मनि
॥ ४२ ॥ नशयालुःसदातिष्ठेद्व्यायामंचविवर्जयेत् ॥ नतुषांगारभस्मास्थिकपालेषुसमाविशेत् ॥ ४३ ॥ वर्जयेत्कलहंलोके गात्राभ्यंगंतथैवच ॥
नमुक्तकेशीतिष्ठेत नाशुचिःस्यात्कथंचन ॥ ४४ ॥ नशयीतोत्तरशिरानचैवाधःशिराःक्वचित् ॥ नवस्त्रहीनानोद्विग्नानचार्द्रचरणासती ॥४५॥ नामं
गल्यांवदेद्वाचंनचहास्याधिकाभवेत् ॥ कुर्याच्चगुरुभिर्नित्यंपूजांमांगल्यतत्परा ॥४६॥ सर्वौषधीभिःसृष्टेनवारिणास्नानमाचरेत् ॥ कृतरक्षातुशुश्रूषावा
चापूजनतत्परा ॥ ४७ ॥ तिष्ठेत्प्रसन्नवदनाभर्तृप्रियहितेरता ॥ नगर्हयेच्चभर्तारंसर्वावस्थमपिक्वचित् ॥ ४८ ॥ कृशाहंदुर्बलाचैववार्द्धक्यंममचाग
तम् ॥ स्तनौमेचलितौस्थानान्मुखंचवलिभंगुरम् ॥४९॥ एवंविधात्वयाचाहंकृतेतिनवदेत्क्वचित्॥स्वस्त्यस्तुतेगमिष्यामितथेत्युक्तस्तयापुनः॥५०॥
पश्यतांसर्वभूतानांतत्रैवांतरधीयत॥ ततःसाभर्तृवाचोक्तविधिनासमतिष्ठत ॥५१॥ अथज्ञात्वातथेंद्रोऽपिदितेःपार्श्वमुपागतः॥विहायदेवसदनंतांशुश्रू
षुरवस्थितः ॥५२॥ दितेश्छिद्रांतरप्रेप्सुरभवत्पाकशासनः ॥ विपरीतोंऽतरव्यग्रःप्रसन्नवदनोबहिः ॥५३॥अजानन्निवतत्कार्यमात्मनश्शुभमाचरन् ॥
ततोवर्षशतांतेसान्यूनेतुदिवसैस्त्रिभिः ॥५४॥ मेनेकृतार्थमात्मानंप्रीत्याविस्मितमानसा ॥ अकृत्वापादयोः शौचंशयानामुक्तमूर्धजा ॥ ५५॥निद्रा
भरसमाक्रांतादिवापरशिराःक्वचित् ॥ ततस्तदन्तरंलब्ध्वाप्रविश्यांतः शचीपतिः ॥५६॥ वज्रेणसप्तधाचक्रेतंगर्भंत्रिदशाधिपः ॥ ततःसप्तचतेजाताः
कुमाराःसूर्यवर्चसः ॥५७॥ रुदंतःसप्ततेबालानिषिद्धादानवारिणा ॥ भूयोऽपिरुदमानांस्तानेकैकान्सप्तधाहरिः ॥५८॥ चिच्छेदवज्रहस्तोवैपुनस्तूदर
संस्थितान् ॥ एवमेकोनपंचाशद्भूत्वातेरुरुदुर्भृशम् ॥५९॥ इंद्रोनिवारयामाससमारुदध्वंपुनःपुनः ॥ ततःसचिंतयामासवितर्कमितिवृत्रहा ॥६०॥ कर्म
णःकस्यमाहात्म्यात्पुनः संजीवितास्त्वमी॥विदित्वापुण्ययोगेनपौर्णमासीफलंत्विदम् ॥६१॥ नूनमेतत्परिणतमथवाब्रह्मपूजनात् ॥ वज्रेणाभिहताः
संतोनविनाशमुपाययुः ॥६२॥ एकोऽप्यनेकतामापयस्मादुदरगोपनम् ॥ अवध्यानूनमेतेवैतस्माद्देवाभवंत्विति ॥६३॥ यस्मान्मारुदइत्युक्तारुदंतो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

गर्भसंभवाः॥मरुतोनामतेनाम्नाभवंतुसुखभागिनः॥६४॥ततःप्रसाद्यदेवेशःक्षमस्वेतिदितिंपुनः॥अर्थशास्त्रंसमास्थायमयैतद्दुष्कृतंकृतम्॥६५॥कृत्वाम
रुद्गणंदेवैः समानममराधिपः ॥ दितिंविमानमारोप्यससुतामगमद्दिवम् ॥ ६६ ॥ यज्ञभागभुजःसर्वेमरुतस्तेततोऽभवन् ॥ नजग्मुरैक्यमसुरैरतस्तेसु
रवल्लभाः ॥ ६७ ॥ भीष्मउवाच ॥ ॥ आदिसर्गस्त्वयाब्रह्मन्कथितोविस्तरेणमे ॥ प्रतिसर्गश्चयेयेषामधिपांस्तान्वदस्वमे ॥ ६८ ॥ पुलस्त्यउ
वाच ॥ ॥ यदाभिषिक्तःसकलेऽपिराज्येपृथुर्द्धरित्र्यामधिपोबभूव ॥ तथौषधीनामधिपश्चकारयज्ञव्रतानांतपसांचसोमम् ॥६९ ॥ नक्षत्रताराद्विजवृक्ष
गुल्मलतावितानस्यचरुक्मगर्भम् ॥ अपामधीशंवरुणंधनानांराज्ञांप्रभुंवैश्रवणंचतद्वत् ॥७०॥ विष्णुंरवीणामधिपंवसूनामग्निंचलोकाधिपतिंचकार॥
प्रजापतीनामधिपंचदक्षंचकारशक्रंमरुतामधीशम् ॥ ७१ ॥ दैत्याधिपानामथदानवानांप्रह्लादमीशंचयमंपितॄणाम् ॥ पिशाचरक्षःपशुभूतयक्षवेताल
राजंत्वथशूलपाणिम् ॥ ७२ ॥ प्रालेयशैलंचपतिंगिरीणामीशंसमुद्रंसरितामधीशम् ॥ गंधर्वविद्याधरकिन्नराणामीशंपुनश्चित्ररथंचकार ॥ ७३ ॥
नागाधिपंवासुकिमुग्रवीर्यंसर्पाधिपंतक्षकमादिदेश ॥ दिग्वारणानामधिपंचकारगजेंद्रमैरावणनामधेयम् ॥ ७४ ॥ सुपर्णमीशंपततामथार्वतांराजानामु
च्चैःश्रवसंचकार ॥ सिंहंमृगाणांवृषभंगवांचप्लक्षंपुनःसर्ववनस्पतीनाम् ॥ ७५ ॥ पितामहःपूर्वमथाभ्यषिंचदेतान्पुनःसर्वदिशाधिनाथान् ॥ पूर्वे
शदिक्पालमथाभ्यषिंचन्नाम्नासुवर्माणमरातिकेतुम् ॥ ७६ ॥ ततोऽधिपंदक्षिणतश्चकारसर्वेश्वरंशंखपदाभिधानम्॥सकेतुमंतंदिगधीशमीशंचकारपश्चा
द्भुवनांडगर्भः ॥ ७७ ॥ हिरण्यरोमाणमुदग्दिगीशंप्रजापतिर्मेघसुतंचकार ॥ अद्यापिकुर्वंतिदिशामधीशाः सदावहंतस्तुभुवोऽभिरक्षाम् ॥ ७८ ॥ चतु
र्भिरेतैःपृथुनामधेयोनृपोऽभिषिक्तःप्रथमःपृथिव्याम् ॥ गतेंतरेचाक्षुषनामधेयेवैवस्वतंचक्रुरिमंपृथिव्याम् ॥ ७९ ॥ गतेऽन्तरेचाक्षुषनामधेयेवैवस्वता
ख्येचपुनःप्रवृत्ते ॥ प्रजापतिःसोऽस्यचराचरस्यबभूवसूर्यान्वयजःसचिह्नः ॥ ८० ॥ ॥ पुलस्त्यउवाच ॥ मन्वंतराणिसर्वाणिमनूनांचरितानियत् ॥
प्रमाणंचैवकल्पस्यतत्सृष्टिंचसमासतः ॥ ८१ ॥ एकचित्तःप्रसन्नात्माशृणुकौरवनंदन ॥ यामानामपुरादेवाआसन्स्वायंभुवांतरे ॥ ८२ ॥ सप्तैवऋ
षयःपूर्वंयेमरीच्यादयःस्मृताः ॥ आग्नीध्रश्चाग्निबाहुश्चविभुःसवनएवच ॥ ८३ ॥ ज्योतिष्मान्द्युतिमान्भव्योमेधामेधातिथिर्वसुः ॥ स्वायंभुव
स्यास्यमनोर्दशैतेवंशवर्द्धनाः ॥ ८४ ॥ प्रतिसर्गममीकृत्वाजग्मुस्तेपरमंपदम् ॥ एवंस्वायंभुवंप्रोक्तंस्वारोचिषमतःपरम् ॥८५ ॥ स्वारोचिषस्यतन
याश्चत्वारोदेववर्चसः ॥ नभोनभस्यप्रभृतिर्भावनःकीर्तिवर्द्धनः ॥ ८६ ॥ दत्तोऽग्निश्च्यवनस्तंभःप्राणःकश्यपएवच ॥ अर्वाबृहस्पतिश्चैवसप्तसप्त
र्षयोऽभवन् ॥ ८७ ॥ तदादेवाश्चतुषिताःस्मृताःस्वारोचिषेंऽतरे ॥ हवींद्रःसुकृतोमूर्तिरापोज्योतिरथः स्मृतः ॥८८॥ वसिष्ठस्यसुताःसप्तयेप्रजापत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्तदा ॥ द्वितीयमेतत्कथितंमन्वंतरमतःपरम्॥८९॥अन्यच्चैवप्रवक्ष्यामितथामन्वंतरंशुभम्॥मनुनामौत्तमिस्तत्रदशपुत्रानजीजनत् ॥९०॥ इषऊ
र्जस्तनूजश्चशुचिःशुक्रस्तथैवच ॥मधुश्चमाधवश्चैवनभस्योऽथनभस्तथा॥९१॥सहःसहस्यएतेषामुत्तमःकीर्तिवर्द्धनः॥ भानवस्तत्रदेवाःस्युरूर्जास्स
प्तर्षयःस्मृताः॥९२॥कौकभिण्डिःकुतुण्डश्चदाल्भ्यःशंखःप्रवाहितः ॥ मितिश्चसंमितिश्चैवसप्तैतेयोगवर्द्धनाः ॥९३ ॥ मन्वंतरंचतुर्थंतुतामसंनामवि
श्रुतम्॥कपिपृस्थुःतथैवाग्निरकपिःकविरेवच ॥९४॥ तथैवःजन्यधामानौमुनयःसप्तनामतः॥साध्यादेवगणायेचकथितास्तामसेंऽतरे॥९५॥अकल्मष
स्तपोधन्वीतपोमूलस्तपोधनः ॥ तपोराशिस्तपस्यश्चसुतपस्यःपरंतपः ॥ ९६ ॥ तामसस्यसुताःसर्वेदशवंशविवर्द्धनाः ॥ पंचमस्यमनोस्तद्वद्रैवत
स्यांतरंशृणु ॥ ९७ ॥ देवबाहुःसुबाहुश्चपर्जन्यःसमयोमुनिः ॥ हिरण्यरोमासप्ताश्वः सप्तैतेऋषयःस्मृता ॥ ९८ ॥ देवाश्चभूतरजसस्तथाप्रकृत
यःस्मृताः ॥ अवशस्तत्वदर्शीचवीतिमान्हव्यपःकपिः ॥ ९९ ॥ मुक्तोनिरुत्सुकःसत्वोनिर्मोहोथऽप्रकाशकः ॥ धर्मवीर्यबलोपेतादशैतेरैवतात्मजाः॥
॥ १०० ॥ भृगुःसुधामाविरजस्सहिष्णुर्नारदस्तथा ॥ विवस्वान्कृतिनामाचसप्तसप्तर्षयोऽपरे ॥ १०१ ॥ चाक्षुषस्यांतरेदेवालेखानामपरिश्रुताः॥
विभवोऽथपृथक्चानुकीर्तितास्त्रिदिवौकसः ॥ १०२ ॥ चाक्षुषस्यांतरेप्राप्तेदेवानांपंचमोजनः ॥ रुरुप्रभृतयस्तद्वच्चाक्षुषस्यसुतादश ॥ १०३ ॥
प्रोक्ताःस्वायंभुवेवंशेयेमयापूर्वमेवते ॥ अन्तरंचाक्षुषंचैवमयातेपरिकीर्तितम् ॥१०४॥ सप्तमंचप्रवक्ष्यामियद्वैवस्वतमुच्यते ॥ अत्रिश्चैववसिष्ठश्चक
श्यपोगौतमस्तथा ॥१०५॥ भारद्वाजस्तथायोगीविश्वामित्रःप्रतापवान्॥ जमदग्निश्चसप्तैतेसांप्रतंतेमहर्षयः ॥१०६॥ कृत्वाधर्मव्यवस्थानंप्रयान्ति
परमंपदम् ॥ सावर्ण्यस्यप्रवक्ष्यामिमनोर्भावितथांतरम् ॥१०७॥ अश्वत्थामाशरद्वांश्चकौशिकोगालवस्तथा ॥ शतानंदःकाश्यपश्चरामश्चऋषय
स्मृताः ॥१०८॥ धृतिर्वरीयान्यवसुःसुवर्णोधृतिरेवच॥वरिष्णुवीर्यःसुमतिर्वसुश्शुक्रश्चवीर्यवान्॥१०९॥ भविष्यस्यार्कसावर्णेर्मनोःपुत्राःप्रकीर्तिताः॥
रौच्यादयस्तथान्येपिमनवःसंप्रकीर्तिताः॥११०॥रुचेःप्रजापतेःपुत्रोरौच्योनामभविष्यति ॥ मनुर्भूतिसुतस्तद्वद्भौत्योनामभविष्यति॥१११॥ ततस्तु
मेरुसावर्णिर्ब्रह्मसूनुर्मनुःस्मृतः ॥ ऋभुश्चऋतुधामाचविष्वक्सेनोमनुस्तथा॥११२॥अतीतानागताश्चैवमनवःपरिकीर्तिताः॥वर्षाणांयुगसाहस्रमेभिर्व्या
प्तंनराधिप ॥ ११३ ॥ स्वेस्वेऽन्तरेसर्वमिदंसमुत्पाद्यचराचरम्॥कल्पक्षयेनिवृत्तेतुमुच्यंतेब्रह्मणासह ॥११४॥ अमीयुगसहस्रान्तेविनश्यन्तिपुनःपुनः॥
ब्रह्माद्याविष्णुसायुज्यंततोयास्यंतिवैनृप ॥ ११५ ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखंडेमन्वंतरवर्णनंनामसप्तमोध्यायः ॥ ७ ॥ भीष्मउवाच ॥ बहुभिर्द्ध
रणीभुक्ताभूपालैःश्रूयतेपुरा ॥ पार्थिवाःपृथिवीयोगात्पृथिवीकस्ययोगतः॥१॥किमर्थंचकृतासंज्ञाभूमेस्सापारिभाषिकी॥गौरितीयंचसंज्ञावाभुवःकस्मा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्रवीहिमे ॥२॥ पुलस्त्यउवाच ॥ पुराकृतयुगस्यासीदंगोनामप्रजापतिः ॥ मृत्योस्तुदुहितातेनपरिणीतातिदुर्मुखी ॥ ३॥ सुनीथानामतस्यास्तुवेनोना
मसुतः पुरा॥अधर्मनिरतःकामीबलवान्वसुधाधिपः ॥४॥ लोकस्याधर्मकृच्चापिपरभार्यापहारकः॥अथतस्यप्रसिद्ध्यर्थंजगदर्थंमहर्षिभिः ॥५॥ अनुनी
तोऽपिनददावशुद्धात्माऽभयंततः ॥ शापेनमारयित्वैनमराजकभयार्दिताः ॥ ६॥ ममंथुर्ब्राह्मणास्तस्यबलाद्देहमकल्मषाः ॥ तत्कायान्मथ्यमानात्तुज
निता म्लेच्छजातयः ॥ ७ ॥ शरीरेमातुरंशेनकृष्णांजनसमप्रभाः ॥ पितुरंशस्यसंगेनधार्मिकोधर्मकारकः ॥ ८ ॥ उत्पन्नोदक्षिणाद्धस्तात्सधनुःसश
रोगदी ॥ दिव्यतेजोमयःपुत्रस्सरत्नकवचांगदः ॥९॥ पृथुरेवाभवन्नाम्नासचविष्णुरजायत ॥ सविप्रैरभिषिक्तःसंस्तपःकृत्वासुदुष्करम् ॥१०॥ विष्णो
र्वरेणसर्वस्य प्रभुत्वमगमत्प्रभुः ॥ निःस्वाध्यायवषट्कारंनिर्द्धर्मंवीक्ष्यभूतलम् ॥११॥ वेद्धुमेवोद्यतःकोपाच्छरेणामितविक्रमः ॥ ततोगोरूपमास्थाय
भूःपलायितुमुद्यता ॥ १२ ॥ पृष्ठेत्वन्वगमत्तस्याःपृथुःसेषुशरासनः॥ततःस्थित्वैकदेशेतुकिंकरोमीतिचाब्रवीत ॥ १३ ॥ पृथुरप्यवदद्वाक्यमीप्सितंदे
हिसुव्रते ॥ सर्वस्यजगतःशीघ्रंस्थावरस्य चरस्यच ॥ १४ ॥ तथेतिचाब्रवीद्भूमिर्दुदोहसनराधिपः॥स्वकेपाणौपृथुर्वत्संकृत्वास्वायंभुवंमनुम् ॥ १५ ॥
तदन्नमभवद्दुग्धंप्रजाजीवंतियेनतु ॥ ततस्तुऋषिभिर्दुग्धावत्सःसोमस्तदाभवत् ॥१६॥ दोग्धावाचस्पतिरभूत्पात्रंवेदस्तपोरसः ॥ देवैश्चवसुधादुग्धा
मरुद्दोग्धातदाभवत् ॥ १७ ॥ इंद्रोवत्सःसमभवत्क्षीरमूर्ज्जस्वलंबलम् ॥ देवानांकांचनंपात्रंपितॄणांराजतंतथा ॥ १८॥ अंतकश्चाभवद्दोग्धायमो
वत्सःस्वधारसः ॥ बिलंचपात्रंनागानांतक्षकोवत्सकोऽभवत् ॥ १९॥ विषंक्षीरंततोदोग्धाधृतराष्ट्रोऽभवत्पुनः॥ असुरैरपिदुग्धेयंआयसेशत्रुपीडनम् ॥
॥ २० ॥ पात्रेमायामभूद्वत्सःप्राल्हादिस्तुविरोचनः ॥ दोग्धात्रिमूर्द्धा तत्रासीन्माया येनप्रवर्तिता ॥ २१ ॥ यक्षैश्चवसुधादुग्धापुरांतर्द्धानमीप्सु
भिः ॥ कृत्वाविश्वावसुंवत्संमणिमंतंमहीपते ॥ २२ ॥ प्रेतरक्षोगणैर्दुग्धावसारुधिरमुल्वणम् ॥ रौप्यनाभोऽभवद्दोग्धासुमालीवत्सएवच ॥ २३ ॥ गं
धर्वैश्चपुनर्दुग्धावसुधासाप्सरोगणैः ॥ वत्संचित्ररथंकृत्वागन्धान्पद्मदलेतथा ॥ २४ ॥ दोग्धावसुरुचिर्नामाथर्ववेदस्यपारगः ॥ गिरिभिर्वसुधादु
ग्धारत्नानिविविधानिच ॥ २५ ॥ औषधानिचदिव्यानिदोग्धामेरुमहीधरः ॥ वत्सोऽभूद्धिमवांस्तत्रपात्रंशैलमयंपुनः ॥ २६ ॥ वृक्षैश्चवसुधा
दुग्धाक्षीरंछिन्नप्ररोहणम् ॥ पालाशपात्रेदोग्धातुसालःपुष्पवनाकुलः ॥ २७ ॥ प्लक्षोऽभवत्ततोवत्सःसर्ववृक्षवनाधिपः ॥ एवमन्यैश्चवसुधातथादु
ग्धायथेच्छतः ॥ २८ ॥ आयुर्द्धनानिसौख्यंचपृथौराज्यंप्रशासति ॥ नदारिद्र्यंतथारोगी नाधनोनचपापकृत् ॥ २९ ॥ नोपसर्गानचाधा
तः पृथौराज्यंप्रशासति ॥ नित्यंप्रमुदितालोकादुःखशोकविवर्जिताः ॥ ३० ॥ धनुष्कोट्या चशैलेंद्रानुत्सार्य समहाबलः ॥ भूमंडलंसमंचक्रेलो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कानांहितकाम्यया ॥ ३१ ॥ नपुरग्रामदुर्गाणिनचायुधधरानराः ॥ म्रियन्तेयत्रदुःखंचनार्थशास्त्रस्यचादरः ॥ ३२ ॥ धर्मैकतानाःपुरुषा
पृथौराज्यंप्रशासति ॥ कथितानिचपात्राणियत्क्षीरंचयथातव ॥ ३३ ॥ येषांयेनरुचिस्तत्रतेभ्योदत्तं विजानता ॥ यज्ञश्रीदेषुसर्वेषुमयातुभ्यंनि
वेदितम् ॥ ३४ ॥ दुहितृत्वंगतायस्मात्पृथोःपृथ्वीमहामते ॥ तस्यानुसारयोगाच्चपृथिवीविश्रुताबुधैः ॥ ३५॥ भीष्म उवाच ॥ आदित्यवंशमखि
लंवदब्रह्मन्यथाक्रमम् ॥ सोमवंशंचतत्वज्ञयथावद्वक्तुमर्हसि ॥३६॥ पुलस्त्य उवाच ॥ विवस्वान्कश्यपात्पूर्वमदित्यामभवत्पुरा ॥ तस्यपत्नीत्रयं
तद्वत्संज्ञाराज्ञीप्रभातथा ॥३७॥ रैवतस्यसुताराज्ञीरेवतंसुषुवेसुतम्॥प्रभाप्रभातंसुषुवेत्वाष्ट्रींसंज्ञातथामनुम् ॥३८॥ यमश्च यमुनाचैवयमलौचबभूव
तुः॥ततस्तेजोमयंरूपमसहंतीविवस्वतः ॥ ३९ ॥ नारीमुत्पादयामासस्वशरीरादनिंदिताम्॥त्वाष्ट्रीस्वरूपरूपेणनाम्ना छायेति भामिनी॥४०॥किंकरो
मीतिपुरतःसंस्थितांतामभाषत ॥ छायेत्वंभजभर्तारंमदीयंतंवरानने ॥ ४१॥ अपत्यानिमदीयानिमातृस्नेहेनपालय ॥ तथेत्युक्त्वाचसादेवमगा
त्कामायसुव्रता ॥ ४२ ॥ कामयामासदेवोऽपिसंज्ञेयमितिचादरात् ॥ जनयामाससावर्णिमनुंमनुस्वरूपिणम् ॥४३॥ सवर्णत्वाच्चसावर्णेर्मनोर्वैवस्वत
स्यतु ॥ ततःसुतांचतपतींत्वाष्ट्रींचैवक्रमेणतु ॥ ४४ ॥ छायायांजनयामाससंज्ञेयमितिभास्करः ॥ छायास्वपुत्रेत्वधिकंस्नेहंचक्रेमनौतदा ॥ ४५॥ न
चक्षमेमनुःपूर्वस्तद्यमःक्रोधमूर्छितः ॥ संतर्जयामासतदापादमुत्क्षिप्यदक्षिणम् ॥ ४६ ॥ शशापचयमंछायाभवतुक्रिमिसंयुतः ॥ पादोऽयमेकोभविता
पूयशोणितविस्रवः ॥ ४७॥ निवेदयामासपितुर्यमःशापेनधर्षितः ॥ निष्कारणमहंशप्तोमात्रादेवसकोपया ॥ ४८ ॥ बालभावान्मयाकिंचिदुद्यतश्च
रणःसकृत् ॥ मनुनावार्यमाणापिममशापमदाद्विभो॥४९ ॥ प्रायोनमातासास्माकमसमास्नेहतोयतः ॥ देवोप्याहयमंभूयःकिंकरोमिमहामते ॥ ५० ॥
सौख्यात्कस्यनदुःखंस्यादथवाकर्मसंततिः ॥ अनिवार्याभवस्यापिकाकथान्येषुजंतुषु ॥ ५१ ॥ कृकवाकुस्तवपदेसक्रिमिंभक्षयिष्यति ॥ खंजंचरुचिरं
चैवपादमेतद्भविष्यति ॥ ५२ ॥ एवमुक्तःसमाश्वस्तस्तपस्तीव्रंचकारह ॥ वैराग्यात्पुष्करेतीर्थेफलफेनानिलाशनः ॥ ५३ ॥ पितामहंसमाराध्य
यावद्वर्षायुतंपुनः ॥ तपःप्रभावाद्देवेशःसंतुष्टःपद्मसंभवः ॥ ५४ ॥ वव्रेसलोकपालत्वंपितृलोकंतथाक्षयम् ॥ धर्माधर्मात्मकस्यास्यजगतस्तुपरीक्ष
णम् ॥ ५५ ॥ एवंसलोकपालत्वमगमत्पद्मसंभवात् ॥ पितॄणामाधिपत्यंचधर्माधर्मस्यचानघ ॥ ५६ ॥ विवस्वानथतज्ज्ञात्वासंज्ञायाः
कर्मचेष्टितम् ॥ त्वष्टुःसमीपमगमदाचचक्षेसरोषवान् ॥ ५७ ॥ तमुवाचततस्त्वष्टासांत्वपूर्वमिदंवचः ॥ तवासहंतीभगवंस्तेजस्तीव्रंतमोनुद ॥
॥ ५८ ॥ वडवारूपमास्थायमत्सकाशमिहागता ॥ निवारितामयासाचत्वद्भयेनदिवस्पते ॥ ५९ ॥ यस्मादविज्ञातमनामत्सकाशमिहागता ॥ त

CC-0. In Public Domain. Digitization by eGangotri

स्मान्मदीयंभवनंप्रवेष्टुंनतवार्हति ॥ ६० ॥ एवमुक्ताजगामाशुमरुदेशमनिंदिता ॥ वडवारूपमास्थायभूतलेसंप्रतिष्ठिता ॥ ६१ ॥ तस्मात्प्रसादंकु
रुमेयद्यनुग्रहभागहम् ॥ अपनेष्यामितेतेजःकृत्वायन्त्रेदिवाकरम् ॥ ६२ ॥ रूपंतवकरिष्यामिलोकानंदकरम्प्रभो ॥ तथेत्युक्तःसरविणाभ्रमेकृत्वा
दिवाकरम् ॥ ६३ पृथक्चकारतेजश्चचक्रंविष्णोःप्रकल्पयत् ॥ त्रिशूलंचापिरुद्रस्यवज्रमिंद्रस्यचापरम् ॥६४॥ दैत्यदानवसंहर्तुंसहस्रकिरणात्मकम् ॥
रूपंचाप्रतिमंचक्रेत्वष्टापद्भ्यामृतेमहत् ॥६५॥ नशशाकचतद्द्रष्टुंपादरूपं रवेः पुनः ॥ अद्यापिच ततः पादौनकश्चित्कारयेत्क्वचित् ॥६६॥ यःकरोति
सपापिष्ठोगतिमाप्नोतिनिंदिताम् ॥ कुष्ठरोगमवाप्नोतिलोकेस्मिन्दुःखसंज्ञितम् ॥ ६७ ॥ तस्मान्नधर्मकामार्थीचित्रेष्वायतनेषुच ॥ नक्वचित्कारये
त्पादौदेवदेवस्यधीमतः ॥६८॥ ततःसभवान्गत्वाभूर्लोकममराधिपः ॥ कामयामासकामार्तोमुखएवदिवाकरः ॥६९॥ अश्वरूपेणमहतातेजसाचस
मन्वितः ॥ संज्ञाचमनसाक्षोभमगमद्भयविह्वला ॥ ७० ॥ नासापुटाभ्यामुत्सृष्टंपरोऽयमितिशंकया ॥ तस्याथरेतसोजातावश्विनावितिनःश्रुतम्
॥ ७१ ॥ दस्रौश्रुतित्वात्संजातौनासत्यौनासिकाग्रतः ॥ ज्ञात्वाचिराच्चतंदेवंसंतोषमगमत्परम् ॥७२॥ विमानेनागमत्स्वर्गेपत्न्यासहमुदान्वितः ॥
सावर्णोऽपिमनुर्मेरावद्यापितपतेतपः ॥ ७३ ॥ शनिस्तपोबलाच्चापिग्रहाणांसमतांगतः ॥ यमुनातपतीचैवपुनर्नद्यौबभूवतुः ॥ ७४ ॥ विष्टिर्घोरा
त्मिकातद्वत्कालत्वेनव्यवस्थिता ॥ मनोर्वैवस्वतस्यापिदशपुत्रामहाबलाः ॥७५॥ इलस्तुप्रथमस्तेषांपुत्रेष्टयासमकल्पयः ॥ इक्ष्वाकुःकुशनाभश्चअ
रिष्टोधृष्टएवच ॥ ७६ ॥ नरिष्यंतःकरूषश्चशर्यातिश्चमहाबलः ॥ पृषध्रश्चाथनाभागः सर्वेतेदिव्यमानुषाः ॥ ७७ ॥ अभिषिच्यमनुःपूर्वमिलंपुत्रंस
धार्मिकम् ॥ जगामतपसेभूयःपुष्करंसतपोवनम् ॥७८॥ अथाजगामसिध्यर्थंतस्यब्रह्मावरप्रदः ॥ वरंवरयभद्रंतेमानवेयंयथेप्सितं ॥ ७९ ॥ उवाचसत
दादेवंपद्माक्षंपद्मजंविभुम् ॥ वशेमेधर्मसंयुक्ताः पृथिव्यांसर्वपार्थिवाः ॥८०॥ भवेयुरीश्वराःस्वामिन्प्रसादात्तवकंजज ॥ तथेत्युक्त्वातुदेवेशस्तत्रैवांतर
धीयत ॥ ८१ ॥ ततोऽयोध्यांसमागत्यसमतिष्ठद्यथापुरा ॥ अथैकदारथारूढइलोनिजसुतोमनोः ॥८२॥ निर्जगामार्थसिध्यर्थमिनप्रायांमहीमिमाम्
॥ भ्रमन्द्वीपानिसर्वाणिक्ष्माभृतःसंप्रसाधयन् ॥८३॥ जगामोपवनंशंभोरथाकृष्टःप्रतापवान् ॥ कल्पद्रुमलताकीर्णंनाम्नाशरवणंमहत् ॥८४॥ रमतेयत्रदे
वेशःसोमःसोमार्द्धशेखरः ॥ उमयासमयस्तत्रपुराशरवणेकृतः ॥८५॥ पुंनामसंज्ञंयत्किंचिदागमिष्यतिनोवनम् ॥ स्त्रीत्वमेष्यतितत्सर्वंदशयोजनमंडले
॥ ८६॥ अज्ञातसमयोराजाइलःशरवणंगतः ॥ स्त्रीत्वंजगामसहसावडवाश्वोऽभवत्क्षणात् ॥ ८७ ॥ पुरुषत्वेकृतंसर्वंस्त्रीकायेविस्मृतंततः ॥ इलेतिस
भवन्नारीपीनोन्नतघनस्तनी ॥ ८८ ॥ उन्नतश्रोणिजघनापद्मपत्रायतेक्षणा ॥ पूर्णेन्दुवदनातन्वीविलासिन्यासितेक्षणा ॥८९॥ पीनोन्नतायतभुजानीलकु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्चितमूर्द्धजा ॥ तनुलोमासुवदनामृदुगद्गदभाषिणी ॥ ९० ॥ श्यामागौरेणवर्णेनतनुताम्रनखांकुरा ॥ कार्मुकभ्रूयुगोपेताहंसावरणगामिनी ॥ ९१ ॥ भ्रम
माणावने तस्मिन्नचिंतयामासभामिनी ॥ कोमेपितावाभ्रातावाकोमेत्राताभवेदिह॥ ९२ ॥ कस्यभर्त्तुरहंदत्ताकियद्वर्षास्मिभूतले॥ चिंतयन्तीचददृशेसोम
पुत्रेणसाङ्गना ॥ ९३ ॥ इलारूपसमाक्षिप्तमनसावरवर्णिनी ॥ बुधस्तदाप्तयेयत्नमकरोत्कामपीडितः ॥ ९४ ॥ विशिष्टाकारवान्मुंडीसकमंडलुपुस्तकः
॥ वेणुदंडकृतावेशः पवित्रकखनित्रकः ॥ ९५ ॥ द्विजरूपःशिखीब्रह्मानिगदन्कर्णकुंडली ॥ बटुभिश्चार्थिभिर्युक्तःसमित्पुष्पकुशोदकैः ॥ ९६ ॥ काले
न्विष्यांततस्तस्मिन्नाजुहावसतामिलाम् ॥ बहिर्मनस्यांतरितःकिलपादपमंडपे ॥ ९७ ॥ ससंभ्रममकस्माच्चसोपालंभमिवाभवत् ॥ त्यक्त्वाग्निहोत्रशुश्रू
षांक्वगतामंदिरान्मम ॥ ९८ ॥ इयंविहारवेलातेअतिक्रामतिसांप्रतम् ॥ एह्येहिपृथुसुश्रोणिसंभ्रांताकेनहेतुना ॥ ९९॥ इयंसायंतनीवेलाविहारस्येहवर्तते ॥
कृत्वोपलेपनंपुष्पैरलंकुरुगृहंमम ॥१०० ॥ साब्रवीद्विस्मृताहंचसर्वमेवतपोधन ॥ आत्मानंत्वांचभर्तारंकुलंचवदमेऽनघ ॥१०१ ॥ बुधःप्रोवाचतांतन्वी
मिलात्वंवरवर्णिनि ॥ अहंचकामुकोनामबहुविद्योबुधःस्मृतः ॥१०२ ॥ तेजस्विनःकुलेजातःपितामेब्राह्मणाधिपः ॥ इतिसातस्यवचनात्प्रविष्टाबुधमंदि
रम् ॥ १०३ ॥ रत्नस्तंभसमाकीर्णंदिव्यमायाविनिर्मितम् ॥ इलाकृतार्थमात्मानंमेनेतद्भवनेस्थिता ॥१०४॥ अहोवृत्तमहोरूपमहोधनमहोकुलम्॥ मम
चास्यचभर्त्तुर्वाअहोलावण्यमुत्तमम् ॥ १०५ ॥ रेमेचसातेन सममतिकालमिलावने ॥ सर्वभोगमयेगेहेयथेंद्रभवने तथा ॥ १०६ ॥ अथान्विष्यंतो
राजानंभ्रातरस्तस्यमानवाः ॥इक्ष्वाकुप्रमुखाजग्मुस्तदाशरवणांतिकम् ॥१०७॥ततस्तेददृशुःसर्वेवडवामग्रतःस्थिताम्॥ रत्नपर्यंतकिरणदीप्यमानामनु
त्तमाम् ॥ १०८ ॥ संप्राप्यप्रत्यभिज्ञानात्सर्वेविस्मयमागताः ॥ अयंचंद्रप्रभोनामवाजीतस्यमहात्मनः ॥ १०९ ॥ अगमद्वडवारूपमुत्तमंकेनहेतुना ॥
ततस्तुमैत्रावरुणिंपप्रच्छुःस्वपुरोहितम् ॥११०॥ किमेतदित्यभूच्चित्रंवदयोगविदांवर ॥ वसिष्ठोप्यब्रवीत्सर्वन्दृष्ट्वातंध्यानचक्षुषा ॥१११॥ समयःशंभुद
यिताकृतःशरवणेपुरा ॥ यःपुमान्प्रविशेच्चात्रसनारीत्वमवाप्स्यति ॥ ११२ ॥ अयमश्वोऽपिनारीत्वमगाद्राज्ञासहैवतु ॥इलःपुरुषतामेतियथासौधनदो
पमः ॥ ११३ ॥ तथैवयत्नःकर्त्तव्यआराध्यचपिनाकिनम् ॥ ततस्तेमानवाजग्मुर्यत्रदेवोमहेश्वरः ॥ ११४ ॥ तुष्टुवुर्विविधैः स्तोत्रैःपार्वतीपरमेश्वरौ ॥
तावूचतुरलंचैपसमयः किंनुसाम्प्रतम्॥ ११५ ॥ इक्ष्वाकोरश्वमेधेनयत्फलंस्यात्तदावयोः॥ दत्वाकिंपुरुषोबीरःसभविष्यत्यसंशयम् ॥ ११६ ॥ तथेत्यु
क्त्वातुतेसर्वेजग्मुर्वैवस्वतात्मजाः ॥इष्ट्वाश्वमेधेनततइलाकिंपुरुषोऽभवत् ॥ ११७॥ मासमेकंपुमान्वीरःस्त्रीत्वंमासमभूत्पुनः ॥ बुधस्यभवनेतिष्ठन्निलो
गर्भधरोऽभवत् ॥११८॥ अजीजनत्पुत्रमेकमनेकगुणसंयुतम् ॥बुधउत्पाद्यतंपूर्वंसस्वर्गमगमत्पुनः ॥११९॥इलस्यनाम्नातद्वर्षमिलावृतमभूत्तदा ॥ सोम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्कवंशजोराजाइलोऽभूद्वंशवर्द्धनः ॥ १२० ॥ एवंपुरूरवाःपूरोरभवद्वंशवर्द्धनः ॥ इक्ष्वाकुरर्कवंशस्यतथैवोक्तोनरेश्वरः ॥ १२१ ॥ इलःकिंपुरुषत्वेच सुद्युम्नइतिचोच्यते ॥ पुनःपुत्रत्रयमभूत्सुद्युम्नस्यापराजितम् ॥ १२२॥ उत्कलोऽथगयस्तद्वद्धरिताश्वश्चवीर्यवान् ॥ उत्कलस्योत्कलानामगयस्यतु गयापुरी ॥ १२३॥ हरिताश्वस्यदिग्याम्यासंज्ञाताकुरुभिःसह ॥प्रतिष्ठानोऽभिषिच्याथसपुरूरवसंसुतम् ॥ १२४ ॥ जगामेलावृतंभोक्तुंदिव्यंवर्षफलाशनः ॥ इक्ष्वाकुर्ज्येष्ठदायादोमध्यदेशमवाप्तवान् ॥ १२५ ॥ नरिष्यंतस्यपुत्रोऽभूच्छुकोनामहाबलः॥नाभागादंबरीषस्तुधृष्टस्यतुसुतत्रयम् ॥१२६॥ धृष्टकेतुःस्वधर्माथोरणधृष्टश्चवीर्यवान् ॥ आनर्तोनामशर्यातेःसुकन्याचैवदारिका ॥ १२७ ॥ आनर्तस्याभवत्पुत्रोरोचमानःप्रतापवान् ॥ आनर्तोनामदेशोऽभून्नगरीचकुशस्थली ॥ १२८ ॥ रोचमानस्यरेवोऽभूद्रेवाद्रैवतएवच ॥ ककुद्मीचापरंनामज्येष्ठःपुत्रशतस्यच ॥१२९॥ रेवतीतस्यसाकन्याभार्यारामस्यविश्रुता॥ करूषाश्चैवकारूषाबहवःप्रथिताभुवि ॥ १३०॥ पृषध्रोगोवधाच्छूद्रोगुरुशापादजायत ॥ इक्ष्वाकुपुत्रानाम्नाथविकुक्षिनिमिदंडकाः ॥ १३१ ॥ श्रेष्ठाःपुत्रशतस्यासन्पंचाशच्चाथतत्सुताः ॥ मेरोरुत्तरतस्तेतुजाताःपार्थिवसत्तमाः ॥ १३२॥ चत्वारिंशत्तथाष्टान्येशतमध्येचयेऽभवन् ॥ मेरोर्दक्षिणतश्चैवराजानस्तेप्रकीर्तिताः ॥ १३३ ॥ ज्येष्ठात्ककुत्स्थनामाभूत्सुतस्तस्यसुयोधनः ॥ तस्यपुत्रःपृथुर्नामविश्वस्तस्यपृथोःसुतः ॥ १३४॥ आर्द्रस्तस्यचपुत्रोऽभूद्युवनाश्वस्ततोऽभवत् ॥ युवनाश्वस्यपुत्रोऽभूच्छावस्तोनामवीर्यवान्॥ १३५॥निर्मितायेनशावस्तीह्यंगदेशेनराधिप॥शावस्ताद्बृहदश्वोऽभूत्कुवलाश्वस्ततोऽभवत् ॥१३६॥ धुंधुमारत्वमगमद्धुंधुंहत्वाऽसुरंपुरा ॥ तस्यपुत्रास्त्रयोजाताद्दृढाश्वोघृणिरेवच ॥ १३७ ॥ कपिलाश्वश्चविख्यातोधौंधुमारिःप्रतापवान् ॥ दृढाश्वस्यप्रमोदस्तुहर्यश्वस्तस्यचात्मजः ॥१३८ ॥ हर्यश्वस्यनिकुंभोऽभूत्संहताश्वस्ततोभवत् ॥ अकृताश्वोरणाश्वश्चसंहताश्वसुतावुभौ ॥१३९॥ युवनाश्वोरणाश्वस्यमांधाताचततोऽभवत् ॥ मांधातुःपुरुकुत्सोभूद्धर्मसेतुश्चपार्थिवः ॥ १४० ॥ मुचुकुन्दश्चविख्यातश्शक्रमित्रःप्रतापवान् ॥ पुरुकुत्सस्यपुत्रोऽभूद्दुःसहोनर्मदापतिः ॥ १४१ ॥ सभूतिस्तस्यपुत्रोऽभूत्त्रिधन्वाचततोऽभवत्॥ त्रिधन्वनःसुतोजातस्त्रय्यारुणइतिस्मृतः ॥ १४२ ॥ तस्यसत्यव्रतोनामतस्मात्सत्यरथःस्मृतः॥तस्यपुत्रोहरिश्चन्द्रोहरिश्चंद्राच्चरोहितः ॥१४३॥रोहिताच्चवृकोजातोवृकाद्बाहुरजायत ॥सगरस्तस्यपुत्रोऽभूद्राजापरमधार्मिकः ॥ १४४ ॥ द्वेभार्येसगरस्यापिप्रभाभानुमतीतथा ॥ ताभ्यामाराधितःपूर्वमौर्वाग्निःपुत्रकाम्यया ॥ १४५ ॥ और्वस्तुष्टस्तयोःप्रादाद्यथेष्टंवरमुत्तमम्॥एकाषष्टिसहस्राणिसुतमेकंतथापरा ॥१४६॥ अगृह्णाद्वंशकर्तारंप्रभाऽगृह्णाद्बहून्सुतान्॥एकंभानुमतीपुत्रमगृह्णादसमंजसम् ॥१४७ ॥ ततःषष्टिसहस्राणिसुषुवेयादवीप्रभा ॥ खनंतःपृथिवींदग्धाविष्णुनायेश्चमार्गणे ॥१४८॥ असमंजस्तुतनयोह्यंशुमान्नामविश्रुतः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यपुत्रोदिलीपस्तुदिलीपात्तुभगीरथः ॥ १४९ ॥ येनभागीरथीगङ्गातपःकृत्वावतारिता ॥ भगीरथस्यतनयोनाभागइतिविश्रुतः ॥ १५० ॥ नाभा
गस्यांबरीषोऽभूत्सिंधुद्वीपस्ततोऽभवत्॥तस्यायुतायुःपुत्रोऽभूदृतुपर्णस्ततोऽभवत् ॥१५१॥ तस्यकल्माषपादस्तुसर्वकर्मांततःस्मृतः॥तस्यानरण्यःपुत्रो
ऽभून्निघ्नस्तस्यसुतोऽभवत् ॥१५२॥ निघ्नपुत्रावुभौजातावनमित्ररघूत्तमौ ॥ अनमित्रोवनमगादरिनाशकृतेनृप ॥१५३ ॥ रघोरभूद्दिलीपस्तुदिलीपाच्चा
प्यजस्तथा ॥दीर्घबाहुरजाज्जातःप्रजापालस्ततोऽभवत्॥१५४॥ततोदशरथोजातस्तस्यपुत्रचतुष्टयम्॥नारायणात्मकाः सर्वेरामस्तस्याग्रजोऽभवत
॥ १५५ ॥ रावणांतकरस्तद्वद्रघूणांवंशवर्द्धनः ॥ वाल्मीकिर्यस्यचरितंचक्रेभार्गवसत्तमः ॥ १५६ ॥ तस्यपुत्रःकुशोनामइक्ष्वाकुकुलवर्द्धनः ॥ अति
थिस्तुकुशाज्जातोनिषधस्तस्यचात्मजः ॥ १५७ ॥ नलस्तुनिषधाज्जातोनभास्तस्मादजायत ॥ नभसःपुंडरीकोऽभूत्क्षमधन्वाततःपरम् ॥ १५८ ॥
तस्यपुत्रोऽभवद्वीरोदेवानीकःप्रतापवान् ॥ अहीनगुस्तस्यसुतःसहस्राश्वस्ततःपरः ॥ १५९॥ ततश्चंद्रावलोकस्तुतारापीडस्ततोऽभवत् ॥ तस्यात्मजश्च
न्द्रगिरिश्चंद्रस्तस्यसुतोऽभवत् ॥१६०॥श्रुतायुरभवत्तस्माद्भारतेयोनिपातितः ॥ नलौद्वावेवविख्यातौवंशेयस्यविशेषतः॥१६१॥वीरसेनसुतस्तद्वन्नैषध
श्चनराधिपः ॥ एतेविवस्वतोवंशेराजानोभूरिदक्षिणाः ॥ १६२ ॥ इक्ष्वाकुवंशप्रभवाःप्राधान्येनप्रकीर्तिताः ॥१६३॥ इतिश्रीपाद्मपुराणेप्रथमेखण्डे
आदित्यवंशकथनंनामाष्टमोऽध्यायः ॥ ८ ॥ भीष्मउवाच ॥ भगवन्श्रोतुमिच्छामिपितॄणांवंशमुत्तमम् ॥ रवेश्चश्राद्धदेवस्यसोमस्यचविशेषतः
॥ १ ॥ पुलस्त्यउवाच ॥ हंततेकथयिष्यामिपितणांवंशमुत्तमम् ॥ स्वर्गेपितृगणाःसप्तत्रयस्तेषाममूर्तयः ॥ २ ॥ मूर्तिमंतोऽथचत्वारःसर्वेषा
ममितौजसाम् ॥ अमूर्त्तयःपितृगणावैराजस्यप्रजापतेः ॥ ३ ॥ यजन्तियान्देवगणावैराजाइतिविश्रुताः ॥ यवैतेयोगविभ्रष्टाः प्रापुर्लोकान्सनात
नान् ॥४ ॥ पुनर्ब्रह्मदिनांतेतुजायंतेब्रह्मवादिनः ॥ संप्राप्यतांस्मृतिंभूयोयोगंसांख्यमनुत्तमम् ॥ ५ ॥ सिद्धिंप्रयांतियोगेनपुनरावृत्तिदुर्लभाम् ॥
योगिनामेवदेयानितस्माच्छ्राद्धानिदातृभिः ॥ ६ ॥ एतेषांमानसीकन्यापत्नीहिमवतोमता ॥ मैनाकस्तस्यदायादःक्रौंचस्तस्यसुतोऽभवत्॥ ७ ॥
क्रौंचद्वीपःस्मृतोयेनचतुर्थोघृतसंयुतः ॥ मेनातुसुषुवेतिस्रःकन्यायोगवतीस्ततः ॥८ ॥ उमैकपर्णापर्णाचतीव्रव्रतपरायणाः ॥ रुद्रस्यैकाभृगोश्चैकाजै
गीषव्यस्यचापरा ॥ ९ ॥ दत्ताहिमवताबालाः सर्वलोकतपोऽधिकाः ॥ पितॄणांलोकसंगीतंकथयामिशृणुष्वतत् ॥१०॥ लोकाःसोमपथानामयत्रमा
रीचनंदनाः ॥ वर्त्ततेयेनपितरोयान्देवाभावयन्त्यलम् ॥ ११ ॥ अग्निष्वात्ताइतिख्यातायज्वानोयत्रसंस्थिताः ॥ अच्छोदानामतेषांतुकन्याभूद्वर
वर्णिनी ॥ १२ ॥ अच्छोदंचसरस्तत्रपितृभिर्निर्मितंपुरा ॥ अच्छोदाथतपश्चक्रेदिव्यंवर्षसहस्रकम् ॥ १३ ॥ आजग्मुःपितरस्तुष्टादास्यन्तःकिलतेव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रम् ॥ दिव्यरूपधराःसर्वेदिव्यमाल्यानुलेपनाः ॥ १४ ॥ सर्वेप्रधानाबलिनःकुसुमायुधसान्निभाः ॥ तन्मध्येमावसुंनामपितरंवीक्ष्यसांगना ॥ १५ ॥
वव्रेवरार्थिनीसंगंकुसुमायुधपीडिता ॥ योगाद्भ्रष्टातुसातेनव्यभिचारेणभामिनी ॥ १६ ॥ धरान्नस्पृशतेपूर्वंप्रयाताथभुवस्तले ॥ तथैवामावसुर्योऽयमि
च्छांचक्रेनतांप्रति ॥ १७ ॥ धैर्येणतस्यसालोकेअमावास्येतिविश्रुता ॥ पितृणांवल्लभायस्माद्दत्तस्याक्षयकारिका ॥ १८ ॥ अच्छोदाधोमुखीदीनाल
ज्जितातपसःक्षयात् ॥ सापितॄन्प्रार्थयामासपुनरात्मसमृद्धये ॥ १९ ॥ विलज्जमानापितृभिरिदमुक्तातपस्विनी ॥ भविष्यमथचालोक्यदेवकार्यंचते
तदा ॥ २० ॥ इदमूचुर्महाभगाःप्रसादशुभया।गिरा ॥ दिविदिव्यशरीरेणयत्किंचित्क्रियतेबुधैः ॥ २१ ॥ तेनैवतत्कर्मफलंभुज्यतेवरवर्णिनि ॥ सद्यःफ
लंतिकर्माणिदेवत्वेप्रेत्यमानुषे ॥ २२ ॥ तस्मात्त्वंसुकृतंकृत्वाप्राप्स्यसेप्रेत्ययत्फलम् ॥ अष्टाविंशेभवित्रीत्वंद्वापरेमत्स्ययोनिजा ॥ २३ ॥ व्यतिक्रमा
त्पितृणांतुकष्टंकुलमवाप्स्यसि ॥तस्माद्राज्ञोवसोःकन्यात्वमवश्यंभविष्यसि ॥२४॥ कन्यात्वेदेवलोकांस्तान्पुनःप्राप्स्यसिदुर्लभान् ॥पराशरस्यवीर्ये
णपुत्रमेकमवाप्स्यसि॥२५॥ द्वीपेतुबदरीप्रायेबादरायणमच्युत ॥सवेदमेकंबहुधाविभजिष्यतितेसुतः ॥२६॥पौरवस्यात्मजौद्वौतुसमुद्रांशस्यशंतनोः ॥
विचित्रवीर्यस्तनयस्तथाचित्रांगदोनृपः ॥२७॥ इमावुत्पाद्यतनयौक्षेत्रजौतस्यधीमतः॥प्रौष्ठपद्यष्टकाभूयःपितृलोकेभविष्यसि ॥ २८ ॥ नाम्नासत्यव
तीलोकेपितृलोकेतथाष्टका॥आयुरारोग्यदानित्यंसर्वकामफलप्रदा॥२९॥भविष्यसिपरेलोकेनदीत्वंचगमिष्यसि ॥ पुण्यतोयासरिच्छ्रेष्ठालोकेष्वच्छो
दनामिका ॥ ३० ॥ इत्युक्तासागणैस्तैस्तुतत्रैवांतरधीयत ॥ साप्यापचारित्रफलंमयायदुदितंपुरा ॥ ३१ ॥ विभ्राजोनामयेचान्येदिविसंतिसुव
र्चसः ॥ लोकाबर्हिषदोयत्रपितरःसंतिसुव्रताः ॥ ३२ ॥ यत्रबर्हिषियुक्तानिविमानानिसहस्रशः ॥ संकल्पपादपायत्रतिष्ठंतिफलदायिनः ॥ ३३ ॥
यदभ्युदयशालासुमोदंतेश्राद्धदायिनः ॥ येदानवासुरगणागंधर्वाप्सरसांगणाः ॥ ३४ ॥ यक्षरक्षोगणास्तेचयजंतिदिविदेवताः ॥ पुलस्त्य
पुत्राःशतशस्तपोयोगबलान्विताः ॥ ३५ ॥ महात्मानोमहाभागाभक्तानामभयंकराः ॥ एतेषांपीवरीकन्यामानसीदिविविश्रुता ॥ ३६ ॥
योगिनीयोगमाताचतपश्चक्रेसुदारुणम् ॥ प्रसन्नोभगवांस्तस्यावरंवव्रेतुसाततः ॥ ३७ ॥ योगवंतंसुरूपंचभर्तारंविजितेंद्रियम् ॥ देहिदेवप्र
सन्नस्त्वंयदितेवदतांवर ॥ ३८ ॥ उवाचदेवोभविताव्यासपुत्रोयदाशुकः ॥ भवित्रीतस्यभार्यात्वंयोगाचार्यस्यसुव्रता ॥ ३९ ॥ भविष्य
तिचतेकन्याकृत्वीनामाथयोगिनी ॥ पांचालपतयेदेयासात्वतायतुसातदा ॥ ४० ॥ जननीब्रह्मदत्तस्ययोगसिद्धांतगास्मृता ॥ कृष्णगौ
रश्चशंभुश्चभविष्यंतिचतेसुताः ॥ ४१ ॥ सर्वकामसमृद्धेषुविमानेष्वपिपावनाः ॥ किंपुनः श्राद्धदाविप्राभक्तिमंतः क्रियान्विताः ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गौर्नामकन्यायेषांतुमानसीदिविराजते ॥ सुकन्यादयितापत्नीसाध्यानांकीर्तिवर्द्धिनी ॥ ४३ ॥ मरीचिगर्भनामानोलोकेमार्तंडमंडले ॥
पितरोयत्रतिष्ठंतिहविष्मंतोंऽगिरःसुताः ॥ ४४ ॥ तीर्थश्राद्धप्रदायांतियत्रक्षत्रियसत्तमाः ॥ राज्ञांतुपितरस्तेवैस्वर्गभोगफलप्रदाः ॥ ४५ ॥
एतेषांमानसीकन्यायशोदानामविश्रुता ॥ पत्नीयांशुमतःश्रेष्ठास्नुषापंचजनस्यच ॥ ४६ ॥ जनन्यथदिलीपस्यभगीरथपितामही ॥ लोकाः
कामदुघानामकामभोगफलप्रदाः ॥ ४७ ॥ सुस्वधानाम पितरोयत्रतिष्ठन्तितेसुताः ॥ आज्यपानामलोकेषुकर्दमस्यप्रजापतेः ॥ ४८ ॥ गापु
लहाग्रजदायादावैश्यास्तान्भावयंतिह ॥ यत्रश्राद्धकृतः सर्वेपश्यन्तियुगपद्गताः ॥ ४९ ॥ मातृभ्रातृपितृष्वसृःसखिसबंधिबान्धवान् ॥ अपिजन्मायु
तैर्दृष्टाननुभूतान्सहस्रशः ॥ ५० ॥ एतेषांमानसीकन्याविरजानामविश्रुता ॥ सापत्नीनहुषस्यासीद्ययातेर्जननीतथा ॥ ५१ ॥ एषाष्टकाभवत्पश्चाद्ब्रह्म
लोकगतासती ॥ त्रयएतेगणाःप्रोक्ताश्चतुर्थंतुवदाम्यहम् ॥ ५२ ॥ लोकाःसुमनसोनामब्रह्मलोकोपरिस्थिताः ॥ सोमपानामपितरोयत्रतिष्ठंतिशाश्वतम्
॥ ५३ ॥ धर्ममूर्तिधराःसर्वेपरतोब्रह्मणःस्मृताः ॥ उत्पन्नाःप्रलयांतेतुब्रह्मत्वंप्राप्ययोगिनः ॥ ५४ ॥ कृत्वासृष्ट्यादिकंसर्वेमानसेसांप्रतंस्थिताः ॥
नर्मदानामतेषांतुकन्यातोयवहासरित् ॥ ५५ ॥ भूतानिपुनतीयातुपश्चिमोदधिगामिनी ॥ तेभ्यःसर्वत्रमनुजाःप्रजासर्गेचनिर्मितम् ॥ ५६ ॥ ज्ञा
त्वाश्राद्धानिकुर्वंतिधर्मभावेनसर्वदा ॥ सर्वदातेभ्यएवास्यप्रसादाद्योगसंततिः ॥ ५७ ॥ पितृणामादिसर्गेतुश्राद्धमेवंविनिर्मितम् ॥ सर्वेषांराजतंपात्र
मथवाराजतान्वितम् ॥ ५८ ॥ दत्तंस्वधांपुरोधायपितॄन्प्रीणातिसर्वदा ॥ आग्नीध्रसोमपाभ्यांतुकार्यमाप्यायनंबुधैः ॥ ५९ ॥ अग्न्यभावेतुविप्र
स्यपाणौवाथजलेपिवा ॥ अजाकर्णेश्वकर्णेवागोष्ठेवाथशिवांतिके ॥ ६० ॥ पितणाममलंस्थानंदक्षिणादिक्प्रशस्यते ॥ प्राचीनावीतमुदकंतिलसं
त्यागमेवच ॥ ६१ ॥ खड्गिनामामिषंचैवमन्नंश्यामाकशालयः ॥ यवनीवारमुद्गेक्षुशुक्लपुष्पफलानिच ॥ ६२ ॥ वल्लभानिप्रशस्तानिपितणामि
हसर्वदा ॥ दर्भामाषाष्पष्टिकान्नंगोक्षीरंमधुसार्पिषी ॥ ६३ ॥ शस्त्राणिचप्रवक्ष्यामिश्राद्धेवर्ज्यानियानिच ॥ मसूरशणनिष्पावाराजमाषाःकुलुत्थकाः
॥ ६४ ॥ पद्मबिल्वार्कदुत्तूरपारिभद्राटरूषकाः ॥ नदेयाःपितृकार्येषुपयश्चाजाविकंतथा ॥ ६५ ॥ कोद्रवोदारवरटकपित्थंमधुकातसी ॥ एतान्यपि
नदेयानिपितृभ्यः श्रियमिच्छता ॥ ६६ ॥ पितॄन्प्रीणातियोभक्त्यातेपुनःप्रीणयंतितम् ॥ यच्छंतिपितरः पुष्टिंस्वांगारोग्यंप्रजाफलम् ॥ ६७ ॥ देवका
र्यादपिपुनःपितृकार्यंविशिष्यते ॥ देवताभ्यःपितृणांतुपूर्वमाप्यायनंस्मृतम् ॥ ६८ ॥ शीघ्रप्रसादास्त्वक्रोधानिःसंगाःस्थिरसौहृदाः ॥ शांतात्मा
नःशौचपराःसततंप्रियवादिनः ॥ ६९ ॥ भक्तानुरक्ताःसुखदाःपितरःपर्वदेवताः ॥ हविष्मतामाधिपत्येश्राद्धदेवस्मृतोरविः ॥ ७० ॥ एतद्धिसर्वमाख्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तंपितृवंशानुकीर्त्तनम् ॥ पुण्यंपवित्रमारोग्यंकीत्तनायनृभिःसदा ॥ ७१ ॥ भीष्मउवाच ॥ श्रुत्वैतदखिलंभूयःपराभक्तिरुपस्थिता ॥ श्राद्धकालंवि
धिंचैवश्राद्धमेवतथैवच ॥७२॥ श्राद्धेषुभोजनीयायेश्राद्धवर्ज्याद्विजातयः ॥ कस्मिन्वासरभागेतुपितृभ्यःश्राद्धमारभेत् ॥ ७३॥ अन्नंदत्तंकथंयातिश्रा
द्धवैब्रह्मवित्तमः ॥ विधिनाकेनकर्त्तव्यंकथंप्रीणातितान्पितॄन् ॥७४॥ पुलस्त्यउवाच ॥ कुर्यादहरहःश्राद्धमन्नाद्येनोदकेनच॥पयोमूलफलैर्वापिपितृ
भ्यःप्रीतिमावहन्॥७५॥नित्यंनैमित्तिकंकाम्यंत्रिविधंश्राद्धमुच्यते॥नित्यंतावत्प्रवक्ष्यामिअर्घ्यावाहनवर्जितम्॥७६॥अदैवतंविजानीयात्पार्वणंपर्वसु
स्मृतम् ॥ पार्वणंत्रिविधंप्रोक्तंशृणुयत्नान्महीपते ॥७७॥ पार्वणेयनियोज्यास्तुतान्शृणुष्वनराधिप ॥ पंचाग्निःस्नातकश्चैवत्रिसौपर्णःषडंगवित् ॥७८॥
श्रोत्रियःश्रोत्रियसुतोविधिवाक्यविशारदः ॥ सर्वज्ञोवेदवान्मंत्रीज्ञानवंशकुलान्वितः ॥७९॥ तृणाचिकेतस्त्रिमधुःश्रुतेष्वन्येषुसंस्थितः॥पुराणवेत्ताब्रह्म
ज्ञःस्वाध्यायीजपतत्परः ॥ ८० ॥ ब्रह्मभक्तः पितृपरःसूर्यभक्तोऽथवैष्णवः ॥ब्राह्मणोयोगनिष्ठात्माविजितात्मासुशीलवान् ॥८१॥ एतेतोष्याःप्रयत्ने
नवर्जनीयानिमाञ्छृणु ॥ पतितस्तत्सुतःक्लीबःपिशुनोव्यंगरोगितः ॥ ८२॥ सर्वेतेश्राद्धकालेतुत्याज्यावैधर्मदर्शिभिः ॥ पूर्वेद्युरपरेद्युर्वाविनीतांश्चनिमंत्र
येत् ॥ ८३ ॥ निमंत्रितांश्चपितरउपतिष्ठंतितान्द्विजान् ॥ वायुभूतानिगच्छंतितथासीनानुपासते ॥ ८४ ॥ दक्षिणंजानुचालभ्यवामंपात्यनिमंत्रयेत् ॥
अक्रोधनैःशौचपरैःसुस्नातैर्ब्रह्मवादिभिः ॥ ८५ ॥ भवितव्यंभवद्भिस्तुमयाचश्राद्धकर्मणि ॥ पितृयज्ञंविनिर्वर्त्यतर्पणाख्यंतुयोऽग्निमान् ॥ ८६ ॥
पिंडान्वाहार्यकंकुर्याच्छ्राद्धमिंदुक्षयेतथा ॥ गोमयेनानुलिप्तेतुदक्षिणाप्लवनस्थले ॥८७ ॥ श्राद्धंसमारभेद्भक्त्यागोष्ठेवाजलसन्निधौ ॥ अग्निमान्निर्वपे
त्पित्र्यं चरुंवासक्तुमुष्टिभिः ॥ ८८ ॥ पितृभ्योनिर्वपामीतिसर्वंदक्षिणतोन्यसेत् ॥ अभिघार्यततःकुर्यान्निर्वापत्रयमग्रतः ॥ ८९ ॥ तेवितस्त्यायताः
कार्याश्चतुरङ्गुलविस्तृताः ॥ दर्वीत्रयंचकुर्वीतखादिरंरजतान्वितम् ॥९०॥ रत्निमात्रंपरिश्लक्ष्णंहस्ताकाराग्रमुत्तमम्॥उदपात्राणिकांस्यस्यमेक्षणंचस
मित्कुशम् ॥ ९१ ॥ तिलपात्राणिसद्वासोगंधधूपानुलेपनम् ॥ आहरेदपसव्यंचसर्वंदक्षिणतःशनैः ॥९२॥ एवमासाद्यतत्सर्वंभवनस्योत्तरेंऽतरे ॥ गोम
येनानुलिप्तायांगोमूत्रेणचमंडलम् ॥ ९३ ॥ साक्षताभिःसपुष्पाभिरद्भिःसव्यापसव्यवत् ॥ विप्राणांक्षालयेत्पादावभिवंद्यपुनःपुनः ॥ ९४ ॥ आसने
षूपविष्टेषुदर्भवत्सुविधानतः ॥ उपस्पृष्टोदकान्विप्रानुपवेश्यानुमंत्रयेत् ॥९५ द्वौदैवेपितृकृत्येत्रीनेकैकंचोभयत्रवा ॥ भोजयेदीश्वरोऽपीहनकुर्याद्वि
स्तरंबुधः ॥ ९६ ॥ दैवपूर्वंनिवेद्याथविप्रानर्घ्यादिनाबुधैः ॥ अग्नौकुर्यादनुज्ञातोविप्रैर्विप्रोयथाविधि ॥ ९७ ॥ स्वगृह्योक्तेनविधिनाकालेकृत्वासमंत
तः ॥ अग्नीषोमयमाभ्यांतुकुर्यादाप्यायनंबुधः ॥ ९८ ॥ दक्षिणाग्नौप्रणीतेनसएवाग्निर्द्विजोत्तमः ॥ यज्ञोपवीतान्निर्वर्त्यततःपर्युक्षणादिकम् ॥ ९९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राचीनावीतिनाकार्यमेतत्सर्वंविजानता॥ लब्ध्वातस्माद्विशेषेणपिंडान्कुर्वीतचोदकम् ॥१००॥ दद्यादुदकपात्रैस्तुसलिलंसव्यपाणिना ॥ दद्यात्सर्वंप्र
यत्नेनदमयुक्तोविमत्सरः ॥१०१॥ विधायरेखांयत्नेनानिर्वपेदवनेजनम् ॥ दक्षिणाभिमुखःकुर्यात्ततोदर्भान्निधायवै ॥१०२॥ निधायपिंडमेकैकंस
र्वंदर्भोपरि क्रमात् ॥ निर्वपेदथदर्भेषुनामगोत्रानुकीर्तनैः ॥ १०३ ॥ तेषुदर्भेषुतंहस्तंविमृज्याल्लेपभागिनाम् ॥ तथैवचजपंकुर्यात्पुनःप्रत्यवनेजनम्
॥ १०४ ॥ जलयुक्तंनमस्कृत्यगंधधूपार्चनादिभिः ॥ एवमावाह्यतत्सर्वंवेदमंत्रैर्यथोदितैः ॥ १०५ ॥ एकाग्निरेकएवाद्भिर्निर्वपेद्दर्विकांतथा ॥ ततःकृ
त्वानरोदद्यात्पितृभ्यस्तुकुशान्बुधः ॥ १०६ ॥ ततःपिंडादिकंकुर्यादावाहनविसर्जनम् ॥ ततोगृहीत्वापिंडेभ्योमात्राःसर्वाःक्रमेणतु ॥ १०७॥ तानेव
विप्रान्प्रथममाशयित्वाचमानवः॥वर्णयन्भोजयेदन्नमिष्टंपूतंचसर्वदा ॥१०८॥ वर्जयेत्क्रोधपरतांस्मरन्नारायणंहरिम् ॥ तृप्तान्यात्वापुनः कुर्याद्विकि
रंसार्ववर्णिकम्॥१०९॥विधृत्यसोदकंत्वन्नंसतिलंप्रक्षिपेद्भुवि॥आचांतेषुपुनर्दद्याज्जलंपुष्पाक्षतोदकम् ॥११०॥ स्वधावाचनकंसर्वंपिंडोपरिसमाचरेत्
देवाद्यंतंप्रकुर्वीतश्राद्धनाशोऽन्यथाभवेत् ॥१११॥ विसृज्यविप्रान्प्रणतस्तेषांकृत्वाप्रदक्षिणम्॥दक्षिणांदिशमाकांक्षन्पितृनुद्दिश्यमानवः॥११२॥दाता
रोनोभिवर्द्धन्तांवेदाःसंततिरेवच॥श्रद्धाचनोमाव्यगमद्बहुदेयंचनोऽस्त्विति ॥११३॥ अन्नंचनोबहुभवेदतिथींश्चलभेमहि ॥ याचितारश्चनःसंतुमाचया
चिष्मकंचन ॥ ११४ ॥ एतदग्निमतःप्रोक्तमन्वाहार्यंतुपार्वणम् ॥ यथेंदुसंक्षयेतद्वदन्यत्रापिनिगद्यते ॥११५॥ पिंडांस्तुगोजविप्रेभ्योदद्यादग्नौजलेऽ
पिवा ॥ वप्रांतेवाथविकिरेदापोभिरथवापयेत् ॥११६॥ पत्नीतुमध्यमंपिंडंप्राशयेद्विनयान्विताम् ॥ आधत्तपितरोगर्भपुत्रसंतानवर्द्धनम् ॥ ११७ ॥
तावन्निर्वापणंतिष्ठेद्यावद्विप्राविसर्जिताः ॥ वैश्वदेवंततःकुर्यान्निवृत्तः पितृकर्मणः ॥११८॥ इष्टैःसहततःशान्तोभुजीतपितृसेवितम्॥पुनर्भोजनमध्वानं
यानमायासमैथुनम् ॥ ११९ ॥ श्राद्धकृच्छ्राद्धभुग्योवासर्वमेतद्विवर्जयेत् ॥ स्वाध्यायंकलहंचैवदिवास्वप्नंचसर्वदा ॥ १२० ॥ अनेनविधिना
श्राद्धंत्रिवर्गस्येहनिर्वपेत् ॥ कन्याकुंभवृषस्थेऽर्केकृष्णपक्षेषुसर्वदा ॥१२१ ॥ यत्रयत्रप्रदातव्यंसपिंडीकरणात्मकम् ॥ तत्रानेनविधानेनदेयमग्निम
तासदा ॥ १२२ ॥ अतःपरंप्रवक्ष्यामिब्रह्मणायदुदीरितम् ॥ श्राद्धंसाधारणंनामभुक्तिमुक्तिफलप्रदम् ॥ १२३ ॥ अयनेविषुवेचैवअमावस्यार्क
संक्रमे ॥ अमावस्याष्टकाकृष्णपक्षपञ्चदशीषुच ॥ १२४ ॥ आर्द्रामघारोहिणीषुद्रव्यब्राह्मणसंगमे ॥ गजच्छायाव्यतीपातेविष्टिवैधृतिवासरे ॥१२५॥
वैशाखस्यतृतीयायानवमीकार्तिकस्यच ॥ पञ्चदशीतुमाघस्यनभस्येचत्रयोदशी ॥ १२६ ॥ युगादयःस्मृताह्येतापितृपक्षोपकारिकाः ॥ तथामन्वं
तरादौचदेयंश्राद्धंविजानता ॥ १२७ ॥ अश्वयुङ्नवमीचैवद्वादशीकार्तिकेतथा ॥ तृतीयाचैत्रमासस्यतथाभाद्रपदस्यच ॥ १२८ ॥ फाल्गुनस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वमावास्यापौषस्यैकादशीतथा ॥ आषाढस्यापिदशमीमाघमासस्यसप्तमी ॥ १२९ ॥ श्रावणेचाष्टमीकृष्णातथाषाढीचपूर्णिमा ॥ कार्तिकीफाल्गु
नीचैवज्येष्ठेपञ्चदशीसिता ॥ १३०॥ मन्वंतरादयस्त्वेतादत्तस्याक्षयकारिकाः ॥ पानीयमप्यत्रतिलैर्विमिश्रंदद्यात्पितृभ्यःप्रयतोमनुष्यः ॥ १३१ ॥
श्राद्धंकृतंतेनसमास्सहस्रंरहस्यमेतत्पितरोवदंति ॥ वैशाख्यामुपवासेषुतथोत्सवमहालये ॥ १३२ ॥ तीर्थायतनगोष्ठेषुद्वीपोद्यानगृहेषुच ॥ विविक्तेषू
पलिप्तेषुश्राद्धंदेयंविजानता॥१३३॥विप्रान्पूर्वेपरेचाह्निविनीतात्मानिमंत्रयेत् ॥ शीलवृत्तगुणोपेतान्वयोरूपसमन्वितान् ॥ १३४॥ द्वौदैवेपितृकृत्येत्री
नेकैकमुभयत्रवा ॥ भोजयेत्सुसमृद्धोऽपिनप्रकुर्वीतविस्तरम् ॥१३५॥ विश्वेदेवान्यवैःपुष्पैरभ्यर्च्यासनपूर्वकम् ॥ पूरयेत्पात्रयुग्मंतुस्थाप्यंदर्भपवित्र
के॥१३६॥शन्नोदेवीत्यपःकुर्याद्यवोऽसीतियवानपि ॥गन्धपुष्पैस्तुसंपूज्यविश्वान्देवान्प्रतिन्यसेत्॥१३७॥विश्वेदेवासइत्याभ्यामावाह्यविकिरेद्यवान्
॥यवोऽसिधान्यराजस्त्वंवारुणोमधुमिश्रितः॥१३८॥निर्णुदःसर्वपानाम्पवित्रऋषिसंस्तुतः ॥गंधपुष्पैरलंकृत्ययादिव्येत्यर्घमुत्सृजेत् ॥१३९॥ अभ्य
र्च्यगंधाद्युत्सृज्यपितृयज्ञंसमारभेत्॥दर्भासनादिकृत्वादौत्रीणिपात्राणिचार्चयत्॥१४०॥सपवित्राणिकृत्वादौशन्नोदेवीत्यपःक्षिपेत्॥तिलोसीतिलान्कु
र्याद्गन्धपुष्पादिकंपुनः ॥ १४१ ॥ पात्रंवनस्पतिमयंतथापर्णमयंपुनः ॥ राजतंवाप्रकुर्वीततथासागरसंभवम् ॥ १४२ ॥ सौवर्णंराजतंताम्रंपितॄणांपात्र
मुच्यते ॥ रजतस्यकथावापिदर्शनंदानमेवच ॥ १४३ ॥ राजतैर्भाजनैरेषांपितॄणांरजतान्वितैः ॥ वार्यपिश्रद्धयादत्तमक्षयायोपकल्पते ॥ १४४॥ अ
द्यापिपितृपात्रेषुपितॄणांराजतान्वितम् ॥ शिवनेत्रोद्भवंयस्मादुत्तमंपितृवल्लभम् ॥१४५॥ एवंपात्राणिसंकल्प्ययथालाभंविमत्सरः ॥ यादिव्येतिपि
तुर्नामगोत्रेदर्भान्करेन्यसेत् ॥ १४६ ॥ पितॄनावाहयिष्यामितथेत्युक्तःसतैःपुनः ॥ उशंतस्त्वातथायन्तुऋग्भ्यामावाहयेत्पितॄन् ॥ १४७ ॥ यादि
व्येत्यर्घ्यमुत्सृज्यदद्याद्गंधादिकंततः ॥ वस्त्रोत्तरंदर्भपूर्वंदत्वासंश्रयमादितः ॥ १४८ ॥ पितृपात्रेनिधायाथन्युब्जमुत्तरतोन्यसेत्॥ पितृभ्यःस्थानम
सीतिनिधायपरिवेषयेत् ॥ १४९ ॥ तत्रापिपूर्ववतः कुर्यादग्निकार्यंविमत्सरः॥ उभाभ्यामपिहस्ताभ्यामाहृत्यपरिवेषयेत्॥ १५०॥ उशन्तस्त्वेतितंदर्भ
पाणिभक्तंविशेषतः ॥ गुणान्वितैश्चशाकाद्यैर्नानाभक्ष्यैस्तथैवच ॥१५१॥ अन्नंचसदधिक्षीरंगोघृतंशर्करान्वितम्॥ मासंप्रीणातिवैसर्वान्पितॄन्नित्याहप
द्मजः ॥ १५२ ॥ द्वौमासौमत्स्यमांसेनत्रीन्मासान्हारिणेनतु ॥ औरभ्रेणाथचतुरःशाकुनेनाथपंचवै ॥ १५३ ॥ वाराहस्यतुमांसेनषण्मासंतृप्तिरुत्तमा
सप्तलोहस्यमांसेनतथाष्टावाजकेनतु॥१५४॥पृषतस्यतुमांसेनतृप्तिर्मासांन्नवैतु ॥ दशमासांश्चतृप्यंतेवराहमहिषामिषैः॥१५५॥शशकूर्मयोस्तुमांसेनमा
सानेकादशैवतु॥संवत्सरंतुगव्येनपयसापायसेनवा॥१५६॥सौकरेणतुतृप्यंतेमासान्पंचदशैवतु ॥वार्ध्रीणसस्यमांसेनतृप्तिर्द्वादशवार्षिकी॥१५७॥काल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शाकेनचानंत्यंखड्गमांसेन चैवहि ॥ यत्किंचिन्मधुनामिश्रंगोक्षीरंदधिपायसम् ॥ १५८ ॥ दत्तमक्षयमित्याहुः पितरः पूर्वदेवताः ॥ स्वाध्यायंश्रावये
त्पित्र्यंपुराणान्यखिलानिच ॥ १५९ ॥ ब्रह्मविष्ण्वर्करुद्राणांस्तवानिविविधानिच ॥ इंद्रेशसोमसूक्तानिपावमानीश्चशक्तितः ॥१६०॥ बृहद्रथंतरंतत्र
ज्येष्ठसामाथरौरवम् ॥ तथैवशांतिकाध्यायंमधुब्राह्मणमेवच ॥१६१॥ मण्डलब्राह्मणंतद्वत्प्रीतिकारिचयत्पुनः ॥ विप्राणामात्मनश्चापितत्सर्वंसमुदीरये
त् ॥ १६२ ॥ भारताध्ययनंकार्यं पितॄणांपरमप्रियम् ॥ भुक्तवत्सुचविप्रेषुभोज्यतोयादिकंनृप ॥१६३॥ सार्ववर्णिकमन्नाद्यमानयेत्सावधारणम्॥समु
त्सृजेद्भुक्तवतामग्रतोविकिरान्भुवि॥१६४॥अग्निदग्धाश्चयेजीवायेऽप्यदग्धाःकुलेमम॥भूमौदत्तेनतृप्यंतुतृप्तायांतुपरांगतिम् ॥१६५॥ येषांनमातानापि
तानबंधुर्नचापिमित्रंनतथान्नमस्ति॥तत्तृप्तयेऽन्नंभुविदत्तमेतत्प्रयातुयोगाययतोयतस्ते ॥१६६॥ असंस्कृतप्रमीतानांत्यागिनांकुलभागिनाम्॥उच्छिष्ट
भागधेयानांदर्भेषुविकिरासनम् ॥ १६७ ॥ तृप्तान् ज्ञात्वोदकंदद्यात्सकृद्विकिरणेतथा ॥ विप्रलिप्तमहीपृष्ठेगोशकृन्मूत्रवारिणा ॥१६८॥ निधायदर्भा
न्विधिवद्दक्षिणाग्रान्प्रयत्नतः ॥ सर्ववर्णविधानेनपिंडांश्चपितृयज्ञवत् ॥१६९॥ अवनेजनपूर्वंतुनामगोत्रंतुमानवः ॥ उक्त्वापुष्पादिकंदत्वाकृत्वाप्रत्य
वनेजनम् ॥ १७० ॥ ज्ञात्वापससव्येनपाणिनात्रिःप्रदाक्षिणम् ॥ पितृवन्मातृकंकार्यंविधिवद्दर्भपणिना ॥ १७१ ॥ दीपप्रज्वालनंतद्वत्कुर्यात्पुष्पार्च
नंबुधः ॥ तथाचांतेषुचाचम्यदद्याच्चापःसकृत्सकृत् ॥१७२॥ तथापुष्पाक्षतान्पश्चादक्षय्योदकमेवच ॥ सतिलंनामगोत्रेणदद्याच्छक्त्याचदक्षिणाम्
॥ १७३ ॥ गोभूहिरण्यवासांसिभव्यानिशयनानिच ॥ दद्याद्यदिष्टंविप्राणामात्मनःपितुरेवच ॥ १७४ ॥ वित्तशाठ्येनरहितःपितृभ्यःप्रीतिमावहेत्
॥ इतःस्वधावाचनकंविश्वेदेवेषुचोदकम् ॥ १७५ ॥ दत्वाशीःप्रतिगृह्णीयाद्द्विजेभ्योऽपियथाबुधः॥अघोराःपितरःसंतुसंत्वित्युक्तः पुनर्द्विजैः॥१७६॥
गोत्रंतथावर्द्धतांतुतथेत्युक्तश्चतैःपुनः ॥ स्वस्तिवाचनकंकुर्यात्पिंडानुद्धृत्यभक्तितः ॥ १७७ ॥ उच्छेषणंतुतत्तिष्ठेद्यावद्विप्रविसर्जनम् ॥ ततोगृहबलिं
कुर्यादितिधर्मोव्यवस्थितः ॥ १७८ ॥ उच्छेषणंभूमिगतमजिह्मस्याशठस्यच ॥ दासवर्गस्यतत्पिंडंभागधेयंप्रचक्षते ॥१७९॥ पितृभिर्निर्मितंपूर्वमे
तदाप्यायनंसदा ॥ अव्रतानामपुत्राणांस्त्रीणामपिनराधिप ॥१८०॥ ततःस्थानाग्रतःस्थित्वाप्रतिगृह्यांबुपात्रिकाम् ॥ वाजेवाजेतिचजपन्कुशाग्रेणवि
सर्जयेत्॥१८१॥बहिःप्रदाक्षिणंकुर्यात्पदान्यष्टावनुव्रजेत्॥बन्धुवर्गेणसहितःपुत्रभार्यासमन्वितः ॥१८२॥ निवृत्यप्रणिपत्याथप्रयुज्याग्निंसमंत्रवित् ॥
वैश्वदेवंप्रकुर्वीतनैत्यिकंबलिमेवच ॥१८३॥ ततस्तुवैश्वदेवांतेसभृत्यसुतबांधवः॥भुंजीतातिथिसंयुक्तःसर्वंपितृनिषेवितम्॥१८४॥एतच्चानुपनीतोऽपिकु
र्यात्सर्वेषुपर्वसु ॥ श्राद्धंसारणंनामसर्वकामफलप्रदम्॥भार्याविरहितोऽप्येतत्प्रवासस्थोऽपिभक्तिमान्॥१८५॥ शूद्रोऽप्यमंत्रकंकुर्यादनेनविधिनानृप ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तृतीयमाभ्युदयिकंवृद्धिश्राद्धेविधीयत ॥ १८६ ॥ उत्सवानंदसंस्कारेयज्ञोद्वाहादिमंगले ॥ मातरःप्रथमपूज्याःपितरस्तदनंतरम् ॥१८७॥ ततोमाता महाराजन्विश्वेदेवास्तथैवच॥प्रदक्षिणोपचारेणदध्यक्षतफलोदकैः॥१८८॥प्राङ्मुखोनिर्वपेत्पिण्डान्पूर्वांश्चैवपुरातनान् ॥ सम्पन्नमित्यभ्युदयेदद्यादर्घं द्वयोर्द्वयोः ॥१८९ ॥ युग्माद्विजातयः पूज्यावस्त्राकल्पांबरादिभिः ॥ तिलकार्थंयवैःकार्यंतच्चसर्वानुपूर्वकम् ॥१९०॥मांगल्यानिचसर्वाणिवाचयेद्द्विज पुंगवान् ॥एवंशूद्रोऽपिसामान्यंवृद्धिश्राद्धंचसर्वदा ॥१९१॥ नमस्कारेणमंत्रेणकुर्यादामानिवैबुधः॥दानम्प्रधानंशूद्रस्यइत्याहभगवान्प्रभुः॥प्रदानेन सर्वकामाप्तिस्तस्यसंजायतेयतः॥१९२॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेसाधारणाभ्युदयकीर्तनंनामनवमोऽध्यायः ॥९॥पुलस्त्यउवाच॥एकोद्दिष्टं ततोवक्ष्येयदुक्तम्ब्रह्मणापुरा॥मृतेपुत्रैर्यथाकार्यामाशौचंचापितुर्यदि ॥ १ ॥ दशाहंशावमाशौचंब्राह्मणस्यविधीयते ॥क्षत्रियेषुदशद्वेच पक्षंवैश्येषुचैवहि ॥२॥शूद्रेषुमासमाशौचंसपिंडेषुविधीयते॥ नैशमाचूडमाशौचंत्रिरात्रंपरतःस्मृतम् ॥३॥जननेऽप्येवमेवस्यात्सर्ववर्णेषुसर्वदा॥अस्थिसंचयनादूर्ध्वमङ्ग स्पर्शोविधीयते ॥ ४ ॥ प्रेतायपिंडदानंतुद्वादशाहंसमाचरेत् ॥ पाथेयंतस्यतत्प्रोक्तंयतःप्रीतिकरंमहत् ॥५॥यस्मात्प्रेतपुरंप्रेतोद्वादशाहेननीयते॥गृहेपुत्र कलत्रंचद्वाशाहंप्रपश्यति ॥ ६ ॥ तस्मान्निधेयमाकाशेदशरात्रंपयस्तथा ॥ सर्वदाहोपशांत्यर्थमध्वश्रमविनाशनम् ॥ ७ ॥ ततस्त्वेकादशाहेऽपिद्विजा नेकादशैवतु ॥ गोत्रादिसूतकांतेचभोजयेन्मनुजोद्विजान् ॥ ८ ॥ द्वितीयेऽह्निपुनस्तद्वदेकोद्दिष्टंसमाचरेत् ॥ नावाहनाग्नौकरणंदैवहीनंविधानतः ॥ ९ ॥ एकंपवित्रमेकोर्घएकःपिंडोविधीयते ॥ उपतिष्ठतामितिवदेद्देयंपश्चात्तिलोदकम् ॥ १० ॥ स्वस्तिब्रूयाद्विप्रकरेविसर्गेचाभिरम्यताम् ॥ शेषंपूर्व वदत्रापिकार्यंवेदविदोविदुः ॥ ११ ॥ अनेनविधिनासर्वमनुमासंसमाचरेत् ॥ सूतकांतेद्वितीयेऽह्निशय्यांदद्याद्विलक्षणाम् ॥ १२ ॥ काञ्चनंपुरुषंतद्व त्फलवस्त्रसमन्वितम् ॥ प्रपूज्यद्विजदांपत्यंनानाभरणभूषितम् ॥ १३ ॥ उपवेश्यतुशय्यायांमधुपर्कंततोददेत् ॥ रजतस्यतुपात्रेणदधिदुग्धसमन्वि तम् ॥ १४ ॥ अस्थिलालाटिकंगृह्यसूक्ष्मंकृत्वाविमिश्रयेत् ॥पाययेद्विजदांपत्यंपितृभक्त्यासमन्वितः ॥ १५॥ एषएवविधिर्दृष्टःपार्वतीयैर्द्विजोत्तमैः॥ तेनदुग्धातुसाशय्यानग्राह्याद्विजसत्तमैः ॥ १६ ॥ गृहीतायांतुतस्यांहिपुनःसंस्कारमर्हति ॥ वेदेचैवपुराणेचशय्यासर्वत्रगर्हिता ॥ १७ ॥ ग्रहीतारस्तु जायन्तेसर्वेनरकगामिनः ॥ग्रथितांवसुजालेनशय्यांदांपत्यसेविताम् ॥१८॥ येस्पृशंतिनजानंतःसर्वेनरकगामिनः ॥ नवश्राद्धेनभोक्तव्यंभुक्त्वाचांद्रा यणंचरेत् ॥ १९ ॥ पितृभक्त्यातुपुत्राणांकार्यमेवसदाभवेत् ॥ वृषोत्सर्गंचकुर्वीतदेयाचकपिलाशुभा ॥ २० ॥ उदकुंभश्चदातव्योभक्ष्यभोज्यफला न्वितः ॥ यावदब्दंनरश्रेष्ठसतिलोदकपूर्वकम्॥ २१॥ ततःसंवत्सरेपूर्णेसपिंडीकरणंभवेत्॥सपिंडीकरणादूर्ध्वंप्रेतःपार्वणभुग्यतः॥२२॥वृद्धिपूर्वेषुकार्येषु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गृहस्थस्यभवेत्ततः ॥ सपिंडीकरणंश्राद्धंदेवपूर्वंनियोजयेत ॥२३॥ पितॄनावाहयेत्तत्रपृथक्प्रेतंविनिर्दिशेत ॥ गंधोदकतिलैर्युक्तंकुर्यात्पात्रचतुष्टयम् ॥ २४ ॥ अर्घ्यार्थंपितृपात्रेषुप्रेतपात्रंप्रसेचयेत् ॥ तद्वत्संकल्प्यचतुरःपिंडान्पितृपरस्तदा ॥२५॥ येसमानाइतिद्वाभ्यामन्नन्तुविभजेत्त्रिधा ॥ अनेन विधिनाचार्घ्यंपूर्वमेवप्रदापयेत् ॥२६॥ ततःपितृत्वमापन्नस्सचतुर्थस्तदात्वनु ॥ अग्निष्वात्तादिमध्येतुप्राप्नोत्यमृतमुत्तमम् ॥ २७ ॥ सपिण्डीकरणादूर्ध्वंपृथक्तस्मैनदीयते ॥ पितृष्वेवचदातव्यंततिंपडंयेषुसंस्थितम् ॥२८॥ ततःप्रभृतिसंक्रान्तावुपरागादिपर्वसु ॥ त्रिपिंडमाचरेच्छ्राद्धमेकोद्दिष्टंमृतेऽहनि ॥ २९ ॥ एकोद्दिष्टंपरित्यज्यमृताहेयःसमाचरेत ॥ सदैवंपितृहासःस्यात्तथाभ्रातृविनाशकः ॥३०॥ मृताहेपार्वणंकुर्वन्नधोयातिसमानवः ॥ संपृक्तेस्वर्गतीभावेप्रेतमोक्षोयतोभवेत् ॥ ३१ ॥ आमश्राद्धंतदाकुर्याद्विधिज्ञःश्राद्धदस्ततः ॥ तेनाग्नौकरणंकुर्यात्पिंडांस्तेनैवनिर्वपेत् ॥ ३२ ॥ त्रिभिःसपिंडीकरणंमासैक्येत्रितयेतथा ॥ यदाप्राप्स्यतिकालेनतदामुच्येतबंधनात ॥३३॥ मुक्तोपिलेपभागित्वंप्राप्नोतिकुशमार्जनात् ॥ लेपभाजश्चतुर्थाद्यास्त्रयःस्युःपिंडभागिनः ॥ ३४ ॥ पिंडदःसप्तमस्तेषांसपिंडाःसप्तपूरुषाः ॥ ॥ भीष्मउवाच ॥ कथंहव्यानिदेयानिकव्यानिचजनैरिह ॥३५॥ गृह्णंतिपितृलोकेवाप्रायःकैर्निगद्यते ॥ यदिमर्त्योद्विजोभुंक्तेहूयतेयदिवानले ॥३६॥ शुभाशुभात्मकाःप्रेतास्तदन्नंभुंजतेकथम् ॥पुलस्त्यउवाच॥ वसुस्वरूपाःपितरोरुद्राश्चैवपितामहाः ॥ ३७ ॥ प्रपितामहास्तथादित्याइत्येषावैदिकीश्रुतिः ॥ नामगोत्रंपितॄणांतुप्रापकंहव्यकव्ययोः ॥ ३८ ॥ श्राद्धस्यमन्त्रतस्तत्वमुपलभ्येतभक्तितः ॥ अग्निष्वात्तादयस्तेषामाधिपत्येव्यवस्थिताः ॥ ३९॥ नामगोत्रास्तदादेशाभवंत्युद्भवतामपि ॥ प्राणिनःप्रीणयत्येतदर्हणंसमुपागतम् ॥ ४० ॥ दिव्योयदिपितामातागुरुःकर्मानुयोगतः ॥ तस्यान्नममृतंभूत्वादिव्यत्त्वेऽप्यनुगच्छति ॥४१॥ दैत्यत्वेभोगरूपेणपशुत्वेपितॄणांभवेत् ॥ श्राद्धान्नंवायुरूपेणनागत्वेऽप्युपतिष्ठति ॥४२॥ पानंभवतियक्षत्वेराक्षसत्वेतथामिषम् ॥ दानवत्वेतथापानंप्रेतत्वेरुधिरोदकम् ॥४३॥ मनुष्यत्वेन्नपानादिनानाभोगवतांभवेत् ॥ रतिशक्तिस्त्रियःकान्तेऽन्येषांभोजनशक्तिता ॥ ४४ ॥ दानशक्तिःसविभवारूपमारोग्यमेवच ॥ श्राद्धंपुष्पमिदंप्रोक्तंफलंब्रह्मसमागमः ॥ ४५ ॥ आयुःपुत्रान्धनंविद्यांस्वर्गंमोक्षंसुखानिच ॥ प्रयच्छन्तितथाराज्यंप्रीताःपितृगणानृप ॥ ४६ ॥ श्रूयतेचपुरामोक्षंप्राप्ताःकौशिकसूनवः ॥ पंचभिर्जन्मसंबंधैः प्राप्ताब्रह्मपरंपदम् ॥४७॥ ॥ भीष्मउवाच ॥ ॥ कथंकौशिकदायादाःप्राप्तायोगमनुत्तमम् ॥ पंचभिर्जन्मसंबन्धैःकथंकर्मक्षयोभवेत् ॥ ४८ ॥पुलस्त्यउवाच ॥ कौशिकोनामधर्मात्माकुरुक्षेत्रेमहानृषिः ॥ नामतःकर्मतस्तस्यपुत्राणांतान्निबोधमे ॥ ॥४९॥ स्वसृपःक्रोधनोहिंस्रः पिशुनः कविरेवच ॥ वाग्दुष्टःपितृवर्तीचगर्गाशिष्यास्तदाभवन् ॥५०॥ पितर्युपरतेतेषामभूद्दुर्भिक्षमुल्बणम् ॥ अना

CC-0. In Public Domain. Digitization by eGangotri

वृष्टिश्चमहतीसर्वलोकभयंकरी ॥ ५१ ॥ गर्गादेशाद्वनेदोग्ध्रींरक्षंतिचतपोधनाः ॥ खादामःकपिलामेतांवयंक्षुत्पीडिताभृशम् ॥ ५२ ॥ इतिचिंतयतां
पापंलघुःप्राहतदानुजः ॥ यद्यवश्यमियंवध्याश्राद्धरूपेणयोज्यताम् ॥५३॥ श्राद्धेनियोज्यमानायांपापंनश्यतिनोध्रुवम् ॥ एवंकुर्वित्यनुज्ञातः पितृव
र्तीतदानुजैः ॥ ५४ ॥ चक्रेसमाहितःश्राद्धमुपयुज्याथतांपुनः ॥ द्वौदेवेभ्रातरौकृत्वापित्र्येत्रींश्चापरान्क्रमात् ॥ ५५ ॥ तथैकमतिथिंकृत्वाश्राद्धदःस्व
यमेवतु ॥ चकारमंत्रवच्छ्राद्धंस्मरन्पितृपरायणः ॥५६॥तदागत्वाविशंकास्तेगुरवेचनिवेदयन् ॥ व्याघ्रेणनिहताधेनुर्वत्सोऽयंप्रतिगृह्यताम् ॥५७॥ एवं
साभक्षिताधेनुःसप्तभिस्तैस्तपोधनैः ॥ वैदिकंबलमाश्रित्यक्रूरेकर्मणिनिर्भयाः ॥ ५८ ॥ ततःकालेप्रणष्टास्तेव्याधादशपुरेऽभवन् ॥ जातिस्मरत्वंप्राप्ता
स्तेपितृभावेनभाविताः ॥५९॥ तत्रविज्ञायवैराग्यंप्राणानुत्सृज्यधर्मतः ॥ लोकैरवीक्ष्यमाणास्तेतीर्थांतेऽनशनेनतु॥६०॥संजातामृगरूपास्तेसप्तकालं
जरेगिरौ॥प्राप्तविज्ञानयोगास्तेतत्यजुस्तांनिजांतनुम्॥६१॥मन्त्रुःप्रपतनेनाथजातवैराग्यमानसाः॥मानसेचक्रवाकास्तेसंजाताःसप्तयोगिनः॥६२॥ ना
मतःकर्मतःसर्वेसुमताःकुसुमोवसुः॥चित्तदर्शीसुदर्शीचज्ञाताज्ञानस्यपारगः॥६३॥ज्येष्ठानुरक्ताःश्रेष्ठास्तेसप्तैतेयोगपावनाः ॥ योगभ्रष्टास्त्रयस्तेषांबभूवु
श्चलचेतसः॥६४॥दृष्ट्वाविभ्राजमानंतमणुहंस्त्रीभिरन्वितम्॥क्रीडंतंविविधैर्भोगैर्महाबलपराक्रमम् ॥६५॥पञ्चालान्वयसंभूतम्प्रभूतबलवाहनम्॥राज्यका
मोभवत्त्वेकस्तेषांमध्येजलौकसाम् ॥ ६६ ॥ पितृवर्तीचयोविप्रःश्राद्धकृत्पितृवत्सलः ॥ अपरौमंत्रिणौदृष्ट्वाप्रभूतबलवाहनौ ॥ ६७ ॥ मंत्रित्वेचकृतु
श्चेच्छामस्मिन्मर्त्यौद्विजोत्तमौ ॥ विभ्राजपुत्रस्त्वेकोऽभूद्ब्रह्मदत्तइतिस्मृतः ॥ ६८ ॥ मंत्रिपुत्रौतथाचैवपुंडरीकसुबालकौ ॥ ब्रह्मदत्तोऽभिषिक्तस्तु
कांपिल्येनगरोत्तमे ॥ ६९ ॥ पंचालराजो विक्रांतः श्राद्धकृत्पितृवत्सलः ॥ योगवित्सर्वजंतूनांचित्तवेत्ताभवत्तदा ॥ ७० ॥ तस्य
राज्ञोऽभवद्भार्यासुदेवस्यात्मजातदा ॥ सन्नतिर्नामविख्याताकपिलायाभवत्पुरा ॥ ७१ ॥ पितृकार्येनियुक्तत्वादभवद्ब्रह्मवादिनी ॥ तयाचकार
सहितः सराज्यंराजनंदनः ॥ ७२ ॥ कदाचिद्गतउद्यानं तयासहसपार्थिवः ॥ ददर्शकीटमिथुनमनंगकलहान्वितम् ॥७३॥ पिपीलिकामधोवक्रांपुरतः
कीटकामुकः॥पंचबाणाभितप्तांगःसगद्गदमुवाचह ॥७४॥ नत्वयासदृशीलोकेकामिनीविद्यतेक्वचित्॥ मध्येक्षीणातिजघनाबृहद्वक्त्रातिगामिनी ॥७५॥
सुवर्णवर्णसदृशीसद्वक्त्राचारुहासिनी॥आलक्ष्यतेचवदनं गुडशर्करवत्सलम् ॥७६॥ भोक्ष्यसेमयिभुक्तेत्वंस्नासिस्नातेतथामयि॥प्रोषितेमयिदीनात्वंक्रु
द्धेचभयचंचला ॥ ७७ ॥ किमर्थंवदकल्याणिसदाधोवनास्थिता ॥ सातमाहज्वलत्कोपाकिमालपसिरेशठ ॥ ७८ ॥ त्वयामोदकचूर्णंतुमांविहा
यापिभक्षितम्॥प्रादास्त्वंतदतिक्रम्यमामन्यस्यैसमन्मथः ॥ ७९ ॥ पिपीलकउवाच॥त्वत्सादृश्यान्मयादत्तमन्यस्यैवरर्णिनि ॥ तदेकमपराधंमेक्षन्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मर्हसिभामिनि॥ ८० ॥ नैवंपुनःकरिष्यामित्यजकोपं च सुस्तनि ॥ स्पृशामिनादौसत्येनप्रणतस्यप्रसीदमे ॥८१॥ रुष्टायांत्वयि सुश्रोणिमृत्युर्मे
पुरतोभवेत् ॥ तुष्टायांत्वयिवामोरुपूर्णाःसर्वमनोरथाः ॥८२॥ पूर्णचंद्रोपमंवक्त्रंस्वादेऽमृतरसोपमम् ॥ निर्भरंपिबसुश्रोणिकामासक्तस्यमेसदा ॥८३॥
एतन्मत्वाशुभे कार्यासर्वदातुकृपामयि ॥ इतिसा वचनं श्रुत्वाप्रसन्नाचाभवत्ततः॥८४॥आत्मानमर्पयामासमोहनायपिपीलिका॥ब्रह्मदत्तोऽपितत्सर्वं
ज्ञात्वासस्मयमाहसत् ॥८५॥ सर्वसत्वरुतज्ञानीप्रभावात्पूर्वकर्मणः ॥ ॥ भीष्म उवाच ॥ कथंसर्वरुतज्ञोभूद्ब्रह्मदत्तोनराधिपः ॥ ८६॥ तच्चापिचाभव
त्कुत्रचक्रवाकचतुष्टयम् ॥ तन्मेकथयसर्वज्ञकुलेकस्यचसुव्रतम्॥८७॥ पुलस्त्यउवाच तस्मिन्नेवपुरेजाताश्चक्रवाकाअथोनृप॥८८॥वृद्धद्विजस्यदायादा
विप्राजातिस्मराबुधाः ॥धृतिमांस्तत्वदर्शीचविद्यावर्णस्तपोऽधिकाः ॥८९॥ नामतःकर्मतश्चैवसुदरिद्रस्यतेसुताः॥तपसेबुद्धिरभवत्तेषांवैद्विजजन्मनाम्
॥ ९० ॥ यास्यामः परमांसिद्धिमूचुस्तेद्विजसत्तमाः ॥ ततेषांवचनश्रुत्वासुदरिद्रोमहातपाः ॥ ९१ ॥ उवाचदीनयावाचाकिमेतदितिपुत्रकाः ॥
अधर्मएषवः पुत्रापितातानित्युवाचह ॥ ९२ ॥ वृद्धंपितरमुत्सृज्यदरिद्रंवनवासिनम् ॥ क्वनुधर्मोत्रभविता मांत्यक्त्वागतिमेवच ॥ ९३ ॥ ऊचु
स्तेकल्पितावृत्तिस्तवतातवचश्शृणु॥व्रतमेत्पुराराज्ञःसतेदास्यतिपुष्कलम् ॥९४॥ धनंग्रामसहस्राणिप्रभातेपठतस्तव ॥कुरुक्षेत्रेतुयेविप्राव्याधादशपुरे
तुये ॥९५ ॥ कालंजरेमृगाभूताश्चक्रवाकास्तुमानसे ॥ इत्युक्त्वापितरंजग्मुस्तेवनंतपसेपुनः ॥९६॥ वृद्धोऽपिसाद्विजोराजन्जगामस्वार्थसिद्धये ॥ अणु
होनामवैभ्राजः पञ्चालाधिपतिः पुरा ॥ ९७ ॥ पुत्रार्थीदेवदेवेशंपद्मयोनिंपितामहम् ॥ आराधयामासविभुंतीव्रव्रतपरायणः ॥ ९८ ॥ ततः
कालेनमहतातुष्टस्तस्यपितामहः ॥ वरंवरयभद्रंतेहृदयेऽभीप्सितंनृप ॥ ९९ ॥ अणुहउवाच ॥ पुत्रंमेदेहिदेवेशमहाबलपराक्रमम् ॥ पारगंसर्व
विद्यानांधार्मिकंयोगिनांवरम् ॥ १०० ॥ सर्वसत्वरुतज्ञंमेदेहियोगिनमात्मजम् ॥ एवमस्त्वितिविश्वात्मातमाहपरमेश्वरः ॥ १०१ ॥ पश्य
तांसर्वभूतानांतत्रैवांतरधीयत ॥ ततःसतस्यपुत्रोभूद्ब्रह्मदत्तःप्रतापवान् ॥ १०२ ॥ सर्वसत्वानुकंपीचसर्वसत्वबलाधिकः ॥ सर्वसत्वरुतज्ञश्चसर्व
सत्वेश्वरेश्वरः ॥ १०३ ॥ अथसत्वेनयोगात्मासपिपीलकमागतः ॥ यत्रतत्कीटमिथुनंरममाणमवस्थितम् ॥ १०४ ॥ ततःसासन्नतिर्दृष्ट्वाप्रहसं
तंसुविस्मितम् ॥ किमप्याशंकमानासातमपृच्छन्नरेश्वरम् ॥ १०५ ॥ सन्नतिरुवाच ॥अकस्मादतिहासोयंकिमर्थमभवन्नृप ॥ हास्यहेतुंनजाना
मियदकालेकृतंत्वया ॥ १०६ ॥ अवदद्राजपुत्रोऽसौतं पिपीलिकभाषितम् ॥ रागवर्द्धिरसोत्पन्नमेतद्धास्यंवरानने ॥ १०७ ॥ नचान्यत्कार
णंकिंचिद्धास्यहेतुः शुचिस्मिते ॥ नसामन्यततंदेवीप्राहालीकमिदंतव ॥ १०८ ॥ अहमेवेहहसितानजीविष्येत्वयाधुना ॥ कथंपिपीलिकलापं

CC-0. In Public Domain. Digitization by eGangotri

मर्त्योवेत्तिसुरादृते ॥ १०९ ॥ तस्मात्त्वयाहमेवाद्यहसिताकिमतः परम् ॥ ततोनिरुत्तरोराजाजिज्ञासुस्तद्वचोहरः ॥ ११० ॥ आस्थायनि
यमंतस्थौसप्तरात्रमकल्मषः ॥ स्वप्नान्तेप्राहतंब्रह्मप्रभातेपर्यटन्पुरम् ॥ १११ ॥ वृद्धद्विजोत्तमाद्वाक्यंसर्वंज्ञास्यतितेप्रिया ॥ इत्युक्त्वांतर्दधे
ब्रह्माप्रभातेचनृपः पुरात् ॥ ११२ ॥ निर्गच्छन्मन्त्रिसहितः सभार्योवृद्धमग्रतः ॥ गदंतंविप्रमायांतंवृद्धं च स ददर्शह ॥ ११३ ॥ ब्राह्मणउवाच ॥
येविप्रमुख्याःकुरुजांगलेषुदाशास्तथादाशपुरेमृगाश्च ॥ कालंजरेसप्तचचक्रवाकायेमानसेतेऽत्रवसंतिसिद्धाः ॥ ११४ ॥ इत्याकर्ण्यवचस्तस्यसप
पातशुचान्वितः ॥ जातिस्मरत्वमगमत्तौचमंत्रिवरात्मजौ ॥ ११५ ॥ कामशास्त्रप्रणेतातु बाभ्रव्यः सतुबालकः ॥ पंचालइति लोकेषुवि
श्रुतः सर्वशास्त्रवित् ॥ ११६ ॥ पुंडरीकोऽपिधर्मात्मावेदशास्त्रप्रवर्तकः ॥ भूत्वाजातिस्मरेशोकात्पतितावग्रतस्तथा ॥ ११७ ॥ हावयंक
र्मविभ्रष्टाः कामतः कर्मबंधनात् ॥ एवंविलप्यबहुशस्त्रयस्तेयोगपारगाः ॥ ११८ ॥ विस्मयाच्छ्राद्धमाहात्म्यमभिनंद्य पुनःपुनः ॥
सतुतस्मैधनंदत्त्वाप्रभूतग्रामसंयुतम् ॥ ११९ ॥ विसृज्यब्राह्मणंतंचवृद्धंधनमदान्वितम् ॥ आत्मीयंनृपतिःपुत्रंनृपलक्षणसंयुतम् ॥ १२० ॥ विष्वक्से
नाभिधानंचराजाराज्येऽभ्यषेचयत ॥ मानसेसलिलेसर्वेततस्तेयोगिनांवराः ॥ १२१ ॥ ब्रह्मदत्तादयस्तस्मिन्पितृभक्ताविमत्सराः ॥ सन्नतिश्चाभवद्दृ
ष्टामयैवतवदर्शितम् ॥१२२॥ राजन्योगफलंसर्वंयदेतदभिलक्ष्यते ॥तथेतिप्राहराजापिपुरस्तादभिनंदयन् ॥१२३॥ त्वत्प्रसादादिदंसर्वंमयैवंप्राप्यतेफ
लम् ॥ १२४ ॥ ततस्तेयोगमास्थायसर्वएववनौकसः ॥ ब्रह्मरंध्रेणपरमंपदमापुस्तपोबलात् ॥ १२५ ॥ एवमायुर्धनंविद्यांस्वर्गंमोक्षसुखानिच ॥
प्रयच्छंतिसुतंराज्यंनृणांतुष्टाःपितामहाः ॥ १२६ ॥ इदंचपितृमाहात्म्यंब्रह्मदत्तस्यवैनृप॥द्विजेभ्यःश्रावयेद्विद्वान्शृणोतिपठतेऽपिवा ॥ कल्पकोटिशतं
साग्रंब्रह्मलोकेमहीयते ॥ १२७ ॥ इति श्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेपितृमाहात्म्यकथनंनामदशमोऽध्यायः ॥१०॥ भीष्मउवाच ॥ कस्मिन्वासरभा
गेतुश्राद्धीश्राद्धंसमाचरेत् ॥ तीर्थेषुकेषुवैश्राद्धंकृतंबहुफलंद्विज ॥ १ ॥ पुलस्त्यउवाच ॥ तीर्थंतुपुष्करंनामयत्तुश्रेष्ठतमंस्मृतम् ॥ सर्वेषांद्विजमुख्यानां
मनोरथमिवास्थितम् ॥ २ ॥ तत्रदत्तंहुतंजप्तमनन्तंभवतिध्रुवम् ॥ पितॄणांवल्लभंनित्यमृषीणांपरमंमतम् ॥ ३ ॥ नंदाथललितातद्वत्तीर्थंमायापुरीशुभा
तथामित्रपदंराजंस्ततःकेदारमुत्तमम् ॥ ४ ॥ गंगासागरमित्याहुःसर्वतीर्थमयंशुभम् ॥ तीर्थंब्रह्मसरस्तद्वच्छतद्रुसलिलंशुभम् ॥ ५ ॥ तीर्थंतुनैमिषंना
मसर्वतीर्थफलप्रदम् ॥ गंगोद्भेदस्तुगोमत्यांयत्रोद्भूतःसनातनः ॥ ६ ॥ तथायज्ञवराहस्तुदेवदेवश्चशूलधृक् ॥ यत्रतत्कांचनन्दानमष्टादशभुजोहरः
॥७॥ नेमिस्तुधर्मचक्रस्यशीर्णायत्राभवत्पुरा ॥ तदेतन्नैमिषारण्यंसर्वतीर्थनिषेवितम् ॥८॥ देवदेवस्यतत्रापिवराहस्यचदर्शनम् ॥ यःप्रयातिसपूतात्मा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नारायणपुरंव्रजेत् ॥ ९ ॥ कोकामुखंपरंतीर्थमिन्द्रमार्गोऽपिलक्ष्यते ॥ अथापिपितृतीर्थंतुब्रह्मणोऽव्यक्तजन्मनः ॥ १० ॥ पुष्करारण्यसंस्थोऽसौयत्रदे
वःपितामहः ॥ विरिंचिदर्शनंश्रेष्ठमपवर्गफलप्रदम् ॥ ११ ॥ कृतंनाममहापुण्यंसर्वपापनिषूदनम् ॥ यत्राद्योनारसिंहस्तुस्वयमेवजनार्दनः ॥ १२ ॥
तीर्थमिक्षुमतीनामपितॄणांचशुभावहा ॥ तुष्यन्तिपितरोनित्यंगंगायमुनसंगमे ॥१३॥ कुरुक्षेत्रंमहापुण्यंयत्रमार्गोऽपिलक्ष्यते॥अद्यापिपितृतीर्थंतुसर्व
कामफलप्रदम् ॥ १४ ॥ नीलकण्ठमितिख्यातंपितृतीर्थंनराधिप ॥ तथाभद्रसरःपुण्यंसरोमानसमेवच ॥ १५ ॥ मंदाकिनीतथाऽच्छोदाविपाशाचसर
स्वती ॥ सर्वमित्रपदंतद्वद्वैद्यनाथंमहाफलम् ॥१६॥ क्षिप्रानदीतथापुण्यातथाकालंजरंशुभम्॥तीर्थोद्भेदंहरोद्भेदंगर्भभेदंमहालयम्॥१७॥भद्रेश्वरंविष्णुप
दंनर्मदाद्वारमेवच ॥ गयापिंडप्रदानेनसमान्याहुर्महर्षयः ॥ १८ ॥ एतानिपितृतीर्थानिसर्वपापहराणिच ॥ स्मरणादपिलोकानांकिमुश्राद्धप्रदायिनाम्
॥ १९ ॥ ॐकारंपितृतीर्थंतुकावेरीकपिलोदकम् ॥ संभेदश्चण्डवेगायांतथैवामरकंटकम् ॥ २० ॥ कुरुक्षेत्राच्चद्विगुणंतस्मिन्स्नानादिकंभवेत् ॥ शुक्रतीर्थं
तुविख्यातंतीर्थंसोमेश्वरंपरम् ॥ २१ ॥ सर्वव्याधिहरंपुण्यंफलंकोटिगुणाधिकम् ॥ श्राद्धेदानेतथाहोमेस्वाध्यायेचापिसन्निधौ ॥ २२ ॥ कायावारोह
णंनामदेवदेवस्यशूलिनः ॥ अवतारंरोचमानंब्राह्मणावसथेशुभे ॥ २३ ॥ जातंतत्सुमहापुण्यंतथाचर्मण्वतीनदी ॥ शूलतापीपयोष्णीचपयोष्णीसंग
मस्तथा ॥ ॥ २४ ॥ महौषधीचारणाचनागतीर्थप्रवर्त्तिनी ॥ महावेणानदीपुण्यामहाशालस्तथैवच ॥ २५ ॥ गोमतीवरुणातद्वत्तीर्थंहौताशनंपरम् ॥
भैरवंभृगुतुंगंचगौरीतीर्थमनुत्तमम् ॥ २६ ॥ तीर्थंवैनायकंनामवस्त्रेश्वरमनुत्तमम् ॥ तथापापहरंनामपुण्यावेत्रवतीनदी ॥ २७ ॥ महारुद्रंमहालिंगंदशा
र्णाचमहानदी ॥ शतरुद्राशताह्वाचतथापितृपदंपुरम् ॥२८॥ अंगारवाहिकातद्वन्नदौद्वौशोणघर्घरौ ॥ कालिकाचनदीपुण्यापितराचनदीशुभा ॥२९॥
एतानिपितृतीर्थानिशस्यंतेस्नानदानयोः ॥ श्राद्धमेतेषुयद्दत्तंतदनंतफलंस्मृतम् ॥ ३० ॥शतावटानदीज्वालाशरद्वीचनदीतथा ॥ द्वारकाकृष्णतीर्थंच
तथाह्युदक्सरस्वती ॥ ३१ ॥ नदीमालवतीनामतथाचागिरिकर्णिका ॥ धूतपापंतथातीर्थंसमुद्रेदक्षिणेतथा ॥ ३२ ॥ गोकर्णोगजकर्णश्चतथाचक्रन
दीशुभा ॥ श्रीशैलंशाकतीर्थंचनारसिंहमतःपरम् ॥ ३३ ॥ महेंद्रंचतथापुण्यापुण्याचापिमहानदी ॥ एतेष्वपिसदाश्राद्धमनंतफलदंस्मृतम् ॥ ३४ ॥
दर्शनादपिपुण्यानिसद्यःपापहराणिवै ॥ तुंगभद्रानदीपुण्यातथाचक्ररथीतिच ॥ ३५ ॥ भीमेश्वरंकृष्णवेणाकावेरीचांजनानदी ॥ नदीगोदावरीपुण्या
त्रिसंध्यापूर्णंसुत्तमम् ॥ ३६ ॥ तीर्थंत्रैयंबकंनामसर्वतीर्थनमस्कृतम् ॥ यत्रास्तेभगवान्भीमःस्वयमेवत्रिलोचनः ॥ ३७ ॥ श्राद्धमेतेषुसर्वेषुदत्तंकोटिगु
णंभवेत् ॥ स्मरणादपिपापानिव्रजंतिशतधानृप ॥ ३८ ॥ श्रीपर्णाचनदीपुण्याव्यासतीर्थमनुत्तमम् ॥ तथामत्स्यनदीकाराशिवधारातथैवच ॥ ३९ ॥

CC-0. In Public Domain. Digitization by eGangotri

भवतीर्थंचविख्यातंपुण्यतीर्थंचशाश्वतम् ॥ पुण्यंरामेश्वरंतद्वद्वेणापुरमलंपुरम् ॥ ४० ॥ अंगारकंचविख्यातमात्मदर्शमलंबुषम् ॥ वत्सव्रातेश्वरंतद्वत्तथा
गोकामुखंपरम् ॥ ४१ ॥ गोवर्द्धनंहरिश्चंद्रंपुरश्चंद्रंपृथूदकम् ॥ सहस्राक्षंहिरण्याक्षंतथाचकदलीनदी ॥ ४२ ॥ नामधेयानिचतथातथासौमित्रिसंगत
म् ॥ इँद्रनीलंमहानादंतथाचप्रियमेलकम् ॥ ४३ ॥ एतान्यपिसदाश्राद्धेप्रशस्तान्याधिकानिच ॥ एतेषुसर्वदेवानांसांनिध्यंपठ्यतेयतः ॥ ४४ ॥
दानमेतेषुसर्वेषुभवेत्कोटिशताधिकम् ॥ बाहुदाचनदीपुण्यातथासिद्धवटंशुभम् ॥ ४५ ॥ तीर्थंपाशुपतंचैवनदीपर्यटिकातथा ॥ श्राद्धमेतेषुसर्वेषुदत्तं
कोटिशतोत्तरम् ॥ ४६ ॥ तथैवपंचतीर्थंचयत्रगोदावरीनदी ॥ युतालिंगसहस्रेणसव्येतरजलावहा ॥ ४७ ॥ जामदग्न्यस्यतत्तीर्थंमोदायतनमुत्तमम् ॥
प्रतीकस्यभयात्सिद्धायत्रगोदावरीनदी ॥ ४८ ॥ तीर्थंतद्धव्यकव्यानामप्सरोगणसंयुतम् ॥ श्राद्धाग्निदानकार्यंचतत्रकोटिशताधिकम् ॥ ४९ ॥
तथासहस्रलिंगंचराघवेश्वरमुत्तमम् ॥ सेंद्रकालानदीपुण्यातत्रशक्रोगतःपुरा ॥ ५० ॥ निहत्यनमुचिंमित्रंतपसास्वर्गमाप्तवान् ॥ तत्रदत्तंन ेःश्राद्धम
नंतफलदंभवेत् ॥ ५१ ॥ पुष्करंनामवैतीर्थंशालग्रामंतथैवच ॥ शोणपातश्चविख्यातोयत्रवैश्वानराशः ॥ ५२ ॥ तीर्थंसारस्वतंचैवस्वामितीर्थंतथैव
च ॥ मलंदरानदीपुण्याकौशिकीचंद्रकातथा ॥ ५३ ॥ विदर्भाचाथवेगाचपयोष्णीप्राङ्मुखापरा ॥ कावेरीचोत्तरांगाचतथाजालंधरोगिरिः ॥ ५४ ॥
एतेषुश्राद्धतीर्थेषुश्राद्धमानंत्यमश्नुते ॥ लोहदंडंतथातीर्थंचित्रकूटस्तथैवच ॥ ५५ ॥ दिव्यंसर्वत्रगंगायास्तथानद्यास्तटंशुभम् ॥ कुब्जाम्रकंतथाती
र्थमुर्वशीपुलिनंतथा ॥ ५६ ॥ संसारमोचनंतीर्थंतथैवऋणमोचनम् ॥ एतेषुपितृतीर्थेषुश्राद्धमानंत्यमश्नुते ॥ ५७ ॥ अट्टहासंतथातीर्थंगौ
तमेश्वरमेवच ॥ तथावासिष्ठतीर्थंचभारतं चततःपरम् ॥ ५८ ॥ ब्रह्मावर्तंकुशावर्तंहंसतीर्थंतथैवच ॥ पिंडारकंचविख्यातंशंखोद्धारंतथैवच
॥ ५९ ॥ भांडेश्वरंबिल्वकंचनीलपर्वतमेवच ॥ तथाचबदरीतीर्थंसर्वतीर्थेश्वरेश्वरम् ॥ ६० ॥ वसुधाराह्वयंतीथरामतीर्थंतथैवच ॥ जयंतीविजयाचैवशु
क्रतीर्थंतथैवच ॥ ६१ ॥ एषुश्राद्धप्रदातारः प्रयांतिपरमंपदम् ॥ तीथमातृगृहंनामकरवीरपुरंतथा ॥ ६२ ॥ सप्तगोदावरीनामसर्वतीर्थेश्वरेश्व
रम् ॥ तत्रश्राद्धंप्रदातव्यमनंतफलमीप्सुभिः ॥ ६३ ॥ कीकटेषुगयापुण्यापुण्यंराजगृहंवनम् ॥ च्यवनस्याश्रमंपुण्यंनदीपुण्यापुनःपुना
॥ ६४ ॥ विषयाराधनंपुण्यंनदीयातुपुनःपुना ॥ यत्रगाथाविचरतिब्रह्मणापरिकीर्तिता ॥ ६५ ॥ एष्टव्याबहवःपुत्रायद्येकोऽपिगयांव्रजेत् ॥ यजे
तवाश्वमेधेननीलंवावृषमुत्सृजेत् ॥ ६६ ॥ एषागाथाविचरतितीर्थेष्वायतनेषुच ॥ सर्वेमनुष्याराजेंद्रकीर्त्तयंतःसमागताः ॥ ६७ ॥
किमस्माकंकुलेकश्चिद्गयांयास्यतियः सुतः ॥ प्रीणयिष्यतितान्गत्वासप्तपूर्वांस्तथापरान् ॥ ६८ ॥ मातामहानामप्येवंश्रुतिरेषाचिरंतनी ॥ गंगा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यामस्थिनिचयंगत्वाक्षेप्स्यतियःसुतः ॥ ६९ ॥ तिलैःसप्ताष्टभिर्वापिदास्यतेचजलांजलिम् ॥ अरण्यत्रितयेवापिपिंडदानंकरिष्यति ॥ ७० ॥
प्रथमंपुष्करारण्येनैमिषेतदनंतरम् ॥ धर्मारण्यंपुनःप्राप्यश्राद्धंभक्त्याप्रदास्यति ॥७१॥ गयायांधर्मपृष्ठेवासरसिब्रह्मणस्तथा ॥ गयाशीर्षवटेचैवपि
तॄणांदत्तमक्षयम् ॥ ७२ ॥ व्रजन्कृत्वानिवापंयस्त्वध्वानंपरिसर्पति ॥ नरकस्थान्पितॄन्सोऽपिस्वर्गंनयतिसत्वरम् ॥ ७३ ॥ कुलेतस्यनराजें
द्रप्रतोभवतिकश्चन ॥ प्रेतत्वंमोक्षभावंचपिंडदानाच्चगच्छति ॥ ७४ ॥ एकोमुनिस्ताम्रकराग्रहस्तोह्याम्रेषुमूलेसलिलंददाति ॥ आम्राश्चसिक्ताःपित
रश्चतृप्ताएकाक्रियाद्व्यर्थकरीप्रसिद्धा ॥ ७५ ॥ गयायांपिंडदानस्यनान्यद्दानंविशिष्यते ॥ एकेनपिंडदानेनतृप्तास्तेमोक्षगामिनः ॥ ७६ ॥ धा
न्यप्रदानंप्रवरंवदंतिवसुप्रदानंचतथामुनींद्राः ॥ गयासुतीर्थेषुनरैःप्रदत्तंतद्धर्महे प्रवरंवदंति ॥ ७७ ॥ सर्वात्मनासुरुचिनामहाचलमहानदी ॥ येतु
पश्यंतितांगत्वामानसंदक्षिणोत्तरे ॥ ७८ ॥ प्रणम्यद्विजमुख्येभ्यःप्राप्तंतैर्जन्मनःफलम् ॥ यद्यदिच्छतिवैमर्त्यस्तत्तदाप्नोत्यसंशयम् ॥ ७९ ॥ ए
षतूद्देशतःप्रोक्तस्तीर्थानांसंग्रहोमया ॥ वागीशोऽपिनशक्नोतिविस्तरात्किमुमानुषः ॥ ८० ॥ सत्यंतीर्थंदयातीर्थंतीर्थमिन्द्रियनिग्रहः ॥ वर्णाश्रमाणां
गेहेऽपितीर्थंशमउदाहृतम् ॥ ८१ ॥ येषुतीर्थेषुयच्छ्राद्धंतत्कोटिगुणमिष्यत ॥ गयायांयत्तुवैश्राद्धंतच्छ्राद्धमपवर्गदम् ॥ ८२ ॥ यस्मात्तस्मा
त्प्रयत्नेनतीर्थश्राद्धंविधीयते ॥ प्रातःकालोमुहूर्तांस्त्रीन्संगवस्तावदेवतु ॥ ८३ ॥ मध्याह्नस्त्रिमुहूर्तःस्यादपराह्णस्ततःपरम् ॥ सायाह्नस्त्रिमुहूर्तःस्या
च्छ्राद्धंतत्रनकारयेत् ॥८४॥ राक्षसीनामसावेलागर्हितासर्वकर्मसु ॥ अह्नोमुहूर्ताव्याख्यातादशपंचचसर्वदा ॥ ८५ ॥ तत्राष्टमोमुहूर्तोयःसकालःकुत
पःस्मृतः ॥ मध्याह्नात्सर्वदायस्मान्मंदीभवतिभास्करः ॥ ८६ ॥ तस्मादनंतफलदस्तत्रारंभोविशिष्यते ॥ खड्गपात्रंचकुतपस्तथानैपालकंबलः
॥ ८७ ॥ रुक्मंदर्भास्तिलागावोदौहित्रश्चाष्टमःस्मृतः॥पापंकुत्सितमित्याहुस्तस्यतत्तापकारिणः ॥ ८८ ॥ अष्टावेतेयतस्तस्मात्कुतपाइतिविश्रुताः॥
ऊर्ध्वंमुहूर्तात्कुतपान्मुहूर्तंचचतुष्टयम् ॥ ८९ ॥ मुहूर्तपंचकंचैवस्वधावाचनमिष्यत ॥ विष्णुदेहसमुद्भूताःकुशाःकृष्णतिलास्तथा ॥९०॥ श्राद्धस्य
लक्षणंकालमितिप्राहुर्मनीषिणः ॥ तिलोदकांजलिर्देयोजलांतेतीर्थवासिभिः ॥ ९१ ॥ सदर्भहस्तेनैकेनगृहेश्राद्धंगमिष्यति ॥ पुण्यंपवित्रमायुष्यं
सर्वपापविनाशनम् ॥९२॥ ब्रह्मणाचैवकथितंतीर्थश्राद्धानुकीर्तनम् ॥ शृणोतियः पठेद्वापि श्रीमान्संजायत नरः ॥ ९३ ॥ श्राद्धकालेचवक्तव्यंतथा
तीर्थनिवासिभिः ॥ सर्वपापोपशांत्यर्थमलक्ष्मीनाशनंमतम् ॥९४॥ इदंपवित्रयशसोनिधानमिदंमहापातकनाशनंच ॥ ब्रह्मार्करुद्रैरभिपूजितंचश्राद्ध
स्यमाहात्म्यमुशंतितज्ज्ञाः ॥ ९५ ॥ इति श्रीपाद्मपुराणेप्रथमेसृष्टिखंडे श्राद्धप्रकरणंनामएकादशोऽध्यायः ॥ ११ ॥ भीष्मउवाच ॥ सोमवं

CC-0. In Public Domain. Digitization by eGangotri

शः कथंजातःकथयात्रविशारद ॥ तद्वंशेकेतुराजानोबभूवुः कीर्तिवर्धनाः ॥१॥ पुलस्त्यउवाच ॥ आदिष्टोब्रह्मणापूर्वमत्रिःसर्गविधौपुरा ॥ अनंत
रंनामतपः सृष्ट्यर्थंतप्तवान्विभुः ॥२॥ यदानंदकरंब्रह्मभगवन्क्लेशनाशनम् ॥ब्रह्मरुद्रेन्द्रसूर्याणामभ्यंतरमतींद्रियम्॥३॥शान्तिंकृत्वात्ममनसातदत्रिः
संयमेस्थितः॥माहात्म्यंतपसोवापिपरमानंदकारकम् ॥४॥यस्माद्वंशपतिः सार्द्धसमयेतदधिष्ठितः॥ तंदृष्ट्वाचष्टसोमेनतस्मात्सोमोऽभवद्विभुः॥ ५ ॥
अथसुस्रावनेत्राभ्यां जलंतत्रात्रिसंभवम् ॥ द्योतयद्विश्वमखिलंज्योत्स्नयासचराचरम् ॥६॥ तद्दिशोजगृहुस्तत्रस्त्रीरूपेणासदृच्छयाः ॥ गर्भोभूत्वोदरे
तांसांस्थितः सोऽप्यत्रिसंभवः ॥ ७ ॥ आशाश्चमुमुचुर्गर्भमशक्ताधारणेततः ॥ समादायाथतंगर्भमेकीकृत्यचतुर्मुखः ॥ ८ ॥ युवानमकरोद्ब्रह्मास
र्वायुधधरंनरम् ॥ स्यंदनेऽथसहस्तेनवेदशक्तिमयेप्रभुः ॥ ९ ॥ आरोप्यलोकमनयदात्मीयंसपितामहः ॥ ततोब्रह्मर्षिभिः प्रोक्तंह्यस्मत्स्वा
मीभवत्वयम् ॥ १० ॥ ऋषिभिर्देवगंधर्वैरप्सरोभिस्तथैवच ॥ स्तूयमानस्यतस्याभूदधिकंमहदंतरम् ॥ ११ ॥ तेजोवितानादभवद्भुवि
दिव्यौषधीगणः ॥ तद्दीप्तिरधिकातस्माद्रात्रौभवतिसर्वदा ॥ १२ ॥ तेनौषधीशः सोमोऽभूद्द्विजेष्वपिहिगण्यते ॥ वेदधामारसश्चायंयदि
दंमंडलंशुभम्॥ १३ ॥ क्षीयतेवर्धतेचैवशुक्लेकृष्णेचसर्वदा ॥ विंशतिंचतथासप्तदक्षः प्राचेतसोददौ ॥ १४ ॥ रूपलावण्यसंयुक्तास्तस्मैक
न्याःसुवर्चसः ॥ ततः शक्तिसहस्राणांसहस्राणिदशैवतु ॥ १५ ॥ तपश्चकारशीतांशुर्विष्णुध्यानैकतत्परः ॥ ततस्तुष्टश्चभगवांस्तस्मै
नारायणोहरिः ॥ १६ ॥ वरंवृणीष्वचोवाचपरमात्माजनार्दनः ॥ ततोवव्रेवरंसोमः शक्रलोकेयजाम्यहम् ॥ १७ ॥ प्रत्यक्षमेवभोक्ता
रोभवंतुममममन्दिरे ॥ राजसूयेसुरगणाब्रह्माद्यायेचतुर्विधाः ॥ १८ ॥ रक्षपालःसुरोऽस्माकमास्तांशूलधरोहरः ॥ तथेत्युक्तः समाजह्रेराजसू
यंतुविष्णुना ॥ १९ ॥ होतात्रिर्भृगुरध्वर्युरुद्गाताचचतुर्मुखः ॥ ब्रह्मत्वमगमत्तस्यउपद्रष्टाहरिः स्वयम् ॥ २० ॥ सदस्याःसर्वदेवास्तुराजसूयविधिः
स्मृतः ॥ वसवोऽध्वर्यवस्तद्वद्विश्वेदेवास्तथैवच ॥ २१ ॥ त्रैलोक्यंदक्षिणातेनऋत्विग्भ्यःप्रतिपादिता ॥ सोमःप्राप्याथदुष्प्राप्यमैश्वर्यंसृष्टिसत्कृतम् ॥
॥ २२ ॥ सप्तलोकैकनाथत्वंप्राप्तस्स्वतपसातदा ॥ कदाचिदुद्यानगतामपश्यदनेकपुष्पाभरणोपशोभाम् ॥ २३ ॥ बृहन्नितंबस्तनभारखेदांपुष्पावभं
गेऽप्यतिदुर्बलांगीम् ॥ भार्यांचतांदेवगुरोरनंगबाणाभिरामायतचारुनेत्राम्॥२४॥तारांसताराधिपतिःस्मरार्तःकेशेषुजग्राहविविक्तभूमौ॥सापिस्मरार्ता ॥२६॥
सहतेनरेमेतद्रूपकांत्याहृतमानसैव ॥ २५ ॥ चिरंविहृत्याथजगामतारांविधुर्गृहीत्वास्वगृहंततोऽपि॥नतृप्तिरासीत्स्वगृहेऽपितस्यतारानुरक्तस्यसुखाग
मेषु ॥ २६ ॥ बृहस्पतिस्तद्विरहाग्निदग्धस्तद्ध्याननिष्ठैकमनाबभूव ॥ शशाकशापंनचदातुमस्मैनमंत्रशस्त्राग्निविषैरनेकैः ॥ २७ ॥ तस्यापकर्तुंविवि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धैरुपायैर्नैवाभिचारैरपिवागधीशः ॥ सयाचयामासततस्तुदेवंसोमंस्वभार्यार्थमनंगतप्तः ॥२८॥ सयाच्यमानोऽपिददौनभार्यांबृहस्पतेःकामवशेन मोहितः ॥ महेश्वरेणाथचतुर्मुखेनसाध्यैर्मरुद्भिःसहलोकपालैः ॥ २९ ॥ ददौयदातांनकथंचिदिंदुस्तदाशिवःक्रोधपरोबभूव ॥ योवामदेवःप्रथितः पृथिव्यामनेकरुद्रार्चितपादपद्मः ॥ ३० ॥ ततःसशिष्योगिरिशः पिनाकीबृहस्पतेः स्नेहवशानुबद्धः ॥ धनुर्गृहीत्वाजगवंपुरारिर्जगामभूतेश्वरसिद्ध जुष्टः ॥ ३१ ॥ युद्धायसोमेनविशेषदीप्तस्तृतीयनेत्रानलभीमवक्रः ॥ सहैवजग्मुश्चगणेश्वराणांविंशाधिकाषष्टिरथोग्रमूर्तिः ॥ ३२ ॥ यक्षेश्वराणांसग णैरनेकैर्युतोऽन्वगात्स्यंदनसंस्थितानम् ॥ वेतालयक्षोरगकिन्नराणांपद्मेनचैकेनतथार्बुदानाम् ॥३३॥ लक्षैस्त्रिभिर्द्वादशभीरथानांसोमोऽप्यगात्तत्रविवृ द्धमन्युः ॥ शनैश्चरांगारकवृद्धतेजानक्षत्रदैत्यासुरसैन्ययुक्तः ॥ ३४ ॥ जग्मुर्भयंसप्ततथैवलोकाधरावनद्वीपससमुद्रगर्भाः ॥ ससोममेवाभ्यगमत्पिनाकी गृहीतदीप्तास्त्रविशालवह्निः ॥ ३५ ॥ अथाभवद्भीषणभीमसोमसैन्यद्वयस्याथमहाहवोऽसौ ॥ अशेषसत्वक्षयकृत्प्रवृद्धस्तीक्ष्णप्रधानोज्वलनैकरूपः ॥ ३६ ॥ शस्त्रैरथान्योन्यमशेषसैन्यंद्वयोर्जगामक्षयमुग्रतीक्ष्णैः ॥ पतंतिशस्त्राणितथोज्वलानिस्वर्भूमिपातालमलंदहंति ॥ ३७ ॥ रुद्रः क्रोधाद्ब्रह्म शिरोमुमोचसोमोऽपिसोमास्त्रममोघवीर्यम् ॥ तयोर्निपातेनसमुद्रभूम्योरथांतरिक्षस्यचभीतिरासीत् ॥३८॥ तदास्रयुद्धंजगतांक्षयायप्रवृद्धमालोक्यपि तामहोऽपि ॥ ततः प्रविश्याथकथंचिदेवनिवारयामास सुरैः सहैव ॥३९॥ अकारणंकिंक्षयकृज्जनानांसोमत्वयापीदमकार्यकार्यम् ॥ यस्मात्परस्त्रीहर णायसोमत्वयाकृतंयुद्धमतीवभीमम्॥४०॥पापग्रहस्त्वंभविताजनेषुपापोऽस्यलंवह्निमुखाशिनांत्वम् ॥भार्यामिमामर्पयवाक्पतस्त्वप्रमाणयन्नेवमदीय वाचम् ॥४१॥ तथेतिचोवाचहिमांशुमालीयुद्धादपाक्रामदतःप्रशांतः ॥ बृहस्पतिस्तामथगृह्यतारांहृष्टोजगामस्वगृहंचरुद्रः ॥४२॥ पुलस्त्यउवाच॥ ततःसंवत्सरस्यांतेद्वादशादित्यसन्निभः ॥ दिव्यपीताम्बरधरोदिव्याभरणभूषितः ॥ ४३ ॥ तारोदरविनिष्क्रान्तःकुमारस्सूर्यसन्निभः ॥ सर्वार्थशा स्त्रविद्विद्वान्हस्तिशास्त्रप्रवर्त्तकः ॥ ४४ ॥ नामयद्राजपुत्रोऽयंविश्रुतोराजवैद्यकः ॥ राज्ञःसोमस्यपुत्रत्वाद्राजपुत्रोबुधःस्मृतः ॥ ४५ ॥ जनानांतुसतें जांसिसर्वाण्येवाक्षिपद्बली ॥ ब्रह्माद्यास्तत्रचाजग्मुर्देवादेवर्षिभिःसह ॥ ४६ ॥ बृहस्पतिगृहेसर्वेजातकर्मोत्सवेतदा ॥ पप्रच्छुस्तेसुरास्तारांकेनजातः कुमारकः ॥४७॥ ततःसालज्जितातेषांनकिंचिदवदत्तदा ॥ पुनःपुनस्तदापृष्टालज्जयंतीवरांगना ॥४८॥ सोमस्येतिचिरादाहततोगृह्णाद्विधुःसुतम् ॥ बुधइत्यकरोन्नामप्रादाद्राज्यंचभूतले ॥ ४९ ॥ अभिषेकंततःकृत्वाप्रदानमकरोद्विभुः ॥ ग्रहमध्यंप्रदायाथब्रह्माब्रह्मर्षिभिर्युतः ॥ ५० ॥ पश्यतांसर्व भूतानांतत्रैवांतरधीयत ॥ इलोदरेचधर्मिष्ठंबुधःपुत्रमजीजनत् ॥५१॥ अश्वमेधशतंसाग्रमकरोद्यस्स्वतेजसा ॥ पुरूरवाइतिख्यातःसर्वलोकनमस्कृतः

CC-0. In Public Domain. Digitization by eGangotri

॥ ५२ ॥ हिमवच्छिखरेरम्येसमाराध्यपितामहम् ॥ लोकैश्वर्यमगाद्राजन्सप्तद्वीपपतिस्तदा ॥५३॥ केशिप्रभृतयोदैत्यास्तद्भृत्यत्वंसमागताः ॥ उर्वशीयस्यपत्नीत्वमगमद्रूपमोहिता ॥ ५४ ॥ सप्तद्वीपावसुमतीसशैलवनकानना ॥ धर्मेणपालितातेनसर्वलोकहितैषिणा ॥ ५५ ॥ चामरग्रहणाकीर्तिः स्वयंचैवांगवाहिका ॥ ब्रह्मप्रसादादेवेंद्रोददावर्धासनंतदा ॥ ५६ ॥ धर्मार्थकामान्धर्मेणसमवेतोऽभ्यपालयत्॥ धर्मार्थकामास्तंद्रष्टुमाजग्मुःकौतुकान्विताः ॥ ५७ ॥ जिज्ञासवस्तच्चरितंकथंपश्यतिनःसमम् ॥ भक्त्याचक्रेततस्तेषामर्घ्यपाद्यादिकंततः ॥ ५८ ॥ आसनत्रयमानीयदिव्यंकनकभूषणम् ॥ निवेश्याथाकरोत्पूजामीषद्धर्मेऽधिकांपुनः ॥५९॥ जग्मतुस्तौचकामार्थावतिकोपंनृपंप्रति॥ अर्थःशापमदात्तस्मैलोभात्त्वन्नाशमेष्यसि ॥६०॥ कामोऽप्याहतवोन्मादोभवितागंधमादने॥ कमारवनमाश्रित्यवियोगाच्चोर्वशीभवात् ॥६१॥ धर्मोऽप्याहचिरायुस्त्वंधार्मिकश्चभविष्यसि॥संततिस्तवराजेंद्रयावदाचंद्रतारकम् ॥६२॥ शतशोवृद्धिमायातिननाशंभुवियास्यति॥षष्टिंवर्षाणिचोन्मादऊर्वशीकामसंभवः ॥६३॥ अचिरादेवभार्यापिवशमेष्यतिचाप्सराः ॥ इत्युक्त्वांतर्दधुःसर्वेराजाराज्यंतदान्वभूत् ॥६४॥ अहन्यहनिदेवेंद्रंद्रष्टुंयातिपुरूरवाः॥ कदाचिदारुह्यरथंदक्षिणांबरचारिणा ॥६५॥ सार्धंशक्रेणसोऽपश्यन्नीयमानामथांबरे ॥ केशिनादानवेंद्रेणचित्रलेखामथोर्वशीम् ॥६६॥ तंविनिर्जित्यसमरेविविधायुधपातनैः ॥ पुराशक्रोऽपिसमरेयेनवज्रीविनिर्जितः ॥ ६७ ॥ मित्रत्वमगमत्तेनप्रादादिंद्रायचोर्वशीम् ॥ ततःप्रभृतिमित्रत्वमगमत्पाकशासनः ॥६८॥सर्वलोकेऽतिशयितंपुरूरवसमेवतम् ॥ प्राहवज्रीतुसंतुष्टोनीयतामियमेवच ॥ ६९ ॥ सापुरूरवसःप्रीत्यैचागायच्चरितंमहत् ॥ लक्ष्मीस्वयंवरंनामभरतेनप्रवर्तितम् ॥ ७० ॥ मेनकांचोर्वशींरंभांनृत्यध्वमितिचादिशत् ॥ ननर्तसलयंतत्रलक्ष्मीरूपेणचोर्वशी ॥ ७१॥ सापुरूरवसंदृष्ट्वानृत्यंतीकामपीडिता ॥ विस्मृताभिनयंसर्वंयत्पुरातनचोदितम् ॥ ७२ ॥शशापभरतःक्रोधाद्वियोगात्तस्यभूतले ॥ पंचपंचाशदब्दानिलताभूताभविष्यसि ॥ ७३ ॥ ततस्तमुर्वशीगत्वाभर्तारमकरोच्चिरम् ॥ शापानुभवनांतेचउर्वशीबुधसूनुना ॥ ७४ ॥ अजीजनत्सुतानष्टौनामतस्तान्निबोधमे ॥ आयुर्दृढायुर्वश्यायुर्बलायुर्धृतिमान्वसुः ॥ ७५ ॥ दिव्यजायुःशतायुश्चसर्वेदिव्यबलौजसः ॥ आयुषोनहुषःपुत्रोवृद्धशर्मातथैवच ॥ ७६ ॥ रजिर्दंडोविशाखश्चवीराःपंचमहारथाः ॥ रजेःपुत्रशतंजज्ञेराजेयाइतिविश्रुतम् ॥ ७७ ॥ रजिराराधयामासनारायणमकल्मषम् ॥ तपसातोषितोविष्णुर्वरंप्रादान्महीपतेः ॥७८॥ देवासुरमनुष्याणामभूत्सविजयीतदा ॥ अथदेवासुरंयुद्धमभूद्वर्षशतत्रयम् ॥ ७९ ॥ प्रह्लादशक्रयोर्भीमंनकश्चिद्विजयीतयोः ॥ ततोदेवासुरैःपृष्टःपृथग्देवश्चतुर्मुखः ॥ ८० ॥ अनयोर्विजयीकःस्याद्रजिर्यत्रेतिसोऽब्रवीत्॥जयायप्रार्थितोराजासहायस्त्वंभवस्वनः ॥ ८१ ॥ दैत्यैःप्राहयदिस्वामीवोभवामिततस्त्वलम् ॥नासुरैःप्रतिपन्नंतत्प्रति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पन्नंसुरैस्तदा ॥८२॥ स्वामीभवत्वमस्माकंबलनाशायविद्विषः ॥ ततोविनाशिताःसर्वेयेवध्यावज्रपाणिनः ॥८३॥ पुत्रत्वमगमत्तुष्टस्तस्येंद्रःकर्मणाप
ततः ॥ दत्त्वेंद्रायपुराराज्यंजगामतपसेरजिः ॥ ८४ ॥ रजिपुत्रैस्तदाछिन्नंबलादिंद्रस्यवैयदा ॥ यज्ञभागश्चराज्यंचतपोबलगुणान्वितैः॥ ८५ ॥ राज्य
भ्रष्टस्ततः शक्रो रजिपुत्रनिपीडितः ॥ प्राहवाचस्पतिंदीनःपीडितोऽस्मिरजेःसुतैः ॥ ८६ ॥ नयज्ञभागोराज्यंमेपीडितस्यबृहस्पते॥ राज्यलाभायमेय
त्नंविधत्स्वधिषणाधिप ॥ ८७ ॥ ततोबृहस्पतिः शक्रमकरोद्बलदर्पितम् ॥ ग्रहशांतिविधानेनपौष्टिकेनचकर्मणा ॥८८॥ गत्वाथमोहयामासरजिपुत्रा
न्बृहस्पतिः ॥ जिनधर्मंसमास्थायवेदबाह्यंसधर्मवित् ॥ ८९ ॥ वेदत्रयीपरिभ्रष्टांश्चकारधिषणाधिपः॥वेदबाह्यान्परिज्ञायहेतुवादसमन्वितान् ॥९०॥
जघानशक्रोवज्रेणसर्वान्धर्मबहिष्कृतान् ॥ नहुषस्यप्रवक्ष्यामिपुत्रान्सप्तैवधार्मिकान् ॥ ९१ ॥ यतिर्ययातिश्शर्यातिरुत्तरःपरएवच ॥ अयतिर्वियति
श्चैवसप्तैतेवंशवर्द्धनाः ॥९२॥ यतिःकुमारभावेऽपियोगीवैखानसोऽभवत् ॥ ययातिरकरोद्राज्यंधर्मैकशरणःसदा ॥९३॥ शर्मिष्ठातस्यभार्याभूद्दुहिता
वृषपर्वणः ॥ भार्गवस्यात्मजाचैवदेवयानीचसुव्रता ॥९४॥ ययातेःपंचदायादास्तान्प्रवक्ष्यामिनामतः ॥ देवयानीयदुंपुत्रंतुर्वसुंचाप्यजीजनत्॥९५॥
तथाद्रुह्यमणंपूरुंशर्मिष्ठाजनयत्सुतान् ॥ यदुःपूरुश्चभरतस्तेवैवंशविवर्द्धनाः ॥९६॥ पूरोर्वंशंप्रवक्ष्यामियत्रजातोऽसिपार्थिव ॥ यदोस्तुयादवाजाता
यत्रतौबलकेशवौ ॥ ९७ ॥ भारावतारणार्थायपांडवानांहितायच ॥ यदोःपुत्राबभूवुश्चपंचदेवसुतोपमाः ॥ ९८ ॥ सहस्राजित्तथाज्येष्ठःक्रोष्टानीलो
ञ्जिकोरघुः ॥ सहस्राजितोदायादःशतजिन्नामपार्थिवः ॥९९॥ शतजितश्चदायादास्त्रयःपरमधार्मिकाः ॥ हैहयश्चहयश्चैवतथातालहयश्चयः ॥ १०० ॥
हैहयस्यतुदायादोधर्मनेत्रःप्रतिश्रुतः ॥ धर्मनेत्रस्यकुंतिस्तुसंहतस्तस्यचात्मजः १०१॥ संहतस्यतुदायादोमहिष्मान्नामपार्थिवः ॥ आसीन्महिष्मतः
पुत्रोभद्रसेनःप्रतापवान् ॥ १०२ ॥ वाराणस्यामभूद्राजाकथितःपूर्वमेवहि ॥ भद्रसेनस्यपुत्रस्तुदुर्दमोनामधार्मिकः॥ १०३ ॥ दुर्दमस्यसुतोभीमोध
नकोनामवीर्यवान् ॥ धनकस्यसुताह्यासंश्चत्वारोलोकविश्रुताः॥ १०४ ॥ कृताग्निःकृतवीर्यश्चकृतधर्मातथैवच ॥ कृतौजाश्चचतुर्थोऽभूत्कृतवीर्याच्च
सोऽर्जुनः ॥ १०५ ॥ जातोबाहुसहस्रेणसप्तद्वीपेश्वरोनृपः ॥ वर्षायुतंतपस्तेपेदुश्चरंपृथिवीपतिः ॥ १०६ ॥ दत्तमाराधयामासकार्त्तवीर्योऽत्रिसंभवम्॥
तस्मैदत्तोवरान्प्रादाच्चतुरःपुरुषोत्तमः ॥ १०७ ॥ पूर्वंबाहुसहस्रंतुसवव्रेराजसत्तमः ॥ अधर्मंध्यायमानस्यभीतिश्चापिनिवारणम् ॥ १०८ ॥ युद्धेनपृ
थिवींजित्वाधर्मेणावाप्यवैबलम् ॥ संग्रामेवर्तमानस्यवधश्चैवाधिकाद्भवेत् ॥ १०९ ॥ एतेनेयंवसुमतीसप्तद्वीपासपत्तना ॥ सप्तोदधिपरिक्षिप्ताक्षात्रेण
विधिनाजिता ॥ ११० ॥ जज्ञेबाहुसहस्रंचइच्छतस्तस्यधीमतः ॥ सर्वेयज्ञामहाबाहोस्तस्यासन्भूरिदक्षिणाः ॥ १११ ॥ सर्वेकांचनयूपास्तेसर्वेकां

CC-0. In Public Domain. Digitization by eGangotri

चनवेदिकाः ॥ सर्वेर्देवैश्चसंप्राप्ताविमानस्थैरलंकृतैः ॥ ११२ ॥ गंधर्वैरप्सरोभिश्चनित्यमेवापिसेविताः ॥ यस्ययज्ञेजगौगाथागंधर्वोनारदस्तथा ॥ ११३ ॥ कार्त्तवीर्यस्यराजर्षेर्महिमानंनिरीक्ष्यसः ॥ ननूनंकार्त्तवीर्यस्यगतिंयास्यंतिपार्थिवाः ॥ ११४ ॥ यज्ञैर्दानैस्तपोभिश्चविक्रमेणश्रुतेनच ॥ ११५ ॥ सप्तद्वीपाननुचरन्वेगेनपवनोपमः ॥ ११५ ॥ पंचाशीतिसहस्राणिवर्षाणांचनराधिपः ॥ सप्तद्वीपपृथिव्याश्चचक्रवर्तीबभूवह ॥ ११६ ॥ सएवपशुपालोऽभूत्क्षेत्रपालःसएवहि॥ सएववृष्ट्यापर्जन्योयोगित्वादर्जुनोऽभवत्॥ ११७॥ योऽसौबाहुसहस्रेणज्याघातकठिनत्वचा ॥ भातिरश्मिसहस्रेणशारदेनेवभास्करः ॥ ११८ ॥ एषनाममनुष्येषुमाहिष्मत्यांमहाद्युतिः ॥ एषवेगंसमुद्रस्यप्रावृट्कालेभजेतवै ॥ ११९ ॥ क्रीडतेस्वसुखायैवप्रतिस्रोतोमहीपतिः ॥ ललनाःक्रीडितास्तेनप्रतिबद्धोर्मिमालिनी ॥१२०॥ ऊर्मिभ्रुकुटिमालासाशंकिताभ्येतिनर्मदा॥एषएवमनोर्वंशेत्ववगाहेन्महार्णवम् ॥१२१॥ करेणोद्धृत्यवेगंतुकामिनीप्रीणनेनतु ॥ तस्यबाहुसहस्रेणक्षोभ्यमाणेमहोदधौ ॥ १२२ ॥ भवंतिलीनानिश्चेष्टाःपातालस्थामहासुराः ॥ तदूरुक्षोभचकिताअमृतोत्पादशंकिताः ॥ १२३ ॥ नतानिश्चलमूर्द्धानोभवंतिचमहोरगाः ॥ एषधन्वीचचिक्षेपरावणंप्रतिसायकान् ॥१२४॥ एषधन्वीधनुर्गृह्यउत्सिक्तंपंचभिःशरैः॥ लंकेशंमोहयित्वातुसबलंरावणंबलात् ॥ १२५ ॥ निर्जित्यबद्धात्वानीयमाहिष्मत्यांबबंधतम् ॥ ततोगतोऽहंतस्याग्रेअर्जुनंसंप्रसादयन् ॥ १२६ ॥ मुमोचराजन्पौत्रंमेसख्यंकृत्वाचपार्थिव ॥ तस्यबाहुसहस्रस्यबभूवज्यातलस्वनः ॥ १२७ ॥ युगांताग्नेःप्रवृत्तस्ययथाज्यातलनिःस्वनः ॥ अहोबलंविधेर्वीर्यंभार्गवःसयदाच्छिनत् ॥ १२८ ॥ मृधेसहस्रंबाहूनांहेमतालवनंयथा ॥ यंवसिष्ठस्तुसंक्रुद्धोह्यर्जुनंशप्तवान्विभुः ॥ १२९ ॥ यस्माद्वनंप्रदग्धंतेविश्रुतंममहैहय ॥ तस्मात्तेदुष्कृतंकर्मकृतमन्योहनिष्यति ॥ १३० ॥ छित्वाबाहुसहस्रंतेप्रमथ्यतरसाबली ॥ तपस्वीब्राह्मणस्त्वांवैवधिष्यतिसभार्गवः ॥ १३१ ॥ तस्यरामोऽथहंतासीन्मुनिशापेनधीमतः ॥ तस्यपुत्रशतंत्वासीत्पंचतत्रमहारथाः ॥ १३२ ॥ कृतास्त्राबलिनःशूराधर्मात्मानोमहाबल ॥ शूरसेनश्चशूरश्चधृष्टोवैकृष्णएवच ॥ १३३ ॥ जयद्ध्वजःसवैकर्ताअवन्तिश्चरसापतिः ॥ जयध्वजस्यपुत्रस्तुतालजंघोमहाबलः ॥१३४ ॥ तस्यपुत्राश्शतान्येवतालजङ्घाइतिस्मृताः ॥ तेषांपंचकुलान्यासन्हैहयानांमहात्मनाम् ॥ १३५ ॥ वीतिहोत्राश्चसंजाताभोजाश्चावंतयस्तथा ॥ तुंडकेराश्चविक्रांतास्तालजंघाःप्रकीर्तिताः ॥१३६॥ वीतिहोत्रसुतश्चापिअनंतोनामवीर्यवान् ॥ दुर्जयस्तस्यपुत्रस्तुबभूवामित्रकर्षणः॥ १३७ ॥ सद्भावेनमहाराजःप्रजाधर्मेणपालयन् ॥ कार्तवीर्यार्जुनोनामराजाबाहुसहस्रधृत् ॥ ॥ १३८ ॥ येनसागरपर्यंताधनुषानिर्जितामही ॥ यस्तस्यकीर्तयेन्नामकल्यमुत्थायमानवः ॥ १३९ ॥ नतस्यवित्तनाशःस्यान्नष्टंचलभतेपुनः ॥ का

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्तवीर्यस्ययोजन्मकथयेदिहधीमतः ॥ यथायष्टायथादातास्वर्गलोकेमहीयते ॥ १४० ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेयदुवंशकीर्तनंनामद्वादशो
ऽध्यायः ॥ १२॥ पुलस्त्यउवाच ॥ क्रोष्टोःशृणुत्वंराजेंद्रवंशमुत्तमपूरुषम् ॥ यस्यान्ववायेसंभूतोविष्णुर्वृष्णिकुलोद्वहः ॥ १ ॥ क्रोष्टोरेवाभवत्पुत्रोवृ
जिनीवान्महायशाः ॥ तस्यपुत्रोऽभवत्स्वातिःकुशंकुस्तत्सुतोऽभवत् ॥२॥ कुशंकोरभवत्पुत्रोनाम्नाचित्ररथोऽस्यतु ॥ शशबिंदुरितिख्यातश्चक्रवर्तीब
भूवह ॥३॥ अत्रानुवंशश्लोकोऽयंगीतस्तस्यपुराऽभवत् ॥ शशबिंदोस्तुपुत्राणांशतानामभवच्छतम् ॥४॥ धीमतांचारुरूपाणांभूरिद्रविणतेजसाम् ॥
तेषांशतप्रधानानांपृथुसाह्वामहाबलाः ॥ ५ ॥ पृथुश्रवाःपृथुयशाःपृथुतेजाःपृथूद्भवः ॥ पृथुकीर्तिः पृथुमतो राजानःशशबिंदवः ॥ ६ ॥ शंसंतिच
पुराणज्ञाःपृथुश्रवसमुत्तमम् ॥ ततश्चास्याभवन्पुत्र उशनाशत्रुतापनः ॥७ ॥ पुत्रश्चोशनसस्तस्यशिनेयुर्नामसत्तमः ॥ आसीच्छिनेयोःपुत्रोयःसरु
क्मकवचोमतः ॥८ ॥ निहत्यरुक्मकवचोयुद्धेयुद्धविशारदः ॥ धन्विनोविविधैर्बाणैरवाप्यपृथिवीमिमाम् ॥ ९ ॥ अश्वमेधेऽददाद्राजाब्राह्मणेभ्यश्च
दक्षिणाम् ॥ जज्ञेतुरुक्मकवचात्परावृत्परवीरहा ॥ १० ॥ तत्पुत्राजज्ञिरेपंचमहावीर्यपराक्रमाः ॥ रुक्मेषुःपुथुरुक्मश्चज्यामघःपरिघोहरिः ॥११॥
परिघंचहरिंचैवविदेहेऽस्थापयत्पिता॥ रुक्मेषुरभवद्राजापृथुरुक्मस्तथाश्रयः ॥१२॥ ताभ्यांप्रव्राजितोराज्याज्ज्यामघोऽवसदाश्रमे ॥ प्रशांतश्चाश्रा
मस्थस्तुब्राह्मणेनविबोधितः ॥१३॥ जगामधनुरादायदेशमन्यंध्वजीरथी ॥ नर्मदातटएकाकीकेवलंवृत्तिकर्शितः ॥१४॥ ऋक्षवंतंगिरिंगत्वामुक्तमन्यै
रुपाविशत् ॥ ज्यामघस्याभवद्भार्याशैब्यापरिणतासती ॥१५॥ अपुत्रोऽप्यभवद्राजाभार्यामन्यामचिंतयन्॥तस्यासीद्विजयोयुद्धेतत्रकन्यामवाप्यसः
॥ १६ ॥ भार्यामुवाचसंत्रासात्स्नुषेयंतेशुचिस्मिते॥ एवमुक्त्वाब्रवीदेनंकस्यकेयंस्नुषेतिवै ॥ १७ ॥ राजोवाच ॥ यस्तेजनिष्यतेपुत्रस्तस्यभार्याभ
विष्यति ॥ तस्याःसातपसोग्रेणकन्यायाः संप्रसूयत ॥१८॥ पुत्रंविदर्भंसुभगंशैब्यापरिणतासती॥ राजपुत्र्यांतुविद्वांसौस्नुषायांक्रथकौशिकौ ॥१९॥
लोमपादंतृतीयंतुपुत्रंपरमधार्मिकम् ॥ पश्चाद्विदर्भोऽजनयच्छूरंरणविशारदम्॥ २० ॥ लोमपादात्मजोबभ्रुर्धृतिस्तस्यतुचात्मजः ॥ कौशिकस्यात्मज
श्चेदिस्तस्माच्चैद्यनृपाःस्मृताः ॥२१ ॥क्रथोविदर्भपुत्रोयःकुंतिस्तस्यात्मजोऽभवत् ॥ कुन्तेर्धृष्टस्ततोजज्ञेधृष्टात्सृष्टःप्रतापवान् ॥ २२ ॥ सृष्टस्यपुत्रोध
र्मात्मानिवृत्तिःपरवीरहा ॥ निवृत्तिपुत्रोदाशार्होनाम्नासतुविदूरथः ॥ २३॥ दाशार्हपुत्रोभीमस्तुभीमाज्जीमूतउच्यते ॥ जीमूतपुत्रोविकृतिस्तस्यभी
मरथःसुतः ॥ २४ ॥ अथभीमरथस्यापिपुत्रोनवरथःकिल ॥ तस्यचासीद्दशरथः शकुनिस्तस्यचात्मजः ॥ २५॥ तस्मात्करंभस्तस्माच्चदेवरातोबभू
वह ॥ देवक्षत्रोऽभवद्राजादेवरातान्महायशाः ॥२६॥ देवगर्भसमोजज्ञेदेवक्षत्रस्यनंदनः ॥ मधुर्नाममहातेजामधोःकुरुवशःस्मृतः ॥ २७॥ आसीत्कु

CC-0. In Public Domain. Digitization by eGangotri

रुवशात्पुत्रः पुरुहोत्रःप्रतापवान् ॥ अंशुर्जज्ञेऽथवैदर्भ्यांद्रवंत्यांपुरुहोत्रतः ॥ २८ ॥ वेत्रकीत्वभवद्भार्याअंशोस्तस्याव्यजायत ॥ सात्वतःसत्वसंपन्नः सात्वतांकीर्तिवर्द्धनः ॥ २९ ॥ इमांविसृष्टिंविज्ञायज्यामघस्यमहात्मनः ॥ प्रजावानेतिसायुज्यंराज्ञःसोमस्यधीमतः ॥ ३० ॥ सात्वतान्सत्वसंपन्ना कौसल्यासुषुवेसुतान् ॥ तेषांगर्गाश्चचत्वारोविस्तरेणैवताञ्छृणु ॥ ३१ ॥ भजमानस्यसृंजय्यांभाजनामासुतोऽभवत् ॥ सृंजयस्यसुतायांतुभाजका स्तुततोऽभवन् ॥३२ ॥ तस्यभाजस्यभार्येद्वेसुषुवातेसुतान्बहून् ॥ नेमिंचकृकणंचैववृष्णिंपरपुरंजयम् ॥३३॥ तेभाजकाःस्मृतायस्माद्भजमानाद्विज ज्ञिरे ॥ देवावृधःपृथुर्नाममधूनांमित्रवर्धनः ॥ ३४ ॥ अपुत्रस्त्वभवद्राजाचचारपरमंतपः ॥ पुत्रः सर्वगुणोपेतोममभूयादितिस्पृहन्॥ ३५ ॥ संयोज्य कृष्णमेवाथपर्णाशायाजलंस्पृशन् ॥ सातोयस्पर्शनात्तस्यसांनिध्यंनिम्नगाह्यगात् ॥ ३६ ॥ कल्याणंचरतस्तस्यशुशोचनिम्नगाततः॥ चिंतयाथपरी तात्माजगामाथविनिश्चयम् ॥ ३७ ॥ भूत्वागच्छाम्यहंनारीयस्यामेवंविधःसुतः ॥ जायेततस्मादद्याहंभवाम्यस्यसुतप्रदा ॥ ३८ ॥ अथभूत्वाकुमा रीसाबिभ्रतीपरमंवपुः ॥ ज्ञापयामासराजानंतामियेषनृपस्ततः ॥ ३९ ॥ अथसानवमेमासिसुषुवेसरितांवरा ॥ पुत्रंसर्वगुणोपेतंबभ्रुंदेवावृधात्परम् ॥ ॥४०॥ अत्रवंशेपुराणज्ञाब्रुवंतीतिपरिश्रुतम्॥ गुणान्देवावृधस्याथकीर्त्तयंतोमहात्मनः ॥४१ ॥ बभ्रुःश्रेष्ठोमनुष्याणांदेवैर्देवावृधःसमः॥ षष्टिःशतंचपुत्रा णांसहस्राणिचसप्ततिः ॥४२॥ एतेमृतत्वंसंप्राप्ताबभ्रोर्देवावृधादपि ॥ यज्ञदानतपोधीमान्ब्रह्मण्यःसुदृढव्रतः ॥४३॥ रूपवांश्चमहातेजाभोजोऽतोऽमृतका वती ॥ शरकान्तस्यदुहितासुषुवेचतुरःसुतान् ॥४४॥ कुकुरंभजमानंचश्यामंकंबलबर्हिषम् ॥ कुकुरस्यात्मजोवृष्टिर्वृष्टेस्तुतनयोधृतिः ॥४५ ॥कपोतरो मातस्यापितित्तिरिस्तस्यचात्मजः॥तस्यासीद्बहुपुत्रस्तुविद्वान्पुत्रोनरिःकिल॥४६॥ख्यायतेतस्यनामान्यच्चंदनोदकदुंदुभिः॥अस्यासीदभिजित्पुत्रस्त तोजातःपुनर्वसुः॥४७॥ अपुत्रोह्यभिजित्पूर्वमृषिभिःप्रेरितोमुदा ॥ अश्वमेधंतुपुत्रार्थमाजुहावनरोत्तमः॥४८॥तस्यमध्येविचरतःसभामध्यात्समुत्थितः अन्धस्तुविद्वान्धर्मज्ञोयज्ञदातापुनर्वसुः ॥४९॥ तस्यासीत्पुत्रमिथुनंवसोश्चारिजितःकिल ॥आहुकश्चाहुकीचैवख्यातामतिमतांवर॥५०॥इमांश्चोदाहरं त्यत्रश्लोकांश्चातिरसात्मकान् ॥ सोपासंगानुकर्षाणांतनुत्राणांवरूथिनाम् ॥ ५१ ॥ रथानांमेघघोषाणांसहस्राणिदशैवतु ॥ नासत्यवादिनोभोजानाय ज्ञानासहस्रदाः ॥५२॥नाशुचिर्नाप्यविद्वांसोनभोजादधिकोऽभवत् ॥ आहुकांतमनुप्राप्तइत्येषोऽन्वयउच्यते॥५३॥आहुकश्चाप्यवंतीषुस्वसारंचाहुकीं ददौ ॥ आहुकस्यैवदुहितापुत्रौद्वौसमसूयत ॥५४ ॥ देवकंचोग्रसेनंचदेवगर्भसमावुभौ ॥ देवकस्यसुताश्चैवजज्ञिरेत्रिदशोपमाः ॥ ५५ ॥ देववानुपदे वश्चसुदेवोदेवरक्षितः ॥ तेषांस्वसारःसप्तैववसुदेवायताददौ ॥ ५६ ॥ देवकीश्रुतदेवाचयशोदाचश्रुतिश्रवा ॥ श्रीदेवाचोपदेवाचसुरूपाचेतिसप्तमी॥५७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नवोग्रसेनस्यसुताःकंसस्तेषांचपूर्वजः ॥ न्यग्रोधस्तुसुनामाचकंकःशंकुःसुभूश्चयः ॥५८॥ अन्यस्तुराष्ट्रपालश्चबद्धमुष्टिःसमुष्टिकः ॥तेषांस्वसारःपंचास
न्कंसाकंसवतीतथा ॥ ५९ ॥ सुरभीराष्ट्रपालीचकंकाचेतिवरांगनाः ॥ उग्रसेनःसहापत्योव्याख्यातःकुकुरोद्भवः ॥ ६० ॥ भजमानस्यपुत्रोऽभूद्रथि
मुख्योविदूरथः ॥ राजाधिदेवःशूरश्चविदूरथसुतोऽभवत् ॥६१॥राजाधिदेवस्यसुतौजज्ञातेवीरसंमतौ ॥ क्षत्रव्रतेऽतिनिरतौशोणाश्वःश्वेतवाहनः॥६२॥
शोणाश्वस्यसुताःपंचशूराररणविशारदाः ॥ शमीचराजशर्माचनिमूर्त्तःशत्रुजिच्छुचिः ॥ ६३ ॥ शमीपुत्रःप्रतिक्षत्रःप्रतिक्षत्रस्यचात्मजः॥प्रतिक्षत्रसुतोभो
जोहृदीकस्तस्यचात्मजः ॥ हृदीकस्याभवन्पुत्रादशभीमपराक्रमाः ॥ ६४ ॥ कृतवर्माग्रजस्तेषांशतधन्वाचसत्तमः ॥ देवार्हश्चसुभानुश्चभीषणश्च
महाबलः ॥ ६५ ॥ अजातश्च विजातश्चकरकश्चकरंधमः ॥ देवार्हस्यसुतोविद्वाञ्जज्ञेकंबलबर्हिषः ॥६६॥ असमौजास्ततस्तस्यसमौजाश्चसुतावुभौ ॥
अजातपुत्रस्यसुतौप्रजायेतेसमौजसौ ॥ ६७ ॥ समौजःपुत्राविख्यातास्त्रयःपरमधार्मिकाः ॥ सुदंशश्चसुवंशश्चकृष्णइत्यनुनामतः ॥ ६८ ॥ अंधका
नामिमंवंशंयःकीर्तयति नित्यशः ॥ आत्मनोविपुलंवंशंप्रजामाप्नोत्ययंततः ॥ ६९ ॥ गांधारीचैवमाद्रीचक्रोष्टोर्भार्येबभूवतुः ॥ गांधारीजनयामास
सुमित्रंमित्रवत्सलम् ॥७०॥ माद्रीयुधाजितंपुत्रंततोवैदेवमीढुषम् ॥ अनमित्रंशिनिंचैवपंचात्रकृतलक्षणाः ॥ ७१ ॥ अनमित्रसुतोनिघ्नोनिघ्नस्यापिच
द्वौसुतौ ॥ प्रसेनश्चमहावीयःशक्तिसेनश्चतावुभौ ॥ ७२ ॥ स्यमंतकंप्रसेनस्यमणिरत्नमनुत्तमम् ॥ पृथिव्यांमणिरत्नानांराजेतिसमुदाहृतम् ॥ ७३ ॥
हृदिकृत्वासुबहुशोमणिंतंसव्यराजत ॥ मणिरत्नंययाचेऽथराजार्थंशौरिरुत्तमम् ॥७४॥ गोविंदश्चनतंलेभेशक्तोऽपिनजहारसः ॥ कदाचिन्मृगयांया
तःप्रसेनस्तेनभूषितः ॥ ७५ ॥ बिलेशब्दंसशुश्रावकृतंसत्त्वेनकेनचित् ॥ ततःप्रविश्यसबिलंप्रसेनोऋक्षमासदत् ॥ ७६ ॥ ऋक्षःप्रसेनंचतथाऋक्षंचा
पिप्रसेनजित् ॥ आसाद्ययुयुधातेतौपरस्परजयेच्छया ॥ ७७ ॥ हत्वाऋक्षःप्रसेनंचततस्तंमणिमाददात् ॥ प्रसेनंतुहतंश्रुत्वागोविंदःपरिशंकितः
॥ ७८ ॥ सत्राजितातुतद्भ्रात्रायादवैश्चतथापरैः ॥ गोविंदेनहतोनूनंप्रसेनोमणिकारणात् ॥ ७९ ॥ प्रसेनस्तुगतोऽरण्यंमणिरत्नेनभूषितः ॥ तंदृष्ट्वानि
जघानाथनत्यजन्तंस्यमंतकम् ॥ ८० ॥ जघानैवाप्रदानेनशत्रुभूतंचकेशवः ॥ इतिप्रवादस्सर्वत्रख्यातस्सत्राजिताकृतः ॥८१॥ अथदीर्घेणकालेनमृ
गयांनिर्गतः पुनः ॥ यदृच्छयाचगोविंदोबिलाभ्याशमथागमत् ॥ ८२ ॥ ततश्शब्दंयथापूर्वंसचक्रेऋक्षराड्बली ॥ शब्दंश्रुत्वातुगोविंदःखड्गपाणिः
प्रविश्यच ॥ ८३ ॥ अपश्यज्जांबवंतंचऋक्षराजंमहाबलम् ॥ ततस्तूर्णंहृषीकेशस्तमृक्षमतिरंहसा ॥ ८४ ॥ जांबवंतंसजग्राहक्रोधसंरक्तलोचनः ॥
दृष्ट्वाचैनंतथाविष्णुंकर्मभिर्वैष्णवींतनुम् ॥८५॥ तुष्टावऋक्षराजोऽपिविष्णुसूक्तेनसत्वरम् ॥ ततस्तुभगवांस्तुष्टोवरेणसमरोचयत् ॥८६॥ जाम्बवानु

CC-0. In Public Domain. Digitization by eGangotri

वाच ॥ इष्टंचक्रप्रहारेणत्वत्तोमेमरणंशुभम् ॥ कन्याचेयंममसुताभर्त्तारंत्वामवाप्नुयात् ॥ ८७ ॥ योऽयंमणिःप्रसेनात्तुहत्वाचैवाप्तवानहम् ॥ सत्वया
गृह्यतांनाथमणिरेषोऽत्रवर्त्तते ॥ ८८ ॥ इत्युक्तोजांबवंतंवैहत्वाचक्रेणकेशवः ॥ कृतकार्योमहाबाहुःकन्यांचैवाददौतदा ॥ ८९ ॥ ततःसत्राजितेचैत
न्मणिरत्नंसवैददौ ॥ यल्लब्धमृक्षराजाच्चसर्वयादवसन्निधौ ॥ ९० ॥ तेनमिथ्याप्रवादेनसंतप्तोऽयंजनार्दनः ॥ ततस्तेयादवाःसर्वेवासुदेवमथाब्रुवन्
॥ ९१ ॥ अस्माकंमनसिह्यासीत्प्रसेनस्तुत्वयाहतः ॥ एकैकस्यास्तुसुंदर्योदशसत्राजितःसुताः॥ ९२ ॥ सत्योत्पन्नास्सुतास्तस्यशतमेकंचविश्रुताः॥
विख्याताश्चमहावीर्याभंगकारश्चपूर्वजः ॥ ९३ ॥ सत्याव्रतवतीस्वप्नाभंगकारस्यपूर्वजा ॥ सुषुवुस्ताःकुमारांश्चशिनीवालःप्रतापवान् ॥ ९४ ॥
अभंगोयुयुधानश्चशिनिस्तस्यात्मजोऽभवत् ॥ तस्माद्युगंधराःपुत्राश्शततस्यप्रकीर्तिताः ॥९५॥ अनमित्राह्वयोयोवैविख्यातोवृष्णिवंशजः ॥ अन
मित्राच्छिनिर्जज्ञेकनिष्ठोवृष्णिनंदनः ॥ ९६ ॥ अनमित्राच्चसंजज्ञेवृष्णिवीरोयुधाजितः ॥ अन्यौचतनयौवीरावृषभश्चित्रएवच ॥ ९७ ॥ ऋषभः
काशिराजस्यसुतांभार्यामनिंदिताम् ॥ जयंतश्चजयंतीचशुभांभार्यामविंदत ॥९८ ॥ जयंतस्यजयंत्यांवैपुत्रःसमभवत्ततः ॥ सदायज्वातिधीरश्चश्रुत
वानतिथिप्रियः॥ ९९ ॥ अक्रूरःसुषुवेतस्मात्सुदक्षोभूरिदक्षिणः ॥ रत्नकन्याचशैब्याचअक्रूरस्तामवाप्तवान् ॥ १०० ॥ पुत्रानुत्पादयामासएकादश
महाबलान् ॥ उपलंभंसदालंभमुत्कलंचार्य्यशैशवम् ॥ १०१ ॥ सुधीरंचसदायक्षंशत्रुघ्नंवारिमेजयम् ॥ धर्मदृष्टिंचधर्मंचसृष्टिमौलिंतथैवच ॥
॥१०२॥ सर्वेचप्रतिहर्तारोरत्नानांजज्ञिरेचते ॥ अक्रूराच्छूरसेनायांसुतौद्वौकुलनंदनौ ॥१०३॥ देववानुपदेवश्चजज्ञातेदेवसंमतौ ॥ अश्विन्यांत्रिचतुः
पुत्राःपृथुर्विपृथुरेवच ॥१०४॥ अश्वग्रीवोऽश्वबाहुश्चसुपार्श्वकगवेषणौ ॥ रिष्टनेमिःसुवर्चाचसुधर्मामृदुरेवच ॥१०५॥ अभूमिर्बहुभूमिश्चश्रविष्ठाश्रवणे
स्त्रियौ ॥ इमांमिथ्याभिशप्तिंयोवेदकृष्णस्यबुद्धिमान् ॥ १०६ ॥ नसमिथ्याभिशापेनअभिगम्यश्चकेनचित् ॥ ऐक्ष्वाकीसुषुवेपुत्रंशूरमद्भुतमीढुषम्
॥ १०७ ॥ मीढुषाज्जज्ञिरेशूराभोजायांपुरुषादश ॥ वसुदेवोमहाबाहुःपूर्वमानकदुंदुभिः ॥ १०८ ॥ देवभागस्तथाजज्ञेतथादेवश्रवाःपुनः ॥
अनावृष्टिःकुनिश्चैवनंदिश्चैवसकृद्यशाः ॥ १०९ ॥ श्यामःशमीकःसप्ताख्यःपंचचास्यवरांगनाः ॥ श्रुतकीर्तिःपृथाचैवश्रुतदेवीश्रुतश्रवाः ॥ ११० ॥
राजाधिदेवीचतथापंचैतावीरमातरः ॥ वृद्धस्यश्रुतदेवीतुकारूषंसुषुवेनृपम् ॥ १११ ॥ कैकेयाच्छ्रुतकीर्तेस्तुजज्ञेसंतर्दनोनृपः ॥ श्रुतश्रवसिचैद्यस्य ॥ ३८ ॥
सुनीथःसमपद्यत ॥ ११२ ॥ राजाधिदेव्याःसंभूतोधर्माद्भयविवर्जितः ॥ शूरःसख्येनबद्धोऽसौकुंतिभोजेपृथांददौ ॥ ११३ ॥ एवंकुंतीसमाख्याचव
सुदेवस्वसापृथा ॥ कुंतिभोजोददात्तांतुपांडोर्भार्यामनिंदिताम् ॥ ११४ ॥ पांण्डोर्थेसूतदेवीसादेवपुत्रान्महारथान् ॥ धर्माद्युधिष्ठिरोजज्ञेवाताज्जज्ञे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृकोदरः ॥ ११५ ॥ इंद्राद्धनंजयश्चैवशक्रतुल्यपराक्रमः ॥ योऽसौत्रिपुरुषाज्जातस्त्रिभिरंशैर्महारथः ॥ ११६ ॥ देवकार्यकरश्चैवसर्वदानवसूदनः ॥
अवध्याश्चापिशक्रस्यदानवायेनघातिताः ॥ ११७ ॥ स्थापितस्तुशक्रेणलब्धवर्चास्त्रिविष्टपे ॥ माद्रवत्यांतुजनितावश्विनावितिनःश्रुतम् ॥११८॥
नकुलःसहदेवश्चरूपसत्वगुणान्वितौ ॥ रोहिणीपौरवीनामभार्याचानकदुंदुभेः ॥ ११९ ॥ लेभेचेष्टंसुतंरामंसारणंचरणप्रियम् ॥ दुर्धरंदमनंचैवपिंडा
रकमाहाहनुम् ॥ १२० ॥ अथमायात्वमावस्यादेवकीयाभविष्यति ॥ तस्यांजज्ञेमहाबाहुःपूर्वंतुसप्रजापतिः ॥१२१॥ अनुजाताभवत्कृष्णासुभद्रा
भद्रभाषिणी ॥ विजयोरोचमानस्तुवर्द्धमानश्चदेवलः ॥ १२२ ॥ एतेसर्वेमहात्मानउपदेव्यांप्रजज्ञिरे ॥ अगावहंमहात्मानंबृहद्देवीव्यजायत ॥१२३॥
बृहद्देव्यांस्वयंजज्ञेमन्दकोनामनामतः ॥ सप्तमंदेवकीपुत्रंरेमंतंसुपुवेसुतम् ॥ १२४ ॥ गवेषणंमहाभागंसंग्रामेष्वपराजितम् ॥ श्रुतदेव्याविहारेतुवने
विचरतापुरा ॥ १२५ ॥ वैश्यायांसमधाच्छौरिः पुत्रंकौशिकमग्रजम् ॥ श्रुतंधरातुराज्ञीतुसौरगंधपरिग्रहः ॥ १२६ ॥ पुत्रंचकपिलंचैववसुदेवात्म
जोबली ॥ जनानांचविषादोऽभूत्प्रथमःसधनुर्द्धरः ॥ १२७ ॥ सौभद्रश्चाभवश्चैवमहासत्वौबभूवतुः ॥ देवभागसुतश्चापिप्रस्तावःसबुधःस्मृतः॥
॥ १२८ ॥ पण्डितंप्रथमंबाहुदेवश्रवसमुत्तमम् ॥ इक्ष्वाकुकुलतोयस्यमनस्विन्यायशस्विनी ॥ १२९ ॥ निवृत्तशत्रुःशत्रुघ्नःश्रद्धातस्मादजायत ॥
गंडूषायामपत्यानिकृष्णस्तुष्टःशतंददौ ॥ १३० ॥ सचंद्रंतुमहाभागंवीर्यवंतंमहाबलम् ॥ रंतिपालश्चरंतिश्चनंदनस्यसुतावुभौ ॥ १३१ ॥ शमीक
पुत्राश्चत्वारोविक्रांताःसुमहाबलाः ॥ विरजश्चधनुश्चैवव्योमस्तस्यससृंजयः ॥१३२॥ अनपत्योऽभवद्व्योमःसृंजयस्यधनंजयः ॥ योजायमानोभोज
त्वंराजार्षित्वमवाप्तवान् ॥ १३३ ॥ कृष्णस्यजन्माभ्युदयंयः कीर्तयतिनित्यशः ॥ शृणोतिवानरोनित्यंसर्वपापैः प्रमुच्यते ॥ १३४ ॥ अथदेवोम
हादेवःपूर्वंकृष्णःप्रजापतिः ॥ विहारार्थंसदेवोऽसौमानुषेष्वप्यजायत ॥ १३५ ॥ देवक्यांवसुदेवेनतपसापुष्करेक्षणः ॥ चतुर्बाहुस्तुसंजातोदिव्यरू
पोजनाश्रयः ॥१३६॥ श्रीवत्सलक्षणंदेवंदृष्ट्वादेवैःसलक्षणम् ॥ उवाचवसुदेवस्तंरूपंसंहरवैप्रभो ॥ १३७ ॥ भीतोऽहंदेवकंसाद्वितस्त्वेतद्ब्रवीमिते ॥
ममपुत्राहतास्तेनश्रेष्ठाःषड्भीमविक्रमाः ॥ १३८ ॥ वसुदेववचःश्रुत्वारूपंसंहरदच्युतः ॥ अनुज्ञाप्यतुतंशौरिर्नंदगोपगृहेऽनयत् ॥ १३९ ॥ दत्वा
तंनंदगोपायरक्ष्यतामितिचाब्रवीत् ॥ अतस्तुसर्वकल्याणंयादवानांभविष्यति ॥ १४० ॥ अयंतुगर्भोदेवक्यायावत्कंसंहनिष्यति ॥ तावत्पृथि
व्यांभविताक्षेमोभारावहःपरम् ॥ १४१ ॥ येवैदुष्टास्तुराजानस्तांस्तुसर्वान्हनिष्यति ॥ कौरवाणांरणेभूतेसर्वक्षत्रसमागमे ॥ १४२ ॥ सार
थ्यमर्जुनस्यायंस्वयंदेवःकरिष्यति ॥ निःक्षत्रियांधरांकृत्वाभोक्ष्यतेशेषतांगताम् ॥ १४३ ॥ सर्वंयदुकुलंचैवदेवलोकंनयिष्यति ॥ भीष्मउवा

CC-0. In Public Domain. Digitization by eGangotri

च ॥ कएषवसुदेवस्तुदेवकीकायशस्विनी ॥ १४४ ॥ नंदगोपश्चकश्चैवयशोदाकामहाव्रता ॥ याविष्णुंपोषितवतीयांसमातेत्यभाषत ॥ १४५ ॥
यागर्भंजनयामासयाचैनंसमवर्द्धयत् ॥ पुलस्त्यउवाच ॥ पुरुषःकश्यपश्चासावदितिस्तत्प्रियास्मृता ॥ १४६ ॥ कश्यपोब्रह्मणोंऽशस्तुपृथिव्याअ
दितिस्तथा ॥ नंदोद्रोणस्समाख्यातोयशोदाथधराभवत् ॥ १४७ ॥ अथकामान्महाबाहुर्देवक्याःसमपूरयत् ॥ येतयाकांक्षिताःपूर्वमजात्तस्मा
न्महात्मनः ॥ १४८ ॥ अचिरंसमहादेवःप्रविष्टोमानुषींतनुम् ॥ मोहयन्सर्वभूतानियोगाद्योगीसमाययौ ॥ १४९ ॥ नष्टेधर्मेतथायज्ञेविष्णुर्वृ
ष्णिकुलेविभुः ॥ कर्तुधर्मव्यवस्थानमसुराणांप्रणाशनम् ॥ १५० ॥ रुक्मिणीसत्यभामाचसत्यानाग्निजितीतथा ॥ सुमित्राचतथाशैब्यागांधा
रीलक्ष्मणातथा ॥ १५१ ॥ सुभीमाचतथामाद्रीकौसल्याविजयातथा ॥ एवमादीनिदेवीनांसहस्राणिचषोडश ॥ १५२ ॥ रुक्मिणीजनया
मासपुत्राञ्शृणुविशारदान् ॥ चारुदेष्णंरणेशूरंप्रद्युम्नञ्चमहाबलम् ॥ १५३ ॥ सुचारुंचारुभद्रञ्चसदश्वंह्रस्वमेवच ॥ सप्तमञ्चारुगुप्तञ्चचारुभद्र
ञ्चचारुकम् ॥ १५४ ॥ चारुहासंकनिष्ठञ्चकन्याञ्चारुमतींतथा ॥ जज्ञिरेसत्यभामायाभानुर्भीमरथःक्षणः ॥ १५५ ॥ रोहितोदीप्तिमांश्चैवताम्रबं
धोजलंधमः ॥ चतस्रोजज्ञिरेतेषांस्वसारश्चयवीयसीः ॥ १५६ ॥ जांबवत्याःसुतोजज्ञेसांबश्चैवातिशोभनः ॥ सौरशास्त्रस्यकर्तावैप्रतिमामंदि
रस्यच ॥ १५७ ॥ मूलस्थानेनिवेशश्चकृतस्तेनमहात्मना ॥ तुष्टेनदेवदेवेनकुष्ठरोगोविनाशितः १५८ ॥ सुमित्रंचारुमित्रंचमित्रविंदाव्यजाय
त ॥ मित्रबाहुःसुनीथश्चनाग्नजित्यांबभूवतुः ॥ १५९ ॥ एवमादीनिपुत्राणांसहस्राणिनिशामय ॥ अशीतिश्चसहस्राणांवासुदेवसुतास्तथा ॥
॥ १६० ॥ प्रद्युम्नस्यचदायादोवैदर्भ्यांबुद्धिसत्तमः ॥ अनिरुद्धोरणेयोद्धाजज्ञेऽस्यमृगकेतनः ॥ १६१ ॥ काम्यासुपार्श्वतनयासांबाह्लेभेतरस्विन
म् ॥ सत्त्वप्रकृतयोदेवाःपराःपंचप्रकीर्तिताः ॥ १६२ ॥ तिस्रःकोटयःप्रवीराणांयादवानांमहात्मनाम् ॥ षष्टिः शतसहस्राणिवीर्यवंतोमहाबलाः ॥
॥ १६३ ॥ देवांशाःसर्वएवेहउत्पन्नास्तेमहौजसः ॥ देवासुरेहतायेवाअसुरास्तुमहाबलाः ॥ १६४ ॥ इहोत्पन्नामनुष्येषुबाधंतेसर्वमानवान् ॥तेषामुद्धर
णार्थायउत्पन्नायादवेकुले॥१६५॥कलानांशतमेकंचयादवानाम्महात्मनाम्॥ विष्णुस्तेषांप्रणेताचप्रभुत्वेचव्यवस्थितः॥१६६॥निदेशस्थायिनस्तस्य
ऋद्धयंतेसर्वयादवाः ॥ भीष्मउवाच ॥ सप्तर्षयः कुबेरश्चयक्षोमणिधरस्तथा॥१६७॥सात्यकिर्नारदश्चैवशिवोधन्वन्तरिस्तथा॥ आदिदेवस्तथाविष्णु
रेभिस्तुसहदैवतैः ॥१६८॥ किमर्थंसहसंभूताः सुरसम्भूतयः क्षितौ ॥ भविष्याःकतिवाचास्यप्रादुर्भावामहात्मनः ॥ १६९ ॥ सर्वक्षेत्रेषुसर्वेषुकिम
र्थमिहजायते ॥ यदर्थमिहसंभूतोविष्णुर्वृष्ण्यंधकेकुले ॥ १७० ॥पुनः पुनर्मनुष्येषुतन्मेत्वंब्रूहिपृच्छतः ॥ पुलस्त्यउवाच ॥ शृणुभूपप्रवक्ष्यामिरह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्यातिरहस्यकम् ॥ यथादिव्यतनुर्विष्णुर्मानुषेष्विहजायते ॥ १७१ ॥ युगांतेतुपरावृत्तेकालेप्रशिथिलेप्रभुः ॥ देवासुरमनुष्येषुजायतेहरिरीश्वरः ॥
॥१७२॥ हिरण्यकशिपुर्दैत्यस्त्रैलोक्यस्यप्रशासिता ॥ बलिनाधिष्ठितेचैवपुनर्लोकत्रयेक्रमात् ॥ १७३ ॥ सख्यमासीत्परमकंदेवानामसुरैःसह ॥ यु
गाख्यादशसंपूर्णाआसीदव्याकुलंजगत ॥१७४॥ निदेशस्थायिनश्चापितयोर्देवासुराःस्वयम् ॥ बद्धोवलिर्विमर्दोऽयंसुसंवृत्तःसुदारुणः ॥१७५॥ देवा
नामसुराणांचघोरःक्षयकरोमहान् ॥ कर्तुंधर्मव्यवस्थांचजायतेमानुषेष्विह ॥१७६॥भृगोःशापनिमित्तंतुदेवासुरकृतेतदा ॥ भीष्मउवाच ॥ कथंदेवा
सुरकृतेहरिर्देहमवाप्तवान् ॥ १७७ दैवासुरंयथावृत्तंतन्मेकथयसुव्रत ॥ पुलस्त्यउवाच ॥ तेषांजयनिमित्तंवैसंग्रामाःस्युःसुदारुणाः॥ १७८ ॥ अवता
रादशद्वौचशुद्धामन्वंतरेस्मृताः ॥ नामधेयंसमासेनशृणुतेषांविवक्षितम् ॥१७९॥ प्रथमोनारसिंहस्तुद्वितीयश्चापिवामनः ॥ तृतीयस्तुवराहश्चचतुर्थो
ऽमृतमंथनः ॥१८०॥ संग्रामःपंचमश्चैवसुघोरस्तारकामयः ॥ षष्ठोह्याडीवकाख्यश्चसप्तमस्त्रैपुरस्तथा ॥१८१॥ अष्टमश्चांधकवधोनवमोवृत्रघातनः ॥
ध्वजश्चदशमस्तेषांहालाहलस्ततःपरम् ॥ १८२ ॥ प्रथितोद्वादशस्तेषांघोरःकोलाहलस्तथा ॥ हिरण्यकशिपुर्दैत्योनरसिंहेनसूदितः ॥१८३॥ वामने
नबलिर्बद्धस्त्रैलोक्याक्रमणेपुरा ॥ हिरण्याक्षोहतोद्वंद्वेप्रतिवादेतुदैवतैः ॥ १८४ ॥ दंष्ट्रयातुवराहेणसमुद्रस्थोद्विधाकृतः॥ प्रह्रादोनिर्जितोयुद्धइंद्रेणामृ
तमंथने ॥१८५॥ विरोचनस्तुप्राह्लादिर्नित्यमिंद्रवधोद्यतः ॥ इंद्रेणैवचविक्रम्यनिहतस्तारकामये ॥१८६॥ अशक्नुवत्सुदेवेषुत्रिपुरंसोढुमासुरम् ॥मो
हयित्वाऽमृतेपीतेगोरूपेणासुरारिणा ॥ १८७ ॥ नासञ्जीवयितुंशक्याभूयोभूयोमृतासुराः ॥ निहतादानवाःसर्वेत्रैलोक्येत्र्यंबकेणतु ॥ १८८ ॥ अ
सुराश्चपिशाचाश्चदानवाश्चांधकेवधे ॥ हतादेवमनुष्यैस्तेपितृभिश्चैवसर्वशः ॥ १८९ ॥ संपृक्तोदानवैर्वृत्रोघोरेकोलाहलेहतः ॥ तदाविष्णुसहायेनम
हेंद्रेणनिपातितः ॥ १९० ॥ हतस्ततोमहेंद्रेणमायाछन्नस्तुयोगवित् ॥ वज्रेणक्षणमाविश्यविप्रचित्तिःसहानुगः ॥ १९१ ॥ दैत्याश्चदानवाश्चैवसंयु
ताःकृत्स्नशस्तुते ॥एतेदैवासुरावृत्तासंग्रामाद्वादशैवतु ॥१९२॥ देवासुरक्षयकराःप्रजानांचहितायवै ॥हिरण्यकशिपूराजावर्षाणामर्बुदंबभौ ॥ १९३ ॥
द्विसप्ततिंतथान्यानिनियुतान्यधिकानितु ॥ अशीतिंचसहस्राणित्रैलोक्यैश्वर्यवानभूत् ॥ १९४ ॥ पर्यायेण तुराजाभूद्बलिर्वर्षार्बुदंपुनः ॥ षष्टिंचैव
सहस्राणिनियुतानिचविंशतिम् ॥ १९५ ॥ बलिराज्याधिकारेतुयावत्कालश्चकीर्तितः ॥ तावत्कालंतुप्रह्लादोनिर्वृतोह्यसुरैःसह ॥ १९६ ॥ जयार्थमेते
विज्ञेयाअसुराणांमहौजसः ॥ त्रैलोक्यमिदमव्यग्रं महेंद्रेणानुपाल्यत ॥१९७ ॥ असम्पन्नमिदंसर्वंयावद्वर्षायुतंपुनः ॥ पर्यायेणैवसम्प्राप्तेत्रैलोक्यंपा
कशासने ॥ १९८ ॥ ततोऽसुरान्परित्यज्ययज्ञोदेवानगच्छत ॥ यज्ञेदेवानथगतेदितिजाःकाव्यमब्रुवन्॥ १९९ ॥ दैत्यांऊचुः ॥ हृतंमघवताराज्यंत्य

CC-0. In Public Domain. Digitization by eGangotri

क्त्वायज्ञःसुरान्गतः ॥ स्थातुंनशक्तुमोह्यत्रप्रविशामोरसातलम् ॥ २०० ॥ एवमुक्तोऽब्रवीदेतान्विषण्णान्सांत्वयन्गिरा ॥ माभैष्टधारयिष्यामितेज
सास्वेनवोऽसुराः ॥ २०१ ॥ मन्त्राश्चौषधयश्चैवधरायांयत्तुवर्तते ॥ मयितिष्ठतितत्सर्वं पादमात्रंसुरेषुवै ॥ २०२ ॥ तत्सर्वंचप्रदास्यामियुष्मदर्थेधृतं
मया॥ततोदेवास्तुतान्दृष्ट्वाधृतान्काव्येनधीमता ॥ २०३ ॥ अमंत्रयंतदेवावैसंविग्नास्तज्जिघृक्षया ॥ काव्योह्येषइदंसर्वंव्यावर्तयतिनोबलात् ॥
॥ २०४ ॥ साधुगच्छामहेतूर्णंयावन्नच्यावयेतवै ॥ प्रसह्यजित्वाशिष्टांस्तुपातालंप्रापयामहे ॥ २०५ ॥ ततोदेवास्तुसंरब्धादानवानुपसृत्यह ॥ त
तस्तेवध्यमानास्तैःकाव्यमेवाभिदुद्रुवुः ॥ २०६ ॥ ततःकाव्यस्तुतान्दृष्ट्वातूर्णंदेवैरभिद्रुतान् ॥ रक्षाकार्येणसंहृत्यदेवेभ्यस्तान्सुरार्दितान् ॥ २०७ ॥
काव्यंदृष्ट्वास्थितंदेवानिर्विशंकास्तुतेजहुः ॥ ततःकाव्योऽनुचिंत्याथब्रह्मणोवचनंहितम् ॥ २०८॥ तानुवाचततःकाव्यः पूर्ववृत्तमनुस्मरन् ॥ त्रैलोक्यं
वोहृतंसर्ववामनेनत्रिभिःक्रमैः ॥ २०९ ॥ बलिर्बद्धोहतोजंभोनिहतश्चविरोचनः ॥ महासुराद्वादशसुसंग्रामेषुसुरैर्हताः ॥ २१० ॥ तैस्तैरुपायैर्भूयिष्ठा
निहतास्तुप्रधानतः ॥ केचिच्छिष्टाश्चयूयंवैयुद्धंनास्तीतिमेमतम् ॥ २११ ॥ नीतयोवोविधातव्याउपासेकालपर्ययात् ॥ यास्याम्यहंमहादेवं
मन्त्रार्थंविजयावहम् ॥ २१२ ॥ अप्रतीपांस्ततोदेवान्मंत्रान्प्राप्यमहेश्वरात् ॥ योत्स्यामहेपुनर्देवैस्ततःप्राप्स्यथवैजयम् ॥ २१३ ॥ ततस्तेकृत
संवादादेवानूचुस्तदासुराः ॥ न्यस्तशस्त्रावयंसर्वेनिःसन्नाहारथैर्विना ॥ २१४ ॥ वयंतपश्चरिष्यामःसंवृतावल्कलैस्तथा ॥ देवास्तेषां वचःश्रुत्वा
सत्याभिव्याहृतंततः ॥२१५ ॥ ततोन्यवर्तयन्सर्वेविज्वरामुदिताश्चते ॥ न्यस्तशस्त्रेषुदैत्येषुविनिवृत्तास्तदासुराः ॥२१६ ॥ ततस्तानब्रवीत्काव्यउ
पाध्वंतपसिस्थिताः ॥ निरुत्सिक्तास्तपोयुक्ताःकालंकार्यार्थसाधकम् ॥ २१७ ॥ पितुराश्रमसंस्थावैमांप्रतीक्षथदानवाः ॥ तानुद्दिश्यासुरान्काव्योम
हादेवं प्रपद्यत ॥ २१८॥ शुक्रउवाच ॥ मन्त्रानिच्छाम्यहंदेवयेनसन्तिबृहस्पतौ ॥ पराभवायदेवानामसुराणांजयायच ॥२१९ ॥ एवमुक्तोऽब्रवीद्दे
वोव्रतंत्वंचरभार्गव ॥ पूर्णंवर्षसहस्रंतुकणधूममधःशिराः ॥ २२० ॥ यदिपास्यसिभद्रंतेततोमन्त्रानवाप्स्यसि ॥ तथेतिसमनुज्ञाप्यशुक्रस्तुभृगुनन्द
नः ॥ २२१ ॥ पादौसंस्पृश्यदेवस्यबाढमित्यब्रवीद्वचः ॥ व्रतंचराम्यहंदेवत्वयादिष्टोऽद्यवैप्रभो ॥ २२२ ॥ आदिष्टोदेवदेवेनकृतवान्भार्गवोमुनिः ॥
तदातस्मिन्गतेशुक्रेअसुराणांहितायवै॥ २२३ ॥मन्त्रार्थेतनुतेकाव्योब्रह्मचर्यमहेश्वरात ॥ तद्बुद्ध्वानीतिपूर्वंवैराजन्यास्तुतदासुरम् ॥ २२४॥ अस्मिं
श्छिद्रेतदामर्षाद्देवास्तानभिदुद्रुवुः ॥ दंशिताःसायुधाःसर्वेबृहस्पतिपुरःसराः ॥ २२५ ॥ दृष्ट्वासुरगणादेवान्प्रगृहीतायुधान्पुनः ॥ उत्पेतुस्सहसास
र्वेसंत्रस्तास्तान्वचोऽब्रुवन् ॥२२६॥ दैत्याऊचुः ॥न्यस्तशस्त्रावयंदेवाआचार्येव्रतमास्थिते ॥दत्वाभवंतस्त्वभयंसम्प्राप्तानोजिघांसया॥२२७॥ अनम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्षावयंसर्वेत्यक्तशस्त्राश्चसंस्थिताः॥चीरकृष्णाजिनधरानिष्क्रियानिष्परिग्रहाः ॥२२८॥ रणेविजेतुंदेवांश्चनशक्ष्यामः कथंचन॥अयुद्धेनप्रपत्स्यामःश
रणंकाव्यमातरम् ॥ २२९ ॥ ज्ञापयामःकृच्छ्रमिदंयावन्नाभ्येतिनोगुरुः ॥ निवृत्तेचतथाशुक्रेयोत्स्यामोदंशितायुधाः ॥२३०॥ एमुक्त्वाचतेऽन्योन्यं
शरणंकाव्यमातरम् ॥ प्रापद्यंतततोभीतास्तेभ्योऽदादभयंतुसा ॥२३१॥ नभेतव्यंनभेतव्यंभयंत्यजतदानवाः ॥ मत्सन्निधौवर्त्ततांवोनभीर्भवितुमर्ह
ति ॥ २३२ तयाभिरक्षितांस्तांश्चदृष्ट्वादेवास्तदाऽसुरान् ॥ अभिजग्मुः प्रसह्यैतानविचार्यबलाबलम् ॥२३३॥ ततस्तान्बध्यमानांस्तुदेवैर्दृष्ट्वासुरांस्त
दा॥देवीक्रुद्धाऽब्रवीद्देवान्निद्रयामोहयाम्यहम् ॥२३४॥ संभृत्यसर्वसंभारान्निद्रांसाव्यसृजत्तदा ॥ तस्तम्भदेवीचबलाद्योगयुक्तातपोधना ॥२३५॥ तत
स्तंस्तभितंदृष्ट्वाइंद्रंदेवाश्चमूढवत् ॥ प्राद्रवंततोभीताइंद्रंदृष्ट्वावशीकृतम् ॥२३६॥ गतेषुसुरसंघेषुविष्णुरिंद्रमभाषत ॥ विष्णुरुवाच ॥ मांत्वंप्रविश
भद्रंतेरक्षिष्येत्वांसुरोत्तम ॥ २३७॥ एवमुक्तस्ततोविष्णुंप्रविवेशपुरंदरः ॥ विष्णुसंरक्षितंदृष्ट्वादेवीक्रुद्धावचोऽब्रवीत् ॥२३८॥ एषत्वांविष्णुनासार्धंद
हामिमघवन्बलात् ॥ मिषतांसर्वभूतानां दृश्यतांमेतपोबलम् ॥२३९॥ तयाभिभूतौतौदेवाविंद्रविष्णूबभूवतुः ॥ कथंमुच्येयसहितोविष्णुरिंद्रमभाषत
॥ २४० ॥ इंद्रोऽब्रवीज्जहिह्येनांयावन्नौनदहेत्प्रभो ॥ विशेषेणाभिभूतोऽस्मिजहीमांजहिमाचिरम् ॥ २४१ ॥ ततःसमीक्ष्यविष्णुस्तांस्त्रीवधे
कृच्छ्रमास्थितः ॥ अभिध्यायततःशक्रमापन्नंसत्वरंप्रभुः ॥२४२॥ ततःसत्वरयायुक्तःशीघ्रकारीभयान्वितः ॥ज्ञात्वाविष्णुस्ततस्तस्याःक्रूरंदेव्याश्चि
कीर्षितम् ॥ २४३ ॥ क्रुद्धश्चचक्रमादायशिरश्चिच्छेदवैभयात् ॥ तंदृष्ट्वास्त्रीवधंघोरंचुक्रोधभृगुरीश्वरः ॥२४४॥ ततोहिशप्तोभृगुणाविष्णुर्भार्यावधेकृ
ते ॥ भृगुरुवाच ॥ यत्त्वयाजानताधर्ममवध्यास्त्रीनिषूदिता ॥२४५॥ तस्मात्त्वंसप्तकृत्वोहिमानुषेषूपयास्यसि ॥ ततस्तेनाभिशापेनष्टेधर्मेपुनःपुनः
॥ २४६ ॥ लोकस्यचहितार्थायजायतेमानुषेष्विह ॥ अथव्याहृत्यविष्णुंसतदादायशिरः स्वयम् ॥ २४७ ॥ समानीयततःकायंपाणौगृह्येदमब्रवी
त ॥भृगुरुवाच॥ एषात्वंविष्णुनादेविहतासंजीवयाम्यहम् ॥२४८॥ यदिकृत्स्नोमयाधर्मोज्ञायतेचरितोऽपिवा ॥ तेनसत्येनजीवस्वयदिसत्यंब्रवीम्य
हम् ॥ २४९ ॥ ततस्तांप्रोक्ष्यशीताद्भिर्जीवजीवेतिसोऽब्रवीत् ॥ ततोऽभिव्याहृतेतस्मिन्देवीसंजीवितातदा ॥ २५० ॥ ततस्तांसर्वभूतानिदृष्ट्वासुप्तो
त्थितामिव ॥ साधुसाध्वितिदृष्ट्वैववचस्तांसर्वतोऽब्रुवन् ॥२५१॥ एवंप्रत्याहृतातेनदेवीसाभृगुणातदा ॥ मिषतांदैवतानांहितदद्भुतमिवाभवत् ॥२५२॥
असंभ्रांतेनभृगुणापत्नीसंजीवितापुनः॥दृष्ट्वाचेंद्रोनालभतशर्मकाव्यभयात्पुनः ॥२५३॥ प्रजागरेततश्चेन्द्रोजयंतीमिदमब्रवीत् ॥ संधिकामोऽभ्यधा
द्वाक्यंस्वांकन्यांपाकशासनः ॥ २५४ ॥इन्द्रउवाच॥ एषकाव्योह्यनिंद्रायव्रतंचरतिदारुणम् ॥ तेनाहंव्याकुलः पुत्रिकृतोमतिमतादृढम् ॥ २५५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तैस्तैर्मनोऽनुकूलैश्चउपचारैरतंद्रिता ॥ आराधयतथापुत्रियथातुष्येतसद्विजः ॥२५६॥ गच्छत्वंतस्यदत्तासिप्रयत्नंकुरुमत्कृते ॥ एवमुक्ताजयंतीसा
वचःसंगृह्यवैपितुः ॥ २५७ ॥ अगच्छद्यत्रघोरंसतपोह्यारभ्यतिष्ठति ॥ तंदृष्ट्वाचपिबंतं साकणधूममधोमुखम् ॥ २५८ ॥ यक्षेणपात्यमानंचकुं
डधारेणपावनम्॥दृष्ट्वातंयतमानंतुदेवीकाव्यमवस्थितम् ॥२५९॥ शत्रूपघातेश्राम्यन्तंदुर्बलस्थितिमास्थितम्॥पित्रायथोक्तंवाक्यंसाकाव्येकृतवतीत
दा ॥ २६० ॥ गीर्भिश्चैवानुकूलाभिःस्तुवंतीवल्गुभाषिणी ॥ गात्रसंवाहनैः कालेसेवमानात्वचः सुखैः ॥ २६१ ॥ व्रतचर्यानुकूलाभिरुपास्यबहु
लाः समाः ॥ पूर्णेधूमव्रतेतस्मिन्घोरेवर्षसहस्रके ॥२६२॥ वरेणच्छंदयामासशिवः प्रीतोऽभवत्तदा ॥ ॥ महेश्वरउवाच॥एतद्व्रतंत्वयैकेनचीर्णंनान्येन
केनचित्॥२६३॥तस्माद्वैतपसाबुद्ध्याश्रुतेनचबलेनच॥ तेजसाचसुरान्सर्वांस्त्वमेकोऽभिभविष्यसि ॥२६४॥ यच्चकिंचिन्मयिब्रह्मन्विद्यतेभृगुनंदन ॥
प्रतिदास्यामितत्सर्वंत्वयावाच्यंनकस्यचित् ॥२६५॥ किंभाषितेनबहुनाअवध्यस्त्वंभविष्यसि ॥ तान्दत्वातुवरांस्तस्मैभार्गवायपुनःपुनः ॥२६६॥
प्रजेशत्वंधनेशत्वमवध्यत्वंचवैददौ ॥ एतांल्लब्ध्वावरान्काव्यः संप्रहृष्टतनूरुहः ॥ २६७ ॥ एवमाभाष्यदेवेशमीश्वरंनीललोहितम् ॥ प्रज्ञान्वितस्तत
स्तस्मैप्राञ्जलिःप्रणतोऽभवत् ॥२६८॥ ततःसोंऽतर्हितेदेवेजयंतीमिदमब्रवीत्॥कस्यत्वंसुभगेकावादुःखितेमयिदुःखिता ॥ २६९ ॥ महतातपसायुक्ता
किमर्थंमांजिगीषसि ॥ अनयासंस्थिताभक्त्याप्रश्रयेणदमेनच ॥२७०॥ स्नेहेनचैवसुश्रोणिप्रीतोऽस्मिवरवर्णिनि ॥ किमिच्छसिवरारोहेकस्तेकामःस
मुद्यतः ॥२७१॥ तंतेसंपादयाम्यद्ययद्यपिस्यात्सुदुष्करम् ॥ एमुक्ताब्रवीदेनंतपसाज्ञातुमर्हसि ॥ २७२ ॥ चिकीर्षितंहिमेब्रह्मंस्त्वंवैवदयथातथम् ॥
एवमुक्तोऽब्रवीदेनांदृष्ट्वादिव्येनचक्षुषा ॥२७३ ॥ मयासहत्वंसुश्रोणिशतवर्षाणिभामिनि ॥ सर्वभूतैरदृश्यांतः संप्रयोगमिहेच्छसि ॥२७४॥ देविइंदी
वरश्यामेवरार्हेवामलोचने ॥ एवंवृणोषिकामांस्त्वंददेवैवल्गुभाषिते ॥ २७५ ॥ एवंभवतुगच्छावगृहंमेमत्तकाशिनि ॥ ततःसगृहमागम्यजयंत्यासह
चोशना ॥ २७६॥ तयासहावसद्देव्याशतवर्षाणिभार्गवः ॥ अदृश्यःसर्वभूतानां माययासंशितव्रतः ॥ २७७ ॥ कृतार्थमागतंज्ञात्वाशुक्रंसर्वेदितेःसु
ताः ॥ अभिजग्मुर्गृहंतस्यमुदितास्तेदिदृक्षवः ॥ २७८ ॥ गतायदानपश्यंतिमाययासंवृतंगुरुम् ॥ लक्षणंतस्यचाबुद्ध्वानाद्यागच्छतिनोगुरुः ॥
२७९ ॥ एवंतेस्वानिधिष्ण्यानिगताःसर्वेयथागताः॥ततोदेवगणास्सर्वेगत्वांगिरसमब्रुवन्॥२८०॥दानवालयेतुभगवान्गत्वातत्रचतांचमूम् ॥ मोहयि
त्वात्मवशगांक्षिप्रमेवतथाकुरु ॥ २८१ ॥ धिषणस्तान्सुरानाहएवमेवव्रजाम्यहम् ॥ तेनगत्वादानवेंद्रः प्रह्लादोवैवशीकृतः ॥ २८२ ॥
शुक्रोभूत्वास्थितस्तत्रपौरोहित्यंचकारसः ॥ स्थितोवर्षशतंसाग्रमुशनातावदागतः ॥ २८३ ॥ दनुपुत्रैस्ततोदृष्टः सभायांतुबृहस्पतिः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उशनाएकएवात्रद्वितीयःकिमिहागतः ॥ २८४ ॥ सुमहत्कौतुकंचात्रभविताविग्रहोदृढम् ॥ किंवदिष्यतिलोकोऽयंद्वारियोऽयंव्यवस्थितः ॥
॥२८५॥ सभायामास्थितोयोऽयंगुरुःकिंनोवदिष्यति ॥ एवंप्रजल्पतांतेषांदनूनांकविरागतः ॥२८६॥ स्वरूपधारिणंतत्रदृष्ट्वासीनंबृहस्पतिम् ॥ उवा
चवचनंक्रुद्धःकिमर्थंत्वमिहागतः ॥ २८७ ॥ शिष्यान्मोहयसेमेत्वंयुक्तंसुरगुरोस्तव ॥ मूढास्तेत्वांनजानंतित्वन्मायामोहिताध्रुवम् ॥ २८८ ॥ त
न्नयुक्तंतवब्रह्मन्परशिष्यप्रधर्षणम् ॥ व्रजत्वंदेवलोकंस्वंतिष्ठधर्ममवाप्स्यसि ॥ २८९ ॥ शिष्योहिमेकचःपूर्वंहतोदानवपुंगवैः ॥ विद्यार्थीतनयोब्रह्मंस्त
वायोग्यागतिस्त्विह ॥ २९० ॥ श्रुत्वातुतस्यतद्वाक्यंस्मितंकृत्वावदद्गुरुः ॥ संतिचोराः पृथिव्यांयेपरद्रव्यापहारिणः ॥२९१॥ एवंविधानदृष्टाश्चरू
पदेहापहारिणः ॥ वृत्रघातेनचेंद्रस्यब्रह्महत्यापुराभवत् ॥ २९२ ॥ लोकायतिकशास्त्रेणभवतासातिरस्कृता ॥ जानामित्वामांगिरसंदेवाचार्यंबृहस्प
तिम् ॥ २९३ ॥ मद्रूपधारिणंप्राप्तंसर्वेपश्यतदानवाः ॥ एषवोमोहनायालंप्राप्तोविष्णुविचेष्टितैः ॥ २९४ ॥ तदेनंशृंखलैर्बद्धाक्षिपेतलवणार्णवे ॥ पु
नरेवाब्रवीच्छुक्रःपुरोधायंदिवौकसाम् ॥ २९५ ॥ मोहितानूनमेतेनक्षयंयास्यथदानवाः ॥ भोअहंदानवेंद्रेहवंचितोऽस्मिदुरात्मना ॥२९६॥ किमर्थंभ
वतात्यक्तःकृतश्चान्यःपुरोहितः ॥ देवाचार्योंऽगिरःपुत्रएषएवबृहस्पतिः॥२९७॥वंचितोऽसिनसन्देहोहितार्थंतुदिवौकसाम्॥त्यजस्वैनंमहाभागशत्रुपक्ष
जयावहम्॥२९८॥अनुशिष्यभयाद्यातःपूर्वमेवमहंप्रभो ॥जलमध्येस्थितःपीतोमहादेवेनशम्भुना॥२९९॥उदरस्थस्यमेजातंसाग्रंवर्षशतंकिल ॥ उदरा
च्छुक्ररूपेणशिश्नेनाहंविसर्जितः ॥ ३०० ॥ वरदःप्राहमांदेवश्शुक्रेष्टंत्वंवरंवृणु ॥ मया वृतोवरंराजन्देवदेवःपिनाकधृत् ॥ ३०१ ॥ मनसाचिंतिताह्य
र्थामानसेयेस्थितावराः ॥ भवंतुमयितेसर्वेप्रसादात्तवशंकर ॥ ३०२ ॥ एवमस्त्वितिदेवेन प्रेषितोऽस्मितवांतिकम् ॥ तावदत्राभवच्चायंपुरोधास्तेबृह
स्पतिः ॥ ३०३ ॥ दृष्टःसत्यंदानवेंद्रमयोक्तंत्वंनिशामय ॥ बृहस्पतिस्तदावाक्यंप्रह्लादंप्रत्यभाषत ॥ ३०४ ॥ नाहमेतंप्रजानामिदेवंवादानवंनरम् ॥
मद्रूपधारिणंराजन्वंचनार्थंतवागतम् ॥ ३०५ ॥ ततस्तेदानवाःसर्वेसाधुसाध्वितिवादिनः ॥ पुरोधाःपौर्विकोनोऽस्तुयो वाकोवाभवत्विति ॥ ३०६॥
नानेनकार्यमस्माकंयातुह्येषयथागतः ॥ सक्रोधमशपत्काव्योदानवेंद्रान्समागतान् ॥ ३०७ ॥ त्यक्तोयथाहंयुष्माभिस्तथासर्वाश्चिरादिव ॥ गतश्री
कान्गतप्राणान्पश्येयंदुःखजीविकान् ॥ ३०८ ॥ सुघोरामापदंप्राप्तानचिरादेवसर्वशः ॥ एवमुक्त्वागतःकाव्योयदृच्छातस्तपोवनम् ॥ ३०९ ॥
तस्मिन्गतेततःशुक्रेस्थितस्तत्रबृहस्पतिः॥पालयन्दानवांस्तत्रकिंचित्कालमतिष्ठत॥३१०॥ततोबहुतिथेकाले अतिक्रांतेनरेश्वर॥संभूयदानवाःसर्वेपर्यपृ
च्छंस्तदागुरुम् ॥ ३११ ॥ संसारेऽस्मिन्नसारेतुकिंचिज्ज्ञानंप्रयच्छनः ॥ येनमोक्षंव्रजामश्चप्रसादात्तवसुव्रत ॥३१२॥ ततःसुरगुरुःप्राहकाव्यरूपीतदा

CC-0. In Public Domain. Digitization by eGangotri

गुरुः ॥ ममाप्येषामतिः पूर्वंयायुष्माभिरुदाहृता ॥ ३१३ ॥ क्षणंकुर्वन्तुसहिताश्शुचीभूयसमाहिताः ॥ ज्ञानंवक्ष्यामिवोदैत्याअहंवैमोक्षदायियत
॥ ३१४ ॥ एषाश्रुतिर्वैदिकीयाऋग्यजुःसामसंज्ञिता ॥ वैश्वानरप्रसादात्तुदुःखदाप्राणिनामिह ॥ ३१५ ॥ यज्ञश्राद्धंकृतंक्षुद्रैरैहिकस्वार्थतत्परैः ॥ ये
त्वमीवैष्णवाधर्मायेचरुद्रकृतास्तथा ॥ ३१६ ॥ कुधर्मादारसहितैर्हिंसाप्रायाःकृताहितैः ॥ अर्द्धनारीश्वरोरुद्रःकथंमोक्षंगमिष्यति ॥ ३१७ ॥ वृतो
भूतगणैर्भूरिभूषितश्चास्थिभिस्तथा ॥ नस्वर्गोनैवमोक्षोऽत्रलोकाःक्लिश्यंतिवैतथा ॥ ३१८ ॥ हिंसायामास्थितोविष्णुःकथंमोक्षंगमिष्यति ॥ रजोगु
णात्मकोब्रह्मास्वांसृष्टिमुपजीवति ॥ ३१९ ॥ देवर्षयोऽथयेचान्येवैदिकंपक्षमाश्रिताः ॥ हिंसाप्रायाः सदाक्रूरामांसादाः पापकारिणः ॥ ३२० ॥
सुरास्तुमद्यपानेनमांसादाब्राह्मणास्त्वमी॥ धर्मेणानेनकःस्वर्गंकथंमोक्षंगमिष्यति ॥३२१॥यच्चयज्ञादिकंकर्म स्मार्तंश्राद्धादिकंतथा ॥ तत्रनैवापवर्गो
ऽस्तियत्रैषाश्रूयतेश्रुतिः ॥ ३२२ ॥ यज्ञंकृत्वापशुंहत्वाकृत्वारुधिरकर्दमम् ॥ यद्येवंगम्यतस्वर्गोनरकःकेनगम्यते ॥३२३॥ यदिभुक्तमिहान्येनतृप्तिर
न्यस्यजायते ॥ दद्यात्प्रवसतः श्राद्धंन सभोजनमाहरेत् ॥ ३२४ ॥ आकाशगामिनोविप्राःपतितामांसभक्षणात् ॥ तेषां न विद्यतेस्वर्गोमोक्षोनैवेहदा
नवाः ॥ ३२५ ॥ जातस्यजीवितंजंतोरिष्टंसर्वस्यजायते ॥ आत्ममांसोपमंमांसंकथंखादेतपंडितः ॥ ३२६ ॥ योनिजास्तुकथंयोनिंसेवंते जंतवस्त्व
मी ॥ मैथुनेनकथंस्वर्गंयास्यंतेदानवेश्वर ॥ मृद्भस्मनायत्रशुद्धिस्तत्रशुद्धिस्तुकाभवेत् ॥ ३२७ ॥ विपरीततमंलोकंपश्यदानवयादृशम् ॥ विण्मूत्रस्य
कृतोत्सर्गेशिश्नापानेतुशोधनम् ॥ ३२८ ॥ नसंभारोऽस्तिवदनेमृदातोयेनवापुनः ॥ भुक्तेवाभोजनेराजन्कथंनापानशिश्नयोः ॥३२९॥ क्रियतेशोध
नंतद्वद्विपरीतास्थितिस्त्वियम् ॥यत्रप्रक्षालनंप्रोक्तंतत्रतेनैवकुर्वते॥३३०॥तारांबृहस्पतेर्भार्यांहृत्वासोमःपुरागतः॥तस्यांजातोबुधःपुत्रोगुरुर्जग्राहतांपुनः
॥३३१॥गौतमस्यमुनेःपत्नीमहल्यांनामनामतः॥अगृह्णात्तांस्वयंशक्रःपश्यधर्मोयथाविधः॥३३२॥एतदन्यच्चजगतिदृश्यतेपापदायकम्॥एवंविधोयत्र
धर्मःपरमार्थोमतस्तुकः॥३३३॥वदस्वत्वंदानवेंद्रवदभूयोवदामिते॥गुरोस्तुगदितंश्रुत्वापरमार्थान्वितंवचः ॥३३४॥जातकौतूहलास्तत्रविविक्तास्तुभवा
र्णवात्॥दानवाऊचुः॥दीक्षयस्वगुरोसर्वान्प्रपन्नान्भक्तितःस्थितान्॥३३५॥येनवैनपुनर्मोहंव्रजामस्तवशासनात्॥ सुविरक्ताःस्मसंसारेशोकमोहप्रदायि
नि ॥३३६॥ उद्धरस्वगुरोसर्वान्केशाकर्षेणकूपतः ॥ कस्यदेवस्यशरणंगच्छामोब्राह्मणोत्तम ॥ ३३७॥ दैवतंचप्रपन्नानांप्रकाशयमहामते ॥ स्मरणेनोप
वासेनध्यानधारणयातथा ॥३३८॥पूजोपहारेचकृते अपवर्गस्तुलभ्यते ॥ विरक्तास्स्मकुटुंबेतुभूयोनात्रयतामहे॥३३९॥एवंचैवगुरुश्छन्नस्तैरुक्तोदनुपुंग
वैः ॥ चिंतयामासतत्कार्यंकथमेतत्करोम्यहम्॥३४०॥ कथमेतेमयापापाःकर्तव्यानरकौकसः ॥ विडंबनाच्छुतेर्बाह्यास्त्रैलोक्येहास्यकारिणः ॥३४१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्युक्त्वाधिषणोराजंश्चिंतयामासकेशवम् ॥ तस्यतच्चिंतितंज्ञात्वामायामोहंजनार्दनः॥३४२॥समुत्पाद्यददौतस्यप्राहचेदंबृहस्पतिम्॥ मायामोहोऽय
मखिलांस्तान्दैत्यान्मोहयिष्यति॥३४३॥भवतासहितःसर्वान्वेदमार्गबहिष्कृतान् ॥एवमादिश्यभगवानंतर्धानंजगामह॥३४४॥तपस्यभिरतान्सोऽथ
मायामोहोगतोऽसुरान्॥तषांसमीपमागत्यबृहस्पतिरुवाचह॥३४५॥ अनुग्रहार्थंयुष्माकंभक्त्याप्रीतस्त्विहागतः॥योगीदिगम्बरोमुण्डोबर्हिपत्रधरोह्यय
म् ॥३४६॥ इत्युक्तेगुरुणापश्चान्मायामोहोऽब्रवीद्वचः ॥ भोभोदैत्याधिपतयःप्रब्रूततपसिस्थिताः ॥३४७॥ ऐहिकार्थंतुपारक्यंतपसःफलमिच्छथ ॥
दानवाऊचुः ॥ पारक्यधर्मलाभायतपश्चर्याहिनोमता ॥३४८॥ अस्माभिरियमारब्धाकिंवातत्रविवक्षितम् ॥ दिगंबर उवाच ॥ कुरुध्वंममवाक्यानि
यदिमुक्तिमभीप्सथ ॥३४९॥ आर्हतंसर्वमेतच्चमुक्तिद्वारमसंवृतम् ॥धर्माद्विमुक्तेरर्होऽयंनैतस्मादपरःपरः ॥३५०॥ अत्रैवावस्थिताःस्वर्गंमुक्तिंचापिग
मिष्यथ ॥ एवंप्रकारैर्बहुभिर्मुक्तिदर्शनवर्जितैः ॥३५१॥ मायामोहेनतेदैत्यावेदमार्गबहिष्कृताः ॥ धर्मायैतदधर्मायसदेतदसदित्यपि ॥ ३५२॥विमु
क्तयेत्विदंनैतद्विमुक्तिंसंप्रयच्छति॥ परमार्थोऽयमत्यर्थंपरमार्थोनचाप्ययम् ॥३५३॥ कार्यमेतदकार्यंहिनैतदेतत्स्फुटंत्विदम्॥ दिग्वाससामयंधर्मोध
र्मोऽयंबहुवाससाम् ॥३५४॥ इत्यनेकार्थवादांस्तुमायामोहेनतेयतः ॥ उक्तास्ततोऽखिलादैत्याःस्वधर्मांस्त्याजितानृप ॥३५५॥ अर्हध्वंमामकंधर्मं
मायामोहेनतेयतः ॥ उक्तास्तमाश्रिताधर्ममार्हतास्तेनतेऽभवन् ॥३५६ ॥ त्रयीमार्गंसमुत्सृज्यमायामोहेनतेऽसुराः॥ कारितास्तन्मयाह्यासंस्तथान्ये
तत्प्रबोधिताः ॥३५७॥ तैरप्यन्येपरेतैश्चतरन्योन्यैस्तथापरे ॥ नमोऽर्हतेचेतिसर्वेसंगमेस्थिरवादिनः ॥३५८॥अल्पैरहोभिःसंत्यक्तास्तैर्दैत्यैःप्रायश
स्त्रयी ॥ पुनश्चरक्तांबरधृन्मायामोहोजितेक्षणः ॥३५९ ॥ सोऽन्यानप्यसुरान्गत्वाऊचेऽन्यन्मधुराक्षरम् ॥ स्वर्गार्थंयदिवोवाञ्छानिर्वाणार्थायवापुनः
॥३६०॥ तदलंपशुघातादिदुष्टधर्मैर्निबोधत ॥ विज्ञानमयमेतद्वैत्वशेषमधिगच्छत ॥३६१॥ बुध्यध्वंमेवचःसम्यग्बुधैरेवमिहोदितम् ॥ जगदेतदना
धारंभ्रांतिज्ञानानुतत्परम् ॥३६२॥ रागादिदुष्टमत्यर्थंभ्राम्यतेभवसंकटे ॥नानाप्रकारंवचनंसतेषांमुक्तियोजितम्॥३६३॥ तथातथाऽवदद्धर्मंतत्यजुस्ते
यथायथा ॥ केचिद्विनिन्दांवेदानांदेवानामपरेनृप ॥ ३६४ ॥ यज्ञकर्मकलापस्यतथाचान्येद्विजन्मनाम् ॥ नैतद्युक्तिसहंवाक्यंहिंसाधर्मायजायते ॥
॥३६५॥ हवींष्यनलदग्धानिफलान्यर्हंतिकोविदाः ॥ निहतस्यपशोर्यज्ञेस्वर्गप्राप्तियदीष्यते ॥३६६॥ स्वपितायजमानेनकिंवातत्रनहन्यते ॥ तृप्तये
जायतेपुंसोभुक्तमन्येनचेद्यदि ॥३६७॥ दद्याच्छ्राद्धंप्रवसतोनवहेयुःप्रवासिनः ॥यज्ञैरनेकैर्देवत्वमवाप्येन्द्रेणभुज्यते ॥३६८॥ शम्यादियदिचेत्काष्ठंत
द्वरंपत्रभुक्पशुः ॥ जनाश्रद्धेयमित्येतदगवम्यतुतद्वचः ॥ ३६९॥ उपेक्ष्यश्रेयसेवाक्यंरोचतांयन्मयेरितम् ॥ नह्याप्तवादानभसोनिपतंतिमहासुराः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥३७०॥ युक्तिमद्वचनंग्राह्यंमयान्यैश्चभवद्विधैः॥ दानवाऊचुः॥तत्त्ववादेवयंसर्वेप्रपन्नास्तवभक्तितः ॥३७१॥ कुरुष्वानुग्रहंचाद्यप्रसन्नोऽसियदिप्रभो॥
संभारानाहरामोऽद्यदीक्षायोग्यांश्चसर्वशः ॥३७२॥प्रसादात्तवयेनाशुमोक्षोहस्तगतोभवेत्॥ततस्तानब्रवीत्सर्वान्मायामोहोऽसुरांस्तदा ३७३ प्रपन्नःशा
सनंह्येषमदीयोगुरुरग्र्यधीः ॥ दीक्षांदास्यतियुष्माकंनिदेशान्ममसत्तमः ॥३७४॥ एतान्दीक्षयभोब्रह्मन्वचनान्ममपुत्रकान् ॥ गतेमोहेदानवास्तेभार्ग
वंवाक्यमब्रुवन्॥३७५॥देहिदीक्षांमहाभागसर्वसंसारमोचनीम् ॥ तथेत्याहोशनादैत्यान्गच्छामोनर्मदामनु ॥३७६॥ भोभोस्त्यजतवासांसिदीक्षांका
रयितास्मिवः॥ एवंतेदानवाभीष्मभृगुरूपेणधीमता ॥३७७॥ आंगिरसेनतेतत्रकृतादिग्वाससोऽसुराः ॥ बर्हिपिच्छध्वजंतेषांगुंजिकाचारुमालिकाम्॥
॥३७८॥ दत्वाचकारतेषांतुशिरसोलुंचनंततः ॥ केशस्योत्पाटनंचैवपरमंधर्मसाधनम् ॥३७९॥ धनानामीश्वरोदेवोधनदःकेशलुंचनात् ॥ सिद्धिप
रमिकांप्राप्ताःसदावेषस्यधारणात् ॥३८०॥ नित्यत्वंलभ्यतेह्येवंपुराप्राहार्हतःस्वयम् ॥ वालोत्पाटेनदेवत्वंमानुषैर्लभ्यतेत्विह ॥ ३८१ ॥ किंनकुर्वी
ततत्तस्मान्महापुण्यप्रदंयतः ॥ मनोरथोहिदेवानांलोकेवैमानुषेकदा ॥३८२॥ अस्मिन्स्याद्भारतेवर्षेजन्मनःश्रावकेकुले ॥ तपसायुञ्ज्महेऽस्मान्वैके
शोत्पाटनपूर्वकम् ॥३८३॥ तीर्थंकराश्चतुर्विंशत्तथातैस्तुपुरस्कृताः॥छायाकृतंफणीन्द्रेणध्यानमार्गप्रदर्शकम् ॥३८४॥ स्तुवन्तंमंत्रवादेनस्वर्गोहस्तग
तोऽर्हतम् ॥ मोक्षोवाभवितानूनंविचारःकोऽत्रकथ्यते॥३८५॥कदास्यामर्षयोभूत्वासूर्याग्निसमतेजसः ॥ जप्त्वाविरागिणश्चैवमनुपंचांगकंतथा॥३८६॥
तथातपस्यतांमृत्युंगतानांकालपर्ययात् ॥ पाषाणेनशिरोभंग्नंभवतेपुण्यकर्मणाम् ॥३८७॥ अरण्येनिर्जनेवासःकदावैभविताहिनः ॥ कर्णजप्यंश्राव
काश्चकरिष्यंतिसमाहिताः ॥३८८॥ भोभोऋषेनगंतव्यंमोक्षमार्गीयतोभवान् ॥ लब्धानियानिस्थानानिभूयोवृत्तिकराणिच ॥३८९॥ त्याज्यानि
तेनचैतानिसत्यमेववचोहिनः ॥ अस्मदीयेनतपसानियमैर्विविधैस्तथा ॥३९०॥ व्रजध्वंचोत्तमस्थानंमोक्षमार्गंचयंबुधाः ॥ विंदंतिभक्तिभावेनतपो
युक्तास्तपस्विनः ॥३९१॥ अक्षेषुनिग्रहोयत्रदयाभूतेषुसर्वदा॥तत्तपोधर्ममित्युक्तंसर्वाचान्याविडम्बना॥३९२॥ ज्ञात्वैतद्भवतासाध्यंगंतव्यंपरमंपदम्
यंवैतीर्थंकरायातायांगतिंयोगिनोगताः ॥३९३॥ एवंवैदेवताःपूर्वंविद्याधरमहोरगाः ॥ मनोरथाभिलाषांस्तेचिंतयंतोदिवानिशम् ॥३९४॥ यद्येषणा
वैयुष्माकंसंसारविरतौकृता ॥ परित्यजध्वंदाराणिस्वर्गमार्गार्गलानिच ॥३९५॥ यस्यांयोनौपिताधातस्तांयोनिंसेवसेकथम् ॥ आत्ममांसोपमंमांसंक
थंखादंतिजंतवः॥३९६॥ततस्तेदानवाभीष्मऊचुःसर्वेगुरुंवचः॥दीक्षस्वनोमहाभागभ्रूणकानग्रतःस्थितान्३९७॥तथाकृत्वासतानाहसमयेनपुरोहितः॥
प्रणामोनान्यदेवेषुकर्तव्योवःकदाचन ॥३९८॥ एकस्थानेयदाभक्तंभोक्तव्यंकरसंपुटे ॥ तत्रस्थानेस्थितंतोयंकेशकीटविवर्जितम् ॥३९९॥तुल्यंप्रियाप्रि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यंकार्यंनान्यद्दृष्टिहतंकचित्॥भोक्तव्यमेतेनविभोआचारेणतथाकुरु॥४००॥भवध्वंसहितायूयंतेतथामोक्षभागिनः ॥ एवमुक्त्वासनियमान्कृत्वातान्द
नुपुंगवांन्॥४०१॥ जगामधिषणोराजन्देवलोकंदिवौकसाम्॥आचचक्षेसतत्सर्वंदानवानांचकारितम्॥४०२॥ततस्तेत्वसुराजग्मुर्नर्मदामभितोवसन्॥
दृष्ट्वातान्दानवांस्तत्रप्रह्लादेनविनाकृतान्॥४०३॥देवराजस्ततोहृष्टोनमुचिंप्राहवैवचः॥हिरण्याक्षंयज्ञहनंधर्मघ्नंवेदनिंदकम्॥४०४॥ राक्षसंक्रूरकर्माणंप्र
घसंविघसंतथा॥मुचिंचैवतथाबाणंविरोचनमथापिवा ॥४०५॥ महिषाक्षंबाष्कलंचप्रचण्डंचंडकंतथा॥रोचमानंतथात्युग्रंसुषेणंदानवोत्तमम् ॥४०६॥
एतान्दृष्ट्वातथाचान्यान्दानवेन्द्रानथाब्रवीत् ॥ ॥इन्द्रउवाच॥दानवेंद्राःपुराजाताःकृतंराज्यंत्रिविष्टपे॥४०७॥इदानींकथमेवेदंव्रतंवेदविलोपकम् ॥ भव
द्भिःकर्तुमारब्धंनग्नमुंडिकमंडलु॥४०८॥मयूरध्वजधारित्वंकथंचैवेहतिष्ठथ॥ ॥दानवाऊचुः॥त्यक्तःसर्वासुरभावऋषिधर्मैर्वयंस्थिताः ॥४०९॥धर्मवृद्धि
करंकर्मचरामःसर्वजंतुषु ॥ त्रैलोक्यराज्यमखिलंभुंक्ष्वशक्रव्रजस्वच ॥ ४१० ॥ तथेतिचोक्त्वामघवापुनर्यातस्त्रिविष्टपम् ॥ एवंतेमोहिताःसर्वेभीष्म
देवपुरोधसा ॥४११॥ नर्मदासरितंप्राप्यस्थितादानवसत्तमाः ॥ ज्ञात्वाशुक्रेणतेसर्वेवृत्तांतमनुबोधिताः ॥४१२॥ तदात्रैलोक्यहरणेचक्रुःक्रूरांपुनर्म
तिम् ॥ ४१३ ॥ इति श्रीपद्मपुराणेप्रथमेसृष्टिखण्डेअवतारचरितंनामत्रयोदशोऽध्यायः ॥ १३ ॥ ॥भीष्मउवाच ॥ कथंत्रिपुरुषाज्जातोह्यर्जुनःपरवीर
हा ॥ कथंकर्णस्तुकानीनःसूतजःपरिकीर्त्यते ॥ १ ॥ वैरंतयोःकथंभूतंनिसर्गादेवतद्वद ॥ बृहत्कौतूहलंमह्यंतद्भवान्वक्तुमर्हति ॥ २॥ पुलस्त्यउवाच॥
छिन्नेवक्त्रेपुराब्रह्माक्रोधेनमहतावृतः ॥ ललाटेस्वेदमुत्पन्नंगृहीत्वाऽताडयद्भुवि ॥३॥ स्वेदतःकुंडलीजज्ञेसधनुष्कोमहेषुधिः ॥सहस्रकवचीवीरःकिंकरो
मीत्युवाचह ॥ ४ ॥ तमुवाचविरिंचस्तुदर्शयन्रुद्रमोजसा ॥ हन्यतामेषदुर्बुद्धिर्जायतेनयथापुनः ॥ ५ ॥ ब्रह्मणोवचनंश्रुत्वाधनुरुद्यम्यपृष्ठतः ॥
संप्रतस्थेमहेशस्यबाणहस्तोऽतिरौद्रदृक् ॥ ६॥ दृष्ट्वापुरुषमत्युग्रंभीतस्तस्यत्रिलोचनः ॥ अपक्रांतस्ततोवेगाद्विष्णोराश्रममभ्यगात् ॥ ७ ॥ त्राहित्रा
हीतिमांविष्णोनरादस्माच्चशत्रुहन् ॥ ब्रह्मणानिर्मितःपापोम्लेच्छरूपोभयंकरः ॥ ८ ॥ यथाहन्यान्नमांक्रुद्धस्तथाकुरुजगत्पते ॥हुङ्कारध्वनिनाविष्णु
र्मोहयित्वातुतंनरम् ॥ ९ ॥ अदृश्यःसर्वभूतानांयोगात्माविश्वदृक्प्रभुः॥तत्रप्राप्तंविरूपाक्षंसांत्वयामासकेशवः ॥ १० ॥ ततस्सप्रणतोभूमौदृष्टोदेवेन
विष्णुना ॥ विष्णुरुवाच ॥ पौत्रोहिमेभवान्रुद्रकंतेकामंकरोम्यहम् ॥ ११॥ दृष्ट्वानारायणंदेवंभिक्षांदेहीत्युवाचह ॥ कपालंदर्शयित्वाग्रेप्रज्वलंस्तेज
सोत्कटम् ॥१२ ॥ कपालपाणिंसंप्रेक्ष्यरुद्रंविष्णुरचिन्तयत् ॥ कोऽन्योयोग्योभवेद्भिक्षुर्भिक्षादानस्यसांप्रतम्॥१३॥ योग्योऽयमितिसंकल्प्यदक्षिणं
भुजमर्पयत् ॥ तद्बिभेदातितीक्ष्णेनशूलेनशशिशेखरः॥ १४ ॥ प्रावर्तततत्तोधाराशोणितस्यविभोर्भुजात् ॥ जांबूनदरसाकारावह्निज्वालेवनिर्मिता

CC-0. In Public Domain. Digitization by eGangotri

॥ १५ ॥ निपपातकपालांतश्शम्भुनासाप्रभिक्षिता ॥ ऋज्वीवेगवतीतीव्रास्पृशंतीत्वंबरंजवात् ॥१६॥ पंचाशद्योजनादैर्घ्याद्विस्ताराद्दशयोजना ॥
दिव्यवर्षसहस्रंसासमुवाहहरेर्भुजात् ॥ १७ ॥ इयंतंकालमीशोऽसौभिक्षांजग्राहभिक्षुकः ॥ दत्तानारायणेनाथकापालेपात्रउत्तमे ॥ १८ ॥ ततोनाराय
णःप्राहशंभुंपरमिदंवचः ॥ संपूर्णंवानवापात्रंततोवैपरमेश्वरः ॥ १९ ॥ सतोयांबुदनिर्घोषंश्रुत्वावाक्यंहरेर्हरः ॥ शशिसूर्याग्निनयनःशशिशेखरशोभि
तः ॥ २० ॥ कपालेदृष्टिमावेश्यत्रिभिर्नेत्रैर्जनार्दनम् ॥ अंगुल्याघटयन्प्राहकपालंपरिपूरितम् ॥२१॥ श्रुत्वाशिवस्यतांवाणींविष्णुर्धारांसमाहरत् ॥
पश्यतोऽथहरेरीशःस्वांगुल्यारुधिरंतदा ॥२२॥ दिव्यवर्षसहस्रंचदृष्टिपातैर्ममंथसः॥ मथ्यमानेततोरक्तेकलिलंबुद्बुदंक्रमात् ॥ २३ ॥ बभूवचततः
पश्चात्किरीटीसशरासनः ॥ बद्धतूणीरयुगलोवृषस्कंधोऽङ्गुलित्रवान् ॥२४ ॥ पुरुषोवह्निसंकाशःकपालेसंप्रदृश्यते ॥ तंदृष्ट्वाभगवान्विष्णुःप्राहरुद्रमि
दंवचः ॥ २५ ॥ कपालेभवकोवायंप्रादुर्भूतोऽभवन्नरः ॥ वचःश्रुत्वाहरेरीशस्तमुवाचविभोशृणु ॥ २६ ॥ नरोनामैषपुरुषःपरमास्त्रविदांवरः ॥ भव
तोक्तोनरइतिनरस्तस्माद्भविष्यति ॥ २७ ॥ नरनारायणौचोभौयुगेख्यातौभविष्यतः ॥ संग्रामेदेवकार्येषुलोकानांपरिपालने ॥ २८ ॥ एषनारायण
सखोनरस्तस्माद्भविष्यति ॥ अथासुरवधेसाह्यंतवकर्त्तामहाद्युतिः ॥ २९ ॥ मुनिर्ज्ञानपरीक्षायांजेतालोकेभविष्यति ॥ तेजोऽधिकमिदंदिव्यंब्रह्मणः
पंचमंशिरः ॥३०॥ तेजसोब्रह्मणोदीप्ताद्भुजस्यतवशोणितात् ॥ ममदृष्टिनिपाताच्चत्रीणितेजांसियानितु ॥३१॥ तत्संयोगसमुत्पन्नःशत्रुंयुद्धेविजेष्य
ति ॥ अवध्यायेभविष्यंतिदुर्जयाअपिचापरे ॥३२॥ शक्रस्यचामराणांचतेषामेषभयंकरः ॥ एवमुक्त्वास्थितःशंभुर्विस्मितश्चहरिस्तदा॥३३॥कपाल
स्थःसतत्रैवतुष्टावहरकेशवौ ॥ शिरस्यंजलिमाधायतदावीरउदारधीः॥३४॥किंकरोमीतितौप्राहइत्युक्त्वाप्रणतःस्थितः॥तमुवाचहरःश्रीमान्ब्रह्मणास्वे
नतेजसा॥३५॥सृष्टोनरोधनुष्पाणिस्त्वमेनंतुनिषूदय॥इत्थमुक्तांजलिधरंस्तुवंतंशंकरोनरम्॥३६॥तथैवांजलिसंबद्धंगृहीत्वाचकरद्वयम् ॥उद्धृत्याथक
पालात्तंपुनर्वचनमब्रवीत् ॥३७॥ सएषपुरुषोरौद्रोयोमयावेदितस्तव॥विष्णुहुंकाररचितमोहनिद्रांप्रवेशितः ॥३८॥विबोधयैनंत्वरितमित्युक्त्वान्तर्दधे
हरः॥नारायणस्यप्रत्यक्षंनरेणानेनवैतदा ॥३९॥वामपादहतः सोऽपिसमुत्तस्थौमहाबलः ॥ततोयुद्धंसमभवत्स्वेदरक्तजयोर्महत्॥४०॥विस्फारितधनुः
शब्दंनादिताशेषभूतलम्॥कवचंस्वेदजस्यैकंरक्तजेनत्वपाकृतम्॥४१॥एवंसमेतयोर्युद्धेदिव्यंवर्षद्वयंतयोः॥युध्यतोःसमतीतंचस्वेदरक्तजयोर्नृप ॥४२॥
रक्तजंद्विभुजंदृष्ट्वास्वेदजंचैवसंगतौ॥विचिन्त्यवासुदेवोऽगाद्ब्रह्मणःसदनंपरम् ॥४३॥ससंभ्रममुवाचेदंब्रह्माणंमधुसूदनः ॥रक्तजेनाद्यभोब्रह्मन्स्वेदजोऽयं
निपातितः॥४४॥श्रुत्वैतदाकुलोब्रह्माबभाषेमधुसूदनम्॥हरेऽद्यजन्मनिनरोमदीयोजीवतादयम्॥४५॥तथातुष्टोऽब्रवीत्तंचविष्णुरेवंभविष्यति॥गत्वात

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योरणमपिनिवार्याहचतावुभौ॥४६॥अन्यजन्मनिभविताकलिद्वापरयोर्मिथः ॥ सधौमहारणेजातेतत्राहंयोजयामिवाम्॥४७॥विष्णुनातुसमाहूयग्रहे
श्वरसुरेश्वरौ॥उक्ताविमौनरौभद्रौपालनीयौममाज्ञया॥४८॥सहस्रांशोस्वेदजोऽयंस्वकीयोंऽशोधरातले॥द्वापरांतेऽवतार्योऽयंदेवानांकार्यसिद्धये॥४९॥
यदूनांतुकुलेभावीशूरोनाममहाबलः ॥तस्यकन्यापृथानामरूपेणाप्रतिमाभुवि॥ ५०॥उत्पत्स्यतिमहाभागादेवानांकार्यसिद्धये ॥ दुर्वासास्तुवरंतस्यै
मंत्रग्रामंप्रदास्यति ॥ ५१ ॥ मंत्रेणानेनयंदेवंभक्त्याआवाहयिष्यति ॥ देवितस्यप्रसादात्तुतवपुत्रोभविष्यति ॥ ५२ ॥ साचत्वामुदयेदृष्ट्वासा
भिलाषारजस्वला ॥ चिंताभिपन्नातिष्ठंतीभजितव्याविभावसो ॥ ५३ ॥ तस्यागर्भेत्वयंभावीकानीनःकुंतिनंदनः ॥ भविष्यतिसुतोदेवदेवकार्यार्थ
सिद्धये ॥ ५४ ॥ तथेतिचोक्त्वाप्रोवाचतजोराशिर्दिवाकरः ॥ पुत्रमुत्पादयिष्यामिकानीनंबलगर्वितम् ॥ ५५ ॥ यस्यकर्णेतिवैनामलोकःसर्वोव
दिष्यति ॥ मत्प्रसादादस्यविष्णोविप्राणांभावितात्मनः ॥ ५६ ॥ अदेयंनास्तिवैलोकेवस्तुकिंचिच्चकेशव ॥ एवंप्रभावंचैवैनंजनयेवचनात्तव ॥
॥ ५७ ॥ एवमुक्त्वासहस्रांशुर्देवंदानवघातिनम् ॥ नारायणंमहात्मानंतत्रैवांतर्दधेरविः ॥ ५८ ॥ अदर्शनंगतेदेवेभास्करेवारितस्करे ॥ वृद्धश्रवसम
प्येवमुवाचप्रीतमानसः ॥ ५९ ॥ सहस्रनेत्ररक्तोत्थोनरोऽयंमदनुग्रहात् ॥ स्वांशभूतोद्वापरांतेयोक्तव्योभूतलेत्वया ॥६०॥ यदापांडुर्महाभागःपृथां
भार्यामवाप्स्यति ॥ माद्रींचापिमहाभागतदारण्यंगमिष्यति ॥ ६१ ॥ तस्याप्यरण्यसंस्थस्यमृगःशापंप्रदास्यति ॥ तेनचोत्पन्नवैराग्यःशतशृंगं
गमिष्यति ॥ ६२ ॥ पुत्रानभीप्सन्क्षेत्रोत्थान्भार्यांसप्रवदिष्यति ॥ अनीप्संतीतदाकुंतीभर्त्तारंसावदिष्यति ॥ ६३ ॥ नाहंमर्त्यस्यवैराजन्पुत्रानि
च्छेकथंचन ॥ दैवतेभ्यःप्रसादाच्चपुत्रानिच्छेनराधिप ॥ ६४ ॥ प्रार्थयंत्यैत्वयाशक्रकुंत्यैदेयोनरस्ततः ॥ वचसाचमदीयेनएवंकुरुशचीपते ॥६५॥
अथाब्रवीत्तदाविष्णुंदेवेशोदुःखितोवचः ॥ अस्मिन्मन्वंतरेऽतीतेचतुर्विंशतिकेयुगे ॥ ६६ ॥ अवतीर्यरघुकुलेगृहेदशरथस्यच ॥ रावणस्यवधार्थाय
शांत्यर्थंचदिवौकसाम् ॥ ६७ ॥ रामरूपेणभवतासीतार्थमटतावने ॥ मत्पुत्रोहिंसितोदेवसूर्यपुत्रहितार्थिना ॥ ६८ ॥ वालिनामाप्लवंगेंद्रःसुग्रीवार्थे
त्वयायतः ॥ दुःखेनानेनलप्तोऽहंगृह्णामिनसुतंनरम् ॥ ६९ ॥ अगृह्णमानंदेवेंद्रंकारणांतरवादिनम् ॥ हरिःप्रोचेशुनासीरंभुवोभारावतारणे ॥ ७० ॥
अवतारंकरिष्यामिमर्त्यलोकेत्वहंप्रभो ॥ सूर्यपुत्रस्यनाशार्थंजयार्थमात्मजस्यते ॥ ७१ ॥ सारथ्यंचकरिष्यामिनाशंकुरुकलस्यच ॥ ततोहृष्टो
ऽभवच्छक्रोविष्णुवाक्येनतेनह ॥ ७२ ॥ प्रतिगृह्यनरंहृष्टःसत्यंचास्तुवचस्तव ॥ एवमुक्त्वावरंदेवःप्रेषयित्वाच्युतःस्वयम् ॥ ७३ ॥ गत्वातुपुंडरी
काक्षोब्रह्माणंप्राहवैपुनः ॥ त्वयासृष्टमिदंसर्वंत्रैलोक्यंसचराचरम् ॥७४॥ आवांकार्यस्यकरणेसहायौचतवप्रभो ॥ स्वयंकृत्वापुनर्नाशंकर्तुंदेवनबुध्यसे

७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥७५॥ कृतंजुगुप्सितंकर्मशम्भुमेतंजिघांसता ॥ त्वयाचदेवदेवस्यसृष्टःकोपेनवैपुमान् ॥७६॥ शुद्ध्यर्थमस्यपापस्यप्रायश्चित्तंपरंकुरु ॥ गृह्णन्वह्नित्रयं
देवअग्निहोत्रमुपाहर ॥ ७७ ॥ पुण्यतीर्थेतथादेशेवनेवापिपितामह ॥ स्वपत्न्यासहितोयज्ञंकुरुष्वास्मत्परिग्रहात् ॥ ७८ ॥ सर्वेदेवास्तथादित्यारुद्रा
श्चापिजगत्पते ॥ आदेशंतेकरिष्यंतियतोऽस्माकंभवान्प्रभुः ॥ ७९ ॥ एकोहिगार्हपत्योऽग्निर्दक्षिणाग्निर्द्वितीयकः ॥ आहवनीयस्तृतीयस्तुत्रिकुंडेषुप्रक
ल्पय ॥ ८० ॥ वर्तुलेत्वर्चयात्मानम्मामथोधनुराकृतौ॥ चतुःकोणेहरंदेवमृग्यजुःसामनामभिः ॥ ८१ ॥ अग्नीनुत्पाद्यतपसापरामृद्धिमवाप्यच ॥
दिव्यंवर्षसहस्रंतुहुत्वाग्नीन्शमयिष्यसि ॥८२॥ अग्निहोत्रात्परंनान्यत्पवित्रमिहपठ्यते॥सुकृतेनाग्निहोत्रेणप्रशुद्ध्यंतिसुविद्विजाः ॥८३॥ पंथानोदेवलो
कस्यब्राह्मणैर्दर्शितास्त्वमी ॥एकोऽग्निःसर्वदाधार्योगृहस्थेनद्विजन्मना ॥८४॥विनाग्निनाद्विजेनेहगार्हस्थ्यन्नतुलभ्यते॥भीष्मउवाच॥योऽसौकपालादु
त्पन्नोनरोनामधनुर्द्धरः ॥ ८५ ॥ किमेषमाधवाज्जातउताहोस्वेनकर्मणा॥ उतरुद्रेणजनितोह्यथवाबुद्धिपूर्वकम् ॥ ८६ ॥ ब्रह्मन्हिरण्यगर्भोऽयमंडजात
श्चतुर्मुखः ॥ अद्भुतंपञ्चमंतस्यवक्त्रंतत्कथमुत्थितम् ॥८७॥ सत्वेरजोनदृश्येतनसत्वंरजसिक्वचित् ॥ सत्वस्थोभगवान्ब्रह्माकथमुद्रेकमादधात् ॥८८॥
मूढात्मनानरोयेनहंतुंहिप्रहितोहरम्॥ ॥ पुलस्त्यउवाच ॥ महेश्वरहरीचैतौद्वावेवसत्पथिस्थितौ ॥८९॥ तयोरविदितंनास्तिसिद्धासिद्धंमहात्मनोः ॥
ब्रह्मणःपंचमंवक्त्रमूर्द्धमासीन्महात्मनः ॥९०॥ ततोब्रह्माऽभवन्मूढोरजसाचोपबृंहितः॥ततोऽयंतेजसासृष्टिममन्यतमयाकृताम्॥९१॥मत्तोऽन्योनास्ति
वैदेवोयेनसृष्टिःप्रवर्तिता ॥ सहदेवाःसगंधर्वाःपशुपक्षिमृगाकुलाः ॥ ९२ ॥ एवंमूढःसपश्चास्योविरिंचिरभवत्पुनः ॥ प्राग्वक्त्रंमुखमेतस्यऋग्वेदस्यप्रव
र्तकम् ॥ ९३ ॥ द्वितीयंवदनंतस्ययजुर्वेदप्रवर्तकम् ॥ तृतीयंसामवेदस्यअथर्वार्थंचतुर्थकम् ॥ ९४ ॥ सांगोपांगेतिहासांश्चसरहस्यान्ससंग्रहान् ॥ वेदा
नधीतेवक्त्रेणपंचमेनोर्द्ध्वचक्षुषा ॥ ९५ ॥ तस्यासुरसुराःसर्वेवक्त्रस्याद्भुतवर्चसः ॥ तेजसानप्रकाशंतेदीपाःसूर्योदयेयथा ॥९६॥ स्वपुरेष्वपिसोद्वेगाह्यव
तंतविचेतसः ॥ नकंचिद्गणयेच्चान्यंतेजसाक्षिपतेपरान् ॥ ९७ ॥ नाभिगंतुंनचद्रष्टुंपुरस्तान्नोपसर्पितुम्॥ शेकुस्त्रस्ताःसुरास्सर्वेपद्मयोनिंमहाप्रभुम् ॥
॥९८॥अभिभूतमिवात्मानंमन्यमानाहतत्विषः॥सर्वेतेमंत्रयामासुर्दैवताहितमात्मनः ॥९९॥गच्छामःशरणंशंभुंनिस्तेजसोऽस्यतेजसा ॥ देवाऊचुः ॥
नमस्तेसर्वसत्वेशमहेश्वरनमोनमः ॥ १०० ॥ जगद्योनेपरंब्रह्मभूतानांत्वंसनातनः ॥ प्रतिष्ठासर्वजगतांत्वंहेतुर्विष्णुनासह ॥ १०१ ॥ एवंसंस्तूयमानो
ऽसौदेवर्षिपितृदानवैः ॥ अंतर्हितउवाचेदंदेवाःप्रार्थयतेप्सितम् ॥ १०२ ॥ देवाऊचुः ॥ प्रत्यक्षदर्शनंदत्वादेहिदेवयथेप्सितम् ॥ कृत्वाकारुण्यमस्माकं
वरश्चापिप्रदीयताम् ॥१०३॥ यदस्माकंमहद्वीर्यंतेजओजःपराक्रमः ॥ तत्सर्वंब्रह्मणाग्रस्तंपंचमास्यस्यतेजसा ॥१०४॥ विनेशुःसर्वतेजांसित्वत्प्रसादा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्पुनःप्रभो ॥ जायतेतुयथापूर्वंतथाकुरुमहेश्वर ॥१०५॥ ततःप्रसन्नवदनोदेवैश्चापिनमस्कृतः ॥ जगामयत्रब्रह्मासौरजोऽहंकारमूढधीः ॥१०६॥ स्तुवं
तोदेवदेवेशंपरिवार्यसमाविशन् ॥ ब्रह्मातमागतंरुद्रंनजज्ञेरजसावृतः ॥ १०७ ॥ सूर्यकोटिसहस्राणांतेजसारंजयञ्जगत् ॥ तदाऽदृश्यतविश्वात्माविश्वसृ
ग्विश्वभावनः ॥१०८॥ सपितामहमासीनंसकलंदेवमंडलम् ॥अभिगम्यततोरुद्रोब्रह्माणंपरमेष्ठिनम् ॥१०९॥ अहोऽतितेजसावक्त्रमधिकंदेवराजते ॥
एवमुक्त्वाट्टहासंतुमुमोचशशिशेखरः ॥११०॥ वामांगुष्ठनखाग्रेणब्रह्मणःपंचमंशिरः ॥चकर्तकदलीगर्भंनरःकररुहैरिव ॥१११॥ विच्छिन्नंतुशिरःपश्चा
द्भवहस्तेस्थितंतदा ॥ ग्रहमंडलमध्यस्थोद्वितीयइवचंद्रमाः ॥११२॥ करोत्क्षिप्तकपालेननर्तमहेश्वरः॥शिखरस्थेनसूर्येणकैलासइवपर्वतः ॥११३॥
छिन्नेवक्त्रेततोदेवाहृष्टास्तंवृषभध्वजम्॥तुष्टुवुर्विविधैःस्तोत्रैर्देवदेवंकपर्दिनम् ॥ ११४ ॥ देवाऊचुः ॥नमःकपालिनेनित्यंमहाकालस्यकालिने ॥ ऐश्वर्य
ज्ञानयुक्तायसर्वभागप्रदायिने ॥ ११५ ॥ नमोहर्षविलासायसर्वदेवमयायच ॥ कलौसंहारकर्तात्वंमहाकालः स्मृतोह्यसि ॥ ११६ ॥ भक्तानामार्ति
नाशस्त्वंदुःखांतस्तेनचोच्यसे ॥ शंकरोष्याशुभक्तानांतेनत्वंशंकरः स्मृतः ॥ ११७ ॥ छिन्नंब्रह्मशिरोयस्मात्त्वंकपालंबिभर्षिच ॥ तेनदेवकपालीत्वं
स्तुतोह्यद्यप्रसीदनः ॥११८॥ एवंस्तुतःप्रसन्नात्मादेवान्प्रस्थाप्यशंकरः ॥स्वानिधिष्ण्यानिभगवांस्तत्रैवासीन्मुदान्वितः ॥११९॥ विज्ञायब्रह्मणोभा
वंततोवीरस्यजन्मच॥ शिरोनीरस्यवाक्याच्चुलोकानांकोपशांतये ॥१२०॥ शिरस्यञ्जलिमाधायतुष्टावाथप्रणम्यतम् ॥ तेजोनिधिपरंब्रह्मज्ञातुमित्थंप्र
जापतिम् ॥१२१॥ निरुक्तसूक्तरहस्यैर्ऋग्यजुःसामभाषितैः ॥ ॥रुद्रउवाच ॥ अप्रमेयनमस्तेऽस्तुपरमस्यपरात्मने ॥१२२॥ अद्भुतानांप्रसूतिस्त्वंतेज
सांनिधिरक्षयः॥विजयाद्विश्वभावस्त्वंसृष्टिकर्तामहाद्युते ॥१२३॥ ऊर्द्ध्ववक्त्रनमस्तेऽस्तुसत्वात्मकधरात्मक ॥ जलशायिञ्जलोत्पन्नजलालयनमोऽस्तु
ते ॥ १२४ ॥जलजोत्फुल्लपत्राक्षजयदेवपितामह ॥ त्वयाह्युत्पादितः पूर्वंसृष्ट्यर्थमहमीश्वर ॥१२५॥ यज्ञाहुतिसदाहारयज्ञांगेशनमोऽस्तुते ॥ स्वर्णग
र्भपद्मगर्भदेवगर्भप्रजापते ॥१२६॥त्वंयज्ञस्त्वंवषट्कारः स्वधात्वंपद्मसंभव॥वचनेनतुदेवानांशिरश्छिन्नंमयाप्रभो ॥१२७॥ ब्रह्महत्याभिभूतोऽस्मिमां
त्वंपाहिजगत्पते॥इत्युक्तोदेवदेवेनब्रह्मावचनमब्रवीत ॥१२८॥ ब्रह्मोवाच ॥ ॥ सखानारायणोदेवः सत्वांपूतंकरिष्यति ॥ कीर्तनीयस्त्वयाधन्यःसमेपू
ज्यःस्वयंविभुः॥१२९॥अनुध्यातोऽसिवैनूनंतेनदेवेनविष्णुना॥येनतेभक्तिरुत्पन्नास्तोतुंमांमतिरुत्थिता॥१३०॥शिरश्छेदात्कपालीत्वंसोमसिद्धांतका
रकः॥ कोटीःशतंचविप्राणामुद्धर्तासिमहाद्युते ॥१३१॥ ब्रह्महत्याव्रतंकुर्यान्नान्यत्किंचनविद्यते॥अभाष्याः पापिनःक्रूराब्रह्मघ्नाःपापकारिणः ॥१३२॥
वैतानिकाविकर्मस्थानतेभाष्याःकथंचन ॥तैस्तुदृष्टैस्तथाकार्यंभास्करस्यावलोकनम् ॥१३३॥ अंगस्पर्शेकृतेरुद्रसचैलोजलमाविशेत् ॥ एवंशुद्धिमवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रोतिपूर्वंदृष्टांमनीषिभिः॥१३४॥सभवान्ब्रह्महन्तासिशुद्ध्यर्थंव्रतमाचर ॥ चीर्णेव्रतेपुनर्भूयःप्राप्स्यसित्वंवरान्बहून्॥१३५॥एवमुक्त्वागतोब्रह्मारुद्रस्त
त्राभिजज्ञिवान् ॥ अचिंतयत्तदाविष्णुंध्यानगत्याततः स्वयम् ॥ १३६॥ लक्ष्मीसहायंवरदंदेवदेवंसनातनम् ॥ अष्टांगप्रणिपातेनदेवदेवस्त्रिलोचनः
॥१३७॥तुष्टावप्रणतोभूत्वाशंखचक्रगदाधरम्॥रुद्रउवाच॥परंपराणाममृतंपुराणंपरात्परंविष्णुमनंतवीर्यम्॥१३८॥स्मरामिनित्यम्पुरुषंवरेण्यंनारायणं
निष्प्रतिमंपुराणम्॥परात्परंपूर्वजमुग्रवेगंगंभीरगम्भीरधियांप्रधानम् ॥१३९॥ नतोऽस्मिदेवंहरिमीशितारंपरात्परंधामपरंचधाम॥परापरंतत्परमंचधा
मपरापरेशंपुरुषंविशालम् ॥ १४० ॥ नारायणंस्तौमिविशुद्धभावंपरापरंसूक्ष्ममिदंससर्ज ॥ सदास्थितत्वात्पुरुषंप्रधानंशांतंप्रधानंशरणंममा
स्तु ॥ १४१ ॥ नारायणंवीतमलंपुराणंपरात्परंविष्णुमपारपारम् ॥ पुरातनंनीतिमतांप्रधानंधृतिक्षमाशांतिपरंक्षितीशम् ॥ १४२ ॥ शुभंसदा
स्तौमिमहानुभावंसहस्रमूर्द्धानमनेकपादम् ॥ अनंतबाहुंशशिसूर्यनेत्रंक्षराक्षरंक्षीरसमुद्रनिद्रम् ॥१४३ ॥ नारायणंस्तौमिपरम्परेशंपरात्परंयत्रिदशैरग
म्यम् ॥ त्रिसर्गसंस्थंत्रिहुताशनेत्रंत्रितत्त्वलक्ष्यंत्रिलयंत्रिनेत्रम् ॥ १४४ ॥ नमामिनारायणमप्रमेयंकृतसितंद्वापरतश्चरक्तम् ॥ कलौचकृष्णंतमथोन
मामिससर्जयोवक्रतएव विप्रान् ॥ १४५ ॥ भुजांतरात्क्षत्रमथोरुयुग्माद्विशः पदाग्राच्चतथैवशूद्रान् ॥ नमामितंविश्वतनुंपुराणंपरात्परंपारगमप्रमेयम्
॥ १४६ ॥ सूक्ष्ममूर्त्तिमहामूर्त्तिविद्यामूर्त्तिममूर्त्तिकम् ॥ कवचंसर्वदेवानांनमस्येवारिजेक्षणम् ॥ १४७ ॥ सहस्रशीर्षदेवेशंसहस्राक्षंमहाभुजम् ॥ जग
त्संव्याप्यतिष्ठंतंनमस्येपरमेश्वरम् ॥१४८॥ शरण्यंशरणंदेवंविष्णुंजिष्णुंसनातनम् ॥नीलमेघप्रतीकाशंनमस्येशार्ङ्गपाणिनम् ॥१४९॥ शुद्धंसर्वगतंनि
त्यंव्योमरूपंसनातनम् ॥ भावाभावविनिर्मुक्तंनमस्येसर्वगंहरिम् ॥ १५० ॥ नचात्रकिंचित्पश्यामिव्यतिरिक्तंतवाच्युत ॥ त्वन्मयंचप्रपश्यामिसर्वमे
तच्चराचरम् ॥१५१॥ एवंतुवदतस्तस्यरुद्रस्यपरमेष्ठिनः॥ इतीरितस्तेनसनातनःस्वयंपरात्परस्तस्यबभूवदर्शने॥१५२॥ रथांगपाणिर्गरुडासनोगिरिं
विदीपयन्भास्करवत्समुत्थितः ॥ वरंवृणीष्वेतिसनातनोऽब्रवीद्धरस्तवाहंवरदः समागतः ॥१५३॥ इतीरितेरुद्रवरोजगादममातिशुद्धिर्भवितासुरेश ॥
नचास्यपापस्यहरंहिचान्यत्संदृश्यतेऽन्यच्चऋतेभवंतम्॥१५४॥ब्रह्महत्याभिभूतस्यतनुर्मेकृष्णतांगता॥शवगंधश्चमेगात्रेलोहस्याभरणानिमे॥१५५॥
कथंमेनभवेद्देवमेतद्रूपंजनार्दन ॥ किंकरोमिमहादेवयेनमेपूर्विकातनुः ॥ १५६ ॥ त्वत्प्रसादेनभवितातन्मेकथयचाच्युत ॥ विष्णुरुवाच ॥ ब्रह्मवध्या
पराचोग्रासर्वकष्टप्रदापरा ॥ १५७ ॥ मनसापिनकुर्वीतपापस्यास्यतुभावनाम् ॥ भवतादेववाक्येननिष्ठाचैषानिबोधिता ॥ १५८ ॥ इदानींत्वंमहा
बाहोब्रह्मणोक्तंसमाचर ॥ भस्मसर्वाणिगात्राणित्रिकालंघर्षयेस्तनौ ॥ १५९ ॥ शिखायांकर्णयोश्चैवकरेचास्थीनिधारय ॥ एवंचकुर्वतोरुद्रकष्टंनैवभ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विष्यति ॥१६०॥ संदिश्यैवंसभगवांस्ततोऽतर्धानमीश्वरः ॥ लक्ष्मीसहायोगतवान्रुद्रस्तनाभिजञ्जिवान् ॥ १६१ ॥ कपालपाणिर्देवेशः पर्य
टन्वसुधामिमाम् ॥ हिमवंतंसमैनाकंमेरुणाचसहैवतु ॥ १६२ ॥ कैलासंसकलंविंध्यंनीलंचैवमहागिरिम् ॥ कांचींकाशींताम्रलिप्तांमगधा
माविलांतथा ॥ १६३ ॥ वत्सगुल्मंचगोकर्णंतथाचैवोत्तरान्कुरून् ॥ भद्राश्वंकेतुमालंचवर्षंहैरण्यकंतथा ॥ १६४ ॥ कामरूपंप्रभासं
चमहेन्द्रंचैवपर्वतम् ॥ ब्रह्महत्याभिभूतोऽसौभ्रमंस्त्राणंनविंदति ॥ १६५ ॥ त्रपान्वितःकपालंतुपश्यन्हस्तगतंसदा ॥ करौविधुन्वन्बहुशो
विक्षिप्तश्चमुहुर्मुहुः ॥ १६६ ॥ यदास्यधुन्वतोहस्तौकपालंपततेनतु ॥ तदास्यबुद्धिरुत्पन्नाव्रतंचैतत्करोम्यहम् ॥ १६७ ॥ मदीयेनैवमार्गेण
द्विजायास्यंतिसर्वतः ॥ ध्यात्वैवंसुचिरंदेवोवसुधांविचचारह ॥ १६८ ॥ पुष्करंतुसमासाद्यप्रविष्टोऽरण्यमुत्तमम् ॥ नानाद्रुमलताकीर्णंनानामृगरवा
कुलम् ॥१६९॥ द्रुमपुष्पभरामोदवासितंयत्सुवायुना ॥ बुद्धिपूर्वमिवन्यस्तैःपुष्पैर्भूषितभूतलम् ॥ १७० ॥ नानागंधरसैरन्यैःपक्वापक्वैःफलैस्तथा॥
विवेशतरुवृंदेनपुष्पामोदाभिनंदितः ॥ ७१ ॥ अत्राराधयतोभक्त्याब्रह्मादास्यतिमेवरम् ॥ ब्रह्मप्रसादात्संप्राप्तंपौष्करंज्ञानमीप्सितम् ॥ ७२ ॥ पाप
घ्नंदुष्टशमनंपुष्टिश्रीबलवर्द्धनम् ॥ एवंवैध्यायतस्तस्यरुद्रस्यामिततेजसः ॥ ७३ ॥ आजगामततोब्रह्माभक्तिप्रीतोऽथकंजजः॥ उवाचप्रणतंरुद्रमुत्था
प्यचपुनर्गुरुः ॥ ७४ ॥ दिव्यव्रतोपचारेणसोऽहमाराधितस्त्वया ॥ भवताश्रद्धयात्यर्थंममदर्शनकांक्षया ॥ ७५ ॥ व्रतस्थामांहिपश्यंतिमनुष्यादेव
तास्तथा ॥ तदिच्छयाप्रयच्छामिवरंयत्प्रवरंवरम् ॥ ७६ ॥ सर्वकामप्रसिद्ध्यर्थंव्रतंयस्मान्निषेवितम् ॥ मनोवाक्कायभावैश्चसंतुष्टेनांतरात्मना ॥७७॥
कंददामिचवैकामंवदभोस्तेयथेप्सितम् ॥ रुद्रउवाच ॥ एषएवाद्यभगवन्सुपर्याप्तोमहावरः ॥७८॥ यद्दृष्टोऽसिजगद्वंद्यजगत्कर्तर्नमोऽस्तुते ॥ महताय
ज्ञसाध्येनबहुकालार्जितेनच ॥ ७९ ॥ प्राणव्ययकरेणत्वंतपसादेवदृश्यते ॥ इमंकपालंदेवेशनकरात्पतितंविभो ॥ १८० ॥ त्रपाकरात्रऋषीणांचचर्यै
षाकुत्सिताविभो ॥ त्वत्प्रसादाद्व्रतंचेदंकृतंकापालिकंतुयत् ॥८१॥ सिद्धमेतत्प्रपन्नस्यमहाव्रतमिहोच्यताम् ॥ पुण्यप्रदेशेयस्मिंस्तुक्षिपामीदंवदस्व
मे ॥ ८२ ॥ पूतोभवामियेनाहंमुनीनांभावितात्मनाम् ॥ ॥ ब्रह्मोवाच ॥ ॥ अविमुक्तंभगवतःस्थानमस्तिपुरातनम् ॥८३॥ कपालमोचनंतीर्थंतव
तत्रभविष्यति॥ अहंचत्वंस्थितस्तत्रविष्णुश्चापिभविष्यति॥८४॥दर्शनेभवतस्तत्रमहापातकिनोऽपिये॥तेऽपिभोगान्समश्नंतिविशुद्धाभवनेमम॥८५॥
वरणापिअसीचापिद्वेनद्यौसुरवल्लभे ॥ अंतरालेतयोःक्षेत्रेवध्यानविशतिक्वचित् ॥ ८६ ॥ तीर्थानांप्रवरंतीर्थंक्षेत्राणांप्रवरंतव ॥ आदेहपतनाद्येतुक्षेत्रं
सेवंतिमानवाः ॥ ८७ ॥ तेमृताहंसयानेनदिवंयांत्यकुतोभयाः ॥ पंचक्रोशप्रमाणेनक्षेत्रंदत्तंमयातव ॥ ८८ ॥ क्षेत्रमध्याद्यदागंगागमिष्यतिसरित्प

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिम् ॥ तदासामहतीपुण्यापुरीरुद्रभविष्यति ॥ ८९ ॥ पुण्याचोदङ्मुखीगंगाप्राचीचापिसरस्वती॥उदङ्मुखीयोजनेद्वेगच्छतेजाह्नवीनदी ॥१९०॥
तत्रवैविबुधाःसर्वेमयासहसवासवाः ॥ आगतावासमेष्यंतिकपालंतत्रमोचय ॥ ९१ ॥ तस्मिंस्तीर्थेतुयेगत्वापिंडदानेनवैपितॄन् ॥ श्राद्धैस्तुप्रीण
यिष्यंतितेषांलोकोऽक्षयोदिवि ॥९२॥ वाराणस्यांमहातीर्थेनरःस्नातोविमुच्यते॥सप्तजन्मकृतात्पापाद्गमनादेवमुच्यते ॥९३॥तत्तीर्थंसर्वतीर्थानामुत्तमं
परिकीर्तितम् ॥ त्यजंतितत्रयेप्राणान्प्राणिनःप्रणतास्तव ॥ ९४ ॥ रुद्रत्वंतेसमासाद्यमोदंतेभवतासह ॥ तत्रापिहितुयद्दत्तंदानंरुद्रयतात्मना ॥ ९५ ॥
स्यान्महच्चफलंतस्यभविताभावितात्मनः ॥ स्वांगस्फुटितसंस्कारंतत्रकुर्वंतियेनराः ॥ ९६ ॥ तेरुद्रलोकमासाद्यमोदंतेसुखिनःसदा ॥
तत्रपूजाजपोहोमःकृतोभवतिदेहिनाम् ॥ ९७ ॥ अनंतफलदः स्वर्गोरुद्रभक्तियुतात्मनः ॥ तत्रदीपप्रदानेतुज्ञानचक्षुर्भवेन्नरः ॥ ९८ ॥ अव्यंगंतरुणं
सौम्यंरूपवंतंतुगोसुतम् ॥ योऽङ्कयित्वामोचयतिसयातिपरमंपदम् ॥ ९९ ॥ पितृभिःसहितोमोक्षंगच्छतेनात्रसंशयः ॥ अथकिंबहुनोक्तेनयत्तत्रक्रि
यतेनरैः ॥ २०० ॥ कर्मधर्मंसमुद्दिश्यतदनंतफलंभवेत् ॥ स्वर्गापवर्गयोर्हेतुस्तद्धितीर्थम्मतंभुवि ॥ १ ॥ स्नानाज्जपात्तथाहोमादनंतफलसाधनम्॥
गत्वावाराणसीतीर्थंभक्त्यारुद्रपरायणाः ॥ २ ॥ येतत्रपंचतांप्राप्ताभक्तास्तेनात्रसंशयः ॥ वसवःपितरोज्ञेयारुद्राश्चैवपितामहाः ॥ ३ ॥ प्रपितामहा
स्तथादित्याइत्येषावैदिकीश्रुतिः ॥ त्रिविधःपिंडदानायविधिरुक्तोमयानघ ॥ ४ ॥ मानुषैःपिंडदानंतुकार्यमत्रागतैस्सदा ॥ पिंडदानंचतत्रैवस्वपु
त्रैःकार्यमादरात् ॥ ५ ॥ सुपुत्रास्तेपितॄणांतुभवंतिसुखदायकाः ॥ प्रोक्तंतीर्थंमयातुभ्यंदर्शनादपिमुक्तिदम् ॥ ६ ॥ स्नात्वातुसलिलेतत्रमुच्यतेज
न्मबंधनात् ॥ विमुक्तोब्रह्महत्यायास्तत्ररुद्रयथासुखम् ॥ ७ ॥ अविमुक्तेमयादत्तेतिष्ठत्वंभार्ययासह ॥ ॥ रुद्रउवाच ॥ पृथिव्यांयानितीर्थानितेष्व
हंविष्णुनासह ॥ ८ ॥ तिष्ठामिभवतोक्तेनवरएषवृतोमया ॥ अहंदेवोमहादेवआराध्योभवतासदा ॥ ९ ॥ वरंदास्यामितेचाहंसंतुष्टेनांतरात्मना ॥
विष्णोश्चाहंप्रदास्यामिवरांश्चमनसीप्सितान् ॥२१०॥ सुराणांचैवसर्वेषांमुनीनांभावितात्मनाम्॥ अहंदाताअहंयाच्योनान्योभाव्यःकथंचन ॥११॥
ब्रह्मोवाच ॥ एवंकरिष्येऽहंरुद्रयत्त्वयोक्तंवचःशुभम् ॥ नारायणश्चतेवाक्यंकर्तासर्वंनसंशयः ॥ १२ ॥ विसृज्यैवंतदारुद्रंब्रह्माचांतरधीयत ॥ वाराण
स्यांमहादेवोगत्वातीर्थंन्यवेशयत् ॥ १३ ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखंडेरुद्रस्यब्रह्मवध्यानाशश्चतुर्दशोऽध्यायः ॥ १४ ॥ भीष्मउवाच ॥किंकृ
तंब्रह्मणाब्रह्मन्प्रेष्यवाराणसीपुरीम् ॥ जनार्दनेनकिंकर्मशंकरेणचयन्मुने ॥ १ ॥ कथंयज्ञःकृतस्तेनकस्मिंस्तीर्थेवदस्वमे ॥ केसदस्याऋत्विजश्चसर्वा
स्तान्प्रब्रवीहिमे ॥ २ ॥ केदेवास्तर्पितास्तेनएतन्मेकौतुकंमहत् ॥ पुलस्त्यउवाच ॥ श्रीनिधानंपुरंमेरोःशिखरेरत्नचित्रितम् ॥ ३ ॥ अनेकाश्चर्यनि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लयंबहुपादपसंकुलम् ॥ विचित्रधातुभिश्चित्रंस्वच्छस्फटिकनिर्मलम् ॥ ४ ॥ लतावितानशोभाढ्यंशिखिशब्दविनादितम् ॥ मृगेन्द्ररववित्रस्तगज यूथसमाकुलम् ॥५॥ निर्झरांबुप्रपातोत्थशीकरासारशीतलम् ॥ वाताहततरुव्रातप्रसन्नापानचित्रितम् ॥६॥ मृगनाभिवरामोदवासिताशेषकाननम् ॥ लतागृहरतिश्रान्तसुप्तविद्याधराध्वगम् ॥७॥ प्रगीतकिन्नरव्रातमधुरध्वनिनादितम्॥ तस्मिन्ननेकविन्यासशोभिताशेषभूमिकम् ॥८॥ वैराजंनामभवनं ब्रह्मणःपरमेष्ठिनः ॥ तत्रदिव्यांगनोद्गीतमधुरध्वनिनादिता ॥ ९ ॥पारिजाततरूत्पन्नमंजरीदाममालिनी॥रत्नरश्मिसमूहोत्थबहुवर्णविचित्रिता॥१०॥ विन्यस्तस्तंभकोटिस्तुनिर्मलादर्शशोभिता ॥ अप्सरोनृत्यविन्यासविलासोल्लासलासिता॥११॥बह्वातोद्यसमुत्पन्नसमूहस्वननादिता ॥ लयतालयुता नेकगीतवादित्रशोभिता ॥ १२ ॥ सभाकांतिमतीनामदेवानांशर्मदायिका ॥ ऋषिसंघसमायुक्तामुनिवृंदनिषेविता ॥१३॥ द्विजातिसामशब्देननादि तानंददायिनी ॥ तस्यांनिविष्टोदेवेशःसंध्यासक्तःपितामहः ॥१४॥ ध्यायतिस्मपरंदेवंयेनेदंनिर्मितंजगत् ॥ ध्यायतोबुद्धिरुत्पन्नाकथंयज्ञंकरोम्यहम् ॥ १५ ॥ कस्मिन्स्थानेमयायज्ञःकार्यःकुत्रधरातले ॥ काशीप्रयागस्तुंगाचनैमिषंशृंखलंतथा ॥ १६ ॥ कांचीभद्रादेविकाचकुरुक्षेत्रंसरस्वती ॥ प्रभासादीनितीर्थानि पृथिव्यामिहमध्यतः ॥ १७ ॥ क्षेत्राणिपुण्यतीर्थानिसंतियानीहसर्वशः ॥ मदादेशाच्चरुद्रेणकृतान्यन्यानिभूतले ॥१८॥ यथा हंसर्वदेवेषुआदिदेवोव्यवस्थितः ॥ तथाचैकंपरंतीर्थमादिभूतंकरोम्यहम् ॥ १९ ॥ अहंयत्रसमुत्पन्नःपद्मंतद्विष्णुनाभिजम् ॥ पुष्करंप्रोच्यतेतीर्थमृषि भिर्वेदपाठकैः ॥ २० ॥ एवंचिंतयतस्तस्यब्रह्मणस्तुप्रजापतेः ॥ मतिरेषासमुत्पन्नाव्रजाम्येषधरातले ॥ २१ ॥ प्राक्स्थानंससमासाद्यप्रविष्टस्तद्वनोत्त मम् ॥ नानाद्रुमलताकीर्णंनानापुष्पोपशोभितम् ॥ २२ ॥ नानापक्षिरवाकीर्णंनानामृगगणाकुलम् ॥ द्रुमपुष्पभरामोदैर्वासयद्यत्सुरासुरान् ॥ ॥ २३ ॥ बुद्धिपूर्वमिवन्यस्तैःपुष्पैर्भूषितभूतलम् ॥ नानागंधरसैःपक्कैःपक्वैश्चषड्तूद्भवैः ॥२४॥ फलैःसुवर्णरूपाढ्यैर्घ्राणदृष्टिमनोहरैः ॥ जीर्णपत्रंतृणं यत्रशुष्ककाष्ठफलानिच ॥ २५ ॥ बहिःक्षिपतिजातानिमारुतोऽनुग्रहादिव ॥ नानापुष्पसमूहानांगंधमादायमारुतः ॥ २६ ॥ शीतलोवातिखंभूमिं दिशोयत्राभिवासयन् ॥ हरितस्निग्धनिश्छिद्रैरकीटकवनोत्कटैः ॥ २७ ॥ वृक्षैरनेकसंज्ञैर्यद्भूषितंशिखरान्वितैः॥अरोगैर्दर्शनीयैश्चसुवृत्तैःकैश्चिदुज्ज्व लैः ॥ २८ ॥ कुटुंबमिवविप्राणामृत्विग्भिर्भातिसर्वतः ॥ शोभंतेधातुसंकाशैरंकुरैःप्रावृताद्रुमाः ॥ २९ ॥ कुलीनैरिवनिश्छिद्रैःस्वगुणैःप्रावृतानराः ॥ पवनाविद्धशिखरैःस्पृशन्तीवपरस्परम् ॥ ३० ॥ आजिघ्रंतीवचान्योन्यंपुष्पशाखावतंसकाः ॥ नागवृक्षाःक्वचित्पुष्पैर्द्रुमवानीरकेसरैः ॥ ३१ ॥ नयनैरिवशोभंतेचंचलैःकृष्णतारकैः ॥ पुष्पसंपन्नशिखराःकर्णिकारद्रुमाःक्वचित् ॥ ३२ ॥ युग्मयुग्माद्विधाचेहशोभन्तइवदंपती ॥ सुपुष्पप्रभवाटो

CC-0. In Public Domain. Digitization by eGangotri

पौर्स्सिदुवारद्रुपंक्तयः ॥ ३३ ॥ मूर्तिमत्यइवाभांतिपूजितावनदेवताः ॥ क्वचित्क्वचित्कुंदलताःसपुष्पाभरणोज्ज्वलाः ॥३४॥ दिक्षुवृक्षेषुशोभंतेबाल
चन्द्राइवोच्छ्रिताः ॥ सर्जार्जुनाःक्वचिद्भान्तिवनोद्देशेषुपुष्पिताः ॥ ३५ ॥ धौतकौशेयवासोभिःप्रावृताःपुरुषाइव ॥ अतिमुक्तकवल्लीभिःपुष्पिताभि
स्तथाद्रुमाः ॥ ३६ ॥ उपगूढाविराजंतेस्वनारीभिरिवप्रियाः ॥ अपरस्परसंसक्तैःसालाशोकाश्चपल्लवैः ॥ ३७ ॥ हस्तैर्हतान्स्पृशंतीवसुहृदश्चिरसंग
ताः ॥ फलपुष्पभरानम्राःपनसाःसरलार्जुनाः ॥ ३८ ॥ अन्योन्यमर्चयन्तीवपुष्पैश्चैवफलैस्तथा ॥ मारुतावेगसंश्लिष्टैःपादपाःसालबाहुभिः ॥
॥ ३९ ॥ अभ्याशमागतंलोकंप्रतिभावैरिवोत्थिताः ॥ पुष्पाणामवरोधेनसुशोभार्थंनिवेशिताः ॥ ४० ॥ वसन्तमहमासाद्यपुरुषान्स्पर्धयंतिहि ॥
पुष्पशोभाभरनुतैःशिखरैर्वायुकम्पितैः ॥४१॥नृत्यंतीवनराःप्रीताःस्रगलंकृतशेखराः॥शृंगाग्रपवनक्षिप्ताःपुष्पावलियुताद्रुमाः॥४२॥ सवल्लीकाःप्रनृत्यं
तिमानवाइवसप्रियाः ॥ स्वपुष्पनतवल्लीभिःपादपाःक्वचिदावृताः ॥४३॥ भांतितारागणैश्चित्रैःशरदीवनभस्तलम्॥द्रुमाणामथवाग्रेषुपुष्पितामालती
लताः ॥४४॥ शेखराइवशोभंतेरचिताबुद्धिपूर्वकम् ॥ हरिताःकांचनच्छायाःफलिताःपुष्पिताद्रुमाः ॥४५॥ सौहृदंदर्शयंतीवनराः साधुसमागमे ॥
पुष्पकिंजलककपिलागताःसर्वदिशासुच ॥४६ ॥ कदंबपुष्पस्यजयंघोषयंतीव षट्पदाः ॥ क्वचित्पुष्पासवक्षीबाःसंपतंतिततस्ततः ॥ ४७ ॥ पुंस्को
किलगणावृक्षगहनेष्विवसप्रियाः ॥ शिरीषपुष्पसंकाशाःशुकामिथुनशःक्वचित् ॥ ४८ ॥ कीर्तयंतिगिरश्चित्राःपूजिताब्राह्मणायथा ॥ सहचारिसुसं
युक्तामयूराश्चित्रबर्हिणः ॥४९॥ वनांतेष्वपिनृत्यंतिशोभंतइवनर्त्तकाः ॥ कूजन्तःपक्षिसंघातानानारुतविराविणः ॥ ५० ॥ कुर्वंतिरमणीयंवैरमणी
यतरंवनम् ॥ नानामृगगणाकीर्णंनित्यंप्रमुदितांडजम् ॥ ५१ ॥ तद्वनंनन्दनसमं मनोदृष्टिविवर्धनम् ॥ पद्मयोनिस्तुभगवांस्तथारूपंवनोत्तमम् ॥
॥५२॥ददर्शादर्शवद्दृष्ट्यासौम्यया पाययन्निव॥तावृक्षपंक्तयःसर्वादृष्ट्वादेवंतथागतम्॥५३॥ निवेद्यब्रह्मणेभक्त्यामुमुचुःपुष्पसंपदः॥पुष्पप्रतिग्रहंकृत्वापा
दपानांपितामहः॥५४॥ वरंवृणीध्वंभद्रंवःपादपानित्युवाचसः॥ एवमुक्ताभगवता तरवोनिरवग्रहाः॥५५॥ऊचुःप्रांजलयःसर्वेनमस्कृत्वाविरिंचिनम् ॥
वरंददासिचेद्देवप्रपन्नजनवत्सल ॥५६ ॥ इहैवभगवन्नित्यंवनेसंनिहितोभव ॥ एषनः परमःकामःपितामहनमोऽस्तुते ॥ ५७॥ त्वंचेद्वससिदेवेशवने
ऽस्मिन्विश्वभावन ॥ सर्वात्मनाप्रपन्नानांवांछितामुत्तमंवरम् ॥५८॥ वरकोटिभिरन्याभिरलंनो दीयतांवरम् ॥ सन्निधानेनतीर्थेभ्यइदंस्यात्प्रवरंमहत ॥ ४० ॥
॥ ५९ ॥ ब्रह्मोवाच ॥ उत्तमंसर्वक्षेत्राणांपुण्यमेतद्भविष्यति ॥ नित्यंपुष्पफलोपेतानित्यंसुस्थिरयौवनाः ॥ ६० ॥ कामगाःकामरूपाश्चकामरूप
फलप्रदाः ॥ कामसंदर्शनाःपुंसांतपःसिद्ध्युज्ज्वलानृणाम् ॥६१ ॥ श्रियापरमयायुक्तामत्प्रसादाद्भविष्यथ ॥ एवंसवरदोब्रह्माऽनुजग्राहपादपान् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ६२ ॥ स्थित्वावर्षसहस्रंतुपुष्करंप्राक्षिपद्भुवि ॥ क्षितिर्निपतितातेनव्यकंपतरसातलम् ॥ ६३ ॥ विवशास्तत्यजुर्वेलांसागराःक्षुभितोर्मयः ॥ शक्रा
शनिहतानीवव्याघ्रव्यालावृतानिच ॥ ६४ ॥ शिखराण्यप्यशीर्यंतपर्वतानांसहस्रशः ॥ देवसिद्धविमानानिगंधर्वनगराणिच ॥ ६५ ॥ प्रचेलुबभ्रमुः
पेतुर्विविशुश्चधरातलम् ॥ कपोतमेघाःखात्पेतुःपुटसंवातदर्शिनः ॥ ६६ ॥ ज्योतिर्गणांश्छादयंतोबभूवुस्तीव्रभास्कराः ॥ महतातस्यशब्देनमूका
न्धबधिरीकृतम् ॥६७॥ बभूवव्याकुलंसर्वंत्रैलोक्यंसचराचरम्॥सुरासुराणांसर्वेषांशरीराणिमनांसिच ॥६८॥ अवसेदुश्चकिमितिकिमित्येतन्नजज्ञिरे ॥
धैर्यमालंब्यसर्वेऽथब्रह्माणंचाप्यलोकयन् ॥ ६९ ॥ नचतेतमपश्यंतकुत्रब्रह्मागतोह्यभूत् ॥ किमर्थंकंपिताभूमिर्निमित्तोत्पातदर्शनम् ॥ ७० ॥ ताव
द्विष्णुर्गतस्तत्रयत्रदेवाव्यवस्थिताः॥ प्रणिपत्यइदंवाक्यमुक्तवंतोदिवौकसः ॥ ७१ ॥ किमेतद्भगवन्ब्रूहिनिमित्तोत्पातदर्शनम् ॥ त्रैलोक्यंकंपितंयेनसं
युक्तंकालधर्मणा ॥ ७२ ॥ जातकल्पावसानंतुभिन्नमर्यादसागरम् ॥ चत्वारोदिग्गजाःकिंतुबभूवुरचलाश्चलाः ॥ ७३ ॥ समावृताधराकस्मात्सप्तसा
गरवारिणा ॥ उत्पत्तिर्नास्तिशब्दस्यभगवन्निष्प्रयोजना ॥ ७४ ॥ यादृशोवास्मृतःशब्दोनभूतोनभविष्यति ॥ त्रैलोक्यमाकुलंयेनचक्रेरौद्रेणचो
द्यता ॥७५॥शुभोऽशुभोवाशब्दोऽयंत्रैलोक्यस्यदिवौकसाम् ॥ भगवन्यदिजानासिकिमेतत्कथयस्वनः ॥ ७६ ॥ एवमुक्तोऽब्रवीद्विष्णुःपरमेणानुभा
वितः ॥ माभैष्टमरुतःसर्वेशृणुध्वंचात्रकारणम् ॥ ७७॥ निश्चयेनानुविज्ञायवक्ष्याम्येषयथाविधम् ॥ पद्महस्तोहिभगवान्ब्रह्मालोकपितामहः ॥ ७८ ॥
भूप्रदेशेपुण्यराशौयज्ञंकर्तुंव्यवस्थितः ॥ अवरोहेपर्वतानांवनेचातीवशोभने ॥ ७९ ॥ कमलंतस्यहस्तात्तुपतितंधरणीतले ॥ तस्यशब्दोमहानेषयेन
यूयंप्रकंपिताः ॥ ८० ॥ तत्रासौतरुवृंदेनपुष्पामोदाभिनंदितः ॥ अनुगृह्याथभगवान्वनंतत्समृगांडजम् ॥ ८१ ॥ जगतोऽनुग्रहार्थायवासंतत्रान्वरो
चयत् ॥ पुष्करंनामतत्तीर्थंक्षेत्रंवृषभमेवच ॥ ८२ ॥ जनितंतद्भगवतालोकानांहितकारिणा ॥ ब्रह्माणंतत्रवैगत्वातोषयध्वंमयासह ॥ ८३ ॥ आरा
ध्यमानोभगवान्प्रदास्यतिवरान्वरान् ॥ इत्युक्त्वाभगवान्विष्णुःसहतैर्देवदानवैः ॥ ८४ ॥ जगामतद्वनोद्देशंयत्रास्तेसतुकंजजः ॥ प्रहृष्टास्तुष्टमनसः
कोकिलालापलापिताः ॥ ८५ ॥ पुष्पोच्चयोज्ज्वलंशस्तंविविशुर्ब्रह्मणोवनम् ॥ संप्राप्तसर्वदेवैस्तुवनंनंदनसंमितम् ॥ ८६ ॥ पद्मिनीमृगपुष्पाढ्यंसु
दृढंशुशुभेतदा ॥ प्रविश्याथवनंदेवाःसर्वपुष्पोपशोभितम् ॥ ८७ ॥ इहदेवोऽस्तीतिदेवाबभ्रमुश्चदिदृक्षवः ॥ मृगयंतस्ततस्तेतुसर्वेदेवाःसवासवाः॥८८॥
अद्भुतस्यवनस्यांतंनतेददृशुराशुगाः ॥ विचिन्वद्भिस्तदादेवंदैवैर्वायुर्विलोकितः ॥ ८९ ॥ सतानुवाचब्रह्माणंनद्रक्ष्यथतपोविना ॥ तदाखिन्नाविचिन्वं
तस्तस्मिन्पर्वतरोधसि ॥ ९० ॥ दक्षिणेचोत्तरेचैवअंतरालेपुनःपुनः ॥ वायूक्तंहृदयेकृत्वावायुस्तानब्रवीत्पुनः ॥ ९१ ॥ त्रिविधोदर्शनोपायोविरिंचे

CC-0. In Public Domain. Digitization by eGangotri

रस्यसर्वदा ॥ श्रद्धाज्ञानेनतपसायोगेनचनिगद्यते ॥ ९२ ॥ सकलंनिष्कलंचैवदेवंपश्यंतियोगिनः ॥ तपस्विनस्तुसकलंज्ञानिनोनिष्कलंपरम् ॥
॥ ९३ ॥ समुत्पन्नेतुविज्ञानेमंदश्रद्धोनपश्यति ॥ भक्त्यापरमयाक्षिप्रंब्रह्मपश्यंतियोगिनः ॥ ९४॥ द्रष्टव्योनिर्विकारोऽसौप्रधानपुरुषेश्वरः ॥ कर्मणा
मनसावाचानित्ययुक्ताःपितामहम् ॥ ९५ ॥ तपश्चरतभद्रंवोब्रह्माराधनतत्पराः ॥ ब्राह्मींदीक्षांप्रपन्नानांभक्तानांचद्विजन्मनाम् ॥ ९६॥ सर्वकालंसजा
नातिदातव्यंदर्शनंमया ॥ वायोस्तुवचनंश्रुत्वाहितमेतदवेत्यच ॥ ९७ ॥ ब्रह्मेच्छाविष्टमतयोवाक्पतिंचततोऽब्रुवन्॥ प्रज्ञानविबुधास्माकंब्राह्मींदीक्षां
विधत्स्वनः ॥ ९८ ॥ सदिदीक्षयिषुःक्षिप्रममरान्ब्रह्मदीक्षया ॥ वेदोक्तेनविधानेनदीक्षयामासतान्गुरुः ॥ ९९ ॥ विनीतवेषाःप्रणताअंतेवासित्वमा
ययुः ॥ ब्रह्मप्रसादंसंप्राप्ताःपौष्करंज्ञानमीरितम् ॥ १०० ॥यज्ञंचकारविधिनाधिषणोऽध्वर्युसत्तमः ॥ पद्मंकृत्वामृणालाढ्यंपद्मदीक्षाप्रयोगतः ॥ १ ॥
अनुजग्राहदेवांस्तान्सुरेच्छाप्रेरितोमुनिः ॥ तेभ्योददौविवेकिभ्यःसवेदोक्तावधानवित् ॥ २ ॥ दीक्षांवैविस्मयंत्यक्त्वाबृहस्पतिरुदारधीः ॥ एक
मग्निंचसंस्कृत्यमहात्मात्रिदिवौकसाम् ॥ ३ ॥ प्रादादांगिरसस्तुष्टोजाप्यंवदोदितंतुयत् ॥ त्रिसुपर्णंत्रिमधुचपावमानींचपावनीम् ॥ ४ ॥ सहिजा
प्यादिकंसर्वमशिक्षयदुदारधीः ॥ आपोहिष्ठेतियत्स्नानंब्राह्मंतत्परिपठ्यते ॥ ५ ॥ पापघ्नंदुष्टशमनंपुष्टिश्रीबलवर्धनम् ॥ सिद्धिदंकीर्तिदंचैवकलि
कल्मषनाशनम्॥६ ॥ तस्मात्सर्वप्रयत्नेनब्राह्मंस्नानंसमाचरेत् ॥ कुर्वंतोमौनिनोदांतादीक्षिताःक्षपितेंद्रियाः ॥ ७ ॥ सर्वेकमंडलुयुतामुक्तकक्षाक्षमा
लिनः ॥ दंडिनश्चीरवस्त्राश्चजटाभिरतिशोभिताः ॥ ८ ॥ स्नानाचारासनरताःप्रयतध्यानधारिणः ॥ मनोब्रह्मणिसंयोज्यनियताहारकांक्षिणः ॥
॥ ९ ॥ अतिष्ठन्दर्शनालापसंगध्यानविवर्जिताः ॥ एवंव्रतधराःसर्वेत्रिकालंस्नानकारिणः ॥ ११० ॥ भक्त्यापरमयायुक्ताविधिनापरमेणच ॥ काले
नमहताध्यानाद्देवज्ञानमनोगताः ॥ ११ ॥ ब्रह्मध्यानाग्निनिर्दग्धायदाशुद्धैकमानसाः ॥ आविर्बभूवभगवान्सर्वेषांदृष्टिगोचरः ॥ १२ ॥ तेजसाप्या
यितास्तस्यबभूवुर्भ्रांतचेतसः ॥ ततोऽवलंब्यतेधैर्यमिष्टंदेवंयथाविधि ॥ १३ ॥ षडंगवेदयोगेनहृष्टचितास्तुतत्पराः ॥शिरोगतैरंजलिभिःशिरोभिश्च
महींगताः ॥ १४ ॥ तुष्टुवुःसृष्टिकर्त्तारंस्थितिकर्तारमीश्वरम् ॥ देवाऊचुः ॥ ब्रह्मणेब्रह्मदेहायब्रह्मण्यायाजितायच ॥ १५ ॥ नमस्कुर्मःसुनियताःक्रतु
वेदप्रदायिने ॥ लोकानुकंपिनेदेवसृष्टिरूपायवैनमः ॥ १६ ॥ ॥ भक्तानुकंपिनेऽत्यर्थंवेदजाप्यस्तुतायच ॥ बहुरूपस्वरूपायरूपाणांशतधारिणे ॥
॥ १७ ॥ सावित्रिपतयेदेवगायत्रीपतयेनमः ॥ पद्मासनायपद्मायपद्मवक्त्रायतेनमः ॥ १८ ॥ वरदायवरार्हायकूर्मायचमृगायच ॥ जटामुकुटयुक्ता
यस्रुवस्रुचनिधारिणे॥१९॥मृगांकमृगधर्मायधर्मनेत्रायतेनमः ॥ विश्वनाम्नेऽथविश्वायविश्वेशायनमोनमः॥१२०॥धर्मनेत्रत्राणमस्मादधिकंकर्तुमर्हसि॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाङ्मनःकायभावैस्त्वांप्रपन्नास्स्मः पितामह ॥ २१ ॥ एवंस्तुतस्तदादेवैर्ब्रह्माब्रह्मविदां वरः ॥ प्रदास्यामिस्मृतोबाढममोघंदर्शनंहिवः ॥ २२ ॥
ब्रुवंतुवांछितंपुत्राःप्रदास्यामिवरान्वरान् ॥ एवमुक्ताभगवतादेवावचनमब्रुवन् ॥ २३ ॥ एषएवाद्यभगवन्सुपर्याप्तोमहान्वरः ॥ जनितोनःसुश
ब्दोऽयंकमलंक्षिपतात्वया ॥ २४ ॥ किमर्थंकंपिताभूमिर्लोकाश्चाकुलिताःकृताः ॥ नैतन्निरर्थकंदेवउच्यतामत्रकारणम् ॥ २५ ॥ ब्रह्मोवाच ॥
युष्मद्धितार्थमेतद्वैपद्मंविनिहितंमया ॥ देवतानांचरक्षार्थंश्रूयतामत्रकारणम् ॥ २६ ॥ असुरोवज्रनाभोऽयंबालजीवापहारकः ॥ अवस्थितस्त्वव
ष्टभ्यरसातलतलाश्रयम् ॥ २७ ॥ युष्मदागमनंज्ञात्वातपस्थान्निहितायुधान् ॥ हंतुकामोदुराचारःसेंद्रानपिदिवौकसः ॥ २८ ॥ घातःकमलपा
तेनमयातस्यविनिर्मितः ॥ सराज्यैश्वर्यदर्पिष्ठस्तेनासौनिहतोमया ॥ २९ ॥ लोकेऽस्मिन्समयेभक्ताब्राह्मणावेदपारगाः ॥ मैवतेदुर्गतिंयांतुल
भंतांसुगतिंपुनः ॥ १३० ॥ देवानांदानवानांचमनुष्योरगरक्षसाम् ॥ भूतग्रामस्यसर्वस्यसमोऽस्मित्रिदिवौकसः ॥ ३१ ॥ युष्मद्धितार्थंपा
पोऽसौमयामंत्रेणघातितः ॥ प्राप्तःपुण्यकृताँल्लोकान्कमलस्यास्यदर्शनात् ॥ ३२ ॥ यन्मयापद्ममुक्तंतुतेनेदंपुष्करंभुवि ॥ ख्यातंभविष्यतेतीर्थंपाव
नंपुण्यदंमहत् ॥ ३३ ॥ पृथिव्यांसर्वजंतूनाम्पुण्यदंपरिपठ्यते ॥ कृतोह्यनुग्रहोदेवाभक्तानांभक्तिमिच्छताम् ॥ ३४ ॥ वनेऽस्मिन्नित्यवासेनवृक्षैरभ्य
र्थितेनच ॥ महाकालोवनेऽत्रागादागतस्यममानघाः ॥ ३५ ॥ तपस्यतांचभवतांमहज्ज्ञानंप्रदर्शितम् ॥ कुरुध्वंहृदयेदेवाःस्वार्थंचैवपरार्थकम्
॥ ३६ ॥ भवद्भिर्दर्शनीयंतुनानारूपधरैर्भुवि ॥ द्विषन्वैज्ञानिनंविप्रंपापेनैवार्दितोनरः ॥ ३७ ॥ नविमुच्येतपापेनजन्मकोटिशतैरपि ॥ वेदांग
पारगंविप्रंनहन्यान्नचदूषयेत् ॥ ३८ ॥ एकस्मिन्निहतेयस्मात्कोटिर्भवतिघातिता ॥ एकंवेदांतगंविप्रंभोजयेच्छ्रद्धयान्वितः ॥ ३९ ॥ तस्यभु
क्ताभवेत्कोटिर्विप्राणांनात्रसंशयः ॥ यःपात्रपूरणींभिक्षांयतीनांतुप्रयच्छति ॥ १४० ॥ विमुक्तःसर्वपापेभ्योनासौदुर्गतिमाप्नुयात् ॥ यथाहंसर्व
देवानांज्येष्ठःश्रेष्ठःपितामहः ॥ ४१ ॥ ॥ तथाज्ञानीसदापूज्योनिर्ममोनिष्परिग्रहः ॥ संसारबंधमोक्षार्थंब्रह्मगुप्तमिदंव्रतम् ॥ ४२ ॥ मयाप्रणीतंवि
प्राणामपुनर्भवकारणम् ॥ अग्निहोत्रमुपादाययस्त्यजेदजितेंद्रियः ॥ ४३ ॥ रौरवंसप्रयात्याशुप्रणीतोयमकिंकरैः ॥ लोकयात्रावितंडश्चक्षुद्रं
कर्मकरोतियः ॥ ४४ ॥ सरागचित्तःशृंगारीनारीजनधनप्रियः ॥ एकभोजीसुमिष्टाशीकृषिवाणिज्यसेवकः ॥ ४५ ॥ अवेदोवेदनिन्दीचपरभार्यां
चसेवते ॥ इत्यादिदोषदुष्टोयस्तस्यसंभाषणादपि ॥ ४६ ॥ नरोनरकगामीस्याद्यश्चसद्व्रतदूषकः ॥ असंतुष्टंभिन्नचित्तंदुर्मतिंपापकारिणम् ॥ ४७ ॥
नस्पृशेदंगसंगेनस्पृष्ट्वास्नानेनशुद्ध्यति ॥ एवमुक्त्वासभगवान्ब्रह्मातैरमरैःसह ॥४८॥ क्षेत्रंनिवेशयामासयथावत्कथयामिते ॥ उत्तरेचंद्रनद्यास्तुप्रा

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

चीयावत्सरस्वती ॥ ४९ ॥ पूर्वंतुनंदनात्कृत्स्नंयावत्कल्पंसपुष्करम् ॥ वेदीह्येषाकृतायज्ञेब्रह्मणालोककारिणा ॥१५०॥ ज्येष्ठंतुप्रथमंज्ञेयंतीर्थंत्रैलो
क्यपावनम् ॥ ख्यातंतद्ब्रह्मदैवत्यंमध्यमंवैष्णवंतथा ॥ ५१ ॥ कनिष्ठंरुद्रदैवत्यंब्रह्मापूर्वमकारयत् ॥ आद्यमेतत्परंक्षेत्रंगुह्यंवेदेषुपठ्यते ॥ ॥ ५२ ॥
अरण्यंपुष्कराख्यंतुब्रह्मासन्निहितःप्रभुः ॥ अनुग्रहोभूमिभागेकृतोवैब्रह्मणास्वयम् ॥ ५३ ॥ अनुग्रहार्थंविप्राणांसर्वेषांभूमिचारिणाम् ॥ सुवर्णवज्रपर्यं
तावेदिकांकामहीकृता ॥ ५४ ॥ विचित्रकुट्टिमारत्नैःकारितासर्वशोभना ॥ रमतेतत्रभगवान्ब्रह्मालोकपितामहः ॥ ५५ ॥ विष्णुरुद्रौतथादेवौवस
वोऽप्यश्विनावपि ॥ मरुतश्चमहेंद्रेणरमंतेचदिवौकसः ॥ ५६ ॥ एतत्तेतथ्यमाख्यातंलोकानुग्रहकारणम् ॥ संहितानुक्रमेणात्रमंत्रैश्चविधिपूर्वकम्
॥ ५७ ॥ वेदान्पठंतियेविप्रागुरुशुश्रूषणेरताः ॥ वसंतिब्रह्मसामीप्येसर्वेतेनानुभाविताः ॥ ५८ ॥ ॥ भीष्मउवाच ॥ भगवन्केनविधिनाअर
ण्येपुष्करेनरैः॥ ब्रह्मलोकमभीप्सद्भिर्वस्तव्यंक्षेत्रवासिभिः ॥ ५९ ॥ किंमनुष्यैरुतस्त्रीभिरुतवर्णाश्रमान्वितैः ॥ वसद्भिःकिमनुष्ठेयमेतत्सर्वंब्रवी
हिमे ॥ ॥ १६० ॥ पुलस्त्यउवाच ॥ ॥ नरैःस्त्रीभिश्चवस्तव्यंवर्णाश्रमनिवासिभिः ॥ स्वधर्माचारनिरतैर्दंभमोहविवर्जितैः ॥ ६१ ॥ कर्मणामनसा
वाचाब्रह्मभक्तैर्जितेंद्रियैः ॥ अनसूयुभिरक्षुद्रैःसर्वभूतहितेरतैः ॥ ६२ ॥ भीष्म उवाच ॥ किंकुर्वाणोनरःकर्मब्रह्मभक्तस्त्विहोच्यते ॥ कीदृशाब्रह्म
भक्ताश्चस्मृतानृणांवदस्वमे ॥ ६३ ॥ पुलस्त्यउवाच ॥ त्रिविधाभक्तिरुद्दिष्टामनोवाक्कायसंभवा ॥ लौकिकीवैदिकीचापिभवेदाध्यात्मिकी
तथा ॥ ६४ ॥ ध्यानधारणयाबुद्ध्यावेदार्थस्मरणेहियत् ॥ ब्रह्मप्रीतिकरीचैषामानसीभक्तिरुच्यते ॥ ६५ ॥ मंत्रवेदनमस्कारैरग्निश्राद्धादिचिंतनैः ॥
जाप्यैश्चावश्यकैश्चैववाचिकीभक्तिरिष्यते ॥ ६६ ॥ व्रतोपवासनियतैश्चित्तेंद्रियनिरोधिभिः ॥ कृच्छ्रैःसांतपनैश्चान्यैस्तथाचांद्रायणादिभिः
॥ ६७ ॥ ब्रह्मकृच्छ्रोपवासैश्चतथाचान्यैःशुभव्रतैः ॥ कायिकीभक्तिराख्यातात्रिविधातुद्विजन्मनाम् ॥६८॥ गोघृतक्षीरदधिभिःरत्नदीपकुशोदकैः ॥
गंधैर्माल्यैश्चविविधैर्धातुभिश्चोपपादितैः ॥ ६९ ॥ घृतगुग्गुलुधूपैश्चकृष्णागरुसुगंधिभिः ॥ भूषणैर्हेमरत्नाढ्यैश्चित्राभिः स्रग्भिरेवच ॥ १७० ॥
नृत्यवादित्रगीतैश्चसर्वरत्नोपहारकैः ॥ भक्ष्यभोज्यान्नपानैश्चयापूजाक्रियतेनरैः ॥ ७१ ॥ पितामहंसमुद्दिश्यभक्तिस्सालौकिकीमता ॥
वेदमंत्रहविर्योगैर्भक्तिर्यावैदिकीमता ॥ ७२ ॥ दर्शेवापौर्णमास्यांवाकर्तव्यमग्निहोत्रकम् ॥ प्रशस्तंदक्षिणादानंपुरोडाशंचरुक्रिया ॥ ७३ ॥
इष्टिर्धृतिःसोमपानांयज्ञीयंकर्मसर्वशः ॥ ऋग्यजुःसामजाप्यानिसंहिताध्ययनानिच ॥ ७४ ॥ क्रियंतेविधिमुद्दिश्यसाभक्तिर्वैदिकीष्यते ॥ अग्निभू
म्यनिलाकाशांबुनिशाकरभास्करम् ॥ ७५ ॥ समुद्दिश्यकृतंकर्मतत्सर्वंब्रह्मदैवतम् ॥ आध्यात्मिकीतुद्विविधाब्रह्मभक्तिः स्थितानृप ॥ ७६ ॥संख्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ख्यायोगजाचान्याविभागंतत्रमेशृणु ॥ चतुर्विंशतितत्त्वानिप्रधानादीनिसंख्यया ॥७७॥ अचेतनानिभोग्यानिपुरुषःपचविंशकः ॥ चेतनःपुरुषो भोक्तानकर्त्तातस्यकर्मणः ॥७८॥ आत्मानित्योऽव्ययश्चैवअधिष्ठाताप्रयोजकः ॥ अव्यक्तः पुरुषोनित्यः कारणंचपितामहः ॥७९॥ तत्त्वसर्गोभावसर्गोभूतसर्गश्चतत्त्वतः ॥ संख्ययापरिसंख्यायप्रधानंचगुणात्मकम् ॥ १८०॥ साधर्म्यमानमैश्वर्यंप्रधानंचविधर्मिच ॥ कारणत्वंचब्रह्मत्वंकाम्यत्वमिदमुच्यते ॥ ८१ ॥ प्रयोज्यत्वंप्रधानस्यवैधर्म्यमिदमुच्यते ॥ सर्वत्रकर्तृस्याद्ब्रह्मपुरुषस्याप्यकर्तृता ॥८२॥ चेतनत्वंप्रधानेचसाधर्म्यमिदमुच्यते ॥ तत्त्वांतरंचतत्त्वानांकर्मकारणमेवच ॥८३॥ प्रयोजनंचवैयोज्यमैश्वर्यंतत्त्वसंख्यया ॥ संख्यास्तीत्युच्यतेप्राज्ञैर्विनिश्चित्यार्थचिंतकैः ॥८४॥ इतितत्त्वस्यसंभारंतत्वसंख्याचतत्त्वतः ॥ ब्रह्मतत्त्वाधिकंचापिश्रुत्त्वातत्त्वंविदुर्बुधाः ॥ ८५॥ सांख्यकृद्भक्तिरेषाचसद्भिराध्यात्मिकीकृता ॥ योगजामपिभक्तानांशृणुभक्तिंपितामहे ॥८६॥ प्राणायामपरोनित्यंध्यानवान्नियतेंद्रियः ॥ भैक्ष्यभक्षीव्रतीवापिसर्वप्रत्याहृतेंद्रियः ॥८७॥ धारणंहृदयेकुर्याद्ध्यायमानः प्रजेश्वरम् ॥ हृत्पद्मकर्णिकासीनंरक्तवक्त्रंसुलोचनम् ॥ ८८ ॥ परितोद्योतितमुखंब्रह्मसूत्रकटीतटम् ॥ चतुर्वक्त्रंचतुर्बाहुंवरदाभयहस्तकम् ॥ ८९ ॥ योगजामानसीसिद्धिर्ब्रह्मभक्तिःपरास्मृता ॥ यएवंभक्तिमान्देवेब्रह्मभक्तः सउच्यते ॥१९०॥ वृत्तिंचशृणुराजेंद्रयास्मृताक्षेत्रवासिनाम् ॥ स्वयंदेवेनविप्राणांविष्णवादीनांसमागमे ॥ ९१ ॥ कथिताविस्तरात्पूर्वंसर्वेषांतत्रसन्निधौ ॥ निर्ममानिरहंकारानिःसंगानिष्परिग्रहाः ॥ ९२ ॥ बंधुवर्गेचनिःस्नेहास्समलोष्टाश्मकांचनाः ॥ भूतानांकर्मभिर्नित्यैर्विविधैरभयप्रदाः ॥९३॥प्राणायामपरानित्यंपरध्यानपरायणाः ॥ याजिनःशुचयोनित्यंयतिधर्मपरायणाः ॥ ॥९४॥ सांख्ययोगविधिज्ञाश्चधर्मज्ञाश्छिन्नसंशयाः ॥ यजंतेविधिनानेनयेविप्राः क्षेत्रवासिनः ॥९५॥ अरण्येपौष्करेतेषांमृतानांसत्फलंशृणु ॥ व्रजंतितेसुदुष्प्रापंब्रह्मसायुज्यमक्षयम् ॥ ९६ ॥ यत्प्राप्यनपुनर्जन्मलभन्तेमृत्युदायकम् ॥ पुनरावर्तनंहित्वाब्राह्मींविद्यांसमास्थितः ॥९७॥ पुनरावृत्तिरन्येषांप्रपंचाश्रमवासिनाम् ॥ गार्हस्थ्यविधिमाश्रित्यषट्कर्मनिरतःसदा ॥ ९८ ॥ जुहोतिविधिनासम्यङ्मंत्रैर्यज्ञेनिमंत्रितः ॥ अधिकंफलमाप्नोतिसर्वदुःखविवर्जितः ॥ ९९ ॥ सर्वलोकेषुचाप्यस्यगतिर्नप्रतिहन्यते ॥ दिव्येनैश्वर्ययोगेनस्वारूढःसपरिग्रहः ॥ २०० ॥ बालसूर्यप्रकाशेनविमानेनसुवर्चसा ॥ वृतः स्त्रीणांसहस्रैस्तुस्वच्छंदगमनालयः ॥ १ ॥ विचरत्यानिवार्येणसर्वलोकान्यदृच्छया ॥ स्पृहणीयतमः पुंसांसर्वधर्मोत्तमोधनी ॥ २ ॥ स्वर्गच्युतः प्रजायेत कुलेमहतिरूपवान् ॥ धर्मज्ञोधर्मभक्तश्चसर्वविद्यार्थपारगः ॥ ३ ॥ तथैवब्रह्मचर्येणगुरुशुश्रूषणेनच ॥ वेदाध्ययनसंयुक्तोभैक्ष्यवृत्तिर्जितेन्द्रियः ॥ ४ ॥ नित्यंसत्यव्रतेयुक्तः स्वधर्मेष्वप्रमादवान् ॥ सर्वकामसमृद्धेनसर्वकामावलंबिना ॥ ५ ॥ सूर्येणेवद्वितीयेनविमानेनानि

CC-0. In Public Domain. Digitization by eGangotri

वारितः ॥ गुह्यकानामब्रह्माख्यगणाः परमसंमताः ॥ ६ ॥ अप्रमेयबलैश्वर्यादेवदानपूजिताः ॥ तेषांससमतांयातितुल्यैश्वर्यसमन्वितः ॥७॥ देवदानव
मर्त्येषुभवत्यनियतायुधः ॥ वर्षकोटिसहस्राणिवर्षकोटिशतानिच ॥८॥ एवमैश्वर्यसंयुक्तोविष्णुलोकेमहीयते ॥ उषित्वासौविभूत्यैवंयदाप्रच्यवतेपुनः
॥ ९ ॥ विष्णुलोकात्स्वकृत्येनस्वर्गस्थानेषुजायते ॥ २१० ॥ पुष्करारण्यमासाद्यब्रह्मचर्याश्रमेस्थितः ॥ अभ्यासेनतुवेदानांवसतेम्रियतेऽपिवा
॥११॥ मृतोऽसौयातिदिव्येनविमानेनस्वतेजसा ॥ पूर्णचंद्रप्रकाशेनशशिवत्प्रियदर्शनः ॥१२॥ रुद्रलोकंसमासाद्यगुह्यकैः सहमोदते॥ऐश्वर्यमहदाप्नो
तिसर्वस्यजगतः प्रभुः ॥ १३ ॥ भुक्त्वायुगसहस्राणिरुद्रलोकेमहीयते ॥ प्रच्युतस्तुपुनस्तस्माद्रुद्रलोकात्क्रमेणतु ॥ १४ ॥ नित्यंप्रमुदितस्तत्रभुक्त्वा
सुखमनामयम् ॥ द्विजानांसदनेदिव्ये कुलेमहतिजायते ॥ १५ ॥ मानुषेषुसधर्म्मात्मासुरूपोवाक्पतिर्भवेत् ॥ स्पृहणीयवपुःस्त्रीणाम्महाभोगपति
र्बली ॥१६॥ वानप्रस्थसमाचारोग्राम्योपाधिविवर्जितः॥ सर्वलोकेषुचाप्यस्यगतिर्नप्रतिहन्यते॥१७॥ शीर्णपर्णफलाहारःपुष्पमूलांबुभोजनः ॥ कपो
तेनाश्मकुट्टेनदंतोलूखलिकेनच ॥१८॥ वृत्त्युपायेनजीवेतचीरवल्कलवाससा ॥जटीत्रिषवणस्नायीत्यक्तदोषस्तुदंडवान् ॥१९ ॥ कृच्छ्रव्रतपरोयस्तुश्वप
चोयदिवापरः ॥ जलशायीपंचतपावर्षास्वभ्रावगाहकः ॥ २२० ॥ कीटकंटकपाषाणभूम्यांतुशयनंतथा ॥ स्थानवीरासनरतः संविभागीदृढव्रतः
॥२१॥ अरण्यौषधिभोक्ताचसर्वभूताभयप्रदः ॥नित्यंधर्मार्जनरतोजितक्रोधोजितेंद्रियः ॥ २२ ॥ ब्रह्मभक्तःक्षेत्रवासीपुष्करेवसतेमुनिः ॥ सर्वसंगपरि
त्यागीस्वारामोविगतस्पृहः ॥ २३॥ यश्चात्रवसतेभीष्मशृणुतस्यापियागतिः॥ तरुणार्कप्रकाशेनवेदिकास्तंभशोभिना ॥ २४॥ ब्रह्मभक्तोविमानेनया
तिकामप्रचारिणा ॥ विराजमानोनभसिद्वितीयइवचंद्रमाः ॥ २५ ॥ गीतवादित्रनृत्यज्ञैर्गंधर्वाप्सरसांगणैः ॥ अप्सरोभिःसमायुक्तोवर्षकोटिशतान्य
सौ ॥ २६ ॥ यस्यकस्यापिदेवस्यलोकंयात्यनिवारितः ॥ ब्रह्मणोऽनुग्रहेणैवतत्रतत्रविराजते ॥ २७ ॥ ब्रह्मलोकाच्युतश्चापिविष्णुलोकंसगच्छति ॥
विष्णुलोकात्परिभ्रष्टोरुद्रलोकंसगच्छति ॥२८॥ तस्मादपिच्युतः स्थानाद्वीपेषुसहिजायते ॥ स्वर्गेषुचतथान्येषुभोगान्भुक्त्वायथेप्सितान् ॥ २९ ॥
भुक्त्वैश्वर्यंततस्तेषुपुनर्मर्त्येषुजायते ॥ राजावाराजपुत्रोवाजायतेधनवान्सुखी ॥ २३० ॥ सुरूपःसुभगः कांतःकीर्तिमान्भक्तिभावितः ॥ ब्राह्मणाः
क्षत्रियावैश्याः शूद्रावाक्षेत्रवासिनः ॥ ३१ ॥ स्वधर्मनिरताराजन्सुवृत्ताश्चिरजीविनः ॥ सर्वात्मनाब्रह्मभक्ताभूतानुग्रहकारिणः ॥ ३२ ॥ पुष्करेतुमहा
क्षेत्रेयेवसंतिमुमुक्षवः ॥ मृतास्ते ब्रह्मभवनंविमानैर्यांतिशोभनैः ॥ ३३ ॥ अप्सरोगणसंघुष्टैःकामगैःकामरूपिभिः ॥ अथवासंप्रदीताग्नौस्वशरीरंजु
होतियः ॥ ३४ ॥ ब्रह्माध्यायीमहासत्वःसब्रह्मभवनंव्रजेत् ॥ ब्रह्मलोकोऽक्षयस्तस्यशाश्वतोविभवैःसह ॥ ३५ ॥ सर्वलोकोत्तमोरम्योभवतीष्टार्थसा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धकः ॥पुष्करेतुमहापुण्येप्राणान्येसलिलेऽत्यजन् ॥ ३६ ॥ तेषामप्यक्षयोभीष्मब्रह्मलोकोमहात्मनाम् ॥ साक्षात्पश्यंतितेदेवंसर्वदुःखविनाशनम्
॥३७॥ सर्वामरयुतंदेवंरुद्रविष्णुगणैर्युतम् ॥ अनाशकेमृताश्शूद्राः पुष्करेतुवनेनराः ॥३८॥ हंसयुक्तैस्ततोयांतिविमानैरर्कसप्रभैः॥नानारत्नसुवर्णाढ्यै
र्द्वंद्वैर्गंधाधिवासितैः ॥ ३९ ॥ अनौपम्यगुणैरन्यैरप्सरोगीतनादितैः॥ पताकाध्वजविन्यस्तैर्नानाघण्टानिनादितैः ॥ २४० ॥ बह्वाश्चर्यसमोपेतैः
क्रीडाविज्ञानशालिभिः ॥ सुप्रभैर्गुणसंपन्नैर्मयूरवरवाहिभिः ॥ ४१ ॥ ब्रह्मलोकेनराधीरारमंतेऽनाशकेमृताः ॥ तत्रोषित्वाचिरंकालंभुक्त्वाभो
गान्यथेप्सितान् ॥ ४२ ॥ धनीविप्रकुलेभोगीजायतेमर्त्यमागतः ॥ कारीषींसाधयेद्यस्तुपुष्करेतुवनेनरः ॥ ४३ ॥ सर्वलोकान्परित्य
ज्यब्रह्मलोकंसगच्छति ॥ ब्रह्मलोकेवसेत्तावद्यावत्कल्पक्षयोभवेत् ॥ ४४ ॥ नैवपश्यतिमर्त्यंहिक्लिश्यमानंस्वकर्मभिः ॥ गतिस्तस्याप्रतिह
तातिर्यगूर्ध्वमधस्तथा ॥ ४५ ॥ सपूज्यः सर्वलोकेषुयशोविस्तारयन्वशी ॥ सदाचारविधिप्रज्ञःसर्वेंद्रियमनोहरः ॥ ४६ ॥ नृत्यवादित्र
गीतज्ञः सुभगः प्रियदर्शनः ॥ नित्यमम्लानकुसुमोदिव्याभरणभूषितः ॥ ४७ ॥ नीलोत्पलदलश्यामोनीलकुञ्चितमूर्द्धजः ॥ अजघन्याः
सुमध्याश्चसर्वसौभाग्यपूरिताः ॥ ४८॥ सर्वैश्वर्यगुणोपेतायौवनेनातिगर्विताः ॥ स्त्रियःसेवंतितत्रस्थाःशयनेरमयंतिच ॥ ४९ ॥ वीणावेणुनिनादै
श्चसुप्तःसंप्रतिबुध्यते ॥ महोत्सवसुखंभुंक्तेदुष्प्राप्यमकृतात्मभिः ॥२५०॥ प्रसादाद्देवदेवस्यब्रह्मणःशुभकारिणः ॥ भीष्मउवाच ॥ आचाराःपरमाध
र्माःक्षेत्रधर्मपरायणाः ॥ ५१ ॥ स्वधर्माचारनिरताजितक्रोधाजितेंद्रियाः ॥ ब्रह्मलोकंव्रजंतीतिनैतच्चित्रंमतंमम ॥ ५२ ॥ असंशयंचगच्छंतिलोका
नन्यानपिद्विजाः ॥ विनापद्मोपवासेनतथैवनियमेनच ॥५३॥ स्त्रियोम्लेछाश्चशूद्राश्चपक्षिणःपशवोमृगाः ॥ मूकाजडान्धबधिरास्तपोनियमवर्जिताः
॥ ५४ ॥ तेषांवदगतिंविप्रपुष्करेयेत्ववस्थिताः ॥ पुलस्त्यउवाच ॥ स्त्रियोम्लेच्छाश्चशूद्राश्चपशवःपक्षिणोमृगाः ॥ ५५॥ पुष्करेतुमृताभीष्मब्रह्म
लोकंव्रजंतिते ॥ शरीरैर्दिव्यरूपैस्तुविमानैरविसप्रभैः ॥५६॥ दिव्यव्यूहसमायुक्तैःसुवर्णवरकेतनैः ॥ सुवर्णवज्रसोपानमणिस्तंभविभूषितैः ॥ ५७ ॥
सर्वकामोपभोगाढ्यैःकामगैःकामरूपिभिः ॥ नानारसाढ्यंगच्छंतिस्त्रीसहस्रसमाकुलाः ॥ ५८ ॥ ब्रह्मलोकंमहात्मानोलोकानन्यान्यथेप्सितान् ॥
ब्रह्मलोकाच्च्युताश्चापिक्रमाद्वीपेषुयांतिते ॥ ५९ ॥ कुलेमहतिविस्तीर्णेधनीभवतिसद्विजः ॥ तिर्यग्योनिगतायेतुसर्पकीटपिपीलिकाः ॥ ॥ २६० ॥
स्थलजाजलजाश्चैवस्वेदांडोद्भिज्जरायुजाः ॥ सकामावाप्यकामावापुष्करेतुवनेमृताः ॥६१॥ सूर्यप्रभविमानस्थाब्रह्मलोकंप्रयांतिते ॥ कलौयुगेमहा
घोरेप्रजाःपापसमीरिताः ॥ ६२ ॥ नान्येनास्मिन्नुपायेनधर्मःस्वर्गश्चलभ्यते ॥ वसंतिपुष्करेयेतुब्रह्मार्चनरतानराः ॥ ६३ ॥ कलौयुगेकृतार्थास्ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्लिश्यंत्यन्येनिरर्थकाः ॥ रात्रौकरोतियत्पापंनरःपंचभिरिंद्रियः ॥ ६४ ॥ कर्मणामनसावाचाकामक्रोधवशानुगः ॥ प्रातःसवनमासाद्यपुष्करेतुपि
तामहम् ॥ ६५॥ अभिगम्यशुचिर्भूत्वातस्मात्पापात्प्रमुच्यते ॥ अर्कस्योदयमारभ्ययावद्दर्शनमूर्ध्वगम् ॥६६॥ मानसाख्येप्रसंचिंत्यब्रह्मयोगेहरेदच
म् ॥ दृष्ट्वाविरिंचिंमध्याह्नेनरःपापात्प्रमुच्यते ॥ ६७ ॥ मध्याह्नास्तमयान्तंयदिंद्रियैःपापमाचरेत् ॥ पितामहस्यसंध्यायांदर्शनादेवमुच्यते ॥ ६८॥
शब्दादीन्विषयान्सर्वान्भुंजानोऽपिसकामतः ॥ यःपुष्करेब्रह्मभक्तोनिवसेत्तपसिस्थितः ॥ ६९ ॥ शीर्णपर्णाशनोपायः फलमूलाम्बुभोजनः ॥
वृक्षमूलेऽश्मकूटे वा सर्वदातपतेतपः ॥ २७० ॥ पुष्करारण्यमध्यस्थोमिष्टान्नास्वादभोजनः ॥ त्रिकालमपिभुंजानोवायुभक्षसमोमतः ॥ ७१ ॥
वसंतिपुष्करेयेतुनराःसुकृतकर्मिणः ॥ तलभंतेमहाभोगान्क्षेत्रस्यास्यप्रभावतः ॥ ७२ ॥ यथामहोदधेस्तुल्योनचान्योऽस्तिजलाशयः ॥
तथावैपुष्करस्यापिसमंतीर्थंनविद्यते ॥ ७३ ॥ देवाधिकोयथाब्रह्मायथानान्योऽधिकोभवेत् ॥ पुष्करारण्यसदृशंतीर्थंनास्त्यधिकंगुणैः ॥ ७४ ॥
अथतेऽन्यान्प्रवक्ष्यामियेऽस्मिन्क्षेत्रेव्यवस्थिताः ॥ ७५ ॥ विष्णुनासहिताःसर्वइंद्राद्याश्चादिवौकसः ॥ गजवक्त्रःकुमारश्चरेवंतःसदिवाकरः ॥ ७६ ॥
शिवदूतीतथादेवीकन्याक्षेमंकरीवरा ॥ स्थिताहितार्थंजगतोब्रह्मणोनिलयसदा ॥ ७७ ॥ अलंतपोभिर्नियमैःसुक्रियार्चनकारिणाम् ॥ व्रतो
पवासकर्माणिकृत्वान्यत्रमहांत्यपि ॥ ७८॥ ज्येष्ठेतुपुष्करारण्येयस्तिष्ठतिनिरुद्यमः ॥ लभतेसर्वकामित्वंयोऽत्रैवास्तेद्विजःसदा ॥ ७९ ॥
पितामहसमंयातिस्थानंपरममव्ययम् ॥ कृतेद्वादशभिर्वर्षैस्त्रेतायांहायनेनतु ॥ मासेनद्वापरेभीष्मअहोरात्रेणतत्कलौ ॥ २८० ॥ फलंसंप्राप्यते
लोकैःक्षेत्रेऽस्मिंस्तीर्थवासिभिः ॥ इत्येवंदेवदेवेनपुरोक्तंब्रह्मणामम ॥ ८१ ॥ नातःपरतरंकिंचित्क्षेत्रमस्तीहभूतले ॥ तस्मात्सर्वप्रयत्नेनारण्य
मेतत्समाश्रयेत् ॥ ८२ ॥ गृहस्थोब्रह्मचारीचवानप्रस्थोऽथभिक्षुकः ॥ यथोक्तकारिणःसर्वेगच्छंतिपरमांगतिम् ॥ ८३ ॥ एकस्मिन्नाश्रमेधर्मं
योऽनुतिष्ठेद्यथाविधि ॥ अकामद्वेषसंयुक्तःसपरत्रमहीयते ॥ ८४ ॥ चतुष्पदाहिनिःश्रणीब्रह्मणैषाप्रतिष्ठिता ॥ एतामाश्रित्यनिःश्रेणींब्रह्मलोकेम
हीयते ॥ ८५ ॥ आयुषोऽपिचतुर्भागंब्रह्मचार्यनसूयकः ॥ गुरौवागुरुपुत्रेवावसेद्धर्मार्थकोविदः ॥ ८६ ॥ कर्मातिरेकेणगुरोरध्येतव्यंबुभूषता ॥
दक्षिणानांप्रदायीस्यादाहूतोगुरुमाश्रयेत् ॥ ८७ ॥ जघन्यशायीपूर्वंस्यादुत्थायीगुरुवेश्मनि ॥ यच्चाशिष्येणकर्त्तव्यंकार्यमासेवनादिकम् ॥ ८८ ॥ ॥ ४४ ॥
कृतमित्येवतत्सर्वंकृत्वातिष्ठेत्तुपार्श्वतः ॥ किंकरःसर्वकारीचसर्वकर्मसुकोविदः ॥ ८९ ॥ शुचिर्दक्षोगुणोपेतोब्रूयादिष्टमथोत्तरम् ॥ चक्षुषागुरु
मव्यग्रोनिरीक्षेतजितेंद्रियः ॥ २९० ॥ नाभुक्तवतिचाश्नीयादपीतवतिनोपिबेत् ॥ नतिष्ठतितथासीतनसुप्तेनैवसंविशेत ॥ ९१ ॥ उत्तानाभ्यांच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पाणिभ्यांपादावस्यमृदुस्पृशेत ॥ दक्षिणंदक्षिणेनैवसव्यंसव्येनपीडयेत् ॥ ९२ ॥ अभिवाद्यगुरुंब्रूयादभिधांस्वांब्रुवन्निति ॥ इदंकरिष्येभगवन्निदं
चापिमयाकृतम् ॥ ९३ ॥ इतिसर्वंचविज्ञाप्यनिवेद्यगुरवेधनम् ॥ कुर्यात्कृतंचतत्सर्वमाख्येयंगुरवेपुनः ॥ ९४ ॥ यांस्तुगंधात्रसान्वापिब्रह्मचा
रीनसेवते ॥ सेवेततान्समावृत्यइतिधर्मेषुनिश्चयः ॥ ९५ ॥ येकेचिद्विस्तरेणोक्तानियमाब्रह्मचारिणः ॥ तान्सर्वाननुगृह्णीयाद्भक्तशिष्यश्चवैगुरोः ॥
॥ ९६॥ सएवंगुरवेप्रीतिमुपहृत्ययथाबलम् ॥ अग्राम्येष्वाश्रमेष्वेवंशिष्योवर्तेतकर्मणा॥९७॥वेदंवेदौतथावेदान्वेदार्थांश्चतथाद्विजः ॥भिक्षाभुगप्यधः
शायीसमधीत्यगुरोर्मुखात् ॥ ९८ ॥ वेदव्रतोपयोगीचचतुर्थांशेनयोगतः ॥ गुरवेदक्षिणांदत्वासमावर्तेद्यथाविधि ॥ ९९ ॥ धर्मान्वितैर्युतोदारैरग्नी
नावाह्यपूजयेत् ॥ द्वितीयमायुषोभागंगृहमेधीसमाचरेत् ॥ ३००॥ गृहस्थवृत्तयःपूर्वंचतस्रोमुनिभिःकृताः॥कुशूलधान्याप्रथमाकुंभीधान्याद्वितीयका
॥ १ ॥ अश्वस्तनीतृतीयोक्ताकापोत्यथचतुर्थिका ॥ तासांपरापराश्रेष्ठाधर्मतालोकजित्तमा ॥ २ ॥ षट्कर्मवर्त्तकस्त्वेकस्त्रिभिरन्यःप्रवर्तते ॥ द्वाभ्यां
चैवचतुर्थस्तुद्विजःसब्रह्मणिस्थितः ॥ ३ ॥ गृहमेधिव्रतादन्यन्महत्तीर्थंनचक्षते ॥ नात्मार्थेपाचयेदन्नंनवृथाघातयेत्पशुम् ॥ ४ ॥ प्राणीवायदिवाप्रा
णीसंस्काराद्यज्ञमर्हति॥ नदिवाप्रस्वपेज्जातुनपूर्वापररात्रयोः ॥५॥ नभुंजीतांतराकालेनानृतंतुवदेदिह ॥ नास्यानश्नन्वसेद्विप्रोगृहेकश्चिदपूजितः॥
॥ ६ ॥ तथास्यातिथयःपूज्याहव्यकव्यवहाःस्मृताः ॥ वेदविद्यव्रतस्नाताःश्रोत्रियावेदपारगाः॥७॥स्वकर्मजीविनोदांताःक्रियावंतस्तपस्विनः ॥ तेषां
हव्यंचकव्यंचाप्यर्हणार्थंविधीयते ॥ ८ ॥ नश्वरैस्संप्रयातस्यस्वधर्मापगतस्यच ॥ अपविद्धाग्निहोत्रस्यगुरोर्वालीककारिणः ॥ ९ ॥ असत्याभिनि
वेशस्यनाधिकारोऽस्तिकव्ययोः ॥ संविभागोऽत्रभूतानांसर्वेषामेवशिष्यते ॥ १० ॥ तथवापचमानेभ्यःप्रदेयंगृहमेधिना ॥ विघसाशीभवेन्नित्यं
नित्यंचामृतभोजनः ॥११॥ अमृतंयज्ञशेषःस्याद्भोजनंहविषासमम् ॥ संभुक्तशेषंयोऽश्नातितमाहुर्विघसाशिनम् ॥१२॥ स्वदारनिरतोदांतोदक्षोऽत्य
र्थंजितेंद्रियः ॥ ऋत्विक्पुरोहिताचार्यमातुलातिथिसंहतः ॥ १३ ॥ वृद्धबालातुरैर्वैद्यैर्ज्ञातिसंबंधिबांधवैः ॥ मात्रापित्राचजामात्राभ्रात्रापुत्रेणभार्यया
॥ १४ ॥ दुहित्रादासवर्गेणविवादंनसमाचरेत् ॥ एतान्विमुच्यसंवादान्सर्वपापैःप्रमुच्यते ॥ १५ ॥ एतैर्जितैस्तुजयतिसर्वलोकान्नसंशयः ॥ आचा
र्योब्रह्मलोकेशः प्राजापत्यप्रभुः पिता ॥१६॥ अतिथिःसर्वलोकेशऋत्विग्वेदाश्रयःप्रभुः ॥ जामाताप्सरसांलोकेज्ञातयोवैश्वदेविकाः ॥ १७ ॥ संबं
धिबांधवादिक्षुपृथिव्यांमातृमातुलौ ॥ वृद्धबालातुराश्चैवआकाशेप्रभविष्णवः ॥ १८ ॥ पुरोधाऋषिलोकेशःसंश्रितास्साध्यलोकपाः ॥ अश्विलोकप
तिर्वैद्योभ्रातातुवसुलोकपः ॥ १९ ॥ चंद्रलोकेश्वरीभार्यादुहिताप्सरसांगृहे ॥ भ्राताज्येष्ठःसमः पित्राभार्यापुत्रःस्वकातनुः ॥३२०॥ कायस्थादासवर्गा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्वदुहिताकृपणंपरम् ॥ तस्मादेतैरधिक्षिप्तःसहेन्नित्यमसंज्वरः ॥ २१ ॥ गृहधर्मरतोविद्वान्धर्मनिष्ठोजितक्रमः ॥ नारभेद्बहुकार्याणिधर्मवान्किंचिदा
रभेत् ॥ २२ ॥ गृहस्थवृत्तयस्तिस्रस्तासांनिःश्रेयसंपरम् ॥ परस्परंतथैवाहुश्चातुराश्रम्यमेवच ॥२३॥ येचोक्तानियमास्तेषांसर्वंकार्यंबुभूषुणा ॥ कुंभ
धान्यैरुञ्छशिलैःकापोतींवृत्तिमाश्रिताः ॥ २४ ॥ यस्मिंश्चतवसंत्यर्थास्तद्राष्ट्रमभिवर्धते ॥ पूर्वापरान्दशपरान्पुनातिचपितामहान् ॥२५॥ गृहस्थवृ
त्तिमप्येतांवर्ततेयोगतव्यथः ॥ सचक्रधरलोकानांसमानाम्प्राप्नुयाद्गतिम् ॥ २६ ॥ जितेंद्रियाणामथवागतिरेषाविधीयते ॥ स्वर्गलोकोगृहस्थानांप्र
तिष्ठानियतात्मनाम् ॥ २७ ॥ ब्रह्मणाभिहिताश्रेणीह्येषायस्याःप्रमुच्यते ॥ द्वितीयांक्रमशःप्राप्यस्वर्गलोकेमहीयते ॥२८॥ तृतीयामपिवक्ष्यामिवान
प्रस्थाश्रमंशृणु ॥ गृहस्थस्तुयदापश्येद्वलीपलितमात्मनः ॥२९॥ अपत्यस्यैवचापत्यंवनमेवतदाश्रयेत् ॥ गृहस्थव्रतखिन्नानांवानप्रस्थाश्रमौकसाम्
॥३३०॥ श्रूयतांभीष्मभद्रंतेसर्वलोकाश्रयात्मनाम्॥दीक्षापूर्वंनिवृत्तानांपुण्यदेशानिवासिनाम् ॥३१॥ प्रज्ञाबलयुजांपुसांसत्यशौचक्षमावताम् ॥ तृती
यमायुषोभागंवानप्रस्थाश्रमेवसन् ॥ ३२ ॥ तानेवाग्नीन्परिचरेद्यजमानोदिवौकसः ॥ नियतोनियताहारोविष्णुभक्तिप्रसक्तिमान् ॥३३॥ तदाग्निहो
त्रमात्राणियज्ञांगानिचसर्वशः ॥ अकृष्टंवैव्रीहियवंनीवारंविघसानिच ॥ ३४ ॥ ग्रीष्मेहविष्यंप्रायच्छेत्समखेष्वापिपंचसु ॥ वानप्रस्थाश्रमेऽप्येताश्चत
स्रोवृत्तयःस्मृताः ॥ ३५ ॥ सद्यःप्रभक्षकाःकेचित्केचिन्मासिकसंचयान् ॥ वार्षिकान्संचयान्केचित्केचिद्द्वादशवार्षिकान् ॥ ३६ ॥ कुर्वन्त्यति
थिपूजार्थंयज्ञतन्त्रार्थमेवच ॥ अभ्रावकाशावर्षासुहेमंतेजलसंश्रयाः ॥३७॥ ग्रीष्मेपंचाग्नितपसःशरद्यमृतभोजनाः ॥ भूमौविपरिवर्तंतेतिष्ठन्तिप्रपदैरपि
॥३८॥ स्थानासनेचवर्तन्तेवसनेष्वपिसंस्थिते ॥ दंतोलूखलिनःकेचिदश्मकुट्टास्तथापरे ॥ ३९ ॥ शुक्लपक्षेपिबन्त्येकेयवागूंक्वथितांक्वचित् ॥ कृष्ण
पक्षेपिबंत्येकेभुंजतेचयथागमम् ॥३४०॥ मूलैरेकेफलैरेकेजलैरेकेदृढव्रताः ॥ वर्त्तयंतियथान्यायंवैखानसधृतव्रताः ॥ ४१ ॥ एताश्चान्याश्चविविधादी
क्षास्तेषांमनस्विनाम् ॥ चतुर्थश्चौपनिषदाधर्मःसाधारणोमतः ॥ ४२ ॥ वानप्रस्थोगृहस्थश्चसततोऽन्यःप्रवर्त्तते ॥ तस्मिन्नेवयुगेतातविप्रैःसर्वार्थदर्शि
भिः ॥ ४३ ॥ अगस्त्यश्चसप्तर्षयोमधुच्छंदोगवेषणः ॥ सांकृतिःसदिवोभांडिर्यवप्रोथोह्यथर्वणः ॥ ४४ ॥ अहोवीर्यस्तथाकाम्यःस्थाणुर्मेधातिथिर्बु
धः ॥ मनोवाकःशिनीवाकःशून्यपालोऽकृतव्रणः ॥ ४५ ॥ एतेकर्मसुविद्वांसस्ततःस्वर्गमुपागमन् ॥ एतेप्रत्यक्षधर्माणस्तथायायावरागणाः ॥४६॥ ॥ ४५ ॥
ऋषीणामुग्रतपसांधर्मनैपुण्यदर्शिनाम् ॥ सुरेश्वरंसमाराध्यब्राह्मणावनमाश्रिताः ॥ ४७ ॥ अपास्योपरतामायांब्राह्मणावनमाश्रिताः ॥ अनक्षत्रास्त
थाऽधृष्याद्दृश्यन्तेज्योतिषंगणाः ॥ ४८ ॥ जरयातुपरिद्यूनाव्याधिनापरिपीडिताः॥चतुर्थंत्वाश्रमंशेषंवानप्रस्थाश्रमाद्ययुः ॥ ४९ ॥ सद्यस्कारीसुनि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वांप्यसर्ववेदसदक्षिणान् ॥ आत्मयाजीसौम्यमतिरात्मक्रीडात्मसंश्रयः ॥ ३५० ॥ आत्मन्यग्निंसमाधायत्यक्त्वासर्वपरिग्रहम् ॥ सद्यस्कश्चय
जेद्यज्ञानिष्टिंचैवेहसर्वदा ॥ ५१ ॥ सदैवयाजिनांयज्ञमात्मनीज्याप्रवर्त्तते ॥ त्रींश्चैवाग्नीन्यजेत्सम्यगात्मन्येवात्मजाक्षणात्॥५२॥प्राप्नुयाद्येनवा
यच्चतत्प्राश्नीयादकुत्सयन् ॥ केशलोमनखान्यस्येद्वानप्रस्थाश्रमेरतः ॥५३॥ आश्रमादाश्रमंसद्यःपूतोगच्छतिकर्मभिः ॥ अभयंसर्वभूतेभ्योयोदत्वा
प्रव्रजेद्द्विजः ॥ लोकास्तेजोमयास्तस्यप्रेत्यचानन्त्यमश्नुते ॥ ५४ ॥ सुशीलवृत्तोव्यपनीतकल्मषोनचेहनामुत्रचरन्त्यमीहते ॥ अरोषमोहोगतसंधिवि
ग्रहः सचेदुदासीनवदात्मचिंतया ॥५५॥ यमेषुचैवान्यगतेषुनव्यथःस्वशास्त्रशून्योहृदिनात्मविभ्रमः ॥ भवेद्यथेष्टागतिरात्मयाजिनिनिस्संशयेधर्मपरे
जितेन्द्रिये॥५६॥अतःपरंश्रेष्ठमतीवसद्गुणैरधिष्ठितंत्रीनतिवर्त्यचाश्रमान्॥चतुर्थमुक्तंपरमाश्रमंशृणुप्रकीर्त्यमानंपरमंपरायणम्॥ ५७॥ प्राप्यसंस्कारमे
ताभ्यामाश्रमाभ्यांततःपरम्॥यत्कार्यंपरमात्मार्थंतत्त्वमेकमनाःशृणु ॥ ५८ ॥ काषायंधारयित्वातुश्रेणीस्थानेषुचत्रिषु ॥ योव्रजेच्चपरंस्थानंपारिव्रा
ज्यमनुत्तमम् ॥ ५९ ॥ तद्भावनेनसंन्यस्यवर्तनंश्रूयतांतथा॥३६०॥एकएवचरेद्धर्मसिध्यर्थमसहायवान्॥एकश्चरतियः पश्यन्नजहातिनहीयते ॥६१॥
अनग्निरनिकेतस्तुग्रामंभिक्षार्थमाश्रयेत् ॥ अश्वस्तनविधानःस्यान्मुनिर्भावसमन्वितः ॥ ६२ ॥ लघ्वाशीनियताहारःसकृदन्नंनिषेवयेत् ॥ कपा
लंवृक्षमूलानिकुचेलमसहायता ॥ उपेक्षासर्वभूतानामेतावद्भिक्षुलक्षणम् ॥ ६३ ॥ यस्मिन्वाचंःप्रविशंतिकूपेप्राप्ताम्मृताइव ॥ न वक्ता
रंपुनर्यांतिसकैवल्याश्रमेवसेत् ॥ ६४ ॥ नैवपश्येन्नशृणुयादवाच्यंजातुकस्यचित् ॥ ब्राह्मणानांविशेषेणनैतद्ब्रूयात्कथंचन ॥ ६५ ॥ यद्ब्राह्मणस्यानु
कूलंतदेवसततंवदेत् ॥ तूष्णीमासीतनिंदायांकुर्वन्भैषज्यमात्मनः ॥ ६६ ॥ येनपूर्णमिवाकाशंभवत्येकेनसर्वदा ॥ शून्यंयेनसमाकीर्णंतं
देवाब्राह्मणंविदुः ॥६७॥ येनकेनचिदाच्छन्नोयेनकेनचिदाशितः ॥यत्रक्वचनशायीचतंदेवाब्राह्मणंविदुः ॥६८॥ अहेरिवजनाद्भीतःसुहृदोनरकादिव ॥
कृपणादिवनारीभ्यस्तंदेवाब्राह्मणंविदुः ॥ ६९॥ नहृष्येतविषीदेतमानितोऽमानितस्तथा ॥ सर्वभूतेष्वभयदस्तंदेवाब्राह्मणंविदुः॥ ३७० ॥ नाभिनं
देतमरणंनाभिनंदेतजीवितम् ॥ कालमेवनिरीक्षेतनिर्देशंकृषकोयथा ॥ ७१ ॥अनभ्याहतचित्तश्चदांतश्चाहतधीस्तथा॥विमुक्तःसर्वपापेभ्योनरोगच्छेत्त
तोदिवम् ॥ ७२ ॥ अभयंसर्वभूतेभ्योभूतानामभयंयतः ॥ तस्यदेहविमुक्तस्यभयंनास्तिकुतश्चन ॥७३ ॥ यथानागपदेऽन्यानिपदानिपदगामिनाम् ॥
सर्वाण्येवावलीयंतेतथाज्ञानानिचेतसि ॥ ७४ ॥ एवंसर्वमहिंसायांधर्मोऽर्थश्चमहीयते॥ मृतःसनित्यंभवतियोहिंसांप्रतिपद्यते ॥ ७५॥ अहिंसकस्ततः
सम्यग्धृतिमान्नियतेंद्रियः ॥ शरण्यस्सर्वभूतानांगतिमाप्नोत्यनुत्तमाम् ॥७६ ॥ एवंप्रज्ञानतृप्तस्यानिर्भयस्यमनीषिणः ॥ नमृत्युरधिकोभावःसोऽमृत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वंचगच्छति ॥ ७७ ॥ विमुक्तः सर्वसंगेभ्योमुनिराकाशवत्स्थितः ॥ विष्णुप्रियकरः शांतस्तंदेवाब्राह्मणंविदुः ॥ ७८ ॥ जीवितंयस्यधर्मार्थंधर्मोरत्यर्थ मेवच ॥ अहोरात्रादिपुण्यार्थंतंदेवाब्राह्मणंविदुः ॥ ७९ ॥ निवारितसमारंभंनिर्नमस्कारमस्तुतिम् ॥ अक्षीणंक्षीणकर्माणंतंदेवाब्राह्मणंविदुः ॥ ८० ॥ सर्वाणिभूतानिसुखंरमंतेसर्वाणिदुःखानिभृशंभवंति ॥ तेषांभवोत्पादनजातखेदः कुर्याच्चकर्माणिचश्रद्दधानः ॥ ८१ ॥ दानंहिभूताभयदक्षिणायाः सर्वाणिदानान्यधितिष्ठतीह ॥ तीक्ष्णंतनुंयः प्रथमंजुहोतिसोऽनंतमाप्नोत्यभयंप्रजाभ्यः ॥८२॥ उत्तानमास्येनहविर्जुहोतिअनंतप्राणो यभितः प्रति ष्ठाम् ॥ तस्यांगसंगादभिनिष्कृतंचवैश्वानरंसर्वमिदंप्रपेदे ॥८३॥ प्रादेशमात्रेहृदिनिसृतंयत्तस्मिन्प्राणेनात्मयाजीजुहोति ॥ तस्याग्निहोत्रंहुतमात्मसं स्थंसर्वेषुलोकेषुसदैवतेषु ॥८४॥ देवंविधातुंत्रिवृतंसुवर्णंयेवैविदुस्तंपरमार्थभूतम् ॥ तसर्वभूतेषुमहीयमानादेवाः समर्थाअमृतंव्रजंति ॥८५॥ वेदांश्चवेद्यं चविधिंचकृत्स्नमथोनिरुक्तंपरमार्थतांच ॥ सर्वंशरीरात्मनियः प्रवेदतस्याभिसर्वेप्रचरंतिनित्यम् ॥ ८६ ॥ भूमावसक्तंदिविचाप्रमेयंहिरण्मयंतंचसमंड लांते ॥ प्रदक्षिणंदक्षिणमंतरिक्षेयोवेदनाप्यात्मनिदीप्तरश्मिः ॥ ८७ ॥ आवर्तमानंचविवर्तमानंषण्नेमियद्द्वादशारंत्रिपर्व ॥ यस्येदमास्यंपरिपातिविश्वं तत्कालचक्रंनिहितंगुहायाम् ॥८८॥ यतः प्रसादंजगतः शरीरंसर्वांश्चलोकानधिगच्छतीह ॥ तस्मिन्हिसंतर्पयतीहदेवान्सवैविमुक्तोभवतीहनित्यम् ॥८९॥ तेजोमयोनित्यमतः पुराणोलोकेभवत्यथभयादुपैति ॥ भूतानियस्मान्नभयंव्रजंतिभूतेभ्योयोनोद्विजतेकदाचित् ॥३९०॥ अगर्हणीयोनचगर्हतेऽन्यान्स वैविप्रः प्रवरंस्वात्मनीक्षेत् ॥ विनीतमोहोऽप्यपनीतकल्मषोनचेहनामुत्रचयोऽर्थमृच्छति ॥ ९१ ॥ अरोषमोहः समलोष्टकांचनः प्रहीणशोकोगतसंधिवि ग्रहः ॥ अपेतनिंदास्तुतिरप्रियाप्रियश्चरन्नुदासीनवदेवभिक्षुः ॥९२॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेक्षेत्रवासमाहात्म्यंनामपंचदशोऽध्यायः ॥१५॥ भीष्मउवाच ॥ यदेतत्कथितंब्रह्मंस्तीर्थमाहात्म्यमुत्तमम् ॥ कमलस्याभिपातेनतीर्थजातंधरातले ॥१॥ तत्रस्थेनभगवताविष्णुनाशंकरेणच ॥ यत्कृ तंमुनिशार्दूलतत्सर्वंपरिकीर्त्तय ॥२॥ कथंयज्ञोहिदेवेनविभुनातत्रकारितः ॥ केसदस्याऋत्विजश्चब्राह्मणाः केसमागताः ॥३॥ केभागास्तस्ययज्ञस्यकिंद्र व्यंकाचदक्षिणा ॥ कावेदीकिंप्रमाणंचकृतंतत्रविरिंचिना ॥४॥ योयाज्यः सर्वदेवानांवेदैः सर्वत्रपठचते ॥ कंचकाममभिध्यायन्वेधायज्ञंचकारह ॥५॥ यथासौदेवदेवेशोह्यजरश्चामरश्चह ॥ तथाचैवाक्षयः स्वर्गस्तस्यदेवस्यदृश्यते ॥६॥ अन्येषांचैवदेवानांदत्तः स्वर्गोमहात्मना ॥ अग्निहोत्रार्थमुत्पन्नावे दाओषधयस्तथा ॥७॥ यचान्येपशवोभूमौसर्वेतेयज्ञकारणात् ॥ सृष्टाभगवतानेनइत्येषावैदिकीश्रुतिः ॥८॥ तदत्रकौतुकंमह्यंश्रुत्वेदंतवभाषितम् ॥ यंका ममधिकृत्यैकंयत्फलंयांचभावनाम् ॥९॥ कृतश्चानेनवैयज्ञः सर्वंशंसितुमर्हसि ॥ शतरूपाचयानारीसावित्रीसात्विहोच्यते ॥१०॥ भार्यासाब्रह्मणः प्रोक्ता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऋषीणांजननीचसा ॥ पुलस्त्याद्यान्मुनीन्सप्तदक्षाद्यांस्तुप्रजापतीन्॥११॥स्वायंभुवादींश्चमनून्सावित्रीसमजीजनत्॥धर्मपत्नींतुतांब्रह्मापुत्रिणीमात्म
नःप्रियाम्॥१२॥पतिव्रतांमहाभागांसुव्रतांचारुहासिनीम्॥कथंसतींपरित्यज्यभार्यामन्यामविंदत॥१३॥किंनाम्नीकिंसमाचाराकस्यसातनयाविभोः॥
क्वसादृष्टाहिदेवेनकेनचास्यप्रदाशता ॥ १४ ॥ किंरूपासातुदेवेशीदृष्टाचित्तविमोहिनी ॥ यांतुदृष्ट्वासदेवेशःकामस्यवशमेयिवान् ॥१५॥ वर्णतोरूप
तश्चैवसावित्र्यास्त्वधिकामुने॥ यामोहितवतीदेवंसवलोकेश्वरंविभुम् ॥१६॥ यथागृहीतवान्देवोनारींतांलोकसुंदरीम् ॥ यथाप्रवृत्तोयज्ञोऽसौतथासर्वंप्र
कीर्तय ॥ १७ ॥ तांदृष्ट्वाब्रह्मणःपार्श्वेसावित्रीकचकारह ॥ सावित्र्यांतुतदाब्रह्माकांतुवृत्तिमवर्त्तत ॥१८ ॥सन्निधौकानिवाक्यानिसावित्रीब्रह्मणतदा॥
उक्ताप्युक्तवतीभूयःसर्वंशंसितुमर्हसि ॥ १९ ॥ किंकृतंतत्रयुष्माभिःकोपोवाथक्षमापिवा ॥ यत्कृतंतत्रयद्दृष्टंयत्तवोक्तंमयात्विह ॥२० ॥ विस्तरेणेहस
र्वाणिकर्माणिपरमेष्ठिनः ॥ श्रोतुमिच्छाम्यशेषेणविधेर्यज्ञविधिंपरम्॥ २१ ॥ कर्मणामानुपूर्व्यंचप्रारंभोहोत्रमेवच ॥ होतुर्भक्षोयथाचापिप्रथमाकस्यका
रिता ॥ २२ ॥ कथंचभगवान्विष्णुःसाहाय्यंकेनकीदृशम् ॥ अमरैर्वाकृतंयच्चतद्भवान्वक्तुमर्हति ॥ २३ ॥ देवलोकंपरित्यज्यकथंमर्त्यमुपागतः ॥
गार्हपत्यंचविधिनाअन्वाहार्यंचदक्षिणम् ॥ २४ ॥ अग्निमाहवनीयंचवेदींचैवतथास्रुवम् ॥ प्रोक्षणीयंस्रुचंचैवआवभृथ्यंतथैवच ॥ २५ ॥ अग्नींस्त्रींश्च
यथाचक्रेहव्यभागवहान्हिव ॥ हव्यादांश्चसुरांश्चक्रकव्यादांश्चपितॄनपि ॥ २६ ॥ भागार्थयज्ञविधिनायेयज्ञायज्ञकर्माणि ॥ यूपान्समि
त्कुशंसोमंपवित्रंपरिधीनपि ॥ २७ ॥ यज्ञियानिचद्रव्याणियथाब्रह्माचकारह ॥ विबभ्राजपुरायश्चपारमेष्ठ्येनकर्मणा ॥ २८ ॥ क्षणानिमेषाः
काष्ठाश्चकलास्त्रकाल्यमेवच ॥ मुहूर्तास्तिथयोमासादिनंसंवत्सरस्तथा ॥२९॥ ऋतवःकालयोगाश्चप्रमाणंत्रिविधंपुरा॥आयुःक्षेत्राण्यपचयंलक्षणंरू
पसौष्ठवम् ॥३०॥ त्रयोवणास्त्रयोलोकास्त्रविद्यंपावकास्त्रयः ॥ त्रैकाल्यंत्रीणिकर्माणित्रयोवर्णास्त्रयोगुणाः ॥ ३१ ॥ सृष्टालोकाःपराःस्रष्ट्रायेचान्ये
ऽनल्पचेतसा ॥ यागतिर्धर्मयुक्तानांयागतिःपापकर्मणाम् ॥३२॥चातुर्वर्ण्यस्यप्रभवश्चातुर्वर्ण्यस्यरक्षिता॥चातुर्विद्यस्ययोवेत्ताचतुराश्रमसंश्रयः॥३३॥
यःपरंश्रूयतेज्योतिर्यःपरंश्रूयतेतपः ॥ यःपरंपरतःप्राहपरंयःपरमात्मवान्॥३४॥सेतुर्योलोकसेतूनांमेध्योयोमेध्यकर्मणाम्॥ वेद्योयोवेदविदुषांयःप्रभुः
प्रभवात्मनाम् ॥ ३५ ॥ असुभूतश्चभूतानामग्निभूतोऽग्निवर्चसाम् ॥ मनुष्याणांमनोभूतस्तपोभूतस्तपस्विनाम् ॥ ३६ ॥ विनयोनयवृत्तीनांतेजस्तेज
स्विनामपि ॥ इत्येतत्सर्वमखिलान्सृजन्लोकपितामहः ॥३७॥ यज्ञाद्वृतिंकामन्वैच्छ्रुत्कथंयज्ञेमतिःकृता ॥ एषमेसंशयोब्रह्मन्नेषमेसंशयःपरः ॥३८॥
आश्चर्यःपरमोब्रह्मादेवैर्दैत्यैश्चपठ्यते ॥ कर्मणाश्चर्यभूतोऽपितत्त्वतःसइहोच्यते ॥ ३९ ॥ पुलस्त्यउवाच ॥ प्रश्नभारोमहानेषत्वयोक्तोब्रह्मणश्रयः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथाशक्तितु वक्ष्यामिश्रूयतांतत्परंयशः ॥ ४० ॥ सहस्रास्यंसहस्राक्षंसहस्रचरणंचयम् ॥ सहस्रश्रवणंचैवसहस्रकरमव्ययम् ॥ ४१ ॥ सहस्रजिह्वंसा
हस्रंसहस्रपरमंप्रभुम् ॥ सहस्रदंसहस्रादिंसहस्रभुजमव्ययम् ॥४२॥ हवनंसवनंचैवहव्यंहोतारमेवच ॥ पात्राणिचपवित्राणिवेदींदीक्षांचरुंस्रुवम् ॥४३॥
स्रुक्सोममवभृचैवप्रोक्षणीदक्षिणाधनम् ॥ अद्ध्वर्युसामगंविप्रंसदस्यान्सदनंसदः ॥ ४४ ॥ यूपंसमित्कुशंदर्वींचमसोलूखलानिच ॥ प्राग्वंशंयज्ञभूमिं
चहोतारंबन्धनंचयत् ॥ ४५ ॥ ह्रस्वान्यतिप्रमाणानिप्रमाणस्थावराणिच ॥ प्रायश्चित्तानिवाजाश्वस्थंडिलानिकुशास्तथा ॥ ४६ ॥ मंत्रंयज्ञंचहवनं
वह्निभागंभवंचमम् ॥ अग्रेभुजंहोमभुजंशुभार्चिषमुदायुधम्॥४७॥ आहुर्वेदविदोविप्रायोयज्ञःशाश्वतःप्रभुः॥ यांपृच्छसिमहाराजपुण्यांदिव्यामिमांक
थाम् ॥ ४८ ॥ यदर्थंभगवान्ब्रह्माभूमौ यज्ञमथाकरोत् ॥ हितार्थंसुरमर्त्यानांलोकानांप्रभवायच ॥४९॥ ब्रह्माथकपिलश्चैवपरमेष्ठीतथैवच ॥ देवाः
सप्तर्षयश्चैवत्र्यंबकश्चमहायशाः ॥ ५० ॥ सनत्कुमारश्चमहानुभावोमनुर्महात्माभगवान्प्रजापतिः ॥ पुराणदेवोऽथतथाप्रचक्रेप्रदीप्तवैश्वानरतुल्यतेजाः
॥ ५१ ॥ पुराकमलजातस्यस्वपतस्तस्यकोटरे ॥ पुष्करेयत्रसंभूतादेवाऋषिगणास्तथा ॥ ५२ ॥ एषपौष्करकोनामप्रादुर्भावोमहात्मनः ॥ पुरा
णंकथ्यतेयत्रवेदस्मृतिसुसंहितम् ॥५३॥ वराहस्तुश्रुतिमुखःप्रादुर्भूतोविरिंचिनः ॥ सहायार्थंसुरश्रेष्ठोवाराहंरूपमास्थितः ॥५४॥ विस्तीर्णपुष्करेकृत्वा
तीर्थंकोकामुखंहितु ॥ वेदपादोयूपदंष्ट्रःक्रतुहस्तश्चितीमुखः ॥ ५५ ॥ अग्निजिह्वोदर्भरोमाब्रह्मशीर्षोमहातपाः ॥ अहोरात्रेक्षणोदिव्योवेदांगःश्रुतिभूष
णः ॥ ५६ ॥ आज्यनासः स्रुवतुंडःसामघोषस्वनोमहान् ॥ सत्यधर्ममयः श्रीमान्कर्मविक्रमसत्कृतः ॥ ५७ ॥ प्रायश्चित्तनखोधीरःपशुजानुर्मखाकृ
तिः ॥ उद्गात्रंत्रोहोमलिंगोफलबीजमहौषधिः॥५८॥वाय्वंतरात्मामंत्रास्थिरापःस्फिक्सोमशोणितः ॥वेदस्कन्धोहविर्गंधोहव्यकव्यातिवेगवान्॥५९॥
प्राग्वंशकायोद्युतिमान्नानादीक्षाभिरर्चितः ॥ दक्षिणाहृदयोयोगीमहासत्रमयोमहान् ॥६०॥ उपाकर्मेष्टिरुचिरःप्रवर्ग्यावर्तभूषणः ॥ छायापत्नीसहायो
वैमणिशृंगमिवोच्छ्रितः ॥ ६१ ॥ सर्वलोकहितात्मायोदंष्ट्रयाभ्युज्जहारगाम् ॥ ततःस्वस्थानमानीयपृथिवींपृथिवीधरः ॥ ६२ ॥ ततोजगामपृथिवी
निर्वाणंधारणाद्धरेः ॥ एवमादिवराहेणधृत्वाब्रह्महितार्थिना ॥ ६३ ॥ उद्धृतापुष्करेपृथ्वीसागरांबुगतापुरा ॥ वृतःशमदमाभ्यांयोदिव्येकोकामुखे
स्थितः ॥६४॥ आदित्यैर्वसुभिःसाध्यैर्मरुद्भिर्दैवतैःसह॥रुद्रैर्विश्वसहायैश्चयक्षराक्षसकिन्नरैः॥६५॥दिग्भिर्विदिग्भिः पृथिवीनदीभिः सह सागरैः॥चरा
चरगुरुःश्रीमान्ब्रह्माब्रह्मविदांवरः॥६६॥उवाचवचनंकोकामुखंतीर्थंत्वयाविभो॥पालनीयंसदागोप्यंरक्षाकार्यामखेत्विह ॥६७॥एवंकरिष्येभगवंस्तदाब्र
ह्माणमुक्तवान्॥उवाच तंपुनर्ब्रह्माविष्णुंदेवंपुरःस्थितम्॥६८॥ब्रह्मोवाच॥त्वंहिमेपरमोदेवस्त्वंहिमेपरमोगुरुः॥त्वंहिमेपरमंधामशक्रादीनांसुरोत्तम॥६९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उत्फुल्लामलपद्माक्षशत्रुपक्षक्षयावह ॥ यथायज्ञेनमेध्वंसोदानवैश्चविधीयते ॥७०॥ तथात्वयाविधातव्यंप्रणतस्यनमोऽस्तुते॥ विष्णुरुवाच॥ भयंत्यजस्व
देवेशक्षयंनेष्यामिदानवान्॥७१॥येचान्येविघ्नकर्तारोयातुधानास्तथासुराः॥घातयिष्याम्यहंसर्वान्स्वस्तितेस्तुपितामह ॥ ७२॥ एवमुक्त्वास्थितस्त
त्रसाहाय्येन कृतक्षणः॥प्रववुश्चशिवावाताःप्रसन्नाश्चदिशोदश ॥७३॥ सुप्रभाणिचज्योतींषिचंद्रंचक्रुःप्रदक्षिणम् ॥ नविग्रहंग्रहाश्चक्रुः प्रसेदुश्चापि सिंध
वः ॥ ७४ ॥ नीरजस्काभूमिरासीत्सकलाह्लाददास्त्वपः ॥ जग्मुः स्वमार्गंसरितोनापिचुक्षुभुरर्णवाः ॥ ७५ ॥ आसञ्शुभानींद्रियाणिनराणामंतरा
त्मनाम् ॥ महर्षयोवीतशोकावेदानुच्चैरवाचयन् ॥ ७६ ॥ यज्ञेतस्मिन्हविःपाकेशिवाआसंश्चपावकाः ॥ प्रवृत्तधर्मसद्वृत्तालोकामुदितमानसाः ॥७७॥
विष्णोःसत्यप्रतिज्ञस्यश्रुत्वारिनिधनागिरः ॥ ततोदेवाःसमायातादानवाराक्षसैस्सह ॥ ७८ ॥ भूतप्रेतपिशाचाश्चसर्वेतत्रागताःक्रमात् ॥ गन्धर्वाप्सर
सश्चैवनागाविद्याधरागणाः ॥७९॥ वानस्पत्याश्चौषधयोयच्चेहद्यच्चनेहति ॥ ब्रह्मादेशान्मारुतेनआनीताःसर्वतोदिशः ॥८०॥ यज्ञपर्वतमासाद्यदाक्षि
णामभितोदिशम् ॥ सुराउत्तरतः सर्वेमर्यादापर्वतेस्थिताः ॥ ८१ ॥ गंधर्वाप्सरसश्चैवमुनयोवेदपारगाः ॥ पश्चिमांदिशमास्थायस्थितास्तत्रमहा
क्रतौ ॥ ८२ ॥ सर्वेदेवनिकायाश्चदानवाश्चासुरागणाः ॥ अमर्षंपृष्ठतःकृत्वासुप्रीतास्तेपरस्परम् ॥८३॥ ऋषीन्पर्यचरन्सर्वेशुश्रूषन्ब्राह्मणांस्तथा॥ऋष
योब्रह्मर्षयश्चद्विजादेवर्षयस्तथा ॥८४॥राजर्षयोमुख्यतमास्समायातास्समंततः॥कतमश्चसुरोऽप्यत्रक्रतौयाज्योभविष्यति ॥८५॥ पशवःपक्षिणश्चैवत
त्रायातादिदृक्षवः ॥ ब्राह्मणाभोक्तुकामाश्चसर्वेवर्णानुपूर्वशः ॥८६॥ स्वयंचवरुणोरत्नंदक्षश्चान्नंस्वयंददौ॥आगत्यवरुणोलोकात्पक्वंचान्नंस्वतोऽपचत् ॥
॥८७॥ वायुर्भक्षविकारांश्चरसपाचीदिवाकरः ॥ अन्नपाचनकृत्सोमोमतिदाताबृहस्पतिः ॥८८॥ धनदानंधनाध्यक्षोवस्त्राणिविविधानिच ॥ सरस्वती
नदाध्यक्षोगंगादेवीसनर्मदा ॥ ८९ ॥ याश्चान्याःसरितःपुण्याःकूपाश्चैवजलाशयाः ॥ पल्वलानितटाकानिकुंडानिविविधानिच ॥ ९० ॥प्रस्रवाणि
चमुख्यानिदेवखातान्यनेकशः ॥ जलाशयानिसर्वाणिसमुद्राःसप्तसंख्यकाः ॥ ९१ ॥लवणेक्षुसुरासर्पिर्दधिदुग्धजलैःसमम् ॥ सप्तलोकाःसपातालाः
सप्तद्वीपाःसपत्तनाः ॥९२॥ वृक्षावल्ल्यःसतृणानिशाकानिचफलानिच॥पृथिवीवायुराकाशमापोज्योतिश्चपंचमम्॥९३॥सविग्रहाणिभूतानिधर्मशास्त्रा
णियानिच ॥ वेदभाष्याणिसूत्राणिब्रह्मणानिर्मितंचयत् ॥ ९४ ॥ अमूर्तंमूर्तमत्यन्तंमूर्तंदृश्यंतथाखिलम् ॥ एवंकृतेतथास्मिंस्तुयज्ञेपैतामहेतदा ॥
॥ ९५ ॥ देवानांसंनिधौतत्रऋषिभिश्चसमागमे ॥ ब्रह्मणोदक्षिणेपार्श्वेस्थितोविष्णुःसनातनः ॥ ९६ ॥ वामपार्श्वेस्थितोरुद्रःपिनाकीवरदःप्रभुः ॥
ऋत्विजांचापिवरणंकृतंतत्रमहात्मना ॥ ९७ ॥ भृगुर्होतावृतस्तत्रपुलस्त्योऽध्वर्युसत्तमः ॥ तत्रोद्गातामरीचिस्तुब्रह्मावैनारदःकृतः ॥ ९८ ॥ सनत्कु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मारादयोयेसदस्यास्तत्रतेऽभवन् ॥प्रजापतयोदक्षाद्यावर्णाब्राह्मणपूर्वकाः ॥९९॥ ब्रह्मणश्चसमीपेतुकृताऋत्विग्विकल्पना ॥ वस्त्रैराभरणैर्युक्ताःकृतावै
श्रवणेनते ॥१००॥ अंगुलीयैःसकटकैर्मुकुटैर्भूषिताद्विजाः ॥ चत्वारोद्वौदशान्येचततस्तेषोडशर्त्विजः ॥१॥ ब्रह्मणापूजिताःसर्वेप्रणिपातपुरःसरम् ॥
अनुग्राह्योभवद्भिस्तुसर्वैरस्मिन्क्रताविह ॥ २ ॥पत्नीममैषासावित्रीयूयंमेशरणंद्विजाः॥ विश्वकर्माणमाहूयब्रह्मणःशीर्षमुंडनम् ॥ ३ ॥ यज्ञेतुविहितंत
स्यकारितंद्विजसत्तमैः ॥ आतसेयानिवस्त्राणिदंपत्यर्थेतथाद्विजैः ॥ ४ ॥ ब्रह्मघोषेणतेविप्रानादयानास्त्रिविष्टपम् ॥ पालयंतोजगच्चेदंक्षत्रियाःसायु
धाःस्थिताः ॥ ५ ॥ भक्ष्यप्रकारान्विविधान्वैश्यास्तत्रप्रचक्रिरे ॥ रसबाहुल्ययुक्तंचभक्ष्यंभोज्यंकृतंततः ॥ ६ ॥ अश्रुतंप्रागदृष्टंचदृष्ट्वातुष्टःप्रजापतिः
॥ प्राग्वाटेतिददौनामवैश्यानांसृष्टिकृद्विभुः ॥७॥ द्विजानांपादशुश्रूषाशूद्रैःकार्यासदात्विह ॥ पादप्रक्षालनंभोज्यमुच्छिष्टस्यप्रमार्जनम् ॥ ८ ॥ ते
ऽपिचक्रुस्तदातत्रतेभ्योभूयःपितामहः ॥ शुश्रूषार्थमयायूयंतुरीयेतुपदेकृताः ॥ ९ ॥ द्विजानांक्षत्रबन्धूनांबन्धूनांचभवद्विधैः ॥ त्रिभ्यश्शुश्रूषणाकार्ये
त्युक्त्वाब्रह्मातथाकरोत् ॥ ११० ॥ द्वाराध्यक्षंतथाशक्रंवरुणंरसदायकम् ॥ वित्तप्रदंवैश्रवणंपवनंगंधदायिनम् ॥ ११ ॥ उद्योतकारिणंसूर्यंप्रभुत्वे
माधवःस्थितः ॥ सोमःसोमप्रदस्तेषांवामपक्षपथाश्रितः ॥ १२ ॥ सुसत्कृताचपत्नीसासावित्रीचवरांगना ॥ अध्वर्युणासमाहूताएहिदेवित्वरान्वि
ता ॥ १३ ॥ उत्थिताश्चाग्नयःसर्वेदीक्षाकालउपागतः ॥ व्यग्रासाकार्यकरणेस्त्रीस्वभावेननागता ॥ १४ ॥ इहवेनकृतंकिंचिद्वारेवैमंडनंमया ॥
भित्त्यांवैचित्र्यकर्माणिस्वस्तिकप्रांगणेनतु ॥१५॥ प्रक्षालनंचभांडानांनकृतंकिमपित्विह॥लक्ष्मीरद्यापिनायातापत्नीनारायणस्यया ॥१६॥ अग्नेःप
त्नीतथास्वाहाधूम्रोर्णातुयमस्यतु ॥ वारुणीवैतथागौरीवायोर्वैसुप्रभातथा ॥ १७ ॥ ऋद्धिर्वैश्रवणीभार्याशम्भोर्गौरीजगत्प्रिया ॥ मेधाश्रद्धाविभूति
श्च अनसूयाधृतिःक्षमा ॥ १८ ॥ गंगासरस्वतीचैवनाद्यायाताश्चकन्यकाः ॥ इंद्राणीचंद्रपत्नीतुरोहिणीशशिनःप्रिया ॥१९॥ अरुंधतीवसिष्ठस्यसप्त
र्षीणांचयाःस्त्रियः ॥ अनसूयात्रिपत्नीचतथान्याःप्रमदाइह ॥२०॥ वध्वोदुहितरश्चैवसख्योभगिनिकास्तथा ॥ नाद्यागतास्तुताःसर्वाअहंतावत्स्थि
ताचिरम् ॥२१॥ नाहमेकाकिनीयास्येयावन्नायांतिताःस्त्रियः ॥ ब्रूहिगत्वाविरिंचितुतिष्ठतावन्मुहूर्तकम् ॥ २२ ॥ सर्वाभिःसहिताचाहमागच्छामित्व
रान्विता ॥ सर्वैःपरिवृतःशोभांदेवैःसहमहामते ॥ २३ ॥ भवान्प्राप्नोतिपरमांतथाहंतुनसंशयः ॥ वदमानांतथाध्वर्युस्त्यक्त्वाब्रह्माणमागतः ॥
॥ २४ ॥ सावित्रीव्याकुलादेवप्रसक्तागृहकर्मणि ॥ सख्योनाभ्यागतायावत्तावन्नागमनंमम ॥ २५ ॥ एवमुक्तोऽस्मिवैदेवकालश्चाप्यतिवर्त्तते ॥ यत्ते
ऽद्यरुचितंतावत्तत्कुरुष्वपितामह ॥ २६ ॥ एवमुक्तस्तदाब्रह्माकिंचित्कोपसमन्वितः ॥ पत्नींचान्यांमदर्थेवैशीघ्रंशक्रइहानय ॥ २७ ॥ यथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रवर्ततेयज्ञःकालहीनोनजायते ॥ तथाशीघ्रंविधत्स्वत्वंनारींकांचिदुपानय ॥ २८ ॥ यावद्यज्ञसमाप्तिर्मेवर्णेत्वंमाकृथामनः ॥ भूयोऽपितांप्रमोक्ष्यामिसमाप्तौतुक्रतोरिह ॥ २९ ॥ एवमुक्तस्तदाशक्रोगत्वासर्वंधरातलम् ॥ स्त्रियोदृष्टास्तुयास्तेनसर्वास्तास्सपरिग्रहाः ॥ १३० ॥ आभीरकन्यारूपाढ्यासुनासाचारुलोचना ॥ नदेवीनचगन्धर्वीनासुरीनचपन्नगी ॥ ३१ ॥ नचास्तितादृशीकन्यायादृशीसावरांगना ॥ ददर्शतांसुचार्वंगींश्रियंदेवीमिवापराम् ॥ ३२ ॥ संक्षिपन्तींमनोवृत्तिविभवंरूपसंपदा ॥ यद्यत्तुवस्तुसौंदर्याद्विशिष्टंलभ्यतेक्वचित् ॥ ३३ ॥ तत्तच्छरीरसंलग्नंतन्वंग्यादृदृशेवरम् ॥ तांदृष्ट्वाचिंतयामासयद्येषाकन्यकाभवेत् ॥३४॥ तन्मत्तःकृतपुण्योऽन्योनदेवोसुविविद्यते ॥ योषिद्रत्नमिदंसेयंसद्भाग्यायांपितासहः॥३५॥ सरागोयदिवास्यात्तुसफलस्त्वेषमेश्रमः ॥ नीलाभ्रकनकांभोजविद्रुमाभांददर्शताम् ॥ ३६ ॥ त्विषंसंबिभ्रतीमंगैःकेशगंडेक्षणाधरैः ॥ मन्मथाशोकवृक्षस्यप्रोद्भिन्नांकलिकामिव ॥ ३७ ॥ प्रदग्धहृच्छयेनैवनेत्रवह्निशिखोत्करैः ॥ धात्राकथंहिसासृष्टाप्रतिरूपमपश्यता ॥ ३८ ॥ कल्पिताचेत्स्वयंबुद्ध्यानैपुण्यस्यगतिःपरा ॥ उत्तुंगाग्राविमौसृष्टौयन्मेसंपश्यतःसुखम् ॥ ३९ ॥ पयोधरौनातिचित्रंकस्यसंजायतेहृदि ॥ रागोपहतदेहोऽयमधरोयद्यपिस्फुटम् ॥ १४० ॥ तथापिसेवमानस्यनिर्वाणंसंप्रयच्छति ॥ वहद्भिरपिकौटिल्यमलकैःसुखमर्प्यते ॥ ४१ ॥ दोषोऽपिगुणवद्भातिभूरिसौंदर्यमाश्रितः ॥ नेत्रयोभूषितावंतावाकर्णाभ्याशमागतौ ॥ ४२ ॥ कारणाद्भावचैतन्यंप्रवदंतिहितद्विदः ॥ कर्णयोर्भूषणेनेत्रेनेत्रयोःश्रवणाविमौ ॥ ४३ ॥ कुंडलांजनयोरत्रनावकाशोऽस्तिकश्चन ॥ नतद्युक्तंकटाक्षाणांयद्विधाकरणंहृदि ॥ ४४ ॥ तवसंबंधिनोयेऽत्रकथंतेदुःखभागिनः ॥ सर्वसुन्दरतामेतिविकारःप्राकृतैर्गुणैः ॥ ४५ ॥ वृद्धेक्षणशतानांतुदृष्टमेषांमयाफलम् ॥ धात्राकौशलयसीमेयंरूपोत्पत्तौसुदर्शिता ॥ ४६ ॥ करोत्येषामनोनॄणांसस्नेहंकृतिविभ्रमैः ॥ एवंविमृशतस्तस्यतद्रूपापहृतत्विषः ॥ ४७ ॥ निरंतरोद्गतैश्छन्नमभवत्पुलकैर्वपु ॥ तांवीक्ष्यतप्तहेमाभांपद्मपत्रायतेक्षणाम् ॥ ४८ ॥ देवानामथयक्षाणांगन्धर्वोरगरक्षसाम् ॥ नानादृष्टामयानार्योनेदृशीरूपसंपदा ॥ ४९ ॥ त्रैलोक्यांतर्गतंयद्यद्वस्तुतत्तत्प्रधानतः ॥ समादायविधात्रास्याःकृतारूपस्यसंस्थितिः ॥ १५० ॥ इन्द्रउवाच ॥ कासिकस्यकुतश्चत्वमागतासुभ्रुकथ्यताम् ॥ एकाकिनीकिमर्थंचवीथीमध्येतुतिष्ठसि ॥ ५१ ॥ यान्येतान्यंगसंस्थानिभूषणानिबिभर्षिच ॥ नैतानितवभूषायैत्वमेतेषांहिभूषणम् ॥ ५२ ॥ नदेवीनचगन्धर्वीनासुरीनचपन्नगी ॥ किन्नरीदृष्टपूर्वावायादृशीत्वंसुलोचने ॥ ५३ ॥ उक्तामयाऽपिबहुशःकस्माद्दत्सेहिनोत्तरम् ॥ त्रपान्वितातुसाकन्याशक्रंप्रोवाचवेपती ॥ ५४ ॥ कन्योवाच ॥ गोपकन्यात्वहंवीरविक्रीणामीहगोरसम् ॥ नवनीतमिदंशुद्धंदधिचेदंविमण्डकम् ॥ ५५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 दध्याचैवात्रतकेणरसेनापिपरंतप ॥ अर्थीयेनासितद्ब्रूहिप्रगृह्णीष्वयथेप्सितम् ॥ ५६ ॥ एवमुक्तस्तदाशक्रोगृहीत्वातांकरेदृढम् ॥ अनयत्तांविशा
 लाक्षींयत्रब्रह्माव्यवस्थितः ॥ ५७ ॥ नीयमानातुसातेनक्रोशन्तीपितृमातरौ ॥ हातातमातर्हाभ्रातर्नयत्येषनरोबलात् ॥ ५८ ॥ यदितेऽस्ति
मयाकार्यंपितरंमेप्रयाचय ॥ सदास्यतिहिमांनूनंभवतःसत्यमुच्यते ॥ ५९ ॥ काहिनाभिलषेत्कन्याभर्तारंभक्तिवत्सलम् ॥ नादेयमस्तितेकिंचि
त्पितुर्मेधर्मवत्सल ॥ १६० ॥ प्रसादयेत्वांशिरसामांसतुष्टःप्रदास्यति ॥ पितुश्चित्तमविज्ञाययद्यात्मानंददामिते ॥ ६१ ॥ धर्मोहिविपुलोनश्ये
त्तेनत्वांनप्रसादये ॥ भविष्यामिवशेतुभ्यंयदितातःप्रदास्यति ॥ ६२ ॥ इत्थमाभाष्यमाणस्तुतयाशक्रोऽनयच्चताम् ॥ ब्रह्मणःपुरतःस्थाप्यप्राहा
स्यार्थेमयाऽबले ॥ ६३ ॥ आनीतासिविशालाक्षिमाशुचोवरवर्णिनि ॥ गोपकन्याचतंदृष्ट्वागौरवर्णंमहाद्युतिम् ॥ ६४ ॥ कमलाक्षंसुबाहुंसं
पुंडरीकनिभेणम् ॥ तप्तकांचनसद्भित्तिसदृशापीनवक्षसम् ॥ ६५ ॥ मतेभहस्तवृत्तोरुरक्तोत्तुंगनखत्विषम् ॥ प्राप्तंसाऽमन्यतात्मानंमन्मथस्ये
षुगोचरे ॥ ६६ ॥ तत्प्राप्तिहेतुकधियागतचित्तेवलक्ष्यते ॥ प्रभुत्वमात्मनोदानेगोपकन्याऽप्यमन्यत ॥ ६७ ॥ यद्येषमांसुरूपत्वादिच्छ
त्यादातुमाग्रहात् ॥ नास्तिसीमंतिनीकाचिन्मत्तोधन्यतराभुवि ॥ ६८ ॥ अनेनाहंसमानीतायच्चक्षुर्गोचरंगता ॥ अस्यत्यागेभवेन्मृत्युरत्यागे
जीवितंसुखम् ॥ ६९ ॥ भवेयमपमानाच्चधिग्रूपादुःखदायिनी ॥ दृश्यतेचक्षुपानेनयाऽपियोषित्प्रसादतः ॥ १७० ॥ साऽपिधन्यानसन्देहः
किंपुनर्यांपरिष्वजेत् ॥ जगद्रूपमशेषंहिपृथक्संचारमाश्रितम् ॥ ७१ ॥ लावण्यंतदिहैकस्थंदर्शितंविश्वयोनिना ॥ अस्योपमास्मरःसाध्वी
मन्मथस्योपमात्वयम् ॥ ७२ ॥ तिरस्कृतस्तुशोकोऽयंपितामातानकारणम् यदिमांनैषआदत्तेस्वल्पंमयिनभाषते ॥ ७३ ॥
अस्यानुस्मरणान्मृत्युःप्रभविष्यतिशोकजः ॥ अनागसिचपत्न्यांतुक्षिप्रंयातयमीदृशी ॥ ७४ ॥ कुचयोर्मणिशोभायैशुद्धाम्बुजसमद्युतिः ॥ मुख
मस्यप्रपश्यंत्यामनोमेध्यानमागतम् ॥ ७५ ॥ अस्यांगस्पर्शसंयोगंनवायोबहुमन्यसे ॥ स्पृशन्नटसियेनत्वंशरीरंप्राणिनांवरम् ॥ ७६ ॥ अ
थवास्यनदोषोऽस्तियदृच्छाचारकोह्यसि ॥ मुषितःस्मरनूनंत्वंसंरक्षस्वांप्रियांरतिम् ॥ ७७ ॥ त्वत्तोऽपिदृश्यतेयेनरूपेणायंस्मराधिकः ॥ ममानेन
मनोरत्नसर्वस्वंचहृतंदृढम् ॥ ७८ ॥ शोभायादृश्यतेवक्रेसाकुतःशशलक्ष्मणि ॥ नोपमासकलंकस्यनिष्कलंकेनशस्यते ॥ १८९ ॥ समानभाव
तांयातिपंकजंनास्यनेत्रयोः ॥ कोपमाजलशंखेनप्राप्ताश्रवणशङ्खयोः ॥ १८० ॥ विद्रुमोऽप्यधरस्यास्यलभतेनोपमांध्रुवम् ॥ आत्मस्थममृतंह्येषसं
स्रवंश्चेष्टतेध्रुवम् ॥ ८१ ॥ यदिकिंचिच्छुभंकर्मजन्मांतरशतैःकृतम् ॥ तत्प्रसादात्पुमान्भर्ताभवत्वेषममेप्सितः ॥ ८२ ॥ एवंचिंतापराधीनायाव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्सागोपकन्यका ॥ तावद्ब्रह्माहरिंप्राहयज्ञार्थंसत्वरंवचः ॥ ८३ ॥ देवीचैषामहाभागागायत्रीनामतःप्रभो ॥ एवमुक्तेतदाविष्णुर्ब्रह्माणंप्रोक्तवानिदम् ॥ ८४ ॥ विष्णुरुवाच ॥ तदेनामुद्वहस्वाद्यमयादत्तांजगत्प्रभो ॥ गांधर्वेणविवाहेनविकल्पंमाकृथाश्चिरम् ॥ ८५ ॥ अमुंगृहाणदेवाद्यअस्याःपाणिमनाकुलम् ॥ गांधर्वेणविवाहेनउपयेमेपितामहः ॥ ८६ ॥ तामवाप्यतदाब्रह्माजगादाध्वर्युसत्तमम् ॥ कृतापत्नीमयाह्येषासदनेमेनिवेशय ॥ ८७ ॥ मृगशृंगधराबालाक्षौमवस्त्रावगुंठिता ॥ पत्नीशालांतदानीताऋत्विग्भिर्वेदपारगैः ॥ ८८ ॥ औदुंबरेणदंडेनप्रावृतोमृगचर्मणा ॥ महाध्वरेतदाब्रह्माधाम्नास्वेनैव शोभते ॥ ८९ ॥ प्रारब्धंचततोहोत्रंब्राह्मणैर्वेदपारगैः ॥ भृगुणासहितैःकर्मवेदोक्तंतैःकृतंतदा ॥ तथायुगसहस्रंतुसयज्ञःपुष्करेऽभवत् ॥ १९० ॥ इति श्रीपाद्मपुराणेप्रथमेसृष्टिखंडेगायत्रीसंग्रहोनामषोडशोऽध्यायः ॥ १६ ॥ भीष्मउवाच ॥ तस्मिंयज्ञेकिमाश्चर्यंतदासीद्द्विजसत्तम ॥ कथंरुद्रःस्थितस्तत्रविष्णुश्चापिसुरोत्तमः ॥ १ ॥ गायत्र्याकिंकृतंतत्रपत्नीत्वेस्थितयातया ॥ आभीरैःकिंनुतत्त्वज्ञैर्ज्ञात्वातैश्चकृतंमुने ॥ २ ॥ एतद्वृत्तंसमाचक्ष्वयथावृत्तंयथाकृतम् ॥ अभीरैर्ब्रह्मणाचापिममैतत्कौतुकंमहत् ॥ ३ ॥ पुलस्त्यउवाच ॥ तस्मिन्यज्ञेयदाश्चर्यंवृत्तमासीन्नराधिप ॥ कथयिष्यामितत्सर्वंशृणुष्वैकमनानृप ॥ ४॥ रुद्रस्तुमहदाश्चर्यंकृतवान्वैसदोगतः ॥ निंद्यंरूपधरोदेवःस्थितोऽसौद्विजसन्निधौ ॥ ५ ॥ विष्णुनानकृतंकिंचित्प्राधान्येसयतःस्थितः ॥ नाशंतुगोपकन्यायाज्ञात्वागोपकुमारकाः ॥ ६ ॥ गोप्यश्चतास्तथासर्वाआगताब्रह्मणोंऽतिकम् ॥ दृष्ट्वातांमेखलाबद्धांयज्ञसीमव्यवस्थिताम् ॥ ७ ॥ हापुत्रीतितदामातापिताहापुत्रिकेतिच ॥ स्वसेतिबांधवाःसर्वेसख्यःसख्येनहासखि ॥ ८ ॥ केनत्वमिहचानीताकेनकस्माच्चवेष्टिता ॥ मौञ्जींतुत्रिवृतांकृत्वाकेनयुक्ताचकंबली ॥ ९ ॥ केनचेयंजटापुत्रिरक्तसूत्रावकल्पिता ॥ एवंविधानिवाक्यानिश्रुत्वोवाचपुरंदरः ॥१०॥ प्रतिषिध्यतुतानेवंसर्वानेवप्रसादयन् ॥ इन्द्रउवाच॥इहचास्माभिरानीतापत्न्यर्थंविनियोजिता ॥ ११ ॥ ब्रह्मणालंबिताबालाप्रलापंमाकृथास्त्विह ॥पुण्याचैषासुभाग्याचसर्वेषांकुलनंदिनी ॥ १२ ॥ पुण्याचेन्नभवत्येषाकथमागच्छतेसदः ॥ एवंज्ञात्वामहाभागनत्वंशोचितुमर्हसि ॥ १३ ॥ गोपांस्त्ववदृष्ट्यतदाशक्रवाक्यादनन्तरम्॥ उवाचस्निग्धयावाचाप्रतिनन्द्यहरिःपुनः ॥ १४॥ विष्णुरुवाच ॥ भोभोगोपसदाचारनत्वंशोचितुमर्हसि ॥ कन्यैषातेमहाभागाप्राप्तादेवंविरिञ्चिनम् ॥ १५ ॥ योगिनोयोगयुक्तायेब्राह्मणावेदपारगाः ॥ नलभन्तेप्रार्थयन्तस्तांगतिंदुहितागता ॥ १६ ॥ धर्मवन्तंसदाचारंभवन्तंधर्मवत्सलम् ॥ मयाज्ञात्वाततःकन्यादत्ताचैषाविरंचये ॥ १७ ॥ अनयातारितोगच्छदिव्याँल्लोकान्महोद

१ ज्वालारूप. क.

CC-0. In Public Domain. Digitization by eGangotri

यान् ॥ युष्माकंचकुलेचापिदेवकार्यार्थसिद्धये ॥ १८ ॥ अवतारंकरिष्येऽहंसाक्रीडातुभविष्यति ॥ यदानन्दप्रभृतयोह्यवतारंधरातले ॥ १९ ॥
करिष्यंतितदाचाहंवसिष्येतेषुमध्यतः ॥ युष्माकंकन्यकाःसर्वारमिष्यंतेमयासह ॥२०॥ तत्रदोषोनभवितानद्वेषोनचमत्सरः॥करिष्यंतितदागोपाभ
यंचनमनुष्यकाः ॥ २१ ॥ नचासांभवितादोषःकर्मणानेनकर्हिचित् ॥ श्रुत्वावाक्यन्तदाविष्णोरूचुर्गोपाः प्रणम्यतम् ॥ २२ ॥ गोपाऊचुः ॥
एवमेषवरोदेवयोदत्तोभविताहिमे ॥ अवतारःकुलेऽस्माकंकर्तव्योधर्मसाधनः ॥ २३ ॥ भवतोदर्शनादेवभवामःस्वर्गवासिनः ॥ शुभदाकन्यकाचै
षातारिणीमेकुलैःसह ॥ २४ ॥ एवंभवतुदेवेशवरदानंविभोतव ॥ अनुनीतास्तदागोपाःस्वयंदेवेनविष्णुना ॥ २५ ॥ ब्रह्मणाप्येवमेवन्तुवामहस्तेन
भाषितम् ॥ त्रपान्वितादर्शनेतुबन्धूनांवरवर्णिनी ॥ २६ ॥ कैरहंतुसमाख्यातायेनेमंदेशमागताः ॥ दृष्ट्वातुतांस्ततःप्राहगायत्रीगोपकन्यका ॥ २७॥
वामहस्तेनतान्सर्वान्प्रणिपातपुरःसरम् ॥ गायत्र्युवाच ॥ अत्रचाहंस्थितामातर्ब्रह्माणंसमुपागता ॥२८॥ भर्तालब्धोमयादेवःसर्वस्याद्योजगत्पतिः ॥
नाहंशोच्याभवत्यातुनपित्रानचबांधवैः ॥ २९ ॥ सखीगणश्चमेयातुभगिन्योदारकैःसह ॥ सर्वेषांकुशलंवाच्यंस्थिताऽस्मिसहदैवतैः ॥ ३० ॥
गतेषुतेषुसर्वेषुगायत्रीसासुमध्यमा ॥ ब्रह्मणासहितारेजेयज्ञवाटंगतासती ॥ ३१ ॥ याचितोब्राह्मणैर्ब्रह्मावरान्नोदेहिचेप्सितान् ॥ यथेप्सितंवरंते
पांतदाब्रह्माऽप्ययच्छत ॥ ३२ ॥ तयादेव्याचगायत्र्यादत्तंतच्चानुमोदितम् ॥ सातुयज्ञेस्थितासाध्वीदेवतानांसमीपगा ॥ ३३ ॥ दिव्यंवर्ष
शतंसाग्रंसयज्ञोववृधेतदा ॥ यज्ञवाटंकपर्दीतुभिक्षार्थंसमुपागतः ॥ ३४ ॥ बृहत्कपालंसंगृह्यपंचमुण्डैरलंकृतः ॥ ऋत्विग्भिश्चसदस्यैश्चदूरा
त्तिष्ठञ्जुगुप्सितः ॥ ३५ ॥ कथंत्वमिहसंप्राप्तोनिंदितोवेदवादिभिः ॥ एवंप्रोत्सार्यमाणोऽपिनिंद्यमानःसतैर्द्विजैः ॥ ३६ ॥ उवाचतान्द्विजान्सर्वा
न्स्मितंकृत्वामहेश्वरः ॥ महेश्वरउवाच ॥अत्रपैतामहेयज्ञेसर्वेपांतोषदायिनि ॥३७॥कश्चिदुत्सार्यतेनैवऋतेमांद्विजसत्तमाः ॥उक्तःसतैःकपर्दीतुभुक्त्वा
चान्नंततोव्रज ॥ ३८ ॥ कपर्दिनाचतेउक्ताभुक्त्वायास्यामिभोद्विजाः ॥ एवमुक्त्वानिषण्णःसकपालंन्यस्यचाग्रतः ॥ ३९ ॥ तेषांनिरीक्ष्यतत्कर्मच
क्रकौटिल्यमीश्वरः ॥ मुक्त्वाकपालंभूमौतुतान्द्विजानवलोकयन् ॥ ४० ॥ उवाचपुष्करंयामिस्नानार्थंद्विजसत्तमाः ॥ तूर्णंगच्छेतितैरुक्तःसगतःपर
मेश्वरः ॥ ४१ ॥ वियत्स्थितःकौतुकेनमोहयित्वादिवौकसः ॥ स्नानार्थंपुष्करंयातेकपर्दिनिद्विजातयः ४२ ॥ कथंहोमोऽत्रक्रियतेकपालेसदसि
स्थिते ॥ कपालांतान्यशौचानिपुराप्राहप्रजापतिः ॥४३॥ विप्रोऽभ्यधात्सदस्येकःकपालमुत्क्षिपाम्यहम् ॥ उद्धृतंतुसदस्येनप्रक्षिप्तंपाणिनास्वयम्॥
॥ ४४ ॥ तावदन्यत्स्थितंतत्रपुनरेवसमुद्धृतम् ॥ एवंद्वितीयंतृतीयंविंशतिस्त्रिंशदप्यहो ॥ ४५ ॥ पंचाशच्चशतंचैवसहस्रमयुतंतथा ॥ एवंनांतःक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पालानांप्राप्यतेद्विजसत्तमैः ॥ ४६ ॥ नत्वाकपर्दिनंदेवंशरणंसमुपागताः ॥ पुष्करारण्यमासाद्यजप्यैश्चवैदिकैर्भृशम् ॥ ४७ ॥ तुष्टुवुःसहिताःस
र्वेतावत्तुष्टोहरःस्वयम् ॥ ततःसदर्शनंप्रादाद्द्विजानांभक्तितःशिवः ॥४८॥ उवाचतांस्ततोदेवोभक्तिनम्रान्द्विजोत्तमान् ॥ शिवउवाच ॥ पुरोडाशस्य
निष्पत्तिःकपालंनविनाभवेत् ॥ ४९ ॥ कुरुध्वंवचनंविप्राभागःस्विष्टकृतोमम ॥ एवंकृतेकृतंसर्वंमदीयंशासनंभवेत् ॥ ५० ॥ तथेत्यूचुर्द्विजाश्शं
भुंकुर्मोवैतवशासनम् ॥ कपालपाणिराहेशोभगवंतंपितामहम् ॥ ५१ ॥ वरंवरयभोब्रह्मन्हृदियत्तेप्रियंस्थितम् ॥ सर्वंतवप्रदास्यामिअदेयंनास्तिमे
प्रभो ॥ ५२ ॥ ब्रह्मोवाच ॥ नतेवरंग्रहीष्यामिदीक्षितोऽहंसदःस्थितः ॥ सर्वकामप्रदश्चाहंयोमांप्रार्थयतेत्विह ॥ ५३ ॥ एवंवदंतंवरदंक्रतौतस्मिन्पि
तामहम् ॥ तथेतिचोक्त्वारुद्रःसवरमस्मादयाचत ॥ ५४ ॥ ततोमन्वंतरेऽतीतेपुनरेवप्रभुःस्वयम् ॥ ब्रह्मोत्तरंकृतंस्थानंस्वयंदेवेनशंभुना ॥ ५५ ॥
चतुर्ष्वपिहिवेदेषुपरिनिष्ठांगतोहियः ॥ तस्मिन्कालेतदादेवोनगरस्यावलोकने ॥ ५६ ॥ संभाषणेद्विजानांतुकौतुकेनसदोगतः ॥ तेनैवोन्मत्तवेषेण
हुतशेषेमहेश्वरः ॥ ५७ ॥ प्रविष्टोब्रह्मणःसद्मदृष्टोदेवैर्द्विजोत्तमैः ॥ प्रहसंतिचकेऽप्येनंकेचिन्निर्भर्त्सयंतिच ॥ ५८ ॥ अपरेपांसुभिःसिञ्चन्त्युन्मत्तंतं
तथाद्विजाः ॥ लोष्टैश्चलगुडैश्चान्येशुष्मिणोबलगर्विताः ॥ ५९ ॥ प्रहरन्तिस्मोपहासंकुर्वाणाहस्तसंविदम् ॥ ततोऽन्येवटवस्तत्रजटास्वागृह्यचांतिक
म् ॥ ६० ॥ पृच्छंतिव्रतचर्यांतांकेनैषातेनिदर्शिता ॥ अत्रवामाःस्त्रियःसंतितासामर्थेत्वमागतः ॥ ६१ ॥ केनैषादर्शिताचर्यागुरुणापापदर्शिना ॥
येनचोन्मत्तवद्वाक्यंवदन्मध्येप्रधावसि ॥ ६२ ॥ शिश्नंमेब्रह्मणोरूपंभगंचापिजनार्दनः ॥ उप्यमानमिदंबीजंलोकःक्लिश्नातिचान्यथा ॥ ६३ ॥ म
याऽयंजनितःपुत्रोजनितोऽनेनचाप्यहम् ॥ महादेवकृतेसृष्टिःसृष्टाभार्याहिमालये ॥ ६४॥ उमादत्तातुरुद्रस्यकस्यसातनयावद ॥ मूढायूयंनजानीथ
वदतांभगवांस्तुवः॥६५॥ ब्रह्मणानकृताचर्यादर्शितानैवविष्णुना॥ गिरिशेनापिदेवेनब्रह्मवध्याकृतेनतु॥६६॥कथंस्विद्वर्हसेदेवंवध्योऽस्माकंत्वमद्यवै ॥
एवंतैर्हन्यमानस्तुब्राह्मणैस्तत्रशंकरः ॥ ६७ ॥ स्मितंकृत्वाऽब्रवीत्सर्वान्ब्राह्मणान्नृपसत्तम ॥ शिवउवाच ॥ किंमांनवित्थभोविप्राउन्मत्तंनष्टचेतनम् ॥
॥ ६८ ॥ यूयंकारुणिकाःसर्वेमित्रभावेव्यवस्थिताः ॥ वदमानमिदंछद्मब्रह्मरूपधरंहरम् ॥ ६९ ॥ माययातस्यदेवस्यमोहितास्तेद्विजोत्तमाः ॥
कपर्दिनंनिजघ्नुस्तेपाणिपादैश्चमुष्टिभिः ॥ ७० ॥ दंडैश्चापिचकीलैश्चउन्मत्तवेषधारिणम् ॥ पीड्यमानस्ततस्तैस्तुद्विजैःकोपमथागमत् ॥
॥ ७१ ॥ ततोदेवेनतेशप्तायूयंवेदविवर्जिताः ॥ ऊर्ध्वजटाःक्रतुभ्रष्टाःपरदारोपसेविनः ॥ ७२ ॥ वेश्यायांतुरताद्यूतेपितृमातृविवर्जिताः ॥
नपुत्रःपैतृकंवित्तंविद्यांवापिगमिष्यति ॥ ७३ ॥ सर्वेचमोहिताःसंतुसर्वेंद्रियविवर्जिताः ॥ रौद्रींभिक्षांसमश्नंतुपरपिंडोपजीविनः ॥ ७४ ॥

CC-0. In Public Domain. Digitization by eGangotri

आत्मानंवर्तयंतश्चनिर्ममाधर्मवर्जिताः ॥ कृपार्पितातुयैर्विप्रैरुन्मत्तेमयिसांप्रतम् ॥ ७५ ॥ तेषांधनंचपुत्राश्चदासीदासमजाविकम् ॥ कुलो
त्पन्नाश्चवैनार्योमयितुष्टेभजिष्यथ ॥ ७६ ॥ एवंशापंवरंचैवदत्त्वांतर्द्धानमीश्वरः ॥ गतोद्विजागतेदेवेमत्वातंशंकरंप्रभुम् ॥ ७७ ॥ अन्विष्यं
तोऽपियत्नेननचापश्यंततेयदा ॥ तदानियमसंपन्नाःपुष्करारण्यमागताः ॥ ७८ ॥ स्नात्वाज्येष्ठसरोविप्राजेपुस्तेशतरुद्रियम् ॥ जाप्यावसानेदेवस्ता
नशरीरगिराब्रवीत् ॥ ७९ ॥ शिवउवाच ॥ अनृतंनमयाप्रोक्तंस्वैरेष्वपिकुतःपुनः॥ आगतेनिग्रहेक्षेमंभूयोऽपिकरवाण्यहम् ॥ ८० ॥ शांतादांताद्वि
जायेतुभक्तिमंतोमयिस्थिराः ॥ नतेषांछिद्यतेवेदोनधनंनापिसंततिः ॥ ८१ ॥ अग्निहोत्ररतायेचभक्तिमंतोजनार्दने ॥ पूजयंतिचब्रह्माणंतेजोराशिं
दिवाकरम् ॥ ८२ ॥ नाशुभंविद्यतेतेषांयेषांसाम्येस्थितामतिः ॥ एतावदुक्त्वावचनंतूष्णींभूतस्तुसोऽभवत् ॥ ८३॥ लब्ध्वावरंसप्रसादंदेवदेवान्महे
श्वरात् ॥ आजग्मुःसहितास्सर्वेयत्रदेवःपितामहः ॥ ८४ ॥ विरिंचिंसंहिताजाप्यैस्तोषयंतोऽग्रतःस्थिताः ॥ तुष्टस्तानब्रवीद्ब्रह्मात्तोऽपिव्रियतां
वरः ॥ ८५ ॥ ब्रह्मणस्तेनवाक्येनहृष्टाःसर्वेद्विजोत्तमाः ॥ कोवरोयाच्यतांविप्राःपरितुष्टेपितामहे ॥ ८६ ॥ एकेतत्राब्रुवन्विप्रावेदान्वैवृणवामहे
नेतिचान्येधनंचान्येव्रियतामविशङ्कितैः ॥ ८७ ॥ किमस्माकंधनेनेहकार्यंतुष्टेपितामहे ॥ अग्निहोत्राणिवेदाश्चशास्त्राणिविविधानिच ॥ ८८ ॥
सांतानिकाश्चयेलोकावरदानाद्भवंतुनः ॥ एवंप्रजल्पतांतत्रविप्राणांकोपमाविशत् ॥ ८९ ॥ केयूयंकेऽत्रप्रवरावयंश्रेष्ठास्तथापरे ॥ नेतिनेतितथाविप्रा
द्विजांस्तांस्तत्रसंस्थितान् ॥ ९० ॥ ब्रह्मोवाचाभिसंप्रेक्ष्यब्राह्मणान्क्रोधपूरितान् ॥ यस्माद्यूयंत्रिभिर्भागैःसभायांबाह्यतःस्थिताः ॥ ९१ ॥ तस्मा
दामूलिकोगुल्मोह्येकोभवतुवोद्विजाः ॥ उदासीनाःस्थितायेतुउदासीनाभवंतुते ॥ ९२ ॥ सायुधाबद्धनिस्त्रिंशायोद्धुकामाव्यवस्थिताः ॥ कौशिकी
तिगणोनामतृतीयोभवतुद्विजाः ॥ ९३ ॥ त्रिधाबद्धमिदंस्थानंसर्वंयुष्मद्भविष्यति ॥ बाह्यतोलोकशब्देनप्रोच्यमानाःप्रजास्त्विह ॥ ९४ ॥ अवि
क्रेयंनास्तिवोऽत्रसर्वस्वंवःप्रणश्यति ॥ तृणानिभूमिरुदकंतथावैदारुसंचयः ॥ ९५ ॥ प्रतिग्रहेचानुवृत्तिःकुपिताश्चपरस्परम् ॥ अभिप्रपन्नविप्राणांक्ष
मावैनात्रकाचन ॥ ९६ ॥ केवलंद्रव्यरुचयोलोभोपहतचेतसः ॥ एवंविधारुद्रशापाद्भवितारोनसंशयः ॥ ९७ ॥ युष्माकंस्थानमेतत्तुविष्णुःपा
लयिताध्रुवम् ॥ मयादत्तंचिरस्थायिअभंगंचभविष्यति ॥ ९८ ॥ एममुक्त्वातदाब्रह्मासमाप्तिंतामवैक्षत ॥ ब्राह्मणाःसहितास्तेतुयज्ञार्थेविबुधैस्सह ॥
॥ ९९ ॥ अतिथिंभोजयानाश्चवेदाभ्यासरतास्तुते ॥ एतच्चपरमंक्षेत्रंपुष्करंब्रह्मसंज्ञितम् ॥ १०० ॥ तत्रस्थायेद्विजाःशांतावसंतिक्षेत्रवासिनः ॥ नते
पांदुर्लभंकिंचिद्ब्रह्मलोकेभविष्यति ॥ १ ॥ कोकामुखेकुरुक्षेत्रेनैमिषेऋषिसंगमे ॥ वाराणस्यांप्रभासेचतथाबदरिकाश्रमे ॥ २ ॥ गंगाद्वारेप्रया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गेचगंगासागरसंगमे ॥ रुद्रकोट्यांविरूपाक्षेमित्रस्यापितथावने ॥ ३ ॥ तीर्थेष्वेतेषुसर्वेषुसिद्धिर्याद्वादशाब्दिका ॥ प्राप्यतेमानवैर्लोकेषण्मासाद्रा
जसत्तम ॥ ४ ॥ पुष्करेतुनसंदेहोब्रह्मचर्यमनायदि ॥ तीर्थानांपरमंतीर्थंक्षेत्राणामपिचोत्तमम् ॥ ५ ॥ सदातुपूजितंपूज्यैर्भक्तियुक्तैःपितामहे ॥
अतःपरंप्रवक्ष्यामिसावित्र्याब्रह्मणासह ॥ ६ ॥ वादोयथानुभूतस्तुपरिहासकृतोमहान् ॥ सावित्रीगमनेसर्वाआगतादेवयोषितः ॥ ७ ॥ भृगोःख्यात्यां
समुत्पन्नाविष्णुपत्नीयशस्विनी ॥ आमन्त्रितातदालक्ष्मीस्तत्रायातात्वरान्विता ॥ ८ ॥ मदिराचमहाभागायोगनिद्राविभूतिदा ॥ श्रीःकमलालया
भूतिःकीर्तिःश्रद्धामनस्विनी ॥ ९॥ पुष्टितुष्टिप्रदायातुदेव्यएताःसमागताः ॥ सतीयादक्षतनयाउमेतिपार्वतीशुभा ॥ ११० ॥ त्रैलोक्यसुंदरीदेवीस्त्री
णांसौभाग्यदायिनी ॥ जयाचविजयाचैवमधुच्छंदामरावती ॥ ११ ॥ सुप्रियाजनकांताचसावित्र्यामंदिरेशुभे ॥ गौर्यासहसमायातास्सुवेषाभर
णान्विताः ॥ १२ ॥ पुलोमदुहिताचैवशक्राणीचसहाप्सराः ॥ स्वाहाचापिस्वधायाताधूमोर्णाचवरानना ॥ १३ ॥ यक्षीतुराक्षसीचैवगौरीचैवम
हाधना ॥ मनोजवावायुपत्नीऋद्धिश्चधनदप्रिया ॥ १४ ॥ देवकन्यास्तथायातादानव्योदनुवल्लभाः ॥ सप्तर्षीणांमहापत्न्यऋषीणांचवरांगनाः ॥
॥ १५ ॥ एवंभगिन्योदुहिताविद्याधरीगणास्तथा ॥ राक्षस्यःपितृकन्याश्चतथान्यालोकमातरः ॥ १६ ॥ वधूभिःसस्नुषाभिश्चसावित्रीगंतुमि
च्छति ॥ अदित्याद्यास्तथासर्वादक्षकन्यास्समागताः ॥ १७ ॥ ताभिःपरिवृतासाध्वीब्रह्माणीकमलालया ॥ काचिन्मोदकमादायकाचिच्छू
र्पंवरानना ॥ १८ ॥ फलपूरितमादायप्रयाताब्रह्मणोऽतिकम् ॥ आढकीःसहनिष्पावागृहीत्वान्यास्तथापराः ॥ १९ ॥ दाडिमानिविचित्राणि
मातुलिंगानिशोभना ॥ करीराणितथाचान्यागृहीत्वाकमलानिच ॥ १२० ॥ कौसुंभकंजीरकंचखर्जूरमपरातथा ॥ उत्तमान्यपरादायनालिकेरा
णिसर्वशः ॥ २१ ॥ द्राक्षयापूरितंकाचित्पात्रंशृंगाटकंतथा ॥ कर्पूराणिविचित्राणिजंबूकानिशुभानिच ॥ २२ ॥ अक्षोटामलकान्गृह्यजंबीराणि
तथापरा ॥ बिल्वानिपरिपक्वानिचिपिटानिवरानना ॥ २३ ॥ अतुल्यान्नविकाराणिबहूनिविविधानिच ॥ कार्पासतूलिकाश्चान्यावस्त्रंकौसुंभकं
तथा ॥१४॥ एवमाद्यानिचान्यानिकृत्वाशूर्पेवराननाः ॥ सावित्र्यासहिताःसर्वाःसंप्राप्ताःसहसाशुभाः ॥२५॥ सावित्रीमागतांदृष्ट्वाभीतस्तत्रपुरंदरः॥
अधोमुखःस्थितोब्रह्माकिमेषामांवदिष्यति ॥२६॥ त्रपान्वितौविष्णुरुद्रौसर्वेचान्येद्विजातयः ॥ सभासदस्तथाभीतास्तथाचान्येदिवौकसः ॥२७॥
पुत्राःपौत्राभागिनेयामातुलाभ्रातरस्तथा ॥ ऋभवोनामयेदेवादेवानामपिदेवताः ॥ २८ ॥ वैलक्ष्येतुस्थिताःसर्वेसावित्रीकिंवदिष्यति ॥ ब्रह्मपार्श्वे

१ कान्तिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थितातत्रकिंतुवैगोपकन्यका ॥ २९ ॥ मौनीभूतातुशृण्वानासर्वेषांवदतांगिरः ॥ अध्वर्युणासमाहूतानागतावरवर्णिनी ॥ १३० ॥ शक्रेणान्याहृता
भीरीदत्तासाविष्णुनास्वयम् ॥ अनुमोदिताचरुद्रेणपित्राऽदत्तास्वयंतथा ॥३१॥ कथंसाभाविताय‌ज्ञसमाप्तिंवाव्रजेत्कथम्॥एवंचिंतयतांतेषांप्रविष्टाक
मलालया ॥३२॥ वृतोब्रह्मासदस्यैस्तुऋत्विग्भिर्दैवतैस्तथा॥हूयन्तेचाग्नयस्तत्रब्राह्मणैर्वेदपारगैः ॥३३॥ पत्नीशालास्थितागोपीसैणशृंगासमेखला॥
क्षौमवस्त्रपरीधानाध्यायंतीपरमंपदम् ॥३४॥ पतिव्रतापतिप्राणाप्राधान्येचनिवेशिता॥रूपान्वितविशालाक्षीतेजसाभास्करोपमा ॥३५॥ द्योतयंती
सदस्तत्रसूर्यस्येवयथाप्रभा ॥ ज्वलमानंतथावह्निंश्रयंतेऋत्विजस्तथा ॥३६॥ पशूनामिहगृह्णानाभागंस्वस्वचरोर्मुदा ॥ यज्ञभागार्थिनोदेवाविलंबा
द्ब्रुवतेतदा ॥३७॥ कालहीनंनकर्तव्यंकृतंनफलदंयतः ॥ वेदेष्वेवमधीकारोदृष्टःसर्वैर्मनीषिभिः ॥३८॥ प्रावर्ग्येक्रियमाणेतुब्राह्मणैर्वेदपारगैः ॥ क्षीर
द्वयेनसंयुक्तःशृतेनाध्वर्युणातथा ॥ ३९ ॥ उपहूतेनागतेनचाहूतेषुद्विजन्मसु ॥ क्रियमाणेतथामक्ष्येदृष्ट्वादेवीरुषान्विता ॥ १४० ॥ उवाचदेवीब्रह्माणं
सदोमध्येतुमौनिनम् ॥ सावित्र्युवाच॥किमेतद्युज्यतेदेवकर्तुमेतद्विचेष्टितम् ॥ ४१ ॥ मांपरित्यज्ययत्कामात्कृतवानसिकिल्बिषम् ॥ नतुल्यापादर
जसाममेयंगोपकन्यका ॥४२॥ यद्वदंतिजनास्सर्वेसंगताःसदसिस्थिताः ॥ आज्ञामीश्वरभूतानांतांकुरुष्वयदीच्छसि ॥ ४३ ॥ भवतारूपलोभेनकृतं
लोकविगर्हितम् ॥ पुत्रेषुनकृतालज्जापौत्रेषुचनतेप्रभो ॥ ४४ ॥ कामकारकृतंमन्यएतत्कर्मविगर्हितम् ॥ पितामहोऽसिदेवानामृषीणांप्रपितामहः
॥ ४५ ॥ कथंनतेत्रपाजाताआत्मनःपश्यतस्तनुम् ॥ लोकमध्येकृतंहास्यमहंचापकृताप्रभो ॥ ४६ ॥ यद्येपतेस्थिरोभावस्तिष्ठदेवनमोऽस्तुते ॥अहं
कथंसखीनांतुदर्शयिष्यामिवैमुखम् ॥ ४७ ॥ भर्त्रामेविधृतापत्नीकथमेतदहंवदे ॥ ब्रह्मोवाच ॥ ऋत्विग्भिस्त्वरितश्चाहंदीक्षाकालादनंतरम् ॥४८॥
पत्नींविनानहोमोऽत्रशीघ्रपत्नीमिहानय ॥ शक्रेणैषासमानीतादत्तेयंममविष्णुना ॥ ४९ ॥ गृहीताचमयासुभ्रुक्षमस्वैतंमयाकृतम् ॥ नचापराधं
भूयोऽन्यंकरिष्येतवसुव्रते ॥ १५० ॥ ॥ पादयोःपतितस्तेऽहंक्षमस्वेहनमोऽस्तुते ॥ पुलस्त्य उवाच ॥ एवमुक्तातदाक्रुद्धाब्रह्माणंशप्तुमुद्यता ॥५१॥
यदिमेऽस्तितपस्तप्तंगुरवोयदितोपिताः ॥ सर्वब्रह्मसमूहेषुस्थानेषुविविधेषुच ॥ ५२ ॥ नैवतेब्राह्मणाःपूजांकरिष्यंतिकदाचन ॥ ऋतेतुकार्तिकीमेकां
पूजांसांवत्सरींतव ॥ ५३ ॥ करिष्यंतिद्विजाःसर्वेमर्त्यानान्यत्रभूतले ॥ एतद्ब्रह्माणमुक्त्वाहशतक्रतुमुपस्थितम् ॥ ५४ ॥ भोभोःशक्रत्वयानीता
आभीरीब्रह्मणोऽतिकम् ॥ यस्मात्तेक्षुद्रकंकर्मतस्मात्त्वंलप्स्यसेफलम् ॥ ५५ ॥ यदासंग्राममध्येत्वंस्थाताशक्रभविष्यसि ॥ तदात्वंशत्रुभिर्बद्धो
नीतःपरमिकांदशाम् ॥ ५६ ॥ अकिंचनोनष्टसत्त्वःशत्रूणांनगरेस्थितः ॥ पराभवंमहत्प्राप्यनचिरादेवमोक्ष्यसे ॥ ५७ ॥ शक्रंशप्त्वातदादेवीविष्णुं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाक्यमथाब्रवीत् ॥ भृगुवाक्येनतेजन्मयदामर्त्येभविष्यति ॥ ५८ ॥ भार्यावियोगजंदुःखंतदात्वंतत्रभोक्ष्यसे ॥ हृतांतेशत्रुणापत्नीपरेपारेमहोदधेः ॥ ५९ ॥ नचत्वंज्ञास्यसेनीतांशोकोपहतचेतनः ॥ भ्रात्रासहपरांकष्टामापदंप्राप्यदुःखितः ॥ १६० ॥ यदायदुकुलेजातःकृष्णसंज्ञोभविष्यसि ॥ पशूनांपालकोभूत्वाचिरकालंभ्रमिष्यसि ॥ ६१ ॥ तदाहरुद्रंकुपितायदादारुवनेस्थितः ॥ तदातेऋषयःक्रुद्धाःशापंदास्यंतिवैहर ॥ ६२ ॥ भोभोःकापालिकक्षुद्रस्त्रीरस्माकंजिहीर्षसि ॥ तदेतद्दर्पितंतेऽद्यभूमौलिंगंपतिष्यति ॥ ६३ ॥ विहीनःपौरुषेणत्वंमुनिशापाच्चपीडितः ॥ गंगाद्वारेस्थितापत्नीसात्वामाश्वासयिष्यति ॥ ६४ ॥ अग्नेत्वंसर्वभक्षोऽसिपूर्वंपुत्रेणमेकृतः ॥ भृगुणाधर्मनित्येनकथंदग्धंदहाम्यहम् ॥ ६५ ॥ जातवेदस्सरुद्रस्त्वांरेतसाप्लावयिष्यति ॥ अमेध्येषुचतेजिह्वाअधिकंप्रज्वलिष्यति ॥ ६६ ॥ ब्राह्मणानृत्विजःसर्वान्सावित्रीवैशशापह ॥ प्रतिग्रहार्थेऽग्निहोत्रेवृथाटव्याश्रयास्तथा ॥ ६७ ॥ सदातीर्थानिक्षेत्राणिलोभादेवभजिष्यथ ॥ परान्नेषुसदातृप्ताअतृप्तास्स्वगृहेषुच ॥ ६८ ॥ अयाज्ययाजनंकृत्वाकुत्सितस्यप्रतिग्रहम् ॥ वृथाधनार्जनंकृत्वाव्ययंचैवतथावृथा ॥ ६९ ॥ प्रेतानांतेनप्रेतत्वंभविष्यतिनसंशयः ॥ एवंशक्रंतथाविष्णुंरुद्रंवैपावकंतथा ॥ १७० ॥ ब्रह्माणंब्राह्मणांश्चैवसर्वांस्तानशपद्रुषा ॥ शापंदत्त्वातथातेषांनिष्क्रांतासदसस्तथा ॥ ७१ ॥ ज्येष्ठंपुष्करमासाद्यतदासाचव्यवस्थिता ॥ लक्ष्मींप्राहसतींतांचशक्रभार्यांवराननाम् ॥ ७२ ॥ युवतीस्तास्तथोवाचनात्रस्थास्यामिसंसदि ॥ तत्रचाहंगमिष्यामियत्रश्रोष्येनचध्वनिम् ॥ ७३ ॥ पुलस्त्य उवाच ॥ ततस्ताःप्रमदाःसर्वाःप्रयाताःस्वनिकेतनम् ॥ सावित्रीकुपितातासामपिशापायचोद्यता ॥ ७४ ॥ यस्मान्मांतुपरित्यज्यगतास्तादेवयोपितः ॥ तासामपितथाशापंप्रदास्येकुपिताभृशम् ॥ ७५ ॥ सावित्र्युवाच ॥ नैकत्रवासोलक्ष्म्यास्तुभविष्यतिकदाचन ॥ क्षुद्रासाचलचित्ताचमूर्खेषुचवसिष्यति ॥ ७६ ॥ म्लेच्छेषुपार्वतीयेषुकुत्सितेऽकुत्सितेतथा ॥ मूर्खेषुचावलिप्तेषुअभिशप्तेदुरात्मनि ॥ ७७ ॥ एवंविधेनरेस्यात्तेवसतिःशापकारिता ॥ शापंदत्त्वाततस्तस्याइंद्राणीमशपत्तदा ॥ ७८ ॥ ब्रह्महत्यागृहीतेंद्रेपत्यौतेदुःखभागिनि ॥ नहुषापहृतेराज्येदृष्ट्वात्वांयाचयिष्यति ॥ ७९ ॥ अहमिंद्रःकथंचैषानोपस्थास्यतिवालिशा ॥ सर्वान्देवान्हनिष्यामिनलप्स्येऽहंशचींयदि ॥ १८० ॥ नष्टात्वंचतदात्रस्तावाक्पतेर्दुःखितागृहे ॥ वसिष्यसेदुराचारेममशापेनगर्विते ॥ ८१ ॥ देवभार्यासुसर्वासुतदाशापमयच्छत ॥ नचापत्यकृतांप्रीतिमेताःसर्वालभिष्यथ ॥ ८२ ॥ दह्यमानादिवारात्रौवंध्याशब्देनदूषिताः ॥गौर्य्यप्येवंतदाशप्तासावित्र्यावरवर्णिनी ॥८३॥ रुदमानातुसादृष्टाविष्णुनाचप्रसादिता ॥ विष्णुरुवाच ॥ मारोदीस्त्वंविशालाक्षिएह्यागच्छसदाशुभे ॥ ८४ ॥ प्रविश्यचसभांदेहिमेखलांक्षौमवाससी ॥ गृहाणदीक्षांब्रह्माणिपादौचप्रणमामिते ॥ ८५ ॥

CC-0. In Public Domain. Digitization by eGangotri

एवमुक्ताऽब्रवीदेनंनकरोमिवचस्तव ॥ तत्रचाहंगमिष्यामियत्रश्रोष्येनवैध्वनिम् ॥ ८६ ॥ एतावदुक्त्वासारुह्यतस्मात्स्थानाद्गिरौस्थिता ॥ विष्णुस्तद
ग्रतःस्थित्वाबद्धाचकरसंपुटम् ॥ ८७ ॥ तुष्टावप्रणतोभूत्वाभक्त्यापरमयास्थितः ॥ विष्णुरुवाच ॥ सर्वगासर्वभूतेषुद्रष्टव्यासर्वतोऽद्भुता ॥ ८८ ॥
सदसच्चैवयत्किंचिद्दृश्यंतन्नविनात्वया ॥ तथापियेषुस्थानेषुद्रष्टव्यासिद्धिमीप्सुभिः ॥ ८९ ॥ स्मर्तव्याभूमिकामैर्वातत्प्रवक्ष्यामितेऽग्रतः ॥ सावित्री
पुष्करेनामतीर्थानांप्रवरेशुभे ॥ ९० ॥ वाराणस्यांविशालाक्षीनैमिषेलिंगधारिणी ॥ प्रयागेललितादेवीकामुकागंधमादने ॥ ९१ ॥ मानसेकुमुदा
नामविश्वकायातथांबरे ॥ गोमंतेगोमतीनाममंदरेकामचारिणी ॥ ९२ ॥ मदोत्कटाचैत्ररथेजयंतीहस्तिनापुरे ॥ कान्यकुब्जेतथागौरीरंभामलयप
र्वते॥९३॥एकाम्रकेकीर्तिमतीविश्वाविश्वेश्वरीतथा॥कर्णिकेपुरुहस्तेतिकेदारेमार्गदायिका॥९४॥नंदाहिमवतःपृष्ठेगोकर्णेभद्रकालिका ॥स्थाण्वीश्वरेभवा
नीतुबिल्वकेबिल्वपत्रिका॥९५॥श्रीशैलेमाधवीदेवीभद्राभद्रेश्वरीतथा॥ जयावराहशैलेतुकमलाकमलालये ॥९६॥रुद्रकोटयांतुरुद्राणीकालीकालंजरेत
था॥महालिंगेतुकपिलाकर्कोटेमंगलेश्वरी॥९७॥शालग्रामेमहादेवीशिवलिंगेजलप्रिया॥मायापुर्यांकुमारीतुसंतानेललितातथा ॥९८ ॥उत्पलाक्षीसहस्रा
क्षेहिरण्याक्षमहोत्पला ॥ गयायांमंगलानामविमलापुरुषोत्तमे ॥ ९९ ॥ विपाशायाममोघाक्षीपाटलापुण्यवर्द्धने ॥ नारायणीसुपार्श्वेतुत्रिकूटेभद्र
सुंदरी ॥ २०० ॥विपुलेविपुलानामकल्याणीमलयाचले ॥ कोटवीकोटितीर्थेतुसुगंधामाधवीवने ॥ १ ॥ कुब्जाम्रकेत्रिसंध्यातुगंगाद्वारेहरिप्रिया ॥
शिवकुंडेशिवानंदानंदिनीदेविकातटे ॥ २ ॥ रुक्मिणीद्वारवत्यांतुराधावृंदावनेतथा ॥ देवकीमथुरायांतुपातालेपरमेश्वरी ॥ ३ ॥ चित्रकूटेतथा
सीताविंध्येविंध्यनिवासिनी ॥ सह्याद्रावेकवीरातुहरिश्चंद्रतुचंद्रिका ॥ ४ ॥ रमणारामतीर्थेतुयमुनायांमृगावती ॥ करवीरेमहालक्ष्मीरुमादेवी
विनायके ॥ ५ ॥ अरोगावैद्यनाथेतुमहाकालेमहेश्वरी ॥ अभयापुष्पतीर्थेतुअमृताविंध्यकंदरे ॥ ६ ॥ मांडव्येमांडवीदेवीस्वाहामाहेश्वरेपुरे ॥
वेगलेतुप्रचंडाथचंडिकामरकंटके ॥ ७ ॥ सोमेश्वरेवरारोहाप्रभासेपुष्करावती ॥ देवमातासरस्वत्यांपारापारतटेस्थिता ॥ ८ ॥ महालयेमहापद्मा
पयोष्ण्यांपिंगलेश्वरी ॥ सिंहिकाकृतशौचेतुकार्तिकेयेतुशंकरी ॥ ९ ॥ उत्पलावर्तकेलोलासुभद्रासिंधुसंगमे ॥ उमासिद्धवनेलक्ष्मीरनंगाभरताश्रमे
॥ २१० ॥ जालंधरेविश्वमुखीताराकिष्किंधपर्वते ॥ देवदारुवनेपुष्टिर्मेधाकाश्मीरमंडले ॥११॥ भीमादेवीहिमाद्रौचतुष्टिर्वस्त्रेश्वरेतथा ॥ कपालमोच
नेश्रद्धामाताकायावरोहणे ॥ १२ ॥ शंखोद्धारेध्वनिर्नामधृतिःपिंडारकेतथा ॥ कालातुचंद्रभागायामच्छोदेसिद्धिदायिनी ॥ १३ ॥ वेणायाम
मृतादेवीबदर्यामुर्वशीतथा ॥औषधीचोत्तरकुरौकुशद्वीपेकुशोदका ॥१४ ॥ मन्मथाहेमकूटेतुकुमुदेसत्यवादिनी ॥ अश्वत्थेवंदनीयातुनिधिर्वैश्रवणा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लये ॥ १५ ॥ गायत्रीवेदवदनेपार्वतीशिवसन्निधौ ॥ देवलोकेतथेंद्राणीब्रह्मास्येतुसरस्वती ॥ १६ ॥ सूर्यबिंबप्रभानाममातृणांवैष्णवीतथा ॥ अरुंधतीसतीनांतुरमासुचतिलोत्तमा ॥ १७ ॥ चित्रेब्रह्मकलानामशक्तिःसर्वशरीरिणाम् ॥ एतद्भक्त्यामयाप्रोक्तंनामाष्टशतमुत्तमम् ॥ १८ ॥ अष्टोत्तरंचतीर्थानांशतमेतदुदाहृतम् ॥ योजपेच्छृणुयाद्वापिसर्वपापैःप्रमुच्यते ॥ १९ ॥ येषुतीर्थेषुयःकृत्वास्नानंपश्येन्नरोत्तमः ॥ सर्वपापविनिर्मुक्तः कल्पंब्रह्मपुरेवसेत्॥ २२० ॥ नामाष्टकशतंयस्तुश्रावयेद्ब्रह्मसन्निधौ ॥ पौर्णमास्याममायांवाबहुपुत्रोभवेन्नरः ॥ २१ ॥ गोदानेश्राद्धदानेवाअहन्यहनि वापुनः ॥ देवार्चनविधौशृण्वन्परंब्रह्माधिगच्छति ॥२२॥ एवंस्तुवंतंसावित्रीविष्णुंप्रोवाचसुव्रता ॥ सवित्र्युवाच ॥ सम्यक्स्तुतात्वयापुत्रत्वमजय्योभ विष्यसि ॥२३॥ अवतारेसदारस्त्वंपितृमातृषुवल्लभः ॥ इहचागत्ययोमांतुस्तवेनानेनसंस्तुयात् ॥ २४ ॥ सर्वपापविनिर्मुक्तःपरंस्थानंगमिष्यति ॥ गच्छयज्ञंविरिञ्चस्यसमाप्तिंनयपुत्रक ॥ २५ ॥ कुरुक्षेत्रेप्रयागेचभविष्येचान्नदायिनी ॥ समीपगास्थिताभर्त्तुःकरिष्येतवभाषितम् ॥ २६ ॥ पुलस्त्यउवाच ॥ एवमुक्तोगतोविष्णुर्ब्रह्मणःसदउत्तमम् ॥ गतायामथसावित्र्यांगायत्रीवाक्यमब्रवीत् ॥ २७ ॥ गायत्र्युवाच ॥ शृण्वन्तु वाक्यमृषयोमदीयंभर्तृसन्निधौ ॥ यदिदंवच्म्यहंतुष्टावरदानायचोद्यता ॥२८॥ ब्रह्माणंपूजयिष्यंतिनराभक्तिसमन्विताः ॥तेषांवस्त्रंधनंधान्यंदाराः सौख्यंधनानिच ॥ २९ ॥ अविच्छिन्नंतथासौख्यंगृहेवैपुत्रपौत्रकम् ॥ भुक्तासौसुचिरंकालमंतेमोक्षंगमिष्यति ॥ २३० ॥ पुलस्त्यउवाच ॥ ब्रह्माणंचप्रतिष्ठाप्यसर्वयत्नैर्विधानतः ॥ यत्पुण्यफलमाप्नोतितदेकाग्रमनाःशृणु ॥ ३१ ॥ सर्वयज्ञतपोदानतीर्थवेदेषुयत्फलम् ॥ तत्फलंकोटिगुणि तंलभेतैतत्प्रतिष्ठया ॥ ३२ ॥ पौर्णमास्युपवासंतुकृत्वाभक्त्यानराधिप ॥ अनेनविधिनायस्तुविरिंचिंपूजयेन्नरः ॥ ३३ ॥ प्रतिपदिमहाबाहोसयाति ब्रह्मणःपदम् ॥ विरिंचिंवासुदेवंतुऋत्विग्भिश्चविशेषतः ॥ ३४ ॥ कार्तिकेमासिदेवस्यरथयात्राप्रकीर्तिता ॥ यांकृत्वामानवाभक्त्यासंयांतिब्रह्मलोक ताम् ॥ ३५ ॥ कार्तिकेमासिराजेंद्रपौर्णमास्यांचतुर्मुखम् ॥ मार्गेणब्रह्मणासार्द्धंसावित्र्याचपरंतप ॥ ३६ ॥ भ्रामयेन्नगरंसर्वंनानावाद्यसमन्वितः ॥ स्थापयेद्भ्रामयित्वातुसलोकनगरंनृप ॥ ३७ ॥ ब्राह्मणान्भोजयित्वाग्रेशांडिलेयंप्रपूज्यच ॥ आरोपयेद्रथेदेवंपुण्यवादित्रनिःस्वनैः ॥ ३८ ॥ रथाग्रे शांडिलीपुत्रंपूजयित्वाविधानतः॥ब्राह्मणान्वाचयित्वातुकृत्वापुण्याहमङ्गलम् ॥ ३९ ॥ देवमारोपयित्वाचरथेकुर्यात्प्रजागरम् ॥ नानाविधैःप्रेक्षणि कैर्ब्रह्मघोषैश्चपुष्कलैः ॥ २४० ॥ कृत्वाप्रजागरंदेवंप्रभातेब्राह्मणान्नृप ॥ भोजयित्वायथाशक्तिभक्ष्यभोज्यैरनेकशः ॥ ४१ ॥ पूजयित्वाजनंधीरमंत्रेण विधिवन्नृप ॥ आज्येनतुमहाबाहोपयसापायसेनच ॥४२॥ ब्राह्मणान्वाचयित्वातुस्वस्त्यातुविधिवन्नृप॥कृत्वापुण्याहशब्दंचतद्रथंभ्रामयेत्पुरे॥४३॥

CC-0. In Public Domain. Digitization by eGangotri

विप्रैश्चतुर्वेदविद्भिर्भ्रामयद्ब्रह्मणोरथम् ॥ बह्वृचाथर्वणैर्वीरछंदोगाध्वर्युभिस्तथा ॥ ४४ ॥ भ्रामयेद्देवदेवस्यसुरश्रेष्ठस्यतंरथम् ॥ प्रदक्षिणंपुरंस
र्वंमार्गेणसुसमेनतु ॥ ४५ ॥ नवोढव्योरथोवीरशूद्रेणहितमिच्छता ॥ नचारोहेद्रथंप्राज्ञोमुक्त्वैकंभोजकंनृपः ॥४६॥ ब्रह्मणोदक्षिणेपार्श्वेगायत्रींस्थाप
येन्नृप ॥ भोजकंवामपार्श्वेतुपुरतःपङ्कजंन्यसेत् ॥ ४७ ॥ एवंतूर्यनिनादैस्तुशंखशब्दैश्चपुष्कलैः ॥ भ्रामयित्वारथंवीरपुरंसर्वंप्रदक्षिणम् ॥ ४८ ॥
स्वस्थानेस्थापयेद्देवंदत्वानीराजनंबुधः ॥ यएवंकुरुतेयात्रांयोवाभक्त्यापिपश्यति ॥ ४९ ॥ रथंवाकर्षयेद्यस्तुसगच्छेद्ब्रह्मणःपदम् ॥ कार्तिकेमास्य
मावास्यांयश्चदीपप्रदीपनम् ॥ २५० ॥ शालायांब्रह्मणःकुर्यात्सगच्छेत्परमंपदम् ॥ गंधपुष्पैर्नवैर्वस्त्रैरात्मानंपूजयेत्तुयः ॥ ५१ ॥ तस्यांप्रतिपदायांतु
सगच्छद्ब्रह्मणःपदम् ॥ महापुण्यातिथिरियंबलिराज्यप्रवर्तिनी ॥ ५२ ॥ ब्रह्मणःसुप्रियानित्यंबालेयीपरिकीर्तिता ॥ ब्रह्माणंपूजयेद्योऽस्यामात्मानंच
विशेषतः ॥ ५३ ॥सयातिपरमंस्थानंविष्णोरमिततेजसः ॥ चैत्रमासिमहाबाहोपुण्याप्रतिपदांवरा ॥ ५४ ॥ तस्यांयःश्वपचंस्पृष्ट्वास्नानंकुर्यान्नरोत्तमः
॥ नतस्यदुरितंकिंचिन्नाधयोव्याधयोनृप॥५५ ॥भवंतिकुरुशार्दूलतस्मात्स्नानंसमाचरेत् ॥दिव्यंनीराजनंतद्धिसर्वरोगविनाशनम्॥५६॥ गोमहिष्या
दियत्किंचित्तत्सर्वंकर्षयेन्नृप ॥ तेनवस्त्रादिभिःसर्वैस्तोरणंबाह्यतोन्यसेत् ॥ ५७ ॥ ब्राह्मणानांतथाभोज्यंकुर्यात्कुरुकुलोद्वह ॥ तिस्रोह्येताःपुराप्रोक्ता
स्तिथयःकुरुनंदन ॥ ५८ ॥ कार्तिकेऽयुजेमासिचैत्रमासितथानृप ॥ स्नानंदानंशतगुणंकार्तिकेयातिथिर्नृप ॥ ५९ ॥ बलिराज्ञस्तुशुभदा
पशूनांहितकारिणी ॥ गायत्र्युवाच ॥यदुक्तंतुतयावाक्यंसावित्र्याकमलोद्भव ॥२६०॥ नतुतेब्राह्मणाःपूजांकरिष्यंतिकदाचन ॥ मदीयंतुवचःश्रुत्वा
येकरिष्यंतिचार्चनम् ॥ ६१ ॥ इहभुक्त्वातुभोगांस्तेपरत्रमोक्षभागिनः ॥ एतांज्ञात्वापरांदद्मिवरंतुष्टःप्रयच्छति ॥६२ ॥ शक्राहंतेवरंदास्येसंग्रामेश
त्रुनिग्रहे ॥ तदाब्रह्मामोचयितागत्वाशत्रुनिकेतनम् ॥६३॥ स्वपुरंलप्स्यसेनष्टंशत्रुनाशात्परांमुदम् ॥ अकंटकंमहद्राज्यंत्रैलोक्येतेभविष्यति ॥६४॥
मर्त्यलोकेयदाविष्णोअवतारंकरिष्यसि ॥ भ्रात्रासहपरंदुःखंस्वभार्याहरणादिजम् ॥६५॥ हत्वाशत्रुंपुनर्भार्यांलप्स्यसेसुरसन्निधौ ॥ गृहीत्वातांपुना
राज्यंकृत्वास्वर्गंगमिष्यसि ॥ ६६ ॥ एकादशसहस्राणिवर्षाणांचपुनर्दिवम् ॥ ख्यातिस्तेविपुलालोकेअनुरागंजनैस्सह ॥ ६७ ॥ सांतानिकानाम
तेवैलोकाःस्थास्यंतिभाविताः ॥ त्वयातेतारितादेवरामरूपेणमानवाः ॥ ६८ ॥ गायत्रीतुतदारुद्रंवरदाप्रत्यभाषत ॥ पतितेऽपिचतेलिंगेपूजांकुर्वं
तियेनराः ॥ ६९ ॥ तेपूताःपुण्यकर्माणःस्वर्गलोकस्यभागिनः ॥ नतांगतिंचाग्निहोत्रेनक्रतौहुतपावके ॥ २७० ॥ यांगतिंमनुजायांतितवलिंगस्य
पूजनात् ॥ गंगातीरेसदालिंगंबिल्वपत्रेणयेतव ॥७१॥ पूजयिष्यंतिसुप्रीतारुद्रलोकस्यभागिनः ॥ प्राप्यापिसर्वभक्षस्त्वमग्नेत्वंभवपावनः ॥ ७२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वयिप्रीतेसुराः सर्वेप्रीतावैनात्रसंशयः ॥ त्वन्मुखेनहविर्देवाः प्रीताः प्राप्यसदाध्रुवम् ॥७३॥ भुंजतेनात्रसंदेहोवेदोक्तंवचनंयथा॥ गायत्रीब्राह्मणांस्तांश्चसर्वां
श्चैवाब्रवीदिदम् ॥ ७४ ॥ युष्माकंप्रीणनंकृत्वासर्वतीर्थेषुमानवाः ॥ पदंसर्वेगमिष्यंतिवैराजाख्यंनसंशयः ॥ ७५ ॥ अन्नप्रकारान्विविधान्दत्त्वादा
नान्यनेकशः॥ श्राद्धेषुप्रीणनंकृत्वादेवदेवाभवंतिते ॥ ७६ ॥ येचवैब्राह्मणश्रेष्ठास्तेषामास्येदिवौकसः ॥ भुंजतेचहविःक्षिप्रंकव्यंचैवपितामहाः ॥७७॥
यूयंहिधारणेशक्तास्त्रैलोक्यस्यनसंशयः ॥ प्राणायामेनचैकेनसर्वेपूताभविष्यथ ॥७८॥ विशेषात्पुष्करेस्नात्वामांजप्त्वावेदमातरम्॥ प्रतिग्रहकृतान्दो
षान्नप्राप्स्यथद्विजोत्तमाः ॥७९॥ पुष्करेचान्नदानेनप्रीताःस्युःसर्वदेवताः ॥ एकस्मिन्भोजितेविप्रेकोट्याःफलमवाप्स्यते॥ २८०॥ ब्रह्महत्यादिपापानिदु
ष्कृतानिकृतानिच ॥ तरिष्यन्तिनरास्सर्वेदत्त्वायुष्मत्करेधनम्॥ ८१ ॥ मदीयेनतुजाप्येनजन्मभिस्तुत्रिभिःकृतम् ॥ ब्रह्महत्यासमंपापंतत्क्षणादेवन
श्यति ॥ ८२ ॥ दशभिर्जन्मभिर्जातंशतेनचपुराकृतम् ॥ त्रियुगेनसहस्रेणगायत्रीहंतिकिल्बिषम् ॥ ८३ ॥ एवंज्ञात्वासदापूताजाप्येतुममवैकृते
॥ भविष्यध्वंनसंदेहोनात्रकार्याविचारणा ॥ ८४ ॥ प्रणवेनत्रिमात्रेणसार्द्धंजप्त्वाविशेषतः ॥ पूताःसर्वेनसंदेहोजप्त्वामांशिरसासह ॥ ८५ ॥
अष्टाक्षरास्थिताचाहंजगद्व्याप्तंमयात्विदम् ॥ माताहंसर्ववेदानांपदैःसर्वैरलंकृता ॥ ८६ ॥ जप्त्वामांभक्तितःसिद्धिंयास्यंतिद्विजसत्तमाः ॥ प्राधान्यं
ममजाप्येनसर्वेषांवोभविष्यति ॥ ८७ ॥ गायत्रीमात्रसारोऽपिवरंविप्रःसुसंयतः ॥ नायंत्रितश्चतुर्वेदीसर्वाशीसर्वविक्रयी ॥ ८८ ॥ यस्माद्विप्रेषु
सावित्र्याशापोदत्तःसदस्यथ ॥ अत्रदत्तंहुतंचापिसर्वमक्षयकारकम् ॥ ८९ ॥ दत्तोवरोमयातेनयुष्माकंद्विजसत्तमाः ॥ अग्निहोत्रपराविप्रास्त्रिकालं
होमदायिनः ॥ २९० ॥ स्वर्गंतेतुगमिष्यंतिसैकविंशतिभिःकुलैः ॥ पुलस्त्यउवाच ॥ एवंशक्रस्यविष्णोश्चरुद्रस्यपावकस्यच ॥ ९१ ॥
ब्रह्मणोब्राह्मणानांचगायत्रीवरमुत्तमम् ॥ तस्मिन्वैपुष्करेदत्त्वाब्रह्मणःपार्श्वगाभवत् ॥ ९२ ॥ चारणैस्तुतदाख्यातंलक्ष्म्यावैशापकारणम् ॥
युवतीनांचसर्वासांशापान्ज्ञात्वापृथक्पृथक् ॥९३॥ लक्ष्म्याश्चैववरंप्रादाद्गायत्रीब्रह्मणःप्रिया॥ गायत्र्युवाच॥ अकुत्सितान्सदासर्वान्कुर्वतीधनशोभना
॥९४॥ शोभिष्यसेनसंदेहःसर्वेभ्यःप्रीतिदायिनी ॥ येत्वयावीक्षिताःपुत्रिसर्वेतेपुण्यभाजनाः ॥९५॥ परित्यक्तास्त्वयायेतुसर्वेतेदुःखभागिनः ॥ तेषां
जातिःकुलंशीलंधर्मश्चैववरानने ॥९६॥ सभायांतेचशोभंतेदृश्यंतेचैवपार्थिवैः ॥ अर्थित्वंचैवतेषांतुकरिष्यंतिद्विजोत्तमाः ॥९७॥ सौजन्यंतेषुकुर्वंति
त्वंनोभ्रातापितागुरुः ॥ बांधवोऽपिनसंदेहोनजीवेयंत्वयाविना ॥९८॥ त्वयिदृष्टेप्रसन्नामेदृष्टिर्भवतिशोभना ॥ मनःप्रसीदतेत्यर्थंसत्यंसत्यंवदामिते
॥९९॥ एवंविधानिवाक्यानित्वद्दृष्ट्यायेनिरीक्षिताः॥ सज्जनास्तेतुश्रोष्यंतिजनानांप्रीतिदायकाः ॥३००॥ इंद्रत्वंनहुषःप्राप्यदृष्ट्वात्वांयाचयिष्यति॥

१०

CC-0. In Public Domain. Digitization by eGangotri

त्वद्दृष्ट्यातुहतःपापोह्यगस्त्यवचनाद्ध्रुवम् ॥ १ ॥ सर्पत्वंसमनुप्राप्यप्रार्थयिष्यतितंतुसः ॥ दर्पेणाहंविनष्टोऽस्मिशरणंमेमुनेभव ॥ २ ॥
वाक्येनतेनतस्यासौनृपस्यभगवानृषिः ॥ कृत्वामनसिकारुण्यमिदंवाक्यंवदिष्यति ॥ ३ ॥ उत्पत्स्यतेकुलेराजात्वदीयेकुलनंदनः ॥ सर्परूप
धरंदृष्ट्वासतेशापंहिभेत्स्यति ॥ ४ ॥ तदात्वंसपतांत्यक्त्वापुनःस्वर्गंगमिष्यसि ॥ अश्वमेधकृतेनत्वंभर्त्रासहपुनर्दिवम् ॥ ५ ॥ प्राप्स्यसेवरदाने
नमदीयेनसुलोचने ॥ पुलस्त्यउवाच ॥ देवपत्न्यस्तदासर्वास्तुष्टयापरिभाषिताः ॥ ६ ॥ अपत्यैरपिहीनानांनैवदुःखंभविष्यति ॥ गौरी
चैवतुगायत्र्यातदासापिविबोधिता ॥ ७ ॥ बृंहितापरितोषेणवरान्दत्त्वामनस्विनी ॥ समाप्तिंतस्ययज्ञस्यकांक्षंतीब्रह्मणःप्रिया ॥ ८ ॥
वरदांतांतथादृष्ट्वागायत्रींवेदमातरम् ॥ प्रणिपत्यतदारुद्रःस्तुतिमेतांचकारह ॥ ९ ॥ रुद्रउवाच ॥ नमोऽस्तुतेवेदमातरष्टाक्षरविशो
धिते ॥ गायत्रीदुर्गतरणीवाणीसप्तविधातथा ॥ ३१० ॥ सर्वाणिस्तुतिशास्त्राणिगाथाश्चनिखिलास्तथा ॥ अक्षराणिचसर्वाणिलक्षणानि
तथैवच ॥ ११ ॥ भाष्यादिसर्वशास्त्राणियेचान्येनियमास्तथा ॥ अक्षराणिचसर्वाणित्वंतुदेविनमोऽस्तुते ॥ १२ ॥ श्वेतात्वंश्वेतरूपासिश
शांकेनसमानना ॥ बिभ्रतीविपुलौबाहूकदलीगर्भकोमलौ ॥ १३ ॥ एणशृंगंकरेगृह्यपंकजंचसुनिर्मलम् ॥ वसानावसनेक्षौमेरक्तेनोत्तरवाससा ॥ १४ ॥
शशिरश्मिप्रकाशेनहारेणोरसिराजिता ॥ दिव्यकुंडलपूर्णाभ्यांकर्णाभ्यांसुविभूषिता ॥१५॥ चन्द्रसापत्न्यभूतेनमुखेनत्वंविराजसे॥मुकुटेनातिशुद्धेन
केशबंधेनशोभिता ॥ १६ ॥ भुजगाभोगसदृशौभुजौतेभूषणंदिवः ॥ स्तनौतेरुचिरौदेविवर्तुलौसमचूचुकौ ॥ १७ ॥ जघनेनातिशुभ्रेणत्रिवलीभं
गदार्पिता ॥सुमध्यवर्त्तिनीनाभिर्गंभीराशुभदर्शिनी ॥ १८ ॥ विस्तीर्णजघनादेवीसुश्रोणीचवरानने ॥ सुजातवृत्तोरुयुगासुजानुचरणातथा ॥ १९ ॥
त्रैलोक्यधारिणीसात्वंभुविसत्योपयाचना ॥ भविष्यसिमहाभागेवरदावरवर्णिनी ॥३२०॥ पुष्करेचकृतायात्रादृष्ट्वात्वांसंभविष्यति ॥ ज्येष्ठेमासेपौ
र्णमास्यामग्र्यांपूजांचलप्स्यसे ॥ २१ ॥ येचवात्वत्प्रभावज्ञाःपूजयिष्यंतिमानवाः ॥ नतेषांदुर्लभंकिंचित्पुत्रतोधनतोऽपिवा ॥ २२ ॥ कांतारे
षुनिमग्नानामटव्यांवामहार्णवे ॥दस्युभिर्वानिरुद्धानांत्वंगतिःपरमानृणाम् ॥२३ ॥ त्वंसिद्धिःश्रीर्धृतिःकीर्तिर्ह्रीर्विद्यासन्नतिर्मतिः ॥ संध्यारात्रिःप्रभा
निद्राकालरात्रिस्त्वमेवच ॥ २४ ॥ अम्बाचकमलामातर्ब्रह्माणीब्रह्मचारिणी ॥ जननीसर्वदेवानांगायत्रीपरमांगना ॥ २५ ॥ जयाचविजयाचैवपु
ष्टिस्त्वंचक्षमादया ॥ सावित्र्यवरजाचासिसदाचेष्टापितुर्मम ॥ २६ ॥ बहुरूपाविश्वरूपासुनेत्राब्रह्मचारिणी ॥ सुरूपात्वंविशालाक्षीभक्तानांपरिर
क्षिणी ॥ २७ ॥ नगरेषुचपुण्येषुआश्रमेषुवरानने ॥ वासस्तवमहादेविवनेषूपवनेषुच ॥ २८ ॥ ब्रह्मस्थानेषुसर्वेषुब्रह्मणोवामतःस्थिता ॥ दक्षिणेनतु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सावित्रीमध्येब्रह्मापितामहः ॥ २९ ॥ अन्तर्वेदीचयज्ञानामृत्विजांचापिदक्षिणा ॥ सिद्धिस्त्वंहिनृपाणांचवेलासागरजामता ॥ ३३० ॥ ब्रह्मचारि
णियादीक्षाशोभाचपरमामता ॥ ज्योतिषांचप्रभादेवीलक्ष्मीर्नारायणेस्थिता ॥ ३१ ॥ क्षमासिद्धिर्मुनीनांचनक्षत्राणांचरोहिणी ॥ राजद्वारेषुतीर्थे
षुनदीनांसंगमेषुच ॥ ३२ ॥ पूर्णिमापूर्णचन्द्रेचबुद्धिर्नीत्यांक्षमाधृतिः ॥ उमादेवीचनारीणांश्रूयसेवरवर्णिनी ॥ ३३ ॥ इन्द्रस्यचारुदृष्टिस्त्वंसहस्रन
यनोपगा ॥ ऋषीणांधर्मबुद्धिस्त्वंदेवानांचपरायणा ॥ ३४ ॥ कर्षकाणांचसीतात्वंभूतानांधरणीतथा ॥ स्त्रीणामवैधव्यकरीधनधान्यप्रदासदा ॥
॥ ३५ ॥ व्याधिंमृत्युंभयंचैवपूजिताशमयिष्यसि ॥ तथातुकार्तिकेमासिपौर्णमास्यांसुपूजिता ॥ ३६ ॥ सर्वकामप्रदादेवीभविष्यसिशुभप्रदे ॥
यश्चेदंपठतेस्तोत्रंशृणुयाद्वाप्यभीक्ष्णशः ॥ ३७ ॥ सर्वार्थसिद्धिंलभतेनरोनास्त्यत्रसंशयः ॥ गायत्र्युवाच ॥ भविष्यत्येवमेवंतुयत्त्वयापुत्रभाषि
तम् ॥ ३८ ॥ विष्णुनासहितःसर्वस्थानेष्वेवभविष्यसि ॥ ३९ ॥ इति श्रीपाद्मपुराणेप्रथमेसृष्टिखंडेसावित्रीविवादगायत्रीवरप्रदानंनामसप्तद
शोऽध्यायः ॥ १७ ॥ भीष्मउवाच ॥ अत्यद्भुतमिदंब्रह्मञ्श्रुतवानस्मितत्त्वतः ॥ अभिषेकंतुगायत्र्याःसदस्यत्रतथाकृतम् ॥ १ ॥ विरोधंचैवसा
वित्र्याशापदानंतथाकृतम् ॥ विष्णुनाचयथादेवीसर्वस्थानेषुकीर्तिता ॥ २ ॥ गायत्रीचापिरुद्रेणस्तुताचवरवर्णिनी ॥ श्रुत्वेदंपूतमात्मानंमन्येऽहंतु
महामुने ॥ ३ ॥ प्रहृष्टानिचरोमाणिप्रशांतंचमनोमम ॥ श्रुत्वामेपरमाप्रीतिःकौतूहलमथैवहि ॥ ४ ॥ नारायणस्तुभगवान्कृत्वातांपरमांचवै ॥
ब्रह्मपत्न्याःस्तुतिंभक्त्यान्यस्यतांपर्वतोपरि. ॥ ५ ॥ उवाचवचनंविष्णुस्तुष्टिपुष्टिप्रदायकम् ॥ श्रीमतीह्रीमतीचैवयाचदेवीश्वरीतथा॥ ६ ॥ एतदे
वश्रुतंब्रह्मंस्तववक्त्राद्विनिःसृतम् ॥ उत्तरंतत्रयद्वृत्तंयच्चतस्मिन्स्थलेकृतम् ॥ ७ ॥ आनुपूर्व्याचतत्सर्वंभगवान्वक्तुमर्हति ॥ श्रुतेनमेदेहशुद्धिर्भविष्यतिन
संशयः ॥ ८ ॥ पुलस्त्यउवाच ॥ यजतःपुष्करेतस्यदेवस्यपरमेष्ठिनः ॥ शृणुराजन्निदंचित्रंपूर्वमेवयथाकृतम् ॥ ९ ॥ आदौकृतयुगेतस्मिन्यजमा
नेपितामहे ॥ मरीचिरंगिराश्चैवपुलस्त्यःपुलहःक्रतुः ॥ १० ॥ दक्षःप्रजापतिश्चैवनमस्कारंप्रचक्रिरे ॥ विद्योतमानाःपुरुषाःसर्वाभरणभूषिताः ॥
॥ ११ ॥ उपनृत्यंतिदेवेशंविष्णुमप्सरसांगणाः ॥ ततोगंधर्वतूर्यैस्तुप्रतिनंद्यविहायसि ॥ १२ ॥ बहुभिःसहगंधर्वैःप्रगायतिचतुंबुरुः ॥ महाश्रुति
श्चित्रसेनऊर्णायुरनघस्तथा ॥ १३ ॥ गोमायुस्सूर्यवर्चाश्चसोमवर्चाश्चकौरव ॥ युगपऽचतृणपायुश्चनंदिश्चित्ररथस्तथा ॥ १४ ॥ त्रयोदशःशालिशि
राःपर्जन्यश्चचतुर्दशः ॥ कलिःपंचदशश्चात्रतारकश्चात्रषोडशः ॥ १५ ॥ हाहाहूहूश्चगन्धर्वोहंसश्चैवमहाद्युतिः ॥ इत्येतेदेवगंधर्वाउपगायंतितेविभु
म् ॥ १६ ॥ तथैवाप्सरसोदिव्याउपनृत्यंतितेविभुम् ॥ धातार्यमाचसवितावरुणोंऽशोभगस्तथा ॥ १७॥ इन्द्रोविवस्वान्पूषाचत्वष्टापर्जन्यएवच ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्येतेद्वादशादित्याज्वलंतोदीप्ततेजसः ॥ १८ ॥ चक्रुरस्मिन्सुरेशाश्चनमस्कारंपितामहे ॥ मृगव्याधश्चशर्वश्चनिर्ऋतिश्चमहायशाः ॥ १९ ॥
अजैकपादहिर्बुध्न्यःपिनाकीचपराजितः ॥ भवोविश्वेश्वरश्चैवकपर्दीचविशांपते ॥ २० ॥ स्थाणुर्भगश्चभगवान्रुद्रास्तत्रावतस्थिरे ॥ अश्विनौवसवश्चा
ष्टौमरुतश्चमहाबलाः ॥ २१ ॥ विश्वेदेवाश्चसाध्याश्चतस्मैप्रांजलयःस्थिताः ॥ शेषाद्यास्तुमहानागावासुकिप्रमुखास्स्थिताः ॥ २२ ॥ काश्यपःकंब
लश्चापितक्षकश्चमहाबलः ॥ अधृष्यास्तेजसादीप्तामहाक्रोधामहाबलाः ॥ २३ ॥ एतेनागामहात्मानस्तस्मैप्रांजलयःस्थिताः ॥ तार्क्ष्यश्चारिष्टने
मिश्चगरुडश्चमहाबलः ॥ २४ ॥ वारुणिश्चैवारुणिश्चवैनतेयाव्यवस्थिताः ॥ नारायणश्चभगवान्स्वयमागत्यलोकवान् ॥ २५ ॥
प्राहलोकगुरुंश्रीमान्सहसर्वैर्महर्षिभिः ॥ त्वयाततमिदंसर्वंत्वयासृष्टंजगत्पते ॥ २६ ॥ तस्माल्लोकेश्वरश्चासिपद्मयोनेनमोऽस्तुते ॥
यदत्रतेमयाकार्यंकर्तव्यंचतदादिश ॥ २७ ॥ एवंप्रोवाचभगवान्सार्धंदेवर्षिभिःप्रभुः ॥ नमस्कृत्यसुरेशायब्रह्मणेऽव्यक्तजन्मने ॥ २८ ॥
सचतत्रस्थितोब्रह्मातेजसाभासयन्दिशः ॥ श्रीवत्सलोमसंच्छन्नोहेमसूत्रेणराजता ॥ २९ ॥ सुरर्षिप्रतिमःश्रीमान्स्वयंभूर्भूतभावनः ॥
शुचिरोमामहावक्षाःसर्वतेजोमयप्रभुः ॥ ३० ॥ यागतिःपुण्यशीलानामगतिःपापकर्मणाम् ॥ योगसिद्धमहात्मानोयंविदुर्लोकमुत्तमम् ॥
॥ ३१ ॥ यस्याष्टगुणमैश्वर्यंयमाहुर्देवसत्तमम् ॥ यंप्राप्यशाश्वतंविप्रानियतामोक्षकांक्षिणः ॥ ३२ ॥ जन्मनोमरणाच्चैवमुच्यं
तेयोगभाविताः ॥ यदेतत्तपइत्याहुःसर्वाश्रमनिवासिनः ॥ ३३ ॥ सेवंसेवंयताहारादुश्चरंव्रतमास्थिताः ॥ योऽनंतइतिनागेषुप्रोच्यते
सर्वयोगिभिः ॥ ३४ ॥ सहस्रमूर्द्धारक्ताक्षःशेषादिभिरनुत्तमैः ॥ योयज्ञइतिविप्रेंद्रैरिज्यतेस्वर्गलिप्सुभिः ॥ ३५ ॥ नानास्थानगतिःश्रीमानेकःकवि
रनुत्तमः ॥ यंदेवंवेत्तिवेत्तारंयज्ञभागप्रदायिनम् ॥ ३६ ॥ वृषाग्निसूर्यचंद्राक्षंदेवमाकाशविग्रहम् ॥ तंप्रपद्यामहेदेवंभगवञ्शरणार्थिनः ॥३७॥ शरण्यं
शरणंदेवंसर्वदेवभवोद्भवम् ॥ ऋषीणांचैवस्रष्टारंलोकानांचसुरेश्वरम् ॥ ३८ ॥ प्रियार्थंचैवदेवानांसर्वस्यजगतःस्थितौ ॥ कव्यंपितृणामुचितंसुराणां
हव्यमुत्तमम् ॥ ३९ ॥ येनप्रवर्तितंसर्वंतंनताःस्मस्सुरोत्तमम् ॥ त्रेताग्निनातुयजतादेवेनपरमेष्ठिना ॥ ४० ॥ यथासृष्टिःकृतापूर्वंयज्ञसृष्टिस्तथापुनः ॥
तथाब्रह्माप्यनंतेनलोकानांस्थितिकारिणा ॥ ४१ ॥ अन्वास्यमानोभगवान्वृद्धोऽप्यथचबुद्धिमान् ॥ यज्ञवाटमचिंत्यात्मागतस्तत्रपितामहः ॥४२॥
धनाढ्यैर्ऋत्विजैःपूर्णंसदस्यैःपरिपालितम् ॥ गृहीतचापेनतदाविष्णुनाप्रभविष्णुना ॥ ४३ ॥ दैत्यदानवराजानोराक्षसानांगणाःस्थिताः ॥ आत्मा
नमात्मनाचैवचिंतयामासवैद्रुतम् ॥ ४४ ॥ चिंतयित्वायथातत्त्वंयज्ञंयज्ञःसनातनः ॥ वरणंतत्रभगवान्कारयामासऋत्विजाम् ॥ ४५ ॥ भृग्वाद्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऋत्विजश्चापियज्ञकर्मविचक्षणाः ॥ चक्रुर्बह्वृचमुख्यैश्चप्रोक्तंपुण्यंयदक्षरम् ॥ ४६ ॥ शुश्रुवुस्तेमुनिश्रेष्ठाविततेतत्रकर्मणि ॥ यज्ञविद्यावेदविद्यापदक्र
मविदांतथा ॥ ४७ ॥ घोषेणपरमर्षीणांसाबभूवनिनादिता ॥ यज्ञसंस्तरविद्भिश्चशिक्षाविद्भिस्तथाद्विजैः ॥ ४८ ॥ शब्दनिर्वचनार्थज्ञैःसर्वविद्याविशा
रदैः ॥ मीमांसाहेतुवाक्यज्ञैर्नानाविद्याविशारदैः ॥ ४९ ॥ लोकायतिकमुख्यश्चशुश्रुवुश्शब्दमीरितम् ॥ इतिहासपुराणज्ञैर्नैकविज्ञानवेदिभिः॥५०॥
तत्रतत्रचराजेंद्रनियतान्संशितव्रतान् ॥ जपहोमपरान्मुख्यान्ददृशुस्तत्रवैद्विजान् ॥५१॥ यज्ञभूमौस्थितस्तस्यांब्रह्मालोकपितामहः ॥ सुरासुरगुरुःश्री
मान्सेव्यमानःसुरासुरैः ॥ ५२ ॥ उपासतेचतत्रैनंप्रजानांपतयःप्रभुम् ॥ दक्षोवसिष्ठःपुलहोमरीचिश्चद्विजोत्तमः ॥ ५३ ॥ अंगिराभृगुरत्रिश्चगौतमो
नारदस्तथा ॥ विद्यमानंचांतरिक्षंवायुस्तेजोजलंमही ॥ ५४ ॥ शब्दःस्पर्शश्चरूपंचरसोगंधस्तथैवच ॥ विकृतश्चविकारश्चयच्चान्यत्कारणंमहत्
॥ ५५ ॥ ऋग्यजुःसामाथर्वाख्यावेदाश्चत्वारएवच ॥ शब्दःशिक्षानिरुक्तंचकल्पश्छंदःसमन्विताः ॥ ५६ ॥ आयुर्वेदधनुर्वेदौमीमांसागणितंतथा
॥ हस्त्यश्वज्ञानसहिताइतिहाससमन्विताः ॥ ५७ ॥ एतैरंगैरुपांगैश्चवेदाःसर्वेविभूषिताः ॥ उपासतेमहात्मानंसहोंकारंपितामहम् ॥ ५८ ॥
तपश्चक्रतवश्चैवसंकल्पःप्राणएवच ॥ एतेचान्येचबहवःपितामहमुपस्थिताः ॥ ५९ ॥ अर्थोधर्मश्चकामश्चद्वेषोहर्षश्चसर्वदा ॥ शुक्रो बृहस्पतिश्चैवसंवर्तो
बुधएवच ॥ ६० ॥ शनैश्चरश्चराहुश्चग्रहाःसर्वेतथैवच ॥ मरुतोविश्वकर्माचपितरश्चापिभारत ॥ ६१ ॥दिवाकरश्चसोमश्चब्रह्माणंपर्युपासते ॥ गायत्री
दुर्गतरणीवाणीसप्तविधातथा ॥ ६२ ॥ सर्वाणिश्रुतिशास्त्राणियमाश्चनियमास्तथा ॥ अक्षराणिचसर्वाणिनक्षत्राणितथैवच ॥६३॥ भाष्याणिसर्व
शास्त्राणिदेहवंतिविशांपते ॥ क्षणालवामुहूर्ताश्चदिनंरात्रिस्तथैवच ॥ ६४ ॥ अर्द्धमासाश्चमासाश्चऋतवःसर्वएवच ॥ उपासतेमहात्मानं
ब्रह्माणंदैवतैःसह ॥ ६५ ॥ अन्याश्चदेव्यःप्रवराह्रीःकीर्तिर्द्युतिरेवच ॥ प्रभाधृतिःक्षमाभूतिर्नीतिर्विद्यमतिस्तथा ॥ ६६ ॥ श्रुतिःस्मृतिस्तथाक्षांतिः
शांतिःपुष्टिस्तथाक्रिया ॥ सर्वाश्चाप्सरसोदिव्यानृत्यगीतविशारदाः ॥६७॥ उपतिष्ठंतिब्रह्माणंसर्वास्तादेवमातरः ॥ विप्रचित्तिःशिबिःशंकूरयःशंकु
स्तथैवच ॥ ६८ ॥ वेगवान्केतुमानुग्रःसोऽग्रोव्यग्रोमहासुरः ॥ परिघःपुष्करश्चैवसांबोऽश्वपतिरेव च ॥ ६९ ॥ प्रह्लादोऽथबलिः कुंभः संह्लादोगगन
प्रियः ॥ अनुह्लादोहरिहरौवराहश्चकुशोरजः ॥ ७० ॥ योनिभक्षोवृषपर्वालिंगभक्षोऽथवैकुरुः ॥ निष्प्रभःसप्रभःश्रीमांस्तथैवचनिरूदरः ॥ ७१ ॥
एकचक्रोमहाचक्रोद्विचक्रःकुलसंभवः ॥ शरभःशलभश्चैवक्रपथःक्रापथःक्रथः ॥ ७२ ॥ बृहद्वांतिर्महाजिह्वःशंकुकर्णोमहाध्वनिः ॥ दीर्घजिह्वोऽर्कन
यनोमृदुकायोमृडप्रियः ॥ ७३ ॥ वायुर्गरिष्ठोनमुचिश्शम्बरोविज्वरोविभुः ॥ विष्वक्सेनश्चदृहंताक्रोधवर्द्धनएवच ॥ ७४ ॥ कालकःकलकांतश्चकु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ण्डदः समरप्रियः ॥ गरिष्ठश्चवरिष्ठश्चप्रलंबोनरकःपृथुः ॥ ७५ ॥ इंद्रतापनवातापीकेतुमान्बलदर्पितः ॥ असिलोमासुलोमाचबाष्कलिःप्रमदोमदः
॥ ७६॥ सृगालवदनश्चैवकेशीचशरदस्तथा ॥ एकाक्षश्चैवराहुश्चवृत्रःक्रोधविमोक्षणः ॥ ७७ ॥ एतेचान्येचबहवोदानवाबलदर्पिताः ॥ ब्रह्माणंपर्युपा
संतवाक्यंचेदमथोचिरे ॥ ७८ ॥ त्वयासृष्टाःस्मभगवंस्त्रैलोक्यंभवताहिनः ॥ दत्तंसुरवरश्रेष्ठदेवेभ्यश्चाधिकाःकृताः ॥ ७९ ॥ भगवन्निहकिंकुर्मोय
ज्ञेतवपितामह ॥ यद्धितंतद्वदास्माकंसमर्थाःकार्यनिर्णये ॥८०॥ किमेभिस्तेवराकैश्चअदितेर्गर्भसंभवैः ॥ दैवतैर्निहतैःसर्वैःपराभूतैश्चसर्वदा ॥ ८१ ॥
पितामहोऽसिसर्वेषामस्माकंदैवतैःसह ॥ तवयज्ञसमाप्तौचपुनरस्मासुदैवतैः ॥ ८२ ॥ श्रियंप्रतिविरोधश्चभविष्यतिनसंशयः ॥ इदानींप्रेक्षणंकुर्मःस
हिताःसर्वदानवैः ॥ ८३ ॥ पुलस्त्यउवाच ॥ सगर्वंतुवचस्तेषांश्रुत्वादेवोजनार्दनः ॥ शक्रेणसहितःशंभुमिदमाहमहायशाः ॥ ८४॥ यज्ञेपैतामहेयेतु
सम्प्राप्तादनुपुङ्गवाः ॥ ब्रह्मणामंत्रिताश्चेहविघ्नार्थंप्रयतंतिते ॥ ८५ ॥ अस्माभिस्तुक्षमाकार्यायावद्यज्ञःसमाप्यते ॥ समाप्तेतुक्रतावस्मिन्युद्धंकार्यं
दिवौकसाम् ॥ ८६ ॥ यथानिर्दानवाभूमिस्तथाकार्यंत्वयाविभो ॥ जयार्थंचेहशक्रस्यभवताचमयासह ॥ ८७ ॥ द्विजानांपरिवेष्टारोमरुतःपरिक
ल्पिताः ॥ दानवानांधनंयच्चगृहीत्वातद्यजामहे ॥ ८८ ॥ अत्रागतेषुविप्रेषुदुःखितेषुजनेष्विह ॥ व्ययंतस्यकरिष्यामोदासभावेनिवेशिताः ॥ ८९ ॥
वदंतमेवंतंविष्णुंब्रह्मावचनमब्रवीत् ॥ एतेदनुसुताःक्रुद्धायुष्माकमपिनेप्सिताः ॥ ९० ॥ भवताचक्षमाकार्यारुद्रेणसहदैवतैः ॥ कृतेयुगावसानेतुसमा
प्तिंचक्रतौगते ॥ ९१ ॥ मयाचप्रेषितायूयमेतेचदनुपुंगवाः ॥ संधिर्वाविग्रहोवापिसर्वैःकार्यस्तदैवहि ॥ ९२ ॥ पुलस्त्यउवाच ॥ पुनस्तान्दानवान्ब्र
ह्मावाक्यमाहस्वयंप्रभुः ॥ दानवैर्नविरोधोऽत्रयज्ञेममकथंचन ॥ ९३ ॥ मैत्रभावस्थितायूयमस्मत्कार्यपरायणाः ॥ दानवाऊचुः ॥ सर्वमेत
त्करिष्यामःशासनंतेपितामह ॥ ९४ ॥ अस्माकमनुजादेवाभयंतेषांनविद्यते ॥ पुलस्त्यउवाच ॥ एतच्छ्रुत्वातदातेषांपरितुष्टःपितामहः ॥ ९५ ॥
मुहूर्तंतिष्ठतांतेषामृषिकोटिरुपागता ॥ श्रुत्वापैतामहंयज्ञंतेषांपूजांतुकेशवः ॥ ९६ ॥ आसनानिददौतेषांतदादेवःपिनाकधृक् ॥ वसिष्ठोऽर्घंद
दौतेषांब्रह्मणापरिचोदितः ॥ ९७ ॥ गामर्घंचततोदत्वापृष्ट्वाकुशलमव्ययम् ॥ निवेशंपुष्करेदत्वास्थीयतामितिचाब्रवीत् ॥ ९८ ॥ ततस्त
ऋषयःसर्वेजटाजिनधरास्तथा ॥ शोभयंतःसरःश्रेष्ठंगङ्गामिवदिवौकसः ॥ ९९ ॥ मुंडाःकाषायिणाश्चैकेदीर्घश्मश्रुधराः परे ॥ विरलैर्दशनैः
केचिच्चिपिटाक्षास्तथापरे ॥ १०० ॥ बृहत्तनूदराःकेऽपिकेकराक्षास्तथापरे ॥ दीर्घकर्णाविकर्णाश्चकर्णैश्चत्रुटितास्तथा ॥ १ ॥
दीर्घफालाविफालाश्चस्नायुचर्मावगुंठिताः ॥ निर्गतंचोदरंतेषांमुनीनांभावितात्मनाम् ॥ २ ॥ दृष्ट्वातेपुष्करंतीर्थंदीप्यमानंसमंततः ॥ तीर्थ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लोभान्नरव्याघ्रतस्यतीरेव्यवस्थिताः ॥ ३ ॥ वालखिल्यामहात्मानोह्यश्मकुट्टास्तथापरे ॥ दंतोलूखलिनश्चान्येसंप्रक्षालास्तथापरे ॥ ४ ॥
वायुभक्षाजलाहाराःपर्णाहारास्तथापरे ॥ नानानियमयुक्ताश्चतथास्थंडिलशायिनः ॥ ५ ॥ सरस्यस्मिन्मुखंदृष्ट्वासुरूपास्याःक्षणादनु ॥
किमेतदितिचिंत्याथनिरीक्ष्यचपरस्परम् ॥ ६ ॥ अस्मिंस्तीर्थेदर्शनेनमुखस्येहसुरूपता ॥ मुखदर्शनमित्येवनामकृत्वातुतापसाः ॥ ७ ॥
स्नातानियमयुक्ताश्चसुरूपास्तेतदाभवन् ॥ देवपुत्रोपमाजाताअनौपम्यगुणान्विताः ॥ ८ ॥ शोभमानानरश्रेष्ठस्थिताःसर्वेवनौकसः ॥
यज्ञोपवीतमात्रेणव्यभजंस्तीर्थमंजसा ॥ ९ ॥ जुह्वतश्चाग्निहोत्राणिचक्रुश्चविविधाःक्रियाः ॥ चिंतयंतोहिराजेंद्रतपसादग्धकिल्बिषाः ॥ ११० ॥
नयास्यामोपरंतीर्थंज्येष्ठभावोत्विदंसरः ॥ ज्येष्ठपुष्करमित्येवनामचक्रुर्द्विजातयः ॥ ११ ॥ तत्रकुब्जान्बहून्दृष्ट्वास्थितांस्तीर्थसमीपतः ॥ बभू
वुर्विस्मितास्तत्रजनायेचसमागताः ॥ १२ ॥ दत्वादानंद्विजातिभ्योभांडानिविविधानिच ॥ श्रुत्वासरस्वतींप्राचींस्नातुकामाद्विजागताः
॥ १३ ॥ सरस्वतीतीर्थवरानानाद्विजगणैर्युता ॥ बदरेंगुदकाश्मर्यप्लक्षाश्वत्थविभीतकैः ॥ १४ ॥ पौलोमैश्चपलाशैश्चकरीरैःपीलुभिस्तथा ॥ सर
स्वतीतीर्थरुहैर्धन्वनैःस्यंदनैस्तथा ॥ १५ ॥ कपित्थैःकरवीरैश्चबिल्वैराम्रातकैस्तथा ॥ अतिमुक्तकषंडैश्चपारिजातैश्चशोभिता ॥ १६ ॥ कदंब
वनभूयिष्ठासर्वसत्वमनोरमा ॥ वाय्वंबुफलपर्णादैर्दंतोलूखलिकैरपि ॥ १७ ॥ तथाश्मकुट्टमुख्यैश्चवरिष्ठैर्मुनिभिर्वृता ॥ स्वाध्यायघोषसं
घुष्टामृगयूथशताकुला ॥ १८ ॥ अहिंसैर्धर्मपरमैस्तथाचातीवशोभिता ॥ सुप्रभाकांचनाख्याचप्राचीनंदाविशालका ॥ १९ ॥ स्रोतोभिः
पंचभिस्तत्रवर्ततेपुष्करेनदी ॥ पितामहस्यसदसिवर्त्तमानेमहीतले ॥ १२० ॥ विततेयज्ञवाटेतुस्वागतेषुद्विजादिषु ॥ पुण्याहघोषैर्विततैर्देवा
नांनियमैस्तथा ॥ २१ ॥ देवेषुचैवव्यग्रेषुतस्मिन्यज्ञविधौतथा ॥ तत्रचैवमहाराजदीक्षितेचपितामहे ॥ २२ ॥ यजतस्तस्यसत्रेणसर्वकाम
समृद्धिना ॥ मनसाचिंतिताह्यर्थाधर्मार्थकुशलास्तथा ॥ २३ ॥ उपतिष्ठंतिराजेंद्रद्विजातींस्तत्रतत्रह ॥ जगुश्चदेवगंधर्वाननृतुश्चाप्सरोगणाः
॥ २४ ॥ वादित्राणिचदिव्यानिवादयामासुरंजसा ॥ तस्ययज्ञस्यसंपत्त्यातुतुषुर्देवताअपि ॥ २५ ॥ विस्मयंपरमंजग्मुःकिमुमानुषयोनयः ॥ वर्त
मानेतथायज्ञेपुष्करस्थेपितामहे ॥ २६ ॥ अब्रुवन्नृपयोभीष्मतदातुष्टास्सरस्वतीम् ॥ सुप्रभांनामराजेंद्रनाम्नाचैवसरस्वतीम् ॥ २७ ॥ तेदृ
ष्ट्वामुनयःसर्वेवेगयुक्तांसरस्वतीम् ॥ पितामहंभासयंतींक्रतुंतेबहुमेनिरे ॥ २८ ॥ एवमेपासरिच्छ्रेष्ठापुष्करेषुसरस्वती ॥ पितामहार्थंसम्भूतातु
ष्ट्यर्थंचमनीषिणाम् ॥ २९ ॥ पुण्यस्यपुण्यताकारिपंचस्रोतास्सरस्वती ॥ सुप्रभानामराजेन्द्रनाम्नाचैवसरस्वती ॥ १३० ॥ यत्रतेमुनयश्शा

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

न्तानानास्वाध्यायवादिनः ॥ तेसमागत्यऋषयस्सस्मरुर्वैसरस्वतीम् ॥ ३१ ॥ साभिध्यातामहाभागाऋषिभिःसत्रयाजिभिः ॥ समास्थिता दिशंपूर्वांभक्तिप्रीतामहानदी ॥ ३२ ॥ प्राचीपूर्ववहानाम्नामुनिवंद्यासरस्वती ॥ इदमन्यन्महाराजाशृण्वाश्चर्यवरंभुवि ॥ ३३ ॥ क्षतोमंकणकोविप्रः कुशाग्रेणेतिनःश्रुतम् ॥ क्षतात्किलकरेतस्यराजञ्शाकरसोऽस्रवत् ॥३४॥ सवैशाकरसंदृष्ट्वाहर्षाविष्टःप्रनृत्तवान् ॥ ततस्तस्मिन्प्रनृत्तेतुस्थावरंजंगमंच यत् ॥ ३५ ॥ प्रानृत्यतजगत्सर्वंतेजसातस्यमोहितम् ॥ शक्रादिभिस्सुरैराजन्नृषिभिश्चतपोधनैः ॥ ३६ ॥ विज्ञप्तस्तत्रवैब्रह्मानायंनृत्येत्तथाकुरु ॥ आदिष्टोब्रह्मणारुद्रऋषेरर्थेनराधिप ॥ ३७ ॥ नायंनृत्येद्यथाभीमतथात्वंवक्तुमर्हसि ॥ गत्वारुद्रोमुनिंदृष्ट्वाहर्षाविष्टमतीवहि ॥ ३८ ॥ भोभोवि प्रर्षभत्वंहिनृत्यसेकेनहेतुना ॥ नृत्यमानेनभवताजगत्सर्वंचनृत्यति ॥ ३९ ॥ तेनायंवारितःप्राहनृत्यन्वैमुनिसत्तमः ॥ मुनिरुवाच ॥ किं नपश्यसिमेदेवकराच्छाकरसोऽस्रवत् ॥ १४० ॥ तंतुदृष्ट्वाप्रनृत्तोऽहंहर्षेणमहतावृतः ॥ तंप्रहस्याब्रवीद्देवोमुनिंरागेणमोहितम् ॥४१॥ अहंनविस्मयं विप्रगच्छामीदृप्रपश्यमाम् ॥ एवमुक्तोमुनिश्रेष्ठोमहादेवेनकौरव ॥ ४२ ॥ ध्यायमानस्तदाकोऽयंप्रतिषिद्धोऽस्मियेनहि ॥ अंगुल्यग्रेणराजेंद्रस्वां गुष्ठस्ताडितस्तथा ॥ ४३ ॥ ततोभस्मक्षताद्राजन्निर्गतंहिमपांडुरम् ॥ तदृष्ट्वाव्रीडितश्चासौप्राहतत्पादयोःपतन् ॥४४॥ नान्यद्देवादहंमन्येरुद्रात्परतरं महत् ॥ चराचरस्यजगतोगतिस्त्वमसिशूलधृत् ॥ ४५ ॥ त्वयासृष्टमिदंसर्वंवदंतीहमनीषिणः ॥ त्वामेवसर्वंविशतिपुनरेवयुगक्षये ॥ ४६ ॥ देवैर पिनशक्यस्त्वंपरिज्ञातुंमयाकुतः ॥ त्वयिसर्वेचदृश्यंतेसुराब्रह्मादयोऽपिये ॥ ४७ ॥ सर्वस्त्वमसिदेवानांकर्ताकारयिताचयः ॥ त्वत्प्रसादात्सुराः सर्वेभवंतीहाकुतोभयाः ॥ ४८ ॥ एवंस्तुत्वामहादेवमृषिश्चप्रणतोऽब्रवीत् ॥ भगवंस्त्वत्प्रसादेनतपोनक्षीयतेत्विह ॥४९॥ ततोदेवःप्रीतमनास्तमृ षिंपुनरब्रवीत् ॥ तपस्तेवर्द्धतांविप्रमत्प्रसादात्सहस्रधा ॥१५०॥ प्राचीमेवेहवत्स्यामित्वयासार्द्धमहंसदा ॥ सरस्वतीमहापुण्याक्षेत्रेचाि मन्विशे षतः ॥५१ ॥ नतस्यदुर्लभंकिंचिदिहलोकेपरत्रच ॥ सरस्वत्युत्तरेतीरेयस्त्यजेदात्मनस्तनुम् ॥५२ ॥ प्राचीतटेजाप्यपरोनचेहम्रियतेपुनः ॥ अ ल्पतोवाजिमेधस्यफलमाप्स्यतिपुष्कलम् ॥ ५३ ॥ नियमैश्चोपवासैश्चकर्शयन्देहमात्मनः ॥ जलाहारोवायुभक्षःपर्णाहारश्चतापसः ॥ ५४ ॥ तथा स्थंडिलशायीचयेचान्येनियमाःपृथक् ॥ करोतियोद्विजश्रेष्ठोनियमांस्तान्व्रतानिच ॥ ५५॥ सयातिशुद्धदेहश्चब्रह्मणःपरमपदम्॥तस्मिंस्तीर्थेतुयैर्दत्तं तिलमात्रंतुकांचनम् ॥ ५६ ॥ मेरुदानसमंतत्स्यात्पुराप्राहप्रजापतिः॥तस्मिंस्तीर्थेतुयेश्राद्धंकरिष्यंतिहिमानवाः ॥ ५७ ॥ एकविंशकुलोपेताःस्वर्गं यास्यंतितेनराः ॥पितॄणांचशुभंतीर्थंपिंडेनैकेनतर्पिताः ॥५८॥ ब्रह्मलोकंगमिष्यंतिस्वपुत्रेणेहतारिताः ॥भूयश्चान्नंनचेच्छंतिमोक्षमार्गंव्रजंतिते ॥५९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राचीनत्वंसरस्वत्यायथाभूतंशृणुष्वतत् ॥ सरस्वतीपुराप्रोक्तादेवैःसर्वैःसंवासवैः ॥ १६० ॥ तटत्वयाप्रयातव्यंप्रतीच्यांलवणोदधेः ॥ वडवाग्निमि
मंनीत्वासमुद्रेनिक्षिपस्वह ॥ ६१ ॥ एवंकृतेसुराःसर्वेभवंतिभयवर्जिताः ॥ अन्यथावडवाग्निस्तुदहतेस्वेनतेजसा ॥ ६२ ॥ तस्माद्रक्षस्वविबुधानेत
स्मादचिराद्भयात् ॥ मातेवभवसुश्रोणिसुराणामभयप्रदा ॥ ६३ ॥ एवमुक्तातुसादेवीविष्णुनाप्रभविष्णुना ॥ आहनाहंस्वतंत्रास्मिपितामेव्रियतां
स्वराट् ॥ ६४ ॥ तदाज्ञाकारिणीनित्यंकुमारीहधृतव्रत ॥ पित्रादेशाद्विनानाहंपदमेकमपिक्वचित् ॥ ६५ ॥ गच्छामितस्मात्कोऽप्यन्यउपाय
श्चिंत्यतामहो ॥ तदाशयंविदित्वाहुस्तेसमेत्यपितामहम् ॥ ६६ ॥ नान्येनशक्यतेनेतुंवडवाग्निःपितामह ॥ अदृष्टदोषाम्मुक्त्वैकांकुमारींतनयांतव
॥ ६७ ॥ सरस्वतींसमानीयकृत्वांकेवरवर्णिनी ॥ शिरस्याघ्रायसस्नेहमुवाचाथसरस्वतीम् ॥ ६८ ॥ मांचदेवासुराःप्राहुःसत्वंब्रूहियशस्विनीम् ॥
नीत्वाविनिक्षिपदेनंवाडवंलवणांबुनि ॥ ६९ ॥ पितुर्वाक्यंहितच्छ्रुत्वावियुक्ताकुररीयथा ॥ पित्रातदैवसाकन्यारुरुदेदीनमानसा ॥१७०॥ शोभते
तन्मुखंतस्याःशोकबाष्पाविलेक्षणम् ॥ सितंविकसितंतद्वत्पद्मंतोयकणोक्षितम् ॥ ७१ ॥ तत्तथाविधमालोक्यपितामहपुरस्सराः ॥ विबुधाः
शोकभावस्यसर्वेवशमुपागताः ॥ ७२ ॥ संस्तभ्यहृदयंतस्याःशोकसंतापितंतदा ॥ पितामहस्तामुवाचमारोदीर्नास्तिभयम् ॥ ७३ ॥ मानलाभश्च
भवितातवदेवानुभावतः ॥ नीत्वाक्षारोदमध्येतुक्षिपस्वज्वलनंसुते ॥ ७४ ॥ एवमुक्तातुसाबालाबाष्पाकुलितलोचना ॥ प्रणम्यपद्मजन्मानं
गच्छाम्युक्तवतीतुसा ॥ ७५ ॥ माभैरुक्तापुनस्तैस्तुपित्राचापितथैवसा ॥ त्यक्त्वाभयंहृष्टमनाःप्रयातुंसमवस्थिता ॥ ७६ ॥ तस्याःप्रयाणसमये
शंखदुंदुभिनिस्वनैः ॥ मंगलानांचनिर्घोषैर्जगदापूरितंशुभः ॥ ७७ ॥ सितांबरधराधन्यासितचंदनमंडिता ॥ शरदंबुजसच्छायतारहारविभूषिता
॥ ७८ ॥ संपूर्णचंद्रवदनापद्मपत्रायतेक्षणा ॥ शुभांकीर्तिंसुरेशस्यपूरयन्तीदिशोदश ॥ ७९ ॥ स्वतेजसातद्धृदयान्निःसृताभासयज्जगत् ॥
अनुव्रजन्तींतांगंगातयोक्तावर्णिनी ॥ १८० ॥ द्रक्ष्यामित्वांपुनरहंकुत्रयातासिमेसखि ॥ एवमुक्तातयागंगाप्रोवाचमधुरांगिरम् ॥ ८१ ॥
यदैवायास्यसिप्राचींदिशंमांपश्यसेशुभे ॥ विबुधैस्त्वंपरिवृतादर्शनंतवसंश्रये ॥ ८२ ॥ उदङ्मुखीतदाभूत्वात्यजशोकंशुचिस्मिते ॥
अहंचोदङ्मुखीपुण्यात्वंतुप्राचीसरस्वती ॥ ८३ ॥ तत्रक्रतुशतंपुण्यंस्नानदानेनसुव्रते ॥ श्राद्धदानेतथानित्यंपितॄणांदत्तमक्षयम् ॥ ८४ ॥
येकरिष्यंतिमनुजाविमुक्तास्तत्रऋणैस्त्रिभिः ॥ मोक्षमार्गंगमिष्यन्तिविचारोनात्रविद्यते ॥ ८५ ॥ तामुवाचततोगङ्गापुनर्दर्शनमस्तुते ॥ गच्छ
स्वमालयंभद्रेस्मर्तव्याहंत्वयानघे ॥ ८६ ॥ यमुनापितथैवंसागायत्रीचमनोरमा ॥ सावित्र्यासहिताःसर्वाःसखींसंप्रैषयंस्तथा ॥ ८७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततोविसृज्यतान्देवान्नदीभूतासरस्वती ॥ उत्तंकस्याश्रमपदउद्भूतासामनस्विनी ॥ ८८ ॥ अधस्तात्प्लक्षवृक्षस्यअवरोप्यचतांतनुम् ॥ अवतीर्णा महाभागादेवानांपश्यतांतदा ॥ ८९ ॥ विष्णुरूपस्तरुःसोऽत्रसर्वदेवैस्तुवन्दितः ॥ संसेव्यश्चद्विजैर्नित्यंफलहेतोर्महोदयः ॥ १९० ॥ अनेकशाखा विततश्चतुर्मुखइवापरः ॥ तत्कोटरकुटीकोटिप्रविष्टानांद्विजन्मनाम् ॥ ९१ ॥ श्रूयंतेविविधावाचःसुराणांरक्तचेतसाम् ॥ वनस्पतिरपुष्पोऽ पिपुष्पितश्चोपलक्ष्यते ॥ ९२ ॥ जातीचम्पकवत्पुष्पैःशाखालग्नैःशुकैःशुभैः ॥ केतकीवबलाकाभिरशोभतसरिद्वरा ॥ ९३ ॥ कोकिला भिस्समालेवफेनकैःपुष्पितेवसा ॥ हरेणेवयथागङ्गाप्लक्षेणैवहिसातथा ॥ ९४ ॥ तत्रांभस्थातदादेवंप्रोवाचाथजनार्दनम् ॥ समर्पयस्वतंवह्निं देवादेशंकरोम्यहम् ॥ ९५ ॥ एवमुक्तेनसातेनप्रत्युक्ताविष्णुनातदा ॥ नतेदाहभयंत्याज्यस्त्वयायंवह्निराट्स्वयम् ॥ ९६ ॥ पश्चिमं सागरंनेतुंवाडवज्वलनंशुभे ॥ एवंक्रमेणगच्छंत्यातदापंप्राप्स्यतेशुभे ॥ ९७ ॥ ततस्तंशातकुंभस्थंकृत्वासौवडवानलम् ॥ समर्पयतगोविन्दः सरस्वत्यामहोदरे ॥ ९८ ॥ सातंगृहीत्वासुश्रोणीप्रतीच्यभिमुखीययौ ॥ अंतर्द्धानेनसंप्राप्तापुष्करंसामहानदी ॥ ९९ ॥ मर्यादापर्वतेतस्मिन्स म्भूताविमलासरित् ॥ पुष्करारण्यंविपुलंसुरसिद्धनिषेवितम् ॥ २०० ॥ पितामहेनयत्रासीद्यज्ञसत्रंनिषेवितम् ॥ सिद्ध्यर्थंमुनिमुख्यानामा गतासौमहानदी ॥ १ ॥ येषुतत्रकृतोहोमःकुंडेष्वासीद्विरिंचिना ॥ तानिसर्वाणिसंप्लाव्यतोयेनाप्युद्गताहिसा ॥ २ ॥ तत्रक्षेत्रेमहापुण्या पुष्करेसातथोत्थिता ॥ तेनतत्पूरणंप्रोक्तंवायुनाजगदायुषा ॥ ३ ॥ सापितत्क्षेत्रमासाद्यपुण्यंपुण्यामहानदी ॥ सरस्वतीस्थितादेवीमर्त्यानां पापनाशिनी ॥ ४ ॥ तत्रयेशुभकर्माणःपुष्करस्थांसरस्वतीम् ॥ पश्यंतितेनपश्यंतिसुघोरांतामधोगतिम् ॥ ५ ॥ यःपुनस्तत्रभावेननरःस्नानंस माचरेत् ॥ सब्रह्मलोकमासाद्यब्रह्मणासहमोदते ॥६॥ यस्तुदद्यात्तत्रदधिब्राह्मणायमनोरमम् ॥ सोऽप्यग्निलोकमासाद्यभुंक्तेभोगान्सुशोभनान् ॥ ७ ॥ वरंप्रावरणंयोऽपिभक्त्यादद्याद्द्विजातये ॥ सोऽपिसद्वस्त्रदानस्यफलंदशगुणंलभेत् ॥ ८ ॥ ज्येष्ठकुंडेनरःस्नात्वायःसंतर्पयतेपितॄन् ॥ सतानुद्धरते सर्वान्नरकादपिशुद्धधीः ॥ ९ ॥ क्षेत्रेपैतामहेपूतेपुण्यांप्राप्यसरस्वतीम् ॥ नरःकिंप्रार्थयेदन्यत्तीर्थंब्रह्मसुतोऽब्रवीत् ॥२१० ॥ तस्मात्सर्वेषुतीर्थेषु स्नातःप्राप्नोतियत्फलम् ॥तत्सर्वंप्राप्नुयान्मर्त्योज्येष्ठकुंडेसकृत्प्लुतः॥ ११ ॥ किमत्रबहुनोक्तेनक्षेत्रंतीर्थंगतिश्शुभा ॥ येनैतत्त्रितयंप्राप्तंप्राप्तातेनगतिः परा ॥ १२ ॥ कालेक्षेत्रेतथातीर्थेस्नात्वाहुत्वापितत्रयः ॥ प्रयच्छतेद्विजायार्थंसोऽनंतंसुखमश्नुते ॥ १३ ॥ कार्त्तिकेमासिशुक्लेचवैशाखेशशिभू षणे ॥ चंद्रसूर्योपरागेचकालेचकुरुजांगले ॥ १४ ॥ क्षेत्रेष्वेतेषुतीर्थानियान्युक्तानिमुनीश्वरैः ॥ तेषांपुण्यतमंतीर्थमिदमाहपितामहः ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुण्डेतुमध्यमेस्नात्वाकार्तिक्यांयःपुमान्द्विजे ॥ प्रयच्छतेचापिद्रव्यंसोऽश्वमेधमवाप्नुयात् ॥ १६ ॥ एवंकनिष्ठकेऽप्यत्रकुंडेस्नात्वासमाधिना ॥ यः
प्रयच्छतिविप्रायसुरूपामपिशालिकाम् ॥ १७ ॥ सप्रयातिनरःक्षिप्रमग्निलोकंमनोरमम् ॥ त्रिःसप्तकुलसंयुक्तोभुंक्तेतत्रमहाफलम् ॥ १८ ॥ त
स्मात्सर्वप्रयत्नेनगमनायमतिःस्थिरा ॥ पुरुषेणतुकर्तव्यापुष्करावाप्तयेशुभा ॥ १९ ॥ पुष्करारण्यमासाद्यप्राचीयत्रसरस्वती ॥ मतिःस्मृतिः
शुभाप्रज्ञामेधाबुद्धिर्दयापरा ॥२२०॥ सरस्वत्यास्तुपर्यायाषष्डेतेसंप्रकीर्तिताः ॥ ततःप्रभृतियत्रासौप्राचीभूतासरस्वती ॥२१॥ तत्रस्थंतज्जलंयेऽपि
पश्यंतितटसंस्थिताः ॥ तेऽप्यश्वमेधस्यफलंलभंतेनात्रसंशयः ॥ २२ ॥ योऽवतीर्यपुनस्तत्रकश्चित्स्नानंसमाचरेत् ॥ नरःसमाधियुक्तोवैब्रह्मणोऽनु
चरोभवेत् ॥ २३ ॥ शाकादिनापिहिपितॄन्यस्तत्रार्चयतेनरः ॥ सोऽप्येतिविपुलान्भोगांस्तेषामेवानुभावतः ॥ २४ ॥ येपुनर्विधिनातत्रश्राद्धं
कुर्वंतिमानवाः ॥ तेनयंतिपितॄन्स्वर्गंनरकादपिदुःखदात् ॥ २५ ॥ तृप्यंतिपितरस्तस्ययस्तत्रकुशमिश्रितम् ॥ स्नात्वाप्रयच्छतेतोयंपूतंतेषांतिलान्वि
तम् ॥ २६ ॥ तेऽपितुष्टाःपुनस्तस्यप्रयच्छन्त्यमितंफलम् ॥ सर्वेषामेवतीर्थानामिदमेवाधिकंस्मृतम् ॥ २७ ॥ आदितीर्थमिदंतस्मात्तीर्थानांभुवि
विश्रुतम् ॥ धर्मापवर्गयोःक्रीडानिधिभूतमवस्थितम् ॥ २८ ॥ सरस्वत्यापुनश्चैवसमेतंगुणवत्तरम् ॥ धर्मार्थकाममोक्षाणांचतुर्णामपिदायकम् ॥
॥२९॥ येऽप्यत्रमलनाशायपुमांसोविविशुर्जलम् ॥ गोप्रदानसमंतेषांसुखेनैवफलंभवेत् ॥२३०॥ सुवर्णदानेनसममेवमाहुर्मनीषिणः ॥ तर्पणात्पिण्ड
दानाच्चनरकेष्वपिसंस्थिताः ॥ ३१ ॥ स्वर्गंप्रयान्तिपितरस्तत्रपुत्रेणतारिताः ॥ पुष्करेऽपिसरस्वत्यांयेपिबंतिजलंजनाः ॥ ३२ ॥ तेलभन्तेऽक्ष
याँल्लोकान्ब्रह्मविश्वेशवंदितान् ॥ स्वर्गनिश्रेणिकाभूतापुष्करेचसरस्वती ॥३३॥ सापुण्यवद्भिस्संप्राप्तुंपुंभिश्शक्यामहानदी ॥ मुनिभिर्धर्मतत्त्वज्ञैस्त
त्रतत्रनिषेविता ॥३४॥ तस्मात्सर्वत्रसादेवीपवित्रासर्वतःस्थिता॥पुष्करेतुविशेषेणपूतात्पूततमाहिसा॥३५॥ नदीसरस्वतीपुण्यासुलभाजगतिस्थिता॥
दुर्लभासाकुरुक्षेत्रेप्रभासेपुष्करेतथा ॥ ३६ ॥ तत्तीर्थंसर्वतीर्थानांप्रवरंविहितंभुवि ॥ धर्मार्थकाममोक्षाणांचतुर्णामपिसाधकम् ॥ ३७॥ प्राचींस
रस्वतींप्राप्ययोऽन्यत्तीर्थंहिमार्गते ॥ सकरस्थंसमुत्सृज्यह्यमृतंविषमिच्छति ॥ ३८ ॥ ज्येष्ठंज्येष्ठाप्रयागस्यमध्यमेमध्यमास्मृता ॥ प्रदक्षिणंततोग
च्छेत्कनीयांसंविचक्षणः ॥ ३९ ॥ त्रिष्वप्येतेषुस्नायीतकुर्याच्चापिप्रदक्षिणम् ॥ प्रयच्छतिपितृभ्योयस्तोयंतेषांतिलान्वितम् ॥२४०॥ तेऽपितुष्टाःपु
नस्तस्यप्रयच्छंत्यमितंफलम् ॥ यःस्नात्वाप्रयतोनित्यंततःपश्येत्पितामहम् ॥ ४१ ॥ अनुलोमविलोमाभ्यांतथाव्यस्तसमस्तयोः ॥ स्नातव्यं
पुष्करेनित्यंब्रह्मलोकमभीप्सिता ॥ ४२ ॥ त्रीणिशृंगाणिशुभ्राणित्रीणिप्रस्रवणानिच ॥ पुष्कराणिप्रसिद्धानिनविद्मस्तत्रकारणम् ॥ ४३ ॥ कनी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यांसंमध्यमंचतृतीयंज्येष्ठपुष्करम् ॥ शृंगशब्दाभिधानानिशुभप्रस्रवणानिच ॥ ४४ ॥ धर्मार्थकाममोक्षाणांसंकल्पैरफलंनरः ॥ यस्तत्रसंत्यजेद्देहंसो
क्षंप्राप्नोत्यसंशयम् ॥ ४५ ॥ प्रयतःसंयतस्तस्यांस्नात्वादद्याद्द्विजेशुभाम् ॥ गामेकांमन्त्रपूतांचलोकानाप्नोतिसोऽक्षयान् ॥ ४६ ॥ किमत्रबहुनोक्ते
नरात्रावपिहियोऽर्थिने ॥ अर्थंप्रयच्छतेस्नात्वासोऽनन्तंसुखमश्नुते ॥४७॥ तत्रदानंप्रशंसंतितिलानांमुनिसत्तमाः ॥ कृष्णपक्षेचतुर्दश्यांस्नानंचविहितं
सदा ॥ ४८ ॥ पिण्याकेनगुडेनापिपिण्डंयोऽत्रप्रयच्छति ॥ पितॄणांप्रयतोभूत्वापितृलोकंसयच्छति ॥ ४९ ॥ पुष्करारण्यमासाद्यपुनस्तस्मात्सरस्व
ती ॥ अन्तर्धानंगतागन्तुंप्रवृत्तापश्चिमामुखी ॥२५०॥ नातिदूरेततस्तस्यपुष्करस्यसुशोभना ॥ खर्जूरवनमासाद्यफलपुष्पोपशोभितम् ॥ ५१ ॥
तत्रोषित्वापुनर्देवीवनेमुनिमनोरमे ॥ सर्वर्तुकुसुमाकीर्णेसिद्धचारणसेविते ॥ ५२ ॥ नंदानामसरिच्छ्रेष्ठात्रिषुलोकेषुविश्रुता ॥ मीननक्रझषोपेता
विमलोदकपूरिता ॥ ५३ ॥ सूतउवाच ॥ अथदेवव्रतःप्राहकिमन्यासासरिद्वरा ॥ एतन्मेकौतुकंब्रह्मन्नंदाशब्दासरस्वती ॥ ५४ ॥
यथाभूतायेनकृताकारणेनसरिद्वरा॥एवमुक्तेपुलस्त्यःसभीष्मायैतत्पुरातनम् ॥ ५५ ॥ आख्यातुमुपचक्रामनंदानामयतस्स्मृता ॥ क्षत्रव्रतधरोनित्य
मासीद्राजाप्रभंजनः ॥५६॥ प्रवृत्तोऽसौमृगान्हंतुंवनेतस्मिन्महाबलः ॥सददर्शततस्तस्मिन्मृगींगुल्मांतरेस्थिताम् ॥५७॥ मार्गणेनसुतीक्ष्णेनतांविव्या
धपुरोगताम् ॥ साविलोक्यदिशःसर्वास्तंदृष्ट्वाशरपाणिनम् ॥ ५८ ॥ आहकिंतेकृतंमूढत्वयैतत्कर्मदुष्करम् ॥ स्तनंतावत्प्रयच्छामिसुतस्याधोमुखी
स्थिता ॥ ५९ ॥ मांसलोभेनविद्धाहंतरसाह्यकुतोभया ॥ पिबंतंगुप्तवत्संचगूढमैथुनमागतम् ॥ २६० ॥ एवंविधंमृगंराजन्नहन्यात्प्राज्ञ
मयाश्रुतम् ॥ स्तनंतुतनयस्यास्यप्रयच्छंतीत्वयाहता ॥ ६१ ॥ बाणेनाशनिकल्पेननिर्दोषावनमागता ॥ तस्मात्त्वमपिदुर्बुद्धेक्रव्यादत्वम
वाप्स्यसि ॥ ६२ ॥ वनेऽस्मिन्कंटकाकीर्णेव्याघ्ररूपंत्वमाप्नुहि ॥ शापप्रदानंश्रुत्वैवंसराजापुरतःस्थितः ॥ ६३ ॥ प्रोवाचप्रांजलिर्भूत्वा
तांमृगींव्यथितेंद्रियः ॥ स्तनंतुतनयस्येहप्रयच्छंतींनमेमता ॥ ६४ ॥ अज्ञानेनहताभद्रेप्रसीदसुसमाधिना ॥ व्याघ्ररूपमहंत्यक्त्वाप्राप्स्या
मिमानुषंकदा ॥ ६५ ॥ एवंविधस्यशापस्यविमोक्षंशंसमेमृगि ॥ एवमुक्तेमृगीतस्यप्रोवाचवचनंशुभम् ॥ ६६ ॥ राजन्नब्दशतांतेतुशा
पस्यागतयागवा ॥ नंदयासहसंवादमासाद्यांतोभविष्यति ॥ ६७ ॥ मृग्योक्तेवचनेराजाव्याघ्रएवाभवत्तदा ॥ नखदंष्ट्रायुधोपेतोव्याघ्र
रूपोऽतिभीषणः ॥६८॥ तत्रासौभक्षयन्नास्तेमृगान्हत्वाचतुष्पदः ॥ द्विपदानपितत्रस्थान्कालेनक्रमयोजितान् ॥६९ ॥ एवंतत्रवनेतस्यसंवत्सरशतंग
तम् ॥ आत्मानंनिंदमानस्यमृगमांसानिखादतः ॥ २७० ॥ कदाहंमानुषंभावंगमिष्यामीदृशंपुनः॥कुत्सितंनकरिष्यामिवियोनिकरणंमहत् ॥ ७१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुर्वतामांसलोभेनमृगयांपरिधावता ॥ आपदासहितंप्राप्तंमानुषाणांभयावहम् ॥७२॥ दर्शनंदुःखदंमह्यंमृगाणांमानुषैःसह ॥ पापेनपापतांनीतोह्य
पापेऽपिसतांकुले ॥ ७३ ॥ उत्पन्नोविकृतिंनीतःपश्यकालस्यपर्ययम् ॥ तस्मान्मेसुकृतंनास्तिहिंसाप्येकाविगर्हिता ॥ ७४ ॥ तयात्तुप्राप्यतेदुःखंन
चमोक्षोभविष्यति ॥ कथंमेभवितामोक्षःकथंसत्यामृगीभवेत् ॥ ७५ ॥ गतेवर्षशतेतस्यवसतस्तद्वनेतदा ॥ आयातंगोकुलंकालेयवसोदककारणा
त् ॥ ७६ ॥ गोवाटवाटीसंस्थानंतत्तत्रसमवस्थितम् ॥ वनोपकण्ठेमंथानरवेणापूरितंचयत् ॥७७॥ क्षीबैर्गोपैःसमाकीर्णपादपैरपितद्वनम् ॥ निशि
वंशरवोपेतंगोपीनांचशुभप्रदम् ॥७८॥ एवंतुवसतस्तस्यखर्जूरवनसंसदि ॥ हृष्टातुष्टाचपुष्टाचनंदावैनामनामतः ॥७९॥ गोमण्डलस्यसामुख्याहंस
वर्णाघटस्रवा ॥ दीर्घघोणाविभक्तांगीबंधुरांगीतनुत्वचा ॥२८०॥ नीलकण्ठाशुभग्रीवाघण्टालीमधुरस्वना ॥ साचयूथस्यसर्वस्यपुरश्चरतिनिर्भया ॥
॥ ८१ ॥ घासस्थानंचरेच्छन्नंगत्वैकाचयथासुखम् ॥ यथेष्टकामासुरभिश्छन्नंचरतिवैतृणम् ॥ ८२ ॥ रोहितोनामततत्रान्यःपर्वतःसरितस्तटे ॥
अनेककन्दरदरीगुहासत्त्वनिषेवितः ॥ ८३ ॥ तस्यपूर्वोत्तरेभागेघोरेतृणसमाकुले ॥ संकटेविषमेदुर्गेभैरवेलोमहर्षणे ॥ ८४ ॥ मृगसिंहसमाकीर्णेबहु
श्वापदसेविते ॥ वल्लीवृक्षादिगहनेशिवाशतनिनादित ॥८५॥ दुर्गेऽस्मिन्वसतेरौद्रःकामरूपीभयंकरः ॥ द्वीपीशोणितदिग्धांसोघोरदंष्ट्रोनखायुधः
॥८६॥ नंदोनामसधर्मात्मासचगोपीहितेरतः ॥ अच्छिन्नाग्रैस्तृणैर्दीर्घैर्गोधनंपरिरक्षति ॥८७॥ तस्ययूथपरिभ्रष्टासानंदातृणलिप्सया ॥ चरंतीव्या
घ्रपुरतःसाधेनुःप्रत्युपस्थिता ॥ ८८ ॥ अभ्यद्रवचतांद्वीपीतिष्ठतिष्ठेतिचाब्रवीत् ॥ त्वमद्यविहितोभक्षःस्वयंप्राप्तासिधेनुके ॥ ८९ ॥ द्वीपिनश्चवचः
श्रुत्वानिष्ठुरंरोमहर्षणम् ॥ शुक्लरूपान्वितंबालंभद्रमिंदुसमप्रभम् ॥२९०॥ वत्संस्मरतिसाधेनुःस्नेहाक्तागद्गदाक्षरम्॥दह्यंतीपुत्रशोकेननंदासापुत्रवत्स
ला ॥ ९१ ॥ रुदंतीकरुणंचैवनिराशापुत्रदर्शने ॥ द्वीपीदृष्ट्वातुतांधेनुंक्रंदमानांसुदुःखिताम् ॥ ९२ ॥ उवाचवचनंघोरंधेनुकेकिंप्ररुद्यते ॥ दैवात्सु
खोपपन्नासिभक्षस्त्वंमेयदृच्छया ॥९३॥ रुदंत्यावाहसंत्यावातवात्तंजीवितंभवेत् ॥ विहितंभुज्यतेलोकेस्वयंप्राप्तासिधेनुके ॥९४॥ मृत्युस्तेविहितोऽ
द्यैववृथाकिमनुशोचसि ॥ पप्रच्छतांपुनर्द्वीपीकिमर्थंरुदितंत्वया ॥ ९५ ॥ कौतुकंचात्रमेजातंमहन्मेकथयस्ववै ॥ व्याघ्रस्यवचनंश्रुत्वानंदावाक्य
मथाब्रवीत् ॥९६॥ क्षंतुमर्हसिमेनाथकामरूपिन्नमोऽस्तुते॥त्वांसमासाद्यलोकस्यपरित्राणंनविद्यते ॥९७॥ जीवितार्थंनशोचामिप्राप्तव्यंमरणंमया॥जात
स्यहिध्रुवोमृत्युर्ध्रुवंजन्ममृतस्यच ॥९८॥ तस्मादपरिहार्येऽर्थेनशोचामिमृगाधिप॥दैवैरपियथासर्वैर्मर्तव्यमवशैर्ध्रुवम् ॥९९॥ तस्मात्तुनाहमेवैकाव्या
घ्रशोचामिजीवितम्॥किंतुस्नेहेनवैसाधोदुःखेनरुदितंमया ॥३००॥अस्तिमेहृदिसंतापस्तंचत्वंश्रोतुमर्हसि ॥ प्रथमेवयसिप्राप्तेप्रसूताहंमृगाधिप ॥१॥

११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इष्टः प्रथमजातश्च सुतस्तु ममबालकः ॥ क्षीरपायीचमेवत्सस्तृणंनाद्यापिजिघ्रति ॥ २ ॥ सचगोपकुलेबद्धः क्षुधार्तोमामवेक्षते ॥ तमहंचा
नुशोचामिकथंजीविष्यतेसुतः ॥३॥ तस्येच्छामिस्तनंदातुंपुत्रस्नेहवशंगता ॥ पाययित्वास्तनंवत्समवलिह्यचमूर्द्धनि ॥ ४॥ सखीनामर्पयित्वातुसं
दिश्यचहिताहितम् ॥ पुनःप्रत्यागमिष्यामियथेष्टंभक्षयिष्यसि ॥ ५ ॥ सनंदायावचःश्रुत्वामृगेंद्रःपुनरब्रवीत् ॥ किंतेपुत्रेणकर्तव्यंमरणंकिंनबुध्यसे
॥ ६ ॥ त्रस्यंतिसर्वभूतानिम्रियंतेमांनिरीक्ष्यच ॥ त्वंपुनःकृपयाविष्टापुत्रपुत्रेतिभाषसे ॥ ७ ॥ नपुत्रानतपोदानंनमातानपितागुरुः ॥ शक्नुवंतिपरि
त्रातुंनरंकालप्रपीडितम् ॥ ८ ॥ कथंत्वंगोकुलंगत्वागोपीजनसमाकुलम् ॥ वृषभैर्नादितंदिव्यंबालवत्सविभूषितम् ॥ ९ ॥ भूषणंदेवलोकस्यस्वगतु
ल्यंनसंशयः ॥ नित्यंप्रमुदितंदिव्यंसर्वदेवप्रपूजितम् ॥ ३१० ॥ यत्पवित्रंपवित्राणांमंगलानांचमंगलम् ॥ यत्तीर्थंसर्वतीर्थानांधन्यानांधन्यमुत्तमम्
॥ ११ ॥ समस्तगुणसंपन्नमीश्वरायतनंमहत् ॥ यत्ख्यातंसर्वतीर्थानांभूमिस्वर्गमनुत्तमम् ॥१२॥ गोपीमंथनशब्देनबालवत्सरवेणच ॥ गवांहुंकारश
ब्देनअलक्ष्मीःप्रतिहन्यते ॥ १३ ॥ यत्रवत्साश्चहुंकारंकरुणंमातृकांक्षया ॥ यद्गोपैःपालितंशूरैर्बाहुयुद्धकृतश्रमैः ॥ १४ ॥ प्रगीतनृत्यसंलापंनंदि
तास्फोटनादितम् ॥ इतस्ततःस्थितैर्वत्सैर्नर्द्यमानंसमंततः ॥ १५ ॥ सरोवद्राजतेगोष्टंचलद्भिरिवपंकजैः ॥ तंश्रीनिकेतनंसौम्यंहृष्टपुष्टजनाकुलम्
॥१६॥ गोलोकप्रतिमंदृष्ट्वाकथंप्रत्यागमिष्यसि ॥ पंचभूतानिमेभद्रेपिबंतुरुधिरंतव॥१७॥ननिर्विण्णानिभूतानिवाङ्मात्रेणकरोम्यहम् ॥ नंदोवाच ॥
एवंप्रथमवत्सायामृगेंद्रशृणुमेवचः ॥ १८ ॥ दृष्ट्वासखींसुतंबालंगोपांश्चप्रतिपालकान् ॥ गोपीजनमुपामन्त्र्यजननींचविशेषतः ॥१९॥ शपथैरागमि
ष्यामिमन्यसेयदिमुञ्चमाम्॥ यत्पापंब्रह्मवध्यायांमातापितृवधेषुच॥३२०॥तेनपापेनलिप्येऽहंयद्यहंनागमेपुनः॥यत्पापंलुब्धकानांतुम्लेच्छानांगरदा
यिनाम् ॥ २१ ॥ तेनपापेनलिप्येऽहंयद्यहंनागमेपुनः ॥ गोषुविघ्नांश्चयेकुर्युःस्वपंतींताडयंतिच ॥ २२ ॥ तेनपापेनलिप्येऽहंयद्यहंनागमेपुनः ॥
सकृद्दत्त्वातुयःकन्यांद्वितीयेदातुमिच्छति ॥ २३ ॥ तस्यपापेनलिप्येऽहंयद्यहंनागमेपुनः ॥ यस्त्वनर्हान्बलीवर्दान्विषमेवाहयेत्पुमान् ॥२४॥ कथा
यांकथ्यमानायांविघ्नंकारयतेतुयः ॥ तेनपापेनलिप्येऽहंयद्यहंनागमेपुनः ॥२५॥ गृहेयस्यागतंमित्रंनिराशंप्रतिगच्छति॥ तस्यपापेनलिप्येऽहंयद्यहं
नागमेपुनः॥२६॥इत्येतैःपातकैर्घोरैरागमिष्याम्यहंपुनः॥ बुद्ध्वासंप्रत्ययंद्वीपीपुनर्वचनमब्रवीत्॥२७॥ व्याघ्रउवाच ॥ संजातःप्रत्ययोऽस्माकंशपथै ॥ ६१ ॥
र्धेनुकेतव ॥ कदाचिन्मन्यसेगत्वामूर्खोऽयंवञ्चितोमया ॥ २८ ॥ अत्रापिकेचिद्वक्ष्यंतिशपथेनास्तिपातकम् ॥ कामिनीषुविवाहेषुगवां
भुक्तौतथैवच ॥ २९ ॥ प्राणत्यागेसमुत्पन्नेश्रद्धातव्यंनचत्वया ॥ लोकेऽस्मिन्नास्तिकाःकेचिन्मूर्खाःपंडितमानिनः ॥ ३३० ॥ भ्रामयिष्यंतितेचित्तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चक्रारूढमिवक्षणात् ॥ कुतर्कहेतुवृत्तांतैरज्ञानावृतचेतसः ॥ ३१ ॥ मोहयंतिनराःक्षुद्राआगमार्थविशारदाः ॥ अतथ्यान्यपितथ्यानिदर्शयंत्यति पेशलाः ॥ ३२ ॥ समेनिम्नोन्नतानीवचित्रकर्मविदोजनाः ॥ प्रायःकृतार्थोलोकोऽयंमन्यतेनोपकारिणम् ॥ ३३ ॥ वत्सःक्षीरक्षयंदृष्ट्वापरित्यजतिमा तरम् ॥ नतंपश्यामिलोकेऽस्मिन्कृतेप्रतिकरोतियः ॥ ३४ ॥ सर्वस्यहिकृतार्थस्यमतिरन्याप्रवर्तते ॥ ऋषिदेवासुरनरैःशपथाःकार्यसिद्धये ॥ ३५ ॥ कृताःपरस्परंपूर्वंतान्नमन्यामहेवयम् ॥ सत्येनापिशपेद्यस्तुदेवाग्निगुरुसन्निधौ ॥ ३६ ॥ तस्यवैवस्वतोराजाधर्मस्यार्द्धंनिकृन्तति ॥ मातेबुद्धिर्भवेदेवंशपथैरेषवंचितः ॥३७॥ त्वयैवदर्शितंसर्वंयथेष्टंकुरुसांप्रतम् ॥ नंदोवाच ॥ एवमेवमहासाधोकस्त्वांवञ्चयितुंक्षमः ॥३८॥ आत्मैववं चितस्तेनयःपरंवञ्चयिष्यति ॥ द्वीप्युवाच ॥ धेनुकेपश्यगच्छत्वंपुत्रकंपुत्रवत्सले ॥ ३९ ॥ पाययित्वास्तनंवत्समवलिह्यचमूर्द्धनि ॥ मातरं भ्रातरंदृष्ट्वासखीस्वजनबांधवान् ॥ ३४० ॥ सत्यमेवाग्रतःकृत्वाशीघ्रमागमनंकुरु ॥ एवंसाशपथंकृत्वाधेनुर्वैसत्यवादिनी ॥ ४१ ॥ अनुज्ञा तामृगेंद्रेणप्रयातापुत्रवत्सला ॥ अश्रुपूर्णमुखीदीनावेपमानासुदुःखिता ॥ ४२ ॥ हुंभारवंप्रमुंचंतीपतिताशोकसागरे ॥ करीवचरणग्राहंगृही तःसलिलाशये ॥ ४३ ॥ अशक्तास्वपरित्राणेविलपंतीमुहुर्मुहुः ॥ सातत्रगोकुलंप्राप्ताहारिन्नद्यास्तटेस्थितम् ॥ ४४ ॥ श्रुत्वावत्संतुक्रो शंतंपर्यधावतसंमुखी ॥ उपसृप्यचतंबालंबाष्पपर्याकुलेक्षणम् ॥ ४५ ॥ संप्राप्यमातरंवत्सःशंकितःपरिपृच्छति ॥ नतेपश्याम्यहंस्वा स्थ्यंधैर्यंनैवाद्यलक्षये ॥ ४६ ॥ उद्विग्नाचापितेदृष्टिर्भीताचातीवलक्ष्यसे ॥ नन्दोवाच ॥ पिबपुत्रस्तनंमेऽद्यकारणंयदिपृच्छसि ॥ ४७ ॥ अशक्ताहंतवाख्यातुंकुरुतृप्तिंयथेप्सिताम् ॥ अपश्चिमंतुतेपुत्रदुर्लभंमातृदर्शनम् ॥ ४८ ॥ एकाहमद्यमेपीत्वाप्रभातेकस्यपास्यसि ॥ त्वांत्यक्त्वापुत्र गंतव्यंशपथैरागताह्यहम् ॥ ४९ ॥ क्षुत्क्षामस्यचव्याघ्रस्यदातव्यमात्मजीवितम् ॥ नंदायाश्चवचःश्रुत्वावत्सोवचनमब्रवीत् ॥ ३५० ॥ वत्सउवाच ॥ अहंतत्रगमिष्यामियत्रत्वंगंतुमिच्छसि ॥ श्लाघ्यंममापिमरणंत्वयासहनसंशयः ॥ ५१ ॥ एकाकिनापिमर्तव्यंमयातेनत्व याविना ॥ यदिमांसंहितंमातर्वनेव्याघ्रोहनिष्यति ॥ ५२ ॥ यागतिर्मातृभक्तानांध्रुवंसामेभविष्यति ॥ तस्मादवश्यंयास्यामित्वयासहन संशयः ॥ ५३ ॥ अथवातिष्ठमातस्त्वंशपथाःसंतुतेमम ॥ जनन्याचवियुक्तस्यजीवितेकिंप्रयोजनम् ॥ ५४ ॥ अनाथस्यवनेनित्यंकोमेनाथो भविष्यति ॥ नास्तिमातृसमोबंधुर्बालानांक्षीरजीविनाम् ॥ ५५ ॥ नास्तिमातृसमोनाथोनास्तिमातृसमागतिः ॥ नास्तिमातृसमःस्नेहोनास्ति मातृसमंसुखम् ॥५६॥ नास्तिमातृसमोदेवइहलोकेपरत्रच ॥ एवंवैपरमोधर्मःप्रजापतिविनिर्मितः ॥५७॥ येतिष्ठंतिसदापुत्रास्तेयांतिपरमांगतिम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नंदोवाच ॥ममैवविहितोमृत्युर्नत्वंपुत्रागमिष्यसि ॥५८॥नचायमन्यजीवानांमृत्युःस्यादन्यमृत्युना ॥ अपश्चिममिमम्पुत्रमातृसंदेशमुत्तमम्॥५९ ॥
अत्रातिष्ठस्वमद्वाक्यात्ततःशुश्रूषणंपुनः ॥ जलेस्थलेचविचरन्प्रमादंतातमाकुरु ॥ ३६० ॥ प्रमादात्सर्वभूतानिविनश्यंतिनसंशयः ॥ नचलोभन
चर्तव्यंविषमस्थंतृणंक्कचित् ॥ ६१ ॥ लोभाद्विनाशःसर्वेषामिहलोकेपरत्रच ॥ समुद्रमटवींपुत्रविशंतिलोभमोहिताः ॥ ६२ ॥ लोभादकार्यमत्यु
ग्रंविद्वानपिसमाचरेत् ॥ लोभात्प्रमादाद्विस्रंभात्त्रिभिर्नाशोभवेन्नृणाम् ॥ ६३ ॥ तस्माल्लोभंनकुर्वीतनप्रमादंनविश्वसेत् ॥ आत्माहिसततंपुत्ररक्षि
तव्यःप्रयत्नतः ॥ ६४ ॥ सर्वेभ्यःश्वापदेभ्यश्चम्लेच्छचोरादिसंकटात् ॥ तिरश्चांपापयोनीनामेकत्रवसतामपि ॥ ६५ ॥ विपरीतानिचित्तानिवि
ज्ञायंतेनपुत्रक ॥ नखिनांचनदीनांचशृंगिणांशस्त्रधारिणाम् ॥ ६६ ॥ नविश्वासस्त्वयाकार्यःस्त्रीणांप्रेष्यजनस्यच ॥ नविश्वसेदविश्वस्तेविश्वस्ते
नातिविश्वसेत् ॥६७॥ विश्वासाद्भयमुत्पन्नंमूलान्यपिनिकृन्तति ॥नविश्वसेत्स्वदेहेऽपिबलिष्ठेभीतचेतसि ॥६८॥ वक्ष्यंतिगूढमत्यर्थंसुत्तंमत्तंप्रमादतः ॥
॥ गंधःसर्वत्रसततमाघ्रातव्यःप्रयत्नतः ॥ ६९ ॥ गावःपश्यंतिगंधेनराजानश्चारचक्षुषा ॥ नैकस्तिष्ठेद्वनेघोरेधर्ममेकंचचिंतयेत् ॥ ३७० ॥ नचो
द्वेगस्त्वयाकार्यः सर्वस्यमरणंध्रुवम् ॥ यथाहिपथिकःकश्चिच्छायामाश्रित्यतिष्ठति ॥ ७१ ॥ विश्रम्यचपुनर्यातितद्वद्भूतसमागमः ॥पुत्रनित्यंजगत्स
र्वंतत्रैकःशोचसेकथम् ॥ ७२ ॥ तावत्त्वंशोकमुत्सृज्यमद्वाक्यमनुपालय ॥ शिरस्याघ्रायतंपुत्रमवलिह्यचमूर्द्धनि ॥ ७३ ॥ शोकेनमहताविष्टाबाष्प
व्याकुललोचना ॥विनिःश्वसंतीनागीवदीर्घमुष्णंमुहुर्मुहुः ॥७४॥पुत्रहीनंजगच्छून्यंप्रपश्यंतीवसाभवत् ॥महापंकनिमग्नेवतिष्ठन्तीचावसीदती॥७५॥
विलप्यनंदिनीपुत्रमुवाचेदंपुनर्वचः ॥ नास्तिपुत्रसमःस्नेहोनास्तिपुत्रसमंसुखम् ॥७६॥ नास्तिपुत्रसमाप्रीतिर्नास्तिपुत्रसमागतिः ॥अपुत्रस्यजगच्छू
न्यमपुत्रस्यगृहेऽसुखम् ॥ ७७ ॥ पुत्रेणलभतेलोकमपुत्रोनरकंव्रजेत् ॥ लोकोवदतिवाक्यानिचंदनंकिलशीतलम् ॥७८॥ पुत्रगात्रपरिष्वंगश्चंदनादति
शीतलः ॥ इतिपुत्रगुणानुक्त्वानिरीक्ष्यचपुनःपुनः ॥७९॥ स्वमातरंसखींगोपीस्त्वरमाणाचपृच्छति ॥ यूथस्याग्रेचरंतींमामासंसादमृगाधिपः ॥
॥ ३८० ॥ मुक्ताहंतेनशपथैःपुनर्यास्यामितत्रवै ॥ सुतंचमातरंचैवसखीर्दृष्टुंचगोकुलम् ॥ ८१ ॥ आगतासत्यवाक्येनपुनर्यास्यामितत्रवै ॥
मातःक्षमस्वतत्सर्वंदौःशील्यादिकृतंमम ॥ ८२ ॥ बालस्तवायंदौहित्रःकिमत्रान्यद्ब्रवीम्यहम् ॥ विपुलेचंपकेमातर्भद्रेसुरभिमानिनि ॥ ८३ ॥
वसुधारेप्रियानंदेमहानंदेघटस्रवे ॥अज्ञानाज्ज्ञानतोवापियदुक्तंकिंचिदप्रियम् ॥ ८४ ॥तत्क्षमध्वंमहाभागायच्चान्यच्चकृतंमया ॥ सर्वाःसर्वगुणोपेताः
सर्वालोकस्यमातरः ॥ ८५ ॥ सर्वाःसर्वप्रदानित्यंरक्षध्वंममबालकम् ॥ अनाथंविकलंदीनंरक्षध्वंममपुत्रकम् ॥ ८६ ॥ मातृशोकाभिसंतप्तंभगिन्यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पालयिष्यथ ॥ भगिनीनामयंपुत्रोह्यर्पितस्स्वसुतोमया ॥ ८७ ॥ पाल्योबालश्चसर्वाभिःपोष्यःपाल्यश्चपुत्रवत् ॥ तस्मादनाथमबलं
पुत्रवत्पालयिष्यथ ॥८८॥ क्षमध्वंचमहाभागायास्येऽहंसत्यसंश्रया ॥ नचिंतामहतीकार्यासखीभिश्चकथंचन ॥ ८९ ॥ प्रथमस्यास्यजातस्य
स्थितंमरणमग्रतः ॥ श्रुत्वातुनंदावचनंमातासख्यश्चदुःखिताः ॥३९०॥ विषादंपरमंजग्मुरिदमूचुश्चविस्मिताः ॥ अहोऽत्रमहदाश्चर्यंयद्व्याघ्रवचनं
त्वया ॥ ९१ ॥ प्रकर्तुमुद्यतंभीमंनंदात्वंसत्यवादिनी ॥ शपथैःसत्यवाक्येनवंचयित्वामहाभयम् ॥ ९२ ॥ नाशनीयंप्रयत्नेननगंतव्यंकथंचन ॥
नंदेनचैवगंतव्यमधर्मःक्रियतेत्वया ॥ ९३ ॥ यद्बालंस्वसुतंत्यक्त्वासत्यलोभेनगम्यते ॥ अत्रगाथापुराप्रोक्ताऋषिभिर्ब्रह्मवादिभिः ॥ ९४ ॥ प्राण
त्यागेससुत्पन्नेशपथैर्नास्तिपातकम् ॥ उक्त्वानृतंभवेद्यत्रप्राणिनांप्राणरक्षणम् ॥ ९५ ॥ अनृतंतत्रसत्यंस्यात्सत्यमप्यनृतंभवेत् ॥ कामिनीषुविवा
हेषुगवांमुक्तौतथैवच ॥ ९६ ॥ ब्राह्मणानांविपत्तौचशपथैर्नास्तिपातकम् ॥ ॥ नंदोवाच ॥ ॥ परेषांप्राणरक्षार्थंवदाम्येवानृतंवचः ॥ ९७ ॥ ना
त्मार्थमुत्सहेवक्तुंजीवितार्थेकथंचन ॥ एकःसंश्लिष्यतेगर्भेमरणेभरणेतथा ॥ ९८ ॥ भुंक्तेचैकःसुखंदुःखमतःसत्यंवदाम्यहम् ॥ सत्येप्रतिष्ठितालोका
धर्मःसत्येप्रतिष्ठितः ॥ ९९ ॥ उदधिस्सत्यवाक्येनमर्यादांनविलंघते ॥ विष्णवेपृथिवींदत्त्वाबलिःपातालमाश्रितः ॥ ४०० ॥ छद्मनापिबलिर्बद्धः
सत्यवाक्यंनचात्यजत् ॥ प्रवर्धमानःशैलेंद्रःशतशृंगःसमुत्थितः ॥ १ ॥ सत्येनसंस्थितोविंध्यःप्रबन्धंनातिवर्तते ॥ स्वर्गापवर्गनरकाःसत्यवा
चिप्रतिष्ठिताः ॥ २ ॥ यस्तुलोपयतेवाचमशेषंतेनलोपितम् ॥ योऽन्यथासंतमात्मानमन्यथाप्रतिपद्यते ॥ ३ ॥ किंतेननकृतंपापंचोरेणात्मापहा
रिणा ॥ यास्यामिनरकंघोरंविलोप्यात्मानमात्मना ॥ ४ ॥ तस्यवैवस्वतोराजाधर्मस्यार्धंनिकृंतति ॥ अगाधेसलिलेशुद्धेसत्यतीर्थेक्षमाह्रदे ॥ ५ ॥
स्नात्वापापविनिर्मुक्तःप्रयातिपरमांगतिम् ॥ अश्वमेधसहस्रंचसत्यंचतुलयाधृतम् ॥ अश्वमेधसहस्राद्धिसत्यमेवविशिष्यते ॥ ६ ॥ सत्यंसाधुफलं
श्रुतंचपरमंक्लेशादिभिर्वर्जितं साधूनांनिकटंसतांकुलधनंसर्वाश्रमाणांफलम् ॥ स्वाधीनंचसुदुर्लभंचजगतस्साधारणंभूषणं यन्म्लेच्छोऽप्यभिधायग
च्छतिदिवंतत्त्यज्यतेवाकथम् ॥ ७ ॥ सख्यऊचुः ॥ नंदेसात्वंनमस्कार्यासर्वैरपिसुरासुरैः ॥ यात्वंपरमसत्त्वेनप्राणांस्त्यजसिपुत्रजान् ॥ ८ ॥
ब्रूमःकिंतत्रकल्याणियात्वंधर्मधुरंधरा ॥ त्यागेनानेननप्राप्यंत्रैलोक्येवस्तुकिंचन ॥९॥ अवियोगंचपश्यामस्त्यागादस्मात्सुतेनहि ॥ नार्याःकल्या
णचित्तायानापदःसंतिकुत्रचित् ॥ ४१० ॥ दृष्ट्वागोपीजनंसर्वंपरिक्रम्यचगोकुलम् ॥ नन्दासंप्रस्थितादेवान्वृक्षांश्चापृच्छ्यसापुनः ॥ ११ ॥ क्षितिं
वरुणमग्निंचवायुंचापिनिशाकरम् ॥ दशदिग्देवतावृक्षान्नक्षत्राणिग्रहैःसह ॥१२॥ सर्वान्विज्ञापयामासप्रणिपत्यमुहुर्मुहुः ॥ येसंश्रितावनेसिद्धाःसर्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्चवनदेवताः ॥ १३ ॥ वनेचरंतंचतृणंतेरक्षंतुसुतंमम ॥ चंपकाशोकपुन्नागास्सरलार्जुनकिंशुकाः ॥ १४ ॥ शृण्वंतुपादपाःसर्वेसंदेशंममविक्लवम् ॥ वत्समेकाकिनंदीनंचरंतंविषमेवने ॥ १५ ॥ रक्षध्वंवत्सकंबालंस्नेहात्पुत्रमिवौरसम् ॥ मात्रापित्राविहीनंचअनाथंदीनमानसम् ॥ १६ ॥ विचरंतमिमांभूमिंक्रंदमानंसुदुःखितम् ॥ तस्येहक्रंदमानस्यमत्पुत्रस्यमहावने ॥ १७ ॥ महाशोकाभिभूतस्यक्षुत्पिपासातुरस्यच ॥ शून्यस्यैकाकिनःसर्वंजगच्छून्यंप्रपश्यतः ॥ १८ ॥ चरमाणस्यकर्तव्यंसानुक्रोशैस्तुरक्षणम् ॥ संदिश्यनंदाप्रीत्यैवंपुत्रस्नेहवशंगता ॥ १९ ॥ शोकाग्निनाचसन्दीप्ताविच्छिन्नापुत्रदर्शने ॥ वियुक्ताचक्रवाकीवलतेवपतितातरोः ॥ ४२० ॥ अन्धेवदृष्टिरहिताप्रस्खलंतीपदेपदे ॥ अगच्छत्सापुनस्तत्रयत्रासौपिशिताशनः ॥ २१ ॥ आस्तेविस्फूर्जितमुखस्तीक्ष्णदंष्ट्रोभयावहः ॥ तावत्तस्याःसुतोवत्सऊर्द्ध्वपुच्छोऽतिवेगवान् ॥ २२ ॥ आगत्यमातुरग्रेऽसौमृगेंद्रस्याग्रतोऽभवत ॥ आगतंतुसुतंदृष्ट्वामृत्युंतमग्रतःस्थितम् ॥ २३ ॥ व्याघ्रंदृष्ट्वातुसाधेनुरिदंवचनमब्रवीत् ॥ भोभोमृगेंद्रागताहंसत्यधर्मव्रतेस्थिता ॥ २४ ॥ कुरुतृप्तिंयथाकाममस्मन्मांसेनसांप्रतम् ॥ संतर्पयस्वभूतानिपिबत्वंशोणितंमम ॥ २५ ॥ मृतायांतुमयित्वंभोभक्षयेमंतुबालकम् ॥ द्वीप्युवाच ॥ स्वागतंतवकल्याणिधेनुकेसत्यवादिनि ॥ २६ ॥ नहिसत्यवतांकिंचिदशुभंभवतिक्वचित् ॥ त्वयोक्तंधेनुकेपूर्वंसत्यंप्रत्यागमेपुनः ॥ २७ ॥ तेनमेकौतुकंप्राप्तंप्राप्तागच्छेत्कथंपुनः ॥ तवसत्यपरीक्षार्थंप्रेषितासिमयापुनः ॥ २८ ॥ अन्यथामांसमासाद्यजीवंतीयास्यसेकथम् ॥ यच्चनःकौतुकंजातंसत्यस्यान्वेषणंमम ॥ २९ ॥ तस्मादनेनसत्येनमुक्तासिचमयाधुना ॥ भगिनीभवतीमह्यंभागिनेयःसुतस्तव ॥ ४३० ॥ दत्तोपदेशस्यशुभेममपापिष्ठकर्मणः ॥ सत्येप्रतिष्ठितालोकाधर्मःसत्येप्रतिष्ठितः ॥ ३१ ॥ सत्येनगौःक्षीरधारांप्रमुंचतिहविःप्रियाम् ॥ सर्वैधन्यतमोगोपोयस्त्वत्क्षीरेणजीवति ॥ ३२ ॥ भूमिप्रदेशाधन्यास्तेसतृणावीरुधःशुभे ॥ तेधन्याश्चकृतार्थाश्चतैरेवसुकृतंकृतम् ॥ ३३ ॥ तैराप्तंजन्मनःसारंयेपिबंतिपयस्तव ॥ मृगेंद्रःप्रत्ययंगत्वाविस्मयंपरमंगतः ॥ ३४ ॥ प्रत्यादेशोऽयमस्माकंसत्यंदेवैःप्रदर्शितः ॥ सत्यमिष्टंगवांदृष्ट्वानमेवाञ्छास्तिजीवितुम् ॥ ३५ ॥ तत्करिष्याम्यहंकर्मयेनमुच्येयकिल्विषात् ॥ मयाजीवसहस्राणिभक्षितानिशतानिच ॥ ३६ ॥ गतिंकामिहगच्छामिदृष्ट्वागोःसत्यमीदृशम् ॥ अहंपापोदुराचारोनृशंसोजीवघातकः ॥ ३७ ॥ कांस्तुलोकान्गमिष्यामिकृत्वाकर्मसुदारुणम् ॥ गमिष्येपुण्यतीर्थानिकरिष्येपापशोधनम् ॥ ३८ ॥ पतिष्येगिरिमारुह्यप्रवेक्ष्येवाहुताशनम् ॥ धेनोऽद्ययन्मयाकार्यंतपःपापाद्विशुद्धये ॥ ३९ ॥ तदादिशस्वसंक्षेपान्नकालोविस्तरस्यतु ॥ धेनुरुवाच ॥ तपःकृतेप्रशंसंतित्रेतायांज्ञानमेवच ॥ ४४० ॥ द्वापरेयज्ञमित्याहुर्दानमेकंकलौयुगे ॥ सर्वेषामेवदानानामिदमेवैकमुत्तमम् ॥ ४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभयंसर्वभूतानांनास्तिदानमतःपरम् ॥ चराचराणांभूतानामभयंयःप्रयच्छति ॥ ४२ ॥ सचसर्वभयान्मुक्तःपरंब्रह्माधिगच्छति ॥ नास्त्यहिंसासमं
दानंनास्त्यहिंसासमंतपः ॥ ४३ ॥ यथाहस्तिपदेष्वन्यत्पदंसर्वंप्रलीयते ॥ सर्वेधर्मास्तथाव्याघ्रप्रलीयंतेह्यहिंसया ॥ ४४ ॥ योगवृक्षस्यछायाया
तापत्रयविनाशिनी ॥ धर्मज्ञानेचपुष्पाणिस्वर्गमोक्षौफलानिच ॥ ४५ ॥ दुःखत्रयाभितप्तस्यछायायोगतरोःस्मृता ॥ नबाध्यतेपुनर्दुःखैःप्राप्यनिर्वा
णमुत्तमम् ॥ ४६ ॥ इत्येतत्परमंश्रेयःकीर्तितंतेसमासतः ॥ ज्ञातंचैवत्वयासर्वंकेवलंमांतुपृच्छसि ॥ ४७ ॥ द्वीप्युवाच ॥ अहंनृग्यापुराशप्तो
व्याघ्ररूपेणसंस्थितः ॥ ततःप्राणिवधात्सर्वमशेषंममविस्मृतम् ॥ ४८ ॥ त्वत्संपर्कोपदेशाभ्यांसंजातंस्मरणंमम ॥ त्वंचाप्यनेनसत्येनगमिष्यसि
परांगतिम् ॥४९॥ तदहंत्वांपुनःपृच्छेप्रश्नमेकंहृदिस्थितम्॥ साग्रंवर्षशतंजातंचितयानस्यमेशुभे॥४५०॥भवत्याभाग्ययोगेनकदाचित्स्वर्गशोभने॥
कृतंधर्मस्यसंस्थानंसतांमार्गेप्रतिष्ठितम् ॥ ५१ ॥ किंतेऽभिधानंकल्याणिब्रूहिमेऽज्ञस्यसुव्रते ॥ नंदोवाच ॥ ममनंदेतिसंज्ञातुकृतानंदेनस्वामिना
॥ ५२ ॥ सांप्रतंभक्षयामीतिह्यतिष्ठःकेनहेतुना ॥ नंदेतिश्रुत्वातन्नाममुक्तशापप्रभंजनः ॥ ५३ ॥ पुनर्नृपत्वमापन्नोबलरूपसमन्वितः ॥ एतस्मिन्नंतरे
धर्मस्तांज्ञात्वासत्यवादिनीम् ॥ ५४ ॥ द्रष्टुंसमागतस्तत्रप्राब्रवीच्चपयस्विनीम् ॥ तवसत्यव्रताद्धृष्टोधर्मोऽहमिहचागतः ॥५५॥ नंदेवृणीष्वभद्रंतेवरं
वरतमंहियत् ॥ एवमुक्ताहिसादेवीनंदातंप्रार्थयद्वरम् ॥ ५६ ॥ तवानुभावात्ससुतागच्छामिपदमुत्तमम् ॥ भवेदिदंशुभंतीर्थंमुनीनांधर्मदायकम् ॥
॥ ५७ ॥ मन्नाम्नाचसरिदियंनंदानामसरस्वती ॥ वरप्रदानाद्देवेशतदेतत्प्रार्थितंमया ॥ ५८ ॥ पुलस्त्यउवाच ॥ सातत्क्षणाद्गतादेवीस्थानंसत्यव
तांशुभम् ॥ प्रभंजनोऽपितद्राज्यंसंप्राप्तःप्रागुपार्जितम् ॥ ५९ ॥ नंदायेनगतास्वर्गंनंदांप्राप्यसरस्वतीम् ॥ तेनाख्ययाबुधैस्तस्याःप्रोक्तानंदासर
स्वती ॥४६०॥ सरस्वतीपुनस्तस्माद्वनात्खर्जूरसंज्ञितात् ॥ दक्षिणेनपुनर्यातापल्लावयंतीधरातलम्॥६१॥आगच्छन्नपियस्तस्यानामगृह्णातिमानवः॥
जीवन्सुखंसआप्नोतिमृतोभवतिखेचरः ॥ ६२॥ तत्रयेशुभकर्माणस्त्यजंतिस्वांतनुंनराः ॥ तेविद्याधरराजानोभवंतिसुखिनोजनाः ॥६३ ॥ नराणां
स्वर्गनिःश्रेणीस्नानात्पानात्सरस्वती ॥ तत्रस्नानंप्रकुर्वन्तियेऽष्टम्यांसुसमाहिताः ॥६४॥ तेमृताःस्वर्गमासाद्यमोदंतेसुमनोरमाः॥ सरस्वतीसदास्त्रीणां
तत्रसौभाग्यदायिका ॥ ६५ ॥ उपोषितातृतीयायामपिसौभाग्यभाजना ॥ तत्रतद्दर्शनेनापिमुच्यतेपापसंचयात् ॥६६॥ स्पृशंतियेनराःकेचित्तेऽपि
ज्ञेयामुनीश्वराः ॥ रजतस्यप्रदानेनरूपवाञ्जायतेनरः ॥ ६७ ॥ पुण्यापुण्यजलोपेतानदीयंब्रह्मणःसुता ॥ नंदानामेतिविपुलाप्रवृत्तादक्षिणामुखी ॥
॥ ६८ ॥ गत्वाततोनातिदूरंपुनर्यातापराङ्मुखी ॥ ततःप्रभृतिसादेवीप्रसभप्रकटास्थिता ॥ ६९ ॥ तस्यास्तटेषुपुण्येषुतीर्थान्यायतनानिच ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संसेवितानिमुनिभिःसिद्धैश्चापिसमंततः ॥ ४७०॥ तेषुसर्वेषुभवतिधर्मैहेतुस्सरस्वती ॥ स्नानात्पानात्प्रदानाद्वाहिरण्यस्यमहानदी ॥ ७१ ॥ हाटकक्षितिगौरीणांनंदातीर्थेमहोदयम् ॥ दानंदत्तंनरैःस्नातैर्जनयत्यक्षयंफलम् ॥ ७२ ॥ धान्यप्रदानंप्रवदंतिशस्तंवसुप्रदानंचतथामुनींद्राः ॥ यैस्तेषुतीर्थेषुनरैःप्रदत्तंतद्धर्महेतुःप्रवरंप्रदिष्टम् ॥ ७३ ॥ प्रायोपवेशंप्रयतःप्रयत्नाद्यस्तत्रकुर्यात्प्रमदापुमान्वा ॥ तीर्थेषुसायुज्यमवाप्यसोऽयंभुंक्तेफलंब्रह्मगृहेयथेष्टम् ॥ ७४ ॥ तस्योपकण्ठेतुमृतास्तुयेवैकर्मक्षयात्स्थावरजंगमाश्च ॥ तैश्चापिसर्वैःसहसाप्रसह्यलभ्येतयज्ञस्यफलंदुरापम् ॥ ७५ ॥ ततस्तुसाधर्मफलप्रदाभवेज्जन्मादिदुःखार्दितचेतसांनृणाम् ॥ सर्वात्मनापुण्यफलासरस्वतीसेव्याप्रयत्नात्पुरुषैर्महानदी ॥ ४७६॥ इति श्रीपाद्मपुराणेप्रथमेसृष्टिखंडेनंदाप्राचीमाहात्म्येऽष्टादशोऽध्यायः ॥ १८ ॥ भीष्मउवाच ॥ पुष्करस्यचनंदायाःश्रुतंमाहात्म्यमुत्तमम् ॥ ऋषिकोटिर्यदायातापुष्करेमुखदर्शनात् ॥ १ ॥ सर्वैःसुरूपतालब्धासर्वमेतन्मयाश्रुतम् ॥ यज्ञोपवीतैर्भक्तानियानितानिवदस्वमे ॥ २ ॥ कथंतीर्थविभागस्तुकृतस्तैःसुमहात्मभिः ॥ आश्रमेयानितीर्थानिकृतान्यपिमहर्षिभिः ॥ ३ ॥ पदन्यासःकृतःपूर्वंविष्णुनायज्ञपर्वते ॥ नागैस्तत्रपञ्चतीर्थंकृतंतैस्तुमहाविषैः ॥ ४ ॥ पिंडप्रदानवापीचकेनपूर्वंविनिर्मिता ॥ उदङ्मुखीभूमिगताकथंगङ्गासरस्वती ॥ ५ ॥ ब्राह्मणैर्वेदविद्वद्भिःकथंयात्रात्रिपुष्करे ॥ कर्तव्यायत्फलंतस्याजायतेतद्वदस्वमे ॥ ६ ॥ पुलस्त्यउवाच ॥ प्रश्नभारोमहानेषभवतापरिकल्पितः ॥ तदेकाग्रमनाभूत्वाशृणुतीर्थमहाफलम् ॥ ७ ॥ यस्यहस्तौचपादौचमनश्चैवसुसंयतम् ॥ विद्यातपश्चकीर्तिश्चसतीर्थफलमश्नुते ॥८॥ प्रतिग्रहादुपावृत्तःसंतुष्टोयेनकेनचित् ॥ अहङ्कारनिवृत्तश्चसतीर्थफलमश्नुते ॥ ॥ ९ ॥ अक्रोधनश्चराजेंद्रसत्यशीलोदृढव्रतः ॥ आत्मोपमश्चभूतेषुसतीर्थफलमश्नुते ॥ १० ॥ ऋषीणांपरमंगुह्यमिदंभरतसत्तम ॥ पूर्वंयत्रमहाराजसत्रेपैतामहेतथा ॥ ११ ॥ यतीनामुग्रतपसांयेषांकोटिःसमागता ॥ मुखदर्शनमाश्रित्यस्थितास्तेज्येष्ठपुष्करे ॥ १२ ॥ सुरूपतांपरांलब्ध्वाप्रीतास्तेमुनिसत्तमाः ॥ हर्षेणमहताविष्टाब्रह्मदर्शनकांक्षिणः ॥ १३ ॥ यज्ञोपवीतैस्तेभूमिमाप्यसर्वेचतुर्दिशम् ॥ कृत्वातीर्थविभागंचस्थिताभक्तिपरायणाः ॥ १४ ॥ आसन्नश्चततस्तेषांतदातुष्टःपितामहः ॥ कोटिंकृत्वातदातेषांमानंदृष्ट्वामनीषिणाम् ॥ १५ ॥ अद्यप्रभृतियुष्माकंधर्मवृद्धिर्भविष्यति ॥ इहागत्यनरोयोवैयदंगंप्रथमंजले ॥ १६ ॥ प्लावयिष्यतिरूपार्थंरूपितातीर्थकारिता ॥ भविष्यतिनसंदेहोयोजनायतमंडले ॥ १७ ॥ अर्धयोजनविस्तारंदीर्घंसार्धंहियोजनम् ॥ एतत्प्रमाणंतीर्थस्यऋषिकोटिप्रवर्त्तितम् ॥१८॥ गमनादेवराजेंद्रपुष्करस्यत्वरिंदम ॥ राजसूयाश्वमेधाभ्यांफलमाप्नोतिमानवः ॥ १९ ॥ सरस्वतीमहापुण्याप्रविष्टाज्येष्ठपुष्करे ॥ तत्रब्रह्मादयोदेवाऋषयःसिद्धचारणाः ॥ २० ॥ अभिगच्छंतिराजेंद्रचै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रशुक्लचतुर्दशीम् ॥ तत्राभिषेकंकुर्वीतपितृदेवार्चनेरतः ॥२१॥ गोमेधंचतदाप्नोतिकुलंचैवसमुद्धरेत् ॥ एवंतीर्थविभागस्तुकृतस्तैस्तुमहर्षिभिः ॥२२॥
पितृन्देवांश्चसन्तर्प्यविष्णुलोकेमहीयते ॥ तत्रस्नात्वाभवेन्मर्त्योविमलश्चन्द्रमायथा ॥ २३ ॥ ब्रह्मलोकमवाप्नोतिगतिंचपरमांव्रजे
त् ॥ नृलोकेदेवदेवस्यतीर्थंत्रैलोक्यविश्रुतम् ॥ २४ ॥ पुष्करंनामविख्यातंमहापातकनाशनम् ॥ दशकोटिसहस्राणितीर्थानांवैमहीप
ते ॥ २५ ॥ सान्निध्यंपुष्करेयेषांत्रिसन्ध्यंकुलनन्दन ॥ आदित्यावसवोरुद्रास्साध्याश्चसमरुद्गणाः ॥ २६ ॥ गन्धर्वाप्सरसश्चैवनित्यंसन्निहितावि
भोः ॥ यत्रदेवास्तपस्तप्त्वादैत्याब्रह्मर्षयस्तथा ॥२७॥ दिव्ययोगामहाराजपुण्येनमहतान्विताः ॥ मनसाप्यभिकामस्यपुष्कराणिमनस्विनः ॥२८॥
पूयन्तेसर्वपापानिनाकपृष्ठेसमोदते ॥ तस्मिंस्तीर्थेमहाराजनित्यमेवपितामहः ॥२९॥ उवासपरमप्रीतोदेवदानवसम्मतः ॥ पुष्करेषुमहाराजदेवाःसर्षि
पुरोगमाः ॥३०॥ सिद्धिंचसमनुप्राप्ताःपुण्येनमहतान्विताः ॥ तत्राभिषेकंयःकुर्यात्पितृदेवार्चनेरतः ॥३१॥ अश्वमेधाद्दशगुणंप्रवदंतिमनीषिणः ॥ अ
प्येकंभोजयेद्विप्रंपुष्करारण्यमाश्रितः ॥ ३२ ॥ अन्नेनतेनसंप्रीताकोटिर्भवतिपूजिता ॥ तेनासौकर्मणाभीष्मप्रेत्यचेहचमोदते ॥ ३३ ॥ शाकैर्मूलैःफ
लैर्वापियेनवावर्तयेत्स्वयम् ॥ तद्वैदद्याद्ब्राह्मणायश्रद्धावाननसूयकः ॥३४॥ तेनैवप्राप्नुयात्प्राज्ञोहयमेधफलनरः ॥ ब्राह्मणःक्षत्रियोवैश्यःशूद्रोवाराजस
त्तम ॥ ३५ ॥ पैतामहंसरःपुण्यंपुष्करंनामनामतः ॥ वैखानसानांसिद्धानांमुनीनांपुण्यदंहियत् ॥३६॥ सरस्वतीपुण्यतमायस्माद्यातामहार्णवम् ॥
आदिदेवोमहायोगीयत्रास्तेमधुसूदनः ॥ ३७ ॥ ख्यातआदिवराहेतिनाम्नात्रिदशपूजितः ॥ हीनवर्णाश्चयेवर्णास्तीर्थेपैतामहेगताः ॥३८॥ नवियोनिंव्र
जंत्येतेस्नात्वातीर्थेमहात्मनः ॥ कार्तिक्यांचविशेषेणयोऽभिगच्छेत्तुपुष्करम् ॥३९॥ फलंतत्राक्षयंतस्यभवतीत्यनुशुश्रुम ॥ सायंप्रातःस्मरेद्यस्तुपुष्करा
णिकृतांजलिः ॥ ४० ॥ उपस्पृष्टंभवेत्तेनसर्वतीर्थेतुकौरव ॥ जन्मप्रभृतियत्पापंस्त्रियोवापुरुषस्यवा ॥४१॥ पुष्करेस्नानमात्रेणसर्वमेतत्प्रणश्यति ॥
यथासुराणांप्रवरःसर्वेषांतुपितामहः ॥ ४२ ॥ तथैवपुष्करंतीर्थंतीर्थानामादिरुच्यते ॥ तद्वद्वादशवर्षाणिपुष्करेनियतःशुचिः ॥४३॥ क्रतून्सर्वानवा
प्नोतिंब्रह्मलोकंसगच्छति ॥ यस्तुवर्षशतंपूर्णमग्निहोत्रमुपासते ॥ ४४ ॥ कार्तिकींवावसेदेकांपुष्करेसममेवतु ॥ पुष्करेदुष्करोहोमःपुष्करेदुष्करंतपः ॥
॥४५॥ पुष्करेदुष्करंदानंवासश्चैवसुदुष्करः ॥ ब्राह्मणोवेदविद्वांस्तुगत्वावैज्येष्ठपुष्करम् ॥४६॥ स्नानाद्भवेन्मोक्षभागीश्राद्धेनपितृतारकः ॥ नाममात्रोऽ
पियोविप्रोगत्वासंध्यामुपासते ॥४७॥ वर्षाणिद्वादशैवेहतेनसंध्याह्युपासिता ॥ भवेत्तुनात्रसंदेहःपुराप्रोक्तंस्वयंभुवा ॥४८॥ सावित्रीकथितोदोषःकु
लेतस्यनजायते ॥ यापत्नीददतेभर्तुःसंध्योपास्तिकरिष्यतः ॥४९॥ करकेणतुताम्रेणतोयंमुक्तादिवंव्रजेत् ॥ ब्रह्मलोकमनुप्राप्यतिष्ठतिब्रह्मणोदिनम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥५०॥ एकाकिनागतेनापिसंध्यावंद्यायथाक्रमम् ॥ पौष्करेणाथतोयेनशृंगारेनिहितेनतु ॥५१॥ तेनापिद्वादशाब्दानिसंध्योपास्तानसंशयः ॥भवेत्स
मीपगापत्नीकुर्वतःपितृतर्पणम् ॥ ५२ ॥ दक्षिणांदिशमास्थायगायत्र्याराजसत्तम ॥ पितॄणांपरमातृप्तिःक्रियतेद्वादशाब्दिकी ॥५३॥ युगसहस्रंपिण्ड
नश्राद्धेनानन्त्यमश्नुते ॥ एतदर्थंहिविद्वांसः कुर्वतेदारसंग्रहम् ॥५४॥ तीर्थेगत्वाप्रदास्यामःपिंडान्वैश्राद्धपूर्वकम् ॥ तेषांपुत्राधनंधान्यमविच्छिन्नाचसं
ततिः ॥५५॥ भवेद्वैनात्रसंदेहएतदाहपितामहः॥ तर्पयित्वापितॄन्देवानग्निष्टोमफलंलभेत् ॥५६॥ आश्रमानपितेवच्मिशृणुष्वैकमनानृप ॥ अगस्त्येन
कृतश्चात्रआश्रमोदेवसंमितः॥५७॥सप्तर्षीणांपुराचात्रआश्रमोदेवसम्मतः ॥ ब्रह्मर्षीणांतथाचात्रमनूनांपरमस्तथा ॥५८॥ नागानांचपुरीरम्यायज्ञपर्वत
रोधसि॥अगस्त्यस्यमहाराजप्रभावममितात्मनः ॥५९॥ कथयामिसमासेनशृणुत्वंसुसमाहितः ॥पूर्वंकृतयुगेभीष्मदानवायुद्धदुर्मदाः॥६०॥कालेयाइ
तिविख्यातागणाःपरमदारुणाः ॥ तेतुवृत्रंसमाश्रित्यनानाप्रहरणोद्यताः ॥ ६१ ॥ समन्तात्पर्यधावन्तमहेन्द्रप्रमुखान्सुरान् ॥ ततोवृत्रवधंयत्नमकुर्वं
स्त्रिदशाःपुरा॥६२॥ पुरन्दरंपुरस्कृत्यब्रह्माणमुपतस्थिरे ॥ कृतञ्जलींस्तुतान्सर्वान्परमेष्ठीत्युवाचह॥६३॥ विदितंमेसुराःसर्वंयद्वःकार्यंचिकीर्षितम् ॥
तमुपायंप्रवक्ष्यामियथावृत्रंवधिष्यथ ॥ ६४ ॥ दधीचिरितिविख्यातोमहानृषिरुदारधीः ॥ तंगत्वासहितास्सर्वेवरंचप्रतियाचत ॥ ६५ ॥ सवो
दास्यतिधर्मात्मासुप्रीतेनान्तरात्मना ॥ सवाच्यःसहितैःसर्वैर्भवद्भिर्जयकांक्षिभिः ॥ ६६ ॥ स्वान्यस्थीनिप्रयच्छस्वत्रैलोक्यहितकांक्षया ॥ सश
रीरंसमुत्सृज्यस्वान्यस्थीनिप्रदास्यति ॥६७॥ तस्यास्थिभिर्महाघोरंवज्रंसंक्रियतांदृढम् ॥ महच्छत्रुहनंदिव्यंतदस्त्रमशनिःस्मृतम् ॥ ६८ ॥ तेनवज्रे
णवैवृत्रंवधिष्यतिशतक्रतुः ॥ एतद्वःसर्वमाख्यातंतस्मात्सर्वंविधीयताम् ॥६९॥ एवमुक्तास्ततोदेवाअनुज्ञाप्यपितामहम् ॥ शतक्रतुंपुरस्कृत्यदधीचेरा
श्रमंययुः ॥ ७० ॥ सरस्वत्याःपरेपारेनानाद्रुमलतावृतम् ॥ षट्पदोद्गीतनिनदैरुद्घुष्टंसामगैरिव ॥ ७१ ॥ पुंस्कोकिलरवोन्मिश्रंजीवंजीवकनादि
तम् ॥ महिषैश्चवराहैश्चसृमरैश्चमरैरपि ॥ ७२ ॥ तत्रतत्रानुचरितैःशार्दूलभयवर्जितैः ॥ करेणुभिर्वारणैश्चप्रभिन्नकरटामुखैः ॥ ७३ ॥ स्वरोद्गारैश्चक्री
डद्भिःसमंतादनुनादितम् ॥ सिंहव्याघ्रैर्महानादंनदद्भिरनुनादितम् ॥ ७४ ॥ मयूरैश्चापिसंलीनैर्गुहाकंदरवासिभिः ॥ तेषुतेषुचकुंजेषुनादितंसुमनो
रमम् ॥७५॥ त्रिविष्टपसमप्रख्यंदधीच्याश्रममागमन् ॥ तत्रापश्यन्दधीचिंतंदिवाकरसमप्रभम् ॥७६॥ जाज्वल्यमानंवपुषायथालक्ष्म्याचतुर्भुजम्॥
तस्यपादौसुराराजन्नभिवंद्यप्रणम्यच ॥ ७७ ॥ अयाचंतवरंसर्वेयथोक्तंपरमेष्ठिना ॥ ततोदधीचिःपरमप्रतीतश्चसुरोत्तमान् ॥ ७८ ॥ उवाचप्रणतो
भूत्वात्विदंकार्यकरंवचः॥दधीचिरुवाच॥ इन्द्राद्यास्त्वागतादेवाःकिमर्थंतद्वदन्तुमे ॥७९॥ पीडयमानानहंमन्येहतप्रभसुरोत्तमाः॥ यदर्थंपीडितात्मान

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तद्ददन्तुनिराकुलम्॥८० ॥देवाऊचुः॥ त्वदस्थिकृतशस्त्रेणदेवास्सन्तुनिरामयाः ॥८१॥ दधीचिरुवाच ॥करोमियद्वोहितमद्यदेवाःस्वंवापिदेहंत्वहमु
त्सृजामि॥पुलस्त्यउवाच ॥तानेवमुक्त्वाद्विपदांवरिष्ठःप्राणांस्ततोऽसौसहसोत्ससर्ज ॥८२॥सुरास्तदस्थीनिसवासवास्तेयथोपयोगंजगृहुःस्मतस्य ॥
प्रहृष्टरूपाश्चजयायदेवास्त्वष्टारमासाद्यतमर्थमूचुः ॥८३॥त्वष्टातुतेषांवचनंनिशम्यप्रहृष्टरूपःप्रयतःप्रयत्नात्॥ चकारवज्रभृशमुग्रवीर्यंकृत्वाचशस्त्रं
तमुवाचहृष्टः ॥८४॥अनेनशस्त्रप्रवरेणदेवभस्मीकुरुष्वाद्यसुरारिमुग्रम्॥ततोहतारिःसगणःसुखंत्वंप्रशाधिकृत्स्नंत्रिदिवंदिविष्ठः ॥त्वष्ट्रातथोक्तस्तुपुरंदर
श्ववज्रंप्रहृष्टःप्रयतोह्यगृह्णात्॥८५॥ ततःसवज्रेणयुतोदैवतैरभिपूजितः॥आससादततोवृत्रंस्थितमावृत्यरोदसी॥८६॥ कालकेयैर्महाकायैस्संमतादभिरक्षि
तम् ॥ समुद्यतप्रहरणैःसशृंगैरिवपर्वतैः ॥८७॥ततोयुद्धंसमभवद्देवानांसहदानवैः॥ मुहूर्तंभरतश्रेष्ठलोकत्रासकरंमहत्॥८८॥उद्यतैःप्रतिसृष्टानांखड्गानांवी
रबाहुभिः ॥आसीत्सुतुमुलःशब्दःशरीरैरभिपाटितः॥८९॥शिरोभिःप्रपतद्भिश्चाप्यंतरिक्षान्महीतलम् ॥तालैरिवमहीपालवृंतैरेवदृश्यते॥९०॥तेहेमक
वचाभूत्वाकालेयाःपरिघायुधाः॥त्रिदशानभ्यवर्तन्तदावदग्धाइवद्रुमाः॥९१॥तेषांवेगवतांवेगंसहितानांप्रधावताम् ॥ नशेकुःसहिताःसोढुंभग्नास्तेप्राद्र
वन्भयात्॥९२॥तान्दृष्ट्वाद्रवतोभीतान्सहस्राक्षःपुरन्दरः॥वृत्रंचवर्द्धमानंतुकश्मलंमहदाविशत्॥९३॥तंशक्रंकश्मलाविष्टंदृष्ट्वाविष्णुःसनातनः ॥स्वतेजो
व्यदधाच्छक्रेबलमस्यविवर्धयन्॥९४॥विष्णुनाप्यायितंशक्रंदृष्ट्वादेवगणास्तदा ॥सर्वेतेजस्समादध्युस्तथाब्रह्मर्षयोऽमलाः॥९५॥ससमाप्यायितःशक्रो
विष्णुनादैवतैःसह॥ऋषिभिश्चमहाभागैर्बलवान्समपद्यत॥९६॥ ज्ञात्वाबलस्थंत्रिदशाधिपंतंननादवृत्रस्सुमहानिनादम्॥तस्यप्रणादेनधरादिशश्चखंद्यौ
र्नगाश्चेतिचचालसर्वम्॥९७॥ततोमहेंद्रःपरमाभितप्तःश्रुत्वारवंघोरतरंमहान्तम्॥भयेनमग्नस्त्वरितंमुमोचवज्रंमहान्तंखलुतस्यशीर्षे॥९८॥सशक्रवज्राभि
हतःपपातमहास्वनःकाञ्चनमाल्यधारी॥ यथामहाशैलवरःपुरस्तात्समन्दरोविष्णुकरात्प्रमुक्तः ॥९९॥ तस्मिन्हतेदैत्यवरेभयार्तःशक्रःप्रदुद्रावसरःप्रवे
ष्टुम्॥वज्रंचमेनेस्वकरात्प्रमुक्तंवृत्रंभयाच्चैवहतंनपश्यति॥१००॥ सर्वेचदेवामुदिताःप्रहृष्टाःसहर्षयश्चैनमथोस्तुवन्ति॥शेषांश्चदैत्यांस्त्वरितंसमेत्यजघ्नुः
सुरावृत्रवधाभितप्तान् ॥ १ ॥ तेवध्यमानास्त्रिदशैस्तदानींमहासुरावायुसमानवेगाः ॥ समुद्रमेवाविविशुर्भयार्ताःप्रविश्यचैवोदधिमप्रमेयम् ॥ २ ॥
झषाकुलंरत्नसमाकुलंचतदास्ममन्त्रंसहिताःप्रचक्रुः ॥तत्रस्मकेचिन्मतिनिश्चयज्ञास्तांस्तानुपायान्परिचिन्तयन्तः ॥३॥भयार्दितादेवनिकायतप्तास्त्रैलो
क्यनाशायमतिंप्रचक्रुः ॥ तेषांतुतत्रक्षयकालयोगाद्घोरामतिश्चिन्तयतांबभूव ॥४॥ येसन्तिविद्यातपसोपपन्नास्तेषांविनाशःप्रथमंचकार्यः ॥लोकाश्च
सर्वेतपसाध्रियन्तेतस्मात्त्वरध्वंतपसाक्षयाय ॥५॥ येसन्तिकेचिद्विवसुन्धरायांतपस्विनोधर्मविदश्चतज्ज्ञाः॥ तेषांवधश्चक्रियतांहिक्षिप्रंतेषुप्रनष्टेषुजग

Nepal Sanskrit University, Balmeeki Campus Library, Kathmandu

द्रिनष्टम् ॥६॥ एवंहिसर्वेगतबुद्धिभावाजगद्विनाशेपरमप्रहृष्टाः ॥ दुर्गंसमाश्रित्यमहोर्मिमन्तंरत्नाकरंवारुणमालयंस्म ॥७॥ समुद्रंतेसमाश्रित्यवारुणं
त्वम्भसांनिधिम्॥कालेयास्समपद्यन्तत्रैलोक्यस्यविनाशने ॥८॥ तेरात्रौसमभिक्रुद्धाबभक्षुस्तांस्तदामुनीन्॥आश्रमेषुचयेसन्तिपुण्येष्वायतनेषुच ॥
॥ ९ ॥ वसिष्ठस्याश्रमेविप्राभक्षितास्तैर्दुरात्मभिः ॥ अशीतिःशतमष्टौचवनेचान्येतपस्विनः ॥११०॥ च्यवनस्याश्रमंगत्वापुण्यंद्विजनिषेवितम् ॥
फलमूलाशनानांहिमुनीनांभक्षितंशतम् ॥११॥एवंरात्रौस्मकुर्वन्तोविविशुश्चार्णवंदिवा ॥भरद्वाजाश्रमंगत्वानियताब्रह्मचारिणः ॥१२॥वाताहाराम्बुभ
क्षाश्चविंशतिश्चनिपूदिताः ॥ एवंक्रमेणभक्षार्थंमुनीनांदानवास्तदा॥१३॥ निशायांपर्यधावन्तशक्ताभुजबलाश्रयात् ॥ कालेनमहतातेवैजघ्नुर्मुनिगणा
न्बहून् ॥१४॥ नचैतानवबुध्यन्तमनुजामनुजाधिप ॥ निःस्वाध्यायवषट्कारंनष्टयज्ञोत्सवक्रियम् ॥१५॥ जगदासीन्निरुत्साहंकालेयभयपीडितम् ॥
एवंप्रक्षीयमाणास्तेमानवामनुजेश्वर ॥ १६ ॥ आत्मत्राणपराभीताःप्राद्रवन्तुदिशोदश ॥ केचिद्गुहांप्रविविशुर्विकीर्णाश्चापरेद्विजाः ॥ १७ ॥ अप
रेचभयोद्विग्नाभयात्प्राणान्समत्यजन् ॥ केचित्तत्रमहेष्वासाःशूराःपरमदर्पिताः ॥१८ ॥ मार्गमाणाःपरंयत्नंदानवानांप्रचक्रिरे ॥ नचैतानन्नुजग्मुस्ते
समुद्रंसमुपाश्रितान् ॥१९॥ शमंनजग्मुःपरममाजग्मुःक्षयमेवच ॥ जगत्प्रशमनेजातेनष्टयज्ञोत्सवक्रिये ॥१२०॥ आजग्मुःपरमोद्विग्नास्त्रिदशामनुजे
श्वर ॥ समेत्यसमहेन्द्रास्तुभयान्मंत्रंप्रचक्रिरे ॥२१॥ नारायणंपुरस्कृत्यवैकुंठमपराजितम् ॥ ततोदेवास्समेतास्तेतदोचुर्मधुसूदनम् ॥ २२ ॥ त्वंनः
स्रष्टाचगोप्ताचभर्ताचजगतःप्रभो ॥ त्वयासृष्टंजगत्सर्वंयच्चेङ्गंयच्चनेङ्गति ॥२३॥ त्वयाभूमिःपुरानष्टासमुद्रात्पुष्करेक्षण ॥ वाराहंरूपमास्थायजगदर्थे
समुद्धृता ॥ २४ ॥ आदिदैत्योमहावीर्योहिरण्यकशिपुःपुरा ॥ नारसिंहंवपुःकृत्वासूदितःपुरुषोत्तम ॥२५॥ अवध्यःसर्वभूतानांबलिश्चापिमहासुरः ॥
वामनंवपुरास्थायत्रैलोक्याद्भ्रंशितस्त्वया ॥२६॥ असुरःसुमहेष्वासोजंभइत्यभिविश्रुतः ॥ यज्ञक्षोभकरःक्रूरस्त्वयासर्वनिपातितः ॥ २७॥ एवमादी
निकर्माणियेषांसंख्यानविद्यते ॥ अस्माकंभयभीतानांत्वंगतिर्मधुसूदन ॥२८॥तस्मात्त्वांदेवदेवेशलोकार्थंज्ञापयामहे ॥ रक्षलोकांश्चदेवांश्चशक्रंचमहतो
भयात्॥२९॥भवत्प्रसादाद्वर्तन्तेप्रजाःसर्वाश्चतुर्विधाः॥ स्वस्थाभवन्तिमनुजाहव्यकव्यैर्दिवौकसः॥१३०॥लोकाह्येवंप्रवर्तन्तेअन्योन्यंचसमाश्रिताः॥
त्वत्प्रभावान्निरुद्विग्नास्त्वयैवपरिरक्षिताः॥३१॥इदंचसमनुप्राप्तंलोकानांभयमुत्तमम्॥जानीमोनचकेनैतेवध्यन्तेब्राह्मणानिशि॥३२॥ ब्राह्मणेषुचक्षीणेषु
पृथ्वीक्षयमेष्यति ॥ त्वत्प्रसादान्महाबाहोलोकास्सर्वेजगत्पते ॥३३॥ विनाशंनाधिगच्छेयुस्त्वयावैपरिरक्षिताः ॥ विष्णुरुवाच ॥ विदितंमेसुरास्सर्वे
प्रजायाःक्षयकारणम् ॥३४ ॥ भवतांचापिवक्ष्यामिशृणुध्वंविगतज्वराः॥कालकेयाइतिख्यातागणाःपरमदारुणाः॥३५॥तेवृत्रंनिहतंदृष्ट्वासहस्राक्षेणधी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मता॥ जीवितंपरिरक्षन्तःप्रविष्टावरुणालयम् ॥ ३६ ॥ तत्प्रविश्योदधिंघोरंनानाग्राहसमाकुलम् ॥ उत्सादनार्थंलोकस्यरात्रौघ्नन्तिमुनीनिह ॥ ३७ ॥
नतुशक्याःक्षयंनेतुंसमुद्रान्तर्हिताहिते॥समुद्रस्यक्षयेबुद्धिर्भवद्भिःपरिचिन्त्यताम्॥३८॥एतच्छ्रुत्वावचोदेवाविष्णुनासमुदाहृतम्॥परमेष्ठिनमासाद्यअ
गस्त्यस्याश्रमंययुः ॥३९॥ तत्रापश्यन्महात्मानंवारुणंदीप्ततेजसम् ॥ उपास्यमानमृषिभिर्देवैरिवपितामहम्॥१४०॥तेऽभिगम्यमहात्मानंमैत्रावरुणि
मुत्तमम् ॥ अप्रमत्तंतपोराशिंकर्मभिःस्वैरनुष्ठितैः ॥ ४१॥ देवाऊचुः ॥ नहुषेणाभितप्तानांलोकानांत्वंगतिःपुरा ॥ भ्रंशितश्चसुरैश्वर्याल्लोकार्थंलोकक
ण्टकः ॥ ४२ ॥ क्रोधात्प्रवृद्धःसमहान्भास्करस्यनगोत्तमः ॥ वचस्तवानतिक्रामन्विन्ध्यःशैलोनवर्धते ॥४३॥ तमसाच्छादितेलोकेमृत्युनाभ्यर्दिताः
प्रजाः॥ त्वामेवनाथमागम्यनिर्वृतिंपरमांगताः ॥ ४४ ॥ अस्माकंभयभीतानांनित्यमेवभवान्गतिः ॥ ततस्त्वद्यप्रयाचामस्त्वांवरंवरदोह्यसि ॥४५ ॥
॥ भीष्मउवाच॥ किमर्थंसहसाविन्ध्यःप्रवृद्धःक्रोधमूर्छितः ॥ एतदिच्छाम्यहंश्रोतुंविस्तरेणमहामुने॥४६॥पुलस्त्यउवाच ॥ अद्रिराजंमहाशैलंमेरुंक
नकपर्वतम् ॥ उदयेऽस्तमयेभानुःप्रदक्षिणमवर्तत ॥ ४७ ॥ तंदृष्ट्वातुतदाविन्ध्यःशैलसूर्यमथाब्रवीत् ॥ यथाहिमेरुर्भवतानित्यशःपरिगम्यते
॥ ४८ ॥ प्रदक्षिणंचक्रियतेमामेवंकुरुभास्कर ॥ एवमुक्तस्ततःसूर्यःशैलेन्द्रंप्रत्यभाषत ॥ ४९ ॥ नाहमात्मेच्छयाशैलंकरोम्येनंप्रदक्षिणम् ॥
एषमार्गःप्रदिष्टोमेयेनेदंनिर्मितंजगत् ॥१५०॥ एवमुक्तस्तदाक्रोधात्प्रवृद्धःसहसाचलः ॥ सूर्याचन्द्रमसोर्मार्गंरोद्धुमिच्छन्परंतप ॥ ५१॥ ततोहिदेवाः
सहितास्तुसर्वेसेंद्राःसमागम्यमहाद्रिराजम्॥निवारयामासुरथोत्पतन्तंनवैसतेषांवचनंचकार ॥५२॥ ततोहिजग्मुर्मुनिमाश्रमस्थंतपस्विनांधर्मवतांवरि
ष्ठम् ॥ अगस्त्यमत्यद्भुतदीप्तवीर्यंतंचार्यमूचुःसहिताःसुरास्ते ॥ ५३ ॥ देवाऊचुः ॥ सूर्याचन्द्रमसोर्मार्गंनक्षत्राणांगतिंतथा ॥ शैलराडावृणोत्येष
विन्ध्यःक्रोधवशानुगः॥५४॥तंनिवारयितुंशक्तोनान्यःकश्चिन्मुनीश्वर॥तच्छ्रुत्वावचनंविप्रःसुराणांशैलमभ्यगात्॥५५॥सोऽभिगम्याब्रवीद्विन्ध्यंसाद
रंसमुपस्थितम् ॥ मार्गमिच्छाम्यहंदत्तंभवतापर्वतोत्तम ॥५६॥ दक्षिणामभिगन्तास्मिदिशंकार्येणकेनचित् ॥ यावदागमनंमेस्यात्तावत्त्वंप्रतिपालय
॥ ५७ ॥ निवृत्तेमयिशैलेन्द्रततोवर्धस्वकामतः॥पुलस्त्यउवाच॥अद्यापिदक्षिणाद्देशाद्वारुणिर्ननिवर्तते ॥५८॥ एतत्तेसर्वमाख्यातंयथाविन्ध्योनवर्धते
अगस्त्यस्यप्रभावेनयन्मांत्वंपरिपृच्छसि ॥ ५९ ॥ कालेयास्तुयथाराजन्सुरैःसर्वैर्निषूदिताः ॥ अगस्त्यद्वारमासाद्यतन्मेनिगदतःशृणु ॥ १६० ॥
त्रिदशानांवचःश्रुत्वामैत्रावरुणिरब्रवीत् ॥ किमर्थंसमुपायातावरंमत्तःकिमिच्छथ ॥६१॥ एवमुक्तास्तदातेनदेवास्तंमुनिमब्रुवन्॥इच्छामएकंवरमद्भुतं
वयंपिबार्णवंदेवमुनेमहात्मन् ॥ ६२ ॥ एवंत्वयेच्छेमकृतेमहर्षेमहार्णवंपीयमानंसमग्रम् ॥ ततोविहन्यामचसानुबन्धंकालेयसंज्ञंसुरविद्विषांबलम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ६३ ॥ त्रिदशानांवचःश्रुत्वातथेतिमुनिरब्रवीत् ॥ करिष्ये भवतांकामंलोकानांसुखकारकम् ॥ ६४ ॥ एवमुक्त्वाततोऽगच्छत्समुद्रंनिधिमम्भसाम्
॥ तपःसिद्धैश्चमुनिभिःसार्धंदेवैश्चसुव्रत ॥ ६५ ॥ मनुष्योरगगंधर्वायक्षाःकिंपुरुषास्तथा ॥ अनुजग्मुर्महात्मानंद्रष्टुकामास्तदद्भुतम् ॥ ६६ ॥
ततोऽभ्यपश्यत्सहितःसमुद्रंभीमनिःस्वनम्॥नृत्यन्तमिवचोर्मीभिर्वल्गन्तमिववायुना॥६७॥हसंतमिवफेनौघैःस्खलन्तंकन्दरेषुच॥नानाग्राहसमाकीर्णं
नानाद्विजगणैर्युतम् ॥ ६८ ॥ अगस्त्यसहितादेवाःसगंधर्वमहोरगाः ॥ ऋषयश्चमहाभागाःसमासेदुर्महोदधिम् ॥ ६९ ॥ समुद्रंससमासाद्यवारुणि
र्भगवानृषिः ॥ उवाचसहितान्देवानृषींस्तांस्तुसमागतान् ॥ १७० ॥ पातुकामःसमुद्रंचअगस्त्यऋषिसत्तमः ॥ एषलोकहितार्थायपिबामिवरुणा
लयम् ॥ ७१ ॥ भवतांयदनुष्ठेयंतच्छीघ्रंसंविधीयताम् ॥ एतावदुक्त्वावचनंमैत्रावरुणिरग्रतः ॥ ७२ ॥ समुद्रमपिबत्क्रुद्धःसर्वलोकस्यपश्यतः ॥
पीयमानंसमुद्रंतुदृष्ट्वादेवाःसवासवाः ॥७३॥ विस्मयंपरमंजग्मुस्स्तुतिभिश्चाप्यपूजयन् ॥ त्वंनस्त्राताविधाताचलोकानांलोकभावनः ॥ त्वत्प्रसादा
त्समुत्सेधमुपगच्छेत्समंजगत्॥७४॥संपूज्यमानस्त्रिदशैर्महात्मागन्धर्वमुख्येषुनदत्सुचैव ॥दिव्यैश्चपुष्पैरवकीर्यमाणोमहार्णवंनिःसलिलंचकार॥७५॥
दृष्ट्वाकृतंनिःसलिलंमहार्णवंसुराःसमस्ताःपरमप्रहृष्टाः ॥ प्रगृह्यदिव्यानिवरायुधानितान्दानवाञ्जघ्नुरदीनसत्त्वाः ॥ ७६ ॥ तेवध्यमानास्त्रिदशै
र्महात्मभिर्महाबलैर्वेगयुतैर्नदद्भिः ॥ नसेहिरेवेगवतांमहात्मनांवेगंतदाधारयितुंदिवौकसाम् ॥ ७७ ॥ तेवध्यमानास्त्रिदशैर्दानवाभीमनिःस्वनाः ॥
चक्रुःसुतुमुलंयुद्धंमुहूर्त्तमिवभारत ॥ ७८ ॥ तेपूर्वंतपसादग्धामुनिभिर्भावितात्मभिः ॥ यतमानाःपरंशक्त्यात्रिदशैर्विनिषूदिताः ॥ ॥ ७९ ॥
तेहेमनिष्काभरणाःकुण्डलाङ्गदधारिणः ॥ निहताबह्वशोभंतपुष्पिताइवकिंशुकाः ॥ १८० ॥ हतशिष्टास्ततःकेचित्कालेयदनुजोत्तमाः ॥ विदार्य
वसुधांदेवींपातालतलमाश्रिताः ॥ ८१ ॥ निहतान्दानवान्दृष्ट्वात्रिदशामुनिपुङ्गवम् ॥ तुष्टुवुर्विविधैर्वाक्यैरिदंचैवाब्रुवन्वचः ॥ ८२ ॥ त्वत्प्रसा
दान्महाभागलोकैःप्राप्तंमहत्सुखम् ॥ त्वत्तेजसाचनिहताःकालेयाभीमविक्रमाः ॥ ८३ ॥ पूरयस्वमहाविप्रसमुद्रंलोकभावनम् ॥ यत्त्वयासलिलं
पीतंतदस्मिन्पुनरुत्सृज ॥ ८४ ॥ एवमुक्तःप्रत्युवाचभगवान्मुनिपुङ्गवः ॥ जीर्णंतद्धिमयातोयमुपायोऽन्यःप्रचिन्त्यताम् ॥ ८५ ॥ पूरणार्थं
समुद्रस्यभवद्भिर्यत्नमास्थितैः ॥एवंश्रुत्वातुवचनंमहर्षेर्भावितात्मनः ॥ ८६ ॥ विस्मिताश्चविषण्णाश्चबभूवुःसहितास्सुराः ॥ परस्परमनुज्ञाप्यप्रणम्य
मुनिपुङ्गवम् ॥८७॥प्रजाःसर्वामहाराजविप्राजग्मुर्यथागतम् ॥ त्रिदशाविष्णुनासार्द्धमनुजग्मुःपितामहम् ॥८८ ॥पूरणार्थंसमुद्रस्यमन्त्रयन्तःपरस्पर
म् ॥ ऊचुःप्राञ्जलयस्सर्वेसागरस्यहिपूरणम् ॥ ८९ ॥ तानुवाचसमेतांस्तुब्रह्मालोकपितामहः ॥ गच्छध्वंविबुधास्सर्वेयथाकामंयथेप्सितम् ॥१९०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महताकालयोगेनप्रकृतिंयास्यतेऽर्णवः ॥ज्ञातींस्तुकारणंकृत्वामहाराजोभगीरथः ॥९१॥ गंगौघेनसमुद्रंचपुनःसंपूरयिष्यति॥एवंतेब्रह्मणादेवाःप्रेषिता
ऋषिसत्तमाः ॥ ९२ ॥ उवाचभगवांस्तुष्टस्त्वगस्त्यमृषिसत्तमम् ॥ देवकार्यंतुभवतादानवानांविनाशनम् ॥९३॥ यतस्संतारितादेवास्तेनतुष्टोऽस्मि
वैमुने ॥ अभिप्रेतोवरोयस्तेयाचयस्वददामितम् ॥ ९४ ॥ एवमुक्तस्तदागस्त्यःप्रणिपातपुरःसरम् ॥ इहस्थेनमयादेवदेवकार्यमिदंकृतम् ॥ ९५ ॥
सर्वाश्रमाणांप्रवरोभवत्वेषममाश्रमः॥त्वयाचोक्तस्तुभगवन्भवितानात्रसंशयः ॥९६॥ ब्रह्मोवाच ॥ यात्रांतुपुष्करेकृत्वाइहागत्यनरास्तुये॥इहकुण्डेषु
येस्नानंतर्पणंपितृदेवयोः ॥९७॥ अर्चनंचैवदेवेषुसर्वमक्षयकारकम्॥अर्घ्यंचोच्चावचंगृह्यशष्कुलापूपकांस्ततः ॥९८॥ दास्यन्तिद्विजमुख्येभ्यस्तेषांवा
सस्त्रिविष्टपे॥श्राद्धेनपितरस्तृप्तायावदाभूतसंप्लवम्॥९९॥कन्दमूलफलैर्वापितर्पयिष्यतियोमुनिम्॥सप्तर्षिस्थानमासाद्यमोदतेशाश्वतीःसमाः॥२००॥
यज्ञपर्वतमारूढोदृष्ट्वागंगाविनिर्गमम्॥ उदङ्मुखीदेवनदीनिर्गतापुष्करंप्रति ॥१॥ अत्राभिषेकंयःकुर्यात्पितृदेवार्चनेरतः ॥अश्वमेधफलंतस्यभवत्येव
नसंशयः॥२॥यस्त्वेकंभोजयेद्विप्रंकोटिर्भवतिभोजिता॥अक्षयंत्वन्नपानंचअत्रदत्तंमुनीश्वर ॥३॥ योऽयमिच्छतिकामंतुसर्वंतस्यभविष्यति॥नवियोनिं
व्रजत्यत्रस्नातमात्रोनरोभुवि ॥ ४ ॥ स्थानानांपरमंस्थानंतीर्थानांतीर्थमुत्तमम् ॥ मयादत्तंमुनिश्रेष्ठभविष्यतिनसंशयः ॥ ५ ॥ जन्मप्रभृतियत्पापं
स्त्रियोवापुरुषस्यवा ॥ अत्रैवस्नातमात्रस्यसर्वमेतत्प्रणश्यति ॥६॥ एवमुक्त्वातुभगवान्ब्रह्मालोकपितामहः ॥ जगामामन्त्र्यसमुनिमगस्त्यंमुनिसत्त
मम् ॥ ७ ॥ अगस्त्योऽपिस्थितस्तत्रआश्रमेस्वेपरंतप ॥ अगस्त्यस्याश्रमोत्पत्तिरेषातेपरिकीर्तिता ॥ ८ ॥ सप्तर्षीणामाश्रमांश्चकीर्तयिष्येकुरूद्वह ॥
अत्रिश्चैववसिष्ठोऽथपुलस्त्यःपुलहःक्रतुः ॥९॥ अंगिरागौतमश्चैवसुमतिःसुमुखस्तथा ॥ विश्वामित्रःस्थूलशिराःसंवर्तश्चप्रतर्दनः ॥२१०॥ रैभ्योबृ
हस्पतिश्चैवच्यवनःकश्यपोभृगुः ॥ दुर्वासाजमदग्निश्चमार्कण्डेयोऽथगालवः ॥११ ॥ उशनाथभरद्वाजोयवक्रीतस्तथामुनिः॥स्थूलाक्षःसकलाक्षश्चक
ण्वोमेधातिथिःकृतः ॥१२॥ नारदःपर्वतश्चैवस्वगन्धीच्यवनोद्विजः॥तृणाम्बुःशंबलोधौम्यःशतानन्दोऽकृतव्रणः॥१३॥जमदग्निस्तथारामोह्यष्टकश्चैव
मादयः ॥ कृष्णद्वैपायनश्चैवपुत्रशिष्यैःसमन्वितः ॥१४॥ एतेतुपुष्करंप्राप्यसप्तर्षीणामथाश्रमे ॥ वेष्टितानियमैश्चापिदयायुक्तास्तपस्विनः ॥१५॥
आनृशंस्यंजयोधैर्यंतपःसत्यंक्षमार्जवम् ॥ दयादानंजपश्चैवसर्वेषांतत्प्रतिष्ठितम् ॥ १६ ॥ इहयत्क्रियतेकर्मतत्परत्रोपभुज्यते ॥ ज्ञात्वातदित्थंमुनयः
परमार्थपरायणाः ॥ १७ ॥ नतत्रनास्तिकायान्तिनस्तेनानाजितेन्द्रियाः ॥ ननृशंसानपिशुनानकृतघ्नानमानिनः ॥१८॥ सत्यतेजस्विनःशूरादया
वंतःक्षमापराः॥ यज्वानोयज्ञशीलाश्चनिरीहानिरुपद्रवाः ॥१९॥ निर्ममानिरहङ्कारास्तत्रगच्छन्तिपुष्करे ॥ नरोगोनजरामृत्युर्भवितात्रमहात्मनाम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २२० ॥ नतत्रमूढाविशन्तिपुरुषाविषयात्मकाः ॥ कामलोभमदद्रोहक्रोधमोहैरुपद्रुताः ॥ २१॥ तुल्यमानापमानाश्चनिर्द्वन्द्वास्संयतेन्द्रियाः ॥ ध्यानयोगपराश्चैवतेतुगच्छन्तिपुष्करम् ॥२२॥ आश्रमेषुयथोक्तेषुयथोक्तंवैद्विजातयः॥येवर्तन्तेसमन्त्रास्तुतेषांलोकामहोदयाः ॥२३॥ येनहिंसन्ति भूतानिकर्मणामनसागिरा॥अनृशंसतराःसन्तःसर्वदाचप्रियंवदाः॥२४॥अग्निहोत्ररतानित्यंनित्यंचातिथिपूजकाः॥नित्यंस्वाध्यायवन्तश्चनित्यंस्ना नपरायणाः ॥२५॥ मातृवत्स्वसृवच्चैवतथादुहितृवच्चह॥परदारान्प्रपश्यन्तिसततंविगतस्पृहाः ॥२६॥ येऽधिक्षिप्तानकुप्यन्तिनहिंसन्तिचहिंसिताः ॥ समदुःखसुखाःसन्तोमहात्मानोजितेन्द्रियाः ॥२७॥ तेहिसर्वेप्रपश्यन्तिपुराचेरुर्महीमिमाम्॥समाधिनाचिन्तयन्तोब्रह्मलोकंसनातनम् ॥२८॥अथाभ वदनावृष्टिःकदाचिन्महतींतदा ॥ कृच्छ्रप्रायोह्यभूत्तत्रसर्वलोकःक्षुधार्दितः ॥ २९ ॥ ततोनिरन्नेलोकेऽस्मिंश्चात्मानंतपरीप्सवः ॥ मृतंकुमारमादाय कृच्छ्रप्रायास्तदापचन् ॥ २३० ॥ अथपर्यचरत्तत्रक्लिश्यमानान्हितानृषीन् ॥ दृष्ट्वाराजाविषादार्त्तःप्रोवाचेदंवचस्तदा ॥ ३१ ॥ राजोवाच ॥ प्रतिग्रहोब्राह्मणानांदृष्टावृत्तिरनिन्दिता ॥ तस्मात्प्रतिग्रहान्मत्तोगृह्णीध्वंमुनिसत्तमाः ॥ ३२ ॥ वरान्ग्रामान्व्रीहियवान्रसान्रत्नानिकाञ्चनम् ॥ गाश्च धेनूश्चतत्सर्वंमामांसंपचतद्विजाः ॥३३॥ ऋषयऊचुः॥राजन्प्रतिग्रहोघोरोमध्वास्वादोविषोपमः ॥ तज्जानतांनःकस्मात्त्वंकुरुषेसम्प्रलोभनम्॥३४॥ दशसूनासमश्चक्रीदशचक्रिसमोध्वजी ॥ दशध्वजिसमावेश्यादशवेश्यासमोनृपः॥ ॥३५॥दशसूनासहस्राणियोवाहयतिशौण्डिकः ॥ तेनतुल्यस्ततो राजाघोरस्तस्यप्रतिग्रहः ॥ ३६ ॥ योराज्ञःप्रतिगृह्णातिब्राह्मणोलोभमोहितः ॥ तामिस्रादिषुघोरेषुनरकेषुसपच्यते ॥ ३७ ॥ तद्गच्छकुशलंतेऽस्तुसह दानेनपार्थिव ॥ अन्येषांदीयतामेतदित्युक्त्वातेवनंययुः ॥ ३८ ॥ अथराज्ञःसमादेशात्तत्रगत्वाथमन्त्रिणः ॥ उदुम्बराणिव्यकिरन्हेमगर्भाणिभू तले ॥ ३९ ॥ ततोह्यन्नंविचिन्वन्तोगृह्णंश्चोदुम्बराण्यपि ॥ गुरूणिहिविदित्वातुनग्राह्याण्यत्रिरब्रवीत् ॥ २४० ॥ अत्रिरुवाच ॥ नास्महेमूढवि ज्ञानानास्महेमन्दबुद्धयः ॥ हैमानीमानिजानीमःप्रतिबुद्धाःस्मज्ञानिनः ॥ ४१॥ इहैवेदंवसुप्रीत्यैप्रेत्यवैकुण्ठितोदयम् ॥ तस्मान्नग्राह्यमेवैतत्सुखमान न्त्यमिच्छता ॥४२॥ शतेनगुणितंनिष्कंसहस्रेणसमन्वितम् ॥ यश्चान्यतःप्रतीच्छेत्सपापिष्ठांलभतेगतिम् ॥ ४३ ॥ यत्पृथिव्यांव्रीहियवंहिरण्यंपश वःस्त्रियः ॥ नूनंनैकस्यपर्याप्तमितिमत्वाशमंव्रजेत् ॥ ४४ ॥ वसिष्ठउवाच ॥ तपसासंचयोयस्यद्रव्याणांयस्यसंचयः ॥ तपःसंचयएवेहविशिष्टोधन संचयात् ॥ ४५ ॥ त्यजतःसंचयान्सर्वान्यान्तिनाशमुपद्रवाः ॥ नहिसंचयवान्कश्चिद्दृश्यतेनिरुपद्रवः ॥ ४६ ॥ यथायथानगृह्णातिब्राह्मणोऽसत्प्र तिग्रहम् ॥ तथातस्यहिसंतोषाद्ब्राह्मंतेजोविवर्द्धते ॥ ४७ ॥ अकिञ्चनत्वंराज्यंचतुलयासमतोलयत् ॥ अकिञ्चनत्वमधिकंराज्यादपिहिता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्मनः ॥ ४८ ॥ कश्यपउवाच ॥ अनर्थोब्राह्मणस्यैषयस्त्वर्थनिचयोमहान् ॥ ४९ ॥ अर्थैश्वर्यविमूढोहिश्रेयसोभ्रश्यतेद्विजः ॥ अर्थसंपद्विमोहाय
विमोहोनरकायच ॥ २५० ॥ तस्मादर्थमनर्थाख्यंश्रेयोऽर्थीदूरतस्त्यजेत् ॥ यस्यधर्मार्थमर्थेहातस्यानीहागरीयसी ॥ ५१ ॥ प्रक्षालनाद्धिपंकस्य
दूरादस्पर्शनंवरम् ॥ योऽर्थेनसाध्यतेधर्मःक्षयिष्णुःसप्रकीर्तितः ॥५२॥ यःपरार्थेपरित्यागःसोऽक्षयोमुक्तिलक्षणः॥भरद्वाजउवाच ॥ जीर्यंतिजीर्यतः
केशादंताजीर्यन्तिजीर्यतः ॥ ५३ ॥ धनाशाजीविताशाचजीर्यतोऽपिनजीर्यति ॥ चक्षुःश्रोत्रेचजीर्येतेतृष्णैकानिरुपद्रवा ॥५४॥ सूच्यासूत्रंयथावस्त्रे
समानयतिसूचकः ॥ तद्वत्संसारसूत्रंहितृष्णासूच्योपनीयते ॥५५॥ यथाशृंगंरुरोःकायेवर्द्धमानेचवर्द्धते ॥ अनन्तपारादुष्पूरातृष्णादुःखशतावहा
॥५६॥अधर्मबहुलाचैवतस्मात्तांपरिवर्जयेत् ॥गौतमउवाच ॥संतुष्टःकोनशक्नोतिफलैश्चाप्यातिवार्तितुम्॥५७॥लुब्धइन्द्रियलौल्येनसंकटान्यवगाहते॥
सर्वत्रसंपदस्तस्यसंतुष्टंयस्यमानसम् ॥५८॥ उपानद्गूढपादस्यतस्यचर्मावृतेवभूः॥ संतोषामृततृप्तानांयत्सुखंशातचेतसाम् ॥५९॥ कुतस्तद्धनलुब्धा
नामितश्चेतश्चधावताम् ॥ असंतोषःपरंदुःखंसन्तोषःपरमंसुखम् ॥२६०॥ सुखार्थीपुरुषस्तस्मात्संतुष्टःसंततंभवेत् ॥ विश्वामित्रउवाच ॥ कामंकाम
यमानस्ययदिकामःसमृद्ध्यति ॥६१॥ अथैनमपरःकामोभूयोविध्यतिबाणवत् ॥ नजातुकामःकामानामुपभोगेनशाम्यति ॥ ६२ ॥ हविषाकृष्णव
र्त्मेवभूयएवाभिवर्द्धते ॥ कामानभिलषन्मोहान्ननरःसुखमेधते ॥६३॥ श्येनालयतरुच्छायांव्रजन्निवकपिञ्जलः ॥ चतुस्सागरपर्यन्तांयोभुंक्तेपृथिवीमि
माम् ॥ ६४ ॥ तुल्याश्मकाञ्चनोयश्चसकृतार्थोनपार्थिवः ॥ जमदग्निरुवाच ॥ प्रतिग्रहसमर्थोऽपिनादत्तेयःप्रतिग्रहम् ॥६५॥ येलोकादानशीलानांस
तानाप्नोतिशाश्वतान्॥ योऽर्थानिच्छेन्नृपाद्विप्रःशोचितव्योमहार्षिभिः॥६६॥नसपश्यतिमूढात्मानरकेयातनाभयम्॥ प्रतिग्रहसमर्थोऽपिनप्रसज्येत्प्रति
ग्रहे ॥ ६७ ॥ प्रतिग्रहेणविप्राणांब्राह्मंतेजःप्रशाम्यति ॥ प्रतिग्रहसमर्थानांनिवृत्तानांप्रतिग्रहात् ॥६८॥ यएवंददतांलोकास्तएवाप्रतिगृह्णताम् ॥ ॥ अ
रुन्धत्युवाच ॥ ॥ बिसतंतुर्यथानित्यमम्भस्थस्सततंविशेत्॥६९॥ तृष्णाचैवमनाद्यंतातथादेहगतासदा ॥ यादुस्त्यजादुर्मतिभिर्यानजीर्यतिजीर्यतः
॥ २७० ॥ योऽसौप्राणान्तिकोरोगस्तांतृष्णांत्यजतःसुखम् ॥ चाण्डालउवाच ॥ उग्रादितोभयाद्यस्माद्बिभ्यतीमेमहेश्वराः॥७१॥बलीयसोदुर्बलवत्त
स्माचैवबिभेम्यहम् ॥ पशुसखउवाच ॥ यदाचरन्तिविद्वांसःसदाधर्मपरायणाः॥७२॥तदेवविदुषाकार्यमात्मनोहितमिच्छता॥ इत्युक्त्वाहेमगर्भाणि
त्यक्त्वातानिफलानिवै॥७३॥ ऋषयोजग्मुरन्यत्रसर्वएवदृढव्रताः ॥ ततस्तेविचरन्तोवैमध्यमंपुष्करंगताः ॥७४॥ ददृशुःसहसाप्राप्तंपरिव्राजंशुनःसख
म्॥तेनेहसहितास्तत्रगत्वाकिंचिद्वनान्तरम् ॥७५॥ सरःपरमपश्यन्तवृतंपद्मैर्जलाशयम्॥निविष्टाःसरसस्तीरेचिन्तयन्तोगतिंशुभाम्॥७६॥शुनःसखो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुनीन्सर्वानुवाचक्षुधितांस्तदा ॥ सर्वेवदन्तुसहिताःकीदृशीक्षुत्प्रवेदना ॥७७॥ तमूचुःसहितास्तेतुपरिव्राजंशुनःसखम् ॥ ऋषयऊचुः ॥शक्तिखड्गग
दाभिश्चचक्रतोमरसायकैः ॥ ७८ ॥ बाधितेवेदनायातुक्षुधयासापिनिर्जिता ॥ श्वासकुष्ठक्षयाष्ठीलीज्वरापस्मारशूलकैः ॥ ७९ ॥ व्याधिभिर्जनि
तासापिक्षुधायानाधिकाभवेत् ॥ हिरण्याङ्गदकेयूरमुकुटोज्ज्वलकुण्डलाः ॥२८०॥ क्षुधायांनविराजन्तेतत्रयेसंस्थितानराः ॥ यथाभूमिगतंतोयंरवि
रश्मिर्विकर्षति ॥ ८१ ॥ तद्वच्छरीरजानाड्यःशोष्यन्तेजठराग्निना ॥ नशृणोतिनचाघ्रातिचक्षुषानैवपश्यति ॥८२॥ दह्यतेक्षीयतेमूढःशुष्यतेक्षुधया
र्दितः ॥ नपूर्वांदक्षिणांचापिपाश्चिमांनोत्तरामपि ॥ ८३ ॥ नचाधोनैवचोर्द्ध्वंचक्षुधाविष्टोहिविन्दति॥ मूकत्वंबधिरत्वंचजडत्वमथपङ्गुता ॥८४॥भैर
वत्वममर्यादंक्षुधायांसंप्रवर्द्धते ॥ जनकंजननींपुत्रान्भार्यांदुहितरंतथा ॥ ८५ ॥ भ्रातरंस्वजनंवापित्यजतिक्षुधयार्दितः ॥ नपितॄन्पूजयेत्सम्यग्दे
वंचापिगुरुंतथा॥८६॥ ऋषीनुपगतांश्चापिक्षुधाविष्टोनविन्दति ॥ एवमन्नविहीनस्यभवन्त्येतानिदेहिनाम् ॥८७ ॥अन्नात्परमतोलोकेनभूतंनभविष्य
ति ॥ अन्नमूलंजगत्सर्वमन्नेचैवप्रतिष्ठितम्॥८८॥ पितरोदेवदैत्याश्चयक्षराक्षसकिन्नराः ॥ मनुष्याश्चपिशाचाश्चसर्वेचान्नमयाःस्मृताः॥८९॥ कुक्कुटा
वायसाःश्वानआखुर्बिलेशयास्तथा ॥ मत्स्याःकीटाःपिपीलाश्चसर्वेचान्नाशयाःस्मृताः ॥ २९० ॥ तस्मात्सर्वप्रयत्नेनअन्नंददज्जुषस्वच ॥ अन्नदस्तृ
प्तिमाप्नोतिशाश्वतींस्थितिमक्षयाम् ॥९१॥तपःसत्यंजपोहोमोध्यानंयोगःपरागतिः ॥ स्वर्गश्चैवसुखप्राप्तिःसर्वमन्नात्प्रवर्तते ॥९२॥चान्द्रोवारुणलोक
श्चयाम्यःकौबेरकस्तथा ॥ गोलोकोब्रह्मलोकोवासर्वेचान्नेप्रतिष्ठिताः ॥ ९३ ॥ चन्दनागरुधूपानिशिशिरेष्विन्धनानिच ॥ अन्नदानस्यवैराजन्कलां
नार्हन्तिषोडशीम् ॥ ९४ ॥ कूपाराममवृषोत्सर्गवाप्यश्चायतनानिच ॥ अन्नदानस्यचैतानिकलांनार्हन्तिषोडशीम् ॥ ९५ ॥ पानीयंभूमिगा
वश्चअन्नंचतुलयाधृतम् ॥ देवैरपिपुरातातेषामन्नंविशिष्यते ॥ ९६ ॥ अन्नंप्राणोबलंतेजोह्यन्नंचैवपराक्रमः ॥ अन्नात्संभवतेतेजोह्यन्नेनैवविवर्धते
॥ ९७ ॥ पौण्डरीकोऽश्वमेधश्चउक्थषोडशिकःक्रतुः ॥ अग्निष्टोमस्त्रिरात्रश्चराजसूयोमहाधनः ॥ ९८ ॥ सौत्रामणिर्वाजपेयोमानुषोऽथपशुस्त
था ॥ अन्नमूलात्प्रवर्तन्तेसर्वेयज्ञाःसविस्तराः ॥ ९९॥ सपर्वतनदीवापिपृथिवीसर्वकानना॥ विधिनातेनसादत्तायोऽन्नंददातिसर्वदा ॥३००॥ क्षुधि
तेनित्यमन्नंवैददच्छ्रद्धासमन्वितः ॥ ब्रह्महत्यादिकंपापंअन्नदश्चापकर्षति ॥ १ ॥ किमज्ञानंतुतेसौम्ययेनास्मान्परिपृच्छसि ॥ ब्राह्मणेभ्योमहाभाग
क्षुधितेभ्योविशेषतः ॥ २ ॥ सर्वदानानिदत्तानिसर्वेयज्ञाःसदक्षिणाः ॥ देवताःपूजिताःसर्वायोऽन्नंददातिनित्यशः ॥३॥ सस्नातःसर्वतीर्थेषुससर्वव्रत
पारगः ॥ तदेवंसंप्रयच्छेतअन्नंश्रद्धासमन्वितः ॥ ४ ॥ ब्रह्मभूतस्ततःसोऽथब्रह्मणासहमोदते ॥ सुसंस्कृतंचयोऽप्यन्नंदद्यादहरहर्द्विजे ॥५॥ यःपठेदन्न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दानंतुश्राद्धेचैवविशेषतः ॥ एकाग्रमानसोभूत्वाअमावस्येन्दुसंक्षये ॥ ६ ॥ भूतोपघातसंपूर्णेश्राद्धेश्रावयतेसदा ॥ पितरस्तस्यतुष्यन्तियावज्जीवं
नसंशयः ॥ ७ ॥ देवद्विजसमीपस्थोऽन्नस्यदाताविमुच्यते ॥ प्रबुद्धोवाप्रमत्तोवाप्रसंगादागतोऽपिवा ॥ ८ ॥ भक्त्याविरहितोवापिशृण्वन्पापा
द्विमुच्यते ॥ दानेनसंयुताविप्राःसुखिनोधर्मभागिनः ॥ ९ ॥ यमोदमोवैनियमःप्रोक्तस्तत्त्वार्थदर्शिभिः ॥ ब्राह्मणानांविशेषेणदमोधर्मः
सनातनः ॥ ३१० ॥ दमस्तेजोवर्द्धयतिपवित्रोदमउत्तमः ॥ विपाप्माचैवतेजस्वीपुरुषोदमतोभवेत् ॥ ११ ॥ येकेचिन्नियमालोकेयेचधर्माश्शु
भान्वयाः ॥ सर्वयज्ञफलंचापिदमस्तेभ्योविशिष्यते ॥१२॥ तपोयज्ञस्तथादानंदमादेवप्रवर्तते ॥ किमरण्येत्वदान्तस्यदान्तस्यापिकिमाश्रमे ॥१३॥
यत्रयत्रवसेद्दान्तस्तदरण्यंमहाश्रमः ॥ शीलवृत्तसमेतस्यनिगृहीतेन्द्रियस्यच॥आर्जवेवर्तमानस्यआश्रमैःकिंप्रयोजनम् ॥ १४॥ ॥ वनेऽपिदोषाःप्रभव
न्तिरागिणांगृहेऽपिपञ्चेन्द्रियनिग्रहस्तपः॥ अकुत्सितेकर्मणियःप्रवर्ततेनिवृत्तरागस्यगृहंतपोवनम् ॥१५॥ सुकर्मधर्मार्जितजीवितानांसदाचसंतुष्यगृहे
रतानाम्॥जितेंद्रियाणामतिथिप्रियाणांगृहेऽपिधर्मोनियमस्थितानाम् ॥१६॥ नशब्दशास्त्रेनिरतस्यमोक्षोनचैवरम्यावसथप्रियस्य॥ नभोजनाच्छादन
तत्परस्यनलोकचित्तग्रहणेरतस्य ॥१७॥ एकांतशीलस्यदृढव्रतस्यसर्वेन्द्रियप्रीतिनिवर्तकस्य ॥ अध्यात्मयोगेगतमानसस्यमोक्षोध्रुवंनित्यमहिंसक
स्य ॥ ३१८ ॥ सुखंचदान्तःस्वपितिसुखेनप्रतिबुध्यते ॥ समःसर्वेषुभूतेषुमनोयस्यप्रबुध्यते ॥ १९ ॥ नरथेनसुखंयातिनहयेननदन्तिना ॥ यथात्म
नाविनीतेनसुखंयातिमहापथे ॥ १२० ॥ नतुकुर्याद्धरिःस्पृष्टःसर्पोवाप्यतिरोषितः ॥ अरिर्वानित्यसंक्रुद्धोयथात्मादमवर्जितः ॥ २१ ॥ नयमं
यममित्याहुरात्मावैयमउच्यते ॥ आत्मावैयमितोयेनसयमस्तुविशिष्यते ॥ २२ ॥ यमोयमइतिप्रोक्तोवृथातूद्विजतेजनः ॥ आत्मावैयमितोयेनय
मस्तस्यकरोतिकिम् ॥२३॥ क्रव्यादेभ्यश्चभूतेभ्योऽदान्तेभ्यश्चसदाभयम् ॥ तेषांविप्रतिषेधार्थंदण्डःसृष्टःस्वयंभुवा ॥२४॥ दण्डोरक्षतिभूतानिदण्डः
पालयतेप्रजाः॥ निवारयतिपापिष्ठान्दण्डोदुर्जयएववा ॥२५॥ श्यामोयुवालोहिताक्षःसर्वभूतभयावहः ॥दण्डःशास्तामनुष्याणांयस्मिन्धर्मःप्रतिष्ठि
तः ॥ २६॥ अथाश्रमेषुसर्वेषुदमएवोत्तमव्रतम् ॥ तानिलिंगानिवक्ष्यामियैर्दान्तइतिकीर्त्यते ॥२७॥ अकार्पण्यमपारुष्यंसंतोषःसुविधानता ॥ अन
सूयागुरोःपूजादयाभूतेष्वपैशुनम् ॥२८॥ षड्भिरेषदमःप्रोक्तऋषिभिःशांतबुद्धिभिः॥दयाधीनौधर्ममोक्षौतथास्वर्गश्चपार्थिव ॥२९॥ अपमानेनकुप्येत
संमानेनप्रहृष्यति॥समदुःखसुखोधीरःसशांतइतिकीर्त्यते॥१३०॥शेतेसुखंहिशान्तस्तुसुखंहिप्रतिबुध्यते।श्रेयस्तरमतस्तिष्ठेदवमन्ताविनश्यति॥३१॥
अपमानितस्तुनध्यायेत्तस्यपापंकदाचन॥ स्वधर्ममपिचावेक्ष्यपरधर्मंनदूषयेत् ॥३२॥ आत्मानमपिजानीयात्परंदोषैस्तुनाक्षिपेत् ॥ मन्त्रैर्हीनंक्रिया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भिर्वाजन्मनाप्यथवापुनः ॥ ३३ ॥ दमश्छादयतेसर्वहीनमंगपटोयथा ॥ अधीयतेनिरर्थंतेनाभिजानंन्तियेदमम् ॥३४॥ श्रुतस्यहिदमोमूलंदमोधर्मः
सनातनः ॥ योह्यात्मनस्तुलयतेसुवर्णतुलयादमम् ॥ ३५ ॥ सतेनधृतिमान्ख्यातोनतुद्रव्येणमोहितः ॥ व्रतानामपिसर्वेषांदमएवपरायणम् ॥३६ ॥
यद्यधीतेषडङ्गानिवेदतत्त्वार्थविद्द्विजः ॥ दमेनतुविहीनश्चपूज्यत्वंनेहगच्छति ॥३७॥ दमेनहीनंनपुनंतिवेदायद्यप्यधीताःसहषड्भिरंगैः ॥ साङ्ख्यंच
योगश्चकुलंचजन्मतीर्थाभिषेकश्चनिरर्थकानि ॥ ३८ ॥ अमृतस्येवतृप्येतअपमानस्ययोगवित् ॥ विषवच्चजुगुप्सेतसंमानस्यसदाद्विजः ॥ ३९ ॥
अपमानात्तपोवृद्धिःसंमानाच्चतपःक्षयः ॥ अर्चितःपूजितोविप्रोदुग्धागौरिवगच्छति ॥ ३४० ॥ पुनराप्यायतेधेनुःसतृणैःसलिलैर्यथा ॥ एवंजपैश्चहो
मैश्चपुनराप्यायतेद्विजः ॥४१॥ आक्रोशकसमोलोकेसुहृदन्योनविद्यते ॥ यस्तुदुष्कृतमादायसुकृतंस्वंप्रयच्छति ॥४२॥ आक्रोशमानानाक्रोशेन्म
न्युंस्वंविनिवर्तयेत् ॥ सन्नियम्यतदात्मानममृतेनाभिषिञ्चति ॥ ४३ ॥ कपालंवृक्षमूलानिकुचेलमसहायता ॥ अनपेक्षाब्रह्मचर्यंनयन्तिपरमांगतिम्
॥ ४४ ॥ कामक्रोधौविनिर्जित्यकिमरण्येकरिष्यति ॥ अभ्यासेनतुवैशास्त्रंकुलंशीलेनधार्यते ॥ ४५ ॥ गुणैर्मन्त्राविधार्यन्तेक्रोधस्सत्त्वेनधार्यते ॥
यस्तुक्रोधंसमुत्पन्नंसंधारयतिचात्मनः ॥ ४६ ॥ अक्रोधेनजपेद्धीरःकस्तेनसदृशोभुवि ॥ यस्तुक्रोधंसमुत्पन्नंसन्तंसंयम्यतिष्ठति ॥ ४७ ॥ तंसत्सारत
मम्मन्येनास्मिन्सीदतियःपुमान् ॥ एषपैतामहोगुह्योब्रह्मराशिस्सनातनः ॥ ४८ ॥ धर्मस्यनियमोयोहिमयातेकथितोभृशम् ॥ अन्येचयज्वनांलो
काअन्येचापितपस्विनाम् ॥४९॥ अन्येदमवतांलोकास्तेवैपरमपूजिताः ॥ एकःक्षमावतांदोषोद्वितीयोनोपपद्यते ॥३५०॥ यदिदंक्षमयायुक्तमशक्त
म्मन्यतेजनः ॥ नचैषदोषोमन्तव्यःक्षमाप्रज्ञावतांबलम् ॥५१॥ प्रशमंयोऽभिजानातिइष्टापूर्तंमहीयते ॥ यत्क्रोधयुक्तोजपतिजुहोतिचयदर्चति॥५२॥
सर्वंक्षरतितत्तस्यभिन्नकुम्भादिवोदकम् ॥ दमाध्यायमिमंपुण्यंप्रातरुत्थाययःपठेत् ॥ ५३ ॥ सधर्मनावमारुह्यदुर्गाण्यतितरिष्यति ॥ दमाध्याय
मिमंपुण्यंसततंश्रावयेद्द्विजः ॥५४॥ सब्रह्मलोकमाप्नोतितस्मान्नच्यवतेपुनः ॥ श्रूयतांधर्मसर्वस्वंश्रुत्वाचैतत्प्रधार्यताम् ॥ ५५ ॥ आत्मनःप्रतिकूला
निपरेषांनसमाचरेत् ॥ मातृवत्परदारांश्चपरद्रव्याणिलोष्टवत् ॥५६॥ आत्मवत्सर्वभूतानियःपश्यतिसपश्यति ॥ पचनंवैश्वदेवार्थंपरार्थंयच्चजीवि
तम् ॥५७॥ पुत्रार्थंमैथुनंयस्यस्वर्गार्थंतस्यजीवितम् ॥ एतद्धिवेदसर्वस्वंधातूनामिवकाञ्चनम् ॥५८॥ सर्वभूतहितंराजन्नधीत्यामृतमश्नुते॥ एवंवैधर्म
सर्वस्वमुक्तातेतुशुनःसखम् ॥ ५९ ॥ तेनैवसहिताःसर्वेनिविष्टास्सरसस्तटे ॥ सरोऽपश्यन्सुविस्तीर्णंपद्मोत्पलजलावृतम् ॥३६०॥ तत्रावतारंकृत्वा
तेबिसानिचकलापशः॥ तीरेनिक्षिप्यसरसश्चक्रुःपुण्यांजलक्रियाम् ॥६१॥ अथोत्तीर्यजलात्तस्मात्तेसमेत्यपरस्परम्॥ बिसान्येतान्यपश्यन्तइदंवचन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मब्रुवन्॥६२॥ ऋषयऊचुः ॥ केनक्षुधाभितप्तानामस्माकंपापकर्मणाम् ॥ नृशंसेनापनीतानिबिसान्याहारकाङ्क्षिणा ॥६३॥ तेशङ्कमानास्त्वन्योन्यं पर्यपृच्छन्द्विजोत्तमाः ॥ चक्रुश्चनिश्चयंसर्वेशपथंप्रतिपार्थिव ॥ ६४ ॥ कश्यपउवाच ॥ सर्वत्रसर्वंहरतुन्यासलोपंकरोतुच ॥ कूटसाक्षित्वमभ्येतुबिसस्तैन्यंकरोतियः ॥ ६५॥ दम्भेनधर्मंचरतुराजानंचोपसेवताम् ॥ मधुमांसंसमश्नातुबिसस्तैन्यंकरोतियः ॥ ६६ ॥ अनृतंभाषतुसदाविषयांश्चोपसेवतु ॥ ददातुकन्यांशुल्केनबिसस्तैन्यंकरोतियः ॥ ६७॥ वसिष्ठउवाच ॥ अनृतौमैथुनंयातुदिवास्वप्नंनिषेवतु ॥ अन्योन्यातिथितामेतुबिसस्तैन्यंकरोतियः ॥ ६८॥ एककूपेवसेद्ग्रामेब्राह्मणोवृषलीपतिः ॥ तस्यसालोक्यतांयातुबिसस्तैन्यंकरोतियः ॥६९॥ भरद्वाजउवाच ॥ नृशंसस्सोऽस्तुसर्वेषु समृद्ध्याचाप्यहङ्कृतः ॥ मत्सरीपिशुनश्चैवबिसस्तैन्यंकरोतियः ॥३७०॥ प्रत्याक्रोशत्ववाक्क्रुष्टस्ताडयत्वन्यताडितः ॥ विक्रीणातुरसांश्चैवबिसस्तैन्यंकरोतियः ॥७१॥ गौतमउवाच ॥ अतिथिंत्वागतंप्राप्यपाकभेदंकरोतुसः ॥ शूद्रान्नंचसदाश्नातुबिसस्तैन्यंकरोतियः ॥७२॥ दत्त्वादानंकीर्तयतु परभार्यासुतुष्यतु ॥ एकाकीमिष्टमश्नातुबिसस्तैन्यंकरोतियः ॥ ७३ ॥ विश्वामित्रउवाच ॥ नित्यकामपरःसोऽस्तुदिवसेचैवमैथुनी ॥ नित्यंतु पातकीचैवबिसस्तैन्यंकरोतियः ॥७४॥ परापवादंवदतुपरदारांश्चसेवतु॥ परनिन्दारतश्चास्तुबिसस्तैन्यंकरोतियः ॥७५॥ मातरंपितरंचैवसोऽवमन्येतदुमतिः ॥ समातर्यन्यबुद्धिःस्याद्बिसस्तैन्यंकरोतियः ॥ ७६ ॥ परपाकंसदाश्नातुपरनारींचसेवतु ॥ वेदविक्रयकृच्चास्तुबिसस्तैन्यंकरोतियः ॥७७॥ जमदग्निरुवाच ॥ परस्ययातुप्रेष्यत्वंसतुजन्मनिजन्मनि॥ सर्वधर्मक्रियाहीनोबिसस्तैन्यंकरोतियः ॥७८॥ शुनःसखउवाच ॥ न्यायेनवेदानध्येतुगृहस्थोऽस्तुप्रियातिथिः ॥ सत्यंवदतुवाजस्रंबिसस्तैन्यंकरोतियः ॥७९॥ अग्निंजुहोतुविधिवद्यज्ञंयजतुनित्यशः ॥ ब्रह्मणस्सदनंयातुबिसस्तैन्यंकरोतियः ॥ ३८०॥ ऋषयऊचुः ॥ इष्टमेवद्विजातीनांयदिदंशपथीकृतम् ॥ त्वयाकृतंबिसस्तैन्यंसर्वेषांनःशुनःसख ॥८१ ॥ शुनःसखउवाच ॥ मयाह्यन्तर्हितान्यासन्बिसानीमानिवोद्विजाः ॥ धर्मंचश्रोतुकामेनजानीध्वंमांचवासवम् ॥८२॥ अलोभादक्षयालोकाजितावोमुनिसत्तमाः॥विमानमधितिष्ठध्वंगच्छामस्त्रिदशालयम् ॥ ८३ ॥ ततोमहर्षयस्तेतुविज्ञायाथपुरन्दरम् ॥ ऊचुःपुरन्दरंचेदंवाक्यंवाक्यविशारदाः ॥ ८४ ॥ इहागत्यनरोयस्तुमध्यमंपुष्करंविशेत् ॥ त्रिरात्रोपोषितोभूत्वालभेदावश्यकंफलम् ॥ ८५ ॥ द्वादशेवार्षिकीदीक्षास्मृतायातुवनौकसाम् ॥ तस्याःफलंसमग्रंचलभेदिहनसंशयः ॥ ८६ ॥ नासौदुर्गतिमाप्नोतिस्वर्गणैःसहमोदते ॥ विरिञ्चिस्थानमासाद्यतिष्ठेद्वैब्रह्मणोदिनम् ॥८७॥ पुलस्त्यउवाच ॥ इन्द्रेणसहसंप्रीतास्तदाजग्मुस्त्रिविष्टपम्॥एवंविलोभ्यमानास्तेलोभैर्बहुविधैरिह॥८८॥ नैवलोभंतथाचक्रुस्तेनजग्मुस्त्रिविष्टपम्॥इदंयःशृणुयान्नित्यमृषीणांचरितंशु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भम्॥८९॥विमुक्तःसर्वपापेभ्यःस्वर्गलोकेमहीयते॥२९०॥इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेसप्तर्षिसंवादोनामैकोनविंशोऽध्यायः॥१९॥भीष्मउवाच॥
अत्याश्चर्यवतीरम्याकथेयंपापनाशिनी॥विस्तरेणचमेब्रूहियाथातथ्येनपृच्छतः॥१॥माहात्म्यंमध्यमस्यापिऋषिभिःपरिकीर्तितम्॥फलंचाब्जस्यकथितं
माहात्म्यंचदमस्यतु॥२॥विष्णुनाचपदन्यासःकृतोयत्रमहामुने॥कनीयसस्तथोत्पत्तिर्यथाभूतावदस्वमे॥३॥पुलस्त्यउवाच॥पुरारथन्तरेकल्पेराजासी
त्पुष्पवाहनः॥नाम्नालोकेषुविख्यातस्तेजसासूर्यसन्निभः॥ ४ ॥तपसातस्यतुष्टेनचतुर्वक्त्रेणभारत ॥ कमलंकाञ्चनंदत्तंयथाकामगमंनृप ॥ ५ ॥ सप्त
द्वीपानिलोकंचयथेष्टंविचरत्सदा ॥ कल्पादौतुसमंद्वीपंतस्यपुष्करवासिना ॥ ६ ॥ लोकेनपूजितंतस्मात्पुष्करद्वीपमुच्यते ॥ तदेवब्रह्मणादत्तंयान
मस्यततोऽम्बुजम् ॥ पुष्पवाहनइत्याहुस्तस्मात्तंदेवदानवाः ॥७॥ नौपम्यमस्तीहजगत्त्रयेऽपिब्रह्माम्बुजस्थस्यचतस्यराज्ञः ॥ ८ ॥ तपोऽनुभावाद
थतस्यराज्ञीनारीसहस्रैरभिवन्द्यमाना ॥नाम्नाचलावण्यवतीबभूवयापार्वतीवेष्टतमाभवस्य ॥ ९ ॥ तस्यात्मजानामयुतंबभूवधर्मात्मनामग्र्यधनुर्धरा
णाम् ॥ तदात्मजांस्तानभिवीक्ष्यराजामुहुर्मुहुर्विस्मयमाससाद ॥ १० ॥ सोऽभ्यागतंपूज्यमुनिप्रवीरंप्रचेतसंवाक्यमिदंबभाषे ॥ कस्माद्विभूतिर
चलामरमर्त्यपूजाजाताकथंकमलजासदृशीसुराज्ञी ॥ ११ ॥ भार्यामयाल्पतपसापरितोषितेनदत्तंममाम्बुजगृहंचमुनीन्द्रधात्रा ॥ यस्मिन्प्रविष्टमपि
कोटिशतंनृपाणांसामात्यकुञ्जररथौघजनावृतानाम् ॥१२॥ नालक्ष्यतेक्वगतमम्बरगामिभिश्चतारागणेन्दुरविरश्मिभिरप्यगम्यम्॥तस्मात्किमन्यज
ननीजठरोद्भवेनधर्मादिकंकृतमशेषजनातिगंयत् ॥ १३ ॥ सर्वैर्मयाथतनयैरथवानयापिसद्धार्ययातदखिलंकथयप्रचेतः ॥ सोऽप्यभ्यधादथभ
वान्तरितंनिरीक्ष्यपृथ्वीपतेशृणुतदद्भुतहेतुवृत्तम्॥१४॥ जन्माभवत्तवतुलुब्धकुलेऽपिघोरंजातस्त्वमप्यनुदिनंकिलपापकारी ॥वपुरप्यभूत्तवपुनःपरुषा
ङ्गसन्धिदुर्गन्धिसत्त्वकुनखाभरणंसमन्तात् ॥१५॥ नोतेसुहृन्नसुतबन्धुजनोनतादृङ्नैवस्वसानजननीचतदाभिशस्ता॥ अतिसंमतापरमभीष्टतमाभि
मुखीजातामहीशतवयोषिदियंसुरूपा ॥ १६ ॥ अभूदनावृष्टिरतीवरौद्राकदाचनाहारनिमित्तमस्याम् ॥ क्षुत्पीडितेनभवतातुयदानकिञ्चिदासादि
तंवन्यफलादिभक्ष्यम् ॥ १७॥ अथाभिदृष्टंमहदम्बुजाढ्यंसरोवरंपङ्कपरीतरोधः ॥पद्मान्यथादायततोबहूनिगतःपुरंवैदिशनामधेयम् ॥ १८ ॥ तन्मू
ल्यलाभायपुरंसमस्तंभ्रान्तंत्वयाशेषमहस्तदासीत् ॥ क्रेतानकश्चित्कमलेषुजातःक्लान्तःपरंक्षुत्परिपीडितश्च ॥ १९ ॥ उपविष्टस्त्वमेकस्मिन्सभार्यो ॥ ७१ ॥
भवनाङ्गणे॥ ततोरात्रौभवांस्तत्रअश्रौषीन्मङ्गलध्वनिम् ॥२०॥ सभार्यस्तत्रगतवान्यत्रासौमङ्गलध्वनिः॥तत्रमण्डलमध्यस्थाविष्णोरर्चाविलोकिता ॥
॥ २१ ॥ वेश्यानङ्गवतीनामबिभ्रतीद्वादशीव्रतम् ॥ समाप्यमाघमासस्यद्वादश्यांलवणाचलम् ॥ २२ ॥ न्यवेदयत्तुगुरवेशय्यांचोपस्करान्विताम् ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अलङ्कृत्यहृषीकेशंसौवर्णसममादरात् ॥ २३ ॥ सातुदृष्ट्वाततस्ताभ्यामिदंचपरिचिन्तितम् ॥ किमेभिःकमलैःकार्यंवरंविष्णुरलंकृतः ॥ २४ ॥ इति
भक्तिस्तदाजातादम्पत्योस्तुनरेश्वर ॥ तत्प्रसङ्गात्समभ्यर्च्यकेशवंलवणाचलम् ॥ २५ ॥ शय्याचपुष्पप्रकरैःपूजिताभूच्चसर्वशः ॥ अथानङ्गवतीतुष्टा
तयोर्धान्यशतत्रयम् ॥ २६ ॥ दीयतामादिदेशाथकलधौतपलत्रयम् ॥ नगृहीतंततस्ताभ्यांमहासत्त्वावलम्बनात् ॥ २७ ॥ अनङ्गवत्याचपुनस्त
योरन्नंचतुर्विधम् ॥ आनीयव्याहृतंचान्नंभुज्यतामितिभूपते ॥ २८ ॥ ताभ्यांचतदपित्यक्तंभोक्ष्यावःश्वोवरानने ॥ प्रसङ्गादुपवासोनौतवाद्यास्तुशु
भावहः ॥ २९ ॥ जन्मप्रभृतिपापिष्ठावावांदेविदृढव्रते ॥ त्वत्प्रसङ्गाद्भवद्गेहेधर्मलेशोऽस्तुनाविह ॥ ३० ॥ इतिजागरणंताभ्यांतत्प्रसङ्गादनुष्ठितम् ॥
प्रभातेचतयादत्ताशय्यासलवणाचला ॥ ३१ ॥ ग्रामश्चगुरवेभक्त्याविप्रेभ्योद्वादशैवतु ॥ वस्त्रालंकारसंयुक्तागावश्चकनकान्विताः ॥ ३२ ॥
भोजनंचसुहृन्मित्रदीनान्धकृपणैःसह ॥ तच्चलुब्धकदाम्पत्यंपूजयित्वाविसार्जितम् ॥ ३३ ॥ सभवांल्लुब्धकोजातःसपत्नीकोनृपेश्वरः ॥ पुष्करप्र
करात्तस्मात्केशवस्यतुपूजनात् ॥ ३४ ॥ विनष्टाशेषपापस्यतवपुष्करमन्दिरम् ॥ तस्यसत्यस्यमाहात्म्यादलोभतपसानृप ॥ ३५ ॥ प्रादात्कामग
मंयानंलोकनाथश्चतुर्मुखः ॥ संतुष्टस्तवराजेन्द्रपुष्करंत्वंसमाश्रय ॥३६॥ कल्पंसत्वंसमासाद्यविभूतिद्वादशीव्रतम् ॥ कुरुराजेन्द्रनिर्वाणमवश्यंसमवा
प्स्यसि ॥ ३७ ॥ एतदुक्त्वातुसमुनिस्तत्रैवान्तरधीयत ॥ राजायथोक्तंचपुनरकरोत्पुष्पवाहनः ॥ ३८ ॥ इदमाचरतोराजन्नखण्डव्रतताभवेत् ॥
यथाकथंचित्कालेनद्वादशद्वादशीर्नृप ॥ ३९ ॥ कर्तव्याशक्तितोदेवविप्रेभ्योदक्षिणानृप ॥ ज्येष्ठेगावःप्रदातव्यामध्यमेभूमिरुत्तमा ॥ ४० ॥
कनिष्ठेकाञ्चनंदेयमित्येषादक्षिणास्मृता ॥ प्रथमंब्रह्मदैवत्यंद्वितीयंवैष्णवंतथा ॥ ४१ ॥ तृतीयंरुद्रदैवत्यंत्रयोदेवास्त्रिषुस्थिताः ॥ इतिकलुष
विदारणंजनानांपठतिचयस्तुशृणोतिचापिभक्त्या ॥ ४२ ॥ मतिमपिचसयातिदेवलोकेवसतिचरोमसमानिवत्सराणि ॥ अथातःसंप्रव
क्ष्यामिव्रतानामुत्तमंव्रतम् ॥ ४३ ॥ कथितंतेनरुद्रेणमहापातकनाशनम् ॥ नक्तमब्दंचरित्वातुगवासार्धकुटुम्बिने ॥ ४४ ॥ हैमं
चक्रंत्रिशूलंचदद्याद्विप्रायवाससी ॥ एवंयःकुरुतेपुण्यंशिवलोकेसमोदते ॥ ४५ ॥ एतदेवव्रतंनाममहापातकनाशनम् ॥ यस्त्वेकभक्तेनक्षिपेद्धेनुं
वृषसमन्विताम् ॥ ४६ ॥ धेनुंतिलमयींदद्यात्सपदंयातिशांकरम् ॥ एतद्रुद्रव्रतंनामभयशोकविनाशनम् ॥ ४७ ॥ यश्चनीलो
त्पलंहैमंशर्करापात्रसंयुतम् ॥ एकान्तरितनक्ताशीसमांतेवृषसंयुतम् ॥ ४८ ॥ वैष्णवंसपदंयातिनीलव्रतमिदंस्मृतम् ॥ आषाढादिच
तुर्मासमभ्यंगंवर्जयेन्नरः ॥ ४९ ॥ भोजनोपस्करंदद्यात्सयातिभवनंहरेः ॥ जनप्रीतिकरंनृणांप्रीतिव्रतमिहोच्यते ॥ ५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वर्जयित्वामंधौयस्तुदधिक्षीरघृतैक्षवम् ॥ दद्याद्वस्त्राणिसूक्ष्माणिरसपात्रेणसंयुतम् ॥ ५१ ॥ संपूज्यविप्रमिथुनंगौरीमेप्रीयतामिति ॥ एतद्गौरी
व्रतंनामभवानीलोकदायकम् ॥५२॥ पुष्यादौयस्त्रयोदश्यांकृत्वानक्तमथोपुनः ॥अशोकंकाञ्चनंदद्यादिक्षुयुक्तंदशाङ्गुलम्॥५३॥ विप्रायवस्त्रसंयुक्तंप्रद्यु
म्नःप्रीयतामिति ॥ कल्पंविष्णुपुरेस्थित्वाविशोकस्स्यात्पुनर्नृप ॥ ५४ ॥ एतत्कामव्रतंनामसदाशोकविनाशनम् ॥ आषाढादिव्रतेयस्तुवर्जयेद्यः फला
शनम् ॥५५॥ चातुर्मास्येनिवृत्तेतुघटंसार्पिर्गुडान्वितम् ॥ कार्तिक्यांतत्पुनर्हैमंब्राह्मणायनिवेदयेत् ॥५६॥ सरुद्रलोकमाप्नोतिशिवव्रतमिदंस्मृतम् ॥
वर्जयेद्यस्तुपुष्पाणिहेमन्तेशिशिरावृते ॥ ५७॥ पुष्पत्रयंचफाल्गुन्यांकृत्वाशक्त्याचकाञ्चनम् ॥ दद्याद्विकालवेलायांप्रीयेतांशिवकेशवौ ॥५८॥दत्त्वा
परंपदंयातिसौम्यव्रतमिदंस्मृतम् ॥ फाल्गुनादितृतीयायांलवणंयस्तुवर्जयेत् ॥५९॥समांतेशयनंदद्याद्गृहंचोपस्करान्वितम् ॥संपूज्यविप्रमिथुनंभवा
नीप्रीयतामिति:।६०॥ गौरीलोकेवसेत्कल्पंसौभाग्यव्रतमुच्यते॥सन्ध्यामौनंनरःकृत्वासमांतेघृतकुम्भकम्॥६१॥वस्त्रयुग्मंतिलान्घण्टांब्राह्मणायनिवेद
येत् ॥ लोकंसारस्वतंयातिपुनरावृत्तिदुर्लभम् ॥ ६२ ॥ एतत्सारस्वतंनामरूपविद्याप्रदायकम् ॥ लक्ष्मीमभ्यर्च्यपञ्चम्यामुपवासीभवेन्नरः ॥ ६३ ॥
समांतेहेमकमलंदद्याद्धेनुसमन्वितम् ॥ सवैविष्णुपदंयातिलक्ष्मीःस्याज्जन्मजन्मनि ॥ ६४ ॥ एतल्लक्ष्मीव्रतंनामदुःखशोकविनाशनम् ॥ कृत्योपलेप
नंशम्भोरग्रतःकेशवस्यच ॥ ६५ ॥ यावदब्दंपुनर्देयाधेनुर्जलघटस्तथा ॥ जन्मायुतंस्वराजास्यात्ततःशिवपुरंव्रजेत् ॥ ६६ ॥ एतदायुर्व्रतंनाम
सर्वकामप्रदायकम् ॥ अश्वस्थंभास्करंगङ्गांप्रणम्यैकाग्रमानसः ॥ ६७ ॥ एकभक्तंनरःकुर्यादब्दमेकंविमत्सरः ॥ व्रतांतेविप्रमिथुनंपूज्यंधेनुत्रया
न्वितम् ॥६८॥ वृक्षंहिरण्मयंदद्यात्सोऽश्वमेधफलंलभेत् ॥ एतत्कीर्तिव्रतंनामभूतिकीर्तिफलप्रदम् ॥६९॥ घृतेनस्नपनंकृत्वाशम्भोर्वाकेशवस्यवा॥अ
क्षताभिःसपुष्पाभिःकृत्वागोमयमण्डलम् ॥७०॥ समांतेहेमकमलंतिलधेनुसमन्वितम् ॥ शूलमष्टाङ्गुलंदद्याच्छिवलोकेमहीयते॥७१॥ सामगायनकं
चैवसामव्रतमिहोच्यते ॥ नवम्यामेकभक्तंतुकृत्वाकन्याश्चशक्तितः ॥७२॥ भोजयित्वासमंदद्याद्धेमकंचुकवाससी॥ हैमंसिंहंचविप्रायदद्याच्छिवपदंव्र
जेत् ॥७३॥ जन्मार्बुदसुरूपःस्याच्छत्रुभिश्चापराजितः ॥ एतद्वीरव्रतंनामनराणांचसुखप्रदम् ॥७४॥चैत्रादिचतुरोमासाञ्जलंदद्याद्दयान्वितः॥व्रतान्ते
मणिकंदद्यादन्नवस्त्रसमन्वितम् ॥७५॥ तिलपात्रंहिरण्यंचब्रह्मलोकेमहीयते ॥ कल्पान्तेभूतिजननमानंदव्रतमुच्यते॥७६॥ पंचामृतेनस्नपनंकृत्वासंव
त्सरंविभोः ॥ वत्सरान्तेपुनर्दद्याद्धेनुंपञ्चामृतान्विताम्॥७७॥विप्रायदद्याच्छंखंचसपदंयातिशांकरम् ॥राजाभवतिकल्पान्तेधृतिव्रतमिदंस्मृतम्॥७८॥
वर्जयित्वापुमान्मांसंव्रतान्तेगोप्रदोभवेत् ॥तद्वद्धेममृगंदद्यात्सोऽश्वमेधफलंलभेत्॥७९॥ अहिंसाव्रतमित्युक्तंकल्पांतेभूपतिर्भवेत् ॥कल्यमुत्थायवैस्नानं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृत्वादाम्पत्यमर्चयेत् ॥८०॥ भोजयित्वायथाशक्तिमाल्यवस्त्रविभूषणैः॥सूर्यलोकेवसेत्कल्पंसूर्यव्रतमिदंस्मृतम् ॥८१॥ आषाढादिचतुर्मासंप्रातःस्नायीभवेन्नरः ॥ विप्रायभोजनंदत्त्वाकार्तिक्यांगोप्रदोभवेत् ॥८२॥ सवैष्णवंपदंयातिविष्णुव्रतमिदंस्मृतम् ॥ अयनादयनंयावद्वर्जयेत्पुष्पसर्पिषी॥८३॥ तदन्तेपुष्पमन्नानिघृतधेन्वासहैवतु ॥ दत्त्वाशिवपदंयातिविप्रायघृतपायसम् ॥८४॥ एतच्छीलव्रतंनामशीलारोग्यफलप्रदम्॥यावत्समंभवेद्यस्तुपञ्चदश्यांपयोव्रतः ॥८५ ॥ समान्तेश्राद्धकृद्दद्याद्गाश्चपञ्चपयस्विनीः ॥ वासांसिचपिशङ्गानिजलकुम्भयुतानिच ॥८६॥ सयातिवैष्णवंलोकंपितॄणांतारयेच्छतम् ॥कल्पान्तेराजराजेन्द्रपितृव्रतमिदंस्मृतम्॥८७॥ सन्ध्यादीपप्रदोयस्तुघृतैस्तैलंविवर्जयेत्॥ समान्तेदीपकंदद्याच्चक्रंशूलंचकाञ्चनम् ॥८८॥ वस्त्रयुग्मंचविप्रायसतेजस्वीभवेन्नरः ॥ रुद्रलोकमवाप्नोतिदीप्तिव्रतमिदंस्मृतम् ॥ ८९ ॥ कार्तिकादितृतीयायांप्राश्यगोमूत्रयावकम् ॥ नक्तंचरेदब्दमेकमब्दान्तेगोप्रदोभवेत् ॥ ९० ॥ गौरीलोकेवसेत्कल्पंततोराजाभवेदिह ॥ एतद्रुद्रव्रतंनामसदाकल्याणकारकम् ॥ ९१ ॥ वर्जयेच्चतुरोमासान्यस्तुगन्धानुलेपनम् ॥ शुक्तिगन्धाक्षतान्दद्याद्विप्रायसितवाससी ॥ ९२ ॥ वारुणंपदमाप्नोतिदृढव्रतमिदंस्मृतम् ॥ वैशाखेपुष्पलवणंवर्जयेदथगोप्रदः ॥ ९३ ॥ भूत्वाविष्णुपदेकल्पंस्थित्वाराजाभवेदिह ॥ एतच्छान्तिव्रतंनामकीतकामफलप्रदम् ॥ ९४ ॥ ब्रह्माण्डंकाञ्चनंकृत्वातिलराशिसमन्वितम् ॥ घृतेनान्यप्रदोभूत्वावह्निंसंतर्प्यसद्विजम् ॥ ९५ ॥ संपूज्यविप्रदाम्पत्यंमाल्यवस्त्रविभूषणैः ॥ शक्तितस्त्रिपलादूर्ध्वंविश्वात्माप्रीयतामिति ॥९६॥ पुण्येऽह्निदद्यादपरेब्रह्मयात्यपुनर्भवम् ॥एतद्ब्रह्मव्रतंनामनिर्वाणफलदंनृणाम् ॥९७॥ यश्चोभयमुखींदद्यात्प्रभूतसकलान्विताम् ॥ दिनंपयोव्रतंतिष्ठेत्सयातिपरमंपदम् ॥ ९८ ॥ एतद्वैसुव्रतंनामपुनरावृत्तिदुर्लभम् ॥ त्र्यहंपयोव्रतःस्थित्वाकाञ्चनंकल्पपादपम् ॥९९॥ पलादूर्ध्वंयथाशक्तितण्डुलप्रस्थसंयुतम् ॥ दत्त्वाब्रह्मपदंयातिभीमव्रतमिदंस्मृतम् ॥ १०० ॥ मासोपवासीयोदद्याद्धेनुंविप्रायशोभनाम् ॥ सवैष्णवपदंयातिभीमतव्रमिदंस्मृतम् ॥ १ ॥ दद्याद्विंशत्पलादूर्ध्वंमहींकृत्वातुकाञ्चनीम् ॥ दिनंपयोव्रतस्तिष्ठेद्रुद्रलोकेमहीयते ॥२॥ धनप्रदमिदंप्रोक्तंसप्तकल्पशतानुगम् ॥ माघेमास्यथचैत्रेवागुडधेनुप्रदोभवेत् ॥ ३ ॥ गुडव्रतंतृतीयायांगौरीलोकेमहीयते ॥ महाव्रतमिदंनामपरमानन्दकारकम् ॥ ४ ॥ पक्षोपवासीयोदद्याद्विप्रायकपिलाद्वयम् ॥ सब्रह्मलोकमाप्नोतिदेवासुरसुपूजितः ॥ ५ ॥ कल्पान्तेसर्वराजास्यात्प्रभाव्रतमिदंस्मृतम् ॥ वत्सरंत्वेकभक्ताशीसभक्ष्यजलकुम्भदः ॥ ६ ॥ शिवलोकेवसेत्कल्पंप्राप्तिव्रतमिदस्मृतम् ॥ नक्ताशीत्वष्टमीषुस्याद्वत्सरान्तेतुधेनुदः ॥७॥ पौरन्दरंपुरंयातिसुगतिव्रतमुच्यते ॥इन्धनंयोददेद्विप्रेवर्षादींश्चतुरस्त्वृतून् ८ ॥घृतधेनुप्रदोऽन्तेचसपरंब्रह्मगच्छति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वैश्वानरव्रतंनामसर्वपापप्रणाशनम्॥९॥एकादश्यांतुनक्ताशीयश्चक्रंविनिवेदयेत्॥कृत्वासमान्तेसौवर्णंविष्णोःपदमवाप्नुयात् ॥११०॥ एतत्कृष्णव्रतं
नामकल्पान्तेराज्यलाभकृत्॥पायसाशीसमान्तेतुदद्याद्विप्रायगोयुगम् ॥११॥ लक्ष्मीलोकेवसेत्कल्पमेतद्देवीव्रतंस्मृतम् ॥ सप्तम्यांनक्तभुग्दद्यात्समाप्ते
गांपयस्विनीम् ॥१२॥ सूर्यलोकमवाप्नोतिभानुव्रतमिदंस्मृतम् ॥ चतुर्थ्यांनक्तभुग्दद्याद्धेमन्तेगोयुगंतथा ॥१३॥ एतद्वैनायकंनामशिवलोकफलप्र
दम् ॥ महाफलानियस्त्यक्त्वा चातुर्मास्यंद्विजातये ॥ १४ ॥ हैमानिकार्तिकेदद्याद्धोमान्तेगोयुगंतथा ॥ एतत्सौरव्रतंनामसूर्यलोकफलप्रदम्॥१५॥
द्वादशद्वादशीर्यस्तुसमाप्योपोषणेनृप ॥ गोवस्त्रकाञ्चनैर्विप्रान्पूजयेच्छक्तितोनरः ॥ १६ ॥ परंपदमवाप्नोतिविष्णुव्रतमिदंस्मृतम् ॥ चतुर्दश्यांतुनक्ता
शीसमान्तेगोयुगप्रदः ॥ १७ ॥ शैवंपदमवाप्नोतित्रैयम्बकमिदंस्मृतम्॥सप्तरात्रोषितोदद्याद्घृतकुम्भंद्विजातये ॥१८॥ वरव्रतमिदंप्राहुर्ब्रह्मलोकफल
प्रदम् ॥ असौकाशींसमासाद्यधेनुंदत्तेपयस्विनीम् ॥१९॥ शक्रलोकेवसेत्कल्पमिदंमन्त्रव्रतंस्मृतम् ॥ मुखवासंपरित्यज्यसमांतेगोप्रदोभवेत्॥१२०॥
वारुणंलोकमाप्नोतिवारुणव्रतमुच्यते॥चान्द्रायणंचयःकुर्याद्धैमंचन्द्रंनिवेदयेत्॥२१॥चन्द्रव्रतमिदंप्रोक्तंचन्द्रलोकफलप्रदम्॥ज्येष्ठेपञ्चतपायोऽन्तेहेम
धेनुप्रदोदिवम् ॥२२॥ यात्यष्टमीचतुर्दश्योरुद्रव्रतमिदंस्मृतम्॥सकृद्विधानकंकुर्यात्तृतीयायांशिवालये ॥२३॥ समाप्तेधेनुदोयातिभवानीव्रतमुच्यते ॥
माघेनिश्यार्द्रवासाःस्यात्सप्तम्यांगोप्रदोभवेत् ॥२४॥ दिविकल्पंवसित्वेहराजास्यात्पवनव्रतम् ॥ त्रिरात्रोपोषितोदद्यात्फाल्गुन्यांभवनंशुभम् ॥२५॥
आदित्यलोकमाप्नोतिधामव्रतमिदंस्मृतम्॥त्रिसन्ध्यंपूज्यदाम्पत्यमुपवासीविभूषणैः ॥२६॥ददन्मोक्षमवाप्नोतिमोक्षव्रतमिदंस्मृतम्॥दत्त्वासितद्विती
यायामिन्दौलवणभाजनम् ॥२७॥ समाप्तेगोप्रदोयातिविप्रायशिवमन्दिरम् ॥ कांस्यंसवस्त्रंराजेन्द्रदक्षिणासहितंतथा ॥२८॥ समाप्तेगांचयोदद्यात्स
यातिशिवमन्दिरम् ॥ कल्पान्तेराजराजस्स्यात्सोमव्रतमिदंस्मृतम् ॥ २९ ॥ प्रतिपत्स्वेकभक्ताशीसमाप्तेचफलप्रदः ॥ वैश्वानरपदंयातिशिखिव्रत
मिदंस्मृतम् ॥१३०॥ हैमंपलद्वयादूर्ध्वंरथमश्वयुगान्वितम्॥दद्यात्कृतोपवासःसदिविकल्पशतंवसेत् ॥३१॥ तदन्तेराजराजस्स्यादश्वव्रतमिदंस्मृतम् ॥
तद्वद्धेमरथंदद्यात्करिभ्यांसंयुतंपुनः ॥३२॥ सत्यलोकेवसेत्कल्पंसहस्रमपिभूमिप ॥ भवेदिहागतोभूम्यांकरिव्रतमिदंस्मृतम् ॥ ३३ ॥ दशम्यामेक
भक्ताशीसमाप्तेदशधेनुदः ॥ दीपंचकाञ्चनंदद्याद्ब्रह्माण्डाधिपतिर्भवेत् ॥ ३४ ॥ एतद्विश्वव्रतंनाममहापातकनाशनम् ॥ कन्यादानंतु
कार्तिक्यांपुष्करेयःकरिष्यति ॥३५॥ एकविंशद्गुणोपेतोब्रह्मलोकंगमिष्यति ॥ कन्यादानात्परंदानंनैवचास्त्यधिकंक्वचित् ॥ ३६ ॥ पुष्करेतुवि
शेषणकार्तिक्यांतुविशेषतः ॥ विप्रायविधिवद्देयन्तेषांलोकोऽक्षयोभवेत् ॥ ३७॥ तिलपिष्टमयंकृत्वागजंरत्नसमन्वितम् ॥ विप्रायये प्रयच्छन्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जलमध्येस्थितानराः ॥३८॥ तेषांचैवाक्षयोलोकोभविताभूतसंप्लवम् ॥ यःपठेच्छ्रुणुयाद्वापिव्रतषष्टिमनुत्तमाम् ॥३९॥ मन्वन्तरशतंसोऽपिगन्धर्वाधि पतिर्भवेत् ॥ षष्टिव्रतंभारतपुण्यमेतत्तवोदितंविश्वजनीनमद्य ॥ १४० ॥ श्रोतुंयदीच्छातवराजराजश्शृणुद्विजातेःकरणीयमेतत् ॥ नैर्मल्यं भावशुद्धिश्चविनास्नानंनविद्यते ॥ ४१ ॥ तस्मान्मनोविशुद्ध्यर्थंस्नानमादौविधीयते ॥ अनुद्धृतैरुद्धृतैर्वाजलैःस्नानंसमाचरेत् ॥ ४२ ॥ तीर्थंप्रक ल्पयेद्विद्वान्मूलमन्त्रेणमन्त्रवित् ॥ नमोनारायणायेतिमूलमन्त्रउदाहृतः ॥ ४३ ॥ सदर्भपाणिर्विधिनाआचान्तःप्रयतःशुचिः ॥ चतुर्हस्त समायुक्तंचतुरस्रंसमन्ततः ॥ ४४ ॥ प्रकल्प्यावाहयेद्गंगामेभिर्मन्त्रैर्विचक्षणः ॥ विष्णोःपादप्रसूतासिवैष्णवीविष्णुदेवता ॥ ४५ ॥ त्राहिनस्त्वेन सस्तस्मादाजन्ममरणान्तिकात् ॥ तिस्रःकोट्योऽर्धकोटीचतीर्थानांवायुरब्रवीत ॥ ४६ ॥ दिविभुव्यंतरिक्षेचतानितसन्तिजाह्नवि ॥ नन्दि नीत्येवतेनामदेवेषुनलिनीतिच ॥ ४७ ॥ दक्षापृथ्वीचसुभगाविश्वकायाशिवासिता ॥ विद्याधरीसुप्रसन्नातथालोकप्रसादिनी ॥ ४८ ॥ क्षेमाचजाह्नवी चैवशान्ताशान्तिप्रदायिनी ॥ एतानिपुण्यनामानिस्नानकालेप्रकीर्त्तयेत् ॥ ४९ ॥ भवेत्सन्निहितातत्रगङ्गात्रिपथगामिनी ॥ सप्तवाराभि जप्तेनकरसंपुटयोजितम्॥१५०॥मूर्ध्निकुर्याज्जलंभूयस्त्रिचतुःपञ्चसप्तधा ॥ स्नानंकुर्यान्मृदातद्वदामन्त्र्यतुविधानतः ॥ ५१ ॥ अश्वक्रान्तेरथक्रान्तेवि ष्णुक्रान्तेवसुन्धरे ॥ मृत्तिकेहरमेपापंयन्मयादुष्कृतंकृतम् ॥ ५२ ॥ उद्धृतासिवराहेणकृष्णेनशतबाहुना ॥ नमस्तेसर्वलोकानांप्रभवारणि सुव्रते ॥५३॥ एवंस्नात्वाततःपश्चादाचम्यतुविधानतः ॥ उत्थायवाससीशुभ्रेशुद्धेतुपरिधायवै ॥ ५४ ॥ ततस्तुतर्पणंकुर्यात्त्रैलोक्याप्यायनायवै॥ ब्रह्माणंतर्पयेत्पूर्वंविष्णुंरुद्रंप्रजापतीन् ॥ ५५ ॥ देवायक्षास्तथानागागन्धर्वाप्सरसांगणाः ॥ क्रूरास्सर्पास्सुपर्णाश्चतरवोजम्भकादयः ॥ ५६ ॥ विद्याधराजलधरास्तथैवाकाशगामिनः ॥ निराधाराश्चयेजीवापापधर्मरताश्चये ॥ ५७ ॥ तषामाप्यायनायैतद्दीयतेसलिलंमया ॥ कृतोपवी तोदेवेभ्योनिवीतीचभवेत्ततः ॥५८॥ मनुष्यांस्तर्पयेद्भक्त्याऋषिपुत्रानृषींस्तथा ॥ सनकश्चसनन्दश्चतृतीयश्चसनातनः ॥५९॥ कपिलश्चासुरिश्चैववो ढुःपंचशिखस्तथा ॥ सर्वेतेतृप्तिमायान्तुमद्दत्तेनाम्बुनासदा ॥ १६० ॥ मरीचिमत्र्यंगिरसौपुलस्त्यंपुलहंक्रतुम् ॥ प्रचेतसंवसिष्ठंच भृगुंनारदमेवच ॥६१॥ देवब्रह्मऋषीन्सर्वांस्तर्पयेत्साक्षतोदकैः ॥ अपसव्यंततःकृत्वासव्यंजानुचभूतले ॥ ६२ ॥ अग्निष्वात्तांस्तथासौम्यान्हवि ष्मन्तस्तथोष्मपान् ॥ सुकालिनोबर्हिषदस्तथाचैवाज्यपान्पुनः ॥ ६३ ॥ संतर्पयेत्पितॄन्भक्त्यासतिलोदकचन्दनैः ॥ सदर्भपाणिर्विधिनापितॄ न्स्वांस्तर्पयेत्ततः ॥६४॥ पित्रादीन्नामगोत्रेणतथामातामहानपि ॥ संतर्प्यविधिवद्भक्त्याइमंमन्त्रमुदीरयेत् ॥ ६५ ॥ येऽबान्धवाबान्धवायेयेऽन्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जन्मनिबान्धवाः ॥ तेतृप्तिमखिलायान्तुयेऽप्यस्मत्तोयकाङ्क्षिणः ॥६६॥आचम्यविधिनासम्यगालिखेत्पद्ममग्रतः॥ साक्षताद्भिस्सपुष्पाभिःसति
लागरुचन्दनैः॥६७॥अर्घ्यंदद्यात्प्रयत्नेनसूर्यनामानुकीर्तनैः ॥ नमस्तेविश्वरूपायनमस्तेविष्णुरूपिणे ॥६८॥ सर्वदेवनमस्तेऽस्तुप्रसीदममभास्कर ॥
दिवाकरनमस्तेऽस्तुप्रभाकरनमोऽस्तुते॥६९॥एवंसूर्यंनमस्कृत्यत्रिःकृत्वाचप्रदक्षिणम्॥द्विजंगांकाञ्चनंचैवदृष्ट्वास्पृष्ट्वागृहंव्रजेत्॥१७०॥ स्वगेहस्थांततः
पुण्यांप्रतिमांचापिपूजयेत्॥ भोजनंचततःपश्चाद्द्विजपूर्वंचकारयेत्॥७१॥अनेनविधिनासर्वऋषयःसिद्धिमागताः ॥१७२॥इतिश्रीपाद्मपुराणेप्रथमेसृष्टि
खण्डेस्नानविधिर्नामविंशोऽध्यायः ॥२०॥ पुलस्त्यउवाच ॥ आसीत्पुराबृहत्कल्पेधर्ममूर्तिर्जनाधिपः॥सुहृच्छक्रस्यनिहतायेनदैत्यास्सहस्रशः॥१॥
सोमसूर्यादयोयस्यतेजसाविगतप्रभाः ॥ भवन्तिशतशोयेनदानवाश्चपराजिताः ॥ २ ॥ यथेच्छरूपधारीचमानुषोऽप्यपराजितः॥तस्यभानुमतीभा
र्यासतीत्रैलोक्यसुन्दरी ॥ ३॥लक्ष्मीसदृशरूपेणनिर्जितामरसुन्दरी ॥ राज्ञस्तस्याग्रमहिषीप्राणेभ्योऽपिगरीयसी॥४॥दशनारीसहस्राणांमध्येश्रीरिवरा
जते ॥ नृपकोटिसहस्रेणनकदाचित्समुच्यते ॥ ५ ॥ कदाचिदास्थानगतःपप्रच्छस्वपुरोहितम् ॥ विस्मयेनावृतोनत्वावसिष्ठमृषिसत्तमम् ॥६॥ भग
वन्केनधर्मेणममलक्ष्मीरनुत्तमा ॥ कस्माच्चविपुलंतेजोमच्छरीरेसदोत्तमम् ॥ ७ ॥ वसिष्ठउवाच ॥ पुरालीलावतीनामवेश्याशिवपरायणा ॥तयादत्त
श्चतुर्दश्यांपुष्करेलवणाचलः॥८॥ हेमवृक्षामरैःसार्द्धंयथावद्विधिपूर्वकम्॥शूद्रःसुवर्णकारश्चकर्मकृत्सोऽभवत्तदा ॥९॥ भृत्योलीलावतीगेहेतेनहैमीर्विनि
र्मिताः ॥ तरवोहेमपुष्पाश्चश्रद्धायुक्तेनपार्थिव ॥ १० ॥ अतिरूपेणसंपन्नाघटितास्तेसुशोभनाः ॥ धर्मकार्यमितिज्ञात्वानगृहीतंचवेतनम् ॥ ११ ॥
उज्ज्वालिताश्चतेपत्न्यासुवर्णमयपादपाः ॥ लीलावतीगृहेचापिपरिचर्याचपार्थिव ॥ १२ ॥ कृतातताभ्यामशाठ्येनद्विजशुश्रूषणादिका ॥ साचली
लावतीवेश्याकालेनमहतानघ ॥ १३ ॥ सर्वपापविनिर्मुक्ताजगामशिवमन्दिरम् ॥ योऽसोसुवर्णकारश्चदरिद्रोऽप्यतिसत्त्ववान् ॥ १४ ॥ नमूल्यमा
दाद्वेश्यातःसभवानिहसाम्प्रतम् ॥ सप्तद्वीपपतिर्जातःसूर्यायुतसमप्रभः ॥ १५ ॥ ययासुवर्णकारस्यतरवोहेमनिर्मिताः॥सम्यगुज्ज्वलिताःपत्न्यासेयं
भानुमतीतव ॥१६॥ तस्मान्नृलोकेष्वपराजितस्त्वमारोग्यसौभाग्ययुताचलक्ष्मीः ॥ तस्मात्त्वमप्यत्रविधानपूर्वंधान्याचलादीन्नृपतेकुरुष्व ॥ १७ ॥
पुलस्त्यउवाच ॥ तथेतिसंपूज्यसुधर्ममूर्तिर्वचोवसिष्ठस्यददौचसर्वान् ॥ धान्याचलादीन्विधिनास्मरारेर्लोकंगतोऽसौसुरपूज्यमानः ॥१८॥ पश्येद्य
दीमानुपनीयमानान्स्पृशेन्मनुष्यैरिहदीयमानान् ॥ शृणोतिभक्त्याथमतिंददातिविकल्मषःसोऽपिदिवंप्रयाति ॥१९॥ दुःस्वप्नप्रशममुपैतिपठ्यमानैः
शैलेन्द्रैर्भवभयभेदनैर्मनुष्यः॥यःकुर्यात्किमुनृपपुङ्गवेहसम्यक्शान्तात्मासकलगिरीन्द्रसंप्रदानम् ॥२०॥भीष्मउवाच॥ किमभीष्टवियोगशोकसंघान

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लमुद्धर्तुमुपोषणंव्रतंवा ॥ विभवध्रुवकारिभूतलेऽस्मिन्भवभीतेरपिसूदनंचपुंसः ॥२१॥ पुलस्त्यउवाच ॥ परिपृष्टमिदंजगत्प्रियंतेविबुधानामपिदुर्ल
भंमहत्त्वात् ॥ तवभक्तिमतस्तथापिवक्ष्येव्रतमिन्द्रासुरमानवेषुगुह्यम् ॥२२॥ पुण्यमाश्वयुजेमासिविशोकद्वादशीव्रतम् ॥ दशम्यांलघुभुग्विद्वान्प्रारभे
तयमेनतु ॥२३॥ उदङ्मुखःप्राङ्मुखोवादन्तधावनपूर्वकम्॥ एकादश्यांनिराहारःसम्यगभ्यर्च्यकेशवम् ॥२४॥ श्रियंचाभ्यर्च्यविधिवद्भोक्ष्येऽहंचा
परेऽहनि ॥ एवंनियमकृत्सुप्त्वाप्रातरुत्थायमानवः ॥२५॥ स्नानंसर्वौषधैःकुर्यात्पञ्चगव्यजलेनतु ॥ शुभ्रमाल्याम्बरधरःपूजयेच्छ्रीशमुत्पलैः ॥२६॥
विशोकायनमःपादौजंघेचवरदायवै॥श्रीशायजानुनीतद्वदूरूचजलशायिने॥२७॥कन्दर्पायनमोगुह्यंमाधवायनमःकटिम् ॥ दामोदरायेत्युदरंपार्श्वेच
विपुलायवै ॥ २८ ॥ नाभिंचपद्मनाभायहृदयंमन्मथायवै ॥ श्रीधरायविभोर्वक्षःकरौमधुभिदेनमः ॥२९ ॥वैकुण्ठायनमःकण्ठमास्यंपद्ममुखायवै॥
नासामशोकनिधयेवासुदेवायचाक्षिणी ॥३०॥ ललाटंवामनायेतिहरयेचपुनर्भ्रुवौ ॥ अलकंमाधवायेतिकिरीटंविश्वरूपिणे ॥३१॥ नमःसर्वात्मनेत
द्वच्छिरइत्यभिपूजयेत् ॥ एवंसम्पूज्यगोविन्दंधूपमाल्यानुलेपनैः ॥३२॥ ततस्तुमण्डलंकृत्वास्थण्डिलंकारयेन्मृदा ॥ चतुरस्रंसमन्ताच्चारत्निमात्रमु
दक्प्लवम् ॥३३॥ श्लक्ष्णंहृद्यंचपरितोवप्रत्रयसमावृतम् ॥ त्रिरङ्गुलोच्छ्रितावप्रास्तद्विस्तारोद्विरङ्गुलः ॥ ३४ ॥ स्थण्डिलस्योपरिष्टात्तुभित्तिरष्टांगु
लाभवेत् ॥ नदीवालुकयासूर्येलक्ष्म्याःप्रतिकृतिंन्यसेत् ॥३५॥ स्थण्डिलेसूर्यमध्यस्थलक्ष्मीमभ्यर्चयेद्बुधः॥ नमोदेव्यैनमःशान्त्यैनमोलक्ष्म्यैनमः
श्रियै॥३६ ॥ नमस्तुष्ट्यैनमःपुष्ट्यैसृष्ट्यैहृष्ट्यैनमोनमः॥विशोकादुःखनाशायविशोकावरदास्तुते ॥३७॥ विशोकामेऽस्तुसंपत्त्यैविशोकासर्वसिद्धये ॥
ततःशुभ्राम्बरैःसूर्यंवेष्ट्यसम्पूजयेत्फलैः ॥ ३८ ॥ भक्ष्यैर्नानाविधस्तद्वत्सुवर्णकमलेनच ॥ राजतीषुचपात्रीषुन्यसेद्दर्भोदकंबुधः ॥ ३९ ॥ ततस्तु
नृत्यगीतानिकारयेत्सकलांनिशाम् ॥ यामत्रयेव्यतीतेतुततउत्थायमानवः ॥४०॥ अभिगम्यचविप्राणांमिथुनानिचपूजयेत् ॥ शक्तितस्त्रीणिचैकंवा
वस्त्रमाल्यानुलेपनैः ॥४१॥ शयनस्थानिपूज्यानिनमोऽस्तुजलशायिने ॥ ततस्तुगीतवाद्येनरात्र्यांजागरणेकृते ॥ ४२ ॥ प्रभातेचततःस्नानंकृत्वा
दाम्पत्यमर्चयेत् ॥ भोजयेच्चयथाशक्तिवित्तशाठ्येनवर्जितः ॥४३॥ भक्त्याश्रुत्वापुराणानितद्दिनंचातिवाहयेत् ॥ अनेनविधिनासर्वंमासिमासिस
माचरेत्॥४४ ॥व्रतान्तेशयनंदद्याद्गुडधेनुसमन्वितम् ॥ सोपधानंसविश्रामंस्वास्तरावरणंशुभम् ॥४५॥ यथालक्ष्मीर्नरेशत्वांनपरित्यज्यगच्छति ॥
तथासुरूपतारोग्यमशोकंचास्तुमेसदा ॥४६॥ यथादेवेनरहितानलक्ष्मीर्जायतेक्वचित् ॥ तथाविशोकतामेऽस्तुभक्तिरग्र्याचकेशवे ॥ ४७ ॥ मन्त्रेणा

१ 'यज्ञ' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेनशयनंगुडधेनुसमन्वितम्॥ सूर्यश्चलक्ष्म्यासहितोदातव्योभूतिमिच्छता॥४८॥उत्पलंकरवीरंवाप्यम्लानंचैवकुङ्कुमम् ॥ केतकंसिन्धुवारंचमल्लिका गन्धपाटला ॥४९॥ कदम्बंकुब्जकंजातीशस्तान्येतानिसर्वदा ॥ भीष्मउवाच ॥ गुडधेनुविधानंचसमाचक्ष्वमुनीश्वर ॥५०॥ किंरूपाकेनमन्त्रेणदा तव्यातदिहोच्यताम्॥ पुलस्त्यउवाच ॥ गुडधेनुविधानस्ययद्रूपमिहयत्फलम् ॥५१॥ तदिदानींप्रवक्ष्यामिसर्वपापविनाशनम्॥ कृष्णाजिनंचतुर्हस्तं प्राग्ग्रीवंविन्यसेद्भुवि ॥५२॥ गोमयेनानुलिप्तायांदर्भानास्तीर्यसर्वतः ॥ लघ्वेणकाजिनंतद्वद्वत्संचपरिकल्पयेत् ॥५३॥ प्राङ्मुखींकल्पयेद्धेनुंमृदावा गांसवत्सकाम् ॥ उत्तमागुडधेनुःस्यात्सदाभारचतुष्टयम् ॥ ५४ ॥ वत्संभारेणकुर्वीतभाराभ्यांमध्यमास्मृता ॥ अर्द्धभारेणवत्सस्स्यात्कनिष्ठाभारकेण तु ॥५५॥ चतुर्थांशेनवत्सःस्याद्गृहवित्तानुसारतः॥ धेनुवत्सौकृतौचोभौसितसूक्ष्माम्बरावृतौ ॥५६॥शुक्तिकर्णाविक्षुपादौशुचिमुक्ताफलेक्षणौ॥सित सूत्रसिराजालौसितकम्बलकम्बलौ ॥ ५७॥ ताम्रगण्डकपृष्ठौद्वौसितचामरलोमकौ ॥ विद्रुमभ्रूयुगावेतौनवनीतस्तनान्वितौ ॥५८॥ काञ्चनाक्षियुगो पेताविन्द्रनीलकनीनिकौ ॥ क्षौमपुच्छौकांस्यदोहौशुभ्रातिकमनीयकौ ॥ ५९ ॥ सुवर्णशृङ्गाभरणौराजताढ्यखुरौचतौ ॥ नानाफलसमायुक्तौघ्राण गन्धकरण्डकौ ॥ ६० ॥ इत्येवंरचयित्वातुधूपदीपैस्तथार्चयेत् ॥ यालक्ष्मीस्सर्वभूतानांयाचदेवेष्ववस्थिता ॥ ६१ ॥ धेनुरूपेणसादेवीममपापंव्य पोहतु ॥ विष्णोर्वक्षसियालक्ष्मीःस्वाहायाचविभावसौ ॥६२॥ चन्द्रार्कशक्रशक्तिर्यासाधेनुर्वरदास्तुमे ॥ स्वधात्वंपितृमुख्यानांस्वाहायज्ञभुजांयतः ॥ ६३ ॥ सर्वपापहराधेनुस्तस्माद्भूतिंप्रयच्छमे ॥ एवमामन्त्र्यतांधेनुंब्राह्मणायनिवेदयेत् ॥ ६४ ॥ विधानमेतद्धेनूनांसर्वासामपिपठ्यते ॥ यास्तु पापविनाशिन्यःपठ्यन्तेदशधेनवः ॥६५॥ तासांस्वरूपंवक्ष्यामिनामानिचनराधिप॥प्रथमागुडधेनुःस्याद्घृतधेनुरथापरा ॥६६॥ तिलधेनुस्तृतीया चचतुर्थीजलनामिका॥क्षीरधेनुःपञ्चमीचमधुधेनुस्तथापरा ॥६७॥ सप्तमीशर्कराधेनुरष्टमीदधिकल्पिता॥रसधेनुश्चनवमीदशमीस्यात्स्वरूपतः॥६८॥ कुम्भास्स्यूरसधेनूनामितरासांस्वराशयः॥सुवर्णधेनुंचाप्यत्रकेचिदिच्छन्तिमानवाः ॥६९॥ नवनीतेनतैलैश्चतथान्येऽपिमहर्षयः॥एतदेवविधानंस्यात्त एवोपस्करास्स्मृताः ॥७०॥ मन्त्रवाहनसंयुक्ताःसदापर्वणिपर्वणि ॥ यथाश्राद्धंप्रदातव्याभुक्तिमुक्तिफलप्रदाः ॥७१॥ गुडधेनुप्रसङ्गेनसर्वास्तवमयो दिताः ॥ अशेषयज्ञफलदाःसर्वपापहराःशुभाः ॥ ७२ ॥ व्रतानामुत्तमंयस्माद्विशोकद्वादशीव्रतम् ॥ तदङ्गत्वेनचैवात्रगुडधेनुःप्रशस्यते ॥ ७३ ॥ अयनेविषुवेपुण्येव्यतीपातेतथापुनः ॥ गुडधेन्वादयोदेयाउपरागादिपर्वसु ॥ ७४ ॥ विशोकद्वादशीचैषासर्वपापहराशुभा ॥ यामुपोष्यनरोयातितत द्विष्णोःपरमंपदम् ॥ ७५ ॥ इहलोकेससौभाग्यमायुरारोग्यमेवच ॥ वैष्णवंपुरमाप्नोतिमरणेस्मरणंहरेः ॥ ७६ ॥ नवार्बुदसहस्राणिदशचाष्टौचधर्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वित् ॥ नशोकदुःखदौर्गत्यंतस्यसञ्जयतेनृप ॥ ७७ ॥ नारीवाकुरुतेयातुविशोकद्वादशीमिमाम् ॥ नृत्यगीतपरानित्यंसापितत्फलमाप्नुयात् ॥ यस्मादग्रेहरेर्नृत्यमनन्तंगीतवादनम् ॥ ७८ ॥ इतिपठतियइत्थंयःशृणोतीहसम्यङ्मधुमुरनरकारेरर्चनंवाथपश्येत् ॥ मतिमपिचजनानांयोददातीन्द्रलोकेसवसतिविबुधौघैःपूज्यतेकल्पमेकम् ॥ ७९ ॥ भीष्मउवाच ॥ भगवञ्श्रोतुमिच्छामिदानमाहात्म्यमुत्तमम् ॥ यदक्षयंपरेलोकेदेवर्षिगणपूजितम् ॥८०॥ पुलस्त्यउवाच ॥ मेरोःप्रदानंवक्ष्यामिदशधानृपसत्तम ॥ ८१॥ यत्प्रदातानन्तलोकान्प्राप्नोतिसुरपूजितान् ॥ पुराणेषुचवेदेषुयज्ञेष्वायतनेषुच ॥ ८२ ॥ नतत्फलमधीतेषुकृतेष्विहयदश्नुते ॥ तस्माद्दानंप्रवक्ष्यामिपर्वतानामनुक्रमात् ॥ ८३ ॥ प्रथमोधान्यशैलःस्याद्द्वितीयोलवणाचलः ॥ गुडाचलस्तृतीयस्तुचतुर्थोहेमपर्वतः ॥ ८४ ॥ पञ्चमस्तिलशैलस्स्यात्षष्ठःकार्प्पासपर्वतः ॥ सप्तमोघृतशैलःस्याद्रत्नशैलस्तथाष्टमः ॥ ८५ ॥ राजतोनवमस्तद्वद्दशमःशर्कराचलः ॥ वक्ष्येविधानमेतेषांयथावदनुपूर्वशः ॥८६॥ अयनेविषुवेपुण्येव्यतीपातेदिनक्षये ॥ शुक्लपक्षेतृतीयायामुपरागेशशिक्षये ॥ ८७ ॥ विवाहोत्सवयज्ञेषुद्वादश्यामथवापुनः ॥ शुक्लायांपञ्चदश्यांवापुण्यर्क्षेवाविधानतः ॥ ८८ ॥ धान्यशैलादयोदेयाःकार्तिक्यांज्येष्ठपुष्करे ॥ तीर्थेष्वायतनेवापिगोष्ठेवाभवनाङ्गणे ॥ ८९ ॥ मण्डपंकारयेद्भक्त्याचतुरस्रमुदङ्मुखम् ॥ प्रागुदक्प्रवणंपुण्यंप्राङ्मुखंवाविधानतः ॥ ९० ॥ गोमयेनानुलिप्तायांभूमावास्तीर्यवैकुशान् ॥ तन्मध्येपर्वतंकुर्याद्विष्कम्भंपर्वतान्वितम् ॥९१॥ धान्यद्रोणसहस्रेणभवेद्गिरिरिहोत्तमः ॥ मध्यमःपञ्चशतकैःकनिष्ठश्चत्रिभिःशतैः ॥ ९२ ॥ मेरुर्महाव्रीहिमयस्तुमध्येसुवर्णवृक्षत्रयसंयुतःस्यात ॥ मूर्द्धन्यवस्थानमथाम्बरेणकार्यंत्वनेकंचपुनर्द्विजाग्र्यैः ॥९३॥ चत्वारिशृङ्गाणिचराजतानिनितम्बभागाअपिराजतास्स्युः ॥ पूर्वेणमुक्ताफलवज्रयुक्तोयाम्येनगोमेदकपद्मरागैः ॥९४ ॥ पश्चाच्चगारुत्मतनीलरत्नैःसौम्येनवैडूर्यकपुष्परागैः ॥ श्रीखण्डखण्डैरभितःप्रवालैर्लतान्वितोमौक्तिकप्रस्तराढ्यः ॥९५ ॥ ब्रह्माथविष्णुर्भगवान्पुरारिर्दिवाकरोऽप्यत्रहिरण्मयःस्यात् ॥ तथेक्षुवंशावृतकन्दरस्तुघृतोदकप्रस्रवणोदिशासु ॥९६॥ शुभ्राम्बराण्यम्बुधरावलिःस्यात्पूर्वेणपीतानिचदक्षिणेन ॥ वासांसिपश्चादथकर्बुराणिरक्तानिचैवोत्तरतोघनानि ॥ ९७ ॥ रौप्यान्महेन्द्रप्रमुखांस्तथाऽष्टौसंस्थाप्यलोकाधिपतीन्क्रमेण ॥ नानावनालीचसमन्ततःस्यान्मनोरमम्माल्यविलेपनंच ॥९८ ॥ वितानकंचोपरिपञ्चवर्णमम्लानपुष्पाभरणंसितंच ॥ इत्थंनिवेश्यामरशैलमग्र्यंमेरोस्तुविष्कम्भगिरीन्क्रमेण ॥ ९९ ॥ तुरीयभागेनचतुर्दिशंचसंस्थापयेत्पुष्पविलेपनाढ्यम् ॥ पूर्वेणमन्दरमनेकफलैश्चयुक्तंकामेनकाञ्चनमयेनविराजमानम् ॥१००॥ याम्येनगन्धमदनोविनिवेशनीयोगोधूमसंचयमयःकलधौतवांश्च ॥ हैमेनयज्ञपतिनाघृतमानसेनवस्त्रेणराजतवनैश्चससंयुतःस्यात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पश्चात्तिलाचलमनेकसुगन्धपुष्पसौवर्णपिप्पलहिरण्मयहंसयुक्तम् ॥ आकारयेद्रजतपुष्पवनेनतद्वद्वस्त्रान्वितंदधिसितोदसरस्तथाग्रे ॥ २ ॥
॥ १ ॥ पश्चात्तिलाचलमनेकसुगन्धपुष्पसौवर्णपिप्पलहिरण्मयहंसयुक्तम् ॥ आकारयेद्रजतपुष्पवनेनतद्वद्वस्त्रान्वितंदधिसितोदसरस्तथाग्रे ॥ २ ॥

CC-0. In Public Domain. Digitization by eGangotri

द्रह्मादीनांचसर्वदा ॥ २८ ॥ तद्वद्धेममयंसर्वलोकपालनिवशनम् ॥ सरांसिवनवृक्षादितद्वच्चान्यान्निवेशयेत् ॥ २९ ॥ कुर्याज्जागरमत्रापिदानमन्त्रा
न्निबोधत ॥ सौभाग्यरससंयुक्तोयतोऽयंलवणेरसः ॥ १३० ॥ तदात्मकत्वेनचमांपाह्यापन्नंनगोत्तम ॥ यस्मादन्येरसाःसर्वेनोत्कटालवणंविना ॥
॥ ३१ ॥ प्रियश्चशिवयोर्नित्यंतस्माच्छान्तिप्रदोभव ॥ विष्णुदेहसमुद्भूतोयस्मादारोग्यवर्धनः ॥ ३२ ॥ तस्मात्पर्वतरूपेणपाहिसंसारसागरात् ॥
अनेनविधिनायस्तुदद्याल्लवणपर्वतम् ॥ ३३ ॥ उमालोकेवसेत्कल्पंततोयातिपरांगतिम् ॥ अतःपरंप्रवक्ष्यामिगुडपर्वतमुत्तमम् ॥ ३४ ॥ यत्प्र
दानान्नरःस्वर्गंप्राप्नोतिसुरपूजितः ॥ उत्तमोदशभिर्भारैर्मध्यमःपञ्चभिर्मतः ॥ ३५ ॥ त्रिभिर्भारैःकनिष्ठःस्यात्तदर्धेनाल्पवित्तवान् ॥ तद्वदामन्त्र
णंपूजांहैमवृक्षान्सुरार्चनम् ॥ ३६ ॥ विष्कम्भपर्वतांस्तद्वत्सरांसिवनदेवताः ॥ होमंजागरणंतद्वल्लोकपालाधिवासनम् ॥३७ ॥ धान्यपर्वतवत्कुर्यादि
ममन्त्रमुदीरयेत् ॥ यथादेवेषुविश्वात्माप्रवरोऽयंजनार्दनः॥३८॥ सामवेदस्तुवेदानांमहादेवस्तुयोगिनाम् ॥ प्रणवःसर्वमन्त्राणांनारीणांपार्वतीयथा ॥
॥ ३९॥ तथारसानांप्रवरःसदैवेक्षुरसोमतः ॥ ममतस्मात्परांलक्ष्मींददातुगुडपर्वतः॥ १४०॥ यस्मात्सौभाग्यदायिन्याधामत्वंगुडपर्वत॥ निर्मितश्चा
दिपार्वत्यातस्मान्मांपाहिसर्वदा ॥ ४१ ॥अनेनविधिनायस्तुदद्याद्गुडमयंगिरिम् ॥ सम्पूज्यमानोगन्धर्वैर्गौरीलोकेमहीयते ॥ ४२ ॥ पुनःकल्पशता
न्तेचसप्तद्वीपाधिपोभवेत् ॥ आयुरारोग्यसंपन्नःशत्रुभिश्चापराजितः ॥ ४३ ॥ अथपापहरंवक्ष्येसुवर्णाचलमुत्तमम् ॥ यस्यप्रदानाद्भवनंवैरिञ्चंयान्ति
मानवाः ॥ ४४ ॥ उत्तमःपलसाहस्रोमध्यमःपञ्चभिःशतैः ॥ तदर्धेनाधमस्तद्वदल्पवित्तोऽपिमानवः ॥ ४५ ॥ दद्यादेकपलादूर्ध्वंयथाशक्ति
विमत्सरः ॥ धान्यपर्वतवत्सर्वंविदध्याद्राजसत्तम ॥ ४६ ॥ विष्कम्भशैलांस्तद्वच्चऋत्विग्भ्यःप्रतिपादयेत् ॥ नमस्तेसर्वबीजायब्रह्मगर्भायवैनमः ॥
॥ ४७ ॥ यस्मादनन्तफलदस्तस्मात्पाहिशिलोच्चय ॥ यस्मादग्नेरपत्यंत्वंयस्मात्पुत्रोजगत्पतेः ॥ ४८ ॥ हेमपर्वतरूपेणतस्मात्पाहिनगोत्तम ॥
अनेनविधिनायस्तुदद्यात्कनकपर्वतम् ॥ ४९ ॥ सयातिपरमंब्रह्मलोकमानन्दकारकम् ॥ तत्रकल्पशतंतिष्ठेत्ततोयातिपरांगतिम् ॥ १५० ॥ अ
थातःसंप्रवक्ष्यामितिलशैलंविधानतः ॥ यत्प्रदानान्नरोयातिविष्णुलोकमनुत्तमम् ॥ ५१ ॥ उत्तमोदशभिर्द्रोणैर्मध्यमःपञ्चभिःस्मृतः ॥ त्रिभिः
कनिष्ठोराजेन्द्रतिलशैलःप्रकीर्तितः ॥ ५२ ॥ पूर्ववच्चापरंसर्वंविष्कम्भपर्वतादिकम् ॥ दानमन्त्रंप्रवक्ष्यामियथाचनृपपुङ्गव ॥ ५३ ॥ यस्मा
न्मधुवधेविष्णोर्देहस्वेदसमुद्भवाः ॥ तिलाःकुशाश्चमापाश्चतस्माच्छान्तिप्रदोभव ॥ ५४ ॥ हव्यकव्येषुयस्माच्चतिलाएवहिरक्षणम् ॥ लक्ष्मींचकुरु
शैलेन्द्रतिलाचलनमोऽस्तुते ॥ ५५ ॥ इत्यामन्त्र्यचयोदद्यात्तिलाचलमनुत्तमम् ॥ सवैष्णवंपदंयातिपुनरावृत्तिदुर्लभम् ॥ ५६ ॥ कार्पासपर्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथैवविंशद्भारैरिहोत्तमः ॥ दशभिर्मध्यमःप्रोक्तःकनिष्ठःपञ्चभिर्मतः ॥ ५७ ॥ भारेणाल्पधनोदद्याद्वित्तशाठ्यविवार्जितः ॥ धान्यपर्वतवत्सर्वमा
सार्धंराजसत्तम ॥ ५८ ॥ प्रभातायांचशर्वर्यांदद्यादिदमुदीरयेत् ॥ त्वमेवावरणंयस्माल्लोकानामिहसर्वदा ॥ ५९ ॥ कार्पासाद्रेनमस्त
स्मादघौघध्वंसनोभव ॥ इतिकार्पासशैलेन्द्रंयोदद्याच्छर्वसंनिधौ ॥ १६० ॥ रुद्रलोकेवसेत्कल्पंततोराजाभवेदिह ॥ अथातःसंप्रवक्ष्यामिघृता
चलमनुत्तमम् ॥ ६१ ॥ तेजोमयंघृतंपुण्यंमहापातकनाशनम् ॥ विंशत्याघतकुम्भानामुत्तमःस्याद्घृताचलः ॥ ६२ ॥ दशभिर्मध्य
मःप्रोक्तःपञ्चभिस्त्वधमःस्मृतः ॥ अल्पवित्तोऽपिकुर्वीतद्वाभ्यामिहविधानतः ॥ ६३ ॥ विष्कम्भपर्वतांस्तद्वच्चतुर्भागेनकल्पयेत् ॥ शा
लितण्डुलपात्राणिकुम्भोपरिनिवेशयेत् ॥ ६४ ॥ कारयेत्संहतानुच्चान्यथाशोभंविधानतः ॥ वेष्टयेच्छुक्लवासोभिरिक्षुदण्डफलादिकैः ॥ ६५ ॥
धान्यपर्वतवत्सर्वंविधानमिहपठ्यते ॥ अधिवासनपूर्वंहितद्वद्धोमसुरार्चनम् ॥ ६६ ॥ प्रभातायांचशर्वर्यांगुरवेविनिवेदयेत् ॥ विष्कम्भपर्वतांस्तद्व
द्दृत्विग्भ्यःशान्तमानसः ॥६७॥ संयोगाद्घृतमुत्पन्नंयस्मादमृततेजसि ॥ तस्माद्घृतार्चिर्विश्वात्माप्रीयतामत्रशंकरः ॥ ६८ ॥ यस्मात्तेजोमयंब्रह्मघृ
तेचैवव्यवस्थितम् ॥ घतपर्वतरूपेणतस्मान्नःपाहिभूधर ॥६९॥ अनेनविधिनादद्याद्घृताचलमनुत्तमम् ॥ महापातकयुक्तोऽपिलोकमायातिशाम्भव
म् ॥ १७० ॥ हंससारसयुक्तेनकिङ्किणीजालमालिना ॥ विमानेनाप्सरोभिश्चसिद्धविद्याधरैर्वृतः ॥ ७१॥ विचरेत्पितृभिःसार्धंयावदाभूतसम्प्लवम्॥
अथातःसंप्रवक्ष्यामिरत्नाचलमनुत्तमम् ॥ ७२ ॥ मुक्ताफलसहस्रेणपर्वतस्स्यादनुत्तमः ॥ मध्यमःपञ्चशतिकस्त्रिशतेनाधमःस्मृतः ॥ ७३ ॥ चतुर्था
शेनविष्कम्भपर्वताःस्युःसमन्ततः॥पूर्वेणवज्रगोमेदैर्दक्षिणेनेन्द्रनीलकैः ॥७४॥ पुष्परागैर्युतःकार्योविद्वद्भिर्गन्धमादनः ॥ वैडूर्यविद्रुमैःपश्चात्संमिश्रो
विपुलाचलः ॥ ७५ ॥ पद्मरागैःससौवर्णिरुत्तरेणापिविन्यसेत् ॥ धान्यपर्वतवत्सर्वमत्रापिपरिकल्पयेत् ॥ ७६ ॥ तद्वदावाहनंकृत्वावृक्षान्देवांश्च
काञ्चनान् ॥ पूजयेत्पुष्पगन्धाद्यैःप्रभातेस्याद्विसर्जनम् ॥ ७७ ॥ पूर्ववद्गुरुऋत्विग्भ्यइमंमन्त्रमुदीरयेत् ॥ यथादेवगणाःसर्वेसर्वरत्नेष्ववस्थिताः ॥
॥ ७८ ॥ त्वंचरत्नमयोनित्यमतःपाहिमहाचल ॥ यस्माद्रत्नप्रदानेनतुष्टिमेतिजनार्दनः ॥ ७९॥ पूजामन्त्रप्रसादेनतस्मान्नःपाहिपर्वत ॥ अनेनविधि
नायस्तुदद्याद्रत्नमयंगिरिम् ॥ १८० ॥ सयातिवैष्णवंलोकममरेश्वरपूजितः ॥ यावत्कल्पशतंसाग्रंवसेत्तत्रनराधिप ॥ ८१ ॥ रूपारोग्यगुणोपेतःसप्त
द्वीपाधिपोभवेत् ॥ ब्रह्महत्यादिकंकिञ्चिदत्रामुत्राथवाकृतम् ॥ ८२ ॥ तत्सर्वंनाशमायातिगिरिर्वज्राहतोयथा ॥ अथातःसंप्रवक्ष्यामिरौप्याचल
मनुत्तमम् ॥ ८३ ॥ यत्प्रदानान्नरोयातिसोमलोकंनरोत्तम ॥ दशभिःपलसाहस्रैरुत्तमोरजताचलः ॥ ८४ ॥ पञ्चभिर्मध्यमःप्रोक्तस्तदर्धे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाधमःस्मृतः ॥ अशक्तोविंशतेरूर्द्धंकारयेच्छक्तितःसदा ॥ ८५ ॥ विष्कंभपर्वतांस्तद्वत्तुरीयांशेनकल्पयेत् ॥ पूर्ववद्राजतान्कुर्यान्मन्दरादी
न्विधानतः ॥ ८६ ॥ कलधौतमयांस्तद्वल्लोकेशान्कारयेद्बुधः ॥ ब्रह्मविष्णवर्कवान्कार्योनितम्बोऽत्रहिरण्मयः ॥ ८७ ॥ राजतंस्यात्तदन्ये
षांपर्वतानांचकाञ्चनम् ॥ शेषंचपूर्ववत्कुर्याद्धोमजागरणादिकम् ॥ ८८ ॥ दद्यात्तद्वत्प्रभातेतुगुरवेरौप्यपर्वतम् ॥ विष्कंभशैलानृत्विग्भ्यः
पूज्यवस्त्रविभूषणैः ॥ ८९ ॥ इमंमन्त्रंपठन्दद्याद्दर्भपाणिर्विमत्सरः ॥ पितॄणांवल्लभंयस्मादिन्दोर्वाशङ्करस्यच ॥ १९० ॥ रजतंपाहित
स्मान्नःशोकसंसारसागरात् ॥ इत्थंनिवेश्ययोदद्याद्रजताचलमुत्तमम् ॥ ९१ ॥ गवामयुतसाहस्रफलमाप्नोतिमानवः ॥ सोमलोकेसगंधर्वैःकिन्नरा
प्सरसांगणैः ॥ ९२ ॥ पूज्यमानोवसेद्विद्वान्यावदाभूतसंप्लवम् ॥ अथातःसंप्रवक्ष्यामिशर्कराचलमुत्तमम् ॥ ९३ ॥ यस्यप्रदानाद्विष्णवर्करुद्रास्तुष्य
न्तिसर्वदा ॥ अष्टभिःशर्कराभारैरुत्तमःस्यान्महाचलः ॥९४॥ चतुर्भिर्मध्यमःप्रोक्तोभाराभ्यामधमःस्मृतम् ॥ भारेणचार्द्धभारेणकुर्याद्यःस्वल्पवित्त
वान् ॥९५॥ विष्कंभपर्वतान्कुर्यात्तुरीयांशेनमानवः॥ धान्यपर्वतवत्सर्वंहैमाम्बरसुसंयुतम् ॥९६॥ मेरोरुपरितःस्थाप्यंहैमंतत्रतरुत्रयम् ॥ मंदारःपारि
जातश्चतृतीयःकल्पपादपः ॥९७॥ एतद्वृक्षत्रयंमूर्ध्निसर्वेष्वपिनिवेशयेत्॥हरिचन्दनसंतानौपूर्वपश्चिमभागयोः ॥९८॥ निवेश्यौसर्वशैलेषुविशेषाच्छर्क
राचले ॥ मन्दरेकामदेवस्तुप्रत्यग्वक्त्रःसदाभवेत् ॥९९॥ गंधमादनशृंगेतुधनदःस्यादुदङ्मुखः॥ प्राङ्मुखोवेदमूर्तिस्तुहंसःस्याद्विपुलाचले ॥२००॥
हैमीभवेत्सुपार्श्वेतुसुरभीदक्षिणामुखी ॥ धान्यपर्वतवत्सर्वमावाहनमखादिकम् ॥ १ ॥ कृत्वाथगुरवेदद्यान्मध्यमंपर्वतोत्तमम् ॥ ऋत्विग्भ्यश्चतुरः
शैलानिमान्मन्त्रानुदीरयेत् ॥२॥ सौभाग्यामृतसारोऽयंपरमःशर्कराचलः ॥ तस्मादानन्दकारीत्वंभवशैलेन्द्रसर्वदा ॥ ३ ॥ अमृतंपिबतांयेतुपतिता
भुविशीकराः ॥ देवानांतत्समुत्थस्त्वंपाहिनःशर्कराचल ॥ ४ ॥ मनोभवधनुर्मध्यादुद्भूताशर्करापुनः ॥ तन्मयोऽसिमहाशैलपाहिसंसारसागरात्॥
॥ ५ ॥ योदद्याच्छर्कराशैलमनेनविधिनानरः ॥ सर्वपापविनिर्मुक्तःप्रयातिब्रह्ममन्दिरम् ॥ ६ ॥ चन्द्रसूर्यप्रतीकाशमधिरुह्यानुजीविभिः ॥ सहै
वयानमुत्तिष्ठेत्ततोविष्णुप्रभोदिवि ॥ ७ ॥ ततःकल्पशतान्तेतुसप्तद्वीपाधिपोभवेत् ॥ आयुरारोग्यसंपन्नोयावज्जन्मायुतत्रयम् ॥ ८ ॥ भोजनंश
क्तितःकुर्यात्सर्वशैलेष्वमत्सरः ॥ स्वयंचाक्षारलवणमश्नीयात्तदनुज्ञया ॥ ९ ॥ पर्वतोपस्करान्सर्वान्प्रापयेद्ब्राह्मणालयम् ॥ एतत्तेसर्वमाख्यातं
शैलदानमनुत्तमम् ॥ २१० ॥ यदन्यद्रोचतेतुभ्यंतन्मांपृच्छस्वपार्थिव ॥ भीष्मउवाच ॥ भगवन्भवसंसारसागरोत्तारकारकम् ॥ ११ ॥ किञ्चि
द्व्रतंसमाचक्ष्वस्वर्गारोग्यफलप्रदम् ॥ पुलस्त्यउवाच ॥ सौरधर्मंप्रवक्ष्यामिनाम्नाकल्याणसप्तमीम् ॥ १२ ॥ विशोकसप्तमींतद्वत्तृतीयांफलसप्तमी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म् ॥ शर्करासप्तमींकुर्यात्तथाकमलसप्तमीम् ॥ १३ ॥ मन्दारसप्तमींषष्ठींसप्तमींशुभसप्तमीम् ॥ सर्वाःपुण्यफलाःप्रोक्ताःसर्वादेवर्षिपूजिताः॥ १४ ॥
विधानमासांवक्ष्यामियथावदनुपूर्वशः ॥ यदातुशुक्लसप्तम्यामादित्यस्यदिनंभवेत् ॥ १५ ॥ सातुकल्याणिनीनामविजयाचनिगद्यते ॥ प्रातर्ग
व्येनपयसास्नानंनद्यांसमाचरेत् ॥ १६ ॥ शुक्लाम्बरधरःपद्ममक्षतैःपरिकल्पयेत् ॥ प्राङ्मुखोऽष्टदलंमध्येतद्वद्वृत्तांचकर्णिकाम् ॥ १७॥ पुष्पाक्षता
द्विर्देवेशंविन्यसेत्सर्वतःक्रमात् ॥ पूर्वेणतपनायेतिमार्तण्डायेतिवैततः ॥ १८॥ याम्येदिवाकरायेतिविधात्रइतिनैर्ऋते ॥ पश्चिमेवरुणायेतिभास्कराये
तिचानिले ॥१९॥ सौम्येविकर्तनायेतिदेवायेत्यष्टमेदले ॥आदावंतेचमध्येचनमोऽस्तुपरमात्मने॥२०॥मन्त्रैरेतैस्समभ्यर्च्यनमस्कारान्तदापितैः॥
शुक्लैर्वस्त्रैःफलैर्भक्ष्यैर्धूपमाल्यानुलेपनैः ॥२१॥ स्थण्डिलेपूजयेद्भक्त्यागुडेनलवणेनवै॥ततोव्याहृतिमन्त्रेणविसृज्यद्विजपुङ्गवान् ॥२२॥ शक्तितस्तर्प
येद्भक्त्यागुडक्षीरघृतादिभिः ॥ तिलपात्रंहिरण्यंचब्राह्मणायनिवेदयेत् ॥ २३ ॥ एवंनियमकृत्सुप्त्वाप्रातरुत्थायमानवः ॥ कृतस्नानजपोविप्रैःसहैव
घृतपायसम् ॥ २४ ॥ भुक्त्वाचवेदविदुषिवैडालव्रतवर्जिते ॥ घृतपात्रंसकनकंसोदकुंभंनिवेदयेत् ॥ २५ ॥ प्रीयतामत्रभगवान्परमात्मादिवाकरः॥
अनेनविधिनासर्वंमासिमासिसमाचरेत् ॥ २६ ॥ ततस्त्रयोदशमासिगाश्चदद्यात्त्रयोदश ॥ वस्त्रालंकारसंयुक्ताःस्वर्णशृंगाःपयःस्विनीः ॥ २७ ॥
एकामपिप्रदद्याच्चवित्तहीनोविमत्सरः ॥ नवित्तशाठ्यंकुर्वीतयतोमोहात्पतत्यधः ॥ २८ ॥ अनेनविधिनायस्तुकुर्यात्कल्याणसप्तमीम् ॥ सर्वपापवि
निर्मुक्तःसूर्यलोकेमहीयते ॥ २९ ॥ आयुरारोग्यमैश्वर्यमनंतमिहजायते ॥ सर्वपापहराचेयंसर्वदैवतपूजिता ॥ ३० ॥ सर्वदुष्टोपशमनीस
दाकल्याणसप्तमी ॥ इमामनन्तफलदांयस्तुकल्याणसप्तमीम् ॥३१॥ शृणोतियःपठेद्वापिसचपापैःप्रमुच्यत ॥ विशोकसप्तमींतद्वद्वक्ष्यामिनृपसत्तम
॥ ३२ ॥ यामुपोष्यनरःशोकंनकदाचिदिहाश्नुते ॥ माघेकृष्णतिलैःस्नातःपंचम्यांशुक्लपक्षतः ॥ ३३ ॥ कृताहारःकृसरयादन्तधावनपूर्वकम् ॥
उपवासव्रतंकृत्वाब्रह्मचारीनिशिस्वपेत् ॥ ३४ ॥ ततःप्रभातउत्थायकृतस्नानजपःशुचिः ॥ कृत्वातुकाञ्चनंपद्ममर्कायेतिप्रपूजयेत् ॥ ३५ ॥ कर
वीरेणरक्तेनरक्तवस्त्रयुगेनच ॥ यथाविशोकंभुवनंत्वयैवादित्यसर्वदा ॥ ३६ ॥ तथाविशोकतामेस्यात्त्वद्भक्तिःप्रतिजन्मच ॥ एवंसम्पूज्यषष्ठ्यांतुभ
क्त्यासम्पूजयेद्द्विजान् ॥ ३७ ॥ स्वयंसम्प्राश्यगोमूत्रमुत्थायकृतनैत्यकः ॥ सम्पूज्यविप्रान्यत्नेनगुडपात्रसमन्वितम् ॥ ३८ ॥ सद्वस्त्रयुग्मंपद्मंच
ब्राह्मणायनिवेदयेत् ॥ अतैललवणंभुक्त्वासप्तम्यांमौनसंयुतः ॥ ३९ ॥ ततःपुराणश्रवणंकर्त्तव्यंभूतिमिच्छता ॥ अनेनविधिनासर्वमुभयोरपिपक्ष
योः ॥४०॥ कुर्याद्यावत्पुनर्माघशुक्लपक्षस्यसप्तमी॥व्रतांतेकलशंदद्यात्सुवर्णकमलान्वितम् ॥४१॥ शय्यांसोपस्करांदद्यात्कपिलांचपयस्विनीम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अनेनविधिनायस्तुवित्तशाठ्येनवर्जितः ॥ ४२ ॥ विशोकसप्तमींकुर्यात्सयातिपरमांगतिम् ॥ यावज्जन्मसहस्राणांसाग्रंकोटिशतंभवेत् ॥
॥ ४३ ॥ तावन्नशोकमाप्नोतिरोगदौर्गत्यवर्जितः ॥ यंयंकामयतेकामंतंतंप्राप्नोतिपुष्कलम् ॥ ४४ ॥ निष्कामंकुरुतेयस्तुसपरंब्रह्मगच्छति ॥
यःपठेच्छृणुयाद्वापिविशोकाख्यांतुसप्तमीम् ॥४५॥ सोऽपीन्द्रलोकमासाद्यनदुःखीजायतेक्वचित् ॥ अन्यामपिप्रवक्ष्यामिनाम्नातुफलसप्तमीम्॥४६॥
यामुपोष्यनरःपापैर्विमुक्तःस्वर्गभाग्भवेत् ॥ मार्गशीर्षेशुभेमासिपञ्चम्यांनियतव्रतः ॥४७॥ षष्ठीमुपोष्यकमलंकारयित्वातुकाञ्चनम् ॥ शर्करासंयुतं
दद्याद्ब्राह्मणायकुटुम्बिने ॥ ४८ ॥ रूपंचकाञ्चनंकृत्वाफलस्यैकस्यधर्मवित् ॥ दद्याद्द्विकालवेलायांभानुर्मेप्रीयतामिति ॥ ४९ ॥ शक्त्यातुविप्रान्स
म्पूज्यसप्तम्यांक्षीरभोजनम् ॥ कृत्वाकुर्यात्फलत्यागंयावत्स्यात्कृष्णसप्तमी ॥२५०॥ तामुपोष्याथविधिवदनेनैवक्रमेणतु ॥ तद्वद्धेमफलंदत्त्वासुवर्ण
कमलान्वितम् ॥ ५१ ॥ शर्करापात्रसंयुक्तंवस्त्रमालासमन्वितम् ॥ संवत्सरमनेनैवविधिनोभयसप्तमीम् ॥ ५२ ॥ उपोष्यदद्यात्क्रमशःसूर्यमन्त्रमु
दीरयेत् ॥ भानुरर्कोरविर्ब्रह्मासूर्यःशक्रोहरिःशिवः ॥ ५३ ॥ श्रीमान्विभावसुस्त्वष्टावरुणःप्रीयतामिति ॥ प्रतिमासंचसप्तम्यामेकैकंनामकीर्त्तयेत्
॥ ५४ ॥ प्रतिपक्षंफलत्यागमेतत्कुर्वन्समाचरेत् ॥ व्रतान्तेविप्रमिथुनंपूजयेद्वस्त्रभूषणैः ॥ ५५ ॥ शर्कराकलशंदद्याद्धेमपद्मफलान्वितम् ॥ यथान
विफलःकामस्त्वद्भक्तानांसदाभवेत् ॥ ५६ ॥ तथानन्तफलावाप्तिरस्तुमेजन्मजन्मनि ॥ इमामनन्तफलदांयःकुर्यात्फलसप्तमीम् ॥ ५७ ॥ भूतभ
व्यांश्चपुरुषांस्तारयेदेकविंशतिम् ॥ यःशृणोतिपठेद्वापिसोऽपिकल्याणभाग्भवेत् ॥५८॥ सर्वपापविशुद्धात्मासूर्यलोकेमहीयते ॥ सुरापानादिकंकि
ञ्चिदत्रामुत्रचवाकृतम् ॥ ५९ ॥ तत्सर्वंनाशमायातियःकुर्यात्फलसप्तमीम् ॥ शर्करासप्तमींवक्ष्येतद्वत्कल्मषनाशिनीम् ॥ २६० ॥ आयुरारोग्यमै
श्वर्यंययानन्तंप्रजायते॥माधवस्यसितेपक्षेसप्तम्यांनियतव्रतः॥६१॥ प्रातःस्नात्वातिलैःशुभ्रैःशुद्धमाल्यानुलेपनः ॥ स्थण्डिलेपद्ममालिख्यकुङ्कुमेन
सकर्णिकम् ॥ ६२ ॥ तस्मिन्नमःसवित्रेतिगन्धपुष्पंनिवेदयेत् ॥ स्थापयेदुदकुम्भंचशर्करापात्रसंयुतम् ॥६३॥ शुक्लवस्त्रैरलङ्कृत्यशुक्लमाल्यानुलेपनैः॥
स्वर्णपुष्पसमायुक्तंमन्त्रेणानेनपूजयेत् ॥ ६४ ॥ विश्ववेदमयोयस्मात्त्वंवेदेषुचपठ्यसे ॥ त्वमेवामृतसर्वस्वमतःशान्तिप्रयच्छमे ॥६५॥ पञ्चगव्यंततः
पीत्वास्वपेत्तत्पार्श्वतःक्षितौ ॥ सौरसूक्तंजपन्नास्तेपुराणश्रवणेनच ॥ ६६ ॥ अहोरात्रेगतेपश्चादष्टम्यांकृतनैत्यकः ॥ तत्सर्ववेदविदुषेब्राह्मणायनिवे
दयेत् ॥६७॥ भोजयेच्छक्तितोविप्रान्शर्कराघृतपायसैः ॥ भुञ्जीतातैललवणंस्वयमप्यथवाग्यतः ॥६८॥ अनेनविधिनासर्वंमासिमासिसमाचरेत् ॥
संवत्सरन्तेशयनंशर्कराकलशान्वितम् ॥ ६९ ॥ सर्वोपस्करसंयुक्तंतथैकांगांपयस्विनीम् ॥ गृहंचशक्तिमान्दद्यात्समस्तोपस्करान्वितम् ॥ २७० ॥

१४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सहस्रेणाथनिष्काणांकृत्वादद्याच्छतेनवा ॥ दशभिर्वात्रिभिर्वापिनिष्केणैकेनवापुनः ॥७१॥ पद्मंस्वशक्तितोदद्यात्पूर्ववन्मन्त्रपाठनम् ॥ वित्तशाठ्यंन
कुर्वीतकुर्वन्दोषान्समश्नुते ॥ ७२ ॥ अमृतंपिबतोवक्रात्सूर्यस्यामृतबिन्दवः ॥ समुत्पेतुर्द्धरण्यांयेशालिमुद्गेक्षवस्तुते ॥७३ ॥ शर्करायारसस्तस्मादि
क्षुसारोऽमृतात्मवान् ॥ इष्टारवेरतःपुण्याशर्कराहव्यकव्ययोः ॥७४॥ शर्करासप्तमीचेयंवाजिमेधफलप्रदा ॥ सर्वदुष्टोपशमनीपुत्रपौत्रविवर्धिनी॥७५॥
यःकुर्यात्परयाभक्त्यासपरंब्रह्मगच्छति ॥ कल्पमेकंवसेत्स्वर्गेततोयातिपरंपदम् ॥ ७६ ॥ इदमनघशृणोतियःस्मरेद्वापरिपठतीहसुरेश्वरस्यलोके
॥ मतिमपिचददातिसोऽपिदेवैरमरपुरेपरिपूज्यतेमुनीन्द्रैः ॥ ७७ ॥ अतःपरंप्रवक्ष्यामितद्वत्कमलसप्तमीम् ॥ यस्यास्संकीर्त्तनादेवतुष्यतीहदि
वाकरः ॥ ७८ ॥ वसन्तामलसप्तम्यांसुस्नातोगौरसर्षपैः ॥ तिलपात्रेचसौवर्णंनिधायकमलंशुभम् ॥ ७९ ॥ वस्त्रयुग्मावृतंकृत्वागन्धपुष्पैरथार्चये
त् ॥ नमस्तेपद्महस्तायनमस्तेविश्वधारिणे ॥ २८० ॥ दिवाकरनमऽस्तेस्तुप्रभाकरनमोऽस्तुते ॥ ततोद्विकालवेलायामुदकुम्भसमन्वितम् ॥
॥ ८१ ॥ विप्रायदद्यात्सम्पूज्यवस्त्रमाल्याविभूषणैः ॥ शक्तितःकपिलांदद्यादलङ्कृत्यविधानतः ॥ ८२ ॥ अहोरात्रेगतेपश्चादष्ट
म्यांभोजयेद्द्विजान् ॥ यथाशक्तिचभुञ्जीतविमांसंतैलवर्जितम् ॥ ८३ ॥ अनेनविधिनाशुक्लसप्तम्यांमासिमासिच ॥ सर्वसमाचरेद्भक्त्यावि
त्तशाठ्यविवर्जितः ॥ ८४ ॥ व्रतान्तेशयनंदद्यात्सुवर्णकमलान्वितम् ॥ ८५ ॥ गाश्चप्रदद्याच्छक्त्यातुसुवर्णस्यपयस्विनीः ॥ भाजना
सनदीपादीन्दद्यादिष्टानुपस्करान् ॥ ८६ ॥ अनेनविधिनायस्तुकुर्यात्कमलसप्तमीम् ॥ लक्ष्मीमनन्तामभ्येतिसूर्यलोकेचमोदते ॥ ८७ ॥
कल्पेकल्पेततोलोकान्सप्तगत्वापृथक्पृथक् ॥ अप्सरोभिःपरिवृतस्ततोयातिपरांगतिम् ॥ ८८ ॥ पश्येदिमांयःशृणुयान्मुहूर्तंपठेच्चभक्त्या
थमतिंददाति ॥ सोऽप्यत्रलक्ष्मीममलामवाप्यगन्धर्वविद्याधरलोकमेति ॥ ८९ ॥ अतःपरंप्रवक्ष्यामिसर्वपापप्रणाशिनीम् ॥ सर्वकाम
प्रदांपुण्यांनाम्नामन्दारसप्तमीम् ॥ २९० ॥ माघस्यामलपक्षेतुपञ्चम्यांलघुभुङ्नरः ॥ दन्तकाष्ठंततःकृत्वाषष्ठीमुपवसेद्बुधः ॥ ९१ ॥
विप्रान्संम्पूजयित्वातुमन्दारंप्राशयेन्निशि ॥ ततःप्रभातउत्थायकृत्वास्नानंपुनर्द्विजान् ॥ ९२ ॥ भोजयेच्छक्तितःकुर्यान्मन्दारकुसुमाष्टकम् ॥
सौवर्णपुरुषंतद्वत्पद्महस्तंसुशोभनम् ॥ ९३ ॥ पद्मंकृष्णतिलैःकृत्वाताम्रपात्रेऽष्टपत्रकम् ॥ हेममन्दारकुसुमैर्भास्कारायेतिपूर्वतः ॥ ९४ ॥
नमस्कारेणतद्वच्चसूर्यायेत्यमलेदले ॥ दक्षिणेतद्वदर्कायतथार्यम्णेचनैर्ऋते ॥ ९५ ॥ पश्चिमेवेदधाम्नेचवायव्येचण्डभानवे ॥ पूष्णेचोत्तर
तःपूज्यआनन्दायेतितत्परम् ॥ ९६ ॥ कर्णिकायांचपुरुषःस्थाप्यःसर्वात्मनेऽपिच ॥ शुक्लवस्त्रैःसमावेष्टयभक्ष्यैर्माल्यफलादिभिः ॥ ९७ ॥ एवमभ्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्र्यतत्सर्वंदद्याद्वेदविदेपुनः ॥ भुञ्जीतातैललवणंवाग्यतःप्राङ्मुखोगृही ॥ ९८ ॥ अनेनविधिनासर्वंसप्तम्यांमासिमासिच ॥ कुर्यात्संवत्सरंयावद्वित्तशाठ्यविवर्जितः ॥ ९९ ॥ एतदेवव्रतान्तेतुनिधायकलशोपरि ॥गोभिर्विभवतःसार्द्धंदातव्यंभूतिमिच्छता॥३००॥ नमोमन्दारनाथायमन्दारभवनायच ॥ त्वंरवेतारयस्वास्मानस्मात्संसारसागरात् ॥ १ ॥ अनेनविधिनायस्तुकुर्यान्मन्दारसप्तमीम् ॥ विपाप्मासससुखीमर्त्यःकल्पंचदिविमोदते ॥ २ ॥ इमामघौघपटलभीषणध्वान्तदीपिकाम् ॥ गच्छन्सङ्गृह्यसंसारशर्वर्यांनस्खलेन्नरः ॥ ३ ॥ मन्दारसप्तमीमेतामीप्सितार्थफलप्रदाम्॥यःपठेच्छृणुयाद्वापिसोऽपिपापैःप्रमुच्यते ॥ ४ ॥ अथान्यामपिवक्ष्यामिशोभनांशुभसप्तमीम् ॥ यामुपोष्यनरोरोगशोकौघात्तुप्रमुच्यते ॥ ५ ॥ पुण्यमाश्वयुजेमासिकृतस्नानजपःशुचिः ॥ वाचयित्वाततोविप्रानारभेच्छुभसप्तमीम् ॥ ६ ॥ कपिलांपूजयेद्भक्त्यागन्धमाल्यानुलेपनैः ॥ नमामिसूर्यसम्भूतामशेषभुवनालयाम् ॥ ७ ॥ त्वामहंशुभकल्याणिस्वशरीरविशुद्धये ॥ अथकृत्वातिलप्रस्थंताम्रपात्रेणसंयुतम् ॥ ८ ॥ काञ्चनंवृषभंतद्वद्वस्त्रमाल्यगुडान्वितम् ॥ सोपधानंचविश्रामभाजनासनसंयुतम् ॥ ९ ॥ फलैर्नानाविधैर्भक्ष्यैर्घृतपायससंयुतैः ॥ दद्याद्विकालवेलायामर्यमाप्रीयतामिति ॥ ३१० ॥ पञ्चगव्यंचसंप्राश्यस्वपेद्भूमावसंस्तरे ॥ततःप्रभातेसञ्जातेभक्त्यासंतर्पयेद्द्विजान् ॥ ११ ॥ अनेनविधिनादद्यान्मासिमासिसदानरः ॥ वाससीवृषभंहैमंतद्वद्गांकाञ्चनोद्भवाम् ॥१२॥ संवत्सरान्तेशयनमिक्षुदण्डगुडान्वितम् ॥ ताम्रपात्रेतिलप्रस्थंसौवर्णंवृषभंतथा॥१३॥ दद्याद्वेदविदेसर्वंविश्वात्माप्रीयतामिति ॥ अनेनविधिनाविद्वान्कुर्याद्यःशुभसप्तमीम् ॥ १४ ॥ तस्यश्रीर्विमलाकीर्त्तिर्भवेज्जन्मनिजन्मनि ॥ अप्सरोगणगन्धर्वैःपूज्यमानःसुरालये ॥ १५ ॥ वसेद्गणाधिपोभूत्वायावदाभूतसम्प्लवम् ॥ कल्पादाववतीर्णश्चसप्तद्वीपाधिपोभवेत्॥१६॥ भ्रूणहत्यासहस्रस्यब्रह्महत्याशतस्यच ॥ नाशायालमियंपुण्यापठ्यतेशुभसप्तमी ॥ १७ ॥ इमांपठेद्यःशृणुयान्मुहूर्तंपश्येत्प्रसंगादपिदीयमानम् ॥ सोऽप्यत्रसर्वाघविमुक्तदेहःप्राप्नोतिविद्याधरनायकत्वम्॥१८॥यावत्समास्सप्तनरःकरोतियःसप्तमींसप्तविधानयुक्ताम्॥ससप्तलोकाधिपतिःक्रमेणभूत्वापदंयातिपरंमुरारेः ॥ ३१९ ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेपुष्करमाहात्म्यएकविंशोऽध्यायः ॥ २१ ॥ भीष्मउवाच ॥ भूर्लोकोऽथभुवर्लोकःस्वर्लोकोऽथमहर्जनः ॥ तपःसत्यंचसप्तैतेदेवलोकाःप्रकीर्तिताः ॥ १ ॥ पर्यायेणतुसर्वेषामाधिपत्यंकथंभवेत् ॥ इहलोकेशुभंरूपमायुरारोग्यमेवच ॥ २ ॥ लक्ष्मीश्चविपुलाब्रह्मन्कथंस्यात्सुरपूजित ॥ पुलस्त्यउवाच ॥ पुराहुताशनःसार्द्धंमारुतेनमहीतले ॥ ३ ॥ आदिष्टःपुरुहूतेनविनाशायसुरद्विषाम् ॥ निर्दग्धेषुततस्तेनदानवेषुसहस्रशः ॥ ४ ॥ तारकःकमलाक्षश्चकालदंष्ट्रःपरावसुः ॥ विरोचनस्तुसंह्रादःप्रयातास्तेतदावसन् ॥ ५ ॥ अन्तःसमुद्रमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विश्यसन्निवेशमकुर्वत ॥ अशक्ताइतितेऽप्यग्निमारुताभ्यामुपेक्षिताः ॥ ६ ॥ ततःप्रभृतिवैदेवान्मानुषान्सभुजङ्गमान् ॥ सम्पीडयचमुनीन्सर्वा
न्प्रविशन्तिपुनर्जलम् ॥ ७ ॥ एवंयुगसहस्राणितेवीराःसप्तपञ्चच ॥ जलदुर्गबलाद्राजन्पीडयन्तिजगत्रयम् ॥ ८ ॥ ततःपुनरथोवह्निमारुता
वमराधिपः ॥ आदिदेशाचिरादम्बुनिधिरेषविशोष्यताम् ॥ ९ ॥ यस्मादस्मद्द्विषांचैषशरणंवरुणालयः ॥ तस्माद्भवद्भ्यामद्यैवशोषमेषप्रणीयताम्
॥ १० ॥ तावूचतुस्ततःशक्रंमयशम्बरसूदनम् ॥ अधर्मएषदेवेन्द्रसागरस्यविनाशनम् ॥ ११ ॥ यस्माज्जीवनिकायस्यमहतःसंक्षयोभवेत् ॥
तस्मादुपायमन्यंतुसमाश्रयपुरन्दर ॥ १२ ॥ यस्ययोजनमात्रेऽपिपिजीवकोटिशतानिच॥निवसन्तिसुरश्रेष्ठसकथंनाशमर्हति॥१३॥ पुलस्त्यउवाच॥
एवमुक्तःसुरेन्द्रस्तुक्रोधसंरक्तलोचनः॥उवाचेदंवचोरोपादमरावग्निमारुतौ॥१४॥इन्द्रउवाच॥नधर्माधर्मसंयोगंप्राप्नुवन्त्यमराःक्वचित्॥भवन्तौतुविशेषे
णमहात्मानौचतिष्ठतः ॥ १५ ॥ ममाज्ञानकृतायस्मान्मारुतेनसमंत्वया ॥ मुनिव्रतपरोभूत्वापरिगृह्यकलेवरम् ॥ १६ ॥ धर्मार्थशास्त्ररहितांयोनिंप्र
तिविभावसो ॥ तस्मादेकेनवपुषामुनिरूपेणमानुषे ॥१७॥ मारुतेनसमंलोकेतवजन्मभविष्यति ॥ यदातुमानुषत्वेऽपित्वयागण्डूषशोषितः ॥१८॥
भविष्यत्युदधिर्वह्नेतदादेवत्वमाप्स्यसि॥पुलस्त्यउवाच॥इतीन्द्रशापात्पतितौतत्क्षणात्तौमहीतले॥१९॥अवाप्तवन्तौदेहंचकुम्भाज्जन्मततोऽभवत्॥ मि
त्रावरुणयोर्वीर्याद्वसिष्ठश्चात्मजोऽभवत्॥२०॥ततोऽगस्त्यउग्रतपाबभूवमुनिसत्तमः॥अस्माद्भ्रातुःसवैभ्रातावसिष्ठस्यानुजोमुनिः ॥२१॥भीष्मउवाच॥
कथंचमित्रावरुणौपितरावस्यतौस्मृतौ॥जन्मकुम्भादगस्त्यस्ययथाभूत्तद्वदाधुना ॥२२॥ पुलस्त्यउवाच ॥ पुरापुराणपुरुषःकदाचिद्गन्धमादने॥भूत्वा
धर्मसुतोविष्णुश्चचारविपुलंतपः ॥ २३ ॥ तपसाचास्यभीतेनविघ्नार्थंप्रेषितावुभौ ॥ शक्रेणमाधवानङ्गावप्सरोगणसंयुतौ ॥ २४ ॥ यदाचगीतवाद्येन
भावहावादिनाहरिः ॥ नकाममाधवाभ्यांचमोहंनेतुमशक्यत ॥ २५ ॥ तदाकाममधुस्त्रीणांविषादमभजद्गणः ॥ संक्षोभायततस्तेषामूरुदेशान्नराग्रजः
॥२६॥ नारीमुत्पादयामासत्रैलोक्यस्यापिमोहिनीम्॥ संमोहितास्तयादेवास्तौतुचैवसुराबुभौ ॥२७॥ अप्सराणांसमक्षंहिदेवानामब्रवीद्धरिः॥उर्वशी
तिचनाम्नेयंलोकेख्यातिंगमिष्यति॥२८॥ततःकामयमानेनमित्रेणाहूयतोर्वशी॥प्रोक्तामांरमयस्वेतिबाढमित्यब्रवीच्चसा ॥२९ ॥ गच्छन्तीतुततःसूर्यलो
कीमिन्दीवरेक्षणा ॥ वरुणेनवृतापश्चाद्वचनंतमभाषत ॥ ३० ॥ मित्रेणाहंवृतापूर्वंममसूर्यःपतिःप्रभो ॥ उवाचवरुणश्चित्तंमयिसंन्यस्यगम्यताम् ॥
॥ ३१ ॥ गातायांबाढमित्युक्त्वामित्रःशापमदादथ ॥ अद्यैवमानुषेलोकेगच्छसोमसुतात्मजम् ॥ ३२ ॥ भजस्वेतियतोमिथ्याधर्मएषत्वयाकृतः ॥
जलकुम्भेततोवीर्यंमित्रेणवरुणेनच ॥ ३३ ॥ प्रक्षिप्तमथसञ्जातौद्वावेवमुनिसत्तमौ ॥ निमिर्नामनृपःस्त्रीभिःपुराद्यूतमदीव्यत ॥३४॥ तदन्तरेऽभ्याज

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गामवसिष्ठोब्रह्मसम्भवः ॥ तस्यपूजामकुर्वाणंशशापसमुनिर्नृपम् ॥ ३५ ॥ विदेहस्त्वंभवस्वेतिशप्तस्तेनाप्यसौमुनिः ॥ अन्योन्यशापादुभयो
विंशरीरेतुतेजसी ॥ ३६ ॥ जग्मतुश्शापनाशायब्रह्माणंजगतःपतिम् ॥ अथब्रह्मसमादेशाल्लोचनेष्ववसन्निमिः ॥ ३७ ॥ निमेषाःस्युश्चलोकानां
तद्विश्रामायपार्थिव ॥ वसिष्ठोऽप्यभवत्तस्मिञ्जलकुम्भेचपूर्ववत् ॥ ३८ ॥ ततोजातश्चतुर्बाहुःसाक्षसूत्रकमण्डलुः ॥ अगस्त्यइतिशान्तात्माबभूवऋ
षिसत्तमः ॥ ३९ ॥ मलयस्यैकदेशेतुवैखानसविधानतः ॥ सभार्यःसंवृतोविप्रैस्तपश्चक्रेसुदुष्करम् ॥ ४० ॥ ततःकालेनमहतातारकादिनिपीडितम् ॥
जगद्वीक्ष्यसकोपेनपीतवान्वरुणालयम् ॥ ४१ ॥ ततोऽस्यवरदास्सर्वेबभूवुःशङ्करादयः ॥ ब्रह्माविष्णुश्चभगवान्वरदानायजग्मतुः ॥ ४२ ॥ वरंवृणी
ष्वभद्रंतेयश्चाभीष्टोऽत्रवैमुने ॥ अगस्त्यउवाच ॥ यावद्ब्रह्मसहस्राणांपञ्चविंशतिकोटयः ॥ ४३ ॥ वैमानिकोभविष्यामिदक्षिणाम्बरवर्त्मनि ॥ मद्वि
मानोदयात्कुर्याद्यःकश्चित्पूजनंमम ॥ ४४ ॥ ससप्तलोकाधिपतिःपर्यायेणभविष्यति ॥ यस्त्वाश्रमंपुष्करेतुमन्नाम्नापरिकीर्तयेत् ॥ ४५ ॥ सचैव
पुण्यतांयातुवरएषवृतोमया ॥ श्राद्धंयेऽत्रकरिष्यन्तिपिण्डपूर्वंतुभक्तितः ॥४६॥ तेषांपितृगणास्सर्वेमयासहदिविस्थिताः ॥ एतत्कालंवसिष्यन्तिएष
एववरोमम ॥४७॥ एवमस्त्वितितेऽप्युक्त्वाजग्मुर्देवायथागतम् ॥ तस्मादर्घःप्रदातव्योह्यगस्त्यायसदाबुधैः ॥ ४८ ॥ भीष्मउवाच ॥ कथ
मर्घप्रदानंचकर्तव्यंतस्यवैमुनेः ॥ विधानंयदगस्त्यस्यपूजनेतद्वदस्वमे ॥ ४९ ॥ पुलस्त्यउवाच ॥ प्रत्यूषसमयेविद्वान्कुर्यादस्योदयेनिशि ॥ स्नानं
शुक्लतिलैस्तद्वच्छुक्लमाल्याम्बरोगृही ॥ ५० ॥ स्थापयेदव्रणंकुम्भंमाल्यवस्त्रविभूषितम् ॥ पञ्चरत्नसमायुक्तंघृतपात्रेणसंयुतम्॥५१॥ अङ्गुष्ठमात्रंपुरुषं
तथैवसुवर्णमध्यायतबाहुदण्डम्॥चतुर्भुजंकुम्भमुखेनिधायधान्यानिसप्ताचलसंयुतानि ॥५२॥ सकांस्यपात्राक्षतशुक्लयुक्तंमन्त्रेणदद्याद्द्विजपुङ्गवाय ॥
उत्क्षिप्यकुम्भोपरिदीर्घबाहुमनन्यचेतायमदिङ्मुखस्थम् ॥५३॥ श्वेतांचदद्याद्यदिशक्तिरस्तिरौप्यैःखुरैर्हैममुखींसवत्साम्॥ धेनुंनरःक्षीरवतींप्रणम्य
स्रग्वस्त्रघण्टाभरणांद्विजाय ॥ ५४ ॥ आसप्तरात्रादुदयेनृपास्यदातव्यमेतत्सकलंनरेण ॥ यावत्समास्सप्तदशाथवास्युरथोर्द्ध्वमप्यत्रवदन्तिकेचित् ॥
॥ ५५ ॥ काशपुष्पप्रतीकाशअग्निमारुतसम्भव ॥ मित्रावरुणयोःपुत्रकुम्भयोनेनमोऽस्तुते ॥ ५६ ॥ प्रत्यब्दंचफलत्यागमेवंकुर्वन्नसीदति ॥ होमं
कृत्वाततःपश्चाद्वर्तयेन्मानवःफलम् ॥ ५७ ॥ अनेनविधिनायस्तुपुमानर्घंनिवेदयेत् ॥ इमंलोकमवाप्नोतिरूपारोग्यफलप्रदम् ॥ ५८ ॥ द्वितीयेन
भुवर्लोकंस्वर्लोकंचततःपरम् ॥ सप्तैवलोकानाप्नोतिसप्तार्घान्यःप्रयच्छति ॥ ५९ ॥ इतिपठतिशृणोतियोहिसम्यक्चरितमगस्त्यसमर्चनंच
पश्येत् ॥ मतिमपिचददातिसोऽपिविष्णोर्भवनगतःपरिपूज्यतेऽमरौघैः ॥ ६० ॥ भीष्मउवाच ॥ सौभाग्यारोग्यफलदममित्रक्षयकारकम् ॥ भुक्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुक्तिप्रदंयच्चतन्मेब्रूहिमहामते ॥ ६१ ॥ पुलस्त्यउवाच ॥ यदुमायांपुरादेवउवाचान्धकसूदनः ॥ कथासुसम्प्रवृत्तासुधर्म्यासुललितासुच ॥ ६२ ॥
तदिदानींप्रवक्ष्यामिभुक्तिमुक्तिफलप्रदम् ॥ गौर्युवाच ॥ दत्तःशापोहिसावित्र्यामह्यंलक्ष्म्यैसुरेश्वर ॥६३ ॥ यथालक्ष्मीप्रधानत्वमहंयामितथावद ॥
शङ्करउवाच॥ शृणुष्वावहितादेवितथैवान्यत्स्वयङ्कृतम् ॥ ६४ ॥ नराणामथनारीणामाराधनमनुत्तमम् ॥ नभस्येवाथवैशाखेपुण्येमार्गशिरस्यथ
॥ ६५ ॥ शुक्लपक्षेतृतीयायांस्नातःसगौरसर्षपैः ॥ गोरोचनंसगोमूत्रंगोदुग्धंचघृतंतथा ॥ ६६॥ दधिचन्दनसंमिश्रंललाटेतिलकंन्यसेत्॥सौभाग्यारो
ग्यकृद्यस्मात्सदाचललिताप्रियम् ॥ ६७ ॥ प्रतिपक्षंतृतीयायांपुमान्वापिसुवासिनी ॥ धारयेद्रक्तवस्त्राणिकुसुमानिसितानिच ॥ ६८ ॥ विधवा
शुक्लवस्त्रंवैत्वेकमेवहिधारयेत् ॥ कुमारीशुक्लसूक्ष्मेचपरिदध्यात्तुवाससी ॥ ६९ ॥ देवींचपञ्चगव्येनततःक्षीरेणकेवलम् ॥ स्नापयेन्मधुनातद्वत्पुष्प
गन्धोदकेनतु ॥ ७० ॥ पूजयेच्छुक्लपुष्पैस्तुफलैर्नानाविधैरपि ॥ धान्यलाजादिलवणगुडक्षीरघृतान्वितैः ॥ ७१ ॥ शुक्लाक्षततिलैरर्चाकार्यादेवि
सदात्वया ॥ पादयोरर्चनंकुर्यात्प्रतिपक्षंवरानने ॥७२॥ वरदायैनमःपादौतथागुल्फौश्रियैनमः ॥ अशोकायैनमोजङ्घेपार्वत्यैजानुनीतथा ॥७३॥
ऊरूमाङ्गल्यकारिण्यैवामदेव्यैतथाकटिम् ॥ पद्मोदरायैजठरंनमःकण्ठेश्रियैनमः ॥७४॥ करौसौभाग्यदायिन्यैबाहूचसुमुखश्रियै ॥ मुखंदर्पविनाशि
न्यैस्मरदायैस्मितंपुनः ॥ ७५ ॥ गौर्यैनमस्तथानासामुत्पलायैचलोचने ॥ तुष्ट्यैललाटमलकंकात्यायन्यैनमःशिरः ॥ ७६ ॥ नमोगौर्य्यैनमः
पुष्ट्यैनमःकान्त्यैनमःश्रियै ॥ रम्भायैललितायैचवामदेव्यैनमोनमः॥ ७७ ॥ एवंसम्पूज्यविधिवदग्रतःपद्ममालिखेत् ॥ पत्रैःषोडशभिर्युक्तंक्रमेणैवस
कर्णिकम् ॥ ७८ ॥ पूर्वेणविन्यसेद्गौरीमपर्णांचततःपरम् ॥ भवानींदक्षिणेतद्वद्रुद्राणींचततःपरम् ॥ ७९ ॥ विन्यसेत्पश्चिमेभागेसौम्यांमदनवासि
नीम् ॥ वायव्येपाटलामुग्रामुत्तरेणतथाउमाम् ॥ ८० ॥ साध्यांपथ्यांतथासौम्यांमङ्गलांकुमुदांसतीम् ॥ भद्रांचमध्येसंस्थाप्यललितांकर्णिको
परि ॥ ८१ ॥ कुसुमैरक्षताद्भिर्वानमस्कारेणविन्यसेत् ॥ गीतमङ्गलघोषंचकारयित्वासुवासिनीम् ॥ ८२ ॥ पूजयेद्रक्तवासोभीरक्तमाल्यानुले
पनैः ॥ सिन्दूरंस्नानचूर्णंचतासांशिरसिपातयेत् ॥ ८३ ॥ सिन्दूरंकुङ्कुमंस्नानमतीवेष्टंयतस्ततः ॥ तथोपदेष्टारमपिपूजयेद्यत्नतोगुरुम् ॥ ८४ ॥
नपूज्यतेगुरुर्यत्रसर्वास्तत्राफलाःक्रियाः ॥ जप्यैश्चपूजयेद्गौरीमुत्पलैरसितैःसदा ॥ ८५ ॥ बन्धुजीवैःप्रियेपूज्याकार्तिकेमासियत्नतः ॥
जातीपुष्पैर्मार्गशिरेपौषेपीतैःकुरण्टकैः ॥ ८६ ॥ कुन्दैःकुमुदपुष्पैश्चदेवींमाघेऽपिपूजयेत् ॥ सिन्दुवारेणजात्यावाफाल्गुनेऽप्यर्चयेन्न
रः ॥ ८७ ॥ चैत्रेतुमल्लिकाशोकैर्वैशाखेगन्धपाटलैः ॥ ज्येष्ठेकमलमन्दारैराषाढेचजलाम्बुजैः ॥ ८८ ॥ मन्दारैरथमालत्याश्रावणेपूजयेत्सदा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गोमूत्रंगोमयंक्षीरंदधिसर्पिःकुशोदकम् ॥ ८९ ॥ बिल्वपत्रार्ककुसुमाम्बुजगोशृङ्गवारिच ॥ पञ्चगव्यंचबिल्वंचप्राशयेत्क्रमशःसदा ॥९०॥ एतद्वाद्दप दादौतुप्राशनंसमुदाहृतम् ॥ प्रतिपक्षंचमिथुनंतृतीयायांवरानने ॥ ९१ ॥ भोजयित्वार्चयेद्भक्त्यावस्त्रमाल्यानुलेपनैः ॥ पुंसःपीताम्बरेदद्यात्स्त्रि याःकौशेयवाससी ॥ ९२ ॥ निष्पावजीरलवणमिक्षुदण्डगुडान्वितम् ॥ स्त्रियैदद्यात्फलंपुंसःसुवर्णोत्पलसंयुतम् ॥ ९३॥ यथानदेविदेवस्त्वांसम्परि त्यज्यगच्छति ॥ तथामामुद्धराशेषदुःखसंसारसागरात् ॥ ९४ ॥ कुमुदाविमलानंदाभवानीवसुधाशिवा ॥ ललिताकमलागौरीसतीरम्भाथपार्व ती ॥ ९५ ॥ नभस्यादिषुमासेषुप्रीयतामित्युदीरयेत् ॥ व्रतान्तेशयनन्दद्यात्सुवर्णकमलान्वितम् ॥ ९६ ॥ मिथुनानिचतुर्विंशद्वादशाथसमर्च येत् ॥ अष्टावष्टाथवाभूयश्चतुर्मासेऽथवार्चयेत् ॥ ९७ ॥ पूर्वंदत्त्वाथगुरवेपश्चादन्यान्समर्चयेत् ॥ उक्तानन्ततृतीयैषासदानन्तफलप्रदा ॥ ९८ ॥ सर्व पापहरादेवीसौभाग्यारोग्यवर्धिनी ॥ नचैनान्वित्तशाठ्येनकदाचिदपिलङ्घयेत् ॥ ९९ ॥ नरोवायदिवानारीसोपवासव्रतंचरेत् ॥ गर्भिणीसूतिकान क्तंकुमारीवाथरोगिणी ॥ १०० ॥ यदाऽशुद्धातदान्येनकारयेत्प्रयतास्वयम् ॥ इमामनन्तफलदांयस्तृतीयांसमाचरेत् ॥ १ ॥ कल्पकोटिशतंसा ग्रंशिवलोकेमहीयते ॥ वित्तहीनोऽपिकुर्वीतयावद्वर्षमुपोषणम् ॥ २ ॥ पुष्पमन्त्रविधानेनसोऽपितत्फलमाप्नुयात् ॥ नारीवाकुरुतेयातुआत्मनःशुभ मिच्छती ॥ जन्मपौरुषमाप्नोतिगौर्यनुग्रहकारितम् ॥ ३ ॥ इतिपठतिशृणोतिवायइत्थंगिरितनयाव्रतमिन्द्रलोकसंस्थः ॥ मतिमपिचद दातियोऽपिदेवैरमरवधूजनकिन्नरैःसपूज्यः ॥४॥ अन्यामपिप्रवक्ष्यामितृतीयांपापनाशिनीम् ॥ रसकल्याणिनीमेतांपुराकल्पभवाविदुः ॥ ५ ॥ माघे मासितुसम्प्राप्यतृतीयांशुक्लपक्षतः ॥ प्रातर्गन्धेनपयसातिलैःस्नानंसमाचरेत् ॥ ६ ॥ स्नापयेन्मधुनादेवींतथैवेक्षुरसेनतु ॥ गन्धोदकेनचपुनः पूजनंकुङ्कुमेनतु॥७॥दक्षिणाङ्गानिसंपूज्यततोवामानिपूजयेत् ॥ ललितायैपदन्देव्यैवामगुल्फौततोऽर्चयेत्॥८॥जङ्घेजानुतथाशान्त्यैतथैवोरुश्रियैन मः ॥ ९ ॥ मदालसायैचकटिममलायैतथोदरम् ॥ स्तनौमदनवासिन्यैकुमुदायैचकन्धराम् ॥ ११० ॥ भुजंभुजाग्रंमाधव्यैकमलायैसुखस्मि ते ॥ भ्रूललाटंचरुद्राण्यैशङ्करायैतथालकम् ॥ ११ ॥ मदनायैललाटंतुमोहनायैपुनर्भ्रुवौ ॥ नेत्रेचन्द्रार्धधारिण्यैतुष्ट्यैचवदनंपुनः ॥ १२ ॥ उत्क ण्ठिन्यैनमःकण्ठममृतायैनमस्तनुम् ॥ रम्भायैचमहाबाहूविशोकायैनमःकरौ ॥१३॥ हृदयंमन्मथाह्वायैपाटलायैतथोदरम् ॥कटिंसुरतवासिन्यैतथो रूपङ्कजश्रियै ॥ १४ ॥ जानुजङ्घेनमोगौर्यैगुल्फौशान्त्यैतथार्चयेत् ॥ धराधरायैपादौतुविश्वकायैनमःशिरः ॥ १५ ॥ नमोभवान्यैकामिन्यैवासु देव्यैजगच्छ्रियै ॥ आनन्ददायैनन्दायैसुभद्रायैनमोनमः ॥१६॥ एवंसम्पूज्यविधिवद्द्विजदाम्पत्यमर्चयेत् ॥ भोजयित्वातथान्नेनमधुरेणविमत्सरः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १७ ॥ समोदकंवारिकुम्भंशुक्लाम्बरयुगद्वयम् ॥ दत्त्वासुवर्णकमलंगन्धमाल्यैरथार्चयेत् ॥११८॥ प्रीयतामत्रकुमुदागृह्णीयाल्लवणव्रतम् ॥ अनेन
विधिनादेवींमासिमासिसदार्चयेत् ॥ ११९ ॥ लवणंवर्जयेन्माघेफाल्गुनेचगुडंपुनः ॥ नवनीतंतथाचैत्रेवर्ज्यंमधुचमाधवे ॥ १२० ॥ पानीयं
ज्येष्ठमासेतुतथाषाढेचजीरकम् ॥ श्रावणेवर्जयेत्क्षीरंदधिभाद्रपदेतथा ॥ २१ ॥ घृतमाश्वयुजेतद्वदूर्जेवर्ज्यंचमाक्षिकम् ॥ धान्याकंमार्ग
शीर्षेतुपौषेवर्ज्याचशर्करा ॥ २२ ॥ व्रतान्तेकरकंपूर्णमेतेषांमासिमासिच ॥ दद्याद्विकालवेलायांभक्ष्यपात्रेणसंयुतम् ॥ २३ ॥
लड्डुकास्सेवकाश्चैवसंयावमथपूरिका ॥ नारिकाघृतपूर्णाश्चपिष्टपूर्णाचनन्दिकी ॥ २४ ॥ क्षीरशाकंचदध्यन्नंपिण्डशाकंतथैवच ॥ माघादौ
क्रमशोदद्यादेतानिकरकोपरि ॥ २५ ॥ कुमुदामाधवीरम्भासुभद्राचाशिवाजया ॥ ललिताकमलानङ्गामङ्गलारतिलालसा ॥ २६ ॥ क्रमा
न्माघादिमासेषुप्रीयतामितिकीर्तयेत् ॥ सर्वत्रपञ्चगव्यंचप्राशनंसमुदाहृतम् ॥ २७ ॥ उपवासीभवेन्नित्यमशक्तौनक्तमिष्यते ॥ कुर्यादेवमिदं
नारीरसकल्याणिनीव्रतम् ॥ २८ ॥ पुनर्माघेचसंप्राप्तेशर्कराकलशोपरि ॥ कृत्वातुकाञ्चनींगौरींपञ्चरत्नसमन्विताम् ॥ २९ ॥ स्वकीयाङ्गुष्ठ
मात्रंचसाक्षसूत्रकमण्डलुम् ॥ चतुर्भुजामिंदुयुतांसितनेत्रपटावृताम् ॥१३०॥ तद्वद्गोमिथुनंचैवसुवर्णस्यसिताम्बरम् ॥ सवस्त्रंभाजनंदद्याद्भवानीप्रीयतामि
ति ॥ ३१ ॥ अनेनविधिनायस्तुरसकल्याणिनीव्रतम् ॥ कुर्याच्चसर्वपापेभ्यस्तत्क्षणादेवमुच्यते ॥ ३२ ॥ भवानांचसहस्रंतुनदुःखीजायतेक्वचित् ॥
अग्निष्टोमसहस्रेणयत्फलंतदवाप्नुयात् ॥ ३३ ॥ नारीवाकुरुतेयातुकुमारीवावरानने ॥ विधवाचवराकीवासापितत्फलभागिनी ॥ सौभाग्यारोग्यसंप
न्नागौरीलोकेमहीयते ॥३४॥ इतिपठतियइत्थंयःशृणोतिप्रसङ्गात्सकलकलुषमुक्तःपार्वतीलोकमेति ॥ मतिमपिचविधत्तेयोनराणांप्रियार्थंविबुधपति
जनानांलोकगःस्यादमोघः ॥ ३५ ॥ तथैवान्यांप्रवक्ष्यामितृतीयांपापनाशिनीम् ॥ नाम्नाचलोकविख्यातामग्र्यानन्दकरीमिमाम् ॥ ३६ ॥ य
दाशुक्लतृतीयायामषाढर्क्षंभवेत्क्वचित् ॥ ३७ ॥ ब्रह्मर्क्षंवाथचमघाहस्तोमूलमथापिवा ॥ दर्भगन्धोदकैःस्नानंतदासम्यक्समाचरेत् ॥ ३८ ॥
शुक्लमाल्याम्बरधरःशुक्लगन्धानुलेपनः ॥ भवानीमर्चयेद्भक्त्याशुक्लपुष्पैःसुगन्धिभिः ॥ ३९ ॥ महादेवंचसकलमुपविष्टंमहासने ॥ वासुदे
व्यैनमःपादौशङ्करायैनमोहरेः ॥ १४० ॥ जङ्घेशोकविनाशिन्यैमानदायैनमःप्रभोः ॥ रम्भायैपूजयेदूरूशिवायचपिनाकिने ॥ ४१ ॥
आनन्दिन्यैकटिंदेव्याःशूलिनश्शूलपाणये ॥ माधव्यैचतथानाभिमथशम्भोर्भवायवै ॥ ४२ ॥ स्तनौचानन्दकारिण्यैशंकरस्येन्दुधारिणे ॥ उत्क
ण्ठिन्यैनमःकण्ठंनीलकण्ठायवैहरेः ॥ ४३ ॥ करावुत्पलधारिण्यैरुद्रायजगतःप्रभोः ॥ बाहूचपरिरम्भिण्यैनृत्यप्रीतायवैहरेः ॥ ४४ ॥ देव्यामुखंवि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लासिन्यैवृषभायपुनर्विभोः ॥ स्मितंचस्मरणीयायैविश्ववक्रायवैविभोः ॥ ४५ ॥ नेत्रेमन्दारवासिन्यैविश्वधाम्नेत्रिशूलिनः ॥ भ्रुवौनृत्यप्रियायैचशं
भोर्वैपाशंशूलिने ॥ ४६ ॥ देव्याललाटमिन्द्राण्यैवृषवाहायवैविभोः ॥ स्वाहायैमुकुटंदेव्याविभोगङ्गाधरायवै ॥४७॥विश्वकायौविश्वभुजौविश्वपदा
मुखौशिवौ ॥ प्रसन्नवरदौवन्देपार्वतीपरमेश्वरौ ॥ ४८ ॥ एवंसम्पूज्यविधिवदग्रतःशिवयोःपुनः ॥ पद्मोत्पलानिरजसानानावर्णेनकारयेत् ॥ ४९ ॥
शङ्खचक्रेसकटकेस्वस्तिकंशुभकारकम् ॥ यावन्तःपांसवस्तत्ररजसःपतिताभुवि ॥१५०॥ तावद्वर्षसहस्राणिशिवलोकेमहीयते ॥ चत्वारिघृतपात्रा
णिसहिरण्यानिशक्तितः ॥ ५१ ॥ दत्त्वाद्विजायकरकमुदकेनसमन्वितम् ॥ प्रतिपक्षंचतुर्मासंयावदेतान्निवेदयेत् ॥ ५२ ॥ ततस्तुचतुरोमासान्पू
र्ववत्करकोपरि॥चत्वारिघृतपात्राणितिलपात्राण्यनन्तरम्॥५३॥ गन्धोदकंपुष्पवारिचन्दनंकुङ्कुमोदकम्॥अपक्वंदधिदुग्धंचगोशृङ्गोदकमेवच॥५४॥
अब्दोदकंतथावारिकुष्ठचूर्णान्वितम्पुनः॥उशीरसलिलंचैवयवचूर्णोदकंपुनः ॥५५॥ तिलोदकंचसम्प्राश्यस्वपेन्मार्गशिरादिषु ॥ मासेषुपक्षद्वितयंप्राश
नंसमुदाहृतम् ॥ ५६ ॥ सर्वत्रशुक्लपुष्पाणिप्रशस्तानिसदार्चने ॥ दानकालेचसर्वत्रमन्त्रमेतमुदीरयेत् ॥ ५७ ॥ गौरीमेप्रीयतांनित्यमघनाशाय
मङ्गला ॥ सौभाग्यायास्तुललिताभवानीसर्वसिद्धये ॥ ५८ ॥ संवत्सरान्तेलवणंगुडकुङ्कुमसंयुतम् ॥ चन्दनेनयुतंकुम्भंसहस्वर्णाम्बुजेनच ॥५९॥
उमायाःप्रीतयेहैमंतद्विदिक्षुफलैर्युतम् ॥ सास्तरावरणांशय्यांसविश्रामांनिवेदयेत् ॥ १६० ॥ सपत्नीकायविप्रायगौरीमेप्रीयतामिति ॥ आत्मान
न्दकरींनामप्राप्नुयात्सम्पदंनरः ॥ ६१ ॥ आयुरानन्दसम्पन्नोनकचिच्छोकमाप्नुयात् ॥ नारीवाकुरुतेयातुकुमारीविधवातथा ॥६२॥ सापितत्फल
माप्नोतिदेव्यनुग्रहलालिता ॥ प्रतिपक्षमुपोष्यैवंमन्त्रार्चनविधानतः ॥ ६३ ॥ रुद्राणांलोकमाप्नोतिपुनरावृत्तिदुर्लभम् ॥ इमांयःशृणुयान्नित्यंश्राव
येद्वापिभक्तितः ॥ ६४ ॥ शक्रलोकंसगत्वातुपूज्यतेकल्पसंस्थितः ॥ शङ्करउवाच ॥ एवंविधाभवतिचेन्नारीव्रतपरायणा ॥ ६५ ॥ सावित्रीतुवरा
कीसातस्याःशापस्तुकीदृशः ॥ नकाचिद्गणनाचास्तियतस्त्रैलोक्यसुन्दरी ॥ ६६ ॥ सापूर्वस्यापिवन्द्याचलक्ष्मीर्विष्णुप्रतिग्रहात् ॥ मयापूर्वन्तवा
र्थायदक्षयज्ञस्तुनाशितः ॥६७ ॥ लक्ष्म्यर्थंविष्णुनाचापिवारिधिर्मथितः पुरा ॥ आज्ञाकरौभवत्योश्चमाकुरुष्वभयंक्वचित् ॥ ६८ ॥ सावित्र्यामान
नाकार्याकुपितायाःप्रसादनम् ॥ मयाचविष्णुनाचैवब्रह्मणामानमीप्सुना ॥ ६९ ॥ गमिष्येब्रह्मसदनंत्वंचतिष्ठवरानने ॥ एवमुक्त्वागतोरुद्रोगौरी
तत्रव्यवस्थिता ॥ १७० ॥ कृतंयुगंसमग्रंचयज्ञेतस्मिन्हुताशनः ॥ वहंस्तुहव्यंदेवानांप्रीणयानोजगत्त्रयम् ॥ ७१ ॥ भोजनंद्विजमुख्येषुभो
गान्विद्याधरेगणे ॥ कामावाप्तिंमनुष्येषुसर्वमेवददौप्रभुः ॥ ७२ ॥ रुद्रेणोक्तस्तदाविष्णुर्धर्मांस्तेत्वंप्रकीर्त्तय ॥ गौरीधर्मान्सरस्वत्यात्रतं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्परिकीर्तितम् ॥ ७३ ॥ इत्येवमुक्तेरुद्रेणविष्णुःप्रोवाचसादरम् ॥ विष्णुरुवाच ॥ नाहंधर्मंख्यापयिष्येस्वकीयंशङ्कराधुना ॥ ७४ ॥ भवाना
ख्यातुमाहात्म्यंमदीयंसुरसत्तम ॥ त्वयावैकथितंपूर्वंकृतंवैपापसंक्षयः ॥ ७५ ॥ भविष्यतिनसन्देहोभवान्पूतोभविष्यति ॥ भीष्मउवाच ॥
मधुरागीर्भवेत्केनव्रतेनमुनिसत्तम ॥ ७६ ॥ तथैवजनसौभाग्यंमतिर्विद्यासुकौशलम् ॥ अभेदश्चापिदाम्पत्येसङ्गोबन्धुजनेनच ॥ ७७ ॥
आयुश्चविपुलंपुंसांतन्मेकथयसत्तम ॥ पुलस्त्यउवाच ॥ सम्यक्पृष्टंत्वयाराजञ्शृणुसारस्वतंव्रतम् ॥ ७८ ॥ यस्यसंकीर्तनादेवदेवीतुष्येत्सरस्वती ॥
यावद्भक्तःस्तवंकुर्यादेतद्व्रतमनुत्तमम् ॥ ७९ ॥ प्राग्वासरादौसम्पूज्यदिव्यंस्तवंसमारभेत् ॥ अथवारविवारेणग्रहताराबलेनच ॥ १८० ॥ पाय
संभोजयेद्विप्रान्कुर्याद्ब्राह्मणवाचनम् ॥ शुक्लवस्त्राणिदत्त्वाचसहिरण्यानिशक्तितः ॥ ८१ ॥ गायत्रींपूजयेद्भक्त्याशुक्लमाल्यानुलेपनैः ॥ यथा
नदेविभगवान्ब्रह्मालोकपितामहः ॥ ८२ ॥ त्वांपरित्यज्यतिष्ठेच्चतथाभववरप्रदा ॥ वेदशास्त्राणिधर्माणिनृत्यागीतादिकंचयत् ॥ ८३ ॥
नविहीनंत्वयादेवितथामेसन्तुसिद्धयः ॥ लक्ष्मीर्मेधाधरापुष्टिर्गौरीतुष्टिर्जयामतिः ॥ ८४ ॥ एताभिःपाहिचाष्टाभिर्मूर्तिभिर्मांसरस्वति ॥ एवं
सम्पूज्यगायत्रींवीणाकमलधारिणीम् ॥ ८५ ॥ शुक्लपुष्पाक्षतैर्भक्त्यासकमण्डलुपुस्तकाम् ॥ मौनव्रतेनभुञ्जीतसायंप्रातश्चधर्मवित् ॥ ८६ ॥ पञ्च
म्यांप्रतिपक्षंचगांचविप्रायशोभनाम् ॥ तथैवतण्डुलप्रस्थंघृतपात्रेणसंयुतम् ॥ ८७ ॥ क्षीरंदद्याद्धिरण्यंचगायत्रीप्रीयतामिति ॥ सन्ध्यायांचतथा
मौनमेतत्कुर्वन्समाचरेत् ॥ ८८ ॥ नरात्र्यांभोजनंकुर्याद्यावन्मासास्त्रयोदश ॥ समाप्तेतुव्रतेदद्याद्भोजनंशुक्लतण्डुलैः ॥ ८९ ॥ पूर्णेसद्वस्त्रयुग्मंतुगांच
विप्रायशोभनाम् ॥दिव्यांवितानंघण्टांचसितनेत्रपटान्विताम् ॥१९० ॥ चन्दनंवस्त्रयुग्मंचदध्यन्नंसुरसंपुनः ॥ अथोपदेष्टारमपिभक्त्यासंपूजयेद्गुरु
म् ॥ ९१ ॥ वित्तशाठ्येनरहितोवस्त्रमाल्यानुलेपनैः ॥ अनेनविधिनायस्तुकुर्यात्सारस्वतंव्रतम् ॥ ९२ ॥ सौभाग्यमतियुक्तस्तुसूक्ष्मकण्ठश्चजा
यते ॥ सरस्वत्याःप्रसादेनब्रह्मलोकेमहीयते ॥ ९३ ॥ नारीवाकुरुतेयातुसापितत्फलभागिनी ॥ ब्रह्मलोकेवसेद्राजन्यावत्कल्पायुतत्रयम् ॥
॥ ९४ ॥ सारस्वतंव्रतंयस्तुशृणुयादपिवापठेत् ॥ विद्याधरपुरेसोऽपिवसेदब्दायुतत्रयम् ॥ १९५ ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेव्रता
ध्यायोनामद्वाविंशोध्यायः ॥ २२ ॥ भीष्मउवाच ॥ वैष्णवायेतुवैधर्मायान्रुद्रःप्रोक्तवानिह ॥ तान्मेकथयविप्रेन्द्रकीदृशास्तेफलंतुकिम् ॥ १ ॥
॥ पुलस्त्यउवाच ॥ पुरारथन्तरेकल्पेपरिपृष्टोमहात्मना ॥ मन्दरस्थोमहादेवःपिनाकीब्रह्मणास्वयम् ॥ २ ॥ कथमारोग्यमैश्वर्यमनन्तममरेश्वर ॥
अल्पेनतपसादेवभवेन्मोक्षःसदानृणाम् ॥ ३ ॥ किंतज्ज्ञानंमहादेवत्वत्प्रसादादधोक्षज ॥ अल्पकेनापितपसामहाफलमिहोच्यते ॥ ४ ॥ इतिपृष्टस्स

॥ ८३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विश्वात्माब्रह्मणालोकभावनः ॥ उमापतिरुवाचेदंमनसःप्रीतिकारकम् ॥ ५ ॥ ईश्वरउवाच ॥ अस्माद्रथन्तरात्कल्पाद्भूयोविंशतिमोयदा ॥ वाराहो
भविताकल्पस्तदामन्वन्तरेशुभे ॥६॥ वैवस्वताख्येसंप्राप्तेसप्तमेसप्तलोकधृक् ॥द्वापराख्यंयुगंतस्मिन्सप्तविंशतिमंयदा॥७॥तस्यान्तेतुमहातेजावासुदेवो
जनार्दनः ॥ भारावतरणार्थायत्रिधाविष्णुर्भविष्यति ॥ ८ ॥ द्वैपायनऋषिस्तत्ररौहिणेयोऽथकेशवः ॥ कंसारिःकेशिमथनःकेशवःक्लेशनाशनः ॥
॥ ९ ॥ पुरींद्वारवतींनामसाम्प्रतंयाकुशस्थली ॥ दिव्यानुभावसंयुक्तामधिवासायशार्ङ्गिणः ॥१०॥ त्वष्टातदाज्ञयाग[illegible]करिष्यतिजगत्पतेः॥तस्यांक
दाचिदासीनःसभायांसोऽमितद्युतिः॥११॥भार्याभिर्वृष्णिविद्वद्भिर्भूरिभिर्भूरिदक्षिणैः ॥ कुरुभिर्देवगन्धर्वैरन्वितःकैटभार्दनः ॥१२॥ प्रवृत्तासुपुराणासु
धर्मसम्बन्धिनीषुच ॥ कथासुभीमसेनेनपरिपृष्टःप्रतापवान् ॥१३॥ त्वयापृष्टस्यधर्मस्यवक्ष्यत्यस्यचभेदकृत्॥ भवितासतदाब्रह्मन्कर्ताचैववृकोदरः॥
॥ १४ ॥ प्रवर्तकोऽस्यधर्मस्यपाण्डुसूनुर्महाबलः ॥ यस्यतीक्ष्णोवृकोनामजठरेहव्यवाहनः ॥ १५ ॥ संभाष्यतेसधर्मात्मातेनचासौवृकोदरः ॥
अतीवस्वादशीलश्चनागायुतबलोमहान् ॥ १६ ॥ धार्मिकस्याप्यशक्तस्यतीव्राग्नित्वादुपोषणे ॥ इदंव्रतमशेषाणांव्रतानामधिकंयतः ॥ १७ ॥
कथयिष्यतिविश्वात्मावासुदेवोजगद्गुरुः॥अशेषयज्ञफलदमशेषाघविनाशनम् ॥१८॥ अशेषदुष्टशमनमशेषसुरपूजितम्॥पवित्राणांपवित्रंयन्मङ्गलानां
चमङ्गलम् ॥ भविष्यंचभविष्याणांपुराणानांपुरातनम् ॥ १९ वासुदेवउवाच ॥ यद्यष्टमीचतुर्दश्योर्द्वादशीषुचभारत ॥ अन्येष्वपिदिनर्क्षे
षुनशक्तस्त्वमुपोषितुम् ॥ २० ॥ ततस्त्वग्यामिमांभीमतिथिंपापप्रणाशिनीम् ॥ उपोष्यविधिनानेनगच्छविष्णोःपरंपदम् ॥ २१ ॥ माघ
मासस्यदशमीयदाशुक्लाभवेत्तदा ॥ घृतेनाभ्यञ्जनंकृत्वातिलैःस्नानंसमाचरेत् ॥ २२ ॥ तथैवविष्णुमभ्यर्चेन्नमोनारायणायच ॥ कृष्णा
यपादौसंपूज्यशिरःकृष्णात्मनेतिच ॥ २३ ॥ वैकुण्ठायेतिवैकण्ठमुरःश्रीवत्सधारिणे ॥ शङ्खिनेगदिनेचैवचक्रिणेवरदायवै ॥२४॥ सर्वंनारायण
न्त्वेवंसम्पूज्यावाहनक्रमात् ॥ दामोदरायेत्युदरंकटिंपञ्चजनायवै॥२५॥ऊरूसौभाग्यनाथायजानुनीभूतधारिणे॥ नमोनीलायवैजङ्घेपादौविश्वभुजेपु
नः ॥ २६ ॥ नमोदेव्यैनमःशान्त्यैनमोलक्ष्म्यैनमःश्रियै ॥ नमस्तुष्ट्यैनमःपुष्ट्यैधृत्यैव्युष्ट्यैनमोनमः ॥ २७ ॥ नमोविहङ्गनाथायवायुवेगायपक्षि
णे ॥ विषप्रमथनायेतिगरुडंचाभिपूजयेत् ॥ २८ ॥ एवंसम्पूज्यगोविन्दमुमापतिविनायकौ ॥ गन्धैर्माल्यैस्तथाधूपैर्भक्ष्यैर्नानाविधैरपि ॥२९॥
गव्येनपयसासिक्तांकृसरामथपायसम् ॥ सर्पिषासहभुक्त्वातुगत्वास्थानान्तरंपुनः ॥ ३० ॥ नैयग्रोधंदन्तकाष्ठमथवाखादिरंबुधः ॥ गृहीत्वाधा
वयेद्दन्तानाचांतःप्रागुदङ्मुखः ॥ ३१ ॥ ब्रूयात्सायन्तनींकृत्वासन्ध्यामस्तमितेरवौ ॥ नमोनारायणायेतित्वामहंशरणंगतः ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकादश्यांनिराहारःसमभ्यर्च्यचकेशवम् ॥ तांरात्रिंसकलांस्थित्वाशेषपर्यङ्कशायिनम् ॥ ३३ ॥ सर्पिषाविश्वदहनंहुत्वाब्राह्मणपुङ्गवैः ॥
सहैवपुण्डरीकाक्षंद्वादश्यांक्षीरभोजनम् ॥ ३४ ॥ करिष्यामियथात्मानंनिर्विघ्नेनास्तुतच्चमे ॥ एवमुक्त्वास्वपेद्भूमावितिहासकथांपुनः ॥
॥ ३५ ॥ श्रुत्वाप्रभातेसंजातेनदींगत्वाविशांपते ॥ स्नानंकृत्वामुदातद्वत्पाषण्डानभिवर्जयेत् ॥ ३६ ॥ उपास्यसन्ध्यांविधिवत्कृत्वाचपितृ
तर्पणम् ॥ प्रणम्यचहृषीकेशंशेषपर्यङ्कशायिनम् ॥ ३७ ॥ गृहस्यपुरतोभक्त्यामण्डपंकारयेद्बुधः ॥ चतुर्हस्तांशुभांकुर्याद्वेदीमरिनिषूदन ॥३८॥
चतुर्हस्तप्रमाणंतुविन्यसेत्तत्रतोरणम् ॥ मध्येचकलशंतत्रमाषमात्रेणसंयुतम् ॥३९॥ छिद्रेणजलसम्पूर्णमधःकृष्णाजिनेस्थितः ॥ तस्यधारांचशिरसा
धारयेत्सकलांनिशाम् ॥ ४० ॥ धाराभिर्भूरिभिर्भूरिफलंवेदविदोविदुः॥ यस्मात्तस्मात्कुरुश्रेष्ठकारयेत्प्रयतोद्विजः ॥४१॥ दक्षिणेचार्धचन्द्रन्तुपश्चि
मेवर्तुलंतथा ॥ अश्वत्थपत्राकारंचउत्तरेणतुकारयेत् ॥ ४२ ॥ मध्येतुपद्माकारंचकारयेद्वैष्णवोद्विजः ॥ पूर्वतोवेदिकास्थानंस्थानंयाम्येचकल्प
येत् ॥ ४३ ॥ पानीयधारांशिरसिधारयेद्विष्णुतत्परः ॥ द्वितीयावेदीदेवस्यतत्रपद्मंसकर्णिकम् ॥ ४४ ॥ तस्यमध्येस्थितंदेवंकुर्याद्वैपुरुषोत्तमम्॥
हस्तमात्रंचतत्कुण्डंकृत्वातत्रत्रिमेखलम् ॥ ४५ ॥ योनिवक्रंततस्तस्मिन्ब्राह्मणैर्यवसर्पिषी ॥ तिलांश्चविष्णुदेवत्यैर्मन्त्रैरेवानलेहुनेत् ॥ ४६ ॥
कृत्वातुवैष्णवंसम्यग्यागंतत्रप्रकल्पयेत् ॥ आज्यधारामध्यमेतुकुण्डेदद्यात्तुयत्नतः ॥४७॥ क्षीरधारांदेवदेवेवारिधारात्मनोपरि ॥ निष्पावार्धप्र
माणंवैधारामाज्यस्यपातयेत् ॥ ४८ ॥ स्वेच्छयाक्षीरजलयोरविच्छिन्नांचशर्वरीम् ॥ जलकुम्भान्महावीर्यस्थापयित्वात्रयोदश ॥ ४९ ॥ भक्ष्यै
र्नानाविधैर्युक्तान्सितवस्त्रैरलङ्कृतान् ॥ प्रतानौदुम्बरैःपात्रैःपञ्चरत्नसमन्वितैः ॥ ५० ॥ चतुर्भिर्बह्वृचैर्होमःकार्यस्तत्रउदङ्मुखैः ॥ रुद्रजाप्यश्चतु
र्भिश्चयजुर्वेदपरायणैः ॥ ५१ ॥ वैष्णवानिचसामानिचतुर्भिःसामवेदिभिः ॥ अरिष्टवर्गसहितान्यभितःपरिपाठयेत् ॥ ५२ ॥ एवंद्वाद
शवैविप्रान्वस्त्रमाल्यानुलेपनैः ॥ पूजयेदङ्गुलीयैश्चकटकैर्हेमसूत्रकैः ॥ ५३ ॥ वासोभिःशयनीयैश्चवित्तशाठ्यविवर्जितः ॥ एवंक्षपातिवाह्यावै
गीतमङ्गलनिःस्वनैः ॥ ५४ ॥ उपाध्यायस्यचपुनर्द्विगुणंसर्वमेवतु ॥ ततःप्रभातेविमलेसमुत्थायत्रयोदश ॥ ५५ ॥ गावोदेयाःकुरुश्रेष्ठसौ
वर्णशृङ्गसंवृताः ॥ पयस्विन्यःशीलवत्यःकांस्यदोहसमन्विताः ॥ ५६ ॥ रौप्यखुराःसवत्साश्चचन्दनेनाभिभूषिताः ॥ तास्तुतेषांततोदत्त्वा
भक्ष्यभोज्येनतर्पितान् ॥ ५७ ॥ कृत्वावैब्राह्मणान्सर्वाञ्छत्रैर्नानाविधैस्तथा ॥ भुक्त्वाचाक्षारलवणमात्मनाचविसर्जयेत् ॥ ५८ ॥ अनुगम्य
पदान्यष्टौपुत्रभार्यासमन्वितः ॥ प्रीयतामत्रदेवेशःकेशवःक्लेशनाशनः ॥ ५९ ॥ एवंगुर्वाज्ञयाकुम्भान्गाश्चैवशयनानिच ॥ वासांसिचैवसर्वेषां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गृहाणिप्रापयेद्बुधः ॥ ६० ॥ अभावेबहुशय्यानामेकामपिसुसंस्कृताम् ॥ शय्यांदद्याद्गृहीभीमसर्वोपस्करसंयुताम् ॥ ६१ ॥ इतिहासपुराणानिवाचयित्वातुवाहयेत् ॥ तद्दिनंकुरुशार्दूलयइच्छेद्विपुलांश्रियम् ॥ ६२ ॥ तस्मात्त्वंसत्त्वमालम्ब्यभीमसेनविमत्सरः ॥ कुरुव्रतमिदंसम्यक्स्नेहाद्गुह्यंमयोदितम् ॥ ६३ ॥ त्वयाकृतमिदंवीरत्वन्नाम्नाचभविष्यति ॥ साभीमद्वादशीह्येषासर्वपापहराशुभा ॥ यातुकल्याणिनीनामपुराकल्पेषुपठ्यत ॥ ६४ ॥ त्वंचादिकर्ताभवसौकरेऽस्मिन्कल्पेमहावीरवरप्रधान ॥ यस्याःस्मृतेःकीर्तनतोऽप्यशेषंपापंप्रनष्टंत्रिदशाधिपस्य ॥ ६५ ॥ दृष्ट्वाचतामप्सरसामभीष्टांवेश्याकृतामन्यभवान्तरेषु ॥ आभीरकन्याहिकुतूहलेनसैवोर्वशीसम्प्रतिनाकपृष्ठे ॥ ६६ ॥ जाताथसावैश्यकुलोद्भवापिपुलोमकन्यापुरुहूतपत्नी ॥ तत्रापितस्याः परिचारिकेयंममप्रियासम्प्रतिसत्यभामा ॥६७ ॥ कृतंपुरामङ्गलमेतदेवद्विजात्मजावेदवतीबभूव ॥ ६८ ॥ अस्यांचकल्याणतिथौविवस्वान्सहस्रधारेणसहस्ररश्मिः ॥ स्नातःपुरामण्डलमेत्यतद्वत्तेजोमयंखेटपतिर्बभूव ॥६९॥ इदमेवकृतंमहेन्द्रमुख्यैर्बहुभिर्देवसुरारिकोटिभिश्च ॥ फलमस्यहनशक्यतेहिवक्तुंयदिजिह्वायुतकोटयोमुखेस्युः ॥७०॥ कलिकलुषविदारिणीमनन्तामपिकथयिष्यतियादवेन्द्रसूनुः ॥ अथनरकगतान्पितॄनथैषाह्यलमुद्धर्तुमिहैवयःकरोति ॥७१॥ इदमनघशृणोतिवक्तिभत्त्यापरिपठतीहपरोपकारहेतोः॥ इहपङ्कजनाभभक्तिमान्भवेदथशक्रस्यसपूज्यतामुपैति ॥७२॥ कल्याणिनीनामपुराविसर्गेयाद्वादशीमाघसितेऽभिपूज्या॥सापाण्डुपुत्रेणकृताभविष्यत्यनन्तपुण्यानघभीमपूर्वा ॥७३॥ ब्रह्मोवाच ॥ वर्णाश्रमाणांप्रभवःपुराणेषुमयाश्रुतः॥सदाचारश्चभगवन्धर्मशास्त्राङ्गविस्तरैः ॥७४॥ पण्यस्त्रीणांसमाचारंश्रोतुमिच्छामितत्त्वतः ॥ ईश्वरउवाच॥तस्मिन्नेवपुरेब्रह्मन्सहस्राणितुषोडश॥७५॥वासुदेवस्यनारीणांभविष्यत्यम्बुजोद्भव॥ताभिर्वसन्तसमयेकोकिलालिकुलाकुले॥७६॥पुष्पितोपवनेफुल्लकह्लारसरसस्तटे॥निर्भरंसहपत्नीभिःप्रशस्ताभिरलङ्कृतः ॥७७॥ रमयिष्यतिविश्वात्माकृष्णोयदुकुलोद्वहः ॥ कुरङ्गनयनःश्रीमान्मालतीकृतशेखरः ॥७८॥ गच्छन्समीपमार्गेणसाम्बोजाम्बवतीसुतः॥साक्षात्कन्दर्परूपेणसर्वाभरणभूषितः॥७९ ॥अनङ्गशरतप्ताभिःसाभिलाषमवेक्षितः॥प्रवुद्धोमन्मथस्तासांभविष्यतियदात्मनि॥८०॥तदवेक्ष्यजगन्नाथस्सर्वज्ञोध्यानचक्षुषा ॥ स्वयंप्रभुर्वक्ष्यतितावोहरिष्यन्तिदस्यवः ॥८१॥ अपरोक्षंयतस्त्वेवंस्निग्धमेतद्विचिन्तितम् ॥ ततःप्रसादितोदेवइदंवक्ष्यतिशार्ङ्गभृत् ॥ ८२॥ ताभिःशापाभितप्ताभिर्भगवान्भूतभावनः ॥ उत्तराश्रितदाशानामुद्धर्ताब्राह्मणप्रियः ॥८३॥ उपदेक्ष्यत्यनन्तात्माभाविकल्याणकारकम् ॥ भवतीनामृषिर्दाल्भ्योयद्व्रतंकथयिष्यति॥८४॥इत्युक्त्वाताःपरित्यज्यगतोऽन्तर्धानमीश्वरः ॥ ततःकालेनमहताभारावतरणेकृते ॥८५॥ निवृत्तेमौसलेतद्वत्केशवेदिव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मागते॥शून्येयदुकुलेसर्वेचौरैरपिजितेऽर्जुने॥८६॥हृतासुकृष्णपत्नीषुदाशभोग्यासुचार्बुदे ॥ तिष्ठन्तीषुचदौगत्यसन्तप्तासुचतुर्मुख॥८७॥आगमिष्य
तियोगात्मादाल्भ्योनाममहातपाः ॥ तास्तमर्घ्येणसंपूज्यप्रणिपत्यपुनःपुनः ॥८८॥ लालप्यमानाबहुशोबाष्पपर्याकुलेक्षणाः॥ स्मरन्त्योविविधा
न्भोगान्दिव्यमाल्यानुलेपनान् ॥८९॥भर्त्तारंजगतामीशमनन्तमपराजितम्॥दिव्यानुभावांचपुरींनानारत्नगृहाणिच॥९०॥द्वारकावासिनःसर्वान्देवरू
पान्कुमारकान् ॥ प्रश्नमेतंकरिष्यन्तिमुनेरभिमुखंस्थिताः ॥ ९१ ॥ दस्युभिर्भगवन्सर्वाःपरिभुक्तावयंबलात् ॥ स्वधर्मश्च्याविताऽस्माकमस्मिन्नः
शरणंभवान् ॥९२॥ आदिष्टोऽसिपुराब्रह्मन्केशवेनचधीमता ॥ कस्मादीशेनसंयोगंप्राप्यवेश्यात्वमागताः ॥९३॥ वेश्यानामपियोधर्मस्तंनोब्रूहितपो
धन ॥ कथयिष्येऽवदत्तासांयद्दाल्भ्यश्चैकितायनः ॥९४॥ दाल्भ्यउवाच ॥ जलक्रीडाविहारेषुपुरासरसिमानसे ॥ भवतीनांसगर्वाणांनारदोऽभ्याश
मागतः ॥ ९५ ॥हुताशनसुताःसर्वाभवत्योऽप्सरसः पुरा ॥ अप्रणम्यावलेपेनपरिपृष्टःसयोगवित् ॥९६॥ कथंनारायणोऽस्माकंभर्त्तास्यादित्युपादि
श ॥ तस्माद्वरप्रदानंचशापश्चायमभूत्पुरा ॥९७॥ शय्याद्वयप्रदानेनमधुमाधवमासयोः ॥ सुवर्णोपस्करोत्सङ्गंद्वादश्यांशुक्लपक्षतः॥९८॥ भर्तानारा
यणोनूनंभविष्यत्यन्यजन्मनि॥यदकृत्वाप्रणामंमेरूपसौभाग्यमत्सरात् ॥९९॥परिपृष्टोऽस्मितेनाशुवियोगोवोभविष्यति॥चोरैरपहृताःसर्वावेश्यात्वं
समवाप्स्यथ ॥ १०० ॥ एवंनारदशापेनकेशवस्यचशापतः ॥ वेश्यात्वमागताःसर्वाभवत्यःकाममोहिताः ॥ १ ॥ इदानीमपियद्वक्ष्येत
च्छृणुध्वंवराङ्गनाः ॥ पुरादैवासुरेयुद्धेहतेषुशतशःसुरैः ॥ २ ॥ दानवासुरदैत्येषुराक्षसेषुततस्ततः ॥ तेषांदारसहस्राणिशतशोऽथसहस्रशः ॥ ३ ॥
परिणीतानियानिस्युर्बलाद्भुक्तानियानिवै ॥ तानिसर्वाणिदेवेशःप्रोवाचवदतांवरः ॥ ४ ॥ वेश्याधर्मेणवर्तध्वमधुनानृपमन्दिरे ॥ भक्तिमत्यो
वरारोहास्तथादेवकुलेषुच ॥ ५ ॥ राजतःस्वामिनश्चापिजीविकांचप्रलप्स्यथ ॥ भविष्यतिचसौभाग्यंसर्वासामपिशक्तितः ॥ ६ ॥ यः
कश्चिच्छुल्कमादायगृहमेष्यतिवःसदा ॥ निश्छद्मनैवोपचर्यःप्रीतिभावैरदाम्भिकैः ॥ ७ ॥ देवतानांपितॄणांचपुण्येऽह्निसमुपस्थिते ॥ गोभूहिर
ण्यधान्यानिप्रदेयानिचशक्तितः ॥ ८ ॥ यद्व्रतंचोपदेक्ष्यामितत्कुरुध्वंचसर्वशः ॥ संसारोत्तारणायालमेतद्वेदविदोविदुः ॥ ९ ॥ यदासूर्य
दिनेहस्तःपुष्योवाथपुनर्वसुः ॥ ॥ भवेत्सर्वौषधिस्नानंसम्यङ्नारीसमाचरेत् ॥ ११० ॥ तदापञ्चशरात्मातुहरिस्सन्निधिमेष्यति ॥ अर्चयेत्पु
ण्डरीकाक्षमनङ्गस्यानुकीर्तनैः ॥ ११ ॥ कामायपादौसम्पूज्यजङ्घेवैमोहकारिणे ॥ मेढ्रंकन्दर्पनिधयेकटिंप्रीतिमतेनमः ॥ १२ ॥ नाभिंसौख्य
समुद्रायवामनायतथोदरम् ॥ हृदयंहृदयेशायस्तनावाह्लादकारिणे ॥१३॥ उत्कण्ठायेतिवैकण्ठमास्यमानन्दकारिणे ॥ वामांसंपुष्पचापायपुष्पबा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णायदक्षिणम् ॥ १४ ॥ मानसायेतिवैमौलिंविलोलायेतिमूर्द्धजम् ॥ सर्वात्मनेशिरस्तद्वद्देवदेवस्यपूजयेत् ॥ १५ ॥ नमःशिवायशान्ताय पाशाङ्कुशधरायच ॥ गदिनेपीतवस्त्रायशङ्खचक्रधरायच ॥ १६ ॥ नमोनारायणायेतिकामदेवात्मनेनमः ॥ नमःशान्त्यैनमःप्रीत्यैनमोरत्यै नमःश्रियै ॥ १७ ॥ नमःपुष्ट्यैनमस्तुष्ट्यैनमःसर्वार्थसम्पदे ॥ एवंसम्पूज्यगोविन्दमनङ्गात्मकमीश्वरम् ॥ १८ ॥ गन्धमाल्यैस्तथाधूपैर्नैवेद्येनचभामिनी ॥ ततआहूयधर्मज्ञंब्राह्मणंवेदपारगम् ॥ १९ ॥ अव्यङ्गमथसम्पूज्यगन्धपुष्पार्चनादिभिः ॥ शालेयतण्डुलप्रस्थंघृतपात्रेणसंयुतम् ॥ १२० ॥ तस्मैविप्रायवैदद्यान्माधवःप्रीयतामिति ॥ यथेष्टाहारसम्भुक्तमेनंद्विजमनुत्तमम् ॥ २१ ॥ रत्यर्थंकामदेवोऽयमितिचित्तेच धारयेत् ॥ यद्यदिच्छतिविप्रेन्द्रस्तत्तत्कुर्याद्विलासिनी ॥२२॥ सर्वभावेनचात्मानमर्पयेत्स्मितभाषिणी ॥ एवमादित्यवारेणसर्वमेतत्समाचरेत् ॥२३॥तण्डुलप्रस्थदानंचयावन्मासास्त्रयोदश॥ततस्त्रयोदशेमासिसम्प्राप्तेचास्यभामिनी॥२४॥विप्रस्योपस्करैर्युक्तांशय्यांदद्याद्विचक्षणा॥सोपधानां सविन्यासांस्वास्तरावरणांशुभाम्॥२५॥दीपिकोपानहच्छत्रपादुकासनसंयुताम्॥सपत्नीकमलङ्कृत्यहेमसूत्राङ्गुलीयकैः॥२६॥सूक्ष्मवस्त्रैःसकटकैर्धूपमाल्यानुलेपनैः ॥ कामदेवंसपत्नीकंगुडकुम्भोपरिस्थितम् ॥ २७ ॥ ताम्रपात्रासनगतंहेमनेत्रपटावृतम् ॥ सुकांस्यभाजनोपेतमिक्षुदण्डसमन्वितम् ॥ २८ ॥ दद्यादनेनमन्त्रेणतथैकांगांपयस्विनीम् ॥ यथान्तरंनपश्यामिकामकेशवयोःसदा ॥ २९ ॥ तथैवसर्वकामाप्तिरस्तुविप्रसदामम ॥ तथाच काञ्चनंदेवंप्रतिगृह्यद्विजोत्तमः ॥१३०॥ कोऽदात्कामोऽदादितिवैदिकंमन्त्रमुदीरयेत् ॥ ततःप्रदक्षिणीकृत्यविसृज्यद्विजपुङ्गवम् ॥ ३१ ॥ शय्यासनादिकंसर्वंब्राह्मणस्यगृहंनयेत् ॥ ततःप्रभृतियोऽन्योऽपिरत्यर्थंगेहमागतः ॥ ३२ ॥ सम्मान्यसूर्यवारेणससम्पूज्योभवेत्सदा ॥ एवंत्रयोदशंयावन्मासमेकंद्विजोत्तमम् ॥ ३३ ॥ तर्पयित्वायथाकामंप्रेषयेच्चैवमन्दिरम् ॥ तदनुज्ञयारूपवन्तंयावदस्यागमोभवेत् ॥ ३४ ॥ आत्मनोऽपियदाविघ्नंगर्भसूतकराजकम् ॥ दैवंवामानुषंवास्यादुपरागेणवाततः ॥३५॥ सावारानष्टपञ्चाशद्यथाशक्तिसमर्पयेत् ॥ एतद्धिकथितंसम्यग्भवतीनांविशेषतः ॥ ३६ ॥ स्वधर्मोऽयंयतोभाव्योवेश्यानामिहसर्वदा ॥ शय्ययात्यज्यतेदेवनकदाचिद्यथाभवान् ॥ ३७ ॥ शय्याममाप्यशून्येयंतथास्तुमधुसूदन ॥ गीतवादित्रनिर्घोषंदेवदेवस्यकारयेत् ॥ ३८ ॥ एतद्वःकथितंसर्वंवेश्याधर्ममशेषतः ॥ पुरुहूतेनयत्प्रोक्तंदानवीषुपुरामया ॥ ३९ ॥ तदिदंसाम्प्रतंसर्वंभवतीष्वपियुज्यते ॥ सर्वपापप्रशमनमनन्तफलदायकम् ॥ कल्याणिनीनांकथितंतदेतद्धुश्चरंव्रतम् ॥ १४० ॥ करोतियाशेषमुदग्रमेतत्कल्याणिनीमाधवलोकसंस्था ॥ सापूजितादेवगणैरशेषैरानन्दकृत्स्थानमुपैतिविष्णोः ॥ ४१ ॥ तपोधनःसोऽप्यभिधायचैतदनङ्गदानव्रतमङ्गनानाम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वस्थानमेष्यन्तिसमस्तमित्थंव्रतंकरिष्यन्तिचदेवयोने ॥१४२॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेवश्याव्रतकथनंनामत्रयोविंशोऽध्यायः ॥ २३ ॥
ब्रह्मोवाच ॥ भगवन्पुरुषस्येहस्त्रियाश्चवरदायकम् ॥ शोकव्याधिभयन्दुःखंनभवेद्येनतद्वद ॥ १ ॥ शङ्करउवाच ॥ श्रावणस्यद्वितीयायांकृष्णायांम
धुसूदनः ॥ क्षीरार्णवेसपत्नीकःसदावसतिकेशवः ॥२॥ तस्यांसम्पूज्यगोविन्दंसर्वान्कामानवाप्नुयात् ॥ गोभूहरिण्यदाक्षादिसप्तकल्पशतानुगम्॥३॥
आवाहनादिकाम्पूजांपूर्ववत्परिकल्पयेत् ॥ अशून्यशयनानामद्वितीयाऽसौप्रकीर्तिता ॥४ ॥ तस्यांसम्पूजयेद्विष्णुमेभिमन्त्रैर्विधानतः ॥ श्रीवत्सधा
रिञ्श्रीकान्तश्रीपतेश्रीधराव्यय ॥ ५ ॥ गार्हस्थ्यंमाप्रणाशंमेयातुधर्मार्थकामदम् ॥ अग्नयोमाप्रणश्यन्तुदेवताःपुरुषोत्तम ॥ ६ ॥ पितरोमाप्रण
श्यन्तुममदाम्पत्यभेदतः ॥ लक्ष्म्यावियुज्यतेदेवोनकदाचिद्यथाहरिः ॥ ७ ॥ तथाकलत्रसम्बन्धोदेवमामेवियुज्यताम् ॥ लक्ष्म्यानशून्यंवरदय
थातेशयनंसदा ॥ ८ ॥ शय्याममाप्यशून्यास्तुतथैवमधुसूदन ॥ गीतवादित्रनिर्घोषान्देवदेवस्यकारयेत् ॥ ९ ॥ घण्टाभवेदशक्तस्यसर्ववाद्यमयी
यतः ॥ एवंसम्पूज्यगोविन्दमश्नीयात्तैलवर्जितम् ॥ १० ॥ नक्तमक्षारलवणंयावत्तस्याश्चतुष्टयम् ॥ ततःप्रभातेसञ्जातेलक्ष्मीपतिसमन्विताम् ॥११॥
दीपान्नभाजनैर्युक्तांशय्यांदद्याद्विलक्षणाम् ॥ पादुकोपानहच्छत्रचामरासनसंयुताम् ॥ १२ ॥ अभीष्टोपस्करैर्युक्तांशुक्लपुष्पाम्बरावृताम् ॥ अव्यङ्गाय
चविप्रायवैष्णवायकुटुम्बिने ॥ १३ ॥ दातव्यावेदविदुषेनवन्ध्यापतयेक्वचित् ॥ तत्रोपवेश्यदाम्पत्यमलङ्कृत्यविधानतः ॥ १४ ॥ पत्न्यास्तु
भाजनंदद्याद्भक्ष्यभोज्यसमन्वितम् ॥ ब्राह्मणस्यापिसौवर्णीमुपस्करसमन्विताम् ॥ १५ ॥ प्रतिमांदेवदेवस्यसोदकुम्भांनिवेदयेत् ॥ एवंयस्तुपुमा
न्कुर्यादशून्यशयनंहरेः ॥१६॥ वित्तशाठ्येनरहितोनारायणपरायणः ॥ नतस्यपत्न्याविरहःकदाचिदपिजायते ॥१७॥ नारीवाविधवाब्रह्मन्यावच्चन्द्रा
र्कतारकम् ॥ नविरूपौनशोकार्तौदम्पतीभवतःक्वचित् ॥ १८ ॥ नपुत्रपशुरत्नानिक्षयंयान्तिपितामह ॥ सप्तकल्पसहस्राणिसप्तकल्पशतानिच॥१९॥
कुर्वन्नशून्यशयनंविष्णुलोकेमहीयते ॥ ब्रह्मोवाच ॥ कथमारोग्यमैश्वर्यंमतिर्धर्मेस्थितिस्सदा ॥ २० ॥ अव्यङ्गाथपरेभक्तिर्विष्णौचापिभवे
त्कथम् ॥ ईश्वरउवाच ॥ साधुब्रह्मंस्त्वयापृष्टमिदानींकथयामिते ॥ २१ ॥ विरोचनस्यसंवादंभार्गवस्यचधीमतः ॥ प्रह्लादस्यसुतंदृष्ट्वाद्विरष्टपरि
वत्सरम् ॥ २२ ॥ तस्यरूपमिदंब्रह्मन्सोऽहसद्भृगुनन्दनः ॥ साधुसाधुमहाबाहोविरोचनशिवंतव ॥ २३ ॥ तत्तथाहसितंतस्यपप्रच्छसुरसूदनः ॥
ब्रह्मन्किमर्थमेतत्तेहास्यंवैमामकंकृतम् ॥ २४ ॥ साधुसाध्वितिमामेवमुक्तवांस्त्वंवदस्वमे ॥ तमेवंवादिनंयुक्तमुवाचवदतांवरः ॥ २५ ॥ विस्मयाद्व्रत
माहात्म्याद्धास्यमेतत्कृतंमया ॥ पुरादक्षविनाशायकुपितस्यत्रिशूलिनः ॥ २६ ॥ अपतद्भीमवक्त्रस्यस्वेदबिन्दुर्ललाटजः ॥ भित्त्वाससप्तपाता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लानदहत्सप्तसागरान् ॥ २७ ॥ अनेकवक्त्रनयनोऽज्वलज्ज्वलनभीषणः ॥ वीरभद्रइतिख्यातःकरपादायुतैर्युतः ॥ २८ ॥ कृत्वासयज्ञमथनंपुनर्भूत
स्यसंप्लवः ॥ त्रिजगद्दहनाद्भूयःशिवेनविनिवारितः ॥ २९ ॥ कृतंत्वयावीरभद्रदक्षयज्ञविनाशनम् ॥ इदानीमलमेतेनलोकदाहेनकर्मणा ॥ ३० ॥
शान्तिप्रदानात्सर्वेषांग्रहाणांप्रथमोभव ॥ प्रहृष्टाभिजनाःपूजांकरिष्यन्तिकृतात्मनः ॥ ३१ ॥ अङ्गारकइतिख्यातिंगमिष्यसिधरात्मज ॥ देवलोके
द्वितीयंचतवरूपंभविष्यति ॥ ३२ ॥ येचत्वांपूजयिष्यन्तिचतुर्थ्यांतुदिनेनराः ॥ रूपमारोग्यमैश्वयतेष्वनन्तंभविष्यति ॥ ३३ ॥ एवमुक्तस्ततः
शान्तिमगमत्कामरूपधृक् ॥ सजातस्तत्क्षणाद्राजन्ग्रहत्वमगमत्पुनः ॥ ३४ ॥ सकदाचिद्भवांस्तस्यपूजार्घादिकमुत्तमम् ॥ दृष्टवान्क्रियमा
णंचशूद्रेणत्वंव्यवस्थितः ॥ ३५ ॥ तेनत्वंरूपवाञ्जातोसुरःशत्रुकुलाशनिः ॥ विविधाचरुचिर्जातायस्मात्तवविदूरगा ॥ ३६ ॥ विरोचनइतिप्राहु
स्तस्मात्त्वांदेवदानवाः ॥ शूद्रेणक्रियमाणस्यव्रतस्यतवदर्शनात् ॥ ३७ ॥ ईदृशीरूपसंपत्तिरितिविस्मितवानहम् ॥ साधुसाध्वितितेनोक्तमहोमाहा
त्म्यमुत्तमम् ॥ पश्यतोऽपिभवेद्रूपमैश्वर्यंकिमुकुर्वतः ॥ ३८ ॥ यस्माच्चभक्त्याधरणीसुतस्यविनिन्द्यमानेनगवादिदानम् ॥ आलोकितंतेन
सुरारिगर्भेसम्भूतिरेषातवदैत्यजाता ॥ ३९ ॥ अथतद्वचनंश्रुत्वाभार्गवस्यमहात्मनः ॥ प्रह्लादनन्दनोवीरःपुनःपप्रच्छभार्गवम् ॥ ४० ॥ विरोचन
उवाच ॥ भगवंस्तद्व्रतंसम्यक्श्रोतुमिच्छामितत्त्वतः ॥ दीयमानंतुयद्दानंमयादृष्टंभवान्तरे ॥ ४१ ॥ माहात्म्यंचविधिंतस्ययथावद्व
क्तुमर्हसि ॥ इतितद्वचनंश्रुत्वाविप्रःप्रोवाचसादरम् ॥ ४२ ॥ चतुर्थ्यङ्गारकदिनेयदाभवतिदानव ॥ मृदास्नानंतदाकुर्यात्पद्मरागविभूषितः ॥ ४३ ॥
अग्निर्मूर्द्धादिवोमन्त्रंजपेत्स्नातउदङ्मुखः ॥ शूद्रस्तूष्णींस्मरन्भौममास्तांभोगविवर्जितः ॥ ४४ ॥ अथास्तमितआदित्येगोमयेनानुलेपयेत् ॥
प्राङ्गणंपुष्पमालाभिरक्षताद्भिःसमन्ततः ॥ ४५ ॥ तदभ्यर्च्यालिखेत्पद्मंकुङ्कुमेनाष्टपत्रकम् ॥ कुङ्कुमस्याप्यभावेनरक्तचन्दनमिष्यते ॥ ४६ ॥
चत्वारःकरकाःकार्याभक्ष्यभोज्यसमन्विताः ॥ तण्डुलैरक्तशालेयःपद्मरागैश्चसंयुताः ॥ ४७ ॥ चतुष्कोणेषुतान्कृत्वाफलानिविविधानिच ॥ गन्ध
माल्यादिकंसर्वंतथैवविनिवेशयेत् ॥ ४८ ॥ सुवर्णशृङ्गांकपिलामथार्च्यरौप्यैःखुरैःकांस्यदोहांसवस्त्राम् ॥ धुरन्धरंरक्तखुरंचसौम्यंधान्यानिसप्ताम्बर
संयुतानि ॥ ४९ ॥ अङ्गुष्ठमात्रंपुरुषंतथैवसौवर्णमप्यायतबाहुदण्डम् ॥ चतुर्भुजंहेममयंचताम्रपात्रेगुडस्योपरिसर्पियुक्तम् ॥ ५० ॥ सामस्वरज्ञाय
जितेन्द्रियायवाग्रूपशीलान्वयसंयुताय ॥ दातव्यमेतत्सकलंद्विजायकुटुम्बिनेनैवतुदम्भयुक्ते ॥ ५१ ॥ भूमिपुत्रमहाभागस्वेदोद्भवपिनाकिनः ॥ रूपा
र्थीत्वांप्रपन्नोऽहंगृहाणार्घ्यंनमोऽस्तुते ॥ ५२ ॥ मन्त्रेणानेनदत्त्वार्घ्यंरक्तचन्दनवारिणा ॥ ततोऽर्चयेद्विप्रवरंरक्तमाल्याम्बरादिभिः ॥ ५३ ॥ दद्यात्तेनैव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मन्त्रेणभौमंगोमिथुनान्वितम् ॥ शय्यांचशक्तिमान्दद्यात्सर्वोपस्करसंयुताम् ॥ ५४ ॥ यद्यदिष्टतमंलोकेयच्चास्यदयितंगृहे ॥ तत्तद्गुणवतेदेयंदत्तस्या
क्षयमिच्छता ॥ ५५ ॥ ततःप्रदक्षिणंकृत्वाविसृज्यद्विजसत्तमम् ॥ नक्तंक्षीराशनंकुर्याद्देवंचाङ्गारकाष्टकम् ॥ ५६ ॥ चतुरोवाथवातस्यंयत्पुण्यं
तद्वदामिते ॥ रूपसौभाग्यसंपन्नःपुमाञ्जन्मनिजन्मनि ॥ ५७ ॥ विष्णौवाथशिवेभक्तःसप्तद्वीपाधिपोभवेत् ॥ सप्तकल्पसहस्राणिरुद्रलोकेमही
यते ॥ तस्मात्त्वमपिदैत्येन्द्रव्रतमेतत्समाचर ॥ ५८ ॥ इत्येवमुक्तोभृगुनन्दनेनचकारसवर्वंतमेवदैत्यः ॥ त्वंचापिराजन्कुरुसर्वमेतद्यतोऽक्षयं
वेदविदोवदन्ति ॥५९॥ शृणोतियश्चैनमनन्यचेतास्तस्यापिसर्वंभगवन्विधत्त ॥ ६० ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेअङ्गारकचतुर्थीव्रतंनामचतु
र्विंशोऽध्यायः ॥ २४ ॥ भीष्मउवाच ॥ उपवासेष्वशक्तस्यतदेवफलमिच्छतः ॥ अनभ्यासेनरोगाद्वाकिमिष्टंव्रतमुच्यताम् ॥ १ ॥ पुलस्त्यउवाच॥
उपवासेष्वशक्तानांनक्तंभोजनमिष्यते ॥ यस्मिन्व्रतेतदप्यत्रश्रूयतांवैव्रतंमहत् ॥ २ ॥ आदित्यशयनंनामयथावच्छङ्करार्चनम् ॥ येषुनक्षत्रयोगेषु
पुराणज्ञाःप्रचक्षते ॥ ३ ॥ यदाहस्तेनसप्तम्यामादित्यस्यदिनंभवेत् ॥ सूर्यस्यचापिसङ्क्रातिस्तिथिस्सासार्वकामिकी ॥ ४ ॥ उमामहेश्वरस्यार्चा
मर्चयेत्सूर्यनामभिः ॥ सूर्यार्चांशिवलिङ्गंचउभयंपूजयेद्यतः ॥ ५ ॥ उमापतेरवेश्चापिनभेदःक्वचिदिष्यते ॥ यस्मात्तस्मान्नृपश्रेष्ठगृहेभानुंसमर्च
येत् ॥ ६॥ हस्तेनसूर्यायनमोऽस्तुपादावर्कायचित्रासुचगुल्फदेशम् ॥ स्वातीषुजङ्घेपुरुषोत्तमायधात्रेविशाखासुचजानुदेशम् ॥ ७ ॥ तथानुराधासुन
मोऽभिपूज्यमूरुद्वयंचैवसहस्रभानोः ॥ ज्येष्ठास्वनङ्गायनमोऽस्तुगुह्यमिन्द्रायभीमायकटिंचमूले॥८॥ पूर्वोत्तराषाढयुगेचनाभिंत्वष्ट्रेनमःसप्ततुरङ्गमाय॥
तीक्ष्णांशवेश्रवणेचाथकुक्षिंपृष्ठंधनिष्ठासुविकर्तनाय ॥ ९ ॥ वक्षस्थलंध्वान्तविनाशनायजलाधिपर्क्षेप्रतिपूजनीयम् ॥ पूर्वोत्तराभाद्रपदद्वयेचबाहू
त्तमश्चण्डकरायपूज्यौ ॥१०॥ साम्नामधीशायकरद्वयंचसम्पूजनीयंनृपरेवतीषु ॥ नखानिपूज्यानितथाश्विनीषुनमोऽस्तुसप्ताश्वधुरन्धराय ॥ ११ ॥
कठोरधाम्नेभरणीषुकण्ठंदिवाकरायेत्यभिपूजनीयम् ॥ ग्रीवाग्निपर्क्षेऽधरसम्पुटेतुसम्पूजयेद्वारतरोहिणीषु ॥१२॥ मृगेऽर्चनीयारसनापुरारेरौद्रेतुदन्ता
हरयेनमस्ते ॥ नमःसवित्रेइतिशङ्करस्यनासाभिपूज्याचपुनर्वसौच ॥ १३ ॥ ललाटमम्भोरुहवल्लभायपुष्येऽलकान्वेदशरीरधारिणे ॥ सार्पेच
मौलिंविबुधप्रियायमघासुकर्णाविितिपूजनीयौ ॥ १४ ॥ पूर्वासुगोब्राह्मणनन्दनायनेत्राणिसंपूज्यतमानिशम्भोः ॥ अथोत्तराफाल्गुनिभेभ्रुवौचवि
श्वेश्वरायेतिचपूजनीये ॥ १५ ॥ नमोऽस्तुपाशाङ्कुशपद्मशूलकपालसर्पेन्दुधनुर्धराय ॥ गयासुरानङ्गपुरान्धकादिविनाशमूलायनमःशिवाय
॥ १६ ॥ इत्यादिकाङ्गानिचपूजयित्वाविश्वेश्वरायेतिशिरोऽभिपूज्यम् ॥ अत्रापिभोक्तव्यमतैलमन्नममांसमक्षारमभुक्तशेषम् ॥ १७ ॥ इत्येवंनृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पनक्तानिकृत्वादद्यात्पुनर्वसौ ॥ शालेयतण्डुलप्रस्थमौदुम्बरमथोघृतम् ॥ १८ ॥ संस्थाप्यपात्रेविप्रायसहिरण्यंनिवेदयेत् ॥ सप्तमेवस्त्रयुग्मंतुपारणे त्वधिकंभवेत् ॥ १९ ॥ चतुर्दशेतुसम्प्राप्तेपारणेभारतादिके ॥ ब्राह्मणंभोजयेद्भक्त्यागुडक्षीरघृतादिभिः ॥ २० ॥ कृत्वाचकाञ्चनंपद्ममष्टपत्रंसक र्णिकम् ॥ शुद्धमष्टाङ्गुलंतच्चपद्मरागदलान्वितम् ॥२१॥ शय्यांसुलक्षणांकृत्वाविरुद्धग्रन्थिवर्जिताम् ॥ सोपधानवितानांचस्वास्तरावरणाश्रयाम् ॥ २२ ॥ पादुकोपानहच्छत्रचामरासनदर्पणैः ॥ भूषणैरपिसंयुक्तांफलवस्त्रानुलेपनैः ॥ २३ ॥ तस्यांविधायतत्पद्ममलङ्कृत्यगुणान्विताम् ॥ कपि लांवस्त्रसंयुक्तामतिशीलांपयस्विनीम् ॥ २४ ॥ रौप्यखुरांहैमशृङ्गींसवत्सांकांस्यदोहनाम् ॥ दद्यान्मन्त्रेणतांधेनुंपूर्वाह्लेनातिलङ्घयेत् ॥ २५ ॥ यथैवादित्यशयनमशून्यंतवसर्वदा ॥ कान्त्याधृत्याश्रियापुष्ट्यातथामेसन्तुवृद्धयः ॥ २६ ॥ तथानदेवाःश्रेयांसंत्वदन्यमनघंविदुः ॥ तथामामुद्धरा शेषदुःखसंसारसागरात् ॥ २७ ॥ ततःप्रदक्षिणीकृत्यप्रणम्यचविसर्जयेत् ॥ शय्यांगवादितत्सर्वंद्विजस्यभवनंनयेत् ॥ २८ ॥ नैतद्विशीला यनदाम्भिकायप्रकाशनीयंव्रतमिन्दुमौलेः ॥ गोविप्रदेवर्षिविकर्मयोगिनांयश्चापिनिन्दामधिकांविधत्ते ॥ २९ ॥ भक्तायदान्तायचगुह्यमेतदाख्ये यमानन्दकरंशिवञ्च ॥ इदंमहापातकिनांनराणांअघक्षयंवेदविदोवदन्ति ॥ ३० ॥ नबन्धुपुत्रैर्नधनैर्वियुक्तःपत्नीभिरानन्दकरःसुराणाम् ॥ नाभ्ये तिरोगंनचदुःखमोहंयाचापिनारीकुरुतेऽथभक्त्या ॥ ३१ ॥ इदंवसिष्ठेनपुराऽर्जुनेनकृतंकुबेरेणपुरन्दरेण ॥ यत्कीर्तनादप्यखिलानिनाशमायान्ति पापानिनसंशयोऽत्र ॥ ३२ ॥ इतिपठतिशृणोतिवायइत्थंरविशयनंपुरुहूतवल्लभःस्यात् ॥ अपिनरकगतान्पितॄनशेषानपिदिवमानयतीहयःकरोति ॥ ३३ ॥ अश्वत्थंचवटंचैवोदुम्बरंवृक्षमेवच ॥ नन्दीशंजम्बुवृक्षंचबिल्वंप्राहुर्महर्षयः ॥ ३४ ॥ मार्गशीर्षादिमासाभ्यांद्वाभ्यांद्वाभ्यामथ क्रमात् ॥ एकैकंदन्तधवनंवृक्षेष्वेतेषुकारयेत् ॥३५॥ दद्यात्समाप्तेदध्यन्नंवितानध्वजचामरम् ॥ द्विजानामुदकुम्भांश्चपञ्चरत्नसमन्वितान् ॥ ३६ ॥ नवित्तशाठ्यंकुर्वीतकुर्वन्दोषानवाप्नुयात् ॥३७॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेआदित्यशयनव्रतंनामपञ्चविंशोऽध्यायः ॥ २५ ॥ भीष्मउवाच ॥ दीर्घायुरारोग्यकुलातिवृद्धिभिर्युक्तःपुमान्रूपकुलान्वितःस्यात् ॥ मुहुर्मुहुर्जन्मनियेनसम्यग्व्रतंसमाचक्ष्वचशीतरश्मेः ॥ १ ॥ पुलस्त्यउवाच ॥ त्वयापृष्टमिदंसम्यगक्षयस्वर्गकारकम् ॥ रहस्यंतुप्रवक्ष्यामियत्पुराणविदोविदुः ॥ २ ॥ रोहिणीचन्द्रशयनंनामव्रतमिहोच्यते ॥ तस्मिन्नारायणस्या र्चामर्चयेदिन्दुनामभिः ॥ ३ ॥ यदासोमदिनेशुक्लाभवेत्पञ्चदशीक्वचित् ॥ अथवाब्रह्मनक्षत्रंपौर्णमास्यांप्रजायते ॥ ४ ॥ तदास्नानंनरःकुर्यात्प ञ्चगव्येनसर्षपैः ॥ आप्यायस्वेतिचजपेद्विद्वानष्टशतंपुनः ॥ ५ ॥ शूद्रोऽपिपरयाभक्त्यापाषण्डालापवर्जितः ॥ सोमायवरदायाथविष्णवेचनमो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नमः ॥ ६ ॥ कृतजप्यःस्वभवनमागत्यमधुसूदनम् ॥ पूजयेत्फलपुष्पैश्चसोमनामानिकीर्तयन् ॥ ७ ॥ सोमायशान्तायनमोऽस्तुपादावनन्तधा
म्नेतिचजानुजङ्घे ॥ ऊरुद्वयंचापिजलोदरायसम्पूजयेन्मेढ्रमनङ्गधाम्ने ॥ ८ ॥ नमोनमःकामसुखप्रदायकटिःशशाङ्कस्यसदार्चनीयः ॥ तथोदरंचा
प्यमृतोदरायनाभिःशशाङ्कायनमोऽभिपूज्या ॥ ९ ॥ नमोऽस्तुचन्द्रायमुखंचनित्यंदन्ताद्विजानामधिपायपूज्याः ॥ हास्यंनमश्चन्द्रमसेऽभिपूज्य
मोष्ठौतुकौमोदवनप्रियाय ॥ १० ॥ नासाचनाथायवरौषधीनामानन्दबीजायपुनर्भ्रुवौच ॥ नेत्रद्वयंपद्मनिभंतथेन्दोरिन्दीवरव्यासकरायशौरेः ॥
॥ ११ ॥ नमःसमस्ताध्वरपूजितायकर्णद्वयंदैत्यनिषूदनाय ॥ ललाटमिन्दोरुदधिप्रियायकेशाःसुषुम्नाधिपतेःप्रपूज्याः ॥ १२ ॥ शिरःशशाङ्का
यनमोमुरारेर्विश्वेश्वरायाथनमःकिरीटम् ॥ पद्मप्रियेरोहिणीनामलक्ष्मिसौभाग्यसौख्यामृतसागराय ॥ १३ ॥ देवींचसम्पूज्यसुगन्धिपुष्पैर्नैवेद्य
धूपादिभिरिन्दुपत्नीम् ॥ सुप्त्वातुभूमौपुनरुत्थितोयःस्नात्वाचविप्रायहविष्यभुक्तः ॥ १४ ॥ देयःप्रभातेसहिरण्यवारिकुम्भोनमःपापविनाशना
य ॥ सम्प्राश्यगोमूत्रममांसमन्नमक्षारमष्टावथविंशतिंच ॥ १५ ॥ ग्रासांश्चत्रीन्सर्पियुतानुपोष्यभुक्तेतिहासंशृणुयान्मुहूर्तम् ॥ कदम्बनीलोत्पलकेतका
निजातिःसरोजंशतपत्रिकाच ॥ १६ ॥ अम्लानपुष्पाण्यथसिन्दुवारंपुष्पंपुनर्भारतमल्लिकायाः ॥ शुक्लंचपुष्पंकरवीरपुष्पंश्रीचम्पकंचन्द्रमसेप्रदेय
म् ॥ १७ ॥ श्रावणादिषुमासेषुक्रमादेतानिसर्वदा ॥ यस्मिन्मासेव्रतादिःस्यात्तत्पुष्पैरर्चयेद्धरिम् ॥ १८ ॥ एवंसंवत्सरंयावदुपोष्यविधि
वन्नरः ॥ व्रतान्तेशयनंदद्याच्छयनोपस्करान्वितम् ॥१९॥ रोहिणीचन्द्रमिथुनंकारयित्वातुकाञ्चनम् ॥ चन्द्रःषडङ्गुलःकार्योरोहिणीचतुरङ्गुला ॥२०॥
मुक्ताफलाष्टकयुतांसितनेत्रसमन्विताम् ॥ क्षीरकुम्भोपरिपुनःकांस्यपात्राक्षतान्विताम् ॥ २१ ॥ दद्यान्मन्त्रेणपूर्वाह्णेशालीक्षुफलसंयुताम् ॥ श्वे
नामथसुवर्णास्यांरौप्यखुरसमन्विताम् ॥२२॥ सवस्त्रभाजनांधेनुंतथाशङ्खंचभाजनम् ॥ भूषणैर्द्विजदाम्पत्यमलङ्कृत्यगुणान्वितम् ॥२३॥ चन्द्रोऽयं
विप्ररूपेणसभार्यइतिकल्पयेत् ॥ यथातेरोहिणीकृष्णशय्यांत्यक्त्वानगच्छति ॥ २४ ॥ सोमरूपस्यवैतद्वन्ममेभेदोविभूतिभिः ॥ यथात्वमेवसर्वे
षांपरमानन्दमुक्तिदः ॥ २५ ॥ भुक्तिर्मुक्तिस्तथाभक्तिस्त्वयिचन्द्रदृढास्तुमे ॥ इतिसंसारभीतस्यमुक्तिकामस्यचानघ ॥ २६ ॥ रूपारोग्यायुष
मेतद्विधायकमनुत्तमम् ॥ इदमेवपितॄणांचसर्वदावल्लभंनृप ॥ २७ ॥ त्रैलोक्याधिपतिर्भूत्वासप्तकल्पशतत्रयम् ॥ चन्द्रलोकमवाप्नोतिपुनरावृत्तिदुर्ल
भम् ॥ २८ ॥ नारीवारोहिणीचन्द्रशयनंयासमाचरेत् ॥ सापितत्फलमाप्नोतिपुनरावृत्तिदुर्लभम् ॥ २९ ॥ इतिपठतिशृणोतिवायइत्थंमधुमथना
र्चनमिन्दुकीर्तनेन॥ मतिमपिचददातिसोऽपिशौरेर्भवनगतःपरिपूज्यतेऽमरौघैः॥३०॥ इति श्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेरोहिणीचन्द्रशयनव्रतंनामष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ड्विंशोऽध्यायः ॥ २६ ॥ भीष्मउवाच ॥ तटाकारामकूपेषुवापीषुनलिनीषुच ॥ विधिंवदस्वमेब्रह्मन्देवतायतनेषुच ॥ १ ॥ केतत्रऋत्विजोविप्रावे
दीवाकीदृशीभवेत् ॥ दक्षिणाबलयःकालःस्थानमाचार्यएवच ॥ २ ॥ द्रव्याणिकानिशस्तानिसर्वमाचक्ष्वसुव्रत ॥ पुलस्त्यउवाच ॥ शृणुराजन्महा
बाहोतटाकादिषुयोविधिः ॥ ३ ॥ पुराणेष्वितिहासोऽयपठ्यतेराजसत्तम ॥ प्राप्यपक्षंशुभंशुक्लंसंप्रातेचोत्तरायणे ॥ ४ ॥ पुण्येऽह्निविप्रैःकथितेकृ
त्वाब्राह्मणवाचनम् ॥ अशुभैर्वर्जितेदेशेतटाकस्यसमीपतः ॥५॥ चतुर्हस्तांसमांवेदींचतुरस्रांचतुर्मुखीम् ॥ तथाषोडशहस्तःस्यान्मण्डपश्चचतुर्मुखः॥
॥ ६ ॥ वेद्यास्तुपरितोगर्तारत्निमात्रास्त्रिमेखलाः ॥ नवसप्ताथवापञ्चऋजुवक्रानृपात्मज ॥ ७ ॥ वितस्तिमात्रायोनिःस्यात्षट्सप्ताङ्गुलिविस्तृता॥
गर्ताश्चहस्तमात्रास्स्युस्त्रिपर्वोच्छ्रितमेखलाः ॥ ८ ॥ सर्वतस्तुसवर्णाःस्युःपताकाध्वजसंयुताः ॥ अश्वत्थोदुम्बरप्लक्षवटशाखाकृतानितु ॥ ९ ॥ मण्ड
पस्यप्रतिदिशंद्वाराण्येतानिकारयेत् ॥ शुभास्तत्राष्टहोतारोद्वारपालास्तथाष्टवै ॥ १० ॥ अष्टौतुजापकाःकार्याब्राह्मणवेदपारगाः ॥ सर्वलक्षणस
म्पूर्णान्मन्त्रज्ञान्विजितेन्द्रियान् ॥ ११ ॥ कुलशीलसमायुक्तान्स्थापयेद्वैद्विजोत्तमान् ॥ प्रतिगर्तेषुकलशायज्ञोपकरणानिच ॥ १२ ॥ व्यजनेचा
सनंशुभ्रंताम्रपात्रंसुविस्तरम् ॥ ततस्त्वनेकवर्णास्स्युर्बलयःप्रतिदैवतम् ॥ १३ ॥ आचार्यःप्रक्षिपेद्भूमावनुमन्त्र्यविचक्षणः ॥ अरत्निमात्रोयूपःस्या
त्क्षीरवृक्षविनिर्मितः ॥ १४ ॥ यजमानप्रमाणेवासंस्थाप्योभूतिमिच्छता ॥ हेमालङ्कारिणःकार्याःपञ्चविंशतिऋत्विजः ॥१५॥ कुण्डलानिचहैमानि
केयूरकटकानिच ॥ तथाङ्गुलिपवित्राणिवासांसिविविधानिच ॥ १६ ॥ दद्यात्समानिसर्वेषामाचार्येद्विगुणंस्मृतम् ॥ दद्याच्छयनसंयुक्तमात्मनश्चाप
पियत्प्रियम् ॥ १७ ॥ सौवर्णौकूर्ममकरौराजतौमत्स्यडुण्डुभौ ॥ ताम्रौकम्भीरमण्डूकावायसःशिंशुमारकः ॥ १८ ॥ एवमासाद्यतत्सर्वमादावेवविशां
ते॥शुक्लमाल्याम्बरधरःशुक्लगन्धानुलेपनः॥१९॥सर्वौषध्युदकैःसर्वैःस्नापितोवेदपारगैः ॥ यजमानःसपत्नीकःपुत्रपौत्रसमन्वितः ॥२०॥ पश्चिमद्वार
मासाद्यप्रविशेद्यागमण्डपम् ॥ ततोमङ्गलशब्देनभेरीणांनिःस्वनेनच ॥ २१ ॥ रजसामण्डलंकुर्यात्पञ्चवर्णेनतत्त्ववित् ॥ षोडशारंततश्चक्रंपद्मगर्भं
चतुर्मुखम् ॥ २२ ॥ चतुरस्रंतुपरितोवृत्तंमध्येसुशोभनम् ॥ वेद्याश्चोपरितःकृत्वाग्रहाँल्लोकपतींस्ततः ॥ २३ ॥ संन्यसेन्मन्त्रतःसर्वान्प्रतिदिक्षुवि
चक्षणः ॥ कलशंस्थापयेन्मध्येवारुणंमन्त्रमाश्रितम् ॥ २४ ॥ ब्रह्माणंचशिवंविष्णुंतत्रैवस्थापयेद्बुधः ॥ विनायकंचविन्यस्यकमलामम्बिकान्तथा
॥ २५ ॥ शान्त्यर्थंसर्वलोकानांभूतग्रामंन्यसेत्ततः ॥ पुष्पभक्ष्यफलैर्युक्तमेवंकृत्वाधिवासनम् ॥२६॥ कुम्भांश्चरत्नगर्भांस्तान्वासोभिःपरिवेष्टयेत् ॥
पुष्पगन्धैरलङ्कृत्यद्वारपालान्समन्ततः ॥ २७ ॥ यजध्वमितितान्ब्रूयादाचार्यमभिपूजयेत् ॥ बहृचौपूर्वतःस्थाप्यौदक्षिणेनयजुर्विदौ ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सामगौपश्चिमेस्थाप्यावुत्तरेणाप्यथर्वणौ ॥ उदङ्मुखोदक्षिणतोयजमानउपाविशेत् ॥ २९ ॥ यजध्वमितितान्ब्रूयाद्याजकान्पुनरेवतान् ॥
उत्कृष्टमन्त्रजाप्येनतिष्ठध्वमितिजापकान् ॥ ३० ॥ एवमादिश्यतान्सर्वान्संधुक्ष्याग्निंसमन्त्रवित् ॥ जुहुयादाहुतीमन्त्रैराज्यंचसमिधस्तथा ॥३१॥
ऋत्विग्भिश्चैवहोतव्यंवारुणैरेवसर्वतः ॥ ग्रहेभ्योविधिवद्धुत्वातथेन्द्रायेश्वरायच ॥ ३२ ॥ मरुद्भ्योलोकपालेभ्योविधिवद्विश्वकर्मणे ॥ शान्तिसू
क्तंचरौद्रंचपावमानंचमङ्गलम् ॥३३॥ जपेच्चपौरुषंसूक्तंपूर्वतोबह्वृचःपृथक् ॥ शाक्रंरौद्रंचसौम्यंचकौष्माण्डंजातवेदसम् ॥३४॥ सौरंसूक्तंजपेयुस्तेदक्षि
णेनयजुर्विदः ॥ वैराजंपौरुषंसूक्तंसौपर्णंरुद्रसंहितम् ॥ ३५ ॥ शैशवंपञ्चनिधनंगायत्रंज्येष्ठसामच ॥ वामदेव्यंबृहत्सामरौरवंचरथन्तरम्
॥ ३६ ॥ गवांव्रतंविकीर्णंचरक्षोघ्नंचयमंतथा ॥ गायेयुःसामगाराजन्पश्चिमद्वारमाश्रिताः ॥ ३७ ॥ आथर्वणाश्चोत्तरतःशान्तिकंपौष्टिकंतथा ॥
जपेयुर्मनसादेवमाश्रितावरुणंप्रभुम् ॥ ३८ ॥ पूर्वेद्युरभितोरात्रावेवंकृत्वाधिवासनम् ॥ गजाश्वरथवल्मीकसंगमाद्व्रजगोकुलात् ॥ ३९ ॥
मृदमादायकुम्भेषुप्रक्षिपेदोषधीस्तथा ॥ रोचनांचससिद्धार्थांगन्धान्गुग्गुलुमेवच ॥ ४० ॥ स्नापनंतस्यकर्त्तव्यंपञ्चगव्यसमन्वितम् ॥ पूर्वंक
र्तुर्महामन्त्रैरेवंकृत्वाविधानतः ॥ ४१ ॥ अतिवाह्यक्षपामेवंविधियुक्तेनकर्मणा ॥ ततःप्रभातेविमलेसञ्जातेतुशतंगवाम् ॥ ४२ ॥ ब्राह्मणेभ्यःप्र
दातव्यमष्टषष्टयथवापुनः ॥ पञ्चाशद्वाथषट्त्रिंशत्पञ्चविंशतिवापुनः ॥ ४३ ॥ ततश्चावसरप्राप्तेशुद्धेलग्नेसुशोभने ॥ वेदशब्दैःसगन्धर्वैर्वाद्यैश्च
विविधैःपुनः ॥ ४४ ॥ कनकालङ्कृतांकृत्वाजलेगामवतारयेत् ॥ सामगायचसादेयाब्राह्मणायविशांपते ॥ ४५ ॥ पात्रीमादायसौवर्णींपञ्च
रत्नसमन्विताम् ॥ ततोनिक्षिप्यमकरान्मत्स्यादींश्चैवसर्वशः ॥ ४६ ॥ धृतांचतुर्भिर्विप्रैश्चवेदवेदाङ्गपारगैः ॥ महानदीजलोपेतांदध्यक्षतविभू
षिताम् ॥४७॥ उत्तराभिमुखांन्युब्जांजलमध्येतुकारयेत् ॥ आथर्वणेनसुस्नातांपुनर्मामयंतथैवच ॥४८॥ आपोहिष्ठेतिमन्त्रेणक्षिप्त्वागत्यचमण्डपम् ॥
पूजयित्वासदस्यान्वैबलिंदद्यात्समन्ततः ॥ ४९ ॥ पुनर्दिनानिहोतव्यंचत्वारिराजसत्तम ॥ चतुर्थीकर्मकर्त्तव्यंदेयंतत्रापिशक्तितः ॥ ५० ॥
कृत्वातुयज्ञपात्राणियज्ञोपकरणानिच ॥ ऋत्विग्भ्यस्तुसमंदद्यान्मण्डपंविभजेत्पुनः ॥ ५१ ॥ हेमपात्रींचशय्यांचविप्रायचनिवेदयेत् ॥ ततः
सहस्रंविप्राणामथवाऽष्टशतंतथा ॥ ५२ ॥ भोजनीयंयथाशक्तिपञ्चाशद्वाथविंशतिः ॥ एवमेषपुराणेषुतटाकविधिरुच्यते ॥ ५३ ॥ कूप ॥ ८९ ॥
वापीषुसर्वासुतथापुष्करिणीषुच ॥ एषएवविधिर्दृष्टःप्रतिष्ठासुतथैवच ॥ ५४ ॥ मन्त्रतस्तुविशेषःस्यात्प्रासादोद्यानभूमिषु ॥ अयंत्वशक्ताव
र्धेनविधिर्दृष्टःस्वयंभुवा ॥ ५५ ॥ स्वल्पेष्वेकाग्निवत्कार्योवित्तशाठ्यविवर्जितैः ॥ प्रावृट्कालेस्थितंतोयमग्निष्टोमसमंस्मृतम् ॥ ५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शरत्कालस्थितंयस्यात्तदुक्तफलदायकम् ॥ वाजपेयातिरात्राभ्यांहेमन्तेशिशिरेस्थितम् ॥ ५७ ॥ अश्वमेधसमंप्राहुर्वसन्तसमयेस्थितम्॥
ग्रीष्मेऽपियत्स्थितंतोयंराजसूयाद्विशिष्यते ॥ ५८ ॥ एतान्महाराजविशेषधर्मान्करोतिचोर्व्यामतिशुद्धबुद्धिः ॥ सयातिब्रह्मालयमेवशुद्धःकल्पान
नेकान्दिविमोदतेच ॥ ५९ ॥ अनेकलोकान्विचरन्स्वरादीन्भुक्त्वापरार्धद्वयमङ्गनाभिः ॥ सहैवविष्णोःपरमंपदंयत्प्राप्नोतितद्योगबलेनभूयः
॥ ६० ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेतटाकप्रतिष्ठाविधिर्नामसप्तविंशोऽध्यायः ॥ २७ ॥ भीष्मउवाच ॥ पादपानांविधिंब्रह्म
न्यथावद्विस्तराद्वद ॥ विधिनायेनकर्त्तव्यंपादपारोपणंबुधैः ॥ १ ॥ येचलोकाःस्मृतायेषांतानिदानींवदस्वमे ॥ पुलस्त्यउवाच ॥ पादपानां
विधिंवक्ष्येतथैवोद्यानभूमिषु ॥ २ ॥ तटाकविधिवत्सर्वंसमाप्यजगतीश्वर ॥ ऋत्विङ्मण्डपसंभारमाचार्यंचापितद्विधम् ॥ ३ ॥ पूजयेद्ब्राह्म
णांस्तद्वद्धेमवस्त्रानुलेपनैः ॥ सर्वौषध्युदकैःसिक्तान्दध्यक्षतविभूषितान् ॥ ४ ॥ वृक्षान्माल्यैरलङ्कृत्यवासोभिरभिवेष्टयेत् ॥ सूच्यासौवर्णया
कार्यंसर्वेषांकर्णवेधनम् ॥ ५ ॥ अञ्जनंचापिदातव्यंतद्वद्धेमशलाकया ॥ फलानिसप्तचाष्टौवाकालधौतानिकारयेत् ॥ ६ ॥ प्रत्येकंसर्ववृक्षाणां
वेद्यांतान्यधिवासयेत् ॥ धूपोऽत्रगुग्गुलुःश्रेष्ठस्ताम्रपात्रेष्वधिष्ठितान् ॥ ७ ॥ सप्तधान्यस्थितान्कृत्वावस्त्रगन्धानुलेपनैः ॥ कुम्भान्सर्वेषुवृक्षेषुस्थाप
यित्वावनीश्वर ॥ ८ ॥ पूजयित्वादिनान्तेचकृत्वाबलिनिवेदनम् ॥ यथावल्लोकपालानामिन्द्रादीनांविधानतः ॥ ९ ॥ वनस्पतेरधिवासएवंका
र्योद्विजातिभिः ॥ ततःशुक्लाम्बरधरांसौवर्णकृतमेखलाम् ॥१०॥ सकांस्यदोहांसौवर्णशृङ्गाभ्यामतिशालिनीम् ॥ पयस्विनींवृक्षमध्यादुत्सृजेद्गामुद
ङ्मुखीम् ॥ ११ ॥ ततोऽभिषेकमन्त्रेणवाद्यमङ्गलगीतकैः ॥ ऋग्यजुःसाममन्त्रैश्चवारुणैरभितस्तदा ॥ १२ ॥ तैरेवकुम्भैःस्नपनंकुर्युर्ब्राह्मणपुङ्गवाः
स्नातःशुक्लाम्बरधरोयजमानोऽभिपूजयेत् ॥ १३ ॥ गोभिर्विभवतःसर्वानृत्विजःससमाहितान् ॥ हेमसूत्रैःसकटकैरङ्गुलीयैःपवित्रकैः ॥ १४ ॥
वासोभिःशयनीयैश्चतथोपस्करपादुकैः ॥ क्षीराभिषेचनंकुर्याद्यावद्दिनचतुष्टयम् ॥ १५ ॥ होमश्चसर्पिषाकार्योयवैःकृष्णतिलैरपि ॥ पलाशसमिधः
शस्ताश्चतुर्थेऽह्नितथोत्सवः ॥ १६ ॥ दक्षिणाचपुनस्तद्वद्देयातत्रापिशक्तितः ॥ यद्यदिष्टतमंकिञ्चित्तत्तद्दद्यादमत्सरी ॥ १७ ॥ आचार्येद्विगुणं
दत्त्वाप्रणिपत्यक्षमापयेत् ॥ अनेनविधिनायस्तुकुर्याद्वृक्षोत्सवंबुधः ॥ १८ ॥ सर्वान्कामानवाप्नोतिफलंचानन्तमश्नुते ॥ यश्चैवमपिराजेन्द्र
वृक्षंसंस्थापयेद्बुधः ॥ १९ ॥॥ सोऽपिस्वर्गेवसेद्राजन्यावदिन्द्रायुतत्रयम् ॥ भूतान्भव्यांश्चमनुजांस्तारयेद्रोमसम्मितान् ॥ २० ॥ परमांसिद्धिमा
प्नोतिपुनरावृत्तिदुर्लभाम् ॥ यइदंशृणुयान्नित्यंश्रावयेद्वापिमानवः ॥ २१ ॥ सोऽपिसम्पूज्यतेदेवैर्ब्रह्मलोकेमहीयते ॥ अपुत्रस्यचपुत्रित्वंपादपाएव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुर्वते ॥ २२ ॥ तीर्थेषुपिण्डदानादीन्नोपकाणांददन्तिते ॥ यत्नेनापिचराजेन्द्रअश्वत्थारोपणंकुरु ॥ २३ ॥ सतेपुत्रसहस्रस्यकृत्यमेकःकरिष्यति ॥ धनीचाश्वस्थवृक्षेणअशोकःशोकनाशनः ॥ २४ ॥ प्लक्षोयज्ञप्रदःप्रोक्तःक्षीरीचायुःप्रदःस्मृतः ॥ जम्बुकीकन्यकादात्रीभार्यादादाडिमीतथा ॥ २५ ॥ अश्वत्थोरोगनाशायपलाशोब्रह्मदस्तथा ॥ प्रेतत्वंजायतेपुंसोरोपयेद्योविभीतकम् ॥ २६ ॥ अङ्कोलेकुलवृद्धिस्तुखादिरेणापिरोगिता ॥ निम्बप्ररोहकाणांतुनित्यंतुष्येदिवाकरः ॥ २७ ॥ श्रीवृक्षेशङ्करोदेवःपाटलायांतुपार्वती ॥ शिंशपायामप्सरसःकुन्देगन्धर्वसत्तमाः ॥ ॥ २८ ॥ तिन्तिडीकेदासवर्गाववञ्जुलेदस्युवस्तथा ॥ पुण्यप्रदःश्रीप्रदश्चचन्दनःपनसस्तथा ॥ २९ ॥ सौभाग्यदश्चम्पकश्चकरीरःपारदारिकः ॥ अपत्यनाशकस्तालोबकुलःकुलवर्द्धनः ॥ ३० ॥ बहुभार्यानारिकेलाद्राक्षासर्वाङ्गसुन्दरी ॥ रतिप्रदातथाकोलीकेतकीशत्रुनाशिनी ॥ ॥ ३१ एवमादिनगाश्चान्येयेनोक्तास्तेऽपिदायकाः ॥ प्रतिष्ठांतेगमिष्यन्तियैस्तुवृक्षाःप्ररोपिताः ॥ ३२ ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेवृक्षारोपणविधिर्नामाष्टाविंशोऽध्यायः ॥ २८ ॥ पुलस्त्यउवाच ॥ तथैवान्यत्प्रवक्ष्यामिसर्वकामफलप्रदम् ॥ सौभाग्यशयनंनामयत्पुराणविदोविदुः ॥ १ ॥ पुरादग्धेषुलोकेषुभूर्भुवःस्वर्महादिषु ॥ सौभाग्यंसर्वभूतानामेकस्थमभवत्तदा ॥ २ ॥ वैकुण्ठंसर्वमासाद्यविष्णोर्वक्षस्थलेस्थितम् ॥ ततःकालेनकियतापुनःसर्गविधौनृप ॥ ३ ॥ अहङ्कारावृतेलोकेप्रधानपुरुषान्विते ॥ स्पर्द्धायांचप्रवृद्धायांकमलासनकृष्णयोः ॥ ४ ॥ पिङ्गाकारासमुद्भूतावह्निज्वालातिभीषणा ॥ तयाभितप्तस्यहरेर्वक्षसस्तद्विनिःसृतम् ॥ ५ ॥ यद्वक्षस्थलमाश्रित्यविष्णोःसौभाग्यमास्थितम् ॥ रसरूपंनतद्यावदाप्नोतिवसुधातले ॥ ६ ॥ उत्क्षिप्तमन्तरिक्षात्तुब्रह्मपुत्रेणधीमता ॥ दक्षेणपीतमात्रंतद्रूपलावण्यकारकम् ॥ ७ ॥ बलंतेजोमहज्जातंदक्षस्यपरमेष्ठिनः ॥ शेषंयदपतद्भूमावष्टधातद्व्यजायत ॥ ८ ॥ ततस्त्वोषधयोजाताःसप्तसौभाग्यदायिकाः॥इक्षवस्तरुराजश्चनिष्पावाश्शालिधान्यकम् ॥ ९ ॥ विकारवच्चगोक्षीरंकुसुम्भंकुसुमंतथा ॥ लवणंचाष्टमंतद्वत्सौभाग्याष्टकमुच्यते ॥ १० ॥ पीतंयद्ब्रह्मपुत्रेणयोगज्ञानविदापुरा ॥ दुहितासाऽभवत्तस्माद्यासतीत्यभिधीयते ॥ ११ ॥ लोकानतीत्यलालित्याल्ललितातेनचोच्यते ॥ त्रैलोक्यसुन्दरींदेवीमुपयेमेपिनाकधृक् ॥ १२ ॥ त्रिविश्वसौभाग्यमयींभुक्तिमुक्तिफलप्रदाम् ॥ तामाराध्यपुमान्भक्त्यानारीवाकिंनविन्दति ॥ १३ ॥ भीष्मउवाच ॥ कथमाराधनंतस्याललितायामुनेवद ॥ यद्विधानंचजगतःशान्तयेतद्वदस्वमे ॥ १४ ॥ पुलस्त्यउवाच ॥ वसन्तमासमासाद्यतृतीयायांजनप्रियः ॥ शुक्लपक्षस्यपूर्वाह्णेतिलैःस्नानंसमाचरेत् ॥१५॥ तस्मिन्नहनिसादेवीकिलविश्वात्मनासती ॥ पाणिग्रहणिकैर्मन्त्रैरुदूढावरवर्णिनी ॥१६॥ तयासहैवविश्वेशंतृतीयायामथार्चयेत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलैर्नानाविधैर्दीपैर्धूपैर्नैवेद्यसंयुतैः ॥१७ ॥ प्रतिमांपञ्चगव्येनतथागन्धोदकेनच ॥ स्नापयित्वार्चयेद्गौरीमिन्दुशेखरसंयुताम् ॥ १८ ॥ नमोऽस्तुपाट
लायैतुपादौदेव्याःशिवस्यच ॥ शिवायेतिचसङ्कीर्त्यजयायैगुल्फयोर्द्वयोः ॥ १९ ॥ त्र्यम्बकायेतिरुद्रस्यभवान्यैजङ्घयोर्युगम् ॥ शिरोरुद्रेश्वरायेति
विजयायैचजानुनी ॥ २० ॥ सङ्कीर्त्यहरिकेशायतथोरुवरदेनमः ॥ ईशायेतिकटिंरत्यैशङ्करायेतिशङ्करम् ॥ २१ ॥ कुक्षिद्वयंचकोटव्यैशूलि
नंशूलपाणये ॥ मङ्गलायैनमस्तुभ्यमुदरंचाभिभूजयेत ॥ २२ ॥ सर्वात्मनेनमोरुद्रमीशान्यैचकुचद्वयम् ॥ शिवंवेदात्मनेतद्वद्रुद्राण्यैकण्ठम
र्चयेत् ॥ २३ ॥ त्रिपुरघ्नायविश्वेशमनन्तायैकरद्वयम् ॥ त्रिलोचनायेतिहरंबाहूकालानलप्रिये ॥ २४ ॥ सौभाग्यभवनायेतिभूषणानि
सदार्चयेत् ॥ स्वाहास्वधायैचमुखमीश्वरायेतिशूलिनम् ॥ २५ ॥ अशोकवनवासिन्यैपूज्यावोष्ठौचभूतिदौ ॥ स्थाणवेचहरंतद्वदास्यंचन्द्र
मुखप्रिये ॥ २६ ॥ नमोऽर्धनारीशहरमसिताङ्गेतिनासिकाम् ॥ नमउग्रायलोकेशंललितेतिपुनर्भ्रुवौ ॥ २७ ॥ शर्वायपुरहर्त्तारंवासुदेव्यैतथालक
म् ॥ नमःश्रीकण्ठनाथायशिवकेशांस्तथार्चयेत् ॥ २८ ॥ भीमोग्रभीमरूपिण्यैशिरःसर्वात्मनेनमः ॥ हरमभ्यर्च्यविधिवत्सौभाग्याष्टकम
ग्रतः ॥ २९ ॥ स्थापयेत्स्निग्धनिष्पावान्कुसुम्भक्षीरजीरकम् ॥ तरुराजेक्षुलवणंकुस्तुम्बुरुमथाष्टमम् ॥ ३० ॥ दद्यात्सौभाग्यकृद्यस्मा
त्सौभाग्याष्टकमित्युत ॥ एवंनिवेद्यतत्सर्वमग्रतःशिवयोःपुनः ॥ ३१ ॥ चैत्रेशृङ्गाटकान्प्राश्यस्वपेद्भूमावरिन्दम ॥ पुनःप्रभातेचतथाकृत
स्नानजपःशुचिः ॥ ३२ ॥ सम्पूज्यद्विजदाम्पत्यंमाल्यवस्त्रविभूषणैः ॥ सौभाग्याष्टकसंयुक्तंसौवर्णंप्रतिमाद्वयम् ॥ ३३ ॥ प्रीयतांमेऽत्रललिता
ब्राह्मणायनिवेदयेत् ॥ एवंसंवत्सरंयावत्तृतीयायांसदानृप ॥ ३४ ॥ प्राशनेदानमन्त्रेचविशेषोऽयंनिबोधमे ॥ गोशृङ्गाम्बुमधौप्रोक्तंवैशाखेगो
मयंपुनः ॥ ३५ ॥ ज्येष्ठेमन्दारकुसुमंबिल्वपत्रंशुचौस्मृतम् ॥ श्रावणेदधिसम्प्राश्यंनभस्येतुकुशोदकम् ॥ ३६ ॥ क्षीरंचाश्वयुजेमासिकार्तिकेपृष
दाज्यकम् ॥ मार्गशीर्षेतुगोमूत्रंपौषेसम्प्राशयेद्घृतम् ॥ ३७ ॥ माघेकृष्णतिलांस्तद्वत्पञ्चगव्यंचफाल्गुने ॥ ललिताविजयाभद्राभवानीकुमुदाशिवा
॥ ३८ ॥ वासुदेवीतथागौरीमङ्गलाकमलासती ॥ उमाचदानकालेतुप्रीयतामितिकीर्त्तयेत् ॥ ३९ ॥ तस्मिंस्तुद्वादशेमासिद्वादश्यांकृष्णमर्चयेत् ॥
तथालक्ष्मींचतत्रैवभर्त्रासार्धमथार्चयेत् ॥ ४० ॥ पौर्णमास्यामतस्तद्वत्सपत्नीकःपितामहः ॥ उपासनीयोविदुषापरत्राभीतिमिच्छता ॥ ४१ ॥
सौभाग्याष्टकंतद्वच्चदातव्यंभूतिमिच्छता ॥ मल्लिकाशोककमलंकदम्बोत्पलचम्पकम् ॥ ४२ ॥ कुब्जकंकरवीरंचबाणमम्लानपङ्कजम् ॥ सिन्दुवा
रंचसर्वेषुमासेषुकुसुमंस्मृतम् ॥ ४३ ॥ जपाकुसुम्भकुसुमंमालतीशतपत्रिका ॥ यथालाभंप्रशस्तानिकरवीरंचसर्वदा ॥ ४४ ॥ एवंसंवत्सरंयावदु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 पोष्यविधिवन्नरः ॥ स्त्रीचनक्तंकुमारीचशिवमभ्यर्च्यभक्तितः ॥ ४५ ॥ व्रतान्तेशयनंदद्यात्सर्वोपस्करसंयुतम् ॥ उमामहेश्वरौहैमौवृषभश्चगवा
 सह ॥ ४६ ॥ स्थापयित्वाचशयनंब्राह्मणायनिवेदयेत् ॥ द्वादश्यांवत्सरंत्वेकंमहालक्ष्म्याचकेशवम् ॥ ४७ ॥ ब्राह्मणंसहसावित्र्यापूजयित्वानर
स्त्विह ॥ सर्वान्कामानवाप्नोतिमनसासमभीप्सितान् ॥ ४८ ॥ अन्यान्यपियथाशक्तिमिथुनान्यम्बरादिभिः ॥ धान्यालङ्कारगोदानैरन्यैश्चधनस
ञ्चयैः ॥ ४९ ॥ वित्तशाठ्येनरहितःपूजयेद्गतविस्मयः ॥ एवंकरोतियःसम्यक्सौभाग्यशयनव्रतम् ॥ ५० ॥ सर्वान्कामानवाप्नोतिपदंवानित्यम
श्नुते ॥ फलस्यैकस्यचत्यागमेतत्कुर्वन्समाचरेत् ॥ ५१ ॥ यशःकीर्तिमवाप्नोतिप्रतिमासंनराधिप ॥ सौभाग्यारोग्यरूपैश्चवस्त्रालङ्कारभूषणैः
॥ ५२ ॥ नवियुक्तोभवेद्राजन्सौभाग्यशयनप्रदः ॥ यस्तुद्वादशवर्षाणिसौभाग्यशयनव्रतम् ॥ ५३ ॥ करोतिसप्तचाष्टौवाब्रह्मलोकेमहीयते ॥ पूज्य
मानोवसेत्सम्यग्यावत्कल्पायुतंनरः ॥ ५४ ॥ विष्णोर्लोकमथासाद्यशिवलोकगतस्तथा ॥ नारीवाकुरुतेयातुकुमारीवानरेश्वर ॥ ५५ ॥ सापित
त्फलमाप्नोतिदेव्यनुग्रहलालिता ॥ शृणुयादपियश्चैवप्रदद्यादथवामतिम् ॥ ५६ ॥ सोऽपिविद्याधरोभूत्वास्वर्गलोकेचिरंवसेत् ॥ ५७ ॥ इदमिहमद
नेनपूर्वसृष्टंशतधनुपाचकृतंनरेणतद्वत् ॥ कृतमथपवनेननन्दिनाचकिमुजननाथमहाद्भुतंनवास्यात् ॥ ५८ ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेव्रता
ध्यायोनामएकोनत्रिंशोऽध्यायः ॥ २९ ॥ भीष्मउवाच ॥ यज्ञपर्वतमासाद्यविष्णुनाप्रभविष्णुना ॥ पदानिचेहदत्तानिकिमर्थंपदपद्धतिः ॥ १ ॥
कृतावैदेवदेवेनतन्मेवदमहामते ॥ कतमोदानवस्तेनविष्णुनादमितोऽत्रवै ॥ २ ॥ कृत्वावैपदविन्यासंतन्मेशंसमहामुने ॥ स्वर्लोकेवसतिर्विष्णोर्वै
कुण्ठेऽस्यमहात्मनः ॥ ३ ॥ सकथंमानुषेलोकेपदन्यासंचकारह ॥ देवलोकेषुवैदेवदेवाःसेन्द्रपुरोगमाः ॥ ४ ॥ तपसामहताब्रह्मन्भक्तायेसततंप्रभुम् ॥
श्रीवराहयवसंतिर्महर्ल्लोकेप्रकीर्तिता ॥ ५ ॥ नृसिंहस्यतथाप्रोक्ताजनलोकेमहात्मनः ॥ त्रिविक्रमस्यवसतिस्तपोलोकेप्रकीर्तिता ॥ ६ ॥ लोकाने
तान्परित्यज्यकथंभूमौपदद्वयम् ॥ क्षेत्रेपैतामहेचास्मिन्पुष्करेयज्ञपर्वते ॥ ७ ॥ पदानिकृतवान्ब्रह्मन्विस्तरान्ममकीर्तय ॥ श्रुतेनसर्वपापस्यनाशो
वैभविताध्रुवम् ॥ ८ ॥ पुलस्त्यउवाच ॥ सम्यक्पृच्छसिभोस्त्वंयत्संशृणुत्वंसमाहितः ॥ यथापूर्वंपदन्यासःकृतोदेवेनविष्णुना ॥ ९ ॥ यज्ञ
पर्वतमासाद्यशिलापर्वतरोधसि ॥ पुराकृतयुगेभीष्मदेवकार्यार्थसिद्धये ॥ १० ॥ विष्णुनाचकृतंपूर्वंपृथिव्यर्थेपरन्तप ॥ त्रिदिवंसर्वमानीतंदान
वैर्बलवत्तरैः ॥ ११ ॥ त्रैलोक्यंवशमानीयजित्वादेवान्सवासवान् ॥ दानवायज्ञभोक्तारस्तत्रासन्बलवत्तराः ॥ १२ ॥ कृताबाष्कलिनासर्वेदानवे
नबलीयसा ॥ एवम्भूतेतदालोकेत्रैलोक्येसचराचरे ॥ १३ ॥ परमार्तिययौशक्रोनिराशोजीवितेकृतः ॥ सबाष्कलिर्दानवेन्द्रोऽवध्योऽयममसंयुगे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १४ ॥ ब्रह्मणोवरदानेनसर्वेषांतुदिवौकसाम् ॥ तदहंब्रह्मणोलोकवृतःसर्वैर्दिवौकसैः ॥ १५ ॥ व्रजामिशरणंदेवंगतिरन्यानविद्यते ॥ एवं
विचिन्त्यदेवेन्द्रोवृतःसर्वैर्दिवौकसैः ॥ १६ ॥ जगामत्वरितोभीष्मयत्रदेवःपितामहः ॥ ब्रह्मणःसपदंप्राप्यवृतस्तैश्चदिवौकसैः ॥ १७ ॥
अब्रवीज्जगतःकार्यंप्राप्तामापदमुत्तमाम् ॥ किंनजानासिवैदेवयतोनोभयमागतम् ॥ १८ ॥ दैत्यैर्यदाहृतंसर्वंवरदानाच्चतेप्रभो ॥ कथितंवैमयासर्वं
बाष्कलेश्चदुरात्मनः ॥ १९ ॥ क्रियतांचाविलम्बेनपितात्वंनःपितामहः ॥ तत्त्वंचिन्तयदेवेशशान्त्यर्थंजगतस्त्विह ॥ २० ॥ तेषांचपश्य
तांकिञ्चिच्छ्रौतस्मार्तादिकाःक्रियाः ॥ नप्रावर्तन्तहानिस्तुतैरस्माकंदिनेदिने ॥ २१ ॥ यथाहिप्राकृतःकश्चित्स्वार्थमुद्दिश्यभाषते ॥ विज्ञा
प्यसेतथास्माभिर्निरस्तोपकृतैःसदा ॥ २२ ॥ यद्येनोपकृतंयस्यसहस्रगुणितंपुनः ॥ योनतस्योपकारायतत्करोतिवृथामतिः ॥ २३ ॥ तस्यो
पकारदग्धस्यनिस्त्रपस्यासतः पुनः ॥ नरकेष्वपिसंवासस्तस्यदुष्कृतकारिणः ॥ २४ ॥ नैतावतैवसाधुत्वंकृतेयातुप्रतिक्रिया ॥ स्वार्थैकनिष्ठ
बुद्धीनामेतन्नापिप्रवर्तते ॥ २५ ॥ यद्यस्यनाभवत्स्थानंजगतोह्यत्रदुःखदम् ॥ शतधाहृदयंदीर्णंतन्नतृप्तिमुपागतम् ॥ २६ ॥ तत्रवायत्रगन्ता
स्मिनिमग्नानुद्धरस्वनः ॥ उपायकथनेनास्ययेनतेजःप्रवर्तते ॥ २७ ॥ यथाऽऽख्यातंमयादृष्टंजगत्तत्स्थमवेक्ष्यताम् ॥ निस्स्वाध्यायवषट्कारं
निवृत्तोत्सवमङ्गलम् ॥ २८ ॥ त्यक्ताध्ययनसंयोगंमुक्तवार्तापरिग्रहम् ॥ दण्डनीत्यापरित्यक्तंश्वासमात्रावशेषितम् ॥ २९ ॥ जगदार्ति
मपिप्राप्तंपुनःकष्टतरांदशाम् ॥ एतावताहिकालेनवयंग्लानिमुपागताः ॥ ३० ॥ ब्रह्मोवाच ॥ जानामिबाष्कलिंतंतुवरदानाच्चगर्वितम् ॥
अजेयंभवतांमन्येविष्णुसाध्योभविष्यति ॥ ३१ ॥ निरुध्यसंस्थितोब्रह्माभावंतत्त्वमयंतदा ॥ समाधिस्थस्यतस्यैवध्यानमात्राच्चतुर्भुजः
॥ ३२ ॥ स्तोकेनैवहिकालेनचिन्त्यमानःस्वयम्भुवा ॥ आजगाममुहूर्तेनसर्वेषामेवपश्यताम् ॥ ३३ ॥ विष्णुरुवाच ॥ भोभोब्रह्मन्निवर्त्त
स्वध्यानादस्मान्निवारितः ॥ यदर्थमिष्यतेध्यानंसोऽहंत्वांसमुपागतः ॥ ३४ ॥ ब्रह्मोवाच ॥ महाप्रसादएषोऽत्रस्वामिनोहिप्रदर्शनम् ॥
कस्यान्यस्यभवेच्चैषाचिन्तायाजगतःप्रभोः ॥ ३५ ॥ ममैवतावदुत्पत्तिर्जगदर्थेविनिर्मिता ॥ जगदेतत्त्वदर्थीयंतत्त्वतोनास्तिविस्मयः ॥ ३६ ॥
भवतापालनंकार्यंसंहरेद्रुद्रएवतु॥एवम्भूतेजगत्यस्मिञ्शक्रस्यास्यमहात्मनः ॥३७॥ हृतंराज्यंबाष्कलिनात्रैलोक्यंसचराचरम्॥भृत्यस्यक्रियतांसाह्यं
मन्त्रदानेनकेशव॥३८॥ वासुदेवउवाच ॥ भवतोवरदानेनअवध्यःसतुसांप्रतम्॥बुद्धिसाध्यःसवैकार्योबन्धनादिहदानवः ॥३९॥ वामनोऽहंभविष्या
मिदानवानांविनाशकः ॥ मयासहव्रजत्वेषबाष्कलेस्तुनिवेशनम् ॥४०॥तत्रगत्वावरंत्वेषमदर्थेयाचतामिमम्॥वामनस्यास्यविप्रस्यभूमेराजन्पदत्रयम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 ॥४१॥ प्रयच्छस्वमहाभागयाच्ञैषातुमयाकृता॥शक्रेणोक्तोदानवेन्द्रोदद्यात्स्वमपिजीवितम् ॥४२॥ गृह्यप्रतिग्रहंतस्यदानवस्यपितामह॥ तंबद्ध्वाचत
 तोयत्नात्कृत्वापातालवासिनम् ॥४३॥ सौकररूपमास्थायवधार्थंचदुरात्मनः ॥ भविष्यामिनसन्देहोव्रजशक्रत्वरान्वितः ॥४४॥ विररामतमुक्त्वै
वमन्तर्द्धानंगतश्चवै ॥ अथकालान्तरेविष्णावदितेर्गर्भतांगते ॥ ४५ ॥ निमित्तान्यतिघोराणिप्रादुर्भूतान्यनेकशः ॥ समस्तजगदाधारेविष्णौगर्भत्व
मागते ॥ ४६ ॥ शोभनंहितदाजातंनिमित्तंचैवमूर्जितम् ॥ मालतीकुसुमानांतुसुगन्धःसुरभिर्ववौ ॥ ४७ ॥ अथविहितविधानंकालमासाद्य
देवस्त्रिदशगणहितार्थंसर्वभूतानुकम्पी ॥ विमलविरलकेशश्चन्द्रशङ्खोदयश्रीरदितितनयभावंदेवदेवश्चकार ॥ ४८ ॥ अवतरतिचविष्णौसिद्धदे
वासुराणामनिमिषनयनानांविप्रसेदुर्मुखानि ॥ अतिविरतरजोभिर्वायुभिःसंवहद्भिर्दिनमपिचतदासीज्जन्मविष्णोःसुगर्भे ॥ ४९ ॥ अदितिरजन
गर्भासापिदेवीप्रयान्तीनतजघनभरार्तामन्दसंचाररम्या ॥ अलसवदनखेदंपाण्डुभावंवहन्तीगुरुतरमवगाढंगर्भमेवोद्वहन्ती ॥ ५० ॥ ततःप्रविष्टेख
लुगर्भवासंनारायणेभूतभविष्ययोगात् ॥ विनापदंप्राप्तमनोरथानिभूतानिसर्वाणितदाबभूवुः ॥ ५१ ॥ समीरणोवातिचमन्दमन्दम्पतत्सुवर्षेषुनगो
द्भवेषु ॥ विविक्तमार्गेषुदिगन्तरेषुजनेषुवैसत्यमुपागतेषु ॥ ५२ ॥ विमुच्यमानेगगनेरजोभिःशनैश्शनैर्नश्यतिचान्धकारे ॥ ५३ ॥ उदरा
न्तर्गतेविष्णौद्रोहबुद्धिस्तदाभवत् ॥ तांनिशामयराजेन्द्रदेवमातुर्यथाक्रमम् ॥ ५४ ॥ किमनुक्रमणेनैवलङ्घयामित्रिविष्टपम् ॥ बाष्कलिंदानवे
न्द्रंतंकुर्यांपातालवासिनम् ॥ ५५ ॥ शक्रस्यतुमयादत्तंधनंलावण्यमेवच ॥ दानवानांविनाशायएकैवप्रभवाम्यहम् ॥ ५६ ॥ क्षिपामिशर
जालानिचक्रयानान्यनेकशः ॥ गदाव्रातांश्चविविधान्दानवानांविनाशने ॥ ५७ ॥ विबुधान्देवलोकस्थानधोभूमेस्तुदानवान् ॥ करोमिकाल
योगेनतत्तुकार्यंव्रतेनमे ॥ ५८ ॥ निस्सृतासहसावाणीवक्रमेवाभिसंस्थिता ॥ येनेदंचिन्त्यतेपूर्वंयन्नदृष्टंनचश्रुतम् ॥ ५९ ॥ बन्धंवैदनुमुख्य
स्यकृतंकोपेनपश्यमे ॥ कश्यपायपुरादत्तंधनंलावण्यमेवच ॥ ६० ॥ किमयंविगतोत्साहोवायवोऽथसमाकुलाः ॥ भ्रमतीवहिमेदृष्टिर्मैतद्रूपंप्रचि
न्तितम् ॥ ६१ ॥ आविष्टाकिमहंवच्मिकेनाप्यसदृशंवचः ॥ विकल्पवशमापन्नाभीक्ष्णंहृदिममर्शसा ॥ ६२ ॥ दधारदिव्यंवर्षाणांसहस्रंदि
व्यमीश्वरम् ॥ ततःसमभवत्तस्यांवामनोभूतवामनः ॥ ६३ ॥ जातेनयेनचक्षूंषिदानवानांहृतानिवै ॥ जातमात्रेततस्तस्मिन्देवदेवेजनार्दने
॥ ६४ ॥ नद्यःस्वच्छाम्बुवाहिन्योववौगन्धवहोऽनिलः ॥ कश्यपोऽपिसुखंलेभेतेनपुत्रेणभास्वता ॥ ६५ ॥ सर्वेषांमानसोत्साहस्त्रैलोक्यान्त
रवासिनाम् ॥ सञ्जातमात्रेतुततोजनाधिपजनार्दने ॥ स्वर्गेलोकेदुन्दुभयोविनेदुस्तैश्चताडिताः ॥ ६६ ॥ अतिप्रहर्षात्तुजगत्त्रयस्यमोहश्चदुः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

खानिचनाशमीयुः ॥ जगौचगन्धर्वगणोऽतिमात्रंभावस्वरैर्भर्तृविमिश्रिताश्च ॥ ६७ ॥ सुराङ्गनाश्चापिचभावयुक्तानृत्यन्तितत्राप्सरसांस मूहाः ॥ तथैवविद्याधरसिद्धसङ्घाविमानयानैर्मुदिताभ्रमन्ति ॥ ६८ ॥ वदन्तिसत्यानृतकार्यनिर्णयंतथाभिरङ्गंप्रतिदर्शयन्ति ॥ गायन्ति गेयंविनिवृत्तरागामुहुर्मुहुर्दुःखसुखप्रभूताः ॥ ६९ ॥ नृत्यन्तिवैस्वर्गगताश्चतेतुधर्मार्जितंस्वर्गमितोव्रजन्ति ॥ ७० ॥ इतिविगतविषा देनिर्मलेजीवलोकेतिमिरनिकरमुक्तानिर्वृतिंप्राप्तुकामाः ॥ ७१ ॥ तत्रोचुःकेचिदुर्व्यांजयजयभगवन्संप्रहृष्टाश्चकेचित्त्वेवंप्रोक्तप्रणादैरविरलमन सश्चानुवादैस्तथान्ये ॥ ध्यायन्तेऽन्येनिगूढंजननभयजरामृत्युविच्छेदहेतोरित्येवंकृत्स्नमासीज्जगदिदमखिलंसर्वतःसम्प्रहृष्टम् ॥७२॥ परमासाद्ययंवि ष्णुंब्रह्माहजगतःकृते ॥ जातोऽयंभवतामर्थेवामनोयदपीश्वरः ॥ ७३ ॥ एषब्रह्माचविष्णुश्चएषएवमहेश्वरः ॥ एषवेदाश्चयज्ञाश्चस्वर्गश्चैषनसंश यः ॥ ७४ ॥ विष्णुव्याप्तमिदंसर्वंजगत्स्थावरजङ्गमम् ॥ एकःसतुपृथक्त्वेनस्वयम्भूरितिविश्रुतः ॥ ७५ ॥ यथार्थवर्णकेस्थानेविचित्रःस्फाटि कोमणिः ॥ ततोगुणवशात्तस्यस्वयम्भोरनुवर्त्तनम् ॥ ७६ ॥ यथाहिगार्हपत्योऽग्निरन्यसंज्ञांपुनर्व्रजेत् ॥ लभेतसंज्ञांभगवान्ब्राह्मा दिषुतथाह्यसौ ॥ ७७ ॥ सर्वथावामनोदेवोदेवकार्यंकरिष्यति ॥ एवंचिन्तयतांतेषांभावितानांदिवौकसाम् ॥ ७८ ॥ जगामशक्रसहितो बाष्कलेश्चनिवेशनम् ॥ दूरादेवचतांदृष्ट्वापुरींतस्यसमावृताम् ॥ ७९ ॥ पाण्डुरैःखगमागम्यैःसर्वरत्नोपशोभितैः ॥ शोभितांभवनैर्मुख्यैस्सुवि भक्तमहापथैः ॥ ८० ॥ नित्यप्रभिन्नैर्मातङ्गैरञ्जनाचलसन्निभैः ॥ देवनागकुलोत्पन्नैःशतसङ्ख्यैर्विराजिताम् ॥ ८१ ॥ निर्मांसगात्रैस्तुरगैरल्पक र्णैर्मनोजवैः ॥ दीर्घग्रीवाक्षिकूटैश्चमनोज्ञैरुपशोभिताम् ॥ ८२ ॥ पद्मगर्भसुवर्णाभाःपूर्णचन्द्रनिभाननाः ॥ सँल्लापोल्लापकुशलास्तत्रवेश्याःसह स्रशः ॥ ८३ ॥ नतत्पुण्यंनसाविद्यानतच्छिल्पंनसाकला ॥ बाष्कलेर्नपुरेयत्तुनिवासंप्रतिगच्छति ॥ ८४ ॥ उद्यानशतसम्बाधेसमाजो त्सवमालिनि ॥ अन्वितेदनुमुख्यैश्चसर्वैरन्तकवर्जितैः ॥ ८५ ॥ वीणावेणुमृदङ्गानांशब्दैःसर्वत्रनादिते ॥ सदाप्रहृष्टादनुजाबहुरत्नोपशोभिताः ॥ ८६ ॥ क्रीडमानाःप्रदृश्यन्तेमेराविवयथामराः ॥ ब्रह्मघोषोमहांस्तत्रदनुवृद्धैरुदीरितः ॥ ८७ ॥ साज्यधूमेनचाग्नीनांवायुनानष्टकिल्बिषे ॥ सुगन्धधूपविक्षेपसुरभीकृतमारुते ॥ ८८ ॥ सुगन्धिदनुजाकीर्णेपुरेतस्मिंस्तुबाष्कलिः ॥ त्रैलोक्यंतुवशेकृत्वासुखेनास्तेसदानवः ॥ ८९ ॥ तत्रस्थःपालयन्नास्तेत्रैलोक्यंसचराचरम् ॥ धर्मज्ञश्चकृतज्ञश्चसत्यवादीजितेन्द्रियः ॥ ९० ॥ सुदर्शःपूर्वदेवानांनयानयविचक्षणः ॥ ब्रह्मण्यश्चशरण्य श्चदीनानामनुकम्पकः ॥ ९१ ॥ वेदमन्त्रप्रभूत्साहसर्वशक्तिसमन्वितः ॥ षाड्गुण्यविषयोत्साहःस्मितपूर्वाभिभाषितः ॥ ९२ ॥ वेदवेदाङ्ग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्त्वज्ञोयज्ञयाजीतपोरतः ॥ नचदुःशीलनिरतःससर्वत्राविहिंसकः ॥ ९३ ॥ मान्यमानयिताशुद्धःसुमुखःपूज्यपूजकः॥सवार्थविदनाधृष्यःसुभगःप्रिय
दर्शनः ॥९४॥ बहुधान्योबहुधनोबहुयानश्चदानवः॥त्रिवर्गसाधकोनित्यंत्रैलोक्येवरपूरुषः ॥९५॥ स्वपुरीनिलयोनित्यंदेवदानवदर्पहा॥सचैवपालया
मासत्रैलोक्येसकलाःप्रजाः॥९६॥नाधमःकश्चिदप्यास्तेतस्मिन्राजनिदानवे॥दीनोवाव्यधितोवापिरल्पायुर्वाथदुःखितः॥ मूर्खोवामन्दरूपोवादुर्भगोवा
निराकृतः॥९७॥एवंयुतंतंविमलैर्गुणौघैर्दृष्ट्वाचमत्वाचनिविष्टबुद्धिम्॥प्रसादयन्दैत्यवरंमहात्मापुरन्दरस्तंतुदनुप्रधानम् ॥९८॥ तेजोयुक्तंदानवंतंतपन्त
मिवभास्करम्॥त्रैलोक्यधारणेशक्तंविस्मितःसोऽभवत्तदा ॥९९॥ इन्द्रंपुरागतंदृष्ट्वादानवेन्द्रायपार्थिव॥ इदमूचुस्तदागत्वादानवायुद्धदुर्मदाः ॥१००॥
आश्चर्यमितिवैकृत्वाइन्द्रोऽभ्येतिपुरींतव ॥ एकाकीद्विजमुख्येनवामनेनसहप्रभो ॥१॥ अस्माभिर्यदनुष्ठेयंसाम्प्रतंनोवदस्वराट्॥दानवानब्रवीत्सर्वान्पु
रेतिष्ठतसङ्कुलम् ॥ प्रवेश्यतांदेवराजःपूज्यःसतुममाद्यवै ॥२ ॥ एतस्मिन्नेवकालेतुवामनःसचवासवः ॥ आगतौदनुनाथेनप्रेम्णाचैवावलोकितौ ॥३॥
कृतार्थंमन्यतात्मानंप्रणिपातपुरःसरम् ॥ उवाचवचनंराजादानवानांधुरन्धरः ॥ ४ ॥ अद्यवैत्रिषुलोकेषुनास्तिधन्यतरोमया ॥ योऽहंश्रियावृतःशक्रं
पश्यामिगृहमागतम्॥५॥ अर्थित्वकाम्ययायस्तुमामयंयाचयिष्यति ॥ गृहागतस्यतस्याहंदास्येप्राणानपिध्रुवम् ॥६॥ दारान्पुत्रांस्तथागारंत्रैलोक्ये
काकथामम ॥ आगत्यसंमुखंतस्यअङ्कमानीयसादरम् ॥ ७ ॥ परिष्वज्याभिनन्द्यैनंगृहंप्रावेशयत्स्वकम् ॥ तस्यस्वागतमर्घ्याद्यैःकृत्वापूजां
प्रयत्नतः ॥८॥ अद्यमेसफलंजन्मपूर्णाःसर्वेमनोरथाः ॥ यस्त्वांपश्यामिशक्राद्यस्वयमेवगृहागतम् ॥९॥ ख्याप्योऽहंदनुमुख्यानांदेवराजत्वयाकृतः ॥
आगच्छतामसगृहंपुण्यतातुपराहिमे ॥ ११० ॥ अग्निष्टोमादिभिर्यज्ञैस्सम्यगिष्टैस्तुयत्फलम् ॥ तत्फलंसमवाप्यैतत्त्वयिदृष्टेपुरन्दर ॥ ११ ॥ यत्फलं
भूमिदानेनगवांदानेनऋत्विजे ॥ ममाद्यतत्फलंभूतमथवाराजसूयकम् ॥ १२ ॥ नाल्पेनतपसालभ्यंदर्शनंतववासव ॥ एवंगेहेमयायत्तेप्रियंकार्यं
तदुच्यताम् ॥१३॥ विकल्पोऽन्योनभवताहृदिकार्यःकथञ्चन ॥ कृतंचतद्विजानीयायद्यपिस्यात्सुदुष्करम् ॥१४ ॥ पुण्योऽहंपुण्यतांप्राप्तोदर्शनात्तव
शत्रुहन् ॥ यत्तेदेववरैर्वन्द्यौवन्दितौचरणौमया ॥ १५ ॥ किमागमनकृत्यंतेवदसर्वंमयिप्रभो ॥ अत्याश्चर्यमिदंमन्येतवागमनकारणम् ॥ १६ ॥ इन्द्र
उवाच ॥ जानेऽहंदनुमुख्यानांप्रधानंत्वांतुवाष्कले॥नात्याश्चर्यमिदंभातित्वयिदृष्टेऽसुरोत्तम ॥ १७ ॥ विमुखानार्थिनोयान्तिभवतोगृहमागताः ॥
अर्थिनांकल्पवृक्षोऽसिदाताचान्योनविद्यते ॥ १८ ॥ प्रभायांसूर्यतुल्योऽसिगाम्भीर्येसागरोपमः ॥ सहिष्णुत्वेधराचैवश्रियानारायणोपमः ॥ १९ ॥
ब्राह्मणःकश्यपकुलेजातोऽयंवामनःशुभे ॥ प्रार्थितोऽहमनेनैवंभूमेर्देहिपदत्रयम् ॥ १२० ॥ ममाग्निशरणार्थाययत्रकुर्यांमखंत्वहम् ॥ तदस्यकारणं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृत्वाअर्थितैषाममप्रभो ॥२१॥ लोकत्रयंमेऽपहृतन्त्वयाविक्रम्यबाष्कले ॥ निर्वृत्तिकोनिर्धनोऽस्मियद्दित्सेनतदस्तिमे॥२२॥ भवन्तंयाचयिष्यामि
परार्थेनापिचात्मना ॥ अर्थित्वेनममाप्यस्ययद्योग्यंतत्समाचर ॥ २३ ॥ जातोऽसिकाश्यपेचत्वंवंशेवंशविवर्द्धनः ॥ दित्यास्त्वंगर्भसम्भूतः
पितात्रैलोकपूजितः ॥२४॥ एवंभूतमहंज्ञात्वातेनत्वांयाचयाम्यहम्॥अस्याग्निशरणार्थायदीयतांभूपदत्रयम् ॥२५॥ अतीवह्रस्वगात्रस्यवामनस्यास्य
दानव ॥ भूमिभागेचपारक्येदातुंनत्वहमुत्सहे ॥ २६ ॥ एतदेवमयादत्तंयद्भवानर्थितोऽसिमे ॥ गुरवोयदिमन्यन्तेमन्त्रिणोवापदत्रयम् ॥ २७ ॥
अर्थित्वेनमदीयेनस्वकुलेबान्धवेऽपिच ॥ गृहायातेमयितथायद्योग्यंतत्समाचर ॥ २८ ॥ यदितेरुचितंवीरदानवेन्द्रमहाद्युते ॥ तदस्मैदीयतांशीघ्रं
वामनायमहात्मने ॥ २९ ॥ बाष्कलिरुवाच ॥ देवेन्द्रस्वागतंतेऽस्तुस्वस्तिप्राप्नुहिमाचिरम् ॥ त्वंसमीक्षस्वधात्मानंसर्वेषांचपरायणम् ॥ १३० ॥
त्वयिभारंसमावेश्यसुखमास्तेपितामहः ॥ ध्यानधारणयायुक्तश्चिन्तयानःपरंपदम् ॥ ३१ ॥ सङ्ग्रामैर्बहुभिःखिन्नोजगच्चिन्तामपास्यतु ॥ क्षीराब्धि
द्वीपमाश्रित्यसुखंस्वपितिकेशवः ॥ ३२ ॥ कैलासेपर्वतश्रेष्ठेकृत्तिवासाउमापतिः ॥ रमतेभार्ययासार्धंभारंत्वयिनिवेश्यवै ॥ ३३ ॥ अन्येचदानवाः
सर्वेबलिनःसाधुधास्त्वया ॥ असहायेनैवशक्रसर्वेऽपिविनिपातिताः ॥ ३४ ॥ आदित्याद्वादशैवेहरुद्रास्त्वेकादशापिवा ॥ अश्विनौवसवश्चैवधर्मश्चैव
सनातनः ॥ ३५ ॥ त्वद्बाहुबलमाश्रित्यत्रिदिवेमखभागिनः ॥ त्वयाक्रतुशतैरिष्टंसमाप्तवरदक्षिणैः ॥ ३६ ॥ त्वयाचघातितोवृत्रोनमुचिःपाक
शासन ॥ त्वदाज्ञाकारिणापूर्वंविष्णुनाप्रभविष्णुना ॥ ३७ ॥ हिरण्यकशिपोर्भ्राताहिरण्याक्षोऽपिघातितः ॥ हिरण्यकशिपुर्योऽत्रजङ्घेचारोप्यघातितः
॥ ३८ ॥ वज्रपाणिनमायान्तमैरावणशिरोगतम् ॥ सङ्ग्रामभूमौदृष्ट्वात्वांसर्वेनश्यन्तिदानवाः ॥ ३९ ॥ येत्वयाविजिताःपूर्वंदानवाबलवत्तराः ॥
सहस्रांशेनतत्तुल्योनभवामिकथञ्चन ॥ १४० ॥ एवंविधोऽसिदेवेन्द्रममकागणनाभवेत् ॥ मांसमुद्धर्तुकामेनत्वयैवागमनंकृतम् ॥ ४१ ॥ करिष्यामि
नसन्देहोदास्येप्राणानपिध्रुवम् ॥ किमर्थंदेवराजोक्ताभूमिरेषात्वयाहिमे ॥ ४२ ॥ इमेदाराःसुतागावोयच्चान्यद्विद्यतेवसु ॥ त्रैलोक्यराज्यमखिलंविप्र
स्यास्यप्रदीयताम् ॥ ४३ ॥ अपकीर्तिर्भवेन्मह्यंपूर्वेषांचनसंशयः ॥ गृहायातस्यशक्रस्यदत्तंबाष्कलिनानतु ॥ ४४ ॥ अन्योऽपियोऽर्थीमेप्राप्तःसमे
प्रियतरःसदा ॥ भवानत्रविशेषेणविचारंमाकृथाःक्वचित् ॥ ४५ ॥ बृहत्त्रपामेदेवेन्द्रयद्भूमेस्तुपदत्रयम् ॥ ब्राह्मणस्यविशेषेणप्रार्थितंतुत्वयाविभो
॥ ४६ ॥ दास्येग्रामवरानस्यभवतस्तुत्रिविष्टपम् ॥ अश्वान्गजान्भूमिधनंस्त्रियश्चोद्भिन्नचूचुकाः ॥ ४७ ॥ यासांदर्शनमात्रेणवृद्धोऽपितरुणायते ॥
ताःस्त्रियोवसुधांचैतांवामनस्यप्रतिग्रहम् ॥ ४८ ॥ प्रतिदास्यामिदेवेन्द्रप्रसादःक्रियतांहिमे ॥ एतावदुक्त्वेवचनेतदाबाष्कलिनानृप ॥ ४९ ॥ पुरोधा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तूशनाप्राहदानवेन्द्रंतदावचः ॥ भवान्राजादानवेन्द्रऐश्वर्येऽष्टविधेस्थितः ॥ १५० ॥ युक्तायुक्तंनजानासिदेयंकस्यमयाक्वचित् ॥ मन्त्रिभिःसुसमा
लोच्ययुक्तायुक्तंपरीक्ष्यच ॥५१॥ प्राप्तंत्रैलोक्यराज्यत्वंजित्वादेवान्सवासवान् ॥ वाक्यस्यास्यावसानेचभवान्प्राप्स्यतिबन्धनम् ॥ ५२ ॥ यएष
वामनोराजन्विष्णुरेवसनातनः ॥ नास्यवैभवतादेयंपितातेघातितःस्वयम् ॥ ५३ ॥ अयंतेपितृहाप्राप्तोमातृहाबन्धुघातकः ॥ वंशोच्छेदकर
स्तुभ्यंभूतश्चैवभविष्यति ॥ ५४ ॥ नचैषधर्मंजानातिशक्रादीनांहितेरतः ॥ मायाविनादानवायेमाययायेननिर्जिताः ॥ ५५ ॥ माययाब्राह्मणंरूपं
वामनंचप्रदर्शितम् ॥ अत्रकिंबहुनोक्तेननास्यदेयंतुकिञ्चन ॥ ५६ ॥ मक्षिकापादमात्रंतुभूमिरस्यप्रतिग्रहः ॥ विनाशमेष्यसिक्षिप्रं
सत्यंसत्यंमयाश्रुतम् ॥ ५७ ॥ गुरुणाप्येवमुक्तस्तुभूयोवाक्यमथाब्रवीत् ॥ धर्मार्थिनामयासर्वंप्रतिज्ञातंगुरोत्विदम् ॥ ५८ ॥ प्रतिज्ञापालनं
कार्यंसतांधर्मःसनातनः ॥ यद्येषभगवान्विष्णुर्नास्तिधन्यतरोमया ॥ ५९ ॥ गृह्यप्रतिग्रहंमत्तोयदिदेवान्बुभूषति ॥ भूयोऽपिधन्यतां
नीतोदेवेनानेनवैगुरो ॥ १६० ॥ यंयोगिनोध्यानयुक्ताध्यायमानाहिदर्शनम् ॥ नलभन्तेतथाविप्रास्सोऽयंदृष्टोमयाद्यवै ॥ ६१ ॥ दानानि
येप्रयच्छन्तिसकुशोदकपाणिना ॥ प्रीयतांभगवान्विष्णुःपरमात्मासनातनः ॥६२॥ एवमुक्तेतुवचनेअपवर्गस्यभागिनः ॥ यदत्रकार्यकरणेविकल्पो
मेबभूवह ॥६३॥ उपदिष्टोऽस्मिभवताबालत्वेचावधारितम्॥शत्रावपिगृहायातोमास्त्वदेयंतुकिञ्चन ॥६४॥ एतदेवविचिन्त्याहंप्राणानपिस्वकान्गुरो॥
वामनस्यप्रदास्यामिशक्रस्यापित्रिविष्टपम् ॥६५॥ अपीडाकारियद्दानंतद्दानमिहदीयते ॥ पीडाकारिचयद्दानंतद्दानंसमलंस्मृतम् ॥ ६६ ॥ पुलस्त्य
उवाच ॥ एतच्छ्रुत्वागुरुस्तत्रत्रपयाधोमुखःस्थितः ॥ बाष्कलिरुवाच ॥ अर्थिताभवतादेवदेयासर्वाधरामया ॥ ६७ ॥ त्रपाकरंभवेन्मह्यंयदस्य
भूपदत्रयम् ॥ इन्द्रउवाच ॥ सत्यमेतद्दानवेन्द्रयदुक्तंभवताहिमे ॥ ६८ ॥ भूमेःपदत्रयार्थित्वंद्विजेनानेनमेकृतम् ॥ एतावतात्वयंचार्थीमयाप्यस्यकृ
तेभवान् ॥ ६९ ॥ दनुपुत्रोयाचितोऽसिवरमेतत्प्रदीयताम् ॥ बाष्कलिरुवाच ॥ पदत्रयंवामनायदेवराजप्रतीच्छमे ॥ १७० ॥ तत्रत्वंसुचिरंकालं
सुखीसुरपतेवस ॥ पुलस्त्यउवाच ॥ एवमुक्त्वाबाष्कलिनावामनायपदत्रयम् ॥ ७१ ॥ तोयपूर्वंतदादत्तंप्रीयतांमेहरिःस्वयम् ॥ दत्तेतुदानवेन्द्रेणत्य
क्त्वारूपंचवामनम् ॥ ७२ ॥ हरिराचक्रमेलोकान्देवानांहितकाम्यया ॥ यज्ञपर्वतमासाद्यगत्वाचैवउदङ्मुखः ॥ ७३ ॥ देवस्यवामचरणेनिविष्टो
दानवालयः ॥ तत्रक्रमंसप्रथमंददौसूर्येजगत्पतिः ॥ ७४ ॥ द्वितीयंचध्रुवेदेवस्तृतीयेनचपार्थिव ॥ ब्रह्माण्डस्ताडितस्तेनदेवेनाद्भुतकर्मणा ॥
॥७५॥ अङ्गुष्ठाग्रेणभिन्नेऽण्डेजलंभूरिविनिःसृतम् ॥ प्लावयित्वाब्रह्मलोकान्सर्वाँल्लोकाननुक्रमात् ॥ ७६ ॥ ध्रुवस्थानंसूर्यलोकंप्लाव्यतंयज्ञपर्वतम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रविष्टापुष्करंधाराधौत्वाविष्णुपदानिसा ॥ ७७ ॥ पदानियानिजातानिवैष्णवानिधरातले ॥ तत्राश्रमेतुयोगत्वास्नानंवाप्यांसमाचरेत् ॥
॥ ७८ ॥ अश्वमेधफलंतस्यदर्शनादेवजायते ॥ एकविंशकुलोपेतोवैकुण्ठेवासमाप्नुयात् ॥ ७९ ॥ भुक्त्वातुविपुलान्भोगान्कल्पानांतुशतत्रयम् ॥
तदन्तेजायतेराजासार्वभौमःक्षिताविह ॥ १८० ॥ तोयधारातुसाभीष्मअङ्गुष्ठाग्राद्विनिःसृता ॥ नदीसावैष्णवीप्रोक्ताविष्णुपादसमुद्भवा ॥ ८१ ॥
अनेनकारणेनाभूद्गङ्गाविष्णुपदीनृप ॥ ययासर्वमिदंव्याप्तंत्रैलोक्यंसचराचरम् ॥ ८२ ॥ अङ्गुष्ठाग्रक्षतादण्डाद्यत्प्रविष्टंजलंशुभम् ॥ प्राप्तंदेवनदीत्वं
तुयातुविष्णुपदीनदी ॥ ८३ ॥ देवनद्यातयाव्याप्तंब्रह्माण्डंसचराचरम् ॥ विभूतिभिर्महाभागसर्वानुग्रहकाम्यया ॥ ८४ ॥ सबाष्कलिर्वामनेनउक्तः
पूरयमेक्रमान् ॥ अधोमुखस्तदाजातउत्तरंनास्यविन्दति ॥ ८५ ॥ मौनीभूतंतुतंदृष्ट्वापुरोधावाक्यमब्रवीत् ॥ शुक्रउवाच ॥ स्वाभाविकीदानशक्ति
र्नतुस्रष्टुंवयंक्षमाः ॥ ८६ ॥ यावतीयंधरादेवसादत्तानेनतेप्रभो ॥ पुलस्त्यउवाच ॥ उक्तोबाष्कलिनाविष्णुर्यावन्मात्रावसुन्धरा ॥ ८७ ॥ यास्र
ष्टाभवतापूर्वंसामयानचगोपिता ॥ अल्पाभूमिर्भवान्दीर्घोनतुस्रष्टेरहंक्षमः ॥ ८८ ॥ इच्छाशक्तिःप्रभवतिप्रभोस्तेदेवसर्वदा ॥ निरुत्तरस्तदावि
ष्णुर्मत्वातंसत्यवादिनम् ॥ ८९ ॥ ब्रूहिदानवमुख्यत्वंकंतेकामंकरोम्यहम् ॥ ममहस्तगतंतोयंत्वयादत्तंतुदानव ॥ १९० ॥ तेनत्वंवरयोग्योऽसि
वराणांभाजनंशुभम् ॥ दास्येऽहंभवतःकाममर्थीयेनवृणुष्वह ॥ ९१ ॥ विज्ञप्तोहितदातेनदेवदेवोजनार्दनः ॥ बाष्कलिरुवाच ॥ भक्तिंवृणोमिदे
वेशत्वद्धस्तान्मरणंहिमे ॥ ९२ ॥ व्रजामिश्वेतद्वीपंतेदुर्लभंतुतपस्विनाम् ॥ पुलस्त्यउवाच ॥ आहैवमुक्तेविष्णुस्तांतिष्ठस्वैकंयुगान्तरम् ॥ ९३ ॥
वाराहरूपीयदाहंप्रवेक्ष्यामिधरातलम् ॥ तदाहनिष्येऽहंत्वांतुमदग्रेचयदैष्यसि ॥ ९४ ॥ उक्तोऽथदानवस्तेनअपासर्पत्तदग्रतः ॥ वामनेनसमा
क्रान्ताःसर्वेलोकास्तदानृप ॥ ९५ ॥ असुरैस्तैस्तदात्यक्तंदेवानांसत्यरक्षणैः ॥ देवोहृत्वातुत्रैलोक्यंजगामादर्शनंविभुः ॥ ९६ ॥ पातालनि
लयश्चापिसुखमास्तेसबाष्कलिः ॥ शक्रोऽपिपालयामासविपश्चिद्भुवनत्रयम् ॥ ९७ ॥ अयंत्रैविक्रमोनामप्रादुर्भावोजगद्गुरोः ॥ गङ्गासम्भवसं
युक्तस्सर्वकल्मषनाशनः ॥ ९८ ॥ विष्णोःपदानामेषातउत्पत्तिःकथितानृप ॥ यांश्रुत्वातुनरोलोकेसर्वपापैःप्रमुच्यते ॥ ९९ ॥ दुःस्वप्नं
दुर्विचिन्त्यंचदुष्कृतंदुष्कृतानिच ॥ क्षिप्रंहिनाशमायान्तिदृष्टेविष्णुपदत्रये ॥ २०० ॥ युगानुक्रमशोदृष्ट्वापापिनोजन्तवस्तथा ॥ सूक्ष्मता
दर्शिताभीष्मविष्णुनापददर्शने ॥ १ ॥ यस्त्वारोहतितस्मिंस्तुमौनवान्मानवोभुवि ॥ कृत्वात्रिपुष्करीयात्रामश्वमेधफलंव्रजेत् ॥ २ ॥ मुच्य
तेसर्वपापैश्चमृतोविष्णुपुरंव्रजेत् ॥ २०३ ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेविष्णुपदोत्पत्तिर्नामत्रिंशोऽध्यायः ॥ ३० ॥ भीष्मउवाच ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भगवन्महदाश्चर्यंबाष्कलेर्बन्धनंहियत् ॥ कृतंत्रिविक्रमंरूपंयदासंयमितोबलिः ॥ १ ॥ एतन्मयाश्रुतंपूर्वंकथ्यमानंद्विजोत्तमैः ॥ पातालेवसतेऽ
द्यापिवैरोचनसुतोबलिः ॥ २ ॥ नागतीर्थंयथाभूतंपिशाचानांतुसम्भवम् ॥ शिवदूतीकथंचात्रकेनेयंमङ्गलीकृता ॥ ३ ॥ अन्तरिक्षेपुष्करंतु
केननीतंमहामुने ॥ एतदाचक्ष्वमेसर्वंयथाबाष्कलिबन्धनम् ॥ ४ ॥ भूमिप्रक्रमणंपूर्वंकृतंदेवेनविष्णुना ॥ द्वितीयेकारणंकिंचयेनदेवश्चकारह ॥
॥ ५ ॥ तत्त्वतस्त्वंहितत्सर्वंयथाभूतंतथावद ॥ पापक्षयकरंह्येतच्छ्रोतव्यंभूतिमिच्छता ॥ ६ ॥ पुलस्त्यउवाच ॥ प्रश्नभारस्त्वयाराजन्कौतु
कादेवकीर्तितः ॥ कथयामिहितत्सर्वंयथाभूतंनृपोत्तम ॥ ७ ॥ विष्णोःपदानुषङ्गेणबन्धनंबाष्कलेरिह ॥ श्रुतन्तद्भवतासर्वंमयातेपरिकीर्तित
म् ॥ ८ ॥ भूयोऽपिविष्णुनाभीष्मप्राप्तेवैवस्वतेऽन्तरे ॥ त्रैलोक्यंबलिनाक्रान्तंविष्णुनाप्रभविष्णुना ॥ ९ ॥ गत्वात्वेकाकिनायज्ञेतथासंयमितो
बलिः ॥ भूयोऽपिदेवदेवेनभूमेःप्रक्रमणंकृतम् ॥ १० ॥ प्रादुर्भावोवामनस्यतथाभूतोनराधिप ॥ पुनस्त्रिविक्रमोभूत्वावामनोऽभूदवामनः ॥ ११ ॥
उत्पत्तिरेषातेसर्वाकथिताकुरुनन्दन ॥ नागानांतुयथातीर्थंतच्छृणुष्वमहाव्रत ॥ १२ ॥ अनन्तोवासुकिश्चैवतक्षकश्चमहाबलः ॥ कर्कोटकश्च
नागेन्द्रःपद्मश्चान्यःसरीसृपः ॥ १३ ॥ महापद्मस्तथाशङ्खःकुलिकश्चापराजितः ॥ एतेकश्यपदायादाएतैरापूरितंजगत् ॥ १४ ॥ एतेषांतु
प्रसूत्यातुइदमापूरितंजगत् ॥ कुटिलाभीमकर्माणस्तीक्ष्णास्याश्चविषोल्बणाः ॥ १५ ॥ दष्ट्वामन्दांश्चमनुजान्कुर्युर्भस्मक्षणात्तुते ॥ तद्दर्शनाद्भवेन्नाशो
मनुष्याणांनराधिप ॥ १६ ॥ अहन्यहनिजायेतक्षयःपरमदारुणः ॥ आत्मनस्तुक्षयंदृष्ट्वाप्रजाःसर्वास्समन्ततः ॥१७ ॥ जग्मुःशरण्यंशरणंब्रह्माणं
परमेश्वरम् ॥ इममेवार्थमुद्दिश्यप्रजाःसर्वामहीपते ॥ १८ ॥ ऊचुःकमलजंदृष्ट्वापुराणंब्रह्मसंज्ञकम् ॥ प्रजाऊचुः ॥ देवदेवेशलोकानांप्रसूतेपर
मेश्वर ॥ १९ ॥ त्राहिनस्तीक्ष्णदंष्ट्राणांभुजगानांमहात्मनाम् ॥ दिनेदिनेभयंदेवपश्यामःकृपणाभृशम् ॥ २० ॥ मनुष्यपशुपक्ष्यादितत्सर्वं
भस्मसाद्भवेत् ॥ त्वयासृष्टिःकृतादेवक्षीयतेतुभुजङ्गमैः ॥ २१ ॥एतज्ज्ञात्वायदुचितंतत्कुरुष्वपितामहः ॥ ब्रह्मोवाच ॥ अहंरक्षांविधास्यामि
भवतीनांनसंशयः ॥ २२ ॥ व्रजध्वंस्वनिकेतानिनीरुजोगतसाध्वसाः ॥ पुलस्त्यउवाच ॥ एवमुक्तेप्रजाःसर्वाब्रह्मणाव्यक्तमूर्तिना ॥ २३ ॥
आजग्मुःपरमप्रीताःस्तुत्वाचैवस्वयम्भुवम् ॥ प्रयातासुप्रजास्वेवंतानाहूयभुजङ्गमान् ॥ २४ ॥ शशापपरमक्रुद्धोवासुकिप्रमुखांस्तदा ॥ ब्रह्मोवाच ॥
अहन्यहनिभूतानिभक्ष्यन्तेवैदुरात्मभिः ॥ २५ ॥ नश्यन्तितूरगैर्दष्टामनुष्याःपशवस्तथा ॥ यस्मान्मत्प्रभवान्नित्यंक्षयंनयथमानुषान् ॥ २६ ॥
अतोऽन्यस्मिन्भवेभूयान्ममकोपात्सुदारुणात् ॥ भवतांहिक्षयोघोरोभाविवैवस्वतेऽन्तरे ॥ २७ ॥ तथान्यःसोमवंशीयोराजावैजनमेजयः ॥ धक्ष्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेसर्वेसत्रेणप्रदीप्तेहव्यवाहने ॥२८॥ मातृष्वसुश्चतनयांस्ताक्ष्यौवोभक्षयिष्यति ॥ एववोभविता नाशःसर्वेषांदुष्टचेतसाम् ॥२९॥ शप्त्वाकुलसहस्रन्तु
यावदेकंकुलंस्थितम् ॥ पुलस्त्यउवाच ॥ एवमुक्तेतुवेपन्तोब्रह्मणाभुजगोत्तमाः॥३०॥निपत्यपादयोस्तस्यइदमूचुर्वचस्तदा ॥सर्पाऊचुः ॥ भगवन्कुटि
लाजातिरस्माकंभूतभावन ॥३१॥ विषोल्बणत्वंक्रूरत्वंदन्दशूकत्वमेवच ॥ सम्पादितंत्वयादेवइदानींशपसेकथम् ॥३२॥ ब्रह्मोवाच॥यदिनाममयासृ
ष्टाभवन्तःकुटिलाशयाः ॥ ततःकिंबहुनानित्यंभक्षयध्वंगतव्यथाः ॥ ३३ ॥ नागाऊचुः ॥ मर्यादांकुरुदेवेशस्थानंचैवपृथक्पृथक् ॥ मनुष्याणां
तथास्माकंसमयंदेवकारय ॥ ३४ ॥ शापोयोभवतादत्तोमनुष्योजनमेजयः ॥ नाशंनःसर्पसत्रेणउल्बणंचकरिष्यति ॥ ३५ ॥ ब्रह्मोवाच ॥ जरत्का
रुरितिख्यातोभविताब्रह्मवित्तमः ॥ जरत्कन्यातस्यदेयातस्यांसुतपत्स्यतेसुतः ॥ ३६ ॥ रक्षांकर्त्तासवोविप्रोभवतांकुलपावनः ॥ तथाकरोमिना
गानांसमयंमनुजैःसह ॥३७॥ तदेकमनसःसर्वेशृणुध्वंममशासनम् ॥ सुतलंवितलंचैवतृतीयंचतलातलम् ॥३८॥ दत्तंचत्रिप्रकारंवोगृहंतत्रगमिष्यथ॥
तत्रभोगान्बहुविधान्भुञ्जानाममशासनात् ॥ ३९ ॥ तिष्ठध्वंसप्तमंयावत्कालंततुपुनःपुनः ॥ ततोवैवस्वतस्यादौकाश्यपेयोभविष्यति ॥ ४० ॥
दायादःसर्वदेवानांसुपर्णस्सर्पभक्षकः ॥ तदाप्रसूतिःसर्पाणांदग्धावैचित्रभानुना ॥ भवतांचैवसर्वेषांभविष्यतिनसंशयः ॥ ४१ ॥ येयेक्रूराभो
गिनोदुर्विनीतास्तेषामन्तोभाविताना न्यथैतत् ॥ कालव्याप्तंभक्षयध्वंचसत्त्वंतथापकारेचकृतेमनुष्यम् ॥४२॥ मन्त्रौषधैर्गारुडैश्चैवतन्त्रैर्बन्धैर्जुष्टामा
नवायेभवन्ति ॥ तेभ्योभीतैर्वर्तितव्यंनचान्यच्चित्तेकार्यंचान्यथावोविनाशः ॥ ४३ ॥पुलस्त्यउवाच॥इतीरितेब्रह्मणावैभुजङ्गाजग्मुःस्थानंसुतलाख्यं
हिसर्वे ॥ तस्थुर्भोगान्भुञ्जमानाश्चसर्वेरसातलेलीलयासंस्थितास्ते ॥ ४४ ॥ एवंशापंतुतेलब्ध्वाप्रसादंचचतुर्मुखात् ॥ तस्थुःपातालनिलयेमुदिते
नान्तरात्मना ॥ ४५ ॥ ततःकालान्तरेभूतेपुनरेवंव्यचिन्तयन् ॥ भविताभरतोराजापाण्डवेयोमहायशाः ॥ ४६ ॥ अस्माकंतुक्षयकरोदैवयोगे
नकेनचित् ॥ कथंत्रिभुवनेनाथःसर्वेषांचपितामहः ॥ ४७ ॥ सृष्टिकर्ताजगद्वन्द्यःशापमस्मासुदत्तवान् ॥ देवंविरञ्चिनंत्यक्त्वागतिरन्या
नविद्यते ॥ ४८ ॥ वैराजेभवनश्रेष्ठेतत्रदेवःसतिष्ठति ॥ सदेवःपुष्करस्थोवैयज्ञंयजतिसाम्प्रतम् ॥ ४९ ॥ गत्वाप्रसादयामस्तंवरंतुष्टःप्रदा
स्यति ॥ एवंविचिन्त्यतेसर्वेनागागत्वाचपुष्करम् ॥ ५० ॥ यज्ञपर्वतमासाद्यशैलभित्तिमुपाश्रिताः ॥ दृष्ट्वानागास्तथाश्रान्तान्वारिधाराश्चशी
तलाः ॥ ५१ ॥ उदङ्मुखावैनिष्क्रान्तास्सर्वेषांतुसुखप्रदाः ॥ नागतीर्थंततोजातंपृथिव्यांभरतर्षभ ॥ ५२ ॥ नागकुण्डंचवैकेचित्सरितंचापरेऽब्रु
वन् ॥ पुण्यंतत्सर्वतीर्थानांसर्पाणांविषनाशनम् ॥ ५३ ॥ मज्जन्तितत्रयेमर्त्याअधिश्रावणपञ्चमि ॥ नतेषांतुकुलेसर्पाःपीडांकुर्वन्तिकर्हिचित् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ५४ ॥ श्राद्धंपितॄणांयेतत्रकरिष्यन्तिनराभुवि ॥ ब्रह्मातेषांपरंस्थानंदास्यतनात्रसंशयः ॥ ५५ ॥ नागानांतुभयंज्ञात्वाब्रह्मालोकपितामहः ॥
पूर्वोक्तंतुपुनर्वाक्यंनागानश्रावयत्तदा ॥ ५६ ॥ पञ्चमीसातिथिर्धन्यासर्वपापहराशुभा ॥ यतोऽस्यामेवसुतिथौनागानांकार्यमुद्धृतम् ॥ ५७ ॥
एतस्यांसर्वतोयस्तुकङ्कम्लंपरिवर्जयेत् ॥ क्षीरेणस्नापयेन्नागांस्तस्यतेयान्तिमित्रताम् ॥ ५८ ॥ भीष्मउवाच ॥ शिवदूतीयथाजातायेनचैवनि
वेशिता ॥ तन्मेसर्वंयथातत्त्वंभवान्शंसितुमर्हति ॥ ५९ ॥ पुलस्त्यउवाच ॥ शिवानीलगिरिंप्राप्तातपसेधृतमानसा ॥ रौद्रीजटोद्भवाशक्ति
स्तस्याःशृणुनृपव्रतम् ॥ ६० ॥ तपःकृत्वाचिरंकालंग्रसिष्याम्यखिलंजगत् ॥ एवमुद्दिश्यपञ्चाग्निंसाधयामासभामिनी ॥ ६१ ॥ तस्याः
कालान्तरेदेव्यास्तपन्त्यास्तपउत्तमम् ॥ रुरुर्नाममहातेजाब्रह्मदत्तवरोऽसुरः ॥ ६२ ॥ समुद्रमध्येरत्नाख्यंपुरमस्तिमहाधनम् ॥ तत्रातिष्ठत्सदै
त्येन्द्रस्सर्वदेवभयङ्करः ॥ ६३ ॥ अनेकशतसाहस्रकोटिकोटिशतोत्तमैः ॥ असुरैरर्चितःश्रीमान्द्वितीयोनमुचिर्यथा ॥ ६४ ॥ कालेनमहता
सोऽथलोकपालपुरंययौ ॥ जिगीषुःसैन्यसंवीतोदेवैर्वैरमरोचयत् ॥ ६५ ॥ उत्तिष्ठतस्तस्यमहासुरस्यसमुद्रतोयंववृधेऽतिवेगात् ॥ अनेकना
गग्रहमीनजुष्टमाप्लावयत्पर्वतसानुदेशान् ॥ ६६ ॥ अन्तस्स्थितानेकसुरारिसङ्घंविचित्रवर्मायुधचित्रशोभम् ॥ भीमंबलंचलितंचारुयोधंविनि
र्ययौसिन्धुजलाद्विशालम् ॥ ६७ ॥ तत्रद्विपादैत्यभटाभ्युपेताःसयानघण्टाश्वसमृद्धियुक्ताः ॥ विनिर्ययुःस्वाकृतिभिर्झषाणांसमत्वमुच्चैःखलु
दर्शयन्तः ॥ ६८ ॥ अश्वास्तथाकाञ्चनसूत्रनद्धारोहीतमत्स्याइवतेजलान्ते ॥ व्यवस्थितास्तैःसममेवतूर्णंविनिर्ययुर्लक्षशःकोटिशश्च ॥
॥ ६९ ॥ तथारविस्यन्दनतुल्यवेगाःसचक्रदण्डाक्षतवेणुयुक्ताः ॥ रथाश्वयन्त्रोपरिपीडिताङ्गाश्चलत्पताकाःस्वनितंविचक्रुः ॥ ७० ॥ तथै
वयोधाःस्थगितास्तरीभिस्तितीर्षवस्तेप्रवरास्त्रपाणयः ॥ रणेरणेलब्धजयाःप्रहारिणोविरेजुरुच्चैरसुरानुगाभृशम् ॥ ७१ ॥ देवेषुवैरणेतेषुवि
द्रुतेषुविशेषतः ॥ असुरास्सर्वदेवानामन्वधावंस्ततस्ततः ॥ ७२ ॥ ततोदेवगणाःसर्वेद्रवन्तोभयविह्वलाः ॥ नीलंगिरिवरंजग्मुर्यत्रदेवी
स्वयंस्थिता ॥ ७३ ॥ रौद्रीतपोन्विताधन्याशाम्भवीशक्तिरुत्तमा ॥ संहारकारिणीदेवीकालरात्रीतियांविदुः ॥ ७४ ॥ सातुदृष्ट्वातदा
देवान्भयत्रस्तान्विचेतसः ॥ पप्रच्छविस्मयाद्देवीप्रोत्फुल्लाम्बुजलोचना ॥ ७५ ॥ देव्युवाच ॥ पृष्ठतोवोनपश्यामिभयंकिञ्चिदुपागतम् ॥ कथं
तुविद्रुतादेवाःसर्वेशक्रपुरःसराः ॥ ७६ ॥ देवाऊचुः ॥ अयमायातिदैत्येन्द्रोरुरुर्भीमपराक्रमः ॥ चतुरङ्गेणसैन्येनमहतापरिवारितः ॥ ७७ ॥
तस्माद्दीनावयंदेवींभवतींशरणंगताः॥पुलस्त्यउवाच ॥ देवानामितिवैश्रुत्वावाक्यमुच्चैर्जहाससा ॥७८॥ तस्यांहसन्त्यांनिश्चेरुर्वराङ्ग्योवदनात्ततः ॥ ॥ ९६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पाशाङ्कुशधराःसर्वाःपीनोन्नतपयोधराः ॥ ७९ ॥ सर्वाश्शूलधराभीमाःसर्वादंष्ट्राङ्कुशाननाः ॥ आबद्धमुकुटाःसर्वाःसन्दष्टदशनच्छदाः ॥ ८० ॥
फूत्काररावैरशिवैस्त्रासयन्त्यश्चराचरम् ॥ काश्चिच्छुक्लाम्बरधराःकाश्चिच्चित्राम्बरास्तथा ॥८१॥ सुनीलवसनाःकाश्चिद्रक्तपानातिलालसाः ॥ नाना
रूपैर्मुखैस्तास्तुनानावेषवपुर्धराः ॥ ८२ ॥ ताभिरेवंवृतादेवीदेवानामभयङ्करी ॥ माभैष्टदेवाभद्रंवोयावद्वदतिदानवः ॥ ८३ ॥ चतुरङ्गबलोपेतोरुरु
स्तावत्समागतः ॥ तंनीलपर्वतवरंदेवानांमार्गमार्गिणः ॥ ८४ ॥ देवानामग्रतःसैन्यंदृष्ट्वादेवीसमाकुलम् ॥ तिष्ठतिष्ठेतिजल्पन्तोदैत्यास्तेसमुपागताः
॥ ८५ ॥ ततःप्रववृतेयुद्धंतासांतेषांमहाभयम् ॥ नाराचैर्भिन्नदेहानांदैत्यानांभुविसर्पताम् ॥ ८६ ॥ रोषाद्दण्डप्रभग्नानांसर्पाणामिवसर्पताम् ॥
शक्तिनिर्भिन्नहृदयांगदासञ्चूर्णितोरसः ॥ ८७ ॥ कुठारैर्भिन्नशिरसोमुसलैर्भिन्नमस्तकाः ॥ विद्धोदरास्त्रिशूलाग्रैश्छिन्नग्रीवावरासिभिः ॥ ८८ ॥
क्षताश्वरथमातङ्गपादाताःपेतुराहवे ॥ रणभूमिंसमासाद्यदैत्याःसर्वेरुरुंविना ॥ ८९ ॥ ततोबलंहतंदृष्ट्वारुरुर्मायान्तदाददे ॥ तयासंमोहितादेव्यो
देवाश्चापिरणाजिरे ॥ ९० ॥ तामस्यामाययादेव्यासर्वमन्धन्तमोऽभवत् ॥ ततोदेवीमहाशक्त्यातंदैत्यंसमताडयत् ॥ ९१ ॥ तयातुताडितस्या
जौदैत्यस्यप्रगतंतमः ॥ मायायामथनष्टायांतामस्यांदानवोरुरुः ॥ ९२ ॥ पातालमाविशत्तूर्णंतत्रापिपरमेश्वरी ॥ देवीभिःसहिताक्रुद्धापुरतोऽभिमु
खीस्थिता ॥ ९३ ॥ रुरोस्तुदानवेन्द्रस्यभीतस्याग्रेगतस्यच ॥ नखाग्रेणशिरश्छित्त्वाचर्मचादायवेगिता ॥ ९४ ॥ निर्ययावथपातालात्पुष्करंचपुन
र्गिरिम् ॥ कन्यासैन्येनमहताबहुरूपेणभास्वता ॥ ९५ ॥ देवैस्तुविस्मितैर्दृष्टाचर्ममुण्डधरारुरोः ॥ स्वकीयेतपसःस्थानेनिविष्टापरमेश्वरी ॥ ९६ ॥
ततोदेव्योमहाभागाःपरिवार्यव्यवस्थिताः ॥ याचयामासुरव्यग्रास्तांतुदेवींबुभुक्षिताः ॥ ९७ ॥ देव्यऊचुः ॥ बुभुक्षितावयंदेविदेहिनोभोजनंवरम् ॥
पुलस्त्यउवाच ॥ एवमुक्तातततोदेवीदध्यौतासांतुभोजनम् ॥ ९८ ॥ नाध्यगच्छत्तदातासांभोजनंचिन्तितम्महत् ॥ तदादध्यौमहादेवंरुद्रंपशुपतिंवि
भुम् ॥ ९९ ॥ सोऽपिध्यानात्समुत्तस्थौपरमात्मात्रिलोचनः ॥ उवाचरुद्रस्तांदेवींकिंतेकार्यंविवक्षितम् ॥ १०० ॥ ब्रूहिदेविमहामायेयत्तेमनसि
वर्तते ॥ शिवदूत्युवाच ॥ छागमध्येतुवैदेवछागरूपेणवर्तसे ॥ १ ॥ एतास्त्वांभक्षयिष्यन्तिभक्ष्यमीप्सितमादरात् ॥ भक्षार्थमासांदेवे
शकिञ्चिद्दातुमिहार्हसि ॥ २ ॥ शूलीकुर्वन्तिमामेताभक्षार्थिन्योमहाबलाः ॥ अन्यथामामपिबलाद्भक्षयेयुर्बुभुक्षिताः ॥ ३ ॥ एवंमांतुसमालक्ष्य
भक्ष्यंकल्पयसत्वरम् ॥ रुद्रउवाच ॥ शिवदूतिब्रवीम्येकंप्रवृत्तंयद्युगान्तरे ॥ ४ ॥ गङ्गाद्वारेदक्षयज्ञोगणैर्विध्वंसितोमम ॥ तत्रयज्ञोमृगोभूत्वाप्रदुद्रा
वसुवेगवान् ॥ ५ ॥ मयाबाणेननिर्विद्धोरुधिरेणप्रसेचितः ॥ अजगन्धस्तदाभूतोनामदेवैस्तुमेकृतम् ॥ ६ ॥ अजगन्धस्त्वमेवेतिदास्येचान्यत्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भोजनम् ॥ एतासांशृणुमेदेविभक्ष्यमेकंमयोचितम् ॥ ७ ॥ कथ्यमानंवरारोहेकालरात्रिमहाप्रभे ॥ यास्त्रीसगर्भादेवेशिअन्यस्त्रीपरिधान
कम् ॥ ८ ॥ परिधत्तेस्पृशेद्वापिपुरुषस्यविशेषतः ॥ सभागोऽस्तुवरारोहेकासाश्चित्पृथिवीतले ॥ ९ ॥ अप्येकवर्षंबालंतुगृहीत्वातत्रवैबलात् ॥
भुक्त्वातिष्ठन्तुसुप्रीताअपिवर्षशतान्बहून् ॥ ११० ॥ अन्याःसूतिगृहेच्छिद्रंगृह्णीयुस्तुह्यपूजिताः ॥ निवसिष्यन्तिदेवेशितथावैजातहारिकाः
॥ ११ ॥ गृहेक्षेत्रेतटाकेचवाप्युद्यानेषुचैवहि ॥ अन्येषुचरुदन्त्योयाःस्त्रियस्तिष्ठन्तिनित्यशः ॥ १२ ॥ तासांशरीरगाश्चान्याःकाश्चित्तृप्ति
मवाप्नुयुः ॥ शिवदूत्युवाच ॥ कुत्सितंभवतादत्तंप्रजानांपरिपीडनम् ॥ १३ ॥ नचत्वंबुध्यसेदातुंशङ्करस्यविशेषतः ॥ त्रपाकरंयद्भवतिप्रजा
नांपरिपीडकम् ॥ १४ ॥ नतुतद्युज्यतेदातुंतासांभक्ष्यंतुशङ्कर ॥ रुद्रउवाच ॥ अवन्त्यांतुयदास्कन्दोमयापूर्वंतुभद्रितः ॥ १५ ॥ चूडा
कर्मणिवृत्तेतुकुमारस्यतदाशुभे ॥ आगत्यमातरोभक्ष्यमपूर्वंतुप्रचक्रिरे ॥ १६ ॥ देवलोकाद्देवगणामातॄणांभोक्तुमागताः ॥ तासांगृहेयदापूर्वं
ब्रह्माद्यास्सुरसत्तमाः ॥ गन्धर्वाप्सरसश्चैवयक्षास्सर्वेचगुह्यकाः ॥ १७ ॥ मेर्वादयःशिखरिणोगङ्गाद्याःसरितस्तथा ॥ १८ ॥ सर्वेनागागजास्सिद्धाः
पक्षिणोऽसुरसूदनाः ॥ डाकिन्यःसहवेतालैर्वृताःसर्वैर्ग्रहैस्तदा ॥ १९ ॥ किमुक्तेनामुनादेवियत्सृष्टंब्रह्मणात्विह ॥ तत्सर्वंभोजनंदत्तंस्वेच्छान्नं
चनभोगतम् ॥ १२० ॥ शिवदूत्युवाच ॥ आसांकृतंदेहिभोज्यंदुर्लभंयत्त्रिविष्टपे ॥ स्नेहाक्तंसगुडंह्यद्यंसुपक्वंपरिकल्पितम् ॥ २१ ॥
कच्चिन्नान्येनयद्भुक्तमपूर्वंपरमेश्वर ॥ पुलस्त्यउवाच ॥ एवमुक्तस्तदासोऽपिदेवदेवोमहेश्वरः ॥ २२ ॥ भक्ष्यार्थंतास्तदाप्राहपार्वत्याश्चैवसन्निधौ ॥
शिवउवाच॥मयावैसाधितंचान्नंप्रकारैर्बहुभिःकृतम् ॥२३॥ तत्सर्वंचव्ययंयातंनचान्यदिहदृश्यत ॥ भवतीष्वागतास्वद्यकिंमयादेयमुच्यताम् ॥२४॥
अपूर्वंभवतीनांयन्मयादेयंविशेषतः ॥ आस्वादितंनचान्येनभक्ष्यार्थेचददाम्यहम् ॥२५॥ अधोभागेचमेनाभेर्वर्तुलौफलसन्निभौ॥भक्षयध्वंहिसहिता
लम्बौमेवृषणाविमौ॥२६॥अनेनचापिभोज्येनपरातृप्तिर्भविष्यति ॥ पुलस्त्यउवाच॥महाप्रसादंताल्लब्ध्वादेव्यस्सर्वास्तदाशिवम्॥२७॥प्रणिपत्यस्थि
ताश्शर्वइदंवचनमब्रवीत्॥करिष्यन्तिशुभाचारान्विनाहास्येनयेनराः॥२८॥तेषांधनंपशुःपुत्रादाराश्चैवगृहादिकम्॥ भविष्यतिमयादत्तंयच्चान्यन्मनसि
स्थितम् ॥२९॥ हास्येनदीर्घदशनादरिद्राश्चभवन्तिते॥तस्मान्ननिन्दाहास्यंचकर्तव्यंहिविजानता॥१३०॥भवत्योमातरःख्याताह्यस्मिँल्लोकेभविष्यथ॥
उपहारेनरायेतुकरिष्यन्तिचकौमुदीम् ॥ ३१ ॥ चणकान्पूरिकाश्चैववृषणैःसहपूपकान् ॥ बन्धुभिःस्वजनैश्चैवतेषांवंशोनछिद्यते ॥ ३२ ॥ अपु
त्रोलभतेपुत्रंधनार्थीलभतेधनम् ॥ रूपवान्सुभगोभोगीसर्वशास्त्रविशारदः ॥३३॥ हंसयुक्तेनयानेनब्रह्मलोकेमहीयते ॥ शिवदूतिमयाप्येवंतासांदत्तंच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भक्षणम् ॥ ३४ ॥ त्रपाकरंकिंभवत्याउक्तोऽहंतन्निशामय ॥ जयस्वदेविचामुण्डेजयभूतापहारिणि ॥ ३५ ॥ जयसर्वगतेदेविकालरात्रिनमोऽस्तुते॥ विश्वमूर्तियुतेशुद्धेविरूपाक्षित्रिलोचने ॥ ३६ ॥ भीमरूपेशिवेविद्येमहामायेमहोदरे ॥ मनोजयेमनोदुर्गेभीमाक्षिक्षुभितक्षये ॥ ३७॥ महामारिविचित्राङ्गिगीतनृत्यप्रियेशुभे ॥ विकरालिमहाकालिकालिकेपापहारिणि ॥ ३८॥ पाशहस्तेदण्डहस्तेभीमहस्तेभयानके ॥ चामुण्डेज्वलमानास्येतीक्ष्णदंष्ट्रेमहाबले ॥ ३९ ॥ शिवयानप्रियेदेविप्रेतासनगतेशिवे ॥ भीमाक्षिभीषणेदेविसर्वभूतभयङ्करि ॥ १४० ॥ करालिविकरालेचमहाकालिकरालिनि ॥ कालिकरालविक्रान्तेकालरात्रिनमोऽस्तुते॥ ४१॥ सर्वशस्त्रभृतेदेविनमोदेवनमस्कृते ॥ पुलस्त्यउवाच॥एवंस्तुताशिवदूतीरुद्रेणपरमेष्ठिना ॥ ४२ ॥ तुतोषपरमादेवीवाक्यंचवमुवाचह ॥ वरंवृणीष्वदेवेशयत्तेमनसिवर्तते ॥ ४३ ॥ रुद्रउवाच ॥ स्तोत्रेणानेनयेदेविस्तोष्यन्तित्वांवराननेतेषांत्वंवरदादेविभवसर्वगतासती ॥ ४४ ॥ इमंपर्वतमारुह्ययःपूजयतिभक्तितः ॥ सपुत्रपौत्रपशुमान्समृद्धिमुपगच्छतु ॥ ४५ ॥ यश्चैवंशृणुयाद्भक्त्यास्तवंदेविसमुद्भवम् ॥ सर्वपापविनिर्मुक्तःपरंनिर्वाणमृच्छतु ॥ ४६ ॥ भ्रष्टराज्योयदाराजानवम्यांनियतःशुचिः ॥ अष्टम्यांचचतुर्दश्यांसोपवासोनरोत्तम ॥ ४७ ॥ संवत्सरेणलभतांराज्यंनिष्कण्टकंपुनः ॥ एषाज्ञानान्विताशक्तिःशिवदूतीतिचोच्यते ॥ ४८ ॥ यएवंशृणुयान्नित्यंभक्त्यापरमयानृप ॥ सर्वपापविनिर्मुक्तःपरंनिर्वाणमाप्नुयात् ॥ ४९ ॥ यश्चैनंपठतेभक्त्यास्नात्वावैपुष्करेजले ॥ सर्वमेतत्फलंप्राप्यब्रह्मलोकेमहीयते ॥ १५० ॥ यत्रैतल्लिखितंगेहेसदातिष्ठतिपार्थिव ॥ नतत्राग्निभयंघोरंसर्वचोरादिसम्भवम् ॥ ५१ ॥ यश्चेदंपूजयद्भक्त्यापुस्तकेऽपिस्थितंबुधाः ॥ तेनचेष्टंभवेत्सर्वंत्रैलोक्यंसचराचरम् ॥५२॥जायन्तेबहवःपुत्राधनंधान्यंवरस्त्रियः ॥रत्नान्यश्वागजाभृत्यास्तेषामाशुभवन्तिच॥५३॥ यत्रेदंलिख्यतेगेहेतत्राप्येवंध्रुवंभवेत् ॥ १५४ ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेशिवदूतीचरितंनामैकत्रिंशोऽध्यायः ॥ ३१ ॥ भीष्मउवाच ॥ केनकर्मविपाकेनप्रेतत्वंजायतेपुनः ॥ केनवात्रप्रमुच्येततन्मेब्रूहिमहामते ॥ १ ॥ पुलस्त्यउवाच ॥ अहंतेकथयिष्यामिसर्वमेतदशेषतः ॥ यच्छ्रुत्वानपुनर्मोहंयास्यतेनृपसत्तम ॥ ॥२॥ येनजायेतप्रेतत्वंयेनचास्मात्प्रमुच्यते ॥ प्राप्नोतिनरकंघोरंदुस्तरंत्रिदशैरपि ॥३॥ सतांसम्भाषणेचैवपुण्यतीर्थानुकीर्त्तने ॥ मानवास्तुप्रमुच्यन्तेआपन्नाःप्रेतयोनिषु ॥ ४ ॥ श्रूयतेहिपुरोभीष्मब्राह्मणःसंशितव्रतः ॥ पृथुस्सर्वत्रविख्यातःसन्तोषेचसदास्थितः ॥ ५ ॥ स्वाध्याययुक्तोगेहेषुनित्ययोगश्चयोगवित ॥ जपयज्ञविधानेनयुक्तंकालंक्षिपेच्चसः ॥ ६ ॥ युक्तःक्षमादयाभ्यांचक्षान्त्यायुक्तश्चतत्त्ववित् ॥ अहिंसाहितचित्तश्चमार्दवेचतथास्थितः ॥ ७ ॥ ब्रह्मचर्यसमायुक्तस्तपोयोगसमन्वितः ॥ युक्तःसपितृकार्येषुयुक्तोवैदिककर्मसु ॥ ८॥ परलोकभययुक्तोयक्तस्सत्यवचः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रति ॥ युक्तोमधुरवाक्येषुयुक्तश्चातिथिपूजने ॥ ९ ॥ इष्टापूर्तसमायुक्तोयुक्तोद्वन्द्वविवर्जने ॥ स्वकर्मविधिसंयुक्तोयुक्तःस्वाध्यायकर्मसु ॥ १० ॥ एवं
कर्माणिकुर्वतस्संसारविजिगीषया ॥ बहून्यब्दान्यतीतानिब्राह्मणस्यगृहेसतः ॥ ११ ॥ तस्यबुद्धिरियंजातातीर्थाभिगमनंप्रति ॥ पुण्यैस्तीर्थजलैरे
तत्क्लिन्नंकुर्यांकलेवरम् ॥ १२ ॥ प्रयतःपुष्करेस्नात्वाभास्करस्योदयंप्रति ॥ कृतजप्यनमस्कारोऽप्यद्धानंप्रत्यपद्यत ॥ १३ ॥ अग्रतःपञ्चपुरुषान
पश्यत्सोऽतिभीषणान् ॥ वनेकण्टकवृक्षाढ्येनिर्जनेपक्षिवर्जिते ॥ १४ ॥ तान्दृष्ट्वाविकृताकारान्सुघोरान्पापदर्शनान् ॥ ईषत्सन्त्रस्तहृदयोव्यतिष्ठ
न्निश्चलाकृतिः ॥ १५ ॥ अवलम्ब्यततोधैर्य्यंभयमुत्सृज्यदूरतः ॥ पप्रच्छमधुराभाषीकेयूयंविकृताःकुतः ॥ १६ ॥ किंवाचैवकृतंकर्मयेनप्राप्ताश्च
वैकृतम् ॥ कथमेवंविधाःसर्वेप्रस्थिताःकुत्रचाध्वनि ॥ १७ ॥ प्रेताऊचुः ॥ क्षुत्पिपासान्वितानित्यंमहादुःखसमावृताः ॥ हृतप्रज्ञावयंसर्वेनष्टसञ्ज्ञा
विचेतसः ॥ १८ ॥ नजानीमोदिशंचापिप्रदिशंचापिकाञ्चन ॥ नान्तरिक्षंमहींचापिनजानीमोदिवंतथा ॥ १९ ॥ यदेतद्दुःखमाख्यात
मेतदेवसुखंभवेत् ॥ प्रभातमिदमाभातिभास्करोदयदर्शनात् ॥ २० ॥ अहंपर्युषितोनामसूचीमुखस्तथापरः ॥ शीघ्रगोरोहकश्चैवपञ्चमोलेखकस्तथा
॥ २१ ॥ ब्राह्मणउवाच ॥ प्रेतानांकर्मजातानांनाम्नांवैसम्भवःकुतः ॥ किंतत्कारणमुद्दिश्ययतोयूयंसनामकाः ॥ २२ ॥ प्रेताऊचुः ॥ अहंस्वादुसदा
भुञ्जेदद्यांपर्युषितंद्विजे ॥ एतत्कारणमासाद्यनामपर्युषितोमम ॥२३॥ सूचिताबहवोऽनेनविप्राश्चान्नाद्यकाङ्क्षिणः ॥ एतत्कारणमुद्दिश्यसूचीमुखाभि
धोमतः ॥ २४ ॥ शीघ्रंगतोऽस्मिविप्रेणयाचितःक्षुधितेनच ॥ एतत्कारणमुद्दिश्यशीघ्रगोद्विजसत्तम ॥ २५ ॥ गृहोपरिसदास्वादुभुङ्क्तेद्विजभयेनहि ॥
उद्विग्नमानसस्तत्रतेनासौरोहकःस्मृतः ॥ २६ ॥ मौनेचापिस्थितोनित्यंयाचितोविलिखन्महीम् ॥ अस्माकमपिपापिष्ठोलेखकोनामनामतः ॥२७॥
कृच्छ्रेणलेखकोयातिरोहकस्तुअवाक्छिराः॥शीघ्रगःपङ्गुतांप्राप्तःसूचीसूचीमुखोऽभवत्॥२८॥पर्युषितोलम्बग्रीवोलम्बोदरउदाहृतः॥बृहद्वृषणलम्बोष्ठः
पापादस्मादजायत ॥२९॥ एतत्तेसर्वमाख्यातमात्मवृत्तंसहेतुकम्॥पृच्छस्वयदितेश्रद्धापृष्टाश्चकथयामहे ॥३०॥ ब्राह्मणउवाच ॥ येजीवाभुवितिष्ठ
न्तिसर्वेऽप्याहारमूलकाः॥युष्माकमपिचाहारंश्रोतुमिच्छामितत्त्वतः॥३१॥प्रेताऊचुः॥शृणुष्वाहारमस्माकंसर्वसत्त्वविगर्हितम्॥ यच्छ्रुत्वानिन्दसेविप्र
भूयोभूयश्चनित्यशः॥३२॥श्लेष्ममूत्रपुरीषेणयोषिदङ्गमलेनच॥गृहाणित्यक्तशौचानिप्रेताभुञ्जन्तितत्रवै ॥३३ ॥ स्त्रीभिर्दग्धानिकीर्णानिप्रकीर्णोच्छिष्ट ॥ ९८ ॥
कानिच॥मलेनापिजुगुप्स्यानिप्रेताभुञ्जन्तितत्रवै॥३४ ॥चित्तलज्जाविहीनानिहोमहीनानियानिच ॥ व्रतैश्चैवविहीनानिप्रेताभुञ्जन्तितत्रवै॥३५॥गुरवो
नैवपूज्यन्तेस्त्रीजितानिगृहाणिच ॥ क्रोधलोभगृहीतानिप्रेताभुञ्जन्तितत्रवै ॥ ३६ ॥ त्रपामेजायतेतातकथ्यमानेस्वभोजने ॥ अस्मात्परतरंचान्यन्न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वक्तुमपिशक्यते ॥ ३७ ॥ निवृर्त्तिप्रेतभावस्यपृच्छामस्त्वांदृढव्रत ॥ यथानभवतिप्रेतस्तन्मेवदतपोधन ॥ ३८ ॥ ब्राह्मणउवाच ॥ एकरात्रद्विरात्रादिकृच्छ्रचान्द्रायणादिभिः ॥ व्रतैरन्यैःकृतैर्नित्यंनप्रेतोजायतेनरः ॥ ३९ ॥ त्रीनग्नीन्पञ्चचैकंवायोऽहन्यहनिसेवते ॥ सर्वभूतदयापन्नोनप्रेतोजायतेनरः ॥ ४० ॥ तुल्योमानेऽपमानेचतुल्यःकाञ्चनलोष्टयोः ॥ तुल्यःशत्रौचमित्रेचनप्रेतोजायतेनरः ॥ ४१ ॥ देवतातिथिपूजासुगुरुपूजासुनित्यशः ॥ रतोवैपितृपूजासुनप्रेतोजायतेनरः ॥ ४२ ॥ शुक्लाङ्गारकसंयुक्ताचतुर्थीजायतेयदा ॥ श्रद्धयाश्राद्धकृत्तस्यांनप्रेतोजायतेनरः ॥ ४३ ॥ जितक्रोधविमर्शोयस्तृष्णासङ्गविवर्जितः ॥ क्षमावान्दानशीलश्चनप्रेतोजायतेनरः ॥ ४४ ॥ गोब्राह्मणांश्चतीर्थानिपर्वतांश्चनदीस्तथा ॥ देवांश्चैवतुयोवन्द्यान्नप्रेतोजायतेनरः ॥ ४५ ॥ प्रेताऊचुः ॥ श्रुताश्चविविधाधर्माःपृच्छामोदुःखितामुने ॥ यनवैजायतेप्रेतस्तन्नोवदमहामते ॥४६॥ ब्राह्मणउवाच ॥ शूद्रान्नेनतुभुक्तेनब्राह्मणेनविशेषतः ॥ म्रियतेह्युदरस्थेनसवैप्रेतोभवेन्नरः ॥ ४७ ॥ मातरंपितरंभ्रातॄन्भगिनींसुतमेवच ॥ अदृष्टदोषांस्त्यजतिसप्रेतोजायतेनरः ॥ ४८ ॥ अयाज्ययाजनाच्चैवयाज्यस्यचविवर्जनात् ॥ रतोवैशूद्रसेवासुसप्रेतोजायतेनरः ॥ ४९ ॥ न्यासापहर्तामित्रध्रुक्छूद्रपाकरतःसदा ॥ विस्रम्भघातीकूटस्थःसप्रेतोजायतेनरः ॥ ५० ॥ ब्रह्महागोघ्नकःस्तेनःसुरापोगुरुतल्पगः ॥ भूमिकन्यापहर्त्ताचसप्रेतोजायतेनरः ॥ ५१ ॥ सामान्यांदक्षिणांलब्ध्वाएकएवनिगूहति ॥ नास्तिकीभावनिरतःसवैप्रेतोऽभिजायते ॥ ५२ ॥ एवंब्रुवाणेविप्रेन्द्रआकाशेदुन्दुभिस्वनः ॥ पुष्पवृष्टिःपपातोर्व्यांदेवैर्मुक्तासहस्रशः ॥ ५३ ॥ प्रेतानांतुविमानानिआगतानिसमन्ततः ॥ अस्यविप्रस्यसम्भाषात्पुण्यसङ्कीर्तनेनच ॥ ५४ ॥ तस्मात्सर्वप्रयत्नेनसतांसम्भाषणंकुरु ॥ यदिंतंश्रेयसाकार्यंगङ्गासुतअतन्द्रितः ॥५५॥ तिलकंसर्वधर्मस्यपञ्चप्रेतकथामिमाम् ॥ पठेल्लक्षंयोऽस्यकुलेनप्रेतोजायतेनरः ॥ ५६ ॥ शृणोतिवाप्यभीक्ष्णंवाश्रद्धयापरयाऽन्वितः ॥ भक्त्यासमन्वितोवापिनप्रेतोजायतनरः ॥ ५७ ॥ भीष्मउवाच ॥ अन्तरिक्षेकिमर्थंतुपुष्करंपरिकीर्त्यते॥मुनिभिर्धर्मशीलैश्चलभ्यतेतत्कथंत्विह ॥५८॥ येनतल्लभ्यतेलब्धंलब्धंचैवफलप्रदम् ॥ तन्मेसर्वंसमाचक्ष्वकौतुकादेवपृच्छतः ॥ ५९ ॥ पुलस्त्यउवाच ॥ ऋषिकोटिस्समायातादक्षिणापथवासिनी ॥ स्नानार्थंपुष्करेराजन्पुष्करञ्चवियद्गतम् ॥ ६० ॥ मत्त्वातेमुनयःसर्वेप्राणायामपरायणाः ॥ ध्यायमानाःपरंब्रह्मस्थिताद्वादशवत्सरान् ॥ ६१ ॥ ब्रह्मामहर्षयस्तत्रदेवास्सेन्द्रास्समागताः ॥ ऋषयोऽन्तर्हिताःप्रोचुर्नियमांस्तेसुदुष्करान् ॥ ६२ ॥ आकारणंपुष्करस्यमन्त्रेणक्रियतांद्विजाः ॥ आपोहिष्ठेतितिसृभिर्ऋग्भिःसान्निध्यमेष्यति ॥ ६३ ॥ अघमर्षणजप्येनभवेद्वैफलदायकम् ॥ विप्रैर्वाक्यावसानेतुसर्वैस्तैस्तुतथाकृतम् ॥ ६४ ॥ कृतेनपुण्यतांप्राप्तायेनिदेशाच्चतेद्विजाः ॥ गर्हिताधर्मशास्त्रेषुतेविप्रादक्षि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णोत्तराः ॥ ६५ ॥ येचान्येपार्वतीयाश्चश्राद्धनार्हन्तिकेतनम् ॥ एतस्मात्कारणाद्राजन्वियत्येवंसमास्थितम् ॥ ६६ ॥ कार्तिक्यांपुष्करंस्नानात्पूत
तामिभयच्छति ॥ ब्रह्मणासहितंराजन्सर्वेषांपुण्यदायकम् ॥ ६७ ॥ तत्रागतास्तुयेवर्णाःसर्वेतेपुण्यभाजनाः ॥ द्विजैस्तुल्यानसन्देहोविना
मन्त्रेणतेनृप ॥ ६८ ॥ आग्नेयंतुयदाऋक्षंकार्तिक्यांभवतिक्वचित् ॥ महतीसातिथिज्ञयास्नानेदानेतथोत्तमा ॥ ६९ ॥ यदायाम्यंतुभवतिऋक्षंत
स्यांतिथौक्वचित् ॥ तिथिःसापिमहापुण्यायतिभिःपरिकीर्तिता ॥ ७० ॥ प्राजापत्यंयदाऋक्षंतिथौतस्यांनराधिप ॥ सामहाकार्तिकीप्रोक्तादेवा
नामपिदुर्लभा ॥ ७१ ॥ यदाचार्केगुरौसोमेवारेष्वेतेषुवैत्रिषु ॥ त्रीण्येतानिचऋक्षाणिस्वयंप्रोक्तानिब्रह्मणा ॥ ७२ ॥ अत्राश्वमेधिकंपुण्यंस्नातस्य
भवतिध्रुवम् ॥ दानमक्षयतांयातिपितॄणांतर्पणंतथा ॥ ७३ ॥ विशाखासुयदाभानुःकृत्तिकासुचचन्द्रमाः ॥ सयोगःपुष्करोनामपुष्करेष्वतिदुर्लभः
॥ ७४ ॥ अन्तरिक्षावतीर्णेतुतीर्थेपैतामहेशुभे ॥ स्नानंयेऽत्रकरिष्यन्तितेषांलोकामहोदयाः ॥ ७५ ॥ नस्पृहान्तेऽन्यपुण्यस्यकृतस्याप्यकृतस्यच ॥
करिष्यन्तिमहाराजसत्यमेतदुदाहृतम् ॥ ७६ ॥ तीर्थानांप्रवरंतीर्थंपृथिव्यामिहपठ्यते ॥ नास्मात्परंपुण्यतीर्थंलोकेषुनृपपठ्यते ॥ ७७ ॥ कार्ति
क्यांतुविशेषेणपुण्यापापहराशुभा ॥ उदुम्बरवनात्तस्मादागताचसरस्वती ॥ ७८ ॥ तयातत्पूरितंतीर्थंपुष्करंमुनिसेवितम् ॥ दक्षिणेशिखरंभातिपर्वत
स्याविदूरतः ॥ ७९ ॥ नीलाञ्जनचयप्रख्यंवर्णतोनीलशाद्वलम् ॥ तयातच्छिखरंतस्यखस्थितंपुष्करंयथा ॥ ८० ॥ प्रावृट्कालेवियत्पूर्णंघनवृन्द
मिवोच्छ्रितम् ॥ कदम्बपुष्पगन्धाढ्यंकुटजार्जुनभूषितम् ॥ ८१ ॥ रथमार्गमिवारोढुंरवेस्तच्छिखरंस्थितम् ॥ वृत्तैस्सपुलकैस्स्निग्धैःस्त्रीणामिवपयो
धरैः ॥ ८२ ॥ श्रीफलैःशिखरंभातिसमन्तात्सुमनोहरैः ॥ गुञ्जद्भिःषट्पदकुलैःसमन्तादुपशोभितम् ॥ ८३ ॥ कोकिलारावरुचिरंशिखिकेकारवा
कुलम् ॥ शृङ्गेमनोहरेतस्मिन्नुद्भूतासुमनोरमा ॥ ८४ ॥ पुण्यापुण्यजलोपेतानदीयंब्रह्मणस्सुता ॥ वंशस्तम्बात्सुविपुलाप्रवृत्ताचोत्तरामुखी
॥ ८५ ॥ गत्वाततोनातिदूरात्पुनर्यातिपराङ्मुखी ॥ ततःप्रभृतिसादेवीप्रसन्नाप्रकटास्थिता ॥ ८६ ॥ अन्तर्धानंपरित्यज्यप्राणिनाम
नुकम्पया ॥ कनकासुप्रभाचैवनन्दाप्राचीसरस्वती ॥ ८७ ॥ पञ्चस्रोताःपुष्करेषुब्रह्मणापरिभाषिता ॥ तस्यास्तीरेसुरम्याणि
तीर्थान्यायतनानिच ॥ ८८ ॥ संसेवितानिमुनिभिःसिद्धैश्चापिसमन्ततः ॥ तेषुसर्वेषुभविताधर्महेतुःसरस्वती ॥ ८९ ॥ हाटकक्षिति
गौरीणांतत्तीर्थेषुमहोदयम् ॥ दानंदत्तंनरैःस्नातैर्जनयत्यक्षयंफलम् ॥ ९० ॥ धान्यप्रदानंप्रवरंवदन्तितिलप्रदानंचतथामुनीन्द्राः ॥
॥ यैस्तेषुतीर्थेषुनरैःप्रदत्तंतद्धर्महेतुप्रवरंप्रदिष्टम् ॥ ९१ ॥ प्रायोपवेशंप्रयतःप्रयत्नाद्यस्तेषुकुर्यात्प्रमदापुमान्वा ॥ तीर्थेऽपिसंयोज्यमनोऽपिचेत्थं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भुङ्क्तेफलंब्रह्मगृहेयथेप्सम्॥९२॥तस्योपकण्ठेम्रियतेहियैस्तुकर्मक्षयात्स्थावरजङ्गमैश्च॥तेचापिसर्वेसकलंप्रसह्यलभन्तियज्ञस्यफलंदुरापम् ॥९३॥ ततस्तु
साधर्मफलारणीचजन्मादिदुःखार्दितचेतसांतु ॥ सर्वात्मनाचारुफलासरस्वतीसेव्याप्रयत्नात्पुरुषैर्महानदी ॥ ९४ ॥ तत्रयेसलिलंपूतंपिबन्तिसत
तन्नराः ॥ नतेमनुष्यादेवास्तेजगत्यामिहसंस्थिताः ॥ ९५ ॥ यज्ञैर्दानैस्तपोभिश्चयत्फलंप्राप्यतेद्विजैः ॥ तदत्रस्नानमात्रेणशूद्रैरपिस्वभावजैः ॥
॥ ९६ ॥ दर्शनात्पुष्करस्यापिमहापातकिनोऽपिये ॥ तेऽपितत्पापनिर्मुक्ताःस्वर्गंयान्तितनुक्षये ॥ ९७ ॥ तत्रोपवासीयज्ञस्यपुण्डरीकस्ययत्फ
लम् ॥ तत्प्राप्नोतिनरःक्षिप्रमल्पायासेनपुष्करे ॥९८॥ माघमासेतिलान्यस्तुप्रयच्छतिचसद्द्विजे ॥ यथाशक्तिचभक्त्याचसविष्णुभवनेवसेत् ॥९९॥
तत्रोपवासंस्नानंचपञ्चगव्याशनंतथा ॥ यःकरोतिनरःसोऽपिदेहान्तेस्वर्गमाप्नुयात् ॥ १०० ॥ वसन्तितत्समीपस्थायेऽपितस्करजातयः ॥ तेऽपि
तस्यानुभावेनस्वर्यान्तिचनसंशयः ॥ १ ॥ येपुनःशूद्रवृत्तिस्थास्त्रिरात्रोपोषितानराः ॥ प्रयच्छन्तिद्विजेष्वर्थंब्रह्मशक्तिसमन्विताः ॥ २ ॥ तेमृ
तायानमारूढाःपद्मासनचतुर्भुजाः ॥ ब्रह्मणासहसायुज्यंप्राप्नुवन्त्यपुनर्भवम् ॥ ३ ॥ गङ्गोद्भेदंयत्रगङ्गासम्प्राप्तासरितांवराम् ॥ सरस्वतींद्रष्टुकामा
सान्त्वार्थेप्रोद्गताऽम्बरात् ॥ ४ ॥ तत्रगत्वापयःपूतंसुरसिद्धनिषेवितम् ॥ सारस्वतंचविमलंविद्याधरगणार्चितम् ॥ ५ ॥ पीतमेकाञ्जलिमितंयेनाप्तं
तेनतत्परम् ॥ अवलोक्यदिशंपूर्वामाहगङ्गेसखित्वया ॥ ६ ॥ एकाकिनीवियुक्तास्मिकयास्येऽहमबान्धवा ॥ तांविज्ञायततोगङ्गारुदन्तींशोककर्शि
ताम् ॥ ७ ॥ पूर्वदेशात्समायाताद्रष्टुंतांदीनमानसाम् ॥ दृष्ट्वाचतांमहाभागांपरिष्वज्यतुपीडिताम् ॥ ८ ॥ नेत्रेप्रमृज्यचैतस्याःप्राहगङ्गावचस्तदा॥
गङ्गोवाच ॥ मारोदीस्त्वंमहाभागेदुष्करंतेकृतंसखि॥९॥ देवकार्यंयदन्येनकर्तुंशक्येतनैवहि॥एतस्मात्तेमहाभागेद्रष्टुंदेवाःसमागताः ॥११०॥एषांचक्रि
यतांपूजावाङ्मनःकायकर्मणा ॥ पुलस्त्यउवाच ॥ सरस्वतीसुरेन्द्राणांकृत्वापूजाविधिक्रमम् ॥११॥ क्रमेणब्रह्मजापश्चात्सङ्गतातुसखीजनम् ॥ ज्येष्ठ
मध्यमयोर्मध्येसङ्गमोलोकविश्रुतः ॥१२॥ पश्चान्मुखीब्रह्मसुताजाह्नवीतुउदङ्मुखी ॥ ततस्तेविबुधाःसर्वेपुष्करंयेसमागताः ॥१३॥ विदित्वादुष्करं
कर्मतस्यांस्तुतिमकारयन् ॥ देवाऊचुः ॥ त्वंबुद्धिस्त्वंमतिर्लक्ष्मीस्त्वंविद्यात्वंगतिःपरा ॥१४॥ त्वंश्रद्धात्वंपरानिष्ठाबुद्धिर्मेधारतिःक्षमा॥त्वंसिद्धि
स्त्वंस्वधास्वाहात्वंपवित्रंमतंमहत् ॥१५॥ सन्ध्यारात्रिःप्रभाभूतिर्मेधाश्रद्धासरस्वती॥यज्ञविद्यामहाविद्यागुह्यविद्याचशोभना ॥१६॥ आन्वीक्षिकीतु
यावार्तादण्डनीतिश्चकथ्यते ॥ नमोऽस्तुतेपुण्यजलेनमःसागरगामिनि ॥ १७ ॥ नमस्तेपापनिर्मोकेनमोदेविजगत्प्रिये ॥ पुलस्त्यउवाच ॥
एवंस्तुताहिसादेवीदिव्यास्वार्थपरायणैः ॥ १८ ॥ एवंसाप्राङ्मुखीतत्रस्थितादेवीसरस्वती ॥ सर्वतीर्थमयीदेवीसर्वामरसमन्विता ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राचीसेतिबुधैर्ज्ञेयाब्रह्मणोवचनन्तथा ॥ तत्रशुद्धावटंनामतीर्थंपैतामहंस्मृतम् ॥ १२० ॥ दर्शनेनापिवैतस्यमहापातकिनोऽपिये ॥ भोगिभोगान्स
मश्नन्तिविशुद्धाब्रह्मणोऽन्तिके ॥ २१ ॥ प्रायोपवेशंयेतत्रप्रकुर्वन्तिनरोत्तमाः ॥ तेमृताब्रह्मयानेनदिवंयान्त्यकुतोभयाः ॥ २२ ॥ तत्राल्पमपियै
र्दानन्दत्तंब्रह्मविदात्मनाम् ॥ जन्मान्तरशतंतेषांतैर्दत्तंभावितात्मनाम् ॥ २३ ॥ खण्डस्फुटितसंस्कारंतत्रकुर्वन्तियेनराः ॥ तेब्रह्मलोकमासाद्यमो
दन्तेसुखिनस्सदा ॥ २४ ॥ योऽत्रपूजाजपोहोमःकृतोभवतिदेहिनाम् ॥ अनन्तंतत्फलंसर्वंब्रह्मभक्तिरतात्मनाम् ॥ २५ ॥ तत्रदीपप्रदानेनज्ञान
चक्षुरतीन्द्रियः ॥ प्राप्नोतिधूपदानेनस्थानंब्रह्मनिषेवितम् ॥ २६ ॥ अथकिंबहुनोक्तेनसङ्गमेयत्प्रदीयते ॥ तदनन्तफलंप्रोक्तंजीवतोवामृतस्य
च ॥ २७ ॥ तनानाज्जपात्तथाहोमादनन्तफलसाधकम् ॥ रामेणागत्यवैतत्रपिण्डंदशरथस्यच ॥ २८ ॥ दत्तंश्राद्धंतत्रतेनमार्कण्डेयेनदर्शिते ॥
स्त्रवापीचतुष्कोणातत्रपिण्डप्रदानराः ॥ २९ ॥ हंसयुक्तेनयानेनसर्वेयान्तित्रिविष्टपम् ॥ तस्यांवाप्यांतुवैब्रह्मापितृमेधंचकारह ॥ १३० ॥ य
ज्ञंयज्ञविदांश्रेष्ठःसमाप्तवरदक्षिणम् ॥ वसवःपितरोज्ञेयारुद्राश्चैवपितामहाः ॥ ३१ ॥ आदित्याश्चततस्तेषांविहिताःप्रपितामहाः ॥ त्रिविधाअपिआ
हूयपुनरुक्ताविरिञ्चिना ॥ ३२ ॥ भवद्भिःपिण्डदानाद्यंग्राह्यमत्रस्थितैस्सदा ॥ यत्कृतंपितृकार्यंचतदनन्तफलंभवेत् ॥ ३३ ॥ वृत्त्यर्थंपितरस्तेषां
तुष्टाश्चैवपितामहाः ॥ लभन्तेतर्पणात्तृप्तिंपिण्डदानात्त्रिविष्टपम् ॥ ३४ ॥ तस्मात्सर्वंपरित्यज्यप्राचीनेपिण्डदोभवेत् ॥ दत्त्वापुत्रःप्रयत्नेनपितॄन्स
र्वांश्चतर्पयेत् ॥ ३५ ॥ प्राचीनेश्वरदेवस्यपुरोभूतंप्रतिष्ठितम् ॥ आदितीर्थंतदित्युक्तंदर्शनादपिमुक्तिदम् ॥ ३६ ॥ स्पृष्ट्वातुसलिलन्तत्रमुच्यतेजन्म
बन्धनात् ॥ अवगाहनाद्ब्रह्मणोऽसौभवत्यनुचरःसदा ॥ ३७ ॥ आदितीर्थेनरःस्नात्वायःप्रदद्यात्समाधिना ॥ अन्नमल्पमपिप्रायःप्रायशस्स्वर्गमा
प्नुयात् ॥ ३८ ॥ यस्तत्रब्रह्मभक्तानांनरःस्नात्वाददेद्धनम् ॥ कृसरेणापिहेम्नाचसस्वर्गेमोदतेसुखी ॥ ३९ ॥ प्राचीसरस्वतीतत्रनरैःकिंमृग्यतेप
रम् ॥ तस्यांस्नानात्फलंतृप्त्यैतपोयज्ञादिलक्षणम् ॥ १४० ॥ येपिबन्तिनराःपुण्यांप्राचींदेवींसरस्वतीम् ॥ नतेनराःसुराज्ञेयामार्कण्डेयर्षिरब्र
वीत् ॥ ४१ ॥ सरस्वतींनदींप्राप्यनस्नानेनियमःक्वचित् ॥ भुक्तेवानचवाभुक्तेदिवावायदिवानिशि ॥ ४२ ॥ तत्तीर्थंसर्वतीर्थानांप्राचीनप्रवरंस्मृ
तम् ॥ पापघ्नंपुण्यजननंप्राणिनांपरिकीर्तितम् ॥ ४३ ॥ येपुनर्भावितात्मानस्तत्रस्नात्वाजनार्दनम् ॥ पूजयन्तियथाशक्तितेप्रयान्तित्रिविष्ट
पम् ॥ ४४ ॥ देवानांप्रवरोविष्णुस्तेनयत्रसरस्वती ॥ सेवितातत्परंतीर्थंक्षितौब्रह्मसुतोऽब्रवीत् ॥ ४५ ॥ ततस्तस्मान्महातीर्थंमन्यमानामहो
दयम् ॥ मन्दाकिनीमुदीक्षन्तीस्थितातत्रसरस्वती ॥ ४६ ॥ तत्तीर्थंसर्वतीर्थानांपरंस्वायम्भुवोऽब्रवीत् ॥ मन्दाकिन्यासमंयत्रप्राप्यपुण्यसमाग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सम् ॥४७॥ तत्रस्थानेस्थितादेवैःस्तुतादेवीसरस्वती ॥ मत्वाचैकाकिनींतांतुदीनास्यांदीनमानसाम् ॥ ४८ ॥ सखींतदासृजद्ब्रह्मारूपिणींविमलेक्षणा
म् ॥ हरिणींहरिरप्याशुजज्ञेकमललोचनाम् ॥ ४९ ॥ वज्रिणीमपिदेवेशोवज्रपाणिर्विसृष्टवान् ॥ सुकुरङ्गरुचिंदेवोनीलकण्ठोवृषध्वजः ॥ १५० ॥
सखींसञ्जनयामाससरस्वत्यास्त्रिलोचनः ॥ विलोक्यमानासाराजन्सखीभिःसुरसुन्दरी ॥ ५१ ॥ प्रहृष्टायातुमारब्धादेवादेशान्महानदी ॥ ततःस
खीभिःसार्द्धंसाप्राचीनागन्तुमुद्यता ॥ ५२ ॥ सरस्वतीसमस्तानांतासांश्रेष्ठतमास्मृता ॥ प्राचीसरस्वतीतोयंयेपिबन्तिमृगाभुवि ॥ ५३ ॥ तेऽपि
स्वर्गंगमिष्यन्तियज्ञैर्द्विजवरायथा ॥ चिन्तामणिरिवात्रैषाप्राचीज्ञेयासरस्वती ॥ ५४ ॥ तथाकामफलस्येयंहेतुभूतामहानदी ॥ दक्षिणांदिश
मालोक्यपुनःपश्चान्मुखीगता ॥ ५५ ॥ उक्तातयातथागङ्गादिशंप्राचींव्रजस्वह ॥ विस्मर्तव्यानचाहंतेव्रजदेवियथागतम् ॥ १५६ ॥ इति
श्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेतीर्थावतारोनामद्वात्रिंशोऽध्यायः ॥ ३२ ॥ भीष्मउवाच ॥ मार्कण्डेयेनवैरामःकथमत्रप्रबोधितः ॥ कथंसमागमो
भूतःकस्मिन्कालेकदामुने ॥ १ ॥ मार्कण्डेयःकस्यसुतःकथंजातोमहातपाः ॥ नाम्नोऽस्यनिगमंब्रूहियथाभूतंमहामुने ॥ २ ॥ पुलस्त्यउवाच ॥
अथतेसम्प्रवक्ष्यामिमार्कण्डेयोद्भवंपुनः ॥ पुराकल्पेमुनिःपूर्वंमृकण्डुर्नामविश्रुतः ॥ ३ ॥ भृगोःपुत्रोमहाभागःसभार्यस्तप्तवांस्तपः ॥ तस्य
पुत्रस्तदाजातोवसतस्तुवनान्तरे ॥ ४ ॥ सपञ्चवार्षिकोभूतोबालएवगुणाधिकः ॥ ज्ञानिनासतदादृष्टोभ्रमन्बालस्तदाङ्गणे ॥ ५ ॥ स्थित्वासमु
चिरंकालंभाव्यर्थंमत्यबुध्यत ॥ तस्यपित्रासवैपृष्टःकियदायुःसुतस्यमे ॥ ६ ॥ सङ्ख्यायाचक्ष्ववर्षाणितस्याल्पान्यधिकानिवा ॥ मृकण्डुनैवमुक्त
स्तुसज्ज्ञानीवाक्यमब्रवीत् ॥ ७ ॥ षण्मासमायुःपुत्रस्यधात्रासृष्टंमुनीश्वर ॥ नैवशोकस्त्वयाकार्यःसत्यमेतदुदाहृतम् ॥ ८ ॥ सतच्छ्रुत्वावचो
भीष्मज्ञानिनायदुदाहृतम् ॥ अथोपनयनंचक्रेबालकस्यपितातदा ॥९॥ आहचैनंपितापुत्रमृषींस्त्वमभिवादय ॥ एवमुक्तःसवैपित्राप्रहृष्टश्चाभिवादने
॥ १० ॥ नवर्णावर्णतांवेत्तिसर्ववर्णाभिवादनः ॥ पञ्चमासास्त्वतिक्रान्तादिवसाःपञ्चविंशतिः ॥ ११ ॥ मार्गेणाथसमायाताऋषयस्तत्रसप्तवै ॥
बालेनतेनतेदृष्टाःसर्वेचाप्यभिवादिताः ॥ १२ ॥ आयुष्मान्भवतैरुक्तःसबालोदण्डमेखली ॥ उक्त्वैवंतेपुनर्बालमपश्यन्क्षीणजीवितम् ॥ १३ ॥ दि
नानिपञ्चतस्यायुर्ज्ञात्वाभीताश्चतेनृप ॥ तंगृहीत्वाबालकंचगतास्तेब्रह्मणोऽन्तिकम् ॥ १४ ॥ प्रतिमुच्यचतंराजन्प्रणिपेतुःपितामहम् ॥ अयमावेदित
स्तैस्तुतेनब्रह्माभिवादितः ॥ १५ ॥ चिरायुर्ब्रह्मणाबालःप्रोक्तःसऋषिसन्निधौ ॥ ततस्तेमुनयःप्रीताःश्रुत्वावाक्यंपितामहात् ॥ ॥ १६ ॥ पिता
महोऋषीन्दृष्ट्वाप्रोवाचविस्मयान्वितः ॥ कार्येणयेनचायातःकोऽयंबालोनिवेद्यताम् ॥१७ ॥ ततस्तंऋषयोराजन्सर्वंतस्मैन्यवेदयन् ॥ पुत्रोमृकण्डोः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षीणायुःसायुपंकुरुबालकम् ॥ १८ ॥ अल्पायुषस्त्वस्यमुनिर्बद्ध्वेमांचापिमेखलाम् ॥ यज्ञोपवीतंदण्डंचदत्त्वाचैनमबोधयत् ॥ १९ ॥ यंकंचित्प
श्यसेबालभ्रमन्तंभूतलेजनम् ॥ तस्याभिवादःकर्तव्यएवमाहपितावचः ॥२० ॥ अभिवादनशीलोऽयंक्षितौदृष्टःपरिभ्रमन् ॥ तीर्थयात्राप्रसङ्गेनदैवयो
गात्पितामह ॥ २१ ॥ चिरायुर्भवपुत्रेतिप्रोक्तोऽसौतत्रबालकः ॥ कथंवचोभवेत्सत्यमस्माकंभवतासह ॥ २२ ॥ एवमुक्तस्तदातैस्तुब्रह्मालो
कपितामहः ॥ ऋतवाक्यादियंभूमिःसंस्थितासर्वतोभया ॥ २३ ॥ ब्रह्मोवाच ॥ मत्समश्चायुषाबालोमार्कण्डेयोभविष्यति ॥ ऋषीणांचापि
मुख्यश्चमत्सहायोभविष्यति ॥ २४ ॥ कल्पस्यादौतथाचान्तेमतोमेमुनिसत्तमः ॥ एवंतेमुनयोबालंब्रह्मलोकेपितामहात् ॥ २५ ॥ संसाध्य
प्रेषयामासुभूयोऽप्येनंधरातलम् ॥ तीर्थयात्रांगताविप्रामार्कण्डेयोनिजंगृहम् ॥ २६ ॥ जगामतेषुयातेषुपितरंस्वमथाब्रवीत् ॥ ब्रह्मलोकमहंनीतो
मुनिभिर्ब्रह्मवादिभिः ॥ २७ ॥ दीर्घायुश्चकृतश्चास्मिवरान्दत्त्वाविसर्जितः ॥ एतदन्यच्चमेदत्तंगतंचिन्ताकरंतव ॥ २८ ॥ कल्पस्यादौतथाचान्ते
भविष्येसमनन्तरे ॥ लोककर्तुर्ब्रह्मणोऽहंप्रसादात्तस्यवैपितः ॥ २९ ॥ पुष्करंवैगमिष्यामितपस्तप्तुंसमुद्यतः ॥ तत्राहंदेवदेवेशमुपासिष्येपिता
महम् ॥ ३० ॥ सर्वकामावाप्तिकरंसर्वारातिनिबर्हणम् ॥ सर्वसौख्यप्रदंदेवमिन्द्रादीनांपरायणम् ॥ ३१ ॥ ब्रह्माणंतोषयिष्यामिसर्वलोकपिताम
हम् ॥ मार्कण्डेयवचःश्रुत्वामृकण्डुर्मुनिसत्तमः ॥ ३२ ॥ जगामपरमंहर्षक्षणमेकंसमुच्छ्वसन् ॥ धैर्यंसुमनसास्थायइदंवचनमब्रवीत् ॥ ३३ ॥
अद्यमेसफलंजन्मजीवितंचसुजीवितम् ॥सर्वस्यजगतांस्रष्टायेनदृष्टःपितामहः ॥३४॥ त्वयादायादवानस्मिपुत्रेणवंशधारिणा ॥ त्वंगच्छपश्यदेवेशंपु
ष्करस्थंपितामहम् ॥ ३५ ॥ दृष्टेतस्मिञ्जगन्नाथेनजरामृत्युरेवच ॥ नृणांभवतिसौख्यानितथैश्वर्यंतपोऽक्षयम् ॥ ३६ ॥ त्रीणिशृङ्गाणिशु
भ्राणित्रीणिप्रस्रवणानिच ॥ पुष्कराणितथात्रीणिनविद्मस्तत्रकारणम् ॥ ३७ ॥ कनीयांसंमध्यमंचतृतीयंज्येष्ठपुष्करम् ॥ शृङ्गशब्दाभिधानानि
शुभप्रस्रवणानिच ॥ ३८ ॥ ब्रह्माविष्णुस्तथारुद्रोनित्यंसन्निहितास्त्रयः ॥ पुष्करेषुमहाराजानातःपुण्यतमंभुवि ॥ ३९ ॥ विरजविमलंतोयंत्रिषुलोके
षुविश्रुतम्॥ब्रह्मलोकस्यपन्थानंधन्याःपश्यन्तिपुष्करम्॥४०॥ यस्तुवर्षशतंसाग्रमग्निहोत्रमुपासिता॥कार्तिकींवावसेदेकांपुष्करेसममेवच ॥४१॥ कर्तु
म्मयानशकितंकर्मणानैवसाधितम् ॥ तदयत्नात्त्वयाताततमृत्युस्सर्वहरोजितः ॥४२॥ तत्रदृष्टस्सदेवेशोब्रह्मालोकपितामहः ॥ नान्योमर्त्यस्त्वयातुल्यो
भविताजगतीतले ॥ ४३॥ अहंवैतोषितोयेनपञ्चवार्षिकजन्मना ॥ वरेणत्वंमदीयेनउपमाचिरजीविनाम् ॥ ४४ ॥गमिष्यसिनसन्देहस्तथाशीर्वचन
म्मम ॥ एवंवदन्तितेसर्वेब्रजलोकान्यथेप्सितान् ॥ ४५ ॥ एवंलब्धप्रसादेनमृकण्डुतनयेनच ॥ आश्रमःस्थापितस्तेनमार्कण्डाश्रमइत्युत ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रस्नात्वाशुचिर्भूत्वावाजपेयफलंलभेत् ॥ सर्वपापविशुद्धात्माचिरायुर्जायतेनरः ॥ ४७ ॥ पुलस्त्यउवाच ॥ तथान्यंतेप्रवक्ष्यामिइतिहासंपुरातनम् ॥ यथारामेणवैतीर्थंपुष्करंतुविनिर्मितम् ॥ ४८ ॥ चित्रकूटात्पुरारामोमैथिल्यालक्ष्मणेनच ॥ अत्रेराममश्रममासाद्यपप्रच्छमुनिसत्तमम् ॥ ४९ ॥ रामउवाच ॥ कानिपुण्यानितीर्थानिकिंवाक्षेत्रंमहामुने ॥यत्रगत्वानरोयोगिन्वियोगंसहबन्धुभिः॥ ५० ॥ नैवप्राप्नोतिभगवन्स्तन्ममाचक्ष्वसुव्रत ॥ अनेनवनवासेनराज्ञस्तुमरणेनच ॥ ५१॥ भरतस्यवियोगेनपरितप्येह्यहंत्रिभिः ॥ तद्वाक्यंराघवेणोक्तंश्रुत्वाविप्रर्षभस्तदा ॥ ५२ ॥ ध्यात्वाचसुचिरंकालमिदंवचनमब्रवीत् ॥ अत्रिरुवाच ॥ साधुपृष्टंत्वयावीररघूणांवंशवर्धन ॥ ५३ ॥ ममपित्राकृतंतीर्थंपुष्करंनामविश्रुतम ॥ पर्वतौद्वौचविख्यातौमर्यादायज्ञपर्वतौ ॥ ५४ ॥ कुण्डत्रयंतयोर्मध्येज्येष्ठमध्यकनिष्ठकम् ॥ ५५ ॥ तेषुगत्वादशरथंपिण्डदानेनतर्पय ॥ तीर्थानांप्रवरंतीथक्षेत्राणामपिचोत्तमम् ॥ अवियोगाचसुरसावापीरघुकुलोद्वह ॥५६॥ तथासौभाग्यकूपोऽन्यःसुजलोरघुनन्दन ॥ तेषुपिण्डप्रदानेन पितरोमोक्षमाप्नुयुः ॥ ५७ ॥ आभूतसम्प्लुवंकालमेतदाहपितामहः ॥ तत्रराघवगच्छस्वभूयोऽप्यागमनंक्रियाः॥५८॥ तथेतिचोक्तारामोऽपिगमनाय मनोदधे ॥ ऋक्षवन्तमभिक्रम्यनगरंवैदिशन्तथा ॥ ५९ ॥ चर्मण्वतींसमुत्तीर्यप्राप्तोऽसौयज्ञपर्वतम् ॥ तमतिक्रम्यवेगेनमध्यमेपुष्करेस्थितः ॥ ६०॥ पितॄन्सन्तर्पयामासअद्भिर्देवांश्चसर्वशः ॥ स्नानावसानेरामेणमार्कण्डोमुनिपुङ्गवः ॥ ६१ ॥ आगच्छञ्शिष्यसंयुक्तोदृष्टस्तत्रैवधीमता ॥ गत्वावैसम्मुखंतस्यप्रणिपत्यचसादरम् ॥ ६२ ॥ पृष्टोऽवियोगदःकूपःकतमस्यांदिशिप्रभो ॥ सुतोदशरथस्याहंरामोनामजनैःस्मृतः ॥६३॥ सौभाग्यवापींतांद्रष्टुमहंप्राप्तोऽत्रिशासनात् ॥ तत्स्थानंतौचवकूपौभगवान्प्रब्रवीतुमे ॥६४॥ एवमुक्तश्चरामेणमार्कण्डःप्रत्युवाचह ॥ मार्कण्डेयउवाच ॥ साधुराघवंभद्रंतेसुकृतंभवताकृतम् ॥६५ ॥ तीर्थयात्राप्रसङ्गेनयत्प्राप्तोऽसीहसाम्प्रतम् ॥ एह्यागच्छस्वपश्यस्ववापींतामवियोगदाम् ॥६६॥ अवियोगश्चसर्वैश्चकूपएवात्रजायते ॥ आमुष्मिकेचहैकेचजीवतोऽपिमृतस्यवा ॥ ६७ ॥ एतद्वाक्यंमुनीन्द्रस्यश्रुत्वालक्ष्मणपूर्वजः ॥ सस्माररामोराजानंतदादशरथनृप ॥ ६८ ॥ भरतंसहशत्रुघ्नंभ्रातॄनन्यांश्चनागरान् ॥ एवंचिन्तयतस्तस्यसन्ध्याकालोव्यजायत ॥ ६९ ॥ उपास्यपश्चिमांसन्ध्यांमुनिभिःसहराघवः ॥ सुष्वापतांनिशांतत्रभ्रातृभार्यासमन्वितः ॥ ७० ॥ विभावर्यवसानेतुस्वप्नान्तेरघुनन्दनः ॥ पित्रामात्रातथाचान्यैरयोध्यायांस्थितःकिल ॥ ७१॥ विवाहमङ्गलेवृत्तेबहुभिर्बान्धवैःसह ॥ समासीनःसभार्योऽसावृषिभिःपरिवारितः ॥७२॥ लक्ष्मणेनाप्येवमेवदृष्टोऽसौसीतयातथा॥ प्रभातेतुमुनीनांतत्सर्वमेवप्रकीर्तितम् ॥ ७३ ॥ ऋषिभिश्चतथेत्युक्तःसत्यमेतद्रघूत्तम ॥ मृतस्यदर्शनेश्राद्धंकार्यमावश्यकंस्मृतम् ॥ ७४ ॥ वृद्धिकामास्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पितरस्तथाचैवान्नकङ्क्षिणः ॥ ददन्तिदर्शनस्वप्नेभक्तियुक्तस्यराघव ॥७५॥ अवियोगस्तुतभ्रात्रापित्राचभरतेनच ॥ चतुर्दशानांवर्षाणांभविताराघव
ध्रुवम् ॥७६॥ कुरुश्राद्धंतथावीरराज्ञोदशरथस्यच ॥ अमीचऋषयःसर्वेतवभक्ताःकृतक्षणाः ॥७७॥ अहंचजमदग्निश्चभारद्वाजश्चलोमशः ॥ देवरातः
शमीकश्चपडेतेवैद्विजोत्तमाः ॥ ७८ ॥ श्राद्धेचतेमहाबाहोसंभारांस्त्वमुपाहर ॥ मुख्यंचेङ्गुदिपिण्याकंबदरामलकैःसह ॥ ७९ ॥ श्रीफलानिचपक्वा
निमूलंचोच्चावचंवहु ॥ मार्गेणचाथमांसेनधान्येनविविधेनच ॥ ८० ॥ तृप्तिंप्रयच्छविप्राणांश्राद्धदानेनसुव्रत ॥ पुष्करारण्यमासाद्यनियतोनियता
शनः ॥८१॥पितॄंस्तर्पयतेयस्तुसोऽश्वमेधमवाप्नुयात् ॥स्नानार्थंतुवयंरामगच्छामोज्येष्ठपुष्करम् ॥८२॥ इत्युक्त्वातेगताःसर्वेमुनयोराघवंनृप॥लक्ष्मणं
चाब्रवीद्रामोमेध्यमाहरमेमृगम् ॥ ८३ ॥ शुद्धेक्षणंचशशकंकृष्णशाकन्तथामधु ॥ जम्बीराणिचमुख्यानिमूलानिविविधानिच ॥ ८४ ॥ पक्वा
निचकपित्थानिफलान्यन्यानियानिच ॥ तान्याहरस्ववैश्राद्धेक्षिप्रमेवास्तुलक्ष्मण ॥ ८५ ॥ तथातत्कृतवान्सर्वंरामादेशाच्चराघवः ॥ बदरे
ङ्गुदिशाकानिमूलानिविविधानिच ॥ ८६ ॥ तत्राहृत्यचरामेणकूटाकारःकृतोमहान् ॥ परिपक्वंचजानक्यासिद्धंरामेनिवेदितम् ॥ ८७ ॥ स्ना
त्वारामोयोगवाप्यांमुनींस्ताननुपालयन् ॥ मध्याह्नाच्चलितेसूर्येकालेकुतपकेतथा ॥ ८८ ॥ आयाताऋषयःसर्वेयेरामेणानुमन्त्रिताः ॥ तानाग
तान्मुनीन्दृष्ट्वावैदेहीजनकात्मजा ॥ ८९ ॥ रामान्तकंपरित्यज्यव्रीडितान्यत्रसंस्थिता ॥ विस्मयोत्फुल्लनयनाचिन्तयानाचवेपती ॥ ९० ॥
ब्राह्मणानेहजानन्तिश्राद्धकालेह्युपस्थिताः ॥ रामेणभोजिताविप्राःस्मृत्युक्तेनयथाविधि ॥ ९१ ॥ वैदिक्यश्चकृतास्सर्वाःसत्क्रियायास्समीरिताः ॥
पुराणोक्तोविधिश्चैववैश्वदेविकपूर्वकः ॥ ९२ ॥ भुक्तवत्सुचविप्रेषुदत्त्वापिण्डान्यथाक्रमम् ॥ प्रेषितेषुयथाशक्तिदत्त्वातेषुचदक्षिणाम् ॥ ९३ ॥
गतेषुविप्रमुख्येषुप्रियांरामोऽब्रवीदिदम् ॥ किमर्थंसुभ्रूनष्टासिमुनीन्दृष्ट्वात्विहागतान् ॥ ९४ ॥ तत्सर्वंत्वमिदंतत्त्वंकारणंवदमाचिरम् ॥ भवितव्यंका
रणेनतच्चगोप्यंनमेकुरु ॥ ९५ ॥ शापितासिममप्राणैर्लक्ष्मणस्यशुचिस्मित ॥ एवमुक्तातदाभर्त्रात्रपयावाङ्मुखीस्थिता ॥ ९६ ॥
विमुञ्चन्तीसाऽश्रुपातंराघवंवाक्यमब्रवीत् ॥ शृणुत्वंनाथयद्दृष्टमाश्चर्यमिहयादृशम् ॥ ९७ ॥ रामत्वयाचिन्त्यमानोराजेन्द्रस्त्विहचागतः ॥
सर्वाभरणसंयुक्तौद्वौचान्यौचतथाविधौ ॥ ९८ ॥ द्विजानांदेहसंयुक्तास्त्रयस्तेरघुनन्दन ॥ पितरस्तुमयादृष्टाब्राह्मणाङ्गेषुराघव ॥ ९९ ॥ दृष्ट्वात्रपान्वि
ताचाहमपक्रान्तातवान्तिकात्॥त्वयावैभोजिताविप्राःकृतंश्राद्धंयथाविधि ॥१००॥ वल्कलाजिनसंवीताकथंराज्ञःपुरःसरा ॥ भवामिरिपुवीरघ्नसत्य
मेतदुदाहृतम् ॥ १ ॥ कौशेयानिचवस्त्राणिकैकेय्यापहृतानिच ॥ ततःप्रभृतिचैवाहंचीरिणीतुवनाश्रयम् ॥ २ ॥ ज्ञात्वाहंनवदेकिञ्चिन्माते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुःखंभवत्विति ॥ नाहंस्मरामिवैमातुर्नपितुश्चपरन्तप ॥ ३ ॥ कदाभविष्यतीहान्तोवनवासस्यराघव ॥ एतदेवानिशंरामचिन्तयन्त्याः पुनःपुनः ॥ ४ ॥ व्रजन्तिदिवसानाथतवपद्मांशपाम्यहम् ॥ स्वहस्तेनकथंराज्ञोदास्येवैभोजनंत्विदम् ॥ ५ ॥ दासानामपियो दासोनोपभुञ्जीतयत्कचित् ॥ एतादृशीकथंत्वस्मैसम्प्रदातुंसमुत्सहे ॥ ६ ॥ याहंराज्ञापुराद्दृष्टासर्वालङ्कारभूषिता ॥ वालव्यजनहस्ताचवी जयन्तीनराधिपम् ॥ ७ ॥ सास्वेदमलदिग्धाङ्गीकथंपश्यामिभूमिपम् ॥ व्यक्तंत्रिविष्टपंप्राप्तस्त्वयापुत्रेणतारितः ॥ ८ ॥ दृष्ट्वामांदुःखितां बालांवनेक्लिष्टामनागसम् ॥ शोकःस्यात्पार्थिवस्यास्यतेननष्टास्मिराघव ॥ ९ ॥ भवान्प्राणसमोरामनतगोप्यंममत्विह ॥ सत्येनतेनचैवाथस्पृशा मिचरणौतव ॥११०॥ तच्छ्रुत्वाराघवःप्रीतःप्रियांतांप्रियवादिनीम् ॥अङ्कमानीयसुदृढंपरिष्वज्यचसादरम् ॥११ ॥भुक्तौभोज्यंतदावीरौपश्चाद्भुक्ताच जानकी ॥ एवंस्थितौतदासाचतांरात्रिंतत्रराघवौ ॥ १२॥ उदितेचसहस्रांशौगमनायमनोदधुः ॥प्रत्यङ्मुखंगतःक्रोशंज्येष्ठंयावच्चपुष्करम् ॥१३॥ पूर्वे भागेपुष्करस्ययावत्तिष्ठतिराघवः ॥ शुश्रावचततोवाचंदेवदूतेनभाषितम् ॥ १४ ॥ भोभोराघवभद्रंतेतीर्थमेतत्सुदुर्लभम् ॥ अस्मिन्स्थाने स्थितोवीरआत्मनःपुण्यतांकुरु ॥ १५ ॥ देवकार्यंत्वयाकार्यंहन्तव्यादेवशत्रवः ॥ ततोहृष्टमनावीरोह्यब्रवील्लक्ष्मणंवचः ॥ १६ ॥ सौमि त्रेऽनुगृहीतोऽहंदेवदेवेनब्रह्मणा ॥ अत्राश्रमपदंकृत्वामासमेकंचलक्ष्मण ॥ १७ ॥ व्रतंचरितुमिच्छामिकायशोधनमुत्तमम् ॥ तथेतिलक्ष्मणे नोक्तेव्रतंपरिसमाप्यतु ॥ १८ ॥ पिण्डदानादिभिर्दानैःश्राद्धैश्चैवपितामहान् ॥ पुष्करेतुतदारामोऽतर्पयद्विधिवत्तदा ॥ १९ ॥ कनकप्रासु भाचैवनन्दाप्राचीसरस्वती ॥ पञ्चस्रोताःपुष्करेषुपितॄणांतुष्टिदायिनी ॥ १२० ॥ दैनन्दिनींपितॄणांतुपूजांतांपितृपूर्विकाम् ॥ रचयित्वातदा रामोलक्ष्मणंवाक्यमब्रवीत् ॥ २१ ॥ एहिलक्ष्मणशीघ्रंत्वंपुष्कराज्जलमानय ॥ पादप्रक्षालनंकृत्वाशयनंकुरुसंस्तरे ॥ २२ ॥ विभावर्यां निवृत्तायांयास्यामोदक्षिणांदिशम् ॥ लक्ष्मणस्त्वब्रवीद्वाक्यंसीतयानीयतांपयः ॥ २३ ॥ नाहंरामसर्वकालेदासभावंकरोमिते ॥ इयंपुष्टाच सुभृशंपीवरीचममाग्रुत ॥ २४ ॥ किंत्वंकरिष्यस्यनयाभार्ययायावदसाम्प्रतम् ॥ किंवामृतस्यवैपृष्ठइयंयास्यतितेप्रिया ॥ २५ ॥ रक्षसेत्वंस दाकालंसुपुष्टांचैवसर्वदा ॥ दृष्ट्वाचैषाक्लेशयतिसततंमांरघूत्तम ॥ २६ ॥ त्वंचक्लेशयसेरामपरत्रजायतेक्षतिः ॥ त्वत्कृतेचसदाचाहंपिपासांक्षु धयासह ॥ २७ ॥ संसहामिनसन्देहःपरत्रचनिशामय ॥ मृतानांपृष्ठतःकश्चिद्गतोनैवचदृश्यते ॥ २८ ॥ भार्य्यापुत्रौधनंचापिएवमाहुर्मनी षिणः ॥ मृतश्चतेपितारामत्यक्त्वाराज्यमकण्टकम् ॥ २९॥ विनिक्षिप्यवनेत्वांचकैकेय्याःप्रियकाम्यया ॥ इहस्थितासाकैकेयीधनंसर्वेचबान्धवाः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १३० ॥ महाराजोदशरथएकएवगतोगतिम् ॥ मन्येऽहंनत्वयासार्धंसीतायास्यतिवैध्रुवम् ॥ ३१ ॥ करिष्यसेकिमनयावदराघवसाम्प्रतम् ॥
श्रुत्वाचाश्रुतपूर्वंहिवाक्यंलक्ष्मणभाषितम् ॥ ३२ ॥ विमनाराघवस्तस्थौसीताचापिवरानना ॥ यदुक्तंलक्ष्मणेनाथसीतासर्वंचकारह ॥ ३३ ॥
ज्ञात्वाश्रुक्त्वाततोवीरौपुष्करेपुष्करेक्षणौ ॥ नीत्वाविभावरींतत्रगमनायमनोदधुः ॥ ३४ ॥ एह्युत्तिष्ठचसौमित्रेव्रजामोदक्षिणांदिशम् ॥ सौमित्रि
रब्रवीद्रामनाहंयास्येकथञ्चन ॥ ३५ ॥ व्रजत्वमनयासार्धंभार्ययाकमलेक्षण ॥ नान्यद्वनगमिष्यामिनैवायोध्यांचराघव ॥ ३६ ॥ अस्मि
न्वनेवसिष्यामिवर्षाणीहचतुर्दश ॥ मयाविनात्वयोध्यायांयदित्वंनगमिष्यसि ॥ ३७ ॥ अनेनवर्त्मनाभूपआगन्तव्यंत्वयाविभो ॥ यदिजीवा
मितत्कालंपुनर्यास्येपितुःपुरम् ३८ ॥ तपस्सम्भावयिष्यामिमयात्वंकिंकरिष्यसि ॥ व्रजसौम्यशिवःपन्थामाचतेपरिपन्थिनः ॥३९॥ पश्यामि
त्वांपुनःप्राप्तंसभार्यंकमलेक्षणम् ॥ पितृपैतामहंराज्यमयोध्यायांनराधिप ॥ १४० ॥ शत्रुघ्नभरतौचोभौत्वदाज्ञाकरणेस्थितौ ॥ अहंतेप्रतिकूलस्तु
वनवासेविशेषतः ॥ ४१ ॥ अनारतंदिवाचाहंरात्रौचैवपरन्तप ॥ कर्मकर्तुंनशक्नोमिव्रजसौम्ययथासुखम् ॥ ४२ ॥ एवंब्रुवाणंसौमित्रिमुवाचरघु
नन्दनः ॥ कथंपूर्वमयोध्यायानिर्गतोऽसिमयासह ॥४३॥ वनेवत्स्याम्यहंरामनववर्षाणिपञ्चच ॥ नतुत्वयाविरहितःस्वर्गेऽपिनिवसेक्वचित् ॥ ४४॥
यागतिस्तेनरव्याघ्रममसाभिभविष्यति ॥ प्रसादःक्रियतांमह्यंनयमामपिराघव ॥ ४५ ॥ इदानीमर्धमार्गेत्वंकथंस्थास्यसिशत्रुहन् ॥ लक्ष्मणस्त्वब्र
वीद्रामंनाहंगन्तावनेपुनः ॥ ४६ ॥ लक्ष्मणंसंस्थितंज्ञात्वारामोवचनमब्रवीत् ॥ मामनुव्रजसौमित्रएकोयास्यामिकाननम् ४७ ॥ द्वितीयामेत्वियंसी
तारामेणोक्तस्तुलक्ष्मणः ॥ गृहीत्वाऽथससुत्तस्थौरामवाक्यंसलक्ष्मणः ॥ ४८ ॥ मर्यादापर्वतंप्राप्तौक्षेत्रसीमांपरन्तपौ ॥ अजगन्धंचदेवेशंदेवदेवं
पिनाकिनम् ॥ ४९ ॥ अष्टाङ्गप्रणिपातेननत्वारामस्त्रिलोचनम् ॥ तुष्टावप्रयतःस्थित्वाशङ्करंपार्वतीप्रियम् ॥ १५० ॥ कृताञ्जलिपुटोभूत्वारो
माञ्चितशरीरकः ॥ सात्त्विकंभावमापन्नोविनिर्धूतरजस्तमाः ॥५१॥ लोकानांकारणंदेवंबुबुधेविबुधाधिपम् ॥५२॥ रामउवाच ॥ कृत्स्नस्ययोऽस्य
जगतःसचराचरस्यकर्ताकृतस्यचपुनःसुखदुःखदश्च ॥ संहारहेतुरपियःपुनरन्तकालेतंशङ्करंशरणदंशरणंव्रजामि ॥ ५३ ॥ यंयोगिनोविगतमो
हतमोरजस्काभक्त्यैकतानमनसोविनिवृत्तकामाः ॥ ध्यायन्तिनिश्चलधियोऽमितदिव्यभावंतंशङ्करंशरणदंशरणंव्रजामि ॥ ५४ ॥ यश्चेन्दुखण्डम ॥ १०३ ॥
मलंविलसन्मयूखंबद्ध्वासदाप्रियतमांशिरसाबिभर्ति ॥ यश्चार्धदेहमददाद्गिरिराजपुत्र्यैतंशङ्करंशरणदंशरणंव्रजामि ॥ ५५ ॥ योऽयंसकृद्विमलचा
रुविलोलतोयांगङ्गांमहोर्मिविषमांगगनात्पतन्तीम् ॥ मूर्ध्नादधेस्रजमिवप्रविलोलपुष्पांतंशङ्करंशरणदंशरणंव्रजामि ॥ ५६ ॥ कैलासशैलशिखरं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परिकम्प्यमानंकैलासशृङ्गसदृशेनदशाननेन ॥ यत्पादपद्मविधृतंस्थिरतांदधारतंशङ्करंशरणदंशरणंव्रजामि ॥ ५७ ॥ येनासकृद्दनुसुताःसमरेनिरस्ता
विद्याधरोरगगणाश्चवरैःसमग्रैः ॥ संयोजितामुनिवराःफलमूलभक्षास्तंशङ्करंशरणदंशरणंव्रजामि ॥५८॥ दक्षाध्वरेचनयनेचतथाभगस्यपूष्णस्तथाद
शनपङ्क्तिमपातयच्च ॥ तस्तम्भयःकुलिशयुक्तमथेन्द्रहस्तंतंशङ्करंशरणदंशरणंव्रजामि ॥ ५९ ॥ एनःकृतोऽपिविषयेष्वपिसक्तचित्ताज्ञानान्वयश्रुत
गुणैरपिनैवयुक्ताः ॥ यंसंश्रिताःसुखभुजःपुरुषाभवन्तितंशङ्करंशरणदंशरणंव्रजामि ॥१६०॥अत्रिप्रसूतिरविकोटिसमानतेजाःसन्त्रासनंविबुधदानवस
त्तमानाम् ॥ यःकालकूटमपिबत्प्रसभंसुदीप्तंतंशङ्करंशरणदंशरणंव्रजामि ॥ ६१ ॥ ब्रह्मेन्द्ररुद्रमरुतांचसषण्मुखानांदद्यादरंसुबहुशोभगवान्महेशः ॥
नन्दिंचमृत्युवदनात्पुनरुज्जहारतंशङ्करंशरणदंशरणंव्रजामि ॥ ६२ ॥ आराधितःसुतपसाहिमवन्निकुञ्जधूमव्रतेनमनसाऽपिपरैरगम्ये ॥ सञ्जीवनी
मकथयद्भृगवेमहात्मातंशङ्करंशरणदंशरणंव्रजामि ॥ ६३ ॥ नानाविधैर्गजबिडालसमानवक्त्रैर्दक्षाध्वरप्रमथनैर्बलिभिर्गणेन्द्रैः ॥ योऽभ्यर्चितोऽमर
गणैश्चसलोकपालैस्तंशङ्करंशरणदंशरणंव्रजामि ॥ ६४ ॥ क्रीडार्थमेवभगवान्भुवनानिसप्तनानानदीविहगपादपमण्डितानि ॥ सब्रह्मकानि
व्यसृजत्सुकृताहितानितंशङ्करंशरणदंशरणंव्रजामि ॥ ६५ ॥ यस्याखिलंजगदिदंवशवर्तिनित्यंयोऽष्टाभिरेवतनुभिर्भुवनानिभुङ्क्ते ॥ यःकारणंसुम
हतामपिकारणानांतंशङ्करंशरणदंशरणंव्रजामि ॥ ६६ ॥ शङ्खेन्दुकुन्दधवलंवृषभप्रवीरमारुह्ययःक्षितिधरेन्द्रसुतानुयातः ॥ यात्यम्बरंप्रलयमेघ
विभूषितंचतंशङ्करंशरणदंशरणंव्रजामि ॥ ६७ ॥ शान्तिंमुनिंयमनियोगपरायणैस्तैर्भीमैर्महोग्रपुरुषैःप्रतिनीयमानम् ॥ भक्त्यानतंस्तुति
परंप्रसभंररक्षतंशङ्करंशरणदंशरणंव्रजामि ॥ ६८ ॥ यःसव्यपाणिकमलाग्रनखेनदेवस्तत्पञ्चमंप्रसभमेवपुरस्सुराणाम् ॥ ब्राह्मंशिरस्तरुणपद्म
निभञ्चकर्त्ततंशङ्करंशरणदंशरणंव्रजामि ॥ ६९ ॥ यस्यप्रणम्यचरणौवरदस्यभक्त्यास्तुत्वाचवाग्भिरमलाभिरतन्द्रितात्मा ॥ दीप्तस्तमांसिनुदतेस्व
करैर्विवस्वांस्तंशङ्करंशरणदंशरणंव्रजामि ॥ १७० ॥ येत्वांसुरोत्तमगुरुंपुरुषाविमूढाजानन्तिनास्यजगतःसचराचरस्य ॥ ऐश्वर्यमाननिगमानुशयेन
पश्चात्तेयातनामनुभवन्त्यविशुद्धचित्ताः ॥ ७१ ॥ तस्यैवंस्तुवतोऽवोचच्छूलपाणिर्वृषध्वजः ॥ उवाचवचनंहृष्टोराघवंतुष्टमानसः ॥ ७२ ॥
रुद्रउवाच ॥ रामहृष्टोऽस्मिभद्रंतेजातस्त्वंनिर्मलेकुले ॥ त्वंचापिजगतांवन्द्योदेवोमानुषरूपधृक् ॥७३॥ त्वयानाथेनवैदेवाःसुखिनःशाश्वतीःसमाः॥
सेविष्यन्तेचिरंकालंगतेवर्षेचतुर्दशे ॥ ७४ ॥ अयोध्यामागतंत्वांयेद्रक्ष्यन्तिभुविमानवाः ॥ सुखंतेऽत्रभजिष्यन्तिस्वर्गेवासंतथाक्षयम् ॥ ७५ ॥
देवकार्यमहत्कृत्वाआगच्छेथाःपुनःपुरीम् ॥ राघवस्तुतथादेवंनत्वाशीघ्रंविनिर्गतः ॥ ७६ ॥ इन्द्रमार्गांनदींप्राप्यजटाजूटंनियम्यच ॥ अब्रवील्ल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्ष्मणंरामइदमर्पयमेधनुः ॥ ७७ ॥ रामवाक्यंतुतच्छ्रुत्वासीतांवैलक्ष्मणोऽब्रवीत् ॥ किमर्थंदेविरामेणत्यक्तोऽहंकारणंविना ॥ ७८ ॥ अपराधं
नजानामिकुपितोयन्महाभुजः ॥ रामेणाहंपरित्यक्तःप्राणांस्त्यक्ष्याम्यसंशयम् ॥ ७९ ॥ नैवमेजीवितेनार्थोधिग्धिङ्मांकुलपांसनम् ॥
आर्यस्ययेनवैमन्युर्जनितःपापकारिणा ॥ १८० ॥ कांस्तुलोकान्गमिष्यामिअपध्यातोमहात्मना ॥ उभौहस्तौमुखेकृत्वासाश्रुकण्ठोऽब्रवीदि
दम् ॥ ८१ ॥ नापराध्यामिरामस्यकर्मणामनसागिरा ॥ स्पृष्टौतेचरणौदेविममनान्यागतिर्भवेत् ॥ ८२ ॥ ततःसीताब्रवीद्रामंत्यक्तःकिमनुज
स्त्वया ॥ वैषम्यंत्यज्यतांबालेलक्ष्मणेलक्ष्मिवर्धने ॥ ८३ ॥ राघवस्त्वब्रवीत्सीतांनाहंत्यक्ष्यामिलक्ष्मणम् ॥ नकदाचिदपिस्वप्नेलक्ष्मणस्य
मतंप्रिये ॥ ८४ ॥ श्रुतपूर्वंचसुश्रोणिक्षेत्रस्यास्यविचेष्टितम् ॥ अत्रक्षेत्रेजनास्सत्यंसर्वेहिस्वार्थतत्पराः ॥ ८५ ॥ परस्परंनपश्यन्तिस्वात्मनश्च
हितंवचः ॥ नशृण्वन्तिपितुःपुत्राःपुत्राणांपितरस्तथा ॥ ८६ ॥ नशिष्याहिगुरोर्वाक्यंशिष्यस्यापितथागुरुः ॥ अर्थानुबन्धिनीप्रीतिर्नकश्चित्क
स्यचित्प्रियः ॥ ८७ ॥ इत्येवंकथयन्नेवप्रातोरेवांमहानदीम् ॥ चक्रेऽभिषेकंकाकुत्स्थःसानुजःसहसीतया ॥ ८८ ॥ तर्पयित्वाचसलिलैःस्वान्पितॄ
न्दैवतान्यपि ॥ उदीक्ष्यचमुहुःसूर्यंदेवताश्चसमाहितः ॥८९॥ कृताभिषेकस्तुरराजरामःसीताद्वितीयःसहलक्ष्मणेन ॥ कृताभिषेकःसहशैलपुत्र्यागुहे
नसार्धंभगवानिवेशः ॥१९० ॥ इति श्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेमार्कण्डेयाश्रमदर्शनंनामत्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ भीष्मउवाच ॥ कस्मिन्का
लेभगवताब्रह्मणालोककारिणा ॥ यज्ञियैर्यष्टुमारब्धंतद्भवान्वक्तुमर्हति ॥ १ ॥ किंनामानोऋत्विजस्तेब्रह्मणायेप्रकल्पिताः ॥ काचवैदक्षिणातेषांदत्ता
तेनमहात्मना ॥ २ ॥ यथाभूतंयथावृत्तंतथात्वंमेप्रकीर्तय ॥ सुमहत्कौतुकंजातंयज्ञंपैतामहंप्रति ॥ ३ ॥ पुलस्त्यउवाच ॥ पूर्वमेवमयाख्यातंयदा
स्वायम्भुवोमनुः ॥ सृष्ट्वाप्रजापतीन्सर्वानुक्तःसृष्टिंकुरुष्ववै ॥ ४ ॥ स्वयंतुपुष्करंगत्वायज्ञस्याहृत्यविस्तरम् ॥ ससम्भारान्समानाय्यवह्न्यगारेस्थि
तोऽभवत् ॥ ५ ॥ गायन्तिनित्यंगन्धर्वानृत्यन्त्यप्सरसांगणाः ॥ ब्रह्मोद्गाताहोताध्वर्युश्चत्वारोयज्ञवाहकाः ॥ ६ ॥एकैकस्यत्रयश्चान्येपरिवाराःस्वय
ङ्कृताः ॥ ब्रह्माचब्राह्मणाच्छंसीपोताचाग्नीध्रएवच ॥ ७ ॥ आन्वीक्षिकीसर्वविद्याब्राह्मीह्येषाचतुष्टयी ॥ उद्गाताचप्रत्युद्गाताप्रतिहर्तासुब्रह्मण्यः
॥ ८ ॥ चतुष्टयीद्वितीयैषातूद्गातुश्चप्रकीर्तिता ॥ होताचमैत्रावरुणस्तथाऽच्छावाकएवच ॥ ९ ॥ ग्रावस्तुच्चचतुर्थोऽत्रतृतीयाचचतुष्टयी ॥
अध्वर्युश्चप्रतिष्ठातानेष्टोन्नेतातथैवच ॥ १० ॥ चतुष्टयीचतुर्थ्येषाप्रोक्ताशन्तनुनन्दन ॥ एतेवैषोडशप्रोक्ताऋत्विजोवेदचिन्तकैः ॥ ११ ॥
शतानित्रीणिषष्टिश्चयज्ञाःसृष्टाःस्वयम्भुवा ॥ एतांश्चैतेषुसर्वेषुप्रवदन्तिसदाद्विजान् ॥ १२ ॥ सदस्यंकेचिदिच्छन्तित्रिसामाध्वर्युमेवच ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्माणंनारदंचक्रेब्राह्मणाच्छंसिगौतमम् ॥ १३ ॥ देवगर्भंचपोतारमाग्नीध्रंचैवदेवलम् ॥ उद्गाताङ्गिरसःप्रत्युद्गाताचपुलहस्तथा ॥ १४ ॥
नारायणःप्रतिहर्तासुब्रह्मण्योऽत्रिरुच्यते ॥ तस्मिन्यज्ञेभृगुर्होतावसिष्ठोमैत्रएवच ॥ १५ ॥ अच्छावाकःक्रतुःप्रोक्तोग्रावस्तुच्च्यवनस्तथा ॥
पुलस्त्योऽध्वर्युरेवासीत्प्रतिष्ठाताच्चवैशिबिः ॥ १६ ॥ बृहस्पतिस्तत्रनेष्टाउन्नेताशांशपायनः ॥ धर्मःसदस्यस्तत्रासीत्पुत्रपौत्रसहायवान् ॥ १७ ॥
भरद्वाजःशमीकश्चपुरुकुत्सोयुगन्धरः ॥ एनकस्तीर्णकश्चैवकेशःकुतपएवच ॥ १८ ॥ गर्गोवेदशिराश्चैवत्रिसामाध्वर्यवःकृताः ॥ कण्वादयस्तथा
चान्येमार्कण्डोगण्डिरेवच ॥ १९ ॥ पुत्रपौत्रसमेताश्चसशिष्याःसहबान्धवाः ॥ कर्माणितत्रकुर्वाणादिवानिशमतन्द्रिताः ॥२०॥ मन्वन्तरेव्यतीतेतु
यज्ञस्यावभृथोऽभवत् ॥ दक्षिणाब्रह्मणेदत्ताप्राचीहोतुस्तुदक्षिणा ॥ २१ ॥ अध्वर्यवेप्रतीचीतुउद्गातुश्चोत्तरातथा ॥ त्रैलोक्यंसकलंब्रह्मादृदौतेषां
तुदक्षिणाम् ॥ २२ ॥ धेनूनांचशतंप्राज्ञैर्दातव्यंयज्ञसिद्धये ॥ अष्टौतुयज्ञवाहेभ्यश्चत्वारिंशाधिकास्तथा ॥ २३ ॥ द्वितीयस्थानिनांचैवचतु
र्विंशत्प्रकीर्तिताः ॥ षोडशैवतृतीयानांदेयावैधेनवःशुभाः ॥ २४ ॥ द्वादशैवतथाचान्याआग्नीध्रादिषुदापयेत् ॥ अनयासङ्ख्ययाचैवग्रामान्दा
सीरजाविकम् ॥ २५ ॥ सहस्रभोज्यंदातव्यंस्नात्वाचावभृथेक्रतौ ॥ यजमानेनसर्वस्वंदेयंस्वायम्भुवोऽब्रवीत् ॥ २६ ॥ अध्वर्यूणांसदस्यानां
स्वेच्छयादानमिष्यते ॥ विष्णुंचाहूयवैब्रह्मावाक्यमाहमुदान्वितः ॥ २७ ॥ ब्रह्मोवाच ॥ अभिप्रसाद्यसावित्रींत्वमिहानयसुव्रत ॥ त्वयिदृष्टेन
साकोपंकरिष्यतिशुभानना ॥ २८ ॥ स्निग्धैःसानुनयैर्वाक्यैर्हेतुयुक्तैर्विशेषतः ॥ त्वंसदामधुराभाषीजिह्वातेस्रवतेऽमृतम् ॥ २९ ॥ यःकरोतिनतेवाक्यं
त्रैलोक्येनसदृश्यते ॥ गन्धर्वैःसहितोगत्वाप्रियांममसमानय ॥३०॥ त्वयाप्रसादितासाध्वीतुष्टासात्वेष्यतिध्रुवम् ॥ विलम्बोनत्वयाकार्योव्रजमाधव
माचिरम् ॥ ३१ ॥ लक्ष्मीस्तेपुरतोयातुसावित्र्याःसदनंशुभा ॥ तस्यास्त्वंपदवींगच्छसान्त्वयस्वप्रियांमम ॥ ३२ ॥ नचतेविप्रियंदेविविवक्तुंकर्तुमी
हते ॥ मुखंप्रेक्ष्यसदाकालंवर्ततेतवसुन्दरि ॥ ३३ ॥ एवंविधानिवाक्यानिमधुराणिबहूनिच ॥ देवीश्रावयितव्यासायथातुष्टाऽचिराद्भवेत् ॥ ३४ ॥
पुलस्त्यउवाच ॥ एवमुक्तस्तदाविष्णुर्ब्रह्मणालोककारिणा ॥ जगामत्वरितोभूत्वासावित्रीयत्रतिष्ठति ॥ ३५ ॥ दूरादेवागच्छमानंपत्न्यासहचके
शवम् ॥ उत्तस्थौसत्वराभूत्वाविष्णुनाचाभिवन्दिता ॥ ३६ ॥ विष्णुरुवाच ॥ नमस्तेदेवदेवेशिब्रह्मपत्निनमोऽस्तुते ॥ त्वांनमस्कृत्यसर्वोहिजनः
पापात्प्रमुच्यते ॥ ३७ ॥ पतिव्रतामहाभागाब्रह्मणस्त्वंहृदिस्थिता ॥ अहर्निशंचिन्तयंस्त्वांप्रसादंतेऽभिकाङ्क्षति ॥३८॥ तस्यैवंदुःखतप्तस्यप्रसादंक
र्तुमर्हसि ॥ सखींचैनांप्रियांपृच्छलक्ष्मींभृगुसुतांसतीम् ॥३९॥ यदिचश्रद्दधानाऽसिवाक्यादस्मात्सुलोचने ॥ पुलस्त्यउवाच ॥ एवमुक्त्वाततःशौरिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सावित्र्याश्चरणद्वयम्॥४०॥ उभाभ्यांचैवहस्ताभ्यांक्षमदेविनमोऽस्तुते ॥जगद्वन्द्येजगन्मातरितिस्पृष्ट्वाभ्यवन्दत॥४१॥ सङ्कोच्यपादौसादेवीस्वकरेण करौहरेः ॥ गृहीत्वोवाचतंविष्णुंसर्वंक्षान्तंमयाऽच्युत ॥ ४२ ॥ सावित्र्युवाच ॥ इयंलक्ष्मीःसदावत्सहृदयेतेनिवत्स्यति ॥ विनात्वयानचान्यत्रर तिंयास्यतिकर्हिचित् ॥४३॥ भृगोःपत्न्यांसमुत्पन्नापत्न्येषातवसुव्रता ॥ देवदानवयत्नेनसम्भूताचोदधौपुनः ॥ ४४ ॥ भगवान्यत्रतत्रैषाअवतारंच कुर्वती ॥ देवत्वेदेवदेहावैमानुषत्वेचमानुषी ॥ ४५ ॥ त्वत्सहायानसन्देहोदाम्पत्यव्रतिनीचिरम् ॥ यन्मयाचात्रकर्त्तव्यंप्रभोतन्मांवदस्ववै ॥ ४६ ॥ विष्णुरुवाच ॥ यज्ञावसानंसञ्जातंप्रेषितोऽहंतवान्तिकम् ॥ सावित्रीमानयक्षिप्रंमयास्नानंसमाचरेत् ॥ ४७ ॥ आगच्छत्वरितादेवियाहितत्रमुदा न्विता ॥ पश्यस्वस्यपतिंगत्वादेवैःसर्वैस्समन्वितम् ॥ ४८ ॥ लक्ष्मीरुवाच॥ आर्येउत्तिष्ठशीघ्रंत्वंयाहियत्रपितामहः ॥विनात्वयानयास्यामिस्पृष्टौ पादौमयातव ॥ ४९ ॥ पुलस्त्यउवाच ॥ उत्थाप्यसाग्रहीद्धस्तंदक्षिणादक्षिणेकरे ॥ चिरायमाणांसावित्रींज्ञात्वादेवःपितामहः ॥ ५० ॥ समीप स्थंमहादेवमिदमाहतदावचः ॥ ब्रह्मोवाच॥गच्छत्वमनयासार्द्धंपार्वत्यासुरभूषण ॥ ५१ ॥ गौरीत्वदग्रतोयातुपश्चात्त्वंगच्छशङ्कर ॥ प्रतिबोध्यानय यथाशीघ्रमायातितत्कुरु॥५२॥पुलस्त्यउवाच॥एवमुक्तोगतोरुद्रःपार्वत्याब्रह्मणःप्रियाम्॥तथाहृष्टौदम्पतीतौपार्वतीपरमेश्वरौ ॥५३॥ देवीसासम्मुखी ताभ्यामुत्थितापरमेश्वरी ॥ दूरादेवतुरुद्रेणब्रह्माणीचाभिवादिता ॥ ५४ ॥ शिवउवाच ॥ब्रह्माप्रतीक्षतेदेविमाविलम्बस्वशोभने ॥ बृहत्कृत्यंत्वयातत्र करणीयंपतिव्रते ॥५५॥ पृच्छस्वेमांवरारोहांगौरींपर्वतनन्दिनीम् ॥ लक्ष्मींचैतांविशालाक्षीमिन्द्राणींवाशुभानने ॥ ५६ ॥ यासांवाश्रद्धधासित्वं पृच्छदेविनमोऽस्तुते ॥ आशीर्वादस्तयादत्तोदेवदेवस्यशूलिनः ॥ ५७ ॥ सावित्र्युवाच॥शरीरार्धेचतेगौरीसदास्थास्यतिशङ्कर ॥ अनयाशोभसेदेव त्वंतुत्रैलोक्यसुन्दर ॥ ५८ ॥ सुखभागिजगत्सर्वंत्वयानाथेनशत्रुहन् ॥ पुलस्त्यउवाच॥एवंब्रुवन्तीसावित्रीगृहीताब्रह्मणःप्रिया ॥ ५९ ॥गौर्य्याचवा महस्तेतुलक्ष्म्यावैदक्षिणेकरे ॥अभिवन्द्यतुतांदेवींशङ्करोवाक्यमब्रवीत्॥ ६०॥ शिवउवाच॥ एह्यागच्छमहाभागेयत्रतिष्ठतितेपतिः ॥ तत्रगच्छवरारोहे स्त्रीणांभर्तापरागतिः॥६१॥एषागौरीसमायाताभ्रातृभार्यातवानघा ॥बृहदाग्रहेणदेविप्रणयाद्गन्तुमर्हसि॥६२॥लक्ष्मीसैषापार्वतीचस्थितादेवितवाग्रतः॥ एतयोर्वचसादेविआवयोश्चशुभानने ॥ ६३ ॥ मानभङ्गोनतेकर्तुंयुज्यतेब्रह्मणःप्रिये ॥ अस्मदभ्यर्थितादेवितत्रयाहिमुदान्विता ॥६४॥ गौर्युवाच ॥ अहंचतेप्रियादेविसर्वदावदसिस्वयम्॥लक्ष्मीश्चतेकरेलग्नादक्षिणेचमयाधृता ॥६५ ॥एह्यागच्छमहाभागेयत्रतिष्ठतितेपतिः ॥ पुलस्त्यउवाच ॥ नीता सातुतदाताभ्यांदेवीसामध्यतःकृता ॥६६ ॥ पुरस्सरौविष्णुरुद्रौशक्राद्याश्चतथासुराः ॥गन्धर्वाप्सरसश्चैवत्रैलोक्यंसचराचरम् ॥ ६७ ॥ तत्रायाताच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सादेवीसावित्रीब्रह्मणःप्रिया ॥ सावित्रीं प्रमुखींदृष्ट्वासर्वलोकपितामहः ॥ ६८ ॥ गायत्र्यासहितोब्रह्माइदंवचनमब्रवीत् ॥ एषादेवीकर्मकरीअहंतेवश
गःस्थितः॥६९॥ समादिशवरारोहेयत्तेकार्यंमयात्विह ॥एवमुक्ताचसादेवीस्वयंदेवेनब्रह्मणा ॥७०॥ त्रपयाऽधोमुखीदेवीनचकिंञ्चिदवोचत॥ पादयोः
पतितादेवीगायत्रीब्रह्मचोदिता ॥ ७१ ॥ कृतवत्यपराधंतेक्षमदेविनमोऽस्तुते ॥ पुलस्त्यउवाच॥आलिङ्गचसादरंकण्ठेसापरिष्वज्यपीडिताम् ॥७२॥
गायत्रींसान्त्वयामाससमान्यश्वेषपतिर्मम॥कर्त्तव्यंवचनंतस्यस्त्रीणांप्राणेश्वरःपतिः॥७३॥उक्तंभगवतापूर्वंसृष्टिकालेविरिञ्चिना॥नचस्त्रीणांपृथग्यज्ञोनव्रतं
नाप्युपोषणम् ॥ ७४ ॥ भर्तायद्वदतेवाक्यंतत्तुकुर्यादकुत्सया ॥ भर्तृनिन्दांयाकुरुतेस्वसृनिन्दांतथैवच ॥ ७५ ॥ परिवादंप्रलापंवानरकंसातु
गच्छति ॥ पत्यौजीवतियानारीउपवासव्रतंचरेत् ॥ ७६ ॥ आयुष्यंहरतेभर्तुर्मृतानरकमृच्छति ॥ एवंज्ञात्वात्वयाभर्तुर्नकार्यंविप्रियंसति
॥ ७७ ॥ नचास्यदक्षिणंत्वङ्गंत्वयासेव्यंकथञ्चन ॥ सर्वकार्येत्वहंचास्यदक्षिणंपक्षमाश्रिता ॥ ७८ ॥ सव्यंत्वमाश्रयेस्साध्विपार्श्वेनारदपुष्करौ ॥
ब्रह्मस्थानानिचान्यानिस्थितान्यायतनानिच ॥ ७९ ॥ लभेवैशोभमानेहयावत्सृष्टिःप्रजायते ॥ भवत्याचमयाचैवस्थातव्यंचनसंशयः ॥ ८० ॥
पुष्करेब्रह्मणःपार्श्वेवामंचत्वंसमाश्रय ॥ अनेनचोपदेशेनसुखंतिष्ठमयान्विता ॥ ८१ ॥ गायत्र्युवाच ॥ एवमेतत्करिष्यामितवनिर्देशकारिका ॥
तवैवाज्ञामयाकार्यात्वंमेप्राणसमासखी॥८२॥ अहंतेत्वनुजादेविसदामांपातुमर्हसि ॥पुलस्त्यउवाच॥देवदेवस्तदाब्रह्मापुष्करेविष्णुनासह॥८३॥स्नाना
वसानेदेवानांसर्वेषांप्रददौवरान् ॥ देवानांचपतिंशक्रंज्योतिषांचदिवाकरम् ॥ ८४ ॥ नक्षत्राणांतथासोमंरसानांवरुणंतथा ॥ प्रजापतीनांदक्षंचनदीनां
चैवसागरम् ॥८५॥ कुबेरंचधनाध्यक्षंतथाचक्रेचरक्षसाम् ॥ भूतानांचैवसर्वेषांगणानांचपिनाकिनम् ॥ ८६ ॥ मानवानांमनुंचैवपक्षिणांगरुडंतथा ॥
ऋषीणांचवसिष्ठंचग्रहाणांचप्रभाकरम् ॥८७॥एवमादीनिवेदत्त्वादेवदेवःपितामहः॥ विष्णुंचशङ्करंचैवब्रह्माप्रोवाचसादरम्॥८८॥ब्रह्मोवाच॥पृथिव्याः
सर्वतीर्थेषुभवन्तौपूज्यसत्तमौ ॥भवद्भ्यांनविनातीर्थंपुण्यतामेतिकर्हिचित् ॥८९॥लिङ्गंवाप्रतिमावापिदृश्यतेयत्रकुत्रचित् ॥तत्तीर्थंपुण्यतांयातिसर्वमे
वफलप्रदम् ॥ ९० ॥ मानवाह्युपहारैश्चयेकरिष्यन्तिपूजनम्॥ युष्माकंमांपुरस्कृत्यतेषांरोगभयंकुतः ॥९१॥ येषुराष्ट्रेषुयुष्माकमुत्सवाःपूजनादिकाः॥
प्रवत्स्यन्तिक्रियाःसर्वायत्फलंतेषुतच्छृणु ॥९२॥ नाधयोव्याधयश्चैवनोपसर्गानक्षुद्भयम् ॥ विप्रयोगोनचापीष्टैर्नानिष्टैर्नापिसङ्गतिः ॥९३॥नाक्षिरोगः
शिरोर्तिर्वापित्तशूलभगन्दराः॥नाभिचारंभयंतत्रापस्मारोनविषूचिका ॥९४ ॥ वृद्धिर्निकामतस्तस्मिन्सम्यग्बुद्धिरनुत्तमा॥ आरोग्यंसर्वतश्चैवदीर्घायु
श्चप्रजाधनम् ॥ ९५ ॥ नाकालेभवितामृत्युर्गावोनालपपयोमुचः ॥ नाकालफलितावृक्षानोत्पातभयमण्वपि ॥ ९६ ॥ एतच्छ्रुत्वाततोविष्णुर्ब्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह्माणंस्तोतुमुद्यतः ॥ ९७ ॥ विष्णुरुवाच॥नमोऽस्त्वनन्तायविशुद्धचेतसेस्वरूपरूपायसहस्रबाहवे॥ सहस्ररश्मिप्रभवायवेधसेविशालदेहायविशुद्धकर्म
णे ॥ ९८ ॥ समस्तविश्वार्तिहरायशम्भवेसमस्तसूर्यानलतिग्मतेजसे ॥ नमोऽस्तुविद्याविततायचक्रिणेसमस्तधीस्थानकृतेसदानमः ॥ ९९ ॥
अनादिदेवाच्युतशेखरप्रभोभाव्युद्भवद्भूतपतेमहेश्वर ॥ महत्पतेसर्वपतेजगत्पतेभुवःपतेभुवनपतेसदानमः ॥ १०० ॥ यज्ञेशनारायणजिष्णुशङ्करक्षिती
शविश्वेश्वरविश्वलोचन ॥ शशाङ्कसूर्याच्युतवीरविश्वप्रवृत्तमूर्तेऽमृतमूर्तअव्यय ॥ १ ॥ ज्वलद्धुताशार्चिनिरुद्धमण्डलप्रदेशनारायणविश्वतोमुख ॥ स
मस्तदेवार्तिहरामृताव्ययप्रपाहिमांशरणगतंतथाविभो ॥ २ ॥ वक्त्राण्यनेकानिविभोतवाहंपश्यामियज्ञस्यगतिंपुराणम् ॥ ब्रह्माणमीशंजगतांप्रसू
तिंनमोऽस्तुतुभ्यंप्रपितामहाय ॥ ३ ॥ संसारचक्रक्रमणैरनेकैःक्वचिद्भवान्देववराधिदेवः ॥ तत्सर्वविज्ञानविशुद्धसत्त्वैरुपास्यसेकिंप्रणमाम्यहंत्वा
म् ॥ ४ ॥ एवंभवन्तंप्रकृतेःपुरस्ताद्योवेत्त्यसौसर्वविदांवरिष्ठः ॥ गुणान्वितेषुप्रसभंविवेद्योविशालमूर्तिस्त्विहसूक्ष्मरूपः ॥ ५ ॥ वाक्पा
णिपादैर्विगतेन्द्रियोऽपिकथंभवान्वैसुगतिस्सुकर्मा ॥ संसारबन्धेनिहितेन्द्रियोऽपिपुनःकथंदेववरोऽसिवेद्यः ॥६॥ मूर्त्तादमूर्त्तंनतुलभ्यतेपरंपरंवपुर्देव
विशुद्धभावैः ॥ संसारविच्छित्तिकरैर्यजद्भिरतोऽवसीयेतचतुर्मुखत्वम् ॥ ७ ॥ परंनजानन्तियतोवपुस्तेदेवादयोऽप्यद्भुतरूपधारिन्॥ विभोऽवतारेऽग्र
तरंपुराणमाराधयेद्यत्कमलासनस्थाम् ॥ ८ ॥ नतेतत्त्वंविश्वसृजोऽपियोनिमेकान्ततोवेत्तिविशुद्धभावः ॥ परंत्वहंवेद्मिकथंपुराणंभवन्तमाद्यंतपसा
विशुद्धम् ॥ ९ ॥ पद्मासनोवैजनकःप्रसिद्धएवंप्रसिद्धिर्ह्यसकृत्पुराणात् ॥ सञ्चिन्त्यतेनाथविभुंभवन्तंजानातिनैवंतपसाविहीनः ॥ ११० ॥
अस्माद्दृशैश्चप्रवरैर्विबोध्यंत्वांदेवमूर्खाःस्वमतिंविभज्य ॥ प्रबोद्धुमिच्छन्तिनतेषुबुद्धिरुदारकीर्तिष्वपिवेदहीनाः ॥११ ॥ जन्मान्तरैर्वेदविवेकबुद्धिभि
र्भवेद्यथावायदिवाप्रकाशः ॥ तल्लाभलुब्धस्यनमानुषत्वंनदेवगन्धर्वपतिःशिवःस्यात् ॥ १२ ॥ नविष्णुरूपोभगवान्सुसूक्ष्मःस्थूलोऽसिदेवःकृतकृ
त्यतायाः॥ स्थूलोऽपिसूक्ष्मःसुलभोऽसिदेवत्वद्बाह्यकृत्यानरकेपतन्ति ॥ १३॥ विमुच्यतेवाभवतिस्थितेऽस्मिन्दस्रेन्दुवह्न्यर्कमरुन्महीभिः ॥ तत्त्वैः
स्वरूपैःसमरूपधारिभिरात्मस्वरूपेविततस्वभावः ॥ १४ ॥ इतिस्तुतिंमेभगवन्ह्यनन्तजुषस्वभक्तस्यविशेषतश्च ॥ समाधियुक्तस्यविशुद्धचेतस
स्त्वद्भावभावैकमनोऽनुगस्य ॥ १५ ॥ सदाहृदिस्थोभगवन्नमस्तेनमामिनित्यंभगवन्पुराण ॥ इतिप्रकाशंतवमेतदीशस्तवंमयासर्वगतिप्रबुद्ध ॥१६॥ ॥ १०६ ॥
संसारचक्रेभ्रमणादियुक्ताभीतिंपुनर्नःप्रतिपालयस्व ॥ १७॥ ब्रह्मोवाच ॥ सर्वज्ञस्त्वंनसन्देहोप्रज्ञाराशिश्चकेशव ॥ देवानांप्रथमःपूज्यःसर्वदात्वंभ
विष्यसि ॥ १८ ॥ नारायणादनन्तरंरुद्रोभक्त्याविरिञ्चनम् ॥ तुष्टावप्रणतोभूत्वाब्रह्माणंकमलोद्भवम् ॥ १९ ॥ नमःकमलपत्राक्षनमस्तेपद्मज

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्मने ॥ नमःसुरासुरगुरोकारिणेपरमात्मने ॥ १२० ॥ नमस्तेसर्वदेवेशनमोवमोहनाशन ॥ विष्णोर्नाभिस्थितवतेकमलासनजन्मने ॥ २१ ॥
नमोविद्रुमरक्ताङ्गपाणिपल्लवशोभिने ॥ शरणंत्वांप्रपन्नोऽस्मित्राहिमांभवसंसृतेः ॥ २२ ॥ पूर्वंनीलाम्बुदाकारंकुड्मलंतेपितामह ॥ दृष्टारक्तमु
खंभूयःपत्रकेसरसंयुतम् ॥२३॥ पद्मंचानेकपत्रान्तमसङ्ख्यातंनिरञ्जनम् ॥ तत्रस्थितेनत्वयैषासृष्टिश्चैवप्रवर्तिता ॥२४ ॥ त्वांमुक्त्वानान्यतस्त्राणंज
गद्वन्द्यनमोऽस्तुते ॥ सावित्रीशापदग्धोऽहंलिङ्गंमेपतितंक्षितौ ॥ २५॥ इदानींकुरुमेशान्तित्राहिमांसहभार्यया ॥ ब्रह्मावैपातुमेपादौजङ्घेवैकमलासनः
॥ २६ ॥ विरिञ्चोमेकटिंपातुसृष्टिकृद्गुह्यमेवच ॥ नाभिंपद्मनिभःपातुजठरंचतुराननः ॥ २७ ॥ उरस्तुविश्वसृक्पातुहृदयंपातुपद्मजः ॥ सावित्रीप
तिर्मेकण्ठंहृषीकेशोमुखंमम ॥ ॥ २८ ॥ पद्मवर्णश्चनयनेपरमात्माशिरोमम ॥ एवंन्यस्यगुरोर्नामशङ्करोनामशङ्करः ॥ २९ ॥ नमस्तेभगवन्ब्रह्मन्नि
त्युक्त्वाविररामह ॥ ततस्तुष्टोहरंब्रह्मावाक्यमेतदुवाचह ॥ १३० ॥ ब्रह्मोवाच ॥कंतेकामंकरोम्यद्यपृच्छमांयद्यदिच्छसि ॥ रुद्रउवाच ॥ यदिप्रसन्नो
मेनाथवरदोयदिवामम ॥ ३१ ॥ तदेकंमेवदविभोयस्मिन्स्थानेभवान्स्थितः ॥ केषुकेषुचस्थानेषुत्वांपश्यन्तिसदाद्विजाः ॥ ३२ ॥ नाम्ना
चकेनतेस्थानंशोभतेधरणीतले ॥ तन्मेवदस्वसर्वेशतवभक्तिरतस्यच ॥ ३३ ॥ ब्रह्मोवाच ॥ पुष्करेऽहंसुरश्रेष्ठोगयायांचचतुर्मुखः ॥ कान्य
कुब्जेदेवगर्भोभृगुकक्षेपितामहः ॥ ३४ ॥ कावेर्य्यांसृष्टिकर्ताचनन्दिपुर्य्यांबृहस्पतिः ॥ प्रभासेपद्मजन्माचवानर्यांचसुरप्रियः ॥ ३५ ॥ द्वार
वत्यांतुऋग्वेदीवैदिशेभुवनाधिपः ॥ पौण्ड्रकेपुण्डरीकाक्षःपिङ्गाक्षोहस्तिनापुरे ॥ ३६ ॥ जयन्त्यांविजयश्चास्मिजयन्तःपुष्करावते ॥ उग्रेषु
पद्महस्तोऽहंतमोनद्यांतमोनुदः ॥ ३७ ॥ अहिच्छत्रेजयानन्दीकाञ्चीपुर्यांजनप्रियः ॥ ब्रह्माहंपाटलीपुत्रऋषिकुण्डेमुनिस्तथा ॥ ३८ ॥ महि
तारेमुकुन्दश्चश्रीकण्ठःश्रीनिवासिते ॥ कामरूपेशुभाकारोवाराणस्यांशिवप्रियः ॥ ३९ ॥ मल्लिकाक्षेतथाविष्णुर्महेन्द्रेभार्गवस्तथा ॥ गोनर्देस्थवि
राकारउज्जयिन्यांपितामहः ॥ १४० ॥ कौशाम्ब्यांतुमहाबोधिरयोध्यायांचराघवः ॥ मुनीन्द्रश्चित्रकूटेतुवाराहोविन्ध्यपर्वते ॥ ४१ ॥ गङ्गाद्वारेपर
मेष्ठीहिमवत्यपिशङ्करः ॥ देविकायांस्रुचाहस्तःस्रवहस्तश्चतुर्वटे ॥ ४२ ॥ वृन्दावनेपद्मपाणिःकुशहस्तश्चनैमिषे ॥ गोप्लक्षेचैवगोपीन्द्रःसचन्द्रोयमु
नातटे ॥ ४३ ॥ भागीरथ्यांपद्मतनुर्जलानन्दोजलन्धरे ॥ कौङ्कणेचैवमद्राक्षःकाम्पिल्येकनकप्रियः ॥ ४४ ॥ वेङ्कटेचान्नदाताचश
म्भुश्चैवक्रतुस्थले ॥ लङ्कायांचपुलस्त्योऽहंकाश्मीरेहंसवाहनः ॥ ४५ ॥ वसिष्ठश्चार्बुदेचैवनारदश्चोत्पलावते ॥ मेलकेश्रुतिदाताहंप्र
पातेयादसांपतिः ॥ ४६ ॥ सामवेदस्तथायज्ञेमधुरेमधुरप्रियः ॥ अङ्कोटेयज्ञभोक्ताचब्रह्मवादेसुरप्रियः ॥ ४७ ॥ नारायणश्चगोमन्तेमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यापुर्यांद्विजप्रियः ॥ ऋषिर्विदेदुराधर्षोदेवायांसुरमर्दनः ॥ ४८ ॥ विजयायांमहारूपःस्वरूपोराष्ट्रवर्द्धने ॥ पृथूदरस्तुमालव्यांशाकम्भर्यांरस
प्रियः ॥ ४९ ॥ पिण्डारकेतुगोपालःशङ्खोद्धारेऽङ्गवर्द्धनः ॥ कादम्बकेप्रजाध्यक्षोदेवाध्यक्षःसमस्थले ॥ १५० ॥ गङ्गाधरोभद्रपीठेजलशाय्यहमर्बु
दे ॥ त्र्यम्बकेत्रिपुराधीशःश्रीपर्वतेत्रिलोचनः ॥ ५१ ॥ महादेवःपद्मपुरेकापालेवैधसस्तथा ॥ शृङ्गबेरपुरेशौरिर्नैमिषेचक्रपाणिकः ॥ ५२ ॥ दण्ड
पुर्यांविरूपाक्षोगौतमोधूतपापके ॥ हंसनाथोमाल्यवतिद्विजेन्द्रोवलिकेतथा ॥ ५३ ॥ इन्द्रपुर्यांदेवनाथोधूतपायांपुरन्दरः ॥ हंसवाहस्तुलम्बायांच
ण्डायांगरुडप्रियः ॥ ५४ ॥ महोदयेमहायज्ञःसुयज्ञोयज्ञकेतने ॥ सिद्धिस्मरेपद्मवर्णेविभायांपद्मबोधनः ॥ ५५ ॥ देवदारुवनेलिङ्गंमहापत्तौवि
नायकः ॥ त्र्यम्बकोमातृकास्थानेअलकायांकुलाधिपः ॥ ५६ ॥ त्रिकूटेचैवगोनर्दःपातालेवासुकिस्तथा ॥ पद्माध्यक्षश्चकेदारेकूष्माण्डेसुरतप्रि
यः ॥ ५७ ॥ कुण्डवाप्यांशुभाङ्गस्तुसारण्यांतक्षकस्तथा ॥ अक्षोटेपापहाचैवअम्बिकायांसदर्शनः ॥ ५८ ॥ वरदायांमहावीरःकान्तारेदुर्गना
शनः ॥ अनन्तश्चैवपर्णाटेप्रकाशायांदिवाकरः ॥ ५९ ॥ विराजायांपद्मनाभःस्वरुद्रश्चवृकस्थले॥ मार्कण्डोवटकेचैववाहिन्यांमृगकेतनः॥१६०॥
पद्मावत्यांपद्मगृहोगगनेपद्मकेतनः ॥ अष्टोत्तरंस्थानशतंमयातेपरिकीर्तितम् ॥ ६१ ॥ यत्रवैममसान्निध्यंत्रिसन्ध्यंत्रिपुरान्तक ॥ एतेषामपियस्त्वे
कंपश्यतेभक्तिमान्नरः ॥ ६२ ॥ स्थानंसुविरजंलब्ध्वामोदतेशाश्वतीःसमाः ॥ मानसंवाचिकंचैवकायिकंयच्चदुष्कृतम् ॥ ६३ ॥ तत्सर्वंनाशमा
यातिनात्रकार्याविचारणा ॥ यस्त्वेतानिचसर्वाणिगत्वामांपश्यतेनरः ॥ ६४ ॥ भवतेमोक्षभागीचयत्राहंतत्रवैस्थितः ॥ पुष्पोपहारैर्धूपैश्चब्राह्मणा
नांचतर्पणैः ॥ ६५ ॥ ध्यानेनचस्थिरेणाशुप्राप्यतेपरमेश्वरः ॥ तस्यपुण्यफलंचाग्र्यमन्तेमोक्षफलंतथा ॥ ६६ ॥ सब्रह्मलोकमासाद्यतत्कालंतत्र
तिष्ठति ॥ पुनःसृष्टौभवेद्देवोवैराजानांमहातपाः ॥ ६७ ॥ ब्रह्महत्यादिपापानिइहलोकेकृतान्यपि ॥ अकामतःकामतोवातानिनश्यन्तितत्क्ष
णात् ॥ ६८ ॥ इहलोकेदरिद्रोयोभ्रष्टराज्योऽथवापुनः ॥ स्थानेष्वेतेषुवैगत्वामांपश्यतिसमाधिना ॥ ६९ ॥ कृत्वापूजोपहारंचस्नानंचपितृत
र्पणम् ॥ कृत्वापिण्डप्रदानंचसोऽचिराद्दुःखवर्जितः ॥ १७० ॥ एकच्छत्रोभवेद्राजासत्यमेतन्नसंशयः ॥ इहराज्यानिसौभाग्यंधनंधान्यंवरस्त्रियः
॥ ७१ ॥ भवन्तिविविधास्तस्ययैर्यात्रापुष्करेकृता ॥ इदंयात्राविधानंयःकुरुतेकारयेतवा ॥ ७२ ॥ शृणोतिवासपापैस्तुसर्वैरेवप्रमुच्यते ॥ अग
म्यागमनंयेनकृतंजानातिमानवः ॥ ७३ ॥ ब्रह्मक्रियायालोपेनबहुवर्षकृतेनच ॥ यात्रांचेमांसकृत्कृत्वावेदसंस्कारमाप्नुयात् ॥ ७४ ॥ किम
त्रबहुनोक्तेनइदमस्तीहशङ्कर ॥ अप्राप्यंप्राप्यतेतेनपापंचापिविनश्यति ॥ ७५ ॥ सर्वयज्ञफलैस्तुल्यंसर्वतीर्थफलप्रदम्॥सर्वेषांचैववेदानांसमाप्तिस्ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नवैकृता ॥ ७६ ॥ यःकृत्वापुष्करेसन्ध्यांसावित्रींसमुपासिता ॥ स्वपत्नीहस्तदत्तेनपौष्करेणजलेनतु ॥ ७७ ॥ भृङ्गारेणवरेणैव मृन्मयेनापिशङ्कर ॥ आनीयतज्जलंपुण्यंसन्ध्योपास्तिर्दिनक्षये ॥७८॥ समाधिनासमाधेयासप्राणायामपूर्विका ॥ तस्यांकृतायांयत्पुण्यंतच्छृणुष्वह राद्यमे ॥ ७९ ॥ तेनद्वादशवर्षाणिभवेत्सन्ध्यासुवन्दिता ॥ अश्वमेधफलंस्नानेदानेदशगुणंतथा ॥ १८० ॥ उपवासेऽप्यनन्तंचस्वयंप्रोक्तंमयाऽनघ ॥ सावित्र्याःपुरतोयस्तुदम्पत्योर्भोजनंददेत् ॥ ८१ ॥ तेनाहंभोजितस्तत्रभवामीहनसंशयः ॥ द्वितीयंभोजयेद्यस्तुभोजितस्तेनकेशवः ॥ ८२ ॥ लक्ष्मीसहायोवरदोवरांस्तस्यप्रयच्छति ॥ उमासहायस्तार्तीयेभोजितोऽसिनसंशयः ॥ ८३ ॥ अथवायाकुमारीणांभक्त्यादद्याच्चभोजनम् ॥ तस्याः कुलेभवेद्वन्ध्यानकदाचिच्चदुर्भगा ॥ ८४ ॥ नकन्याजननीक्वापिनभर्तुर्यानवल्लभा ॥ पुलस्त्यउवाच ॥ तस्मात्सर्वप्रयत्नेनसावित्र्यग्रेतुभोजनम् ॥ ८५ ॥ पारत्रमैहिकंवापिकामयद्भिर्नरैःसदा ॥ दातव्यंसर्वदाभीष्मकटुतैलविवर्जितम् ॥ ८६ ॥ नचाम्लंनचवैक्षारंस्त्रीणांभोज्यंकदाचन॥ भक्ष्यंपञ्चप्रकारंचरसैःसर्वैस्सुसंस्कृतम् ॥ ८७ ॥ घृतपूर्यःसुपक्वाश्चबहुक्षीरसमन्विताः ॥ शिखरिणीतथापेयादधिक्षीरसमन्विता ॥ ८८ ॥ आह्लादकारिणीपुंसांस्त्रीणांचातीववल्लभा ॥ धनधान्याञ्जनोपेतनारीणांचशताकुलम् ॥ ८९ ॥ पूपकंशष्कुलंतस्यांजायतेनात्रसंशयः ॥ नज्वरोन चसन्तापोनदुःखंनवियोगिता ॥ १९० ॥ असौतारयतेस्वानांकुलानामेकविंशतिम् ॥ बन्धुभिश्चसुतैश्चैवदासीदासैरनन्तकैः ॥ ९१ ॥ पूरितं चकुलंतस्याःपूरिकांयाप्रदास्यति ॥ एधतेचचिरंकालंपुत्रपौत्रसमन्वितम् ॥ ९२ ॥ कुलंचसकलंतस्यशष्कुलंयःप्रयच्छति ॥ पुत्रिण्योवैदुहि तरोबन्धुभिःसहितंकुलम् ॥ ९३ ॥ शिखरिणीप्रदात्रीणांयुवतीनांनसंशयः ॥ मोदतेतुकुलंतस्याःसर्वसिद्धिप्रपूरितम् ॥ ९४ ॥ मोदकानां प्रदानेनएवमाहप्रजापतिः ॥ एतदेवतुगौरीणांभोजनंहरशस्यते ॥ ९५ ॥ सुभगापुत्रिणीसाध्वीधनऋद्धिसमन्विता ॥ सहस्रभोजिनीशम्भो जन्मजन्मभविष्यति ॥ ९६ ॥ पूपानिचैवपुण्यानिकृतानिमधुराणिच ॥ द्राक्षारसप्रधानंचगुडखण्डसमन्वितम् ॥ ९७ ॥ शारदेनतुधान्येन कृत्वाखण्डंविमिश्रितम् ॥ स्त्रीणांचैवतुपेयानिभक्ष्याणिचद्विजन्मनाम् ॥ ९८ ॥ इहचाविकवासांसिवर्षायोग्यानिसर्वशः ॥ यानियानिच पेयानितानियोग्यानिदापयेत् ॥ ९९ ॥ प्रतिपूज्यविधानेनवसुदानैःसकञ्चुकैः ॥ कुङ्कुमेनानुलिप्ताङ्ग्याःस्रग्दामभिरलङ्कृताः ॥ २०० ॥ दत्त्वातूपानहावङ्घ्योर्नारिकेलंकरेतथा ॥ अक्ष्णोश्चैवाञ्जनंदत्त्वासिन्दूरंचैवमस्तके ॥ १ ॥ गुडंफलानिहृद्यानिवाञ्छितानिमृदूनिच ॥ हस्तेदत्त्वा सपात्राणिप्रणिपत्यविसर्जयेत् ॥ २ ॥ स्वयंभुञ्जीतवैपश्चात्सबन्धुर्बालकैःसह ॥ अथवानैवसम्पत्तिस्तीर्थेदानंचभाजनम् ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पिण्डप्रदानपूर्वंतुश्राद्धंकुर्याद्विधानतः ॥
गृहेगतःप्रदास्यामिहृष्टोदेवप्रसीदमे ॥ एवमेवपितॄणांचआगत्यस्वीयमन्दिरे ॥ ४ ॥ पिण्डप्रदानपूर्वंतुश्राद्धंकुर्याद्विधानतः ॥
पितरस्तस्यवैतृप्ताभवन्तिब्रह्मणोदितम् ॥ ५ ॥ तीर्थादष्टगुणंपुण्यंस्वगृहेददतांशिव ॥ नचपश्यन्तिवैनीचाःश्राद्धंद्विजातिभिःकृतम् ॥ ६ ॥
एकान्तेतुगृहेगुप्तेपितॄणांश्राद्धमिष्यते ॥ नीचदृष्ट्याहतंतच्चपितॄन्नैवोपतिष्ठति ॥ ७ ॥ तस्मात्सर्वप्रयत्नेनश्राद्धंगुप्तंचकारयेत् ॥
पितॄणांतृप्तिदंप्रोक्तंस्वयमेवस्वयम्भुवा ॥ ८ ॥ गौरीभक्त्याधिकायातुशस्ताज्ञातक्रियातुसा ॥ राजसीमनसाज्ञाताजनानांकीर्तिदायिनी ॥
॥ ९ ॥ गुप्तंदानंसदादेयमात्मनोहितमिच्छता ॥ पक्वान्नंदृश्यतामेतिदीयमानंजनैर्भुवि ॥ २१० ॥ दृश्यमानंतुतत्तुष्ट्यैदृश्यतेनेहक
र्हिचित् ॥ एकस्मिन्भोजितेविप्रेकोटिर्भवतिभोजिता ॥ ११ ॥ भवनेनात्रसन्देहःसत्यंपौराणिकंवचः ॥ तीर्थेतुब्राह्मणंनैवपरीक्षेतकथञ्चन ॥
॥ १२ ॥ अन्नार्थिनमनुप्राप्तंभोज्यंतंमनुरब्रवीत् ॥ सक्तुभिःपिण्डदानंचसंयावैःपायसेनवा ॥ १३ ॥ कर्त्तव्यमृषिभिर्दृष्टंपिण्याकेनैङ्गुदेनवा ॥
तिलपिण्याककैर्देयंभक्तिमद्भिर्नरैःसदा ॥ १४ ॥ श्राद्धंतत्रतुकर्तव्यमर्घ्यावाहनवर्जितम् ॥ स्वधांतुगृध्राःकाकावानैवदृष्ट्याहरन्तिते ॥ १५ ॥ श्रा
द्धंतत्तीर्थिकंप्रोक्तंपितॄणांतृप्तिदंपरम् ॥ कर्तव्यंतत्प्रयत्नेनभक्तिरेवात्रकारणम् ॥ १६ ॥ भक्त्यातुष्यन्तिपितरस्तुष्टाःकामान्दिशन्तिते ॥ पुत्रंपौत्रं
धनंधान्यंकामान्यान्मनसेच्छति ॥ १७ ॥ भक्त्याचाराधितोदद्यान्नॄणांप्रीतःपितामहः ॥ अकालेऽप्यथकालेवातीर्थेश्राद्धंसदानरैः ॥ १८ ॥ प्राप्तैरे
वसदास्नानंकर्तव्यंपितृतर्पणम् ॥ पिण्डदानंचकर्तव्यंपितॄणांचातिवल्लभम् ॥ १९ ॥ पितरोहिनिरीक्षन्तेगोत्रजंसमुपागतम् ॥ आशयापरयायु
क्ताःकाङ्क्षन्तस्सलिलंचते ॥ २२० ॥ विलम्बोनैवकर्तव्योनैवविघ्नंसमाचरेत् ॥ अच्छिन्नासन्ततिस्तेषांसदाकालंभविष्यति ॥ २१ ॥ पितरःपुत्रदा
तारोवृद्धिश्राद्धाभिकाङ्क्षिणः ॥ तेनतेसन्ततिच्छेदंनकुर्वन्तिहिकर्हिचित् ॥ २२ ॥ अतःश्राद्धंपुराप्रोक्तंस्वयमेवस्वयम्भुवा ॥ गुणोत्तरंतुयत्कार्यंद्विजैः
पितृपरायणैः ॥ २३ ॥ तीर्थेक्षेत्रेगृहेवापिसङ्क्रान्तौग्रहणेऽपिवा ॥ विषुवेअयनेचापिजन्मर्क्षेचप्रपीडिते ॥ २४ ॥ एतान्वैश्राद्धकालांस्तुपुरा
स्वायम्भुवोऽब्रवीत् ॥ कृतेश्राद्धेनवैपुंसांपीडाभवतिदेहजा ॥ २५ ॥ तदापुत्रकृतंवापिसर्वंत्यजतिदुष्कृतम् ॥ यथानभवितापीडाग्रहचोरनृपादिकात्
॥ २६ ॥ दुष्कृतंनश्यतेसर्वंपरत्रचगतिंशुभाम् ॥ लभतेनात्रसन्देहःप्रजापतिवचोयथा ॥ २७ ॥ कृतेयुगेपुष्कराणित्रेतायांनैमिषंस्मृतम् ॥ ॥ १०८ ॥
द्वापरेचकुरुक्षेत्रंकलौगङ्गांसमाश्रयत ॥ २८ ॥ दुष्करःपुष्करेवासोदुष्करंपुष्करेतपः ॥ दुष्करंपुष्करेदानंदुष्करःपुष्करेजपः ॥ २९ ॥ य
दन्यत्रकृतंपापंतीर्थेतद्यातिलाघवम् ॥ नतीर्थकृतमन्यत्रक्वचित्पापंव्यपोहति ॥ २३० ॥ सायंप्रातःस्मरेद्यस्तुपुष्कराणिकृताञ्जलिः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपस्पृष्टंभवेत्तेनसर्वतीर्थेषुभारत ॥ ३१ ॥ सायम्प्रातरुपस्पृश्यपुष्करेनियतन्द्रियः ॥ क्रतून्सर्वानवाप्नोतिब्रह्मलोकंचगच्छति ॥ ३२ ॥ द्वा
दशाब्दंद्वादशाहंमासंमासार्धमेवच ॥ योवसेत्पुष्करेनित्यंसगच्छेत्परमांगतिम् ॥ ३३ ॥ सर्वेषामेवलोकानांब्रह्मलोकोपरिस्थितः ॥ यइच्छेत्पु
ष्करंगन्तुंसोऽनुसेवेतपुष्करम् ॥ ३४ ॥ यथालोमविलोमाभ्यांतथाव्यस्तसमस्तयोः ॥ स्नातस्तुपुष्करेसम्यक्कोट्याश्चफलमश्नुते ॥ ३५ ॥
विधिवत्क्रियमाणेषुसर्वतीर्थेषुयत्फलम् ॥ पुष्करालोकनादेवनरःप्राप्नोतितत्फलम् ॥ ३६ ॥ दशकोटिसहस्राणितीर्थानांवैमहीतले ॥
सान्निध्यंपुष्करेतेषांत्रिसन्ध्यंकुरुनन्दन ॥ ३७ ॥ यावत्तिष्ठन्तिगिरयोयावत्तिष्ठन्तिसागराः ॥ तावत्पुष्करमृत्यूनांब्रह्मलोकोनसंशयः
॥ ३८ ॥ जन्मान्तरसहस्रैश्चआजन्ममरणान्तिकम् ॥ निर्दहेद्दुष्कृतंसर्वंसकृत्स्नात्वातुपुष्करे ॥ पुष्करंदुष्करंक्षेत्रंसर्वपापप्रणाशनम् ॥ ३९ ॥
पुष्करेवाऽजगन्धंयेप्रपश्यन्तिस्ममानवाः ॥ तेऽप्यशेषाघनिर्मुक्तायान्तिरुद्रसलोकताम् ॥ २४० ॥ तत्रोष्यरजनीमेकांभवस्यसदनेशुचिः ॥
अम्बुभक्षोवायुभक्षःशिवसायुज्यतांव्रजेत् ॥ ४१ ॥ अजकर्णेह्रदेस्नात्वादृष्ट्वामाहेश्वरंपदम् ॥ सुवर्णमौलिमालोक्यकिंपुनःपरितप्यते ॥ ४२ ॥
एकहंसंकुरुक्षेत्रेगङ्गाभेदंचनैमिषे ॥ पुष्करेतुअजंदृष्ट्वामुक्तिरेषाविशिष्यते ॥२४३॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेब्रह्मयज्ञवर्णनंनामचतुस्त्रिंशत्तमो
ऽध्यायः ॥ ३४ ॥ भीष्मउवाच ॥ क्षेमङ्करीतुयादेवीस्थितापुष्करपर्वते ॥ तस्याउत्पत्तिमाचक्ष्वपरंकौतूहलंहिमे ॥ १ ॥ पुलस्त्यउवाच ॥
यासाक्षेमङ्करीदेवीसर्वसत्त्वबलोत्कटा ॥ सात्त्विकीपरमाशक्तिःपुष्करंप्रापकारणे ॥ २ ॥ शुभवक्त्राम्बुजादेवीनीलायतविलोचना ॥ तस्यास्तपन्त्याः
कालेनमहत्त्वात्कुपितंमनः ॥ ३ ॥ तस्यक्रोधात्समुत्तस्थुःकुमार्यस्सौम्यलोचनाः ॥ नीलकुञ्चितकेशान्ताबिम्बोष्ठाःपद्मलोचनाः ॥ ४ ॥
नितम्बरशनादामनूपुराढ्याःसुवर्चसः ॥ एवंविधाःस्त्रियोदेव्याःक्षुभितंमनसिद्रुतम् ॥ ५ ॥ सहस्रशःसमुत्तस्थुःकोटिशोविविधामलाः ॥
सृष्ट्वाकुमारीस्तादेवीस्तस्मिन्नेवागिरौशुभाः ॥ ६ ॥ तपसानिर्मितंदेव्यापुरमाकाशगंमहत् ॥ विशालरथसौवर्णप्राकारेणोपशोभितम् ॥ ७ ॥
अन्तर्जलानिवेश्मानिमणिसोपानवन्तिच ॥ रत्नजालगवाक्षाणिआसन्नोपवनानिच ॥ ८ ॥ प्राधान्येनप्रवक्ष्यामिकन्यानामानितेऽनघ ॥
विद्युत्प्रभाचन्द्रकान्तिस्सूर्यकान्तिस्तथापरा ॥९॥ गम्भीरादारुकेशीचसुकेशीचापिसुन्दरी ॥ नीलकेशीघृताचीचउर्वशीशीलमण्डना ॥१०॥ चारु
कर्णाविशाल[illegible]धन्यापीनपयोधरा ॥ चन्द्रप्रभागिरिसुतातथासूर्यप्रभानना ॥ ११ ॥ स्वयम्प्रभाचारुमुखीसर्वदूतीविभावरी॥जया[illegible]जय
चै[illegible]तथाचैवापराजिता ॥ १२ ॥ एताश्चान्याश्चशतशःकन्यास्तस्मिन्पुरोत्तमे ॥ देव्याअनुचर्यःसर्वाःपाशाङ्कुशधराःशुभाः ॥ १३ ॥ ताभिःपरिवृता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवीसिंहासनगतास्थिता ॥ यौवनस्थामहाभागापीनोन्नतपयोधरा ॥ १४ ॥ चम्पकाशोकपुन्नागनागकेसरदामभिः ॥ सचामरार्चितादेवी यावदास्तेतपोऽन्विता ॥ १५ ॥ तावदागतवांस्तत्रनारदोब्रह्मणःसुतः ॥ तंदृष्ट्वासहसाऽऽयातंब्रह्मपुत्रंतपोनिधिम् ॥ १६ ॥ विद्युत्प्रभासुवाचेद मासनंदीयतामिति ॥ पाद्यमाचमनीयंचक्षिप्रमस्मैप्रदीयताम् ॥ १७ ॥ एवमुक्तातदादेवीकन्या।विद्युत्प्रभाशुभा ॥ आसनंपाद्यमर्घ्यंचनारदाय न्यवेदयत् ॥ १८ ॥ ततःकृतासनंदृष्ट्वाप्रणतंनारदंमुनिम् ॥ उवाचवचनंदेवीहर्षेणमहताऽन्विता ॥ १९ ॥ देव्युवाच ॥ स्वागतंतमुनिश्रेष्ठ कस्माल्लोकादिहागतः ॥ किंकार्यंदेवयत्कृत्यंमानःकालात्ययोभवेत् ॥ २० ॥ पुलस्त्यउवाच ॥ इत्यंवमुक्तःसमुनिर्नारदःप्राहलोकवित् ॥२१॥ नारदउवाच ॥ ब्रह्मलोकादिन्द्रलोकंतस्माद्रौद्रमथाचलम् ॥ इहस्थांत्वांचवैदेविद्रष्टुमभ्यागतोह्यहम् ॥ २२ ॥ पुलस्त्यउवाच ॥ एवमुक्त्वा मुनिवरस्तांदेवींसन्निरीक्ष्यच ॥ अहोऽभयमहोधैर्यमहोकान्तिरहोवयः ॥ २३ ॥ अहोनिष्कामतादेव्याइतिखेदमुपाययौ ॥ देवगन्धर्वसिद्धानां यक्षकिन्नररक्षसाम् ॥ २४ ॥ न रूपमीदृशंक्कापिस्त्रीष्वन्यास्विहदृश्यते ॥ एवंसश्चिन्त्यमनसानारदोविस्मयान्वितः ॥ २५ ॥ प्रणम्यदेवीं वरदामुत्पपातनभस्तलम् ॥ गतश्चत्वरयायुक्तःपुरींदैत्येन्द्रपालिताम् ॥ २६ ॥ महिषाख्येनयाभीष्मसमुद्रान्तःस्थितातदा ॥ तत्राससादभ गवान्महिषंदानवाकृतिम् ॥ २७ ॥ दृष्ट्वालब्धवरंवीरंदेवसैन्यान्तकंमहत् ॥ सतेनपूजितोभक्त्यानारदोमुनिपुङ्गवः ॥ २८ ॥ प्रीतात्मा नारदस्तस्मैदेव्यारूपमनुत्तमम् ॥ आचख्यौतद्यथान्यायंयदृष्टंपुष्करेतथा ॥ २९ ॥ नारदउवाच ॥ असुरेन्द्रशृणुष्वैकंकन्यारत्नसमन्वितम्॥ येनलब्धेनलब्धंस्यात्त्रैलोक्यंसचराचरम् ॥ ३० ॥ ब्रह्मलोकादहंदैत्यपुष्करारण्यमागतः ॥ तत्रदेवीपुरंदृष्टंकुमारीशतसङ्कुलम् ॥ ३१ ॥ तत्रप्रधानायाकन्यातापसीव्रतधारिणी ॥ आदेवदैत्ययक्षाणांमध्येकाचिन्नदृश्यते ॥ ३२ ॥ तादृशीतुशुभादैत्यतादृग्ब्रह्माण्डमध्यतः ॥ तादृशीभ्रमतादृष्टानकदाचिन्मयासती ॥ ३३ ॥ तस्याश्चदेवगन्धर्वाःसिद्धकिन्नरचारणाः ॥ उपासाञ्चक्रिरेसर्वेयेचान्येदेवनायकाः ॥ ३४ ॥ तांदृष्ट्वाचशुभांदेवींत्वांद्रष्टुंसमुपागतः ॥ अजित्वादेवताःसर्वानतांलभेतकर्हिचित् ॥ ३५ ॥ पुलस्त्यउवाच ॥ एवमुक्त्वाक्षणंस्थित्वा तमनु ज्ञाप्यनारदः ॥ यथागतंययौधीमानन्तर्धानेनतत्क्षणात् ॥ ३६ ॥ गतेतुनारदेदैत्यश्चिन्तयामासतांशुभाम् ॥ श्रुतायानारदमुखात्स्मृत्वाविस्मि तमानसः ॥ ३७ ॥ तामेवचिन्तयञ्छर्मनलेभेदैत्यसत्तमः ॥ तत्त्वज्ञान्सर्वमन्त्राणांमन्त्रिणःसमुपाह्वयत् ॥ ३८ ॥ तस्याष्टौमन्त्रिणोवीरा नीतिमन्तोबहुश्रुताः ॥ प्रघसोविघसश्चैवशङ्कुकर्णोविभावसुः ॥ ३९ ॥ विद्युन्मालीसुमालीचपर्जन्योऽक्रूरएवच ॥ एतेमन्त्रिवराःसर्वेप्राधान्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नप्रकीर्तिताः ॥ ४० ॥ तेदानवेन्द्रमासाद्यऊचुःकृत्यंविधीयताम् ॥ तेषांतद्वचनंश्रुत्वादानवेन्द्रोमहाबलः ॥ ४१ ॥ उवाचकन्यालाभाय
नारदावाप्तनिश्चयः ॥ ४२ ॥ महिषासुरउवाच ॥ मह्यंहिकथिताबालानारदेनसुरर्षिणा ॥ बिम्बोष्ठीचारुसर्वाङ्गीचन्द्रकान्ततराहिसा ॥ ४३ ॥
स्तनौचपीनौकठिनौसंहतौचारुदर्शनौ ॥ मृणालकोमलौबाहूनयनेचसुतारके ॥ ४४ ॥ गम्भीरावतुलाताभिस्त्रिवलीशोभनोदरा ॥ विस्तीर्ण
जघनाचैवसुश्रोणीमृदुगामिनी ॥ ४५ ॥ कदलीगर्भसङ्काशमूरुयुग्मंचशोभनम् ॥ चरणौसुप्रभौतस्याधरण्यांसुप्रतिष्ठितौ ॥ ४६ ॥
परोपकारिणातेनमुनिनाभावितात्मना ॥ एवंविधामेकथिताश्रुतायावीर्यहारिणी ॥ ४७ ॥ पुंसांवैश्राविर्तेलिङ्गेदृष्टाप्राणहराहिसा ॥ अवश्यं
सामयाग्राह्यायुष्माकंसन्निधौरणे ॥ ४८ ॥ सावाऽजित्वासुरान्यक्षान्नलभ्येतकिलाङ्गना ॥ एतदर्थंभवन्तोमेकथयन्तुविनिश्चयम् ॥ ४९ ॥
कथंसालभ्यतेबालाकथंदेवाश्चनिर्जिताः ॥ भवेयुरितितेसर्वेमन्त्रिणोदानवेश्वरम् ॥ ५० ॥ ऊचुःसम्मन्त्रिताःसर्वेकथयामोवयंतव ॥ एवमुक्त्वा
वचोऽवोचत्प्रघसोदानवेश्वरम् ॥ ५१ ॥ प्रघसउवाच ॥ यासातेकथितादैत्यनारदेनमहासती ॥ साशक्तिःपरमादेवीवष्णवीलोकधारिणी ॥५२॥
गुरुपत्नींभृत्यपत्नींतथासामन्तयोषितः ॥ जिघृक्षन्म्रियतेराजन्नगम्यागमनेनच ॥ ५३ ॥ साग्निज्वालातृणंत्वंचसाचत्वांनिर्दहिष्यति ॥
एवंज्ञात्वानभावंतुकर्तुमर्हसिदानव ॥ ५४ ॥ सुरर्षिणासुरकार्यंकर्तुकामेनकीर्तिता ॥ ५५ ॥ पुलस्त्यउवाच ॥ प्रघसेनैवमुक्तेतुतद्देवींप्रतिपा
र्थिव॥ दैत्येश्वरमथाहेदंविघसोनयकोविदः ॥५६॥विघसउवाच॥वारणीयाकदाचित्तुसर्वदाविजिगीषुभिः॥अन्यतन्त्रेणकन्यायाःकार्यंकापिप्रधर्षणम्
॥५७॥यदितेरोचतेवाक्यंमदीयंराजसत्तम ॥इदानींतांशुभांदेवींगत्वायाचतुकश्चन॥५८॥योमहात्माभवेत्तस्यबन्धुस्तंयाचयामहे॥साम्नैवादौततःपश्चा
त्करिष्यामःप्रयाणकम् ॥५९॥ ततोभेदंकरिष्यामस्ततोदण्डंक्रमेणव ॥ अनेनक्रमयोगेनयदिसानैवलभ्यते ॥६०॥ ततःसन्नह्यगच्छामबलाद्धर्त्तुमसतां
तदा ॥ महिषासुरउवाच ॥ साधूक्तोविघसेनैषयत्नःप्रतिवराननाम् ॥६१॥ तदेवक्रियतांशीघ्रंदूतस्तत्रविसृज्यताम् ॥ यःसर्वशास्त्रनीतिज्ञःशुचिःशौच
समन्वितः ॥ ६२ ॥ सत्यंज्ञात्वातुतांदेवींवर्णतोरूपतोगुणः ॥ पराक्रमेणशौर्येणवयसाचबलेनच ॥ ६३ ॥ बन्धुवर्गेणसामग्र्यामानेना
भरणेन च ॥ एवंज्ञात्वातुतांदेवींततःकार्यंविधीयताम् ॥ ६४ ॥ पुलस्त्यउवाच ॥ प्रशस्यतस्यतद्वाक्यंविघसंमन्त्रिसत्तमम् ॥ प्रशस्य
सर्वेतंदूतंसन्देष्टुमुपचक्रमुः ॥ ६५ ॥ विद्युत्प्रभंमहाभागंबहुमायाविदंशुभम् ॥ विसर्जयित्वातंदूतंविघसोवाक्यमब्रवीत् ॥ ६६ ॥ विघसउवाच ॥
सन्नह्यतांदानवेन्द्रचतुरङ्गबलेनच ॥ क्रियतांविजयंतावद्देवसैन्यंप्रतिप्रभो ॥ ६७ ॥ असुरेन्द्रसुरैर्भग्नैस्त्वत्पराक्रमभीषितः ॥ साकन्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वश्यतामेतित्वयिशक्रत्वमागते ॥ ६८ ॥ लोकपालैर्जितैःसर्वैस्तथैवमरुतांगणैः ॥ नागैर्विद्याधरैःसिद्धैर्गन्धर्वैःसर्वतोजितैः ॥ ६९ ॥ रुद्रैर्वसुभिरादित्यैस्त्वमेवेन्द्रोभविष्यसि ॥ इन्द्रस्यतेसतःकन्यादेवगन्धर्वयोषितः ॥ वशमेवागमिष्यन्तिसर्वदाभयपीडिताः ॥ ७० ॥ पुलस्त्यउवाच ॥ एवमुक्तस्तदादैत्यःसेनापतिमुवाचह ॥ विरूपाक्षंमहामेघंनीलाञ्जनसमप्रभम् ॥ ७१ ॥ महिषासुरउवाच ॥ आनीयतांद्रुतं सैन्यंहस्त्यश्वरथपत्तिमत् ॥ येनदेवांश्चगन्धर्वाञ्जयामोयुधिदुर्जयान् ॥ ७२ ॥ पुलस्त्यउवाच ॥ एवमुक्तोविरूपाक्षस्तंगृहीत्वासमूर्धनि ॥ उवाच तंदानवेन्द्रंप्रणिपत्यप्रशस्यच ॥ ७३ ॥ विरूपाक्षउवाच ॥ अविरोधेनदेवानांतिष्ठराजन्छतंसमाः ॥ जीवद्भिःप्राप्यतेराज्यंभोगाःसौख्यंधनानिच ॥ ७४ ॥ एतन्मत्वानविरोधंसुरैर्गच्छमहाद्युते ॥ ब्रह्मणातेवरोदत्तस्त्वजेयस्त्वंदिवौकसाम् ॥ ७५ ॥ अनेनैववरेणत्वंस्वस्थानेतिष्ठवैसुखम् ॥ देवानांदानवानांचकन्यायारूपतोऽधिकाः ॥ ७६ ॥ पतिस्तासांदानवेन्द्रसवकर्तास्मितेवचः ॥ अतीवस्पर्धनेलोकोजेतुंस्वेनबलेनच ॥ ७७ ॥ तेषांप्रधानभूतानांकोटयस्त्वर्बुदानिच ॥ येषांस्वबलमायातिशतकोट्यायुताधिकम् ॥ ७८ ॥ तेषांदैत्यसहस्राणिदानवानांमहात्मनाम् ॥ संमतंचक्रुरव्यग्रास्तदादैत्याःप्रहारिणः ॥ प्रयाणंरोचयामासदेवसैन्यजिघांसया ॥ ७९ ॥ पुलस्त्यउवाच ॥ ततोमहिषदैत्यस्तु कामरूपीमहाबलः ॥ मत्तंनागंसमारूढोययियासुर्मेरुपर्वतम् ॥ ८० ॥ तत्रेन्द्रपुरमासाद्यदेवैःसहशतक्रतुम् ॥ अभिदुद्रावदैत्येन्द्रस्ततोदेवाःक्रुधान्विताः ॥ ८१ ॥ शितान्यादायशस्त्राणिवाहनानिविशेषतः ॥ अधिष्ठायसुरानाजौदुद्रुवुर्मुदिताभृशम् ॥८२॥ तेषांप्रववृतेयुद्धंमहतांभीमविक्रमम्॥ घोरंप्रचण्डयोधानामन्योन्यमतिगर्जताम्॥८३॥तत्राञ्जनोनीलकुक्षिर्मेघवर्णोबलाहकः॥उदराक्षोललाटाक्षोमहाक्षोभीमविक्रमः ॥८४॥ स्वर्भानुर्वसुरष्टौघःसर्वेदुद्रुवुराहवे ॥ ८५ ॥ यथासङ्ख्येनतद्वच्चदैत्याद्वादशचापरे ॥ आदित्यान्दैत्यसङ्घास्तेतेषांप्राधान्यतःशृणु ॥ ८६ ॥ भीमाक्षोगजकर्णश्चशङ्कुकर्णस्तथैवच ॥ रक्ताक्षोभीमदंष्ट्रश्चविद्युज्जिह्वस्तथैवच ॥ ८७ ॥ अतिकायोमहाकायोदीर्घबाहुःकृतान्तकृत् ॥ एतेद्वादशदैत्येन्द्राआदित्यानभिदुद्रुवुः ॥ ८८ ॥ स्वंस्वंबलमुपादायतद्वदन्येऽपिदानवाः ॥ यथासङ्ख्येनरुद्रांस्तुदुद्रुवुर्भीमविक्रमाः ॥ ८९ ॥ शेषान्देवाञ्शेषदैत्यायथायोग्यमुपाद्रवन् ॥ स्वयंमहिषदैत्यस्तुइन्द्रंदुद्राववेगतः ॥९०॥ सचातिबलवान्दैत्योब्रह्मणोवरदर्पितः ॥ अवध्यःपुरुषेणाजौयद्यपिस्यात्पिनाकधृक् ॥९१॥ आदित्यैर्वसुभिःसर्वैरुद्रैश्चापिमहद्भृशम्॥असुरायातुधानाश्चसङ्ख्यापूरणकेवलाः॥९२॥देवानामपिसैन्यानिनिहतान्यसुरैर्युधि॥एवम्भूतेतदाभग्नेदेवेन्द्रेविद्रुताःसुराः॥९३॥ अर्दिताविविधैःशस्त्रैःशूलपट्टिशमुद्गरैः॥गतवन्तोब्रह्मलोकमसुरैरर्दिताःसुराः॥९४॥ अथविद्युत्प्रभोदैत्यस्तदादूतोविसर्जितः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देव्याःसकाशंगत्वातुउवाचतनुमध्यमाम् ॥ ९५ ॥ प्रणम्यप्रणतोभूत्वाकुमारीशतसङ्कुलाम् ॥ आस्थानेविनयायत्तस्तथावचनमब्रवीत् ॥९६॥ देवि
पूर्वमृषिस्त्वासीदादिसर्गेषुसम्भवः ॥ संवत्सरशताज्जातःसुपार्श्वोनामवैभुवि ॥९७॥ तस्याभवन्महातेजाःसिन्धुद्वीपःप्रतापवान् ॥ सहितीव्रंतपस्तेपे
माहिष्मत्यांसुरोत्तमे ॥ ९८ ॥ कुर्वन्स्थितस्तपोघोरंनिराहारस्त्वशोभने ॥ दैत्यस्यविप्रचित्तेस्तुसुतासुरम्तोपमा ॥ ९९ ॥ माहिष्मतीतिविख्या
तारूपेणासदृशीभुवि ॥ सखीभिःसापरिवृताविहरन्तीयदृच्छया ॥ १०० ॥ आगतामन्दरद्रोणींतत्रापश्यत्तपोवनम् ॥ मुनेरम्बरसंसक्तविविधद्रुम
मालिकम् ॥ १ ॥ लतागृहैःसुविहितैर्बकुलैराम्रतिन्दुकैः ॥ चन्दनैर्बदरैःशालैःसरलैरुपशोभितम् ॥ २ ॥ विचित्रवनखण्डैश्चभूषितंतन्महात्मभिः ॥
दृष्ट्वोत्तमंवनंरम्यमासुरीकन्यकाशुभा ॥ ३ ॥ माहिष्मतीवरारोहाचिन्तयामासभामिनी ॥ भीषयित्वाऽहमेतांस्तुतापसानाश्रमेस्वयम् ॥ ४ ॥ तिष्ठा
मिक्रीडतीसार्धंसखिभिःपरमार्चिता ॥ एवंसंचिन्त्यसादवीमहिषीसम्बभूवह ॥ ५ ॥ महिषीभिःसहान्याभिस्तीक्ष्णशृङ्गाग्रधारिणी ॥ तमृषिंभीषितुं
ताभिर्महानादंननादसा ॥ ६ ॥ असौचभीषितस्ताभिस्तांज्ञात्वाज्ञानचक्षुषा ॥ आसुरींक्रोधसम्पन्नःशशापचसुलोचनाम् ॥ ७ ॥ यस्माद्भीषयसेमां
त्वंमहिषीरूपधारिणी॥अतोभवमहिष्येवपापकर्मेशतंसमाः ॥८॥ एवमुक्तातदासातुसखीभिःसहवेपती ॥ पादयोरपतत्तस्यशापान्तंकुरुजल्पती ॥९॥
तस्यास्तद्वचनंश्रुत्वासमुनिःकरुणान्वितः ॥ शापान्तमकरोत्तस्यावाक्यंचेदमुवाचह ॥ ११० ॥ मुनिरुवाच ॥ अनेनैवतुरूपेणपुत्रमेकंप्रसूयसे ॥
शापान्तोभविताभद्रेमद्वाक्यंनमृषाभवेत् ॥११॥ पुलस्त्यउवाच ॥ एवमुक्तागतासातुनर्मदातीरमुत्तमम्॥ यत्रतेपेतपोघोरंसिन्धुद्वीपःप्रतापवान्॥१२॥
तत्रविद्युन्मतीनामदैत्यकन्याऽतिरूपिणी ॥ सादृष्टातेनमुनिनाविवस्त्रामज्जतीजले ॥ १३ ॥ चस्कन्दचमुनिःशुक्रंशिलाद्रोण्यांमहातपाः ॥ तच्चमा
हिष्मतीदृष्ट्वादिव्यगन्धिसुगन्धिच ॥ १४ ॥ निजांसखीमुवाचेदंपिबामिचजलंशुभम् ॥ एवमुक्त्वातुसापीत्वातच्छुक्रंमुनिसम्भवम् ॥ १५ ॥ प्राप
गर्भंमुनेर्वीर्याद्वत्सरंजठरेधृतम् ॥ तस्याःपुत्रोऽभवच्छ्रीमान्महाबलपराक्रमः ॥१६॥ महिषेतिस्मृतोनाम्नाब्रह्मवंशविवर्धनः ॥ सुराणामपहृत्याजौत्रैलो
क्यंसम्मतोऽनघे ॥ १७॥ आगम्यदास्यतेसुभ्रुतवदेविमहासुरः ॥ तस्यात्मनःप्रदानेनकुरुदेविमहत्कृतम् ॥ आत्मनास्वयमात्मानंशोचमानासुखीभव
॥ १८ ॥ वृथात्वंयौवनंप्राप्तापीनौचेमौपयोधरौ ॥ यदितस्याङ्गसंलग्नौसफलंजीवितंभवेत् ॥ १९ ॥ भवत्यानतुसन्देहःप्राप्तंवैजन्मनःफलम् ॥ मा
क्लेशयवृथादेविवयश्चेदंसयौवनम् ॥ १२० ॥ सभाग्याभवसुश्रोणिपतिंप्राप्नुहिदानवम् ॥ किमनेनतुवक्त्रेणयन्मुखेतस्यनार्प्यते ॥ २१ ॥
सुधारसस्याभ्यधिकमास्वादंलभशोभनम् ॥ एवमुक्तातदादेवीतेनदूतेनशोभना ॥ जहासपरमादेवीवाचंनोवाचकिञ्चना ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्याहसन्त्याः सहितंत्रैलोक्यंसचराचरम् ॥ ददर्शकुक्षौसम्भ्रान्तः तत्क्षणात्समपद्यत ॥ २३ ॥ ततोदेव्याः प्रतीहारीजयानामासितेक्षणा ॥ देव्या
हृदिस्थितंवाक्यमुवाचतनुमध्यमा ॥ २४ ॥ कन्यार्थयत्त्वयादूतवचनंसमुदीरितम् ॥ इदंनामव्रतंवास्याः कौमारंसार्वकालिकम् ॥ २५ ॥
अन्याअपिकुमार्योऽत्रसन्तिदेव्याः पदानुगाः ॥ तासामेकापिनोलभ्याकिमुदेवीस्वयंशुभा ॥ २६ ॥ याहिदूतत्वरावांस्त्वंकिञ्चिदन्यद्भविष्यति ॥
एवमुक्तस्ततोदूतस्तावद्ब्रह्मोऽग्निमहामुनिः ॥ २७ ॥ आयातोनारदस्तूर्णमेतदूचेमहातपाः ॥ देविदेवैरहंप्रीत्याप्रेषितोऽस्मितवान्तिकम् ॥ २८ ॥
देवाः सर्वेजितामेरुंविहायब्रह्मणोऽन्तिकम् ॥ २८ ॥ विगतादेविदैत्येनमहिषाख्येननिर्जिताः ॥ २९ ॥ त्वांग्रहीतुंहियत्नंसकृतवान्देविदैत्यराट् ॥
एवमुक्तासिदेवित्वंयोधयस्ववरानने ॥ १२० ॥ स्थिरीभूत्वामहादेवितंदैत्यंप्रतिघातय ॥ उक्त्वैवान्तर्हितः सद्योनारदः स्वेच्छयाययौ ॥ ३१ ॥
देवीचकन्याकोट्यस्ताः सन्नह्यन्तामुवाचह ॥ ततः कन्यामहाभागाः सर्वास्तादेविशासनात् ॥ ३२ ॥ बभूवुर्घोररूपिण्यः खड्गचर्मधनुर्धराः ॥
सङ्ग्रामहेतोः सन्तस्थुः सैन्यविध्वंसनायवै ॥ ३३ ॥ तच्चदेवबलंत्यक्त्वासावैदैत्यचमूर्द्रुतम् ॥ आगतायत्रसादेवीसंनद्धस्त्रीबलंमहत् ॥ ३४ ॥
ततस्तायुयुधुः कन्यादानवैः सहदर्पिताः ॥ क्षणेनतद्बलंताभिश्चतुरङ्गंनिपातितम् ॥ ३५ ॥ शिरांसितत्रकेषाञ्चिच्छिन्नानिपतितानिच ॥
इतरेषांविदार्याशुकव्यादाः शोणितंपपुः ॥ ३६ ॥ अन्येकबन्धभूतास्तुननृतुस्तत्रदानवाः ॥ एवंक्षणेनतेसर्वेविध्वस्ताः पापचेतसः ॥ ३७ ॥
अपरेविद्रुताः सर्वेयत्रासौमहिषासुरः ॥ ततोहाहाकृतंसवतदादैत्यबलंमहत् ॥ ३८ ॥ एवंतदाकुलंदृष्ट्वामहिषोवाक्यमब्रवीत् ॥
सेनापतेकिमेतद्धिबलंभग्नंममाग्रतः ॥ ३९ ॥ ततोयज्ञहतोनामदैत्योहस्तिस्वरूपवान् ॥ उवाचहतमेतद्धिकुमारीभिः समन्ततः ॥ १४० ॥
भवानपूर्वकन्यार्थीकथितंनारदेनते ॥ तयाहतमिदंसर्वंमन्येत्वांतुहनिष्यति ॥ ४१ ॥ ततोदुद्रावमहिषस्तांकन्यांशुभलोचनाम् ॥ गदामुसलह
स्तश्चकन्यांदुद्रावतांबलात् ॥ ४२ ॥ यत्रतिष्ठतिसादेवीदेवगन्धर्वपूजिता ॥ तत्रवसोऽसुरः प्रापयत्रदेवीव्यवस्थिता ॥ ४३ ॥ सातुदृष्ट्वातमायान्तं
विंशत्पाणिर्बभूवह ॥ धनुः खड्गंतथाशक्तिः शरः शूलंतथागदा ॥४४॥ सहस्रारंतथाचक्रंमुसलंभिण्डिपालकम् ॥ परशुर्डमरुश्चैवतथाघण्टाविशालिनी
॥ ४५ ॥ शतघ्नीमुद्गरोघोरोभुशुण्डीकुन्तमेवच ॥ दण्डपाशौध्वजश्चवपद्मंचेतीहविंशतिः ॥ ४६ ॥ भूत्वाविंशद्भुजादेवीसिंहमास्थायदंशिता ॥
स्स्माररुद्रंदेवेशंरौद्रंसंहारकारिणम् ॥ ४७ ॥ ततोवृषध्वजः साक्षाद्रुद्रस्तत्रैवसंययौ ॥ तयाप्रणम्यविज्ञप्तः सर्वान्दैत्याञ्जयाम्यहम् ॥ ४८ ॥
त्वयिसन्निहितेदेवेविष्णौचापिपरन्तप ॥ युष्मत्सन्निधिमात्रेतुपश्यदेवसनातन ॥ ४९ ॥ एवमुक्त्वाऽसुरान्सर्वाञ्जिवांसुः परमेश्वरी ॥ मुक्त्वातमेकं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महिषंवधार्थंसातमभ्यगात् ॥ १५० ॥ तथादेवींततःसोऽपिदृष्ट्वादुद्राववेश्वरीम् ॥ क्वचिद्युध्यतिदैत्येन्द्रःक्वचिन्नैवपलायते ॥ ५१ ॥ क्वचित्पुन
र्मृशंचक्रेक्वचित्पुनरुपागमत ॥ एवंवर्षसहस्राणिदशतस्यतयासह ॥ ५२ ॥ देव्याविनिगतानिस्थुर्युध्यतस्तस्यशोभने ॥ बभ्रामसकलन्त्वाजौ
ब्रह्माण्डंभीतमानसम् ॥५३॥ततःकालेनमहताशतशृङ्गेमहागिरौ ॥ दैत्येश्वरंचतंदृष्ट्वादेवीवचनमब्रवीत् ॥ ५४ ॥ रूपलोभात्त्वयानीचदूतोयोऽसौम
मान्तिकम् ॥ प्रेषितोयत्त्वयातस्यसन्दिष्टंतद्वदस्वमे ॥ ५५ ॥ नमयातच्छ्रुतपूर्वमिदानींत्वन्मुखात्पुनः ॥ श्रोतुमिच्छामितद्वाक्यंभवाननुभविष्यति
॥ ५६ ॥ पद्भ्यामाक्रम्यशूलेननिहतोदैत्यसत्तमः ॥ छिन्नेशिरसिखड्गेनतत्कण्ठादुत्थितःपुमान् ॥ रौद्रोऽपिसगतःस्वर्गंदेव्याशस्त्रनिपा
तितः॥५७॥ततोदेवगणाःसर्वेमहिषंवीक्ष्यनिर्जितम्॥सेन्द्राद्यास्तुस्तुतिंचक्रुर्देव्यास्तुष्टेनचेतसा॥५८॥देवाऊचुः॥नमोदेविमहाभागेगम्भीरेभीमदर्शने॥
नयस्थेस्थितिसिद्धान्तेत्रिनेत्रेविश्वतोमुखि ॥५९॥ विद्याविद्येजपेजाप्येमहिषासुरमर्दिनि ॥ सर्वगेसर्वविद्येशिविश्वरूपिणिवैष्णवि॥१६०॥वीतशोके
ध्रुवेदेविपद्मपत्त्रायतेक्षणे ॥ शुद्धसत्वव्रतस्थेचचण्डरूपेविभावरि ॥ ६१ ॥ ऋद्धिसिद्धिप्रदेदेविसर्वसत्वमयेध्रुवे ॥ विद्यापुराणशिल्पानांजननिभूत
धारिणि ॥ ६२ ॥ सर्वदेवरहस्यानांसर्वसत्त्ववतांशुभे ॥ नमोऽस्तुतेमहादेविनमोऽस्तुपरमेश्वरि ॥ ६३ ॥ नमोऽस्तुसर्वभूतानांमातर्नित्येऽक्षयेऽव्यये
॥ नतेषांजायतेकिञ्चिदशुभंरणसङ्कटे ॥ ६४ ॥ येतुव्याघ्रभयेघोरेचौरराजभयेतथा ॥ सर्वभूताभयादेवीक्षेम्याक्षेमङ्करीतिच ॥ ६५ ॥ विभावरीभा
वरीचसर्वस्थितिकरीतथा ॥ सर्वासांभगवान्रुद्रःसर्वगत्वात्पतिःस्मृतः ॥ ६६॥ यावत्यस्तुमहाशक्त्यस्तावद्रूपस्तुशङ्करः ॥ निगडस्थोऽपियोदेवि
त्वांस्मरिष्यतिमानवः ॥ सोऽपिबन्धात्प्रमुच्येतससुखंवसतेसुखी ॥ ६७ ॥ पुलस्त्यउवाच ॥ एवंस्तुतासुरैर्देवीप्रणिपातपुरस्कृता ॥ उवाचदेवीसु
श्रोणीवृणुध्वंवरमुत्तमम् ॥ ६८ ॥ देवाऊचुः ॥ देविपुष्करसंस्थांत्वांस्तुवन्त्यनेनभक्तितः ॥ तेसर्वकामसम्पन्नाभवन्तुवरएषवै ॥ ६९ ॥ पुलस्त्य
उवाच ॥ एवमस्त्वितितान्देवानुक्त्वादेवीपरावरान् ॥ विसर्जयित्वातान्देवीस्वयंतत्रैवसंस्थिता ॥ १७० ॥ एवंयःशृणुतेजन्मदेव्याः
कुरुकुलोद्वह ॥ सदासेवेतविरजइदंप्राप्नोत्यनामयम् ॥ ७१ ॥ यःक्षेमङ्करिवृत्तान्तंब्रह्मशक्तिसमुद्भवम् ॥ सपुत्रपौत्रपशुमान्समृ
द्धिमुपगच्छति ॥ ७२ ॥ यश्चेदंशृणुयाद्भक्त्यादेवीस्तोत्रमनुत्तमम् ॥ सर्वबाधाविनिर्मुक्तंपदंनिर्वाणमृच्छति ॥ ७३ ॥ यएतांवेद
वैदेव्याउत्पत्तिंत्रिविधांस्थिताम् ॥ सर्वपापविनिर्मुक्तःपदंनिर्वाणमृच्छति ॥ ७४ ॥ ॥ भ्रष्टराज्यपदोराजासप्तम्यांनियतःशुचिः ॥ अष्टम्यां
चनवम्यांचउपवासीनरोत्तम ॥ ७५ ॥ संवत्सरेणलभतेराज्यंनिष्कण्टकंनृपः ॥ यासात्रिविदसम्भूतावेदशक्तिःपरावरा ॥ ७६ ॥ एषाज्ञाना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्मिकासर्वासात्त्विकीब्रह्मसंज्ञिता ॥ एषैवरक्ताराजसीवैष्णवीपरिकीर्तिता ॥ ७७ ॥ एषैवकृष्णातामसीरौद्रीदेवीप्रकीर्तिता ॥ परमात्मायथा
देवएकएवत्रिधास्थितः ॥ ७८ ॥ अपराचपराचैवतथैवान्यापरावरा ॥ त्रिधाप्यवस्थिताशक्तिरेकैकात्रिविधाभवेत् ॥ ७९ ॥ यएवं
शृणुयात्सर्वंक्षेम्यायाःपरमंशिवम् ॥ सर्वपापविनिर्मुक्तःपदंनिर्वाणमाप्नुयात् ॥ १८० ॥ यश्चैवंपठतेभक्त्यानवम्यांनियतःशुचिः ॥ सरा
ज्यापत्यलाभेनभयेभ्यःपरिमुच्यते ॥ ८१ ॥ यत्रैवंलिखितागेहेसदातिष्ठतिधारिता ॥ नतत्राग्निभयंघोरंचौर्यसर्पादिकंनृप ॥ ८२ ॥ यश्चै
तत्पूजयेद्भक्त्यापुस्तकेलिखितंबुधः ॥ तेनचेष्टंभवेत्सर्वंत्रैलोक्यंसचराचरम् ॥ ८३ ॥ जायन्तेपशवःपुत्रास्तथाधान्यंवरस्त्रियः ॥ रत्नान्य
श्वागजाभृत्याग्रामाश्चाशुभवन्त्युत ॥ ८४ ॥ यस्येदंतिष्ठतेगेहेतस्याप्येतद्ध्रुवंभवेत् ॥ एतदेवरहस्यंमेकीर्तितंनृपसत्तम ॥ ८५ ॥ क्षेमङ्करी
भवंतेतुसर्वंक्षेमङ्करंशुभम् ॥ क्षेम्याक्षेमङ्करीदेवीसर्वेषांभयनाशिनी ॥ ८६ ॥ रुद्रस्यखलुमाहात्म्यंदेवीनांसम्भवस्तथा ॥ नवकोट्यस्तुचा
मुण्डाभेदभिन्नाव्यवस्थिताः ॥ ८७ ॥ यारौद्रीतामसीशक्तिःसाचामुण्डाप्रकीर्तिता ॥ अष्टादशतथाकोट्योवैष्णव्याभेदउच्यते ॥ ८८ ॥ यासातु
राजसीशक्तिःपालनेचैववैष्णवी ॥ याब्राह्मीशक्तिःसत्त्वस्थासाचानन्ताप्रकीर्तिता ॥ ८९ ॥ क्षेमङ्कर्यानसङ्ख्यातुब्राह्मीशक्तिःपरावरा ॥ ब्रह्माणी
साप्रुविज्ञेयासृष्टिरूपाजगत्स्थिता ॥१९०॥ एतासांसर्वभेदेषुपृथगेकैकशोभनाः ॥ सर्वासांभगवान्रुद्रःसर्वगत्वात्पतिःस्मृतः ॥ ९१ ॥ यावत्यस्ता
महाशक्तयस्तावद्रूपाणिशङ्करः ॥ कृत्तिवासास्तुभजतेपतिरूपेणसर्वदा ॥ ९२ ॥ यश्चाराधयतेतास्तुतस्यरुद्रोऽपितुष्यति ॥ सिध्यन्तेतास्तदादेव्यो
मन्त्रिणोनात्रसंशयः ॥ १९३ ॥ इतिश्रीपद्मपुराणेप्रथमेसृष्टिखण्डेक्षेमङ्कर्युत्पत्तिर्नामपञ्चत्रिंशत्तमोऽध्यायः ॥ ३५ ॥ भीष्मउवाच ॥ यासम्भूता
शरीरात्तुब्रह्मणोऽव्यक्तजन्मनः ॥ गायत्र्यष्टभुजाभूत्वाख्याताविंशभुजातथा ॥ १ ॥ सैवचान्याभवद्देवीदेवकार्यचिकीर्षया ॥ महिषाख्यासुरवधंकु
र्वतीब्रह्मणोरता ॥ २ ॥ वैष्णव्यानिहतोदैत्यःकतमोयोमहाबलः ॥ चामुण्डयारुद्रशक्त्याकतमोदानवोहतः ॥ ३ ॥ पुलस्त्यउवाच ॥ इदंजग
त्स्थितंभीष्मगङ्गासिकतसङ्ख्यया ॥ यत्किञ्चिद्भवतेवृत्तंतत्सववेदसर्ववित् ॥ ४ ॥ स्वायम्भुवोहतोदैत्योवैष्णव्यामन्दरेगिरौ ॥ महिषाख्योऽभि
भाष्यश्चसचवैवस्वतेपुनः ॥ ५ ॥ नन्दयानिहतोविन्ध्येमहाबलपराक्रमः ॥ अथवाज्ञानशक्तिश्चमहिषोऽज्ञानमूर्तिमान् ॥ ६ ॥ अज्ञानंज्ञानसाध्यं
तुभवतीहनसंशयः ॥ मूर्तिपक्षेचेतिहासोमन्मूर्तिःस्वेनबाध्यत ॥ ७ ॥ ख्याप्यतेवेदवादैस्तुअहन्तैर्वेदवादिभिः ॥ ८ ॥
इदानींशृणुमेराजन्पञ्चपातकनाशनम् ॥ यजनंदेवदेवस्यब्रह्मपुत्रवसुप्रदम् ॥ ९ ॥ इहजन्मनिदारिद्र्यव्याधिकुष्ठादिपीडितः ॥ अलक्ष्मीवानपुत्रस्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योभवेत्पुरुषोभुवि ॥ १० ॥ तस्यसद्योभवेल्लक्ष्मीरायुःपूर्णंसुतास्सुखम् ॥ कृत्वातुमण्डलगतंलोकपालसमन्वितम् ॥ ११ ॥ ब्रह्माणंतुपरंदेवंयःपश्यतिविधानतः ॥ पूजितंनवनाभेनमन्त्रमूर्तिमयोनिजम् ॥ १२ ॥ कार्तिकेमासिशुक्लायांपौर्णमास्यांविशेषतः ॥ सर्वासुवायजेदेवंपूर्णिमासुविधानतः ॥१३॥ सङ्क्रान्तौचमहाबाहोचन्द्रसूर्यग्रहेऽपिवा ॥ यःपश्यतिविभुंदेवंपूजितंगुरुणानृप ॥१४॥ तस्यसद्योभवेत्तुष्टिःपापध्वंसश्चजायते ॥ समान्योदेवतानांचभवतीहनराधिप ॥ १५ ॥ ब्राह्मणक्षत्रियविशांभक्तानांतुपरीक्षणम् ॥ संवत्सरंगुरुःकुर्याज्जातिशौचक्रियादिभिः ॥ १६ ॥ उपपन्नमितिज्ञात्वाहृदयेनावधारयेत् ॥ तेऽपिभक्तियुताध्यात्वात्वाचार्यंपरमेश्वरम् ॥ १७ ॥ संवत्सरंगुरौभक्तिंकुर्युर्विष्णौयथातथा ॥ प्रसादयेयुश्चततःपूर्णेसंवत्सरेगुरुम् ॥ १८ ॥ भगवंस्त्वत्प्रसादेनसंसारार्णवतारणम् ॥ परब्रह्मोपासनेनविरिञ्च्याराधनेनच ॥ १९ ॥ सहस्रशीर्षजप्येनमण्डलब्राह्मणेनच॥ ध्यानेनस्यात्तथास्माकमुपदेशःप्रदीयताम् ॥ २० ॥ इच्छामोवैदिकींलक्ष्मींविशेषेणप्रसद्यताम् ॥ अभ्यर्थितोगुरुस्त्वेवंमेधावीतैस्तदाततः ॥ २१ ॥ यथाविधिसमभ्यर्च्यब्रह्माणंविष्णुमग्रतः ॥ तेबद्धनेत्राःस्वाप्यास्तुकार्तिकस्यचतुर्दशीम् ॥ २२ ॥ ब्राह्ममुहूर्तेचोत्थायबद्धपद्मासनास्तुते ॥ ध्यात्वागुरुंसहस्रारेश्वेतवस्त्रोपवीतकम् ॥ २३ ॥ श्वेतमाल्याम्बरधरंश्वेतगन्धानुलेपनम् ॥ निर्गम्यचबहिर्नद्यांकुर्युर्नित्यमतन्द्रिताः ॥ २४ ॥ क्षीरवृक्षोत्थमाचार्योदापयेद्दन्तधावनम् ॥ तेचतंभक्षयेयुर्हिनदींगत्वासमुद्रगाम् ॥ २५ ॥ इतरद्वातटाकंवागृहेवापिविधानतः॥तद्भक्षयेयुर्मन्त्रेणमन्त्रितंपरमेष्ठिनः ॥ २६ ॥ आपोहिष्ठेतिमन्त्रेणसप्तकृत्वोऽभिमन्त्रितम् ॥ देवस्यत्वेतिवैजप्त्वायुञ्जानेतिकरेन्यसेत् ॥ २७ ॥ इरावत्येतिप्रक्षाल्यब्रह्मोदनेतिवैमुखे ॥ भक्षयित्वाक्षिपेद्दूरंपतितंचनिरीक्षयेत् ॥ २८ ॥ सम्मुखंप्राङ्मुखंवापिविदिशंचापिवागतम् ॥ संमुखेदेवतालब्धिर्मन्त्रसिद्धिश्चजायते ॥२९॥ पराङ्मुखेदन्तकाष्ठेसर्वेदेवाःपराङ्मुखाः ॥ उत्तरेणगतेतस्मिन्सिद्धिर्भवतिवानवा ॥ ३० ॥ दक्षिणेनभवेन्मृत्युर्गुरोस्तस्यनसंशयः ॥ प्रेक्ष्याशुभंस्वपेद्भूमौदेवदेवस्यसन्निधौ ॥ ३१ ॥ स्वप्नान्दृष्ट्वागुरोरग्रेश्रावयेयुर्विचक्षणाः ॥ ततःशुभाशुभंतत्रलक्षयेत्परमोगुरुः ॥ ३२ ॥ पौर्णमास्यामथस्नात्वाततोदेवालयंव्रजेत्॥गुरुश्चमण्डलंभूमौकलिपतायांतुवर्तयेत् ॥३३॥ लक्षणैर्विविधैर्भूमिंलक्षयित्वाविधानतः ॥ षोडशारंलिखेत्पद्मंनवधारमथापिवा॥३४॥अष्टपत्रमथोवापिलिखित्वादर्शयेद्बुधः ॥ नेत्रबन्धंतुकुर्वीतसितवस्त्रेणयत्नतः॥३५॥वर्णानुक्रमतःशिष्यान्पुष्पहस्तान्प्रवेशयेत्॥ नवनाभंयदाकुर्यान्मण्डलंवर्णकैर्बुधः॥ ३६॥इन्द्राणीपूर्वकंदेवमिन्द्रमैन्द्र्यांतुपूजयेत्॥लोकपालैःसमंतद्वदग्निंसम्पूजयेन्नृपः॥३७॥दिशिवह्नेर्यमंयाम्यांनैर्ऋत्यांचैवनिर्ऋतिम् ॥ वरुणंवारुणाशायांवायुंवायव्यगोचरे॥३८॥धनदंचोत्तरेन्यस्यरुद्रमीशानगोचरे॥कमण्डलुंपूर्वतोहिस्रुचंवैदक्षिणेतथा ॥३९॥ हंसंवैपश्चिमायांतुउत्तरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यांस्रुवंतथा ॥ आग्नेय्यांचबृसींदद्यान्नैर्ऋत्यांपादुकेतथा ॥ ४० ॥ वायव्यांयोगपट्टंचऐशान्यांचगन्तिकाम् ॥ विष्णुस्तुपूर्वतःपूज्योदक्षिणे चापिशङ्करः ॥४१॥ पश्चिमेतुरविर्देवऋषयश्चोत्तरेतथा ॥ मध्येस्वयंपद्मजन्मासावित्रीदक्षिणेतथा ॥ ४२ ॥ उत्तरेचैवगायत्रीदेवीपद्मदलेक्षणा ॥ ऋग्वेदंपूर्वतोन्यस्ययजुर्वेदंचदक्षिणे ॥ ४३ ॥ पश्चिमेसामवेदंचअथर्वंचोत्तरेतथा ॥ इतिहासपुराणानिच्छन्दोज्यौतिषमेवच ॥ ४४ ॥ धर्मशास्त्राणिचान्यानिइन्द्रादिदिक्षुविन्यसेत् ॥ पूर्वपत्रेबलंपूज्यप्रद्युम्नंदक्षिणदले ॥ ४५ ॥ पश्चिमेचानिरुद्धंचवासुदेवमथोत्तरे ॥ पूर्वतोवामदेवंचसद्योजातंतुदक्षिणे ॥ ४६ ॥ ईशानंपश्चिमेस्थाप्यतत्पुरुषंचोत्तरेतथा ॥ अघोरस्सर्वतःपूज्यएषापूजातुमण्डले ॥ ४७ ॥ पूर्वतोभास्करंपूज्यदक्षिणेन दिवाकरम् ॥ प्रभाकरंपश्चिमेतुग्रहराजमथोत्तरे ॥ ४८ ॥ एवंपूज्यविधानेनब्रह्माणंपरमेश्वरम् ॥ दिङ्मण्डलेतुविन्यस्यअष्टौकुम्भान्विधानतः ॥ ४९ ॥ ब्राह्मंतुकलशंमध्येनवमंतत्रकल्पयेत् ॥ स्नापयेन्मुक्तिकामंतुब्रह्मणोवैघटेनतु ॥ ५० ॥ श्रीकामंवैष्णवेनेहकलशेनतुपार्थिव ॥ राज्यार्थिनंस्नापयेच्चऐन्द्रेणकलशेनतु ॥ ५१ ॥ द्रव्यप्रतापकामंतुआग्नेयघटवारिणा ॥ मृत्युञ्जयविधानाययाम्येनस्नापयेन्नरम् ॥ ५२ ॥ दुष्टप्रध्वंसनायालंनैर्ऋतेनविधीयते ॥ स्नापयेद्वारुणेनाशुपापनाशायमानवम् ॥ ५३ ॥ शरीरारोग्यकामंतुवायव्येनाभिषेचयेत् ॥ द्रव्यसम्पत्तिकामस्यकौबेरेणविधीयते ॥ ५४ ॥ रौद्रेणज्ञानकामस्यलोकपालघटास्त्विमे ॥ एकैकेननरःस्नात्वासर्वदोषविवर्जितः ॥ ५५ ॥ जायतेब्रह्मसदृशोराजासद्योऽथवानरः ॥ अथवादिक्षुसर्वासुयथासङ्ख्येनलोकपान् ॥ ५६ ॥ पूजयेत्तुस्वनाम्नातुकुम्भैरेवविधानतः ॥ एवंसम्पूज्यदेवांस्तुलोकपालान्प्रसन्नधीः ॥ ५७ ॥ पश्चात्परीक्षिताञ्शिष्यान्बद्धनेत्रान्प्रवेशयेत् ॥ दग्ध्वाग्नेय्याधारणयावायुनाविधुनेत्ततः ॥ ५८ ॥ सोमेनाप्यायितान्कृत्वाश्रावयेत्समयांस्ततः ॥ ननिन्द्याद्ब्राह्मणान्देवान्विष्णुंब्राह्मणमेवच ॥ ५९ ॥ इन्द्रमादित्यमग्निंचलोकपालान्ग्रहांस्तथा ॥ गुरुंचब्राह्मणंवापिमुनीन्द्रंपूर्वदीक्षितम् ॥ ६० ॥ एवंतुसमयाञ्श्राव्यपश्चाद्धोमंतुकारयेत् ॥ ॐनमोभगवतेब्रह्मणेसर्वरूपिणेहुंफट्स्वाहा ॥ ६१ ॥ षोडशाक्षरमन्त्रेणहोमयेज्ज्वलितेऽनले ॥ गर्भाधानादिकास्सर्वाआहुतीस्सम्प्रदापयेत् ॥ ६२ ॥ तिसृभिस्तुव्याहृतिभिर्देवदेवस्यसन्निधौ ॥ होमान्तेदीक्षितःपश्चाद्दापयेद्गुरुदक्षिणाम् ॥ ६३ ॥ हस्त्यश्वयानशकटहेमधान्यादिकंनृप ॥ दापयेद्गुरवेप्राज्ञोमध्यमेमध्यमंतथा ॥ ६४ ॥ दापयेदपरेयुग्मंसहिरण्यन्तुतद्गुरोः ॥ एवंकृतेतुयत्पुण्यंमहत्सञ्जायतेतथा ॥ ६५ ॥ तन्नशक्यंनिगदितुमपिवर्षशतैरपि ॥ दीक्षितोऽथपुराभूत्वापाद्मंवैशृणुयाद्यदि ॥ ६६ ॥ तेनवेदाःपुराणानिसर्वमन्त्रास्ससङ्ग्रहाः ॥ जप्तास्स्युःपुष्करेतीर्थेप्रयागेसिन्धुसागरे ॥ ६७ ॥ देवह्रदेकुरुक्षेत्रेवाराणस्यांविशेषतः ॥ ग्रहणेविषुवेचैवयत्फलं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जपतांभवेत् ॥ ६८ ॥ फलंशतगुणंतच्चपुष्करस्थंपितामहम् ॥ दृष्ट्वाप्राप्नोतिविविधान्कामान्कामयतेयदि ॥ ६९ ॥ पूजांवैधानिकींकृत्वादीक्षितो
यःशृणोतिच ॥ देवाअपितपःकृत्वाध्यायन्तिचवदन्तिच ॥ ७० ॥ कदामेभारतेवर्षेजन्मस्यादितिपार्थिव ॥ दीक्षिताश्चभविष्यामःपाद्मंश्रोष्याम
हेकदा ॥ ७१ ॥ पाद्मंतुषोडशात्मानंन्यस्यदेहेकदावयम् ॥ यास्यामस्तुपरंस्थानंयद्गत्वानपुनर्भवेत् ॥ ७२ ॥ एवंजल्पन्तिविबुधामनसाचिन्तय
न्तिच ॥ ब्रह्मयज्ञंचकार्तिक्यांकदाद्रक्ष्यामहेनृप ॥ ७३ ॥ एवंतेविधिरुद्दिष्टोमयायंकुरुसत्तम ॥ देवगन्धर्वयक्षाणांसर्वदादुर्लभोह्यसौ ॥ ७४ ॥
एवंयोवेत्तितत्त्वेनयश्चपश्यतिमण्डलम् ॥ यश्चेमंशृणुयाच्चैवसर्वेमुक्ताइतिश्रुतिः ॥ ७५ ॥ अतःपरंप्रवक्ष्यामिरहस्यमिदमुत्तमम् ॥ येनलक्ष्मीर्धृ
तिस्तुष्टिःपुष्टिश्चापिभवेन्नृणाम् ॥ ७६ ॥ सर्वेग्रहास्सदासौम्याजायन्तेयेनपार्थिव ॥ आदित्यवारंहस्तेनपूर्वमादायभक्तितः ॥ ७७ ॥ भक्तैकेन
क्षिपेत्तावद्यावत्सप्तचसंख्यया ॥ ततस्तुसप्तमेपूर्णेकुर्याद्ब्राह्मणभोजनम् ॥ ७८ ॥ आदित्यंचैवसौवर्णंकृत्वायत्नेनमानवः ॥ रक्तवस्त्रयुगच्छन्नंछत्रिकां
पादुकेतथा ॥ ७९ ॥ उपानहौचदातव्येस्थापयेत्ताम्रभाजने ॥ घृतेनस्नपनंकृत्वासम्पूर्णाङ्गंद्विजातये ॥ ८० ॥ दापयेत्कृत्यविदुषेब्राह्मणाय
विशेषतः ॥ एवंकृतौफलंतस्यभवेदारोग्यमुत्तमम् ॥ ८१ ॥ द्रव्यसम्पत्समग्राप्तिरितिपौराणिकीक्रिया ॥ अविसंवादिनीचेयंशान्तिपुष्टिप्रदानृणाम्
॥ ८२ ॥ तद्वच्चित्रासुसङ्गृह्यसोमवारंविचक्षणः ॥ रात्रिभक्षःक्षिपेदष्टौसोमवारान्प्रयत्नतः ॥ ८३ ॥ प्रत्येकंब्राह्मणाभोज्यायथाशक्तिविचक्षणाः ॥
नवमेतुततःपूर्णेकुर्याद्ब्राह्मणभोजनम् ॥ ८४ ॥ वस्त्रयुग्मंचदातव्यंततःसोमंप्रदापयेत् ॥ कांस्यभाजनसंस्थंतुक्षीरसम्पूरितंततः ॥ ८५ ॥
तद्वच्छत्रंपादुकेचतथोपानत्समन्वितम् ॥ सम्पूर्णाङ्गायदातव्यंब्राह्मणायविशषतः ॥ ८६ ॥ स्वात्यामङ्गारकंपूज्यक्षपयेन्नक्तभोजनैः ॥ अष्टावे
वंचयावच्चकुर्याद्ब्राह्मणभोजनम् ॥ ८७ ॥ अङ्गारकंचसौवर्णंस्थापितंताम्रभाजने ॥ दापयेद्ब्राह्मणायाथसम्पूर्णाङ्गायचैवहि ॥ ८८ ॥ नक्षत्रानु
क्रमेणैवक्षिपेन्नक्तानिसप्तवै ॥ अष्टमेतुक्रमात्खेटान्सौवर्णान्दापयेद्बुधः ॥८९॥ अग्निकार्यंचकुर्वीतयथादृष्टंविधानतः ॥ एवंकृतेभवेद्यद्वैतन्निबोधनरा
धिप ॥ ९० असौम्याश्चग्रहास्सर्वेसौम्यरूपाभवन्तिच ॥ सर्वेरोगाविनश्यन्तितुष्टिमायान्तिदेवताः ॥ ९१ ॥नविरुन्धन्तितंनागाःपितरस्तर्पितास्त
था॥दुस्स्वप्ननाशोभवतिशृण्वतांपठतांतथा ॥ ९२॥ यदिभौमोरविसुतोभास्करोराहुणासह ॥ केतुश्चमूर्ध्नितिष्ठन्तिरौद्राःपीडाकराग्रहाः ॥ ९३ ॥ अनेन
कृतमात्रेणससौभाग्याभवन्तिहि ॥ यएवंकुरुतेराजन्सदाभक्तिसमन्वितः ॥९४॥ तस्यसानुग्रहाःसर्वेशान्तिंगच्छन्तिनान्यथा ॥ शनैश्चरंराहुकेतूलो
हपात्रेषुविन्यसेत् ॥९५॥ लोहेनकारयेच्चैनान्ब्राह्मणेभ्यश्चदापयेत्॥कृष्णंवस्त्रयुगंदेयमेतेषांप्रीणनायवै ॥ ९६ ॥ सौवर्णाङ्गाश्चदातव्याःशान्तिश्रीविज

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC 0. In Public Domain. Digitization by eGangotri

प्सुभिः॥व्रतान्तेसर्वएतेहिग्रहास्सौवर्णकानृप ॥९७॥ दातव्याःशान्तिमिच्छद्भिर्व्रतान्तेद्विजभोजनम्॥यथाशक्तिदक्षिणाचग्रहाणांप्रीतयेतथा ॥९८॥
अल्पायासेनराजेन्द्रसर्वान्कामानवाप्नुयात्॥ शङ्कराज्ज्ञानमन्विच्छेदारोग्यंभास्करात्तथा ॥९९॥ हुताशनाद्धनंहीच्छेद्गतिमिच्छेज्जनार्दनात् ॥ व्राह्मं
पितामहाच्चैवसर्वजन्तुप्रशान्तिदम्॥१००॥भीष्मउवाच॥यस्त्वयाकथितोयज्ञोयज्वनांतुफलंमहत् ॥तथायुपस्स्वल्पतयाअन्यैःप्राप्तुंनशक्यते॥१॥
स्वल्पायासेनयत्पुण्यंसंवत्सरमुपोषणम् ॥ भवेत्तन्मेमुनिश्रेष्ठकथयस्वमहाफलम् ॥ २ ॥ पुलस्त्यउवाच ॥ इदमर्थंमहाराजश्वेतोराजामहायशाः ॥
वसिष्ठंपृष्टवान्प्रश्नंक्षुधयापीडितोभृशम् ॥ ३ ॥ आसीदिलावृतेवर्षेश्वेतोराजामहाबलः ॥ समहींसकलांजिग्येसद्वीपांसपत्तनाम् ॥ ४ ॥ ब्रह्म
पुत्रोवसिष्ठश्चआसीत्तस्यपुरोहितः ॥ सकदाचिन्नृपश्रेष्ठोजित्वापरमधार्मिकः ॥ ५ ॥ पुरोहितमुवाचेदंवसिष्ठंजपतांवरम् ॥ श्वेतउवाच ॥ भगवन्न
श्वमेधानांसहस्रंकर्तुमुत्सहे ॥६॥ सुवर्णरूप्यरत्नानांदानंकर्तुंद्विजातिषु ॥ पृथिव्यामन्नदानंतुदातुन्नेच्छामिवैगुरो ॥७॥ नान्नेनकिंचिद्दत्तेनद तेहन्निद्विजे
प्रभो ॥ पुलस्त्यउवाच ॥ नकिंचिद्वस्त्विवतिज्ञात्वानदत्तंतत्कदाचन ॥ ८ ॥ रत्नवस्त्रमलङ्कारंग्रामांश्चनगराणिच ॥ अददाद्ब्राह्मणेभ्योऽसौश्वेतोराजा
महायशाः ॥ ९ ॥ नान्नंजलंतेनराज्ञादत्तमासीत्कदाचन ॥ ततोऽश्वमेधैर्बहुभिर्यज्वासौनृपसत्तम ॥ ११० ॥ स्वर्गंगतःपुण्यजिततपस्तस्थावर्बुदत्र
यम् ॥ ब्राह्मींसलोकतांप्राप्तःसर्वालङ्कारभूषितः ॥ ११ ॥ नृत्यन्त्यप्सरसस्तत्रगायन्तेसिद्धयोषितः ॥ तुम्बुरुर्नारदस्तत्रद्वावप्यनुगतौसदा ॥ १२ ॥
अगायेतांमहाप्राज्ञौमुनयश्चतपोऽन्विताः ॥ वेदोक्तमन्त्रैःस्तुन्वन्तिअनेकक्रतुयाजिनम् ॥ १३ ॥ एवंविभवयुक्तस्यराज्ञस्तस्यमहात्मनः ॥ क्षुधयापी
डयतेदेहंतृष्णयाचविशेषतः ॥ १४ ॥ सतयापीडयमानस्तुक्षुधयाराजसत्तमः ॥ विमानेनाप्यसौस्वर्गंत्यक्त्वागाद्दक्षपर्वतम् ॥१५॥ यत्रात्ममूर्तिस्त
त्रागात्पुरादग्धामहावने ॥ तत्रास्थीनिस्वयंगृह्यलिहन्नास्तेसपार्थिवः ॥ १६ ॥ पुनर्विमानमारुह्ययययौनाकंनराधिपः ॥ अथकालेनमहतासराजासं
शितव्रतः ॥ १७ ॥ स्वान्यस्थीनिलिहन्दृष्टोवसिष्ठेनपुरोधसा ॥ उक्तश्चकिन्नुराजेन्द्रस्वास्थिभक्षोनराधिप ॥ १८ ॥ एवमुक्तस्ततोराजावसिष्ठेनम
हर्षिणा ॥ उवाचवचनंचेदंश्वेतोराजाथतंमुनिम् ॥ १९ ॥ भगवंस्तृट्क्षुधार्तोऽहमन्नदानंपुरामया ॥ नदत्तंमुनिशार्दूलतेनमांक्षुत्प्रबाधते ॥ १२० ॥
एवमुक्तस्तदाराज्ञावसिष्ठोमुनिपुङ्गवः ॥ उवाचतंनृपंभूयोवाक्यमेतन्महामुनिः ॥ २१ ॥ किंतेकरोमिराजेन्द्रक्षुधितस्यविशेषतः ॥ वस्तुकस्यापि
किञ्चिद्धिनादत्तमुपतिष्ठति ॥ रत्नहेमप्रदानेनभोगवाञ्जायतेनरः ॥ २२ ॥ अन्नदानप्रदानेनसर्वकामैःप्रदीपितः ॥ तन्नदत्तंत्वयाराजन्स्तोकंमत्वान
राधिप ॥ २३ ॥ श्वेतउवाच ॥ अदत्तस्यचसम्भूतिर्यथाभवतिमेगुरो ॥ वसिष्ठत्वत्प्रसादेनतन्ममाचक्ष्वपृच्छतः ॥ २४ ॥ वसिष्ठउवाच ॥ अस्त्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कंकारणंयेनजायतेनात्रसंशयः ॥ तच्छृणुष्वनरव्याघ्रकथ्यमानंमयातव ॥ २५ ॥ आसीद्राजापुराकल्पेविनीताश्वेतिकीर्तितः ॥ सचाश्वमेधमारे
भयज्ञंकर्तुवरंनृपः ॥ २६ ॥ यजनान्तेद्विजेन्द्रेभ्योदत्तंगोऽश्वादियाचितम् ॥ नान्नंदत्तंतेनकिञ्चित्स्वल्पंमत्वायथात्वया ॥ २७॥ ततःकालेनमहतामृ
तोऽसौजाह्नवीतटे ॥ मायापुर्यांविनीताश्वःसार्वभौमोऽभवन्नृपः ॥ २८ ॥ स्वर्गंचगतवान्सोऽपियथाराजाभवान्प्रभो ॥ असावपिक्षुधाविष्टएवमेवा
गतोऽभवत् ॥ २९ ॥ मर्त्यलोकेनदीतीरेगङ्गायांनीलपर्वते ॥ विमानेनार्कवर्णेनभास्वतादेववन्नृप ॥ १३० ॥ ददर्शतत्स्वकंदेहंतथास्वंचपुरोहितम्॥
होतारंब्राह्मणंनामयजन्तंजाह्नवीतटे ॥ ३१ ॥ तंदृष्ट्वासावपिपुनःपर्यपृच्छद्द्विजोत्तमम् ॥ क्षुधायाःकारणंराजन्सहोतातमुवाचह ॥ ३२ ॥ तिलधेनुं
चवैराजन्घृतधेनुंचसत्तम ॥ जलधेनुंचधेनुंचरसधेनुंचपार्थिव ॥ ३३ ॥ देहिशीघ्रंयेनभवांस्तृट्क्षुधावर्जितोदिवि ॥ रमेतयावदादित्यस्तपतेदिविच
न्द्रमाः ॥ ३४ ॥ एवमुक्तस्ततोराजातंपुनःपृष्टवानिदम् ॥ तिलधेनुस्थितिंब्रूहितथाकृत्वाददाम्यहम् ॥ ३५ ॥ पुरोहितउवाच ॥ विधानंतिलधेनो
स्तुतच्छृणुष्वनराधिप ॥ धेनुस्स्यात्षोडशाढक्याचतुर्भिर्वत्सकोभवेत् ॥ ३६ ॥ इक्षुदण्डमयाःपादादन्ताःपुष्पमयाःशुभाः ॥ नासागन्धमयी
तस्याजिह्वागुडमयीतथा ॥ ३७ ॥ पुच्छेस्रक्कल्पनीयास्याद्घण्टाभरणभूषिता ॥ ईदृशींकल्पयित्वातुस्वर्णशृङ्गींतुकल्पयेत् ॥ ३८ ॥ रौप्यखुरांकांस्य
दोहांपूर्वधेनुविधानतः ॥ कृत्वातांब्राह्मणायाशुदापयेन्मन्त्रतोनप ॥ ३९ ॥ स्थितांकृष्णाजिनेधेनुंवासोभिर्गोपितांशुभाम् ॥ सूत्रेणासूत्रितांकृत्वा
पञ्चरत्नसमन्विताम् ॥ १४० ॥ सर्वौषधिसमायुक्तांमन्त्रपूतांतुदापयेत् ॥ अन्नंमेजायतांसद्यःपानंसर्वरसास्तथा ॥ ४१ ॥ कामान्सम्पा
दयास्माकंतिलधेनोद्विजेऽर्पिता ॥ गृह्णामिदेवित्वांभक्त्याकुटुम्बार्थेविशेषतः ॥ ४२ ॥ देहिकामान्वितान्सर्वांस्तिलधेनोनमोऽस्तुते ॥ एवंविधान
तोदत्तातिलधेनुर्नृपोत्तम ॥ ४३ ॥ सर्वकामसमावाप्तिंकुरुतेनात्रसंशयः ॥ जलधेनुस्तथैवेहकुम्भैरेवप्रकल्पिता ॥ ४४ ॥ दत्तातुविधिनाकामा
न्सद्यःसर्वान्प्रयच्छति॥धेनुशतंतथादत्तंपूर्णिमानियमेनहि ॥४५॥ सावित्रीइववैस्वर्गेसर्वकामप्रदाभवेत्॥घृतधेनुस्तथादत्ताविधानेनविचक्षणैः॥४६॥
सर्वकामसमावाप्तिंकुरुतेकान्तिदाभवेत् ॥ रसधेनुस्तथादत्ताकार्तिकेमासिपार्थिव ॥ ४७ ॥ सर्वान्कामान्प्रयच्छेत्तुंनित्यंसागतिदाभवेत् ॥ एतत्तेस
र्वमाख्यातंसमासाद्बहुविस्तरम् ॥४८॥ अपारंफलमुद्दिष्टंब्रह्मणासर्वकर्मणा ॥ तृष्णयाक्षुधयायद्वापीडितोराजसत्तम ॥ ४९ ॥ तद्दानंकार्तिकेदेयंपूर्वं
देहिनराधिप॥ब्रह्माण्डंसर्वसम्पन्नंभूतरत्नौषधीयुतम् ॥१५०॥ देवदानवयक्षैश्चयुक्तमेतत्सदाविभो॥एतत्तुसकलंकृत्वासर्वतोरजतान्वितम् ॥५१॥ सुरत्न
सूर्यचन्द्राढ्यंकार्तिकेद्वादशीदिने ॥ अथवापञ्चदश्यांतुकार्तिकस्यैवनान्यतः ॥५२ ॥ पुरोहितायगुरवेदापयेद्भक्तिमान्नरः ॥ ब्रह्माण्डोदरवर्तीनियानि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूतानिपार्थिव ॥५३॥ तानिदत्तानिवैतेनसमासात्कथितंतव ॥ यद्यज्ञैर्यजतोराजन्समाप्तवरदक्षिणैः॥५४॥सर्वफलंतत्खण्डस्यब्रह्माण्डस्यविशेषतः ॥
यःपुनःसकलंचेदंब्रह्माण्डंप्रदिशेन्नरः ॥५५॥ तेनजप्तंहुतंदत्तंपठितंकीर्तितंभवेत् ॥ राजोवाच ॥ विधिंब्रह्माण्डदानस्यकृत्वातन्मोक्षभाग्भवेत् ॥५६॥
कालंदेशंविप्रतीर्थंसर्वंत्वंवदमेऽनघ ॥ कृतेनयेनसर्वस्यफलभागीभवाम्यहम् ॥५७॥ कुत्सितस्यास्यभावस्यक्षमस्मास्यादचिराच्चमे॥वसिष्ठउवाच ॥
एवंश्रुत्वाततोराजन्पुरोधास्तस्यसद्विजः ॥ ५८ ॥ ब्रह्माण्डंकारयामाससौवर्णंसर्वधातुभिः ॥ युतंनिष्कसहस्रेणपद्मंतत्रह्यकल्पयत् ॥ ५९ ॥तत्रब्रह्मा
तस्यमध्येपद्मरागैरलङ्कृतः ॥ सावित्र्याचैवगायत्र्याऋषिभिर्मुनिभिःसह ॥ १६० ॥ नारदाद्याःसुताःसर्वइन्द्राद्याश्चदिवौकसः ॥ सौवर्णविग्रहाः
सर्वेब्रह्मणस्तुपुरःसराः ॥६१॥ वराहरूपीभगवाँल्लक्ष्म्यासहसनातनः ॥ नीलंमरकतंचैवभूषायांतस्यकारयेत् ॥६२॥ गोमेदैस्तस्यवैशोभांकारयेतच
बुद्धिमान्॥मौक्तिकैश्चापिसोमस्यशोभांवज्रैर्दिवाकरे ॥६३॥ ग्रहाणांचैवसर्वेषांसुवर्णानिचदापयेत्॥स्वर्णात्सप्तगुणंरौप्यंरौप्यात्ताम्रंतथाविधम् ॥६४॥
ततःसप्तगुणंकायकांस्यंसप्तगुणंतथा ॥ कांस्यात्सप्तगुणंकार्यंत्रपुचैवनराधिप ॥६५॥ त्रपुसप्तगुणंसीसंसीसाल्लोहंचकारयेत ॥ सप्तद्वीपास्समुद्राश्चसप्त
वैकुलपर्वताः ॥ ६६ ॥ अनयासङ्कचयाकृत्वानिपुणैःशिल्पिभिस्ततः ॥ पादपादीनिभूतानिराजतान्येवकारयेत् ॥ ६७ ॥ आरण्यानिचसत्त्वानि
सौवर्णानिचकारयेत् ॥ वृक्षान्वनस्पतीन्गुल्मतृणपर्णानिवीरुधः ॥ ६८ ॥ सर्वप्रकल्प्यविधिवत्तीर्थेदेयंविचक्षणः ॥ कुरुक्षेत्रेगयायांचप्रयागेऽमरक
ण्टके ॥ ६९ ॥ द्वारवत्यांप्रभासेचगङ्गाद्वारेचपुष्करे ॥ तीर्थेष्वेतेषुवैदेयंग्रहणेशशिसूर्ययोः ॥ १७० ॥ दिनच्छिद्रेषुसर्वेषुअयनेदक्षिणोत्तरे ॥
व्यतीपातेबहुगुणंविषुवेचविशेषतः ॥ ७१ ॥ दातव्यमेतद्राजेन्द्रविचारंनैवकारयेत् ॥ शालाग्निहोत्रिणंकृत्वासुरूपंचगुणान्वितम् ॥ ७२ ॥ सपत्नी
कंचसम्पूज्यभूषयित्वाचभूषणैः ॥ पुरोहितंमुख्यतमंकृत्वान्येचतथाद्विजाः ॥ ७३ ॥ चतुर्विंशद्गुणोपेताःसपत्नीकानिमन्त्रिताः ॥ अङ्गुलीयानि
चतथाकर्णवेष्टंचदापयेत् ॥ ७४ ॥ एवंविधांस्तुतान्पूज्यतेषामग्रेसुसंस्थितः ॥ अष्टाङ्गप्रणिपातेनप्रणम्यचपुनःपुनः ॥ ७५ ॥पुरोहितायपुरतःकृत्वा
वैकरसम्पुटम् ॥ यूयंवैब्राह्मणाःप्रीतामैत्रत्वेनानुगृह्णत ॥ ७६ ॥ सौमुख्येनद्विजश्रेष्ठाभूयःपूततरस्त्वह ॥ भवतांप्रीतियोगेनस्वयंप्रीतःपितामहः
॥ ७७ ॥ ब्रह्माण्डेनतुदत्तेनतोषंयातुजनार्दनः ॥ पिनाकपाणिभगवाञ्शक्रश्चत्रिदशेश्वरः ॥ ७८ ॥ एतेतोषंसमायान्तुअनुध्यानाद्विजोत्तमाः ॥
एवंस्तुत्वाततोराजाब्राह्मणान्वेदपारगान् ॥ ७९ ॥ ब्रह्माण्डंतुगुरोःप्रादात्सविधानंपुनःक्षणात् ॥ सर्वकामैस्ततस्तृप्तोययौस्वर्गंनराधिपः ॥ १८० ॥
तेनैवगुरुणातच्चविभक्तंब्राह्मणैःसह ॥ दत्तंतेनापिचान्येभ्योब्रह्माण्डंचनराधिप ॥ ८१ ॥ ब्रह्माण्डेभूमिदानेचग्राहीचैकोनवैभवेत् ॥ गृह्णन्दोषमवाप्नो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिब्रह्महत्यांनसंशयः ॥ ८२ ॥ सर्वेषांचैवप्रत्यक्षंदातव्यंपरिकीर्त्यवै ॥ दीयमानंचपश्यन्तितेऽपिपूताभवन्तिहि ॥ ८३ ॥ दर्शनादेवते
मुक्ताभवन्त्येवनसंशयः ॥ याभीमद्वादशीप्रोक्तास्वर्णतोयंमृगाजिनम् ॥ ८४ ॥ एतानिकृत्वापश्यन्तुदृष्टैरेतैःक्रियाफलम् ॥ अयत्नादेव
लभ्येतकर्तुश्चैवसलोकता ॥ ८५ ॥ सदागावःप्रणम्याश्चमन्त्रेणानेनपार्थिव ॥ नमोगोभ्यःश्रीमतीभ्यःसौरभेयीभ्यएवच ॥ ८६ ॥ नमो
ब्रह्मसुताभ्यश्चपवित्राभ्योनमोनमः ॥ मन्त्रस्यचास्यस्मरणाद्गोदानफलमाप्नुयात् ॥ ८७ ॥ तस्मात्त्वमपिराजेन्द्रपुष्करेतीर्थउत्तमे॥कार्तिक्यांतु
विशेषेणगोदानफलमाप्स्यसि ॥ ८८ ॥ यत्किञ्चिद्क्रियतेपापंस्त्रियोवापुरुषस्यवा ॥ पुष्करेस्नानमात्रेणतदशेषंप्रणश्यति ॥ ८९ ॥ पृथिव्यांया
नितीर्थानिआसमुद्रात्तुभारत ॥ पुष्करेतान्युपायान्तिकार्तिक्यांतुविशेषतः ॥ १९० ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेब्रह्माण्डदानंनामषड्त्रिंश
त्तमोऽध्यायः ॥ ३६ ॥ भीष्मउवाच ॥ उक्तंभगवतासर्वपुराणाश्रयसंयुतम् ॥ तथाश्वेतेनब्रह्माण्डंगुरवेप्रतिपादितम् ॥ १ ॥ श्रुत्वैतत्कौतुकंजा
तंयथातेनास्थिलेहनम् ॥ कृतंक्षुधापनोदार्थेअन्नदानाद्विनाद्विज ॥ २ ॥ तदहंश्रोतुमिच्छामिपृथिव्यांयेचपार्थिवाः ॥ अन्नदानाद्दिवंप्राप्ताःकृतवश्चा
न्नमूलकाः ॥ ३ ॥ कथंतस्यमतिर्नष्टाश्वेतस्यचमहात्मनः ॥ नदत्तंतेनान्नदानमृषिभिर्वानदर्शितम् ॥ ४ ॥ अहोमाहात्म्यमन्नस्यइहदत्तस्यय
त्फलम् ॥ परत्रभुज्यतेपुम्भिःस्वर्गश्चाक्षयतांव्रजेत् ॥ ५ ॥ अन्नदानंपरंविप्राःकीर्तयन्तिसदोत्थिताः ॥ अन्नदानात्सुरेन्द्रेणत्रैलोक्यमिहभुज्यते
॥ ६ ॥ शतक्रतुरितिप्रोक्तःसर्वैरेवद्विजोत्तमैः ॥ तेनावस्थांतत्सदृशींप्राप्तवांस्त्रिदशेश्वरः ॥ ७ ॥ दानादेवगतःस्वर्गंत्वत्तःसर्वंश्रुतंमया ॥ अप
रंचपुरावृत्तंनिवृत्तंयदिकर्हिचित् ॥ ८ ॥ भूयोऽपिश्रोतुमिच्छामितन्मेवदमहामत ॥ पुलस्त्यउवाच ॥ एतदाख्यानकंपूर्वमगस्त्येनमहात्मना
॥ ९ ॥ रामायकथितंराजंस्तत्तेवक्ष्यामिसाम्प्रतम् ॥ भीष्मउवाच ॥ कस्मिन्वंशेसमुत्पन्नोरामोऽसौनृपसत्तमः ॥ १० ॥ यस्यागस्त्येनकथित
श्चेतिहासःपुरातनः ॥ पुलस्त्यउवाच ॥ रघुवंशेसमुत्पन्नोरामोनाममहाबलः ॥ ११ ॥ देवकार्यंकृतंतेनलङ्कायांरावणोहतः ॥ पृथिवीराज्यसंस्थ
स्यऋषयोऽभ्यागतागृहे ॥ १२ ॥ प्राप्तास्तेतुमहात्मानोराघवस्यनिवेशनम् ॥ प्रतीहारस्ततोराममगस्त्यवचनाद्गुतम् ॥ १३ ॥ आवेदया
मासऋषीन्प्राप्तांस्तांश्चत्वरान्वितः ॥ दृष्ट्वारामंद्वारपालःपूर्णचन्द्रमिवोदितम् ॥ १४ ॥ द्वारपालउवाच ॥ कौसल्यासुतभद्रंतेसुप्रभाताद्यशर्वरी ॥
द्रष्टुमभ्युदयन्तेऽद्यसम्प्राप्तोरघुनन्दन ॥ १५ ॥ अगस्त्योमुनिभिःसार्धंद्वारितिष्ठतितेनृप ॥ पुलस्त्यउवाच ॥ श्रुत्वाप्राप्तान्मुनीन्रामस्तान्भास्कर
समद्युतीन् ॥ १६ ॥ प्राहवाक्यंतदाद्वाःस्थंप्रवेशयत्वरान्वितः ॥ किमर्थंतुत्वयाद्वारिनिरुद्धामुनिसत्तमाः ॥ १७ ॥ रामवाक्यान्मुनींस्तांस्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रावेशयद्यथासुखम् ॥ दृष्ट्वातुतान्मुनीन्प्राप्तान्प्रत्युवाचकृताञ्जलिः ॥ १८ ॥ रामोऽभिवाद्यप्रणतआसनेषुन्यवेशयत् ॥ तेतुकाञ्चनचित्रेषुस्वा
स्तीर्णेषुसुखेषुच ॥ १९ ॥ कुशोत्तरेषुचासीनाःसमन्तान्मुनिपुङ्गवाः ॥ पाद्यमाचमनीयंचददौचार्घ्यंपुरोहितः ॥ २० ॥ रामेणकुशलंपृष्टाऋषयः
सर्वएवते ॥ महर्षयोवेदविदइदंवचनमब्रुवन् ॥ २१ ॥ ऋषयऊचुः॥कुशलंनोमहाबाहोसर्वत्ररघुनन्दन ॥ त्वांतुदिष्ट्याकुशलिनंपश्यामोहत
विद्विषम् ॥ २२ ॥ हृतासीताऽतिपापेनरावणेनदुरात्मना ॥ पत्नीतेरघुशार्दूलतस्याएवौजसाहतः ॥ २३ ॥ असहायेनचैकेनत्वया
रामरणेहतः ॥ यादृशंतेकृतंकर्मतस्यकर्तानविद्यते ॥ २४ ॥ इहसम्भाषितुंप्राप्तादृष्ट्वापूताःस्मसाम्प्रतम् ॥ दर्शनात्तवराजेन्द्रसर्वेजातास्तप
स्विनः ॥ २५ ॥ रावणस्यवधात्तेऽद्यकृतमश्रुप्रमार्जनम् ॥ दत्त्वापुण्यामिमांवीरजगत्यभयदक्षिणाम् ॥ २६ ॥ दिष्ट्यावर्धसिका
कुत्स्थजयेनामितविक्रम ॥ दृष्टस्सम्भाषितश्चासियास्यामश्चाश्रमान्स्वकान् ॥ २७ ॥ अरण्यंतेप्रविष्टस्यमयाचेन्द्रशरासनम् ॥ अर्पितंचाक्षयौतू
णौकवचंचपरन्तप ॥ २८ ॥ भूयोऽप्यागमनंकार्यमाश्रमेमेरघूद्वह ॥ पुलस्त्यउवाच ॥ एवमुक्त्वातुतेसर्वेमुनयोऽन्तर्हिताभवन् ॥ २९ ॥ गतेषुमु
निमुख्येषुरामोधर्मभृतांवरः ॥ चिन्तयामासतत्कार्यंकिंस्यान्मेमुनिनोदितम् ॥ ३० ॥ भूयोऽप्यागमनंकार्यमाश्रमेरघुनन्दन ॥ अवश्यमेवगन्त
व्यंमयागस्त्यस्यसन्निधौ ॥ ३१ ॥ श्रोतव्यंदेवगुह्यंतुकार्यमन्यच्चयद्वदेत् ॥ एवंचिन्तयतस्तस्यरामस्यामिततेजसः ॥ ३२ ॥ करिष्येनियतं
धर्मंधर्मोहिपरमागतिः ॥ सतुवर्षसहस्राणिदशराज्यमकारयत् ॥ ३३ ॥ ददतोजुह्वतश्चैवजग्मुस्तान्येकवर्षवत् ॥ प्रजाःपालयतस्तस्यराघव
स्यमहात्मनः ॥ ३४ ॥ एतस्मिन्नेवदिवसेवृद्धोजानपदोद्विजः ॥ मृतंपुत्रमुपादायराजद्वारमुपागतः ॥ ३५ ॥ उवाचविविधंवाक्यंस्नेहाक्षर
समन्वितम् ॥ ब्राह्मणउवाच ॥ दुष्कृतंकिन्नुमेपुत्रपूर्वदेहान्तरेकृतम् ॥ ३६ ॥ त्वामेकपुत्रंयदहंपश्यामिनिधनंगतम् ॥ अप्राप्तयौवनंबालंपञ्चवर्ष
गतायुषम् ॥ ३७ ॥ अकालेकालमापन्नंदुःखायममपुत्रक ॥ अकृत्वापितृकार्याणिगतोवैवस्वतक्षयम् ॥ ३८ ॥ रामस्यदुष्कृतंव्यक्तंयेनतेमृ
त्युरागतः ॥ बालवध्याब्रह्मवध्यास्त्रीवध्याचैवराघवम् ॥ ३९ ॥ प्रवेक्ष्यतिनसन्देहःसभार्येतुमृतेमयि ॥ पुलस्त्यउवाच ॥ शुश्रावराघवःसर्वं
दुःखशोकसमन्वितम् ॥ ४० ॥ निवार्यतंद्विजंरामोवसिष्ठंवाक्यमब्रवीत् ॥ रामउवाच ॥ किंमयाद्यचकर्तव्यंकार्यमेवंविधेस्थिते ॥ ४१ ॥ प्रा
णानहंजुहोम्यग्नौपर्वताद्वापतेह्यहम् ॥ कथंशुद्धिमहंयामिश्रुत्वाब्राह्मणभाषितम् ॥ ४२ ॥ पुलस्त्यउवाच ॥ वसिष्ठस्याग्रतःस्थित्वाराज्ञोदीनस्यनार
दः ॥ प्रत्युवाचश्रुतंवाक्यमृषीणांसन्निधौतदा ॥ ४३ ॥ नारदउवाच ॥ शृणुरामयथाऽकालेप्राप्तोवैबालसंक्षयः ॥ पुराकृतयुगेरामसर्वत्रब्राह्मणोत्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रम् ॥ ४४ ॥ अब्राह्मणोनवैकश्चित्तपस्तपतिराघव ॥ अमृत्यवस्तदासर्वेजायन्तेचिरजीविनः ॥ ४५ ॥ त्रेतायुगेपुनःप्राप्तेब्रह्मक्षत्रमनुत्तमम् ॥ अध
र्मोद्वापरेतेषांवैश्याञ्शूद्रांस्तथाविशत् ॥ ४६ ॥ एवंनिरन्तरंजुष्टमुद्भूतमनृतंपुनः ॥ अधर्मस्यत्रयःपादाएकोधर्मस्यचागतः ॥ ४७ ॥ ततःसर्वेभृशं
त्रस्तावर्णाब्राह्मणपूर्वकाः ॥ भूयःपादस्तुधर्मस्यद्वितीयःसमपद्यत ॥४८॥ तस्मिन्द्वापरसंज्ञेतुतपोवैश्यंसमाविशत् ॥ युगत्रयस्यवैधर्म्यंधर्मस्यप्रतिति
ष्ठति ॥ ४९ ॥ कलिसंज्ञेततःप्राप्तेवर्तमानेयुगेऽन्तिमे ॥ अधर्मश्चानृतंचैववववृधातेनरर्षभ ॥ ५० ॥ नशूद्रोलभतेकर्तुंतपउग्रंनरर्षभ ॥ भविताशूद्रयो
न्यांतुतपश्चर्याकलौयगे ॥ ५१ ॥ सतेविषयपर्यन्तेराजन्नुग्रतरन्तपः ॥ शूद्रस्तपतिदुर्बुद्धिस्तेनबालवधःकृतः ॥ ५२ ॥ यस्याधर्ममकार्यंवाविषयेपा
र्थिवस्यहि ॥ पुरेवाराजशार्दूलकुरुतेदुर्मतिर्नरः ॥ ५३ ॥ क्षिप्रंसनरकंयातियावदाभूतसम्प्लवम् ॥ चतुर्थंतस्यपापस्यभागमश्नातिपार्थिवः ॥५४॥
सत्वंपुरुषशार्दूलगच्छस्वविषयंस्वकम् ॥ दुष्कृतंयत्रपश्येथास्तत्रयत्नंसमाचर ॥ ५५ ॥ एवंतेधर्मवृद्धिश्चबलस्यवर्धनंतथा ॥ भविष्यतिनरश्रे
ष्ठबालस्यास्यचजीवनम् ॥ ५६ ॥ पुलस्त्यउवाच ॥ नारदेनैवमुक्तस्तुसाश्चर्योरघुनन्दनः ॥ प्रहर्षमतुलंलेभेलक्ष्मणंचेदमब्रवीत् ॥ ५७ ॥ राम
उवाच ॥ गच्छसौम्यद्विजश्रेष्ठंसमाश्वासयलक्ष्मण ॥ बालस्यचशरीरंत्वंतैलद्रोण्यांनिधापय ॥ ५८ ॥ गन्धैश्चपरमोदारैस्तैलैश्चैवसुगन्धिभिः ॥
यथानशीर्यतेबालस्तथासौम्यविधीयताम् ॥ ५९ ॥ यथाशरीरंगुप्तंस्याद्बालस्याक्लिष्टकर्मणः ॥ विपत्तिःपरिभेदोवानभवेत्तत्तथाकुरु ॥ ६० ॥
पुलस्त्यउवाच॥तथासन्दिश्यसौमित्रिंलक्ष्मणंशुभलक्षणम् ॥ मनसापुष्पकंदध्यावागच्छेतिमहायशाः ॥६१॥ इङ्गितंतत्तुविज्ञायकामगंहेमभूषितम् ॥
आजगाममुहूर्तात्तुसमीपंराघवस्यहि ॥ ६२ ॥ सोऽब्रवीत्प्राञ्जलिर्वाक्यमहमस्मिनराधिप ॥ अग्रेतवमहाबाहोकिङ्करःसमुपस्थितः ॥ ६३ ॥
भाषितंसुचिरंश्रुत्वापुष्पकस्यनराधिप ॥ अभिवाद्यमहर्षींस्तान्विमानंसोऽध्यरोहत ॥ ६४ ॥ धनुर्गृहीत्वातूणौचखड्गंचापिमहाप्रभम् ॥ नि
क्षिप्यनगरेवीरौसौमित्रिभरतावुभौ ॥ ६५ ॥ प्रायात्प्रतीचींत्वरितोविचिन्वन्सुसमाहितः ॥ उत्तरामगमत्पश्चाद्दिशंहिमवदाश्रिताम् ॥ ६६ ॥
पूर्वामपिदिशांगत्वातथापश्यन्नराधिपः ॥ सर्वांशुद्धसमाचारामादर्शमिवनिर्मलाम् ॥ ६७ ॥ ततोदिशंसमाक्रामद्दक्षिणांरघुनन्दनः ॥ शैल
स्यचोत्तरेपार्श्वेददर्शसुमहत्सरः ॥ ६८ ॥ तस्मिन्सरसितप्यन्तंतापसंसुमहत्तपः ॥ ददर्शराघवोभीमंलम्बमानमधोमुखम् ॥ ६९ ॥ तमुपा
गम्यकाकुत्स्थस्तप्यमानंतुतापसम् ॥ उवाचराघवोवाक्यंधन्यस्त्वमसरप्रभ ॥ ७० ॥ कस्यांयोनौतपोवृद्धिर्वर्ततेदृढनिश्चय ॥ अहंदाश
रथीरामःपृच्छामित्वांकुतूहलात् ॥ ७१ ॥ कोऽर्थोव्यवसितस्तुभ्यंस्वर्गलोकोऽथवेतरः ॥ किमर्थंतप्यसेवात्वंश्रोतुमिच्छामितापस ॥ ७२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्राह्मणोवासिभद्रंतेक्षत्रियोवाथदुर्जयः ॥ वैश्यस्तृतीयवर्णोवाशूद्रोवासत्यमुच्यताम् ॥ ७३ ॥ तपःसत्यात्मकंनित्यंस्वर्गलोकपरिग्रहे ॥
सात्विकंराजसंचैवतच्चसत्यात्मकंतपः ॥ ७४ ॥ जगदुपकारहेतुर्हिसृष्टंतद्वैविरिञ्चिना ॥ रौद्रंक्षत्रियतेजोजंतत्तुराजसमुच्यते ॥ ७५ ॥ पर
स्योत्सादनार्थायतच्चासुरमुदाहृतम् ॥ अज्ञानिनिहुतेयोवाअसृग्दिग्धानिभागशः ॥ ७६ ॥ पञ्चाग्निंसाधयेद्वापिसिद्धिंवामृत्युमेववा ॥ आ
सुरोह्येषतेभावोनचमेत्वंद्विजोमतः ॥ ७७ ॥ सत्यंतेवदतःसिद्धिरनृतेनास्तिजीवितम् ॥ तस्यतद्भाषितंश्रुत्वारामस्याक्लिष्टकर्मणः ॥ ७८ ॥
अवाक्छिरास्तथाभूतोवाक्यमेतदुवाचह ॥ शूद्रतापसउवाच ॥ स्वागतंतेनृपश्रेष्ठचिराद्दृष्टोऽसिराघव ॥ ७९ ॥ पुत्रभूतोऽस्मितेचाहंपितृभूतोऽ
सिमेऽनघ ॥ अथवानैतदेवंहिसर्वेषांनृपतिःपिता ॥ ८० ॥ सत्वमर्च्योऽसिभोराजन्वयंतेविषयेतपः ॥ चरामस्तत्रभागोऽस्तिपूर्वसृष्टःस्वय
म्भुवा ॥ ८१ ॥ नधन्याःस्मोवयंरामधन्यस्त्वमसिपार्थिव ॥ यस्यतेविषयेह्येवंसिद्धिमिच्छन्तितापसाः ॥ ८२ ॥ तपसात्वंमदीयेनसिद्धिमाप्नुहिरा
घव ॥ यदेतद्भवताप्रोक्तंयोनौकस्यांतुतेतपः ॥ ८३ ॥ शूद्रयोनिप्रसूतोऽहंतपउग्रंसमास्थितः ॥ देवत्वंप्रार्थयेरामस्वशरीरेणसुव्रत ॥ ८४ ॥ नमिथ्या
हंवदेभूपदेवलोकजिगीषया॥शूद्रंमांविद्धिकाकुत्स्थशम्बूकंनामनामतः॥८५॥पुलस्त्यउवाच॥भाषतस्तस्यकाकुत्स्थःखड्गंतुरुचिरप्रभम्॥निष्कृष्यको
शाद्विमलंशिरश्चिच्छेदराघवः ॥ ८६ ॥ तस्मिञ्छूद्रेहतेदेवाःसेन्द्राश्चाग्निपुरोगमाः ॥ साधुसाध्वितिकाकुत्स्थंप्रशशंसुर्मुहुर्मुहुः ॥ ८७ ॥ पुष्प
वृष्टिश्चमहतीदेवानांसुसुगन्धिनी ॥ आकाशाद्विप्रमुक्तातुराघवंसर्वतोऽकिरत् ॥ ८८ ॥ सुप्रीताश्चाब्रुवन्देवारामंवाक्यविदांवरम् ॥ देवाऊचुः ॥
सुरकार्यमिदंसौम्यकृतंतेरघुनन्दन ॥ ८९ ॥ गृहाणचवरंरामयमिच्छसिमहाव्रत ॥ पुलस्त्यउवाच ॥ देवानांभाषितंश्रुत्वाराघवःसुसमाहितः
॥ ९० ॥ उवाचप्राञ्जलिर्वाक्यंसहस्राक्षंपुरन्दरम् ॥ रामउवाच ॥ यदिदेवाःप्रसन्नामेवरार्होयदिवाप्यहम् ॥ ९१ ॥ कर्मणायदिमेप्रीताद्विजपुत्रः
सजीवतु ॥ वरमेतद्धिभवतांकाङ्क्षितंपरमंहिमे ॥ ९२ ॥ ममापराधाद्बालोऽसौब्राह्मणस्यैकपुत्रकः ॥ अप्राप्तकालःकालेननीतोवैवस्वतक्षयम्
॥ ९३ ॥ तंजीवयतभद्रंवोनानृतीस्यामहंगुरोः ॥ द्विजस्यसंश्रुतोह्यर्थोजीवयिष्यामितेसुतम् ॥ ९४ ॥ मदीयेनायुषाबालंपादेनार्द्धेनवा
सुराः ॥ जीवेदयंवरोमह्यंवरकोटयधिकोवृतः ॥ ९५ ॥ पुलस्त्यउवाच ॥ राघवस्यतुतद्वाक्यंश्रुत्वाविबुधसत्तमाः ॥ प्रत्यूचुस्तेमहात्मानं
प्रीताःप्रीतिसमन्विताः ॥ ९६ ॥ देवाऊचुः ॥ निर्वृतोभवकाकुत्स्थब्राह्मणस्यैकपुत्रकः ॥ जीवितंप्राप्तवान्भूयःसमेतश्चापिबन्धुभिः ॥ ९७ ॥
यस्मिन्मुहूर्तेकाकुत्स्थशूद्रोऽयंविनिपातितः ॥ तस्मिन्मुहूर्तेसहसाजीवेनसमयुज्यत ॥ ९८ ॥ स्वस्तिप्राप्नुहिभद्रंतेसाधयामःपरंतप ॥ अग-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्त्यस्याश्रमपदेद्रष्टारःस्ममहामुनिम् ॥ ९९ ॥ सतथेतिप्रतिज्ञायदेवानांरघुनन्दनः ॥ आरुरोहविमानंतंपुष्पकंहेमभूषितम् ॥ १०० ॥ इति श्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेशूद्रतापसवधोनामसप्तत्रिंशोऽध्यायः ॥ ३७ ॥ पुलस्त्यउवाच ॥ ततोदेवाःप्रयातास्तेविमानैर्बहुभिस्तदा ॥ रामोऽप्यनुजगामाशुकुम्भयोनेस्तपोवनम् ॥ १ ॥ उक्तंभगवतातेनभूयोऽप्यागमनंकथाः ॥ पूर्वमेवसभायांचयोमांद्रष्टुंसमागतः ॥ २ ॥ तदहंदेवता देशात्तत्कार्यार्थेमहामुनिम् ॥ पश्यामितंमुनिंगत्वादेवदानवपूजितम् ॥ ३ ॥ उपदेशंचमेतुष्टःस्वयंदास्यतिसत्तमः ॥ दुःखीयेनपुनर्म त्र्येनभवामिकदाचन ॥ ४ ॥ पितादशरथोमह्यंकौसल्याजननीतथा ॥ सूर्यवंशेसमुत्पन्नस्तथाप्यवंसुदुःखितः ॥ ५ ॥ राज्यकालेवनेवासो भार्ययाचानुजेनच ॥ हरणंचापिभार्यायारावणेनकृतंमम ॥ ६ ॥ असहायेनतुमयातीर्त्वासागरमुत्तमम् ॥ रुद्धातुतांपुरींसर्वांकृत्वातस्यकुलक्षयम् ॥७॥ दृष्टासीतामयात्यक्तादेवानांतुपुरस्तदा ॥ शुद्धांतांमांतथोचुस्तमयासीतातथागृहम् ॥ ८ ॥ समानीताप्रीतिमतालोकवाक्याद्विसर्जिता ॥ वनेव सतिसादेवीपुरेचाहंवसामिवै ॥ ९ ॥ जातोऽहमुत्तमेवंशउत्तमोऽहंधनुष्मताम् ॥ उत्तमंदुःखमापन्नोहृदयंनैवभिद्यते ॥ १० ॥ वज्रसारस्य सारेणधात्राहंनिर्मितोध्रुवम् ॥ इदानींब्राह्मणादेशाद्भ्रमामिधरणीतले ॥ ११ ॥ तपःस्थितस्तुशूद्रोऽसौमयापापोनिपातितः ॥ देववाक्यात्तु मेभूयःप्राणोमेहृदिसंस्थितः ॥ १२ ॥ पश्यामितंमुनिंवन्द्यंजगतोऽस्यहितेरतम् ॥ दृष्टेनमेतथादुःखंनाशमेष्यतिसत्वरम् ॥ १३ ॥ उदयेन सहस्रांशोर्हिमंयद्वद्विलीयते ॥ तद्वन्मेदुःखसम्प्राप्तिःसर्वथानाशमेष्यति ॥ १४ ॥ दृष्ट्वाचदेवान्सम्प्राप्तानगस्त्योभगवानृषिः ॥ अर्घ्य मादायसुप्रीतःसर्वांस्तानभ्यपूजयत् ॥ १५ ॥ ततगृह्यततःपूजांसम्भाष्यचमहामुनिम् ॥ जग्मुस्तेत्रिदशाहृष्टानाकपृष्ठंसहानुगाः ॥ १६ ॥ गतेषुतेषुकाकुत्स्थःपुष्पकादवरुह्यच ॥ अभिवादयितुंप्राप्तःसोऽगस्त्यमृषिमुत्तमम् ॥ १७ ॥ रामउवाच ॥ सुतोदशरथस्याहंभवन्तम भिवादितुम् ॥ आगतोवैमुनिश्रेष्ठसौम्येनेक्षस्वचक्षुषा ॥ १८ ॥ निर्धूतपापस्त्वांदृष्ट्वाभवामीहनसंशयः ॥ पुलस्त्यउवाच ॥ एतावदुक्त्वासमुनिमभि वाद्यपुनःपुनः ॥ १९ ॥ कुशलंभृत्यवर्गस्यमृगाणांतनयस्यच ॥ भगवद्दर्शनाकाङ्क्षीशूद्रंहत्वात्विहागतः ॥ २० ॥ अगस्त्यउवाच ॥ स्वागतंते रघुश्रेष्ठजगद्वन्द्यसनातन ॥ दर्शनात्तवकाकुत्स्थपूतोऽहंमुनिभिःसह ॥ २१ ॥ त्वत्कृतेरघुशार्दूलगृहाणार्घंमहाद्युते ॥ स्वागतंनरशार्दूलदिष्ट्या प्राप्तोऽसिशत्रुहन् ॥ २२ ॥ त्वंहिनित्यंबहुमतोगुणैर्बहुभिरुत्तमैः ॥ अतस्त्वंपूजनीयोवैममनित्यंहृदिस्थितः ॥ २३ ॥ सुराहिकथयन्तित्वांशूद्र घातिनमागतम् ॥ ब्राह्मणस्यचधर्मेणत्वयावैजीवितःसुतः ॥ २४ ॥ उष्यतांचेहभगवन्सकाशेममराघव ॥ प्रभातेपुष्पकेणासिगन्तायोध्यां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महामते ॥ २५ ॥ इदंचाभरणंसौम्यसुकृतंविश्वकर्मणा ॥ दिव्यंदिव्येनवपुषादीप्यमानंस्वतेजसा ॥ २६ ॥ प्रतिगृह्णीष्वराजेन्द्रमत्प्रियंकुरु
राघव ॥ लब्धस्यहिपुनर्दानेसुमहत्फलमुच्यते ॥ २७ ॥ त्वंहिशक्तःपरित्रातुंसेन्द्रानपिसुरोत्तमान् ॥ तस्मात्प्रदास्येविधिवत्प्रतीच्छस्वनरर्षभ
॥ २८ ॥ पुलस्त्यउवाच ॥ अथोवाचमहाबाहुरिक्ष्वाकूणांमहारथः ॥ कृताञ्जलिर्मुनिश्रेष्ठंस्वंचधर्ममनुस्मरन् ॥ २९ ॥ श्रीरामउवाच ॥ प्रति
ग्रहोवैभगवंस्तवमेऽत्रविगर्हितः ॥ क्षत्रियेणकथंविप्रप्रतिग्राह्यंविजानता ॥ ३० ॥ ब्राह्मणेनतुयद्दत्तंतन्मेत्वंवक्तुमर्हसि ॥ सपुत्रोगृहवान
स्मिसमर्थोऽस्मिमहामुने ॥ ३१ ॥ आपदाचनचाक्रान्तःकथंग्राह्यःप्रतिग्रहः ॥ भार्यामेसुचिरंनष्टानचान्याममविद्यते ॥ ३२ ॥
केवलंदोषभागीचभवामीहनसंशयः ॥ कष्टांचैवदशांप्राप्यक्षत्रियोऽपिप्रतिग्रहम् ॥ ३३ ॥ कुर्वन्नदोषमाप्नोतिमनुरेवात्रकारणम् ॥
वृद्धौचमातापितरौसाध्वीभार्याशिशुःसुतः ॥ ३४ ॥ अप्यकार्यशतंकृत्वाभर्तव्यामनुरब्रवीत् ॥ नाहंप्रतीच्छेविप्रर्षेत्वयादत्तंप्रतिग्रहम्
॥ ३५ ॥ नचमेभवताकोपःकार्योवैमुसुरपूजित ॥ ३६ ॥ अगस्त्यउवाच ॥ नचप्रतिग्रहेदोषोगृहीतपार्थिवैर्नृप ॥ भवान्वैतारणेशक्तस्त्रैलो
क्यस्यापिराघव ॥ ३७ ॥ तारयब्राह्मणंरामविशेषेणतपस्विनम् ॥ तस्मात्प्रदास्यविधिवत्प्रतीच्छस्वनराधिप ॥ ३८ ॥ रामउवाच ॥
क्षत्रियेणकथंविप्रप्रतिग्राह्यंविजानता ॥ ब्राह्मणेनयथादत्तंतन्मेत्वंवक्तुमर्हसि ॥ ३९ ॥ अगस्त्यउवाच ॥ आसन्कृतयुगेरामब्रह्मभूतेपुरा
तने ॥ अपार्थिवाःप्रजाःसर्वाःपुराणांचचतुर्मुखम् ॥ ४० ॥ ताःप्रजादेवदेवेशंराजार्थंसमुपागमन् ॥ सुराणांविद्यतेराजादेवदेवःशतक्रतुः
॥ ४१ ॥ श्रेयसेऽस्मासुलोकेशपार्थिवंकुरुसाम्प्रतम् ॥ यस्मिन्पूजांप्रयुञ्जानाःपुरुषाभुञ्जतेमहीम् ॥ ४२ ॥ ततोब्रह्मासुरश्रेष्ठोलोकपालान्सवास
वान् ॥ समाहूयाब्रवीत्सर्वांस्तेजोभागोऽत्रयुज्यताम् ॥ ४३ ॥ ततोददुर्लोकपालाश्चतुर्भागंस्वतेजसा ॥ अक्षयश्चततोब्रह्मायतोजातोऽक्षयोनृप
॥ ४४ ॥ तंब्रह्मालोकपालानामंशंपुंसामयोजयत् ॥ ततोनृपस्तदातासांप्रजानांक्षेमपण्डितः ॥ ४५ ॥ तत्रैन्द्रेणतुभागेनसर्वानाज्ञा
पयेन्नृपः ॥ वारुणेनचभागेनसर्वान्पुष्णातिदेहिनः ॥ ४६ ॥ कौबेरेणतथांशेनत्वर्थान्दिशतिपार्थिवः ॥ यश्चयाम्योनृपेभागस्तेनशास्ति
चवैप्रजाः ॥ ४७ ॥ तत्रैन्द्रेणभागेननरेन्द्रोऽसिरघूत्तम ॥ प्रतिगृह्णीष्वाभरणंतारणार्थेममप्रभो ॥ ४८ ॥ पुलस्त्यउवाच ततोरामःप्रजाग्राहमुनेर्ह
स्तान्महात्मनः ॥ दिव्यमाभरणंचित्रंप्रदीप्तमिवभास्करम् ॥ ४९ ॥ प्रतिगृह्यततोऽगस्त्याद्राघवःपरवीरहा ॥ निरीक्ष्यसुचिरंकालंविचार्यच
पुनःपुनः ॥ ५० ॥ मौक्तिकानिविचित्राणिधात्रीफलसमानिच ॥ जाम्बूनदनिबद्धानिवज्रविद्रुमनीलकैः ॥ ५१ ॥ पद्मरागैःसगोमेधैर्वैडूर्यैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुष्परागकैः ॥ सुनिबद्धंसुविभक्तंसुकृतंविश्वकर्मणा ॥ ६२ ॥ दृष्ट्वाप्रीतिसमायुक्तोभूयश्चेदंव्यचिन्तयत् ॥ नेदृशानिचरत्नानिमयादृष्टानिकानि
चित् ॥ ६३ ॥ उपशोभानिबद्धानिपृथ्वीमूल्यसमानिच ॥ विभीषणस्यलङ्कायांनदृष्टानिमयापुरा ॥ ६४ ॥ इतिसञ्चिन्त्यमनसाराघव
स्तमृषिंपुनः ॥ आगमंतस्यदिव्यस्यप्रष्टुंसमुपचक्रमे ॥ ६५ ॥ रामउवाच ॥ अत्यद्भुतमिदंब्रह्मन्नप्राप्यंचमहीक्षिताम् ॥ कथंभगवताप्राप्तंकुतोवा
केननिर्मितम् ॥ ६६ ॥ कुतूहलवशाच्चैवपृच्छामित्वांमहामते ॥ करतलेस्थितेरत्नेकरमध्यंप्रकाशते ॥ ६७ ॥ अधमंतद्विजानीयात्सर्वशा
स्त्रेषुगर्हितम् ॥ दिशःप्रकाशयेद्यत्तन्मध्यमंमुनिसत्तम ॥ ६८ ॥ ऊर्ध्वगंत्रिशिखंयत्स्यादुत्तमंतदुदाहृतम् ॥ एतान्युत्तमजातीनिऋषिभिः
कीर्तितानितु ॥ ६९ ॥ आश्चर्याणांबहूनांहिदिव्यानांभगवान्निधिः ॥ एवंवदतिकाकुत्स्थेमुनिर्वाक्यमथाब्रवीत् ॥ ६० ॥ अगस्त्यउवाच ॥
शृणुरामपुरावृत्तंपुरात्रेतायुगेमहत् ॥ द्वापरेसमनुप्राप्तेवनेयदृष्टवानहम् ॥ ६१ ॥ आश्चर्यंसुमहाबाहोनिबोधरघुनन्दन ॥ पुरात्रेतायुगेह्या
सीदरण्यंबहुविस्तरम् ॥ ६२ ॥ समन्ताद्योजनशतंमृगव्याघ्रविवर्जितम् ॥ तस्मिन्निष्पुरुषेऽरण्येचिकीर्षुस्तपउत्तमम् ॥ ६३ ॥ अहमाक्रमितुं
सौम्यतदरण्यमुपागतः ॥ तस्यारण्यस्यमध्यंतुयुक्तंमूलफलैःसदा ६४ ॥ शाकैर्बहुविधाकारैर्नानारूपैःसुकाननैः ॥ तस्यारण्यस्यमध्येतुपञ्चयो
जनमायतम् ॥ ६५ ॥ हंसकारण्डवाकीर्णंचक्रवाकोपशोभितम् ॥ तत्राश्चर्यंमयादृष्टंसरःपरमशोभितम् ॥ ६६ ॥ विसारिकच्छपाकीर्णंबकप
ङ्क्तिगणैर्युतम् ॥ समीपेतस्यसरसस्तपस्तप्तुंगतःपुरा ॥ ६७ ॥ देशंपुण्यमुपेत्यैवंसर्वहिंसाविवर्जितम् ॥ तत्राहमवसंरात्रिंनैदाघींपुरुषर्षभ ॥
॥ ६८ ॥ प्रभातेपुनरुत्थायसरस्तदुपचक्रमे ॥ अथापश्यंशवमहमस्पृष्टजरसंक्वचित ॥ ६९ ॥ तिष्ठन्तंपरयालक्ष्म्यासरसोनातिदूरतः ॥ तदर्थं
चिन्तयानोऽहंमुहूर्तमिवराघव॥७०॥अस्यतीरेनवैप्राणीकोवाप्येषसुरर्षभः ॥ मुनिर्वापार्थिवोवापिकमुनिःपार्थिवोऽपिवा ॥ ७१ ॥ अथवापार्थिवसुत
स्तस्यैवंसम्भवःकृतः ॥ अतीतेऽह्निरात्रौवाप्रातर्वापिमृतोयदि ॥ ७२ ॥ अवश्यंतुमयाज्ञेयासरसोऽस्यविनिष्क्रिया ॥ यावदेवंस्थितश्चाहं
चिन्तयानोरघूत्तम ॥ ७३ ॥ अथापश्यंमुहूर्तात्तुदिव्यमद्भुतदर्शनम् ॥ विमानंपरमोदारंहंसयुक्तंमनोजवम् ॥ ७४ ॥ पुरस्तत्रसहस्रंतुविमानेऽ
प्सरसांनृप ॥ गन्धर्वाश्चैवतत्संख्यारमयन्तिवरंनरम् ॥ ७५ ॥ गायन्तिदिव्यगेयानिवादयन्तितथापरे ॥ अथापश्यंनरंतस्माद्विमानादवरुह्यतु
॥ ७६ ॥ शवमांसंभक्षयन्तंस्नात्वारघुकुलोद्वह ॥ ततोभुक्त्वायथाकामंसमांसंबहुपीवरम् ॥ ७७ ॥ अवतीर्यसरःशीघ्रमारुरोहदिवंपुनः ॥ तमहं
देवसङ्काशंश्रियापरमयान्वितम् ॥ ७८ ॥ भोभोस्वर्गिन्महाभागपृच्छामित्वांकथंत्विदम् ॥ जुगुप्सितस्तवाहारोगतिश्चेयंतवोत्तमा ॥ ७९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदिगुह्यंनचैतत्तेकथयत्वद्यमेभवान् ॥ कामतःश्रोतुमिच्छामिकिमेतत्परमंवचः ॥ ८० ॥ कोभवान्वदसन्देहमाहारश्चविगर्हितः ॥ त्वये
दंभुज्यतेसौम्यकिमर्थंकचवर्तसे ॥ ८१ ॥ कस्यायमैश्वरोभावःशवत्वेनविनिर्मितः ॥ आहारंचकथंनिन्द्यंश्रोतुमिच्छामितत्त्वतः ॥ ८२ ॥ श्रुत्वा
चभाषितंतत्रममरामसतांवर ॥ प्राञ्जलिःप्रत्युवाचेदंसस्वर्गीरघुनन्दन ॥ ८३ ॥ श्वेतउवाच ॥ शृणुष्वाद्ययथावृत्तंममेदंसुखदुःखजम् ॥ कामो
हिदुरतिक्रम्यःशृणुयत्पृच्छसेद्विज ॥८४॥ पुरावैदर्भकोराजापितामेहिमहायशाः॥वासुदेवइतिख्यातस्त्रिषुलोकेषुधार्मिकः ॥८५॥ तस्यपुत्रद्वयंब्रह्मन्द्वा
भ्यांस्त्रीभ्यामजायत॥अहंश्वेतइतिख्यातोयवीयान्सुरथोऽभवत् ॥८६॥ पितर्युपरतेतस्मिन्पौरामामभ्यषेचयन्॥तत्राहंकारयन्राज्यंधर्मेचासंसमाहितः
॥८७॥एवंवर्षसहस्राणिबहूनिसमुपाव्रजन् ॥ ममराज्यंकारयतःपरिपालयतःप्रजाः ॥८८॥ सोऽहंनिमित्तेकस्मिंश्चिद्वैराग्येणद्विजोत्तम ॥ मरणंहृदये
कृत्वातपोवनमुपागमम् ॥८९॥ सोऽहंवनमिदंरम्यंभृशंपक्षिविवार्जितम्॥प्रविष्टस्तपआस्थातुमस्यैवसरसोऽन्तिके ॥९०॥ राज्येऽभिषिच्यसुरथंभ्रातरं
तंनराधिपम् ॥ इदंसरःसमासाद्यतपस्ततंसुदारुणम् ॥ ९१ ॥ दशवर्षसहस्राणितपस्तप्त्वामहावने ॥ शुभंतुभवनंप्राप्तोब्रह्मलोकमनामयम् ॥९२॥ स्व
र्गस्थमपिमांब्रह्मन्क्षुत्पिपासेद्विजोत्तम ॥ अबाधेतांभृशंचाहमभवंव्यथितेन्द्रियः ॥ ९३ ॥ ततस्त्रिभुवनश्रेष्ठमवोचंवैपितामहम् ॥ भगवन्स्वर्गलोकोऽ
यंक्षुत्पिपासाविवर्जितः॥९४॥ कस्येयंकर्मणःपक्तिःक्षुत्पिपासेयतोहिमे ॥ आहारःकश्चमेदेवब्रूहित्वंश्रीपितामह ॥९५ ॥ ततःपितामहःसम्यक्चिरंध्या
त्वामहामुने॥मामुवाचततोवाक्यंनास्तिभोज्यंस्वदेहजम्॥९६॥ऋतेस्वानितुमांसानिभक्षयत्वंतुनित्यशः॥स्वशरीरंत्वयापुष्टंकुर्वतातपउत्तमम् ॥९७॥
नादत्तंजायतेतातश्वेतपश्यमहीतले ॥ आग्रहाद्भिक्षमाणायभिक्षापिप्राणिनेपुरा ॥ ९८ ॥ नहिदत्तागृहेभ्रान्त्यामोहादतिथयेतदा ॥ तेनस्वर्गगतस्या
पिक्षुत्पिपासेतवाधुना ॥ ९९ ॥ सत्वंप्रपुष्टमाहारैःस्वशरीरमनुत्तमम् ॥ भक्षयस्वचराजेन्द्रसातेतृप्तिर्भविष्यति ॥१००॥ एवमुक्तस्ततोदेवंब्रह्माणमह
मुक्तवान् ॥ भक्षितेचस्वकेदेहेपुनरन्यन्नमेविभो ॥ १ ॥ क्षुधानिवारणनवदेहस्यास्यविनोदनम्॥खादामिह्यक्षयंदेवप्रियंमेनहिजायते ॥ २ ॥ ततोऽब्र
वीत्पुनर्ब्रह्मातवदेहोऽक्षयःकृतः ॥ दिनेदिनेतेपुष्टात्माशवःश्वेतभविष्यति ॥ ३ ॥ यावद्वर्षशतंपूर्णंस्वमांसंखादभोनृप ॥ यदागच्छतिचागस्त्यः
श्वेतारण्यंमहातपाः ॥ ४ ॥ भगवानतिदुधर्षस्तदाकृच्छ्राद्विमोक्ष्यसे ॥ सहितारयितुंशक्तःसेन्द्रानपिसुरासुरान्॥५॥ आहारंकुत्सितंचेमंराजर्षेकिंपुन
स्तव ॥ सुरकार्यंमहत्तेनसुकृतंतुमहात्मना ॥ ६ ॥ उदधिंनिर्जलंकृत्वादानवाश्चनिपातिताः ॥ विन्ध्यश्चादित्यविद्वेषाद्वर्धमानोनिवारितः
॥ ७ ॥ लम्बमानामहीचैषागुरुत्वेनाधिवासिता ॥ दक्षिणादिग्दिवंयातात्रैलोक्यंविषमंस्थितम् ॥ ८ ॥ मयागत्वासुरैःसार्द्धंप्रेषितोदक्षिणां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिशम् ॥ समांकुरुमहाभागगुरुत्वेनजगत्समम् ॥९॥ एवंचतेनमुनिनास्थित्वासर्वाधरासमा ॥ कृताराजेन्द्रमुनिनाएवमद्यापिदृश्यते ॥ ११० ॥
सोऽहंभगवतःश्रुत्वादेवदेवस्यभाषितम् ॥ भुञ्जेचकुत्सिताहारंस्वशरीरमनुत्तमम् ॥ ११ ॥ पूर्णवर्षशतंचाद्यभोजनंकुत्सितंचमे ॥ क्षयंनाभ्येति
तद्विप्रतृप्तिश्चापिममोत्तमा ॥ १२ ॥ तंमुनिंकृच्छ्रसन्तप्तश्चिन्तयामिदिवानिशम् ॥ कदावैदर्शनंमह्यंसमुनिर्दास्यतेवने ॥ १३ ॥ एवंमेचि
न्तयानस्यगतंवर्षशतन्त्विह ॥ सोऽगस्त्योहिगतिर्ब्रह्मन्मुनिर्मेभविताध्रुवम् ॥ १४ ॥ नगतिर्भवितामह्यंकुम्भयोनिमृतेद्विजम् ॥ श्रुत्वेत्थंभाषितं
रामदृष्ट्वाहारंचकुत्सितम् ॥ १५ ॥ कृपयापरयायुक्तस्तंनृपंस्वर्गगामिनम् ॥ करोम्यहंसुधाभोज्यंनाशयामिचकुत्सितम् ॥ १६ ॥ चिन्तयन्नित्य
वोचंतमगस्त्यःकिंकरिष्यति ॥ अहमेतत्कुत्सितंतेनाशयामिमहामते ॥ १७ ॥ ईप्सितंप्रार्थयस्वास्मान्मनःप्रीतिकरंपरम् ॥ सस्वर्गीमांततःप्राहक
थंब्रह्मवचोऽन्यथा ॥१८॥ कर्तुंमुनेमयाशक्यंनचान्यस्तारयिष्यति ॥ ऋतेवैकुम्भयोनिंतंमैत्रावरुणसम्भवम् ॥१९॥ अपृष्टोऽपिमयाब्रह्मन्नेवमूचेपिता
महः ॥ एवंब्रुवाणंतंश्वेतमुक्तवानहमस्मिसः ॥ १२० ॥ आगतस्तवभाग्येनदृष्टोऽहंनात्रसंशयः ॥ ततःस्वर्गीसमांज्ञात्वादण्डवत्पतितोभुवि ॥२१॥
तमुत्थाप्यततोरामाब्रवंकिंतेकरोम्यहम् ॥ राजोवाच ॥ आहारात्कुत्सिताद्ब्रह्मंस्तारयस्वाद्यदुष्कृतात् ॥ २२ ॥ येनलोकोऽक्षयःस्वर्गोभवि
तात्वत्कृतेनमे ॥ ततःप्रतिग्रहोदत्तोजगद्वन्द्यनृपेणहि ॥ २३ ॥ भवान्मामनुगृह्णातुप्रतीच्छस्वप्रतिग्रहम् ॥ इदमाभरणंसौम्यतारणार्थंद्विजोत्तम
॥ २४ ॥ ब्रह्मर्षेप्रतिगृह्णीष्वप्रसादंकर्तुमर्हसि ॥ इहगाश्चसुवर्णंचधनंवस्त्रसमन्वितम् ॥ २५ ॥ भक्ष्यंभोज्यंचविप्रर्षेददाम्याभरणंत्वहम् ॥
सर्वकामप्रदंतुभ्यंसर्वान्भोगांश्चतेद्विज ॥ २६ ॥ तारणेतुभवान्मह्यंप्रसादंकर्तुमर्हति ॥ तस्याहंस्वर्गिणोवाक्यंश्रुत्वादुःखसमन्वितम् ॥ २७ ॥
कृतामतिस्तारणायनलोभाद्रघुनन्दन ॥ गृहीतेभूषणेराममसहस्तगतेतदा ॥ २८ ॥ मानुषःपौर्विकोदेहस्तदानष्टोऽस्यभूपते ॥ प्रनष्टेतुशरीरेचराजर्षिः
परयामुदा ॥ २९ ॥ मयोक्तोऽसौविमानेनजगामत्रिदिवंपुनः॥ तेनमेशक्रतुल्येनदत्तमाभरणंशुभम् ॥१३०॥ तस्मिन्निमित्तेकाकुत्स्थदत्तमद्भुतकर्मणा
श्वेतोवैदर्भकोराजातदाभूद्गतकल्मषः ॥ १३१ ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेरामागस्त्यसंवादोनामाष्टात्रिंशोऽध्यायः ॥३८॥ पुलस्त्यउवाच ॥
तदद्भुततमंवाक्यंश्रुत्वाचरघुनन्दनः ॥ गौरवाद्विस्मयाच्चापिभूयःप्रष्टुंप्रचक्रमे ॥ १ ॥ रामउवाच ॥ भगवंस्तद्वनंघोरंयत्रासौतप्तवांस्तपः ॥ श्वेतोवैद
र्भकोराजातदद्भुतमभूत्कथम् ॥ २ ॥ विषमंतद्वनंराजाशून्यंमृगविवर्जितम् ॥ प्रविष्टस्तपआस्थातुंकथंवदमहामुने ॥ ३ ॥ समन्ताद्योजनशतंनिर्म
नुष्यमभूत्कथम् ॥ भवान्कथंप्रविष्टस्तद्येनकार्येणतद्वद ॥ ४ ॥ अगस्त्यउवाच ॥ पुराकृतयुगेराजामनुर्दण्डधरःप्रभुः ॥ तस्यपुत्रोऽथना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आसीदिक्ष्वाकुरमितद्युतिः ॥ ५ ॥ तंपुत्रंपूर्वजंराज्येनिक्षिप्यभुविसंमतम् ॥ पृथिव्यांराजवंशानांभवराजेत्युवाचह ॥ ६ ॥ तथेतिचप्रतिज्ञातंपितुः पुत्रेणराघव ॥ ततःपरमसंहृष्टःपुनस्तंप्रत्यभाषत ॥७॥ मनुरुवाच ॥ प्रीतोऽस्मिपरमोदारकर्मणातेनसंशयः ॥ दण्डेनचप्रजारक्षनचदण्डमकारणम् ॥ ८ ॥ अपराधिषुयोदण्डःपात्यतेमानवैरिह ॥ सदण्डोविधिवन्मुक्तःस्वर्गंनयतिपार्थिवम् ॥ ९ ॥ तस्माद्दण्डेमहाबाहोयत्नवान्भवपुत्रक ॥ धर्मस्तेपरमोलोकेकृतएवंभविष्यति ॥ १० ॥ अगस्त्यउवाच ॥ इतितंबहुसंदिश्यमनुपुत्रंसमाधिना ॥ जगामत्रिदिवंहृष्टोब्रह्मलोकमनुत्तमम् ॥ ११ ॥ जनयिष्येकथंपुत्रानितिचिन्तापरोऽभवत् ॥ कर्मभिर्बहुभिस्तैस्तैस्ससुतैस्संयुतोऽभवत् ॥ १२ ॥ तोषयामासपुत्रैस्सपितॄन्देवसुतोपमैः ॥ सर्वेषामुत्तमस्तेषांकनीयान्रघुनन्दन ॥ १३ ॥ शूरश्चकृतविद्यश्चगुरुश्चजनपूजया ॥ नामतस्याथदण्डेतिपिताचक्रेसबुद्धिमान् ॥ १४ ॥ भविष्यद्दण्डपतनंशरीरेतस्यवीक्ष्यच ॥ सम्पश्यमानस्तंदोषंघोरंपुत्रस्यराघव ॥ १५ ॥ सविन्ध्यनीलयोर्मध्येराज्यमस्यददौप्रभुः ॥ सदण्डस्तत्र राजाभूद्रम्येपर्वतमूर्द्धनि ॥ १६ ॥ पुरंचाप्रतिमंतेननिवेशायतथाकृतम् ॥ नामतस्यपुरस्याथमधुमत्तमितिस्वयम् ॥ १७ ॥ तथादेशेनसम्पन्नः शूरोवासमथाकरोत् ॥ एवंराजासतद्राज्यंचकारसपुरोहितः ॥ १८ ॥ प्रहृष्टसुप्रजाकीर्णंदेवराजोयथादिवि ॥ ततःसदण्डःकाकुत्स्थबहुवर्षगणायुतम् ॥ १९ ॥ अकारयत्तुधर्मात्माराज्यंनिहतकण्टकम् ॥ अथकालेतुकस्मिंश्चिद्राजाभार्गवमाश्रमम् ॥ २० ॥ रमणीयमुपाक्रामच्चैत्रमासेमनोरमे॥ तत्रभार्गवकन्यांतुरूपेणाप्रतिमांभुवि ॥ २१ ॥ विचरन्तींवनोद्देशेदण्डोऽपश्यदनुत्तमाम् ॥ उत्तुङ्गपीवरींश्यामांचन्द्राभवदनांशुभाम् ॥ २२ ॥ सुनासांचारुसर्वाङ्गींपीनोन्नतपयोधराम् ॥ मध्येक्षामांचविस्तीर्णांदृष्ट्वातांकुरुतेमुदम् ॥ २३ ॥ एकवस्त्रांवनेचैकांप्रथमेयौवनेस्थिताम् ॥ सतांदृष्ट्वात्वधर्मेणअनङ्गशरपीडितः ॥ २४ ॥ अभिगम्यसुविश्रान्तांकन्यांवचनमब्रवीत् ॥ दण्डउवाच ॥ कुतस्त्वमसिसुश्रोणिकस्यचासिसुशोभने ॥२५॥ पीडितोऽहमनङ्गेनपृच्छामित्वांसुशोभने ॥ त्वयामेऽपहृतंचित्तंदर्शनादेवसुन्दरि ॥ २६ ॥ इदंतेवदनंरम्यंमुनीनांचित्तहारकम् ॥ यद्यहंनलभेभोक्तुं मृतंमामवधारय ॥ २७ ॥ त्वयाहृताममप्राणामांजीवयसुलोचने ॥ दासोऽस्मितेवरारोहेभक्तंमांभजशोभने ॥ २८ ॥ अगस्त्यउवाच ॥ तस्यैवंतुब्रुवाणस्यमदोन्मत्तस्यकामिनः ॥ भार्गवीप्रत्युवाचेदंवचःसविनयंनृपम् ॥ २९ ॥ अरजोवाच ॥ भार्गवस्यसुतांविद्धिशुक्रस्याक्लिष्टकर्मणः ॥ अरजांनामराजेन्द्रज्येष्ठामाश्रमवासिनः ॥ ३० ॥ शुक्रःपितामेराजेन्द्रत्वंचशिष्योमहात्मनः ॥ धर्मतोभगिनीचाहंभवामि नृपनन्दन ॥ ३१ ॥ एवंविधंवचोवक्तुंनत्वमर्हसिपार्थिव ॥ अन्येभ्योऽपिसुदुष्टेभ्योरक्ष्याचाहंसदात्वया ॥ ३२ ॥ क्रोधनोमेपितारौद्रो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भस्मत्वंत्वांसमानयेत् ॥ अथवाराजधर्मेणासम्बन्धंकुरुषेबलात् ॥ ३३ ॥ पितरंयाचयस्वत्वंधर्मदृष्टेनकर्मणा ॥ वरयस्वनृपश्रेष्ठपितरं
मेमहाद्युतिम् ॥ ३४ ॥ अन्यथाविपुलंदुःखंतवघोरंभवेद्ध्रुवम् ॥ क्रुद्धोहिमेपितासर्वंत्रैलोक्यमभिनिर्दहेत ॥३५॥ अगस्त्यउवाच ॥ ततोऽशुभंमहा
घोरंश्रुत्वादण्डःसुदारुणम् ॥ प्रत्युवाचमदोन्मत्तःशिरसाभिनतःपुनः ॥३६॥ दण्डउवाच ॥ प्रसादंकुरुसुश्रोणिकामोन्मत्तस्यकामिनि ॥ त्वयारुद्धा
ममप्राणाविशीर्यन्तेशुभानने ॥ ३७ ॥ त्वांप्राप्यवैरंमेऽत्रास्तुवधोवापिमहत्तरः ॥ भक्तंभजस्वमांभीरुत्वयिभक्तिर्हिमेपरा ॥ ३८ ॥ अग
स्त्यउवाच ॥ एवमुक्त्वातुतांकन्यांबलात्सङ्गृह्यबाहुना ॥ अन्येनराज्ञाहस्तेनविवस्त्रासातथाकृता ॥ ३९ ॥ अङ्गमङ्गेसमाश्लिष्यमुखेचैवमुखं
कृतम् ॥ विस्फुरन्तींयथाकामंमैथुनायोपचक्रमे ॥ ४० ॥ तमनर्थंमहाघोरंदण्डःकृत्वासुदारुणम् ॥ नगरंस्वंजगामाशुमदोन्मत्तइवद्विपः
॥ ४१ ॥ भार्गवीरुदतीदीनाआश्रमस्याविदूरतः ॥ प्रत्यपालयदुद्विग्नापितरंदेवसम्मितम् ॥ ४२ ॥ समुहूर्तादुपस्पृश्यदेवर्षिरमितद्युतिः ॥
स्वमाश्रमंशिष्यवृतंक्षुधार्तःसन्न्यवर्तत ॥ ४३ ॥ सोऽपश्यदरजांदीनांरजसासमभिप्लुताम् ॥ चन्द्रस्यघनसंयुक्तांज्योत्स्नामिवपराजिताम्
॥ ४४ ॥ तस्यरोषःसमभवत्क्षुधार्तस्यमहात्मनः ॥ निर्दहन्निवलोकांस्त्रींस्ताञ्शिष्यान्समुवाचह ॥ ४५ ॥ भार्गवउवाच ॥ पश्यध्वंविपरीत
स्यदण्डस्यादीर्घदर्शिनः ॥ विपत्तिंघोरसङ्काशांदीप्तामग्निशिखामिव ॥ ४६ ॥ यन्नाशंदुर्गतिंप्राप्तस्सानुगश्चनसंशयः ॥ यस्तुदीप्तहुताश
स्यअर्चिःसंस्पृष्टवानिह ॥ ४७ ॥ यस्मात्सकृतवान्पापमीदृशंघोरसम्मितम् ॥ तस्मात्प्राप्स्यतिदुर्मेधाःपांसुवर्षमनुत्तमम् ॥ ४८ ॥ कुराजा
देशसंयुक्तःसभृत्यबलवाहनः ॥ पापकर्मसमाचारोवधंप्राप्स्यतिदुर्मतिः ॥ ४९ ॥ समन्ताद्योजनशतंविषयंचास्यदुर्मतेः ॥ धुनोतुपांसुवर्षेण
महतापाकशासनः ॥ ५० ॥ सर्वसत्त्वानियानीहजङ्गमस्थावराणिवै ॥ सर्वेषांपांसुवर्षेणक्षयःक्षिप्रंभविष्यति ॥ ५१ ॥ दण्डस्यविषयोयाव
त्तावत्सवनमाश्रमम् ॥ पांसुवर्षमिवाकस्मात्सप्तरात्रंभविष्यति ॥ ५२ ॥ अगस्त्यउवाच ॥ इत्युक्त्वाक्रोधसन्तप्तस्तमाश्रमनिवासिनम् ॥ जनं
जनपदस्यान्तेस्थीयतामित्युवाचह ॥ ५३ ॥ उक्तमात्रेउशनसाआश्रमावसथोजनः ॥ क्षिप्रंतुविषयात्तस्मात्स्थानंचक्रेचबाह्यतः ॥ ५४ ॥
तंतथोक्त्वामुनिजनमरजामिदमब्रवीत् ॥ भार्गवउवाच ॥ आश्रमेत्वंसुदुर्मेधेवसचेहसमाहिता ॥ ५५ ॥ इदं योजनपर्यन्तमाश्रमंरुचिरप्रभम् ॥
अरजेविरजास्तिष्ठकालमत्रसमाश्शतम् ॥ ५६ ॥ अगस्त्यउवाच ॥ श्रुत्वानियोगंविप्रर्षेररजाभार्गवीतदा ॥ तथेतिपितरंप्राहभार्गवंभृशदुःखिता॥
॥ ५७ ॥ इत्युक्त्वाभार्गवोवासंतस्मादन्यमुपाक्रमत् ॥ सप्ताहेभस्मसाद्भूतंयथोक्तंब्रह्मवादिना ॥ ५८ ॥ तस्माद्दण्डस्यविषयोविन्ध्यशैलस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मानुष ॥ शप्तोह्युशनसारामतदाभूद्धर्षणेकृते ॥ ५९ ॥ ततःप्रभृतिकाकुत्स्थदण्डकारण्यमुच्यते ॥ एतत्तेसर्वमाख्यातंयन्मांपृच्छसिराघव
॥ ६० ॥ सन्ध्यामुपासितुंवीरसमयोह्यतिवर्तते ॥ एतेमहर्षयोरामपूर्णकुम्भाःसमन्ततः ॥ ६१ ॥ कृतोदकानरव्याघ्रपूजयन्तिदिवाकरम् ॥
सर्वैर्ऋषिभिरभ्यस्तैःस्तोत्रैर्ब्रह्मादिभिःकृतैः ॥६२॥ रविरस्तंगतोरामगत्वोदकमुपस्पृश ॥ पुलस्त्यउवाच ॥ ऋषेर्वचनमादायरामःसन्ध्यामुपासितुम्
॥ ६३ ॥ उपचक्रामतत्पुण्यंससरोरघुनन्दनः ॥ अथतस्मिन्वनोद्देशेरम्येपादपशोभिते ॥ ६४ ॥ नदीपुण्येगिरिवरेकोकिलाशतमण्डिते ॥ नाना
पक्षिरवोद्यानेनानामृगसमाकुले ॥ ६५ ॥ सिंहव्याघ्रसमाकीर्णेनानाद्विजसमावृते ॥ गृध्रोलूकौप्रवसितौबहून्वर्षगणानपि ॥ ६६ ॥ अथो
लूकस्यभवनंगृध्रःपापविनिश्चयः ॥ ममेदमितिकृत्वासौकलहंतेनचाकरोत् ॥ ६७ ॥ राजासर्वस्यलोकस्यरामोराजीवलोचनः ॥ तंप्रपद्यावहे
शीघ्रंकस्यैतद्भवनंभवेत् ॥ ६८ ॥ गृध्रोलूकौप्रपद्येतांजातकोपावमर्षिणौ ॥ रामंप्रपद्यतौशीघ्रंकलिव्याकुलचेतसौ ॥ ६९ ॥ तौपरस्प
रविद्विषौस्पृशतश्चरणौतथा ॥ अथदृष्ट्वाराघवेन्द्रंगृध्रोवचनमब्रवीत् ॥ ७० ॥ गृध्रउवाच ॥ सुराणामसुराणांचत्वंप्रधानोमतोमम ॥ बृहस्पतेश्च
शुक्राच्चत्वंविशिष्टोमहामतिः ॥ ७१ ॥ परावरज्ञोभूतानांमर्त्येशक्रइवापरः ॥ दुर्निरीक्षोयथासूर्योहिमवानिवगौरवे ॥ ७२ ॥ सागर
श्चासिगाम्भीर्येलोकपालोयमोह्यसि ॥ क्षान्त्याधरण्यातुल्योऽसिशीघ्रत्वेह्यनिलोपमः ॥ ७३ ॥ गुरुस्त्वंसर्वसम्पन्नोविष्णुरूपोऽसिराघव ॥
अमर्षीदुर्जयोजेतासर्वास्त्रविधिपारगः ॥ ७४ ॥ शृणुत्वंममदेवेशविज्ञाप्यंनरपुङ्गव ॥ ममालयंपूर्वकृतंबाहुवीर्येणवैप्रभो ॥ ७५ ॥ उलूको
हरतेराजंस्त्वत्समीपेविशेषतः ॥ ईदृशोऽयंदुराचारस्त्वदाज्ञालङ्घकोनृप ॥ ७६ ॥ प्राणान्तिकेनदण्डेनरामशासितुमर्हसि ॥ एवमुक्तेतु
गृध्रेणउलूकोवाक्यमब्रवीत् ॥ ७७ ॥ शृणुदेवममज्ञाप्यमेकचित्तोनराधिप ॥ सोमाच्छक्राच्चसूर्याच्चधनदाच्चयमात्तथा ॥ ७८ ॥ जायतेवै
नृपोरामकिञ्चिद्भवतिमानुषः ॥ त्वंतुसर्वमयोदेवोनारायणपरायणः ॥ ७९ ॥ प्रोच्यतेसोमताराजन्सम्यक्कार्येविचारिते ॥ सम्यग्रक्षसि
तापेभ्यस्तमोघ्नोहियतोभवान् ॥ ८० ॥ दोषेदण्डात्प्रजानांत्वंयतःपापभयापहः ॥ दाताप्रहर्तागोप्ताचतेनेन्द्रइवनोभवान् ॥ ८१ ॥ अधृ
ष्यःसर्वभूतेषुतेजसाचानलोमतः ॥ अभीक्ष्णंतपसेपापांस्तेनत्वंरामभास्करः ॥ ८२ ॥ साक्षाद्वित्तेशतुल्यस्त्वमथवाधनदाधिकः ॥ वित्ता
यत्तातुपत्नीश्रीर्नित्यंतेराजसत्तम ॥ ८३ ॥ धनदस्यतुकोशेनधनदस्तेनवैभवान् ॥ समःसर्वेषुभूतेषुस्थावरेषुचरेषुच ॥ ८४ ॥ शत्रौमित्रेचतेदृष्टिः
समन्ताद्यातिराघव ॥ धर्मेणशासनंनित्यंव्यवहारविधिक्रमैः ॥ ८५ ॥ यस्यरुष्यसिवैराममृत्युस्तस्याभिधीयते ॥ गीयसेतेनवैराजन्यम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्यभिविश्रुतः ॥ ८६ ॥ यश्चासौमानुषोभावोभवतोनृपसत्तम ॥ आनृशंस्यपरोराजासर्वेषुकृपयान्वितः ॥ ८७ ॥ दुर्बलस्यत्वनाथस्य
राजाभवतिवैबलम् ॥ अचक्षुषोभवेच्चक्षुरमतेषुमतिर्भवेत् ॥ ८८ ॥ अस्माकमपिनाथस्त्वंश्रूयतांममधार्मिक ॥ भवतातत्रमन्तव्यंयथैते
किलपक्षिणः ॥ ८९ ॥ योऽस्मन्नाथःसपक्षीन्द्रोभवतोविनियोज्यकः॥ अस्वाम्यंदेवनास्माकंसन्निधौभवतःप्रभो ॥ ९० ॥ भवतैवकृतंपूर्वंभूतग्रामंचतु
र्विधम् ॥ ममालयप्रविष्टस्तुगृध्रोमांबाधतेनृप ॥ ९१ ॥ भवान्देवमनुष्येषुशास्तावैनरपुङ्गव ॥ पुलस्त्यउवाच ॥ एतच्छ्रुत्वातुवैरामःसचिवानाह्वय
त्स्वयम् ॥ ९२ ॥ विष्टिर्जयन्तोविजयःसिद्धार्थोराष्ट्रवर्धनः ॥ अशोकोधर्मपालश्चसुमन्त्रश्चमहाबलः ॥ ९३ ॥ एतेरामस्यसचिवाराज्ञोदश
रथस्यच ॥ नीतियुक्तामहात्मानःसर्वशास्त्रविशारदाः ॥ ९४ ॥ सुशान्ताश्चकुलीनाश्चनयेमन्त्रेचकोविदाः ॥ तानाहूयसधर्मात्मापुष्पकादव
रुह्यच ॥ ९५ ॥ गृध्रोलूकौविवदन्तौपृच्छतिस्मरघूत्तमः ॥ रामउवाच ॥ कतिवर्षाणिभोगृध्रतवेदंनिलयंकृतम् ॥ ९६ ॥ एतन्मेकौतुकंब्रू
हियदिजानासितत्त्वतः ॥ एतच्छ्रुत्वावचोगृध्रोबभाषेराघवंस्थितम् ॥ ९७ ॥ गृध्रउवाच ॥ इयंवसुमतीरामममानुषैर्बहुबाहुभिः ॥ उच्छ्रितैरा
चितासर्वातदाप्रभृतिमद्गृहम् ॥ ९८ ॥ उलूकस्त्वब्रवीद्राममंपादपैरुपशोभिता ॥ यदैवपृथिवीराजंस्तदाप्रभृतिमेगृहम् ॥ ९९ ॥ एतच्छ्रुत्वातु
रामोवैसभासदउवाचह ॥ १०० ॥ रामउवाच ॥ नसासभायत्रनसन्तिवृद्धाःवृद्धानतेयेनवदन्तिधर्मम् ॥ नासौधर्मोयत्रनचास्तिसत्यंनतत्स
त्यंयच्छलमभ्युपैति ॥ १ ॥ येतुसभ्याःसभांगत्वातूष्णींध्यायन्तआसते ॥ यथाप्राप्तंनब्रुवतेसर्वेतेऽनृतवादिनः ॥ २ ॥ नवक्तिचश्रुतंयश्चका
मक्रोधात्तथाभयात् ॥ सहस्रंवारुणाःपाशाःप्रतिमुञ्चन्तितंनरम् ॥ ३ ॥ तेषांसंवत्सरेपूर्णेपाशएकःप्रमुच्यते ॥ तस्मात्सत्यंतुवक्तव्यंजानतास
त्यमञ्जसा ॥ ४ ॥ एतच्छ्रुत्वातुसचिवाराममेवाब्रुवंस्तदा ॥ उलूकःशोभतेराजन्नतुगृध्रोमहामते ॥ ५ ॥ त्वंप्रमाणंमहाराजराजाहिपरमागतिः ॥
राजमूलाःप्रजाःसर्वाराजाधर्मःसनातनः ॥ ६ ॥ शास्ताराजानृणांयेषांनतेगच्छन्तिदुर्गतिम् ॥ वैवस्वतेनमुक्ताश्चभवन्तिपुरुषोत्तमाः ॥ ७ ॥ सचि
वानांवचःश्रुत्वारामोवचनमब्रवीत् ॥ श्रूयतामभिधास्यामिपुराणंयदुदाहृतम् ॥ ८ ॥ द्यौःसचन्द्रार्कनक्षत्रासपर्वतमहीद्रुमम् ॥ सलिलार्णवसं
मग्नंत्रैलोक्यंसचराचरम् ॥ ९ ॥ एकमेवतदाह्यासीत्सर्वमेकमिवाम्बरम् ॥ पुनर्भूःसहलक्ष्म्याचविष्णोर्जठरमाविशत् ॥ ११० ॥ तांनिगृह्यमहा
तेजाःप्रविश्यसलिलार्णवम् ॥ सुष्वापहिकृतात्मासबहुवर्षशतान्यपि ॥ ११ ॥ विष्णौसुप्तेततोब्रह्माविवेशजठरंततः ॥ बहुस्रोतंचतंज्ञात्वामहा
योगीसमाविशत् ॥ १२ ॥ नाभ्यांविष्णोःसमुद्भूतंपद्मंहेमविभूषितम् ॥ सतुनिर्गम्यवैब्रह्मायोगीभूत्वामहाप्रभुः ॥ १३ ॥ सिसृक्षुःपृथिवींवायुंप

CC-0. In Public Domain. Digitization by eGangotri

वतांश्चमहीरुहान् ॥ तदन्तराःप्रजाःसर्वामानुषांश्चसरीसृपान् ॥ १४ ॥ जरायुजाण्डजान्सर्वान्ससर्जसमहातपाः ॥ तस्यगात्रसमुत्पन्नःकैटभो
मधुनासह ॥ १५ ॥ दानवौतौमहावीर्यौघौरौलब्धवरौतदा ॥ दृष्ट्वाप्रजापतिंतत्रक्रोधाविष्टावुभौनृप ॥ १६ ॥ वेगेनमहताभोक्तुंस्वयम्भु
वमधावताम् ॥ दृष्ट्वासत्त्वानिसर्वाणिनिस्सरन्तिपृथक्पृथक् ॥ १७ ॥ ब्रह्मणासंस्तुतोविष्णुर्हत्वातौमधुकैटभौ ॥ पृथिवींवर्धयामासस्थित्य
र्थंमेदसातयोः ॥ १८ ॥ मेदोगन्धातुधरणीमेदिनीत्यभिधांगता ॥ तस्मान्नगृध्रस्यगृहमुलूकस्यतदाऽभवत् ॥ १९ ॥ तस्माद्गृध्रस्त्वसत्योवै
पापकर्मापरालयम् ॥ स्वीयंकरोतिपापात्मादण्डनीयोनसंशयः ॥ १२० ॥ ततोऽशरीरिणीवाणीअन्तरिक्षात्प्रभाषते ॥ मावधीरामगृध्रंत्वंपू
र्वंदग्धंतपोबलात् ॥ २१ ॥ पुरागौतमदग्धोऽयंप्रजानाथोजनेश्वर ॥ ब्रह्मदत्तस्तुनामैषशूरःसत्यव्रतःशुचिः ॥ २२ ॥ गृहमागत्यविप्रोऽस्य
भोजनंप्रत्ययाचत ॥ साग्रंवर्षशतंचैवभुक्तवान्नृपसत्तम ॥ २३ ॥ ब्रह्मदत्तस्तुवैतस्यपाद्यमर्घ्यंस्वयंततः ॥ आत्मनैवाकरोत्सम्यग्भोजनार्थंमहा
द्युते ॥ २४ ॥ समाविश्यगृहंतस्यआहारेतुमहात्मनः ॥ नारींपूर्णस्तनींदृष्ट्वाहस्तेनाथपरामृशत् ॥ २५ ॥ अथक्रुद्धेनमुनिनाशापोदत्तःसुदारुणः ॥
गृध्रत्वंगच्छवैमूढराजामुनिमथाब्रवीत् ॥ २६ ॥ कृपांकुरुमहाभागशापोद्धारोभविष्यति ॥ दयालुस्तद्वचःश्रुत्वापुनराहनराधिप ॥ २७ ॥
उत्पत्स्यतेरघुकुलेरामोनाममहायशाः ॥ इक्ष्वाकूणांमहाभागोराजाराजीवलोचनः ॥ २८ ॥ तनदृष्टोविपापस्त्वंभवितानरपुङ्गव ॥ दृष्टोरा
मेणतच्छ्रुत्वाबभूवपृथिवीपतिः ॥ २९ ॥ गृध्रत्वंत्यज्यवैशीघ्रंदिव्यगन्धानुलेपनः ॥ पुरुषोदिव्यरूपोऽसौबभाषेतंनराधिपम् ॥ १३० ॥
साधुराघवधर्मज्ञत्वत्प्रसादादहंविभो ॥ विमुक्तोनरकाद्घोरादपापस्तुत्वयाकृतः ॥ ३१ ॥ विसर्जितंमयागाध्र्यंनररूपीमहीपतिः ॥ उलूकंप्रा
हधर्मज्ञस्वगृहंविशकौशिक ॥ ३२ ॥ अहंसन्ध्यामुपासित्वागमिष्येयत्रवैमुनिः ॥ अथोदकमुपस्पृश्यसन्ध्यामन्वास्यपश्चिमाम् ॥ ३३ ॥
आश्रमंप्राविशद्रामःकुम्भयोनेर्महात्मनः ॥ तस्यागस्त्योबहुगुणंफलमूलंचसादरम् ॥ ३४ ॥ रसवन्तिचशाकानिभोजनार्थमुपाहरत् ॥
सभुक्तवान्नरव्याघ्रस्तदन्नममृतोपमम् ॥ ३५ ॥ प्रीतश्चपरितुष्टश्चतांरात्रिंसमुपावसत् ॥ प्रभातेकाल्यमुत्थायकृत्वाह्निकमरिन्दम ॥ ३६ ॥
ऋषिंसमभिचक्रामगमनायरघूत्तमः ॥ अभिवाद्याब्रवीद्रामोमहर्षिंकुम्भसम्भवम् ॥ ३७ ॥ आपृच्छेसाधयेब्रह्मन्ननुज्ञातुंत्वमर्हसि ॥ धन्योऽ
स्म्यनुगृहीतोऽस्मिदर्शनेनमहामुने ॥ ३८ ॥ दिष्ट्याचाहंभविष्यामिपावितात्मामहात्मनः ॥ एवंब्रुवतिकाकुत्स्थेवाक्यमद्भुतदर्शनम् ॥ ३९ ॥
उवाचपरमप्रीतोबाष्पनेत्रस्तपोधनः ॥ अत्यद्भुतमिदंवाक्यंतवरामशुभाक्षरम् ॥ १४० ॥ पावनंसर्वभूतानांत्वयोक्तंरघुनन्दन ॥ मुहूर्तमपिरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मत्वांमैत्रेणेक्षन्तियेनराः ॥ ४१ ॥ पाविताःस्सर्वसूक्तैस्तेकथ्यन्तेत्रिदिवौकसः ॥ यचत्वांघोरचक्षुर्भिरीक्षन्तेप्राणिनोभुवि ॥ ४२ ॥ तेहताब्रह्म
दण्डेनसद्योनरकगामिनः ॥ ईदृशस्त्वंरघुश्रेष्ठपावनःसर्वदेहिनाम् ॥ ४३ ॥ कथयन्तश्चलोकास्त्वांसिद्धिमेष्यन्तिराघव ॥ गच्छस्वानातुरोऽविघ्नं
पन्थानमकुतोभयः ॥ ४४ ॥ प्रशाधिराज्यंधर्मेणगतिस्तुजगतांभवान् ॥ एवमुक्तस्तुमुनिनाप्राञ्जलिप्रग्रहोनृपः ॥ ४५ ॥ अभिवादयितुंच
क्रेसोऽगस्त्यमृषिसत्तमम् ॥ अभिवाद्यमुनिश्रेष्ठांस्तांश्चसवास्तपोऽधिकान् ॥ ४६ ॥ अथारोहत्तदाव्यग्रःपुष्पकंहेमभूषितम् ॥ तंप्रयान्तंमुनिगणा
आशीर्वादैस्समन्ततः ॥ ४७ ॥ अपूपुजन्नरेन्द्रंतंसहस्राक्षमिवामराः ॥ ततोऽर्धदिवसेप्राप्तेरामःसर्वार्थकोविदः ॥ ४८ ॥ अयोध्यांप्राप्यकाकु
त्स्थःपद्भ्यांकक्षामवातरत् ॥ ततोविसृज्यरुचिरंपुष्पकंकामवाहितम् ॥ ४९ ॥ कक्षान्तराद्विनिष्क्रम्यद्वास्स्थान्राजाब्रवीदिदम् ॥ लक्ष्म
णंभरतंचैवगच्छध्वंलघुविक्रमाः ॥ १५० ॥ ममागमनमाख्यायसमानयतमाचिरम् ॥ श्रुत्वाथभाषितंद्वाःस्थारामस्याक्लिष्टकर्मणः
॥ ५१ ॥ गत्वाकुमारावाहूयराघवायन्यवदेयन् ॥ द्वास्थैःकुमारावानीतौराघवस्यनिदेशतः ॥ ५२ ॥ दृष्ट्वातुराघवःप्राप्तौप्रियौभरतलक्ष्मणौ ॥
समालिङ्ग्यचतुरामस्तौवाक्यंचेदमुवाचह ॥५३॥ कृतंमयायथातथ्यंद्विजकार्यमनुत्तमम् ॥ धर्महेतुमतोभूयःकर्तुमिच्छामिराघवौ ॥५४॥ भवद्भ्यामा
त्मभूताभ्यांराजसूयंक्रतूत्तमम्॥सहितोयष्टुमिच्छामियत्रधर्मश्चशाश्वतः ॥ ५५ ॥ पुष्करस्थेनवैपूर्वब्रह्मणालोककारिणा ॥शतत्रयेणयज्ञानामिष्टंषष्ट्यधि
केनच ॥ ५६ ॥ इष्ट्वाहिराजसूयेनसोमोधर्मेणधर्मवित् ॥ प्राप्तःसर्वेषुलोकेषुकीर्तिस्थानमनुत्तमम् ॥ ५७ ॥ इष्ट्वाहिराजसूयेनमित्रःशत्रुनिबर्ह
णः ॥ मुहूर्तेनसुशुद्धेनवरुणत्वमुपागतः ॥ ५८ ॥ तस्माद्भवन्तौसञ्चिन्त्यकार्येऽस्मिन्वदतंहितम् ॥ भरतउवाच ॥ त्वंधर्मःपरमःसाधोत्वयि
सर्वावसुन्धरा ॥ ५९ ॥ प्रतिष्ठितामहाबाहोयशश्चामितविक्रम ॥ महीपालाश्चसर्वेत्वांप्रजापतिमिवामराः ॥ १६० ॥ निरीक्षन्तेमहात्मा
नोलोकनाथतथावयम् ॥ प्रजाश्चपितृवद्राजन्पश्यन्तित्वांमहामते ॥ ६१ ॥ पृथिव्यांगतिभूतोऽसिप्राणिनामिहराघव ॥ सत्वमेवंविधंयज्ञंना
हर्तासिपरन्तप ॥ ६२ ॥ पृथिव्यांसर्वभूतानांविनाशोदृश्यतेयतः ॥ श्रूयतेराजशार्दूलसोमस्यमनुजेश्वर ॥ ६३ ॥ ज्योतिषांसुमहद्युद्धं
सङ्ग्रामेतारकामये ॥ तारावृहस्पतेर्भार्याहृतासोमेनकामतः ॥ ६४ ॥ तत्रयुद्धंमहद्वृत्तंदेवदानवनाशनम् ॥ वरुणस्यक्रतौघोरेसङ्ग्रामेमत्स्य
कच्छपाः ॥ ६५ ॥ निवृत्तेराजशार्दूलसर्वेनष्टाजलेचराः ॥ हरिश्चन्द्रस्ययज्ञान्तेराजसूयस्यराघव ॥ ६६ ॥ आडीबकंमहद्युद्धंस
र्वलोकविनाशनम् ॥ पृथिव्यांयानिसत्त्वानितिर्यग्योनिगतानिवै ॥ ६७ ॥ दिव्यानांपार्थिवानांचराजसूयेक्षयःश्रुतः ॥ सत्वंपुरुषशार्दूल

CC-0. In Public Domain. Digitization by eGangotri

बुद्ध्यासञ्चिन्त्यपार्थिव ॥ ६८ ॥ प्राणिनांचहितंसौम्यंपूर्णंधर्मंसमाचर ॥ भरतस्यवचःश्रुत्वाराघवःप्राहसादरम् ॥ ६९ ॥ रामउवाच ॥
प्रीतोऽस्मितवधर्मज्ञवाक्येनानेनशत्रुहन् ॥ निवर्तितताराजसूयान्मतिर्मेधर्मवत्सल ॥ १७० ॥ पूर्णंधर्मंकरिष्यामिकान्यकुब्जेचवामनम् ॥ स्थापयि
ष्याम्यहंवीरसामेख्यातिर्दिवंगता ॥ ७१ ॥ भविष्यतिनसन्देहोयथागङ्गाभगीरथात् ॥ १७२ ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेयज्ञनि
वारणंनामैकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥ भीष्मउवाच ॥ कथंरामेणविप्रर्षेकान्यकुब्जेतुवामनः ॥ स्थापितःक्वचलब्धोऽसौविस्तरान्ममकी
र्तय ॥ १ ॥ तथाहिमधुराचैषायावाणीरामकीर्तने ॥ कीर्तिताभगवन्मह्यंमनःकर्णसुखावहा ॥ २ ॥ अनुरागेणतंलोकाःस्नेहात्पश्यन्तिराघवम् ॥
धर्मज्ञश्चकृतज्ञश्चबुद्ध्याचपरिनिष्ठितः ॥ ३ ॥ प्रशास्तिपृथिवींसर्वांधर्मेणसुसमाहितः ॥ तस्मिञ्शासतिवैराज्यंसर्वकामफलाद्रुमाः
॥ ४ ॥ रसवन्तःप्रभूताश्चवासांसिविविधानिच ॥ अकृष्टपच्यापृथिवीनिःसपत्नामहात्मनः ॥ ५ ॥ देवकार्यंकृतंतेनरावणोलोककण्टकः ॥
सपुत्रोऽमात्यसहितोलीलयैवनिपातितः ॥ ६ ॥ तस्यबुद्धिस्समुत्पन्नापूर्णेधर्मेद्विजोत्तम ॥ तस्याहंचरितंसर्वंश्रोतुच्छामिवैमुने ॥ ७ ॥ पुल
स्त्यउवाच ॥ कस्यचित्त्वथकालस्यरामोधर्मपथेस्थितः ॥ यच्चकारमहाबाहोशृणुष्वैकमनानृप ॥ ८ ॥ सस्माररराघवेन्द्रस्तुकथंराजाविभीषणः ॥
लङ्कायांसंस्थितोराज्यंकरिष्यतिचराक्षसः ॥ ९ ॥ गीर्वाणेषुप्रातिकूल्यंविनाशस्यतुलक्षणम् ॥ मयातस्यतुतद्दत्तंराज्यंचन्द्रार्ककालिकम् ॥
॥ १० ॥ तस्याविनाशतःकीर्तिःस्थिरामेशाश्वतीभवेत् ॥ रावणेनतपस्तप्तंविनाशायात्मनस्त्विह ॥ ११ ॥ विध्वस्तःसचपापिष्ठोदे
वकार्येमयाधुना ॥ तदिदानींमयान्वेष्यःस्वयंगत्वाविभीषणः ॥ १२ ॥ सन्देष्टव्यंहितंतस्ययेनतिष्ठेत्सशाश्वतम् ॥ एवंचिन्तयतस्तस्यरामस्या
मिततेजसः ॥ १३ ॥ आजगामाथभरतोरारामंदृष्ट्वाब्रवीदिदम् ॥ किंत्वंचिन्तयसेदेवनरहस्यंवदस्वमे ॥ १४ ॥ देवकार्येधरायांवास्व
कार्येवानरोत्तम ॥ एवंब्रुवन्तंभरतंध्यायमानमवस्थितम् ॥ १५ ॥ ॥ अब्रवीद्राघवोवाक्यंरहस्यंतुनवैतव ॥ भवान्बहिश्चरःप्राणोलक्ष्म
णश्चमहायशाः ॥ १६ ॥ अवेद्यंभवतोनास्तिममसत्यंविधारय ॥ एषामेमहतीचिन्ताकथंदेवैर्विभीषणः ॥ १७ ॥ वर्ततेयद्धितार्थंवै
दशग्रीवोनिपातितः ॥ गमिष्येतदहंलङ्कांयत्रचासौविभीषणः ॥ १८ ॥ तंचदृष्ट्वापुरींतांतुकार्यमुक्त्वाचराक्षसम् ॥ आलोक्यसर्ववसुधांसुग्री
वंवानरेश्वरम् ॥ १९ ॥ महाराजंचशत्रुघ्नंभ्रातृपुत्रांश्चसर्वशः ॥ एवंवदतिकाकुत्स्थेभरतःपुरतःस्थितः ॥ २० ॥ उवाचराघवंवाक्यंगमिष्येभवता
सह ॥ एवंकुरुमहाबाहोसौमित्रिरिहतिष्ठतु ॥ २१ ॥ इत्युक्त्वाभरतंरामस्सौमित्रिंचाहवैपुरे ॥ रक्षाकार्यात्वयावीरयावदागमनंहिनौ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २२ ॥ एवंलक्ष्मणमादिश्यध्यात्वावैपुष्पकंनृप ॥ आरुरोहसवैयानंकौसल्यानन्दवर्धनः ॥ २३ ॥ पुष्पकंतुततःप्रातंगान्धारविषयोय
तः ॥ भरतस्यसुतौदृष्ट्वाजगन्नीतिंनिरीक्ष्यच ॥ २४ ॥ पूर्वांदिशंततोगत्वालक्ष्मणस्यसुतौयतः ॥ पुरेषुतेषुषड्रात्रमुषित्वारघुनन्दनौ ॥ २५ ॥
गतौतेनविमानेनदक्षिणामभितोदिशम् ॥ गङ्गायामुनसम्भेदंप्रयागमृषिसेवितम् ॥ २६ ॥ अभिवाद्यभरद्वाजमत्रेराश्रममीयतुः ॥ सम्भाष्यचमु
नींस्तत्रजनस्थानमुपागतौ ॥ २७ ॥ रामउवाच ॥ अत्रपूर्वंहतासीतारावणेनदुरात्मना ॥ हत्वाजटायुषंगृध्रंयोऽसौपितृसखोहिनौ ॥ २८ ॥
अत्रास्माकंमहद्युद्धंकबन्धेनकुबुद्धिना ॥ हतेनतेनदग्धेनसीतास्तेरावणालये ॥ २९ ॥ ऋष्यमूकेगिरिवरेसुग्रीवोनामवानरः ॥ सतेकरिष्यतेसाह्यं
पम्पांव्रजसहानुजः ॥ ३० ॥ पम्पासरःसमासाद्यशबरींगच्छतापसीम् ॥ इत्युक्तोदुःखितोवीरनिराशोजीवितेस्थितः ॥ ३१ ॥ इयंसान
लिनीवीरयस्यांवैलक्ष्मणोऽवदत् ॥ माकृथाःपुरुषव्याघ्रशोकंशत्रुविनाशन ॥ ३२ ॥ आज्ञाकारिणिभृत्येचमयिप्राप्स्यसिमैथिलीम्
अत्रमेवार्षिकामासागतावर्षशतोपमाः ॥ ३३ ॥ अत्रैवनिहतोवालीसुग्रीवार्थेपरन्तप ॥ एषासादृश्यतेनूनंकिष्किन्धावालिपालिता
॥ ३४ ॥ यस्यांवैसहिधर्मात्मासुग्रीवोवानरेश्वरः ॥ वानरैःसहितोवीरतावदास्तेसमाःशतम् ॥ ३५ ॥ वानरैस्सहसुग्रीवोयावदास्तेसभांग
तः ॥ तावत्तत्रागतौवीरौपुर्यांभरतराघवौ ॥ ३६ ॥ दृष्ट्वासभ्रातरौप्रातौप्रणिपत्याब्रवीदिदम् ॥ क्वयुवांप्रस्थितौवीरौकार्यंकिंतुकरिष्यथः
॥ ३७ ॥ विनिवेश्यासनेतौचददावर्घ्यंस्वयंतदा ॥ एवंसभास्थितेतत्रधर्मिष्ठेरघुनन्दने ॥ ३८ ॥ अङ्गदोऽथहनूमांश्चनलोनीलश्चपाटलः ॥ गजो
गवाक्षोगवयःपनसश्चमहायशाः ॥ ३९ ॥ पुरोधसोमन्त्रिणश्चदैवज्ञोदधिवक्त्रकः ॥ नीलश्शतबलिर्मैन्दोद्विविदोगन्धमादनः ॥ ४० ॥ वीरबाहु
स्सुबाहुश्ववीरसेनोविनायकः ॥ सूर्याभःकुमुदश्चैवसुषेणोहरियूथपः ॥ ४१ ॥ ऋषभोविनतश्चैवगवाख्योभीमविक्रमः ॥ ऋक्षराजश्चधूम्रश्च
सहसैन्यैरुपागताः ॥ ४२ ॥ अन्तःपुराणिसर्वाणिरुमातारातथैवच ॥ अवरोधोऽङ्गदस्यापितथान्याःपरिचारिकाः ॥ ४३ ॥
प्रहर्षमतुलंप्राप्यसाधुसाध्वितिचाब्रुवन् ॥ वानराश्चमहात्मानःसुग्रीवसहितास्तदा ॥ ४४ ॥ वानर्यश्चमहाभागास्ताराद्यास्तत्रराघवम् ॥
अभिप्रेक्ष्याश्रुकण्ठच्श्चप्रणिपत्येदमब्रुवन् ॥ ४५ ॥ क्वसादेवीत्वयादेवयाविनिर्जित्यरावणम् ॥ शुद्धिंकृत्वाहितेवह्नौपितुरग्रउमापतेः ॥ ४६ ॥
त्वयानीतांपुरींरामनतांपश्यामितेऽग्रतः ॥ नविनात्वंतयादेवशोभसेरघुनन्दन ॥ ४७ ॥ त्वयाविनापिसाध्वीसाक्वनुतिष्ठतिजानकी ॥
अन्यांभार्यांनतेवेद्मिभार्याहीनोनशोभसे ॥४८॥ क्रौञ्चयुग्मंमिथोयद्वच्चक्रवाकयुगंयथा ॥ एवंवदन्तीं तांतारांताराधिपसमाननाम् ॥ ४९ ॥ प्राहप्रवच

सांश्रिष्ठोरामोराजीवलोचनः ॥ चारुदंष्ट्रेविशालाक्षिकालोहिदुरतिक्रमः ॥ ५० ॥ सर्वंकालकृतंविद्धिजगदेतच्चराचरम् ॥ विसृज्यताःस्त्रियःसर्वाः
सुग्रीवोऽभिमुखःस्थितः ॥ ५१ ॥ सुग्रीवउवाच ॥ भवन्तौयेनकार्येणइहायातौनरेश्वरौ ॥ तच्चापिकथ्यतांशीघ्रंकृत्यकालोहिवर्तते ॥ ५२ ॥ ब्रुवाण
मेवंसुग्रीवंभरतोरामचोदितः ॥ आचचक्षेचगमनंलङ्कायांराघवस्यतु ॥ तौचाब्रवीच्चसुग्रीवोभवद्भ्यांसहितःपुरीम् ॥ ५३ ॥ गमिष्येराक्षसंदेवद्रष्टुंतत्र
विभीषणम् ॥ सुग्रीवेणैवमुक्तेतुगच्छस्वेत्याहराघवः ॥५४॥ सुग्रीवोराघवौतौचपुष्पकेतुस्थितास्त्रयः ॥ तावत्प्राप्तेविमानंतुसमुद्रस्योत्तरंतटम् ॥५५॥
अब्रवीद्भरतंरामोह्यत्रमेराक्षसेश्वरः ॥ चतुर्भिःसचिवैःसार्धंजीवितार्थेविभीषणः ॥ ५६ ॥ प्राप्तस्ततोलक्ष्मणेनलङ्काराज्येऽभिषेचितः ॥ अत्रचाहंस
मुद्रस्यपरेपारेस्थितस्त्र्यहम् ॥५७॥ दर्शनंदास्यतेमेऽसौज्ञातिकार्यंभविष्यति ॥ तावन्नदर्शनंमह्यंदत्तमेतेनशत्रुहन् ॥ ५८॥ ततःकोपःसमुद्भूतश्चतुर्थेऽ
हनिराघव॥धनुरायम्यवेगेनदिव्यमस्त्रंकरेधृतम् ॥५९॥ दृष्ट्वामांशरणान्वेषीभीतोलक्ष्मणम्.श्रितः ॥ सुग्रीवेणानुनीतोऽस्मिक्षम्यतांराघवत्वया ॥६०॥
ततोमयोत्क्षिप्तशरोमरुदेशह्यपाकृतः ॥ ततस्समुद्रराजेनभृशंविनयशालिना ॥ ६१ ॥ उक्तोऽहंसेतुबन्धेनलङ्कांत्वंव्रजराघव ॥ लङ्घयित्वानरव्याघ्र
वारिपूर्णंमहोदधिम् ॥ ६२ ॥ एषसेतुर्मयाबद्धःसमुद्रेवरुणालये ॥ त्रिभिर्दिनैःसमाप्तिंवैनीतोवानरसत्तमैः ॥ ६३ ॥ प्रथमेदिवसेबद्धोयोजना
निचतुर्दश ॥ द्वितीयेऽहनिषट्त्रिंशत्तृतीयेऽर्धशतंतथा ॥६४॥ इयंसादृश्यतेलङ्कास्वर्णप्राकारतोरणा ॥ अवरोधोमहानत्रकृतोवानरसत्तमैः ॥ ६५ ॥
चैत्रशुक्लचतुर्दश्यांमहद्युद्धमभूदिह ॥ अष्टचत्वारिंशद्दिनंयत्रासौरावणोहतः ॥ ६६ ॥ अत्रप्रहस्तोनीलेनहतोराक्षसपुङ्गवः ॥ हनूमताचधूम्रा
क्षोह्यत्रैवविनिपातितः ॥ ६७ ॥ महोदरातिकायौचसुग्रीवेणमहात्मना ॥ हतोमयाकुम्भकर्णोलक्ष्मणेनेन्द्रजित्तथा ॥ ६८ ॥ मयाचात्रदशग्री
वोहतोराक्षसपुङ्गवः ॥ अत्रसम्भाषितुंप्राप्तोब्रह्मालोकपितामहः ॥ ६९ ॥ पार्वत्यासहितोदेवःशूलपाणिर्वृषध्वजः ॥ महेन्द्राद्याःसुरगणाःसगन्धर्वाः
सकिन्नराः ॥ ७० ॥ पितामेचसमायातोमहाराजस्त्रिविष्टपात् ॥ वृतश्चाप्सरसांसङ्घैर्विद्याधरगणैस्तथा ॥ ७१ ॥ तेषांसमक्षंसर्वेषांजानकीशुद्धि
मिच्छता ॥ उक्तासीताहव्यवाहंप्रविष्टाशुद्धिमागता ॥ ७२ ॥ असुरैश्चसुरैर्दृष्टागृहीतापितृशासनात् ॥ अथाप्युक्तोऽथराज्ञाहमयोध्यांगच्छ
पुत्रक ॥ ७३ ॥ नमेस्वर्गोबहुमतस्त्वयाहीनस्यराघव ॥ तारितोऽहंत्वयापुत्रप्राप्तोऽस्मीन्द्रसलोकताम् ॥ ७४ ॥ लक्ष्मणंचाब्रवीद्राजापुत्र
पुण्यंत्वयार्जितम् ॥ भ्रात्रासममथोदिव्याँल्लोकान्प्राप्स्यसिचोत्तमान् ॥ ७५ ॥ आहूयजानकींराजावाक्यंचेदमुवाचह ॥ नचमन्युस्त्वयाकार्यो
भर्तारंप्रतिसुव्रते ॥७६॥ ख्यातिर्भविष्यत्येवाग्र्याभर्तुस्तेशुभलोचने ॥ एवंवदतिरामेतुपुष्पकेचव्यवस्थिते ॥ ७७ ॥ तत्रयेराक्षसवरास्तेगत्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुविभीषणम् ॥ प्राप्तोरामःससुग्रीवश्चाराइत्थंतदाऽवदन् ॥ ७८ ॥ विभीषणस्तुतच्छ्रुत्वारामागमनमन्तिके ॥ चारांस्तान्पूजयामाससवंकाम
धनादिभिः ॥ ७९ ॥ अलङ्कृत्यपुरींतांतुनिष्क्रान्तःसचिवैःसह ॥ दृष्ट्वारामंविमानस्थंमेराविवदिवाकरम् ॥ ८० ॥ अष्टाङ्गप्रणिपातेननत्वा
राघवमब्रवीत् ॥ अद्यमेसफलंजन्मप्राप्ताःसर्वेमनोरथाः ॥ ८१ ॥ यद्दृष्टौदेवचरणौजगद्वन्द्यावनिन्दितौ ॥ कृतःश्लाघ्योऽस्म्यहंदेवशक्रादीनांदि
वौकसाम् ॥ ८२ ॥ आत्मानमधिकंमन्येत्रिदशेशात्पुरन्दरात् ॥ देवस्यदर्शनात्तेऽद्यस्पृहणीयोदिवौकसाम् ॥ ८३ ॥ अभिवन्द्यसरामंतुआ
लिङ्गचभरतंहरिम् ॥ लङ्कांप्रवेशयामासविशिष्टायात्रिविष्टपात् ॥८४ ॥ रावणस्यगृहेदीप्तेसर्वरत्नोपशोभिते ॥ उपविष्टेतुकाकुत्स्थेअर्घंदत्त्वाविभीषणः
॥ ८५ ॥ उवाचप्राञ्जलिर्भूत्वासुग्रीवंभरतंतथा ॥ इहागतस्यरामस्ययद्दास्येनतदस्तिमे ॥ ८६ ॥ इयंचलङ्कारामेणरिपुंत्रैलोक्यकण्टकम् ॥ हत्वातु
पापकर्माणंदत्तापूर्वंपुरीमम ॥ ८७ ॥ इयंपुरीइमेदाराअमीपुत्रास्तथाह्यहम् ॥ सर्वमेतन्मयादत्तंसर्वमक्षयमस्तुते ॥ ८८ ॥ ततःप्रकृतयःसर्वालङ्का
वासिजनाश्रये ॥ आजग्मूराघवंद्रष्टुंकौतूहलसमन्विताः ॥ ८९ ॥ उक्तोविभीषणस्तैस्तुरामंदर्शयनःप्रभो ॥ विभीषणेनकथितारा घवायमहा
त्मने ॥ ९० ॥ तेषामुपायनंसर्वंभरतोरामचोदितः ॥ जग्राहवानरेन्द्रश्चधनरत्नौघसञ्चयम् ॥ ९१ ॥ एवंतत्रत्र्यहंरामोह्यवसद्राक्षसालये ॥ चतुर्थेऽ
हनिसम्प्राप्तेरामेचापिसभास्थिते ॥ ९२ ॥ केकसीपुत्रमाहेदंरामंद्रक्ष्यामिपुत्रक ॥ वधूभिस्सहितागत्वात्वंविज्ञापयपुत्रक ॥ ९३ ॥ दृष्टेतस्मिन्मह
त्पुण्यंप्राप्यतेमुनिसत्तमैः ॥ विष्णुरेषमहाभागश्चतुर्मूर्तिस्सनातनः ॥ ९४ ॥ सीतालक्ष्मीर्महाभागनबुद्धासाग्रजेनते ॥ पित्रातेपूर्वमाख्यातंदेवानां
दिविसङ्गमे ॥ ९५ ॥ कुलेरघूणांवैविष्णुःपुत्रोदशरथस्यतु ॥ भविष्यतिविनाशायदशग्रीवस्यरक्षसः ॥ ९६ ॥ विभीषणउवाच ॥ एवंकुरुष्व
वैमातगृहाणनवमम्बरम् ॥ पात्रंचन्दनसंयुक्तंदधिक्षौद्राक्षतैःसह ॥ ९७ ॥ दूर्वयार्घंसहकुरुराजपुत्रस्यदर्शनम् ॥ सरमामग्रतःकृत्वायाश्चान्या
देवकन्यकाः ॥ ९८ ॥ व्रजस्वराघवाभ्याशंतस्मादग्रेव्रजाम्यहम् ॥ एवमुक्त्वागतंरक्षोयत्ररामोव्यवस्थितः ॥ ९९ ॥ उत्सार्यदानवान्सर्वान्रामं
द्रष्टुंसमागतान् ॥ सभांतांविमलांकृत्वारामंस्वाभिमुखेस्थितम् ॥ १०० ॥ विभीषणउवाच ॥ विज्ञाप्यंशृणुमेदेववदतश्चविशांपते ॥ दशग्रीवं
कुम्भकर्णंयाचमांचाप्यजीजनत् ॥ १ ॥ इयंसादेवमातानःपादौतेद्रष्टुमिच्छति ॥ तस्यास्तुत्वंकृपांकृत्वादर्शनंदातुमर्हसि ॥ २ ॥ राम
उवाच ॥ अहंतस्याःसमीपंतुमातृदर्शनकाङ्क्षया ॥ गमिष्येराक्षसेन्द्रत्वंशीघ्रंयाहिममाग्रतः ॥ ३ ॥ प्रतिज्ञायतुतंवाक्यमुत्तस्थौचवरास
नात् ॥ मूर्ध्निचाञ्जलिमाधायप्रणाममकरोद्विभुः ॥४॥ अभिवादयेऽहंभवतींमाताभवसिधर्मतः ॥ महतातपसाचापिपुण्येनविविधेनच ॥ ५ ॥ इमौ

CC-0. In Public Domain. Digitization by eGangotri

तेचरणौदेविमानवोयदिपश्यति ॥ पूर्णस्स्यात्तदहंप्रीतोदृष्ट्वेमौपुत्रवत्सले ॥ ६ ॥ कौसल्यामेयथामाताभवतीचतथामम ॥ केकसीचाब्रवीद्रामं
चिरंजीवसुखीभव ॥ ७ ॥ भर्त्रामेकथितंवीरविष्णुर्मानुषरूपधृत् ॥ अवतीर्णोरघुकुलेहितार्थेत्रिदिवौकसाम् ॥ ८ ॥ दशग्रीवविनाशायभूतिं
दातुंविभीषणे ॥ वालिनोनिधनंचवसेतुबन्धंचसागरे ॥ ९ ॥ पुत्रोदशरथस्यैवसर्वंसचकरिष्यति ॥ इदानींत्वंमयाज्ञातःस्मृत्वातद्भर्तृभाषितम् ॥
॥ ११० ॥ सीतालक्ष्मीर्भवान्विष्णुर्देवावैवानरास्तथा ॥ गृहंपुत्रगमिष्यामिस्थिरकीर्तिमवाप्नुहि ॥ ११ ॥ सरमोवाच ॥ इहैववत्सरंपूर्णमशो
कवनिकास्थिता ॥ सेविताजानकीदेवीसुखंतिष्ठतितेप्रिया ॥ १२ ॥ नित्यंस्मरामिवैपादौसीतायास्तुपरन्तप ॥ कदाद्रक्ष्यामितांदेवींचिन्तयाना
त्वहर्निशम् ॥ १३ ॥ किमर्थंदेवदेवेननानीताजानकीत्विह ॥ एकाकीनैवशोभेथायोषिताचतयाविना ॥ १४ ॥ समीपेशोभतेसीतात्वंच
तस्याःपरन्तप ॥ एवंब्रुवन्त्यांभरतःकेयमित्यब्रवीद्वचः ॥ १५ ॥ ततश्चेङ्गितविद्रामोभरतंप्राहसत्वरम् ॥ विभीषणस्यभार्यावैसरमानामनामतः
॥ १६ ॥ प्रियासखीमहाभागासीतायास्सुदृढंमता ॥ सर्वंकालकृतंपश्यनजानेकिंकरिष्यति ॥ १७ ॥ गच्छत्वंसुभगेभर्तृगेहंपालयशोभने ॥
मांत्यक्त्वाहिगतादेवीभाग्यहीनंगतिर्यथा ॥ १८ ॥ तयाविरहितःसुभ्रुरतिंविन्देनकर्हिचित् ॥ शून्याएवदिशःसर्वाःपश्यामीहपुनर्भ्रमन्
॥ १९ ॥ विसृज्यतांचसरमांसीतायास्तुप्रियांसखीम् ॥ गतायामथकेकस्यांरामःप्राहविभीषणम् ॥ १२० ॥ दैवतेभ्यःप्रियंकार्यंनापराध्या
स्त्वयासुराः ॥ आज्ञयाराजराजस्यवर्तितव्यंत्वयानघ ॥ २१ ॥ लङ्कायांमानुषोयोवैसमागच्छेत्कथञ्चन ॥ राक्षसैर्नचहन्तव्योद्रष्टव्योऽसौ
यथात्वहम् ॥ २२ ॥ विभीषणउवाच ॥ आज्ञयाहंनरव्याघ्रकरिष्येसर्वमेवतु ॥ विभीषणेहिवदतिवायूराममुवाचह ॥ २३ ॥ इहास्तिवैष्णवी
मूर्तिःपूर्वंबद्धोवलिर्यया ॥ तांनयस्वमहाभागकान्यकुब्जेप्रतिष्ठय ॥ २४ ॥ विदित्वातदभिप्रायंवायुनासमुदाहृतम् ॥ विभीषणस्त्वलङ्कृत्यरत्नैः
सर्वैश्चवामनम् ॥ २५ ॥ आनीयचार्पयद्रामेवाक्यंचेदमुवाचह ॥ यदावैनिर्जितःशक्रोमेघनादेनराघव ॥ २६ ॥ तदावैवामनस्त्वेषआनीतो
जलजेक्षण ॥ नयस्वतमिमंदेवदेवदेवंप्रतिष्ठय ॥ २७ ॥ तथेतिराघवःकृत्वापुष्पकंचसमारुहत् ॥ धनंरत्नमसङ्ख्येयंवामनंचसुरोत्तमम् ॥ २८ ॥
गृह्यसुग्रीवभरतावारूढौवामनादनु ॥ व्रजन्नेवाम्बरेरामस्तिष्ठेत्याहविभीषणम् ॥ २९ ॥ राघवस्यवचःश्रुत्वाभूयोऽप्याहसराघवम् ॥ करिष्येसर्व
मेतद्धियदाज्ञप्तंविभोत्वया ॥ १३० ॥ सेतुनानेनराजेन्द्रपृथिव्यांसर्वमानवाः ॥ आगत्यप्रतिबाधेरन्नाज्ञाभङ्गोभवेत्तव ॥ ३१ ॥ कोऽत्रमेनियमो
देवकिन्नुकार्यंमयाविभो ॥ श्रुत्वैतद्राघवोवाक्यंराक्षसोत्तमभाषितम् ॥ ३२ ॥ कार्मुकंगृह्यहस्तेनरामःसेतुंद्विधाच्छिनत् ॥ त्रिर्विभज्यचवेगेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मध्येवैदशयोजनम् ॥ ३३ ॥ छित्त्वातुयोजनंचैकमेकंखण्डत्रयंकृतम् ॥ वेलावनंसमासाद्यरामः पूंजांरमापतेः ॥ ३४ ॥ कृत्वारामेश्वरंनाम्नादेवदेवं
जनार्दनम् ॥ अभिषिच्याथसंगृह्यवामनंरघुनन्दनः ॥ ३५ ॥ दक्षिणादुदधेश्चैवनिर्जगामत्वरान्वितः ॥ अन्तरिक्षादभूद्वाणीमेघगम्भीरनिःस्वना ॥
॥ ३६ ॥ रुद्रउवाच ॥ भोभोरामास्तुभद्रंतेस्थितोऽहमिहसाम्प्रतम् ॥ यावज्जगदिदंरामयावदेषाधरास्थिता ॥ ३७ ॥ तावदेवचतेसेतुतीर्थं
स्थास्यतिराघव ॥ श्रुत्वैवंदेवदेवस्यगिरंताममृतोपमाम् ॥ ३८ ॥ रामउवाच ॥ नमस्तेदेवदेवेशभक्तानामभयङ्कर ॥ गौरीकान्तनमस्तुभ्यंदक्षय
ज्ञविनाशन ॥ ३९ ॥ नमोभवायशर्वायरुद्रायवरदायच ॥ पशूनांपतयेनित्यंचोग्रायचकपर्दिने ॥ १४० ॥ महादेवायभीमायत्र्यम्बकाय
दिशांपते ॥ ईशानायभगघ्नायनमोऽस्त्वन्धकघातिने ॥ ४१ ॥ नीलग्रीवायघोरायवेधसेवेधसास्तुत ॥ कुमारशत्रुनिघ्नायकुमारजननायच ॥
॥ ४२ ॥ विलोहितायधूम्रायशिवायक्रथनायच ॥ नमोनीलशिखण्डायशूलिनेदैत्यनाशिने ॥ ४३ ॥ उग्रायचत्रिनेत्रायहिरण्यवसुरेतसे ॥
अनिन्द्यायाम्बिकाभर्त्रेसर्वदेवस्तुतायच ॥ ४४ ॥ अभिगम्यायकाम्यायसद्योजातायवैनमः ॥ वृषध्वजायमुण्डायजटिनेब्रह्मचारिणे ॥ ४५ ॥
तप्यमानायतप्यायब्रह्मण्यायजयायच ॥ विश्वात्मनेविश्वसृजेविश्वमावृत्यतिष्ठते ॥ ४६ ॥ नमोनमोऽस्तुदिव्यायप्रपन्नार्तिहरायच ॥ भक्ता
नुकम्पिनेदेवविश्वतेजोमनोगते ॥ ४७ ॥ पुलस्त्यउवाच ॥ एवंसंस्तूयमानस्तुदेवदेवोहरोनृप ॥ उवाचराघवंवाक्यंभक्तिनम्रंपुरःस्थितम् ॥
॥ ४८ ॥ रुद्रउवाच ॥ भोभोराघवभद्रंतेब्रूहियत्तेमनोगतम् ॥ यावदेवप्रयच्छामिनास्त्यदेयंमयाहिते ॥ ४९ ॥ पुष्कराक्षमहादेवदेवदेवस्स
नातनः ॥ भवान्नारायणोनूनंगूढोमानुषयोनिषु ॥ १५० ॥ अवतीर्णोदेवकार्यंकृतंतच्चानघत्वया ॥ इदानींस्वंव्रजस्थानंकृतकार्योऽसि
शत्रुहन् ॥५१॥ त्वयाकृतंपरंतीर्थंसेत्वाख्यंरघुनन्दन ॥ आगत्यमानवाराजन्पश्येयुरिहसागरे ॥५२ ॥ महापातकयुक्तायेतेषांपापंविलीयते ॥ ब्रह्मव
ध्यादिपापानियानिकष्टानिकानिचित्॥५३॥ दर्शनादेवनश्यन्तिनात्रकार्याविचारणा॥ गच्छत्वंवामनंस्थाप्यगङ्गातीरेरघूत्तम॥५४॥पृथिव्यांसर्वशः
कृत्वाभागानष्टौपरन्तप॥श्वेतद्वीपंस्वकंस्थानंव्रजदेवनमोऽस्तुते॥५५॥ पुलस्त्यउवाच॥प्रणिपत्यततोरामस्तीर्थंप्राप्तश्चपुष्करम्॥ विमानंतुनयात्यूर्ध्वं
वेष्टितंतत्तुराघवः॥५६॥किमिदंवेष्टितंयानंनिरालम्बेऽम्बरेस्थितम्॥भवितव्यंकारणेनपश्येत्याहस्मवानरम्॥५७॥सुग्रीवोरामवचनादवतीर्यधरातले॥स
चपश्यतिब्रह्माणंसुरसिद्धसमन्वितम्॥५८॥ब्रह्मर्षिसङ्घसहितंचतुर्वेदसमन्वितम्॥दृष्ट्वागत्याब्रवीद्रामंसर्वलोकपितामहः॥५९॥सहितोलोकपालैश्चवस्वा

१ पूजामुमापतेः। इति पाठान्तरम्। २ देवदेवमुमापतिम्। इति पाठान्तरम्।

CC-0. In Public Domain. Digitization by eGangotri

दित्यमरुद्गणैः ॥ तंदेवपुष्पकंनैवलङ्घयेद्धिपितामहम् ॥१६०॥अवतीर्यततोरामः पुष्पकाद्धमभूषितात् ॥ नत्वाविरिञ्चनदेवंगायत्र्यासहसंस्थितम् ॥६१॥ अष्टाङ्गप्रणिपातेनपश्चाङ्गालिङ्गितावनिः ॥तुष्टावप्रणतोभूत्वादेवदेवंविरिञ्चनम् ॥६२॥ रामउवाच ॥नमामिलोककर्तारंप्रजापतिसुरार्चितम् ॥देवनाथंलोकनाथंप्रजानाथंजगत्पतिम् ॥६३॥नमस्तेदेवदेवेशसुरासुरनमस्कृत ॥भूतभव्यभवन्नाथहरिपिङ्गललोचन ॥६४॥बालस्त्वंवृद्धरूपीचमृगचर्मासनाम्बरः ॥ तारणश्चासिदेवस्त्वंत्रैलोक्यप्रभुरीश्वरः ॥ ६५ ॥ हिरण्यगर्भपद्मगर्भवेदगर्भस्मृतिप्रद ॥ महासिद्धोमहापद्मीमहादण्डीचमेखली ॥ ६६ ॥ कालश्चकालरूपीचनीलग्रीवोविदांवरः ॥ वदकर्ताऽर्भकोनित्यःपशूनांपतिरव्ययः ॥ ६७ ॥ दर्भपाणिर्हंसकेतुःकर्ताहर्ताहरोहरिः ॥ जटीमुण्डीशिखीदण्डीलगुडीचमहायशाः ॥ ६८ ॥ भूतेश्वरःसुराध्यक्षःसर्वात्मासर्वभावनः ॥ सर्वगःसर्वहारीचस्रष्टाचगुरुरव्ययः ॥ ६९ ॥ कमण्डलुधरोदेवःस्रुकस्रुवादिधरस्तथा ॥ हवनीयोऽर्चनीयश्चओंकारोज्येष्ठसामगः ॥ १७० ॥ मृत्युश्चैवामृतश्चैवपारियात्रश्चसुव्रतः ॥ ब्रह्मचारीव्रतधरोगुहावासीसुपङ्कजः ॥ ७१ ॥ अमरोदर्शनीयश्चबालसूर्यनिभस्तथा ॥ पद्मवासीचभगवान्सावित्रीपतिरच्युतः ॥ ७२ ॥ वरप्रदोदानवानांविष्णोर्लब्धवरस्तथा ॥ कर्मकर्ताऽधर्महर्ताअभयहस्तएवच ॥ ७३ ॥ अग्निमुखोह्यग्निकेतुर्मुनिरूपोदिशांपतिः ॥ उत्सवोवेदस्रष्टासिचतुर्वर्गाधिपस्तथा ॥ ७४ ॥ दक्षिणेवामतश्चापिपत्नीभ्यामुपसेवितः ॥ भिक्षुश्चभिक्षुरूपश्चत्रिजटीलब्धनिश्चयः ॥ ७५ ॥ चित्तवृत्तिकरःकामोमधुर्मधुकरस्तथा ॥ वानप्रस्थोवनगतआश्रमीपूजितस्तथा ॥ ७६ ॥ जगद्धाताचकर्ताचपुरुषःशाश्वतोध्रुवः ॥ धर्माध्यक्षोविरूपाक्षस्त्रिधर्मोभूतभावनः ॥ ७७ ॥ त्रिवेदोबहुरूपश्चसूर्यायुतसमप्रभः ॥ मोहकोबन्धकश्चैवदानवानांविशेषतः ॥ ७८ ॥ देवदेवश्चपद्माङ्कस्त्रिनेत्रोऽब्जजटस्तथा ॥ हरिश्मश्रुर्धनुर्धारीभीमोधर्मपराक्रमः ॥७९॥पुलस्त्यउवाच ॥ एवंस्तुतस्तुरामेणब्रह्माब्रह्मविदांवरः ॥ उवाचप्रणतंरामंकरेगृह्यपितामहः ॥१८०॥ ब्रह्मोवाच ॥ विष्णुस्त्वंमानुषेदेहेऽवतीर्णोवसुधातले ॥ कृतंतद्भवतासर्वंदेवकार्यंमहाविभो ॥ ८१ ॥ संस्थाप्यवामनंदेवंजाह्नव्यादक्षिणेतटे ॥ अयोध्यांस्वपुरींगत्वासुरलोकंव्रजस्वच ॥ ८२ ॥ पुलस्त्यउवाच ॥ विसृष्टोब्रह्मणारामःप्रणिपत्यपितामहम् ॥ आरूढःपुष्पकंयानंसम्प्राप्तोमधुरांपुरीम् ॥ ८३ ॥ समीक्ष्यपुत्रसहितंशत्रुघ्नंशत्रुघातिनम् ॥ तुतोषराघवःश्रीमान्भरतःसहरीश्वरः ॥ ८४ ॥ शत्रुघ्नोभ्रातरौप्राप्तौशक्रोपेन्द्राविवागतौ ॥ प्रणिपत्यततोमूर्ध्नापश्चाङ्गालिङ्गितावनिः ॥ ८५ ॥ उत्थाप्यचाङ्कमारोप्यरामोभ्रातरमञ्जसा ॥ भरतश्चततःपश्चात्सुग्रीवस्तदनन्तरम् ॥ ८६ ॥ उपविष्टोऽथरामायसोऽर्घमादायसत्वरम् ॥ राज्यंनिवेदयामासचाष्टाङ्गंराघवेतदा ॥ ८७ ॥ श्रुत्वाप्राप्तंततोरामंसर्वैवैमाथुरोजनः ॥ वर्णाब्राह्मणभूयिष्ठा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्रष्टुमेनंसमागताः ॥ ८८ ॥ सम्भाष्यप्रकृतीःसर्वानैगमान्ब्राह्मणैःसह ॥ दिनानिपञ्चोषित्वाऽत्ररामोगन्तुंमनोदधे ॥ ८९ ॥ शत्रुघ्नश्च
ततोरामेवाजिनोऽथगजांस्तथा ॥ कृताकृतंचकनकंतत्रोपायनमाहरत् ॥ १९० ॥ रामस्त्वाहततःप्रीतःसर्वमेतन्मयातव ॥ दत्तंपुत्रौतेऽभिषि
ञ्चराजानौमाथुरेजने ॥ ९१ ॥ एवमुक्त्वाततोरामःप्राप्तोमध्यन्दिनेरवौ ॥ महोदयंसमासाद्यगङ्गातीरेसवामनम् ॥ ९२ ॥ प्रतिष्ठाप्यद्विजा
नाहभाविनःपार्थिवांस्तथा ॥ मयाकृतोऽयंधर्मस्यसेतुर्भूतिविवर्धनः ॥ ९३ ॥ प्राप्तेकालेपालनीयोनचलोप्यःकथञ्चन ॥ प्रसारितकरेणैः प्रा
र्थनैषामयाकृता ॥ ९४ ॥ नृपाःकृतेमयार्थित्वेयत्क्षेमंक्रियतामिह ॥ नित्यंदैनन्दिनीपूजाकार्यासर्वैरतन्द्रितैः ॥ ९५ ॥ ग्रामान्दत्त्वाधनंत
त्रलङ्कायाआहृतंचयत् ॥ प्रेषयित्वाचकिष्किन्धांसुग्रीवंवानरेश्वरम् ॥ ९६ ॥ अयोध्यामागतोरामःपुष्पकंतमथाब्रवीत् ॥ नागन्तव्यंत्व
याभूयस्तिष्ठयत्रधनेश्वरः ॥ कृतकृत्यस्ततोरामःकर्तव्यंनाप्यमन्यत ॥ ९७ ॥ पुलस्त्यउवाच ॥ एवंतेभीष्मरामस्यकथायोगेनपार्थिव ॥
उत्पत्तिर्वामनस्योक्ताकिंभूयःश्रोतुमिच्छसि ॥ ९८ ॥ कथयामितुतत्सर्वंयत्रकौतूहलंनृप ॥ सर्वंतेकीर्तयिष्यामियेनार्थीनृपनन्दन ॥ १९९ ॥
इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेवामनप्रतिष्ठानामचत्वारिंशोऽध्यायः ॥ ४० ॥ भीष्मउवाच ॥ कथितंवामनस्यैवमाहात्म्यंविस्तरेणवै ॥
पुनस्तस्यैवमाहात्म्यमन्यद्विष्णोरतोवद ॥ १ ॥ पद्मंकथमभूदेवनाभौयेनाभवज्जगत ॥ कथंचवैष्णवीसृष्टिःपद्ममध्येऽभवत्पुरा ॥ २ ॥ कथंपा
द्ममहाकल्पेऽभवत्पद्ममयंजगत् ॥ जलार्णवगतस्येहनाभौजातंजलानुगम् ॥३॥ प्रभावंपद्मनाभस्यस्वपतःसागराम्भसि॥पुष्करेतुकथंजातादेवाऋषि
गणाःपुरा ॥ ४ ॥ एतदाख्याहिनिखिलंयोगंयोगविदांवर ॥ शृण्वतस्तस्यमेकीर्तिंनतृप्तिरुपजायते ॥ ५ ॥ कियताचैवकालेनशोभतेपुरुषोत्तमः ॥
कियन्तंवैस्वपितिचकतिकालस्यसम्भवाः ॥ ६ ॥ कियतावाथकालेनप्रोत्तिष्ठतिमहायशाः ॥ कथंचोत्थायभगवान्सृजतेनिखिलंजगत् ॥ ७ ॥
केप्रजापतयस्तावदासन्पूर्वंमहामुने ॥ कथंनिर्मितवांस्तत्रचैतंल्लोकंसनातनम् ॥८॥ कथमेकार्णवेशून्येनष्टेस्थावरजङ्गमे ॥ भूगोलकेप्रदग्धेतुप्रनष्टोरग
राक्षसे ॥ ९ ॥ नष्टानलानिलाकाशेनष्टधर्मेम्महीतले ॥ केवलेगह्वरीभूतेमहाभूतविपर्यये ॥ १० ॥ किंनुविश्वपतिःसाक्षान्महातेजामहाद्युतिः ॥ आस्ते
यथाध्याननिष्ठोविधिमास्थाययोगवित् ॥ ११ ॥ शृण्वतःपरयाभक्त्याब्रह्मन्नेतदशेषतः ॥ वक्तुमर्हसिधर्मज्ञयशोनारायणात्मकम् ॥ १२ ॥
श्रद्दिनःसूपविष्टस्यभगवन्वक्तुमर्हसि ॥ १३ ॥ पुलस्त्यउवाच ॥ नारायणस्ययशसःश्रवणेयातवस्पृहा ॥ सद्वंशान्वयपूतस्यन्याय्यंकुरुकु
लोद्वह ॥ १४ ॥ शृणुष्वादिपुराणेषुदेवेभ्यश्चयथाश्रुति ॥ ब्राह्मणानांचवदतांश्रुत्वावैसुमहात्मनाम् ॥ १५ ॥ यथाचतपसादृष्ट्वाबृहस्पतिसमद्युतिः ॥

CC-0. In Public Domain. Digitization by eGangotri

पराशरसुतः श्रीमान्गुरुर्द्वैपायनोऽब्रवीत् ॥ १६ ॥ तत्तेऽहंकथयिष्यामियथाभक्तियथाश्रुति ॥ यद्विज्ञातंमयासम्यगृषिमार्गेणसत्तम ॥ १७ ॥
कःसमुत्सहतेज्ञातुंपरंनारायणात्मकम् ॥ विश्वावितारंब्रह्मायंनवेदयतितत्त्वतः ॥ १८ ॥ तत्कर्मविश्वदेवानांतद्रहस्यंमहर्षिषु ॥ सइज्यस्सर्व
यज्ञानांसतत्त्वंतत्त्वदर्शिनाम् ॥ १९ ॥ अध्यात्ममध्यात्मविदांनरकंचविकर्मिणाम् ॥ अधिदैवंचतद्दैवमधिदैवतसंज्ञितम् ॥ २० ॥
अधिभूतंचतद्भूतंपरंचपरमार्थिनाम् ॥ सयज्ञोवेदनिर्दिष्टस्तत्तपःकवयोविदुः ॥ २१ ॥ यःकर्त्ताकारकोबुद्धिर्यतःक्षेत्रज्ञएवच ॥ प्रणवः
पुरुषःशास्ताएकश्चेतिविभाव्यते ॥ २२ ॥प्राणःपञ्चविधश्चैवध्रुवमक्षरमेवच ॥ कालःपाकश्चयज्ञश्चयष्टाचाधीतमेवच ॥ २३ ॥ उच्यतेविविधैर्भावैः
सएवायंतुतत्परम् ॥ सएवभगवान्सर्वंकरोतिनकरोतिच ॥ २४ ॥ सोऽस्मिन्कारयतेसर्वंस्थानिनांचकृतिःकृता ॥ यजामहेतमेवाद्यंसएवोत्थाननि
वृतः ॥ २५ ॥ योवक्तायच्चवक्तव्यंयश्चाहंतद्ब्रवीमिते ॥ श्रूयतेयच्चवैश्राव्यंयच्चान्यत्परिजल्पितम् ॥ २६ ॥ याकथायाश्चश्रुतयोयोधर्मोधर्मतत्परः॥
विश्वंविश्वपतिर्यश्चसतुनारायणःस्मृतः ॥ २७ ॥ यत्सत्यंयदनृतमादिमध्यभूतंयच्चान्त्यंनिरवधिकंचयद्भविष्यम् ॥ यत्किञ्चिच्चरमचरंयदस्तिचान्य
त्सर्वंतत्पुरुषवरःप्रधानभूतः॥२८॥चत्वार्य्याहुःसहस्राणिवर्षाणांतत्कृतंयुगम्॥ तस्यतावच्छतीसन्ध्याद्विगुणाकुरुनन्दन ॥२९॥ यत्रधर्मश्चतुष्पादस्त्व
धर्मःपादविग्रहः॥स्वधर्मनिरताःशान्ताजायन्तेयत्रमानवाः ॥३०॥ विप्राःस्थिताधर्मपराराजवृत्तिस्थितानृपाः॥ कृष्यामभिरतावैश्याःशूद्राःशुश्रूषव
स्तथा ॥३१ ॥ तदासत्यंचसत्वंचधर्मश्चैवविवर्धत ॥ सद्भिराचरितोधर्मोयेनलोकःप्रवर्त्तते ॥३२॥ एतत्कृतयुगेवृत्तंसर्वेषामेवपार्थिव ॥ प्राणिनांधर्मसं
ज्ञानांनराणांनीचजन्मनाम् ॥ ३३ ॥ त्रीणिवर्षसहस्राणित्रेतायुगमिहोच्यते ॥ तस्यतावच्छतीसन्ध्याद्विगुणापरिकीर्तिता ॥ ३४ ॥ द्वाभ्याम
धर्मःपादाभ्यांत्रिभिर्धर्मोव्यवस्थितः ॥ यत्रसत्यंचसत्वंचक्रियाधर्मोविधीयते ॥ ३५ ॥ त्रेतायांविकृतिंयान्तिवर्णालोभेनसंयुताः ॥ चातुर्वर्ण्यस्य
वैकृत्यंक्षान्तिदौर्बल्यमेवच ॥ ३६ ॥ एषात्रेतायुगगतिर्विचित्रादेवनिर्मिता ॥ द्वापरंद्विसहस्रंतुवर्षाणांकुरुनन्दन ॥ ३७ ॥ तस्यतावच्छतीस
न्ध्याद्विगुणंयुगमुच्यते ॥ तत्राप्यतीवार्थपराःप्राणिनोरजसाहताः ॥३८॥ शठानैष्कृतिकाःक्षुद्राजायन्तेकुरुनन्दन ॥ द्वाभ्यांधर्मःस्थितःपद्भ्याम
धर्मस्त्रिभिरुत्थितः ॥३९॥ विपर्ययशतैर्धर्मःक्षयमेतिकलौयुगे ॥ ब्रह्मण्यभावश्च्यवतेतथास्तिक्यंविवर्ज्यते ॥ ४० ॥ व्रतोपवासास्त्यज्यन्तेकलौवैयु
गपर्यये ॥ तदावर्षसहस्रंतुवर्षाणांद्वेशतेतथा ॥ ४१ ॥ सन्ध्ययासहसङ्ख्यातःक्रूरःकलियुगस्तथा ॥ यत्राधर्मश्चतुष्पादोधर्मःपादपरिग्रहः ॥ ४२ ॥
कामिनस्तापसाःक्षुद्राजायन्तेयत्रमानवाः ॥नचावसायिकःकश्चिन्नसाधुर्नचसत्यवाक् ॥४३॥ नास्तिकाब्राह्मणाभक्ताजायन्तेतत्रमानवाः॥अहङ्कार

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गृहीताश्चप्रक्षीणस्नेहबन्धनाः ॥४४॥ विप्राःशूद्रसमाचारास्सन्तिसर्वेकलौयुगे ॥ आश्रमाणांविपर्यासःकलौसम्प्रतिवर्तते ॥४५॥ वर्णानांचैवसन्देहो
युगान्तेकुरुनन्दन ॥ एषाद्वादशसाहस्रीयुगाख्यापूर्वनिर्मिता ॥ ४६ ॥ सहस्रयुगपर्यन्तंतदहर्ब्राह्ममुच्यते ॥ ततोऽहनिगतेतस्मिन्सर्वेषामेवजीविनाम्॥
॥ ४७ ॥ शरीरनिर्वृतिंदृष्ट्वाकालःसंहारबुद्धिमान् ॥ देवतानांचसर्वेषांब्राह्मणानांमहीपते ॥ ४८॥ दैत्यानांदानवानांचयक्षराक्षसपक्षिणाम् ॥
गन्धर्वाणामप्सरसांभुजङ्गानांचपार्थिव ॥ ४९ ॥ पर्वतानांनदीनांचपशूनांचैवसत्तम ॥ तिर्यग्योनिगतानांचक्रिमीणांदंशिनांतथा ॥ ५० ॥
सर्वभूतपतिःपञ्चभूतदाभूतानिभूतकृत् ॥ जगत्संहरणार्थायकुरुतेवैशसंमहत् ॥ ५१ ॥ भूत्वासूर्यश्चक्षुषीआददानोभूत्वावायुःप्राणिनांप्राणिजातम्॥
भूत्वावर्ति निर्दहन्सर्वलोकान्भूत्वामेघोभूयउग्रोऽभ्यवर्षत् ॥ ५२ ॥ भूत्वानारायणोयोगीसर्वमूर्तिविभावसुः ॥ गभस्तिभिःप्रदीप्ताभिःसंशोषयतिसा
गरान् ॥ ५३ ॥ ततःपीत्वार्णवान्सर्वान्नदीकूपांश्चसर्वतः ॥ पर्वतानांचसलिलंसर्वमादाययोगवित् ॥ ५४॥ भूत्वाचैवसहस्रार्चिर्महींभित्वारसातले॥
रमतेजलमादायपिबन्नसमनुत्तमम् ॥ ५५ ॥ मूर्त्तामूर्त्तंतदन्यच्चयदस्तिप्राणिषुध्रुवम् ॥ तत्सर्वमरविन्दाक्षआदत्तेपुरुषोत्तमः ॥ ५६ ॥ वायुश्चबलवा
न्भूत्वाविधुन्वानोऽखिलंजगत्॥प्राणापानंसमासाद्यवायुनाक्रमतेहरिः ॥५७॥ ततोदेवगणानांचसर्वेषांचैवदेहिनाम्॥पञ्चेन्द्रियगुणास्सर्वेभूतान्येवचया
निच ॥५८॥ घ्रेयंघ्राणंशरीरंचपृथिवीसंश्रितागुणाः॥लोकयात्राभगवतामुहूर्तेनविनाशिता ॥५९॥ जिह्वारसश्चस्नेहश्चसंश्रिताःसलिलेगुणाः ॥ रूपं
चक्षुर्विभागश्चनेत्रंज्योतिःश्रितागुणाः ॥ ६० ॥ स्पर्शःप्राणश्चचेष्टाचपवनंसंश्रितागुणाः ॥ शब्दःश्रोत्रंचश्रवणंगगनंसंश्रितागुणाः ॥ ६१ ॥ मनो
बुद्धिश्चचित्तंचक्षेत्रज्ञंचेतिसंश्रिताः ॥ परेणपरमेष्ठीचहृषीकेशमुपाश्रिताः ॥ ६२ ॥ ततोभगवतस्तस्यरश्मिभिःपरिवारिताः ॥ वायुनापरिणुन्नाश्च
भूमिशाखामपाश्रिताः ॥ ६३ ॥ तेषांसंहरणोद्भूतःपावकःशतधाज्वलन् ॥ प्रदहन्नखिलंविश्वंवृत्तःसंवर्त्तकोऽनलः ॥ ६४ ॥ सपर्वतद्रुमान्गुल्माँल्लँ
तावल्लीस्तृणानिच ॥ विमानानिचदिव्यानिपुराणिविविधानिच ॥६५॥ यानिचाश्रयणीयानिसर्वाण्यप्यदहद्भृशम् ॥ भस्मीकृत्यतुतान्सर्वाँल्लो
काँल्लोकगुरोर्गुरुः ॥ ६६ ॥ सभूतिंधारयामासयुगान्तेलोकसंभवाम् ॥ सहस्रवृष्टिःशतधाभूत्वाकृष्णोमहाघनः ॥६७॥ दिव्यतोयेनहविषातर्पयामास
मेदिनीम् ॥ ततःक्षीरनिकाशेनस्वादुनापरमाम्भसा ॥ ६८ ॥ शिशिरेणचपुण्येनमहीनिर्वाणमागमत् ॥ तेनतोयेनसम्पृक्तापयस्साधर्म्यतोधरा
॥ ६९ ॥ एकार्णवजलीभूतासर्वसत्त्वविवर्जिता ॥ महासत्त्वान्यपिविभुंप्रविष्टान्यमितौजसम् ॥ ७० ॥ नष्टार्कपवनाकाशेसूक्ष्मेजगतिसंवृते ॥
संशोषमात्मनाकृत्वासमुद्राणांचदेहिनः ॥ ७१ ॥ दग्ध्वासङ्कोच्यचतथास्वपित्येकःसनातनः ॥ पौराणंरूपमास्थायस्वपित्यमितविक्रमः ॥ ७२ ॥

Nepal Sanskrit University, Balmeeki Campus Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकार्णवजलेव्यापीयोगीयोगमुपासितः ॥ अनेकानिसहस्राणियुगान्येकार्णवाम्भसि ॥ ७३ ॥ नचैवकश्चिदव्यक्तंव्यक्तोवेदितुमर्हति ॥ कश्चैषपुरु
षोनामकिंयोगःकश्चयोगवान् ॥ ७४ ॥ नपृष्ठेनैवममितोनैवपार्श्वेनचाग्रतः ॥ कश्चिद्विज्ञायतेतस्यदृश्यतेदेवसत्तमः ॥ ७५ ॥ नभःक्षितिपव
नमपःप्रकाशनंप्रजापतिंभुवनधरंसुरेश्वरम् ॥ पितामहंश्रुतिनिलयंमुनींप्रभुंसमापयञ्छयनमरोचयत्प्रभुः ॥ ७६ ॥ एवमेकार्णवीभूतेशेतेलोके
महाद्युतिः ॥ प्रच्छाद्यसलिलेनोर्वीहंसोनारायणायते ॥ ७७ ॥ महतोरजसोमध्येमहार्णवसमस्यवै ॥ वारिजाक्षोमहाबाहुरक्षयंब्रह्मयद्विदुः ॥ ७८ ॥
आत्मरूपसरूपेणतमसासंवृतःप्रभुः ॥ मनःसात्विकमादाययत्रतत्सत्वमाहितम् ॥ ७९ ॥ याथातथ्यंपरंज्ञानंभूतायब्रह्मणेततः ॥ रहस्यंचतथोद्दि
ष्टंयथोपनिषदांस्मृतम् ॥ ८० ॥ पुरुषोयज्ञइत्येतत्परमंपरिकीर्तितम् ॥ यश्चान्यःपुरुषाख्यःस्यात्सएवपुरुषोत्तमः ॥ ८१ ॥ येचयज्ञकरा
विप्रायऋत्विजइतिस्मृताः ॥ अस्मादेवपुराभूतावक्त्रेभ्यःश्रूयतेतथा ॥ ८२ ॥ ब्रह्माणंप्रथमंवक्त्रादुद्गातारंचसामगम् ॥ होतारंचतथाध्वर्युंबाहु
भ्यामसृजत्प्रभुः ॥ ८३ ॥ ब्रह्माणंब्राह्मणाच्छंसिस्तोतारौचैवसर्वशः ॥ मेढ्राच्चमैत्रावरुणंप्रतिष्ठातारमेवच ॥ ८४ ॥ उदरात्प्रतिहर्तारंपोतारंचैव
पार्थिव ॥ पाणिभ्यामथचाग्नीध्रमुन्नेतारंचयाजुषम् ॥ ८५ ॥ अच्छावाकमथोरुभ्यांसुब्रह्मण्यंचसामगम् ॥ एवमेवंसभगवान्षो
डशैताञ्जगत्पतिः ॥ ८६ ॥ स्वयम्भूःसर्वयज्ञानामृत्विजोऽसृजदुत्तमान् ॥ तदाचैषमहायोगीपुरुषोयज्ञसंज्ञितः ॥ ८७ ॥
वेदाश्चैवतथासर्वेसहाङ्गोपनिषत्क्रियाः ॥ स्वपित्येकार्णवेचैवयदाश्चर्यमभूत्पुरा ॥ ८८ ॥ श्रूयतांतुतदाविप्रोमार्कण्डेयःकुतूहलात् ॥
गीर्णोभगवतातेनकुक्षावासीन्महामुनिः ॥ ८९ ॥ बहुवर्षसहस्रायुस्तस्यैववरतेजसः ॥ अटंस्तीर्थप्रसङ्गेनपृथिवीतीर्थगोचरः ॥ ९० ॥
आश्रमाणिचपुण्यानिदेवतायतनानिच ॥ देशान्राष्ट्राणिचित्राणिपुराणिविविधानिच ॥ ९१ ॥ जपहोमपराःशान्तास्तपोभिरमलाःस्मृताः ॥
मार्कण्डेयस्ततस्तस्यशनैर्वक्त्राद्विनिर्गतः॥९२॥निष्क्रामन्तंनचात्मानंजानीतेदेवमायया॥निष्क्रम्यतस्यउदरादेकार्णवमथोजगत्॥९३॥ सर्वतस्तमसा
च्छन्नंमार्कण्डेयोऽन्ववैक्षत ॥ तस्योत्पन्नंभयंतीव्रंव्यत्ययंचात्मजीवितम् ॥ ९४ ॥ देवदर्शनसंहृष्टोविस्मयंपरमंगतः ॥ सोऽचिन्तयदमोघात्मा
मार्कण्डेयोऽथशङ्कितः ॥ ९५ ॥ किंनुस्याच्चित्तसंमोहःकिंनुस्वप्नोऽनुभूयते ॥ व्यक्तमन्यतरोभावएतयोर्भवितामम ॥ ९६ ॥ नहिस्वप्नोह्य
यंसत्ययुक्तंयत्सत्यमर्हति ॥ नष्टचन्द्रार्कपवनोनष्टपर्वतभूतलः ॥ ९७ ॥ कतमःस्यादयंलोकइतिशोकमुपागतः ॥ ददर्शचापिपुरुषंस्वपन्तंपर्वतो
पमम् ॥ ९८ ॥ सलिलेऽर्धमथोमग्नंजीमूतमिवसागरे ॥ तपन्तमिवतेजोभिरामुक्तशशिभास्करम् ॥ ९९ ॥ गाम्भीर्यात्सागरमिवभासमानंमहौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जसा ॥ देवंद्रष्टुमिहायातःकोभवानितिविस्मयात् ॥ १०० ॥ तथैवचमुनिःकुक्षिंपुनरेवप्रवशितः ॥ सप्रविष्टःपुनःकुक्षिंमार्कण्डेयःसविस्मयम्॥१॥ तथैवचपुनर्भूयोविजानन्स्वप्नदर्शनम् ॥ सतथैवयथापूर्वंपृथिवीमटतेवनम् ॥ २ ॥ पुण्यतीर्थजलोपेतंविविधान्याश्रमाणिच ॥ क्रतुभिर्यजमानांश्चसमाप्तगुरुदक्षिणैः ॥ ३ ॥ अपश्यद्देवकुक्षिस्थान्यज्ञस्थाञ्शतशोद्विजान् ॥ सद्वृत्तमाश्रिताःसर्वेवर्णाब्राह्मणपूर्वकाः ॥ ४ ॥ चत्वारआश्रमाःसम्यग्यथापूर्वंविलोकिताः ॥ एवंवर्षशतंसाग्रंमार्कण्डेयेनधीमता ॥ ५ ॥ चरतापृथिवीसर्वातत्कुक्षौहिसमीक्ष्यते ॥ ततःकदाचिदथवैपुनःकुक्षेर्विनिर्गतः ॥ ६ ॥ सुप्तंन्यग्रोधशाखायांबालमेकंनिरीक्ष्यच ॥ तथैवैकार्णवजलेनीहारेणावृतान्तरे ॥ ७ ॥ अव्यक्तक्रीडितेलोकेसर्वभूतविवर्जिते ॥ समुनिर्विस्मयाविष्टःकौतूहलसमन्वितः ॥ ८ ॥ बालमादित्यसङ्काशंनशक्नोत्यभिवीक्षितुम् ॥ सोऽप्यचिन्तयदेकान्तेस्थित्वासलिलसन्निधौ ॥ ९ ॥ पूर्वदृष्टमिदंमेनेशङ्कितोदेवमायया॥अगाधेसलिलेशतेमार्कण्डेयःसविस्मयः ॥ ११० ॥ पूर्ववत्तमथोद्रष्टुमव्रजत्त्रस्तलोचनः ॥ सतस्मैभगवानाहस्वागतंबालभोइति ॥ ११ ॥ बभाषेमेघतुल्येनस्वरेणपुरुषोत्तमः ॥ मार्कण्डेयनभेतव्यमागच्छस्वममान्तिकम् ॥ १२ ॥ मार्कण्डेयउवाच ॥ कोनाम्नाकीर्तयतिमांकुर्वन्परिभवंमम ॥ दिव्यवर्षसहस्राख्यंधर्षयंश्चैवमेवयः ॥ १३ ॥ नह्येषचसदाचारोदेवेष्वपिममोचितः ॥ मांब्रह्मापिहिसस्नेहोदीर्घायुरितिभाषते ॥ १४ ॥ कस्तपोघोरमासाद्यममाद्यत्यक्तजीवितः ॥ मार्कण्डेयेतिमामुक्त्वामृत्युमीक्षितुमर्हसि ॥ १५ ॥ एवंप्रक्षुभितःक्रोधान्माकण्डेयोमहामुनिः ॥ तदैनंभगवान्भूयोबभाषेमधुसूदनः ॥ १६ ॥ श्रीभगवानुवाच ॥ अहंतेजनकोवत्सहृषीकेशःपितागुरुः ॥ आयुःप्रदातापौराणःकिंमांत्वंनोपसर्पसि ॥ १७ ॥ मांपुत्रकामःप्रथमंत्वत्पिताङ्गिरसोमुनिः ॥ पूर्वमाराधयामासतपस्तीव्रंसमाश्रितः ॥ १८ ॥ तंदृष्ट्वाघोरतपसंत्रिदशोत्तमतेजसम् ॥ दत्तवांस्त्वामहंपुत्रंमहर्षिममितौजसम् ॥ १९ ॥ कस्समुत्सहतेचान्योयोगिभूतात्मगात्मकम् ॥ द्रष्टुमेकार्णवगतंक्रीडन्तंयोगमायया ॥ १२० ॥ ततःप्रहृष्टहृदयोविस्मयोत्फुल्ललोचनः ॥ मूर्ध्निबद्धाञ्जलिपुटोमार्कण्डेयोमहातपाः ॥ २१ ॥ नामगोत्रेतुसम्प्रोच्यदीर्घायुर्लोकपूजितः ॥ तस्मैभगवतेभक्त्यानमस्कारमथाकरोत् ॥ २२ ॥ मार्कण्डेयउवाच ॥ इच्छामितत्त्वतोज्ञातुमिमांमायांतवानघ ॥ यदेकार्णवमध्यस्थःशेषेत्वंबालरूपवान् ॥ २३ ॥ किंसंज्ञश्चैवभगवाँल्लोकेविज्ञायसेप्रभो ॥ तर्कयेऽहंमहात्मानंकोह्यन्यःस्थातुमर्हसि ॥ २४ ॥ श्रीभगवानुवाच ॥ अहंनारायणोब्रह्मन्सर्वभूतविनाशनः ॥ अहंसहस्रशीर्षास्यःसहस्रपदसंयुतः ॥ २५ ॥ आदित्यवर्णःपुरुषोमुखेब्रह्ममयोह्यहम् ॥ अहमग्निर्हव्यवहःसप्तसप्तिभिरन्वितः ॥ २६ ॥ अहमिन्द्रपदः

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

शक्रऋतूनांपरिवत्सरः ॥ अहयोगिषुसाङ्ख्याख्योयुगान्तावर्तएवच ॥ २७ ॥ अहंसर्वाणिसत्त्वानिदैवतान्यखिलानिच ॥ भुजगानामहंशेष
स्ताक्ष्योंऽहंसर्वपक्षिणाम् ॥ २८ ॥ कृतान्तःसर्वभूतानांविज्ञेयःकालसंज्ञितः ॥ अहंधर्मस्तपश्चाहंसर्वाश्रमनिवासिनाम् ॥ २९ ॥ अहंदया
परोधर्मःक्षीरोदोऽहंमहार्णवः ॥ यत्सत्यंतत्परंत्वेकअहमेवप्रजापतिः ॥ १३० ॥ अहंसाङ्ख्यमहंयोगोह्यहंतत्परमंपदम् ॥ अहमिज्याक्रियाचाहमहं
विद्याधिपःस्मृतः ॥ ३१ ॥ अहंज्योतिरहंवायुरहंभूमिरहंजलम् ॥ आकाशोऽहंसमुद्राश्चनक्षत्राणिदिशोदश ॥ ३२ ॥ अहंवर्षमहंसोमःपर्जन्योऽहमहं
रविः ॥ अहंपुराणंपरमंतथैवाहंपरायणम् ॥ ३३ ॥ भविष्येचापिसर्वत्रभविष्यत्सर्वसङ्ग्रहः ॥ यत्किञ्चित्पश्यसेविप्रयच्छृणोषिचकिञ्चन ॥ ३४ ॥
यच्चानुभवसेलोकेतत्सर्वंमामनुस्मर ॥ विश्वंसृष्टंमयापूर्वंसृजेऽद्यापिचपश्यमाम् ॥ ३५ ॥ युगेयुगेचरक्षामिमार्कण्डेयाखिलंजगत् ॥ तदेतत्कथितंसर्वं
मार्कण्डेयावधारय ॥ ३६ ॥ शुश्रूपुरपिधर्मेषुकुक्षौचरसुखंमम ॥ ममब्रह्माशरीरस्थोदेवाश्चऋषिभिःसह ॥ ३७ ॥ व्यक्तमव्यक्तयोगंमामवगच्छसुर
द्विषम् ॥ अहमेकाक्षरोमन्त्रस्त्र्यक्षरश्चपितामहः ॥ ३८ ॥ परस्त्रिवर्गओंकारःपरमात्मप्रदर्शनः ॥ एवमादिपुराणंचवदतेमांमहामते ॥ ३९ ॥
पुलस्त्यउवाच ॥ वक्त्रमाहृतवानीशोमार्कण्डेयमथोहरिः ॥ ततोभगवतःकुक्षिंप्रविष्टोमुनिसत्तमः ॥ १४० ॥ यदक्षयंविविधमुपाश्रितंतुतन्महार्णवे
व्यपगतचन्द्रभास्करे ॥ शनैश्चरन्प्रभुरथहंससंज्ञितःसृजञ्जगद्विहरतिकालपर्यये ॥ ४१ ॥ अथचैवंशुचिर्भूत्वाचचारसतुवैतपः ॥ छादयित्वाऽत्मनो
देहंपयसाम्बुजसम्भवः ॥ ४२ ॥ ततोमहात्मातिबलोमर्त्यलोकविसर्जने ॥ महतांचैवभूतानांविश्वोविश्वमचिन्तयत् ॥ ४३ ॥
तस्यचिन्तयमानस्यनियतेसंस्थितेऽर्णवे ॥ निराकाशेतोयमयेसूक्ष्मेजगतिसंक्षये ॥ ४४ ॥ ईशःसंक्षोभयामाससोऽर्णवंसलिलंगतः ॥ अथान्त
रादपांसूक्ष्ममथच्छिद्रमभूत्पुरा ॥ ४५ ॥ शब्दंप्रतिततोभूतोमारुतश्छिद्रसम्भवः ॥ संलब्ध्वान्तरसंक्षोभंव्यवर्धतसमीरणः ॥ ४६ ॥ नभस्वताब
लवतावेगाद्विक्षोभितोऽर्णवः ॥ तस्यार्णवस्यक्षुब्धस्यतस्मिन्नम्भसिमथ्यतः ॥ ४७ ॥ कृष्णवर्त्मासमभवत्प्रभुर्वैश्वानरोमहान् ॥ ततःसंशोषया
मासपावकःसलिलंबहु ॥ ४८ ॥ समस्तजलधिश्छिद्रमभवद्विसृतंनभः ॥ आत्मतेजोभवाःपुण्याआपोऽमृतरसोपमाः ॥ ४९ ॥ आकाशंछिद्र
सम्भूतंवायुराकाशसम्भवः ॥ अथसङ्घर्षसम्भूतंपावकंचास्यसम्भवम् ॥ १५० ॥ दृष्ट्वापितामहोदेवोमहाभूतविभावनः ॥ दृष्ट्वाभूतानिभग
वाँल्लोकसृष्ट्यर्थमुत्तमम् ॥ ५१ ॥ ब्रह्मणोजन्मसहितंबहुरूपोह्यचिन्तयत् ॥ चतुर्युगानांसंख्यातंसहस्रंयुगपर्यये ॥ ५२ ॥ यत्पृथिव्यांद्विजे
न्द्राणांतपसाभावितात्मनाम् ॥ बहुजन्मविशुद्धात्माब्रह्मणोहरिरुच्यते ॥ ५३ ॥ ज्ञानंदृष्ट्वातुविश्वात्मायोगिनांयातियोग्यताम् ॥ तंयोगवन्तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विज्ञायसम्पूर्णैश्वर्यमुत्तमम् ॥ ५४ ॥ पदेब्रह्मणिविश्वस्यन्ययोजयतयोगवित् ॥ ततस्तस्मिन्महातोयेमहेशोहरिरच्युतः ॥ ५५ ॥ जलक्री
डांचविधिवत्सचक्रेसर्वलोककृत् ॥ पद्मंनाभ्युद्भवंचैकंसमुत्पादितवांस्ततः ॥ ५६ ॥ सहस्रवर्णविरजंभास्कराभंहिरण्मयम् ॥ ५७ ॥ हुताश
नज्वलितशिखोज्ज्वलप्रभंसमुत्थितंशरदमलार्कतेजसम् ॥ विराजतेकमलमुदारवर्चसंमहात्मनस्तनुरुहचारुशैवलम् ॥ १५८ ॥ इतिश्रीपाद्मे
पुराणेप्रथमेसृष्टिखण्डेपद्मप्रादुर्भावोनामैकचत्वारिंशोऽध्यायः ॥ ४१ ॥ पुलस्त्यउवाच ॥ अथयोगवतांश्रेष्ठमसृजद्भूरिवर्चसम् ॥ स्रष्टारंसर्व
लोकानांब्रह्माणंसर्वतोमुखम् ॥ १ ॥ तस्मिन्हिरण्मयेपद्मेबहुयोजनविस्तृते ॥ सर्वतेजोगुणमयेपार्थिवैर्लक्षणैर्वृते ॥ २ ॥ तच्चपद्मंपुराभूतंपृथिवी
रूपमुत्तमम् ॥ नारायणसमुद्भूतंप्रवदन्तिमहर्षयः ॥ ३ ॥ यत्पद्मंसारसादेवीपृथिवीपरिकथ्यते ॥ येपद्मकेशरामुख्यास्तान्दिव्यान्पर्वतान्वि
दुः ॥ ४ ॥ हिमवन्तंचनीलंचमेरुंनिषधमेवच ॥ कैलासंशृङ्गवन्तंचतथाद्रिंगन्धमादनम् ॥ ५ ॥ पुण्यंत्रिशिखरंचैवकान्तंमन्दरमेवच ॥
उदारंपिञ्जरंचैवविन्ध्यमस्तंचपर्वतम् ॥ ६ ॥ एतएवगणानांचसिद्धानांचमहात्मनाम् ॥ आश्रयाःपुण्यशीलानांसर्वकामफलप्रदाः ॥ ७ ॥
एतेषामन्तरेद्वीपोजम्बूद्वीपइतिस्मृतः ॥ जम्बूद्वीपस्यसंस्थानंयज्ञियायत्रचक्रियाः ॥ ८ ॥ तेभ्योयद्द्रवतेतोयंदिव्यामृतरसोपमम् ॥ दिव्यतीर्थ
शताधाराःसरस्यःसर्वतःस्मृताः ॥ ९ ॥ यान्येतानीहपद्मस्यकेसराणिसमन्ततः ॥ असङ्ख्येयाःपृथिव्यांतेविविधाश्चैवपर्वताः ॥ १० ॥
यानिपर्णानिपद्मस्यभूरिपूर्वाणिपार्थिव ॥ तेदुर्गमाःशलचितम्लेच्छदेशाःप्रकीर्तिताः ॥ ११ ॥ यान्यधोभागपत्राणितानिवासास्तुभागशः ॥
दैत्यानामसुराणांचपन्नगानांचपार्थिव ॥ १२ ॥ तेषांमध्येऽन्तरंयत्तुतद्रसातलसंज्ञितम् ॥ महापातककर्माणोमज्जन्तेयत्रमानवाः ॥ १३ ॥ पद्म
स्यचान्तरेपद्मएकार्णवगतामही ॥ चतुर्दिशासुसङ्ख्याताश्चत्वारःसलिलाकराः ॥ १४ ॥ एवंनारायणस्यार्थेमहीपुष्करसम्भवा ॥ प्रादुर्भावोऽ
प्ययंतस्मान्नाम्नापुष्करसंज्ञितः ॥ १५ ॥ एतस्मात्कारणाद्यज्ञेपुराणःपरमर्षिभिः ॥ यज्ञियैर्वेददृष्टान्तैर्यज्ञेयूपचितिःकृता ॥ १६ ॥ एवंभगवता
तेनविश्वंव्याप्यधराचिता ॥ पर्वतानांनदीनांचरचनाचैवनिर्मिता ॥ १७ ॥ विश्वस्ययश्चाप्रतिमप्रभावःप्रभाकराभोवरुणोऽमितद्युतिः ॥ शनैःस्वय
म्भूर्व्यसृजत्सुषुप्तंजगन्मयःपद्मनिधिंमहार्णवे ॥ १८ ॥ विघ्नस्तपसिसम्भूतोमधुर्नाममहासुरः ॥ तेनैवचसहोद्भूतोह्यसुरोनामकैटभः ॥ १९ ॥ तौर
जस्तमसोर्भूतौसम्भूतौतामसौगणौ ॥ एकार्णवंजगत्सर्वंक्षोभयेतांमहाबलौ ॥ २० ॥ दिव्यरक्ताम्बरधरौश्वेतदीप्ताग्रदंष्ट्रिणौ ॥ किरीटमकुटोदग्रौकेयू
रवलयोज्ज्वलौ ॥ २१ ॥ महाविवृतताम्राक्षौपीनोरस्कौमहाभुजौ ॥ महागिरेःसंहननौजङ्गमाविवपर्वतौ ॥ २२ ॥ नवमेघप्रतीकाशावादित्यप्रतिमा

Nepal Sanskrit University ... Varanasi

CC-0. In Public Domain. Digitization by eGangotri

ननौ ॥ विपुलाभोगकेयूरकराभ्यामतिभीषणौ ॥ २३ ॥ पादसञ्चारविन्यासैर्विक्षिपन्ताविवार्णवम् ॥ कम्पयन्तौहरिमिवशयानंमधुसूदनम् ॥ २४ ॥
तौतत्रविचरन्तौतुपुष्करेविश्वतोमुखौ ॥ योगिनांश्रेष्ठमत्यन्तंदीप्तंददृशतुस्तदा ॥ २५ ॥ ॥ नारायणसमाज्ञातंसृजन्तमखिलाःप्रजाः ॥ दैवतानिच
विश्वानिमानसांश्चसुतानृषीन् ॥ २६ ॥ ततस्तावूचतुस्तत्रब्रह्माणमसुरोत्तमौ ॥ दुष्टौयुयुत्सूसङ्क्रुद्धौक्रोधव्याकुलितेक्षणौ ॥ २७ ॥ कस्त्वंपु
ष्करमध्यस्थःसितोष्णीषश्चतुर्भुजः ॥ आवामगणयन्मोहादास्सेत्वंविगतस्पृहः ॥ २८ ॥ एह्यागच्छावयोर्युद्धंदेहित्वंकमलोद्भव ॥ आवाभ्यांपरमे
शाभ्यामशक्तःस्थातुमर्णवे ॥ २९ ॥ तत्रकश्चभवेत्तुभ्यंयेनचात्रनियोजितः ॥ कःस्रष्टाकश्चतेगोप्ताकेननाम्नाभिधीयते ॥ ३० ॥ ब्रह्मोवाच ॥ ईश्व
रःप्रोच्यतेलोकेविष्णुश्चानन्तशक्तिधृत् ॥ ॥ तत्सकाशात्तुजातंमांस्रष्टारमवगच्छतम् ॥ ३१ ॥ मधुकैटभावूचतुः ॥ नावयोःपरमंलोकेकिंचिदस्तिम
हामुने ॥ आवाभ्यांछाद्यतेविश्वंतमसारजसाचवै ॥ ३२ ॥ रजस्तमोमयावावामृषीणामतिलङ्घिनौ ॥ धर्मशीलंछादयन्तौनाशकौसर्वदेहि
नाम् ॥ ३३ ॥ आवाभ्यांयुज्यतेलोकोदुस्तराभ्यांयुगेयुगे ॥ आवामर्थश्चकामश्चयज्ञस्सर्वपरिग्रहः ॥ ३४ ॥ सुखंयत्रमदोयत्रयत्रश्रीःकीर्तिरेवच ॥
येषांयत्काङ्क्षितंकिञ्चित्तत्तदावांविचिन्तय ॥ ३५ ॥ ब्रह्मोवाच ॥ आवाभ्यांसंहतौदृष्ट्वायुवांपूर्वपराजितौ ॥ तंसमाधायगुणिनंसत्वंचास्मिस
माश्रितः ॥ ३६ ॥ यःपरोयोगयुक्तात्मायोऽक्षरःसत्वमेवच ॥ रजसस्तमसश्चैवयःस्रष्टाविश्वसम्भवः ॥ ३७ ॥ ततोभूतानिजायन्तेसात्विका
नीतराणिच ॥ सएवयुवयोर्नाशंवाञ्छदेवःकरिष्यति ॥ ३८ ॥ स्वपन्नेवततोदेवोबहुयोजनविस्तृतौ ॥ बाहूनारायणोब्रह्मकृतवानात्ममायया ॥ ३९ ॥
कृष्यमाणौततस्तस्यबाहुभ्यांबाहुशालिनौ ॥ चेरतुस्तौविगलितौशकुनाविवपीवरौ ॥ ४० ॥ ततस्तावाहतुर्गत्वावासुदेवंसनातनम् ॥ पद्मनाभंहृ
षीकेशंप्रणिपत्यनतावुभौ ॥ ४१ ॥ जानीवस्त्वांविश्वयोनिंत्वामेकंपुरुषोत्तमम् ॥ आवयोश्चैवहेतुंत्वांजानन्तौबुद्धिकारणम् ॥ ४२ ॥ अमोघ
दर्शनंसत्यंयतस्त्वांविद्मश्शाश्वतम् ॥ ततस्त्वामभितोदेवकाङ्क्षावःप्रसमीक्षितुम् ॥ ४३ ॥ अमोघदर्शनोऽसित्वंनमस्तेसमिति
ञ्जय ॥ तमिच्छावोवरंदेवत्वयाहितमरिन्दम ॥ ४४ ॥ श्रीभगवानुवाच ॥ किमर्थमामनुब्रूथयुवामसुरसत्तमौ ॥ गतायुष्कौयुवांभूयस्त्वहोजीवितुमि
च्छथः ॥ ४५ ॥ मधुकैटभावूचतुः ॥ यस्मिन्नकश्चिन्मृतवान्देवतस्मिन्वधंप्रभो ॥ इच्छावःपुत्रतांचैवभवतःसुमहातपः ॥ ४६ ॥
श्रीभगवानुवाच ॥ युवयोर्बाढमेतत्स्याद्भविष्येकलिसम्भवे ॥ भविष्यथोनसन्देहःसत्यमेतद्ब्रवीमिवाम् ॥ ४७ ॥ पुलस्त्यउवाच ॥ वरंप्रदा
याथमहासुराभ्यांसनातनोविश्वधरःसुरोत्तमः ॥ रजस्तमोजौतुतदाऽनोपमौममर्दतावूरुतलेऽमरप्रभुः ॥ ४८ ॥ स्थित्वातस्मिंस्तुकमलेब्रह्माब्रह्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विदांवरः ॥ ऊर्ध्वबाहुर्महातेजास्तपोघोरंसमाश्रितः ॥ ४९ ॥ प्रज्वलन्निवतेजोभिर्भाभिःस्वाभिस्तमोनुदः ॥ बभासेसतुधर्मात्मासहस्रांशुरि
वांशुभिः ॥ ५० ॥ अथान्यद्रूपमास्थायप्रभुर्नारायणोऽव्ययः ॥ आजगाममहातेजायोगाचार्योमहायशाः ॥ ५१ ॥ साङ्ख्याचार्यश्चमति
मान्कपिलोब्रह्मणांवरः ॥ उभावपिमहात्मानौपूजितौतत्रतत्परौ ॥ ५२ ॥ तौप्रातावूचतुस्तत्रब्रह्माणममितौजसम् ॥ परावरविशेषज्ञौपूजितौ
चमहर्षिभिः ॥ ५३ ॥ ब्रह्मसम्परिविद्यन्तेविशालंजगदास्थितौ ॥ ग्रामणीस्सर्वभूतानांब्रह्मात्रैलोक्यपूजितः ॥ ५४ ॥ तयोस्तद्वचनंश्रुत्वा
विबोध्यगतयोःपरम् ॥ त्रीनिमान्कृतवाँल्लोकान्यथेयंब्रह्मणःश्रुतिः ॥ ५५ ॥ पुत्रंस्वसम्भवंचैकंसमुत्पादितवान्प्रभुम् ॥ तदाग्रेचागतस्तस्यब्रह्म
मानससम्भवः ॥ ५६ ॥ उत्पन्नमात्रोब्रह्माणमुक्तवान्मानसःसुतः ॥ किंकुर्मस्तवसाहाय्यंब्रवीतुभगवानिति ॥ ५७ ॥ ब्रह्मोवाच ॥ यदे
षकपिलोनामब्रह्मनारायणस्तथा ॥ वदतोभवतस्त्वंतुतत्कुरुष्वमहामते ॥ ५८ ॥ ब्रह्मणासतथोक्तस्तौप्राहभूपसमुत्थितः ॥ शुश्रूषुरस्मियु
वयोःकिंकरोमिकृताञ्जलिः ॥ ५९ ॥ श्रीभगवानुवाच ॥ यत्सत्यमक्षरंब्रह्मअष्टादशविधंचतत् ॥ यत्सत्यममृतंतत्तुपरंपदमनुस्मर ॥ ६० ॥
एतद्वचोनिशम्यैवंसययौदिशमुत्तराम् ॥ गत्वाचतत्रसब्रह्मअगमज्ज्ञानचक्षुषा ॥ ६१ ॥ ततोब्रह्मासुवर्णामद्वितीयमसृजत्प्रभुः ॥ सङ्कल्पयित्वामन
सातमेवचमहामनाः ॥ ६२ ततःसोऽप्यब्रवीद्वाक्यंकिंकरोमिपितामह ॥ पितामहसमाज्ञातोब्रह्माणंसमुपस्थितः ॥ ६३ ॥ ब्राह्मणस्यामृतरसोऽनु
भूतस्तेनवैततः ॥ प्रातःसपरमंस्थानंसतयोःपार्श्वमागतः ॥ ६४ ॥ तस्मिन्नपिगतेसोऽथतृतीयमसृजत्प्रभुः ॥ सोक्षप्रवृत्तिकुशलंसुवर्णामयुतंप्रभुः ॥
॥६५॥ सोऽपितंधर्ममास्थायतयोरेवागमद्गतिम् ॥ एवंपुत्रास्त्रयोऽप्येतेगताःशम्भोर्महात्मनः ॥६६॥ तान्गृहीत्वासुतांस्तस्यतौगतावूर्जितांगतिम् ॥
नारायणश्चभगवान्कपिलश्चयतीश्वरः ॥ ६७ ॥ यंकालंतेगताब्रह्मब्रह्मातंकालमेवच ॥ तपोघोरतरंभूयःसंश्रितःपरमंपदम् ॥ ६८ ॥ नचशक्त
स्ततोब्रह्माप्रभुरेकस्तपश्चरन् ॥ शरीरार्धात्ततोभार्यामुत्पादयतितच्छुभाम् ॥ ६९ ॥ आत्मनःसदृशान्पुत्रानसृजद्वैपितामहः ॥ विश्वेप्रजानांपतयो
येभ्योलोकाविनिःसृताः ॥ ७० ॥ विश्वेशंप्रथमंतावन्महात्मातपसात्मजम् ॥ सर्वत्रसंहतंपुण्यंनाम्नाधर्मंससृष्टवान् ॥ ७१ ॥ दक्षंमरीचिमत्रिंचपु
लस्त्यंपुलहंक्रतुम् ॥ वसिष्ठंगौतमंचैवभृगुमङ्गिरसंमुनिम् ॥ ७२ ॥ अत्यद्भुतास्स्वकृत्येनज्ञेयास्तेतुमहर्षयः ॥ त्रयोदशगुणारम्भायेवंशास्तुमहर्षि
णाम् ॥ ७३ ॥ अदितिर्दितिर्दनुःकालाअनायुःसिंहिकाखसा ॥ प्राचीक्रोधाचसुरसाविनताकद्रुरेवच ॥ ७४ ॥ दक्षस्यापत्यमेतद्वैकन्यद्वादशपार्थि
व ॥ नक्षत्राणिचचन्द्रस्यविंशतिस्सप्तचोर्जिताः ॥ ७५ ॥ मरीचेःकश्यपःपुत्रस्तपसानिर्मितःकिल ॥ तस्मैद्वादशकन्याश्चदक्षस्ताश्चान्वमन्यत ॥

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

॥ ७६ ॥ नक्षत्राणिचसोमायतथैवंदत्तवान्नृपिः ॥ रोहिण्यादीनिसर्वाणिपुण्यानिकुरुनन्दन ॥७७॥ तथैवदशधर्मायदत्ताश्चापिमनोरमाः ॥ लक्ष्मी
स्सरस्वतीसन्ध्याविश्वेशाचमहायशाः ॥ देवीसरस्वतीचैवब्रह्मणानिर्मिताःपुरा ॥ ७८ ॥ एताःपञ्चवरिष्ठावैसुरश्रेष्ठायपार्थिव ॥ दत्ताधर्मायभद्रंतेब्र
ह्मणादृष्टकर्मणा ॥ ७९ ॥ यारूपार्धवतीपत्नीब्रह्मणःकामरूपिणी ॥ सुरभिःसहसाभूत्वाब्रह्माणंसमुपस्थिता ॥ ८० ॥ ततस्तामगमद्ब्रह्मामैथुनेलोक
पूजितः ॥ लोकसर्जनहेतुज्ञोगवामर्थायसत्तम ॥ ८१ ॥ जज्ञेचैकादशसुतान्विपुलान्धर्मसंज्ञितान् ॥ रक्तसन्ध्याभ्रसङ्काशान्महतस्तिग्मतेजसः ॥
॥ ८२ ॥ तेरुदन्तोद्रवन्तश्चगतवन्तःपितामहम् ॥ रोदनाद्रवणाच्चैवरुद्राएवेतितेस्मृताः ॥ ८३ ॥ निर्हतिश्चैवसन्ध्यश्चतृतीयश्चाप्ययोनिजः ॥ मृग
व्याधःकपर्दीचमहाविश्वेश्वरश्चयः ॥ ८४ ॥ अहिर्बुध्न्यश्चभगवान्कपालीचवपिङ्गलः ॥ सेनानीश्चमहातेजारुद्राश्चैकादशस्मृताः ॥ ८५॥ तस्यामे
वसुरभ्यांचगावोजाताःसुराश्चये ॥ अजश्चैवतुहंसश्चतथैवनृपसत्तम ॥ ८६ ॥ ओषध्यःप्रवरायाश्चसरभ्यास्तास्समुत्थिताः ॥ धर्माल्लक्ष्मीस्तथाका
मंसाध्यान्साध्याव्यजायत ॥ ८७॥ भवंचप्रभवंचैवकृशाश्वंस्ववहंतथा ॥ अरुणंवरुणंचैवविश्वामित्रचलध्रुवौ ॥८८॥ हविष्मन्तंतनूजंचविधानाभि
मतावपि ॥ वत्सरंचैवभर्तिंचसर्वासुरनिपूदनम् ॥८९॥ सुपर्वाणंबृहत्कान्तिमहालोकनमस्कृतम् ॥ वासवानुगतादेवीजनयामासवैसुरान्॥९०॥ धरंवै
प्रथमंदेवंद्वितीयंध्रुवमव्ययम् ॥ विश्वावसुंतृतीयंचचतुर्थंसोममीश्वरम् ॥९१॥ ततोऽनुरूपमायंचयमंतस्मादनन्तरम् ॥ सप्तमंचतथावायुमष्टमंनिर्हतिं
तथा ॥ ९२ ॥ धर्मस्यापत्यमेतद्वैसुरभ्यांतदजायत ॥ विश्वेदेवाश्चविश्वायांधर्माज्जाताइतिस्मृताः ॥ ९३ ॥ दक्षश्चैवमहाबाहुःपुष्करस्तमएवच ॥
चाक्षुषश्चततोऽत्रिश्चतथाभद्रमहोरगौ ॥९४॥ विश्वान्तकवसुर्बालोनिकुम्भश्चमहायशाः ॥ रुरुदुश्चातिसिद्धौजाभास्करप्रमितद्युतिः ॥९५ ॥ विश्वा
न्देवान्देवमाताविश्वेषांजनयत्सुतान् ॥ मरुत्वतीमरुत्वतोदेवानजनयत्सुतान् ॥ ९६ ॥ अग्निश्चक्षूरविर्ज्योतिःसावित्रीमित्रमेवच ॥ अमरंशरवृष्टिंच
सुकर्षंचमहत्तरम्॥९७॥विराजंचैवराजंचविश्वायुंसुमतिंतथा ॥अश्वगंचित्ररश्मिचतथाचनिषधंनृपम् ॥९८॥ भूयएवंचात्मविधिंचारित्रपादमात्रगम् ॥
बृहन्तंवैबृहद्रूपंतथाचैवसनाभिगम् ॥९९॥ मरुत्वतीप्रजाजज्ञज्येष्ठान्तंमरुतांगणम् ॥अदितिःकश्यपाज्जज्ञेआदित्यान्द्वादशैवहि ॥१००॥ इन्द्रोविष्णु
र्भगस्त्वष्टावरुणोंऽशोऽर्यमारविः॥पूषामित्रश्चवरदोधातापर्जन्यएवहि ॥१॥ इत्येतेद्वादशादित्यावरिष्ठास्त्रिदिवौकसाम्॥आदित्यस्यसरस्वत्यांजज्ञाते
द्वौसुतौवरौ ॥२॥ तपःश्रेष्ठौगुणश्रेष्ठौत्रिदिवस्यातिसंमतौ॥दनुस्तुदानवाञ्जज्ञेदितिर्दैत्यान्व्यजायत॥३॥ कालातुकालकेयांस्तानसुरान्राक्षसांस्तथा॥
अनायुषायास्तनयाव्याधयश्चमहाबलाः ॥ ४ ॥ सिंहिकाग्रहमाताचगन्धर्वजननीमुनिः ॥ प्राचीत्वप्सरसांमातापुण्यानांभारतेतरा ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्रोधाद्याः सर्वभूतानिपिशाचायाश्चपार्थिव ॥ जज्ञेयक्षगणांश्चैवराक्षसांश्चविशांपते ॥ ६ ॥ चतुष्पदानिसत्त्वानिएतागाश्चैवसौरभी ॥ पुरा
णपुरुषश्चैवमायांविष्णुर्हरिःप्रभुः ॥ ७ ॥ कथितस्तेऽनुपूर्वेणसंस्तुतश्चमहर्षिभिः ॥ ८ ॥ यश्चेदमग्र्यंशृणुयात्पुराणंसदानरःपर्वसुचेत्पठेत ॥ अवाप्यलो
कंसहिवीतरागःपरत्रचस्वर्गफलानिभुङ्क्ते ॥ ९ ॥ चक्षुषामनसावाचाकर्मणाचचतुर्विधम् ॥ प्रसादयतियःकृष्णंतस्यकृष्णःप्रसीदति ॥ ११० ॥ राज्यं
चलभतेराजानिर्धनश्चोत्तमंधनम् ॥ क्षीणायुर्लभतेचायुःपुत्रकामोऽथसन्ततिम् ॥ ११ ॥ यज्ञार्थिनस्तथाकामांस्तपांसिविविधानिच ॥ यंयंकामयते
कामंतंतंलोकेश्वराल्लभेत् ॥ १२ ॥ सर्वंविहाययइमंपठेद्वैपौष्करंहरेः ॥ प्रादुर्भावंनरश्रेष्ठनतस्यह्यशुभंभवेत् ॥ १३ ॥ एषपौष्करकोनामप्रादुर्भा
वोमहात्मनः॥कीर्तितस्तुमहाराजव्यासश्रुतिनिदर्शनात् ॥१४॥ विष्णुत्वंशृणुमेविष्णोर्हरित्वंचकृतेयुगे ॥ वैकुण्ठत्वंचदेवेषुकृष्णत्वंमानुषेषुच ॥१५॥
ईश्वरस्यहितस्यैषाकर्मणांगहनागतिः ॥ साम्प्रतंभूतभव्यंचशृणुराजन्यथातथम् ॥१६॥ अव्यक्तोव्यक्तलिङ्गस्थोयएषभगवान्प्रभुः॥नारायणोह्यनन्ता
त्माप्रभवोऽव्ययएवच ॥ १७ ॥ एषनारायणोभूत्वाहरिरासीत्सनातनः ॥ ब्रह्मावायुश्चसोमश्चधर्मःशक्रोबृहस्पतिः ॥ १८ ॥ अदितेरपिपुत्रत्वमेत्यज
कुरुनन्दन॥ एषविष्णुरितिख्यातइन्द्रस्यावरजोविभुः ॥१९॥ प्रसादनंतस्यविभोरदित्याःपुत्रकारणम् ॥ वधार्थंसुरशत्रूणांदैत्यदानवरक्षसाम् ॥१२०॥
प्रधानात्मापुराह्येषब्रह्माणमसृजत्प्रभुः ॥ ससर्जाथसुरान्कल्पेब्रह्माणंचप्रजापतीन् ॥२१॥ असृजन्मानसांस्तत्रब्रह्मवंशाननुत्तमान् ॥ तेभ्योऽभवन्मह
त्मभ्यःपरंब्रह्मसनातनम् ॥२२॥ एतदाश्चर्यभूतस्यविष्णोःकर्मानुकीर्तितम् ॥ कीर्त्तनीयस्यलोकेषुकीर्त्यमानंनिबोधमे ॥२३॥ वृत्तेवृत्रवधेभीष्मवर्तमा
नेकृतेयुगे ॥ आसीत्त्रैलोक्यविख्यातःसङ्ग्रामस्तारकामयः ॥ २४ ॥ यत्रतेदानवाघोराःसर्वेसङ्ग्रामदुर्जयाः ॥ घ्नन्तिदेवासुरान्सर्वान्सयक्षोरगराक्ष
सान् ॥ २५ ॥ तेवध्यमानाविमुखाश्छिन्नप्रहरणारणे ॥ त्रातारंमनसाजग्मुर्देवंनारायणंप्रभुम् ॥ २६ ॥ एतस्मिन्नन्तरेमेघानिर्वाणाङ्गारवर्चसः॥सार्क
चन्द्रग्रहगणंच्छादयन्तोनभस्तलम् ॥२७॥ चण्डविद्युद्गणोपेताघोरनिर्ह्रादकारिणः॥अन्योन्यवेगाभिहताःप्रवबुःसप्तमारुताः ॥२८॥ दीप्ततोयाःसनि
र्घातैःसहवज्रानलानिलैः ॥ रवैस्मघोरैरुत्पातैर्दह्यमानमिवाम्बरम् ॥२९॥ पेतुरुल्कासहस्राणिनिपेतुःखचराण्यपि ॥ दैवानिचविमानानिप्रपतन्त्युत्प
तन्तिच ॥ १३० ॥ चतुर्युगान्तसमयेलोकानांयद्भयंभवेत् ॥ अरूपवतिरूपाणितस्मिन्नुत्पातलक्षणे ॥ ३१ ॥ तस्माद्दुष्प्रथितंसर्वंनप्राज्ञायतकिंचन ॥
तिमिरौघपरिक्षिप्तानरेजुश्चदिशोदश ॥ ३२ ॥ विवेशरूपिणीकालीकालमेघावगुण्ठिता ॥ द्यौर्नभात्यभिभूतार्काघोरेणतमसावृता ॥ ३३ ॥
तान्घनौघान्सतिमिरान्दोर्भ्यामाच्छिद्यसप्रभुः ॥ वपुःस्वंदर्शयामासदिव्यंकृष्णवपुर्हरिः ॥३४ ॥ बलाहकाञ्जननिभंबलाहकतनूरुहम् ॥ तेजसावपु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पाचैवकृष्णंकृष्णमिवाचलम्॥३५॥दीप्तपीताम्बरधरंतप्तकाञ्चनभूषणम्॥धूम्रान्धकारवपुषंयुगान्ताग्निमिवोत्थितम्॥३६॥मृत्तद्विगुणपीनांसंकिरीटाच्छ
न्नमूर्धजम्॥बभौचामीकरप्रख्यैरायुधैरुपशोभितम्॥३७॥चन्द्रार्ककिरणोद्योतंगिरिकूटमिवोच्छ्रितम्॥नन्दकानन्दितकरंकौस्तुभोद्भासितोरसम्॥३८॥
शक्तिचित्रफलोदग्रंशङ्खचक्रगदाधरम् ॥ विष्णुशैलंक्षमाशीलश्रीवत्संशार्ङ्गपाणिनम् ॥ ३९ ॥ त्रिदशोदारफलदंस्वर्गस्त्रीचारुवल्लभम् ॥ सर्वलोकमनः
कान्तंसर्वसत्वमनोहरम् ॥ १४० ॥ मायाविशालविटपंतोयदौघसमप्रभम् ॥ विद्याहङ्कारमानाढ्यमहाभूतप्ररोहणम् ॥ ४१ ॥ विशेषपत्रैर्निचितं
ग्रहनक्षत्रपुष्पितम् ॥ दैत्यलोकमहास्कन्धंमर्त्यलोकप्रकाशितम् ॥ ४२ ॥ सागराकारनिर्ह्रादंरसातलतलाश्रयम् ॥ नागेन्द्रपाशैर्विततंपक्षिजन्तुसम
न्वितम् ॥४३॥ शीलानाहार्यगन्धाढ्यंसर्वलोकमहाद्रुमम् ॥ अव्यक्तानन्दसलिलंव्यक्ताहङ्कारफेनिलम् ॥४४॥ महाभूतकरौघौघंग्रहनक्षत्रबुद्बुदम्॥
विमानवाहनैर्व्याप्तंतोयदाडम्बराकुलम् ॥ ४५ ॥ जन्तुमत्स्यगणाकीर्णंशैलशङ्खकुलैर्युतम् ॥ त्रैगुण्यविषयावर्तंसर्वलोकतिमिङ्गिलम् ॥ ४६ ॥
वीरवृक्षलतागुल्मंभुजगोत्सृष्टशैवलम् ॥ द्वादशार्कमहाद्वीपंरुद्रैकादशपत्तनम् ॥४७॥ वस्वष्टपर्वतोपेतंत्रैलोक्याम्भोमहोदधिम् ॥ सन्ध्यासन्ध्योर्मिस
लिलमापूर्णानिलशोभितम्॥ ४८॥दैत्ययक्षगणग्रामंरक्षोगणझषाकुलम्॥ पितामहमहावीर्यंस्वर्गस्त्रीरत्नसङ्कुलम्॥४९॥श्रीकीर्तिकान्तिलक्ष्मीभिर्नदीभि
श्चसमाकुलम् ॥ कालयोगमहावर्षप्रलयोत्पत्तिवेगितम् ॥ १५०॥ सत्संयोगमहापारंनारायणमहार्णवम् ॥ देवातिदेवंवरदंभक्तानांभक्तवत्सलम्॥५१॥
अनुग्रहकरंदेवंप्रशान्तिकरणंशुभम् ॥ हर्यश्वरथसंयुक्तसुपर्णध्वजशोभित ॥ ५२ ॥ चन्द्रार्कचक्ररचितउदाराक्षवृतान्तरे ॥ अनन्तरश्मिसंयुक्तेदु
र्दर्शेमेरुकूबरे ॥ ५३ ॥ तारकाचित्रकुसुमेग्रहनक्षत्रबन्धुरे ॥ भयेष्वभयदेव्योम्निदेवदैत्यापराजिते ॥ ५४ ॥ हर्यश्वरथसंयुक्तमुक्ताशो
भासमन्वितम् ॥ ददृशुस्तेस्थितंदेवंदिव्यलोकमयेरथे ॥ ५५ ॥ तेकृताञ्जलयःसर्वेदेवाइन्द्रपुरोगमाः ॥ जयशब्दंपुरस्कृत्यशरण्यंशरणंगताः
॥ ५६ ॥ एतेपांचगिरःश्रुत्वासविष्णुर्देवदैवतः ॥ मनश्चक्रेविनाशायदानवानांमहामृधे ॥ ५७ ॥ आकाशेतुस्थितोविष्णुरुत्तमंवपुराश्रितः ॥
उवाचदेवताःसर्वाःसप्रतिज्ञमिदंवचः ॥ ५८ ॥ विष्णुरुवाच ॥ शान्तिंव्रजतभद्रंवोमाभैष्टमरुतांगणाः ॥ जितामेदानवाःसर्वेत्रैलोक्यंपरिगृह्यताम्
॥५९॥ पुलस्त्यउवाच ॥ ततोऽस्यसत्यसन्धस्यविष्णोर्वाक्येनतोषिताः ॥ देवाःप्रीतिंपरांजग्मुःप्राश्यामृतमिवोत्तमम्॥ १६०॥ततस्तमश्चसंहृत्यवि
नेशुश्चबलाहकाः ॥ प्रवबुश्चशिवावाताःप्रसन्नाश्चदिशोदश ॥ ६१ ॥ शुद्धप्रायाणिज्योतींषिसोमंचक्रुःप्रदक्षिणम् ॥ नविग्रहंग्रहाश्चक्रुःप्रसन्नाश्चापि
सिन्धवः ॥ ६२ ॥ विरजाअभवन्मार्गालोकाःस्वर्गादयस्त्रयः ॥ यथार्थमूहुस्सरितश्चुक्षुभेनतथार्णवः ॥ ६३ ॥ आसञ्छुभानीन्द्रियाणि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नराणामन्तरात्मसु ॥ महर्षयोवीतशोकावेदानुच्चैरधीयत ॥ ६४ ॥ यज्ञेषुचहविःपाकंशिवमापचपावकः ॥ प्रवृत्तधर्मसंवृत्तालोकामुदितमा
नसाः ॥ ६५ ॥ विष्णोःसत्यप्रतिज्ञस्यश्रुत्वारिनिधनागिरः ॥ ततोऽभयंविष्णुमुखाच्छ्रुत्वादैतेयदानवाः ॥ ६६ ॥ उद्योगंविपुलंचक्रुर्युद्धायविजया
यच ॥ मयस्तुकाञ्चनमयंत्रिनल्वान्तरमव्ययम् ॥ ६७ ॥ चतुश्चक्रंसुविपुलंसुकल्पितमहायुधम् ॥ किङ्किणीजालनिर्घोषंद्वीपिचर्मपरिष्कृतम् ॥६८॥
रुचिरंरश्मिजालैश्चहैमजालैश्चशोभितम् ॥ ईहामृगगणाकीर्णंपक्षिसङ्घविराजितम् ॥ ६९ ॥ दिव्यास्त्रशस्त्ररुचिरंपयोधरनिनादितम् ॥ स्वक्षंरथवरो
दारंसूपस्थंगगनोपमम् ॥ १७० ॥ गदापरिघसम्पूर्णंमूर्तिमन्तमिवार्णवम् ॥ हेमकेयूरवलयंचन्द्रमण्डलकूबरम् ॥ ७१ ॥ सपताकंध्वजोपेतंसादि
त्यमिवमन्दरम् ॥ गजेन्द्राभोगवपुषंक्वचित्केसरवर्चसम् ॥ ७२ ॥ युक्तमृक्षसहस्रेणसुधाराम्बुदनादितम् ॥ दीप्तमाकाशगंदिव्यंरथंपररथारुजम्
॥ ७३ ॥ अध्यतिष्ठद्रणाकाङ्क्षीमेरुंदीप्तमिवांशुमान् ॥ तारस्तुक्रोशविस्तारमायामेचतथाविधम् ॥ ७४ ॥ शैलकूबरसङ्काशंनीलाञ्जनचयोपमम् ॥
काललोहस्यरत्नानांसमूहाबद्धकूबरम् ॥ ७५ ॥ तिमिरोद्गारकिरणंगर्जन्तमिवतोयदम् ॥ लोहजालेनमहतासगवाक्षेणदंशितम् ॥ ७६ ॥ आयसैःपरि
घैःपूर्णंक्षेपणीयैश्चमुद्गरैः ॥ प्रासैःपाशैश्चविततैरसंयुक्तैश्चकण्टकैः ॥ ७७ ॥ शोभितंत्रासनीयश्चतोमरैःसपरश्वधैः ॥ उद्यतंद्विषतांहेतोर्द्वितीयमिव
मन्दरम् ॥ ७८ ॥ युक्तंखरसहस्रेणसोऽध्यारोहद्रथोत्तमम् ॥ विरोचनस्तुसङ्क्रुद्धोगदापाणिरवस्थितः ॥ ७९ ॥ प्रमुखेतस्यसैन्यस्यदीप्तशृङ्गइवा
चलः ॥ युक्तंहयसहस्रेणहयग्रीवस्तुदानवः ॥ १८० ॥ व्यूहितंदानवव्यूहंपरिचक्रामवीर्यवान् ॥ विप्रचित्तिसुतःश्वेतःश्वेतकुण्डलभूषणः ॥ ८१ ॥
स्यन्दनंवाहयामासपरानीकस्यमर्दनः ॥ व्यायतंकिष्कुसाहस्रंधनुर्विस्फारयन्महत् ॥ ८२ ॥ सचाहवमुखेतस्थौसप्ररोहइवाचलः ॥ खरस्तु
विकिरन्क्रोधान्नेत्राभ्यांरोषजंजलम् ॥ ८३ ॥ स्फुरद्दन्तोष्ठनयनःसङ्ग्रामंसोऽभ्यकाङ्क्षत ॥ त्वष्टात्वष्टादशहयंयानमास्थायदानवः ॥ ८४ ॥
श्वेतमेघप्रतीकाशोयुद्धायाभिमुखःस्थितः ॥ अरिष्टोबलिपुत्रश्चवरिष्ठोदुर्धरायुधः ॥ ८५ ॥ युद्धायाभिमुखस्तस्थौधराधरविकम्पनः ॥
किशोरस्त्वतिसंहर्षात्किशोरइवचोदितः ॥ ८६ ॥ अभवद्दैत्यमध्येसग्रहमध्येयथारविः ॥ लम्बस्तुनवमेघाभःप्रलम्बाम्बरभूषणः ॥ ८७ ॥ दैत्य
व्यूहगतोभातिसनीहारइवांशुमान् ॥ वसुन्धराभस्तदनुदशनौष्ठेक्षणायुधः ॥ ८८ ॥ हसंस्तिष्ठतिदैत्यानांमध्येक्रूरमहाग्रहः ॥ अन्येहयगता
स्तत्रमत्तेभेन्द्रगताःपरे ॥ ८९ ॥ सिंहव्याघ्रगताश्चान्येवराहर्क्षेषुचापरे ॥ केचित्खरोष्ट्रयातारःकेचित्तोयदवाहनाः ॥ १९० ॥ पत्तयश्चापरे
दैत्याभीषणाविकृताननाः ॥ एकपादास्त्वपादाश्चननृतुर्युद्धकाङ्क्षिणः ॥ ९१ ॥ आस्फोटयन्तोबहवःस्वनन्तश्चतथापरे ॥ हृप्तशार्दूलनिर्घो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पानेदुर्दानवपुङ्गवाः ॥ ९२ ॥ तेगदापरिघैर्वीरैःशिलामुद्गरपाणयः ॥ बाहुभिःपरिघाकारैस्तर्जयन्तिस्मदेवताः ॥ ९३ ॥ प्रासैःखङ्गैश्च पाशैश्चतोमराङ्कुशपट्टिशैः ॥ चिक्षिपुस्तेशतघ्नीभिःशतधारैश्चमुद्गरैः ॥ ९४ ॥ खड्गैःशूलैश्चशैलैश्चपरिघैश्चोद्यतायुधैः ॥ युक्तंबलाहकगणैः सर्वतःसंवृतंनभः ॥ ९५ ॥ एवंतद्दानवंसैन्यंसर्वसत्त्वमदोत्कटम् ॥ देवताभिमुखंतस्थौमेघानीकमिवोदितम् ॥ ९६ ॥ रेजेचतद्दैत्यस हस्रगाढंवाय्वग्निशैलाम्बुदतोयकल्पम् ॥ बलंबलौघाकुलमभ्युदीर्णंयुयुत्सयोन्मत्तमिवावभासे ॥ ९७ ॥ श्रुतस्तेदैत्यसैन्यस्यविस्तारः कुरुनन्दन ॥ सुराणामपिसैन्यस्यविस्तरंवैष्णवंशृणु ॥ १९८ ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेदैत्यसेनावर्णनंनामद्विचत्वारिंशत्तमोऽध्यायः ॥ ४२ ॥ पुलस्त्यउवाच ॥ आदित्यावसवोरुद्राअश्विनौचमहाबलौ ॥ सबलाःसानुगाश्चैवसमनह्यन्यथाक्रमम् ॥ १ ॥ पुरुहूतश्चपुरतो लोकपालःसहस्रदृक् ॥ ग्रामणीःसर्वदेवानामारुरोहवरद्विपम् ॥ २ ॥ सव्येचास्यरथःपार्श्वेपक्षिप्रवरकेतनः ॥ सुचारुचक्रचरणोहेमच्छत्रपरि ष्कृतः ॥ ३ ॥ देवगन्धर्वयक्षौघैरनुयातःसहस्रशः ॥ दीप्तिमद्भिश्चस्वर्गस्थैर्ब्रह्मर्षिभिरभिष्टुतः ॥ ४ ॥ वज्रविस्फारितोद्भूतैर्विद्युदिन्द्रायुध प्रभैः ॥ युक्तंबलाहकगणैःपर्वतैरिवकामगैः ॥ ५ ॥ यमारूढःसभगवान्पर्येतिसकलंजगत् ॥ हविर्दानेषुगायन्तिविप्रामखमुखेस्थिताः ॥ ६ ॥ स्वर्गसङ्ग्रामयातेषुदेवतूर्यनिनादिषु ॥ सदायमुपनृत्यन्तिशतशोह्यप्सरोगणाः ॥ ७ ॥ केतुनानागराजेनराजमानोयथारविः ॥ युक्तोहयसहस्रेणमनोमारुतरंहसा ॥ ८ ॥ सम्यग्रथवरोभातियुक्तोमातलिनातदा ॥ कृत्स्नःपरिवृतोमेरुर्भास्करस्येवतेजसा ॥ ९ ॥ यमस्तु दण्डमुद्यम्यकालयुक्तंचमुद्गरम् ॥ तस्थौसुरगणानीकेदैत्यानांचैवदर्शयन् ॥ १० ॥ चतुर्भिःसागरैर्युक्तोलेलिहानैश्चपन्नगैः ॥ शङ्खमुक्ताङ्गदधरो बिभ्रत्तोयमयंवपुः ॥ ११ ॥ कालपाशान्समाविध्यहयैःशशिकरोपमैः ॥ वाय्वीरितजलाकारैःकुर्वँल्लीलाःसहस्रशः ॥ १२ ॥ पाण्डुरो द्धूतवसनःप्रवालरुचिराङ्गदः ॥ मणिश्यामोत्तमवपुर्हारकेणार्चितोदरः ॥ १३ ॥ वरुणःपाशधृन्मध्येदेवानीकस्यतस्थिवान् ॥ युद्धवेला मभिलषन्भिन्नवेलइवार्णवः ॥ १४ ॥ यक्षराक्षससैन्येनगुह्यकानांगणैरपि ॥ युक्तश्चशङ्खपद्माभ्यांनिधीनामधिपःप्रभुः ॥ १५ ॥ राजराजेश्वरःश्रीमान्गदापाणिरदृश्यत ॥ विमानयोधीधनदोविमानेपुष्पकेस्थितः ॥ १६ ॥ सराजराजःशुशुभेयक्षेशोनरवाहनः ॥ ईक्षमाणः स्वसङ्ग्रामंसाक्षादिवशिवःस्थितः ॥ १७ ॥ पूर्वपक्षेसहस्राक्षःपितृराजश्चदक्षिणे ॥ वरुणःपश्चिमेपक्षउत्तरेनरवाहनः ॥ १८ ॥ चतुष्पक्षाश्चचत्वारो लोकपालामहाबलाः ॥ आत्मदिक्षुचरन्तश्चतस्यदेवबलस्यते ॥ १९ ॥ सूर्यःसप्ताश्वयुक्तेनरथेनानिलगामिना ॥ श्रियाजाज्वल्यमानेनदीप्यमानैश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रश्मिभिः ॥ २० ॥ उदयास्तमयौचक्रेमेरुपर्यन्तगामिना ॥ त्रिदिवद्वारचक्रेणतपसालोकमव्ययम् ॥ २१ ॥ सहस्ररश्मियुक्तेनभ्राजमानेनतेजसा ॥
चचारमध्येदेवानांद्वादशात्मादिवाकरः ॥२२॥ सोमःश्वेतहयोभातिस्यन्दनेशीतरश्मिमान् ॥ हिमतोयप्रपूर्णाभिर्भाभिराह्लादयञ्जगत् ॥२३॥तमृक्ष
योगानुगतंशिशिरांशुंद्विजेश्वरम्॥शशच्छायाङ्कितततनुंनैशस्यतमसःक्षयम् ॥२४ ॥ ज्योतिषामीश्वरंव्योम्निरसदंप्रभुमव्ययम् ॥ ओषधीनांपवित्राणां
निधानममृतस्यच ॥ २५ ॥ जगतःपरमंभागंसौम्यंसर्वमयंरसम् ॥ ददृशुर्दानवाःसोमंहिमप्रहरणंस्थितम् ॥२६॥ यःप्राणःसर्वभूतानांपञ्चधाभिद्यते
नृषु ॥ सप्तस्कन्धगतोलोकांस्त्रीन्दधारचकारच ॥ २७ ॥ यमाहुरग्निकर्त्तारंसर्वप्रभवमीश्वरम् ॥ सप्तस्वरगतायस्ययोनिर्गीर्भिरुदीर्यते ॥ २८ ॥ यंव
दन्तिचलंभूतंयंवदन्त्यशरीरिणम् ॥ यमाहुराकाशगमंशीघ्रगंशब्दयोनिजम् ॥ २९ ॥ सवायुःसर्वभूतायुरुद्धतःस्वेनतेजसा ॥ ववौप्रव्यथयन्दै
त्यान्प्रतिलोमंसतोयदः ॥ ३० ॥ मारुतोदेवगन्धर्वैर्विद्याधरगणैःसह ॥ चिक्रीडरश्मिभिश्शुभ्रैर्निर्मुक्तैरिवपन्नगैः ॥ ३१ ॥ सृजन्तःसर्पपतय
स्तीव्रंरोषमयंविषम् ॥ शरभूताविलग्नाश्चचेरुर्व्यात्ताननादिवि ॥ ३२ ॥ पर्वताश्चशिलाशृङ्गैःशतशाखैश्चपादपैः ॥ उपतस्थुःसुरगणान्प्रहर्तुंदा
नवंबलम् ॥ ३३ ॥ यःसदेवोहृषीकेशःपद्मनाभस्त्रिविक्रमः ॥ युगान्तेकृष्णवर्त्माचविश्वस्यजगतःप्रभुः ॥ ३४ ॥ सर्वयोनिःसमधुहाहव्यभुक्क्रतु
संस्थितः ॥ भूम्यम्बुव्योमभूतात्माश्यामःशान्तिकरोऽरिहा ॥ ३५॥ सोमार्काग्निमयंचक्रमुद्यम्योत्तमतेजसम् ॥ अविघ्नममरादीनांचक्रेचक्रगदाधरः
॥ ३६ ॥ सव्येनालम्ब्यमहतींसर्वायुधविनाशिनीम् ॥ करेणकालींवपुषाशत्रुकालप्रदांगदाम् ॥ ३७ ॥ शेषैर्भुजैःप्रदीप्ताभैर्भुजगारिध्वजःप्रभुः ॥
दधारायुधजालानिशार्ङ्गादीनिमहाबलः ॥ ३८ ॥ सकश्यपस्यात्मभवंद्विजंभुजगभोजनम् ॥ भुजगेन्द्रेणवदनेनिविष्टेनविराजितम् ॥ ३९ ॥
अमृतारम्भसंयुक्तंमन्दराद्रिमिवोच्छ्रितम् ॥ देवासुरविमर्देषुबहुशोदृष्टविक्रमम् ॥ ४० ॥ महेन्द्रेणामृतस्यार्थेवज्रेणकृतलक्षणम् ॥ विचित्रपत्रव
सनंधातुमन्तमिवाचलम् ॥ ४१ ॥ स्फीतक्रोधावलम्बेनशीतांशुसमतेजसा ॥ भोगिभोगावसक्तेनमणिरत्नेनभास्वता ॥ ४२ ॥ पक्षाभ्यांचारुप
त्राभ्यामावृतंदिविलीलया ॥ युगान्तेसेन्द्रचापाभ्यांतोयदाभ्यामिवाम्बरम् ॥ ४३ ॥ नीललोहितपीताभिःपताकाभिरलङ्कृतम् ॥ अरुणावरजंश्री
मानारुह्यसमरेप्रभुः ॥ ४४ ॥ सुवर्णवर्णवपुषंसुपर्णंखेचरोत्तमम् ॥ तमन्वयुःसुरगणामुनयश्चसमाहिताः ॥ ४५ ॥ गीर्भिःपरममन्त्राभिस्तुष्टुवुश्च
गदाधरम् ॥ तद्वैश्रवणसंश्लिष्टंवैवस्वतपुरःसरम् ॥ ४६ ॥ वारिराजपरिक्षिप्तंदेवराजविराजितम् ॥ पवनाबद्धनिर्घोषंसम्प्रदीप्तहुताशनम् ॥ ४७ ॥
विष्णोर्जिष्णोःसहिष्णोश्चभ्राजिष्णोस्तेजसावृतम् ॥ बलंबलवदुद्रिक्तंयुद्धायसमवर्तत ॥ ४८ ॥ स्वस्त्यस्तुदेवेभ्यइतिबृहस्पतिरभाषत ॥ स्वस्त्यस्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दैत्येभ्यइतिउशनावाक्यमाबदद् ॥ ४९ ॥ ताभ्यांबलाभ्यांसञ्जज्ञेतुमुलोविग्रहस्तथा ॥ सुराणामसुराणांचपरस्परजयैषिणाम् ॥ ५० ॥ दानवा
दैवतैःसार्द्धंनानाप्रहरणोद्यमाः ॥ समीयुर्युध्यमानावैपर्वताइवपर्वतैः ॥ ५१ ॥ तत्सुरासुरसंयुक्तंयुद्धमत्यद्भुतंबभौ ॥ धर्माधर्मसमायुक्तंदर्पेणविनये
नच ॥ ५२ ॥ ततोहयैःप्रजवितैर्वारणैश्चप्रचोदितैः ॥ उत्पतद्भिश्चगगनेसासिहस्तैःसमन्ततः ॥ ५३ ॥ क्षिप्यमाणैश्चमुसलैःसम्पतद्भिश्चसायकैः ॥
चापैर्विस्फार्यमाणैश्चपात्यमानैःसुदारुणैः ॥ ५४ ॥ तद्युद्धमभवद्घोरंदेवदानवसंकुलम् ॥ जगतस्त्रासजननंयुगसंवर्तकोपमम् ॥ ५५ ॥ स्वहस्तमुक्तैः
परिघैर्मुद्गरैश्चैवपर्वतैः ॥ दानवास्समरेजघ्नुर्देवानिन्द्रपुरोगमान् ॥ ५६ ॥ तेवध्यमानाबलिभिर्दानवैर्जितकाशिभिः ॥ विषण्णवदनादेवाजग्मुरार्तिं
परांमृधे ॥ ५७ ॥ तेचास्त्रशूलमथिताःपरिघैर्भिन्नमस्तकाः ॥ भिन्नोरस्कादितिसुतैःस्रवद्रक्तारणेबहु ॥ ५८ ॥ सूदिताःशरजालैश्चनिर्यत्नाश्चशरैः
कृताः ॥ प्रविष्टादानवींमायांनशेकुस्तेविचेष्टितुम् ॥ ५९ ॥ उत्तम्भितमिवाभातिनिष्प्राणसदृशाकृति ॥ बलंसुराणामसुरैर्निष्प्रयत्नायुधंकृतम्
॥ ६० ॥ दैत्यचापच्युतान्घोरांश्छित्त्वावज्रेणतान्शरान् ॥ शक्रोदैत्यबलंघोरंविवेशबहुलोचनः ॥ ६१ ॥ सदैत्यप्रमुखान्सर्वान्हत्वादैत्यबलंमहत्॥
तामसेनास्त्रजालेनतमोभूतमथाकरोत् ॥ ६२ ॥ तेऽन्योन्यंनान्वबुध्यन्तदैत्यानांवाहनानिच ॥ घोरेणतमसाविष्टाःपुरुहूतस्यतेजसा ॥ ६३ ॥
मायापाशैर्विमुक्तास्तुयत्नवन्तःसुरोत्तमाः ॥ शिरांसिदैत्यसङ्घानांतमोभूतान्यपतायन् ॥ ६४ ॥ अपध्वस्ताविसंज्ञाश्चतमसानीलवर्चसा ॥ पेतु
स्तेदानवास्सद्यश्छिन्नपक्षाइवाद्रयः ॥६५॥ तत्राभिभूतदैत्येन्द्रमन्धकारमिवान्तरम् ॥ दानवंदेहसदनंतमोभूतमिवाभवत् ॥ ६६ ॥ तथासृजन्महा
मायांमयस्तांतामसींदहन् ॥ युगान्तोद्योतजननींसृष्टामौर्वेणवह्निना ॥ ६७ ॥ साददाहचतांशाक्रींमायामयविकल्पिता ॥ दैत्याश्चादित्यवपुषासद्य
उत्तस्थुराहवे ॥ ६८ ॥ मायामौर्वींसमासाद्यदह्यमानादिवौकसः ॥ भेजिरेचन्द्रविषयंशीतांशुसलिलह्रदम् ॥ ६९ ॥ तेदह्यमानाऔर्वेणवह्निनानष्ट
चेतसः ॥ शशंसुर्वज्रिणंदेवाःसन्तप्ताःशरणैषिणः ॥ ७० ॥ सन्तप्तेमाययासैन्येहन्यमानेचदानवैः ॥ चोदितोदेवराजेनवरुणोवाक्यमब्रवीत् ॥७१॥
वरुणउवाच॥पुराब्रह्मर्षिजःशक्रतपस्तेपेसुदारुणम् ॥ उर्वःसपूर्वंतेजस्वीसदृशोब्रह्मणोगुणैः ॥ ७२ ॥ तंतपन्तमिवादित्यंतपसाजगदव्ययम् ॥ उपत
स्थुर्मुनिगणादेवादेवर्षिभिःसह ॥ ७३ ॥ हिरण्यकशिपुश्चैवदानवोदानवेश्वरः ॥ ऋषिंविज्ञापयामासपुरापरमतेजसम् ॥ ७४ ॥ ऊचुर्ब्रह्मर्षयस्तेतुव
चनंधर्मसंहितम् ॥ ऋषिवंशेषुभगवंश्छिन्नमूलमिदंकुलम् ॥ ७५ ॥ एकस्त्वमनपत्यश्चगोत्रायान्योनविद्यते ॥ कौमारंव्रतमास्थायक्लेशमेवानुवर्तसे
॥ ७६ ॥ बहूनिविप्रगोत्राणिमुनीनांभावितात्मनाम् ॥ एकदेहानितिष्ठन्तिविविक्तानिविनाप्रजाः ॥ ७७ ॥ एवम्भूतेषुसर्वेषुपुत्रैर्मेनास्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कारणम् ॥ भवांश्चतापसश्रेष्ठःप्रजापतिसमद्युतिः ॥ ७८ ॥ तत्प्रवर्तस्ववंशायवर्धयात्मानमात्मना ॥ समाधत्स्वोर्जिततंतेजोद्वितीयांकुरुवैतनुम्
॥ ७९ ॥ सएवमुक्तोमुनिभिर्मुनिर्मनसिताडितः ॥ जगर्हतानृषिगणान्वचनंचेदमब्रवीत् ॥ ८० ॥ यथाहिविहितोधर्मोमुनीनांशाश्वतः
पुरा ॥ आर्षंहिकेवलंकर्मवन्यमूलफलाशिनः ॥ ८१ ॥ ब्रह्मयोनौप्रसूतस्यब्राह्मणस्यात्मवार्तिनः ॥ ब्रह्मचर्यंसुचरितंब्रह्माणमपिचालयेत
॥ ८२ ॥ जनानांवृत्तयस्तिस्रोयेगृहाश्रमवासिनः ॥ अस्माकंचवनेवृत्तिर्वनाश्रमनिवासिनाम् ॥ ८३ ॥ अब्भक्षावायुभक्षाश्चदन्तोलूखलिन
स्तथा ॥ अश्मकुट्टादयोयत्रपञ्चाग्नितपसश्चये ॥ ८४ ॥ एतेतपसितिष्ठन्तोव्रतैरपिसुदुश्चरैः ॥ ब्रह्मचर्यंपुरस्कृत्यप्रार्थयन्तिपरांगतिम्
॥ ८५ ॥ ब्रह्मचर्याद्ब्राह्मणस्यब्राह्मणत्वंविधीयते ॥ एवमाहुःपरेलोकेब्रह्मचर्यविदोजनाः ॥ ८६ ॥ ब्रह्मचर्येस्थितोधर्मोब्रह्मचर्येस्थितंतपः ॥
येस्थिताब्रह्मचर्येतुब्राह्मणादिवितेस्थिताः ॥ ८७ ॥ नास्तियोगंविनासिद्धिर्नास्तियोगंविनायशः ॥ नास्तिलोकेयशोमूलंब्रह्मचर्यात्परन्तप॥८८॥
योनिगृह्येन्द्रियग्रामंभूतग्रामंचपञ्चकम् ॥ ब्रह्मचयसमाधत्तेकिमतःपरमंतपः ॥८९॥ अयोगकेशधरणमसङ्कल्पव्रतक्रिया ॥ अब्रह्मचर्याचर्याचत्रयंस्या
द्दम्भसंज्ञितम् ॥ ९० ॥ क्वदाराःक्वचसंयोगःक्वचभावविपर्ययः ॥ नन्वियंब्रह्मणासृष्टामनसामानसीप्रजा ॥ ९१ ॥ यद्यस्तितपसोवीर्यंयुष्माकं
विजितात्मनाम् ॥ सृजध्वंमानसान्पुत्रान्प्राजापत्येनकर्मणा ॥ ९२ ॥ मनसानिर्मितायोनिराधातव्यातपस्विभिः ॥ नोदारयोगंबीजंचव्रतमुक्तं
तपस्विनाम् ॥ ९३ ॥ यदिदंलुप्तधर्मार्थ्यंयुष्माभिरिहनिर्भयैः ॥ व्याहृतंसद्भिरत्यथमसद्भिरिवसंमतम् ॥ ९४ ॥ वपुर्दीप्तान्तरात्मानमेषकृत्वा
मनोमयम् ॥ दारयोगंविनास्रक्ष्येपुत्रमात्मतनूरुहम् ॥ ९५ ॥ एवमात्मानमात्मामेद्वितीयंजनयिष्यति ॥ प्राजापत्येनविधिनादिधक्षन्तमिव
प्रजाः ॥ ९६ ॥ वरुणउवाच ॥ उर्वस्तुतपसाविष्टोनिवेश्योरुंहुताशने ॥ ममन्थैकेनदर्भेणपुत्रस्यप्रसवारणिम् ॥ ९७ ॥ तस्योरुंसहसाभित्त्वा
वरोऽसौह्यग्निरुत्थितः ॥ जगतोदहनाकाङ्क्षीपुत्रोऽग्निस्समपद्यत ॥ ९८ ॥ उवस्योरुंविनिर्भिद्यऔर्वोनामान्तकोऽनलः ॥ दिधक्षुरिवलोकांस्त्री
ञ्जज्ञेपरमकोपनः ॥ ९९ ॥ उत्पद्यमानश्चोवाचपितरंदीनयागिरा ॥ क्षुधामेबाधतेतातजगद्भक्षेत्यजस्वमाम् ॥ १०० ॥ त्रिदिवारोहिभिर्ज्वालै
र्जृम्भमाणोदिशोदश ॥ निर्दहन्सर्वभूतानिववृधेसोऽन्तकोपमः ॥ १ ॥ एतस्मिन्नन्तरेब्रह्मामुनिमुवसमागतः ॥ उवाचवार्यतांपुत्रोजगतस्त्वंदयां
कुरु ॥ २ ॥ अस्यापत्यस्यतेविप्रकरिष्येसाह्यमुत्तमम् ॥ तथ्यमेतद्वचःपुत्रश्शृणुत्वंवदतांवर ॥ ३ ॥ और्वउवाच ॥ धन्योऽस्म्यनुगृहीतोऽस्मियः
न्मेत्वंभगवञ्शिशोः ॥ मतिमेतांददासीहपरमात्मन्हितायवै ॥ ४ ॥ प्रभातकालेसम्प्राप्तेकाङ्क्षितव्येसमागमे ॥ भगवंस्तर्पितःपुत्रःकैर्हव्यैःप्राप्स्यतेसु

CC-0. In Public Domain. Digitization by eGangotri

खम् ॥ ५ ॥ कुत्रचास्यनिवासःस्याद्भोजनंतुकिमात्मकम् ॥ विधास्यतीहभगवान्वीर्यतुल्यंमहौजसः ॥ ६ ॥ ब्रह्मोवाच ॥ वडवामुखेचवसतिःसमुद्रेवै
भविष्यति ॥ ममयोनिर्जलंविप्रतत्त्रामेयंव्रजत्वयम ॥ ७ ॥ तत्रायमास्तेनियतंपिबन्वारिमयंहविः ॥ तद्वारिविस्तरंविप्रविसृजाम्यालयंचतम् ॥
॥ ८ ॥ ततोयुगान्तेभूतानामेषचाहंचपुत्रक ॥ सहितोविचरिष्यावोनिष्पुराणकराविह ॥ ९ ॥ एषोऽग्निरन्तकालेतुसलिलाशीमयाकृतः ॥
दहनःसर्वभूतानांसदेवासुररक्षसाम् ॥ ११० ॥ एवमस्त्वितितंसोऽग्निःसंवृतज्वालमण्डलः ॥ प्रविवेशार्णवमुखंनत्वोर्वंपितरंप्रभुम् ॥ ११ ॥
प्रतियातस्ततोब्रह्मातेचसर्वेमहर्षयः ॥ और्वस्याग्नेःप्रभावज्ञाःस्वांस्वांगतिमुपागताः ॥ १२ ॥ हिरण्यकशिपुर्दृष्ट्वातदातन्महदद्भुतम् ॥ उर्वंप्रणत
सर्वाङ्गोवाक्यमेतदुवाचह ॥ १३ ॥ हिरण्यकशिपुरुवाच ॥ भगवन्नद्भुतमिदंसंवृत्तंलोकसाक्षिकम् ॥ तपसातेमुनिश्रेष्ठपरितुष्टःपितामहः ॥ १४ ॥
अहंतुतवपुत्रस्यतवचैवमहाव्रत ॥ भृत्यइत्यवगन्तव्यःश्लाघ्यस्त्वमिहकर्मणा ॥ १५ ॥ तन्मांपश्यसमापन्नंतवैवाराधनेरतम् ॥ यदिसीदेन्मुनिश्रेष्ठत
वैवस्यात्पराजयः ॥ १६ ॥ उर्वउवाच ॥ धन्योऽस्म्यनुगृहीतोऽस्मियस्यतेऽहंगुरुर्मतः ॥ नास्तितेतपसानेनभयंचैवेहसुव्रत ॥ १७ ॥ तामेवमा
यांगृह्णीष्वममपुत्रेणनिर्मिताम् ॥ निरिन्धनामग्निमयींदुःस्पर्शांपावकैरपि ॥ १८ ॥ एषातेस्वस्यवंशस्यवशगारिविनिग्रहे ॥ रक्षिष्यत्यात्मपक्षंचवि
पक्षंचप्रधक्ष्यति ॥ १९ ॥ वरुणउवाच ॥ एषादुर्विषहामायादेवैरपिदुरासदा ॥ और्वेणनिर्मितापूर्वंपावकेनोर्वसूनुना ॥ १२० ॥ तस्मिंस्तुव्यथिते
दैत्येनिवार्यैषानसंशयः ॥ शापोह्यस्याःपुरादत्तःसृष्ट्यायेनैवतेजसा ॥ २१ ॥ यद्येषाप्रतिहन्तव्याकर्तव्योभगवान्सुखी ॥ दीयतांमेसखाशक्रतोययो
निर्निशाकरः ॥२२॥ तेनाहंसहसङ्गम्ययादोभिश्चसमावृतः ॥ मायामेतांहनिष्यामित्वत्प्रसादान्नसंशयः ॥२३॥ पुलस्त्यउवाच॥एवमस्त्वितिसंतुष्टः
शक्रस्त्रिदशवर्धनः ॥ सन्दिदेशाग्रतः सोमंयुद्धायशिशिरायुधम् ॥ २४ ॥ इन्द्रउवाच॥ गच्छसोमसहायस्त्वंभवपाशधरस्यवै ॥ असुराणांविनाशाय
जयार्थंत्रिदिवौकसाम् ॥ २५ ॥ त्वंमतःप्रतिवीर्यश्चज्योतिषामपिचेश्वरः ॥ त्वन्मयान्सर्वलोकेषुरसान्वेदविदोविदुः ॥ २६ ॥ त्वयासमोनलोकेऽ
स्मिन्विद्यतेशिशिरायुधः ॥ क्षयवृद्धीतवाव्यक्तेसागरेचैवचाम्बरे ॥ २७ ॥ प्रवर्तयस्यहोरात्रात्कालंसंमोहयञ्जगत् ॥ लोकच्छायामयंलक्ष्मत
वाङ्कःशशविग्रहः ॥ २८ ॥ नविदुःसोमतेमायांयेचनक्षत्रयोनयः ॥ त्वमादित्यपथादूर्ध्वंज्योतिषांचोपरिस्थितः ॥ २९ ॥ तमःप्रोत्सार्यसहसाभा
सयस्यखिलंजगत् ॥ शीतभानुर्हिमतनुर्ज्योतिषामधिपःशशी ॥ १३० ॥ अपितत्कालयोगात्माइज्योयज्ञरथोऽव्ययः ॥ ओषधीशःक्रियायोनिर
पांयोनिरनुष्णगुः ॥ ३१ ॥ शीतांशुरमृताधारश्चपलःश्वेतवाहनः ॥ त्वंकान्तिःकान्तवपुषांत्वंसोमःसोमपायिनाम् ॥ ३२ ॥ सौम्यस्त्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वभूतानांतिमिरघ्नस्त्वमृक्षराट् ॥ तद्गच्छत्वंमहासेनवरुणेनवरूथिना ॥ ३३ ॥ शमयस्वासुरींमायांययादह्यामहेरणे ॥ ३४ ॥ सोमउवाच ॥
यन्मांवदसियुद्धार्थंदेवराजवरप्रद ॥ एषवर्षामिशिशिरंदैत्यमायापकर्षणम् ॥ ३५ ॥ एतान्मेशीतनिर्दग्धान्पश्यस्वहिमवेष्टितान् ॥ विमायान्विम
दांश्चैवदैत्यसङ्घान्महाहवे ॥ ३६ ॥ तथाहिमकरोत्सृष्टाः सपाशाहिमवृष्टयः ॥ वेष्टयन्तिचतान्दैत्यान्वायुर्मेघगणानिव ॥ ३७ ॥ तौपाशशीतांशुध
रौवरुणेन्दूमहाबलौ ॥ जघ्नतुर्हिमपातैश्चपाशपातैश्चदानवान् ॥३८॥ द्वावम्बुनाथौसमरेतौपाशहिमयोधिनौ ॥ मृधेचेरतुरम्भोभिःक्षुब्धाविवमहार्णवौ
॥ ३९ ॥ ताभ्यामापरितंसर्वंतद्दानवबलंमहत् ॥ जगत्संवर्त्तकाम्भोदैःप्रवर्षैरिवसंवृतम् ॥ १४० ॥ तावुद्यतावम्बुनाथौशशाङ्कवरुणा
वुभौ ॥ शमयामासतुस्तांतुमायांदैत्येन्द्रनिर्मिताम् ॥ ४१ ॥ शीतांशुजालनिर्दग्धाःपाशैश्चास्कन्दितारणे ॥ नशेकुश्चलितुंदैत्याविशिरस्काइ
वाद्रयः ॥ ४२ ॥ शीतांशुनिहतास्तेतुदैत्यास्सर्वेनिपातिताः ॥ हिमप्लावितसर्वाङ्गानिरूष्माणइवाग्नयः ॥ ४३ ॥ तेषांतुदिविदैत्यानां
निपतन्तिशुभानिवै ॥ विमानानिविचित्राणिनिपतन्त्युत्पतन्तिच ॥ ४४ ॥ तान्पाशहस्तग्रथितांश्छादितान्शीतरश्मिभिः ॥ मयोददर्शमा
यावीदानवान्दिविदानवः॥ ४५ ॥ सशैलजालांविततांखड्गपट्टिशहासिनीम् ॥ पादपोत्करकूटस्थांकन्दराकीर्णकाननाम् ॥ ४६ ॥ सिंह
व्याघ्रगणाकीर्णांनदद्भिर्देवयूथपैः ॥ ईहामृगगणाकीर्णांपवनाघूर्णितद्रुमाम् ॥ ४७ ॥ निर्मितांस्वेनपुत्रेणकूजन्तींदिविकामगाम् ॥ प्रथितांपार्व
तींमायांससृजेससमन्ततः ॥ ४८ ॥ सासिशब्दैश्शिलावर्षैःसम्पतद्भिश्चपादपैः ॥ जघानदेवसङ्घांस्तान्दानवानभ्यजीवयत् ॥ ४९ ॥ नैशाकरीवारु
णीचमायेअन्तर्हितेतदा ॥ अभवद्घोरसञ्चारापृथिवीपर्वतैरिव ॥ १५० ॥ अश्मप्रहरणेनापिनशिलाभिर्वशीकृतः ॥ नचारुद्धोद्रुमगणैर्देवोऽदृश्यतक
श्चन ॥ ५१ ॥ तदपध्वस्तधनुषंभग्नप्रहरणाविलम् ॥ निष्प्रयत्नंसुरानीकंवर्जयित्वागदाधरम् ॥ ५२ ॥ सहियुद्धगतःश्रीमानीशोनस्मव्यकम्पत ॥
सहिष्णुत्वाज्जगत्स्वामीनचुक्रोधगदाधरः ॥ ५३ ॥ कालज्ञःकालमेघाभःसमीक्षन्कालमाहवे ॥ देवासुरविमर्दंचद्रष्टुकामस्तदाहरिः ॥ ५४ ॥ ततोभ
गवतादिष्टौरणेपावकमारुतौ ॥ चोदितौविष्णुवाक्येनततोमायांव्यकर्षताम् ॥ ५५ ॥ ताभ्यामुद्भ्रान्तवेगाभ्यांप्रवृद्धाभ्यांमहाहवे ॥ दग्धासापार्वती
मायाभस्मीभूताननाशह ॥ ५६ ॥ सोऽनिलोऽनलसंयुक्तस्सोऽनलश्चानिलाकुलः ॥ दैत्यसेनांददहतुर्युगान्तेष्विवमूर्च्छितौ ॥५७॥ वायुःप्रजवित
स्तत्रपश्चादग्निश्चमारुतात्॥चेरतुर्दावनानीकेक्रीडन्तावनलानिलौ ॥५८॥ भस्मीभूतेषुभूतेषुप्रपतत्सूत्पतत्सुच॥ दानवानांविमानेषुनिपतत्सुसमन्ततः
॥ ५९ ॥ वातस्कन्धापविद्धेषुकृतकर्मणिपावके ॥ मायावधेप्रवृत्तेतुस्तूयमानेगदाधरे ॥ १६० ॥ निष्प्रयत्नेषुदैत्येषुत्रैलोक्येमुक्तबन्धने ॥ प्रहृष्टेषुच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवेषुसाधुसाध्वितिजल्पिषु ॥ ६१ ॥ जयेदशशताक्षस्यदैत्यानांचपराजये ॥ दिक्षुसर्वासुशुद्धासुप्रवृत्तेधर्मविस्तरे ॥ ६२ ॥ अपावृत्तेचन्द्रपथेस्व
स्थानस्थेदिवाकरे ॥ प्रवृत्तिस्थेषुभूतेषुनृषुचारित्रवत्सुच ॥ ६३ ॥ अभिन्नबन्धनेमृत्यौहूयमानेहुताशने ॥ यज्ञशोभिषुदेवेषुस्वर्गमार्गेदिशत्सुच ॥
॥ ६४ ॥ लोकपालेषुसर्वेषुदिक्षुसन्धानवर्तिषु ॥ भावेतपसिसिद्धानामभावेपापकर्मणाम् ॥ ६५ ॥ देवपक्षेप्रमुदितेदैत्यपक्षेविषीदति ॥ त्रिपादविग्र
हेधर्मेऽधर्मेपादपरिग्रहे ॥६६॥ अपावृत्तेमहाद्वारेवर्तमानेचसत्पथे ॥ लोकेषुधर्मवृत्तेषुप्रवृत्तेष्वाश्रमेषुच ॥ ६७ ॥ प्रजारक्षणयुक्तेषुराजमानेषुराजसु ॥
प्रशान्तेषुचलोकेषुशान्तेतमसिदानवे ॥ ६८ ॥ अग्निमारुतयोस्तस्मिन्वृत्तेसङ्ग्रामकर्मणि ॥ तन्मयाविमलालोकास्ताभ्यांजयकृतक्रियाः ॥ ६९ ॥
तीव्रंदैत्यभयंश्रुत्वामारुताग्निकृतंमहत् ॥ कालनेमीतिविख्यातोदानवःप्रत्यदृश्यत ॥ १७० ॥ भास्कराकारमुकुटःशिञ्जिताभरणाङ्गदः ॥ मन्दरा
द्रिप्रतीकाशोमहारजतसंवृतः ॥ ७१ ॥ शतप्रहरणोदग्रःशतबाहुःशताननः ॥ शतशीर्षःस्थितःश्रीमाञ्शतशृङ्गइवाचलः ॥ ७२ ॥ कक्षेमहतिसंवृद्धोनि
दाघइवपावकः ॥ धूम्रकेशोहरिश्मश्रुर्दन्तुरोविकटाननः ॥ ७३ ॥ त्रैलोक्यान्तरविस्तारंधारयन्विपुलंवपुः ॥ बाहुभिस्तुलयन्व्योमक्षिपन्पद्भ्यांम
हीधरान् ॥ ७४ ॥ ईरयन्मुखनिश्वासैर्वृष्टिकारान्बलाहकान् ॥ तिर्यगायतरक्ताक्षंमन्दरोदग्रवर्चसम् ॥ ७५ ॥ दिधक्षन्तमिवायान्तंसर्वान्देगणान्मृ
धे ॥ तर्जयन्तंसुरगणांश्छादयन्तंदिशोदश ॥ ७६ ॥ संवर्तकालेद्दृषितंदृष्टंमृत्युमिवोत्थितम् ॥ सुतलेनोच्छ्रयवताविपुलाङ्गुलिपर्वणा ॥ ७७ ॥
लम्बाभरणपूर्णेनकिंचिच्चलितकर्मणा ॥ उच्छ्रितेनाग्रहस्तेनदक्षिणेनवपुष्मता ॥ ७८ ॥ दानवान्देवनिहतान्ब्रुवन्तंतिष्ठतेतिच ॥ तंकालनेमिंसमरेद्वि
षतांकालनेमिनाम् ॥ ७९ ॥ वीक्षन्तेस्मसुराःसर्वेभयविह्वललोचनाः ॥ तंवीक्षन्तेस्मभूतानिग्रसन्तंकालनेमिनम् ॥ १८० ॥ त्रिविक्रमंविक्रमन्तं
नारायणमिवापरम् ॥ सोऽभ्युच्छ्रयंपुनःप्राप्तोमारुताघूर्णिताम्बरः ॥ ८१ ॥ प्राक्रामदसुरोयोद्धुंत्रासयन्सर्वदेवताः ॥ समेयिवान्सुरेन्द्रेणपरिष्वक्तो
भ्रमत्रणे ॥ ८२ ॥ कालनेमिर्बभौदैत्यःसविष्णुरिवमन्दरः ॥ अथविव्यथिरेदेवाःसर्वेशक्रपुरोगमाः ॥ ८३ ॥ कालनेमिनमायान्तंदृष्ट्वाकालमि
वापरम्॥दानवानुपिप्रीषुःकालनेमिर्महासुरः ॥८४॥ व्यवर्धतमहातेजास्तपान्तेजलदोयथा ॥ तंत्रैलोक्यान्तरगतंदृष्ट्वातेदानवेश्वराः ॥ ८५ ॥ उत्त
स्थुरपरिश्रान्ताःपीत्वेवाम्रृतमुत्तमम् ॥ तेवीतभयसन्त्रासामयतारपुरोगमाः ॥ ८६ ॥ तारकामयसङ्ग्रामेसततंजितकाशिनः ॥ रेजुरायोधनगता
दानवायुद्धकाङ्क्षिणः ॥ ८७ ॥ मन्त्रमभ्यसतांतेषांव्यूहंचपरिधावताम् ॥ प्रेक्षतांचाभवत्प्रीतिर्दानवंकालनेमिनम् ॥ ८८ ॥ येतुतत्रमयस्यास
न्मुख्यायुद्धपुरस्सराः ॥ तेतुसर्वेभयंत्यक्त्वाहृष्टायोद्धुमुपस्थिताः ॥ ८९ ॥ मयस्तारोवराहश्चहयग्रीवश्चदानवः ॥ विप्रचित्तिसुतःश्वेतःखरलम्बावु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भावपि ॥१९०॥ अरिष्टोबलिपुत्रश्चकिशोराख्यस्तथैवच ॥ स्वर्भानुश्चामरप्रख्यश्चक्रयोधीमहासुरः ॥ ९१ ॥ एतेऽस्त्रवेदिनःसर्वेसर्वेतपसिसुस्थिताः॥
दानवाःकृतिनोजग्मुःकालनेमिनमुद्धतम् ॥ ९२ ॥ तेगदाभिस्सुगुर्वीभिश्चक्रैरथपरश्वधैः ॥ कालकल्पैश्चमुसलैःक्षेपणीयैश्चमुद्गरैः ॥ ९३ ॥ अश्मभि
श्चाद्रिसदृशैस्तथाशैलैश्चदारुणैः ॥ पट्टिशैर्भिण्डिपालैश्चपरिघैश्चोत्तमायसैः ॥ ९४ ॥ घातिनीभिश्चगुर्वीभिःशतघ्नीभिस्तथैवच ॥ युगैर्यन्त्रैश्चनिर्मुक्तै
र्लाङ्गलैरुग्रताडितैः ॥ ९५ ॥ दोर्भिरायतमानैश्चपाशैश्चपरिघादिभिः ॥ भुजङ्गवक्रैर्लेलिहानैर्विसर्पद्भिश्चसायकैः ॥ ९७ ॥ वज्रैःप्रहरणीयैश्चदीप्य
मानैश्चतोमरैः ॥ विकोशैरसिभिस्तीक्ष्णैःशूलैश्चशितनिर्मलैः ॥ ९८ ॥ दैत्यैःसन्दीप्यमानैश्चप्रगृहीतशरासनैः ॥ ततःपुरस्कृत्यतदाकालने
मिनमाहवे ॥ ९९ ॥ सादीप्तशस्त्रप्रवरादैत्यानांरुरुचेचमूः ॥ यौर्निमीलितसर्वाङ्गावनालीवाम्बुदागमे ॥ २०० ॥ देवतानामपिचमूर्मुमुदेशक्रपालि
ता ॥ उपेताशिशिरोष्णाभ्यांतेजोभ्यांचन्द्रसूर्ययोः ॥ १ ॥ वायुवेगवतीसौम्याताराग‍णपताकिनी ॥ तोयदाबद्धवसनाग्रहनक्षत्रहासिनी ॥ २ ॥
यमेन्द्रधनदैर्गुप्तावरुणेनचधीमता ॥ साप्रदीप्ताग्निपवनानारायणपरायणा ॥ ३ ॥ सासमुद्रौघसदृशीदीप्यमानामहाचमूः ॥ रराजास्त्रवतीभी
मायक्षगन्धर्वशालिनी ॥ ४ ॥ तयोश्चम्वोस्तदानींतुबभूवससमागमः ॥ द्यावापृथिव्योःसंयोगोयथास्याद्युगपर्यये ॥ ५ ॥ तद्युद्धमभवद्घोरंदेव
दानवसङ्कुलम् ॥ क्षमापराक्रमपरंसदर्पविनयस्यदम् ॥ ६ ॥ निश्चक्रमुर्बलाभ्यांतुभीमाभ्यांचसुरासुराः ॥ पूर्वापराभ्यांसंरब्धाःसागराभ्यामि
वाम्बुदाः ॥ ७ ॥ ताभ्यांबलाभ्यांसंहृष्टाश्चेरुस्तेदेवदानवाः ॥ वनाभ्यांपार्वतीयाभ्यांपुष्पिताभ्यांयथानगाः ॥ ८ ॥ समाजघ्नुस्तथाभेरीः
शङ्खान्दध्मुरनेकशः ॥ ॥ ब्रह्माण्डंचभुवंचैवदिशश्चसमपूरयन् ॥९॥ ज्याघाततलनिर्घोषोधनुषांकूजितानिच ॥ दुन्दुभीनांचनिर्ह्रादोदैत्यमन्तर्दधुः
स्वनम्॥२१०॥तेऽन्योन्यमभिसम्पेतुर्यातयन्तःपरस्परम्॥बभञ्जुर्बाहुभिर्बाहुद्वन्द्वमन्येयुयुत्सवः॥११॥ देवानामशनीर्घोराःपरिघांश्चोत्तमायुधान् ॥
निस्त्रिंशान्ससृजुःसङ्ख्येगदागुर्वीश्चदानवाः ॥ १२ ॥ गदानिपातैर्भग्नाङ्गबाणैश्चशकलीकृताः ॥ परिपेतुर्भृशंकेचित्पुनःकेचित्तुजघ्निरे ॥१३॥ ततोर
थैश्चतुरगैर्विमानैश्चगजादिभिः ॥ समीयुस्तेऽतिसंरब्धारोषादन्योन्यमाहवे ॥१४॥ संवर्त्तमानास्समरेसन्दष्टौष्ठपुटाननाः ॥ रथारथैर्नियुध्यन्तेपादा
ताश्चपदातिभिः ॥ १५ ॥ तेषांरथानांतुमुलःसशब्दःशब्दवाहिनाम् ॥ नभोनिदध्रानयथानभस्येजलदस्वनैः ॥ १६ ॥ बभञ्जिरेरथान्केचित्केचि
त्संमृदितारथैः ॥ सम्बाधमन्येसम्प्राप्तानशेकुश्चलितुंरथाः ॥ १७ ॥ अन्योन्यमध्येसमरेदोर्भ्यामुत्क्षिप्यदंशिताः ॥ संह्रादमाणास्सबलाजघ्नुस्तत्रा
सिचर्मिणः ॥ १८ ॥ अस्त्रैरन्येविनिर्भिन्नारक्तंवेमुर्हतायुधि ॥ क्षरज्जलानांसदृशाजलदानांसमागताः ॥ १९ ॥ तदस्त्रशस्त्रप्रथितंक्षिप्ताक्षिप्तगदावि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लम् ॥ देवदानवसङ्घुष्टंसङ्कुलंयुद्धमाबभौ ॥ २२० ॥ तद्दानवमहामेघंदेवायुधविराजितम् ॥ अन्योन्यबाणवर्षेणयुद्धदुर्दिनमाबभौ ॥ २१ ॥ एत
स्मिन्नन्तरेक्रुद्धःकालनेमिस्सदानवः ॥ अवर्धतसमुद्रौघैःपूर्यमाणइवाम्बुदः ॥ २२ ॥ तस्यविद्युल्लतापीडाःप्रदीप्ताशनिवर्षिणः ॥ गात्रैर्नगगिरिप्रख्यै
र्विनिपेतुर्बलाहकाः ॥ २३ ॥ क्रोधान्निश्वसतस्तस्यभ्रूभेदस्वेदवर्षिणः ॥ साग्निस्फुलिङ्गाःप्रततामुखान्निश्चेरुरर्चिषः ॥ २४ ॥ तिर्यगूर्ध्वंचगगनेववृधु
स्तस्यबाहवः ॥ पर्वतादिवनिष्क्रान्ताःपञ्चास्याइवपन्नगाः ॥ २५ ॥ सोऽस्त्रजालैर्बहुविधैर्धनुभिःपरिघैरपि ॥ दिव्यमाकाशमावव्रेपर्वतैरुच्छ्रितैरिव
॥ २६ ॥ सोऽनिलोद्धूतवसनस्तस्थौसङ्ग्रामलालसः ॥ सन्ध्यातपग्रस्तशिलःसाक्षान्मेरुरिवाचलः ॥ २७ ॥ ऊरुवेगप्रमथितैःशृङ्गशैलाग्रपादपैः ॥
अपातयद्देवगणान्वज्रेणेवमहागिरीन् ॥ २८ ॥ बाहुभिश्चसनिस्त्रिंशैश्छिन्नभिन्नशिरोरुहाः ॥ नशेकुश्चलितुंदेवाःकालनेमिहतायुधि ॥ २९ ॥ मुष्टिभि
र्निहताःकेचित्केचिच्चद्विदलीकृताः ॥ यक्षगन्धर्वपतगाःसमहोरगकिन्नराः ॥२३०॥ तेनवित्रासिताःपेतुःसमरेकालनेमिना ॥ नशेकुर्यत्नवन्तोऽपियत्नं
कर्तुंविचेतसः ॥ ३१ ॥ तेनशक्रःसहस्राक्षोऽस्पन्दितःशरबन्धनैः ॥ निष्प्रयत्नःकृतःसङ्ख्येचलितुंनशशाकह ॥ ३२ ॥ निर्जलाम्भोदसदृशोनिर्जला
र्णवसप्रभः ॥ निर्व्यापारःकृतस्तेनविपाशोवरुणोमृधे ॥ ३३ ॥ रणेवैश्रवणस्तेनपरीतःकालरूपिणा ॥ विलपँल्लोकपालेशस्त्याजितोधनदःक्रियाम्
॥ ३४ ॥ यमःसर्वहरस्तेनमृत्युप्रहरणोरणे ॥ याम्यामवस्थांसन्त्यज्यभीतःस्वांदिशमाविशत् ॥ ३५ ॥ सलोकपालानुत्सार्यहत्वातेषांचकर्मतत् ॥
दिक्षुसर्वासुदेहंस्वंचतुर्धाविदधेतदा ॥ ३६ ॥ सनक्षत्रपथंगत्वादिव्यंस्वर्भानुदर्शितम् ॥ जहारलक्ष्मींसोमस्ययच्चास्यविषयंमहत् ॥ ३७ ॥ चालया
मासदीप्तांशुंधर्मद्वारासभास्करम् ॥ शासनंचास्यविषयंजहारदिनकर्मच ॥ ३८ ॥ सोऽग्निंदेवमुखंजित्वाचकारात्ममुखाश्रयम् ॥ वायुंचतरसाजित्वा
चकारात्मवशानुगम् ॥ ३९ ॥ ससमुद्रात्समानीयसमस्ताःसरितोबलात् ॥ चकाराभिमुखावीर्यादेवभूताश्चसिन्धवः ॥ २४० ॥ अपःस्ववशगाः
कृत्वादिविजायाश्चभूमिजाः ॥ छादयामासजगतींसुगुप्तांधरणीधरैः ॥ ४१ ॥ सस्वयम्भूरिवाभातिमहाभूतपतिर्महान् ॥ सर्वलोकमयोदैत्यःसर्वलो
कभयावहः ॥ ४२ ॥ सलोकपालैकवपुश्चन्द्रसूर्यग्रहात्मवान् ॥ पावकानिलसम्भूतोरराजयुधिदानवः ॥ ४३ ॥ पारमेष्ठ्येस्थितःस्थानेलोकानांप्रभ
वोपमे ॥ तंतुष्टुवुर्दैत्यगणादेवाइवपितामहम् ॥ ४४ ॥ पञ्चतंनाभ्यवर्तन्तविपरीतेनकर्मणा ॥ वेदोधर्मःक्षमासत्यंश्रीश्चनारायणाश्रया ॥ ४५ ॥ सते
षामनुपस्थानात्सक्रोधोदानवेश्वरः ॥ वैष्णवंपदमन्विच्छन्सगतोदेवतायतः ॥ ४६ ॥ सददर्शसुपर्णस्थंशङ्खचक्रगदाधरम् ॥ दानवानांविनाशायभ्रा
मयन्तंगदांशुभाम् ॥ ४७ ॥ सजलाम्भोदसदृशंविद्युत्सदृशवाससम् ॥ आरूढंस्वर्णपत्राढ्यंखेचरंकाश्यपंखगम् ॥४८॥ दुष्टदैत्यविनाशायदृष्ट्वाखस्थ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मिवस्थितम् ॥ दानवोविष्णुमक्षोभ्यंबभाषेक्षुब्धमानसः ॥ ४९ ॥ कालनेमिरुवाच ॥ अयंसरिपुरस्माकंपूर्वेषांप्राणनाशनः ॥ अर्णवावासिनश्चैवम
धोश्चकैटभस्यच ॥ २५० ॥ अयंसरिपुरस्माकमसमःकिलकथ्यते ॥ अनेकसंयुगेऽनेनदानवाबहवोहताः ॥ ५१ ॥ अयंसनिर्घृणोलोकेस्त्रीबालनि
रपत्रपः ॥ येनदानवनारीणांसीमन्तोद्धरणंकृतम् ॥ ५२ ॥ अयंसविष्णुर्देवानांवैकुण्ठश्चदिवौकसाम् ॥ अनन्तोभोगिनांमध्येस्वयम्भूश्चस्वयम्भुवः ॥
॥ ५३ ॥ अयंसनाथोदेवानामस्माभिर्विप्रकृष्यते ॥ अस्यक्रोधंसमासाद्यहिरण्यकशिपुर्हतः ॥५४॥ अस्यच्छायामुपाश्रित्यदेवामखमुखेस्थिताः ॥
आज्यंमहर्षिभिर्दत्तमश्नुवन्तित्रिधाहुतम् ॥ ५५ ॥ अयंसनिधनेहेतुःसर्वेषाममरद्विषाम् ॥ अस्यचक्रप्रविष्टानिकुलान्यस्माकमाहवे ॥ ५६ ॥
अयंसकिलयुद्धेषुसुरार्थेत्यक्तजीवितः ॥ सविभुस्तेजसायुक्तंचक्रंक्षिपतिशत्रुषु ॥ ५७ ॥ अयंसकालोदैत्यानांकालभूतेमयिस्थिते ॥ अतिक्रान्त
स्यकालस्यफलंप्राप्स्यतिकेशवः ॥ ५८ ॥ दिष्ट्येदानींसमक्षंमेविष्णुरेषसमागतः ॥ निष्पिष्टोबहुनासद्भ्येमय्येवप्रणशिष्यति ॥ ५९ ॥ या
स्याम्यपचितिंदिष्ट्यापूर्वेषामद्यसंयुगे ॥ इमंनारायणंहत्वादानवानांभयावहम् ॥ २६० ॥ क्षिप्रमेवहनिष्यामिरणेऽमरगणानहम् ॥ जात्यन्तर
गतोऽप्येषबाधतेदानवान्मृधे ॥ ६१ ॥ एषोऽनन्तःपुराभूत्वापद्मनाभइतिश्रुतः ॥ जघानैकार्णवेघोरेताबुभौमधुकैटभौ ॥ ६२ ॥ द्विधाभूतं
वपुःकृत्वासिंहस्यार्द्धंनरस्यच ॥ पितरंमेजघानैकोहिरण्यकशिपुंपुरा ॥६३॥ यंसुतंगर्भमाधत्तद्यदितिर्देवतारणिः ॥ त्रींल्लोकानाजहारैकःक्रममाण
स्त्रिभिःक्रमैः ॥६४॥ भूयस्त्विदानींसम्प्राप्तेसङ्ग्रामेतारकामये॥ मयासहसमागम्यसदेवोविनशिष्यति ॥६५॥ पुलस्त्यउवाच ॥ एवमुक्त्वाबहुविधं
क्षिप्रंनारायणंरणे ॥ वाग्भिरप्रतिरूपाभिर्युद्धमेवाभ्यरोचयत् ॥ ६६ ॥ क्षिप्यमाणोऽसुरेन्द्रेणनचुकोपगदाधरः ॥ क्षमाबलेनमहतासस्मि
तंचेदमब्रवीत्॥६७॥नारायणउवाच ॥ अल्पंदर्पबलंदैत्यस्थिरमक्रोधजंबलम्॥हतस्त्वंदर्पजैर्दोषैर्हित्वायोभाषसेक्षमाम् ॥६८॥अधमस्त्वंममसतोधिगे
तत्तववाग्बलम् ॥ केतत्रपुरुषाःसन्तियत्रगर्जन्तियोषितः ॥ ६९ ॥ अहंत्वांदैत्यपश्यामिपूर्वेषांमार्गगामिनम् ॥ प्रजापतिकृतंसेतुंत्यक्त्वाकःस्वस्ति
मान्भवेत् ॥ २७० ॥ अद्यत्वांनाशयिष्यामिदेवव्यापारघातकम् ॥ स्वेषुस्वेषुचस्थानेषुस्थापयिष्यामिदेवताः ॥ ७१ ॥ पुलस्त्यउवाच ॥ एवंब्रु
वतिवाक्यंतुमृधेश्रीवत्सधारिणि ॥ जहासदानवःक्रोधाद्धस्तांश्चक्रेचसायुधान् ॥ ७२ ॥ सबाहुशतमुद्यम्यसर्वायुधगणान्रणे ॥ क्रोधाद्द्विगुणरक्ताक्षो
विष्णोर्वक्षस्यपातयत् ॥ ७३ ॥ दानवाश्चापिसमरेमयतारपुरोगमाः ॥ उद्यतायुधनिस्त्रिंशाविष्णुमभ्यद्रवन्रणे ॥ ७४ ॥ सताड्यमानोऽतिबलैर्दैत्यैः
सर्वायुधोद्यतैः ॥ नचचालततोयुद्धेकम्प्यमानइवाचलः ॥७५॥ संयुक्तश्चसुपर्णेनकालनेमिर्महासुरः ॥ सर्वप्राणेनमहतींगदामुद्यम्यबाहुभिः ॥ ७६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

घोरांज्वलन्तींमुमुचेसंख्येगरुडोपरि ॥ कर्मणातेनदैत्यस्यविष्णुर्विस्मयमागमत् ॥ ७७ ॥ तदातेनसुपर्णस्यपातितामूर्ध्निसागदा ॥ सुपर्णंव्यथितं
दृष्ट्वाक्षतंचवपुरात्मनः ॥ ७८ ॥ क्रोधसंरक्तनयनोवैकुण्ठश्चक्रमाददे ॥ व्यवर्द्धतचवेगेनसुपर्णेनसमंविभुः ॥ ७९ ॥ भुजाश्चास्यव्यवर्धन्तव्याप्नुवन्तो
दिशोदश ॥ विदिशश्चैवखंचापिगांचैवप्रत्यपूरयन् ॥ २८० ॥ ववृधेसपुनर्लोकान्क्रान्तुकामइवौजसा ॥ तंजयायसुरेन्द्राणांवर्द्धमानंनभस्तले
॥ ८१ ॥ ऋषयःसहगन्धर्वास्तुष्टुवुर्मधुसूदनम् ॥ सद्यांकिरीटेनलिखञ्छिरसाभास्वरेणच ॥ ८२ ॥ पद्भ्यामाक्रम्यवसुधांदिशःप्रच्छाद्यबाहुभिः ॥
सहस्रकरतुल्याभंसहस्रारमरिक्षयम् ॥ ८३ ॥ दीप्ताग्निसदृशंघोरंदर्शनेनसुदर्शनम् ॥ सुवर्णरेणुपर्यन्तंवज्रनाभंभयावहम् ॥ ८४ ॥ मेदोऽस्थिम
ज्जारुधिरैःसिक्तंदानवसम्भवैः ॥ अद्वितीयंप्रहरणंक्षुरपर्यन्तमण्डलम् ॥ ८५ ॥ स्रग्दाममालानिचितंकामगंकामरूपिणम् ॥ स्वयंस्वयम्भुवासृष्टंभय
दंसर्वविद्विषाम् ॥ ८६ ॥ दधाररोषेणाविष्टंनित्यमाहवदर्पितम् ॥ क्षपणाद्यस्यमुह्यन्तिलोकाःसस्थाणुजङ्गमाः ॥ ८७ ॥ क्रव्यादानिचभूतानितृप्तिं
यान्तिमहामृधे ॥ तमप्रतिमकर्माणंसमानंसूर्यवर्चसा ॥ ८८ ॥ चक्रमुद्यम्यसमरेकोपदीप्तोगदाधरः ॥ प्रनष्टंदानवंतेजःकुर्वाणंस्वेनतेजसा ॥ ८९ ॥
चिच्छेदबाहूंस्तेनैवसमरेकालनेमिनः॥तच्चवक्त्रशतंघोरंसाग्निचूर्णाट्टहासिवै॥२९०॥ तस्यदैत्यस्यचक्रेणप्रममाथबलाद्धरिः॥सच्छिन्नबाहुर्विशिरानप्राक
म्पतदानवः॥९१॥कबन्धावस्थितःसङ्ख्येविशाखइवपादपः॥तंवितत्यमहापक्षौवायोःकृत्वासमंजवम्॥९२॥ उरसाताडयामासगरुडःकालनेमिनम् ॥
सतस्यदेहोऽभिखोविवाहुःखात्परिभ्रमन् ॥ ९३ ॥ निपपातदिवंत्यक्त्वाक्षोभयन्धरणीतलम् ॥ तस्मिन्निपतितेदैत्येदेवाःसर्षिगणास्तथा ॥ ९४ ॥
साधुसाध्वितिवैकुण्ठंसमेताःप्रत्यपूजयन् ॥ अपरेयेतुदैत्यावैयुद्धेदृष्टपराक्रमाः ॥ ९५ ॥ तेसर्वेबाहुभिर्व्याप्तानशेकुश्चलितुंरणे ॥ कांश्चित्केशेषुजग्राह
कांश्चित्कण्ठेष्वपीडयत्॥९६॥चकर्तकस्यचिद्वक्त्रंमध्येऽगृह्णात्तथापरम्॥तेगदाचक्रनिर्दग्धागतसत्त्वागतासवः ॥९७॥ गगनाद्भ्रष्टसर्वाङ्गानिपेतुर्धरणी
तले॥तेषुसर्वेषुदैत्येषुहतेषुपुरुषोत्तमः ॥९८॥ शक्रप्रियंततःकृत्वाकृतकर्मागदाधरः॥तस्मिन्विमर्देसंवृत्तेसङ्ग्रामेतारकामये ॥९९॥ तंचदेशंजगामाशु
ब्रह्मालोकपितामहः ॥ सर्वैर्ब्रह्मर्षिभिःसार्द्धंगन्धर्वाप्सरसांगणैः ॥ ३०० ॥ देवदेवंहरिंदेवःपूजयन्वाक्यमब्रवीत् ॥ १ ॥ ब्रह्मोवाच ॥ कृतंदेवमहत्कर्म
सुराणांशल्यमुद्धृतम् ॥ निधनेनचदैत्यानांवयंचपरितोषिताः ॥ २ ॥ योऽयंत्वयाहतोविष्णोकालनेमिर्महासुरः ॥ त्वामेतस्यऋतेह्यस्मिन्शास्ताक ॥ १३८ ॥
श्चिन्नविद्यते ॥ ३ ॥ एषदेवान्परिभवँल्लोकांश्चसचराचरान् ॥ ऋषीणांकदनंकृत्वामामपिप्रतिगर्जति ॥ ४ ॥ तदनेनत्वदीयेनपरितुष्टोऽस्मिकर्मणा ॥
यदयंकालकल्पस्तेकालनेमिर्निपातितः ॥ ५ ॥ तदागच्छस्वभद्रंतेगच्छामदिवमुत्तमाम् ॥ ब्रह्मर्षयस्त्वांतत्रस्थाःप्रतीक्षन्तेसदोगताः ॥ ६ ॥ कंचाहं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तवदास्यामिवरंवरभृतांवर॥स्वस्थानस्थेषुदेवेषुतेषांचवरदोभवान् ॥७॥ निर्यातमेतत्त्रैलोक्यंस्फीतंनिहतकण्टकम् ॥ अस्मिन्नेवमृधेविष्णोशक्रायसुम
हात्मने ॥ ८ ॥ पुलस्त्यउवाच ॥ एवमुक्तोभगवताब्रह्मणाहरिरव्ययः ॥ देवाञ्शक्रमुखान्सर्वानुवाचशुभयागिरा ॥ ९ ॥ विष्णुरुवाच ॥ श्रूयतां
त्रिदशास्सर्वेयावन्तोऽत्रसमागताः॥सुपर्णसहितैस्तत्रपुरस्कृत्यपुरन्दरम्॥ ३१० ॥ अस्माभिःसमरेसर्वैःकालनेमिमुखाहताः ॥ दानवाविक्रमोपेताःश
क्रादपिमहत्तराः ॥११॥ अस्मिन्महतिसङ्ग्रामेद्वावेवतुविनिस्सृतौ ॥ विरोचनस्तुदैतेयःस्वर्भानुश्चमहाबलः ॥ १२ ॥ स्वांदिशंभजतांशक्रोदिशंवरु
णएवच ॥ याम्यांयमःपालयतामुत्तरांचधनाधिपः ॥ १३ ॥ ऋक्षैःसहसदायोगंगच्छतांचन्द्रमास्तथा ॥ अयमृतुमुखंसूर्योभजतामयनैःसह ॥१४॥
आज्यभागाःप्रवर्तन्तांसदस्यैरभिपूजिताः ॥ हूयन्तामग्नयोविप्रैर्वेददृष्टेनकर्मणा ॥१५॥ देवाश्चबलिहोमेनस्वाध्यायेनमहर्षयः ॥ श्राद्धेनपितरश्चैवतु
ष्टिंयान्तुयथासुखम् ॥ १६ ॥ वायुश्चरतुमार्गस्थस्त्रिधादीप्यतुपावकः ॥ त्रयोवर्णाश्चलोकांस्त्रींस्तर्पयन्त्वात्मजैर्गुणैः ॥ १७ ॥ क्रतवःसम्प्रवर्तन्तांदी
क्षणीयैर्द्विजातिभिः ॥ दक्षिणाश्चोपपद्यन्तांयाज्ञिकैश्चपृथक्पृथक् ॥ १८ ॥ गाश्चसूर्योरसान्सोमोवायुःप्राणांश्चप्राणिषु ॥ तर्पयन्तःप्रवर्तन्तामेतेसौ
म्यैःस्वकर्मभिः ॥ १९ ॥ यथावदनुपूर्वेणमहेन्द्रमलयोद्भवाः ॥ त्रैलोक्यमातरःसर्वाःसमुद्रंयान्तुसिन्धवः ॥ ३२० ॥ दैत्येभ्यस्त्यज्यतांभीश्चशान्तिं
व्रजतदेवताः ॥ स्वस्तिवोऽस्तुगमिष्यामिब्रह्मलोकंसनातनम् ॥ २१ ॥ स्वगृहेस्वर्गलोकेवासङ्ग्रामेवाविशेषतः ॥ विश्वस्तैश्चनगन्तव्यंनित्यंक्षुद्रा
हिदानवाः ॥ २२ ॥ छिद्रेषुप्रहरन्त्येतेनतेषांसंस्थितिर्ध्रुवा ॥ सौम्यानांनिजभावानांभवतामार्जवेमनः ॥ २३ ॥ पुलस्त्यउवाच ॥ एवमुक्त्वासुरगणा
न्विष्णुस्सत्यपराक्रमः ॥ जगामब्रह्मणासार्द्धंब्रह्मलोकंमहायशाः ॥ २४ ॥ देवानांमहतींप्रीतिमुत्पाद्यभगवान्प्रभुः ॥ २५ ॥ एतदाश्चर्यमभवत्स
ङ्ग्रामेतारकामये ॥ दानवानांचविष्णोश्चयन्मांत्वंपरिपृच्छसि ॥ ३२६ ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेपद्मोद्भवदेवासुरयुद्धोनामत्रिचत्वारिंश
त्तमोऽध्यायः ॥ ४३ ॥ भीष्मउवाच ॥ श्रुतःपद्मोद्भवोब्रह्मन्विस्तरेणत्वयेरितः ॥ समासाद्भवमाहात्म्यमुत्पत्तिंचगुहस्यच ॥ १ ॥ श्रोतुमिच्छामि
तेब्रह्मन्यथाभूतःकृतंचयत् ॥ तारकश्चकथम्भूतोदानवोबलवत्तरः ॥ २ ॥ कार्तिकेयेनसब्रह्मन्कथंध्वस्तोमहासुरः ॥ कथंरुद्रेणमुनयः
प्रेषितामन्दरंगिरिम् ॥ ३ ॥ कथंलब्धाउमातत्ररुद्रेणपरमेष्ठिना ॥ एतदाख्याहिमेसर्वंयथाभूतंमहामुने ॥ ४ ॥ पुलस्त्यउवाच ॥
कश्यपेनपुराप्रोक्तादितिर्दैत्यारणिःशुभा ॥ वज्रसारमयैश्चाङ्गैःपुत्रोदेविभविष्यति ॥ ५ ॥ वज्राङ्गोनामपुत्रस्तुभविताधर्मवत्सलः ॥ साचलब्धवरा
देवीसुषुवेवज्रदुश्छिदम् ॥ ६ ॥ सजातमात्रएवाभूत्सर्वशास्त्रार्थपारगः ॥ उवाचमातरंभक्त्यामातःकिंकरवाण्यहम् ॥ ७ ॥ तस्योवाचततोहृष्टादिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दैत्याधिपस्यतु ॥ बहवोमेहताः पुत्राः सहस्राक्षेणपुत्रक ॥ ८ ॥ तषामपचितिंकर्तुंगच्छशक्रवधायतु ॥ बाढमित्यवतांचोक्काजगामत्रिदिवंबलात्
॥ ९ ॥ बद्धाततः सहस्राक्षंपाशेनामोघवर्चसा ॥ मातुरन्तिकमागच्छद्व्याधः क्षुद्रमृगंयथा ॥ १० ॥ एतस्मिन्नन्तरेब्रह्माकश्यपश्चमहातपाः ॥ आगतौ
तत्रयत्रास्तांमातापुत्रावभीतकौ ॥ ११ ॥ दृष्ट्वातुतावुवाचेदंब्रह्माकश्यपएवच ॥ मुञ्चैनंपुत्रदेवेन्द्रंकिमनेनप्रयोजनम् ॥ १२ ॥ अवमानोवधः प्रोक्तः
पुत्रसम्भावितस्यतु ॥ अस्मद्वाक्येनयोमुक्तस्त्वद्धस्तान्मृतएवसः ॥ १३ ॥ परस्यगौरवान्मुक्तः शत्रूणांशत्रुराहवे ॥ सजीवन्नेवहिमृतोदिवसेदिवसेपुनः ॥
॥ १४ ॥ एतच्छ्रुत्वातुवज्राङ्गः प्रणतोवाक्यमब्रवीत् ॥ नमेकृत्यमनेनास्तिमातुराज्ञाकृताहिमे ॥ १५ ॥ त्वंसुरासुरनाथोवैमान्यश्चप्रपितामहः ॥
करिष्येत्वद्वचोदेवएषमुक्तः शतक्रतुः ॥ १६ ॥ तपसेमेरतिर्देवानिर्विघ्नंतच्चमेभवेत् ॥ त्वत्प्रसादेनभगवन्नित्युक्त्वाविररामह ॥ १७ ॥ तस्मिंस्तूष्णींस्थिते
दैत्येप्रोवाचेदंपितामहः ॥ ब्रह्मोवाच ॥ तपस्त्वंकुरुमापन्नः सोऽस्मच्छासनसंस्थितः ॥ १८ ॥ अनयाचित्तशुद्ध्याहिपर्याप्तंजन्मनः फलम् ॥ इत्युक्त्वा
पद्मजः कन्यांससर्जायतलोचनाम् ॥ १९ ॥ तामस्मैप्रददौदेवः पत्न्यर्थेपद्मसम्भवः ॥ वराङ्गीतिचनामास्याः कृत्वायातः पितामहः ॥ २० ॥ वज्रा
ङ्गोऽपितयासार्द्धंजगामतपसेवनम् ॥ ऊर्द्ध्वबाहुस्सदैत्येन्द्रोऽचरदब्दसहस्रकम् ॥ २१ ॥ कालंकमलपत्राक्षः शुद्धबुद्धिर्महातपाः ॥ तावच्चाधोमुखः कालं
तावत्पञ्चाग्निमध्यगः ॥ २२ ॥ निराहारोघोरतपास्तपोराशिरजायत ॥ ततः सोऽन्तर्जलेचक्रेवासंवर्षसहस्रकम् ॥ २३ ॥ जलान्तरंप्रविष्टस्यतस्यप
त्नीमहाव्रता ॥ तस्यैवतीरेसरसः स्थितासौमौनमाश्रिता ॥ २४ ॥ निराहारंतपोघोरंप्रविवेशमहाद्युतिः ॥ तस्यांतपसिवर्तन्त्यामिन्द्रश्चक्रेविभीषिकाम्
॥ २५ ॥ गत्वातुमर्कटाकारस्तदाश्रमपदंमहत् ॥ बृसींचकर्षबलवान्गन्धाद्यर्चाकरण्डकम् ॥ २६ ॥ ततस्तुसिंहरूपेणभीषयामासभामिनीम् ॥ ततो
भुजङ्गरूपेणाप्यदशच्चरणद्वयम् ॥ २७ ॥ तपोबलवशात्सातुनवध्यत्वंजगामह ॥ भीषिकाभिरनेकाभिः क्लेशयन्पाकशासनः ॥ २८ ॥ विरराम यदा
नैववज्राङ्गमहिषीतदा ॥ शैलस्यदुष्टतांमत्वाशापंदातुंसमुद्यता ॥ २९ ॥ तांशापाभिमुखींदृष्ट्वाशैलः पुरुषविग्रहः ॥ उवाचतांवरारोहांवराङ्गींभीतलोच
नः ॥ ३० ॥ शैलउवाच ॥ नाहंमहाव्रतेदुष्टः सेव्योऽहंसर्वदेहिनाम् ॥ विप्रियेतंकरोत्येषरुषितः पाकशासनः ॥ ३१ ॥ एतस्मिन्नन्तरेजातः कालोवर्ष
सहस्रकः ॥ तस्मिञ्ज्ञात्वातुभगवान्कालेकमलसम्भवः ॥ ३२ ॥ तुष्टः प्रोवाचवज्राङ्गंतदागत्यजलाशयम् ॥ ब्रह्मोवाच ॥ ददामिसर्वकामंतउत्तिष्ठदिति
नन्दन ॥ ३३ ॥ एवमुक्तस्तदोत्थायसदैत्येन्द्रस्तपोनिधिः ॥ उवाचप्राञ्जलिर्वाक्यंसर्वलोकपितामहम् ॥ ३४ ॥ वज्राङ्गउवाच ॥ आसुरोमास्तुमेभावः
सन्तुलोकाममाक्षयाः ॥ तपस्यभिरतिर्मेऽस्तुशरीरस्यास्यवर्तनम् ॥ ३५ ॥ एवमस्त्वितितंदेवोजगामस्वकमालयम् ॥ वज्राङ्गोऽपिसमाप्तेतुतपसि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थिरसंयमः ॥ ३६ ॥ सङ्गन्तुमिच्छन्स्वांभार्यांनददर्शाश्रमेस्वके ॥ क्षुधाविष्टःसशैलस्यगहनंप्रविवेशह ॥ ३७ ॥ आदातुंफलमूलानिसच
तस्मिन्व्यलोकयत ॥ रुदन्तींस्वांप्रियांदीनांतरुप्रच्छादिताननाम् ॥३८॥ तांविलोक्यततोदत्यःप्रोवाचपरिसान्त्वयन् ॥ वज्राङ्गउवाच ॥ केनतेऽ
पकृतंभद्रेयमलोकंयियासुना ॥ ३९ ॥ कंवाकामंप्रयच्छामिशीघ्रंप्रब्रूहिमानिनि ॥ वराङ्गयुवाच ॥ त्रासितास्म्यपविद्धास्मिताडितापीडितास्मिच
॥ ४० ॥ रौद्रेणदेवराजेननष्टनाथेवभूरिशः ॥ दुःखस्यान्तमपश्यन्तीप्राणांस्त्यक्तुंव्यवस्थिता ॥ ४१ ॥ पुत्रंमेतारकंदेहितस्माद्दुःखमहार्णवात् ॥
एवमुक्तस्तुदैत्येन्द्रःकोपव्याकुललोचनः ॥४२॥ शक्तोऽपिदेवराजस्यप्रतिकर्तुंमहासुरः ॥ तपएवपुनश्चर्तुंव्यवस्यतमहाबलः॥४३॥ज्ञात्वातस्यतुसङ्क
ल्पंब्रह्माक्रूरतरंपुनः ॥ आजगामत्वरायुक्तोयत्रासौदितिनन्दनः ॥ ४४ ॥ ब्रह्मोवाच ॥ किमर्थंपुत्रभूयस्त्वंकर्तुंनियममुद्यतः ॥ तदहंतेपुनर्दास्येकाङ्क्षितं
पुत्रमोजसा ॥ ४५ ॥ वज्राङ्गउवाच ॥ उत्थितेनमयादृष्टासमाधानात्त्वदाज्ञया ॥ त्रासितेन्द्रेणमामाहसावराङ्गीसुतार्थिनी ॥ ४६ ॥ पुत्रंमेतारकं
देहितुष्टोमेत्वंपितामह ॥ ब्रह्मोवाच ॥ अलंतेतपसावीरमाक्लेशेदुस्तरेविश ॥ ४७॥ पुत्रस्तुतारकोनामभविष्यतिमहाबलः ॥ देवसीमन्तिनीनांतुधम्मि
ल्लकविमोक्षकः॥४८॥ इत्युक्तोदत्यनाथस्तुप्रणम्यप्रपितामहम्॥ गत्वातांनन्दयामासमहिषींकर्शितान्तराम्॥४९॥तौदम्पतीकृतार्थौतुजग्मतुःस्वाश्रमं
तदा ॥ आहितंतुतदागर्भंवराङ्गीवरवर्णिनी ॥ ५० ॥ पूर्णवर्षसहस्रंतुदधारोदरएवहि ॥ ततोवर्षसहस्रान्तेवराङ्गीसात्वसूयत ॥ ५१ ॥ जायमानेतु
दैत्येतुतस्मिँल्लोकभयङ्करे ॥ चचालसर्वापृथिवीप्रोद्धूताश्चमहार्णवाः ॥ ५२ ॥ चेलुर्धराधराश्चापिववुर्वाताश्चभीषणाः ॥ जेपुर्जप्यंमुनिवरानेदुर्व्याल
मृगाअपि ॥ ५३ ॥ जहौकान्तिश्चन्द्रसूर्यौनीहारच्छादितादिशः ॥ जातेमहासुरेतस्मिन्सर्वेचापिमहासुराः ॥ ५४ ॥ आजग्मुर्हर्षितास्तत्रतथा
चासुरयोषितः ॥ जगुर्हर्षसमाविष्टाननृतुश्चाप्सरोगणाः ॥ ५५ ॥ ततोमहोत्सवेजातेदानवानांमहाद्युते ॥ विषण्णमनसोदेवाःसहेन्द्राअभवंस्तदा
॥ ५६ ॥ वराङ्गीतुसुतंदृष्ट्वाहर्षेणापूरितातदा ॥ बहुमेनेचदैत्येन्द्रोविजातंतंतदातया ॥ ५७ ॥ जातमात्रस्तुदत्येन्द्रस्तारकश्चोग्रविक्रमः ॥
अभिषिक्तोऽसुरैर्मुख्यैःकुजम्भमहिषादिभिः ॥ ५८ ॥ सर्वासुरमहाराज्येपृथिवीतुलनक्षमे ॥ सतुप्राप्तमहाराज्यस्तारकोनृपसत्तम ॥ ५९ ॥
उवाचदानवश्रेष्ठोयुक्तियुक्तमिदंवचः ॥ तारकउवाच ॥ शृणुध्वमसुराःसर्वेवाक्यंममममहाबलाः ॥ ६० ॥ वंशक्षयकरादेवाःसर्वेषामेवदानवाः॥अस्मा
कंजातिधर्मेणविरूढंवैरमक्षयम्॥६१॥वयंतपश्चरिष्यामःसुराणांनिग्रहायतु॥स्वबाहुबलमाश्रित्यसर्वएवनसंशयः ॥६२॥ पुलस्त्यउवाच॥ तच्छ्रुत्वासं
मतंकृत्वापारियात्रंययौगिरिम् ॥ निराहारःपञ्चतपाःपत्रभुग्वारिभोजनः ॥ ६३ ॥ शतंशतंसमानांतुतपांस्येतान्यथाकरोत् ॥ एवंतुकर्शितेदेहेतपोरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शित्वमागते ॥ ६४ ॥ ब्रह्मागत्याहदैत्येन्द्रंवरंवरयसुव्रत ॥ सवव्रेसर्वभूतेभ्योनमेमृत्युर्भवेदिति ॥ ६५ ॥ तमुवाचततोब्रह्मादेहिनांमरणंध्रुवम् ॥ यत
स्ततोऽपिवरयमृत्युंयस्मान्नशङ्कसे ॥ ६६ ॥ ततःसञ्चिन्त्यदैत्येन्द्रःशिशोर्वैसप्तवासरात् ॥ वव्रेमहासुरोमृत्युंमोहितोह्यवलेपतः ॥ ६७ ॥ जगामो
मित्युदाहृत्यब्रह्मादैत्योनिजंगृहम् ॥ अथाहमन्त्रिणस्तूर्णंबलंमेसम्प्रयुज्यताम् ॥ ६८ ॥ यदिवोमत्प्रियंकार्यंनिग्राह्याःसुरसत्तमाः ॥ निगृहीतेषुमे
प्रीतिर्जायतेचातुलाऽसुराः ॥ ६९ ॥ तारकस्यवचःश्रुत्वाग्रसनोनामदानवः ॥ सेनानीर्दैत्यराजस्यसज्जंचक्रेबलंचतत् ॥ ॥ ७० ॥ आहत्यभेरींग
म्भीरांदैत्यानाहूयसत्वरः ॥ दशकोटीश्वरादैत्यादैत्यानांचण्डविक्रमाः ॥७१॥ तेषामग्रेसरोजम्भःकुजम्भोऽनन्तरोऽसुरः ॥ महिषःकुञ्जरोमेघःकाल
नेमिर्निमिस्तथा ॥ ७२ ॥ मन्थनोजम्भकःशुम्भोदैत्येन्द्रादशनायकाः ॥ अन्येचशतशस्तत्रपृथिवीतुलनक्षमाः ॥ ७३ ॥ गरुडानांसहस्रेणचक्रा
ष्टकविभूषितः ॥ सकूबरपरीवारश्चतुर्योजनविस्तृतः ॥ ७४ ॥ स्यन्दनस्तारकस्यासीद्व्याघ्रसिंहखरार्वभिः ॥ युक्तारथास्तुग्रसनजम्भकौजम्भ
कुम्भिनाम् ॥ ७५ ॥ मेघस्यद्वीपिभिर्युक्तःकूष्माण्डैःकालनेमिनः ॥ पर्वताभश्चतुर्दंष्ट्रोनिमेश्चैवमहागजः ॥ ७६ ॥ शतहस्ततुरङ्गस्थोमन्थनोनाम
दैत्यराट् ॥ जम्भकस्तूष्ट्रमारूढोगिरीन्द्राभंमहाबलः ॥७७॥ शुम्भोमेषंसमारूढोऽन्येऽप्येवंचित्रवाहनाः ॥ प्रचण्डाश्चित्रवर्माणःकुण्डलोष्णीषभूषि
ताः ॥ ७८ ॥ तद्बलंदैत्यसिंहस्यभीमरूपंव्यजायत ॥ प्रमत्तमत्तमातङ्गतुरङ्गरथसङ्कुलम् ॥ ७९ ॥ प्रतस्थेऽमरयुद्धायबहुपत्तिपताकिकम् ॥ एत
स्मिन्नन्तरेवायुर्देवदूतोऽसुरालये ॥ ८० ॥ दृष्ट्वातद्दानवबलंजगामेन्द्रस्यशंसितुम् ॥ सगत्वातुसभांदिव्यांमहेन्द्रस्यमहात्मनः ॥ ८१ ॥ शशंसम
ध्येदेवानांतत्कार्यंसमुपस्थितम् ॥ तच्छ्रुत्वादेवराजस्तुनिमीलितविलोचनः ॥ ८२ ॥ बृहस्पतिमुवाचेदं वाक्यंकालेमहाभुजः ॥ इन्द्रउवाच ॥ स
म्प्राप्नोतिविमर्दोऽयंदेवानांदानवैःसह ॥ ८३ ॥ कार्यंकिमत्रतद्ब्रूहिनीत्युपायोपबृंहितम् ॥ एतच्छ्रुत्वातुवचनंमहेन्द्रस्यगिरांपतिः ॥ ८४ ॥ इत्यु
वाचमहाभागोबृहस्पतिरुदारधीः ॥ बृहस्पतिरुवाच ॥ सामपूर्वाश्रुतानीतिश्चतुरङ्गापताकिनी ॥ ८५ ॥ जिगीषतांसुरश्रेष्ठस्थितिरेषासनातनी ॥
सामभेदस्तथादानंदण्डश्चाङ्गचतुष्टयम् ॥ ८६ ॥ नसान्त्वगोचरेलुब्धानभेद्यास्त्वकधर्मिणः ॥ नदानमत्रसंसिद्ध्यैप्रसह्यैवापहारिणाम् ॥ ८७ ॥
एकोऽभ्युपायोदण्डोऽत्रभवतांयदिरोचते ॥ एवमुक्तःसहस्राक्षएवमेतदुवाचह ॥ ८८॥ कर्त्तव्यतांचसञ्चिन्त्यप्रोवाचामरसंसदि ॥ इन्द्रउवाच ॥
अवधानेनमेवाचंशृणुध्वंनाकवासिनः ॥ ८९ ॥ भवन्तोयज्ञभोक्तारोदिव्यात्मानोहिसान्वयाः ॥ स्वेमहिम्निस्थितानित्यंजगतःपालनेरताः॥९०॥
क्रियतांसमरोद्योगःसैन्यंसंयोज्यतांमम ॥ आह्रियन्तांचशस्त्राणिपूज्यन्तांशस्त्रदेवताः ॥ ९१ ॥ वाहनानिविमानानियोजयध्वंममेश्वराः ॥ यमंसे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नापतिंकृत्वाशीघ्रमेवदिवौकसः ॥ ९२ ॥ पुलस्त्यउवाच ॥ इत्युक्तास्समनह्यन्तदेवानांयप्रधानतः॥वाजिनामयुतेनाजौहेमघण्टापरिष्कृतम् ॥९३॥ नानाश्चर्यगुणोपेतंसम्प्राप्तंदेवदानवैः ॥ रथंमातलिनायुक्तंदेवराजस्यदुर्जयम् ॥ ९४ ॥ यमोमहिषमास्थायसेनाग्रेसमवर्त्तत ॥ चण्डकिङ्करवृन्देनस र्वतःपरिवारितः ॥ ९५ ॥ कल्पकालोद्गतज्वालापूरितोऽम्बरगोचरः ॥ हुताशनस्त्वजारूढःशक्तिहस्तोव्यवस्थितः ॥ ९६ ॥ पवनोऽङ्कुशहस्तश्चवि स्तारितमहाजवः ॥ भुजगेन्द्रसमारूढोजलेशोभगवान्स्वयम् ॥ ९७ ॥ नरयुक्तेरथेदेवोराक्षसेशोवियच्चरः ॥ तीक्ष्णखड्गयुतोभीमःसमरेसमवस्थि तः ॥ ९८ ॥ महासिंहरथेदेवोधनाध्यक्षोगदायधः ॥ चन्द्रादित्यावश्विनौचचतुरङ्गबलान्विताः ॥ ९९ ॥ सेनान्योदेवराजस्यदुर्जयाभुवनत्रये॥ कोटयस्तास्त्रयस्त्रिंशद्देवदेवनिकायिनाम् ॥ १०० ॥ हिमाचलाभेसितचारुचामरेसुवर्णपद्मामलसुन्दरस्रजि ॥ कृताभिरामोज्ज्वलकुङ्कुमाङ्करेकपोल लीलालिकदम्बसङ्कुले ॥ १ ॥ स्थितस्तदैरावणनामकुञ्जरेमहामनाश्चित्रविभूषणाम्बरः ॥ विशालवज्रःसुवितानभूषितःप्रकीर्णकेयूरभुजङ्गमण्डलः ॥ २ ॥ सहस्रदृग्वन्दितपादपल्लवस्त्रिविष्टपेऽशोभतपाकशासनः ॥ तुरङ्गमातङ्गकुलौघसङ्कुलासितातपत्रध्वजशालिनीच ॥ ३ ॥ बभूवसादुर्जयपत्ति सन्तताविभातिनानायुधयोधदुस्तरा ॥ ४ ॥ ततोऽश्विनौचमरुतःससाध्याःसपुरन्दराः ॥ यक्षराक्षसगन्धर्वादिव्यनानास्त्रपाणयः ॥ ५ ॥ जघ्नुर्दै त्येश्वरंसर्वेसम्भूयतुमहाबलाः ॥ नचैवास्त्राण्यसज्जन्तगात्रेवज्राचलोपमे ॥ ६ ॥ अथोरथादवप्लुत्यतारकोदानवाधिपः ॥ जघानकोटिशोदेवा न्करपार्ष्णिभिरेवच ॥ ७ ॥ हतशेषाणिसैन्यानिदेवानांविप्रदुद्रुवुः ॥ दिशोभीतानिसन्त्यज्यरणोपकरणानिच ॥ ८ ॥ दृष्ट्वाताान्विद्रुतान्देवांस्तार कोवाक्यमब्रवीत् ॥ ९ ॥ तारकउवाच ॥ मावधिष्टसुरान्दैत्यावज्राङ्गायचमन्दिरे ॥ शीघ्रमानीयदर्श्यन्ताम्बद्धान्पश्यत्वयंसुरान् ॥ ११० ॥ पुल स्त्यउवाच॥लोकपालांस्ततोदत्योबद्धाचेन्द्रमुखात्रणे ॥ सरुद्रान्सुदृढैःपाशैःपशुपालःपशूनिव ॥ ११ ॥ सभूयोरथमास्थायजगामस्वकमालयम् ॥ सिद्धगन्धर्वसङ्घुष्टंविपुलाचलमस्तकम् ॥१२॥ स्तूयमानोदितिसुतैरप्सरोभिःसुसेवितः ॥११३॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेदेवासुरसङ्ग्रामे तारकजयोनामचतुश्चत्वारिंशत्तमोऽध्यायः ॥ ४४ ॥ पुलस्त्यउवाच ॥ प्रादुरासीत्प्रतीहारःशुभ्रचीनांशुकाम्बरः ॥ सजानुभ्यांमहींगत्वा पिहितास्यश्चपाणिना ॥ १ ॥ उवाचानाविलंवाक्यमल्पाक्षरपरिष्कृतम् ॥ दैत्येन्द्रमर्कवृन्दाभंबिभ्रतंभास्वरंवपुः ॥ २ ॥ कालनेमिः सुरान्बद्धाप्रादायद्वारितिष्ठति ॥ सविज्ञापयतिस्थेयंक्ववन्दिनिचयैःप्रभो ॥ ३ ॥ तन्निशम्याब्रवीद्दैत्यःप्रतीहारस्यभाषितम् ॥ यथेष्टंस्थी यतामेभिर्गृहंमेभुवनत्रयम् ॥ ४ ॥ केवलंवासवंत्वेकंमुण्डयित्वाविमुच्यताम् ॥ सितवस्त्रपरिच्छन्नंशुनःपादेनचिह्नितम् ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंकृतेततोदेवादूयमानेनचेतसा ॥ जग्मुर्जगद्गुरुंद्रष्टुंशरणंकमलोद्भवम् ॥ ६ ॥ विनिर्विण्णास्तमासाद्यशिरोभिर्द्धरणींगताः ॥ तुष्टुवुःसुष्ठुवर्णा
ढ्यैर्वचोभिःकमलासनम् ॥ ७ ॥ देवाऊचुः ॥ नमस्त्वोङ्काराङ्कुरादिप्रसूत्यैविश्वस्थानानन्तभेदस्यपूर्वम् ॥ सम्भूतस्यानन्तरंसत्त्वमू
लेसंहारेच्छोस्तेनमःसत्त्वमूर्त्ते ॥ ८ ॥ व्यक्तीनांत्वामादिभूतंमहिम्नाचास्मादस्मानभिधानाद्विचिन्त्य ॥ द्यावापृथ्व्योरूर्द्ध्वलोकांस्तथाधश्चाण्डाद
स्मात्त्वंविभागंचकर्थ ॥ ९ ॥ व्यक्तंमेरुर्यज्जरायस्तवाभूद्देवंविम्नस्त्वत्प्रणीतोऽवकाशः ॥ व्यक्तंदेवाजज्ञिरेयस्यदेहादेहस्यान्तश्चारिणोदेहभाजः
॥ १० ॥ द्यौस्तेमूर्द्धालोचनेचन्द्रसूर्यौव्यालाःकेशाःश्रोत्ररन्ध्रेदिशस्ते ॥ गात्रंयज्ञःसिन्धवःसन्धयोवैपादौभूमिस्तूदरंतेसमुद्राः ॥ ११ ॥ माया
कारःकारणंत्वंप्रसिद्धोवेदैःशान्तोज्योतिरकस्त्वमुक्तः ॥ वेदार्थेनत्वांविवृण्वन्तिबुद्ध्याहृत्पद्मान्तःसंनिविष्टंपुराणम् ॥ १२ ॥ त्वांचात्मानंलब्धयोगा
गृणन्तिसाङ्ख्यैर्यास्ताःसप्तसूक्ष्माःप्रणीताः ॥ तासांहेतुर्याष्टमीचापिगीतातास्वन्तस्थोजीवभूतस्त्वमेव ॥१३॥ दृष्ट्वामूर्त्तिस्थूलसूक्ष्मांचकार्येवैभावाः
कारणेकेचिदुक्ताः ॥ सम्भूतास्तेत्वत्तएवादिसर्गेभूयस्तास्त्वांवासनान्तेऽभ्युपेयुः॥१४॥त्वत्सङ्कृतस्त्वन्तरायोनिगूढःकालोमेयोध्वस्तसङ्ख्याविकल्पः॥
भावाभावाव्यक्तिसंहारहेतुःसोऽनन्तस्त्वंतस्यकर्तानिधानम् ॥ १५ ॥ स्थूलस्सर्वोऽनर्थभूतस्ततोऽन्यस्सोऽर्थस्सूक्ष्मोयोहितेभ्योऽपिगीतः ॥ स्थूला
भावाश्चावृतायैश्चतेषांतेभ्यःस्थूलस्त्वंपुराणेप्रणीतः ॥१६॥ भूतंभूतंभूतिमद्भूतभावंभावेभावंभावितंत्वंयुनक्षि॥युक्तंयुक्तंव्यक्तिभावान्निरस्यस्थानेस्थाने
व्यक्तिवृत्तिंकरोषि ॥ १७ ॥ इत्थंदेवोव्यक्तिभाजांशरण्यस्त्राताणोप्ताभावितोऽनन्तमूर्तिः ॥ १८ ॥ पुलस्त्यउवाच ॥ विरेमुरमराःस्तुत्वाब्रह्माणमिति
कारणम् ॥ तस्थुर्मनोभिरिष्टार्थसम्प्राप्तिप्रार्थनास्ततः ॥ १९ ॥ एवंस्तुतोविरिञ्चिस्तुप्रसादंपरमंगतः ॥ अमरान्वरदोऽप्याहवामहस्तेननिर्दिशन्
॥ २० ॥ ब्रह्मोवाच ॥ नारीवाभर्तृकाकस्माद्धस्तसन्त्यक्तभूषणा ॥ नराजसेकुतश्शक्रम्लानवक्त्रसरोरुहः ॥ २१ ॥ हुताशनवियुक्तोऽपिधूमेनन
विराजसे ॥ तृणौघेनप्रतिच्छन्नोदग्धदावश्चिरोषितः ॥ २२ ॥ यमामयशरीरेणक्लिष्टेनाद्यविराजसे ॥ दण्डेनालम्बनेनेवकृष्टेयेनपदेपदे ॥ २३ ॥
रजनीचरनाथत्वंकिंभीतइवभाषसे ॥ राक्षसेन्द्रकृतादानेत्वमरातिक्षतोयथा ॥ २४ ॥तनुस्तेवरुणोच्छुष्कापरीतस्येववह्निना ॥ विमुक्तरुधिरंचाथ
पदंत्वंप्रविलोकय ॥ २५ ॥ वायोभवान्विचेतस्कःखड्गाग्रैरिवनिष्कृतः ॥ किंत्वंनतोऽसिधनदसन्त्यज्येवकुबेरताम् ॥ २६ ॥ रुद्रास्त्रिशूलिनः
सन्तोऽविन्दध्वंबहुशूरताम् ॥ भवतांकेनचाक्षिप्तातीव्रतानस्तदुच्यताम् ॥ २७ ॥ पुलस्त्यउवाच ॥ एवमुक्ताःसुरास्तेनब्रह्मणाब्रह्मवर्तिना ॥ वाचां
प्रधानभूतत्वात्तेमारुतमचोदयन् ॥ २८ ॥ अथशक्रमुखैर्देवःपवनःप्रतिचोदितः ॥ प्राहदेवंचतुर्वक्त्रंभवान्वेत्तिचराचरम् ॥ २९ ॥ वायुरुवाच॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुरुहूतमुखाःसबलानिमिषाविजिताःप्रसभंकिलदैत्यशतैः ॥ क्रतवोविहिताभवतास्थितयेजगतांचमहाद्भुतचित्रगुणाः ॥ ३० ॥ अपियज्ञकृतःश्रुत
कामफलाविहिताऋषयस्ततएवपुरः ॥ अपिनाकमभूत्किलयज्ञभुजांभवतोविनियोगवशात्सततम् ॥ ३१ ॥ अपहृत्यविमानगणंसकृतोदनुजेन
महाकरभूमिसमः ॥ कृतवानसिसर्वगुणातिशयंयमशेषमहीधरराजतया ॥ ३२ ॥ मखभूषितमंशुमतामवधिंसुरधामगिरिंगगनेऽपिसदा ॥ अधि
वासविहारविधानुचितोदनुजेनपरिष्कृतशृङ्गतटः ॥ ३३ ॥ प्रविलम्बितरत्नगुहानिवहोबहुदैत्यसमाश्रयतांगमितः ॥ असुरस्यचतस्यभयेनगतंसवि
षादशरीरनिमित्ततया ॥ ३४ ॥ उपभोग्यतयाधिकृतंसुचिरंविमलद्युतिपूरितदिग्वदनम् ॥ भवतैवविनिर्मितमादियुगेसुरहेतिसमूहवरंकुलिशम्॥३५॥
दितिजस्यशरीरमवाप्यगतंशतधामतिभेदमिवाल्पविदः ॥३६॥ बाणश्चयुधिविद्धाङ्गाद्वारिद्वास्थैर्निदर्शिताः ॥ लब्धप्रवेशाःकृच्छ्रेणवयंतस्यामरद्विषः
॥ ३७ ॥ सभायाममरादेवप्रकृष्योपनिवेशिताः ॥ वेत्रहस्तैरजल्पन्तस्तथोपहसिताःपरैः ॥ ३८ ॥ महार्थाःसिद्धसर्वार्थाभवन्तःस्वल्पभाषिणः ॥
शास्त्रयुक्तमथब्रूतमामराबहुभाषिणः ॥ ३९ ॥ सभेयंदत्यसिंहस्यनशक्रस्यविशृङ्खला ॥ वदद्भिरितिदैत्यस्यप्रेष्यैर्विहसिताबहु ॥ ४० ॥ ऋतवोमूर्ति
मन्तश्चाप्यहर्निशमुपासते ॥ कृतापराधंसत्रासंनत्यजन्तिकथञ्चन ॥ ४१ ॥ तन्त्रीलयनयोपेतंसिद्धगन्धर्वकिन्नरैः ॥ सुरागमुपधाविष्टंगीयतेतस्य
वेश्मसु ॥४२॥ कृताकृतोपकरणैर्मित्रादिगुरुलाघवः॥शरणागतसन्त्यागीत्यक्तसत्यप्रतिश्रयः ॥४३॥ इतिनिश्शेषमथवानिश्शेषंकेनशक्यते॥त्वस्या
विनयमाख्यातुंस्रष्टातत्रपरायणम् ॥ ४४ ॥ पुलस्त्यउवाच ॥ इत्युक्त्वाव्यरमद्वायुःशनैर्देवविचेष्टितम् ॥ सुरानुवाचभगवांस्ततःस्मितमुखाम्बुजः
॥ ४५ ॥ ब्रह्मोवाच ॥ अवध्यस्तारकोदैत्यःसर्वैरपिसुरासुरैः ॥ यस्यवध्यस्सनाद्यापिजातस्त्रिभुवनेपुमान् ॥ ४६ ॥ मयासवरदानेनछन्दयित्वानि
वारितः ॥ तपसःसाम्प्रतंराजात्रैलोक्यदहनात्मकः ॥ ४७ ॥ सतुवव्रेवधंदैत्यशिशुतःसप्तवासरात् ॥ सतुसप्तदिनोबालःशङ्कराद्योभविष्यति ॥४८॥
तारकस्यनिहन्तासभास्करामोभविष्यति ॥ साम्प्रतंचाप्यपत्नीकःशङ्करोभगवान्प्रभुः ॥ ४९ ॥ हिमाचलस्यदुहितायाचदेवीभविष्यति ॥ तस्याः
सकाशाद्यःसूनुररण्याःपावकोयथा ॥ ५० ॥ जनिष्यतिसतंप्राप्यतारकोनभविष्यति ॥ मयाऽभ्युपायःकथितोयथैषहिभविष्यति ॥ ५१ ॥ शेषं
चाप्यस्यविभवंविभजध्वमनन्तरम् ॥ स्तोककालंप्रतीक्षध्वंनिर्विशङ्केनचेतसा ॥ ५२ ॥ पुलस्त्यउवाच॥इत्युक्तास्त्रिदशास्तेनसाक्षात्कमलयोनिना॥
जग्मुस्तेप्रणिपत्येशंयथायोगंदिवौकसः ॥ ५३ ॥ ततोयातेषुदेवेषुब्रह्मालोकपितामहः ॥ निशांसस्मारभगवांस्तांदेवींपूर्वसम्भवाम् ॥ ५४ ॥ ततो
भगवतीरात्रिरुपतस्थेपितामहम् ॥ तांविविक्तेसमालोक्यब्रह्मोवाचविभावरीम् ॥ ५५ ॥ ब्रह्मोवाच ॥ विभावरिमहत्कार्यंदेवानांसमुपस्थितम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्कर्तव्यंत्वयादेविशृणुकार्यस्यनिश्चयम् ॥ ५६ ॥ तारकोनामदैत्येन्द्रः सुरशत्रुरनिर्जितः ॥ तस्याभवायभगवाञ्जनयिष्यतिचेश्वरः ॥ ५७ ॥
सुतंसभवितातस्यतारकस्यान्तकःकिल ॥ शङ्करस्याभवत्पत्नीसतीदक्षसुतातुया ॥ ५८ ॥ सापितुःकुपितादेवीकस्मिंश्चित्कारणान्तरे ॥ भवित्रीहि
मशैलस्यदुहितालोकभाविनी ॥ ५९ ॥विरहेणहरस्तस्यामत्वाशून्यंजगत्त्रयम् ॥ सतस्यहिमशैलस्यकन्दरेसिद्धसेविते॥ ६० ॥ प्रतीक्षमाणस्तज्जन्म
किञ्चित्कालंनिवत्स्यति ॥ तयोःसुततत्तपसोर्भवितायोमहान्सुतः ॥ ६१ ॥ भविष्यतिसदैत्यस्यतारकस्यविनाशकः ॥ जातमात्राचसादेवीस्वल्प
संज्ञेवभामिनी ॥ ६२ ॥ विरहोत्कण्ठितागाढंहरसङ्गमलालसा ॥ तयोःसुततत्तपसोःसंयोगःस्याच्छुभावहः ॥ ६३॥ ततस्ताभ्यांतुजनितःस्वल्पोवा
कलहोभवेत् ॥ ततस्तुसंशयोभूयस्तारकस्यचदृश्यते ॥ ६४ ॥ तयोःसंयुक्तयोस्तस्मात्सुरतासक्तिकारणे ॥ विघ्नंत्वयाविधातव्यंयथाताभ्यांतथा
शृणु ॥ ६५ ॥ गर्भस्थमेवतन्मातुःस्वेनरूपेणसंज्ञया ॥ ततोविहस्यशर्वस्तांविपण्णोनर्मपूर्वकम् ॥ ६६ ॥ भर्त्सयिष्यतितांदेवींततःसाकुपितासती॥
प्रयास्यतितपश्चर्तुंततःसातपसायुता ॥ ६७ ॥ जनयिष्यतितंशर्वादमितद्युतिमण्डलम् ॥ सम्भविष्यतिहन्तासौसुरारीणामसंशयम् ॥ ६८ ॥ त्व
यापिदानवादेविहन्तव्यालोकदुर्जयाः ॥ यावत्सुरेश्वरीदेहसङ्क्रान्तगुणसञ्चया ॥ ६९ ॥ तत्सङ्गमेनतावत्त्वंदैत्यान्हन्तुंनशक्यसे ॥ एवंकृतेतपस्तस्वा
त्वयासर्वंकरिष्यति ॥ ७० ॥समाप्तनियमादेवियदाचोमाभविष्यति ॥ तदास्वमेवसारूप्यंशैलजाप्रतिपत्स्यते ॥ ७१ ॥ तदात्वयापिसहिताभवानी
साभविष्यति ॥ रूपांशेनतुसंयुक्ताउमायास्त्वंभविष्यसि ॥ ७२ ॥ एकोऽनंशेतिलोकस्त्वांवरदेपूजयिष्यति ॥ भेदैर्बहुविधाकारैःसर्वगांकामसाधि
नीम् ॥ ७३ ॥ ओंकारवक्त्रागायत्रीत्वमितिब्रह्मवादिभिः ॥ आक्रान्तैरूर्जिताकाराराजभिश्चमहाभुजैः ॥ ७४ ॥ त्वंभूरितिविशांमाताशूद्रैश्शैवेति
पूजिता ॥ क्षान्तिर्मुनीनामक्षोभ्यादयानियमिनामपि ॥ ७५ ॥ त्वंमहोपायसन्देहोनीतिर्नयविसर्पिणाम् ॥ परिच्छित्तिस्त्वमर्थानांत्वमीहाप्राणिह्
च्छया ॥ ७६ ॥ त्वंमुक्तिस्सर्वभूतानांत्वंगतिःसर्वदेहिनाम् ॥ रतिस्त्वंरतचित्तानांप्रीतिस्त्वंहृदिदेहिनाम् ॥ ७७ ॥ त्वंकीर्तिःसत्यभूतानांत्वंशान्ति
र्दुष्टकर्मणाम् ॥ त्वंभ्रान्तिःसर्वभूतानांत्वंगतिःक्रतुयाजिनाम् ॥ ७८ ॥ जलधीनांमहावेलात्वंचलीलाविलासिनी ॥ प्रियकण्ठग्रहानन्ददायिनीत्वंवि
भावरी ॥ ७९ ॥ इत्यनेकविधैर्देवीरूपैर्लोकेत्वमर्चिता ॥ येत्वांस्तोष्यन्तिवरदेपूजयिष्यन्तिचापिये ॥ ८० ॥ तेसर्वकामानाप्स्यन्तिनियतानात्रसं
शयः ॥ ८१ ॥ पुलस्त्यउवाच ॥ इत्युक्तातुनिशादेवीतथेत्युक्त्वाकृताञ्जलिः ॥ जगामत्वरितातूर्णंगृहंहिमगिरेर्महत् ॥ ८२ ॥ तत्रासीनांमहाह
र्म्येरत्नभित्तिसमाश्रयाम् ॥ ददर्शमेनामापाण्डुच्छविवक्त्रसरोरुहाम् ॥ किञ्चित्क्षामांमुखोदग्रस्तनभारावनामिताम् ॥ ८३ ॥ महौषधिगणाबद्धमन्त्रा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जनिषेविताम् ॥ उदूढकनकोन्नद्धजीवरक्षामनोरमाम् ॥ ८४ ॥ मणिदीपगणज्योतिर्महालोकप्रकाशिते ॥ प्रकीर्णबहुसिद्धार्थमनोज्ञपरिचारके ॥ ८५ ॥ शुद्धचीनांशुकच्छत्रभूशय्यास्तरणोज्ज्वले ॥ धूपामोदमनोरम्येसज्जसर्वोपयोगिके ॥ ८६ ॥ ततःक्रमेणदिवसेगतेदूरंविभावरी ॥ विजृम्भितसुखोदर्केततोमेनामहागृहे ॥ ८७ ॥ प्रसुप्तप्रायपुरुषेनिद्राभूतोपचारके ॥ स्फुटालोकेशशभृतिश्रान्तरात्रिविहङ्गमे ॥ ८८ ॥ रजनीचरसञ्चारभूतैरावृतचत्वरे ॥ गाढकण्ठग्रहालग्नेशुभगोष्ठजनेततः ॥ ८९ ॥ किंचिदाकुलतांप्राप्तेमेनानेत्राम्बुजद्वये ॥ आविवेशसुखेरात्रिःसुखमद्भुतसङ्गमा ॥९०॥ उन्मादायजगन्मातुःक्रमेणजठरान्तरे ॥ आविवेशातुलंजन्ममन्यमानाकदातुवै ॥ ९१ ॥ अरञ्जयद्गृहंदेव्यागुहारण्येविभावरी ॥ ततोजगत्यानिर्वाणहेतुहिमगिरिप्रिया ॥ ९२ ॥ ब्राह्मेमुहूर्तेसुभगेप्रासूयतगुहारणिम् ॥ तस्यांतुजायमानायांजन्तवःस्थाणुजङ्गमाः ॥ ९३ ॥ अभवन्सुखिनःसर्वेसर्वलोकनिवासिनः ॥ नारकाणामपितदासुखंस्वर्गसमंमहत् ॥ ९४ ॥ अभवत्क्रूरसत्त्वानांचेतःशान्तंचदेहिनाम् ॥ ज्योतिषामपितेजस्तुसुतरांचाभवत्तदा ॥ ९५ ॥वनाश्रिताश्चौषधयःस्वादवन्तिफलानिच ॥ गन्धवन्तिचमाल्यानिविमलंचनभोऽभवत् ॥ ९६ ॥ मारुतश्चसुखस्पर्शोदिशश्चसुमनोहराः ॥ ऋतूद्भूतफलायोगपरिपाकगुणोज्ज्वला ॥ ९७ ॥ अभवत्पृथिवीदेवीशालिमालाकुलापिच ॥ तपांसिदीर्घचीर्णानिमुनीनांभावितात्मनाम् ॥ ९८ ॥ तस्मिन्गतानिसाफल्यंकालेनिर्मलचेतसाम् ॥ विस्मृतानिचशास्त्राणिप्रादुर्भावंप्रपेदिरे ॥ ९९ ॥ प्रभावस्तीर्थमुख्यानांतदापुण्यतमस्त्वभूत् ॥ अन्तरिक्षेऽमराश्चासन्विमानेषुसहस्रशः ॥ १०० ॥ समहेन्द्रजलाधीशवायुवह्निपुरोगमाः ॥ पुष्पवृष्टिंप्रमुमुचुस्तस्मिंस्तुहिनभूधरे ॥ १ ॥ जगुर्गन्धर्वमुख्याश्चननृतुश्चाप्सरोगणाः ॥ मेरुप्रभृतयश्चापिमूर्तिमन्तोमहाचलाः ॥ २ ॥ तस्मिन्महोत्सवेप्राप्तेदिव्याःप्रसृतपाणयः ॥ सागरास्सरितश्चैवसमाजग्मुश्चसर्वशः ॥ ३ ॥ हिमशैलोऽभवल्लोकेतदासर्वैश्चराचरैः ॥ संसेव्यश्चाधिगम्यश्चसाश्रयश्चाचलोत्तमः ॥ ४ ॥ अनुभूयोत्सवंदेवाजग्मुःस्वान्निलयांस्तदा ॥ देवनागेन्द्रगन्धर्वशैललीलावतीगणैः ॥ ५ ॥ हिमशैलसुतादेवीत्वहम्पूर्विकयाततः ॥ क्रमेणबुद्धिमानीताविद्याश्चानलसैर्बुधैः ॥ ६ ॥ क्रमेणरूपसौभाग्यप्रबोधैर्भुवनत्रये ॥ सम्पूर्णलक्षणाजाताहिमालयसुतातथा ॥७॥ एतस्मिन्नन्तरेशक्रोनारदंदेवसंमतम् ॥ देवर्षिमथसस्मारकार्यसाधनतत्परः ॥ ८ ॥ सतुशक्रस्यविज्ञायकाङ्क्षितंभगवांस्तदा ॥ आजगाममुदायुक्तोमहेन्द्रस्यनिवेशनम् ॥ ९ ॥ तंतुदृष्ट्वासहस्राक्षःसमुत्थायमहासनात् ॥ यथार्हेणतुपाद्येनपूजयामासवासवः ॥ ११० ॥ शक्रप्रणिहितांपूजांप्रतिगृह्ययथाविधि ॥ नारदःकुशलंदेवमपृच्छत्पाकशासनम् ॥ ११ ॥ पृष्टेचकुशलेशक्रःप्रोवाचवचनंप्रभुः ॥ १२ ॥ इन्द्रउवाच ॥ कुशलस्याङ्कुरस्तावत्संवृत्तोभुवनत्रये॥तत्फलोद्भवसम्पत्तौत्वंमयाविदितोमुने ॥ १३ ॥ वेत्स्येव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्समस्तंत्वंतथापिपरिचोदितः ॥ निर्वृतिंपरमांयातिनिवेद्यार्थंसुहृज्जने ॥ १४ ॥ तद्यथाशैलजादेवीयोगंयायात्पिनाकिना ॥ शीघ्रंतथोद्यमःसर्वैर
स्मत्पक्षैर्विधीयताम् ॥ १५ ॥ पुलस्त्यउवाच॥ अवगम्यार्थमखिलंततआमन्त्र्यनारदः ॥शीघ्रंजगामभगवान्हिमशैलनिकेतनम् ॥ १६ ॥ तत्रद्वारे
सविप्रेन्द्रश्चित्रवेत्रलताकुले ॥ बन्दितोहिमशैलेननिर्गतेनपुरोमुनिः ॥ १७ ॥ सहप्रविश्यभवनंभुवोभूषणतांगतम् ॥ निवेदितेस्वयंहैमेहिमशैलेनविस्तृ
ते ॥ १८ ॥ महासनेमुनिवरोनिषसादातुलद्युतिः ॥ यथार्हमर्घ्यंपाद्यंचशैलस्तस्मैन्यवेदयत् ॥ १९ ॥ मुनिःसप्रतिजग्राहतमर्घ्यंविधिवत्तदा ॥ गृही
तार्घम्मुनिश्रेष्ठमपृच्छच्छ्लक्ष्णयागिरा ॥ १२० ॥ कुशलंतपसःशैलःशनैःफुल्लाननाम्बुजः ॥ मुनिरप्यद्रिराजानमपृच्छत्कुशलंतदा ॥ २१ ॥
नारदउवाच ॥ अहोधर्मोचितस्तेऽस्तिसंनिवशोमहागिरे ॥ पृथुत्वंमनसातुल्यंकन्दराणांतवानघ ॥ २२ ॥ गुरुत्वंतेगुणौघानांस्थावराद
तिरिच्यते ॥ प्रसन्नताचतोयस्यमुनिभ्यश्चाधिकातव ॥ २३ ॥ नलक्षयामःशैलेन्द्रकुत्राविनयतास्थिता ॥ नानातपोभिर्मुनिभिर्ज्वलनार्कसमप्रभैः ॥
॥२४॥ पावनैःपावितोनित्यंत्वंकन्दरसमाश्रयैः ॥ अवमत्यविमानानिस्वर्गवासविरागिणः ॥ २५ ॥ पितुर्गृहइवासीनादेवगन्धर्वकिन्नराः ॥ अहो
धन्योऽसिशैलेन्द्रयस्यतेकन्दरंहरः ॥२६॥ अध्यास्तेलोकनाथोहिरांमध्यानपरायणः ॥२७॥ पुलस्त्यउवाच ॥ इत्युक्तवतिदेवर्षौनारदेसादरंगिरा ॥
हिमशैलस्यमहिषीमेनामुनिदिदृक्षया ॥ २८ ॥ अनुयातादुहित्रातुस्वल्पालिपरिचारिका ॥ लज्जाप्रणयनम्राङ्गीप्रविवेशनिकेतनम् ॥ २९ ॥ यत्र
स्थितोमुनिवरःशलेनसहितोवशी ॥ तंदृष्ट्वातेजसोराशिंमुनिंशैलप्रियातदा ॥ १३० ॥ ववन्देगूढवदनापाणिपद्मकृताञ्जलिः ॥ तांविलोक्यमहाभागां
देवर्षिरमितद्युतिः ॥ ३१ ॥ आशीर्भिरमृतोद्गाररूपाभिस्तांव्यवर्द्धयत् ॥ ततोविस्मितचित्तातुहिमवद्गिरिपुत्रिका ॥ ३२ ॥ ऐक्षिष्टनारदंदेवीमुनिम
द्भुतरूपिणम् ॥एहिवत्सेतिसाप्युक्ताऋषिणास्निग्धयागिरा ॥ ३३ ॥ कण्ठेगृहीत्वापितरमङ्केसातुसमाविशत् ॥ उवाचमातातांदेवीमभिवन्दयपुत्रिके
॥ ३४ ॥ भगवन्तंतपोधन्यंपतिमाप्स्यसिसम्मतम् ॥ इत्युक्तातुततोमात्रावस्त्रेणपिहितानना ॥ ३५ ॥ किंचित्कम्पितमूर्द्धातुवाक्यंनोवाचकिंच
न ॥ ततःपुनरुवाचेदंवाक्यंमातासुतांतदा ॥३६॥ वत्सेवन्दयदेवर्षिंततोदास्यामितेशुभम् ॥ रत्नक्रीडनकंरम्यंस्थापितंयच्चिरंमया ॥ ३७ ॥ इत्युक्ता
साततोवेगादुद्धृत्यचरणौतदा ॥ ववन्देमूर्ध्निसन्धायपाणिपङ्कजकुड्मलम् ॥३८॥ कृतेतुवन्दनेतस्यामातासखिमुखेनतु ॥ चोदयामासशनकैस्तस्याः
सौभाग्यदर्शिनाम् ॥ ३९ ॥ शरीरलक्षणानांचपरिज्ञानायकौतुकात् ॥ स्त्रीस्वभावात्स्वदुहितुश्चिन्तांहृदिसमुद्वहन् ॥ १४० ॥ ज्ञात्वातदिङ्गितंशैलो

१ 'शम' इति पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महिष्याहृदयेनतु ॥ अनुदीर्णाकृतिर्मेनेरम्यमेतदुपस्थितम् ॥ ४१ ॥ चोदितःशैलमहिषीसख्यामुनिवरस्ततः ॥ स्मिताननोमहाभागोवाक्यंप्रोवाच
नारदः ॥ ४२ ॥ नारदउवाच ॥ नजातोऽस्याःपतिर्भद्रेलक्षणैश्चविवर्जितः ॥ उत्तानहस्तासततंचरणैर्व्यभिचारिभिः ॥ ४३ ॥ सुच्छायास्याभवि
ष्येयंकिमन्यद्बहुभाष्यते ॥ श्रुत्वैतत्सम्भ्रमाविष्टोध्वस्तधैर्योहिमाचलः ॥४४॥ नारदंप्रत्युवाचाथसाश्रुकण्ठोमहागिरिः ॥ ४५ ॥ हिमवानुवाच ॥
संसारस्यातिदोषस्यदुर्विज्ञेयागतिर्यतः ॥ सृष्ट्याचावश्यभाविन्याकेनाप्यतिशयात्मना ॥४६॥ कर्त्राप्रणीताम्मर्यादास्थितासंसारिणामियम् ॥ योजा
यतेहियद्बीजाज्जनितुःसोऽर्थसाधकः ॥ ४७ ॥ जनिताचापिजातस्यनकश्चिदितिचस्फुटम् ॥ स्वकर्मणैवजायन्तेविविधाभूतजातयः ॥४८॥ अण्ड
जोह्यण्डजाज्जातःपुनर्जायेतमानवः ॥ मानुषोऽपिसरीसृप्यांमानुषत्वेनजायते ॥ ४९ ॥ तत्रापिजातौश्रेष्ठायांधर्मस्योत्कर्षणेनतु ॥ अपुत्रजन्मनः
शेषाःप्राणिनःसमवस्थिताः ॥ १५० ॥ मनुजास्तत्रसुतरांनयेनसहधर्मिणः ॥ क्रमेणाश्रमसम्प्राप्तिर्ब्रह्मचारिव्रतादनु ॥ ५१ ॥ तस्यकर्तुर्नियोगेनसं
सारोयेनवर्धितः ॥ संसारस्यहिनोत्पत्तिःसर्वेस्युयदिनिर्गृहाः ॥ ५२ ॥ कर्त्रातुशास्त्रेषुसदासुतलाभःप्रशंसितः ॥ प्राणिनांमोहनार्थायनरकत्राणकार
णात् ॥ ५३ ॥ स्त्रियाविरहितासृष्टिर्जन्तूनांनोपपद्यते ॥ स्त्रीजातिस्तुप्रकृत्यैवकृपणादैन्यभागिनी ॥ ५४ ॥ शास्त्रालोचनसामर्थ्याद्दूषितंतासुकर्तृ
णा ॥ तस्यांनोपरिभावज्ञाभवेदितिचवेधसा ॥ ५५ ॥ शास्त्रेषूक्तमसन्दिग्धंबहुवारंमहाफलम् ॥ दशपुत्रसमाकन्यायापिस्याच्छीलवर्जिता ॥५६॥
वाक्यमेतत्फलभ्रष्टंपुंसांग्लानिकरंफलम् ॥ कन्याहिकृपणाशोच्यापितुर्दुःखविवर्द्धिनी ॥ ५७ ॥ यापिस्यात्पूर्णसर्वार्थापतिपुत्रसमन्विता ॥ किंपु
नर्दुर्भगाहीनापतिपुत्रधनादिभिः ॥ ५८ ॥ त्वंचोक्तवान्सुतायामेशरीरेदोषसङ्ग्रहम् ॥ अहोमुह्यामिशुष्यामिग्लामिसीदामिनारद ॥ ५९ ॥ अयुक्त
मपिवक्तव्यमप्राप्यमपिसाम्प्रतम् ॥ अनुग्रहायमेछिन्धिदुःखंकन्याश्रयंमुने ॥ १६० ॥ परिच्छिन्नेऽप्यसन्दिग्धेमनःपरिभवाश्रयात् ॥ तृष्णामुष्णा
तिनिष्णातंफललोभाश्रयात्पुनः ॥ ६१ ॥ स्त्रीणांहिपरमंजन्मकुलानामुभयात्मनाम् ॥ इहामुत्रसुखायोक्तंसत्पतिप्राप्तिसंज्ञितम् ॥ ६२ ॥ दुर्लभत्वा
त्सतःस्त्रीणांविगुणोऽपिपतिःकिल ॥ नप्राप्यतेविनापुण्यैःपतिर्नार्याःकदाचन ॥६३॥ यतोनिस्साधनोधर्मःपरिणामोत्थितारतिः ॥ धनंजीवितपर्य
न्तंपत्यौनार्याःप्रतिष्ठितम् ॥ ६४ ॥ निर्द्धनोदुर्मुखोमूर्खःसर्वलक्षणवर्जितः ॥ दैवतंपरमंनार्याःपतिरुक्तःसदैवहि ॥ ६५ ॥ त्वयादेवर्षिणाप्रोक्तंनजा
तोऽस्याःपतिःकिल ॥ एतद्दौर्भाग्यमतुलमसह्यंचदुरुद्वहम् ॥६६॥ चराचरेभूतसर्गेचिन्तासाव्यापिनीमुने ॥ सनजातइतिश्रुत्वाममेदंव्याकुलंमनः ॥
॥ ६७ ॥ मनुष्यदेवजातीनांशुभाशुभनिवेदकम् ॥ लक्षणंहस्तपादाभ्यांलक्षणंविहितंकिल ॥ ६८ ॥ सेयमुत्तानहस्तेतित्वयोक्तामुनिपुङ्गव ॥ उत्तान

CC-0. In Public Domain. Digitization by eGangotri

हस्तताप्रोक्तायाचतामवनित्यका ॥ ६९ ॥ शुभोदयानांधन्यानांनकदाचित्प्रयच्छताम् ॥ सुच्छाययास्याश्चरणौत्वयोक्तौऽव्यभिचारिणौ ॥ १७० ॥
तत्रापिश्रेयसीह्याशामुनेनप्रतिभातिनः ॥ शरीरलक्षणाश्चान्येपृथक्फलनिवेदिनः ॥ ७१ ॥ पुलस्त्यउवाच ॥ इत्युक्त्वाविरतेशैलेमहादुःखविचारि
णि ॥ स्मितपूर्वमुवाचेदंनारदोदेवपूजितः ॥ ७२ ॥ नारदउवाच ॥ हर्षस्थानेचमहतित्वयादुःखंनिरुच्यते ॥ अपरिच्छिन्नवाक्यार्थोमोहंयासिमहा
गिरे ॥ ७३ ॥ इमांशृणुगिरंमत्तोरहस्यपरिनिष्ठिताम् ॥ समाहितोमहाशैलमयोक्तस्यविचारणाम् ॥ ७४ ॥ नजातोऽस्याःपतिर्देव्यायन्मयोक्तं
हिमाचल ॥ सनजातोमहादेवोभूतभव्यभवोद्भवः ॥ ७५ ॥ शरण्यःशाश्वतःशास्ताशङ्करःपरमेश्वरः ॥ ब्रह्मरुद्रेन्द्रमुनयोगर्भजन्मजरार्दिताः ॥७६॥
तस्यतेपरमेशस्यसर्वेक्रीडनकागिरे ॥ ब्रह्माण्डतस्तदिच्छातःसम्भूतोभुवनप्रभुः ॥ ७७ ॥ विष्णुर्युगेयुगेजातोनानाजातिर्महातनुः ॥ मन्यसेमायया
जातंविष्णुंचापियुगेयुगे ॥ ७८ ॥ आत्मनोनविनाशोऽस्तिस्थावरान्तेऽपिभूधर ॥ संसारेजायमानस्यम्रियमाणस्यदेहिनः ॥ ७९ ॥ नश्यतेदेहए
वात्रनात्मनोनाशउच्यते ॥ब्रह्मादिस्थावरान्तोऽयंसंसारोयःप्रकीर्तितः ॥१८०॥ सजन्ममृत्युदुःखार्तोह्यनिशंपरिवर्तते॥महादेवोऽचलःस्थाणुर्नजातोज
नकोऽजरः ॥ ८१ ॥ भविष्यतिपतिःसोऽस्याजगन्नाथोनिरामयः ॥ यदुक्तंचमयादेवीलक्षणैर्वर्जितातव ॥ ८२॥ शृणुतस्यापिवाक्यस्यसम्यक्त्वेन
विचारणम् ॥ लक्षणंदेविकोह्यङ्कःशरीरावयवाश्रयः ॥ ८३ ॥ सचायुर्धनसौभाग्यपरिणामप्रकाशकः ॥ अनन्तस्याप्रमेयस्यसौभाग्यस्यतुभूधर ॥
॥ ८४ ॥ नैवाङ्कोलक्षणाकारःशरीरेसंविधीयते ॥ अतोऽस्यालक्षणंगात्रेशैलनास्तिमहामते ॥ ८५ ॥ यच्चाहमुक्तवानस्याउत्तानकरतासदा ॥ उत्ता
नोवरदःपाणिरेषदेव्याःसदैवतु ॥ ८६ ॥ सुरासुरमुनिव्रातवरदात्रीभविष्यति ॥ यच्चप्रोक्तंमयापादौसुच्छायौऽव्यभिचारिणौ ॥ ८७ ॥ मत्तःशृणु
त्वमस्यापिव्याख्योक्तिंशैलसत्तम ॥ चरणौपद्मसङ्काशौस्वच्छावस्यानखोज्ज्वलौ ॥ ८८ ॥ सुरासुराणांनमतांकिरीटमणिकान्तिभिः ॥ विचित्रव
र्णैःपश्यद्भिःसुच्छायौप्रतिबिम्बितौ ॥ ८९ ॥ एषाभार्याजगद्भर्तुर्वृषाङ्कस्यमहीधर ॥ जननीसर्वलोकस्यसम्भूताभूतभाविनी ॥ १९० ॥ शिवेयंपाव
नायैवत्वत्क्षेत्रेपावनद्युतिः ॥ तद्यथाशीघ्रमेवैषायोगंयायात्पिनाकिनः ॥ ९१ ॥ तथाविधेयंविधिवत्त्वयाशैलेन्द्रसत्तम ॥ अस्त्यत्रहिमहत्कार्यंदे
वानांहिमभूधर ॥ ९२ ॥ पुलस्त्यउवाच ॥ एवंश्रुत्वातुशैलेन्द्रोनारदात्सर्वमेवहि ॥ स्वमात्मानंपुनर्जातंमेनेमेनापतिस्तदा ॥ ९३ ॥ उवाचचा ॥ १४४ ॥
पिसंहृष्टोनारदंतुहिमाचलः ॥ ९४ ॥ हिमाचलउवाच ॥ दुस्तरान्नरकाद्घोरादुद्धृतोऽस्मित्वयाविभो ॥ पातालादहमुद्धृत्यसप्तलोकाधिपःकृतः ॥
॥९५॥ हिमाचलोऽस्मिविख्यातस्त्वयामुनिवराधुना ॥ हिमाचलाच्छतगुणांप्रापितोऽस्मिसमुन्नतिम् ॥ ९६ ॥ आनन्दादेवचाहारिहृदयंमेमहामुने॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाध्यवस्यतिकृत्यानांविभागप्रविचारणम् ॥ ९७ ॥ भवद्विधानांनियतममोघंदर्शनंमुने ॥ भवद्भिरेवहिप्रोक्तंनिवासायात्मरूपिणाम् ॥ ९८ ॥ मुनी
नांदेवतानांचस्वयंकर्तास्मिकल्मषम् ॥ तथापिवस्तुन्येकस्मिन्नाज्ञामेसम्प्रदीयताम् ॥९९ ॥ पुलस्त्यउवाच ॥ इत्युक्तवतिशैलेन्द्रेसतदाहर्षनिर्भरः ॥
उवाचनारदोवाक्यंकृतंसर्वमितिप्रभो ॥ २०० ॥ सुरकार्येसएवार्थस्तवापिसुमहत्तरः ॥ इत्युक्त्वानारदःशीघ्रंजगामत्रिदिवंततः ॥ १ ॥ सगत्वादे
वभवनंमहेन्द्रंसन्ददर्शह ॥ ततोऽनुरूपेसमुनिरुपविष्टोमहासने ॥ २ ॥ पृष्टःशक्रेणप्रोवाचगिरिजासंश्रयांकथाम् ॥ ३ ॥ नारदउवाच ॥ यन्मह्यमु
क्तंकर्तव्यंतन्मयाकृतमेवहि ॥ किंतुपञ्चशरस्येषुगोचरत्वमपेक्षितम् ॥ ४ ॥ पुलस्त्यउवाच ॥ इत्युक्तोदेवराजस्तुमुनिनाकार्यदर्शिना ॥ चूताङ्कुरा
स्त्रंसस्मारभगवान्पाकशासनः ॥ ५ ॥ सस्मृतस्तुतदाक्षिप्रंसहस्राक्षेणधीमता ॥ उपतस्थेरतियुतःसविलासोझषध्वजः ॥ ६ ॥ प्रादुर्भूतंचतंदृष्ट्वा
शक्रःप्रोवाचमन्मथम् ॥ ७ ॥ शक्रउवाच ॥ उपदेशेनबहुनाकिंत्वांप्रतिरतिप्रिय ॥ मनोभवोऽसितेनत्वंवेत्सिभूतमनोगतम् ॥ ८ ॥ तद्यथानु
क्रमंतुत्वंकुरुनाकसदांप्रियम् ॥ शङ्करंयोजयक्षिप्रंगिरिपुत्र्यामनोभव ॥ ९ ॥ संयुक्तोमधुनानेनगच्छरत्यासहायवान् ॥ इत्युक्तोमदनस्तेनशक्रे
णस्वार्थसिद्धये ॥ २१० ॥ प्रोवाचपञ्चबाणोऽथवाक्यंभीतःशतक्रतुम् ॥ ११ ॥ कामउवाच ॥ अनयादेवसामग्र्यामुनिदानवभीमया ॥ दुःसा
ध्यश्शङ्करोदेवःकिंनवेत्सिजगत्प्रभो ॥ १२ ॥ तस्यदेवस्यवेत्थत्वंकारणंपदमव्ययम् ॥ प्रायःप्रसादेकोपेऽपिसर्वंहिमहतांमहत् ॥ १३ ॥ सर्वोपभोग
सारंहिसौन्दर्यस्वर्गसम्भवम् ॥ विशेषंकाङ्क्षतांशक्रसामान्याद्भ्रंशनंफलात् ॥ १४ ॥ श्रुत्वैतद्वचनंशक्रस्तमुवाचामरैर्युतः ॥ १५ ॥ शक्रउवाच ॥
वयंप्रमाणंतेतत्ररतिकान्तनसंशयः ॥ सन्दंशेनविनाशक्तिरयस्कारस्यनेष्यते ॥ १६ ॥ कस्यचिच्चक्वचिद्दृष्टंसामर्थ्यंनतुसर्वतः ॥ १७ ॥ पुल
स्त्यउवाच ॥ इत्युक्तःप्रययौकामःसखायंमधुमाश्रितः ॥ रतियुक्तोजगामाशुप्रस्थंतुहिनभूभृतः ॥ १८ ॥ सतुप्राप्याकरोच्चिन्तांकार्यस्योपायपू
र्विकाम् ॥ महात्मानोहिनिष्कम्पामनस्तेषांसुदुर्जयम् ॥ १९ ॥ तदादावेवसंक्षोभ्यनेत्थंतस्यजयोभवेत् ॥ संसिद्धिःप्रायशश्चैवपूर्वसंशोध्यमानसम्
॥ २२० ॥ कथमेवंविधैर्भावैर्द्वेषानुगमनंविना ॥ क्रोधःक्रूरतरात्सङ्गाद्व्रीषणेर्षामहासखी ॥ २१ ॥ चापल्यान्मूर्ध्निविध्वस्तधैर्याधारमहाबला ॥ ताम
स्य विनियोक्ष्यामिमनसोविकृतिंपुरः ॥ २२ ॥ पिधायधैर्यद्वाराणिसन्तोषमपकृष्यच ॥ अवगन्तुंहिमांतत्रनकश्चिदिहपण्डितः ॥ २३ ॥ विक
ल्पमात्रसंस्थानंविरूपाक्षमनोभवम् ॥ प्रविश्याथक्रियारम्भीगम्भीरावर्तदुस्तरः ॥ २४ ॥ भविष्यामिहरस्याहंतपःस्थस्यस्थिरात्मनः ॥ इन्द्रि
यग्राममावृत्यरम्यसाधनसंविधिः ॥ २५ ॥ चिन्तयित्वेतिमदनोभूतभर्तुस्तदाश्रमम् ॥ जगामजगतीसारंसरलद्रुमवेदिकम् ॥ २६ ॥ शान्तस

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वसमाकीर्णमचलंप्राणिसङ्कुलम् ॥ नानापुष्पलताजालंसानुसंस्थगणेश्वरम् ॥ २७ ॥ निर्व्यग्रवृषभोद्घुष्टंनीलशाद्वलसानुकम् ॥ तत्रापश्यत्त्रिनेत्रस्य
रम्यंकश्चिद्द्वितीयकम् ॥ २८ ॥ वीरकंवीरलोकेशमीशानसदृशद्युतिम् ॥ पङ्ककुङ्कुमकिञ्जल्कपुञ्जपिङ्गजटासटम् ॥ २९ ॥ वेत्रपाणिंतमव्य
ग्रमुग्रंचाभद्रभूषणम् ॥ ततोनिमीलितोन्निद्रपद्मपत्रान्तलोचनम् ॥ २३० ॥ प्रेक्षमाणमृजुस्थानंनासावंशाग्रगोचरम् ॥ अतीवरम्यसिंहेन्द्रचर्म
लम्बोत्तरीयकम् ॥ ३१ ॥ श्रवणाहिफणोन्मुक्तनिश्वासानलपिङ्गलम् ॥ प्रङ्खत्कपोलपर्यन्तचुम्बिलम्बिजटाचयम् ॥ ३२ ॥ कृतवासुकि
पर्यन्तनाभिमूलनिवेशितम् ॥ ब्रह्माञ्जलिस्थनासाग्रनिबद्धोरगभूषणम् ॥ ३३ ॥ ददर्शशङ्करंकामःक्रमप्राप्तान्तिकःशनैः ॥ ततोभ्रमरझङ्कारमाल
म्ब्यद्रुमसानुगम् ॥ ३४ ॥ प्रविष्टःकर्णरन्ध्रेणभवस्यमदनोमनः ॥ शङ्करस्तमथाकर्ण्यमधुरंमदनाश्रयम् ॥ ३५ ॥ सस्मारदक्षतनयांदयितां
रन्तुमानसः ॥ ततःशिवस्यशनकैस्तिरोधायातिनिर्मला ॥ ३६ ॥ समाधिभावनातस्थौलक्ष्यप्रत्यक्षरूपिणी ॥ ततस्तन्मयतांयातःप्रत्यूह
पिहिताशयः ॥ ३७ ॥ विवेशविबुधाधीशोविकृतिंमदनात्मिकाम् ॥ ईषत्क्रोधसमाविष्टोधर्यमालम्ब्यधूर्जटिः ॥ ३८ ॥ निरस्यमदनंस्थि
त्वायोगमायासमावृतः ॥ सतयामाययाविष्टोजज्वालमदनस्ततः ॥ ३९ ॥ इच्छाशरीरोदुर्ज्ञेयोदोषावासोमहाशयः ॥ हृदयान्निर्गतःसोऽथवासना
व्यसनात्मकः ॥ २४० ॥ बहिस्थलंसमासाद्यउपतस्थेझषध्वजः ॥ अनुयातोहिसाह्येनमित्रेणमधुनासह ॥ ४१ ॥ सहकारतरोर्दृष्ट्वामन्दमारु
तनिर्धुतम् ॥ स्तवकंमदनोरम्यंहरवक्षसिसत्वरम् ॥ मुमोचमोहनंनाममार्गणंमकरध्वजः ॥ ४२ ॥ सतस्यहृदयेशुद्धेनामशालीमहाशरः ॥
पपातपरुषःप्रांशुःपुष्पबाणोविमोहनः ॥ ४३ ॥ ततःकरणसन्दोहेविद्धेतुहृदयेभवः ॥ बभूवभूतपोऽकम्प्यधैर्योऽपिमदनोन्मुखः ॥ ४४ ॥ ततःप्रभु
त्वाद्भावानामावशंस्वमपश्यत ॥ वाक्यंबहुबभाषेऽथप्रत्यूहप्रसवात्मकम् ॥ ४५ ॥ ततःकोपानलोद्भूतघोरहुङ्कारभीषणे ॥ बभूववदनेनेत्रंतृतीयमन
लाकुलम्॥४६॥रुद्रस्यरौद्रवपुषोजगत्संहारभैरवम्॥तदन्तिकस्थेमदनेव्यस्फारयतधूर्जटिः॥४७॥तन्नेत्रविस्फुलिङ्गेनक्रोशतांनाकवासिनाम् ॥ गमितो
भस्मतांतूर्णंकन्दर्पःकामदर्पकः॥४८॥सतुतंभस्मसात्कृत्वाहरनेत्रोद्भवोऽनलः ॥ व्यजृम्भतजगद्दग्धुंज्ञात्वाहुङ्कारघस्मरम्॥४९॥ततोभवोजगद्धेतोर्व्यभ
जज्जातवेदसम् ॥ सहकारेमधौचन्द्रेसुमनस्स्वपरेष्वपि ॥ २५० ॥ भृङ्गेषुकोकिलास्येचविभागेनस्मरानलम्॥सबाह्याभ्यन्तरेविद्धोहरोऽथस्मरमार्गणैः
॥ ५१ ॥ भागेष्वेतेषुसंविष्टंवीक्षन्तीवहुताशनम् ॥ विभक्तंलोकसंक्षोभकरंदुर्वारजृम्भितम् ॥ ५२ ॥ तत्प्रातिस्नेहसम्पूर्णकामेनहृदयेकिल ॥ ज्वलन्न
हर्निशंभीमोदुःखस्यवशगोऽभवत् ॥ ५३ ॥ विलोक्यहरहुङ्कारज्वालाभस्मीकृतंस्मरम् ॥ विललापरतिःक्रूरंबन्धुनामधुनासह ॥ ५४ ॥ ततो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विलप्यबहुशोमधुनापरिसान्त्विता ॥ जगामशरणंदेवमिन्दुमौलिंत्रिलोचनम् ॥ ५५ ॥ भृङ्गानुयातांसङ्गत्यपुष्पितांसहकारजाम् ॥ लतांपत्र द्रुमच्छन्नांजातांपरभृतांसखीम् ॥ ५६ ॥ निबध्यतुजटाजूटंकुटिलैरलकैरतिः ॥ उद्धर्त्यगात्रंशुभ्रेणहृद्येनस्मरभस्मना ॥ ५७ ॥ जानुभ्यामवनिंगत्वा प्रोवाचेन्दुविभूषणम् ॥ ५८ ॥ रतिरुवाच ॥ नमःशिवायास्तुमनोमयायजगन्मयायाद्भुतवर्त्मनेनमः ॥ नमःशिवायास्तुसुरार्चितायतुभ्यंसदाभक्त कृपापराय ॥ ५९ ॥ नमोभवायास्तुभवोद्भवायनमोऽस्तुतेध्वस्तमनोभवाय ॥नमोऽस्तुमायामदनाश्रयायनमोनिसर्गामलभूषिताय ॥२६०॥ नमोऽ स्त्वमेयायगुणायनायनमोऽस्तुसिद्धायपुरातनाय ॥ नमःशरण्यायनमोगुणायनमोऽस्तुतेभीमगणानुगाय॥६१॥नमोऽस्तुनानाभुवनार्द्धकर्त्रेनमोऽस्तु भक्ताभिमतप्रदाय ॥ नमोऽथकर्मप्रसुवेनमःसदाअनन्तरूपायसदैवतुभ्यम् ॥ ६२ ॥ असह्यकोपायसदैवतुभ्यंशशाङ्कचिह्नायनमोऽस्तुतुभ्यम् ॥ असीमलीलापरमस्तुतायवृषेन्द्रयानायपुरान्तकाय ॥ ६३ ॥ नमःप्रसिद्धायमहौषधायनमोऽस्तुनानाविधरूपकाय ॥ नमोऽस्तुकालायनमःकलाय नमोऽस्तुतेकालकलातिगाय॥६४॥ चराचराचार्यविचार्यवर्यमाचार्यमुत्प्रेक्षितभूतसर्गम्॥त्वामिन्दुमौलिंशरणंप्रपन्नाप्रियात्तयेऽहंसहसामहेशम्॥६५॥ प्रयच्छमेकामयशःसमृद्धिंपतिंविनातंभगवेवन्नजी ॥प्रियःप्रियायाःपुरुषेशनित्यस्ततोऽपरःकोभुवनेष्विहास्ति ॥ ६६ ॥ प्रभुःप्रभावीप्रभवःप्रियाणां प्रवीणपर्यायपरापरन्तपः ॥ त्वमेवनाथोभुवनस्यगोप्तादयालुरुन्मूलितभक्तभीतिः ॥ ६७ ॥ पुलस्त्यउवाच ॥ इत्थंस्तुतःशङ्करइन्दुमौलिर्वृषाकपिर्म न्मथकान्तयातु॥तुतोषदोषाकरखण्डधारीउवाचचैनांमधुरंनिरीक्ष्य ॥६८॥ शङ्करउवाच ॥ भविष्यतिचकामोऽयंकालेकान्तेऽचिरादथ ॥ अनङ्गइति लोकेषुसविख्यातिंगमिष्यति ॥ ६९ ॥ इत्युक्ताशिरसावन्द्यगिरीशंकामवल्लभा ॥ जगामोपवनंचान्यद्रतिस्तुहिनपर्वते ॥ २७० ॥ रुरोदचापि बहुशोदीनारम्यस्थलेस्थले ॥ मरणव्यवसायापिनिवृत्ताचशिवाज्ञया ॥ ७१ ॥ अथनारदवाक्येनचोदितोहिमभूधरः॥कृताभरणसंस्कारांकृतकौतुक मङ्गलाम् ॥ ७२ ॥ स्वर्गपुष्पकृतापीडांशुभ्रचीनांशुकाम्बराम् ॥ सखीभ्यांसंयुतांशैलोगृहीत्वास्वसुतांततः ॥ ७३ ॥ जगामसुभगेयोगेतदासम्पूर्ण मानसः ॥ सकाननान्युपाक्रम्यवनान्युपवनानिच ॥ ७४ ॥ ददर्शरुदतींनारीमप्रतर्क्यांमहौजसम् ॥ नरूपेणेदृशीलोकेरम्येषुवनसानुषु ॥ ७५ ॥ कौतुकेनपरामृष्टस्तांदृष्ट्वारुदतींगिरिः ॥ उपसृप्यततस्तस्यानिकटंसोऽप्यपृच्छत ॥ ७६ ॥ हिमवानुवाच ॥ कासिकस्यासिकल्याणिकिमर्थंचापि रोदिषि ॥ नैतदल्पमहंमन्येकारणंलोकसुन्दरि ॥ ७७ ॥ सातस्यवचनंश्रुत्वाउवाचमधुनासह ॥ रुदन्तीशोकवचनंश्वसन्तीदैन्यवर्धनम् ॥ ७८ ॥ रतिरुवाच ॥ कामस्यदयितांभार्यांरतिंमांविद्धिसुव्रत ॥ गिरावस्मिंश्चभगवान्गिरिशस्तपसिस्थितः ॥७९॥ तेनप्रत्यूहरुष्टेनक्रोधाद्विस्फार्यलोचनम् ॥

CC-0. In Public Domain. Digitization by eGangotri

विमुच्याग्निशिखाज्वालांकामोभस्मावशेषितः ॥ २८० ॥ अहंतुशरणंयातातंदेवंभयविह्वला ॥ स्तुतवत्यथसन्तुष्टस्ततोमांगिरिशोब्रऽवीत् ॥ ८१ ॥
तुष्टोऽहंकामदयितेकामोत्पत्तिर्भविष्यति ॥ त्वत्स्तुतिंचाप्यधीयानोनरोभक्त्यामदाश्रयः ॥ ८२ ॥ लप्स्यतेकाङ्क्षितंकामंनिवर्तंमरणादपि ॥
प्रतीक्षमाणातद्वाक्यमाशावेशवशादहम् ॥ ८३ ॥ शरीरंपरिरक्षिष्येकिञ्चित्कालंमहाद्युते ॥ इत्युक्तस्तुतयारत्याशैलःसम्भ्रमभीषणः ॥ ८४ ॥
पाणावादायतनयांगन्तुमैच्छत्स्वकंपुरम् ॥ भाविनोऽवश्यभावित्वाद्भवित्रीभूतभाविनी ॥ ८५ ॥ लज्जमानासखिमुखैरुवाचपितरंगिरिम् ॥
॥ ८६ ॥ शैलपुत्र्युवाच ॥ दुर्भगेनशरीरेणकिंममानेनकारणम् ॥ कथंचतादृशांप्राप्तश्शङ्करोमेपतिर्भवेत् ॥ ८७ ॥ तपोभिःप्राप्यतेऽभीष्टंना
साध्यन्तुतपस्यतः ॥ दुर्भगत्वंवृथालोकेविहितेसतिसाधने ॥ ८८ ॥ तपसिभ्रष्टसन्देहाततःस्वार्थजिगीषया ॥ एवन्तपःकरिष्येऽहंया
मीत्युक्तवतींसुताम् ॥ ८९ ॥ उवाचवाचाशैलेन्द्रोगद्गदस्वरवर्णया ॥ २९० ॥ हिमवानुवाच ॥ उमेतिचापलंपुत्रिनक्षमंतावकंव
पुः ॥ सोढुंक्लेशानुरूपस्यतपसःसौम्यदर्शने ॥ ९१ ॥ भावीन्यपिचकार्याणिपदार्थानिसदैवतु ॥ भाविनोऽर्थाभवन्त्येवबहवोऽनिच्छ
तोऽपिहि ॥ ९२ ॥ तस्मान्नतपसातेऽस्तिबालेकिञ्चित्प्रयोजनम् ॥ भवनंचैवगच्छामिचिन्तयिष्यामितत्रवै ॥ ९३ ॥ इत्युक्तातुयदानै
वगृहमन्वेतिशैलजा ॥ ततोऽद्रिश्चिन्तयाविष्टःस्वसुतांप्रशशंसच ॥ ९४ ॥ ततोऽन्तरिक्षेदिव्याचवागभूद्भुवनत्रये ॥ उमेतिचापलंपुत्रित्वयोक्तातन
यायतः ॥ ९५ उमेतिनामतेनास्याभुवनेषुभविष्यति ॥ सिद्धिर्मूर्तिमतीत्वेषासाधयिष्यतिचिन्तितम् ॥ ९६ ॥ इतिश्रुत्वातुवचनंसतदाकाश
मण्डले ॥ अनुज्ञायसुतांशैलोजगामाशुस्वमन्दिरम् ॥ ९७ ॥ पुलस्त्यउवाच ॥ शैलजापिययौशैलमगम्यमपिदैवतैः ॥ सखीभ्यामनुयातातुनि
यतानगराजजा ॥ ९८ ॥ शृङ्गंहिमवतःपुण्यंनानाधातुविभूषितम् ॥ दिव्यपुष्पलताकीर्णंभ्रमरोद्घुष्टपादपम् ॥ ९९ ॥ दिव्यप्रस्रवणोपेतंमनोर
थशतोज्ज्वलम् ॥ नानापक्षिसमायुक्तंचक्रवाकोपशोभितम् ॥ ३०० ॥ जलजस्थलजैःपुण्यैःप्रफुल्लैरुपशोभितम् ॥ चित्रकन्दरसङ्कुह्यंदिव्यगेहसम
न्वितम् ॥ १ ॥ विहङ्गसङ्घसङ्घुष्टंकल्पपादपसङ्कटम् ॥ तत्रापश्यन्महाशाखंशाखिनंहरितच्छदम् ॥ २ ॥ सर्वर्तुकुसुमोपेतंचक्रवाकोपशोभितम् ॥
नानापुष्पशताकीर्णंनानाविधफलान्वितम् ॥ ३ ॥ त्यक्तंसूर्यस्यरुचिभिर्भिन्नसंहतपल्लवम् ॥ तत्राम्बराणिसन्त्यज्यभूषणानिचशैलजा ॥ ४ ॥
संवीतावल्कलैर्दिव्यैर्दर्भनिर्मितमेखला ॥ त्रिःस्नातापाटलाहाराबभूवशरदांशतम् ॥ ५ ॥ शतमेकेनजीर्णेनपर्णेनावर्त्तयत्तदा ॥ निराहाराशतंसा
भूत्समानांतपसोनिधिः ॥ ६ ॥ ततउद्वेजिताःसर्वेप्राणिनस्तपसोऽग्निना ॥ ततःसस्मारभगवान्मुनीन्सप्तशतक्रतुः ॥ ७ ॥ तेसमागम्यमुदिताःस

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वेंसमुदितास्तथा ॥ पूजितास्तेमहेन्द्रेणपप्रच्छुस्तत्प्रयोजनम् ॥ ८ ॥ ऋषयऊचुः॥किमर्थंहिसुरश्रेष्ठसंस्मृतास्तुवयंत्वया ॥ ९ ॥ शक्रःप्रोवाच
शृण्वन्तुभगवन्तःप्रयोजनम् ॥ शक्रउवाच॥ हिमाचलेतपोघोरंतप्यतेभूधरात्मजा ॥३१०॥ तस्याभिमतयोगेनभवन्तःकर्तुमर्हथ ॥ तपःसमापनंदेव्या
जगदर्थेत्वरान्विताः ॥ तथेत्युक्त्वाततःशैलंसिद्धसङ्घातसेवितम् ॥ ११ ॥ ऊचुरागम्यमुनयस्तामथोमधुराक्षरम् ॥ पुत्रिकस्तेव्यवसितःकामःकमल
लोचने ॥ १२ ॥ तानुवाचततोदेवीसादरंगौरवान्मुनीन् ॥ १३ ॥ देव्युवाच ॥ तपस्यन्तोमहाभागाःप्रोह्यमौनंभवादृशाम् ॥ वन्दनायनियुक्ता
धीर्याचयत्यविकल्पितम् ॥ १४ ॥ सुप्रसन्नमुखायूयंगृहीत्वासनमादितः ॥ उपविष्टाःश्रमंमुक्त्वाततःप्रक्ष्यथमामनु ॥ १५ ॥ इत्युक्तास्तेततश्च
क्रुस्तत्रासनपरिग्रहम् ॥ साचतान्विधिवत्पूर्वंपूजयित्वाविधानतः ॥ १६ ॥ उवाचादित्यसङ्काशान्मुनीन्सप्तऋषीञ्शनैः ॥ त्यक्त्वाव्रतात्मकंमौ
नंनत्वाचविधिवन्मुनीन् ॥ १७ ॥ भगवन्तोऽपिमौनान्तेतस्याःसप्तर्षयोऽप्यथ ॥ गौरवाधारतांप्राप्तांपप्रच्छुस्तांपुनस्तथा ॥ १८ ॥ सापिगौर
वगर्भेणमनसाचारुहासिनी ॥ मुनीन्सर्वांस्तथालोक्यप्रोवाचप्रोह्यवाग्यमम् ॥ १९ ॥ भगवन्तोविजानीथप्राणिनांमनसेप्सितम् ॥ शरीरादिभि
रत्यर्थंकदर्थ्यन्तेहिदेहिनः ॥ ३२० ॥ केचित्तुनिपुणास्तत्रघटन्तेविविधोद्यमैः ॥ उपायैर्दुर्लभान्भावान्प्राप्नुवन्तिह्यतन्द्रिताः ॥ २१ ॥ अपरेतु
परिच्छिद्यनानाकारानुपक्रमान् ॥ देहान्तरार्थंसारम्भमाश्रयन्तिहितद्व्रतम् ॥ २२ ॥ ममत्वाकाशसम्भूतकुसुमस्रग्विभूषितम् ॥ विन्ध्यशृङ्गंस्प्र
ष्टुकामोहस्तःप्रसरतेमुहुः ॥ २३ ॥ अहंकिलभवंदेवंपतिंप्राप्तुंसमुद्यता ॥ प्रकृत्यैवदुराराध्यंतपस्यन्तंचसम्प्रति ॥ २४ ॥ सुरासुरैरनिर्णी
तंपरमार्थक्रियाश्रयम् ॥ साम्प्रतंचापिनिदग्धोमदनोवीतरागिणा ॥ २५ ॥ कथमाराधयेदीशंमादृशीतादृशंशिवम् ॥ २६ ॥ पुलस्त्यउवाच॥
इत्युक्तामुनयस्तेतुस्थिरतांमनसस्ततः ॥ ज्ञातुमस्यावचःप्रोचुःप्रक्रमात्प्रकृतार्थकम् ॥ २७ ॥ मुनयऊचुः ॥ द्विविधंतुसुखंतावत्पुत्रिलोकेविभा
व्यते ॥ शरीरस्यास्यसंयोगश्चेतसश्चापिनिर्वृतिः ॥ २८ ॥ प्रकृत्यातुसदिग्वासाभीमोभस्मास्थिभूषणः ॥ कपालीभिक्षुकोनग्नोविरूपाक्षोऽस्थिर
क्रियः ॥ २९ ॥ प्रमत्तोन्मत्तकाकारोबीभत्सोकृतसङ्ग्रहः ॥ पत्यानतेनचास्त्यर्थोमूर्तानर्थेनकाङ्क्षितः ॥ ३३० ॥ यदिस्वस्यशरीरस्यसुखमिच्छ
सिशाश्वतम् ॥ तत्कथंतेमहादेवाद्भूतभाजोजुगुप्सितात् ॥३१॥ स्रवन्नरवसासास्थिकपालकृतभूषणात् ॥ श्वसदुग्रभुजङ्गेन्द्रकृतभूषणभूषितात् ॥३२॥
श्मशानवासिनोरौद्रप्रमथानुगतादपि ॥ सुरेन्द्रमुकुटव्रातनिघृष्टचरणोऽरिहा ॥ ३३ ॥ हरिरस्तिजगद्धाताश्रीकान्तोऽनन्तमूर्तिमान् ॥ जप्योय
ज्ञभुजामस्तितथेन्द्रःपाकशासनः ॥ ३४ ॥ देवतानांनिधिश्चास्तिज्वलनस्सर्वकामधुक् ॥ वायुरस्तिजगद्धातायःप्राणस्सर्वदेहिनाम् ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

तथावैश्रवणोराजासवार्थमहिमाप्रभुः ॥ एभ्यएकतमंकस्मान्नत्वंसम्प्राप्तुमिच्छसि ॥ ३६ ॥ उतान्यस्मादिहप्राप्यंसुखंतेमनसेहितम् ॥ एवमेतत्त
थापुत्रिप्रभावोलोकसम्पदाम् ॥ ॥ ३७ ॥ अस्मिन्देहेपरेवापिकल्याणप्राप्तयेतव ॥ पितुरेवास्तितेसवसुरेभ्योयन्निवेदितम् ॥ ३८ ॥ वरस्यप्राप्तये
क्लेशस्सचाप्यत्राफलस्तरुः ॥ प्रायेणप्रार्थितोह्यर्थस्समर्थोह्यतिदुर्लभः ॥ ३९ ॥ स्वस्थानविनियोगित्वात्पुत्रितत्रापिलभ्यते ॥ ३४० ॥ पुलस्त्य
उवाच ॥ इत्युक्तवत्सुकुपितामुनिवर्येषुशैलजा ॥ उवाचक्रोधरक्ताक्षीविस्फुरद्दशनच्छदा ॥ ४१ ॥ देव्युवाच ॥ असद्ग्रहस्यकानीतिर्व्यसनस्यक
यन्त्रणा ॥ विपरीतार्थबोद्धारःसत्पथेकेनयोजिताः ॥ ४२ ॥ एवंमांवित्थदुष्प्रज्ञामस्थानासद्ग्रहप्रियाम् ॥ नमांप्रतिविचारोऽस्तियदहङ्कारमानिनी
॥ ४३ ॥ प्रजापतिसमाःसर्वेभवन्तःसर्वदर्शिनः ॥ ननूनंवित्थतंदेवंशाश्वतंजगतःप्रभुम् ॥ ४४ ॥ अजमीशानमव्यक्तममेयमहिमोदयम् ॥ आ
स्तांतत्कर्मसद्भावंसम्बोधंतावदावृतम् ॥ ४५ ॥ विदुस्तंनहरिब्रह्ममुखाअपिसुरेश्वराः॥यत्तस्यविभवंस्वोत्थंभुवनेषुविजृम्भितम् ॥ ४६ ॥ प्रकटंसर्व
भूतानांतदप्यथनवित्थकिम् ॥ कस्यैतद्गगनंमूर्तिःकस्याग्निःकस्यमारुतः ॥ ४७ ॥ कस्यभूःकस्यवरुणःकश्चन्द्रार्कविलोचनः ॥ कस्यार्चयन्तिलोके
षुलिङ्गंभक्त्यासुरासुराः ॥ ४८ ॥ यच्चब्रह्मेश्वरादेवाविष्णिवन्द्राद्यामहर्षयः ॥ प्रभावंप्रभवंवापितेषामपिनवित्थकिम् ॥ ४९ ॥ अदितेःकश्य
पाज्जातादेवानारायणादयः ॥ मरीचेःकश्यपःपुत्रोह्यदितिर्दक्षपुत्रिका ॥ ३५० ॥ मरीचिश्चापिदक्षश्चपुत्रौतौब्रह्मणःकिल ॥ ब्रह्माहिरण्मयादण्डा
देवसिद्धविभूतिकः ॥ ५१ ॥ कस्यप्रादुरभूद्ध्यानात्प्राकृतःप्राकृतांशकः ॥ अथनारायणेनैवस्वकीयच्छासमाश्रयात् ॥ ५२ ॥ तत्प्रेरितः
प्रयात्वेषजन्मनारायणत्मकम् ॥ सापिकर्मणएवोक्ताप्रेरणाविवशात्मनाम् ॥ ५३ ॥ यथोन्मादादिदुष्टस्यमतिरेवहिसाभवेत् ॥ इष्टानेवपदार्थान्वै
विपरीतान्हिमन्यते ॥ ५४ ॥ लोकस्यव्यवहारेषुदृष्टेषुहसतेसदा ॥ धर्माधमफलप्राप्तौविष्णुमेवनिबोधत ॥ ५५ ॥ विदध्वमित्थंमुनयोऽसकृ
च्चमेगिरंगिरीशश्रुतिभूमिसन्निधौ ॥ उत्कृष्टकेदारइवावनीतलेसुबीजमुष्टिंसुफलायकर्षकाः ॥ ५६ ॥ तेतांश्रुत्वाहितांरम्यांप्रक्रमात्प्रक्रमक्रियाम्॥
वाचंवाचांपतिप्रख्याःप्रोचुश्चस्मितसुन्दराः॥ ५७॥ मुनयऊचुः॥ जातेलोकविधानेतुसत्यंतत्कार्यमुत्तमम्॥ प्रायःप्रालेयशैलस्यशङ्कातत्कालरूपिणः
॥ ५८ ॥ सत्यमुत्कण्ठिताःसर्वेयेयेकार्यार्थमुद्यताः ॥ तेषांत्वरन्तेचेतांसिकिन्तुनाममहात्मनाम् ॥ ५९ ॥ लोकयात्रानुगन्तव्याविशेषेणविवक्षि
तैः ॥ यतस्तद्धर्ममेधन्तेतत्प्रामाण्यंपरेधृताः ॥ ३६० ॥ पुलस्त्यउवाच॥इत्युक्त्वामुनयोजग्मुस्त्वरितातुहिनाचलम् ॥ तत्रतेपूजितास्तेनहिमशैलेनसा
दरम् ॥ ६१ ॥ ऊचुर्मुनिवराःप्रीताःस्वल्पकंतुत्वरान्विताः ॥६२॥ मुनयऊचुः ॥ देवोदुहितरंसाक्षात्पिनाकीतवमार्गते ॥ तच्छीघ्रंपावयात्मानमाहुत्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वानलेहुतम्॥६३॥कार्यंहितञ्चदेवानांसुचिरंपरिवर्तते ॥ जगदुद्धारणायैषविधातव्यःसमुद्यमः ॥ ६४॥ पुलस्त्यउवाच ॥ इत्युक्तस्तुतदाशैलोहर्षावेशव
शान्मुनीन् ॥ असमर्थोऽभवद्वक्तुमुत्तरंप्रार्थयन्निव ॥ ६५ ॥ ततोमेनामुनीन्वन्द्यप्रोवाचस्नेहविक्लवा ॥ दुहितुस्तान्मुनींश्चैववचनंस्वयमर्थवत्॥६६॥
मेनोवाच ॥ यदर्थंदुहितुर्जन्मचेच्छन्त्यपिमहाफलम् ॥ तदेवोपस्थितंसर्वंप्रक्रमेणैवसाम्प्रतम्॥ ६७ ॥ कुलजन्मवयोरूपविभुत्वैस्सहितोऽपियः॥
वरस्तस्यापिनाहूयसुतादेयाह्वयाचतः ॥ ६८ ॥ दिग्वासाजटिलःशूलीदग्धकामोऽपिकामदः ॥ सतुमत्सुतयाघोरःकथंनामउपास्यते ॥ ६९ ॥
मुनयऊचुः ॥ ऐश्वर्यमवगच्छस्वशङ्करस्यसुरासुराः ॥ आराध्यमानपादाब्जयुगलाश्चसुनिर्वृताः ॥ ३७० ॥ यस्योपयोगियद्रूपंतेनतत्प्रार्थ्यतेचिरम् ॥
घोरंतपस्यतेबालातेनरूपेणनिर्वृता ॥ ७१ ॥ यत्साव्रतानिदिव्यानिनयिष्यतिसमापनम् ॥ तदत्रावहितातावदस्मास्वेवभविष्यति ॥७२॥ पुलस्त्य
उवाच ॥ इत्युक्त्वागिरिणासार्द्धंययुर्यत्रास्तिशैलजा ॥ जितार्कज्वलनज्वालातपस्तेजोमयीह्युमा ॥ ७३ ॥ प्रोक्तासामुनिभिःस्निग्धंमानिन्याह
वचोऽर्थवत् ॥ ७४ ॥ उमोवाच ॥ नाहंक्षुद्रात्किलेच्छामिऋतेशर्वात्पिनाकिनः ॥ स्थितंचतारतम्येनप्राणिनांपरमर्द्धिदम् ॥ ७५ ॥ धीरतैश्वर्य
कार्याणिप्रमाणमतुलंमहत् ॥ यस्मान्नकिञ्चिदहपरंयच्चयस्मात्प्रवर्तते ॥ ७६ ॥ यस्यैश्वर्यमनाद्यन्तंतमहंशरणंगता ॥ समःसव्यवसायश्चदीर्घेण
विपरीतकः ॥ ७७ ॥ एवंनिशम्यतेवाचंदेव्यामुनिवरास्तदा ॥ आनन्दाश्रुपरीताक्षाःसस्वजुस्तांतपस्विनीम् ॥ ७८॥ ऊचुश्चपरमप्रीताःशलजां
मधुरंवचः ॥ ७९ ॥ ऋषयऊचुः ॥ अत्यद्भुतमहोपुत्रिज्ञानमूर्तिरिवामला ॥ प्रसादयसिनोभावंभवभावप्रतिश्रयात् ॥ ३८० ॥ ननुविद्मोवयंतस्य
देवस्यैश्वर्यमद्भुतम् ॥ त्वन्निश्चयस्यदृढतांवेत्तुंवयमिहागताः ॥ ८१ ॥ अचिरादेवतन्वङ्गिकामस्त्वेषभविष्यति ॥ आदित्यस्सप्रभोयातिरत्नेभ्यः
कान्द्युतिःपृथक् ॥ ८२ ॥ कोऽर्थोवर्णान्स्वकांस्त्यक्त्वातथात्वंगिरिशंविना ॥ यामोऽनेकाभ्युपायेनतमभ्यर्थयितुंवयम् ॥ ८३ ॥ अस्माकमपि
चैषोऽर्थःसुतरांहृदिवर्तते ॥ अतस्त्वमेवसावुद्धिर्यतोनीतिस्त्वमेवहि ॥ ८४ ॥ अतोनिःसंशयंकार्यंशङ्करोऽपिविधास्यति ॥ ८५ ॥ पुलस्त्यउवाच॥
इत्युक्त्वापूजितास्सर्वेमुनयोगिरिकन्यया ॥ प्रययुर्गिरिशंद्रष्टुंप्रस्थंहिमवतोमहत् ॥८६॥ गङ्गाम्भःप्लावितात्मानःपिङ्गाबद्धजटासटाः ॥ भृङ्गानुया
तपाणिस्थमन्दारकुसुमस्रजः ॥ ८७ ॥ सम्प्राप्यतुगिरेःप्रस्थंददृशुःशङ्कराश्रमम् ॥ प्रशान्ताशेषसत्वौघंपर्यस्तमितकाननम् ॥ ८८ ॥ निःशब्दक्षोभ
सलिलप्रयातंसर्वतोदिशम् ॥ तत्रापश्यंस्ततोद्वारिवीरकंवेत्रपाणिनम् ॥ ८९ ॥ तमेतेमुनयःपूज्यविनीताःकार्यगौरवात् ॥ ऊचुर्मधुरभाषाभिस्ते
वाचंवाग्मिनांवराः ॥ ३९० ॥ ऋषयऊचुः॥द्रष्टुंवयमिहायाताःशङ्करंगणनायकम् ॥ त्रिलोचनंविजानीहिसुरकार्यप्रचोदिताः ॥९१॥ त्वमेवनोगति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तत्रयथाकालानतिक्रमः ॥ स्यात्प्रार्थनैषाप्रायेणप्रतीहारमयीप्रभो ॥ ९२ ॥ पुलस्त्यउवाच ॥ इत्युक्तोमुनिभिःसोऽथगौरवात्तानुवाचह ॥ वीरक
उवाच ॥ सवनस्यापरांसन्ध्यांकर्तुंमन्दाकिनींगतः ॥ ९३ ॥ क्षणनभाविताविप्रास्ततोद्रक्ष्यथशूलिनम् ॥ ९४ ॥ पुलस्त्यउवाच ॥ इत्युक्तामुनय
स्तस्थुर्यत्नात्कार्यविचक्षणाः ॥ गम्भीराम्बुधरंप्रावृट्तृषिताश्चातकायथा ॥ ९५ ॥ तथाक्षणेननिष्पन्नसमाचारक्रियाविधिम् ॥ वीरासनकृतोद्देशं
मृगचर्मनियामितम् ॥ ९६ ॥ ततोविनीतोजानुभ्यामवलम्ब्यमहींमुदा ॥ उवाचवीरकोदेवंप्रणयैकसमाश्रयम् ॥ ९७ ॥ वीरकउवाच ॥ सम्प्रा
तामुनयःसप्तद्रष्टुंत्वांदीप्ततेजसम् ॥ विभोसमादिशद्रष्टुंततोध्यानमिहार्हसि ॥ ९८ ॥ पुलस्त्यउवाच ॥इत्युक्तोधूर्जटिस्तेनवीरकेणमहात्मना ॥ भ्रूभङ्ग
संज्ञयातेषांप्रवेशाज्ञांददौतदा ॥ ९९ ॥ मूर्द्धकम्पेनतान्सप्तवीरकोऽपिमहामुनीन् ॥ आजुहावविदूरस्थान्दर्शनायपिनाकिनः ॥ ४०० ॥ त्वराबद्ध
जटास्तेचलम्बकृष्णाजिनाम्बराः ॥ विविशुर्वेदिकांदिव्यांगिरीशस्यविभोस्ततः ॥ १ ॥ बद्धपाणिपुटाक्षिप्तनाकपुष्पोत्करास्ततः ॥ पिनाकिपाद
युगलंवन्द्यनाकनिवासिनः ॥ २ ॥ ततःस्निग्धेक्षिताःसन्तोमुनयःशूलपाणिना ॥ गिरीशंतुततोदृष्ट्वातेसमंतुष्टुवुर्मुदा ॥ ३ ॥ मुनयऊचुः ॥ अहो
कृतार्थावयमेवसाम्प्रतंसुरेश्वरैर्वन्दितपादपल्लवम् ॥ विलोकयामोगुणगौरवर्द्धिभिःसमादिशेःकार्यमशेषरक्षणम् ॥ ४ ॥ पुलस्त्यउवाच ॥ ततःप्रह
स्यसर्वज्ञउवाचमुनिसत्तमान् ॥ ५ ॥ शङ्करउवाच ॥ भवतांयद्धृदिगतंकार्यंतत्कुरुताधुना ॥ ६ ॥ पुलस्त्यउवाच ॥ इत्युक्तामुनयस्तूर्णंययुर्यत्रच
शैलजा॥बभाषिरेविभागज्ञागिरिजांगिरिगह्वरे ॥७॥ ऋषयऊचुः॥रम्यंप्रियमनोहारिमारूपंतपसादह॥प्रीतस्तेशङ्करःपाणिमेषप्रतिग्रहीष्यति॥८॥वय
मर्थितवन्तस्तेपितरंपूर्वमागताः ॥ पित्रासहगृहंगच्छवयंयामःस्वमन्दिरम् ॥ ९ ॥ पुलस्त्यउवाच ॥ इत्युक्तातपसःसत्यंफलमस्तीतिचिन्त्यसा ॥
त्वरमाणाययौवेश्मपितुर्दिव्यंसुशोभितम् ॥ ४१० ॥ सातत्ररजनींमेनेवर्षायुतसमांसती ॥ हरदर्शनसञ्जातसमुत्कण्ठाहिमाद्रिजा ॥ ११ ॥
ततोमुहूर्त्तेब्राह्मेतुतस्याश्चक्रुःसुहृत्क्रियाम् ॥ नानामङ्गलसन्दोहान्यथावत्क्रमपूर्वकम् ॥ १२ ॥ दिव्यमङ्गलसंयोगान्मन्दिरेबहुमङ्गले ॥ उपासत
गिरिंमूर्त्ताऋतवःसर्वकामिकाः ॥ १३ ॥ वायवःसुखदाश्चासन्संमार्जनविधौगिरेः ॥ हर्म्येषुश्रीःस्वयंदेवीकृतनानाप्रसाधना ॥ १४ ॥ कान्तिःसर्वे
षुभावेषुऋद्धिश्चभरणाकुला ॥ चिन्तामणिप्रभृतयोरत्नाश्शैलंसमन्ततः ॥ १५ ॥ उपतस्थुर्लताश्चापिकल्पकाद्यामहाद्रुमाः ॥ ओषध्योमूर्तिमत्यश्च ॥ १४८ ॥
दिव्यौषधिसमन्विताः ॥ १६ ॥ रसाश्चधातवश्चैवसर्वेशैलस्यकिङ्कराः ॥ किङ्करास्तस्यशैलस्यव्यग्राश्चाश्रमवर्तिनः ॥ १७ ॥ नद्यःसमुद्रा
निखिलाःस्थावरंजङ्गमंचयत् ॥ तसर्वेहिमशैलस्यमहिमानमवर्द्धयन् ॥ १८ ॥ अभवन्मुनयोनागायक्षागन्धर्वकिन्नराः ॥ शङ्करस्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पिविबुधागन्धमादनपर्वते ॥ १९ ॥ सज्जमण्डनसम्भारास्तस्थुर्निर्मलमूर्त्तयः ॥ शर्वस्याथजटाजूटेचन्द्रखण्डंपितामहः ॥ ४२० ॥ ब
बन्धप्रणयोद्दारविस्फारितविलोचनः ॥ कपालमालांविपुलांचामुण्डामूर्ध्निबध्नती ॥ २१ ॥ उवाचगिरिशंकालीपुत्रंजनयशङ्कर ॥ योदैत्येन्द्रकुलं
हत्वामांरक्तैस्तर्पयिष्यति ॥ २२ ॥ शौरिर्वितंसिकारत्नंकण्ठाभरणमुज्ज्वलम् ॥ भुजङ्गाभरणंगृह्यसज्जःशम्भोःपुरोऽभवत् ॥ २३ ॥ शक्रोगजाजि
नंतस्यवसाभ्यक्ताग्रपल्लवम्॥ दध्रेसरभसंस्विद्यद्भिस्तीर्णमुखपङ्कजम्॥२४॥वायवश्चबबुस्तीक्ष्णास्तीक्ष्णंहिमगिरिप्रभम् ॥वृषंविभूषयामासुर्हरयानंमनो
जवम् ॥ २५ ॥ विरेजुर्नयनान्तस्थाःशम्भोःसूर्यानलेन्दवः ॥ स्वांद्युतिंलोकनाथस्यजगतःकर्मसाक्षिणः ॥ २६ ॥ चिताभस्मसमाधत्तकपालेरजतप्र
भम् ॥ मनुजास्थिमयींमालांनिबबन्धचपाणिना ॥ २७ ॥ प्रेताधिपःपुरेदूरेसभयःसमवर्तत ॥ नानाकारमहारत्नभूषणंधनदाहृतम् ॥ २८ ॥ विहा
योद्दीप्तसर्पेन्द्रकटकेनस्वपाणिना ॥ कर्णोत्तंसंचकारेशोह्यमलंतक्षकंस्वयम् ॥ २९ ॥ निष्पन्नाभरणंचैवप्रसाध्येशंप्रसाधनैः ॥ तत्राप्येषांनियमतोह्य
भवन्व्यग्रमूर्तयः ॥४३०॥ मुमोचाभिनवान्सर्वरम्यशालिरसौषधीन्॥व्यग्रातुपृथिवीदेवीसर्वभावान्मनोरमा ॥३१॥ गृहीत्वावरुणःसाक्षाद्रत्नाढ्याभर
णानिच ॥ पुष्पाणिचविचित्राणिनानारत्नमयानितु ॥ ३२ ॥ तस्थौसाभरणोदेवःसर्वज्ञःसर्वदेहिनाम् ॥ ज्वलनश्चापिदिव्यानिहैमान्याभरणानिच
॥ ३३ ॥ जातरूपपवित्राणिप्रयतःसमुपस्थितः ॥ वायुर्ववौचसुरभिःसुखसंस्पर्शनोविभुम् ॥ ३४ ॥ छत्रंचन्द्रकरोद्दामंहासितंचशतक्रतुः ॥ जग्राहमु
दितःश्रीमान्बाहुभिर्वज्रभूषणः ॥ ३५ ॥ जगुर्गन्धर्वमुख्याश्चननृतुश्चाप्सरोगणाः ॥ वादयन्तोऽतिमधुरंजगुर्गन्धर्वकिन्नराः ॥ ३६ ॥ मुहूर्तादृतवस्त
त्रजगुश्चननृतुश्चवै ॥ चपलाश्चगणास्तस्थुर्लोडयन्तोहिमाचलम् ॥ ३७ ॥ उपविष्टःक्रमाद्धाताविश्वकृद्भगनेत्रहा ॥ चकारौद्वाहिकंकृत्यंपत्न्यास
हयथोदितम् ॥ ३८ ॥ दत्तार्घ्योगिरिराजेनसुरवृन्दैर्विनोदितः ॥ अवसत्तांक्षपांतत्रपत्न्यासहपुरान्तकः ॥३९॥ ततोगन्धर्वगीतेननृत्येनाप्सरसामपि
स्तुतिभिर्देवदैत्यानांविबुद्धोविबुधाधिपः ॥ ४४० ॥ आमन्त्र्यहिमशैलेन्द्रंप्रभातेजाययासह ॥ जगाममन्दरगिरिंवायुवेगेनशृङ्गिणा ॥ ४१ ॥ ततो
गतेभगवतिनीललोहितेसहोमयारतिमनुभूतभूधरः॥सबान्धवोभवतिहिकस्यनोमनोविशृङ्खलंजगतिहिकन्यकापितुः ॥४२॥ पुरोद्यानेषुरम्येषुविविक्ते
षुवनेषुच ॥ सुरक्तहृदयोदेव्याविजहारभगाक्षिहा ॥ ४३ ॥ ततोबहुतिथेकालेपुत्रनाम्नागिरेःसुता ॥ सखीभिःसहिताक्रीडांचक्रेकृत्रिमपुत्रकैः ॥ ४४ ॥
कदाचिद्गन्धतैलेनगात्रमभ्यज्यशैलजा॥चूर्णैरुद्वर्तयामासमलेनापूरितांतनुम्॥४५॥ तदुद्वर्त्तनकंगृह्यनरंचक्रेगजाननम् ॥पुरुषंक्रीडतीदेवीतच्चाप्यक्षिपद
म्भसि ॥ ४६ ॥ जाह्नव्याशिवयासख्याततःसोभूद्बृहत्तनुः ॥ कायेनातिविशालेनजगदापूरयत्तदा ॥ ४७ ॥ पुत्रेत्युवाचतंदेवीपुत्रेत्यूचेचजाह्नवी ॥

गाङ्गेयइतिदेवैस्तुपूजितोऽभद्गजाननः ॥४८॥ विनायकाधिपत्यंचददावस्यपितामहः ॥ पुनःसाक्रीडतीचक्रेतरुंचवरवर्णिनी ॥ ४९ ॥ मनोज्ञमङ्कुरंरूढमशोकस्यशुभानना ॥वर्द्धयामासतंचापिकृतसंस्कारमङ्गलम् ॥४५० ॥ बृहस्पतिमुखैर्विप्रैर्दिवस्पतिपुरोहितैः॥ततोदेवैःसमुनिभिःप्रोक्तादेवीत्विदंवचः ॥ ५१ ॥ मुनिदेवाऊचुः ॥ अधुनादर्शितेमार्गेमर्यादांकर्तुमर्हसि ॥ फलंकिंभवितादेविकल्पितैस्तरुपुत्रकैः ॥ ५२ ॥ पुलस्त्यउवाच ॥ इत्युक्ताहर्षपूर्णाङ्गीप्रोवाचातिशुभांगिरम् ॥ ५३ ॥ पार्वत्युवाच ॥ एकंनिरुदकेग्रामेयःकूपंकारयेद्बुधः ॥ बिन्दौबिन्दौचतोयस्यसवसेद्वत्सरंदिवि ॥ ५४ ॥ दशकूपसमावापीदशवापीसमोह्रदः॥दशह्रदसमाकन्यादशकन्यासमोद्रुमः॥५५॥एषावैशुभमर्यादानियतालोकभाविनी॥५६॥पुलस्त्यउवाच ॥इत्युक्तास्तुततोविप्राबृहस्पतिपुरोगमाः ॥ जग्मुःस्वमन्दिराण्येवभवानींवन्द्यमातरम् ॥५७॥ गतेषुतेषुदेवोऽपिशङ्करःपर्वतात्मजाम्॥पाणिनालम्ब्यपादेनस्वमावासमगच्छत ॥५८॥ चित्तप्रसादजननंप्रासादाट्टालगोपुरम् ॥ लम्बमौक्तिकदामानंमालिकाकुलवेदिकम् ॥५९॥ सुनद्धकलधौतंचक्रीडागृहमनोगतम्॥प्रकीर्णकुसुमामोदमत्तालिकुलकूजितम् ॥४६०॥ किन्नरोद्गीतसङ्गीतगृहान्तरितभित्तिकम् ॥ सुगन्धिधूपसङ्घातंमनःप्राप्यमलक्षितम् ॥६१॥ क्रीडामयूरनारीभिरभितोरभसार्पितम् ॥ हंससङ्घातसन्दिष्टस्फटिकस्तम्भतोरणम् ॥६२॥ अनाविलमसम्भ्रान्त्याबहुशःकिन्नराकुलम्॥शुकैर्यत्राभिदृश्यन्तेपद्मरागविनिर्मिताः॥६३॥भित्तयोजातिसम्भ्रान्त्याप्रतिबिम्बितमौक्तिकाः॥तत्राक्षैःप्रिययादेवोविहर्तुमुपचक्रमे॥६४॥स्वच्छेन्द्रनीलभूभागेक्रीडन्तौयत्रसंस्थितौ ॥ वपुःसहायतांप्राप्तौविनोदरसनिर्वृतौ ॥६५॥ एवंप्रक्रीडतोस्तत्रदेवीशङ्करयोस्तदा ॥ प्रादुर्भूतोमहाशब्दःपतिताम्बरगोचरः ॥६६॥ तच्छ्रुत्वाकौतुकाद्देवीकिमेतदितिशङ्करम् ॥पर्यपृच्छत्सुरवरंहरंविस्मितपूर्वकम्॥६७॥उवाचदेवोनतत्तेदृष्टपूर्वंशुचिस्मिते ॥एतेगणेशाःक्रीडन्तेशैलेऽस्मिन्मत्प्रियाःसदा ॥ ६८ ॥ तपसाब्रह्मचर्येणनामभिःक्षेत्रसेवनैः ॥ यैरहंतोषितःपूर्वंतएतेमनुजोत्तमाः ॥ ६९ ॥ मत्समीपमनुप्राप्तामामद्द्याःशुभानने ॥ कामरूपामहोत्साहामहारूपगुणान्विताः॥४७०॥कर्मभिर्विस्मयंतषांप्रयामिबलशालिनाम्॥सामरस्यास्यजगतःसृष्टिसंहरणक्षमाः ॥७१॥ब्रह्मचन्द्रेन्द्रगन्धर्वैस्सकिन्नरमहोरगैः ॥ विवर्जितोऽप्यहंनित्यंनैभिर्विरहितोरमे ॥७२॥ हृद्यामेचारुसर्वाङ्गितएतत्क्रीडितागिरौ ॥ इत्युक्तातुतदादेवीत्यक्त्वातंविस्मयाकुला॥७३॥गवाक्षान्तरमासाद्यप्रेक्षतेचकितानना॥यावन्तस्तेकृशादीर्घाह्रस्वाःस्थूलामहोदराः॥७४॥ व्याघ्रेभवदनाःकेचित्केचिन्मेषाजरूपिणः ॥ अनेकप्राणिरूपाश्चज्वालास्याःकृष्णपिङ्गलाः॥७५॥सौम्याभीमाःस्मितमुखाःकृष्णपिङ्गजटास्सदा ॥ नानाविहङ्गवदनानानाविधसुराननाः ॥७६॥ कौशेयचर्मवसनानग्नाश्चान्येविरूपिणः ॥ गोकर्णागजकर्णाश्चबहुवक्त्रेक्षणोदराः ॥ ७७ ॥ बहुपादाबहुभुजादिव्यनानास्त्रपाणयः॥अनेककुसुमापी

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

डानानाव्याकुलभीषणाः ॥७८॥ कृतनानायुधधरानानाकवचभूषणाः॥विचित्रवाहनारूढादिव्यरूपावियच्चराः ॥७९॥वीणावाद्यरवोद्घुष्टानानास्था
नकनर्तकाः ॥ गणेशांस्तांस्तथादृष्ट्वादेवीप्रोवाचशङ्करम् ॥ ४८० ॥ देव्युवाच ॥ गणेशाःकतिसङ्ख्याताःकिंनामानःकिमात्मकाः ॥ एकैकशोमम
ब्रूहिनिष्ठितायेपृथक्पृथक् ॥ ८१ ॥ शङ्करउवाच ॥ कोटिकोटिश्चसङ्ख्यातानानाविख्यातपौरुषाः ॥ जगदापूरितंसर्वमेभिर्भीमैर्महाबलैः ॥ ८२ ॥
सिद्धक्षेत्रेषुरथ्यासुजीर्णोद्यानेषुवेश्मसु ॥ दानवानांशरीरेषुबालेपून्मत्तकेषुच ॥ ८३ ॥ एतेविशन्तिमुदितानानाहारविहारिणः ॥ ऊष्मपाःफेनपाश्चै
वधूमपामधुपायिनः ॥ ८४ ॥ मेदाहाररुधिरपास्सर्वभक्षाह्यभोजनाः ॥ देवादास्तापसाहारानानावाद्यरतिप्रियाः ॥ ८५ ॥ नहिवक्तुमनन्तत्वा
च्छक्यन्तेहिगणाःपृथक् ॥ ८६ ॥ देव्युवाच ॥ नागत्वगुत्तरासङ्गःशुद्धाङ्गोमुञ्जमेखली ॥ मनःशिलेनकल्पेनचपलोरञ्जितानन: ॥ ८७ ॥ भृङ्ग
दष्टोत्पलानांचस्रग्दामामधुराकृतिः ॥ पाषाणशकलोत्तानकांस्यतालप्रवर्तकः ॥८८ ॥ असौगणेश्वरोदेवकिंनामाकिन्नरानुगः ॥यएषगणगीतेषुदत्त
कर्णोमुहुर्मुहुः ॥ ८९ ॥ शर्वउवाच ॥ सएषवीरकोदेविसदामेहृदयप्रियः ॥ नानाश्चर्यगुणाधारोगणेश्वरगणार्चितः ॥ ४९० ॥ देव्युवाच ॥ ईदृश
स्यसुतस्यास्तिममोत्कण्ठापुरान्तक ॥ कदाहमीदृशंपुत्रंद्रक्ष्याम्यानन्ददायकम् ॥ ९१ ॥ शर्वउवाच ॥ एषएवसुतस्तेऽस्तुनयनानन्दकारकः ॥ त्व
यामात्राकृतार्थोहिवीरकोऽपिसुमध्यमे ॥ ९२ ॥ पुलस्त्यउवाच ॥ इत्युक्ताप्रेषयामासविजयांहर्षणोत्सुकाम् ॥ वीरकानयनायाशुदुहिताभूभृतःस
खीम् ॥ ९३ ॥ साऽवरुह्यत्वरायुक्ताप्रासादादम्बरस्पृशः ॥ गणपंगणमध्यस्थंसूर्यकोटिप्रवर्तनम् ॥ ९४ ॥ विजयोवाच ॥ एहिवीरकचापल्यात्त्वया
देवीप्रतोषिता ॥ त्वामाह्वयतिचेत्युक्तस्त्यक्त्वापाषाणखण्डनम् ॥ ९५ ॥ देव्याःसमीपमागच्छद्विजयानुगतःशनैः ॥ प्रासादशिखरोत्फुल्लरक्ता
म्बुजनिभद्युतिः ॥ ९६ ॥ तंदृष्ट्वाप्रस्थितानल्पस्वादुक्षीरपयोधरा ॥ ९७ ॥ गिरिजोवाच ॥ पिबक्षीरमिदंवत्ससुतंपिबयथेच्छकम् ॥ ९८ ॥ पुल
स्त्यउवाच ॥ उवाचदेवीसस्नेहंगिरामधुरवर्णया ॥ ९९ ॥ गिरिजोवाच ॥ एहिसद्योहिजातोऽसिमेपुत्रकोदेवदेवेनदत्तोऽधुनावीरक ॥
उक्तवत्यङ्कआधायपर्यष्वजत्तंकपोलेचुचुम्बागराणनन्दिनी ॥५००॥ मूर्ध्न्युपाघ्रायसंमार्ज्यगात्राणिचाभूषयामासदिव्यैःस्वयंभूषणैः ॥ किङ्किणीमेख
लानूपुरैःसम्मणिप्रोक्तकेयूरहारैरमूल्यैर्गुणैः ॥ १ ॥ कोमलैःपल्लवैश्चित्रितश्चारुभिर्मङ्गलैःकङ्कणैर्दिव्यमन्त्रोद्भवैः ॥ तस्यशुद्धैस्ततोभूरिभिश्चाकरो
न्मिश्रसिद्धार्थकैरङ्गरक्षाविधिम् ॥ २ ॥ एवमादायचोवाचकृत्वास्रजंमूर्ध्निगोरोचनापत्रभङ्गोज्ज्वलैः ॥ वत्सवत्साधुनाक्रीडसार्द्धंगणैरप्रमत्तोव्रजश्च
प्रवर्जशनैः ॥ ३ ॥ व्यालमालाकुलाःशैलसानुद्रुमादन्तिभिर्भग्नशाखापरंभङ्गिनः ॥ जाह्नवीमण्डलक्षुब्धतोयाकुलंमाविशेथाबहुव्याघ्रजुष्टेवने ॥४॥

CC-0. In Public Domain. Digitization by eGangotri

वत्ससङ्ख्येषुदुर्गेषुयद्वीरकपुत्रभावायतांस्वच्छचित्तोजनः ॥ प्रार्थितंभव्यमायातिभाविन्यसौभाव्यतांसोऽपिनिर्वर्त्यसर्वैर्गुणैः॥५॥पुलस्त्यउवाच ॥
एवमुक्तोऽनयावीरकोमातरंसस्मयन्नाहलीलावशाविष्टधीः ॥ एषमात्रास्वयंमेकृतःकङ्कणःपत्रकश्चित्रितःपाटलैर्बिन्दुभिः ॥ ६ ॥ चारुपुष्पैरियंमालती
भिःकृतामालिकासेशिरस्याहिताकोमला ॥ तोषयामीश्वरीमित्ययंसत्वरंचिन्तयित्वाऽव्रजद्वाह्यतःक्रीडनम् ॥ ७ ॥ स्वैर्गुणैःसंयुतोवीरकोहर्षितो
दक्षिणात्पश्चिमंपश्चिमादुत्तरम् ॥ उत्तरात्पूर्वमभ्येत्यसख्यायुताप्रेक्षतेतंगवाक्षान्तराद्वीरकम् ॥ ८ ॥ शैलपुत्रीबहिःक्रीडितारंजगत्स्नेहतःपुत्रलुब्धा
यतस्सोऽत्रकः॥मोहमायातियःस्वल्पवेत्ताजडोमांसविण्मूत्रसङ्घातदेहोद्वहः ॥ ९ ॥ द्रष्टुमभ्यन्तरंनाकवासेश्वरेष्विन्दुमौलिंप्रविष्टेषुकक्षान्तरम् ॥ वाह
नान्येवमारोहमाणास्ततोलोकपालास्त्रपूगंमुहूर्त्तावधि ॥५१०॥खड्गएषोऽविखड्गाकरोनिर्मलःकृन्तकःकस्यकेनाहतोभ्रूतनः ॥ नोभवेद्धस्तदण्डेनकिं
ब्रूमहेभीममृत्यर्ङ्गणेनास्तिकृत्यंगिरौ ॥ ११ ॥ पाशएषोऽस्तितेनात्रकोबध्यतेमावृथालोकपालानुगास्तिष्ठत ॥ एवमेवैतदित्यब्रुवंस्तेतदावीक्ष्यदेवा
नुगंवीरकंरक्षकम् ॥ १२ ॥ प्राहदेवीवनेपर्वतेनिर्जराध्यग्निशालामुखेभूतलेभूतपाः ॥ निर्झराम्भोनिपातेषुनोमज्जतात्पुष्पजालावनद्धेषुधामस्वपि ॥
॥ १३ ॥ प्रोच्चनानाद्रिकुञ्जावगाहेष्वथोमारुतास्फोटसंरक्षणेकामतः ॥ काञ्चनोत्तुङ्गशृङ्गावरोहक्षितौहैमरेणूत्करासङ्गपिङ्गद्युतिः ॥१४॥ खेचराणांनने
चापिरम्येबभौरूपसम्पत्प्रकारोगणोवासितुम् ॥ मन्दरेकन्दरेचारुवापीतटेकुन्दमन्दारपुष्पप्रवालाम्बुजे ॥ १५ ॥ सिद्धनारीभिरापीतरूपामृतंविस्तृतै
र्नेत्रमात्रैरनुन्मेषिभिः ॥ वीरकंशैलपुत्रीनिमेषान्तरादस्मरत्पुत्रगृध्नुर्विनोदार्थिनी ॥१६॥सोऽपिताहक्क्षणावाप्तपुण्योदयोयोहिजन्मान्तरेऽस्यात्मजत्व
न्ततः ॥ क्रीडतस्तस्यतृप्तिःकथंजायतेयोऽपिभावाजगद्ध्वसातेजसा ॥ १७॥ कल्पितःप्रेक्षणंदिव्यगीतक्षणंनृत्यलोलैर्गणेशैःप्रवृत्यक्षणम् ॥ सिंहनादा
कुलेगण्डशैलेज्वलद्वल्लजालेबृहत्सालतालेक्षणम् ॥ १८ ॥ फुल्लनानातमालालिकालेक्षणंवृक्षमूलेविलोलोमरालेक्षणम् ॥ स्वल्पपङ्केजलेपङ्कजाङ्केक्षणं
मातुरङ्केशुभेनिष्कलङ्केक्षणम् ॥१९॥ परिक्रीडितेबाललीलाविसारीगणेशाधिपोदेवतानन्दकारी ॥ निकुञ्जेषुविद्याधरोद्गीतशीलपिनाकीवलीला
विलासैःसलीलः ॥ ५२० ॥ प्रकाश्यभुवनंगोभिस्ततोदिनकरेगते ॥ देशान्तरंतदापश्चाद्दूरस्थोधरणीधरः ॥२१॥मित्रत्वमस्यसुहृढंहृदयेद्योतयन्नि
व ॥ नित्यमाराधितोविप्रैःश्रीमान्विखनसःसुतः ॥ २२ ॥ नाकरोत्सवितुर्मेरुरुपकारंपतिष्यतः ॥ जनेष्वेषाव्यवस्थेतिश्रूयतेस्खलितोह्यधः ॥२३॥
दिनेनानुगतोभानुःस्वजनंपरिपूरयन् ॥ सन्ध्याबद्धाञ्जलिपुटामुनयोऽभिमुखारविम् ॥२४॥यावदध्यासतेशीघ्रंनिवार्योष्णाभिभाविताम्॥व्यजृम्भता
थलोकेऽस्मिन्क्रमाद्वैभावरंतमः ॥२५॥ कुटिलस्येवहृदयेकालुष्यंदूषयन्मनः ॥ ज्वलत्फणिफणारत्नदीपोद्द्योतितभित्तिके ॥२६॥ शयनेशशिसङ्घात

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रत्नवस्त्रोत्तरच्छदे ॥ नानारत्नद्युतिलसच्छक्रचापविडम्बके ॥ २७ ॥ रत्नैः किङ्किणिजालेनलसन्मुक्ताकलापके ॥ कमनीयचलद्धीलावितानाच्छादिता
म्बरे ॥२८॥ मन्दरेमन्दसञ्चारंगतेगिरिसुतायुतः ॥ तस्थौगिरिसुताबाहुलतामिलितकन्धरः ॥२९॥ शशिमौलिः सितज्योत्स्नास्फारपूरितगोचरः॥ गिरि
जाप्यसितापाङ्गीनीलोत्पलदलच्छविः ॥ ९३० ॥ विभावर्याचसम्पृक्ताबभूवातीवगोमयी॥ तामुवाचततोदेवः क्रीडाकेलिकलायुताम्॥३१॥ इतिश्रीप
द्मपुराणेप्रथमेसृष्टिखण्डेगौरीविवाहवर्णनंनामपञ्चचत्वारिंशोऽध्यायः॥४५॥ शर्वउवाच॥ शरीरेममतन्वङ्गिसितेभास्यसितद्युतिः॥ भुजङ्गीवासिताशुभ्रे
संश्लिष्टाचन्दनेतरौ ॥ १ ॥ चन्द्रातपेनसम्पृक्तारुधिराम्बरसंवृता ॥ रजनीवासितेपक्षेदृष्टिदोषंददासिमे ॥ २ ॥ पुलस्त्यउवाच ॥ इत्युक्तागिरिजाते
नमुक्तकण्ठापिनाकिनम् ॥ उवाचकोपरक्ताक्षीभ्रुकुटीविकृतानना ॥ ३ ॥ देव्युवाच ॥ स्वकृतेनजनः सर्वोजाड्येनपरिभूयते ॥ अवश्यमर्थीप्राप्नोति
खण्डनंशशिमण्डन ॥ ४ ॥ तपोभिर्दीर्घचरितैर्यात्वांप्रार्थितवत्यहम् ॥ तस्यामेनियतस्त्वेषह्यवमानः पदेपदे ॥ ५ ॥ नैवास्मिकुटिलाशर्वविषमान
चधूर्जटे ॥ सविषस्त्वंजगत्ख्यातोव्यक्तदोषाकराश्रयः ॥ ६ ॥ त्वंहिमुष्णासिदशनान्नेत्रहन्ताभगस्यच ॥ आदित्यस्त्वांविजानातिभगवान्द्वादशा
त्मकः ॥ ७ ॥ मूर्ध्निशूलंजनयसिस्वैर्दोषैर्मामधिक्षिपन् ॥ यस्त्वंमामात्थकृष्णेतिमहाकालोऽसिविश्रुतः ॥ ८ ॥ यास्याम्यहंपरित्यक्तुमात्मानंतपसा
गिरिम् ॥ जीवन्त्यानमयाकृत्यंधूर्तेनपरिभूतया ॥ ९ ॥ कापालिकेनक्षुद्रेणश्मशानेनित्यवासिना ॥ भूत्याविलिप्तस्वाङ्गेनमातृमध्यस्थचारिणा ॥
॥ १० ॥ पुलस्त्यउवाच ॥ निशम्यतस्यावचनंकोपतीक्ष्णाक्षरंहरः ॥ उवाचानिष्टसम्भ्रान्तः प्रचलेनेन्दुमौलिना ॥ ११ ॥ शर्वउवाच ॥ अगा
त्मजासिगिरिजेनाहंनिन्दापरस्तव ॥ चाटूक्तिबुद्ध्यातुमयाकृतउन्मादसंश्रयः॥१२॥ विकल्पः स्वस्थचित्तेतुगिरिजेनममक्रमात् ॥ यद्येवंकुपिताभीरु
तत्त्वाहंनवैपुनः ॥ १३ ॥ नर्मवादीभविष्यामिजहिकोपंशुचिस्मिते ॥ शिरसाप्रणतेनैषरचितस्तेमयाञ्जलिः ॥ १४ ॥ विहीनोह्यपमानेननिन्दिते
नैतिविक्रियाम् ॥ असतांतुसतांनस्यान्मर्मस्पृष्टोनरः किल ॥ १५॥ पुलस्त्यउवाच ॥ अनेकैश्चाटुभिर्देवीदेवेनप्रतिबोधिता ॥ कोपंतीव्रंनतत्याजसती
मर्मणिघट्टिता॥१६॥ अवष्टब्धमथाच्छिद्यवासः शङ्करपाणिना ॥ विपर्यस्तालकावेगाद्गन्तुमैच्छच्चशैलजा ॥ १७ ॥ तस्याव्रजन्त्याः कोपेनपुनराह
पुरान्तकः ॥१८॥ शर्वउवाच ॥ सत्यंसर्वैरवयवैस्तनोषिसदृशंपितुः ॥ हिमाचलस्यशृङ्गस्थमेघजालाकुलंमनः ॥ १९ ॥ तथादुरवगाह्येभ्यो
गहनोहितवाशयः॥ काठिन्यमश्मसारेभ्योवनेभ्योबहुलंगता ॥२०॥ कुटिलत्वंनिम्नगाभ्योदुःसेव्यत्वंहिमादपि॥ सङ्क्रान्तंसर्वमेवैतत्तन्वङ्गिहिमभूधरा
त् ॥ २१ ॥ पुलस्त्यउवाच ॥ इत्युक्तासापुनः प्राहगिरिशंशैलकन्यका ॥ कोपकम्पितमूर्द्धासाप्रस्फुरद्दशनच्छदा ॥ २२ ॥ उमोवाच ॥ स्याःसर्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दोषदानेननिन्दायांगुणिनोबलात् ॥ तवापिदुष्टसम्पर्कात्सङ्क्रान्तंसर्वमेवहि ॥ २३ ॥ व्यालेभ्योऽनेकजिह्वत्वंभस्मनोऽस्नेहवृत्तिता ॥ हृत्कालुष्यं
शशाङ्कोत्थंदुर्बाधत्वंविषादपि ॥ २४ ॥ किंचात्रबहुनोक्तेनअलंवाचांश्रमेणते ॥ श्मशानवासान्निर्भीस्त्वंनग्नत्वात्तवनत्रपा ॥ निर्घृणत्वंकपालित्वाद
यातेविगताचिरम् ॥ २५ ॥ पुलस्त्यउवाच ॥ इत्युक्त्वामन्दिरात्तस्मान्निर्जगामहिमाद्रिजा ॥ त‍्यांव्रजन्त्यांदेवेश्यांगणैःकिलकिलाकृता ॥ २६ ॥
क्वमातर्गच्छसीत्युक्त्वारुदद्भिर्धावितंपुनः ॥ विष्टभ्यचरणौदेव्यावीरकोबाष्पगद्गदः ॥ २७ ॥ प्रोवाचमातःकिन्त्वेतत्कयासिकुपितातुरा ॥ अहंत्वाम
नुयास्यामिव्रजन्तींस्नेहवर्जिताम् ॥ २८ ॥ नोचेत्पतिष्येशिखराद्गिरेरस्यत्वयोज्झितः ॥ उन्नम्यवदनंदेवीदक्षिणेनतुपाणिना ॥ २९ ॥ उवाचवीरकं
मातात्वंशोकंपुत्रमाकृथाः ॥ शैलाग्रात्पतितुंनैवनचगन्तुंमयासह ॥ ३० ॥ युक्तंतेपुत्रगच्छामियेनकार्येणतच्छृणु ॥ कृष्णेत्युक्ताहरेणाहंस्तम्भिता
स्म्यवमानिता ॥ ३१ ॥ साहंतपःकरिष्यामियेनगौरीत्वमाप्नुयाम् ॥ एषस्त्रीलम्पटोदेवोयातायांमय्यनन्तरम् ॥ ३२ ॥ द्वाररक्षात्वयाकार्यानित्यंर
न्ध्रान्ववेक्षणम् ॥ यथानकाचित्प्रविशेद्योषित्तत्रहरान्तिकम् ॥ ३३ ॥ दृष्ट्वापरस्त्रियंचापिवदेथाममपुत्रक ॥ शीघ्रमेवकरिष्यामियथायुक्तमनन्तरम् ॥
॥ ३४ ॥ पुलस्त्यउवाच ॥ एवम‍ वतिदेवेशींवीरकोवाचसाम्प्रतम् ॥ मातुराज्ञामृताहारप्लाविताङ्गोगतज्वरः ॥ ३५ ॥ जगामरक्षांसद्रष्टुंप्रणिपत्यतु
मातरम् ॥ देवीचापश्यदायान्तींसखींमातुर्विभूषिताम् ॥३६॥ कुसुमामोदिनींनामतस्यशैलस्यदेवताम् ॥ सापिदृष्ट्वागिरिसुतांस्नेहविक्लवमानसा ॥
॥ ३७ ॥ क्वपुत्रिगच्छसीत्युच्चैरालिङ्ग्योवाचदेवता ॥ सातस्याःसर्वमाचख्यौशङ्करात्कोपकारणम् ॥ ३८ ॥ पुनश्चोवाचगिरिजादेवतांमातृसंमि
ताम् ॥ ३९ ॥ उमोवाच ॥ नित्यशैलाधिराजस्यदेवतात्वमनिन्दिते ॥ सर्वतःसन्निधानंतेमनसातीववत्सला ॥ ४० ॥ अतस्तुतेप्रवक्ष्यामियद्विधेयं
त्वयाम्बिके ॥ अन्यस्त्रीसम्प्रवेशस्तुत्वयारक्ष्यःप्रयत्नतः ॥ ४१ ॥ सरहस्येप्रयत्नेननिषेव्यःसततंगिरौ ॥ पिनाकिनःप्रविष्टायांवक्तव्यंमेत्वयानघे॥
ततोऽहंसंविधास्यामियत्क्षमंतदनन्तरम् ॥ ४२ ॥ पुलस्त्यउवाच ॥ इत्युक्तातांतथेत्युक्त्वाजगामसागिरिंशुभा ॥ उमापिपितुरुद्यानंजगामाद्रिसुता
द्रुतम् ॥ ४३ ॥ अन्तरिक्षंसमाविश्यमेघमालाविलप्रभम् ॥ भूषणानिततोन्यस्यवृक्षवल्कलधारिणी ॥ ४४ ॥ ग्रीष्मेपञ्चाग्निसन्तप्तावर्षासुचजलोषि
ता ॥ वन्याहारानिराहाराशुष्कस्थण्डिलशायिनी ॥ ४५ ॥ एवंसाधयतीतत्रतपःसाचव्यवस्थिता ॥ ज्ञात्वागतांगिरिसुतांदैत्यस्तत्रान्तरेबली॥४६॥ ॥ १६१ ॥
अन्धकस्यसुतोहृष्टःपितुर्वधमनुस्मरन् ॥ देवान्सर्वान्विजित्याजौबकभ्रातारणोत्कटः ॥४७॥ आडिर्नामान्तरप्रेक्षीसततंचन्द्रमौलिनः ॥ आजगामाम
ररिपुःपुरंत्रिपुरघातिनः ॥४८॥ सतत्रागत्यददृशेवीरकंद्वार्यवस्थितम् ॥ विचिन्त्यसोऽपिचवरंदत्तंकमलयोनिना ॥ ४९ ॥ हतेकिलान्धकेदैत्येगिरिशे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नासुरद्विषा॥आडिश्चकारविपुलंतपःपरमदारुणम्॥५०॥ समागत्याब्रवीद्ब्रह्मातपसापरितोषितः॥किमाडेदानवश्रेष्ठतपसाप्राप्तुमिच्छसि ॥५१॥ब्रह्माण
माहदैत्यस्तुनिर्मृत्युत्वमहंवृणे॥५२॥ब्रह्मोवाच॥जातानामिहसंसारेविनामृत्युंनयुज्यते॥यतस्ततोऽपिदैत्येन्द्रमृत्युःप्राप्यश्शरीरिभिः ॥५३॥ पुलस्त्य
उवाच॥इत्युक्तोदैत्यसिंहस्तुप्रोवाचाम्बुजसम्भवम्॥५४॥ आडिरुवाच॥रूपस्यपरिवर्तोमेयदास्यात्पद्मसम्भव॥तदामृत्युर्ममभवेदन्यथात्वमरोऽस्म्य
हम् ॥५५॥ पुलस्त्यउवाच ॥इत्युक्तस्तुतथोवाचतुष्टःकमलसम्भवः॥ यदाद्वितीयोरूपस्यविवर्त्तस्तेभविष्यति॥५६॥तदातेभवितामृत्युरन्यथानभवि
ष्यति॥इत्युक्तोऽमरतांमेनेदैत्यसूनुर्महाबलः॥५७॥तस्मिन्कालेत्वसंस्मृत्यतद्वधोपायमात्मनः॥ प्रतिहर्तुर्दृष्टिपथेवीरकस्याभवंस्तदा॥५८॥भुजङ्गरूपी
रन्ध्रेणप्रविवेशदृशःपथम् ॥ परिहृत्यगणेशस्यदानवोरौद्रदुर्जयः ॥ ५९ ॥ अलक्षितोगणेशेनप्रविश्याथपरीतनुम् ॥ भुजङ्गरूपंसन्त्यज्यजग्राहाथम
हासुरः ॥६०॥ उमारूपंरमयितुंगिरिशंमूढचेतनः ॥ कृत्वामायामयंरूपमप्रतर्क्यंमनोहरम् ॥६१॥ सर्वैरवयवैःपूर्णंसर्वाभिज्ञानबृंहितम् ॥ कृत्वाभगा
न्तरेदन्तंदैत्योवज्रमयंदृढम् ॥६२॥ तीक्ष्णाग्रंबुद्धिमोहेनगिरिशंहन्तुमुद्यतः ॥ कृत्वोमारूपसंस्थानंगतोदैत्योहरान्तिकम् ॥६३॥ पापोरम्याकृतिश्चित्र
भूषणाम्बरसंयुतः ॥ तंदृष्ट्वागिरिशस्तुष्टस्तमालिङ्ग्यमहासुरम् ॥ ६४ ॥ मन्यमानोगिरिसुतांसर्वैरवयवान्तरैः ॥ अपृच्छत्साधुभावंतंगिरिपु
त्रिनकृत्रिमम् ॥ ६५ ॥ यात्वंमदाशयंज्ञात्वाप्राप्तेहवरवर्णिनी ॥ त्वयाविरहितंशून्यंममस्थानंजगत्रयम् ॥ ६६ ॥ प्राप्ताप्रसन्नवदनेयुक्तमेवं
विधंत्वयि ॥ इत्युक्तोदानवेन्द्रस्तुतंबभाषेस्मयञ्शनैः ॥ ६७ ॥ सचाबुध्यदभिज्ञानैःप्राहत्रिपुरघातिनम् ॥ ६८ ॥ दैत्यउवाच ॥ या
तास्मितपसःकामाद्दूरंलब्धुंहिमाचलम् ॥ रतिश्चतत्रमेनाभूत्ततःप्राप्तात्वदन्तिकम् ॥६९॥ पुलस्त्यउवाच॥इत्युक्तःशङ्करःशङ्कांचित्तेप्राप्तोविचारयन्॥
हृदयेनसमाधायदेवःप्रहसिताननः ॥ ७० ॥ कुपिताकुपितंबुद्ध्वाप्रकृत्याचदृढव्रता ॥ अप्राप्तकामासंप्राप्ताकिमेतत्संविजानती ॥ ७१ ॥
इतिचिन्त्यहरस्तस्याअभिज्ञानंविचारयन् ॥ नापश्यद्वामपार्श्वेतुतदङ्कंपद्मलक्षणम् ॥ ७२ ॥ लोम्नामावर्तरचितंततोदेवःपिनाकधृत् ॥ बुद्ध्वा
तांदानवींमायामाकारंगूहयंस्ततः ॥ ७३ ॥ मेढ्रदंष्ट्रास्त्रमादायदानवंतमसादयत् ॥ नचाबुध्यततद्वृत्तंवीरकोद्वाररक्षकः ॥ ७४ ॥ कुसुमामोदि
नंदृष्ट्वास्त्रीरूपंदानवेश्वरम् ॥ दूतेनमारुतेनाशुबोधिताहिमशैलजा ॥ ७५ ॥ श्रुत्वावायुमुखाद्देवीक्रोधरक्ताविलेक्षणा ॥ अपश्यद्वीरकंपुत्रंहृदयेनैव
दूयता ॥ ७६ ॥ देव्युवाच ॥ मातरंमांपरित्यज्ययस्मात्त्वंस्नेहविक्लवाम् ॥ विहितावसरःस्त्रीणांशङ्करस्यरहोविधौ ॥ ७७ ॥ तस्मात्तेमा
नुपरूक्षाजडाहृदयवर्जिता ॥ गणेशाकारसदृशीशिलामाताभविष्यति ॥ ७८ ॥ निमित्तएषविख्यातोवीरकस्यसुतादरात् ॥ सम्भवेप्रक्रमे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चैवविचित्राख्यानसंशयः ॥७९॥ पुलस्त्यउवाच ॥ एवमुत्सृष्टशापायांगिरिपुत्र्यामनन्तरम् ॥ निर्जगाममुखात्क्रोधःसिंहरूपीमहाबलः ॥ ८० ॥ सतुसिंहःकरालास्यःसटाजटिलकन्धरः ॥ ऊर्ध्वप्रोद्भूतलाङ्गूलोदंष्ट्रोत्कटमुखावटः ॥ ८१ ॥ व्यादितास्योलम्बजिह्वःक्षामःकुक्षिबलादिषु ॥ अस्यास्येवर्तितुंदेवीव्यवस्थितवतीतदा ॥ ८२ ॥ ज्ञात्वामनोगतंतस्याभगवांश्चतुराननः ॥ आजगामाश्रमपदंसम्पदामाश्रयंयतः ॥ आगम्योवाचदेवेशोगिरिजांस्पष्टयागिरा ॥ ८३ ॥ ब्रह्मोवाच ॥ किंपुनःप्राप्तुकामासिकिमलभ्यंददामित ॥ विरम्यतामतिक्लेशात्तपसोऽस्मान्मदाज्ञया ॥ ॥ ८४ ॥ पुलस्त्यउवाच ॥ तच्छ्रुत्वोवाचगिरिजागुरोर्गौरवयन्त्रितम् ॥ वाक्यंवाचाहरोद्गीर्णवर्णनिर्गमवाञ्छितम् ॥ ८५ ॥ देव्युवाच ॥ तपसादुष्करेणाप्तःपतिर्वैशङ्करोमया ॥ समांश्यामलवर्णेतिबहुशःप्रोक्तवान्हरः ॥ ८६ ॥ तस्मादहंकाञ्चनाभवर्णातन्नामसंयुता ॥ भर्तुर्भूतपतेरङ्गमेकतोनिर्विषंभवेत् ॥ ८७ ॥ पुलस्त्यउवाच ॥ तस्यास्तद्भाषितंश्रुत्वाप्रोवाचजगदीश्वरः ॥ ८८ ॥ ब्रह्मोवाच ॥ एवंभवत्वंभूयश्चभर्तुर्देहार्द्धचारिणी ॥ ८९ ॥ पुलस्त्यउवाच ॥ ततस्तत्याजतांकृष्णांफुल्लनीलोत्पलत्वचम् ॥ त्वक्चसाप्यभवद्भीमाघण्टाहस्तात्रिलोचना ॥ ९० ॥ नानाभरणसम्पूर्णापीतकौशेयधारिणी ॥ तामब्रवीत्ततोब्रह्मादेवींनीलाम्बुजत्विषम् ॥ ९१ ॥ ब्रह्मोवाच ॥ निशेभूधरजादेहसम्पर्कात्त्वंमदाज्ञया ॥ सम्प्राप्ताकृतकृत्यत्वमेकानंशापुरोह्यसि ॥ ९२ ॥ यएषसिंहःप्रोद्भूतोदेव्याःक्रोधाद्वरानने ॥ सतेऽस्तुवाहनंदेविकेतौचास्तुमहाबलः ॥९३॥ गच्छविन्ध्याचलंतत्रसुरकार्यंकरिष्यसि ॥ पञ्चालोनामयक्षोऽयंयक्षलक्षपदानुगः ॥दत्तस्तेकिङ्करोदेविमयामायाशतैर्युतः ॥९४॥ पुलस्त्यउवाच ॥ इत्युक्ताकौशिकीदेवीविन्ध्यशैलंजगामह ॥ उमापिप्राप्तसङ्कल्पाजगामगिरिशान्तिकम् ॥९५॥ प्रविशन्तींतुतांद्वारादपहृत्यसमाहितः ॥ रुरोधवीरकोदेवींहेमवेत्रलताधरः ॥ तामुवाचचकोपेनरूपेतुव्यभिचारिणीम् ॥ ९६ ॥ वीरकउवाच ॥ प्रयोजनंनतेऽत्रास्तिगच्छयावन्नभक्ष्यसे ॥ देव्यारूपधरोदैत्योदेवंवञ्चितुमागतः ॥ ९७ ॥ प्रविष्टोनचदृष्टोऽसौसचदेवेनघातितः ॥ घातितेचाहमाज्ञप्तोनीलकण्ठेनकोपिना ॥९८॥ द्वारेत्वनवधानंतेयस्मात्पश्यामिवैततः ॥ भविष्यसिनमेद्वाःस्थोवर्षपूगाननेकशः ॥ ९९ ॥ अतस्तेनात्रदास्यामिप्रवेशंगम्यतांद्रुतम् ॥ एकांमुक्त्वागिरिसुतांमातरंस्नेहवत्सलाम् ॥ प्रवेशंलभतेनान्यानारीकमललोचने ॥ १०० ॥ पुलस्त्यउवाच ॥ इत्युक्तातुतदादेवीचिन्तयामासचेतसा ॥ नारीनैवसदैतेयोवायुर्मेयामभाषत ॥ १ ॥ वृथैववीरकश्शप्तोमयाक्रोधपरीतया ॥ अकार्यंक्रियतेमूढैःप्रायःक्रोधसमन्वितैः ॥ २ ॥ क्रोधेननश्यतेकीर्तिःक्रोधोहन्तिस्थिरांश्रियम् ॥ अपरिच्छिन्नतत्त्वार्थापुत्रंशापितवत्यहम् ॥ ३ ॥ विपरीतार्थबुद्धीनांसुलभोविपदागमः ॥ सञ्चिन्त्यैवमुवाचेदंवीरकंप्रतिशैलजा ॥ सज्जलज्जाविकारेणवदनेनाम्बुजत्वि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षा ॥ ४ ॥ देव्युवाच ॥ अहंवीरकतेमातानतेऽस्तुमनसोभ्रमः ॥ शङ्करस्यास्मिदयितासुतातुहिनभूभृतः ॥ ५ ॥ ममगात्रच्छविभ्रान्त्या माशङ्कांपुत्रधारय ॥ तुष्टेनगौरतादत्ताममेयंपद्मजन्मना ॥ ६ ॥ मयाशप्तोऽस्यविदितवृत्तान्तेदैत्यनिर्मिते ॥ ज्ञात्वानारीप्रवेशंतुशङ्करेरहसि स्थिते ॥ ७ ॥ ननिवर्तयितुंशक्यःशापःकिन्तुब्रवीमिते ॥ शीघ्रमेष्यसिमातुष्यात्सर्वकामसमन्वितः ॥ ८ ॥ पुलस्त्यउवाच ॥ शिरसातु ततोवन्द्यमातरंपूर्णमानसः ॥ उवाचसाध्वींपूर्णेन्दुद्युतिंतुहिनशैलजाम् ॥ ९ ॥ वीरकउवाच ॥ नतसुरासुरमौलिलसन्मणिप्रवरकान्तिकरालि नखाङ्घ्रिके ॥ नगसुतेशरणागतवत्सलेतवनमोऽवनतार्त्तिविनाशिनि ॥ ११० ॥ तपनमण्डलमण्डितकन्धरेपृथुसुवर्णनगद्युतिहारिके ॥ विषम भङ्गविषङ्गमभीषितोगिरिसुतेभवतीमहमाश्रये ॥ ११ ॥ जगतिकाप्रणताभिमतंददौझटितिसिद्धिमृतेभवतीयथा ॥ जगतिकांप्रणमेच्छशि शेखरोभुवनभृन्मुनयोभवतींयथा ॥ १२ ॥ विमलयोगविनिर्मितदुर्जयेसुतनुतुल्यमहेश्वरमण्डली ॥ विदलितान्धकबान्धवसंहतिःसुरवरैःप्रथमं त्वमभिष्टुता ॥ १३ ॥ सितसटापटलोद्धतकन्धराभवमहामृगराजरयस्थिता ॥ विमलशक्तिमुखानलपिङ्गलायतभुजौघनिपिष्टमहासुरा ॥१४॥ निगदिताभुवनैरतिचण्डिकाजननिशुम्भनिशुम्भनिषूदिनी ॥ प्रणतचिन्तितदाभवदानवप्रशमनैकरतिस्तरसाभुवि॥१५॥वियतिवायुपथेज्वलनाकुलेऽ वनितलेतवदेविचयद्वपुः ॥ तदजितेप्रतिमेप्रणमाम्यहंभुवनभाविनितेभववल्लभे ॥ १६ ॥ जलधयोललितोद्धतवीचयोहुतवहोद्युतिदग्धचराचरः॥ फणसहस्रभृतश्चभुजङ्गमास्त्वमभिधास्यसिमामभयङ्करा ॥१७॥ भगवतिस्थिरभक्तजनाश्रयेप्रतिगतोभवतीचरणाश्रयम् ॥ करणजातमिहास्तुम माद्यवैतवविलाससुखानुभवास्पदम्॥१८॥पुलस्त्यउवाच॥ सुप्रसन्नाततोदेवीवीरकस्येतिसंस्तुता ॥ प्रविवेशशुभंभर्तुर्भवनंभूधरात्मजा॥१९॥ द्वाःस्थोऽ पिवीरकोदेवान्हरदर्शनकाङ्क्षिणः ॥ व्यसर्जयत्स्वकानेवगृहानादरपूर्वकम् ॥ १२० ॥ नास्त्यत्रावसरोदेवादेव्यासहवृषाकपिः ॥ निभृतःक्रीडतीत्यु क्तावयुस्तेचयथागतम् ॥ २१ ॥ गतेवर्षसहस्रेतुदेवास्त्वरितमानसाः ॥ ज्वलनंचोदयामासुर्ज्ञातुंशङ्करचेष्टितम् ॥ २२ ॥ प्रविश्यपक्षिरन्ध्रेणशुक रूपीहुताशनः ॥ ददर्शशयनेसर्वरतौगिरिजयासह ॥ २३ ॥ ददर्शतंचदेवेशोहुताशंशुकरूपिणम् ॥ तमुवाचमहादेवःकिञ्चित्कोपसमन्वितः ॥ २४ ॥ शर्वउवाच ॥ निषिक्तमर्धंदेव्यांमेवीर्यंचशुकविग्रह ॥ लज्जयाविरतिश्चास्यत्वमर्धंपिबपावक ॥ २५ ॥ यस्मात्तुत्वत्कृतेविघ्नंतस्मात्त्व य्युपपद्यते ॥२६॥ पुलस्त्यउवाच ॥ इत्युक्तःप्राञ्जलिर्वह्निरपिबद्वीर्यमाहितम् ॥ तेनाप्लुतास्ततोदेवास्तन्मुखाक्रभवोयतः ॥२७॥ विपाट्यजठरंतेषां वीर्यंमाहेश्वरंततः ॥ निष्क्रान्तंतप्तहेमाभंवितंतेशङ्कराश्रमे ॥ २८ ॥ तस्मिन्सरोमहज्जातंविमलंबहुयोजनम् ॥ प्रोत्फुल्लहेमकमलंनानाविहगनादितम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २९ ॥ तच्छ्रुत्वातुसरोदेवीजातंहेममहाम्बुजम् ॥ जगामकौतुकाविष्टातत्सरःकनकाम्बुजम् ॥ १३० ॥ तत्रकृत्वाजलक्रीडांतदब्जकृतशे
खरा ॥ उपविष्टाततस्तस्यतीरेदेवीसखीवृता ॥ ३१ ॥ पातुकामाचतत्तोयंस्वादुनिर्मलपङ्कजम् ॥ अपश्यत्कृत्तिकास्तास्सषडर्कद्युतिसन्निभाः
॥३२॥ पद्मपत्रेतुतद्वारिगृहीत्वाप्रस्थितागृहम् ॥ हर्षात्सोवाचपास्यामिपद्मपत्रेस्थितंपयः ॥३३॥ ततस्ताऊचुरखिलाःकृत्तिकाहिमशैलजाम् ॥३४॥
कृत्तिकाऊचुः ॥ दास्यामोदयितेगर्भेसम्भूतोयोभविष्यति ॥ सोऽस्माकमपिपुत्रःस्यादस्मन्नाताचवृत्तिमान्॥ त्रिषुलोकेषुविख्यातःसर्वेष्वपिशुभानने
॥३५॥ पुलस्त्यउवाच॥इत्युक्तोवाचगिरिजाकथंमद्गात्रसम्भवैः ॥ सर्वैरवयवैर्युक्तोभवतीभ्यःसुतोभवेत्॥३६॥ ततस्तांकृत्तिकाऊचुर्विधास्यामोऽस्यवै
वयम्॥ उत्तमान्युत्तमाङ्गानियद्येवंतुभविष्यति ॥३७॥ उक्तावैशैलजाप्राहभवत्वेवमनिन्दिताः॥ततस्तुहर्षसम्पूर्णाःपद्मपत्रस्थितंपयः॥ तस्यैददुस्तया
चापितत्पीतंक्रमशोजलम् ॥ ३८ ॥ पीतेतुसलिलेचैवतस्मिन्नेवक्षणेवरः ॥ विपाटचदेव्याश्चततोदक्षिणंकुक्षिमुद्गतः ॥ ३९ ॥ निश्चक्रामाद्भुतोबालोरो
गशोकविनाशनः ॥ प्रभाकरकरव्रातप्रकारप्रकरप्रभुः ॥ १४० ॥ गृहीतनिर्मलोदग्रशक्तिशूलाङ्कुशोऽनलः ॥ दीप्तोमारयितुंदैत्यानुत्थितःकनकच्छविः
॥ ४१ ॥ एतस्मात्कारणादेवकुमारश्चापिसोऽभवत्॥ वामंविदार्यनिष्क्रान्तस्ततोदेव्याःपुनःशिशुः॥४२॥ स्कन्दोऽथवदनाद्वह्नेःशुभ्रात्षड्वदनोऽरिहा॥
कृत्तिकासलिलादेवशाखाभिःसविशेषतः ॥ ४३ ॥ शाखाःशिवाःसमाख्याताःषट्सुवक्रेषुविस्तृताः ॥ यतस्ततोविशाखोऽसौख्यातोलोकेषुषण्मुखः
॥४४॥ स्कन्दोविशाखःषड्वक्त्रःकार्तिकेयश्चविश्रुतः ॥ पक्षेचैत्रस्यबहुलेपञ्चदश्यांमहाबलौ ॥ ४५ ॥ सम्भूतावर्कसदृशौविशालेशरकानने ॥ सितेपक्षे
तुपञ्चम्यांतथैतौपावकानलौ ॥ ४६ ॥ बालकाभ्यांचकारैकंसन्ध्यायामेवभूतये ॥ तस्यामेवततःषष्ठ्यामभिषिक्तोगुहःप्रभुः ॥ ४७ ॥ सर्वैरमरसङ्घातै
र्ब्रह्मोपेन्द्रेन्द्रभास्करैः॥गन्धमाल्यैःशुभैर्धूपैस्तथाक्रीडनकैरपि ॥ ४८ ॥ छत्रैश्चामरजालैश्चभूषणैश्चविलेपनैः ॥ अभिषिक्तोविधानेनयथावत्षण्मुखः
प्रभुः ॥ ४९ ॥ सुतामस्मैददौशक्रोदेवसेनेतिविश्रुताम् ॥ पत्न्यर्थंदेवदेवेशोददौविष्णुरथायुधम् ॥१५०॥ यक्षाणांदशलक्षाणिददावस्यधनाधिपः॥
ददौहुताशनस्तेजोददौवायुश्चवाहनम् ॥ ५१ ॥ ददौक्रीडनकंत्वष्टाकुक्कुटंकामरूपिणम् ॥ एवंसुरास्तुतेसर्वेपरिवारमनन्तकम् ॥ ५२ ॥ ददु
र्मुदितचेतस्काःस्कन्दायादित्यवर्चसे ॥ जानुभ्यामवनौस्थित्वासुरसङ्घास्तमस्तुवन् ॥ ५३ ॥ स्तोत्रेणानेनवरदंषण्मुखंमुख्यशःसुराः ॥ ५४ ॥ देवा
ऊचुः ॥ नमःकुमारायमहाप्रभायस्कन्दायचास्कन्दितदानवाय ॥ नवार्कबिम्बाप्रतिमप्रभायनमोऽस्तुगुह्यायगुहायतुभ्यम् ॥ ५५ ॥ नमोऽस्तु
तलोकभयापहायनमोऽस्तुतेलोककृपापराय ॥ नमोविशालामललोचनायनमोविशाखायमहाव्रताय ॥५६॥ नमोनमस्तेऽस्तुरणोत्कटायनमोमयूरो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ज्वलवाहनाय ॥ नमोऽस्तुकेयूरधरायतुभ्यंनमोधृतोदग्रपताकिनेते ॥९७॥ नमःप्रभावप्रणतायतेऽस्तुनमोऽस्तुघण्टाधरधैर्यशालिने ॥ ९८ ॥ कुमा
रउवाच ॥ ॥ कंवःकामंप्रयच्छामिभवन्तोब्रूतनिर्वृताः॥ यद्यप्यसाध्यंकृत्यंनोहृदयेचिन्तितंचिरम् ॥ ९९ ॥ पुलस्त्यउवाच॥इत्युक्तास्तुसुरास्तेनप्रोचुः
प्रणतमौलयः ॥ सर्वएवमहात्मानंगुहंमुदितमानसाः ॥१६०॥ देवाऊचुः॥दैत्येन्द्रस्तारकोनामसर्वामरकुलान्तकृत् ॥बलवान्दुर्जयस्तीक्ष्णोदुराचारोऽ
तिकोपनः ॥ ६१ ॥ तमेवजहिदुर्धर्षंदैत्यंसर्वविनाशनम्॥ उपस्थितःकृत्यशेषोह्यस्माकंचभयावहः ॥६२॥ हिरण्यकशिपुश्चोग्रोह्यवध्योदेवतागणैः ॥
यज्ञघ्नःपापकर्मावैयेनब्रह्मापितापितः ॥ एतौहरस्वभद्रंतेतावकंचमहाबलम्॥पुलस्त्यउवाच॥६३॥एवमुक्तस्तथेत्युक्त्वासर्वामरपदानुगः ॥ जगामजग
तांनाथःस्तूयमानोऽमरेश्वरैः ॥६४॥ तारकस्यवधार्थायजगतांकण्टकस्यच ॥ ततश्चप्रेषयामासशक्रोलब्धसमाश्रयः ॥ दूतंदानवसिंहस्यपरुषाक्षरवा
दिनम् ॥ ६५ ॥ सतुगत्वाब्रवीद्दैत्यमभयोभीमदर्शनम् ॥६६॥ दूतउवाच ॥ शक्रस्त्वामाहदेवशोदैत्यकेतुंदिवस्पतिः ॥ तारकासुरतच्छत्त्याघटयस्व
यथेच्छया॥६७॥यज्जगज्ज्वलनोद्दीप्तंकिल्बिषंचत्वयाकृतम्॥तस्याहंसादकस्तेऽद्यराजास्मिभुवनत्रये ॥६८॥पुलस्त्यउवाच॥श्रुत्वैतदद्भुतंवाक्यंकोपसं
रक्तलोचनः ॥ उवाचदूतंदुष्टात्मानष्टप्रायविभूतिकः ॥ ६९ ॥ तारकउवाच ॥ दृष्टंतेपौरुषंशक्रशतशोऽथमहारणे ॥ निस्त्रपत्वान्नतेशान्तिर्विद्यते
शक्रदुर्मते ॥ १७० ॥ पुलस्त्यउवाच ॥ एवमुक्तेगतेदूतेचिन्तयामासदानवः ॥ नालब्धसंश्रयश्शक्रोवक्तमेवमिहार्हति ॥ ७१ ॥ जातःस्कन्दोऽधुना
शर्वाज्ज्ञायतेसमुपाश्रयः ॥ निमित्तौघांस्तदादुष्टान्सोऽपश्यन्नाशवेदिनः ॥ ७२ ॥ पांसुवर्षमसृक्पातंगगनादवनीतले ॥ वामनेत्रप्रकम्पंचवक्रशोषं
मनोभयम् ॥ ७३ ॥ स्वकानांवक्रपद्मानांम्लानतांचव्यलोकयत् ॥ दुष्टांश्चप्राणिनोरौद्रान्सोऽपश्यद्दुष्टवादिनः ॥ ७४ ॥ तदचिन्त्यैवदितिजो
न्यस्तचित्तोऽभवत्क्षणात् ॥ यावद्गजघटाघण्टाघनत्काररवोत्कटाम् ॥ ७५ ॥ तद्वत्तुरङ्गसङ्घातहेषोत्साहविभूषिताम् ॥ सैन्यैस्सेनान्तरोदग्रध्वजरा
जैर्विराजिताम् ॥ ७६ ॥ विमानैश्चाद्भुताकारैश्चलितामलचामरैः ॥ विभूषणपिनद्धांचकिन्नरोद्गीतनादिताम् ॥ ७७ ॥ नानानाकतरूत्फुल्लकुसुमा
पीडधारिणीम् ॥ विशोकास्त्रपरिस्फारचर्मनिर्मलदर्शिनीम् ॥ ७८ ॥ विद्युत्पुष्टद्युतिधरांनानावाद्यविनादिताम् ॥ सेनांनाकसदांदैत्यःप्रासादस्थोव्य
लोकयत् ॥७९॥सचिन्तयामासतदाकिञ्चिद्विभ्रान्तमानसः ॥ अपूर्वःकोभवेद्योद्धायोमयानविनिर्जितः ॥१८०॥ ततश्चिन्ताकुलोदैत्यःशुश्रावकटुका
क्षरम् ॥ सिद्धबन्दिभिरुद्घुष्टमिदंहृदयदारुणम् ॥ ८१ ॥ बन्दिनऊचुः ॥ जयातुलशक्तिदीधितिपञ्जरभुजदण्डप्रचण्डतररभससुरवदनकुमुदविका
सनविलासनेत्रकुमारवर ॥ ८२ ॥ जयदितिजकुलमहोदाधिवडवानलमधुरमयूररथसुरमुकुटकोटिकुञ्चितचरणनखाङ्कुरमहासेन ॥ ८३ ॥ जयचलि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तललितचूडाकलापनवविमलकमलदण्डकान्तदैत्येशवंशदुःसहदावानल ॥ ८४ ॥ जयविशाखविभोजयबालसत्ववासरभुवनालिशोकशमनजय
सकललोकदितिसुतधुरन्धरनाशकस्कन्द ॥ ८५ ॥ पुलस्त्यउवाच ॥ श्रुत्वैतत्तारकःसर्वंशुद्घुष्टंदेवबन्दिभिः ॥ सस्मारब्रह्मणोवाक्यंवधंबालादुप
स्थितम् ॥ ८६ ॥ स्मृत्वाधर्मौघविध्वंसीसदावीरपदानुगः ॥ मन्दिरान्निर्जगामाशुशोकग्रस्तेनचेतसा ॥ ८७ ॥ कालनेमिमुखादैत्याःसन्त्रस्ता
भ्रान्तचेतसः ॥ स्वेष्वनीकेषुचतदात्वराविस्मितचेतसः ॥ हिरण्यकशिपुंप्राहदानवानांधुरन्धरः ॥ ८८ ॥ तारकउवाच ॥ त्रपाकरंभवेन्मह्यंबलाद
स्मात्पलायनम्॥यद्यहंहन्तवेयामिसोऽपिवैकमलाश्रितः ॥ ८९ ॥ हत्वाहंबालकंचैनंदुस्स्पर्शःस्यामकारणम् ॥ यातधावतगृह्णीतयोजयध्वंवरू
थिनीम् ॥ १९० ॥ पुलस्त्यउवाच ॥ कुमारंतारकोदृष्ट्वाबभाषेभीषणाकृतिः ॥ ९१ ॥ तारकउवाच ॥ किंबालयोद्धुकामोऽसिक्रीडकन्दुकलीलया ॥
यैरसित्वंविसृष्टोऽत्रसङ्गरेतेहिभीरवः ॥ ९२ ॥ बालत्वादथतेबुद्धिरेवंस्वल्पार्थदर्शिनी ॥ कुमारोऽपितमग्रस्थंबभाषेहर्षवत्तमम् ॥ ९३ ॥ कुमार
उवाच ॥ शृणुतारकशास्त्रार्थइहनैवनिरूप्यते॥शस्त्रैरर्थानदृश्यन्तेसमरेनिर्भरंभये ॥९४॥ शिशुत्वंमावमंस्थामेशिशुःकष्टोभुजङ्गमः॥दुष्प्रेक्षोभास्करो
बालस्तथाहंदुर्जयःशिशुः॥अल्पाक्षरोनमन्त्रःकिंसस्फुरोदैत्यदृश्यते ॥९५॥ पुलस्त्यउवाच॥कुमारेप्रोक्तवत्येवंदैत्यश्चिक्षेपमुद्गरम्॥कुमारस्तंतुचिच्छेद
चक्रेणामोघवर्चसा ॥ ९६ ॥ ततश्चिक्षेपदैत्येन्द्रोभिन्दिपालमयोमयम् ॥ करेणतंचजग्राहकार्तिकेयोऽमरारिहा ॥ ९७ ॥ गदांमुमोचदैत्यायसमु
त्थायंखरस्वनाम् ॥ तयाहतस्ततोदैत्यश्चकम्पेऽचलराडिव ॥ ९८ ॥ मेनेचदुर्जयंदैत्यस्तदाबालंसुदुःसहम् ॥ चिन्तयामासबुद्ध्यावैप्राप्तःकालोन
संशयः ॥९९॥ कम्पितंचसमालोक्यकालनेमिपुरोगमाः ॥ सर्वेदैत्यैश्वराजघ्नुःकुमाररंरणदारुणम् ॥ २०० ॥ सतैःप्रहारैरस्पृष्टस्तथाक्रूरैर्महाद्युतिः॥
सबालोबलिभिर्वेगैरयुध्यद्दानवैरण ॥ १ ॥ रणशौण्डाश्चदैत्येन्द्राःपुनर्जघ्नुःशिलीमुखैः ॥ कुमारंसमरेदैत्याबलिनोदेवकण्टकाः ॥ २ ॥ कुमार
स्यव्यथानाभूद्दैत्यास्त्रनिहतस्यतु ॥ प्राणान्तकरणंजातंदेवानांदानवाहवम् ॥ ३ ॥ देवान्निपीडितान्दृष्ट्वाकुमारःकोपमाविशत् ॥ ततोऽस्त्रैर्दारया
मासदानवानामनीकिनीम् ॥ ४ ॥ तैरस्त्रैर्निष्प्रतीकारैस्ताडितास्सुरकण्टकाः ॥ कालनेमिमुखाःसर्वेरणेह्यासन्पराङ्मुखाः ॥ ५ ॥ विद्रुतेषुच
दैत्येषुप्रहतेषुसमन्ततः ॥ किन्नरोद्गारगीतैश्चहास्यसंन्यस्तचेतनः ॥ ६ ॥ जघ्नेकुमारंगदयानिष्टप्तकनकत्विषा ॥ शरैर्मयूरंचित्रैश्चचकारविमुखंरणे
॥ ७ ॥ दृष्ट्वापराङ्मुखोदेवोमुक्तरक्तंस्ववाहनम् ॥ जग्राहशक्तिंविमलांरणेकनकभूषणाम् ॥ ८ ॥ बहुनाहेमकेयूररुचिरेणषडाननः ॥ ततोऽब्रवीन्महा
सेनस्तारकंदानवाधिपम् ॥९॥ महासेनउवाच॥तिष्ठतिष्ठसुदुर्बुद्धेयमलोकंविलोकय ॥ हतोह्यसिमयाशक्त्यास्मरस्वंदैत्यचेष्टितम् ॥ २१० ॥ पुलस्त्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उवाच ॥ इत्युक्त्वातुततःशक्तिंमुमोचदितिजंप्रति ॥ साकुमारभुजोत्सृष्टातत्केयूररवानुगा ॥ ११ ॥ बिभेददैत्यहृदयंवज्रशैलेन्द्रकर्कशम् ॥
गतासुःसपपातोर्व्यांप्रलयेभूधरोयथा ॥ १२ ॥ विकीर्णमुकुटोष्णीषोविस्रस्ताखिलभूषणः ॥ तस्मिन्विनिहतेदैत्येदानवानांधुरन्धरे ॥१३॥ नाभूत्क
श्चित्तदादुःखीनरकेष्वपिपापकृत् ॥ स्तुवन्तःषण्मुखंदेवाःप्राक्रीडन्नागतस्मिताः ॥ १४ ॥ जग्मुःस्वानेवभुवनान्निरस्यासंस्तथोत्सुकाः ॥ ददुश्चापिवरं
सर्वेदेवास्तेषण्मुखायतु॥१५॥तुष्टाःसम्प्राप्तसर्वार्थास्सहसिद्धैस्तपोधनैः ॥१६॥ देवाऊचुः॥यःपठेत्स्कन्दसम्बन्धांकथामेतांमहामतिः॥शृणुयाच्छ्रावये
द्वापिसभवेत्कीर्तिमान्नरः ॥ १७ ॥ बह्वायुःसुभगःश्रीमान्कीर्तिमाञ्शुभदर्शनः ॥ भूतेभ्योनिर्भयश्चापिसर्वदुःखविवर्जितः ॥ १८ ॥ सन्ध्या
मुपास्ययःपूर्वांस्कन्दस्यचरितंपठेत् ॥ सयुक्तःकिन्नरैःसर्वैर्महाधनपतिर्भवेत ॥ २१९ ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेकुमारसंभवतारकवधोनाम
षट्चत्वारिंशत्तमोऽध्यायः ॥ ४६ ॥ भीष्मउवाच ॥ इदानींश्रोतुमिच्छामिहिरण्यकशिपोर्वधम् ॥ नरसिंहस्यमाहात्म्यंतथापापविनाशनम्
॥ १ ॥ पुलस्त्यउवाच ॥ पुराकृतयुगेराजन्हिरण्यकशिपुःप्रभुः ॥ दैत्यानामादिपुरुषश्चकारसुमहत्तपः ॥ २ ॥ दशवर्षसहस्राणिदशवर्षशता
निच ॥ जलवासीसमभवत्स्नानमौनधृतव्रतः ॥ ३ ॥ वृतःशमदमाभ्यांचब्रह्मचर्येणचैवहि ॥ ब्रह्माप्रीतोऽभवत्तस्यतपसानियमेनच ॥ ४ ॥ ततः
स्वयम्भूर्भगवान्स्वयमागत्यतत्रहि ॥ विमानेनार्कवर्णेनहंसयुक्तेनभास्वता ॥ ५ ॥ आदित्यैर्वसुभिःसाध्यैर्मरुद्भिर्दैवतैस्सह ॥ रुद्रैर्विश्वसहायैश्चयक्ष
राक्षसपन्नगैः ॥ ६ ॥ दिग्भिश्चैवविदिग्भिश्चनदीभिःसागरैस्तथा ॥ नक्षत्रैश्चमुहूर्तैश्चखचरैश्चमहाग्रहैः ॥ ७ ॥ देवैर्ब्रह्मर्षिभिःसार्द्धंसिद्धैःसप्त
र्षिभिस्तथा ॥ राजर्षिभिःपुण्यकृद्भिर्गन्धर्वाप्सरसांगणैः ॥ ८ ॥ चराचरगुरुःश्रीमान्वृतःसर्वैर्दिवौकसैः ॥ ब्रह्माब्रह्मविदांश्रेष्ठोदैत्यंवचनमब्र
वीत् ॥ ९ ॥ ब्रह्मोवाच॥ प्रीतोऽस्मितवभक्तस्यतपसानेनसुव्रत ॥ वरंवरयभद्रंतेयथेष्टंकाममाप्नुहि ॥१०॥ हिरण्यकशिपुरुवाच ॥ नदेवासुरगन्धर्वा
नयक्षोरगराक्षसाः ॥ नमानुषाःपिशाचाश्चहन्युर्मांदेवसत्तम ॥ ११ ॥ ऋषयोमानवाःशापैर्नशपेयुःपितामह ॥ यदिमेभगवान्प्रीतोवरएषवृतोमया
॥ १२ ॥ नशस्त्रेणनचास्त्रेणगिरिणापादपेनवा ॥ नशुष्केणनचार्द्रेणनस्याच्चान्येनमेवधः ॥ १३ ॥ भवेयमहमेवार्कःसोमोवायुर्हुताशनः ॥ सलिलंचा
न्तरिक्षंचनक्षत्राणिदिशोदश॥१४॥अहंक्रोधश्चकामश्चवरुणोवासवोयमः ॥ धनदश्चधनाध्यक्षोयक्षःकिम्पुरुषाधिपः॥१५॥ ब्रह्मोवाच ॥ एषदिव्योवर
स्तातमयादत्तस्तवाद्भुतः ॥ सर्वकामप्रदोवत्सप्राप्स्यसित्वंनसंशयः ॥१६॥ पुलस्त्यउवाच ॥ एवमुक्त्वासभगवाञ्जगामाकाशमेवहि ॥ वैराजंब्रह्मस
दनंब्रह्मर्षिगणसेवितम् ॥ १७ ॥ ततोदेवाश्चगन्धर्वाऋषिभिःसहचारणाः ॥ वरप्रदानंश्रुत्वैवंपितामहमुपस्थिताः ॥ १८ ॥ देवाऊचुः ॥ वरप्रदानाद्भ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गवन्वधिष्यतिसनोऽसुरः ॥ तत्प्रसादश्चभगवन्वधोऽप्यस्यविचिन्त्यताम् ॥ १९ ॥ पुलस्त्यउवाच ॥ भगवान्सर्वभूतानामादिकर्त्तास्वयंप्रभुः ॥ स्रष्टाचहव्यकव्यानामव्यक्तप्रकृतिःपरः ॥ २० ॥ सर्वलोकहितंवाक्यंश्रुत्वादेवःप्रजापतिः ॥ आश्वासयामासतदासुशीतैर्वचनाम्बुभिः ॥२१॥ ब्रह्मोवाच ॥ अवश्यंत्रिदशास्तेनप्राप्तव्यंतपसःफलम् ॥ तपसोऽन्तेऽस्यभगवान्वधंविष्णुःकरिष्यति ॥ २२ ॥ पुलस्त्यउवाच ॥ तच्छ्रुत्वाविबुधावाक्यंसर्वेपङ्कजजाननात् ॥ स्वानिस्थानानिदिव्यानिविप्रजग्मुर्मुदान्विताः ॥ २३ ॥ लब्धमात्रवरेसोऽथप्रजास्सर्वाअबाधत ॥ हिरण्यकशिपुर्दैत्योवरदानेनगर्वितः ॥ २४ ॥ आश्रमेषुमहाभागान्मुनीन्वैशंसितव्रतान् ॥ सत्यधर्मपरान्दान्तान्धर्षयामासदानवः ॥ २५ ॥ देवांस्त्रिभुवनस्थांश्चपराजित्यमहासुरः ॥ त्रैलोक्यंवशमानीयस्वर्गेवसतिदानवः ॥ २६ ॥ यदावरमदोत्सिक्तश्चोदितःकालधर्मिणा ॥ यज्ञियानकरोद्दैत्यानयज्ञियांश्चदेवतान् ॥ २७ ॥ तदादैत्याश्चसाध्याश्चविश्वेचवसवस्तथा ॥ रुद्रादेवगणायक्षादेवद्विजमहर्षयः ॥ २८ ॥ शरण्यंशरणंविष्णुमुपतस्थुर्महाबलम् ॥ देवदेवंयज्ञमयंवासुदेवंसनातनम् ॥ २९ ॥ देवाऊचुः ॥ नारायणमहाभागदेवास्त्वांशरणंगताः ॥ त्रायस्वजहिदैत्येन्द्रंहिरण्यकशिपुंप्रभो ॥ ३० ॥ त्वंहिनःपरमोदातात्वंहिनःपरमोगुरुः ॥ त्वंहिनःपरमोदेवोब्रह्मादीनांसुरोत्तमः ॥ ३१ ॥ विष्णुरुवाच ॥ भयंत्यजध्वममराअभयंवोददाम्यहम् ॥ तथैवत्रिदिवंदेवाःप्रतिपद्यतमाचिरम् ॥ ३२ ॥ एनंहिसगणंदैत्यंवरदानेनगर्वितम् ॥ अवध्यममरेन्द्राणांदानवेन्द्रंनिहन्म्यहम् ॥ ३३ ॥ पुलस्त्यउवाच ॥ एवमुक्त्वातुभगवान्विश्वरूपोविष्णुरव्ययः ॥ हिरण्यकशिपुस्थानंजगामहरिरीश्वरः ॥ ३४ ॥ तेजसाभास्कराकारःशशीकान्त्येवचापरः ॥ नरस्यकृत्वार्धतनुंसिंहस्यार्द्धतनुंतथा ॥३५॥ नारसिंहेनवपुषापाणिंसङ्गृह्यपाणिना ॥ ततोददर्शविस्तीर्णांदिव्यांरम्यांमनोरमाम् ॥ ३६ ॥ सर्वकामयुतांशुभ्रांहिरण्यकशिपोःसभाम् ॥ विस्तीर्णांयोजनशतंशतमध्यर्द्धमायताम् ॥ ३७ ॥ वैहायसींकामगमांपञ्चयोजनमुच्छ्रिताम् ॥ जराशोकक्लमापेतांनिष्प्रकम्प्यांशिवांसुखाम् ॥३८॥ वेश्मासनवतींरम्यांज्वलन्तीमिवतेजसा॥अन्तःसलिलसंयुक्तांविहितांविश्वकर्मणा ॥३९॥ दिव्यवर्णमयैर्वृक्षैःफलपुष्पप्रदैर्युताम् ॥ नीलपीतासितश्यामैःश्वेतलोहितकैरपि ॥ ४० ॥ अवदातैस्तथागुल्मैरक्तमञ्जरिधारिभिः ॥ सिताभ्रवनसङ्काशांप्लवन्तींचददर्शसः ॥ ४१ ॥ रश्मिमतीस्वभावेनदिव्यगन्धमनोरमा॥सुसुखानचदुःखासानशीतानचघर्मदा ॥४२॥ नक्षुत्पिपासेग्लानिंवाप्राप्यतांप्राप्नुवन्तितते ॥ नानारूपैरुपकृतासुचित्रैश्चसुभास्वरैः ॥४३॥ अतिचन्द्रातिसूर्यातिशिखिकान्तिस्वयम्प्रभा॥दीप्यतेनाकपृष्ठस्थाभासयन्तीविभासुरा ॥४४॥ सर्वेचकाशिरेतस्यांमुदिताश्चैवमानुषाः ॥ रसवच्चप्रभूतंचभक्ष्यभोज्यान्नमुत्तमम् ॥४५॥ पुण्यगन्धाःस्रजश्चापिनित्यकालफलाद्रुमाः ॥ उष्णेशीतानितोयानिशीतेचोष्णानि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सन्तिवै ॥ ४६ ॥ पुष्पिताग्रान्महाशाखान्प्रवालाङ्कुरधारिणः ॥ लतावितानसंछन्नान्कलशानैक्षिष्टसप्रभुः ॥ ४७ ॥ गन्धवन्तिचपुष्पाणिरसवन्ति
फलानिच ॥ तानिशीतानिचोष्णानितत्रतत्रसरांसिच ॥४८॥ अपश्यद्भूपतीर्थानिसभायांतस्यसप्रभुः ॥ नलिनैःपुण्डरीकैश्चशतपत्रैःसुगन्धिभिः ॥
॥ ४९ ॥ रक्तैःकुवलयैश्चैवकह्लारैरुत्पलैस्तथा॥नानाश्चर्यसमोपेतैःपुष्पैरन्यैश्चसुप्रियैः ॥ ५० ॥ कारण्डवैश्चक्रवाकैःसारसैःकुररैरपि ॥ विमलस्फ
टिकाभानिपाण्डुरच्छदनैर्द्विजैः ॥ ५१ ॥ बहुहंसोपगीतानिसारसानांरुतानिच ॥ गन्धयुक्तालतास्तत्रपुष्पमञ्जरिधारिणीः ॥ ५२ ॥ दृष्टवान्भग
वान्हृष्टःखदिरान्वेतसार्जुनान् ॥ चूतानिम्बानागवृक्षाःकदम्बाबकुलाधवाः ॥ ५३ ॥ प्रियङ्गवःपाटलाख्याःशाल्मल्यस्सहरिद्रवाः ॥ शालास्ताला
स्तमालाश्चचम्पकाश्चमनोरमाः ॥ ५४ ॥ तथैवान्येव्यराजन्तसभायांपुष्पिताद्रुमाः ॥ एलाककुभकङ्कोललवलीकर्णपूरकाः ॥ ५५ ॥ मधुकाःको
विदाराश्चबहुतालसमुच्छ्रयाः ॥ अञ्जनाशोकपर्णासाबहवश्चित्रकाद्रुमाः ॥ ५६ ॥ वरुणाश्चपलाशाश्चपनसास्सहचन्दनैः ॥ नीलास्सुमनसश्चैवनी
पाश्चाश्वत्थतिन्दुकाः ॥ ५७ ॥ पारिजाताश्चतरवोमल्लिकाभद्रदारवः ॥ अटरूषाःपीलुकाश्चतथाचैवैलवालुकाः ॥ ५८ ॥ मन्दारकाःकुरबकाःपुन्ना
गाःकुटजास्तथा ॥ रक्ताःकुरबकाश्चैवनीलाश्चागरुभिःसह ॥ ५९ ॥ किंशुकाश्चैवभव्याश्चदाडिमाबीजपूरकाः ॥ कालेयकादुकूलाश्चहिङ्गवस्तै
लवर्त्तिकाः ॥६०॥ खर्जूरानालिकेराश्चहरीतकमधूककाः॥सप्तपर्णाश्चबिल्वाश्चसयावाश्चशरावताः ॥६१॥ असनाश्चतमालाश्चनानागुल्मसमावृताः ॥
लताश्चविविधाकाराःपुष्पपत्रफलोपगाः ॥ ६२ ॥ एतेचान्येचबहवस्तत्रकाननजाद्रुमाः ॥ नानापुष्पफलोपेताव्यराजन्तसमन्ततः ॥६३॥ चकोराः
शतपत्राश्चमत्तकोकिलशारिकाः ॥ पुष्पितान्पुष्पिताग्रांश्चसम्पतन्तिमहाद्रुमान् ॥ ६४ ॥ रक्तपीतारुणास्तत्रपादपाग्रगताःखगाः ॥ परस्परम
वैक्षन्तप्रहृष्टाजीवजीवकाः ॥ ६५ ॥ तस्यांसभायांदैत्यन्द्रोहिरण्यकशिपुस्तदा ॥ आसीनआसनेचित्रदशनल्वेप्रमाणतः ॥ ६६ ॥ दिवाकरनिभे
दिव्येदिव्यास्तरणसंस्तृते ॥ हिरण्यकशिपुर्दैत्यआस्तेज्वलितकुण्डलः ॥ ६७ ॥ उपचेरुर्महादत्याहिरण्यकशिपुंतदा ॥ दिव्यतालानिगीता
निजगुर्गन्धर्वस माः ॥ ६८ ॥ विश्वाचीसहजन्याचप्रम्लोचेतिचपूजिता ॥ दिव्याथसौरभेयीचसमीचीपुञ्जिकस्थली ॥ ६९ ॥ मिश्रकेशी
चरम्भाचचित्रभाश्रुतिविभ्रमा ॥ चारुनेत्राघृताचीचमेनकाचोर्वशीतथा ॥ ७० ॥ एतास्सहस्रशश्चान्यानृत्यगीतविशारदाः ॥ उपातिष्ठन्तरा
जानंहिरण्यकशिपुंप्रभुम् ॥ ७१ ॥ उपासतेऽदितेःपुत्राःसर्वेलब्धवरास्तथा ॥ बलिर्विरोचनस्तत्रनरकःपृथिवीसुतः ॥ ७२ ॥ प्रह्लादोविप्रचित्ति
श्चगविष्ठश्चमहासुरः ॥ सुरहन्तादुःखकर्तासुमनास्सुमतिस्तथा ॥ ७३ ॥ घटोदरोमहापार्श्वःक्रथनःपिठरस्तथा ॥ विश्वरूपस्सुरूपश्चविश्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कायोमहाबलः ॥ ७४ ॥ दशग्रीवश्चवालीचमेघवासामहासुरः ॥ घटाभोविटरूपश्चज्वलनश्चेन्द्रतापनः ॥ ७५ ॥ दैत्यदानवसङ्घास्तेसर्वेज्व
लितकुण्डलाः ॥ स्रग्विणोवार्मिणःसर्वेसर्वेचचरितव्रताः ॥ ७६ ॥ सर्वेलब्धवराःशूरास्सर्वेविहितमृत्यवः ॥ एतेचान्येचबहवोहिरण्यकशिपुंप्रभुम् ॥
॥ ७७ ॥ उपासतेमहात्मानंसर्वेदिव्यपरिच्छदाः ॥ विमानैर्विविधाकारैर्भ्राजमानैरिवाग्निभिः ॥ ७८ ॥ महेन्द्रवपुषःसर्वेविचित्राङ्गदबाहवः ॥
भूषिताङ्गादितेःपुत्रास्तमुपासतसर्वतः ॥ ७९ ॥ ऐश्वर्यंदैत्यसिंहस्ययथातस्यमहात्मनः ॥ नश्रुतंनैवदृष्टंचकस्याप्रिभुवनत्रये ॥ ८० ॥ रज
तकनकचित्रवेदिकायांपरिकृतरत्नविचित्रवीथिकायाम् ॥ सददर्शमृगाधिपःसभायांसुरुचिरजालगवाक्षशोभितायाम् ॥ ८१ ॥ कनकवलय
हारभूषिताङ्गंदितितनयंसमृगाधिपोददर्श ॥ दिवसकरकरप्रभंज्वलन्तंदितिजसहस्रशतैर्निषेव्यमाणम् ॥ ८२ ॥ ततोदृष्ट्वामहाभागंकालचक्रमि
वागतम् ॥ नारसिंहवपुश्छन्नंभस्मच्छन्नमिवानलम् ॥ ८३ ॥ हिरण्यकशिपोःपुत्रःप्रह्लादोनामवीर्यवान् ॥ दिव्येनवपुषासिंहमपश्यद्देवमागतम् ॥
॥ ८४ ॥ तंदृष्ट्वारुक्मशैलाभमपूर्वांतनुमाश्रितम् ॥ विस्मितादानवाःसर्वेहिरण्यकशिपुश्चसः ॥ ८५ ॥ प्रह्लादउवाच ॥ महाराजमहाबा
होदैत्यानामादिसम्भव ॥ नश्रुतंनैवमेदृष्टंनारसिंहमिदंवपुः ॥ ८६ ॥ अव्यक्तंपरमंदिव्यंकिमिदंरूपमागतम् ॥ दैत्यान्तकरणंघोरंशंसतीवमनो
मम॥८७॥अस्यदेवाःशरीरस्थाःसागराःसरितस्तथा ॥ हिमवान्वारियात्रश्चयेचान्येकुलपर्वताः ॥ ८८ ॥ चन्द्रमास्सहनक्षत्रैरादित्योरश्मिभिःसह ॥
धनदोवरुणश्चैवयमःशक्रःशचीपतिः ॥ ८९ ॥ मरुतोदेवगन्धर्वाऋषयश्चतपोधनाः ॥ नागायक्षाःपिशाचाश्चराक्षसाभीमविक्रमाः ॥ ९० ॥
ब्रह्मादेवाःपशुपतिर्ललाटस्थाभ्रमन्तिहि ॥ स्थावराणिचसर्वाणिजङ्गमानितथैवच ॥ ९१ ॥ भवांश्चसहितोऽस्माभिःसर्वैर्दैत्यगणैर्वृतः ॥ विमान
शतसङ्कीर्णासर्वायाभवतःसभा ॥ ९२ ॥ सर्वंत्रिभुवनंराजँल्लोकधर्मश्चशाश्वतः ॥ दृश्यतेनरसिंहेऽस्मिंस्तथेदंनिखिलंजगत् ॥ ९३ ॥
प्रजापतिश्चात्रमनुर्महात्माग्रहाश्चयोगाश्चमहीनभश्च ॥ उत्पातकालश्चधृतिर्मतिश्चरतिश्चसत्यंचतपोदमश्च ॥ ९४ ॥ सनत्कुमारश्चमहानुभावोविश्वे
चदेवाऋषयश्चसर्वे ॥ क्रोधश्चकामश्चतथैवहर्षोदर्पश्चमोहःपितरश्चसर्वे ॥ ९५ ॥ पुलस्त्यउवाच ॥ प्रह्लादस्यवचःश्रुत्वाहिरण्यकशिपुःप्रभुः ॥ उवाच
दानवान्सर्वान्गणांश्चसगणाधिपः ॥ ९६ ॥ हिरण्यकशिपुरुवाच ॥ मृगेन्द्रोगृह्यतामेषअपूर्वांतनुमास्थितः ॥ यदिवासंशयःकश्चिद्वध्यतांवनगोचरः
॥९७॥ पुलस्त्यउवाच ॥ तेदानवगणास्सर्वेमृगेन्द्रंभीमविक्रमम् ॥ परिक्षिपन्तोमुदितास्त्रासयामासुरोजसा ॥९८॥ सिंहनादंविमुच्याथनरसिंहोमहा
बलः ॥ बभञ्जतांसभांसर्वांव्यादितास्यइवान्तकः ॥ ९९ ॥ सभायांभज्यमानायांहिरण्यकशिपुःस्वयम् ॥ चिक्षेपास्त्राणिसिंहस्यरोषव्याकुल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लोचनः ॥ १०० ॥ सर्वास्त्राणामथश्रेष्ठंदण्डमस्त्रंसुदारुणम् ॥ कालचक्रंतथाघोरंविष्णुचक्रंतथापरम् ॥ १ ॥ पैतामहंमहात्युग्रंत्रैलोक्यनिर्मि
तंमहत् ॥ विचित्रामशनिंचवशुष्काद्र्चाशनिद्वयम् ॥ २ ॥ रौद्रन्तथोग्रशूलंचकङ्कालंमुसलंतथा ॥ अस्त्रंब्रह्मशिरश्चैवब्राह्ममस्त्रंतथैवच ॥ ३ ॥
नारायणास्त्रमैन्द्रंचआग्नेयंशैशिरंतथा ॥ वायव्यंमथनंचैवकपालमथकिङ्करम् ॥ ४ ॥ तथाप्रतिहतांशक्तिंक्रौञ्चमस्त्रंतथैवच ॥ मोहनंशोषणंचैव
सन्तापनविलापने ॥ ५ ॥ कम्पनंशातनंचैवमहास्त्रंचैवरोधनम् ॥ कालमुद्गरमक्षोभ्यंतापनंचमहाबलम् ॥ ६ ॥ संवर्तनंमोहनंचतथामायाधरंवर
म् ॥ गान्धर्वमस्त्रंदयितमसिरत्नंचनन्दकम् ॥ ७ ॥ प्रस्वापनंप्रमथनंवारुणंचास्त्रमुत्तमम् ॥ अस्त्रंपाशुपतंचैवयस्याप्रतिहतागतिः ॥ ८ ॥
एतान्यस्त्राणिदिव्यानिहिरण्यकशिपुस्तदा ॥ असृजन्नरसिंहस्यदीप्तस्याग्नेरिवाहुतिम् ॥ ९ ॥ अस्त्रैःप्रज्वलितैःसिंहमावृणोदसुरोत्तमः ॥ वि
वस्वान्घर्मसमयेहिमवन्तमिवांशुभिः ॥ ११० ॥ सह्यमर्षानिलोद्धूतोदैत्यानांसैन्यसागरः ॥ क्षणेनाप्लावयत्सर्वंमैनाकमिवसागरः ॥ ११ ॥ प्रा
सैःपाशैश्चखड्गैश्चगदाभिर्मुसलैस्तथा ॥ वज्रैरशनिभिश्चैवबहुशाखैर्महाद्रुमैः ॥ १२ ॥ मुद्गरैःकूटपाशैश्चशिलोलूखलपर्वतैः ॥ शतघ्नीभि
श्चदीप्ताभिर्दण्डैरपिसुदारुणैः ॥ १३ ॥ तेदानवाःपाशगृहीतहस्तामहेन्द्रतुल्याशनितुल्यवेगाः ॥ समन्ततोऽभ्युद्यतबाहुकायाःस्थिताःसशी
र्षाइवनागपोताः ॥ १४ ॥ सवर्णमालाकुलभूषिताङ्गाःसुतीक्ष्णदंष्ट्राकुलवक्त्रगर्ताः ॥ स्फुरत्प्रभास्तेचसशृङ्गदेहाश्चीनांशुकाभान्तियथैवहं
साः ॥ १५ ॥ सोऽसृजद्दानवोमायामग्निवायुसमीरितम् ॥ तमिन्द्रस्तोयदैःसार्धंसहस्राक्षोमहाद्युतिः ॥ १६ ॥ महतातोयवर्षेणश
मयामासपावकम् ॥ तस्यांप्रतिहतायांतुमायायांयुधिदानवः ॥ १७ ॥ असृजद्घोरसङ्काशंतमस्तीव्रंसमन्ततः ॥ तमसासंवृतेलोकेदैत्ये
ष्वात्तायुधेषुच ॥ १८ ॥ स्वतेजसापरिवृतोदिवाकरइवोद्गतः ॥ त्रिशिखांभ्रुकुटीमस्यददृशुर्दानवारणे ॥ १९ ॥ ललाटस्थांत्रिकू
टस्थांगङ्गांत्रिपथगामिव ॥ ततःसर्वासुमायासुहतासुदितिनन्दनाः ॥ १२० ॥ हिरण्यकशिपुंदैत्याविषण्णाश्शरणंययुः ॥ ततःप्रज्व
लितःक्रोधात्प्रदहन्निवतेजसा ॥ २१ ॥ तस्मिन्क्रुद्धेतुदैत्येन्द्रेतमोभूतमभूज्जगत ॥ आवहःप्रवहश्चैवविवहोऽथसमीरणः ॥ २२ ॥ परावह
स्संवहश्चउद्वहश्चमहाबलः ॥ तथापरिवहःश्रीमानुत्पातभयशंसिनः ॥ २३ ॥ इत्येवंक्षुभिताःसप्तमरुतोगगनेचराः ॥ येग्रहास्सर्वलोकस्यक्षयेप्रा
दुर्भवन्तिहि ॥ २४ ॥ तेसर्वेगगनेहृष्टाव्यचरंश्चयथासुखम् ॥ अयोगतश्चाप्यचरद्योगंनिशिनिशाचरः ॥ २५ ॥ सग्रहःसहनक्षत्रैस्तारापतिररिंदम
॥ विवर्णतांचभगवान्गतोदिविदिवाकरः ॥ २६ ॥ कृष्णःकबन्धश्चतदालक्ष्यतेसुमहान्दिवि ॥ असृजच्चासितांसूर्योधूमवर्त्तांविभावसुः ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गगनस्थश्चभगवानभीक्ष्णपरिविष्यते ॥ सप्तधूमनिभाघोराःसूर्यादिविसमुत्थिताः ॥ २८ ॥ सोमस्यगगनस्थस्यग्रहास्तिष्ठन्तिशृङ्गगाः ॥ वामेचदक्षिणेचैवस्थितौशुक्रबृहस्पती ॥ २९ ॥ शनैश्चरोलोहिताङ्गोलोहिताङ्गसमद्युतिः ॥ समंसमधिरोहन्तसर्वेवैगगनेचराः ॥ १३० ॥ शृङ्गाणिशनकैर्घोरायुगान्तावर्त्तनग्रहाः ॥ चन्द्रमाश्चसनक्षत्रोग्रहैःसहतमोनुदः ॥ ३१ ॥ चराचरविनाशायरोहिणींनाभ्यनन्दत ॥ गृहीतोराहुणाचन्द्र उल्काभिरभिहन्यते ॥३२॥ उल्काःप्रज्वलिताश्चन्द्रेव्यचरन्तयथासुखम् ॥ देवानामधिपोदेवःसोऽप्यवर्षतशोणितम् ॥ ३३ ॥ अपतद्गगनादुल्काविद्युद्रूपामहास्वना ॥ अकालेचद्रुमास्सर्वेपुष्प्यन्तिचफलन्तिच ॥ ३४ ॥ लताश्चसफलाःसर्वायाआहुर्दैत्यनाशिकाः ॥ फलेफलान्यजायन्तपुष्पेपुष्पंतथैवच ॥ ३५ ॥ उन्मीलन्तिनिमीलन्तिहसन्तिप्ररुदन्तिच ॥ विक्रोशन्तिचगम्भीरंधूमायन्तेज्वलन्तिच ॥ ३६ ॥ प्रतिमास्सर्वदेवानांकथयन्त्योमहद्भयम् ॥ आरण्यैःसहसंसृष्टाग्राम्याश्चमृगपक्षिणः ॥ ३७ ॥ चुक्रुशुर्भैरवंतत्रमृगयुद्धउपस्थिते ॥ नद्यश्चप्रतिकूलाःप्रवहन्तिकलुषोदकाः ॥ ३८ ॥ नप्राकाशन्तचदिशोरक्तरेणुसमाकुलाः ॥ वानस्पत्यानपूज्यन्तेपूजनार्हाःकथञ्चन ॥ ३९ ॥ वायुवेगेनहन्यन्तेभज्यन्तेप्रणमन्तिच॥ तथाचसर्वभूतानांछायानपरिवर्त्तते ॥ १४० ॥ अपरेणगतेसूर्येसलोकानांयुगक्षय ॥ तदाहिरण्यकशिपोर्दैत्यस्योपरिवेश्मनः ॥ ४१ ॥ भाण्डागारायुधागारेनिविष्टमभवन्मधु ॥ असुराणांविनाशायसुराणांविजयायच ॥ ४२ ॥ दृश्यन्तेविविधोत्पाताघोराघोरनिदर्शनाः ॥ एतेचान्येचबहवोघोररूपाःसमुत्थिताः ॥ ४३ ॥ दैत्येन्द्रस्यविनाशायदृश्यन्तेरणशंसिनः ॥ मेदिन्यांकम्पमानायांदैत्येन्द्रेणमहात्मना ॥ ४४ ॥ महीधरानागगणानिपेतुरमितौजसः॥विषज्वालाकुलैर्वक्त्रैर्विमुञ्चन्तोहुताशनम् ॥४५॥ चतुःशीर्षाःपञ्चशीर्षाःसप्तशीर्षाश्चपन्नगाः॥वासुकिस्तक्षकश्चैवकार्कोटकधनञ्जयौ ॥ ४६ ॥ एलामुखःकालियश्चमहापद्मश्चवीर्यवान् ॥ सहस्रशीर्षश्शुद्धाङ्गोहेमतालध्वजःप्रभुः ॥ ४७ ॥ शेषोऽनन्तोमहानागोह्यप्रकम्प्यश्चकम्पिताः॥ दीप्यन्तेऽन्तर्जलस्थानिपृथिवीविवराणिव ॥ ४८ ॥ सप्तदैत्येन्द्रकोपेनकम्पितानिसमन्ततः ॥ नानातेजोधराश्चापिपातालतलचारिणः ॥ ४९ ॥ पातालेसहसाक्षुब्धेदुष्प्रकम्प्याःप्रकम्पिताः ॥ हिरण्यकशिपुर्दैत्यस्तदासंस्पृष्टवान्महीम् ॥ १५० ॥ सन्दष्टौष्ठपुटःक्रुद्धोवराहइवपूर्वजः ॥ गङ्गाभागीरथीचैवकौशिकीसरयूरपि ॥ ५१ ॥ यमुनाचाथकावेरीकृष्णावेणीचनिम्नगा ॥ तुङ्गाभद्रामहावेगानदीगोदावरीतथा ॥५२॥ चर्मण्वतीचसिन्धुश्चतथानदनदीपतिः ॥ मेलकप्रभवश्चैवशोणोमणिनिभोदकः ॥ ५३ ॥ नर्मदाचशुभस्रोतास्तथावेत्रवतीनदी ॥ गोमतीगोकुलाकीर्णातथापूर्वासरस्वती ॥ ५४ ॥ महाकालमहीचैवतमसापुष्पवाहिनी ॥ जम्बूद्वीपंरत्नवच्चसर्वरत्नोपशोभितम् ॥५५॥ सुवर्णपुटकंचैवसुवर्णाकरमण्डितम् ॥ महानदश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लौहित्यश्शैलःकाञ्चनशोभितः ॥ ५६ ॥ पत्तनंकोशकाराणांकशिंचरजताकरम् ॥ मगधाश्चमहाग्रामाःपुण्ड्राउग्रास्तथवच ॥ ५७ ॥ सुह्मामल्ला
विदेहाश्चमालवाःकाशिकोसलाः ॥ भवनंवैनतेयस्यदैत्येन्द्रेणाभिकम्पितम् ॥ ५८ ॥ कैलासशिखराकारंयत्कृतंविश्वकर्मणा ॥ रक्ततोयोमहाभीमो
लौहित्योनामसागरः ॥ ५९ ॥ उदयश्चमहाशैलउच्छ्रितःशतयोजनम् ॥ सुवर्णवेदिकःश्रीमान्मेघपङ्क्तिनिषेवितः॥ १६० ॥ भ्राजमानोऽर्कसदृशैर्जा
तरूपमयैर्द्रुमः ॥ सालैस्तालैस्तमालैश्चकर्णिकारैश्चपुष्पितैः ॥ ६१ ॥ अयोमुखश्चविख्यातःसर्वतोधातुमण्डितः ॥ तमालवनगन्धश्चपर्वतोमलयः
शुभः ॥६२॥ सुराष्ट्राश्चसबाह्लीकाश्शूद्राभीरास्तथैवच॥ भोजाःपाण्ड्याश्चवङ्गाश्चकलिङ्गास्ताम्रलिप्तकाः ॥६३॥ तथवपौण्ड्राःशुभ्राश्चवामचूडास्सकेर
लाः ॥ क्षोभितास्तेनदैत्येनदेवाश्चाप्सरसांगणाः ॥ ६४ ॥ अगस्त्यभवनंचवयदगस्त्यकृतंपुरा ॥ सिद्धचारणसङ्घैश्चविप्रकीर्णंमनोहरम् ॥ ६५ ॥
विचित्रनानाविहगंसुपुष्पितमहाद्रुमम् ॥ जातरूपमयैःशृङ्गैरप्सरोगणसेवितम् ॥६६॥ गिरिःपुष्पितकश्चैवलक्ष्मीवान्प्रियदर्शनः ॥ उत्थितःसागरंभि
त्वाविश्रामश्चन्द्रसूर्ययोः॥६७॥रराजसमहाशृङ्गैर्गगनंविलिखन्निव॥चन्द्रसूर्यांशुसङ्काशैःसागराम्बुसमावृतैः ॥६८॥ विद्युत्त्वान्पर्वतःश्रीमानायतःशत
योजनम्॥ विद्युतांयत्रसम्पातानिपात्यन्तेनगोत्तमे ॥६९॥ ऋषभःपर्वतश्चैवश्रीमानृषभसंस्थितः ॥ कुञ्जरःपर्वतःश्रीमानगस्त्यस्यगृहंशुभम् ॥१७०॥
विमलाख्याचदुर्द्धर्षासर्पाणांमालतीपुरी॥तथाभोगवतीचापिदैत्येन्द्रेणाभिकम्पिता॥७१॥महासेनगिरिश्चैवपारियात्रश्चपर्वतः ॥ चक्रवांश्चगिरिश्रेष्ठोवा
राहश्चैवपर्वतः॥७२॥प्राग्ज्योतिषपुरंचापिजातरूपमयंशुभम्॥यस्मिन्वुवासदुष्टात्मानरकोनामदानवः ॥७३॥ मेघश्चपर्वतश्रेष्ठोमेघगम्भीरनिस्स्वनः॥
षष्टिस्तत्रसहस्राणिपर्वतानांविशांपते ॥ ७४ ॥ तरुणादित्यसङ्काशोमेरुश्चैवमहान्गिरिः ॥ यक्षराक्षसगन्धर्वैर्नित्यंसेवितकन्दरः ॥ ७५ ॥
हेमगर्भोमहासेनस्तथामेघसखोगिरिः ॥ कैलासश्चैवशैलेन्द्रोदानवेन्द्रेणकम्पितः ॥ ७६ ॥ हेमपुष्करसञ्छन्नंतेनवैखानसंसरः ॥ कम्पितंमानसं
चैवहंसकारण्डवाकुलम् ॥ ७७ ॥ त्रिशृङ्गःपर्वतश्रेष्ठःकुमारीचसरिद्वरा ॥ तुषारचयसंच्छन्नोमन्दरश्चापिपर्वतः ॥ ७८ ॥ उशीरबीजश्च
गिरिर्भद्रप्रस्थस्तथाद्रिराट् ॥ प्रजापतिगिरिश्चैवतथापुष्करपर्वतः ॥ ७९ ॥ देवाभःपर्वतश्चैवतथावैवालुकागिरिः ॥ क्रौञ्चसप्तर्षिशैलरूधूम्रवर्ण
श्चपर्वतः ॥ १८० ॥ एतेचान्येचगिरयोदेशाजनपदास्तथा ॥ नद्यःससागराःसर्वादानवेनाभिकम्पिताः ॥ ८१ ॥ कपिलश्चमहीपुत्रोव्याघ्रवांश्च
प्रकम्पितः ॥ खेचराश्चनिशापुत्राःपातालतलवासिनः ॥८२॥ गणस्तथापरोरौद्रोमेघनामाङ्कुशायुधः॥ऊर्द्ध्वगोभीमवेगश्चसर्वएतेऽभिकम्पिताः ॥८३॥
गदीशूलीकरालश्चहिरण्यकशिपुस्तथा ॥ जीमूतवननिर्घोषोजीमूतइववेगवान् ॥ ८४ ॥ देवारिर्दितिजोदृप्तोनृसिंहंसमुपाद्रवत् ॥ सतुतेनततस्तीक्ष्णै

CC-0. In Public Domain. Digitization by eGangotri

मृगेन्द्रेणमहानखैः ॥ तदोङ्कारसहायेनविदार्यनिहतोयुधि ॥८५॥ महीचकालश्चशशीनभश्चग्रहाश्चसूर्याश्चदिशश्चसर्वाः ॥ नद्यश्चशैलाश्चमहार्णवाश्च
गताःप्रसादंदितिपुत्रनाशात् ॥ ८६ ॥ ततःप्रमुदितादेवाऋषयश्चतपोधनाः ॥ तुष्टुवुर्नामभिर्दिव्यैरादिदेवंसनातनम् ॥ ८७ ॥ यत्त्वयाविधृतंदेवना
रसिंहमिदंवपुः ॥ एतदेवार्चयिष्यन्तिपरापरविदोजनाः ॥ ८८ ॥ ब्रह्मोवाच ॥ भवान्ब्रह्माचरुद्रश्चमहेन्द्रोदेवसत्तमः ॥ भवान्कर्त्ताविकर्त्ताचलोका
नांप्रभवोऽव्ययः ॥ ८९ ॥ परांचसिद्धिंचपरंचसत्वंपरंरहस्यंपरमंहविश्च ॥ परंचधर्मंपरमंयशश्चत्वामाहुरग्र्यंपरमंपुराणम् ॥ १९० ॥ परंचसत्यंप
रमंतपश्चपरंपवित्रंपरमंचमार्गम् ॥ परंचयज्ञपरमंचहोत्रंत्वामाहुरग्र्यंपरमंपुराणम् ॥ ९१॥ परंशरीरंपरमंचब्रह्मपरंचयोगंपरमांचवाणीम् ॥ परंरहस्यंप
रमांगतिंचत्वामाहुरग्र्यंपरमंपुराणम् ॥ ९२ ॥ पुलस्त्यउवाच ॥ एवमुक्त्वातुभगवान्सर्वलोकपितामहः ॥ स्तुत्वानारायणंदेवंब्रह्मलोकंगतःप्रभुः ॥
॥ ९३ ॥ ततोनदत्सुतूर्येषुनृत्यन्तीष्वप्सरःसुच ॥ क्षीरोदस्योत्तरंकूलंजगामहरिरीश्वरः ॥ ९४ ॥ नारसिंहंवपुर्देवःस्थापयित्वासुदीप्तिमान् ॥ पौराणं
रूपमास्थायप्रययौगरुडध्वजः ॥९५॥ अष्टचक्रेणयानेनभूतियुक्तेनभास्वता ॥ अव्यक्तप्रकृतिर्देवःस्वस्थानंगतवान्प्रभुः ॥ १९६ ॥ इतिश्रीपाद्मपु
राणेप्रथमेसृष्टिखण्डेनरसिंहप्रादुर्भावोनामसप्तचत्वारिंशत्तमोऽध्यायः ॥ ४७ ॥ श्रीभीष्मउवाच ॥ नरसिंहस्यमाहात्म्यंविस्तरेणत्वयेरितम् ॥
तथाभवस्यमाहात्म्यंभैरवस्याभिधीयताम् ॥ १ ॥ पुलस्त्यउवाच ॥ तस्यापिदेवदेवस्यशृणुत्वंकर्मचोत्तमम् ॥ आसीद्दैत्योऽन्धकोनामभिन्नाञ्जन
चयोपमः ॥ २ ॥ तपसामहतायुक्तोह्यवध्यस्त्रिदिवौकसाम् ॥ सकदाचिन्महादेवंपार्वत्यासहितंविभुम् ॥ ३ ॥ क्रीडमानंतदादृष्ट्वाहर्तुंदेवींप्रचक्रमे ॥
एतांदेवींहराम्यद्यवियोगेमृत्युमेष्यति ॥ ४ ॥ ततःस्थिराभवित्रीमेभार्यैषालोकसुन्दरी ॥ विम्बौष्ठंचारुवदनंचारुकान्ततरंसुखम् ॥ ५ ॥ यद्येषान
भवेद्भार्याजीवितेकिंप्रयोजनम् ॥ एतांमतिमथास्थायमन्त्रिभिःसहमन्त्र्यच ॥ ६ ॥ चक्रेयोगंससैन्यस्यसेनापतिमभाषत ॥ ७ ॥ अन्धकउवाच॥
आनयस्वरथंमह्यंजैत्रंदेवनिपातनम् ॥ जयिष्येत्रिदशान्सर्वान्विष्णुरुद्रपुरोगमान् ॥ हरिष्येपर्वतसुतांतयामेऽपहृतंमनः ॥ ८ ॥ पुलस्त्यउवाच ॥
मन्त्रिणातस्यचाख्यातःकनकस्यवधस्सुरैः ॥ परभार्यानुरक्तस्यकृतोदेवःसवासवैः ॥ ९ ॥ श्रुत्वाकोपपरीतात्माबभूवासुरसत्तमः ॥ हत्वातुकनकं
शक्रोभयादन्धासुरस्यच ॥ १० ॥ जगामशरणान्वेषीकैलासंशङ्करालयम् ॥ दृष्ट्वाप्रणम्यदेवेशंचन्द्रार्द्धकृतशेखरम् ॥११ ॥ भीतोविज्ञापयामासधृत
साहस्रलोचनः ॥ १२ ॥ इन्द्रउवाच ॥ अभयंदेहिमेदेवदानवादन्धकादहम् ॥ बिभेमितस्यपुत्रोऽद्यमयायुधिनिपातितः ॥ १३ ॥ तद्यावन्नसजाना
तिहतंपुत्रंमहासुरः ॥ तावत्तत्रस्थएवाशुहन्यतांमद्भयावहः ॥ १४ ॥ स्त्रीलौल्याद्दानवःक्रूरःपरभार्यापहारकः ॥ सर्वथाघातनीयस्तेभवतासुरसत्तम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १५ ॥ पुलस्त्यउवाच॥शक्रस्यैवंवचःश्रुत्वाशरण्यःशङ्करस्तदा ॥ ददावभयमेवासौमाभरितिशतक्रतोः ॥१६॥दत्ताभयोऽथकैलासादाजगामकुश
स्थलीम् ॥ वृतोभूतगणैरीशोवधार्थंचान्धकस्यतु ॥ १७॥ कृत्वारूपंमहाकायंविश्वरूपंसुभैरवम् ॥ सर्पैर्ज्वलद्भिर्घोवद्भिर्भीमंभीमभुजङ्गवत् ॥१८॥
जटासटाभिराकाशंफणिरत्नशिखार्चिषा ॥ दहन्नतीवतजोभिःकालाग्निरिवसंक्षये ॥ १९ ॥ मुखैर्दंष्ट्राङ्कुराङ्कैश्चद्वितीयेन्दुकलोज्ज्वलैः ॥ पातालोदर
रूपाभैर्भैरवारावनादिभिः ॥ २० ॥ भुजैरनेकसाहस्रैर्बहुशस्त्रकृतग्रहः ॥ बद्धाभरणभूषाढचैरणेघोरनिनादिभिः ॥२१ ॥सिंहचर्मपरीधानंव्याघ्रत्वगुत्त
रीयकम्॥गजाजिनकृताटोपंपतद्भृङ्गरवाकुलम् ॥ २२ ॥ ईदृग्रूपंविधायेशोदनुदैत्यभयावहम् ॥ अवातरन्महींभीमोदनूनांक्षयकारकः ॥ २३ ॥ अ
न्धासुरोऽपिदनुजःपुत्रंश्रुत्वाहतंयुधि॥क्रोधनतमसाविष्टोरणतूर्याण्यचोदयत् ॥२४॥ संहत्यावहितःप्राप्तोयत्रतेत्रिदशाःस्थिताः ॥ महत्यासेनयासार्द्धं
रथवारणयुक्तया ॥ २५ ॥ तेदेवादानवान्वीक्ष्यमहाहवकृतादरान् ॥ व्यपयाततनुत्राणाःशम्भुंशरणमन्वयुः ॥ २६ ॥ माभैष्टेतिचतान्देवोदेवानुक्त्वा
त्रिलोचनः ॥ गृहीत्वाशूलमातिष्ठद्दंष्ट्रारवधरोरुषा ॥ २७ ॥ अन्धकेनाथरुष्टेनशतकोटिशरैर्गणाः ॥ निहताश्चापिदेवानांबहूनामेकताकृता ॥ २८ ॥
सस्फुलिङ्गार्चिषोवह्नेर्मुञ्चमानःपिनाकधृत्॥शरैःसमावृतंचक्रेअन्धकंरथगंततः ॥२९॥ दनुनाथोरथस्थोऽथशिथिलःशिथिलायुधः ॥ निमन्त्र्यदानवा
न्सर्वान्सयोद्धुमुपचक्रमे ॥ ३० ॥ बहुधातद्बलंभग्नंविविधायुधयोधिभिः॥ युधिवीरैर्हतंदेवैःस्थाणुनासख्यमाश्रितैः॥३१॥दानवश्चान्धकःसैन्यंभिन्नं
दृष्ट्वाकृतंसुरैः ॥ आत्मानंचमहेशेननिरुद्धंबाणकोटिभिः ॥ ३२ ॥ विह्वलीभूतदेहोऽसौधयमालम्ब्यकेवलम् ॥ पिनाकंचैवरुद्रस्यगृह्यरुद्रमताडयत
॥ ३३ ॥पिनाकस्याभिघातेनरुद्रोभूमिमथागमत् ॥ भूमौनिपातितेदेवेचलितंभुवनत्रयम् ॥ ३४ ॥ तत्यजुःसागरावेलांपर्वताःशिखराणिच ॥
नक्षत्राणिवियोगीनिजग्मुर्मुक्तान्यनेकशः ॥ ३५ ॥ पतितेभुविदेवेशेअन्धकोगदयापुनः ॥ जघानरुषितोनागंहत्वातंपातयद्भुवि ॥ ३६ ॥
शिवंत्यक्त्वानागराजःग्रपलाय्यान्यतोगतः ॥ मुहूर्त्ताचेतनांलब्ध्वाउत्थितःपरमेश्वरः ॥ ३७ ॥ गृहीत्वापरशुंदिव्यंदानवंनैवपश्यति ॥
कृत्वातुतामसींमायांमायाशतविशारदः ॥ ३८ ॥ तयाविमोहितेदेवेक्वनुवैदानवोगतः ॥ शम्भोर्भयमथोप्राप्यकिंनुपापःकरिष्यति ॥
॥ ३९ ॥ तमसाच्छादितायावद्देवाव्याकुलतांगताः ॥ सम्भ्रान्तमानसानीकास्तदोचुःकार्यगौरवात् ॥ ४० ॥ एतस्मिन्नन्तरेसूर्यस्ते
जोरूपोव्यवस्थितः ॥ उत्तस्थौनररूपेणकुर्वन्वितिमिरादिशः ॥ ४१ ॥ नष्टेतमसिहृष्टाङ्गेखद्योतेप्रकटस्थिते ॥ देवामुदमवापुस्तेस्पष्टानन
विलोचनाः॥४२॥उद्दीप्तास्तुसुराःसर्वेगणाःस्कन्दपुरोगमाः ॥ स्तुवन्तिविविधैःस्तोत्रैर्नररूपंदिवाकरम् ॥ ४३ ॥ अनौपम्यंजगद्व्यापिब्रह्मविष्णुशिवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्परम् ॥ स्निग्धविद्रुमसच्छायंसिन्दूरारुणसप्रभम् ॥४४॥ प्रभामन्ततदाद्दृष्ट्वापश्चाङ्गालिङ्गितावनिः ॥ पुनःप्रणामप्रवणंप्रणिधानपुरःसरम् ॥४५॥ आ
लोक्यस्निग्धयादृष्ट्यादेवदेवंत्रिलोचनः ॥ उवाचस्निग्धगम्भीरवाचादेवंशनैर्हरः ॥४६॥ हरउवाच ॥ पूरयन्निवतेजोभिर्भगवान्भुवनत्रयम् ॥ दैत्यमा
याभिपन्नानांदर्शनाकुलचेतसाम् ॥ प्राणिनामिदमेवैकमविसंवादिदैवतम् ॥ ४७ ॥ अयमेवचसंसारसागरात्सकलादपि ॥ सत्त्वानुत्तारयन्देवःकर्ण
धारायतेप्रभुः ॥ ४८ ॥ यजन्तोजन्तवोभक्त्यायंदेवंविविधाःसदा ॥ निःश्रेयसायकल्पन्तेतंनतोभास्करंविभुम् ॥४९॥ यस्तूदयाद्रिशिखरेमुकुटाय
मानलीलागभस्तिभिरलंकुसुमप्रकाशैः ॥ व्याप्यस्वदीधितिगणैःप्रदिशोदिशश्चदेदीप्यतेससविताविभवायलोके ॥ ५० ॥ ब्रह्मेन्द्ररुद्रमरुदच्युतव
ह्निपाथोनाथप्रयोगनिपुणैश्चऋषीन्द्रसङ्घैः ॥ श्रेयोऽर्थिभिःप्रतिदिनंहिमसाङ्गरागौर्दिव्याङ्गरागपरिलिप्तसमस्तदेहैः ॥ ५१ ॥ पूज्यंवपुस्तवसदाप्रलये
हिवेदैर्गीर्भिर्विचित्रपदमण्डलमण्डिताभिः ॥ येत्वांस्तुवन्तिपरसद्मनिसद्महीनानित्यंप्रसारितकराभुवितेभवन्ति ॥ ५२ ॥ येदद्रुकुष्ठपिटिकादिभिर
र्दिताङ्गाःशीर्णत्वचःकुनखिनश्च्युतकेशपाशाः ॥ देवेशतेऽपितवपादनताभवन्तिसद्योद्भिरष्टशरदाकृतयोमनुष्याः ॥ ५३ ॥ सामेतिसामगगणाहिम
खार्थकंत्वामध्वर्यवस्त्वृगितिबह्वृचमुख्यपूगाः ॥ त्वामेवमार्यमितिकायविदोऽधिगन्तुंनागाश्चवेतिपितरोऽप्यथसर्वगन्धम् ॥ ५४ ॥ मायेतिचोपनि
षदर्कषडेवदेवासत्यास्तथावयमिवेहउपासतेऽमी ॥ गन्धर्वकिन्नरगणाःसहचारणैस्तुरूपंतथाचभगवन्प्रतिपद्यसेत्वम् ॥ ५५ ॥ येनार्चयन्तिसत
तंभवतोऽर्च्यमार्चैस्तेऽर्चिष्प्रतापितदिगम्बरवित्तहीनाः ॥ क्षुत्क्षामकण्ठजठराघटखर्परेणभिक्षामटन्तिपरवेश्मसुतेऽर्थहीनाः ॥ ५६ ॥ उत्फुल्लकोकन
दकोशविशालनेत्रमीपद्विलासलुलिताञ्चितपिङ्गतारम् ॥ कामंप्रशस्ततरसुन्दरहाररम्यमुत्तुङ्गपीवरपयोधरभारखिन्नम् ॥ ५७ ॥ रम्भोपमोरुपृथुपीननि
तम्बबिम्बानद्धक्कणन्मणिरणद्रशनाकलापम् ॥ वृन्दंललाटतटकोटिपटान्तलम्बिहेमाञ्चलाञ्चितमुखंकुलपालिकानाम् ॥ ५८ ॥ कान्तंगृहेषुकलगद्गद
भाषितानांझङ्काररनूपुररवेणविराविताताम् ॥ तेषांकृशानुकरमिन्दुसमानकान्तंयैरर्चितोऽसिभगवन्भवमोचनस्त्वम् ॥ ५९ ॥ ब्रह्मात्वमेवहरिरस्य
निलोऽनलोऽसिरुद्रोऽन्तकोऽसिवरुणोऽस्यमराधिपोऽसि ॥ सोमोऽसिवायुरसिभूरसिचेश्वरोऽसियज्ञोऽसिवित्तपतिरस्यपराजितोऽसि ॥ ६० ॥
येसततसतिसुखवाहरणेनमुक्ताभूमावथेतितरसोरुतरंतरीताः ॥ व्योमैतदन्तरहितंपरितोहिगत्वागच्छन्तिनश्रमपदंहिमनागपीमे ॥ ६१ ॥ ध्यानैकयोग
निरताश्चसमाधिभावाद्ध्यात्वापदंतवतुरीयमनन्तमूर्ते ॥ मुक्तामयास्तनुभृतोनभियाभियुक्तास्तद्ब्रह्मशाश्वतमचिन्त्यमनाद्यनन्तम् ॥ ६२ ॥
जन्मादिरोगरहितंपरमंपुराणमीशंजरामरणशोकभयातिरिक्तम् ॥ स्थूलानुभावनगणागणितंविशुद्धंवेदान्तवादिभिरलंपरिमन्यतेयत् ॥ ६३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वामग्निपुञ्जवपुषंतपसांनिवासंयाता दिवंसुचिरकालमुपास्यभक्ताः ॥ भानोसुरासुरसमूहशिरोनिघृष्टपादारविन्दयुगलामलचारुमूर्ते ॥ ६४ ॥
भूतेशभूतवरदासकृदव्ययात्मन्व्योमाट्टहाससवितर्भुवनैकदीप ॥ ऋक्सामममन्त्रयजुषामधिवासनामसृष्टिस्थितिप्रलयकारणलोकपाल ॥ ६५ ॥
दीनस्यदेवकृपणस्यभवेभवेमेमग्नस्यचारुदविचारमनोरथानि ॥ शश्वद्यतीश्वरशशीकरकङ्कघोरोत्पातोजरामरणशोकरुगान्तरस्य ॥ ६६ ॥
यःप्रातःसायमिदंमध्याह्नेवापठेच्चदीप्तांशोः ॥ सालोक्यंयातिरवेःप्राप्नोतिधर्मार्थकामांश्च ॥ ६७ ॥ नित्यंतस्माच्चसूर्याच्चमनसोऽभिहितंच
यत् ॥ नमस्तदेवदेवेशभक्तानामभयङ्कर ॥ ६८ ॥ सुब्रह्मण्यनमस्तेऽस्तुसर्वदेवनमस्कृत ॥ तिग्मांशोवैनमस्तुभ्यंजगतश्चक्षुषेनमः ॥ ६९ ॥
प्रभाकरनमस्तेऽस्तुभानोजयजगत्पत ॥ अनेनदनुमुख्येनपीडितोऽहंजगत्पते ॥७०॥ किंकरोमिकथंचैनंघातयामिदिवाकर ॥ ७१ ॥ सूर्यउवाच ॥
जयशूलेनपापिष्ठंमायाशतविशारदम्॥जयंप्राप्नुहिदेवेशहत्वाशूलेनचान्धकम्॥७२॥पुलस्त्यउवाच ॥ गृह्यशूलंततोदूरमाक्षिपत्तेजसाहरः॥ततोऽन्धक
स्त्रिशूलेनाताडयत्पापकर्मकृत् ॥७३॥ तस्मिन्युद्धेतथारुद्रोह्यन्धकेनाभिपीडितः ॥ मुमोचबाणमत्युग्रंनाम्नापाशुपतंहियत् ॥ पिनाकमानम्यदोर्भ्यां
पिनाकीशङ्करःस्वयम् ॥७४॥ रुद्रबाणविनिर्भेदाद्रुधिरादन्धकस्यतु॥अन्धकाश्चसमुत्पन्नाश्शतशोऽथसहस्रशः ॥ ७५ ॥ तेषांविदार्यमाणानांरुधिरा
दपरेपुनः॥बभूवुरन्धकाघोरायैर्व्याप्तमखिलंजगत् ॥ ७६ ॥ तंतुमायाविनंदृष्ट्वादेवदेवस्तदान्धकम् ॥ पानार्थमन्धकस्यास्यससृजेमातृकास्तदा
॥ ७७ ॥ माहेश्वरींतथाब्राह्मींशौरींवावाडवींतथा ॥ सौपर्णीमथवायव्यांशङ्खिनींतैत्तिरींतथा ॥ ७८ ॥ सौरींसौम्यांशिवदूतींचामुण्डामथवारुणीम्॥
वाराहींनारसिंहींचवैष्णवींचविभावरीम् ॥ ७९ ॥ शतानन्दांभगानन्दांपिच्छिलांभगमालिनीम् ॥ बालामतिबलांरक्तांसुरभींमुखमण्डिताम् ॥८०॥
मातृनन्दांसुनन्दांचबिडालींशकुनींतथा ॥ रेवतींचमहापुण्यांतथैवशिखिपट्टिकाम् ॥ ८१ ॥ शूलेनचततोदैत्यंबिभेदत्रिपुरान्तकः ॥ निर्गतंरुधिरंत
स्मात्पपुस्तामातरस्तदा ॥ ८२ ॥ नीरक्तोहितदादैत्यश्शुष्कतांप्रापभूपते ॥ शूलेप्रोतस्तदादैत्योदिव्यवर्षसहस्रकम् ॥८३॥ महाबलेनरुद्रेणविधृतोऽ
पिमृतोनहि ॥ स्तुतस्तेनतदाशम्भुर्भक्त्यादत्येनसुव्रत ॥८४ ॥ अन्धकउवाच ॥ नमोऽस्तुशम्भोभवनाशहेतोनमोऽस्तुतेदेववरप्रसीद ॥ त्वंभूजलाग्नी
रनभोऽर्कसोमयज्वाष्टमूर्तिर्भवभावनोऽलम्॥८५॥ त्वांवैबाणोबहुवाद्येनतोष्यप्राप्तश्चैश्यंस्वेपुरेतत्स्वरक्ष्यम् ॥ रक्षोऽधीशोबाहुभिस्तोल्यशैलंयुष्मत्क्रा
न्तक्लिष्टरूपोह्यनौषीत् ॥८६॥ प्राप्तोऽप्यैश्यंसर्वरक्षोगणानांपुत्रंचापिप्रोर्जितंशक्रबन्धम्॥८७॥भवभयहरहरपरमउदारममसुखकरणनिखिलसुरसार ॥
जितमरुदभिमतवितरणपारतवपदकमलमिहारणसार ॥ ८८ ॥ तवेशपादपङ्कजंकरोतियोनरोहृदिसदेशतस्यवाञ्छितंददासिभक्तिभावितः ॥ मुनी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्वराः पुराहरं भवन्तमेवमादरात्प्रपूज्य लिङ्गरूपिणं समापिता मनोरथान् ॥ ८९ ॥ भवोद्भवैकरूपिणं प्रपञ्चपञ्चकाकृति विचिन्त्य वृक्षकोटरस्थ एष जीववजीव
नम्॥ भवेद्भवाङ्घ्रिचिन्तनात्तसर्वकाम ईश्वर त्वदीयकिंङ्करान्विते पदे पदे समागतः ॥९०॥ मूढोऽहं नाभिजानामि त्वां स्तोतुं भक्तवत्सल ॥ सदीश्वरेण मन
साऽप्यनुकम्प्योरणं गतः ॥ ९१ ॥ पुलस्त्य उवाच ॥ इति स्तुतो महेशस्तु भक्त्या दैत्येन सादरम् ॥ गणेशतां ददौ तस्मै नाम भृङ्गीरिटीति च ॥ ९२ ॥
एष ते महिमा भूप हरस्य भवहारिणः ॥ कथितो विघ्नविघ्नाख्यस्तत्पराणां सुखावहः ॥ ९३ ॥ भीष्म उवाच ॥ मनुष्यस्यापि देवत्वं सुखं राज्यं धनं यशः ॥
जयं भोग्यं तथारोग्यमायुर्विद्यां श्रियं सुतम् ॥ बन्धुवर्गं शिवं सर्वं ब्रूहि मे विप्रसत्तम ॥ ९४ ॥ पुलस्त्य उवाच ॥ एभिर्गुणैर्युतः श्रीमान्सदैव ब्राह्मणो भुवि ॥
त्रैलोक्ये तु सदा मेध्यो विप्रदेवो युगे युगे ॥ ९५ ॥ पूजयित्वा द्विजान्देवाः स्वर्गं भुञ्जन्ति चाक्षयम् ॥ धरामवन्ति राजानो लोका वित्तं सुखं शिवम् ॥ ९६॥
लोके विप्रसमो नास्ति देवानामपि दैवतम् ॥ स च धर्ममयः साक्षाद्भुवि मुक्तिप्रदो भृशम् ॥९७॥ लोकानां सद्गुरुः पूज्यस्तीर्थभूतोऽनघो जनः ॥ सर्वदेवालयः
सत्वो निर्मितो ब्रह्मणा पुरा ॥ ९८ ॥ इममर्थं पुरा पृष्टो नारदेन पितामहः ॥ कस्मिंस्तु पूजिते ब्रह्मन्प्रसन्नो माधवो भवेत् ॥ ९९ ॥ ब्रह्मोवाच ॥ यस्य
विप्राः प्रसीदन्ति तस्य विष्णुः प्रसीदति ॥ तस्माद्ब्राह्मणशुश्रूषुः परं ब्रह्माधिगच्छति ॥ १०० ॥ विष्णुर्ब्राह्मणदेहे हि सुसदा वसति नान्यथा ॥ तस्माद्ब्राह्मण
पूजायां विष्णुस्तुष्यति तत्क्षणात् ॥ १ ॥ विप्रान्यः पूजयेन्नित्यं दानमानार्चनादिभिः ॥ कृतं क्रतुशतं तेन विध्युक्तं प्रियदक्षिणम् ॥ २ ॥ ब्राह्मणस्य मुखं
क्षेत्रमनूषरमकण्टकम् ॥ वापयेत्सर्वबीजानि सा कृषिः सार्वकालिकी ॥ ३ ॥ अभिगम्य तु यद्दत्तं यच्च दानं मनोरमम्॥ विद्यते सागरस्यान्तो दानस्यान्तो न
विद्यते ॥ ४ ॥ मनसापि न हिंसन्ति भूदेवमाततायिनम् ॥ मनोऽनुकूलतां यान्ति देवैरपि च दुर्लभाम् ॥ ५ ॥ गृहे यस्यागतो विद्वान्नैराश्यं नोपगच्छति ॥
सर्वपापक्षयस्तस्य चाक्षयं स्वर्गमश्नुते ॥ ६ ॥ काले देशे च पात्रे च विप्रे यच्चार्पयेद्वसु ॥ तद्धलं चाक्षयं विद्धि जन्मजन्मनि तिष्ठति ॥ ७ ॥ न च दारिद्र्य
तामेति नातुरो न च कातरः ॥ मनोऽनुकूलां प्रमदामर्चयित्वा द्विजाँल्लभेत् ॥ ८ ॥ कृत्वा साहसकर्माणि दद्याद्विप्राय पर्वसु ॥ तद्दानं सुगुणं प्रोक्तमभयं लाभ
एव च ॥ ९ ॥ विप्रपादतलोद्घृष्टक्षिती भवति यः करः ॥ स करः श्रीकरो नाम अन्यः कर्मकरः करः ॥११०॥ विप्रपादरजःपूताः पूतास्तज्जलबिन्दुभिः ॥
विपद्भिश्च सदा पापैर्मुक्ता यान्ति त्रिविष्टपम् ॥ ११ ॥ विप्रपादरजःपूताः शुचयो गृहचत्वराः ॥ पुण्यक्षेत्रसमास्ते स्युः प्रशस्ता यज्ञकर्मसु ॥ १२ ॥ आदौ
ब्रह्ममुखाद्विप्रः समुद्भूतः पुरानघः ॥ वेदास्तत्रैव सञ्जाताः सृष्टिसंस्थितिहेतवः ॥ १३ ॥ तस्माद्विप्रमुखे वेदाश्चार्पिताः पुरुषेण हि ॥ पूजार्थं सर्वलोकानां
सर्वयज्ञार्थतो ध्रुवम् ॥ १४ ॥ पितृयज्ञे विवाहे च वह्निकार्येषु शान्तिषु ॥ प्रशस्ता ब्राह्मणा नित्यं सर्वस्वस्त्ययनेषु च ॥ १५ ॥ देवा भुञ्जन्ति हव्यानि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बलिंप्रेतादयोऽसुराः ॥ पितरश्चैवकव्यानिविप्रस्यैवमुखाद्ध्रुवम् ॥ १६ ॥ देवेभ्यश्चपितृभ्यश्चयोदद्याद्यज्ञकर्मसु ॥ दानंहोमंबलिंचैवविनाविप्रेण
निष्फलम् ॥ १७ ॥ भुञ्जन्तिचासुरास्तत्रप्रेतादैत्याश्चराक्षसाः ॥ तस्माद्ब्राह्मणमाहूयतेषुकर्माणिकारयेत् ॥ १८ ॥ कालेदेशेचपात्रेचलक्षकोटिगुणं
भवेत् ॥ श्रद्धयाचद्विजंदृष्ट्वाप्रकुर्यादभिवादनम् ॥ १९ ॥ दीर्घायुस्तस्यवाक्येनचिरजीवीभवेन्नरः ॥ अनभिवादनाद्विप्रद्वेषादश्रद्धयापिच॥१२०॥
आयुःक्षीणंभवेत्पुंसांभूतिनाशश्चदुर्गतिः ॥ आयुर्वृद्धिर्यशोवृद्धिर्वृद्धिर्विद्याधनस्यच ॥ पूजयित्वाद्विजान्श्रेष्ठोभवेन्नास्त्यत्रसंशयः ॥ २१ ॥ नविप्र
पादोदककर्दमानिनवेदशास्त्रप्रतिघोषितानि ॥ स्वाहास्वधास्वस्तिविवर्जितानिश्मशानतुल्यानिगृहाणितानि ॥२२॥ नारदउवाच॥ कश्चपूज्यतमोवि
प्रोह्यपूज्योवाऽथकोभवेत् ॥ विप्रस्यलक्षणंब्रूहियाथातथ्यंगुरोरपि ॥२३॥ ब्रह्मोवाच ॥ पूज्यःश्रोत्रियकोनित्यंसदाचारसमन्वितः॥सद्वृत्तःकलुषैर्मुक्त
स्तीर्थभूतोजनोऽनघः ॥२४॥ नारदउवाच ॥ जातःकःश्रोत्रियस्तातसत्कुलेवाप्यसत्कुले॥सदसत्कर्मकर्तावाकःपूज्योभुविवाडवः ॥२५॥ ब्रह्मोवाच॥
सच्छ्रोत्रियकुलेजातोह्यक्रियोनैवपूजितः ॥ असत्क्षेत्रकुलेपूज्योव्यासवैभाण्डकौयथा ॥ २६ ॥ क्षत्रियाणांकुलेजातोविश्वामित्रोऽस्तिमत्समः ॥ वेश्या
पुत्रोवसिष्ठश्चअन्येसिद्धाद्विजादयः ॥२७॥ तस्मात्सच्छ्रोत्रियादीनांशृणुपुत्रकलक्षणम्॥ धरायांतीर्थभूतानांसर्वपापहरायच ॥२८॥ जन्मनाब्राह्मणो
ज्ञेयःसंस्कारैर्द्विजउच्यते ॥ विद्ययायातिविप्रत्वंत्रिभिःश्रोत्रियलक्षणम् ॥२९॥ विद्यापूतोमन्त्रपूतोवेदपूतस्तथैवच ॥ तीर्थस्नानादिभिर्मेध्योविप्रःपूज्य
तमःस्मृतः ॥ १३० ॥ नारायणेसदाभक्तःशुद्धान्तकरणस्तथा ॥ जितेन्द्रियोजितक्रोधस्समःसर्वजनेषुच ॥ ३१ ॥ गुरुदेवातिथेर्भक्तःपित्रोःशुश्रूषणे
रतः ॥ परदारेमनोयस्यकदाचिन्नैवमोदत ॥ ३२ ॥ पुराणकथकोनित्यंधर्माख्यानस्यसन्ततिः ॥ अस्यैवदर्शनान्नित्यमश्वमेधादिजंफलम् ॥ ३३ ॥
संलापेगतिमेत्यस्यभागीरथ्याप्लवस्यच ॥ व्रतैश्वविविधःपूतोनित्यस्नानद्विजार्चनैः ॥ ३४ ॥ मित्रामित्रेदयालुःस्यात्समःसर्वजनेषुच ॥ परस्वंनहरेद्य
स्तुतृणमप्यटवीगतम् ॥३५॥ कामक्रोधादिनिर्मुक्तइन्द्रियैरजितःपुमान् ॥ परदारान्नगृह्णातिमनसापिगृहागतान् ॥३६॥ नारदउवाच ॥गायत्र्यालक्षणं
किंवाप्रत्येकाक्षरजंगुणम्॥कुक्षिचरणगोत्राणांतस्याब्रूहिसुनिश्चयम् ॥३७॥ ब्रह्मोवाच ॥ छन्दोगायत्रीगायत्र्याःसवितादेवताध्रुवम् ॥ शुक्लवर्णात्वग्निमु
खाविश्वामित्रऋषिस्तथा॥३८॥ब्रह्मणश्शिरआरूढारुद्रविष्णुहृदिस्थिता॥उपनयनेनियोगःस्यात्साङ्ख्यायनसगोत्रजा ॥३९॥त्रैलोक्यचरणाज्ञेयापृथि
वीकुक्षिसंस्थिता॥चतुर्विंशतिस्थानेचपादादौमस्तकान्तके॥१४०॥चतुर्विंशत्यक्षरंन्यस्यब्रह्मलोकंसविन्दति ॥ प्रत्यर्णदेवतांज्ञात्वाविष्णुसायुज्यमाप्नु
यात्॥४१॥अपरंचप्रवक्ष्यामिगायत्र्यालक्षणंध्रुवम् ॥सतपञ्चतथाब्रह्मयजुरष्टादशाक्षरम् ॥४२॥ ज्वलनादिहकारान्तंजलेस्थित्वाशतंजपेत्॥उपपातक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कोट्यातुतथातिपातकैरपि ॥४३॥ ब्रह्महत्यादिभिःपापैर्मुक्तायान्तिममालयम् ॥ ॐअग्नेर्वाक्पुंसियजुर्वेदेनजुष्टात्सोमंपिबस्वाहा ॥४४॥ विष्णुमन्त्रंम
हामन्त्रंतथामाहेश्वरस्यच ॥ देवीसूर्यगणेशानांतथाक्रतुभुजांसुत ॥ ४५ ॥ यस्यकस्यकुलेजातोगुणवानेवतैर्गुणैः ॥ साक्षाद्ब्रह्ममयोविप्रःपूजनीयः
प्रयत्नतः ॥ ४६ ॥ दानंदद्याच्चविधिवत्सदापर्वणिपर्वणि ॥ अक्षयंलभतेदाताजन्मकोटिशतान्प्रति ॥ ४७ ॥ स्वाध्यायनिरतोविप्रोयःपठेत्पा
ठयेत्परान् ॥ धर्मंचश्रावयेल्लोकेसदाचारंश्रुतिंस्मृतिम् ॥ ४८ ॥ पुराणसंहितांनूनंतथैवधर्मसंहिताम् ॥ श्रावयित्वातुलोकेषुश्रावयित्वाद्विजातिषु
॥ ४९ ॥ उर्व्यांविष्णुसमःसोऽपिपूजनीयोनरैःसुरैः ॥ १५० ॥ यद्बलंचाक्षयंतस्यतीर्थभूतानघस्यच ॥ समानमर्चनंकृत्वानरोयात्यच्युतालयम्
॥ ५१ ॥ कदाचित्क्रियतेपापंविप्रःपापैर्नलिप्यते ॥ चाण्डालस्यगृहेनिष्ठौभास्करज्वलनौयथा ॥ ५२ ॥ याजनाध्यापनाद्यौनात्तथवासत्प्रतिग्रहार्त
विप्राणांनभवेद्दोषोज्वलनार्कसमाद्विजाः ॥५३॥ तान्प्रतिग्रहजान्दोषान्प्राणायामव्यवस्थिताः ॥ नाशयन्तीहपापानिवायुर्मेघमिवाम्बरे ॥ ५४ ॥
गायत्रींयोजपेन्नित्यंप्राणायामसमन्विताम् ॥ प्रत्यक्षरामरैर्युक्तांस्वाङ्गेविन्यस्यतामपि ॥ ५५ ॥ सर्वपापाद्विनिर्मुक्तोजन्मकोटिकृतादपि ॥ ब्रह्मणः
पदवींप्राप्यसगच्छेत्प्रकृतेःपरम् ॥ ५६ ॥ प्राणायामयुतांतस्माद्गायत्रींजपनारद ॥ ५७ ॥ नारदउवाच ॥ प्राणायामाःकथंब्रह्मन्प्रत्येकाक्षरदेवताः ॥
तेषांन्यासंतथाङ्गेषुवदतातयथाक्रमम् ॥ ५८ ॥ ब्रह्मोवाच ॥ गुददेशेत्वपानःस्याद्धृदिप्राणोऽस्तिदेहिनः ॥ तस्माद्गुदंसमाकुञ्च्यप्राणेनसहयोजयेत
॥ ५९ ॥ पूरकेणतदापुत्रकृत्वाकुम्भकमुत्तमम् ॥ प्राणायामत्रयंकृत्वागायत्रींसञ्जपेद्द्विजः ॥ १६० ॥ अनेनैवजपेद्यस्तुमहापातकसञ्चयः ॥ सकृ
दुच्चारितेनैवक्षयंयात्युपपातकम् ॥६१॥ प्रतिवर्णस्वरंज्ञात्वाविन्यसेद्यःकलेवरे ॥ सजनोब्रह्मतामेतिफलंवक्तुंनशक्नुमः ॥ ६२ ॥ प्रत्यक्षरस्ययद्दैवंशृ
णुपुत्रवदाम्यहम् ॥ यज्जप्त्वाचपुनर्मातुःस्तनंनपिबतिद्विजः ॥ ६३ ॥ आग्नेयंप्रथमंज्ञेयंवायव्यंतुद्वितीयकम् ॥ तृतीयसूर्यदैवत्यंचतुर्थंवैयतंतथा
॥ ६४ ॥ पञ्चमंयमदैवत्यंवारुणंषष्ठमुच्यते ॥ सप्तमंबार्हस्पत्यंतुपार्जन्यंचाष्टमंविदुः ॥ ६५ ॥ ऐन्द्रंचनवमंज्ञेयंगान्धर्वंदशमंतथा ॥ पौष्णमेकादशं
विद्धिमैत्रंद्वादशकंस्मृतम् ॥६६॥ त्वाष्ट्रंत्रयोदशज्ञेयंवासवंतुचतुर्दशम् ॥ मारुतंपञ्चदशकंसौम्यंषोडशकंस्मृतम् ॥६७॥ आङ्गिरसंसप्तदशंवैश्वदेवमतः
परम् ॥ आश्विनंचैकोनविंशंप्राजापत्यंतुविंशकम् ॥ ६८ ॥ सर्वदेवमयंज्ञेयमेकविंशकमक्षरम् ॥ रौद्रंद्वाविंशकंज्ञेयंब्राह्मंज्ञेयमतःपरम् ॥ ६९ ॥
वैष्णवंतुचतुर्विंशमेताअक्षरदेवताः ॥ जपकालेतुसञ्चिन्त्यतासुसायुज्यतांव्रजेत् ॥ १७० ॥ ज्ञात्वातुदेवतास्तस्यवाङ्मयंविदितंभवेत् ॥ सर्वपा
पविनिर्मुक्तोब्रह्मणःपदवींव्रजेत् ॥ ७१ ॥ गायत्रींविन्यसेत्पूर्वंशरीरेचात्मनोबुधः ॥ चतुर्विंशतिस्थानेषुआपादमस्तकेषुच ॥ ७२ ॥ तत्का

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रंविन्यसेद्योगीपादाङ्गुष्ठेविचक्षणः॥ सकारंगुल्फदेशेतुविकारंजङ्घयोर्न्यसेत् ॥ ७३ ॥ तुकारंजानुमध्येचवकारंचोरुदेशतः ॥ रेकारंगुह्यदेशेतुणिकारंवृष
णेन्यसेत् ॥७४॥ यङ्कारंकटिदेशेतुभकारंनाभिमण्डले॥गोकारंजठरेन्यस्यदेकारंस्तनयोर्न्यसेत् ॥७५॥ वकारंहृदयेन्यस्यस्यकारंकरदेशतः ॥ धीका
रंवदनेन्यस्यमकारंतालुकेन्यसेत् ॥७६॥ हिकारंनासिकाग्रेचधिकारंचक्षुषोर्न्यसेत् ॥ योकारंतुभ्रुवोर्मध्येयोकारंचललाटके ॥ ७७ ॥ नःकारंतुमुखेपू
र्वेप्रकारंदक्षिणेमुखे ॥ चोकारंपश्चिमेन्यस्यदकारंचोत्तरेन्यसेत् ॥ ७८ ॥ यात्कारंमूर्ध्निविन्यस्यसर्वव्यापीव्यवस्थितः ॥ एतान्विन्यस्यधर्मात्माब्र
ह्मविष्णुशिवात्मकः ॥७९॥ महायोगीमहाज्ञानीपरंनिर्वाणकंव्रजेत् ॥ सन्ध्याकालेपुनर्न्यासंशृणुत्वंतद्यथार्थतः ॥ १८० ॥ ॐभूरितिहृदयेन्यस्यॐ
भुवशिशरसिन्यसेत् ॥ ॐस्वःशिखायैतत्सवितुर्वरेण्यमितिकलेवरे ॥ ८१ ॥ ॐभर्गोदेवस्यधीमहीतिनेत्रयोः ॥ ओंधियोयोनःप्रचोदयादितिकर
योर्न्यसेत् ॥ ८२ ॥ ॐआपोज्योतीरसोऽमृतंब्रह्मभूर्भुवःस्वरोम् ॥ इत्युदकस्पर्शमात्रेणपापात्पूतोव्रजेद्धरिम् ॥८३॥ ॐभूःॐभुवःॐस्वःॐमहःॐजनः
ॐतपःॐसत्यम् ॥ ॐतत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहिधियोयोनःप्रचोदयात ॥ ॐआपोज्योतीरसोऽमृतंब्रह्मभूर्भुवःस्वरोम्॥इतिसव्याहृतिंसप्रणवां
दशोङ्कारांसन्ध्याकालेकुम्भकेनवारत्रयंजप्त्वासूर्योपस्थानेसावित्रींचतुर्विंशत्यक्षरांजप्त्वामहाविद्याधिकोभवति॥ ब्रह्मत्वंलभते॥षट्कुक्षिलक्षणांपुत्रगाय
त्रींशृणुयत्नतः ॥ यांज्ञात्वातुपरंब्रह्मस्थानंगच्छतिवैद्विजः ॥ ८४ ॥ ओंतत्सवितुर्वरेणियंभर्गोदेवस्यधीमहिधियोयोनःप्रचोदयात् ॥ ८५ ॥
अथगायत्रीपञ्चशीर्षलक्षणम् ॥ ॐभूः ॥ ॐभुवः ॥ ॐस्वः ॥ ॐमहः ॥ ॐजनः ॥ ॐतपः ॥ ॐसत्यम् ॥ ॐतत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहिधि
योयोनःप्रचोदयात् ॥ ८६ ॥ सव्याहृतिंतुगायत्रींपुनर्न्यासंतुकारयेत् ॥ सर्वपापविनिर्मुक्तोविष्णुसायुज्यतांव्रजेत् ॥ ८७ ॥ ॐभूःपादाभ्याम् ॥
ॐभुवःजानुभ्याम् ॥ ॐस्वःकट्याम् ॥ ॐमहःनाभौ ॥ ॐजनःहृदयेन्यसेत् ॥ ॐतपःकरयोः ॥ ॐसत्यंललाटे ॥ ॐतत्सवितुर्वरेणियं
भर्गोदेवस्यधीमहिधियोयोनःप्रचोदयात् ॥ इतिशिखायाम् ॥ ८८ ॥ एवंविप्रोनजानातिसएवब्राह्मणाधमः ॥ नतस्यक्षीयतेपाप्माभवेद्धूरिप्रति
ग्रहः ॥ ८९ ॥ इमांयोवेत्तिगायत्रींसवबीजसमन्विताम्॥सवेत्तिचतुरोवेदान्योगज्ञानंजपत्रयम् ॥ १९० ॥ यएनांनैवजानातिसशूद्रात्परतःस्मृतः ॥
तस्यापूतस्यविप्रस्यनदेयंपितृपार्वणम् ॥ ९१ ॥ नस्नानफलदःकश्चित्सर्वंचनिष्फलंभवत् ॥ विद्यावित्तंतथाजन्मद्विजत्वंकारणंयतः ॥९२॥ निष्फलं
सकलंतस्यमेध्यंपुष्पंयथाऽशुचौ ॥ चर्तुर्वेदाश्चगायत्रीपुरावैतुलितामया ॥ ९३ ॥ चतुर्वेदात्परागुर्वीगायत्रीमोक्षदास्मृता ॥ दशभिर्जन्मजनितंशते
नचपुराकृतम् ॥९४॥ त्रियुगंतुसहस्रेणगायत्रीहन्तिकिल्बिषम् ॥ गायत्रीमक्षमालायांसायंप्रातश्चयोजपेत् ॥९५॥ चतुर्णामपिवेदानांफलंप्राप्नोत्यसं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शयम् ॥ त्रिसन्ध्यंयोजपेन्नित्यंगायत्रींहायनंद्विजः ॥ ९६ ॥ तस्यपापंक्षयंयातिजन्मकोटिसमुद्भवम् ॥ गायत्र्युच्चारमात्रेणपापकूटात्पुना
तिच ॥ ९७ ॥ स्वर्गापवर्गमाप्नोतिजप्त्वानित्यंद्विजोत्तमः ॥ वासुदेवस्यमन्त्राणिजपेद्यस्तुदिनेदिने ॥ ९८ ॥ प्रणमेच्चहरेःपादौसगच्छेदपवर्गिताम् ॥
वासुदेवस्यस्तोत्राणिमुखेचापिकथोत्तमा ॥ ९९ ॥ पङ्कस्यलवमात्रंतुतस्यदेहेनतिष्ठति ॥ वेदशास्त्रावगाहेनत्रिस्रोतःस्नानजंफलम् ॥ २०० ॥ धर्मपाठ
कृतांलोकेयज्ञकोटिफलंलभेत् ॥ एवंविप्रगुणान्वक्तुंनशक्नोमिद्विजोत्तम ॥ १ ॥ विश्वरूपश्चकोदेहीसमूर्तोहरिरेवच ॥ यस्यशापाद्विनाशःस्यादायुर्वि
द्यायशोधनम् ॥ २ ॥ वरदानात्समायान्तिसर्वाःसम्पत्तयस्तथा ॥ विष्णुर्ब्रह्मण्यतामेतिसदाविप्रप्रसादतः ॥ ३ ॥ नमोब्रह्मण्यदेवायगोब्राह्मणहिताय
च ॥ जगद्धितायकृष्णायगोविन्दायनमोनमः ॥ ४ ॥ मन्त्रेणैवंहरिंयस्तुपूजयेत्सततंनरः ॥ प्रसादीचहरिस्तस्यविष्णुसायुज्यतांव्रजेत् ॥ ५ ॥ यइ
दंशृणुयात्पुण्यमाख्यानंधर्मविग्रहम् ॥ तस्यपापंक्षयंयातिजन्मजन्मकृतंचयत् ॥ ६ ॥ यःपठेत्पाठयेद्वापिउपदेष्टाजनस्यच ॥ नतस्यपुनरावृत्तिः
स्वर्गमक्षयमश्नुते ॥ ७ ॥ धनंधान्यंलभेदत्रराज्यभोगानरोगिताम् ॥ सत्सुतंचशुभांकीर्तिंदेववद्रमतेदिवि ॥ २०८ ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टि
खण्डेब्राह्मणसंस्कारोनामाष्टचत्वारिंशत्तमोऽध्यायः ॥ ४८ ॥ नारदउवाच ॥ तवप्रसादतोज्ञातोविप्रःपुण्यतमश्चयः ॥ यथाजानामिदेवेशक्रि
ययाब्राह्मणाधमम् १ ॥ ब्रूहिशीघ्रंसुरश्रेष्ठयदिप्रीतिंमयीच्छसि ॥ २ ॥ ब्रह्मोवाच ॥ स्नानैर्दशविधैर्मुक्तस्तथैवतर्पणादिभिः ॥ सन्ध्यासंयमहीनश्च
सएवब्राह्मणाधमः ॥ ३ ॥ देवपूजाव्रतैर्मुक्तोवेदविद्यादिभिस्तथा ॥ सत्यशौचादिभिश्चैवयोगज्ञानाग्नितर्पणैः ॥ ४ ॥ पञ्चस्नानानिविप्राणांकीर्तिता
निमहर्षिभिः ॥ आग्नेयंवारुणंब्राह्मंवायव्यंदिव्यमेवच ॥ ५ ॥ आग्नेयंभस्मनास्नानमद्भिर्वारुणमुच्यते ॥ आपोहिष्ठेतिवैब्राह्मंवायव्यंगोरजःस्मृतम् ॥
॥ ६ ॥ अद्भिरातपवर्षाभिर्दिव्यंस्नानमुदाहृतम् ॥ एतैस्तुमन्त्रतःस्नानात्तीर्थानांफलमाप्नुयात् ॥ ७ ॥ तुलसीपत्रसंलग्नंशालग्रामशिलाम्बुच ॥ ग
वांशृङ्गोदकंचैवविप्रपादोदकंचयत् ॥ गुरूणामेवमुख्यानांपूतात्पूतमितिस्मृतिः ॥ ८ ॥ त्यागतीर्थादिभिर्यज्ञैर्व्रतहोमादिभिस्तथा ॥ यत्फलंलभतेधीरःस्ना
नैरेतैस्तुतत्फलम् ॥ ९ ॥ तर्पणैश्चविनिर्मुक्तःपितॄणामेवनित्यशः ॥ पितृहानरकंयातिसन्ध्याहीनस्तुविप्रहा ॥ १० ॥ मन्त्रव्रतविहीनश्चवेदविद्यागु
णैरपि ॥ यज्ञदानादिभिर्मुक्तोब्राह्मणश्चाधमाधमः ॥ ११ ॥ यज्ञार्थकादेवलकानाक्षत्राग्रामयाजकाः ॥ परदाररतानित्यंपञ्चैतेब्राह्मणाधमाः ॥ १२ ॥
मन्त्रसंस्कारहीनाश्चशुचिसंयमवर्जिताः ॥ मोघाशिनोदुरात्मानोब्राह्मणाश्चाधमाधमाः ॥ १३ ॥ अपिस्तेयरतामूढाःसर्वधर्मविवर्जिताः ॥ उन्मा
र्गगामिनोनित्यंब्राह्मणाश्चाधमाधमाः ॥ १४ ॥ श्राद्धादिकर्मरहितागुरुसेवाविवर्जिताः ॥ अमन्त्राभिन्नमर्यादाएतेसर्वाधमाधमाः ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

असम्भाष्याइमेदुष्टास्सर्वेनिरयगामिनः॥अमेध्यास्तेदुराचाराअपूज्याश्चसमन्ततः ॥१६॥खड्गोपजीविकाःप्रेष्यागोवाहनरताद्विजाः॥कारुवृत्त्युपजी
वाश्चगणवार्द्धुषिकाश्चये ॥१७॥ बालापण्याभिचाराश्चअन्त्यजाश्रयमाश्रिताः ॥ कृतघ्नाश्चगुरुघ्नाश्चएतेसर्वाधमाःस्मृताः ॥ १८ ॥ येचैवान्येहता
चाराःपाषण्डाधर्मनिन्दकाः॥दूषकादेवभेदानामेतेब्रह्मद्विषोद्विजाः॥१९॥ तथापिब्राह्मणश्चैवनहन्तव्यःकदाचन॥एनंहत्वाद्विजश्रेष्ठब्रह्महापुरुषोभवेत्॥
॥ २० ॥ अन्त्यजातिषुम्लेच्छेषुतथाचाण्डालजातिषु ॥ पतितोवान्नयोनिभ्यांनहन्तव्यःकथञ्चन ॥ २१ ॥ सर्वजातिस्त्रियंगत्वासर्वाभक्ष्यस्यभक्ष
णात् ॥ द्विजत्वंनविनश्येतपुण्याद्विप्रोभवेत्पुनः ॥ २२ ॥ नारदउवाच ॥ ईदृशंदुष्कृतंकृत्वापश्चात्पुण्यंसमाचरेत् ॥ कांगतिंयात्यसौविप्रःसर्व
लोकपितामहः ॥ २३ ॥ ब्रह्मोवाच ॥ कृत्वासर्वाणिपापानिपश्चाद्यस्तुजितेन्द्रियः ॥ मुच्यतेसर्वपापेभ्यःपुनर्ब्रह्मत्वमर्हति ॥ २४ ॥ शृणुपुत्रकथांरम्यां
विचित्रांचपुरातनीम् ॥ कस्यचिद्ब्राह्मणस्यापियौवनाढ्यःसुतोऽभवत् ॥ २५ ॥ ततोयौवनसम्पत्तेर्मोहाच्चपूर्वकर्मणः ॥ चाण्डालीमगमत्सद्यस्तस्याः
प्रियतरोऽभवत् ॥ २६ ॥ तस्यामुत्पादितास्तेनपुत्रादुहितरस्तथा ॥ स्वकुटुम्बंपरित्यज्यगृहेतस्याश्चिरंस्थितः ॥ २७ ॥ अन्याभक्ष्यंनचाश्नातिघृ
णयाचसुरांत्यजेत् ॥ तमुवाचसदासाचभक्षयान्यतरांसुराम् ॥ २८ ॥ तामुवाचतदाशौचंगदितुंनार्हसिप्रिये ॥ उत्कारोजायतेतस्याःश्रवणात्स
ततंमम ॥ २९ ॥ एकदासमृगान्वेषाच्छ्रांतःसुप्तोगृहेदिवा ॥ गृहीत्वासासुरांतस्यहसित्वाचमुखेददौ ॥ ३० ॥ ततोविप्रमुखादग्निःप्रजज्वालस
मन्ततः ॥ ज्वालातुसकुटुम्बांतामदहच्चगृहंवसु ॥ ३१ ॥ हाहाकृत्वासमुत्थायविललापतदाद्विजः ॥ विलापान्तेचजिज्ञासासमारब्धाचतेनहि ॥
॥ ३२ ॥ कुतश्चाग्निःसमुद्भूतोगृहेदाहःकथंमम ॥ ततःखेतमुवाचेदंतेजस्तेब्राह्मणस्यच ॥ ३३ ॥ कथितेतद्यथावृत्तेब्राह्मणोविस्मयंगतः ॥ वि
मृश्यार्थमुवाचेदंपुनःखेऽस्यहितंवचः ॥ ३४ ॥ विप्रनष्टंसुतेजस्तेतस्माद्धर्मचरोभव ॥ ततोमुनिवरान्गत्वापप्रच्छात्महितंद्विजः ॥ ३५ ॥ तमू
चुर्मुनयःसर्वेदानधर्मंसमाचर ॥ ३६ ॥ ऋषयऊचुः ॥ पूयन्तेसर्वपापेभ्योब्राह्मणानियमैर्व्रतैः ॥ नियमाञ्शास्त्रदृष्टांश्चपूतत्वार्थमुपाचर ॥ ३७ ॥
चान्द्रायणांश्चकृच्छ्रांश्चतप्तकृच्छ्रान्पुनःपुनः ॥ प्राजापत्यांश्चदिव्यांश्चदोषशोषायसत्वरम् ॥ ३८ ॥ गच्छतीर्थानिपूतानिगोविन्दाराधनंकुरु ॥
क्षयमेष्यन्तिपापानिनचिरेणसमन्ततः ॥ ३९ ॥ पुण्यतीर्थप्रभावाच्चगोविन्दस्यप्रभावतः ॥ क्षयमेष्यन्तिपापानिब्रह्मत्वंप्राप्स्यतेभवान् ॥ ४० ॥
शृणुतातयथावृत्तंकथयामःपुरातनम् ॥ आहारार्थीपुरावत्सगरुडोविनतासुतः ॥ ४१ ॥ पतङ्गोऽपिबहिःसाक्षादण्डान्निस्सृत्यशावकः ॥
क्षुधार्थीमातरंप्राहभक्ष्यंमेदीयतामिति ॥ ४२ ॥ ततःपर्वतसङ्काशंगरुडंचमहाबलम् ॥ दृष्ट्वामातामहाभागातनयंहृष्टमानसा ॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विनतोवाच ॥ क्षुधांतेबाधितुंपुत्रनशक्नोमिसमन्ततः ॥ तवतातस्तपस्तेपेलौहित्यस्योत्तरेतटे ॥ ४४ ॥ कश्यपोनामधर्मात्मासाक्षा
ल्लोकपितामहः ॥ तत्रगच्छस्वपितरंपृच्छकामंयथातव ॥ अस्योपदेशतस्तातक्षुधातेशममेष्यति ॥ ४५ ॥ ऋषयऊचुः ॥ ततोमातुर्वचःश्रुत्वावै
नतेयोमहाबलः ॥ अगमत्पितुरभ्याशंसमुहूर्तान्मनोजवः ॥ ४६ ॥ दृष्ट्वातातंमुनिश्रेष्ठंज्वलन्तमिवपावकम् ॥ प्रणम्यशिरसावाक्यमुवाचपितरंखगः॥
॥ ४७ ॥ वैनतेयउवाच ॥ भक्षार्थीसमनुप्राप्तःसुतोऽहंतेमहात्मनः ॥ क्षुधयापीडितोनाथभक्ष्यंमेदीयतांप्रभो ॥ ४८ ॥ ऋषयऊचुः ॥ ततोध्या
नंसमालम्ब्यज्ञात्वातंविनतासुतम् ॥ पुत्रस्नेहाद्वचश्चेदंप्रोवाचमुनिसत्तमः ॥४९॥ कश्यपउवाच॥अनेकशतसाहस्रानिषादाःसरितांपतेः ॥ तीरेतिष्ठ
न्तिपापिष्ठास्तान्सम्भक्ष्यसुखीभव ॥५०॥ तीर्थमुत्सादयन्तिस्मतीर्थकाकादुरासदाः ॥ विनाविप्रंनिषादेषुभक्षयत्वमलक्षितम् ॥५१॥ ऋषयऊचुः ॥
इत्युक्तःप्रययौपक्षीभक्षयामासतांस्ततः ॥ अलक्ष्यभावोविप्रोऽपिगिलितस्तेनपक्षिणा ॥ ५२ ॥ सतस्यगलकेगाढंलालगीतिद्विजस्तदा ॥ व
मितुंगिलितुंचापिनशशाकद्विजोत्तमम् ॥ ५३ ॥ गत्वाथपितरंप्राहकिमेतदितिमेपितः ॥ लग्नंमेगलकेसत्त्वंप्रतिकर्तुंनशक्नुयाम् ॥ ५४ ॥
ऋषयऊचुः ॥ तस्यतद्वचनंश्रुत्वाकश्यपस्तमुवाचह ॥ ५५ ॥ कश्यपउवाच ॥ मयोक्तंतेपुरावत्सब्राह्मणोऽयंनबुध्यसे ॥ ५६ ॥ ऋषयऊचुः ॥
इत्युक्त्वाचमुनिर्धीमान्द्विजंप्राहसधार्मिकः ॥ ५७ ॥ कश्यपउवाच ॥ आगच्छत्वंममासन्नंहितंतेप्रवदाम्यहम् ॥ ५८ ॥ ऋषयऊचुः ॥ तमुवा
चतदाविप्रःकश्यपंमुनिपुङ्गवम् ॥५९॥ विप्रउवाच ॥ ममैतेसुहृदोनित्यंसर्वेसम्बन्धिनःप्रियाः ॥ श्वशुराःश्यालकाश्चाप्तास्सबालाश्चतथापरे ॥६०॥
एतैःसहप्रयास्यामिनिरयंचापिवाशिवम् ॥६१॥ ऋषयऊचुः ॥ तस्यतद्वचनंश्रुत्वाविस्मितःकश्यपोऽब्रवीत् ॥६२ ॥ कश्यपउवाच॥ द्विजानांचकुले
जातश्चाण्डालैःपतितोभवान् ॥ पुरुषास्तेप्रतिष्ठन्तेघोरेचनिलयेध्रुवम् ॥ ६३ ॥ चिरायनिष्कृतिस्तेषांनैवास्तीहकथञ्चन ॥ सर्वांश्चैवदुराचारांश्चाण्डा
लान्पापकारिणः ॥ ६४ ॥ दोषांस्त्यक्त्वानरःपश्चात्सुखीभवतिनान्यथा ॥ ६५ ॥ अज्ञानाद्यदिवामोहात्कृत्वापापंसुदारुणम् ॥ ततोधर्मंचरे
द्यस्तुसगच्छेत्परमांगतिम् ॥ ६६ ॥ पापकृन्नचरेद्धर्मंपापेकर्यान्मतिंपुनः ॥ शिलानावंयथारूढःसागरेसंनिमज्जति ॥ ६७ ॥ कृत्वासर्वाणि
पापानितथादुर्गतिसञ्चयम् ॥ उपशान्तोभवेत्पश्चात्तद्दोषंशमयिष्यति ॥ ६८ ॥ ऋषयऊचुः ॥ तमुवाचमहाप्राज्ञंद्विजंमुनिवरोत्तमम् ॥ ६९ ॥ विप्र ॥ १६३ ॥
उवाच ॥ यदिमांनजहातीहखगःसर्वांश्चबान्धवान्॥ततःप्राणंचत्यक्ष्यामिखगेमर्मावघातिनि ॥७०॥ नोचेत्त्यजतुमेबन्धून्प्रतिज्ञामेदृढात्मनः ॥७१॥
ऋषयऊचुः॥ततस्ताक्ष्यमुवाचेदंमुनिर्ब्रह्मवधभयात् ॥ ७२ ॥ कश्यपउवाच॥उद्गमैतान्सविप्रांश्चम्लेच्छानेतान्समन्ततः ॥ वनेषुपर्वतान्तेषुदिक्षुतान्प

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तगेश्वर ॥ ७३ ॥ ऋषयऊचुः ॥ उद्ववामततःशीघ्रंदोषज्ञःपितुराज्ञया ॥ ततःसर्वेऽभवन्व्यक्ताअकेशाःश्मश्रुवर्जिताः ॥ ७४ ॥ यवनाभोजन
प्रीताःकिञ्चिच्छ्मश्रुयुताश्चये ॥ अग्नौचनग्नकाःपापादक्षिणस्यामवाचकाः ॥ ७५ ॥ घोराःप्राणिवधेप्रीतादुरात्मानोगवाशिनः ॥ नैर्ऋतेकुवदाः
पापागोब्राह्मणवधोद्यताः ॥ ७६ ॥ खर्पराःपश्चिमेपूर्वेनिवसन्तिचदारुणाः ॥ वायव्यांचतुरुष्काश्चश्मश्रुपूर्णागवाशिनः ॥ ७७ ॥ अश्व
पृष्ठसमारूढाःप्रयुद्धेष्वनिवार्तिनः ॥ उत्तरस्यांचगिरयोम्लेच्छाःपर्वतवासिनः ॥ ७८ ॥ सर्वभक्षादुराचारावधबन्धरताःकिल ॥ ऐशान्यांनि
रयाःसन्तिकर्तॄणांवृक्षवासिनः ॥ ७९ ॥ एतेम्लेच्छास्थितादिक्षुचोरास्तेशस्त्रपाणयः ॥ येषांचस्पर्शमात्रेणसचैलोजलमाविशेत् ॥ ८० ॥ ए
तेषांचकलौदेशेऽप्यकालेधर्मवर्जिते ॥ संस्पर्शंचप्रकुर्वन्तिवित्तलोभात्समन्ततः ॥ ८१ ॥ म्लेच्छांस्तान्मोचयित्वातुक्षुधयापरिपीडितः ॥ पुन
राहद्विजस्तातक्षुधामेबाधतेतराम् ॥ अवदद्गरुडंतत्रकश्यपःकृपयाद्रुतम् ॥ ८२ ॥ कश्यपउवाच ॥ तिष्ठन्तौविपुलौतत्रजिघांसूगजकच्छ
पौ ॥ अप्रमेयौमहासत्त्वौसागरस्यैकदेशतः ॥ तावप्सुचद्रुतंवत्सक्षुधांतेवारयिष्यतः ॥ ८३ ॥ ऋषयऊचुः ॥ सपितुर्वचनंश्रुत्वातत्रगत्वा
भिपद्यतौ ॥ नखैर्भित्त्वाकूर्मगजौमहासत्त्वौमहाजवः ॥ ८४ ॥ खमुत्पपाततौधृत्वाविद्युद्वेगोमहाबलः ॥ आधारतांनगच्छन्तिनगाश्चमन्दरा
दयः ॥ ८५ ॥ ततोयोजनलक्षेद्वेगत्वामारुतरंहसा ॥ महत्यांजम्बुशाखायांनिपपातमहाबलः ॥ ८६ ॥ भग्नासासहसाशाखातांपतन्तींखगेश्वरः ॥
गोब्राह्मणवधाद्भीतोदधारतरसाबली ॥ ८७ ॥ धृत्वातांरुचिरंवेगाद्व्रजन्तंखेमहाबलम् ॥ गत्वाविष्णुरुवाचेदंनररूपधरोहरिः ॥८८॥ विष्णुरुवाच ॥
कस्त्वंभ्रमसिचाकाशेकिमर्थंपतगेश्वर ॥ विधृत्यमहतींशाखांमहान्तौगजकच्छपौ ॥ ८९ ॥ तमुवाचद्विजस्तस्मिन्नररूपधरंहरिम् ॥ गरुडोऽहंमहाबा
होखगरूपःस्वकर्मणा॥९०॥ कश्यपस्यमुनेस्सूनुर्विनतागर्भसम्भवः ॥ पश्यैतौचमहासत्त्वौभक्षणार्थंमयाधृतौ ॥९१॥ नधराचममाधारोनवृक्षानचप
र्वताः ॥ अनेकयोजनान्यूर्ध्वंदृष्ट्वाजम्बूमहीरुहम् ॥९२॥ अपतंतस्यशाखायांसहेमौपरिभक्षितुम् ॥ भग्नासासहसाशाखातांचधृत्वाभ्रमाम्यहम् ॥९३॥
कोटिकोटिसहस्राणांब्राह्मणानांगवांवधात् ॥ भयंतत्रविषादोमेसहसाप्राविशद्विभुध ॥ किंकरोमिकथंयामिकोमेवेगंसहिष्यति ॥ ९४ ॥ ऋषयऊचुः ॥
इत्युक्तःपतगश्रेष्ठंप्रोवाचेदंहरिस्तदा ॥ ९५ ॥ विष्णुरुवाच ॥ अस्मद्बाहुंसमारुह्यभक्षेमौगजकच्छपौ ॥ ९६ ॥ गरुडउवाच ॥ ॥ ममाधारंनगच्छ
न्तिसागराश्चनगोत्तमाः ॥ अथचैवंमहासत्त्वंकथंत्वंधारयिष्यसि ॥९७॥ ऋतेनारायणादन्यःकोमांधारयितुंक्षमः ॥ त्रैलोक्येकःपुमांस्तिष्ठेद्योवेगंमे
सहिष्यति ॥ ९८ ॥ हरिरुवाच ॥ स्वकार्यमुद्धरेत्प्राज्ञःस्वकार्यंकुरुसाम्प्रतम् ॥ कृत्वाकार्यंखगश्रेष्ठविजानीषेचमांध्रुवम् ॥९९॥ ऋषयऊचुः ॥ महा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्त्वंचतंदृष्ट्वाविमृश्यमनसाखगः ॥ एवमस्त्वितिचोक्त्वासपपातहमहाभुजे ॥१००॥ नचचालभुजस्तस्यसन्निपातखगेशितुः ॥ तत्रस्थित्वासतांशा
खांसुमोचपर्वतालये ॥१॥ शाखापतनमात्रेणसचराचरकानना ॥ चचालवसुधाचैवसागराःप्रचकम्पिरे॥२॥ततश्चखादितौसत्त्वौसहसागजकच्छपौ॥
तृप्तिंनप्राप्तवान्सोऽपिक्षुधातस्यनशाम्यति ॥३॥ एतज्ज्ञात्वातुगोविन्दस्तमुवाचखगेश्वरम्॥४॥ विष्णुरुवाच ॥ भुजस्यममांसंतुभक्षयित्वासुखीभव
॥५॥ऋषयऊचुः॥इत्युक्तेप्रचुरंमांसंभुजस्यतस्यतेनहि ॥ खादितंक्षुधयापुत्रव्रणंतस्यनविद्यते॥तमुवाचमहाप्राज्ञश्चराचरगुरुंहरिम्॥६॥ वैनतेयउवाच॥
कस्त्वंकिंवाप्रियंतेऽद्यकरिष्यामिचसाम्प्रतम् ॥ ७ ॥ नारायणउवाच ॥ विद्धिनारायणंमांहित्वत्प्रियाथसमागतम् ॥ ८ ॥ ऋषयऊचुः ॥ रूपंस्वं
दर्शयामासप्रत्ययार्थंचतस्यवै॥ पीतवस्त्रंघनश्यामंचतुर्भुजमनोहरम् ॥९॥ शङ्खचक्रगदापद्मधरंसर्वसुरेश्वरम् ॥ तंचदृष्ट्वागरुत्मांश्चप्रणम्यशिरसाहरिम्
॥११०॥ वैनतेयउवाच॥प्रियंकिंतेकरिष्यामिवदनःपुरुषोत्तम ॥११॥ऋषयऊचुः॥तमब्रवीन्महातेजादेवदेवेश्वरोहरिः॥१२॥विष्णुरुवाच॥भवमेवाहनं
शूरसखेत्वंसार्वकालिकम्॥१३॥ऋषयऊचुः॥ तमुवाचखगश्रेष्ठोधन्योऽहंविबुधेश्वर॥सफलंजन्ममेनाथत्वांचदृष्ट्वाद्यमेप्रभो ॥ १४ ॥ प्रार्थयित्वाचपित
रावागमिष्यामितेऽन्तिकम् ॥ प्रीतोविष्णुरुवाचेदंभवत्वमजरामर ॥१५ ॥ अवध्यःसर्वभूतेभ्यःकर्मतेजश्चमत्समम्॥सर्वत्रतेगतिश्चास्तुनिखिलंतुसुखं
ध्रुवम् ॥ १६ ॥ संमिलतुद्रुतंसर्वंयत्तेमनसिवर्तते ॥ यथेष्टंप्रीतिमाहारमकष्टेनप्रलप्स्यसे ॥ १७ ॥ व्यसनान्मातरंसद्योमोचयिष्यसिनान्यथा ॥ एव
मुक्त्वाहरिःसद्यस्तत्रैवान्तरधीयत ॥ १८ ॥ तार्क्ष्योऽपिपितरंगत्वाकथयच्चाखिलंततः ॥ सतच्छ्रुत्वाप्रहृष्टात्मातनयंपुनरब्रवीत्॥१९॥कश्यपउवाच ॥
धन्योऽहंचखगश्रेष्ठधन्यातेजननीशिवा ॥ धन्यंक्षेत्रंकुलंचैवयस्यपुत्रस्त्वमीदृशः ॥ १२० ॥ यस्यपुत्रःकुलेजातोवैष्णवःपुरुषोत्तमः ॥ कुलकोटिं
समुद्धृत्यविष्णुसायुज्यतांव्रजेत् ॥ २१ ॥ विष्णुंयःपूजयेन्नित्यंविष्णुंध्यायेतगायति ॥ जपेन्मन्त्रंसदाविष्णोःस्तोत्रंतस्यपठिष्यति ॥ २२ ॥
प्रसादंचभजेन्नित्यमुपवासंहरेर्दिने ॥ क्षयाच्चसर्वपापानांमुच्यतेनात्रसंशयः ॥ २३ ॥ यस्यतिष्ठतिगोविन्दोमानसेचसदैवहि ॥ सएवनरशार्दूलोविष्णु
लोकेमहीयते ॥ २४ ॥ जलेविष्णुःस्थितोनित्यंरम्यस्थानेचसत्पथे ॥ गविविप्रेसदास्वर्गेब्रह्मागारेशुचेर्गृहे ॥ २५ ॥ एतेषुचजपेद्यस्तुसपुण्यःपुरु
षोत्तमः ॥ जन्मकोटिसहस्रेभ्यःकृत्वासत्कर्मसञ्चयम् ॥ २६ ॥ क्षयाच्चसर्वपापानांविष्णोःकिङ्करतांव्रजेत् ॥ धन्योऽसौमानवोलोकेविष्णोस्साहृश्य
माव्रजेत् ॥ २७ ॥ नित्यःसुरवरैःपूज्योलोकनाथोऽच्युतोऽव्ययः ॥ सुप्रसन्नोभवेद्यस्यसएवपुरुषोत्तमः ॥२८॥ तपोभिर्बहुभिर्धर्मैर्मखैर्नानाविधैरपि॥
विष्णुर्नलभ्यतेदेवैस्त्वयाऽसौविप्रलभ्यते ॥ २९ ॥ सपत्नीव्यसनाद्घोरान्मातरंतेप्रमोचय ॥ ततोयास्यसिदेवेशंकृत्वामातुःप्रतिक्रियाम् ॥ १३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऋषयऊचुः ॥ गृहीत्वाजनकस्याज्ञांलब्ध्वाविष्णोर्वरंमहत् ॥ अम्बापार्श्वंगतोहृष्टस्तांप्रणम्याग्रतःस्थितः ॥ ३१ ॥ विनतोवाच ॥ अभवद्भोजनंतेऽद्य
पुत्रदृष्टःपितापिच ॥ किमर्थंवाविलम्बस्तेचिन्तयाव्यथिताह्यहम् ॥ ३२ ॥ ऋषयऊचुः॥समातुर्वचनंश्रुत्वागरुडःप्रहसन्निव ॥ कथयामासवृत्तान्तंसा
श्रुत्वाविस्मिताभवत् ॥ ३३ ॥ विनतोवाच॥कथंचदुष्करंकर्मशिशुभावात्त्वयाकृतम् ॥ धन्याहंमेकुलंधन्यंयस्त्वंविष्णुसखोऽभवः ॥ ३४ ॥ लब्ध्वा
वरंमहात्मानंदृष्ट्वामेहृष्यतेमनः ॥ पौरुषेणत्वयावत्सउद्धृतंमेकुलद्वयम् ॥ ३५ ॥ सुपर्णउवाच ॥ मातःकिंतेकरिष्यामिप्रियमेवतदुच्यताम् ॥ कार्यं
कृत्वाथयास्यामिपार्श्वंनारायणस्यच ॥ ३६ ॥ ऋषयऊचुः॥एतच्छ्रुत्वातुसाप्राहगरुडंविनतासती ॥ महद्दुःखंचमेचास्तिकुरुतातप्रतिक्रियाम्॥३७॥
भगिनीमेसपत्नीसापणिताहंतयापुरा ॥ तस्यादास्यमहंप्राप्ताकस्तारयतिमामितः ॥ ३८ ॥ कृष्णंकृत्वाविषैरश्वंतस्याःपुत्रैर्महोरगैः ॥ उषःकालेऽवद
त्साचअश्वोऽयंकृष्णतांव्रजेत् ॥ ३९ ॥ ततोऽहमवदंतत्रसदाचार्यरुचासितः ॥ मिथ्यातेवचनंमातःप्रतिज्ञांसाकरोत्तदा ॥ १४० ॥ ततोऽहमब्रवंकद्रूं
शपथंनागमातरम् ॥ यदीमंकृष्णताभ्येतिहरेरश्वमहंतदा ॥ कृताभवामितेदासीत्यहमेतत्तदाऽवदम् ॥ ४१ ॥ ततस्तस्मिन्हरेरश्वेकृतेकृष्णेचकृत्रिमैः॥
तस्याःपुत्रैश्चधूर्तैश्चदासीत्वमगमंतदा ॥ ४२ ॥ यस्मिन्कालेह्यभीष्टश्चतस्याद्रव्यंददाम्यहम् ॥ तस्मिन्कालेह्यदासीत्वंयास्यामिकुलनन्दन ॥ ४३ ॥
गरुडउवाच ॥ पृच्छशीघ्रंचमातस्तांकरिष्यामिप्रतिक्रियाम् ॥ भक्षयिष्यामितान्नागान्प्रतिज्ञामेयथार्थतः ॥ ४४ ॥ ऋषयऊचुः ॥ ततःकद्रूमुवाचेदं
विनतादुःखितासती ॥४५॥ विनतोवाच॥अभीष्टंवदकल्याणियेनमुच्येयकृच्छ्रतः॥४६॥ऋषयऊचुः॥अब्रवीत्सादुराचारापीयूषंदीयतामिति॥एतच्छ्रु
त्वातुवचनमभवत्साचनिष्प्रभा॥ततःशनैरुपागम्यतनयंप्राहदुःखिता॥४७॥विनतोवाच॥अमृतंप्रार्थयत्पापातातकिंवाकरिष्यसि॥४८॥ऋषयऊचुः॥
श्रुत्वावाक्यंगरुत्मांश्चमहाक्रोधसमन्वितः॥४९॥गरुडउवाच॥अमृतंचानयिष्यामिमातर्माविमुखीभव ॥१५०॥ ऋषयऊचुः॥एवमुक्त्वातुतरसासगतः
पितुरन्तिकम् ॥५१॥ गरुडउवाच॥अमृतंचानयिष्यामिमातुरर्थेऽधुनाऽनघ॥५२॥ ऋषयऊचुः॥सतस्यवचनंश्रुत्वामुनिःप्राहखगेश्वरम्॥५३॥कश्यप
उवाच॥सत्यलोकस्यवैचोर्ध्वेविश्वकर्मविनिर्मिता॥पुरीचास्तिसभारम्यादेवानांहितहेतवे॥५४॥ वह्निप्राकारदुर्लभ्यादुर्धर्षाचासुरैःसुरैः॥रक्षार्थंनिर्मितो
देवःसुरैस्तत्रमहाबलः ॥५५॥ यंयंपश्यतिवीरःससएवभस्मतांव्रजेत् ॥५६ ॥ सुपर्णउवाच ॥ नारायणाद्वरोलब्धोमयाचमुनिसत्तम ॥ भयंनास्तीहमे
तातसुरासुरगणादपि ॥ ५७ ॥ ऋषयऊचुः ॥ एवमुक्त्वागरुत्मान्सउद्धृत्यसागराज्जलम् ॥ जगामाकाशमाविश्यखगश्चोर्ध्वमनोजवः ॥५८॥ पक्षवा
तेनतस्यैवरजःसमुद्गतंबहु॥तस्यान्तिकंनचत्यक्तमगमत्तस्यतच्चयः ॥५९॥ गत्वाचञ्चूजलेनापिवह्निंनिर्वापयद्बली ॥ रजोभिःपरिपूर्णाक्षोनसुरस्तंचप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्यति ॥ १६० ॥ जघानरक्षिवर्गांस्तानमृतंचाहरद्बली ॥ आनयन्तंचपीयूषंखगंगत्वाशतक्रतुः ॥ ६१ ॥ ऐरावतंसमारूढोवाक्यमेतदुवाचह ॥
॥ ६२ ॥ इन्द्रउवाच ॥ खगरूपधरःकस्त्वंपीयूषंहरसेबलात् ॥ अप्रियंसर्वदेवानांकृत्वाजीवेरितःकथम् ॥६३॥ विशिखैरग्निसङ्काशैर्नयामियममन्दि
रम् ॥ ६४ ॥ ऋषयऊचुः ॥ श्रुत्वावाक्यंहरेःकोपादुवाचसमहाबलः ॥ ६५ ॥ गरुडउवाच ॥ नयामितवपीयूषंदर्शयस्वपराक्रमम् ॥ ६६ ॥ ऋषय
ऊचुः ॥ एतच्छ्रुत्वामहाबाहुर्जघानविशिखैःशितैः ॥ यथामेरुगिरेःशृङ्गंतोयवर्षेणतोयदः ॥ ६७ ॥ नखैरशनिसङ्काशैर्बिभेदगरुडोगजम् ॥ मात
लिंचरथंचक्रंतथादेवान्पुरस्सरान् ॥ ६८ ॥ व्यथितोऽसौमहाबाहुर्मातलिर्गजपुङ्गवः ॥ विमुखाःपक्षवातेनसर्वेदेवगणास्तदा ॥ ६९ ॥
ततस्तुकोपितोजिष्णुर्जघानकुलिशेनतम् ॥ कुलिशस्यावपातेननचक्षुब्धोमहाखगः ॥ १७० ॥ स्वंमोघंभिदुरंदृष्ट्वाहरिर्भीतोऽभवत्तदा ॥
संनिवृत्त्यततोयुद्धात्तत्रैवान्तरधीयत ॥ ७१ ॥ सुतरामपिगच्छन्तंवेगाद्भूतलमागतः ॥ अब्रवीत्ससुरश्रेष्ठःसर्वदेवगणाग्रतः ॥ ७२ ॥
शक्रउवाच ॥ यदिदास्यसिपीयूषमिदानींनागमातरि ॥ भुजगाश्चामराःसर्वेक्रियन्तेहिध्रुवंतया ॥ ७३ ॥ प्रतिज्ञातेभवेन्नष्टानफलंजी
वितस्यते ॥ तस्मादिदंहरिष्यामिसंमतेनतवानघ ॥ ७४ ॥ गरुत्मानुवाच ॥ यस्मिन्कालेह्यदासीसामातामेदुःखितासती ॥ विदितास
र्वलोकेषुहरेऽमृतंहरिष्यसि ॥ ७५ ॥ ऋषयऊचुः ॥ एवमुक्त्वामहावीर्योगत्वोवाचप्रसूंतदा ॥ ७६ ॥ गरुडउवाच ॥ आनीतममृतंमातस्तस्याएव
प्रदीयताम् ॥ ७७ ॥ ऋषयऊचुः ॥ प्रोत्फुल्लहृदयासाचदृष्ट्वापुत्रंसहामृतम् ॥ तामाहूयामृतंदत्त्वाचादासीत्वंतदागता ॥ ७८ ॥ तृणकाष्ठानिभूतानिप
शवश्चसरीसृपाः ॥ दृष्ट्वासविस्मयास्सर्वेदेवाम्महर्षयस्तदा ॥ ७९ ॥ मोचयित्वातुतामम्बांगरुडःसुष्ठुतांगतः ॥ एतस्मिन्नन्तरेशक्रोजहारसहसासु
धाम् ॥ १८० ॥ निधायगरलंतत्रतयाचानुपलक्षितः ॥ प्रहृष्टहृदयाकद्रूःपुत्रानाहूयसम्भ्रमात् ॥ ८१ ॥ तषांमुखेददौहृष्टाक्ष्वेडंचामृतलक्षणम् ॥
तानुवाचप्रसूःपुत्रान्युष्माकंचकुलेसदा ॥ ८२ ॥ मुखेतिष्ठन्त्वमीदैवाबिन्दवस्तेननिर्वृताः ॥ महर्षयस्ततोदेवाःसिद्धगन्धर्वमानुषाः ॥ ८३ ॥ ऊचुः
सन्तुकुलेमातरस्माकंचप्रसादतः ॥ नागैर्विसर्जितादेवाःससिद्धामुनयस्तथा ॥ ८४ ॥ जग्मुःस्वमालयंहृष्टानागाःप्रमुदिताःस्थिताः ॥ एतस्मिन्नन्तरे
नागांश्चखादगरुडोबलात् ॥ ८५ ॥ दिक्षुपलायिताःशेषाःपर्वतेषुवनेषुच ॥ सागरेषुचपातालेबिलेषुतरुकोटरे ॥८६॥ निभृतेषुनिकुञ्जेषुस्थिताःसर्पा
श्चनिर्वृताः ॥ भुजगास्तस्यभक्ष्याश्चसदैवविधिनिर्मिताः ॥ ८७ ॥ सखादयित्वानागांश्चसम्भाष्यपितरावथ ॥ विबुधान्पूजयित्वातुजगामहरिमव्य
यम् ॥ ८८ ॥ यःपठेच्छृणुयाद्वापिसुपर्णचरितंशुभम् ॥ सर्वपापविनिर्मुक्तःसुरलोकेमहीयते ॥ १८९ ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेगरुडोत्प

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्तिर्नामैकोनपञ्चाशत्तमोऽध्यायः ॥ ४९ ॥ ब्रह्मोवाच ॥ अतःपरंतुविप्रर्षेचाण्डालपतितोद्विजः ॥ प्रलप्यचबहूञ्शोकाञ्जगामकश्यपंमुनिम् ॥ १ ॥
गत्वोवाचमुनिश्रेष्ठवदास्माकंहितंवचः ॥ यथापापाद्विमुच्येऽहंमुनिश्रेष्ठतथाकुरु ॥ २ ॥ ऋषयऊचुः ॥ तमुवाचमहातेजाईषद्धास्यःसमन्ततः ॥ ३ ॥
कश्यपउवाच ॥ सन्दर्शनाच्चम्लेच्छानामुपशान्तोऽसिवैस्वयम् ॥ गायत्र्याश्चजपैर्होमैर्व्रतैश्चान्द्रायणादिभिः ॥ स्मरन्नित्यंहरेःपादमुपोष्यहरिवा
सरम् ॥ ४ ॥ अहर्निशंहरेर्ध्यानंप्रणामंकुरुतंप्रभुम् ॥ तीर्थस्नानेनमन्त्रेणपङ्कस्यान्तंगमिष्यसि ॥ ५ ॥ ततःपापक्षयादेवब्राह्मणत्वंचलप्स्यसे ॥ व्रतैर्वृ
षाधिकैर्मोक्षंनाशयन्कल्मषंद्विज ॥ ६ ॥ ब्रह्मोवाच ॥ मुनेस्तस्यवचःश्रुत्वाकृतकृत्योऽभवत्तदा ॥ पुण्यंसविविधंकृत्वापुनर्ब्रह्मत्वमाप्तवान् ॥ ७ ॥
ततस्तप्त्वातपस्तीव्रंस्वर्लोकंचिरमभ्यगात् ॥ सद्वृत्तस्याखिलंपापंक्षयंयातिदिनेदिने ॥ ८ ॥ असद्वृत्तस्यपुण्यंहिक्षयंयात्यजनोपमम् ॥ अनाचारा
द्धतोविप्रआचारात्सुरतांव्रजेत् ॥ ९ ॥ ततःकण्ठगतैःप्राणैराचारंकुरुतेद्विजः ॥ कर्मणामनसाङ्गेनसदाचारंसदाकुरु ॥ १० ॥ कश्यपस्योपदेशेनस
विनीतोऽभवद्द्विजः ॥ आचारंतुपुनःकृत्वातपस्तप्त्वादिवंगतः ॥ ११ ॥ अनाचारीहतोविप्रःस्वर्गलोकेषुगर्हितः ॥ आचारंतुपुनःकृत्वासुरलोके
महीयते ॥ १२ ॥ नारदउवाच ॥ प्राप्नुवन्तिगतिंलोकाःपूजयित्वाद्विजोत्तमान् ॥ द्विजानांपीडनंकृत्वागतिंगच्छन्तिकांप्रभो ॥ १३ ॥ ब्रह्मोवाच ॥
क्षुधासन्तप्तदेहानांब्राह्मणानांमहात्मनाम् ॥ नार्चयेच्छक्तितोभक्त्यासयातिनरकंनरः ॥ १४ ॥ परुषेणक्रोशयित्वाक्रोधाद्वस्तुविसर्जयेत् ॥
सयातिनरकंघोरंमहारौरवकृच्छ्रकम् ॥ १५ ॥ सन्निवृत्तस्ततःकीटाद्यन्त्यजातिषुजायते ॥ ततोरोगीदरिद्रस्तुक्षुधयापरिपीडितः ॥ १६ ॥
नावमन्येत्ततोविप्रंक्षुधयागृहमागतम् ॥ नददामीतियोब्रूयाद्देवाग्निब्राह्मणेषुसः ॥ १७ ॥ तिर्यग्योनिशतंगत्वाचाण्डालयमुपगच्छति ॥
पादमुद्यम्ययोविप्रंहन्तिगांपितरौगुरुम् ॥ १८ ॥ रौरवेनियतोवासस्तस्यनास्तीहनिष्कृतिः ॥ यदिपुण्याद्भवेज्जन्मसएवपण्डुतांव्रजेत् ॥ १९ ॥
अतिदीनोविषादीचदुःखशोकाभिपीडितः ॥ एवंजन्मत्रयंप्राप्यभवेत्तस्यचनिष्कृतिः ॥ २० ॥ मुष्टिचपेटकीलैश्चहन्याद्विप्रंतुयःपुमान् ॥
तापनेरौरवेघोरेकल्पान्तंसोऽपितिष्ठति ॥ २१ ॥ अथजन्मसमासाद्यकुक्कुरःक्रूरचण्डकः ॥ अन्त्यजातिषुजातोऽपिदरिद्रःकुक्षिशूलवान् ॥ २२ ॥
पादमुद्यच्छतेवायस्तस्यपादेशिलीपदः ॥ खञ्जोवामन्दजङ्घोवाखण्डपादोभवेन्नरः ॥ २३ ॥ पक्षवातेनचाङ्गानिप्रकम्पन्तेसदैवहि ॥ मातरंपितरंविप्रं
स्नातकंचतपस्विनम् ॥ २४ ॥ हत्वागुरुगणंक्रोधात्कुम्भीपाकेचिरंभवेत् ॥ उषित्वाचैवजायेतकीटजातिषुतत्परम् ॥ २५ ॥ विरुद्धंपरुषंवाक्यंयोवदे
द्द्विद्विजातिषु ॥ अष्टौकुष्ठाःप्रजायन्तेतस्यदेहेदृढंसुत ॥ २६ ॥ विचर्चिकाथदद्रूश्चमण्डलःशुक्तिसिध्मकौ ॥ कालकुष्ठस्तथाशुक्लस्तरुणश्चातिदारुणः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २७ ॥ ततोभिषक्प्रयोगेचपापात्पुण्यंपलायते ॥ अपुण्याज्जलरेखेवतेनैवनिधनंव्रजेत् ॥ २८ ॥ एषांमध्येमहाकुष्ठास्त्रयएवप्रकीर्तिताः ॥ काल
कुष्ठस्तथाशुक्लस्त्ववरुणश्चातिदारुणः ॥ २९ ॥ महापातकभावानांज्ञानात्संसर्गतोऽपिवा ॥ अतिपातकिनामेवत्रयोदेहेभवन्तिवै ॥ ३० ॥ संसर्गात्सह
सम्बन्धाद्रोगःसञ्चरतेनृणाम् ॥ दूरात्परित्यजेद्धीरःस्पृष्ट्वास्नानंसमाचरेत् ॥३१॥ पतितंकुष्ठसंयुक्तंचाण्डालंचगवाशिनम् ॥ श्वानंरजस्वलांभिल्लंस्पृष्ट्वा
स्नानंसमाचरेत् ॥ ३२ ॥ दुरितस्यानुरूपेणदेहेकुष्ठाव्यवस्थिताः ॥ इहलोकेपरत्रैवाप्यत्रनास्तितुसंशयः ॥ ३३ ॥ न्यायेनोपार्जितांवृत्तिंब्रह्मस्वंहरते
तुयः ॥ अक्षयंनरकंप्राप्यपुनर्जन्मनविद्यते ॥ ३४ ॥ पिशुनोयस्तुविप्राणांरन्ध्रान्वेषणतत्परः ॥ तंदृष्ट्वाप्यथवास्पृष्ट्वासचैलोजलमाविशेत्
॥ ३५ ॥ ब्रह्मस्वंप्रणयाद्भुक्तंदहत्यासप्तमंकुलम् ॥ विक्रमेणतुभुञ्जानोदशपूर्वान्दशापरान् ॥ ३६ ॥ नविषंविषमित्याहुर्ब्रह्मस्वंविषमुच्यते ॥
विषमेकाकिनंहन्तिब्रह्मस्वंपुत्रपौत्रकम् ॥ ३७ ॥ मोहाच्चमातरंगत्वाब्राह्मणींचगुरोःस्त्रियम् ॥ पतित्वारौरवेघोरेपुनरुत्पत्तिदुर्लभः ॥ ३८ ॥
पतन्तिपितरस्तस्यकुम्भीपाकेऽथतापने ॥ अवीचिकालसूत्रेचमहारौरवरौरवे ॥ ३९ ॥ कदाचिदपिवातेषांनिष्कृतिंनानुमेनिरे ॥ प्राणंहत्वाद्वि
जातीनांस्वयंयात्यपुनर्भवम् ॥ पतन्तिपुरुषास्तस्यरौरवेचसहस्रशः ॥ ४० ॥ नारदउवाच ॥ सर्वेषामेवविप्राणांवधेचपातकंसमम् ॥ विषमंवा
कुतस्तिष्ठेत्तत्त्वतोवक्तुमर्हसि॥ ४१ ॥ब्रह्मोवाच ॥ हत्वाविप्रंध्रुवंपुत्रपातकंयदुदाहृतम् ॥ लभतेब्रह्महाघोरंवक्तव्यंचापरंशृणु ॥ ४२॥लक्षकोटिसहस्राणां
ब्राह्मणानांवधंभजेत् ॥ वेदशास्त्रयुतंहत्वाश्रोत्रियंविजितेन्द्रियम् ॥ ४३ ॥ विप्रंचवैष्णवंहत्वातस्माद्दशगुणोत्तरम् ॥ स्ववंशान्पातयित्वातुपुनर्जन्मन
विन्दते ॥ ४४ ॥ त्रिवेदंस्नातकंहत्वावधस्यान्तंनविन्दते ॥ ४५ ॥ श्रोत्रियंचसदाचारंतीर्थमन्त्रप्रपूतकम् ॥ ईदृशंब्राह्मणंहन्तुःपापस्यान्तोनविद्यते
॥ ४६ ॥ अपकारंसमुद्दिश्यद्विजःप्राणान्परित्यजेत् ॥ दृश्यतेयेनचान्येनब्रह्महासभवेन्नरः ॥ ४७ ॥ वचोभिःपरुषैर्वृत्तैःपीडितस्ताडितोद्विजः ॥
यमुद्दिश्यत्यजेत्प्राणांस्तमाहुर्ब्रह्मघातिनम् ॥ ४८ ॥ ऋषयोमुनयोदेवाःसर्वेब्रह्मविदस्तथा ॥ देशानांपार्थिवानांचसाचवध्याभवेदिह ॥ ४९ ॥
अतोब्रह्मवधंप्राप्यपितृभिःसहपच्यते ॥ प्रायोपवेशकंविप्रंबुधःसंमानयेद्ध्रुवम् ॥ ५० ॥ दोषैश्चापिविनिर्मुक्तमुद्दिश्यप्राणमुत्सृजेत् ॥ सप्रलिप्तोवधे
घोरैर्नतुयंपरिकीर्तयेत् ॥ ५१ ॥ आत्मघातंद्रुमारोहंकोटरैरुपजीवनम् ॥ यःकुर्यादात्मनोघातंस्ववंशेब्रह्महाभवेत् ॥ ५२ ॥ भ्रूणंचघातयेद्यस्तुशि
शुंवाआतुरंगुरुम् ॥ ब्रह्महास्वयमेवस्यान्नतुयंपरिकीर्तयेत् ॥ ५३ ॥ मारयेच्चसगोत्रंवाब्राह्मणंब्राह्मणाधमः ॥ तस्यैवतद्भवेत्पापंनतुयंपरिकीर्त्तयेत्
॥ ५४ ॥ पीडयित्वाद्विजंशूद्रःस्वकार्यंचापिसाधयत् ॥ तत्रापापेचशूद्रस्यपातकंनान्यथाभवेत् ॥ ५५ ॥ तात्कालिकवधंहत्वाहन्तारमातता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यिनम् ॥ नचहन्ताचतत्पापैर्लिप्यतेद्विजसत्तम ॥ ५६ ॥ आततायिनमायान्तमपिवेदान्तगंरणे ॥ जिघांसन्तंजिघांसेच्चनतेनब्रह्महाभवेत् ॥५७॥
अग्निदोगरदश्चैवधनहारीचसुतघः ॥ क्षेत्रदारापहारीचषडेतेह्याततायिनः ॥ ५८ ॥ खलोराजवधोद्योगीपितॄणांचवधेरतः ॥ अनुयायीनृपोराज्ञश्च
त्वारश्चाततायिनः ॥ ५९ ॥ तत्क्षणान्नमृतंविप्रंपुनर्हन्तुंनयुज्यते ॥ पुनर्हत्वावधंघोरंज्ञानात्प्राप्नोतिनिश्चितम् ॥ ६० ॥ लोकेविप्रसमोनास्तिपू
जनीयोजगद्गुरुः ॥ हत्वातंयद्भवेत्पापंतत्परंचनविद्यते ॥ ६१ ॥ देववत्पूजनीयोऽसौदेवासुरगणैर्नरैः ॥ ब्राह्मणस्यसमोनास्तित्रिषुलोकेषुनिश्चितम
॥ ६२ ॥ नारदउवाच ॥ कांवृत्तिंसमुपाश्रित्यजीवितव्यंद्विजेनहि ॥ अपापेनसुरश्रेष्ठतत्त्वतोवक्तुमर्हसि ॥ ६३ ॥ ब्रह्मोवाच ॥ अयाचिताचयाभि
क्षाप्रशस्तासाप्रकीर्तिता ॥ उञ्छवृत्तिस्ततोभद्रासुभद्रासर्ववृत्तिषु ॥ ६४ ॥ यामाश्रित्यमुनिश्रेष्ठागच्छन्तिब्रह्मणःपदम् ॥ दक्षिणायज्ञशेषाणांग्राह्या
यज्ञगतेनहि ॥ ६५ ॥ पाठनंयाजनंकृत्वाग्रहीतव्यंधनंद्विजैः ॥ पाठयित्वापठित्वाचकृत्वास्वस्त्ययनंशुभम् ॥ ६६ ॥ ब्राह्मणानामिदंजीव्यंशि
ष्टावृत्तिःप्रतिग्रहः ॥ शास्त्रोपजीविनोधन्याधन्यावृक्षोपजीविनः ॥ ६७ ॥ धन्यावृक्षलताजीव्यावाटीसस्योपजीविनः ॥ अन्नजन्तुवधेपापंतस्य
दोषोपशान्तये ॥ ६८ ॥ नवधान्यानिशस्तानिविप्रेभ्यःसम्प्रदापयेत् ॥ नचेत्प्राणिवधेह्यत्रक्षीयन्तेचायुषोध्रुवम् ॥ ६९ ॥ तस्माद्द्यात्सुबहूनि
पितृदेवद्विजातिषु ॥ अभावात्क्षत्रियावृत्तिर्ब्राह्मणैरुपजीव्यते ॥ ७० ॥ न्याययुद्धेषुयोद्धव्यंचरेद्वीरव्रतंशुभम् ॥ सतयाचद्विजोवृत्त्यायद्धनंलभ
तेनृपात् ॥ ७१ ॥ पितृयज्ञादिदानेषुमेध्यंतद्धनमुच्यते ॥ समभ्यसेद्धनुर्विद्यांवेदयुक्तांसदानघः ॥ ७२ ॥ शक्तिकुन्तगदाखड्गपरिघाणांसमन्ततः॥
अश्वारोहंगजारोहमैन्द्रजालममानकम् ॥ ७३ ॥ रथभूमिगतंयुद्धंयुक्तंसर्वत्रकारयेत् ॥ द्विजदेवध्रुवाणांचस्त्रीणांवृत्तंतपस्विनाम् ॥ ७४ ॥ साधुसा
ध्वीगुरूणांचनृपाणांरक्षणाद्ध्रुवम् ॥ यत्पुण्यंलभ्यतेशूरैःकथंतद्ब्रह्मवादिभिः ॥ ७५ ॥ सर्वपापक्षयंकृत्वासोऽक्षयंस्वर्गमश्नुते ॥ संमुखेन्याययु
द्धेचपतन्तिब्राह्मणारणे ॥ ७६ ॥ तेव्रजन्तिपरंस्थानंनगम्यंब्रह्मवादिनाम् ॥ धर्मयुद्धस्ययद्वृत्तंशृणुपुण्यंयथार्थतः ॥ ७७ ॥ संमुखेनप्रयुध्यन्तेनचग
च्छन्तिकातरम् ॥ नभग्नंपृष्ठतोघ्नन्तिनिःशस्त्रंप्रपलायितम् ॥ ७८ ॥ अयुध्यमानंभीरुंचपतितंगतकल्मषम् ॥ असच्छूद्रंस्तुतिप्रीतमाहवेशरणा
गतम् ॥ ७९ ॥ हत्वाचनरकंयान्तिदुर्वृत्ताजयकाङ्क्षिणः ॥ एषाचक्षत्रियावृत्तिःसदाचारैस्तुगीयते ॥८०॥ यामाश्रित्यदिवंयान्तिसर्वक्षत्रियकुञ्जराः॥
धर्मयुद्धेशुभोमृत्युःसंमुखेक्षत्रियस्यच ॥ ८१ ॥ अत्रपूतोभवेत्सोऽपिसर्वपापैःप्रमुच्यते ॥ सतिष्ठेत्स्वर्गलोकेचप्रासादेरत्नभूषिते ॥ ८२ ॥ जाम्बून
दमयस्तम्भेरत्नभूषितभूतले ॥ इष्टद्रव्यैःसुसम्पूर्णेदिव्यवस्त्रोपशोभिते ॥ ८३ ॥ पुरतःकल्पवृक्षाश्चतिष्ठन्तिसर्वदायिनः ॥ वापीकूपतटाकाद्यैरुद्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नैरुपशोभिते ॥ ८४ ॥ यौवनाढ्याश्चसेवन्तेतंदेवपुरकन्यकाः ॥ तस्याग्रतोमुदानित्यंनृत्यन्त्यप्सरसांगणाः ॥ ८५ ॥ गीतंगायन्तिगन्धर्वावदे
वाश्चस्तुतिपाठकाः ॥ एवंक्रमेणकल्पान्तेसार्वभौमोभवेन्नृपः ॥ ८६ ॥ सर्वभोगैककर्ताचनीरुङ्मन्मथविग्रहः ॥ तस्यपत्न्यःप्ररूपाढ्याःसदैवयौ
वनान्विताः ॥ ८७ ॥ धर्मशीलाःसुताःशुभ्राःसमृद्धाःपितृसंमताः ॥ एवंक्रमेणभुञ्जन्तिसप्तजन्मसुक्षत्रियाः ॥ ८८ ॥ अन्यायेनतुयोद्धारस्तिष्ठ
न्तिनरकेचिरम् ॥ एवंचक्षत्रियावृत्तिर्ब्राह्मणैरुपजीव्यते ॥ ८९ ॥ वैश्यःशूद्रैस्तथान्यैश्चअन्त्यजैर्म्लेच्छजातिभिः ॥ येचयोधाःप्रयुध्यन्तेन्याययु
द्धेनसर्वदा ॥ ९० ॥ तेऽपियान्तिपरंस्थानंसर्वेवर्णाद्विजातयः ॥ नशूरोयोद्विजोभीरुरस्त्रशस्त्रविवर्जितः ॥ ९१ ॥ विपत्तौवैश्यवृत्तिंचकारयेद्द्विज
सत्तमः ॥ वैश्यवृत्तिंवणिग्भावंकृषिंचैवतथापरैः ॥ ९२ ॥ कारयेत्कृषिवाणिज्यंविप्रकर्मनचत्यजेत् ॥ वणिग्भावान्मृषात्युक्तौदुर्गतिंप्राप्नुयाद्द्विजः
॥ ९३ ॥ आर्द्रद्रव्यंपरित्यज्यब्राह्मणोलभतेशिवम् ॥ समुत्पाद्यततोवृत्तिंदद्याद्विप्रायसर्वशः ॥ ९४ ॥ पितृयज्ञेतथाचाग्नौजुहुयाद्विधिवद्द्विजः ॥
तुलेऽसत्यंनकर्त्तव्यंतुलाधर्मप्रतिष्ठिता ॥ ९५ ॥ छलभावंतुलेकृत्वानरकंप्रतिपद्यते ॥ अतुलंचापियद्द्रव्यंतत्रमिथ्यापरित्यजेत् ॥ ९६ ॥ एवं
मिथ्यानकर्त्तव्यामृषापापप्रसूतिका ॥ नास्तिसत्यात्परोधर्मोनानृतात्पातकंपरम् ॥ ९७ ॥ अतःसर्वेषुकार्येषुसत्यमेवविशिष्यते ॥ अश्वमेधसहस्रं
तुसत्यंचतुलयाधृतम् ॥ ९८ ॥ अश्वमेधसहस्राद्धिसत्यमेवविशिष्यते ॥ योवदेत्सर्वकार्येषुसत्यंमिथ्यापरित्यजेत् ॥ ९९ ॥ सनिस्तरतिदुर्गाणि
स्वर्गमक्षयमश्नुते ॥ वाणिज्यंकारयेद्विप्रोमिथ्याऽवश्यंपरित्यजेत ॥ १०० ॥ वृद्धिंचनिक्षिपेत्तीर्थेस्वयंशेषंतुभोजयेत् ॥ देहक्लेशात्तत्सहस्रगुणंभव
तिसर्वदा ॥ १ ॥ अर्थार्जनविधौमर्त्याविशन्तिविषमेजले ॥ कान्तारमटवींचैवश्वापदैःसेवितांतथा ॥ २ ॥ गिरिंगिरिगुहांदुर्गांम्लेच्छानां
शस्त्रपातिनाम् ॥ गृहंप्रतिभयंस्थानंधनलोभात्समन्ततः ॥ ३ ॥ सुतदारान्परित्यज्यदूरंगच्छन्तिलोभिनः ॥ स्कन्धेभारंवहन्त्यन्येतर्याचक्रे
निपातनैः ॥ ४ ॥ क्षेपणीभिर्महादुःखैस्सदाप्राणव्ययेनच ॥ अर्थस्यसञ्चयःपुत्रप्राणात्प्रियतरोमहान् ॥ ५ ॥ एभिर्न्यायार्जितंवित्तं
वणिग्भावेनयत्नतः ॥ पितृदेवद्विजातिभ्योदत्तंचाक्षयमश्नुते ॥ ६ ॥ एतौदोषौमहान्तौचवाणिज्येलाभकर्मणि ॥ लोभानामपरित्यागो
मृषाग्राह्यश्चविक्रयः ॥ ७ ॥ एतौदोषौपरित्यज्यकुर्यादर्थार्जनंबुधः ॥ अक्षयंलभतेदानाद्वणिग्दोषैर्नलिप्यते ॥ ८ ॥ पुण्यकर्मरतोविप्रः
कृषिंहिपरिकारयेत् ॥ वाहयेद्दिवसस्यार्धंबलीवर्दचतुष्टयम् ॥ ९ ॥ अभावात्त्रितयंचैवअविश्रामंनकारयेत् ॥ चारयेच्चतृणेऽच्छिन्नेचोरव्याघ्रवि
वर्जिते ॥ ११० ॥ दद्याद्वासंयथेष्टंचनित्यमातर्पयेत्स्वयम् ॥ गोष्ठंचकारयेत्तस्यकिञ्चिद्विघ्नविवर्जितम् ॥ ११ ॥ सदागोमयमूत्राभ्यांविघसैश्चविवर्जि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तम् ॥ नमलंनिक्षिपेद्गोष्ठेसर्वदेवनिकेतने ॥१२॥ आत्मनःशयनीयस्यसदृशंकारयेद्बुधः ॥ समंनिर्वापयेद्यत्नाच्छीतवातरजस्तथा ॥१३॥ प्राणस्यस
दृशंपश्येद्गांचसामान्यविग्रहम् ॥ अस्यदेहेसुखंदुःखंतथातस्यैवकल्पते ॥ १४ ॥ अनेनविधिनायस्तुकृषिकर्माणिकारयेत् ॥ सचगोवाहनैर्दोषैर्नलि
प्येतधनीभवेत ॥ १५ ॥ दुर्बलंपीडयेद्यस्तुतथैवगदसंयुतम् ॥ अतिबालातिवृद्धंचसगोहत्यांसमालभेत् ॥१६॥ विषमंवाहयेद्यस्तुदुर्बलंसबलंतथा ॥
सगोहत्यासमंपापंप्राप्नोतीहनसंशयः ॥ १७ ॥ योवाहयेद्विनासस्यंखादन्तंगांनिवारयेत् ॥ मोहात्तृणंजलंवापिसगोहत्यासमंलभेत् ॥ १८ ॥
सङ्क्रान्त्यांपौर्णमास्यांचामावास्यायांतथैवच ॥ हलस्यवाहनात्पापंगवामयुतहत्यया ॥ १९ ॥ अमूषुपूजयेद्यस्तुसितैश्चित्रादिभिर्नरः ॥ कज्जलैः
कुसुमैस्तैलैःसोऽक्षयंस्वर्गमश्नुते ॥ १२० ॥ घासमुष्टिंपरगवेयोददातिसदाह्निकम् ॥ सर्वपापक्षयस्तस्यस्वर्गंचाक्षयमश्नुते ॥ २१ ॥ यथाविप्रस्तथा
गौश्चद्वयोःपूजाफलंसमम् ॥ विचारेब्राह्मणोमुख्योनृणांगावःपशौतथा ॥ २२ ॥ नारदउवाच ॥ विप्रोब्रह्ममुखेजातःकथितोमेत्वयानघ ॥ कथंगो
भिःसमोनाथविस्मयोमेविधेध्रुवम् ॥२३॥ ब्रह्मोवाच ॥ शृणुचात्रयथातथ्यंब्राह्मणानांगवांयथा ॥ एकपिण्डक्रियैक्यंतुपुरुषैर्निर्मितंपुरा ॥२४॥ पुरा
ब्रह्ममुखोद्भूतंकूटंतेजोमयंमहत् ॥ चतुर्भागप्रजातंतद्वेदोऽग्निर्गौर्द्विजस्तथा ॥ २५ ॥ प्राक्तेजःसम्भवोवेदोवह्निरेवतथैवच ॥ परतोगौस्तथाविप्रो
जातश्चैवपृथक्पृथक् ॥ २६ ॥ तत्रसृष्टामयाचादौवेदाश्चत्वारएकशः ॥ स्थित्यर्थंसर्वलोकानांभुवनानांसमन्ततः ॥ २७ ॥ अग्निर्हव्यानिभु
ञ्जीतदेवहेतोस्तथाद्विजः ॥ आज्यंगोप्रभवंविद्धितस्मादेतेप्रसूतकाः ॥ २८ ॥ नसन्तियदिलोकेषुचत्वारोऽमीमहत्तराः ॥ तदाखिलंचभुवनंनष्टंस्थाव
रजङ्गमम् ॥ २९ ॥ एभिर्धृताःसदालोकाःप्रतिष्ठन्तिस्वभावतः ॥ स्वभावोब्रह्मरूपोऽसावेतेब्रह्ममयाःस्मृताः ॥१३०॥ तस्माद्गौःपूजनीयोऽसौविप्रदे
वासुरैरपि ॥ उदारःसर्वकार्येषुजातस्तथ्योगुणाकरः ॥ ३१ ॥ सर्वदेवमयःसाक्षात्सर्वसत्त्वानुकम्पकः ॥ अस्यकार्यंमयासृष्टंपुरैवपोषणंप्रति
॥ ३२ ॥ अतएवमयादत्तंवरंचातिसुशोभनम् ॥ एकजन्मनितेमोक्षस्तवास्त्वितिविनिश्चितम् ॥ ३३ ॥ अत्रैवयेमृतागावस्त्वागच्छन्तिममालयम् ॥
पापस्यकणमात्रंतुतेषांदेहेनतिष्ठति ॥ ३४ ॥ देवीगौर्धेनुकादेवाश्चादिदेवीत्रिशक्तिका ॥ प्रसादाद्यस्ययज्ञानांप्रभवोहिविनिश्चितः ॥ ३५ ॥ गवां
सर्वपवित्राणिपुनन्तिसकलंजगत् ॥ मूत्रंगोर्गोमयंक्षीरंदधिसर्पिस्तथैवच ॥ ३६ ॥ अमीषांभक्षणेपापंनतिष्ठतिकलेवरे ॥ तस्माद्घृतंदधिक्षीरंनित्यं
खादन्तिधार्मिकाः ॥ ३७ ॥ विशिष्टंसर्वद्रव्येषुगव्यमिष्टंपरंशुभम् ॥ यस्यास्येभोजनंनास्तितस्यमूर्तिस्तुपूतिका ॥ ३८ ॥ अन्नाद्यंपञ्चरात्रेणसप्त
रात्रेणवैपयः ॥ दधिविंशतिरात्रेणघृतंस्यान्मासमेककम् ॥ ३९ ॥ अगव्यैर्यस्तुभुङ्क्तेवैमासमेकंनिरन्तरम् ॥ भोजनेतस्यमर्त्यस्यप्रेताःखादन्तिचैवहि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १४० ॥ परमान्नंपरंशुद्धंस्विन्नंचातपतण्डुलैः ॥ भुक्त्वातुयत्कृतंपुण्यंकोटिकोटिगुणंभवेत् ॥ ४१ ॥ अन्यच्चापिचयद्द्रव्यंहविष्यंशास्त्रनिर्मित
म् ॥ तद्भुक्त्वायत्कृतंकर्मसर्वंलक्षगुणंभवेत् ॥ ४२ ॥ निरामिषंचयत्किञ्चित्तस्माद्यद्यत्फलंलभेत् ॥ तस्माद्गौः सर्वकार्येषुशस्ताचैकायुगेयुगे ॥ सर्वदा
सर्वकामेषुधर्मकामार्थमोक्षदा ॥४३॥ नारदउवाच ॥ केषुकिंवाप्रयोगेणपरंपुण्यंप्रकीर्तितम् ॥ वदतत्सर्वलोकेशयथाजानामितत्त्वतः ॥ ४४ ॥ ब्रह्मो
वाच ॥ सकृत्प्रदक्षिणंकृत्वागोधनंचाभिवन्दयेत् ॥ सर्वपापाविनिर्मुक्तःस्वर्गंचाक्षयमश्नुते ॥ ४५ ॥ सुराचार्योयथावन्द्यःपूज्योऽसौमाधवोयथा ॥
सप्तप्रदक्षिणंकृत्वाचैश्वर्यात्पाकशासनः ॥ ४६ ॥ कल्यउत्थायगोमध्येपात्रंगृह्यसहोदकम् ॥ निषिञ्चेद्योगवांशृङ्गमस्तकेनैवतज्जलम् ॥ ४७ ॥ प्रती
च्छेतनिराहारस्तस्यपुण्यंनिबोधम ॥ श्रूयन्तेयानितीर्थानित्रिषुलोकेषुनारद ॥४८॥ सिद्धचारणयुक्तानिसेवितानिमहर्षिभिः॥ अभिषेकस्समस्तेषांग
वांशृङ्गोदकस्यच ॥ ४९ ॥ प्रातरुत्थाययोमर्त्यःस्पृशेद्गांचघृतंमधु ॥ सर्षपांश्चप्रियङ्गूंश्चकल्मषात्प्रतिमुच्यते ॥ १५० ॥ घृतक्षीरप्रदागावोघृतयो
न्योघृतोद्भवाः ॥घृतनद्योघृतावर्तास्तामेसन्तुसदागृहे ॥ ५१ ॥ घृतंमेसर्वगात्रेषुघृतंमेमनसिस्थितम् ॥ गावोममाग्रतोनित्यंगावःपृष्ठतएवच ॥ ५२ ॥
गावश्चसर्वगात्रेषुगवांमध्येवसाम्यहम् ॥ इत्याचम्यजपेन्मन्त्रंसायंप्रातरिदंशुचिः ॥ ५३ ॥ सर्वपापक्षयस्तस्यस्वर्लोकेपूजितोभवेत् ॥ यथागौश्चत
थाविप्रोयथाविप्रस्तथाहरिः ॥५४॥ हरिर्यथातथागङ्गाएतेनह्यवृषाःस्मृताः ॥ गावोबन्धुर्मनुष्याणांमनुष्याबान्धवागवाम् ॥५५॥ गौश्चयस्मिन्गृहे
नास्तितद्बन्धुरहितंगृहम् ॥ गोमुखेचाश्रितावेदाःसपडङ्गपदक्रमाः ॥५६॥ शृङ्गयोश्चस्थितौनित्यंसहैवहरिकेशवौ ॥ उदरेऽवस्थितःस्कन्दःशीर्षेब्रह्मा
स्थितःसदा ॥ ५७ ॥ वृषध्वजोललाटेचशृङ्गाग्रइन्द्रएवच ॥ कर्णयोराश्विनौदेवौचक्षुषोश्शशिभास्करौ ॥ ५८ ॥ दन्तेषुगरुडोदेवोजिह्वा
यांचसरस्वती ॥ अपानेसर्वतीर्थानिप्रस्रावेचैवजाह्नवी ॥ ५९ ॥ ऋषयोरोमकूपेषुमुखतःपृष्ठतोयमः ॥ धनदोवरुणश्चैवदक्षिणंपार्श्व
माश्रितौ ॥ १६० ॥ वामपार्श्वेस्थितायक्षास्तेजस्वन्तोमहाबलाः ॥ मुखमध्येचगन्धर्वानासाग्रेपन्नगास्तथा ॥ ६१ ॥ खुरा
णांपश्चिमेपार्श्वेऽप्सरसश्चसमाश्रिताः ॥ गोमयेवसतेलक्ष्मीर्गोमूत्रेसर्वमङ्गला ॥ ६२ ॥ पादाग्रेखेचरावेद्याहम्भाशब्देप्रजापतिः ॥
चत्वारःसागराःपूर्णाधेनूनांचस्तनेषुवै ॥ ६३ ॥ गांचस्पृशतियोनित्यंस्नातोभवतिनित्यशः ॥ अतोमर्त्यःप्रपुष्टैस्तुसर्वपापैःप्रमुच्यते ॥ ६४ ॥ ॥ १६८ ॥
गवांरजःखुरोद्भूतंशिरसायस्तुधारयेत् ॥ सचतीर्थजलेस्नातःसर्वपापैःप्रमुच्यते ॥ ६५ ॥ नारदउवाच ॥ गवांचदशवर्णानांकस्यदानेचकिंफल
म् ॥ ब्रूहितत्त्वंगुरुश्रेष्ठपरमेष्ठिन्प्रियंयदि ॥ ६६ ॥ ब्रह्मोवाच ॥ श्वेतांगांब्राह्मणेदत्त्वामानवश्चेश्वरोभवेत् ॥ प्रासादेवसतेनित्यंभोगीचसुखमेधते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ६७ ॥ धूम्रातुस्वर्गकान्तारसंसारेपापमोक्षिणी ॥ अक्षयंकपिलादानंकृष्णांदत्त्वानसीदति ॥ ६८ ॥ पाण्डुरादुर्लभालोकेगौरीचकुलनन्दिनी ॥
रक्ताक्षीरूपकामस्यधनकामस्यनीलिका ॥ ६९ ॥ एकांचकपिलांदत्वासर्वपापैःप्रमुच्यते ॥ यत्तुबाल्यकृतंपापंयौवनेवार्धकेकृतम् ॥ १७० ॥ वा
चाकृतंकर्मकृतंमनसायत्प्रचिन्तितम् ॥ अगम्यागमनंचैवमित्रद्रोहेचपातकम् ॥ ७१ ॥ मानकूटंतुलाकूटंकन्यानृतंगवानृतम् ॥ सर्वंचनाशयेत्क्षिप्रंक
पिलांयःप्रच्छति ॥ ७२ ॥ दशयोजनविस्तीर्णामहापारामहानदी ॥ नाराचजलकान्तारेप्रसृतेचोदकार्णवे ॥ ७३ ॥ यावद्वत्सस्यद्वौपादौमुखंया
वन्नजायते ॥ तावद्गौःपृथिवीज्ञेयायावद्गर्भंनमुञ्चति ॥ ७४ ॥ सुवर्णशृङ्गींवस्त्राढ्यांसर्वालङ्कारभूषिताम् ॥ ताम्रपृष्ठींरौप्यखुरांतथाकांस्योपदोहना
म् ॥ ७५ ॥ शोभितांगन्धपुष्पैश्चसर्वालङ्कारभूषिताम् ॥ ईदृशींकपिलांदद्याद्द्विजातौवेदपारगे ॥ ७६ ॥ सर्वपापक्षयस्तस्यविष्णुलोकेऽच्युतोभवे
त् ॥ ७७ ॥ तस्यांतुदुह्यमानायांभूमौपतन्तिबिन्दवः ॥ आरामादिविजायन्तेबहुपुष्पफलोत्तमाः ॥ ७८ ॥ यत्रकामफलावृक्षानद्यःपायसकर्दमाः ॥
प्रासादाश्चापिसौवर्णास्तत्रगच्छन्तिगोप्रदाः ॥ ७९ ॥ दशधेनूश्चयोदद्यादेकंचैवधुरन्धरम् ॥ समानंतुफलंप्रोक्तंब्रह्मणासमुदाहृतम् ॥ १८० ॥ ए
कंचदशभिर्दद्यात्सहस्राणांशतंफलम् ॥ तस्यानुसारतोवेद्यंफलंनारदयत्नतः ॥ ८१ ॥ पितॄनुद्दिश्ययःपुत्रोवृषंचमोक्षयेद्भुवि ॥ पितरोविष्णुलोकेषुम
हीयन्तेयथेप्सितम् ॥ ८२ ॥ चतस्रोवत्सतर्यश्चएकस्यैववृषस्यच ॥ मोक्ष्यन्तेसर्वतःपुत्रविधिरेषसनातनः ॥ ८३ ॥ यावन्तिचैवरोमाणितस्यता
सांचसर्वशः ॥ तावद्वर्षसहस्राणिस्वर्गंभुञ्जन्तिमानवाः ॥ ८४ ॥ लाङ्गूलेनवृषोयच्चजलंचोत्क्षिपतिध्रुवम् ॥ तत्तोयंतुसहस्राब्दंपितॄणाममृतंभवेत्
॥ ८५ ॥ खुरेणकर्षयेद्भूमिंततोलोष्टंचकर्दमः ॥ पितृभ्यश्चस्वधातत्रलक्षकोटिगुणंभवेत् ॥ ८६ ॥ विद्यमानेचजनकेयदिमाताविनश्यति ॥ चन्दने
नाङ्किताधेनुस्तस्याःस्वर्गायदीयते ॥ ८७ ॥ दाताचैवपितॄणांचऋणंचैवप्रमुञ्चति ॥ अक्षयंलभतेस्वर्गंपूजितोमघवायथा ॥ ८८ ॥ सर्वलक्षणसं
युक्तातरुणीगौःपयस्विनी ॥ समाप्रसूतिकाभद्रासाचगौःपृथिवीस्मृता ॥ ८९ ॥ तस्यदानेनमन्त्रस्यपृथ्वीदानसमंफलम् ॥ शतक्रतुसमोमर्त्यःकु
लमुद्धरतेशतम् ॥ १९० ॥ गवांचहरणंकृत्वामृतेगोरथवत्सके ॥ कृमिपूर्णेसकूपेचतिष्ठेदाभूतसम्प्लवम् ॥ ९१ ॥ गवांचैववधंकृत्वापितृभिःसहपच्य
ते ॥ रौरवेनरकेघोरेतावत्कालंप्रतिक्रिया ॥९२॥ गोप्रचारप्रभग्नश्चषण्डवाहनबन्धनः ॥ अक्षयंनरकंप्रायात्पुनर्जन्मनिजन्मनि ॥ ९३ ॥ सकृच्चश्रा
वयेद्यस्तुकथांपुण्यतमामिमाम् ॥ सर्वपापक्षयस्तस्यदेवैश्चसहमोदते ॥ ९४ ॥ यइदंशृणुयाद्वापिपरंपुण्यतमंमहत् ॥ सप्तजन्मकृतात्पापान्मुच्यते
तत्क्षणेनहि ॥ १९५ ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेगोमाहात्म्यंनामपञ्चाशत्तमोऽध्यायः ॥ ५० ॥ नारदउवाच ॥ केनाचारेणविप्रस्यब्रह्मते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जोविवर्धते ॥ केनाचारेणतस्यैवब्रह्मतेजोविनश्यति ॥ १ ॥ ब्रह्मोवाच ॥ शयनीयात्समुत्थायरात्र्यंशेद्विजसत्तमः ॥ देवांश्चैवस्मरेन्नित्यंतथापुण्य वतोध्रुवम् ॥ २ ॥ गोविन्दंमाधवंकृष्णंहरिंदामोदरंतथा ॥ नारायणंजगन्नाथंवासुदेवमजंविभुम् ॥ ३ ॥ सरस्वतींमहालक्ष्मींसावित्रींवेदमातरम् ॥ ब्रह्माणंभास्करंचन्द्रंदिक्पालांश्चग्रहांस्तथा ॥ ४ ॥ शङ्करंचशिवंशम्भुमीश्वरंचमहेश्वरम् ॥ गणेशंचतथास्कन्दंगौरींभागीरथींशिवाम् ॥ ५ ॥ पुण्यश्लोकोनलोराजापुण्यश्लोकोजनार्दनः ॥ पुण्यश्लोकाचवैदेहीपुण्यश्लोकोयुधिष्ठिरः ॥ ६ ॥ अश्वत्थामाबलिर्व्यासोहनूमांश्चविभीषणः ॥ कृपः परशुरामश्चसप्तैतेचिरजीविनः ॥ ७ ॥ एतान्यस्तुस्मरेन्नित्यंप्रातरुत्थायमानवः ॥ ब्रह्महत्यादिभिःपापैर्मुच्यतेनात्रसंशयः ॥ ८ ॥ सकृदुच्चरितेतातसर्वयज्ञफलंलभेत् ॥ गवांशतसहस्राणांदानस्यफलमश्नुते ॥ ९ ॥ ततश्चापिशुचौदेशेमलमूत्रंपरित्यजेत् ॥ दक्षिणाभिमुखोरात्रौदिवाकुर्यादुदङ्मुखः ॥ १० ॥ परतोदन्तकाष्ठंचतृणैरुदुम्बरादिभिः ॥ अतःपरंचसन्ध्यायांसंयतश्चद्विजोभवेत् ॥ ११ ॥ पूर्वाह्णेरक्तवर्णांतुमध्याह्नेशुक्लवर्णिकाम् ॥ सायंसरस्वतींकृष्णांद्विजोध्यायेद्यथाविधि ॥ १२ ॥ ततःसमाचरेत्स्नानंयथाज्ञानेनयत्नतः ॥ अङ्गंप्रक्षालयित्वातुमृद्भिःसंलेपयेत्ततः ॥ ॥ १३ ॥ शिरोदेशेललाटेचनासिकायांहृदिभ्रुवोः ॥ बाह्वोःपार्श्वेतथानाभौजान्वोरङ्घ्रिद्वयेतथा ॥ १४ ॥ एकालिङ्गेगुदेतिस्रस्तथावामकरेदश ॥ उभयोःसप्तदातव्यामृदःशुद्धिमभीप्सता ॥ १५ ॥ अश्वक्रान्तेरथक्रान्तेविष्णुक्रान्तेवसुन्धरे ॥ मृत्तिकेहरमेपापंयन्मयादुष्कृतंकृतम् ॥ १६ ॥ अनेनैवतुमन्त्रेणमृत्तिकांयस्तनौक्षिपेत् ॥ सर्वपापक्षयस्तस्यशुचिर्भवतिमानवः ॥ १७ ॥ ततस्तुवेदपूर्वेणस्नानंकुर्याद्विचक्षणः ॥ नदेनद्यां तथाकूपेपुष्करिण्यांतटाकके ॥ १८ ॥ जलराशौचवप्रेचघटस्नानंतथोत्तरम् ॥ कारयेद्विधिवन्मर्त्यःसर्वपापक्षयायच ॥ १९ ॥ प्रातःस्नानंमहापुण्यंसर्वपापप्रणाशनम् ॥ यःकुर्यात्सततंविप्रोविष्णुलोकेमहीयते ॥ २० ॥ प्रातःसन्ध्यासमीपेचयावद्दण्डचतुष्टयम् ॥ तावत्पानीयममृतंपितॄणामुपतिष्ठते ॥ २१ ॥ परतोघटिकायुग्मंयावद्यामैकमाह्निकम् ॥ मधुतुल्यंजलंतस्मिन्पितॄणांप्रीतिवर्धनम् ॥ २२ ॥ ततस्तुसार्द्धयामैकंजलंक्षीरमयंस्मृतम् ॥ क्षीरमिश्रंजलंतावद्यावद्दण्डचतुष्टयम् ॥ २३ ॥ अतःपरंचपानीयंयावद्विप्रहरत्रयम् ॥ तत्परंलोहितंप्रोक्तंयावदस्तंगतोरविः ॥ २४ ॥ चतुर्थप्रहरेस्नानेरात्रौवातर्पयेत्पितॄन् ॥ तत्तोयंरक्षसामेवग्रहणेनविनाशितम् ॥ २५ ॥ पानीयंसर्वसिद्ध्यर्थंपुरैव निर्मितंमया ॥ रक्षार्थंतस्यतोयस्ययक्षाश्चैवधुरन्धराः ॥ २६ ॥ नप्राप्नुवन्तिपितरोयेचलोकान्तरंगताः ॥ दुष्प्राप्यंसलिलंतेषामृतेस्वान्मर्त्यवासिनः ॥ २७ ॥ तस्माच्छिष्यैश्चपुत्रैश्चपौत्रदौहित्रकादिभिः ॥ बन्धुवर्गैस्तथाचान्यैस्तर्पणीयंपितृव्रतैः ॥ २८ ॥ नारदउवाच ॥ जलस्यदै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वतंब्रूहितर्पणस्यविधिंमयि ॥ यथाजानामिदेवेशतत्त्वतोवक्तुमर्हसि ॥ २९ ॥ ब्रह्मोवाच ॥ जलस्यदेवताविष्णुःसर्वलोकेषुगीयते ॥ जल
पूतोभवेद्यस्तुविष्णुस्तच्छङ्करोभवेत् ॥ ३० ॥ जलंगण्डूषमात्रंतुपीत्वापूतोभवेन्नरः ॥ विशेषात्कुशसंसर्गात्पीयूषादधिकंजलम् ॥ ३१ ॥ सर्वदे
वालयोदर्भोमयाऽयंनिर्मितःपुरा ॥ कुशमूलेभवेद्ब्रह्माकुशमध्येतुकेशवः ॥ ३२ ॥ कुशाग्रेशङ्करंविद्धिकुशएतेप्रतिष्ठिताः ॥ कुशहस्तःसदामेध्यः
स्तोत्रंमन्त्रंपठेद्यदि ॥ ३३ ॥ सर्वंशतगुणंप्रोक्तंतीर्थेसाहस्रमुच्यते ॥ कुशाःकाशास्तथादूर्वायवपत्राणिव्रीहयः ॥ ३४ ॥ वल्वजाःपुण्डरीकाश्च
कुशास्सप्तप्रकीर्तिताः ॥ आनुपूर्व्येणमेध्याःस्युःकुशालोकेप्रतिष्ठिताः ॥ ३५ ॥ विनामन्त्रेणयत्स्नानंसर्वंतन्निष्फलंभवेत ॥ अमृतात्स्वादुतामेति
संस्पर्शाच्चतिलस्यच ॥ ३६ ॥ तस्माच्चतर्पयेन्नित्यंपितॄंस्तिलजलैर्बुधः ॥ दशभिश्चतिलैस्तावत्पितॄणांप्रीतिरुत्तमा ॥ ३७ ॥ अग्निस्तम्भभयाद्देवा
नचेच्छन्त्यतिविस्तरम् ॥ स्नात्वायस्तर्पयेन्नित्यंतिलमिश्रोदकैःपितॄन् ॥ ३८ ॥ सयातिब्रह्मणःस्थानंसमुद्धृत्योभयंकुलम् ॥ विशेषेणयुगाद्यासुत्वमा
वस्यांतथैवच ॥३९॥ अक्षयंस्वर्गमाप्नोतितर्पयित्वातिलैःपितॄन् ॥ नीलषण्डविमोक्षेणत्वमावास्यातिलोदकैः ॥४०॥ वर्षासुदीपदानेनपितॄणामनृणो
भवेत् ॥ वत्सरैकममायांतुतर्पयेद्यस्तिलैःपितॄन् ॥ ४१ ॥ विनायकत्वमाप्नोतिसर्वदेवैःप्रपूज्यते ॥ युगाद्यासुचसर्वासुयस्तिलैस्तर्पयेत्पितॄन् ॥ ४२ ॥
उक्तंयद्वाप्यमायांतुतस्माच्छतगुणाधिकम् ॥ अयनेविषुवेचैवराकामायांतथैवच ॥ ४३ ॥ तर्पयित्वापितृव्यूहंस्वर्गलोकेमहीयते ॥ तथामन्वन्तरा
ख्यायामन्यस्यांपुण्यसंस्थितौ ॥४४॥ ग्रहणेचन्द्रसूर्यस्यपुण्यतीर्थेगयादिषु ॥ तर्पयित्वापितॄन्यातिमाधवस्यनिकेतनम् ॥४५॥ तस्मात्पुण्याहकंप्रा
प्यतर्पयेत्पितृसञ्चयम् ॥ तर्पणंदेवतानांचपूर्वंकृत्वासमाहितः ॥४६॥ अधिकारीभवेत्पश्चात्पितॄणांतर्पणेबुधः ॥ श्राद्धेभोजनकालेचपाणिनैकेनदापये
त् ॥ ४७ ॥ उभाभ्यांतर्पणेदद्याद्विधिरेषसनातनः ॥ दक्षिणाभिमुखोभूत्वाशुचिर्वैतर्पयेत्पितॄन् ॥ ४८ ॥ तृप्यतामितिवाक्येननामगोत्रेणवैपु
नः ॥ अकृष्णैर्यत्तिलैर्मोहात्तर्पयेत्पितृसञ्चयम् ॥ ४९ ॥ भूम्यांददातियदपोदाताचैवजलेस्थितः ॥ वृथातद्दीयतेदानंनोपतिष्ठतिकस्यचित् ॥
॥ ५० ॥ स्थलेस्थित्वाजलेयस्तुप्रयच्छेदुदकंनरः ॥ नोपतिष्ठेत्पितॄणांतुसलिलंतन्निरर्थकम् ॥ ५१ ॥ आर्द्रवासाजलेयस्तुकुर्यादुदकतर्पणम् ॥
पितरस्तस्यतृप्यन्तिसहदेवैस्सदानघ ॥ ५२ ॥ रजकैःक्षालितंवस्त्रमशुद्धंकवयोविदुः ॥ हस्तप्रक्षालनेचवपुनर्वस्त्रंतुशुध्यति ॥ ५३ ॥ शुष्क
वासाःशुचौदेशेस्थानेयत्तर्पयेत्पितॄन् ॥ ततोदशगुणेनैवतुष्यन्तिपितरोध्रुवम् ॥ ५४ ॥ स्नानंसन्ध्यांचपाषाणेखड्गेवाताम्रभाजने ॥ तर्पणंकुरुते
यस्तुप्रत्येकंचशताधिकम् ॥ ५५ ॥ रौप्याङ्गुलीयंतर्जन्यांधृत्वायत्तर्पयेत्पितॄन् ॥ सर्वंचशतसाहस्रगुणंभवतिनान्यथा ॥ ५६ ॥ तथैवाना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मिकायांतुधृत्वास्वर्णाङ्गुलींबुधः ॥ तर्पयेत्पितृसन्दोहंलक्षकोटिगुणंभवेत् ॥ ५७ ॥ अङ्गुष्ठदेशिनीमध्येसव्यहस्तस्यखङ्गकम् ॥ धृत्वानामिकया
रत्नमञ्जलेरक्षयंफलम् ॥ ५८ ॥ स्नानार्थमभिगच्छन्तंदेवाःपितृगणैःसह ॥ वायुभूतानुगच्छन्तितृषार्ताःसलिलार्थिनः ॥ ५९ ॥ निराशा
स्तेनिवर्तन्तेवस्त्रनिष्पीडनेनच ॥ तस्मान्नपीडयेद्वस्त्रमकृत्वापितृतर्पणम् ॥ ६० ॥ तिस्रःकोट्योऽर्धकोटीचयानिलोमानिमानुषे ॥ स्रवन्तिसर्व
तीर्थानितस्मान्नपरिपीडयेत् ॥ ६१ ॥ देवाःपिबन्तिशिरसिश्मश्रुतःपितरस्तथा ॥ चक्षुषोरपिगन्धर्वाअधस्तात्सर्वजन्तवः ॥ ६२ ॥ देवाःपि
तृगणाःसर्वेगन्धर्वाजन्तवस्तथा ॥ स्नानमात्रेणतुष्यन्तिस्नानात्पापंनविद्यते ॥ ६३ ॥ नित्यस्नानंचयःकुर्यात्सनरःपुरुषोत्तमः ॥ सर्वपापैर्विनिर्मु
क्तोनाकलोकेमहीयते ॥ ६४ ॥ स्नानंतर्पणपर्यन्तंदेवामहर्षयोविदुः ॥ अतःपरंचदेवानांपूजनंकारयेद्बुधः ॥ ६५ ॥ गणेशंपूजयेद्यस्तुविघ्नस्त
स्यनजायते॥ आरोग्यार्थंचसूर्यंचधर्ममोक्षायमाधवम् ॥६६॥ शिवंचकृत्यकामार्थंसर्वकामायचण्डिकाम् ॥ देवांस्तुपूजयित्वातुवैश्वदेवबलिंचरेत् ॥
॥ ६७ ॥ वह्निकार्यंततःकृत्वायज्ञंब्राह्मणतर्पणम् ॥ देवानांसर्वसत्त्वानांपुनस्त्रिविष्टपंव्रजेत् ॥ ६८ ॥ गतागतंस्थिरंकृत्वाकामान्मोक्षंसुखंदिवम् ॥
तस्मात्सर्वप्रयत्नेननित्यंकर्माणिकारयेत् ॥ ६९ ॥ नारदउवाच ॥ किमथचजलंतातदेवाःपितृगणैःसह ॥ नप्राप्नुवन्तिसर्वज्ञलभन्ते
मानवायथा ॥ ७० ॥ ब्रह्मोवाच ॥ पुरासृष्टंमयातोयंसर्वदेवमयामृतम् ॥ तस्यैवरक्षणार्थंचरक्षोयक्षाधनुर्धराः॥ ७१ ॥ घ्नन्तितेपितरंदेवमस्मद्वा
क्यान्नमानुषम् ॥ पशवःपक्षिणःकीटामर्त्यलोकेव्यवस्थिताः ॥ ७२ ॥ मर्त्यजाताश्चदेवायेतथैवमानुषाध्रुवम् ॥ तर्पयित्वागुरुंनित्यंसुरलोकेप्रतिष्ठि
ताः ॥ ७३ ॥ अस्नायीचमलंभुङ्क्तेअजपीपूयशोणितम् ॥ अकृत्वातर्पणंनित्यंपितृहाचोपजायते ॥ ७४ ॥ ब्रह्महत्यासमंपापंदेवानामप्यपू
जने ॥ सन्ध्याकृत्यमकृत्वाचसूर्यंहन्तिचपापकृत् ॥ ७५ ॥ नारदउवाच ॥ ब्राह्मणस्यसदाचारक्रमंब्रूहिचकर्मणाम् ॥ इतरेषांचवर्णानांप्रवृत्त
मखिलंवद ॥ ७६ ॥ ब्रह्मोवाच ॥ आचाराल्लभतेचायुराचाराल्लभतेसुखम् ॥ आचारात्स्वर्गमोक्षंचआचारोहन्त्यलक्षणम् ॥ ७७ ॥ अनाचारो
हिपुरुषोलोकेभवतिनिन्दितः ॥ दुःखभागीचसततंव्याधितोऽल्पायुरेवच ॥ ७८ ॥ नरकेनियतंवासोह्यनाचारान्नरस्यच ॥ आचाराच्चपरंलो
कमाचारंशृणुतत्त्वतः ॥ ७९ ॥ गोमयेनगृहेनित्यंप्रकुर्यादुपलेपनम् ॥ प्रक्षालयेत्ततःपीठंकाष्ठंपात्रंशिलातलम् ॥ ८० ॥ भस्मनाकांस्यपा
त्रंतुताम्रमम्लेनशुद्ध्यति ॥ शिलापात्रंतुतैलेनफालंगोवालकेनतु ॥ ८१ ॥ स्वर्णरौप्यादिपात्रंतुजलमात्रेणशुध्यति ॥ अग्निनालोहपात्रंतु
पाकप्रक्षालनेनतु ॥ ८२ ॥ खननाद्दाहनाच्चैवउपलेपनधावनात् ॥ पर्जन्यवर्षणाच्चैवभूरमेध्याविशुध्यति ॥ ८३ ॥ तैजसानांमणीनांच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वस्याश्रमयस्यच ॥ भस्मभिर्मृत्तिकाभिश्चशुद्धिरुक्तामयापुरा ॥ ८४ ॥ शय्याभार्याशिशुर्वस्त्रमुपवीतंकमण्डलुः ॥ आत्मनःकथिताश्शुद्धा नपरेषांकदाचन ॥ ८५ ॥ नभुञ्जीतैकवस्त्रेणनस्नायादेकवाससा ॥ नधारयेत्परस्यैवंस्नानवस्त्रंकदाचन ॥ ८६ ॥ संस्कारंकेशदन्तानां प्रातरेवसमाचरेत् ॥ गुरूणांचनमस्कारंनित्यमेवसमाचरेत् ॥ ८७ ॥ हस्तपादेमुखेचैवपश्चार्द्रोभोजनंचरेत् ॥ पश्चार्द्रकस्तुभुञ्जानःशतंवर्षाणिजीवति ॥ ८८ ॥ देवतानांगुरोराज्ञांस्नातकाचार्ययोरपि ॥ नाक्रामेत्कामतश्छायांविप्रस्यदीक्षितस्यच ॥ ८९ ॥ गोगणंदैवतंविप्रंघृतंमधुचतुष्पथम् ॥ प्रदक्षिणंप्रकुर्वीतप्रख्यातांश्चवनस्पतीन्॥९०॥गोविप्रावग्निविप्रौचविप्रौद्वौदम्पतीतथा॥तयोर्मध्येनगच्छेतस्वर्गस्थोऽपिपतेद्ध्रुवम् ॥९१॥ उच्छिष्टोन स्पृशेदग्निंब्राह्मणंदैवतंगुरुम् ॥ स्वशीर्षंपुष्पवृक्षंचयज्ञवृक्षमधार्मिकम् ॥ ९२ ॥ त्रीणितेजांसिनोच्छिष्टउदीक्षेतकदाचन ॥ सूर्याचन्द्रमसावेवंनक्षत्राणिचसर्वशः ॥ ९३ ॥ नेक्षेद्विप्रंगुरुंदेवंराजानंयतिनांवरम् ॥ योगिनंदेवकर्माणंधर्माणांकथकंद्विजम् ॥ ९४ ॥ नदीनांचप्रतीरेचपत्युश्चसरितांतथा ॥ यज्ञवृक्षस्यमूलेचउद्यानेपुष्पवाटके ॥ ९५ ॥ शरीरस्यमलत्यागंनकुर्याज्जीवनेतथा ॥ विप्रस्यायतनेगोष्ठेरम्येराजपथेषुच ॥ ९६ ॥ नक्षौरंकारये द्धीरःकुजस्याह्निकदाचन ॥ मलंनधारयेद्दन्तेनस्वंनवदनेक्षिपेत् ॥ ९७ ॥ तैलाभ्यङ्गंनकुर्वीतवासरेरविभौमयोः ॥ स्वगात्रासनयोर्वाद्यंगुरोरेकासनादनम् ॥ ९८ ॥ नहरेच्छ्रोत्रियस्वंचदेवस्यापिगुरोरपि ॥ राज्ञस्तपस्विनांचवपङ्गोरन्धस्ययोषितः ॥ ९९॥ पन्थादेयोब्राह्मणायगोभ्योराजभ्यएवच॥ रोगिणेभारतप्तायगुर्विण्यैदुर्बलायच ॥ १०० ॥ विवादंनचकुर्वीतनृपविप्रचिकित्सकैः ॥ ब्राह्मणंगुरुपत्नींचदूरतःपरिवर्जयेत् ॥ १ ॥ पतितंकुष्ठसंयुक्तं चाण्डालंचगवाशिनम् ॥ निर्धूतंज्ञानहीनंचदूरतःपरिवर्जयेत् ॥ २ ॥ स्त्रियंदुष्टांचदुर्वृत्तामपवादप्रदायिनीम् ॥ कुकर्मकारिणींदुष्टांसदैवकलहप्रियाम् ॥ ३ ॥ प्रमत्तामधिकाङ्गींश्चनिर्लज्जांबाह्यचारिणीम् ॥ व्ययशीलामनाचारांदूरतःपरिवर्जयेत् ॥ ४ ॥ मलिनांनाभिवन्देतगुरुपत्नींकदाचन ॥ नस्पृशेत्तांचमेधावीस्पृष्ट्वास्नानेनशुद्ध्यति ॥ ५ ॥ सतयासहकेलिंचवर्जयेच्चसदैवहि ॥ शृणुयाच्चवचोनूनंनपश्येच्चगुरोःस्त्रियम् ॥ ६ ॥ वधूंपुत्रस्यभ्रातुश्च स्वपुत्रींयुवतींध्रुवम् ॥ अन्यांचगुरुपत्नींचनेक्षेत्स्पर्शंनकारयेत् ॥ ७ ॥ ताभिःसहकथालापंतथाभ्रूभङ्गदर्शनम् ॥ कलहंनिस्त्रपांवाणींसदैवपरिवर्जयेत् ॥ ८ ॥ नदद्याच्चसदापादंतुपाङ्गारास्थिभस्मसु ॥ कार्पासास्थिषुनिर्माल्योचितिकाष्ठेचितौगुरौ ॥ ९ ॥ शुष्कंमीनंनभक्षेतपूतिगन्धिममेध्यकम् ॥ विघसंचान्यदुच्छिष्टंपाकार्थंचपरस्यच ॥११०॥ नस्थातव्यंनगन्तव्यंक्षणमप्यसतासह ॥ नतिष्ठेच्चक्षणंधीरोदीपच्छायेकलिद्रुमे ॥ ११ ॥ अस्पृश्यैस्सहचालापंपतितैःकुपितैःसह ॥ नकुर्यात्क्षणमात्रंतुकृत्वागच्छेच्चरौरवम् ॥ १२ ॥ कनिष्ठंनाभिवन्देतपितृव्यंमातुलंतथा ॥ उत्थायचासनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दद्यात्कृताञ्जल्यग्रतःस्थितः ॥१३॥ तैलाभ्यक्तंतथोच्छिष्टमार्द्रवस्त्रंचरोगिणम्॥पारावारगतोद्विप्रंवहन्तंनाभिवादयेत् ॥१४॥ यज्ञस्यान्तर्गतंनयंक्रीड
न्तंस्त्रीजनैःसह ॥ बालक्रीडागतंचापिपुष्पयुक्तंकुशैर्युतम् ॥ १५ ॥ शिरःप्रावृत्यकर्णौवाअप्सुमुक्तशिखोऽपिवा ॥ अकृत्वापादयोःपूजांनाचामे
द्दक्षिणामुखः ॥ १६ ॥ उपवीतविहीनश्चनग्नकोमुक्तकच्छकः ॥ एकवस्त्रपिधानश्चआचान्तोनैवशुद्ध्यति ॥ १७ ॥ मध्यमाभिर्मुखंपूर्वंतिसृभिःसमु
पस्पृशेत् ॥ अङ्गुष्ठदेशिनीभ्यांचनासांचतदनन्तरम् ॥१८॥ अङ्गुष्ठानामिकाभ्यांचचक्षुषीसमुपस्पृशेत् ॥ कनिष्ठाङ्गुष्ठतःश्रोत्रेनाभिमङ्गुष्ठकेनतु॥१९॥
तलेनहृदयंन्यस्यसर्वाभिर्मस्तकोपरि ॥ बाहूचाग्रेणसंस्पृश्यततःशुद्धोभवेन्नरः ॥१२०॥ अनेनाचमनंकृत्वामानवःप्रयतोभवेत् ॥ सर्वपापैर्विनिर्मुक्तः
स्वर्गंचाक्षयमश्नुते ॥ २१ ॥ प्राणस्त्रिपुटश्रृङ्ग्याचव्यानोऽपानश्चमुद्रया ॥ समानस्तुसमस्ताभिरुदानस्तर्जनींविना ॥ २२ ॥ नागःकूर्मश्चकृकरोदेव
दत्तोधनञ्जयः ॥ उपप्रीणन्तुतेप्रीतायेभ्योभूमौप्रदीयते ॥ २३ ॥ शयनंचार्द्रपादेनशुष्कपादेनभोजनम् ॥ नान्धकारेचशयनंभोजनंनैवकारयेत्
॥ २४ ॥ पश्चिमेदक्षिणेचैवनकुर्याद्दन्तधावनम् ॥ उत्तरेपश्चिमेचवनस्वपेद्धिकदाचन ॥ २५ ॥ स्वप्नादायुःक्षयंयातिब्रह्महापुरुषोभवेत् ॥ नकुर्वी
ततःस्वप्नंशस्तंचपूर्वदक्षिणम् ॥ २६ ॥ आयुष्यंप्राङ्मुखोभुङ्क्तेयशस्यंदक्षिणामुखः ॥ श्रियंप्रत्यङ्मुखोभुङ्क्तेयशोभुङ्क्तउदङ्मुखः ॥ २७ ॥ प्राच्यां
नरोलभेदायुर्याम्यांप्रेतत्वमश्नुते ॥ वारुणेचभवेद्रोगीआयुर्वित्तंतथोत्तरे॥२८॥ देवानामेकभुक्तंतुद्विभुक्तंस्यान्नरस्यच ॥ त्रिभुक्तंप्रेतदैत्यस्यचतुर्थंकौण
पस्यतु ॥ २९ ॥ निरामिषंहविर्देवामत्स्यमांसादिमानुषाः ॥ पूतिपर्युषितंदुष्टमन्येभुञ्जन्त्यनावृताः ॥ १३० ॥ स्वर्गस्थितानामिहजीवलोकेचत्वारि
तेषांहृदयेवसन्ति ॥ दानंप्रशस्तंमधुराचवाणीदेवार्चनंब्राह्मणतर्पणंच ॥ ३१ ॥ कार्पण्यवृत्तिःस्वजनेषुनिन्दाकुचेलतानीचजनेषुभक्तिः ॥ अतीव
रोषःकटुकाचवाणीनरस्यचिह्नंनरकागतस्य ॥ ३२ ॥ नवनीतोपमावाणीकरुणाकोमलंमनः ॥ धर्मबीजप्रसूतानामेतत्प्रत्यक्षलक्षणम् ॥ ३३ ॥
दयादरिद्रहृदयंवचःक्रकचकर्कशम् ॥ पापबीजप्रसूतानामेतत्प्रत्यक्षलक्षणम् ॥ ३४ ॥ श्रावयेच्छृणुयाद्वापिसदाचारादिकंनरः ॥ आचारादेःफलं
लब्ध्वापापात्पूतोऽच्युतोदिवि ॥ १३५ ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेसदाचारवर्णनंनामैकपञ्चाशोऽध्यायः ॥ ५१ ॥ भीष्मउवाच ॥
यत्पुण्यमधिकंलोकेसर्वदासर्वसंमतम् ॥ तद्वदस्वेच्छयाविप्रयत्कृतंपूर्वपूर्वकैः ॥ १ ॥ पुलस्त्यउवाच ॥ एकदातुद्विजाःसर्वेव्यासशिष्यास्सहादरात्॥ ॥ १७१ ॥
व्यासंप्रणम्यपप्रच्छुर्धर्मंमांचयथाभवान् ॥ २ ॥ द्विजाऊचुः ॥ पुण्यात्पुण्यतमंलोकेसर्वधर्मेषुचोत्तमम् ॥ किंकृत्वामानवाःस्वर्गंभुञ्जतेचाक्षयंवद
॥ ३ ॥ लभ्यंचाकष्टकंशुद्धंवर्णानांमर्त्यवासिनाम् ॥ गुरूणांचलघूनांचसाध्यमेकंक्रतुंवद ॥ ४ ॥ यद्यत्कृत्वाचदेवानांपूज्योनाकेभवेन्नरः ॥ तत्तद्वद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चनोब्रह्मन्प्रसादीभवधर्मतः ॥५॥ व्यासउवाच॥ पञ्चाख्यानंवदिष्यामिश्रृणुध्वंतत्रपूर्वतः ॥ पञ्चानामेककंकृत्वाविन्दन्मोक्षंदिवंयशः॥६॥ पित्रोरर्चा
ऽथपत्युश्चसाम्यंसर्वजनेषुच ॥ मित्राद्रोहोविष्णुभक्तिरेतेपञ्चमहामखाः ॥ ७ ॥ प्राक्पित्रोरर्चयाविप्रायद्धर्मंसाधयेन्नरः॥ नतत्क्रतुशतैरेवतीर्थयात्रादि
भिर्भुवि ॥ ८ ॥ पिताधर्मःपितास्वर्गःपिताहिपरमंतपः ॥ पितरिप्रीतिमापन्नेप्रीयन्तेसर्वदेवताः ॥ ९ ॥ पितरोयस्यतृप्यन्तिसेवयाचगुणेन
च ॥ तस्यभागीरथीस्नानमहन्यहनिवर्तते ॥ १० ॥ सर्वतीर्थमयीमातासर्वदेवमयःपिता ॥ मातरंपितरंतस्मात्सर्वयत्नेनपूजयेत् ॥ ११ ॥ मातरं
पितरंचैवयस्तुकुर्यात्प्रदक्षिणम् ॥ प्रदक्षिणीकृतातेनसप्तद्वीपावसुन्धरा ॥ १२ ॥ जानुनीचकरौयस्यपित्रोःप्रणमतःशिरः ॥ निपतन्तिपृथिव्यांच
सोऽक्षयांलभतेदिवम् ॥ १३ ॥ तयोश्चरणयोर्यावद्रजश्चिह्नानिमस्तके ॥ प्रतीकेचविलग्नानितावत्पूतःसुतस्तयोः ॥ १४ ॥ पादारविन्दसलिलंयः
पित्रोःपिबतेसुतः ॥ तस्यपापंक्षयंयातिजन्मकोटिशतार्जितम् ॥ १५ ॥ धन्योऽसौमानवोलोकेपूतोऽसौसर्वकल्मषात् ॥ विनायकत्वमाप्नोतिजन्म
नैकेनमानवः ॥ १६ ॥ पितरौलङ्घयेद्यस्तुवचोभिःपुरुषाधमः ॥ निरयेचवसेत्तावद्यावदाभूतसम्प्लवम् ॥१७॥ पित्रोरनर्चनंकृत्वाभुङ्क्तेयस्तुसुताधमः॥
कृमिकूपेऽथनरकेकल्पान्तमुपतिष्ठति ॥ १८ ॥ रोगिणंचापिवृद्धंचपितरंवृत्तिकर्शितम् ॥ विकलंनेत्रकर्णाभ्यांत्यक्त्वागच्छेच्चरौरवम् ॥ १९ ॥
अन्त्यजातिषुम्लेच्छेषुचाण्डलेष्वपिजायते ॥ पित्रोरपोषणंकृत्वासर्वपुण्यक्षयोभवेत् ॥ २० ॥ नाराध्यपितरौपुत्रस्तीर्थदेवान्भजन्नपि ॥ तयोर्न
फलमाप्नोतिकीटवद्भ्रमतेमहीम् ॥ २१ ॥ कथयामिपुरावृत्तंविप्राःश्रृणुतयत्नतः ॥ यंश्रुत्वानपुनर्मोहंप्रयास्यथपुनर्भुवि ॥ २२ ॥ पुरासीच्चद्विजः
कश्चिन्नरोत्तमइतिस्मृतः ॥ स्वपितरावनादृत्यगतोऽसौतीर्थसेवया ॥ २३ ॥ ततःसर्वाणितीर्थानिगच्छतोब्राह्मणस्यच ॥ आकाशेस्नानचैलानिप्रशु
ष्यन्तिदिनेदिने ॥ २४ ॥ अहङ्कारोऽविशत्तस्यमानसेब्राह्मणस्यच ॥ मत्समोनास्तिवैकश्चित्पुण्यकर्मामहायशाः ॥ २५ ॥ इत्युक्तेचाननेतस्यअह
दच्चबकस्तदा ॥ क्रोधाच्चैवेरितस्तस्यसशशापद्विजोबकम् ॥ २६ ॥ पपातचबकःपृथ्व्यांसभस्मीभूतविग्रहः ॥ भीर्द्विजेन्द्रंमहामोहःप्राविशच्चान्तक
र्मणि ॥ २७ ॥ ततःपापाच्चविप्रस्यचेलंखेचनगच्छति ॥ विषादमगमत्सद्यस्ततःखेतमुवाचह ॥२८॥ देववाण्युवाच ॥ गच्छवाडवचाण्डालंमूकंपर
मधार्मिकम् ॥ तत्रधर्मंचजानीषेक्षेमंतेतद्वचोभवेत् ॥ २९ ॥ व्यासउवाच॥ खाच्चतद्वचनंश्रुत्वागतोऽसौमूकमन्दिरम् ॥ शुश्रूषन्तंचपितरौसर्वारम्भा
न्ददर्शसः ॥ ३० ॥ ददतंशीतकालेचसम्यगुष्णंजलंतयोः ॥ तैलतापनताम्बूलंतथातूलवतींपटीम् ॥ ३१ ॥ नित्याशनंचमिष्टान्नंदुग्धखण्डंतथैवच ॥
दापयन्तंवसन्तेचमधुमालांसुगन्धिकाम् ॥ ३२ ॥ अन्यानियानिभोग्यानिकृत्यानिविविधानिच ॥ उष्णेचावीजयत्सोऽपिनित्यंचपितराव पि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ३३ ॥ ततस्तयोःप्रचर्यांचकृत्वाभुङ्क्तेऽथसर्वदा ॥ श्रमस्यवारणंकुर्यात्सन्तापस्यतथैवच ॥ ३४ ॥ एभिःपुण्यैःस्थितोविष्णुस्तस्यगेहोदरेचिरम्॥
अन्तरिक्षेचक्रीडन्तमाधारस्तम्भवर्जितं ॥ ३५ ॥ तस्यापिभवनेनित्यंस्थितंत्रिभुवनेश्वरम् ॥ विप्ररूपधरंकान्तंनान्यैर्भूतंचसत्परम् ॥ ३६ ॥ तेजो
मयंमहासत्त्वंशोभयन्तंचमन्दिरम् ॥ दृष्ट्वाविस्मयमापन्नोविप्रःप्रोवाचमूककम् ॥ ३७ ॥ विप्रउवाच ॥ आसन्नंचममागच्छत्वयैवेच्छामिशाश्वतम्॥
हितंमेसर्वलोकानांतत्त्वतोवक्तुमर्हसि ॥ ३८ ॥ मूकउवाच ॥ पित्रोरर्चांकरोम्यद्यकथमायामितेऽन्तिकम् ॥ अर्चयित्वातुपितरौकृत्यंतेकरवाणि
वै ॥ ३९ ॥ तिष्ठमेद्वारदेशेचआतिथ्यंतेकरोम्यहम् ॥ ४० ॥ व्यासउवाच ॥ इत्युक्तेचैवचाण्डालेचुकोपब्राह्मणस्तदा ॥ ४१ ॥ ब्राह्मणउवाच ॥
ब्राह्मणंमांपरित्यज्यकिंकार्यमधिकंतव ॥ ४२ ॥ मूकउवाच ॥ किंकुप्यसिवृथाविप्रनबकोऽहंतवाधुना ॥ कोपस्सिद्ध्यतितेतावद्बकेनान्यत्रकिंचन
॥ ४३ ॥ गगनेस्नानशाटीतेनशुष्यतिनतिष्ठति ॥ वचनंखात्ततःश्रुत्वामद्गृहंचागतोभवान् ॥ ४४ ॥ तिष्ठतिष्ठवदिष्यामिनोचेद्गच्छपतिव्रताम् ॥
तांचदृष्ट्वाद्विजश्रेष्ठदयितंतेफलिष्यति ॥ ४५ ॥ व्यासउवाच ॥ ततस्तस्यगृहाद्विष्णुर्द्विजरूपधरोविभुः ॥ विनिस्सृत्यद्विजंप्राहगेहंतस्याःप्रयाम्य
हम् ॥ ४६ ॥ सविमृश्यद्विजश्रेष्ठस्तेनसार्धंचचालह ॥ गच्छन्तंतमुवाचेदंहरिंविप्रोऽतिविस्मितः ॥ ४७ ॥ विप्रउवाच ॥ किमर्थंचत्वयाविप्रचाण्डा
लस्यगृहोदरे ॥ सदासंस्थीयतेतातयोपाजनवृतेमुदा ॥ ४८ ॥ हरिरुवाच ॥ इदानींमानसंशुद्धंनभूतंभवतोध्रुवम् ॥ पतिव्रतादिकंदृष्ट्वापश्चाज्ज्ञास्यसि
मांकिल ॥ ४९ ॥ विप्रउवाच ॥ पतिव्रताचकातातकिंवातस्याश्श्रुतंमहत् ॥ येनाहंतत्रगच्छामिकारणंवदमेद्विज ॥ ५० ॥ हरिरुवाच ॥ नदीनां
जाह्नवीश्रेष्ठाप्रमदानांपतिव्रता ॥ मनुष्याणांप्रजापालोदेवानांचजनार्दनः ॥ ५१ ॥ पतिव्रताचयानारीपत्युर्नित्यंहितेरता ॥ कुलद्वयस्यपुरुषानुद्धरे
त्साशतंशतम् ॥ ५२ ॥ स्वर्गंभुनक्तितावच्चयावदाभूतसम्प्लवम् ॥ स्वर्गाद्भ्रष्टोभवेद्वास्याःसार्वभौमोनृपःपतिः ॥ ५३ ॥ अस्यैवमहिषीभूत्वासुखंविन्दे
दनन्तरम् ॥ पुनःपुनःस्वर्गराज्यंतस्यतस्यानसंशयः ॥ ५४ ॥ एवंजन्मशतंप्राप्यअन्तेमोक्षोभवेद्ध्रुवम् ॥ ५५ ॥ विप्रउवाच ॥ पतिव्रताभवेत्कावा
तस्याःकिंवाचलक्षणम् ॥ ब्रूहिमेद्विजशार्दूलयथाजानामितत्त्वतः ॥ ५६ ॥ हरिरुवाच ॥ पुत्राच्छतगुणंस्नेहाद्राजानंचभयादथ ॥ आराधयेत्पतिं
शौरिंयापश्येत्सापतिव्रता ॥ ५७ ॥ कार्येदासीरतौवेश्याभोजनेजननीसमा ॥ विपत्सुमन्त्रिणीभर्तुःसाचभार्यापतिव्रता ॥ ५८ ॥ भर्तुराज्ञांनलङ्घ्येद्या
मनोवाक्कायकर्मभिः ॥ भुक्तेपत्यौसदाचात्तिसाचभार्यापतिव्रता ॥ ५९ ॥ यस्यांयस्यांतुशय्यायांपतिःस्वपितियत्नतः ॥ तत्रतत्रचसाभर्तुरर्चांकरो
तिनित्यशः ॥ ६० ॥ नैवमत्सरमायातिनकार्पण्यंनमानिनी ॥ मानेऽमानेसमानंचयापश्येत्सापतिव्रता ॥ ६१ ॥ सुवेषंयानरंदृष्ट्वाभ्रा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तरंपितरंसुतम् ॥ मन्यतेचपरंसाध्वीसाचभार्यापतिव्रता ॥ ६२ ॥ तांगच्छद्विजशार्दूलवदकामंयथातव ॥ तस्यपत्न्योऽष्टतिष्ठन्तितन्मध्ये वरवर्णिनी ॥ ६३ ॥ रूपयौवनसम्पन्नादयायुक्तायशस्विनी ॥ शुभानामेतिविख्यातागत्वातांपृच्छतेहितम् ॥ ६४ ॥ व्यासउवाच ॥ एवमुक्त्वातुभगवांस्तत्रैवान्तरधीयत ॥ तस्यैवादृश्यतांदृष्ट्वाविस्मितोऽभूद्द्विजस्तदा ॥ ६५ ॥ सचसाध्वीगृहंगत्वापप्रच्छाथपतिव्रताम् ॥ अतिथेर्वचनंश्रुत्वागृहान्निःसृत्यसम्भ्रमात् ॥ ६६ ॥ दृष्ट्वाद्विजंसतीतत्रद्वारदेशेस्थिताभवत् ॥ तांचदृष्ट्वाद्विजश्रेष्ठउवाचवचनंमुदा ॥ ६७ ॥ विप्रउवाच ॥ प्रियंममहितंब्रूहियथादृष्टंत्वमेवहि ॥ ६८ ॥ पतिव्रतोवाच ॥ साम्प्रतंपत्युरर्चास्तिनचास्माकंस्वतन्त्रता ॥ पश्चात्कार्यंकरिष्यामिगृहाणातिथ्यमद्यवै ॥ ६९ ॥ विप्रउवाच ॥ ममदेहेक्षुधानास्तिपिपासाद्यनचश्रमः ॥ अभीष्टंवदकल्याणिनोचेच्छापंददामिते ॥ ७० ॥ व्यासउवाच ॥तमुवाचतदासापिनबकोऽहंद्विजोत्तम ॥ गच्छधर्मतुलाधारंपृच्छतंतेहितंद्विज ॥७१॥ इत्युक्त्वासामहाभागाप्रययौचगृहोदरम् ॥ तत्रापश्यद्द्विजोविप्रंयथाचाण्डालवेश्मनि ॥ ७२ ॥ विमृश्यविस्मयापन्नस्तेनसार्धंययौद्विजः ॥ तिष्ठन्तंचद्विजंतंचसोऽपश्यद्धृष्टमानसम् ॥ ७३ ॥ सचोवाचमुदाविप्रंदृष्ट्वातंतांसतींचसः ॥ विप्रउवाच ॥ ७४ ॥ देशान्तरेचयद्वृत्तंतयाचकथितंकिल ॥ कथंजानातिमद्वृत्तंचाण्डालोऽपिपतिव्रता ॥ अतोमेविस्मयस्तातकिमाश्चर्यंपरंमहत् ॥ ७५ ॥ हरिरुवाच ॥ ज्ञायतेकारणंतातसर्वेषांभूतभावनः ॥ अतिपुण्यात्सदाचाराद्यतस्त्वंविस्मयंगतः ॥ किमुक्तश्चतयात्वंचवदतत्साम्प्रतंमुने ॥ ७६ ॥ विप्रउवाच ॥ प्रष्टुंधर्मतुलाधारंसाचमांसमुपादिशत् ॥ ७७ ॥ हरिरुवाच ॥ आगच्छमुनिशार्दूलअहंगच्छामितंप्रति ॥ गच्छन्तंचहरिंप्राहतुलाधारःक्वतिष्ठति ॥ ७८ ॥ हरिरुवाच ॥ जनानांनिकरोयत्रबहुद्रव्यसुविक्रये ॥ विक्रीणातिचक्रीणातितुलाधारस्ततस्ततः ॥ ७९ ॥ जनोयवात्रसंस्नेहंकूटमन्नस्यसञ्चयम् ॥ सर्वतस्यमुखादेवगृह्णातिचददात्यपि ॥ ८० ॥ सत्यंत्यक्त्वानृतंकिंचित्प्राणान्तेसमुपस्थिते ॥ नोक्तंनरवरश्रेष्ठस्तेनधर्मतुलाधरः ॥८१॥ व्यासउवाच ॥ इत्युक्तेतुतमद्राक्षीद्विक्रीणन्तंरसान्बहून् ॥ मलपङ्कधरंमर्त्यंदन्तकुड्मलपङ्क्तिलम् ॥ ८२ ॥ तत्रवस्तुधनोत्थांचभाषन्तंविविधांगिरम् ॥ वृतंबहुविधैर्मर्त्यैःस्त्रीभिःपुम्भिश्चसर्वतः ॥ कथंकथमितिप्राहसतंमधुरयागिरा ॥ ८३ ॥ विप्रउवाच ॥ धर्मस्यमेसमुद्देशंवदप्राप्तोऽन्तिकंहिते ॥ ८४ ॥ तुलाधारउवाच ॥ यावज्जनाःप्रतिष्ठन्तिममैवसन्निधौद्विज ॥ तावन्मेस्वस्थतानास्तियावच्चरात्रियामकः ॥ ८५ ॥ तच्चोपदेशमादायगच्छधर्माकरंप्रति ॥ बकस्यमरणेदोषंखेचवस्त्राविशोषणम् ॥ ८६ ॥ सर्वंतत्रचजानीपेसज्जनाद्द्रोहकंव्रज ॥ तत्रतस्योपदेशेनतवकामःफलिष्यति॥८७॥व्यासउवाच॥इत्युक्त्वातंतुलाधारःकरोतिक्रयविक्रयौ॥८८॥विप्रउवाच॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथाततगमिष्यामिसज्जनाद्रोहकंप्रति ॥ तुलाधारसमुद्देशान्नजानामितदालयम् ॥८९॥ हरिरुवाच ॥ एह्यागच्छगमिष्यामित्वयासार्द्धंचतद्गृहम् ॥
अथवर्त्मनिगच्छन्तमुवाचब्राह्मणोहरिम् ॥ ९० ॥ विप्रउवाच ॥ तुलाधारस्यनस्नानंनदेवपितृतर्पणम् ॥ मलदिग्धंचगात्रंतुसर्वंचैलमलक्षणम् ॥
॥ ९१ ॥ कथंजानातिमद्वृत्तंदेशान्तरसमुद्भवम् ॥ अतोमेविस्मयस्तातसर्वंत्वंवदकारणम् ॥९२॥हरिरुवाच ॥ सत्येनसमभावेनजितंतेनजगत्रयम् ॥
तेनातृप्यन्तपितरोदेवामुनिगणैःसह ॥ ९३ ॥ भूतभव्यप्रवृत्तंचतेनजानातिधार्मिकः ॥ नास्तिसत्यात्परोधर्मोनानृतात्पातकंपरम् ॥ ९४ ॥
विशेषेसमभावस्यपुरुषस्यानघस्यच ॥ अरौमित्रेऽप्युदासीनेमनोयस्यसमंव्रजेत् ॥ सर्वपापक्षयस्तस्यविष्णुसायुज्यतांव्रजेत् ॥ ९५ ॥ एवंयोवर्तते
नित्यंकुलकोटिंसमुद्धरेत् ॥ समोधर्मःसमःस्वर्गःसमंहिपरमंतपः ॥ यस्यैवमानसेनित्यंसमःसपुरुषोत्तमः ॥ ९६ ॥ सत्यंदमःशमश्चैवधै
र्यंस्थैर्यमलोभता ॥ अनाश्चर्यमनालस्यंतस्मिन्सर्वंप्रतिष्ठितम् ॥ ९७ ॥ तेनवैदेवलोकस्यनरलोकस्यसर्वशः ॥ वृत्तंजानातिधर्मज्ञस्तस्यदेहेस्थितो
हरिः॥९८॥लोकेतस्यसमोनास्तिसमःसत्यार्जवेषुच॥सचधर्ममयःसाक्षात्तेनैवधारितंजगत् ॥९९॥ द्विजउवाच॥ ज्ञातंमेत्वत्प्रसादाच्चतुलाधारस्यकार
णम् ॥ अद्रोहकस्ययद्वृत्तंतद्ब्रूहित्वंयदीच्छसि ॥ १०० ॥ हरिरुवाच ॥ पुरैवराजपुत्रस्यकुलस्त्रीनवयौवना ॥ पत्नीवकामदेवस्यशचीववासवस्य
च ॥ १ ॥ तस्यप्राणसमाभार्यासुन्दरीनामसुन्दरी ॥ अकस्मात्पार्थिवश्चैवकार्येगन्तुंसमुद्यतः ॥ २ ॥ मनसालोचितंतेनप्राणेभ्योऽपिगरी
यसीम् ॥ कस्मिन्स्थानेस्थापयामियतोरक्षाभवेद्ध्रुवम् ॥ ३ ॥ इत्यालोच्यैवसहसात्वागतोऽस्यगृहंप्रति ॥ उक्तंचतादृशंवाक्यंश्रुत्वासविस्मयं
गतः ॥ ४ ॥ अद्रोहकउवाच ॥ नतातस्तेनचभ्रातानचाहंतवबान्धवः ॥ पितृमातृकुलस्यैवतस्यानहिसुहृज्जनः ॥कथंचमद्गृहेतातस्थित्यास्वस्थोभवि
ष्यसि ॥ ५ ॥ हरिरुवाच ॥ एतस्मिन्नन्तरेतेनचोक्तंवाक्यंयथोचितम् ॥ ६ ॥ राजपुत्रउवाच ॥ लोकेत्वत्सदृशोनास्तिधर्मज्ञोविजितेन्द्रियः ॥ ७ ॥
हरिरुवाच ॥ सचाहतंचसर्वज्ञंवक्तुंनार्हसिदूषणम् ॥ त्रैलोक्यमोहिनींभार्यांकःपुमान्रक्षितुंक्षमः ॥८॥ राजपुत्रउवाच ॥ धरण्यांपरिविज्ञायत्वागतोऽहं
तवान्तिकम् ॥ एषातिष्ठतुतेऽगारेव्रजामिनिजमन्दिरम् ॥ ९ ॥ हरिरुवाच ॥ इत्युक्तेसपुनःप्राहनगरेऽस्मिन्प्रशोभने ॥ बहुकामुकसम्पूर्णेकथंरक्षाभवे
त्स्त्रियाः ॥ ११० ॥ सचोवाचपुनस्तंचकुरुरक्षांव्रजाम्यहम् ॥ गृहस्थःसङ्कटादाहधर्मस्यराजपुत्रकम् ॥ ११ ॥ अद्रोहकउवाच॥ करोम्यनुचितंकार्यं
स्वदास्यमुचितंहितम् ॥ सदाचैवेदृशीभार्यास्थातव्यामद्गृहेपितः ॥ १२ ॥ अरक्षारक्षणेदेववदाभीष्टंकुरुप्रियम् ॥ ममतल्पेमयासार्धंशयाना
भार्ययासह ॥ मन्यसेदैवतंस्वंचेत्तिष्ठेन्नोचेत्तुगच्छतु ॥ १३ ॥ हरिरुवाच ॥ क्षणंविमृश्यतंप्राहराजपुत्रःपुनस्तदा ॥ १४ ॥ राजपुत्रउवाच ॥ बाढ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मेतद्वचस्तातयथाभीष्टंतथाकुरु॥१५॥हरिरुवाच॥ततोभार्यांजगादाथअस्यवाक्याच्छिवाशिवम् ॥ कर्तव्यंचनतेदोषआज्ञयाममसुन्दरि ॥ १६ ॥
एतदुक्त्वागतःसोऽपिभूपतेःशासनात्पितुः ॥ अनन्तरंक्षपायांचयदुक्तंचतथाकृतम् ॥ १७ ॥ योषितोर्मध्यगःसोऽपिनित्यंस्वपितिधार्मिकः ॥ धर्मा
न्नचलतेसोऽपिस्वभार्यापरभार्ययोः ॥ १८ ॥ संस्पर्शात्स्वस्त्रियश्चास्यकामाभिलषितंमनः ॥ तस्याःसंसर्गतश्चैवदुहितैवप्रमन्यते ॥ १९ ॥
स्तनौतस्यास्तुपृष्ठेचलगन्तौचपुनःपुनः ॥ बालकस्येवपुत्रस्यस्तनौमातुःसमन्यते ॥ १२० ॥ तस्याअङ्गानिचाङ्गेषुलगन्तिचपुनःपुनः॥ ततोमातु
स्सुतस्येवसोऽमन्यतदिनेदिने ॥ २१ ॥ तस्ययोषासुसंसर्गोनिवृत्तस्त्वभवत्ततः ॥ एवंसंवत्सरस्यार्द्धेतत्पतिश्चागतःपुरम् ॥२२॥ अपृच्छत्तंचलोकेषु
तस्यावृत्तमथोदितम् ॥ केचिद्वद्वंबोधयन्तोयुवानोऽपिसुविस्मिताः ॥ २३ ॥ केचिदाहुस्त्वयादत्तातयासार्द्धस्वपित्यसौ ॥ स्त्रीपुंसोरेकसंसर्गा
च्छान्ततातुकथंभवेत् ॥ २४ ॥ तस्यांयस्याभिलाषोऽस्तिनपृष्टस्सवदेद्युवा ॥ लोकानांकुश्रुतिर्वार्तातेनपुण्यबलाच्छ्रुता ॥ २५॥ जनापवादमोक्षार्थं
बुद्धिस्तस्याभवच्छुभा ॥ दारूणिस्वयमाहृत्याजिज्वलत्समहानलम् ॥२६॥ एतस्मिन्नन्तरेतातराजपुत्रःप्रतापवान् ॥ आगमत्तद्गृहंसद्यःसोऽपश्यत्तां
चयोषितम् ॥ २७ ॥ प्रोत्फुल्लवदनांनारींप्रविषादगतंनरम् ॥ अनयोर्मानसंज्ञात्वाराजपुत्रोऽवदद्वचः ॥ २८ ॥ राजपुत्रउवाच ॥ किंनसम्भाषसेमां
चमित्रकंचिरमागतम्॥२९॥हरिरुवाच ॥ अब्रवीत्सोऽपिधर्मात्माराजपुत्रमनष्टधीः ॥१३०॥अद्रोहकउवाच॥यत्कृतंदुष्करंकर्ममयात्वद्धितकारणात्॥
सर्वंव्यर्थमहंमन्येजनानांचप्रवादतः ॥ अद्यवह्निमहंयास्येप्रपश्यन्तुनरास्सुराः ॥३१॥ हरिरुवाच ॥ इत्युक्त्वासमहाभागःप्रविवेशहुताशनम् ॥विश
तस्तस्यवह्नौनकुसुमंचिकुरालये ॥३२॥ नाङ्गमस्यानलोऽधाक्षीन्नचवस्त्रंनकुन्तलम् ॥ खेचदेवामुदासर्वेसाधुसाध्वितिचाब्रुवन्॥३३॥अपतन्पुष्पवर्षा
णितस्यमूर्ध्निसमन्ततः॥यैर्यैश्चदुष्कृतंवाक्यंगदितंतावुभौप्रति ॥३४॥ तेषांमुखेप्रजायन्तेकुष्ठानिविविधानिच ॥ तत्रागत्यचदेवाश्चवह्नेराकृष्यतंमुदा
॥३५॥अपूजयन्सुपुष्पैश्चमुनयोविस्मयंगताः ॥सर्वैर्मुनिवरैरेवंमनुष्यैर्विविधैस्तदा॥३६॥ अर्च्यतेतुमहातेजाःसचसर्वानपूजयत्॥सज्जनाद्रोहकंनामकृ
तंदेवासुरैर्नृभिः ॥३७॥ तस्यपादरजःपूतासस्यपूर्णाधराभवत् ॥सुराश्चाहुश्चतंतत्रभार्यातेसम्प्रगृह्यताम्॥३८॥ एतस्यसदृशोलोकेनभूतोनभविष्यति॥
नास्तीतिसाम्प्रतंपृथ्व्यांकामलोभाजितःपुमान् ॥ ३९ ॥ देवासुरमनुष्याणांरक्षसांमृगपक्षिणाम् ॥ कीटादीनांचसर्वेषांकामएषसुदुर्जयः ॥ ४० ॥
कामाल्लोभात्तथाक्रोधान्नित्यंसत्त्वेषुजायते ॥ संसारबन्धकःकामोह्यकामोनकचिद्भवेत् ॥ ४१ ॥ अनेनैवजितंसर्वंभुवनानिचतुर्दश ॥ अमुष्यहृदये
नित्यंवासुदेवोमुदास्थितः ॥ ४२ ॥ एवंस्पृष्ट्वाथदृष्ट्वातंमनुष्याःसर्वकल्मषात् ॥ पूयन्तेह्यनघाश्चैवलभन्तेचाक्षयांदिवम् ॥ ४३ ॥ एवमुक्त्वागतादेवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विमानैश्चदिवंमुदा ॥ मनुष्याःप्रययुस्तुष्टाद्दम्पतीस्वगृहंतथा ॥ ४४ ॥ दिव्यंचक्षुस्तदातस्यचासीदेवान्सपश्यति ॥ त्रैलोक्यस्यचवार्त्तांचजानाति
लीलयाभृशम् ॥ ४५ ॥ ततस्तस्यचवीथ्यांचदृष्टस्तेनसहैवसः ॥ सपप्रच्छमुदातंचधर्मोद्देशंहितंवद ॥ ४६ ॥ सज्जनाद्रोहउवाच ॥ गच्छवा
डवधर्मज्ञवैष्णवंपुरुषोत्तमम्॥तंचदृष्ट्वात्वभीष्टंतेसाम्प्रतंचफलिष्यति ॥४७॥ बकस्यनिधनंयद्वावत्त्रस्याशोषणंतथा ॥जानीषेचापरोयश्चकामस्तेऽस्ति
हृदिस्थितः ॥४८॥ व्यासउवाच॥एतच्छ्रुत्वातुवचनमागतोवैष्णवंप्रति ॥विष्णुरूपद्विजेनैवसार्द्धंतेनमुदाययौ॥४९॥अपश्यत्पुरुषंशुद्धंज्वलन्तंचपुरः
स्थितम्॥सर्वलक्षणसम्पूर्णंदीप्यमानंस्वतेजसा ॥१५०॥ अब्रवीत्सचधर्मात्माध्यानस्थंचहरेःप्रियम् ॥५१॥ विप्रउवाच॥वदनोयद्वृत्तंवैदूरात्त्वांचाग
तोह्यहम्॥५२॥वैष्णवउवाच॥प्रसन्नस्तेसुरश्रेष्ठोदानवारीश्वरःसदा॥दृष्ट्वात्वांचमनोऽस्माकंहृष्यतीवाधुनाद्विज ॥५३॥ कल्याणंचातुलंतेऽद्यफलिष्यति
मनोरथः॥सुखवर्त्मनितेनित्यंचैलंशुष्यतिनान्यथा॥दृष्ट्वादेवंसुरश्रेष्ठंममगेहेहरिंस्थितम्॥५४॥व्यासउवाच॥इत्युक्तेवैष्णवेनाथसतुतंपुनरब्रवीत् ॥५५॥
विप्रउवाच॥क्वासौविष्णुःस्थितोनित्यंदर्शयाद्यप्रसादतः॥५६॥ वैष्णवउवाच॥अस्मिन्देवगृहेरम्येप्रविश्यपरमेश्वरम्॥तंदृष्ट्वाकिल्बिषाद्घोरान्मुच्यसेज
न्मबन्धनात् ॥५७॥ व्यासउवाच ॥ तस्यतद्वचनंश्रुत्वाप्रविश्यसदनंप्रति॥अपश्यत्तंद्विजंविष्णुंतिष्ठन्तंपद्मतल्पके ॥५८॥ शिरसैवप्रवन्द्याथजग्राहचर
णौमुदा ॥ प्रसादीभवदेवेशनज्ञातस्त्वंपुरामया ॥ ५९ ॥ इहामुत्रचदेवेशतवाहंकिङ्करःप्रभो ॥ अनुग्रहश्चमेदृष्टोभवतोमधुसूदन ॥१६०॥ रूपंतेद्रष्टुमि
च्छामियदिचास्तिकृपामयि ॥६१॥ विष्णुरुवाच ॥ अस्तिमेत्वयिभूदेवप्रियत्वंचसदैवहि ॥ स्नेहात्पुण्यवतामेवदर्शनंकारितंमया ॥६२॥ दर्शना
त्स्पर्शनाद्ध्यानात्कीर्तनाद्भाषणात्तथा ॥ सकृत्पुण्यवतामेवस्वर्गंचाक्षयमश्नुते ॥ ६३ ॥ नित्यमेवतुसंसर्गात्सर्वपापक्षयोभवेत् ॥ भुक्त्वासुखमन
न्तंचमद्देहेप्रविलीयते ॥ ६४ ॥ स्नात्वाचपुण्यतीर्थेषुदृष्ट्वामांचैवसर्वतः ॥ दृष्ट्वापुण्यवतांदेशान्ममदेहेविलीयते ॥६५॥ कथयित्वाकथांपुण्यांलोका
नामग्रतःसदा ॥ सचैवनरशार्दूलमद्देहेप्रविलीयते ॥६६॥ उपोष्यवासरेऽस्माकंश्रुत्वामच्चरितंध्रुवम् ॥ रात्रौजागरणंकृत्वामद्देहेप्रविलीयते ॥ ६७ ॥
अत्यन्तघोषणोनृत्यगीतवाद्यादिकैस्सदा ॥ नामस्मरन्द्विजश्रेष्ठमद्देहेप्रविलीयते ॥ ६८ ॥ मद्भक्तस्तीर्थभूतश्चत्वमेवबकमारणात् ॥ यत्पापंतस्यमो
क्षायसखेस्थित्वा उवाचह ॥ ६९ ॥ गच्छमूकंमहात्मानंतीर्थपुण्यवतांवरम् ॥ मूकस्यदर्शनात्तातसर्वेदृष्टामहाजनाः ॥ १७० ॥ तेषांचदर्शनादे
वतथासम्भाषणान्मम ॥ ममसम्पर्कभावाच्चमद्गृहंचागतोभवान् ॥ ७१ ॥ जन्मकोटिसहस्रेभ्योयस्यपापक्षयोभवेत् ॥ समांपश्यतिधर्मज्ञोयथा
तेनप्रसन्नता ॥ ७२ ॥ ममैवानुग्रहाद्धतसअहंदृष्टस्त्वयानघ ॥ तस्माद्वरंगृहाणत्वंयत्तेमनसिवर्तते ॥ ७३ ॥ विप्रउवाच ॥ अस्माकंसर्वथानाथ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मानसंत्वयितिष्ठतु ॥ त्वदृतेसर्वलोकेशकदाचिन्नतुरोचताम् ॥७४॥ माधवउवाच ॥ यस्मादेतादृशीबुद्धिःस्फुरतेतेसदानघ ॥ तस्मान्मत्सदृशान्भोगा न्मद्गेहेसंप्रलप्स्यसे ॥७५॥ किंतुतेपितरौपूजामाप्नुतोनत्वयानघ ॥ पूजयित्वातुपितरौपश्चाद्यास्यसिमत्तनुम् ॥ ७६ ॥ तयोर्निश्वासवातेनमन्युनाच भृशंपुनः ॥ तपःक्षरतितेनित्यंतस्मात्पूजयतौद्विज ॥७७॥ मन्युर्निपततेयस्मिन्पुत्रेपित्रोश्चनित्यशः ॥ तन्निरयंनबाधेऽहंनधातानचशङ्करः ॥ ७८ ॥ तस्मात्त्वंपितरौगच्छकुरुपूजांप्रयत्नतः ॥ ततस्त्वंहितयोरेवप्रसादान्मत्पदंव्रज ॥७९॥ व्यासउवाच ॥ इत्युक्तेतुद्विजश्रेष्ठःपुनराहजगद्गुरुम् ॥१८०॥ विप्रउवाच ॥ प्रसन्नोयदिमेनाथरूपंस्वंदर्शयाच्युत ॥८१॥ व्यासउवाच ॥ ततोद्विजप्रणयतःप्रसन्नहृदयोवशी॥रूपंस्वंदर्शयामासब्रह्मण्योब्रह्मकर्मणे ॥८२॥ शङ्खचक्रगदापद्मधारिणंपुरुषोत्तमम् ॥ कारणंसर्वलोकस्यतेजसापूरयज्जगत् ॥८३॥ प्रणम्यदण्डवद्विप्रउवाचपुनरच्युतम् ॥ अद्यमेसफलंजन्म अद्यमेचक्षुषीशिवे ॥ ८४ ॥ अद्यमेचकरौश्लाघ्यौधन्योऽहंजगदीश्वर ॥ अद्यमेपुरुषायान्तिब्रह्मलोकंसनातनम् ॥ ८५ ॥ नन्दन्तिबान्धवामेऽद्यत्वत्प्र सादाज्जनार्दन ॥ इदानींचप्रसिद्धामेसर्वेचैवमनोरथाः ॥ ८६ ॥ किंतुमेविस्मयोनाथमूकादिज्ञानिनोभृशम् ॥ कथंजानन्तिमद्वृत्तं देशान्तरउपस्थितम् ॥ ८७ ॥ तस्यगेहोदराकाशेस्थितोविप्रोऽतिशोभनः ॥ तथापतिव्रतागेहेतुलाधारशिरस्यपि ॥ ८८ ॥ तथा मित्राद्रोहकस्यत्वंचवैष्णवमन्दिरे ॥ अनुग्रहाच्चमेविप्रतत्त्वतोवक्तुमर्हसि ॥ ८९ ॥ श्रीभगवानुवाच ॥ पित्रोर्भक्तःसदामूकःपति व्रताशुभाचसा ॥ सत्यवादीतुलाधारःसमःसर्वजनेषुच ॥ १९० ॥ लोभकामजिदद्रोहोमद्भक्तोवैष्णवःस्मृतः ॥ सम्प्रीतोऽहंगुणैरेषांतिष्ठा म्यावसथेमुदा ॥ भारतीकमलाभ्यांचसहितोद्विजसत्तम ॥ ९१ ॥ विप्रउवाच ॥ महापातकिसंसर्गान्नराश्चैवातिपातकाः ॥ इतिजल्पन्तिधर्मज्ञाः स्मृतिशास्त्रेषुसर्वदा ॥ पुराणागमवेदेषुकथंत्वंतिष्ठसेगृहे ॥ ९२ ॥ श्रीभगवानुवाच ॥ कल्याणानांचसर्वेषांकर्त्तामूकोजगत्रये ॥ वृत्तस्थोयोऽपिचण्डा लस्तंदेवाब्राह्मणंविदुः ॥ ९३ ॥ मूकस्यसदृशोनास्तिलोकेषुपुण्यकर्मतः ॥ पित्रोर्भक्तिपरोनित्यजितंतेनजगत्त्रयम् ॥ ९४ ॥ तयोर्भक्त्यात्वहंतुष्टः सर्वदेवगणैःसह ॥ तिष्ठामिद्विजरूपेणतस्यगेहोदरेचखे ॥ ९५ ॥ तथापतिव्रतागेहेतुलाधारस्यमन्दिरे ॥ अद्रोहकस्यभवनेवैष्णवस्यचवेश्मनि ॥ ९६ ॥ सदातिष्ठामिधर्मज्ञमुहूर्तंनत्यजाम्यहम् ॥ तेनपश्यन्तिमांनित्यंयेत्वन्येपापकृज्जनाः ॥ ९७ ॥ पुण्यत्वाच्चत्वयादृष्टोममानुग्रहकारणात् ॥ पित्रोर्भक्तिपरःशुद्धश्चाण्डालोदेवतांगतः ॥ ९८ ॥ तस्मात्तेनसहप्रीत्यातिष्ठामितस्यमन्दिरे ॥ पुनःपुनःकथालापंकरोमिद्विजनन्दन ॥ ९९ ॥ तस्य वैमानसेनित्यंवर्तेऽहंभूतभावनः ॥ सतज्जानातित्वद्वृत्ततथापतिव्रतादयः ॥ २०० ॥ तेषांवृत्तंवदिष्यामिशृणुत्वंचानुपूर्वशः ॥ यच्छ्रुत्वासर्वथामर्त्यो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुच्यतेजन्मबन्धनात् ॥ १ ॥ पितुर्मातुःपरंतीर्थदेवदेवेषुनैवहि ॥ पित्रोरर्चाकृतायेनसएवपुरुषोत्तमः ॥२॥ पित्रोराज्ञाचदेवस्यगुरोराज्ञासमंफलम् ॥ आराधनादिवोराज्यंबाधयारौरवंव्रजेत् ॥ ३ ॥ सचास्माकंहृदिस्थोऽपितस्याहंत्हृदयेस्थितः ॥ आवयोरन्तरंनास्तिपरत्रेहचमत्समः ॥ ४ ॥ मदग्रेमत्पुरेरम्येसर्वैश्चबान्धवैःसह ॥ सभुञ्जीताक्षयंभोगमन्तेमयिचलीयते ॥ ५ ॥ अतएवहिमूकोऽसौवार्त्तांत्रैलोक्यसम्भवाम् ॥ जानातिनरशार्दूल एपतेविस्मयःकुतः ॥ ६ ॥ द्विजउवाच ॥ मोहादज्ञानतोवापिनकृत्वापितुरर्चनम् ॥ ज्ञात्वावाकिंचकर्तव्यंसदसज्जगदीश्वर ॥ ७ ॥ श्रीभगवानुवाच ॥ दिनैकंमासपक्षौवापक्षार्धंवाथवत्सरम् ॥ पित्रोर्भक्तिःकृतायेनसचगच्छेन्ममालयम् ॥८॥ कारयित्वामनःकष्टमवश्यंनरकंव्रजेत् ॥ नकृतावा कृतावास्यात्पित्रोरर्चापरंपुरा ॥ वृषोत्सर्गंनरःकृत्वापितृभक्तिफलंलभेत् ॥ ९ ॥ अन्नंवस्त्रंतथागव्यंमधुमांसादिसत्कृतम् ॥ दद्यादकुत्सितंश्राद्धेवृषोत्सर्गफलंलभेत् ॥ २१० ॥ श्राद्धंदद्याद्द्विजाग्र्यायवेदशास्त्रानुभाविने ॥ शान्तायवीतरागायवृषोत्सर्गफलंलभेत् ॥ ११ ॥ अन्नंवस्त्रंतथागव्यंसामिषंचनिरामिषम् ॥ सर्वंलक्षगुणंप्रोक्तंज्ञातिभ्योयत्प्रदीयते ॥ १२ ॥ सर्वस्वेनकृतंश्राद्धंयेनपुत्रेणधीमता ॥ जातिस्मरत्वंप्राप्नोतिपितृभक्तिफलंलभेत् ॥ १३ ॥ श्राद्धात्परोमहायज्ञस्त्रैलोक्येतुनविद्यते ॥ अत्रयद्दीयतेकिंचित्सर्वंचाक्षयमश्नुते ॥ १४ ॥ अन्यस्मिंश्चायुतंविद्धिज्ञातिभ्योलक्षमुच्यते ॥ पिण्डेकोटिगुणंप्रोक्तंद्विजायानन्तमुच्यते ॥१५॥ गङ्गाजलेगयायांचप्रयागेपुष्करेतथा ॥ वाराणस्यांसिद्धकुण्डेगङ्गासागरसङ्गमे ॥ १६ ॥ अन्नपिण्डंप्रदद्याद्यस्तस्यमुक्तिर्भवेद्ध्रुवम्॥पितरश्चाक्षयंस्वर्गंलभन्तेजन्मनःफलम् ॥१७॥ भागीरथ्यांविशेषेणयस्तुदद्यात्तिलोदकम्॥मुक्तिमार्गंसचाप्नोतिपिण्डदानेतुकिंपुनः ॥१८॥नदीतीरेषुसाहस्रंनदेत्वयुतमिष्यते ॥ सामान्यफलसंसर्गाच्छ्राद्धंशतगुणंभवेत् ॥१९॥ अमायांचयुगाद्यायांग्रहणेसूर्यचन्द्रयोः ॥ पार्वणंकुरुतेयस्तुसोऽक्षयंलोकमश्नुते ॥ २२०॥ पितरस्तस्यतुष्यन्तिसर्वेसमायुतंप्रति ॥ आशिषंदयितंदत्त्वाभोग्यंचानन्तमात्मजे ॥ २१ ॥ ततःपर्वणिपुत्रैश्चकर्त्तव्यंपार्वणंमुदा ॥ पित्रोर्यज्ञमिमंकृत्वामुच्यतेजन्मबन्धनात् ॥ २२ ॥ अहन्यहनियच्छ्राद्धंनित्यश्राद्धमितिस्मृतम् ॥ श्रद्धयाकारयेद्यस्तुसोऽक्षयंलोकमश्नुते ॥ २३ ॥ तथैवापरपक्षेचकाम्यश्राद्धंविधानतः ॥ कृत्वाकामंसचाप्नोतियद्वामनसिवर्तते ॥ २४ ॥ आषाढीमवधिंकृत्वा यस्तुपक्षस्तुपञ्चमः ॥ तत्रश्राद्धंप्रकुर्वीतकन्यांगच्छतुवानवा ॥ २५ ॥ कन्यांगतेसवितरियान्यहानितुषोडश ॥ क्रतुभिस्तानितुल्यानिसमाप्तवरदक्षिणैः ॥ २६ ॥ काम्यश्राद्धंमहापुण्यमिदंतस्यागतंशिवम् ॥ अभावात्कृष्णपक्षादौतुलायांकर्तुमर्हति ॥ २७ ॥ अमावृश्चिकमायातिनैराश्यंपितरोगताः ॥ पुनःस्वभवनंयान्तिशापंदत्त्वासुदारुणम् ॥ २८ ॥ पितृशापेनपुत्रस्यनष्टंसर्वमितिस्मृतम् ॥ धनंपुत्रायशःकाम्यमभीष्टमायुरेवच ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वाण्येतानिलभ्यन्तेजन्मजन्मसुमानवैः ॥ पितॄणांचवरेणैवतस्मान्मैनंपरित्यजेत् ॥ ३० ॥ विवाहव्रतयज्ञादौकृत्वानान्दीमुखंद्विजः ॥ अक्षयंलभ
तेपुण्यंगोत्रंतस्यप्रवर्द्धते ॥ ३१ ॥ एतद्विपर्ययोयस्यसयातिनरकंनरः ॥ कुलक्षयोभवेत्तस्यसजीवोदुःखितोभवेत् ॥ ३२ ॥ ततस्तुपूजयेदग्रेगणेशं
शम्भुनन्दनम् ॥ परंषोडशमातॄश्चतत्पश्चात्पितृसञ्चयम् ॥ ३३ ॥ नान्दीमुखेषुसर्वेषुप्रपितामहपूर्वकम् ॥ नान्दीमुखेद्विजान्सर्वान्स्थापयेत्प्राङ्मुखा
न्सुधीः ॥३४ ॥उच्चारयेन्नमोवाक्यंस्वधाचान्यत्रयोजयेत्॥ ग्रहणेचन्द्रसूर्यस्यदत्त्वापिण्डोदकंनरः ॥ ३५ ॥ अक्षयंलभतेस्वर्गं पितॄणांपुष्टिवर्द्धनम्॥
तत्रस्नानंनकुर्याद्यःशक्त्त्यापिण्डोदकंनरः ॥ ३६ ॥ नददातिपितॄणांतुचाण्डालत्वंसगच्छति ॥ ३७ ॥ सर्वंभूमिसमंदानंसर्वेव्याससमाद्विजाः ॥
सर्वंगङ्गासमंतोयंराहुग्रस्तेनिशाकरे ॥ ३८ ॥ इन्दोर्लक्षगुणंप्रोक्तंदशलक्षंतुभास्करे ॥ गङ्गातोयेतुसम्प्राप्तइन्दोःकोटीरवेर्दश ॥ ३९ ॥
गवांशतसहस्रस्यसम्यग्दत्तस्ययत्फलम् ॥ तत्फलंजाह्नवीस्नानेराहुग्रस्तेनिशाकरे ॥ २४० ॥ चन्द्रसूर्यग्रहेचैवअवगाहतिजाह्नवीम् ॥
सस्नातस्सर्वतीर्थेषुकिमर्थमटतेमहीम् ॥ ४१ ॥ सूर्यग्रहःसूर्यवारेसोमेसोमग्रहतस्था ॥ चूडामणिरितिख्यातस्तत्रानन्तफलंस्मृतम् ॥ ४२ ॥
समुपोष्यतयोःपूर्वेपुण्यतीर्थेतुयःपुमान् ॥ दत्त्वापिण्डोदकंदानंसत्यलोकेप्रतिष्ठितः ॥ ४३ ॥ द्विजउवाच ॥ पितुरेवमहायज्ञः
श्राद्धंचभवतेरितम् ॥ तातापश्चिमकालादौकिंकर्त्तव्यंसुतेनहि ॥ ४४ ॥ किंकृत्वाचपरंश्रेयोजन्मजन्मसुलभ्यते ॥ पुत्रेणधीमतादेवय
त्नतोवक्तुमर्हसि ॥ ४५ ॥ श्रीभगवानुवाच ॥ पूर्ववयसिसम्प्राप्तेपितापुत्रइतिस्मृतः ॥ उत्तरेचसुतस्तातःपालनान्नतुपूजनात् ॥ ४६ ॥
देववत्पूजयेत्तातंस्नेहंकुर्याच्चपुत्रवत् ॥ नलङ्घयेद्वचस्तस्यमनसापिकदाचन ॥ ४७ ॥ आतुरस्यपितुःपुत्रोयस्तुकुर्यात्प्रतिक्रियाम् ॥ सोऽक्षयं
लभतेस्वर्गंसदादेवैःप्रपूज्यते ॥ ४८ ॥ मुमूर्षोरपितातस्यपश्यतोमृत्युलक्षणम् ॥ कृत्वाचयजनंपुत्रोदेवानांतुल्यतांव्रजेत् ॥ ४९ ॥ विधि
नाऽनशनेनैवपितुःस्वर्गंददातियः ॥ पुत्रस्यतस्यधीरस्यशृणुवक्ष्यामियद्गुणम् ॥ २५० ॥ अश्वमेधसहस्राणिराजसूयशतानिच ॥ भवेदनशनेपु
ण्यंतीर्थेकोटिगुणंतयोः ॥ ५१ ॥ भागीरथ्याजलेचैवयोमृतःपुरुषोत्तमः ॥ पयोधररसंमातुर्नपिबेन्मुक्ततांव्रजेत् ॥ ५२ ॥ वाराणस्यांत्यजेद्य
स्तुप्राणांश्चैवयदृच्छया ॥ अभीष्टंचफलंभुक्त्वामद्देहेप्रविलीयते ॥ ५३ ॥ यागतिर्योगयुक्तानांमुनीनामूर्द्धरेतसाम् ॥ सागतिस्त्यजतःप्राणान्ब्रह्म
पुत्रेषुसप्तसु ॥ ५४ ॥ लोहितस्यविशेषेणतीरोत्तरसमाश्रितः ॥ विधिनायस्त्यजेत्प्राणान्सचमत्समतांव्रजेत् ॥ ५५ ॥ तस्यैवचोर्वशीकेशेपुण्यती
र्थेद्विजोत्तम ॥ मृतोत्पन्नःसमाप्नोतिसर्वदोषैर्नलिप्यते ॥ ५६ ॥ गृहस्याभ्यन्तरेयस्यप्राणत्यागोभवेद्ध्रुवम् ॥ यावद्ग्रन्थिर्गृहेतिष्ठेत्तावद्बन्धोभवे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्तनौ ॥ ५७ ॥ हायनेहायनेचापिएकैकंपरिहीयते ॥ पश्यतांपुत्रबन्धूनांबन्धनेनास्तिनिष्कृतिः ॥ ५८ ॥ पर्वतेकाननेदुर्गेस्थानेवाजलवर्जिते ॥
मृतोदुर्गतिमाप्नोतिकीटादौजायतेपुनः ॥ ५९ ॥ संस्कारश्चभवेद्यस्यमृतस्यपरवासरे ॥ षष्टिर्वर्षसहस्राणिकुम्भीपाकेप्रतिष्ठति ॥ २६० ॥ अस्पृश्य
स्पर्शनादेवउच्छिष्टःपतितोमृतः ॥ सुचिरंनरकेस्थित्वाम्लेच्छजातिषुजायते ॥ ६१ ॥ तथैवबहुकीटेषुजायतेसत्त्वजातिषु ॥ तस्मान्नचिरकालेषुजा
नीयात्पुण्यपातकम् ॥ ६२ ॥ पुण्यात्पुण्यप्रयोगैश्चसर्वेषांमर्त्यवासिनाम् ॥ मरणेयागतिःपुंसांगतिर्भवतितादृशी ॥ ६३ ॥ पुण्यतीर्थेमृतोयस्तु
विष्णोर्नामानिचिन्तयन् ॥ पापात्पूतोव्रजेत्स्वर्गंसर्वदोषैर्नलिप्यते ॥ ६४ ॥ पितुर्मृतस्यदेहंतुवहेद्यस्तुसुतोबली ॥ पदेपदेऽश्वमेधस्यफलंप्राप्नोत्यसं
शयम् ॥६५॥ प्राक्चितौचपितुर्देहेमुखाग्निंकारयेत्सुतः ॥ विधिनामन्त्रपूतेनपश्चाद्देहंदहेत्पुनः ॥ ६६ ॥ लोभमोहसमायुक्तंपापपुण्यसमावृतम् ॥
दहेयंसर्वगात्राणिदिव्याँल्लोकान्सगच्छतु ॥ ६७ ॥ दग्ध्वाचलङ्घयेत्पुत्रोऽप्यस्थिसञ्चयनंप्रति ॥ दशाहेसमनुप्राप्तेचार्द्रवस्त्रंपरित्यजेत् ॥ ६८ ॥
छित्त्वाचलोहितंचैलंवह्नौचाथजलेक्षिपेत् ॥ ततश्चैकादशाहेचश्राद्धंकुर्याद्विचक्षणः ॥६९ ॥ प्रेतस्यदेहपुष्ट्यर्थंब्राह्मणैकंतुभोजयेत् ॥ दानंदद्याच्चविधि
वद्वस्त्रंपीठंचपादुकाम् ॥ २७० ॥ सर्वोपकरणैस्तुल्यंधरादिगजवाजिकम् ॥ कृष्णांगांचप्रदद्यात्तुसर्वपापविमुक्तये ॥ ७१ ॥ चतुर्थाहेत्रिपक्षेचषण्मासे
चाब्दिकेतथा ॥ द्वादशप्रतिमास्यानिश्राद्धान्येतानिषोडश॥७२॥यस्यैतानिनसन्तीहयथाशक्तिचश्रद्धया ॥ पिशाचत्वंस्थिरंतस्यदत्तैःश्राद्धशतैरपि
॥ ७३ ॥ अब्दमम्बुघटंदद्यादन्नंचामिषसंयुतम् ॥ नित्यानित्यमभावाच्चक्षपन्मासंसमापयेत् ॥ ७४ ॥ सपिण्डीकरणश्राद्धंगतेसंवत्सरेबुधः ॥ पार्व
णस्यविधानेनकारयेद्द्विजसत्तमः ॥ ७५ ॥ पितुरब्दमशौचंस्यान्मातुःषण्मासमेवच ॥ त्रिमासंतुस्त्रियश्चैवतदर्द्धंभ्रातृपुत्रयोः ॥ ७६ ॥ सपिण्डा
नामशौचंस्याद्यावद्देहेसतिष्ठति ॥ पुत्रस्ययन्निषिद्धंतुशृणुतात्वदाम्यहम् ॥ ७७ ॥ ब्रह्मचारीसदाचारीनगच्छेच्चस्त्रियंक्वचित् ॥ ७८ ॥ सप्तघट्याः
परंचैवनवघट्याश्चपूर्वतः ॥ सकालःकुतपोज्ञेयःपितृणांदत्तमक्षयम् ॥ ७९ ॥ श्राद्धेत्रीणिपवित्राणिदौहित्रःकुतपस्तिलाः ॥ त्रीणिचात्रप्रशंसन्तिसत्यम
क्रोधमत्वराम्॥२८०॥सायंसन्ध्यांपरान्नंचपुनर्भोजनमैथुनम् ॥दानंप्रतिग्रहंचैवश्राद्धंकृत्वाविवर्जयेत्॥८१॥अकर्तव्यशतंकृत्वाकार्यंकुर्याद्विचक्षणः ॥
तच्चकर्तव्यतामेतिस्वयमुक्तंविरिञ्चिना ॥८२॥ शृणुपुत्रपुरावृत्तंबहूनांचवदाम्यहम् ॥ गुरोर्गोहननंकृत्वाददुःश्राद्धंययुर्दिवम् ॥ ८३ ॥ तेषांचकीर्त्तनादेव
श्राद्धंभवतिचाक्षयम् ॥ वसिष्ठस्यमुनेःशिष्याब्राह्मणास्सप्तसुव्रताः ॥ ८४ ॥ पितृश्राद्धेसमायातेहोमधेनुंगुरोःप्रियाम् ॥ प्रार्थयित्वागृहंनीत्वासप्त
भिर्भ्रातृभिर्मुदा ॥ ८५ ॥ गव्यार्थंपितृयज्ञेतांधेनुंहत्वाविमृश्यच॥ददुर्मांसंचविप्रेचशेषंविप्रांस्त्वभोजयन् ॥ ८६ ॥ समाप्यपितृकर्माणिवत्संसङ्गृह्यते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विजाः ॥ गुरौस्समर्पयामासुर्धेनुर्व्याघ्रेणभक्षिता ॥ ८७ ॥ ततस्तपोबलादेवज्ञात्वातेषांचकारणम् ॥सशशापततःशिष्यांश्चाण्डालाश्चभविष्यथ॥८८॥
वेपमानास्ततोविप्राःकृताञ्जलिपुटाःस्थिताः॥ ८९॥शिष्याऊचुः ॥धेनोर्मांसप्रदातारःपितृकृत्येसदानघ॥ अकर्तव्यसहस्राणिमहान्तिपातकानिच ॥
कुर्वन्तःपितृकार्येषुपापात्पूतादिवंगताः ॥ २९० ॥ श्रुतंबहुविधंनाथमुखात्तेचपुरातनम् ॥ क्षन्तुमर्हसिधर्मज्ञशापस्यान्तोविधीयताम् ॥ ९१ ॥
वसिष्ठउवाच ॥ शापोवोऽथयथापाप्मानतुधर्मविचारणात् ॥ चाण्डालादौसमुत्पन्नाःपुरावृत्तंस्मरिष्यथ ॥ ९२ ॥ नचवोज्ञानलोपश्चस्मृतिशास्त्र
मनष्टकम् ॥ पापयोनिंसमुत्तीर्यपश्चान्मोक्षंगमिष्यथ ॥ ९३ ॥ ततःप्राणान्परित्यज्यगुरुशापात्तुतेद्विजाः ॥ जाताश्चाण्डालयोनौतुसर्वेज्ञानस
मन्विताः ॥ ९४ ॥ स्तन्यंतैस्तुनपीतंवैस्मरद्भिःपूर्वजन्मतत् ॥ मृताजातामृगाःसर्वेचक्रवाकाःपुनर्वने ॥ ९५ ॥ हंसास्तुमानसेतीर्थेशुक्लाजाताःपुन
र्द्विजाः ॥ मुमूर्षवोमहाभागामृतास्तेखेदकारणात् ॥ ९६ ॥ तस्मिन्कालेमहाराजोधर्मकेतुरितिस्मृतः ॥ ययौस्नातुंततस्तीर्थंसदारःसपरिच्छदः
॥ ९७ ॥ ततोहंसास्त्रयोमोहाद्राज्यंभोग्यंतुयोषितः ॥ भक्ष्याणिचिन्तयन्तश्चलोकान्तरमयुस्तदा ॥ ९८ ॥ज्ञात्वावेदंचवेदाङ्गंमोक्षंयास्यामहेवयम्॥
चिन्तयन्तोगताअन्येततोलोकान्तरंप्रति ॥ ९९ ॥ अथत्रयोनृपाजाताश्चत्वारोविप्रसत्तमाः ॥ कुरुक्षेत्रेततोवेदान्वेदाङ्गानिसमन्ततः ॥ ३०० ॥ तपो
बलाद्विदन्तिस्मवार्तांचामुत्रचेहच ॥ त्रयोराजकुलेजाताराजानोमदमोहिताः ॥ १ ॥ ज्ञानलोपात्परंलोकंनजानन्तिहिताहितम् ॥ तेचविप्राश्चसन्दे
हांदाहूयचेटकंस्वकम् ॥२॥ विप्राऊचुः ॥राज्ञोगच्छस्वकार्पण्यात्पत्रंदेहिचसम्भ्रमात् ॥३॥ सप्तव्याधादशार्णेषुमृगाःकालञ्जरेगिरौ ॥ चक्रवाकाःशर
द्वीपेहंसाःसरसिमानसे॥४॥तेऽपिजाताःकुरुक्षेत्रेब्राह्मणावेदपारगाः॥प्रस्थितादूरमध्वानंयूयंकिमवसीदथ॥५॥भगवानुवाच ॥ गृहीत्वाचेटकोलेखंराज्ञ
स्तुसमदर्शयत्॥दृष्ट्वालेखंतुराजानोराज्यंत्यक्त्वाययुर्द्विजान् ॥६॥ श्रुत्वावाक्यंततस्तेषांगतास्तेचतपोधनाः ॥ अचिरेणैवकालेनमोक्षंयाताश्चतैस्सह
॥७॥यइदंशृणुयाच्छ्राद्धेसप्तव्याधादिकंद्विज॥अक्षय्यंचान्नपानंचपितॄणामुपतिष्ठति ॥८॥ द्विजउवाच॥वित्तहीनस्यविप्रस्यपितृकार्यंकथंभवेत्॥तपस्वि
नोवनस्थस्यगृहस्थस्यचकेशव॥९॥ भगवानुवाच॥तृणकाष्ठार्जनंकृत्वाप्रार्थयित्वावराटकम्॥करोतिपितृकार्याणिततोलक्षगुणंभवेत ॥ ३१० ॥ अक
र्तव्यशतंकृत्वापितृश्राद्धंकरोतियः ॥ सर्वपापक्षयस्तस्यस्वर्गंयातिचमानवः ॥ ११ ॥ सर्वाभावेपितृतिथौगोभ्योघासंददातियः ॥ फलंचपिण्ड
दानस्यसम्प्राप्नोत्यधिकंनरः ॥ १२ ॥ पुरावैराटविषयेरुरोदातीवदीनकः ॥ पितृतिथौस्वयंप्राप्तेसर्वाभावाच्चरोदिति ॥ १३ ॥ रुदित्वासु
चिरंसोऽपिपप्रच्छकोविदंद्विजम् ॥ १४ ॥दीनउवाच ॥ ब्रह्मन्पितृतिथावद्यकिंस्वित्कृत्वाहितंभवेत् ॥ १५ ॥ वराटकश्चमेनास्तिधनंब्रह्मविदांवर ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपदेशंचमेदेहियेनधर्मेस्थितोह्यहम् ॥ १६ ॥ द्विजउवाच ॥ गच्छशीघ्रंवनेतातमुहूर्तंकुतपेऽधुना ॥ घासंपितरमुद्दिश्यगवेदेहीतिसत्वरम् ॥ १७ ॥
॥ भगवानुवाच ॥ ततस्तस्योपदेशेनगृहीत्वाघासपूलकम् ॥ गवेदत्वायथाहृष्टःपुष्ट्यर्थंपितुरेवच ॥ १८ ॥ एतत्पुण्यप्रसादेनगतोऽसौसुरमन्दि
रम् ॥ स्वर्गंचसुचिरंभुक्त्वाउत्पन्नोधनिनांकुले ॥ १९ ॥ धनवान्सपुरापुण्यात्पितृयज्ञस्यकारणात् ॥ सददातिपितुःपिण्डंसर्वस्वेनधनेनच॥३२०॥
तत्रैकजन्मनोऽभ्यासाद्गतोऽसौविष्णुमन्दिरम् ॥ भुक्त्वानन्तसुखंतत्रसावभौमोऽभवन्नृपः ॥ २१ ॥ पितृयज्ञात्परोयस्माद्धर्मोनास्तिकथञ्चन ॥ त
स्मात्सर्वप्रयत्नेनशक्त्याकुर्यादमत्सरः ॥ २२ ॥ यःपठेद्धर्मसन्तानंजनानामग्रतोनरः ॥ विष्णुपद्याजलेस्नानंप्रतिलोकंचलभ्यते ॥ २३ ॥ जन्मज
न्मकृतोयेनमहापातकसञ्चयः ॥ तत्सर्वंप्रलयंयातिसकृदुच्चरितेश्रुत ॥ ३२४ ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेपञ्चाख्यानेपितृभक्तिनिरूपणंनाम
द्विपञ्चाशत्तमोध्यायः ॥ ५२ ॥ नरोत्तमउवाच ॥ त्रिदशानांचदेवानामन्येषांजगदीश्वरः ॥ प्रभुःकर्ताचहर्त्ताचगोप्ताभर्त्तापिताप्रसूः ॥ १ ॥ अस्मा
कंवाक्छ्रमोविष्णोःकथनेनैवयुज्यते ॥ किंतुकौतूहलंमेऽस्तिपिपासावाक्षुधाऽपिवा ॥ २ ॥ कृतंपृच्छतियेनैववक्तव्यंतत्प्रियेणहि ॥ अतीतंचैवजाना
तिकथंनाथपतिव्रता ॥ ३ ॥ किंवातस्याःप्रभावंचवक्तुमर्हस्यशेषतः॥४॥भगवानुवाच ॥ कथितंमेपुरावत्सपुनःकौतूहलंद्विज ॥ कथयिष्यामितत्स
र्वंयत्तेमनसिवर्तते ॥ ५ ॥ पतिव्रतापतिप्राणासदापत्युर्हितेरता ॥ देवानापिसाराध्यामुनीनांब्रह्मवादिनाम् ॥ ६ ॥ धवस्यैकस्ययानारीलोकेपूज्य
तमास्मृता ॥ तस्यासंमानने‍गुर्वीनिभृतानभविष्यति ॥ ७ ॥ मध्यदेशेपुरातातनगरीचातिशोभना ॥ तस्यांचब्रह्मजातीयासेव्यानाम्नीपतिव्रता ॥
॥ ८ ॥ तस्याधवोऽभवत्कुष्ठीपूर्वकर्मविरोधतः ॥ गलद्व्रणस्यपत्युश्चनित्यंचर्यापरायणा ॥ ९ ॥ यद्यन्मनोरथंतस्यशक्त्यासाकुरुतेभृशम् ॥ अर्चये
द्देववन्नित्यंस्नेहंकुर्यादमत्सरा ॥ १० ॥ कदाचित्पथिगच्छन्तींवेश्यांपरमसुन्दरीम् ॥ दृष्ट्वातीवाभवन्मोहान्मन्मथाविष्टचेतनः ॥ ११ ॥ निश्वस्यसु
तरांदीर्घंततस्तुविमनाभवत् ॥ श्रुत्वागृहाद्विनिःसृत्यसाध्वीपप्रच्छतंपतिम् ॥ १२ ॥ साध्व्युवाच ॥ उन्मनास्त्वंकथंनाथनिःश्वासस्तेकथंविभो ॥
ब्रूहिमेयच्चकर्तव्यमकर्तव्यंचयत्प्रियम् ॥१३॥दयितंतेकरिष्यामित्वमेकोमेगुरुःप्रियः॥अभीष्टंवदमेनाथयथाशक्तिकरोम्यहम्॥१४॥भगवानुवाच॥इत्यु
क्तेतामुवाचेदंवृथाकिंभाषसेप्रिये ॥ नशक्तात्वंनचैवाहंमोघंवक्तुंनयुज्यते ॥ ३५ ॥ प्रष्टुंनाधिकरोषीतियथादीर्घतरोःफलम् ॥ भूमौस्थित्वातुखर्वात्मा
समुद्धर्तुंप्रवाञ्छति ॥१६ ॥ तथामेरमणीलोभान्मोहाद्यदभिवाञ्छितम् ॥ दम्पत्योरपिदुःसाध्यमपयानंवदाम्यहम् ॥ १७ ॥ पतिव्रतोवाच ॥ ॥
ज्ञात्वातुत्वन्मनोवृत्तंशक्ताहंकार्यसाधने ॥ आदेशंकुरुमेनाथकर्तव्यंयेनकेनचित् ॥ १८ ॥ यदितेदुर्लभंकार्यंकर्तुंशक्नोमियत्नतः ॥ तदामेत्वतिक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ल्याणंफलिष्यतिपरेत्विह ॥ १९ ॥ भगवानुवाच ॥ इत्युक्तेपरमप्रीतःस्थितोवचनमब्रवीत् ॥ पापाभ्यासाच्चपाप्मानंप्रेच्छतीतितिविनिश्चयः ॥
॥ २०॥ कुष्ठ्युवाच ॥ पथ्यस्मिन्सम्प्रगच्छन्तींवेश्यांपरमसुन्दरीम् ॥ सर्वतश्चानवद्याङ्गींदृष्ट्वामेदह्यतेमनः ॥२१ ॥ यदितांत्वत्प्रसादाच्चप्राप्नोमिन
वयौवनाम् ॥ तदामेसफलंजन्मकुरुसाध्विहितंमम ॥ २२ ॥ यदिमांकुष्ठिनंदीनंपूतिगन्धंनवव्रणम् ॥ नगच्छतिवरारोहातदामेनिधनंहितम् ॥ २३ ॥
॥ भगवानुवाच ॥ श्रुत्वातेनेरितंवाक्यंसाध्वीवचनमब्रवीत् ॥ २४ ॥ पतिव्रतोवाच ॥ यथाशक्तिकरिष्यामिस्थिरीभवप्रभोऽधुना ॥ २५ ॥
॥ भगवानुवाच ॥ मनसाथसमालोच्यक्षपान्तेह्युषसिद्रुतम् ॥ गोमयंसहशोधन्यागृहीत्वासाययौमुदा ॥ २६ ॥ सम्प्राप्यगणिकागेहंशोधयित्वा
चचत्वरम् ॥ प्रतोलींवीथिकांचैवगोमयंप्रददौमुदा ॥ २७ ॥ सातूर्णमागतागेहेजनस्यालोकनेभयात् ॥ एवंक्रमेणसासाध्वीचरतिस्मदिनत्रयम् ॥
॥ २८ ॥ अथसावारमुख्याचचेटिकाश्चेटकानपि ॥ अपृच्छत्कस्यकर्माणिशोभनानिचचत्वरे ॥ २९ ॥ मयानोक्तेऽप्युषःकालेकस्यमत्प्रियकार
णात् ॥ रुच्यकर्मणिदीप्यन्तेरथ्याचत्त्वरवीथिकाः ॥ ३० ॥ परस्परेणसञ्चिन्त्यवारमुख्यांचतेऽब्रुवन् ॥ ३१ ॥ चेटकाऊचुः ॥ अस्माभिर्नकृ
तंभद्रेकर्मचैतत्प्रमार्जनम् ॥ ३२ ॥ भगवानुवाच ॥ अथसाविस्मयंगत्वासञ्चिन्त्यरजनीक्षये ॥ तयाचदृश्यतेसाचतथैवपुनरागता ॥ ३३ ॥ दृष्ट्वा
तांमहतींसाध्वींब्राह्मणींचपतिव्रताम् ॥ दधारचरणेतस्याहाक्षमस्वेतिभाषिणी ॥ ३४ ॥ गणिकोवाच ॥ आयुर्देहंचसम्पित्तर्यशोऽर्थःकीर्तिरेवच ॥
एतासांमेविनाशायस्फुरसीवपतिव्रते ॥ ३५ ॥ यद्यत्प्रार्थयसेसाध्विनित्यंदास्यामितद्दृढम् ॥ सुवर्णमणिरत्नंवाचैलंवायन्मनोरथम् ॥ ३६ ॥ भग
वानुवाच ॥ तामुवाचततःसाध्वीनमेचार्थैप्रयोजनन् ॥ अस्तिकार्यंचतेकिञ्चिद्ददामिकुरुषेयदि ॥ तदामेहृदिसन्तोषःकृतंसर्वंत्वयाधुना ॥ ३७ ॥
॥ गणिकोवाच ॥ सत्यंसत्यंकरिष्यामिद्रुतंवदपतिव्रते ॥ कुरुमेरक्षणंमातर्द्रुतंकृत्यंचमेवद ॥ ३८ ॥ भगवानुवाच ॥ त्रपयानिकृतंवाच्यंतस्यामुक्तंव
रंप्रियम् ॥ क्षणंविमृश्यसावेश्याकृत्वाक्षान्तिमुवाचच ॥ ३९ ॥ कुष्ठिनःपूतिगन्धस्यसम्पर्केदुःखिताभृशम् ॥ दिनैकंचकरिष्यामियद्यागच्छतिम
द्गृहम् ॥ ४० ॥ पतिव्रतोवाच ॥ आगमिष्यामितेगेहमद्यरात्रौचसुन्दरि ॥ भुक्तभोग्यंपतिंहृष्टंपुनर्नेष्यामिमद्गृहम् ॥ ४१ ॥ गणिकोवाच ॥ गच्छशी
घ्रंमहाभागेस्वगृहंचपतिव्रते ॥ पतिस्तेचार्द्धरात्रेसआगच्छतुचमद्गृहम् ॥ ४२ ॥बहवोमेप्रियास्सन्तिराजानस्तत्समाश्रये ॥ एकैकोमद्गृहेनित्यंतिष्ठती
हनिरन्तरम् ॥ ४३ ॥ अद्याहंगृहंमेशून्यंकरिष्यामिचत्वद्भयात ॥ सचागच्छतुतेभर्त्तासचास्मान्प्राप्यगच्छतु ॥ ४४ ॥ भगवानुवाच ॥ एतच्छ्रु
त्वातुसासाध्वीगतासौस्वगृहेतथा ॥ पत्यौनिवेदयामासकृत्यंतेफलितंप्रभो ॥४५॥ अद्यरात्रौचतद्गेहंगन्तुंख्यातिंकरोतिसा॥प्रभूताःपतयस्तस्यास्तव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कालोनविद्यते ॥ ४६ ॥ विप्रउवाच ॥ कथंयास्यामितद्गेहंमयागन्तुंनशक्यते ॥ एतज्ज्ञात्वाकुतःक्षान्तिःकृतंकार्यंकथंभवेत् ॥ ४७ ॥ पतिव्र
तोवाच ॥ स्वपृष्ठस्थमहंकृत्वानेष्यामितद्गृहंप्रति ॥ सिद्धेह्यर्थेनयिष्यामिपुनस्तेनैववर्त्मना ॥ ४८ ॥ द्विजउवाच ॥ कल्याणित्वत्कृतेनैवसर्वंमे
कृत्यमेष्यति ॥ इदानींयत्कृतंकर्मस्त्रीजनैरपिदुःसहम् ॥ ४९ ॥ भगवानुवाच ॥ तस्मिंश्चनगरेरम्येनित्यंचधनिनोगृहे ॥ चौरैश्चप्रचुरंवित्तंहृतंरा
ज्ञाश्रुतंतदा ॥ श्रुत्वासर्वान्निशाचारानाहूयनृपतीरुषा ॥ ५० ॥ नृपतिरुवाच॥जीवितुंयदिवोवाञ्छाचोरंममाद्यदास्यथ ॥ ५१ ॥ भगवानुवाच ॥
गृहीत्वातुनृपस्याज्ञांयत्तैर्जिघृक्षयाकुलैः ॥ चारैश्चोरोगृहीतस्तैर्बलाच्चैवनृपाज्ञया ॥ ५२ ॥ नगरोपान्तदेशेचवृक्षमूलेघनेवने ॥ समाधिस्थोमहा
तेजामाण्डव्योमुनिपुङ्गवः ॥ ५३ ॥ व्यतिष्ठद्वह्निसङ्काशोयोगिनांप्रवरोमुनिः ॥ अन्तर्नाडीगतोवायुःकिञ्चिन्नप्रतिभातिच ॥ ५४ ॥ तंब्रह्मतुल्यं
तिष्ठन्तंदृष्ट्वादुष्टामहामुनिम् ॥ चोरोऽयमद्भुताकारोधूर्तस्तिष्ठतिकानने ॥ ५५ ॥ एवमुक्त्वातुतंपापाबबन्धुर्मुनिसत्तमम् ॥ नोक्ताश्चनेक्षितास्तेन
पुरुषाअतिदारुणाः ॥ ५६ ॥ ततोराजाउवाचेदंसम्प्राप्तस्तस्करोमया ॥ उपान्तेचपथिद्वारेकुरुध्वंघोरदण्डनम् ॥ ५७ ॥ माण्डव्यश्चमुनि
स्तत्रपथिशूलेचकीलितः ॥ पायुदेशेचतैर्दत्तंशूलंयावच्चमस्तकम् ॥ ५८ ॥ व्यथांसचनजानातिशूलेविद्धतनुर्यमात् ॥ अन्यैरपिकृतोदण्डःकृ
तस्तैस्तुमनोहितः ॥ ५९ ॥ एतस्मिन्नन्तरेरात्रावन्धकारेघनोन्नते ॥ स्वपतिंपृष्ठतःकृत्वाप्रययौसापतिव्रता ॥ ६० ॥ माण्डव्यस्यतनौतत्रकुष्ठि
नोऽङ्गंललागतत् ॥ भग्नःसमाधिस्तस्यैवंकुष्ठिसंसर्गतोध्रुवम् ॥ ६१ ॥ माण्डव्यउवाच ॥ एवंयेनाधुनाकृच्छ्रंकारितंगात्रवेदनम् ॥ सएवभस्म
तांयातुप्रोदितेचविरोचने ॥ ६२ ॥ भगवानुवाच ॥ माण्डव्येनैवमुक्तस्सपपातधरणीतले ॥ ततःपतिव्रताचाहब्रध्नोनोदयतुध्रुवम् ॥ ६३ ॥
दिनत्रयंगृहंनीत्वाशापाद्भस्मगताततः ॥ शयनीयेस्थितंरम्येधृत्वाऽतिष्ठत्पतिव्रता ॥ ६४ ॥ शप्त्वातंचमुनिश्रेष्ठोगतोदेशमभीष्टकम् ॥ सूरोनोद
यतेलोकेयावच्चैवदिनत्रयम् ॥ ६५ ॥ निखिलंव्यथितंदृष्ट्वात्रैलोक्यंसचराचरम् ॥ शतक्रतुंपुरस्कृत्यगतादेवाःपितामहम् ॥ ६६ ॥ वृत्तंन्यवे
दयन्सर्वंपद्मयोनौदिवौकसः ॥ कारणंचनजानीमस्त्वंतुयोग्यंविधेहिनः ॥ ६७ ॥ पतिव्रतायायद्वृत्तंमाण्डव्यस्यमुनेश्चयत् ॥ यथानोदयतेब्रध्नो
धातादेवेष्ववेदयत् ॥ ६८ ॥ ततोदेवाविमानैश्चपुरस्कृत्यप्रजापतिम् ॥ गतास्तदन्तिकंविप्रतूर्णंसर्वेचभूतलम् ६९ ॥ तेषांश्रियाविमानानां
मुनीनांकिरणैस्तथा ॥ शतसूर्यमिवाभातिनान्यत्रचगृहोदरे ॥ ७० ॥ पतिव्रतोवाच ॥ हाहतास्मिकथंसूरोमद्गृहेसमुपस्थितः ॥ ७१ ॥ भगवानुवा
च ॥ अदृश्यन्ततयादेवाविमानैर्हंससन्निभैः ॥ एतस्मिन्नन्तरेब्रह्मातामुवाचपतिव्रताम् ॥ ७२ ॥ ब्रह्मोवाच ॥ अखिलानांचदेवानांद्विजानांचग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वांतथा ॥ यथैवनिधनंतेपांकथंतेपरिरोचते ॥ मातःक्रोधंत्यजस्वाद्यसूर्यस्योदयनंप्रति ॥ ७३ ॥ पतिव्रतोवाच ॥ सर्वलोकानतिक्रम्यपति
रेकोगुरुर्मम ॥ अस्यमृत्युर्मुनेश्शापादुदितेचविरोचने ॥ ७४ ॥ तेनैवकारणेनैषमयाशप्तोदिवाकरः ॥ नकोपान्नचमोहाच्चलोभात्कामान्नमत्सरात
॥ ७५ ॥ ब्रह्मोवाच ॥ एकस्यनिधनेनैवत्रैलोक्यस्यहितंभवेत् ॥ ततस्तेचाधिकंपुण्यंमातरेवंभविष्यति ॥ ७६ ॥ साचोवाचविधितत्रदेवा
नामग्रतःसती ॥ पतिंत्यक्त्वाचमेसत्यंशिवंमेनानुरोचते ॥ ७७ ॥ ब्रह्मोवाच ॥ उदितेचखगेसौम्येपत्यौतेभस्मतांगते ॥ स्वस्थीभूतेचत्रैलोक्ये
करिष्यामिहितंतव ॥ ७८ ॥ भस्मनःपुरुषोभाव्यःकामदेवसमप्रभः ॥ गुणःसर्वैर्युतोभर्तारतिवत्त्वंचसर्वदा ॥ ७९ ॥ यथापूज्योहरिर्देवैर्यथाल
क्ष्मीश्चपूजिता ॥ तथैवदम्पतीस्वर्गेतस्मान्मद्वचनंकुरु ॥ ८० ॥ पतिव्रतोवाच ॥ पत्युर्मेनिधनेब्रह्मन्विधवालोकनिन्दिता ॥ कांस्तुलोका
न्गमिष्यामिभग्नाचारामलीमसा ॥ ८१ ॥ ब्रह्मोवाच ॥ अतस्तेनास्तिदोषोवैनमृतस्तेधवोऽधुना ॥ अस्माकंवचनेनैवकुष्ठीमन्मथतांव्रजेत् ॥
॥ ८२ ॥ भगवानुवाच ॥ वदत्येवंविधौसाचविमृश्यक्षणमेवच ॥ बाढमुक्तवतीसाचततस्सूर्योदयोऽभवत् ॥ ८३ ॥ अभवद्भस्मरूपोऽसौ
मुनिशापप्रपीडितः ॥ भस्मनोमध्यतोजातोद्विजोमन्मथपीडितः ॥ ८४ ॥ दृष्ट्वाविस्मयमापन्नाःसर्वेतपुरवासिनः ॥ मुदितादेवसङ्घाश्चजनः
स्वस्थतरोऽभवत् ॥ ८५ ॥ विमानेनार्कवर्णेनस्वर्लोकादागतेनच ॥ पतिनासहसासाध्वीसुरैःसार्द्धंगतादिवम् ॥ ८६ ॥ एवंपतिव्रतायस्माच्छुभाचै
वतुमत्समा ॥ तेनवृत्तंचजानातिभूतंभव्यंप्रवतनम् ॥ ८७ ॥ यइदंश्रावयेल्लोकेपुण्याख्यानमनुत्तमम् ॥ तस्यपापंक्षयंयातिजन्मजन्मकृतंचयत् ॥
॥ ८८ ॥ अक्षयंलभतेस्वर्गंविबुधैःसम्प्रयुज्यते ॥ ब्राह्मणोलभतंवेदंजन्मजन्मसुवाडव ॥ ८९ ॥ सकृच्छृणोतियःपूतोदुष्कृतौघाद्विमुच्यते ॥
सुरालयमवाप्नोतिस्वर्गाद्भ्रष्टोधनीभवेत् ॥ ९० ॥ इतिश्रीपाद्मपुराणेसृष्टिखण्डेपतिव्रतोपाख्यानंनामत्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥ द्विज
उवाच ॥ माण्डव्यस्यमुनेर्विष्णोशूलाघातःकथंतनौ ॥ पत्यौपतिव्रतायाश्चकथंकुष्ठकलेवरे ॥ १ ॥ हरिरुवाच ॥ शिशुभावाच्चमाण्डव्यो
झिल्लिकायामभानतः ॥ वस्तिदेशेतृणंदत्त्वामोहात्सचमुमोचताम् ॥ २ ॥ तेनापवाददोषेणधर्मस्याज्ञातुरेवच ॥ अहोरात्रंव्यथाकृच्छ्राभुक्ता
तेनद्विजन्मना ॥ ३ ॥ किन्तुसमाधिनातेननज्ञातंशूलसम्भवम् ॥ कृच्छ्रंचमुनिनाकृत्स्नंयोगाभ्यासाद्भृशादपि ॥ ४ ॥ कुष्ठिनोब्रह्मणोघाताद
जितेन्द्रियकारणात् ॥ पूतिगन्धंतनौकुष्ठंसञ्जातंद्विजसत्तम ॥ ५ ॥ पुराविप्रायतेनैवदत्तंगौरीचतुष्टयम् ॥ कन्यकात्रितयंविप्रतेनतस्यपतिव्रता ॥
॥ ६ ॥ अस्यास्तुकारणादेवसचमत्समतांव्रजेत् ॥ अत्रतेविस्मयःकुत्रवेदकर्मपुरातनम् ॥ ७ ॥ द्विजउवाच ॥ कृत्यानारीनयस्यैवतस्यस्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गोंभवेद्ध्रुवम् ॥ यथैतच्चरितंनाथसर्वेषांशिवमिष्यते ॥ ८ ॥ हरिरुवाच ॥ सन्तिकृत्याःस्त्रियःकाश्चित्पुंसःसर्वस्वदस्यच ॥ तत्राप्यरक्षणी
यांचमनसापिनधारयेत् ॥ ९ ॥ नस्त्रीणामप्रियःकश्चित्प्रियोवापिनविद्यते ॥ गावस्तृणमिवारण्येप्रार्थयन्तिनवंनवम् ॥ १० ॥ पुमांसं
वित्तहीनंचविरूपंगुणवर्जितम् ॥ अकुलीनंचभृत्यंचकामिनीभजतेध्रुवम् ॥ ११ ॥ भर्तारंचगुणोपेतंकुलीनंचमहाधनम् ॥ सुन्दरंरतिदक्षंचत्यक्त्वा
नीचंभजेद्वधूः ॥ १२ ॥ उमानारदसंवादमाख्यानंविद्धिभूसुर ॥ येनविद्याःस्त्रियाश्चेष्टाविविधाःकृत्स्नशोद्विज ॥ १३ ॥ स्वभावान्नारदोविप्र
विश्वजिज्ञासकोमुनिः ॥ स्वान्तेविमृश्याथगतःकैलासंगिरिमुत्तमम् ॥ १४ ॥ वृषकेतुसदाख्यानसप्रतिष्ठेहिमेगिरौ ॥ प्रणिपत्यमहात्मावैपप्रच्छपा
र्वतींमुनिः ॥ १५ ॥ नारदउवाच ॥ देविसीमन्तिनीनांतुदुश्चेष्टांज्ञातुमुत्सहे ॥ कौतुकेनत्वयाचर्यावधूनांसम्प्रयुज्यते ॥ १६ ॥ सर्वासामपिनारी
णांस्वान्तंजानासितत्त्वतः ॥ तन्मांकथयसर्वेषुविनीतमज्ञमेवच ॥ १७ ॥ देव्युवाच ॥ युवतीनांसदाचित्तंपुंसुतिष्ठत्यसंशयम् ॥ अस्मिन्योनौसु
संयोग्येसज्जंतेवाप्यसज्जंते ॥१८॥ सुवेषंपुरुषंदृष्ट्वाभ्रातरंयदिवासुतम्॥योनिःक्लिद्यतिनारीणांसत्यंसत्यंहिनारद॥१९॥स्थानंनास्तिक्षणंनास्तिनास्तिप्रा
र्थयितानरः ॥ तेननारदनारीणांसतीत्वमुपजायते ॥ २० ॥ घृतकुम्भसमानारीतप्ताङ्गारसमःपुमान् ॥ तस्माद्घृतंचवह्निंचनैकस्थानेचधारयेत
॥ २१ ॥ यथैवमत्तमातङ्गंसृणिमुद्गरयोगतः ॥ स्ववशंकुरुतेयन्तातथास्त्रीणांप्ररक्षकः ॥२२॥ पितारक्षतिकौमारेभर्तारक्षतियौवने ॥ पुत्राश्चस्थाविरे
भावेनस्त्रीस्वातन्त्र्यमर्हति ॥ २३ ॥ ततःस्वातन्त्र्यभावाच्चस्वेच्छयाचनराङ्गना ॥ पुरुषेणार्थिताधीराप्रेरणादिचरीभवेत् ॥ २४ ॥ अरक्षणा
द्यथापाकःश्वकाकवशगोभवेत्॥ तथैवयुवतीनारीस्वच्छन्दाद्दुष्टतांव्रजेत् ॥ २५ ॥ पुनरेवकुलंदुष्टंतस्यास्संसर्गतोभवेत् ॥ परबीजेनयोजातःसचस्या
द्वर्णसङ्करः ॥ २६ ॥ जारजःसङ्करःपापोनरकेनियतंवसेत् ॥ कीटजातौगताजाताःपुनःसर्वेमहीतले ॥ २७ ॥ ततोम्लेच्छमुपानीतंकुलंस्याद्द्विजन
न्दन ॥ कुलक्षयोभवेद्यस्मात्तस्माद्दुष्टांनधारयेत् ॥ २८ ॥ ज्ञात्वैवयोषितांदोषंक्षमतेयोनराधमः ॥ सतिष्ठेन्निरयेघोरेरौरवेपितृभिःसह ॥ २९ ॥
काचित्पातयतेनारीकाचिदुद्धरतेकुलम् ॥ तस्मात्सर्वप्रयत्नेनकुलजामुद्वहेद्बुधः ॥ ३० ॥ कुलद्वयंसमानारीसमयित्वातुतिष्ठति ॥ साध्वीतारयते
वंशान्दुष्टापातयतिध्रुवम् ॥ ३१ ॥ दारेष्वधीनंस्वर्गंचकुलंपङ्क्तयशोऽयशः ॥ पुत्रंदुहितरंमित्रंसंसारेकथयन्तिच ॥ ३२ ॥ तस्मादेकांद्वितीयांवावामा
मुद्वाहयेद्बुधः ॥ सन्तानार्थांतुकामाचबहुदोषाश्रिताचसा ॥ ३३ ॥ रजस्वलांचवनितांनावगच्छतियःपतिः ॥ ब्रह्महाभ्रूणहासोऽपिदुर्गतिंचाधिगच्छ
ति ॥ ३४ ॥ योमोहाद्दुर्भगांकृत्वासाध्वींत्यजतिपापकृत् ॥ तस्यावधेनयत्पापंतद्भुक्त्वानरकंव्रजेत् ॥ ३५ ॥ परदारान्बलाद्गत्वाधनैर्वासंप्रलो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भयेत् ॥ सयातिनरकंघोरंप्रेत्येहचकलत्रहा ॥ ३६ ॥वनिताहरणंकृत्वाचाण्डालकुलतांव्रजेत् ॥ तथैववनिताहानात्पतितोजायतेनरः ॥ ३७ ॥ रामां
विन्यस्यस्कन्धेचचिरंयमपुरेवसेत् ॥ मलमूत्रंशिरोदेशेनित्यंतस्यचसम्पतेत् ॥ ३८ ॥ एवंवर्षसहस्राणिभारंवहतिदुर्मतिः ॥ पुनर्यावन्तिलोमानि
तावत्सरौरवंव्रजेत् ॥ ३९ ॥ पुनःकीटेषुसन्तीर्णस्तदामानुषतांव्रजेत् ॥ ततश्चकलहंशोकंप्राप्नोतिपूर्वकल्मषात् ॥ ४० ॥ एवंजन्मत्रयंप्राप्यमुच्यते
पातकान्नरः ॥ तत्कालंनरकंभुक्त्वासातुकाकीतुवञ्चकी ॥ ४१ ॥ उच्छिष्टंनरकंभुक्त्वामानुषेविधवाभवेत्॥यःपुनश्चान्त्यजांगच्छेन्म्लेच्छांवापुल्कसां
नरः ॥ ४२ ॥ द्वित्रिचतुर्गुणंभुक्त्वातत्रसञ्चीर्णवञ्चकः ॥ मातरंगुरुभार्यांचब्राह्मणींमहिषींतथा ॥४३॥ अन्यांवाप्रभुपत्नींचगत्वायात्यपुनर्भवम् ॥ भगि
नींतत्पुत्रभार्यांतथादुहितरंस्नुषाम् ॥ ४४ ॥ पितृव्यांमातुलानींतुतथैवचपितृष्वसाम् ॥ मातृष्वस्रादिकामन्यांगत्वानास्तिचनिष्कृतिः ॥ ४५ ॥
ब्रह्महासभवेदन्धोवचसाजडतांव्रजेत् ॥ कर्णयोर्बधिरोजातश्च्यवतेनास्तिनिष्कृतिः ॥ ४६ ॥ उक्त्वाअश्लीलमत्यर्थमखिलंस्त्रीकृतेनहि ॥ ४७ ॥
॥ द्विजउवाच ॥ एवंदुष्कृतमासाद्यकथंमोक्षोभवेत्पुनः ॥ तत्समाचक्ष्वभगवञ्श्रोतुमिच्छामितत्त्वतः ॥४८॥ श्रीभगवानुवाच ॥ तासांचगमनंकृत्वा
तप्तांलोहस्यपुत्तलीम् ॥ समालिङ्ग्यत्यजेत्प्राणंशुचिर्लोकान्तरंव्रजेत् ॥ ४९ ॥ योवैगृहाश्रमंत्यक्त्वामच्चित्तोजायतेनरः ॥ नित्यंस्मरतिगोविन्दं
सर्वपापक्षयोभवेत् ॥ ५० ॥ ब्रह्महत्यायुतंतेनकृतंगुर्वङ्गनागमात् ॥ शतंशतसहस्रंचपैष्टीमद्यस्यभक्षणात् ॥ ५१ ॥ स्वर्णादेर्हरणंकृत्वातेषांसंसर्ग
कंचिरम् ॥ एतान्यन्यानिपापानिमहान्तिपातकानिच ॥ ५२ ॥ अग्निंप्राप्ययथातूलंतृणंशुष्कंप्रणश्यति ॥ तस्मान्मन्नामगोविन्दंस्मृत्वापूतोभवे
न्नरः ॥ ५३ ॥ योवागृहाश्रमेतिष्ठेन्नित्यंगोविन्दघोषणम् ॥ कृत्वाचपूजयित्वाचसपापात्सन्तरोभवेत् ॥ ५४ ॥ भागीरथीतटेरम्येखगस्यग्रहणेशि
वे ॥ गवांकोटिप्रदानेनयत्फलंलभतेनरः ॥ ५५ ॥ तत्फलंसमवाप्नोतिसहस्रंचाधिकंचयत् ॥ गोविन्दकीर्तनेतातमत्पुरेचाक्षयंवसेत् ॥ ५६ ॥
कामात्सभवनेस्थित्वासार्वभौमोभवेन्नृपः ॥ पुराणेमत्कथांश्रुत्वामत्सादृश्यंलभेन्नरः ॥ ५७ ॥ कथयित्वापुराणंचविष्णुसायुज्यतांव्रजेत् ॥ तस्मा
न्नित्यंचश्रोतव्यंपुराणंधर्मसञ्चयम् ॥ ५८ ॥ श्रावितव्यंप्रयत्नेनलोकेविष्णुतनुंव्रजेत् ॥ अन्यद्वास्त्रीकृतेदोषेयथायोगंभवेद्ध्रुवम् ॥ ५९ ॥
निशामयप्रवक्ष्यामितत्त्वतोद्विजनन्दन ॥ सर्वबीजस्यदानेनसाम्बुकुम्भंमहाफलम् ॥ ६० ॥ दद्याद्विप्रायपुण्याहेसद्यःपूतोभवेत्क्षणात् ॥ सर्वधा
न्यादिकंबीजंकालेदद्याद्द्विजातये ॥ ६१ ॥ सर्वपापक्षयंकृत्वाअक्षयंस्वर्गमश्नुते ॥ गुणंवक्ष्यामिविप्रर्षेसतीनांयादृशंदृढम् ॥ ६२ ॥ शुद्धवंशोभवेत्त
स्यानित्यंलक्ष्मीःप्रवर्तते ॥उभयोर्वंशयोःस्वर्गोभर्तुरात्मनएवच ॥६३॥ पतिव्रतागुणोविप्रविस्मृतःपृच्छतस्तव ॥ पुनर्वक्ष्यामियोषाणांसर्वलोकहितं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुभम् ॥ ६४ ॥ उषित्वापूर्वकालंचपुण्यापुण्येनयोषितः ॥ पश्चात्पतिव्रतायाश्चताश्चगच्छन्तिमद्गतिम् ॥ ६५ ॥ षण्मासंवाथवर्षंवाअधिकंच
प्रशस्यते ॥ पतिव्रताभवेद्याचयावत्पूताव्रजेद्दिवम् ॥ ६६ ॥ सुरापंविप्रहन्तारंसर्वपापयुतंपतिम् ॥ पङ्कात्पूतंनयेत्स्वर्गंभर्तारंयानुगच्छति ॥ ६७ ॥
तिस्रःकोटयोऽर्धकोटीचयावल्लोमानिमानुषे ॥ तावत्कालंवसेत्स्वर्गेभर्तारंयानुगच्छति ॥ ६८ ॥ कन्दर्पसदृशोभर्तासारतीवमनोरमा ॥ जिष्णोरे
वचिरंलोकेभुङ्क्तेऽनन्तमयंसुखम् ॥ ६९ ॥ पतिव्रताबलाद्याचविदूरेस्वामिपातने ॥ चिह्नंलब्ध्वामृतावह्नौपापादुद्धरतेपतिम् ॥ ७० ॥ पति
व्रताचयानारीदेशान्तरमृतेपतौ ॥ साभर्तुश्चिह्नमादायवह्नौसुस्वादिवंव्रजेत् ॥ ७१ ॥ यास्त्रीब्राह्मणजातीयामृतंपतिमनुव्रजेत् ॥ सास्वर्गमात्मघाते
ननात्मानंनपतिंनयेत् ॥ ७२ ॥ नम्रियेतसमंगत्वाब्राह्मणीब्रह्मशासनात् ॥ प्रव्रज्यागतिमाप्नोतिमरणादात्मघातिनी ॥ ७३ ॥ ॥
॥ नरोत्तमउवाच ॥ सर्वासामपिजातीनांब्राह्मणःशस्यइष्यते ॥ पुण्यंचद्विजमुख्येनअत्रकिंवाविपर्ययः ॥ ७४ ॥ श्रीभगवानुवाच ॥
ब्राह्मण्यास्साहसंकर्मनैवयुक्तंकदाचन ॥ निःशेषेऽस्यावधंकृत्वासनरोब्रह्महाभवेत् ॥ ७५ ॥ तस्माद्ब्राह्मणजातीयाविप्रयाचव्रतंच
रेत् ॥ प्रवक्ष्यामियथातथ्यंशृणुविप्रयथार्थतः ॥ ७६ ॥ आपणान्तरमामिष्यंभक्षयेन्नकदाचन ॥ अश्वमेधसहस्राणांहायनेफलमाप्नुयात् ॥ ७७ ॥
अर्हणंचेष्टदेवस्यहरेर्व्रतमनुत्तमम् ॥ स्वामिनोऽपिजलंपिण्डंसम्प्रदद्यादमत्सरात् ॥ ७८ ॥ युगकोटिसहस्राणियुगकोटिशतानिच ॥ पतिनास
हसासाध्वीविष्णुलोकेयुताभवत् ॥ ७९ ॥ ततोमहाव्रतंप्राप्यनिरयेब्राह्मणीवधूः ॥ उद्धरेदुभयोर्वंशाञ्छतशोऽथसहस्रशः ॥ ८० ॥ अतोबन्धुज
नैरेवपुत्रैर्भ्रात्रादिभिर्बुधैः ॥ विनियम्यसदातस्याव्रतलोपंनकारयेत् ॥ ८१ ॥ हरेश्चेद्वासरंप्राप्यविधवानव्रतंचरेत् ॥ पुनर्वैधव्यमायातिजन्मजन्मनि
दुर्भगा ॥ ८२ ॥ भोजनान्मत्स्यमांसस्यव्रतानांविप्रयोगतः ॥ चिरंनिरयमासाद्यशुनीभवतिनिश्चितम् ॥ ८३ ॥ दुष्टायमैथुनंगच्छेद्विधवाकुलना
शिनी ॥ नरकाननुभूयाथगृध्रिणीदशजन्मसु ॥ ८४ ॥ द्विजन्मफेरवाभूत्वाततोमानुषतांव्रजेत् ॥ तथैवबालवैधव्यादासीत्वमुपगच्छति ॥ ८५ ॥
द्विजउवाच ॥ कन्यादानफलंब्रूहिवददास्याःफलंचयत् ॥ विधानंचयथोक्तंचयदिमेऽनुग्रहःप्रभो ॥ ८६ ॥ श्रीभगवानुवाच ॥ रूपाढ्येगुणसम्पन्नेकु
लीनेयौवनान्विते ॥ समृद्धेवित्तसम्पूर्णेकन्यादानफलंशृणु ॥ ८७ ॥ सर्वाभरणसंयुक्तांकन्यकांयोददातिच ॥ तेनदत्ताधरासर्वासशैलवनकानना ॥ ८८ ॥
अर्द्धाभरणदानेनफलंदातुर्भवेद्ध्रुवम् ॥ अनाभरणकन्यायाःपादैकस्यफलंभवेत् ॥ ८९ ॥ यःपुनःशुल्कमश्नातिसयातिनरकेनरः ॥ विक्रीयचात्मजां
मूढोनरकान्ननिवर्त्तते ॥ ९० ॥ लोभादसदृशेपुंसिकन्यांयस्तुप्रयच्छति ॥ रौरवंनरकंप्राप्यचाण्डालत्वंचगच्छति ॥ ९१ ॥ अतएवहिशुल्कंच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जामातुर्नकदाचन ॥ गृह्णातिमनसाप्राज्ञोयद्दत्तंतस्यचाक्षयम् ॥९२॥ भूमिंगांचहिरण्यंचधनंवस्त्रंचधान्यकम्॥जामातुर्यौतकंदत्त्वासवभवतिचाक्षयम्
॥ ९३ ॥ विवाहसमयेवत्ससगोत्रपरगोत्रजैः ॥ यौतकंदीयतेकिंचित्तत्सवचाक्षयंभवेत् ॥ ९४ ॥ दातानस्मरतेदानंप्रतिग्राहीनयाचते ॥ उभौतौन
रकंयातश्छिन्नरज्जुर्घटोयथा ॥ ९५ ॥ अवश्यंयौतकंदानंदातव्यंसात्त्विकेनहि ॥ अदत्त्वानरकंप्राप्यदासीत्वमुपगच्छति ॥९६॥ अत्यासन्नेऽतिदूर
स्थेचात्याढचेचातिदुर्गते॥कुलहीनेचमूर्खेचषट्सुकन्यानदीयते ॥९७॥ अतिवृद्धेचातिदीनेरोगिष्ठेदेशवासिनि॥अतिक्रुद्धेऽप्यसन्तुष्टेषट्सुकन्यानदीय
ते॥ ९८ ॥ एतेभ्यःकन्यकांदत्त्वानरकंचाधिगच्छति ॥ लोभात्संमानलाभाच्चकन्यकापरिवर्तनात् ॥९९॥ मुनीनांप्रेयसींनारींयुवतींरूपशालिनीम् ॥
सालङ्कारांसशय्यांचदत्त्वाऽनन्तफलंलभेत् ॥ १०० ॥ अनयोश्चफलंतुल्यंयुवतीकन्ययोरपि ॥ एकावरायदातव्याअपराब्राह्मणायतु ॥ १ ॥ क्रीनादे
वायदातव्याधीरेणाकष्टकर्मणा ॥ कल्पकालंभवेत्स्वर्गेनृपोवाकौमहाधनी ॥ २ ॥ प्रतिजन्मलभेतैषसुपत्नींवरवर्णिनीम् ॥ यइदंशृणुयान्नि
त्यंपुण्याख्यानमनुत्तमम् ॥ ३ ॥ सर्वपापक्षयस्तस्यसर्वशास्त्रार्थपारगः ॥ लभेतसोऽक्षयंस्वर्गंनारीणांवल्लभोभवेत् ॥ ४ ॥ क्षत्रियोविजयीचा
थलोकनाथोभवेद्ध्रुवम् ॥ श्रुतंहरतिपापानिजन्मजन्मकृतानिच ॥ सौभाग्यंलभतेलोकेतथवचवराङ्गनाः ॥१०५॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टि
खण्डेपञ्चाख्यानेस्त्रीणामाख्यानंनामचतुष्पञ्चाशत्तमोऽध्यायः ॥ ५४ ॥ द्विजउवाच ॥ तुलाधारस्यचरितंप्रभावमतुलंप्रभो ॥ वक्तुमर्हस्यशेषेणयदि
मय्यस्त्यनुग्रहः ॥ १ ॥ भगवानुवाच ॥ सत्यभावादलोभाच्चदद्याद्योवैत्वमत्सरात् ॥ नित्यंयज्ञशतंतस्यसुनिष्पन्नंसुदक्षिणम् ॥ २ ॥ सत्येनोदयते
सूरोवातिवातस्तथैवच ॥ नसिन्धुर्लङ्घयेद्वेलांधत्तेकूर्मोधरांतथा ॥ ३ ॥ सत्येनलोकास्तिष्ठन्तिसर्वेचवसुधाधराः ॥ सत्याद्भ्रष्टोऽथयःसत्त्वोऽप्यधो
वासीभवेद्ध्रुवम् ॥४॥ सत्यवाचिरतोयस्तुसत्यकार्यरतःसदा ॥ सशरीरेणस्वर्लोकमागत्याच्युततांव्रजेत् ॥ ५ ॥ सत्येनमुनयःसर्वेमांचगत्वास्थिरा
स्स्थिताः ॥ सत्याद्युधिष्ठिरोराजासशरीरोदिवंगतः ॥ ६ ॥ सर्वशत्रुगणंजित्वालोकोधर्मेणपालितः ॥ अकरोच्चमखंशुद्धंराजसूयंसुदुर्लभम् ॥ ७ ॥
चतुरशीतिसहस्राणिब्राह्मणानांचनित्यशः ॥ भोजयेद्रुक्मपात्रेषुराजोपकरणेषुच ॥ ८ ॥ भोजयित्वोपकरणांस्तेभ्योदत्त्वाविसर्जयेत् ॥ यदभीष्टंद्वि
जातीनामतोऽन्यद्दापयेद्धनम् ॥ ९ ॥ अदरिद्रंततोज्ञात्वाद्विजव्यूहंपरित्यजेत् ॥ तथैवस्नातकानांतुसहस्राणितुषोडश ॥ १० ॥ नित्यंसम्भोजयेद्रा
जासत्येनैवविमत्सरः ॥ अतिष्ठंस्तेगृहेपूर्वंचिरंतस्यजिगीषया ॥ ११ ॥ जितंतेनजगत्सर्वंप्राणानुग्रहकारणात् ॥ सत्येनचासुरोराजाबलिरिन्द्रोभ
विष्यति ॥ १२ ॥ पातालस्थस्यतस्यैवभूयस्तिष्ठामिवेश्मनि ॥ निरन्तरंचतिष्ठामिस्वान्तेपुण्यैककर्मणः ॥ १३ ॥ यद्वापुरामयाबद्धोदैत्ययो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेर्विमोक्षणात् ॥ तलंचैवामरत्वंहिशक्रत्वंप्रददाम्यहम् ॥ १४ ॥ हरिश्चन्द्रोनृपस्सत्यात्सवाहनपरिच्छदः ॥ स्वशरीरेणशुद्धेनसत्यलोकेप्रतिष्ठि
तः ॥ १५ ॥ राजानोबहवश्चान्येयेचसिद्धामहर्षयः ॥ ज्ञानिनोयतयश्चैवसर्वेसत्येऽच्युताभवन् ॥ १६ ॥ तस्मात्सत्यरतोलोकेसंसारोद्धरणक्षमः॥
तुलाधारोमहात्मावैसत्यवाक्येप्रतिष्ठितः ॥ १७ ॥ लोकेतत्सदृशोनास्तिसत्यवाक्यस्यकारणात् ॥ अश्वमेधसहस्रेणसत्यंतुतुलयाधृतम् ॥
॥ १८ ॥ अश्वमेधसहस्राद्धिसत्यमेवविशिष्यते ॥ सर्वसत्याद्भवेत्साध्यंसत्योहिदुरतिक्रमः ॥ १९ ॥ सत्यवाक्येनसाधेनुर्बहुलास्वर्गगामिनी ॥
सर्वराष्ट्रंसमाधायपुनरावृत्तिदुर्लभा ॥२०॥ तथायंसर्वदासाक्षीमृषानास्तिकदाचन ॥ बह्वर्घमल्पमर्घंचक्रयविक्रयणेसुधीः ॥ २१ ॥ सत्यवाक्यं
प्रशस्तंचविशेषात्साक्षिणोभवेत् ॥ साक्षिणःसत्यमुक्त्वाचअक्षयंस्वर्गमाययुः ॥ २२ ॥ वावदूकःसभांप्राप्यसत्यंवदतिवाक्पतिः ॥ सया
तिब्रह्मणोगेहंयज्ञैरन्यैश्चदुर्लभम् ॥ २३ ॥ सभायांयोवदेत्सत्यमश्वमेधफलंलभेत् ॥ लोभाद्द्वेषान्मृषोक्त्वाचरौरवनरकंव्रजेत् ॥ २४ ॥ सर्वसाक्षी
तुलाधारोजनानांशूरएवच ॥ विशेषाल्लोभसन्त्यागान्नाकेनिर्जरतांव्रजेत् ॥ २५ ॥ कश्चिच्छूद्रोमहाभागोनलोभेवर्ततेक्वचित् ॥ वृत्तिश्शाकेनदुःखे
नतथाशिलोञ्छतोभृशम् ॥२६॥ जर्जरंवस्त्रयुग्मंचकटौगात्रेचसर्वदा॥सदापिलोभविरहोनपरस्वंगृहीतवान् ॥ २७ ॥ तस्यजिज्ञासयैवाहंगृहीत्वावस्त्र
युग्मकम् ॥ अवकोटेनदीतीरेस्थितस्संस्थाप्यसादरम् ॥ २८ ॥ सदृक्षावस्त्रयुग्मंतन्नलोभेकुरुतेमनः ॥ इतरस्यपरिज्ञायतत्क्षान्त्यास्वगृहंययौ
॥ २९ ॥ ततोविचिन्तयित्वातुदृदास्वल्पमितिद्विज ॥ उदुम्बरंहेमगर्भंमयातत्रैवपातितम् ॥ ३० ॥ कीकटेचनदीतीरेविकोणेजनवर्जिते ॥ तस्यया
तस्यदेशेतुदृष्टंतेनतदद्भुतम् ॥ ३१ ॥ अलंविधानमेतत्तुकृत्रिमंचोपलक्ष्यत ॥ ग्रहणेवाधुनाचास्यअलोभंनष्टमेवमे ॥ ३२ ॥ अस्यैवरक्षणेकष्टमहङ्का
रपदंत्विदम् ॥ यतोलोभस्ततोलाभोलाभाल्लोभःप्रवर्तते ॥ ३३ ॥ लोभग्रस्तस्यपुंसश्चशाश्वतोनिरयोभवेत् ॥ यदिनोविगुणंवित्तंयदावेश्मनितिष्ठति
॥ ३४ ॥ तदामेदारपुत्राणामुन्मादोह्युपपद्यते ॥ उन्मादात्कामसञ्जातविकारान्मतिविभ्रमः ॥ ३५ ॥ भ्रमान्मोहोऽप्यहङ्कारःक्रोधलोभावतःपरम् ॥
एषांप्रचुरभावाच्चतपःक्षयंगमिष्यति ॥ ३६ ॥ क्षीणेतपसिवर्तन्तेपङ्काश्चित्तप्रमोहकाः ॥ तैश्चशृङ्खलयोगैश्चबद्धोनैवोद्धृतिंव्रजेत् ॥ ३७ ॥ एतद्वि
मृश्यशूद्रोऽसौपरित्यज्यगृहंगतः ॥ स्वस्थादेवामुदातत्रसाधुसाध्वितिचाब्रुवन् ॥ ३८ ॥ निर्ग्रन्थिरूपमादायतस्यान्तिकगृहंतथा ॥ गत्वाहंदैवसंवाद ॥ १८१ ॥
मवदंभूतवर्तनम् ॥ ३९ ॥ ततोऽभ्यासप्रसङ्गाच्चजनानांचपरिप्लवात् ॥ तस्ययोषातदागत्यपप्रच्छदैवकारणम्॥४०॥ ततोऽहमवदंतस्ययद्वाचेतोगतंद्रु
तम् ॥ निभृतोऽथनिनादस्यकारणंकथितंमया ॥ ४१ ॥ हृद्गतंपतिनातेऽद्यविधिनादत्तमज्ञवत् ॥ परित्यक्तंमहाभागेपुनर्नास्तीहतेवसु॥४२ ॥ याव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्जीवतिदौर्विध्यंतस्यभोक्तानसंशयः ॥ गच्छमातर्गृहंशून्यमलब्धंतत्प्रपृच्छतम् ॥ ४३ ॥ श्रुत्वातद्वैशिवंसाचवचनंपत्युरन्तिके ॥ गत्वाप्रोवाचदुर्वृत्तंतच्छ्रुत्वाविस्मयंगतः ॥ ४४ ॥ सविचिन्त्यतयासार्धमागतोऽसौममान्तिकम् ॥ निभृतंमामुवाचेदंक्षपणत्वंचकीर्तय ॥ ४५ ॥ क्षपणकउवाच ॥ चाक्षुषंचिरसंशुद्धंहेलयातृणवत्कथम् ॥ त्वयात्यक्तंयतस्तातनास्तिभाग्यमकण्टकम् ॥ ४६ ॥ ऐश्वर्यमतुलंशौर्यंशीर्यतेभावुकंपुनः ॥ स्वबन्धूनांमहद्दुःखमाजन्ममरणान्तिकम्॥४७॥द्रक्ष्यसेचात्मनानित्यंमृतानांयागतिर्ध्रुवम्॥ तस्मात्तद्गृह्यतांतूर्णंभुंङ्क्ष्वभोग्यमकण्टकम् ॥ ऐश्वर्यमतुलंशौर्यंलोकनांविस्मयंवरम् ॥ ४८ ॥ शूद्रउवाच ॥ नमेवित्तेस्पृहाचास्तिधनंसंसारवागुरा ॥ तद्विधौपतितोमर्त्योनपुनर्मोक्षकंव्रजेत् ॥४९ ॥ शृणुवित्तस्ययद्दोषमिहलोकेपरत्रच ॥ भयंचोराच्चज्ञातिभ्योराजभ्यस्तस्करादपि ॥ ५० ॥ सर्वेजिघांसवोमर्त्याःपशुमत्स्यविविष्किराः ॥ तथाधनवतांनित्यंकथमर्थास्सुखावहाः ॥ ५१ ॥ प्राणस्यान्तकरोह्यर्थस्साधकोदुरितस्यच ॥ कालादीनांप्रियंगेहंनिदानंदुर्गतेःपरम् ॥ ५२ ॥ क्षपणकउवाच ॥ यस्यार्थास्तस्यमित्राणियस्यार्थास्तस्यबान्धवाः ॥ कुलंशीलंचपाण्डित्यंरूपभोग्यंयशःसुखम् ॥ ५३ ॥ धनेनतुविहीनस्यपुत्रदारोज्झितस्यच ॥ कथंमित्रंकथंधर्मोदीनानांजन्मनःकथम् ॥५४॥ सत्त्वादिक्रतुकायचपुष्करिण्युपकारकम् ॥ दानंनाकस्यसोपानंनिःस्वस्यचनसिद्ध्यति ॥५५॥ व्रतकार्यंस्यरक्षाचधर्मादिश्रवणंभृशम् ॥ पितृयज्ञादितीर्थंचनिर्वित्तस्यनसिद्ध्यति ॥ ५६ ॥ तथारोगप्रतीकारःपथ्यमौषधसञ्चयः ॥ रक्षणंविग्रहस्यैवशत्रूणांविजयोध्रुवम् ॥ ५७ ॥ स्त्रीणांचजन्मनावार्तावसुयोगेनलभ्यते ॥ भूतभव्यप्रवृत्तानांसुकृतंदुष्कृतंचयत् ॥ ५८ ॥ तस्माद्बहुधनंयस्यतस्यभोग्यंयदृच्छया ॥ स्वर्गंवितरणादेवलप्स्यसेह्यचिरादितः ॥ ५९॥ शूद्रउवाच ॥ अकामाच्चव्रतंसर्वमक्रोधात्तीर्थसेवनम् ॥दयाजप्यसमाशुद्धंसन्तोषोधनमेवच ॥ ६० ॥ अहिंसापरमासिद्धिःशिलोञ्छवृत्तिरुत्तमा ॥शाकाहारःसुधातुल्यउपवासःपरन्तप ॥६१॥ सन्तोषोमेमहाभोग्यंमहादानंवराटकम् ॥मातृवत्परदाराश्चपरद्रव्याणिलोष्टवत्॥ ६२॥ परदाराभुजङ्गाभाःसर्वेयज्ञाइदंमम ॥ तस्मादेनंनगृह्णामिसत्यंसत्यंगुणाकर ॥ ६३ ॥ प्रक्षालनाद्धिपङ्कस्यदूरादस्पर्शनंवरम् ॥ ६४॥ भगवानुवाच॥इत्युक्तेतुनरश्रेष्ठपुष्पवर्षंपपातह ॥ मूर्ध्निदेशेतनौतस्यसर्वदेवेरितंद्विज ॥६५ ॥ देवदुन्दुभयोनेदुर्नृत्यन्त्यप्सरसांगणाः ॥ जगुर्गन्धर्वपतयोविमानंचापतद्दिवः ॥६६॥ ऊचुर्देवगणास्तत्रविमानमिदमारुह॥सत्यलोकंसमासाद्यभुङ्क्ष्वभोग्यंमहेन्द्रवत्॥६७॥सङ्ख्यातेनापिवर्तेतभोग्यकालस्यधार्मिक॥इत्युक्तेषुचदेवेषुशूद्रोवचनमब्रवीत्॥६८॥शूद्रउवाच॥कथंनिर्ग्रन्थकस्यास्यज्ञानंचेष्टास्यभाषणम् ॥किंवाहरिहरौब्रह्माकिंवाशक्रोबृहस्पतिः॥६९॥किंवामच्छलनार्थायसाक्षाद्धर्मइहागतः॥७०॥श्रीभगवानुवाच॥इत्युक्तेक्षपणश्चासौस्मितोवचनमब्रवीत्॥७१॥क्षपणकउवाच ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विज्ञातुंचैववोधर्ममहंविष्णुरिहागतः ॥ विमानेनदिवंगच्छसकुटुम्बोमहामुने ॥ ७२ ॥ मत्प्रसादाच्चयुष्माकंसदैवनवयौवनम् ॥ भविष्यतिमहाप्राज्ञ भाग्यानन्त्यंप्रलप्स्यथ ॥ ७३ ॥श्रीभगवानुवाच॥दिव्याभरणसंयुक्तादिव्यवस्त्रोपशोभिताः ॥ गतास्तेसहसानाकंसर्वैर्बन्धुजनैर्वृताः ॥७४॥ एवंद्विजवरश्रेष्ठलोभत्यागाद्ययुर्दिवम् ॥ तुलाधारस्तथाधीमान्सत्यधर्मप्रतिष्ठितः ॥ ७५ ॥ येनजानातितद्वृत्तंदेशान्तरसमुद्भवम् ॥ तुलाधारसमोनास्तिसुरलोकेप्रतिष्ठितः ॥ तस्मात्त्वमपिभूदेवसमंगत्वादिवंव्रज ॥ ७६ ॥ यइदंशृणुयान्मर्त्यःसर्वधर्मप्रतिष्ठितः ॥ जन्मजन्मार्जितंपापंतत्क्षणात्तस्यनश्यति ॥ ७७ ॥ सकृत्पठनमात्रेणसर्वयज्ञफलंलभेत् ॥ लोकानांपुरतोविप्रदेवानामर्च्यतांव्रजेत् ॥ ७८ ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेशूद्रस्यालोभाख्यानंनामपञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥ श्रीभगवानुवाच ॥ अद्रोहकस्यचाख्यातोमहिमालोकदुःसहः ॥ एकतल्पगतांवामांक्षान्त्वासर्वजितोऽभवत् ॥ १ ॥ ज्ञानिनामपिदुःसाध्यंमुनीनांब्रह्मचारिणाम् ॥ सुरासुरमनुष्याणांविषमंतत्समंगतः ॥ २ ॥ स्वभावाद्विषमंकामंजेतुंकःपुरुषःक्षमः ॥ अद्रोहकमृतेविप्रसएवभवजित्पुमान् ॥ ३ ॥ अहल्याहरणादेवसुरेशस्यभगाङ्कता ॥ पुनर्देव्याःप्रसादाच्चसहस्राक्षेतिविश्रुतः ॥ ४ ॥ विदितंसर्वलोकेचत्रैलोक्येसचराचरे ॥ ५ ॥ द्विजउवाच ॥ कथंचदेवदेवस्यअहल्याहरणंप्रभो ॥ भगाङ्कत्वंचसम्प्राप्यसहस्राक्षःसुराधिपः ॥६ ॥नगाङ्कोऽपिभगाङ्कत्वंसम्प्राप्तस्सुरराट्कथम् ॥ दुःश्रुतंसुरवैकल्यंश्रोतुमिच्छामितत्त्वतः ॥ ७ ॥ श्रीभगवानुवाच ॥ पुरास्वान्तोद्भवांकन्यांलोकेशश्चमहामनाः ॥ गौतमायददौधातालोकपालाग्रतोमुदा ॥ ८ ॥ ततस्तुलोकपालानांमन्मथाविष्टचेतसाम् ॥ शचीपतेस्तुसंमोहोहृदिशल्यइवस्थितः ॥ ९ ॥लोकपालानतिक्रम्यसुवेषावरवर्णिनी ॥ द्विजायरत्नभूतैषादत्ताकिंवाकरोम्यहम् ॥ १० ॥ इतिसञ्चिन्त्यतस्यास्तुवर्तमानेचयौवने ॥ पुनश्चमाययादृष्टंरूपंतस्यास्सुशोभनम् ॥ ११ ॥ पुनश्चिन्तयमानोऽसौगौतमाध्यासनंगतः ॥ पश्चात्तुतस्यगमनाद्यद्वृत्तंतच्छृणुष्वमे॥१२॥ एकदागौतमःस्नातुंगतोऽसौपुष्करंप्रति ॥ साध्वीचगृहशौचेचगृहवस्तुनितत्परा ॥ १३ ॥ प्रवृत्तादेववास्तूनांबलिंकर्तुंचतत्परा ॥ इन्धनंवह्निकार्यंचनित्यकर्मानुसञ्चयम् ॥ १४ ॥ एतस्मिन्नन्तरेशक्रोमुनेस्तस्यमहात्मनः ॥ रूपमास्थायगात्रेणप्रविवेशोटजंमुदा ॥ १५ ॥ पतिव्रतापतिंदृष्ट्वाश्रद्धयापरयासती ॥ देवस्थानेचवस्तूनांसञ्चयंकर्तुमुद्यता ॥ १६ ॥ ततस्तामब्रवीदार्तोमुनिवेषधरोहरिः ॥ १७ ॥ इन्द्रउवाच ॥ प्रद्युम्नवशगोवामेदेहिमेचुम्बनादिकम् ॥ १८ ॥ श्रीभगवानुवाच ॥ एतस्मिन्नन्तरेसाचत्रपायुक्ताब्रवीद्वचः ॥१९॥ अहल्योवाच ॥ देवकार्यादिकंत्यक्त्वावक्तुंनार्हसिमेप्रभो ॥ सर्वंजानासिधर्मज्ञपुण्यानांनिश्चयंमुने ॥ २० ॥ अयमर्थोहिवेलायामधुनैवनयुज्यते ॥ २१ ॥ श्रीभगवानुवाच ॥ ततस्तांचारुसर्वाङ्गींदृष्ट्वामन्मथ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पीडितः ॥ २२ ॥ इन्द्रउवाच ॥ अलंप्रियेनवक्तव्यंहृच्छयोमेप्रजायते ॥ कर्तव्यंचाप्यकर्तव्यंपत्युर्वचनसंमतम् ॥ २३ ॥ करोतिसततंयाचसा चनारीपतिव्रता ॥ लङ्घयेद्याचतस्याज्ञांसुरतेचविशेषतः ॥ पुण्यंतस्याभवेन्नष्टंदुर्गतिंचाधिगच्छति ॥ २४ ॥ श्रीभगवानुवाच ॥ साब्रवीद्देववस्तूनि सन्तिदेवार्थतोमुने ॥ नित्यकर्माणिचान्यानिकिंवातेषुविपर्ययः ॥ २५ ॥ सचोवाचसतींतत्रदेह्यालिङ्गादिकंमम ॥ मनसाभयमुत्सृज्यमयादत्ता नितानिच ॥ २६ ॥ इत्युक्त्वातांपरिष्वज्यकृतस्तेनमनोरथः ॥ एतस्मिन्नन्तरेविप्रमुनेर्हृद्यासकलमषम् ॥२७ ॥ ततोध्यानंसमारभ्याजानाद्वृत्तंशची पतेः ॥ तूर्णमेवद्वारदेशेगत्वाचसमुपस्थितः ॥ २८ ॥ शक्रोमुनिंतुसंलक्ष्यचौतुदेहंविवेशह ॥ गच्छतोवृषदंशस्यपद्धतौप्रचचालह ॥ २९ ॥ मुनिस्तत्रावदत्तंवैकस्त्वंमार्जाररूपधृक् ॥ भयात्तस्यमुनेरग्रेशक्रःप्राञ्जलिरास्थितः ॥ ३० ॥ मघवन्तंपुरोदृष्ट्वाचुकोपमुनिपुङ्गवः ॥ ३१ ॥ मुनि रुवाच ॥ यत्त्वयाचेदृशंकर्मभगार्थंछलसाहसम् ॥ कृतंतस्मात्तवाङ्गेषुसहस्रभगमुत्तमम् ॥ ३२ ॥ भवत्विहतुपापिष्ठलिङ्गंतेनिपतिष्यति ॥ गच्छमे पुरतोमूढसुरस्थानंदिवौकसः ॥ ३३ ॥ पश्यन्तिमुनिशार्दूलानराःसिद्धास्सहोरगाः ॥ ३४ ॥ श्रीभगवानुवाच ॥ एवमुक्त्वामुनिश्रेष्ठोरुदन्तींतांपति व्रताम् ॥ पप्रच्छकिमिदानींतेकर्मदारुणमागतम् ॥ इत्युक्तावेपमानासाभीतापतिमुवाचह ॥ ३५ ॥ अहल्योवाच ॥ अज्ञानाद्यत्कृतंकर्मक्षन्तुमर्हसिवै प्रभो ॥ ३६ ॥ मुनिरुवाच ॥ परेणाभिगतासित्वममेध्यापापचारिणी ॥ अस्थिचर्मसमाविष्टानिर्मांसानखवर्जिता ॥ चिरंस्थास्यसिचैकापित्वां पश्यन्तुजनाःस्त्रियः ॥ ३७ ॥ श्रीभगवानुवाच ॥ दुःखितातमुवाचेदंशापस्यान्तोविधीयताम् ॥ इत्युक्तेकरुणाविष्टोमन्युनापिपरिप्लुतः ॥ ३८ ॥ जगादगौतमोवाक्यंरामोदाशरथिर्यदा ॥ वनमभ्यागतोविष्णुःसविश्वामित्रलक्ष्मणः ॥ ३९ ॥ दृष्ट्वात्वांदुःखितांशुष्कांनिर्देहांपथिसंस्थिताम् ॥ गदिष्यतिचवैरामःकौशिकस्याग्रतोहसन् ॥ ४० ॥ किमियंशुष्करूपाचप्रतिमास्थिमयीशुभा ॥ नदृष्टंमेपुराब्रह्मन्रूपंलोकविपर्ययम् ॥४१॥ ततोरामं महाभागंविष्णुंमानुपविग्रहम् ॥ यद्वृत्तमासीत्पूर्वंतत्कौशिकःकथयिष्यति ॥ ४२ ॥ कौशिकस्यवचःश्रुत्वारामोवक्ष्यतिधर्मवित् ॥ अस्यादोषोनचै वास्तिदोषोऽयंपाकशासने ॥ ४३ ॥ एवमुक्तेतुरामेणत्यक्त्वारूपंजुगुप्सितम् ॥ दिव्यंरूपंसमास्थायमद्गृहंचागमिष्यसि ॥ ४४ ॥ शप्त्वातु गौतमस्तांहितपस्तप्तुंगतोवनम् ॥ ततोऽत्यन्तंशुष्करूपातथैवपथिसंस्थिता ॥४५ ॥ रामस्यवचनादेवगौतमंपुनरागता ॥ गौतमोऽपितयासार्द्धम द्यैवंदिवितिष्ठति ॥ ४६ ॥ इन्द्रोऽपित्रपयायुक्तःस्थितश्चान्तर्जलेचिरम् ॥ स्थित्वाचान्तर्जलेदेवीमस्तौदिन्द्राक्षिसंज्ञिताम् ॥ ४७ ॥ सुप्रसन्नाततोदेवी स्तोत्रेणपरितोषिता ॥ गत्वोवाचततःसाचवरोऽस्मत्तोविगृह्यताम् ॥ ४८ ॥ ततोदेवीमुवाचेदंशक्रःपरपुरञ्जयः ॥ ४९ ॥ शक्रउवाच ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वत्प्रसादाच्चमेदेविवैरूप्यंमुनिशापजम्॥नश्येच्चदेवराज्यंचलभेऽहंतुपुरायथा ॥५०॥ श्रीभगवानुवाच ॥ तमुवाचततोदेवीपापंतन्मुनिशापजम्॥हन्तुं
ब्रह्मादयोदेवाश्शक्तानाहंसुरेश्वर ॥५१॥ किंतुबुद्धिंसृजाम्यद्ययेनलोकैर्नलक्ष्यते ॥ योनिमध्यगतंदृष्टिसहस्रंतेभविष्यति ॥५२॥ सहस्राक्षइतिख्यातस्सु
रराज्यंकरिष्यसि ॥ मेषाण्डंतवशिश्नंचभविष्यतिचमद्वरात् ॥५३॥ इत्युक्त्वासाजगन्मातातत्रैवान्तरधीयत ॥ शक्रोदेववरैःपूज्योह्यद्यापिदिविवर्तते
॥५४॥ इन्द्रस्यैतादृशीकामादवस्थाद्विजसत्तम ॥ ५५ ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेअहल्याहरणंनामषट्पञ्चाशत्तमोऽध्यायः ॥५६॥ श्रीभग
वानुवाच ॥ अपरंचप्रवक्ष्यामिकामेनाधिष्ठितस्यच ॥ पुराभागीरथीतीरेद्विजःपरमहंसकः ॥१॥ उपदेष्टासहस्राणांद्विजानांशान्तिदःपरः ॥ एकदण्ड
धरःसाक्षात्कूर्मवद्धरणीस्थितः ॥२॥ एकाकिनःसतस्तस्यदेवागारेविनिष्कृते ॥ पत्युर्गृहात्परंगेहंगन्तुंसायंसमुद्यता ॥३॥ अकस्माद्युवतीनारीमिलि
तारूपधारिणी॥दृष्ट्वातांभगवान्विप्रोमन्मथस्यभयार्दितः ॥४॥ अगारजठरेकृत्वासचैनांप्राक्षिपत्क्षपाम् ॥ अर्गलंसादृढंकृत्वादेवागारेसुशोभने ॥५॥
कदाचिदपितंद्वारादागन्तुंनददातिह ॥ एवंभूतःसमाधिस्थःक्षपांक्षिप्त्वाविलप्यसः ॥६॥ चिन्तयंस्तांवरारोहांद्वारिकिंवाकृतंमम ॥ एवंसञ्चिन्त्यतामाह
द्वारंदेहीहनःप्रिये ॥ ७ ॥ पतिश्चवशगःकान्तेदयितस्तेभविष्यति ॥ ततस्तंप्राहसाविप्रंवृद्धंकामप्रलालसम् ॥ ८ ॥ नार्युवाच॥अनन्विताागिर
स्तातवक्तुंत्वंनार्हसिप्रभो ॥ ९ ॥ श्रीभगवानुवाच ॥ अथासौभगवान्प्राहप्रचुरंचास्तिमेवसु ॥ तवदास्यामिकल्याणिप्रस्फोटयकपाटिकाम् ॥ १० ॥
विप्रमाहपुनःसाचत्वंवैमेधर्मतःपिता ॥ मागच्छपुत्रिकांमांचपरयोषांचधार्मिक ॥ ११ ॥ मनसाससमालोच्यसुषिरेणपथागृहान् ॥ बाहुनो
द्धाटयतेनैवगन्तुंचैवसमुद्यतः ॥ १२ ॥ गच्छतश्चार्द्धमररउत्तमाङ्गंसुसङ्कटे ॥ प्रविष्टंनपुनश्चैतिपञ्चत्वमगमत्तदा ॥ १३ ॥ उषःकाले
समायातारक्षिणोयेचकिङ्कराः ॥ अद्भुतंतंशवंदृष्ट्वातामूचुस्तेचविस्मिताः ॥ १४ ॥ रक्षिणऊचुः ॥ कथंचनिधनंत्वस्यसम्भूतंब्रूहिसुन्दरि
॥ १५ ॥ श्रीभगवानुवाच ॥ कथयित्वातुतद्वृत्तमभीष्टंदेशमागता ॥ एवंकामस्यमहिमादुर्निवारोजनेषुच ॥ १६ ॥ सर्वेषामपिज
न्तूनांसुरासुरनृणांभवेत् ॥ दृष्ट्वाऽमोघांवरारोहांसर्वलोकपितामहः ॥ १७ ॥ च्युतबीजोऽभवत्तत्रलौहित्यसम्भवःस्मृतः ॥ पुनातिसकलाँल्लोकान्स
र्वतीर्थमयोहिसः ॥ १८ ॥ यमाश्रित्यनरोयातिब्रह्मलोकमनामयम् ॥ १९ ॥ द्विजउवाच ॥ ॥ कथंचब्रह्मणोमोहोह्यमोघाकावराङ्गना ॥ उद्भ
वंतीर्थराजस्यश्रोतुमिच्छामितत्त्वतः ॥ २० ॥ श्रीभगवानुवाच ॥ मुनिर्देवैःसमाराध्यःपद्मयोनिसमप्रभः ॥ शन्तनुश्चेतिविख्यातःपत्नीतस्यपतिव्र
ता ॥ २१ ॥ अमोघेतिसमाख्यातारूपयौवनशालिनी ॥ अस्याश्चपतिमन्वेष्टुंयातोब्रह्माचतद्गृहम् ॥ २२ ॥ तस्मिन्कालेमुनिश्रेष्ठःपुष्पाद्यर्थं ॥ १८३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वनंगतः ॥ सातंदृष्ट्वासुरश्रेष्ठमर्घ्यपाद्यादिकंददौ ॥ २३ ॥ दूरेऽभिवादनंकृत्वासागृहंप्रविवेशह ॥ तांचदृष्ट्वाऽनवद्याङ्गींधाताकामवशंगतः ॥ २४ ॥
स्रष्टात्मानंसमाधायाचिन्तयत्तांपुरोगताम् ॥ बीजंपपातखट्वायांब्रह्मणःपरमात्मनः ॥ २५ ॥ ततोब्रह्मागतस्त्रस्तस्त्वरयापरिपीडितः ॥ अथायातो
मुनिर्गेहंशुक्रंपीठेददर्शह ॥ २६ ॥ तामपृच्छद्वरारोहांकश्चाप्यत्रागतःपुमान् ॥ तमुवाचततोऽमोघाब्रह्माह्यत्रागतःपते ॥ २७ ॥ त्वामेवान्वेषितुंनाथ
मयादत्तोऽत्रपीठकः ॥ शुक्रस्यकारणंचात्रतपसाज्ञातुमर्हसि ॥ २८ ॥ ततोध्यानात्परिज्ञातंतेनैवचद्विजन्मना ॥ २९ ॥ शन्तनुरुवाच ॥ ब्रह्मरे
तःपरंसाध्विपालयस्वममाज्ञया ॥ उत्पद्यतेसुतस्तेतुसर्वलोकैकपावनः ॥ आवयोःसर्वकल्याणंफलिष्यतिमनोगतम् ॥ ३० ॥ श्रीभगवानुवाच ॥
ततःपतिव्रतातस्यआज्ञामागृह्यसम्भवात् ॥ पपौरेतोमहाभागाब्रह्मणःपरमात्मनः ॥ ३१ ॥ आवर्तइवसञ्जज्ञेरौद्रगर्भइतिस्फुरन् ॥ प्रसोढुंनैव
शक्तासाशन्तनुंचाब्रवीत्ततः ॥ ३२ ॥ अमोघोवाच ॥ गर्भंधारयितुंनाथनशक्नोम्यधुनाप्रभो ॥ किंकरिष्यामिधर्मज्ञप्राणोमेसञ्ज्वलत्यपि ॥ आ
ज्ञापयमहाभागगर्भंत्यक्ष्यामियत्रच ॥ ३३ ॥ पत्युराज्ञांसमादायमुक्तोगर्भोयगन्धरे ॥ पयस्तजोमयंशुद्धंसर्वधर्मप्रतिष्ठितम् ॥ ३४ ॥ तन्म
ध्येपुरुषःशुद्धःकिरीटीनीलवाससा ॥ रत्नदाम्नाचविद्धाङ्गोदुष्प्रेक्ष्योज्योतिषांगणः ॥ ३५ ॥ ततोदेवगणाःस्वर्गात्पुष्पवर्षमवाकिरन् ॥ प्रसूतःसर्वतीर्थे
षुतीर्थराजइतिस्मृतः ॥ ३६ ॥ ततोरामइतिख्यातःप्रजातोऽहंभृगोःकुले ॥ क्षत्रियान्पितृहन्तॄंस्तुससैन्यबलवाहनान् ॥ ३७ ॥ हत्वायु
द्धगतान्भीतान्पङ्कैःसर्वैर्युतोह्यहम् ॥ ब्रह्महत्यासमंघोरंमद्देहेसमुपस्थितम् ॥ ३८ ॥ पङ्कयुक्तकुठारंमेक्षालितंनैवशुद्ध्यति ॥ ततःखेचाभवद्वा
णीराममद्वचनंकुरु ॥ ३९ ॥ देववागुवाच ॥ यत्रतीर्थेकुठारंतेनिर्मलंचभवेदिह ॥ तत्रतेसर्वपापानांजातानांचक्षयोभवेत् ॥ ४० ॥ जनानांतत्र
सर्वेषांहितार्थंतिष्ठमानद ॥ चपलंगच्छतीर्थानिसर्वाणिसुमहान्तिच ॥ ४१ ॥ तेषांमध्येमहातीथपर्शुःशुद्धोभवेद्यदि ॥ तंचजानीहितीर्थेषुमुक्ति
दंपरिकीर्तितम् ॥ ४२ ॥ श्रीभगवानुवाच ॥ तच्छ्रुत्वाजामदग्न्यस्तुतीर्थानिप्रययौतदा ॥ गङ्गांसरस्वतींशुभ्रांकावेरींसरयूंतथा ॥ ४३ ॥ गो
दावरींचयमुनांकद्रूंचवसुदांतथा ॥ अन्यांचपुण्यदांरम्यांगौरींपूर्वास्थितांशुभाम् ॥ ४४ ॥ गच्छतस्तस्यधीरस्यसदागतिसमस्यच ॥ क्षालि
तःसर्वतीर्थेषुनपुनर्निर्मलोऽभवत् ॥ ४५ ॥ ततोगिरिगुहांदुर्गांमहारण्यंचपर्वतम् ॥ गिरिकूटचदुर्लभ्यंययौतीर्थमसौहरिः ॥ ४६ ॥ ॥ नचनिर्मल
तामेतिकुठारस्तस्यतेनच ॥ विषादमगमत्तत्ररामःपरपुरञ्जयः ॥ ४७ ॥ हाहेतिविविधंकृत्वाचोपविश्यधरातले ॥ प्रचिन्तामगमद्वीरस्तमुवाचपुन
स्तथा ॥ ४८ ॥ देववागुवाच ॥ पूर्वस्यांदिशिदेवेशतीर्थंचास्तिगुहोदरे ॥ ४९ ॥ श्रीभगवानुवाच ॥ तच्छ्रुत्वानरशार्दूलोगत्वाकुण्डंददर्शसः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रदक्षिणंजलावर्तंशुभ्रंपापहरंशुभम् ॥ ५० ॥ तज्जलस्पर्शमात्रेणकुठारःशुद्धतांगतः ॥ ततोरामोऽभिषेकंतुकृतवान्प्रमुदान्वितः ॥ ५१ ॥ शुद्धात्म नस्त्वपापस्यत्वबुद्धिर्जाताप्रपाविनी ॥ सरामःसुचिरंस्थित्वातीर्थराजंप्रसाद्यतम् ॥ ५२ ॥ ततस्ततोऽचलात्प्राप्यपुरंवेगसमन्वितः ॥ ख्यातंकृत्वा ततश्चोन्यागतोऽसौलवणार्णवम् ॥ ५३ ॥ अयंतीर्थवरःसाक्षात्पितामहकृतोभुवि ॥ सुखदःसर्वतःशुद्धोमुक्तिमार्गप्रदःकिल ॥ ५४ ॥ एवंकामप्र भावंचविद्धिदुर्वारदुःसहम् ॥ कामाज्जातंवृषंपापंपुण्यंपुण्यप्रयोगतः ॥ ५५ ॥ सजातश्चैवलौहित्योविरिञ्चेश्चैवचौरसः ॥ शन्तनोःक्षेत्रसञ्जातस्त्व मोघागर्भसम्भवः ॥ ५६ ॥ विरिञ्चिनाजितःकामःशन्तनोरप्यमत्सरात् ॥ तस्याःपतिव्रतात्वाच्चतीर्थात्तीथवरोहिसः ॥ ५७ ॥ एवंयस्तुपठेन्नित्यं पुण्याख्यानमिदंशिवम् ॥ शृणुयाद्वामुदापृथ्व्यांमुक्तिमार्गंसगच्छति ॥ ५८ ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेपञ्चाख्यानेलौहित्योत्पत्तिर्नामसप्त पञ्चाशत्तमोऽध्यायः ॥५७॥ श्रीभगवानुवाच ॥ पुराशर्वःस्त्रियोदृष्ट्वायुवतीरूपशालिनीः ॥ गन्धर्वकिन्नराणांचमनुष्याणांचसर्वतः ॥ १ ॥ मन्त्रेण ताःसमाकृष्यत्वतिदूरेविहायसि ॥ तपोव्याजपरोदेवस्तासुसङ्गतमानसः ॥ २ ॥ अतिरम्यांकुटींकृत्वाताभिःसहमहेश्वरः ॥ क्रीडांचकारसहसाम नोभवपराभवः ॥ ३ ॥ एतस्मिन्नन्तरेगौर्याश्चित्तमुद्भ्रान्ततांगतम् ॥ अपश्यद्ध्यानयोगेनक्रीडन्तंजगदीश्वरम् ॥ ४ ॥ स्त्रीभिरन्तर्गतंज्ञात्वारोषस्यव शगाभवत् ॥ ततःक्षेमङ्करीरूपाभूत्वाचप्रविवेशसा ॥ ५ ॥ व्योमैकान्तेऽतिदूरेचकामदेवसमप्रभम् ॥ वामातिमध्यगंशुभ्रंपुरुषंपुरुषोत्तमम् ॥ ६ ॥ स्त्रीभिःसहसमालिङ्ग्यप्रक्रीडन्तंमुहुर्मुहुः॥चुम्बन्तंनिर्भरंदेवंहरंरागप्रपीडितम् ॥७॥ वृत्तंक्षेमङ्करीदृष्ट्वानिपपाताग्रतस्तदा ॥ तासांकेशेषुचाकृष्यचकार चरणाहतिम् ॥८॥ त्रपयापीडितश्शर्वःपराङ्मुखमवस्थितः ॥ केशेष्वाकृष्यरोषात्ताःपातयामासभूतले ॥ ९ ॥ स्त्रियःसर्वाधरांप्राप्यसहसाविकृतान नाः ॥ उमाशापप्रदग्धाङ्गाम्लेच्छानांवशमागताः ॥ १० ॥ ताश्चाण्डालस्त्रियःख्याताअधवाधवसंयुताः ॥ अद्याप्युमाकृतंशापंसर्वास्ताश्चसमश्नु युः ॥ ११ ॥ अथोमाशतधारूपंकृत्वेशंसङ्गतातदा ॥ एवंप्रभावंजानीहिकामस्यसततंद्विज ॥ १२ ॥ ततश्चिरात्तयासार्द्धंगतःकैलासमन्दि रम् ॥ अतःक्षेमङ्करींदृष्ट्वायेऽभिनन्दन्तिमानवाः ॥ १३ ॥ तेषांवित्तर्द्धिविभवाभवन्तीहपरत्रच ॥ कुङ्कुमारक्तसर्वाङ्गिकुन्देन्दुधवलानने ॥ १४ ॥ सर्वमङ्गलदेदेविक्षेमङ्करिनमोऽस्तुते ॥ योगिनीसाम्यंतेनैवसम्मुखाविमुखापिवा ॥ १५ ॥ दृष्ट्वातांनाभिवन्देद्यस्तस्यथुद्धेपराजयः॥ राजगृहेषु विद्यायांनमस्काराज्जयोभवेत् ॥ १६ ॥ एवंकामस्यमाहात्म्यंभवोमोहवशंगतः ॥ ममैवयादृशोमोहःसर्वलोकैःप्रगीयते ॥ १७ ॥ परस्त्रीहरणे दोषान्ममदुर्गतिसञ्चयम् ॥ यथोद्भूतंप्रवक्ष्यामिजनेषुविदितंद्विज ॥ १८ ॥ गोपीपतिहिताकाचित्काचिद्बालातपस्विनी ॥ प्रौढाकात्यायनीवृद्धा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काचित्सम्बन्धिनीवधूः ॥ १९ ॥ आसांहरणदोषाच्चयद्वृत्तंतच्छृणुष्वमे ॥ रणेपराजयंदैन्यंशोकंपुत्रविनाशनम् ॥२०॥ सारथ्यंस्त्रीजनेपापंचण्डा
लादेवविप्लवम् ॥ शुक्लाङ्गंक्षयवृद्धिंचकल्पेशाश्वतमाप्नुयाम् ॥ २१ ॥ अयंदेवासुराणांचक्षमयाप्रभुतांगतः ॥ अस्यैवसदृशोलोकेनभूतो
नभविष्यति ॥ २२ ॥ रामामङ्कस्थितांरम्यांक्षमातल्पगतेनच ॥ त्यक्त्वैवसाधितालोकास्सुरासुरसुदुर्लभाः ॥ २३ ॥ एवंवैष्णवमुख्यश्चसुरासुरगणा
र्चितः ॥ योनोददातिभुक्त्यग्र्यंशेषंचस्वयमश्नुते ॥२४ ॥ एवमभ्यासधैर्येणदीर्घकालेसुखंगते ॥ प्राक्सङ्गमात्स्वभार्यांचदृष्ट्वामांप्रददौमुदा ॥ २५ ॥
द्वादशाब्दंप्रसङ्कल्प्यप्राग्भोगोमयिवेशितः ॥ तेनतस्यगृहेनित्यंतिष्ठामिगृहरक्षणात् ॥ २६ ॥ तथाधात्रीफलस्यापिसदास्वरसमीहते ॥ तस्मा
दुक्तोमयान्येषांवैष्णवानांचवैष्णवः ॥२७॥ पुरायेविप्रमेभक्तास्सुरामत्पथगामिनः ॥ तैरेवनकृतंयच्चतदनेनकृतंपरम् ॥२८॥ तस्माद्वैष्णवसर्वस्वंनाम
रम्यंमयाकृतम् ॥ अस्यवेश्मनितिष्ठामिमुहूर्तंनचलाम्यहम् ॥ २९ ॥ अतोयेचैवमद्भक्तास्तेष्वहंसुलभोद्विज ॥ अस्माकंपदवींतेभ्योह्यद्य द्वि
स्वकारणम् ॥ ३० ॥ आवयोावप्रसौजन्यंस्वप्नभोज्यादिकंसमम् ॥ सायुज्यंचसखित्वंचपश्यभूदेवनान्तरम् ॥ ३१ ॥ व्यासउवाच॥ततोमूका
दयस्सर्वेस्वागताहरिमीश्वरम् ॥ गन्तुकामादिवंपुण्यास्सदाराःसपरिच्छदाः ॥ ३२ ॥ येचतेषांगृहाभ्याशेऽप्यात्मनोगृहगोधिकाः ॥ नानाकीटादयो
येचतेषामनुययुःसुराः ॥ ३३ ॥ एतस्मिन्नन्तरेदेवाःसिद्धाश्चपरमर्षयः ॥ प्रचक्रुःपुष्पवर्षाणिसाधुसाध्वित्यनादयन् ॥ ३४ ॥ देवदुन्दुभयोनेदुर्वि
मानेषुवनेषुच ॥ समारुह्यरथंस्वंस्वंहरिवीथीपुरंययुः ॥ ३५ ॥ तदद्भुतंसमालोक्यविप्रोऽवोचज्जनार्दनम् ॥ उपदेशंचदेवेशब्रूहिमेमधुसूदन
॥ ३६ ॥ श्रीभगवानुवाच ॥ गच्छस्वपितरौतातशोकविक्लवमानसौ ॥ समाराध्यप्रयत्नेनमद्भूहंप्राप्स्यसेऽचिरात ॥ ३७ ॥ पितृमातृसमादेवानति
ष्ठन्तिसुरालये ॥ याभ्यांसुगर्हितंदेहंशिशुत्वेपालितंसदा ॥ ३८ ॥ अज्ञानदोषसहितंप्रपुष्टंचापिवर्धितम् ॥ याभ्यांतयोस्समंनास्तित्रैलोक्येसचराचरे
॥३९ ॥ व्यासउवाच॥ततोदेवगणास्सर्वेपञ्चभिस्तैर्मुदान्विताः॥माधवंसंस्तुवन्तश्चगतास्तेहरिमन्दिरम् ॥४०॥ खचितांचपुरींरम्यांविश्वकर्मविनिर्मि
ताम्॥रत्नाढ्यामिष्टसम्पूर्णांकल्पवृक्षादिभिर्युताम् ॥ ४१ ॥ शातकुम्भमयैर्गेहैस्सर्वरत्नैस्सकर्बुराम्॥वज्रवैडूर्यसोपानांस्वर्णदीतोयसंयुताम् ॥ ४२ ॥
गीतवाद्यादिसम्पूर्णांसर्वदुर्गसमाकुलाम् ॥ कोकिलालापबहुलांसिद्धगन्धर्वसेविताम् ॥ ४३ ॥ रूपाढ्यैःसुजनैःपूर्णांप्रयान्तीमिवखेपुरीम् ॥ ततःस्थि
त्वाऽच्युताःसर्वेसर्वलोकोर्ध्वतोभृशम् ॥ ४४ ॥ द्विजोऽपिपितरौगत्वासमाराध्यप्रयत्नतः ॥ अचिरेणैवकालेनसकुटुम्बोहरिंययौ ॥४५॥ पञ्चाख्यान
मिदंपुण्यंमयातेसमुदाहृतम् ॥ यःपठेच्छृणुयाद्वापितस्यनास्तीहदुर्गतिः ॥ ब्रह्महत्यादिभिःपापैर्नलिप्येतकदाचन ॥ ४६ ॥ गवांकोटिप्रदानेनयत्फलं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लभतेनरः ॥ तत्फलंसमवाप्नोतिपश्चाख्यानावगाहनात् ॥४७॥ स्नानेनपुष्करेनित्यंभागीरथ्यांचसर्वदा ॥ यत्फलंतदवाप्नोतिसकृच्छ्रवणगोचरात ॥ ४८ ॥ दुःस्वप्नंनाशयेत्क्षिप्रंतथारोग्यंप्रयच्छति ॥ लक्ष्म्यारोग्यकरंचैवतस्माच्छ्रोतव्यमेवहि ॥ ४९ ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेपञ्चाख्यानंनामाष्टपञ्चाशत्तमोऽध्यायः ॥ ५८ ॥ ॥ द्विजाऊचुः ॥ कीर्तिर्धर्मोऽथलोकेषुसर्वाणिप्रवराणिच ॥ वदनोमुनिशार्दूलयदिनोऽस्तित्वनुग्रहः ॥ १ ॥ व्यासउवाच ॥ यस्यखातेवनेगावस्तृप्यन्तिमासमेवच ॥ यद्वासप्तदिनात्पूतःसर्वदेवैःसपूजितः ॥ २ ॥ पुष्करिण्याविशेषेणपूतायायज्ञकर्मणा ॥ यत्फलंजलदानेनसर्वमत्रास्तितच्छृणु ॥ ३ ॥ हायनेहायनेचैवकल्पंकल्पंविधीयते ॥ दानात्स्वर्गमवाप्नोतितोयदःसर्वदोभुवि ॥ ४ ॥ मेघेवर्षतिखातेचजायन्तेयेतुशीकराः ॥ तावद्वर्षसहस्राणिदिवमश्नातिमानवः ॥ ५ ॥ तोयैरन्नादिपाकैश्चप्रसन्नोमानवोभवेत् ॥ प्राणानांचविनान्नैश्चधारणंनैवजायते ॥ ६ ॥ पितॄणांतर्पणंशौचंरूपंवैगन्ध्यनाशनम् ॥ बीजंत्विहार्जितंसर्वंसर्वंतोयेप्रतिष्ठितम् ॥ ७ ॥ वस्त्रस्यधावनेरुच्यंभाजनानांतथैवच ॥ तेनैवसर्वकार्यंचपानीयंमेध्यमेवच ॥ ८ ॥ तस्मात्सर्वप्रयत्नेनवापीकूपतटाककम् ॥ कारयेच्चबलैःसर्वैस्तथासर्वधनेनच ॥ ९ ॥ ततोविनिर्जलेदेशेयोददातिजलाशयम् ॥ वासरेवासरेतस्यकल्पंस्वर्गंविनिर्दिशेत् ॥ १० ॥ त्रिविष्टपाच्युतोविप्रोवेदशास्त्रार्थपारगः ॥ लोकबन्धुःसधर्मात्मातपस्तस्मादिवंव्रजेत् ॥ ११ ॥ एवंजन्माष्टकंप्राप्यएकस्याक्षयमिष्यते ॥ क्षत्रियाणांकुलेजातःसार्वभौमोऽभवन्नृपः ॥ १२ ॥ विशोऽक्षयंधनंविद्याजन्मजन्मसुयत्प्रियम् ॥ शूद्रादयोऽन्त्यजाश्चान्येलभन्तेस्वर्गतिंमुहुः ॥ १३ ॥ चतुर्हस्तप्रमाणंतुकूपंखनतियःपुमान् ॥ परोपकारकंनित्यंकल्पंस्वर्गंतुहायने ॥ १४ ॥ द्विगुणेद्विगुणंविद्याच्छतंचैवचतुर्गुणे ॥ विंशत्किष्कुप्रमाणांतुदद्यात्पुष्करिणींतुयः ॥१५॥ विष्णोर्धामलभतसोऽपिदिव्यभोगंतथैवच ॥ अनन्तरंनृपोजातोधनीवागीश्वरोभवेत् ॥ १६ ॥ एवंद्विस्त्रिश्चतुर्वापिगुणतोभोग्यमिष्यते ॥ विस्तीर्णेप्रचुरंविद्धिसहस्रेणाच्युतोदिवः ॥१७॥ सहस्राद्द्विगुणेनैवसुरपूज्योभवेन्नरः॥जन्तवस्तत्रयेसन्तियावन्तोजीवनंययुः ॥१८॥ तत्सङ्ख्याकाजनास्तस्यकिङ्कराःपृष्ठलग्नकाः॥ भवन्तिसततंगेहेपुरेजनपदेषुच ॥ १९ ॥ विहायपितरंभोग्याधनेक्षीणेयथावनम् ॥ पक्षिणस्सूकरश्चैवमहिषीकरिणीतथा ॥ २० ॥ उपदेष्टाचकर्त्ताचषडेतेस्वर्गगामिनः ॥ दिव्यंचपक्षिणांचैवशतंस्वर्गंविनिर्दिशेत् ॥ २१ ॥ क्रोडोवर्षसहस्रंतुमहिष्ययुतहायनम् ॥ देवरूपंसमास्थायकरिण्यालक्षमुच्यते ॥ २२ ॥ कोट्येकमुपदेष्टुश्चकर्तुरक्षयमेवच ॥ पुराधनिसुतेनैवकृतःख्यातोजलाशयः ॥ २३ ॥ अयुतधनव्ययेनैवप्राणेनैवबलेनच ॥ सर्वसत्त्वोपकारायशिवश्रद्धायुतेनच ॥ २४ ॥ कालेनकियताचापिक्षीणवित्तोऽभवत्किल ॥ कश्चिदर्थीधनीतस्यमूल्यदानायचो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्यतः ॥ २५ ॥ विमृश्यधनिनाचोक्तंव्याहारंशृणुताधुना ॥ दीनारस्यायुतंवातेदास्याम्यस्याश्चकारणात् ॥ २६ ॥ लब्धंतेपुष्करिण्याश्चपुण्यंलाभात्प्र
सन्यसे ॥ शक्त्यादत्त्वाथमूल्यंतांस्वीयांकर्तुंव्यवस्थितः ॥२७॥ एवमुक्तेसतंप्राहवासरेऽप्ययुतंपुनः ॥ फलंभवतिवैनित्यंपुण्यंपुण्यविदोविदुः ॥२८॥
एतस्मिन्निर्जलेदेशेशिवंखातंकृतंचमे ॥ स्नानपानादिकंकर्मसर्वेकुर्वन्त्यभीप्सितः ॥ २९ ॥ तस्मान्मेऽप्ययुतार्थस्यनैत्यकंफलमिष्यते ॥ ततस्तस्याभव
द्धास्यंतथैवचसभासदाम् ॥३०॥ ह्रियाचपीडितःसोऽपिवाक्यमेतदुवाचह ॥ सत्यमेतद्वचोऽस्माकंपरीक्षांकुरुधर्मतः ॥ ३१ ॥ मत्सरात्सतुतंप्राहशृ
णुमेवचनंपितः ॥ दीनारायुतमेतत्तेदत्त्वाचानीयप्रस्तरम् ॥ ३२ ॥ पातयिष्यामितेखातेयथायोगंग्रमज्जतु ॥ उन्मज्जतिचयत्कालेप्रस्तरःसन्तरत्यपि
॥३३॥ क्षयंयास्यतिनोवित्तंनोचेन्मेधर्मतोहिंसा ॥ बाढमुक्त्वायुतंतस्यगृहीत्वास्वगृहंगतः ॥३४॥ साक्षिणामग्रतस्तेनप्रस्तरःपातितस्तथा ॥ पुष्क
रिण्यांमहत्यांचदृष्टंनरसुरासुरैः ॥ ३५ ॥ ततोधर्मतुलायांतुतुलितंधर्मसाक्षिणा ॥ दीनारायुतदानस्यपुष्करिण्याजलस्यतु ॥ ३६ ॥ नसमंतुदिनैकं
तुजलस्यधर्मतोभृशम् ॥ धनिनोमानसंदुःखंमोघार्थंचपरेऽहनि ॥ ३७ ॥ शिलोच्चयोऽभवत्तीर्णोद्वीपवच्चजलोपरि ॥ ततःकोलाहलःशब्दोजनानांसमु
पस्थितः ॥ ३८ ॥ तच्छ्रुत्वाद्भुतवाक्यंचसुदातौचागतौततः ॥ दृष्ट्वाशैलंतथाभूतंकृतंतेनायुतंतथा ॥ ३९ ॥ ततःखाताधिपेनैवशैलंदूरेनिपातितम् ॥
पुण्यंखातस्यचोत्खातेप्रलुप्तस्यसुतेनहि ॥४०॥ सोऽपिनाकंसमारुह्यजन्मजन्मसुनिर्वृतः ॥ गोत्रमातृगणानांचनृपाणांसुहृदांतथा ॥४१॥ सखीनांचो
पकर्तॄणांखातंखात्वाऽक्षयंफलम् ॥ तपस्विनामनाथानांब्राह्मणानांविशेषतः ॥४२॥ खातंतुजनयित्वातुस्वर्गचाक्षयमश्नुते॥तस्मात्खातादिकंविप्राःश
क्तितोयःकरिष्यति ॥ ४३ ॥ सर्वपापक्षयात्पुण्यंमोक्षंयायान्नसंशयः ॥ यइदंश्रावयेल्लोकेधर्माख्यानंमहोत्कटम् ॥ ४४ ॥ सर्वखातप्रदानस्यफलम
श्नातिधार्मिकः ॥ ग्रहणेभास्करस्यैवभागीरथ्यांतटेवरे ॥ ४५ ॥ गवांकोटिप्रदानस्यफलंश्रुत्वालभेन्नरः ॥ नचदरिद्रतामेतिनशोकंव्याधिसञ्चयम्
॥ ४६ ॥ असंमानंमहद्दुःखमुभयोर्नाधिगच्छति ॥ ४७ ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेखातादिकीर्तनंनामैकोनषष्टितमोऽध्यायः ॥ ५९ ॥
॥ व्यासउवाच ॥ शाखिनामेवसर्वेषांफलंवक्ष्यामियादृशम् ॥ तच्छृणुध्वंमहाभागारोपणेचपृथक्पृथक् ॥१॥ यस्तुरोपयतेतीरेपुण्यवृक्षान्समन्ततः॥
तस्यपुण्यफलंज्ञातुंकथितुंनैवशक्यते ॥ २ ॥ अन्यत्ररोपणंकृत्वाशाखिनांयत्फलंलभेत् ॥ ततोजलसमीपेतुलक्षकोटिगुणंभवेत् ॥ ३ ॥ स्वयंपुष्क
रिणीतीरेत्वनन्तंफलमश्नुते ॥ तस्माच्छतगुणंब्रूमःशाखिनांपुण्यकारिणाम् ॥ ४ ॥ अश्वत्थरोपणंकृत्वाजलाशयसमीपतः ॥ यत्फलंलभतेमर्त्योनत
त्क्रतुशतैरपि ॥ ५ ॥ पतन्तियानिपत्राणिजलेपर्वणिपर्वणि ॥ तानिपिण्डसमानीहपितॄणामक्षयंययुः ॥ ६ ॥ खादन्तिपतगास्तत्रफलानिकामतो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ध्रुवम् ॥ ब्रह्मभक्ष्यसमंतस्यपुण्यंभवतिचाक्षयम् ॥७॥ अश्वत्थेनैवभक्ष्यणरोपणनवयत्फलम् ॥ तद्वैक्रतुशतैर्नैवपुत्रैरवशतैरपि ॥ ८ ॥ उष्णेच्छाय
प्रगृह्णन्तिगावोदेवद्विजातयः ॥ कर्तुःपितृगणानांचस्वर्गोभवतिचाक्षयः ॥ ९ ॥ क्रतुस्वस्थस्यवैविघ्नमक्षयत्वान्नशक्यते ॥ तस्मात्सर्वप्रयत्नेनरोप
येद्वृक्षमाधवम् ॥ १० ॥ एकंवृक्षंसमारोप्यनरःस्वर्गान्नहीयते ॥ तस्मादेवमहावृक्षंरोपयध्वंद्विजोत्तमाः ॥ ११ ॥ जलानांनिकटेरम्येरसानांक्रयवि
क्रये ॥ मार्गेजलाशयेवृक्षान्रोपयेद्योमहाशयः ॥१२॥अश्वत्थादीन्समारोप्यस्वर्गंयातिमनोरमम् ॥ अर्चयित्वातुयत्पुण्यंप्रवक्ष्यामिद्विजातयः ॥१३॥
स्नात्वाश्वत्थंस्पृशेद्यस्तुसर्वपापैःप्रमुच्यते ॥ अस्नातोयःस्पृशेन्मर्त्योलभतेस्नानजंफलम् ॥ १४ ॥ दृष्ट्वाचनाशयेत्पापंस्पृष्ट्वालक्ष्मींप्रपद्यते ॥ प्रद
क्षिणेभवेदायुःसदाश्वत्थनमोऽस्तुते ॥१५॥ चलद्दलायवृक्षायसदाविष्णुस्थितायच ॥ बोधिसत्त्वाययोग्यायसदाश्वत्थनमोऽस्तुते ॥ १६ ॥ अश्व
त्थायतुहव्यंतुपयोनैवेद्यमेवच ॥ पुष्पंधूपंदीपकंचदत्त्वास्वर्गान्नहीयते ॥ १७ ॥ सपुत्रंचाक्षयंविद्धिधनवृद्धियशस्करम् ॥ विजयंमानदंभद्रमश्वत्थ
स्यप्रपूजनम् ॥ १८ ॥ यज्ञंतंचहुतंस्तोत्रंयन्त्रमन्त्रादिकंचयत् ॥ सर्वंकोटिगुणंप्रोक्तंमूलेचलदलस्यच ॥ १९ ॥ यस्यमूलेस्थितोविष्णुर्मध्येतिष्ठति
शङ्करः ॥ अग्रभागेस्थितोब्रह्माकस्तंजगतिनार्चयेत् ॥ २० ॥ सोमवारेत्वमायांचस्नानंयन्मौनिनाकृतम् ॥ दानस्यगोसहस्रस्यफलंचाश्वत्थवन्दने
॥२१॥ सप्तप्रदक्षिणेनैवगवामयुतजंफलम् ॥ प्रचुराल्लक्षकोटिश्चतस्मात्कार्याहिसासदा ॥२२॥ यत्किञ्चिद्दीयतेतत्रफलमूलजलादिकम् ॥ सर्वंतच्चाक्ष
यफलंजन्मजन्मसुजायते ॥ २३ ॥ अहोऽश्वत्थसमोनास्तिवृक्षरूपीहरिर्भुवि ॥ यथापूज्योद्विजोलोकेयथागावोयथामराः ॥ २४ ॥ तथाश्वत्थवृक्ष
रूपोदेवःपूज्यतमःस्मृतः ॥ रोपणेरक्षणेस्पर्शेपूजाकर्मणिवैसदा ॥ २५ ॥ ददातिवित्तंपुत्रांश्चस्वर्गंमोक्षंपुनःक्रमात् ॥ किञ्चिच्छेदंतुयःकुर्यादश्वत्थस्य
तनौनरः ॥ २६ ॥ कल्पैकंनिरयंभुक्त्वाचाण्डालादौप्रजायते ॥ मूलच्छेदेनतस्यैवसचयात्यपुनर्भवम् ॥ २७ ॥ पुरुषास्तस्यतिष्ठन्तिरौरवेघोरदर्श
ने ॥ अश्वत्थस्यैकवृक्षस्यरोपणेयत्फलंभवेत् ॥ २८ ॥ तथैवचम्पकेऽर्केचत्रयाणांरोपणेऽपिच ॥ अष्टौबिल्वस्यवृक्षाश्चन्यग्रोधाश्चैवसप्तच ॥ २९ ॥
निम्बस्यदशवृक्षाश्चफलंचैषांसमंभवेत् ॥ एकैकस्यफलंचोक्तंवृक्षाणांरोपणेद्विजाः ॥ ३० ॥ एवंबुद्ध्वातुधर्मात्मायःकुर्यात्कृत्रिमंवनम् ॥ कल्पकोटिसह
स्राणिकल्पकोटिशतानिच ॥ ३१ ॥ नाकमेतिसचूतस्यसमारोप्यसहस्रकम् ॥ ततोद्वित्रिगुणेनैवन्यूनेवाप्रचुरेऽपिवा ॥३२॥ भुङ्क्तेभुक्त्वापुनःकुर्यान्नृपो
वाथसदीश्वरः ॥ स्वर्गंभोग्यंततोराज्यंकल्याणंमङ्गलंशुभम् ॥३३॥ आरोग्यंशौर्यसम्पन्नमारामादेवजायते॥फलानियस्यखादन्तिजन्तवोऽथसहस्रशः
॥३४॥ आश्रिताविहगाःकीटाःपतगाःशलभादयः॥छायाश्रिताश्चयेसत्त्वास्तत्संख्याताःपृथग्जनाः॥३५॥ तस्यकिङ्करतांयान्तिशतशोदेवतार्चिताः॥

CC-0. In Public Domain. Digitization by eGangotri

येचवृक्षामहासत्त्वास्सर्वेतेदेवरूपिणः ॥३६॥ तदर्चापितृवत्कार्याशुश्रूषाजलपिण्डकम् ॥ मर्त्यलोकेचतेपुत्रास्तस्यजन्मनिजन्मनि ॥ ३७ ॥ सुरूपाः सुविनीताश्चसदापुण्यक्रियाःशुभाः॥एवंगणेशतांयान्तिजन्तवश्चूतलग्नकाः ॥ ३८ ॥ धात्रीहरीतकीचान्येकटुतिक्ताम्लसम्भवाः ॥सर्वेचारामतःशुद्धाः फलदाःशिवदाःसदा ॥३९॥ प्रासादायत्रसौवर्णाःसर्वरत्नविभूषिताः ॥सर्वाभरणसंयुक्ताविमानाश्चानिलोपमाः ॥४०॥ शातकुम्भमयावृक्षाःसदैवसर्वदायिनः ॥सर्वर्तुसुखदाःसौम्यकन्यकाअप्सरस्समाः ॥४१॥ गीतनृत्यपराधीरास्तत्रतिष्ठन्तिवृक्षदाः॥पुष्करिण्योविशेषेणखातान्यन्यानियानिच ॥४२॥ शुद्धोपलान्तररचितानद्यःपायसकर्दमाः ॥ पुनर्दुग्धसफेनाश्चअन्नादिषड्सान्विताः ॥ ४३ ॥ मर्त्यलोकेयथाभोग्यंपुनःस्वर्गेपुनर्भुवि ॥ पुनरेवतदभ्यासात्खातमारामकंपुनः ॥ ४४ ॥ यथापुण्यादिकंकृत्वास्वर्गमर्त्याधिपःपुमान् ॥ अशक्तस्तुप्रपांकृत्वापुष्करिण्याःफलंलभेत् ॥ ४५ ॥ प्रपायालक्षणंचात्रसर्वपापहरंपरम् ॥ सर्वभोगप्रदंशुद्धंस्वर्गापवर्गदंस्थिरम् ॥ ४६ ॥ लक्षणंचप्रवक्ष्यामिप्रपायाःकीर्तिवर्धनम् ॥ निर्जलेऽध्वनिपृक्तेच स्थानेकृत्वाचमण्डपम् ॥ ४७ ॥ बहुपान्थेसमायातेग्रीष्मवर्षाशरत्स्वपि ॥ अगरुकादिसौगन्ध्यंजलंपूगंसचन्द्रकम् ॥ ४८ ॥ आसनंचैवताम्बूलं दत्त्वास्वर्गान्नहीयते ॥ एवंवर्षत्रयेणैवपुष्करिण्याःफलंलभेत् ॥ ४९ ॥ स्वर्गाच्चैवाच्युतोमर्त्योदेवैरपिप्रपूज्यते ॥ मासमेकंतुयोदद्यात्प्रपांग्रीष्मेऽथ निर्जले ॥ ५० ॥ कल्पैकंतुवसेत्स्वर्गेस्वर्गाद्भ्रष्टोमहीयते ॥ प्रपादास्तत्रतिष्ठन्तियत्रपुष्करिणीप्रदाः ॥ ५१ ॥ नोचेद्धर्मघटोदेयःपुण्यःपापक्षयायच ॥ एषधर्मघटोज्ञेयोब्रह्मविष्णुशिवात्मकः ॥ ५२ ॥ तवप्रसादात्सफलाममसन्तुमनोरथाः ॥ स्वर्णमाषंचतुर्भागंदक्षिणार्थंघटस्यच ॥ ५३ ॥ एवंवर्षत्रयेणैवप्रपादानफलंलभेत् ॥ यःपठेच्छ्रावयेद्वापिपुष्करिण्यादिजंफलम् ॥ ५४ ॥ साक्षात्पापाद्भवेन्मुक्तस्तत्प्रसादात्तुसद्गतिः ॥ जनेषुश्रावयेद्यस्तुपुण्याख्यानमिदंशुभम् ॥ ५५ ॥ कल्पकोटिसहस्राणिसुरलोकेसतिष्ठति ॥ ५६ ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेपुष्करिण्यादिधर्मकीर्तनंनामषष्टितमोऽध्यायः ॥ ६० ॥ व्यासउवाच ॥ अतःपरंप्रवक्ष्यामिकीर्त्तिधर्मपरंशुभम् ॥ सेतुबन्धफलंपुण्यंब्रह्मणाभाषितंतथा ॥ १ ॥ कान्तारेदुस्तरेपङ्केपुरुशङ्कसमाकुलम् ॥ आलिंकृत्वाभवेत्पूतोदेवत्वंयातिमानवः ॥ २ ॥ वितस्तौतुलभेत्स्वर्गंदिव्यंवर्षशतंसमम्॥एवंसङ्ख्याविधाने ननरःस्वर्गान्नहीयते ॥ ३ ॥ कदाचित्पङ्क्योगाच्चस्वर्गाद्भुविविजायते ॥ तदाभट्टारकःश्रीमान्रोगशोकविवर्जितः ॥ ४ ॥ पङ्कादौसङ्क्रमांश्चैवकृत्वा स्वर्गान्नहीयते ॥ सर्वपापंक्षयंतस्यसम्प्रयातिदिनेदिने ॥ ५ ॥ तथालिसङ्क्रमाणांचफलंतुल्यंप्रकीर्तितम् ॥ धनप्राणाव्ययेनैवधीमताक्रियतेसदा ॥ ६ ॥ श्रूयतांयत्पुरावृत्तमाख्यानंवृद्धसम्मतम् ॥ कश्चिच्चोरोमहाभीष्मेस्तेयकर्मणिचोद्यतः ॥ ७ ॥ कान्तारेगोशिरःस्थाप्यकान्त्वास्तेयंगतो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह्यसौ ॥ धनापहरणंकृत्वागृहस्थस्यचतेनहि ॥ ८ ॥ गतःस्वमन्दिरंतत्रजनागच्छन्तिवर्त्मनि ॥ सर्वेषामेकपादस्यसुखंभवतिनिश्चितम् ॥ ९ ॥
एकपादेह्नदेदुर्गेतारकंगोशिरःपरम् ॥ चान्द्रायणंचतत्तस्यकान्तारेसंस्थितंशिरः ॥ १० ॥ ततश्चोरस्यनिधनेचित्रगुप्तप्रणीतके ॥ ११ ॥ चित्रगुप्त
उवाच ॥ धर्मस्यफलमात्रंतुएतस्यचनविद्यते ॥ नदैवंपैतृकंकार्यंतीर्थस्नानंद्विजार्चनम् ॥ १२ ॥ दानंगुरुजनेमानंज्ञानंपरहितंशुभम् ॥ मनसानकृतं
तेनक्रिययाचकथंपुनः ॥ १३ ॥ कृतंसाहसिकंस्तेयंपरदाराभिमर्शनम् ॥ भूतमिथ्यापवादंचसाधुनिन्दापरंतथा ॥ एवंशतसहस्रंतुतथागोहरणंकृतम्
॥ १४ ॥ व्यासउवाच ॥ तत्राहधर्मराजस्तुकालानलसमप्रभः ॥ १५ ॥ धर्मराजउवाच ॥ नयतैनंफलंशूरादुर्गतिंचापुनर्भवम् ॥ १६ ॥ व्यास
उवाच ॥एतस्मिन्नन्तरेऽवोचच्चित्रगुप्तोऽनुकम्पकः॥१७ ॥चित्रगुप्तउवाच ॥अस्त्यस्यगोशिरःपुण्यंकिंचिन्नाथक्षमाधुना ॥१८॥ अस्यपुनर्भवोनास्तिश
र्मचात्रलवंनहि ॥ चिन्तयित्वोच्यतांदेवतत्पापस्यक्षयायवै ॥ १९ ॥ व्यासउवाच ॥ नृपोद्वादशवार्षिक्यंलभेत्पुण्योदयंक्षितौ ॥ तथाहधर्म
राजस्तंगच्छमर्त्यंदुरात्मक ॥ २० ॥ अकण्टकंचराज्यंचभुङ्क्ष्वद्वादशवत्सरम् ॥ यद्धृतंगोशिरोमागमुक्तस्तस्यैवकारणात् ॥ २१ ॥ पुनरत्रसमाग
म्यसङ्गन्ताचापुनर्भवम् ॥ ततःकृताञ्जलिर्देवमुवाचदुःखपीडितः ॥ २२ ॥चोरउवाच ॥ धर्मराजानुकम्पांचमय्येवंपापकारिणि ॥ कुरुनाथत्वनाथे
चजानामिप्रीतिपूर्वकम् ॥ २३ ॥ व्यासउवाच ॥ धर्मराजस्तुतंचाहबाढमेवमितोव्रज ॥ स्मरिष्यसिस्ववृत्तान्तंमत्प्रसादात्सुदुःखितः ॥ २४ ॥ एत
स्मिन्नन्तरेचैवमोचितःकिङ्करेणहि॥ तस्यजन्माभवत्कौचदुर्विधेचातिवाणिके ॥ २५ ॥ आजन्मविविधंदुःखंभुक्तंपूर्वविकर्मतः ॥भुक्त्वाक्लेशंमहान्तं
चएकविंशतिहायनम् ॥ २६ ॥ तस्मिन्राष्ट्रेमृतोभूपःस्वकर्मपरिपीडितः ॥ एतस्मिन्नन्तरेऽमात्यैःसमालोक्यसुमन्त्रिभिः ॥ २७ ॥ अनेक
परिमर्शैस्तुपृथिव्यांभ्रमणंकृतम् ॥ तमावृण्वंश्वतेसद्यःसर्वेषांपुरतोदृढम् ॥ २८ ॥ ततोराज्याभिषेकश्चकृतस्तैस्तुविमत्सरैः ॥ सचराज्यंचसंश्रित्य
धर्मराजवरेणच ॥ २९ ॥ अकरोदालिकंकर्मशिलाबद्धंचमृन्मयम् ॥ सङ्क्रमंजलदुर्गेचतरणिंचतथापरे ॥ ३० ॥ वापीकूपतटाकानिप्रपाराममही
रुहम् ॥ कृतवान्विविधंयज्ञंदानपुण्यमतःपरम् ॥ ३१ ॥ स्मरंश्चपूर्वकर्म्माणिसर्वपापक्षयायवै ॥ कृतंबहुविधंधर्मंव्रतानिविविधानिच ॥ ३२ ॥
सुराणांब्राह्मणानांचगुरूणांचैवतर्पणात् ॥ पापात्पूतोययौगेहंधर्मराजस्यधीमतः ॥ ३३ ॥ सयानस्थंततोदृष्ट्वाक्रोधरक्तेक्षणोऽभवत् ॥ सचतं
प्राञ्जलिःप्राहभोधर्मकुरुतारणम् ॥ ३४ ॥ चित्रगुप्तोऽब्रवीद्वाक्यंधर्मराजसमीपतः ॥ ३५ ॥ चित्रगुप्तउवाच ॥ कर्मणामनसापूतोविष्णुलोकंसगच्छतु
॥ ३६ ॥ व्यासउवाच ॥ सतच्छुत्वापुनश्चाहतस्यविज्ञायकारणम् ॥ स्मितःप्रीत्याप्रसन्नात्मागच्छगच्छाच्युतालयम् ॥ ३७॥ विमानंसुरलोकाच्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वागतंवर्णकर्बुरम् ॥ समारुह्यगतःस्वर्गंपुनरावृत्तिदुर्लभम् ॥ ३८ ॥ तस्मात्किष्कुप्रमाणंहिदत्तंयेनालिकंपुरा ॥ सतुराज्यान्वयंस्वर्गंमहान्तंचानुगच्छति ॥ ३९ ॥ तथैवगोप्रचारंतुदत्त्वास्वर्गान्नहीयते ॥ यागतिर्गोप्रदस्यैवध्रुवंतस्यभविष्यति ॥ ४० ॥ व्यामैकंगोप्रचारंतुमुक्तंयनसुधीमता ॥ तस्यस्वर्गभवेदिष्टंकिमन्यैःपुरुभाषितैः ॥ ४१ ॥ गोप्रचारंयथाशक्तियोवैत्यजतिहेतुना ॥ दिनेदिनेब्रह्मभोज्यंपुण्यंतस्यशताधिकम् ॥ ४२ ॥ ॥ ४२ ॥ तस्माद्गवांप्रचारंतुमुक्त्वास्वर्गान्नहीयते ॥ यश्छिनत्तिद्रुमंपुण्यंगोप्रचारंछिनत्यपि ॥ ४३ ॥ तस्यैकविंशपुरुषाःपच्यन्तेरौरवेषुच ॥ गोचारघ्नंग्रामगोपःशक्तोज्ञात्वातुदण्डयेत् ॥ ४४ ॥ छेत्तारंधर्मवृक्षाणांविशेषाद्गोप्रचारवम् ॥ तस्यदण्डसुखंतस्यतस्मात्तंदण्डयेत्तुसः ॥ ४५ ॥ प्रासादंकुरुतेयस्तुविष्णुलिङ्गस्यमानवः ॥ त्रिकाण्डंपञ्चकाण्डंचसुशोभंसुघटान्वितम् ॥ ४६ ॥ इतोऽधिकंतुयोदद्यान्मृन्मयंवादृषन्मयम् ॥ वसुवृत्तिसुपूर्णंचसुरम्यंदिव्यभूतलम् ॥ ४७ ॥ प्रतिष्ठाकर्मसम्पन्नंकिङ्करादिभिरावृतम् ॥ सुलिङ्गमिष्टदेवस्यविष्णोरेवविशेषतः ॥ ४८ ॥ कृत्वाचविष्णुसायुज्यंसमाप्नोतिनरोत्तमः ॥ तथैवप्रतिमांकृत्वाहरेरन्यतरस्यच ॥ ४९ ॥ कृत्वादेवकुलंरम्यंयत्फलंलभतेनरः ॥ नतन्मखसहस्रैस्तुदानैर्भुविव्रतादिभिः ॥ ५० ॥ कल्पकोटिसहस्राणिकल्पकोटिशतानिच ॥ प्रासादेरत्नसंयुक्तेसम्पूर्णद्रव्यसङ्कुले ॥ ५१ ॥ सवसेत्कामगेयानेसर्वलोकमनोहरे ॥ स्वर्गाच्च्युतोभवेद्राजासार्वभौमोगुणैर्वशी ॥ ५२ ॥ शिवलिङ्गेतुप्रासादंकारयित्वास्वशक्तितः ॥ यदुक्तंविष्णुलिङ्गेतुतज्ज्ञेयंशिववेश्मनि ॥ ५३॥ भुङ्क्तेभोगंमहाभागोमनःशर्मकरंपरम् ॥ रामाभिरामसम्पूर्णंसर्वतःसुखदंदिवि ॥ ५४ ॥ उर्व्यामक्षयभोग्यानिनृपोवाथमहाधनी ॥ हरस्यप्रतिमांयश्चकृत्वादेवगृहेनरः ॥ ५५ ॥ सुलिङ्गांवासुरूपांवाकल्पकोटिंवसेद्दिवि ॥ स्वर्गाद्भ्रष्टोभवेद्राजाधनीपूज्यतमोऽपिवा ॥५६ ॥ देवीलिङ्गेषुसर्वेषुकृत्वादेवगृहंनरः ॥ सुरत्वंप्राप्नुयाल्लोकेदेव्यास्सर्वसुखोद्भवे॥ ५७ ॥ भृशमच्युततामेतिसुखमेतिनिरामयम् ॥रत्नसंसृष्टप्रासादेमणिकर्बुरभूतले ॥५८॥ रामायुतप्रसम्भोग्येदेवीसंसृष्टनिर्भये॥नृत्यगीतपरेरम्येसर्वेन्द्रियमनोरमे ॥५९॥ रत्नमर्दलतालाढयेसर्वदास्त्रीजनेरिते ॥ निर्मलेसुखदेरम्येरत्नानांसुशुभेगृहे ॥ ६० ॥ तथैवप्रतिमायाश्चदेव्याःप्रासादमुत्तमम् ॥ नियुतंकल्पकोटीनांस्वर्लोकमेतिमानवः ॥ ६१ ॥ स्वर्गाद्भ्रष्टोभवेद्भूपोदेवीभक्तिपरायणः ॥ एवंचजन्मसाहस्रंस्मरएवभवेद्भुवि ॥ ६२ ॥ प्रासादंगाणपत्यंचदेव्यावाप्रीतिमान्नरः ॥ कृत्वासुरगणानांचपूजितोदिविजायते ॥ ६३ ॥ तथैवराजतामेतिभोग्यान्देवीपुरेतथा ॥ अविघ्नंसर्वकार्येषुसदैवगणपोयथा ॥ ६४ ॥ आज्ञानस्खलितातस्यसुरासुरनरेषुच ॥ तथैवसौरप्रासादेफलमेतिनरोत्तमः ॥ ६५ ॥ अरोगीसुप्रसन्नात्माकामदेवसमप्रभः ॥ वरदःसर्वलोकेषुयथाब्रध्नस्तथाहिसः ॥ ६६ ॥ सूरस्यप्रतिमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यांचगृहंकृत्वाशिलामयम् ॥ कल्पकोटिशतंभुक्त्वास्वर्गमुर्वीश्वरोभवेत् ॥ ६७ ॥ विष्ण्वादिसर्वदेवानामर्चनंयत्पृथक्पृथक् ॥ प्रत्येकंसम्प्रवक्ष्यामिन राणांहितहेतवे ॥ ६८ ॥ घृतप्रदीपंयोदद्यान्मासमेकमहर्निशम् ॥ दिव्यंवर्षायुतंस्वर्गेपूजितोदेवसत्तमैः ॥ ६९ ॥ घृतस्नानंतथालिङ्गेयःकुर्याद्भुविमा नवः ॥ कल्पकोटिसहस्राणिमासैकेलभतेनरः ॥७० ॥तिलतैलप्रदीपस्यतथान्यस्यार्द्धकंफलम् ॥ मासैकंजलदानस्यफलेनेश्वरतांव्रजेत् ॥७१॥ धूपदा नेनगन्धर्वंचन्दनेद्विगुणंभवेत् ॥ मृगमदागरुसत्त्वस्यदानेबहुफलंभवेत् ॥७२॥ मालापुष्पप्रदानेननरःस्यात्त्रिदशेश्वरः ॥शीतेतूलपटींदत्त्वासर्वदुःखा त्प्रमुच्यते ॥ ७३ ॥ जन्मजन्मसुलभ्येतउष्णेचशीतलांपटीम् ॥ दत्त्वाचनैवसींदेतशक्त्यावस्त्रंददातियः ॥ ७४ ॥ चतुर्हस्तप्रमाणंचवर्ष्मवेधंसुशोभन म् ॥ पिधानंचरणानांचदत्त्वास्वर्गान्नहीयते॥ ७५ ॥ शक्त्यास्वर्णप्रदानेनस्वर्गेपूज्योभवेन्नरः ॥ दशयोजनविस्तीर्णेमण्डपेरूपभाग्भवेत् ॥७६॥ सुव र्णरत्नसंयुक्तंदत्त्वादशगुणंलभेत् ॥ वज्रवैडूर्यगारुत्ममाणिक्यादीननर्घतः ॥ ७७ ॥ दत्त्वालिङ्गेविधानाच्चब्राह्मणेवायशस्विनि ॥ शतयोजनविस्तीर्ण मण्डलेऽधिपतिर्भवेत् ॥ ७८ ॥ तथैवभुविजातोऽपिसर्वलोकप्ररञ्जनः ॥ सुरभिद्रव्यदानेनवावदूकश्चसुन्दरः ॥ ७९ ॥ रक्तामृतसुकण्ठश्चपूगदानान्नरो भवेत्॥वरदासीप्रदानेननरःकल्पंवसेद्दिवि॥८०॥वरदासीप्रदानेनउर्व्यांजातोधनेश्वरः ॥तथैवभृत्यदानेनबहुभृत्योभवेद्दिवि॥८१॥धरायामक्षयाऋद्धि र्जन्मजन्मसुजायते ॥ सर्वतूर्यप्रदानेनगुणवाँह्लोकसम्मतः ॥ ८२ ॥ नृत्यगीतादिशास्त्रेणगन्धर्वाणांपतिर्भवेत् ॥ दासीदासयुतःस्वर्गेधनैःस्त्रीभिर्वरैर्यु तः ॥ ८३ ॥ तथैवगोप्रदानेनतावत्कालंवसेद्दिवि ॥ लिङ्गेदुग्धप्रदानाच्चनरःकल्पंवसेद्दिवि ॥ ८४ ॥ दध्नास्नानेनद्विगुणंघृतेनतुशताधिकम् ॥ अन्नंषड्र ससंयुक्तंदत्त्वाक्षितिपतिर्भवेत् ॥ ८५ ॥ तथैवपायसंदत्त्वामुनीनांप्रवरोभुवि ॥ हविष्यान्नंमुदादत्त्वावेदशास्त्रार्थपारगः ॥ ८६ ॥ निरामिषप्रदानाच्चब्र ह्मचारीव्रतीभवेत् ॥मधुदानाच्चसौभाग्यंगुडेनलवणेनच॥ ८७ ॥ शर्करादिभिर्लावण्यंसर्वलोकेषुगीयते ॥ देवानांशम्भुलिङ्गानामर्चांकृत्वाविधानतः ॥ ॥ ८८ ॥ अनुक्रमेणस्वर्गादौलोकानांसपतिर्भवेत् ॥ लोकानांचहितार्थायदेवास्तिष्ठन्तिसम्मुखाः ॥ ८९ ॥ सकृत्प्रदक्षिणंकृत्वाशम्भुलिङ्गेषुपण्डि तः॥ दिव्यंवर्षशतंपूर्णंस्वर्गमेतिनरोत्तमः॥९० ॥ एवमेवक्रमेणैवनमस्कारैःस्वयम्भुवः ॥ लोकवन्द्योव्रजेत्स्वर्गंतस्मान्नित्यंसमाचरेत् ॥ ९१ ॥ लिङ्ग रूपस्यदेवस्ययोधनंहरतेनरः ॥ सचरौरवमासाद्यहरणात्कीटतांव्रजेत् ॥ ९२ ॥ दातुःपूजांचलिङ्गार्थेहरेश्चाप्याददातियः ॥ कुलकोटिसहस्रेणन रकान्ननिवर्तते ॥ ९३ ॥ जलपुष्पादिदीपार्थेवसुचान्यद्गृहीतवान् ॥ पश्चान्नदीयतलोभादक्षयंनरकंव्रजेत् ॥ ९४ ॥ दासींहृत्वातुलिङ्गस्यनर कान्ननिवर्तते ॥ कामार्तोमातरंगच्छेन्नगच्छेच्छिवचेटिकाम् ॥९५॥ शिवदासींततोगत्वाशिवस्वहरणेतथा ॥ भक्षणादन्नपानानांनरोदुर्गतिमाप्नुयात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ९६ ॥ अतोदेवलविप्रोयोनरकान्ननिवर्तते ॥ तस्माद्वेश्याजनानांचदौष्टयमेवहितंभवेत् ॥ ९७ ॥ अतस्तुगणिकांस्पृष्ट्वानरःस्नानाद्विशुध्य
ति ॥ मलिनांदुर्गतिंयातिबहुपूरुषसंश्रयात् ॥ ९८ ॥ वेश्यातपस्विनीयाचदेवार्चनरतासदा ॥ पतिव्रतपराशुद्धास्वर्गंचाक्षयमश्नुते ॥ ९९ ॥
गणिकांमातृवद्यस्तुसदासन्नांप्रपश्यति ॥ देववत्सुरलोकेषुनिखिलंभोगमश्नुते ॥ १०० ॥ सुरासुरनराणांचवन्दनीयोयथाहरिः ॥ तथार्होऽयंसर्व
लोकेसर्वभूतैकपावनः ॥ १ ॥ देवदासःसदायस्तुदेवकृत्येषुलोलुपः ॥ सचगच्छतिलोकेशोदेवलोकेमहीयते ॥ २ ॥ एतेषामेवलिङ्गानिकार
यित्वाचमण्डपम् ॥ शक्त्यायंलभतेनाकंकालस्यनिश्चयंशृणु ॥ ३ ॥ हायनैकंतृणेनैवशरकाण्डेनतच्छतम् ॥ अयुतंत्वन्यकाष्ठेनलक्षं
खादिरदारुणा ॥ ४ ॥ कोटिकोटिचपाषाणैःसुदृढैर्यत्नसंयुतैः ॥ तस्मात्सर्वप्रयत्नेनमण्डपंकारयेद्बुधः ॥ ५ ॥ यावत्कालंव
सेत्स्वर्गेनरोमण्डपकारकः ॥ तावत्कालंचहरणेनरोदुर्गतिमाप्नुयात् ॥ ६ ॥ जनानांनिचयेरम्येवस्तूनांक्रयविक्रये ॥ आश्रयेचाध्वगा
नांचनदीनदसमागमे ॥ ७ ॥ देवानांमण्डपंकृत्वायत्फलंलभतेनरः ॥ तत्फलंसमवाप्नोतिद्विगुणंविप्रमन्दिरे ॥ ८ ॥ अनाथस्य
चदीनस्यश्रोत्रियस्यविशेषतः ॥ कारयित्वागृहंरम्यंनरःस्वर्गान्नहीयते ॥ ९ ॥ यइदंशृणुयान्नित्यंपुण्याख्यानमनुत्तमम् ॥ अक्ष
यंलभतेस्वर्गंप्रासादादेःफलंलभेत् ॥ ११० ॥ धनिनांचेश्वराणांचतथापुण्यवतांपुनः ॥ पाठयित्वापठित्वातुनरःस्वर्गान्नहीयते॥११॥देवानांदासदा
सीनांसदादेवालयेषुच ॥ पठेद्यस्तुसदाविप्रोमोक्षमार्गंसगच्छति ॥१२॥ नृपाणामीश्वराणांचधनिनांगुणिनांपुरः ॥ पठित्वामोक्षमाप्नोतिश्रवणात्तत्फ
लंलभेत् ॥ १३ ॥ द्विजाऊचुः ॥ सामान्येकःपरःपुण्योमर्त्यलोकेद्विजोत्तम ॥ सुलभोमर्त्यपूज्यस्तुमुनीनांचतपस्विनाम् ॥ १४ ॥ चातु
र्वर्ण्याश्रमाणांचपापपुण्यवतांनृणाम् ॥ गुणागुणवतांचैववर्णावर्णवतांतथा ॥ १५ ॥ व्यासउवाच ॥ सर्वेषामेवभूतानांरुद्राक्षेणयुतोवरः ॥ दर्शनाद्य
स्यलोकानांपापराशिःप्रलीयते ॥ १६ ॥ स्पर्शनाद्दिवमश्नातिधारणाद्रुद्रतांव्रजेत् ॥ शिरस्युरसिबाहौचरुद्राक्षंधारयेत्तुयः ॥ १७ ॥ सचेशानस
मोलोकेमखेसर्वत्रगोचरः ॥ यत्रतिष्ठत्यसौविप्रस्सदेशःपुण्यवान्भवेत् ॥ १८ ॥ तंदृष्ट्वाप्यथवास्पृष्ट्वानरःपूयेतकल्मषात् ॥ यज्जप्यंतर्पणंदानंस्नान
मर्चाप्रदक्षिणम् ॥ १९ ॥ यत्किञ्चित्कुरुतेपुण्यंनिखिलंतदनन्तकम् ॥ तीर्थानांचमहत्तीर्थंरुद्राक्षस्यफलंद्विजाः ॥ १२० ॥ अस्यैवधारणाद्देही
पापात्पूतोऽतिपुण्यभाक् ॥ गृहीत्वाचाक्षमालांचब्रह्मग्रन्थियुतांशिवाम् ॥ २१ ॥ यज्जप्तंचकृतंदानंस्तोत्रमन्त्रंसुरार्चनम् ॥ सर्वंचाक्षयतामेतिपा
पंचक्षयमाव्रजेत् ॥ २२ ॥ मालायालक्षणंब्रूमःश्रूयतांद्विजसत्तमाः ॥ तस्यास्तुलक्षणंज्ञात्वाशैवमार्गंप्रलप्स्यथ ॥ २३ ॥ निर्योनिकीटविद्धंचभग्न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लिङ्गंयथाक्रमम् ॥ अन्योन्यंबीजलग्नंचमालायांपरिवर्जयेत् ॥ २४ ॥ स्वयंचग्रथितायाचश्लथान्योन्यप्रसज्जिता ॥ शूद्रादिग्रथिताऽशुद्धादूराच्चां
परिवर्जयेत् ॥ २५ ॥ मध्यमालग्नकंबीजंजप्तव्यंचयथाक्रमम् ॥ हस्तसम्भ्रमणेनैवमेर्वामर्शंपुनःपुनः ॥ २६ ॥ सङ्ख्यातंयज्जपेन्मन्त्रमसङ्ख्यातंचनि
ष्फलम् ॥ सर्वेषामेवदेवानांजपेन्मन्त्रंस्वमालया ॥ २७ ॥ प्रयतःसकलेतीर्थेकोटिकोटिगुणंभवेत् ॥ शुद्धायामेवभूम्यांतुमेध्यकेवृक्षमूलके ॥ २८ ॥
गोष्ठेचतुष्पथागारेविष्णोर्मन्त्रंशिवस्यच ॥ गणपतेश्चसूरस्यलिङ्गेऽनन्तफलंलभेत् ॥ २९ ॥ शून्यागारेशवस्याग्रेश्मशानेचचतुष्पथे ॥ देवीमन्त्रं
जपेद्यस्तुसद्यस्सिद्ध्यतिसाधकः ॥ १३० ॥ यावच्चावैदिकंमन्त्रंपौराणंचागमोद्भवम् ॥ सर्वंरुद्राक्षमालायामीप्सितार्थप्रदायकम् ॥ ३१ ॥ रुद्राक्ष
स्रवजंशुद्धंजलंशिरसिधारयेत् ॥ सर्वस्मात्कल्मषात्पूतःपुण्यंभवतिचाक्षयम् ॥ ३२ ॥ रुद्राक्षस्यचप्रत्येकंबीजंप्रत्येकनिर्जरम् ॥ धारयेद्यस्तनौ
मर्त्यःसुराणांसत्तमोभवेत् ॥ ३३ ॥ द्विजाऊचुः ॥ रुद्राक्षस्तुकुतोजातःकुतोवामेध्यतांगतः ॥ किमर्थंस्थावरोभूमौकेनैवचप्रचारितः ॥ ३४ ॥
व्यासउवाच ॥ पुराकृतयुगेविप्रास्त्रिपुरोनामदानवः ॥ सुराणांचवधंकृत्वाअन्तरिक्षपुरेहिसः ॥ ३५ ॥ प्रणाशेसर्वलोकानांस्थिरोब्रह्मवरेण
च ॥ शुश्रावशङ्करोभीमंदेवैरीशोनिवेदितम् ॥ ३६ ॥ ततोऽजगवमासज्यबाणमन्तकसन्निभम् ॥ धृत्वातंचजघानाथदृष्ट्वदिव्येनचक्षुषा ॥३७॥
सपपातमहीपृष्ठेमहोल्केवच्युतोदिवः ॥ घटनव्याकुलाद्रुद्रात्पतिताःस्वेदबिन्दवः ॥ ३८ ॥ तत्राश्रुबिन्दुतोजातोमहारुद्राक्षकःक्षितौ ॥ अस्यैव
चफलंजीवानजानन्त्यतिगुह्यतः ॥ ३९ ॥ ततःकैलासशिखरेदेवदेवंमहेश्वरम् ॥ प्रणम्यशिरसाभूमौस्कन्दोवचनमब्रवीत् ॥ १४० ॥ स्कन्दउवाच ॥
रुद्राक्षस्यफलंनाथज्ञातुमिच्छामितत्त्वतः ॥जप्येऽथधारणेचैवदर्शनेस्पर्शनेऽपिवा ॥४१॥ ईश्वरउवाच॥लक्षंतुदर्शनात्पुण्यंकोटिर्वैस्पर्शनेनच ॥ दश
कोटिफलंपुण्यंधारणाल्लभतेनरः ॥ ४२ ॥ लक्षकोटिसहस्राणिलक्षकोटिशतानिच ॥ जप्त्वास्यलभतेपुण्यंनात्रकार्याविचारणा ॥ ४३ ॥ उच्छि
ष्टोवाविकर्मस्थोयुक्तोवासर्वपातकैः ॥ मुच्यतेसर्वपापेभ्योरुद्राक्षधारणेनवै ॥ ४४ ॥ कण्ठेरुद्राक्षमादायश्वापदोम्रियतेयदि ॥ सोऽपिरुद्रत्वमाप्नो
तिकिंपुनर्मानुषादयः ॥ ४५ ॥ ध्यानधारणहीनोऽपिरुद्राक्षंयदिधारयेत् ॥ सर्वपापविनिर्मुक्तःसयातिपरमांगतिम् ॥ ४६ ॥ कार्तिकेयउवाच ॥
एकवक्त्रंद्वित्रिचतुःपञ्चषड्वक्त्रमेवच ॥ सप्ताष्टनववक्त्रंचदशैकादशवक्त्रकम् ॥ ४७ ॥ रुद्राक्षंद्वादशास्यंचत्रयोदशमुखंतथा ॥ चतुर्दशास्यसंयुक्तंस्वय
मुक्तंचशङ्करम् ॥ ४८ ॥ तेषांचतन्मुखानांचदेवताःकाश्चतद्वद ॥ गुणोवाकीदृशस्तेषांदोषोवाजगदीश्वर ॥ ४९ ॥ यदिमेऽनुग्रहोवास्तिकथयस्वय
थार्थतः ॥ १५० ॥ ईश्वरउवाच ॥ एकवक्त्रःशिवःसाक्षाद्ब्रह्महत्यांव्यपोहति ॥ तस्मात्तुधारयेद्देहेसर्वपापक्षयायच ॥ ५१ ॥ शिवलोकं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सगच्छेच्चशिवेनसहमोदते ॥ महतापुण्ययोगेनहरानुग्रहकारणात् ॥ ५२ ॥ एकवक्त्रलभन्मत्यःकैलासचपडानन ॥ देवदेवोद्विवक्त्रंचयस्तुधा
रयतेनरः ॥ ५३ ॥ सर्वपापंक्षयंयातियद्ब्रह्मगोवधादिकम् ॥ स्वर्गंचाक्षयमाप्नोतिद्विवक्त्रधारणात्ततः ॥ ५४ ॥ त्रिवक्त्रमनलभस
क्षाद्यस्यदेहेप्रतिष्ठति ॥ तस्यजन्मार्जितंपापंदहत्यग्निरिवेन्धनम् ॥ ५५ ॥ स्त्रीहत्याब्रह्महत्याभ्यांबहूनांचैवहत्यया ॥ यत्पापंस्ला
तेमर्त्यःसर्वंनश्यतितत्क्षणात् ॥ ५६ ॥ यत्फलंवह्निपूजायामग्निकार्येघृताहुतौ ॥ तत्फलंलभतेधीरःस्वर्गंचानन्तमश्नुते ॥ ५७ ॥
त्रिवक्त्रंधारयेद्यस्तुसचब्रह्मसमोभुवि ॥ निचितंदुष्कृतंसर्वंदहेज्जन्मनिजन्मनि ॥ ५८ ॥ नचोदरेभवेद्रोगोनचैवापटुतांव्रजेत् ॥ पराजयंन
लभतेनाग्निनादह्यतेगृहम् ॥ ५९ ॥ एतान्यन्यानिसर्वाणिवज्रादेश्वनिवारणम् ॥ नाशुभंविद्यतेकिञ्चित्त्रिवक्त्रस्यतुधारणात् ॥ १६० ॥
चतुर्वक्त्रःस्वयंब्रह्मायस्यदेहेप्रतिष्ठति ॥ सभवेत्सर्वशास्त्रज्ञोद्विजोवेदविदांवरः ॥ ६१ ॥ सर्वधर्मार्थतत्त्वज्ञःस्मार्तःपौराणिकोभवेत् ॥
यत्पापंनरहत्यायांबहुसत्त्वेषुवेश्मसु ॥ ६२ ॥ तत्सर्वंदहतेशीघ्रंचतुर्वक्त्रस्यधारणात् ॥ महेशस्तुष्यतेनित्यंभूतानामधिपोभवेत् ॥ ६३ ॥
सद्योजातस्तथेशानस्तत्पुरुषोऽघोरएवच ॥ वामदेवइमेदेवावक्त्रैःपञ्चभिराश्रिताः ॥ ६४ ॥ अतःसर्वत्रभूयिष्ठाःपञ्चवक्त्राधरातले ॥
रुद्रस्यात्मजरूपोऽयंतस्मात्तंधारयेद्बुधः ॥ ६५ ॥ कल्पकोटिसहस्राणिकल्पकोटिशतानिच ॥ तावत्कालंशिवस्याग्रेपूजनीयःसुरासुरैः ॥
॥ ६६ ॥ सार्वभौमोभवेद्भूमौशर्वतेजाःशिवालये ॥ तस्मात्सर्वप्रयत्नेनपञ्चवक्त्रंतुधारयेत् ॥ ६७ ॥ षड्वक्त्रंकार्तिकेयन्तुधारय
न्दक्षिणेभुजे ॥ ब्रह्महत्यादिभिःपापैर्मुच्यतेनात्रसंशयः ॥ ६८ ॥ स्कन्दस्यसदृशःशूरःकल्पान्तेसमुपस्थिते ॥ नात्रपराजयंचैतिगुणानामाक
रोभुवि ॥ ६९ ॥ कुमारत्वमवाप्नोतियथागौरीशनन्दनः ॥ ब्राह्मणोभूपपूज्यश्चक्षत्रियोलभतेजयम् ॥ १७० ॥ वैश्याःशूद्रादयोवर्णाःसदैश्वर्यप्रपूरि
ताः ॥ तस्यैववरदागौरीमातेवसुलभाभवेत् ॥ ७१ ॥ ततोभुजबलादेवविश्वतेजाभवेन्नरः ॥ वाग्मीधीरस्सभायांचनृपवेश्मनिसंसदि ॥ ७२ ॥ नच
कातरतामेतिनैवभङ्गोभवेद्ध्रुवम् ॥ एतान्यन्यानिसर्वाणिषड्वक्त्रस्यैवधारणात् ॥ ७३ ॥ सप्तवक्त्रोमहासेनस्त्वनन्तोनामनागराट् ॥ अस्यप्रत्ये
कवक्त्रेतुप्रतिनागाव्यवस्थिताः ॥ ७४ ॥ अनन्तःकर्कटश्चैवपुण्डरीकोऽथतक्षकः ॥ विषोल्बणश्चकारीषःशङ्खचूडश्चसप्तमः ॥ ७५ ॥ एतेनागामहा
वीर्याःसप्तवक्त्रेव्यवस्थिताः ॥ अस्यधारणमात्रेतुविषंनक्रमतेतनौ॥७६॥ हरश्चपरमप्रीतोभवेन्नागेश्वरेयथा॥प्रीत्यास्यसर्वपापानिक्षयंयान्तिदिनेदिने
॥ ७७ ॥ ब्रह्महत्यासुरापानंस्तेयादिगुरुतल्पजम् ॥ यत्पापंलभतेमर्त्यःसर्वंनश्यतितत्क्षणात् ॥ ७८ ॥ देवस्यसदृशंभोग्यंत्रैलोक्येनिश्चितंलभेत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अष्टवक्रोमहासेनःसाक्षाद्देवोविनायकः ॥ ७९ ॥ अस्यैवधारणादेवयत्पुण्यंतच्छृणुष्वमे ॥ जन्मजन्मनमूर्खःस्यान्नातुरोनचनष्टधीः ॥ १८० ॥
अविघ्नंसर्वकार्येषुतस्यैवसततंभवेत् ॥ नैपुण्यंलिपिकार्येषुमहाकार्येषुकौशलम् ॥ ८१ ॥ सर्वारम्भादिकार्येषुक्षमंतस्यदिनेदिने ॥ अर्धकूटंतुलाकू
टंसर्वकूटंतथैवच ॥ ८२ ॥ शिश्नोदरकरेणैवसंस्पृशेद्वागुरुस्त्रियम् ॥ एवमादीनिसर्वाणिहन्तिपापानिसर्वथा ॥ ८३ ॥ अक्षयंत्रिदिवंभुक्त्वामुक्तोया
तिपरांगतिम् ॥ गुणान्येतानिसर्वाणिअष्टवक्त्रस्यधारणात् ॥ ८४ ॥ नवास्यंभैरवंप्रोक्तंधारयेद्यस्तुबाहुतः ॥ कपिलंमुक्तिदंधृत्वामम्तुल्यबलोभ
वेत् ॥ ८५ ॥ लक्षकोटिसहस्राणिब्रह्महत्याःकरोतियः ॥ ताःसर्वादहतेशीघ्रंनववक्रस्यधारणात् ॥ ८६ ॥ सुरलोकेसदादेवैःपूजितोमघवायथा ॥
हरवद्धरवेश्मस्थोगणेशोनात्रसंशयः ॥ ८७ ॥ पन्नगाश्चविनश्यन्तिदशवक्रस्यधारणात् ॥ वक्रैश्चैकादशेवत्सरुद्राश्चैकादशस्मृताः ॥ ८८ ॥
शिखायांधारयेन्नित्यंतस्यपुण्यफलंशृणु ॥ अश्वमेधसहस्राणियज्ञकोटिशतानिच ॥ ८९ ॥ गवांशतसहस्रस्यसम्यग्दत्तस्ययत्फलम् ॥ तत्फलंशीघ्र
माप्नोतिवक्रैकादशधारणात् ॥ १९० ॥हरस्यसदृशोलोकेपुनर्जन्मनविद्यते ॥ रुद्राक्षंद्वादशास्यंयःकण्ठदेशेतुधारयेत् ॥ ९१ ॥ आदित्यस्तुष्यतेनि
त्यंद्वादशास्येव्यवस्थितः ॥ गोमेधंनरमेधंचकृत्वायत्फलमश्नुते ॥ ९२ ॥ तत्फलंशीघ्रमाप्नोतिवज्रादेश्चनिवारणम् ॥ नैववह्नेर्भयंचैवनचव्याधिः
प्रवर्तते ॥ ९३ ॥ अर्थलाभंसुखंभुङ्क्तेईश्वरोनदरिद्रता ॥ हस्त्यश्वनरमार्जारमूषकाञ्छशकांस्तथा ॥ ९४ ॥ व्यालदंष्ट्रिशृगालादीन्हत्वाव्यापातयत्य
पि ॥ मुच्यतेनात्रसन्देहोवक्त्रद्वादशधारणात् ॥९५॥ वक्त्रत्रयोदशोरुद्रोरुद्राक्षःप्राप्यतेयदि ॥ शन्तमःसतुविज्ञेयःसर्वकामफलप्रदः ॥९६॥ सुधारसा
यनंचैवधातुवादश्चपादुका ॥ सिध्यन्तितस्यवैसर्वेभाग्ययुक्तस्यषण्मुख ॥ ९७ ॥ मातृपितृस्वसृभ्रातृगुरून्वाथनिहत्यच ॥ मुच्यतेसर्वपापेभ्यस्त्रयोद
शास्यधारणात् ॥ ९८ ॥ अक्षयंलभतेस्वर्गंयथादेवोमहेश्वरः ॥ चतुर्दशमुखंवत्सरुद्राक्षंयदिधारयेत् ॥ ९९ ॥ सततंमूर्ध्निबाहौवाशक्तिपिण्डंशिव
स्यच ॥किंपुनर्बहुनोक्तेनवर्णितेनपुनःपुनः ॥ पूज्यतेसततंदेवैःप्राप्यतेपुण्यगौरवात् ॥२००॥ कार्तिकेयउवाच ॥ भगवञ्छ्रोतुमिच्छामिवक्रेवक्रेयथा
विधि ॥ न्यसनंकेनमन्त्रेणधारणंवाकथंवद ॥ १ ॥ ईश्वरउवाच ॥ शृणुषण्मुखतत्त्वेनवक्रेवक्रेयथाविधि ॥ अमन्त्रोच्चारणादेवगुणाह्येतेप्रकीर्तिताः
॥ २ ॥ यःपुनर्मन्त्रसंयुक्तंधारयेद्भुविमानवः ॥गुणास्तस्यमहत्त्वंचकथितुंनैवशक्यते ॥३॥ इदानींमन्त्राआदिश्यन्ते ॥ ॐ रुद्रएकवक्रस्य॥ॐ खंद्वि ॥ १९० ॥
वक्रस्य॥ॐवुंत्रिवक्रस्य॥ॐह्रींचतुर्वक्रस्य॥ॐह्रांपञ्चवक्रस्य॥ ॐहूंषड्वक्रस्य॥ॐह्रःसप्तवक्रस्य॥ॐकंअष्टवक्रस्य॥ॐजूंनववक्रस्य॥ॐक्षंदशवक्रस्य॥ॐश्रीं
एकादशवक्रस्य॥ॐह्रींद्वादशवक्रस्य॥ॐक्षौंत्रयोदशवक्रस्य॥ॐत्रांचतुर्दशक्रस्य॥एवंमन्त्रायथाक्रमंन्यस्तव्याः ॥ शिरस्युरसिमालांचगृहीत्वायोव्रजेन्न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रः॥पदेपदेऽश्वमेधस्यफलमाप्नोतिनान्यथा॥४॥सर्वेषामपिवक्राणांधारणेमत्समोभवेत् ॥तस्मात्सर्वप्रयत्नेनरुद्राक्षंपुत्रधारय॥५॥ धारयित्वातुरुद्राक्षं
म्रियतेयःक्षितौनरः ॥ सयातिमत्पुरंरम्यंसर्वदेवैःप्रपूजितः ॥ ६ ॥ मरुदेशेपुरावत्सवाणिज्यायकिलस्थले ॥ गच्छन्वणिक्सुतस्तातततरौप्रेताप्रपी
डितः ॥ ७ ॥ नरीनर्तिततःप्रेताद्विजेनपरमैक्षिच ॥ ८ ॥ द्विजउवाच॥कात्वंनृत्यसिदीनासिसंवृताजीर्णवाससा ॥९॥ ईश्वरउवाच ॥ अथसाचद्विजं
प्राहदेवदूतान्मयाश्रुतम् ॥ अस्यचारुनरस्यैववज्रपातेनसाम्प्रतम् ॥ २१०॥निश्चितंनिधनंविप्रमद्भर्त्तातुभविष्यति॥एतस्मिन्नन्तरेनाकाद्वज्रंतस्यशिरो
परि ॥ ११ ॥ अपतत्सपपातोर्व्यांरुद्राक्षस्यार्धखण्डके ॥ ततोममपुरात्पुत्रविमानंचापतद्भुतम् ॥ १२ ॥ समारुह्यततःश्रीमांस्तत्रतिष्ठतिस
श्चिरम् ॥ ममांशकंसमासाद्यईश्वरःकौधनीभवेत् ॥ १३ ॥ एवंरुद्राक्षखण्डेचमृतस्यसुगतिःसुत ॥ ज्ञानेनधारिणःपुंसःफलंवक्तुंनशक्नुमः ॥ १४ ॥
सशैवोवाभवेच्छाक्तोगाणपत्योऽथसौरकः ॥ योदधातिमृतोमालामेकंरुद्राक्षकंतुवा ॥ १५ ॥ यःपठेत्पाठयेद्वापिश्रावयेच्छृणुतेऽपिवा ॥
सर्वपापात्प्रमुक्तात्मासुखंस्वर्गंलभेत्क्रमात् ॥ २१६ ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेरुद्राक्षमाहात्म्यंनामैकषष्टितमोऽध्यायः ॥ ६१ ॥
स्कन्दउवाच ॥ अपरस्यापिपृच्छामिफलस्यपूतताांतरोः ॥ सर्वलोकहितार्थायवदनोजगदीश्वर ॥ १ ॥ ईश्वरउवाच ॥ धात्रीफलंपरं
पूतंसर्वलोकेषुविश्रुतम् ॥ यस्यरोपान्नरोनारीमुच्यतेजन्मबन्धनात् ॥ २ ॥ पावनंवासुदेवस्यफलंप्रीतिकरंशुभम् ॥ अस्यभक्षणमात्रेणमुच्यते
सर्वकल्मषात् ॥ ३ ॥ भक्षणेचभवेदायुःपानेवैधर्मसञ्चयः ॥ अलक्ष्मीनाशनंस्नानेसर्वैश्वर्यमवाप्नुयात् ॥४॥ यस्मिन्गृहेमहासेनधात्रीतिष्ठतिसर्वदा ॥
तस्मिन्गृहेनगच्छन्तिप्रेतादैतेयराक्षसाः ॥ ५ ॥ नगङ्गानगयाचैवनकाशीनचपुष्करम् ॥ एकैवहिनृणांधात्रीसम्प्राप्तेहरिवासरे ॥६॥ एकादश्यांपक्षयुगे
धात्रीस्नानंकरोतियः ॥ सर्वपापंक्षयंयातिविष्णुलोकेमहीयते ॥ ७ ॥ धात्रीफलंसदासेव्यंभक्षणेस्नानएवच ॥ नियतंपारणेविष्णोःस्नानमात्रेहरेर्दिने
॥८॥संयतेपारणेचैवाधात्र्येकस्पर्शनेनरः॥मुक्तातुलङ्घयेद्यस्तुएकादश्यांसितासिते॥९॥एकेनैवोपवासेनकृतेनतुषडानन ॥सप्तजन्मकृतात्पापान्मुच्यते
नात्रसंशयः॥१०॥अक्षयंलभतेस्वर्गंविष्णुसायुज्यमाप्नजेत्॥ तस्मात्सर्वप्रयत्नेनधात्रीव्रतंसमाचर॥११॥धात्रीद्रवेणसततंयस्यकेशाःसुरञ्जिताः॥नपिबे
त्सपुनर्मातुःस्तनंकश्चित्षडानन ॥ १२ ॥ धात्रीदर्शनसंस्पर्शान्नाम्नउच्चारणेऽपिवा ॥ वरदःसम्मुखोविष्णुःसन्तुष्टोभवतिप्रियः ॥ १३ ॥ धात्री
फलंचयत्रास्तेतत्रतिष्ठतिकेशवः ॥ तत्रब्रह्मास्थिरापद्मातस्मात्तांतुगृहेन्यसेत् ॥ १४ ॥ अलक्ष्मीर्नश्यतेतत्रयत्रधात्रीप्रतिष्ठति ॥ सन्तुष्टास्सर्वदेवा
श्चनत्यजन्तिक्षणंमुदा ॥ १५ ॥ धात्रीफलेननैवेद्यंयोददातिमहाधनम् ॥ तस्यतुष्टोभवेद्विष्णुर्नान्यैःक्रतुशतैरपि ॥ १६ ॥ स्नात्वाधात्रीद्रवेणैव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूजयेद्यस्तुमाधवम् ॥ सोऽभीष्टफलमाप्नोतियद्यामनसिवर्त्तते ॥ १७ ॥ तथैवलक्षणंस्मृत्वापूजयित्वाफलेनतु ॥ सुवर्णशतसाहस्रंफलमेतिनरोत्तमः ॥ १८ ॥ यागतिर्ज्ञानिनांस्कन्दमुनीनांयोगसेविनाम् ॥ गतिंतांसमवाप्नोतिधात्रीसेवारतोनरः ॥ १९ ॥ तीर्थसेवाभिगमनैर्व्रतैश्चविविधैस्तथा ॥ सागतिर्लभ्यतेपुंसांधात्रीफलसुसेवया ॥ २० ॥ प्रीतिश्चसर्वदेवानांदेवीनांनोगणस्यच ॥ सम्मुखावरदास्नानेधात्रीफलनिषेवणे ॥ २१ ॥ ग्रहादुष्टाश्च येकेचिदुग्राश्चदैत्यराक्षसाः ॥ सर्वेनदुष्टतांयान्तिधात्रीफलसुसेवनात् ॥ २२ ॥ सर्वयज्ञेषुकार्येषुशस्तंचामलकीफलम् ॥ सर्वदेवस्यपूजायांवर्जयित्वारविंसुत ॥ २३ ॥ तस्माद्रविदिनेतातसप्तम्यांचविशेषतः ॥ धात्रीफलानिसततंदूरतःपरिवर्जयेत् ॥ २४ ॥ यस्तुस्नातितथाऽश्नातिधात्रींचरविवासरे ॥आयुर्वित्तंकलत्रंचसर्वंतस्यविनश्यति॥२५॥सङ्क्रान्तौचभृगोर्वारेषष्ठ्यांप्रतिपदिध्रुवम्॥नवम्यांचाप्यमायांचधात्रींदूरात्परित्यजेत् ॥२६॥ सङ्क्रान्त्यांतुभवेद्रोगीअलक्ष्मीर्भृगुवासरे ॥ अनपत्यंयदालक्ष्म्यांनवम्यामायुषःक्षयः ॥ दशधात्रीसमायोगात्सर्वनाशंविनिर्दिशेत् ॥ २७ ॥ नासिकाकर्णतुण्डेषुमृतस्यचिकुरेषुवा ॥ तिष्ठद्धात्रीफलंयस्यसयातिविष्णुमन्दिरम् ॥ २८ ॥ धात्रीसम्पर्कमात्रेणमृतोयात्यच्युतालयम् ॥ सर्वपापक्षयस्तस्यस्वर्गंयातिरथेनतु ॥ २९ ॥ धात्रीद्रवंनरोलिप्त्वायस्तुस्नानंसमाचरेत् ॥ पदेपदेऽश्वमेधस्यफलंप्राप्नोतिधार्मिकः ॥ ३० ॥ अस्यदर्शनमात्रेणयेवैपापिष्ठजन्तवः ॥ सर्वेतेप्रपलायन्तेग्रहादुष्टाश्चदारुणाः ॥ ३१ ॥ पुरैकःपुल्कसःस्कन्दमृगयार्थंवनंगतः ॥ मृगपक्षिगणान्हत्वातृषयापरिपीडितः ॥ ३२ ॥ क्षुधयाऽमलकीवृक्षंपुरःपीनफलान्वितम् ॥ दृष्ट्वासंरुह्यसहसाचखादफलमुत्तमम् ॥ ३३ ॥ ततोदैवात्सवृक्षाग्रान्निपपातमहीतले ॥ वेदनागाढसंविद्धःपञ्चत्वमगमत्तदा ॥ ३४ ॥ ततःप्रेतगणाःसर्वेरक्षोभूतगणास्तथा ॥ तनुवोढुंमुदासर्वेयेवैशमनसेवकाः ॥ ३५ ॥ नशक्नुवन्तिचाण्डालंमृतंद्रष्टुंमहाबलाः ॥ अन्योन्यंविग्रहस्तेषांममायमितिभाषताम् ॥ ३६ ॥ ग्रहीतुंचापिनेतुंचनशक्तास्तेपरस्परम् ॥ ततस्तेतुसमालोक्यगतामुनिगणान्प्रति ॥ ३७ ॥ प्रेताऊचुः ॥ किमर्थंमुनयोधीराश्चाण्डालंपापकारिणम् ॥ प्रेक्षितुंनवयंशक्तानचापियमसेवकाः ॥ ३८ ॥ म्रियन्तेपातितायेचस्थिरैर्युद्धपराङ्मुखाः ॥ साहसैःपातिताभीतावज्राग्निकाष्ठपीडिताः ॥ ३९ ॥ सिंहव्याघ्रहतामर्त्याव्याघ्रैर्वाजलजन्तुभिः ॥ जलस्थलस्थिताःप्रेतावृक्षपर्वतपातिताः ॥ ४० ॥ पशुपक्षिहतायेचकारागारेगरैर्मृताः ॥ आत्मघातमृतायेचश्राद्धादिकर्मवर्जिताः ॥ ४१ ॥ गूढकर्ममृताधूर्तागुरुविप्रनृपद्विषः ॥ पाषण्डाःकौलिकाःक्रूरागरदाःकूटसाक्षिणः ॥ ४२ ॥ आशौचान्नस्यभोक्तारःप्रेतभोग्यानसंशयः ॥ ममायमितिभाषन्तोनेतुंतंचनशक्नुमः ॥ ४३ ॥ आदित्यइवदुष्प्रेक्ष्यःकिंवाकस्यप्रभावतः ॥ ४४ ॥ मुनयऊचुः ॥ अनेनभक्षितंप्रेताःपक्वंचामलकीफलम् ॥ तत्सङ्गं्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्तितस्यैवफलानिप्रचुराणिच ॥ ४५ ॥ तेनैवकारणेनायंदुष्प्रेक्ष्योभवतांध्रुवम् ॥ वृक्षाग्रपतितस्याथप्राणःस्नेहान्नचत्यजेत् ॥ ४६ ॥ नायंवारेणसूर्य
स्यनचान्येपापकारिणः ॥ धात्रीभक्षणमात्रेणपापात्पूतोव्रजेद्दिवम् ॥ ४७ ॥ प्रेताऊचुः ॥ पृच्छामोवोह्यविज्ञानान्नवयंनिन्दकाःक्वचित्॥विष्णुलोका
द्विमानंतुयावन्नैवात्रगच्छति ॥ ४८ ॥ उच्यतांमुनिशार्दूलावोद्भुतंमनसिस्थितम् ॥ यावद्द्विजानघोषन्तिवेदमन्त्रादिकल्पितम् ॥ ४९ ॥ घोष्यन्तेयत्र
वेदाश्चमन्त्राणिविविधानिच ॥ पुराणस्मृतयोयत्रक्षणंस्थातुंनशक्नुमः ॥ ५० ॥ यज्ञहोमजपस्थानदेवतार्चनकर्मणाम् ॥ पुरतोवैनतिष्ठामस्तस्मा
द्वृत्तंसमुच्यताम् ॥ ५१ ॥ किंवैकृत्वाप्रेतयोनिंलभन्तेहिनराद्विजाः ॥ श्रोतुमिच्छामहेसम्यक्कथंवैविकृतंवपुः ॥ ५२ ॥ द्विजाऊचुः ॥ शीतवातात
पक्लेशैःक्षुत्पिपासाविशेषकैः ॥अन्यैरपिचदुःखैर्येपीडिताःकूटसाक्षिणः ॥ ५३ ॥ वधबन्धप्रमीताश्चप्रेतास्तेनिरयंगताः ॥ छिद्रान्वेषपरायेचद्विजानां
कर्मघातिनः ॥ ५४॥ तथैवचगुरूणांचतेप्रेताश्चापुनर्भवाः ॥ दीयमानेद्विजाग्र्येतुदातारंप्रतिषिध्यति ॥ ५५ ॥ चिरंप्रेतत्वमाश्रित्यनरकान्ननिवर्तते॥
परस्यवाऽत्मनोवागांकृत्वापीडनवाहने ॥ ५६ ॥ नपालयन्तियेमूढास्तेप्रेताःकर्मजाभुवि ॥ हीनप्रतिज्ञकाःसत्यास्तथाभग्नव्रतानराः ॥ ५७ ॥ नलि
नीदलभुक्ताश्चतेप्रेताःकर्मजाभुवि ॥ विक्रीणन्तिसुतांशुद्धांस्त्रियंसाध्वीमकण्टकाम् ॥५८॥ पितृव्यमातुलादेश्चतेप्रेताःकर्मजाभुवि ॥ एतेचान्येचबहवः
प्रेताजाताःस्वकर्मभिः ॥ ५९ ॥ प्रेताऊचुः ॥ नभवन्तिकथंप्रेताःकर्मणाकेनवाद्विजाः ॥ हितायतूर्णंवदनःसर्वलोकहितंपरम् ॥६०॥ द्विजाऊचुः ॥
येनचैवकृतंस्नानंजलेतीर्थस्यधीमता ॥ नमस्कृतंपरंलिङ्गंनप्रेतोजायतेनरः ॥ ६१ ॥ एकादश्यामुपोष्यैवद्वादश्यांचविशेषतः ॥ पूजयित्वाहरिंम
र्त्याःप्रेतत्वंनव्रजन्तिवै ॥ ६२ ॥ वेदाक्षरप्रसूक्तैश्चस्तोत्रमन्त्रादिभिस्तथा ॥ देवानांपूजनेरक्तानवैप्रेताभवन्तिते ॥ ६३ ॥ श्रुत्वापौराणिकंवाक्यं
दिव्यंचधर्मसंहितम् ॥ पाठयित्वापठित्वाचपिशाचत्वंनगच्छति ॥ ६४ ॥ व्रतैश्चविविधैःपूताःपद्माक्षधारणैस्तथा ॥ जप्त्वापद्माक्षमालायांप्रेतत्वं
नैवगच्छति ॥ ६५ ॥ धात्रीफलद्रवैःस्नात्वानित्यंतद्भक्षणेरताः ॥ तेनविष्णुंसुसम्पूज्यनगच्छन्तिपिशाचताम् ॥ ६६ ॥ प्रेताऊचुः ॥ सतांसन्द
र्शनात्पुण्यमितिपौराणिकाविदुः॥ तस्माद्वोदर्शनंजातंहितंनःकर्तुमर्हथ ॥ ६७ ॥ प्रेतभावाद्यथामुक्तिःसर्वेषांनोभविष्यति ॥ ब्रूतोपदेशकंधीरायुष्माकं
शरणागताः॥६८॥ईश्वरउवाच॥ततोदयालवःसर्वेतानूचुर्द्विजसत्तमाः॥६९॥द्विजाऊचुः॥धात्रीणांभक्षणंशीघ्रंकुर्वतांमुक्तिहेतवे ॥७०॥ प्रेताऊचुः॥धात्री
णांदर्शनेविप्रावयंस्थातुंनशक्नुमः ॥ कथंतेषांफलानांचशक्तावैभक्षणेऽधुना ॥ ७१ ॥ द्विजाऊचुः ॥ अस्माकंवचनेनात्रधात्रीणांभक्षणंशिवम् ॥ फलि
ष्यतिपरंलोकंतस्माद्गन्तुंसमर्हथ ॥७२॥ ईश्वरउवाच॥अथतेभ्योवरंलब्ध्वाधात्रीवृक्षंपिशाचकैः॥समारुह्यफलंप्राप्यभक्षितंलीलयातदा॥७३॥ततोदेवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लयात्तूर्णंरथःपीनःसुशोभनः ॥ आगतस्तंसमारुह्यसचाण्डालपिशाचकाः ॥ गतास्तेत्रिदिवंपुत्रव्रतैर्यज्ञैःसुदुर्लभम् ॥ ७४॥ स्कन्दउवाच ॥ धात्रीभ
क्षणमात्रेणपुण्यंलब्ध्वादिवंगताः ॥ तद्भक्षिणःकथंस्वर्गंनगच्छन्तिनरादयः ॥ ७५ ॥ ईश्वरउवाच ॥ पूर्वंतेज्ञानलोपाच्चनजानन्तिहिताहितम् ॥ उ
च्छिष्टंश्वभिरुत्स्पृष्टंश्लेष्ममूत्रंशकृत्तुवा ॥७६॥ मत्वाचमोहिताःश्रेष्ठंप्रेतादन्तिसदैवहि ॥ शकृच्छौचजलंवान्तंबलिसूकरकुक्कुटैः ॥७७॥ मृतकेसूतके
जप्यंनत्यक्तंयेनकेनचित् ॥ तस्यान्नंचजलंप्रेताःखादन्तितुसदैवहि ॥ ७८ ॥ दुर्दान्तागृहिणीयस्यशुचिसंयमवर्जिता ॥ गुरुनिःसारितादुष्टासन्तिप्रे
ताश्चतत्रवै ॥ ७९ ॥ अपुङ्गवाःकुलैर्जात्याबलोत्साहविवर्जिताः ॥ बधिराश्चकृशादीनाःपिशाचाःकर्मजातयः ॥ ८० ॥ क्षणंचमङ्गलंनास्तिदुः
खैर्देहयुताभृशम्॥तैनैवविकृताकाराःसर्वभोगविवर्जिताः ॥ ८१ ॥ नग्नकारोगसन्तप्तामृतारूक्षामलीमसाः ॥ एतेचान्येचदुःखार्ताःसदैवप्रेतजातयः
॥ ८२ ॥ तेनकर्मविपाकेनजायन्तेकाममीदृशाः ॥ पितृमातृगुरूणांचदेवनिन्दापराश्चये ॥ ८३ ॥ पाषण्डाःकौलिकाःपापास्तेप्रेताःकर्मजाभुवि ॥
गलपाशैर्जलैःशस्त्रैर्गरलैरात्मघातकाः ॥ ८४ ॥ इहलोकेचतेप्रेताश्चाण्डालादिषुसम्भवाः॥ अन्त्यजाःपतिताश्चैवपापरोगमृताश्चये ॥ ८५ ॥ अन्त्य
जैर्घातितायुद्धेतेप्रेतानिश्चिताभुवि ॥ महापातकसंयुक्ताविवाहेचबहिष्कृताः ॥ ८६ ॥ शौर्यात्साहसिकायेचतेप्रेताःकर्मजाभुवि ॥ राजद्रोहकरायेच
पितॄणांद्रोहचिन्तकाः ॥८७॥ ध्यानाध्ययनहीनाश्चव्रतैर्देवार्चनादिभिः ॥ अमन्त्राःस्नानहीनाश्चगुरुस्त्रीगमनेरताः॥८८॥तथैवचान्त्यजस्त्रीषुदुर्गतासु
चसङ्गताः ॥ मृताःक्रूरोपवासेनम्लेच्छेदेशस्थितामृताः ॥ ८९ ॥ म्लेच्छभाषायुताःशुद्धास्तथाम्लेच्छोपजीविनः ॥ अनुवर्तन्तियेम्लेच्छान्स्त्रीधनैरुप
जीवकाः ॥ ९० ॥ स्त्रियोयैश्चनरक्ष्यन्तेतेप्रेतानात्रसंशयः ॥ क्षुधासन्तप्तदेहंतुश्रान्तंविप्रंगृहागतम् ॥ ९१ ॥ गुणपुण्यातिथिंत्यक्त्वापिशाचत्वंव्रज
न्तिते ॥ विक्रीणन्तिचवैगाश्चम्लेच्छेषुचगवाशिषु ॥ ९२ ॥ प्रेतलोकेसुखंस्थित्वातेचयान्त्यपुनर्भवम् ॥ अशौचाभ्यन्तरेयेचजाताश्चपशवोमृताः ॥
॥ ९३ ॥ चिरंप्रेताःपिशाचाश्चमृताजाताःपुनःपुनः ॥ जातकर्मसुखैश्चैवसंस्कारैर्येविवर्जिताः ॥ ९४ ॥ एकैकस्मिंश्चसंस्कारेप्रेतत्वंपरिहीयते ॥ स्ना
नसन्ध्यासुरार्चाभिर्वेदयज्ञव्रताक्षरैः ॥ ९५ ॥ आजन्मवर्जिताःपापास्तेप्रेताश्चापुनर्भवाः ॥ भोजनोच्छिष्टपात्राणियानिदेहमलानिच ॥ ९६ ॥
निपातयन्तियेतीर्थेतेप्रेतानात्रसंशयः ॥ दानमानार्चनैर्नैवयैर्विप्राभुवितर्पिताः ॥ ९७ ॥ पितरोगुरवश्चैवप्रेतास्तेकर्मजाभृशम् ॥ पतिंत्यक्त्वाच
यानार्योवसन्तिचेतरैर्जनैः ॥ ९८ ॥ प्रेतलोकेचिरंस्थित्वाजायन्तेचान्त्ययोनिषु ॥ पतिंचवञ्चयित्वायाविषयेन्द्रियमोहिताः ॥ ९९ ॥
मिष्टंचादन्तियाःपापास्तास्तुप्रेताश्चिरंभुवि ॥ विण्मूत्रभक्षकायेचब्रह्मस्वभक्षणेरताः ॥ १०० ॥ अभक्ष्यभक्षकाश्चान्येतेप्रेताश्चापुनर्भवाः ॥ बलाद्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परवस्तूनिगृह्णन्तिनददत्यपि ॥ १ ॥ अतिथीनवमन्यन्तेप्रेतानिरयमास्थिताः ॥ तस्मादामलकींभुक्त्वास्नात्वातस्यद्रवेणच ॥ २ ॥
सर्वपापाद्विनिर्मुक्तोविष्णुलोकेमहीयते ॥ तस्मात्सर्वप्रयत्नेनसेवयामलकींशिवाम् ॥ ३ ॥ यइदंशृणुयान्नित्यंपुण्याख्यानमिदंशुभम् ॥ सर्व
पापप्रपूतात्माविष्णुलोकेमहीयते ॥ ४ ॥ श्रावयेत्सततंलोकेवैष्णवेषुविशेषतः ॥ सयातिविष्णुसायुज्यमितिपौराणिकाविदुः ॥ ५ ॥
स्कन्दउवाच ॥ महीरुहफलंज्ञातंप्रपूतंद्विविधंप्रभो ॥ इदानींश्रोतुमिच्छामिपत्रंपुष्पंसुमोक्षदम् ॥ ६ ॥ ईश्वरउवाच ॥ सर्वेभ्यःपत्र
पुष्पेभ्यःसत्तमातुलसीशिवा ॥ सर्वकामप्रदाशुद्धावैष्णवीविष्णुसुप्रिया ॥ ७ ॥ भुक्तिमुक्तिप्रदामुख्यासर्वलोकपराशुभा ॥ यामाश्रित्यगताः
स्वर्गमक्षयंमुनिसत्तमाः ॥ ८ ॥ हितार्थंसर्वलोकानांविष्णुनारोपितापुरा ॥ तुलसीपत्रपुष्पंचसर्वधर्मप्रतिष्ठितम् ॥ ९ ॥ यथाविष्णोःप्रि
यालक्ष्मीर्यथाहंप्रियएवच ॥ तथेयंतुलसीदेवीचतुर्थोनोपपद्यते ॥ १० ॥ तुलसीपत्रमेकंतुशतहेमफलप्रदम् ॥ नान्यैःपुष्पैस्तथापत्रैर्नान्यैर्गन्धा
नुलेपनैः ॥ ११ ॥ तुष्यतेदैत्यहाविष्णुस्तुलस्याश्चदलैर्विना ॥ अनेनपूजितोयेनहरिर्नित्यंपराशया ॥ १२ ॥ तेनदत्तंहुतंज्ञातंकृतंयज्ञव्रतादिकम् ॥
जन्मजन्मनिभासित्वंसुखंभाग्यंयशःश्रियम् ॥ १३ ॥ कुलंशीलंकलत्रंचपुत्रंदुहितरंतथा ॥ धनंराज्यमरोगत्वंज्ञानंविज्ञानमेवच ॥ १४ ॥ वेदवेदाङ्ग
शास्त्रंचपुराणागमसंहिताः ॥ सर्वंकरगतंमन्येतुलस्याभ्यर्चनेहरेः ॥ १५ ॥ यथागङ्गापवित्राङ्गीसुरलोकेविमोक्षदा ॥ यथाभागीरथीपुण्यातथेयंतुल
सीशिवा ॥ १६ ॥ किंचगङ्गाजलेनैवकिंचपुष्करसेवया ॥ तुलसीदलमिश्रेणजलेनैवप्रमोद्यते ॥ १७ ॥ माधवःसम्मुखोयस्यजन्मजन्मसुधीमतः॥
तस्यश्रद्धाभवेच्छ्रुत्वातुलस्याहरिमर्चितुम् ॥ १८ ॥ योमञ्जरीदलैरेवतुलस्याविष्णुमर्चयेत् ॥ तस्यपुण्यफलंस्कन्दकथितुंनैवशक्यते ॥ १९ ॥
तत्रकेशवसान्निध्यंयत्रास्तितुलसीवनम् ॥ तत्रब्रह्माचकमलासर्वदेवगणैःसह ॥ २० ॥ तस्मात्तांसंनिकृष्टेतुसदादेवींप्रपूजयेत् ॥ स्तोत्रम
न्त्रादिकंयद्वासर्वमानन्त्यमश्नुते ॥ २१ ॥ येचप्रेताश्चकूष्माण्डाःपिशाचाब्रह्मराक्षसाः ॥ भूतदैत्यादयस्तत्रपलायन्तेसदैवहि ॥ २२ ॥
अलक्ष्मीर्नाशिनीघूर्णायाडाकिन्यादिमातरः ॥ सर्वाःसङ्कुचितायान्तिदृष्ट्वातुतुलसीदलम् ॥ २३ ॥ ब्रह्महत्यादयःपापव्याधयःपापसम्भवाः ॥ कुम
न्त्रिणाकृतायेचसर्वेनश्यन्तितत्रवै ॥ २४ ॥ भूतलेवापितंयेनहर्यर्थंतुलसीवनम् ॥ कृतंक्रतुशतंतेनविधिवत्प्रियदक्षिणम् ॥ २५ ॥ हरि
लिङ्गेषुचान्येषुशालग्रामशिलासुच ॥ तुलसीग्रहणंकृत्वाविष्णोःसायुज्यमाव्रजेत् ॥ २६ ॥ नन्दन्तिपुरुषास्तस्यमाधवार्थेक्षितौतु
यः ॥ तुलसींरोपयेद्धीरःसयातिमाधवालयम् ॥ २७ ॥ पूजयित्वाहरिंदेवंनिर्माल्यंतुलसीदलम् ॥ धारयेद्यःस्वशीर्षेतुपापात्पूतो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिक्व्रजेत् ॥ २८ ॥ पूजनेकीर्त्तनेध्यानेरोपणेधारणेकलौ ॥ तुलसीदहतेपापंस्वर्गंमोक्षंददातिच ॥ २९ ॥ उपदेशंदिशेदस्याःस्वयमा
चरतेपुनः ॥ सयातिपरमंस्थानंमाधवस्यनिकेतनम् ॥ १३० ॥ हरेःप्रियकरंयच्चतन्मेप्रियतरंभवेत् ॥ सर्वेषामपिदेवानांदेवीनांचसमन्ततः ॥ ३१॥
श्राद्धेषुयज्ञकार्येषुपर्णमेकंषडानन ॥ तस्मात्सर्वप्रयत्नेनतुलसीसेवनंकुरु ॥ ३२ ॥ तुलसीसेवितायेनतेनसर्वंतुसेवितम् ॥ गुरुंविप्रंदेवतीर्थंतस्मात्से
वयषण्मुख ॥ ३३ ॥ शिखायांतुलसींकृत्वायस्तुप्राणान्परित्यजेत् ॥ दुष्कृतौघाद्विनिर्मुक्तःस्वर्गमेतिनिरामयम् ॥ ३४॥ राजसूयादिभिर्यज्ञैर्व्रतैश्च
विविधैर्यमैः ॥ यागतिःप्राप्यतेधीरैस्तुलसीसेविनांभवेत् ॥ ३५ ॥ तुलसीदलेनचैकेनपूजयित्वाहरिंनरः ॥ वैष्णवत्वमवाप्नोतिकिमन्यैःशास्त्रवि
स्तरैः ॥ ३६ ॥ नपिबेत्सपयोमातुस्तुलस्याःकोटिसङ्ख्यकैः ॥ अर्चितःकेशवोयेनशाखामृदुलपल्लवैः ॥ ३७॥ भावयेत्पुरुषान्मर्त्यःशतशोऽथस
हस्रशः ॥ पूजयित्वाहरिंनित्यंकोमलैस्तुलसीदलैः ॥ ३८ ॥ प्रधानतोगुणास्ताततुलस्यागदितामया॥ निखिलंपुरुकालेनगुणंवक्तुंनशक्नुमः॥३९॥
यस्त्विदंशृणुयान्नित्यमाख्यानंपुण्यसञ्चयम् ॥ पूर्वजन्मकृतात्पापान्मुच्यतेजन्मबन्धनात् ॥ १४० ॥ सकृत्पठनमात्रेणवह्निष्टोमफलंलभेत् ॥ नत
स्यव्याधयःपुत्रमूर्खत्वंनकदाचन ॥ ४१ ॥ सर्वदाजयमाप्नोतिनगच्छेत्सपराजयम् ॥ लेखस्तिष्ठेद्गृहेयस्यतस्यलक्ष्मीःप्रवर्तते ॥ ४२ ॥ नचा
धयोनचप्रेतानशोकानावमानना ॥ नतिष्ठन्तिक्षणंतत्रयत्रेयंवर्ततेलिपिः ॥ १४३ ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेतुलसीमाहात्म्यंनामद्विषष्टि
तमोऽध्यायः ॥ ६२ ॥ द्विजाऊचुः ॥ तुलसीपुष्पमाहात्म्यंश्रुतंत्वत्तोहरेःशुभम् ॥ तस्याःस्तोत्रंकृतंपुण्यंश्रोतुमिच्छामहेवयम् ॥१॥ व्यासउवाच ॥
पुरास्कन्दपुराणेचयन्मयाकीर्तितंद्विजाः ॥ कथयामिपुराणंचपुरतोमोक्षहेतवे ॥ २ ॥ शतानन्दमुनेःशिष्याःसर्वेतेसंशितव्रताः ॥ प्रणिपत्यगुरुं
विप्राःपप्रच्छुःपुण्यतोहितम् ॥३॥ शिष्याऊचुः॥पूर्वंब्रह्ममुखान्नाथयच्छ्रुतंतुलसीस्तवम्॥तद्वयंश्रोतुमिच्छामस्त्वत्तोब्रह्मविदांवर॥४॥शतानन्दउवाच॥
नामोच्चारेकृतेतस्याःप्रीणात्यसुरदर्पहा ॥ पापानिविलयंयान्तिपुण्यंभवतिचाक्षयम् ॥ ५ ॥ साकथंतुलसीलोकैःपूज्यतेवन्द्यतेनहि ॥ दर्शनादेव
यस्यास्तुदानंकोटिगवांभवेत् ॥ ६ ॥ धन्यास्तेमानवालोकेयद्गृहेविद्यतेकलौ ॥ शालग्रामशिलार्थंतुतुलसीप्रत्यहंक्षितौ ॥ ७ ॥ तुलसींयेविचि
न्वन्तिधन्यास्तेकरपल्लवाः ॥ केशवार्थंकलौयेचरोपयन्तीहभूतले ॥ ८ ॥ किंकरिष्यतिसंरुष्टोयमोऽपिसहकिङ्करैः ॥ तुलसीदलेनदेवेशःपूजितोयेन ॥ १९३ ॥
दुःखहा ॥ ९ ॥ तीर्थयात्रादिगमनैःफलैःसिध्यतिकिन्नरः ॥ स्नानेदानेतथाध्यानेप्राशनेकेशवार्चने ॥ १० ॥ तुलसीदहतेपापंकीर्तनेरोपणेकलौ ॥
तुलस्यमृतजन्मासिसदात्वंकेशवप्रिये ॥ ११ ॥ केशवार्थंचिनोमित्वांवरदाभवशोभने ॥ त्वदङ्गसम्भवैर्नित्यंपूजयामियथाहरिम् ॥ १२ ॥ तथाकु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रुपवित्राङ्गिकलौमलविनाशिनि॥मन्त्रेणानेनयःकुर्याद्विचित्यतुलसीदलम् ॥ १३ ॥ पूजनंवासुदेवस्यलक्षकोटिगुणंभवेत्॥ प्रभावंतवदेवेशिगायन्ति
सुरसत्तमाः ॥ १४ ॥ मुनयःसिद्धगन्धर्वाःपातालेनागराट्स्वयम् ॥ नतेप्रभावंजानन्तिदेवताःकेशवादृते ॥ १५ ॥ गुणानांपरिमाणंतुकल्पकोटि
शतैरपि ॥ कृष्णानन्दात्समुद्भूताक्षीरोदमथनोद्यमे ॥१६॥ उत्तमाङ्गेपुरायेनतुलसीविष्णुनाधृता ॥ प्राप्यैतानित्वयादेविविष्णोरङ्गानिसर्वशः॥१७॥
पवित्रतात्वयाप्राप्तातुलसींत्वांनमाम्यहम् ॥ त्वदङ्गसम्भवैःपत्रैःपूजयामियथाहरिम् ॥ १८ ॥ तथाकुरुष्वमेऽविघ्नंयतोयामिपरांगतिम् ॥ रोपिता
गोमतीतीरेस्वयंकृष्णेनपालिता ॥ १९ ॥ जगद्धितायतुलसीगोपीनांहितहेतवे ॥ वृन्दावनेविचरतासेविताविष्णुनास्वयम् ॥ २० ॥ गोकुलस्यवि
वृद्ध्यर्थंकंसस्यनिधनायच ॥ वसिष्ठवचनात्पूर्वंरामेणसरयूतटे ॥ २१ ॥ राक्षसानांवधार्थायरोपितात्वंजगत्प्रिये ॥ रोपितातपसोवृद्ध्यैतुलसींत्वांन
माम्यहम् ॥२२॥ वियोगेवासुदेवस्यध्यात्वात्वांजनकात्मजा ॥ अशोकवनमध्येतुप्रियेणसहसङ्गता ॥२३॥ शङ्करार्थंपुरादेविपार्वत्यात्वंहिमालये ॥
रोपितातपसोवृद्ध्यैतुलसींत्वांनमाम्यहम् ॥ २४ ॥ सर्वाभिर्देवपत्नीभिःकिन्नरैश्चापिनन्दने ॥ दुःस्वप्ननाशनार्थायसेवितात्वंनमोऽस्तुते ॥ २५ ॥
धर्मारण्येगयायांचसेवितापितृभिःस्वयम् ॥ सेवितातुलसीपुण्याआत्मनोहितमिच्छता ॥ २६ ॥ रोपितारामचन्द्रेणसेवितालक्ष्मणेनच ॥ पालिता
सीतयाभक्त्यातुलसीदण्डकेवने ॥ २७ ॥ त्रैलोक्यव्यापिनीगङ्गायथाशास्त्रेषुगीयते ॥ तथैवतुलसीदेवीदृश्यतेसचराचरे ॥ २८ ॥ ऋष्यमूकेचव
सताकपिराजेनसेविता ॥ तुलसीवालिनाशायतारासङ्गमहेतवे ॥ २९ ॥ प्रणम्यतुलसींदेवींसागरोत्क्रमणंकृतम् ॥ कृतकार्यःप्रहृष्टश्चहनूमान्पुनरागतः
॥ ३० ॥ तुलसीग्रहणंकृत्वाविमुक्तोयातिपातकैः ॥ अथवामुनिशार्दूलाब्रह्महत्यांव्यपोहति ॥ ३१ ॥ तुलसीपत्रगलितंयस्तोयंशिरसावहेत् ॥ गङ्गा
स्नानमवाप्नोतिदशधेनुफलप्रदम् ॥ ३२ ॥ प्रसीददेविदेवेशिप्रसीदहरिवल्लभे ॥ क्षीरोदमथनोद्भूतेतुलसित्वांनमाम्यहम् ॥३३ ॥ द्वादश्यांजागरेरात्रौ
यःपठेत्तुलसीस्तवम् ॥ द्वात्रिंशदपराधांश्चक्षमतेतस्यकेशवः ॥ ३४ ॥ यत्पापंयौवनेबाल्येकौमारेवार्द्धकेकृतम् ॥ तत्सर्वंविलयंयातितुलसीस्तवपाठतः
॥ ३५ ॥ प्रीतिमायातिदेवेशस्तुष्टोलक्ष्मींप्रयच्छति ॥ कुरुतेशत्रुनाशंचसुखंविद्यांप्रयच्छति ॥ ३६ ॥ तुलसीनाममात्रेणदेवायच्छन्तिवाञ्छितम् ॥
गर्ह्याणामपिदेवेशोमुक्तिंयच्छतिदेहिनाम् ॥ ३७ ॥ तुलसीस्तवसन्तुष्टस्सुखंवृद्धिंददातिच ॥ उद्धृतंहेलयाविद्धिपापंयमपथेस्थितम् ॥ ३८ ॥ यस्मि
न्गृहेचलिखितोविद्यतेतुलसीस्तवः ॥ नाशुभंविद्यतेतस्यशुभमाप्नोतिनिश्चितम् ॥ ३९ ॥ सर्वंचमङ्गलंतस्यनास्तिकिञ्चिदमङ्गलम् ॥ सुभिक्षंसर्व
दातस्यधनंधान्यंचपुष्कलम् ॥४०॥ निश्चलाकेशवेभक्तिर्नवियोगश्चवैष्णवैः॥ जीवतिव्याधिनिर्मुक्तोनाधर्मेजायतेमतिः॥४१॥द्वादश्यांजागरेरात्रौयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पठेत्तुलसीस्तवम् ॥ तीर्थकोटिसहस्रैस्तुयत्फलंलक्षकोटिभिः ॥ ४२ ॥ तत्फलंसमवाप्नोतिपठित्वातुलसीस्तवम् ॥ ४३ ॥ इतिश्रीपाद्मपुराणेप्रथमे
सृष्टिखण्डेतुलसीस्तवमाहात्म्यंनामत्रिषष्टितमोऽध्यायः॥ ६३॥ द्विजाऊचुः ॥ मज्जनादखिलंपापंक्षयंयातिसुनिश्चितम् ॥ महापातकमन्यच्चतदादेशं
वदस्वनः ॥ १ ॥ पापात्पूतोऽक्षयंनाकमश्नुतेदिविशक्रवत् ॥ सुरयोनेर्नहानिःस्यादुपदेशंवदस्वनः ॥ २ ॥ अत्रभोग्यंपरंसर्वंमृतेस्वर्गेसुरोत्तमः ॥
कलिपापहतानांचस्वर्गसोपानमुच्यते ॥ ३ ॥ व्यासउवाच ॥ गतिंचिन्तयतांविप्रास्तूर्णंसामान्यजन्मनाम्॥स्त्रीपुंसामीक्षणाद्यस्माद्गङ्गापापंव्यपोह
ति ॥ ४ ॥ गङ्गेतिस्मरणादेवक्षयंयातिचपातकम् ॥ कीर्तनादतिपापानिदर्शनाद्गुरुकल्मषम् ॥ ५ ॥ स्नानात्पानाच्चजाह्नव्यांपितॄणांतर्पणात्तथा ॥
महापातकवृन्दानिक्षयंयान्तिदिनेदिने ॥ ६ ॥ अग्निनादह्यतेतूलंतृणंशुष्कंक्षणाद्यथा ॥ तथागङ्गाजलस्पर्शात्पुंसांपापंदहेत्क्षणात् ॥ ७ ॥ सम्प्राप्नो
त्यक्षयंस्वर्गंगङ्गास्नानेनकेशवम् ॥ यशोराज्यंलभेत्पुण्यंस्वर्गमन्तेपरांगतिम् ॥ ८ ॥ पितॄनुद्दिश्यगङ्गायांयस्तुपिण्डंप्रयच्छति ॥ विधिनावाक्यपू
र्वेणतस्यपुण्यफलंशृणु ॥ ९ ॥ अन्नैकेनतुसाहस्रंवर्षंपूज्यःसुरालये ॥ तिलेनद्विगुणंविद्धितथामेध्यफलेनच ॥ १० ॥ गव्येनविधिनाविप्राःस्वर्गस्या
न्तोनविद्यते ॥ एवंपिण्डप्रदानेननित्यंक्रतुशतंभवेत् ॥ ११ ॥ पितरोनिरयस्थायेधन्यास्तेमर्त्यवासिनः ॥ धनपुत्रयुतारोग्यंसुखसम्मानपूजिताः॥
॥ १२ ॥ रसातलगतायेचयेचकीटामहीतले ॥ स्थावरेपक्षिसङ्घादौतेमर्त्याधनिनोनृपाः ॥ १३ ॥ तत्तत्पुत्रैश्चपौत्रैश्चगोत्रैर्दौहित्रकैस्तथा ॥ जामा
तृभागिनेयैश्चसुहृन्मित्रैःप्रियाप्रियैः ॥ १४ ॥ प्रदीयतेजलंपिण्डंयथोपकरणान्वितम् ॥ गङ्गातोयेषुतीरेषुतेषांस्वर्गोऽक्षयोभवेत् ॥ १५ ॥ पिण्डादू
र्ध्वंस्थितायेचपितरोमातृगोत्रजाः ॥ भवन्तिसुखिनःसर्वेमर्त्याश्शतसहस्रशः॥ १६ ॥स्वर्गेतस्यस्थिताःसत्त्वाअधःस्थामध्यवासिनः ॥ नित्यंवाञ्छ
न्तिसद्गङ्गांगच्छन्तुसुरनिम्नगाम् ॥ १७ ॥ एकोगच्छतिगङ्गांयःपूयन्तेतस्यपूरुषाः ॥ एतदेवमहापुण्यंतरतेतारयत्यपि ॥ १८ ॥ गङ्गाकृत्स्नगुणंव
क्तुंनशक्तश्चतुराननः॥अतःकिञ्चिद्वदाम्यत्रभागीरथ्याद्विजागुणम् ॥ १९ ॥ मुनयःसिद्धगन्धर्वायेचान्येसुरसत्तमाः॥गङ्गातीरेतपस्तप्त्वास्वर्गलोकेऽच्यु
ताभवन् ॥ २० ॥ दिव्येनवपुषासर्वेकामगेनरथेनच ॥ अद्यापिननिवर्तन्तेरत्नपूर्णक्षयेषुवै ॥ २१ ॥ प्रासादायत्रसौवर्णास्सर्वलोकोर्ध्वगाश्शिवाः ॥
इष्टद्रव्यैःसुसम्पूर्णाःस्त्रियोयत्रमनोरमाः ॥ २२ ॥ पारिजातसमाःपुष्पवृक्षाःकल्पद्रुमोपमाः ॥ गङ्गातीरेतपस्तप्त्वातत्रैश्वर्यंलभन्तिहि ॥ २३ ॥ तपो
भिर्बहुभिर्यज्ञैर्व्रतैर्नानाविधैस्तथा ॥ पुरुदानैर्गतिर्याचगङ्गांसंसेवतांचसा ॥ २४ ॥ जारजंपतितंदुष्टमन्त्यजंगुरुघातिनम् ॥ सर्वद्रोहेणसंयुक्तंसर्वपात
कसंयुतम् ॥ २५ ॥ त्यजन्तिपितरंपुत्राःप्रियंपत्न्यःसुहृद्गणाः ॥ अन्येचबान्धवाःसर्वेगङ्गातुनपरित्यजेत् ॥ २६ ॥ यथामातास्वयंजन्ममलशौचं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चकारयेत् ॥ क्रोडीकृत्यतथातेपांगङ्गाप्रक्षालयेन्मलम् ॥ २७ ॥ भवन्तितेसुविख्याताभोग्यालङ्कारपूजिताः ॥ दर्शनेक्रियतेगङ्गासकृद्भक्त्यानरैस्तु
येः ॥ २८ ॥ तेषांकुलानांलक्षंतुभवात्तारयतेशिवा ॥ स्मृतार्तिहर्त्रीयैर्ध्यातासंस्तुतासाधुमोदिता ॥ २९ ॥ गङ्गातारयतेनृणामुभौवंशौभवार्णवात् ॥
सङ्क्रान्तिषुव्यतीपातेग्रहणेचन्द्रसूर्ययोः॥३०॥ पुष्येस्नात्वातुगङ्गायांकुलकोटिंसमुद्धरेत्॥शुक्लपक्षेदिवामर्त्योगङ्गायामुत्तरायणे ॥ ३१ ॥ धन्यादेहं
विमुञ्चन्तिहृदिस्थेचजनार्दने ॥ अनेनविधिनायस्तुभागीरथ्याजलेशुभे ॥ ३२ ॥ प्राणांस्त्यक्त्वाव्रजेत्स्वर्गंपुनरावृत्तिवर्जितम् ॥ योगङ्गानुगतोनि
त्यंसर्वदेवानुगोहिसः ॥ ३३ ॥ सर्वदेवमयोविष्णुर्गङ्गाविष्णुमयीयतः ॥ गङ्गायांपिण्डदानेनपितॄणांवैतिलोदकैः ॥ ३४ ॥ नरकस्थादिवंयान्तिस्वर्ग
स्थामोक्षमाप्नुयुः ॥ परदारपरद्रव्यबाधाद्रोहपरस्यच ॥३५॥ गतिर्मनुष्यमात्रस्यगङ्गैवपरमागतिः ॥ वेदशास्त्रविहीनस्यगुरुनिन्दापरस्यच ॥ ३६ ॥
समयाचारहीनस्यनास्तिगङ्गासमागतिः ॥ किंयज्ञैर्बहुवित्ताढ्यैःकिंतपोभिःसुदुष्करैः ॥ ३७ ॥ स्वर्गमोक्षप्रदागङ्गासुखसौभाग्यपूजिता ॥ निय
मैःपरमैर्नित्यंकियोगैश्चित्तरोधकैः ॥ ३८ ॥ भुक्तिमुक्तिप्रदागङ्गासुखमोक्षाग्रतःस्थिता ॥ अनेकजन्मसञ्जातपापंपुंसांविनश्यति ॥ ३९ ॥ स्नानमा
त्रेणगङ्गायांसद्यःस्यात्पुण्यभाङ्नरः ॥ प्रभासेगोसहस्रस्यराहुग्रस्तेदिवाकरे ॥ ४० ॥ लभतेयत्फलंदानेगङ्गास्नानादिनेदिने ॥ दृष्ट्वातुहरतेपापं
स्पृष्ट्वातुलभतेदिवम् ॥ ४१ ॥ प्रसङ्गादपिसागङ्गामोक्षदात्ववगाहिता ॥ सर्वेन्द्रियाणांचापल्यंवासनाशक्तिसम्भवम् ॥ ४२ ॥ निर्घृणत्वंततोगङ्गा
दर्शनात्प्रविनश्यति ॥ परद्रव्याभिकाङ्क्षित्वंपरदाराभिलाषिता ॥ ४३ ॥ परधर्मेरुचिश्चैवदर्शनादेवनश्यति ॥ यदृच्छालाभसन्तोषस्स्वधर्मेषुप्रव
र्तते ॥ ४४ ॥ सर्वभूतसमत्वंचगङ्गायांमज्जनाद्भवेत् ॥ यस्तुगङ्गांसमाश्रित्यसुखंतिष्ठतिमानवः ॥ ४५ ॥ जीवन्मुक्तस्सएवेहसर्वेषामुत्तमोत्तमः ॥
गङ्गांसंश्रित्ययस्तिष्ठेत्तस्यकार्यंनविद्यते ॥ ४६ ॥ कृतकृत्यस्सवैमुक्तोजीवन्मुक्तश्चमानवः ॥ यज्ञोदानंतपोजप्यंश्राद्धंचसुरपूजनम् ॥ ४७ ॥ गङ्गा
यांतुकृतंनित्यंकोटिकोटिगुणंभवेत् ॥ अन्यस्थानेकृतंपापंगङ्गातीरेविनश्यति ॥ ४८ ॥ गङ्गातीरेकृतंपापंगङ्गास्नानेननश्यति ॥ आत्मनोजन्मनक्ष
त्रेजाह्नवीसङ्गतेदिने ॥ ४९ ॥ नरःस्नात्वातुगङ्गायांस्वकुलंचसमुद्धरेत् ॥ आदरेणयथास्तौतिधनवन्तंसदानरः ॥ ५० ॥ सकृद्गङ्गांतथास्तुत्वाभवेत्स्व
र्गस्यभाजनम् ॥ अश्रद्धयापिगङ्गायायोऽसौनामानुकीर्तनम् ॥ ५१ ॥ करोतिपुण्यवाहिन्यास्सवैस्वर्गस्यभाजनम् ॥ क्षितौभावयतोमर्त्यान्नागां
स्तारयतेऽप्यधः ॥५२॥ दिवितारयतेदेवान्गङ्गात्रिपथगास्मृता ॥ ज्ञानतोऽज्ञानतोवापिकामतोऽकामतोऽपिवा ॥ ५३ ॥ गङ्गायांचमृतोमर्त्यःस्वर्गं
मोक्षंचविन्दति ॥ यागतिर्योगयुक्तस्यसत्वस्थस्यमनीषिणः ॥ ५४ ॥ सागतिस्त्यजतःप्राणान्गङ्गायांतुशरीरिणः ॥ चान्द्रायणसहस्राणियश्चरे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्कायशोधनम् ॥ ५५ ॥ पानंकुर्याद्यथेच्छंचगङ्गाम्भःसविशिष्यते ॥ तावत्प्रभावस्तीर्थानांदेवानांतुविशेषतः ॥ ५६ ॥ तावत्प्रभावोवेदानांयावन्ना
प्नोतिजाह्नवीम्॥ तिस्रःकोट्योऽर्धकोटीचतीर्थानांवायुरब्रवीत् ॥५७॥ दिविभुव्यन्तरिक्षेचतानितेसन्तिजाह्नवि ॥ विष्णुपादाब्जसम्भूतेगङ्गेत्रिपथगा
मिनि ॥ ५८ ॥ धर्मद्रवेतिविख्यातेपापंमेहरजाह्नवि ॥ विष्णुपादप्रसूतासिवैष्णवीविष्णुपूजिता ॥ ५९ ॥ त्राहिमामेनसस्तस्मादाजन्ममरणान्तिका
त् ॥ श्रद्धयाधर्मसम्पूर्णेश्रीमतारजसाचते ॥६०॥ अमृतेनमहादेविभागीरथिपुनीहिमाम् ॥ त्रिभिःश्लोकवरैरेभिर्यःस्नायाज्जाह्नवीजले ॥६१॥ जन्म
कोटिकृतात्पापान्मुच्यतेनात्रसंशयः ॥ मूलमन्त्रंप्रवक्ष्यामिजाह्नव्याहरिभाषितम् ॥६२॥ सकृज्जपान्नरःपूतोविष्णुदेहेप्रतिष्ठति॥६३॥ मन्त्रश्चायम्॥ॐ
नमोगङ्गायैविश्वरूपिण्यैनारायण्यैनमोनमः ॥ ६४ ॥ जाह्नवीतीरसम्भूतांमृदंमूर्ध्नाबिभर्तियः ॥ सर्वपापविनिर्मुक्तोगङ्गास्नानंविनानरः ॥ ६५ ॥
गङ्गाजलोर्मिनिर्धूतपवनंस्पृशतेयदि ॥ सपूतःकल्मषाद्घोरात्स्वर्गंचाक्षयमश्नुते ॥ ६६॥ यावदस्थिमनुष्यस्यगङ्गातोयेप्रतिष्ठति ॥ तावद्वर्षसहस्राणि
स्वर्गलोकेमहीयते ॥ ६७ ॥ पित्रोर्बन्धुजनानांचअनाथानांगुरोरपि ॥ गङ्गायामस्थिपातेननरःस्वर्गान्नहीयते ॥ ६८ ॥ गङ्गांप्रतिवहेद्यस्तुपितॄ
णामस्थिखण्डकम् ॥ पदेपदेऽश्वमेधस्यफलंप्राप्नोतिमानवः ॥६९ ॥ धन्याजानपदायेचपशवःपक्षिकीटकाः ॥ स्थावराजङ्गमाश्चान्येगङ्गातीरसमा
श्रिताः ॥ ७० ॥ क्रोशान्तरमृतायेचजाह्नव्याद्विजसत्तमाः ॥ मानवादेवतास्सन्तिइतरेमानवाभुवि ॥ ७१ ॥ गङ्गास्नानायसङ्गच्छन्पथिसंम्रियते
यदि ॥ सचस्वर्गमवाप्नोतिगङ्गास्नानफलंलभेत् ॥७२॥ गङ्गाजलेप्रयास्यन्तितंजीवाःपथियेमृताः ॥ कीटाःपतङ्गाश्शलभाःपादाघातेनगच्छताम्
॥७३॥ येवदन्तिसमुद्देशंगङ्गांप्रतिजनंद्विजाः ॥ तेचयान्तिपरंपुण्यंगङ्गास्नानफलंनराः ॥७४॥ जाह्नवींयेचनिन्दन्तिपाषण्डैर्हतचेतसः ॥ तेयान्ति
नरकंघोरंपुनरावृत्तिदुर्लभम् ॥७५॥ दुःस्थोवापिस्मरन्नित्यंगङ्गेतिपरिकीर्तयन् ॥ पठन्स्वर्गमवाप्नोतिकिमन्यैर्बहुभाषितैः ॥७६॥गङ्गागङ्गेतियोब्रूया
द्योजनानांशतैरपि ॥ मुच्यतेसर्वपापेभ्योविष्णुलोकंसगच्छति ॥७७॥ अन्धाश्चपङ्गवस्तेचवृथाभवसमुद्भवाः ॥ गर्भपाताद्विपद्यन्तेयेगङ्गांनगतानराः
॥७८॥नकीर्तयन्तियेगङ्गांजलतुल्यानराधमाः॥पराान्नोपदिशन्तिस्मवातूलाश्चित्तविभ्रमाः ॥७९॥नपठन्तिजनायेचतेषांशास्त्रंविनिष्फलम्॥गङ्गापुण्य
फलंविप्राःकुधियःपतिताधमाः ॥८०॥ पाठयन्तिजनायेचश्रद्धयानिपठन्तिच॥गच्छन्तितेदिवंधीरास्तारयन्तिपितॄन्गुरून् ॥ ८१ ॥पाथेयकंगच्छतां
योवसुशक्त्याप्रयच्छति ॥ भागीरथ्यालभेत्स्नानंयःपरान्नेनगच्छति ॥८२॥ कर्तुःस्नानफलंविद्याद्द्विगुणंप्रेरकस्यच ॥ इच्छयानिच्छयाचापिप्रेरणेना
न्यसेवया ॥ ८३ ॥ जाह्नवींयोगतःपुण्यांसगच्छेन्निर्जरालयम् ॥ ८४ ॥ द्विजाऊचुः ॥ गङ्गायाःकीर्तनंव्यासश्रुतंत्वत्तोविनिर्मलम् ॥ गङ्गाकस्मा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्किमाकाराकुतःसाद्यतिपावनी ॥ ८५ ॥ व्यासउवाच ॥ शृणुध्वंकथयाम्यद्यकथांपुण्यांपुरातनीम् ॥ यांश्रुत्वामोक्षमार्गंचप्राप्नोतिनरसत्तमः
॥ ८६ ॥ ब्रह्मलोकंपुरागत्वानारदोमुनिपुङ्गवः ॥ नत्वाविधिंचपप्रच्छपूतंत्रैलोक्यपावनम् ॥ ८७ ॥ किंसृष्टंचत्वयातातसंमतंशम्भुकृष्णयोः ॥
सर्वलोकहितार्थायभुवःस्थानेसमीहितम् ॥ ८८ ॥ देवीवादेवताकावासर्वासामुत्तमोत्तमा ॥ यांसमासाद्यदेवाश्चदैत्यमानुषपन्नगाः ॥ ८९ ॥ अण्ड
जाःस्वेदजावृक्षायेचान्यउद्भिज्जादयः ॥ सर्वेयान्तिशिवंब्रह्मन्समग्रंविभवंध्रुवम् ॥ ९० ॥ ब्रह्मोवाच ॥ सृजताचपुराप्रोक्तामायाप्रकृतिरूपिणी ॥
आद्याभवस्वलोकानांत्वत्तोभवंसृजाम्यहम् ॥ ९१ ॥ एतच्छ्रुत्वापरासाचसप्तधाचाभवत्तदा ॥ गायत्रीवाक्चस्वर्लक्ष्मीस्सर्वसस्यवसुप्रदा ॥ ९२ ॥
ज्ञानविद्याउमादेवीशक्तिबीजातपस्विनी ॥ वर्णिकाधर्मद्रवाचएतास्सप्तप्रकीर्तिताः ॥ ९३ ॥ गायत्रीप्रभवावेदावेदात्सर्वंस्थितंजगत् ॥ स्वस्ति
स्वाहास्वधादीक्षाएतागायत्रिजाःस्मृताः ॥ ९४ ॥ उच्चारयेत्सदायज्ञेगायत्रींमातृकादिभिः ॥ कृतौदेवाःस्वधांप्राप्यभवेयुरजरामराः ॥ ९५ ॥ तत
स्सुधारसंदेवामुमुचुर्धरणीतले ॥ अथसस्यवतीपृथ्वीओषधीनांपराशुभा ॥ ९६ ॥ फलमूलैरसैर्भक्ष्यैर्जनाःसुस्थतराभवन् ॥ भारतीसर्वलोका
नांचाननेमानसेस्थिता ॥ ९७ ॥ तथैवसर्वशास्त्रेषुधर्मोद्देशंकरोतिसा ॥ विज्ञानंकलहंशोकंमोहामोहंशिवाशिवम् ॥ ९८ ॥ तयाविनाजगत्सर्वंयात्य
तत्त्वमितिस्मृतम् ॥ कमलासम्भवश्चैववस्त्रभूषणसञ्चयः ॥ ९९ ॥ सुखंराज्यंत्रिलोकेतुततःसाहरिवल्लभा ॥ उमयाहेतुनाशम्भोर्ज्ञानंलोकेषुस
न्ततम् ॥ १०० ॥ ज्ञानमाताचसाज्ञेयाशम्भोरर्धाङ्गवासिनी ॥ वर्णिकाशक्तिरत्युग्रासर्वलोकप्रमोहिनी ॥ १ ॥ सर्वलोकेषुलोकानांस्थितिसंहार
कारिणी॥देव्याचनिहतौपूर्वमसुरौमधुकैटभौ ॥२॥ रुरुश्चापिहतोघोरःसवलोकपरिश्रुतः ॥ सर्वदेवैकजेतारंसाजघ्नेमहिषासुरम् ॥३॥ निहतालीलया
देव्यायेऽसुरादैत्यपुङ्गवाः ॥ एवंबलानिदैत्यानांनिहत्यसर्वदातया ॥ ४ ॥ पालितंमोदितंचैवकृत्स्नमेतज्जगत्त्रयम् ॥ धर्मद्रवस्वरूपाचसर्वधर्मप्र
तिष्ठिता ॥५॥ महतींतांसमालोक्यमयाकमण्डलौधृता ॥ विष्णुपादाब्जसम्भूताशम्भुनाशिरसाधृता ॥ ६ ॥ अस्माभिश्चत्रिभिर्युक्ताब्रह्मविष्णुमहे
श्वरैः॥धर्मद्रवापरिख्याताजलरूपाकमण्डलौ॥७॥ बलियज्ञेषुसम्भूताविष्णुनाप्रभविष्णुना॥ छद्मनाछलितःपूर्वंबलिर्बलवतांवरः॥८॥ ततःपादद्वयेनैव
क्रान्तंसर्वमहीतलम् ॥ नभःपादश्चब्रह्माण्डंभित्त्वाममपुरःस्थितः ॥९॥ मयासम्पूजितःपादःकमण्डलुजलेनवै ॥ प्रक्षाल्यैवार्चितात्पादाद्धेमकूटेऽपतज्ज
लम् ॥११०॥ तत्कूटाच्छङ्करंप्राप्यभ्रमतेसाजटास्थिता ॥ ततोभगीरथेनैवसमाराध्यशिवंभुवि ॥११॥ आनीयाराधितोनित्यंतपसागजपुङ्गवः ॥ तेन
भित्त्वानगंवीर्यात्त्रिभिर्दन्तैःकृतंबिलम् ॥१२॥ ततस्त्रिबिलगायस्मात्त्रिस्रोतालोकविश्रुता ॥ हरिब्रह्महरयोगात्पूतालोकस्यपावनी ॥१३॥ समासाद्यच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तांदेवींसर्वधर्मफलंलभेत् ॥ पाठयज्ञपरैःसर्वैर्मन्त्रहोमसुरार्चनैः ॥१४॥ सागतिर्नभवेज्जन्तोर्गङ्गासंसेवयाचया ॥ धर्मस्यसाधनोपायोह्यतःपरोनविद्यते
॥१५॥त्रैलोक्यपुण्यसंयोगात्तस्मात्तांव्रजनारद॥१६॥ गङ्गातोयास्थिसंयोगात्सुतास्तेसगरस्यच॥स्वर्गताःपितृभिश्चैवस्वपूर्वापरजैःसह॥१७॥ व्यास
उवाच॥ततोब्रह्ममुखाच्छ्रुत्वानारदोमुनिपुङ्गवः॥गङ्गाद्वारेतपःकृत्वाब्रह्मणासदृशोऽभवत्॥१८॥सर्वत्रसुलभागङ्गात्रिषुस्थानेषुदुर्लभा ॥गङ्गाद्वारेप्रयागे
चगङ्गासागरसङ्गमे॥१९॥ त्रिरात्रेणैकरात्रेणनरोयातिपरांगतिम्॥ तस्मात्सर्वप्रयत्नेनसद्योमुक्तिंविचिन्तयेत्॥१२०॥ ततोगच्छतधर्मज्ञाःशिवांभागी
रथीमिह॥अचिरेणैवकालेनस्वर्गंमोक्षंप्रगच्छथ ॥२१॥विशेषात्कलिकालेचगङ्गामोक्षप्रदानृणाम्॥ कृच्छ्राच्चक्षीणसत्त्वानामनन्तःपुण्यसम्भवः॥२२॥
पुलस्त्यउवाच ॥ततस्तेब्राह्मणाहृष्टाःश्रुत्वाव्यासाद्गिरंशुभाम्॥गङ्गायांतुतपस्तप्त्वामोक्षमार्गंययुस्तदा॥२३॥यइदंशृणुयान्मर्त्यःपुण्याख्यानमनुत्तमम्॥
सर्वंतरतिदुःखौघंगङ्गास्नानफलंलभेत् ॥२४॥ सकृदुच्चारितेचैवसर्वयज्ञफलंलभेत् ॥ दानंजप्यंतथाध्यानंस्तोत्रंमन्त्रसुरार्चनम् ॥ २५ ॥ तत्रैवकारये
द्यस्तुसचानन्तफलंलभेत् ॥ तस्मात्तत्रैवकर्तव्यंजपहोमादिकंनरैः ॥२६॥ अनन्तंचफलंप्रोक्तंजन्मजन्मसुलभ्यते ॥१२७॥ इतिश्रीपाद्मपुराणेप्रथमेसृ
ष्टिखण्डेगङ्गामाहात्म्यंनामचतुःषष्टितमोऽध्यायः ॥ ६४ ॥ पुलस्त्यउवाच ॥ एतस्मिन्नन्तरेपूर्वंव्यासशिष्योमहामुनिः ॥ नमस्कृत्यगुरुंभी
ष्मसञ्जयःपरिपृच्छति ॥ १ ॥ सञ्जयउवाच ॥ देवानांपूजनोपायंक्रमंब्रूहिसुनिश्चितम् ॥ अग्रेपूज्यतमःकोऽसौकोमध्येनित्यपूजने ॥ २ ॥
अन्तेचपूजाकस्यैवकस्यकोवाप्रभावकः ॥ किंवाकंचफलंब्रह्मन्पूजयित्वालभेन्नरः ॥ ३ ॥ व्यासउवाच ॥ गणेशंपूजयेदग्रेत्वविघ्नार्थपरेत्विह ॥
विनायकत्वमाप्नोतियथागौरीसुतोहिसः ॥ ४ ॥ पार्वत्यजनयत्पूर्वंसुतौमहेश्वरादिमौ ॥ सर्वलोकधरौशूरौदेवौस्कन्दगणाधिपौ ॥ ५ ॥
तौदृष्ट्वातुसुरास्सर्वेश्रद्धयापरयान्विताः ॥ सुधयोत्पादितंदिव्यंतस्यैप्रादुस्तुमोदकम् ॥ ६ ॥ दृष्ट्वातुमोदकंताभ्यामर्थिताजननीतदा ॥ ततस्तु
विस्मितादेवीसुतावेवमभाषत ॥ ७ ॥ पार्वत्युवाच ॥ इदंतुमोदकंपुत्रौदेवैर्दत्तंमुदान्वितैः ॥ महाबुद्धीतिविख्यातंसुधयापरिनिर्मितम् ॥ ८ ॥ गुणंचा
स्यप्रवक्ष्यामिशृणुतंतुसमाहितौ ॥ अस्यैवाघ्राणमात्रेणअमरत्वंलभेद्ध्रुवम् ॥ ९ ॥ सर्वशास्त्रार्थतत्त्वज्ञःसर्वशस्त्रास्त्रकोविदः ॥ निपुणःसर्वतन्त्रेषुलेख
कश्चित्रकृत्सुधीः ॥ १० ॥ ज्ञानविज्ञानतत्त्वज्ञःसर्वज्ञोनात्रसंशयः ॥ पुत्रौधर्मादधिकतांप्राप्यसिद्धिंशतंव्रजेत् ॥ ११ ॥ यस्तस्यवैप्रदास्यामिपि
तुस्तेसम्मतंत्विदम् ॥ १२ ॥ व्यासउवाच ॥ श्रुत्वामातृमुखादेवंवचःपरमकोविदः ॥ स्कन्दस्तीर्थंययौसद्यःसर्वंत्रिभुवनस्थितम् ॥ १३ ॥ बर्हिणं
स्वंसमारुह्यत्वभिषेकःकृतःक्षणात् ॥ पितरौप्रदक्षिणंकृत्वालम्बोदरधरस्सुधीः ॥ १४ ॥ ततएवमुदायुक्तःपित्रोरेवाग्रतःस्थितः ॥ पुरतश्चतथास्क

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्दोमेदेहीतिस्त्रिवर्त्स्थितः ॥ १५ ॥ ततस्तुतौसमीक्ष्याथपार्वतीविस्मिताब्रवीत् ॥ १६ ॥ पार्वत्युवाच ॥ सर्वतीर्थाभिषेकैस्तुसर्वदेवैर्नतैस्तथा ॥
सर्वयज्ञव्रतैर्मन्त्रैर्योगैरन्यैर्यमैस्तथा ॥ १७ ॥ पित्रोरर्चापरस्यैवकलांनार्हतिषोडशीम् ॥ तस्मात्सुतशतादेषोऽधिकःशतगुणैरपि ॥ १८ ॥ अतोद
दामिहेरम्बेमोदकंदेवनिर्मितम् ॥ अस्यैवकारणादस्यअग्रेपूजामखेषुच ॥ वेदशास्त्रस्तवादौचनित्यंपूजाविधासुच ॥ १९ ॥ पार्वत्यासहभूते
शोददौतस्मैवरंमहत् ॥ २० ॥ महादेवउवाच ॥ अस्यैवपूजनादग्रेदेवास्तुष्टाभवन्तुच ॥ २१ ॥ सर्वासामपिदेवानांपितॄणांचसमन्ततः ॥
तोषोभवतुनित्यंचपूजितेऽग्रेगणेश्वरे ॥ २२ ॥ व्यासउवाच ॥ ततःसर्वेषुयज्ञेषुपूजयेद्गणपंद्विजः ॥ कोटिकोटिगुणंतेषुदेवदेवीवचोयथा ॥
॥ २३ ॥ दत्त्वासर्वगुणंपुण्यंदेवदेव्यातथामुदा ॥ कृतंगणाधिपत्यंचसर्वदेवाग्रतस्तदा ॥ २४ ॥ तस्मात्प्राज्येषुयज्ञेषुस्तोत्रेषुनित्यपूजने ॥
गणेशंपूजयित्वातुसर्वसिद्धिंलभेन्नरः ॥ २५ ॥ एवंज्ञात्वातुदेवैस्तुदयितप्राप्तिकाम्यया ॥ पूजितश्चाथसर्वैस्तुस्वर्गमोक्षार्थतोध्रुवम् ॥ २६ ॥ नक्ता
हारश्चतुर्थ्यांतुपूजयित्वागणाधिपम् ॥ लिङ्गेवाप्रतिमाचित्रेदेवःपूज्योभवेद्यदि ॥ २७ ॥ गणाधिपनमस्तुभ्यंसर्वविघ्नप्रशान्तिद ॥ उमा
नन्दप्रदप्राज्ञत्राहिमांभवसागरात् ॥ २८ ॥ हरानन्दकरध्यानज्ञानविज्ञानदप्रभो ॥ विघ्नराजनमस्तुभ्यंप्रसन्नोभवसर्वदा ॥ २९ ॥ कृतोपवासो
गणपंपूजयेद्योनरोमुदा ॥ सर्वपापविनिर्मुक्तःसुरलोकेमहीयते ॥ ३० ॥ स्तोत्रंतस्यप्रवक्ष्यामिनामद्वादशकंशुभम् ॥ ओंनमोगणपतयेमन्त्रएषउ
दाहृतः ॥ ३१ ॥ गणपतिर्विघ्नराजोलम्बतुण्डोगजाननः ॥ द्वैमातुरश्चहेरम्बएकदन्तोगणाधिपः ॥ ३२ ॥ विनायकश्चारुकर्णःपशुपालोभवात्म
जः ॥ द्वादशैतानिनामानिप्रातरुत्थाययःपठेत् ॥ ३३ ॥ विश्वंतस्यभवेद्वश्यंनचविघ्नंभवेत्क्वचित् ॥ महाप्रेताश्शमंयान्तिपीड्यतेव्याधिभि
र्नच ॥ ३४ ॥ सर्वपापाद्विनिर्मुक्तोह्यक्षयंस्वर्गमश्नुते ॥ ३५ ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेगणपतिस्तोत्रंनामपञ्चषष्टितमोऽध्यायः ॥
॥ ६५ ॥ व्यासउवाच ॥ पुनरन्यत्प्रवक्ष्यामिस्तोत्रंगणाधिपस्यच ॥ सर्वसिद्धिकरंपूतंसर्वाभीष्टफलप्रदम् ॥ १ ॥ एकदन्तंमहाकायंतप्तका
ञ्चनसन्निभम् ॥ लम्बोदरंविशालाक्षंवन्देऽहंगणनायकम् ॥ २ ॥ मुञ्जकृष्णाजिनधरंनागयज्ञोपवीतकम् ॥ बालेन्दुकलिकामौलिंवन्देऽहंगणनायकम्
॥ ३ ॥ सर्वविघ्नहरंदेवंसर्वविघ्नविवर्जितम् ॥ मूषकोत्तममारुह्यदेवासुरमहाहवे ॥ योद्धुकामंमहाबाहुंवन्देऽहंगणनायकम् ॥ ४ ॥ अम्बिकाहृ
दयानन्दंमातृकापरिवेष्टितम् ॥ भक्तिप्रियंमदोन्मत्तंवन्देऽहंगणनायकम् ॥ ५ ॥ चित्ररत्नविचित्राङ्गंचित्रमालाविभूषणम् ॥ कामरूपधरंदेवंव
न्देऽहंगणनायकम् ॥ ६ ॥ गजवक्त्रंसुरश्रेष्ठंचारुकर्णविभूषितम् ॥ पाशाङ्कुशधरंदेवंवन्देऽहंगणनायकम् ॥७॥ यक्षकिन्नरगन्धर्वैःसिद्धविद्याधरैस्सदा॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तूयमानंमहादेवंवन्देऽहंगणनायकम् ॥ ८ ॥ गणाष्टकमिदंपुण्यंभक्तितोयःपठेन्नरः ॥ सर्वसिद्धिमवाप्नोतिरुद्रलोकेमहीयते ॥ ९ ॥ ननिः स्वतांतथाभ्येतिसप्तजन्मसुमानवः ॥ यइदंपठतेनित्यंमहाराजोभवेन्नरः ॥ १० ॥ वश्यंकरोतित्रैलोक्यंपठनाच्छ्रवणादपि ॥ स्तोत्रंपरंमहा पुण्यंगणपस्यमहात्मनः ॥ ११ ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेगणपतिस्तोत्रंनामषट्षष्टितमोऽध्यायः ॥ ६६ ॥ व्यासउवाच ॥ नान्दीमुखेषुसर्वेषुपूजयेद्योगणाधिपम् ॥ तस्यसर्वोभवेद्दश्यःपुण्यंभवतिचाक्षयम् ॥ १ ॥ गणानांत्वेतिमन्त्रेणसर्वयज्ञघटेषुच ॥ सर्वसिद्धिमवाप्नो तिस्वर्गंमोक्षंलभेन्नरः ॥ २ ॥ मृन्मयेप्रतिमायांचचित्रेचाथदृषन्मये ॥ द्वारदारुणिपात्रेचहेरम्बंलेखयेद्बुधः ॥ ३ ॥ अन्यस्मिन्नपिदेशे तुसततंदृष्टिगोचरे ॥ स्थापयित्वातुहेरम्बंशक्त्यायःपूजयेद्बुधः ॥ ४ ॥ तस्यकार्याणिसिद्ध्यन्तिदयितानिसमन्ततः ॥ नविघ्नंजायते किंचित्त्रैलोक्यंवशमानयेत ॥ ५ ॥ विद्यार्थीलभतेविद्यांवेदशास्त्रसमुद्भवाम् ॥ अन्यांचशिल्पिविद्यांचविजयांस्वर्गदायिनीम् ॥ ६ ॥ धनार्थीवि पुलंवित्तंकन्यांसाध्वींमनोरमाम् ॥ ऐश्वर्यंधर्मसाध्यंचतनयंकुलमोक्षदम् ॥ ७ ॥ नरोगैःपीड्यतेकश्चिन्नग्रहैःप्रेतयोनिभिः ॥ शृङ्गिभिर्नापिरक्षोभिर्वि द्युद्भिर्वनतस्करैः ॥ ८ ॥ नराजाकुप्यतिगृहेनचमारीप्रवर्तते ॥ नदौर्भिक्ष्यंनदौर्बल्यंपूजयित्वाविनायकम् ॥ ९ ॥ अभिप्रेतार्थसिद्ध्यर्थंपूजितोयस्सु रैपि ॥ सर्वविघ्नच्छिदेतस्मैगणाधिपतयेनमः ॥ १० ॥ मन्त्रश्चायम्॥ॐनमोगणपतये ॥ नारायणप्रियैःपुष्पैरन्यैश्चापिसुगन्धिभिः ॥ मोदकैः फलमूलैश्चद्रव्यैःकालोद्भवैस्तथा ॥११॥ दधिदुग्धैःप्रियैर्वाद्यैरपिधूपसुगन्धिभिः ॥ पूजयेद्गणपंयस्तुसर्वसिद्धिमवाप्नुयात् ॥१२॥ विशेषात्तस्यलिङ्गे तुयोददातिवसुप्रियम् ॥ पूजोपकरणंवस्त्रंसर्वलक्षगुणंभवेत् ॥ १३ ॥ देशेचभारतेवर्षेवनितापूर्वसन्निधौ ॥ लौहित्यदक्षिणेतीरेलिङ्गरूपोविनायकः ॥ १४ ॥ हरगौरीसमादेशाद्देवानांसम्मतेनच ॥ स्थितोलोकप्रशान्त्यर्थंसर्वविघ्नविनाशनात् ॥ १५ ॥ पूजयित्वातुतंदेवंशक्तितोद्रव्यसञ्चयैः ॥ विनायकत्वमाप्नोतिवेदशास्त्रार्थपारगः ॥ १६ ॥ सकृत्प्रदक्षिणंकृत्वादृष्ट्वास्पृष्ट्वातुमानवः ॥ अक्षयंलभतेस्वर्गंसदादेवैःप्रपूज्यते ॥ १७ ॥ संस र्गिणांचम्लेच्छानांगत्यर्थंसुतपस्विनाम् ॥ पुत्रार्थंसर्वलोकानांतत्रशम्भुर्विनायकः ॥१८॥ कृत्वाभिषेकंलौहित्येस्पृशेद्यस्तुगणाधिपम् ॥ सप्तजन्मकृ तात्पापान्मुच्यतेनात्रसंशयः ॥ १९ ॥ नवैधव्यंनकार्पण्यंनशोकंनतुमत्सरम् ॥ विनायकंसमासाद्यजन्मजन्मनिसंलभेत् ॥ २० ॥ पुनःसिद्धिंपुन र्भोग्यंपुनःकीर्तिःपुनर्बलम् ॥ पूजयित्वातुगणपंनरस्यनात्रसंशयः ॥ २१ ॥ अस्यपूजामकृत्वाचसर्वाभीष्टंविनश्यति ॥ तत्रदेवाश्चसुप्रीताब्रह्मविष्णुह रादयः ॥ २२ ॥ मोहाद्भ्रान्त्याचनकृतंहरिणास्यार्चनंपुनः ॥ ततोविघ्नंसमुत्पन्नंदेवराजस्यधीमतः ॥ २३ ॥ मघोनोगणपस्याथपूजाविरहि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यच ॥ अथासुरैर्महावीर्यैर्हिरण्याक्षमुखैरणे ॥ २४ ॥ मघवातुजितोवीर्याद्धिरण्याक्षेणवैतदा ॥ ततस्सुराश्चनिर्वीर्यायावद्वर्षशतंपुरा ॥ २५ ॥
दैवासुरेमहायुद्धेसुराणांचपराजयः ॥ ततोदेवाधिदेवेतुशिवेदेवैर्निवेदितम् ॥२६॥ देवाऊचुः ॥ भगवन्नसुरैर्नोहिजितंराज्यंगतामखाः ॥ २७ ॥ व्यास
उवाच ॥ एतस्मिन्नन्तरेशम्भुर्देवान्वचनमब्रवीत् ॥२८॥ शम्भुरुवाच ॥ हेरम्बायवरोदत्तउमयाप्रीतयामया ॥ पूजयातेपरासिद्धिर्देवादीनांभवत्विति
॥ २९ ॥ अवजानातियोमोहात्पुरुषस्तुमहोत्सवे ॥ नभवेत्तस्यसिद्धिश्चरणेचापिपराजयः ॥ ३० ॥ महामखेनयुष्माभिःपूजागणपतेःकृता ॥ हेल
यानकृतामोहात्तस्मात्प्राप्तःपराजयः ॥३१॥ शीघ्रंगच्छतवैपुण्यांगणपस्यमहात्मनः ॥ पूजांकुरुतधर्मज्ञाजयस्तूर्णंभविष्यति ॥३२॥ व्यासउवाच॥
ततोहरमुखाच्छ्रुत्वावचःक्षेमपरंहितम् ॥ प्रहृष्टाविबुधास्सर्वेगणपस्यपुरःस्थिताः ॥ ३३ ॥ देवाऊचुः ॥ गणाधिपनमस्तुभ्यंसर्वदेवैकपालक ॥ स्व
र्गभोगप्रदप्रीत्याहेरम्बत्वांनताःस्मह ॥ ३४ ॥ जयदंसर्वयुद्धेषुसिद्धिदंसर्वकर्मसु ॥ महामायंमहाकायंहेरम्बत्वांनताःस्मह ॥ ३५ ॥ एकदन्तंम
हाप्राज्ञंलम्बतुण्डंविनायकम् ॥ देवंमहर्षिदेवानामिन्द्रस्यचनताःस्मह ॥३६॥ व्यासउवाच॥ एताःश्रुत्वागिरस्तेषांत्रिदशानांमहात्मनाम् ॥ विस्मितो
गणपोदेवानिदंवचनमब्रवीत् ॥ ३७ ॥ गणेशउवाच ॥ कुतोमेतरसास्तोत्रंपूजांकुरुथसाम्प्रतम् ॥ करिष्यामिहितार्थंवैतूर्णंकामंसमुच्यताम् ॥३८॥
व्यासउवाच ॥ एतस्मिन्नन्तरेसूरिःसुराणांयाजकःसुधीः ॥ उवाचवचनंस्मेरंबृहस्पतिर्विनायकम् ॥ ३९ ॥ बृहस्पतिरुवाच ॥ दोषंमहर्षिदेवानामि
न्द्रस्यचविनायक ॥ यत्तेपुरार्चनंयज्ञनकृतंतत्क्षमस्वनः ॥ ४० ॥ व्यासउवाच ॥ सुराचार्यगिरःश्रुत्वागणपोवाक्यमब्रवीत् ॥ ४१ ॥ गणेशउवाच॥
युष्माभिर्व्रियतांदेवावरोमत्तोहिवाञ्छितः ॥ ४२ ॥ व्यासउवाच ॥ ततःशक्रादयःसर्वेबृहस्पतिपुरोगमाः ॥ ऊचुर्गणपतिंदेवाजयोऽस्माकंभवत्विति
॥४३॥ देवानांवचनंश्रुत्वागणेशोऽवाक्यमब्रवीत् ॥४४॥ गणेशउवाच ॥ बाढमेवसुरश्रेष्ठाजयोवोभवतुद्रुतम् ॥ ४५ ॥ व्यासउवाच ॥ ततोदेवगणा
स्सर्वेहर्षनिर्भरमानसाः ॥ गणेशंपूजयामासुर्गन्धसारैस्तुमण्डनैः ॥ ४६ ॥ दिव्यधूपैःसुवस्त्रैश्चकुसुमैर्नन्दनोद्भवैः ॥ पारिजातादिभिःपुष्पैरन्यैर्देव
मनोहरैः ॥ ४७ ॥ पूजितोगणपोदेवैरुवाचसुरसत्तमान् ॥ ४८ ॥ गणेशउवाच ॥ गच्छध्वंविबुधादेवंविष्णुमद्भुतसाहसम् ॥ सविधास्यतिवःका
मंवाञ्छितंचततःसुराः ॥ ४९ ॥ व्यासउवाच ॥ स्वंस्वंरथंसमारुह्यगतास्तेहरिमव्ययम् ॥ पीताम्बरंनमस्कृत्यऊचुर्देवगणामुदा ॥ ५० ॥ देवाऊ
चुः ॥ हरात्मजंतुसम्प्राप्यपूजयित्वागणाधिपम् ॥ आगतास्त्वत्सकाशंवैमहात्मन्नघकेशव ॥५१॥ व्यासउवाच ॥ एतच्छ्रुत्वातुदेवानांवचनंहरिरव्य
यः ॥ यथातथ्यमुवाचेदंहनिष्येदैत्यपुङ्गवान् ॥ ५२ ॥ श्रुत्वावागमृतंदेवानारायणमुखाच्च्युतम् ॥ हृष्टाश्चतंमुदाविष्टाद्रव्यैरिष्टैःसमर्चयन् ॥५३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुनर्विष्णुरुवाचददेवानिन्द्रपुरोगमान् ॥ ५४ ॥ विष्णुरुवाच ॥ स्वंस्वंबलंसमाहृत्यसज्जीभवतविज्वराः॥हनिष्येतान्दुराचारान्बलंचैवसमन्ततः॥
अस्त्रवृन्दंतुसंगृह्ययूयंतिष्ठतनिर्भयाः ॥ ५५ ॥ व्यासउवाच ॥ माधवस्यवचःश्रुत्वाप्रगताःसुरपुङ्गवाः ॥ विमानानिसमारुह्यसर्वेदिव्यास्त्रधारिणः
॥ ५६ ॥ देवानांहर्षवाक्यानिदैत्यचाराःश्रुतानिवै ॥ राजानंकथयामासुर्हिरण्याक्षंमहाबलम् ॥ ५७ ॥ श्रुत्वादैत्यपतिस्तत्रचुकोपातिमहाबलः॥
सचिवांस्तुसमाहूयक्रुद्धोवचनमब्रवीत् ॥ ५८ ॥ दैत्यराजउवाच ॥ अधुनेन्द्रादिदेवाश्चनिखिलाःक्रूरबुद्धयः ॥ माधवंचपरीप्सन्तःशम्भौ
सर्वंन्यवेदयन् ॥ ५९ ॥ कथंजयंचलप्स्यामोदैत्यवृन्देऽतिदारुणे ॥ त्रिपुराररिुवाचेदंगणेशंयजतामराः ॥ ६० ॥ पूजयित्वातुतंदेवंजेष्यथासुर
दानवान् ॥ ततोदेवगणैर्हृष्टैःपूजितोगणनायकः ॥ ६१ ॥ गणाधिपेनतुष्टेनक्रूरोदत्तोवरोमहान् ॥ जेष्यथाद्यासुरान्सर्वांस्ततोदेवामुदान्विताः ॥६२॥
हरिंनिवेदयामासुरस्मद्वधपरीप्सवः ॥ हरेर्बाढमुपश्रुत्यरथिनःशस्त्रपाणयः ॥ ६३ ॥ युद्धार्थमधितिष्ठन्तिनिर्जरास्त्वभयामयि ॥ यस्ययाशक्ति
रस्तीहदेवाज्ञेतुंवदत्वलम् ॥६४॥ व्यासउवाच॥ततोराज्ञोवचःश्रुत्वामधुर्वचनमब्रवीत् ॥६५॥ मधुरुवाच ॥ जेष्यामिचहरिंराजन्सहायंमेनियोजय ॥
जितेनारायणेदेवाःसभयास्त्रिदशाध्रुवम् ॥ तस्मान्नारायणोऽस्माकंभागःसर्वपुरञ्जयः ॥ ६६ ॥ व्यासउवाच ॥ ततोधुन्धुश्चसुन्दश्चकालकेयोमहा
बलः॥सहायाश्चमधोस्तस्यजेष्यामोमाधवंनृप ॥६७॥सर्वदैत्यबलेमुख्याश्चत्वारोदृढविक्रमाः॥कालमृत्युसमावीराःसर्वास्त्रविधिपारगाः॥६८॥बलस्त
त्राब्रवीद्वाक्यंयस्मिञ्जयउपस्थितः ॥ तंचजेष्यामिजिष्णुंचप्रतिज्ञामेदृढानृप ॥ ६९ ॥ नमुचिश्चमुचिश्चैवभ्रातरौबलदर्पितौ ॥ ऊचतुस्तौनृपंह्यावां
जेष्यावोवैबलाद्बलौ॥७०॥जम्भश्चैवाब्रवीद्वाक्यमिन्द्रमिन्द्रपुरोगमान्॥जेष्यामिनात्रसन्देहोदैत्याभवतविज्वराः ॥७१॥ त्रिपुरश्चाब्रवीद्वाक्यंजेष्यामि
चविनायकम्॥तावदूचेऽथसेनानीर्मयोदेवान्तकोबली॥७२॥कुबेरंप्रतिरक्षोभिःसर्वांश्चैवहिरण्यकान्॥एतस्मिन्नन्तरेतत्रनारदोमुनिसत्तमः ॥७३॥ गत्वो
वाचहिरण्याक्षंजिष्णुदूतोऽहमागतः॥राज्यंत्यजस्ववाचानःप्राणेषुयदितेहितम् ॥७४॥ नचेद्युध्यस्वमामद्यनवागच्छरसातलम्॥ततःकोपादुवाचेदंनार
दंमुनिसत्तमम्॥७५॥दैत्यराजउवाच ॥ अहिंस्यस्त्वंब्राह्मणाद्यगच्छतूर्णंममाग्रतः॥देवानांचविपत्तिंचकदनंनिधनंपुरः॥पश्यविप्रक्षणेनान्तंप्राप्तंहरिहरा
दिकम्॥७६॥व्यासउवाच॥एवमुक्त्वासदैत्येन्द्रोबलाध्यक्षानुवाचह॥७७॥दैत्यराजउवाच॥सज्जीकृत्यबलंसर्वांश्चार्थांश्चानयतद्रुतम्॥७८॥व्यासउवाच॥ ॥ १९८ ॥
दैत्यराजवचःश्रुत्वाबलाध्यक्षाःसमन्ततः॥बलान्याहूयसहसासन्त्रस्तास्तूर्णमागताः॥७९॥कोटिकोटिसहस्राणिअक्षौहिण्योबलानिच ॥एकैकस्यचवी
रस्यवाहनानिमहान्तिच ॥ ८० ॥ स्यन्दनानिविचित्राणिगजोष्ट्राश्वखरानपि॥सिंहव्याघ्रलुलायांश्चसमारुह्ययुस्तदा ॥ ८१ ॥ वाद्यैःसर्वैश्चभूयिष्ठैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सिंहनादैर्भयानकैः ॥ दिशस्तुपूरयामासुस्सिन्धुवेलाचलाधराः ॥ ८२ ॥ सर्वलोकाश्चवित्रेसुःसमुद्राश्चचकम्पिरे ॥ देवदुन्दुभयोनेदुःसर्वदेवैःस
मीरिताः ॥ ८३ ॥ वाद्यैश्चविविधैरन्यैर्वायुपूर्णैर्घनस्वनैः ॥ सर्वलोकाभयत्रस्तायेचत्रैलोक्यवासिनः ॥ ८४ ॥ अष्टकामागताकाशंघोरंतीव्रंमहा
हवम् ॥ परिघैःपाशशूलैश्चखड्गयष्टिपरश्वधैः ॥ ८५ ॥ शरैश्चनिशितैर्घोरैर्जघ्नुरन्योन्यमाहवे ॥ शस्त्रास्त्रैर्बहुधामुक्तैर्दिशःसर्वानिरन्तरम् ॥ ८६ ॥
विग्रहेषुधरण्यांचपर्वतेषुजलेषुच ॥ देवस्थानेतथाकाशेपर्वताग्रेषुसानुषु ॥८७॥ गह्वरेषुमहारण्येतयोर्युद्धमवर्तत ॥ पुष्कलादिघनानांचवर्षधाराजलं
यथा ॥ ८८ ॥ पतन्त्यस्त्राणिसैन्येषुशतशोऽथसहस्रशः ॥ केचित्पेतुःपृथिव्यांतुशरैःसम्भिन्नविग्रहाः ॥ ८९ ॥ शक्तिभिर्मुसलैश्चान्यैश्चक्रशूलपर
श्वधैः ॥ पतिताःसम्मुखेशूरायुद्धेषुन्यायवर्तिनः ॥ ९० ॥ गच्छन्तिसुरसद्मानिस्वाम्यर्थेयेत्वभीरवः ॥ येचान्येकातराःपापाहन्तारोविमुखान्रणे
॥ ९१ ॥ अन्यायैर्येचयोद्धारस्तेयान्तियममन्दिरम् ॥ त्रिदिवस्थागजारोहाःसैन्धवस्थास्तथापरान् ॥ ९२ ॥ रथस्थांश्चरथारोहाःपदगांश्चपदा
तयः ॥ परस्परंविनिघ्नन्तिशूरायुद्धाभिकाङ्क्षिणः ॥ ९३ ॥ मुदिताःसत्त्वसम्पन्नाधर्मिष्ठाबलसंवृताः ॥ केषांचिद्वाहवश्छिन्नामुसलैर्भिन्नमस्तकाः
॥ ९४ ॥ केशाश्शिरांसिवस्त्राणिनिपेतुर्धरणीतले ॥ मध्यच्छिन्नास्तथाभिन्नाःपेतुरुर्व्यांमहाबलाः ॥ ९५ ॥ खड्गपातैस्तथाचोग्रैश्छिन्नभिन्नाःपर
श्वधैः ॥ गामेवपतिताधीरादिव्यालङ्कारभूषिताः ॥ ९६ ॥ प्रदीप्तोऽभूद्धरादेशोवीरैर्नागैर्हयैरथैः ॥ विविधाभरणैर्नष्टैःपताकाभिश्चकेतुभिः ॥ ९७ ॥
ततोवसुन्धरासर्वासशैलवनकानना ॥ रुधिरौघप्लुतातत्रविबुधासुरयोर्युधि ॥ ९८ ॥ क्रव्यादैर्बहुभिस्तत्रखादितोद्रव्यसञ्चयः ॥ लोहितंप्रचुरंपीतं
रक्षोभिश्चवृकादिभिः ॥ ९९ ॥ अन्यैर्महागणैरेवक्षतजंपवनान्वितम् ॥ खादितंप्रीतिमद्भिश्चफेरुगृध्रगणैर्मुदा ॥ १०० ॥ एतस्मिन्नन्तरेसूरिःसुर
पूज्योबृहस्पतिः ॥ मृतसञ्जीवनीविद्यांसुराणांसञ्जजापह ॥ १ ॥ विशल्यकरणींदिव्यांब्रह्मविद्यांमहाबलाम् ॥ ततोधन्वन्तरिर्विद्वान्सुरवैद्योमनो
जवः ॥ २ ॥ औषधैस्तत्प्रयोगैश्चरणेपर्यटतेमुदा ॥ तत्रदेवाश्चजीवन्तियेमृताश्चमहाहवे ॥ ३ ॥ अव्रणाबलसपन्नाःप्रयुध्यन्तिभृशंपुनः ॥ एवंशत
सहस्रंतुगणंदैत्यस्यचोद्धतम् ॥ ४ ॥ पतितंपुण्ययोगाच्चशरैर्निर्भिन्नकन्धरम् ॥ ततस्तुजयशब्देननन्दन्तिसिद्धचारणाः ॥ ५ ॥ ऋषयःखेचराश्चा
न्येयेचैवाप्सरसांगणाः ॥ गीतिंगायन्तिगन्धर्वाःशशंसुःपरमर्षयः ॥ ६ ॥ अथक्रुद्धोमहातेजादैत्यमुख्योमहाबलः ॥ कालकेयइतिख्यातःसेनानीर्दै
त्यपस्यच ॥ ७ ॥ स्यन्दनस्थोमहावीर्योधनुरादायतत्रच ॥ जघानसुरसङ्घांस्तान्नर्तयामासभूतले ॥ ८ ॥ निरन्तरशरौघेनच्छादितंगगनंतदा ॥ निप
तन्तिशराःसैन्येकोटिकोटिसहस्रशः ॥ ९ ॥ निपतन्तिततोदेवाःसंयुगेष्वनिवर्तिनः ॥ रुधिरोद्गारिणस्सर्वेसिद्धगन्धर्वकिन्नराः ॥ ११० ॥ विशिखैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पीडितादेवानिपेतुर्धरणीतले ॥ केचिच्छरशतैर्भिन्नास्सहस्रैरयुतैस्तथा ॥११॥ पेतुरुर्व्यांमहावीर्यायेरणेसुरपुङ्गवाः ॥ व्यथिताश्चाभवन्सर्वेस्यन्दनस्था
दिवौकसः ॥ १२ ॥ शरैःप्रव्यथितास्तेतुस्थातुंशक्तानसम्मुखे ॥ तेनावगाहितंसैन्यंगजेनेवसरोवनम् ॥ १३ ॥ शरैस्तस्यार्दितादेवावन्नानलसम
प्रभैः ॥ नशेकुःसमरेस्थातुंमघवन्तंययुस्तदा ॥ १४ ॥ चित्ररथइतिख्यातोदेवश्शस्त्रभृतांवरः ॥ ययौस्यन्दनमारुह्ययुद्धंप्रतिधनुर्धरः ॥ १५ ॥ अत्र
वीद्वचनंसोऽपिसेनान्यंतुमहासुरम् ॥ १६ ॥ चित्ररथउवाच॥यथाहंसिमहाशूरसुरसेनांमुदान्वितः ॥ सत्वंप्रशंसनीयश्चशूरोऽसिसुरसंमतः ॥ १७ ॥
हिरण्याक्षप्रियंकर्मकृतंयुद्धेत्वयाधुना ॥ इदानींममबाणैश्चगच्छस्वयममन्दिरम् ॥ १८ ॥ व्यासउवाच ॥ ततश्चकालकेयस्तुस्मितोवचनमब्रवीत् ॥
॥ १९ ॥ कालकेयउवाच ॥ पुरैवविजितोदेवगणःसर्वःप्रलीलया ॥ इदानींतुस्थितंयुद्धेबलंसर्वंतुहेलया ॥ १२० ॥ यदितेनिधनेप्रीतिरस्तीहसुरपु
ङ्गव ॥ एभिस्त्वांनिशितैर्बाणैर्नयामियममन्दिरम् ॥ २१ ॥ व्यासउवाच ॥ इत्युक्त्वापरमक्रुद्धोबाणमन्तकसन्निभम् ॥ जघानसमरेवीरस्त्रिभिश्चि
च्छेदसोऽम्बरे ॥ २२ ॥ पुनर्बाणांश्चसमरेयोजयित्वाद्भुतंरुषा ॥ जघानप्रचुरान्दैत्यांस्तांश्चकर्त्तसलाघवात् ॥ २३ ॥ ततोऽन्योन्यंशरैस्तीक्ष्णैःका
लानलसमप्रभैः ॥ युद्धेधनुष्मतांश्रेष्ठश्चिच्छेदसुविवेगतः ॥ २४ ॥ तद्युद्धमभवद्देवदैत्ययोर्धर्मतोभृशम् ॥ द्रष्टुकामागताःपार्श्वमृषिदेवाःसुरोरगाः
॥ २५ ॥ एवंशतसहस्राणिबाणानांविधृतानिच ॥ अन्योन्यंसमरेवीरौविजयायविरेजतुः ॥ २६ ॥ अथक्रुद्धोमहातेजागन्धर्वाणांपतिस्तदा ॥ त्रि
भिर्बिभेदबाणैश्चललाटेहृदिपञ्चभिः ॥ २७ ॥ सप्तभिर्जठरेनाभौवस्तौतस्यसपञ्चभिः ॥ शरैःसम्पातितोदैत्योमुग्धःकश्मलतांगतः ॥ २८ ॥ शिथि
लीकृतचापश्चलेभेसंज्ञांचिराद्बली ॥ लब्धसंज्ञस्त्रिभिर्बाणैस्सबिभेदसुरोत्तमम् ॥ २९ ॥ चकर्त्तधनुरस्त्रैश्चदैत्यराजस्यपश्यतः ॥ ततोबाणसहस्रैस्तुका
लान्तकसमप्रभैः ॥ १३० ॥ बिभेददैत्यसिंहंतुसुराणामुत्तमोबली ॥ हतचेताःसदैत्येन्द्रोबहुशोणितसंस्रवः ॥ ३१ ॥ विह्वलोबहुबाणार्तःशूलंज
ग्राहदानवः ॥ शूलहस्तस्यतस्यैवचतुर्भिस्तुरगान्शरैः ॥ ३२ ॥ हत्वाचपातयामासत्रिभिर्यन्तारमेवच ॥ जघानशूलमुर्वीस्थस्ततोगन्धर्वसत्तमम्
॥ ३३ ॥ विचकर्तत्रिभिर्बाणैःशूलंचित्ररथोबली ॥ शूलंचनष्टंदृष्ट्वाहतभोगमिवोरगम् ॥ ३४ ॥ गृहीत्वामुद्गरंघोरंप्रदुद्रावसुरंबली ॥ समुद्गरंसमा
यातंदैत्यसेनाधिपंतदा ॥ ३५ ॥ विचकर्त्तशिरोदेहादर्धचन्द्रेणसम्भ्रमात् ॥ सपपातमहीपृष्ठेसञ्चचालवसुन्धरा ॥ ३६ ॥ ततोदैत्यगणाः
सर्वेविमुखाविप्रदुद्रुवुः ॥ १३७ ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेकालकेयवधोनामसप्तषष्टितमोऽध्यायः ॥ ६७ ॥ व्यासउवाच ॥
भ्रातरंनिहतंदृष्ट्वाकालेयोनामदानवः ॥ चित्ररथंप्रदुद्रावधृत्वाबाणंसकार्मुकम् ॥ १ ॥ दृष्ट्वाऽसुरंविधावन्तंकालमृत्युसमप्रभम् ॥ अरौत्सीत्तंमहावीर्यो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जयन्तःपाकशासनिः॥२॥ अब्रवीच्चमहातेजादैतेयंसुरसत्तमः ॥ तथ्यंधर्माभिसंयुक्तंलोकद्वयहितंध्रुवम् ॥३॥जयन्तउवाच॥शस्त्राभिघातदुःखार्तंकश्म
लंचान्यसंयुतम्॥प्रभग्नंचनिरस्तंचयोहन्तिसचबालिशः॥४॥सुचिरंरौरवंभुक्त्वातस्यदासोभवेच्चिरम्॥तस्मान्माऽसुंप्रयुध्यस्वयुद्धधर्मस्थितोभव॥५॥
व्यासउवाच॥ जयन्तमब्रवीद्वाक्यंकालेयःक्रोधमूर्च्छितः ॥६॥ कालेयउवाच॥निहत्यभ्रातृहन्तारमथत्वांहन्मिसाम्प्रतम्॥ ७ ॥व्यासउवाच॥ततस्तं
चासुरश्रेष्ठंकालानलसमप्रभम् ॥ जयन्तोनिशितैर्बाणैर्जवानसुरसत्तमः ॥ ८ ॥ निचकर्त्तशरान्सोऽपित्रिभिर्विव्याधचासुरः ॥ ततःकोपसमाविष्टौ
नाराचैर्दशभिस्तथा ॥ ९ ॥ शरांश्चिच्छिदतुस्तत्रबिभिदतुश्चपरस्परम् ॥ स्यन्दनाच्चतयोरेवबहुसुस्रावशोणितम् ॥ १० ॥ यथावृष्टिगणंप्राप्यनदी
गैरिकवाहिनी ॥ तथातौचमहावीर्यौनक्षीणौनचकातरौ ॥ ११ ॥ नशर्मपरिलेभातेपरस्परजयेषिणौ ॥ अथतस्यचदैत्यस्यधनुश्चिच्छेदचेषुणा ॥
॥ १२ ॥ यन्तारंपञ्चभिर्बाणैःपातयामासभूतले ॥ अष्टाभिर्निशितैर्बाणैश्चतुरोऽश्वानपातयत् ॥ १३ ॥ शक्तिंसङ्गृह्यभूमिष्ठःकुमारंचजघानह ॥
आयान्तींवह्निकूटाभांशरैश्चिच्छेदपञ्चभिः ॥१४॥ गदामादायवेगाच्चजयन्तंसजघानह ॥ गदयापीडितंसाश्वंसवरूथंसकूबरम् ॥ १५ ॥ पातयित्वा
धरण्यांचसिंहनादंननादह ॥ लाघवात्सधरांगत्वागदापाणिरुपस्थितः ॥ १६ ॥ वज्रपाताद्यथाशब्दोलोकानांदुःसहोभवेत् ॥ तथातयोर्गदापातेश
ब्दःस्यात्तुमुहुर्मुहुः ॥ १७ ॥ एवंतयोर्गदायुद्धंयावदब्दचतुष्टयम् ॥ प्रभग्नेतेगदेखस्थौखड्गचर्मधरावुभौ ॥ १८ ॥ तदापदातिनोर्युद्धमद्भुतंलोमहर्ष
णम् ॥ दृष्ट्वाचविस्मयंजग्मुर्देवासुरमहोरगाः ॥ १९ ॥ खड्गपातैर्मुहूर्तान्तेतयोश्छिन्नेतुवर्मणी ॥ अभवत्खड्गयुद्धंचतयोर्युद्धातिशीलिनोः ॥ २० ॥
दधारचिकुरेतस्यजयन्तोभीमविक्रमः ॥ शिरश्छित्त्वास्यखड्गेनपातयामासभूतले ॥ २१ ॥ ततस्तुजयशब्देनदेवाःसर्वेननन्दिरे ॥ प्रभग्नादैत्यस
ङ्घाश्चदिशःसर्वाःप्रदुद्रुवुः ॥ २२ ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेकालेयवधोनामाष्टषष्टितमोऽध्यायः ॥ ६८ ॥ व्यासउवाच ॥ एतच्छ्रुत्वातु
दैत्येन्द्रोहिरण्याक्षोमहाबलः ॥ सरोषश्चातिताम्राक्षोह्यसुरानादिदेशह ॥ १ ॥ हिरण्याक्षउवाच ॥ स्वयंगच्छामियुद्धायदेवानांविजिघांसया ॥ नाग
च्छन्तिनयुद्धयन्तेतेनमार्गाद्विशन्त्वितः ॥२॥व्यासउवाच॥ एतच्छ्रुत्वातुवचनंशेषादैत्यगणाधिपाः ॥ युद्धायप्रययुःसर्वेशूलपाशातिपण्डिताः ॥३॥
अधिकंपूर्वसैन्याच्चतथाशतगुणैरपि ॥ निरन्तरंतथाकाशंप्रययुर्युद्धकाङ्क्षिणः ॥ ४ ॥ ततोरुद्रास्ससाध्याश्चविश्वेचवसवस्तथा ॥ स्कन्दश्चगणपश्चैववि
ष्णुजिष्णुपुरोगमाः ॥ ५ ॥ सर्वेयोद्धुंगतास्तेचहृष्टारणसमुत्सुकाः ॥ एतस्मिन्नन्तरेयुद्धंदेवदानवयोरपि ॥ ६ ॥ नभूतंनश्रुतंपूर्वंसर्वलोकभयङ्करम् ॥
शस्त्रास्त्रैर्बहुधायुक्तंशिशिरेणेवकाननम् ॥७॥ धरांस्वर्गौकआकाशंसंरुध्ययुद्धमाबभौ ॥ अन्योन्यंजघ्नुराकाशेतथान्योन्यंमहीतले ॥८॥ शक्तिभिर्मु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सलैर्भल्लैर्बहुभिःशरवृष्टिभिः ॥ दारुणैःखड्गपातैश्चतथाचक्रपरश्वधैः ॥ ९ ॥ अन्यायुधैश्चविविधैर्निर्जघ्नुस्तेपरस्परम् ॥ अभवन्घोररूपाणिधरा
काशेऽव्ययानिच ॥ १० ॥ शस्त्रैःशरैरसृक्पातैःकङ्कवायसजम्बुकैः ॥ यथामुसलधाराभिर्घनावर्षन्तिलोहितम् ॥ ११ ॥ तथैवक्षतजैःस्रस्तैस्वाङ्गा
च्चदेवदानवाः ॥ केचित्पतन्तिमुह्यन्तिस्खलन्तिचहसन्तिच ॥ १२ ॥ मुञ्चन्तिचार्तनादांश्चसिंहनादंमुहुर्मुहुः ॥ केषांचिद्बाहवश्छिन्नाश्छिन्नपादास्त
थापरे ॥ १३ ॥ छिन्नपार्श्वोदराःकेचिन्निपेतुःशतशोभुवि ॥ कोटिकोटिसहस्राणिगजवाज्यसुराणिच ॥ १४ ॥ अपतन्धरणीपृष्ठेरक्तौघेबहु
धाभुवि ॥ ततस्तुधरणीपृष्ठेत्वभवल्लोहितार्णवः ॥ १५ ॥ विपरीतास्ततोनद्यःसद्यस्तत्रविसुस्रुवुः ॥ तृणकाष्ठपरास्तत्रशक्तयोदारुसञ्चयाः ॥ १६ ॥
मुद्गरामुसलाःशूलामकराद्याभवन्तिच ॥ जयन्तिकाध्वजामीनाःकमठाश्चर्मकायकाः ॥ १७ ॥ शरादिभिर्महोष्ट्रैश्चनिरुद्धाःप्रचुरैस्तथा ॥ केशचा
मरशैवालाःसम्पूर्णास्तास्ततस्ततः॥१८॥ पतद्भिश्चतथान्यैश्चविविधैःक्षतजार्णवः ॥ तदावसुन्धरासर्वासशैलवनकानना ॥१९॥ रुधिरौघामहाघोरास
र्वलोकभयङ्करा ॥ स्कन्दस्यशक्तिपातेनगतादैत्यायमक्षयम् ॥ २० ॥ पर्शुनापरमेणैवअग्निनाग्निशिखैःशरैः ॥ वरुणस्यचपाशेनबद्धामग्नायमक्षये ॥
॥ २१ ॥ येषांपुत्रैश्चपौत्रैश्चपुरोगैःसचिवैस्तथा ॥ निपातिताश्चदैतेयाःशरशक्त्यृष्टिवृष्टिभिः ॥ २२ ॥ ग्रहैश्चश्वसनैरेवयक्षगन्धर्वकिन्नरैः॥महत्यागदया
चैवकुबेरेणचधीमता ॥ २३ ॥ घनानांनिकरैर्वज्रैस्तुषारैर्विधुनेरितैः ॥ पन्नगानांविषैर्घोरैर्दैत्याःपेतुर्धरातले ॥ २४ ॥ अन्यैश्चविविधैर्देवैःकोटिकोटिस
हस्रशः ॥ पातिताःप्रययुस्सर्वेधरण्यांतुगतासवः ॥ २५॥ देहांस्त्यक्त्वादिवंयान्तिकेचिच्चयममन्दिरम् ॥ केचिद्गच्छन्तिपातालंपुण्यापुण्यप्रयोगतः॥
॥ २६ ॥ एतस्मिन्नन्तरेवेदाञ्जजल्पुःपरमर्षयः ॥ स्वस्त्यस्तुब्राह्मणेभ्यश्चगोभ्यःस्त्रीभ्यस्तपस्विषु ॥२७॥ प्रयुध्यमानेष्वन्येषुसाम्प्रतंसर्वजन्तुषु ॥ वि
बुधैरर्दितादैत्याःशेषाःपर्वतमाश्रिताः ॥२८॥ प्रजग्मुश्चदिशःसर्वाःकातरारणभीरवः ॥ दैत्यव्यूहेप्रभग्नेचबलोनाममहाबलः ॥ २९ ॥ अर्दयामासदेवां
श्चसंयम्याग्निसमैःशरैः ॥ तस्यबाणार्दितादेवाबहवोबलदर्पिताः ॥३०॥ पतिताधरणीपृष्ठेकेचिद्भग्नारणाजिरे ॥ दृष्ट्वातस्यमहत्कर्मदारुणंलोकभीषणम्
॥ ३१ ॥ शशंसुर्ऋषयोदेवास्तत्रशिघ्राःप्रचुकुशुः ॥ अथक्रुद्धोमहातेजाश्शतक्रतुररिन्दमः ॥ ३२ ॥ जघानशरसन्दोहैर्बलंबलवतांवरम् ॥ सोऽपि
क्रुद्धोबलोयुद्धेतथाशक्रंससम्भ्रमः ॥ ३३ ॥ रुधिरेणावसिक्ताङ्गौप्रसृतेनमहाबलौ ॥ तौयथामाधवेमासिपुष्पितौकिंशुकद्रुमौ ॥ ३४ ॥ चक्राणिच
सहस्राणिशूलानिमुसलानिच ॥ निचखानरणेशक्रेचपलेचासुरोत्तमः ॥ ३५ ॥ तानिचक्राणिशूलानिनिचकर्त्तशरोत्तमैः ॥ सुरराट्सहसाभ्रान्तोली
लयासमरेबली ॥ ३६ ॥ सचदैत्योमहातेजाःशक्त्याचैवपुरन्दरम् ॥ निजघानतदातूर्णंगजस्थंचस्तनान्तरे ॥ ३७ ॥ तयाविनिहतःशक्रःप्रचचालग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जोपरि ॥ लब्धसंज्ञोगलेजिष्णुर्बिभेददनुजंक्षणात् ॥ ३८ ॥ रथसंस्थस्यहस्तौचधनुश्चिच्छेदचेषुणा ॥ चर्मतीक्ष्णंध्वजंतस्यशरेणैकेनवीरहा ॥
॥ ३९ ॥ चतुर्भिर्निशितैर्बाणैर्विव्याधचतुरोहयान् ॥ शरेणैकेनसूतस्यशिरश्चिच्छेदतत्क्षणात् ॥ ४० ॥ छिन्नधन्वाहतरथोहताश्वोहतसारथिः ॥
निपत्यमूर्च्छितःपृथ्व्यांमुहूर्तान्मृत्युमापसः ॥ ४१ ॥ अथक्रुद्धोमहादैत्योनमुचिःसुरदर्पहा ॥ गदामादायसहसासजघानमहागजम् ॥ ४२ ॥
यथामेरुगिरेःशृङ्गेवज्रपातोभवेद्ध्रुवम् ॥ तथैवचमहाशब्दोह्यभवल्लोमहर्षणः ॥ ४३ ॥ प्रहारेणार्दितःपद्मीसञ्चचालसविह्वलः ॥ रुधिरेणावसिक्ता
ङ्गोविमुखोवेदनातुरः ॥ ४४ ॥ शतक्रतुंविधावन्तिशतशोऽथसहस्रशः ॥ अर्धचन्द्रैःक्षुरप्रैश्चचिच्छेदपाकशासनः ॥ ४५ ॥ जन्तुभिस्तस्यमायाभि
रर्दितास्सुरपुङ्गवाः ॥ भूमौनिपतिताःकेचित्केचित्सुप्तारथोपरि ॥ ४६ ॥ दृष्ट्वातस्यमहत्कर्ममाधवोविशिखांस्तथा ॥ जन्तुभूतान्सचक्रेणचिच्छेददेह
लग्नकान् ॥ ४७ ॥ ततोजिष्णुस्त्रिभिर्बाणैःपातयामासभूतले ॥ पृथिव्यांपतितोदैत्योमूर्च्छितःस्खलितःपुनः ॥ ४८ ॥ दधारमुद्गरंघोरंशक्रंहन्तुंस
मुद्यतः ॥ ततोजघानमघवाकुलिशेनमहासुरम् ॥ ४९ ॥ सपपातमहीपृष्ठेक्षतवक्षामहाबलः ॥ साधुसाध्वितिदेवाश्चसिद्धाश्चैवमहर्षयः ॥ ५० ॥
अपूजयंस्तदाशक्रंबहुभिःपुष्पवृष्टिभिः ॥ ततोदैत्यगणाःसर्वेभीतास्तत्रप्रदुद्रुवुः ॥ ५१ ॥ गीतंगायन्तिगन्धर्वाननृतुश्चाप्सरोगणाः ॥ ५२ ॥ इति
श्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेबलनमुचिवधोनामैकोनसप्ततितमोऽध्यायः ॥ ६९ ॥ व्यासउवाच ॥ बलंचनिहतंदृष्ट्वानमुचिंचस्वकाग्रजम् ॥
मुचिस्तत्राब्रवीद्वाक्यंज्येष्ठोमेसूदितस्त्वया ॥ १ ॥ परोक्षेणाधुनात्वांचशरैर्नेष्यामिभास्करिम् ॥ २ ॥ व्यासउवाच ॥ तमब्रवीन्महातेजाःशक्रः
सर्वसुरार्चितः ॥ ३ ॥ शक्रउवाच ॥ भ्रातुस्तेधर्मपन्थानमिदानींलप्स्यसेध्रुवम् ॥ वह्नेरुष्णमविज्ञायप्रमोहाच्छलभायथा ॥ सहसाप्रविशन्त्यग्निं
तथामांयोद्धुमिच्छसि ॥ ४ ॥ व्यासउवाच ॥ एवंब्रुवाणमिन्द्रंचजघानविशिखैस्त्रिभिः ॥ सचिच्छेदत्रिभिर्बाणैःशक्रःपरपुरञ्जयः ॥ ५ ॥ ततोजघानदश
भिरिन्द्रमैरावणंत्रिभिः ॥ सप्तभिर्मातलिंछित्वानादैरुच्चैर्ननादह ॥ ६ ॥ शक्रंप्रतिपुनर्दैत्योभ्रामयामाससम्भ्रमात ॥ आयसींतांगदांकोपान्महा
बलपराक्रमः ॥ ७ ॥ ततस्तुलाघवाच्छक्रोजघानकुलिशेनहि ॥ भिदुरस्यावपातेनगतासुर्निपपातह ॥ ८ ॥ दनुजस्यप्रपातेनसञ्चचालवसुन्धरा ॥
देवाःप्रचक्रुर्नृत्यानिदानवाविप्रदुद्रुवुः ॥ ९ ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेमुचिवधोनामसप्ततितमोऽध्यायः ॥ ७० ॥ व्यासउवाच ॥
तारेयोबलसम्पन्नःशक्रतुल्यपराक्रमः ॥ जघानविशिखैस्स्कन्दंपितृघातिनमाहवे ॥ १ ॥ ततस्स्कन्दोमहाबाहुर्हरितुल्यपराक्रमः ॥ विचकर्त
शरांस्तांस्तान्निर्बिभेदशरोत्तमैः ॥ २ ॥ सदैत्यस्सहसास्कन्दंछादयामासमार्गणैः ॥ असम्भ्रान्तःप्रचिच्छेदविशाखोविशिखैस्तदा ॥ ३ ॥ तारे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योऽग्निशरैःस्कन्दंजघानरणमूर्धनि ॥ विशिखंभिदुरप्रख्यंचखानहरनन्दने ॥ ४ ॥ वैश्वानरेणसेनानीस्तत्रसम्पर्यवारयत् ॥ रौद्रमस्त्रंपुनर्दैत्यःप्रेषयामासतंप्रति ॥ ५ ॥ तन्निरस्तंकृतंतेनबाणेनास्फालितेनच ॥ अघोरंप्राक्षिपद्दैत्योघोररूपसुदारुणम् ॥ ६ ॥ भूधराविटपास्सिंहास्तथासर्पादयःशराः ॥ धावन्तिपार्वतीपुत्रंकोटिकोटिसहस्रशः ॥ ७ ॥ छित्त्वातांस्तुशरान्स्कन्दोबिभेददैत्यपुङ्गवम् ॥ आपादंशीर्षपर्यन्तंशरैरस्यर्कसन्निभैः ॥ ८ ॥ स्वर्णपुङ्खाःशरालग्नादेहेदैत्यपतेर्भृशम् ॥ रेजुस्तेस्वर्णशकलायथाकृष्णशिलोच्चये ॥ ९ ॥ तस्यदेहात्ततश्चैवबहुसुस्रावशोणितम् ॥ यथाचमाधवेमासिपुरुपुष्पश्शमीतरुः ॥ १० ॥ स्यन्दनाधश्वराश्वाश्चशिशियिरेभूमिलग्नकाः ॥ अथक्रुद्धोमहादैत्यःशूलंभीमंचदारुणम् ॥ ११ ॥ धृत्वातंप्रतिचिक्षेपकालमृत्युसमप्रभम् ॥ पार्वतीनन्दनेनापिशूलंपाशुपतेनह ॥ १२ ॥ क्षिप्तंतेनकृतंदग्धंमुहूर्तेनरणाजिरे ॥ पुनःशक्तिंमुमोचाथब्रह्मदत्तान्तुदानवः ॥ १३ ॥ शूलंप्रतिजघानाथशतकूटसमप्रभम् ॥ ततोऽस्त्रेवज्रसङ्काशेजघ्नतुस्तेवियत्यपि ॥ १४ ॥ तयोस्सवीर्ययोरस्त्रेधरण्यांप्रणिपेततुः ॥ ततोदैत्यपतिःस्कन्दंशरैरग्निशिखोपमैः ॥ १५ ॥ अर्दयामाससहसाघनधारेवपर्वतम् ॥ तांस्तुच्छित्त्वामहाबाहुःसेनानीश्चापमस्यवै ॥ १६ ॥ विचकर्तार्धचन्द्रेणतथायन्तुःशिरोमहत् ॥ तथाश्वान्बहुभिर्बाणःपातयामासभूतले ॥ १७ ॥ गृहीत्वामुसलंवेगात्सदुद्रावस्थलेगुहम् ॥ जघानतेनदैत्येन्द्रःशिखिनंशिखिवाहनम् ॥ १८ ॥ ततोमोहंगतोबर्हीप्रचकम्पेमुहुर्मुहुः ॥ ततःस्कन्दःपुनस्तंचजघानासुरपुङ्गवम् ॥ १९ ॥ प्रचिच्छेदासिनावेगान्मुसलंचातिदारुणम् ॥ तारेयःशक्तिमादायजघानक्रौञ्चदारणम् ॥ २० ॥ सोऽपिशक्तिंमुमोचाथअमोघांदुष्टघातिनीम् ॥ ततःसन्दह्यसाशक्तिर्विश्वप्रलयकारिणी ॥ २१ ॥ यमदण्डसमातंचभित्त्वापुनर्गुहंगता ॥ सगतासुःपपातोर्व्यांचालयंश्चवसुन्धराम् ॥ २२ ॥ पुष्पधूपादिभिःस्कन्दःसर्वदेवैःप्रपूजितः ॥ २३ ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेतारेयवधोनामैकसप्ततितमोऽध्यायः ॥ ७१ ॥ व्यासउवाच ॥ ततोदेवान्तकोदैत्योव्यनदत्समरंप्रति ॥ रणंचकारधर्मेणसन्दष्टौष्ठपुटोबली ॥१॥ सगत्वाचाब्रवीद्वाक्यंसर्वलोकविगर्हितम् ॥ २ ॥ देवान्तकउवाच ॥ नजानासिमहद्धर्मंदुष्टमोहाद्यथाक्रमम् ॥ पापपुण्यप्रयोगेणनिग्रहानुग्रहेप्रभुः ॥३॥ अहंचनिर्मितोधात्राकरोमितवशासनम् ॥ नजानासियतोधर्मंकालमृत्युपुरःसरः ॥४॥ नरोगोनजराकालोनमृत्युर्नचकिङ्करः ॥ धर्मात्प्रचलितःकर्मीकर्ष्यंयातिदिवानिशम् ॥ ५ ॥ व्यासउवाच ॥ उक्त्वाचैवंमहावीर्यंयमंधर्मैकसाक्षिकम्॥ सजघानत्रिभिर्बाणैःकालमृत्युसमप्रभैः ॥६॥ प्रचिच्छेदसधर्मात्मातेतवन्यैर्विशिखैस्त्रिभिः ॥ ततस्तूच्चैःशरैःप्राज्यैर्युगान्तानलसप्रभैः ॥७॥ निजघानयमंसङ्ख्येसचिच्छेदशरैःशरान् ॥ एतस्मिन्नन्तरेक्रुद्धौपरस्परजयैषिणौ ॥ ८ ॥ जघ्नतुःसमरेऽन्योन्यंमहाबलपराक्रमौ ॥ अहोरात्रंतयोर्युद्धमवर्त्ततसु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दारुणम् ॥ ९ ॥ एतस्मिन्नन्तरेक्रुद्धः शक्त्याप्रशमनंरुषा ॥ बिभेददैत्यशार्दूलोह्यहङ्कारयुतोबली ॥ १० ॥ तामेवाथरुषाधर्मोगृहीत्वाशक्तिकांद्रुतम् ॥
निजघानतयैवासुंस्तनयोरन्तरेभृशम् ॥११॥ सविह्वलितसर्वाङ्गोमुखादागतशोणितः ॥ ततःक्रुद्धोमहातेजाधृत्वादण्डंसुदारुणम् ॥१२॥ अमोघंपात
यामासतस्यदैत्यस्यविग्रहे ॥ साश्वंरथंतथासूतंयोद्धारंशस्त्रसञ्चयम् ॥१३॥ चकारभस्मसात्तंचशमनःक्रोधमूर्च्छितः ॥ पतितेचतथादैत्येदुर्धर्षोनाम
दानवः ॥१४॥ शमनंशूलहस्तस्तुप्रदुद्रावजिघांसया ॥ शूलहस्तंसमायान्तंवडवानलसन्निभम् ॥१५॥ आससादरणेमृत्युःशक्तिहस्तोऽतिनिर्भयः ॥
सचदृष्ट्वाऽसुरोमृत्युंशूलेनैवजघानह ॥ १६ ॥ शक्तिंचैवततोमृत्युःप्रचिक्षेपरणाजिरे ॥ संदह्यसहसाशूलंवह्निकूटसमप्रभम् ॥ १७ ॥ दैत्यस्यहृद
यंभित्त्वागतासाचधरातलम् ॥ सरथःसपपातोर्व्यांशक्तिजर्जरविग्रहः ॥१८॥ अथान्योदुर्मुखोमृत्युंकृष्टचापोमहाबलः ॥ खड्गचर्मधरःकालोरथएव
गतोऽभवत् ॥१९॥ दृष्ट्वातंविशिखैःप्राज्यैर्जघानसयमंरणे॥सचाप्लुत्यरथाद्देवोह्यसिनाचसकुण्डलम् ॥२०॥ शिरश्चिच्छेदसहसापातयित्वाचभूतले ॥
हतशेषंबलंसर्वंप्रदुद्रावदिशोदश ॥२१॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेदेवान्तकदुर्धर्षदुर्मुखवधोनामद्विसप्ततितमोऽध्यायः ॥७२॥ व्यासउवाच ॥
अथान्योनमुचिःक्रुद्धःस्यन्दनस्थोदिवौकसः ॥ विशिखैरर्दयामासघोरैराशीविषोपमैः ॥ १ ॥ ततस्तुसंयुगेदेवाःसिद्धकिन्नरपन्नगाः ॥ नशक्नुव
न्तिबाणानांवेगंसोढुंसमन्ततः ॥ २ ॥ रथमुच्चैश्श्रवोऽश्वेनयुक्तंमातलिनेरितम् ॥ पुरुहूतःसमास्थायप्रागमत्तंमहाबलम् ॥ ३ ॥ दृष्ट्वाशक्रंमहावीर्यं
नमुचिर्दैत्यपुङ्गवः॥अब्रवीद्वासवंसंख्येवचनंसानुगेतदा ॥४॥ नमुचिरुवाच॥प्राकृतंनिर्जरंहत्वानयशोऽस्तिनचप्रियम्॥नलाभकृतकंवापिनजयस्तुपुर
न्दर ॥ ५ ॥ तस्मात्त्वयिहतेऽत्रैवसर्वंभवतिशाश्वतम् ॥ देवराज्यंप्रलप्स्यामिसुखंभोग्यंसुरालये ॥ ६ ॥ व्यासउवाच॥तमब्रवीन्महातेजाःशक्रःपरपु
ञ्जयः ॥ ७ ॥ इन्द्रउवाच ॥ शूरतावाक्यमात्रेणसर्वत्रसुलभाभवेत् ॥ महापराक्रमंयद्वाअस्तितेदानवाधम ॥ ८ ॥ दर्शयस्वाहवेवीर्यंपुरंनेष्यामि
भास्करेः ॥ ९ ॥ व्यासउवाच॥एतच्छ्रुत्वामहातेजाश्चुकोपदैत्यपुङ्गवः ॥ पञ्चभिर्निशितैर्बाणैर्जघानसुरसत्तमम् ॥ १० ॥ तांस्तुचिच्छेदमघवाक्षु
रप्रैःपञ्चभिर्द्रुतम् ॥ जग्मतुस्तौमहावीर्यौसमरेविजयैषिणौ ॥ ११ ॥ अन्योन्यंसहसावेगाच्छरैश्चिच्छिदतुःशरान् ॥ बिभिदातेऽथगात्राणिविशिखै
र्भिदुरोपमैः ॥ १२ ॥ अत्यपूर्वंकृतंकर्मताभ्यामेवररणेभृशम् ॥ लाघवंशरसन्धानग्रहमोक्षेषुदुर्लभम् ॥ १३ ॥ दृष्ट्वातुविस्मयंजग्मुर्देवासुरगणा
स्तदा ॥ एतस्मिन्नन्तरेदैत्योमायास्त्रंप्रमुमोचह ॥ १४ ॥ विशिखाःशतशस्तत्रविनिश्चेरुस्समन्ततः ॥ शक्रःकोपात्पुनःशीघ्रंधनुरुद्यम्यवीर्यवान्
॥ १५ ॥ जघानविशिखैरुग्रैःसर्वगात्रेषुसञ्ज्वलन् ॥ ततोमार्गणसाहस्रैरष्टभिस्त्वधिकंतथा ॥ १६ ॥ बिभिदातेततोऽन्योन्यंचिच्छिदातेपरस्परम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शरैर्निरन्तराकाशंददृशुस्तत्रसंयुगे ॥ १७ ॥ निपतन्तिधरापृष्ठेखड्गपातैःसहस्रशः ॥ एवंसुदीर्घकालेतुगतेतस्मिन्महाहवे ॥ १८ ॥ मायास्त्रंदर्श
यामासक्रूरकृन्नमुचिस्तदा ॥ तामसंत्रिषुलोकेषुकृतंस्यात्तुनिरन्तरम् ॥ १९ ॥ परस्परंनपश्यन्तिदेवासुरगणाभृशम् ॥ सूर्यचन्द्रग्रहाणांचवह्नीनांचदि
वौकसाम् ॥ २० ॥ तस्मिंस्तमसिदुष्पारेगभस्तिर्नैवदृश्यते ॥ दैत्यस्यचततस्तूर्णंशरैरग्निशिखोपमैः ॥ २१ ॥ विभग्नाःसर्वदेवाश्चशक्रश्चरणसंमु
खे ॥ शरैर्विभिन्नदेहास्तुनिपेतुर्धरणीतले ॥ २२ ॥ प्रभग्नाश्चापरेशूरास्संयान्तिचदिशोदश ॥ कूटंतस्यपरिज्ञायसर्वदेवार्चितोहरिः ॥ २३ ॥ सौम्य
मस्त्रंमुमोचाथदिविसूर्यशतप्रभम् ॥ विलम्बितंसमालोक्यशक्त्याचबहुघण्टया ॥ २४ ॥ जघानोरसिदैत्यस्यसपपातव्यथान्वितः ॥ चिरात्संलभ्य
संज्ञांचदैतेयःक्रोधमूर्च्छितः ॥ २५ ॥ गत्वावेगात्सुरश्रेष्ठमैरावतंदधारह ॥ त्रासयामाससुतरामिन्द्रस्यद्विरदंरुषा ॥ २६ ॥ धृत्वासतुगजंसेन्द्रंमुमोच
धरणीतले ॥ ततोभूमिगतःशक्रःकश्मलंचक्षणंगतः ॥ २७ ॥ अवप्लुत्यसदैत्येन्द्रोगजदन्तान्तरस्थितः ॥ शक्रंग्रहीतुकामस्यवधार्थंयूथपस्यसः ॥
॥ २८ ॥ असिनाऽसुरमुख्यस्यशिरश्छित्वान्यपातयत् ॥ सर्वेप्रजहृषुर्देवागन्धर्वाललितंजगुः ॥ २९ ॥ मुदितास्तेचमुनयःस्तुवन्तिसुरसत्तमम्
॥ ३० ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेद्वितीयनमुचिवधोनामत्रिसप्ततितमोऽध्यायः ॥ ७३ ॥ व्यासउवाच ॥ दिव्यंरथंसमास्थायधनुर्हस्तोब
लैर्युतः ॥ गत्वाचमाधवंसङ्ख्येदेवासुरगणाग्रतः ॥ १ ॥ क्रोधेनमहताविष्टोमधुर्निर्जरमर्दनः ॥ अब्रवीत्परुषंवाक्यमव्ययंहरिमीश्वरम् ॥ २ ॥ नाराय
णनजानासियुद्धधर्ममितःकथम् ॥ अन्यायाद्दुर्वधोपायंकृत्वानष्टोनशोचसि ॥३॥ अनेनपङ्क्योगेनव्यवहारेकृतस्यच ॥ सुरत्वंचोपनष्टंस्यादन्यसृष्टिं
करोम्यहम् ॥४॥ त्वामेवनिहनिष्यामिसहदेवगणैरिह ॥ इत्युक्त्वाधनुरादायजघानविशिखैर्विभुम् ॥ ५ ॥ माधवस्तान्बिभेदाथशरैर्वज्रसमप्रभैः ॥
बहुभिस्सर्वगात्रेषुजघानचमधुंततः ॥ ६॥ माययाच्छादितःसोऽभूद्दैत्यस्तंसुरसत्तमाः ॥ येवैशूराश्चरुद्राद्यास्त्रिदशास्सत्त्वधारिणः ॥ ७ ॥ देव्योना
नाविधाश्चापिसायुधावाहनान्विताः ॥ सेनान्योगणपादेवालोकेशहरविष्णवः ॥ ८ ॥ अन्येग्रहादयोदेवाःसर्वेयुध्यन्तिसङ्गताः ॥ विनष्टाश्चतदादेवा
मधोर्वैमाययाध्रुवम् ॥ ९॥ संमुखेविमुखेचैवशरशक्त्यृष्टिवृष्टिभिः ॥ पतन्तिसहसादेवाभूमौशस्त्राभिपीडिताः ॥१०॥ एतस्मिन्नन्तरेविष्णुर्गृहीत्वाच
सुदर्शनम् ॥ असुरान्माययादेवाञ्जघानरणमूर्धनि ॥ ११ ॥ अथतेषांशिरांस्येषच्छित्वाचैवसहस्रशः ॥ पातयामासदेवेशोदैत्यानांचदुरात्मनाम्
॥१२॥ एवमन्यान्विभुर्दैत्यान्द्रावयामाससङ्गरात् ॥ तंदृष्ट्वामुनयोदेवाःसर्वेविस्मयमाययुः ॥ १३ ॥ कर्णेकर्णेप्रजल्पन्तेदेवामुनिगणास्तथा ॥१४॥
मुनिदेवाऊचुः ॥ सदादेवैकगोप्ताचहरिरव्ययईश्वरः ॥ सर्वसाक्षीत्वयंदेवोदैत्यजिष्णुर्युगेयुगे ॥ १५ ॥ कथंहन्तिसुरान्सर्वान्कल्पान्तइहजायते ॥ ॥ २०२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १६ ॥ व्यासउवाच ॥ एतस्मिन्नन्तरेदूरेमधुर्मायांप्रयोजिता ॥ हररूपधरोभूत्वाअब्रवीद्धरिमव्ययम् ॥ १७ ॥ मधुरुवाच ॥दैत्यानामग्रतःपापरणे
देवान्समन्ततः ॥ हत्वार्किंतेशिवंचाद्यधर्मकीर्तियशोगुणाः ॥ १८ ॥ महतोन्मत्तभावेननजानासिपरान्स्वकान् ॥ अतस्त्वांनिशितैर्बाणैर्नयामियम
सादनम् ॥ १९॥ व्यासउवाच ॥ एवमुक्त्वाशरैरुग्रैर्जघानकेशवंरणे ॥ निचकर्तशरांस्तांस्तुमाधवोवाक्यमब्रवीत् ॥ २० ॥ माधवउवाच॥जानामि
त्वांरणेदैत्यंहररूपधरंप्रियम्॥शूरंशूरविक्रमाणंमधुंमायानियोजितम् ॥ २१ ॥ मिथ्यालोकंप्रदास्यामिपातयित्वारणाजिरे ॥ २२ ॥ व्यासउवाच॥
एतस्मिन्नन्तरेतीक्ष्णैःशरैर्विव्याधसंयुगे ॥ जटिलंवृषकेतुंचवृषभस्थंमहेश्वरम् ॥ २३ ॥ तयोर्युद्धमतीवासीद्देवदानवयोस्तदा ॥ परस्परंभिन्दतोश्चप्रा
तान्प्राप्ताञ्शराञ्शरैः ॥२४॥ क्षुरप्रेणधनुस्तस्यचिच्छेदहरिरव्ययः ॥ ततश्चपातयामासघोटकंवृषरूपिणम् ॥२५॥ सदैत्यश्शूलहस्तोऽथप्रदुद्रावजग
त्पतिम् ॥ भ्रामयित्वाततःशूलंजघानपरमेश्वरम् ॥ २६ ॥ त्रिभिश्चिच्छेदबाणैश्चशूलंकालानलप्रभम् ॥ ततःक्रूरोमहाबाहुर्मधुर्मायातिमायिकः
॥ २७ ॥ देवीरूपंसमास्थायसिंहस्थःप्रययौहरिम् ॥ शरैर्बहुविधैर्विष्णुंजघानैवाब्रवीद्वचः ॥ २८ ॥ मधुरुवाच ॥ स्वामीतुमेसुरश्रेष्ठत्वयैवपातितो
युधि ॥ अहंत्वांचहनिष्यामिसुतौस्कन्दविनायकौ ॥ २९ ॥ व्यासउवाच॥ उक्तवन्तंचदैतेयंजघानबहुमार्गणैः ॥ सपपातमहीपृष्ठेगतासुर्लोहितोद्गिरः
॥ ३० ॥ पितरौनिहतौदृष्ट्वामायाबद्धोमहाबलः ॥ स्कन्दःशक्तिसमादायप्रायाद्योधयितुंहरिम् ॥ ३१ ॥ ततोधाताऽब्रवीद्वाक्यंस्कन्दंमोहप्रपीडितम्
॥ ३२ ॥ ब्रह्मोवाच ॥ पश्यतेपितरौदूरेपश्यन्तौयुद्धमीदृशम् ॥ अन्तरिक्षेभ्रमन्तौचसंस्थितौलोकसाक्षिणौ ॥ ३३ ॥ व्यासउवाच ॥
एतच्छ्रुत्वाततोदृष्ट्वातत्रैवान्तरधीयत ॥ ततोधुन्धुश्चसुन्धुश्चभ्रातरावतिदर्पितौ ॥ ३४ ॥ वधंप्रतिहरेर्युद्धेपेततुर्गरुडोपरि ॥ खड्गहस्तंचधुन्धुंच
सगदंसुन्धुमेवच ॥ ३५ ॥ चिच्छेदनन्दकेनैकंगदयाऽऽसादयत्परम् ॥ पेततुस्तौधरापृष्ठेप्रवीरौक्षतविक्षतौ ॥ ३६ ॥ मधुस्तदागतस्तूर्णम
न्तर्धानंतमोवृतः ॥ पातयामासविष्णौचमाययाशतपर्वतान् ॥ ३७ ॥ ततस्तान्पर्वतांश्छित्वातमसोऽन्तर्गतोयुधि ॥ क्रोधात्सुदर्शनेनैवशिरश्छि
त्त्वानिपातितः ॥ ३८ ॥ ततोब्रह्मादिभिर्देवैश्शम्भुनात्रिदशैरपि ॥ मधुसूदनइतिख्यातिर्विष्णोर्लोकेषुकारिता ॥ ३९ ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टि
खण्डेमधुवधोनामचतुःसप्ततितमोऽध्यायः ॥ ७४ ॥ व्यासउवाच ॥ ततोवृत्रोमहातेजादैत्यानांप्रवरोयुधि ॥ दिग्गजाढ्यंसमारूढःप्राद्रवद्बलसूदनम्
॥ १ ॥ आगच्छन्तंततोवृत्रंशरैःकालानलप्रभैः ॥ विव्याधसर्वगात्रेषुद्विरदस्थोमहाहवे ॥ २ ॥ ततोवृत्रस्तुशीर्षंचजिष्णोरेवपतत्रिणा ॥ विव्याधसह
सातेनसचचालमहाबलः ॥ ३ ॥ आत्मानंचसमाश्वास्यधनुरुद्यम्यवीर्यवान् ॥ ववर्षशरवर्षेणतस्यदैत्यस्यविग्रहे ॥ ४ ॥ शरांश्छित्वाबिभेदाशु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शरैराशीविषोपमैः ॥ शतक्रतुंमहावीर्यःसर्वदेवाधिपंयुधि ॥ ५ ॥ ततःशरसहस्रैस्तुदैत्यंविव्याधदेवराट् ॥ परस्परंशरायान्तिहेमरत्नविभूषिताः ॥६॥ सञ्चरन्तियथावाताद्वृत्ताश्शतसहस्रशः ॥ वियत्पथिशरायान्तियथासप्ताश्वरश्मयः ॥ ७ ॥ एवंशरसहस्रैस्तुबिभिदातेपरस्परम्॥ मनोजवसमाःशीघ्रा गाढाःशिखरिणोयथा ॥ ८ ॥ वडवानलसंस्पर्शाःखगावच्चारभेदकाः ॥ तयोर्धनुष्मतोर्युद्धेशरास्तुल्यगुणान्विताः ॥ ९ ॥ एवंक्रमेणयुद्धेचअहोरा त्रमवर्तत ॥ महेन्द्रोद्विरदंतस्यशूलेनैवजघानह ॥ १० ॥ सनिपत्यमहीपृष्ठेलाघवात्स्वरथंययौ ॥ रथस्थस्तस्यदेवस्यशक्त्याचैरावणंदृढम् ॥ ११ ॥ बिभेदलाघवेनाशुवज्रेणेवमहागिरिम् ॥ शुशुभेकम्पमानस्तुसेन्द्रःसचमहागजः ॥ १२ ॥ ततःशक्तिंसमादायआविध्यमघवाऽसुरम् ॥ बिभेदोरसि दैत्यस्यसपपातरथोपरि ॥ १३ ॥ क्षणात्संज्ञांसमालम्ब्यसविनघ्नपतत्रिणा ॥ बिभेदसमरेशक्रंसततःकश्मलंगतः ॥१४॥ इन्द्रःसंज्ञांपुनःप्राप्यजघान विशिखैःशितैः ॥ शतकोटिसमैर्बाणैरर्दितोव्यथयान्वितः ॥ १५ ॥ ततोवृत्रोमहाशूलंप्राक्षिपन्निर्जरेश्वरे ॥ शाम्भवास्त्रेणदेवेशोवैष्णवास्त्रंमुमोचह ॥ १६ ॥ उभयोरम्बरेचास्त्रेवह्निकूटसमप्रभे ॥ अन्योन्यंजघ्नतुस्तत्रस्फुलिङ्गानिविमुञ्चती ॥ १७ ॥ स्पर्शनेचस्फुलिङ्गानामुभयोःसेनयोर्भटाः ॥ न शक्ताःसम्मुखेस्थातुंशलभाज्वलनेयथा ॥१८॥ दग्धाःपेतुःपृथिव्यांचदिशस्सर्वाःप्रदुद्रुवुः ॥ देवदानवयोर्वीराःशून्यस्तत्राभवद्रणः ॥ १९ ॥ स्वंस्व मस्त्रंसमाहूयचक्रतुःसुभृशंतथा ॥ अस्त्रंनिरस्तकंदृष्ट्वासदैत्यःक्रोधमूर्च्छितः ॥ २० ॥ माययाशैलसन्दोहमस्त्रंशक्रेमुमोचह ॥ बाणौघैःशैलसङ्घातंप्र चिच्छेदरणेहरिः ॥ २१ ॥ अघोरंप्रासृजद्दैत्यःपुरुहूतेमहाबले ॥ कोटिकोटिसहस्राणिजन्तूनांप्रवराणिच ॥ २२ ॥ सिंहशार्दूलभल्लूकवृकव्याघ्रमहा गजाः ॥ दन्दशूकादयःसत्त्वाःप्रधावन्तिसुरेश्वरम् ॥ २३ ॥ क्षुरप्रैरर्धचन्द्रैश्चभल्लैःशिलीमुखैस्तथा ॥ असम्प्राप्तान्प्रचिच्छेदमघवापरवीरहा ॥ २४ ॥ ततोवृत्रोमहाबाहुर्धनुरुद्यम्यवीर्यवान् ॥ बिभेदशरसाहस्रैर्वज्रकल्पैःशतक्रतुम् ॥ २५ ॥छित्वाक्षुरप्रैश्शक्रश्चधनुस्तस्यचकर्तच ॥सूतंचाश्वान्पृथिव्यांच पातयामाससतत्क्षणात् ॥ २६ ॥ सकण्टकांगदांभीमांसम्पूज्यासुरसत्तमः ॥ जघानपव्रिनःशीर्षेमोहाद्दन्तीक्षितिंययौ ॥२७॥ सगदःसर्वदेवेशोधरणीं समुपस्थितः ॥ ततस्तयोर्गदायुद्धमवर्ततमुहुर्मुहुः ॥ २८ ॥ तयोःप्रहरतोःशब्दोगदापातोद्भवोध्रुवम् ॥ आवर्तंपरिवर्तंचचक्रतुस्तौपुनःपुनः ॥ २९ ॥ अधऊर्ध्वंप्रहारंचपार्श्वयोरतिभीषणम् ॥ बभूवैवंतयोर्युद्धंलोकालोकभयङ्करम् ॥ ३० ॥ दृष्ट्वादेवगणाःसिद्धादानवाविस्मयंगताः ॥ युद्ध्यमानौतुतौ वीरौमृत्युसंशयमागतौ ॥ ३१ ॥ देवदानववीराश्चद्रष्टुंनैवतदीशिरे ॥ ईशब्रह्मादयःखेतुस्थितादृष्टुंतदद्भुतम् ॥ ३२॥ तयोर्हुंकारशब्देनगदापातस्वनेन च ॥ ऊर्ध्वोर्ध्वमगमच्छब्दोह्यशनेश्चोपजायते ॥ ३३ ॥ भग्नेगदेद्वयोरेवकरःसम्पुटितस्तयोः ॥ एवंचैवार्धयामेनतयोरस्त्रेनिपेततुः ॥ ३४ ॥ एतस्मि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्नन्तरेवीरौखड्गचर्मधरौतदा ॥ प्रतियोद्धुंमहाघोरमाहवेसम्प्रचेरतुः ॥ ३५ ॥ निस्त्रिंशौविद्युदुल्काभौतयोर्गात्रेचचर्मणी ॥ दृश्येतेसर्वलोकैश्चलाघवा
द्विस्मयंगतैः ॥ ३६ ॥ चिच्छिदातेतयोरेवचर्मणीबहुवर्णके ॥ भीष्मकंबलयुद्धंचतयोरेवंप्रवर्तते ॥ ३७ ॥ मण्डलंचक्रधन्वंचलाघवंचपरिप्लुतम् ॥
वृत्रवासवयोर्युद्धंवृत्रवासवयोरिव ॥ ३८ ॥ केशान्वृत्रस्यउत्प्लुत्यसम्प्रधृत्यासिनाद्भुतम् ॥ शिरश्चिच्छेदसहसामघवारणमूर्धनि ॥ ३९ ॥ जयशब्द
स्ततस्त्वासीद्देवानांचसमन्ततः ॥ प्रोत्फुल्लहृदयादेवामघवन्तमपूजयन् ॥ ४० ॥ देवदुन्दुभयोनेदुर्ननृतुश्चाप्सरोगणाः॥गीतंगायन्तिगन्धर्वामुनयः
स्तुतिपाठकाः ॥ ४१ ॥ भीताःपलायिताःसर्वेदैत्यास्त्यक्तायुधादिशः ॥ ४२ ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेवृत्रासुरवधोनामपञ्चसप्ततित
मोऽध्यायः ॥ ७५ ॥ व्यासउवाच ॥ चतुर्भिस्तुरगैर्जुष्टंरथंसूर्यसमप्रभम् ॥ त्रैपुरिःसंरुरोहाथाब्रवीद्वाक्यंगणाधिपम् ॥ १ ॥ त्रैपुरिरुवाच ॥ पिता
मेनिहतःपित्रातवयस्माद्गणाधिप ॥ तस्मात्त्वामद्यविशिखैर्नयामियमसादनम् ॥ २ ॥ व्यासउवाच ॥ ततस्तमब्रवीद्देवोगणेशस्त्रिपुरात्मजम् ॥ ३ ॥
गणेशउवाच ॥ तवतातेनदुष्टेनसुराणामहितंपुरा ॥ कृतंकर्ममहत्पापंश्रुतंनोजनकेनहि ॥ ४ ॥ पापकर्मरतंदुष्टंज्ञात्वाज्ञानबलेनच ॥ अवधीत्तंशरैकेन
पितरंतेबलेनच ॥ ५ ॥ पङ्कात्प्रतारितोमोहात्प्रेषितोयममन्दिरम् ॥ त्वांचाहंतत्पथंदैत्यप्रेषयामिक्षणादिह ॥ ६ ॥व्यासउवाच॥ उक्तवन्तंमहाप्राज्ञं
सुराणांचगणाधिपम् ॥ विव्याधदशभिस्तीक्ष्णैःकालानलसमप्रभैः॥ ७ ॥ ततःशरसहस्रैस्तुदैत्यंविव्याधसाहसात् ॥ यमदण्डसमैर्बाणैःक्षुरप्रैश्च
शिलीमुखैः॥८॥कङ्कपत्रैर्महातीक्ष्णैर्वज्रानलसमप्रभैः ॥ विचकर्तशरांश्चास्यलम्बोदरःसुरार्चितः ॥ ९ ॥ पुनर्विव्याधविशिखैःसहसाभिदुरोपमैः ॥
शरैरार्दितसर्वाङ्गोमूर्च्छितस्त्वपतद्भुवि ॥ १० ॥ ततोभद्रश्चसौभद्रोभीषणोनिर्जरान्तकः ॥ स्वांस्वांगदांसमादायदुद्रुवुस्तंविनायकम् ॥ ११ ॥ युग
पत्तेगदापातैर्निजघ्नुर्गणनायकम् ॥ लघवात्तुवृथाकृत्वागदास्तेषांमहाबलः ॥ १२ ॥ भद्रकस्यतुशीर्षेचाहनत्परशुनातदा ॥ सौभद्रस्योत्तमाङ्गंच
असिनाग्रेनिपातितम् ॥ १३ ॥ भीषणस्यकुठारेणखड्गेननिर्जरान्तकम् ॥ पातयित्वाचहेरम्बोमहागिरिसमांस्तदा ॥१४॥ चतुरोगणमुख्यांश्चअन्यां
श्चापातयद्द्विषः॥ततःसंज्ञांसमालभ्यत्रैपुरिश्चासुरोत्तमः॥१५॥समारुह्यरथंस्वंचजघानसुरसत्तमम्॥विशिखैरर्धचन्द्रैश्चक्षुरप्रैर्भल्लकैस्तथा॥ १६॥ तांस्तु
चिच्छेदधर्मात्मापुनर्विव्याधतंशरैः ॥ चतुर्भिःसैन्धवांश्चैवशरैकेनचसारथिम् ॥ १७ ॥ शरैःसम्पातयामासधरण्यांगणनायकान्॥लाघवात्तुरथंचान्यं
गत्वात्रिपुरनन्दनः ॥१८॥ विशिखैर्वज्रसङ्काशैःसंबिभेदगणाधिपम्॥रुधिरेणावसिक्ताङ्गोरुषाघोरयमप्रभः॥१९॥ललाटेचत्रिभिर्बाणैस्सप्तभिश्चस्तना
न्तरे ॥ चतुर्भिर्नाभिदेशेचपञ्चभिर्मुष्टिमस्तके ॥२०॥ संबिभेदमहाक्रोधोबलिनंशम्भुनन्दनः ॥ शरैरर्दितसर्वाङ्गःसदैत्योरणमूर्धनि ॥ २१॥ कश्मलं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परमंगत्वासम्पपातरथोपरि ॥ ततःसूतेनधीरेणअपनीतोरणाजिरात् ॥ २२ ॥ विमुखंनाहनच्छूरोविनायकःसुरार्चितः ॥ चिरात्संज्ञांसमालभ्यय
न्तारंचाब्रवीद्वचः ॥ २३ ॥ त्रैपुरिरुवाच ॥ गच्छसूतरणेभीरुंविनायकंहरात्मजम् ॥ २४ ॥ व्यासउवाच ॥ ततोयन्ताब्रवीद्वाक्यंसत्यंपथ्यंचको
मलम् ॥ २५ ॥ सारथिरुवाच ॥ हरात्मजशरान्सोढुंकस्समर्थोरणाजिरे ॥ तस्मान्मोहगतस्त्वंचमयानीतःप्रभासुत ॥२६॥ एतज्ज्ञात्वात्विदानींभो
यद्युक्तंतद्विधीयताम् ॥२७॥ व्यासउवाच॥ एतस्मिन्नन्तरेराज्ञाप्रेरितःकविसत्तमः ॥ औषधादिप्रयोगेणगजःसंज्ञामबोधयत् ॥ २८ ॥ अकारयच्छत
गुणप्राणंचजयमादिशत् ॥ प्राग्जलंमन्त्रितंदत्त्वारुरोधास्याङ्गकव्रणान् ॥ २९ ॥ सगजोदशनैरेवस्फोटयामासवैगिरिम् ॥ एवंशतसहस्राणिसैन्या
निसैन्यपालकान् ॥ ३० ॥ पातयामाससमितौगजःपरमदुर्जयः ॥ सदैत्यस्तस्यपृष्ठस्थःशरैःकालानलप्रभैः ॥ ३१ ॥ हत्वात्वपातयच्चोर्व्यांमुख्य
मुख्यान्सुराधिपान् ॥ शरैस्तस्यतदादेवायमदण्डसमप्रभैः ॥ ३२ ॥ निपतन्तिंमहावीर्यारुधिरौघपरिप्लुताः ॥ यस्मिन्यस्मिंश्चमार्गेतुसदैत्यःसग
जोगतः ॥ ३३ ॥ तत्रतत्रचकाराशुभीषणंसञ्चितंशरैः ॥ गजेनपातिताःकेचिद्गजारोहेणचापरे ॥ ३४ ॥ वेगेनभ्रमणेनैवसुराःकेचित्प्रतापिताः ॥
एवंसुरगणाध्यक्षाःशस्त्रास्त्रैर्विविधैश्चतम् ॥ ३५ ॥ सगजंयुद्धनिर्भीतानिजघ्नुर्बहुभिःशरैः ॥ तथापितद्गजयोद्धुंनशक्तास्तेमहाबलाः ॥ ३६ ॥ क्षि
प्रंतांस्तुगजोदन्तैस्त्रैपुरोऽपातयच्छरैः ॥ नगतायेधरण्यांचदेवाजर्जरविग्रहाः ॥ ३७ ॥ शरण्यंगणपंजग्मुर्भीतास्तेवेदनातुराः ॥ देवानांकदनंदृष्ट्वा
गणाधीशःप्रतापवान् ॥ ३८ ॥ सगजताडयामासवज्रानलसमैःशरैः ॥ सगजोवेगसंरुद्धःशरेणचसमुत्थितः ॥ ३९ ॥ अथोतौद्वौशरैरेवबिभिदा
तेपरस्परम् ॥ उभौतौनर्दमानौचअन्योन्यंजयमैच्छताम् ॥ ४० ॥ शोणितैर्लिप्तसर्वाङ्गौवीरमुख्यौसुरासुरौ॥अथाखुंसगजोमत्तोबिभेददशनैःस्वकैः
॥ ४१ ॥ आखुनाभिद्रुतोनागोघोरयुद्धंतयोःपरम् ॥ अधोर्ध्वंसंविभागेचचतुर्भिर्युद्धमद्भुतम् ॥ ४२ ॥ सशब्दंतुमुलंयुद्धंसर्वलोकभयङ्करम् ॥
दशनैर्दशनैरेवशरैरेवशरोत्तमैः ॥ ४३ ॥ तद्घोरमभवद्युद्धंदेवदानवसङ्गरे ॥ आखुकोभेदयाञ्चक्रेमहानागंमहाबलम् ॥४४॥ पर्शुनापृष्ठवंशाग्रेस्थित्वाते
नाहनत्पुनः ॥ दैत्यस्यदशनद्वारेहृदिस्कन्धेऽथलाघवात् ॥ ४५ ॥ सगजःसपपातोर्व्यांगतासुर्लोहितंवमन् ॥शशंसुर्मुनयोदेवास्साधुसाध्वितिचाब्रु
वन् ॥ ४६ ॥ गणपंपुष्पगन्धैश्चगन्धधूपैरपूजयन् ॥ दुद्रुवुर्दैत्यसङ्घाश्चभीताश्चप्राणकातराः ॥ ४७ ॥ तथैवसहपार्वत्यासुरानाहमहेश्वरः॥४८॥
महेश्वरउवाच ॥ अत्रान्येऽस्त्रैरमोघैश्चदैत्यानाजघ्नुराहवे ॥ यावत्तुसेनयोर्नैवजययुद्धंसमापयेत् ॥ ४९ ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेत्रैपुरिवि
मर्दोनामषट्सप्ततितमोऽध्यायः ॥ ७६ ॥ व्यासउवाच ॥ श्रुत्वामहेश्वराद्वाक्यंदेवाःशक्रपुरोगमाः ॥ दुद्रुवुर्दैत्यसङ्घांस्तान्सर्वेसर्वान्समन्ततः ॥१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आजगाममहाबाहुःकुम्भोनाममहासुरः॥नैर्ऋतोयक्षराजानंगदयाचाहनद्भृशम् ॥ २ ॥ गुह्यकेशोगदापातैर्जघानभृशमुत्तमम् ॥ ततोऽन्योन्यंगदायुद्ध
मभवद्भीषणंतयोः ॥ ३ ॥ चक्रबन्धंमहाबन्धंपुरोवध्यनिबन्धनम् ॥ प्राचुरंभीषणंयानंस्फोटतैलाभिवास्तिकम् ॥ ४ ॥ तेनकृत्वामहायुद्धमवसाने
धनेश्वरः ॥ पातयामासतंस्फोटंतस्यकुम्भस्यचोरसि ॥ ५ ॥ भग्नदंष्ट्रस्ततःकुम्भोनिपपातमहीतले ॥ स्यन्दनस्थोमहावीर्योजम्भोहरिहयंतदा
॥ ६ ॥ जघानशरसङ्घैश्चतथैवैरावणंभृशम् ॥ वासवोभिदुरेणैवसम्बिभेदासुरोत्तमम् ॥ ७ ॥ सपपातधरापृष्ठेगतासुर्लोहितोक्षितः ॥ तथारण्यंसु
घोरंचअघोरंघोरमेवच ॥ ८ ॥ चतुरोगणमुख्यांश्चशक्त्याबिभेदसंयुगे ॥ सेनानीश्चैवप्रत्येकंपातयामासलाघवात् ॥ ९ ॥ सौरभंशरसङ्घैश्चजय
न्तोवशमानयत् ॥ शक्तिहस्तंचसंह्रादंयमदण्डंनरान्तकम् ॥ १० ॥ हत्वाचपातयामाससभस्मीकृतविग्रहः ॥ कालश्चखड्गपातेनपातयामासबा
भ्रवम् ॥ ११ ॥ शक्त्यामृत्युर्बिभेदाश्वंतथानिर्घृणकंरणे ॥ अग्निनादह्यमानाश्चसप्तैतेचमहाबलाः ॥ १२ ॥ भद्रबाहुर्महाबाहुःसुगन्धोगन्धएवच॥
भौरिकोवह्लिकोभीमएतेसेनाग्रगामिनः ॥ १३ ॥ रणेसन्दग्धदेहाश्चपेतुरुर्व्यांगतासवः ॥ पाशबद्धामहावीर्यावरुणस्यमहात्मनः ॥ १४ ॥ पेतु
रुर्व्यांमहसत्त्वाःशूराःशूरभयानकाः ॥ शूरस्यरश्मिजालेननिहताःपञ्चदानवाः ॥ १५ ॥ तुरुतुम्बुरुदुर्मेधस्साधकासाधकाभिधाः ॥ क्रूरक्रौञ्चरणे
शानमोदसम्मोदषण्मुखाः ॥ १६ ॥ शरैर्निपातितादैत्याःसंयुगेमातरिश्वना ॥ नैर्ऋतोगदयाभीमंपातयामासभूतले ॥ १७ ॥ शूलपातैश्चरुद्राणां
शतशोदैत्यदानवाः ॥ निपेतुःसंयुगेभीताःसंमुखारणपण्डिताः ॥ १८ ॥ वसूनांशरपातैश्चशूराणांरश्मिमालिनाम् ॥ मेघानांकरकाभिश्चवज्रपा
तैस्सुदारुणैः ॥ १९ ॥ निपातितारणेदैत्याःशतशोबलशालिनः ॥ कुबेरस्यगदापातैर्निपतन्तिसहस्रशः ॥ २० ॥ शक्रस्यभिदुरेणैवभेदितादैत्यपु
ङ्गवाः ॥ असङ्ख्याताःपन्तत्युर्व्यांस्कन्दशक्त्यातथाहताः ॥ २१ ॥ गणेशपर्शुपातेनपतन्तिमुख्यमुख्यकाः ॥ वैकुण्ठकरमुक्तेनचक्रेणतीव्रकर्मणा
॥ २२ ॥ दैत्यानांप्रवराणांचशिरांसिनिपतन्तिकौ ॥ शमनोयमदण्डेनकोटिकोटिसहस्रशः ॥ २३ ॥ अपातयत्तदाभूम्यांकालःखड्गेनदानवान् ॥
मृत्युश्शक्त्यातथादैत्यान्पाशीपाशेनचापरान् ॥ २४ ॥ पातेनतक्षकादीनांसुधांशोःशिशिरेणच ॥ अश्वारोहीखरोमन्योहनिपाशस्तथागजान्
॥ २५ ॥ परिघेणगजंकुम्भेदैत्यानांनाशयत्ततः ॥ एवमश्वान्गजांश्चैवलाघवात्सन्यपातयत् ॥ २६ ॥ एवंसिद्धैश्चगन्धर्वैरप्सरोभिर्महाबलैः ॥
अन्याभिर्देवताभिश्चसमातृगणनायकैः ॥ २७ ॥ निपातितामहोघोरायतेप्रलयदानवाः ॥ शरैश्चखड्गपातैश्चशूलशक्तिपरश्वधैः ॥ २८ ॥ यष्टि
परिघकुन्तैश्चपातयन्त्यसुरान्सुराः ॥ एवंसंक्षीयमाणेषुदैत्यराट्समपद्यत ॥ २९ ॥ आदित्यरथसङ्काशंरथंरत्नविभूषितम ॥ शातकुम्भमयंदिव्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

घण्टाचामरभूषितम् ॥ ३० ॥ पताकाध्वजसम्पूर्णंरम्यंशक्ररथोपमम् ॥ समारुह्यमहावीरोहिरण्याक्षोऽसुराधिपः ॥ ३१ ॥ जघानशरजालैश्चदुर्नि
वार्यैःसुरासुरैः ॥ ससैन्यानिगजान्वीरोरथांश्चसहसैन्धवान् ॥ ३२ ॥ पातयामासभूमौचशतशोऽथसहस्रशः॥एवंचरन्सवृन्देषुनिखिलेषुदिवौकसाम्
॥ ३३ ॥ पातयामासदैत्येन्द्रःशरौघान्मृत्युसन्निभान् ॥ क्रमेणसमरेचाथदेवसैन्यान्यमन्थत ॥ ३४ ॥ यथापुष्करिणीवृन्देगजःकञ्जवनंशितैः॥
शरपातैरथोवेगात्सिंहनादैःपुनःपुनः ॥ ३५ ॥ धरण्यांपतितावेगात्तदादैत्येश्वरस्यच ॥ दशभिश्चसुतीक्ष्णाग्रैर्जयन्तंसजघानह ॥ ३६ ॥ रेमन्तं
पञ्चभिर्बाणैःशक्रंपञ्चदशेनतु ॥चित्ररथंविंशतिभिःपञ्चविंशतिभिर्गुहम्॥३७॥ हेरम्बंत्रिंशरेणैवचत्वारिंशच्छरैर्यमम् ॥तथैवकालंमृत्युंचपाणिनाद्विगुणे
नच ॥ ३८ ॥ गुह्यकेशंजगत्प्राणंदशभिर्दशभिःशरैः ॥ षड्भिश्चसप्तभिश्चैवरुद्रान्सर्वान्पृथक्पृथक् ॥ ३९ ॥ वसून्सर्वांश्चसशरैःसिद्धगन्धर्वपन्न
गान् ॥ दशाष्टदशभिःषड्भिर्युद्धेदेवानभिनत्त्यसौ ॥ ४० ॥ ओजौघादतिवीर्याच्चशीघ्रलाघवदर्शनान् ॥ आपत्प्राप्ताःसुराभीत्याप्रतिकर्तुंनचेश्व
राः ॥ ४१ ॥ महेशशूलसङ्काशैःशरैर्मर्मविभेदिभिः ॥ ताडितानिर्जरायुद्धेमूर्च्छिताधरणींययुः ॥ ४२ ॥ तस्यैवसंमुखेस्थातुंनशेकुःप्रवरास्सु
राः ॥ ततोदेवाविनिर्धूतास्त्रिदिवेशेनसंयुताः ॥ ४३ ॥ शरण्यंतेहरिंतत्रशरणंताडितायथुः ॥ एतस्मिन्नन्तरेविष्णुःप्राहजिष्णुंखगेश्वरम् ॥ ४४ ॥
विष्णुरुवाच ॥ अधुनागच्छदैत्यस्यसंमुखंरणमूर्धनि ॥ ४५ ॥ व्यासउवाच ॥ नाशायसततस्तूर्णंगतस्तस्यान्तिकंजवात् ॥ सरथंमार्गणैर्भि
त्वाविष्णुमारोधयज्जवम् ॥ ४६ ॥ रथस्यसम्मुखेदैत्यउवाचविष्णुमव्ययम् ॥ ४७ ॥ दैत्यराजउवाच ॥ अन्यसृष्टिंकरोम्यद्यहत्वात्वांचसनि
र्जरम् ॥ ४८ ॥ व्यासउवाच ॥ ततोविष्णुरुवाचेदंगर्जन्तंदैत्यपुङ्गवम् ॥ ४९ ॥ विष्णुरुवाच ॥ शक्तस्त्वंस्पर्द्धनेपापयदियुद्धेस्थिरोभव ॥
॥ ५० ॥ व्यासउवाच ॥ ततःशरशतैरेवजघानविष्णुमव्ययम् ॥ असम्भ्रान्तःसचिच्छेदयमदण्डनिभाञ्शरान् ॥ ५१ ॥ पुनःशरसहस्राणिप्रेरया
मासतंरणे ॥ तांश्चच्छित्वाशरैःशौरिस्तंचविव्याधमार्गणैः ॥ ५२ ॥ प्रगौरवादहार्याभैःसंस्पर्शाद्वाडवानलैः ॥ शरैश्चभेदकैस्तीक्ष्णैःखगमैश्चम
नोजवैः ॥ ५३ ॥ लाघवात्केशवास्त्रस्यतूलशुष्कतृणोपमैः ॥ हैमैःशरसहस्रैस्तुताडितोदैत्यपुङ्गवः ॥ ५४ ॥ बाधयाभ्यर्दितःक्रुद्धोधृत्वाशि
खरिणंरणे ॥ जघानमाधवंवेगाद्धिरण्याक्षोमहाबलः ॥ ५५ ॥ तंचसञ्चूर्णयामासगदयालीलयाहरिः ॥ एवंपर्वतसाहस्रंपातितंतुक्रमेणहि ॥
॥ ५६ ॥ तथैवलाघवाच्चूर्णंहरिणादानवारिणा ॥ पुनर्बाहुसहस्राणिकृत्वाऽसौदानवोत्तमः ॥ ५७ ॥ शरैःशक्तिभिरत्युग्रैःशूलैःपरशुकादिभिः ॥
ववर्षबहुभिर्विष्णुंक्रोधाविष्टेनचेतसा ॥ ५८ ॥ तांस्तुतेनैवप्रहितांश्चिच्छेदसुरसत्तमः ॥ शरैर्दीप्तैर्महाघोरैरसुराणांभयङ्करैः ॥ ५९ ॥ विव्याधसर्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गात्रेषुशम्भुशूलोपमैश्शरैः ॥ दानवाधिपतिंसङ्ख्येह्यव्ययोहरिरीश्वरः ॥ ६० ॥ सचकश्मलतांगत्वासर्वशक्तिमनुत्तमाम् ॥ कालजिह्वोपमांघोराम
ष्टघण्टासमन्विताम् ॥ ६१ ॥ हरेरुरसिपीनेचविद्रुत्यापातयद्द्रुतम् ॥ शुशुभेससुरश्रेष्ठस्तडित्वत्सान्द्रमेघवत् ॥ ६२ ॥ ततश्चुकुशुर्दैत्याजये
तिसाधुवादिनः ॥ ततश्चक्रंदैत्यसैन्येदानवारिर्व्यसर्जयत् ॥ ६३ ॥ तेषांशिरांसिसञ्छिद्यमाधवंपुनरागमत् ॥ सदैत्यंशक्तिपातेनपातयामासवैर
णे ॥ ६४ ॥ चिरात्संज्ञांसमालम्ब्यवह्निबाणेनकेशवम् ॥ निजघानरणेक्रुद्धोहरिःकौबेरमाक्षिपत् ॥ ६५ ॥ ततोमुमोचमायास्त्रंचासुरंचातिदारु
णम् ॥ सिंहव्याघ्रलुलायांश्वतद्वद्द्विपसरीसृपान् ॥ ६६ ॥ जघानसमरेविष्णुंहिरण्याक्षःप्रतापवान् ॥ ततोमायास्त्रसम्भूताञ्शस्त्रास्त्रौघात्रणेहरिः॥
॥ ६७ ॥ प्रचिच्छेदशरैरेवशूलेनैवमताडयत् ॥ सविह्वलितसर्वाङ्गस्तत्क्षणंलोहितोक्षितः ॥ ६८ ॥ विचकर्षहरन्विष्णुरसृग्विप्लुतविग्रहः ॥ त
च्छूलंचत्रिभिर्बाणैःप्रविव्याधसुराधिपः ॥ ६९ ॥ वरूथंसध्वजंकेतुंरथंचैवातपत्रकम् ॥ यन्तारंचप्रचिच्छेददशभिश्चहरिःशरैः ॥ ७० ॥ पातितेचरथे
दैत्यःसम्प्लुत्याथरथंपरम् ॥ आरुरोहसदैत्येन्द्रःसम्मुखंचाकरोद्बली ॥ ७१ ॥ ततोयुद्धंमहाघोरमभवल्लोमहर्षणम् ॥ हिरण्याक्षस्यचहरेर्लोकविस्मा
पनंमहत् ॥ ७२ ॥ अस्त्रयुद्धंतथान्योन्यंकृतप्रतिकृतंचतत् ॥ ततोनियुद्धेसततंदिव्यवर्षशतंगतम् ॥ ७३ ॥ ततोदैत्योमहासत्त्वोववृधेवामनोयथा ॥
मुखेनजग्राहरुषात्रैलोक्यंसचराचरम् ॥ ७४ ॥ भूमण्डलंसमुद्धृत्यविवेशचरसातलम् ॥ शेषाश्चविविशुर्दैत्यास्तमनुप्रीतिसंयुताः ॥ ७५ ॥ ततो
विष्णुर्महातेजाज्ञात्वादैत्यबलंमहत् ॥ दधाररूपंवाराहंदैत्यराजजिघांसया ॥ ७६ ॥ धृत्वाक्रोडतनुंविष्णुर्विवेशतमनुद्रुतम् ॥ तत्रगत्वारसामूले
रसातलगतांमहीम् ॥ ७७ ॥ दृष्ट्वास्वदंष्ट्रयोर्दध्रेलोकाधारांवसुन्धराम् ॥ तांधृत्वागच्छतस्तस्यविष्णोरमिततेजसः ॥ ७८ ॥ समाजगामदैत्येन्द्रो
धृष्टंवाग्भिस्तुदन्नु ॥ मायाक्रोडतनुर्विष्णुर्दुर्वचांसिसहन्रुषा ॥ ७९ ॥ जलोपरिदधारेमांधरांभूधरएवच ॥ तस्यांन्यस्यस्वसत्त्वंचसचकारतदा
ऽचलाम् ॥ ८० ॥ ततःपश्चात्ससंलग्नोदैत्यराट्समुपस्थितः ॥ क्रोधेनमहताविष्टोजघानगदयाहरिम् ॥ ८१ ॥ माययासूकरोविष्णुस्तांगदांसमव
श्चयत ॥ योगयुक्तोयथामृत्युंकौमोदक्याहनच्चतम् ॥ ८२ ॥ ततःपुनारुषाविष्टोहिरण्याक्षोमहाबलः ॥ मुष्टिनाप्राहरद्देवंदक्षिणेतुभुजेप्रभोः ॥
॥ ८३ ॥ एवंयुद्धंमहाघोरंसव्यासव्यंगतागतम् ॥ परिभ्रमणविक्षेपंकृतानुकरणंतथा ॥ ८४ ॥ ततोब्रह्मादयोदेवायुद्धंपश्यन्तिखेस्थिताः ॥ स्वस्तिं
प्रजाभ्योदेवेभ्यऋषिभ्यश्चेतिचाब्रुवन् ॥ ८५ ॥ ऊचुश्चदेवदेवेशंविष्णुंवाराहरूपिणम् ॥ ८६ ॥ ब्रह्मादयऊचुः ॥ माक्रीडबालवद्देवजह्यमुंदेव
कण्टकम् ॥ ८७ ॥ व्यासउवाच ॥ ततोविष्णुर्महातेजामायावाराहरूपधृक् ॥ ब्रह्माद्यनुमतिंप्राप्यचक्रंप्राक्षिपदुल्बणम् ॥ ८८ ॥ सहस्रसू

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्यसङ्काशंसहस्रारंमहाप्रभम् ॥ दैत्यान्तकरणंरौद्रंप्रलयाग्निसमप्रभम् ॥ ८९ ॥ तच्चक्रंविष्णुनामुक्तंहिरण्याक्षंमहाबलम् ॥ चकारभस्मसात्सद्योब्र
ह्मादीनांचपश्यताम् ॥ ९० ॥ दैत्यान्तकरणंरौद्रंचक्रंचागमदच्युतम् ॥ ततोब्रह्मादयोदेवाःशक्रमुख्याश्चलोकपाः ॥ दृष्ट्वाचविजयंविष्णोःस्तुव
न्तिस्मसमागताः ॥ ९१ ॥ देवाऊचुः ॥ नताःस्मविष्णुंजगदादिभूतंसुरासुरेन्द्रंजगतांप्रपालकम् ॥ यन्नाभिपद्मात्किलपद्मयोनिर्बभूवतंवैशर
णंगताःस्मः ॥ ९२ ॥ नमोनमोमत्स्यवपुर्द्धरायनमोऽस्तुतेकच्छपरूपधारिणे ॥ नमःप्रकुर्मश्चनृसिंहरूपिणेतथापुनर्वामनरूपिणेनमः ॥ ९३ ॥
नमोऽस्तुतेक्षत्रविनाशनायरामायरामायदशास्यनाशिने ॥ प्रलम्बहन्त्रेशितिवाससेनमोनमोऽस्तुबुद्धायचदैत्यमोहिने ॥ ९४ ॥ म्लेच्छान्तका
यापिचकल्किनाम्नेनमःपुनःक्रोडवपुर्धराय ॥ जगद्धितार्थंचयुगेयुगेभवान्बिभर्तिरूपंत्वसुराभवाय ॥ ९५ ॥ निषूदितोऽयंह्यधुनाकिलत्वयादैत्योहिर
ण्याक्षइतिप्रगल्भः ॥ यश्चेन्द्रमुख्यान्किललोकपालान्संहेलयाचैवतिरश्चकार ॥ ९६ ॥ सवैत्वयादेवहितार्थमेवनिपातितोदेववरप्रसीद ॥
त्वमस्यविश्वस्यविसर्गकर्ताब्राह्मेणरूपेणचदेवदेव ॥ ९७ ॥ पातात्वमेवास्ययुगेयुगेचरूपाणिधत्सेसुमनोहराणि ॥ त्वमेवकालाग्निहरश्च
भूत्वाविश्वंक्षयंनेष्यसिचान्तकाले ॥ ९८ ॥ अतोभवानेवचविश्वकारणंनतेऽपरंजीवमजीवमीश ॥ यत्किंचभूतंचभविष्यरूपंप्रवर्त्तमा
नंचतथैवरूपम् ॥ ९९ ॥ सर्वंत्वमेवासिचराचराख्यंनभातिविश्वंत्वदृतेचकिंचित् ॥ अस्तीतिनास्तीतिचभेदनिष्ठंत्वय्ययंवभातंसदस
त्स्वरूपम् ॥ १०० ॥ ततोभवन्तंकतमोऽपिदेवनज्ञातुमर्हत्यविपक्वबुद्धिः ॥ ऋतेभवत्पादपरायणंजनंतेनागताःस्मश्शरणंशरण्यम् ॥
॥ १ ॥ ॥ व्यासउवाच ॥ ततोविष्णुःप्रसन्नात्माउवाचत्रिदिवौकसः ॥ २ ॥ विष्णुरुवाच ॥ तुष्टोऽस्मिदेवाभद्रंवोयुष्मत्स्तोत्रेणसाम्प्र
तम् ॥ ३ ॥ यइदंप्रपठेद्भक्त्याविजयस्तोत्रमादरात् ॥ नतस्यदुर्लभंदेवास्त्रिषुलोकेषुकिंचन ॥ ४ ॥ गवांशतसहस्रस्यसम्यग्दत्तस्ययत्फलम् ॥
तत्फलंसमवाप्नोतिकीर्तनाच्छ्रवणान्नरः ॥ ५ ॥ सर्वकामप्रदंनित्यंदेवदेवस्यकीर्तनम् ॥ अतःपरंमहाज्ञानंनभूतंनभविष्यति ॥ १०६ ॥ इतिश्रीपाद्म
पुराणेप्रथमेसृष्टिखण्डेदेवासुरसंग्रामसमाप्तौविजयस्तोत्रंनामसप्तसप्ततितमोऽध्यायः ॥ ७७ ॥ संजयउवाच ॥ येऽसुराश्चमृतायुद्धेसम्मुखेविमुखेऽपि
वा ॥ गतिंतेषामहंब्रह्मञ्श्रोतुमिच्छामितत्त्वतः ॥१॥ असङ्ख्याताइमेदैत्यास्त्रैलोक्येसचराचरे ॥ अद्याप्यासन्गताःकुत्रएतन्मेशंसभोगुरो ॥ २ ॥ व्या
सउवाच ॥ येमृतास्संमुखेशूरादैत्यानांप्रवरारणे ॥ स्वयंप्राप्यचदेवत्वंभोग्यमश्नन्तिशाश्वतम् ॥ ३ ॥ प्रासादायत्रसौवर्णानानारत्नविभूषिताः ॥
सर्वकामप्रदावृक्षाःस्वर्णदीतोयसंयुताः ॥ ४ ॥ पद्मोत्पलसुकह्लारैर्गन्धाढ्यैरन्यपुष्पकैः ॥ दधिदुग्धाज्यखण्डैश्चयुतापुष्करिणीशुभा ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतीवरूपसम्पन्नाःसदैवनवयौवनाः ॥ यत्रसन्तिस्त्रियोदिव्याःसर्वाभरणभूषिताः ॥ ६ ॥ तत्रराज्यंप्रकुर्वन्तितथैववसुधातले ॥ एवंजन्माष्टकंप्रा
प्यधनिनोऽध्यक्षमन्त्रिणः ॥ ७ ॥ अर्धसंमुखगात्रेणदिवमश्नन्तिशाश्वतम् ॥ विमुखाःकातराभीतायेचमायाविनोरणे ॥ ८ ॥ तेयान्तिनिरयंघो
रंयेचदेवद्विजद्विषः ॥ पतितंमूर्च्छितंभग्नमन्ययोद्धारमाहवे ॥ ९ ॥ हन्तारोनिरयंयान्तितेचम्लेच्छाःकुवाचकाः ॥ परन्यासापहर्तारोविमुखास्स
न्तितत्त्वतः ॥ १० ॥ रात्रौवाविपिनेनष्टेचोरास्साहसकारिणः ॥ सर्वभक्षरतामूढाम्लेच्छागोब्रह्मघातकाः ॥ ११ ॥ कुवाचकाःपरेम्लेच्छाएतेयेकू
टयोनयः ॥ तेषांपैशाचिकीभाषालोकाचारोनविद्यते ॥ १२ ॥ नास्तिशौचंतपोज्ञानंनदेवपितृतर्पणम् ॥ दानश्राद्धादिकंयज्ञेसुराणांचप्रपूजनम्
॥ १३ ॥ पितॄणांचनशुश्रूषाद्विजदेवतपस्विनाम्॥ज्ञानलोपादतस्तेषांमलशौचंनविद्यते ॥ १४ ॥ मातरंभगिनींचान्यांगृहिणींकामयन्तिच ॥ सर्वो
विपर्ययोलोकात्सदाचारोमलीमसः ॥ १५ ॥ तार्क्ष्यस्योद्गमनानांचअन्येषांगोत्रवासिनाम् ॥ कुलजातास्सदादैत्यायेषांपुण्यमकारणम् ॥ १६॥
दुर्गतिंचमृतायान्तिद्विजस्त्रीशिशुघातिनः ॥ गवाशिनोदुरात्मानोह्यभक्ष्यभक्षणेरताः ॥ १७ ॥ कीटयोनिंव्रजन्त्येतेतरवश्चपिपीलिकाः ॥ नमन्त्रे
षुनदेवेषुकल्पन्तेतेसुरद्विषः ॥ १८ ॥ अग्रजःसहजस्तेषांसद्दृङ्ग्णोग्राम्यवृत्तयः ॥ लोमकेशप्रणेतारःक्रव्यभक्षरताभुवि ॥ १९ ॥ साहसंचव्रतंदानंस्ना
नंयज्ञादिकंचयत् ॥ मत्स्यमांसादिषुप्रीतामृषावचनभाषिणः ॥ २० ॥ सदाकामास्सदालोभास्सदाक्रोधमदान्विताः ॥ वधबन्धरतोद्वेगाद्यूतसङ्गी
तसम्प्रियाः ॥ २१ ॥ कुभृत्याःकुजनप्रीताःपूतिगन्धरतानराः ॥ नदेवेषुनविप्रेषुनधर्मश्रवणेषुच ॥ २२ ॥ स्तोत्रमन्त्रादिकेपुण्येयथाकार्येष्वनि
श्चयाः ॥ बहुरोगाधिरोषाश्चबहुरूपपरिच्छदाः ॥ २३ ॥ नरजातिषुदैत्यानांचिह्नान्येतानिभूतले ॥ नजानन्तिपरंलोकंनगुरुंस्वंनचापरम् ॥ २४ ॥
गर्भपूरणमिच्छन्तिनातिथिंनगुरून्द्विजान् ॥ नदेवंनसुतंगोत्रंनमित्रंनचबान्धवम् ॥ २५ ॥ स्वप्नेदानंनजानन्तिभक्षणान्नपरिच्छदम् ॥ गोपायन्तिध
नंयस्मात्तेयक्षानररूपिणः ॥२६॥ प्राणान्तेऽपिधनंकिंचिन्नदिशन्तिचराजनि ॥ तेयक्षादुर्गतिस्थाश्चपरार्थेभारवाहकाः ॥ २७ ॥ प्रेतानांलक्षणंयद्वा
सर्वलोकविगर्हितम् ॥ स्त्रीणांचपुरुषाणांचशृणुष्वैकमनाममम ॥२८॥ मलपङ्कधरानित्यंसत्यशौचविवर्जिताः ॥ दन्तकुन्तलवस्त्राणांवपुषोमलसञ्चयाः
॥ २९ ॥ गृहपीठादिपात्राणांसकृच्छौचंनरोचते ॥ नपश्यन्तिसुखंस्त्रीणांविशन्तिकाननेद्रुतम् ॥ ३० ॥ विघसोच्छिष्टपूतीनांभक्षणेऽभिरताभुवि ॥
अन्नपानंचशयनमन्धकारेषुरोचते ॥ ३१ ॥ कदाचित्स्वस्थतानास्तिक्वचिद्वाशुचितातनौ ॥ लक्षणंनरलोकेषुप्रेतानामीदृशंकिल ॥ ३२ ॥ हिता
हितंनजानन्तिमित्रामित्रंगुणागुणम्॥पापपुण्यादिकंस्थानंस्नानंदेवद्विजार्चनम् ॥३३॥ अरिमित्रमुदासीनंनविदन्तिस्वभावतः ॥ मर्त्यस्थाःपशवस्ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चज्ञायन्तेबुद्धिसंमतैः ॥ ३४ ॥ बुद्ध्यानानात्वभावाश्चभ्रमन्तिचमृषाभुवि ॥ यक्षरूपानरास्तेचसर्वकर्मबहिष्कृताः ॥ ३५ ॥ एषांभेदंप्रवक्ष्यामि
लक्षणंधरणीतले ॥ विजातामत्र्यलोकेषुपापस्यैवानुरूपतः ॥ ३६ ॥ मलीमसभुविप्रस्थंनागरंछद्मरूपिणम् ॥ विघसादिप्रभोक्तारंकाकमाहुर्मनी
षिणः ॥ ३७ ॥ अभक्ष्येनिरतःपापःकुक्कुरःपूतिसंप्रियः ॥ [प्रवृत्तस्सर्वगुह्येषुभक्ष्याभक्ष्यसजीवनः ॥ ३८ ॥ भूम्यांपश्वादियोनीनांकुलेषुप्राप्त
सम्भवाः ॥ शुनोविगृह्यहस्तेनम्लेच्छानांभक्षणप्रियाः ॥ ३९ ॥ विशेषात्सूकराणांचतथाचरणयोधिनाम् ॥ पोषणेभक्षणेप्रीताःपूतिगर्ह्येष्वसा
धुषु ॥ ४० ॥ पर्वतेकरणाद्धत्तैःकाष्ठसञ्चयसङ्ग्रहे ॥ विज्ञेयास्तेसदाम्लेच्छाःक्षत्रियाणांभयाकुलाः ॥ ४१ ॥ लोकानांनष्टधर्मेचसदाशौचवि
वर्जिते ॥ कुलीनानांतदाम्लेच्छाभविष्यन्तिचदस्यवः ॥ ४२ ॥ तेषांसंसर्गतोऽन्येचसम्बन्धादन्नभोजनात् ॥ मैथुनात्तस्ययोषासुतद्भावंतुव्र
जन्तिते ॥ ४३ ॥ तस्मिन्कालेजनास्सर्वेदुःखरोगप्रतापिताः ॥ दुर्भिक्षान्नपरामूढाःसदाराजप्रपीडिताः ॥ ४४ ॥ तत्रासत्येरतामर्त्याःसर्व
शौचविवर्जिताः ॥ नश्रूयन्तेजनैरेवपुराणागमसंहिताः ॥ ४५ ॥ मद्यमांसप्रियाःपापास्सर्वभक्षास्सुदारुणाः ॥ दारुणाचारनिरतानित्यंछ
लपरायणाः ॥ ४६ नपुष्णन्तिसुतास्तातंप्रसुवंचगुरूनपि ॥ नशुश्रूषन्तिवैभृत्याःस्वामिनंगुणशालिनम् ॥ ४७ ॥ भर्तारंनस्त्रियःकाश्चि
च्छ्वशुरौचस्वमातरः ॥ नित्यकष्टानरास्तत्रकलहश्चगृहेगृहे ॥ ४८ ॥ नृपाम्लेच्छाःसुरापाश्चतथामन्त्रिपुरोहिताः ॥ मनुष्यैश्चबलिस्तेषांमत्स्यै
र्मांसैर्निरामिषः ॥ ४९ ॥ पाषण्डायासयोगेभ्यःप्रधानागुणवार्तयोः ॥ धनिकैःकोकिलैर्मन्दैर्व्याप्तंतैस्तुमहीतलम् ॥ ५० ॥ ततोऽन्यो
न्यंप्रियामूढावनेवानगरेषुच ॥ भक्ष्याभक्ष्यंसमश्नन्तिमत्स्यमांसादिकंनराः ॥ ५१ ॥ वनेद्विजातयश्चान्येभुञ्जतेचानुपापकम् ॥ भक्तिमन्तंप
शुंचान्यत्सर्वेयान्त्यपुनर्भवम् ॥५२ ॥ पातयन्तिपितॄन्पापाःसर्वेतेपूर्वदेवकाः ॥ ॥ पिशाचाराक्षसायेचमर्त्यकागुह्यकाध्रुवम् ॥ ५३ ॥ एतेचाविनय
प्रीतानदेवानचमानुषाः ॥५४॥संजयउवाच ॥ कथंचमर्त्यभावेषुलक्षंजानन्तितात्त्विकाः ॥ एतंमेसंशयंनाथदूरीकुरुततस्ततः ॥५५॥ व्यासउवाच ॥
कृतपापानुरूपास्तुद्विजातिष्वन्यजातिषु ॥ असुराराक्षसाःप्रेताःस्वभावंनत्यजन्तिते ॥ ५६ ॥ जातायेचासुरामर्त्येसदातेकलहोत्सुकाः ॥ कु
हकाःकच्चराःक्रूराःविज्ञेयाराक्षसाभुवि ॥ ५७ ॥ जनोद्विग्नादिकंदानंतथादेवार्चनंभुवि ॥ उग्रभावाद्धनंलब्ध्वाराज्यंभुञ्जन्तिशाश्वतम् ॥ ५८ ॥ जयं
शौर्यादिकंपुण्यंपुनःपापक्षयंव्रजेत् ॥ एवमुर्व्यांतथानाकेनागलोकेयमालये ॥ ५९ ॥ उग्रेणतपसाकश्चित्सुरत्वंलभतेदिवि ॥ वासुदेवंसमाराध्य
प्रह्लादःसुरपूजितः ॥ ६० ॥ हरंतथान्धकोदैत्यःस्तुत्वातत्सभ्यकोऽभवत् ॥ तस्यैवगणमुख्यत्वंलेभेभृङ्गीमहाबलः ॥ ६१ ॥ एतेचान्येचबहवो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बलिरिन्द्रोभविष्यति ॥ गच्छन्तिसद्गतिंतातइहामुत्रचसर्वदा ॥ ६२ ॥ केचिद्दैत्यकुलेजाताःपृथिव्यांसुरसत्तमाः ॥ भावयन्तिपितॄन्सर्वाञ्शत
शोऽथसहस्रशः ॥ ६३ ॥ एकेनापिसुपुत्रेणकुलत्राणंचधीमता ॥ एकोऽपिवैष्णवःपुत्रःकुलकोटिंसमुद्धरेत् ॥ ६४ ॥ म्रियन्तेपुण्यतीर्थेषुमुक्तिक्षेत्रेच
ज्ञानतः ॥ ब्रह्मज्ञानविदोयेतेतारयन्तितरन्तिच ॥ ६५ ॥ एकापतिव्रतानारीकुलकोटिंसमुद्धरेत् ॥ जितेन्द्रियोऽपिधर्मात्माद्विजदेवार्चनेरतः ॥६६॥
क्षयेधर्मेकलौशेषेपुरेजनपदेषुच ॥ एकोरक्षतिधर्मात्मापुरेग्रामंजनंकुलम् ॥ ६७ ॥ विज्ञातमेदुरंचासीद्ब्राह्मणानांपुरंमहत् ॥ तत्रसर्वेद्विजाःशश्व
त्सन्ध्योपासनतत्पराः ॥ ६८ ॥ वेदपाठरताधीरादेवातिथिद्विजार्चकाः ॥ यज्ञव्रताग्निकर्माणःषट्कर्मपरिनिश्चयाः ॥ ६९ ॥ अतिकृच्छ्रेचतेषांवैन
पापेवर्ततेमनः ॥ कुर्वन्तिसततंवीराव्रतंयज्ञंसनातनम् ॥ ७० ॥ कदाचिद्दैवयोगाच्चगृहस्थश्चसकोविदः ॥ वह्नौजुहोतिविप्रर्षिराज्यंमन्त्रेणमन्त्रवित्
॥ ७१ ॥ तस्मिन्कालेचतस्यैवमूत्रकृच्छ्रंसुदारुणम् ॥ तत्रोज्झितुंगतःसोऽपिरक्षार्थंस्थाप्यचेटिकाम् ॥ ७२ ॥ तस्यास्त्वनवधानेनशुनाचाज्यं
चभक्षितम् ॥ भियातयाततःपात्रंस्वीयमूत्रेणसम्भृतम् ॥ ७३ ॥ असंलक्ष्याजुहोदग्नौसविप्रस्त्वरयाततः ॥ आश्चर्यंचततोवह्नौलक्षितंतेनतत्क्षणात्
॥ ७४ ॥ कूटंहेममयंसाक्षात्स्वर्णजाम्बूनदप्रभम् ॥ गृहीत्वातन्मुदाविप्रःपापयोगंचकारह ॥ ७५ ॥ पप्रच्छविस्मयादासींकथमेतद्वदप्रिये ॥
मुदातत्रयथावृत्तंकथितंतुतयाद्विज ॥ ७६ ॥ ततोनित्यंयथाकालंतच्चतस्यप्रवर्तते ॥ समृद्धिरद्भुतागेहेलोकविस्मयकारिणी ॥ ७७ ॥ ततःपरस्परा
च्छ्रुत्वासर्वैरेवचतत्पुरे ॥ कृतंकर्मदुराचारंश्रुत्वालोभादसाधुभिः ॥ ७८ ॥ गुरुलोभाच्चसुमहत्स्वान्तेपङ्कंविशत्यपि ॥ पङ्कादेवभयान्मोहान्मतिभ्रं
शोऽभवत्ततः ॥ ७९ ॥ अथकिल्बिषकूटेनदग्धमेवपुरंचतत् ॥ स्त्रियोदुष्टाजनादुष्टाःसर्वेपापबलात्तदा ॥ ८० ॥ वृद्धोज्ञाताद्विजस्तत्रतत्कार्येनमतिं
दधौ ॥ तस्यभार्यातदासाध्वीपुरुदुःखेनसंयुता ॥ ८१ ॥ भर्तारंकृच्छ्रसन्तप्तापुरकार्यंजगादसा ॥ ८२ ॥ ब्राह्मण्युवाच ॥ कष्टमेवर्ततेनाथदृष्ट्वा
त्वांदुःखसंयुतम् ॥ ग्रामाचारमिमंयद्वाऽप्यपरंकर्तुमर्हसि ॥ ८३ ॥ व्यासउवाच ॥ ततस्तत्रसदोषज्ञःस्मित्वावचनमब्रवीत् ॥ ८४ ॥ द्विजउवाच॥
यस्तुजीवतिपापेनत्यक्त्वाधर्मपरंहितम् ॥ सवैधेयोमहाभागेप्रगच्छत्यपुनर्भवम् ॥ ८५ ॥ एतेविप्रादुराचाराःसदारास्सपरिच्छदाः ॥ अतिपात
कयोगाच्चमहापातकसंमताः ॥ ८६ ॥ सहपापेनमहताप्रयास्यन्तिरसातलम् ॥ अन्तेऽपुनर्भवंप्राप्यापराधान्तोनविद्यते ॥ ८७ ॥ अहमेकोऽत्रति
ष्ठामिस्वपुण्यपरिरक्षणात् ॥ ८८ ॥ व्यासउवाच ॥ ततस्सातमुवाचेदंलोकहास्यंवचस्तव ॥ वक्तुमर्हसिनश्चाग्रेनपुरोऽन्यस्यकस्यचित् ॥ ८९ ॥
द्विजउवाच ॥ यदियास्यामिचान्यत्रइतोऽहंतत्क्षणात्प्रिये ॥ सवित्तैःस्वजनैरेवपुरीयास्यत्यधोगतिम् ॥ ९० ॥ व्यासउवाच ॥ इत्युक्त्वापरम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रीतःसङ्गृह्यचधनंस्वकम् ॥ क्षिप्रंसचतयासार्धंययौसीमान्तरंद्विजः ॥ ९१ ॥ स्थित्वाऽपश्यत्पुरीतावत्स्थिरातिष्ठतिपूर्ववत् ॥ साचाहतंपतिंसाध्वी
पुरीचेयंननश्यति ॥ ९२ ॥ विमृश्यतामुवाचेदंविप्रवर्यस्सुविस्मितः ॥ किंनुतिष्ठतितत्रैवद्रव्यमस्मद्गृहाद्बहिः ॥ ९३ ॥ विचार्यसाधवंप्राहमया
भ्रान्त्याऽपानहौ ॥ नानीतेतिष्ठतस्तत्रधारयिष्यामिकिंनुवै ॥ ९४ ॥ एवमुक्त्वापतिंसाध्वीगृहीत्वातेउपागता ॥ पत्युरभ्याशतोदृष्टंपुरंनिर्व्यथनं
गतम् ॥ ९५ ॥ ततोविप्रादयोवर्णाःकचराःपुरवासिनः ॥ तिष्ठन्तिनरकेघोरेदुःखिताश्चापुनर्भवे ॥ ९६ ॥ कृच्छ्राद्यमपुरंयान्तिनास्तितेषांचनि
ष्कृतिः ॥ पूतिगन्धंततोऽमेध्यंवर्जनीयंप्रकीर्तितम् ॥ ९७ ॥ पूर्ववद्भक्षणेप्रीतोह्यघपापंकरोतिच ॥ स्तेयशीलोनिशाचारीबुधैर्ज्ञेयस्सवञ्चकः ॥ ९८ ॥
अबुधःसर्वकार्येषुअज्ञातःसर्वकर्मसु ॥ समयाचारहीनस्तुपशुरेवसबालिशः ॥ ९९ ॥ एवमुष्ट्रादयस्सन्तिभक्षादिनकुलादयः ॥ हिंस्रोज्ञातिज
नोद्वेगीरतेयुद्धेचकातरः ॥ १०० ॥ विघसादिप्रियोनित्यंनरःश्वाकीर्तितोबुधैः ॥ चौर्यकर्मरतोनित्यंबहुमित्रप्रवञ्चकः ॥ १ ॥ मिथुनेकलहोनित्यं
मर्त्यस्तुपरिकीर्तितः ॥ प्रकृत्याचपलोनित्यंसदाभोजनचञ्चलः ॥ २ ॥ प्लवगःकाननप्रीतोनरःशाखामृगोभुवि ॥ सूचकोभाषयाबुद्ध्यास्वजनेऽन्य
जनेषुच ॥ ३ ॥ उद्वेगजनकत्वाच्चसपुमानुरगःस्मृतः ॥ बलवान्क्रान्तशीलश्चसततंचानपत्रपः ॥ ४ ॥ पूतिमांसप्रियोभोगीनृसिंहस्समुदाहृतः ॥
तत्स्वनादेवसीदन्तिभीताअन्येवृकादयः ॥ ५ ॥ द्विरदादिनरायेचज्ञायन्तेदूरदर्शिनः ॥ एवमादिक्रमेणैवविजानीयान्नरेषुच ॥ ६ ॥ सुराणांलक्षणं
ब्रूमोनररूपंव्यवस्थितम् ॥ द्विजदेवातिथीनांचगुरुसाधुतपस्विनाम् ॥ ७ ॥ पूजातपोरतोनित्यंधर्मशास्त्रेषुनीतिषु ॥ क्षमाशीलोजितक्रोधःसत्यवादी
जितेन्द्रियः ॥ ८ ॥ अलुब्धःप्रियवाक्शान्तोधर्मशास्त्रार्थसंप्रियः ॥ दयालुर्दयितोलोकेरूपवान्मधुरस्वरः ॥ ९ ॥ वागीशःसर्वकार्येषुगुणीदक्षो
महाबलः ॥ साक्षरश्चापिविद्वांश्चगीतनृत्यार्थतत्त्ववित् ॥ ११० ॥ आत्मविद्यादिकार्येषुसर्वतन्त्रीस्वरेषुच ॥ हविष्येषुचसर्वेषुगव्येषुचनिरामिषे
॥ ११ ॥ सद्योगास्वादद्रव्येचप्रत्यग्रेचातिशोभने ॥ गन्धमाल्येषुवस्त्रेषुशास्त्रेष्वाभरणेषुच॥ १२ ॥सम्प्रीतश्चातिथौदानेपार्वणादिषुकर्मसु ॥ स्नानदाना
दिभिःकार्यैर्व्रतैर्यज्ञैःसुरार्चनैः ॥ १३ ॥ कालोगच्छतिपाठैश्चनक्लीबंवासरंभवेत् ॥ अयमेवमनुष्याणांसदाचारोनिरन्तरम् ॥ १४ ॥ देववन्मानवाचारोगी
यतेमुनिसत्तमैः ॥ किन्तुसत्त्वाधिकोदेवोमनुष्योभीतएवच ॥ १५ ॥ गम्भीरःसर्वदादेवःसदैवमानवोमृदुः॥ द्वयोस्तुल्याचसम्प्रीतिर्नदैत्यादौभवेत्किल
॥ १६ ॥प्रीतिभावंपरंसौख्यंसौहृदंसुकृतंशुभम्॥दैवमानुषयोरेवदैत्यराक्षसयोस्तथा॥ १७ ॥प्रेतादीनांचप्रेतेषुपशौप्रीतिःपशोरपि ॥काकादयःस्वजातौच
तथान्येचस्वजातिषु॥ १८ ॥प्रीताभवन्तिचाप्रीताविज्ञातेषांचलक्षणम्॥एवंपुण्यविशेषेणसविशेषासुजातिषु ॥ १९ ॥ प्रियाप्रियंविजानीयात्पुण्यापुण्यं

CC-0. In Public Domain. Digitization by eGangotri

गुणागुणम्॥दम्पत्योर्नसुखंकिंचिज्जातिभेदान्नृणांभुवि ॥१२०॥ स्वजातिषुभवेत्प्रीतिर्मुक्तौवानिरयेऽपिवा॥अतिपुण्याल्लभेदायुःशोभनाःपुण्यकारिणः
॥२१॥पापात्मानोलभन्तेऽन्तंयेचदैत्यादयोनराः॥कृतेजाताःसुराभूमौनदैत्याश्चान्यजातयः ॥२२॥ त्रेतायामेकपादंचद्विपदंद्वापरेयुगे॥सन्ध्यायांचक
लेरेवसर्वपादंचसङ्कुलम् ॥२३॥ देवादीनांभवेज्जातंभारतंयत्प्रवर्तितम्॥येतेदुर्योधनस्यैवयोधाःसैन्यादयस्तथा॥२४॥ तेचदैत्यादयःसर्वेयेचकर्णादयो
भुवि॥गाङ्गेयोवसुमुख्यश्चद्रोणोदेवमुनिःप्रभुः ॥२५॥ अश्वत्थामाहरःसाक्षाद्धरिर्नन्दकुलोद्भवः॥पञ्चेन्द्राःपाण्डवाजाताविदुरोधर्मएवच॥२६॥गान्धा
रीद्रौपदीकुन्तीचैतादेव्योधरातले ॥ देवदैत्याःकलेर्मध्येदैत्याश्शेषेचमानवाः ॥ २७ ॥ उत्पत्स्यन्तेसदाप्रेताःक्रव्यादाःपशुपक्षिणः ॥ तेषांचकुलटा
दासीनित्यकष्टायवीयसी ॥२८॥ नित्यंद्वन्द्वेषुसम्प्रीत्यातेषामाचारभाषिणी ॥ किल्बिषेषुचसर्वेषुकलहेऽन्यायकर्मणि ॥ रतादैत्यादयोयेतेसर्वेनिरय
गामिनः ॥ २९ ॥ वैशम्पायनउवाच ॥ दैत्यादीनांमृषाभावात्सुरत्वंनसुरालयम् ॥ कथंभोग्यंकथंसौख्यमारोग्यंबलसञ्चयम् ॥१३०॥ राज्यमायु
स्तथाकीर्तिरभीष्टंदयितंबलम् ॥ नीतिविद्यादिकंभाव्यंजन्मवृद्धंसनातनम् ॥३१ ॥ दानाध्ययनकर्माणियज्ञादिचकथंप्रभो ॥ एतदाताय शिष्यायम
ह्यंभोवक्तुमर्हसि ॥३२॥ व्यासउवाच ॥ दैत्यानांसाहसादेवतापोभवतिनिश्चितम् ॥ व्रतंयज्ञादिकंचैवसम्प्रीतिःस्वजनस्यच ॥३३॥ योदान्तोविगुणैर्मु
क्तोनीतिशास्त्रार्थतत्त्वगः ॥ एतैश्चविविधैःपूतःसभवेत्सुरलक्षणः ॥ ३४ ॥ पुराणागमकर्माणिनाकेष्वत्रचवैद्विज ॥ स्वयमाचरतेपुण्यंसधरोद्धरण
क्षमः ॥ ३५ ॥ यःशैवोवैष्णवश्चाण्डःसौरोगाणपएवच ॥ तारयित्वापितॄन्सर्वान्सधरोद्धरणक्षमः ॥ ३६ ॥ विशेषाद्वैष्णवंदृष्ट्वाप्रीयतेपूजयेच्चयः ॥
विमुक्तस्सर्वपापेभ्यस्सधरोद्धरणक्षमः ॥ ३७ ॥ षट्कर्मनिरतोविप्रःसर्वयज्ञरतस्सदा ॥ धर्माख्यानप्रियोनित्यंसधरोद्धरणक्षमः ॥ ३८ ॥ विश्वास
घातिनोयेचकृतघ्नाव्रतलोपिनः ॥ द्विजदेवेषुविद्विष्टाश्शातयन्तिधरांनराः ॥ ३९ ॥ येचमद्यरताःपापाद्यूतकर्मरतास्तथा ॥ पाषण्डपतितालापाः
शातयन्तिधरांनराः ॥ १४० ॥ सुकर्मरहितायेचनित्योद्वेगाश्चनिर्भयाः ॥ स्मृतिशास्त्रार्थकोद्विग्नाश्शातयन्तिधरांनराः ॥ ४१ ॥ निजवृत्तिंपरित्य
ज्यकुर्वन्तिचाधर्मांचये ॥ गुरुनिन्दारताद्वेषाच्छातयन्तिधरांनराः ॥ ४२ ॥ दातारंयेरोधयन्तिपातकेप्रेरयन्तिच ॥ दीनानाथान्पीडयन्तिशातय
न्तिधरांनराः ॥ ४३ ॥ एतेचान्येचबहवःपापकर्मकृतोनराः ॥ पुरुषान्पातयित्वातुशातयन्तिधरांनराः ॥ ४४ ॥ यइदंशृणुयाद्रम्यंगुह्याद्गुह्यंपरंहि
तम् ॥ नतस्यदुर्गतिर्दुःखंदौर्भाग्यंदीनताभुवि ॥ ४५ ॥ नदैत्यादौभवेज्जन्मस्वर्लोकेशाश्वतंसुखम् ॥ नाकालेमरणंतस्यनचपापैःप्रलिप्यते ॥
॥ ४६ ॥ इहसर्वजनाध्यक्षस्त्रिदिवंत्रिदिवेश्वरः ॥ कल्पंकल्पंदिवंभुक्त्वामोक्षमार्गंव्रजत्यसौ ॥ १४७ ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेपुण्यव्यक्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्नामाष्टसप्ततितमोऽध्यायः ॥ ७८ ॥ वैशम्पायनउवाच ॥ प्रभवत्ययमाकाशेनित्यंद्विजवरप्रभो ॥ कोऽयंकोवाप्रभावोऽस्यकुत्रजातोघृणीश्वरः॥१॥
किंकरोतीहिकार्यंवैयतोरश्मिमयोभृशम् ॥ देवैर्मुनिवरैस्सिद्धैश्चारणैर्दैत्यराक्षसैः ॥ २ ॥ निखिलैर्मानुषैःपूज्यःसदैवब्राह्मणादिभिः ॥ ३ ॥ व्यास
उवाच ॥ परमंब्रह्मणस्तेजोब्रह्मदेहाद्विनिस्सृतम् ॥ साक्षाद्ब्रह्ममयंविद्धिधर्मकामार्थमोक्षदम् ॥ ४ ॥ मयूखैर्निर्मलैःकूटमतिचण्डंसुदुःसहम् ॥ दृष्ट्वा
प्रदुद्रुवुर्लोकाःकरैश्चण्डैःप्रपीडिताः ॥ ५ ॥ ततश्चसागराःसर्वेवरनद्योनदादयः ॥ शुष्यन्तिजन्तवस्तत्रम्रियन्तेचातुराजनाः ॥ ६ ॥ अथशक्रादयो
देवाब्रह्माणंसमुपागताः ॥ इममर्थंतदाप्रोचुर्देवांश्चविधिरब्रवीत् ॥ ७ ॥ ब्रह्मोवाच ॥ आदिर्ब्रह्मतनोर्देवाःसत्त्वगोजनकःप्रभुः ॥ अयंरजोमयःसाक्षा
त्सुधांशुस्तनुमध्यगः ॥ ८ ॥ एताभ्यांपालितालोकास्त्रैलोक्येसचराचराः ॥ दिव्योपपादकादेवायेवात्रैवजरायुजाः ॥ ९ ॥ अण्डजास्स्वेदजाश्चैव
येवात्रैवोद्भिज्जादयः ॥ सूर्यस्यास्यप्रभावंतुवक्तुमेवनशक्नुमः ॥ १० ॥ अनेनरक्षितालोकाजनितापालिताध्रुवम् ॥ अस्यैवसदृशोनास्तिसर्वेषांपरि
रक्षणात् ॥ ११ ॥ यंचदृष्ट्वाप्युषःकालेपापराशिःप्रलीयते ॥ तमाराध्यजनामोक्षंसाधयन्तिद्विजातयः ॥ १२ ॥ सन्ध्योपासनकालेतुविप्राब्रह्मवि
दःकिल ॥ उद्बाहवोभवन्त्येवतेचदेवप्रपूजिताः ॥ १३ ॥ अस्यैवमण्डलस्थांचदेवींसन्ध्यास्वरूपिणीम्॥समुपास्यद्विजास्सर्वेलभन्तेस्वर्गमोक्षकौ ॥
॥ १४ ॥ धरायांपतितोच्छिष्टाःपूतास्तेचास्यरश्मिभिः ॥ सन्ध्योपासनमात्रेणकल्मषात्पूततांव्रजेत् ॥ १५ ॥ दृष्ट्वाचाण्डालकंगोघ्नंपतितंकुष्ठस
ङ्गतम् ॥ महापातकसङ्कीर्णमुपपातकसंवृतम् ॥ १६ ॥ पश्यन्तियेनरास्सूर्यंतेपूतागुरुकिल्बिषात् ॥ अस्योपासनमात्रेणसर्वरोगात्प्रमुच्यते ॥१७॥
नान्धत्वंनचदारिद्र्यंनदुःखंनचशोच्यताम् ॥ लभतेचइहामुत्रसमुपास्यविरोचनम् ॥ १८ ॥ प्रदृष्टानैवलोकैश्चदेवाहरिहरादयः ॥ ध्यानरूपप्रगम्या
स्तेदृष्टोदेवोह्ययंस्मृतः ॥ १९ ॥ देवाऊचुः ॥ अस्तुप्रसादनाराध्यश्चास्तूपासनपूजनम् ॥ अस्यैवदर्शनंब्रह्मन्प्रलयानलसंमितम् ॥ २० ॥ सर्वेन
रादयस्सत्त्वामृतावस्थांगताभुवि ॥ अस्यतेजःप्रभावेणप्रनष्टास्सागरादयः ॥ २१ ॥ नसमर्थावयंसोढुंकथमन्येपृथग्जनाः ॥ तस्मात्तवप्रसादाच्चपू
जयामोयथारविम् ॥ यजन्तिचनराभक्त्यातदुपायोविधीयताम् ॥२२॥ व्यासउवाच ॥ देवानांवचनंश्रुत्वागतोब्रह्माखगेश्वरम् ॥ गत्वास्तोतुंसमारे
भेसर्वलोकहितायवै॥२३॥ब्रह्मोवाच॥देवत्वंसर्वलोकस्यचक्षुर्भूतोनिरामयः॥ब्रह्मरूपधरःसाक्षाद्दुष्प्रेक्ष्यःप्रलयानलः॥२४॥ सर्वदेवस्थितस्त्वंहिसदावा
युसखस्तनौ ॥ अन्नादिपाचनंत्वत्तोजीवनंचभवेद्ध्रुवम् ॥ २५ ॥ उत्पत्तिप्रलयौदेवत्वमेकोभुवनेश्वरः ॥ त्वदृतेसर्वलोकानांदिनैकंनास्तिजीवनम् ॥
॥ २६ ॥ प्रभुस्त्वंसर्वलोकानांत्रातागोप्तापिताप्रसूः ॥ चराचराणांसर्वेषांत्वत्प्रसादाद्धृतंजगत् ॥ २७ ॥ देवेषुत्वत्समोनास्तिभगवंस्त्वखिलेषुच ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्तर्देहेषुबाह्येषुसर्वेषुभुवनेषुच ॥ २८ ॥ सर्वत्रतेऽस्तिसद्भावस्त्वयैतद्धारितंजगत् ॥ रूपगन्धादिकारीत्वंरसानांस्वादुतात्वया ॥ २९ ॥ एवं
विश्वेश्वरःसूरोनिखिलस्थितिकारकः ॥ तीर्थानांपुण्यक्षेत्राणांमखानांजगतःप्रभोः ॥ ३० ॥ त्वमेकःप्रयतोहेतुस्सर्वसाक्षीगुणाकरः ॥ सर्वज्ञःसर्व
कर्ताचहर्तापातासदोत्सुकः ॥ ३१ ॥ ध्वान्तपङ्कामयघ्नश्चदारिद्र्यदुःखनाशनः ॥ प्रेत्येहचपरोबन्धुःसर्वज्ञःसर्वलोचनः ॥ ३२ ॥ त्वदृतेसर्वलो
कानामुपकारीनविद्यते ॥ ३३ ॥ आदित्यउवाच ॥ पितामहमहाप्राज्ञविश्वेन्द्रविश्वभावक ॥ ब्रूहिशीघ्रंपरंयत्तेकरिष्यामिमतंविधे ॥ ३४ ॥ ब्रह्मो
वाच ॥ मयूखस्तेऽतिचण्डश्चलोकानामतिदुःसहः ॥ यथैवमृदुतामेतितथाकुरुसुरेश्वर ॥ ३५ ॥ आदित्यउवाच ॥ किरणाःकोटिकोटिर्मेलोक
नाशकराःपराः ॥ नचाभीष्टकरालोकेप्रयोगाच्छिन्धितान्प्रभो ॥ ३६ ॥ व्यासउवाच ॥ ततोविरिञ्चिनातूर्णंरविवाक्यवशाद्ध्रुवम् ॥ आहूय
विश्वकर्माणंकृत्वावज्रमयींभ्रमिम् ॥ ३७ ॥ चिच्छेदचरवेर्भानून्प्रलयानलसन्निभान् ॥ तैरेवरचितंतत्रविष्णोश्चक्रंसुदर्शनम् ॥ ३८ ॥ अमोघं
यमदण्डंचशूलंपशुपतेस्तथा ॥ कालस्यचपरःखड्गश्शक्तिर्गुरुप्रमोदिनी ॥ ३९ ॥ चण्डिकायाःपरंशस्त्रंविचित्रंशूलकंतथा ॥ चक्रेब्रह्माज्ञयाशीघ्रं
विश्वकर्मातुतेनवै ॥ ४०॥ सहस्रकिरणंशिष्टमन्यच्चैवप्रशातितम् ॥ अजनोपायभावेनपुनश्चकश्यपान्मुनेः ॥ ४१ ॥ अदितेर्गर्भसञ्जातआदित्यइतिवै
स्मृतः ॥ अयंचरतिविश्वान्तेमेरुश्रृङ्गंभ्रमत्यपि ॥ ४२ ॥ सदोर्ध्वंदिनरात्रंचधरण्यालक्षयोजने ॥ ग्रहाश्चन्द्रादयस्तत्रचरंन्तिविधिनोदिताः ॥ ४३ ॥
सूरःसञ्चरतेमासान्द्वादशद्वादशात्मकः ॥ सङ्क्रमादस्यसङ्क्रान्तिःसर्वैरेवप्रतीयते ॥ ४४ ॥ तासुयद्दाफलंब्रूमोलोकानांनिखिलंमुने॥धनुर्मिथुनमीने
षुकन्यायांषडशीतयः ॥ ४५ ॥ वृषवृश्चिककुम्भेषुसिंहेविष्णुपदीस्मृता ॥ तर्पणंचाक्षयंविद्धिदानंदेवार्चनंतथा ॥ ४६ ॥ षडशीतिसहस्राणिषडशीतौ
फलंभवेत् ॥ विष्णुपद्यांतुलक्षंतुअयनेकोटिकोटिकम् ॥ ४७ ॥ विष्णुपद्यांतुयद्दानमक्षयंपरिकीर्तितम् ॥ दातुर्वदामिसान्निध्यंसदाजन्मनिजन्मनि
॥ ४८ ॥ शीतेतूलपटीदानान्नदुःखंजायतेतनौ ॥ तुलादानेतल्पदानेद्वयोरेवाक्षयंफलम् ॥ ४९ ॥ सर्वोपकरणांशय्यांयोददातिविमत्सरः ॥ वर्णमु
ख्यायविप्रायसराजपदवींलभेत् ॥ ५० ॥ तथैवाग्निंजलंदत्त्वानदीतीरेपथिप्रगे ॥ दत्त्वाचतैलताम्बूलमुर्व्याअधिपतिर्भवेत् ॥ ५१ ॥ सत्यभावाद्द्विजं
नत्वाधनीचाक्षयतांव्रजेत् ॥ माघेमास्यसितपक्षेपञ्चदश्यामहर्मुखे ॥५२ ॥ पितॄंस्तिलजलैरेवतर्पयित्वाक्षयोदिवि॥ सुलक्षणांचगांदत्त्वाहेमश्रृङ्गांमणि
प्रभाम् ॥ ५३ ॥ रौप्यखुरप्रदेशांचतथाकांस्यसुदोहनाम् ॥ एतांदत्त्वाद्विजाग्र्यायसार्वभौमोभवेन्नृपः ॥ ५४ ॥ दत्त्वान्नाभरणंराजामण्डलेशोधने
श्वरः ॥ तिलधेनुंतुयोदद्यात्सर्वोपस्करणान्विताम् ॥ ५५ ॥ सप्तजन्मार्जितात्पापान्मुक्तोनाकेऽक्षयोभवेत् ॥ भोज्यान्नंब्राह्मणेदत्त्वाअक्षयंस्वर्गमश्नुते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ९६ ॥ धान्यंवस्त्रंतथाभृत्यंगृहपीठादिकंचयत् ॥ योददातिद्विजाग्र्याय तंचलक्ष्मीर्नमुञ्चति ॥ ९७ ॥ यत्किञ्चिद्दीयतेदानंस्वल्पवायदिवाबहु ॥
अक्षयंपरलोकेषुयुगाद्यासुतथैवच॥९८॥ यद्वादेवार्चनंस्तोत्रंधर्माख्यानप्रतिश्रवः ॥ पुनातिसर्वपापेभ्योदिविपूज्योभवत्यसौ ॥९९॥तृतीयामाघमास
स्यसितामन्वन्तरास्मृता ॥ तस्यांयद्दीयतेदानंसर्वमक्षयमुच्यते ॥ ६० ॥ धनंभोग्यंतथाराज्यंनाकेकल्पान्तरस्थितम् ॥ तस्माद्दानंसतांपूजाप्रेत्यान
न्तफलप्रदा ॥ ६१ ॥ मन्वन्तरातुमाघेस्यात्सप्तमीयासितेतरा ॥ तिथिःपुण्यतमाप्रोक्तापुराणैरभिरक्षिता ॥ ६२ ॥ माघमासेसितेपक्षेसप्तमीकोटिभा
स्करा ॥ तामुपोष्यनरःपुण्यांमुच्यतेनात्रसंशयः ॥ ६३ ॥ सूर्यग्रहणतुल्याहिशुक्लामाघस्यसप्तमी ॥ अरुणोदयवेलायांतस्यांस्नानंमहाफलम् ॥
॥ ६४ ॥ यच्चतत्रकृतंपापंमयासप्तसुजन्मसु ॥ तन्मेरोगंचशोकंचभास्करीहन्तुसप्तमी ॥ ६५ ॥ जननीसर्वभूतानांसप्तमीसप्तसप्तिके ॥ सप्तम्यामुदितेदे
विनमस्तेरविमण्डले ॥ ६६ ॥ अर्कपत्रंयवाःपुष्पंसुगन्धबदरीफलम् ॥ तत्पत्रेताम्रपात्रेवायुक्तमानीयतण्डुलम् ॥ ६७ ॥ यज्ञसूत्रंससिन्दूरं
दत्त्वाचार्घंसुशोभनम् ॥ सर्वंपापंक्षयंयातिसप्तजन्मकृतंचयत् ॥ ६८ ॥ नरकैःपीड्यतेतावद्रोगैःपापैश्चदुःखदैः ॥ हविष्यंभोजयेदन्नंशुद्धमात
पतण्डुलैः ॥ ६९ ॥ वर्जयेच्चशिलाघृष्टंशृङ्गबेरंतुशाककम् ॥ कोरदूषकपत्रंचरम्भाच्छागीघृतंतथा ॥ ७० ॥ केशकीटादिकंवर्ज्यमुष्णोदस्ना
नमेवच ॥ अल्पबीजादिकंसर्वंव्रतेसूरस्यवर्जयेत् ॥ ७१ ॥ अन्यच्चनाचरेत्तत्रधर्मचिन्तांविनाव्रती ॥ सौरव्रतंमहापुण्यंपुराणैरभिनन्दितम्
॥ ७२ ॥ वर्षकोटिसहस्राणिवर्षकोटिशतानिच ॥ आदित्यस्यसमंभोग्यंलभतेदिविशाश्वतम् ॥ ७३ ॥ एवंस्वर्गक्षयादेवराजाभूमौमहाधनी ॥ मर्त्ये
लोकेपुराभ्यासात्करोतिभास्करव्रतम् ॥७४॥ तथास्वयंसुखंभोग्यंलभतेदिविशाश्वतम् ॥ आरोग्यंसम्पदंजन्मीभास्करस्यप्रसादतः ॥ ७५ ॥ रवि
वारेभवेद्याचसप्तमीमाघशुक्लके ॥ महाजयेतिविख्याताअन्यत्रविजयास्मृता ॥ ७६ ॥ विजयाकोटिलक्षंस्यादनन्तंस्यान्महाजया ॥ तत्रैकेनव्रतेनैवे
मुच्यतेजन्मबन्धनात् ॥ ७७ ॥ अश्वरत्नंसुवर्णंचरक्तवस्त्रंचधान्यकम् ॥ ददातिभास्करप्रीत्यास्वर्गमर्त्यपतिःक्रमात् ॥ ७८ ॥ एषांभेदंप्रवक्ष्यामिशृणु
विप्रयथार्थवत् ॥ उत्तमाभरणैर्युक्तंसद्वाहंयोददातिह ॥ ७९ ॥ समुद्रैस्सप्तभिर्जुष्टांभूमिमेत्यरिवर्जिताम्॥लभेद्भवान्तरेमर्त्यमेकेनैकाधिपोभवेत् ॥८०॥
अश्वहीनंचपत्राङ्गंवृषभैर्वाप्यलङ्कृतम्॥ हेममाषंद्विमाषंवादक्षिणाविहिताबुधैः॥ ८१ ॥ रत्नभाण्डंमहार्घंचहैमैरेवकृतंचयत् ॥ स्वर्णंवाकेवलंदत्त्वात्रिवि
ष्टपधनेश्वरः ॥ ८२ ॥ रक्तवस्त्रंचधान्यंचशक्तितोयःप्रयच्छति ॥ स्वर्गोर्व्योरीशतामेतिनतंलक्ष्मीर्विमुञ्चति ॥ ८३ ॥ अरोगीसुप्रसन्नात्मादस्युजेताप्र
तापवान् ॥ यावत्प्रभासतेभानुस्तावत्पूज्यतमोहिसः॥ ८४ ॥ माघादौद्वादशीमायांसप्तमींकारयेत्सतु॥इहाभीष्टफलंभुक्त्वासुरैश्चैवप्रपूज्यते॥ ८५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अर्काङ्गसप्तमीव्रतंकृत्वाचविधिवद्बुधः ॥ पापात्पूतइहाभीष्टंसम्प्राप्यमुक्तिमाप्नुयात् ॥ ८६ ॥ लक्षणंचप्रवक्ष्यामिमासिमासिचयोविधिः ॥ व्रतस्यास्यप्रसादाच्चसुराणामर्चितोदिवि॥८७॥शुक्लपक्षेरविदिनेप्रवृत्तेचोत्तरायणे ॥ पुंनामधेयनक्षत्रेगृह्णीयात्सप्तमीव्रतम्॥ ८८॥ हस्तोमैत्रंतथापुष्यः श्रवोमृगपुनर्वसू ॥ पुंनामधेयनक्षत्राण्येतान्याहुर्मनीषिणः ॥ ८९ ॥ पञ्चम्यामेकभक्तंतुषष्ठ्यांनक्तंप्रकीर्तितम् ॥ सप्तम्यामुपवासंचअष्टम्यांपारणंभवेत् ॥९०॥ अर्काग्रंशुचिगोमयंसुमरिचंतोयंफलंचाश्नुतेमूलंनक्तमुपोषणंचविधिवत्कृत्वैकभक्तंतथा ॥ क्षीरंवाप्यशनंघृताक्तमितिचप्रोक्ताःक्रमेणामुना कृत्वावासरसप्तमींदिनकृतःप्राप्नोत्यभीष्टंफलम् ॥ ९१॥ अर्काग्रंग्रामात्पूर्वोत्तरदिग्गतार्कविटपस्यशाखाग्रस्थितंविशिष्टंसूक्ष्मपत्रद्वयंसतोयंदन्तैरस्पृष्टं पातव्यम् ॥ शुचिगोमयंभूमावपतितंमध्याङ्गुष्ठाभ्यांपलमात्रंदन्तैरस्पृष्टंसतोयंपातव्यम् ॥ सुमरिचमव्रणमपुरातनंस्थूलमवशुष्कमेकंदन्तैरस्पृष्टंसतोयं पातव्यम् ॥ तोयंब्रह्मपित्रङ्गुलीमूलप्रसरंपातव्यम् ॥ फलंखर्जूरनारिकेलानामन्यतमंदन्तैरस्पृष्टंपातव्यम्॥ घृताक्तमितिचाहारंमयूरडिम्भपरिमाणम् ॥ घृतमपितत्परिमाणम् ॥ ९२ ॥ आत्मनोद्विगुणांछायांयदाकुर्वीतभास्करः ॥ तदानक्तंविजानीयान्ननक्तंनिशिभोजनम् ॥ ९३ ॥ प्रथमंपूजयेद्देवंफलपुष्पादिमन्त्रकैः ॥ अन्नदानंततःकुर्याद्विध्युक्तपरिमाणकम् ॥ ९४ ॥ ततोध्यानम् ॥ सर्वलक्षणम्पूर्णंसर्वाभरणभूषितम् ॥ द्विभुजंरक्तवर्णंचरक्तपङ्कजधृत्करम् ॥ ९५ ॥ तेजोबिम्बंबहुजलमध्यस्थंसपरिच्छदम् ॥ पद्मासनगतंदेवंरक्तगन्धानुलेपनम् ॥ आदित्यंचिन्तयेद्देवंपूजाकालेविशेषतः ॥९६॥ मन्त्रश्चायम् ॥ भास्करायविद्महेसहस्ररश्मयेधीमहितन्नःसूर्यःप्रचोदयात् ॥ ९७॥ जप्यएषपरःप्रोक्तःसप्तम्यांविजयावहः ॥ करवीरैःकरञ्जैश्वरक्तकुङ्कुमसन्निभैः ॥ ९८ ॥ पश्चाच्चपारणाकार्यातथाष्टम्यांविशेषतः ॥ अष्टम्यामेवकर्तव्यंनवम्यांनैवपारणम् ॥ ९९ ॥ व्रतेफलंनचाप्नोतिनवम्यांपारणेकृते ॥ पारणंत्वपराह्णेतुकटुतिक्ताम्लवर्जितम् ॥ १०० ॥ तण्डुलंशोधयेद्यत्नात्तृणबीजादिकंत्यजेत् ॥ मुद्गमाषतिलादीनिघृतंचपरिवर्जयेत् ॥ १ ॥ ब्राह्मणान्भोजयेद्भक्त्याशक्तःक्षीरादिहव्यकैः ॥ यथाशक्त्यन्नपानैश्वव्यञ्जनैश्चनिरामिषैः ॥ २ ॥ विप्रायदक्षिणांदद्याद्विभज्यचानुरूपतः ॥ इमामनन्तफलदांयःकुर्यात्सप्तमींनरः ॥ ३ ॥ सर्वपापप्रशमनींधनपुत्रविवर्धनीम् ॥ मासिमासिद्विजश्रेष्ठव्रतंकृत्वार्कतुष्टये ॥ ४ ॥ यःकुर्यात्पारणंभक्त्यासूर्यलोकंसगच्छति ॥ कल्पकोटिंवसेत्स्वर्गेततोयातिपरांगतिम् ॥ ५ ॥ इदमेवपरंगुह्यंभाषितंशम्भुनापुरा ॥ श्रवणात्सततंतस्यव्रतस्यपरिपालनात ॥ श्रावयेद्वापिलोकस्यफलंतुल्यंप्रकीर्तितम् ॥ १०६ ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेअर्काङ्गसप्तमीव्रतंनामैकोनाशीतितमोऽध्यायः ॥ ७९ ॥ वैशम्पायनउवाच ॥ भगवंस्त्वत्प्रसादाच्चश्रुतंमेपावनंव्रतम् ॥ अपरंश्रोतुमिच्छामिब्रह्मस्यचप्रि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यंचयत् ॥ १ ॥ व्यासउवाच ॥ कैलासशिखरेरम्येसुखासीनंमहेश्वरम् ॥ प्रणम्यशिरसाभूमौस्कन्दोवचनमब्रवीत् ॥ २ ॥ अर्काङ्गाख्यविधिस्त्व
त्तोमयैवंविस्तराच्छ्रुतः ॥ वारादेर्यत्फलंनाथश्रोतुमिच्छामितत्त्वतः ॥ ३ ॥ ईश्वरउवाच ॥ रक्तपुष्पैरवेर्वारेत्वर्घ्यंदद्याद्व्रतीनरः ॥ नक्ताहारंहविष्यान्नं
कृत्वास्वर्गान्नहीयते ॥ ४ ॥ सप्तम्याश्चसदाचारंसर्वमेवार्कवासरे ॥ कुर्वतःप्रीतिमाप्नोतिसगणःपरमेश्वरः ॥ ५ ॥ सूरस्यसदृशंयातितिथिवारस्य
पालनात् ॥ एकेनगाणपत्यस्ययावत्सूरोनभस्तले ॥ ६ ॥ सर्वकामप्रदंपुण्यमैश्वर्यंरोगनाशनम् ॥ स्वर्गदंमोक्षदंपुण्यंरवेर्वारेव्रतंहितम् ॥ ७ ॥
रविवारेणसङ्क्रान्त्यासप्तम्यातद्दिनेशिवे ॥ व्रतपूजादिकंजप्यंसर्वंचाक्षयतांव्रजेत् ॥ ८ ॥ आदित्यवासरेशुभ्रेग्रहाधिपप्रपूजनम् ॥ प्राणादहतवक्त्रे
णनिःसार्यमण्डलेन्यसेत् ॥ ९ ॥ द्विभुजंरक्तपद्मस्थंसुगलंरक्तवाससंसर्वरक्ताभरणंध्यात्वाहस्ताभ्यांपुष्पंविधृतंसङ्घ्रायैशान्यांक्षिपेत् ॥ १० ॥
आदित्यायविद्महेभास्करायधीमहि ॥ तन्नोभानुःप्रचोदयात् ॥ ११ ॥ ततोगुरूपदिष्टेनविधिनाचविलेपनम् ॥ विलेपनान्तेसद्धूपंधूपान्तेचप्रदीपक
म् ॥ १२ ॥ प्रदीपान्तेचनैवेद्यंततोवारिनिवेदयेत् ॥ ततोजप्यंस्तुतिंमुद्रांनमस्कारंतुकारयेत् ॥ १३ ॥ अञ्जलिःप्रथमामुद्राद्विती
याधेनुकास्मृता ॥ एवंयःपूजयेदर्करविसायुज्यमाप्नुयात् ॥ १४ ॥ ममब्रह्मवधाद्घोरंकपालंकरलग्नकम् ॥ रवेस्तस्यप्रसादाच्चमुक्तंवाराणसीत
टे ॥ १५ ॥ रवेःपरतरंदैवंत्रैलोक्येतुनविद्यते ॥ यस्यप्रसादतोघोरान्मुक्तोऽहंगुरुकिल्बिषात् ॥ १६ ॥ स्कन्दउवाच ॥ श्रुत्वात्वत्तोगिरंनाथवि
स्मयोमेऽभवत्प्रभो ॥ त्वदन्योऽस्तिनकोदेवःकथंब्रह्मवधस्त्वयि ॥ १७ ॥ त्वंचज्ञानीश्वरोयोगीलोकेभोक्ताऽक्षरोऽव्ययः ॥ देवानांगुरुरेकस्त्वंव्याप्त
रूपीमहेश्वरः ॥ १८ ॥ सर्वज्ञोवरदोनित्यंसर्वेषांप्राणिनांप्रभुः ॥ दुष्कृतंतेकुतोनाथतथाक्रोधोविशेषतः ॥ १९ ॥ शिवउवाच ॥ लोकानां
चहितार्थायपृथग्भूतायुगेयुगे ॥ सर्वंकुर्मोवयंपुत्रब्रह्मविष्णुमहेश्वराः ॥ २० ॥ नास्माकंबन्धमोक्षौचनाकार्यंकार्यमेववा ॥ तथालोकस्यरक्षार्थंच
रामोविधिपूर्वकम् ॥ २१ ॥ सर्वंचपरमंचैवसर्वविघ्नविनाशनम् ॥ सर्वरोगप्रशमनंसर्वार्थप्रतिसाधकम् ॥ २२ ॥ एकोऽसौबहुधाभूत्वाकालभे
दादनिन्दितः ॥ मासेमासेतुतपतिएकोद्वादशतांव्रजेत् ॥ २३ ॥ मित्रोमार्गशिरेमासिपौषेविष्णुःसनातनः ॥ वरुणोमाघमासेतुसूर्योवैफाल्गुने
तथा ॥ २४ ॥ चैत्रेमासितपेद्भानुर्वैशाखेतापनःस्मृतः ॥ ज्येष्ठमासेतपेदिन्द्रआषाढेतपतेरविः ॥ २५ ॥ गभस्तिःश्रावणेमासियमोभाद्रपदेत
था ॥ हिरण्यरेताश्वयुजिकार्तिकेतुदिवाकरः ॥ २६ ॥ इत्येतेद्वादशादित्यामासिमासिप्रकीर्तिताः ॥ उग्ररूपामहातेजायुगान्तानलवर्चसः ॥
॥ २७ ॥ यइदंपठतेनित्यंतस्यपापंनविद्यते ॥ नरोगोनचदारिद्र्यंनावमानोभवेत्क्वचित् ॥ २८ ॥ अक्षयंलभतेस्वर्गंसुखंराज्यंयशःक्रमात् ॥ महा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मन्त्रंप्रवक्ष्यामिसर्वप्रीतिकरंपरम् ॥ २९ ॥ ॐनमःसहस्रबाहवेआदित्यायनमोनमः ॥ नमस्तेपद्महस्तायवरुणायनमोनमः ॥ ३० ॥ नमस्तिमिर
नाशायश्रीसूर्यायनमोनमः ॥ नमःसहस्रजिह्वायभानवेचनमोनमः ॥ ३१ ॥ त्वंचब्रह्मात्वंचविष्णूरुद्रस्त्वंचनमोनमः ॥ त्वमग्निःसर्वभूतेषुवायु
स्त्वंचनमोनमः ॥ ३२ ॥ सर्वगःसर्वभूतेषुनहिकिंचित्त्वयाविना ॥ चराचरेजगत्यस्मिन्सर्वदेहेव्यवस्थितः ॥ ३३ ॥ इतिजस्वालभेत्कामं
स्वर्गभोग्यादिकंक्रमात् ॥ आदित्योभास्करःसूर्योअर्कोभानुर्दिवाकरः ॥ ३४ ॥ सुवर्णरेतामित्रश्चपूषात्वष्टाचतेदश ॥ स्वयम्भूस्तिमिराशश्चद्वा
दशःपरिकीर्तितः ॥ ३५ ॥ नामान्येतानिसूर्यस्यशुचिर्यस्तुपठेन्नरः ॥ सर्वपापाच्चरोगाच्चमुक्तोयातिपरांगतिम् ॥ ३६ ॥ पुनरन्यत्प्र
वक्ष्यामिभास्करस्यमहात्मनः ॥ रक्ताख्यायेरक्तनिभास्सिन्दूरारुणविग्रहाः ॥ ३७ ॥ यानिनामानिमुख्यानितच्छृणुष्वषडानन ॥ तपनस्तापनश्चैव
कर्त्ताहर्त्ताग्रहेश्वरः ॥ ३८ ॥ लोकसाक्षीत्रिलोकेषुव्योमाधिपोदिवाकरः ॥ अग्निगर्भोमहाविप्रःस्वर्गःसप्ताश्ववाहनः ॥ ३९ ॥ पद्महस्तस्तमोभेदी
ऋग्वेदोयजुस्सामगः ॥ कालप्रियंपुण्डरीकंमूलस्थानंचभावितम् ॥ ४० ॥ यःस्मरेच्चसदाभक्त्यातस्यरोगभयंकुतः ॥ शृणुकार्तिकयत्नेनसर्वपाप
हरंशुभम् ॥ ४१ ॥ नसन्देहोमनाक्कार्यआदित्यस्यमहामते ॥ ॐइन्द्रायनमः ॥ ॐविष्णवेनमः ॥ ४२ ॥ एषजप्यश्चहोमश्चसन्ध्योपासनमेव
च ॥ सर्वशान्तिकरश्चैवसर्वविघ्नविनाशनः ॥ ४३ ॥ नाशयेत्सर्वरोगांश्चलूताविस्फोटकादिकान् ॥ कामलादिकरोगांश्चयेरोगाश्चैवदारुणाः ॥४४॥
ऐकाहिकंत्र्याहिकंचज्वरंचातुर्थिकंतथा ॥ कुष्ठरोगंक्षयंरोगंकुक्षिरोगंज्वरंतथा ॥४५॥ अश्मरीमूत्रकृच्छ्रांश्चनानारोगामयांस्तथा ॥ येवातप्रभवारो
गायेरोगागर्भसम्भवाः ॥ ४६ ॥ मर्दयन्तोमहारोगामर्दितावेदनात्मकाः ॥ विलयंयान्तितेसर्वआदित्योच्चारणेनतु ॥ ४७ ॥ रक्षमांदेवदेवेशग्र
हरोगभयेषुच ॥ प्रशमंयान्तितेसर्वेकीर्तितेतुदिवाकरे ॥ ४८ ॥ मूलमन्त्रंप्रवक्ष्यामिसर्वकामार्थसाधकम् ॥ भुक्तिमुक्तिप्रदंनित्यंभास्करस्यम
हात्मनः ॥ ४९ ॥ मन्त्रश्चायम् ॥ ॐह्रांह्रींसःसूर्यायनमः ॥ अनेनमन्त्रेणसदासर्वसिद्धिर्भवेद्ध्रुवम् ॥ ५० ॥ व्याधयोवैनबाधन्तेनचा
निष्टभयंभवेत् ॥ सूर्यावर्तोदकंयस्तुगृहीत्वातुक्रमेणतु ॥ ५१ ॥ तस्यप्राशनमात्रेणनरोरोगात्प्रमुच्यते ॥ नदातव्यंनख्यातव्यंजप्तव्यंचप्रय
त्नतः ॥ ५२ ॥ अभक्तेष्वनपत्येषुपाषण्डलौकिकेषुच ॥ कटुतैलसमायुक्तंनस्येपानेचदापयेत् ॥ ५३ ॥ सूर्यावर्तजलंपुत्रसर्वरोगाद्विमुच्य
ते ॥ मूलमन्त्रस्तुजप्तव्यःसन्ध्यायांहोमकर्मसु ॥ ५४ ॥ जप्यमानेतुनश्यन्तिरोगाःक्रूरग्रहास्तथा ॥ किमन्यैर्बहुभिःशास्त्रैर्मन्त्रैर्वाबहुविस्तरैः
॥ ५५ ॥ सर्वशान्तिरियंवत्ससर्वार्थप्रतिसाधिका ॥ नास्तिकायनदातव्यादेवब्राह्मणनिन्दके ॥ ५६ ॥ गुरुभक्तायदातव्यानान्येभ्योऽपिकदा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चन ॥ प्रातरुत्थाययोनित्यंकीर्तयिष्यतिमानवः ॥ ५७ ॥ गोघ्नःकृतघ्नकश्चैवमुच्यतेसर्वपातकैः ॥ शरीरारोग्यकृच्चैवधनवृद्धियशस्करः ॥ ५८ ॥
जायतेनात्रसन्देहोयस्यतुष्येद्दिवाकरः ॥ एककालंद्विकालंवात्रिकालंनित्यमेवच ॥ ५९ ॥ यःपठेद्रविसान्निध्येसोऽभीष्टंफलमाप्नुयात् ॥ पुत्रा
र्थीलभतेपुत्रंकन्यार्थीकन्यकांलभेत् ॥ ६० ॥ विद्यार्थीलभतेविद्यांधनार्थीलभतेधनम् ॥ शृणुयात्संयुतोभक्त्याशुद्धाचारसमन्वितः ॥ ६१ ॥
सर्वपापविनिर्मुक्तस्सूर्यलोकंव्रजत्यपि ॥ भास्करस्यव्रतेयच्चव्रताचारमखेषुच ॥ ६२ ॥ पुण्यस्थानेषुतीर्थेषुपठेत्कोटिगुणंभवेत् ॥ ग्रहेभोज्येषुपूजा
यांब्रह्मभोज्येद्विजाग्रतः ॥ ६३ ॥ यइदंपठतेविप्रस्तस्यानन्तफलंभवेत् ॥ तपस्विनांचविप्राणांदेवानामग्रतःसुधीः ॥ ६४ ॥ यःपठेत्पाठयेद्वापिसुर
लोकेमहीयते ॥ ६५ ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेसूर्यशान्तिर्नामाशीतितमोऽध्यायः॥ ८० ॥ व्यासउवाच ॥ मध्यदेशेस्वराट्सम्राड्भद्रेश्वर
इतिश्रुतः ॥ तपोभिर्बहुभिःपूतोव्रतैर्नानाविधैरपि॥ १ ॥देवांस्तुपूजयेन्नित्यंसुभावेनसदाखलु ॥ तस्यसव्येऽभवत्कुष्ठंकरेश्वेतमजायत ॥ २ ॥ ततोभि
षक्प्रयोगाच्चलक्षणंदृश्यतेपुरा ॥ आहूयद्विजमुख्यांश्चमन्त्रिणःसोऽब्रवीद्वचः ॥ ३ ॥ राजोवाच॥ किल्बिषंमेकरेविप्रादुःसहंलोकगर्हितम् ॥ तस्मात्पु
ण्यंमहाक्षेत्रंयत्रत्यक्ष्यामिविग्रहम् ॥ ४ ॥ आज्ञापयतधर्मज्ञाःपरलोकहितायवै ॥ वंशहीनस्यमेवीराःप्रेत्यामुत्रहितंचयत् ॥ ५ ॥ तद्ब्रूतसुप्रसन्नाम
उद्दिष्टंयत्करोम्यहम् ॥ ६ ॥ द्विजाऊचुः ॥ परित्यक्तेत्वयाराष्ट्रेधर्मशीलेनधीमता ॥ नष्टंजगदिदंराजंस्तस्मान्नोवक्तुमर्हसि ॥ ७ ॥ अयमस्यप्रतीका
रोह्यस्माभिरवगम्यते ॥ सूरंमन्त्रैर्महादेवंयत्नादाराधयप्रभो ॥ ८ ॥ राजोवाच ॥ केनोपायेनविप्रेन्द्रास्तोषयिष्यामिभास्करम् ॥ अमेध्येनाथकु
ष्ठेनलोकानांगर्हितेनच ॥ ९ ॥ अदृश्यःसर्वभूतानांगर्हितोऽस्मिद्विजातयः ॥ किंकरिष्यामिराज्यंचकिंस्यादाराधनेनतु ॥ १० ॥ द्विजाऊचुः ॥
अत्रस्थित्वास्वराज्येतुसमुपास्यविरोचनम् ॥ प्रमुच्यकिल्बिषाद्घोरात्स्वर्गमोक्षंचलप्स्यसे ॥ ११ ॥ व्यासउवाच ॥ एतच्छ्रुत्वातुराजेन्द्रःप्रणिपत्य
द्विजोत्तमान् ॥ अकार्षीत्तस्यसूर्यस्यपरमाराधनंचयत् ॥ १२ ॥ नित्यपूजांतथामन्त्रैरुपहारैर्विलेपनैः ॥ फलैर्नानाविधैरर्घैरक्षतातपतण्डुलैः
॥ १३ ॥ जपापुष्पार्कपर्णैश्चकरवीरकरञ्जकैः ॥ रक्तकुङ्कुमसिन्दूरैस्तथावासन्तिकादिभिः ॥ १४ ॥ सुगन्धकदलीपत्रैस्तत्फलैःसुमनोहरैः ॥ अर्घ्य
मौदुम्बरेकृत्वासदासूर्यायपार्थिवः ॥ १५ ॥ आदित्यसंमुखोदत्तेसदामन्त्रिपुरोहितैः ॥ महिषीभिस्तथाचार्घोभोगिनीभिःसमन्ततः ॥ १६ ॥ सर्वैर
न्तःपुरस्थैश्चसपत्नीकैश्चरक्षिभिः॥ चेटवर्गैस्तथाऽन्यैश्चदीयतेऽर्घोदिनेदिने ॥ १७ ॥अर्कशान्तिभिरत्युग्रैःस्तोत्रमन्त्रादिभिःपरैः॥मूलमन्त्रान्यमन्त्रैश्चय
जन्तिस्मदिवाकरम् ॥ १८ ॥ तथार्काङ्गव्रतंचान्यत्कृतंतैःसुसमाहितैः ॥ क्रमात्समांसमासाद्यरोगस्यान्तंगतोनृपः ॥ १९ ॥ बाधितेचामयेघोरेसरा

CC-0. In Public Domain. Digitization by eGangotri

जानिखिलंजगत् ॥ नियम्यकारयामासकल्येचयाजनव्रतम् ॥ २० ॥ एवमेवजपापुष्पंसुगन्धंकदलीफलम् ॥ बाणैर्जायाभिरालभ्यमर्कपर्णान्य
पुष्पकम् ॥ २१ ॥ एवमेवमहापुण्यंकृत्वासर्वजनप्रियम् ॥ हविष्यान्नोनिराहारोजनोयजतिभास्करम् ॥ २२ ॥ एवमेवत्रिभिर्वर्गैरर्चितस्तैर्विभा
करः ॥ सन्तुष्टोभूपभागम्यकृपयाचाब्रवीद्वचः ॥ २३ ॥ सूर्यउवाच ॥ वरंवरयचाभीष्टंयस्तेमनसिवर्तते ॥ सर्वेषांवोहितार्थायसानुगःपुर
वासिनाम् ॥ २४ ॥ राजोवाच ॥ यदीच्छसिवरंदातुंसर्वलोचनमत्प्रियम् ॥ सर्वेषांनःपरंस्वगत्वत्सकाशेभवत्विति ॥ २५ ॥ सूर्यउवाच ॥ अ
मात्यास्तेद्विजाविप्राःसदारास्सपरिच्छदाः ॥ नवीनयौवनाःशुद्धायावदाभूतसम्प्लवम् ॥ २६ ॥ तिष्ठन्तुमत्पुरेरम्येसर्वभोगैर्निरामयाः ॥ सुरद्रुमैः
सुसम्पूर्णैःप्रासादैर्द्रुमकल्पकैः ॥ २७ ॥ प्रमदाभिर्महाभागनृत्यगीतादिभिःपरैः ॥ पञ्चकल्पान्तरेराजामन्वादौत्वंभविष्यसि ॥ २८ ॥ अमीतेमनु
जाभूपपुरस्थाश्चपुरोधसः ॥ तथाजनपदस्थाश्चविद्वांसोधनिनोनराः॥२९॥तत्रमत्तोवरंलब्ध्वासुखंस्वर्गमवाप्स्यथ ॥३०॥व्यासउवाच॥एवमुक्त्वाज
गच्चक्षुस्तत्रैवान्तरधीयत ॥ ततोभद्रेश्वरोराजासपुरोदिविमोदते ॥ ३१ ॥ तत्रकीटादयोयेचतेऽपीताःससुतादयः ॥ स्वर्गेदेवद्रुमेभोग्यंकुर्वन्तिमह
दद्भुतम् ॥ ३२ ॥ एवमेवनृपाविप्रासुनयश्शंसितव्रताः ॥ येचक्षत्रादयोवर्णास्सूरस्वर्गंययुर्द्रुतम् ॥ ३३ ॥ कैश्चिदभ्यर्थितंवित्तंपुत्रदारास्तथापरैः ॥ सु
खंस्वर्गंतथारोग्यंभास्करस्यप्रसादतः ॥ ३४ ॥ पुण्यकूटमिदंभद्रंयःपठेन्मानवःशुचिः ॥ सर्वपापक्षयस्तस्यरुद्रवत्पूजितोभुवि ॥ ३५ ॥ सर्वसाक्षीभ
वेत्स्वर्गेवरदोभास्करप्रियः ॥ शृणोतिसंयतोमर्त्यःसोऽभीष्टंफलमाप्नुयात् ॥ ३६ ॥ पारगःसर्वपापानांभास्करस्यैवसंसदि ॥ वावदूकोभवेन्नित्यंश्र
वणात्पुण्यवान्धनी ॥ ३७ ॥ इदंगुह्यातिगुह्यंचभास्करेणप्रचारितम् ॥ इदंयमायकथितंक्षितौव्यासेनकीर्तितम् ॥ ३८ ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टि
खण्डेभद्रेश्वराख्यानंनामैकाशीतितमोऽध्यायः ॥ ८१ ॥ वैशम्पायनउवाच ॥ श्रुतोग्रहेश्वरस्यैषप्रभावस्त्वत्प्रसादतः ॥ रव्यादीनांग्रहाणांचसाधनं
नोवदद्विज ॥ १॥ केतेरव्यादयस्तेषांकथंतोषःकथंप्रियम्॥कालेदेशेतुसम्प्राप्तेदर्शनंतच्छिवाशिवम् ॥२॥ व्यासउवाच ॥ ग्रहादयोयेलोकेतुभुञ्जन्तिपु
ण्यपातकम्॥शिवाशिवंचकुर्वन्तिविश्वकर्मक्षयायवै ॥ ३ ॥ सूरःकालोऽन्तकोज्ञेयोजनेषुचग्रहेषुच ॥ तिग्मसौम्याच्चयोगात्सनिग्रहानुग्रहेप्रभुः ॥४॥
ग्रहभावाच्चतस्यैवसन्तोषंनिगदाम्यहम्॥उदुम्बरपलाशाभ्यांपल्लवाभ्यांजुहोतियः॥५॥आकृष्णेनेतिमन्त्रेणमूलकेनाथशान्तये॥जुहुयादाज्ययुक्ताभ्या
मभीष्टफलहेतवे ॥६॥ शान्तयेसर्वरोगाणांवधबन्धविमोचने ॥ एकैकेनतुमन्त्रेणहोतव्यंचशतंशतम्॥७॥शितंचच्छागलंदद्यात्सूरायादित्यवासरे॥भो
जयेद्ब्राह्मणाञ्छक्त्याहव्यकव्यैर्मनोहरैः ॥ ८ ॥ सप्तम्यांचसितेपक्षेपञ्चदश्यांतथैवच ॥ रोगाद्विमुच्यतेरोगीनरोगात्कृच्छ्रमेष्यति॥९॥परमंचामरंसत्त्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माब्रह्मस्तम्बमात्रके ॥ ब्रह्माण्डेचाणुमात्रेचसूरःसम्भावयिष्यते ॥ १० ॥ संहारान्तंक्रमात्सर्वमुत्पत्तिस्थितिकारणात् ॥ प्राणसर्गेजनानांसपाताविश्व
चरस्तनौ ॥ ११ ॥ मृत्युकालेतनोर्मध्यात्प्राणेनसहगच्छति ॥ शीर्षान्तस्थःसदाचन्द्रोद्विरष्टकलयायुतः॥१२॥अहर्निशंसुधावृष्टिंदेहेवर्षत्यधोमुखः॥
जन्तवस्तेनजीवन्तिमहासत्त्वानुमात्रकाः ॥१३ ॥ उर्व्यांसस्यानिपुष्णातितथास्थावरजङ्गमान् ॥ एताभ्यांपुष्पवद्भ्यांचधारितंजनितंजगत् ॥ १४ ॥
तयोराराधनात्पुष्टिःसदापुण्यापरार्द्धिका॥साधयेत्सर्वकार्याणिसाधकःसर्वदाशुचिः ॥१५॥ नपूजयतियोमोहात्सुधांशुंमानवाधमः॥आयुस्तस्यक्षयं
यातिनरकंचाधिगच्छति॥१६॥निष्कलङ्ककलाधारगङ्गाधरशिरोमणे॥द्वितीयायांजगन्नाथतुभ्यंचन्द्रनमोऽस्तुते ॥१७॥तिथिमन्यामनुप्राप्यनमस्कारं
विधोरपि ॥ प्रकरोतिनरोयस्तुसोऽभीष्टंफलमाप्नुयात् ॥ १८॥ अत्रिनेत्रोद्भवश्रीमन्क्षीरोदमथनोद्भव ॥ महेशमुकुटावासतुभ्यंचन्द्रनमोऽस्तुते॥१९॥
दिव्यरूपनमस्तुभ्यंसुधाकरजगत्पते ॥ शुक्लपक्षेतथाकृष्णेत्रियामायांविदुर्बुधाः ॥ २० ॥ ॐह्रांह्रींसोमायनमःइतिजप्यमन्त्रः ॥ प्रभातेजपनीयः॥
एवंयःपूजयेत्सोमंश्रावयेच्चशृणोतिवा ॥ सपीयूषसमोलोकेभवेज्जन्मनिजन्मनि ॥ २१ ॥ एवंसहस्रनाम्नायःस्तौतिपूजयतेभुवि ॥ सोऽक्षयंलभतेस्व
र्गंपुनरावृत्तिदुर्लभम् ॥ २२ ॥ इतिसोमपूजा ॥ पित्तलेभाजनेकांस्येदधिपूर्णेघृतेशिवे ॥ न्यूनोऽधिकस्तुविभवाच्छत्वाकर्मविमत्सरः ॥ २३ ॥
स्वर्णेवाराजतेवारेसौम्येकृष्णभवेबुधम् ॥ संस्थाप्यसर्वसंस्थानेदद्याद्बहुसुतायच ॥ २४ ॥ परंभवतिसौभाग्यंपीयूषादधिकंभृशम् ॥ स्त्रीणांचपुरुषा
णांचनदौर्भाग्यंकदाचन ॥ २५ ॥ रूपसौभाग्यकामोऽहंदधिपूर्णंचभाजनम् ॥ ददामिकांस्यपात्रस्थंदेहिसौभाग्यरूपकम् ॥ २६ ॥ द्विजायवा
क्यपूर्वेणदद्याद्विमत्सरोनरः ॥ शक्तितोदक्षिणादेयातथावस्त्रादिकंनवम् ॥ २७ ॥ भोज्यान्नंसर्वसंपूर्णंताम्बूलंसुमनोहरम् ॥ पुष्पमालादिकंदद्याद्रूप
सौभाग्यहेतवे ॥ २८ ॥ एवंयःकुरुतेदानंसोमोद्दिष्टंद्विजातये ॥ स्वर्लोकेनरलोकेवारूपसौभाग्यभुग्भवेत् ॥ २९ ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टि
खण्डेसोमार्चननामद्व्यशीतितमोऽध्यायः ॥८२॥ वैशम्पायनउवाच॥उद्भवंलोहिताङ्गस्यसन्तोषंतुजनेषुच ॥ प्रभावंवैभवंतेजःश्रोतुमिच्छामितत्त्वतः
॥ १ ॥ व्यासउवाच ॥ हरांशसम्भवोदेवःकुजातःपृथिवीसुतः ॥ सत्त्वस्थस्सत्त्वसंपूर्णश्शूरःशक्तिधरोभुवि ॥ २ ॥ तीक्ष्णःक्रूरग्रहोदेवोलोहि
ताङ्गःप्रतापवान् ॥ कुमारोरूपसंपन्नोविद्युत्पातमयःप्रभुः ॥ ३ ॥ अनेनभर्जितादैत्याःक्रव्यादायेसुरद्विषः ॥ दशायोगाच्चमनुजाउद्भिज्जाःपशुप
क्षिणः ॥ ४ ॥ वैशम्पायनउवाच ॥ शम्भोरेपकथंजातःकथंजातोमहीसुतः ॥ ग्रहोदेवःकथंक्रूरएतदिच्छामिवेदितुम् ॥ ५ ॥ कथमस्यभवेत्तुष्टिः
सर्वलोकेषुसर्वदा ॥ गुरोमय्यातभावेतुवदनिस्संशयंमुखात् ॥ ६ ॥ व्यासउवाच ॥ हिरण्याक्षकुलेधीमानसुराणांचपार्थिवः ॥ अन्धकेतिसमाख्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तोदैत्यःसर्वसुरान्तकृत् ॥ ७ ॥ जातोविष्णुवरादेवजातोविष्णुपराक्रमः ॥ तेनैवनिर्जितादेवास्सेन्द्राःक्रतुभुजःक्रमात् ॥ ८ ॥ ततोदेवाविधिंग
त्वावचनंचेदमब्रुवन् ॥ अन्धकेनैवचास्माकंहृतंराज्यंसुखंमखः ॥ ९ ॥ तस्मात्तस्यवधोपायउच्यतांतद्विधीयताम् ॥ अथधाताब्रवीद्वाक्यंदेवानस्य
चनैधनम् ॥ १० ॥ नास्तिविष्णुवरादेवपीयूषस्यचभक्षणात् ॥ किन्तुतस्यासुरत्वस्ययथापरिभवोध्रुवम् ॥ ११ ॥ कुर्वेलोकहितार्थायश्रद्धांकाम
समन्विताम् ॥ विचिकित्सातुतत्रैवसर्वास्त्रीरतिगच्छति ॥ १२ ॥ त्यक्त्वैकांपार्वतींदुर्गांनतस्यमानसंस्थिरम् ॥ ततःक्रुद्धोजगत्स्वामीतंचवैरूप्य
तांनयेत् ॥ १३ ॥ ततोऽसुरत्वंसन्त्यज्यगणस्तस्यभविष्यति ॥ एवमुक्त्वाप्रजाध्यक्षःश्रद्धांकामसमन्विताम् ॥ १४ ॥ विचिकित्सांस्वमायांच
प्रेषयामासतंप्रति ॥ ततोविचेष्टितःकामाद्योषान्वेषणतत्परः ॥ १५ ॥ स्वदारान्परयोषांचनापश्यद्विचिकित्सया ॥ ततोमायाप्रयुक्तोऽसौत्रैलोक्यं
विचचारह ॥ १६ ॥ दृष्टंचहिमवत्पृष्ठेस्त्रीरत्नंचातिशोभनम् ॥ दृष्ट्वाचपार्वतींदैत्यःकामस्यवशगोऽभवत् ॥ १७ ॥ ज्ञानलोपात्ततोदुर्गांग्रहीतुंतांसचे
च्छति ॥ उमाचकोटवीरूपंकृत्वादेहस्यचात्मनः ॥ १८ ॥ ईश्वरस्यान्तिकस्थाचग्रहीतुंतांससारसः ॥ ततःकामविचेताश्चउन्मत्तीकृतचेतनः
॥ १९ ॥ नजहातिशिवांधात्रींपार्वतींदैत्यपुङ्गवः ॥ ततोध्यानात्समागम्यमिलितःपार्वतींधवः ॥ २० ॥ दृष्ट्वातंचसदैत्येन्द्रःप्रगतस्तुस्वमालयम् ॥
सज्जीकृत्यस्वयोधांश्चशम्भुंजेतुंसमुत्सुकः ॥ २१ ॥ गौरीमेवसमानेतुंकाममोहादचेतनः ॥ एतच्छ्रुत्वातुत्रिदशागत्वातंनन्दिनेरिताः ॥ २२ ॥
अकुर्वंश्चमहद्युद्धंघोरंलोकभयङ्करम् ॥ दैत्यान्रणेमृतांस्तत्रदैत्याचार्योह्यजीवयत् ॥ २३ ॥ एतद्वृत्तंतुकैलासेसर्वेचैवन्यवेदयन् ॥ क्रोधाच्छम्भु
स्तदावाक्यंनन्दिनंनिजगादह ॥ २४ ॥ शम्भुरुवाच ॥ गच्छदैत्यालयंवीरद्रुतमेवममाज्ञया ॥ पश्यतांसर्वदैत्यानांदैत्येन्द्रस्यचसंसदि ॥ २५ ॥
गृहीत्वाचिकुरेऽत्यर्थंभार्गवंतंदुरात्मकम् ॥ लब्ध्वाचास्मत्सकाशंवैविह्वलंचानयत्क्षणात् ॥ २६ ॥ व्यासउवाच ॥ ततोनन्दीश्वरःश्रीमान्पार्वतीप
तिनेरितः ॥ काव्यंतंकुन्तलेधृत्वादैत्यानांपुरतोबलात् ॥ २७ ॥ आनयन्तंचतंदैत्याजघ्नुःप्रहरणैःशरैः ॥ नशेकुस्तेरुजांकर्तुंनन्दिनोबलशालिनः
॥ २८ ॥ देवानामग्रतोनन्दीगृहीत्वातंचकुन्तले ॥ हरस्यपुरतोहृष्टःसहतेनसमाययौ ॥ २९ ॥ गृहीत्वाभार्गवंशम्भुरसुराणांगुरुंरुषा ॥ अगिलद्रौ
द्रमूर्तोसौऽकालान्तकसमःप्रभुः ॥ ३० ॥ ततोदैत्यपतिःक्रुद्धःसर्वसैन्यवृतोबली ॥ दुद्रावशङ्करंतत्रघोरैःप्रहरणादिभिः ॥ ३१ ॥ त्रिदशाश्चतथाक्रुद्धा
स्ततोविद्याधरादयः ॥ प्रययुःसमरंतत्रदैत्यानांचभृशंरुषा ॥ ३२ ॥ एतस्मिन्नन्तरेघोरंयुद्धंभीष्मंसमुत्थितम् ॥ देवदानवयोरेवंसर्वलोकभयङ्क
रम् ॥ ३३ ॥ ततःप्रत्ययितास्त्रैश्चदेवानिघ्नन्तिदानवान् ॥ दनुजानिर्जरांस्तत्रविनिघ्नन्तिमहाहवे ॥३४॥ शातकुम्भमयाङ्गैस्तेशरैर्वज्रसमानकैः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बिभिदूरत्नपुङ्खैश्चपरस्परजयैषिणः ॥ ३५ ॥ दीपयन्तिभृशंकान्तैस्तद्गात्राणिनभांसिच ॥ वीर्यवन्तोमहादैत्यानमोघैरस्त्रसञ्चयैः ॥ ३६ ॥
हत्वाचपातयामासुःकाश्यपाःसुरसत्तमाः ॥ जगद्भयातंमहासैन्यंबलायुधसुसंवृतम् ॥ ३७ ॥ नीतंक्षयंसुरैःसर्वैःशस्त्रैःप्रत्ययितैःक्षणात् ॥ स्वयंच
युध्यमानेनमहादेवेनयत्नतः ॥ ३८ ॥ शूलोद्धृतोऽपिसुचिरमविनष्टोऽथनम्रधीः ॥ अन्धकोगणतांनीत्वाकृतोभृङ्गीरिटिर्द्विज ॥ ३९ ॥ ततोदेवा
न्समाभाष्यशुक्रमुद्गीर्णवाञ्शिवः ॥ भूमौनिपतितोगर्भस्ततोभौमइतिस्मृतः ॥ ४० ॥ शुक्रःशिवंसमाभाष्यगतोदैत्यान्मुदान्वितः ॥ एवंभौमस्स
मुत्पन्नोहरांशोभूससुद्भवः ॥ ४१ ॥ तस्यपूजाचतुर्थ्यांतुभौमवारेचसुव्रतैः ॥ दशाद्यरिष्टेचतथागोचरेऽनिष्टराशिगे ॥ ४२ ॥ त्रिकोणेमण्डलेचैवर
क्तपुष्पानुलेपनैः ॥ एवंवैपूजितोभौमःप्रयच्छतिमतिंधनम् ॥ ४३ ॥ पुत्रान्सुखंयशश्चैवकिंभूयःश्रोतुमिच्छसि ॥ एतद्वःकथितंशिष्याधर्माख्यानं
शुभावहम् ॥ ४४ ॥ यच्छ्रुत्वानपुनर्भूयोजायतेम्रियतेऽपिवा ॥ द्विजातीनांपुण्यदंचसंसेव्यंचशुभेप्सुभिः ॥ ४५ ॥ यथासुखंचगच्छध्वंकृतकृत्या
ममाज्ञया ॥ ४६ ॥ ब्रह्मोवाच ॥ एवंविश्राव्यभगवान्व्यासःसत्यवतीसुतः ॥ निर्णीयधर्मंविविधंशम्याप्रासमगात्सुत ॥ ४७ ॥ त्वमपिश्रद्धयावत्स
ज्ञात्वातत्त्वंयथासुखम् ॥ विहरस्वयथाकालंगायमानोहरिंमुदा ॥ लोकान्धर्मंचोपदिशन्प्रीणयन्जगतांगुरुम् ॥ ४८ ॥ पुलस्त्यउवाच ॥ इत्युक्तःप्रययौ
भूपनारदोगन्धमादनम् ॥ नारायणंमुनिवरंद्रष्टुंबदरिकाश्रमे ॥ ४९ ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेभौमोत्पत्तिपूजनंनामत्र्यशीतितमोऽध्यायः ॥ ८३ ॥
भीष्मउवाच ॥ चण्डिकानुग्रहाद्दैत्यागताश्शिष्टारसातलम् ॥ तद्वदस्वमहाप्राज्ञचण्डिकापूजनेफलम् ॥ १ ॥ यथासम्पूज्यतेदेवीतुष्टायच्छतियत्फ
लम् ॥ श्रोतुंकौतूहलंमेऽद्यतद्वदस्वसविस्तरम् ॥ २ ॥ पुलस्त्यउवाच ॥ शृणुध्वन्नृपशार्दूलचण्डिकापूजनेफलम् ॥ यत्कृत्वास्वर्गभुङ्मर्त्यःपश्चान्मोक्षं
लभेद्ध्रुवम् ॥ ३ ॥ यत्पूजनेफलंदेव्यानतत्क्रतुशतैरपि ॥ लभ्यतेनितरांताततीर्थदानव्रतादिभिः ॥ ४ ॥ चण्डिकांपूजयेद्भक्त्यायोनरःप्रत्यहंनृप ॥
नक्षमस्तत्फलंवक्तुंसाक्षाद्देवःपितामहः ॥ ५ ॥ मातुर्देव्याःप्रसादेनसुलभंसर्वमेवहि ॥ अश्वमेधसहस्राणिवाजपेयशतानिच ॥ ६ ॥ चण्डिकाभ्य
र्चनस्यैतेलक्षांशेनापिनोसमाः ॥ सदांतासमुनिर्यष्टासतपस्वीसतीर्थगः ॥ ७ ॥ यःसदापूजयेद्दुर्गांनानापुष्पानुलेपनैः ॥ धूपैर्दीपैस्तथाभोज्यैःप्रणमेद्वापि
भाविनीम् ॥ ८ ॥ सयोगीसमुनिःश्रीमांस्तस्यमुक्तिःकरेस्थिता ॥ वर्षमेकंतुयोदुर्गांपूजयेद्विजितेन्द्रियः ॥ ९ ॥ एकाहारोमहाबाहोसोऽग्निष्टोम
फलंलभेत् ॥ पौर्णमास्यांनवम्यांचक्षीरेणवनराधिप ॥ १० ॥ स्नापयित्वाशुभांदुर्गांवाजपेयफलंलभेत् ॥ शुक्लपक्षेनवम्यांतुअष्टम्यांपरमेश्वरीम् ॥ ११ ॥
त्रिकालंपूजयेद्यस्तुचतुर्दश्यांनराधिप ॥ सगच्छतिपरंस्थानंयत्रदेवीव्यवस्थिता ॥ १२ ॥ क्रीडयित्वाचिरंकालंराजाभवतिभूतले ॥ नवम्यांसोपवासस्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यःपूजयतिचण्डिकाम् ॥१३॥दशानामश्वमेधानांफलंप्राप्नोतिमानवः॥जितेन्द्रियोब्रह्मचारीशुचिर्भूत्वातुयोनरः ॥१४॥चण्डिकांपूजयेद्भक्त्यासयाति
परमांगतिम्॥स्नानोपवासनियमैःपूजाजागरमार्जनैः॥१५॥पर्वकालेषुसर्वेषुचण्डिकांयःप्रपूजयेत् ॥विमानंवरमारुह्यध्वजमालाकुलंनृप॥१६॥ब्रह्मलो
केनरोगत्वामोदतेशाश्वतीःसमाः ॥ तस्मात्सर्वप्रयत्नेनयथाविभवविस्तरैः ॥ १७ ॥ पूजयेत्सततंदुर्गांमहापुण्यफलेच्छया ॥ अयनेविषुवेचैव
षडशीतिमुखेनृप ॥ १८ ॥ मासैश्चतुर्भिर्यत्पुण्यंविधिनापूज्यचण्डिकाम् ॥ तत्फलंलभतेवीरनवम्यांकार्तिकस्यतु ॥ १९ ॥ मासिचाश्वयुजेवीरशुक्ले
पक्षेत्रिशूलिनीम् ॥ नवम्यांपूजयेद्यस्तुतस्यपुण्यफलंशृणु ॥ २० ॥ अश्वमेधसहस्रस्यराजसूयशतस्यच ॥ यत्फलंतल्लभेद्वीरदिविदेवगणैर्वृ
तः ॥ २१ ॥ मासिमासिनरोभक्त्यापूजयेद्यस्तुचण्डिकाम् ॥ लभेत्षाण्मासिकंपुण्यंनवम्यांतुनसंशयः ॥ २२ ॥ मेरुपर्वततुल्योऽपिराशिःपाम
स्यकर्मणः ॥ चण्डिकांवैद्यमासाद्यक्षीयतेदुष्टरोगवत्॥ ॥ २३ ॥ दुर्गार्चनेरतोनित्यंमहापातकसम्भवैः॥दोषैर्नलिप्यतेवीरपद्मपत्रमिवाम्भसा ॥२४॥
छित्त्वाभित्त्वाचभूतानिहत्वासर्वमिदंजगत् ॥ प्रणम्यशिरसादेवींनपापैर्भुविलिप्यते ॥ २५ ॥ सर्वावस्थांगतोवापियुक्तोवासर्वपातकैः ॥ दुर्गांदृष्ट्वा
नरःसोऽपिप्रयातिपरमंपदम् ॥ २६ ॥ स्वपंस्तिष्ठन्व्रजन्मार्गेप्रलपन्भोजनेरतः ॥ स्मरतेसततंदुर्गांसचमुच्येतबन्धनात् ॥ २७ ॥ तद्देशेनचदु
र्भिक्षंनचदुःखंप्रवर्तते ॥ नकश्चिन्म्रियतेराजन्पूज्यतेयत्रचण्डिका ॥ २८ ॥ योदुर्गांपूजयेन्नित्यंश्वपचोवाजितेन्द्रियः ॥ भावेनचसमायुक्तःसोऽपिया
तिपरांगतिम् ॥ २९ ॥ पूजयित्वातुतांभक्त्याश्रद्धयासर्वमङ्गलाम् ॥ प्रयातिपरमंस्थानंयत्रसासर्वमङ्गला ॥ ३० ॥ घृताभिषेकंयःकुर्यादहोरात्रंनरा
धिप॥सूक्ष्मधारेणताम्रेणभगवत्याविचक्षणः ॥ ३१ ॥ मासिचाश्वयुजेवीरसर्वपापैःप्रमुच्यते ॥ कार्तिकेपौर्णमास्यांयःसोमवारेऽर्चयेदुमाम् ॥३२॥
सोऽग्निष्टोमफलंविन्देत्सूर्यलोकंचगच्छति ॥ आषाढेपौर्णमास्यांतुयोऽर्चयेदम्बिकांनरः ॥३३॥ सोपवासोमहाभागसयातिपरमांगतिम्॥पौर्णमास्यां
तुयोमाघेपूजयेद्विधिवच्छिवाम् ॥ ३४ ॥ सोऽश्वमेधमवाप्नोतिविष्णुलोकेमहीयते ॥ अयनेदक्षिणेयस्तुपूजयेदम्बिकांनृप ॥ ३५ ॥ सकृद्गन्धो
दकैःपुण्यैर्गन्धर्वसदनेवसेत् ॥ पञ्चगव्यंततःक्षिप्त्वापञ्चचूडाचलेवसेत् ॥ ३६ ॥ आपःक्षीरंकुशाग्राणितण्डुलाहविरक्षताः ॥ सहासिद्धार्थकादूर्वाःकु
ङ्कुमंरोचनामधु ॥ ३७ ॥ अर्घोऽयंकुरुशार्दूलद्वादशाङ्गउदाहृतः ॥ अनेनपूजयेद्यस्तुसयातिपरमंपदम् ॥ ३८ ॥ दारवेणार्घ्यपात्रेणदत्त्वार्घ्यंविधिव
न्नृप ॥ देव्यैतदामहाराजअग्निष्टोमफलंलभेत् ॥ ३९ ॥ अब्दमेकशतंदिव्यंशक्रलोकेमहीयते ॥ गन्धानुलेपनंकृत्वाज्योतिष्टोमफलंलभेत् ॥ ४० ॥
चन्दनेनावलिप्यार्यामग्निष्टोमफलंलभेत् ॥ विलिप्यकृष्णागरुणावाजपेयफलंलभेत् ॥ ४१ ॥ कुङ्कुमेनविलिप्यार्यांगोसहस्रफलंलभेत् ॥ चन्दना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गरुकस्तूरैःसूक्ष्मपत्रैःसकुङ्कुमैः ॥ ४२ ॥ दुर्गामालिप्यविधिवत्कल्पकोटिंवसेद्दिवि ॥ अग्निहोत्रपरेविप्रेवेदवेदाङ्गपारगे ॥ ४३ ॥ सुवर्णानांसुवर्णानां
शतेदत्तेतुयत्फलम् ॥ तत्फलंलभतेराजन्पूजयित्वातुचाम्बिकाम् ॥ ४४ ॥ मालयाबिल्वपत्राणांनवम्यांगुग्गुलेनच ॥ मालाद्वयेनसम्पूज्यदुर्गांदेवीं
नराधिपः ॥ ४५ ॥ बिल्ववृक्षस्यपत्रैर्वाराजसूयफलंलभेत् ॥ करवीरस्यचस्रग्भिःपूजयेद्यस्तुचण्डिकाम् ॥ ४६ ॥ वाजपेयस्ययज्ञस्यफलंप्राप्नो
तिमानव ॥द्रोणपुष्पस्यचस्रग्भिःपूजयेद्यस्तुचण्डिकाम् ॥ ४७ ॥ राजसूयफलंप्राप्यस्वर्गलोकेमहीयते ॥ पूजयित्वातुराजेन्द्रश्रद्धयाविधिपूर्वकम् ॥
॥ ४८ ॥ वन्यपुष्पस्यमालाभिःपितृलोकेमहीयते ॥ शमीपुष्पस्यचस्रग्भिरार्यांसम्पूज्यभक्तितः ॥ ४९ ॥ गोसहस्रफलंलब्ध्वाविष्णुलोके
महीयते ॥ सर्वेषामेवपुष्पाणांप्रवरंनीलमुत्पलम् ॥ ५० ॥ नीलोत्पलसहस्रेणयस्तुमालांप्रयच्छति ॥ दुर्गायैविधिवद्वीरतस्यपुण्यफलंशृणु ॥५१॥
वर्षकोटिसहस्राणिवर्षकोटिशतानिच ॥ दिव्यमूर्तिधरोभूत्वारुद्रलोकेमहीयते ॥ ५२ ॥ सर्वासांपुष्पजातीनांयत्फलंपरिकीर्तितम् ॥ तस्माच्छतगुणं
प्राप्यदुर्गालोकेमहीयते ॥ ५३ ॥ नीलोत्पलसहस्रैस्तुपूजयेद्यस्तुचण्डिकाम् ॥ वाजपेयफलंप्राप्यरुद्रलोकेमहीयते ॥५४॥ अलाभेपुष्पजातीनांपत्रा
ण्यपिनिवेदयेत् ॥ पत्राणामप्यलाभेतुओषधीस्तुनिवेदयेत् ॥ ५५ ॥ ओषधीनामभावेतुभक्त्याभगवतीजिता ॥ प्रत्येकमुक्तपुष्पेषुकुशेष्वपिफलं
नृप ॥ ५६ ॥ आङ्गिरसेषुतेष्वेवद्विगुणंकाञ्चनस्यतु ॥ मल्लिकामुत्पलंपत्रंशमीपुन्नागचम्पकम् ॥ ५७ ॥ कर्णिकारमशोकंचद्रोणपुष्पंविशेषतः ॥
चन्दनंचजपापुष्पंनागकेसरमेवच ॥ ५८ ॥ यःप्रयच्छतिपुण्यात्मापुष्पाण्येतानिभावतः ॥ चण्डिकायैनरश्रेष्ठसचप्रोक्तफलंलभेत् ॥ ५९ ॥ सम्प्रा
प्यकालाद्राजत्वंचण्डिकानुचरोभवेत् ॥ अथपुष्पविशेषाणांफलंवक्ष्येऽम्बिकार्चने ॥ ६० ॥ ऋतुकालोद्भवैःपुष्पैर्मल्लिकाजातिकुङ्कुमैः ॥ सितरक्तै
स्तथापुष्पैर्नीलपुष्पैस्तुपाण्डुरैः ॥ ६१ ॥ किंशुकैःकरवीरैश्चविकङ्कतसुचम्पकैः ॥ बकुलैश्चैवमन्दारैःकुन्दपुष्पैःकुरण्टकैः ॥ ६२ ॥ कर्णिकारार्क
पुष्पैश्चनिम्बजैश्चापराजितैः ॥ धत्तूरकातिमुक्तैश्चब्रह्मकागस्तिसम्भवैः ॥ ६३ ॥ दमनैःसिन्दुवारैश्चसुरभीमार्कवैस्तथा ॥ लताभिर्ब्रह्मवृक्षस्यदूर्वा
ङ्कुरैश्चकोमलैः ॥ ६४ ॥ मञ्जरीभिःकुशानांचबिल्वपत्रैःसुशोभनैः ॥ भक्त्यायुक्तस्तथानुक्तैर्जलजैःस्थलसम्भवैः ॥ ६५ ॥ पत्रैःपुष्पैर्यथालाभंस
र्वौषधिमयैःशुभैः ॥ वन्यानांसर्वपत्रैश्चपुष्पैश्चैवप्रपूजयेत् ॥ ६६ ॥ पद्माकृतिंचयःकुर्यान्मण्डलंचण्डिकागृहे ॥ सब्रह्मणःपुरंगत्वामोदतेब्रह्मणासह ॥
॥ ६७ ॥ शङ्खवर्णंतुयःकुर्यान्मण्डलंविधिवन्नृप ॥ सदिव्यंयानमारुह्यचन्द्रलोकमवाप्नुयात् ॥ ६८ ॥ नानावर्णेनचूर्णेनकृत्वामण्डलमुत्तमम् ॥
गत्वामाहेश्वरीलोकंमोदतेशाश्वतीःसमाः ॥ ६९ ॥ वज्राकृतिंवज्रचूर्णैर्यःकुर्यान्मण्डलंनृप ॥ ऐरावतसमारूढइन्द्राणीलोकमाप्नुयात् ॥ ७० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यःकरोतिनरोभक्त्यादुर्गायाःपुरतोमहत् ॥श्वेतकृष्णैःसितैर्वर्णैःश्रीवत्साङ्कितमुत्तमम् ॥ ७१ ॥ मण्डलंसनरोवीरविमानवरमाश्रितः ॥ सेव्यमानोऽप्स
रोव्रातैर्व्रजेच्छ्रीलोकमुत्तमम्॥७२॥यःकरोतिनरोभक्त्यामण्डलंह्यम्बिकागृहे ॥रमतेकिन्नरैःसार्धयावदाभूतसम्प्लवम्॥७३॥घृतपिष्टप्रदीपादौघृतमिश्रित
पल्लवैः॥ओषधीभिश्चमेध्याभिःसर्वबीजैर्यवादिभिः ॥७४॥ नवम्यांसर्वकालेतुयात्राकालेविशेषतः ॥ यःकुर्याच्छ्रद्धयावीरदिव्यंनीराजनंनरः ॥७५॥
शङ्खभेर्यादिभिर्घोषैर्महद्भिर्देववादितैः ॥ नताशेषविनिर्घोषैर्जयशब्दैश्चपुष्कलैः ॥ ७६ ॥ यावन्तोदिवसादेव्याःपूजनेयान्तिवैनृणाम् ॥ तावत्क
ल्पसहस्राणिस्वर्गलोकेमहीयते॥७७॥यस्तुकुर्यात्प्रदीपेनशिवलोकंसगच्छति ॥ लवणेनाक्षतैःकृत्वादेव्यानीराजनंशुभम् ॥७८॥ तावत्कल्पसहस्राणि
विष्णुलोकेमहीयते॥सुवर्णरौप्यवर्णैश्चकृत्वानीराजनंनरः॥७९॥भगवत्यैमहाराजब्रह्मलोकेमहीयते॥ त्रिकालंयोनरःकुर्याद्दुर्गायाःपुरतोनृप॥८०॥नृत्यं
गीतंचवादित्रंतस्यपुण्यफलंशृणु॥यावन्त्यब्दानिकुरुतेनृत्यंगीतंचवादितम्॥८१॥तावत्कल्पानिराजेन्द्रदेवीलोकेसुखंवसेत्॥ एकाहमपियोभक्त्यापञ्च
गव्येनचण्डिकाम्॥ ८२॥स्नापयेन्नृपशार्दूलसगच्छेत्सुरभीपुरम्॥कपिलापञ्चगव्येनघृतक्षीरयुतेनच॥८३॥ स्नानंशतगुणंप्रोक्तमितरेभ्योनराधिप॥वर्षै
श्चषट्सहस्राणांपापानांसमुपार्जनम् ॥८४॥ तत्सर्वंविलयंयातितोयेनलवणंयथा॥घृताभ्यङ्गेनदेव्यास्तुकृतेनविधिवन्नृप॥८५॥तस्मादभ्यञ्जयेद्भक्त्या
नित्यंभगवतींनृप ॥ नवम्यांशुक्लपक्षेतुविधिवच्चण्डिकांनप ॥ ८६ ॥ घृतेनस्नापयेद्यस्तुतस्यपुण्यफलंशृणु ॥ दशपूर्वान्दशपरानात्मानंचविशेषतः
॥ ८७ ॥ भवार्णवात्समुद्धृत्यदुर्गालोकेमहीयते ॥ क्षीराद्यैःस्नापयेद्यस्तुश्रद्धाभक्तिसमन्वितः ॥ ८८ ॥ चण्डिकांसनरोयातिगोलोकंतमसःपरम् ॥
चण्डिकांस्नापयेद्यस्तुनरश्चेक्षुरसेनच ॥ ८९ ॥ सौपर्णकेनयानेनविष्णुनासहमोदते ॥ योनरःस्नापयेद्दुर्गांश्रद्धयाहेमवारिणा ॥ ९० ॥ सौवर्ण
यानमारूढोमोदतेपुरुषैर्दिवि॥रत्नोदकेनविधिवत्स्नापयेच्छ्रद्धयान्वितः ॥ ९१ ॥ चण्डिकांसनरैःपूर्वैर्विष्णुलोकेमहीयते ॥ स्नापयेद्यउमांदेवींनरः
कर्पूरवारिणा ॥ ९२ ॥ सौवर्णयानमारूढोगच्छतेयन्त्रचण्डिका ॥ चण्डिकांस्नापयित्वातुश्रद्धयागरुवारिणा ॥ ९३ ॥ इन्द्रलोकंसमासाद्यक्रीडते
सहकिन्नरैः॥पितॄनुद्दिश्ययोदुर्गांमधुनापायसेनच ॥ ९४ ॥ स्नापयेद्विधिवद्भक्त्यातस्यपुण्यफलंशृणु ॥ तृप्ताभवन्तिपितरस्तस्यवर्षशतद्वयम् ॥९५॥
यएवंस्नापयेन्नित्यंस्नानद्रव्यैर्नराधिप ॥ युगपद्विधिवद्वीरतस्यपुण्यफलंशृणु ॥ ९६ ॥ अश्वमेधसहस्रस्यराजसूयशतस्यच ॥ अग्निष्टोमस्ययज्ञ
स्यसफलंविन्दतेनरः ॥ ९७॥ स्नापयित्वानरस्ताम्रैर्वाजपेयफलंलभेत् ॥ सौवर्णैःस्नापयित्वातुचण्डिकांकलशैर्नृप ॥ ९८ ॥ अश्वमेधफलंप्राप्य
ब्रह्मलोकेमहीयते॥घृतस्नातांतथादुर्गांसमुद्वर्तयतेतुयः ॥९९॥ यवगोधूमजैश्चूर्णैर्घर्षयेच्छार्करेणच ॥ घृतेनपयसादध्नास्नापयेच्चण्डिकांततः ॥१००॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बिल्वपत्रैःसुगन्धाढचैर्धर्षयेद्यत्नतःपुमान्॥गोसहस्रशतेदत्तेयत्फलंपुष्करेस्मृतम्॥१॥तत्फलंलभतेवीरदेव्याउद्वर्तनेकृते॥दत्त्वार्घ्यंविधिवद्भक्त्यादुर्गायै
पद्मवारिणा ॥ २ ॥ सम्पूज्यमानोगन्धर्वैरमतेदिविदेववत् ॥ कृत्वोपवासंविधिवत्सुभोगीपुत्रवान्भवेत् ॥ ३ ॥ उत्तरेत्वयनेयस्तुसोपवासोयजे
च्छिवाम्॥बहुपुत्रोबहुधनःसनरःकीर्तिमान्भवेत् ॥ ४ ॥ कृत्वोपवासंविधिवद्विषुवेयोऽर्चयेच्छिवाम् ॥ शक्तिमान्बहुपुत्रश्चसभवेद्बलवान्नरः ॥ ५ ॥
योऽर्चयेद्विधिवद्दुर्गांग्रहणेचन्द्रसूर्ययोः ॥ कृत्वोपवासंविधिवत्सभवेत्पुत्रवान्नरः ॥ ६ ॥ शान्तिकामोनरोयस्तुराहुग्रस्तेदिवाकरे ॥ सोपवासोऽर्च
येद्देवींसगच्छेत्परमंपदम् ॥ ७ ॥ इत्येतेकथितावीरपूजाकालामनीषिभिः ॥ दुर्गायाःकुरुशार्दूलयेषुपूज्यदिवंव्रजेत् ॥ ८ ॥ दुर्गायादर्शनंपुण्यं
दर्शनादभिवन्दनम् ॥ वन्दनात्स्पर्शनंपुण्यंस्पर्शनादभिपूजनम् ॥ ९ ॥ पूजनाल्लेपनंश्रेष्ठंलेपनात्तर्पणंस्मृतम् ॥ तर्पणान्मांसदानंतुमहिषाजनि
घातनम् ॥ ११० ॥ अहन्यहनियोदुर्गांपूजयेद्रुधिरादिभिः ॥ कुलानांशतमुद्धृत्यब्रह्मलोकेमहीयते ॥ ११ ॥ वरंप्राणपरित्यागःशिरसःकर्तनंवरम् ॥
नचा (नाना) पूज्येहभुञ्जीतचण्डिकांचण्डरूपिणीम्॥ १२॥इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेदेवीपूजाकथनंनामचतुरशीतितमोऽध्यायः ॥ ८४ ॥
पुलस्त्यउवाच ॥ देवैःपुराजगत्कर्तापृष्टोदेवःपितामहः ॥ ब्रूहिदुर्गार्चनंदेवयेनतुष्यतिचण्डिका ॥ १ ॥ ब्रह्मोवाच ॥ शम्भुःपूजयतेदेवींमन्त्रशक्ति
मयींशुभाम् ॥ अक्षमालांकरेन्यस्यतेनासौविभवोद्भवः ॥ २ ॥ दुर्गांरत्नमयींदेवाःपूजयामिसदाह्यहम् ॥ तेनप्राप्तंमयाचैवब्रह्मत्वंचसुदुर्लभम्॥३॥
इन्द्रनीलमयींदेवींविष्णुःपूजयतेसदा ॥ विष्णुत्वंप्राप्तवांस्तेनअद्भुतैकंसनातनम् ॥ ४ ॥ देवींहेममयींदुर्गांधनदोऽर्चयतेसदा ॥ तेनासौधनदोदेवोधने
शत्वमवाप्तवान् ॥ ५ ॥ विश्वेदेवामहात्मानोरौप्यांदेवींमनोरमाम् ॥ यजन्तिविधिवत्तेनविश्वेदेवत्वमागताः ॥ ६ ॥ वायुःपूजयतेभक्त्यादेवीं
पित्तलसम्भवाम् ॥ वायुत्वंतेनसम्प्राप्तंअनौपम्यगुणावहम् ॥ ७ ॥ वसवःकांस्यकांदेवींपूजयन्तिविधानतः ॥ प्राप्तास्ततोमहात्मानोवसुत्वंतन्महोद
यम् ॥ ८ ॥ अश्विनौपार्थिवींदेवींपूजयन्तौविधानतः ॥ तेनतावश्विनौदेवौस्ववैद्यौसम्बभूवतुः ॥ ९ ॥ स्फाटिकींशोभनांदेवींवरुणःपूजयेत्सदा ॥
वरुणत्वंचसम्प्राप्तंतेनचर्द्ध्यासमन्वितम् ॥ १० ॥ देवींरत्नमयींपुण्यामग्निर्यजतिभावितः ॥ अग्नित्वंप्राप्तवांस्तेनतेजोरूपसमन्वितम् ॥ ११ ॥
ताम्रांदेवींसदाकालंभक्त्यादेवोदिवाकरः ॥ अर्चयेत्तेनसम्प्राप्तंसूर्यत्वंशुभमुत्तमम् ॥ १२ ॥ मुक्ताफलमयींदेवींसोमःपूजयतेसदा ॥ तेनसोमेन
सम्प्राप्तंसोमत्वंसततोज्ज्वलम् ॥ १३ ॥ प्रवालकमयींदेवींपूजयन्तिविधानतः ॥ तेनतेग्रहतांप्राप्ताःग्रहाःसूर्यादयोऽनिशम् ॥ १४ ॥ वारिजांशोभनां
देवींपूजयन्त्यसुरोत्तमाः ॥ वारिजाश्चमहात्मानस्तेनतेऽमितविक्रमाः ॥ १५ ॥ त्रपुसीसमयींदेवींयजन्तेपितरःसदा ॥ पितृत्वंप्राप्यतेसर्वेसम्पूज्याश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जगत्त्रये ॥ १६ ॥ तथालोहमयींदेवींपिशाचाःपूजयन्तिताम् ॥ तेनसिद्धिबलोपेताःप्रयान्तिपरमंपदम् ॥ १७ ॥ त्रिलोहिनींसदादेवींयजन्तेगुह्य
कादयः ॥ तेनभोगबलोपेताःप्रयान्तीश्वरमन्दिरम् ॥ १८ ॥ वज्रलोहमयींदेवींयजन्तेभूतयोनयः ॥ तेनमुक्ताःसुरत्वंचलभन्तेसततंदिवि ॥ १९ ॥
देवास्तथायूयमपियदीच्छथपरांगतिम् ॥ शिवांमणिमयींपूज्यलभध्वंमनसेप्सितम् ॥ २० ॥ यश्चदेव्यागृहंनित्यंसंमार्जयतिभक्तितः ॥ सभवेद्बल
वान्देवाःसर्वसम्पत्तिसंयुतः ॥ २१ ॥ देव्यागृहंतुयोदेवागोमयेनानुलेपयेत् ॥ स्त्रीपुमान्वायथावच्चषण्मासाभ्यन्तरेततः ॥ सलभेदीप्सितान्कामा
न्देवीलोकंचगच्छति॥२२॥पुलस्त्यउवाच॥स्नानकालेमहाराजनानावादित्रमङ्गलैः॥जयशब्दैश्चयोदुर्गांस्नाप्यमानांजलादिभिः॥२३॥ सम्पूजयति
भक्त्याचगन्धपुष्पादिभिस्तथा॥सक्रीडतेदिवंगत्वागन्धर्वाप्सरसांगणैः॥२४॥ चक्रैर्वाशतसङ्ख्यैस्तुक्षीरवृक्षसमुद्भवैः॥हेमजैश्चापिकलशैर्जलक्षीरघृता
न्वितैः॥२५॥अनेकवर्णसंयुक्तैरक्षतैर्नीरतण्डुलैः॥यःकरोतिनरोभक्त्याचक्राकारंतुमण्डलम्॥२६॥चण्डिकायाःपुरोराजंश्चण्डिकायाश्चमन्दिरे॥सदि
व्ययानगोभूत्वारमतेवैष्णवेपुरे ॥२७॥शुभंवाप्यशुभंवापिफलंपुष्पंनिवेदयेत् ॥भक्त्यायुक्तोनरःसवसचदेवत्वमाप्नुयात् ॥२८॥ नानाकुसुममालाभि
र्मण्डपंचण्डिकोपरि॥यःकुर्याद्विधिवद्भक्त्याविष्णुलोकेमहीयते ॥२९॥कुर्यात्पुष्पगृहंभक्त्याविधिवच्चण्डिकोपरि ॥ नवम्यांपर्वकालेवाविचित्रकुसुमो
ज्ज्वलम्॥३०॥विमानंवरमारुह्यपुष्पदामोपशोभितम् ॥ अक्षयंमोदतेकालंचण्डिकालयमाश्रितः ॥ ३१ ॥ पूजाविभक्तविन्यासरचनादिषुसर्वतः॥फ
लमेवंसमासेनज्ञेयंवित्तानुसारतः ॥ ३२ ॥ कृष्णागरुंसकर्पूरंरोचनंचन्दनंतथा ॥ भगवत्यनरोभूयःपङ्कंदत्वानराधिपः ॥ ३३ ॥ इहकामानवाप्याथ
शिवलोकेमहीयते ॥ गुग्गुलुंसघृतंदत्त्वादुर्गायैचनरर्षभ ॥३४॥ वर्षार्धंविधिवद्भक्त्यागोसहस्रफलंलभेत् ॥ अगुरुंधूपमावेद्यसर्वयज्ञफलंलभेत् ॥३५॥
सितागरुंनरोदत्वागोसहस्रफलंलभेत् ॥ सर्वेषामेवधूपानांदुर्गायागुग्गुलुःप्रियः ॥३६॥ घृतयुक्तोविशेषेणसततंप्रीतिवर्धनः ॥ द्वेसहस्रेपलानांतुतथा
पलशतद्वयम् ॥३७॥ दत्त्वाशुक्लनवम्यांतुचण्डिकावल्लभोभवेत् ॥ महिषाक्षंघृताक्तंतुदत्त्वाबिल्वमथापिवा ॥ ३८ ॥ वाजपेयफलंप्राप्यसूर्यलोकेमही
यते ॥ सकृच्चागरुधूपेनप्रीतिदासर्वमङ्गला ॥ ३९ ॥ शोधयेत्पापकलिलंकाञ्चनंदहनोयथा ॥ वस्त्राणिसुविचित्राणिसूक्ष्माणिसुमृदूनिच ॥ ४० ॥
यःप्रयच्छतिदुर्गायैसगच्छतिशिवालयम्॥यावन्तस्तन्तवोवीरतेषुवस्त्रेषुकीर्तिताः ॥४१॥ तावद्वर्षसहस्राणिशोभतेचण्डिकालये॥सुवर्णतिलकेयस्तुभग
वत्यैप्रयच्छति ॥ ४२ ॥ सगच्छतिपरंस्थानंयत्रसापरमाकला ॥ सुवर्णघटितंवस्त्रंयोदुर्गायैप्रयच्छति ॥ ४३ ॥ गोसहस्रफलंप्राप्यसूर्यलोकेमही
यते ॥ वित्तानुसरणेनैवंफलंज्ञेयंसमासतः ॥ ४४ ॥ सन्ध्याकालेनवम्यांयोबलिंकुर्यान्नराधिप ॥ चण्डिकायतनेभक्त्यामहिषाजनिपातनैः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ४५ ॥ सगच्छतिपरंस्थानंयत्रसाचण्डिकास्थिता ॥ गुडखण्डाज्यसम्मिश्रमन्नंदद्यान्नराधिप ॥ ४६ ॥ देव्यैयःसकुलोऽथासौसूर्यलोकेमहीयते ॥
गुडखण्डघृतानांचतथाशर्करयानृप ॥ ४७ ॥ दत्तेचोद्वर्तनंदेव्यैसयातिब्रह्मणःपदम् ॥ शाल्योदनंरसानांचप्रपानंविरजंतथा ॥ ४८॥ यःप्रयच्छति
दुर्गायैसचगच्छेच्छिवालयम् ॥ दुर्गामुद्दिश्यपानीयंकेतकीगन्धवासितम् ॥ ४९ ॥ यःप्रयच्छतिराजेन्द्रसगणाधिपतिर्भवेत् ॥ आम्रंचनारिकेलंचख
र्जूरंबीजपूरकम् ॥ ५० ॥ यःप्रयच्छतिदुर्गायैसगच्छेत्परमंपदम् ॥ घृतदीपप्रदानेनयोऽर्चयेचण्डिकांनरः ॥५१॥ सोऽश्वमेधफलंप्राप्यचण्डिकाऽनुच
रोभवेत् ॥ तैलदीपंचयोदद्यात्पूजयित्वातुचण्डिकाम् ॥ ५२ ॥ नागलोकंसमासाद्यक्रीडतेसहकिन्नरैः ॥ आत्मदेहवसादीपंप्रज्वाल्यचण्डिकाग्रतः ॥
॥ ५३ ॥ निवेदयेन्नरोभक्त्यामोदतेसोऽम्बिकालये ॥ यःकुर्यात्कार्तिकेमासिशोभनांदीपमालिकाम् ॥ ५४ ॥ चण्डिकायतनेभक्त्यासस्सूर्यालयमात्र
जेत् ॥ घृतेनकुरुशार्दूलअमायांचस्वशक्तितः ॥ ५५ ॥ विशेषतोनवम्यांचभक्तिश्रद्धासमन्वितः ॥ तावद्वर्षसहस्राणिब्रह्मलोकेमहीयते ॥ ५६ ॥
अश्मसारमयंकृत्वानानादीपसमन्वितम् ॥ दीपवृन्दंसमुद्बोध्यदुर्गायाःपुरतोनृप ॥ ५७ ॥ नरःकल्पायुतंसाग्रंदुर्गालोकेमहीयते ॥ चन्द्रांशुनिर्मलंछत्रं
मणिमाणिक्यभूषितम् ॥ ५८ ॥ सर्वतःशोभनंकृत्वानानापुष्पानुलेपनैः ॥ दुर्गायाःपुरतोधत्तेसयातिपरमांगतिम् ॥ ५९ ॥ चामरेश्रद्धयादेव्यैदत्त्वा
चश्रद्धयान्वितः ॥ राजसूयफलंप्राप्यहंसलोकेमहीयते ॥ ६० ॥ सम्प्रसारितदेहोयोदण्डवत्पतितोभुवि ॥ चण्डिकापुरतोवीरसयातिपरमां
गतिम् ॥ ६१ ॥ जपसन्ध्योपवासेषुसर्वतीर्थेषुयत्फलम् ॥ तत्फलंलभतेवीरप्रणम्यशिरसाशिवाम् ॥ ६२ ॥ दुर्गापूजोपकरणंस्वल्पंवायदिवाबहु॥
कृत्वावित्तानुसारेणरुद्रलोकेमहीयते ॥ ६३ ॥ चण्डिकांपूजयित्वातुप्रहृष्टेनान्तरात्मना ॥ कृताञ्जलिपुटोभूत्वाइदंस्तोत्रमुदीरयेत् ॥ ६४ ॥
दुर्गांशिवांशान्तिकरींब्रह्माणींब्रह्मणःप्रियाम् ॥ सर्वलोकप्रणेत्रींचप्रणमामिसदाम्बिकाम् ॥ ६५ ॥ मङ्गलांशोभनांशुद्धांनिष्कलांपरमांकलाम् ॥
विश्वेश्वरींविश्ववन्द्यांचण्डिकांप्रणमाम्यहम् ॥ ६६ ॥ सर्वदेवमयींदेवींसर्वदेवनमस्कृताम् ॥ ब्रह्मेशविष्णुनमितांप्रणमामिसदाप्युमाम् ॥ ६७ ॥
विन्ध्यस्थांविन्ध्यनिलयांदिव्यस्थाननिवासिनीम् ॥ योगिनींयोगविद्यांचचण्डिकांप्रणमाम्यहम् ॥ ६८ ॥ ईशानमातरंदेवीमीश्वरीमी
श्वरप्रियाम् ॥ प्रणतोऽस्मिसदादुर्गांसंसारार्णवतारिणीम् ॥ ६९ ॥ इदंयःपठतेनित्यंशृणुयाद्वापिभक्तितः ॥ समुक्तःसर्वपापेभ्योदुर्गा
लोकेमहीयते ॥ ७० ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेदुर्गार्चनस्तोत्रकथनंनामपञ्चाशीतितमोऽध्यायः ॥ ८५ ॥ भीष्मउवाच ॥
श्रुतंसूर्यस्यचन्द्रस्यभौमस्यापिप्रपूजनम् ॥ बुधस्यसोमसूनोश्चपूजनंकथयाधुना ॥ १ ॥ पुलस्त्यउवाच ॥ तारागर्भसमुद्भूतोबुध

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्चन्द्रकुमारकः ॥ सौम्यःक्रूरोग्रहोज्ञेयःशुभाशुभप्रदोनृणाम् ॥ २ ॥ शराकारंमण्डलंतुबुधस्यपरिकीर्तितम् ॥ हरिन्मणिसमै
र्वर्णैश्चूर्णैःकुर्यात्तुमण्डलम् ॥ ३ ॥ पूजयेत्तत्रगन्धाद्यैःपुष्पैर्धूपैस्सुशोभनैः ॥ दानंचविधिवत्कुर्याद्दशारिष्टेचगोचरे ॥ ४ ॥ कर्पूराश्चैवमुद्गाश्चहरि
द्वस्त्रंहरिन्मणिः ॥ सुवर्णंचयथाशक्तिदद्याद्बोधनतुष्टये ॥ ५ ॥ सोमपुत्रमहाप्राज्ञवेदवेदाङ्गपारग ॥ नमस्तेग्रहमध्यस्थप्रसन्नोभवमेसदा ॥ ६ ॥
इतिस्तुत्वामहाराजबुधंभक्त्यासमाहितः ॥ प्राप्नुयान्निखिलान्कामान्सोमसूनुप्रसादतः ॥ ७ ॥ गुरोश्चपूजनंप्रोक्तंपट्टसाकारमण्डले ॥ पीतवर्णैःसु
निष्पन्नैश्चूर्णैराजन्सुशोभनैः ॥ ८ ॥ पीतैर्गन्धयुतैःपुष्पैर्वस्त्रैर्हेम्नाचपूजयेत् ॥ दशागोचरयोर्दौष्टयेदानंदद्याच्चशक्तितः ॥ ९ ॥ चणकद्विदलंचैवपीत
वस्त्रंसुवर्णकम् ॥ पुष्परागंतुविप्रायदद्याच्चारिष्टशान्तये ॥ १० ॥ बृहस्पतेसुराचार्यसर्वशास्त्रविशारद ॥ दानेनानेनसंतुष्टोभवसौम्योममाधुना॥११॥
एवंकृतेतुराजेन्द्रस्वानुकूलोभवेद्गुरुः ॥ सर्वान्कामानवाप्नोतिनरोगुरुसमर्चनात् ॥ १२ ॥ भार्गवस्यापिवक्ष्यामिपूजनंनृपतेऽधुना ॥ यत्कृत्वासर्व
कामाप्तिःसम्यक्पुंसांप्रजायते ॥ १३ ॥ पञ्चकोणंसमुद्दिष्टंमण्डलंभार्गवस्यतु ॥ चूर्णकैःश्वेतवर्णैश्चविधिनासुधियाकृतम् ॥ १४ ॥ श्वेतगन्धैश्चपु
ष्पैश्चवस्त्रैश्चापिसितैस्तथा ॥ पूजयेद्भार्गवंभक्त्यानरःश्रद्धासमन्वितः ॥ १५ ॥ रौप्यंचदक्षिणादानंयथाशक्तिप्रकीर्तितम् ॥ दशाद्यरिष्टेचोत्पन्नेसि
तमश्वंप्रदापयेत् ॥ १६ ॥ तण्डुलाःश्वेतवस्त्रंचरौप्यंचन्दनमेवच ॥ कर्पूरंचसुगन्धाढ्यंदेयंदानंद्विजातये ॥ १७ ॥ भृगुपुत्रमहाभागदानवानांपुरो
हित ॥ दानेनानेनसंतुष्टोभवसर्वासुरार्चित ॥ १८ ॥ इतिमन्त्रंसमुच्चार्यदद्याद्दानंयथोदितम् ॥ तस्यतुष्टोभवत्याशुभार्गवःकुरुनन्दन ॥ १९ ॥ शनै
श्चरस्यपूजार्थंमण्डलंचनराकृति ॥ कृत्वाचूर्णैःकृष्णवर्णैःपूजयेत्तत्रभक्तितः ॥ २० ॥ कृष्णैर्गन्धैश्चपुष्पैश्चवस्त्रैश्चापितथाविधैः ॥ लोहंचदक्षिणादा
नंपिण्याकंचतिलस्यच ॥ २१ ॥ दानंशनैश्चरारिष्टेकृष्णांगांकृष्णवस्त्रकम् ॥ सुवर्णंचयथाशक्तिदद्यान्नीलमणिंतथा ॥ २२ ॥ सूर्यसूनोमहाभाग
छायापुत्रमहाबल ॥ अधोदृष्टेभवशनेप्रसन्नोऽस्मात्प्रदानतः ॥ २३ ॥ एवंस्तुत्वाशनिंभक्त्यायश्चदद्याद्द्विजातये ॥ स्वानुकूलोभवेत्तस्यशनिःपापे
चगोचरे ॥ २४ ॥ राहोर्वर्णादिकंसर्वंशनिवन्मण्डलंतथा ॥ सूर्याकारंसमुद्दिष्टंतत्रपूजार्कसूनुवत् ॥ २५ ॥ गोमेदंसर्षपाश्चैवतिलामाषाश्चकृष्णकाः ॥
महिषीचतथाच्छागोदानंराहोःप्रकीर्तितम् ॥ २६ ॥ सिंहिकासुतदैत्येन्द्रराहोचन्द्रार्कमर्दन ॥ भवतुष्टोमहाभागदानेनानेनसुव्रत ॥ २७ ॥ केतो
र्मण्डलकंकुर्याद्ध्वजाकृतिसुशोभनम् ॥ शनिवत्सकलंज्ञेयंपूजावर्णादिकंनृप ॥ २८ ॥ सप्तधान्यंसमुद्दिष्टंसस्वर्णंकेतुदानकम् ॥ एवंकृतेस्वानुकूलौ
भवेतांचनृणांनृप ॥ २९ ॥ प्रदद्यातांधनंपुत्रान्सुखंसौभाग्यमेवच ॥ आकृष्णेतिरवेर्मन्त्रइमंदेवास्तथाविधोः ॥३० ॥ अग्निर्मूर्द्धेतिभौमस्यमन्त्रोज

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्येऽर्हणेतथा ॥ उद्बुध्यस्वतीन्दुसूनोर्बृहस्पतेर्गुरोस्तथा ॥ ३१ ॥ अन्नात्परीतिशुक्रस्यशन्नोदेवीरयंशनेः ॥ कयानइतिराहोश्चकेतोःकेतुमितिस्मृतः
॥ ३२ ॥ एतेमन्त्रास्समुद्दिष्टाग्रहाणांपूजनेजपे ॥ एवंकृतेनृपश्रेष्ठानुकूलाअखिलाग्रहाः ॥ ३३ ॥ भवन्तिपुंसांसततंयच्छन्तिचसुसम्पदः ॥ ३४ ॥
एतन्महाराजमयासमस्तंतुभ्यंसमुद्दिष्टमिहक्रमेण ॥ श्रुत्वानरःसर्वश्रुतार्थसारमेतीश्वरस्यैवचसन्निधानम् ॥ ३५ ॥ इदंपवित्रंयशसोनिधानमिदंपितॄ
णामतिवल्लभंस्यात् ॥ इदंचदेवेष्वमृतायकल्पतेपुण्यावहंपातकिनांचपुंसाम् ॥ ३६ ॥ इतिपठतियशस्यंयःशृणोतीहभक्त्यामधुमुरनरकारेरर्चनंवाथ
पश्येत् ॥ मतिमपिचजनानांयोददातीन्द्रलोकेविधिशिवविबुधेन्द्रैःपूज्यतेकल्पमेकम् ॥ ३७ ॥ यइदंशृणुयान्नित्यमृषीणांचरितंशुभम् ॥ विमुक्त
स्सर्वपापेभ्यःस्वर्गलोकेमहीयते ॥ ३८ ॥ तपःकृतेप्रशंसन्तित्रेतायांज्ञानमेवच ॥ द्वापरेयज्ञमित्याहुर्दानमेकंकलौयुगे ॥ ३९ ॥ सर्वेषामेवदानाना
मिदमेवैकमुत्तमम् ॥ अभयंसर्वभूतानांनास्तिदानमतःपरम् ॥ ४० ॥ दानंप्रधानंशूद्रस्यत्वित्याहभगवान्प्रभुः ॥ दानेनसर्वकामाप्तिस्तस्यसंजाय
तेतपः ॥ ४१ ॥ पुण्यंपवित्रमायुष्यंसर्वपापविनाशनम् ॥ पुराणमेतत्कथितंतीर्थश्राद्धानुवर्णनम् ॥ ४२ ॥ शृणोतियःपठेद्वापिश्रीमान्संजायतेनरः
सर्वपापविनिर्मुक्तःसलक्ष्मीकंहरिंलभेत् ॥ ४३ ॥ इदंमहाराजअगादितुभ्यंपुण्यंमहापातकनाशनंच ॥ ब्रह्मार्करुद्रैश्चसुपूजितंचश्रोतव्यमेतत्प्रवद
न्तितज्ज्ञाः ॥ ४४ ॥ सृष्टिखण्डमिदंराजन्मयातुभ्यंप्रकीर्तितम् ॥ पुराणस्यादिभूतंचनवधासृष्टिपौष्करम् ॥ ४५ ॥ द्विजेभ्यःश्रावयेद्विद्वान्य
श्चैवैशृणुयात्पठेत् ॥ कल्पकोटिशतंसाग्रंब्रह्मलोकेसमोदते ॥ ४६ ॥ इतिश्रीपाद्मपुराणेप्रथमेसृष्टिखण्डेपुराणावतारेग्रहार्चनवर्णनंनामषडशीतित
मोऽध्यायः ॥ ८६ ॥ इतिसृष्टिखण्डंसमाप्तम् ॥ शुभंभवतु ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ श्रीपाद्मे महापुराणे द्वितीयं भूमिखण्डं प्रारभ्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

भूमिखंडाचीं चित्रें



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ॐश्रीगणेशायनमः ॥ ऋषयऊचुः ॥ शृणुसूतमहाभागसर्वतत्त्वार्थकोविद ॥ सन्देहमागतंविद्वन्दारुणंबुद्धिनाशनम् ॥ १ ॥ केचित्[1]पठन्तिप्रह्ला
दंपुराणेषुद्विजोत्तमाः ॥ पञ्चवर्षान्वितेनापिकेशवःपरितोषितः ॥ २ ॥ देवासुरेकथंप्राप्तेहरिणासहयुध्यति ॥ निहतोवासुदेवेनप्रविष्टोवैष्णवींत
नुम् ॥ ३ ॥ सूतउवाच ॥ कश्यपेनपुराज्ञातंकृतंव्यासेनधीमता ॥ ब्रह्मणाकथितंपूर्वंव्यासस्याग्रेस्वयंप्रभोः ॥ ४ ॥ तमेवंहिप्रवक्ष्यामिभवतामग्रतोद्वि
जाः ॥ सन्देहकारणंजातंछिन्नंदेवेनवेधसा ॥ ५ ॥ व्यासउवाच ॥ शृणुसूतमहाभागब्रह्मणापरिभाषितम् ॥ [2]प्रह्लादस्ययथाजन्मपुराणेऽप्यन्यथा
श्रुतम् ॥ ६ ॥ जातमात्रःसर्व[3]सुखंवैष्णवंमा[4]र्गमाश्रितः ॥ महाभागवतश्रेष्ठःप्रह्लादोदेवपूजितः ॥ ७ ॥ विष्णुनासहयुद्धायसपुत्रःसङ्गरंगतः ॥ नि
हतोवासुदेवेनप्रविष्टोवैष्णवींतनुम् ॥ ८ ॥ सृष्टिभावंशृणुष्वत्वमस्यैवचमहात्मनः ॥ सङ्गरंप्राप्य[5]पुत्राद्यैर्विष्णुनासहवीर्यवान् ॥ ९ ॥ प्रविष्टो
वैष्णवंतेजस्सम्प्राप्यस्वेनतेजसा ॥ महाभागवतश्रेष्ठःप्रह्लादोदेवपूजितः ॥ १० ॥ पुराकल्पेमहाभागयथाजातःसवीर्यवान् ॥ वृत्तान्तंतस्यवीरस्यप्रव
क्ष्यामिसमासतः ॥ ११ ॥ पश्चिमेसागरस्यान्तेद्वारकानामवैपुरी ॥ सर्वऋद्धिसमायुक्तासर्वसिद्धिसमन्विता ॥ १२ ॥ तस्यामास्तेसदादेवोयो
गज्ञोयोगवित्तमः ॥ शिवशर्मेतिविख्यातोवेदशास्त्रार्थकोविदः ॥ १३ ॥ तस्यापिपञ्चपुत्रास्तुबभूवुःशास्त्रकोविदाः ॥ यज्ञशर्मावेदशर्माधर्मशर्मा
तथैवच ॥ १४ ॥ विष्णुशर्मामहाभागोनूनंतत्कर्मकोविदः ॥ पञ्चमःसोमशर्मेतिपितृभक्तिपरायणः ॥ १५ ॥ पितृभक्तिंविनाचैवधर्ममन्यं
द्विजोत्तमाः ॥ नविदन्तिमहात्मानस्तद्भावेनतुभाविताः ॥ १६ ॥ तेषांतुभक्तिंसंपश्यञ्छिवशर्माद्विजोत्तमः ॥ चिन्तयामाससमेधावीनिष्कर्षि[6]ष्ये
सुरोत्तमान् ॥ १७ ॥ पितृभक्तेषुयोभावोनैतेषांमनसिस्थितः ॥ यथाजानाम्यहंचाथकरिष्येबुद्धिपूर्वकम् ॥ १८ ॥ विष्णोश्चैवप्रसादात्ससर्वसि
द्धि[7]र्बभूवह ॥ सद्भावंचिन्तयामासअञ्जनार्थंद्विजोत्तमाः ॥ १९ ॥ उपायंब्राह्मणश्रेष्ठस्तपसस्तेजसःकिल ॥ चकारसोऽप्युपायज्ञोमाययाब्रह्मवि
त्तमः ॥ २० ॥ तेषामग्रेततोव्याजंशिवशर्माव्यदर्शयत् ॥ महताज्वररोगेणमृतामाताविदर्शिता ॥ २१ ॥ तैस्तुदृष्टामृतामातापितरंवाक्यमब्रुव
न् ॥ २२ ॥यर्या[8]वयंमहाभागगर्भोदरेप्रवर्द्धिताः ॥ कलेवरंपरित्यज्यस्वयमेवगताक्षयम् ॥ २३ ॥ अपहायगतासेयंस्वर्गेतातकिमुच्यते ॥ २४ ॥
शिवशर्मोपरिभवंपुत्रंभक्तिपरायणम् ॥ यज्ञशर्माणमाहूयइत्युवाचद्विजोत्तमः ॥ २५ ॥ शिवशर्मोवाच ॥ अनेनापिसुतीक्ष्णेनशस्त्रेणनिशितेन

---

१ 'स्तुवन्ति' इ० पा०। २ 'प्रह्लादस्य च संवादमृषेर्नारायणस्य च' इ० पा०। 'प्रह्लादस्य यथा कर्मपुराणे चान्यथाश्रुतम्' इ० पा०। ३ 'सवसुधां' इ० पा०। ४ 'भावम्' इ० पा०। ५ 'युयुधे' इ० पा०। ६ 'निष्कार्षिष्ये द्विजोत्तमान्' इ० पा०। ७ 'सर्वसिद्धो०' इ० पा०। ८ 'अस्या' इ० पा०।

CC-0. In Public Domain. Digitization by eGangotri

वै ॥ विच्छिद्याङ्गानिसर्वाणियत्रतत्रक्षिपस्वह ॥ २६ ॥ तत्कृतंतेनपुत्रेणयथादेशःश्रुतःपितुः ॥ समायातःपुनःपश्चात्पितरंवाक्यमब्रवीत् ॥२७॥
यथादिष्टंत्वयातातततत्सर्वंकृतवानहम् ॥ समादिशममान्यच्चकार्यकारणमद्यच ॥ तच्चसर्वंकरिष्यामिदुर्जयंदुर्लभंपितः ॥ २८ ॥ तमाज्ञायमहाभा
गंपितृभक्तंसचद्विजः ॥ निश्चयंपरमंज्ञात्वाद्वितीयस्यविचिन्तयन् ॥ २९ ॥ वेदशर्माणमाहूयगच्छत्वंममशासनात् ॥ स्त्रियाविनानशक्नोमि
स्थातुंकन्दर्पमोहितः ॥ ३० ॥ माययादर्शितानारीसर्वसौभाग्यसम्पदा ॥ एनामानयवत्सत्वंममार्थेकृतनिश्चयः ॥ ३१ ॥ एवमुक्तस्तथाप्र
हकरिष्येतवसुप्रियम् ॥ पितरंतंनमस्कृत्यतामुवाचगतस्ततः ॥ ३२ ॥ त्वांदेवियाचतेतातःकामबाणप्रपीडितः ॥ अतस्त्वंजरयायुक्तेप्रसादसुमुखीभ
व ॥ ३३ ॥ भजत्वंचारुसर्वाङ्गीपितरंममसुन्दरि ॥ एवमाकर्णितंतस्यमाययावेदशर्मणः ॥ ३४ ॥ स्त्र्युवाच ॥ जरयापीडितस्यापिनैवेच्छामि
कदाचन॥सश्लेष्ममुखरोगस्यव्याधिग्रस्तस्यसाम्प्रतम् ॥ ३५ ॥ शिथिलस्यापिचार्तस्यतस्यवृद्धस्यसङ्गमम् ॥ भवन्तंरन्तुमिच्छामिकरिष्येतवसुप्रि
यम् ॥ ३६ ॥ भवन्तंरूपसौभाग्यैर्गुणरत्नैरलङ्कृतम् ॥ दिव्यलक्षणसम्पन्नंदिव्यरूपंमहौजसम् ॥ ३७ ॥ किंकरिष्यसितातेनवृद्धेनशृणुमान
द ॥ ममाङ्गभोगभावेनसर्वंप्राप्स्यसिदुर्लभम् ॥ ३८ ॥ यद्यत्त्वमिच्छसेविप्रतद्ददामिनसंशयः ॥ एतद्वाक्यंमहच्छ्त्वाअप्रियंपापसङ्कुलम् ॥
॥ ३९ ॥ वेदशर्मोवाच ॥ अधर्मयुक्तंतेवाक्यमयुक्तंपापमिश्रितम् ॥ नेदृशंमांवदेर्देविपितृभक्तमनागसम् ॥ ४० ॥ पितुरर्थंसमायातस्त्वा
महंप्रार्थयेशुभे ॥ अन्यदेवंनवक्तव्यंभजत्वंपितरंमम ॥ ४१ ॥ यद्यत्त्वमिच्छसेदेवित्रैलोक्येसचराचरम् ॥ तत्तद्द्मिनसन्देहोदेवराज्याधिकंशुभे ॥
॥ ४२ ॥ स्त्र्युवाच ॥ एवंसमर्थोदातुंमेपितुरर्थेयदाभवान् ॥ तदामेदर्शयाद्यैवसेन्द्रांस्त्वंसमहेश्वरान् ॥ ४३ ॥ दातुमेवंसमर्थोऽसिदुर्लभंसाम्प्र
तंकिल ॥ किंतेबलंमहाभागदर्शयस्वत्वमात्मनः ॥ ४४ ॥ वेदशर्मोवाच ॥ पश्यपश्यबलंदेविप्रभावंतपसोमम ॥ मयाहूताःसमायाताइन्द्रा
द्याःसुरसत्तमाः ॥ ४५ ॥ वेदशर्माणमूचुस्तेकिंकुर्मोहिद्विजोत्तम ॥ यमेवमिच्छसेविप्रतंददामोनसंशयः ॥ ४६ ॥ वेदशर्मोवाच ॥ य
दिदेवाःप्रसन्नामेप्रसादसुमुखायदि ॥ ददतुविमलांभक्तिंपादयोःपितुरेवमे ॥ ४७ ॥ एवमस्तुसुराःसर्वेयथायातास्तथागताः ॥ त ॥ १ ॥
मुवाचतंतथादृष्ट्वादृष्टंतेतपसोबलम् ॥ ४८ ॥ देवैस्तुनास्तिमेकार्यंयदिदातुमिहेच्छसि ॥ यन्मांनयसिशुर्वर्थंतत्कुरुष्वममप्रियम् ॥ देहि
त्वंस्वंशिरोविप्रस्वहस्तेननिकृत्यवै ॥ ४९ ॥ वेदशर्मोवाच ॥ धन्योऽहमद्यसञ्जातोमुक्तश्चैवऋणत्रयात् ॥ स्वशिरोदेविदास्यामिगृ

१ ‘ ततो दृष्ट्वा ’ इ० पा० । सा स्त्रीति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ह्यतांगृह्यतांशुभे ॥ ५० ॥ शितेनतीक्ष्णधारेणशस्त्रेणद्विजसत्तमः ॥ निकृत्यस्वंशिरश्चाथददौतस्यैप्रहस्यच ॥ रुधिरेणप्लुतंसाच
परिगृह्यगतामुनिम् ॥ ५१ ॥ स्युवाच ॥ तवार्थेप्रेषितंविप्रपुत्रेणवेदशर्मणा ॥ एतच्छिरःसङ्गृहाणनिकृत्तंचात्मनात्मनः ॥ ५२ ॥ उत्तमाङ्गंप्रद
त्तंमेपितृभक्तेनतेनते ॥ तवार्थेद्विजशार्दूलमामेवंपरिभुङ्क्ष्ववै ॥ ५३ ॥ तस्यतैर्भ्रातृभिर्दृष्टंसाहसंवेदशर्मणः ॥ वेपिताङ्गत्वमापन्नास्तेबभू
वुःपरस्परम् ॥५४॥ मृतानोधर्मसाध्वीसामातासत्यसमाधिना ॥अयमेवमहाभागःपितुरर्थेमृतःशुभः ॥ ५५ ॥ धन्योऽयंधन्यतांप्राप्तःपितुरर्थेकृतंशु
भम् ॥ एवंसम्भाषितंतैस्तुभ्रातृभिःपुण्यचारिभिः ॥ ५६ ॥ समाकर्ण्यद्विजोवाक्यंज्ञात्वाभक्तिपरायणम् ॥ निकृत्तंचशिरस्तेनपुत्रेणवेदशर्म
णा ॥ ५७ ॥ धर्मशर्माणमाहाथशिरएतत्प्रगृह्यताम् ॥ ५८ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेशिवशर्मचरितेप्रथमोऽध्यायः ॥ १ ॥ सूतउवाच ॥
तदादायमहात्मासौनिर्जगामत्वरान्वितः ॥ पितृभक्त्यातपोभिश्चसत्यार्जवबलेनसः ॥ १ ॥ धर्ममाकृष्टवांश्चैवधर्मशर्माततस्तदा ॥ समाकृष्टस्तुवै
धर्मस्तपसातस्यधीमतः ॥ २ ॥ धर्मशर्माणमागत्यइदंवचनमब्रवीत् ॥ कस्मात्त्वयासमाहूतोधर्मशर्मन्समागतः ॥ तन्मेकथयकार्यंत्वंतत्करोमि
नसंशयः ॥ ३ ॥ धर्मशर्मोवाच ॥ यद्यस्तिगुरुशुश्रूषायदिनिष्ठाऽचलंतपः ॥ तेनसत्येनमेधर्मवेदशर्मासजीवतु ॥ ४ ॥ धर्मउवाच ॥ दमशौ
चेनसत्येनतपसातवसुव्रत ॥ पितृभक्त्यातवभ्रातावेदशर्मामहाभुजः ॥ ५ ॥ पुनरेवमहात्मासौजीवनंचलभिष्यति ॥ ६ ॥ तपसानेनतुष्टोऽस्मि
पितृभक्त्यामहामते ॥ वरंवरयभद्रंतेदुर्लभंधर्मवित्तमैः ॥ ७ ॥ एवमाकर्णितंतेनसुवाक्यंधर्मशर्मणा ॥ वैवस्वतंमहात्मानंतमुवाचमहायशाः ॥ ८ ॥
देहिमेत्वचलांभक्तिंपितुःपादार्हणेपुनः ॥ धर्मेरतिंतथामोक्षंसुप्रसन्नोयदामम ॥ ९ ॥ तमुवाचततोधर्मोमत्प्रसादाद्भविष्यति ॥ एवमुक्तेमहावाक्येवेद
शर्मातदोत्थितः ॥१०॥ प्रसुप्तवन्महाप्राज्ञोधर्मशर्माणमब्रवीत् ॥ क्वसादेवीगताभ्रातःक्वसतातोभवेदिति ॥११॥ समासेनसमाख्यातंयथापित्रानियोजि
तः ॥ समाज्ञायततोहृष्टोधर्मशर्माणमब्रवीत् ॥ १२ ॥ ममाद्यैवमहाभागशिरसाजीवितनच ॥ संमुखीभववैभ्रातःकोऽन्योमेत्वादृशोभुवि ॥ १३ ॥
भ्रातरंचैवमाभाष्यउत्सुकःपितरंप्रति ॥ गमनायमतिंचक्रेभ्रात्राचधर्मशर्मणा ॥ १४ ॥ द्वावेतौतुगतौतत्रपितरंहृष्टमानसौ ॥ द्वाभ्यांतत्रसमास्थाय
शिवशर्माणमुत्तमम् ॥ १५ ॥ धर्मशर्मातदोवाचपितरंदीप्तिसंयुतम् ॥ ममाद्यवमहाभागतपसाजीवितेनच ॥ १६ ॥ वेदशर्मासमानीतस्तंपुत्रंप्रगृहाण
भोः ॥ शिवशर्माततोहृष्टोभक्तिंविज्ञायतस्यच ॥ १७ ॥ नकिञ्चिदब्रवीत्तंतुपुनश्चिन्तामुपेयिवान् ॥ पुरतोविनयेनापिवर्तमानंमहामतिम् ॥ १८ ॥

१ 'तेजसा तव विप्रेन्द्र गृहादेनं यमस्य च ॥ वेदशर्माणमानीतं स्वं पुत्रं प्रगृहाणभोः' ॥ इ० पा० ।

विष्णुशर्माणमाभाषीद्वत्समेवचनंकुरु ॥ इन्द्रलोकंव्रजस्वाद्यतस्मादानयचामृतम् ॥१९॥ अनयाकान्तयासार्द्धं[1]स्थातुमिच्छामिसाम्प्रतम् ॥ सागरा
द्यत्समुत्पन्नममृतंव्याधिनाशनम् ॥ २० ॥ साधुनेच्छतिमामेषायथनांतुलभाम्यहम् ॥ तथाकुरुष्वशीघ्रंत्वमन्यथान्यंप्रयास्यति ॥ २१॥ वृद्धंज्ञात्वा
वमन्येतइयंबालासुरूपिणी ॥ अद्यदेव्याऽनयासार्द्धंप्रिययाभुवनत्रये ॥ २२ ॥ निर्दो[2]षोव्याधिनिर्मुक्तोयथातातभवाम्यहम् ॥ तथाकुरुष्वमेवत्सम
द्भक्तोऽसियदाभुवि ॥ २३ ॥ एवमाकर्ण्यतद्वाक्यंपितुस्तस्यमहात्मनः ॥ विष्णुशर्मातदोवाचपितरंदीप्ततेजसम् ॥ २४ ॥ सर्वमेतत्करिष्यामिभव
तःसुखमुत्तमम् ॥ एवमाभाष्यधर्मात्माविष्णुशर्मामहामतिः ॥ २५ ॥ पितरंतंनमस्कृत्यपुनःकृत्वाप्रदक्षिणम् ॥ बलेनमहतासोऽपितपसानियमेन
च ॥ २६ ॥ अन्तरिक्षगतश्चा[3]सीद्गच्छमानस्यधीमतः ॥ समहावयुवेगेनऐन्द्रंसम्प्रतिगच्छति ॥ २७ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेशिवशर्मचरि
तेद्वितीयोऽध्यायः ॥ २ ॥ सूतउवाच ॥ प्रस्थितस्तेनमार्गेणप्रविष्टोगगनान्तरे ॥ सदृष्टोदेवदेवेनसहस्राक्षेणधीमता ॥ १ ॥ उद्यमंतस्यवैज्ञात्वाच
क्रेविघ्नंसुराधिराट् ॥ मेनकांतामुवाचेदंगच्छत्वंममशासनात् ॥ २ ॥ समाचरस्वास्यशीघ्रंगत्वाविघ्नंसुमध्यमे ॥ अस्यैवविप्रवर्यस्यपुत्रस्यशिव
शर्मणः ॥ ३ ॥ तथाकुरुष्वभद्रंतेयथानायातिमेगृहम् ॥ एवमाकर्ण्यतद्वाक्यंमेनकाप्रस्थितात्वरात् ॥ ४ ॥ (॥ सूतं[4]उवाच ॥) रूपौदार्यगुणोपेता
सर्वालङ्कारभूषिता ॥ नन्दनस्यवनस्यान्तेदोलायांसमुपस्थिता ॥५॥ सुस्वरेणप्रगायन्तीगीतंवीणा[5]स्वरोपमम् ॥ तेनदृष्टाविशालाक्षीचतुराचारुलोच
ना ॥ ६ ॥ व्यवसायंततोज्ञात्वातस्याविघ्नमनुत्तमम् ॥ इन्द्रेणप्रेषिताचैषानचभद्रकराभवेत्॥ ७॥एवंज्ञात्वाजगामाथसत्वरेणद्विजोत्तमः॥तयादृष्टस्त
थापृष्टःक्वयास्यसिमहामते ॥ ८ ॥ विष्णुशर्मातदोवाचमेनकांकामचारिणीम् ॥ इन्द्रलोकंप्रयास्यामिपितुरर्थेत्वरान्वितः ॥ ९ ॥ मेनकाविष्णुश
र्माणंप्रत्युवाचप्रियंपुनः ॥ कामबाणैःप्रभिन्नाहंत्वामद्यशरणंगता ॥ १० ॥ रक्षस्वद्विजशार्दूलयदिधर्ममिहेच्छसि ॥ यावद्धित्वंमयादृष्टःकामाकुलि
तचेतसा ॥ ११ ॥ कामानलेनसन्दग्धातावदेवनसंशयः ॥ सम्भ्रान्ताकामसंतप्ताप्रसादसुमुखोभव॥ १२ ॥ विष्णुशर्मोवाच ॥ चरित्रंदेवदेवस्यविदि
तंमेवरानने ॥ भवत्याश्चप्रजानामिनाहंचैतादृशःशुभे ॥ १३ ॥ भवत्यास्तेजसारूपैरन्येमुह्यन्तिशोभने ॥ विश्वामित्रादयोदेविपुत्रोऽहंशिव
शर्मणः ॥ १४ ॥ योगसिद्धिंगतस्यापितपःसिद्धस्यचाबले ॥ कामादयोमहादोषाआदावेवविनिर्जिताः ॥ १५ ॥ अन्यंभजविशालाक्षिइन्द्रलोकंव्र

---

१ 'पातुम्' इ० पा० । २ 'नाशं याति जरा मेऽद्य यथा नीरुग्भवाम्यहम् ।' इ० पा० । ३ 'वायुवेगः' इति शेषः । वायुवेगः तस्य गच्छमानस्य धीमतः अन्तरिक्षगत आसीत । येन महता वायुवेगेनेत्युत्तरत्रसङ्गतिः । ४ इदमधिकं पुस्तकान्तरस्थम् । ५ 'वाणीश्वरोपम्' इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

जाम्यहम् ॥ एवमुक्त्वाजगामाथत्वरितोद्विजसत्तमः ॥ १६ ॥ निष्फलामेनकाजातापृष्ठादेवेनवज्रिणा ॥ विभीषांदर्शयामासनानारूपांपुनःपुनः
॥ १७ ॥ यथाऽनलेनसन्दग्धास्तृणानांसञ्चयाद्विजाः ॥ भस्मीभूताभवन्त्येवतथातास्ताविभीषिकाः ॥ १८ ॥ विप्रस्यतेजसातस्यपितृभक्तस्यसत्त
माः ॥ प्रलयंगतास्तुघोरास्तादारुणाभीषिकाद्विजाः॥१९॥सविघ्नान्दर्शयामाससहस्राक्षःपुनःपुनः॥तेजसाऽनाशयद्विप्रःस्वकीयेनमहायशाः ॥२०॥
एवंविघ्नान्बहूंस्तस्यइन्द्रस्यापिमहात्मनः ॥ नाशयामासमेधावीतपसस्तेजसापिवा ॥ २१ ॥ नष्टेषुतेषुविघ्नेषुदारुणेषुमहत्सुच ॥ ज्ञात्वातस्य
कृतान्विघ्नान्दारुणान्भीषणाकृतीन् ॥ २२ ॥ अथक्रुद्धोमहातेजाविष्णुशर्माद्विजोत्तमः ॥ इन्द्रंप्रतिमहाभागोरागरक्तान्तलोचनः ॥ २३ ॥ इन्द्र
लोकादहंचेन्द्रंपातयिष्यामिनान्यथा ॥ निजधर्मेरतस्याद्ययोविघ्नंतुसमाचरेत् ॥ २४ ॥ तस्यदण्डंप्रदास्यामियोवैहन्यात्सहन्यते ॥ एवमन्यंकरि
ष्यामिदेवानांपालकंपुनः ॥ २५ ॥ एवंसमुद्यतोविप्रइन्द्रनाशायसत्तमः ॥ तावदेवसमायातोदेवेन्द्रःपाकशासनः ॥ २६ ॥ भोभोविप्रमहाप्राज्ञतप
सानियमेनच ॥ दमेनसत्यशौचाभ्यांत्वत्समोनास्तिचापरः ॥ २७ ॥ अनयापितृभक्त्यातेजितोऽहंदैवतैःसह ॥ ममापराधंत्वंसर्वंक्षन्तुमर्हसिस
त्तम ॥ २८ ॥ वरंवरयभद्रंतेदुर्लभंचददाम्यहम् ॥ विष्णुशर्मातदोवाचदेवराजंतथागतम् ॥ २९ ॥ विप्रतेजोमहेन्द्रेन्द्रअसह्यंदेवदैवतैः ॥ पितृभक्तस्य
देवेशदुःसहंसर्वथाविभो ॥ ३० ॥ तेजोभङ्गोनकर्त्तव्योब्राह्मणानांमहात्मनाम् ॥ पुत्रपौत्रैःसमस्तैस्तुब्रह्मविष्णुहरान्पुनः ॥ ३१ ॥ नाशयन्तेन
सन्देहोयदिरुष्टाद्विजोत्तमाः ॥ नागच्छेद्यद्भवानद्यतदाराज्यमनुत्तमम् ॥३२॥आत्मतपःप्रभावेणअन्यस्मैतुमहात्मने॥ दातुकामस्तुसञ्जातोरोषपूर्णेन
चक्षुषा ॥ ३३ ॥ भवानद्यसमायातोवरंदातुमिहेच्छसि ॥ अमृतंदेहिदेवेन्द्रपितृभक्तिंतथाचलाम् ॥ ३४ ॥ एवंविधंवरंदेहियदितुष्टोऽसिशत्रुहन् ॥
एवंददामिपुण्यंतेवरंचामृतसंयुतम् ॥ ३५ ॥ एवमाभाष्यतंविप्रममृतंदत्तवान्स्वयम् ॥ सकुम्भंदत्तवांस्तस्मैप्रीयमाणेनचात्मना ॥ ३६ ॥ अचलाते
भवेद्विप्रभक्तिःपितरिसर्वदा ॥ एवमाभाष्यतंविप्रंविसृज्यचसहस्रदृक् ॥ ३७ ॥ प्रसन्नोऽभूच्चतद्दृष्ट्वाविप्रतेजःसुदुःसहम् ॥ विष्णुशर्माततोगत्वा
पितरंवाक्यमब्रवीत् ॥ ३८ ॥ तातइन्द्रात्समानीतममृतंव्याधिनाशनम् ॥ अनेनापिमहाभागनीरुजोभवसर्वदा ॥ ३९ ॥ अमृतेनत्वमद्यैवपरांतृप्तिम
वाप्नुहि ॥ एतद्वाक्यंमहच्छ्रुत्वाशिवशर्मासुतस्यहि ॥४० ॥ सुतान्सर्वान्समाहूयप्रीयमाणेनचेतसा ॥ पितृभक्ताःसुतायूयंमद्वाक्यपरिपालकाः॥४१॥
वरंवृणुध्वंसुप्रीताःपुत्रकादुर्लभंभुवि ॥ एवमाभाषितंतस्यशुश्रुवुःसर्वसम्मताः ॥ ४२ ॥ तेसर्वेतुसमालोच्यपितरंप्रत्यथाब्रुवन् ॥ अस्माकंजीवतान्मा

१ 'नन्दनं वनमाश्रितः'। इ० पा० । उवाचेति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तागतायायममन्दिरम् ॥ ४३ ॥ नीरुजाभवतादेवीप्रसादात्तवसुव्रता ॥ भवान्पिताइयंमाताजन्मजन्मान्तरेपितः ॥ वयंसुताभवेमेतिसर्वेपुण्यकृत
स्तथा ॥ ४४ ॥ शिवशर्मोवाच ॥ अद्यैवापिमृतामाताभवतांपुत्रवत्सला ॥ जीवमानासुहृष्टासाएष्यतेनात्रसंशयः ॥ ४५ ॥ एवमुक्तेशुभेवाक्ये
ऋषिणाशिवशर्मणा ॥ तेषांमातासमायाताप्रहृष्टावाक्यमब्रवीत् ॥ ४६॥ एतदर्थंसमुत्पन्नंसुवीर्यंतनयंसुतम्॥नराःसत्पुत्रमिच्छन्तिकुलवंशप्रभावकम्
॥ ४७ ॥ स्त्रियोलोकेमहाभागाःसपुण्याःपुण्यवत्सलाः॥ सुतमिच्छन्तिसर्वत्रपुण्याङ्गंपुण्यसाधकम् ॥ ४८ ॥ कुक्षिंयस्यागतोगर्भःसुपुण्यःपरिवर्त्त
ते ॥ पुण्यान्पुत्रान्प्रसूयेतसानारीपुण्यभागिनी ॥ ४९ ॥ कुलाचारंकुलाधारंपितृमातृप्रतारकम् ॥ विनापुण्यैःकथंनारीसम्प्राप्नोतिसुतोत्तमम्॥५०॥
नजानेकीदृशैःपुण्यैरेषभर्तासुपुण्यभाक् ॥ सञ्जातोधर्मवीर्योऽपिधर्मात्माधर्मवत्सलः ॥ ५१ ॥ यस्यवीर्यान्मयाप्राप्तायूयंपुत्रास्ततोऽधिकाः ॥ एवं
पुण्यप्रभावोऽयंभवन्तःपुण्यवत्सलाः ॥ ५२ ॥ ममपुत्रास्तुसञ्जाताःपितृभक्तिपरायणाः ॥ अहोलोकेषुपुण्यैश्चसुपुत्रःपरिलभ्यते ॥ ५३ ॥ एकैक
शोऽधिकाःपञ्चमयाप्राप्तामहाशयाः॥ यज्वानःपुण्यशीलाश्चतपस्तेजःपराक्रमाः॥५४॥ एवंसंवर्धितास्तेतुतयामात्रापुनःपुनः ॥ हर्षेणमहताविष्टाःप्रणे
मुर्मातरंसुताः ॥ ५५ ॥ पुत्राऊचुः॥ सुपुण्यैःप्राप्यतेमातासन्मातासुपिताकिल ॥ भवतीपुण्यकृन्मातानोभाग्यैस्तुप्रवर्तिता ॥ ५६ ॥ यस्यागर्भोदरं
प्राप्यसुपुण्यैश्चप्रवर्द्धिताः ॥ जन्मजन्मनित्वंमातापिताचैवभविष्यथः ॥ ५७॥ पितोवाच ॥ शृणुध्वंमामकाःपुत्राःसुवरंपुण्यदायकम् ॥ मयि
तुष्टेसुताभोगाननुभुञ्जन्तुचाक्षयान् ॥ ५८ ॥ पुत्राऊचुः ॥ यदितातप्रसन्नोऽसिवरंदातुमिहेच्छसि ॥ अस्मान्प्रेषयगोलोकंवैष्णवंदाहवर्जितम्॥५९॥
पितोवाच ॥ गच्छध्वंवैष्णवंलोकंयूयंविगतकल्मषाः ॥ मत्प्रसादात्तपोभिश्चपितृभक्त्यानयास्वया॥ ६० ॥ एवमुक्तेतुतेनापिसुवाक्येऋषिणाततः॥
शङ्खचक्रगदापाणिर्गरुडारूढआगतः॥६१॥सपुत्रंशिवशर्माणमित्युवाचपुनःपुनः ॥ सपुत्रेणत्वयाद्यैवजितोभक्त्यास्मिवैद्विज ॥ ६२ ॥ पुत्रैःसार्द्धं
समागच्छचतुर्भिःपुण्यकारिभिः ॥ अनयाभार्ययासार्द्धंपुण्ययापतिकाम्यया ॥ ६३ ॥ शिवशर्मोवाच ॥ अमीगच्छन्तुपुत्रामेवैष्णवंलोकमुत्त
मम् ॥ कञ्चित्कालंतुनेष्यामिभूमौवैभार्ययासह ॥ ६४ ॥ अनेनापिसुपुत्रेणअन्त्येनसोमशर्मणा ॥ एवमुक्तेशुभेवाक्येऋषिणासत्यभाषिणा ॥६५॥
तानुवाचाथदेवेशःसुपुत्राञ्छिवशर्मणः ॥ गच्छन्तुमोक्षदंलोकंदाहप्रलयवर्जितम् ॥ ६६ ॥ एवमुक्तेततोविप्राश्चत्वारःसत्यचेतसः ॥ विष्णुरूप
धराःसर्वेबभूवुस्तत्क्षणादपि ॥ ६७ ॥ इन्द्रनीलसमावर्णैःशङ्खचक्रगदाधराः ॥ सर्वाभरणसौभाग्याविष्णुरूपामहौजसः ॥ ६८ ॥ हारकङ्कणशोभा

१ 'तपोऽधिकाः' ४० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ढ्यारत्नमालाभिशोभिताः ॥ सूर्यतेजःप्रतीकाशास्तेजोज्वालाभिरावृताः ॥ ६९ ॥ प्रविष्टावैष्णवंकायंपश्यतःशिवशर्मणः ॥ दीपंदीपायथा यान्तितद्वल्लीनामहामते ॥ ७० ॥ गतास्तेवैष्णवंधामपितृभक्त्याद्विजोत्तमाः ॥ प्रभावंतुप्रवक्ष्यामिसुसत्यंसोमशर्मणः ॥ ७१ ॥ इति श्रीपाद्मपुराणेभूमिखण्डेशिवशर्मोपाख्यानेतृतीयोऽध्यायः ॥ ३ ॥ सूतउवाच ॥ गतेषुतेषुगोलोकंवैष्णवंतमसःपरम् ॥ शिवशर्मामहाप्राज्ञःकनिष्ठंवाक्यमब्रवीत् ॥ १ ॥ ब्राह्मणउवाच ॥ सोमशर्मन्महाप्राज्ञत्वंपितुर्भक्तितत्परः ॥ अमृतस्यमहाकुम्भंरक्षदत्तंमयाधुना ॥ २ ॥ तीर्थयात्रांप्रयास्यामिअनयाभार्ययासह ॥ एवमस्तुमहाभागकरिष्येरक्षणंशुभम् ॥ ३ ॥ कुम्भंदत्त्वासमेधावीतस्यहस्तेमहात्मनः ॥ दशवर्षप्रमाणंतुतपस्तेपेनिरन्तरम् ॥ ४ ॥ कुम्भंरक्षतिधर्मात्मादिवारात्रमतन्द्रितः ॥ पुनःसहिसमायातःशिवशर्मामहायशाः ॥ ५ ॥ मायांकृत्वामहाप्राज्ञोभार्ययासहतंसुतम् ॥ कुष्ठरोगातुरोभूत्वातस्यभार्याचतादृशी ॥६॥ मांसपिण्डोपमौजातौद्रावेतौमाययाकृतौ ॥ सन्निधिंतस्यघोरस्यविप्रस्यसोमशर्मणः ॥७॥ समागतौहितौदृष्ट्वासर्वतोहिसुदुःखितौ ॥ कृपयापरयाविष्टःसोमशर्मामहायशाः ॥ ८ ॥ तयोःपादौनमस्कृत्यभक्त्यानमितकन्धरः ॥ भवादृशौनपश्यामितपसाभिसमन्वितम् ॥ ९ ॥ गुणव्रातैःसुपुण्यैश्चकिमिदंवर्तितंत्वयि ॥ दासवद्देवताःसर्वावर्तन्तेसर्वदातव ॥ १० ॥ आदेशंप्राप्यविप्रेन्द्रआकृष्टास्तेजसातव ॥ तवाङ्गेकेनपापेनगदोऽयंवेदनान्वितः ॥ ११ ॥ सञ्जातोब्राह्मणश्रेष्ठतन्मेकथयकारणम् ॥ इयंपुण्यवतीमातामहापुण्यापतिव्रता ॥ ॥ १२ ॥ याहिभर्तृप्रसादेनत्रैलोक्यंकर्तुमिच्छति ॥ साकथंदुःखमाप्नोतिकिंनास्तितपसःफलम् ॥ १३ ॥ रागद्वेषौपरित्यज्यविविधेनापिकर्मणा ॥ याचशुश्रूषतेकान्तंदेववद्गुरुवत्सला ॥ १४ ॥ साकथंदुःखमाप्नोतिकुष्ठरोगंसुदुःखदम् ॥ १५ ॥ शिवशर्मोवाच ॥ माशुचस्त्वंमहाभागभुज्यतेकर्मजंफलम् ॥ नरेणकर्मयुक्तेनपापपुण्यमयेनहि ॥ १६ ॥ शोधनंचकुरुष्वत्वमुभयोरोगयुक्तयोः ॥ शुश्रूषणंमहाभागयदिपुण्यमिहेच्छसि ॥ १७ ॥ एवमुक्तेशुभेवाक्येसोमशर्मामहायशाः ॥ शुश्रूषांवाकरिष्यामियुवयोःपुण्ययुक्तयोः ॥ १८ ॥ मयापापेनदुष्टेनकृपणेनद्विजोत्तम ॥ किंकर्तव्यमिहाद्यैवयोगुरुंनहिपूजयेत् ॥ १९ ॥ एवमाभाष्यदुःखाद्वातयोर्दुःखेनदुःखितः ॥ श्लेष्ममूत्रपुरीषंचउभयोःपर्यशोधयत् ॥ २० ॥ पादप्राक्षालनंचक्रेअङ्गसंवाहनंतथा ॥ स्नानस्थानादिकंसोऽपितयोर्भक्त्यान्वितःस्वयम् ॥ २१ ॥ द्वावेतौहिगुरूविप्रःसोमशर्मामहायशाः ॥ तीर्थंनयतिधर्मात्मास्कन्धमारोप्यसत्तमः ॥ २२ ॥ द्वावेतौहिस्वहस्तेनस्नापयित्वातुमङ्गलैः ॥ सुमन्त्रैर्वेदविच्चैवस्नानस्यविधिपूर्वकम् ॥ २३ ॥ तर्पणंचपितॄणांतुदेवतानांतु

१'लोकम्' इ० पा० । २ उवाचेति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूजनम् ॥ द्वाभ्यामपिचधर्मात्मासकारयतिनित्यशः ॥ २४ ॥ स्वयंहोमंददात्यग्नौपचत्यन्नमनुत्तमम् ॥ संज्ञापयतिसुप्रीतौद्वावेतौचमहागुरू ॥ ॥ २५ ॥ शय्यासनेचतौविप्रःप्रस्वापयतिनित्यशः ॥ वस्त्रपुष्पादिकंसर्वंताभ्यांनित्यंप्रयच्छति ॥ २६ ॥ ताम्बूलंबहुगन्धाढ्यमुभयोरर्पयेत्सतु ॥ मशर्मा महाभागस्ताभ्याम पिचपूरयेत् ॥ २७ ॥ मूलंपयःसुभक्ष्याद्यंनित्यमेवददात्यसौ ॥ तयोस्तुवाञ्छितंनित्यंसोमशर्मामहायशाः ॥ २८ ॥ अनेनक्रमयोगेणनित्यमेवप्रसादयेत् ॥ सोमशर्मासुधर्मात्मापितरौपरिपूजयेत् ॥ २९ ॥ सोमशर्माणमाहूयपिताकुत्सतिनिष्ठुरः ॥ निन्दितैर्निष्ठुरैर्वाक्यैस्ताडयेन्मुष्टिभिस्तदा ॥ ३० ॥ कृतकार्येकृतेपुण्येनित्यमेवसुतेपुनः ॥ नकृतंशोभनंमह्यंत्वयैवकुलपांसन ॥ ३१ ॥ एवंनानाविधैर्वाक्यैर्निष्ठुरैर्दुःखदायकैः ॥ अताडयद्दण्डघातैःशिवशर्मासदातुरः ॥ ३२ ॥ एवंकृतेऽपिधर्मात्मानैवकुप्यतिकर्हिचित् ॥ मनसावचसाचैवकर्मणात्रिविधेनच ॥ ३३ ॥ सन्तुष्टःसर्वदासोऽपिपितरंपरिपूजयेत् ॥ तद्वत्ससोमशर्मावैमातरंचदिनेदिने ॥३४॥ यज्ज्ञात्वाशिवशर्माचचरितंस्वीयमीक्षते ॥ अमृतंमत्कृतेचापिआनीतंविष्णुशर्मणा ॥ ३५ ॥ पुण्ययुक्तःसधर्मात्मापितृभक्तिपरःसदा ॥ एवंबहुतिथेकालेशतसङ्ख्येगतेसति ॥ ३६ ॥ शिवशर्मापितस्यैवभक्तिंदृष्ट्वाविचिन्त्यवै ॥ मयावैपूर्वमित्युक्तंसुपुत्रंयज्ञसंज्ञकम् ॥ ३७ ॥ मातृखण्डानिमान्पुत्रयत्रतत्रक्षिपस्वहि ॥ मद्वाक्यंपालितंतेनकृतामातरिनोकृपा ॥ ३८ ॥ एतत्स्वल्पतरंदुःखंनिर्जीवेघातमिच्छतः॥साहसंतुकृतंतेनपुत्रेणवेदशर्मणा ॥ ३९ ॥ अस्याधिकमहंमन्येयतोऽयंचलतेनच ॥ निमेषमात्रमेवापिसाहसंकारयेत्पुनः ॥ ४० ॥ अपरंसत्यसम्पन्नंप्रभावंतपसःपुनः ॥ नित्यंसमाराधनेऽपिअधिकंचास्यदृश्यते ॥ ४१ ॥ तस्मादस्यपरीक्षाचसमयेतपसःकृता ॥ भक्तिभावात्तथासत्यान्नैवपुत्रःप्रणश्यति ॥ ४२ ॥ माययाचनिजाङ्गेऽपिकुष्ठरोगोनिदर्शितः ॥ श्लेष्ममूत्रमलानांचघृणांनैवकरोतिच ॥ ४३ ॥ व्रणान्विशोधयेन्नित्यंस्वहस्तेनमहायशाः ॥ पादसंवाहनंदद्याच्छौचंचैवमहामतिः ॥ ४४ ॥ दुःसहंवचनंमह्यंदारुणंसहतेसदा ॥ भर्त्सनेताडनेचैवसदाभीष्टप्रवाचकः ॥ ४५ ॥ एवंदुःखसमाचारोममपुत्रोमहामतिः ॥ दुःखानांसागरंमन्येबहुक्लेशैस्तुक्लेशितः ॥ ४६ ॥ अपनेष्याम्यहंदुःखंविष्णोश्चैवप्रसादतः ॥ विचार्यमनसाविप्रःशिवशर्मामहामतिः ॥४७॥ पुनर्मायांचकाराथकुम्भादपहृतंपयः ॥ पश्चात्तंचसमाहूयसोमशर्माणमब्रवीत् ॥ ४८ ॥ तवहस्तेमयादत्तममृतंव्याधिनाशनम् ॥ तन्मेशीघ्रंप्रयच्छस्वयथापानंकरोम्यहम् ॥ ४९ ॥ येननीरुग्भवाम्यद्यप्रसादाद्विष्णुशर्मणः ॥ एवमुक्तेतदावाक्येऋषिणाशिवशर्मणा॥५०॥समुत्थायत्वरायुक्तःसोमशर्माकमण्डलुम्॥तंचरिक्तंततोदृष्ट्वाह्यमृतेनविनाकृतम् ॥ ५१ ॥

१ 'त्रिष्टां' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कस्यपापस्यवैकर्मकेनमेविप्रियंकृतम् ॥ इतिचिन्तापरोभूत्वासोमशर्मासुदुःखितः ॥ ५२ ॥ पितुरग्रचवृत्तान्तंकथयिष्याम्यहंयदा ॥ ततःको
पंप्रयास्येतगुरुर्मेव्याधिपीडितः ॥५३॥ सुचिरंचिन्तयित्वातुसोमशर्मामहामतिः ॥ यदिमेसत्यमस्तीतिगुरुशुश्रूषणंयदि ॥५४॥ तपस्तप्तंमयापूर्वंनि
र्व्यलीकेनचेतसा॥दमशौचादिभिःसत्यंधर्ममेवप्रपालितम् ॥५५॥ तदाघटोऽमृतयुतोभवत्वेषनसंशयः ॥ यावदेवमहाभागश्चिन्तयित्वाविलोकयेत् ॥
॥ ५६ ॥ तावच्चामृतपूर्णस्तुपुनरेवाभवद्घटः ॥ तंदृष्ट्वाहर्षसंयुक्तःसोमशर्मामहायशाः ॥ ५७ ॥ गत्वागुरुंनमस्कृत्यकुम्भमादायसत्वरम् ॥ गृहा
णत्वंपितश्चेमंपयःकुम्भंसमागतम् ॥ ५८ ॥ पानंकुरुमहाभागगदान्मुक्तोभवाचिरम् ॥ एतद्वाक्यंमहापुण्यंसत्यधर्मार्थकंपुनः ॥ ५९ ॥ शिवशर्मा
सुतस्यापिश्रुत्वाचमधुराक्षरम् ॥ हर्षेणमहताविष्टइदंवचनमब्रवीत् ॥ ६० ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेशिवशर्मोपाख्यानेचतुर्थोऽध्यायः ॥ ४ ॥
शिवशर्मोवाच ॥ तपसादमशौचाभ्यांगुरुशुश्रूषयातथा ॥ भक्त्याभावेनतुष्टोऽस्मितवाद्यचसुपुत्रक ॥ १ ॥ त्यंजामिवैकृतंरूपंमत्तःसुखमवाप्नु
हि ॥ एवमुक्त्वासुतंविप्रोदर्शयामासतांतनुम् ॥ २ ॥ यथापूर्वंस्थितौतौतुतथासदृष्टवान्गुरू ॥ दीप्तिमन्तौमहात्मानौसूर्यबिम्बोपमावुभौ ॥३ ॥ नना
मपादौसद्भक्त्याउभयोस्तुमहात्मनोः ॥ ततःसुतंसमामन्त्र्यहर्षेणमहतान्वितः ॥ ४ ॥ विष्णोःप्रसादाद्धर्मात्माभार्ययासहकेशवम् ॥ जगामनिजपु
ण्यैश्चयोगाभ्यासेनसत्तमः ॥ ५ ॥ प्रविष्टोवैष्णवंधामसमुनिर्दुर्लभंपदम् ॥ नत्वन्यैःप्राप्यतेपुण्यैस्तपोभिर्मुक्तिदंपदम् ॥ ६ ॥ विष्णोस्तुचिन्तनैर्न्या
सध्यानज्ञानैःस्तवैस्तथा ॥ नदानैस्तीर्थयात्राभिर्दृश्यतेमधुसूदनः ॥ ७ ॥ समाधिज्ञानयोगेनदृश्यतेपरमंपदम् ॥ महायोगैर्यथाविप्रःप्रविष्टोवैष्णवीं
तनुम् ॥ ८ ॥ सूतउवाच ॥ ततस्तत्रतपस्तेपेसोमशर्मामहाद्युतिः ॥ अश्मलोष्टसमंमेनेकाञ्चनंभूषणंपुनः ॥ ९ ॥ जिताहारःसधर्मात्मानिद्रयापरिव
र्जितः ॥ ससर्वान्विपयांस्त्यक्त्वाएकान्तमपिसेवते ॥ १० ॥ योगासनसमारूढोनिराशोनिष्परिग्रहः ॥ तस्यवेलासुसम्प्राप्तामृत्युकालस्यवैतदा ॥
॥ ११ ॥ आगतादानवाविप्रंसोमशर्माणमन्तिके ॥ मृत्युकालेतुसम्प्राप्तेप्राणयात्राप्रवर्तिनः ॥ १२ ॥ शालग्रामेमहाक्षेत्रेऋषीणांमानवर्द्धने ॥ केचिद्व
दन्तिवैदैत्याःकेचिद्वदन्तिदानवाः ॥ १३ ॥ एवंविधोमहाशब्दःकर्णरन्ध्रंगतस्तदा ॥ तस्यैवविप्रवयस्यसुचिरात्सोमशर्मणः ॥ १४ ॥ ज्ञानध्यानवि
लग्नस्यप्रविष्टंदैत्यजंभयम् ॥ तेनध्यानेनतस्यापिदैत्यभीत्यैववैतदा ॥ १५ ॥ सत्वरंचैवतत्प्राणागतास्तस्यमहात्मनः ॥ दैत्यभयेनसंयुक्तःसहिमृत्यु
वशंगतः ॥ १६ ॥ तस्माद्दैत्यगृहेजातोहिरण्यकशिपोःसुतः ॥ देवासुरेमहायुद्धेनिहतश्चक्रपाणिना ॥ १७ ॥ यद्धयमानेनतेनापिप्रह्लादेनमहा

१ 'गृहाणवैष्णवं सूक्तं' इ० पा०। 'त्यजस्व वैकृतं रूपम्' इति पाठस्त्वनर्थकः। २ 'विक्रियापरिवर्जितः' इ० पा०। ३ 'मानवाः' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्मना ॥ सुदृष्टंवासुदेवत्वंविश्वरूपसमन्वितम् ॥ १८ ॥ योगाभ्यासेनपूर्वेणज्ञानमासीन्महात्मनः ॥ सस्मारपूर्वकंसर्वंचरितंशिवशर्मणः ॥ ॥ १९ ॥ प्रागहंसोमशर्माख्यःप्रविष्टोदानवींतनुम् ॥ अस्मात्कायात्कदापुण्यंकेवलंधामउत्तमम् ॥ २० ॥ प्रयास्यामिमहापुण्यैर्ज्ञानाख्यैर्मो क्षदायकैः ॥ समरेम्रियमाणेनप्रह्लादेनमहात्मना ॥ २१ ॥ एवंचिन्ताकृतापूर्वंश्रूयतांद्विजसत्तमाः ॥ एवंतुचसमाख्यातंसर्वसन्देहनाशनम् ॥ ॥ २२ ॥ सूतउवाच ॥ प्रह्लादेनिहतेसङ्ख्येदेवदेवेनचक्रिणा ॥ रुरुदेकमलासातुहतपुत्राचकामिनी ॥ २३ ॥ प्रह्लादस्यतुयामाताहिरण्यकशो पोःप्रिया ॥ प्रह्लादस्यमहाशोकैर्दिवारात्रौप्रशोचति ॥ २४ ॥ पतिव्रतामहाभागाकमलानामतत्प्रिया ॥ रोदमानांदिवारात्रौनारदस्तामु वाचह ॥ २५ ॥ माशुचस्त्वंमहाभागेपुत्रार्थंपुण्यभागिनि ॥ निहतोवासुदेवेनतवपुत्रःसमेष्यति ॥ २६ ॥ भूयःस्वलक्षणोपेतस्त्वत्सुत श्चमहामतिः ॥ प्रह्लादेतिचवैनामपुनरस्यभविष्यति ॥ २७ ॥ विहीनश्चासुरैर्भावैर्देवत्वेनसमन्वितः ॥ इन्द्रत्वेमोदतेभद्रेसर्व देवैर्नमस्कृतः ॥ २८ ॥ सुखीभवमहाभागेतेनपुत्रेणवैसदा ॥ नप्रकाश्यात्वयादेविसुवार्तेयंचकस्यचित् ॥ २९ ॥ वक्तव्यंज्ञानभावैस्तत्सुगोप्यंकुरुत्वं सदा ॥ एवमुक्त्वागतोविप्रोनारदोमुनिसत्तमः ॥ ३० ॥ कमलायाश्चोदरेतुजन्मास्यानुत्तमंपुनः ॥ प्रह्लादेतिचवैनामतस्याख्यानंमहात्मनः॥ ३१ ॥ बाल्यंभावंगतोविप्राःकृष्णमेवव्यचिन्तयत् ॥ नरसिंहप्रसादेनदेवराजोऽभवद्दिवि ॥ ३२ ॥देवत्वंलभ्यचैवासावैन्द्रंपदमनुत्तमम् ॥ मोक्षंयास्यतिज्ञा नात्मावैष्णवंधामचोत्तमम् ॥ ३३ ॥ असङ्ख्यातामहाभागाःसृष्टेर्भावाह्यनेकशः ॥ मोहएवंनकर्तव्योज्ञानवद्भिर्महात्मभिः ॥ ३४ ॥ एतद्वःसर्वमा ख्यातंयथापृष्टंद्विजोत्तमाः ॥ अन्यंपृच्छतवैप्रश्नंसन्देहंवोभिनद्म्यहम् ॥ ३५ ॥ विजयंदेवतानांतुदानवानांमहत्क्षयम् ॥ कृतंहिदेवदेवेनस्थापितं भुवनत्रयम् ॥ ३६ ॥ ऋषयऊचुः ॥ इन्द्रत्वंकस्यसञ्जातंदेवानांशब्दधारकम् ॥ केनदत्तंत्वमाचक्ष्वविस्तराद्द्विजसत्तम ॥ ३७ ॥ ॥ सूतउवाच ॥ वि स्तरेणप्रवक्ष्यामिइन्द्रत्वंयेनसत्तमः ॥प्राप्तएषमहाभागोयथापुण्यतमेनच ॥ ३८ ॥ हतेषुतेषुदैत्येषुसमस्तेषुमहाहवे ॥ अतिनष्टेषुपापेषुगोविन्देनमहा त्मना ॥ ३९ ॥ ततोदेवाःसगन्धर्वानागाविद्याधरास्तथा ॥ सम्प्रोचुर्माधवंसर्वेबद्धप्राञ्जलयस्ततः ॥ ४० ॥ भगवन्देवदेवेशहृषीकेशनमोऽस्तुते ॥ विज्ञापयामहेत्वांवैतत्सर्वमवधार्यताम् ॥ ४१ ॥ शास्तागोप्ताचपुण्यात्माअस्माकंकुरुकेशव ॥ राजानंपुण्यधर्माणंत्वमिन्द्रंलोकशासनम् ॥ ४२ ॥ त्रैलोक्यस्यप्रजादेवयमाश्रित्यसुखंलभेत् ॥ ४३ ॥ वासुदेवउवाच ॥ ममलोकेमहाभागावैष्णवेनसमन्वितः ॥ तेजसाब्राह्मणश्रेष्ठश्चिरकालंनि

१ च यः तमित्यध्याहृत्य तं राजानं कुर्वीति शब्दार्थसंगतिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वासितः ॥ ४४ ॥ तस्यकालःप्रपूर्णश्चममलोकेमहात्मनः ॥ वसतस्तस्यविप्रस्यमद्भक्तस्यसुरोत्तमाः ॥ ४५ ॥ तेजसावैष्णवेनैवभवतां पालकोहिसः ॥ भविष्यतिसधर्मात्मासचधर्मानुरञ्जकः ॥ ४६ ॥ पालकोधारकश्चैवसचब्राह्मणसत्तमः ॥ भविष्यतिसधर्मात्माभवतां त्राणकारणात् ॥ ४७ ॥ अदित्यास्तनयश्चैवसुव्रताख्योमहामनाः ॥ महाबलोमहावीर्यःसवइन्द्रोभविष्यति ॥ ४८ ॥ सूतउवाच ॥ एवंवरा न्सदेवेशोदत्त्वादेवेभ्यउत्तमान् ॥ देवाविजयिनःसर्वेविष्णुनासहसत्तमाः ॥ ४९ ॥ कश्यपंपितरंद्रष्टुंमातरंचततोगताः॥प्रणेमुस्तेमहात्मानावुभावेतौसु खासनौ ॥ ५० ॥ ऊचुःप्राञ्जलयःसर्वेहर्षेणमहतान्विताः ॥ युवयोश्चप्रसादेनदेवत्वंहिगतावयम् ॥ हर्षेणमहताविष्टोदेवान्वाक्यमुवाचसः ॥ ५१ ॥ कश्यपउवाच ॥ यूयंवैसत्यधर्मेणवर्तमानाःसदैवहि ॥ आवयोश्चप्रसादेनतपसश्चप्रभावतः ॥ ५२ ॥ प्राप्तवन्तोभवन्तस्तुदेवत्वंचाक्षयंपदम् ॥ वरमेवददाम्येषबहुप्रीतिसमन्वितः ॥ ५३ ॥ अमरानिर्जराश्चैवअक्षयाश्चभविष्यथ ॥ सर्वकामसमृद्धार्थाःसर्वसिद्धिसमन्विताः ॥ ५४ ॥ देवानागाश्चगन्धर्वामत्प्रसादान्महासुराः ॥ ५५ ॥ विष्णुरुवाच ॥ वरंवरयभद्रंतेदेवमातर्यशस्विनि ॥ मनसाचेप्सितंसर्वंतत्तेदद्मि सुनिश्चितम् ॥ ५६ ॥ अदितिरुवाच ॥ पूर्वंपुत्रवतीभूताप्रसादात्तवमाधव ॥ अमरानिर्जराःसर्वअक्षयाःपुण्यवत्सलाः ॥ अमीपु त्रामयालब्धाःश्रूयतांमधुसूदन ॥ ५७ ॥ सुतरांत्वंचगोविन्दसर्वकामसमृद्धिदः ॥ ममगर्भेवसंश्चैवभवांश्चममनन्दनः ॥५८॥ त्वयापुत्रेणनित्यंचयथा नन्दामिकेशव ॥ एवंमहोदयंनाथपूरयस्वमनोरथम् ॥ ५९ ॥ वासुदेवउवाच ॥ भवत्यादेवकार्यार्थगन्तव्यंमानुषंवपुः ॥ तदाहंतवगर्भेवैवासं यास्यामिनिश्चितम् ॥ ६० ॥ युगेद्वादशकेप्राप्तेभूभारहरणायवै ॥ जमदग्निसुतोदेविरामोनामद्विजोत्तमः ॥ ६१ ॥ प्रतापीतेजसायुक्तःसर्वक्षत्रव धायच ॥ तवपुत्रोभविष्यामिसर्वशस्त्रभृतांवरः ॥ ६२ ॥ सप्तविंशतिकेप्राप्तेत्रेताख्येतुतथायुगे ॥ रामोनामभविष्यामितवपुत्रःपतिव्रते ॥ ॥ ६३ ॥ पुनःपुत्रोभविष्यामितवैवशृणुपुण्यधेः ॥ अष्टाविंशतिकेप्राप्तेद्वापरान्तेयुगेतदा ॥ ६४ ॥ सर्वदैत्यविनाशार्थेभूभारहरणायच ॥ वा सुदेवाख्यस्तेपुत्रोभविष्यामिनसंशयः ॥ ६५ ॥ इदानींकुरुकल्याणिमद्वाक्यंधर्मसंयुतम् ॥ सर्वलक्षणसम्पन्नंसत्यधर्मसमन्वितम् ॥ ६६ ॥ स र्वज्ञंसर्वदन्देविपुत्रमुत्पादयसुन्दरम् ॥ इन्द्रत्वंतस्यदास्यामिइन्द्रःसोऽपिभविष्यति ॥ ६७ ॥ एवंसम्भाषितंश्रुत्वामहाहर्षसमन्विता ॥ देवदेवप्रसा देनइन्द्रःपुत्रोभविष्यति ॥ ६८ ॥ एवमस्तुमहाभागतववाक्यंकरोम्यहम् ॥ ततस्तादेवताःसर्वाजग्मुःस्वस्थानमेवहि ॥ ६९ ॥ हरिणासहतेसर्वे

---

१ 'चतुर्विंशतिके' इति पाठः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निरातङ्कामुदान्विताः ॥ ७० ॥ सूतउवाच ॥ अदितिःकश्यपंप्राहऋतुंप्राप्यमनस्विनी ॥ भगवन्दीयतांपुत्रःसुरेन्द्रपदभोजकः ॥ ७१ ॥ चिन्तयित्वाक्षणंविप्रस्तामुवाचमनस्विनीम् ॥ एवमस्तुमहाभागेतवपुत्रोभविष्यति ॥ ७२ ॥ त्रैलोक्यस्यापिकर्तासयज्ञभोक्तासएवच ॥ तस्याःशिरसिसंन्यस्यस्वहस्तंचद्विजोत्तमः ॥ ७३ ॥ तपश्चचारतेजस्वीसत्यधर्मसमन्वितः ॥ सुव्रतोनामतेजस्वीविष्णुलोकेवसेत्सदा ॥ ७४ ॥ तस्यपुण्यक्षयेजातेविष्णुलोकाद्विजोत्तमाः ॥ पतनंकर्मवशतस्ततस्तस्यद्विजोत्तमाः ॥ ७५ ॥ पुण्यगर्भंगतोविप्रअदित्यास्तुमहातपाः ॥ इन्द्रत्वंभोक्तुकामार्थंसत्यपुण्येनकर्मणा ॥ ७६ ॥ गर्भंदधारसादेवीपुण्येनतपसाकिल ॥ तपस्तेपेनिरालस्यावनवासंगतासती ॥ ७७ ॥ दिव्यंवर्षशतंयातंतपन्त्यांदेवमातारि ॥ तपन्त्यथतपस्तीव्रंदुष्करंदेवतासुरैः ॥ ७८ ॥ ततःसातपसातेनतेजसाचप्रभान्विता ॥ सूर्यतेजःप्रतीकाशाद्वितीयइवभास्करः ॥ ७९ ॥ शुशुभेसायथादीप्तापरमंध्यानमास्थिता ॥ रूपेणाधिकतांयातातपसस्तेजसातदा ॥ ८० ॥ तपोध्यानपरासाचवायुभक्षातपस्विनी ॥ अधिकंशुशुभेदेवीदक्षस्यतनयातदा ॥ ८१ ॥ सिद्धाश्चऋषयःसर्वेदेवाश्चापिमहौजसः ॥ स्तुवन्तितांमहाभागांरक्षन्तिचसुतत्पराः ॥ ८२ ॥ पूर्णेवर्षशतेतस्याविष्णुस्तत्रसमागतः ॥ तामुवाचमहाभागामदितितपसान्विताम् ॥ ८३॥ देविगर्भःसुसम्पूर्णःसूतिकालःप्रवर्तते ॥ तवैवतपसापुष्टस्तेजसाचप्रवर्द्धितः ॥ ८४ ॥ अद्यैवगर्भमेतंत्वंमुञ्चमुञ्चयशस्विनी॥एवमाभाष्यदेवेशःसजगामस्वकंगृहम् ॥८५॥ असूतपुत्रंसादेवीकालेप्राप्तेमहोदये ॥ सापुत्रंदीप्तिसंयुक्तंद्वितीयमिवभास्करम् ॥ ८६ ॥ सुभगंचारुसर्वाङ्गंसर्वलक्षणसंयुतम् ॥ चतुर्बाहुंमहाकायंलोकपालंसुरेश्वरम्[१] ॥ ८७ ॥ तेजोज्वालासमाकीर्णंचक्रपद्मसुहस्तकम् ॥ चन्द्रबिम्बानुकारेणवदनेनमहामतिः ॥ ८८ ॥ राजमानंमहाप्राज्ञंतजसावैष्णवेनच ॥ अन्यैश्चलक्षणैर्दिव्यैर्दिव्यभावैरलङ्कृतम् ॥ ८९ ॥ सर्वलक्षणसम्पूर्णंचन्द्रास्यंकमलेक्षणम् ॥ आजग्मुस्तेत्रयोदेवा[२]ऋषयोवेदपारगाः ॥ ९० ॥ गन्धर्वाश्चततोनागाःसिद्धाविद्याधरास्तथा ॥ ऋषयःसप्ततेदिव्याःपूर्वापर[३]महौजसः ॥ ९१ ॥ अन्येचमुनयःपुण्याःपुण्यमङ्गलदायिनः ॥ आजग्मुस्तेमहात्मानोहर्षनिर्भरमानसाः ॥ ९२ ॥ तस्मिञ्जातेमहाभागेभगवन्तोमहौजसि ॥ आजग्मुर्देवताःसर्वेपर्वतास्तुतपस्विनः ॥ ९३ ॥ क्षीराद्याःसागराःसर्वेनद्यश्चैवतथामलाः ॥ प्रीतिमन्तस्ततःसर्वेयेचान्येहिचराचराः ॥९४॥ मङ्गलैस्तुमहोत्साहंचक्रुःसर्वेसुरेश्वराः ॥ ननृतुश्चाप्सरःसङ्घागन्धर्वाललितंजगुः॥९५॥ वेदमन्त्रैस्ततोदेवाब्राह्मणावेदपारगाः ॥ स्तुवन्तितंमहात्मानंसुतंवैकश्यपस्यच ॥ ९६ ॥ ब्रह्माविष्णुश्चरुद्रश्चवेदाश्चैवसमागताः ॥ अङ्गोपाङ्गैश्चसंयु

१ 'नरेश्वरम्' इ० पा०। २ 'तत्र ते देवाः' इ० पा०। ३ 'पूर्वाचार्याः' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्तास्तस्मिञ्जातेमहौजसि ॥ ९७ ॥ त्रैलोक्येयानिसत्त्वानिपुण्ययुक्तानिसत्तम ॥ समागतानितत्रैवतस्मिञ्जातेमहौजसि ॥ ९८ ॥ मङ्गलंचक्रिरेसर्वेगी
तपुण्यैर्महोत्सवैः ॥ हर्षेणनिर्भराःसर्वेपूजयन्तोमहौजसः ॥ ९९ ॥ ब्रह्माद्याश्चत्रयोदेवाःकश्यपोऽथबृहस्पतिः ॥ चक्रिरेनामकर्माणितस्यैवहिमहात्म
नः ॥ १०० ॥ वसुदत्तेतिविख्यातोवसुदेतिपुनस्तव ॥ आखण्डलेतितन्नाममरुत्वान्नामतेपुनः ॥ १ ॥ मघवांश्चबिडौजास्त्वंपाकशासनइत्यपि ॥शक्र
श्चैवहिविख्यातइन्द्रश्चैवेतितेसुतः ॥ २ ॥ इत्येतानिचनामानितस्यैवचमहात्मनः ॥ चक्रुश्चदेवताःसर्वाःसन्तुष्टाहृष्टमानसाः ॥ ३ ॥ स्नानंतुका
रयामासुःसंस्काराणिमहासुरः ॥ विश्वकर्माणमाहूयददुराभरणानिच ॥ ४ ॥ तानिपुण्यानिदिव्यानितस्मैतेतुमहात्मने ॥ जातेतस्मिन्महाभागेदेव
राजेमहात्मनि ॥५॥ एवंमुदंततःप्रापुःसर्वेदेवामहौजसः॥पुण्येतिथौतथाऋक्षेसुमुहूर्तेमहात्मभिः ॥६॥ इन्द्रत्वेस्थापितोदेवैरभिषिक्तःसुमङ्गलैः॥प्राप्तमै
न्द्रंपदंतेनप्रसादात्तस्यचक्रिणः॥७॥तपश्चकारतेजस्वीवसुदत्तःसुरेश्वरः॥ उग्रेणतेजसायुक्तोवज्रपाशाङ्कुशायुधः॥८॥सूतउवाच॥उग्रंसमस्तंतपसःप्रभावं
विलोक्यशुक्रोनिजगादगाथाम्॥लोकेषुचाऽन्योनभविष्यतीतियथाहिचायंचसुदर्शनीयः॥९॥ विष्णोःप्रसादान्नपरोमहात्मासम्प्राप्तमैश्वर्यमिहैवदिव्य
म् ॥ अनेनतुल्योनभविष्यतीतिलोकेषुचान्यस्तपसोग्रवीर्यः ॥११०॥ इतिश्रीपाद्मपुराणेभूमिखण्डेदेवासुरेइन्द्राभिषेकोनामपञ्चमोऽध्यायः॥५॥सूतउ
वाच ॥ कश्यपस्यचभार्यान्यादनुर्नामतपस्विनी ॥ पुत्रशोकेनसन्तप्तासम्प्राप्तादितिमन्दिरम् ॥१॥ रोदमानाप्रणम्यैवपादपद्मयुगंतदा ॥दुःखेनमहता
प्राप्तादितिस्तांप्रत्यबोधयत् ॥२॥ दितिरुवाच ॥ तवैवहिमहाभागेकिमिदंरोदकारणम्॥पुत्रिण्यश्चैकपुत्रेणलोकेनार्योभवन्तिवै॥३॥भवतीशतपुत्राणांगु
णिनामपिभामिनि ॥ मातात्वमसिकल्याणिशुम्भादीनांमहात्मनाम् ॥ ४ ॥ कस्माद्दुःखंत्वयाप्राप्तमेतन्मेकारणवद ॥ हिरण्यकशिपूराजाहिरण्याक्षो
महाबलः ॥ ५ ॥ यस्याःपुत्रौमहात्मानौमहाबलपराक्रमौ ॥ कस्माद्दुःखंमहज्जातंतस्माच्चैवसखेवद ॥ ६ ॥ आख्याहिकारणंसर्वंयस्माद्रोदिषिसा
म्प्रतम् ॥ एवमाभाष्यतांदेवींविरराममनस्विनी ॥ ७ ॥ दनुरुवाच ॥ पश्यपश्यमहाभागेसपत्न्याश्चमनोरथम् ॥ परिपूर्णंकृतंतेनदेवदेवेनच
क्रिणा ॥ ८ ॥ यथापूर्ववरोदत्तोह्यदित्यैदेविविष्णुना ॥ तथेदानींचपुत्रायतस्यादत्तोवरोमहान् ॥९॥ कश्यपाद्धिश्रुतोजातस्त्रैलोक्यपालकःसुतः ॥
इन्द्रत्वंतस्यवैदत्तंतवपुत्राद्धिहृत्यच ॥ १० ॥ मनोरथैस्तुसम्पूर्णाअदितिःसुखवर्द्धिनी ॥ कनीयान्वसुदत्तश्चतस्याःपुत्रश्चसम्प्रति ॥ ११ ॥ ऐन्द्रं
पदंसुदुष्प्राप्यंदेवैःसार्द्धंभुनक्तिच ॥ १२ ॥ दितिरुवाच ॥ कस्मात्पदात्परिभ्रष्टोममपुत्रोमहामतिः ॥ अन्येचदानवादैत्यास्तेजोभ्रष्टाःकथंसखे

१ 'वसुदत्तवीरः' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १३ ॥ तस्यत्वंकारणंब्रूहिविस्तरेणयशस्विनि ॥ तामाभाष्यदितिर्वाक्यंविररामसुदुःखिता ॥ १४ ॥ दनुरुवाच ॥ देवाश्चदानवाःसर्वेसक्रोधाः
सङ्गरंगताः ॥ तत्रयुद्धंमहज्जातंदैत्यसंक्षयकारकम् ॥ १५ ॥ देवैश्चविष्णुनायुद्धेममपुत्रानिपातिताः ॥ तथवतवपुत्रास्तेदेवदेवेनचक्रिणा ॥ १६ ॥
वनेगतान्यथासिंहोद्रावयेत्स्वेनतेजसा॥तथातेमामकाःपुत्रानिहताःशङ्खपाणिना॥१७॥ कालनेमिमुखंसैन्यंदुर्जयंससुरासुरैः॥नाशितंमर्दितंसर्वंद्रावितं
विकलीकृतम्॥१८॥स्वैरर्चिभिर्यथावह्निस्तृणानिज्वालयेद्वने॥तथादैत्यगणान्सर्वान्निर्दहत्येवकेशवः॥१९॥ममपुत्रामृतादेविबहुशस्तवनन्दनाः॥वह्निं
प्राप्ययथासर्वेशलभायान्तिसंक्षयम् ॥ २० ॥ तथातेदानवाःसर्वेहरिंप्राप्यक्षयंगताः ॥ एवमेतंहिवृत्तान्तंदितिःशुश्रावदारुणम् ॥२१॥ दितिरुवाच ॥
वज्रपातोपमंभद्रेवदस्यैवंकथंमम ॥ एवमाभाष्यतांदेवीमूर्च्छितानिपपातह ॥ २२ ॥ हाहाकष्टमिदंजातंबहुदुःखंप्रतापकम् ॥ रुरोदकरुणंसा
थपुत्रशोकसुपीडिता ॥ २३ ॥ तांदृष्ट्वासमुनिश्रेष्ठउवाचवचनंशुभम् ॥ मारोदिषिचभद्रंतेनैवंशोचन्तित्वद्विधाः ॥ २४ ॥ सत्ववन्तोमहाभा
गेलोभमोहेनवर्जिताः ॥ कस्यपुत्राहिसंसारेकस्यदेवीसुबान्धवाः ॥ २५ ॥ नास्तिकस्येहकेनापितत्सर्वंश्रूयतांप्रिये ॥ दक्षस्यापिसुतायूयंसुन्दर्य
श्चैवमामकाः ॥ २६ ॥ भवतीनामहंभर्ताकामनापूरकःशुभे ॥ योज[1]कःपालकश्चैवरक्षकोऽस्मिवरानने ॥ २७ ॥ कस्माद्वैरंकृतंक्रूरैरसुरैर
जितात्मभिः ॥ तवपुत्रामहाभागेसत्यधर्मविवर्जिताः ॥ २८ ॥ तेनदोषेणतेसर्वेतवदोषेणवैशुभे ॥ निहतावासुदेवेनदैवतैस्तुनिपातिताः
॥ २९ ॥ तस्माच्छोकोनकर्तव्यःसत्यमोक्षविनाशनः ॥ शोकोहिनाशयेत्पुण्यंक्षयात्पुण्यस्यनश्यति ॥ ३० ॥ तस्माच्छोकंपरित्यजविग्नरूपंवरान
ने ॥ आत्मदोषप्रभावेनदानवामरणंगताः ॥ ३१ ॥ देवानिमित्तभूताश्चनाशिताःस्वेनकर्मणा ॥ एवंज्ञात्वामहाभागेसमागच्छसुखं
प्रति ॥ ३२ ॥ एवमुक्त्वामहायोगीतांप्रियांदुःखभागिनीम् ॥ विषादाच्चनिवृत्तोऽसौविररामममहामतिः ॥ ३३ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डे
देवासुरेदितिविलापोनामषष्ठोऽध्यायः ॥ ६ ॥ दितिरुवाच ॥ सत्यमुक्तंत्वयानाथसर्वमेवनसंशयः ॥ भर्तृस्नेहंपरित्यज्यगतासापत्न्यजंद्विज ॥१॥
अभिमानेनदुःखेनमानभङ्गेनसत्तम ॥ महादुःखेनसन्तप्ताकरिष्येप्राणमोचनम् ॥ २ ॥ ॥ कश्यपउवाच ॥ श्रूयतामभिधास्यामियथाशान्तिर्भ
विष्यति ॥ नकःकस्यभवेत्पुत्रोनमातानपिताशुभे ॥ ३ ॥ नभ्राताबान्धवःकस्यनचस्वजनबान्धवाः ॥ एवंसंसारसम्बन्धोमायामोहमन्वितः ॥ ४ ॥
स्वयमेवपितादेविस्वयंमाताऽथबान्धवाः ॥ स्वयंस्वजनवर्गश्चस्वयंधर्मःसनातनः ॥ ५ ॥ आचारेणनरोदेविसुखित्वमुपजायते ॥ अनाचारेण

१ 'पोषकः' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पापेननाशंयातितथाध्रुवम् ॥ ६ ॥ क्रूरयोनिंप्रयात्येवंनरोदेविनसंशयः ॥ कर्मणासत्यहीनेनमहापापेनमोहितः ॥ ७ ॥ रिपुत्वेवर्त्ततेमर्त्यः
प्राणिनांनित्यसंस्थितः ॥ रिपवस्तस्यवर्तन्तेयत्रतत्रनसंशयः ॥ ८ ॥ ॥ मैत्रेणवर्ततेमर्त्योयदालोकेप्रियेशुभे ॥ तदातस्यभवन्त्येवमित्राः
सर्वत्रभामिनि ॥ ९ ॥ कृषिकारोयदादेविच्छन्नंबीजंसुसंस्थिम् ॥ यादृशंतुभवत्येवतादृशंफलमश्नुते ॥ १० ॥ तथातवचपुत्रैश्चसाधुभिः
स्पर्धितंसह ॥ कर्मणस्तस्यतत्प्राप्तंफलंभुङ्क्ष्वसुसंस्थितम् ॥ ११ ॥ तवपुत्रामहाभागेतपःशान्तिविवर्जिताः ॥ तेनपापेनतेसर्वेपतितावैमह
त्पदात् ॥ १२ ॥ एवंज्ञात्वाशमंगच्छमुञ्चदुःखंसुखंतथा ॥ कस्यपुत्राश्चमित्राणिकस्यस्वजनबान्धवाः ॥ १३ ॥ आत्मकर्मानुसारेणसुखं
जीवन्तिजन्तवः ॥ परार्थेचिन्तनंदेवितत्त्वज्ञानेनपण्डिताः ॥ १४ ॥ नकुर्वन्तिमहात्मानोव्यर्थमेवनसंशयः ॥ पञ्चभूतात्मकंकायंकेवलंसन्धि
जर्जरम् ॥ १५ ॥ आत्मामित्रंकृतंतेनसर्वंदेविसुखाशया ॥ आत्मानाममहापुण्यःसर्वगःसर्वदर्शकः ॥ १६ ॥ सर्वसिद्धिस्तुसर्वात्मासात्त्विकः
सर्वसिद्धिदः ॥ एवंसर्वमयोदेविभ्रमत्येकोनिरञ्जनः ॥ १७ ॥ भ्रमतानिर्जनेयेनमूर्तिमन्तोद्विजोत्तमाः ॥ चत्वारोदर्शिताःपुण्यामूर्तिमन्तोमहौजसः
॥ १८ ॥ पञ्चमःश्वसनश्चैवपूर्वाणांमित्रमेवच ॥ अथोआत्मासमायातोज्ञानसाहाय्यमेववा॥१९ ॥ सतान्दृष्ट्वामहात्मावैज्ञानमात्मासमब्रवीत् ॥ज्ञानप
श्यअमीपञ्चमन्त्रयन्तःपरस्परम् ॥ २० ॥ एतान्गत्वाब्रवीहित्वंयूयंकइतिपृच्छह ॥ ज्ञानंवाक्यंपरंश्रुत्वासार्थंतस्यमहात्मनः॥२१॥तदाहात्मानमारा
ध्यमेतैःकिंतेप्रयोजनम् ॥ तत्त्वतोब्रूहिमेदेवसदाशुद्धोऽसिसर्वदा ॥ २२ ॥ आत्मोवाच ॥ एतेपञ्चमहाभागारूपवन्तोमनस्विनः ॥ गत्वासन्दर्शया
म्येनानाभाष्येज्ञानश्रूयताम् ॥ २३ ॥ भव्यानेतान्प्रवक्ष्यामिपञ्चमींगतिमागतान् ॥ दूतत्वंगच्छभोज्ञानकुशलोदूतकर्मणि ॥ २४ ॥
॥ ज्ञानमुवाच ॥ त्वमात्मञ्छृणुमेवाक्यंसत्यंसत्यंवदाम्यहम् ॥ एतेषांसङ्गतिस्तातकार्यानैवत्वयाकदा ॥ २५ ॥ पञ्चानामपिशुद्धात्मन्नका
र्यंशुभमिच्छता ॥ भवतःसङ्गतिंमोहइच्छत्येषमहामते ॥ २६ ॥ आत्मोवाच ॥ एतेषांसङ्गतिंज्ञानकस्माद्वारयतेभवान् ॥ तन्मेत्वंकारणंब्रूहि
याथातथ्येनपण्डित ॥ २७ ॥ ज्ञानमुवाच ॥ एतेषांसङ्गमात्रात्तुमहद्दुःखंभविष्यति ॥ दुःखमूलाहिपञ्चैवशोकसन्तापकारकाः ॥ २८ ॥ एवम
स्तुमहाप्राज्ञकरिष्येवचनंतव ॥ ज्ञानमाभाष्यसह्यात्माध्यानेनसहसङ्गतः ॥ २९ ॥ कश्यपउवाच ॥ ततःपञ्चैवतेतत्राद्राक्षुरात्मानमेवतम् ॥ बुद्धि
मूचुःसमाहूयसङ्गच्छात्मानमेवहि ॥ ३० ॥ दूतत्वंकुरुकल्याणिअस्माकमात्मनासह ॥ पञ्चतत्त्वामहात्मानोविश्वस्यधारकाःशुभाः ॥ ३१ ॥

१ 'फलं भुञ्जन्ति' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवत्यामैत्रमिच्छन्तिइत्याभाष्यमहामतिम् ॥ गत्वाबुद्धेत्वयाकार्यंकर्तव्यंनइतोव्रज ॥ ३२ ॥ एवमस्तुमहाभागाकरिष्येकार्यमुत्तमम्॥एवमाभाषितं
तेषांगत्वाऽऽहात्मानमेवतम् ॥ ३३ ॥ अहंबुद्धिमहाभागभवन्तंसमुपागता ॥ दूतत्वेमहतांपार्श्वात्तेषांत्वंवचनंशृणु ॥ ३४ ॥ भवन्मैत्रींसमिच्छन्ति
अक्षयांपञ्चआत्मकाः॥ कुरुमैत्रींमहाप्राज्ञजहिध्यानंसुदूरतः ॥ ३५ ॥ ध्यानमुवाच ॥ नकर्तव्यस्त्वयाचात्मन्नेतेषांवैसमागमः ॥ एषांसंसर्गमात्रेण
महद्दुःखंभविष्यति ॥ ३६ ॥ मयाज्ञानेनहीनस्त्वंकथंकर्मकरिष्यसि ॥ एवमेवनकर्तव्यस्तेषांचैवसमागमः ॥ ३७ ॥ गर्भवासंनयिष्यन्ति
भवन्तंनान्यथाविभो ॥ ज्ञानेनैवमयाहीनोअज्ञानंयास्यसिध्रुवम् ॥ ३८ ॥ एवमुक्त्वातमात्मानंविरराममहामतिम् ॥ ततस्तामागतांबुद्धिमात्मा
प्रोवाचनिश्चितः ॥ ३९ ॥ ज्ञानध्यानौमहात्मानौमन्त्रिणौममशोभनौ ॥ तत्रयानंनमेयुक्तंतद्बुद्धेकिंकरोम्यहम् ॥ ४० ॥ एवंश्रुत्वाततोबुद्धिस्तेषां
पार्श्वेयशस्विनी ॥ समाचष्टसमग्रंतत्कथनंज्ञानध्यानयोः ॥ ४१ ॥ ततस्तेपञ्चकाःसर्वेआत्मानंप्रतिजग्मिरे ॥ मैत्रीमेवप्रतीच्छामोभवतोनित्यमेव
हि ॥ ४२ ॥ यस्माच्छुद्धोऽसिलोकेशतस्मात्त्वांसमुपागताः ॥स्वयमेवविचार्यैवउत्तरंनःप्रदीयताम् ॥ ४३ ॥ आत्मोवाच ॥ यूयंपञ्चैवसम्प्राप्ता
ममैत्रंसमिच्छथ ॥ स्वीयंगुणंप्रभावंचकथयन्तुममाग्रतः ॥ ४४ ॥ भूमिरुवाच ॥ सर्वकार्यस्यसंस्थानंचर्ममांससमन्वितम् ॥ अस्थिमूलदृढत्वं
मेनखलोमसमन्वितम् ॥ ४५ ॥ प्रभावोहिमहाप्राज्ञकायमध्येममैवहि ॥ नासिकागमनोगन्धस्समेभृत्योमहामनाः ॥ ४६ ॥ आकाश
उवाच ॥ अहमाकाशकःप्राप्तोममकायेप्रभावकम् ॥ श्रूयतामभिधास्यामिपरब्रह्मस्वरूपिणम् ॥ ४७ ॥ बाह्यान्तरावकाशश्चशून्यस्थानेवसाम्य
हम् ॥ तत्रामात्यौतुकर्णौमेश्रवणार्थंप्रतिष्ठितौ ॥ ४८ ॥ वायुरुवाच ॥ पञ्चरूपेणतिष्ठामिकरोम्येवंशुभाशुभम् ॥ चर्मकायेस्थितोऽमात्यःस्पर्शंसंश्र
यतेगुणम् ॥ ४९ ॥ तेजउवाच ॥ कायेसंस्थःसदानित्यंपाकयोगंकरोम्यहम् ॥ सबाह्याभ्यन्तरंसर्वंद्रव्याद्रव्यंप्रदर्शये ॥ ५० ॥ तत्रनेत्रावमात्यौमेद्र
व्यलब्धिप्रसाधकौ ॥ एवंमयात्मव्यापारस्तवाग्रेकथितःपरः ॥ ५१ ॥ आपऊचुः॥शुक्रंमज्जातथालालाएवंत्वक्संन्धिसंस्थितम् ॥ रुधिरंप्रेषयामो
वैकायमध्येस्थितावयम् ॥५२॥ सुपोषयामोऽहर्निशममृतेनकलेवरम् ॥ एवम्मयस्सुव्यापारःकायपत्तनकेप्रिये ॥५३॥ अमात्यंरसनांविद्धिरसास्वाद
करींपराम् ॥ ५४ ॥ नासिकोवाच ॥ सुगन्धेनपरांपुष्टिंकायस्यापिकरोम्यहम् ॥ दुर्गन्धंतुपरित्यज्यकायेगन्धंप्रदर्शये ॥५५ ॥ बुद्धियुक्तामहाभाग ॥ ८ ॥
तस्याभावेनभाविता ॥ स्वामिकार्यायकायेऽस्मिन्नहंतिष्ठामिनिश्चला ॥ गन्धंममगुणंविद्धिद्विविधंयत्प्रवर्तितम् ॥ ५६ ॥ श्रवणेऊचतुः ॥ कार्या
कार्यादिकंशब्दंलोकैरुक्तंशुभाशुभम् ॥ शृणुयावःस्वकायस्थौसत्यासत्येप्रियाप्रिये ॥ ५७ ॥ शब्दोह्यस्मद्गुणःप्रोक्तोव्यापारोऽपितथैवहि ॥ योज

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यावोनसन्देहोयदाबुद्धिःप्रपूरयेत् ॥ ५८ ॥ त्वगुवाच ॥ पञ्चरूपात्मकोवायुःशरीरेऽस्मिन्व्यवस्थितः ॥ सबाह्याभ्यन्तरांचेष्टांतेषांजानामितत्त्वतः ॥ ५९ ॥ शीतोष्णमातपंवर्षंवायोःस्फुरणमेवच ॥ सर्वंजानामिसंस्पर्शादङ्गश्लेषादिकंनृणाम् ॥ ६० ॥ स्पर्शएवगुणोमह्यमेतत्सत्यंवदाम्यहम् ॥ एवंहितेसमाख्यातोमयाव्यापारएवहि ॥६१॥ नेत्रेऊचतुः॥संसारेयानिरूपाणिभव्याभव्यानिसत्तम ॥ यदाप्रेरयतेबुद्धिस्तदापश्यावनान्यथा॥६२॥ वसावःकायमध्येवैरूपंगुणमिहावयोः ॥ एवंव्यापारसम्बन्धःकायमध्येमहामते ॥ ६३ ॥ जिह्वोवाच ॥ बुद्धियुक्ताअहंतातरसभेदान्विचारये ॥ क्षारमम्लादिकंसर्वंनीरसंस्वादुचिन्तये ॥ ६४ ॥ व्यापारेणह्यनेनापिनित्ययुक्तावसाम्यहम् ॥ इन्द्रियाणांहिसर्वेषांबुद्धिरेषाप्रणायिका ॥ ६५ ॥ एवं पञ्चसमायातानींन्द्रियाणिप्रियेशृणु ॥ स्वीयानियानिकर्माणिकथयन्तिपुनःपुनः ॥ ६६ ॥ अथबुद्धिःसमायातातमुवाचमहामतिम् ॥ मद्विहीनो यदाकायस्तदानश्यतिनान्यथा ॥ ६७ ॥ तस्मात्त्वंमांसमास्थायवर्त्तयस्वमहामते ॥ अथकर्मसमायातमात्मानमिदमब्रवीत् ॥ ६८ ॥ अहंकर्ममहाप्राज्ञतवपार्श्वंसमागतम् ॥ त्वांप्रेषयाम्यहंतेनपथायेनेहगच्छसि ॥६९॥ एवमाकर्ण्यतत्सर्वमात्माप्रोवाचतान्प्रति॥यूयंपञ्चात्मकैर्युक्ताःसर्वसाधारणाः किल ॥७०॥ कस्मान्मैत्रंसमिच्छन्तितत्रपञ्चात्मकंप्रति ॥ ब्रुवन्तुकारणंसर्वेममाग्रेसर्वमेवतत्॥७१॥ पञ्चात्मकाऊचुः ॥ अस्मत्सङ्गप्रसङ्गेनपिण्डमेव प्रजायते ॥ तस्मिन्पिण्डेमहाबुद्धेभवान्वसतिसुव्रतः ॥ ७२ ॥ तिष्ठामोहिवयंसर्वेप्रसादात्तवतत्रहि ॥ एतस्मात्कारणान्मैत्रमिच्छामस्तवनित्यशः ॥ ७३ ॥ आत्मोवाच ॥ एवमस्तुमहाभागाभवतांप्रियमेवच ॥ करिष्येनात्रसन्देहोमैत्रंहिप्रीतिकारणात् ॥ ७४ ॥ वार्यमाणोमहाभागोज्ञानेनापि महात्मना ॥ ध्यानेनचमहात्मासौतेषांसङ्गतिमागतः ॥ ७५ ॥ सतैःप्रमोहितस्तत्ररागद्वेषादिभिस्तदा ॥ पञ्चतत्त्वसमायुक्तःकायित्वङ्गतवान्प्रभुः ॥ ७६ ॥ यदागर्भसमायातोविष्ठामूत्रसमाकुले ॥ दुर्गन्धेपिच्छिलावर्तेपतितस्तैःससंयुतः ॥ ७७ ॥ अङ्गेनव्याकुलीभूतः पञ्चात्मकानुवाचसः ॥ भोभोःपञ्चात्मकाःसर्वेशृणुध्वंवचनंमम ॥ ७८ ॥ भवतांसप्रसङ्गेनमहादुःखेनमोहितः ॥ नत्वस्मिन्पिच्छिलेघोरेपतितोहिमहाभये ॥ ७९ ॥ पञ्चात्मकाऊचुः ॥ तावत्संस्थीयतांराजन्यावद्गर्भःप्रपूरयेत् ॥ पश्चान्निर्गमनंतेवैभविष्यतिनसंशयः ॥ ८० ॥ अस्माकंहि भवान्स्वामीकायदेशेव्यवस्थितः ॥ राज्यमेवंप्रकर्तव्यंसुखभोक्ताभविष्यति ॥ ८१ ॥ तेषांतद्वचनंश्रुत्वाआत्मादुःखेनपीडितः ॥ गन्तुमिच्छन्नसौ तस्मात्पलायनपरोऽभवत् ॥ ८२ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेदेवासुरेशरीरकथनंनामसप्तमोऽध्यायः ॥ ७ ॥ कश्यपउवाच ॥ सगर्भेव्याकुलोजातः खिद्यमानोदिनेदिने ॥ दुःखाक्रान्तोहिधर्मात्मासर्वपीडाभिपीडितः॥१॥ अधोमुखस्तुगर्भस्थोमोहजालेनबन्धितः ॥ आधिव्याधिसमाक्रान्तोहा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हाभूतोविचेतनः ॥ दुःखेनमहताविष्टोज्ञानमाहप्रपीडितः ॥ २ ॥ आत्मोवाच ॥ तववाक्यंमहाप्राज्ञनकृतंतुमयातदा ॥ ध्यानेनवार्यमाणोऽपिपतितो
गर्भसङ्कटे ॥ ३ ॥ तस्माद्रक्षमहाप्राज्ञगर्भवासात्सुदारुणात् ॥ ४ ॥ ज्ञानमुवाच ॥ मयात्वंवारितोह्यात्मन्कृतंवाक्यंनचैवमे ॥ पञ्चात्मकैर्महाक्रूरैःपा
तितोगर्भसङ्कटे ॥ ५ ॥ इदानींगच्छत्वंध्यानंतस्मात्सम्प्राप्स्यसेसुखम् ॥ गर्भवासाद्भविष्यस्तेमोक्षएवनसंशयः ॥ ६ ॥ तस्यतद्वचनंश्रुत्वाज्ञात्वा
ज्ञानस्यतत्त्वताम् ॥ ध्यानमाहूयप्रोवाचश्रूयतांवचनंमम ॥ ७ ॥ त्वामहंशरणंप्राप्तोध्यानमांरक्षनित्यशः ॥ एवमस्तुमहाप्राज्ञध्यानमाहमहामतिम्
॥ ८ ॥ एतद्वाक्यंततःश्रुत्वाआत्मावैध्यानमागतः ॥ ध्यानेनहिसमंगर्भेसंस्थितोमोहवर्जितः ॥ ९ ॥ यदाध्यानंगतोह्यात्माविस्मृतंगर्भजंभयम् ॥
सद्भाभ्यांसहितस्तत्रआत्मामोहविनाकृतः ॥ १० ॥ चिन्तयन्नेववैनित्यमात्मकंसुखमेवहि ॥ इतोनिष्क्रान्तमात्रस्तुत्यजेपञ्चात्मकंवपुः ॥ ११ ॥
एवंचिन्तयतेनित्यंगर्भवासगतःप्रभुः ॥ सूतिकालेतुसम्प्राप्तेप्राजापत्येवरानने ॥ १२ ॥ वायुनाचलितोगर्भःप्राणेनापिबलीयसा ॥ योनिर्विकासमा
यातिचतुर्विंशाङ्गुलंतदा ॥ १३ ॥ पञ्चविंशाङ्गुलोगर्भस्तेनपीडाविजायते ॥ एवंसम्पीड्यमानस्तुमूर्च्छयामूर्च्छितःप्रिये ॥ १४ ॥ पतितोभूमिभागे
तुज्ञानध्यानसमन्वितः ॥ प्राजापत्येनदिव्येनवायुनासपृथक्कृतः ॥ १५ ॥ भूमिसंस्पर्शमात्रेणज्ञानध्यानेतुविस्मृते ॥ संसारबन्धसन्दिग्धआत्मा
प्रियतयास्थितः ॥ १६ ॥ गुणदोषसमाक्रान्तोमहामोहसमन्वितः ॥ स्नानपानादिकंसर्वमिच्छत्येवदिनेदिने ॥ १७ ॥ एवंसम्पुष्यमाणस्तुआत्मा
पञ्चात्मकैःसह॥व्याप्यतेहीन्द्रियैःसर्वैर्विषयैःपापकारिभिः॥१८॥ बान्धवानांसमोहेनभार्यादीनांतथैवच ॥ आकुलव्याकुलोदेविजायतेचदिनेदिने ॥
॥ १९ ॥ महामोहेनसन्दिग्धोमोहजालगतःप्रभुः ॥ कैवर्तेनयथाबद्धःशकुलोजालबन्धनैः ॥ २० ॥ चलितुंनैवशक्तोऽस्तितथात्मासीत्प्रबन्धि
तः ॥ मोहजालैस्तुतैःसर्वैर्दृढबन्धैस्तुबन्धितः ॥ २१ ॥ एवमादिप्रपञ्चैनव्याप्तोऽसौव्यापकेनहि ॥ ज्ञानविज्ञानविभ्रष्टोरागद्वेषादिभिर्हतः
॥ २२ ॥ कामेनपीड्यमानस्तुक्रोधेनैवतथैवच ॥ प्रकृत्याकर्मणाबद्धोमहामूढोव्यजायत ॥ २३ ॥ एवंमूढोयदात्मासौकामक्रोधवशं
गतः ॥ लोभरागादिभिःसर्वैर्व्याप्तस्तैर्दुरात्मभिः ॥ २४ ॥ इयंभार्याह्ययंपुत्रइदंमित्रमिदंगृहम् ॥ एवंसंसारजालेनमहामोहेनबन्धितः ॥ २५ ॥
पुत्रशोकादिभिर्दुःखैर्विविधैराकुलस्तदा॥जरयाव्याधिभिश्चैवसङ्ग्रस्तश्चाधिभिस्तथा ॥२६॥ एवमात्मासम्प्रतप्तोदुःखमोहैःसुदारुणैः ॥ अभिमानै
र्मानभङ्गैर्नानादुःखैश्चखण्डितः ॥ २७ ॥ वृद्धत्वेनतथादेविशबलत्वेनपीडितः ॥ दुःखंचिन्तयतेनित्यंहाहाभूतोविचेतनः ॥ २८ ॥ रात्रौस्व
प्नान्प्रपश्येतदिवाचैतन्यवर्जितः ॥ वैकल्येनतथाज्ञानांव्याप्तोदेविदिनेदिने ॥ २९ ॥ संसारेभ्रममाणेनवैराग्यंतत्रदर्शितम् ॥ निःशङ्कंबन्धुहीनंचप्रशा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्तंतुष्टमेवच ॥ ३० ॥ तमुवाचतदात्मावैकामक्रोधविवर्जितम् ॥ कोभवान्नग्नरूपेणकथंमित्रैर्नलज्जसे ॥ ३१ ॥ यत्रलोकाःस्त्रियोवृद्धायुवत्योमातर
स्तथा ॥ एतासांहिगतोमध्येनबिभेषिह्यनावृतः ॥३२ ॥ वीतरागउवाच ॥ कोह्यत्रनग्नोदृश्येतननग्नोऽस्मीतिवैकदा ॥ सुसम्बद्धस्त्वमेवापिपरिधानस
मन्वितः ॥ ३३ ॥ ननग्नोऽस्मिकदादिव्यभवान्नग्नःप्रदृश्यते ॥ इन्द्रियार्थवशेवर्तीमर्यादापरिवर्जितः ॥ ३४ ॥आत्मोवाच ॥ पुरुषस्यकाहिमर्यादा
तामाचक्ष्वचसुव्रत ॥ विस्तरेणमहाप्राज्ञयदिजानासिनिश्चितम् ॥ ३५॥ कश्यपउवाच ॥ वीतरागोमहाप्राज्ञस्तमुवाचमहामतिः ॥ ३६ ॥ वीतराग
उवाच ॥ सुस्थैर्यंभजतेचित्तंसुखदुःखेषुनित्यशः ॥ क्लेशितंसर्वभावैश्चतेषुतेषुपरित्यजेत् ॥३७॥ अथलज्जांप्रवक्ष्यामिमनोयानिर्विशत्यलम् ॥ मया
ह्येवंनकर्तव्यंनग्नःस्थानविर्जितः ॥ ३८ ॥ पश्चात्तापेसुसंलीनःसालज्जापरिकथ्यते ॥ कस्यलज्जाप्रकर्तव्याद्वितीयोनास्तिसर्वदा ॥ ३९ ॥ एकश्चपुरु
षोदिव्यःकस्यकिंचिन्ननाशयेत् ॥ अथलोकान्प्रवक्ष्यामियेत्वयापरिकीर्तिताः ॥ ४० ॥ यथाकुलालकश्चक्रेमृत्पिण्डंचनिधापयेत् ॥ भ्रामयित्वातु
सूत्रेणनानाभेदान्प्रकाशयेत् ॥ ४१ ॥ भाण्डानांतुसहस्राणिस्वेच्छयामतिसंस्थितः ॥ तथायंसृजतेधातानानारूपाणिनान्यथा ॥ ४२ ॥
पश्चाद्विनाशमायान्तियेनकेनापिहेतुना ॥ सर्वदैवस्थितायेचयेलोकाश्चसनातनाः ॥ ४३ ॥ तेषांलज्जाप्रकर्तव्यानावर्तन्तेहितेभुवि ॥ आका
शावायुतेजांसिपृथ्वीचापश्चपञ्चमः ॥ ४४ ॥ अमीलोकाःप्रकाशन्तेयेचसर्वत्रसंस्थिताः ॥ सत्त्वानामङ्गदेशेषुपञ्चैतेषुसुसंस्थिताः ॥ ४५ ॥
सर्वत्रैवचवर्तन्तेकस्यलज्जाविधीयते ॥ स्त्रीणांरूपंप्रवक्ष्यामिश्रूयतांतातसाम्प्रतम् ॥ ४६ ॥ यथाघटसहस्रेषुसोदकेषुविराजते ॥ एकश्चन्द्रोहि
सर्वत्रभवांस्तद्वद्विराजते ॥ ४७ ॥ गतेजन्तुसहस्रेषुमोहचक्रेमहात्मवान् ॥ स्थावरेषुचसर्वेषुजङ्गमेषुतथाभवान् ॥ ४८ ॥ योनिद्वारेणपापे
नमायामोहमयेनवै ॥ कुचाभ्यांचनितम्बाभ्यांवयसाचविराजते ॥ ४९ ॥ ह्यन्मांसस्याधिकावृद्धिर्दृष्टाचात्रनसंशयः ॥ पतनायचलोकानांमो
हरूपंविदर्शितम् ॥ ५० ॥ नभवत्येवसानारीयात्वयापरिकीर्तिता ॥ लीलयाकुरुतेधाताविनोदायसदात्मनः ॥ ५१ ॥ यथानार्यास्तथापुंसोजीवः
सर्वत्रसंस्थितः ॥ कुचयोनिविहीनायेजीवन्मुक्ताःसदैवहि ॥ ५२ ॥ नरस्तुपुरुषःप्रोक्तोनारीप्रकृतिरुच्यते ॥ रमतेतेनवैसार्द्धंनमुक्ताहिक
दाचन ॥ ५३ ॥ भवान्प्रकृतिसंयुक्तःपुरुषेपुप्रदृश्यते ॥ कःकस्यकुरुतेलज्जामेवंज्ञात्वासुखंव्रज ॥ ५४ ॥ वृद्धांस्त्रियंप्रवक्ष्यामिसदावृद्धांवरान
न ॥ त्वचाजर्जरतांयातायास्वाङ्गैर्वैवरानना ॥ ५५ ॥ श्वेतैश्चैवतथाकेशैःपलितैश्चसमाकुला ॥ बलहीनाथदीनापिव्यापितावलिनातदा ॥ ५६ ॥
नेयंवृद्धाभवेन्नारीपरंवृद्धाचकथ्यते ॥ एतस्यालक्षणंप्रोक्तंयुवतींप्रवदाम्यहम् ॥ ५७ ॥ ज्ञानेनवर्द्धतेनित्यंजीवपार्श्वेसमाश्रिता ॥ सुमतिर्नामसम्प्रोक्ता

CC-0. In Public Domain. Digitization by eGangotri

सावृद्धायुवतीतिच ॥ ५८ ॥ नारीपुरुषलोकेषुसर्वदैवप्रतिष्ठिता ॥ लज्जातस्याःप्रकर्तव्याअन्यच्चैववदाम्यहम् ॥ ५९ ॥ मातरंवैप्रवक्ष्यामियात्वया परिकीर्तिता ॥ प्राणिनामङ्गदेशेषुसदैवचेतनास्थिता ॥६०॥ परज्ञानप्रदायाचसाप्रज्ञापरिकथ्यते॥प्रज्ञामातासमाख्याताप्राणिनांपालनायसा ॥६१॥ संस्थितासर्वलोकेषुपोषणायहितायवा ॥ सुमतिर्नामयाप्रोक्तासामातापरिकथ्यते॥ ६२॥ संसारद्वारमार्गाणियानिरूपाणिनित्यशः॥भवन्तिमातरोह्ये ताबहुदुःखप्रदर्शिकाः ॥ मातृरूपंसमाख्यातमन्यत्किंतेवदाम्यहम्॥६३॥आत्मोवाच॥ भवान्कोहिसमायातोममसन्तापनाशकः॥विस्तरेणसमाख्या हिस्वरूपमात्मनःस्वयम् ॥ ६४ ॥ वीतरागउवाच ॥ यस्मात्कामानिवर्तन्तेनिराशाःसर्वएवते ॥ यंदुष्ट्वान्नपश्यन्तिकर्माण्येतानिनान्यथा॥६५॥ यत्समीपंहिनायातिआशाचैवकदाचन ॥ क्रोधोलोभस्तथामोहोयद्भयात्प्रलयंगता ॥ ६६ ॥ वीतरागोऽस्मिभद्रंतेविवेकोममबान्धवः ॥ ६७ ॥ आत्मोवाच ॥ कीदृशोऽसौतवभ्राताविवेकोनामनामतः ॥ तस्यत्वंलक्षणंब्रूहिभ्रातुरात्मनएवच ॥ ६८ ॥ वीतरागउवाच ॥ तस्यैवलक्षणंरूपंनवदामितवाग्रतः ॥ भ्रातुस्तस्यमहाभागआह्वानंचकरोम्यहम् ॥ ६९ ॥ भोभोविवेकमेभ्रातरावयोस्त्वंवचःशृणु ॥ एह्येहिसुमहाभागममस्नेहान्महामते ॥ ७० ॥ कश्यपउवाच ॥ शान्तिक्षमाभ्यांसंयुक्तोभार्याभ्यांचसमागतः ॥ सर्वदृक्सर्वगोव्यापीसर्वतत्त्वपरायणः ॥ ७१॥ सन्देहानांचसर्वेषांयोरिपुर्ज्ञानवत्सलः ॥ धारणाधीश्चद्वेपुत्र्यौतस्यैवहिमहात्मनः ॥ ७२ ॥ तस्ययोगःसुतोज्येष्ठोमोक्षोयस्यमहागुरुः ॥ निर्मलोनिरहङ्कारोनिराशोनिष्परिग्रहः ॥ ७३ ॥ सर्ववेलाप्रसन्नात्मागतद्वन्द्वोमहामतिः ॥ सविवेकः समायातोगुणरत्नैर्विभूषितः ॥ ७४ ॥ यस्यामात्यौमहात्मानौधर्मसत्यौमहामती॥ क्षमाशान्तिसमायुक्तःसविवेकःसमागतः ॥ ७५ ॥ वीतरागमुवाचेदमाहूतोऽहंसमागतः ॥ तद्भ्रातःकारणंसर्वंकथ्यतांहिममाग्रतः ॥ यमाश्रित्य त्वयाद्यैवकृतमाह्वानमेवमे ॥७६॥ वीतरागउवाच ॥ पुमान्स्थितोयःपुरतोमहापाशैर्नियन्त्रितः ॥ मोहस्यबाणैःसम्भ्रान्तःसंसारस्यचबन्धनैः॥७७॥ सर्वस्यव्यापकःस्वामीअयमात्माममैवच ॥ पञ्चतत्त्वैःसमाविष्टोज्ञानध्यानविवर्जितः॥७८॥पृच्छतामेनमात्मानंभवांस्तत्त्वेषुपण्डितः॥वीतरागवचः श्रुत्वाविवेकोवाक्यमब्रवीत् ॥ ७९ ॥ विवेकउवाच ॥ सुखेनस्थीयतेदेवभवताविश्वनायक ॥ आगतेत्वयिसंसारेकिंकिंभुक्तंसुखंस्वयम् ॥ ८० ॥ आत्मोवाच ॥ गर्भवासोमहद्दुःखमसह्यंदारुणंमया ॥ भुक्तमेवमहाप्राज्ञज्ञानहीनेनवैसदा ॥ ८१ ॥ देहेऽपिज्ञानविभ्रष्टःसोऽहंजातोह्यनेकधा॥बाल्यावस्थांगतेनाथकृत्याकृत्यंकृतंमया ॥ ८२ ॥ तारुण्येनकृताक्रीडाभुक्ताभार्याह्यनेकशः ॥ वार्धकंप्राप्यसंतप्तःपुत्रशोकादिभिस्तथा ॥ ८३ ॥ भार्यादीनांवियोगैस्तुदग्धोऽस्म्यहमहर्निशम् ॥ दुःखैरनेकसंवर्णैःसंतप्तोऽस्मिदिनेदिने ॥ ८४ ॥ दिवारात्रौमहाप्राज्ञनविन्दामिसुखंक्वचित् ॥ एवंदुःखैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुसंतप्तः किंकरोमिमहामते ॥ ८५ ॥ तमुपायंवदस्वैवसुखंविन्दामियेनवै ॥ अस्मात्संसारजालौघान्मोचयाद्यसुबन्धनात् ॥ ८६ ॥ विवेकउवाच ॥
भवाञ्छुद्धोऽसिनिर्द्वन्द्वोह्यपापोऽसिजगत्पते ॥ एनंगच्छमहात्मानंवीतरागंसुखप्रदम् ॥ ८७ ॥ निःसंशयंत्वयाद्दष्टनग्नमाचारवर्जितम् ॥ सुखप्रदर्श
कोह्येषसर्वसंतापनाशकः ॥ ८८ ॥ एवमाकर्ण्यशुद्धात्मावीतरागंगतःपुनः ॥ तमुवाचश्वसन्दीनःश्रूयतांवचनंमम ॥ ८९ ॥ सुखंविन्दामियेनाहंतं
मार्गंममदर्शय ॥ एवमस्तुमहाप्राज्ञकरिष्येवचनंतव ॥ ९० ॥ पुनर्गच्छविवेकंहिसुखवार्ताकृतात्वया ॥ सुखमार्गस्यवैवक्तातवचैषभविष्यति ॥ ९१ ॥
वीतरागेणपुण्येनप्रेषितोगतवान्प्रभुः ॥ तमुवाचमहात्मानंविवेकंशुद्धसत्तमम् ॥ ९२ ॥ सुखंमेदर्शयत्वंहिवीतरागेणप्रेषितः ॥ भवच्छरणमापन्नो
रक्षसंसारदारुणात् ॥ ९३ ॥ विवेकउवाच ॥ ज्ञानंगच्छमहाप्राज्ञसतेसर्वंवदिष्यति ॥ आत्मातथोक्तःसम्प्राप्तोयत्रज्ञानंप्रतिष्ठितम् ॥ ९४ ॥ भोभोज्ञा
नमहातेजःसर्वभावप्रदर्शक ॥ शरणंत्वामहंप्राप्तःसुखमार्गंप्रदर्शय ॥ ९५ ॥ ज्ञानमुवाच ॥ भृत्योऽहंतवलोकेशत्वंमांवेत्सिनसुव्रत ॥ मयाध्यानेनवै
पूर्वंवारितस्त्वंपुनःपुनः ॥ ९६ ॥ पश्चात्मकानांसङ्गेनआपदंप्राप्तवान्भवान् ॥ ध्यानंगच्छमहाप्राज्ञसतेदातासुखस्यच ॥ ९७ ॥ ज्ञानेनप्रेषितोह्या
त्माध्यानमाश्रित्यसंस्थितः ॥ सुखमत्यन्तसिद्धंचध्यानंमेदर्शयस्वह ॥ ९८ ॥ भवच्छरणमायातंमामेवंपरिरक्षय ॥ एवंसम्भाषितंतस्यध्यानमाक
र्ण्यतद्वचः ॥ ९९ ॥ समुवाचपुनश्चापितमात्मानंप्रहृष्टवान् ॥ नैवत्याज्योऽस्म्यहंतातसर्वकर्मसुनिश्चितः ॥ १०० ॥ त्वयैववीतरागेणविवेकेनसदै
वहि ॥ ध्यानयुक्तोभवस्वत्वमात्मानमवलोकय ॥ १ ॥ आत्मवांस्त्वंस्थिरोभूत्वानिरातङ्कोविकल्पितः ॥ यथादीपोनिवातस्थःकज्ज
लंवमतेस्थिरः ॥ २ ॥ तथादोषान्प्रज्वलित्वानिर्वाणंहिप्रयास्यति ॥ एकान्तस्थोनिराहारोमिताशीभवसर्वदा ॥ ३ ॥ निर्द्वन्द्वःशब्दसंही
नोनिश्चलोह्यासनेस्थितः ॥ आत्मानमात्मनाध्यायन्ममैवस्थिरबुद्धिना ॥ ४ ॥ प्राप्स्यसेपरमंस्थानंतद्विष्णोःपरमंपदम् ॥ १०५ ॥ इतिश्रीपाद्मपुराणे
भूमिखण्डेऽध्यात्मवर्णनेऽष्टमोऽध्यायः ॥ ८ ॥ कश्यपउवाच ॥ एवंसंबोधितस्तत्रआत्माध्यानादिकैस्तदा ॥ त्यक्तुकामःसतत्कार्यंपञ्चात्मकंसबुद्धिमा
न् ॥ १ ॥ निमित्तान्येवपश्यन्वैप्राप्यतांस्तान्प्रयातिसः ॥ विहायकायंनिर्लक्ष्यंपतितंनैवपश्यति ॥ २ ॥ सहवर्द्धितयोर्नास्तिसम्बन्धःप्राणदेहयोः ॥ धनपु
त्रकलत्रैश्चसम्बन्धःकेनहेतुना ॥ ३ ॥ एवंज्ञात्वाशमंगच्छक्लैब्यंमाभजसुप्रिये ॥ अयमेवपरंब्रह्मअयमेवसनातनः ॥ ४ ॥ अयमात्मस्वरूपेणदैत्यदेवेषुसंस्थि
तः ॥ अयंब्रह्माह्ययंरुद्रोह्ययंविष्णुःसनातनः ॥ ५ ॥ अयंसृजतिविश्वानिअयंपालयतेप्रजाः ॥ संहरत्येषधर्मात्माधर्मरूपीजनार्दनः ॥ ६ ॥ अने
नोत्पादितादेवादानवाश्चैवसुप्रिये ॥ देवाश्चाधर्मनिर्मुक्ताधर्महीनाःसुतास्तव ॥ ७ ॥ धर्मोऽयंमाधवस्याङ्गंसर्वदेवैश्चपालितम् ॥ धर्मंचचिन्तयेदेविध

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्मचैवतुपालयेत् ॥ ८ ॥ तस्यविष्णुःसधर्मात्मासर्वदैवप्रसादवान् ॥ धर्मेणवर्तितादेवाःसत्येनतपसाकिल ॥ ९ ॥ येषांविष्णुःप्रसन्नोवैधर्मस्तैरि
हपालितः ॥ विष्णोःकायमिदंधर्मंसत्यंहृदयमेवच ॥ १० ॥ यस्तौपालयतेनित्यंतस्यविष्णुःप्रसीदति ॥ दूषयेद्यःसत्यधर्मौपापमेवप्रपालयेत्
॥ ११ ॥ तस्यविष्णुःप्रकुप्येतनाशयेदतिवीर्यवान् ॥ वैष्णवैःपालितंधर्मंतपःसत्येनसंस्थितैः ॥ १२ ॥ तेषांप्रसन्नोधर्मात्मारक्षामेवंकरोतिच ॥
तवपुत्रादनोःपुत्राःसैंहिकेयास्तथैवच ॥ १३ ॥ अधर्मेणापिपापेनवर्तिताःपापचेतसः ॥ सूदितावासुदेवेनसमरेचक्रपाणिना ॥ १४ ॥ योऽसावा
त्मामयाप्रोक्तःपूर्वमेवतवाग्रतः ॥ सोऽयंविष्णुर्नसन्देहोधर्मात्मासर्वपालकः ॥ १५ ॥ दैत्यकायेषुयःस्वस्थःपापमेवसमास्थितः ॥ जघ्निवान्दा
नवान्देविसचक्रुद्धोमहामतिः ॥ १६ ॥ सबाह्याभ्यन्तरेभूत्वातवपुत्रानिपातिताः ॥ येनचोत्पादितादेवितेनैवविनिपातिताः ॥ १७ ॥ नैषांमोह
स्तुकर्तव्योभवत्यावचनंशृणु ॥ पापेनवर्ततेयोऽसौसएवनिधनंव्रजेत् ॥ १८ ॥ तस्मान्मोहंपरित्यज्यसदाधर्मसमाश्रय ॥ १९ ॥ दितिरुवाच ॥ एव
मस्तुमहाभागकरिष्येवचनंतव ॥ कश्यपंचमुनिश्रेष्ठमेवमाभाष्यदुःखिता ॥ २० ॥ सम्बोधितासामुनिनादुःखंसन्त्यज्यसंस्थिता ॥ २१ ॥ इतिश्रीपा
द्मपुराणेभूमिखण्डेदेवासुरेदितिसम्बोधनंनामनवमोऽध्यायः ॥ ९ ॥ ऋषयऊचुः ॥ ततस्तेदानवाःसर्वेहिरण्यकशिपूत्तराः ॥ युद्धाद्भग्नास्तुकिंचक्रु
र्व्यवसायंमहामते ॥ १ ॥ विस्तरेणापिनोब्रूहितेषांवृत्तमनुत्तमम् ॥ श्रोतुमिच्छामहेसर्वेत्वत्तोवैसाम्प्रतंद्विज ॥ २ ॥ सूतउवाच ॥ भग्नारणात्तुतेस
र्वेबलहीनास्तुवैतदा ॥ गतदर्पाःसुदुःखार्तादैत्यास्तेपितरंगताः ॥ ३ ॥ भक्त्याप्रणम्यतेसर्वेसमूचुःकश्यपंतदा ॥ ४ ॥ दानवाऊचुः ॥ भवद्वीर्या
त्समुत्पत्तिरस्माकंद्विजसत्तम ॥ देवतानांमहाभागदानवानांतथैवच ॥ ५ ॥ वयंचदानवाःसर्वेबलवीर्यपराक्रमाः ॥ उपायज्ञाःसुधीराश्चउद्यमेनस
मन्विताः ॥ ६ ॥ वयंतुबहवस्तातदेवास्त्वल्पास्तथैवच ॥ कथंजयन्तितेसर्वेवयंभग्नामहाहवात् ॥ ७ ॥ तत्किंवैकारणंतातबलतेजःसमन्विताः ॥ ७ ॥
मत्तनागसहस्राणामेकैकस्यमहामत ॥ ८ ॥ बलमस्तिचदैत्यस्यनास्तिदेवेषुतादृशम् ॥ जयश्चदृश्यतेतातदेवेष्वेवमहाहवे ॥ तत्सर्वंकथयस्वैवसंश
यंछेत्तुमर्हसि ॥ ९ ॥ कश्यपउवाच ॥ शृणुध्वंपुत्रकाःसर्वेजयस्यापिचकारणम् ॥ यस्माद्धिदेवताःसर्वेसमरेजयिनोऽभवन् ॥ १० ॥ वीर्य
निर्वापकस्तातोमाताक्षेत्रमिदंसदा ॥ धारणेपालनेचैवपोषणेचयथैवहि ॥ ११ ॥ किंकुर्याद्विषमार्थेतुपितापुत्रेचवैतथा ॥ अत्रप्रधानंकर्मैवमामेवंबु
द्धिराश्रिता ॥ १२ ॥ द्वैविध्यंकर्मसम्बन्धंपापपुण्यसमुद्भवम् ॥ सत्यमेवसमाश्रित्यक्रियतेधर्मउत्तमः ॥ १३ ॥ तपोध्यानसमायुक्तंतारणायहितं
सुताः ॥ पातकंयतनायोक्तंसर्वदैवनसंशयः ॥ १४ ॥ बलेनपरिवारेणआभिजात्येनपुत्रकाः ॥ पुण्यहीनस्यपुंसोवैतद्बलंविकलायते ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उन्नतागिरिदुर्गेषुवृक्षाःसन्तिसुपुत्रकाः ॥ पतन्तिवातवेगेनसमूलास्तुघनास्तथा ॥ १६ ॥ सत्यधर्मविहीनास्तेतथायान्तियमक्षयम् ॥ साधारणः प्राणिनांचधर्मएषसुपुत्रकाः ॥ १७ ॥ येनसन्तरतेजन्तुरिहचैवपरत्रच ॥ तद्युष्माभिःपरित्यक्तंसत्यंधर्मसमन्वितम् ॥ १८ ॥ अधर्ममास्थितंपुत्रायुष्माभिःसत्यवर्जितैः ॥ सत्यधर्मतपोभ्रष्टाःपतितादुःखसागरे ॥ १९ ॥ देवाश्चसत्यसम्पन्नाःश्रेयसाचसमन्विताः ॥ तपःशान्तिदमोपेताः सुपुण्याःपापवर्जिताः ॥ २० ॥ यत्रसत्यंचधर्मश्चतपःपुण्यंतथैवच ॥ यत्रविष्णुर्हृषीकेशोजयस्तत्रप्रदृश्यते ॥ २१ ॥ तेषांसहायःसम्भूतोवासुदेवः सनातनः ॥ तस्माज्जयन्तितेदेवाःसत्यधर्मसमन्विताः ॥ २२ ॥ सहायेनबलेनैवपौरुषेणतथैवच ॥ भवन्तःकिलवैपुत्रास्तपःसत्यविवर्जिताः॥२३॥ यस्यविष्णुःसहायश्चतपश्चैवबलंतथा ॥ तस्यैवचजयोदृष्टइतिधर्मविदोविदुः ॥ २४ ॥ यूयंधर्मविहीनास्तुतपःसत्यविवर्जिताः ॥ ऐन्द्रंपदंबलेनैवप्राप्तवन्तश्चपूर्वतः ॥ २५ ॥ तपोविनामहाप्राज्ञाधर्मेणयशसाविना ॥ बलदर्पगुणैःपुत्रानप्राप्यमैन्द्रकंपदम् ॥ २६ ॥ प्राप्याप्यैन्द्रंपदंपुत्रास्ततोभ्रष्टाभवन्तिहि ॥ तस्माद्यूयंप्रकुर्वन्तुतपःपुत्राःसमन्विताः ॥ २७ ॥ अविरोधेनसंयुक्ताज्ञानध्यानसमन्विताः ॥ वैरंचैवनकर्तव्यंकेशवेनसमंकदा ॥ २८ ॥ एवंविधायदापुत्रायूयंधन्याभविष्यथ ॥ परांसिद्धितदासर्वेप्रयास्यथनसंशयः ॥ २९ ॥ एवंसम्भाषितास्तेतुकश्यपेनमहात्मना ॥ समाकर्ण्यपितुर्वाक्यंदानवास्तेमहौजसः ॥ ३० ॥ प्रणम्यकश्यपंभक्त्यासमुत्थायत्वरान्विताः ॥ सुमन्त्रंचक्रिरेदैत्याःपरस्परसमाहिताः॥ ३१ ॥ हिरण्यकशिपूराजातानुवाचाथदानवान् ॥ तपश्चैवकरिष्यामोदुष्करंसर्वदायकम् ॥ ३२ ॥ हिरण्याक्षस्तदोवाचकरिष्येदारुणंतपः ॥ ततोबलेनत्रैलोक्यंग्रहीष्येनात्रसंशयः ॥ ३३ ॥रणेनिर्जित्यगोविन्दंतमिमंपापचेतसम् ॥ व्यापाद्यदेवताःसर्वाःपदमैन्द्रंव्रजाम्यहम् ॥ ३४ ॥ बलिरुवाच ॥ एवंनयुज्यतेकर्तुंयुष्माभिर्दितिजेश्वराः ॥ विष्णुनासहयद्वैरंतद्वैरंनाशकारणम् ॥ ३५ ॥ दानधर्मैस्तथापुण्यैस्तपोभिर्यज्ञयाजनैः ॥ तमाराध्यहृषीकेशंसुखंगच्छन्तिमानवाः ॥ ३६ ॥ हिरण्यकशिपुरुवाच ॥ अहमेवंनकरिष्यहरेराराधनंकदा ॥ स्वभावंतुपरित्यज्यशत्रुसेवाप्रचर्यते ॥ ३७ ॥ मरणादधिकंतंतुमानयन्तिहिपण्डिताः ॥ विष्णोःसेवानवैकार्यामयाचान्यैश्चदानवः ॥ ३८ ॥ तमुवाचमहात्मानंबलिःपितामहंपुनः ॥ धर्मशास्त्रेषुयद्दृष्टंमुनिभिस्तन्त्रवेदिभिः ॥ ३९ ॥ राजनीतियुतंमन्त्रंशत्रोश्चैवप्रधानतः ॥ हीनमात्मानमाज्ञायरिपुंतंबलिनंतथा ॥ ४० ॥ तस्यपार्श्वेप्रगत्वैवजयकालंप्रतीक्षयेत् ॥ दीपच्छायांसमाश्रित्यतमोवसतिसर्वदा ॥ ४१ ॥ स्नेहंदशागतंप्रेक्ष्यदीपस्यापिमहाबलम् ॥ प्रकाशंयातिवेगेनतमश्चवर्द्धतेपुनः ॥ ४२ ॥ तथाप्रसादयेच्छन्नःस्नेहंनिर्दिश्यतत्त्वतः ॥ स्नेहंकृत्वासुरैःसार्द्धंधर्मभावैःसुरद्विपः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ ४३ ॥ पूर्वमुक्तंसुमन्त्रंतुमुनिनाकश्यपेनहि ॥ तेनमन्त्रेणराजेन्द्रकुरुकार्यंस्वमात्मवन् ॥ ४४ ॥ तस्यतद्वचनंश्रुत्वाप्राहदैत्यःप्रताप
वान् ॥ पौत्रनैवंकरिष्येऽहंमानभङ्गंतथात्मनः ॥ ४५ ॥ अन्येचबान्धवाःसर्वेतमूचुर्नयपण्डितम् ॥ बलिनोक्तंचयत्पुण्यंदेवतानांप्रियङ्करम् ॥४६॥
शक्रमानकरंप्रोक्तंदानवानांभयङ्करम् ॥ करिष्यामोवयंसर्वेतपएवमनुत्तमम् ॥ ४७ ॥ तपसानिर्जित्यदेवान्हरिष्यामःस्वकंपदम् ॥ एवमामन्त्र्य
तेसर्वेनिराकृत्यबलिंतदा ॥ ४८ ॥ विष्णोःसार्द्धमहावैरंहृदिकृत्वामहासुराः ॥ तपश्चक्रुस्ततःसर्वेगिरिदुर्गेषुसानुषु ॥ ४९ ॥ एवंतेदानवाःस
र्वेत्यक्तरागाःसुनिश्चिताः ॥ कामक्रोधविहीनाश्चनिराहाराजितक्लमाः ॥ ५० ॥ इतिश्रीपाद्मपुराणेभूमिखंण्डेदैत्यतपश्चर्यावर्णनंनामदशमोऽध्यायः
॥ १० ॥ ऋषयऊचुः ॥ सर्वज्ञेनत्वयाप्रोक्तंदैत्यदानवसङ्गरम् ॥ इदानींश्रोतुमिच्छामःसुव्रतस्यमहात्मनः ॥ १ ॥ कस्यपुत्रोमहाप्राज्ञःकस्यगो
त्रसमुद्भवः ॥ किंतपस्तस्यविप्रस्यकथमाराधितोहरिः ॥ २ ॥ सूतउवाच ॥ कथाप्रज्ञाप्रभावेनपूर्वमेवयथाश्रुता ॥ तथाविप्राःप्रवक्ष्यामिसुव्रत
स्यमहात्मनः ॥ ३ ॥ चरितंपावनंदिव्यंवैष्णवंश्रेयआवहम् ॥ भवतामग्रतःसर्वंविष्णोश्चैवप्रसादतः ॥ ४ ॥ पूर्वकल्पेमहाभागाःसुक्षेत्रेपापनाशने
रेवातीरेसुपुण्येचतीर्थेवामनर्नसंज्ञके ॥ ५ ॥ कौशिकस्यकुलेजातःसोमशर्माद्विजोत्तमः ॥ सतुपुत्रविहीनस्तुबहुदुःखसमन्वितः ॥ ६ ॥ दारिद्र्येण
सदुःखेनसर्वदैवप्रपीडितः ॥ पुत्रोपायंधनस्यापिदिवारात्रौप्रचिन्तयेत् ॥ ७ ॥ एकदातुप्रियातस्यसुमनानामसुव्रता ॥ भर्तारंचिन्तयोपेतमधोमु
खमलक्षयत् ॥ ८ ॥ समालोक्यतदाकान्तंतमुवाचतपस्विनी ॥ दुःखजालैरसङ्ख्यैस्तुतवचित्तंप्रधर्षितम् ॥९॥ व्यामोहेनप्रमूढोऽसित्यजचिन्तांमहा
मते ॥ ममदुःखंसमाचक्ष्वस्वस्थोभवसुखंव्रज ॥ १० ॥ नास्तिचिन्तासमंदुःखंकायशोषणमेवहि ॥ यश्चिन्तांत्यज्यवर्तेतससुखेनप्रमोदते ॥ ११ ॥
चिन्तायाःकारणंविप्रकथयस्वममाग्रतः ॥ प्रियावाक्यंसमाकर्ण्यसोमशर्माब्रवीत्प्रियाम् ॥ १२ ॥ सोमशर्मोवाच ॥ इच्छयाचिन्तितंभद्रेचिन्तादुः
खस्यकारणम् ॥ तत्सर्वंतुप्रवक्ष्यामिश्रुत्वाचैवावधार्यताम् ॥ १३ ॥ नजानेकेनपापेनधनहीनोऽस्मिसुव्रते ॥ तथापुत्रविहीनश्चएतद्दुःखस्यकार
णम् ॥ १४ ॥ ॥ सुमनोवाच ॥ श्रूयतामभिधास्यामिसर्वसन्देहनाशनम् ॥ स्वरूपमुपदेशस्यसर्वविज्ञानदर्शनम् ॥ १५ ॥ लोभःपाप
स्यबीजंहिमोहोमूलंचतस्यहि ॥ असत्यंतस्यवैस्कन्धोमायाशाखासुविस्तरा ॥ १६ ॥ दम्भकौटिल्यपत्राणिकुबुद्ध्यापुष्पितःसदा ॥ अनृतं[3]तं
स्यसौगन्ध्यंफलमज्ञानमेवच ॥ १७ ॥ छद्मपाखण्डचौर्येर्ष्याःक्रूराःकूटाश्चपापिनः ॥ पक्षिणोमोहवृक्षस्यमायाशाखासमाश्रिताः ॥ १८ ॥

१ 'चरित्रमितिशेषः' इ० पा० । २ 'चामरकण्टके' इ० पा० । ३ 'हननं' इति 'नृशंसं' इ० च पाठभेदौ ।

CC-0. In Public Domain. Digitization by eGangotri

अज्ञानंसुफलंतस्यरसोऽधर्मः फलस्यहि ॥ तृष्णोदकेनसंवृद्धाऽश्रद्धातस्यद्रवः प्रिय ॥ १९ ॥ अधर्मस्तुरसस्तस्यउत्कटोमधुरायते ॥ यादृशैश्च
फलैश्चैवसुफलोलोभपादपः ॥ २० ॥ अस्यच्छायांसमाश्रित्ययोनरः परितुष्यते ॥ फलानितस्यचाश्नातिसुपक्वानिदिनेदिने ॥ २१ ॥ फलानां
तुरसेनापिअधर्मेणतुपालितः ॥ ससन्तुष्टोभवेन्मर्त्यः पतनायाभिगच्छति ॥ २२ ॥ तस्माच्चिन्तांपरित्यज्यपुमाँल्लोभंनकारयेत् ॥ धनपुत्रकल
त्राणांचिन्तामेकांनकारयेत् ॥२३॥ योहिविद्वान्भवेत्कान्तमूर्खाणांपथमेतिहि ॥ मूर्खश्चिन्तयतेनित्यंकथमर्थंममैवहि ॥ २४ ॥ सुभार्यामिहविन्दा
मिकथंपुत्रानहंलभे ॥ एवंचिन्तयतेनित्यंदिवारात्रौविमोहितः ॥ २५ ॥ क्षणमेकंप्रपश्येतचिन्तामध्येमहत्सुखम् ॥ पुनश्चैतन्यमायातिमहादुः
खेनपीडयते ॥ २६ ॥ चिन्तामोहौपरित्यज्यअनुवर्तस्वचद्विज ॥ संसारेनास्तिसम्बन्धः केनसार्धंमहामते ॥ २७ ॥ मित्राणिबान्धवाः पुत्राः पितृ
मातृसभृत्यकाः ॥ सम्बन्धिनोभवन्त्येवकलत्राणितथैवच ॥ २८ ॥ सोमशर्मोवाच ॥ सम्बन्धः कीदृशोभद्रेतथाविस्तरतोवद ॥ येनसम्बन्धि
नः सर्वेधनपुत्रादिबान्धवाः ॥ २९ ॥ सुमनोवाच ॥ ऋणसम्बन्धिनः केचित्केचिन्न्यासापहारकाः ॥ लाभप्रदाभवन्त्येकेउदासीनास्तथापरे
॥ ३० ॥ भेदैश्चतुर्भिर्जायन्तेपुत्रमित्रस्त्रियस्तथा ॥ भार्यापिताचमाताचभृत्याः स्वजनबान्धवाः ॥ ३१ ॥ स्वेनस्वेनहिजायन्तेसम्बन्धेनमहीतले ॥
न्यासापहारभावेनयस्ययेनकृतंभुवि ॥ ३२ ॥ न्यासस्वामीभवेत्पुत्रोगुणवान्रूपवान्भुवि ॥ येनैवापहृतंन्यासंतस्यगेहेनसंशयः ॥ ३३ ॥ न्या
सापहरणाद्दुःखंसदत्त्वादारुणंगतः ॥ न्यासस्वामीसुपुत्रोऽभून्न्यासापहारकस्यच ॥ ३४ ॥ गुणवान्रूपवांश्चैवसर्वलक्षणसंयुतः ॥ भक्तिंतुदर्शयंस्तस्यपु
त्रोभूत्वादिनेदिने ॥ ३५ ॥ प्रियवाङ्मधुरोरोगीबहुस्नेहंविदर्शयन् ॥ स्वीयंद्रव्यंसमुद्धृत्यप्रीतिमुत्पाद्यचोत्तमाम् ॥ ३६ ॥ यथायेनप्रदत्तंस्यान्न्यासस्य
हरणात्पुरा ॥ दुःखमेवमहाभागदारुणंप्राणनाशनम् ॥३७॥ तादृशंतस्यसौहृद्यात्पुत्रोभूत्वामहागुणैः ॥ अल्पायुश्चतथाभूत्वामरणंचोपगच्छति ॥३८॥
दुःखंदत्त्वाप्रयात्येवंभूत्वाभूत्वापुनः पुनः ॥ यदाहापुत्रपुत्रेतिप्रलापंहिकरोतिसः ॥ ३९ ॥ तदाहास्यंकरोत्येवकस्यपुत्रोहिकः पिता ॥ अनेनापहृतंन्यासं
मदीयस्योपकारणम् ॥ ४० ॥ द्रव्यापहरणेनापिनमेप्राणागताः किल ॥ दुःखेनमहताचैवअसह्येनचवैपुरा ॥ ४१ ॥ तथादुःखंप्रदत्त्वाहंद्रव्यमुद्धृत्यचो
त्तमम् ॥ गन्तास्मिसुभृशंचाद्यकस्याहंसुतईदृशः ॥४२ ॥ नचैषमेपितापुत्रः पूर्वमेवनकस्यचित् ॥ पिशाचत्वंमयादत्तमस्यैवेतिदुरात्मनः ॥४३॥ एवमु
क्त्वाप्रयात्येवंतंप्रहस्यपुनः पुनः ॥ प्रयात्यनेनमार्गेणदुःखंदत्त्वासुदारुणम् ॥४४॥ एवंन्यासंसमुद्धर्तुंपुत्राः कान्ताभवन्तिवै ॥ संसारेदुःखबहुलादृश्यन्ते
यत्रतत्रच ॥४५॥ ऋणसम्बन्धिनः पुत्रान्प्रवक्ष्यामितवाग्रतः ॥४६॥ इतिश्रीपाद्मपुराणेभूमिखण्डेसुव्रतोपाख्यानेएकादशोऽध्यायः ॥११॥ सुमनोवाच ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऋणसम्बन्धिनंपुत्रंप्रवक्ष्यामितवाग्रतः ॥ ऋणंयस्यगृहीत्वायःप्रयातिमरणंकिल ॥१॥अर्थदातासुतोभूत्वाभ्राताचाथपिताप्रिया॥मित्ररूपेणवर्तेतअति
दुष्टःसदैवसः॥२॥गुणंनैवप्रपश्येतसक्रूरोनिष्ठुराकृतिः ॥ जल्पतेनिष्ठुरंवाक्यंसदैवस्वजनेषुच ॥ ३ ॥ मिष्टंमिष्टंसमश्नातिभोगान्भुङ्क्तेचनित्यशः ॥
द्यूतकर्मरतोनित्यंचौरकर्मणिसस्पृहः॥४॥गृहद्रव्यंबलाद्भुङ्क्तेवार्यमाणःसकुप्यति॥ पितरंमातरंचैवकुत्सतेचदिनेदिने॥५॥द्रावकस्त्रासकश्चैववहुनिष्ठुरज
ल्पकः ॥ एवंभुक्त्वाऽथतद्द्रव्यंसुखेनपरितिष्ठति ॥ ६ ॥ जातकर्मादिभिर्बाल्येद्रव्यंगृह्णातिदारुणः ॥ पुनर्विवाहसम्बन्धान्नानाभेदैरनेकधा ॥ ७ ॥
एवंसञ्जायतेद्रव्यमेवमेतद्ददात्यपि ॥ गृहक्षेत्रादिकंसवममैवहिनसंशयः ॥ ८ ॥ पितरंमातरंचवहिनस्त्येवदिनेदिने ॥ भुसुण्डैर्मुसलैश्चैवसर्वघातैः
सुदारुणैः ॥ ९ ॥ मृतेतुतस्मिन्पितरिमातर्येवातिनिष्ठुरः ॥ निःस्नेहोनिष्ठुरश्चैवजायतनात्रसंशयः ॥ १० ॥ श्राद्धकर्माणिदानानिनकरोतिक
दैवसः ॥ एवंविधाश्चवैपुत्राःप्रभवन्तिमहीतले ॥ ११ ॥ रिपुंपुत्रंप्रवक्ष्यामितवाग्रेद्विजपुङ्गव ॥ बाल्येवयसिसम्प्राप्तेरिपुत्वेवर्ततेसदा ॥ १२ ॥
पितरंमातरंचैवक्रीडमानोहिताडयेत् ॥ ताडयित्वाप्रयात्येवप्रहस्यैवपुनःपुनः ॥ १३ ॥ पुनरायातिसन्त्रस्तःपितरंमातरंप्रति ॥ सक्रोधोवर्ततेनित्यं
कुत्सतेचपुनःपुनः ॥ १४ ॥ एवंसवततनित्यंवैरकर्मणिसर्वदा ॥ पितरंमारयित्वाचमातरंचततःपुनः ॥ १५ ॥ प्रयात्येवंसदुष्टात्मापूर्ववैरानुभा
वतः ॥ अथातःसम्प्रवक्ष्यामियस्माल्लभ्यंभवेत्प्रियम् ॥ १६ ॥ जातमात्रःप्रियंकुर्याद्बाल्येलालनक्रीडनैः ॥ वयःप्राप्यप्रियंकुर्यान्मातापित्रोरन
न्तरम् ॥ १७ ॥ भक्त्यासन्तोषयेन्नित्यंतावुभौपरितोषयेत् ॥ स्नेहेनवचसाचैवप्रियसम्भाषणेनच ॥ १८ ॥ मृतेगुरौसमाज्ञायस्नेहेनरुदतेपुनः ॥
श्राद्धकर्माणिसर्वाणिपिण्डदानादिकांक्रियाम् ॥ १९ ॥करोत्येवसुदुःखार्तस्तेभ्योयात्रांप्रयच्छति ॥ ऋणत्रयान्वितःस्नेहाद्भुञ्जापयतिनित्यशः॥२०॥
यस्माल्लभ्यंभवेत्कान्तप्रयच्छतिनसंशयः ॥ पुत्रोभूत्वामहाप्राज्ञअनेनविधिनाकिल ॥ २१ ॥ उदासीनंप्रवक्ष्यामितवाग्रेप्रियसाम्प्रतम् ॥ उदा
सीनेनभावेनसदैवपरिवर्तते ॥ २२ ॥ ददातिनैवगृह्णातिनचकुप्यतितुष्यति ॥ नोवाददातिसन्त्यज्यउदासीनोद्विजोत्तम ॥ २३ ॥ तवाग्रे
कथितंसर्वंपुत्राणांगतिरीदृशी ॥ यथापुत्रस्तथाभार्यापितामाताऽथबान्धवाः ॥ २४ ॥ भृत्याश्चान्येसमाख्याताःपशवस्तुरगास्तथा ॥ गजामहिष्यो
दासाश्चऋणसम्बन्धिनस्त्वमी ॥ २५ ॥ गृहीतंनऋणंतेनआवाभ्यांतुनकस्यचित् ॥ न्यासमेवंनकस्यापिकृतंवैपूर्वजन्मनि ॥ २६ ॥ धारयावोन ॥ १३ ॥
कस्यापिऋणंकान्तशृणुष्वहि ॥ नवैरमस्तिकेनापिपूर्वजन्मनिवैकृतम् ॥ २७ ॥ आवाभ्यांहिनविप्रेन्द्रनत्यक्तंहितथापते ॥ एवंज्ञात्वाशमंगच्छत्य
जचिन्तामनर्थकीम् ॥ २८ ॥ कस्यपुत्राःप्रियाभार्याकस्यस्वजनबान्धवाः ॥हृतंनचैवकस्यापिनैवदत्तंत्वयापुनः ॥ २९ ॥ कथंहिधनमायाति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विस्मयंव्रजमाधव ॥ प्राप्तव्यमेवयत्रैवभवेद्द्रव्यंद्विजोत्तम ॥३०॥ अनायासेनहस्तेहितस्यैवपरिजायते ॥ यत्नेनमहताचैवद्रव्यंरक्षतिमानवः॥ ३१ ॥
व्रजमानोव्रजत्येवधनंतत्रैवतिष्ठति ॥ एवंज्ञात्वाशमंगच्छजहिचिन्तामनर्थकीम् ॥ ३२ ॥ कस्यपुत्राःप्रियाभार्याकस्यस्वजनबान्धवाः ॥ कःकस्य
नास्तिसंसारेअसम्बन्धाद्द्विजोत्तम ॥ ३३ ॥ महामोहेनसंमूढामानवाःपापचेतसः ॥ इदंगृहमयंपुत्रइमानार्योममैवहि ॥ ३४ ॥ अनृतंदृश्यतेका
न्तसंसारस्यहिबन्धनम् ॥ एवंसम्बोधितोदेव्याभार्ययाप्रिययातदा ॥ ३५ ॥ पुनःप्राहप्रियांभार्यांसुमनांज्ञानवादिनीम् ॥ ३६ ॥ सोमश
र्मोवाच ॥ सत्यमुक्तंत्वयाभद्रेसर्वसन्देहनाशनम् ॥ तथापिवंशमिच्छन्तिसाधवःसत्यपण्डिताः ॥ ३७ ॥ यथापुत्रस्यमेचिन्ताधनस्यचतथा
प्रिये ॥ येनकेनाप्युपायेनपुत्रमुत्पादयाम्यहम् ॥ ३८ ॥ सुमनोवाच ॥ पुत्रेणलोकाञ्जयतिपुत्रस्तारयतेकुलम् ॥ सत्पुत्रेणमहाभागपितामाताच
जन्तवः ॥ ३९ ॥ एकःपुत्रोवरोविद्वान्बहुभिर्निर्गुणैस्तुकिम् ॥ एकस्तारयतेवंशमन्येसन्तापकारकाः ॥ ४० ॥ पूर्वमेवमयाप्रोक्तमन्येसम्बन्धगा
मिनिः ॥ पुण्येनप्राप्यतेपुत्रःपुण्येनप्राप्यतेकुलम् ॥ ४१ ॥ सुगर्भःप्राप्यतेपुण्यैस्तस्मात्पुण्यंसमाचार ॥ जातस्यमृतिरेवास्तिजन्मएवमृतस्यच
॥ ४२ ॥ सुजन्मप्राप्यतेपुण्यैर्मरणंतुतथैवच ॥ सुखंधनचयःकान्तभुज्यतेपुण्यकर्मभिः ॥ ४३ ॥ सोमशर्मोवाच ॥ पुण्यस्याचरणंब्रूहितथाजन्मा
न्यपिप्रिये ॥ सुपुण्यःकीदृशोभद्रेवदपुण्यस्यलक्षणम् ॥ ४४ ॥ सुमनोवाच ॥ आदौपुण्यंप्रवक्ष्यामियथापुण्यश्रुतंमया ॥ पुरुषोवाथवानारीयथा
नित्यंचवर्तते ॥ ४५ ॥ यथापुण्यैःसमाप्नोतिकीर्तिंपुत्रान्प्रियान्धनम् ॥ पुण्यस्यलक्षणंकान्तसर्वमेववदाम्यहम् ॥ ४६ ॥ ब्रह्मचर्येणसत्येनमख
पञ्चकवर्तनैः ॥ दानेननियमैश्चापिक्षमाशौचेनवल्लभ ॥ ४७ ॥ अहिंसयासुशक्त्याचअस्तेयेनापिवर्तनैः ॥ एतैर्दशभिरङ्गैस्तुधर्ममेवंप्रपूरयेत्
॥ ४८ ॥ सम्पूर्णोजायतेधर्मोग्रासैर्भोगोयथोदरे॥ धर्मंसृजतिधर्मात्मात्रिविधेनैवकर्मणा ॥ ४९ ॥ तस्यधर्मःप्रसन्नात्मापुण्यमेवंतुप्रापयेत् ॥ यंयंचि
न्तयतेप्राज्ञस्तंतंप्राप्नोतिदुर्लभम् ॥ ५० ॥ सोमशर्मोवाच ॥ कीदृङ्मूर्तिस्तुधर्मस्यकान्यङ्गानिचभामिनि ॥ प्रीत्याकथयमेकान्तेश्रोतुंश्रद्धाप्रवर्तते
॥५१॥सुमनोवाच॥लोकेधर्मस्यवैमूर्तिःकैर्दृष्टानद्विजोत्तम ॥ अदृश्यवर्त्मासत्यात्मानदृष्टोदेवदानवैः॥५२ ॥अत्रिवंशेसमुत्पन्नोअनसूयात्मजोद्विजः॥
तेनदृष्टोमहाधर्मोदत्तात्रेयेणवैसदा॥५३॥ द्वावतौतुमहात्मानौकुर्वाणौतपउत्तमम्॥धर्मेणवर्तमानौतौतपसाचबलेनच॥५४॥इन्द्राधिकेनरूपेणप्रशस्तेन
भविष्यतः ॥ दशवर्षसहस्रंतौयावत्तुवनसंस्थितौ ॥५५॥ वायुभक्षौनिराहारौसञ्जातौशुभदर्शनौ ॥ दशवर्षसहस्रंतुतावत्कालंतपोऽर्जितम्॥५६॥सुसा
ध्यमानयोश्चैवतत्रधर्मःप्रदृश्यत ॥ पञ्चाग्निःसाध्यतेद्वाभ्यांतावत्कालंद्विजोत्तम ॥ ५७ ॥ त्रिकालंसाधितंतावन्निराहारंकृतंतथा॥जलमध्येस्थितौतावद्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्तात्रेयोयतिस्तथा ॥ ५८ ॥ दुर्वासास्तुमुनिश्रेष्ठस्तपसाचैवकर्षितः॥धर्मंप्रतिसधर्मात्माचुक्रोधमुनिपुङ्गवः ॥ ५९ ॥ क्रुद्धेसतिमहाभागतस्मिन्मुनि
वरेतदा ॥ अथधर्मःसमायातःस्वरूपेणचवैतदा ॥ ६० ॥ ब्रह्मचर्यादिभिर्युक्तस्तपोभिश्चसबुद्धिमान् ॥ सत्यंब्राह्मणरूपेणब्रह्मचर्यंतथैवच
॥ ६१ ॥ तपस्तुद्विजवर्योऽस्तिदमःप्राज्ञोद्विजोत्तमः ॥ नियमस्तुमहाप्राज्ञोदानमेवतथैवच ॥ ६२ ॥ अग्निहोत्रिस्वरूपेणह्यात्रेयंहिसमागताः ॥
क्षमाशन्तिस्तथालज्जाचाहिंसाचह्यकल्पना ॥ ६३ ॥ एताःसर्वाःसमायाताःस्त्रीरूपास्तुद्विजोत्तम ॥ बुद्धिःप्रज्ञादयाश्रद्धामेधासत्कृतिशान्तयः
॥ ६४ ॥ पञ्चयज्ञास्तथापुण्याःसाङ्गावेदास्तुतेतदा॥स्वस्वरूपधराश्चैवतेसर्वेसिद्धिमागताः॥६५॥अग्न्याधानादयःपुण्याअश्वमेधादयस्तथा॥रूपला
वण्यसंयुक्ताःसर्वाभरणभूषिताः ॥६६ ॥ दिव्यमाल्याम्बरधरादिव्यगन्धानुलेपनाः ॥ किरीटकुण्डलोपेतादिव्याभरणभूषिताः ॥ दीप्तिमन्तःसुरूपा
स्तेतेजोज्वालाभिरावृताः ॥ ६७ ॥ एवंधर्मःसमायातःपरिवारसमन्वितः ॥ यत्रतिष्ठतिदुर्वासाःक्रोधनःकालवत्तथा ॥ ६८ ॥ धर्मउवाच ॥ क
स्मात्कोपःकृतोविप्रभवांस्तपस्समन्वितः ॥ क्रोधोहिनाशयेच्छ्रेयस्तपएवनसंशयः ॥ ६९ ॥ सर्वनाशकरन्तस्मात्क्रोधंतत्रविवर्जयेत् ॥ स्वस्थोभव
द्विजश्रेष्ठउत्कृष्टंतपसःफलम् ॥ ७० ॥ दुर्वासाउवाच ॥ भवान्कोहिसमायातएतैर्द्विजवरैःसह ॥ एतानार्यःप्रतिष्ठन्तिसुरूपाःसमलङ्कृताः ॥ ७१ ॥
कथयस्वममाग्रेत्वंविस्तरेणमहामते ॥ ७२ ॥ धर्मउवाच ॥ अयंब्राह्मणरूपेणसर्वतेजःसमन्वितः ॥ दण्डहस्तःसुप्रसन्नःकमण्डलुधरस्तथा ॥ ७३ ॥
तवाग्रेब्रह्मचर्याख्यस्सोऽयंपश्यसमागतः ॥ अन्यंपश्यत्वमेवंचदीप्तिमन्तंद्विजोत्तम ॥ ७४ ॥ कपिलंपिङ्गलाक्षंचसत्यमेनंद्विजोत्तम ॥ तादृशंप
श्यधर्मात्मन्वैश्वदेवसमप्रभम् ॥७५॥ यत्तपोहित्वयाविप्रसर्वदेवसमाश्रितम् ॥ एतंपश्यमहाभागतवपार्श्वसमागतम् ॥ ७६ ॥ प्रसन्नवाग्दीप्तियुक्तः
सर्वजीवदयापरः ॥ दमएषतथाऽऽयातोयःपोषयतिसर्वदा॥७७॥ जटिलःकर्कशःपिङ्गोह्यतितीव्रोमहाप्रभुः॥ नाशकोहिसपापानांखड्गहस्तोद्विजोत्तम
॥७८॥अभिशान्तोमहापुण्योनित्यक्रियासमन्वितः॥ नियमस्तुसमायातस्तवपार्श्वेद्विजोत्तम॥७९॥ अनिर्मुक्तोमहादीप्तःशुद्धस्फटिकसंनिभः॥ पयः
कमण्डलुकरोदन्तकाष्ठधरोद्विजः॥८०॥ शौचएषसमायातोभवतःसन्निधाविह॥अतिसाध्वीमहाभागासत्यभूषणभूषिता ॥८१॥ सर्वभूषणशोभाङ्गीशु
श्रूषेयंसमागता॥अतिधीराप्रसन्नाङ्गीगौरीप्रहसितानना ॥८२॥ पद्महस्ताइयंधात्रीपद्मनेत्रासुपद्मिनी॥दिव्यैराभरणैर्युक्ताक्षमाप्राप्ताद्विजोत्तम ॥ ८३ ॥
अतिशान्तासुप्रतिष्ठाबहुमङ्गलसंयुता ॥ दिव्यरत्नकृताशोभादिव्याभरणभूषिता ॥८४॥ तवशान्तिर्महाप्राज्ञज्ञानरूपासमागता ॥ परोपकारकरणा
बहुसत्यसमाकुला ॥ ८५ ॥ मितभाषासदैवासौअकल्पातेसमागता ॥ प्रसन्नासाक्षमायुक्तासर्वाभरणभूषिता ॥ ८६ ॥ पद्मासनासुरूपासाश्यामव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्णायशस्विनी ॥ अहिंसेयंमहाभागाभवन्तंतुसमागता ॥८७॥ तप्तकाञ्चनवर्णाङ्गीरक्ताम्बरविलासिनी ॥ सुप्रसन्नासुमन्त्राचयत्रतत्रनपश्यति ॥८८॥
ज्ञानभावसमाक्रान्तापुण्यहस्तातपस्विनी॥मुक्ताभरणशोभाढ्यानिर्मलाचारुहासिनी ॥ ८९ ॥ इयंश्रद्धामहाभागपश्यपश्यसमागता ॥ बहुबुद्धिसमा
क्रान्ताबहुज्ञानसमाकुला॥९०॥सुभोगासक्तरूपासासुस्थिताचारुमङ्गला॥ सर्वैष्टध्यानसंयुक्तालोकमातायशस्विनी ॥९१॥ सर्वाभरणशोभाढ्यापीन
श्रोणिपयोधरा ॥ गौरवर्णासमायातामाल्यवस्त्रविभूषिता ॥ ९२ ॥ इयंमेधामहाप्राज्ञतवैवपरिसंस्थिता ॥ हंसचन्द्रप्रतीकाशामुक्ताहारविलम्बिनी ॥
॥ ९३ ॥ सर्वाभरणसम्भूषासुप्रसन्नामनस्विनी ॥ श्वेतवस्त्रेणसंवीताशतपत्रंशयेकृतम् ॥ ९४ ॥ पुस्तककरापङ्कजस्थाराजमानासदैवहि ॥ एषाप्रज्ञा
महाभागभाग्यवन्तंसमागता ॥ ९५ ॥ लाक्षारससमावर्णासुप्रसन्नासदैवहि ॥ पीतपुष्पकृतामालाहारकेयूरभूषणा ॥ ९६ ॥ मुद्रिकाकङ्कणोपेताक
र्णकुण्डलमण्डिता ॥ पीतेनवाससादेवीसदैवपरिराजते ॥ ९७ ॥ त्रैलोक्यस्योपकारायपोषणायाद्वितीयका ॥ यस्याःशीलंद्विजश्रेष्ठसदैवपरिकीर्ति
तम् ॥ ९८ ॥ सेयंदयासुसम्प्राप्तातवपार्श्वेद्विजोत्तम ॥ इयंवृद्धामहाप्राज्ञभावभार्यातपस्विनी ॥ ९९ ॥ ममभाताद्विजश्रेष्ठधर्मोऽहंतवसुव्रत ॥ इति
ज्ञात्वाशमंगच्छमामेवंपरिपालय ॥ १०० ॥ दुर्वासाउवाच ॥ यदिधर्मःसमायातोमत्समीपंतुसाम्प्रतम् ॥ एतन्मेकारणंब्रूहिकिंतेधर्मकरोम्यहम् ॥
॥ १ ॥ धर्मउवाच ॥ कस्मात्क्रुद्धोऽसिविप्रेन्द्रकिमेतैर्विप्रियंकृतम् ॥ तन्मेत्वंकारणंब्रूहिदुर्वासोयदिमन्यसे ॥ २॥ दुर्वासाउवाच ॥ येनाहंकुपितो
देवतदिदंकारणंशृणु ॥ दमशौचैःसुसंक्लेशैःशोधितंकायमात्मनः ॥ ३ ॥ लक्षवर्षप्रमाणंवैतपश्चर्यामयाकृता ॥ एवंपश्यसिमामेवंदयातेनप्रवर्तते ॥
॥ ४ ॥ तस्मात्क्रुद्धोऽस्मितेऽद्यैवशापमेवंददाम्यहम् ॥ एवंश्रुत्वातदातस्यतमुवाचमहामतिः ॥ ५ ॥ धर्मउवाच ॥ मयिनष्टेमहाप्राज्ञलोको
नाशंसमेष्यति ॥ दुःखमूलमहंतातनिकर्शामिभृशंद्विज ॥ ६ ॥ सौख्यंपश्चादहंदद्मियदिसत्यंनमुञ्चति ॥ पापोऽयंसुखमूलस्तुपुण्यंदुःखेनलभ्यते ॥
॥ ७ ॥ पुण्यमेवंप्रकुर्वाणःप्राणीप्राणान्विमुञ्चति ॥ महत्सौख्यंददाम्येवंपरत्रचनसंशयः ॥ ८ ॥ दुर्वासाउवाच ॥ सुखंयेनाप्यतेतेनपरंदुःखंप्रप
द्यते ॥ तत्तुमर्त्यःपरित्यज्यअन्येनापिप्रभुज्यते ॥ ९ ॥ तत्सुखंकोविजानातिनिश्चयंनैवपश्यति ॥ तच्छ्रेयोनैवपश्यामिअन्याय्यंहिकृतंतव ॥
॥ ११० ॥ येनकायेनक्रियतेभुज्यतेनैवतत्सुखम् ॥ अन्येनक्रियतेक्लेशमन्येनापिप्रभुज्यते ॥ ११ ॥ तत्सुखंकोविजानातिचान्यायंधर्ममेववा॥
अन्येनक्रियतेक्लेशमन्येनापिसुखंपुनः ॥ १२ ॥ भुनक्तिपुरुषोधर्मतत्सर्वंश्रेयसायुतम् ॥ पुण्यंचैवअनेनापिअनेनफलमश्नुते ॥ १३ ॥ क्रिय
माणंपुनःपुण्यमन्येनपरिभुज्यते ॥ तत्सर्वंहिसुखंप्रोक्तंयत्तथायस्यलक्षणम् ॥ १४ ॥ धर्मशास्त्रोदितंचैवकृतंसर्वत्रनान्यथा ॥ येनकायेनकुर्वन्ति

CC-0. In Public Domain. Digitization by eGangotri

तेनदुःखंसहन्तिते ॥ १५ ॥ परत्रतेनभुञ्जन्तिअनेनापितथैवच ॥ इतिज्ञात्वासधर्मात्माभवान्समवलोकयेत् ॥ १६ ॥ यथाचौरामहापापाः
स्वकायेनसहन्तिते ॥ दुःखेनदारुणंतीव्रंतथासुखंकथंनहि ॥ १७ ॥ धर्मउवाच ॥ येनकायेनपापाश्चसञ्चरन्तिहिपातकम् ॥ तेनपीडांसहन्त्ये
वपातकस्यहितत्फलम् ॥ १८ ॥ दण्डमेकंपरंदृष्टंधर्मशास्त्रेषुपण्डितैः ॥ तंधर्मपूर्वकंविद्धिएतैर्न्यायैस्त्वमेवहि ॥ १९ ॥ दुर्वासाउवाच ॥ एवंन्यायंनम
न्येऽहंतथैवशृणुधर्मराट् ॥ शापत्रयंप्रदास्यामिक्रुद्धोऽहंतवनान्यथा ॥१२०॥ धर्मउवाच॥ यदाक्रुद्धोमहाप्राज्ञमामेवहिक्षमस्वच ॥ नैवक्षमसिविप्रेन्द्र
दासीपुत्रंहिमांकुरु॥२१॥राजाहंतुप्रकर्तव्यश्चाण्डालश्चमहामुने॥प्रसादसुमुखोविप्रप्रणतस्यसदैवहि ॥२२॥ दुर्वासाश्चततःक्रुद्धोधर्मंचैवशशापह ॥२३॥
दुर्वासाउवाच ॥ राजाभवत्वंधर्माद्यदासीपुत्रश्चनान्यथा ॥ गच्छचाण्डालयोनिंचधर्मत्वंस्वेच्छयाव्रज ॥ २४ ॥ एवंशापत्रयंदत्त्वागतोऽसौद्विजस
त्तमः ॥ अनेनापिप्रसङ्गेनदृष्टोधर्मःपुराकिल ॥ २५ ॥ सोमशर्मोवाच ॥ धर्मस्तुकीदृशोजातस्तेनशप्तोमहात्मना ॥ तद्रूपंतस्यमेब्रूहियदिजानासि
भामिनी ॥ २६ ॥ सुमनोवाच ॥ भरतानांकुलेजातोधर्मोभूत्वायुधिष्ठिरः ॥ विदुरोदासीपुत्रस्तुअन्यंचैववदाम्यहम् ॥ २७ ॥ यदाराजाहरिश्च
न्द्रोविश्वामित्रेणकर्षितः ॥ तदाचाण्डालतांप्राप्तःसहिधर्मोमहामतिः ॥ २८ ॥ एवंकर्मफलंभुक्तंधर्मेणापिमहात्मना ॥ दुर्वाससोहिशापाद्वैसत्यमुक्तं
तवाग्रतः ॥ १२९ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेसोमशर्माख्यानेसोमशर्मसुमनासंवादेद्वादशोऽध्यायः ॥ १२ ॥ सोमशर्मोवाच ॥ लक्षणंब्रह्मचर्य
स्यतन्मेविस्तरतोवद ॥ कीदृशंब्रह्मचयचयदिजानासिभामिनी ॥ १ ॥ सुमनोवाच ॥ नित्यंसत्येरतिर्यस्यपुण्यात्मातुष्टतांव्रजेत् ॥ ऋतौप्राप्ते
व्रजेन्नारींस्वीयांदोषविवर्जितः ॥ २ ॥ स्वकुलस्यसदाचारंकदानैवविमुञ्चति ॥ एतदेवसमाख्यातंगृहस्थस्यद्विजोत्तम ॥ ३ ॥ ब्रह्मचर्यंमयाप्रोक्तं
गृहिणामुत्तमंकिल ॥ यतीनांतुप्रवक्ष्यामितन्मयागदितंशृणु ॥४॥ दमसत्यसमायुक्तःपापाद्भीतस्तुसर्वदा ॥ भार्यासङ्गंवर्जयित्वाध्यानज्ञानप्रतिष्ठितः
॥ ५ ॥ यतीनांब्रह्मचर्यंचसमाख्यातंतवाग्रतः ॥ तपएवप्रवक्ष्यामितन्मेनिगदतःशृणु ॥ ६ ॥ आचारेणप्रवर्तेतकामक्रोधविवर्जितः ॥ प्राणिना
मुपकारायसंस्थितउद्यमावृतः ॥ ७ ॥ तपएवंसमाख्यातंसत्यमेवंवदाम्यहम् ॥ परद्रव्येष्वलोलुप्त्वंपरस्त्रीषुतथैवच ॥ ८ ॥ दृष्टामतिर्नयस्यस्यात्स
सत्यःपरिकीर्तितः ॥ दानमेवप्रवक्ष्यामियेनजीवन्तिमानवाः ॥ ९ ॥ आत्मसौख्यंप्रतीच्छेद्यःसइहैवपरत्रवा ॥ अन्नस्यापिमहादानंसुखस्यैवध्रुव
स्यंवा ॥ १० ॥ ग्रासमात्रंतथादेयंक्षुधार्तायनसंशयः ॥ दत्तेसतिमहत्पुण्यममृतंसोऽश्नुतेसदा ॥ ११ ॥ दिनेदिनेप्रदातव्यंयथाविभवसम्भवम् ॥
तृणंशय्यांचवचनंगृहच्छायांसुशीतलाम् ॥ १२ ॥ भूमिमपस्तथाचान्नंप्रियवाक्यमनुत्तमम् ॥ आसनंवचनालापंकौटिल्येनविवर्जितम् ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मनोजीवनार्थायनित्यमेवकरोतियः ॥ देवान्पितॄन्समभ्यर्च्यएवंदानंददातियः ॥ १४ ॥ इहैवमोदतेऽसौवैपरत्रहितथैवच ॥ अवन्ध्यंदिवसं
योवैदानाध्ययनकर्मभिः ॥ १५ ॥ प्रकुर्यान्मानुषोभूत्वासदेवोनात्रसंशयः ॥ नियमंचप्रवक्ष्यामिधर्मसाधनमुत्तमम् ॥ १६ ॥ देवानांब्राह्मणा
नांचपूजास्वभिरतोहियः ॥ नित्यंनियमसंयुक्तोदानव्रतेषुसुव्रत ॥ १७ ॥ उपकारेषुपुण्येषुनियमोऽयंप्रकीर्तितः ॥ क्षमारूपंप्रवक्ष्यामिश्रूयतांद्वि
जसत्तम ॥ १८ ॥ पराक्रोशंहिसंश्रुत्यताडितसतिकेनचित् ॥ क्रोधंनचैवगच्छेत्तुताडितोनहिताडयेत् ॥ १९ ॥ सहिष्णुःस्यात्सधर्मात्मानहिरागं
प्रयातिच ॥ समश्नातिपरंसौख्यमिहचामुत्रवापिच ॥ २० ॥ एवंक्षमासमाख्याताशौचमेवंवदाम्यहम् ॥ सबाह्याभ्यन्तरेयोवैशुद्धोरागविवर्जितः
॥ २१ ॥ स्नानाचमनकैरेवव्यवहारेणवर्तते ॥ शौचमेवंसमाख्यातमहिंसांतुवदाम्यहम् ॥ २२ ॥ तृणमपिविनाकार्यंछेत्तव्यंनविजानता ॥
अहिंसानिरतोभूयाद्यथात्मनितथापरे ॥ २३ ॥ शान्तिमेवप्रवक्ष्यामिशान्त्यासुखंसमश्नुते ॥ शान्तिरेवप्रकर्तव्याक्लेशान्नैवपरित्यजेत् ॥ २४ ॥
भूतवैरंविसृज्यैवमनएवंप्रकारयेत् ॥ एवंशान्तिःसमाख्याताअस्तेयंतुवदाम्यहम् ॥ २५ ॥ परस्वंनैवहर्तव्यंपरजायातथैवच ॥ मनोभिर्वचनैःकायै
र्मनएवंप्रकारयेत् ॥ २६ ॥ दममेवप्रवक्ष्यामितवाग्रेद्विजसत्तम ॥ दमनादिन्द्रियाणांवैमनसोऽपिविकारिणः ॥ २७ ॥ औद्धत्यंनाशयेत्तेषांसचैत
न्योवशीतदा ॥ शुश्रूषांतुप्रवक्ष्यामिधर्मशास्त्रेषुयादृशी ॥ २८ ॥ पूर्वाचार्यैर्यथाप्रोक्तातामेवंप्रवदाम्यहम् ॥ वाचादेहेनमनसागुरुकार्यंप्रसाधयेत
॥ २९ ॥ जायतेऽनुग्रहोयत्रशुश्रूषासानिगद्यते ॥ साङ्गोधर्मःसमाख्यातस्तवाग्रेद्विजसत्तम ॥ ३० ॥ अन्यच्चतेप्रवक्ष्यामिश्रोतुमिच्छसियत्पते ॥
ईदृशेचापिधर्मेतुवर्ततेयोनरःसदा ॥ ३१ ॥ संसारेतस्यसम्भूतिःपुनरेवंनजायते ॥ स्वर्गंगच्छतिधर्मेणसत्यंसत्यंवदाम्यहम् ॥ ३२ ॥ एवंज्ञात्वाम
हाप्राज्ञधर्ममेवव्रजस्वहि ॥ सर्वंहिप्राप्यतेकान्तयदसाध्यंमहीतले ॥ ३३ ॥ धर्मप्रसादतस्तस्मात्कुरुवाक्यंममैवहि ॥ भार्यायास्तुवचःश्रुत्वासो
मशर्मासुबुद्धिमान् ॥ ३४ ॥ पुनःप्रोवाचतांभार्यांसुमनांधर्मवादिनीम् ॥ ३५ ॥ इतिश्रीपाद्मपुराणेपञ्चपञ्चाशत्सहस्रसंहितायांभूमिखण्डेऐन्द्रेसुम
नोपाख्यानेत्रयोदशोऽध्यायः ॥ १३ ॥ सोमशर्मोवाच ॥ एवंविधंमहापुण्यंधर्मव्याख्यानमुत्तमम् ॥ कथंजानासिभद्रेत्वंकस्माच्चैवत्वयाश्रुतम्
॥ १ ॥ सुमनोवाच ॥ भार्गवाणांकुलेजातःपितामममहामते ॥ च्यवनोनामविख्यातःसर्वज्ञानविशारदः ॥ २ ॥ तस्याहंप्रियकन्यावैप्राणादपि
चवल्लभा ॥ यत्रयत्रव्रजत्येषतीर्थारामेषुसुव्रत ॥ ३ ॥ सभासुचमुनीनांतुदेवतायतनेषुच ॥ तेनसार्द्धंव्रजाम्येकाक्रीडमानासदैवहि ॥ ४ ॥ कौशिका
न्वयसम्भूतोवेदशर्मामहामतिः ॥ पितुर्ममसखादैवादटमानःसमागतः ॥ ५ ॥ दुःखेनमहताविष्टश्चिन्तयानोमुहुर्मुहुः ॥ समागतंमहात्मानंतमु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाचपितामम ॥ ६ ॥ भवन्तंदुःखसन्तप्तमितिजानामिसुव्रत ॥ कस्माद्दुःखीभवाञ्जातस्तस्मात्त्वंकारणंवद ॥ ७ ॥ एतद्वाक्यंततःश्रुत्वाच्यवनस्यम हात्मनः ॥ तमुवाचमहात्मानंपितरंममसुव्रत ॥ ८ ॥ वेदशर्मामहाप्राज्ञःसर्वदुःखस्यकारणम् ॥ ममभार्यामहासाध्वीपातिव्रत्यपरायणा ॥ ९ ॥ अपुत्रासाहिसञ्जाताममवंशोनविद्यते ॥ एतत्तेकारणंप्रोक्तंप्रश्नितोऽस्मियतस्त्वया ॥ १० ॥ एतस्मिन्नन्तरेप्राप्तःकश्चित्सिद्धःसमागतः ॥ ममपित्रा तथातेनह्युत्थायवेदशर्मणा ॥ ११ ॥ द्वाभ्यामपिचसिद्धोऽसौपूजितोभक्तिपूर्वकैः ॥ उपहारैस्सभोज्यान्नैर्वचनैर्मधुराक्षरैः ॥ १२ ॥ द्वाभ्यामन्तर्गतं पृष्टंपूर्वोक्तंचयथात्वया ॥ उभौतौप्राहधर्मात्मासखायंपितरंमम ॥ १३ ॥ धर्मस्यकारणंसर्वंमयोक्तंतेतथाकिल ॥ धर्मेणप्राप्यतेपुत्रोधनंधान्यं तथास्त्रियः ॥ १४ ॥ ततस्तेनकृतोधर्मःसम्पूर्णंवेदशर्मणा ॥ तस्माद्धर्मात्सुसञ्जातंमहत्सौख्यंसपुत्रकम् ॥ १५ ॥ तेनसङ्गप्रसङ्गेनममैषमति निश्चयः ॥ यथाकान्ततवप्रोक्तंमयैवचपरंशुभम् ॥ १६ ॥ तस्माच्छ्रुतंमहासिद्धात्सर्वसन्देहनाशनम् ॥ विप्रधर्मंसमाश्रित्यअनुवर्त्तस्व सर्वदा ॥ १७ ॥ सोमशर्मोवाच ॥ धर्मेणकीदृशोमृत्युर्जन्मचैववदस्वमे ॥ उभयोर्लक्षणंकान्तेतत्सर्वंहिवदस्वमे ॥ १८ ॥ सुमनो वाच ॥ सत्यशौचक्षमाशान्तितीर्थपुण्यादिकैस्तथा ॥ धर्मश्चपालितोयेनतस्यमृत्युंवदाम्यहम् ॥ १९ ॥ रोगोनजायतेतस्यनचपीडा कलेवरे ॥ नश्रमोवैनचग्लानिर्नचस्वेदोभ्रमस्तथा ॥ २० ॥ दिव्यरूपधराभूत्वागन्धर्वाब्राह्मणास्तथा ॥ वेदपाठसमायुक्तागीतज्ञानवि शारदाः ॥ २१ ॥ तस्यपार्श्वंसमायान्तिस्तुतिंकुर्वन्तिचातुलाम् ॥ स्वस्थोहिआसनेयुक्तोदेवपूजारतःकिल ॥ २२ ॥ तीर्थंचलभतेप्राज्ञःस्नानार्थंधर्म तत्परः ॥अग्न्यगारेचगोस्थानेदेवतायतनेषुच॥२३॥आरामेचतडागेचयत्राश्वत्थोवटस्तथा॥ब्रह्मवृक्षंसमाश्रित्यश्रीवृक्षंचतथापुनः ॥२४॥ अश्वस्थानंस माश्रित्यगजस्थानगतोनरः ॥ अशोकंचूतवृक्षंचसमाश्रित्ययदास्थितः ॥ २५॥ सन्निधौब्राह्मणानांचराजवेश्मगतोऽथवा॥रणभूमिंसमाश्रित्यपूर्वंयत्र मृतोभवेत् ॥ २६ ॥ मृत्युस्थानानिपुण्यानिकेवलंधर्मकारणम् ॥ गोगृहंतुसुसम्प्राप्यतथाचामरकण्टकम् ॥ २७ ॥ शुद्धधर्मंकरोतिनित्यंधर्मतोधर्मव त्सलः ॥ एवंस्थानंसमाप्नोतियदामृत्युंसमाश्रितः ॥ २८ ॥ मातरंपश्यतेपुण्यंपितरंचनरोत्तमः ॥ भ्रातरंश्रेयसायुक्तमन्यंस्वजनबान्धवम् ॥ २९ ॥ बन्दिभिस्तुतथापुण्यैःस्तूयमानंपुनःपुनः ॥ पापिष्ठंनैवपश्येतमातापित्रादिकंपुनः ॥३०॥ गीतंगायन्तिगन्धर्वाःस्तुवन्तिस्तावकाःस्तवैः ॥ मन्त्रपा ठैस्तथाविप्रामातास्नेहेनपूजयेत् ॥ ३१ ॥ पितास्वजनवर्गांश्चधर्मात्मानंमहामतिम् ॥ एवंदूताःसमाख्याताःपुण्यस्थानानितेविभो ॥३२॥ प्रत्यक्षा न्पश्यतेदूतान्हास्यस्नेहसमाविलान्॥नचस्वप्नेनमोहेनह्रुदयुक्तेननैवसः ॥३३॥ धर्मराजोमहाप्राज्ञोभवन्तंतुसमाह्वयेत् ॥ एह्येहित्वंमहाभागयत्रधर्मः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सतिष्ठति ॥ ३४ ॥ तस्यमोहोनचभ्रान्तिर्नग्लानिःस्मृतिविभ्रमः ॥ जायतेनात्रसन्देहःप्रसन्नात्मासतिष्ठति ॥ ३५ ॥ ज्ञानविज्ञानसम्पन्नःस्मरन्देवं जनार्दनम् ॥ तैःसार्द्धंतुप्रयात्येवंसन्तुष्टोहृष्टमानसः ॥ ३६ ॥ एकत्वंजायतेतत्रत्यजतःस्वंकलेवरम् ॥ दशमद्वारमाश्रित्यआत्मातस्यसगच्छति ॥ ॥ ३७ ॥ शिबिकातस्यचायातिहंसयानंमनोहरम् ॥ विमानमेवचायातिहयोवागजउत्तमः ॥ ३८ ॥ छत्रेणध्रियमाणेनचामरैर्व्यजनैस्तथा ॥ वीज्यमानःसपुण्यात्मापुण्यैरेवंसमन्ततः ॥ ३९ ॥ गीयमानस्तुधर्मात्मास्तूयमानस्तुपण्डितैः ॥ बन्दिभिश्चारणैर्दिव्यैर्ब्राह्मणैर्वेदपारगैः ॥ ४० ॥ साधुभिःस्तूयमानस्तुसर्वसौख्यसमन्वितः ॥ यथादानप्रभावेनफलमाप्नोतितत्रसः ॥ ४१ ॥ आरामवाटिकामध्येसप्रयातिसुखेनवै ॥ अप्सरोभिःसमाकीर्णोदिव्याभिर्मङ्गलैर्युतः ॥ ४२ ॥ देवैःसंस्तूयमानस्तुधर्मराजंप्रपश्यति ॥ देवाश्चधर्मसंयुक्ताजग्मुःसंसुखमेवतम् ॥ ४३ ॥ एह्येहिवैमहाभागभुङ्क्ष्वभोगान्मनोऽनुगान् ॥ एवंसपश्यतेधर्मंसौम्यरूपंमहामतिम् ॥ ४४ ॥ स्वस्यपुण्यप्रभावेन भुङ्क्तेचस्वर्गमेवसः ॥ भोगक्षयात्सधर्मात्मापुनजन्मप्रयातिवै ॥ ४५ ॥ निजधर्मप्रसादात्सकुलंपुण्यंप्रयातिवै ॥ ब्राह्मणस्यसुपुण्यस्यक्षत्रियस्यतथैवच ॥ ४६ ॥ धनाढ्यस्यसुपुण्यस्यवश्यस्यैवमहामत ॥ धर्मेणमोदतेतत्रपुनःपुण्यंकरोतिसः ॥ ४७ ॥ इतिश्रीपाद्मपुराणेपञ्चपञ्चाशत्सहस्रसंहितायांभूमिखण्डेऐन्द्रेसुमनोपाख्यानेचतुर्दशोऽध्यायः ॥ १४ ॥ सोमशर्मोवाच ॥ पापिनांमरणंभद्रेकीदृशैर्लक्षणैर्युतम्॥ तन्मेत्वंविस्तराद्ब्रूहियदिजानासिभामिनि ॥ १ ॥ सुमनोवाच ॥ श्रूयतामभिधास्यामितस्मात्सिद्धाच्छ्रुतंमया ॥ पापिनांमरणेकान्तयादृशंलिङ्गमेवच ॥ २ ॥ महापातकिनांचैवस्थानंचेष्टांवदाम्यहम् ॥ विण्मूत्रामेध्यसंयुक्तांभूमिंपापसमन्विताम् ॥ ३ ॥ सतांप्राप्यसुदुष्टात्माप्राणान्दुःखेनमुञ्चति ॥ चाण्डालभूमिंसम्प्राप्यमरणंयातिदुःस्थितः ॥ ४ ॥ गर्दभाचरितांभूमिंवेश्यागेहंसमाश्रितः ॥ चर्मकारगृहंगत्वानिधनायोपगच्छति ॥ ५ ॥ अस्थिचर्मनखैःपूर्णमाश्रितंपापकिल्बिषैः ॥ तांप्राप्यचसदुष्टात्मामृत्युंयातिसुनिश्चितम् ॥ ६ ॥ अन्यांपापसमाचारांप्राप्यमृत्युंसगच्छति ॥ अथचेष्टांप्रवक्ष्यामिदूतानांतुतमिच्छताम् ॥ ७ ॥ भैरवान्दारुणान्घोरानतिकृष्णान्महोदरान् ॥ पिङ्गाक्षान्पीतनीलांश्चअतिश्वेतान्महोदरान् ॥ ८ ॥ अत्युच्चान्विकरालांश्चशुष्कमांसवसोपमान् ॥ रौद्रदंष्ट्रान्करालांश्चसिंहास्यान्सर्पहस्तकान् ॥ ९ ॥ सतान्दृष्ट्वाप्रकम्पेतखिद्यतेचमुहुर्मुहुः ॥ शिवासंनादवद्घोरान्महारावान्महामते ॥ १० ॥ मुञ्चन्तिदूतकाःसर्वेकर्णमूलेतुतस्यहि॥ गलेपाशैःप्रबद्धातेकटिंबद्धातथोदरे ॥ ११ ॥ समाघृष्यनिपात्यतेहाहेतिवदतेमुहुः ॥ म्रियमाणस्ययाचेष्टातामेवंप्रवदाम्यहम् ॥ १२ ॥ परद्रव्यापहरणंपरभार्याविडम्बन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म् ॥ ऋणंपरस्यसर्वस्वंगृहीतंयत्तुपापिभिः ॥ १३ ॥ पुनर्नैवप्रदत्तंहिलोभास्वादविमोहतः ॥ अन्यदेवंमहापापंकुप्रतिग्रहमेवच ॥ १४ ॥
कण्ठमायान्तितेसर्वेम्रियमाणस्यतस्यच ॥ यानिकानिचपापानिपूर्वमेवकृतानिच ॥ १५ ॥ आयान्तिकण्ठमूलंतेमहापापस्यनान्यथा ॥
दुःखमुत्पादयन्त्येतेकफबन्धेनदारुणम् ॥ १६ ॥ पीडाभिर्दारुणाभिस्तुकण्ठोघुरघुरायते ॥ रोदतेकम्पतेऽत्यर्थंमातरंपितरंपुनः ॥ १७ ॥ स्म
रतेभ्रातरंतत्रभार्यांपुत्रान्पुनःपुनः ॥ पुनर्विस्मरणंयातिमहापापेनमोहितः ॥ १८ ॥ तस्यप्राणानगच्छन्तिबहुपीडासमाकुलाः ॥ पततेकम्पतेचैवमू
र्च्छतेचपुनःपुनः ॥ १९ ॥ एवंपीडासमायुक्तोदुःखंभुङ्क्तेऽतिमोहितः ॥ तस्यप्राणाःसुदुःखेनमहाकष्टैःप्रचालिताः ॥ २० ॥ अपानमार्गमाश्रित्यशृ
णुकान्तप्रयान्तिते ॥ एवंप्राणीमहामुग्धोलोभमोहसमन्वितः ॥ २१ ॥ नीयतेयमदूतैस्तुतस्यदुःखंवदाम्यहम् ॥ २२॥ इतिश्रीपाद्मपुराणेभूमिखण्डेऐ
न्द्रेसुमनोपाख्यानेपापमरणविवक्षानामपञ्चदशोऽध्यायः ॥ १५ ॥ सुमनोवाच॥अङ्गारसञ्चयेमार्गेघृष्यमाणोहिनीयते॥दह्यमानःसदुष्टात्माचेष्टमानः
पुनःपुनः ॥ १ ॥ यत्रातपोमहातीव्रोद्वादशादित्यतापितः ॥ नीयतेतेनमार्गेणसन्तप्तःसूर्यरश्मिभिः ॥ २ ॥ पर्वतेष्वेवदुर्गेषुछायाहीनेषुदुर्मतिः ॥ नी
यतेतेनमार्गेणक्षुधातृष्णाप्रपीडितः ॥ ३ ॥ सदूतैर्हन्यमानस्तुगदाखड्गैःपरश्वधैः ॥ कशाभिस्ताड्यमानस्तुनिन्द्यमानस्तुदूतकैः॥४॥ततःशीतमयेमार्गे
वायुनासेव्यतेपुनः॥तेनशीतेनदुःखीसभूत्वायातिनसंशयः ॥५॥ आकृष्यमाणोदूतैस्तुनानादुर्गेषुनीयते॥ एवंपापीसदुष्टात्मादेवब्राह्मणनिन्दकः॥६॥
सर्वपापसमाचारोनीयतेयमकिङ्करैः ॥ यमंपश्यतिदुष्टात्माकृष्णाञ्जनचयोपमम् ॥ ७ ॥ तमुग्रंदारुणंभीमंभीमदूतैःसमावृतम् ॥ सर्वव्याधिसमाकीर्णं
चित्रगुप्तसमन्वितम् ॥८॥ आरूढंमहिषंदेवंधर्मराजंद्विजोत्तम ॥ दंष्ट्राकरालमत्युग्रंतस्यास्यंकालसंनिभम् ॥९॥ पीतवासंगदाहस्तंरक्तगन्धानुलेपनम्
रक्तमाल्यकृताभूषंगदाहस्तंभयङ्करम् ॥ १० ॥ एवंविधंमहाकायंयमंपश्यतिदुर्मतिः ॥ तंदृष्ट्वासमनुप्राप्तंसर्वधर्मबहिष्कृतम् ॥११॥ यमःपश्यतितंदुष्टं
पापिष्ठंधर्मकण्टकम्॥शासयेत्तुमहादुःखैःपीडाभिर्दारुणुद्रैः॥१२॥यावद्युगसहस्रान्तंतावत्कालंप्रपच्यते॥नानाविधेचनरकेपच्यतेचपुनःपुनः ॥१३॥
नारकींयातिवैयोनिंकृमिकोटिषुपापकृत्॥अमेध्येपच्यतेनित्यंहाहाभूतोविचेतनः ॥१४॥ मरणंचसपापात्माएवंयातिसुनिश्चितम् ॥ एवंपापस्यसंयो
गंभुङ्क्तेचैवसुदुर्मतिः ॥ १५ ॥ पुनर्जन्मप्रवक्ष्यामियासुयोनिषुयातिच ॥ शुनांयोनिशतंप्राप्यभुङ्क्तेवैपातकंपुनः ॥ १६ ॥ व्याघ्रोभवतिदुष्टात्मारास
भींयातिवैपुनः ॥ मार्जारशूकरींयोनिंसर्पयोनिंतथैवच ॥१७॥ नानाभेदासुसर्वासुतिर्यक्षुचपुनःपुनः ॥ पापपक्षिषुसंयातिअन्यासुमहतीषुच ॥१८॥
चाण्डालभिल्लयोनिंचपुलिन्दींयातिपापकृत्॥एतत्तेसर्वमाख्यातंपापिनांजन्मचैवहि ॥१९॥ मरणेचैवकान्ताद्यचेष्टातेषांसुदारुणा ॥ पापपुण्यसमाचा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रस्तवाग्रेकथितोमया ॥ २० ॥ अन्यदेवंप्रवक्ष्यामियदिपृच्छसिमानद ॥ २१ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेपञ्चापञ्चाशत्सहस्रसंहितायामैन्द्रेसुमनो
पाख्यानेपापपुण्यविवक्षानामषोडशोऽध्यायः ॥ १६ ॥ सोमशर्मोवाच ॥ सर्वदेविसमाख्यातंधर्मसंस्थानमुत्तमम् ॥ कथंपुत्रमहंविद्यांसर्वज्ञंगुणसंयुत
म् ॥१॥ वदत्वंमेमहाभागेयदिजानासिसुव्रते ॥ दानधर्मादिकंभद्रेपरत्रेहनसंशयः ॥२॥ सुमनोवाच ॥ वसिष्ठंगच्छधर्मज्ञंतंप्रार्थयमहामुनिम् ॥तस्मा
त्प्राप्स्यसिवैपुत्रंधर्मज्ञंधर्मवत्सलम् ॥३॥ सूतउवाच ॥ एवमुक्तेतयावाक्येसोमशर्माद्विजोत्तमः ॥ एवंकरिष्येकल्याणितववाक्यंनसंशयः ॥ ४ ॥ एव
मुक्त्वाजगामाशुसोमशर्माद्विजोत्तमः॥वसिष्ठंसर्ववेत्तारंदिव्यंतंतपतांवरम् ॥५॥ गङ्गातीरेस्थितंपुण्यमाश्रमस्थंद्विजोत्तमम् ॥तेजोज्वालासमाकीर्णंद्वि
तीयमिवभास्करम्॥६॥ राजमानंमहात्मानंब्रह्मण्यंचद्विजोत्तमम्॥ भक्त्याप्रणम्यविप्रेशंदण्डवच्चपुनःपुनः ॥७॥ तमुवाचमहातेजाब्रह्मसूनुरकल्मषः॥
उपाविशासनेपुण्येसुखेनसुमहामते ॥८॥एवमुक्त्वासयोगीन्द्रःपुनःप्राहतपोधनम्॥गृहेपुत्रेषुतेवत्सदारभृत्येषुसर्वदा ॥९॥ क्षेममस्तिमहाभागपुण्यकर्म
सुचाग्निषु ॥ निरामयोऽसिचाङ्गेषुधर्मंपालयसेसदा ॥ १० ॥ एवमुक्त्वामहाप्राज्ञःपुनःप्राहसुशर्मणम् ॥ किंकरोमिप्रियंकार्यंसुप्रियंतेद्विजोत्तम
॥११॥ एवंसम्भाष्यतंविप्रंविरराममहामुनिः॥एवमुक्तोमहाप्राज्ञस्सोमशर्मामुनिस्तदा ॥ तमुवाचमहात्मानंवसिष्ठंतपतांवरम् ॥ १२ ॥ सोमशर्मो
वाच॥भागवञ्छ्रूयतांवाक्यंसुप्रसन्नेनचेतसा॥१३॥यदिमेसुप्रियंकार्यंत्वयवमुनिपुङ्गव ॥ममप्रश्नार्थसन्देहंविच्छेदयद्विजोत्तम॥१४॥दारिद्र्यंकेनपापेन
पुत्रसौख्यंकथंनहि ॥ एपमेसंशयस्तातकस्मात्पापाद्वदस्वमे ॥ १५ ॥ महामोहेनसंमुग्धःप्रिययाबोधितोद्विज ॥ तयाहंप्रेषितस्तातववपार्श्वंसमातुरः
॥ १६ ॥ तत्सर्वंहिसमाचक्ष्वसर्वसन्देहनाशकम् ॥ मुक्तिदाताभवस्वत्वंममसंसारबन्धनात् ॥ १७ ॥ वसिष्ठउवाच॥पुत्रामित्राण्यथभ्राताभार्यास्वज
नबान्धवाः ॥ पञ्चभेदास्तुसम्बन्धात्पुरुषस्यभवन्तिते ॥ १८॥ तेतेसुमनयाप्रोक्ताःपूर्वमेवतवाग्रतः ॥ ऋणसम्बन्धिनःसर्वेतेकुपुत्राद्विजोत्तम॥१९॥
पुत्रस्यलक्षणंपुण्यंतवाग्रेप्रवदाम्यहम् ॥ पुण्यप्रसक्तोयस्यात्मासत्यधर्मरतःसदा ॥ २० ॥ शुद्धिविज्ञानसम्पन्नस्तपस्वीवाग्विदांवरः ॥ सर्वकर्म
सुधीर्धीरोवेदाध्ययनतत्परः ॥२१॥ ससर्वशास्त्रवेत्ताचदेवब्राह्मणपूजकः ॥ याजकःसर्वयज्ञानांदातात्यागीप्रियंवदः ॥२२॥ विष्णुध्यानपरोनित्यंशा
न्तोदान्तोजपीसदा॥पितृमातृपरोनित्यंसर्वस्वजनवत्सलः ॥ २३ ॥ कुलस्यतारकोविद्वान्कुलस्यपरिपोषकः ॥ एवंगुणैश्चसंयुक्तःसपुत्रःसुखदायकः
॥ २४ ॥ अन्येसम्बन्धसंयुक्ताःशोकसन्तापदायकाः ॥ एतादृशेनकिंकार्यंफलहीनेनतेनच ॥२५॥ आयान्तियान्तितेसर्वेतापंदत्त्वासुदारुणम् ॥ पुत्र
रूपेणतेसर्वेसंसारेद्विजसत्तम॥ २६ ॥ पूर्वजन्मकृतंपुण्यंयत्त्वयापरिपालितम् ॥ तत्सर्वंहिप्रवक्ष्यामिश्रूयतामद्भुतंपुनः ॥ २७ ॥ भवाञ्छूद्रोमहाप्राज्ञ

CC-0. In Public Domain. Digitization by eGangotri

पूर्वजन्मनिनान्यथा ॥ कृषिकर्त्ताज्ञानहीनोमहालोभेनसंयुतः ॥ २८ ॥ एकभार्यःसदाद्वेषीबहुपुत्रोह्यदत्तवान् ॥ धर्मंनैवविजानासिसत्यंनैवपरिश्रुतम्
॥ २९ ॥ दानंनैवत्वयादत्तंशास्त्रंनैवप्रतिश्रुतम् ॥ कृतानैवत्वयातीर्थेयात्राचैवमहामते ॥ ३० ॥ एवंकृतंत्वयाविप्रकृषिमार्गंपुनःपुनः ॥ पशूनांपालनं
सर्वगवांचैवद्विजोत्तम ॥ ३१ ॥ महिषीणांतथाश्वानांपालनंचपुनःपुनः ॥एवंपूर्वंकृतंकर्मत्वयैवद्विजसत्तम ॥ ३२॥ विपुलंचधनंतद्वल्लोभेनपरिसञ्चि
तम्॥तस्यव्ययंसुपुण्येननकृतंतुत्वयाकदा॥३३॥ पात्रेदानंनदत्तंतुदृष्ट्वादुर्बलमेवच ॥ कृपांकृत्वानदत्तंतुभवताधनमेवच ॥३४॥ गोमहिष्यादिकंसर्वंप
शूनांसञ्चितंत्वया ॥ विक्रीयचधनंविप्रसञ्चितंविपुलंत्वया ॥ ३५ ॥ तक्रंघृतंतथाक्षीरंविक्रयित्वाततोदधि ॥ दुष्कालंचिन्तितंविप्रमोहितोविष्णु
मायया ॥ ३६ ॥ कृतंमहार्घमेवात्रअन्नंब्राह्मणसत्तम ॥ निर्दयेनत्वयादानंनदत्तंतुकदाचन ॥ ३७ ॥ देवानांपूजनंविप्रभवतानकृतंकदा ॥
प्राप्यपर्वाणिविप्रेभ्योद्रव्यंनचसमर्पितम् ॥ ३८ ॥ श्राद्धकालंतुसम्प्राप्यश्रद्धयानकृतंत्वया ॥ भार्यावदतितेसाध्वीदिनमेनंसमागतम् ॥ ३९ ॥
श्वशुरस्यश्राद्धकालःश्वश्र्वाश्चैवमहामते ॥ त्वंश्रुत्वातद्वचस्तस्यागृहंत्यक्त्वापलायसे ॥ ४० ॥ धर्ममार्गंनदृष्टंतेश्रुतंनैवकदात्वया ॥ लो
भोमातापिताभ्रातालोभःस्वजनबान्धवाः ॥ ४१ ॥ पालितंलोभमेवैकंत्यक्त्वाधर्मंसदवहि ॥ तस्माद्दुःखीभवाञ्जातोदारिद्र्येणातिपीडितः ॥ ४२ ॥
दिनेदिनेमहातृष्णाहृदयेतेप्रवर्द्धते ॥ यदायदागृहेद्रव्यंवृद्धिमायातितेतदा ॥ ४३ ॥ तृष्णयादह्यमानस्तुतयात्वंवह्निरूपया ॥ रात्रौवासुप्रसुप्तस्तुनि
श्चितोहिप्रचिन्तसि ॥ ४४ ॥ दिनंप्राप्यमहामोहैर्व्यापितोऽसिसदैवहि ॥ सहस्रंलक्षंमेकोटिःकदावार्बुदमेवच ॥४५॥ भविष्यतिकदाखर्वोनिखर्वश्चा
थमेगृहे ॥ एवंसहस्रंलक्षंचकोटिरर्बुदमेवच ॥ ४६ ॥ खर्वोनिखर्वःसञ्जातस्तृष्णानैवप्रगच्छति ॥ तवकार्यंपरित्यज्यवृद्धिमायातिसर्वदा ॥ ४७ ॥
नैवदत्तंहुतंविप्रभुक्तंनैवकदात्वया ॥ खनितंभूमिमध्येतुक्षिप्तंपुत्रानजानते ॥ ४८ ॥ अन्यमेवमुपायंतुद्रव्यागमनकारणात् ॥ कुरुषेसर्वदाविप्रलो
कान्पृच्छसिबुद्धिमान् ॥ ४९ ॥ खनित्रमञ्जनंवादंधातुवादमतःपरम् ॥ पृच्छमानोभ्रमस्येकस्तृष्णयापरिमोहितः ॥ ५० ॥ स्पर्शंचिन्तयसेनित्यं
कल्पान्सिद्धिप्रदायकान्॥प्रवेशंविवराणांतुचिन्तमानःसुपृच्छसि ॥५१॥तृष्णानलेनदग्धेनसुखंनैवप्रगच्छसि॥तृष्णानलेनसन्दीप्तोहाहाभूतोविचेतनः
॥५२॥एवंमुग्धोऽसिविप्रेन्द्रगतस्त्वंकालवश्यताम्॥दारपुत्रेषुतद्द्रव्यंपृच्छमानेषुवैत्वया ॥५३॥ कथितंनैववृत्तान्तंप्राणांस्त्यक्त्वागतोयमम्॥एवंसर्वम
याऽऽख्यातंवृत्तान्तंतवपूर्वकम् ॥ ५४ ॥ अनेनकर्मणाविप्रनिर्धनोऽसिदरिद्रवान्॥संसारेयस्यसत्पुत्राभक्तिमन्तःसदैवहि ॥५५॥ सुशीलाज्ञानसम्पन्नाः
सत्यधर्मरताःसदा ॥ सम्भवन्तिगृहेतस्ययस्यविष्णुःप्रसीदति ॥५६॥ धनंधान्यंकलत्रंतुपुत्रपौत्रमनन्तकम्॥सभुङ्क्तेमर्त्यलोकेवैयस्यविष्णुःप्रसन्नवान्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ५७ ॥ विनाविष्णोःप्रसादेनदारान्पुत्रान्नचाप्नुयात् ॥ सुजन्मचकुलंविप्रतद्विष्णोःपरमंपदम् ॥ ५८ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेऐन्द्रेसुमनो
पाख्यानेसप्तदशोऽध्यायः ॥ १७ ॥ सोमशर्मोवाच ॥ पूर्वजन्मकृतंपापंत्वयाख्यातंचमेमुने ॥ शूद्रत्वेनतुविप्रेन्द्रमयैवपरिवर्जितम् ॥ १ ॥ विप्र
त्वंहिमयाप्राप्तंतत्कथंद्विजसत्तम ॥ तत्सर्वंकारणंब्रूहिज्ञानविज्ञानपण्डित ॥ २ ॥ वसिष्ठउवाच ॥ यत्त्वयाचेष्टितंपूर्वंकर्मधर्माश्रितंद्विज ॥ तदहं
सम्प्रवक्ष्यामिश्रूयतांयदिमन्यसे ॥ ३ ॥ ब्राह्मणःकश्चिदनघःसदाचारःसुपण्डितः ॥ विष्णुभक्तस्तुधर्मात्मानित्यंविष्णुपरायणः ॥ ४ ॥ यात्रा
व्याजेनतीर्थानांभ्रमत्येकःसमेदिनीम् ॥ अटमानःसमायातस्तवगेहंमहामतिः ॥ ५ ॥ याचितंस्थानमेकंवैवासार्थंद्विजसत्तम ॥ तवैवभार्ययादत्तंत्व
याचसहपुत्रकैः ॥ ६ ॥ एयतामेयतांब्रह्मन्सुखेनसुगृहेमम ॥ वैष्णवंब्राह्मणंपुण्यमित्युवाचपुनःपुनः ॥ ७ ॥ सुखेनस्थीयतामत्रगृहोऽयंतवसुव्रत॥
अद्यधन्योऽस्म्यहंपुण्यमद्यतीर्थमहंगतः ॥ ८ ॥ अद्यतीर्थफलंप्राप्तंतवाङ्घ्रिद्वयदर्शनात् ॥ गवांस्थानंवरंपुण्यंनिवासायनिवेदितम्॥९॥ अङ्गसंवा
हनंकृत्वापादौचैवप्रमर्दितौ ॥ क्षालितौचपुनस्तोयैःस्नातःपादोदकेनहि ॥१०॥ सद्योघृतंदधिक्षीरमन्नंतक्रंप्रदत्तवान् ॥ तस्मैचब्राह्मणायैवभवानित्थं
महात्मने ॥ ११ ॥ एवंसन्तोषितोविप्रस्त्वयाचसहभार्यया ॥ पुत्रैःसार्धंमहाभागोवैष्णवोज्ञानपण्डितः ॥ १२ ॥ अथप्रभातेसम्प्राप्तेदिनेपुण्ये
सुभाग्यदे ॥ आषाढस्यतुशुद्धस्यैकादशीपापनाशिनी ॥ १३ ॥ तस्मिन्दिनेसुसम्प्राप्तासर्वपातकनाशिनी ॥ यस्यांदेवोहृषीकेशोयोगनिद्रांप्रग
च्छति ॥ १४ ॥ तांप्राप्यचततोलोकास्तत्यजुर्बुद्धिपण्डिताः ॥ गृहस्यसर्वकर्माणिविष्णुध्यानरताद्विज ॥ १५ ॥ उत्सवंपरमंचक्रुर्गीतमङ्गल
वादनैः ॥ स्तुवन्तिब्राह्मणाःसर्वेवेदैःस्तोत्रैःसुमङ्गलैः ॥ १६ ॥ एवंमहोत्सवंप्राप्यसचब्राह्मणसत्तमः॥तस्मिन्दिनेस्थितस्तत्रसम्प्राप्तंसमुपोषणम् ॥
॥ १७ ॥ एकादश्यास्तुमाहात्म्यंपठितंब्राह्मणेनवै ॥ भार्यापुत्रैस्त्वयासार्द्धंश्रुतंधर्ममनुत्तमम्॥१८॥ श्रुतेतस्मिन्महापुण्येभार्यापुत्रैस्तुप्रेरितः॥संसर्गाद
स्यविप्रस्यव्रतमेतत्समाचर ॥१९॥ तदाकर्ण्यमहद्वाक्यंसर्वपुण्यप्रदायकम् ॥ व्रतमेतत्करिष्यामिइतिनिश्चितमानसः ॥ २० ॥ भार्यापुत्रैःसमंगत्वा
नद्यांस्नानंकृतंत्वया ॥ हृष्टेनमनसाविप्रपूजितोमधुसूदनः ॥२१॥ सर्वोपहारैःपुण्यैश्चगन्धधूपादिभिस्तथा ॥ रात्रौजागरणंकृत्वानृत्यगीतादिभिस्तथा
॥ २२ ॥ ब्राह्मणस्यप्रसङ्गेननद्यांस्नानंपुनःकृतम् ॥ पूजितोदेवदेवेशःपुष्पधूपादिमङ्गलैः ॥ २३ ॥ भक्त्याप्रणम्यगोविन्दंस्नापयित्वापुनःपुनः ॥
निर्वापंताहृशंदत्तंब्राह्मणायमहात्मने ॥ २४ ॥ भक्त्याप्रणम्यतंविप्रंदत्तातस्मैसुदक्षिणा ॥ कृतवान्पारणंविप्रपुत्रैर्भार्यादिभिःसमम् ॥ २५ ॥ प्रेषि
तोभक्तिपूर्वेणसद्भावेनत्वयैवसः ॥ एवंव्रतंसमाचीर्णंत्वयावैद्विजसत्तम ॥ २६ ॥ सङ्गत्याब्राह्मणस्यैवविष्णोश्चैवप्रसादतः ॥ भवान्ब्राह्मणतांप्राप्तः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्यधर्मसमन्वितः ॥ २७ ॥ तेनव्रतप्रभावेनत्वयाप्राप्तंमहत्कुलम् ॥ भूसुराणांमहाप्राज्ञसत्यधर्मसमाविलम् ॥ २८ ॥ तस्मैतुब्राह्मणायैववैष्णवा
यमहात्मने ॥ श्रद्धयासत्यभावेनदत्तमन्नंसुसंस्कृतम् ॥ २९ ॥ तेनदानप्रभावेनमिष्टान्नमुपतिष्ठति ॥ महामोहैःप्रमुग्धोहितृष्णयाव्यापितंमनः
॥ ३० ॥ पूर्वजन्मनितेविप्रअर्थमेवप्रसञ्चितम्॥नदत्तंब्राह्मणेभ्योहिदीनेष्वन्येषुवैत्वया ॥३१॥दारेषुपुत्रलोभेनम्रियमाणेनवैतदा ॥ तस्यपापस्यभावे
नदारिद्र्यंत्वामुपाविशत्॥३२॥पुत्रलोभंपरित्यज्यस्नेहंत्यक्त्वाप्रदूरतः॥अपुत्रवान्भवाञ्जातस्तस्यपापस्यवैफलम् ॥३३॥ सुपुत्रंचकुलंविप्रधनंधान्यंध
रास्त्रियः॥सुजन्ममरणंचैवसुभोगाःसुखमेवच॥३४॥राज्यंस्वर्गश्चमोक्षश्चयद्यद्दुर्लभमेवच॥प्रसादात्तस्यदेवस्यविष्णोश्चैवमहात्मनः ॥३५॥तस्मादारा
ध्यगोविन्दंनारायणमनामयम्॥प्राप्स्यसित्वंपरंस्थानंतद्विष्णोःपरमंपदम्॥३६॥सुपुत्रत्वंधनंधान्यंसुभोगान्सुखमेवच ॥ पूर्वजन्मकृतंसर्वंयत्त्वयापरि
चेष्टितम् ॥३७॥ तन्मयाकथितंविप्रतवाग्रेपरिनिष्ठितम्॥ एवंज्ञात्वामहाभागनारायणपरोभव ॥३८॥ब्रह्मात्मजेनापिमहानुभावःसविप्रवर्यःपरिबोधि
तोहि॥ हर्षेणयुक्तःसमहानुभावोभक्त्यावसिष्ठंप्रणिपत्यतत्र॥३९॥आमन्त्र्यविप्रःसजगामगेहंतांप्राप्यभार्यांसुमनांप्रहर्षः ॥सर्वंहिवृत्तंममपूर्वचेष्टितंतेनैव
विप्रेणतवप्रसादात् ॥ ४० ॥ भद्रेवसिष्ठेनविकाशनीतमद्यैवमोहंपरिनाशितंमे ॥ आराधयिष्येमधुसूदनंहियास्यामिमोक्षंपरमंपदंतत् ॥ ४१ ॥ आ
कर्ण्यवाक्यंपरमंमहत्तत्सुमङ्गलंमङ्गलदायकंहि ॥ हर्षेणयुक्तातमुवाचकान्तंपुण्योऽसिविप्रेणविबोधितोऽसि ॥ ४२ ॥ इतिश्रीपाद्मपुराणेपञ्चपञ्चाश
त्सहस्रसंहितायांभूमिखण्डेऐन्द्रेसुमनोपाख्यानेअष्टादशोऽध्यायः ॥ १८ ॥ सूतउवाच ॥ सोमशर्मामहाप्राज्ञःसुमनयासहसत्तमः ॥ कपिलासङ्गमे
पुण्येरेवातीरेसुपुण्यदे ॥ १ ॥ स्नात्वातत्रसमेधावीतर्पयित्वासुरान्पितॄन् ॥ तपस्तेपेसुशान्तात्माजपन्नारायणंशिवम् ॥ २ ॥ द्वादशाक्षरमन्त्रेणध्या
नयुक्तोमहामनाः ॥ तस्यैवदेवदेवस्यवासुदेवस्यसुव्रतः॥३॥आसनेशयनेयानेस्वप्नेपश्यतिकेशवम् ॥ सदैवनिश्चलोभूत्वाकामक्रोधविवर्जितः ॥ ४ ॥
साचसाध्वीमहाभागापतिव्रतपरायणा ॥ सुमनाकान्तमेवापिशुश्रूषतितपोऽन्वितम् ॥ ५ ॥ ध्यायमानस्यतस्यापिविघ्नैःसन्दर्शितंभयम् ॥ सर्पाविषो
ल्बणाःकृष्णास्तत्रयान्तिमहात्मनः ॥ ६ ॥ पार्श्वेतेतप्यमानस्यतस्यतेसोमशर्मणः ॥ सिंहव्याघ्रगजाद्दृष्टाभयमेवंप्रचक्रिरे ॥ ७ ॥ वेतालाराक्षसा
भूताःकूष्माण्डाःप्रेतभैरवाः ॥ भयंविदर्शयन्त्येतेदारुणंप्राणनाशनम् ॥ ८ ॥ नानाविधामहाभीमाःसिंहास्तत्रसमागताः ॥ दंष्ट्राकरालवक्त्राश्चजगर्जु
श्चातिभैरवम् ॥ ९ ॥ विष्णोर्ध्यानात्सधर्मात्मानचचालमहामतिः ॥ महाविघ्नैःसुसंरूढैश्चालितोमुनिपुङ्गवः ॥१० ॥ एवंनचलतेध्यानात्सोमशर्मा
द्विजोत्तमः ॥ झञ्झावातैश्चशीतेनमहावृष्ट्यासुपीडितः ॥ ११ ॥ भम्भारावमहाभीमःसिंहस्तत्रसमागतः ॥ तंदृष्ट्वाभयवित्रस्तःसस्मारनृहरिंद्विजः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १२ ॥ इन्द्रनीलप्रतीकाशंपीतवस्त्रंमहौजसम् ॥ शङ्खचक्रधरंदेवंगदापङ्कजधारिणम् ॥ १३ ॥ महामौक्तिकहारेणइन्दुवर्णानुकारिणा ॥ कौ
स्तुभेनापिरत्नेनद्योतमानंजनार्दनम् ॥ १४ ॥ श्रीवत्साङ्केनदिव्येनहृदयंयस्यराजते ॥ सर्वाभरणशोभाङ्गंशतपत्रनिभेक्षणम् ॥ १५ ॥ सुस्मि
तास्यंसुप्रसन्नंरत्नदामाभिशोभितम् ॥ भ्राजमानंहृषीकेशंध्यानंतेनकृतंध्रुवम् ॥१६॥ त्वमेवशरणंकृष्णशरणागतवत्सल ॥ नमोऽस्तुदेवदेवायकिंमेभयं
करिष्यति ॥ १७ ॥ यस्योदरेत्रयोलोकाःसतचान्येमहात्मनः ॥ शरणंतंप्रपन्नोऽस्मिकास्तेभयंममैवहि ॥ १८ ॥ यस्माद्भयाःप्रवर्तन्तेकृत्यादिकम
हाबलाः ॥ सर्वभयप्रहर्तारंतमस्मिशरणंगतः ॥ १९ ॥ पातकानांतुसर्वेषांदानवानांमहाभयम् ॥ रक्षकोविष्णुभक्तानांतमस्मिशरणंगतः ॥ २० ॥
वृन्दारकाणांसर्वेषांदानवानांमहात्मनाम् ॥ योगतिःकृष्णभक्तानांतमस्मिशरणंगतः ॥ २१ ॥ अभयोभयनाशायपापनाशायज्ञानवान् ॥ एकश्च
ब्रह्मरूपेणतमस्मिशरणंगतः ॥ २२ ॥ व्याधीनांनाशकायैवयऔषधस्वरूपवान् ॥ निरामयोनिरानन्दस्तमस्मिशरणंगतः ॥ २३ ॥ अचलश्चा
लयेल्लोकानपापोज्ञानमेवच ॥ तमस्मिशरणंप्राप्तोभयंकिंमेकरिष्यति ॥ २४ ॥ साधूनांचापिसर्वेषांपालकोयोह्यनामयः ॥ पातिविश्वंचविश्वात्मात
मस्मिशरणंगतः ॥ २५ ॥ योमेमृगेन्द्ररूपेणभयंदर्शयतेऽग्रतः ॥ तमहंशरणंप्राप्तोनरसिंहंभयापहम् ॥ २६ ॥ मदमत्तोमहाकायोवनहस्तीसमाग
तः ॥ गजलीलागतिंदेवंशरणागतवत्सलम् ॥ २७ ॥ गजास्यंज्ञानसम्पन्नंसपाशाङ्कुशधारिणम् ॥ कालास्यंगजतुण्डंचशरणंसुगतोऽस्म्यहम् ॥
॥ २८ ॥ हिरण्याक्षप्रहर्तारंवाराहंशरणंगतः ॥ वामनंतंप्रपन्नोऽस्मिशरणागतवत्सलम् ॥ २९ ॥ ह्रस्वास्तुवामनाःकुब्जाःप्रेताःकूष्माण्डकादयः ॥
मृत्युरूपधराःसर्वेदर्शयन्तिभयंमम॥३०॥अमृतंतंप्रपन्नोऽस्मिकिंभयंमेकरिष्यति ॥३१॥ ब्रह्मण्योब्रह्मदोब्रह्माब्रह्मज्ञानमयोहरिः ॥ शरणंतंप्रपन्नोऽस्मि
भयंकिंमेकरिष्यति ॥ ३२ ॥ अभयोयोहिजगतोभीतिघ्नोभीतिदायकः ॥ भयरूपंप्रपन्नोऽस्मिभयंकिंमेकरिष्यति ॥ ३३ ॥ तारकःसर्वलोकानांना
शकःसर्वपापिनाम् ॥ तमहंशरणंप्राप्तोधर्मरूपंजनार्दनम् ॥ ३४ ॥ सुरारणंयोहिरेणवपुर्द्धारयतेऽद्भुतम् ॥ शरणंतस्यगन्तास्मिसदागतिरयंमम ॥
॥ ३५ ॥ झञ्झावातोमहाचण्डोवपुर्दूयतिमेभृशम् ॥ शरणंतंप्रपन्नोऽस्मिसदागतिरयंमम ॥ ३६ ॥ अतिशीतंचातिवर्षाआतपस्तापदायकः ॥ ए
षांरूपेणयोदेवस्तस्याहंशरणंगतः ॥ ३७ ॥ कालरूपाअमीप्राप्ताभयदाममचालकाः ॥ एषांशरणंप्रपन्नोऽस्मिहरेःस्वरूपिणांसदा ॥ ३८ ॥ यंस
र्वदेवंपरमेश्वरंहिनिष्केवलंज्ञानमयंप्रदीपम् ॥ वदन्तिनारायणमादिसिद्धंसिद्धेश्वरंतंशरणंप्रपद्ये ॥३९ ॥ इतिध्यायन्स्तुवन्नित्यंकेशवंक्लेशनाशनम् ॥
भक्त्यातेनसमानीतस्तदात्महृदयेहरिः ॥ ४० ॥ उद्यमंविक्रमंतस्यसदृष्ट्वासोमशर्मणः ॥ आविर्भूयहृषीकेशस्तमुवाचप्रहृष्टवान् ॥ ४१ ॥ सोमशर्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्महाप्राज्ञश्रूयतांभार्ययासह ॥ वासुदेवोऽस्मिविप्रेन्द्रवरंयाचयसुव्रत ॥ ४२ ॥ तेनोक्तोहिसविप्रेन्द्रउन्मील्यनयनद्वयम् ॥ दृष्ट्वाविश्वेश्वरंदेवं
घनश्याममहोदयम् ॥ ४३ ॥ सर्वाभरणशोभाढ्यंसर्वायुधसमन्वितम् ॥ दिव्यलक्षणसम्पन्नंपुण्डरीकनिभेक्षणम् ॥ ४४ ॥ पीतेनवाससायुक्तं
राजमानंसुरेश्वरम् ॥ वैनतेयसमारूढंशङ्खचक्रगदाधरम् ॥ ४५ ॥ ब्रह्मादीनांसुधातारंजगतोऽस्यमहायशाः ॥ विश्वस्यास्यसदातीतंरूपातीतंजगद्गु
रुम् ॥ ४६ ॥ हर्षेणमहताविष्टोदण्डवत्प्रणिपत्यतम् ॥ श्रियायुक्तंभासमानंसूर्यकोटिसमप्रभम् ॥ ४७ ॥ बद्धाञ्जलिपुटोभूत्वातयासुमनयासह ॥ जय
जयेत्युवाचैनंजयमाधवमानद ॥४८॥ जययोगीशयोगीन्द्रजययज्ञपतेहरे ॥ यज्ञघ्नजययज्ञेशजयशाश्वतसर्वग ॥४९॥ जयसर्वेश्वरानन्तयज्ञरूपनमो
ऽस्तुते ॥ जयज्ञानवतांश्रेष्ठजयत्वंज्ञाननायक ॥५०॥ जयसर्वदसर्वज्ञजयत्वंसर्वभावन॥जयजीवस्वरूपेशमहाजीवनमोऽस्तुते ॥५१॥ जयप्रज्ञादप्रज्ञा
ङ्गजयप्राणप्रदायक ॥ जयपापघ्नपुण्येशजयपुण्यपतेहरे ॥५२॥ जयज्ञानस्वरूपेशज्ञानगम्यायतेनमः ॥ जयपद्मपलाशाक्षपद्मनाभायतेनमः ॥५३॥
जयगोविन्दगोपालजयशङ्खधरामल॥जयचक्रधराव्यक्तव्यक्तरूपायतेनमः॥५४॥जयविक्रमशोभाङ्गजयविक्रमनायक॥जयलक्ष्मीविलासाङ्गनमोवेद
मयायते ॥ ५५ ॥ जयविक्रमशोभाङ्गजयउद्यमदायक ॥ जयउद्यमकालायउद्यमायनमोनमः ॥ ५६ ॥ जयउद्यमशक्तायउद्यमत्रयधारक ॥
युद्धोद्यमप्रवृत्तायतस्मैधर्मायतेनमः ॥ ५७ ॥ नमोहिरण्यरेतस्कतस्मैतेजयतेनमः ॥ अतितेजःस्वरूपायसर्वतेजोमयायच ॥ ५८ ॥ दैत्यतेजोवि
नाशायपापतेजोहरायच ॥ गोब्राह्मणहितार्थायनमोऽस्तुपरमात्मने ॥ ५९ ॥ नमोऽस्तुहुतभोक्त्रेचनमोहव्यवहायते ॥ नमःकव्यवहायैवस्वधारूपाय
तेनमः ॥ ६० ॥ स्वाहारूपाययज्ञायपावनायनमोनमः ॥ नमस्तेशार्ङ्गहस्तायहरयेपापहारिणे ॥ ६१ ॥ सदसच्चोदनायैवनमोविज्ञानशालिने ॥
नमोवेदस्वरूपायपावनायनमोनमः ॥६२॥ नमोऽस्तुहरिकेशायसर्वक्लेशहरायते ॥ केशवायपरायैवनमस्तेविश्वधारिणे ॥६३॥ नमःकृपाकरायैवनमो
हर्षमयायते ॥ अनन्तायनमोनित्यंशुद्धायक्लेशनाशिने ॥ ६४ ॥ आनन्दायनमोनित्यंदिव्यायदिव्यरूपिणे ॥ रुद्रैर्नमितपादायविरिञ्चिनमितायते
॥६५॥सुरासुरेन्द्रनमितपादपद्मायतेनमः ॥ नमोनमःपरेशायअजितायामृतात्मने ॥ ६६ ॥ क्षीरसागरवासायनमःपद्माप्रियायते ॥ ॐकारायचशु
द्धायअचलायनमोनमः ॥ ६७ ॥ व्यापिनेव्यापकायैवसर्वव्यसनहारिणे ॥ नमोनमोवराहायमहाकूर्मायतेनमः ॥ ६८ ॥ नमोवामनरूपायनृसिंहाय
महात्मने ॥ नमोरामायदिव्यायसर्वक्षत्रवधायच ॥ ६९ ॥ सर्वज्ञानायमत्स्यायनमोरामायतेनमः ॥ नमःकृष्णायबुद्धायनमोम्लेच्छप्रणाशिने
॥ ७० ॥ नमःकपिलविप्रायहयग्रीवायतेनमः ॥ नमोव्यासस्वरूपायनमःसर्वमयायते ॥ ७१ ॥ एवंस्तुत्वाहृषीकेशंतमुवाचजनार्दनम् ॥ गुणानां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुपरंपारंब्रह्मावेत्तिनपावन ॥ ७२ ॥ नचैवस्तोतुंसर्वज्ञस्तथारुद्रःसहस्रदृक् ॥ वक्तुंकोहिसमर्थस्तुकीदृशीमेमतिर्विभो ॥ ७३ ॥ निर्गुणंसगुणंस्तोत्रंम
येवतवकेशव ॥ क्षमशब्दापशब्दंमेतवदासोऽस्मिसुव्रत ॥ ७४ ॥ जन्मजन्मनिलोकेशदयांमेकुरुपावन ॥ ७५ ॥ इतिश्रीपाद्मपुराणेपञ्चपञ्चाशत्सह
स्रसंहितायांभूमिखण्डेऐन्द्रेसुमनोपाख्यानेएकोनविंशोऽध्यायः ॥ १९ ॥ हरिरुवाच ॥ तपसानेनपुण्येनसत्येनानेनतेद्विज ॥ स्तोत्रेणपावनेनापितु
ष्टोऽस्मिव्रियतांवरः ॥१॥ वरंदद्मिमहाभागयत्तेमनसिवर्तते ॥ यंयमिच्छसिकामंत्वंतंतंतेपूरयाम्यहम् ॥२॥ सोमशर्मोवाच ॥ प्रथमंदेहिमेकृष्णवरमे
कंसुवाञ्छितम् ॥ सुप्रसन्नेनमनसायद्यस्तिसुदयामयि ॥ ३ ॥ जन्मजन्मान्तरंप्राप्यतवभक्तिंकरोम्यहम् ॥ दर्शयस्वपरंस्थानमचलंमोक्षदायकम्
॥ ४ ॥ स्ववंशतारकंपुत्रंदिव्यलक्षणसंयुतम् ॥ विष्णुभक्तिपरंनित्यंममवंशप्रधारकम् ॥ ५ ॥ सर्वज्ञंसर्वदंदान्तंतपस्तेजस्समन्वितम् ॥ देवब्राह्मण
लोकानांपालकंपूजकंसदा ॥६॥ देवमित्रंपुण्यभावंदातारंज्ञानपण्डितम् ॥ देहिमेईदृशंपुत्रंदारिद्र्यंहरकेशव ॥ ७ ॥ भवत्वेवंनसन्देहोवरमेनंवृणोम्यह
म् ॥ ८ ॥ हरिरुवाच ॥ एवमस्तुद्विजश्रेष्ठभविष्यतिनसंशयः ॥ मत्प्रसादात्सुपुत्रस्तुतववंशप्रतारकः ॥ ९ ॥ भोक्ष्यसित्वंवरान्भोगान्दिव्यांश्चमा
नुषानिह ॥ समालोक्यपरंसौख्यंपुत्रसम्भवजंशुभम् ॥ १० ॥ यावज्जीवसिविप्रत्वंतावद्दुःखंनपश्यसि ॥ दाताभोक्तागुणग्राहीभवविष्यसिनसं
शयः ॥ ११ ॥ सुतीर्थेमरणंचापियास्यसित्वंपरांगतिम् ॥ एवंवरंहरिर्दत्त्वासप्रियायद्विजायसः ॥ १२ ॥ अन्तर्धानंगतोदेवःस्वप्नवत्परिदृश्यते ॥
तदासुमनयायुक्तःसोमशर्माद्विजोत्तमः ॥ १३ ॥ सुतीर्थेपावनेतस्मिन्नेवातीरेसुपुण्यदे ॥ अमरकण्टकेविप्रोदानंपुण्यंकरोतिसः ॥ १४ ॥ गतेब
हुतरेकालेतस्यवैसोमशर्मणः ॥ कपिलारेवयोःसङ्गेस्नानंकृत्वासनिर्गतः ॥ १५ ॥ दृष्टवान्पुरतोविप्रःश्वेतमेकंहिकुञ्जरम् ॥ सुप्रभंसुन्दरंदिव्यं
सुमदंचारुलक्षणम् ॥ १६ ॥ नानाभरणशोभाढ्यंबहुलक्ष्म्यासमन्वितम् ॥ सिन्दूरैःकुङ्कुमैस्तस्यकुम्भस्थलेविराजिते ॥ १७ ॥ कर्णनीलोत्पलयु
तंपताकादण्डसंयुतम् ॥ नागोपरिस्थितोदिव्यःपुरुषोदृष्टसुप्रभः ॥ १८ ॥ दिव्यलक्षणसम्पन्नःसर्वाभरणभूषितः ॥ दिव्यमाल्याम्बरधरोदिव्यग
न्धानुलेपनः ॥ १९ ॥ सुसौम्यंसोमवत्पूर्णंच्छत्रचामरसंयुतम् ॥ नागारूढंप्रयान्तंतंपुनःपश्यतिसत्तमः ॥ २० ॥ सिद्धचारणगन्धर्वैः
स्तूयमानंसुमङ्गलम् ॥ सगजंसुन्दरंदृष्ट्वापुरुषंदिव्यलक्षणम् ॥ २१ ॥ व्यतर्कयत्सोमशर्माविस्मयाविष्टमानसः ॥ कोऽयंप्रयातिदिव्याङ्गः
पन्थानप्राप्यसुव्रतः ॥ २२ ॥ एवंचिन्तयतस्तस्ययावद्गृहंसमाप्तवान् ॥ प्रविशन्तंगृहद्वारंदेवरूपंमनोहरम् ॥ २३ ॥ हर्षेणमहताविष्टः
सोमशर्माद्विजोत्तमः ॥ स्वगृहंप्रतिधर्मात्मात्वरमाणःप्रयातिच ॥ २४ ॥ गृहद्वारंगतोयावत्तावत्तंतुनपश्यति ॥ पतितान्येवपुष्पा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णिसौहृद्यानिमहामतिः ॥ २५ ॥ दिव्यानिवासयुक्तानिप्राङ्गणेद्विजसत्तमः ॥ चन्दनैःकुङ्कुमैःपुण्यैःसुगन्धैस्तुविलेपितम् ॥ २६ ॥
स्वकीयंप्राङ्गणेदृष्ट्वादूर्वाक्षतसमन्वितम् ॥ सएवंविस्मयाविष्टश्चिन्तयानःपुनःपुनः ॥ २७ ॥ ददर्शसुमनांप्राज्ञोदिव्यमङ्गलसम्पदम् ॥ २८ ॥
सोमशर्मोवाच ॥ केनदत्तानिदिव्यानिएतान्याभरणानिच ॥ शृङ्गाररूपसौभाग्यंवस्त्रालङ्कारभूषणम् ॥ २९ ॥ तन्मेत्वंकारणंभद्रेकथयस्वाविशङ्कि
ता ॥ एवंसम्भाष्यतांभार्यांविररामद्विजोत्तमः ॥ ३० ॥ सुमनोवाच ॥ शृणुकान्तसमायातःकश्चिद्देववरोत्तमः ॥ श्वेतनागसमारूढोदिव्याभरण
भूषितः ॥ ३१ ॥ दिव्यगन्धानुलिप्ताङ्गोदिव्याश्चर्यसमन्वितः ॥ नजानेकोहिदेवोऽसौविप्रगन्धर्वसेवितः ॥ ३२ ॥ स्तूयमानःसमायातोदेवगन्धर्व
चारणैः ॥ योषितःपुण्यरूपाढ्यारूपशृङ्गारसंयुताः ॥ ३३ ॥ सर्वाभरणशोभाढ्याःसर्वाःपूर्णमनोरथाः॥ताभिःसहसमक्षंमेपुरुषेणमहात्मना ॥ ३४ ॥
चतुष्कंपूरितंरत्नैःसर्वशोभासमन्वितम्॥तत्राहमासनेपुण्येस्थापितास्त्रीगणैःकिल॥३५॥वस्त्रालङ्कारभूषांमेददुस्तेसर्वएवहि ॥वेदमङ्गलगीतैस्तुशास्त्रगी
तैश्चपुण्यदैः ॥३६॥अभिषिक्तास्मितैःसर्वैरन्तर्धानंपुनर्गताः॥मामेवंपरितःसर्वेपुनरूचुर्द्विजोत्तम॥ ३७॥तवगेहेवयंसर्वेवसिष्यामःसदैवहि ॥ शुचिर्भव
सुकल्याणिभर्त्रासार्द्धंसदैवहि ॥ ३८ ॥ एवमुक्त्वागताःसर्वेएवंदृष्टंमयैवहि ॥ तयायत्कथितंवृत्तंसमाकर्ण्यमहामतिः ॥ ३९ ॥ पुनश्चिन्तांप्रपन्नोऽसौ
किमिदंदेवनिर्मितम् ॥ विचिन्तयित्वाथतदासोमशर्मामहामतिः॥४०॥ब्रह्मकर्मणिसंयुक्तःसाधर्म्यंधर्ममुत्तमम् ॥ तस्माद्गर्भंमहाभागादधारव्रतशालि
नी ॥ ४१ ॥ तेनगर्भेणसादेवीअधिकंशुशुभेतदा ॥ सन्दीप्तपुत्रसंयुक्ततेजोज्वालासमन्विता ॥४२॥ साहिजज्ञेचतपसातनयंदेवसन्निभम् ॥ अन्तरि
क्षेततोनेदुर्देवदुन्दुभयस्तदा ॥ ४३ ॥ शङ्खान्दध्मुर्महादेवागन्धर्वाललितंजगुः ॥ अप्सरसस्तथासर्वाननृतुस्तास्तदाकिल ॥ ४४ ॥ अथब्रह्मासुरैःसा
र्द्धंसमायातोद्विजोत्तमम्॥चकारनामतस्यैवसुव्रतेतिसमाहितः ॥ ४५ ॥ नामकृत्वाततोदेवाजग्मुःसर्वेमहौजसः ॥ गतेषुतेषुदेवेषुसोमशर्मासुतस्यच
॥ ४६ ॥ जातकर्मादिकंकर्मचकारद्विजसत्तमः ॥ जातेपुत्रेमहाभागेसुव्रतेदेवनिर्मिते ॥ ४७ ॥ तस्यगेहेमहालक्ष्मीर्धनधान्यसमाकुला ॥ गजाश्वम
हिषीगावःकाञ्चनंरत्नमेवच ॥ ४८ ॥ यथाकुबेरभवनंशुशुभेधनसञ्चयैः ॥ तत्सोमशर्मणोगेहंतथैवपरिराजते ॥ ४९ ॥ ध्यानपुण्यादिकंकर्मचकारद्वि
जसत्तमः ॥ तीर्थयात्रांगतोविप्रोनानापुण्यसमाकुलः ॥ ५० ॥ अन्यानियानिपुण्यानिदानानिद्विजसत्तमः ॥ चकारतत्रमेधावीज्ञानपुण्यसमन्वितः
॥ ५१ ॥ एवंसाधयतेधर्मंपालयेच्चपुनःपुनः ॥ पुत्रस्यजातकर्मादिकर्माणिद्विजसत्तमः ॥ ५२ ॥ विवाहंकारयामासहर्षेणमहताकिल ॥ पुत्रस्यपुत्राः
सञ्जाताःसद्गुणालक्षणान्विताः ॥ ५३ ॥ सत्यधर्मतपोपेतादानधर्मरताःसदा ॥ सतेषांपुण्यकर्माणिसोमशर्माचकारह ॥ ५४ ॥ पौत्राणांतुमहा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भागस्तेषांसुखेनमोदते ॥ सर्वसौख्यंसबुभुजेतेजसाराजराजवत् ॥ ५५ ॥ पञ्चविंशाब्दिकोयद्वत्तद्वत्कायस्तुतस्यहि ॥ सूर्यतेजःप्रतीकाशःसोमश
र्मामहामतिः ॥ ५६ ॥ साचापिशुशुभेदेवीसुमनापुण्यमङ्गलैः ॥ पुत्रपौत्रैर्महाभागादानव्रतैश्चसंयमैः ॥ ५७ ॥ अतिभातिविशालाक्षीपुण्यैःपतिव्रता
दिभिः ॥तारुण्येनसमायुक्तायथाषोडशवार्षिकी॥५८॥ मोदमानौमहात्मानौदम्पतीचारुमङ्गलौ ॥ हर्षेणचसमायुक्तौपुण्यात्मानौमहोदयौ ॥ ५९ ॥
एवंतयोस्तुवृत्तान्तंपुण्याचारसमन्वितम् ॥ सुव्रतस्यप्रवक्ष्यामिव्रतचर्यांद्विजोत्तमाः ॥ ६० ॥ यथातेनसमाराध्यनारायणमनामयम् ॥ ६१ ॥
इतिश्रीपाद्मपुराणेपञ्चपञ्चाशत्सहस्रसंहितायांभूमिखण्डेऐन्द्रेसुमनोपाख्यानेसुव्रतोत्पत्तिर्नामविंशोऽध्यायः ॥ २० ॥ सूतउवाच ॥ एकदाव्यासदेवो
ऽसौब्रह्माणंजगतःपतिम् ॥ सुव्रताख्यानकंसवपप्रच्छातीवविस्मितः ॥ १ ॥ व्यासउवाच ॥ लोकात्मँल्लोकविन्यासदेवदेवमहाप्रभो ॥ सुव्रतस्या
थचरितंश्रोतुमिच्छामिसाम्प्रतम् ॥ २ ॥ ब्रह्मोवाच ॥ पाराशर्यमहाभागश्रूयतांपुण्यमुत्तमम् ॥ सुव्रतस्यसुविप्रस्यतपश्चर्यासमन्वितम् ॥ ३ ॥
सुव्रतोनाममेधावीबाल्यादपिसचिन्तयन् ॥ गर्भेनारायणंदेवंदृष्टवान्पुरुषोत्तमम् ॥ ४ ॥ सपूर्वकर्माभ्यासेनहरेर्ध्यानंगतस्तदा ॥ शङ्खचक्रधरंदे
वंपद्मनाभंसुपुण्यदम् ॥ ५ ॥ ध्यायतेचिन्तयेत्सोहिगीतेज्ञानेप्रपाठने ॥ एवंदेवंहरिंध्यायन्सदैवद्विजसत्तमः ॥ ६ ॥ क्रीडत्येवंसदाडिम्भैः
सार्द्धंचबालकोत्तमः ॥ बालकानांस्वकंनामहरेश्चैवमहात्मनः ॥ ७ ॥ चकारसहिमेधावीपुण्यात्मापुण्यवत्सलः ॥ समाह्वयतिवैमित्रंहरेर्नाम्नामहामतिः
॥ ८ ॥ भोभोःकेशवएह्येहिएहिमाधवचक्रधृक् ॥ क्रीडस्वचमयासार्धंत्वमेवपुरुषोत्तम ॥ ९ ॥ सममेवंप्रगन्तव्यमावाभ्यांमधुसूदन ॥ एव
मेवसमाह्वानंनामभिश्चहरेर्द्विजः ॥ १० ॥ क्रीडनेपठनेहास्येशयनेगीतप्रेक्षणे ॥ यानेचह्यासनेध्यानेमन्त्रेज्ञानेसुकर्मसु ॥ ११ ॥ पश्यत्येवं
वदत्येवंजगन्नाथंजनार्दनम् ॥ सध्यायतेतमेकंहिविश्वनाथंमहेश्वरम् ॥ १२ ॥ तृणेकाष्ठेचपाषाणेशुष्केसार्द्रेहिकेशवम् ॥ पश्यत्येवंसधर्मात्मा
गोविन्दंकमलेक्षणम् ॥ १३ ॥ आकाशेभूमिमध्येतुपर्वतेषुवनेषुच ॥ जलेस्थलेचपाषाणेजीवेष्वेवमहामतिः ॥ १४ ॥ नृसिंहंपश्यतेविप्रःसुव्रतः
सुमनासुतः ॥ बालक्रीडांसमासाद्यरमत्येवंदिनेदिने ॥ १५ ॥ गीतैश्चगायतेकृष्णंसुरागैर्मधुराक्षरैः ॥ तालैर्लयसमायुक्तैःसुस्वरैर्मूर्च्छनान्वि
तैः ॥१६॥ सुव्रतउवाच ॥ ध्यायन्तिवेदविदुषःसततंमुरारिंयस्याङ्गमध्येसकलंहिविश्वम् ॥ योगेश्वरंसकलपापविनाशनंचपादंव्रजामिशरणंमधुसूदन
स्य ॥ १७ ॥ लोकेषुयोहिसकलेष्वनुवर्ततेथोलोकाश्चयत्रसततंनिवसन्तिसर्वे ॥ दोषैर्विहीनमखिलैःपरमेश्वरंतंतस्यैवपादयुगलंसततंनमामि ॥१८॥
नारायणंगुणनिधानमनन्तवीर्यंवेदान्तशुद्धमतयःप्रपठन्तिनित्यम् ॥ संसारसागरमनन्तमगाधदुर्गमुत्तारणार्थमखिलंशरणंप्रपद्ये ॥ १९ ॥ यो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गीन्द्रमानससरोवरराजहंसंशुद्धंप्रभावमखिलंसततंहियस्य ॥ तस्यैवपादयुगलंविमलंविशालंदीनस्यमेऽसुररिपोकुरुतस्यरक्षाम् ॥ २० ॥ ध्याये
ऽखिलस्यभुवनंस्वपतिंचदेवंदुःखान्धकारदलनार्थमिहैवचन्द्रम् ॥ लोकस्यपालनकृतेपरिणीतधर्मंसत्यान्वितंसकललोकगुरुंसुरेशम् ॥ २१ ॥ गाया
म्यहंसुरसगीतकतालमानैःश्रीरङ्गमेकमनिशंभुवनस्यदेवम् ॥ अज्ञाननाशकमलंचदिनेशतुल्यमानन्दकन्दमखिलंमहिमासमेतम् ॥ २२ ॥ सम्पूर्णमे
वममृतस्यकलानिधानंतंगीतकौशलमनन्यरसैःप्रगाये ॥ युक्तंस्वयोगकरणैःपरमार्थदृष्टिंविश्वंसपश्यतिचराचरमेवनित्यम् ॥ २३ ॥ पश्यन्तिनैवयमि
हाथसुपापलोकास्तंकेशवंशरणमेवमुपैतिनित्यम् ॥ २४ ॥ कराभ्यांवाद्यमानस्तुतालंतालसमन्वितम् ॥ गीतेनगायतेकृष्णंबालकैःसहमोदते ॥२५॥
एवंक्रीडारतोनित्यंबालभावेनवैतदा ॥ सुव्रतःसुमनापुत्रोविष्णुध्यानपरायणः ॥ २६ ॥ क्रीडमानंप्राहमातासुव्रतंचारुलक्षणम् ॥ भोजनंकुरुमेवत्स
क्षुधात्वांपरिपीडयेत् ॥ २७ ॥ तामुवाचपुनःप्राज्ञःसुमनांमातरंपुनः ॥ महामृतेनतृप्तोऽस्मिहरिध्यानरसेनवै ॥२८॥ भोजनासनमारूढोमिष्टमन्नंप्रप
श्यति ॥ इदमन्नंस्वयंविष्णुरात्माह्यन्नंसमाश्रितः ॥ २९ ॥ आत्मरूपेणयोविष्णुरनेनान्नेनतृप्यतु ॥ क्षीरसागरसंवासोयस्यैवपरिसंस्थितः ॥ ३० ॥
जलेनानेनपुण्येनतृप्तिमायातुकेशवः ॥ ताम्बूलचन्दनैर्गन्धैरेभिःपुष्पैर्मनोहरैः ॥ ३१ ॥ आत्मस्वरूपेणतृप्तस्तृप्तिमायातुकेशवः ॥ शयनेयातिधर्मा
त्मातदाकृष्णंप्रचिन्तयेत् ॥ ३२ ॥ योगनिद्रान्वितंकृष्णंतमहंशरणंगतः ॥ भोजनाच्छादनेष्वेवमासनेशयनेद्विजः ॥ ३३ ॥ चिन्तयेद्वासुदेवंततस्मै
सर्वंप्रकल्पयेत् ॥ तारुण्यंप्राप्यधर्मात्माकामभोगान्विहायवै ॥ ३४ ॥ संयुक्तःकेशवध्यानैर्वैडूर्यपर्वतोत्तमे ॥ यत्रसिद्धेश्वरंलिङ्गंवैष्णवंपापनाशनम्
॥ ३५ ॥ रुद्रसोङ्कारसंज्ञंचध्यात्वाचैवमहेश्वरम् ॥ ब्रह्मणावर्द्धितंदेवंनर्मदादक्षिणेतटे ॥ ३६ ॥ सिद्धेश्वरंसमाश्रित्यतपोभावंव्यचिन्तयत् ॥ ३७ ॥
इतिश्रीपाद्मपुराणेपञ्चपञ्चाशत्सहस्रसंहितायांभूमिखण्डेऐन्द्रेसुमनोपाख्यानेएकविंशोऽध्यायः ॥ २१ ॥ व्यासउवाच ॥ प्रश्नमेकंमहाभागकरिष्येसा
म्प्रतंवद ॥ त्वयैवपूर्वमुक्तंहिसुव्रतंचप्रतीश्वरम् ॥ १ ॥ पूर्वाभ्यासेनसन्ध्यायन्नारायणमनामयम् ॥ कस्यांज्ञात्यांसमुत्पन्नःसुव्रतःपूर्वजन्मनि ॥ २ ॥
तन्मेत्वंसाम्प्रतंब्रूहिकथमाराधितोहरिः ॥ अनेनापिसदेवेशकोऽयंपुण्यसमाविलः ॥ ३ ॥ ब्रह्मोवाच ॥ वैदिशेनगरेपुण्येसर्वर्द्धिसमाकुले ॥ तत्र
राजामहातेजाऋतध्वजसुतोवली ॥ ४ ॥ तस्यात्मजोमहाप्राज्ञोरुक्मभूषणविश्रुतः ॥ सन्ध्यावलीतस्यभार्याधर्मपत्नीयशस्विनी ॥ ५ ॥ तस्यांपुत्रं
समुत्पाद्यसआत्मसदृशंततः ॥ तस्यधर्माङ्गदंनामचकारनृपनन्दनः ॥ ६ ॥ सर्वलक्षणसम्पन्नःपितृभक्तिपरायणः ॥ रुक्माङ्गदस्यतनयोयोऽयंभग
वतांवरः ॥ ७ ॥ पितुःसौख्याययेनापिमोहिन्यैतुशिरोददे ॥ वैष्णवेनचधर्मेणपितृभक्त्यातुतस्यहि ॥ ८ ॥ सुप्रसन्नोहृषीकेशःसकायोवैष्णवंपदम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नीतस्तुसर्वधर्मज्ञोवैष्णवःसात्वतांवरः ॥ ९ ॥ धर्माङ्गदोमहाप्राज्ञःप्रज्ञाज्ञानविशारदः ॥ तत्रस्थोवैमहाप्राज्ञोधर्मोऽसौधर्मभूषणः ॥ १० ॥ दिव्यान्म
नोऽनुगान्भोगान्मोदमानःप्रभुञ्जति ॥ पूर्णेयुगसहस्रान्तेधर्मोवैधर्मभूषणः ॥११॥ तस्मात्पदात्परिभ्रष्टोविष्णोश्चैवप्रसादतः ॥ सुव्रतोनाममेधावीसुम
नानन्दवर्द्धनः ॥ १२ ॥ सोमशर्माख्यतनयःश्रेष्ठोभगवतांवरः॥तपश्चचारमेधावीविष्णुध्यानपरोऽभवत् ॥ १३ ॥ कामक्रोधादिकान्दोषान्परित्यज्य
द्विजोत्तमः ॥ संयम्यचैन्द्रियंवर्गंतपस्तेपेनिरन्तरम् ॥ १४॥ वैडूर्यपर्वतश्रेष्ठेसिद्धेश्वरस्यसन्निधौ ॥ एकीकृत्यमनश्चायंसंयोज्यविष्णुनासह ॥१५ ॥
एवंवर्षशतंस्थित्वाध्यानेनास्यमहात्मनः॥सुप्रसन्नोजगन्नाथःशङ्खचक्रगदाधरः॥१६॥तस्मैवरंददौचाथसलक्ष्म्यासहकेशवः॥भोभोःसुव्रतधर्मात्मन्बु
ध्यस्वविबुधांवर ॥१७॥ वरंवरयभद्रंतेकृष्णोऽहंतेसमागतः ॥ एवमाकर्ण्यमेधावीविष्णोर्वाक्यमनुत्तमम् ॥१८॥हर्षेणमहताविष्टोदृष्ट्वादेवंजनार्दनम् ॥
बद्ध्वाञ्जलिपुटोभूत्वाप्रणाममकरोत्तदा॥१९॥सुव्रतउवाच ॥ संसारसागरमतीवमहासुदुःखजालोर्मिभिर्विविधमोहचयैस्तरङ्गैः ॥ सम्पूर्णमस्तिनिजदो
षगुणैस्तुप्राप्तंतस्मात्समुद्धरजनार्दनमाऽऽशुदीनम् ॥२०॥ कर्माम्बुदेमहतिगर्जतिवर्षतीवविद्युल्लतोल्लसतिपातकसञ्चयैर्मे॥मोहान्धकारपटलैर्ममनास्ति
दृष्टिर्दीनस्यतस्यमधुसूदनदेहिहस्तम् ॥ २१ ॥ संसारकाननवनंबहुदुःखवृक्षैःसंसेव्यमानमपिमोहमयैश्चसिंहैः ॥ सन्दीप्तमस्तिकरुणाबहुवह्नितजः
सन्तप्यमानमनिशंपरिपाहिकृष्ण ॥ २२ ॥ संसारवृक्षमतिजीर्णमपीहउच्चंमायासुकन्दकरुणाबहुदुःखशाखम् ॥ जायादिसङ्गच्छदनंफलितंमुरारेत
त्राधिरूढपतितंगभगवन्हिरक्ष ॥ २३ ॥ दुःखानलैर्विविधमोहमयैःसुधूमैःशोकैर्वियोगमरणान्तिकसन्निभैश्च ॥ दग्धोऽस्मिकृष्णसततंममदेहिमोक्षज्ञा
नाम्बुदैःसमभिषिञ्चसदैवमांत्वम् ॥ २४ ॥ घोरान्धकारपटलेमहतीवगर्तेसंसारनाम्निपतितंसततंहिकृष्ण ॥ त्वंसत्कृपोममहिदीनभयातुरस्यतस्मा[2]
द्विरज्यशरणंतवआगतोऽस्मि ॥ २५॥ त्वामेवयेनियतमानसभावयुक्ताध्यायन्तिज्ञानमनसापदवींलभन्ते ॥ नत्वैवपादयुगलंचमहासुपुण्यंयद्देवकिन्न
रगणाःपरिचिन्तयन्ति ॥ २६ ॥ नान्यंवदामिनभजामिनचिन्तयामित्वत्पादपद्मयुगलंसततंनमामि ॥ कामंत्वमेवममपूरयमेऽद्यकृष्णदूरेणयातुमम
पातकसञ्चयस्ते ॥ २७ ॥ दासोऽस्मिदेवतवकिङ्करजन्मजन्मत्वत्पादपद्मयुगलंसततंस्मरामि ॥ २८ ॥ यदिकृष्णप्रसन्नोऽसिदेहिमेसुवरंप्रभो ॥
सन्मातापितरौकृष्णसकायौमन्दिरेनय ॥ आत्मनश्चमहादेवमयासहनसंशयः ॥ २९ ॥ श्रीकृष्णउवाच ॥ एवंतेपरमंकार्यंभविष्यतिनसंशयः
॥ ३० ॥ ब्रह्मोवाच ॥ तस्यतुष्टोहृषीकेशोभक्त्यातस्यप्रतोषितः ॥ प्रयातौवैष्णवंलोकंदाहप्रलययवर्जितौ ॥ ३१ ॥ सुव्रतेनसमंतौद्वौसुमनासोमश

१ 'निरञ्जने' इ० पा० । २ 'तस्माद्धिकृष्ण्य शरणं नय मामितस्त्वम्' ॥ इ० पा० ।

४१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मकौ ॥ यावत्कल्पद्वयंप्राप्तंतावत्ससुव्रतोद्विजः ॥ ३२ ॥ बुभुजेबुभुजेदिव्याँल्लोकांश्चैवमहामते ॥ देवकार्यार्थमत्रैवकाश्यपस्यगृहंपुनः ॥ ३३ ॥
अवतीर्णोमहाप्राज्ञोवचनात्तस्यचक्रिणः ॥ ऐन्द्रंपदंहियोभुङ्क्तेविष्णोश्चैवप्रसादतः ॥ ३४ ॥ वसुदत्तेतिविख्यातःसर्वदेवैर्नमस्कृतः ॥ ऐन्द्रंपदंहियो
भुङ्क्तेसाम्प्रतंवासवोदिवि ॥ ३५ ॥ एतत्तेसर्वमाख्यातंसृष्टिसम्बन्धकारणम् ॥ अन्यदेवंप्रवक्ष्यामियदेवपरिपृच्छसि ॥ ३६ ॥ व्यासउवाच ॥ धर्मा
ङ्गदोमहाप्राज्ञोरुक्माङ्गदसुतोबली ॥ आद्येकृतयुगेजातःसृष्टिकालेसवासवः ॥ ३७ ॥ तत्कथंदेवदेवेशअन्योधर्माङ्गदोभुवि ॥ अन्योरुक्माङ्गदो
राजाकिंचायंत्रिदशाधिपः ॥ ३८ ॥ एतन्मेसंशयंजातंतद्भवान्वक्तुमर्हति ॥ ब्रह्मोवाच ॥ हन्ततेकथयिष्यामिसर्वसन्देहनाशनम् ॥३९॥देवस्यलीला
सृष्ट्यर्थेवर्ततेद्विजसत्तम ॥ यथावाराश्चपक्षाश्चमासाश्चऋतवोयथा॥४०॥ संवत्सराश्चमनवस्तथायान्तियुगाःपुनः ॥ पश्चात्कल्पःसमायातिव्रजाम्ये
वंजनार्दनम् ॥ ४१ ॥ अहमेवमहाप्राज्ञमयियान्तिचराचराः ॥ पुनःसृजतियोगात्मापूर्ववद्विश्वमेवहि ॥४२॥ पुनरहंपुनर्वेदाःपुनस्तेदेवताद्विजाः ॥
तथाभूपाश्चतेसर्वेस्वचरित्रसमाविलाः ॥४३॥ प्रभवन्तिमहाभागविद्वांस्तत्रनमुह्यति ॥ पूर्वकल्पेमहाभागोयथारुक्माङ्गदोनृपः ॥ ४४ ॥ तथाधर्माङ्ग[1]
दश्चायंसञ्जातःख्यातिमान्द्विजः॥रामादयोमहाप्राज्ञाययातिर्नहुषस्तथा ॥४५॥ मन्वादयोमहात्मानःप्रभवन्तिलयन्तिच ॥ ऐन्द्रंपदंप्रभुञ्जन्तिराजा
नोधर्मतत्पराः॥४६॥यथाधर्माङ्गदोवीरःप्रभुञ्जतिमहत्पदम्॥एवंवेदाश्चदेवाश्चपुराणाःस्मृतिपूर्वकाः॥४७॥एतत्तुसर्वमाख्यातंतवाग्रेद्विजसत्तम ॥ चरितं
सुव्रतस्याथपुण्यंसुगतिदायकम् ॥ ४८ ॥ अव्यक्तंतुमहाभागप्रब्रवीमितवाग्रतः ॥४९॥इतिश्रीपाद्मपुराणेपञ्चपञ्चाशत्सहस्रसंहितायांभूमिखण्डेऐन्द्रेसु
व्रतोपाख्यानंनामद्वाविंशोऽध्यायः ॥ २२ ॥ ऋषयऊचुः ॥ विचित्रेयंकथापुण्याधन्यायशोविधायिनी ॥ सर्वपापहराप्रोक्ताभवतावदतांवर ॥ १ ॥
सृष्टिसम्बन्धमेतन्नस्तद्भवान्वक्तुमर्हति ॥ पूर्वमेवयथासृष्टिर्विस्तरात्सूतनन्दन ॥ २ ॥ सूतउवाच ॥ विस्तरेणप्रवक्ष्यामिसृष्टिसंहाकारणम् ॥ श्रुत
मात्रेणयस्यापिनरःसर्वज्ञतांव्रजेत् ॥ ३ ॥ हिरण्यकशिपुर्योहितेनव्याप्तंजगत्रयम् ॥ तपसाराध्यब्रह्माणंवरंप्राप्तंसुदुर्लभम् ॥ ४ ॥ तस्माद्देवान्महाभा
गादमरत्वंतथैवच ॥ देवाँल्लोकान्ससंव्याप्यप्रभुत्वंस्वयमार्जितम् ॥५॥ ततोदेवाःसगन्धर्वामुनयोवेदपारगाः ॥ नागाश्चकिन्नराःसिद्धायक्षाश्चैवतथापरे
॥ ६ ॥ ब्रह्माणंतुपुरस्कृत्यजग्मुर्नारायणंप्रभुम् ॥ क्षीरसागरसंसुप्तंयोगनिद्रांगतंप्रभुम् ॥ ७ ॥ तंसम्बोध्यमहास्तोत्रैर्देवाःप्राञ्जलयस्तथा॥सम्बुद्धेस
तिदेवेशेवृत्तंतस्यदुरात्मनः ॥ ८ ॥ आचचक्षुर्महाप्राज्ञसमाकर्ण्यजगत्पतिः ॥ नृसिंहरूपमास्थायहिरण्यकशिपुंव्यहन् ॥ ९ ॥ पुनर्वाराहरूपेणहि

[1] 'धर्मांङ्गदः' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रण्याक्षोमहाबलः ॥ उद्धृतावसुधापुण्याअसुरोघातितस्तदा ॥ १० ॥ अन्यांश्चघातयामासदानवान्घोरदर्शनान् ॥ एवंचैतेषुनष्टेषुदानवेषुमहत्सुच
॥ ११ ॥ अन्येषुतेषुनष्टेषुदितिपुत्रेषुवैतदा ॥ पुनःस्थानेषुप्राप्तेषुदेवेषुचमहत्सुच ॥ १२ ॥ यज्ञेष्वेवप्रवृत्तेषुसर्वेषुधर्मकर्मसु ॥ सुस्थेषुसर्वलोकेषुसा
दितिर्दुःखपीडिता ॥ १३ ॥ पुत्रशोकेनसन्तप्ताहाहाभूताविचेतना ॥ भर्तारंसूर्यसङ्काशंतपस्तेजःसमन्वितम् ॥ १४ ॥ दातारंचमहात्मानंसर्तारंक
श्यपंतदा ॥ भक्त्याप्रणम्यविप्रेन्द्रतमुवाचमहामतिम् ॥ १५ ॥ भगवन्नष्टपुत्राहंकृतादेवेनचक्रिणा ॥ दैतेयादानवाःसर्वेदेवैश्चैवनिपातिताः॥१६॥पुत्र
शोकानलेनाहंसन्तप्तामुनिसत्तम ॥ ममानन्दकरंपुत्रंसर्वतेजोहरंविभो॥१७॥सुबलंचारुसर्वाङ्गंदेवराजसमप्रभम्॥ बुद्धिमन्तंमुसर्वज्ञंज्ञातारंसर्वपण्डितम्
॥ १८॥ तपस्तेजःसमायुक्तंसबलंचारुलक्षणम् ॥ ब्रह्मण्यंज्ञानवेत्तारंदेवब्राह्मणपूजकम्॥१९ ॥ जेतारंसर्वलोकानांममानन्दकरंद्विज॥सर्वलक्षणसम्पन्नं
पुत्रंमेदेहित्वंविभो ॥ २०॥ एवमाकर्ण्यवैतस्याःकश्यपोवाक्यमुत्तमम्॥ कृपाविष्टमनास्तुष्टोदुःखितायाद्विजोत्तम ॥२१॥ तामुवाचमहाभागःकृपणां
दीनमानसाम् ॥तस्याःशिरसिसंन्यस्यस्वहस्तंभावतत्परः॥२२॥भविष्यतिमहाभागेयादृशोवाञ्छितःसुतः॥ एवमुक्त्वाजगामासौमेरुंगिरिवरोत्तमम्
॥२३॥ तपस्तेपेनिरालम्बःसाधयन्परमव्रतः॥एतस्मिन्नन्तरेसातुदधारगर्भमुत्तमम् ॥२४॥ सादितिःसर्वधर्मज्ञाचारुकर्मामनस्विनी॥शतवर्षप्रमाणंसा
शुचिस्वान्ताबभूवह॥२५॥तयावैजनितःपुत्रोब्रह्मतेजःसमन्वितः॥अथकश्यपआयातोहर्षेणमहतान्वितः॥२६॥चकारनाममेधावीतस्यपुत्रस्यसत्तमः॥
बलमित्यब्रवीत्पुत्रंनामतःसदृशोमहान् ॥२७॥ एवंनामचकाराथव्रतबन्धंचकारसः॥प्राहपुत्रमहाभागब्रह्मचर्यंप्रसाधय ॥२८॥ पुत्रउवाच॥ एवमेवंकरि
ष्यामितववाक्यंद्विजोत्तम ॥ वेदस्याध्ययनंकुर्यांब्रह्मचर्येणसत्तम ॥२९॥ सूतउवाच ॥ एवंवर्षशतंसाग्रंगतंतस्यतपस्यतः ॥ मातुःसमक्षमायातस्तप
स्तेजःसमन्वितः॥३०॥ तपोवीर्यमयंदिव्यंब्रह्मचर्यमहात्मनः॥ दितिःपश्यतिपुत्रस्यहर्षेणमहतान्विता ॥३१॥ तमुवाचमहत्मानंबलंपुत्रंतपस्विनम् ॥
मेधाविनंमहात्मानंप्रज्ञाज्ञानविशारदम् ॥३२॥ त्वयिजीवतिमेधाविन्प्रजीवन्तिसुताममा॥ हिरण्यकशिप्वाद्यास्तेयेहताश्चक्रपाणिना ॥३३॥ वैरंसाध
यमेवत्सजहिदेवान्रिपून्रणे ॥ सादनुस्तमुवाचेदंबलंपुत्रंमहाबलम् ॥ ३४ ॥ आदाविन्द्रंहिदेवेन्द्रंद्रुतंसूदयपुत्रक ॥ पश्चाद्देवानिपात्यन्तांततोगरुड
वाहनः ॥ ३५ ॥ तयोराकर्ण्यसादेवीअदितिःपतिदेवता ॥ दुःखेनमहताविष्टापुत्रमिन्द्रमभाषत ॥ ३६ ॥ दितिपुत्रोमहाकायोवर्द्धतेब्रह्मतेजसा ॥
देवानांहिवधार्थायतपस्तेपेनिरञ्जने ॥ ३७ ॥ एवंजानीहिदेवेशयदिक्षेममिहेच्छसि ॥ एवमाकर्ण्यतद्वाक्यंसमातुःपाकशासनः ॥ ३८ ॥ चिन्ताम
वापदुःखेनमहतींदेवराट्तदा ॥ महाभयेनसन्त्रस्तश्चिन्तयामासवैततः ॥ ३९ ॥ कथमेनंहनिष्यामिदेवधर्मविदूषकम् ॥ इतिनिश्चित्यदेवेशोबलस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निधनंप्रति ॥ ४० ॥ एकदाहिबलःसोऽपिसन्ध्यार्थंसिन्धुमाश्रितः ॥ कृष्णाजिनेनदिव्येनदण्डकाष्ठेनराजितः ॥ ४१ ॥ अमलेनापिपुण्येनब्रह्मचर्ये
णतेनसः ॥ सागरस्योपकण्ठेतंसन्ध्यासनमुपागतम् ॥४२॥ जपमानंसुशातंतंददर्शेपाकशासनः ॥ वज्रेणतेनदिव्येनताडितोदितिनन्दनः॥४३॥बलं
निपतितंदृष्ट्वागतसत्त्वंगतंभुवि ॥ हर्षेणमहताविष्टोदेवराण्मुमुदेतदा ॥ ४४ ॥ एवंनिपात्यतंदैत्यंदितिनन्दनमेवच ॥ राज्यंचकारधर्मात्मासुखेनपाक
शासनः ॥ ४५ ॥ इतिश्रीपाद्मपुराणेपञ्चपञ्चाशत्सहस्रसंहितायांभूमिखण्डेबलदैत्यवधोनामत्रयोविंशोऽध्यायः ॥२३॥ सूतउवाच ॥ हतंश्रुत्वादितिः
पुत्रंसुबलंबलमेवच ॥ रुदितंकरुणंकृत्वाहाहाकष्टंभृशंमम ॥१॥ एवंसुकरुणंकृत्वाबहुकालंतपस्विनी ॥ सागताकश्यपंकान्तंतमुवाचयशस्विनी ॥२॥
तवपुत्रोमहापापइन्द्रःसुरगणेश्वरः ॥ सागरोपागतंदृष्ट्वाबलंमेब्रह्मलक्षणम् ॥ ३ ॥ वज्रेणघातयामाससन्ध्यामास्यन्तमेवहि ॥ एवंश्रुत्वाततःक्रुद्धोमरी
चितनयस्तदा ॥४॥ क्रोधेनमहताविष्टःप्रजज्वालेववह्निना ॥ अवलुच्यजटामेकांशुच्यग्नौसद्द्विजोत्तमः ॥ ५ ॥ इन्द्रस्यैववधार्थायपुत्रमुत्पादयाम्य
हम् ॥ तस्मात्कुण्डात्समुत्पन्नोहुताशनमुखादपि ॥६॥ कृष्णाञ्जनचयोपेतःपिङ्गाक्षोभीषणाकृतिः ॥ दंष्ट्राकरालवक्त्रान्तोजगतांभयदायकः ॥७॥ महा
चर्वरिकोघोरःखड्गचर्मधरस्तथा ॥ सर्वाङ्गतेजसादीप्तोमहामेघोपमोबली ॥८॥ उवाचकश्यपंविप्रमादेशोममदीयताम् ॥ कस्मादुत्पादितोविप्रभवता
कारणंवद ॥९॥ तमहंसाधयिष्यामिप्रसादात्तवसुव्रत ॥ १० ॥ कश्यपउवाच ॥ अस्यामनोरथंपुत्रपूरयस्वममैवहि ॥ आदित्याख्यंमहाप्राज्ञजहि
इन्द्रंदुरात्मकम् ॥ ११ ॥ निहतेदेवराजेहिऐन्द्रंपदंप्रभुङ्क्ष्वच ॥ एवंतेनसमादिष्टःकश्यपेनमहात्मना ॥१२॥ वृत्रस्तुउद्यमंचक्रेतस्येन्द्रस्यवधायच ॥
धनुर्वेदस्यचाभ्यासंसचक्रेपौरुषान्वितः ॥१३॥ बलंवीर्यंतथाक्षात्रंतेजोधैर्यसमन्वितम् ॥ दृष्ट्वाहितस्यदैत्यस्यसहस्राक्षोभयातुरः॥१४॥ उपायश्चिन्ति
तस्तस्यवृत्रस्यापिदुरात्मनः ॥ वधार्थंदेवदेवेनसमाहूयमहामुनीन् ॥१५॥ सप्तर्षीन्प्रेषयामासवृत्रंदैत्येश्वरंप्रति ॥ भवन्तस्तत्रगच्छन्तुयत्रवृत्रःसतिष्ठति
॥१६॥ सन्धिंकुर्वन्तुवैतेनसार्द्धंममुनीश्वराः ॥ एवंतेनसमादिष्टामुनयःसप्ततेतदा ॥१७॥ वृत्रासुरंततःप्रोचुःसहस्राक्षप्रचालिताः ॥ सख्यंकर्तुंप्रयच्छे
त्सक्रियतांदैत्यसत्तम ॥ १८ ॥ ऋषयःसप्ततत्त्वज्ञाऊचुर्वृत्रंमहाबलम् ॥ सहस्राक्षोमहाप्राज्ञोभवतासहसत्तम ॥ १९ ॥ मैत्रमिच्छतिवैकर्तुंतत्कथंन
करोषिकिम् ॥ अर्धमैन्द्रंपदंवीरसत्वंभुङ्क्ष्वसुखेनवै ॥ २० ॥ वक्तित्वामेवमिन्द्रोऽपिअसुरादेवतास्तथा ॥ कुरुमैत्रीन्तुतैस्सर्वैर्वैरंचैवविसृज्यवै ॥२१॥
वृत्रउवाच ॥ यदिसत्येनदेवेन्द्रोमैत्रमिच्छतिसत्तमः ॥ २२ ॥ सत्यमाश्रित्यचैवाहंकरिष्येनात्रसंशयः ॥ छद्मचैवंपुरस्कृत्यइन्द्रोद्रोहंसमाचरेत् ॥
तदाकिंक्रियतेविप्राइत्यर्थेप्रत्ययंहिकिम् ॥ २३ ॥ ऋषयस्त्विन्द्रमाचख्युरित्यर्थेप्रत्ययंवद ॥ तन्नस्त्वंसत्यतांब्रूहियदिसख्यमिहेच्छसि ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इन्द्रउवाच ॥ यद्यसत्येनवर्तेऽहंभवद्भिःसहछद्मना ॥ ब्रह्महत्यादिकैःपापैर्लिप्येऽहंनात्रसंशयः ॥ २५ ॥ तेवृत्रंदैत्यनाथंतंपुनरूचुर्महौजसः ॥ ब्रह्मह
त्यादिकैःपापैर्लिप्येऽहंनात्रसंशयः ॥ २६ ॥ इत्युवाचमहाप्राज्ञत्वामेवंसपुरन्दरः ॥ एतेनप्रत्ययेनापिसख्यंकुरुमहामते॥२७॥वृत्रउवाच ॥ भवतांशि
ष्टमार्गेणसत्येनानेनतस्यच ॥ मैत्रमेवंकरिष्यामितेनसार्द्धंद्विजोत्तमाः ॥ २८ ॥ वृत्रइन्द्रस्यसंस्थानंनीतोब्राह्मणपुङ्गवैः ॥ इन्द्रस्तमागतंदृष्ट्वावृत्रंमित्रा
र्थमुद्यतः ॥ २९ ॥ सिंहासनात्समुत्थायअर्घमादायसत्वरः ॥ ददौतस्मैसधर्मात्मावृत्रायद्विजसत्तमाः ॥ ३० ॥ अर्धंभुङ्क्ष्वमहाप्राज्ञऐन्द्रमेतन्महत्प
दम् ॥ वर्तितव्यंसुखेनापिआवाभ्यांदैत्यसत्तम ॥ ३१ ॥ सूतउवाच ॥ एवंविश्वासयन्दैत्यंवृत्रंमैत्रेणवैतदा ॥ गतेषुतेषुविप्रेषुस्वस्थानंद्विजसत्तमाः
॥ ३२ ॥ छिद्रंपश्यतिदुष्टात्मावृत्रस्यापिसदैवहि ॥ सावधानत्वमिन्द्रोऽपिदिवारात्रौप्रचिन्तयेत् ॥ ३३ ॥ तस्यच्छिद्रंनपश्येतवृत्रस्यापिमहात्मनः॥
उपायंचिन्तयामासतस्यैववधहेतवे ॥ ३४ ॥ रम्भासम्प्रेपितातेनमोहयस्वमहासुरम् ॥ येनकेनाप्युपायेनयथाहत्वालभेसुखम् ॥ ३५ ॥ तथाकुरु
ष्वकल्याणिसंमोहायसुरद्विषः ॥ वनंपुण्यंमहादिव्यंपुण्यपादपसेवितम् ॥ ३६ ॥ बहुवृक्षफलोपेतंमृगपक्षिसमाकुलम् ॥ विमानमन्दिरैर्दिव्यैःसर्व
त्रपरिशोभितम् ॥ ३७ ॥ दिव्यगन्धर्वसङ्गीतंभ्रमराकुलितंसदा ॥ कोकिलानांरुतैःपुण्यैःसर्वत्रमधुरायतैः ॥ ३८ ॥ शिखिसारङ्गनादैश्चस
र्वत्रसुसमाकुलम् ॥ दिव्यैस्तुचन्दनैर्वृक्षैःसर्वत्रसमलङ्कृतम् ॥ ३९ ॥ वापीकुण्डतडागैश्चजलपूर्णैर्मनोहरैः॥कमलैःशतपत्रैश्चपुष्पितैःसमलङ्कृतम्॥४०॥
देवगन्धर्वसंसिद्धैश्चारणैश्चैवकिन्नरैः ॥ मुनिभिःशुशुभेदिव्यैर्दिव्योद्यानवरेणच ॥ ४१ ॥ अप्सरोगणसङ्कीर्णंनानाकौतुकमङ्गलैः ॥ हेमप्रासादस
म्बाधंदण्डच्छत्रैश्चचामरैः ॥ ४२ ॥ कलशैश्चपताकाभिःसर्वत्रसमलङ्कृतम् ॥ वेदध्वनिसमाकीर्णंगीतध्वनिसमाकुलम् ॥४३॥ एवंनन्दनमासाद्यसार
म्भाचारुहासिनी ॥ अप्सरोभिःसमंतत्रक्रीडत्यवेंविलासिनी ॥ ४४ ॥ एकदातुसवृत्रोवैकालाकृष्टोगतोवनम् ॥ कतिभिर्दानवैःसार्द्धंमुदयापरया
युतः ॥ ४५ ॥ अलक्ष्येभ्रमतेपार्श्वंतस्यैवचमहात्मनः ॥ देवराजोऽपिविप्रेन्द्राश्छिद्रान्वेषीद्विषांकिल ॥ ४६ ॥ सहिवृत्रोमहाप्राज्ञोविश्वस्तःसर्व
कर्मसु ॥ इन्द्रंमित्रंपरंजानन्भयंचक्रेनतस्यसः ॥ ४७ ॥ भ्रममाणोवनंपश्येत्सर्वत्रपरमंशुभम् ॥ सुरम्यंकौतुकवनंवनितागणसङ्कुलम् ॥ ४८ ॥
चन्दनस्यापिवृक्षस्यछायांशीतांसुपुण्यदाम् ॥ समाश्रित्यविशालाक्षीरम्भातत्रप्रदीव्यति ॥ ४९ ॥ सखीभिस्तुमहाभागादोलारूढायशस्विनी ॥
गायतेसुस्वरंगीतंसर्वविश्वप्रमोहनम् ॥ ५० ॥ तत्रवृत्रःसमायातःकामाकुलितमानसः ॥ दोलारूढांसमालोक्यरम्भांचारुसुलोचनाम् ॥ ५१ ॥
इतिश्रीपाद्मपुराणेपञ्चपञ्चाशत्सहस्रसंहितायांभूमिखण्डेवृत्रवञ्चनंनामचतुर्विंशोऽध्यायः ॥ २४ ॥ सूतउवाच ॥ इयंहिकागायतिचारुलोचनावि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लासभावैःपरिविश्वमेव ॥ अतीवबालाशुशुभेमनोहरासम्पूर्णभावैःपरिमोहयेज्जनम् ॥ १ ॥ दृष्ट्वासरम्भांकमलायताक्षींपीनस्तनींचर्चितकुङ्कमा
ङ्गीम् ॥ पद्माननांकामगृहंमसैषानोवारतिश्चारुमनोहरेयम् ॥ २ ॥ सम्पूर्णभावांपरिरूपयुक्तांकामाङ्गशीलामतिलीलभावाम् ॥ पश्यामिचैनांचमु
काममोहितांयास्यामिपृच्छामिचकाभवेत्सा ॥ ३ ॥ इतीवदैत्यःसुविचिन्तयान्वितःकामेनमुग्धोबहुकालनोदितः ॥ समातुरस्तत्रजगामसत्व
रमुवाचतांदीनमनाःसुलोचनाम् ॥ ४ ॥ कस्यासिवासुन्दरिकेनप्रेषिताकिंनामतेपुण्यतमंवदस्वमे ॥ तवैवरूपेणमहातितेजसामुग्धोऽस्मिबालेममव
श्यतांव्रज ॥ ५॥ एवमुक्ताविशालाक्षीप्राहकामाकुलंप्रति ॥ अहंरम्भामहाभागक्रीडार्थंवनमुत्तमम् ॥६॥ सखीभिस्सहितायातानन्दनंवनमुत्तमम् ॥
त्वंतुकोवाकिमर्थंहिममपार्श्वंसमागतः ॥ ७ ॥ वृत्रउवाच ॥ श्रूयतामभिधास्यामियोऽहंबालेसमागतः ॥ हुताशनात्समुत्पन्नःकश्यपस्यसुतःशुभे
॥ ८ ॥ सखाहंदेवदेवस्यइन्द्रस्यापिवरानने ॥ ऐन्द्रंपदंवरारोहेअर्धंमेमुक्तिमागतम् ॥ ९ ॥ अहंवृत्रःकथंदेविमामेवंनतुविन्दसि ॥ त्रैलोक्यंवश
मायातंयस्यैववरवर्णिनि ॥ १० ॥ अहंशरणमायातःकामाद्रक्षवरानने ॥ भजस्वमांविशालाक्षिकामेनाकुलितंप्रिये ॥ ११ ॥ रम्भोवाच ॥वश
गाहंतवैवाद्यभविष्यामिनसंशयः ॥ यद्यद्ददाम्यहंवीरतत्तत्कार्यंत्वयैवहि ॥ १२ ॥ एवमस्तुमहाभागेतत्तत्सर्वंकरोम्यहम् ॥ एवंसम्भाषणंकृत्वा
तयासहमहाबलः ॥ १३ ॥ तस्मिन्वनेमहापुण्येरेमेदानवसत्तमः ॥ तस्यागीतेननृत्येनहास्येनललितेनच ॥ १४ ॥ अतिमुग्धोमहादैत्यः
सतस्याःसुरतेनच ॥ तमुवाचमहाभागंदानवंसावरानना ॥ १५ ॥ सुरापानंकुरुष्वेहपिबस्वमधुमाधवीम् ॥ तामुवाचविशालाक्षींरम्भांशशि
निभाननाम् ॥ १६ ॥ पुत्रोऽहंब्राह्मणस्यापिवेदवेदाङ्गपारगः ॥ सुरापानंकथंभद्रेकरिष्यामिविनिन्दितम् ॥१७॥ तयातुरम्भयादेव्याप्रीत्यादत्तासुरा
हठात् ॥ तस्यादाक्षिण्यभावेनसुरापानंकृतंतदा ॥ १८ ॥ अतीवमुग्धःसुरयाज्ञानभ्रष्टोयदाऽभवत् ॥ तदन्तरेसुरेन्द्रेणवज्रेणनिहतस्तदा ॥ १९ ॥
ब्रह्महत्यादिकैःपापैःसलिप्तोवृत्रहाततः ॥ ब्राह्मणास्तुततःप्रोचुरिन्द्रपापंकृतंत्वया ॥ २० ॥ अस्मद्वाक्याच्चविश्वस्तोवृत्रोनाममहाबलः ॥ हतो
विश्वासभावेनएवंपापंत्वयाकृतम् ॥ २१ ॥ इन्द्रउवाच ॥ येनकेनाप्युपायेनहन्तव्योऽरिःसदैवहि ॥ देवब्राह्मणहन्ताचयज्ञधर्मस्यकण्टकः ॥२२॥
निहतोदानवोदुष्टस्त्रैलोक्यस्यापिनाशकः ॥ तदर्थंकुपितायूयमेतन्न्यायस्यलक्षणम् ॥ २३ ॥ विचारश्चापिकर्त्तव्योभवद्भिर्द्विजसत्तमाः ॥ पश्चा
त्कोपःप्रकर्त्तव्योन्याय्यान्याय्यंविचिन्त्यताम् ॥ २४ ॥ एवंसम्बोधिताविप्राइन्द्रेणापिमहात्मना ॥ ब्रह्मादिभिःसुरैःसर्वैर्बोधितास्तेचसत्तमाः
॥ २५ ॥जग्मुःस्वस्थानमेवंहिनिहतेधर्मकण्टके ॥ २६ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवृत्रासुरवधोनामपञ्चविंशोऽध्यायः ॥२५॥ सूतउवाच ॥ तंपुत्रं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निहतंश्रुत्वासादितिर्दुःखपीडिता ॥पुत्रशोकेनतेनैवसन्दग्धाद्विजसत्तमाः ॥ १ ॥ पुनरूचेमहात्मानंकश्यपंमुनिपुङ्गवम् ॥ इन्द्रस्यापिसुदुष्टस्यवधार्थं
द्विजसत्तम ॥ २ ॥ ब्रह्मतेजोमयंतीव्रंदुःसहंसर्वदैवतैः ॥ पुत्रैकंदीयतांकान्तसुप्रियाहंयदाविभो ॥३॥ कश्यपउवाच ॥ निहतौबलवृत्रौचममपुत्रौमहा
बलौ ॥ अघमाश्रित्यदेवेनइन्द्रेणापिदुरात्मना ॥ ४ ॥ तस्यैवचवधार्थायपुत्रमेकंददाम्यहम् ॥ वर्षाणांतुशतैकंत्वंशुचिर्भवयशस्विनि ॥ ५ ॥
एवमुक्त्वासयोगीन्द्रोहस्तंशिरसिवैतदा ॥ दत्त्वादित्यासहैवासौगतोमेरुंतपोवनम् ॥ ६ ॥ तपस्ततापसादेवीतपोवननिवासिनी ॥ शुचिष्मतीसदा
भूत्वापुत्रार्थाद्विजसत्तम ॥ ७ ॥ ततोदेवःसहस्राक्षोज्ञात्वाउद्यममेवच ॥ दित्याश्चैवमहाभागअन्तरप्रेक्षकोऽभवत् ॥ ८ ॥ पञ्चविंशाब्दिको
भूत्वादेवराड्दैवतोपमः ॥ ब्राह्मणस्यचरूपेणतस्याश्चान्तिकमागतः ॥ ९ ॥ सतांप्रणम्यधर्मात्मामातरंतपसान्विताम् ॥ तयोक्तस्तुसहस्राक्षो
भवान्कोद्विजसत्तम ॥ १० ॥ तामुवाचसहस्राक्षःपुत्रोऽहंतवशोभने ॥ ब्राह्मणोवेदविद्वांश्चधर्मंजानामिभामिनि ॥ ११ ॥ तपसस्तवसाहाय्यंकरि
ष्येनात्रसंशयः ॥ शुश्रूषतिसतांदेवींमातरंतपसान्विताम् ॥ १२ ॥ तमिन्द्रंसानजानातिआगतंदुष्टकारिणम् ॥ धर्मपुत्रंविजानातिशुश्रूषन्तंदिने
दिने ॥ १३ ॥ अङ्गंसंवाहयेद्देव्याःपादौप्रक्षालयेत्ततः ॥ पत्रमूलंफलंतत्रवल्कलाजिनमेवच ॥ १४ ॥ ददात्येवंसधर्मात्मातस्यैदित्यैसदैवहि ॥
भक्त्यासन्तोषितातस्यसन्तुष्टातमभाषत ॥ १५ ॥ पुत्रेजातेमहापुण्येइन्द्रेचनिहतेसति ॥ कुरुराज्यंमहाभागपुत्रेणममदैवकम् ॥ १६ ॥ एवमस्तु
महाभागेतेप्रसादाद्भविष्यति ॥ तस्याश्चैवान्तरंप्रेप्सुरभवत्पाकशासनः ॥१७॥ ऊनेवर्षशतेचास्याददर्शान्तरमच्युतः ॥ अकृत्वापादयोःशौचंदितिः
शयनमाविशत् ॥ १८॥ शय्यान्तेसाशिरःकृत्वामुक्तकेशातिविह्वला ॥ निद्रामाहारयामासतस्याःकुक्षिंप्रविश्यह ॥ १९ ॥ वज्रपाणिस्ततो
गर्भंसप्तधातंन्यकृन्तत ॥ वज्रेणतीक्ष्णधारेणरुरोदउदरेस्थितः ॥ २० ॥ सगर्भस्तत्रविप्रेन्द्राइन्द्रहस्तगतेनवै ॥ रोदमानंमहागर्भंतमुवाचपुनःपुनः
॥ २१ ॥ शतक्रतुर्महातेजामारोदीरित्यभाषत ॥ सप्तधाकृतवाञ्छक्रस्तंगर्भंदितिजंपुनः ॥ २२ ॥ एकैकंसप्तधाच्छित्त्वारुदमानंसदेवराट् ॥ एवं
वैमरुतोजातास्तेतुदेवामहौजसः ॥ २३ ॥ यथाइन्द्रेणतेप्रोक्ताबभूवुर्नामभिस्ततः ॥ अतिवीर्यमहाकायास्तीव्रतेजःपराक्रमाः ॥ २४ ॥ एकोनावैब
भूवुस्तेपञ्चाशन्मरुतस्ततः ॥ मरुतोनामतेख्याताइन्द्रमेवसमाश्रिताः ॥ २५ ॥ भूतानामेवसर्वेषांरोचयन्तिगणंमहत् ॥ निकायेषुनिकायेषुहरिः
प्रादात्प्रजापतिः ॥ २६ ॥ क्रमशस्तानिराज्यानिपृथुपूर्वाणितानिवै ॥ सदेवःपुरुषःकृष्णःसर्वव्यापीजगद्गुरुः ॥ ॥ २७ ॥ तपोजिष्णुर्महातेजाः

१ 'पुनः स रोदमानं तमेकैकं सप्तधाकरोत् ॥ ते वै जातास्तु मरुतो देवाः सर्वे महौजसः ॥' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वएकःप्रजापतिः ॥ पर्जन्यःपावकःपुण्यःसर्वात्मासर्वएवहि ॥ २८ ॥ तस्यसर्वमिदंपुण्यंजगत्स्थावरजङ्गमम् ॥ भूतसर्गमिमंसम्यग्जानतोद्वि
जसत्तम ॥ २९ ॥ नावृत्तिभयमस्तीहपरलोकभयंकुतः ॥ इमांसृष्टिंमहापुण्यांसर्वपापहरांशुभाम् ॥ ३० ॥ यःशृणोतिनरोभक्त्यासर्वपापैःप्रमुच्य
ते ॥ सहिधन्यश्चपुण्यश्चसहिसत्यसमन्वितः ॥ ३१ ॥ यःशृणोतिइमांसृष्टिंसयातिपरमांगतिम् ॥ सर्वपापविशुद्धात्माविष्णुलोकंसगच्छति
॥ ३२ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेमरुदुत्पत्तिर्नामषड्विंशोऽध्यायः ॥ २६ ॥ सूतउवाच ॥ सप्रभुःसर्वलोकेशोह्यभिषिच्यततोनृपम् ॥ पृथुंवेनस्य
तनयंसर्वराज्येमहाप्रभुम् ॥ १ ॥ महाबाहुंमहाकायंयथेन्द्रंचसुरेश्वरम् ॥ क्रमेणापिततोब्रह्माराज्यानिचविचार्यवै ॥ २ ॥ यद्यस्यापिभवेद्योग्यंदातुंत
दुपचक्रमे ॥ वृक्षाणांब्राह्मणानांचग्रहर्क्षाणांतथैवच ॥ ३ ॥ सोमंराज्येसोऽभ्यषिञ्चत्तपसांचमहामतिः ॥ धर्माणांधर्मयज्ञानांपुण्यानांपुण्यतेजसाम्
॥ ४ ॥ अपांमध्येतथादेवंतीर्थानांहितथैवच ॥ वरुणंसोऽभिषिच्यैवरत्नानांचद्विजोत्तम ॥ ५ ॥ अन्येषांसर्वयक्षाणांराज्येवैश्रवणंपुनः ॥ विष्णुमेव
महाप्राज्ञमादित्यानांपितामहः॥ ६ ॥ राज्येसंस्थापयामासजनताहितहेतवे ॥ सर्वेषामेवपुण्यानांदक्षमेवप्रजापतिम् ॥ ७ ॥ समर्थंसर्वधर्मज्ञंप्रजापति
गणेश्वरम्॥प्रह्लादंसर्वधर्मज्ञंसहिराज्येन्यरूपयत्॥८॥दैत्यानांदानवानांचविष्णुतेजःसमन्वितम्॥यमंवैवस्वतंधर्मंपैत्र्येराज्येऽभिषिच्यच॥९॥ यक्षराक्ष
सभूतानांपिशाचोरगसर्पिणाम्॥ योगिनीनांचसर्वासांवैतालानांमहात्मनाम्॥१०॥कङ्कालानांहिसर्वेषांकूष्माण्डानांतथैवच॥ पार्थिवानांचसर्वेषांगिरि
शंशूलपाणिनम्॥११॥पर्वतानांहिसर्वेषांहिमवन्तंमहागिरिम् ॥ नदीनांचतडागानांवापिकानांतथैवच॥१२॥कुण्डानांकूपराज्येहिदिव्येषुचसुरेश्वरः ॥
सागरंस्थापितंपुण्यंसर्वतीर्थमनुत्तमम्॥१३॥ गन्धर्वाणांतुसर्वेषांराज्येपुण्येतथैवच॥चित्ररथंततोब्रह्माअभिषिच्यसुरेश्वरः॥१४॥ नागानांपुण्यवीर्याणां
वासुकिंचचतुर्मुखः॥सर्पाणांतुतथाराज्येअभिषिच्यसतक्षकम्॥१५॥ वारणानांततोराज्येऐरावणमसिञ्चत॥.अश्वानांचैवसर्वेषामुच्चैःश्रवसमेवच॥१६॥
पक्षिणांचैवसर्वेषांवैनतेयमथापिसः ॥ मृगाणांचततोराज्येब्रह्मासिंहमथादिशत् ॥ १७ ॥ गोवृषंतुगवांमध्येअभिषिच्यप्रजापतिः ॥ वनस्पतीनांसर्वे
षांप्लक्षमेवपितामहः ॥१८॥ एवंराज्यानिसर्वाणिसंस्थाप्यचपितामहः॥दिशापालांस्ततोब्रह्मास्थापयामाससत्तमः ॥१९॥ वैराजस्यतथापुत्रंपूर्वस्यां
दिशिसत्तमः ॥ सुधन्वानंदिशःपालंराजानंसोऽभ्यषिञ्चत ॥ २० ॥ दक्षिणस्यांमहात्मानंकर्दमस्यप्रजापतेः॥ पुत्रंशङ्खपदंनामराजानंसोऽभ्यषिञ्चत
॥ २१ ॥ पश्चिमायांतथाब्रह्मावरुणस्यप्रजापतेः ॥ पुत्रंचपुष्करंनामसोऽभ्यषिञ्चत्प्रजापतिः ॥ २२ ॥ उत्तरस्यांदिशिब्रह्मानलकूबरमेवच ॥ एवंचैवा
भ्यषिञ्चद्दिक्पालान्समहौजसः ॥ २३ ॥ यैरियंपृथिवीसर्वासप्तद्वीपासपत्तना ॥ यथाप्रदेशमद्यापिधर्मेणप्रतिपाल्यते ॥ २४ ॥ पृथुश्चैवंमहाभागः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सोऽभिषिक्तोनराधिपः ॥ राजसूयादिभिःसर्वैरभिषिक्तोमहामखैः ॥ २५ ॥ विधिनावेददृष्टेनराजराज्येमहीपतिः ॥ चाक्षुषेनाम्निसम्पुण्येअतीतेचम
हौजसि ॥२६॥ मन्वन्तरेमहाभागदेवपुण्यहितैषिणि ॥ ततोवैवस्वतायैवमनवेराज्यमादिशत् ॥२७॥ विस्तरंचापिव्याख्यास्येपृथोश्चैवमहात्मनः ॥
यदिमामेवविप्रेन्द्रशुश्रूषसिअतन्द्रितः ॥२८॥ एतदेवमधिष्ठानंमहत्पुण्यंप्रकीर्तितम् ॥ सर्वेष्वेवपुराणेषुएतद्धिनिश्चितंसदा ॥२९॥ पुण्यंयशस्यमायु
ष्यंस्वर्गवासकरंशुभम् ॥ धन्यंपवित्रमायुष्यंपुत्रदंवृद्धिदायकम् ॥ ३० ॥ यःशृणोतिनरोभक्त्याभावध्यानसमन्वितः ॥ अश्वमेधफलंतस्यजायतेना
त्रसंशयः ॥ ३१ ॥ इतिश्रीपाद्मपुराणेपञ्चपञ्चाशत्सहस्रसंहितायांभूमिखण्डेराज्याभिषेकोनामसप्तविंशोऽध्यायः ॥२७॥ ऋषयऊचुः ॥ विस्तरेणसमा
ख्याहिजन्मतस्यमहात्मनः ॥ पृथोश्चैवमहाभागश्रोतुकामावयंपुनः ॥ १ ॥ राज्ञातेनयथादुग्धाइयंधात्रीमहात्मना ॥ पुनर्देवैश्चपितृभिर्मुनिभिस्तत्त्व
वेदिभिः ॥२॥ यथादैत्यैश्चनागैश्चयथायक्षैर्यथाद्रुमैः ॥ शैलैश्चैवपिशाचैश्चगन्धर्वैःपुण्यकर्मभिः ॥३॥ ब्राह्मणैश्चतथासिद्धैराक्षसैर्भीमविक्रमैः ॥ पूर्वमे
वयथादुग्धाअन्यैश्चसुमहात्मभिः ॥ ४ ॥ तेषामेवहिसर्वेषांविशेषंपात्रधारणम् ॥ क्षीरस्यापिविधिंब्रूहिविशेषंचमहामते॥५॥ वेनस्यापिनृपस्यैवपाणि
रेवमहात्मनः ॥ ऋषिभिर्मथितःपूर्वंसकस्मादिहकारणात् ॥६ ॥ क्रुद्धैश्चैवमहापुण्यैःसूतपुत्रवदस्वनः ॥ विचित्रेयंकथापुण्यासर्वपापप्रणाशिनी ॥७॥
श्रोतुकामामहाभागतृप्तिर्नैवप्रजायते ॥ ८ ॥ सूतउवाच ॥ वैन्यस्यहिपृथोश्चैवतस्यविस्तरमेवच ॥ जन्मवीर्यंतथाक्षेत्रंपौरुषंद्विजसत्तमाः ॥ ९ ॥
प्रवक्ष्यामियथासर्वंचरितंतस्यधीमतः ॥ शुश्रूषध्वंमहाभागामामेवंद्विजसत्तमाः ॥ १० ॥ अभक्तायनवक्तव्यमश्रद्धायशठायच ॥ सुमूर्खायसुमोहा
यकुशिष्यायतथैवच ॥ ११ ॥ श्रद्धाहीनायकूटायसर्वनाशायमाद्विजाः ॥ अन्यथापठतेयोहिनिरयंचप्रयातिहि ॥ १२ ॥ भवन्तोभावसंयुक्ताःस
त्यधर्मपरायणाः॥भवतामग्रतःसर्वंचरित्रंपापनाशनम् ॥१३॥ सम्प्रवक्ष्याम्यशेषेणशृणुध्वंद्विजसत्तमाः॥स्वर्ग्यंयशस्यमायुष्यंधन्यंवेदैश्चसम्मितम् ॥
॥ १४ ॥ रहस्यमृषिभिःप्रोक्तंप्रवक्ष्यामिद्विजोत्तमाः ॥ यश्चैनंकीर्तयेन्नित्यंपृथोर्वैन्यस्यविस्तरम् ॥ १५ ॥ ब्राह्मणेभ्योनमस्कृत्यनसशोचेत्कृता
कृतम् ॥ सप्तजन्मार्जितंपापंश्रुतमात्रेणनश्यति ॥ १६ ॥ ब्राह्मणोवेदविद्वांश्चक्षत्रियोविजयीभवेत् ॥ वैश्योधनसमृद्धःस्याच्छूद्रःसुखमवाप्नुयात् ॥
॥ १७ ॥ एवंफलंसमाप्नोतिपठनाच्छ्रवणादपि ॥ पृथोर्जन्मचरित्रंचपवित्रंपापनाशनम्॥१८॥ धर्मगोप्तामहाप्राज्ञोवेदशास्त्रार्थकोविदः॥ अत्रिवंशस
मुत्पन्नःपूर्वमत्रिसमःप्रभुः ॥ १९ ॥ स्रष्टासर्वस्यधर्मस्यअङ्गोनामप्रजापतिः ॥ यआसीत्तस्यपुत्रोवैवेनोनामप्रजापतिः ॥ २० ॥ धर्ममेवंपरित्यज्य
सर्वदैवप्रवर्तते ॥ मृत्योःकन्यामहाभागासुनीथानामनामतः ॥ २१ ॥ तांतुअङ्गोमहाभागःसुनीथामुपयेमिवान् ॥ तस्यामुत्पादयामासवेनंधर्मप्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

निजधर्मंपरित्यज्यअधर्मेनिरतोऽभवत् ॥ २३ ॥ कामाल्लोभान्महामोहात्पापमेवस
णाशनम् ॥ २२ ॥ मातामहस्यदोषेणवेनःकालात्मजात्मजः ॥
माचरत् ॥ वेदाचारमयंधर्मंपरित्यज्यनराधिपः ॥ २४ ॥ अन्ववर्ततपापेनमदमत्सरमोहितः ॥ वेदाध्यायंविनालोकेप्रावर्तन्ततदाजनाः ॥ २५ ॥
निःस्वाध्यायवषट्काराःप्रजास्तस्मिन्प्रजापतौ॥ प्रवृत्तंनपपुःसोमंहुतंयज्ञेषुदेवताः ॥ २६ ॥ इत्युवाचसदुष्टात्माब्राह्मणान्प्रतिनित्यशः ॥ नाध्येतव्यं
नहोतव्यंनदेयंदानमेवच॥२७॥ नयष्टव्यंनहोतव्यमितितस्यप्रजापतेः॥ आसीत्प्रतिज्ञाक्रूरेयंविनाशेप्रत्युपस्थिते ॥२८॥ अहमिज्यश्चयष्टाचयज्ञश्चेति
पुनःपुनः ॥ मयियज्ञाविधातव्यामयिहोतव्यमित्यपि ॥ २९ ॥ इत्यब्रवीत्सदावेनोह्यहंविष्णुःसनातनः ॥ अहंब्रह्माअहंरुद्रोमित्रइन्द्रःसदागतिः
॥ ३० ॥ अहमेवप्रभोक्ताचहव्यंकव्यंनसंशयः ॥ अथतेमुनयःक्रुद्धावेनंप्रतिमहाबलाः ॥ ऊचुस्तेसङ्गताःसर्वेराजानंपापचेतनम् ॥ ३१ ॥ ऋष
यऊचुः ॥ राजाहिपृथिवीनाथःप्रजांपालयतेसदा ॥ धर्ममूर्तिःसराजेन्द्रतस्माद्धर्मंहिरक्षयेत् ॥ ३२ ॥ वयंदीक्षांप्रवेक्ष्यामोयज्ञेद्वादशवार्षिकी
म् ॥ अधर्मंकुरुमायागेनैषधर्मःसतांगतिः ॥ ३३ ॥ कुरुधर्मंमहाराजसत्यंपुण्यंसमाचर ॥ राजाहंपालयिष्यामिइतितेसमयःकृतः ॥ ३४ ॥
तांस्तथाब्रुवतःसर्वान्महर्षीनब्रवीत्तदा ॥ वेनःप्रहस्यदुर्बुद्धिरिममर्थमनर्थकम् ॥ ३५ ॥ वेनउवाच ॥ स्रष्टाधर्मस्यकश्चान्यःश्रोतव्यंकस्यवामया ॥
श्रुतवीर्यतपःसत्योमयावाकःसमोभुवि ॥ ३६ ॥ प्रभवंसर्वभूतानांधर्माणांचविशेषतः ॥ सम्मूढानविदुर्नूनंभवन्तोमांविचेतसः ॥ ३७ ॥
इच्छन्दहेयंपृथिवींप्लावयेयंजलैस्तथा ॥ द्यांभुवंचैवरुन्धेयंनात्रकार्याविचारणा ॥ ३८ ॥ यदानशक्यतेमोहादवलेपाच्चपार्थिवः ॥ अपनेतुंतदावे
नंततःक्रुद्धामहर्षयः ॥ ३९ ॥ विस्फुरन्तंतदावेनंबलाद्गृह्यततोरुषा ॥ वेनस्यतस्यसव्योरुंममन्थुर्जातमन्यवः ॥ ४० ॥ कृष्णाञ्जनचयोपेतम
तिह्रस्वंविलक्षणम् ॥ दीर्घास्यंचविरूपाक्षंनीलकञ्चुकवर्चसम् ॥ ४१ ॥ लम्बोदरंव्यूढकर्णमतिभीतंदुरोदरम् ॥ ददृशुस्तेमहात्मानोनिषीदेत्यब्रुवं
स्ततः ॥ ४२ ॥ तेषांतद्वचनंश्रुत्वानिषसादभयातुरः ॥ पर्वतेषुवनेष्वेवतस्यवंशःप्रतिष्ठितः ॥४३॥ निषादाश्चकिराताश्चभिल्लानाहलकास्तथा ॥ भ्र
मराश्चपुलिन्दाश्चयेचान्येम्लेच्छजातयः ॥ ४४॥ पापाचारास्तुतेसर्वेतस्मादङ्गात्प्रजज्ञिरे ॥ अथतेऋषयःसर्वेप्रसन्नमनसस्ततः ॥ ४५ ॥ गतकलमष
मेवंतंजातंवेनंनृपोत्तमम् ॥ ममन्थुर्दक्षिणंपाणिंतस्यैवचमहात्मनः ॥ ४६ ॥ मथितेतस्यपाणौतुसञ्जातंस्वेदमेवहि ॥ पुनर्ममन्थुस्तेविप्रादक्षिणंपाणि ॥ २७ ॥
मेवच ॥ ४७ ॥ सुकरात्पुरुषोजज्ञेद्वादशादित्यसन्निभः ॥ तप्तकाञ्चनवर्णाङ्गोदिव्यमाल्याम्बरावृतः ॥ ४८ ॥ दिव्याभरणशोभाङ्गोदिव्यगन्धानुले
पनः ॥ मुकुटेनार्कवर्णेनकुण्डलाभ्यांविराजते ॥ ४९ ॥ महाकायोमहाबाहूरूपेणाप्रतिमोभुवि ॥ खड्गबाणधरोधन्वीकवचीचमहाप्रभुः ॥ ५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वलक्षणसम्पन्नःसर्वालङ्कारभूषणः ॥ तेजसारूपभावेनसुवर्णैश्चमहामतिः ॥ ५१॥ दिविइन्द्रोयथाभातिभुविवेनात्मजस्तथा ॥ तस्मिञ्जातेमहाभागे
देवाश्चऋषयोऽमलाः ॥ ५२ ॥ उत्सवंचक्रिरेसर्वेवेनस्यतनयंप्रति ॥ दीप्यमानःस्ववपुषासाक्षादग्निरिवोज्ज्वलः ॥ ५३ ॥ आद्यमाजगवंनामधनुर्गृ
ह्यमहावरम् ॥ शरान्दिव्यांश्चरक्षार्थंकवचंचमहाप्रभम् ॥ ५४ ॥ जातेसतिमहाभागेपृथौवीरेमहात्मनि ॥ सम्प्रहृष्टानिभूतानिसमस्तानिद्विजोत्तम
॥ ५५ ॥ सर्वतीर्थानितोयानिपुण्यानिविविधानिच ॥ तस्याभिषेकेविप्रेन्द्राःसर्वएवप्रतस्थिरे ॥ ५६ ॥ पितामहाद्यादेवास्तुभूतानिविविधानिच ॥
स्थावराणिचराण्येवअभ्यषिञ्चन्नराधिपम् ॥ ५७ ॥ महावीरंप्रजापालंपृथुमेवद्विजोत्तम ॥ पृथुर्वैन्योराजराज्येअभिगम्यचराचरैः ॥ ५८ ॥ देवैर्वि
प्रैस्तथासर्वैरभिषिक्तोमहामनाः ॥ राज्ञांसमधिराज्येवैपृथुर्वैन्यःप्रतापवान् ॥ ५९ ॥ तस्यपित्राप्रजाःसर्वाःकदानैवानुरञ्जिताः ॥ तेनानुरञ्जिताः
सर्वासुमुदिरेसुखेनवै ॥ ६० ॥ तस्यानुरागाद्वीरस्यनामराजेत्यजायत ॥ प्रयातस्यसुवीरस्यसमुद्रस्यद्विजोत्तम ॥ ६१ ॥ आपस्तस्तम्भिरे
सर्वाभयात्तस्यमहात्मनः ॥ दुर्गंमार्गंविलोप्यैवसुमार्गंपर्वताददुः ॥ ६२ ॥ आज्ञाभङ्गंनचक्रुस्तेगिरयःसर्वएवते ॥ अकृष्टपच्यापृथिवीसर्वत्रकामधे
नवः॥ ६३ ॥ पर्जन्यःकामवर्षीचवेदयज्ञान्महोत्सवान् ॥ कुर्वन्तिब्राह्मणाःसर्वेक्षत्रियाश्चतथापरे ॥ ६४ ॥ सर्वकामफलावृक्षास्तस्मिञ्छासतिपार्थि
वे ॥ नदुर्भिक्षंनचव्याधिर्नाकालमरणंनृणाम् ॥ ६५ ॥ सर्वेसुखेनजीवन्तिलोकाधर्मपरायणाः ॥ तस्मिञ्छासतिदुर्धर्षेराजराजेमहात्मनि ॥ ६६ ॥
एतस्मिन्नेवकालेतुयज्ञेपैतामहेशुभे ॥ सूतःसूत्यांसमुत्पन्नःसौम्येऽहनिमहामतिः ॥ ६७ ॥ तस्मिन्नेवमहायज्ञेजज्ञेप्राज्ञोऽथमागधः ॥ पृथोःस्तवार्थं
तौतत्रसमाहूतौमहर्षिभिः ॥ ६८ ॥ सूतस्यलक्षणंवक्ष्येमहापुण्यंद्विजोत्तमाः ॥ शिखासूत्रेणसंयुक्तोवेदाध्ययनतत्परः ॥६९ ॥ सर्वशास्त्रार्थवेत्ताऽसाव
ग्निहोत्रमुपासिता ॥ दानाध्ययनसम्पन्नोब्रह्माचारपरायणः॥ ७० ॥ देवानांब्राह्मणानांचपूजनाभिरतःसदा ॥ याचकःस्तावकैःपुण्यैर्वेदमन्त्रैर्यजेत्किल
॥ ७१ ॥सदाचारपरोनित्यंसम्बन्धोब्राह्मणैःसह ॥ एवंसमागधोजज्ञेवेदाध्ययनवर्जितः॥७२॥ बन्दिनश्चारणाःसर्वेब्रह्माचारविवर्जिताः ॥ ज्ञेयास्तेच
महाभागाःस्तावकाःप्रभवन्तिते ॥ ७३ ॥ स्तवनार्थमुभौसृष्टौनिपुणौसूतमागधौ ॥ तावूचुर्ऋषयःसर्वेस्तूयतामेषपार्थिवः ॥ ७४ ॥ कर्मैतदनुरूपंचया
दृशोऽयंनराधिपः ॥ तावूचतुस्तदासर्वांस्तानृषीन्बन्दिमागधौ ॥ ७५ ॥ आवांदेवानृषींश्चैवप्रीणयावःस्वकर्मभिः ॥ नचास्यविद्मोवैकर्मनतथालक्षणं
यशः ॥ ७६ ॥ कर्मणायेनकुर्यावस्तोत्रमस्यमहात्मनः॥जानीवस्तन्नविप्रेन्द्राअविज्ञातगुणस्यहि ॥ ७७ ॥ भविष्यैस्तैर्गुणैःपुण्यैःस्तोतव्योऽयंनरो
त्तमः ॥ कृतवान्यानिकर्माणिपृथुरेवमहायशाः ॥ ७८ ॥ ऊचुस्तेमुनयःसर्वेगुणान्दिव्यान्महात्मनः ॥ सत्यवाञ्ज्ञानसम्पन्नोबुद्धिमान्ख्यातविक्रमः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥७९॥ सदाशूरोगुणग्राहीपुण्यवांस्त्यागवान्गुणी ॥ धार्मिकःसत्यवादीचयज्ञानांयाजकोत्तमः॥८०॥ प्रियवाक्सत्यवादीचधान्यवान्धनवान्गुणी ॥
गुणज्ञःसगुणग्राहीधर्मज्ञःसत्यवत्सलः ॥ ८१ ॥ सर्वगःसर्ववेत्ताचब्रह्मण्योवेदवित्सुधीः ॥ प्रज्ञावान्सुस्वरश्चैववेदवेदाङ्गपारगः ॥ ८२ ॥ धातागोताप्र
जानांसविजयीसमराङ्गणे ॥ राजसूयादिकानांतुयज्ञानांराजसत्तमः ॥ ८३ ॥ आहर्ताभूतलेचैकःसर्वधर्मसमन्वितः ॥ एतेगुणाअस्यचाग्रेभविष्यन्ति
महात्मनः ॥ ८४ ॥ ऋषिभिस्तौनियुक्तौतुकुर्वाणौसूतमागधौ ॥ गुणैश्चैवभविष्यैश्चस्तोत्रंतस्यमहात्मनः ॥ ८५ ॥ तदाप्रभृतिवैलोकाःस्तवैस्तुष्टाम
हामते ॥ पुरतश्चभविष्यन्तिदातारःस्तावनैर्गुणैः ॥ ८६ ॥ ततःप्रभृतिलोकेऽस्मिन्स्तवेषुद्विजसत्तमाः ॥ आशीर्वादाःप्रयुज्यन्तेतेषांद्रविणमुत्तमम्
॥ ८७ ॥ सूतायमागधायैवबन्दिनेचमहोदयम् ॥ चारणायततःप्रादात्कलिङ्गंदेशमुत्तमम् ॥ ८८ ॥ पृथुःप्रसादाद्धर्मात्माहैहयंदेशमेवच ॥ रेवातीरेपुरं
कृत्वास्वनाम्नानृपनन्दनः ॥ ८९ ॥ ब्राह्मणेभ्योद्विजश्रेष्ठयजन्दातापृथुःपुरा ॥ सर्वज्ञंसर्वदातारंधर्मवीर्यंनरोत्तमम् ॥९०॥ तंददृशुःप्रजाःसर्वामुनयश्च
तपोऽमलाः ॥ ऊचुःपरस्परंपुण्याएषराजामहामतिः ॥ ९१ ॥ देवादीनांवृत्तिदाताअस्माकंचविशेषतः ॥ प्राजानांपालकश्चैववृत्तिदोहिभविष्य
ति ॥ ९२ ॥ इयंधात्रीमहाप्राज्ञाउप्तंबीजंपुराकिल ॥ जीवनार्थंप्रजाभिस्तुग्रासयित्वास्थिराऽभवत् ॥ ९३ ॥ ततःपृथुंद्विजश्रेष्ठप्रजाःसमभिदुद्रुवुः॥
विधत्स्वेतिसुवृत्तिंनोमुनीनांवचनंतदा ॥ ९४ ॥ ग्रासयित्वातदान्नानिपृथ्वीजातासुनिश्चला ॥ भयंप्रजानांसुमहत्सदृष्ट्वाराजसत्तमः ॥ ९५ ॥ मह
र्षिवचनात्सोऽपिप्रगृह्यसशरंधनुः ॥ अभ्यधावत्तवेगेनपृथ्वींक्रुद्धोनराधिपः ॥ ९६ ॥ कौञ्जरंरूपमास्थायभयात्तस्यतुमेदिनी ॥ वनेषुदुर्गदेशे
षुगुप्ताभूत्वाचचारसा ॥ ९७ ॥ नपश्यतिमहाप्राज्ञःकुरूपंद्विजसत्तमाः ॥ आचचक्षुर्महाप्राज्ञंकुञ्जररूपमास्थिता ॥ ९८ ॥ ततःकुञ्जररूपांतामभि
दुद्रावपार्थिवः॥ताड्यमानाचसातेननिशितैर्मार्गणैस्ततः॥९९॥हरिरूपंसमास्थायपलायनपराऽभवत्॥हरेरूपंसमास्थायअभिदुद्रावपार्थिवः ॥१००॥
सोऽतिक्रुद्धोमहाप्राज्ञोरोषारुणसुलोचनः ॥ सुबाणैर्निशितैस्तीक्ष्णैराजघानसमेदिनीम् ॥ १ ॥ आकुलव्याकुलाजाताबाणाघातहतातदा ॥ माहिषं
रूपमास्थायपलायनपराऽभवत् ॥ २ ॥ अभ्यधावतवेगेनबाणपाणिर्धनुर्धरः ॥ सागौर्भूत्वाद्विजश्रेष्ठाःस्वर्गमेवगताध्रुवम् ॥ ३ ॥ ब्रह्मणःशरणंप्राप्ता
विष्णोश्चैवमहात्मनः ॥ रुद्रादीनांचदेवानांत्राणस्थानंनविन्दति ॥ ४ ॥ अलभन्तीभृशंत्राणंवैन्यमेवान्वविन्दत ॥ तस्यपार्श्वंपुनःप्राप्ताबाणघात
समाकुला ॥ ५ ॥ बद्धाञ्जलिपुटाभूत्वातंपृथुंवाक्यमब्रवीत् ॥ त्राहित्राहीतिराजेन्द्रसाराजानमभाषत ॥ ६ ॥ अहंधात्रीमहाभागसर्वाधारा
वसुन्धरा ॥ निहतायांमयिनृपनिहतंलोकसप्तकम् ॥ ७ ॥ कृताञ्जलिपुटाभूत्वापूज्यालोकैस्त्रिभिःसदा ॥ उवाचचैनंराजानमवध्यास्त्रीसदानृप ॥८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्त्रीणांवधेमहत्पापंदृष्टमस्तिद्विजोत्तमैः ॥ गवांवधेमहत्पापंदृष्टमस्तिद्विजोत्तमैः ॥ ९ ॥ मयाविनामहाराजकथंधारयसेप्रजाः ॥ अहंयदा
स्थिराराजंस्तदालोकाश्चराचराः ॥ ११० ॥ स्थिरत्वंयान्तितेसर्वेस्थिरीभूतायदाह्यहम् ॥ मांविनातुइमेलोकाविनश्येयुश्चराचराः ॥ ११ ॥
ततःप्रजाविनश्येयुर्ममनाशेसमागते ॥ कथंधारयिताचासिप्रजाराजन्मयाविना ॥ १२ ॥ मयिलोकाःस्थिराराजन्मयेदंधार्यतेजगत् ॥ मद्विनाशे
विनश्येयुःप्रजाःसर्वानसंशयः ॥ १३ ॥ नमामर्हसिवैहन्तुंश्रेयश्चेत्त्वंचिकीर्षसि ॥ प्रजानांपृथिवीपालशृणुदेववचोमम ॥ १४ ॥ उपायैश्चमहाभाग
सुसिद्धिंयान्त्युपक्रमाः ॥ समालोक्यह्युपायंत्वंप्रजायेनधरिष्यसि ॥ १५ ॥ मांहत्वात्वंमहाराजधारणेपालनेसदा ॥ पोषणेचमहाप्राज्ञमद्विना
हिकथंनृप ॥ १६ ॥ धरिष्यसिप्रजांचेमांकोपंयच्छत्वमात्मनः ॥ अन्नमयीभविष्यामिधरिष्यामिप्रजामिमाम् ॥ १७ ॥ अहंनारीअवध्याचप्रा
यश्चित्तीभविष्यसि ॥ अवध्यांतुस्त्रियंप्राहुस्तिर्यग्योनिगतामपि ॥ १८ ॥ विचार्यैवंमहाराजनधर्मंत्यक्तुमर्हसि ॥ एवंनानाविधैर्वाक्यैरुक्तोधा
त्र्यानराधिपः ॥ १९ ॥ कोपमेनंमहाराजत्यजदारुणमेवहि ॥ प्रसन्नेत्वयिराजेन्द्रतदास्वस्थाभवाम्यहम् ॥ १२० ॥ एवमुक्तस्तयाराजापृथुर्वै
न्यःप्रजापतिः ॥ तामुवाचमहाभागांधरित्रींद्विजसत्तमाः ॥ १२१ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेपृथूपाख्यानेऽष्टाविंशोऽध्यायः ॥ २८ ॥ पृथुरु
वाच ॥ हतेचैवमहापापेएकस्मिन्पापचारिणि ॥ लोकाःसुखेनजीवन्तिसाधवःपुण्यदर्शिनः ॥ १ ॥ तस्मादेकःप्रहर्तव्यःपापिष्ठःपापचेतनः ॥ तस्मा
त्त्वांहिहनिष्यामिसर्वसत्त्वप्रणाशिनीम् ॥ २ ॥ त्वयाबीजानिसर्वाणिलुप्तान्येतानिसाम्प्रतम् ॥ ग्रासंकृत्वास्थिरीभूत्वाप्रजाहत्वाक्वयास्यसि ॥ ३ ॥
हतेपापेदुराचारेसुखंजीवन्तिसाधवः ॥ तस्मात्पापाप्रहन्तव्यासत्यमेवंनसंशयः ॥ ४ ॥ पालितव्यःप्रयत्नेनयस्माद्धर्मःप्रवर्द्धते ॥ भवत्यातुमहत्पा
पंप्रजासंक्षयकारकम् ॥५ ॥ एकस्यार्थेनयोहन्यादात्मनोवापरस्यवा ॥ लोकोपतापकंहत्वानभवेत्तस्यपातकम् ॥ ६ ॥ यस्मिंस्तुनिहतेपापएक
स्मिन्स्वेपरेतथा ॥ बहवस्सुखमेधन्तेहन्याद्दुष्टंनपातकम् ॥ ७ ॥ प्रजानिमित्तंत्वामेवहनिष्यामिनसंशयः ॥ यदिमेपुण्यसंयुक्तंवचनंनकरिष्यसि
॥ ८ ॥ जगतोऽस्यहितार्थायसाधुचैववसुन्धरे ॥ हनिष्येत्वांशितैर्बाणैर्मद्वाक्यात्तुपराङ्मुखीम् ॥९॥ स्वीयेनतेजसाचैवपुण्यास्त्रैलोक्यवासिनीः ॥
प्रजाश्चाहंधरिष्यामिधर्मेणापिनसंशयः ॥ १० ॥ मच्छासनंसमास्थायधर्मयुक्तंवसुन्धरे ॥ इमाःप्रजाआज्ञयामेसञ्जीवयसदैवहि ॥ ११ ॥
एवंमेशासनंभद्रेअद्ययर्हिकरिष्यसि ॥ ततःप्रीतोऽस्मितेनित्यंगोपायिष्यामिसर्वदा ॥ १२ ॥ त्वामेवहिनसन्देहअन्येचैवनृपोत्तमाः ॥ धेनरूपेणसा
पृथ्वीबाणाञ्चितकलेवरा ॥ १३ ॥ उवाचेदंपृथुंवैन्यंधर्माधारंमहामतिम् ॥ १४ ॥ धरण्युवाच ॥ तवादेशंमहाराजसत्यपुण्यार्थसंयुतम् ॥ प्रजानिमि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्तमत्यर्थंविधास्यामिनसंशयः ॥ १५ ॥ उद्यमेनापिपुण्येनउपायेननरेश्वर ॥ समारम्भाःप्रसिद्ध्यन्तिपुण्याश्चैवाप्युपक्रमाः ॥१६॥ उपायंपश्यराजे न्द्रयेनत्वंसत्यवान्भवेः ॥ धारयेथाःप्रजाश्चेमायेनसर्वाःप्रवर्द्धयेः ॥ १७ ॥ संलग्नाश्चोत्तमाबाणाममाङ्गेतेशिलाशिताः ॥ समुद्धरस्वयंराजंश्छल्यान्नि भृतमेवमे ॥ समांकुरुमहाराजतिष्ठेन्मयियथापयः ॥ १८ ॥ सूतउवाच ॥ धनुषोऽग्रेणताञ्छैलान्नानारूपान्गुरूंस्तथा ॥ उत्सारयंस्ततःसर्वांसमहृ पांचकारसः ॥ १९ ॥ तदाप्रभृतितेशैलावृद्धिमापुर्द्विजोत्तमाः ॥ तस्याअङ्गात्स्वयंबाणान्स्वकीयान्नृपनन्दनः ॥ २० ॥ समुद्धृत्यततोवैन्यःप्रीतेनम नसातदा ॥ गर्ताश्चकन्दराश्चैवबाणाघातैःसमीकृताः ॥ २१॥ एवंपृथ्वींसमांसर्वांचकारपुण्यवर्द्धनः ॥ समीकृत्यमहाभागोवत्संतस्याव्यकल्पयत् ॥ ॥ २२ ॥ मनुंस्वायम्भुवंपूर्वंपरिचिन्त्यपुनःपुनः ॥ अतीतेष्वथसर्वेषुमन्वन्तरेषुसत्तमाः ॥२३॥ विषमत्वंगताभूमिःपन्थानासीच्चकुत्रचित् ॥ समानि विषमाण्येवंस्वयमासन्द्विजोत्तमाः ॥ २४ ॥ पूर्वमनोश्चाक्षुषस्यप्राप्तेचैवान्तरेतदा ॥ जातेपूर्वविसर्गेचविषमेचधरातले ॥ २५ ॥ ग्रामाणांचपुराणांच पत्तनानांतथैवच ॥ देशानांक्षेत्रपन्नानांमर्यादानहिदृश्यते ॥ २६ ॥ कृषिर्नैवनवाणिज्यंनगोरक्षाप्रवर्तते ॥ नानृतंभाषतेकश्चिन्नलोभोनचमत्सरः ॥ ॥ २७ ॥ नाभिमानंचवैपापंनकरोतिकदाकिल ॥ वैवस्वतस्यसम्प्राप्तेअन्तरेद्विजसत्तम ॥ २८ ॥ वैन्यस्यसम्भवात्पूर्वंप्रजानामेवसम्भवः ॥ इमाः प्रजाद्विजाःसर्वानिवासंसमरोचयन् ॥ २९ ॥ क्वचिद्भूमौगिरौक्वापिनदीतीरेषुवैतदा ॥ कुञ्जेषुसर्वतीर्थेषुसागरस्यतटेषुच ॥ ३०॥ निवासंचक्रिरेसर्वाः प्रजाःपुण्येनवैतदा॥ तासामाहारःसञ्जातःफलंमूलंतथामधु ॥३१॥ महताकृच्छ्रेणतासामाहारश्चद्विजोत्तमाः ॥ पृथुर्वैन्यःसमालोक्यप्रजानांकष्टमेवहि ॥३२॥ स्वायम्भुवोमनुर्वत्सःकल्पितस्तेनभूभुजा ॥ स्वपाणिःकल्पितस्तेनपात्रमेवंमहामते ॥३३॥ सपृथुःपुरुषव्याघ्रोदुदोहवसुधांतदा ॥ सर्वसस्य मयंक्षीरंससर्वान्नंगुणान्वितम् ॥ ३४ ॥ तेनपुण्येनचान्नेनसुधाकल्पेनताःप्रजाः ॥ तृप्तिंनयन्तिदेवान्वैप्रजाःपितॄंस्तथाऽपरान् ॥ ३५ ॥ प्रसादात्तस्य वैन्यस्यसुखंजीवन्तिताःप्रजाः॥देवेभ्यश्चपितृभ्यश्चदत्त्वाचान्नंप्रजास्ततः ॥३६॥ ब्राह्मणेभ्योविशेषेणअतिथिभ्यस्तथैवच॥पुण्यास्ताभुञ्जतेपश्चात्प्र जाःसर्वाद्विजोत्तमाः ॥ ३७ ॥ यज्ञैश्चान्येयजन्त्येवतर्पयन्तिजनार्दनम् ॥ तेनचान्नेनदेवेशंतृप्तिंगच्छन्तिदेवताः ॥ ३८ ॥ पुनर्वर्षतिपर्जन्यःप्रेषितोमा धवेनच ॥तस्मात्पुण्यामहौषध्यःसम्भवन्तिसुपुण्यदाः ॥३९॥ सस्यजातानिसर्वाणिपृथोःप्रभृतिनान्यथा ॥ तेनान्नेनप्रजाःसर्वावर्तन्तेऽद्यापिनित्यशः ॥४०॥ऋषिभिश्चैवमिलितैर्दुग्धाचेयंवसुन्धरा॥पुनर्विप्रैर्महाभाग्यैःसत्यवद्भिःसुरैस्तथा ॥४१॥सोमोवत्सस्स्वरूपोऽभूद्दोग्धादेवगुरुःस्वयम् ॥ ऊर्जंक्षीरं पयःकल्पयेनजीवन्तिचामराः॥४२॥तेषामन्नेनपुण्येनसर्वेजीवन्तिजन्तवः॥सत्यपुण्येप्रवर्तन्तेऋषिदुग्धावसुन्धरा ॥४३॥ अथातःसम्प्रवक्ष्यामियथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुग्धाइयंधरा॥पितृभिश्चपुरावत्सविधिनायेनवैतदा ॥४४॥सुपात्रंराजतंकृत्वास्वधाक्षीरंसुधान्वितम्॥परिकल्प्ययमंवत्संदोग्धाचान्तकएवसः ॥४५॥
नागैःसर्पैस्ततोदुग्धातक्षकंवत्समेवच॥अलाबुपात्रमादायविषंक्षीरंद्विजोत्तमाः ॥४६॥नागानांतुतथादोग्धाधृतराष्ट्रःप्रतापवान्॥सर्पानागाद्विजश्रेष्ठास्ते
नवर्तन्तिचातुलाः॥४७॥नागावर्तन्तितेनापिह्यत्युग्रेणद्विजोत्तमाः॥ विषेणघोररूपेणसर्पाश्चैवभयानकाः॥४८॥तेनैववर्तयन्त्युग्रामहाकायामहाबलाः॥
तदाहारास्तदाचारास्तद्वीर्यास्तत्पराक्रमाः ॥४९॥ अथातःसम्प्रवक्ष्यामियथादुग्धावसुन्धरा ॥ असुरैर्दानवैःसर्वैःकल्पयित्वाद्विजोत्तमाः ॥५०॥पात्र
मत्रान्नसदृशमायसंसर्वकामिकम् ॥ क्षीरंमायामयंकृत्वासर्वारातिविनाशनम् ॥५१ ॥ तेषामभूत्सवैवत्सोविरोचनःप्रतापवान् ॥ ऋत्विग्द्विमूर्धादैत्या
नांमधुर्दोग्धामहाबलः ॥५२॥तयाहिमाययादैत्याःप्रवर्तन्तेमहाबलाः ॥ महाप्रज्ञामहाकायामहातेजःपराक्रमाः ॥५३॥तद्बलंपौरुषंतेषांतेनजीवन्तिदा
नवाः ॥ तयैतेमाययाद्यापिसर्वमायाद्विजोत्तमाः ॥ ५४ ॥ प्रवर्तन्तेऽमितप्रज्ञास्तेतदेषामिदंबलम् ॥ तथातुदुग्धायक्षैःसासर्वाधारासुमेदिनी ॥५५॥
इतिशुश्रुमविप्रेन्द्राःपुराकल्पेमहात्मभिः ॥ अन्तर्धानमयंक्षीरमयस्पात्रेसुविस्तरे ॥ ५६ ॥ वैश्रवणोमहाप्राज्ञस्तदावत्सःप्रकल्पितः ॥ मणिधरस्य
पितापुण्यःप्राज्ञोबुद्धिमतांवरः ॥ ५७ ॥ दोग्धारजतनाभस्तुतस्याश्चासीन्महामतिः ॥ सर्वज्ञःसर्वधर्मज्ञोयक्षराजसुतोबली ॥ ५८ ॥ अष्टबाहुर्म
हातेजाद्विशीर्षःसुमहातपाः ॥ यक्षावर्तन्तितेनापिसर्वदैवद्विजोत्तमाः ॥ ५९ ॥ पुनर्दुग्धाइयंपृथ्वीराक्षसैश्चमहाबलैः ॥ तथाचैषापिशाचैश्चसातुरैर्द
ग्धवारिभिः ॥ ६० ॥ उत्प्लुतंनृकपालंतंशावपात्रमयस्कृतम् ॥ सुप्रजांभोक्तुकामास्तेतीव्रकोपपराक्रमाः ॥ ६१ ॥ दोग्धारजतनाभस्तुतेषामा
सीन्महाबलः ॥ सुमालीनामवत्सश्चशोणितंक्षीरमेवच ॥ ६२ ॥ रक्षांसियातुधानाश्चपिशाचाश्चमहाबलाः ॥ यक्षास्तेनचजीवन्तिभूतसङ्घाश्च
दारुणाः ॥ ६३ ॥ गन्धर्वैरप्सरोभिश्चपुनर्दुग्धावसुन्धरा ॥ कृत्वावत्संसुविद्वांसंतैश्चचित्ररथंपुनः ॥६४॥ दुदुहुःपद्मपात्रेतुगान्धर्वंगीतसङ्कुलम् ॥
सुरुचिर्नामगन्धर्वस्तेषामासीन्महामतिः ॥ ६५ ॥ दोग्धापुण्यतमश्चैवतस्याश्चद्विजसत्तमाः ॥ शुचिगीतंमहात्मानःसुक्षीरंदुदुहुस्तदा ॥ ६६ ॥
गन्धर्वास्तेनजीवन्तियक्षाश्चाप्सरसस्तथा ॥ पर्वतैश्चमहापुण्यैर्दुग्धाचेयंवसुन्धरा ॥ ६७ ॥ रत्नानिविविधान्येवओषधीश्चामृतोपमाः ॥
वत्सश्चैवमहाभागोहिमवान्परिकल्पितः ॥ ६८ ॥ मेरुर्दोग्धाचसञ्जातःपात्रंकृत्वातुशैलजम् ॥ तेनक्षीरेणसंवृद्धाःशैलाःसर्वेमहोच्छ्रयाः ॥ ६९॥ पु
नर्दुग्धामहावृक्षैःपुण्यैःकल्पद्रुमादिभिः ॥ पालाशंपात्रमानिन्युश्छिन्नदग्धप्ररोहणम् ॥ ७० ॥ शालोदुदोहपुण्याङ्गःप्लक्षोवत्सोऽभवत्तदा ॥ गुह्यकैश्चा
रणैःसिद्धैर्विद्याधरगणैस्तदा ॥ ७१ ॥ दुग्धाचेयंसर्वधात्रीसर्वकामप्रदायिनी ॥ यंयमिच्छन्तियेलोकाःपात्रवत्सविशेषणैः ॥ ७२ ॥ तैस्तैस्ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षांददात्येवक्षीरंसद्भावमीदृशम् ॥ इयंधात्रीविधात्रीतुइयंश्रेष्ठावसुन्धरा ॥ ७३ ॥ सर्वकामदुघाधेनुरियंपुण्यैरलङ्कृता ॥ इयंज्येष्ठाप्रतिष्ठातुइयंसृष्टि
रियंप्रजा ॥ ७४ ॥ पावनीपुण्यदापुण्यासर्वसस्यप्ररोहिणी ॥ चराचरस्यसर्वस्यप्रतिष्ठायोनिरेवच ॥ ७५ ॥ महालक्ष्मीरियंविद्यासर्वविश्वमयी
सदा ॥ सर्वकामदुघादोग्ध्रीसर्वबीजप्ररोहिणी ॥ ७६ ॥ सर्वेषांश्रेयसांमातासर्वलोकधरात्वियम् ॥ पञ्चानामपिभूतानांप्रकाशोरूपमेवच ॥ ७७ ॥
आसीदियंसमुद्रान्तामेदिनीतिपरिश्रुता ॥ मधुकैटभयोःकृत्स्नामेदसासमभिप्लुता ॥ ७८ ॥ तेनेयंमेदिनीनामप्रोच्यतेब्रह्मवादिभिः ॥ ततोऽभ्युपग
मान्प्राज्ञपृथोर्वैन्यस्यसत्तमाः ॥ ७९ ॥ दुहितृत्वमनुप्राप्तादेवीपृथ्वीतिचोच्यते ॥ तेनराज्ञाद्विजश्रेष्ठाःपालितेयंवसुन्धरा ॥ ८० ॥
ग्रामाधारागृहाढ्याचपुरपत्तनमालिनी ॥ सस्याकरवतीस्फीतासर्वतीर्थमयीद्विजाः ॥ ८१ ॥ एवंवसुमतीदेवीसर्वलोकमयीसदा ॥ एवंप्रभावोरा
जेन्द्रःपुराणेपरिपठयते ॥ ८२ ॥ पृथुर्वैन्योमहाभागःसर्वकर्मप्रकाशकः ॥ यथाविष्णुर्यथाब्रह्मायथारुद्रःसनातनः ॥ ८३ ॥ नमस्कार्यास्त्र
योदेवादेवाद्यैर्ब्रह्मवादिभिः ॥ ब्राह्मणैर्ऋषिभिःसर्वैर्नमस्कार्योनृपोत्तमः ॥ ८४ ॥ वर्णानामाश्रमाणांयःस्थापकःसर्वलोकधृक् ॥ पार्थिवैश्चमहा
भागैःपार्थिवत्वमिहेप्सुभिः ॥ ८५ ॥ आदिराजोनमस्कार्यःपृथुर्वैन्यःप्रतापवान् ॥ धनुर्वेदार्थिभिर्योधैःसदैवजयकाङ्क्षिभिः ॥ ८६ ॥ नमस्कार्यो
महाराजोवृत्तिदातामहीभृताम् ॥ एवंपात्रविशेषाश्चमयाख्याताद्विजोत्तमाः ॥ ८७ ॥ वत्सानांसुविशेषाश्चदोग्धॄणांभवदग्रतः ॥ क्षीरस्यापिविशेषंतु
यथोद्दिष्टंहिभूभुजा ॥ ८८ ॥ समाख्यातंतथाग्रेचभवतांवैयथार्थतः ॥ धन्यंयशस्यमारोग्यंपुण्यंपापप्रणाशनम् ॥ ८९ ॥ पृथोर्वैन्यस्यचरितंयः
शृणोतिद्विजोत्तमाः ॥ तस्यभागीरथीस्नानमहन्यहनिजायते ॥ ९० ॥ सर्वपापविशुद्धात्माविष्णुलोकंप्रयातिसः ॥ ९१ ॥ इतिश्रीपाद्मपु
राणेपञ्चपञ्चाशत्सहस्रसंहितायांभूमिखण्डेपृथूपाख्यानएकोनत्रिंशोऽध्यायः ॥ २९ ॥ ॥ ऋषयऊचुः ॥ योऽसौवेनस्त्वयाऽख्यातःपापाचारे
णवर्तितः ॥ तस्यपापस्यकावृत्तिःकिंफलंप्राप्तवान्द्विज ॥ १ ॥ चरित्रंतस्यवेनस्यसमाख्याहियथापुरा ॥ विस्तरेणविदांश्रेष्ठत्वंनएतन्महामते
॥ २ ॥ सूतउवाच ॥ चरित्रंतस्यवेनस्यवैन्यस्यापिमहात्मनः ॥ प्रवक्ष्यामिसुपुण्यंचयथान्यायंश्रुतंपुरा ॥ ३ ॥ जातेपुत्रेमहाभागेतस्मिन्पृथौ
महात्मनि ॥ विमलत्वंगतोराजाधर्मत्वंगतवान्पुनः ॥ ४ ॥ महापापानिसर्वाणिअर्जितानिनराधमैः ॥ तीर्थसङ्गप्रसङ्गेनतेषांपापंप्रयातिच
॥ ५ ॥ सतांसङ्गात्प्रजायेतपुण्यमेवनसंशयः ॥ पापानांतुप्रसङ्गेनपापमेवप्रजायते ॥ ६ ॥ सम्भाषाद्दर्शनात्स्पर्शादासनाद्भोजनात्किल ॥
पापिनांसम्भवाच्चैवकिल्बिषंपरिसञ्चरेत् ॥७॥ तथापुण्यात्मकानांचपुण्यमेवप्रसञ्चरेत्॥महातीर्थप्रसङ्गेनपापाःशुध्यन्तिनान्यथा॥८॥ पुण्यांगतिंप्रया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्त्येतेनिर्द्धूताशेषकल्मषाः ॥ ९ ॥ ऋषयऊचुः ॥ तत्कथंयान्तितेपापाःपरांसिद्धिंद्विजोत्तम ॥ तन्नोविस्तरतोब्रूहिश्रोतुंश्रद्धाप्रवर्तते ॥ १० ॥ सूत
उवाच ॥ लुब्धकाश्चमहापापाःसञ्जातादासधीवराः ॥ रेवाचयमुनागङ्गातासामम्भसिसंस्थिताः ॥ ११ ॥ ज्ञानतोऽज्ञानतःस्नात्वासङ्क्रीडन्तेतच
वैजले ॥ महानद्याःप्रसङ्गेनतेयान्तिपरमांगतिम् ॥ १२ ॥ दासत्वंपापसङ्घातंपरित्यज्यव्रजन्तिते॥ पुण्यतोयप्रसङ्गाच्चह्याप्लुताःसर्वएवते ॥ १३ ॥
महानद्याःप्रसङ्गाच्चअन्यासांनैवसत्तमाः ॥ महापुण्यजनस्यापिपापंनश्यतिपापिनाम् ॥ १४ ॥ प्रसङ्गाद्दर्शनात्स्पर्शान्नात्रकार्याविचारणा ॥ अत्रा
र्थेश्रूयतेविप्राइतिहासोऽघनाशनः ॥ १५ ॥ तंवोह्यद्यप्रवक्ष्यामिबहुपुण्यप्रदायकम् ॥ कश्चिदस्तिमृगव्याधःसुलोभाख्योमहावने ॥ १६ ॥ श्वभि
र्वागुरिजालैश्चधनुर्बाणैस्तथैवच ॥ मृगान्घातयतेनित्यंपिशितास्वादलम्पटः ॥ १७॥ एकदातुसुदुष्टात्माबाणपाणिर्धनुर्धरः ॥ श्वभिःपरिवृतोदुर्गंव
नंविन्ध्यस्यवैगतः ॥ १८॥ मृगान्रुरून्वराहांश्चभीतान्सूदितवान्बहून् ॥ रेवातीरंसमासाद्यकश्चिच्छफरघातकः ॥ १९ ॥ शफरान्सूदयित्वासनि
र्जगामबहिर्जलात् ॥ मृगव्याधस्यलोभस्यभयत्रस्तातततोमृगी ॥ २०॥ जीवत्राणपरासाऽतीभीताचलितचेतना ॥ त्वरमाणापलायन्तीरेवातीरंसमा
श्रिता ॥२१॥ श्वभिश्चचालितासातुबाणघातक्षतातुरा ॥ श्वसनस्यापिवेगेनसुलोभोमृगघातकः ॥ २२ ॥ पृष्ठएवसमायातिपुरतोयातिसामृगी ॥
दृष्टवांस्तांशफरहाबाणपाणिःसमुद्यतः ॥ २३ ॥ धनुरानम्यवेगेनअनुरुध्यचतांमृगीम् ॥ तावल्लुब्धकलोभाख्यःश्वभिःसार्द्धंसमागतः ॥ २४ ॥
नहन्तव्यामदीयेयंमृगयांमेसमागता ॥ तस्यवाक्यंसमाकर्ण्यमीनहामांसलम्पटः ॥ २५ ॥ बाणंमुमोचदुष्टात्मातामुद्दिश्यमहाबलः ॥ निहतामृग
लुब्धेनबाणेननिशितेनच ॥ २६ ॥ प्रमृतासामृगीतत्रबाणाभ्यांपापचेतसोः ॥ श्वभिर्दन्तैःसमाक्रान्तात्वरमाणापपातसा ॥ २७ ॥ शिखराच्चह्रदेपु
ण्येरेवायाःपापनाशने ॥ श्वानश्चत्वरमाणास्तेपतिताविमलेह्रदे ॥ २८ ॥ मृगव्याधोवदत्येवंधीवरंक्रोधमूर्च्छितः ॥ मदीयेयंमृगीदुष्टकस्माद्बा
णैर्हतात्वया ॥ २९ ॥ तमुवाचपुनःसोऽपिमीनहामृगघातकम् ॥ मदीयेयंनसन्देहश्चावलितःप्रभाषसे ॥ ३० ॥ युध्यमानौततस्तौतुद्धावेतौतु
परस्परम् ॥ क्रोधलोभान्महाभागौपतितौविमलेजले ॥ ३१ ॥ तस्मिन्कालेमहापर्ववर्ततेगतिदायकम् ॥ अमावास्यासमायोगंमहापुण्यफलप्र
दम् ॥ ३२ ॥ वेलायांपतिताःसर्वेपर्वणस्तस्यसत्तमाः ॥ जपध्यानविहीनास्तेभावसत्यविवर्जिताः ॥ ३३ ॥ तीर्थस्नानप्रसङ्गेनमृगीश्वाचसलुब्ध
कः ॥ सर्वपापविनिर्मुक्तास्तेगताःपरमांगतिम् ॥ ३४ ॥ तीर्थानांचप्रभावेनसतांसङ्गाद्विजोत्तमाः ॥ नाशयेत्पापिनांपापंदहेदग्निरिवेन्धनम् ॥३५॥
तेषामेवंहिसंसर्गादृषीणांचमहात्मनाम् ॥ सम्भाषाद्दर्शनान्नष्टंस्पर्शाच्चैवनृपस्यच ॥ ३६ ॥ वेनस्यकल्मषंनष्टंसतांसङ्गात्पुराकिल ॥ अत्युग्रपुण्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संसर्गात्पापंनश्यतिपापिनाम् ॥ ३७ ॥ अत्युग्रपापिनांसङ्गात्पापमेवप्रसञ्चरेत् ॥ मातामहस्यदोषेणसंलिप्तोवेनएवसः ॥ ३८ ॥ ऋषयऊचुः ॥ मा
तामहस्यकोदोपस्तंनोविस्तरतोवद ॥ समृत्युःसचवैकालःसयमोधर्मएच ॥ ३९ ॥ नहिंसकोहिकस्यापिपदेतस्मिन्प्रतिष्ठितः ॥ चराचराश्चयेलोकाः
स्वकर्मवशवर्तिनः ॥४० ॥ जीवन्तिचम्रियन्तेचभुञ्जन्त्येवंस्वकर्मभिः ॥ पापाःपश्यन्तितंघोरंतेषांकर्मविपाकतः ॥ ४१ ॥ निरयेषुचसर्वेषुकर्मणैवंसु
पुण्यवान् ॥ योजयंत्ताडयेत्सूतयमएषदिनेदिने ॥ ४२ ॥ सर्वेष्वेवसुपुण्येषुकर्मस्वेवंसपुण्यवान् ॥ योजयत्येवधर्मात्मातस्यदोषोनदृश्यते ॥
समृत्योःकेनदोषेणपापीवेनस्त्वजायत ॥ ४३ ॥ सूतउवाच ॥ समृत्युःशासकोनित्यंपापानांदुष्टचेतसाम् ॥ ४४ ॥ वर्ततेकालरूपेणतेषांकर्मविमृश्य
ति ॥ दुष्कृतंकर्मयस्यापिकर्मणातेनघातयेत् ॥ ४५ ॥ तस्यपापंविदित्वासौनयत्येवंहितंयमः ॥ सुकृतात्मालभेत्स्वर्गंकर्मणासुकृतेनवै ॥ ४६ ॥
योजयत्येषतान्सर्वान्मृत्युरेवसुदूतकैः ॥ महतासौख्यभावेनगीतमङ्गलकारिणा ॥ ४७ ॥ दानभोगादिभिश्चैवयोजयेच्चकृतात्मकान् ॥ पीडाभिर्विवि
धाभिश्चक्लेशैःकाष्ठैश्चदारुणैः ॥ ४८ ॥ त्रासयेत्ताडयेद्विप्रान्सक्रोधोमृत्युरेवतान् ॥ कर्मण्येवंहितस्यापिव्यापारःपरिवर्तते ॥ ४९ ॥ मृत्योश्चा
पिमहाभागलोभात्पुण्यात्प्रजायते ॥ सुनीथानामवैकन्यासञ्जातैषामहात्मनः ॥ ५० ॥ पितुःकर्मविमृश्यैवक्रीडमानासदैवसा ॥ प्रजानांशास्ति
कर्तारंपुण्यपापनिरीक्षणम् ॥ ५१ ॥ सातुकन्यामहाभागासुनीथानामतस्यसा ॥ रममाणावनंप्राप्तासखीभिःपरिवारिता ॥ ५२ ॥ तत्रापश्य
न्महाभागंगन्धर्वतनयंवरम् ॥ गीतकोलाहलस्यापिसुशङ्खंनामसातदा ॥ ५३ ॥ ददर्शचारुसर्वाङ्गंतप्यन्तंसुमहत्तपः ॥ गीतविद्यासुसिद्ध्यर्थं
ध्यायमानंसरस्वतीम् ॥ ५४ ॥ तस्योपघातमेवासौसाचकारदिनेदिने ॥ सुशङ्खःक्षमतेनित्यंगच्छगच्छेतिसोऽब्रवीत् ॥ ५५ ॥ प्रेषितानैवगच्छे
त्साविघ्नमेवसमाचरेत् ॥ तेनैवमुक्तासाक्रुद्धाऽताडयत्तपसिस्थितम् ॥ ५६ ॥ तामुवाचततःक्रुद्धःसुशङ्खःक्रोधमूर्च्छितः ॥ दुष्टेपापसमाचारेकस्मा
द्विघ्नस्त्वयाकृतः ॥ ५७ ॥ ताडनात्ताडनंदुष्टेनकुर्वन्तिमहाजनाः ॥ आक्रुष्टानैवकुप्यन्तिइतिधर्मस्यसंस्थितिः ॥ ५८ ॥ त्वयाहंघातितःपापेनिर्दोष
स्तपसान्वितः ॥ एवमुक्त्वासधर्मात्मासुनीथांपापचारिणीम् ॥ ५९॥ विररामहाक्रोधाज्ज्ञात्वानारींनिवर्तितः ॥ ततःसापापमोहाद्वाबाल्याद्वातमि
हैवच ॥ ६० ॥ समुवाचमहात्मानंसुशङ्खंतपसिस्थितम् ॥ त्रैलोक्यवासिनांतातोममैवपरिघातकः॥६१॥असतोघातयेन्नित्यंसत्यान्सपरिपालयेत् ॥ ॥ ३१ ॥
नैवदोषोभवेत्तस्यमहापुण्येनवर्तयेत्॥६२॥एवमुक्त्वागतासातुपितरंवाक्यमब्रवीत् ॥ मयाहिताडितस्तातगन्धर्वतनयोवने ॥६३॥तपस्तपन्सदैकान्ते
कामक्रोधविवर्जितः ॥ समामुवाचधर्मात्माक्रोधरागसमन्वितः ॥६४॥ नाताडयेत्ताडयन्तंक्रोशन्तंनैवक्रोशयेत्॥इत्युवाचसमांतातातन्मेत्वंकारणंवद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥६५॥ एवमुक्तः सवैमृत्युः सुनीथांद्विजसत्तमाः॥ किञ्चिन्नोवाचधर्मात्माप्रश्नप्रत्युत्तरंततः ॥६६ ॥ वनंप्राप्तापुनःसाहिसुशङ्खोयत्रसंस्थितः ॥ कशाघातै
स्ततोदौष्ट्याज्जघानतपतांवरम्॥६७॥ सुशङ्खस्ताडितोविप्रामृत्योश्चैवहिकन्यया॥ततःक्रुद्धोमहातेजाःशशापतनुमध्यमाम्॥६८॥निर्दोषोहियतोदुष्टेत्व
येवपरिताडितः ॥ अहमत्रवनेसंस्थस्तस्माच्छापंददाम्यम् ॥६९॥ गार्हस्थ्यंचसमास्थायसहभर्त्रायदाशृणु ॥ पापाचारमयःपुत्रोदेवब्राह्मणनिन्दकः
॥ ७० ॥ सर्वपापरतोदुष्टेतवगर्भेभविष्यति ॥ एवंशप्त्वागतःसोऽपितपएवसमाश्रितः ॥ ७१ ॥ गतेतस्मिन्महाभागेसासुनीथागृहंगता ॥ समाचष्ट
महात्मानंपितरंतत्समानसा ॥ ७२ ॥ यथाशप्तातदातेनगन्धर्वतनयेनसा ॥ तत्सर्वंसंश्रुतंतेनमृत्युनापरिभाषितम् ॥ ७३ ॥ कस्मात्त्वयाताडितोऽसौ
तपस्वीदोषवर्जितः ॥ युक्तंनैवकृतंपुत्रितपतस्तस्यताडनम् ॥ ७४ ॥ एवमाभाष्यधर्मात्मामृत्युःपरमदुःखितः ॥ बभूवसहितत्तस्यादिष्टमेवंविचिन्त
यन् ॥ ७५ ॥ सूतउवाच ॥ अत्रिपुत्रोमहातेजाअङ्गोनामप्रतापवान् ॥ एकदातुगतोविप्रानन्दनंप्रतिसद्द्विजः ॥ ७६ ॥ तत्रदृष्ट्वादेवराजंतमिन्द्रंपाक
शासनम् ॥ अप्सरसांगणैर्युक्तंगन्धर्वैःकिन्नरैस्तथा ॥ ७७ ॥ गीयमानंगीतगैश्चसुस्वरैःसप्तकैस्तथा ॥ वीज्यमानंसुगन्धैश्चव्यजनैःसर्वतोऽपितम्
॥ ७८ ॥ योषिद्भीरूपयुक्ताभिश्चामरैर्हंसगामिभिः ॥ छत्रेणहंसवर्णेनचन्द्रबिम्बानुकारिणा ॥ ७९ ॥ राजमानंसहस्राक्षंसर्वाभरणभूषितम् ॥
कामक्रीडागतंदेवंदृष्टवानमितौजसम् ॥ ८० ॥ तस्यपार्श्वेमहाभागांपौलोमींचारुमङ्गलाम् ॥ रूपेणतेजसाचैवतपसाचयशस्विनीम् ॥ ८१ ॥
सौभाग्येनविराजन्तींपातिव्रत्येनतांसतीम् ॥ तयासहसहस्राक्षःसरेमेनन्दनेवने ॥ ८२ ॥ तस्यलीलांसमालोक्यअङ्गश्चैवद्विजोत्तमः ॥ धन्योवैदेव
राजोऽयमीदृशैःपरिवारितः ॥ ८३ ॥ अहोऽस्यतपसोवीर्यंयेनप्राप्तंमहत्पदम् ॥ यदाममेदृशःपुत्रःसर्वलोकप्रधारकः ॥ ८४ ॥ भवेत्तदामहत्सौख्यं
प्राप्स्यामीहनसंशयः ॥ इतिचिन्तापरोभूत्वात्वरमाणोगृहंगतः ॥ ८५ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेत्रिंशोऽध्यायः ॥ ३० ॥ सूत
उवाच ॥ अथत्वङ्गोमहातेजादृष्ट्वेयन्द्रस्यसम्पदम् ॥ भोगंचैवविलासंचलीलांतस्यमहात्मनः ॥ १ ॥ कथंमेइन्द्रसदृशःपुत्रःस्याद्धर्मसंयुतः ॥
चिन्तयित्वाक्षणंचैवअङ्गोधर्मभृतांवरः ॥ २ ॥ स्वकंगेहंसमायातःसत्वङ्गःसत्यतत्परः ॥ अत्रिंपप्रच्छपितरंप्रणतोनम्रकन्धरः ॥ ३ ॥ कोऽयंपुण्य
समाचारोभुङ्क्तऐन्द्रंपदंमहत् ॥ कस्यपुण्यस्यवैपुष्टिःकिंकृतंकर्मकीदृशम् ॥ ४ ॥ कीदृशंतपएतस्यकमाराधितवान्पुरा ॥ एतन्मेविस्तरेणत्वंब्रूहिसत्य
वतांवर ॥ ५ ॥ अत्रिरुवाच ॥ साधुसाधुमहाभागयद्येवंपृच्छसेमयि ॥ चरित्रमिन्द्रस्यवत्सतन्मेनिगदतःशृणु ॥ ६ ॥ सुव्रतोनाममेधावीपुराब्राह्म
णसत्तमः ॥ तेनकृष्णोहृषीकेशस्तपसाचैवतोपितः ॥ ७ ॥ पुण्यंगर्भंपुनःप्राप्तोह्यदित्याःकश्यपात्किल ॥ विष्णोश्चैवप्रसादेनसुरराजोबभूवह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥८॥ अङ्गउवाच ॥कथमिन्द्रसमः पुत्रोममस्यात्पुत्रवत्सल ॥ तदुपायंसमाचक्ष्वत्वंहिज्ञानवतांवरः ॥९॥अत्रिरुवाच॥ समासेनैवतस्यैवसुव्रतस्यमहात्मनः ॥ चरित्रमखिलंपुण्यंनिशामयमहामते ॥ १० ॥ यथासुव्रतमेधावीपुराराधितवान्हरिम् ॥ तस्यभावंचभक्तिंचध्यानंचैवमहात्मनः॥११॥ समालोक्यजगन्नाथोदत्तवान्वैमहत्पदम् ॥ सऐन्द्रंसर्वभोगाढ्यंत्रैलोक्यंसचराचरम् ॥ १२ ॥ विष्णोश्चैवप्रसादाच्चपदंभुङ्क्तेत्रिलोकधृक् ॥ एवंतेसर्वमाख्यातमिन्द्रस्यापिविचेष्टितम् ॥ १३ ॥ भक्त्यातुष्यतिगोविन्दोभावध्यानेनसत्तम ॥ सर्वंददातितुष्टात्माभक्त्यासन्तोषितोहरिः ॥ १४ ॥ तस्मादाराध्यगोविन्दंसर्वदंसर्वसम्भवम् ॥ सर्वज्ञंसर्ववेत्तारंसर्वेषांपुरुषंवरम् ॥ १५ ॥ तस्मात्प्राप्स्यसिसर्वंत्वंयद्यदिच्छसिनन्दन ॥ १६ ॥ सुखस्यदातापरमार्थदातामोक्षस्यदाताजगतांहिनाथः ॥ तस्मात्तमाराधयगच्छपुत्रसम्प्राप्स्यसेइन्द्रसमंहिपुत्रम् ॥१७॥ आकर्ण्यवाक्यंपरमार्थयुक्तमुक्तंमहात्माऋषिणाहितेन ॥ सङ्गृह्यतत्त्ववचनस्यतस्यप्रणम्यतंशाश्वतमभ्ययात्सः ॥१८॥ आमन्त्र्यचाङ्गः पितरंमहात्माब्रह्मात्मजंब्रह्मसमानमेव ॥ सम्प्राप्तवान्मेरुगिरेस्तुशृङ्गंतंकाञ्चनैरत्नमयैःसमेतम् ॥ १९ ॥ इतिश्रीपाद्मपुराणेपञ्चपञ्चाशत्सहस्रसंहितायांभूमिखण्डेवेनोपाख्यानेएकत्रिंशोऽध्यायः ॥ ३१ ॥ सूतउवाच ॥ नानारत्नैःसुदीप्ताङ्गोहाटकेनापिसर्वतः ॥ राजमानोगिरिश्रेष्ठोयथासूर्यःस्वरश्मिभिः ॥ १ ॥ छायामशोकांसम्प्राप्यशीतलांसुखदायिनीम् ॥ ध्यायन्तियोगिनःसर्वेउपविष्टादृढासने ॥ २ ॥ क्वचित्तपन्तिमुनयःक्वचिद्गायन्तिकिन्नराः ॥ सन्तुष्टाऋषिगन्धर्वावीणातालकराविलाः ॥ ३ ॥ तालमानलयेलीनाःस्वरैःसप्तभिरन्वितैः ॥ मूर्च्छनारक्तिसंयुक्तंव्यक्तंगीतंमनोहरम् ॥ ४ ॥ तस्मिन्वैपर्वतश्रेष्ठेचन्दनच्छायसंश्रिताः ॥ गन्धर्वागीततत्त्वज्ञागीतंगायन्तितत्पराः ॥ ५ ॥ नृत्यन्तियोषितस्तत्रदेवानांपर्वतोत्तमे ॥ पापहापुण्यदोदिव्यःसुश्रेयसांप्रदायकः ॥ ६ ॥ वेदध्वनिःसुमधुरःश्रूयतेपर्वतोत्तमे ॥ चन्दनाशोकपुन्नागैःशालैस्तालैस्तमालकैः ॥ ७ ॥ वटैस्तुमेघसङ्काशैराजतेपर्वतोत्तमः ॥ सन्तानकैःकल्पवृक्षैरम्भापादपसङ्कुलैः ॥ ८ ॥ नगेन्द्रोभातिसर्वत्रनाकवृक्षैःसुपुष्पितैः ॥ नानाधातुसमाकीर्णोनानारत्नचयोगिरिः ॥ ९ ॥ नानाकौतुकसंयुक्तोनानामङ्गलसंयुतः ॥ वेदवृन्दैःसुसञ्जुष्टोह्यप्सरोगणसङ्कुलः ॥ १० ॥ ऋषिभिर्मुनिभिःसिद्धैर्गन्धर्वैःपरिभातिसः ॥ गजैश्चाचलसङ्काशैःसिंहनादैर्विराजते ॥ ११ ॥ शरभैर्मत्तशार्दूलैर्मृगधूर्तैरलङ्कृतः ॥ वापीकूपतडागैश्चसम्पूर्णैर्विमलोदकैः ॥ १२ ॥ हंसकारण्डवाकीर्णैःसर्वत्रपरिशोभते ॥ कनकोत्पलैश्चश्वेतैश्चरक्तोत्पलैर्विराजते ॥ १३ ॥ नदीस्रवणसङ्घातैर्विमलैश्चोदकैस्तथा ॥ शालतालैश्चरूपैश्चसगजैःस्फाटिकैस्तथा ॥ १४ ॥ विस्तीर्णैःकाञ्चनैर्दिव्यैःसूर्यवह्निसमप्रभैः ॥ शिलातलैश्चसम्पूर्णःशैलराजोविराजते ॥ १५ ॥ विमानैर्देवतानांचप्रासा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दैःपर्वतोत्तमैः ॥ हंसचन्द्रप्रतीकाशैर्हेमदण्डैरलङ्कृतः ॥ १६ ॥ कलशैश्चामरैर्युक्तैःप्रासादैःपरिशोभितः ॥ नानागुणप्रमुदितदेववृन्दैश्चशोभितः ॥ १७ ॥ देववृन्दैरनेकैश्चगन्धर्वैश्चारणैस्तथा ॥ सर्वत्रराजतेपुण्योमेरुर्गिरिवरोत्तमः ॥ १८ ॥ तस्माद्गङ्गामहापुण्यापुण्यतोयामहानदी ॥ प्रसूतापुण्यतीर्थाढ्याहंसपद्मैःसमाकुला ॥ १९ ॥ मुनिभिःसेव्यमानासाऋषिसङ्घैर्महानदी ॥ एवंगुणंगिरिश्रेष्ठंपुण्यकौतुकमङ्गलम् ॥ २० ॥ अङ्गश्चात्रिसुतःपुण्यःप्रविवेशमहामुनिः॥गङ्गातीरेसुपुण्येचएकान्तेचारुकन्दरे ॥२१॥ तत्रोपविश्यमेधावीकामक्रोधविवर्जितः॥सर्वेन्द्रियाणिसंयम्यहृषीकेशंमनोगतम् ॥ २२ ॥ ध्यायमानःसधर्मात्माकृष्णंक्लेशापहंप्रभुम् ॥ आसनेशयनेयानेध्यानेचमधुसूदनम् ॥ २३ ॥ नित्यंपश्यतियुक्तात्मायोगयुक्तोजितेन्द्रियः ॥ चराचरेषुजीवेषुतेषुपश्यतिकेशवम् ॥ २४ ॥ आर्द्रेषुचैवशुष्केषुसर्वेष्वन्येषुसद्विजः ॥ एवंवर्षशतंजातंतप्यमानस्यतस्यच॥२५॥ समालोक्यजगन्नाथश्चक्रपाणिर्द्विजोत्तमम् ॥ बहुविघ्नान्सुघोरांश्चदर्शयत्येवनित्यशः ॥ २६ ॥ तेजसातस्यदेवस्यनृसिंहस्यमहात्मनः ॥ निरातङ्कःसधर्मात्मादहत्यग्निरिवेन्धनम् ॥ २७ ॥ नियमैःसंयमैश्चान्यैरुपवासैर्द्विजोत्तमः ॥ क्षीयमाणस्तुसञ्जातोदीप्यमानःस्वतेजसा ॥ २८ ॥ सूर्यपावकसङ्काशस्त्वङ्गएवंप्रदृश्यते ॥ एवंतपःसुनिरतंध्यायमानंजनार्दनम् ॥ २९ ॥ आविर्भूयाब्रवीद्देवोवरंवरयमानद ॥ तंचदृष्ट्वाहृषीकेशमङ्गःपरमनिर्वृतः ॥ ३० ॥ तुष्टावप्रणतोभूत्वावासुदेवंप्रसन्नधीः ॥ ३१ ॥ अङ्गउवाच ॥ त्वंगतिःसर्वभूतानांभूतभावनपावन ॥ भूतात्मासर्वभूतेशनमस्तुभ्यंगुणात्मने ॥ ३२ ॥ गुणरूपायगुह्यायगुणातीतायतेनमः ॥ गुणायगुणकर्त्रेचगुणाढ्यायगुणात्मने ॥ ३३ ॥ भवायभवकर्त्रेचभक्तानांभवहारिणे ॥ भवोद्भवायगुह्यायनमोभवविनाशिने ॥३४॥ यज्ञाययज्ञरूपाययज्ञेशायनमोनमः ॥ यज्ञकर्मप्रसज्ञायनमःशङ्खधरायच ॥ ३५ ॥ नमोनमोहिरण्यायनमोरथाङ्गधारिणे॥सत्यायसत्यभावायसर्वसत्यमयायच॥३६॥धर्मायधर्मकर्त्रेचसर्वकर्त्रेचतेनमः॥धर्माङ्गायसुवीरायधर्माधारायतेनमः ॥३७॥ नमःपुण्यायपुत्रायब्रह्मपुत्रायमहात्मने ॥ मायामोहविनाशायसर्वमायाकरायते॥३८॥मायाधरायमूर्तायत्वमूर्तायनमोनमः॥ सर्वमूर्तिधरायैवशङ्करायनमोनमः ॥ ३९ ॥ ब्रह्मणेब्रह्मरूपायपरब्रह्मस्वरूपिणे ॥ नमस्तेसर्वधाम्नेचनमोधामधरायच ॥ ४० ॥ श्रीमतेश्रीनिवासायश्रीधरायनमोनमः ॥ क्षीरसागरवासायचामृतायचतेनमः ॥ ४१ ॥ महौषधायघोरायमहाप्रज्ञापरायच ॥ अक्रूरायप्रमेध्यायमेध्यानांपतयेनमः॥ ४२ ॥अनन्तायह्यशेषायचानघायनमोनमः ॥ आकाशस्यप्रकाशायपक्षिरूपायतेनमः ॥ ४३ ॥ हुतायहुतभोक्त्रेचहवीरूपायतेनमः ॥ बुद्धायबुधरूपायसदाबुद्धायतेनमः ॥ ४४ ॥ नमोहव्यायकव्यायस्वधाकारायतेनमः ॥ स्वाहाकारायशुद्धायह्यव्यक्तायमहात्मने ॥ ४५ ॥ व्यासायवासवायैववसुरूपायतेनमः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वासुदेवायविश्वायवह्निरूपायतेनमः ॥ ४६ ॥ हरयेकेवलायैववामनायनमोनमः ॥ नमोनृसिंहदेवायसत्त्वपालायतेनमः ॥ ४७ ॥ नमोगोविन्द
गोपायनमएकाक्षरायच ॥ नमःसर्वाक्षरायैवहंसरूपायतेनमः ॥ ४८ ॥ त्रितत्त्वायनमस्तुभ्यंपञ्चतत्त्वायतेनमः॥ पञ्चविंशतितत्त्वायतत्त्वाधाराय
वैनमः ॥ ४९ ॥ कृष्णायकृष्णरूपायलक्ष्मीनाथायतेनमः ॥ नमःपद्मपलाशाक्षआनन्दायपरायच ॥५०॥नमोविश्वम्भरायैवपापनाशायवैनमः॥
नमःपुण्यसुपुण्यायसत्यधर्मायतेनमः ॥ ५१ ॥ नमोनमःशाश्वतअव्ययायनमोनमःसर्वनभोमयाय ॥ श्रीपद्मनाभायमहेश्वरायनमामितेकेश
वपादपद्मम् ॥ ५२ ॥ आनन्दकन्दकमलाप्रियवासुदेवसर्वेशईशमधुसूदनदेहिदास्यम् ॥ पादौनमामितवकेशवजन्मजन्मकृपांकुरुष्वममशान्तिद
शङ्खपाणे ॥ ५३ ॥ संसारदारुणहुताशनतापदग्धंपुत्रादिबन्धुमरणैर्बहुशोकतापैः ॥ ज्ञानाम्बुदेनममप्लावयपद्मनाभदीनस्यमच्छरणरूपभवस्वनाथ
॥ ५४ ॥ एवंस्तोत्रंसमाकर्ण्यत्वङ्गस्यापिमहात्मनः ॥ दर्शयित्वास्वकंरूपंघनश्याममहौजसम् ॥ ५५ ॥ शङ्खचक्रगदापाणिपद्महस्तंमहाप्रभुम् ॥
वैनतेयसमारूढमात्मरूपंप्रदर्शितम् ॥ ५६ ॥ सर्वाभरणशोभाङ्गंहारकङ्कणकुण्डलैः ॥ राजमानंपरंदिव्यंनिर्मलंवनमालया ॥ ५७ ॥ अङ्गस्याग्रे
हृषीकेशःशोभमानमहत्प्रभः ॥ श्रीवत्साङ्केनपुण्येनकौस्तुभेनजनार्दनः ॥ ५८ ॥ दर्शयित्वास्वकंदेहंसर्वदेवमयोहरिः ॥ सउवाचमहात्मानंतमङ्ग
मृषिसत्तमम् ॥ ५९ ॥ भोभोविप्रमहाभागश्रूयतांवचनंशुभम् ॥ मेघगम्भीरघोषेणसमाभाष्यद्विजोत्तमम् ॥ ६० ॥ तपसानेनतुष्टोऽस्मिवरंवरय
शोभनम् ॥ तुष्यमाणंहृषीकेशंतंदृष्ट्वाकमलापतिम् ॥६१॥ दीप्यमानंविराजन्तंविश्वरूपंजनेश्वरम् ॥ पादाम्बुजद्वयंतस्यप्रणम्यचपुनःपुनः॥६२॥
हर्षेणमहताविष्टस्तमुवाचजनार्दनम् ॥ दासोऽहंतवदेवेशशङ्खचक्रगदाधर ॥ ६३ ॥ वरंमेदातुकामोऽसिदेहित्वंवंशजंसुतम् ॥ दिविशक्रोयथाऽऽभा
तिसर्वतेजःसमन्वितः ॥ ६४ ॥ तादृशंदेहिमेपुत्रंसर्वलोकस्यरक्षकम् ॥ सर्वदेवप्रियंदेवब्रह्मण्यंधर्मपण्डितम् ॥ ६५ ॥ दातारंज्ञानसम्पन्नंधर्मतेजःसम
न्वितम् ॥ त्रैलोक्यरक्षकंकृष्णंसत्यधर्मानुपालकम् ॥ ६६ ॥ यज्वनामुत्तमंचैकंशूरंत्रैलोक्यभूषणम् ॥ ब्रह्मण्यंवेदविद्वांसंसत्यसन्धंजितेन्द्रियम्
॥ ६७ ॥ अजितंसर्वजेतारंविष्णुतेजःसमप्रभम् ॥ वैष्णवंपुण्यकर्तारंपुण्यजंपुण्यलक्षणम् ॥ ६८ ॥ शान्तंतुतपसोपेतंसर्वशास्त्रविशारदम् ॥ वेद
ज्ञंयोगिनांश्रेष्ठंभवतोगुणसंनिभम् ॥ ६९ ॥ ईदृशंदेहिमेपुत्रंदातुकामोयदावरम् ॥ ७० ॥ श्रीवासुदेवउवाच ॥ एभिर्गुणैःसमोपेतस्तवपुत्रोभ
विष्यति ॥ अत्रिवंशस्यवैधर्ताविश्वस्यास्यमहामते ॥ ७१ ॥ तेजसायशसापुण्यैःपितरंचोद्धरिष्यति ॥ उद्धरिष्यतियःसत्यैःपितरंचपितामहम्
॥ ७२ ॥ भवान्यास्यतिमेस्थानंतद्विष्णोःपरमंपदम् ॥ इत्युक्त्वादेवदेवेशस्तमङ्गंप्रतिसद्द्विज ॥ ७३ ॥ कस्यचित्पुण्यवीर्यस्यपुण्यांकन्यांविवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हय ॥ तस्यास्तुत्पादयसुतंशुभंपुण्यावहप्रियम् ॥ ७४ ॥ सभविष्यतिधर्मात्मामत्प्रसादान्महामते ॥ सर्वज्ञःसर्ववेत्ताचयादृशोवाञ्छितस्त्वया ॥ एवंवरंततोदत्त्वाअन्तर्धानंगतोहरिः ॥ ७५ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेअङ्गवरप्रदानंनामद्वात्रिंशोऽध्यायः ॥ ३२ ॥

ऋषयऊचुः ॥ शप्तागन्धर्वपुत्रेणसुशङ्खेनमहात्मना ॥ तस्यशापात्कथंजाताकिंकिंकर्मकृतंतया ॥ १ ॥ सलेभेकीदृशंपुत्रंतस्यशापाद्विजोत्तम ॥ सुनीथायाश्चचरितंत्वंनोविस्तरतोवद ॥ २ ॥ सूतउवाच ॥ सुशङ्खेनापितेनैवसाशप्तातनुमध्यमा ॥ पितुःस्थानंगतासातुसुनीथादुःखपीडिता ॥ ३ ॥ पितरंचात्मनश्चैवचरितंचप्रकाशितम् ॥ श्रुतवान्सोऽपिधर्मात्मामृत्युःसत्यवतांवरः ॥ ४ ॥ तामुवाचसुनीथांतुसुतांशप्तांमहात्मना ॥ भवत्यादुष्कृतंपापंधर्मतेजःप्रणाशनम् ॥ ५ ॥ कस्मात्कृतंमहाभागेसुशान्तस्यहिताडनम् ॥ विरुद्धंसर्वलोकस्यभवत्यापरिकल्पितम् ॥ ६ ॥ कामक्रोधविहीनंतंसुशान्तंधर्मवत्सलम् ॥ तपोमार्गेविलीनंचपरब्रह्मणिसंस्थितम् ॥ ७ ॥ तमेवघातयेद्योवैतस्यपापंशृणुष्वहि ॥ पापात्माजायतेपुत्रःकिल्बिषंलभतेबहु ॥ ८ ॥ ताडयन्तंताडयेद्यःक्रोशन्तंक्रोशयेत्पुनः ॥ तस्यपापंसवैभुङ्क्तेताडितस्यनसंशयः॥९ ॥ सवैशान्तोजितात्माचताडयन्तंनताडयेत् ॥ निर्दोषंप्रतियेनापिताडनंचकृतंसुते ॥ १० ॥ पश्चान्मोहेनपापेननिर्दोषेऽपिचताडयेत् ॥ निर्दोषंप्रतियेनापिद्रोहःक्रियतेवृथा ॥ ११ ॥ निर्दोषंताडयेत्पश्चान्मोहात्पापेनकेनचित् ॥ सपापीपापमाप्नोतिनिर्दोषस्यशरीरजम् ॥ १२ ॥ निर्दोषोवातयेत्तंवैताडन्तंपापचेतसम् ॥ पुनरुत्थायवेगेनसाहसात्पापचेतनम् ॥ १३ ॥ पापकर्तुश्चयत्पापंनिर्दोषंप्रतिगच्छति ॥ ताडनंनैवतस्माद्वैकार्यंदोषवतोऽपिच ॥ १४ ॥ दुष्कृतंचमहत्पुत्रित्वयैवपरिपालितम् ॥ शप्तातेनापियाचैवतस्मात्पुण्यंसमाचर ॥१५॥ सतांसङ्गंसमासाद्यसदैवपरिवर्तय ॥ योगध्यानेनज्ञानेनपरिवर्तयनन्दिनि ॥ १६ ॥ सतांसङ्गोमहापुण्योबहुश्रेयोविधायकः ॥ बालेपश्यसुदृष्टान्तंसतांसङ्गस्ययद्गुणम् ॥ १७ ॥ अपांसंस्पर्शनात्पानात्स्नानात्तत्रमहाधियः ॥ मुनयःसिद्धिमायान्तिबाह्याभ्यन्तरक्षालिताः ॥१८॥ आयुष्मन्तोभवन्त्येतेलोकाःसर्वेचराचराः ॥ आपःशान्ताःसुशीताश्चमृदुगात्राःप्रियङ्कराः॥१९॥ निर्मलारसवत्यश्चपुण्यवीर्यामलापहाः ॥ तथासन्तस्त्वयाज्ञेयानिषेव्याश्चप्रयत्नतः ॥२०॥ यथावह्निप्रसङ्गाच्चमलंत्यजतिकाञ्चनम् ॥ तथासतांहिसंसर्गात्पापंत्यजतिमानवः ॥ २१ ॥ सत्यवह्निःप्रदीप्तश्चप्रज्वलेत्पुण्यतेजसा ॥ सत्येनदीप्ततेजास्तुज्ञानेनापिसुनिर्मलः ॥ २२॥ अत्युष्णोध्यानभावेनअस्पृश्यःपापजैर्नरैः ॥ सत्यवह्नेःप्रसङ्गाच्चपापंसर्वंविनश्यति ॥ २३ ॥ तस्मात्सत्यस्यसंसर्गःकर्तव्यःसर्वथात्वया ॥ पापभारंपरित्यज्यपुण्यमेवंसमाश्रय ॥ २४ ॥ सूतउवाच ॥ एवंपित्रासुनीथासादुःखितांप्रतिबोधिता ॥ नमस्कृत्यपितुःपादौगतासानिर्जनंवनम् ॥ २५ ॥ कामंक्रोधंपरित्यज्यबाल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भावंतपस्विनी ॥ मोहद्रोहौचमायांचत्यक्त्वाएकान्तमास्थिता ॥ २६ ॥ तस्याःसख्यःसमाजग्मूरम्भाद्यास्तास्तपोऽन्विताः ॥ तांददृशुर्विशाला
क्ष्यःसुनीथांदुःखभागिनीम् ॥ २७ ॥ ध्यायन्तींचिन्तयानांतामूचुश्चिन्तापरायणाः ॥कस्माच्चिन्तयसेभद्रेकयावाचिन्तयान्विता ॥ २८ ॥ तन्नोवैका
रणंब्रूहिचिन्तादुःखप्रदायिनी ॥ एकैवसार्थकाचिन्ताधर्मस्यार्थेविचिन्त्यते ॥ २९ ॥ द्वितीयासार्थकाचिन्तायोगिनांधर्मनन्दिनी ॥ अन्यानिर
र्थिकाचिन्तातांनैवपरिकल्पयेत् ॥ ३० ॥ कायनाशकरीचिन्ताबलतेजःप्रणाशिनी ॥ नाशयेत्सर्वसौख्यंतुरूपहानिंनिदर्शयेत् ॥ ३१ ॥ तृष्णांमोहं
तथालोभमेतांश्चिन्ताहिप्रापयेत् ॥ पापमुत्पादयेच्चिन्ताचिन्तिताचदिनेदिने ॥ ३२ ॥ चिन्ताव्याधिप्रकाशायनरकायप्रकल्पयेत् ॥ तस्माच्चिन्तांप
रित्यज्यचानुवर्तस्वशोभने ॥ ३३ ॥ आर्जितंकर्मणापूर्वंस्वयमेवनरेणतु ॥ तदेवभुङ्क्तेऽसौजन्तुर्ज्ञानवान्नविचिन्तयेत् ॥ ३४ ॥ तस्माच्चिन्तांपरित्यज्य
सुखदुःखादिकंवद ॥ तासांतद्वचनंश्रुत्वासुनीथावाक्यमब्रवीत् ॥३५॥ इतिश्रीपाद्मपुराणेपञ्चपञ्चाशत्सहस्रसंहितायांभूमिखण्डेवेनोपाख्यानेसुनीथा
चरितंनामत्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ सूतउवाच ॥ यथाशप्तावनेपूर्वंसुशङ्खेनमहात्मना ॥ तासुसर्वंसमाख्यातंसखीष्वेवविचेष्टितम् ॥ आत्मनश्चम
हाभागादुःखेनातिप्रपीडिता ॥ १ ॥ सुनीथोवाच ॥ अन्यच्चैवप्रवक्ष्यामिसख्यःशृण्वन्तुसाम्प्रतम् ॥ २ ॥ मदीयरूपसम्पत्तिवयःसुगुणसम्पदः ॥
विलोक्यमांपितुश्चिन्तासञ्जाताममकारणात्॥३॥देवेभ्योदातुकामोऽसौमुनिभ्यस्तुमहायशाः॥मांचहस्तेविगृह्यैवसर्वान्वाक्यमुदाहरत् ॥४॥ गुणयुक्ता
सुताबालाममेयंचारुलोचना ॥ दातुकामोऽस्मिभद्रंवोगुणिनेसुमहात्मने ॥ ५ ॥ मृत्योर्वाक्यंततोदेवाऋषयःशुश्रुवुस्तदा ॥ तमूचुर्भाषमाणंतेदेवाइन्द्र
पुरोगमाः ॥६॥ तवकन्यागुणाढ्येयंशीलानांपरमोनिधिः ॥ दोषेणैकेनसन्दुष्टाऋषिशापेनतेनवै॥७॥ अस्यामुत्पत्स्यतेपुत्रोयस्यवीर्यात्पुमान्किल ॥
भवितासमहापापीपुण्यवंशविनाशकः ॥ ८ ॥ गङ्गातोयेनसम्पूर्णःकुम्भएवप्रदृश्यते ॥ सुरायाबिन्दुनालिप्तोमद्यकुम्भःप्रजायते ॥ ९ ॥ पापस्यपाप
संसर्गात्कुलंपापिप्रजायते ॥ आरनालस्यवैबिन्दुःक्षीरमध्येप्रयातिचेत् ॥१०॥ पश्चान्नाशयतेक्षीरमात्मरूपंप्रकाशयेत् ॥ तद्वद्विनाशयेद्वंशंपापःपुत्रो
नसंशयः ॥११॥ अनेनापिहिदोषेणतवेयंपापभागिनी ॥ अन्यस्मैदीयतांगच्छदेवैरुक्तःपितामम ॥१२॥ देवैश्चापिसगन्धर्वैर्ऋषिभिश्चमहात्मभिः ॥
तैश्चापिसम्परित्यक्तःपितामेदुःखपीडितः ॥१३ ॥ ममान्येचापिस्वीकारंनकुर्वन्तिहिसज्जनाः ॥ एवंपापमयंकर्ममयाचैवपुराकृतम् ॥ १४ ॥ सन्तप्ता
दुःखशोकेनवनमेवसमाश्रिता ॥ तपएवचरिष्यामिकरिष्येकायशोषणम् ॥ १५ ॥ भवतीभिःसुपृष्टाहंकार्यकारणमेवहि ॥ ममचिन्तानुगंकर्ममयात
द्वःप्रकाशितम् ॥१६॥ एवमुक्त्वासुनीथासामृत्योःकन्यायशस्विनी ॥ विररामचदुःखार्ताकिञ्चिन्नोवाचवैपुनः ॥ १७॥ सख्यऊचुः ॥ दुःखमेव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महाभागेत्यजकायविनाशनम्॥नास्तिकस्यकुलेदोषोदेवैःपापंसमाश्रितम् ॥१८॥ जिह्मसुक्तंपुरातेनब्रह्मणाहरसन्निधौ ॥देवैश्चापिसहित्यक्तोब्रह्मापूज्य तमोऽभवत् ॥ १९ ॥ ब्रह्महत्याप्रयुक्तोऽसौदेवराजोऽपिपश्यभोः ॥ देवैःसार्धंमहाभागोभुङ्क्तेलोकत्रयंमहान् ॥ २० ॥ गौतमस्यप्रियांभार्यामहल्यांगं तवान्पुरा ॥ परदाराभिगामीसदेवत्वेपरिवर्त्तते ॥ २१ ॥ ब्रह्महत्योपमंकर्मदारुणंकृतवान्हरः ॥ ब्रह्मणस्तुकपालेनचाद्यापिपरिवर्तते ॥ २२ ॥ देवा नमन्तितंदेवमृषयोवेदपारगाः ॥ आदित्यःकुष्ठसंयुक्तस्त्रैलोक्यंचप्रकाशयेत् ॥२३॥ लोकानमन्तितंदेवंदेवाद्याःसचराचराः ॥ कृष्णोभुङ्क्तेमहाशापंभा र्गवेणकृतंपुरा ॥ २४ ॥ गुरुभार्यांगतश्चन्द्रःक्षयीतेनप्रजायते ॥ भविष्यतिमहातेजाराजराजःप्रतापवान् ॥ २५ ॥ पाण्डुपुत्रोमहाप्राज्ञोधर्मात्मास युधिष्ठिरः ॥ गुरोश्चैववधार्थायअनृतंसवदिष्यति ॥ २६ ॥ एतेष्वेवमहत्पापंवर्ततेचमहत्सुच ॥ वैगुण्यंकस्यवैनास्तिकस्यनास्तिचलाञ्छनम् ॥ ॥ २७ ॥ भवतीस्वल्पदोषेणविलिप्तासिवरानने ॥ उपकारंकरिष्यामस्तवैववरवर्णिनि ॥ २८ ॥ तवाङ्गेयेगुणाःसन्तिसत्यस्त्रीणांयथाशुभे ॥ अन्य त्रापिनपश्यामस्तान्गुणांश्चारुलोचने॥२९॥रूपमेवगुणःस्त्रीणांप्रथमंभूषणंशुभे॥शीलमेवद्वितीयंचतृतीयंसत्यमेवच॥३०॥आर्जवत्वंचतुर्थंचपञ्चमंधर्म मेवहि ॥ मंधुरत्वंततःप्रोक्तंषष्ठमेववरानने ॥ ३१॥ शुद्धत्वंसप्तमंबालेअन्तर्बाह्येषुयोषिताम् ॥ अष्टमंहिपितुर्भावःशुश्रूषानवमंकिल ॥ ३२ ॥ सहिष्णु र्दशमंप्रोक्तंरतिश्चैकादशंतथा ॥ पातिव्रत्यंततःप्रोक्तंद्वादशंवरवर्णिनि ॥ ३३ ॥ तैस्त्वंसम्भूषिताबालेमाबिभेषिवरानने ॥ येनोपायेनतेभर्ताभविष्य तिसुधर्मधृक् ॥ ३४ ॥ तमुपायंप्रपश्यामस्तवार्थंवयमेवहि ॥ स्वस्थाभवमहाभागेमात्वंवैसाहसंकुरु ॥ ३५ ॥ सूतउवाच ॥ एवमुक्तासुनीथासापुन रूचेसखीस्तुताः ॥ कथयध्वंममोपायंयेनभर्ताभविष्यति ॥ ३६ ॥ तामूचुस्तावरानार्योरम्भाद्याश्चारुलोचनाः ॥ रूपमाधुर्यसंयुक्ताभवतीभूतिवर्द्धि नी ॥ ३७ ॥ ब्रह्मशापेनसम्भीतावयमत्रसमागताः ॥ विद्यामेकांप्रदास्यामःपुरुषाणांप्रमोहिनीम् ॥ ३८ ॥ सर्वमायाविदांभद्रेसर्वभद्रप्रदायिनीम् ॥ विद्याबलंततोदद्युस्तस्यैताःसुखदायकम् ॥ ३९ ॥ यंयंमोहयितुंभद्रेइच्छस्येवंसुरादिकम् ॥ तंतंसद्योमोहयावइत्युक्तासातथाकरोत् ॥ ४० ॥ विद्या यांहिसुसिद्धायांसासुनीथासुनन्दिता ॥ भ्रमत्येवंसखीभिस्तुपुरुषान्साविपश्यति ॥ ४१॥ अटमानागतापुण्यंनन्दनंवनमुत्तमम् ॥ गङ्गातीरेततोदृष्ट्वा ब्राह्मणंरूपसंयुतम् ॥ ४२ ॥ सर्वलक्षणसम्पन्नंसूर्यतेजःसमप्रभम् ॥ रूपेणाप्रतिमंलोकेद्वितीयमिवमन्मथम् ॥ ४३ ॥ देवरूपंमहाभागंभाग्यवन्तंसु

१'षष्ठं सतीत्वं दृढता सप्तमं साहसोऽष्टमम् ॥ नवमं मङ्गलं गानं दशमं व्यवसायिता ॥ एकादशं तथा स्त्रीणां कामाधिक्यं प्रकीर्तितम् ॥ मधुरं वचनं प्रोक्तं द्वादशं वरवर्णिनि॥'इति पाठः पुस्तकान्तरे परिपठ्यते ।

४३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भाग्यदम् ॥ अनौपम्यंमहात्मानंविष्णुतेजःसमप्रभम् ॥ ४४ ॥ वैष्णवंसर्वपापघ्नंविष्णुतुल्यपराक्रमम् ॥ कामक्रोधविहीनंतमत्रिवंशविभूषणम् ॥
॥ ४५ ॥ दृष्ट्वासुरूपंतपसांस्वरूपंदिव्यप्रभावंपरितप्यमानम् ॥ पप्रच्छरम्भांसुसखींसरागाकोऽयंदि[1]विष्ठःप्रवरोमहात्मा ॥ ४६ ॥ इतिश्रीपाद्मपुराणे
भूमिखण्डेवेनोपाख्यानेचतुस्त्रिंशोऽध्यायः ॥ ३४ ॥ रम्भोवाच॥ब्रह्माअव्यक्तसम्भूतस्तस्माज्जज्ञेप्रजापतिः ॥ अत्रिर्नामसधर्मात्मातस्यपुत्रोमहामनाः
॥ १॥ अङ्गोनामअयंभद्रेनन्दनंवनमागतः ॥ इन्द्रस्यसम्पदंदृष्ट्वानानातेजस्समन्विताम् ॥२॥ कृतास्पृहाअनेनापिइन्द्रस्यसदृशेपदे ॥ ईदृशोहियदा
पुत्रोममस्याद्[2]धर्मसंयुतः ॥ ३ ॥ सुश्रेयोमेभवेज्जन्मयशःकीर्तिसमन्वितम् ॥ आराधितोहृषीकेशस्तपोभिर्नियमैस्तथा ॥ ४ ॥ सुप्रसन्नेहृषीकेशेवरंया
चितवानयम् ॥ इन्द्रस्यसदृशंपुत्रंविष्णुतेजःपराक्रमम् ॥ ५ ॥वैष्णवंसर्वपापघ्नंदेहिमेमधुसूदन ॥ दत्तवान्सतदापुत्रमीदृशंसर्वधारकम् ॥ ६ ॥ तदा
प्रभृतिविप्रेन्द्रःपुण्यांकन्यांप्रपश्यति ॥ यथात्वंचारुसर्वाङ्गीतथायंपरिपश्यति ॥ ७ ॥ एनंगच्छवरारोहेअस्मात्पुत्रोभविष्यति ॥ पुण्यात्मापुण्यधर्म
ज्ञोविष्णुतेजःपराक्रमः ॥ ८ ॥ एतत्तेसर्वमाख्यातंयथाहंपृच्छितात्वया ॥ अयंभर्ताभवत्य[3]र्होभवेदेवनसंशयः ॥९॥ सुशङ्खस्यापियःशापोवृथासोऽपि
भविष्यति ॥ अस्माज्जातेमहाभागेपुत्रेधर्मप्रचारिणि ॥ १० ॥ भविष्यसिसुखीभद्रेसत्यंसत्यंवदाम्यहम् ॥ सुक्षेत्रेकृषिकारस्तुबीजंवपतितत्परः ॥
॥ ११ ॥ सतथाभुञ्जतेदेवियथाबीजंतथाफलम् ॥ अन्यथानैवजायेतेतत्सर्वंसदृशंभवेत् ॥ १२ ॥ अयमेषमहाभागस्तपस्वीपुण्यवीर्यवान् ॥ अस्य
वीर्यात्समुत्पन्नोअस्यैवगुणसम्पदा ॥ १३ ॥ युक्तःपुत्रोमहातेजाःसर्वदेहभृतांवरः ॥ भविष्यतिमहाभाग्योयुक्तात्मायोगतत्त्ववित् ॥ १४ ॥ एवंहि
वाक्यंतुनिशम्यबालारम्भाप्रियोक्तंशिवदायकंतत्॥विचिन्त्यबुद्ध्येहसुनीथयातदातत्त्वार्थमेतत्परिसत्यमेवहि ॥ १५ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डे
वेनोपाख्यानेपञ्चत्रिंशोऽध्यायः ॥ ३५ ॥ सुनीथोवाच ॥ सत्यमुक्तंत्वयाभद्रेएवमेतत्करोम्यहम् ॥ अनयाविद्ययाविप्रंमोहयिष्यामिनान्यथा ॥
॥ १ ॥ साहाय्यंदेहिमेपुण्यंयेनगच्छामिसाम्प्रतम् ॥ एवमुक्तातयारम्भातामुवाचमनस्विनीम् ॥ २ ॥ कीदृग्ददामिसाहाय्यंतत्त्वंकथयभामिनि ॥
दूतत्वंगच्छमेभद्रेएतंप्रतिसुसाम्प्रतम् ॥ ३ ॥ एवमुक्तंतयातांतुरम्भांप्रतिसुलोचनाम् ॥ एवमेवप्रतिज्ञातंरम्भयादेवयोषिता ॥४ ॥ करिष्येतवसाहाय्य
मादेशोममदीयताम् ॥ सद्भावेनविशालाक्षीरूपयौवनशालिनी ॥ ५ ॥ माययादिव्यरूपासासम्बभूववरानना ॥ रूपेणाप्रतिमालोकेमोहयन्तीजगत्त्र
यम् ॥ ६ ॥ मेरोश्चैवमहापुण्येशिखरेचारुकन्दरे ॥ नानाधातुसमाकीर्णेनानारत्नोपशोभिते॥७॥ देववृक्षैःसमाकीर्णेबहुपुष्पोपशोभिते॥देववृन्दसमा

१ 'सखी विप्रवर 'इति पाठान्तरम्। २ 'वंशवर्द्धनः' इ० पा०। ३ भवत्याः अर्हः भवत्यर्हः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कीर्णेगन्धर्वाप्सरसेविते॥८॥मनोहरेसुरम्येचशीतच्छायासमाकुले॥चन्दनानामशोकानांतरूणांचारुहासिनी ॥९॥ दोलायांसासमारूढासर्वशृङ्गारशोभिता॥कौशेयेनसुनीलेनराजमानावरानना॥१०॥बन्धूकपुष्पवर्णेनकञ्चुकेनद्विजोत्तमाः॥सर्वाङ्गसुन्दरीबालावीणातालकराविला ॥११॥ गायमानावरंगीतंसुस्वरंविश्वमोहनम्॥ताभिःपरिवृताबालासखीभिःसुमनोहरा॥१२॥ अङ्गस्तुकन्दरेपुण्येएकान्तेध्यानमास्थितः॥कामक्रोधविहीनस्तुध्यायमानोजनार्दनम् ॥ १३ ॥ सशुत्वासुस्वरंगीतंमधुरंसुमनोहरम् ॥ तालमानक्रियोपेतंसर्वसत्त्वविकर्षणम् ॥ १४ ॥ ध्यानाच्चचालतेजस्वीमायागीतेनमोहितः ॥ समुत्थायासनात्तूर्णंवीक्षमाणोमुहुर्मुहुः ॥ १५ ॥ जगामतत्रवेगेनमायाचलितमानसः ॥ दोलासंस्थांविलोक्यववीणादण्डकराविलाम् ॥ १६ ॥ हसमानांसुगायन्तींपूर्णचन्द्रनिभाननाम् ॥ मोहितस्तेनगीतेनरूपेणापिमहायशाः ॥ १७ ॥ तस्यालावण्यभावेनमन्मथस्यशराहतः ॥ आकुलव्याकुलज्ञानऋषिपुत्रोद्विजोत्तमः ॥ १८ ॥ प्रलपत्यतिमोहेनजृम्भतेचपुनःपुनः ॥ स्वेदःकम्पोऽथसन्तापस्तस्याजायततत्क्षणात् ॥१९॥ मुह्यन्निवमहामोहैर्ग्लानश्चलितमानसः ॥ वेपमानस्ततस्त्वङ्गोदूयमानःसमागतः ॥ २० ॥ तामालोक्यविशालाक्षींमृत्युकन्यांयशस्विनीम् ॥ अथोवाचमहात्माससुनीथांचारुहासिनीम् ॥ २१ ॥ कात्वंकस्यवरारोहेसखीभिःपरिवारिता ॥ केनकार्येणसम्प्राप्ताकेनत्वंप्रेषितावनम् ॥ २२ ॥ तवाङ्गंसुन्दरंसर्वमत्रभातिमहावने ॥ समाचक्ष्वममाद्यैवप्रसादसुमुखीभव ॥ २३ ॥ मायामोहेनसम्मुग्धस्तस्याःकर्मनविन्दति ॥ मार्गणैर्मन्मथस्यापिपरिविद्धोमहामुनिः ॥ २४ ॥ एवंविधंमहद्वाक्यंसमाकर्ण्यमहामतेः ॥ नोवाचकिञ्चित्साविप्रंसमालोक्यसखीमुखम् ॥२५॥ रम्भांचप्रेरयामाससुनीथासंज्ञयासखीम् ॥ समुवाचततोरम्भासादरंतंद्विजंप्रति ॥ २६ ॥ इयंकन्यामहाभागामृत्योश्चापिमहात्मनः ॥ सुनीथाख्याप्रसिद्धेयंसर्वलक्षणसम्पदा ॥ २७ ॥ पतिमन्विच्छतीबालाधर्मवन्तंतपोनिधिम् ॥ शान्तंदान्तंमहाप्राज्ञंवेदविद्याविशारदम् ॥ २८ ॥ एवंविधंमहद्वाक्यंसमाकर्ण्यमहामुनिः ॥ तामुवाचततस्त्वङ्गोरम्भामप्सरसांवराम् ॥ २९ ॥ मयाचाराधितोविष्णुःसर्वविश्वमयोहरिः ॥ तेनदत्तोवरोमह्यंपुत्राख्यःसर्वसिद्धिदः ॥ ३० ॥ तन्निमित्तमहंभद्रेसुतार्थंनित्यमेवच ॥ कस्यचित्पुण्यवीर्यस्यकन्यामेकांप्रचिन्तय ॥ ३१ ॥ सदैवाहंनपश्यामिसुभार्यांसत्यमीदृशीम् ॥ इयंधर्मस्यवैकन्याधर्माचारावरानना ॥ ३२ ॥ मामेवंहिभजत्वेषायदिकान्तमिहेच्छति ॥ यंयमिच्छेदियंबालातंददामिनसंशयः ॥ ३३ ॥ अदेयंदेयमित्याहअस्याःसङ्गमकारणात् ॥ एकमेवत्वयादेयंरम्भोवाचद्विजोत्तमम् ॥ ३४ ॥ विप्रेन्द्रत्वंशृणु

१ 'समतामात्मनः क्वचित्' इति पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्वहप्रतिज्ञांवच्मिसाम्प्रतम् ॥ एषानैवत्वयात्याज्याधर्मपत्नीतवैवहि ॥ ३५ ॥ अस्यादोषोगुणोनैवग्राह्यएवत्वयाकदा ॥ इत्यर्थेप्रत्ययंविप्रप्रत्यक्षं
परिदर्शय ॥ ३६ ॥ स्वहस्तंदेहिविप्रेन्द्रसत्यप्रत्ययकारकम् ॥ एवमस्तुमयादत्तोह्यस्याहस्तोनसंशयः ॥ ३७ ॥ ॥ सूतउवाच ॥ एवंसम्ब
न्धकंकृत्वासत्यप्रत्ययकारकम् ॥ गान्धर्वेणविवाहेनसुनीथामुपयेमिवान् ॥ ३८ ॥ तस्मैदत्त्वासुनीथांतांरम्भाहृष्टेनचेतसा ॥ सातांचामन्त्रयि
त्वावैगतागेहंस्वकंपुनः ॥ ३९ ॥ प्रहृष्टचेतसःसख्यःस्वस्थानंपरिजग्मिरे ॥ गतासुतासुसर्वासुसखीषुद्विजसत्तमः ॥ ४० ॥ रेमेत्वङ्गस्तयासार्धं
प्रिययाभार्ययासह ॥ तस्यामुत्पाद्यतनयंसर्वलक्षणसंयुतम् ॥ ४१ ॥ चकारनामतस्यैववेनाख्यंतनयस्यहि ॥ ववृधेसमहातेजाःसुनीथातनय
स्तदा ॥ ४२ ॥ वेदशास्त्रमधीत्यैवधनुर्वेदंगुणान्वितम् ॥ सर्वासामपिमेधावीविद्यानांपारमेयिवान् ॥ ४३ ॥ अङ्गस्यतनयोवेनःशिष्टाचारे
णवर्तते ॥ सवेनोब्राह्मणश्रेष्ठःक्षत्राचारपरोऽभवत् ॥ ४४ ॥ दिविचेन्द्रोयथाभातिसर्वतेजःसमन्वितः ॥ भात्येवंतुमहाप्राज्ञःस्वबलेनपराक्रमैः
॥ ४५ ॥ चाक्षुषस्यान्तरेप्राप्तेवैवस्वतसमागते ॥ प्रजापालंविनालोकेप्रजाःसीदन्तिसर्वदा ॥ ४६ ॥ ऋषयोधर्मतत्त्वज्ञाःप्रजाहेतोस्तपोधनाः॥
व्यचिन्तयन्महीपालंधर्मज्ञंसत्यपण्डितम् ॥ ४७ ॥ तंवेनमेवददृशुःसम्पन्नंलक्षणैर्युतम् ॥ प्राजापत्येपदेपुण्येअभ्यषिञ्चन्द्विजोत्तमाः ॥४८॥
अभिषिक्तेमहाभागेत्वङ्गपुत्रेतदानृपे ॥ तेप्रजापतयःसर्वेजग्मुश्चैवतपोवनम् ॥ ४९ ॥ गतेषुतेषुसर्वेषुवेनोराज्यमकारयत् ॥ सासुनीथासुतं
दृष्ट्वासर्वराज्यप्रसाधकम् ॥ ५० ॥ विशङ्कतेप्रभावेनशापात्तस्यमहात्मनः ॥ ममपुत्रोमहाभागोधर्मत्राताभविष्यति ॥ ५१ ॥ इत्येवंचिन्त
येन्नित्यंपूर्वपापाद्विशङ्किता ॥ धर्माङ्गानिसुपुण्यानिसुताग्रेपरिदर्शयेत् ॥ ५२ ॥ सत्यभावादिकान्पुण्यान्गुणान्सावैप्रकाशयेत् ॥ इत्युवाच
सुतंसाहिअहंधर्मसुतासुत ॥ ५३ ॥ पितातेधर्मतत्त्वज्ञस्तस्माद्धर्मंसमाचर ॥ इत्येवंबोधयेन्नित्यंपुत्रंवेनंतदासती ॥ ५४ ॥ मातापित्रोस्तयो
र्वाक्यंप्रजायुक्तंप्रपालयेत् ॥ एवंवेनःप्रजापालःसञ्जातःक्षितिमण्डले ॥ ५५ ॥ सुखेनजीवतेलोकःप्रजाधर्मेणरञ्जिताः ॥ एवंराज्यप्रभावंतु
वेनस्यापिमहात्मनः ॥ ५६ ॥ धर्मभावाःप्रवर्तन्तेतस्मिञ्छासतिपार्थिवे ॥ ५७ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेषट्त्रिंशोऽध्यायः
॥ ३६ ॥ ऋषयऊचुः ॥ एवंवेनस्यचैवासीत्सृष्टिरेवमहात्मनः ॥ धर्माचारंपरित्यज्यकथंपापमतिर्भवेत् ॥ १ ॥ सूतउवाच ॥ ज्ञानविज्ञानसंप ॥ ३६ ॥
न्नामुनयस्तत्त्ववेदिनः ॥ शुभाशुभंवदन्त्येवंतन्नस्यादिहचान्यथा ॥ २ ॥ तप्यमानेनतेनापिसुशङ्खेनमहात्मना ॥ दत्तःशापःकथंविप्रानयथावच्चजाय

१ 'नाहुषस्य' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ते॥३॥वेनस्यपातकाचारंसर्वमेववदाम्यहम् ॥ तस्मिञ्छासतिधर्मज्ञेप्रजापालेमहात्मनि ॥४॥ पुरुषःकश्चिदायातश्छंद्मलिङ्गधरस्तदा ॥ नग्नरूपोमहा
कायःशिरोमुण्डोमहाप्रभः ॥५॥ मार्जनींशिखिपत्राणांकक्षायांसहिधारयन् ॥ गृहीतंपानपात्रंतुनालिकेरमयंकरे ॥६॥ पठमानोह्यसच्छास्त्रंवेदधर्म
विदूषकम् ॥ यत्रवेनोमहाराजस्तत्रायातस्त्वरान्वितः ॥ ७ ॥ सभायांतस्यवेनस्यप्रविवेशसपापवान् ॥ तंदृष्ट्वासमनुप्राप्तंवेनःप्रश्नंतदाकरोत् ॥८॥
भवान्कोहिसमायातईदृग्रूपधरोमम ॥ सभायांवर्तमानस्यपुरःकस्मात्समागतः ॥ ९ ॥ कोवेषःकिंतुतेनामकोधर्मःकर्मतेवद ॥ कोवेदस्तेकआचारः
किंतपःकाप्रभावना ॥१०॥ किंज्ञानंकःप्रभावस्तेकिंसत्यंधर्मलक्षणम् ॥ तत्त्वंसर्वंसमाचक्ष्वममाग्रेसत्यमेवच ॥११॥ श्रुत्वावेनस्यतद्वाक्यंपापोवाक्य
मुदाहरत् ॥ करोष्येवंवृथाराज्यंमहामूढोनसंशयः ॥ १२ ॥ अर्हंधर्मस्यसर्वस्वमर्हंपूज्यतमस्सुरैः ॥ अर्हंज्ञानमर्हंसत्यमर्हंधातासनातनः ॥ १३ ॥
अर्हंधर्मअर्हंमोक्षःसर्वदेवमयोह्यहम् ॥ ब्रह्मदेहात्समुद्भूतःसत्यसन्धोऽस्मिनान्यथा ॥ १४ ॥ जिनरूपंविजानीहिसत्यधर्मकलेवरम् ॥ मांमेवहिप्रधा
वन्तियोगिनोज्ञानतत्पराः ॥ १५ ॥ वेनउवाच ॥ तवैवकीदृशंकर्मकिंतेदर्शनमेवच ॥ किमाचारोवदस्वैहिइत्युक्तंतेनभूभुजा ॥१६॥ पातकउवाच ॥
अर्हन्तोदेवतायत्रनिर्ग्रन्थोदृश्यतेगुरुः ॥ दयाचैवपरोधर्मस्तत्रमोक्षःप्रदृश्यते ॥ १७ ॥ दर्शनेऽस्मिन्नसन्देहआचारान्प्रवदाम्यहम् ॥ यजनंयाजनंना
स्तिवेदाध्ययनमेवच ॥ १८ ॥ नास्तिसन्ध्यातपोदानंस्वधास्वाहाविवर्जितम् ॥ हव्यकव्यादिकंनास्तिनैवयज्ञादिकाक्रिया ॥ १९ ॥ पितॄणांतर्पणं
नास्तिनातिथिर्वैश्वदेविकम्॥ क्षपणस्यवरापूजाअर्हतोध्यानमुत्तमम् ॥ २० ॥ अयंधर्मसमाचारोजैनमार्गेप्रदृश्यते ॥ एतत्तेसर्वमाख्यातंनिजधर्मस्य
लक्षणम् ॥ २१ ॥ वेनउवाच ॥ वेदप्रोक्तोयथाधर्मोयत्रयज्ञादिकाःक्रियाः ॥ पितॄणांतर्पणंश्राद्धंवैश्वदेवंनदृश्यते ॥ २२ ॥ नदानंतपएवास्तिकास्तेध
र्मस्यलक्षणम् ॥ वदसत्यंममाग्रेतुदयाधर्मश्चकीदृशः ॥ २३ ॥ पातकउवाच ॥ पञ्चतत्त्वप्रवृद्धोऽयंप्राणिनांकायएवच ॥ आत्मावायुस्वरूपोऽयंते
षांनास्तिप्रसङ्गता ॥२४॥ यथाजलेषुभूतानामपिसङ्गमवेहितत् ॥ जायतेबुद्बुदाकारंतद्भूतसमागमः ॥ २५ ॥ पृथ्वीभावोरजःस्थस्तुचापस्तत्रैवसं
स्थिताः ॥ ज्योतिस्तत्रप्रदृश्येतसुवायुर्वर्ततेत्रिषु ॥ २६ ॥ आकाशमावृणोत्पश्चाद्बुद्बुदत्वंप्रजायते ॥ अप्सुमध्येप्रभात्येवसुतेजोवर्तुलंवरम् ॥२७॥क्षण
मात्रंप्रदृश्येतक्षणान्नैवचदृश्यते ॥ तद्वद्भूतसमायोगःसर्वत्रपरिदृश्यते ॥२८॥ अन्तकालेप्रयात्यात्मापञ्चपञ्चसुयान्तिते ॥ मोहमुग्धास्ततोमर्त्यावर्त
न्तेचपरस्परम् ॥ २९ ॥ श्राद्धंकुर्वन्तिमोहेनक्षयाहेपितृतर्पणम् ॥ क्वास्तेमृतःसमश्नातिकीदृशोऽसौनृपोत्तम ॥ ३० ॥ किंज्ञानंकीदृशंकार्यंकेनदृष्टं

१ ‘ब्रह्मलिङ्गधर’ इति, ‘पद्मलिङ्गधर’ इति च पा० । २ ‘को देवस्ते’ इ० पा० । ३ ‘अर्हं पूज्यतमश्चरैः’ इ० पा० । ४ ‘मम रूपं हि ध्यायन्ति’ इ० पा० । ५ ‘कीदृशो धर्मः’ इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वदस्वनः ॥ मिष्टान्नंभोजयित्वाचतृप्तायान्तिचब्राह्मणाः ॥ ३१ ॥ कस्यश्राद्धंप्रदीयेतसातुश्रद्धानिरर्थिका ॥ अन्यदेवंप्रवक्ष्यामिवेदानांकर्मदारुणम्
॥ ३२ ॥ यदाऽतिथिर्गृहेयातिमहोक्षंपचतेद्विजः ॥ अजंवाराजराजेन्द्रअतिथिंपरिभोजयेत् ॥ ३३ ॥ अश्वमेधमखेअश्वंगोमेधेवृषमेवच ॥ नरमे
धेनरंराजन्वाजपेयेतथाह्यजान् ॥३४॥ राजसूयेमहाराजप्राणिनांघातनंबहु ॥ पुण्डरीकेगजंहन्याद्गजमेधेऽथकुञ्जरम् ॥३५॥ सौत्रामण्यांपशुंमेध्यंमे
षमेवप्रदृश्यते ॥ नानारूपेषुसर्वेषुश्रूयतांनृपनन्दन ॥ ३६ ॥ नानाजातिविशेषाणांपशूनांघातनंस्मृतम् ॥ यच्चापिदीयतेदानंकिंतद्दानस्यलक्षणम् ॥
॥ ३७ ॥ ज्ञेयंतदन्नमुच्छिष्टंक्रियतेभूरिभोजनम् ॥ अत्यन्तदोषहीनांस्तान्हिंसन्तियन्महामखे ॥ ३८ ॥ तत्रकिंदृश्यतेधर्मःकिंफलंतत्रभूपते ॥ पशू
नांमारणंयत्रनिर्दिष्टंवेदपण्डितैः ॥ ३९ ॥ तस्माद्विनष्टधर्मंचनपुण्यंमोक्षदायकम् ॥ दयांविनाहियोधर्मःसधर्मोविफलायते ॥ ४० ॥ जीवानांपाल
नंयत्रतत्रधर्मोनसंशयः ॥ स्वाहाकारःस्वधाकारस्तपःसत्यंनृपोत्तम ॥ ४१ ॥ दयाहीनंचापलंस्यान्नास्तिधर्मस्तुतत्रहि ॥ एतेवेदानवेदाःस्युर्दयायत्रन
विद्यते ॥ ४२ ॥ दयादानपरोनित्यंजीवमेवप्ररक्षयेत् ॥ चाण्डालोऽप्यथशूद्रोवासवैब्राह्मणउच्यते ॥४३॥ ब्राह्मणोनिर्दयोयोवैपशुघातपरायणः ॥ स
वैसुनिर्दयःपापीकठिनःक्रूरचेतनः ॥ ४४ ॥ वञ्चकैःकथितोवेदोयोवेदोज्ञानवर्जितः ॥ यत्रज्ञानंभवेन्नित्यंतत्रवेदःप्रतिष्ठते ॥ ४५ ॥ दयाहीनेषुवेदेषुवि
प्रेषुचमहामते ॥ नास्तिसत्यंक्रियातत्रवेदविप्रेषुवैतदा ॥ ४६ ॥ वेदानवेदाराजेन्द्रब्राह्मणाःसत्यवर्जिताः ॥ दानस्यापिफलंनास्तितस्माद्दानंनदीयते
॥ ४७ ॥ यथाश्राद्धस्यवैचिह्नंतथादानस्यलक्षणम् ॥ जिनस्यापिचयद्धर्मंभुक्तिमुक्तिप्रदायकम् ॥ ४८ ॥ तवाग्रेऽहंप्रवक्ष्यामिबहुपुण्यप्रदा
यकम् ॥ आदौदयाप्रकर्तव्याशान्तभूतेनचेतसा ॥ ४९ ॥ आराधयेद्दृढादेवंजितंयेनचराचरम् ॥ मनसाशुद्धभावेनजिनमेकंप्रपूजयेत् ॥ ५० ॥
नमस्कारःप्रकर्तव्यस्तस्यदेवस्यनान्यथा ॥ मातापित्रोस्तुवैपादौकदानैवप्रवन्दयेत् ॥ ५१ ॥ अन्येषामपिकावार्ताश्रूयतांराजसत्तम ॥ ५२ ॥
॥ वेनउवाच ॥ एतेविप्राश्चआचार्यागङ्गाद्याःसरितस्तथा ॥ वदन्तिपुण्यतीर्थानिबहुपुण्यप्रदानिच ॥ तत्किंवदस्वसत्यंमेयदिधर्ममिहेच्छसि ॥
॥ ५३ ॥ पातकउवाच ॥ आकाशाद्वैमहाराजमेघावर्षन्तिवैजलम् ॥ भूमौहिपर्वतेष्वेवंसर्वत्रपततेजलम् ॥ ५४ ॥ सआप्लाव्यततस्तिष्ठेद्द
यांसर्वत्रभावयेत् ॥ नद्यःपांपप्रवाहास्तुतासुतीर्थंश्रुतंकथम् ॥ ५५ ॥ जलाशयामहाराजतडागाःसागरास्तथा ॥ पृथिव्याधारकाश्चैवगिरयो
अश्मराशयः ॥ ५६ ॥ नास्त्येतेषुचवैतीर्थंजलैर्जलदमुत्तमम् ॥ स्नानेयदामहत्पुण्यंकस्मान्मत्स्येषुवैनहि ॥ ५७ ॥ दृष्टास्नानेनवैसिद्धिर्मी

१ 'कर्मकारणम्' इ० प.० । २ हन्यादित्यत्र संबन्धः । प्रदृश्यते इत्यस्य सर्वकर्मसु इतीत्यध्याहारेण सम्बन्धः । ३ 'जलप्रवाहास्तु' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाःशुद्ध्यन्तिनान्यथा ॥ यत्रजिनस्तत्रतीर्थंतत्रधर्मःसनातनः ॥ ५८ ॥ तपोदानादिकंसर्वंपुण्यंतत्रप्रतिष्ठितम् ॥ ५९ ॥ एकोजिनःसर्वमयोनृ
पेन्द्रनास्त्येवधर्मंपरमंहितीर्थम् ॥ अयंतुलाभःपरमस्तुतस्माद्ध्यायस्वनित्यंसुसुखोभविष्यसि ॥ ६० ॥ विनिन्द्यधर्मंसकलंसवेदंदानंसपुण्यं
परयज्ञरूपम् ॥ पापस्वभावैर्बहुबोधितोनृपस्त्वङ्गस्यपुत्रोभुवितेनपापिना ॥ ६१ ॥ इतिश्रीपाद्मपुराणेपञ्चपञ्चाशत्सहस्रसंहितायांभूमिखण्डेवेनो
पाख्यानेसप्तत्रिंशोऽध्यायः ॥ ३७ ॥ सूतउवाच ॥ एवंसम्बोधितोवेनःपापभावंगतःकिल ॥ पुरुषेणतेनजैनेनमहापापेनमोहितः ॥ १ ॥
नमस्कृत्यततःपादौतस्यैवचदुरात्मनः ॥ वेदधर्मंपरित्यज्यसत्यधर्मादिकांक्रियाम् ॥ २ ॥ सुयज्ञानांनिवृत्तिःस्याद्वेदानांहितथैवच ॥
पुण्यशास्त्रमयोधर्मस्तदानैवप्रवर्तितः ॥ ३ ॥ सर्वपापमयोलोकःसञ्जातस्तस्यशासनात् ॥ नैवयागाश्चवेदाश्चधर्मशास्त्रार्थमुत्तमम् ॥ ४ ॥
नदानाध्ययनंविप्रास्तस्मिञ्छासतिपार्थिवे ॥ एवंधर्मप्रलोपोऽभून्महत्पापंप्रवर्तितम् ॥ ५ ॥ अङ्गेनवार्यमाणस्तुअन्यथाकुरुतेभृशम् ॥ ननाम
पितुःपादौमातुश्चैवदुरात्मवान् ॥ ६ ॥ सनकस्यापिविप्रस्यअहमेकःप्रतापवान् ॥ पित्रानिवार्यमाणश्चमात्राचैवदुरात्मवान् ॥ ७ ॥ नकरोतिशुभं
पुण्यंतीर्थदानादिकंकदा ॥ आत्मभावानुरूपंचबहुकालंमहायशाः ॥ ८ ॥ पुनःसर्वैर्विचार्यैवंकस्मात्पापीव्यजायत ॥ अङ्गप्रजापतेःपुत्रोवंशलाञ्छ
नमागतः ॥ ९ ॥ पुनःपप्रच्छधर्मात्मासुतांमृत्योर्महात्मनः ॥ कस्यदोषात्समुत्पन्नोवदसत्यंममप्रिये ॥ १० ॥ सुनीथोवाच ॥ पूर्वमेवस्ववृत्तान्तमा
त्मपुण्यंचनन्दिनी ॥ समाचष्टचअङ्गायममदोषान्महामते ॥ ११ ॥ बाल्यंकृतंमयापापंसुशङ्खस्यमहात्मनः ॥ तपसिसंस्थितस्यापिनान्यत्कि
ञ्चित्कृतंमया ॥ १२ ॥ शप्ताहंकुप्यतातेनदुष्टातेसन्ततिर्भवेत् ॥ इतिजानेमहाभागतेनायंदुष्टतांगतः ॥ १३ ॥ समाकर्ण्यमहातेजास्तयासहवनंययौ॥
गतेतस्मिन्महाभागेसभार्येचवनेतदा ॥ १४ ॥ सप्तैतेऋषयस्तत्रवेनपार्श्वंगतास्तथा ॥ समाहूयततःप्रोचुरङ्गस्यतनयंप्रति ॥ १५ ॥ मावेनसाहसं
कार्षीःप्रजापालोभवानिह ॥ त्वयासर्वमिदंलोकंत्रैलोक्यंसचराचरम् ॥ १६ ॥ धर्मेचैवमहाभागसकलंहिप्रतिष्ठितम् ॥ पापकर्मपरित्यज्यपुण्यंकर्म
समाचर ॥ १७ ॥ एवमुक्तेषुतेष्वेवप्रहसन्वाक्यमब्रवीत् ॥ अहमेवपरोधर्मोऽहमेवार्हःसनातनः ॥ १८ ॥ अहंधाताअहंगोप्ताअहंवेदार्थएवच ॥ अहं
धर्मोमहापुण्योजैनधर्मःसनातनः ॥१९॥ मामेवकर्मणाविप्राभजध्वंधर्मरूपिणम् ॥२०॥ ऋषयऊचुः ॥ ब्राह्मणाःक्षत्रियावैश्यास्त्रयोवर्णाद्विजातयः॥
सर्वेषामेववर्णानांश्रुतिरेषासनातनी ॥२१॥ वेदाचारेणवर्तन्तेतेनजीवन्तिजन्तवः ॥ ब्रह्मवंशात्समुद्भूतोभवान्ब्राह्मणएवच ॥२२॥पश्चाद्राजापृथिव्या
श्चसञ्जातःकृतविक्रमः॥राजपुण्येनराजेन्द्रसुखंजीवन्तिवैद्विजाः॥२३॥ राज्ञःपापेननश्यन्तितस्मात्पुण्यंसमाचर ॥ समाहतस्त्वयाधर्मःकृतश्चापिनरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

धिप॥२४॥त्रेतायुगस्यकर्मापिद्वापरस्यतथानहि ॥ कलेश्चैवप्रवेशंतुवर्त्तयिष्यन्तिमानवाः॥२५॥ जैनधर्मंसमाश्रित्यसर्वेपापप्रमोहिताः ॥ वेदाचारंप
रित्यज्यपापंयास्यन्तिमानवाः ॥२६॥ पापस्यमूलमेवंवैजैनधर्मोनसंशयः ॥ अनेनमुग्धाराजेन्द्रमहामोहेनपातिताः ॥२७॥ मानवाःपापसङ्घातास्ते
षांनाशायनान्यथा ॥ भविष्यत्येवगोविन्दःसर्वपापापहारकः ॥ २८ ॥ स्वेच्छारूपंसमासाद्यसंहरिष्यतिपातकात् ॥ पापेषुसङ्गतेष्वेवंम्लेच्छ
नाशायवैपुनः ॥ कल्किरेवस्वयंदेवोभविष्यतिनसंशयः ॥ २९ ॥ व्यवहारंकलेश्चैवत्यजपुण्यंसमाश्रय ॥ वर्तयस्वहिसत्येनप्रजापालोभवस्वहि
॥ ३० ॥ वेनउवाच ॥ अहंज्ञानवतांश्रेष्ठःसर्वंज्ञातंमयाइह ॥ योऽन्यथावर्ततेचैवसदण्डयोभवतिध्रुवम् ॥ ३१ ॥ अत्यर्थंभाषमाणंतं
राजानंपापचेतनम् ॥ कुपितास्तेमहात्मानःसर्वेवैब्रह्मणःसुताः ॥ ३२ ॥ कुपितेष्वेवविप्रेषुवेनोराजामहात्मसु ॥ ब्रह्मशापभयात्तेषांवल्मीकं
प्रविवेशह ॥ ३३ ॥ अथतेमुनयःक्रुद्धावेनंपश्यन्तिसर्वतः ॥ ज्ञात्वाप्रनष्टंभूपंतंवल्मीकस्थंसुसाम्प्रतम् ॥ ३४ ॥ बलादानिन्युस्तंविप्राःक्रूरंतं
पापचेतनम् ॥ दृष्ट्वाचपापकर्माणंमुनयःसुसमाहिताः॥३५॥सव्यंपाणिंममन्थुस्तेभूपस्यजातमन्यवः॥तस्माज्जातोमहाह्रस्वोनीलवर्णोभयङ्करः॥३६॥
बर्बरोरक्तनेत्रस्तुबाणपाणिर्धनुर्द्धरः ॥ सर्वेषामेवपापानांनिषादानांबभूवह ॥ ३७ ॥ धातापालयिताराजाम्लेच्छानांतुविशेषतः ॥ तंदृष्ट्वापापकर्मा
णमृषयस्तुमहामते ॥३८॥ममन्थुर्दक्षिणंपाणिंवेनस्यापिमहात्मनः ॥ तस्माज्जातोमहात्मासयेनदुग्धावसुन्धरा ॥ ३९ ॥ पृथुर्नाममहाप्राज्ञोराजराजो
महाबलः ॥ तस्यपुण्यप्रसादाच्चवेनोधर्मार्थकोविदः ॥ ४० ॥ चक्रवर्तिपदंभुक्त्वाप्रसादात्तस्यचक्रिणः ॥ जगामवैष्णवंलोकंतद्विष्णोःपरमंपदम्
॥ ४१ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेऽष्टात्रिंशोऽध्यायः ॥ ३८ ॥ ऋषयऊचुः ॥ कथंवेनोगतःस्वर्गंपापंत्यक्त्वाप्रदूरतः ॥ तन्नोविस्तर
तोऽत्रापिवदसत्यवतांवर ॥ १ ॥ सूतउवाच ॥ ऋषीणांपुण्यसंसर्गात्संवादाच्चद्विजोत्तमाः ॥ कायस्यमथनात्पापोबहिस्तस्यविनिर्गतः ॥ २ ॥
पश्चाद्वेनःसपुण्यात्माज्ञानंलेभेचशाश्वतम् ॥ रेवायादक्षिणेकूलेतपश्चचारसद्विजाः ॥ ३ ॥ तृणबिन्दोर्ऋषेश्चैवआश्रमेपापनाशने ॥ वर्षाणांतुशतं
साग्रंकामक्रोधविवर्जितः ॥ ४ ॥ तस्योग्रतपसादेवःशङ्खचक्रगदाधरः ॥ प्रसन्नोऽभून्महाभागोनिष्पापस्यनृपस्यवै ॥ उवाचचप्रसन्नोऽस्मिव्रियतांवर
उत्तमः ॥ ५ ॥ वेनउवाच ॥ यदिदेवप्रसन्नोऽसिदेहिमेवरमुत्तमम् ॥ अनेनापिशरीरेणगन्तुमिच्छामित्वत्पदम् ॥ ६ ॥ पित्रासार्धंमहाभागमात्राचैव
सुरेश्वर ॥ तवैवतेजसादेवतद्विष्णोःपरमंपदम् ॥ ७ ॥ श्रीवासुदेवउवाच ॥ क्वगतोऽसौमहामोहोयेनत्वंमोहितोनृप ॥ लोभेनमोहयुक्तेनतमोमार्गेनि

१ 'जातुं' इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

पातितः ॥ ८ ॥ वेनउवाच ॥ यन्मेपूर्वकृतंपापंतेनाहंमोहितोविभो ॥ अतोमामुद्धरास्मात्त्वंपापाच्चैवसुदारुणात् ॥ ९ ॥ प्रजप्तव्यमथोपाठ्यंतद्व
दानुग्रहाद्विभो ॥ १० ॥ भगवानुवाच ॥ साधुभूपमहाभागपापंतेनाशमागतम् ॥ शुद्धोऽसितपसाचत्वंततःपुण्यंवदाम्यहम् ॥ ११ ॥ पुरा
वैब्रह्मणातातपृष्टोऽहंभवतायथा ॥ तस्मैयदुदितंवत्सतत्तेसर्ववदाम्यहम् ॥ १२ ॥ एकदाब्रह्मणाध्यानस्थितेननाभिपङ्कजे ॥ प्रादुरासतदात
स्यवरदानायसुव्रत ॥ १३ ॥ तेनपृष्टंमहत्पुण्यंस्तोत्रंपापप्रणाशनम् ॥ वासुदेवाभिधानंचसुगतिप्रदमिच्छता ॥ १४ ॥ स्तोत्राणांपरमंतस्मैवा
सुदेवाभिधंमहत् ॥ सर्वसौख्यप्रदंनॄणांपठतांजपतांसदा ॥ उपादिशंमहाभागविष्णुप्रीतिकरंपरम् ॥ १५ ॥ विष्णुरुवाच ॥ एतत्सर्वंजग
द्व्याप्तंमयात्वव्यक्तमूर्तिना ॥ अतोमांमुनयःप्राहुर्विष्णुंविष्णुपरायणाः ॥ १६ ॥ वसन्तियत्रभूतानिवसत्येषुचयोविभुः ॥ सवासुदेवोविज्ञेयोविद्वद्भि
रहमादरात् ॥ १७ ॥ सङ्कर्षतिप्रजाश्चान्तेह्यव्यक्तायतोविभुः॥ ततःसङ्कर्षणोनाम्नाविज्ञेयःशरणागतैः ॥ १८ ॥ इङ्गितेकामरूपोऽहंबहुस्यामितिका
म्यया ॥ प्रद्युम्नोऽहंबुधैस्तस्माद्विज्ञेयोऽस्मिसुतार्थिभिः ॥ १९ ॥ अत्रलोकेत्रिनाचेशौसर्वेशौहरकेशवौ ॥ निरुद्धोऽहंयोगबलान्नकेनातोऽनिरुद्धवत्त
॥ २० ॥ विश्वाख्योऽहंप्रतिजगज्ज्ञानविज्ञानसंयुतः ॥ अहमित्यभिमानीचजाग्रच्चिन्तासमाकुलः ॥ २१ ॥ तैजसोऽहंजगच्चेष्टामयश्चेन्द्रियरूपवान् ॥
ज्ञानकर्मसमुद्रिक्तःस्वप्नावस्थांगतोह्यहम् ॥ २२ ॥ प्राज्ञोऽहमधिदैवात्माविश्वाधिष्ठानगोचरः ॥ सुषुप्तावास्थितोलोकादुदासीनोविकल्पितः ॥२३॥
तुरीयोऽहंनिर्विकारीगुणावस्थाविवर्जितः ॥ निर्लिप्तःसाक्षिवद्विश्वप्रतिबिम्बितविग्रहः ॥ २४ ॥ चिदाभासश्चिदानन्दश्चिन्मयश्चित्स्वरूपवान् ॥ नि
त्योऽक्षरोब्रह्मरूपोब्रह्मन्नेवमवेहिमाम् ॥ २५ ॥ भगवानुवाच ॥ इत्युक्त्वान्तर्दधेविष्णुःस्वरूपंब्रह्मणेपुरा ॥ सोऽपिज्ञात्वाजगद्व्याप्तिंकृतात्मासमभूत्क्ष
णात् ॥ २६ ॥ राजंस्त्वमपिशुद्धात्मापृथोर्जन्मनएवच ॥ तथाप्याराधयविभुंस्तोत्रेणानेनसुव्रत ॥ २७॥ तुष्टोविष्णुस्तमभ्याहवरंवरयमानद॥२८॥
वेनउवाच ॥ सुगतिंदेहिमेविष्णोदुष्कृतात्तारयस्वमाम् ॥ शरणंत्वांप्रपन्नोऽस्मिकारणंवदसद्गतेः ॥ २९ ॥ विष्णुरुवाच ॥ पूर्वमेवमहाभागत्वङ्गेना
पिमहात्मना ॥ अहमाराधितस्तेनतस्मैदत्तोवरोमया ॥ ३० ॥ प्रयास्यसिमहाभागवैष्णवंलोकमुत्तमम् ॥ कर्मणास्वेनविप्रेन्द्रपुण्येननृपनन्दन
॥ ३१ ॥ आत्मार्थेत्वंमहाभागवरमेवप्रयाचय ॥ शृणुवेनमहाभागवृत्तान्तंपूर्वसम्भवम् ॥ ३२ ॥ तवमात्रेपुरादत्तःशापःक्रुद्धेनभूपते ॥ सुशङ्खेन
सुनीथायैबाल्येपूर्वंमहात्मना ॥ ३३ ॥ ततस्त्वङ्गेवरोदत्तोमयैवविदितात्मना ॥ त्वांसमुद्धर्तुकामेनसुपुत्रस्तेभविष्यति ॥ ३४ ॥ एवमुक्त्वातु
पितरंतवाहंगुणवत्सल ॥ भवदङ्गात्समुद्भूतःकरिष्येलोकपालनम् ॥ ३५ ॥ दिवीन्द्रोहियथाभातितथाहंभूतलेस्थितः ॥ आत्मावैजायतेपुत्रइतिसत्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वतीश्रुतिः॥३६॥ अतस्त्वंसुगतिंवत्सलभिष्यसिवरान्मम ॥ गत्यर्थमात्मनोराजन्दानमेकंसमाचर ॥३७॥यस्त्वांपातकरूपोऽहंसुनीथायाःपरन्तप॥
अग्रुवंनग्नरूपेणकर्तुंत्वांतुविधर्मगम् ॥ ३८ ॥ अन्यथातुसुशङ्खस्यवाक्यमेवान्यथाभवेत् ॥ अतोविधिर्निषेधश्चह्यहमेवनृपोत्तम ॥ ३९ ॥ कर्मानुरू
पफलदोवुद्ध्यतीतोगुणाग्रहः ॥ दानमेवपरंश्रेष्ठंदानंसर्वप्रभावकम्॥४०॥तस्माद्दानंददस्वत्वंदानात्पुण्यंप्रवर्तते ॥ दानेननश्यतेपापंतस्माद्दानंददस्वहि
॥ ४१ ॥ अश्वमेधादिभिर्यज्ञैर्यजस्वनृपसत्तम ॥ भूमिदानादिकंदानंब्राह्मणेभ्योददस्ववै ॥ ४२ ॥ सुदानात्प्राप्यतेभोगःसुदानात्प्राप्यतेयशः ॥ सुदा
नाज्जायतेकीर्तिःसुदानात्प्राप्यतेसुखम् ॥ ४३ ॥ दानेनस्वर्गमाप्नोतिफलंतत्रभुनक्तिच ॥ दत्तस्यापिसुदानस्यश्रद्धायुक्तस्यसत्तम ॥ ४४ ॥ कालेप्रा
प्तेव्रजेत्तीर्थंपुण्यस्यापिफलंत्विदम् ॥ पात्रभूतायविप्रायश्रद्धापूतेनचेतसा ॥ ४५ ॥ योददातिमहादानंमयिभावंनिवेश्यच ॥ तस्याहंसकलंदद्मिमन
सायंयमिच्छति ॥ ४६ ॥ वेनउवाच ॥ कालंदानस्यमेब्रूहिकीदृक्कालस्यलक्षणम् ॥ तीर्थस्यापिचयद्रूपंपात्रस्यापिसुलक्षणम् ॥४७॥ दानस्यापिजग
न्नाथविधिंविस्तरतोवद ॥ प्रसादसुमुखोभूत्वादयामेयदिवर्त्तते ॥ ४८ ॥ श्रीकृष्णउवाच ॥ दानकालंप्रवक्ष्यामिनित्यंनैमित्तिकंनृप ॥ काम्यं
चान्यंमहाराजचतुर्थंप्रायिकंपुनः ॥ ४९ ॥ सूर्योदयस्यवेलायांपापंनश्यतिसर्वतः ॥ अन्धकारादिकानांचघोराणांनाशकारकः ॥ ५० ॥ दिविसूर्यो
ममांशोऽयंतेजसांकल्पितोनिधिः ॥ तस्यैवतेजसादग्धाभस्मतांयान्तिकिल्बिषाः ॥ ५१ ॥ उदयन्तंममांशंयोदृष्ट्वादत्तेतुवार्यपि ॥ तस्यकिंकथ्यतेभू
पनित्यंपुण्यविवर्द्धनम् ॥ ५२ ॥ सम्प्राप्तायांसुवेलायांतस्यांपुण्यकरोनरः ॥ स्नात्वाभ्यर्च्यपितॄन्देवान्दानदाताभवेत्पुनः ॥ ५३ ॥ यथाशक्तिप्रभा
वेनश्रद्धापूतेनचेतसा ॥ अन्नंपयःफलंपुष्पंवस्त्रंताम्बूलभूषणम् ॥ ५४ ॥ हेमरत्नादिकंचैवतस्यपुण्यमनन्तकम् ॥ मध्याह्नेतुततोराजन्नपराह्णेतथैवच
॥ ५५ ॥ मामुद्दिश्यचयोदद्यात्तस्यपुण्यमनन्तकम् ॥ खाद्यपानादिकंमिष्टंलेपनंगन्धकुङ्कुमम् ॥५६॥ कर्पूरादिकमेवापिवस्त्रालङ्कारसंयुतम् ॥ अवि
च्छिन्नंददात्येवंभोगसौख्यप्रदायकम् ॥ ५७ ॥ नित्यकालोमयाख्यातोदानपूजार्थिनांशुभः ॥ अथातःसम्प्रवक्ष्यामिनैमित्तिकमनुत्तमम् ॥ ५८ ॥
त्रिकालेष्वपिदातव्यंदानमेवंनसंशयः ॥ शून्यंदिनंनकर्तव्यमात्मनोहितमिच्छता ॥ ५९ ॥ यस्मिन्कालेप्रदत्तंहिकिंचिद्दानंनराधिप ॥ तत्प्रभावान्म
हाप्राज्ञोबहुसामर्थ्यसंयुतः ॥ ६० ॥ धनाढ्योगुणवान्प्राज्ञःपण्डितोऽपिविचक्षणः ॥ पक्षंमासंदिनंयावन्नदत्तंवैयदाशनम् ॥६१॥ तावद्वैवारयाम्यंनंभ
क्ष्याच्चैवनरोत्तमम् ॥ स्वमलंभक्षितंचैवअदत्त्वादानमुत्तमम् ॥ ६२ ॥ उत्पादयाम्यहंरोगंसवभोगनिवारणम्॥ तेषांकायेष्वसन्तुष्टोबहुपीडाप्रदायकम्

१ 'गोभूस्वर्णान्नपूर्वकम्' इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

॥ ६३ ॥ मन्दानलेनसंयुक्तंज्वरंसन्तापकारकम् ॥ त्रिकालेषुनदत्तंयैर्ब्राह्मणेषुसुरेषुच ॥६४॥ स्वयमश्नातिमिष्टंतुतेनपापंमहत्कृतम् ॥ प्रायश्चित्ते
नरौद्रेणतमेवंपरिशोधयेत्॥६५॥उपवासैर्महाराजकायशोषकरादिकैः॥ चर्मकारोयथाचर्मकुण्डस्योपरिनिर्घृणः॥६६॥शोधयेच्चकषायैश्चतच्चर्मस्फोटय
त्यथ ॥ तथाहंपापकर्तारंशोधयामिनसंशयः ॥ ६७ ॥ ओषधीनांसुयोगाच्चकषायैःकटुकैर्ध्रुवम् ॥ उष्णोदकैश्चसन्तापैर्वैद्यरूपेणनान्यथा ॥ ६८ ॥
सुखंभुङ्क्तेततस्सोऽग्रेभोगान्पुण्यान्मनोऽनुगान् ॥ नकरोतिसमर्थस्सन्सर्वदानमनुत्तमम् ॥६९॥ महतापापरूपेणतमेवंपरितापये ॥ नित्यकालस्ययद्दा
नमात्मार्थपापिभिर्यथा ॥ ७० ॥ नदत्तंराजराजेन्द्रश्रद्धापूतेनचेतसा ॥ तथातान्जारयाम्येतानुपायैर्दारुणैःकिल ॥ ७१ ॥ नैमित्तिकंतथाकालंपुण्यं
चैवतवाग्रतः ॥ प्रवक्ष्यामिनरश्रेष्ठसुबुद्ध्याशृणुतत्परः ॥ ७२ ॥ अमावास्यामहाराजपौर्णमासीतथैवच ॥ यदाभवतिसङ्क्रान्तिर्व्यतीपातोनरेश्वर
॥ ७३ ॥ वैधृतिश्चयदाप्रोक्तायदाचैकादशीभवेत् ॥ महामाघीतथाषाढीवैशाखीकार्तिकीतथा ॥ ७४ ॥ अमासोमसमायोगेमन्वादिषुयुगादिषु ॥
गजच्छायातथाप्रोक्तापितृक्षयतिथिस्तथा ॥ ७५ ॥ एतेनैमित्तिकाःख्यातास्तवाग्रेनृपसत्तम ॥ एतेषुदीयतेदानंतस्यदानस्ययत्फलम् ॥ ७६ ॥
तत्फलंतुप्रवक्ष्यामिश्रूयतांनृपसत्तम ॥ मामुद्दिश्यनरोभक्त्याब्राह्मणायप्रयच्छति ॥ ७७ ॥ तस्याहंनिर्विकल्पेनप्रयच्छामिनसंशयः ॥ गृहंसौख्यंम
हाराजस्वर्गमोक्षादिकंबहु ॥ ७८ ॥ काम्यंकालंप्रवक्ष्यामिदानस्यफलदायकम् ॥ व्रतानामेवसर्वेषांदेवादीनांतथैवच ॥ ७९ ॥ दानस्यपुण्यकालंतुस
म्प्रोक्तंद्विजसत्तमैः ॥ आभ्युदयिकमेवापिकालंवक्ष्यामितेनृप ॥ ८० ॥ शुभानामेवसर्वेषांवैवाहिकमनुत्तमम् ॥ पुत्रस्यजातमात्रस्यचौलमौञ्ज्यादि
कंतथा ॥ ८१ ॥ प्रासादध्वजदेवानांप्रतिष्ठादिककर्मणि ॥ वापीकूपतडागानामारामस्यगृहस्यच ॥८२॥ तदाभ्युदयिकंप्रोक्तंमातृणांयत्रपूजनम् ॥
तस्मिन्कालेददेदानंसर्वसिद्धिप्रदायकम् ॥ ८३ ॥ त्रिविधोऽयंतुतेकालःप्रोक्तश्चैवनृपोत्तम ॥ अन्यच्चैवप्रवक्ष्यामिपापपीडानिवारणम्॥ ८४ ॥ मृत्यु
कालेचसम्प्राप्तेक्षयंज्ञात्वानरोत्तम ॥ तत्रदानंप्रदातव्यंयममार्गसुखप्रदम् ॥८५ ॥ नित्यनैमित्तिकात्कालात्काम्याभ्युदयिकात्तथा ॥ अन्त्यःकालोम
हाराजसमाख्यातस्तवाग्रतः ॥ ८६ ॥ एतेकालाःसमाख्याताःस्वकर्मफलदायकाः ॥ तीर्थस्यलक्षणंराजन्प्रवक्ष्यामितवाग्रतः ॥ ८७ ॥ सुतीर्थाना
मियंगङ्गाभातिपुण्यासरस्वती ॥ रेवाचयमुनातापीतथाचर्मण्वतीनदी ॥ ८८॥ सरयूर्घर्घरावेणासर्वपापप्रणाशिनी ॥ कावेरीकपिलाचान्याविशाला
विश्वतारिणी ॥ ८९ ॥ गोदावरीसमाख्यातातुङ्गभद्रानरोत्तम ॥ पापानांभीतिदानित्यंभीमरथीप्रपठ्यते ॥ ९० ॥ देविकाकृष्णगङ्गाचअन्याःसरि
द्वरोत्तमाः ॥ एतासांपुण्यकालेषुसन्तितीर्थान्यनेकशः ॥ ९१ ॥ ग्रामेवायदिवाऽरण्येनद्यःसर्वत्रपावनाः ॥ तत्रतत्रप्रकर्तव्याःस्नानदानादिकाःक्रियाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ९२ ॥ यदानज्ञायतेनामतासांतीर्थस्यसत्तम ॥ नामोच्चारंप्रकुर्वीतविष्णुतीर्थमिदंनृप॥ ९३ ॥ तीर्थस्यदेवतातद्वदहमेवनसंशयः ॥ मामेवमुच्चरेद्यो
वैतीर्थेदेवेषुसाधकः ॥ ९४ ॥ तस्यपुण्यफलंजातमन्नाम्नानृपनन्दन ॥ अज्ञातानांसुतीर्थानांदेवानांनृपसत्तम ॥ ९५ ॥ स्नानेदानेमहाराजमन्नाममहिस
मुच्चरेत् ॥ तीर्थानामेवराजेन्द्रधात्राधात्र्यइमाःकृताः॥९६॥सिन्धवःसर्वपुण्यानांसर्वस्थाःक्षितिमण्डले ॥ यत्रतत्रप्रकर्तव्यंस्नानदानादिकंनृप ॥९७॥
अक्षयंफलमाप्नोतिसुतीर्थानांप्रसादतः ॥ तीर्थरूपामहापुण्याःसागराःसप्तएवच ॥९८॥ मानसाद्यास्तथाराजन्सरस्यश्चप्रकीर्तिताः ॥ निर्झराःपल्व
लाःप्रोक्तास्तीर्थरूपानसंशयः ॥ ९९ ॥ स्वल्पानद्योमहाराजतासुतीर्थंप्रतिष्ठितम् ॥ खातेष्वेवंचसर्वेषुवर्जयित्वाचकूपकम् ॥१००॥ पर्वतास्तीर्थरू
पाश्चमेर्वाद्याश्चमहीतले ॥ यज्ञभूमिश्चयज्ञश्चअग्निहोत्रेयथास्थितः ॥ १ ॥ श्राद्धभूमिस्तथाशुद्धादेवशालातथापुनः ॥ होमशालातथाप्रोक्तावे
दाध्ययनवेश्मच ॥ २ ॥ गृहेषुपुण्यसंयुक्तंगोस्थानंवरमुत्तमम् ॥ सोमपायीभवेद्यत्रतीर्थंतत्रप्रतिष्ठितम् ॥ ३ ॥ आरामायत्रवैपुण्याअश्वत्थो
यत्रतिष्ठति ॥ ब्रह्मवृक्षोभवेद्यत्रवटवृक्षस्तथैवच ॥ ४ ॥ अन्येचवन्यसंस्थानेतत्रतीर्थंप्रतिष्ठितम् ॥ एतेतीर्थाःसमाख्याताःपितामातातथैवच ॥ ५ ॥
पुराणंपठ्यतेयत्रगुरुर्यत्रस्वयंस्थितः ॥ सुभार्यातिष्ठतेयत्रतत्रतीर्थंनसंशयः ॥ ६ ॥ सुपुत्रस्तिष्ठतेयत्रतत्रतीथनसंशयः ॥ एतान्यपिचतीर्थानि
राजवेश्मतथैवच ॥ ७ ॥ वेनउवाच ॥ पात्रस्यलक्षणंब्रूहियस्मैदेयंसुरोत्तम ॥ प्रसादसुमुखोभूत्वाकृपयाममामाधव ॥८॥वासुदेवउवाच ॥ शृणुराजन्म
हाप्राज्ञपात्रस्यापिसुलक्षणम् ॥ यस्मैदेयंसुदानंचश्रद्धापूतैर्महात्मभिः ॥ ९ ॥ ब्राह्मणंसुकुलोपेतंवेदाध्ययनतत्परम् ॥ शान्तंदान्तंतपोयुक्तं
शुक्लमेवविशेषतः ॥११०॥ प्रज्ञावन्तंज्ञानवन्तंदेवपूजनतत्परम्॥सत्यवन्तंमहापुण्यंवैष्णवंज्ञानपण्डितम्॥११॥धर्मज्ञंमुक्तलौल्यंचपाखण्डैस्तुविवर्जि
तम् ॥ एवंपात्रंसमाख्यातमन्यदेवंवदाम्यहम् ॥ १२ ॥ एवमेतैर्गुणैर्युक्तंस्वसृपुत्रंनरोत्तमम् ॥ एतंपात्रंविजानीहिदुहितुस्तनयंततः ॥ १३ ॥ जामा
तरंमहाराजभावैरेतैश्चसंयुतम् ॥ गुरुंचदीक्षितंचैवपात्रभूतंनरोत्तम ॥ १४ ॥ एतान्येवसुपात्राणिदानयोग्यानिसत्तम ॥ वेदाचारसमोपेतस्तृप्तिंनैवच
गच्छति ॥१५॥ वर्जयेत्किलतंविप्रंतथाकाणंसुधूर्तकम् ॥अतिकृष्णंमहाराजकपिलंपरिवर्जयेत्॥१६॥ कर्कटाक्षंसुनीलंचश्यावदन्तंविवर्जयेत् ॥ नील
दन्तंतथाराजन्पीतदन्तंतथैवच ॥ १७ ॥ गोदन्तंकृष्णदन्तंचबर्बरंचातिपांसुलम् ॥ हीनाङ्गमधिकाङ्गंचकुष्ठिनंकुनखंतथा ॥ १८ ॥ दुश्चर्माणंमहा
राजखल्वाटंपरिवर्जयेत् ॥ अन्यायेपुरतायस्यजायाविप्रस्यकस्यच ॥ १९ ॥ तस्मैदानंनदातव्यंयदिब्रह्मसमोभवेत् ॥ स्त्रीजितायनदातव्यंशाखारण्डे[1]

१ स्वशाखां परित्यज्यान्यशाखीयकर्मकर्ता शाखारण्डः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महामते ॥ १२० ॥ व्याधितायनदातव्यंमृतभोजिषुभूपते ॥ चोरायचनदातव्यंसयद्यत्रिसमोभवेत् ॥ २१ ॥ अतृप्तायनदातव्यंशावंतुपरिव
र्जयेत् ॥ अतिस्तब्धायनोदेयंशठायचविशेषतः ॥ २२ ॥ वेदशास्त्रसमायुक्तःसदाचारेणवर्जितः ॥ श्राद्धेदानेचराजेन्द्रनैवयुक्तःकदाभवेत् ॥ २३ ॥
अथदानंप्रवक्ष्यामिसफलंपुण्यदायकम् ॥ कालतीर्थसुपात्राणांश्रद्धायोगात्प्रजायते ॥ २४ ॥ नास्तिश्रद्धासमंपुण्यंनास्तिश्रद्धासमंसुखम् ॥ नास्ति
श्रद्धासमंतीर्थंसंसारेप्राणिनांनृप ॥२५॥ श्रद्धाभावेनसंयुक्तोमामेवंपरिसंस्मरेत् ॥ पात्रहस्तेप्रदातव्यंस्वल्पमेवनृपोत्तम ॥२६॥ एवंविधस्यदानस्यवि
धियुक्तस्ययत्फलम् ॥ अनन्तंतदवाप्नोतिमत्प्रसादात्सुखीभवेत्॥१२७॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेएकोनचत्वारिंशोऽध्यायः॥३९॥
वेनउवाच ॥ नित्यदानफलंदेवत्वत्तःपूर्वंमयाश्रुतम्॥नैमित्तिकस्यदानस्यदत्तस्यापिहियत्फलम् ॥१॥ तत्फलंमेसमाचक्ष्वत्वत्प्रसादात्प्रयत्नतः॥श्टण्वं
स्तृप्तिंनगच्छामिश्रोतुंश्रद्धाप्रवर्तते ॥२॥ विष्णुरुवाच ॥ नैमित्तिकंप्रवक्ष्यामिदानमेवनृपोत्तम ॥ महापर्वणिसम्प्राप्तेयेनदानानिश्रद्धया ॥ ३ ॥ सत्पा
त्रेभ्यःप्रदत्तानितस्यपुण्यफलंशृणु ॥ गजंरथंप्रदत्तेयोह्यश्वंचापिनृपोत्तम ॥ ४ ॥ सचभृत्यैस्तुसंयुक्तःपुण्यदेशेनपोत्तमः ॥ जायतेहिमहाराजमत्प्रसा
दान्नसंशयः ॥ ५ ॥ राजाभवतिधर्मात्माज्ञानवान्बलवान्सुधीः ॥ अजेयःसर्वभूतानांमहातेजाःप्रजायते ॥ ६ ॥ महापर्वणिसम्प्राप्तेभूमिदानंददा
तियः ॥ गोदानंवामहाराजसर्वभोगपतिर्भवेत् ॥ ७ ॥ ब्राह्मणायसुपुण्यायदानंदद्यात्प्रयत्नतः ॥ महादानानियोदद्यात्तीर्थेपर्वणिपात्रवित् ॥ ८ ॥
तेषांचिह्नंप्रवक्ष्यामिभूपतित्वंप्रजायते ॥ तीर्थेपर्वणिसम्प्राप्तेगुप्तदानंददातियः ॥ ९ ॥ निधीनामाशुसम्प्राप्तिरक्षरापरिजायते ॥ महापर्वणिसम्प्राप्तेती
र्थेषुब्राह्मणायच ॥ १० ॥ सुचैलंचमहादानंकाञ्चनेनसमन्वितम् ॥ पुण्यंफलंप्रवक्ष्यामितस्यदानस्यभूपते ॥ ११ ॥ जायन्तेबहवःपुत्राःसुगुणावेद
पारगाः ॥ आयुष्मन्तःप्रजावन्तोयशःपुण्यसमन्विताः ॥ १२ ॥ विपुलाश्चैवजायन्तेस्फीतालक्ष्मीर्महामते ॥ सौख्यंचलभतेपुण्यंधर्मवान्परिजायते
॥ १३ ॥ महापर्वणिसम्प्राप्तेतीर्थेगत्वाप्रयत्नतः ॥ कपिलांकाञ्चनींदद्याद्ब्राह्मणायमहात्मने ॥ १४ ॥ तस्यपुण्यंप्रवक्ष्यामिदानस्यचमहामते ॥ क
पिलादोमहाराजसर्वसौख्यान्प्रभुञ्जति ॥ १५ ॥ यावद्ब्रह्माप्रजीवेत्सतावत्तिष्ठतितत्रसः ॥ महापर्वणिसम्प्राप्तेअलङ्कृत्यचगांतदा ॥ १६ ॥ का
ञ्चनेनापिसंयुक्तांवस्त्रालङ्कारभूषणैः ॥ तस्यदानस्यराजेन्द्रफलभोगंवदाम्यहम् ॥ १७ ॥ विपुलाजायतेलक्ष्मीर्दानभोगसमाकुला ॥ सर्वविद्यापति
र्भूत्वाविष्णुभक्तोभवेत्किल ॥ १८ ॥ विष्णुलोकेवसेन्मर्त्योयावत्तिष्ठतिमेदिनी ॥ तीर्थंगत्वातुयोदद्याद्ब्राह्मणायविभूषणम् ॥ १९ ॥ भुक्त्वातुविपु
लान्भोगानिन्द्रेणक्रीडतेसह ॥ महापर्वणिसम्प्रातेवस्त्रंचद्विजपुङ्गवे ॥ २० ॥ दत्त्वान्नंभूमिसंयुक्तंपात्रेश्रद्धासमन्वितः ॥ मोदतेसतुवैकुण्ठेविष्णुत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ल्यपराक्रमः ॥ २१ ॥ सवस्त्रंकाञ्चनंदत्त्वाद्विजायपरिशीलिने ॥ स्वेच्छयाअग्निसदृशोवैकुण्ठेसवसेत्सुखी ॥ २२ ॥ सुवर्णस्यसुकुम्भंचघृतेनपरि
पूरयेत् ॥ पिधानंरौप्यंकर्तव्यंवस्त्रहारैरलङ्कृतम् ॥ २३ ॥ पुष्पमालान्वितंकुर्याद्ब्रह्मसूत्रेणशोभितम् ॥ प्रतिष्ठितंवेदमन्त्रैस्तंसम्पूज्यमहामते
॥ २४ ॥ उपचारैःपवित्रैश्चषोडशैःपरिपूजयेत ॥ स्वलङ्कृत्यततोदद्याद्ब्राह्मणायमहात्मने ॥ २५ ॥ षोडशैवततोगावःसवस्त्राःकांस्यदोहनाः ॥
कुम्भयुक्ताश्चचत्वारोदक्षिणांचसकाञ्चनाम् ॥ २६ ॥ तथाद्वादशकागावोवस्त्रालङ्कारभूषणाः ॥ पृथग्भूतायविप्रायदातव्यानात्रसंशयः ॥ २७ ॥
एवमादीनिदानानिअन्यानिनृपनन्दन ॥ तीर्थकालंसुसम्प्राप्यपात्रसम्पत्तिमेवच ॥ २८ ॥ श्रद्धाभावेनदातव्यंबहुपुण्यकरंभवेत् ॥ विष्णुमुद्दि
श्ययद्दानंकामनापरिकल्पितम् ॥ २९ ॥ तस्यदानस्यभावेनभावनापरिभावितः ॥ तादृक्फलंसमश्नातिमानुषोनात्रसंशयः ॥ ३० ॥ आभ्यु
दयंप्रवक्ष्यामियज्ञादिषुप्रवर्तते ॥ तेनदानेनतस्यापिश्रद्धयाचद्विजोत्तम ॥ ३१ ॥ प्रज्ञावृद्धिंसमाप्नोतिनचदुःखंप्रविन्दति ॥ भोगान्भुनक्तिधर्मा
त्माजीवमानस्तुसाम्प्रतम् ॥ ३२ ॥ ऐन्द्रास्तुभुङ्क्तेभोगान्सदातादिव्यांगतिंगतः ॥ स्वकुलंनयतेस्वर्गंकल्पानांचसहस्रकम् ॥ ३३ ॥ एवमाभ्युद
यंप्रोक्तमथान्यत्तेवदाम्यहम् ॥ कायस्यचक्षयंज्ञात्वाजरयापरिपीडितः ॥ ३४ ॥ दानंतेनप्रदातव्यमाशांकस्यनकारयेत् ॥ मृतेचमयिमेपुत्राअ
न्येस्वजनबान्धवाः ॥ ३५ ॥ कथमेतेभविष्यन्तिमांविनासुहृदोमम ॥ तेषांमोहात्प्रमुग्धोवैनददातिसकिंचन ॥ ३६ ॥ मृत्युंप्रयातिमोहात्मारु
दन्तिमित्रबान्धवाः ॥ दुःखेनपीडिताःसर्वेमायामोहेनपीडिताः ॥ ३७ ॥ सङ्कल्पयन्तिदानानिमोक्षंवैचिन्तयन्तिच ॥ तस्मिन्मृतेमहाराजमा
यामोहेगतेसति ॥ ३८ ॥ विस्मरन्तिचदानानिलोभात्मानोदिशन्तिन ॥ योऽसौमृतोमहाराजयमपथंसुदुःखितः ॥ ३९ ॥ तृषाक्षुधासमाक्रान्तो
बहुदुःखैःप्रपीडितः ॥ तस्माद्दानंप्रदातव्यंस्वयमेवनसंशयः ॥ ४० ॥ कस्यपुत्राश्चपौत्राश्चकस्यभार्यानृपोत्तम ॥ संसारेनास्तिकःकस्यतस्माद्दानं
प्रदीयते ॥ ४१ ॥ ज्ञानवताप्रदातव्यंस्वयमेवनसंशयः ॥ अन्नपानंचताम्बूलमुदकंकाञ्चनंतथा ॥ ४२ ॥ सुगांसवत्सांभूमिंचफलानिविविधा
निच ॥ जलपात्राण्यनेकानिसोदकानिनृपोत्तम ॥ ४३ ॥ वाहनानिविचित्राणियानान्येवमहामते ॥ नानागन्धंसकर्पूरंपादयोर्वैसुखप्रदे ॥ ४४ ॥
उपानहौप्रदातव्येयदीच्छेद्विपुलंसुखम् ॥ एतैर्दानैर्महाराजयममार्गंसुखेनवै ॥ ४५ ॥ प्रयातिमानवोराजन्यमदूतैरलङ्कृतम् ॥ ४६ ॥ इति
श्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेचत्वारिंशोऽध्यायः ॥ ४० ॥ वेनउवाच ॥ पुत्रोभार्याकथंतीर्थपितामाताकथंवद ॥ गुरुश्चैवकथंतीर्थंतन्मेवि
स्तरतोवद ॥ १ ॥ श्रीविष्णुरुवाच ॥ अस्तिवाराणसीरम्यागङ्गायुक्तामहापुरी ॥ तस्यांवसतिवैश्योहिकृकलोनामनामतः ॥ २ ॥ तस्यभा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्यामहासाध्वीपतिव्रतपरायणा ॥ धर्माचारपरानित्यंसावैपतिपरायणा ॥ ३ ॥ सुकलानामपुण्याङ्गीसुपुत्राचारुमङ्गला ॥ सत्यंवदासदाशुद्धाप्रि
याकाराप्रियप्रिया ॥ ४ ॥ एवंगुणैःसमायुक्तासुभगाचारुकारिणी ॥ सवैश्यउत्तमोनानाधर्मज्ञोज्ञानवान्गुणी ॥ ५ ॥ पुराणेश्रौतधर्मेचसदाश्रवणत
त्परः ॥ तीर्थयात्राप्रसङ्गेनबहुपुण्यप्रदायिकाम् ॥ ६ ॥ श्रद्धयानिर्गतोयात्रांतीर्थानांपुण्यमङ्गलाम् ॥ ब्राह्मणानांप्रसङ्गेनसार्थवाहेनतेनच ॥ ७ ॥
प्रस्थितोधर्ममार्गंतुतमुवाचपतिव्रता ॥ पतिस्नेहेनसंमुग्धाभर्तारंवाक्यमब्रवीत् ॥ ८ ॥ सुकलोवाच ॥ अहंतेधर्मतःपत्नीसहपुण्यकरीप्रिय ॥
पतिमार्गंप्रतीक्ष्याहंपतिदेवंयजाम्यहम् ॥ ९ ॥ कदानैवमयात्याज्यंसामीप्यंतेद्विजोत्तम ॥ तवच्छायांसमाश्रित्यकरिष्येधर्ममुत्तमम् ॥ १० ॥
पतिव्रताख्यंपापघ्नंनारीणांगतिदायकम् ॥ पुण्यस्त्रीकथ्यतेलोकेयास्यात्पतिपरायणा ॥११॥ युवतीनांपृथक्तीर्थंविनाभर्तुर्नशोभते ॥ सुखदंनास्ति
वैलोकेस्वर्गमोक्षप्रदायकम्॥१२॥सव्यंपादंचभर्तुश्चप्रयागंविद्धिसत्तम ॥ वामंचपुष्करंतस्ययानारीपरिकल्पयेत् ॥१३॥ तस्यपादोदकस्नानात्तत्पुण्यं
परिजायते ॥ प्रयागपुष्करसमंस्नानंस्त्रीणांनसंशयः ॥ १४ ॥ सर्वतीर्थमयोभर्तासर्वपुण्यमयःपतिः ॥ मखानांयजनात्पुण्यंयद्वैभवतिदीक्षिते
॥ १५ ॥ तत्फलंसमवाप्नोतिसेवयाभर्तुरेवहि ॥ गयादीनांसुतीर्थानांयात्रांकृत्वाहियद्भवेत् ॥ १६ ॥ तत्फलंसमवाप्नोतिभर्तुःशुश्रूषणादपि ॥
समासेनप्रवक्ष्यामितन्मेनिगदतःशृणु ॥ १७ ॥ नास्त्यासांहिपृथग्धर्मःपतिशुश्रूषणंविना ॥ तस्मात्कान्तसहायंतेकुर्वाणासुखदायिनी ॥ १८ ॥
तवच्छायांसमाश्रित्यआगमिष्यामिनान्यथा ॥ रूपंशीलंगुणंभक्तिंसमालोक्यवयस्तथा॥१९॥ सौकुमार्यंविचार्यैवंकृकलःसपुनःपुनः॥यद्येवंहिनयि
ष्यामिदुर्गमार्गंसुदुःखदम् ॥ २० ॥ रूपनाशोभवेच्चास्याःशीतातपविलोडनात् ॥ पद्मगर्भप्रतीकाशमस्याश्चाङ्गंप्रवर्णकम् ॥ २१ ॥
झञ्झावातेनशीतेनकृष्णवर्णंभविष्यति ॥ पन्थाःकर्कशसुग्रावापादौचास्याःसुकोमलौ ॥ २२ ॥ एष्यतेवेदनांतीव्रामथोगन्तुंनचक्षमा ॥ क्षुत्तृष्णा
भिपरीताङ्गीकीदृशीयंभविष्यति ॥ २३ ॥ वामाङ्गीममचस्थानंसुखस्थानंवरानना ॥ ममप्राणप्रियानित्यंनित्यंधर्मस्यचाश्रयः ॥ २४ ॥
नाशमेतियदाबालाममनाशोभवेदिह ॥ इयंमेजीविकानित्यमियंप्राणस्यचेश्वरी ॥ २५ ॥ ननयिष्येवनंतीर्थमेकश्चैवाप्यहंव्रजे ॥ चिन्तयित्वा
क्षणंनूनंकृकलेनमहात्मना ॥ २६ ॥ तस्यचित्तानुगोभावस्तयाज्ञातोनपोत्तम ॥ पुनरूचेमहाभागाभर्तारंप्रस्थितंतदा ॥ २७ ॥ अनघा
नैववैत्याज्यापुरुषैःशृणुसत्तम ॥ मूलमेवंहिधर्मस्यपुरुषस्यमहामते ॥ २८ ॥ एवंज्ञात्वामहाभागमामेवंनयसाम्प्रतम् ॥ श्रुत्वासर्वंहितेना
पिप्रियायाभाषितंबहु ॥ २९ ॥ प्रहस्यैववचोब्रतेतामेवंकृकलःपुनः ॥ नैवत्याज्याभवेद्भार्याप्राप्ताधर्मेणवैप्रिये ॥ ३० ॥ येनभार्यापरि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्यक्तासुनीताधर्मचारिणी ॥ दशाङ्गधर्मस्तेनापिपरित्यक्तोवरानने ॥ ३१ ॥ तस्मात्त्वामेवभद्रंतेनैवत्यक्ष्येकदाप्रिये ॥ एवमाभाष्यतांभार्यां सम्बोध्यचपुनःपुनः ॥ ३२ ॥ तस्याअज्ञातमात्रेणससार्थेनसमंगतः ॥ गतेतस्मिन्महाभागेकृकलेपुण्यकर्मणि ॥ ३३ ॥ देवकर्मसुवेलायां कालेपुण्येशुभानना ॥ नैवपश्यतिभर्तारंकृकलंनिजमन्दिरे ॥ ३४ ॥ समुत्थायत्वरायुक्तारुदमानासुदुःखिता ॥ वयस्यान्पृच्छतेभर्तुर्दुःखशोकाधिपीडिता ॥ ३५ ॥ युष्माभिर्वामहाभागादृष्टोऽसौकृकलोमम ॥ प्राणेश्वरोगतःक्वापिभवन्तोममबान्धवाः ॥ ३६ ॥ यदिदृष्टो महाभागाःकृकलोममसाम्प्रतम् ॥ भर्तारंपुण्यकर्तारंसर्वज्ञंसत्यपण्डितम् ॥ ३७ ॥ कथयन्तुमहात्मानंयदिदृष्टोमहामतिः ॥ तस्यास्तद्भाषितं श्रुत्वातामूचुस्तेमहामतिम् ॥ ३८ ॥ धर्मयात्राप्रसङ्गेननाथस्तेकृकलःशुभे ॥ तीर्थयात्रांचकारासौकस्माच्छोचसिसुव्रते ॥ ३९ ॥ साधयित्वामहातीर्थंपुनरेष्यतिशोभने ॥ एवमाश्वासितासाचपुरुषैराप्तकारिभिः ॥ ४० ॥ पुनर्गेहंगताराजन्सुकलाचारुभाषिणी ॥ रुरोदकरुणंदुःखं सुकलापिपरायणा ॥ ४१ ॥ यावदायातिमेभर्त्ताभूमौस्वप्स्यामिसंस्तरे ॥ घृतंतैलंनभोक्ष्येऽहंदधिक्षीरंतथैवच ॥ ४२ ॥ लवणंचपरित्यक्तं तथाताम्बूलमेवच ॥ मधुरंचतथाराजंस्त्यक्तंगुडादिकंतथा ॥ ४३ ॥ एकाहारानिराहारातावत्स्थास्येनसंशयः ॥ यावच्चागमनंभर्तुःपुनरेवभविष्यति ॥ ४४ ॥ एवंदुःखान्वितभूत्वाएकवेणीधरापुनः ॥ एककञ्चुकसंवीतामलिनाचबभूवसा ॥ ४५ ॥ मलिनेनापिवस्त्रेणएकेनैवस्थिता पुनः ॥ हाहाकारंप्रमुञ्चन्तीनिःश्वसन्तीसुदुःखिता ॥४६॥ वियोगानलसन्दग्धाकृष्णाङ्गीमलधारिणी ॥ एवंदुःखसमाचारासुकृशाविह्वलातदा ॥४७॥ रोदमानादिवारात्रंनिद्रांलेभेनवैनिशि ॥ क्षुधांनविन्दतेराजन्दुःखेनविदलीकृता ॥ ४८ ॥ अथसख्यःसमायाताःपप्रच्छुःसुकलांतदा ॥ ४९ ॥ सख्यऊचुः ॥सुकलेचारुसर्वाङ्गिकस्माद्रोदिषिसम्प्रति ॥ ततस्त्वंकारणंब्रूहिदुःखस्यास्यवरानने ॥ ५० ॥ सुकलोवाच ॥ समांत्यक्त्वागतोभर्ताधर्मार्थंधर्मतत्परः ॥ तीर्थयात्राप्रसङ्गेनअटतेमेदिनींततः ॥ ५१ ॥ मांत्यक्त्वासगतःस्वामीनिर्दोषांपापवर्जिताम् ॥ अहंसाध्वीसमाचारासदापुण्या पतिव्रता ॥ ५२ ॥ मांत्यक्त्वासगतोभर्तातीर्थसाधनतत्परः ॥ तेनाहंदुःखितासख्योवियोगेनातिपीडिता ॥ ५३ ॥ जीवनाशोवरंश्रेष्ठोवरंवै विषभक्षणम् ॥ वरमग्निप्रवेशश्चवरंकायविनाशनम् ॥ ५४ ॥ नारींप्रियांपरित्यज्यभर्तायातिसुनिष्ठुरः ॥ भर्तृत्यागोवरंनैवप्राणत्यागोवरंसखि ॥ ५५ ॥ वियोगंनसमर्थाहंसहितुंनित्यदारुणम् ॥ तेनाहंदुःखितासख्योवियोगेनापिनित्यशः ॥ ५६ ॥ सख्यऊचुः ॥ तीर्थयात्रांगतोभर्तापुनरेष्यतितेपतिः ॥ वृथाशोचयसेकायंवृथाशोकंकरोषिवै ॥ ५७ ॥ वृथात्वंतप्यसेबालेवृथाभोगान्परित्यजेः ॥ पिबस्वपानंभुङ्क्ष्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वंस्वप्रदत्तंहिपूर्वकम् ॥ ५८ ॥ कस्यभर्तासुताःकस्यकस्यस्वजनबान्धवाः ॥ कःकस्यनास्तिसंसारेसम्बन्धःकेनचवहि ॥ ५९ ॥ भक्ष्यतेभुज्यतेबालेसंसारस्यहितत्फलम् ॥ मृतेप्राणिनिकोऽश्नातिकोहिपश्यतितत्फलम् ॥ पीयतेभुज्यतेबालेएतत्संसारतःफलम् ॥ ६० ॥ सुकलोवाच ॥ भवतीभिःप्रयुक्तंयत्तन्नस्याद्वेदसंमतम् ॥ यातुभर्तुःपृथग्भूतातिष्ठत्येकासदैवहि ॥ ६१ ॥ पापभूताभवेन्नारीतांनमन्यन्तिसज्जनाः ॥ भर्तुःसार्धंसदासख्योदृष्टोवेदेषुसर्वदा ॥ ६२ ॥ सम्बन्धःपुण्यसंसर्गाज्जायतेनात्रसंशयः ॥ नारीणांचसदातीर्थंभर्ताशास्त्रेषुपठ्यते ॥ ६३ ॥ तमेवावाहयेन्नित्यंवाचाकायेनकर्मभिः ॥ मनसापूजयेन्नित्यंभावसत्येनतत्परा ॥ ६४ ॥ भर्तुःपार्श्वंमहातीर्थंदक्षिणाङ्गंसदैवहि ॥ तमाश्रित्ययदानारीगृहस्थापरिवर्त्तयेत् ॥ ६५ ॥ यजतेदानपुण्यैश्चतस्यदानस्ययत्फलम् ॥ वाराणस्यांचगङ्गायांयत्फलंनचपुष्करे ॥ ६६ ॥ द्वारकायांनचावन्त्यांकेदारेशशिभूषणे ॥ लभतेनैवसानारीयजमानासदाकिल ॥ ६७ ॥ तादृशंफलमेवंसानप्राप्नोतिकदासखि ॥ सुसुखंपुत्रसौभाग्यंस्नानंदानंचभूषणम् ॥ ६८ ॥ वस्त्रालङ्कारसौभाग्यंरूपंतेजःफलंसदा ॥ यशःकीर्तिमवाप्नोतिगुणंचवरवर्णिनी ॥ ६९ ॥ भर्तुःप्रसादात्सर्वंचलभतेनात्रसंशयः ॥ विद्यमानेयदाकान्तेअन्यंधर्मंकरोतिया ॥ ७० ॥ निष्फलंजायतेतस्याःपुंश्चलीपरिकथ्यते ॥ नारीणांयौवनंरूपमवतारंस्मृतंध्रुवम् ॥ ७१ ॥ एकस्यापिहिभर्तुश्चतस्यार्थेभूमिमण्डले ॥ सुपुत्रासुयशानारीपरिकथ्येतवैसदा ॥ ७२ ॥ तुष्टेभर्तरिसंसारेदृश्यानारीनसंशयः ॥ पतिहीनाभवेन्नारीभवेत्साभूमिमण्डले ॥ ७३ ॥ कुतस्तस्याःसुखंरूपंयशःकीर्तिःसुताभुवि ॥ सुदौर्भाग्यंमहद्दुःखंसंसारेपरिभुज्यते ॥ ॥ ७४ ॥ पापभागाभवेत्साचदुःखाचारासदैवहि ॥ तुष्टेभर्तरितस्यास्तुतुष्टाःसर्वाश्चदेवताः ॥ ७५ ॥ तुष्टेभर्तरितुष्यन्तिऋषयोदेवमानवाः ॥ भर्तानाथोगुरुर्भर्तादेवतादैवतैःसह ॥ ७६ ॥ भर्तातीर्थंश्चपुण्यश्चनारीणांनृपनन्दन ॥ शृङ्गारंभूषणंरूपंवर्णंसौगन्ध्यमेवच ॥ ७७ ॥ कृत्वासातिष्ठतेनित्यंवर्जयित्वासुपर्वसु ॥ शृङ्गारैर्भूषणैःसातुशुशुभेसायदापतिः ॥ ७८ ॥ पत्याविनाभवत्येवक्षीरंसर्पमुखेयथा ॥ भर्तुरर्थेमहाभागासुव्रताचारुमङ्गला ॥ ७९ ॥ गतेभर्तरियानारीशृङ्गारंकुरुतेयदि ॥ रूपंवर्णंचतत्सर्वंशवरूपेणजायते ॥ ८० ॥ वदन्तिभूतलेलोकाःपुंश्चलीयंनसंशयः ॥ तस्माद्भर्तुर्वियुक्तायानार्याःशृणुतभूतले ॥८१॥ इच्छन्त्यावैमहासौख्यंभवितव्यंकदाचन ॥ सुजायायाःपरोधर्मोभर्ताशास्त्रेषुगीयते ॥ ८२ ॥ तस्माद्धेशाश्वतोधर्मोनत्याज्योभार्ययाकिल ॥ एवंधर्मंविजानामिकथंभर्तापरित्यजत् ॥ ८३ ॥ इत्यर्थेश्रूयतेसख्यइतिहासःपुरातनः ॥ सुदेवायाश्चचरितंसुपुण्यंपापनाशनम् ॥ ८४ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डवनोपाख्यानेसुकलाचरितएकचत्वारिंशोऽध्यायः ॥ ४१ ॥ सख्यऊचुः ॥ सुदेवाकात्वया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रोक्ताकिमाचारावदस्वनः ॥ त्वयाप्रोक्तंमहाभागेवदनःसत्यमेवच ॥ १ ॥ सुकलोवाच ॥ अयोध्यायांमहाराजःसआसीद्धर्मकोविदः ॥ मनुपुत्रोम
हाभागःसर्वधर्मार्थतत्परः ॥ २ ॥ इक्ष्वाकुर्नामसर्वज्ञोदेवब्राह्मणपूजकः ॥ तस्यभार्यासदापुण्यापतिव्रतपरायणा ॥ ३ ॥ तयासार्द्धंयजेद्यज्ञंतीर्था
निविविधानिच ॥ वेदराजस्यवीरस्यकाशीशस्यमहात्मनः ॥ ४ ॥ सुदेवानामवैकन्यासत्याचारपरायणा ॥ उपयेमेमहाराजइक्ष्वाकुस्तांमहीपतिः
॥ ५ ॥ सुदेवांचारुसर्वाङ्गींसत्यव्रतपरायणाम् ॥ तयासर्द्धंयजद्यज्ञान्सुपुण्यान्पुण्यनायकः ॥ ६ ॥ सरेमेनृपशार्दूलोनित्यंचप्रिययातया ॥ एकदातु
महाराजस्तयासार्द्धंवनंययौ ॥७॥ गङ्गारण्यंसमासाद्यमृगयांक्रीडतेसदा ॥ सिंहान्हत्वावराहांश्चगजांश्चमहिषांस्तथा ॥ ८ ॥ क्रीडमानस्यतस्याग्रेवरा
हश्चसमागतः ॥ बहुशूकरयूथेनपुत्रपौत्रैरलङ्कृतः ॥ ९ ॥ एकाचशूकरीतस्यप्रियापार्श्वेप्रतिष्ठिता ॥ दृष्ट्वाचराजराजेन्द्रंदुर्जयंमृगयारतम् ॥ १० ॥
पर्वताधारमाश्रित्यभार्ययासहशूकरः ॥ तिष्ठत्येकःपरिवृतःपुत्रपौत्रादिभिस्तुसः ॥ ११ ॥ महाराजकृतंतेषांज्ञात्वातुकदनंमहत् ॥ तानुवाच
सुतान्पौत्रान्भार्यांतांचसशूकरः ॥ १२ ॥ कोशलाधिपतिर्वीरोमनुपुत्रोमहाबलः ॥ क्रीडतेमृगयांकान्तेमृगान्संहरतेबहून् ॥१३॥ समांदृष्ट्वामहाराजए
ष्यतेनात्रसंशयः ॥ अन्येषांलुब्धकानांमेनास्तिप्राणभयंध्रुवम् ॥ १४ ॥ ममरूपंनृपोदृष्ट्वाक्षमांनैवकरिष्यति ॥ हर्षेणमहताविष्टोबाणपाणिर्धनुर्द्ध
रः ॥ १५ ॥ श्वभिर्युक्तोमहातेजालुब्धकैःपरिवारितः ॥ प्रियेकरिष्यतेघातंममाप्येवंनसंशयः ॥ १६ ॥ शूकर्युवाच ॥ यदायदापश्यसिलुब्धका
न्बहून्महावनेकान्तसमायुधान्बहून् ॥ एतैस्तुपुत्रैर्ममपौत्रकैःसमंदूरंनुभोयासिपलायमानः ॥ १७ ॥ त्यक्त्वासुधैर्यंबलपौरुषंमहन्महाभयेनापि
विषण्णचेतनः ॥ दृष्ट्वानृपेन्द्रंपुरुषोत्तमोत्तमंकरोपिकिंकान्तवदस्वकारणम् ॥१८॥ तस्यास्तुवाक्यंसनिशम्यकोलउवाचतांशूकरराजउत्तरम् ॥ यदर्थं
भीतोऽस्मिसुलुब्धकात्प्रियेदृष्ट्वागतोदूरनिशम्यशूकरान् ॥ १९ ॥ सुलुब्धकाःपापकराःशठाःप्रियेकुर्वन्तिपापंगिरिदुर्गकन्दरे ॥ सदैवदुष्टाबहुपापचि
न्तकाजाताश्चसर्वेपरिपापिनांकुले ॥ २० ॥ तेषांहिहस्तान्मरणाद्बिभेमिमृतोऽपियास्यामिपुनश्चपापम् ॥ दूरंगिरिंपर्वतकन्दरंचव्रजामिकान्तेअपमृ
त्युभीतः ॥ २१ ॥ अयंहिपुण्योनरनाथआगतोविश्वाधिकःकेशवरूपभूपः ॥ युद्धंकरिष्येसमरेमहात्मनासार्द्धंप्रियेपौरुषविक्रमेण ॥ २२ ॥ जेष्या
मिभूपंयदिस्वेनतेजसाभोक्ष्यामिकीर्तिंत्वतुलांपृथिव्याम् ॥ तेनाहतोवीरवरेणसङ्गरेयास्यामिलोकंमधुसूदनस्य ॥ २३ ॥ ममाङ्गभूतेनपलेनमेदसातृ
प्तिंपरांयास्यतिभूमिनाथः॥तृप्ताभविष्यन्तिसुलोकदेवताअस्मादयंचागतोवज्रपाणिः॥२४॥अस्यैवहस्तान्मरणंयदाभवेद्धाभश्चमेसुन्दरिकीर्तिरुत्तमा॥
तस्माद्यशोभूमितलेजगत्त्रयेव्रजामिलोकंमधुसूदनस्य ॥ २५ ॥ नैवंभीतोऽस्मिक्षुब्धोऽस्मिगतोऽहंगिरिसानुषु ॥ पापाद्भीतोगतःकान्तेधर्मंदृष्ट्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थितोह्यहम् ॥ २६ ॥ नजानेपातकंपूर्वमन्यजन्मनिचार्जितम् ॥ यनाहंशौकरींयोनिंगतोऽहंपापसञ्चयात् ॥ २७ ॥ क्षालयिष्याम्यहंघोरं
पूर्वपातकसञ्चयम् ॥ बाणोदकैर्महाघोरैःसुतीक्ष्णैर्निशितैःशतैः ॥ २८ ॥ पुत्रान्पौत्रान्वरांकन्यांकुटुम्बंबालवृद्धकम् ॥ गिरिंगच्छगृहीत्वातुमम
मोहमिमंत्यज ॥ २९ ॥ समस्त्रेहंपरित्यज्यहरिरेपसमागतः ॥ अस्यहस्तात्प्रयास्यामितद्विष्णोःपरमंपदम् ॥ ३० ॥ दैवेनापिममाद्यैवस्वर्गद्वारम
नुत्तमम् ॥ उद्घाटितकपाटंतुयास्यामिसुमहादिवम् ॥ ३१ ॥ सुकलोवाच ॥ तच्छुत्वावचनंतस्यशूकरस्यमहात्मनः ॥ उवाचतत्प्रियास
ख्यःसीदमानान्तरातदा ॥ ३२ ॥ शूकर्युवाच ॥ यस्मिन्यूथेभवान्स्वामीपुत्रपौत्रैरलङ्कृतः ॥ मित्रैश्चभ्रातृभिश्चैवअन्यैःस्वजनबान्धवैः ॥३३॥त्वयैवा
लङ्कृतोयूथोभवतापरिशोभते ॥ त्वांविनायंमहाभागकीदृग्यूथोभविष्यति ॥३४॥ तवैवस्वबलेनापिगर्जमानाश्चशूकराः ॥ विचरन्तिगिरौकान्तत
नयाममबालकाः ॥ ३५ ॥ कन्दान्मूलान्सुभक्षन्तिनिर्भयास्तवतेजसा ॥ दुर्गेषुवनकुञ्जेषुग्रामेषुनगरेषुच ॥ ३६ ॥ नकुर्वन्तिभयंतीव्रंसिंहानामि
हपर्वते ॥मनुष्याणांमहाबाहोपालितास्तवतेजसा ॥३७॥ त्वयात्यक्ताअमीसर्वेबालकाममदारकाः॥दीनाश्चैवाकुलाश्चैवभविष्यन्तिविचेतनाः ॥३८॥
नित्यमेवसुखंवर्त्मगत्वापश्यन्तिबालकाः ॥ पतिहीनायथानारीशोभतेनैवशोभना ॥ ३९ ॥ अलङ्कृतायथादिव्यैरलङ्कारैःसकाञ्चनैः ॥ परिच्छदैर
त्नवस्त्रैःपितृमातृसहोदरैः ॥ ४० ॥ श्वश्रूश्वशुरकैश्चान्यैःपतिहीनानभातिसा ॥ चन्द्रहीनायथारात्रिःपुत्रहीनंयथाकुलम् ॥ ४१ ॥ दीपहीनंयथागेहंनैव
भातिकदाचन ॥ त्वांविनाऽयंतथायूथोनैवशोभेतमानद ॥ ४२ ॥ आचारेणविनामर्त्योज्ञानहीनोयतिर्यथा ॥ मन्त्रहीनोयथाराजातथायंनैवशोभते
॥ ४३ ॥ कैवर्तेनविनानौर्वासम्पूर्णापरिसागरे ॥ नभात्येवंयथासार्थःसार्थवाहेनवैविना ॥ ४४ ॥ सेनाध्यक्षेणचविनायथासैन्यंनभातिच ॥ त्वां
विनावैतथासैन्यंशूकराणांमहामते ॥ ४५ ॥ दीनोभविष्यतितथावेदहीनोयथाद्विजः ॥ मयिभारंकुटुम्बस्यविनिवेश्यप्रगच्छसि ॥ ४६ ॥ मरणं
सुलभंज्ञात्वाकाप्रतिज्ञातवेदृशी ॥ त्वांविनाहंनशक्नोमिधर्तुंप्राणान्प्रियेश्वर ॥ ४७ ॥ त्वयैवसहितास्वर्गंभूमिंवाथमहामते ॥ नरकंवापिभोक्ष्यामि
सत्यंसत्यंवदाम्यहम् ॥ ४८ ॥ त्वंवापुत्रांस्तुपौत्रांस्तुगृहीत्वायूथमुत्तमम् ॥ आवांव्रजावयूथेशदुर्गमेवंसुकन्दरम् ॥४९॥ जीवितव्यंपरित्यज्यमरणाया
भिगम्यते ॥ तत्रकोदृश्यतेलाभोमरणेवदसाम्प्रतम् ॥ ५० ॥ वाराहउवाच ॥ वीराणांत्वंनजानासिसुधर्मंशृणुसाम्प्रतम् ॥ युद्धार्थिनाहिवीरेण
वीरंगत्वाप्रयाचितम् ॥५१॥ देहिमेयोधनंसङ्ख्ययुद्धार्थ्यहंसमागतः ॥ परेणयाचितंयुद्धंनददातियदानरः ॥५२॥ कामाल्लोभाद्भयाद्वापिमोहाद्वाशृ
णुवल्लभे ॥ कुम्भीपाकेतुनरकेवसेद्युगसहस्रकम् ॥ ५३ ॥ क्षत्रियाणांपरोधर्मोयुद्धंदेयंनसंशयः ॥ तद्युद्धंदीयमानेनरणभूमिगतेनवै ॥ ५४ ॥ निर्जितं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुपरंतत्रयशःकीर्त्तिप्रभुञ्जते ॥ सवाहतोयुध्यमानःपौरुषेणातिनिर्भयः ॥ ५५ ॥ वीरलोकमवाप्नोतिदिव्यान्भोगान्प्रभुञ्जते ॥ यावद्वर्षसहस्राणांविंश
त्यैकांप्रियेशृणु ॥५६॥ वीरलोकेवसेत्तावद्देवाचारैर्महीयते॥मनुपुत्रःसमायातअयंवीरोनसंशयः ॥ ५७ ॥ सङ्ग्राममंयाचमानस्तुयुद्धंदेयंमयाध्रुवम् ॥
युद्धातिथिःसमायातोविष्णुरूपःसनातनः ॥ ५८ ॥ सत्कारोयुद्धरूपेणकर्तव्यश्चमयाशुभे ॥ ५९ ॥ शूकर्युवाच ॥ यदायुद्धंत्वयादेयंराज्ञेचैवमहा
त्मने ॥ ततोऽहंपौरुषंकान्तपश्यामितवकीदृशम् ॥ ६० ॥ सुकलोवाच ॥ एवमुक्त्वाप्रियान्पुत्रान्समाहूयत्वरान्विता ॥ उवाचपुत्रकायूयंशृणुध्वं
वचनंमम ॥ ६१ ॥ युद्धातिथिःसमायातोविष्णुरूपःसनातनः ॥ मयातत्रप्रगन्तव्यंयत्रायंहिगमिष्यति ॥ ६२ ॥ यावत्तिष्ठतिवैनाथोभवतांप्रति
पालकः ॥ यूयंगच्छतवैदूरंदुर्गंगिरिगुहामुखम् ॥ ६३ ॥ सुखंजीवतमेवत्सावर्जयित्वासुलुब्धकान् ॥ मयातत्रैवगन्तव्यंयत्रैषहिगमिष्यति
॥ ६४ ॥ भवतांश्रेष्ठोऽयंभ्रातायूथरक्षांकरिष्यति ॥ एतेपितृव्यकाःसर्वेभवतांत्राणकारकाः ॥ ६५ ॥ दूरंप्रयातवैसर्वेमांविहायसुपुत्रकाः ॥ ६६ ॥
पुत्राऊचुः ॥ अयंहिपर्वतश्रेष्ठोबहुमूलफलोदकः ॥ भयंतुकस्यवैनास्तिसुखंजीवनमस्तिवै ॥ ६७ ॥ युवाभ्यांहिअकस्माद्वैइदमुक्तंभयङ्करम् ॥ तन्नोहि
कारणंमातर्वदसत्यमिहैवहि ॥ ६८ ॥ शूकर्युवाच ॥ अयंराजामहारौद्रःकालरूपःसमागतः ॥ क्रीडतेमृगयालुब्धोमृगान्हत्वाबहून्वने ॥ ६९ ॥
इक्ष्वाकुर्नामदुर्धर्षोमनुपुत्रोमहाबलः॥संहरिष्यतिकालोऽयंदूरंयातसुपुत्रकाः ॥ ७० ॥ पुत्राऊचुः ॥ मातरंपितरंत्यक्त्वायःप्रयातिसपापधीः ॥ महा
रौद्रंसुघोरंतुनरकंप्रतिपद्यते ॥७१॥ मातुःपुण्यंपयःपीत्वापुष्टोभवतिनिर्घृणः ॥ मातरंपितरंत्यक्त्वायःप्रयातिसुदुर्बलः ॥ ७२ ॥ पूयंनरकमेतीहकृमि
दुर्गन्धसङ्कुलम् ॥ मातस्तस्मान्नयास्यामोगुरुंत्यक्त्वाइहैवच ॥ ७३ ॥ एवंविषादःसञ्जातस्तेषांधर्मार्थसंयुतः ॥ व्यूहंकृत्वास्थिताःसर्वेबलतेजः
समाकुलाः ॥ ७४ ॥ साहसोत्साहसम्पन्नाःपश्यन्तिनृपनन्दनम् ॥ नदन्तःपौरुषैर्युक्ताःक्रीडमानावनेतदा ॥ ७५ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनो
पाख्यानेसुकलाचरित्रेद्विचत्वारिंशत्तमोऽध्यायः ॥ ४२ ॥ सुकलोवाच ॥ एवंतेशूकराःसर्वेयुद्धायसमुपस्थिताः ॥ पुरःस्थितस्यतेराज्ञोह्यवतस्थुश्च
लुब्धकाः ॥ १ ॥ महावराहोराजेन्द्रगिरिसानुंसमाश्रितः ॥ महतायूथभावेनव्यूहंकृत्वाप्रतिष्ठति ॥ २ ॥ कपिलःस्थूलपीनाङ्गोमहादंष्ट्रोम
हामुखः ॥ दुःसहःशूकरोराजन्गर्जतेचातिभैरवम् ॥ ३ ॥ तानपश्यन्महाराजःशालतालवनाश्रयान् ॥ तेषांतद्वचनंश्रुत्वामनुपुत्रःप्रतापवान् ॥४४॥
॥ ४ ॥ गृह्यतांशूरवाराहोविध्यतांबलदर्पितः ॥ एवमाभाष्यतान्वीरोमनुपुत्रःप्रतापवान् ॥ ५ ॥ अथतेलुब्धकाःसर्वेमृगयामदमोहिताः ॥
संनद्धादंशिताःसर्वेश्वभिःसार्द्धंप्रजग्मिरे ॥ ६ ॥ हर्षेणमहताविष्टोराजराजोमहाबलः ॥ अश्वारूढःसुसैन्येनचतुरङ्गेणसंयतः ॥ ७ ॥ गङ्गा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तीरंसमायातोमेरौगिरिवरोत्तमे ॥ रत्नधातुसमाकीर्णेनानावृक्षैरलङ्कृते ॥ ८ ॥ सुकलोवाच ॥ योबलधाममरीचिचयकरनिकरमयप्रोत्तुङ्गोऽत्यु
च्चंगगनमेवसम्प्राप्तोनानानगाचरितशोभोगिरिराजोभाति ॥ ९ ॥ योजनबहलविमलगङ्गाप्रवाहसमुच्चरत्तीरवीचीतरङ्गभङ्गैर्मुक्ताफलसदृशैर्निर्मलाम्बु
कणैःसर्वत्रप्रक्षालितधवलतलशिलातलोगिरीन्द्रःसुश्रियायुक्तः ॥ १० ॥ देवैश्चारणकिन्नरैःपरिवृतोगन्धर्वविद्याधरैःसिद्धैरप्सरसांगणैर्मुनिजनैर्नागेन्द्र
विद्याधरैः ॥ श्रीखण्डैर्बहुचन्दनैस्ससरलैःशालैस्तमालैर्गिरीरुद्राक्षैर्वरसिद्धिदायकघनैःकल्पद्रुमैःशोभते ॥ ११ ॥ नानाधातुविचित्रोवैनानारत्न
विचित्रितैः ॥ विमानैःकाञ्चनैर्दण्डैःकलत्रैरुपशोभते ॥ १२ ॥ नालिकेरवनैर्दिव्यैःपूगवृक्षैर्विराजते ॥ दिव्यपुन्नागबकुलैःकदलीखण्डमण्डितैः
॥ १३ ॥ पुष्पकैश्चम्पकैरद्रिःपाटलैःकेतकैस्तथा ॥ नानावल्लीवितानैश्चपुष्पितैःपद्मकैस्तथा ॥ १४ ॥ नानावर्णैःसुपुष्पैश्चनानावृक्षैरलङ्कृतः ॥
दिव्यवृक्षैःसमाकीर्णःस्फाटिकस्यशिलातलैः ॥ १५ ॥ योगियोगीन्द्रसंसिद्धैःकन्दरान्तर्निवासिभिः ॥ निर्झरैश्चैवरम्यैश्चबहुप्रस्रवणैर्गिरिः ॥ १६ ॥
नदीप्रवाहसंहृष्टैःसङ्गमैरुपशोभते ॥ ह्रदैश्चपल्वलैःकुण्डैर्निर्मलोदकधारिभिः ॥ १७ ॥ गिरिराजोविभात्येकःसानुभिःसहसंस्थितैः ॥
शरभैश्चैवशार्दूलैर्मृगयूथैरलङ्कृतः ॥ १८ ॥ महामत्तैश्चमातङ्गैर्महिषैरुरुभिःसदा ॥ अनेकैर्दिव्यभावैश्चगिरिराजोविभातिसः ॥ १९ ॥ अयोध्याधिप
तिर्वीरइक्ष्वाकुर्मनुनन्दनः ॥ तयासुभार्यययायुक्तश्चतुरङ्गबलेनच ॥२०॥ पुरतोलुब्धकायान्तिशूराःश्वानश्चशीघ्रगाः ॥ यत्रास्तेशूकरःशूरोभार्ययासहि
तोबली ॥ २१ ॥ बहुभिःशूकरैर्गुप्तोगुरुभिःशिशुभिस्ततः ॥ मेरुभूमिंसमाश्रित्यगङ्गातीरंसमन्ततः ॥ २२ ॥ सुकलोवाच ॥ तामुवाचवराहस्तुसुप्रि
यांहर्षसंयुतः ॥ प्रियेपश्यसमायातःकोसलाधिपतिर्बली ॥ २३ ॥ मामुद्दिश्यमहाप्राज्ञोमृगयांक्रीडतेनृपः ॥ युद्धमेवकरिष्यामिसुरासुरप्रहर्षकम्
॥ २४ ॥ अथभूपोमहातेजाबाणपाणिर्धनुर्धरः ॥ सुदेवांसत्यधर्माङ्गींतामुवाचप्रहर्षितः ॥ २५ ॥ पश्यप्रियेमहाकोलंगर्जमानंमहाबलम् ॥ परिवारस
मायुक्तंदुःसहंमृगघातिभिः ॥ २६ ॥ अद्यैवाहंहनिष्यामिसुबाणैर्निशितैःप्रिये ॥ मामेवहिमहाशूरोयुद्धायसमुपाश्रयेत् ॥२७॥ एवमुक्त्वाप्रियोभार्या
लुब्धकान्वाक्यमब्रवीत् ॥ यथाशूरोमहाशूराःप्रेषयध्वंहिशूकरम् ॥ २८ ॥ अथतेप्रेषिताःशूराबलतेजःपराक्रमाः ॥ गर्जमानाःप्रधावन्तिबलतेजःप
राक्रमाः ॥ २९ ॥ कोलंप्रतिगताःसर्वेवायुवेगेनसाम्प्रतम् ॥ विध्यन्तिबाणजालैस्तेनिशितैर्वनचारकाः ॥ ३० ॥ नानाशस्त्रैरथास्त्रैश्चवाराहंवीररूपि
णम् ॥ ३१ ॥ सुकलोवाच ॥ पतन्तिबाणतोमराविमुक्तलुब्धकैःशराघनागिरिंप्रवर्षिणोयथातथाधरान्तरे ॥ हतोदृढप्रहारिभिःसनिर्जितस्ततस्तथाश
तैस्तुयूथपालकःसकोलःसङ्गरंगतः ॥ ३२ ॥ स्वपुत्रपौत्रबान्धवैःपरांश्चसंहरेत्सवैपतन्तितेस्वदंष्ट्रयाहताहवेऽवलुब्धकाः ॥ पतन्तिपादहस्तकाःस्थित

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्यवेगभ्रामणैःसलुब्धगर्जमेवतंवराहोऽपश्यदागतम् ॥ ३३ ॥ स्वतेजसाविनाशितंमुखाग्रदंष्ट्रयाहतंगतःसयत्रभूपतिःसवाञ्छतेनसङ्गरम् ॥ ३४ ॥
इक्ष्वाकुनाथंसुमहत्प्रसह्यसन्त्रास्यक्रुद्धःसहिशूकरेशः ॥ युद्धंवनेवाञ्छतितेनसार्द्धमिक्ष्वाकुणासङ्गरहर्षयुक्तः ॥ ३५ ॥ वाराहःपुनरेवयुद्धकुशलःसंवा
ञ्छतेसङ्गरंतुण्डाग्रेणसुतीक्ष्णदन्तनखरैःक्रुद्धोधरांक्षोभयन् ॥ हुङ्कारोच्चारगर्वात्प्रहरतिविमलंभूपतिंतंचराजञ्ज्ञात्वाविष्णुपराक्रमंमनुसुतस्त्वानन्दरोमा
ञ्चितः ॥ ३६ ॥ दृष्ट्वाशूकरपौरुषंयमतुलंमेनेपतिर्देवराड्देवारिंमनसाविचिन्त्यसहसावाराहरूपेणवै ॥ सम्प्रेक्ष्यैवमहाबलंबहुतरंयुक्तंत्वरेर्वारणंसै
न्यंकोलविनाशनायसहसासङ्गृह्यसङ्गृह्यताम् ॥ ३७ ॥ प्रेषिताश्ववारणारथाश्ववेगवत्तराःसुबाणखड्गधारिणोभुशुण्डिभिश्चमुद्गरैः ॥ सपाशपाणिलुब्ध
कानदन्तितत्रतत्परानिवारितोनतिष्ठतेहयागजाश्चयद्गताः ॥ ३८ ॥ क्वचित्क्वचिन्नदृश्यतेक्वचित्क्वचित्प्रदृश्यतेक्वचिद्भयंप्रदर्शयेत्क्वचिद्धयान्प्रमर्दयेत
॥ ३९ ॥ मर्दयित्वाभटान्वीरान्वाराहोरणदुर्जयः ॥ शब्दंचकारदुर्धर्षक्रोधारुणविलोचनः ॥ ४० ॥ कोसलाधिपतिर्वीरस्तंदृष्ट्वारणदुर्जय
म् ॥ युध्यमानंमहाकायंमुञ्चन्तंमेघवत्स्वनम् ॥४१॥ गर्जतिसमरंविचरतिविलसतिवीरान्स्वतेजसाधीरः ॥ तडिदिवमुखेषुदंष्ट्रातस्यविभात्युल्लसत्येव
॥ ४२ ॥ मनुपुत्रस्तथादृष्ट्वाकोलंचनिशितैःशरैः ॥ प्रतिभिन्नमेकैकंशस्त्राहतंचबन्धुभिः ॥४३॥ नरपतिरुवाचसैन्याःकिमिहनगृह्णन्तुओजसाशूराः॥
युध्यध्वंतत्रनिशितैर्बाणैस्तीक्ष्णैरनेनापि ॥ ४४ ॥ समाकर्ण्यततोवाक्यंक्रुद्धस्यापिमहात्मनः ॥ ततस्तेसैनिकाःसर्वेयुद्धायसमुपस्थिताः ॥ ४५ ॥
अनेकैर्भटसाहस्रैर्वनेतंसमरेस्थितम् ॥ दिक्षुसर्वासुसंहत्यविभिदुःशूकरंरणे ॥ ४६ ॥ विद्धश्चकैश्चित्तदाबाणजालैःसुयोधैश्चसङ्ग्रामभूमौविशालैः ॥
क्वचिच्चक्रघातैःक्वचिद्वज्रपातैर्हतंदुर्जयंसङ्गरेतंमहान्तैः ॥४७॥ ततःपौरुषैःक्रोधयुक्तःसकोलःसुविच्छिद्यपाशान्रणेप्रस्थितःसः ॥ महाशूकरैःसार्धमेवप्र
यातस्ततःशोणितस्यापिधाराभिषिक्तः ॥ ४८ ॥ करोतिप्रहारंचतुण्डेनवीरहयानांद्विपानांचचिच्छेदवीरः ॥ स्वदंष्ट्राग्रभागेनतीक्ष्णेनवीरान्पदातीन्हि
सम्पातयद्रोषभावैः ॥ ४९ ॥ जघानास्यशुण्डंगजस्यापिरुष्टोभटान्हतान्पादनखैस्तुहृष्टः ॥ ५० ॥ ततस्तेशूकराःसर्वेलुब्धकाश्चपरस्परम् ॥ युयु
धुःसङ्गरंकृत्वाक्रोधारुणविलोचनाः ॥५१॥ लुब्धकैश्चहताःकोलाःकोलैश्चापिसुलुब्धकाः ॥ निहताःपतिताभूमौक्षतजेनापिसारुणाः ॥५२॥ जीवंत्य
क्त्वाहताःकोलैर्लुब्धकाःपतितारणे ॥ मृताश्चशूकरास्तत्रश्वानःप्राणांश्चतत्यजुः ॥५३॥ यत्रयत्रमृताभूमौपतितामृगघातकाः॥बहवःशूकराराज्ञाखड्गपा
तैर्निपातिताः ॥५४॥ कतिनष्टाहताःकोलाभीतादुर्गेषुसंस्थिताः ॥ कुञ्जेषुकन्दरान्तेषुगुहान्तेषुनृपोत्तम ॥५५॥ लुब्धकाश्चमृताःकेचिच्छिन्नादंष्ट्राग्रसु
करैः ॥ प्राणांस्त्यक्त्वागताःस्वर्गंखण्डशोविदलीकृताः ॥ ५६ ॥ वागुराःपाशजालाश्चकुटकाःपञ्जरास्तथा ॥ नाडयश्चपतिताभूमौयत्रतत्रसमन्ततः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ५७ ॥ एकोदयितयासार्धंवाराहःपरितिष्ठति ॥ पौत्रकैःपञ्चसप्तभिर्युद्धार्थंबलदर्पितः ॥५८ ॥ तमुवाचतदाकान्तंशूकरंशूकरीपुनः ॥ गच्छकान्तम
यासार्द्धमेभिस्तुबालकैःसह ॥ ५९ ॥ प्राहप्रीतोवराहस्तांविवस्तांसुप्रियामिति ॥ क्वगच्छामिप्रभग्नोऽहंस्थानंनास्तिमहीतले ॥ ६० ॥ मयिनष्टेम
हाभागेकोलयूथंविनङ्क्ष्यति ॥ द्वयोश्चसिंहयोर्मध्येजलंपिबतिशूकरः ॥ ६१ ॥ द्वयोःशूकरयोर्मध्येसिंहोनैवपिबत्यपः ॥ एवंशूकरजाति
षुदृश्यतेबलमुत्तमम् ॥ ६२॥ तदहंनाशयाम्येवयदाभग्नोव्रजाम्यहम् ॥ जानेधर्मंमहाभागेबहुश्रेयोविधायकम् ॥ ६३ ॥ कस्माल्लोभाद्भयाद्वापियु
ध्यमानःप्रणश्यति॥रणतीर्थंपरित्यज्यसस्यात्पापीनसंशयः ॥ ६४ ॥ निशितंशस्त्रसंव्यूहंदृष्ट्वाहर्षंप्रगच्छति ॥ अवगाह्यामरींसिन्धुतीर्थपारंप्रगच्छति
॥ ६५ ॥ सयातिवैष्णवंलोकंपुरुषांश्चसमुद्धरेत् ॥ समायान्तंचतदहंकथंभग्नोव्रजामिवै ॥ ६६ ॥ योधनंशस्त्रसङ्कीर्णंप्रवीरानन्ददायकम् ॥
दृष्ट्वाप्रयातिसंहृष्टस्तस्यपुण्यफलंशृणु ॥ ६७ ॥ पदेपदेमहत्स्नानंभागीरथ्याःप्रजायते ॥ रणाद्भग्नोगृहंयातियोलोभाच्चप्रियेशृणु ॥ ६८ ॥ मा
तृदोषंप्रकाशेतस्त्रीजातःपरिकथ्यते ॥ अत्रयज्ञाश्चतीर्थाश्चअत्रदेवामहौजसः ॥ ६९ ॥ पश्यन्तिकौतुकंकान्तेमुनयःसिद्धचारणाः ॥ त्रैलो
क्यंवर्ततेतत्रयत्रवीरप्रकाशनम् ॥ ७० ॥ समराद्भग्नंप्रपश्यन्तिसर्वेत्रैलोक्यवासिनः ॥ शपन्तिनिर्घृणंपापंप्रहसन्तिपुनःपुनः ॥ ७१ ॥ दुर्गातिंदर्शये
त्तस्यधर्मराजोनसंशयः ॥ सम्मुखःसमरेयुद्धेस्वशिरःशोणितंपिबेत् ॥ ७२ ॥ अश्वमेधफलंभुङ्क्तेइन्द्रलोकंप्रगच्छति ॥ यदाजयतिसङ्ग्रामेशत्रूञ्छूरो
वरानने ॥ ७३ ॥ तदाप्रभुङ्क्तेलक्ष्मींनानाभोगान्नसंशयः ॥ यदातत्रत्यजेत्प्राणान्सम्मुखःसन्निराश्रयः ॥ ७४ ॥ सगच्छेत्परमंस्थानंदेवक
न्यांप्रभुङ्क्ते ॥ एवंधर्मंविजानामिकथंभग्नोव्रजाम्यहम् ॥ ७५ ॥ अनेनसमरेयुद्धंकरिष्येनात्रसंशयः ॥ मनोःपुत्रेणधीरेणराज्ञाइक्ष्वाकुणासह ॥
॥ ७६ ॥ डिम्भान्गृहीत्वायाहित्वंसुखंजीववरानने ॥ तस्यश्रुत्वावचःप्राहबद्धाहंतवबन्धनैः ॥ ७७ ॥ स्नेहभानरसाख्यैश्चरतिक्रीडनकैःप्रिय ॥ पुर
तस्तेसुतैःसार्द्धंप्राणांस्त्यक्ष्यामिमानद ॥ ७८ ॥ एवमेतौसुसम्भाष्यपरस्परहितैषिणौ ॥ युद्धायनिश्चितौभूत्वासमालोकयतोरिपून् ॥ ७९ ॥ कोश
लाधिपतिंवीरंतमिक्ष्वाकुंमहामतिम् ॥ ८० ॥ यथैवमेघःपरिगर्जतेदिविप्रावृट्सुकालेषुतडित्प्रकाशैः ॥ तथैवसङ्गर्जतिकान्तयासमंसमाह्वयेद्राजवरं
खुराग्रैः ॥ ८१ ॥ तंगर्जमानंददृशेमहात्मावाराहमेकंपुरुपार्थयुक्तम् ॥ ससारअश्वस्यजवेनयुक्तःससम्मुखंतस्यनृवीरधीरः ॥८२॥ इतिश्रीपाद्मपुराणे
भूमिखण्डेवेनोपाख्यानेसुकलाचरित्रेत्रयश्चत्वारिंशत्तमोऽध्यायः ॥ ४३ ॥ सुकलोवाच ॥ स्वसैन्यंदुर्धरंदृष्ट्वानिर्जितंदुर्धरेणतत् ॥ चुकोपभूपतिः
क्रूरंदुःसहंशूकरंप्रति ॥१॥ धनुरादायवेगेनबाणंकालानलोपमम्॥ तस्याभिमुखमेवासौहयेनाभिससारसः ॥२॥ सयदानृपतिंहयपृष्ठगतंवरपौरुषयुक्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ममित्रहणम् ॥ परिपश्यतिशूकरयूथपतिःप्रगतोऽभिमुखंरणभूमितले ॥३॥ निशितेनशरेणहतोहियदानृपतेर्हयपादतलेप्रगतः ॥ तमिहैवविलङ्घ्यच
वेगमनाःप्रखरेणजवेनचकोलवरः ॥ ४ ॥ व्यथितस्तुरगःसकिरिःकिटिनानहियातिक्षितौसहिविद्धगतिः ॥ तुरगःपतितोभुवितुण्डहतोलघुस्यन्दनमेव
गतोनृपतिः ॥५॥ सहिगर्जतिशूकरजातिरवैरथसंस्थितकोशलपेनजवात् ॥ गदयानिहतःकिलभूपतिनारणमध्यगतःसहियूथपतिः ॥६॥ परित्यज्य
ततुंचस्वकांहितदागतएवहरेर्गृहमेववरम् ॥ ७ ॥ कृत्वाहियुद्धंसमरेहितेनराज्ञासमंशूकरराजराजः ॥ पपातभूमौचहतोयदातुववर्षिरेदेववराःसु
पुष्पैः ॥ ८ ॥ तस्योर्ध्वगःपुष्पचयःसुजातःसन्तानकानामिवसौरभश्च ॥ सकुङ्कुमैश्चन्दनवृष्टिमेवकुर्वन्तिदेवाःपरितुष्यमाणाः ॥ ९ ॥ विमृश्य
मानःसहितेनराज्ञाचतुर्भुजःसोऽपिबभूवराजन् ॥ दिव्याम्बरोभूषणदिव्यरूपःस्वतेजसाभातिदिवाकरोयथा ॥ १० ॥ दिव्येनयानेनदिवंगतो
यदासुपूज्यमानःसुरराजदेवैः ॥ गन्धर्वराजःसबभूवभूयःपूर्वंस्वकंकायमिहैवहित्वा ॥ ११ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेसुकला
चरित्रेचतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥ सुकलोवाच ॥ अथतेलुब्धकाःसर्वेशूकरींप्रतिजग्मिरे ॥ शूराश्चदारुणाःप्राप्ताःपाशहस्ताश्चभीषणाः
॥ १ ॥ चतुरश्चततोडिम्भान्वृत्वास्थित्वाचशूकरी ॥ कुटुम्बेनसमंकान्तंहतंदृष्ट्वामहाहवे ॥ २ ॥ भर्तुर्मेचिन्तितंप्राप्तमृषिदेवैश्चपूजितः ॥
गतःस्वर्गंमहात्मासौवीर्येणानेनकर्मणा ॥ ३ ॥ अनेनापिपथायास्येस्वर्गंभर्त्तासतिष्ठति ॥ तथासुनिश्चितंकृत्वापुत्रान्प्रतिविचिन्तितम् ॥ ४ ॥
यदाजीवन्तिमेबालाश्चत्वारोवंशधारकाः ॥ भवत्यस्यसुवीरस्यकोलस्यापिमहात्मनः ॥ ५ ॥ केनोपायेनपुत्रान्वैरक्षायुक्तान्करोम्यहम् ॥ इति
चिन्तापराभूत्वादृष्ट्वापर्वतसङ्कटम् ॥ ६ ॥ तत्रमार्गंसुविस्तीर्णंनिष्कासायप्रयास्यते ॥ तयासुनिश्चितंकृत्वापुत्रान्प्रतिविचिन्तितम् ॥ ७ ॥ तानु
वाचमहाराजपुत्रान्प्रतिसुमोहितान् ॥ यावत्तिष्ठाम्यहंपुत्रास्तावद्गच्छतशीघ्रगाः ॥ ८ ॥ तेषांमध्येसुतोज्येष्ठःकथंयास्यामिमातरम् ॥ संत्य
ज्यजीवलोभाच्चधिङ्मेमातःसुजीवितम् ॥ ९ ॥ पितृवैरंकरिष्यामिसाधयिष्येरणेरिपून् ॥ गृहीत्वात्वंकनीयसोभ्रातॄन्स्त्रीन्दुर्गकन्दरम् ॥ १० ॥
पितरंमातरंत्यक्त्वायोयातिहिसपापधीः ॥ नरकंचप्रयात्येवकृमिकोटिसमाकुलम् ॥ ११ ॥ तमुवाचसुदुःखार्तात्वांत्यक्त्वाहंकथंसुत ॥ संया
स्यामिमहापापात्त्रयोगच्छन्तुमेसुताः ॥ १२ ॥ कनीयसस्त्रयस्त्वेवगतागिरिवनान्तरम् ॥ तौजग्मतूरणभुवंतेषामेवसुपश्यताम् ॥ १३ ॥
तेजसासुबलेनापिगर्जन्तौचपुनःपुनः ॥ अथतेलुब्धकाःशूराःसम्प्राप्तावातरंहसः ॥ १४ ॥ पथातेनापिदुर्गेणत्रयस्तेप्रेषितानृप ॥ तिष्ठतःस्मपथंरुद्ध्वा
द्वावेतौजननीसुतौ ॥ १५ ॥ लुब्धकाश्चततःप्राप्ताःखड्गबाणधनुर्धराः ॥ प्रजघ्नुस्तोमरैस्तीक्ष्णैश्चक्रैश्चमुसलैस्ततः ॥ १६ ॥ मातरंपृष्ठतःकृत्वातनयो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

युध्यतेसतैः ॥ दंष्ट्रयानिहताःकेचित्केचित्तुण्डेनघातिताः ॥१७॥ सञ्जघानखुराग्रैश्चशूराश्चपतितारणे ॥ युयुधेशूकरःसङ्ख्येदृष्टोराज्ञामहात्मना ॥१८॥
पितुःसकाशाच्छूरोऽयमितिज्ञात्वाससम्मुखः ॥ बाणपाणिर्महातेजामनुसूनुःप्रतापवान् ॥१९॥ निशितेनापिबाणेनअर्द्धचन्द्रानुकारिणा ॥ राज्ञाहतः
पपातोर्व्यांविद्धोरस्कोमहात्मना ॥२०॥ ममारसहसाभूमौपपातसहिशूकरः ॥ पुत्रमोहंपरंप्राप्तातस्योपरिगतास्वयम् ॥२१॥ तयाचनिहताःशूरास्तु
ण्डघातैर्महीतले ॥ निपेतुर्लुब्धकाःशूराःकतिनष्टामृतानृप ॥ २२ ॥ द्रावयन्तीमहत्सैन्यंदंष्ट्रयासूकरीततः ॥ यथाकृत्यासमुद्भूतामहाभयविधायिका
॥२३॥ तमुवाचततोराज्ञीदेवराजसुतोपमम् ॥ अनयानिहतंराजन्महत्सैन्यंतवैवहि ॥ २४ ॥ कस्मादुपेक्षसेकान्ततन्मेत्वंकारणंवद ॥ तामुवाचमहारा
जोनाहंहन्मिइमांस्त्रियम् ॥२५॥ महादोषंप्रियेदृष्टंस्त्रीवधेदैवतैःकिल ॥ तस्मान्नघातयेन्नारींप्रेषयेऽहंनकंचन ॥२६॥ अस्यावधनिमित्तार्थेपापाद्बिभेमि
सुन्दरि ॥ एवमुक्त्वातदाराजाविरराममहीपतिः ॥२७॥ लुब्धकोझार्झरोनामददृशेसतुसूकरीम् ॥ कुर्वन्तींकदनंतेषांदुःसहांसुभटैरपि ॥२८॥ आवि
व्याधसुवेगेनबाणेननिशितेनहि॥संलग्नेनतुबाणेनशोणितेनपरिप्लुता ॥२९॥ शोभमानात्वरांप्राप्तावीरश्रियासमाकुला॥तुण्डेनापिहतःसङ्ख्येझाझरःस
तयापुनः॥३०॥पतमानेनतेनापिझार्झरेणतदाहता ॥ खड्गेननिशितेनापिपपातविदलीकृता ॥३१॥ श्वसमानारणेनापिमूर्च्छनाभिपरिप्लुता ॥ दुःखे
नमहताविष्टाजीवमानामहीतले ॥ ३२ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेसुकलाचरित्रेपञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥ सुकलोवाच ॥
श्वसन्तींशूकरींदृष्ट्वापतितांपुत्रवत्सलाम् ॥ सुदेवाकृपयाविष्टागत्वातांदुःखितांप्रति ॥ १ ॥ अभिषिच्यमुखंतस्याःशीतलेनोदकेनच ॥ पुनःसर्वाङ्गमे
वापिदुःखितांरणशालिनीम् ॥ २ ॥ पुण्येनशीततोयेनसाउवाचाभिषिञ्चतीम् ॥ उवाचमानुषींवाचंसुस्वरंनृपतिप्रियाम् ॥ ३ ॥ सुखंभवतुतेदेविअ
भिषिक्तात्वयायदि ॥ सम्पर्कादर्शनात्तेऽद्यगतोमेपापसञ्चयः ॥४॥तदाकर्ण्यमहद्वाक्यमद्भुताकारसंयुतम् ॥ चित्रमेतन्मयादृष्टंकृतंतेऽनामयंवचः॥५॥
पशुजातिमतीचेयंसौष्ठवंभाषतेस्फुटम् ॥ स्वरव्यञ्जनसम्पन्नंसंस्कृतमुत्तमंमम ॥ ६ ॥ हर्षेणविस्मयेनापिकृत्वासाहसमुत्तमम् ॥ तत्रस्थासामहाभा
गातंपतिंवाक्यमब्रवीत् ॥ ७ ॥ पश्यराजन्नपूर्वेयंसंस्कृतंभाषतेमहत् ॥ पशुयोनिगताचेयंयथावैमानुषोवदेत् ॥ ८ ॥ तदाकर्ण्यततोराजासर्वज्ञान
वतांवरः ॥ अद्भुतमद्भुताकारंयन्नदृष्टंश्रुतंमया ॥ ९ ॥ तामुवाचततोराजासुदेवांसुप्रियांतदा ॥ पृच्छचैनांशुभांकान्तेकाचेयंतुभविष्यति ॥ १० ॥
श्रुत्वातुनृपतेर्वाक्यंसापप्रच्छचसूकरीम् ॥ काभविष्यसित्वंभद्रेचित्रंतेदृश्यतेबहु ॥ ११ ॥ पशुयोनिगतात्वंवैभाषसेमानुषंवचः ॥ सौष्ठवंज्ञानसम्प
न्नंवदमेपूर्वचेष्टितम् ॥ १२ ॥ भर्तुश्चापिमहाराजभटस्यास्यमहात्मनः ॥ कोऽयंधर्मोमहावीर्योगतःस्वर्गंपराक्रमैः ॥ १३ ॥ आत्मनश्चस्वभर्तुश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वंपूर्वानुगंवद ॥ एवमुक्त्वामहाभागाविरराम नृपप्रिया ॥ १४ ॥ शूकर्युवाच ॥ यदिपृच्छसिमांभद्रेममास्यचमहात्मनः ॥ तत्सर्वंतेप्रवक्ष्यामिच
रितंपूर्वचेष्टितम् ॥ १५ ॥ अयमेषमहाप्राज्ञोगन्धर्वोगीतपण्डितः ॥ रङ्गविद्याधरोनामसर्वशास्त्रार्थकोविदः ॥ १६ ॥ मेरुंगिरिवरश्रेष्ठंचारुकन्द
रनिर्झरम् ॥ तमाश्रित्यमहातेजाःपुलस्त्योमुनिसत्तमः ॥ १७ ॥ तपश्चचारतेजस्वीनिर्व्यलीकेनचेतसा ॥ विद्याधरस्तत्रगतःस्वेच्छयासमहाप्रभो
॥ १८ ॥ तमाश्रित्यगिरिश्रेष्ठंगीतमभ्यसतेतदा ॥ स्वरतालसमोपेतंसुस्वरंचारुहासिनी ॥ १९ ॥ गीतंश्रुत्वामुनिस्तस्यध्यानाच्चलितमानसः ॥
गायन्तंतमुवाचेदंगीतविद्याधरंप्रति ॥ २० ॥ भवद्गीतेनदिव्येनदेवामुह्यन्तिनान्यथा ॥ सुस्वरेणसुपुण्येनतालमानेनपण्डित ॥ २१ ॥ लययुक्ते
नभावेनमूर्च्छनासहितेनच ॥ मेमनश्चलितंध्यानाद्गीतेनानेनसुव्रत ॥ २२ ॥ इदंस्थानंपरित्यज्यअन्यस्थानंव्रजस्वतत् ॥ २३ ॥ गीतविद्याधर
उवाच ॥ आत्मज्ञानसमंगीतमहमत्रप्रसाधये ॥ दुःखंददेनकस्यापिसुखदोनृषुसर्वदा ॥ २४ ॥ गीतेनानेनदिव्येनसर्वास्तुष्यन्तिदेवताः ॥ शम्भु
श्चापिसमानीतोगीतध्वनिरतोद्विज ॥ २५ ॥ गीतंसर्वरसंप्रोक्तंगीतमानन्ददायकम् ॥ शृङ्गाराद्यारसाःसर्वेगीतेनापिप्रतिष्ठिताः ॥ २६ ॥
शोभामायान्तिगीतेनवेदाश्चत्वारउत्तमाः ॥ गीतेनदेवताःसर्वास्तोषमायान्तिनान्यथा ॥ २७ ॥ तदेवंनिन्दसेगीतंमामेवंपरिचालयेः ॥ अन्यायोऽयं
महाभागतवैवइहदृश्यते ॥२८॥ पुलस्त्यउवाच॥सत्यमुक्तंत्वयाद्यैवगीतार्थंबहुपुण्यदम् ॥ शृणुत्वंमामकंवाक्यंमानंत्यजमहामते ॥ २९ ॥ नाहंगीतं
प्रकुत्सामिगीतंवन्दामिनान्यथा ॥ विद्याश्चतुर्दशैवैताएकीभावेनभावदाः ॥ ३० ॥ प्राणिनांसिद्धिमायान्तिमनसानिश्चलेनच ॥ तपश्चतद्वन्मन्त्रा
श्चसुसिद्ध्यन्त्येकचिन्तया ॥ ३१ ॥ हृषीकाणांमहावर्गश्चपलोममसंमतः ॥ विषयेष्वेवसर्वेषुनयत्यात्मानमुच्चकैः ॥ ३२ ॥ चालयित्वामनस्त
स्माद्ध्यानादेवनसंशयः ॥ यत्रशब्दंनरूपंचयुवतीनैवतिष्ठति ॥ ३३ ॥ मुनयस्तत्रगच्छन्तितपःसिद्ध्यर्थमेवहि ॥ अयंगीतःपवित्रस्तेबहुसौख्यप्रदा
यकः ॥ ३४ ॥ नपश्येमवयंवीरतिष्ठामोवनसंस्थिताः ॥ अन्यत्स्थानंप्रयाहित्वंनोवावयंव्रजामहे ॥ ३५ ॥ गीतविद्याधरउवाच ॥ इन्द्रियाणांब
लंवर्गंजितंयेनमहात्मना ॥ सजयीकथ्यतेयोगीसचवीरःससाधकः ॥ ३६ ॥ शब्दंश्रुत्वाथवादृष्ट्वारूपमेवंमहामते ॥ चलतेनैवयोध्यानात्सधीरस्त
पसाधकः ॥ ३७ ॥ भवांस्तुतेजसाहीनइन्द्रियैर्विजितोयतः ॥ स्वर्गेऽपिनास्तिसामर्थ्यंममगीतस्यधर्षणे ॥ ३८ ॥ वर्जयन्तिवनंसर्वेहीनवीर्यान
संशयः ॥ अयंसाधारणोविप्रवनदेशोनसंशयः ॥ ३९ ॥ देवानांसर्वजीवानांयथाममतथातव ॥ कथंगच्छाम्यहंत्यक्त्वावनमेवमनुत्तमम् ॥ ४० ॥
यूयंगच्छन्तुतिष्ठन्तुयद्भव्यंतत्तुनान्यथा ॥ एवमाभाष्यतंविप्रंगीतविद्याधरस्तदा ॥ ४१ ॥ समाकर्ण्यततस्तेनमुनिनातस्यउत्तरम् ॥ चिन्तयामास

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मेधावीकिंकृत्वासुकृतंभवेत् ॥ ४२ ॥ क्षमांकृत्वाजगामाथअन्यत्स्थानंद्विजोत्तमः ॥ तपश्चचारधर्मात्मायोगासनगतःसदा ॥ ४३ ॥ कामंक्रो
धंपरित्यज्यमोहंलोभंतथैवच ॥ सर्वेन्द्रियाणिसंयम्यमनसासममेवच ॥ एवंस्थितस्तदायोगीपुलस्त्योमुनिसत्तमः ॥ ४४ ॥ सुकलोवाच ॥ गतेत
स्मिन्महाभागेपुलस्त्येमुनिपुङ्गवे ॥ कालादिष्टेनतेनापिगीतविद्याधरेणच ॥ ४५ ॥ चिन्तितंसुचिरंकालंनदृष्टोऽयंभयान्मम ॥ क्वगतस्तिष्ठतेवापि
कुरुतेकिंकथंचसः ॥ ४६ ॥ ज्ञात्वापद्मात्मजसुतमेकान्तवनशालिनम् ॥ गतोवराहरूपेणतस्याश्रममनुत्तमम् ॥ ४७ ॥ आसनस्थं
महात्मानंतेजोज्वालासमाविलम् ॥ दृष्ट्वाचकारवैक्षोभंतस्यविप्रस्यभामिनि ॥ ४८ ॥ धर्षयेन्नियतंविप्रंतुण्डाग्रेणकुचेष्टया ॥ पशुंज्ञात्वा
महाराजक्षमतेतस्यदुष्कृतम् ॥ ४९ ॥ मूत्रयेत्पुरतःकृत्वाविष्ठांचकुरुतेततः ॥ नृत्यतेक्रीडतेतत्रपततिप्रोच्चलेत्पुनः ॥ ५० ॥ पशुंज्ञात्वा
परित्यक्तोमुनिनातेनभूपते ॥ एकदातुतथाऽऽयातेलेनरूपेणवैपुनः ॥ ५१ ॥ अट्टाट्टहासेनपुनर्हास्यमेवंकृतंतदा ॥ रोदनंचकृतंतत्रगीतंगाय
तिसुस्वरम् ॥ ५२ ॥ तथातमागतंविप्रोगीतविद्याधरंनृप ॥ चेष्टितंतस्यवैदृष्ट्वाघोणीह्येषभवेन्नहि ॥ ५३ ॥ ज्ञात्वातस्यतुवृत्तान्तंमामेवं
परिचालयेत् ॥ पशुंज्ञात्वामयात्यक्तोदुष्टएषसुनिर्घृणः ॥ ५४ ॥ एवंज्ञात्वामहात्मानंगन्धर्वाधममेवहि ॥ चुकोपमुनिशार्दूलस्तंशशा
पमहामतिः ॥ ५५ ॥ यस्मात्सूकररूपेणमामेवंपरिचालयेः ॥ तस्माद्व्रजमहापापपापयोनिंतुशौकरीम् ॥ ५६ ॥ शप्तस्तेनापिविप्रेणगतोदेवंपुरन्द
रम् ॥ तमुवाचमहात्मानंकम्पमानोवरानने ॥ ५७ ॥ शृणुवाक्यंसहस्राक्षतवकार्यंकृतंमया ॥ तपएवहिकुर्वन्सन्दारुणंमुनिपुङ्गवः ॥ ५८ ॥ तस्मा
त्तपःप्रभावाच्चचालितःक्षोभितोमया ॥ शप्तस्तेनास्मिविप्रेणदेवरूपंप्रणाशितम् ॥ ५९ ॥ पशुयोनिंगतंशक्रमामेवंपरिरक्षय ॥ ज्ञात्वातस्यसवृत्तान्तं
गीतविद्याधरस्यच ॥ ६० ॥ तेनसार्धंगतश्चेन्द्रस्तंमुनिंपर्यभाषत ॥ दीयतामनुग्रहोनाथसिद्धिज्ञोऽसिद्विजोत्तम ॥ ६१ ॥ क्षम्यतांमुनिवर्यास्मिन्क्रि
यतांशापमोक्षणम् ॥ ६२ ॥ पुलस्त्यउवाच ॥ इतिसम्प्रार्थितोविप्रोमहेन्द्रेणाहदृष्टधीः ॥ वचनात्तवदेवेशक्षन्तव्यंचमयापिहि ॥ भविष्यतिमहारा
जमनुपुत्रोमहाबलः ॥ ६३ ॥ इक्ष्वाकुर्नामधर्मात्मासर्वधर्मानुपालकः ॥ तस्यहस्ताद्यदामृत्युरस्यैवचभविष्यति ॥ ६४ ॥ तदैषवैस्वकंदेहंप्राप्स्यते
नात्रसंशयः ॥ एतत्तेसर्ववृत्तान्तंशूकरस्यनिवेदितम् ॥ ६५ ॥ आत्मनश्चप्रवक्ष्यामिपत्यासार्धंशृणुष्वहि ॥ मयाचपातकंघोरंकृतंयत्पापयापुरा ॥
॥ ६६ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेसुकलाचरित्रेषट्चत्वारिंशोऽध्यायः ॥ ४६ ॥ सुकलोवाच ॥ सुदेवाचारुसर्वाङ्गीतामुवाचाथसूक
रीम् ॥ पशुयोनिंगतात्वंहिकथंवदसिसंस्कृतम् ॥ १ ॥ एवंविधंमहाज्ञानंकस्माद्भूतंवदस्वमे ॥ कथंजानासिवैभर्तुश्चरित्रमात्मनःशुभे ॥ २ ॥ शूकर्यु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाच ॥ पशोर्भावेनमोहेनमुग्धाहंवरवर्णिनि ॥ निहताखड्गबाणैश्चपतितारणमूर्धनि ॥ ३ ॥ मूर्च्छयाभिपरिक्लिन्नाज्ञानहीनावरानने ॥ त्वयाभिषिक्तायै
नाहंपुण्यहस्तेनसुन्दरि ॥ ४ ॥ पुण्योदकेनशीतेनतवहस्तगतेनवै ॥ अभिषिक्तेहिमेकायेमोहोनष्टोविहायमाम् ॥ ५ ॥ यथाविनाशंतेजोभिरन्धकारः
प्रयातिसः ॥ तथातवाभिषेकेनममपापंगतंशुभे ॥ ६ ॥ प्रसादात्तवचार्वङ्गिलब्धंज्ञानंपुरातनम् ॥ पुण्यांगतिंप्रयास्यामिइतिज्ञातंमयाशुभे ॥ ७ ॥
श्रूयतामभिधास्यामिपूर्ववृत्तान्तमात्मनः ॥ यत्कृतंतुमयाभद्रेपापयादुष्कृतंबहु ॥ ८ ॥ कलिङ्गाख्यमहादेशेश्रीपुरंनामपत्तनम् ॥ सर्वसिद्धिसमाकी
र्णंचतुर्वर्णनिषेवितम् ॥ ९ ॥ वसतिस्मद्विजःकोऽपिवसुदत्तइतिश्रुतः ॥ ब्रह्माचारपरोनित्यंसत्यधर्मपरायणः ॥ १० ॥ वेदवेत्ताज्ञानवेत्ताशुचिमा
न्गुणवान्धनी ॥ धनधान्यसमाकीर्णःपुत्रपौत्रैरलङ्कृतः ॥ ११ ॥ तस्याहंतनयाभद्रेसोदरैःस्वजनबान्धवैः ॥ अलङ्कारैस्तुशृङ्गारैर्भूषितास्मिवरानने ॥
॥ १२ ॥ सुदेवानाममेतातश्चकारसमहामतिः ॥ तस्याहंदयितानित्यंपितुश्चापिमहामते ॥ १३ ॥ रूपेणाप्रतिमाजातासंसारेनास्तितादृशी ॥ रूपयौव
नगर्वेणमत्ताहंचारुहासिनी ॥ १४ ॥ अहंकन्यासुरूपावैसर्वालङ्कारशोभिता ॥ मांचदृष्ट्वाततोलोकाःसर्वेस्वजनवर्गकाः ॥ १५ ॥ मामेवंयाचमानास्ते
विवाहार्थेवरानने ॥ याचिताहंद्विजैःसर्वैर्नददातिपितामम ॥ १६ ॥ स्नेहाच्चैवमहाभागेसुमोहसमहामतिः ॥ नदत्ताहंतदातेनपित्राचैवमहात्मना ॥ १७ ॥
सम्प्राप्तंयौवनंबालेमयिभावसमन्वितम् ॥ रूपमेतादृशंदृष्ट्वाममामातासुदुःखिता ॥ १८ ॥ पितरंमउवाचाथकस्मात्कन्यानदीयते ॥ त्वंकस्मैसुद्विजायैव
ब्राह्मणायमहात्मने ॥ १९ ॥ देहिकन्यांमहाभागसम्प्राप्तायौवनंत्वियम् ॥ वसुदत्तोद्विजश्रेष्ठःप्रत्युवाचद्विजोत्तमः ॥ २० ॥ मातरंमेमहाभागेश्रूयतांव
चनंमम ॥ महामोहेनमुग्धोऽस्मिसुतायावरवर्णिनी ॥ २१ ॥ योमेगृहस्थोविप्रोवैभविष्यतिशुभेशृणु ॥ तस्मैकन्यांप्रदास्यामिजामात्रेतुनसंशयः ॥
॥ २२ ॥ ममप्राणप्रियाचैषासुदेवानात्रसंशयः ॥ एवमूचेमदर्थेसवसुदत्तःपितामम ॥ २३ ॥ कौशिकस्यकुलेजातःसर्वविद्याविशारदः ॥ ब्राह्मणानांगु
णैर्युक्तःशीलवान्गुणवाञ्छुचिः ॥ २४ ॥ वेदाध्ययनसम्पन्नंपठमानंहिसुस्वरम् ॥ भिक्षार्थंद्वारमायान्तंपितृमातृविवर्जितम् ॥ २५ ॥ तंदृष्ट्वासमनुप्राप्तं
रूपंवीक्ष्यमहामतिः ॥ तंप्रोवाचपिताएवंकोभवान्वैभविष्यति ॥ २६ ॥ किंतेनामकुलंगोत्रमाचारंवदसाम्प्रतम् ॥ समाकर्ण्यपितुर्वाक्यंवसुदत्तमुवाच
सः ॥ २७ ॥ कौशिकस्यान्वयेजातोवेदवेदाङ्गपारगः ॥ शिवशर्मेतिमेनामपितृमातृविवर्जितः ॥ २८ ॥ सन्तिमेभ्रातरश्चान्येचत्वारोवेदपारगाः ॥
एवंकुलंसमाख्यातमाचारःकुलसम्भवः ॥ २९ ॥ एवंसर्वंसमाख्यातंपितरंशिवशर्मणा ॥ शुभेलग्नेतिथौप्राप्तेनक्षत्रेभगदैवते ॥ ३० ॥ पित्रादत्तास्मि
सुभगेतस्मैविप्रायवैतदा ॥ पितृगेहेवसाम्येकातेनसार्धंमहात्मना ॥ ३१ ॥ नैवशुश्रूषितोभर्तामयासपापयातदा ॥ पितृमातृसुद्रव्येणगर्वेणापिप्रमोहि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ता ॥ ३२ ॥ अङ्गसंवाहनंतस्यनकृतंहिमयाकदा ॥ रतिभावेनस्नेहेनवचनेनमयाशुभे ॥३३॥ क्रूरबुद्ध्याहिदृष्टोऽसौसर्वदापापयामया ॥ पुंश्चलीनांप्र
सङ्गेनतद्भावंहिगताशुभे ॥ ३४ ॥ मातापित्रोश्चभर्तुश्चभ्रातॄणांहितमेवच ॥ नकरोम्यहमेवापियत्रयत्रव्रजाम्यहम् ॥ ३५ ॥ एवंमेदुष्कृतंदृष्ट्वाशिवशर्मा
पतिर्मम ॥ स्नेहाच्छ्वशुरवर्गस्यममभर्तामहामतिः ॥ ३६ ॥ नकिंचिद्वक्तिमांसोऽपिक्षमतेदुष्कृतंमम ॥ वार्यमाणाकुटुम्बेनअहमेवंसुपापिनी ॥ ३७ ॥
तस्यशीलंविदित्वातेसाधुत्वंशिवशर्मणः ॥ पितामाताचमेसर्वेममपापेनदुःखिताः ॥ ३८ ॥ भर्त्तामेदुष्कृतंदृष्ट्वास्वगृहान्निर्गतोबहिः ॥ तंदेशंग्राममे
नंचपरित्यज्यगतस्ततः ॥ ३९ ॥ गतेभर्तरिमितातःसञ्जातश्चिन्तयान्वितः ॥ ममदुःखेनदुःखात्मायथारोगेणपीडितः ॥ ४० ॥ ममभाताउवाचैनं
भर्तारंदुःखपीडितम् ॥ कस्माच्चिन्तयसेकान्तवदद्दुःखंममाग्रतः ॥ ४१ ॥ वसुदत्तउवाचैनांमातरंममनन्दने ॥ सुतांत्यक्त्वागतोविप्रोजामाताशृणु
वल्लभे ॥ ४२ ॥ इयंपापसमाचारानिर्घृणापापचारिणी ॥ अनयाहिपरित्यक्तःशिवशर्मामहामतिः ॥ ४३ ॥ समस्तस्यकुटुम्बस्यदाक्षि
ण्येनमहामतिः ॥ ममायंसद्द्विजःकान्तेसुदेवांनैवभाषते ॥ ४४ ॥ वसतेसौम्यभावेननैवनिन्दतिकुत्सति ॥ सुदेवांपापसश्चारांसर्वैपण्डितबुद्धि
मान् ॥ ४५ ॥ भविष्यतित्वियंदुष्टासुदेवाकुलनाशिनी ॥ अहमेनांपरित्यज्यव्रजामिगृहवासिनि ॥ ४६ ॥ ब्राह्मण्युवाच ॥ अद्यज्ञातंत्वया
कान्तसुतायागुणदूषणम् ॥ तवमोहेनस्नेहेननदृष्टंयंशृणुसाम्प्रतम् ॥४७॥ तावद्विलाडयेत्पुत्रंयावत्स्यात्पञ्चवार्षिकः ॥ शिक्षाबुद्ध्यासदाकान्तपुनर्मो
हेनपोषयेत् ॥ ४८ ॥ स्नानाच्छादनकैर्भक्ष्यैर्भोज्यैःपेयैर्नसंशयः ॥ गुणेषुयोजयेत्कान्तसद्विद्यासुचतंसुतम् ॥ ४९ ॥ गुणशिक्षार्थनिर्मोहः
पिताभवतिसर्वदा ॥ पालनेपोषणेकान्तसंमोहःपरिजायते ॥ ५० ॥ सगुणंनवदेत्पुत्रंकुत्सयेच्चदिनेदिने ॥ काठिन्यंचवदेन्नित्यंवचनैःपरिपी
डयेत् ॥ ५१ ॥ यथाहिसाधयेन्नित्यंसुविद्यांज्ञानतत्परः ॥ अभिमानेछलेनापिपापंत्यक्त्वाप्रदूरतः ॥ ५२ ॥ नैपुण्यंजायतेनित्यंविद्यासुचगुणे
षुच ॥ माताचताडयेत्कन्यांस्नुषांश्वश्रूर्विताडयेत् ॥ ५३ ॥ गुरुश्चताडयेच्छिष्यंततःसिध्यन्तिनान्यथा ॥ भार्याचताडयेत्कान्तअमात्यंनृप
तिस्तथा ॥ ५४ ॥ हयंचताडयेद्धीरोगजंमात्रोदिनेदिने ॥ शिक्षाबुद्ध्याप्रसिध्यन्तिताडनात्पालनाद्विभो ॥ ५५ ॥ त्वयेयंनाशितानाथसर्व
दैवनसंशयः ॥ सार्धंसुब्राह्मणेनापिभवताशिवशर्मणा ॥ ५६ ॥ निरङ्कुशाकृतागेहेतेननष्टामहामते ॥ तावद्विधारयेत्कन्यांगृहेकान्तवचःशृणु
॥ ५७ ॥ अष्टवर्षान्वितायावत्प्रबलांनैवधारयेत् ॥ पितुर्गेहस्थितापुत्रीयत्पापंहिप्रकुर्वती ॥ ५८ ॥ उभाभ्यामपितत्पापंपितृभ्यामपिविन्दति ॥
तस्मान्नधार्यतेकन्यासमर्थानिजमन्दिरे ॥ ५९ ॥ यस्यदत्ताभवेत्साचतस्यगेहेप्रपोषयेत् ॥ तत्रस्थासाधयेत्कान्तंसगुणंभक्तिपूर्वकम् ॥ ६० ॥ कुलस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जायतेकीर्तिःपितासुखेनजीवति ॥ तत्रस्थाकुरुतेपापंतत्पापंभुञ्जतेपतिः ॥ ६१ ॥ तत्रस्थावर्द्धतेनित्यंपुत्रैःपौत्रैःसदैवसा ॥ पिताकीर्तिमवाप्नोति
सुतायाःसुगुणैःप्रिय ॥ ६२ ॥ तस्मान्नधारयेत्कान्तगेहेपुत्रींसभर्तृकाम् ॥ इत्यर्थेश्रूयतेकान्तइतिहासोभविष्यति ॥ ६३ ॥ अष्टाविंशतिकेप्राप्तेयुगेद्वाप
रकेमहान् ॥ उग्रसेनस्यवीरस्ययदुज्येष्ठस्ययत्प्रभो ॥ ६४ ॥ चरित्रंतेप्रवक्ष्यामिशृणुष्वैकमनाद्विज ॥ ६५ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्या
नेसुकलाचरित्रेसप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥ ब्राह्मण्युवाच ॥ माथुरेविषयेरम्येमथुरायांनृपोत्तमः ॥ उग्रसेनेतिविख्यातोयादवःपरवीरहा ॥१॥
सर्वधर्मार्थतत्त्वज्ञोवेदज्ञःश्रुतवान्बली ॥ दाताभोक्तागुणग्राहीसद्गुणान्वेत्तिभूपतिः ॥ २ ॥ राज्यंचकारमेधावीप्रजाधर्मेणपालयेत् ॥ एवंसचमहातेजा
उग्रसेनःप्रतापवान् ॥ ३ ॥ वैदर्भेविपयेपुण्येसत्यकेतुःप्रतापवान् ॥ तस्यकन्यामहाभागापद्माक्षीकमलानना ॥ ४ ॥ नाम्नापद्मावतीनामसत्यधर्मप
रायणा ॥ सातुस्त्रीणांगुणैर्युक्ताद्वितीयेवसमुद्रजा ॥ ५ ॥ वैदर्भीशुशुभेराजन्स्वगुणैःसत्यकारणैः ॥ माथुरउग्रसेनस्तुउपयेमेसुलोचनाम् ॥ ६ ॥ तया
सहमहाभागसुखंरेमेप्रतापवान् ॥ अतिप्रीतोगुणैस्तस्यास्तयासहसुखीभवेत् ॥ ७ ॥ तस्याःस्नेहेनप्रीत्याचसंमुग्धोमाथुरेश्वरः ॥पद्मावतीमहाभागात
स्यप्राणप्रियाऽभवत् ॥ ८ ॥ तयाविनानबुभुजेतयासहप्रक्रीडयेत् ॥ तयाविनानसेवेतपरमंसुखमेवसः ॥ ९॥ एवंप्रीतिकरौजातौपरस्परमनुत्तमौ ॥
स्नेहवन्तौद्विजश्रेष्ठसुखसम्प्रीतिदायकौ ॥ १० ॥ सत्यकेतुश्चराजेन्द्रःसस्मारसपद्मावतीम् ॥ स्वसुतांतांमहाभागोमातातस्याःसुदुःखिता ॥ ११ ॥
सदूतान्प्रेषयामासवैदर्भोमथुरांप्रति ॥ उग्रसेनंनृवीरेन्द्रंसादरेणद्विजोत्तम ॥ १२॥ उग्रसेनंमहाराजंसदूतोवाक्यमब्रवीत् ॥ विदर्भाधिपतिर्वीरोभक्त्या
स्नेहेननन्दयन् ॥ १३ ॥ आत्मनःकुशलंब्रूतेभवतांपरिपृच्छति ॥ सत्यकेतुर्महाराजत्वामेवंपरिपृष्टवान् ॥१४ ॥ दर्शनायप्रेषयस्वसुतांपद्मावतींमम॥
यदित्वंमन्यसेनाथप्रीतिस्नेहंहितस्यच ॥ १५ ॥ प्रेषयस्वमहाभागांप्रियांप्रीतिकरांतव ॥ औत्कण्ठ्येनमहाराजसशोकेनानुवर्तते ॥ १६ ॥ समाकर्ण्य
ततोवाक्यमुग्रसेनोनृपोत्तमः ॥ प्रीत्यास्नेहेनतस्यापिसत्यकेतोर्महात्मनः ॥ १७ ॥ दाक्षिण्येनचविप्रेन्द्रप्रेषयामासभूपतिः ॥ पद्मावतींप्रियांभार्यामु
ग्रसेनःप्रतापवान् ॥१८॥ प्रेषितानेनराजेन्द्रगतापद्मावतीस्वकम् ॥ पूर्वंगृहंसतीसातुमहाहर्षेणसङ्कुला ॥ १९ ॥ पितृपूर्वंकुटुम्बंतुददर्शेचारुमङ्गला ॥
पितुःपादौननामाथशिरसासत्यतत्परा ॥ २० ॥ आगतायांमहाराजःपद्मावत्यांद्विजोत्तम ॥ हर्षेणमहताविष्टोविदर्भाधिपतिर्नृपः ॥ २१ ॥ वर्द्धिता ॥ ६९ ॥
दानमानैश्चवस्त्रालङ्कारभूपणैः ॥ पद्मावतीसुखेनापिपितुर्गेहेप्रवर्तते ॥ २२ ॥ सखीभिःसहितासातुनिःशङ्कापरिवर्तते ॥ रमतेसातदातत्रयथापूर्वंतथै
वच ॥ २३ ॥ गृहेवनेतडागेषुप्रासादेचतथैवसा ॥ पुनर्बालेवभूतासानिर्लज्जासम्प्रवर्तते ॥ २४ ॥ निःशङ्कावर्ततेविप्रसखीभिःसहसर्वदा ॥ पतिव्रता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महाभागाहर्षेणमहतान्विता ॥ २५ ॥ सुखंतुपितृगेहस्यदुर्लभंश्वाशुरेगृहे ॥ एवंज्ञात्वातदारेमेकदाईदृग्भविष्यति ॥ २६ ॥ अनेनमोहभावेनक्रीडालु
ब्धावरानना ॥ सखीभिःसहितानित्यंवनेपूपवनेतदा ॥ २७ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेसुकलाचरित्रेऽष्टचत्वारिंशोऽध्यायः ॥४८॥
ब्राह्मण्युवाच ॥ एकदातुमहाभागगतासापर्वतोत्तमे ॥ रमणीयंवनंदृष्ट्वाकदलीखण्डमण्डितम् ॥ १ ॥ शालैस्तालैस्तमालैश्चनालिकेरैस्तथोत्कटैः ॥
पूगीफलैर्मातुलिङ्गैर्नारङ्गैश्चारुजम्बुकैः ॥ २ ॥ चम्पकैःपाटलैःपुण्यैःपुष्पितैःकुटकैर्वटैः ॥ अशोकबकुलोपेतंनानावृक्षैरलङ्कृतम् ॥ ३ ॥ पर्वतंपुण्यव
न्तंतंपुष्पितैश्चनगोत्तमैः ॥ सर्वत्रदृश्यतेरम्योनानाधातुसमाकुलः ॥ ४ ॥ तडागंसर्वतोभद्रंपुण्यतोयेनपूरितम् ॥ कमलैःपुष्पितैश्चान्यैःसुगन्धैःकन
कोत्पलैः ॥ ५॥ श्वेतोत्पलैर्विभासन्तंरक्तोत्पलसुपुष्पितैः ॥ नीलोत्पलैश्चकह्लारैर्हंसैश्चजलकुक्कुटैः ॥६॥ पक्षिभिर्जलजैश्चान्यैर्नानाधातुसमाकुलः॥
तडागंसर्वतःशुभ्रंनानापक्षिगणैर्युतम् ॥ ७ ॥ कोकिलानांरुतैःपुण्यैःसुस्वरैःपरिशोभितः ॥ मधुराणांतथाशब्दैःसर्वत्रमधुरायते ॥ ८ ॥ षट्पदानांसु
नादेनसर्वत्रपरिशोभते ॥ एवंविधंगिरिंरम्यंतदेववनमुत्तमम् ॥ ९ ॥ तडागंसर्वतोभद्रंददृशेनृपनन्दिनी ॥ वैदर्भीक्रीडमानासासखीभिःसहितातदा
॥ १० ॥ समालोक्यवनंपुण्यंसर्वत्रकुसुमाकुलम् ॥ चापल्येनप्रभावेनस्त्रीभावेनचलीलया ॥ ११ ॥ पद्मावतीसरस्तीरेसखीभिःसहितातदा ॥ जल
क्रीडासमालीनाहसतेगायतेपुनः ॥ १२ ॥ सुखेनरममाणासातस्मिन्सरसिभामिनी ॥ एवंविप्रतदासातुसुखेनपरिवर्तयेत् ॥ १३ ॥ गोभि
लोनामवैदैत्योभृत्योवैश्रवणस्यच ॥ दिव्येनापिविमानेनसर्वभोगपरिप्लुतः ॥ १४ ॥ यातिचाकाशमार्गेणगोभिलोदैत्यसत्तमः ॥ तेनदृष्टाविशा
लाक्षीवैदर्भीनिर्भयातदा ॥ १५ ॥ सर्वयोषिद्वरासाहिउग्रसेनस्यवैप्रिया ॥ रूपेणाप्रतिमालोकेसर्वाङ्गेषुविराजते ॥ १६ ॥ रतिर्वैमन्मथस्यापिकिंवा
पीयंहरिप्रिया ॥ किंवापिपार्वतीदेवीशचीकिंवाभविष्यति ॥ १७ ॥ यादृशीदृश्यतेचेयंनारीणांप्रवरोत्तमा ॥ अन्यापिईदृशीनास्तिद्वितीयाक्षिति
मण्डले ॥ १८ ॥ नक्षत्रेषुयथाचन्द्रःसम्पूर्णोभातिशोभनः ॥ गुणरूपकलाभिस्तुतथाभातिवरानना ॥ १९ ॥ पुष्करेषुयथाहंसस्तथेयंचारुहा
सिनी ॥ अहोरूपमहोभावअस्यास्तुपरिदृश्यते ॥ २० ॥ काकस्यशोभनाबालाचारुवृत्तपयोधरा ॥ व्यमृशद्गोभिलोदैत्यःपद्मावतींवराननाम्
॥ २१ ॥ चिन्तयित्वाक्षणंविप्रकाकस्यापिभविष्यति ॥ ज्ञानेनमहताज्ञात्वावैदर्भीतिनसंशयः ॥ २२ ॥ दयिताउग्रसेनस्यपतिव्रतपरायणा ॥
आत्मबलेनतिष्ठन्तीदुष्प्राप्यापुरुषैरपि ॥ २३ ॥ उग्रसेनोमहामूर्खःप्रेषितायेनवैवरा ॥ पितुर्गेहमियंबालासतुभाग्येनवर्जितः ॥ २४ ॥ अनयाविना
सजीवेच्चकथंकूटमतिःसदा ॥ किंवानपुंसकोराजाएनांयोहिपरित्यजेत् ॥ २५ ॥ तांदृष्ट्वासतुकामात्मासञ्जातस्तत्क्षणादपि ॥ इयंपतिव्रताबाला

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दुष्प्राप्यापुरुषैरपि ॥ २६ ॥ कथंभोक्ष्याम्यहंगत्वाकामोमामतिपीडयेत् ॥ अभुक्त्वैनांयदायास्येतत्स्यान्मृत्युर्ममैवहि ॥ २७ ॥ अद्यैवहिनसन्देहो
यतःकामोमहाबलः ॥ इतिचिन्तापरोभूत्वागोभिलोमनसैक्षत ॥२८॥ कृत्वामायामयंरूपमुग्रसेनस्यभूपतेः॥ यादृशस्तूग्रसेनश्चसाङ्गोपाङ्गोमहान्नृपः
॥ २९ ॥ गोभिलस्तादृशोभूत्वागत्याचस्वरभाषया ॥ यथावस्त्रोयथावेशोवयसाचतथापुनः ॥ ३० ॥ दिव्यमाल्याम्बरधरोदिव्यगन्धानुलेपनः॥
सर्वाभरणशोभाङ्गोयादृशोमाथुरेश्वरः ॥ ३१ ॥ भूत्वाऽथतादृशोदैत्यउग्रसेनमयस्तदा ॥ माययापरयायुक्तोरूपलावण्यसम्पदा ॥ ३२ ॥ पर्वताग्रे
अशोकस्यच्छायामाश्रित्यसंस्थितः ॥ शिलातलस्थोदुष्टात्मावीणादण्डेनवीरकः ॥ ३३ ॥ सुस्वरंगायमानस्तुगीतंविश्वप्रमोहनम् ॥ तालमान
क्रियोपेतंसप्तस्वरविभूषितम् ॥ ३४ ॥ गीतंगायतिदुष्टात्मातस्यारूपेणमोहितः ॥ पर्वताग्रेस्थितोविप्रहर्षेणमहतान्वितः ॥ ३५ ॥ सखीमध्यगता
सातुपद्मावतीवरानना ॥ शुश्रुवेसुस्वरंगीतंतालमानलयान्वितम् ॥ ३६ ॥ कोऽयंगायतिधर्मात्मामहत्सौख्यप्रदायकम् ॥ गीतंहिसत्क्रियोपेतंसर्व
भावसमन्वितम् ॥ ३७ ॥ सखीभिःसहितागत्वाऔत्सुक्येननृपात्मजा ॥ अशोकच्छायामाश्रित्यविमलेसुशिलातले ॥ ३८ ॥ ददर्शभूपवेषेणगो
भिलंदानवाधमम् ॥ पुष्पमालाम्बरधरंदिव्यगन्धानुलेपनम् ॥ ३९ ॥ सर्वाभरणशोभाङ्गंपद्मावतीपतिव्रता ॥ मथुरेशःसमायातःकदाधर्मपरा
यणः ॥ ४० ॥ ममनाथोमहात्मावैराज्यंत्यक्त्वाप्रदूरतः ॥ यावद्विचिन्तयेत्साचतावत्पापेनतेनसा ॥ ४१ ॥ समाहूताऽऽतुरीभूयएहित्वंहिप्रिये
मम ॥ चकिताशङ्कितासाचकथंभर्त्तासमागतः ॥ ४२ ॥ लज्जितादुःखिताजाताअधःकृत्वाततोमुखम् ॥ अहंपापादुराचारानिःशङ्कापरिवर्त्तिता
॥ ४३ ॥ कोपमेवंमहाभागःकरिष्यतिनसंशयः ॥ यावद्विचिन्तयेत्साचतावत्तेनापिपापिना ॥४४॥ समाहूताऽऽतुरीभूयएह्येहित्वंममप्रिये ॥ त्वया
विनाकृतोदेविप्राणान्धर्तुंवरानने ॥ ४५ ॥ नहिशक्नोम्यहंकान्तेजीवितंप्रियमेवच ॥ तवस्नेहेनलुब्धोऽस्मित्वांत्यक्त्वानोत्सहेभृशम् ॥ ४६ ॥
ब्राह्मण्युवाच ॥एवमुक्तागताऽपश्यत्सुमुखंलज्जयान्विता ॥समालिङ्ग्यततोदैत्यःसतींपद्मावतींतदा ॥४७॥ एकान्तंतुसमानीतासुभुक्ताइच्छयाततः॥
दैत्येनगोभिलेनापिसत्यकेतोःसुतातदा ॥ ४८ ॥ सुकलोवाच ॥ मुष्कस्थानेऽस्यसङ्केतंनाविन्दतवरानना ॥ स्ववस्त्रंसापरिगृह्यशङ्कितादुःखिता
ह्यभूत् ॥ ४९ ॥ सासक्रोधावचःप्राहगोभिलंदानवाधमम् ॥ कस्त्वंपापसमाचारोनिर्घृणोदानवाकृतिः ॥ ५० ॥ शप्तुकामासमुद्युक्तादुःखेनाकुलि
तेक्षणा ॥ वेपमानातदाराजन्दुःखभारेणपीडिता ॥ ५१ ॥ ममकान्तच्छलेनैवत्वयाऽगत्यदुरात्मवन् ॥ नाशितंधर्ममेवाग्र्यंपातिव्रत्यमनुत्तमम्
॥ ५२ ॥ सुस्वरंरुदितंकृत्वाममजन्मत्वयाहृतम् ॥ पश्यमेबलमत्रैवशापंदास्येसुदारुणम् ॥ ५३ ॥ एवंसम्भाषमाणातंशप्तुकामातुगोभिलम्

CC-0. In Public Domain. Digitization by eGangotri

॥ ६४ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेसुकलाचरित्रेएकोनपञ्चाशत्तमोऽध्यायः ॥ ४९ ॥ सुकलोवाच ॥ तस्यास्तुवचनंश्रुत्वागोभिलो
वाक्यमब्रवीत् ॥ भवतीशप्तुकामासिकस्मान्मेकारणंवद ॥ १ ॥ केनदोषेणलिप्तोऽस्मियस्मात्त्वशप्तुमुद्यता ॥ गोभिलोनामदैत्योऽस्मिपौलस्त्य
स्यभटःशुभे ॥ २ ॥ दैत्याचारेणवर्तामिजानेविद्यामनुत्तमाम् ॥ वेदशास्त्रार्थवेत्तास्मिकलासुनिपुणःपुनः ॥ ३ ॥ एवंसर्वंविजानामिदैत्याचारंश्रृणु
ष्वमे ॥ परस्वंपरदारांश्चबलाद्भुञ्जामिनान्यथा ॥४॥ वयंदैत्याःसमाकर्ण्यदैत्याचारेणसाम्प्रतम् ॥ वर्त्तामोज्ञातिभावेनसत्यंसत्यंवदाम्यहम् ॥ ५ ॥
ब्राह्मणानांहिच्छिद्राणिविपश्यामोदिनेदिने ॥ तेषांहितपसोनाशंविघ्नैःकुर्मोनसंशयः ॥ ६ ॥ छिद्रंप्राप्यवयंदेविनाशयामोनसंशयः ॥ ब्राह्मणान्छ्रू
यतांभद्रेदेवयज्ञंवरानने ॥ ७ ॥ नाशयामोवयंयज्ञान्धर्मयज्ञंनसंशयः ॥ सुब्राह्मणान्परित्यज्यदेवंनारायणंप्रभुम् ॥ ८ ॥ पतिव्रतांमहाभा
गांसुमतिंभर्तृतत्पराम् ॥ दूरेणापिपरित्यज्यतिष्ठामोनात्रसंशयः ॥ ९ ॥ तेजोदेविसुविप्रस्यहरेश्चैवमहात्मनः ॥ नार्याःपतिव्रतायाश्चसोढुंदै
त्याश्चनक्षमाः ॥ १० ॥ पतिव्रताभयेनापिविष्णोःसुब्राह्मणस्यच ॥ नश्यन्तिदानवाःसर्वेदूरंराक्षसपुङ्गवाः ॥ ११ ॥ अहंदानवधर्मेणवि
चरामिमहीतलम् ॥ कस्मात्त्वंशप्तुकामासिममदोषोविचार्यताम् ॥ १२ ॥ पद्मावत्युवाच ॥ ममधर्मःसुकायश्चत्वयैवपरिनाशितः ॥ अहंप
तिव्रतासाध्वीपतिकामातपस्विनी ॥ १३ ॥ स्वमार्गेसंस्थितापापमाययापरिनाशिता ॥ तस्मात्त्वामप्यहंदुष्टआधक्ष्यामिनसंशयः ॥ १४ ॥
गोभिलउवाच ॥ धर्ममेवप्रवक्ष्यामिभवतीयदिमन्यते ॥ अग्निचिद्ब्राह्मणस्यापिश्रूयतांनृपनन्दिनि ॥ १५ ॥ जुह्वन्देवंद्विकालंयोनत्यजेद
ग्निमन्दिरम् ॥ सचाग्निहोत्रीभवतियजत्येवदिनेदिने ॥ १६ ॥ अन्यच्चैवंप्रवक्ष्यामिभृत्यधर्मंवरानने ॥ मनसाकर्मणावाचाविशुद्धोयोऽपिनित्य
शः ॥१७॥ नित्यमादेशकारीयःपश्चात्तिष्ठतिचाग्रतः ॥ सभृत्यःकथ्यतेदेविपुण्यभागीनसंशयः ॥ १८ ॥ यःपुत्रोगुणवाञ्ज्ञातापितरंपालयेच्छुभः ॥
मातरंचविशेषेणमनसाकायकर्मभिः ॥ १९ ॥ तस्यभागीरथीस्नानमहन्यहनिजायते ॥ अन्यथाकुरुतेयोहिसपापीस्यान्नसंशयः ॥ २० ॥ अन्यच्चै
वंप्रवक्ष्यामिपतिव्रतमनुत्तमम् ॥ वाचासुमनसाचैवकर्मणाश्रृणुभामिनि ॥ २१ ॥ शुश्रूषांकुरुतेयाहिभर्तुश्चैवदिनेदिने ॥ तुष्टेभर्त्तरियाप्रीतानत्यजेत्क्रो
धंनपुनः ॥ २२ ॥ तस्यदोषंनगृह्णातिताडितातुष्यतेपुनः ॥ भर्त्तुःकर्मसुसर्वेषुपुरतस्तिष्ठतेसदा ॥ २३ ॥ साचापिकथ्यतेनारीपतिव्रतपरायणा ॥
पतितोऽपिपितापुत्रैर्बहुदोषसमन्वितः ॥ २४ ॥ कस्मादपिचनत्याज्यःकुष्ठितःक्षुधितोऽपिवा ॥ एवंपुत्राःशुश्रूषन्तिपितरंमातरंकिल ॥ २५ ॥ तेया
न्तिपरमंलोकंतद्विष्णोःपरमंपदम् ॥ एवंहिस्वामिनंयेवैउपाचरन्तिभृत्यकाः ॥ २६ ॥ पत्युर्लोकंप्रयान्त्येतेप्रसादात्स्वामिनस्तदा ॥ अग्निंनैवत्यजे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विप्रोब्रह्मलोकंप्रयातिसः ॥२७॥ अग्नित्यागकरोविप्रोवृषलीपतिरुच्यते ॥ स्वामिद्रोहीभवेद्भृत्यःस्वामित्यागान्नसंशयः ॥२८॥ अग्निंचपितरंचैवन त्यजेत्स्वामिनंशुभे ॥ सदाविप्रःसुतोभृत्यःसत्यंसत्यंवदाम्यहम् ॥ २९ ॥ परित्यज्यप्रगच्छन्तितेयान्तिनरकार्णवम् ॥ पतितंव्याधितंदेविविकलंकु ष्ठिनंतथा ॥३०॥ सर्वकर्मविहीनंचगतवित्तादिसञ्चयम् ॥ भर्तारंनत्यजेन्नारीयदिश्रेयइहेच्छति ॥३१॥ त्यक्त्वाकान्तंव्रजेन्नारीअन्यत्कार्यमिहेच्छति ॥ सामतापुंश्चलीलोकेसर्वधर्मबहिष्कृता ॥ ३२ ॥ गतेभर्तरियाग्राम्यंभोगंशृङ्गारमेवच ॥ लौल्याच्चकुरुतेनारीपुंश्चलीवदतेजनः ॥ ३३ ॥ एवंधर्मं विजानामिवेदशास्त्रैश्चसंमतम् ॥ दानवाराक्षसाःप्रेताधात्रासृष्टायदादितः ॥३४॥ तत्रेहकारणंसर्वंप्रवक्ष्यामिनसंशयः ॥ ब्राह्मणादानवाश्चैवपिशाचा श्चैवराक्षसाः ॥ ३५ ॥ धर्मार्थंसकलंप्रोक्तमधीतंतैस्तुसुन्दरि ॥ विन्दन्तिसकलंसर्वेआचरन्तिनदानवाः ॥ ३६ ॥ विधिहीनंप्रकुर्वन्तिदानवाज्ञानव र्जिताः ॥ अन्यायेनव्रजन्त्येतेमानवाविधिवर्जिताः ॥ ३७ ॥ तेषांशासनहेत्वर्थंकृताएतेऽपिनान्यथा ॥ विधिहीनंप्रकुर्वन्तियेहिधर्मंनराधमाः॥३८॥ तान्वयंशासयामोवैदण्डेनमहताकिल ॥ भवत्यादारुणंकर्मकृतमेवसुनिर्घृणम् ॥ ३९ ॥ गार्हस्थ्यंचपरित्यज्यअत्रायाताकिमर्थतः ॥ वदस्येवंमुखे नापिअहंहिपतिदेवता ॥ ४० ॥ कर्मणानास्तितद्दृष्टंपतिदैवत्यमेवते ॥ भर्तारंतंपरित्यज्यकिमर्थंत्वमिहागता ॥४१॥ शृङ्गारंभूषणंवेषंकृत्वातिष्ठसिनि र्घृणा ॥ किमर्थंहिकृतंपापेकस्यहेतोर्वदस्वमे ॥४२॥ निःशङ्कावर्त्तसेचापिप्रमत्तागिरिकानने ॥ मयात्वंसाधितापापदण्डेनमहताशृणु ॥४३॥ अधर्म चारिणीदुष्टापतिंत्यक्त्वासमागता ॥ कास्तेतत्पतिदेवत्वंदर्शयत्वंममाग्रतः ॥४४॥ भवतीपुंश्चलीनाममयात्यक्तःस्वकःपतिः ॥ पृथक्छय्यायदानारी तदासापुंश्चलीमता ॥४५॥ योजनानांशतैकस्यसोऽन्तरेणप्रवर्त्तते॥कास्तितेपतिदैवत्यंपुंश्चल्याचारचारिणी ॥४६॥ निर्लज्जेनिर्घृणेदुष्टेकिंमेवदसिसंमु खी ॥ तपसःकास्तितेभावःक्वतेजोबलमेवच ॥ ४७ ॥ दर्शयस्वममाद्यैवबलवीर्यपराक्रमम् ॥ ४८ ॥ पद्मावत्युवाच ॥ स्नेहेनापिसमानीताश्रूयता मसुराधम ॥ भर्तुर्गेहादहंपित्राकास्तेतत्रचपातकम् ॥ ४९ ॥ नैवकामान्नलोभाच्चनमोहान्नचमत्सरात् ॥ आगताऽहंपतिंत्यक्त्वापतिभावेनसंस्थिता ॥ ५० ॥ भर्तृरूपच्छलेनापित्वयैवपरिवञ्चिता ॥ भवन्तंमाथुरंज्ञात्वागताऽहंसम्मुखंतव ॥ ५१ ॥ मायाविनंयदाजानेत्वामेवंदानवाधम ॥ ए केनहुङ्कृतेनैवभस्मीभूतंकरोम्यहम् ॥ ५२ ॥ गोभिलउवाच ॥ चक्षुर्हीनानपश्यन्तिमानवाःशृणुसाम्प्रतम् ॥ धर्मनेत्रविहीनात्वंकथंजानासिमामिह ॥ ५३ ॥ यदातेभावउत्पन्नःपितुर्गेहंप्रतिशृणु ॥ पतिध्यानंपरित्यज्यमुक्ताध्यानेनत्वंतदा ॥ ५४ ॥ ज्ञाननेत्रंतदानष्टंस्फुटंचहृदयेतव ॥ कथंमांत्वंवि जानासिज्ञानचक्षुर्हताभुवि ॥ ५५ ॥ कस्यामातापिताभ्राताकस्याःस्वजनबान्धवाः ॥ सर्वस्थानेपतिर्ह्येकोभार्यायास्तुनसंशयः ॥ ५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्युक्त्वाहिप्रहस्यैवगोभिलोदानवाधमः ॥ नभयंविद्यतेतेऽद्यममापिशृणुपुंश्चलि ॥ ५७ ॥ किंभवेत्तवशापेनवृथैवपरिकम्पसे ॥ ममगेहंसमाश्रित्य
भुङ्क्ष्वभोगान्मनोऽनुगान् ॥ ५८ ॥ पद्मावत्युवाच ॥ गच्छपापसमाचारकिंत्वंवदसिनिर्घृणः ॥ सतीभावेनसंस्थास्मिपतिव्रतपरायणा ॥ ५९ ॥
धक्ष्यामित्वांमहापापयद्येवंतुवदिष्यसि ॥ एवमुक्त्वातथैकान्तेनिषसादमहीतले ॥ ६० ॥ दुःखेनमहताविष्टांतामुवाचसगोभिलः ॥ तवोदरेमया
न्यस्तंस्ववीर्यंसुकृतंशुभे ॥ ६१ ॥ तस्मादुत्पत्स्यतेपुत्रस्त्रैलोक्यक्षोभकारकः ॥ एवमुक्त्वाजगामाथगोभिलोदानवस्तदा ॥ ६२ ॥ गतेतस्मि
न्दुराचारेदानवेपापचारिणि ॥ दुःखेनमहताविष्टानृपकन्यारुरोदह ॥ ६३ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेसुकलाचरितेपञ्चाशत्तमो
ऽध्यायः ॥ ५० ॥ ब्राह्मण्युवाच ॥ गतेतस्मिन्दुराचारेगोभिलेपापचेतसि ॥ पद्मावतीरुरोदाथदुःखेनमहतान्विता ॥ १ ॥ तस्यास्तुरुदितंश्रुत्वा
सख्यःसर्वाद्विजोत्तम ॥ पप्रच्छुस्तांराजकन्यांताःसर्वाश्चवराननाः ॥ २ ॥ कस्माद्रोदिषिभद्रंतेकथयस्वहिचेष्टितम् ॥ क्वगतोऽसौमहाराजोमाथुरा
धिपतिस्तव ॥ ३ ॥ येनत्वंहिसमाहूताप्रियेत्युक्त्वावदस्वनः ॥ ताउवाचसुदुःखेनरोदमानापुनःपुनः ॥४॥ तयाआवेदितंसर्वंयज्जातंदोषसम्भवम् ॥
ताभिर्नीतापितुर्गेहंवेपमानासुदुःखिता ॥ ५ ॥ मातुःसमक्षंतस्यास्तुआचचक्षुस्तदास्त्रियः ॥ समाकर्ण्यततोदेवीगतासाभर्तृमन्दिरम् ॥ ६ ॥
भर्तारंश्रावयामाससुतावृत्तान्तमेवहि ॥ समाकर्ण्यततोराजामहादुःखीव्यजायत ॥ ७॥ यानाच्छादनकंदत्त्वापरिवारसमन्विताम् ॥ मथुरांप्रेषयामा
सगतासाप्रियमन्दिरम् ॥ ८ ॥ सुतादोषंसमाच्छाद्यपितामाताद्विजोत्तम ॥ उग्रसेनस्तुधर्मात्मापद्मावतींसमागताम् ॥ ९॥सदृष्ट्वासुमुदेचाशुउवाचेदं
वचःपुनः॥त्वयाविनानशक्तोऽस्मिजीवितुंहिवरानने ॥१०॥बहुप्रभासिमेप्रीतागुणशीलैस्तुसर्वदा॥भक्त्यासत्येनतेकान्तेपतिदैवत्यकैर्गुणैः॥११॥समा
भाष्यप्रियांभार्यांपद्मावतींनरेश्वरः ॥तयासार्धंसवैरेमेउग्रसेनोनृपोत्तमः ॥१२॥ ववृधेदारुणोगर्भःसर्वलोकभयप्रदः ॥ पद्मावतीविजानातितस्यगर्भस्य
कारणम् ॥ १३ ॥ स्वोदरेवर्द्धमानस्यचिन्तयन्तीदिवानिशम् ॥ अनेनकिंमुजातेनलोकनाशकरेणवै ॥१४॥ अनेनापिनमेकार्यंदुष्टपुत्रेणसाम्प्रतम् ॥
ओषधींपृच्छतेसातुगर्भपातस्यसर्वतः ॥ १५ ॥ नारीमहौषधींसाहिविन्दन्तीचदिनेदिने ॥ गर्भस्यपातनायैवउपायाबहुशःकृताः ॥ १६ ॥ ववृधे
दारुणोगर्भःसर्वलोकभयङ्करः ॥ तामुवाचततोगर्भःपद्मावतींचमातरम् ॥ १७ ॥ कस्मात्त्वंव्यथसेमातरोषधीभिर्दिनेदिने ॥ पुण्येनवर्द्धतेचायुःपापेना
ल्पंतुजीवितम् ॥ १८ ॥ आत्मकर्मविपाकेनजीवन्तिचम्रियन्तिच ॥ आमगर्भाःप्रयान्त्यन्येअपक्वास्तुमहीतले ॥ १९ ॥ जातमात्राम्रियन्तेऽन्ये
कतितेयौवनान्विताः ॥ बालावृद्धाश्चतरुणाआयुषोवशतांगताः ॥ २० ॥ सर्वेकर्मविपाकेनजीवन्तिचम्रियन्तिच ॥ ओषध्योमन्त्रदेवाश्चनिमित्ताः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्युर्नसंशयः ॥ २१ ॥ मामेवहिनजानासिभवतीयादृशोह्यहम् ॥ दृष्टःश्रुतस्त्वयापूर्वंकालनेमिमहाबलः ॥ २२ ॥ दानवानांमहावीर्यस्त्रैलोक्यस्यभ
यप्रदः ॥ देवासुरेमहायुद्धेहतोऽहंविष्णुनापुरा ॥ २३ ॥ साधयितुंचतद्वैरमागतोऽस्मितवोदरम् ॥ साहसंचश्रमंमातर्माकुरुष्वदिनेदिने ॥ २४ ॥ एव
मुक्त्वाद्विजश्रेष्ठमातरंविररामसः ॥ मातोद्यमंपरित्यज्यमहादुःखादभूत्तदा ॥ २५ ॥ दशाब्दाश्चगतायावत्तावद्वृद्धिमवाप्तवान् ॥ पश्चाज्जज्ञेमहातेजाः
कंसोऽभूत्समहाबलः ॥२६॥ येनसन्त्रासितालोकास्त्रैलोक्यस्यनिवासिनः ॥ योहतोवासुदेवेनगतोमोक्षंनसंशयः ॥२७॥ एवंश्रुतंमयाकान्तभविष्यंतु
भविष्यति ॥ पुराणेष्वेवसर्वेषुनिश्चितंकथितंतव ॥२८॥ पितृगेहेस्थिताकन्यानाशमेवंप्रयातिसा॥गृहावासायमेकान्तकन्यामोहंनकारयेत् ॥ २९ ॥
इमांदुष्टांमहापापांपरित्यज्यस्थिरोभव ॥ प्राप्तव्यंतुमहापापंदुःखंदारुणमेवच ॥३०॥ लोकेश्रेयस्करंकान्ततद्भुङ्क्ष्वत्वंमयासह ॥३१॥ शूकर्युवाच ॥
एतद्वाक्यंसुमन्त्रंतुश्रुत्वासहिद्विजोत्तमः ॥ त्यागेमतिंचकारासौसमाहूताह्यहंतदा ॥३२॥ सकलंवस्त्रशृङ्गारंममदत्तंशुभेशृणु॥तवैवदुर्नयैर्विप्रःशिवशर्मा
द्विजोत्तमः ॥ ३३ ॥ गतोवैमतिमान्दुष्टेकुलदुष्टप्रचारिणि ॥ यत्रतेतिष्ठतेभर्तातत्रगच्छनसंशयः ॥ ३४ ॥ तवयद्रोचतेस्थानंयथादिष्टंतथाकुरु ॥ एव
मुक्त्वामहाभागेपितृमातृकुटुम्बकैः ॥ ३५ ॥ परित्यक्तागताशीघ्रंनिर्लज्जाहंवरानने ॥ नलभाम्यहमेवापिवासस्थानंसुखंशुभे ॥ ३६ ॥ भर्त्सयन्ति
चमांलोकाःपुंश्चलीयंसमागता ॥ अटमानागतादेशात्कुलमानेनवर्जिता ॥ ३७ ॥ देशेगुर्जरकेपुण्येसौराष्ट्रेशिवमन्दिरे ॥ वनस्थलेतिविख्यातंनगरं
वृद्धिसङ्कुलम् ॥ ३८ ॥ अतीवपीडितादेविक्षुधयाहंतदाशृणु ॥ कर्परंहिकरेगृह्यभिक्षार्थमुपचक्रमे ॥ ३९ ॥ गृहिणांद्वारदेशेषुप्रविशामिसुदुःखिता ॥
ममरूपंविपश्यन्तिलोकाःकुत्सन्तिभामिनि ॥ ४० ॥ नददतेचमेभिक्षांपापाचेयंसमागता ॥ एवंदुःखसमाहारादारिद्यपरिपीडिता ॥ ४१ ॥ अट
न्त्याचमयादृष्टंगृहमेकमनुत्तमम् ॥ तुङ्गप्राकारसंवेष्टंवेदशालासमन्वितम् ॥४२॥ वेदध्वनिसमाकीर्णंबहुविप्रसमाकुलम् ॥धनधान्यसमाकीर्णंदासीदा
सैरलङ्कृतम् ॥ ४३ ॥ प्रविवेशगृहंरम्यंलक्ष्मीमुदितमेवतत् ॥ तद्गृहंसर्वतोभद्रंतस्यैवशिवशर्मणः ॥ ४४ ॥ भिक्षांदेहीत्युवाचाथसुदेवादुःखपीडिता ॥
शिवशर्माथशुश्रावभिक्षाशब्दंद्विजोत्तमः ॥ ४५ ॥ मङ्गलांनामवैभार्यांलक्ष्मीरूपांवराननाम् ॥ तांहसन्प्राहधर्मात्माशिवशर्मामहामतिः ॥ ४६ ॥
इयंहिदुर्बलाप्राप्ताभिक्षार्थंद्वारमागता ॥ समाहूयप्रियेचैनांदेहित्वंभोजनंशुभे ॥ ४७ ॥ कृपयापरयाऽऽविष्टाज्ञात्वामांतुसमागताम् ॥ प्रोवाचमङ्गला
कान्तंदास्यामिप्रियभोजनम् ॥ ४८ ॥ एवमुक्त्वाचभर्तारंमङ्गलामङ्गलान्विता ॥ पुनर्मांभोजयामासमिष्टान्नेनसुदुर्बलाम् ॥ ४९ ॥ मामुवाचसधर्मा
त्माशिवशर्मामहामुनिः ॥ कात्वमत्रसमायाताकस्यवाश्रमसेजगत् ॥ ५० ॥ केनकार्येणसर्वत्रकथयस्वममाग्रतः ॥ एवमाकर्ण्यतद्वाक्यंभर्तुश्चैव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महात्मनः ॥९१॥ स्वरेणलक्षितःकान्तोमयावैपापयातदा ॥ व्रीडयाधोमुखीजाताहृष्टोभर्तायदामया ॥९२॥ मङ्गलाचारुसर्वाङ्गीभर्तारमिदमब्रवीत्॥ काचेयंहिसमाचक्ष्वत्वांदृष्ट्वाहिविलज्जति ॥ ९३ ॥ कथयस्वप्रसादेनकाचएषाभविष्यति ॥ ९४ ॥ इति श्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेसुकलाचरित्रएकपञ्चाशत्तमोऽध्यायः ॥ ९१ ॥ शिवशर्मोवाच ॥ मङ्गलेश्रूयतांवाक्यंयदिपृच्छसिसाम्प्रतम् ॥ यदर्थंहित्वयापृष्टंतन्निबोधवरानने ॥१॥ इयंहिसाम्प्रतंप्राप्तावराकीभिक्षुरूपिणी ॥ वसुदत्तस्यविप्रस्यसुतेयंचारुलोचने ॥ २ ॥ सुदेवानामभद्रेयंममजायाप्रियासदा ॥ केनापिकारणेनैवदेशंत्यक्त्वासमागता ॥ ३ ॥ ममदुःखेनदग्धेयंवियोगेनवरानने ॥ मांज्ञात्वातुसमायाताभिक्षुरूपेणतेगृहम् ॥ ४ ॥ एवंज्ञात्वात्वयाभद्रेआतिथ्यंपरिशोभितम् ॥ कर्त्तव्यंनचसन्देहइच्छन्त्याममसुप्रियम् ॥ ५ ॥ भर्तुर्वाक्यंनिशम्यैवमङ्गलापतिदेवता ॥ हर्षेणमहताविष्टास्वयमेवसुमङ्गला ॥ ६ ॥ स्नानाच्छादनभोज्यंचममचक्रेवरानने ॥ रत्नकाञ्चनयुक्तैश्चाभरणैश्चपतिव्रता ॥ ७ ॥ अहंहिभूषिताभद्रेतयैवपतिकाम्यया ॥ तयाहंभूषितादेविमानस्नानैश्चभोजनैः ॥८॥ भर्त्राहंमानितादेविजातंदुःखमनन्तकम् ॥ ममोरसिमहातीव्रंसर्वप्राणिविनाशनम् ॥९॥ तस्यामानोमयादृष्टोदुःखमात्मगतंतथा॥ चिन्तामेदारुणाजाताययाप्राणाव्रजन्तिमे ॥१०॥ कदापिवचनंदत्तंनमयापापयाशुभम् ॥ अस्यैवविप्रवर्यस्यआचरन्त्याचदुष्कृतम् ॥ ११ ॥ पादप्रक्षालनंनैवअङ्गसंवाहनंनहि ॥ एकान्तंनमयादत्तंतस्यैवहिमहात्मनः ॥ १२ ॥ सम्भाषांकथमस्यैवकरिष्येपापनिश्चया ॥ रात्रौचैवतदातत्रपतितादुःखसागरे ॥१३॥ एवंहिचिन्तमानायाःस्फुटितंहृदयंमम ॥ गताःप्राणास्तदाकायंपरित्यज्यवरानने ॥१४॥ तत्रदूताःसमायाताधर्मराजस्यवैतदा ॥ वीराश्चदारुणाःक्रूरागदाचक्रासिधारिणः ॥१५॥ तैस्तुबद्धामहाभागेशृङ्खलैर्दृढबन्धनैः ॥ नीतायमपुरंतैस्तुरुदमानासुदुःखिता ॥१६॥ मुद्गरैस्ताडयमानाहंदुर्गमार्गेणपीडिता ॥ भर्त्स्यमानायमस्याग्रेतैस्तत्राहंप्रवेशिता ॥१७॥ दृष्टाहंयमराजेनसक्रोधेनमहात्मना ॥ अङ्गारसञ्चयेक्षिप्ताक्षितानरकसञ्चये ॥ १८ ॥ लोहस्यपुरुषंकृत्वाअग्निनापरितापितः ॥ ममोरसिसमुत्क्षिप्तोनिजभर्तुश्चवञ्चनात् ॥ १९ ॥ नानापीडातिसन्तप्तानरकाग्निप्रतापिता ॥ तैलद्रोण्यांपरिक्षिप्ताकरम्भवालुकोपरि ॥ २० ॥ असिपत्रैश्चसंच्छिन्नाजलयन्त्रेणवाहिता ॥ कूटशाल्मलिवृक्षेषुक्षिप्तातेनमहात्मना ॥ २१ ॥ पूयशोणितविष्ठायांपतिताकृमिसङ्कुले ॥ सर्वेषुनरकेष्वेवंक्षिप्ताहंनपनन्दिनि ॥ २२ ॥ पीडायुक्तेषुतीव्रेषुतेनैवापिमहात्मना ॥ करपत्रैःपाटिताहंशक्तिभिस्ताडिताभृशम् ॥ २३ ॥ अन्येष्वेवनरकेषुपातितानपनन्दिनि ॥ योनिगर्तेषुक्षिप्तास्मिपतितादुःखसङ्कटे ॥ २४ ॥ धर्मराजेनतेनाहंनरकेषुनिपातिता॥ वल्गुलीयोनिमासाद्यभुक्तंदुःखंसुदारुणम् ॥२५॥ गताहंक्रौष्टुकींयोनिंशुनीयोनिंपुनर्गता ॥ सकुक्कुटींचमार्जारीमाखुयोनिंगताह्यहम् ॥२६॥ एवंयो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निर्विशेषेषुपापयोनिषुतेनच ॥ क्षिप्तास्मिधर्मराजेनपीडितासर्वयोनिषु ॥ २७ ॥ तेनैवाहंकृताभूमौशूकरीनृपनन्दिनि ॥ तवहस्तेमहाभागेसन्तितीर्थान्यनेकशः ॥ २८ ॥ तेनोदकेनसिक्तास्मित्वयैववरवर्णिनि ॥ ममपापंगतंदेविप्रसादात्तवसुन्दरि ॥ २९ ॥ तवैवतेजःपुण्येनजातंज्ञानंवरानने ॥ इदानीमांसमुद्धरस्वपतितांनरकसङ्कटे ॥ ३० ॥ यदानोद्धरसेदेविपुनर्यास्यामिदारुणम् ॥ नरकंचमहाभागेत्राहिमांदुःखभागिनीम् ॥ ३१ ॥ गताहंपापभावेनदीनाहंचनिराश्रया ॥ ३२ ॥ सुदेवोवाच ॥ किंकृतंहिमयाभद्रेसुकृतंपुण्यसम्भवम् ॥ येनाहमुद्धरेत्वांवैतन्मेत्वंवदसाम्प्रतम् ॥ ३३ ॥ शूकर्युवाच ॥ अयंराजामहाभागइक्ष्वाकुर्मनुनन्दनः ॥ विष्णुरेषमहाप्राज्ञोभवतीश्रीर्हिनान्यथा ॥ ३४ ॥ पतिव्रतामहाभागापतिव्रतपरायणा ॥ त्वंसतीसर्वदाभद्रेसर्वतीर्थमयीप्रिया ॥३५॥ देविसर्वमयीनित्यंसर्वदेवमयीसदा ॥ महापतिव्रतालोकएकात्वंनृपतेःप्रिया ॥ ३६ ॥ ययाशुश्रूषितोभर्ताभवत्याहिअहर्निशम् ॥ एकस्यदिवसस्यापिपुण्यंदेहिवरानने ॥३७॥ पतिशुश्रूषणस्यापियदिमेकुरुषेप्रियम् ॥ ममपातापितात्वंवैत्वंमेगुरुःसनातनः ॥ ३८ ॥ अहंपापादुराचाराअसत्याज्ञानवर्जिता ॥ मामुद्धरमहाभागेभीताहंयमताडनैः ॥ ३९ ॥ सुकलोवाच ॥ एवंश्रुत्वातयाप्रोक्तंसमालोक्यनृपंतदा ॥ किंकरोमिमहाराजएषकिंवदतेपशुः ॥ ४० ॥ इक्ष्वाकुरुवाच ॥ एनांदुःखांवराकींवैपापयोनिंगतांशुभे ॥ समुद्धरस्वपुण्यैस्त्वंमहच्छ्रेयोभविष्यति ॥ ४१ ॥ एवमुक्तावरानारीसुदेवाचारुमङ्गला ॥ उवाचैकाब्दपुण्यंतेमयादत्तंवरानने ॥ ४२ ॥ एवमुक्तेनवाक्येनतयादेव्याहितत्क्षणात् ॥ रूपयौवनसम्पन्नादिव्यमालाविभूषिता ॥ ४३ ॥ दिव्यदेहाचसम्भूतातेजोज्वालासमावृता ॥ सर्वभूषणशोभाढ्यानानारत्नैश्चशोभिता ॥ ४४ ॥ सञ्जातादिव्यरूपासादिव्यगन्धानुलेपना ॥ दिव्यंविमानमारूढाअन्तरिक्षंगतासती ॥ ४५ ॥ तामुवाचततोराज्ञींप्रणतानतकन्धरा ॥ स्वस्त्यस्तुतेमहाभागेप्रसादात्तवसुन्दरि ॥ ४६ ॥ व्रजामिपातकान्मुक्तास्वर्गंपुण्यतमंशुभम् ॥ प्रणम्यैवंगतास्वर्गंसुदेवाशृणुसत्तम ॥ ४७ ॥ एतत्तेसर्वमाख्यातंसुकलायानिवेदितम् ॥ ४८ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेसुकलाचरित्रेसुदेवास्वर्गारोहणंनामद्विपञ्चाशत्तमोऽध्यायः ॥५२॥ सुकलोवाच ॥ एवंधर्मंश्रुतंपूर्वंपुराणेषुतदामया ॥ पतिहीनाकथंभोगंकरिष्येपापनिश्चया ॥१॥ कान्तेनतुविनातेनजीवंकायेनधारये ॥ २ ॥ विष्णुरुवाच॥ एवमुक्त्वापरंधर्मंपतिव्रतमनुत्तमम् ॥ तास्तुसख्योवरानार्योहर्षेणमहतान्विताः ॥ ३ ॥ श्रुत्वाधर्मंपरंपुण्यंनारीणांगतिदायकम् ॥ स्तुवन्तितांमहाभागांसुकलांधर्मवत्सलाम् ॥ ४ ॥ ब्राह्मणाश्चसुराःसर्वेपुण्यस्त्रियोनरोत्तम ॥ तस्याध्यानंप्रकुर्वन्तिपतिकामप्रभावतः ॥ ५ ॥ अत्यर्थंदृढतामिन्द्रःसुविचिन्त्यसुरेश्वरः ॥ सुकलायाःपरंभावंसुविचार्यामरेश्वरः ॥ ६ ॥ चालयेधैर्यमस्याश्चपतिस्नेहंनसंशयः ॥ सस्मारमन्मथंदेवंत्वरमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णःसुराधिपः ॥७॥ पुष्पचापंससङ्गृह्यमीनकेतुःसमागतः ॥ प्रिययाचतयायुक्तोरत्याहृष्टोमहाबलः ॥ ८ ॥ बद्धाञ्जलिपुटोभूत्वासहस्राक्षमुवाचसः ॥
कस्मादहंत्वयानाथअधुनासंस्मृतोविभो ॥ आदेशोदीयतांमेऽद्यसर्वभावेनमानद ॥ ९ ॥ इन्द्रउवाच ॥ सुकलेयंमहाभागापतिव्रतपरायणा ॥ शृ
णुष्वकामदेवत्वंकुरुसाहाय्यमुत्तमम् ॥ १० ॥ निष्कर्षयमहाभागांसुकलांपुण्यमङ्गलाम् ॥ तच्छ्रुत्वावचनंतस्यशक्रस्यतमथाब्रवीत् ॥ ११ ॥ एवम
स्तुसहस्राक्षकरिष्यामिनसंशयः ॥ साहाय्यंदेवदेवेशतवकौतुककारणात् ॥ १२ ॥ एवमुक्त्वामहातेजाःकन्दर्पोमुनिदुर्जयः ॥ देवाञ्जेतुंसमर्थोऽहंसमु
नीनृषिसत्तमान् ॥ १३ ॥ किंपुनःकामिनींदेवयस्याअङ्गेनवैबलम् ॥ कामिनीनामहंदेवअङ्गेषुनिवसाम्यहम् ॥ १४ ॥ भालेकुचेषुनेत्रेषुकचाग्रेषुचस
र्वदा ॥ नाभौकट्यांपृष्ठदेशेजघनेयोनिमण्डले ॥ १५ ॥ अधरेदन्तभागेषुकक्षायांहिनसंशयः ॥ अङ्गेष्वेवंप्रत्यङ्गेषुसर्वत्रनिवसाम्यहम् ॥ १६ ॥ नारी
ममगृहंदेवसदातत्रवसाम्यहम् ॥ तत्रस्थःपुरुषान्सर्वान्मारयामिनसंशयः ॥ १७ ॥ स्वभावेनाबलादेवसन्तप्तामममार्गणैः ॥ पितरंमातरंदृष्ट्वाअन्यंस्व
जनबान्धवम् ॥ १८ ॥ सुरूपंसुगुणंदेवममबाणाहतासती ॥ चलतेनात्रसन्देहोविपाकंनैवचिन्तयेत् ॥ १९ ॥ योनिःस्पन्देतनारीणांस्तनाग्रौचसुरे
श्वर ॥ नास्तिधैर्यंसुरेशानसुकलांनाशयाम्यहम् ॥ २० ॥ इन्द्रउवाच ॥ पुरुषोऽहंभविष्यामिरूपवान्गुणवान्धनी ॥ कौतुकार्थमिमांनारींचालयामि
मनोभव ॥ २१ ॥ नैवकामान्नसन्त्रासान्नवालोभान्नकारणात् ॥ नवैमोहान्नवैक्रोधात्सत्यंसत्यंरतिप्रिय ॥ २२ ॥ कथंमेदृश्यतेतस्यामहत्सत्यंपतिव्रत
म् ॥ निष्कर्षिष्यइतोगत्वाभवन्मोहोऽत्रकारणम् ॥ २३ ॥ एवंकामंचसन्दिश्यजगामसुरराट्स्वयम् ॥ आत्मविकृतिसम्भूतोरूपवान्गुणवान्स्वयम्
॥ २४ ॥ सर्वाभरणशोभाङ्गःसर्वभोगसमन्वितः ॥ भोगलीलासमाकीर्णःसर्वदौदार्यसंयुतः ॥ २५ ॥ यत्रसातिष्ठतेदेवीकृकलस्यप्रियानृप ॥ आत्म
लीलांस्वरूपंचगुणंभावंप्रदर्शयेत् ॥ २६ ॥ नैवपश्यतिसातंतुपुरुषंरूपसम्पदम् ॥ यत्रयत्रव्रजेत्साहितत्रतांपश्यतेनृप ॥ २७ ॥ साभिलाषेणमनसाता
मेवंपरिपश्यति॥कामचेष्टांसहस्राक्षोऽदर्शयत्सर्वभावकैः ॥ २८ ॥ चतुष्पथेपथेतीर्थेयत्रदेवीप्रयातिसा ॥ तत्रतत्रसहस्राक्षस्तामेवपरिपश्यति ॥ २९ ॥
इन्द्रेणप्रेषितादूतीसुकलांप्रतिसागता ॥ सुकलांसुमहाभागांप्रत्युवाचप्रहस्यवै ॥ ३० ॥ अहोसत्यमहोधैर्यमहोकान्तिरहोक्षमा ॥ अस्यारूपेणसं
सारेनास्तिनारीवरानना ॥ ३१ ॥ कात्वंभवसिकल्याणिकस्यभार्याभविष्यसि ॥ यस्यत्वंसगुणाभार्यासधन्यःपुण्यभाग्भुवि ॥ ३२ ॥ तस्यास्तु
वचनंश्रुत्वाताम्रुवाचमनस्विनी ॥ वैश्यजात्यांसमुत्पन्नोधर्मात्मासत्यवत्सलः ॥ ३३ ॥ तस्याहंहिप्रियाभार्यासत्यसन्धस्यधीमतः ॥ कृकलस्यापि
वैश्यस्यसत्यमेववदामिते ॥ ३४ ॥ ममभर्तासधर्मात्मातीर्थयात्रांगतःसुधीः ॥ तस्मिन्गतेमहाभागेममभर्तरिसम्प्रति ॥ ३५ ॥ अतिक्रान्ताःशृणु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्वत्वंत्रयश्चैवापिवत्सराः ॥ ततोऽहंदुःखिताजाताविनातेनमहात्मना ॥ ३६ ॥ एतत्तेसर्वमाख्यातमात्मवृत्तान्तमेवत ॥ भवतीपृच्छतेमांकाभवि
ष्यतिवदस्वमे ॥ ३७ ॥ सुकलायावचःश्रुत्वादूत्याआभाषितंपुनः ॥ मामेवंपृच्छसेभद्रेतत्तेसर्वंवदाम्यहम् ॥ ३८ ॥ अहंतवान्तिकंप्राप्ताकार्यार्थंवर
वर्णिनि ॥ श्रूयतामभिधास्यामिश्रुत्वाचवावधार्यताम् ॥ ३९ ॥ गतस्तेनिर्घृणोभर्तात्वांत्यक्त्वातुवरानने ॥ किंकरिष्यसितेनापिप्रियाघातकरेणच
॥ ४० ॥ यस्त्वांत्यक्त्वागतःपापीसाध्व्याचारसमन्विताम् ॥ किंवासतेगतोबालेतत्रजीवतिवैमृतः ॥ ४१ ॥ किंकरिष्यतितेनैवंभवतीखिद्यतेवृ
था ॥ कस्मान्नाशयतेचाङ्गंदिव्यंहेमसमप्रभम् ॥ ४२ ॥ बाल्येवयसिसम्प्राप्तेमानवोनचविन्दति ॥ एकंसुखंमहाभागेबालक्रीडांविनाशुभे ॥ ४३ ॥
वार्द्धकेदुःखसम्प्राप्तिर्जराकायंप्रहिंसयेत् ॥ तारुण्येभुज्यतेभोगःसुखात्सर्वोवरानने ॥ ४४ ॥ यावत्तिष्ठतितारुण्यंतावद्भुञ्जन्तिमानवाः ॥ सुखभोगा
दिकंसर्वंस्वेच्छयारमतेनरः ॥ ४५ ॥ यावत्तिष्ठतितारुण्यतावद्भोगान्प्रभुञ्जते ॥ वयस्यपिगतेभद्रेतारुण्येकिंकरिष्यति ॥ ४६ ॥ सम्प्राप्तेवार्द्धकेदेवि
किंचित्कार्यंनसिध्यति ॥ स्थविरश्चिन्तयेन्नित्यंसुखकार्यंनगच्छति ॥ ४७ ॥ पयस्यपिगतेबालेक्रियतेसेतुबन्धनम् ॥ तादृशोऽयंभवेत्कायस्ता
रुण्येतुगतेशुभे ॥ ४८॥ तस्माद्भुङ्क्ष्वसुखेनापिपिबस्वमधुमाधवीम् ॥ कामबाणादहन्त्यङ्गंतवेमेचारुलोचने ॥ ४९ ॥ अयमेकःसमायातःपुरुषो
रूपवान्गुणी ॥ अयंहिपुरुषव्याघ्रःसर्वज्ञोगुणवान्धनी ॥ ५० ॥ तवार्थेनित्यसंयुक्तःस्नेहेनवरवर्णिनि ॥ ५१ ॥ सुकलोवाच ॥ बाल्यंनास्त्यपिजी
वस्यतारुण्यंनास्तिजीविते ॥ वृद्धत्वंनास्तिचैवास्यस्वयंसिद्धःसुसिद्धिदः ॥ ५२ ॥ अमरोनिर्जरोव्यापीसुसिद्धःसर्ववित्तमः ॥ अकामःकामदो
लोकेआत्मरूपेणवर्तते ॥५३ ॥ यथागेहस्यसंस्थानंतथाकायस्यदृश्यते ॥ यथावार्द्धकिनाकायस्तथासूत्रेणमन्दिरम् ॥ ५४ ॥ अनेककाष्ठसङ्घातैर्ना
नादारुसमुच्चयैः ॥ मृत्तिकयोदकेनापिसमन्तात्परिणामयेत् ॥ ५५ ॥ विलिप्तंलेपकैःकाष्ठंचित्रंभवतिचित्रकैः ॥ प्रथमंरूपमायातिगृहंसूत्रेणसूत्रितम्
॥ ५६ ॥ पुष्णन्तिचस्वयंतत्तुलेपनाद्यैर्दिनेदिने ॥ वायुनादोलितंनित्यंगृहंचमलिनायते ॥ ५७ ॥ मध्यमोवर्ततुतःकालोगृहस्यपरिकथ्यते ॥ रूप
हानिर्भवेत्तस्यगृहस्वामीविलेपयेत् ॥ ५८ ॥ स्वेच्छयाचगृहस्वामीरूपवत्त्वंनयेद्गृहम् ॥ तारुण्यंतस्यगेहस्यदूतिकेपरिकथ्यते ॥ ५९ ॥ काष्ठसङ्घै
श्चजीर्णत्वंबहुकालःप्रयातिसः ॥ स्थानभ्रष्टाःप्रजायन्तेमूलाग्रेप्रचलन्तिते ॥ ६० ॥ नसहेल्लेपनाभारमाधारेणप्रतिष्ठति ॥ एतद्गृहस्यवार्द्धक्यंकथितं
शृणुदूतिके ॥ ६१ ॥ पतमानंगृहंदृष्ट्वागृहस्वामीपरित्यजेत् ॥ गृहमन्यंप्रवेशायप्रयात्येवहिसत्वरम् ॥ ६२ ॥ तथाबाल्यंचतारुण्यंनृणांवृद्धत्वमेवच ॥
सबाल्येबालरूपश्चज्ञानहीनंप्रकारयेत् ॥ ६३ ॥ चित्रयेत्कायमेवापिवस्त्रालङ्कारभूषणैः ॥ लेपनैश्चन्दनैश्चान्यैस्ताम्बूलप्रभवादिभिः ॥ ६४ ॥ काय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तरुणतांयातिअतिरूपोविजायते ॥ वाह्याभ्यन्तरमेवापिरसैःसर्वैःप्रपोषयेत् ॥ ६५ ॥ तेनपोषणभावेनपरिपुष्टःप्रजायते ॥ जायतेमांसवृद्धिस्तुर सैश्चापिनवोत्तमा ॥ ६६ ॥ यान्तिविस्तरतांराजन्नङ्गान्याप्यायितान्यपि ॥ प्रत्यङ्गानिरसैश्चैवस्वंस्वंरूपंप्रयान्तिवै ॥ ६७ ॥ दन्ताधरौस्तनौबाहू कटिपृष्ठमुरूउभे ॥ हस्तपादतलौतद्वद्वृद्धत्वंप्रतिपेदिरे ॥ ६८ ॥ उभाभ्यामपितान्येववृद्धिमायान्तितानिवै॥अङ्गानिरसमांसाभ्यांसुरूपाणिभवन्तिते ॥ ६९ ॥ तैःस्वरूपैर्भवेन्मर्त्योरसबद्धश्चदूतिके ॥ सुरूपःकथ्यतेमर्त्योलोकेकेनप्रियोभवेत् ॥ ७० ॥ विष्ठामूत्रस्यवैकोशःकायएषचदूतिके ॥ अप वित्रशरीरोऽयंसदास्रवतिनिर्घृणः ॥ ७१ ॥ तस्यकिंवर्ण्यतेरूपंजलबुद्बुदवच्छुभे ॥ यावत्पञ्चाशद्वर्षाणितावत्तिष्ठतिवैदृढः ॥ ७२ ॥ पश्चाच्च जायतेहानिस्तस्यैवापिदिनेदिने ॥ दन्ताःशिथिलतांयान्तितथालालायतेमुखम् ॥ ७३ ॥ चक्षुर्भ्यामपिपश्येन्नकर्णाभ्यांनशृणोतिच ॥ गतिं कर्तुंनशक्नोतिहस्तपादैश्चदूतिके ॥ ७४ ॥ अक्षमोजायतेकायोजराकालेनपीडितः ॥ तद्रसःशोषमायातिजराग्नितापशोषितः ॥ ७५ ॥ अक्ष मोजायतेदूतिकेनरूपत्वमिष्यते ॥ यथाजीर्णंगृहंयातिक्षयमेवंनसंशयः ॥ ७६ ॥ तथासंक्षयमायातिवार्द्धकेतुकलेवरम् ॥ ममरूपंसमायातंवर्ण स्यैवंदिनेदिने ॥ ७७ ॥ केनाहंरूपसंयुक्ताकेनरूपत्वमिष्यते ॥ यथाजीर्णंगृहंयातिकेनासौपुरुषोबली ॥ ७८ ॥ यस्यार्थमागतादूतिभवतीकेनशं सति ॥ किमुचैवत्वयादृष्टंममाङ्गंवदसाम्प्रतम् ॥ ७९ ॥ तस्याङ्गादिहहीनंचदूतिनास्त्यधिकंतथा ॥ यथात्वंचतथाऽसौवैतथाहंनात्रसंशयः ॥ ८० ॥ कस्यरूपंनविद्येतरूपवान्नास्तिभूतले ॥ उच्छ्रायाःपतनान्ताश्चनगास्तुगिरयःशुभे ॥ ८१ ॥ कालेनपीडितायान्तितद्वद्भूताश्चनान्यथा ॥ अरूपोरूपवान्दिव्यआत्मासर्वगतःशुचिः ॥ ८२ ॥ स्थावरेष्वेवसर्वेषुजङ्गमेषुचदूतिके ॥ एकोनिवसतेशुद्धोघटेष्वेकंयथोदकम् ॥ ८३ ॥ घटनाशात्प्रयात्येकमेकत्वंत्वंनबुध्यसे ॥ पिण्डनाशादयंचात्माएकरूपोविजायते ॥ ८४ ॥ एकंरूपंमयादृष्टंसंसारेवसतांसदा ॥ एवंवदस्वतंज्ञात्वा यस्यार्थमिहचागता ॥ ८५ ॥ दर्शयस्वअपूर्वंमेयदिभोक्तुमिहेच्छसि ॥ व्याधिनापीड्यमानस्यकफेनापिवृतस्यच ॥ ८६ ॥ अङ्गाद्विचलते शोणःस्थानभ्रष्टोऽभिजायते ॥ अङ्गसन्धिषुसर्वासुपलत्वंचान्तरङ्गतः ॥ ८७ ॥ एकतोनाशमायातिस्वंहिरूपंपरित्यजेत् ॥ विष्ठात्वंजायतेशी घ्रंकृमिभिश्चभवेत्किल ॥ ८८ ॥ तद्वद्दुःखकरंवापिनिजरूपंपरित्यजेत् ॥ श्रूयतांजायतेपश्चात्कृमिदुर्गन्धसङ्कुलम् ॥ ८९ ॥ जायन्तेतत्रवैयूकाः कृमयोवानसंशयः ॥ सकृमिःकुरुतेस्फोटंकण्डूंचपरिदारुणाम् ॥ ९० ॥ व्यथामुत्पादयेद्यूकासर्वाङ्गंपरिचालयेत् ॥ नखाग्रैर्घृष्यमाणासाकण्डूःशा न्ताप्रजायते ॥ ९१ ॥ तद्वत्तैश्चशृणष्वैवक्षुरतस्यनसंशयः ॥ भुनक्त्येवरसान्मर्त्यःसुभक्षान्पिवतेपुनः ॥ ९२ ॥ वायुनातेनप्राणेनपाकस्थानंप्रणीय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ते ॥ यद्भुक्तंप्राणिभिर्दूतिपाकस्थानंगतंपुनः ॥ ९३ ॥ सर्वंतत्पिहितंतत्रवायुर्वैपातयेन्मलम् ॥ सारभूतोरसस्तत्रतद्रक्तश्चप्रजायते ॥ ९४ ॥ निर्मलःशु
द्धवीर्यस्तुब्रह्मस्थानंप्रयातिच ॥ आकृष्टःससमानेननीतस्तेनापिवायुना ॥ ९५ ॥ स्थानंनलभतेवीर्यंचञ्चलत्वेनवर्तते ॥ प्राणिनांहिकपालेषुकृमयः
सन्तिपञ्चवै ॥९६॥ द्वावेतौकर्णमूलेतुनेत्रस्थानेततःपुनः ॥ कनिष्ठाङ्गुलिमानेनरक्तपुच्छाश्चदूतिके ॥ ९७ ॥ नंवनीतस्यवर्णेनकृष्णपुच्छानसंशयः ॥
तेषांनामापिभद्रेत्वंमत्तोनिगदितंशृणु ॥ ९८ ॥ पिङ्गलीशृङ्खलीनामद्वौकृमीकर्णमूलयोः ॥ चपलःपिप्पलश्चैवद्वावेतौनासिकाग्रयोः ॥ ९९ ॥ शृङ्ग
लीजङ्गलीचान्यौनेत्रयोरन्तरस्थितौ ॥ कृमीणांशतपञ्चाशत्ताद्दग्भूतानसंशयः ॥ १०० ॥ भालान्तेऽवस्थिताःसर्वेराजिकायाःप्रमाणतः ॥ कपालरो
गिणःसर्वेविकुर्वन्तिनसंशयः ॥ १ ॥ केशद्वयंमुखेतस्यविद्यतेशृणुदूतिके ॥ प्राणिनांसंक्षयंविद्धितत्क्षणेहिनसंशयः ॥ २ ॥ स्वस्थानेसंस्थितस्यापि
प्राजापत्यस्यवैमुखे ॥ तद्वीर्यंरसरूपेणपततेनात्रसंशयः ॥ ३ ॥ मुखेनपिबतेवीर्यंतेनमत्तःप्रजायते ॥ तालुमध्यप्रदेशेचचञ्चलत्वेनवर्तते ॥ ४ ॥
इडाचपिङ्गलानाडीसुषुम्नाख्याचसंस्थिता ॥ सुबलेनापितस्यैवनाडिकाजालपञ्जरे ॥५॥ कामकण्डूर्भवेद्दूतिसर्वेषांप्राणिनांकिल ॥ पुंसश्चस्फुरतेलि
ङ्गंनार्यायोनिश्चदूतिके ॥ ६ ॥ स्त्रीपुंसौसम्भ्रमत्तौतुव्रजतःसङ्गमंततः ॥ कायेनकायसङ्घृष्टिर्मैथुनेनहिजायते ॥ ७ ॥ क्षणमात्रंसुखंकायेपुनःकण्डूश्च
ताद्दशी ॥ सर्वत्रद्दश्यतेदूतिभावएवंविधःकिल ॥ ८ ॥ व्रजत्वमात्मनःस्थानंनैवास्त्यत्रअपूर्वता ॥ अपूर्वंनास्तिमेकिंचित्करोम्येवनसंशयः ॥१०९॥
इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेसुकलाचरित्रेत्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥ विष्णुरुवाच ॥ एवमुक्तागतादूतीतयासुकलयातदा ॥ समा
सेनसुसम्प्रोक्तमवधार्यपुरन्दरः ॥ १ ॥ तदर्थंभाषितंतस्याःसत्यधर्मसमन्वितम् ॥ आलोच्यसाहसंधर्यज्ञानमेवपुरन्दरः ॥ २ ॥ ईद्दशंहिवदेत्काहि
नारीभूत्वामहीतले ॥ योगरूपंसुसंशिष्टंन्यायोदैःक्षालितंवचः ॥ ३ ॥ पवित्रेयंमहाभागासत्यरूपानसंशयः ॥ त्रैलोक्यस्यसमस्तस्यधुरंधर्तुंभवेत्क्षमा
॥ ४ ॥ एतदर्थंविचार्यैवजिष्णुःकन्दर्पमब्रवीत् ॥ त्वयासहगमिष्यामिद्रष्टुंतांकृकलप्रियाम् ॥ ५ ॥ प्रत्युवाचसहस्राक्षंमन्मथोबलदर्पितः ॥ गम्यतां
तत्रदेवेशयत्रास्तेसापतिव्रता ॥ ६ ॥ मानंवीर्यंबलंधयतस्याःसत्यंपतिव्रतम् ॥ गत्वाहंनाशयिष्यामिकियन्मात्रासुरेश्वर ॥ ७ ॥ समाकर्ण्यसहस्राक्षो
वचनंमन्मथस्यच ॥ भोभोऽनङ्गशृणुष्वत्वमधिकंभाषितंसुधा ॥ ८ ॥ सुद्दढासत्यवीर्येणसुस्थिराधर्मकर्मभिः ॥ सुकलेयमजेयावैतत्रतेपौरुषंनहि ॥ ९९ ॥
॥ ९ ॥ इत्याकर्ण्यततःक्रुद्धोमन्मथस्त्विन्द्रमब्रवीत् ॥ ऋषीणांदेवतानांचबलंमयाप्रणाशितम् ॥ १० ॥ अस्याबलंकियन्मात्रंभवताममकथ्यते ॥

१ 'अतसीपुष्पवर्णेन' इ० पा० । २ 'योगरूपं सुसिद्धं च ज्ञानोदकेन क्षालितम्' । इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पश्यतस्तवदेवेशनाशयिष्यामितांस्त्रियम् ॥ ११ ॥ नवनीतंयथाचाग्नेस्तेजोदृष्ट्वाद्रवंव्रजेत् ॥ तथेमांद्रावयिष्यामिस्वेनरूपेणतेजसा ॥ १२ ॥ गच्छ
तत्रमहत्कार्यमुत्पाद्यंसाम्प्रतंध्रुवम् ॥ कस्मात्कुत्ससिमेतेजस्त्रैलोक्यस्यविनाशनम् ॥ १३ ॥ विष्णुरुवाच ॥ आकर्ण्यवाक्यंतुमनोभवस्यएतामसा
ध्यांतवकामजाने ॥ धैर्यंसमुद्यम्यचपुण्यदेहांपुण्येनपुण्यांबहुपुण्यचाराम् ॥ १४ ॥ पश्यामितेपौरुषमुग्रवीर्यमितोहिगत्वातुधनुष्मतावै ॥ तेनापि
सार्धंप्रजगामभूयोरत्याचदूत्याचपतिव्रतांताम् ॥ १५ ॥ एकांसुपुण्यांस्वगृहस्थितांतांध्यानेनपत्युश्चरणेनियुक्ताम् ॥ यथासुयोगीप्रविधायचित्तंविक
ल्पहीनंनचकल्पयेत ॥१६॥ अत्यद्भुतंरूपमनन्ततेजोयुतंचकाराथसतीप्रमोहम् ॥ नीलाञ्चितंभोगयुतंमहात्माझषध्वजश्चैवपुरन्दरश्च ॥ १७ ॥ दृष्ट्वासु
लीलंपुरुषंमहान्तंचरन्तमेवंपरिकामभावम् ॥ जायाहिवैश्यस्यमहात्मनस्तुमेनेनसारूपयुतंगुणज्ञम् ॥ १८ ॥ अम्भोयथापद्मदलेगतंवैप्रयातिमुक्ताफ
लकस्यकीर्तिम् ॥ तद्वत्स्वभावःपरिसत्ययुक्तोजज्ञेचतस्यास्तुपतिव्रतायाः ॥ १९ ॥ अनेनदूतीपरिप्रेषितापुरायामांयुवत्याहगुणज्ञमेनम् ॥ लीलास्व
रूपंबहुधात्मभावंममैपसर्वंपरिदर्शयेच्च ॥ २० ॥ ममैवकालंप्रबलंविचिन्त्यागतोहिमेकान्तगुणैश्चसत्खलः ॥ रत्यासमेतस्तुकथंचजीवेत्सत्याश्मभारे
णप्रमर्दितश्च ॥२१॥ ममापिभावंपरिगृह्यकान्तोजीवेत्कियान्वापिसुबुद्धियुक्तः ॥ शून्योहिकायोममचास्तिसद्यश्चेष्टाविहीनोमृतकल्पएव ॥२२॥ का
यस्यग्रामस्यप्रजाःप्रनष्टाःसुविक्रियाख्यंपरिगृह्यकर्म॥ ममाधिकेनापिसमंसुकान्तसऊर्ध्वशोभामनयच्चकामः॥२३॥यदामृतोबलवान्हर्षयुक्तःस्वयंदृशा
वैपरिनृत्यमानः ॥ तथाअनेनापिप्रभापयेऽद्भुतंयोमांहिवान्छत्यपिभोक्तुकामः ॥ २४ ॥ एवंविचार्यैवतदामहासतीसत्याख्यरज्ज्वादृढबद्धचे
तना ॥ गृहंस्वकीयंप्रविवेशसातदातत्तस्यभावंनियमेनवेत्तुम् ॥ २५ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेसुकलाचरित्रेचतुःपञ्चाशत्त
मोऽध्यायः ॥ ५४ ॥ विष्णुरुवाच ॥ भावंविदित्वासुरराट्चतस्याःप्रोवाचकामंपुरतःस्थितंसः ॥ नचास्तिशक्यास्मरतेजयायसत्यात्मक
ध्यानसुदंशितासती ॥ १ ॥ धर्माख्यचापंस्वकरेगृहीत्वाज्ञानाभिधानंवरसेवबाणम् ॥ योद्धुंरणेसम्प्रतिसंस्थितासतीवीरोयथादर्पितवीर्यभावः
॥ २ ॥ जिगीषयेयंपुरुषार्थमेवत्वमात्मनःकुरुषेपौरुषंतु ॥ त्वांमद्यजेतुंसमरेसमर्थायद्गाव्यमेवंतदिहैवचिन्त्यम् ॥ ३ ॥ दग्धोऽसिपूर्वंत्व
मिहैवशम्भुनामहात्मनातेनसमंविरोधम् ॥ कृत्वाफलंतस्यविकर्मणश्चजातोऽस्यनङ्गःस्मरसत्यमेव ॥ ४ ॥ यथात्वयाकर्मकृतंपुरास्मरफलंतु
प्राप्तंतुतथैवतीव्रम् ॥ सुकुत्सितांयोनिमवाप्स्यसिध्रुवंसाध्व्यानयासार्धमिहैवकथ्यसे ॥ ५ ॥ येज्ञानवन्तःपुरुषाजगत्त्रयेवैरंप्रकुर्वन्तिमहा

१ 'देवा न जेतुं समरे समर्थाः' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वमभिःसमम् ॥ भुञ्जन्तितेदुष्कृतमेवतत्फलंदुःखान्वितंरूपविनाशनंच ॥ ६ ॥ व्याघुष्यआवांतुव्रजावकामएनांपरित्यज्यसतींप्रयुज्य ॥ सत्याःप्रसङ्गेनपुरामयातुलब्धंफलंपापमयंत्वसह्यम् ॥ ७ ॥ त्वमेवजानासिचरित्रमेतच्छप्तोऽस्मितेनापिचगौतमेन ॥ जातंश्चमेषवृषणःसदाह्यहंभवान्गतोमांतुविहायतत्र ॥ ८ ॥ तेजःप्रभावोह्यतुलःसतीनांधातासमर्थःसहितुंनसूर्यः ॥ सुकुत्सितंरूपमिदंतुरक्षेत्पुरानसूयामुनिनाहिशप्तम् ॥ ९ ॥ निरुध्यसूर्यंपरिविंगवन्तमुद्यन्तमेवंप्रभयासुदीप्तम् ॥ भर्तुश्चमृत्युंपरिबाधमानंमाण्डव्यशापस्यचकौण्डिनस्य ॥ १० ॥ अत्रेःप्रियासत्यपतिव्रतातयास्वपुत्रतांदेवत्रयंहिनीतम् ॥ नकिंपुरामन्मथतेश्रुतंसदासंस्कारयुक्ताःप्रभवन्तिसत्यः ॥ ११ ॥ सावित्रीनाम्नीद्युमत्सेनपुत्रीनीतंप्रियंसापुनरानिनाय ॥ यमादिहैवाश्वपतेःसुपुत्रंसतीत्वमेवंपरिसंश्रुतंच ॥ १२ ॥ अग्नेःशिखांकःपरिसंस्पृशेद्वैतरेद्धिकःसागरमेवमूढः ॥ गलेतुबद्धासुशिलांभुजाभ्यांकोवासतींवश्यतिवीतरागाम् ॥ १३ ॥ उक्तेतुवाक्येबहुनीतियुक्तेइन्द्रेणकामस्यसुशिक्षणार्थम् ॥ आकर्ण्यवाक्यंमकरध्वजस्तुउवाचदेवेन्द्रमथैनमेव ॥ १४ ॥ तवातिदेशादहमागतोवैधैर्यंसुहृत्त्वंपुरुषार्थमेव ॥ त्यक्त्वातदर्थंपरिभाषसेमांनिःसत्त्वरूपंबहुभीतियुक्तम् ॥ १५ ॥ व्याबुद्धियास्यामियदासुरेशस्याल्लोकमध्येममकीर्तिनाशः ॥ ऊढिङ्करोमानविहीनएवसर्वेवदिष्यन्त्यनयाजितंमाम् ॥ १६ ॥ येवैजितादेवगणाश्चदानवाःपूर्वमुनीन्द्रास्तपसाप्रयुक्ताः ॥ हास्यंकरिष्यन्तिममापिसद्योनार्याजितोमन्मथएषभीमः ॥१७॥ तस्मात्प्रयास्यामित्वयैवसार्धमस्याबलंमानमतःसुरेश॥ तेजश्चधैर्यंपरिणाशयिष्येकस्माद्भवानत्रबिभेतिशक्र ॥१८॥ सम्बोध्यचैवंससुराधिनाथंचापंगृहीतंसशरंसुपुष्पम् ॥ उवाचक्रीडांपुरतःस्थितांतांविधायमायांभवतीप्रयातु ॥ १९ ॥ वैश्यस्यभार्यांसुकलांसुपुण्यांसत्येस्थितांधर्मविदांगुणज्ञाम् ॥ इतोहिगत्वाकुरुकार्यमुक्तंसाहाय्यरूपंचप्रियेसखेशृणु ॥ २० ॥ क्रीडांसमाभाष्यततोमनोभवस्त्वन्तेस्थितांप्रीतिमथाह्वयत्पुनः ॥ कार्यंभवत्याममकार्यमुत्तममेतांसुस्नेहैःपरिभावयत्वम् ॥ २१ ॥ इन्द्रंहिदृष्ट्वासुकलायथाभवेत्स्नेहानुगाचारुविलोचनेयम् ॥ तैस्तैःप्रभावैर्गुणवाक्ययुक्तैर्नयस्ववश्यंचप्रियेसखेशृणु ॥ २२ ॥ भोभोःसखेसाधयगच्छशीघ्रंमायामयंनन्दनरूपयुक्तम् ॥ पुष्पोपयुक्तंचफलप्रधानंघुष्टंरुतैःकोकिलषट्पदानाम् ॥ २३ ॥ आहूयवीरंमकरन्दमेवरसायनंस्वादुगुणैरुपेतम् ॥ सहानिलाद्यैर्निजकर्मयुक्तैःसम्प्रेषयित्वापुनरेवकामम् ॥ २४ ॥ एवंसमादिश्यमहत्ससैन्यंत्रैलोक्यसंमोहकरंतुकामः ॥ चक्रेप्रयाणंसुरराजसार्धंसंमोहनायैवमहासतींताम् ॥ २५ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेसुकलाचरित्रेपञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥ विष्णुरुवाच ॥

१ 'जातश्च सर्वाङ्गभगाङ्कोऽहम्' इ० पा० । २ 'सत्कारयोग्याः' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्याःसत्यविनाशायमन्मथःससुराधिपः ॥ प्रस्थितःसुकलांतर्हिसत्योधर्ममथाब्रवीत् ॥ १ ॥ पश्यधर्ममहाप्राज्ञमन्मथस्यविचेष्टितम् ॥
तवार्थमात्मनश्चैवपुण्यस्यापिमहात्मनः ॥ २ ॥ विसृजामिमहास्थानंवास्तुरूपंसुखोदयम् ॥ सत्याख्यंसचविप्राख्यंसुदेवाख्यंगृहोत्तमम् ॥ ३ ॥
तमेवनाशयेद्दत्वाकामएषप्रमत्तधीः ॥ रिपुरूपःसुदुष्टात्माअस्माकंहिनसंशयः ॥ ४ ॥ पतिस्तपोधनोविप्रःसुसतीयापतिव्रता ॥ सुसत्योभूपति
धर्ममगेहानसंशयः ॥५॥ यत्राहंवृद्धिसम्पुष्टस्तत्रवासोहितेभवेत् ॥ तत्रपुण्यंसमायातिश्रद्धयासहक्रीडते ॥ ६ ॥ क्षमाशान्तिसमायुक्ताआयातिमम
मन्दिरम् ॥ यथासत्योदमश्चैवदयासौहृदमेवच ॥ ७ ॥ प्रज्ञायुक्तःसनिर्लोभोयत्राहंतत्रसंस्थितः ॥ शुचिःस्वभावस्तत्रैवअमीचममबान्धवाः ॥ ८ ॥
अस्तेयमप्यहिंसाचतितिक्षावृद्धिरेवच ॥ ममगेहेसमायाताधन्यतांश्रृणुधर्मराट् ॥ ९ ॥ गुरूणांचापिशुश्रूषाविष्णुर्लक्ष्म्यासमावृतः ॥ मद्गेहंतुसमाया
न्तिदेवाश्चाग्निपुरोगमाः ॥ १० ॥ मोक्षमार्गप्रकाशेद्योज्ञानीदीप्त्यासमन्वितः ॥ एतैःसार्धंवसाम्येवसतीषुधर्मवत्सुच ॥ ११ ॥ साधुष्वेतेषुसर्वेषुगृह
रूपेषुमेसदा ॥ उक्तेनापिकुटुम्बेनवसाम्येवत्वयासह ॥ १२ ॥ ससत्त्वाःसाधुरूपास्तेवेधसामेगृहीकृताः ॥ सञ्चरामिमहाभागस्वच्छन्देनचलीलया ॥
॥ १३ ॥ ईश्वरश्चजगत्स्वामीत्रिनेत्रोवृषवाहनः ॥ ममगेहेस्वरूपेणवर्ततेशिवयायुतः ॥ १४ ॥ तदिदंसंसृतेःसारंगृहरूपंमहेश्वरम् ॥ सदनंशङ्करे
त्याख्यंनाशितंमन्मथेनवै ॥ १५ ॥ विश्वामित्रंमहात्मानंतपन्तंतपउत्तमम् ॥ मेनकांहिसमाश्रित्यकामोऽयंजितवान्पुरा ॥ १६ ॥ सतीपतिव्रताहल्या
गौतमस्यप्रियाशुभा ॥ सुसत्याच्चालितातेनमन्मथेनदुरात्मना ॥१७॥ मुनयःसत्यधर्मज्ञानानास्त्रियःपतिव्रताः ॥ मद्गृहास्ताइमाःसर्वादीपिताःकाम
वह्निना ॥ १८ ॥ दुर्धरोदुःसहोव्यापीयोऽतिसत्येषुनिष्ठुरः ॥ मामेवंपश्यतेनित्यंक्वसत्यःपरितिष्ठति ॥ १९ ॥ समांज्ञात्वासमायातिबाणपाणिर्ध
नुर्धरः ॥ नाशयेन्मद्गृहंपापोवीतिहोत्रैश्चनामकैः ॥ २० ॥ पापलेशाश्चयेक्रूराअन्येपाषण्डसंश्रयाः ॥ तेतुबुद्ध्याऽहिताःसर्वेसत्यगेहंविशन्तिहि ॥
॥ २१ ॥ सेनाध्यक्षैरसत्यैस्तुच्छद्मनातेनसाधितः ॥ पातयेदर्दयेद्गेहंपापःशस्त्रैर्दुरात्मभिः ॥ २२ ॥ मामेवंताडयेत्पापोमहाबलमनोभवः ॥ अस्य
धाम्नाप्रदग्धोऽहंशून्यतांहिव्रजामिवै ॥ २३ ॥ नूतनंगृहमिच्छामिस्त्रियाख्यंपतिभूपतिम् ॥ कृकलस्यापिपुण्यस्यप्रियेयंशिवमङ्गला ॥ २४ ॥
तद्गृहंसुकलाख्यंमेदग्धुंपापःसमुद्यतः ॥ अयमेषसहस्राक्षःकामेनसहितोबली ॥ २५ ॥ कामस्यकारणात्कस्मात्पूर्ववृत्तंनविन्दति ॥ अहल्यायाः
प्रसङ्गेनमेषोपस्थोव्यजायत ॥ २६ ॥ पौरुषंहिमुनेर्दृष्ट्वासत्याश्चैवप्रधर्षणात् ॥ नष्टःकामस्यदोषेणसुरराट्तत्रसंस्थितः ॥ २७ ॥ भुक्तवान्दारुणं
शापंदुःखेनमहतान्वितः ॥ कृकलस्यप्रियामेनांसुकलांपुण्यचारिणीम् ॥ २८ ॥ एषहन्तुंसहस्राक्षउद्यतःकामसंयुतः ॥ यथाचेन्द्रेणनायातिकामएष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथाकुरु ॥ २९ ॥ धर्मराजमहाप्राज्ञभवान्मतिमतांवरः ॥ ३० ॥ धर्मराजउवाच ॥ ऊनंतेजःकरिष्यामिकामस्यमरणंतथा ॥ एकोपायोमया
दृष्टस्तमिहैवप्रपश्यतु ॥ ३१ ॥ प्रज्ञाचैषामहाप्राज्ञाशकुनीरूपचारिणी ॥ भर्तुरागमनंपुण्यंशब्देनाख्यातुखेयतः ॥ ३२ ॥ शकुनस्यप्रभावेनभर्तु
श्चागमनेनच ॥ दुष्टैर्नष्टानभूयेतस्वस्थचित्तानसंशयः ॥३३॥ प्रज्ञासंप्रेषितातेनगतासासुकलागृहम् ॥ प्रकुर्वतीमहच्छब्दंदृष्टदेवेवसाबभौ ॥ ३४ ॥
पूजितामानिताप्रज्ञाधूपदीपादिभिस्तदा ॥ ब्राह्मणंसुकलाऽपृच्छत्किमेषाचवदेन्मम ॥ ३५ ॥ ब्राह्मणउवाच ॥ भर्तुश्चागमनंब्रूतेतवैवसुभगेस्थिरा ॥
दिनसप्तकमध्येसआगमिष्यतिनान्यथा ॥ ३६ ॥ इत्येवमाकर्ण्यसुमङ्गलंवचःप्रहर्षयुक्तासहसाबभूव ॥ धर्मज्ञमेकंसगुणंहिकान्तंशकुनात्प्रदिष्टंहिस
मागतंतम् ॥ ३७ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेसुकलाचरित्रेषट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥ विष्णुरुवाच ॥ क्रीडासतीरूपधराप्र
भूत्वागेहंगताचारुपतिव्रतायाः ॥ तामागतांसत्यस्वरूपयुक्तासासादरंवाक्यमुवाचधन्या ॥ १ ॥ वाक्यैःसुपुण्यैःपरिपूजितासाउवाचक्रीडासुकलां
विहस्य ॥ मायानुगंविश्वविमोहनंसतीप्रत्युत्तरंसत्यप्रमेययुक्तम् ॥ २ ॥ ममापिभर्ताप्रबलोगुणज्ञोधीरःसविद्योमहिमाप्रयुक्तः ॥ त्यक्त्वागतःपापत
रांसुपुण्योमामेवनाथःशृणुपुण्यकीर्तिः ॥ ३ ॥ वाक्यैस्तुपुण्यैरबलास्वभावादाकर्ण्यसर्वंसुकलासमुक्तम् ॥ संशुद्धभावांचविचिन्त्यचाहकस्माद्गतः
सुन्दरितेऽद्यनाथः ॥ ४ ॥ विहायतेरूपमतीवसत्यमाचक्ष्वसर्वंभवतीसुभर्तुः ॥ ध्यानोपयुक्तासकलंकरोतिसखीस्वरूपागृहमागतामे ॥ ५ ॥ क्रीडा
बभाषेशृणुसत्यमेतंचरित्रभावंममभर्त्तुरस्य ॥ अहंप्रियेयस्यसदैवयुक्तायमिच्छतेतंप्रतिसान्त्वयामि ॥ ६ ॥ कर्तुःसुपुण्यंवचनंसुभर्तुर्ध्यानोपयुक्तास
कलंकरोमि ॥ एकान्तशीलासगुणानुरूपाशुश्रूषयैकस्तमिहैवदेवि ॥ ७ ॥ ममपूर्वविपाकोऽयंसम्प्रत्येवंप्रवर्तते ॥ यतस्त्यक्त्वागतोभर्त्तामामेवंमन्द
भागिनीम् ॥ ८ ॥ सखेनधारयेजीवंस्वकीयंकायमेवच ॥ पत्याहीनाःकथंनार्यःसुजीवन्तिचनिर्घृणाः ॥ ९ ॥ रूपशृङ्गारसौभाग्यंसुखंसम्पत्तिरे
वच ॥ नारीणांहिमहाभागोभर्ताशास्त्रेषुगीयते ॥ १० ॥ तयासर्वंसमाकर्ण्ययदुक्तंक्रीडयातदा ॥ सत्यभावंविदित्वासामेनेसम्भाषितंतदा ॥ ११ ॥
विश्वस्तासामहाभागासुकलापतिदेवता ॥ तामुवाचपुनःसर्वमात्मचेष्टानुगंवचः ॥ १२ ॥ समासेनसमाख्यातंपूर्ववृत्तान्तमात्मनः ॥ यथाभर्तागतो
यात्रांपुण्यसाधनतत्परः ॥ १३ ॥ आत्मदुःखंसुसत्यंचतपएवमनस्विनि ॥ बोधिताक्रीडयासातुसमाश्वास्यपतिव्रता ॥ १४ ॥ एकदातुतयाप्रोक्तं
क्रीडयासुकलांप्रति ॥ सखेपश्यवनंसौम्यंदिव्यवृक्षैरलङ्कृतम् ॥ १५ ॥ तत्रतीर्थंपरंपुण्यमस्तिपातकनाशनम् ॥ नानावल्लीवितानैश्चसुपुष्पैःपरिशो ॥ ९७ ॥

१ 'हृष्टं दैवज्ञमेव च' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भितम् ॥ १६ ॥ आवाभ्यामपिगन्तव्यंपुण्यहेतोर्वरानने ॥ समाकर्ण्यतयासार्द्धंसुकलामाययातदा ॥ १७ ॥ प्रविवेशवनंदिव्यंनन्दनोपममेवसा ॥ सर्वर्तुकुसुमोपेतंकोकिलाशतनादितम् ॥ १८ ॥ गीयमानंसुमधुरैर्नादैर्मधुकरैरपि ॥ कूजद्भिःपक्षिभिःपुण्यैःपुण्यध्वनिसमाकुलम् ॥ १९ ॥ चन्दनादिकवृक्षैश्चसौरभैश्चविराजितम् ॥ सर्वभोगैःसुसम्पूर्णमाधव्यामाधवेनवै ॥ २० ॥ रचितंमोहनायैवसुकलायाश्चकारणात् ॥ तयासार्धंप्रविष्टासातद्वनंसर्वभावनम् ॥ २१ ॥ ददर्शसौख्यदंपुण्यंमायाभावंनविन्दति ॥ वीक्षमाणावनंदिव्यंतयासहजनेश्वर ॥ २२ ॥ शक्रोऽपिचाभ्ययात्तत्रदेवमूर्तिविराजितः ॥ तयादूत्यासमंप्रातःकामस्तत्रसमागतः ॥ २३ ॥ सर्वभोगपतिर्भूत्वाकामलीलासमाकुलः ॥ काममाहसमाभाष्यएषासासुकुलाऽऽगता ॥ ॥ २४ ॥ प्रहरस्वमहाभागक्रीडायाःपुरतःस्थिताम् ॥ मायांकृत्वासमानीतांक्रीडयातवसन्निधौ ॥ २५ ॥ पौरुषंदर्शयाद्यैवयद्यस्तिकुरुनिश्चितम् ॥ ॥ २६ ॥ कामउवाच ॥ आत्मरूपंदर्शयस्वचतुरंलीलयान्वितम् ॥ येनाहंप्रहराम्येतांपञ्चबाणैःसहस्रदृक् ॥ २७ ॥ इन्द्रउवाच ॥ क्वास्तेतेपौरुषंमूढयेनलोकंविडम्बसे ॥ ममाधारपरोभूत्वायोद्धुमिच्छसिसाम्प्रतम् ॥२८॥ कामउवाच ॥ तेनापिदेवदेवेनमहादेवेनशूलिना ॥ पूर्वमेवहृतंरूपंममकायोनविद्यते ॥ २९ ॥ इच्छाम्यहंयदानारींहन्तुंशृणुष्वसाम्प्रतम् ॥ पुंसांकायंसमाश्रित्यआत्मरूपंप्रदर्शये॥३०॥पुमांसंवासहस्राक्षनार्याःकायंसमाश्रये ॥ पूर्वंदृष्टायदानारीतामेवपरिचिन्तयेत् ॥ ३१ ॥ चिन्त्यमानस्यपुंसस्तुनार्यारूपंपुनःपुनः ॥ अदृष्टंतुसमाश्रित्यपुंसमुन्मादयाम्यहम् ॥ ३२ ॥ तथाप्युन्मादयाम्येवंनारीरूपंनसंशयः॥संस्मरणात्स्मरोनाममजातंसुरेश्वर ॥ ३३ ॥ तांदृष्ट्वातादृशोरङ्गवस्तुरूपंसमाश्रये ॥ आत्मतेजःप्रकाशेनबाध्यबाधकतांव्रजेत ॥ ३४ ॥ नारीरूपंसमाश्रित्यधीरंपुरुषंप्रमोहयेत् ॥ पुरुषंतुसमाश्रित्यभावयामिसुयोषितम् ॥ ३५ ॥ रूपहीनोऽस्मिहेइन्द्रअस्मद्रूपंसमाश्रयेत् ॥ तवरूपंसमाश्रित्यतांसाधयेयथेप्सिताम् ॥ ३६ ॥ एवमुक्त्वासदेवेन्द्रंकायंतस्यमहात्मनः ॥ सखाऽसौमाधवस्यापिसमाश्रित्यसुमायुधः ॥ ३७ ॥ तामेवहन्तुंकुसुमायुधोऽपिसाध्वींसुपुण्यांकृकलस्यभार्याम् ॥ समुत्सुकस्तिष्ठतिबाणलक्ष्यंतस्याश्चकायंनयनैर्विलोक्य ॥ ३८ ॥ इति श्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेसुकलाचरित्रेसप्तपञ्चाशत्तमोऽध्यायः ॥ ५७॥ विष्णुरुवाच ॥ क्रीडाप्रयुक्तासुवनंप्रविष्टावैश्यस्यभार्यासुकलासुतन्वी ॥ ददर्शसर्वंगहनंमनोरमंतामेवपप्रच्छसखींसतीसा ॥ १ ॥ अरण्यमेतत्प्रवरंसुपुण्यंदिव्यंसखेकस्यमनोभिरामम् ॥ सिद्धंसुकामैःप्रवरैःसमस्तैःपप्रच्छहर्षात्सुकलासखींताम् ॥ २ ॥ क्रीडोवाच ॥ एतद्वनंदिव्यगुणैःप्रयुक्तंसिद्धस्वभावैःपरिभावनेन ॥ पुष्पाकुलंकामफलोपयुक्तंविपश्यसर्वंमकरध्वजस्य ॥ ३ ॥ एवंवाक्यंततःश्रुत्वाहर्षेणमहतान्विता ॥ समालोक्यमहद्वृत्तंकामस्यचदुरात्मनः ॥ ४ ॥ वायुनानीयमानंतंसमाघ्राति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नसौरभम् ॥ वातिवायुःस्वभावेनसौरभेणसमन्वितः ॥ ५ ॥ तद्घ्राणोविशतेनासांयथातथासुलीलया ॥ सागन्धंनैवगृह्णातिपुष्पाणांचवरानना ॥ ६ ॥ नचास्वादयतेसातुसुरसान्सामहासती ॥ ससखाकामदेवस्यरममाणोविनिर्जितः ॥ ७ ॥ लज्जितःपराङ्मुखोभूत्वाभूपालवचनच्छदैः ॥ फलेभ्योहिसुपक्वेभ्यःपुष्पमञ्जरिसंस्कृतः ॥ ८ ॥ लवरूपोऽपतद्भूमौरसस्त्वेषतयाजितः ॥ मकरन्दःसुदीनात्माफलाद्भूमिंततःपुनः ॥ ९ ॥ भक्ष्यतेमक्षिकाभिश्चयथामृतोरणेतथा ॥ मक्षिकाभक्ष्यमाणस्तुप्रवाहेनप्रयातिसः ॥ १० ॥ मन्दंमन्दंप्रयात्येवतंहसन्तिचपक्षिणः ॥ नानारुतैःप्रचलन्तिसुखमानन्दनिर्भरैः ॥ ११ ॥ प्रीत्याशकुनयस्तत्रवनमध्यनगस्थितः ॥ सुकलयाजितोह्येषनिम्नंपन्थानमाश्रितः ॥ १२ ॥ प्रीत्यासमेतारतिःकामभार्यागत्वाब्रवीत्सासुकलांविहस्य ॥ स्वस्त्यस्तुतेस्वागतमेवभद्रेरमस्वप्रीत्यानयनाभिरामम् ॥ १३ ॥ तेरूपमिष्टममलमिन्द्रस्यापिमहात्मनः ॥ यदेष्टंतेतदाब्रूहिसमानेष्येनसंशयः ॥ १४ ॥ सूतउवाच ॥ वदन्त्यौतेस्त्रियौदृष्ट्वाश्रुत्वोवाचसुभाषितम् ॥ रतिंप्रतिगृहीत्वामेगतोभर्त्तामहामतिः ॥ १५ ॥ यत्रमेतिष्ठतेभर्त्तातत्राहंपतिसंयुता ॥ तत्रकामश्चमेप्रीतिरयंकायोनिराश्रयः ॥ १६ ॥ द्वेअप्युक्तंसमाकार्ण्यरतिप्रीतीविलज्जिते ॥ व्रीडमानेगतेतेद्वेयत्रकामोमहाबलः ॥ १७ ॥ ऊचतुस्तंमहावीरमिन्द्रकायसमाश्रितम् ॥ चापमाकर्षमाणंतंनेत्रलक्ष्यंमहाबलम् ॥ १८ ॥ दुर्जयेयंमहाप्राज्ञत्यजपौरुषमात्मनः ॥ पतिकामामहाभागापतिव्रतासदैवसा ॥ १९ ॥ कामउवाच ॥ अनयालोक्यतेरूपमिन्द्रस्यास्यमहात्मनः ॥ यदिदेवितदाचाहंहनिष्यामिनसंशयः ॥ २० ॥ अथवेषधरोदेवोमहारूपःसुराधिपः ॥ सतयानुगतस्तूर्णंपरयालीलयातदा ॥२१॥ सर्वभोगसमाकीर्णःसर्वाभरणशोभितः ॥ दिव्यमाल्याम्बरधरोदिव्यगन्धानुलेपनः ॥ २२ ॥ तयारत्यासमायातोयत्रास्तेपतिदेवता ॥ प्रत्युवाचमहाभागांसुकलांसत्यचारिणीम् ॥ २३ ॥ पूर्वंदूतीसमक्षंतेप्रीत्याचप्रहितामया ॥ कस्मान्नमन्यसेभद्रेभजन्तंत्वामिहागतम् ॥ २४ ॥ सुकलोवाच ॥ रक्षायुक्तास्मिभद्रंतेभर्तुःपुत्रैर्महात्मभिः ॥ एकाकिनीसहायैश्चनैवकस्यभयंमम ॥ २५ ॥ शूरैश्चपुरुषाकारैःसर्वत्रपरिरक्षिता ॥ नातिप्रस्तावयेवक्तुंव्यग्राकर्मणितस्यच ॥ २६ ॥ यावत्प्रस्पन्दतेनेत्रंतावत्कालंमहामते ॥ भवान्नलज्जतेकस्माद्रममाणोमयासह ॥ भवान्कोहिसमायातोनिर्भयोमरणादपि ॥२७॥ इन्द्रउवाच॥त्वामेवंहिप्रपश्यामिवनमध्येसमागताम् ॥ समाख्यातास्त्वयाशूराभर्तुश्चतनयाःपुनः ॥२८॥ कथंपश्याम्यहंतावद्दर्शयस्वममाग्रतः ॥ २९ ॥ सुकलोवाच ॥ सनिजसकलवर्गस्याधिपत्येनिवेश्यधृतिमतिगतिबुद्ध्याख्यैस्तुसंन्यस्यसत्यम् ॥ अचलसकलधर्मोनित्ययुक्तोमहात्मामदनसबलधर्मात्मासदामांजुगोप ॥ ३० ॥ सामेवंपरिरक्षतेदमगुणैःशौचैस्तुधर्मःसदासत्यंपश्यसमागतंममपुरःशान्तिक्षमाभ्यांयुतम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बोधश्चातिमहाबलः पृथुयशायोमांनमुश्चेत्कदाबद्धाहंदृढबन्धनैः स्वगुणजः सान्निध्यमेवंगतः ॥ ३१ ॥ रक्षायुक्ताः कृताः सर्वैसत्याद्यामममसाम्प्रतम् ॥ धर्मलाभादिकाः सर्वेदमबुद्धिपराक्रमाः ॥ ३२ ॥ मामेवंहिप्ररक्षन्तिकिंमांप्रार्थयसेबलात् ॥ कोभवान्निर्भयोभूत्वादूत्यासार्धसमागतः ॥ ३३ ॥ सत्यं धर्मस्तथापुण्यंज्ञानाद्याः प्रबलास्तथा ॥ ममभर्तुः सहायाश्चतेमांरक्षन्तिवेश्मनि ॥ ३४ ॥ अहंरक्षायुतानित्यंदमशान्तिपरायणा ॥ नमांजेतुंसमर्थश्च अपिसाक्षाच्छचीपतिः ॥ ३५ ॥ यदिवामन्मथोवापिसमागच्छतिवीर्यवान् ॥ दंशिताहंसदासत्यंसत्यकेनैवनान्यथा ॥ ३६ ॥ निरर्थकास्तस्यबाणाभविष्यन्तिनसंशयः ॥ त्वामेवंहिहनिष्यन्तिधर्मादयोमहाभटाः ॥ ३७ ॥ दूरंगच्छपलायत्वमत्रमातिष्ठसाम्प्रतम् ॥ वार्यमाणोयदातिष्ठेर्भस्मीभूतोभविष्यसि ॥ ३८ ॥ भर्त्राविनानिरीक्षेतममरूपंयदाभवान् ॥ यथादारुदहेदग्निस्तथाधक्ष्यामिनान्यथा ॥ ३९ ॥ एवंश्रुत्वासहस्राक्षोमन्मथस्यापिसंमुखम् ॥ पश्यपौरुषमेतस्यायुध्यस्वनिजपौरुषैः ॥ ४० ॥ यथागतास्तथासर्वेमहाशापभयातुराः ॥ स्वंस्वंस्थानंमहाराजइन्द्राद्याः प्रययुस्तदा ॥ ४१ ॥ गतेषुतेषुसर्वेषुसुकलासापतिव्रता ॥ स्वगृहंपुण्यसंयुक्तापतिध्यानेनचागता ॥ ४२ ॥ स्वगृहंपुण्यसंयुक्तंसर्वतीर्थमयंतदा ॥ सर्वयज्ञमयंराजन्सम्प्राप्तापतिदेवता ॥ ४३ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेसुकलाचरित्रेऽष्टपञ्चाशत्तमोऽध्यायः ॥ ५८ ॥ विष्णुरुवाच ॥ कृकलः सर्वतीर्थानिसाधयित्वागृहंप्रति ॥ प्रस्थितः सार्थवाहेनमहानन्दसमन्वितः ॥ १ ॥ एवंचिन्तयतेनित्यंसंसारः सफलोमम ॥ तृप्ताः स्वर्गंप्रयास्यन्तिपितरोममनान्यथा ॥ २ ॥ तावत्प्रत्यक्षरूपेणबद्धातस्यपितामहान् ॥ पुरतस्तस्यसम्ब्रूतेनहितेपुण्यमुत्तमम् ॥ ३ ॥ दिव्यरूपोमहाकायः कृकलंवाक्यमब्रवीत् ॥ तवतीर्थफलंनास्तिश्रममेववृथाकृथाः ॥ ४ ॥ स्वयंसन्तोषमाप्नोषिनहितेपुण्यमुत्तमम् ॥ एवंश्रुत्वाततोवैश्यः कृकलोदुःखपीडितः ॥ ५ ॥ भवान्कः संवदस्येवंकस्माद्बद्धाः पितामहाः ॥ केनदोषप्रभावेनतन्मेत्वंकारणंवद ॥ ६ ॥ कस्मात्तीर्थफलंनास्तिममयात्राकथंनहि ॥ सर्वमेवसमाचक्ष्वयदिजानासिसंस्फुटम् ॥ ७ ॥ धर्मउवाच ॥ पूतांपुण्यतमांस्वीयांभार्यांत्यक्त्वाप्रयातियः ॥ तस्यपुण्यफलंसर्वंवृथाभवतिनान्यथा ॥ ८ ॥ धर्माचारपरांपुण्यांसाधुव्रतपरायणाम् ॥ पतिव्रतरतांभार्यांसुगुणांपुण्यवत्सलाम् ॥ ९ ॥ तामेवापिपरित्यज्यधर्मकार्यंप्रयातियः ॥ वृथातस्यंकृतः सर्वोधर्मोभवतिनान्यथा ॥ १० ॥ सर्वाचारपराभव्याधर्मसाधनतत्परा ॥ पतिव्रतरतानित्यंसर्वदाज्ञानवत्सला ॥ ११ ॥ एवंगुणाभवेद्भार्यायस्यपु

१ 'ज्ञानाख्यश्च' इ० 'सत्याख्यश्च' इति च पा० । २ 'धर्मः' इत्यध्याहार्यम् प्रकरणप्राप्तत्वात् । एतदर्धमप्यधिकमेव । प्रक्षिप्तमिति प्रतिभाति । उत्तरवाक्येऽन्वयसाङ्गत्यात् । ३ 'विनीतां विमलां पुण्याम्' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ण्यामहासती ॥ तस्यगेहेसदादेवास्तिष्ठन्तिचमहौजसः ॥ १२ ॥ पितरोगेहमध्यस्थाःश्रेयोवाञ्छन्तितस्यच ॥ गङ्गाद्याःपुण्यनद्यश्चसागरास्त
त्रनान्यथा ॥ १३ ॥ पुण्यासतीयस्यगेहेवर्ततेसत्यतत्परा ॥ तत्रयज्ञाश्चगावश्चऋषयस्तत्रनान्यथा ॥ १४ ॥ तत्रसर्वाणितीर्थानिपुण्यानि
विविधानिच ॥ भार्यायोगेनतिष्ठन्तिसर्वाण्येतानिनान्यथा ॥ १५ ॥ पुण्यभार्याप्रयोगेणगार्हस्थ्यंसम्प्रजायते ॥ गार्हस्थ्यात्परमोधर्मोद्वितीयोनास्तिभूतले ॥ १६ ॥ गृहस्थस्यगृहंपुण्यंसत्यपुण्यसमन्वितम् ॥ सर्वतीर्थमयंवैश्यसर्वदेवसमन्वितम् ॥ १७ ॥ गार्हस्थ्यंचसमाश्रित्य
सर्वेजीवन्तिजन्तवः ॥ तादृशंनैवपश्यामिअन्यमाश्रमसुत्तमम् ॥ १८ ॥ मन्त्राग्निहोत्रंदेवाश्चसर्वेधर्माःसनातनाः ॥ दानाचाराःप्रवर्तन्तेयस्यपुंस
श्चवैगृहे ॥ १९ ॥ एवंयोभार्ययाहीनस्तस्यगेहंवनायते ॥ यज्ञाश्चवैनसिध्यन्तिदानानिविविधानिच ॥ २० ॥ भार्याहीनस्यपुंसोऽपिनसिध्यतिम
हाव्रतम् ॥ धर्मकर्माणिसर्वाणिपुण्यानिविविधानिच ॥२१॥ नास्तिभार्यासमंतीर्थंधर्मसाधनहेतवे ॥ शृणुष्वत्वंगृहस्थस्यनान्योधर्मोजगत्रये॥२२॥
यत्रभार्यागृहंतत्रपुरुषस्यापिनान्यथा ॥ ग्रामेवाप्यथवारण्येसर्वधर्मस्यसाधनम् ॥ २३ ॥ नास्तिभार्यासमंतीर्थंनास्तिभार्यासमंसुखम् ॥ नास्तिभा
र्यासमंपुण्यंतारणायहितायच ॥ २४ ॥ धर्मयुक्तांसतींभार्यांत्यक्त्वायासिनराधम ॥ गृहंधर्मंपरित्यज्यक्वास्तेधर्मस्यतेफलम् ॥ २५ ॥ तयाविनाय
दातीर्थेश्राद्धदानंकृतंत्वया ॥ तेनदोषेणवैबद्धास्तवपूर्वपितामहाः ॥ २६ ॥ भवांश्चौरोह्यमीचौरायैस्तुभुक्तंसुलोलुपैः ॥ त्वयादत्तस्यश्राद्धस्यअन्नमेवं
तयाविना ॥ २७॥ सुपुत्रःश्रद्धयायुक्तःश्राद्धदानंददातियः ॥ भार्यादत्तेनपिण्डेनतस्यपुण्यंवदाम्यहम् ॥ २८ ॥ यथाऽमृतस्यपानेननृणांतृप्ति
र्हिजायते ॥ तथापितॄणांश्राद्धेनसत्यंसत्यंवदाम्यहम् ॥२९॥ गार्हस्थ्यस्यचधर्मस्यभार्याभवतिस्वामिनी॥त्वयैषावञ्चितामूढचौरकर्मकृतंवृथा॥३०॥
अमीपितामहाश्चौरायैर्भुक्तंतुतयाविना ॥ भार्यापचतिचेदन्नंस्वहस्तेनामृतोपमम् ॥३१॥ तदन्नमेवभुञ्जन्तिपितरोहृष्टमानसाः ॥ तेनैवतृप्तिमायान्तिस
न्तुष्टाश्चभवन्तिते ॥ ३२ ॥ तस्माद्भार्यांविनाधर्मःपुरुषस्यनसिध्यति ॥ नास्तिभार्यासमंतीर्थंपुंसांसुगतिदायकम् ॥ ३३ ॥ भार्यांविनाचयोधर्मःसए
वविफलोभवेत् ॥ ३४ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेसुकलाचरित्रएकोनषष्टितमोऽध्यायः ॥ ५९ ॥ कृकलउवाच ॥ कथंमेजायतेसि
द्धिःकथंपितृविमोचनम् ॥ एतन्मेविस्तरेणापिधर्मराजवदाधुना ॥१॥ धर्मउवाच ॥ गच्छगेहंमहाभागत्वांविनादुःखमाचरत् ॥ सम्बोधयत्वंसुकलां ॥ ६९ ॥
स्वपत्नींधर्मचारिणीम् ॥ २ ॥ श्राद्धदानंगृहंगत्वातस्याहस्तेनवैकुरु ॥ स्मृत्वापुण्यानितीर्थानियजस्वत्वंसुरोत्तमान् ॥ ३ ॥ तीर्थयात्राकृतासिद्धि
स्तवचैवभविष्यति ॥ भार्यांविनातुयोलोकेधर्मंसाधितुमिच्छति ॥ ४ ॥ सगार्हस्थ्यंविलोप्यैवएकाकीविचरेद्वनम् ॥ विफलोजायतेलोकेतं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नंमन्यन्तिदेवताः ॥५॥ यज्ञाःसिद्धिंतदायान्तियदास्याद्गृहिणीगृहे ॥ एकाकीससमर्थोनधर्मार्थसाधनायच ॥६॥ विष्णुरुवाच ॥एवमुक्त्वाचतंवैश्यं गतोधर्मोयथागतम् ॥ कृकलोऽपिसधर्मात्मास्वगृहंप्रतिप्रस्थितः ॥ ७ ॥ स्वगृहंप्राप्यमेधावीदृष्ट्वातांचपतिव्रताम् ॥ सार्थवाहेनतेनापिस्वेस्थानंप्राप्य बुद्धिमान् ॥८॥ तयासमागतंदृष्ट्वाभर्तारंधर्मकोविदम् ॥ कृतंसुमङ्गलंपुण्यंभर्तुरागमनेतदा ॥९॥ समाचष्टसधर्मात्माधर्मस्यापिविचेष्टितम् ॥ समाक र्ण्यमहाभागाभर्तुर्वाक्यंमुदावहम् ॥ १० ॥ धर्मवाक्यंप्रशस्याथअनुमेनेचतंतथा ॥ अथोसकृकलोवैश्यस्तयासार्धंसुपुण्यकम् ॥ ११ ॥ चकारश्रद्ध याश्राद्धंदेवतागृहसंस्थितः ॥ पितरोदेवगन्धर्वाविमानैश्चसमागताः ॥ १२ ॥ तुष्टुवुस्तौमहात्मानौदम्पतीमुनयस्तथा ॥ अहंचाऽपितथाब्रह्मादेव्या युक्तोमहेश्वरः ॥ १३ ॥ सर्वेदेवाःसगन्धर्वाविमानैश्चसमागताः ॥ अहमेवततोब्रह्मादेव्यायुक्तोमहेश्वरः ॥ १४ ॥ सर्वेदेवाःसगन्धर्वास्तस्याःसत्येन तोषिताः ॥ ऊचुश्चतौमहात्मानौधर्मज्ञौसत्यपण्डितौ ॥ १५ ॥ भार्ययासहभद्रंतेवरंवरयसुव्रत ॥ १६ ॥ कृकलउवाच ॥ कस्यपुण्यप्रसङ्गेनत पसश्चसुरोत्तमाः ॥ सभार्यायवरंदातुंभवन्तोहिसमागताः ॥ १७ ॥ इन्द्रउवाच ॥ एषासतीमहाभागासुकलाचारुमङ्गला ॥ अस्याःसत्येनतुष्टाःस्म दातुकामावरंतव ॥ १८ ॥ समासेनतुतत्प्रोक्तंपूर्ववृत्तान्तमेवच ॥ तस्याश्चरितमाहात्म्यंश्रुत्वाभर्तासहर्षितः ॥ १९ ॥ तयासहसधर्मात्माहर्ष व्याकुललोचनः ॥ ननामदेवताःसर्वाउवाचचपुनःपुनः ॥ २० ॥ यदितुष्टामहाभागात्रयोदेवाःसनातनाः ॥ अन्येचऋषयःपुण्याःकृपांकृत्वाममो परि ॥ २१ ॥ जन्मजन्मनिदेवानांभक्तिमेवंकरोम्यहम् ॥ धर्मसत्यरतिःस्यान्मेभवतांहिप्रसादतः ॥ २२ ॥ पश्चाद्धिवैष्णवंलोकंसभार्यश्चपितामहैः॥ गन्तुमिच्छाम्यहंदेवायदितुष्टामहौजसः ॥ २३ ॥ देवाऊचुः ॥ एवमस्तुमहाभागसर्वमेवभविष्यति॥ सुकलेयंमहापुण्यातवपत्नीयशस्विनी ॥ २४ ॥ विष्णुरुवाच ॥ पुष्पवृष्टिंततश्चक्रुस्तयोरुपरिभूपते ॥ जगुर्गीतंमहापुण्यंललितंसुस्वरंततः ॥ २५ ॥ गन्धर्वागीततत्त्वज्ञाननृतुश्चाप्सरोगणाः ॥ ततोदे वाःसगन्धर्वाःस्वंस्वंस्थानंनृपोत्तम ॥ २६ ॥ वरंदत्त्वाप्रजग्मुस्तेस्तूयमानाःपतिव्रताम् ॥ नारीतीर्थंसमाख्यातमन्यत्किंचिद्वदामिते ॥२७॥ एतत्तेसर्व माख्यातंपुण्याख्यानमनुत्तमम् ॥ यःशृणोतिनरोराजन्सर्वपापैःप्रमुच्यते ॥ २८ ॥ श्रद्धयाशृणुतेनारीसुकलाख्यानमुत्तमम् ॥ सौभाग्येनतुसत्येनपुत्र पौत्रैर्नमुच्यते ॥ २९ ॥ मोदतेधनधान्येनसहभर्त्रासुखीभवेत् ॥ पतिव्रताभवेत्साचजन्मजन्मनिनान्यथा ॥३०॥ब्राह्मणोवेदविद्वांश्चक्षत्रियोविजयीभ वेत् ॥ धनधान्यंभवेच्चैववैश्यगेहेनसंशयः ॥३१॥ धर्मज्ञोजायतेराजन्सदाचारःसुखीभवेत् ॥ शूद्रःसुखमवाप्नोतिपुत्रपौत्रैःप्रवर्धते ॥३२॥ विपुलाजा

१ 'नान्नमश्नन्ति देवताः' इ० पा० । २ 'मुमुदे चान्तरात्मना' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यतेलक्ष्मीर्धनधान्यैरलङ्कृता ॥ ३३ ॥ इतिश्रीपाद्मपुराणेपञ्चपञ्चाशत्सहस्रसंहितायांभूमिखण्डेवेनोपाख्यानेसुकलाचरित्रेषष्टितमोऽध्यायः ॥ ६० ॥
वेनउवाच ॥ भार्यातीर्थंसमाख्यातंसर्वतीर्थोत्तमोत्तमम् ॥पितृतीर्थंसमाख्याहिपुत्राणांतारणंपरम् ॥ १ ॥ विष्णुरुवाच॥ कुरुक्षेत्रेमहाक्षेत्रेकुण्डलोनाम
ब्राह्मणः ॥ सुकर्मानामसत्पुत्रःकुण्डलस्यमहात्मनः ॥ २ ॥ गुरूतस्यमहावृद्धौधर्मज्ञौशास्त्रकोविदौ ॥ द्वावेतौतुमहात्मानौजरयापरिपीडितौ ॥ ३ ॥
तयोःशुश्रूषणंचक्रेभक्त्याचपरयाततः ॥ धर्मज्ञोभावसंयुक्तोअहर्निशमनारतम् ॥ ४ ॥ तस्माद्वेदानधीतेसपितुःशास्त्राण्यनेकशः ॥ सर्वाचा
रपरोदक्षोधर्मज्ञोज्ञानवत्सलः ॥ ५ ॥ अङ्गसंवाहनंचक्रेगुर्वोश्चस्वयमेवसः ॥ पादप्रक्षालनंचैवस्नानभोजनकांक्रियाम् ॥ ६ ॥ भक्त्याचैवस्वभावेनत
द्ध्यानेतन्मयोभवेत् ॥ मातापित्रोश्चराजेन्द्रउपचर्याप्रकारयेत् ॥ ७ ॥ तद्वर्तमानकालेतुबभूवनृपसत्तम ॥ पिप्पलोनामवैविप्रःकश्यपस्यमहात्मनः
॥ ८ ॥ तपस्तेपेनिराहारोजितात्माजितमत्सरः ॥ दयादानदमोपेतःकामंक्रोधंविजित्यसः ॥ ९ ॥ दशारण्यगतोधीमाञ्ज्ञानशान्तिपरायणः ॥ सर्वे
न्द्रियाणिसंयम्यतपस्तेपेमहामनाः ॥ १० ॥ तपःप्रभावतस्तस्यजन्तवोगतविग्रहाः ॥ वसन्तिसुखुगेतत्रएकोदरगताइव ॥ ११ ॥ तत्तपस्तस्यमुनयो
दृष्ट्वाविस्मयमाययुः ॥ नेदृशंकेनचित्तप्तंयथासौतप्यतेमुनिः ॥ १२ ॥ देवाश्चइन्द्रप्रमुखाःपरंविस्मयमाययुः ॥ अहोअस्यतपस्तीव्रंशमश्चेन्द्रियसं
यमः ॥ १३ ॥ निर्विकारोनिरुद्वेगःकामक्रोधविवर्जितः ॥ शीतवातातपसहोधराधरइवस्थितः ॥ १४ ॥ विषयेविमुखोधीरोमनसोऽतीतसङ्ग्रहम् ॥
नशृणोतियथाशब्दंकस्यचिद्द्विजसत्तमः ॥ १५ ॥ संस्थानंतादृशंगत्वास्थित्वाएकाग्रमानसः ॥ ब्रह्मध्यानमयोभूत्वासानन्दसुखपङ्कजः ॥ १६ ॥
अश्मकाष्ठमयोभूत्वानिश्चेष्टोगिरिवत्स्थितः ॥ स्थाणुवद्दृश्यतेचासौसुस्थिरोधर्मवत्सलः ॥ १७ ॥ तपःक्लिष्टशरीरोऽतिश्रद्धावानननसूयकः ॥ एवंवर्षस
हस्रैकंसञ्जातंतस्यधीमतः ॥ १८ ॥ पिपीलिकाभिर्बह्वीभिःकृतंमृद्भारसञ्चयम् ॥ तस्योपरिमहाकायंवल्मीकंनिजमन्दिरम् ॥ १९ ॥ वल्मीकोदरमध्य
स्थोजडीभूतइवस्थितः ॥ सएवंपिप्पलोविप्रस्तपतेसुमहत्तपः ॥ २० ॥ कृष्णसर्पैस्तुसर्वत्रवेष्टितोद्विजसत्तमः ॥ तमुग्रतेजसंविप्रंप्रदशन्तिविषोल्बणाः
॥ २१ ॥सम्प्राप्यगात्रमर्माणिविषंतस्यनभेदयेत् ॥ तेजसातस्यविप्रस्यनागाःशान्तिमथागमन् ॥ २२ ॥ तस्यकायात्समुद्भूताअर्चिषोदीप्ततेजसः ॥
नानारूपाःसुबहुशोदृश्यन्तेचपृथक्पृथक् ॥ २३ ॥ यथावह्नेःखरतरास्तथाविधानरोत्तम ॥ यथामेघोदरेसूर्यःप्रविष्टोभातिरश्मिभिः ॥ २४ ॥ वल्मीक
स्थस्तथाविप्रःपिप्पलोभातितेजसा ॥ सर्पादशन्तिविप्रंतंसक्रोधादशनैरपि ॥ २५ ॥ नभिन्दन्तिचदंष्ट्राग्राश्चर्मभित्त्वानृपोत्तम ॥ एवंवर्षसहस्रैकंतपआ
चरतस्ततः ॥ २६ ॥ गतंतुराजराजेन्द्रमुनेस्तस्यमहात्मनः ॥ त्रिकालंसाध्यमानस्यशीतवर्षातपान्वितः ॥ २७ ॥ गतःकालोमहाराजपिप्पलस्यमहा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्मनः ॥ तद्वच्चवायुभक्षंतुकृतंतनमहात्मना ॥ २८ ॥ त्रीणिवर्षसहस्राणिगतानितस्यतप्यतः ॥ तस्यमूर्ध्नितततोदेवैः पुष्पवृष्टिःकृतापुरा ॥ २९ ॥ ब्रह्मज्ञो ऽसिमहाभागधर्मज्ञोऽसिनसंशयः ॥ सर्वज्ञानमयोऽसित्वंसञ्जातःस्वेनकर्मणा ॥ ३० ॥ यंयंत्वंवाञ्छसेकामंतंतंप्राप्स्यसिनान्यथा ॥ सर्वकामप्रसिद्ध स्त्वंस्वतएवभविष्यसि ॥ ३१ ॥ समाकर्ण्यमहद्वाक्यंपिप्पलोऽपिमहामनाः ॥ प्रणम्यदेवताःसर्वाभक्त्यानमितकन्धरः ॥३२॥ हर्षेणमहताविष्टोवचनं प्रत्युवाचसः ॥ इदंविश्वंजगत्सर्वंममवश्यंयथाभवेत् ॥३३॥ तथाकुरुध्वंदेवेन्द्राविद्याधरोभवाम्यहम् ॥ एवमुक्त्वासमेधावीविररामनृपोत्तम ॥ ३४ ॥ एवमस्त्वितितेप्रोचुर्द्विजश्रेष्ठंसुरास्तदा ॥ दत्त्वावरंमहाभागजग्मुस्तस्मैमहात्मने ॥ ३५॥ गतेषुतेषुदेवेषुपिप्पलोद्विजसत्तमः ॥ ब्रह्मण्यंसाधयेन्नित्यंवि श्ववश्यंप्रचिन्तयेत् ॥ ३६ ॥ तदाप्रभृतिराजेन्द्रपिप्पलोद्विजसत्तमः ॥ विद्याधरपदंलब्ध्वाकामगामीमहीयते ॥ ३७ ॥ एवंसपिप्पलोविप्रोविद्याधरप दंगतः ॥ सञ्जातोदेवलोकेशःसर्वशास्त्रविशारदः ॥ ३८ ॥ एकदातुमहातेजाःपिप्पलःपर्यचिन्तयत् ॥ विश्वंवश्यंभवेत्सर्वंममदत्तोवरोत्तमः ॥ ३९ ॥ तदर्थंप्रत्ययंकर्तुमुद्यतोद्विजपुङ्गवः ॥ यंयंचिन्तयतेकर्तुंतंतंहिवशमानयेत् ॥ ४० ॥ एवंसप्रत्ययेजातेमनसापर्यकल्पयत् ॥ द्वितीयोनास्तिवैलोकेमत्स मःपुरुषोत्तमः ॥ ४१ ॥ एवंहिकल्पमानस्यपिप्पलस्यमहात्मनः ॥ ज्ञात्वामानसिकंभावंसारसस्तमुवाचह ॥ ४२ ॥ सरस्तीरगतोराजन्सुस्वरंव्यञ्ज नान्वितम् ॥ स्वनंसौष्ठवसंयुक्तमुक्तवान्पिप्पलंप्रति ॥ ४३ ॥ कस्मादुद्वहसेगर्वमेवंत्वंपरमात्मकम् ॥ सर्ववश्यात्मिकींसिद्धिंनाहंमन्येतवैवहि ॥४४॥ वश्यावश्यमिदंकर्मअर्वाचीनंप्रशस्यते ॥ पराचीनंनजानासिपिप्पलत्वंहिमूढधीः ॥ ४५ ॥ वर्षाणांतुसहस्राणियावत्त्रीणित्वयातपः ॥ समाचीर्णंततो गर्वंकुरुषेकिंमुधाद्विज ॥ ४६ ॥ कुण्डलस्यसुतोधीरःसुकर्मानामयःसुधीः ॥ वश्यावश्यंजगत्सर्वंतस्यासीच्छृणुसाम्प्रतम् ॥ ४७ ॥ अर्वाचीनंपराची नंसवैजानातिबुद्धिमान् ॥ लोकेनास्तिमहाज्ञानीतत्समःशृणुपिप्पल ॥ ४८ ॥ नकुण्डलस्यपुत्रेणसदृशस्त्वंसुकर्मणा ॥ नदत्तंतेनवैदानंनज्ञानंपरिचि न्तितम् ॥ ४९ ॥ हुतयज्ञादिकंकर्मनकृतंतेनवैकदा ॥ नगतस्तीर्थयात्रायांनचवह्निरुपासनम्[1] ॥ ५० ॥ सकदाकृतवान्विप्रधर्मसेवार्थमुत्तमम् ॥ स्व च्छन्दचारीज्ञानात्मापितृमातृसुहृत्सदा ॥ ५१ ॥ वेदाध्ययनसम्पन्नःसर्वशास्त्रार्थकोविदः ॥ यादृशंतस्यवैज्ञानंबालस्यापिसुकर्मणः ॥ ५२ ॥ तादृशंनास्तितेज्ञानंवृथात्वंगर्वमुद्वहेः ॥ ५३ ॥ पिप्पलउवाच ॥ कोभवान्पक्षिरूपेणमामेवंपरिकुत्सयेत् ॥ कस्मान्निन्दतिमेज्ञानंपराचीनंतुकीदृशम् ॥ ५४ ॥ तन्मेविस्तरतोब्रूहित्वयिज्ञानंकथंभवेत् ॥ अर्वाचीनगतिंसर्वांपराचीनस्यसाम्प्रतम् ॥ ५५ ॥ वदत्वमण्डजश्रेष्ठज्ञानपूर्वंसुविस्तरम् ॥ किंवा

१ 'सद्गुरूपासनं नच' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्माचविष्णुश्चकिंवारुद्रोभविष्यसि ॥ ५६ ॥ सारसउवाच ॥ नास्तितेतपसोभावःफलंनास्तिचतस्यतु ॥ त्वयानपरितप्तस्यतपसःसाम्प्रतंशृणु
॥ ५७ ॥ कुण्डलस्यापिपुत्रस्यबालस्यापियथागुणः ॥ तथातेनास्तिवैज्ञानंपरिज्ञातंनतत्पदम् ॥ ५८ ॥ इतोगत्वापिपृच्छत्वंममरूपंद्विजोत्तम ॥ सव
दिष्यतिधर्मात्मासर्वज्ञानंतवैवहि ॥ ५९ ॥ विष्णुरुवाच ॥ एवमाकर्ण्यतत्सर्वंसारसेनप्रभाषितम् ॥ निर्जगामसवेगेनदशारण्यंमहाश्रमम् ॥६०॥ इति
श्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेएकषष्टितमोऽध्यायः ॥६१॥ विष्णुरुवाच ॥ कुण्डलस्याश्रमंगत्वासत्यधर्मसमाकुलम् ॥ सुकर्माणंततोदृष्ट्वापि
तृमातृपरायणम् ॥ १ ॥ शुश्रूषन्तंमहात्मानंगुरूसत्यपराक्रमम् ॥ महारूपंमहातेजंमहाज्ञानसमाकुलम् ॥२॥ मातापित्रोःपदान्तेतमुपविष्टंददर्शसः॥
महाभक्त्यान्वितंशान्तंसर्वज्ञानमहानिधिम् ॥ ३ ॥ कुण्डलस्यापिपुत्रेणसुकर्मणामहात्मना ॥ आगतंपिप्पलंदृष्ट्वाद्वारदेशेमहामतिम् ॥ ४ ॥ आसना
त्तूर्णमुत्थायअभ्युत्थानंकृतंपुनः ॥ आगच्छत्वंमहाभागविद्याधरमहामते ॥ ५ ॥ आसनंपाद्यमर्घंचददौतस्मैमहामतिः ॥ निर्विघ्नोऽसिमहाप्रा
ज्ञकुशलेनप्रवर्त्तसे ॥ ६ ॥ निरामयंचपप्रच्छपिप्पलंतंसमागतम् ॥ यस्मादागमनंतेऽद्यतत्सर्वंप्रवदाम्यहम् ॥७॥ वर्षाणांचसहस्राणित्रीणियावत्त्वया
तपः ॥ तप्तमेवमहाभागसुरेभ्यःप्राप्तवान्वरम् ॥ ८ ॥ वश्यत्वंचत्वयाप्राप्तंकामचारस्तथैवच ॥ तेनमत्तोनजानासिगर्वमुद्वहसेवृथा ॥ ९ ॥ दृष्ट्वातेचे
ष्टितंसर्वंसारसेनमहात्मना ॥ ममाभिधानंकथितंममज्ञानमनुत्तमम् ॥१०॥ पिप्पलउवाच ॥ योऽसौमांसारसोविप्रसरित्तीरेप्रयुक्तवान् ॥ सर्वज्ञानंवदे
न्मांहिसतुकःप्रभुरीश्वरः ॥ ११ ॥ सुकर्मोवाच ॥ भवन्तमुक्तवान्योवैसरित्तीरेतुसारसः ॥ ब्रह्माणंत्वंमहाज्ञानंतंविद्धिपरमेश्वरम् ॥ १२ ॥ अन्यत्किंपृ
च्छसेब्रूहितमेवंप्रवदाम्यहम् ॥ एवमुक्तःसधर्मात्मासुकर्मानृपनन्दन ॥ १३ ॥ पिप्पलउवाच ॥ त्वयिविश्यंजगत्सर्वमितिशुश्रुमभूतले ॥ तन्मे
त्वंकौतुकंविप्रदर्शयस्वप्रयत्नतः ॥ १४ ॥ पश्यकौतुकमेवाद्यत्वंवश्यावश्यकारणम् ॥ तमुवाचसधर्मात्मासुकर्मापिप्पलंप्रति ॥ १५ ॥ अथसस्मार
वैदेवान्सुकर्माप्रत्ययायवै ॥ इन्द्राद्यालोकपालाश्चदेवाश्चाग्निपुरोगमाः ॥१६॥ समागताःसमाहूतानानाविद्याधरास्तथा ॥ सुकर्माणंततःप्रोचुर्देवाश्चा
ग्निपुरोगमाः ॥ १७ ॥ कस्मात्स्मृतास्त्वयाविप्रततोऽर्थकारणंवद ॥ १८ ॥ सुकर्मोवाच ॥ अयमेषसुसम्प्राप्तोविद्याधरोहिपिप्पलः ॥ मामे
वंभाषतेविप्रवश्यावश्यत्वकारणम् ॥१९॥ प्रत्ययार्थंसमाहूताअस्यैवचमहात्मनः ॥ स्वंस्वंस्थानंप्रगच्छध्वमित्युवाचसुरान्प्रति ॥२०॥ तमूचुस्तेततो
देवाःसुकर्माणंमहामतिम् ॥ अस्माकंदर्शनंविप्रनमोघंजायतेवरम् ॥ २१ ॥ वरंवरयभद्रंतेमनसायद्विरोचते ॥ तत्तेदद्मोनसंदेहस्त्वेवमूचुःसु

१ 'पराचीनस्य तत्पदम्' इ० पा० । २ 'तं जगाम स वेगेन ब्रह्मात्मानं नृपोत्तम' इ० पा० । ३ 'ब्राह्मणम्' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रोत्तमाः ॥ २२ ॥ भक्त्याप्रणम्यतान्देवान्ययाचेसद्विजोत्तमः ॥ अचलांदत्तदेवेन्द्राःसुभक्तिभावसंयुताम् ॥ २३ ॥ मातापित्रोश्चमेनित्यंतद्वैवरमनु
त्तमम् ॥ पितामेवैष्णवंलोकंप्रयात्वेतद्वरोत्तमम् ॥ तद्वन्माताचदेवेशावरमन्यंनयाचये ॥ २४ ॥ ॥ देवाऊचुः ॥ पितृभक्तोऽसिविप्रेन्द्राभक्त्यातवव
यंद्विज ॥ सुकर्मञ्छ्रूयतांवाक्यंप्रीत्यायुक्ताःसदैवते ॥२५॥ एवमुक्त्वागतादेवाःस्वर्लोकंनृपनन्दन॥सर्वमैश्वर्यमेतेनतस्याग्रेपरिदर्शितम्॥२६॥दृष्टंतुपि
प्पलेनापिकौतुकंचमहाद्भुतम् ॥ तमुवाचसधर्मात्मापिप्पलंकुण्डलात्मजम् ॥२७॥ अर्वाचीनंत्विदंरूपंपराचीनंचकीदृशम् ॥ प्रभावमुभयोश्चैववदस्व
वदतांवर ॥ २८ ॥ सुकर्मोवाच ॥ पराचीनस्यरूपस्यलिङ्गमेववदामिते ॥ येनलोकाःप्रमोदन्तेइन्द्राद्याःसचराचराः ॥२९॥ अयमेवजगन्नाथःसर्वगो
व्यापकःप्रभुः ॥ अस्यरूपंनदृष्टंहिकेनाप्येवहियोगिना ॥ ३० ॥ श्रुतिरेववदत्येवंतंवक्तुंशङ्कितेवसा ॥ अपाणिपादनासश्चअकर्णोमुखवर्जितः ॥३१॥
सर्वंपश्यतिवैकर्मकृतंत्रैलोक्यवासिनाम् ॥ तेषामुक्तमकर्णश्चसशृणोतिसुसाक्ष्यदः ॥ ३२ ॥ गतिहीनोव्रजेत्सोऽपिसहिसर्वत्रदृश्यते ॥ पाणिहीनोऽपिगृ
ह्णातिपादहीनःप्रधावति ॥ ३३ ॥ सर्वत्रदृश्यतेविप्रव्यापकःपादवर्जितः ॥ यंनपश्यन्तिदेवेन्द्रामुनयस्तत्त्वदर्शिनः ॥ ३४ ॥ सचपश्यतितान्सर्वा
न्सत्यासत्यपदेस्थितान् ॥ व्यापकंविमलंसिद्धंसिद्धिदंसर्वनायकम् ॥ ३५ ॥ यंजानातिमहायोगीव्यासोधर्मार्थकोविदः ॥ तेजोमूर्तिःसचाकाशमेक
वर्णमनन्तकम् ॥ ३६ ॥ तदेतन्निर्मलंरूपंश्रुतिराख्यातिनिश्चितम् ॥ व्यासश्चैवहिजानातिमार्कण्डेयश्चतत्पदम्॥३७॥अर्वाचीनंप्रवक्ष्यामिशृणुष्वैका
ग्रमानसः ॥ यदासंहृत्यभूतात्मास्वयमेकःप्रगच्छति ॥ ३८ ॥ अप्सुशय्यांसमास्थायशेषभोगासनस्थितः ॥ तमाश्रित्यस्वपित्येकोबहुकालंजनार्द
नः ॥ ३९ ॥ जलान्धकारसन्ततोमार्कण्डेयोमहामुनिः ॥ स्थानमिच्छन्सयोगात्मानिर्विण्णोभ्रमणेनसः ॥ ४० ॥ भ्रममाणःसदृदृशेशेषपर्यङ्कशायि
नम् ॥ सूर्यकोटिप्रतीकाशंदिव्याभरणभूषितम् ॥ ४१ ॥ दिव्यमाल्याम्बरधरंसर्वव्यापिनमीश्वरम् ॥ योगनिद्रांगतंकान्तंशङ्खचक्रगदाधरम् ॥४२॥
एकानारीमहाभागाकृष्णाञ्जनचयोपमा ॥ दंष्ट्राकरालवदनाभीमरूपाद्विजोत्तम ॥ ४३ ॥ तयोक्तोऽसौमुनिश्रेष्ठोमाभैरितिमहामुनिः ॥ पद्मपत्रंसुवि
स्तीर्णंपञ्चयोजनमायतम् ॥ ४४ ॥ तस्मिन्पत्रेमहादेव्यामार्कण्डेयोनिवेशितः ॥ केशवेसतिसुप्तेऽपिनास्त्यत्रचभयंतव ॥ ४५ ॥ तामुवाचसयोगीन्द्रः
कात्वंभवसिभामिनि ॥ अस्मिन्विनिर्जितेचैकाभवतीपरिबृंहिता ॥ ४६ ॥ पृष्टैवंमुनिनादेवीसादरंप्राहभूसुर॥ नागभोगाङ्कपर्यङ्केसयःस्वपितिकेशवः
॥ ४७ ॥ अस्याहंवैष्णवीशक्तिःकालरात्रिरिहोच्यते ॥ मामेवंविद्धिविप्रेन्द्रसर्वमायासमन्वितम् ॥ ४८ ॥ महामायापुराणेषुजगन्मोहायकथ्यते ॥
इत्युक्त्वासागतादेवीअन्तर्धानंहिपिप्पल ॥ ४९ ॥ देव्यामनुगतायांतुमार्कण्डेयस्यपश्यतः ॥ तस्यनाभ्यांसमुत्पन्नंपङ्कजंहाटकप्रभम् ॥ ५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्माज्जज्ञेमहातेजाब्रह्मालोकपितामहः ॥ तस्माद्विजज्ञिरेलोकाःसर्वेस्थावरजङ्गमाः ॥ ५१ ॥ इन्द्राद्यालोकपालाश्चदेवाश्चाग्निपुरोगमाः ॥ अर्वाचीनं
स्वरूपंतुदर्शितंहिमयानृप ॥ ५२ ॥ अर्वाचीनस्वरूपोऽयंपराचीनोनिराश्रयः ॥ यदासदर्शयेत्कार्यंकायरूपाभवन्तिते ॥ ५३ ॥ ब्रह्माद्याःसर्वलोका
श्चअर्वाचीनाहिपिप्पल ॥ अर्वाचीनाअमीलोकायेभवन्तिजगत्त्रये ॥ ५४ ॥ पराचीनःसभूतात्मायंसुपश्यन्तियोगिनः ॥ मोक्षरूपंपरंस्थानंपर
ब्रह्मस्वरूपकम् ॥ ५५ ॥ अव्यक्तमक्षरंहंसंशुद्धंसिद्धिसमन्वितम् ॥ पराचीनस्ययद्रूपंविद्याधरतवाग्रतः ॥ ५६ ॥ सर्वमेवमयाख्यातमन्यत्किंतेवदा
म्यहम् ॥ ५७ ॥ पिप्पलउवाच ॥ कस्मादेतन्महाज्ञानमुद्भूतंतवसुव्रत ॥ अर्वाचीनगतिंविद्वान्पराचीनगतिंतथा ॥ ५८ ॥ त्रैलोक्यस्यपरं
ज्ञानंत्वय्येवंपरिवर्त्तते ॥ तपसोनैवपश्यामिपरांनिष्ठांहिसुव्रत ॥ ५९ ॥ यजनंयाजनंतीर्थंतपोवाकृतवानसि ॥ तत्प्रभावंवदस्वैवंकेनज्ञानं
तवाखिलम् ॥ ६० ॥ सुकर्मोवाच ॥ तपएवनजानामिनकृतंकायशोषणम् ॥ यजनंयाजनंवापिनजानेतीर्थसाधनम् ॥ ६१ ॥ नम
यासाधितंध्यानंपुण्यकालंसुकर्मजम् ॥ स्फुटमेकंप्रजानामिपितृमातृप्रपूजनम् ॥ ६२ ॥ उभयोरपिहस्तेनमातापित्रोस्तुनित्यशः ॥ पाद
प्रक्षालनंपुण्यंस्वयमेवकरोम्यहम् ॥ ६३ ॥ अङ्गसंवाहनंस्नानंभोजनादिकमेवच ॥ त्रिकालेध्यानसंलीनःसाधयामिदिनेदिने ॥ ६४ ॥ पादोदकं
तयोश्चैवमातापित्रोर्दिनेदिने॥भक्तिभावेनविन्दामिपूजयामिसुभावतः॥६५॥गुरूमेजीवमानौतुयावत्कालंहिपिप्पल ॥तावत्कालंहिमेलाभोह्यतुलश्चप्र
जायते ॥ ६६ ॥ त्रिकालंपूजयाम्येतौशुद्धभावेनचेतसा ॥ स्वच्छन्दलीलासञ्चारीवर्ताम्येवहिपिप्पल ॥ ६७ ॥ किंमेचान्येनतपसाकिंमेकायस्यशो
षणैः ॥ किंमेसुतीर्थयात्राभिरन्यैःपुण्यैश्चसाम्प्रतम् ॥ ६८ ॥ मखानामेवसर्वेषांयत्फलंप्राप्यतेद्विज[1]॥ तत्फलंतुमयादृष्टंपितुःशुश्रूषणादपि ॥ ६९ ॥
मातुःशुश्रूषणंतद्वत्पुत्राणांगतिदायकम् ॥ सर्वकर्मसुसर्वस्वंसारभूतंजगत्त्रये ॥ ७० ॥ पुत्रस्यजायतेलोकोमातुःशुश्रूषणादपि ॥ पितुःशुश्रूषणेतद्वन्म
हत्पुण्यंप्रजायते ॥ ७१ ॥ तत्रगङ्गागयातीर्थतत्रपुष्करमेवच ॥ यत्रमातापितातिष्ठेत्पुत्रस्यापिनसंशयः ॥ ७२ ॥ अन्यानितत्रतीर्थानिपुण्यानिविवि
धानिच ॥ भवन्त्येतानिपुत्रस्यपितुःशुश्रूषणादपि ॥ ७३ ॥ पितुःशुश्रूषणात्तस्यदानस्यतपसःफलम् ॥सत्पुत्रस्यभवेद्विप्रअन्यधर्मःश्रमायते॥७४॥
पितुःशुश्रूषणात्पुण्यंपुत्रःप्राप्नोत्यनुत्तमम् ॥ स्वकर्मणस्तुसर्वस्वमिहैवचपरत्रच ॥ ७५ ॥ जीवमानौगुरूत्वेतौस्वमातापितरौतथा ॥ शुश्रूषतेसुतोभू
त्वातस्यपुण्यफलंशृणु ॥ ७६ ॥ देवास्तस्यापितुष्यन्तिऋषयःपुण्यवत्सलाः ॥ त्रयोलोकास्तुतुष्यन्तिपितुःशुश्रूषणादिह ॥ ७७ ॥ मातापित्रोस्तु

१ 'भजन्त्येतानि' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यः पादौनित्यमेवहिक्षालयेत् ॥ तस्यभागीरथीस्नानमहन्यहनिजायते ॥ ७८ ॥ पुण्यैर्मिष्टान्नपानैर्यः पितरंमातरंतथा ॥ भक्त्याभोजयतेनित्यंतस्य पुण्यंवदाम्यहम्॥७९॥अश्वमेधस्ययज्ञस्यफलंपुत्रस्यजायते॥ ताम्बूलैश्छादनैश्चैवपानैश्चशनकैस्तथा॥८०॥भक्त्याचान्नेनपुण्येनगुरूयेनाभिपूजितौ॥ सर्वज्ञानीभवेत्सोऽपियशःकीर्तिमवाप्नुयात् ॥ ८१ ॥ मातरंपितरंदृष्ट्वाहर्षात्सम्भाषयेत्सुतः॥निधयस्तस्यसन्तुष्टास्तस्यगेहेवसन्तिते ॥ ८२ ॥ गावः सौहृद्यमायान्तिपुत्रस्यसुखदाःसदा ॥ ८३ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेमातृपितृतीर्थमाहात्म्येद्विषष्टितमोऽध्यायः ॥ ६२ ॥

सुकर्मोवाच ॥ तयोश्चापिद्विजश्रेष्ठमातापित्रोश्चस्नातयोः ॥ पुत्रस्यापिहिसर्वाङ्गेपतन्त्यम्बुकणायदा ॥ १ ॥ सर्वतीर्थसमंस्नानंपुत्रस्यापिसुजायते ॥ पतितंविकलंवृद्धमशक्तंसर्वकर्मसु ॥ २ ॥ व्याधितंकुष्ठिनंतातंमातरंचतथाविधाम् ॥ उपाचरतियःपुत्रस्तस्यपुण्यंवदाम्यहम् ॥ ३ ॥ विष्णुस्तस्य प्रसन्नात्माजायतेनात्रसंशयः ॥ प्रयातिवैष्णवंलोकंयदप्राप्यंहियोगिभिः ॥ ४ ॥ पितरौविकलौदीनौवृद्धावेतौगुरूसुतः ॥ महागदेनसम्प्राप्तौपरित्य जतिपापधीः ॥ ५ ॥ पुत्रोनरकमाप्नोतिदारुणंकृमिसङ्कुलम् ॥ वृद्धाभ्यांचसमाहूतोगुरुभ्यामिहसाम्प्रतम् ॥ ६ ॥ नप्रयातिसुतोभूत्वातस्यपापंवदा म्यहम् ॥ विष्ठाशीजायतेमूढोग्रामघोणीनसंशयः ॥ ७ ॥ यावज्जन्मसहस्रंतुपुनःश्वाचाभिजायते ॥ पुत्रगेहेस्थितौवृद्धौमाताचजनकस्तथा ॥ ८ ॥ अभोजयित्वातावन्नंस्वयमत्तिचयःसुतः ॥ मूत्रंविष्ठांसभुञ्जीतयावज्जन्मसहस्रकम् ॥ ९ ॥ कृष्णसर्पोभवेत्पापीयावज्जन्मशतद्वयम् ॥ मातरंपितरंवृद्ध मवज्ञायप्रवर्त्तते ॥ १० ॥ ग्राहोऽपिजायतेदुष्टोजन्मकोटिशतैरपि ॥ तावेतौकुत्सतेपुत्रःकटुकैर्वचनैरपि ॥ ११ ॥ सचपापीभवेद्व्याघ्रःपश्चाद्दक्षःप्रजा यते ॥ मातरंपितरंपुत्रोयोनैमन्येतदुष्टधीः ॥ १२ ॥ कुम्भीपाकेवसेत्तावद्यावद्युगसहस्रकम् ॥ नास्तिमातृसमंतीर्थंपुत्राणांचपितुःसमम् ॥ १३ ॥ तारणायहितायैवइहैवचपरत्रच ॥ तस्मादहंमहाप्राज्ञपितृदेवंप्रपूजये ॥ १४ ॥ मातृदेवंसर्वदेवयोगयोगीतथाभवम् ॥ मातृपितृप्रसादेनसञ्जातंज्ञान मुत्तमम् ॥ १५ ॥ त्रिलोकीयंसमस्तातुसंयातामम वश्यताम् ॥ अर्वाचीनगतिंजानेदेवस्यास्यमहात्मनः ॥ १६ ॥ वासुदेवस्यतस्यैवपराचीनामहा मते ॥ सर्वंज्ञानंसमुद्भूतंपितृमातृप्रसादतः ॥ १७ ॥ कोनपूजयतेविद्वान्पितरंमातरंतथा ॥ साङ्गोपाङ्गैरधीतैस्तैःश्रुतिशास्त्रसमन्वितैः ॥ १८ ॥ वेदै रपिचकिंविप्रपितायेननपूजितः ॥ मातानपूजितायेनतस्यवेदानिरर्थकाः ॥ १९ ॥ यज्ञैश्चतपसाविप्रकिंदानैःकिंचपूजनैः ॥ प्रयातितस्यवैफल्यंन मातायेनपूजिता ॥ २० ॥ नपितापूजितोयेनजीवमानोगृहेस्थितः ॥ एषपुत्रस्यवैधर्मस्तथातीर्थंनरेष्विह ॥ २१ ॥ एषपुत्रस्यवैमोक्षस्तथाजन्म

१ 'गृध्रोऽपि' इ० पा० । २ 'न नमस्यति पापधीः' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलंशुभम् ॥ एषपुत्रस्यवैयज्ञोदानमेवनसंशयः ॥ २२ ॥ पितरंपूजयेन्नित्यंभक्त्याभावेनतत्परः ॥ तस्यजातंसमस्तंतद्यदुक्तंपूर्वमेवहि ॥ २३ ॥
दानस्यापिफलंतेनतीर्थस्यापिनसंशयः ॥ यज्ञस्यापिफलंप्राप्तंमातायेनाप्युपासिता ॥ २४ ॥ पितायेनसुभक्त्याचनित्यमेवाप्युपासितः ॥ तस्य
सर्वास्सुसंसिद्धायज्ञाद्याःपुण्यदाःक्रियाः ॥ २५ ॥ एतदर्थंसमाज्ञातंधर्मशास्त्रंश्रुतंमया ॥ पितृभक्तिपरोनित्यंभवेत्पुत्रोहिपिप्पल ॥ २६ ॥ तुष्टेपितरि
सम्प्राप्तंयदुराज्ञापुरासुखम् ॥ रुष्टेपितरिचप्राप्तंमहत्पापंपुराशृणु ॥ २७ ॥ रुरुणापौरवेणापिपित्राशतेनभूतले ॥ एवंज्ञानंमयाचाप्तंद्वावेतौयदुपासितौ
॥ २८ ॥ एतयोश्चप्रसादेनप्राप्तंफलमनुत्तमम् ॥ २९ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेमातापितृतीर्थमाहात्म्येत्रिषष्टितमोऽध्यायः ॥६३॥
पिप्पलउवाच ॥ पितुःप्रसादभावाद्वैयदुनासुखमुत्तमम् ॥ कथंप्राप्तंसुभुक्तंचतन्मेविस्तरतोवद ॥ १ ॥ कस्मात्पापप्रभावंचरुरुर्भुङ्क्तेद्विजोत्तम॥
सकलंविस्तरेणापिवदमेकुण्डलात्मज ॥ २ ॥ सुकर्मोवाच ॥ श्रूयतामभिधास्यामिचरित्रंपापनाशनम् ॥ नहुषस्यसुपुण्यस्यययातेश्चमहात्मनः ॥
॥ ३ ॥ सोमवंशात्प्रभूतोहिनहुषोमेदिनीपतिः ॥ दानधर्माननेकांश्चचकारह्यतुलानपि ॥ ४ ॥ मखानामश्वमेधानामियाजशतमुत्तमम् ॥ वाजपेय
शतंचापिअन्यान्यज्ञाननेकधा ॥५॥ आत्मनःपुण्यभावेनइन्द्रलोकमवापसः ॥ पुत्रंधर्मगुणोपेतंप्रजापालंचकारसः॥६॥ययातिंसत्यसम्पन्नंधर्मवीर्यम
हामतिम् ॥ ऐन्द्रंपदंगतोराजातस्यपुत्रःपदेस्वके ॥ ७ ॥ ययातिःसत्यसम्पन्नःप्रजाधर्मेणपालयेत् ॥ स्वयमेवप्रपश्येत्सप्रजाकर्माणितान्यपि ॥८॥
याजयामासधर्मज्ञःश्रुत्वाधर्ममनुत्तमम् ॥ यज्ञतीर्थादिकंसर्वंदानपुण्यंचकारसः ॥ ९ ॥ राज्यंचकारमेधावीसत्यधर्मेणवैतदा ॥ यावदशीतिसहस्रा
णिवर्षाणांनृपनन्दनः ॥ १० ॥ तावत्कालंगतंतस्यययातेस्तुमहात्मनः ॥ तस्यपुत्राश्चचत्वारस्तद्वीर्यबलविक्रमाः ॥ ११ ॥ तेषांनामानिवक्ष्या
मिशृणुष्वैकाग्रमानसः ॥ तस्यासीज्ज्येष्ठपुत्रस्तुरुरुर्नाममहाबलः ॥ १२ ॥ पुरुर्नामद्वितीयोऽभूत्कुरुश्चान्यस्तृतीयकः ॥ यदुर्नामसधर्मात्माचतुर्थो
नृपतेःसुतः ॥ १३ ॥ एवंचत्वारःपुत्राश्चययातेस्तुमहात्मनः ॥ तेजसापौरुषेणापिपितृतुल्यपराक्रमाः ॥ १४ ॥ एवंराज्यंकृतंतेनधर्मेणापिययाति
ना ॥ तस्यकीर्तिर्यशोभावस्त्रैलोक्येप्रचुरोऽभवत् ॥१५॥ विष्णुरुवाच ॥ एकदातुद्विजश्रेष्ठोनारदोब्रह्मनन्दनः ॥ ऐन्द्रलोकंगतोराजन्द्रष्टुंचैवपुरन्द
रम् ॥ १६ ॥ सहस्राक्षस्ततोऽपश्यद्धुताशनसमप्रभम् ॥ देवोविप्रंसमायान्तंसर्वज्ञंज्ञानपण्डितम् ॥ १७ ॥ पूजितंमधुपर्काद्यैर्भक्त्यानमितकन्धरः ॥
निवेश्यचासनेपुण्येपप्रच्छमुनिपुङ्गवम् ॥१८॥ इन्द्रउवाच ॥ कस्मादागमनंतेऽद्यकिमर्थमिहचागतः ॥ किंतेहिसुप्रियंविप्रकरोम्यद्यमहामुने ॥१९॥
॥ नारदउवाच ॥ देवराजकृतंसर्वंभक्त्यायच्चप्रभाषितम् ॥ सन्तुष्टोऽस्मिमहाप्राज्ञप्रश्नोत्तरंवदाम्यहम् ॥ २० ॥ महीलोकात्सुसम्प्राप्तःसाम्प्रतंतवम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्दिरम् ॥ त्वामन्वेष्टुंसमायातोद्रष्टुंनाहुषमेवच ॥ २१ ॥ इन्द्रउवाच ॥ सत्यधर्मेणकोराजाप्रजाःपालयतेसदा ॥ सर्वधर्मसमायुक्तःश्रुतवाञ्ज्ञानवा न्गुणी ॥ २२ ॥ पृथिव्यामस्तिकोराजावेदज्ञोब्राह्मणप्रियः ॥ ब्रह्मण्योवेदविच्छूरोयज्वादातासुभक्तिमान् ॥ २३ ॥ नारदउवाच ॥ एभिर्गुणैस्तुसंयु क्तोनहुषस्यात्मजोबली ॥ यस्यसत्येनवीर्येणसर्वेलोकाःप्रतिष्ठिताः ॥ २४ ॥ भवादृशोहिभूलोकेययातिर्नहुषात्मजः ॥ भवान्स्वर्गेसचैवास्तिभूतलेभू तिवर्धनः ॥ २५ ॥ पितुःश्रेष्ठोमहाराजह्यश्वमेधशतंतथा ॥ वाजपेयशतंचक्रेययातिःपृथिवीपतिः ॥ २६ ॥ दत्तान्यनेकरूपाणिदानानितेनभक्तितः ॥ गवांलक्षसहस्राणिगवांकोटिशतानिच ॥ २७ ॥ कोटिहोमांश्चकाराथलक्षहोमांस्तथैवच ॥ भूमिदानादिदानानिब्राह्मणेभ्योऽददाच्चयः ॥ २८ ॥ सर्वं येनस्वरूपंहिधर्मस्यपरिपालितम् ॥ एवंगुणैःसमायुक्तोययातिर्नहुषात्मजः ॥ २९ ॥ वर्षाणांतुसहस्राणिअशीतिर्नृपसत्तमः ॥ राज्यंचकारसत्येन यथादिविभवानिह ॥ ३० ॥ सुकर्मोवाच ॥ एवमाकर्ण्यदेवेन्द्रोनारदात्समुनीश्वरात् ॥ समालोच्यसमेधावीसम्भीतोधर्मपालनात् ॥ ३१ ॥ शत यज्ञप्रभावेननहुषोहिपुरामम ॥ ऐन्द्रंपदंगतोवीरोदेवराजोऽभवत्पुरा ॥३२॥ शचीबुद्धिप्रभावेनपदभ्रष्टोऽप्यजायत ॥ तादृशोऽयंमहाराजःपितुस्तुल्यप राक्रमः ॥ ३३ ॥ प्राप्स्यतेनात्रसन्देहःपदमैन्द्रंनसंशयः ॥ येनकेनाप्युपायेनतंभूपंदिवमानये ॥ ३४ ॥ इत्येवंचिन्तयामासतस्माद्भीतःसुरेश्वरः ॥ भूपालस्यनृपश्रेष्ठययातेःसुमहद्भयात् ॥३५॥ तमानेतुंततोदूतंप्रेषयामासदेवराट् ॥ नहुषस्यविमानंतुसर्वकामसमन्वितम् ॥३६॥ सारथिंमातलिंनाम विमानेनसमन्वितम् ॥ गतोहिमातलिस्तत्रयत्रास्तेनहुषात्मजः ॥३७॥ प्रहितःसुरराजेनसमानेतुंमहामतिम् ॥ सभायांवर्त्तमानस्तुयथाइन्द्रःप्रशोभते ॥ ३८ ॥ तथाययातिर्धर्मात्मास्वसभायांविराजते ॥ तमुवाचमहात्मानंराजानंसत्यभूषणम् ॥३९॥ सारथिर्देवराजस्यश्रृणुराजन्वचोमम ॥ प्रहितोदे वराजेनसकाशंतवसाम्प्रतम् ॥ ४० ॥ यद्ब्रूतेदेवराजस्तुतत्सर्वंसुमनाःकुरु ॥ आगन्तव्यंत्वयादेवऐन्द्रंलोकंहिनान्यथा ॥ ४१ ॥ पुत्रेराज्यंविसृज्यैव कृत्वाचान्त्येष्टिमुत्तमाम् ॥ इलोराजामहातेजावसतेनहुषात्मज ॥४२॥ पुरूरवामहावीर्योविप्रचित्तिर्महामनाः॥ शिबिर्वसतितत्रैवमनुरिक्ष्वाकुभूपतिः ॥४३॥सगरोनाममेधावीनहुषश्चपितातव॥ [1]ऋतवीर्यःकृतज्ञश्चशन्तनुश्चमहामनाः ॥४४॥ भरतोयुवनाश्वश्चकार्तवीर्योनरेश्वरः ॥ [2]यज्ञानाहृत्यबहुधामो दन्तेदिविभूभृतः ॥४५॥ अन्येचैवतुराजानोयज्ञकर्मसुतत्पराः ॥सर्वेतेदिविचेन्द्रेणमोदन्तेस्वेनकर्मणा ॥४६॥ त्वंपुनःसर्वधर्मज्ञःसर्वधर्मेषुसंस्थितः ॥ शक्रेणसहमोदस्वस्वर्गलोकेमहीपते ॥ ४७ ॥ ययातिरुवाच ॥ किंमयातत्कृतंकर्मयेनमय्यर्थितातव ॥ इन्द्रस्यदेवराजस्यतत्सर्वमेवदस्वच ॥ ४८ ॥

१ 'कृतवीर्यः' इ० पा० । २ 'यज्वानः सुमहाबलाः' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मातलिरुवाच ॥ यदशीतिसहस्राणिवर्षाणांहित्वयानृप ॥ दानपुण्यादिककर्मयज्ञैस्तुपरिसाधितम् ॥ ४९ ॥ दिवंगच्छमहाराजकर्मणास्वेनभू
पते ॥ सखित्वंदेवराजेनकुरुगच्छसुरालयम् ॥५०॥ पश्चात्मकंशरीरंचभूमौत्यजमहामते ॥ दिव्यरूपंसमास्थायभुङ्क्ष्वभोगान्मनोऽनुगान् ॥ ५१ ॥
यथायथाकृताभूमौयज्ञादानंतपश्चते ॥ तथातथास्वर्गभोगाःप्रार्थयन्तेनरेश्वर ॥ ५२ ॥ ययातिरुवाच ॥ येनकायेनसिध्येतसुकृतंदुष्कृतं
भुवि ॥ मातलेतत्कथंत्यक्त्वागच्छेल्लोकमुपार्जितम् ॥ ५३ ॥ मातलिरुवाच ॥ यत्रैवोपार्जितंकायंपश्चात्मकमिदंनृप ॥ तत्रैवपरित्यज्यादि
व्येनैवव्रजन्तितम् ॥ ५४ ॥ इतरेमानवाःसर्वेपापपुण्यप्रसाधकाः ॥ तेऽपिकायंपरित्यज्यअधऊर्ध्वंव्रजन्तिवै ॥ ५५ ॥ ययातिरुवाच ॥ पश्चा
त्मकेनकायेनसुकृतंदुष्कृतंनराः ॥ उत्पाद्यैवप्रयान्त्येवअधऊर्ध्वंतुमातले ॥ ५६ ॥ कोविशेषोहिधर्मज्ञभूमौकायंपरित्यजेत् ॥ पापपुण्यप्रभावा
द्वैकायस्यपतनंभवेत् ॥ ५७ ॥ दृष्टान्तोदृश्यतेसूतप्रत्यक्षंमर्त्यमण्डले ॥ विशेषंनैवपश्यामिपापपुण्यस्यचाधिकम् ॥ ५८ ॥ सत्यधर्मादिकंक
र्मयेनकायेनमानवः ॥ समर्जयतिवैमर्त्यस्तंकस्माद्विप्रसर्जयेत् ॥ ५९ ॥ आत्माकायश्चद्वावेतौमित्ररूपावुभावपि ॥ कायंभित्रंपरित्यज्यआ
त्मायातिसुनिश्चितः ॥६०॥ मातलिरुवाच ॥ सत्यमुक्तंत्वयाराजन्कायंत्यक्त्वाप्रयातिसः ॥ सम्बन्धोनास्तितेनापिसमंकायेनचात्मनः॥६१॥यस्मा
त्पश्चत्वरूपोऽयंसन्धिजर्जरितःसदा ॥ जरयापीड्यमानस्तुव्याधिभिर्दूषितःसदा ॥६२॥ जरादोषैःप्रभग्नोऽसौअत्रस्थातुंसनेच्छति॥ आकुलव्याकुलो
भूत्वाजीवस्त्यक्त्वाप्रयातिसः ॥ ६३ ॥ सत्येनधर्मपुण्यैश्चदानैर्नियमसंयमैः ॥ अश्वमेधादिभिर्यज्ञैस्तीर्थैःसंयमनैस्तथा ॥ ६४ ॥ सुपुण्यैःसुकृ
तैश्चान्यैर्जरानैवप्रधार्यते ॥ पातकैश्चमहाराजद्रवतेकायमेवसा ॥ ६५ ॥ ययातिरुवाच ॥ कस्माज्जरासमुत्पन्नाकस्मात्कायंप्रपीडयेत् ॥ ममवि
स्तरतस्त्वंचवक्तुमर्हसिसत्तम ॥ ६६ ॥ मातलिरुवाच ॥ हन्ततेवर्णयिष्यामिजरायाःपरिकारणम् ॥ यस्माचेयंसमुद्भूताकायमध्येनृपोत्तम ॥६७॥
पश्चभूतात्मकःकायोविषयैःपश्चभिःश्रितः ॥ यदात्मात्यजतेराजन्सकायःपरिधक्ष्यते ॥ ६८ ॥ वह्निनादीप्यमानस्तुसरसोज्वलतेनृप ॥ तस्माद्धि
जायतेधूमोधूमान्मेघाश्चजज्ञिरे ॥ ६९ ॥ मेघादापःप्रवर्तन्तेअद्भ्यःपृथ्वीप्रकल्पते ॥ जलमायातिसाध्वीसायथानारीरजस्वला ॥ ७० ॥ तस्मा
त्प्रजायतेगन्धोगन्धाद्रसोनृपोत्तम ॥ रसात्प्रभवतेचान्नमन्नाच्छुक्रंनसंशयः ॥ ७१ ॥ शुक्राद्धिजायतेकायःकुरूपःकायएवच ॥ यथापृथ्वीसृजेद्ग
न्धात्रसैश्चरतिभूतले ॥ ७२ ॥ तथाकायश्चरेन्नित्यंरसाधारोहिसर्वशः ॥ गन्धश्चजायतेतस्माद्गन्धाद्रसोभवेत्पुनः ॥ ७३ ॥ तस्माज्जज्ञेमहावह्निर्दृ
ष्टान्तंपश्यभूपते ॥ यथाकाष्ठाद्भवेद्वह्निःपुनःकाष्ठंप्रकाशयेत् ॥७४॥ कायमध्येरसादग्निस्तद्वदेवप्रजायते॥ तत्रसश्चरतेनित्यंकायंपुष्णातिभूपते॥७५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यावद्रसस्यचाधिक्यंतावज्जीवःप्रशान्तिमान् ॥ चरित्वाताहृशंवह्निःक्षुधारूपेणवर्तते ॥ ७६ ॥ अन्नमिच्छत्यसौतीव्रःपयसाचसमन्वितम् ॥ प्रदानंलभतचान्नमुदकंचापिभूपते ॥ ७७ ॥ शोणितंचरतेवह्निस्तद्वद्वीर्यंनसंशयः ॥ यक्ष्मरोगोभवेत्तस्मात्सर्वकायप्रणाशकः ॥ ७८ ॥ रसाधिक्यंभवेद्राजन्नथवह्निःप्रशाम्यति ॥ रसेनपीडयमानस्तुज्वररूपोऽभिजायते ॥ ७९ ॥ ग्रीवापृष्ठंकटिंपायुंसर्वास्वेवतुसन्धिषु ॥ आरुध्यतिष्ठतेवह्निः कायेवह्निःप्रवर्तते ॥ ८० ॥ तस्याऽधिक्यंचरेन्नित्यंकायंपुष्णातिसर्वतः ॥ रसस्तुबन्धमायातिबलरूपोभवेत्तदा ॥ ८१ ॥ अतिरिक्तोबलेनैववीर्यान्मर्माणिचालयेत् ॥ तेनैवजायतेकामःशल्यरूपोभवेन्नृप ॥ ८२ ॥ सकामाग्निःसमाख्यातोबलनाशकरोनृप ॥ मैथुनस्यप्रसङ्गेनविनाशत्वंकलेवरे ॥ ८३ ॥ नारींचसंश्रयेत्प्राणीपीडितःकामवह्निना ॥ मैथुनस्यप्रसङ्गेनमूर्छितःकामकर्शितः ॥ ८४ ॥ तेजोहीनोभवेत्कायोबलहानिश्चजायते ॥ बलहीनोयदास्याद्वैदुर्बलोवह्निनेरितः ॥ ८५ ॥ सवह्निःप्रचरेत्कायेशोणितंशुक्रमेवच ॥ शुक्रशोणितयोर्नाशाच्छून्यदेहोऽभिजायते ॥ ८६ ॥ अतीवजायतेवायुःप्रचण्डोदारुणाकृतिः ॥ विवर्णोदुःखसन्तप्तःशून्यबुद्धिस्ततोभवेत् ॥ ८७ ॥ दृष्ट्वाश्रुतातुयानारीतच्चित्तोभ्रमतेसदा ॥ तृप्तिर्नजायतेकायेलोलुपेचित्तवर्त्मनि ॥ ८८ ॥ विरूपश्चसुरूपश्चध्यानान्मध्येप्रजायते ॥ बलहीनोयदाकामीमांसशोणितसंक्षयात् ॥ ८९ ॥ पलितंजायतेकायेनाशितंकामवह्निना ॥ तस्मात्सञ्जायतेकामीवृद्धोभूत्वादिनेदिने ॥ ९० ॥ सुरतेचिन्ततेनारींयथावार्द्धुषिकोनरः ॥ तथातथाभवेद्धानिस्तेजसोऽस्यनरेश्वर ॥ ९१ ॥ तस्मात्प्रजायतेकायोनाशरूपंसमृच्छति ॥ अग्निःप्रजायतेभूयोजरारूपोनसंशयः ॥ ९२ ॥ प्राणिनांक्षयरूपेणज्वरोभवतिदारुणः ॥ स्थावराजङ्गमाःसर्वेज्वरेणपरिपीड़िताः ॥ ९३ ॥ नाशमायान्तितेसर्वेबहुपीडाप्रपीडिताः ॥ एतत्तेसर्वमाख्यातमन्यत्किंतेवदाम्यहम् ॥ ९४ ॥ एवमुक्तोमहाराजोमातलिंवाक्यमब्रवीत् ॥ ९५ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेमातापितृतीर्थकथनेचतुःषष्टितमोऽध्यायः ॥ ६४ ॥ ययातिरुवाच ॥ धर्मस्यरक्षकःकायोमातलेचात्मनासह ॥ नाकमेषनप्रयातितन्मेत्वंकारणंवद ॥ १ ॥ मातलिरुवाच ॥ पञ्चानामपिभूतानांसङ्गतिर्नास्तिभूपते ॥ आत्मनासहवर्तन्तेसङ्गत्यानैवपञ्चते ॥ २ ॥ सर्वेषांतत्रसङ्घातःकायग्रामेप्रवर्तते ॥ जरयापीडिताःसर्वेस्वंस्वंस्थानंप्रयान्तिते ॥ ३ ॥ यथारसाधिकापृथ्वीमहाराजप्रकल्पिता ॥ रसैःक्लिन्नाततःपृथ्वीमृदुत्वंयातिभूपते ॥ ४ ॥ भिद्यतेपिपीलिकाभिर्मूषिकाभिस्तथैवच ॥ छिद्राण्येवप्रजायन्तेवल्मीकाश्चमहोदराः ॥ ५ ॥ तद्वत्कायेप्रजायन्तेगण्डमालाविचर्चिकाः ॥ कृमिभिर्भिद्यमानश्चकायएषनरोत्तम ॥ ६ ॥ गुल्मास्तत्रप्रजायन्तेसद्यःपीडाकरास्तदा ॥ एभिर्दोषैःसमायुक्तःकायोऽयंनहुषात्मज ॥ ७ ॥ कथंप्राणसमायोगाद्दिवंयातिनरेश्वर ॥ काये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पार्थिवभागोऽयंसमानार्थंप्रतिष्ठितः ॥ ८ ॥ नकायःस्वर्गमायातियथापृथ्वीतथास्थितः ॥ एतत्तेसर्वमाख्यातंदोषौघैःपार्थिवस्ययः ॥ ९ ॥ इति
श्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेमातापितृतीर्थमाहात्म्येपञ्चषष्टितमोऽध्यायः ॥ ६५ ॥ ययातिरुवाच ॥ पापात्पततिकायोऽयंधर्माच्चशृणुमा
तले ॥ विशेषंनचपश्यामिपुण्यस्यापिमहीतले ॥ १ ॥ पुनःप्रजायतेकायोयथाहिपतनंपुरा ॥ कथमुत्पद्यतेदेहस्तन्मेविस्तरतोवद ॥ २ ॥
मातलिरुवाच ॥ अथनाराकिणांपुंसामधर्मादेवकेवलात् ॥ क्षणमात्रेणभूतेभ्यःशरीरमुपजायते ॥ ३ ॥ तद्वद्धर्मेणचैकेनदेवानामौपपादिकम् ॥
सद्यःप्रजायतेदिव्यंशरीरंभूतसारतः ॥ ४ ॥ कर्मणाव्यतिमिश्रेणयच्छरीरंमहात्मनाम् ॥ तद्रूपपरिणामेनविज्ञेयंहिचतुर्विधम् ॥ ५ ॥ उद्भिज्जाःस्था
वराज्ञेयास्तृणगुल्मादिरूपिणः ॥ कृमिकीटपतङ्गाद्याःस्वेदजानामदेहिनः ॥६॥ अण्डजाःपक्षिणःसर्वेसर्पानक्राश्चभूपते ॥ जरायुजाश्चविज्ञेयामानुपा
श्चचतुष्पदाः ॥ ७ ॥ तत्रसिक्ताजलैर्भूमिरर्कस्योष्मविपाचिता ॥ वायुनाधम्यमानाचक्षेत्रतांतुप्रपद्यते ॥ ८ ॥ तत्रचोप्तानिबीजानिसंसिक्तान्य
म्भसापुनः ॥ उपगम्यमृदुत्वंचमूलभावंव्रजन्तिच ॥९॥ तन्मूलादङ्कुरोत्पत्तिरङ्कुरात्पर्णसम्भवः ॥ पर्णान्नालंततःकाण्डंकाण्डाच्चप्रभवःपुनः ॥१०॥
प्रभवाच्चभवेत्क्षीरंक्षीरात्तण्डुलसम्भवः ॥ तण्डुलाच्चततःपक्वाभवन्त्योषधयस्तथा ॥ ११ ॥ यवाद्याःशालिपर्यन्ताःश्रेष्ठास्सप्तदशस्मृताः ॥ ओषध्यः
फलसाराढ्याःशेषाःक्षुद्राःप्रकीर्तिताः॥१२॥एतालूनामर्दिताश्चमुनिभिःपूर्वसंस्कृताः॥ शूर्पोलूखलपात्राद्यैःस्थालिकोदकवह्निभिः॥१३॥ षड्विधाहिस्व
भेदेनपरिणामंव्रजन्तिताः ॥अन्योन्यरससंयोगादनेकस्वादतांगताः॥१४॥ भक्ष्यंभोज्यंपेयलेह्यंचोष्यंखाद्यंचभूपते॥ तासांभेदाःषडङ्गाश्चमधुराद्याश्च
षड्गुणाः ॥१५॥ तदन्नंपिण्डकवलैर्ग्रासैर्भुक्तंचदेहिभिः॥अन्तःस्थूलाशयेसर्वप्राणान्स्थापयतिक्रमात् ॥१६॥ अपक्कंभुक्तमाहारंसवायुःकुरुतेद्विधा ॥ स
म्प्रविश्यान्नमध्येचपक्कंकृत्वापृथग्गुणम् ॥ १७ ॥ अग्नेरूर्ध्वंजलंस्थाप्यतदन्नंचजलोपरि ॥ जलस्याधःस्वयंप्राणःस्थित्वाग्निंधमतेशनैः ॥ १८ ॥ वायु
नाधम्यमानोऽग्निरत्युष्णंकुरुतेजलम् ॥ तदन्नमुष्णयोगेनसमन्तात्पच्यतेपुनः ॥ १९ ॥ द्विधाभवतितत्पक्वंपृथक्किट्टंपृथग्रसः ॥ मलैर्द्वादशभिःकिट्टं
भिन्नंदेहाद्बहिर्व्रजेत ॥ २० ॥ कर्णाक्षिनासिकाजिह्वादन्तोष्ठप्रजननंगुदम् ॥ मलान्स्रवेदथस्वेदोविण्मूत्रंद्वादशस्मृताः ॥ २१॥ हृत्पद्मेप्रतिबद्धाश्चसर्वना
ड्यःसमन्ततः ॥ तासांमुखेषुतंसूक्ष्मंप्राणःस्थापयतेरसम् ॥२२॥ रसेनतेनतानाडीःप्राणःपूरयतेपुनः ॥ सन्तर्पयन्तितानाडयःपूर्णादेहंसमन्ततः॥२३॥ ॥ ६६ ॥
ततःसनाडीमध्यस्थःशारीरेणोष्मणारसः ॥ पच्यतेपच्यमानश्चभवेत्पाकद्वयंपुनः ॥ २४ ॥ त्वग्मांसास्थिमज्जामेदोरुधिरंचप्रजायते ॥ रक्ताल्लोमा

१ 'वदनं' इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

निर्मांसंचकेशाःस्नायुश्चमांसतः ॥ २५ ॥ स्नायोर्मज्जातथास्थीनिवसामज्जास्थिसम्भवा ॥ मज्जाकारेणवैकल्यंशुक्रंचप्रसवात्मकम् ॥ २६ ॥ इतिद्वाद
शचान्नस्यपरिणामाःप्रकीर्तिताः ॥ शुक्रंतस्यपरीणामःशुक्राद्देहस्यसम्भवः ॥ २७ ॥ ऋतुकालेयदाशुक्रंनिर्दोषंयोनिसंस्थितम् ॥ तदातद्वायुसंसृष्टं
स्त्रीरक्तेनैकतांव्रजेत् ॥ २८ ॥ विसर्गकालेशुक्रस्यजीवःकारणसंयुतः ॥ नित्यंप्रविशतेयोनिंकर्मभिःस्वैर्नियन्त्रितः ॥ २९ ॥ शुक्रस्यसहरक्तस्यएका
हात्कललंभवेत् ॥ पञ्चरात्रेणकललेबुद्बुदत्वंततोभवेत् ॥ ३० ॥ मांसत्वंमांसमात्रेणपञ्चधाजायतेपुनः ॥ ग्रीवाशिरश्चस्कन्धश्चपृष्ठवंशस्तथोदरम् ॥
॥ ३१ ॥ पाणीपादौतथापार्श्वौकटिर्गात्रंतथैवच ॥ मासद्वयेनपर्वाणिक्रमशःसम्भवन्तिच ॥ ३२ ॥ त्रिभिर्मासैःप्रजायन्तेशतशोऽङ्कुरसन्धयः॥ मासै
श्चतुर्भिर्जायन्तेअङ्गुल्यादियथाक्रमम् ॥ ३३ ॥ मुखंनासाचकर्णौचमासैर्जायन्तिपञ्चभिः ॥ दन्तपङ्क्तिस्तथाजिह्वाजायतेतुनखाःपुनः ॥३४॥ कर्णयो
श्चभवेच्छिद्रंषण्मासाभ्यन्तरेपुनः॥पायुर्मेढ्रमुपस्थंचशिश्नश्चाप्युपजायते ॥३५॥ सन्धयोयेचगात्रेषुमासैर्जायन्तिसप्तभिः ॥ अङ्गप्रत्यङ्गसम्पूर्णंशिरः
केशसमन्वितम् ॥ ३६ ॥ विभक्तावयवस्पष्टंपुनर्मासेऽष्टमेभवेत् ॥ पञ्चात्मकसमायुक्तःपरिपक्वःसतिष्ठति ॥ ३७ ॥ मातुराहारवीर्येणषड्विधेनरसेनच ॥
नाभिसूत्रनिबद्धेनवर्द्धतेसदिनेदिने ॥ ३८ ॥ ततःस्मृतिंलभेज्जीवःसम्पूर्णेऽस्मिञ्छरीरके ॥ सुखंदुःखंविजानातिनिद्रांस्वप्नंपुराकृतम् ॥ ३९ ॥ मृतश्चा
हंपुनर्जातोजातश्चाहंपुनर्मृतः ॥ नानायोनिसहस्राणिमयादृष्टान्यनेकधा ॥४०॥ अधुनाजातमात्रोऽहंप्राप्तसंस्कारएवच ॥ ततःश्रेयःकरिष्यामियेनग
र्भेनसम्भवः ॥ ४१ ॥ गर्भस्थश्चिन्तयत्येवमहंगर्भाद्विनिःसृतः ॥ अध्येष्यामिपरंज्ञानंसंसारविनिवर्तकम् ॥ ४२ ॥ अवश्यंगर्भदुःखेनमहतापरिपी
डितः ॥ जीवःकर्मवशादास्तेमोक्षोपायंविचिन्तयेत् ॥ ४३ ॥ यथागिरिवराक्रान्तःकश्चिद्दुःखेनतिष्ठति ॥ तथाजरायुणादेहीदुःखंतिष्ठतिदुःखितः
॥ ४४ ॥ पतितःसागरेयद्वद्दुःखमास्तेसमाकुलः ॥ गर्भोदकेनसिक्ताङ्गस्तथास्तेव्याकुलात्मकः ॥ ४५ ॥ लोहकुम्भेयथान्यस्तःपच्यतेकश्चिदग्निना ॥
गर्भकुम्भेतथाक्षिप्तःपच्यतेजठराग्निना ॥ ४६ ॥ सूचीभिरग्निवर्णाभिर्भिन्नगात्रोनिरन्तरम् ॥ यद्दुःखंजायतेतस्यतद्गर्भेऽष्टगुणंभवेत्॥ ४७ ॥गर्भवासा
त्परंवासंकष्टंनैवास्तिकुत्रचित् ॥देहिनांदुःखमतुलंसुघोरमपिसङ्कटम्॥४८॥इत्येतद्गर्भदुःखंहिप्राणिनांपरिकीर्तितम्॥चरस्थिराणांसर्वेषामात्मगर्भानुरू
पतः ॥ ४९ ॥ गर्भात्कोटिगुणापीडायोनियन्त्रनिपीडनात् ॥ संमूर्च्छितस्यजायेतजायमानस्यदेहिनः ॥ ५० ॥ इक्षुवत्पीड्यमानस्यपापमुद्गरपेषणा
त् ॥ गर्भान्निष्क्रममाणस्यप्रबलैःसूतिवायुभिः ॥ ५१ ॥ जायतेसुमहद्दुःखंपरित्राणंनविन्दति ॥ यन्त्रेणपीड्यमानाःस्युर्निःसाराश्चयथेक्षवः ॥ ५२ ॥
तथाशरीरंयोनिस्थंपात्यतेयन्त्रपीडनात् ॥ अस्थिमद्वर्तुलाकारंस्नायुबन्धनवेष्टितम् ॥ ५३ ॥ रक्तमांसवसालिप्तंविण्मूत्रद्रव्यभाजनम् ॥ केशलोमनख

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

च्छन्नंरोगायतनमुत्तमम् ॥ ५४ ॥ वदनैकमहाद्वारंगवाक्षाष्टकभूषितम् ॥ ओष्ठद्वयकपाटंतुदन्तजिह्वागलान्वितम् ॥५५॥ नाडीस्वेदप्रवाहंचकफपित्तप
रिप्लुतम् ॥ जराशोकसमाविष्टंकालवक्त्रानलेस्थितम् ॥ ५६ ॥ कामक्रोधसमाक्रान्तंश्वसनैश्चोपमर्दितम् ॥ भोगतृष्णातुरंमूढंरागद्वेषवशानुगम् ॥५७॥
सवर्णिताङ्गप्रत्यङ्गंजरायुपरिवेष्टितम् ॥ सङ्कटेनाविविक्तेनयोनिमार्गेणनिर्गतम् ॥ ५८ ॥ विण्मूत्ररक्तसिक्ताङ्गंषट्कौशिकसमुद्भवम् ॥ अस्थिपञ्जरस
ङ्घातंज्ञयमस्मिन्कलेवरे ॥ ५९ ॥ शतत्रयंषष्ट्यधिकंपञ्चपेशीशतानिच ॥ सार्धाभिस्तिसृभिश्छन्नंसमन्ताद्रोमकोटिभिः ॥ ६० ॥ शरीरंस्थूलसूक्ष्मा
भिर्दृश्यादृश्याभिरन्ततः ॥ एताभिर्मांसनाडीभिःकोटिभिस्तत्समन्वितम् ॥ ६१ ॥ प्रस्वेदमशुचिंताभिरन्तरस्थंचतेनहि ॥ द्वात्रिंशद्दशनाःप्रोक्ताविं
शतिश्चनखाःस्मृताः ॥ ६२ ॥ पित्तस्यकुडवंज्ञेयंकफस्यार्धाढकंतथा ॥ वसायाश्चपलत्रिंशत्तदर्धंकललस्यवा ॥ ६३ ॥ वातार्बुदपलंज्ञेयंपला
निदशमेदसः ॥ पलत्रयंमहारक्तंमज्जारक्ताच्चतुर्गुणा ॥ ६४ ॥ शुक्रार्धंकुडवंज्ञेयंतदर्धंदेहिनांबलम् ॥ मांसस्यचैकंपिण्डेनपलसाहस्रमुच्यते ॥ ६५ ॥
रक्तंपलशतंज्ञेयंविण्मूत्रंचाप्रमाणतः ॥ इतिदेहगृहेराजन्वासःस्यान्नित्यमात्मनः ॥ ६६ ॥ अशुद्धंचविशुद्धस्यकर्मबन्धविनिर्मितम् ॥ शुक्रशोणितसं
योगाद्देहःसञ्जायतेक्वचित् ॥ ६७ ॥ नित्यंविण्मूत्रसंयुक्तस्तेनायमशुचिःस्मृतः॥यथावैविष्ठयापूर्णःशुचिःसान्तर्बहिर्घटः ॥ ६८ ॥ शौचेनशोध्यमानो
ऽपिदेहोऽयमशुचिर्भवेत् ॥ यंप्राप्यातिपवित्राणिपञ्चगव्यहवींषिच॥ ६९ ॥ अशुचित्वंप्रयान्त्याशुदेहोऽयमशुचिस्ततः ॥ हृद्यान्यप्यन्नपानानियंप्रा
प्यसुरभीणिच ॥ ७० ॥ अशुचित्वंप्रयान्त्याशुकोऽन्यःस्यादशुचिस्ततः ॥ हेजनाःकिंनपश्यध्वंयन्निर्यातिदिनेदिने ॥ ७१ ॥ देहानुगोमलःपूतिस्त
दाधारःकथंशुचिः॥देहःसंशोध्यमानोऽपिपञ्चगव्यकुशाम्बुभिः॥ ७२ ॥घृष्यमाणइवाङ्गारोनिर्मलत्वंनगच्छति ॥ स्रोतांसियस्यसततंप्रवहन्तिगिरेरि
व ॥ ७३ ॥ कफमूत्राद्यमशुचिःसदेहःशुध्यतेकथम् ॥ सर्वाशुचिनिधानस्यशरीरस्यनविद्यते ॥ ७४ ॥ शुचिरेकप्रदेशोऽपिशुचिर्नस्यादृतेऽपिवा ॥
दिवावायदिवारात्रौमृत्तोयैःशोध्यतेकरः ॥ ७५ ॥ तथापिशुचिभाङ्नस्यान्नविरज्यन्तितेनराः॥कायोऽयमग्र्यधूपाद्यैर्यत्नेनापिसुसंस्कृतः ॥ ७६ ॥
नजहातिस्वभावंहिश्वपुच्छमिवनामितम् ॥ तथाजात्यैवकृष्णोर्णानशुक्लाजातुजायते॥ ७७ ॥संशोध्यमानापितथाभवेन्मूर्तिर्ननिर्मला॥जिघ्रन्नपिस्वदु
र्गन्धंपश्यन्नपिमलंस्वकम् ॥ ७८ ॥ नविरज्यतिलोकोऽयंपीडयन्नपिनासिकाम् ॥ अहोमोहस्यमाहात्म्यंयेनव्यामोहितंजगत् ॥ ७९ ॥ जिघ्रन्पश्य
न्स्वकान्दोषान्कायस्यनविरज्यते ॥ स्वदेहस्यविगन्धेनविरज्येतनयोनरः ॥ ८० ॥ विरागकारणंतस्यकिमन्यदुपदिश्यते ॥ सर्वमेवजगत्पूतंदेहमे
वाशुचिःपरम् ॥ ८१ ॥ यन्मलावयवस्पर्शाच्छुचिरप्यशुचिर्भवेत् ॥ गन्धलेपापनोदायशौचंदेहस्यकीर्तितम् ॥ ८२ ॥ द्वयस्यापगमात्पश्चाद्भावशु

CC-0. In Public Domain. Digitization by eGangotri

द्ध्चाविशुद्ध्यति ॥ गङ्गातोयेनसर्वेणमृद्धारैर्गात्रलेपनैः ॥ ८३ ॥ मर्त्योदुर्गन्धदेहोऽसौभावदुष्टोनशुध्यति॥ तीर्थस्नानैस्तपोभिश्चदुष्टात्मानचशुध्यति ॥ ८४ ॥ स्वमूर्तिःक्षालितातीर्थैनशुद्धिमधिगच्छति ॥ अन्तर्भावप्रदुष्टस्यविशतोऽपिहुताशनम् ॥ ८५ ॥ नस्वर्गोनापवर्गश्चदेहनिर्दहनंपरम् ॥ भावशुद्धिःपरंशौचंप्रमाणंसर्वकर्मसु ॥ ८६ ॥ अन्यथालिङ्ग्यतेकान्ताभावेनदुहितान्यथा ॥ मनसाभिद्यतेवृत्तिरभिन्नेष्वपिवस्तुषु ॥ ८७ ॥ अन्यथैवसतीपुत्रंचिन्तयेदन्यथापतिम् ॥ यथायथास्वभावस्यमहाभागउदाहृतम् ॥ ८८ ॥ परिष्वक्तोऽपियद्भार्याँभावहीनांनकारयेत् ॥ नाद्याद्विविधमन्नाद्यंरस्यानिसुरभीणिच ॥ ८९ ॥ अभावेननरस्तस्माद्भावःसर्वत्रकारणम् ॥ चित्तंशोधययत्नेनकिमन्यैर्बाह्यशोधनैः ॥ ९० ॥ भावतःशुचिशुद्धात्मास्वर्गंमोक्षंचविन्दति ॥ ज्ञानामलाम्भसापुंसःसवैराग्यमृदापुनः ॥ ९१ ॥ अविद्यारागविण्मूत्रलेपोनश्येद्विशोधनैः ॥ एवमेतच्छरीरंहिनिसर्गादशुचिंविदुः ॥ ९२॥ विद्यादसारनिःसारंकदलीसारसन्निभम ॥ ज्ञात्वैवंदोषवद्देहंयःप्राज्ञःशिथिलीभवेत् ॥९३॥ सोऽतिक्रामतिसंसारंदृढग्राहोऽवतिष्ठति ॥ एवमेतन्महाकष्टंजन्मदुःखंप्रकीर्त्तितम् ॥ ९४ ॥ पुंसामज्ञानदोषेणनानाकर्मवशेनच ॥ गर्भस्थस्यमतिर्यासीत्साजातस्यप्रणश्यति ॥ ९५ ॥ सुमूर्च्छितस्यदुःखेनयोनियन्त्रनिपीडनात् ॥ बाह्येनवायुनाचास्यमोहसङ्गेनदेहिनाम् ॥ ९६ ॥ स्पृष्टमात्रस्यघोरेणज्वरःसमुपजायते ॥ तेनज्वरेणमहतामहामोहःप्रजायते ॥ ९७ ॥ संमूढस्यस्मृतिभ्रंशःशीघ्रंसञ्जायतेपुनः ॥ स्मृतिभ्रंशात्ततस्तस्यपूर्वकर्मवशेनच ॥ ९८ ॥ रतिःसञ्जायतेतस्यजन्तोस्तत्रैवजन्मनि ॥ रक्तोमूढश्चलोकोऽयमकार्येसम्प्रवर्त्तते ॥ ९९ ॥ नचात्मानंविजानातिनपरंनचदैवतम् ॥ नशृणोतिपरंश्रेयःसचक्षुरपिनेक्षते ॥ १०० ॥ समेपथिशनैर्गच्छन्स्खलतीवपदेपदे ॥ सत्यांबुद्धौनजानातिबोध्यमानोबुधैरपि ॥ १ ॥ संसारेक्लिश्यतेतेननरोलोभवशानुगः ॥ गर्भस्मृतेरभावेचशास्त्रमुक्तंशिवेनच ॥ २ ॥ तद्दुःखकथनार्थायस्वर्गमोक्षप्रसाधकम् ॥ येनतस्मिञ्छिवेज्ञातेधर्मकामार्थसाधने ॥ ३ ॥ नकुर्वन्त्यात्मनःश्रेयस्तदत्रमहदद्भुतम् ॥ अव्यक्तेन्द्रियवृत्तित्वाद्बाल्येदुःखंमहत्पुनः ॥ ४ ॥ इच्छन्नपिनशक्नोतिवक्तुंकर्तुंनसत्कृती ॥ दन्तजन्ममहद्दुःखंलौल्येनवायुनातथा ॥ ५ ॥ बालरोगैश्चविविधैःपीडाबालग्रहैरपि ॥ तृड्बुभुक्षापरीताङ्गःक्वचित्तिष्ठतिगच्छति ॥ ६ ॥ विण्मूत्रभक्षणाद्यंचमोहाद्बालःसमाचरेत् ॥ कौमारःकर्णवेधेनमातापित्रोश्चताडनैः ॥ ७ ॥ अक्षराध्ययनाद्यैश्चदुःखंगुर्वादिशासनात् ॥ प्रमत्तेन्द्रियवृत्तेश्चकामरागप्रपीडिनः ॥८॥ रोगार्दितस्यसततंकुतःसौख्यंहियौवने ॥ ईर्ष्ययासुमहद्दुःखंमोहाद्दुःखंप्रजायत ॥ ९ ॥ तत्रस्यात्कुपितस्यैवरागोदुःखायकेवलम् ॥ रात्रौनविन्दतेनिद्रांकामाग्निपरिखेदितः ॥११०॥ दिवावापिकुतःसौख्यमर्थोपार्जनचिन्तया ॥ व्यवायाश्रितदेहस्ययेपुंसःशुक्रबिन्दवः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ११ ॥ नतेसुखायमन्तव्याःस्वेदजाइवविन्दवः॥ कृमिभिःपीड्यमानस्यकुष्ठिनःपामरस्यच ॥१२॥ कण्डूयनाग्नितापेनयत्सुखंस्त्रीषुतद्विदुः ॥ यादृ
शंमन्यतेसौख्यमर्थोपार्जनचिन्तया ॥१३॥ तादृशंस्त्रीषुमन्तव्यमधिकंनैवविद्यते ॥ मर्त्यस्यवेदनासैवयांविनाचित्तनिर्वृतिः॥१४॥ततोऽन्योन्यंपुराप्रा
प्तमन्तेसैवान्यथाभवेत् ॥ तदेवंजरयाग्रस्तमामयाव्यपिनप्रियम् ॥१५॥ अपूर्ववत्स्वमात्मानंजरयापरिपीडितम् ॥ यःपश्यन्नविरज्येतकोऽन्यस्तस्मा
दचेतनः ॥ १६ ॥ जराभिभूतोऽपिजन्तुःपत्नीपुत्रादिबान्धवैः॥अशक्तत्वाद्दुराचारैर्भृत्यैश्चपरिभूयते ॥१७॥ नधर्ममर्थंकामंचमोक्षंचजरयायुतः॥शक्तः
साधयितुंतस्माद्युवाधर्मंसमाचरेत् ॥ १८ ॥ वातपित्तकफादीनांवैषम्यंव्याधिरुच्यते ॥ वातादीनांसमूहेनदेहोऽयंपरिकीर्तितः ॥ १९ ॥ तस्माद्व्याधि
मयंज्ञेयंशरीरमिदमात्मनः ॥ वाताद्यव्यतिरिक्तत्वाद्व्याधीनांपञ्जरस्यच॥१२०॥ रोगर्नानाविधैर्यातिदेहीदुःखान्यनेकधा ॥ तानिचस्वात्मवेद्यानिकि
मन्यत्कथयाम्यहम् ॥ २१ ॥ एकोत्तरंमृत्युशतमस्मिन्देहेप्रतिष्ठितम् ॥ तत्रैकःकालसंयुक्तःशेषाश्चागन्तवःस्मृताः ॥ २२ ॥ येत्विहागन्तवःप्रोक्तास्तेप्र
शाम्यन्तिभेषजैः ॥ जपहोमप्रदानैश्चकालमृत्युर्नशाम्यति ॥ २३ ॥ यदिवाऽपमृत्युर्नस्याद्विषास्वादादशङ्कितः ॥ नचास्तिपुरुषस्तस्मादपमृत्योर्विभे
तिसः॥ २४ ॥ विविधाव्याधयस्तत्रसर्पाद्याःप्राणिनस्तथा ॥ विषाणिचाभिचाराश्चमृत्योर्द्वाराणिदेहिनाम् ॥२५॥ पीडितंसर्वरोगाद्यैरपिधन्वन्तरिः
स्वयम् ॥ स्वस्थीकर्तुंनशक्नोतिकालप्राप्तंनचान्यथा ॥ २६ ॥ नौषधंनतपोदानंनमातानचबान्धवाः॥शक्नुवन्तिपरित्रातुंनरंकालेनपीडितम्॥२७॥
रसायनतपोजाप्ययोगसिद्धैर्महात्मभिः ॥ अवान्तरितशान्तिःस्यात्कालमृत्युमवाप्नुयात् ॥ २८ ॥ जायतेयोनिकीटेषुमृतःकर्मवशात्पुनः ॥ देहभेदे
नयःपश्येद्वियोगंकर्मसंक्षयात् ॥२९॥ मरणंतद्विनिर्दिष्टंननाशःपरमार्थतः ॥ महातमःप्रविष्टस्यछिद्यमानेषुमर्मसु ॥१३०॥ यद्दुःखंमरणेजन्तोर्नतस्ये
होपमाक्वचित् ॥ हातातमातःकान्तेतिक्रन्दत्येवंसुदुःखितः ॥ ३१ ॥ मण्डूकइवसर्पेणग्रस्यतेमृत्युनाजगत् ॥ बान्धवैःसपरित्यक्तःप्रियैश्चपरिवारितः
॥ ३२ ॥ निःश्वसन्दीर्घमुष्णंचमुखेनपरिशुष्यता ॥ खट्वायांपरिवृत्तोहिमुह्यतेचमुहुर्मुहुः ॥३३॥ संमूढःक्षिपतेऽत्यर्थंहस्तपादावितस्ततः ॥ खट्वातो
वाञ्छतेभूमिंभूमेःखट्वांपुनर्महीम् ॥ ३४ ॥ विवशस्त्यक्तलज्जश्चमूत्रविष्ठानुलेपितः ॥ याचमानश्चसलिलंशुष्ककण्ठोष्ठतालुकः ॥ ३५ ॥ चिन्त
मानःस्ववित्तानिकस्यैतानिमृतेमयि ॥ यमदूतैर्नीयमानःकालपाशेनकर्षितः ॥ ३६ ॥ म्रियतेपश्यतामेवंगलेघुरुघुरायते ॥ जीवस्तृणजलौकेवदेहा
द्देहंविशेत्क्रमात् ॥ ३७ ॥ प्राप्नोत्युत्तरमङ्गंचदेहंत्यजतिपूर्वकम् ॥ मरणात्प्रार्थनादुःखमधिकंहिविवेकिनाम् ॥ ३८ ॥ क्षणिकंमरणदुःखमनन्तं
प्रार्थनाकृतम् ॥ जगतांपतिरर्थित्वाद्विष्णुर्वामनतांगतः ॥ ३९ ॥ अधिकःकोऽपरस्तस्माद्योनयास्यतिलाघवम् ॥ ज्ञातंमयेदमधुनामृत्योर्भवति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्गुरुः ॥१४०॥ नपरंप्रार्थयेद्भूयस्तृष्णालाघवकारणम् ॥ आदौदुःखंतथामध्येदुःखमन्तेचदारुणम्॥४१॥निसर्गात्सर्वभूतानामितिदुःखपरम्परा ॥ वर्तमानान्यतीतानिदुःखान्येतानियानितु ॥४२॥ ननरःशोचयेज्जन्मनविरज्यतितेनवै ॥ आत्याहारान्महद्दुःखमल्पाहारात्तदन्तरम् ॥ ४३ ॥ त्रुटतेभोजनेकण्ठोभोजनेचकुतःसुखम् ॥ क्षुधाहिसर्वरोगाणांव्याधिःश्रेष्ठतमःस्मृतः ॥ ४४ ॥ सकाम्यौषधलेपेनक्षणमात्रंप्रशाम्यति ॥ क्षुद्व्याधिवेदनातीव्रानिःशेषबलकृन्तनी ॥ ४५ ॥ तयाभिभूतोम्रियतेयथान्यैर्व्याधिभिर्नरः ॥ तद्रसेऽपिहिकिंसौख्यंजिह्वाग्रपरिवर्तिनि ॥ ४६ ॥ तत्क्षणादर्धकालेनकण्ठंप्राप्यनिवर्तते ॥ इतिक्षुद्व्याधितप्तानामन्नमौषधवत्स्मृतम् ॥ ४७ ॥ नतत्सुखायमन्तव्यंपरमार्थेनपण्डितैः ॥ मृतोपमश्चयःशेतेसर्वकार्यविवर्जितः ॥ ४८ ॥ तत्रापिचकुतःसौख्यंतमसाचोदितात्मनः ॥ प्रबोधेऽपिकुतःसौख्यंकार्यैरुपहतात्मनः ॥ ४९ ॥ कृषिवाणिज्यसेवाद्यगोरक्षादिपरिश्रमैः ॥ प्रातर्मूत्रपुरीषाभ्यांमध्याह्नेक्षुत्पिपासया ॥ १५० ॥ तृप्ताःकाम्येनबाध्यन्तेनिद्रयानिशिजन्तवः ॥ अर्थस्योपार्जनेदुःखंदुःखमर्जितरक्षणे ॥ ५१ ॥ नाशेदुःखंव्ययेदुःखमर्थस्यैवकुतःसुखम् ॥ चौरेभ्यःसलिलेभ्योऽग्नेःस्वजनात्पार्थिवादपि ॥ ५२ ॥ भयमर्थवतांनित्यंमृत्योर्देहभृतामिव ॥ खेयथापक्षिभिर्मांसंभक्ष्यतेश्वापदैर्भुवि ॥ ५३ ॥ जलेचभक्ष्यतेमत्स्यैस्तथासर्वत्रवित्तवान् ॥ विमोहयन्तिसम्पत्सुवारयन्तिविपत्सुच ॥ ५४ ॥ खेदयन्त्यर्जनेकालेकदार्थाःस्युःसुखावहाः ॥ प्रागर्थपतिरुद्विग्नःपश्चात्सर्वार्थनिःस्पृहः ॥ ५५ ॥ तयोरर्थपतिर्दुःखीसुखीमन्येविरक्तधीः हेमन्तेशैशिरंदुःखंग्रीष्मेतापस्यदारुणम् ॥ ५६ ॥ प्रावृष्यत्यल्पवृष्टिभ्यांकालेऽप्येवंकुतःसुखम् ॥ विवाहविस्तरेदुःखंतद्गर्भोद्वहनेपुनः ॥ ५७ ॥ सूतिवैषम्यदुःखैश्चदुःखंविष्ठादिकर्मभिः ॥ दन्ताक्षिरोगेपुत्रस्यहाकष्टंकिंकरोम्यहम् ॥५८॥ गावोनष्टाःकृषिर्भग्नाभार्याचप्रपलायिता ॥ अमीप्राघूर्णिकाःप्राप्ताभयंमेशंसिनोगृहान् ॥ ५९ ॥ बालापत्याचमेभार्याकःकरिष्यतिरन्धनम्॥विवाहकालेकन्यायाःकीदृशश्चवरोभवेत् ॥ १६० ॥ एतच्चिन्ताभिभूतानांकुतःसौख्यंकुटुम्बिनाम् ॥ ६१ ॥ कुटुम्बचिन्ताकुलितस्यपुंसःश्रुतंचशीलंचगुणाश्चसर्वे ॥ अपक्वकुम्भेनिहिताइवापःप्रयान्तिदेहेनसमंविनाशम् ॥ ६२ ॥ राज्येऽपिहिकुतःसौख्यंसन्धिविग्रहचिन्तया ॥ पुत्रादपिभयंयत्रतत्रसौख्यंहिकीदृशम् ॥ ६३ ॥ स्वजातीयाद्भयंप्रायःसर्वेषामेवदेहिनाम् ॥ एकद्रव्याभिलाषित्वाच्छुनामिवपरस्परम् ॥ ६४ ॥ नप्रविश्यवनंकश्चिन्नृपःख्यातोऽस्तिभूतले ॥ निखिलंयस्तिरस्कृत्यसुखंतिष्ठतिनिर्भयः ॥ ६५ ॥ युद्धेबाहुसहस्रंहिपातयामासभूतले॥श्रीमतःकार्तवीर्यस्यऋषिपुत्रःप्रतापवान् ॥६६॥ ऋषिपुत्रस्यरामस्यरामोदशरथात्मजः ॥ जघानवीर्यमतुलमूर्ध्वगंसुमहात्मनः ॥ ६७ ॥ जरासन्धेनरामस्यतेजसानाशितंयशः ॥ जरासन्धस्यभीमेनतस्यापिपवनात्मजः ॥ ६८ ॥ हनुमानपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूर्येणविक्षिप्तःपतितःक्षितौ ॥ निवातकवचान्सर्वदानवान्बलदर्पितान् ॥ ६९ ॥ हतवानर्जुनःश्रीमान्गोपालैःसविनिर्जितः ॥ सूर्यःप्रतापयुक्तोऽपि मेघैःसंछाद्यतेकचित् ॥ १७० ॥ क्षिप्यतेवायुनामेघोवायोर्वीर्यंनगैर्जितम् ॥ दह्यन्तेवह्निनाशैलाःसवह्निःशाम्यतेजलैः ॥ ७१ ॥ तज्जलंशोष्यते सूर्यैस्तेसूर्याःसहवारिणा ॥ त्रैलोक्येनसमस्ताश्चनश्यन्तिब्रह्मणोदिने ॥ ७२ ॥ ब्रह्मापित्रिदशैःसार्धमुपसंह्रियतेपुनः ॥ परार्धद्वयकालान्तेशिवेन परमात्मना ॥ ७३ ॥ एवंनैवास्तिसंसारेयच्चसर्वोत्तमंबलम् ॥ विहायैकंजगन्नाथंपरमात्मानमव्ययम् ॥ ७४ ॥ ज्ञात्वासातिशयंसर्वमतिमानंविव र्जयेत् ॥ एवंभूतेजगत्यस्मिन्कःसुरःपण्डितोऽपिवा ॥ ७५ ॥ नह्यस्तिसर्ववित्कश्चिन्नवामूर्खोऽपिसर्वतः ॥ यावद्यस्तुविजानातितावत्तत्रसपण्डितः ॥ ७६ ॥ समाधानेतुसर्वत्रप्रभावःसदृशःस्मृतः ॥ वित्तस्यातिशयत्वेनप्रभावःकस्यचित्कचित् ॥ ७७ ॥ दानवैर्निर्जितादेवास्तेदेवैर्निर्जिताःपुनः ॥ इत्यन्योन्यंश्रितोलोकोभाग्यैर्जयपराजयैः ॥ ७८ ॥ एवंवस्त्रयुगंराज्ञांप्रस्थमात्राम्बुभोजनम् ॥ यानंशय्यासनंचैवशेषंदुःखायकेवलम् ॥ ७९ ॥ सप्त[3] मेचापिभवनेखट्वामात्रपरिग्रहः ॥ उदकुम्भसहस्रेभ्यःक्लेशायासप्रविस्तरः ॥१८०॥ प्रत्यूषेतूर्यनिर्घोषःसमंपुरनिवासिभिः॥राज्येऽभिमानमात्रंहिममेदं वाद्यतेगृहे ॥ ८१ ॥ सर्वंमाभरणंभारःसर्वमालेपनंमलम् ॥ सर्वंप्रलपितंगीतंनृत्यमुन्मत्तचेष्टितम् ॥ ८२ ॥ इत्येवंराज्यसम्भोगैःकुतःसौख्यंविचा रतः ॥ नृपाणांविग्रहेचिन्तावान्योन्यविजिगीषया ॥ ८३ ॥ प्रायेणश्रीमदालेपान्नहुषाद्यामहानृपाः ॥ स्वर्गंप्राप्तानिपतिताःकःश्रियाविन्दते सुखम् ॥ ८४ ॥ स्वर्गेऽपिचकुतःसौख्यंदृष्ट्वादीप्तांपरश्रियम् ॥ उपर्युपरिदेवानामन्योन्यातिशयस्थिताम् ॥ ८५ ॥ नरैःपुण्यफलंस्वर्गेमूलच्छेदे नभुज्यते ॥ नचान्यत्क्रियतेकर्मसोऽत्रदोषःसुदारुणः ॥ ८६ ॥ छिन्नमूलतरुर्यद्वद्दिवसैःपततिक्षितौ ॥ पुण्यस्यसंक्षयात्तद्वन्निपतन्तिदिवौकसः ॥ ८७ ॥ सुखाभिलाषनिष्ठानांसुखभोगादिसम्प्लवैः ॥ अकस्मात्पतितंदुःखंकष्टंस्वर्गेदिवौकसाम् ॥ ८८ ॥ इतिस्वर्गेऽपिदेवानांनास्तिसौख्यंवि चारतः ॥ क्षयश्चविषयासिद्धौस्वर्गेभोगायकर्मणाम् ॥ ८९ ॥ तत्रदुःखंमहत्कष्टंनरकाग्निषुदेहिनाम् ॥ घोरैश्चविविधैर्भावैर्वाङ्मनःकायसम्भवैः ॥ १९० ॥ कुठारच्छेदनंतीव्रंवल्कलानांचतक्षणम् ॥ पर्णशाखाफलानांचपातश्चण्डेनवायुना ॥ ९१ ॥ उन्मूलनान्नदीभिश्चगजैरन्यैश्चदेहिभिः ॥ दावाग्निहिमशोषैश्चदुःखंस्थावरजातिषु ॥ ९२ ॥ तद्वद्धुजङ्गसर्पाणांक्रोधेदुःखंचदारुणम् ॥ दुष्टानांघातनंलोकेपाशेनचनिबन्धनम् ॥ ९३ ॥ अकस्मा ज्जन्ममरणंकीटानांचमुहुर्मुहुः ॥ सरीसृपनिकायानामेवंदुःखान्यनेकधा ॥ ९४ ॥ पशूनामात्मशमनंदण्डताडनमेवच ॥ नासावेधेनसन्त्रासःप्रतोदेन

१ 'यस्य' इ० पा० । २ 'कालं यान्ति सुराः सर्वे प्रतिमानेन वर्जिताः' इ० पा० । ३ 'सार्वभौमोऽपि भवति अद्धामात्रपरिग्रहः' । इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुताडनम् ॥ ९५ ॥ वेत्रकाष्ठादिनिगडैरङ्कुशेनाङ्गबन्धनम् ॥ भावेनमनसाक्लेशैर्भिक्षायुवादिपीडनम् ॥ ९६ ॥ आत्मयूथवियोगैश्चबलान्नयनबन्धनैः ॥ पशूनांसन्तिकायानामेवंदुःखान्यनेकशः ॥ ९७ ॥ वर्षाशीतातपाद्दुःखंसुकष्टंग्रहपक्षिणाम् ॥ क्लेशमानातिकायानामेवंदुःखान्यनेकधा ॥ ९८ ॥ गर्भवासेमहद्दुःखंजन्मदुःखंतथानृणाम् ॥ सुबाल्यदुःखंचाज्ञानंकौमारेगुरुशासनम् ॥ ९९ ॥ यौवनेकामरागाभ्यांदुःखंचैवेर्ष्ययापुनः ॥ कृषिवाणिज्यसेवाद्यैर्गोरक्षादिककर्मभिः ॥ २०० ॥ वृद्धभावेचजरयाव्याधिभिश्चप्रपीडनात् ॥ मरणेचमहद्दुःखंप्रार्थनायांततोऽधिकम् ॥ १ ॥ राजाग्निजलदायातचौरशत्रुभयंमहत् ॥ अर्थस्यार्जनरक्षायांभयंनाशेव्ययेपुनः ॥ २ ॥ कार्पण्यंमत्सरोदम्भोधनाधिक्येभयंमहत् ॥ अकार्येसम्प्रवृत्तिश्चदुःखानिधनिनांसदा ॥ ३ ॥ भृत्यवृत्तिःकुसीदंचदासत्वंपरतन्त्रता ॥ इष्टानिष्टाभियोगश्चसंयोगाश्चसहस्रशः ॥ ४ ॥ दुर्भिक्षंदुर्भगत्वंचमूर्खत्वंचदरिद्रता ॥ अधरोत्तरभागश्चनारकंराजविक्रमम् ॥ ५ ॥ अन्योन्याभिभवंदुःखमन्योन्यतोभयंमहत् ॥ अन्योन्याच्चप्रकोपश्चराज्ञोदुःखंमहीभृताम् ॥ ६ ॥ अनित्यतात्रभावानांकृतकाम्यस्यदेहिनः ॥ अन्योन्यमर्मभेदाच्चअन्योन्यकरपीडनात् ॥ ७ ॥ लुब्धाश्चपापभेदेनअन्योन्यस्यचभक्षणम् ॥ इत्येवमादिभिर्दुःखैर्यस्माद्भीतंचराचरम् ॥ ८ ॥ निरयादिमनुष्यान्तंतस्मात्सर्वंत्यजेद्बुधः ॥ स्कन्धात्स्कन्धेनयन्भारंविश्राममंमन्यतेयथा ॥ ९ ॥ तद्वत्सर्वमिदंलोकेदुःखंदुःखेनशाम्यति ॥ अन्योन्यातिशयोपेताःसर्वदाभोगसम्प्लवाः ॥२१०॥ धर्मक्षयाच्चदेवानांदिविदुःखमवस्थितम् ॥नानायोनिसहस्रेषुसम्भवःपुण्यसंक्षयात् ॥ ११ ॥ रोगाश्चविविधाकारादेवलोकेऽपिसंस्मृताः ॥ यज्ञस्यहिशिरश्छिन्नमश्विभ्यांसंहितंपुनः ॥१२॥ तेनदोषेणयज्ञस्यशिरोरोगःसदैवहि ॥ मार्तण्डभानोःकुष्ठंचवरुणस्यजलोदरम् ॥ १३ ॥ पूष्णोदशनवैकल्यंभुजस्तम्भःशचीपतेः ॥ सुमहान्क्षयरोगश्चसोमस्यपरिकीर्तितः ॥ १४ ॥ ज्वरश्चसुमहानासीद्दक्षस्यापिप्रजापतेः ॥ कल्पेकल्पेचदेवानांमहतामपिसंक्षयः ॥ १५ ॥ परार्धद्वयकालान्तेब्रह्मणश्चाप्यनित्यता ॥ दक्षस्यदुहितांपौत्रींब्रह्माकामितवान्पुनः ॥ १६ ॥ क्रोधेनचजयांदेवींयोगज्ञांशप्तवान्प्रभुः ॥ कामक्रोधौस्थितौयत्रतत्रदोषास्तदात्मकाः ॥१७॥ दुःखानिचसमस्तानिसंस्थितानिनसंशयः ॥ विशीर्णजन्ममरणंसर्वाशित्वंहविर्भुजः ॥ १८ ॥ स्त्रीवधःकामसक्तिश्चसारथ्यंपाण्डवेबले ॥ रुद्रेणत्रिपुरंदग्धंदक्षयज्ञोविनाशितः ॥ १९ ॥ स्कन्दस्यजन्मवैशुक्रात्क्रीडादीनांसहस्रशः ॥ एवंत्रयोऽपिरागाद्यैर्दोषैर्देवाःसमन्विताः॥ २२० ॥एभ्यःपरःप्रभुःशान्तःपरिपूर्णःसमुक्तिदः ॥ एवमेतज्जगत्सर्वमन्योन्यातिशयेस्थितम् ॥ २१ ॥ दुःखैराकुलितंज्ञात्वानिर्वेदंपरमंव्रजेत् ॥ निर्वेदाच्चविरागःस्याद्विरागाज्ज्ञानसम्भवः ॥ २२ ॥ ज्ञानेनतत्परंज्ञानंशिवंमुक्तिमवाप्नुयात् ॥ समस्तदुःखनिर्मुक्तःस्वस्थात्मासमुखीतदा ॥ सर्वज्ञःपरिपूर्णश्चमुक्तइत्यभिधी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यते ॥ २३ ॥ मातलिरुवाच ॥ एतत्तेसर्वमाख्यातंयत्त्वयापरिपृच्छितम् ॥ धर्माधर्मविवेकोहिसर्वज्ञानसमुद्भवः ॥ २४ ॥ इन्द्रलोकेप्रगन्तव्यंदेवरा
जस्यशासनात् ॥२२५॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेपितृमातृतीर्थमाहात्म्येषट्षष्टितमोऽध्यायः ॥६६॥ ययातिरुवाच॥अस्मद्भाग्यप्र
सङ्गेनभवतोदर्शनंमम ॥ सञ्जातंशक्रसंवाहएतच्छ्रेयोममातुलम् ॥ १ ॥ मानवामर्त्यलोकेचपापंकुर्वन्तिदारुणम् ॥ तेषांकर्मविपाकंचमातलेवदसाम्प्र
तम् ॥ २ ॥ मातलिरुवाच ॥ श्रूयतामभिधास्यामिपापाचारस्यलक्षणम् ॥ श्रुतेसतिमहज्ज्ञानमत्रलोकेप्रजायते ॥ ३ ॥ वेदनिन्दांप्रकुर्वन्तिब्रह्माचा
रस्यकुत्सनम् ॥ महापातकमेवापिज्ञातव्यंज्ञानपण्डितैः ॥ ४ ॥ साधूनामपिसर्वेषांयःपीडांहिसमाचरेत् ॥ महापातकमेवापिप्रायश्चित्तेनहि
व्रजेत् ॥ ५ ॥ कुलाचारंपरित्यज्यअन्याचारंव्रजन्तिच ॥ एतच्चपातकंघोरंकथितंकृत्यवेदिभिः ॥ ६ ॥ मातापित्रोश्चयानिन्दाताडनंभगि
नीषुच ॥ पितृष्वसुर्निन्दनंचतदेवपातकंध्रुवम् ॥ ७ ॥ सम्प्राप्तेश्राद्धकालेऽपिपञ्चक्रोशान्तरेस्थितम् ॥ जामातरंपरित्यज्यतथाचदुहितुःसुतम्
॥ ८ ॥ स्वसारंचैवस्वस्रीयंपरित्यज्यप्रवर्तते ॥ कामात्क्रोधाद्भयाद्वापिअन्यंभोजयतेयदा ॥ ९ ॥ पितरोनैवभुञ्जन्तिदेवाश्चैवनभुञ्जते ॥
एतच्चपातकंतस्यपितृघातसमंकृतम् ॥ १० ॥ दानकालेऽपिसम्प्राप्तेआगतेब्राह्मणेकिल ॥ भूरिदानंपरित्यज्यकतिभ्योहिप्रदीयते ॥ ११ ॥
एकस्मैदीयतेदानमन्येभ्योऽपिनदीयते ॥ एतच्चपातकंघोरंदानभ्रंशकरंस्मृतम् ॥ १२ ॥ यजमानगृहेसेवासंस्थितान्ब्राह्मणान्निजान् ॥
परित्यज्यहियद्दानंनदानस्यचलक्षणम् ॥ १३ ॥ समाश्रितंहियंविप्रंधर्माचारसमन्वितम् ॥ सर्वोपायैःसुपुष्येत्तंसुदानैर्बहुभिर्नृप ॥ १४ ॥ तंसम
भ्यर्च्यविद्वांसंप्राप्तंविप्रंसदार्हयेत् ॥ तंहित्यक्त्वाददेदानमन्यस्मैब्राह्मणायवै ॥ १५ ॥ दत्तंहुतंभवेत्तस्यनिष्फलंनात्रसंशयः ॥ ब्राह्मणःक्षत्रियोवैश्यः
शूद्रश्चापिचतुर्थकः ॥ १६ ॥ पुण्यकालेषुसर्वेषुसंश्रितंपूजयेद्द्विजम् ॥ मूर्खंवापिहिविद्वांसंतस्यपुण्यफलंशृणु ॥ १७ ॥ अश्वमेधस्ययज्ञस्यफलंत
स्यप्रजायते ॥ कस्माद्धिकारणाद्राजन्छक्यंप्राप्यनकारयेत्॥ १८ ॥ अन्योविप्रःसमायातस्तत्कालंश्राद्धकर्मणि ॥ उभौतौपूजयेत्तत्रभोजनाच्छाद
नैस्ततः ॥ १९ ॥ ताम्बूलदक्षिणाभिश्चपितरस्तस्यहर्षिताः ॥ श्राद्धभुक्तायदातव्यंसदादानंचदक्षिणा ॥ २० ॥ नददेच्छ्राद्धकर्तायोगोहत्यादिस
मंभवेत् ॥ द्वावेतौपूजयेत्तस्माच्छ्रद्धयानृपसत्तम ॥ २१ ॥ निर्द्धनत्वप्रभावाद्वैतमेकंहिप्रपूजयेत् ॥ व्यतीपातेपिऽसम्प्राप्तेवैधृतौचनृपोत्तम ॥ २२ ॥
अमावास्यांतथाराजन्क्षयाहेऽपरपक्षके ॥ श्राद्धमेवंप्रकर्तव्यंब्राह्मणादित्रिवर्णकैः ॥ २३ ॥ यज्ञेतथामहाराजऋत्विजश्चप्रकारयेत् ॥ तथाविप्राःप्रक
र्तव्याःश्राद्धदानायसर्वदा ॥ २४ ॥ अविज्ञातःप्रकर्तव्योब्राह्मणोनैवजानता ॥ यस्यापिज्ञायतेवंशःकुलंत्रिपुरुषंतथा ॥ २५ ॥ आचारश्चतथाराजं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तंविप्रंसन्निमन्त्रयेत् ॥ कुलंनज्ञायतेयस्यआचारेणविचारयेत् ॥ २६ ॥ श्राद्धदानेप्रकर्तव्येविशुद्धोमूर्खएवहि ॥ अविज्ञातोभवेद्विप्रोवेदवेदाङ्गपारगः ॥ २७ ॥ श्राद्धदानंप्रकर्तव्यंतस्माद्विप्रंनिमन्त्रयेत् ॥ आतिथ्यंतुप्रकर्तव्यमपूर्वंनृपसत्तम ॥ २८ ॥ अन्यथाकुरुतेपापीसयातिनरकंध्रुवम् ॥ तस्माद्विप्रःप्रकर्तव्योदानेश्राद्धेचपर्वसु ॥ २९ ॥ आदौपरीक्षयेद्विप्रंश्राद्धेदानेप्रकारयेत् ॥ नाश्नन्तितस्यवैगेहेपितरोविप्रवर्जिताः ॥३० ॥ शापंदत्त्वाततोयान्तिश्राद्धाद्विप्रविवर्जितात् ॥ महापापीभवेत्सोऽपिब्रह्महासचकथ्यते ॥ ३१ ॥ पैत्राचारंपरित्यज्ययोवर्तेतनरोत्तम ॥ महापापीसविज्ञेयःसर्वधर्मबहिष्कृतः ॥ ३२ ॥ येत्यजन्तिशिवाचारंवैष्णवंभोगदायकम् ॥ निन्दन्तिब्राह्मणंधर्मंविज्ञेयाःपापवर्द्धनाः ॥ ३३ ॥ येत्यजन्तिशिवाचारंशिवभक्तान्द्विषन्तिच ॥ हरिंनिन्दन्तियेपापाब्रह्मद्वेषकराःसदा ॥ ३४ ॥ आचारनिन्दकायेतेमहापातककृत्तमाः ॥ आद्यंपूज्यंपरंज्ञानंपुण्यंभागवतंतथा ॥३५॥ वैष्णवंहरिवंशंवामत्स्यंवाकूर्ममेवच ॥ पाद्मंवायेपूजयन्तितेतपांश्रेयोवदाम्यहम्॥ ३६ ॥ प्रत्यक्षंतेनवैदेवःपूजितोमधुसूदनः ॥ तस्मात्प्रपूजयेज्ज्ञानंवैष्णवंविष्णुवल्लभम् ॥ ३७ ॥ देवस्थानेचनित्यंवैवैष्णवंपुस्तकंनृप ॥ तस्मिन्प्रपूजितेविप्रपूजितःकमलापतिः ॥ ३८ ॥ असम्पूज्यहरेर्ज्ञानंयेऽधीयतेलिखन्तिच ॥ अज्ञायतत्प्रयच्छन्तिशृण्वन्त्युच्चारयन्तिच ॥ ३९ ॥ विक्रीडन्ति[1]चलोभेनकुज्ञाननियमेनच ॥ असंस्कृतप्रदेशेषुयथेष्टंस्थापयन्तिच ॥ ४० ॥ हरिज्ञानंयथाक्षेमंप्रत्यक्षाच्चप्रकाशयेत् ॥ अधीतेचसमर्थश्चयःप्रमादंकरोतिच ॥ ४१ ॥ अशुचिश्चाशुचौस्थानेयःप्रवक्तिशृणोतिच॥ इतिसर्वंसमासेनज्ञाननिन्दासमंस्मृतम् ॥४२॥ गुरुपूजामकृत्वैवयःशास्त्रंश्रोतुमिच्छति ॥ नकरोतिचशुश्रूषामाज्ञाभङ्गंचभावतः ॥४३॥ नाभिनन्दतितद्वाक्यमुत्तरंसम्प्रयच्छति ॥ गुरुकर्मणिसाध्येचतदुपेक्षांकरोतिच ॥ ४४ ॥ गुरुमार्तमशक्तंचविदेशंप्रस्थितंतथा ॥ अरिभिःपरिभूतंवायःसन्त्यजतिपापकृत् ॥ ४५ ॥ पठमानंपुराणंतुतस्यपापंवदाम्यहम् ॥ कुम्भीपाकेवसेत्तावद्यावदिन्द्राश्चतुर्दश ॥ ४६ ॥ पठमानंगुरुंयोहिउपेक्षयतिपापधीः ॥ तस्यापिपातकंघोरंचिरंनरकदायकम् ॥४७॥ भार्यापुत्रेषुमित्रेषुयश्चावज्ञांकरोतिच ॥ इत्येतत्पातकंज्ञेयंगुरुनिन्दासमंमहत् ॥४८॥ ब्रह्महास्वर्णस्तेयीचसुरापीगुरुतल्पगः ॥ महापातकिनश्चैतेतत्संयोगीचपञ्चमः ॥ ४९ ॥ क्रोधाद्द्वेषाद्भयाल्लोभाद्ब्राह्मणस्यविशेषतः ॥ मर्मातिकृन्तकोयश्चब्रह्मघ्नःसप्रकीर्तितः ॥ ५० ॥ ब्राह्मणंयःसमाहूययाचमानमकिञ्चनम् ॥ पश्चान्नास्तीतियोब्रूयात्सचवैब्रह्महानृप ॥ ५१ ॥ यस्तुविद्याभिमानेननिस्तेजयतिवैद्विजम् ॥ उदासीनंसभामध्येब्रह्महासप्रकीर्तितः ॥५२॥ मिथ्यागुणेरथात्मानंनयत्युत्कर्षतांपुनः ॥ गुरुंविरोधयेद्यस्तुसचवैब्रह्महा

१ 'विक्रीणन्ति' च इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्मृतः ॥ ५३ ॥क्षुत्तृषाततदेहानामन्नभोजनमिच्छताम् ॥ यःसमाचरतेविघ्नंतमाहुर्ब्रह्मघातकम् ॥ ५४ ॥ पिशुनःसर्वलोकानांरन्ध्रान्वेषणतत्परः ॥
उद्वेजनकरःक्रूरःसचवैब्रह्महास्मृतः ॥ ५५ ॥ देवद्विजगवांभूमिंपूर्वदत्तांहरेत्तुयः ॥ प्रनष्टामपिकालेनतमाहुर्ब्रह्मघातकम् ॥५६॥ द्विजवित्तापहरणंन्या
सेनसमुपार्जितम् ॥ ब्रह्महत्यासमंज्ञेयंतस्यपातकमुत्तमम् ॥ ५७ ॥ अग्निहोत्रंपरित्यज्यपञ्चयज्ञादिकर्मच ॥ मातापित्रोर्गुरूणांचकूटसाक्ष्यंचयश्च
रेत् ॥ ५८ ॥ अप्रियंशिवभक्तानामभक्ष्याणांचभक्षणम् ॥ वनेनिरपराधानांप्राणिनांचप्रमारणम् ॥ ५९ ॥ गवांगोष्ठेवनेचाग्नेःपुरेग्रामेचदीपनम्॥
इतिपापानिघोराणिसुरापानसमानितु ॥ ६० ॥ दीनसर्वस्वहरणंपरस्त्रीगजवाजिनाम् ॥ गोभूरजतवस्त्राणामोषधीनांरसस्यच ॥ ६१ ॥ च
न्दनागुरुकर्पूरकस्तूरीपट्टवाससाम् ॥ परन्यासापहरणंरुक्मस्तेयसमंस्मृतम् ॥ ६२ ॥ कन्यायावरयोग्यायाअदानंसदृशेवरे ॥ पुत्रमित्रकल
त्रेषुगमनंभगिनीषुच ॥ ६३ ॥ कुमारीसाहसंघोरमन्त्यजस्त्रीनिषेवणम् ॥ सवर्णायाश्चगमनंगुरुतल्पसमंस्मृतम् ॥ ६४ ॥ महापातकतुल्या
निपापान्युक्तानियानितु ॥ तानिपातकसंज्ञानितन्न्यूनमुपपातकम् ॥ ६५ ॥ द्विजायार्थंप्रतिज्ञायनप्रयच्छतियःपुनः ॥ तत्रविस्मरतेविप्रस्तु
ल्यंतदुपपातकम् ॥ ६६ ॥ द्विजद्रव्यापहरणंमर्यादायाव्यतिक्रमम् ॥ अतिमानातिकोपश्चदाम्भिकत्वंकृतघ्नता ॥ ६७ ॥ अन्यत्रविषया
सक्तिःकार्पण्यंशाठ्यमत्सरम् ॥ परदाराभिगमनंसाध्वीकन्याभिदूषणम् ॥ ६८ ॥ परिवित्तिःपरिवेत्ताययाचपरिविद्यते ॥ तयोर्दानंचकन्यायास्तयो
रेवचयाजनम् ॥ ६९ ॥ पुत्रमित्रकलत्राणामभावेस्वामिनस्तथा ॥ भार्याणांचपरित्यागःसाधूनांचतपस्विनाम् ॥ ७० ॥ गवांक्षत्रियवैश्यानांस्त्री
शूद्राणांचघातनम् ॥ शिवायतनवृक्षाणांपुष्पारामविनाशनम् ॥ ७१ ॥ यःपीडामाश्रमस्थानामाचरेदल्पिकामपि ॥तद्भृत्यपरिवर्गस्यपशुधान्यवन
स्यच ॥ ७२ ॥ वस्त्रधान्यपशुस्तेयमयाज्यानांचयाजनम् ॥ यज्ञारामतडागानांदारापत्यस्यविक्रयः ॥७३ ॥ तीर्थयात्रोपवासानांव्रतानांचसुकर्म
णाम्॥स्त्रीधनान्युपजीवन्तिस्त्रीभवाद्यन्नजीविताः ॥७४ ॥स्वधर्मंविक्रयाद्यस्तुअधर्मंवर्णतेनरः ॥परदोषप्रवादीचपरच्छिद्रावलोककः ॥७५॥ परद्रव्या
भिलाषीचपरदारावलोककः ॥ एतेगोघ्नसमानाश्चज्ञातव्यानृपनन्दन ॥ ७६ ॥ यःकर्तासर्वशास्त्राणांगोहर्तागोश्वविक्रयी ॥ निर्दयोऽतीवभृत्येषुपशूनां
दमकश्चयः ॥ ७७ ॥ मिथ्याप्रवदतेवाचमाकर्णयतियःपरैः ॥ स्वामिद्रोहीगुरुद्रोहीमायावीचपलःशठः ॥ ७८ ॥ योभार्यापुत्रमित्राणिबालवृद्धकृशा
तुरान् ॥ भृत्यानतिथिबन्धूंश्चत्यक्त्वाऽश्नातिबुभुक्षितान् ॥७९ ॥ यस्तुमृष्टंसमश्नातिनोवाप्यन्नंददातिच ॥ पृथक्पाकीसविज्ञेयोब्रह्मवादिषुगर्हितः ॥
॥ ८० ॥ नियमान्स्वयमादाययेत्यजन्त्यजितेन्द्रियाः ॥ प्रव्रज्यागमितायैश्चसंयुक्तायेचमद्यपैः ॥८१॥ येचापिक्षयरोगार्तांगांपिपासाक्षुधातुराम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नपालयन्तियत्नेनतेगोघ्नानारकाःस्मृताः ॥ ८२ ॥ सर्वपापरतायेचचतुष्पात्क्षेत्रभेदकाः ॥ साधून्विप्रान्गुरूंश्चैवयश्चगांहिप्रताडयेत् ॥ ८३ ॥ येताडयन्त्यदोषांचनारींसाधुपदेस्थिताम् ॥ आलस्यबद्धसर्वाङ्गोयःस्वपितिमुहुर्मुहुः ॥ ८४ ॥दुर्बलांश्चनपुष्णन्तिनष्टान्नान्वेषयन्तिच ॥ पीडयन्त्यतिभारेणसक्षतान्वाहयन्तिच ॥ ८५ ॥ सर्वपापरतायेचसंयुक्तायेचभुञ्जते ॥ भग्नाङ्गीं क्षतरोगार्तांगोरूपांचक्षुधातुराम् ॥ ८६ ॥ नपालयन्तियत्नेनतेजनानारकाःस्मृताः ॥ वृषाणांवृषणौयेचपापिष्ठाघातयन्तिच ॥ ८७ ॥ बाधयन्तिचगोवत्सान्महानारकिणोनराः ॥ आशयासमनुप्रातंक्षुत्तृषाश्रमपीडितम् ॥ ८८ ॥ यचातिथिंनमन्यन्तेतेवैनिरयगामिनः ॥ अनाथंविकलंदीनंबालंवृद्धंभृशातुरम् ॥ ८९ ॥ नानुकम्पन्तियेमूढास्तेयान्तिनरकार्णवम् ॥ अजाविकोमाहिषिकोयःशूद्रावृषलीपतिः ॥ ९० ॥ शूद्रोविप्रस्यक्षत्रस्ययआचारेणवर्तते ॥ शिल्पिनःकारवोवैद्यास्तथादेवलकानराः ॥ ९१ ॥ भृतकामात्यकर्माणःसर्वेनिरयगामिनः ॥ यश्चोदितमतिक्रम्यस्वेच्छयाआहरेत्करम् ॥ ९२ ॥ नरकेषुसपच्येतयश्चदण्डंवृथानयेत् ॥ उत्कोचकैरधिकृतैस्तस्करैश्चप्रपीड्यते ॥ ९३ ॥ यस्यराज्ञःप्रजाराज्येपच्यतेनरकेषुसः ॥ येद्विजाःप्रतिगृह्णन्तिनृपस्यान्यायवर्तिनः ॥ ९४ ॥ प्रयान्तितेऽपिघोरेषुनरकेषुनसंशयः ॥ पारदारिकचौराणांयत्पापंपार्थिवस्यच ॥ ९५ ॥ भवत्यरक्षतोघोरोराज्ञस्तस्यपरिग्रहः ॥ अचौरंचौरवद्यश्चचौरंचाचौरवत्पुनः ॥ ९६ ॥ अविचार्यनृपःकुर्यात्सोऽपिवैनरकंव्रजेत् ॥ घृततैलान्नपानादिमधुमांससुरासवम् ॥ ९७ ॥ गुडेक्षुक्षीरशाकादिदधिमूलफलानिच ॥ तृणकाष्ठंपुष्पपत्रंकांस्यंरजतमेवच ॥ ९८ ॥ उपानच्छत्रकटकशिबिकामासनंमृदु ॥ ताम्रंसीसंत्रपुकांस्यंशङ्खाद्यंचजलोद्भवम् ॥ ९९ ॥ वादित्रंवेणुवंशाद्यंगृहोपस्करणानिच ॥ ऊर्णाकार्पासकौशेयरङ्कपट्टोद्भवानिच ॥१००॥ तूलंसूक्ष्माणिवस्त्राणियेलोभेनहरन्तिच ॥ एवमादीनिचान्यानिद्रव्याणिविविधानिच ॥१॥ नरकेषुद्रुतंगच्छेदपहृत्याल्पकान्यपि ॥ यद्वातद्वापरद्रव्यमपिसर्षपमात्रकम् ॥ २ ॥ अपहृत्यनरोयातिनरकेनात्रसंशयः ॥ बह्वल्पकाद्यपितथापरस्यममताकृतम् ॥ ३ ॥ अपहृत्यनरोयातिनरकेनात्रसंशयः ॥ एवमाद्यैर्नरःपापैरुत्क्रान्तिसमनन्तरम् ॥ ४ ॥ शरीरघातनार्थायपूर्वाकारमवाप्नुयात् ॥ यमलोकंव्रजन्त्येतेशरीरस्थाययमाज्ञया ॥ ५ ॥ यमदूतैर्महाघोरैर्नीयमानाःसुदुःखिताः ॥ देवतिर्यङ्मनुष्याणामधर्मनियतात्मनाम् ॥ ६ ॥ धर्मराजःस्मृतःशास्तासुघोरैर्विविधैर्वधैः ॥ विनयाचारयुक्तानांप्रमादान्मलिनात्मनाम् ॥ ७ ॥ प्रायश्चित्तैर्गुरुःशास्तानचतैरीक्ष्यतेयमः ॥ पारदारिकचौराणामन्यायव्यवहारिणाम् ॥ ८ ॥ नृपतिःशासकःप्रोक्तःप्रच्छन्नानांचधर्मराट् ॥ तस्मात्कृतस्यपापस्यप्रायश्चित्तंसमाचरेत् ॥ ९ ॥ नाभुक्तस्यान्यथानाशःकल्पकोटिशतैरपि ॥ यःकरोतिस्वयंकर्मकारयेद्वानुमोदयेत् ॥ ११० ॥ कायेनमनसा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाचातस्यचाधोगतिःफलम् ॥ इतिसंक्षेपतःप्रोक्ताःपापभेदास्त्रिधाऽधुना ॥ ११ ॥ कथ्यन्तेगतयश्चित्रानराणांपापकर्मणाम् ॥ एतत्तेनृपतेऽधर्म
फलंप्रोक्तंसुविस्तरात् ॥ १२ ॥ अन्यत्किंतेप्रवक्ष्यामितन्मेब्रूहिनरोत्तम ॥ अधर्मस्यफलंप्रोक्तंधर्मस्यापिवदाम्यहम् ॥ १३ ॥ इत्याहमातलि
स्तत्रराजानंसर्ववत्सलम् ॥ तस्मिन्धर्मप्रसङ्गेनइत्याख्यातंमहात्मना ॥ १४ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेपितृतीर्थवर्णनेययाति
चरित्रेसप्तषष्टितमोऽध्यायः ॥ ६७ ॥ ययातिरुवाच ॥ अधर्मस्यफलंसूतश्रुतंसर्वंमयाविभो ॥ धर्मस्यापिफलंब्रूहिश्रोतुंकौतूहलंमम ॥ १ ॥
मातलिरुवाच ॥ अथपापैरिमेयान्तियमलोकंचतुर्विधाः ॥ सन्त्रासजननंघोरंविवशाःसर्वदेहिनः ॥ २ ॥ गर्भस्थैर्जायमानैश्चबालैस्तरुणम
ध्यमैः ॥ पुंस्त्रीनपुंसकैर्वृद्धैर्यातव्यंजन्तुभिस्ततः ॥ ३ ॥ शुभाशुभफलंतत्रदेहिनांप्रविचार्यते ॥ चित्रगुप्तादिभिःसर्वैर्मध्यस्थैःसर्वदर्शिभिः
॥ ४ ॥ नतेऽत्रप्राणिनःसन्तियेनयान्तियमक्षयम् ॥ अवश्यंहिकृतंकर्मभोक्तव्यंतद्विचारितम् ॥ ५ ॥ येतत्रशुभकर्माणःसौम्यचित्तादया
न्विताः ॥ तेनरायान्तिसौम्येनपथायमनिकेतनम् ॥ ६ ॥ यःप्रदद्याच्चविप्राणामुपानत्काष्ठपादुके ॥ सविमानेनमहतासुखंयातियमालयम् ॥ ७ ॥
छत्रदानेनगच्छन्तिपथासाभ्रेणदेहिनः ॥ दिव्यवस्त्रपरीधानायान्तिवस्त्रप्रदायिनः ॥ ८ ॥ शिबिकायाःप्रदानेनविमानेनसुखंव्रजेत् ॥ सुखासन
प्रदानेनसुखंयान्तियमालयम् ॥ ९ ॥ आरामकर्ताछायासुशीतलासुसुखंव्रजेत् ॥ यान्तिपुष्पकयानेनपुष्पारामप्रदायिनः ॥ १० ॥ देवायतनकर्ता
चयतीनामाश्रमस्यच ॥ अनाथमण्डपानांचक्रीडन्यातिगृहोत्तमैः ॥ ११ ॥ देवाग्निगुरुविप्राणांमातापित्रोश्चपूजकः ॥ १२ ॥ विप्रेषुदीनेषुगुणान्वि
तेषुयच्छ्रद्धयास्वल्पमपिप्रदत्तम् ॥ तत्सर्वकामान्समुपैतिलोकेश्राद्धेचदानंप्रवदन्तिसन्तः ॥१३॥ श्रद्धादानेनविज्ञेयमपिवालाग्रमात्रकम् ॥ यत्पात्रा
दिचतुष्टयंश्रद्धातेषुसदामम ॥१४॥ श्रद्धीयतेसदातस्माच्छ्रद्धायास्तत्फलंभवेत् ॥ गुणान्वितेषुदीनेषुयच्छत्त्र्यावसथान्यपि ॥१५॥ सम्प्रयातिसर्वका
मंस्थानंपैतामहंनृप॥श्रद्धयायेनविप्रायदत्तंकाकिणिमात्रकम् ॥१६॥ सस्याद्दिव्यातिथिर्भूपदेवानांकीर्तिवर्धनः ॥ तस्माच्छ्रद्धान्वितैर्देयंतत्फलंभवति
ध्रुवम् ॥१७॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेमातृपितृतीर्थवर्णनेययातिचरित्रेऽष्टषष्टितमोऽध्यायः ॥६८॥ मातलिरुवाच॥अथधर्माःशि
वेनोक्ताःशिवधर्मागमोत्तमाः ॥ ज्ञेयाबहुविधास्तेचकर्मयोगप्रभेदतः॥१॥हिंसादिदोषनिर्मुक्ताःक्लेशायासविवर्जिताः॥सर्वभूतहिताःशुद्धाःसूक्ष्मायासा ॥ ७१ ॥
महत्फलाः ॥ २ ॥ अनन्तशाखाकलिताःशिवमूलैकसंश्रिताः ॥ ज्ञानध्यानसुपुष्पाढ्याःशिवधर्माःसनातनाः ॥ ३ ॥ धारयन्तिशिवंयस्माद्धार्यंते
शिवभाषितैः ॥ शिवधर्माःस्मृतास्तस्मात्संसारार्णवतारकाः ॥ ४ ॥ तथाऽहिंसाक्षमासत्यंह्रीःश्रद्धेन्द्रियसंयमः ॥ दानमिज्यातपोदानंदशकंधर्मसा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धनम् ॥ ५ ॥ अथव्यस्तैःसमस्तैर्वाशिवधर्मैरनुष्ठितैः ॥ शिवैकरस्यसम्प्राप्तैर्गतिरेकैवकल्पिता ॥ ६ ॥ यथाभूःसर्वभूतानांस्थानंसाधारणंस्मृतम् ॥
तत्तथाशिवभक्तानांतुल्यंशिवपुरंस्मृतम् ॥७ ॥ यथेहसर्वभूतानांभोगाःसातिशयाःस्मृताः ॥ नानापुण्यविशेषेणभोगाःशिवपुरेतथा ॥ ८ ॥ शुभाशुभ
फलंचापिभुज्यतेसर्वदेहिभिः ॥ शिवधर्मस्यचैकस्यफलंतत्रोपभुज्यते ॥ ९ ॥ यस्ययादृग्भवेत्पुण्यंश्रद्धापात्रविशेषतः ॥ भोगाःशिवपुरेतस्यज्ञेयाः
सातिशयाःशुभाः॥ १० ॥ स्थानप्राप्तिःपरंतुल्याभोगाःशान्तिमयाःस्थिताः ॥ कुर्यात्पुण्यंमहत्तस्मान्महाभोगजिगीषया ॥ ११ ॥ सर्वातिशयमेवैकं
भावितंचसुरोत्तमैः ॥ आत्मभोगाधिपत्यंस्याच्छिवःसर्वजगत्पतिः ॥ १२ ॥ केचित्तत्रैवमुच्यन्तेज्ञानयोगरतानराः ॥ आवर्तन्तेपुनश्चान्येसंसारभो
गतत्पराः ॥ १३ ॥ तस्माद्विमुक्तिमिच्छंस्तुभोगासक्तिंचवर्जयेत् ॥ विरक्तःशान्तिचित्तात्माशिवज्ञानमवाप्नुयात् ॥ १४ ॥येचापीशान्यहृदयायज
न्तीशंप्रसङ्गतः ॥तेषामपिददातीशःस्थानंभावानुरूपतः ॥१५ ॥ तत्रार्चयन्तियेरुद्रंसकृदुच्छिन्नकल्मषाः ॥ तेषांपिशाचलोकेषुभोगानीशःप्रयच्छति
॥ १६ ॥ सन्तप्तादुःखभारेणम्रियन्तेसर्वदेहिनः ॥ अन्नदःपुण्यदःप्रोक्तःप्राणदश्चापिसर्वदः ॥ १७ ॥ तस्मादन्नप्रदानेनसर्वदानफलंलभेत् ॥ त्रैलोक्ये
यानिरत्नानिभोगस्त्रीवाहनानिच ॥ १८ ॥ अन्नदानप्रदःसर्वमिहामुत्रफलंलभेत् ॥ यस्यान्नपानपुष्टाङ्गःकुरुतेपुण्यसञ्चयम् ॥ १९ ॥ अन्नप्रदातुस्त
स्यार्धंकर्तुश्चार्धंनसंशयः ॥ धर्मार्थकाममोक्षाणांदेहःपरमसाधनम् ॥ २० ॥ स्थितिस्तस्यान्नपानाभ्यामतस्तत्सर्वसाधनम् ॥ अन्नंप्रजापतिःसाक्षा
दन्नंविष्णुःशिवःस्वयम् ॥ २१ ॥ तस्मादन्नसमंदानंनभूतंनविष्यति ॥ त्रयाणामपिलोकानामुदकंजीवनंस्मृतम् ॥ २२ ॥ पवित्रमुदकंदिव्यंशुद्धंसर्वं
रसायनम् ॥ अन्नपानाश्वगोवस्त्रशय्यासूत्रासनानिच ॥ २३ ॥ प्रेतलोकेप्रशस्तानिदानान्यष्टौविशेषतः ॥ एवंदानविशेषेणधर्मराजपुरंनरः ॥ २४ ॥
यस्माद्यातिसुखेनैवतस्माद्धर्मंसमाचरेत् ॥ येपुनःक्रूरकर्माणःपापादानविवर्जिताः ॥ २५ ॥ भुञ्जतेदारुणंदुःखंनरकेनृपनन्दन ॥ तथासुखंप्रभुञ्जन्ति
दानकर्तारएवतु ॥ २६ ॥ तेषांतुसम्भवेत्सौख्यंकर्मयोगरतात्मनाम् ॥ अप्रमेयगुणैर्दिव्यैर्विमानैःसर्वकामकैः ॥ २७ ॥ असङ्ख्यैस्तत्पुरंव्याप्तंप्राणि
नामुपकारकैः ॥ सहस्रसोमदिव्यंवासूर्यतेजःसमप्रभम् ॥ २८ ॥ रुद्रलोकमितिप्रोक्तमशेषगुणसंयुतम् ॥ सर्वेषांशिवभक्तानांतत्पुरंपरिकीर्तितम्॥ २९ ॥
रुद्रक्षेत्रेमृतानांचजङ्गमस्थावरात्मनाम् ॥ अप्येकदिवसंभक्त्यायःपूजयतिशङ्करम् ॥३० ॥ सोऽपियातिशिवस्थानंकिंपुनर्बहुशोऽर्चयन् ॥ वैष्णवावि
ष्णुभक्ताश्चविष्णुध्यानपरायणाः ॥ ३१ ॥ तेऽपिगच्छन्तिवैकुण्ठेसमीपंदेवचक्रिणः ॥ ब्रह्मवादीचधर्मात्माब्रह्मलोकंप्रयातिसः ॥ ३२॥ पुण्यकर्तासुपु
ण्येनपुण्यलोकंप्रयातिच ॥ तस्मादीशेसदाभक्तिंभावयेदात्मनात्मनि ॥ ३३ ॥ हरौवापिमहाराजयुक्तात्माज्ञानवान्स्वयम् ॥ तस्मात्सर्वविचारेणभा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वदोपविचारतः ॥३४॥ एवंविष्णुप्रभावेनविशिष्टेनापिकर्मणा ॥ नरैःस्थानमवाप्यतेदेशभावानुरूपतः ॥ ३५ ॥ इत्येतदपरंप्रोक्तंश्रीमच्छिवपुरंमहत्॥
देहिनांकर्मनिष्ठानांपुनरावर्त्तकंस्मृतम् ॥३६॥ ऊर्ध्वंशिवपुराज्ज्ञेयंवैष्णवंलोकमुत्तमम् ॥ वैष्णवामानवायान्तिविष्णुध्यानपरायणाः ॥ ३७ ॥ब्राह्म
णाब्रह्मलोकंतुसदाचारानरोत्तमाः ॥ प्रयान्तियज्विनःसर्वेपुरींतांतत्त्वकोविदाः ॥ ३८ ॥ऐन्द्रलोकंतथायान्तिक्षत्रियायुद्धशालिनः ॥ अन्येचपुण्यक
र्त्तारःपुण्यलोकान्प्रयान्तिते ॥ ३९ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेपितृतीर्थेययातिचरितेएकोनसप्ततितमोऽध्यायः ॥ ६९ ॥
मातलिरुवाच ॥ यमपीडांप्रवक्ष्यामिमहातीव्रांसुदारुणाम् ॥ भुञ्जतेपापिनःसर्वेक्रूरास्तेब्रह्मघातकाः ॥ १ ॥ क्वचित्पापाःप्रपच्यन्तेतीव्रेणकरिपाग्नि
ना ॥ क्वचित्तिंसिहैर्वृकैर्व्याघ्रैर्दंशैःकीटैश्चदारुणैः ॥२॥ क्वचिन्महाजलौकोभिःक्वचिदाजगरैःपुनः ॥ मक्षिकाभिश्चरौद्राभिःक्वचित्सर्पैर्विषोल्बणैः ॥ ३ ॥
मत्तमातङ्गयूथैश्चबलोत्कृष्टैःप्रमाथिभिः ॥ पन्थानमुल्लिखद्भिश्चतीक्ष्णशृङ्गमहावृषैः॥४॥महाशृङ्गैश्चमहिषैर्दुष्टगात्रप्रबाधकैः ॥ डाकिनीभिश्चरौद्राभिर्वि
करालैश्चराक्षसैः ॥ ५ ॥ व्याधिभिश्चमहाघोरैःपीड्यमानाव्रजन्तिते ॥ महातुलांसमारूढादह्यमानादवानले॥६॥महावेगप्रधूतास्तेमहाचण्डेनवायुना ॥
महापाषाणवर्षेणभिद्यमानाश्चसर्वतः ॥ ७ ॥ पतद्भिर्वज्रनिर्घोषैरुल्कापातैश्चदारुणैः ॥ प्रदीप्ताङ्गारवर्षेणहन्यमानाव्रजन्तिते ॥८॥ महतापांसुवर्षेणपूर्य
माणायमंगताः ॥येनराःपापकर्माणःपापंभुञ्जन्तिदारुणम् ॥ ९ ॥ एवंपापविशेषेणपापिष्ठाःपापकारकाः ॥ नरकंप्रतिभुञ्जन्तिबहुपीडासमाकुलम् ॥
॥ १० ॥ एतत्तेसर्वमाख्यातंविवेकंपुण्यपापयोः ॥ अन्यत्किंतेप्रवक्ष्यामिधर्मशास्त्रमनुत्तमम् ॥ ११ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेपितृ
तीर्थवर्णनेययातिचरित्रेसप्ततितमोऽध्यायः ॥ ७० ॥ ययातिरुवाच ॥ यत्त्वयासर्वमाख्यातंधर्माधर्ममनुत्तमम् ॥ शृण्वतोऽथममश्रद्धापुनरेवप्रवर्तते
॥ १ ॥ देवानांलोकसंस्थानांवदसङ्ख्याःप्रकीर्तिताः ॥ यस्यपुण्यप्रसङ्गेनयेनप्राप्तंचमातले ॥ २ ॥ मातलिरुवाच ॥ योगयुक्तंप्रवक्ष्यामितपसा
यदुपार्जितम् ॥ देवानांलोकसंस्थानंसुखभोगप्रदायकम् ॥ ३ ॥ धर्मभावंप्रवक्ष्यामिआयासैरर्जितंपृथक् ॥ उपरिष्टाच्चलोकानांस्वरूपंचाप्यनुक्रमात्
॥ ४ ॥ तत्राष्टगुणमैश्वर्यंपार्थिवंपिशिताशिनाम् ॥ तस्मात्सद्योगतानांचनराणांतत्समंस्मृतम् ॥ ५ ॥ रक्षसांषोडशगुणंपार्थिवानांचतद्विधम्॥एवंनि
रवशेषंचयच्छेषंकुलतेजसाम् ॥ ६ ॥ गन्धर्वाणांचवायव्यंयाक्षंचसकलंस्मृतम् ॥ पाञ्चभौतिकमिन्द्रस्यचत्वारिंशद्गुणंमहत् ॥ ७ ॥ सोमस्यमानसं
दिव्यंविश्वेशंपाञ्चभौतिकम् ॥ सौम्यंप्रजापतीशानामहङ्कारगुणाधिकम् ॥ ८ ॥ चतुष्षष्टिगुणंब्राह्मंबौधमैश्वर्यमुत्तमम् ॥ विष्णोःप्राधानिकंतन्त्रमैश्व
र्यंब्रह्मणःपदम् ॥ ९ ॥ श्रीमच्छिवपुरेदिव्येऐश्वर्यंसर्वकामिकम् ॥ अनन्तगुणमैश्वर्यंशिवस्यात्मगुणंमहत् ॥ १० ॥ आदिमध्यान्तरहितंविशुद्धंत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वलक्षणम् ॥ सर्वावभासकंसूक्ष्ममनौपम्यंपरात्परम् ॥ ११ ॥ सुसम्पूर्णंजगद्द्वेषंपशुपाशविमोक्षणम् ॥ योयत्स्थानमनुप्राप्तस्तस्यभोगस्तदात्मकः
॥ १२ ॥ विमानंतत्समानंचभवेदीशप्रसादतः॥ नानारूपाणिताराणांदृश्यन्तेकोटयस्त्विमाः ॥ १३ ॥ अष्टाविंशतिरेवंतेसन्दीप्ताःसुकृतात्मनाम् ॥
येकुर्वन्तिनमस्कारमीश्वरायक्वचित्क्वचित्॥ १४॥सम्पर्कात्कौतुकाल्लोभात्तद्विमानंलभन्तिते ॥ नामसङ्कीर्तनाद्वापिप्रसङ्गेनशिवस्ययः॥१५॥ कुर्याद्वा ६३ ॥
पिनमस्कारंनतस्यविलयोभवेत् ॥ इत्येतागतयस्तत्रमहत्यःशिवकर्मणि ॥ १६ ॥ कर्मणाभ्यन्तरेणापिपुंसामीशानभावतः ॥ प्रसङ्गेनापियेकुर्युः
शङ्करस्मरणंनराः ॥ १७ ॥ तल्लभ्यंत्वतुलंसौख्यंकिंपुनस्तत्परायणैः ॥ विष्णुचिन्तांप्रकुर्वन्तिध्यानेनगतमानसाः ॥ १८ ॥ तेयान्तिपरमंस्थानंतद्वि
ष्णोःपरमंपदम् ॥ शैवंचवैष्णवंरूपमेकरूपंनरोत्तम ॥ १९ ॥ द्वयोश्चअन्तरंनास्तिएकरूपमहात्मनोः ॥ शिवायविष्णुरूपायशिवरूपायविष्णवे ॥
॥ २० ॥ शिवस्यहृदयंविष्णुर्विष्णोश्चहृदयंशिवः ॥ एकमूर्तिस्त्रयोदेवाब्रह्मविष्णुमहेश्वराः ॥ २१ ॥ त्रयाणामन्तरंनास्तिगुणभेदाःप्रकीर्तिताः ॥
शिवभक्तोऽसिराजेन्द्रतथाभागवतोऽसिवै ॥ २२ ॥ तेनदेवाःप्रसन्नास्तेब्रह्मविष्णुमहेश्वराः ॥ सुप्रीतावरदाराजन्कर्मणस्तवसुव्रत ॥ २३ ॥ इन्द्रादेशा
त्समायातःसन्निधौतवमानद ॥ ऐन्द्रमेनंपदंयाहिपश्चाद्ब्राह्मंमहेश्वरम् ॥ २४ ॥ वैष्णवंचप्रयाहित्वंदाहप्रलयवर्जितम् ॥ अनेनापिविमानेनदिव्येन
सर्वगामिना ॥ २५ ॥ दिव्यमूर्तिरतोभुङ्क्ष्वदिव्यभोगान्मनोरमान् ॥ समारुह्यविमानंत्वंपुष्पकंसुखगामिनम् ॥ २६ ॥ सुकर्मोवाच ॥ एवमुक्त्वाद्वि
जश्रेष्ठमौनवान्मातलिस्तदा ॥ राजानंधर्मतत्त्वज्ञंययातिंनहुषात्मजम् ॥ २७ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेमातापितृतीर्थेययातिचरित्रे
एकसप्ततितमोऽध्यायः ॥ ७१ ॥ पिप्पलउवाच ॥ मातलेश्चवचःश्रुत्वासराजानहुषात्मजः ॥ किंचकारमहाप्राज्ञस्तन्मेविस्तरतोवद ॥ १ ॥ सर्वपुण्य
मयीपुण्याकथेयंपापनाशिनी ॥ श्रोतुमिच्छाम्यहंप्राज्ञनैवतृप्यामिसर्वदा ॥ २ ॥ सुकर्मोवाच ॥ सर्वधर्मभृतांश्रेष्ठोययातिर्नृपसत्तमः ॥ तमुवाचागतं
दूतंमातलिंशक्रसारथिम् ॥ ३ ॥ शरीरंनैवत्यक्ष्यामिगमिष्येनदिवंपुनः ॥ शरीरेणविनादूतपार्थिवेननसंशयः ॥४॥ यद्यप्येवंमहादोषाःकायस्यैवप्र
कीर्तिताः ॥ पूर्वंचापिसमाख्यातंत्वयासर्वंगुणागुणम् ॥ ५ ॥ नाहंत्यक्ष्येशरीरंवैनागमिष्येदिवंपुनः ॥ इत्याचक्ष्वइतोगत्वादेवदेवंपुरन्दरम् ॥ ६ ॥
एकाकिनाहिजीवेनकायेनापिमहामते ॥ नैवसिद्धिंप्रयात्येवंसांसारिकमिहैवहि ॥ ७ ॥ नैवप्राणंविनाकायोजीवःकायंविनानहि ॥ उभयोश्चापिमित्र
त्वंनयिष्येनाशर्मिन्द्रन ॥८ ॥ यस्यप्रसादभावाद्वैसुखमश्नातिकेवलम् ॥ शरीरस्याप्ययंप्राणोभोगानन्यान्मनोऽनुगान् ॥९॥ एवंज्ञात्वास्वर्गभोग्यंन
भोज्यंदेवदूतक ॥ सम्भवन्तिमहादुधाव्याधयोदुःखदायकाः ॥ १० ॥ मातलेकिल्बिपाच्चैवजरादोषात्प्रजायते ॥ पश्यमेपुण्यसंयुक्तंकायंषोडशवार्षि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कम् ॥ ११ ॥ जन्मप्रभृतिमेकायःशतार्धाब्दंप्रयातिच ॥ तथापिनूतनोभावःकायस्यापिप्रजायते ॥१२॥ ममकालोगतोदूतअब्दानांशतमुत्तमम् ॥ य
थाषोडशवर्षस्यकायःपुंसःप्रशोभते ॥ १३ ॥ यथामेशोभतेदेहोबलवीर्यसमन्वितः ॥ नैवग्लानिर्नमेहानिर्नश्रमोव्याधयोजरा ॥ १४ ॥ मातलेममका
योऽपिधर्मोत्साहेनवर्द्धते॥सर्वामृतमयंदिव्यमौषधंपरमौषधम् ॥ १५ ॥ पापव्याधिप्रणाशार्थंधर्माख्यंहिकृतम्पुरा ॥ तेनमेशोधितःकायोगतदोषस्तु
जायते ॥ १६ ॥ हृषीकेशस्यसन्ध्यानंनामोच्चारणमुत्तमम् ॥ एतद्रसायनंदूतनित्यमेवंकरोम्यहम् ॥ १७ ॥ तेनमेव्याधयोदोषाःपापाद्याःप्रलयंगताः॥
विद्यमानेहिसंसारेकृष्णनाम्निमहौषधे ॥ १८ ॥ मानवामरणंयान्तिपापव्याधिप्रपीडिताः ॥ नपिबन्तिमहामूढाःकृष्णनामरसायनम् ॥ १९ ॥ तेन
ध्यानेनज्ञानेनपूजाभावेनमातले ॥ सत्येनदानपुण्येनममकायोनिरामयः ॥ २० ॥ पापर्द्धेरामयाःपीडाःप्रभवन्तिशरीरिणः ॥ पीडाभ्योजायतेमृत्युः
प्राणिनांनात्रसंशयः ॥ २१ ॥ तस्माद्धर्मःप्रकर्तव्यःपुण्यसत्याश्रयैर्नरैः ॥ पञ्चभूतात्मकःकायःशिरासन्धिविजर्जरः ॥ २२ ॥ एवंसन्धीकृतोमर्त्योहे
मकारीवटङ्कणैः॥ तत्रभातिमहानग्निर्द्धातुरेवचरःसदा ॥२३॥ शतखण्डमयेविप्रयःसंधत्तेसबुद्धिमान्॥हरेर्नाम्नाचदिव्येनसौभाग्येनापिपिप्पल ॥२४॥
पञ्चात्मकाहियेखण्डाःशतसन्धिविजर्जराः ॥ तेनसन्धारिताःसर्वेकायोधातुसमोभवेत् ॥ २५ ॥ हरेःपूजोपचारेणध्यानेननियमेनच ॥ सत्यभावे
नदानेननूत्नःकायोविजायते ॥ २६ ॥ दोषानश्यन्तिकायस्यव्याधयःशृणुमातले ॥ बाह्याभ्यन्तरशौचंहिदुर्गन्धिर्नैवजायते ॥ २७ ॥ शुचिस्ततो
भवेत्सूतप्रसादात्तस्यचक्रिणः ॥ नाहंस्वर्गंगमिष्यामिस्वर्गमत्रकरोम्यहम् ॥ २८ ॥ तपसाचैवभावेनस्वधर्मेणमहीतलम् ॥ स्वर्गरूपंकरिष्यामिप्रसा
दात्तस्यचक्रिणः ॥ २९ ॥ एवंज्ञात्वाप्रयाहित्वंकथयस्वपुरन्दरम् ॥ ३० ॥ सुकर्मोवाच ॥ समाकर्ण्यततःसूतोनृपतेःपरिभाषितम् ॥ आशीर्भि
रभिनन्द्याथआमन्त्र्यनृपतिंगतः ॥ ३१ ॥ सर्वंनिवेदयामासइन्द्रायचमहात्मने ॥ समाकर्ण्यसहस्राक्षोययातेस्तुमहात्मनः ॥ ३२ ॥ तस्याथचिन्त
यामासानयनार्थंदिवंप्रति ॥ ३३ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेमातापितृतीर्थेययातिचरितेद्विसप्ततितमोऽध्यायः ॥ ७२ ॥ पिप्पल
उवाच ॥ गतेतस्मिन्महाभागेदूतइन्द्रस्यवैपुनः ॥ किंचकारसधर्मात्माययातिर्नहुषात्मजः ॥ १ ॥ सुकर्मोवाच ॥ तस्मिन्गतेदेववरस्यदूतेसचिन्त
यामासनरेन्द्रसूनुः ॥ आहूयदूतान्प्रवरान्ससत्वरंधर्मार्थयुक्तंवचआदिदेश ॥ २ ॥ गच्छन्तुदूताःप्रवराःपुरोत्तमेदेशेषुद्वीपेष्वखिलेषुलोके ॥ कुर्व
न्तुवाक्यंममधर्मयुक्तंव्रजन्तुलोकाःसुपथाहरेश्च ॥ ३ ॥ भावैःसुपुण्यैरमृतोपमानैर्ध्यानैश्चज्ञानैर्यजनैस्तपोभिः ॥ यज्ञैश्चदानैर्मधुसूदनैकमर्चन्तुलोका

१'गददोषो न जायते' इ० पा०। २'धातुरेव कलेवरम्' । इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विषयान्विहाय ॥ ४ ॥ सर्वत्रपश्यन्त्वसुरारिमेकंशुष्केषुचार्द्रेष्वपिस्थावरेषु ॥ अभ्रेषुभूमौसचराचरेषुस्वीयेषुकायेष्वपिजीवरूपम् ॥ ५ ॥ देवं
तमुद्दिश्यदिशन्तुदानमातिथ्यभावैःपरिपैत्रिकैश्च ॥ नारायणंदेववरंयजध्वंदोषैर्विमुक्ताअचिराद्भविष्यथ ॥ ६ ॥ योमामकंवाक्यमिहैवमानवोलोभा
द्विमोहादपिनैवकारयेत् ॥ सशास्यतांयास्यतिनिर्घृणोध्रुवंममापिचौरोहियथानिकृष्टः ॥ ७ ॥ आकर्ण्यवाक्यंनृपतेश्चदूताःसंहृष्टभावाःसकलांच
पृथ्वीम् ॥ आचख्युरेवंनृपतेःप्रणीतमादेशभावंसकलंप्रजासु ॥ ८ ॥ विप्रादिमर्त्याअमृतंसुपुण्यमानीतमेवंभुवितेनराज्ञा ॥ पिबन्तुपुण्यंपरिवैष्ण
वाख्यंदोषैर्विहीनंपरिणाममिष्टम् ॥ ९ ॥ श्रीकेशवंक्लेशहरंवरेण्यमानन्दरूपंपरमार्थमेवम् ॥ नामामृतंदोषहरंतुराज्ञाआनीतमस्त्येवपिबन्तुलोकाः
॥ १० ॥ सखड्गपाणिंमधुसूदनाख्यंतंश्रीनिवासंसगुणंसुरेशम् ॥ नामामृतंदोषहरंसुराज्ञाआनीतमस्त्येवपिबन्तुलोकाः ॥ ११ ॥ श्रीपद्मनाभंकमले
क्षणंचआधाररूपंजगतांमहेशम् ॥ नामामृतंदोषहरंसुराज्ञाआनीतमस्त्येवपिबन्तुलोकाः ॥ १२ ॥ पापापहंव्याधिविनाशरूपमानन्ददंदानवदैत्य
नाशनम् ॥ नामामृतंदोषहरंसुराज्ञाआनीतमस्त्येवपिबन्तुलोकाः ॥ १३ ॥ यज्ञाङ्गरूपंचरथाङ्गपाणिंपुण्याकरंसौख्यमनन्तरूपम् ॥ नामामृतंदोष
हरंसुराज्ञाआनीतमस्त्येवपिबन्तुलोकाः ॥ १४ ॥ विश्वाधिवासंविमलंविरामंरामाभिधानंरमणंमुरारिम् ॥ नामामृतंदोषहरंतुराज्ञाआनीतमस्त्येव
पिबन्तुलोकाः ॥ १५ ॥ आदित्यरूपंतमसांविनाशंबन्धस्यनाशंमतिपङ्कजानाम्[1] ॥ नामामृतंदोषहरंसुराज्ञाआनीतमस्त्येवपिबन्तुलोकाः॥ १६ ॥
नामामृतंसत्यमिदंसुपुण्यमधीत्ययोमानवविष्णुभक्तः ॥ प्रभातकालेनियतोमहात्मासयातिमुक्तिंनहिकारणंच ॥ १७ ॥ इतिश्रीपाद्मपुराणेभूमि
खण्डेवेनोपाख्यानेपितृतीर्थवर्णनेययातिचरितेत्रिसप्ततितमोऽध्यायः ॥७३॥ सुकर्मोवाच ॥ दूतास्तुग्रामेषुवदन्तिसर्वेद्वीपेषुदेशेष्वथपत्तनेषु ॥लोकाः
शृणुध्वंनृपतेस्तदाज्ञांसर्वप्रभावैर्हरिमर्चयन्तु ॥ १ ॥ दानैश्चयज्ञैर्बहुभिस्तपोभिर्धर्माभिलाषैर्यजनैर्मनोभिः ॥ ध्यायन्तुलोकामधुसूदनंतुआदेशमेवंनृ
पतेस्तुतस्य ॥२॥ एवंसुघुष्टंसकलंतुपुण्यमाकर्ण्यतंभूमितलेषुलोकैः ॥ तदाप्रभृत्येवयजन्तिविष्णुंध्यायन्तिगायन्तिजपन्तिमर्त्याः ॥३॥ वेदप्रणीतैश्च
सुसूक्तमन्त्रैःस्तोत्रैःसुपुण्यैरमृतोपमानैः ॥ श्रीकेशवंतद्गतमानसास्तेव्रतोपवासैर्नियमैश्चदानैः ॥ ४ ॥ विहायदोषान्निजकायचित्तवाग्उद्भवान्प्रेमरताः
समस्ताः ॥ लक्ष्मीनिवासंजगतांनिवासंश्रीवासुदेवंपरिपूजयन्ति ॥ ५ ॥ इत्याज्ञातस्यभूपस्यवर्ततेक्षितिमण्डले ॥ वैष्णवेनापिभावेनजनाःसर्वेज
यन्तिते ॥ ६ ॥ नामभिःकर्मभिर्विष्णुंयजन्तेज्ञानकोविदाः ॥ तद्ध्यानास्तद्व्यवसिताविष्णुपूजापरायणाः ॥ ७ ॥ यावद्भूमण्डलंसर्वंयावत्तपति

१. 'चन्द्रप्रकाशम्' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भास्करः ॥ तावद्धिमानवालोकाःसर्वेभागवताबभुः ॥ ८ ॥ विष्णोर्ध्यानप्रभावेनपूजास्तोत्रेणनामतः ॥ आधिव्याधिविहीनास्तेसञ्जातामानवा
स्तदा ॥ ९ ॥ वीतशोकाश्चपुण्याश्चसर्वेचैवतपोधनाः ॥ सञ्जातावैष्णवाविप्रप्रसादात्तस्यचक्रिणः ॥ १० ॥आमयैश्चविहीनास्तेदोषैरोषैश्चवर्जिताः॥
सर्वैश्वर्यसमापन्नाःसर्वरोगविवर्जिताः ॥ ११ ॥ प्रसादात्तस्यदेवस्यसञ्जातामानवास्तदा ॥ अमरानिर्जराःसर्वेधनधान्यसमन्विताः ॥ १२ ॥
मर्त्याविष्णुप्रसादेनपुत्रपौत्रैरलङ्कृताः ॥ तेषामेवमहाभागगृहद्वारेषुनित्यशः ॥ १३ ॥ कल्पद्रुमाःसुपुण्यास्तेसर्वकामफलप्रदाः ॥ सर्वकामदुघा
गावःसचिन्तामणयस्तथा ॥ १४ ॥ सन्तितेषांगृहेपुण्याःसर्वकामप्रदायकाः ॥ अमरामानवाजाताःपुत्रपौत्रैरलङ्कृताः ॥ १५ ॥ सर्वदोष
विहीनास्तेविष्णोश्चैवप्रसादतः ॥ सर्वसौभाग्यसम्पन्नाःपुण्यमङ्गलसंयुताः ॥ १६ ॥ सुपुण्यादानसम्पन्नाज्ञानध्यानपरायणाः ॥ नदुर्भिक्षंन
चव्याधिर्नाकालमरणंनृणाम् ॥ १७ ॥ तस्मिञ्शासतिधर्मज्ञेययातौनृपतौतदा ॥ वैष्णवामानवाःसर्वेविष्णुव्रतपरायणाः ॥ १८ ॥ तद्ध्याना
स्तद्गताःसर्वेसञ्जाताभावतत्पराः ॥ तेषांगृहाणिदिव्यानिपुण्यानिद्विजसत्तम ॥ १९ ॥ पताकाभिःसुशुक्लाभिःशङ्खयुक्तानितानिवै ॥ गदाङ्कित
ध्वजाभिश्चनित्यंचक्राङ्कितानिच ॥ २० ॥ पद्माङ्कितानिभासन्तेविमानप्रतिमानिच ॥ गृहाणिभित्तिभागेषुचित्रितानिसुचित्रकैः ॥ २१ ॥ सर्वत्र
गृहद्वारेषुपुण्यस्थानेषुसत्तमाः ॥ वनानिसन्तिदिव्यानिशाद्वलानिशुभानिच ॥ २२ ॥ तुलस्याचद्विजश्रेष्ठतेषुकेशवमन्दिरैः ॥ भासन्तेपुण्यदि
व्यानिगृहाणिप्राणिनांसदा ॥ २३ ॥ सर्वत्रवैष्णवोभावोमङ्गलोबहुदृश्यते ॥ शङ्खशब्दाश्चभूलोकेमिथःस्फोटरवैस्सखे ॥ २४ ॥ श्रूयन्तेतत्रविप्रे
न्द्रदोषपापविनाशकाः ॥ शङ्खस्वस्तिकपद्मानिगृहद्वारेषुभित्तिषु ॥ २५ ॥ विष्णुभक्त्याचनारीभिर्लिखितानिद्विजोत्तम ॥ गीतरागसुवर्णैश्च
मूर्च्छनातानसुस्वरैः ॥ २६ ॥ गायन्तिकेशवंलोकाविष्णुध्यानपरायणाः ॥ २७॥ हरिंमुरारिंप्रवदन्तिकेशवंप्रीत्याजितंमाधवमेवचान्ये ॥ श्रीनार
सिंहंकमलेक्षणंतंगोविन्दमेकंकमलापतिंच ॥२८॥ कृष्णंशरण्यंशरणंजपन्तिरामंचजप्यैःपरिपूजयन्ति ॥ दण्डप्रणामैःप्रणमन्तिविष्णुंतद्ध्यानयुक्ताः
परिवैष्णवास्ते ॥२९॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेमातापितृतीर्थवर्णनेययातिचरित्रेचतुःसप्ततितमोऽध्यायः ॥ ७४ ॥ सुकर्मोवाच ॥
विष्णुंकृष्णंहरिंरामंमुकुन्दंमधुसूदनम् ॥ नारायणंविष्णुरूपंनारसिंहंतमच्युतम् ॥ १ ॥ केशवंपद्मनाभंचवासुदेवंचवामनम् ॥ वाराहंकमठंम
त्स्यंहृषीकेशंसुराधिपम् ॥ २ ॥ विश्वेशंविश्वरूपंचअनन्तमनघंशुचिम् ॥ पुरुषंपुष्कराक्षंचश्रीधरंश्रीपतिंहरिम् ॥ ३ ॥ श्रीदंश्रीशंश्रीनिवासंमाध

१ 'कपिलं च' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वंमोक्षदंप्रभुम् ॥ इत्येवंहिसमुच्चारंनामभिर्मानवाःसदा ॥ ४ ॥ प्रकुर्वन्तिनराःसर्वेबालवृद्धाःकुमारिकाः ॥ स्त्रियोहरिंसुगायन्तिगृहकर्मरताःसदा ॥ ५ ॥ आसनेशयनेयानेध्यानेवचसिमाधवम् ॥ क्रीडमानास्तथाबालागोविन्दंप्रणमन्तिते ॥ ६ ॥ दिवारात्रौसुमधुरंब्रुवन्तिहरिनामच ॥ विष्णूच्चारोहिसर्वत्रश्रूयतेद्विजसत्तम ॥ ७ ॥ वैष्णवेनप्रभावेनमर्त्यावर्तन्तिभूतले ॥ प्रासादकलशाग्रेषुदेवतायतनेषुच ॥ ८ ॥ यथासूर्यस्यबिम्बानितथा चक्राणिभान्तिच ॥ वैकुण्ठेदृश्यतेभावस्तद्भावंजगतीतले ॥ ९ ॥ तेनराज्ञाकृतंविप्रपुण्यंचापिमहात्मना ॥ विष्णुलोकस्यसमतांतथानीतंमहीतलम् ॥ १० ॥ नहुषस्यापिपुत्रेणवैष्णवेनययातिना ॥ उभयोर्लोकयोर्भावमेकीभूतंमहीतलम् ॥ ११ ॥ भूतलस्यापिविष्णोश्चअन्तरंनैवदृश्यते ॥ विष्णूच्चारंतुवैकुण्ठेयथाकुर्वन्तिवैष्णवाः ॥ १२ ॥ भूतलेतादृशोच्चारंप्रकुर्वन्तिचमानवाः ॥ उभयोर्लोकयोर्विप्रएकभावःप्रदृश्यते ॥ १३ ॥ जरारोगभयंनास्तिमृत्युहीनानराबभुः ॥ दानभोगप्रभावश्चअधिकोदृश्यतेभुवि ॥ १४ ॥ पुत्राणांतुसुखंपुण्यमधिकंपौत्रजंनराः ॥ प्रभुञ्जन्तिसुखेनापिमानवाभुविसत्तम ॥ १५ ॥ विष्णोःप्रसाददानेनउपदेशेनतस्यच ॥ सर्वव्याधिविनिर्मुक्तामानवावैष्णवाःसदा ॥ १६ ॥ स्वर्गलोकप्रभावोहिकृतोराज्ञामहीतले ॥ पञ्चविंशप्रमाणेनवर्षाणिनृपसत्तम ॥ १७ ॥ वेदविज्ञानराःसर्वेज्ञानध्यानपरायणाः ॥ यज्ञदानपराःसर्वेदयाभावाश्चमानवाः॥१८॥ उपकाररताःपुण्याधन्यास्तेकीर्तिभाजनाः ॥ सर्वेधर्मपराविप्रविष्णुध्यानपरायणाः ॥ १९ ॥ राज्ञातेनोपदिष्टास्तेसञ्जातावैष्णवाभुवि ॥ श्रूयतांनृपशार्दूलचरित्रंतस्यभूपतेः ॥ २० ॥ सर्वधर्मपरोनित्यंविष्णुभक्तश्चनाहुषिः ॥ अब्दानांतत्रलक्षंहितस्याप्येवंगतंभुवि ॥ २१ ॥ नूतनोदृश्यतेकायःपञ्चविंशाब्दिकोयथा ॥ पञ्चविंशाब्दिकोभातिरूपेणवयसातदा ॥ २२ ॥ प्रबलःप्रौढिसम्पन्नःप्रसादात्तस्यचक्रिणः ॥ मानुषाभुवमास्थाययमंनैवप्रयान्तिते ॥ २३ ॥ रागद्वेषविनिर्मुक्ताःक्लेशपाशविवर्जिताः ॥ सुखिनोदानपुण्यैश्चसर्वधर्मपरायणाः ॥ २४ ॥विस्तारंतेजनाःसर्वेसन्तत्यापिगतानृप ॥ यथादूर्वावटाश्चैवविस्तारंयान्तिभूतले ॥ २५ ॥ तथातेमानवाःसर्वेपुत्रपौत्रैःप्रविस्तृताः ॥ मृत्युदोषविहीनास्तेचिरंजीवन्तिवैजनाः ॥२६॥ स्थिरकायाश्चसुखिनोजरारोगविवर्जिताः ॥ पञ्चविंशाब्दिकाःसर्वेनरादृश्यन्तिभूतले ॥ २७ ॥ सत्याचारपराःसर्वेविष्णुध्यानपरायणाः ॥ एवंसर्वेचमर्त्यास्तेप्रसादात्तस्यचक्रिणः ॥ २८ ॥ सञ्जातामानवाःसर्वेदानभोगपरायणाः ॥ मृतोनश्रूयतेलोकेमर्त्यःकोऽपिनरोत्तम ॥ २९ ॥ शोकंनैवप्रपश्यन्तिदोषंनैवप्रयान्तिते ॥ यद्रूपंस्वर्गलोकस्यतद्रूपंभूतलस्यच ॥ ३० ॥ सञ्जातंमानवश्रेष्ठप्रसादात्तस्यचक्रिणः ॥ विप्रध्यायमदूतास्तेविष्णुदूतैश्च

१ 'प्रणमन्ति हरिं नार्यः' इ० पा० । २ 'स्वर्गलोकतिरस्कारः कृतो राज्ञा महीतले' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ताडिताः ॥ ३१ ॥ रुदमानागताःसर्वेधर्मराजंपरस्परम् ॥ तत्सर्वंकथितंदूतैश्चष्टितंभूपतेस्तुतैः ॥ ३२ ॥ अमृत्युभूतलंजातंदानभोगेनभास्करे ॥ नहु
षस्यात्मजेनापिकृतंदेवययातिना ॥३३॥ विष्णुभक्तेनपुण्येनस्वर्गरूपंप्रदर्शितम् ॥ एवमाकर्णितंसर्वंधर्मराजेनवैतदा ॥ ३४ ॥ धर्मराजस्तदातत्रदूते
भ्यःश्रुतविस्तरः ॥ चिन्तयामाससर्वार्थंश्रुत्वैवंनृपचेष्टितम् ॥ ३५ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेमातापितृतीर्थवर्णनेययातिचरित्रेपञ्च
सप्ततितमोऽध्यायः ॥ ७५ ॥ सुकर्मोवाच ॥ सौरिर्दूतैस्तथासर्वैःसहस्वगजगामसः ॥ द्रष्टुंतत्रसहस्राक्षंदेववृन्दैःसमावृतम् ॥ १ ॥ धर्मराजंसमायान्तं
ददर्शसुरराट्तदा ॥ समुत्थायत्वरायुक्तोदत्त्वाचार्घमनुत्तमम् ॥२॥ पप्रच्छागमनंतस्यकथयस्वममाग्रतः ॥ समाकर्ण्यमहद्वाक्यंदेवराजस्यभाषितम्
॥ ३ ॥ धर्मराजोऽब्रवीत्सर्वंययातेश्चरितंमहत ॥ श्रयतांदेवदेवेशयस्मादागमनंमम ॥ ४ ॥ कथयाम्यहमत्रापियेनाहमागतस्तव ॥ नहुषस्यात्मजेना
पिवैष्णवेनमहात्मना ॥ ५ ॥ वैष्णवाश्चकृतामर्त्यायेवसन्तिमहीतले ॥ वैकुण्ठस्यसमंरूपंमर्त्यलोकस्यवैकृतम् ॥ ६ ॥ अमरामानवाजाताजरारोग
विवर्जिताः ॥ पापमेवनकुर्वन्तिअसत्यंनवदन्तिते ॥ ७ ॥ कामक्रोधविहीनास्तेलोभमोहविवर्जिताः ॥ दानशीलामहात्मानःसर्वेधर्मपरायणाः ॥८॥
सर्वधर्मैःसमर्चन्तिनारायणमनायमम्॥तेनवैष्णवधर्मेणमानवाजगतीतले ॥९॥ निरामयावीतशोकाःसर्वेचस्थिरयौवनाः॥दूर्वावटायथादेवविस्तारंया
न्तिभूतले॥१०॥तथातेविस्तरंप्राप्ताःपुत्रपौत्रैःप्रपौत्रकैः॥तेषांपुत्रैःप्रपौत्रैश्चवंशाद्वंशान्तरंगताः॥११॥एवंहिवैष्णवःसर्वोजरामृत्युविवर्जितः॥मर्त्यलोकः
कृतस्तेननहुषस्यात्मजेनवै ॥१२॥ पदभ्रष्टोऽस्मिसञ्जातोव्यापारेणविवर्जितः ॥ एतत्सर्वंसमाख्यातंममकर्मविनाशनम् ॥१३॥एवंज्ञात्वासहस्राक्षलो
कस्यास्यहितंकुरु ॥ एतत्तेसर्वमाख्यातंयथापृष्टोऽस्मिवैत्वया ॥१४॥ एतस्मात्कारणादिन्द्रआगतस्तवसन्निधौ॥१५॥इन्द्रउवाच॥पूर्वमेवमयादूतआ
गमायमहात्मनः॥प्रेषितोधर्मराजेन्द्रदूतेनास्यापिभाषितम् ॥१६॥ नाहंस्वर्गसुखस्यार्थीनागमिष्येदिवंपुनः॥स्वर्गरूपंकरिष्यामिसर्वंतद्भूमिमण्डलम्
॥१७॥इत्याचचक्षेभूपालःप्रजापाल्यंकरोतिसः ॥ तस्यधर्मप्रभावेनभीतस्तिष्ठामिसर्वदा॥ १८ ॥ धर्मउवाच॥येनकेनाप्युपायेनतमानयसुभूपतिम् ॥
देवराजमहाभागयदीच्छसिममप्रियम् ॥ १९ ॥ इत्याकर्ण्यवचस्तस्यधर्मस्यापिसुराधिपः ॥ चिन्तयामासमेधावीसर्वंतत्त्वेनभूपते ॥ २० ॥ कामदेवं
समाहूयगन्धर्वांश्चपुरन्दरः ॥ मकरन्दंरतिंदेवआनिनायमहामनाः ॥ २१ ॥ तथाकुरुतवैयूयंयथाऽऽगच्छतिभूपतिः ॥ यूयंगच्छन्तुभूलोकंमयादिष्टा
नसंशयः ॥ २२ ॥ कामउवाच ॥ युवयोस्तुप्रियंपुण्यंकरिष्यामिनसंशयः ॥ राजानंपश्यमांचैवस्थितंचैवसमायुधि ॥ २३ ॥ एवमुक्त्वागताः

१ 'पिप्पल' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वेयत्रराजासनाहुषिः ॥ नटरूपेणतेसर्वेकामाद्याःकर्मणाद्विज ॥ २४ ॥ आशीर्भिरभिनन्द्यैवतेचऊचुःसुनाटकम् ॥ तेषांतद्वचनंश्रुत्वाययातिःपृथिवीपतिः ॥२५॥ सभांचकारमेधावीदेवरूपांसुपण्डितैः ॥ समायातःस्वयंभूपोज्ञानविज्ञानकोविदः ॥ २६ ॥ तेषांतुनाटकंराजापश्यमानःसनाहुषिः ॥ चरितंवामनस्यापिउत्पत्तिंविप्ररूपिणः ॥ २७ ॥ रूपेणाप्रतिमालोकेसुस्वरंगीतमुत्तमम् ॥ गायमानाजराराजन्नार्यारूपेणवैतदा ॥ २८ ॥ तस्यागीतविलासेनहास्येनललितेनच ॥ मधुरालापतस्तस्यकन्दर्पस्यचमायया ॥ २९ ॥ मोहितस्तेनभावेनदिव्येनचरितेनच ॥ बलेश्चैवयथारूपंविन्ध्यावल्यायथापुरा ॥ ३० ॥ वामनस्ययथारूपंचक्रेमारोऽथतादृशम् ॥ सूत्रधारःस्वयंकामोवसन्तःपारिपार्श्वकः ॥ ३१ ॥ नटीवेषधराजातासारतिर्हृष्टवल्लभा ॥ नेपथ्यान्तश्चरीराजन्सातस्मिन्नृत्यकर्मणि ॥ ३२ ॥ मकरन्दोमहाप्राज्ञःक्षोभयामासभूपतिम् ॥ ३३ ॥ यथायथापश्यतिनृत्यमुत्तमंगीतंसमाकर्णतिसक्षितीशः ॥ तथातथामोहितवान्सभूपतिंनटीप्रणीतेनमहानुभावः ॥ ३४ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेमातापितृतीर्थेययातिचरितेषट्सप्ततितमोऽध्यायः ॥७६ ॥ सुकर्मोवाच ॥ कामस्यगीतलास्येनहास्येनललितेनच ॥ मोहितोराजराजेन्द्रोनटं[1]रूपेणपिप्पल ॥ १ ॥ कृत्वामूत्रंपुरीषंचसराजानहुषात्मजः ॥ अकृत्वापादयोःशौचमासनेऽपविष्टवान् ॥ २ ॥ तदन्तरंतुसम्प्राप्यसञ्चारजरानृपम् ॥ कामेनापिनृपश्रेष्ठइन्द्रकार्यंकृतंहितम् ॥ ३ ॥ निवृत्तेनाटकेतस्मिन्गतेषुतेषुभूपतिः ॥ जराभिभूतोधर्मात्माकामसंसक्तमानसः ॥ ४ ॥ मोहितःकाममोहेनविह्वलोविकलेन्द्रियः ॥ अतीवमुग्धोधर्मात्माविषयैश्चापवाहितः ॥ ५ ॥ एकदातुगतोराजामृगयाव्यसनातुरः ॥ वनेचक्रीडतेसोऽपिमोहरागवशंगतः ॥ ६ ॥ सरसंक्रीडमानस्यनृपतेश्चमहात्मनः ॥ मृगश्चैकःसमायातश्चतुःशृङ्गोह्यनौपमः ॥ ७ ॥ सर्वाङ्गसुन्दरोराजन्हेमरूपतनूरुहः ॥ [2]रत्नज्योतिःसुचित्राङ्गोदर्शनीयोमनोहरः ॥ ८ ॥ अभ्यधावत्सवेगेनबाणपाणिर्धनुर्द्धरः ॥ इत्यमन्यतमेधावीकोऽपिदैत्यःसमागतः ॥ ९ ॥ मृगेणचसतेनापिदूरमाकर्षितोनृपः ॥ गतःसरथवेगेनश्रमेणपरिखेदितः ॥ १० ॥ वीक्षमाणस्यतस्यापिमृगश्चान्तरधीयत ॥ सपश्यतिवनंतत्रनन्दनोपममद्भुतम् ॥ ११ ॥ चारुवृक्षसमाकीर्णंभूतं[3]पञ्चकशोभितम् ॥ गुरुभिश्चन्दनैःपुण्यैःकदलीखण्डमण्डितैः ॥१२॥ बकुलाशोकपुन्नागैर्नालिकेरैश्चतिन्दुकैः ॥ पूगीफलैश्चखर्जूरैःकुमुदैःसप्तपर्णकैः ॥ १३ ॥ पुष्पितैःकर्णिकारैश्चनानावृक्षैःसदाफलैः ॥ पुष्पितामोदसंयुक्तैःकेतकैःपाटलैस्ततः ॥ १४ ॥ वीक्षमाणोमहाराजोददर्शसरउत्तमम् ॥ पुण्योदकेनसम्पूर्णंविस्तीर्णंपञ्चयोजनम् ॥ १५ ॥ हंसकारण्डवाकीर्णंजलपक्षिविनादितम् ॥ कमलैश्चापिमुदितंश्वेतोत्पलविराजितम् ॥१६॥

१ 'रसरूपो बभूव ह' इ० पा० । २ 'रत्नमौलिः' इ० पा० । ३ 'सेव्यमानं मरुद्गणैः' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रक्तोत्पलैःशोभमानंहाटकोत्पलमण्डितम् ॥ नीलोत्पलैःप्रकाशितंकह्लारैरतिशोभितम् ॥ १७ ॥ मत्तैर्मधुकरैश्चापिसर्वत्रपरिनादितम् ॥ एवंसर्वगुणोपेतंददर्शसरउत्तमम् ॥ १८ ॥ पञ्चयोजनविस्तीर्णंदशयोजनदीर्घकम् ॥ तडागंसर्वतोभद्रंदिव्यभावैरलङ्कृतम् ॥ १९ ॥ रथवेगेनसंखिन्नःकिंचिच्छ्रमनिपीडितः ॥ निषसादतटेतस्यचूतच्छायांसुशीतलाम् ॥ २० ॥ स्नात्वापीत्वाजलंशीतंपद्मसौगन्ध्यवासितम् ॥ सर्वश्रमोपशमनममृतोपममेवतत् ॥ २१ ॥ वृक्षच्छायेततस्तस्मिन्नुपविष्टेनभूभृता ॥ गीतध्वनिःसमाकर्णिगीयमानोयथातथा ॥ २२ ॥ यथास्त्रीगायतेदिव्यातथायंश्रूयतेध्वनिः ॥ गीतमियोमहाराजएवंचिन्तांपरांगतः ॥ २३ ॥ चिन्ताकुलस्तुधर्मात्मायावच्चिन्तयतेक्षणम् ॥ तावन्नारीवराकाचित्पीनश्रोणीपयोधरा ॥ २४ ॥ नृपतेःपश्यतस्तस्यवनेतस्मिन्समागता ॥ सर्वाभरणशोभाङ्गीशीललक्षणसम्पदा ॥ २५॥ तस्मिन्वनेसमायातानृपतेःपुरतःस्थिता ॥ तामुवाचमहाराजःकाहिकस्यभविष्यसि ॥ २६ ॥ किमर्थंहिसमायातातन्मेत्वंकारणंवद ॥ पृष्टासतीतदातेननकिंचिदपिपिप्पल ॥ २७ ॥शुभाशुभंचभूपालंप्रत्यवोचद्वरानना ॥ प्रहस्यैवगताशीघ्रंवीणादण्डकराऽबला ॥ २८ ॥ विस्मयेनापिराजेन्द्रोमहताव्यापितस्तदा ॥ मयासम्भाषिताचेयंमांनब्रूतेस्मसोत्तरम् ॥२९॥ पुनश्चिन्तांसमापेदेययातिःपृथिवीपतिः॥योवैमृगोमयादृष्टश्चतुःशृङ्गःसुवर्णकः ॥ ३० ॥ तस्मान्नारीसमुद्भूतातत्सत्यंप्रतिभातिमे ॥ मायारूपमिदंसत्यंदानवानांभविष्यति ॥३१॥चिन्तयित्वाक्षणंराजाययातिर्नहुषात्मजः ॥यावच्चिन्तयतेराजातावन्नारीमहावने॥ ३२॥अन्तर्धानंगताविप्रप्रहस्यनृपनन्दनम्॥एतस्मिन्नन्तरेगीतंसुस्वरंपुनरेवतत् ॥३३॥ शुश्रुवेपरमंदिव्यंमूर्छनातानसंयुतम् ॥ जगामसत्वरंराजायत्रगीतध्वनिर्महान् ॥ ३४ ॥ जलान्तेपुष्करंचैवसहस्रदलमुत्तमम् ॥ तस्योपरिवरानारीशीलरूपगुणान्विता ॥ ३५ ॥ दिव्यलक्षणसम्पन्नादिव्याभरणभूषिता ॥ दिव्यैर्भावैःप्रभात्येकावीणादण्डकराविला ॥ ३६ ॥ गायन्तीसुस्वरंगीतंतालमानलयान्वितम् ॥ तेनगीतप्रभावेनमोहयन्तीचराचरान् ॥ ३७ ॥ देवान्मुनिगणान्सर्वान्दैत्यान्गन्धर्वकिन्नरान् ॥ तांदृष्ट्वासविशालाक्षींरूपतेजोपशालिनीम् ॥ ३८ ॥संसारेनास्तिचैवान्यानारीदृशीचराचरे ॥ पुरानटोजरायुक्तोनृपतेःकायमेवहि ॥३९॥ सञ्चारितोमहाकामस्तदासौप्रकटोऽभवत् ॥ घृतंस्पृष्ट्वायथावह्नीरश्मिवान्सम्प्रजायते ॥ ४० ॥ तांचदृष्ट्वातथाकामस्तत्कायात्प्रकटोऽभवत् ॥ मन्मथाविष्टचित्तोऽसौतांदृष्ट्वाचारुलोचनाम् ॥ ४१ ॥ ईदृग्रूपानदृष्टामेयुवतीविश्वमोहिनी ॥ चिन्तयित्वाक्षणंराजाकामसंसक्तमानसः ॥ ४२ ॥ तस्याःसविरहेणापिलुब्धोऽभून्नृपतिस्तदा ॥ कामाग्निनादह्यमानःकामज्वरेणपीडितः ॥ ४३ ॥ कथंस्यान्ममचैवेयंकथंभावोभविष्यति ॥ यदामां

१ 'जलान्ते पुष्कले चैव महत्सदनमुत्तमम्' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गूहतेबालापद्मास्यापद्मलोचना ॥ ४४ ॥ यदीयंप्राप्यतेतर्हिसफलंजीवितंभवेत् ॥ एवंविचिन्त्यधर्मात्माययातिःपृथिवीपतिः ॥ ४५ ॥ तामुवाच
वरारोहांकात्वंकस्यापिवाशुभे ॥ पूर्वंदृष्टातुयानारीसादृष्टापुनरेवच ॥ ४६ ॥ तांपप्रच्छसधर्मात्माकाचेयंतवपार्श्वगा ॥ सर्वंकथयकल्याणिअहंहि
नहुषात्मजः ॥४७ ॥ सोमवंशप्रसूतोऽहंसप्तद्वीपाधिपःशुभे ॥ ययातिर्नाममेदेविख्यातोऽहंभुवनत्रये ॥४८॥ तवसङ्गमनेचेतोभावमेवंप्रवाञ्छते ॥ दे
हिमेसङ्गमंभद्रेकुरुसुप्रियमेवहि ॥ ४९ ॥ यंयंहिवाञ्छसेभद्रेतद्ददामिनसंशयः ॥ दुर्जयेनापिकामेनहतोऽहंवरवर्णिनि ॥ ५० ॥ तस्मात्राहिसुदीनंमां
प्रपन्नंशरणंतव ॥ राज्यंचसकलामुर्वींशरीरमपिचात्मनः ॥ ५१ ॥ सङ्गमेतवदास्यामित्रैलोक्यमिदमेवते ॥ तस्यराज्ञोवचःश्रुत्वासास्त्रीपद्मनिभान
ना ॥५२॥ विशालांस्वसखींप्राहब्रूहिराजानमागतम् ॥ नामचोत्पत्तिस्थानंचपितरंमातरंशुभे ॥५३॥ ममापिभावमेकाग्रमस्याग्रेचनिवेदय ॥तस्या
श्ववाञ्छितंज्ञात्वाविशालाभूपतिंतदा ॥५४॥ उवाचमधुरालापैःश्रूयतांनृपनन्दन ॥५५ ॥विशालोवाच ॥ कामएषपुरादग्धोदेवदेवेनशम्भुना ॥ रु
रोदसारतिर्दुःखाद्भर्त्राहीनाऽपिसुस्वरम् ॥ ५६ ॥ अस्मिन्सरसिराजेन्द्रसारतिर्न्यवसत्तदा ॥ तस्यप्रलापमेवंसासुस्वरंकरुणान्वितम् ॥ ५७ ॥ स
माकर्ण्यततोदेवाःकृपयापरयान्विताः ॥सञ्जाताराजराजेन्द्रशङ्करंवाक्यमब्रुवन्॥ ५८॥जीवयस्वमहादेवपुनरेवमनोभवम् ॥ वराकीयंमहाभागभर्तृही
नाहिकीदृशी ॥५९ ॥ कामेनापिसमायुक्तामस्मत्स्नेहात्कुरुष्वहि ॥ तच्छ्रुत्वाचवचःप्राहजीवयामिमनोभवम् ॥ ६०॥ कायेनापिविहीनोऽयंपञ्चबा
णोमनोभवः ॥ भविष्यतिनसन्देहोमाधवस्यसखापुनः ॥ ६१ ॥ दिव्येनापिशरीरेणवर्तयिष्यतिनान्यथा ॥ महादेवप्रसादाच्चमीनकेतुःसजीवितः
॥ ६२ ॥ आशीर्भिरभिनन्द्यैवंदेव्याःकामंनरोत्तम ॥ गच्छकामप्रवर्तस्वप्रिययासहनित्यशः ॥ ६३ ॥ एवमाहमहातेजाःस्थितिसंहारकः ॥ पुनः
कामःसरःप्राप्तोयत्रास्तेदुःखितारतिः ॥ ६४ ॥ इदंकामसरोराजन्रतिरत्रसुसंस्थिता ॥ दग्धेसतिमहाभागेमन्मथेदुःखधर्षिता ॥ ६५ ॥ रत्याःको
पात्समुत्पन्नःपावकोदारुणाकृतिः ॥ अतीवदग्धातेनापिसारतिर्मोहमूर्छिता ॥ ६६ ॥ अश्रुपातंमुमोचाथभर्तृहीनानरोत्तम ॥ नेत्राभ्यांहिजलेतस्याः
पतिताअश्रुबिन्दवः ॥ ६७ ॥ तेभ्योजातोमहाशोकःसर्वसौख्यप्रणाशकः ॥ जरापश्चात्समुपन्नाअश्रुभ्योनृपसत्तम ॥ ६८ ॥ वियोगोनामदुर्मे
धास्तेभ्योजज्ञेप्रणाशकः ॥ दुःखसन्तापकौचोभौजज्ञातेदारुणौतदा ॥ ६९ ॥ मूर्छानामततोजज्ञेदारुणासुखनाशिनी ॥ शोकाज्जज्ञेमहाराजकामज्व
रोऽथविभ्रमः ॥ ७० ॥ प्रलापोविह्वलश्चैवउन्मादोमृत्युरेवच ॥ तस्याश्चअश्रुबिन्दुभ्योजज्ञिरेविश्वनाशकाः ॥ ७१ ॥ रत्याःपार्श्वेसमुत्पन्नाःसर्वेता
पाङ्गधारिणः ॥ मूर्तिमन्तोमहाराजसद्भावगुणसंयुताः ॥ ७२ ॥ कामएषसमायातःकेनाप्युक्तंतदानृप ॥ महानन्देनसंयुक्ताद्दृष्ट्वाकामंसमागत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म् ॥७३॥ नेत्राभ्यामश्रुपूर्णाभ्यांपतिताअश्रुबिन्दवः ॥ अप्सुमध्येमहाराजचापल्याज्जज्ञिरेप्रजाः ॥ ७४ ॥ प्रीतिर्नामतदाजज्ञेख्यातिर्ल्लज्ञानरोत्तम ॥
तेभ्योजज्ञेमहानन्दःशान्तिश्चान्यानपोत्तम ॥ ७५ ॥ जज्ञातेद्वेशुभेकन्येसुखसम्भोगदायिके ॥ लीलाक्रीडामनोभावसंयोगस्तुमहान्नृप ॥ ७६ ॥
रत्यास्तुवामनेत्राद्वैआनन्दादश्रुबिन्दवः॥जलान्तेपतिताराजंस्तस्माज्जज्ञेसुपङ्कजम् ॥७७॥ तस्मात्सुपङ्कजाज्जाताइयंनारीवरानना ॥ अश्रुबिन्दुमती
नामरतिपुत्रीनरोत्तम ॥ ७८ ॥ तस्याः[1]प्रीत्यासुखंकृत्वानित्यंवर्त्तेसमीपगा ॥ सखीभावस्वभावेनसंहृष्टासर्वदाशुभा ॥७९॥ विशालानाममेख्यातंवरु
णस्यसुतानृप ॥ अस्याश्चान्तेप्रवर्तामिस्नेहात्स्निग्धास्मिसर्वदा ॥ ८० ॥ एतत्तेसर्वमाख्यातमस्याश्चात्मनएवते ॥ तपश्चचारराजेन्द्रपतिकामावरान
ना ॥ ८१ ॥ राजोवाच ॥ सर्वमेवत्वयाऽऽख्यातंमयाज्ञातंशुभेशृणु ॥ मामेवंहिभजत्वेषारतिपुत्रीवरानना ॥ ८२ ॥ यमेषावाञ्छतेबालातत्सर्वंतुददा
म्यहम् ॥ तथाकुरुष्वकल्याणियथामेवश्यतांव्रजेत् ॥ ८३ ॥ विशालोवाच ॥ अस्याव्रतंप्रवक्ष्यामितदाकर्णयभूपते ॥ पुरुषंयौवनोपेतंसर्वज्ञंवीरलक्ष
णम् ८४ ॥ देवराजसमंराजन्धर्माचारसमन्वितम् ॥ तेजस्विनंमहाप्राज्ञंदातारंयज्विनांवरम् ॥८५॥ गुणानां[2]धर्मभावस्यज्ञातारंपुण्यभाजनम् ॥ लोक
इन्द्रसमंराजन्सुयज्ञैर्धर्मतत्परम् ॥ ८६ ॥ सर्वैश्वर्यसमोपेतंनारायणमिवापरम् ॥ देवानांसुप्रियंनित्यंब्राह्मणानामतिप्रियम् ॥ ८७ ॥ ब्रह्मण्यंवेदतत्त्वज्ञं
त्रैलोक्येख्यातविक्रमम् ॥ एवंगुणैःसमुपेतंत्रैलोक्येनप्रपूजितम् ॥ ८८ ॥ सुमतिंसुप्रियंकान्तंमनसावरमीप्सति ॥ ८९ ॥ ययातिरुवाच ॥
एवंगुणैःसमुपेतंविद्धिमामिहचागतम् ॥ अस्यानुरूपोभर्त्ताहंसृष्टोधात्रानसंशयः ॥ ९० ॥ विशालोवाच ॥ भवन्तंपुण्यसंवृद्धंजानेराजञ्जग
त्रये ॥ पूर्वोक्तायेगुणाःसर्वेमयोक्ताःसन्तितेत्वयि ॥ ९१ ॥ एकेनापिचदोषेणत्वामेषाहिनमन्यते ॥ एषमेसंशयोजातोभवान्विष्णु
मयोनप ॥ ९२ ॥ ययातिरुवाच ॥ समाचक्ष्वमहादोषंयमेषानानुमन्यते ॥ तत्त्वेनचारुसर्वाङ्गीप्रसादसुमुखीभव ॥ ९३ ॥ विशालो
वाच ॥ आत्मदोषंनजानासिकस्मात्त्वंजगतीपते ॥ जरयाव्याप्तकायस्त्वमनेनेयंनमन्यते ॥ ९४ ॥ एवंश्रुत्वामहद्वाक्यमप्रियंजगतीपतिः ॥
दुःखेनमहताविष्टस्तामुवाचपुनर्नृपः ॥ ९५ ॥ जरादोषोनमेभद्रेसंसर्गात्कस्यचित्कदा ॥ समुद्भूतंममाङ्गेवैतंनजानेजरागमम् ॥ ९६ ॥ यंयं
हिवाञ्छतेचैषात्रैलोक्येदुर्लभंशुभे ॥ तमस्यैदातुकामोऽहंव्रियतांवरउत्तमः ॥ ९७ ॥ विशालोवाच ॥ जराहीनोयदास्यास्त्वंतदातेसुप्रियाभवे
त् ॥ एतद्धिनिश्चितंराजन्सत्यंसत्यंवदाम्यहम् ॥ ९८ ॥ श्रुतिरेवंवदेद्राजन्पुत्रेभ्रातरिभृत्यके ॥ जरासङ्क्रम्यतेयस्यतस्याङ्गेपरिसञ्चरेत् ॥ ९९ ॥ ता

१ 'अस्याः प्रीत्या सुखसौहार्दादहं वर्ते हि सर्वदा' इ० पा०। २ 'सर्वभावस्य' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रुण्यंतस्यवैगृह्यतस्मैदत्त्वाजरांपुनः ॥ उभयोःप्रीतिसंवादःसुरुच्याजायतेशुभः ॥ १०० ॥ यथात्मदानपुण्यस्यकृपयायोददातिच ॥ फलंराज
न्दितत्तस्यजायतेनात्रसंशयः ॥ १ ॥ दुःखेनोपार्जितंपुण्यमन्यस्मैहिप्रदीयते ॥ सुपुण्यंतद्भवेत्तस्यपुण्यस्यफलमश्नुते ॥ २ ॥ पुत्राय
दीयतांराजंस्तस्मात्तारुण्यमेवच ॥ प्रगृह्यैवसमागच्छसुन्दरत्वेनभूपते ॥ ३ ॥ यदात्वमिच्छसेभोक्तुंतदात्वंकुरुभूपते ॥ एवमाभाष्यसाभूपंविशाला
विररामह ॥ ४ ॥ सुकर्मोवाच ॥ एवमाकर्ण्यराजेन्द्रोविशालामवदत्तदा ॥ ५ ॥ राजोवाच ॥ एवमस्तुमहाभागेकरिष्येवचनंतव ॥ कामासक्तःस
मूढस्तुययातिःपृथिवीपतिः ॥ ६ ॥ गृहंगत्वासमाहूयसुतान्वाक्यमुवाचह ॥ तुरुंपूरुंकुरुंराजायदुंचपितृवत्सलम् ॥ ७ ॥ कुरुध्वंपुत्रकाःसौख्यंयूयं
हिममशासनात् ॥ ८ ॥ पुत्राऊचुः ॥ पितृवाक्यंप्रकर्तव्यंपुत्रैश्चापिशुभाशुभम् ॥ उच्यतांतातत्तच्छीघ्रंकृतंविद्धिनसंशयः ॥ ९ ॥ एवमाकर्ण्यतद्वा
क्यंपुत्राणांपृथिवीपतिः॥आचचक्षेपुनस्तेषुहर्षेणाकुलमानसः ॥११०॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेमातापितृतीर्थवर्णनेययातिचरित्रेसप्त
सप्ततितमोऽध्यायः॥ ७७ ॥ ययातिरुवाच ॥ एकेनगृह्यतांपुत्राजरामेदुःखदायिनी॥धीरेणभवतांमध्येतारुण्यंममदीयताम् ॥१॥स्वकीयंहिमहाभागाः
स्वरूपमिदमुत्तमम् ॥ सन्तप्तंमानसंमेऽद्यस्त्रियांसक्तंसुचञ्चलम् ॥२ ॥ भाजनस्थायथापश्चआवर्त्तयतिपावकः ॥तथामेमानसंपुत्राःकामानलसुचालित
म् ॥ ३ ॥ एकोगृह्णातुमेपुत्राजरांदुःखप्रदायिनीम् ॥ स्वकंददातुतारुण्यंयथाकामंचराम्यहम् ॥ ४॥ योमेजरापसरणंकरिष्यतिसुतोत्तमः ॥ सचमेभो
क्ष्यतेराज्यंधनुर्वंशंधरिष्यति ॥ ५ ॥ तस्यसौख्यंसुसम्पत्तिर्धनंधान्यंभविष्यति ॥ विपुलासन्ततिस्तस्ययशःकीर्तिर्भविष्यति ॥६॥पुत्राऊचुः॥भवा
न्धर्मपरोराजन्प्रजाःसत्येनपालकः ॥ कस्मात्तेहीदृशोभावोजातःप्रकृतिचापलः॥७॥ राजोवाच ॥ आगतानर्तकाःपूर्वंपुरंमेहिप्रनर्तकाः॥तेभ्योमेकाम
संमोहेजातोमोहश्चईदृशः ॥८ ॥ जरयाव्यापितःकायोमन्मथाविष्टमानसः ॥ सम्बभूवसुतश्रेष्ठाःकामेनचसमाकुलः ॥९॥ काचिद्दृष्टामयानारीदिव्यरू
पावरानना ॥ मयासम्भापितापुत्राःकिंचिन्नोवाचमांसती॥१०॥ विशालानामतस्याश्चसखीचारुविचक्षणा ॥ सामामाहशुभंवाक्यंममसौख्यप्रदायक
म् ॥ ११ ॥ जराहीनोयदास्यास्त्वंतदातेसुप्रियाभवेत् ॥ एवमङ्गीकृतंवाक्यंतयोक्तंगृहमागतः॥१२॥मयाजरापनोदार्थंतदेवंसमुदाहृतम् ॥ एवंज्ञात्वा
प्रकर्तव्यंमत्सुखंहिसुपुत्रकाः ॥ १३॥ तुरुरुवाच ॥ शरीरंप्राप्यतेपुत्रैःपितुर्मातुःप्रसादतः ॥धर्मश्चक्रियतेराजञ्छरीरेणविपश्चिता ॥ १४ ॥ पित्रोःशुश्रू
षणंकार्यंपुत्रैश्चापिविशेषतः ॥ नचयौवनदानस्यकालोऽयंमेनराधिप॥ १५॥प्रथमेवयसिभोक्तव्यंविषयंमानवैर्नृप॥इदानींतन्नकालोऽयंवर्ततेतवसाम्प्र
तम् ॥ १६ ॥ जरांतातप्रदत्त्वावैपुत्रेतातमहद्व्रताम् ॥ पश्चात्सुखंप्रभोक्तव्यंनतुस्यात्तवजीवितम् ॥ १७॥ तस्माद्वाक्यंमहाराजकरिष्येनैवतेपुनः॥एवमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भापतनृपंतुरुर्ज्येष्ठसुतस्तदा ॥ १८ ॥ तुरोर्वाक्यंतुतच्छ्रुत्वाक्रुद्धोराजाबभूवसः ॥ तुरुंशशापधर्मात्माक्रोधेनारुणलोचः ॥ १९ ॥ अपध्वस्तस्त्वया
ऽऽदेशोममायंपापचेतन ॥ तस्मात्पापीभवस्वत्वंसर्वधर्मबहिष्कृतः ॥२०॥ शिखयात्वंविहीनश्चवेदशास्त्रविवर्जितः ॥ सर्वाचारविहीनस्त्वंभविष्यसि
नसंशयः ॥ २१ ॥ ब्रह्मघ्नस्त्वंदेवदुष्टःसुरापःसत्यवर्जितः ॥ चण्डकर्मप्रकर्तात्वंभविष्यसिनराधमः ॥ २२ ॥ सुरालीनःक्षुधीपापीगोघ्नश्चत्वंभविष्य
सि ॥ दुश्चर्मामुक्तकच्छश्चब्रह्मद्वेष्टानिराकृतिः ॥ २३ ॥ परदाराभिगामीत्वंमहाचण्डःप्रलम्पटः ॥ सर्वभक्षश्चदुर्मेधाःसदात्वंचभविष्यसि ॥२४॥ स
गोत्रांरमसेनारींसर्वधर्मप्रणाशकः ॥ पुण्यज्ञानविहीनात्माकुष्ठवांश्चभविष्यसि ॥ २५ ॥ तवपुत्राश्चपौत्राश्चभविष्यन्तिनसंशयः ॥ ईदृशाःसर्वपुण्यघ्ना
म्लेच्छाःसुकलुषीकृताः[1] ॥२६॥ एवंतुरुंसुशप्त्वैवयदुंपुत्रमथाब्रवीत् ॥ जरांवैधारयस्वेहभुङ्क्ष्वराज्यमकण्टकम् ॥२७॥ बद्धाञ्जलिपुटोभूत्वायदूराजा
नमब्रवीत् ॥जराभारंनशक्नोमिवोढुंतातकृपांकुरु ॥ २८ ॥ शीतमध्वाकदन्नंचवयोऽतीताश्चयोषितः ॥ मनसःप्रातिकूल्यंचजरायाःपञ्चहेतवः ॥२९॥
जरादुःखंनशक्नोमिनवेवयसिभूपते ॥ कःसमर्थोहिवैधर्तुंक्षमस्वत्वंममाधुना ॥ ३० ॥ यदुंक्रुद्धोमहाराजःशशापद्विजनन्दन ॥ राज्यार्होनचतेवंशःक
दाचिद्वैभविष्यति ॥ ३१ ॥ बलतेजःक्षमाहीनःक्षात्रधर्मविवर्जितः ॥ भविष्यतिनसन्देहोमच्छासनपराङ्मुखः ॥३२॥ यदुरुवाच॥निर्दोषोऽहंमहारा
जकस्माच्छप्तस्त्वयाधुना ॥ कृपांकुरुष्वदीनस्यप्रसादसुमुखोभव ॥ ३३ ॥ राजोवाच ॥ महादेवःकुलेतेवैस्वांशेनापिहिपुत्रक ॥ करिष्यतिविसृष्टिंच
तदापूतंकुलंतव ॥ ३४ ॥यदुरुवाच ॥ अहंपुत्रोमहाराजनिर्दोषःशापितस्त्वया॥ अनुग्रहोदीयतांमेयदिमेवर्त्ततेदया ॥ ३५ ॥राजोवाच ॥ योभवेज्ज्ये
ष्ठपुत्रस्तुपितुर्दुःखापहारकः ॥ राज्यदायंसभुङ्क्तेचभारवोढाभवेत्सहि ॥ ३६ ॥ त्वयाधर्मंनप्रवृत्तमभाष्योऽसिनसंशयः ॥ भवतानाशिताज्ञामे
महादण्डेनघातिनः ॥ ३७ ॥ तस्मादनुग्रहोनास्तियथेष्टंचतथाकुरु ॥ ३८ ॥ यदुरुवाच ॥ यस्मान्मेनाशितंराज्यंकुलंरूपंत्वयानृप ॥ तस्माद्दु
ष्टोभविष्यामितववंशपतिर्नृप ॥ ३९ ॥ तववंशेभविष्यन्तिनानाभेदास्तुक्षत्रियाः ॥ तेषांग्रामान्सुदेशांश्चस्त्रियोरत्नानियानिवै ॥ ४०॥ भोक्ष्यन्तिचन
सन्देहोअतिचण्डामहाबलाः ॥ ममवंशात्समुत्पन्नास्तुरुष्काम्लेच्छरूपिणः ॥ ४१ ॥ त्वयायेनाशिताःसर्वेशप्ताःशापैःसुदारुणैः ॥ एवंबभा
षेराजानंयदुःक्रुद्धोनृपोत्तम ॥ ४२ ॥ अथक्रुद्धोमहाराजःपुनश्चैवंशशापह ॥ मत्प्रजानाशकाःसर्वेवंशजास्तेशृणुष्वहि ॥ ४३ ॥ यावच्चन्द्रश्चसूर्यश्च
पृथ्वीनक्षत्रतारकाः ॥ तावन्म्लेच्छाःप्रपक्ष्यन्तेकुम्भीपाकेचरौरवे ॥ ४४ ॥ कुरुंदृष्ट्वाततोबालंक्रीडमानंसुलक्षणम् ॥ समाह्वयतितंराजानसु

१ 'मच्छापकलुषीकृताः' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तंनृपनन्दनम् ॥ ४५ ॥ शिशुंज्ञात्वापरित्यक्तःसकुरुस्तेनवैतदा ॥ शर्मिष्ठायाःसुतंपुण्यंतंपूरुंजगदीश्वरः ॥ ४६ ॥ समाहूयबभाषेचजरामेगृह्यतां पुनः ॥ भुङ्क्ष्वराज्यंमयादत्तंसुपुण्यंहतकण्टकम् ॥ ४७ ॥ पूरुरुवाच ॥ राज्यंदेवेनभोक्तव्यंपित्राभुक्तंयथातव ॥ त्वदादेशंकरिष्यामिजरामे दीयतांनृप ॥ ४८ ॥ तारुण्येनममाद्यैवभूत्वासुन्दररूपधृक् ॥ भुङ्क्ष्वभोगान्सुकर्माणिविषयासक्तचेतनः ॥ ४९ ॥ यावदिच्छामहाभाग विहरस्वतयासह ॥ यावज्जीवाम्यहंतातजरांतावद्धराम्यहम् ॥ ५० ॥ एवमुक्तस्तुतेनापिपूरुणाजगतीपतिः ॥ हर्षेणमहताविष्टस्तंपुत्रंप्रत्युवाचसः ॥ ५१ ॥ यस्माद्वत्सममाज्ञावैनहताकृतवानिह ॥ तस्मादहंविधास्यामिबहुसौख्यप्रदायकम् ॥ ५२ ॥ यस्माज्जरागृहीतामेदत्तंतारुण्यकंस्वकम् ॥ तेनराज्यंप्रभुङ्क्ष्वत्वंमयादत्तंमहामते॥५३॥एवमुक्तःसपूरुश्चतेनराज्ञामहीपते॥ तारुण्यंदत्तवानस्मैजग्राहास्माज्जरांनृप॥५४॥ततःकृतेविनिमयेवयसो स्तातपुत्रयोः ॥ तस्माद्वृद्धतरःपूरुःसर्वाङ्गेषुव्यदृश्यत ॥ ५५॥ नूतनत्वंगतोराजायथाषोडशवार्षिकः ॥ रूपेणमहताविष्टोद्वितीयइवमन्मथः ॥ ५६॥ धनूराज्यंचछत्रंचव्यजनंचासनंगजम् ॥ कोशंदेशंबलंसवचामरंस्यन्दनंतथा ॥ ५७ ॥ ददौतस्यमहाराजःपूरोश्चैवमहात्मनः ॥ कामासक्तश्च धर्मात्मातांनारीमनुचिन्तयन् ॥५८॥ तंत्सरःसागरप्रख्यंकामाख्यंनहुषात्मजः ॥ अश्रुबिन्दुमतीयत्रजगामलघुविक्रमः॥५९॥ तांदृष्ट्वातुविशालाक्षीं चारुपीनपयोधराम् ॥ विशालांचमहाराजःकन्दर्पाकृष्टमानसः ॥ ६० ॥ राजोवाच ॥ आगतोऽस्मिमहाभागेविशालेचारुलोचने ॥ जरात्यागः कृतोभद्रेतारुण्येनसमन्वितः ॥ ६१ ॥ युवाभूत्वासमायातोभवत्वेषाममाधुना ॥ यंयंहिवाञ्छतेचैषातंतंदद्मिनसंशयः ॥ ६२ ॥ विशालोवाच ॥ यदाभवान्समायातोजरांदुष्टांविहायच ॥ दोषेणैकेनलिप्तोऽसिभवन्तंनैवमन्यत ॥ ६३ ॥ राजोवाच ॥ ममदोषंवदस्वत्वंयदिजानासिनिश्चि तम् ॥ तंतुदोषंपरित्यक्ष्येगुणरूपंनसंशयः ॥६४॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेमातापितृतीर्थवर्णनेययातिचरितेऽष्टसप्ततितमोऽध्यायः ॥ ७८ ॥ विशालोवाच ॥ शर्मिष्ठायस्यवैभार्यादेवयानीवरानना ॥ सौभाग्यंतत्रवैदृष्टमन्यथानास्तिभूपते ॥ १ ॥ तत्कथंत्वंमहाभागअस्याःकार्ये वशोभवेः॥ सपत्नजेनभावेनभवान्भर्ताप्रतिष्ठितः ॥ २ ॥ ससर्पोऽसिमहाराजभूतलेचन्दनंयथा ॥ सर्पैश्चवेष्टितोराजन्महाचन्दनएवहि ॥ ३ ॥ तथा त्वंवेष्टितःसर्पैःसपत्नीसंज्ञकैर्नृप ॥ वरमग्निप्रवेशश्चशिखाग्रात्पतनंवरम् ॥ ४ ॥ रूपतेजःसमायुक्तंसपत्नीसहितंप्रियम् ॥ नवरंतादृशंकान्तंसपत्नी विषसंयुतम् ॥ ५ ॥ तस्मान्नमन्यतेकान्तंभवन्तंगुणसागरम् ॥ ६ ॥ राजोवाच ॥ देवयान्यानमेकार्यंशर्मिष्ठयावरानने ॥ इत्यर्थंपश्यमेकोशंसत्त्वध

१'स्ववृत्तं नैव सस्मार कामात्मा नहुषात्मजः' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्मसमन्वितम् ॥ ७ ॥ अश्रुबिन्दुमत्युवाच ॥ अहंराज्यस्यभोक्रीचतवकायस्यभूपते ॥ यद्यद्ददाम्यहंभूपतत्तत्कार्यंत्वयाध्रुवम् ॥ ८ ॥ इत्यर्थेममदे
हिस्वंकरंत्वंधर्मवत्सल ॥ बहुधर्मसमोपेतंचारुलक्षणसंयुतम् ॥ ९ ॥ राजोवाच ॥ अन्यभार्यांनविन्दामित्वांविनावरवर्णिनि ॥ राज्यंचसकलामु
र्वीममकायंवरानने ॥ १० ॥ सकोशंभुङ्क्ष्वचार्वङ्गिएषदत्तःकरस्तव ॥ यदेवभाषसेभद्रेतदेवंतुकरोम्यहम् ॥ ११ ॥ अश्रुबिन्दुमत्युवाच ॥ अनेना
पिमहाभागतवभार्याभवाम्यहम् ॥ एवमाकर्ण्यराजेन्द्रोहर्षव्याकुललोचनः ॥ १२ ॥ गान्धर्वेणविवाहेनययातिःपृथिवीपतिः॥ उपयेमेसुतांपुण्यांमन्म
थस्यनरोत्तम ॥ १३ ॥ तयासार्द्धंमहात्मावैरमतेनृपनन्दनः ॥ सागरस्यचतीरेषुवनेषूपवनेषुच ॥ १४ ॥ पर्वतेषुचरम्येषुसरित्सुचतयासह ॥ रमते
राजराजेन्द्रस्तारुण्येनमहीपतिः ॥ १५ ॥ एवंविंशत्सहस्राणिगतानिनिरतस्यच ॥ भूपस्यतस्यराजेन्द्रययातेस्तुमहात्मनः ॥ १६ ॥ विष्णुरुवाच ॥
एवंतयामहाराजोययातिर्मोहितस्तदा॥कन्दर्पस्यप्रपञ्चेनइन्द्रस्यार्थेमहामते ॥१७॥ सुकर्मोवाच ॥ एवंपिप्पलराजासौययातिःपृथिवीपतिः॥तस्यामो
हेनकामेनरतेनललितेनच ॥ १८ ॥ नजानातिदिनंरात्रिंमुग्धःकामस्यकन्यया ॥ एकदामोहितंभूपंययातिंकामनन्दिनी ॥ उवाचप्रणतंनम्रंवशगंचा
रुलोचना ॥ १९ ॥ अश्रुबिन्दुमत्युवाच ॥ सञ्जातंदोहदंकान्ततन्मेकुरुमनोरथम् ॥ अश्वमेधंमखश्रेष्ठंयजस्वपृथिवीपते ॥ २० ॥ राजोवाच ॥
एवमस्तुमहाभागेकरोमितवसुप्रियम् ॥ समाहूयसुतश्रेष्ठंराज्यभोगेविनिःस्पृहम् ॥ २१ ॥ समाहूतःसमायातोभक्त्यानमितकन्धरः ॥ बद्धाञ्जलिपुटो
भूत्वाप्रणाममकरोत्तदा ॥ २२ ॥ तस्याःपादौननामाथभक्त्यानमितकन्धरः ॥ आदेशोदीयतांराजन्येनाहूतःसमागतः ॥ २३ ॥ किंकरोमिमहाभा
गदासस्तेप्रणतोऽस्मिच ॥ २४ ॥ राजोवाच ॥ अश्वमेधस्ययज्ञस्यसम्भारंकुरुपुत्रक ॥ समाहूयद्विजान्पुण्यानृत्विजोभूमिपालकान् ॥ २५ ॥ एवमु
क्तोमहातेजाःपूरुःपरमधार्मिकः ॥ सर्वंचकारसम्पूर्णंयथोक्तंतुमहात्मना ॥ २६ ॥ तयासार्धंसजग्राहसुदीक्षांकामकन्यया ॥ अश्वमेधयज्ञवाटेदत्त्वादा
नान्यनेकधा ॥ २७ ॥ ब्राह्मणेभ्योमहाराजभूरिदानमनन्तकम् ॥ दीनेषुचविशेषेणययातिःपृथिवीपतिः ॥ २८ ॥ यज्ञान्तेचमहाराजस्तामुवाचवरा
ननाम् ॥ अन्यत्तेसुप्रियंबालेकिंकरोमिवदस्वमे ॥ तत्सर्वंदेविकर्तास्मिसाध्यासाध्यंवरानने ॥ २९ ॥ सुकर्मोवाच ॥ इत्युक्तातेनसाराज्ञाभूपालंप्रत्युवा
चह ॥ जातोमेदोहदोराजंस्तत्कुरुष्वममानघ ॥३०॥ इन्द्रलोकंब्रह्मलोकंशिवलोकंतथैवच ॥विष्णुलोकंमहाराजद्रष्टुमिच्छामिसुप्रियम् ॥३१॥ दर्शय
स्वमहाभागयदहंसुप्रियातव॥ एवमुक्तस्तयाराजातामुवाचससुप्रियाम् ॥३२॥ साधुसाधुवरारोहेपुण्यमेवप्रभाषसे॥स्त्रीस्वभावाच्चचापल्यात्कौतुकाच्च

१ 'भूमिदानम्'इति० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वरानने ॥ ३३ ॥ यत्तवोक्तंमहाभागेतदसाध्यंविभातिमे ॥ तत्साध्यंपुण्यदानेनयज्ञेनतपसापिच॥३४॥ अन्यथानभवेत्साध्यंयत्त्वयोक्तंवरानने ॥ असाध्यंतुभवत्यावैभाषितंपुण्यमिश्रितम् ॥३५॥मर्त्यलोकाच्छरीरेणअनेनापिचमानवः ॥ श्रुतोदृष्टोनमेऽद्यापिगतःस्वर्गंसुपुण्यकृत्॥३६॥ततोऽसाध्यं वरारोहेयत्त्वयाभाषितंमम ॥ अन्यदेवकरिष्यामिप्रियंतेतद्वदप्रिये ॥३७॥ देव्युवाच॥अन्यैश्चमानुषैराजन्नसाध्यंस्यान्नसंशयः॥त्वयिसाध्यंमहाराजसत्यंसत्यंवदाम्यहम्॥३८॥तपसायशसाक्षात्रैर्दानैर्यज्ञैश्चभूपते॥नास्तिभवादृशश्चान्योमर्त्यलोकेचमानवः॥३९॥क्षात्रंबलंसुतेजश्चत्वयिसर्वंप्रतिष्ठितम् ॥ तस्मादेवंप्रकर्तव्यंमत्प्रियंनहुषात्मज ॥ ४० ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेमातापितृतीर्थवर्णनेययातिचरित्रेएकोनाशीतितमोऽध्यायः ॥ ७९ ॥ पिप्पलउवाच ॥ कामकन्यांयदाराजाउपयेमेद्विजोत्तम ॥ किंचक्रातेतदातेद्वेपूर्वभार्येसुपुण्यके ॥ १ ॥ देवयानीमहाभागाशर्मिष्ठावार्षपर्वणी ॥ तयोश्चरित्रंतत्सर्वंकथयस्वममाग्रतः ॥ २ ॥ सुकर्मोवाच ॥ यदानीताकामकन्यास्वगृहंतेनभूभुजा ॥ अत्यर्थंस्पर्धतेसातुदेवयानीमनस्विनी ॥ ३ ॥ तस्यार्थेतुसुतौशप्तौक्रोधेनकुलितात्मना ॥ शर्मिष्ठांचसमाहूयशब्दंचक्रेयशस्विनी ॥ ४ ॥ रूपेणतेजसादानैःसत्यपुण्यव्रतैस्तथा ॥ शर्मिष्ठादेवयानीचस्पर्धेतेस्मतयासह ॥ ५ ॥ दुष्टभावंतयोश्चापिसाऽज्ञासीत्कामजातदा ॥ राज्ञेसर्वंतयाविप्रकथितंतत्क्षणादिह ॥ ६ ॥ अथक्रुद्धोमहाराजःसमाहूयाब्रवीद्यदुम् ॥ शर्मिष्ठावध्यतांगत्वाशुक्रपुत्रीतथापुनः ॥ ७ ॥ सुप्रियंकुरुमेवत्सयदिश्रेयोहिमन्यसे ॥ एवमाकर्ण्यतत्तस्यपितुर्वाक्यंयदुस्तदा ॥ ८ ॥ प्रत्युवाचनृपेन्द्रंतंपितरंप्रतिमानद ॥ नाहंतुघातयेतातमातरौदोषवर्जिते ॥ ९ ॥ मातृघातेमहादोषःकथितोवेदपण्डितैः ॥ तस्माद्धातंमहाराजएतयोर्नकरोम्यहम्॥ १० ॥ दोषाणांतुसहस्रेणमातालिप्तायदाभवेत् ॥ भगिनीचमहाराजदुहिताचतथापुनः॥११॥ पुत्रैर्वाभ्रातृभिश्चैवनैववध्याभवेत्कदा ॥ एवंज्ञात्वामहाराजमातरौनैवघातये ॥ १२ ॥ यदोर्वाक्यंतदाश्रुत्वाराजाक्रुद्धोबभूवह ॥ शशापतंसुतंपश्चाद्ययातिःपृथिवीपतिः ॥ १३ ॥ यस्मादाज्ञाहतात्वद्यत्वयापापिसमोऽपिहि ॥ मांतुरंशंभजस्वत्वंमच्छापकलुषीकृतः ॥ १४ ॥ एवमुक्त्वायदुंपुत्रंययातिःपृथिवीपतिः ॥ पुत्रंशप्त्वामहाराजस्तयासार्द्धंमहायशाः ॥ १५ ॥ रमतेसुखभोगेनविष्णोर्ध्यानेनतत्परः ॥ अश्रुबिन्दुमतीसाचतेनसार्द्धंसुलोचना ॥ १६ ॥ बुभुजेचारुसर्वाङ्गीपुण्यान्भोगान्मनोऽनुगान् ॥ एवंकालेगतस्तस्यययातेस्तुमहात्मनः ॥ १७ ॥ अक्षयानिर्जराःसर्वाअपरास्तुप्रजास्तथा ॥ सर्वेलोकामहाभागविष्णुध्यानपरायणाः ॥ १८ ॥ तपसासत्यभावेनविष्णोर्ध्यानेनपिप्पल ॥ सर्वेलोकामहाभागसुखिनःसाधुसेवकाः

१ 'वीर्यैः' इ० पा०। २ 'मातुलसुतां भजस्व' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १९ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेमातापितृतीर्थवर्णनेययातिचरित्रेऽशीतितमोऽध्यायः ॥ ८० ॥ सुकर्मोवाच ॥ यथेन्द्रोऽसौमहा
प्राज्ञःसदाभीतोमहात्मनः ॥ ययातेर्विक्रमंदृष्ट्वादानपुण्यादिकंबहु ॥ १ ॥ मेनकांप्रेषयामासअप्सरांदूतकर्मणि ॥ गच्छभद्रेमहाभागेममादेशंवदस्व
हि ॥ २ ॥ कामकन्यामितोगत्वादेवराजवचोवद ॥ येनकेनाप्युपायेनराजानंत्वमिहानय ॥ ३ ॥ एवंश्रुत्वागतासाचमेनकातत्रप्रेषिता ॥ समाचष्ट
तुतत्सर्वंदेवराजस्यभाषितम् ॥ ४ ॥ एवमुक्तागतासाचमेनकातत्प्रचोदिता ॥ गतायांमेनकायांतुरतिपुत्रीमनस्विनी ॥ ५ ॥ राजानंधर्मसङ्केतंप्रत्यु
वाचयशस्विनी ॥ राजंस्त्वयाहमानीतासत्यवाक्येनवैपुरा ॥ ६ ॥ स्वकरश्चान्तरेदत्तोभवनंचसमाहृता ॥ यद्यद्वदाम्यहंराजंस्तत्तत्कार्यंहिवैत्वया
॥ ७ ॥ तदेवंहित्वयावीरनकृतंभाषितंमम ॥ त्वामेवंतुपरित्यक्ष्येयास्यामिपितृमन्दिरम् ॥ ८ ॥ राजोवाच ॥ यथोक्तंहित्वयाभद्रेतत्तेकर्त्तानसं
शयः ॥ असाध्यंतुपरित्यज्यसाध्यंदेविवदस्वमे ॥ ९ ॥ अश्रुबिन्दुमत्युवाच ॥ एतदर्थेमहीकान्तभवानिहमयावृतः ॥ सर्वलक्षणसम्पन्नःसर्वधर्मस
मन्वितः ॥ १० ॥ सर्वसाध्यमितिज्ञात्वासर्वधर्तारमेवच ॥ कर्त्तारंसर्वधर्माणांस्रष्टारंपुण्यकर्मणाम् ॥ ११ ॥ त्रैलोक्यसाधकंज्ञात्वात्रैलोक्येऽप्रतिमं
चवै ॥ विष्णुभक्तमहंजानेवैष्णवानांमहावरम् ॥ १२ ॥ इत्याशयामयाभर्त्ताभवानङ्गीकृतःपुरा ॥ यस्यविष्णुप्रसादोऽस्तिससर्वत्रपरिव्रजेत् ॥१३॥
दुर्लभंनास्तिराजेन्द्रत्रैलोक्येसचराचरे ॥ सर्वेष्वेवसुलोकेषुविद्यतेतवसुव्रत ॥ १४ ॥ विष्णोश्चैवप्रसादेनगगनेगतिरुत्तमा ॥ मर्त्यलोकंसमासाद्यत्व
यैववसुधाधिप ॥ १५ ॥ जरापलितहीनास्तुमृत्युहीनाजनाःकृताः ॥ गृहद्वारेषुसर्वेषुमर्त्यानांचनरर्षभ ॥ १६ ॥ कल्पद्रुमाअनेकाश्चत्वयैवपरिकल्पि
ताः ॥ येषांगृहेषुमर्त्यानांसुनयःकामधेनवः ॥ १७ ॥ त्वयैवप्रेषिताराजन्स्थिरीभूताःसदाकृताः ॥ सुखिनःसर्वकामैश्चमानवाश्चत्वयाकृताः ॥१८॥
गृहैकमध्येसाहस्रंकुलीनानांप्रदृश्यते ॥ एवंवंशविवृद्धिश्चमानवानांत्वयाकृता ॥ १९ ॥ यमस्यापिविरोधेनइन्द्रस्यचनरोत्तम ॥ व्याधिपापविहीनस्तु
मर्त्यलोकस्त्वयाकृतः ॥ २० ॥ स्वतेजसाऽहङ्कारेणस्वर्गरूपंतुभूतलम् ॥ दर्शितंहिमहाराजत्वत्समोनास्तिभूपतिः ॥ २१ ॥ नरोनैवप्रसूतोहिनोत्प
त्स्यतिभवादृशः ॥ भवन्तमित्यहंजानेसर्वधर्मप्रभाकरम् ॥ २२ ॥ तस्मान्मयाकृतोभर्तावदस्वैवंममाग्रतः ॥ नर्ममुक्त्वानृपेन्द्रत्वंवदसत्यंममाग्रतः
॥ २३ ॥ यदितेसत्यमस्तीहधर्मश्चास्तिनराधिप ॥ देवलोकेषुमेनास्तिगगनेगतिरुत्तमा ॥ २४ ॥ सत्यंत्यक्त्वायदाचत्वंनैवस्वर्गंगमिष्यसि ॥ तदा
कूटंतववचोभविष्यतिनसंशयः ॥ २५ ॥ पूर्वंकृतंहियच्छ्रेयोभस्मीभूतंभविष्यति ॥२६॥ राजोवाच ॥ सत्यमुक्तंत्वयाभद्रेसाध्यासाध्यंनचास्तिमे ॥
सर्वसाध्यंसुलोकंमेसुप्रसादाज्जगत्पतेः ॥ २७ ॥ स्वर्गंदेवियतोनैमितत्रमेकारणंशृणु ॥ भागंतुतेनदास्यन्तिममम़ृत्युश्चदेवताः ॥ २८ ॥ ततोमेमानवाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वेप्रजाःसर्वावरानने ॥ मृत्युयुक्ताभविष्यन्तिमयाहीनानसंशयः ॥ २९ ॥ गन्तुंस्वर्गंनवाञ्छामिसत्यमुक्तंवरानने ॥ ३० ॥ देव्युवाच ॥ लोकान्दृष्ट्वामहाराजआगमिष्यसिवैपुनः ॥ पूरयस्वममाद्यत्वंजातांश्रद्धांमहातुलाम् ॥ ३१ ॥ राजोवाच ॥ सर्वमेवंकरिष्यामि यत्त्वयोक्तंनसंशयः ॥ समालोक्यमहातेजाययातिर्नहुषात्मजः ॥ ३२ ॥ एवमुक्त्वाप्रियांराजाचिन्तयामासवैतदा ॥ अन्तर्जलचरो मत्स्यःसोऽपिजालेनबध्यते ॥ ३३ ॥ मरुत्समानवेगोऽपिमृगःप्राप्नोतिबन्धनम् ॥ योजनानांसहस्रस्थमामिषंवीक्षतेखगः ॥ ३४ ॥ सकण्ठ लग्नपाशंचनपश्येद्दैवमोहितः ॥ सवैषम्यकरःकालःकालःसम्मानहानिदः ॥ ३५ ॥ परिभावकरःकालोयत्रकुत्रापितिष्ठतः ॥ नरंकरोतिदातारंयाचि तारंचवैपुनः ॥ ३६ ॥ भूतानिस्थावरादीनिदिविवायदिवाभुवि ॥ सर्वंकलयतेकालःकालोह्येकइदंजगत् ॥ ३७ ॥ अनादिनिधनोधाताजगतःकार णंपरम् ॥ लोकान्कालःसपचतिवृक्षेफलमिवाहितम् ॥ ३८ ॥ नमन्त्रानतपोदानंनमित्राणिनबान्धवाः ॥ शक्नुवन्तिपरित्रातुंनरंकालेनपीडितम् ॥ ३९ ॥ त्रयःकालकृताःपाशाःशक्यन्तेनातिवर्तितुम् ॥ विवाहोजन्ममरणंयदायत्रतुयेनच ॥ ४० ॥ यथाजलधराव्योम्निभ्राम्यन्तेमातरिश्वना ॥ तथेदंकर्मयुक्तेनकालेनभ्राम्यतेजगत् ॥ ४१ ॥ सुकर्मोवाच ॥ कालोऽयंकर्मयुक्तस्तुयोनरैःसमुपासितः॥कालस्तुप्रेरयेत्कर्मतंतंकालःकरोतिसः ॥४२॥ उपद्रवाघातदोषाःसर्पाश्चव्याधयस्ततः ॥ सर्वेकर्मनियुक्तास्तेप्रचरन्तिचमानुषे ॥ ४३ ॥ सुखस्यहेतवोयेचउपायाःपुण्यमिश्रिताः ॥ तेसर्वेकर्मसंयु क्तानपश्येयुःशुभाशुभम् ॥ ४४ ॥ कर्मदायदिवालोकेकर्मसम्बन्धिबान्धवाः ॥ कर्माणिचोदयन्तीहपुरुषंसुखदुःखयोः ॥४५॥ सुवर्णंरजतंवापियथा रूपंविनिश्चितम्॥तथानिबध्यतेजन्तुःस्वकर्मणिवशानुगः ॥ ४६ ॥ पञ्चैतानीहसृज्यन्तेगर्भस्थस्यैवदेहिनः ॥ आयुःकर्मचवित्तंचविद्यानिधनमेवच ॥ ४७ ॥ यथामृत्पिण्डतःकर्ताकुरुतेयद्यदिच्छति ॥ तथापूर्वकृतंकर्मकर्तारमनुगच्छति ॥ ४८ ॥ देवत्वमथमानुष्यंपशुत्वंपक्षितातथा ॥ तिर्यक्त्वं स्थावरत्वंचप्राप्यतेचस्वकर्मभिः ॥ ४९ ॥ सएवतत्तथाभुङ्क्तेनित्यंविहितमात्मना ॥ आत्मनाविहितंदुःखंचात्मनाविहितंसुखम् ॥ ५० ॥ गर्भशय्या मुपादायभुञ्जतेपूर्वदैहिकम् ॥ सन्त्यजन्तिस्वकंकर्मनकचित्पुरुषाभुवि ॥ ५१ ॥ बलेनप्रज्ञयावापिसमर्थाःकर्तुमन्यथा ॥ सुकृतान्युपभुञ्जन्तिदुःखानि चसुखानिच ॥५२॥ हेतुंप्राप्यनरोनित्यंकर्मबन्धैस्तुबध्यते ॥ यथाधेनुसहस्रेषुवत्सोविन्दतिमातरम् ॥ ५३ ॥ तथाशुभाशुभंकर्मकर्तारमनुगच्छति॥ उपभोगादृतेयस्यनाशएवनविद्यते ॥ ५४ ॥ प्राक्तनंबन्धनंकर्मकोऽन्यथाकर्तुमर्हति ॥ सुशीघ्रमपिधावन्तंविधानमनुधावति ॥ ५५ ॥ शेतेसहशया

१ 'यथा कृतं तथा भुङ्क्ते नित्यं विहितमात्मना' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेनपुराकर्मयथाकृतम् ॥ उपतिष्ठतितिष्ठन्तंगच्छन्तमनुगच्छति ॥ ५६ ॥ करोतिकुर्वतःकर्मच्छायेवानुविधीयते ॥ यथाछायातपौनित्यंसुसम्बद्धौपरस्परम् ॥ ५७ ॥ तद्वत्कर्मचकर्ताचसुसम्बद्धौपरस्परम् ॥ ग्रहारोगाविषाःसर्पाःशाकिन्योराक्षसास्तथा॥५८॥ पीडयन्तिनरंपश्चात्पीडितंपूर्वकर्मणा॥ येनयत्रोपभोक्तव्यंसुखंवादुःखमेववा ॥५९॥ सतत्रबद्धारज्ज्वावैबलाद्दैवेननीयते ॥ दैवःप्रभुर्हिभूतानांसुखदुःखोपपादने ॥६०॥अन्यथाचिन्त्यतेकर्मजाग्रतास्वपतापिवा ॥ अन्यथासतथाप्राज्ञदैवएवंजिघांसति ॥ ६१ ॥ शस्त्राग्निविषदुर्गेभ्योरक्षितव्यंचरक्षति ॥ अरक्षितंभवेत्सत्यंतदेवंदैवरक्षितम् ॥ ६२ ॥ दैवेननाशितंयत्तुतस्यरक्षानदृश्यते ॥ यथापृथिव्यांबीजानिउत्पन्नानिचधनानिच ॥ ६३ ॥ तथैवात्मनिकर्माणितिष्ठन्तिप्रभवन्तिच ॥ तैलक्षयाद्यथादीपोनिर्वाणमधिगच्छति ॥ ६४ ॥ कर्मक्षयात्तथाजन्तुःशरीरान्नाशमृच्छति ॥ कर्मक्षयात्तथामृत्युस्तत्त्वविद्भिरुदाहृतः ॥६५ ॥ विविधाःप्राणिनस्तस्यमृत्योरोगाश्चहेतवः ॥ तथाममविपाकोऽयंपूर्वकृतस्यनान्यथा ॥ ६६ ॥ सम्प्राप्तोनात्रसन्देहःस्त्रीरूपोऽयंनसंशयः ॥ क्रमेगेहंसमायाता नाटकानटनर्तकाः ॥ ६७ ॥ तेषांसङ्गप्रसङ्गेनजरादेहंसमाश्रिता ॥ सर्वंकर्मकृतंमन्येयन्मेसम्भावितंध्रुवम् ॥ ६८ ॥ तस्मात्कर्मप्रधानंचउपायाश्चनिरर्थकाः ॥ पुरावैदेवराजेनमदर्थेदूतसत्तमः ॥ ६९ ॥ प्रेषितोमातलिर्नामनकृतंतस्यतद्वचः ॥ तस्यकर्मविपाकोऽयंदृश्यतेसाम्प्रतंमम ॥ ७० ॥ इतिचिन्तापरोभूत्वादुःखेनमहतान्वितः ॥ यद्यस्याहिवचःप्रीत्यानकरोमिहिसर्वथा ॥ ७१ ॥ सत्यधर्माबुभावेतौयास्यतस्तौनसंशयः ॥ सद्दृंशंचसमायातंयद्दृष्टंमसकर्मणा ॥ ७२ ॥ भविष्यतिनसन्देहोदैवोहिदुरतिक्रमः ॥ एवंचिन्तापरोभूत्वाययातिःपृथिवीपतिः ॥ ७३ ॥ कृष्णंक्लेशापहंदेवंजगामशरणंहरिम् ॥ ध्यात्वानत्वाततःस्तुत्वामनसामधुसूदनम् ॥ ७४ ॥ त्राहिमांशरणंप्राप्तस्त्वामहंकमलाप्रिय ॥ ७५ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेमातापितृतीर्थवर्णनेययातिचरित्रेएकाशीतितमोऽध्यायः ॥ ८१ ॥ सुकर्मोवाच ॥ एवंचिन्तयतेयावद्राजापरमधार्मिकः ॥ तावत्प्रोवाचसादेवीरतिपुत्रीवरानना ॥१ ॥किमुचिन्तयसेराजंस्त्वमिहैवमहामते ॥ प्रायेणापिस्त्रियःसर्वाश्चपलाःस्युर्नसंशयः ॥२॥ नाहंचापलयभावेनत्वामेवंप्रविचालये ॥ नाहंहिकारयाम्यद्यभवत्पार्श्वंनृपोत्तम॥३॥ अन्यस्त्रियोयथालोकेचपलत्वाद्वदन्तिच॥अकार्यंराजराजेन्द्रलोभान्मोहाच्चलम्पटाः ॥४॥ लोकानांदर्शनायैवजाताश्रद्धाममोरसि ॥ देवानांदर्शनंपुण्यंदुर्लभंहिसुमानुषैः ॥५॥ तेषांचदर्शनंराजन्कारयामिवदस्वमे ॥ दोषंपापकरंयत्तुमत्सङ्गादिहचेद्भवेत् ॥६॥ कथंचिन्तयसेदुःखंयथान्यःप्राकृतोजनः ॥ महाभयाद्यथाभीतोमोहगर्तेगतोयथा ॥७॥ त्यजचिन्तांमहाराजनगन्तव्यंत्वयादिवि ॥ येनते

१ ‘अन्नानि च धनानि च’ इ० पा० । २ ‘दैवसंज्ञकः’ इ० पा० । ३ ‘साध्यं चैव समायातम्’ इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जायतेदुःखंतन्नकार्यंमयाकदा ॥ ८ ॥ एवमुक्तस्तथाराजातामुवाचवराननाम् ॥चिन्तितंयन्मयादेवितच्छृणुष्वहिसाम्प्रतम् ॥९॥ मानभङ्गोमयादृष्टो
नैवस्वस्यमनःप्रिये ॥ मयिस्वर्गंगतेकान्तेप्रजादीनाभविष्यति ॥१०॥ त्रासयिष्यतिदुष्टात्मायमस्तुव्याधिभिःप्रजाः ॥ त्वयासार्धंप्रयास्यामिस्वर्ग
लोकंवरानने ॥११॥ एवमाभाष्यतांराजासमाहूयसुतोत्तमम् ॥ पूरुंतंसर्वधर्मज्ञंजरायुक्तंमहामतिम्॥१२॥एह्येहिसर्वधर्मज्ञधर्मंजानासिनिश्चितम्॥ममा
ज्ञयाहिधर्मात्मन्धर्मःसम्पालितस्त्वया॥१३॥ जरामेदीयतांताततारुण्यंगृह्यतांपुनः ॥ राज्यंकुरुममेदंत्वंसकोशबलवाहनम्॥१४॥आसमुद्रांप्रभुङ्क्ष्व
त्वंरत्नपूर्णांवसुन्धराम् ॥मयादत्तांमहाभागसग्रामवनपत्तनाम् ॥ १५ ॥ प्रजानांपालनंपुण्यंकर्तव्यंचसदानघ ॥ दुष्टानांशासनंनित्यंसाधूनांपरिपाल
नम् ॥ १६ ॥ कर्तव्यंचत्वयावत्सधर्मशास्त्रप्रमाणतः ॥ ब्राह्मणानांमहाभागविधिनापिस्वकर्मणा ॥ १७ ॥ भक्त्याचपालनंकार्यंयस्मात्पूज्याजग
त्रये ॥ पञ्चमेसप्तमेघस्रेकोशंपश्यविपश्चितः ॥ १८ ॥ बलंचनित्यंसम्पूज्यंप्रसादधनभोजनैः ॥ चारचक्षुर्भवस्वत्वंनित्यंदानपरोभव ॥१९॥ भवस्व
नियतोमन्त्रेसदागोप्यःसुपण्डितैः ॥ नियतात्माभवस्वत्वंमागच्छमृगयांसुत ॥ २० ॥ विश्वासःकस्यनोकार्यःस्त्रीषुकोशेमहाबले ॥ पात्राणांत्वंतु
सर्वेषांकलानांकुरुसङ्ग्रहम् ॥ २१ ॥ यजयज्ञैर्हृषीकेशंपुण्यात्माभवसर्वदा ॥ प्रजानांकण्टकान्सर्वान्मर्दयस्वदिनेदिने ॥ २२ ॥ प्रजानांवाञ्छितंसर्व
मर्पयस्वदिनेदिने ॥ प्रजासौख्यंप्रकर्तव्यंप्रजाःपोषयपुत्रक ॥ २३ ॥ स्वकोवंशःप्रकर्तव्यःपरदारेषुमाकृथाः ॥ मतिंदुष्टांपरस्वेषुपूर्वानन्वेहिसर्वदा ॥
॥ २४ ॥ वेदानांहिसदाचिन्ताशास्त्राणांहिचसर्वदा ॥ कुरुष्वैवंसदावत्सशस्त्राभ्यासरतोभव ॥ २५ ॥ सन्तुष्टःसर्वदावत्सस्वशय्यानिरतोभव ॥
गजस्यवाजिनोऽभ्यासंस्यन्दनस्यचसर्वदा ॥ २६ ॥ एवमादिश्यतंपुत्रमाशीर्भिरभिनन्द्यच ॥ स्वहस्तेनचसंस्थाप्यकरेदत्तंस्वमायुधम् ॥ २७ ॥
स्वांजरांतुसमागृह्यदत्त्वातारुण्यमस्यच ॥ गन्तुकामस्ततःस्वर्गंययातिःपृथिवीपतिः ॥२८॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेमातापितृतीर्थ
वर्णनेययातिचरित्रेद्व्यशीतितमोऽध्यायः ॥ ८२ ॥ सुकर्मोवाच ॥ समाहूयप्रजाःसर्वाद्वीपानांवसुधाधिपः ॥ हर्षेणमहताविष्टइदंवचनमब्रवीत् ॥१॥
इन्द्रलोकंब्रह्मलोकंरुद्रलोकमतःपरम् ॥ वैष्णवंसर्वपापघ्नंप्राणिनांगतिदायकम् ॥ २ ॥ व्रजाम्यहंनसन्देहोह्यनयासहसत्तमाः ॥ ब्राह्मणाःक्षत्रियावै
श्याःसशूद्राश्चप्रजामम ॥ ३ ॥ सुखेनापिसकुटुम्बैःस्थातव्यंतुमहीतले ॥ पूरुरेषमहाभागोभवतांपालकस्त्विह ॥४॥ स्थापितोऽस्तिमयालोकाराजा
धीरःसदण्डकः ॥ एवमुक्तास्तुताःसर्वाःप्रजाराजानमब्रुवन् ॥ ५ ॥ श्रूयतेसर्ववेदेषुपुराणेषुनृपोत्तम ॥ धर्मएवंयतोलोकेनदृष्टःकेनवैपुरा ॥ ६ ॥ दृष्टो

१ 'स्वासने नृपसत्तमः' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ऽस्माभिरसौधर्मोदशाङ्गः सत्यवल्लभः ॥ सोमवंशसमुत्पन्नोनहुषस्यमहागृहे ॥ ७ ॥ हस्तपादमुखैर्युक्तःसर्वाचारप्रचारकः ॥ ज्ञानविज्ञानसम्पन्नः पुण्यानांचमहानिधिः ॥ ८ ॥ गुणानांहिमहाराजआकरःसत्यपण्डितः ॥ कुर्वन्तिचमहाधर्मंसत्यवन्तोमहौजसः ॥ ९ ॥ तं[1]धर्मंदृष्टवन्तःस्मभवन्तं कामरूपिणम् ॥ भवन्तंकामकर्तारमीदृशंसत्यवादिनम् ॥ १० ॥ कर्मणात्रिविधेनापिवयंत्यक्तुंनशक्नुमः ॥ यत्रत्वंतत्रगच्छामःसुसुखंपुण्यमेवच॥ ॥ ११ ॥ नरकेऽपिभवान्यत्रवयंतत्रनसंशयः ॥ किंदारैर्धनभोगैश्चकिंजीवैर्जीवितेनच ॥ १२ ॥ त्वांविनासुमहाराजतेननास्त्यत्रकारणम् ॥ त्वयैव सहराजेन्द्रवयंयास्यामनान्यथा ॥ १३ ॥ एवंश्रुत्वावचस्तासांप्रजानांपृथिवीपतिः ॥ हर्षेणमहताविष्टःप्रजावाक्यमुवाचह ॥ १४ ॥ आगच्छन्तुम यासार्द्धंसर्वेलोकाःसुपुण्यकाः ॥ नृपोरथंसमारुह्यतयावैकामकन्यया ॥ १५ ॥ रथेनहंसवर्णेनचन्द्रबिम्बानुकारिणा ॥ चामरैर्व्यजनैश्चापिवीज्य मानोगतव्यथः ॥ १६ ॥ केतुनातेनपुण्येनशुभ्रेणापिमहीयसा॥ शोभमानोयथादेवोदेवराजःपुरन्दरः ॥१७॥ ऋषिभिःस्तूयमानस्तुबन्दिभिश्चारणै स्तथा ॥ प्रजाभिःस्तूयमानश्चययातिर्नहुषात्मजः ॥ १८ ॥ प्रजाःसर्वास्ततोयानैःसमायातानरेश्वरम् ॥ गजैरश्वैरथैश्चान्यैःप्रस्थिताश्चदिवंप्रति ॥ ॥ १९ ॥ ब्राह्मणाःक्षत्रियावैश्याःशूद्राश्चान्येपृथग्जनाः ॥ सर्वेचवैष्णवालोकाविष्णुध्यानपरायणाः ॥ २० ॥ तेषांतुकेतवःशुक्लाहेमदण्डैरलङ्कृताः॥ शङ्खचक्राङ्किताःसर्वेसदण्डाःसपताकिनः ॥ २१ ॥ प्रजावृन्देषुभासन्तेपताकामारुतेरिताः ॥ दिव्यमालाधरास्सर्वेशोभितास्तुलसीदलैः ॥ २२ ॥ दिव्यचन्दनदिग्धाङ्गादिव्यगन्धानुलेपनाः ॥ दिव्यवस्त्रकृताशोभादिव्याभरणभूषिताः ॥ २३ ॥ सर्वेलोकाः[2]सुरूपास्तेराजानमुपजग्मिरे ॥ प्रजाश तसहस्राणिलक्षकोटिशतानिच ॥ २४॥ अर्वखर्वसहस्राणितेजनाःप्रतिजग्मिरे ॥ तेतुराज्ञासमंसर्वेवैष्णवाःपुण्यकारिणः ॥ २५ ॥ विष्णुध्यानपराः सर्वेजपदानपरायणाः ॥ २६ ॥ सुकर्मोवाच ॥ एवंतेप्रस्थिताःसर्वेहर्षेणमहतान्विताः ॥ पूरुंपुत्रंमहाराजस्वराज्येपरिषिच्यतम् ॥ २७ ॥ ऐन्द्रंलोकं जगामाथययातिःपृथिवीपतिः ॥ तेजसातस्यपुण्येनधर्मेणतपसातदा ॥ २८ ॥ तेजनाःप्रस्थिताःसर्वेवैष्णवंलोकमुत्तमम् ॥ ततोदेवाःसगन्धर्वाः किन्नराश्चारणास्तथा ॥ २९ ॥ सहितादेवराजेनआगताःसंमुखंतदा ॥ तस्यैवापिनृपे[3]न्द्रस्यपूजयन्तोनृपोत्तम ॥ ३० ॥ इन्द्रउवाच ॥ स्वागतंतेमहा राजममगेहंसमाविश ॥ अत्रभोगान्प्रभुङ्क्ष्वत्वंदिव्यान्कामान्मनोऽनुगान् ॥ ३१ ॥ राजोवाच ॥ सहस्राक्षमहाप्राज्ञतवपादाम्बुजद्वयम् ॥ नमस्क रोम्यहंदेवब्रह्मलोकंव्रजाम्यहम् ॥ ३२ ॥ देवैःसंस्तूयमानश्चब्रह्मलोकंजगामह ॥ पद्मयोनिर्महातेजाःसार्धंमुनिवरैस्तदा ॥ ३३ ॥ आतिथ्यंच

१ 'नाधिकं दृष्टमस्माभिर्भवतः कामरूपिणः' इ० पा० । २ 'सरामास्ते' इ० पा० । ३ तस्य नृपेन्द्रस्य पूजयन्तस्तं नृपेन्द्रं पूजयन्त इति कर्मणि षष्ठी ।

CC-0. In Public Domain. Digitization by eGangotri

चकारास्यपाद्यार्घादिसुविष्टरैः ॥ उवाचविष्णुलोकंहिप्रयाहित्वंस्वकर्मणा ॥ ३४ ॥ एवमाभाषितेधात्राजगामशिवमन्दिरम् ॥ चक्रेआतिथ्यपूजांच उमयासहशङ्करः ॥३५॥ तस्यैवापिनृपेन्द्रस्यराजानमिदमब्रवीत्॥कृष्णभक्तोऽसिराजेन्द्रममापिसुप्रियोभवान्॥३६॥ ततोययातेराजेन्द्रवसत्वंमममन्दिरे ॥ सर्वान्भोगान्प्रभुङ्क्ष्वत्वंदुःखप्राप्यान्हिमानुषैः ॥३७॥ अन्तरंनास्तिराजेन्द्रममविष्णोर्नसंशयः ॥ योऽसौविष्णुस्वरूपेणसवैरुद्रोनसंशयः ॥३८॥योरुद्रोविद्यतेराजन्सचविष्णुःसनातनः॥उभयोरन्तरंनास्तितस्माच्चैववदाम्यहम्॥ ३९ ॥ विष्णुभक्तस्यपुण्यस्यस्थानमेवददाम्यहम्॥तस्मादत्रमहाराजस्थातव्यंहित्वयानघ ॥४०॥ एवमुक्तःशिवेनापिययातिर्हरिवल्लभः ॥भक्त्याप्रणम्यदेवेशंशङ्करंनतकन्धरः ॥४१॥ एतत्सर्वंमहादेवत्वयोक्तमिहसाम्प्रतम् ॥ युवयोरन्तरंनास्तिएकामूर्तिर्द्विधा[1]भवत् ॥४२॥ वैष्णवंगन्तुमिच्छामिपादौतवनमाम्यहम् ॥ एवमस्तुमहाराजगच्छलोकंतुवैष्णवम् ॥४३॥समादिष्टःशिवेनापि[2]प्रतस्थेवसुधाधिपः ॥ पृथ्वीशस्तैर्महापुण्यैर्वैष्णवैर्विष्णुवल्लभैः ॥ ४४ ॥ नृत्यमानैस्ततस्तैस्तुपुरतस्तस्यभूपतेः ॥ शङ्खशब्दैःसुपापघ्नैःसिंह[3]नादैःसुपुष्कलैः ॥ ४५ ॥ जगामनिःस्वनैराजापूज्यमानःसुचारणैः ॥ सुस्वरैर्गीयमानस्तुपाठकैःशास्त्रकोविदैः ॥ ४६ ॥ गायन्तिपुरतस्तस्यगन्धर्वागीततत्पराः ॥ ऋषिभिःस्तूयमानश्चदेववृन्दैःसमन्वितैः ॥४७॥ अप्सरोभिःसुरूपाभिःसेव्यमानःसनाहुषिः[4]॥गन्धर्वैःकिन्नरैःसिद्धैश्चारणैःपुण्यमङ्गलैः ॥ ४८ ॥ साध्यैर्विद्याधरैराजामरुद्भिर्वसुभिस्तथा ॥ रुद्रैश्चादित्यवर्गैश्चलोकपालैर्दिगीश्वरैः ॥ ४९ ॥ स्तूयमानोमहाराजस्त्रैलोक्येनसमन्ततः ॥ ददर्शवैष्णवंलोकमनौपम्यमनामयम् ॥५०॥ विमानैःकाञ्चनैराजासर्वशोभासमाविलैः॥हंसकुन्देन्दुधवलैर्विमानैरुपशोभितैः ॥ ५१ ॥ प्रासादैःशतभौमैश्चमेरुमन्दरसन्निभैः ॥ शिखरैरुल्लिखद्भिश्चस्वर्व्योमहाटकान्वितैः ॥ ५२ ॥ जाज्वल्यमानैःकलशैःशोभतेसुपुरोत्तमम् ॥ तारागणैर्यथाऽकाशंतेजःश्रियाप्रकाशते ॥ ५३ ॥ प्रज्वलत्तेजोज्वालाभिर्लोचनैरिवलोकते ॥ नानारत्नैर्हरेर्लोकःप्रहसद्दशनैरिव ॥ ५४ ॥ समाह्वयतितान्पुण्यान्वैष्णवान्विष्णुवल्लभान् ॥ ध्वजव्याजेनराजेन्द्रचलिताग्रैःसुपल्लवैः ॥ ५५ ॥ श्वसनान्दोलितैस्तैश्चध्वजाग्रैश्चमनोहरैः ॥ हेमदण्डैश्चघण्टाभिःसर्वत्रसमलङ्कृतम् ॥ ५६ ॥ सूर्यतेजःप्रकाशैश्चगोपुराट्टालकैस्ततः ॥ गवाक्षैर्जालमालैश्चवातायनमनोहरैः ॥ ५७ ॥ प्रतोलीनांप्रकाशैश्चप्राकारैर्हेमरूपकैः ॥ तोरणैःसुपताकाभिर्नानाशब्दैःसुमङ्गलैः ॥ ५८ ॥ कलशाग्रैश्चक्रबिम्बैरविबिम्बसमप्रभैः ॥ सुभोगैःशतकक्षैश्चनिर्जलाम्बुदसन्निभैः ॥ ५९ ॥ दण्डच्छत्रसमाकीर्णैःकलशैरुपशोभितैः ॥ प्रावृट्कालाम्बुदाकारैर्मन्दिरैरुपशोभितैः ॥६०॥ कलशैःशोभमानैस्तैर्ऋक्षैर्द्यौरिवभूतलम्॥

१ 'त्रिधा' इ० पा०। २ 'प्रणम्य च शिवामुमाम्' इ० पा०। ३ 'घण्टानादैः' इ० पा०। ४ 'अप्सरोभिर्युतो राजा' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दण्डजालपताकाभिर्ऋक्षजालसमप्रभैः ॥ ६१ ॥ तादृशैःस्फाटिकाकारैःकान्तिशङ्खेन्दुसन्निभैः॥हेमप्रासादसम्बाधैर्नानाधातुमयैस्ततः ॥ ६२॥ विमानैरर्बुदसङ्ख्यैःशतकोटिसहस्रकैः ॥ सर्वभोगयुतैश्चैवशोभतेहरिपत्तनम् ॥ ६३ ॥ यैःसमाराधितोदेवःशङ्खचक्रगदाधरः ॥ तेप्रसादात्तस्यतेषुनिवसन्ति गृहेषुच ॥ ६४ ॥ सर्वपुण्येषुदिव्येषुभोगाढ्येषुचमानवाः ॥ वैष्णवाःपुण्यकर्माणोनिर्धूताशेषकल्मषाः ॥ ६५ ॥ एवंविधैर्गृहैःपुण्यैःशोभितंविष्णुमन्दिरम् ॥ नानावृक्षैःसमाकीर्णंवनैश्चन्दनशोभितैः ॥ ६६ ॥ सर्वकामफलैराजन्सर्वत्रसमलङ्कृतम् ॥ वापीकुण्डतडागैश्चसारसैरुपशोभितैः॥ ६७ ॥ हंसकारण्डवाकीर्णैःकल्हारैरुपशोभितैः ॥ शतपत्रैर्महापद्मैःपद्मोत्पलविराजितैः ॥ ६८ ॥ कनकोत्पलवर्णैश्चसरोभिश्चविराजते ॥ वैकुण्ठंसर्वशोभाढ्यंदेवोद्यानैरलङ्कृतम् ॥ ६९ ॥ दिव्यशोभासमाकीर्णंवैष्णवैरुपशोभितम् ॥ वैकुण्ठंददृशेराजामोक्षस्थानमनुत्तमम् ॥ ७० ॥ देववृन्दैःसमाकीर्णंययातिर्नहुषात्मजः ॥ प्रविवेशपुरंरम्यंसर्वदाहविवर्जितम् ॥ ७१ ॥ ददृशेसर्वक्लेशघ्नंनारायणमनामयम् ॥ विमानैरुपशोभन्तंसर्वाभरणशालिनम् ॥ ७२ ॥ पीतवस्त्रंजगन्नाथंश्रीवत्साङ्कंमहाद्युतिम् ॥ वैनतेयसमारूढंश्रियायुक्तंपरात्परम् ॥ ७३ ॥ सर्वेषांदेवलोकानांयोगतिःपरमेश्वरः ॥ परमानन्दरूपेणकैवल्येनविराजते ॥ ७४ ॥ सेव्यमानंमहालोकैःसुपुण्यैर्वैष्णवैर्हरिम् ॥ देववृन्दैःसमाकीर्णंगन्धर्वगणसेवितम् ॥ ७५ ॥ अप्सरोभिर्महात्मानंदुःखक्लेशापहंहरिम् ॥ नारायणंननामाथस्वपत्न्यासहभूपतिः ॥ ७६ ॥ प्रणेमुर्मानवाःसर्वेवैष्णवामधुसूदनम् ॥ गतायेवैष्णवाःसर्वेसहराज्ञामहामते ॥ ७७ ॥ पादाम्बुजद्वयंतस्यनेमुर्भक्त्यामहामते ॥ प्रणमन्तंमहात्मानंराजानंदीप्ततेजसम् ॥ ७८ ॥ तमुवाचहृषीकेशस्तुष्टोऽहंतवसुव्रत ॥ वरंवरयराजेन्द्रयत्तेमनसिवर्तते ॥ तत्तेददाम्यसन्देहंमद्भक्तोऽसिमहामते ॥ ७९ ॥ राजोवाच ॥ यदित्वंदेवदेवेशतुष्टोऽसिमधुसूदन ॥ दासत्वंदेहिसततमात्मनश्चजगत्पते ॥ ८० ॥ विष्णुरुवाच ॥ एवमस्तुमहाभागममभक्तोनसंशयः ॥ लोकेममहाराजस्थातव्यमनयासह ॥ ८१ ॥ एवमुक्तोमहाराजोययातिःपृथिवीपतिः ॥ प्रसादात्तस्यदेवस्यविष्णुलोकंप्रसाधितम् ॥ ८२ ॥ निवसत्येषभूपालोवैष्णवंलोकमुत्तमम् ॥ ८३ ॥ इतिश्रीपाद्मपुराणे भूमिखण्डेवेनोपाख्यानेपितृतीर्थवर्णनेययातिचरित्रेययातेःस्वर्गारोहणंनामत्र्यशीतितमोऽध्यायः ॥ ८३ ॥ सुकर्मोवाच ॥ एतत्तेसर्वमाख्यातंचरित्रं पापनाशनम् ॥ पुत्राणांतारकंदिव्यंबहुपुण्यप्रदायकम् ॥ १ ॥ प्रत्यक्षंदृश्यतेलोकेययातिचरितंश्रुतम् ॥ पूरुणाप्तंमहद्राज्यंदुर्गतिंगतवांस्तुरुः ॥ २ ॥ पितृप्रसादात्कोपाच्चयथाजातंतथापुनः ॥ पुत्राणांतारकंपुण्यंयशस्यंधनधान्यदम् ॥ ३ ॥ शापयुक्ताविमौचोभौतुरुश्चयदुरेवच ॥ पितृमातृसमंनास्तिअभीष्टफलदायकम् ॥ ४ ॥ साभिलाषेणभावेनपितापुत्रंसमाह्वयेत् ॥ माताचपुत्रपुत्रेतितस्यपुण्यफलंशृणु ॥ ५ ॥ समाहूतोयथापुत्रःप्रयाति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मातरंप्रति ॥ योयातिहर्षसंयुक्तोगङ्गास्नानफलंलभेत् ॥ ६ ॥ पादप्रक्षालनंयस्तुकुरुतेचमहायशाः ॥ सर्वतीर्थफलंभुङ्क्तेप्रसादात्तुतयोःसुतः ॥
॥ ७ ॥ अङ्गसंवाहनाच्चान्यदश्वमेधफलंलभेत् ॥ भोजनाच्छादनस्नानैर्गुरुंयःपोषयेत्सुतः ॥ ८ ॥ पृथ्वीदानसमंपुण्यंतत्पुत्रेहिप्रजायते ॥ सर्वतीर्थम
यीगङ्गातथामातानसंशयः ॥ ९ ॥ बहुपुण्यमयःसिन्धुर्यथालोकेप्रतिष्ठितः ॥ अस्मिँल्लोकेपितातद्वत्पुराणकवयोविदुः ॥ १० ॥ आक्रोशतेक्रोशते
यस्तुपितरंमातरंपुनः ॥ सपुत्रोनरकंयातिरौरवाख्यंनसंशयः ॥ ११ ॥ मातरंपितरंवृद्धौगृहस्थोयोनपोषयेत् ॥ सपुत्रोनरकंयातिवेदनांप्राप्नुयाद्ध्रुवम्
॥ १२ ॥ कुत्सतेपापकर्तायोगुरुंपुत्रःसुदुर्मतिः ॥ निष्कृतिर्नैवदृष्टावैपुराणैःकविभिःकदा ॥ १३ ॥ एवंज्ञात्वाह्यहंविप्रपूजयामिदिनेदिने ॥ मातरं
पितरंनित्यंभक्त्यानमितकन्धरः ॥ १४ ॥ कृत्याकृत्यंवदेच्चैवसमाहूयगुरुर्मम ॥ तत्करोम्यविचारेणशक्त्यास्वस्यचपिप्पल ॥ १५ ॥ तेनमेपरमंज्ञानं
सञ्जातंगतिदायकम्॥ एतयोश्चप्रसादेनसंसारेपरिवर्तते॥१६॥यच्चकिंचित्प्रकुर्वन्तिमानवाभुविसंस्थिताः ॥गृहस्थस्तदहंजानेयच्चस्वर्गेप्रवर्तते॥१७॥ ना
गानांचइहस्थोऽपिचारंजानामिपिप्पल ॥ एतयोश्चप्रसादेनज्ञानंमेजातमुत्तमम् ॥ १८ ॥ गच्छविद्याधरश्रेष्ठभवानर्चतुमाधवम् ॥ १९ ॥ विष्णुरु
वाच ॥ एवंसञ्चोदितस्तेनपिप्पलोहिस्वकर्मणा ॥ आनम्यतंद्विजश्रेष्ठंलज्जितोऽपिदिवंययौ ॥ २० ॥ सुकर्मासोऽपिधर्मात्मागुरुंशुश्रूषतेनृप ॥ एत
त्तेसर्वमाख्यातंपितृतीर्थानुगंमया ॥ २१ ॥अन्यत्किंतेप्रवक्ष्यामिवदवेनमहामते ॥ २२ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेमातापितृतीर्थमा
हात्म्यवर्णनंनामचतुरशीतितमोऽध्यायः ॥८४॥ वेनउवाच ॥ भगवन्देवदेवेशप्रसादाच्चममत्वया ॥ भार्यातीर्थंसमाख्यातंपितृतीर्थमनुत्तमम् ॥ १ ॥
मातृतीर्थंहृषीकेशबहुपुण्यप्रदायकम् ॥ प्रसादसुमुखोभूत्वागुरुतीर्थंवदस्वमे ॥ २ ॥ श्रीभगवानुवाच ॥ कथयिष्याम्यहंराजन्गुरुतीर्थमनुत्तमम् ॥
सर्वपापहरंप्रोक्तंशिष्याणांगतिदायकम् ॥ ३ ॥ शिष्याणांपरमंपुण्यंधर्मरूपंसनातनम् ॥ परंतीर्थंपरंज्ञानंप्रत्यक्षफलदायकम् ॥ ४ ॥ यस्यप्रसादाद्रा
जेन्द्रइहैवफलमश्नुते ॥ परलोकेसुखंभुङ्क्तेयशःकीर्तिमवाप्नुयात्॥ ५ ॥प्रसादाद्यस्यराजेन्द्रगुरोश्चैवमहात्मनः॥प्रत्यक्षंदृश्यतेशिष्यैस्त्रैलोक्यंसचराचरम्
॥ ६ ॥ व्यवहारंचलोकानामाचारंनृपनन्दन ॥ विज्ञानंविन्दतेशिष्योमोक्षंचवप्रयातिच ॥ ७ ॥ सर्वेषामेवलोकानांयथासूर्यःप्रकाशकः ॥ गुरुःप्र
काशकस्तद्वच्छिष्याणांबुद्धिदानतः ॥ ८ ॥ रात्रावेवप्रकाशेच्चसोमोराजानृपोत्तम ॥ तेजसानाशयेत्सर्वमन्धकारंचराचरे ॥ ९ ॥ गृहेप्रकाशयेद्दीपः
सम्यक्नृपसत्तम ॥ तेजसानाशयेत्सर्वमन्धकारंघनाविलम् ॥ १० ॥ अज्ञानतमसाव्याप्तंशिष्यंद्योतयतेगुरुः ॥ शिष्यप्रकाशउद्द्योतैरुपदेशैर्महामते
॥ ११ ॥ दिवाप्रकाशकःसूर्यःशशीरात्रौप्रकाशकः ॥ गृहप्रकाशकोदीपस्तमोनाशकरःसदा ॥ १२ ॥ रात्रौदिवागृहस्यान्तेगुरुःशिष्यंसदैवहि ॥ अ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञाना यंतमस्तस्यगुरुः सर्वंप्रणाशयेत् ॥ १३ ॥ तस्माद्गुरुःपरंतीर्थंशिष्याणामवनीपते ॥ एवंज्ञात्वाततःशिष्यःसर्वदातंप्रपूजयेत् ॥ १४ ॥ गुरुंपु
ण्यमयंज्ञात्वात्रिविधेनापिकर्मणा॥ इत्यर्थेश्रूयतेराजन्निति हासःपुरातनः ॥१५॥ सर्वपापहरःप्रोक्तश्च्यवनस्यमहात्मनः॥भार्गवस्यकुलेजातश्च्यवनोमु
निसत्तमः ॥ १६ ॥ तस्यचिन्तासमुत्पन्नाएकदातुनृपोत्तम ॥ कदाहंज्ञानसम्पन्नोभविष्यामिमहीतले ॥ १७ ॥ दिवारात्रौचिन्तयन्सज्ज्ञानार्थीमुनिस
त्तमः ॥ एवंतुचिन्तमानस्यमतिरासीन्महात्मनः ॥१८॥ तीर्थयात्रांप्रयास्यामिअभीष्टफलदायिनीम्॥ गृहक्षेत्रादिसन्त्यज्यभार्यांपुत्रंधनंततः॥१९॥
तीर्थयात्राप्रसङ्गेनअटतेमेदिनींतदा ॥ लोमानुलोमयात्रांसगङ्गायाःकृतवान्नृप ॥ २० ॥ सतद्वन्नर्मदायाश्चसरस्वत्यामुनीश्वरः ॥ गोदावर्यादिसर्वासां
नदीनांसागरस्यच ॥ २१ ॥ अन्येपांसर्वतीर्थानांक्षेत्राणांचनपोत्तम ॥ देवानांपुण्यलिङ्गानांयात्राव्याजेनसोऽभ्रमत् ॥ २२ ॥ भ्रममाणस्यतस्यापि
तीर्थेषुपरमेषुच ॥ कायश्चनिर्मलोजातःसूर्यतेजःसमप्रभः ॥२३॥ च्यवनःकाशतेदीप्त्यापूतात्मानेनकर्मणा ॥ भ्रममाणःसमायातःक्षेत्राणामुत्तमंतदा
॥ २४ ॥ नर्मदादक्षिणेकूलेनाम्नाअमरकण्टकम् ॥ ददर्शसुमहालिङ्गंसर्वेषांगतिदायकम् ॥ २५ ॥ नत्वास्तुत्वातुसम्पूज्यसिद्धनाथंमहेश्वरम् ॥
ज्वालेश्वरंततोदृष्ट्वादृष्ट्वाचाप्यमरेश्वरम् ॥ २६ ॥ ब्रह्मेशंकपिलेशंचमार्कण्डेश्वरमुत्तमम् ॥ एवंयात्रांततःकृत्वाओङ्कारंसमुपागतः ॥ २७ ॥ व
टच्छायांसमाश्रित्यशीतलांश्रमनाशिनीम् ॥ सुखेनसंस्थितोविप्रश्च्यवनोभृगुनन्दनः ॥ २८ ॥ तत्रस्वनंसशुश्रावसमुक्तंपक्षिणातदा ॥ दिव्य
भाषासमायुक्तंज्ञानविज्ञानसंयुतम् ॥ २९ ॥ शुकश्चएकस्तत्रास्तेबहुकालप्रजीवकः ॥ कुञ्जलोनामधर्मात्माचतुष्पुत्रःसभार्यकः ॥ ३० ॥ आ
संस्तस्यहिपुत्राश्चचत्वारःपितृनन्दनाः ॥ तेषांनामानिराजेन्द्रकथयिष्येतवाग्रतः ॥ ३१ ॥ ज्येष्ठस्तुउज्ज्वलोनामद्वितीयस्तुसमुज्ज्वलः ॥
तृतीयोविज्वलोनामचतुर्थश्चकपिञ्जलः ॥ ३२ ॥ एवंपुत्रास्तुचत्वारःकुञ्जलस्यमहामते ॥ शुकस्यतस्यपुण्यस्यपितृमातृपरायणाः ॥ ३३ ॥
भ्रमन्तिगिरिकुञ्जेषुद्वीपेषुचसमाहिताः ॥ भोजनार्थंतुसंक्षुब्धाःक्षुधयापरिपीडिताः ॥ ३४ ॥ स्वोदरस्थांक्षुधांसौम्यफलैरमृतसन्निभैः ॥ अमृ
तस्वादुतोयेनशमयन्तिनृपोत्तम ॥ ३५ ॥ नित्यंचैवरसाढ्यानिआहारार्थंसुपुत्रकाः ॥ नीत्वाफलानिदम्पत्योर्निक्षिपन्तिप्रयत्नतः ॥ ३६ ॥
मातुरर्थेमहाभागाभक्तिभावसमन्विताः ॥ तुष्टाआहारमुत्पाद्यभक्षयन्तिपठन्तिच ॥ ३७ ॥ तत्रक्रीडारताःसर्वेविलसन्तिरमन्तिच ॥ सन्ध्याका
लंसमाज्ञायपितुरन्तिकमुत्तमम् ॥ ३८ ॥ आयान्तिभक्ष्यमादायगुर्वर्थंतुप्रयत्नतः ॥ पश्यतस्तस्यविप्रस्यच्यवनस्यमहात्मनः ॥ ३९ ॥ आ
गतास्त्वण्डजाःसर्वेपितुर्नीडंसुशोभनम् ॥ पितरंमातरंचोभौप्रणेमुस्तेमहामते ॥ ४० ॥ ताभ्यांभक्ष्यंसमासाद्यउपतस्थुस्तयोःपुरः ॥ सर्वेसम्भाषिताः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पित्रामानितास्तेसुतोत्तमाः ॥ ४१ ॥ मात्राचकृपयाराजन्वचनैःप्रीतिसंमितैः ॥ पक्षवातनशीतेनमातापित्रोश्चतेतदा ॥ ४२ ॥ तेषामाप्यायनंतौद्वौच
क्रातेपक्षिणौनृप ॥ आशीर्भिरभिनन्द्यैवद्वाभ्यामपिसुपुत्रकान् ॥ ४३ ॥ तैश्चदत्तंसुसम्पुष्टमाहारममृतोपमम् ॥ तावेवहिसुसम्प्रीतिंचक्रातेद्विजसत्त
म ॥ ४४ ॥ पिबतोनिर्मलंतोयंतीर्थकोटिसमुद्भवम् ॥ स्वस्थानंतुसमाश्रित्यसुखसन्तुष्टमानसौ ॥ ४५॥ चक्रातेचकथांदिव्यांसुपुण्यांपापनाशिनी
म् ॥ पित्रातुकुञ्जलेनापिपृष्टउज्ज्वलआत्मजः ॥ ४६ ॥ क्वगतोऽस्यद्यपुत्रत्वंकिमपूर्वंत्वयापुनः ॥ तत्रदृष्टंश्रुतंपुण्यंतन्मेकथयनन्दन
॥ ४७॥ कुञ्जलस्यपितुर्वाक्यंसमाकर्ण्यसउज्ज्वलः ॥पितरंप्रत्युवाचाथभक्त्यानमितकन्धरः ॥४८ ॥प्रणाममकरोन्मूर्ध्नाकथांचक्रेमनोहराम् ॥४९ ॥
उज्ज्वलउवाच ॥ प्लक्षद्वीपंमहाभागनित्यमेवव्रजाम्यहम् ॥ महताउद्यमेनापिआराहार्थंमहामते ॥ ५० ॥ प्लक्षेद्वीपेमहाराजसन्तिदेशाअनेकशः ॥
पर्वताःसरिदुद्यानवनानिचसरांसिच ॥ ५१ ॥ ग्रामाश्चपत्तनाश्चान्येसुप्रजाभिःप्रमोदिताः ॥ सदासुखेनसन्तुष्टालोकाहृष्टावसन्तिते ॥ ५२ ॥ दा
नपुण्यजपोपेताःश्रद्धाभावसमन्विताः ॥ प्लक्षद्वीपेमहाराजआसीत्पुण्यमतिःसदा ॥ ५३ ॥ दिवोदासस्तुधर्मात्मातत्सुतासीदनूपमा ॥ गुणरूपस
मायुक्तासुशीलाचारुमङ्गला ॥५४॥ दिव्यादेवीतिविख्यातारूपेणाप्रतिमाभुवि ॥ पित्राविलोकितासातुरूपलावण्यसंयुता ॥ ५५ ॥ प्रथमेवयसि
साचवर्ततेचारुमङ्गला ॥ सतांदृष्ट्वादिवोदासोदिव्यादेवींसुतांतदा ॥ ५६ ॥ कस्मैप्रदीयतेकन्यासुवरायमहात्मने ॥ इतिचिन्तापरोभूत्वासमालो
क्यनरोत्तमः ॥ ५७ ॥ रूपदेशस्यराजानंसमालोक्यमहीपतिः ॥ चित्रसेनंमहात्मानंसमाहूयनरोत्तमः ॥ ५८ ॥ कन्यांददौमहात्मासौचित्र
सेनायधीमते ॥ तस्याविवाहकालेतुसम्प्राप्तेसमयेनृप ॥ ५९ ॥ मृतोऽसौचित्रसेनस्तुकालधर्मेणवैकिल ॥ दिवोदासस्तुधर्मात्माचिन्तयामासभूप
तिः ॥६०॥ सुब्राह्मणान्समाहूयपप्रच्छनृपनन्दनः ॥ अस्याविवाहकालेतुचित्रसेनोदिवंगतः ॥६१॥ अस्यास्तुकीदृशंकर्मभविष्यतिवदन्तुमे ॥६२॥
॥ ब्राह्मणाउचुः ॥ विवाहोदृश्यतेराजन्कन्यायास्तुविधानतः॥पतिर्मृत्युंप्रयात्यस्यानोचेत्सङ्गंकरोतिच ॥६३॥ महाधिव्याधिनाग्रस्तस्त्यागंकृत्वा
प्रयातिच॥प्रव्राजितोभवेद्राजन्धर्मशास्त्रेषुदृश्यते ॥ ६४ ॥ अनुद्वाहितायाःकन्यायाउद्वाहःक्रियतेबुधैः ॥ नस्याद्रजस्वलायावदन्यःपतिर्विधीय
ते ॥ ६५ ॥ विवाहंतुविधानेनपिताकुर्यान्नसंशयः ॥ एवंराजन्समादिष्टंधर्मशास्त्रंबुधैर्जनैः ॥ ६६ ॥ विवाहःक्रियतामस्याइत्यूचुस्तेद्विजोत्तमाः ॥
दिवोदासस्तुधर्मात्माद्विजवाक्यप्रणोदितः ॥ ६७ ॥ विवाहार्थंमहाराजउद्यमंकृतवान्नृप ॥ पुनर्दत्तातुदानेनदिव्यादेवीद्विजोत्तम ॥ ६८ ॥ रूपसेना
यपुण्यायतस्मैराज्ञेमहात्मने ॥ मृत्युधर्मंगतोराजाविवाहेतुमहीपतिः ॥ ६९ ॥ यदायदामहाभागदिव्यादेव्याश्चभूपतिः ॥ भर्ताचम्रियतेकालेप्राप्तेल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ग्रस्यसर्वदा ॥७०॥ एकविंशतिभर्तारःकालेकालेमृताःपितः ॥ ततोराजामहादुःखीसञ्जातःख्यातविक्रमः ॥ ७१ ॥ समालोच्यसमाहूयसमामन्त्र्यस
मन्त्रिभिः ॥ स्वयंवरेमहाबुद्धिंचकारपृथिवीपतिः ॥७२ ॥ प्लक्षद्वीपस्यराजानःसमाहूतामहात्मना ॥ स्वयंवरार्थमाहूतास्तथातेधर्मतत्पराः ॥७३॥
तस्यास्तुरूपसंमुग्धाराजानोमृत्युनोदिताः ॥ सङ्ग्रामंचक्रिरेमूढास्तेमृताःसमराङ्गणे ॥ ७४ ॥ एवंतातक्षयोजातःक्षत्रियाणांमहात्मनाम् ॥ दिव्या
देवीसुदुःखार्तागतासावनकन्दरम् ॥ ७५ ॥ रुरोदकरुणंबालादिव्यादेवीमनस्विनी ॥ एवंतातमयादृष्टमपूर्वंतत्रवैतदा ॥ ७६ ॥ तन्मेसुविस्तरंतात
तस्याःकथयकारणम् ॥ ७७ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेगुरुतीर्थेच्यवनोपाख्यानेपञ्चाशीतितमोऽध्यायः ॥ ८५ ॥ कुञ्जलउवाच॥
तस्यास्तुचेष्टितंवत्सदिव्यादेव्यावदाम्यहम् ॥ पूर्वजन्मकृतंसर्वंतन्मेनिगदतःशृणु ॥ १ ॥ अस्तिवाराणसीपुण्यानगरीपापनाशिनी ॥ तस्यामास्ते
महाप्राज्ञःसुवीरोनामनामतः ॥ २ ॥ वैश्यजात्यांसमुत्पन्नोधनधान्यसमाकुलः ॥ तस्यभार्यामहाप्राज्ञचित्रानामसुविश्रुता ॥ ३ ॥ कुलाचारंपरि
त्यज्यअनाचारेणवर्तते॥नमन्यतेहिभर्तारंस्वैरवृत्त्याप्रवर्तते ॥४॥ धर्मपुण्यविहीनातुपापमेवसमाचरेत्॥भर्तारंकुत्सतेनित्यंनित्यंचकलहप्रिया ॥५॥
नित्यंपरगृहेवासोभ्रमतेसागृहेगृहे ॥ परच्छिद्रंसमापश्येत्सदादुष्टाचप्राणिषु ॥ ६ ॥ साधुनिन्दापरादुष्टासदाहास्यकरीचसा ॥ अनाचारांमहापापांज्ञा
त्वावीरोऽपिनन्दनः ॥७॥ सतांत्यक्त्वामहाप्राज्ञउपयेमेमहामतिः॥अन्यवैश्यस्यवैकन्यांतयासहप्रवर्तते ॥८॥ धर्माचारेणपुण्यात्मासत्यधर्ममतिःस
दा॥निरस्तातेनसाचित्राप्रचण्डाभ्रमतेमहीम् ॥९॥ दुष्टानांसङ्गतिंप्राप्तानराणांपापिनांसदा ॥ दूतीकर्मचकाराथसातेषांपापनिश्चया ॥ १० ॥ गृहभङ्गं
चकाराथसाधूनांपापकारिणी ॥ साध्वींनारींसमाहूयपापवाक्यैःसुलोभयेत् ॥११॥ धर्मभङ्गंचकाराथवाक्यैःप्रत्ययकारकैः ॥ साधूनांसास्त्रियंचित्रा
अन्यस्मैप्रतिपादयेत् ॥ १२ ॥ एवंगृहशतंभग्नंचित्रयापापनिश्चयात ॥ सङ्ग्रामंसामहादुष्टाऽकारयत्पतिपुत्रकैः ॥ १३ ॥ मनांसिचालयेत्पापापुरुषा
णांस्त्रियःप्रति ॥ अकारयच्चसङ्ग्रामंयमग्रामविवर्धनम् ॥१४॥ एवंगृहशतंभङ्क्त्वापश्चात्सानिधनंगता॥शासितायमराजेनबहुदण्डैःसुनन्दन ॥१५॥
अभोजयत्सुनरकान्रौरवांस्तरणेःसुतः ॥ पाचितारौरवेचित्राचित्राःपीडाःप्रदर्शिताः ॥१६॥ यादृशंक्रियतेकर्मतादृशंपरिभुज्यते ॥ तयागृहशतंभग्नंचि
त्रयापापनिश्चयात् ॥१७॥ तत्तत्कर्मविपाकोऽयंतयाभुक्तोद्विजोत्तम यस्माद्गृहशतंभग्नंतस्माद्दुःखंप्रभुञ्जति ॥ १८ ॥ विवाहसमयेप्राप्तेदैवंचपाकतां
गतम् ॥ प्राप्तेविवाहसमयेभर्तामृत्युंप्रयातिच ॥ १९ ॥ यथागृहशतंभग्नंतथावरशतंमृतम् ॥ स्वयंवरेतदावत्सविवाहेचैकविंशतिः ॥ २० ॥ दिव्यादे
व्यामयाख्यातंयथामेपृच्छितंत्वया॥एतत्तेसर्वमाख्यातंतस्याःपूर्वविचेष्टितम् ॥२१॥ उज्ज्वलउवाच ॥ दिव्यादेव्यास्त्वयाख्यातंयत्पूर्वपूर्वंचेष्टितम् ॥

CC-0. In Public Domain. Digitization by eGangotri

तथापापंकृतंघोरंगृहभङ्गाख्यमेवच ॥ २२ ॥ प्लक्षद्वीपस्यभूपस्यदिवोदासस्यवसुता ॥ केनपुण्यप्रभावेणतयाप्राप्तंमहाकुलम् ॥ २३ ॥ एषमेसंशय
स्ताततदेतत्प्रब्रवीतुमे ॥ एवंपापसमाचाराकथंजातानृपात्मजा ॥ २४॥कुञ्जलउवाच ॥ चित्रायाश्चेष्टितंपुण्यंतत्सर्वंप्रवदाम्यहम् ॥ श्रूयतामुज्ज्वलसु
तचित्रयायत्कृतंपुरा ॥ २५॥ भ्रममाणोमहाप्राज्ञःकश्चित्सिद्धःसमागतः ॥ कुचैलोवस्त्रहीनश्चसंन्यासीसचदण्डधृक् ॥२६ ॥ कौपीनेनसमायुक्तःपाणि
पात्रोदिगम्बरः ॥ गृहद्वारंसमाश्रित्यचित्रायाःपरिसंश्रितः ॥ २७॥ समौनीसर्वमुण्डस्तुविजितात्माजितेन्द्रियः ॥ निराहारोजिताहारःसर्वतत्त्वार्थदर्श
कः ॥ २८ ॥ दूराध्वानपरिश्रान्तआतपाकुलमानसः ॥ श्रमेणखिद्यमानश्चतृषाक्रान्तःसुपुत्रक ॥ २९ ॥ चित्राद्वारंसमाश्रित्यच्छायामाश्रित्यसं
स्थितः ॥ तयादृष्टोमहात्मासचित्रयाश्रमपीडितः ॥ ३० ॥ सेवांचक्रेचचित्रासातस्यैवसुमहात्मनः ॥ पादप्रक्षालनंकृत्वादत्त्वाआसनमुत्तमम्॥३१॥
आस्यतामासनेतातसुखेनापिसुकोमले ॥ क्षुधापनोदनाथहिभुज्यतामन्नमुत्तमम् ॥ ३२ ॥ स्वच्छयापरितुष्टश्चशीतलंसलिलंपिब ॥ एवमुक्त्वातथा
कृत्वादेववत्पूज्यतंसुत ॥ ३३ ॥ अङ्गसंवाहनंकृत्वानाशितश्रमएवच ॥ तयोक्तोऽपिमहात्मासभुक्त्वापीत्वाद्विजोत्तम ॥ ३४ ॥ एवंसन्तोषितःसिद्ध
स्तयातत्त्वार्थदर्शकः ॥ सन्तुष्टःसर्वधर्मात्माकिंचित्कालंस्थिरोऽभवत् ॥ ३५ ॥ स्वेच्छयासगतोविप्रोमहायोगीयथागतम् ॥ गतेतस्मिन्महाभागे
सिद्धेचैवमहात्मनि ॥ ३६ ॥ साचित्रामरणंप्राप्तास्वकर्मवशमागता ॥ शासिताधर्मराजेनमहादण्डैःसुदुःखदैः ॥ ३७ ॥ साचित्रानरकंप्राप्तावेदना
व्रातदायकम् ॥ भुङ्क्तेदुःखंमहाराजसावैयुगसहस्रकम् ॥ ३८ ॥ भोगान्तेतुपुनर्जन्मसम्प्राप्तंमानुपस्यच ॥ पूर्वंसम्पूजितःसिद्धस्तयापुण्यवतांवरः ॥
॥ ३९ ॥ तस्यकर्मविपाकोऽयंप्राप्तापुण्यवतांकुले ॥ क्षत्रियाणांमहाराज्ञोदिवोदासस्यवैगृहे ॥ ४० ॥ दिव्यादेवीवरापत्यंसञ्जातंतस्यमानद ॥ साहि
दत्तवतीचान्नपानंपुण्यंमहात्मने ॥ ४१ ॥ तस्यदानस्यसाभुङ्क्तेमहत्पुण्यफलोदयम् ॥ पिबतेशीतलंतोयंमिष्टान्नंचभुनक्तिवै ॥ ४२ ॥ दिव्यान्भोगा
न्प्रभुञ्जानावर्ततेपितृमन्दिरे ॥ सिद्धस्यास्यप्रभावाच्चराजकन्याव्यजायत ॥ ४३ ॥ पापकर्मप्रभावाच्चगृहभङ्गान्महामते ॥ विधवात्वंभुञ्जतेसादिव्या
देवीसुपुत्रक ॥ ४४ ॥ एतत्तेसर्वमाख्यातंदिव्यादेव्याविचेष्टितम् ॥ अन्यत्किंतेप्रवक्ष्यामियत्त्वंपृच्छसिमामिह ॥ ४५ ॥ उज्ज्वलउवाच ॥ कथंसा
मुच्यतेशोकान्महादुःखाद्वदस्वमे ॥ सास्याच्चकीदृशीबालामहादुःखेनपीडिता ॥ ४६ ॥ तत्सुखंकीदृशंतस्माद्विपाकश्चभविष्यति ॥ एतंमेसंशयंता
तसाम्प्रतंछेत्तुमर्हसि ॥ ४७ ॥ कथंसालभतेमोक्षंतंचोपायंवदस्वमे ॥ एकाकिनीमहाभागामहारण्येप्ररोदिति ॥ ४८ ॥ विष्णुरुवाच ॥ पुत्रवा
क्यंमहच्छ्रुत्वाक्षणमेकंविचिन्त्यसः ॥ प्रत्युवाचमहाप्राज्ञःकुञ्जलःपुत्रकंप्रति ॥ ४९ ॥ शृणुवत्समहाभागसत्यमेतद्वदाम्यहम् ॥ पापयोनिंतुसम्प्रा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्यपूर्वकर्मसमुद्भवाम् ॥ ५० ॥ तिर्यक्त्वेनचमेज्ञानंनष्टंसम्प्रतिपुत्रक ॥ अस्यवृक्षस्यसङ्गाच्चप्रयतस्यमहात्मनः ॥ ५१ ॥ रेवायाश्चप्रसादेनविष्णो
श्चैवप्रसादतः ॥ येनसालभतेज्ञानंमोक्षस्थानंनिवर्तते ॥ ५२ ॥ उपदेशंप्रवक्ष्यामिमोक्षमार्गमनुत्तमम् ॥ यास्यतेकल्मषान्मुक्तायथाहेमहुताशनात्
॥ ५३ ॥ शुद्धंचजायतेवत्ससङ्गाद्वह्नेःस्वरूपवत् ॥ हरेर्ध्यानान्महाप्राज्ञशीघ्रंतस्यमहात्मनः ॥ ५४ ॥ जपहोमव्रतात्पापंनाशंयातिहिपापिनाम्॥
मदंत्यजेद्यथानागोभयार्त्तिसिंहस्यसर्वदा ॥ ५५ ॥ नामोच्चारेणकृष्णस्यतत्प्रयातिहिकिल्बिषम् ॥ तेजसावैनतेयस्यविषहीनाइवोरगाः ॥ ५६ ॥
ब्रह्महत्यादिकाःपापाःप्रलयंयान्तिनान्यथा ॥ नामोच्चारेणतस्यापिचक्रपाणेःप्रयान्तिते ॥ ५७ ॥ यदानामशतंपुण्यमघराशिविनाशनम् ॥ साज
पेतस्थिराभूत्वाकामक्रोधविवर्जिता ॥ ५८ ॥ सर्वेन्द्रियाणिसंयम्यआत्मज्ञानेनगोपयेत् ॥ तस्यध्यानप्रविष्टासाएकभूतासमाहिता ॥ ५९ ॥ सा
जपेत्परमंज्ञानंतदामोक्षंप्रयातिच ॥ तन्मनास्तत्पदेलीनायोगयुक्तायदाभवेत् ॥ ६० ॥ उज्ज्वलउवाच ॥ वदतातपरंज्ञानंपरमंममसाम्प्रतम् ॥ पश्चा
द्ध्यानंव्रतंपुण्यंनाम्नांशतमिहैवच ॥ ६१ ॥ कुञ्जलउवाच ॥ परंज्ञानंप्रवक्ष्यामियन्नदृष्टंतुकेनचित् ॥ श्रूयतांपुत्रकैवल्यंकेवलंमलवर्जितम् ॥ ६२ ॥
यथादीपोनिवातस्थोनिश्चलोवायुवर्जितः ॥प्रज्वलन्नाशयेत्सर्वमन्धकारंमहामते ॥ ६३ ॥ तद्वद्दोषविहीनात्माभवत्येवनिराश्रयः ॥ निराशोनिर्मलोव
त्सनमित्रंनरिपुःकदा ॥ ६४ ॥ नशोकोनचहर्षश्चनलोभोनचमत्सरः ॥ एकोविषादहर्षैश्चसुखदुःखैर्विमुच्यते ॥ ६५ ॥ विषयैश्चापिसर्वैश्चइन्द्रिया
णिससंहरेत् ॥ तदासकेवलोजातःकेवलत्वंप्रजायते ॥ ६६ ॥ अग्निकर्मप्रसङ्गेनदीपस्तैलंप्रशोषयेत् ॥ वर्त्याधारेणराजेन्द्रनिःसङ्गोवायुवर्जितः ॥
॥ ६७ ॥ कज्जलंवमतेपश्चात्तैलस्यापिमहामते ॥ कृष्णासौदृश्यतेरेखादीपस्याग्रेमहामते ॥ ६८ ॥ स्वयमाकृष्यतेतैलंतेजसानिर्मलोभवेत् ॥ कायव
र्तिस्थितस्तद्वत्कर्मतैलंप्रशोषयेत् ॥ ६९ ॥ विषयान्कज्जलीकृत्यप्रत्यक्षंसम्प्रदर्शयेत् ॥ जनयेन्निर्मलोभूत्वास्वयमेवप्रकाशयेत् ॥ ७० ॥ क्रोधादि
भिःक्लेशसंज्ञैर्वायुभिःपरिवर्जितः ॥ निःस्पृहोनिश्चलोभूत्वातेजसास्वयमुज्ज्वलेत् ॥ ७१ ॥ त्रैलोक्यंपश्यतेसर्वंस्वस्थानस्थःस्वतेजसा ॥ केवलज्ञान
रूपोऽयंमयातेपरिकीर्तितः ॥ ७२ ॥ ध्यानंतस्यप्रवक्ष्यामिद्विविधंतस्यचक्रिणः ॥ केवलज्ञानरूपेणदृश्यतेज्ञानचक्षुषा ॥ ७३ ॥ योगयुक्तामहात्मानः
परमार्थपरायणाः ॥ यंपश्यन्तिविनिद्रास्तुयत्तपःसर्वदर्शकम् ॥ ७४ ॥ हस्तपादविहीनंचसर्वत्रपरिगच्छति ॥ सर्वंगृह्णातित्रैलोक्यंस्थावरंजङ्गमंसुत
॥ ७५ ॥ नासामुखविहीनस्तुघ्रातिजक्षितिपुत्रक ॥ अकर्णःशृणुतेसर्वंसर्वसाक्षीजगत्पतिः ॥ ७६ ॥ अरूपोरूपसम्बद्धःपञ्चवर्गवशंगतः ॥ सर्वलो

१ 'दुःखवर्जितम्'-इ० पा० । २ 'निश्चलः' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कस्ययःप्राणःपूजितःसचराचरैः ॥ ७७ ॥ अजिह्वोवदतेसर्ववेदशास्त्रानुगंसुतः ॥ अत्वचःस्पर्शनंचापिसर्वेषामेवजायते ॥ ७८ ॥ सदानन्दोवि
रक्तात्माएकरूपोनिराश्रयः ॥ निर्जरोनिर्ममोन्यायीसगुणोनिर्ममोऽमलः ॥ ७९ ॥ अवश्यःसर्ववश्यात्मासर्वदःसर्ववित्तमः॥तस्यध्यातानचैवास्ति
सर्वैसर्वमयोविभुः ॥ ८० ॥ एवंसर्वमयंध्यानंपश्यतेयोमहात्मनः ॥ सयातिपरमंस्थानममूर्तममृतोपमम् ॥ ८१ ॥ द्वितीयंतुप्रवक्ष्यामिअस्यध्यानं
महात्मनः ॥ मूर्ताकारंतुसाकारंनिराकारंनिरामयम् ॥ ८२ ॥ ब्रह्माण्डंसर्वमतुलंवासितंयस्यवासना ॥ सतस्माद्वासुदेवेतिउच्यतेममनन्दन
॥ ८३ ॥ वर्षमाणस्यमेघस्ययद्वर्णतस्यतद्भवेत् ॥ सूर्यतेजःप्रतीकाशंचतुर्बाहुंसुरेश्वरम् ॥ ८४ ॥ दक्षिणेशोभतेशङ्खोहेमरत्नविभूषितः ॥
सूर्यबिम्बसमाकारंचक्रंपद्मंप्रतिष्ठितम् ॥ ८५ ॥ कौमोदकीगदातस्यमहासुरविनाशिनी ॥ वामेचशोभतेवत्सहस्तेतस्यमहात्मनः ॥ ८६ ॥
महापद्मंसुगन्धाढ्यंतस्यदक्षिणहस्तगम् ॥ शोभमानःसदैवास्तेसायुधःकमलाप्रियः ॥ ८७ ॥ कम्बुग्रीवंवृत्तमास्यंपद्मपत्रनिभेक्षणम् ॥ राजमानंहृ
षीकेशंदशनैरत्नसन्निभैः ॥ ८८ ॥ गुडाकेशाःसन्तियस्यअधरोविद्रुमाकृतिः ॥ शोभतेपुण्डरीकाक्षःकिरीटेनापिपुत्रक ॥ ८९ ॥ विशालेनापिरूपेण
केशवस्तुसुवर्चसा ॥ कौस्तुभेनाङ्कितेनैवराजमानोजनार्दनः ॥ ९० ॥ सूर्यतेजःप्रतीकाशकुण्डलाभ्यांप्रभातिच ॥ श्रीवत्साङ्केनपुण्येनसर्वदाराजते
हरिः ॥ ९१ ॥ केयूरकङ्कणैर्हारैर्मौक्तिकैर्ऋक्षसन्निभैः ॥ वपुषाभ्राजमानस्तुविजयोजयतांवरः ॥ ९२ ॥ भ्राजतेसोऽपिगोविन्दोहेमवर्णेनवाससा ॥
मुद्रिकारत्नयुक्ताभिरङ्गुलीभिर्विराजते ॥ ९३ ॥ सर्वायुधैःसुसम्पूर्णैर्दिव्यैराभरणैर्हरिः ॥ वैनतेयसमारूढोलोककर्ताजगत्पतिः ॥ ९४ ॥ एवंतंध्याय
तेनित्यमनन्यमनसानरः ॥ मुच्यतेसर्वपापेभ्योविष्णुलोकंसगच्छति ॥ ९५॥ एतत्तेसर्वमाख्यातंध्यानमेवजगत्पतेः ॥ व्रतंचैवप्रवक्ष्यामिसर्वपापनि
वारणम् ॥ ९६ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेगुरुतीर्थवर्णनेषडशीतितमोऽध्यायः ॥८६॥ कुञ्जलउवाच ॥ व्रतभेदान्प्रवक्ष्यामियैर्यैश्चा
राधितोहरिः ॥ जयाचविजयाचैवजयन्तीपापनाशिनी ॥ १ ॥ त्रिस्पृशावञ्जुलीचान्यातिलदग्धातथापरा ॥ अखण्डाचारकन्याचमनोरथासुपुत्रक
॥ २ ॥ दिव्यप्रभावाःसन्त्यन्यास्तिथयःपुत्रपौत्रदाः ॥ अशून्यशयनंचान्यज्जन्माष्टमीमहाव्रतम् ॥ ३ ॥ एतैर्व्रतैर्महापुण्यैःपापंदूरंप्रयातिच ॥ प्रा
णिनांनात्रसन्देहःसत्यंसत्यंवदाम्यहम् ॥ ४ ॥ स्तोत्रंतस्यप्रवक्ष्यामिपापराशिविनाशनम् ॥ सुपुत्रशतनामाख्यंनराणांगतिदायकम् ॥ ५ ॥ तस्यदेव
स्यकृष्णस्यशतनामाख्यमुत्तमम् ॥ सम्प्रत्येवप्रवक्ष्यामितच्छृणुष्वसुतोत्तम ॥ ६ ॥ विष्णोर्नामशतस्यापिऋषिंछन्दोवदाम्यहम् ॥ देवंचैवमहाभा

१ 'निर्गुणः' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गसर्वपापविशोधनम् ॥ ७ ॥ विष्णोर्नामशतस्यापिऋषिर्ब्रह्माप्रकीर्तितः ॥ विष्णुस्तुदेवताप्रोक्तश्छन्दोऽनुष्टुप्तथैवच ॥ सर्वकामिकसंसिद्ध्यैमोक्षेच
विनियोगकः ॥८॥ नमाम्यहंहृषीकेशंकेशवंमधुसूदनम्॥ सूदनंसर्वदैत्यानांनारायणमनामयम् ॥९॥ जयन्तंविजयंकृष्णमनन्तंवामनंततः ॥ विष्णुं
विश्वेश्वरंपुण्यंविश्वाधारंसुरार्चितम् ॥ १० ॥ अनघंत्वघहन्तारंनरसिंहंश्रियःप्रियम् ॥ श्रीपतिंश्रीधरंश्रीदंश्रीनिवासंमहोदयम् ॥ ११ ॥ श्रीराममाध
वंमोक्षंक्षमारूपंजनार्दनम् ॥ सर्वज्ञंसर्ववेत्तारंसर्वदंसर्वनायकम् ॥ १२ ॥ हरिंमुरारिंगोविन्दंपद्मनाभंप्रजापतिम् ॥ आनन्दंज्ञानसम्पन्नंज्ञानदंज्ञानना
यकम् ॥ १३ ॥ अच्युतंसबलंचन्द्रंचक्रपाणिंपरावरम् ॥ युगाधारंजगद्योनिंब्रह्मरूपंमहेश्वरम् ॥ १४ ॥ मुकुन्दंतंसुवैकुण्ठमेकरूपंजगत्पतिम् ॥ वासु
देवंमहात्मानंब्रह्मण्यंब्राह्मणप्रियम् ॥ १५ ॥ गोप्रियंगोहितंयज्ञंयज्ञाङ्गंयज्ञवर्द्धनम् ॥ यज्ञस्यापिसुभोक्तारंवेदवेदाङ्गपारगम् ॥ १६ ॥ वेदज्ञंवेदरूपंतं
विद्यावासंसुरेश्वरम् ॥ अव्यक्तंतंमहाहंसंशङ्खपाणिंपुरातनम् ॥ १७ ॥ पुरुषंपुष्कराक्षंतुवाराहंधरणीधरम् ॥ प्रद्युम्नंकामपालंचव्यासंव्यालमहेश्वरम्॥
॥ १८ ॥ सर्वसौख्यंमहासौख्यंमोक्षंचपरमेश्वरम् ॥ योगरूपंमहाज्ञानंयोगिनांगतिदंप्रियम् ॥ १९ ॥ मुरारिंलोकपालंतंपद्महस्तंगदाधरम् ॥ गुहावा
संसर्ववासंपुण्यवासंमहाभुजम् ॥ २० ॥ नमामिनिश्चलंनित्यंमनोवाक्कायकर्मभिः ॥२१॥ नाम्नांशतेनापिसुपुण्यकर्तायःस्तौतिकृष्णंमनसास्थिरेण॥
सयातिलोकंमधुसूदनस्यविहायलोकानिहपुण्यपूतः ॥ २२ ॥ नाम्नांशतंमहापुण्यंसर्वपातकशोधनम् ॥ जपेदनन्यमनसाध्यायेद्ध्यानसमन्वितम्
॥२३॥ नित्यमेवनरःपुण्यैर्गङ्गास्नानफललभत् ॥ तस्मात्तुसुस्थिरोभूत्वासमाहितमनाजपेत् ॥ २४ ॥ त्रिकालंचजपेन्मर्त्योनियतोनियमेस्थितः ॥
अश्वमेधफलंतस्यजायतेनात्रसंशयः ॥ २५ ॥ एकादश्यामुपोष्यैवपुरतोमाधवस्ययः ॥ जागरेप्रजपेन्मर्त्यस्तस्यपुण्यंवदाम्यहम् ॥ २६ ॥ पुण्डरी
कस्ययज्ञस्यफलमाप्नोतिमानवः ॥ तुलसीसन्निधौस्थित्वामनसायोजपेन्नरः ॥ २७ ॥ राजसूयफलंभुङ्क्तेवर्षेणापिचमानवः ॥ शालग्रामशिलाय
त्रयत्रद्वारावतीशिला ॥ २८ ॥ उभयोःसन्निधौजाप्यंकर्तव्यंसुखमिच्छता ॥ बहुसौख्यंप्रभुक्त्वैवकुलानांशतमेवच ॥ २९ ॥ एकेनचाधिकंमत्यआ
त्मनासहतारयेत् ॥ कार्तिकेस्नानकर्तायःपूजयेन्मधुसूदनम् ॥ ३० ॥ यःपठेत्प्रयतःस्तोत्रंप्रयातिपरमांगतिम् ॥ माघस्नायीहरिंपूज्यभक्त्याचमधुसू
दनम् ॥ ३१ ॥ ध्यायेचैवहृषीकेशंजपेद्वाथशृणोतिवा ॥ सुरापानादिकंपापंविहायपरमंपदम् ॥ ३२ ॥ विनाविघ्नंनरःपुत्रसम्प्रयातिजनार्द
नम् ॥ श्राद्धकालेहियोमर्त्योविप्राणांभुञ्जतांपुरः ॥ ३३ ॥ योजपेच्चशतंनाम्नांस्तोत्रंपातकनाशनम् ॥ पितरस्तुष्टिमायान्तितृप्तायान्तिपरांगतिम्
॥ ३४ ॥ ब्राह्मणोवेदविद्वान्स्यात्क्षत्रियोविन्दतेमहीम् ॥ धनऋद्धिंप्रभुञ्जीतवैश्योजपतियःसदा ॥ ३५ ॥ शूद्रःसुखंप्रभुङ्क्तेऽथब्राह्मणत्वंचगच्छति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राप्यजन्मान्तरंवत्सवेदविद्यांप्रविन्दति ॥ ३६ ॥ सुखदंमोक्षदंस्तोत्रंजप्तव्यंचनसंशयः ॥ केशवस्यप्रसादेनसर्वसिद्धोभवेन्नरः ॥ ३७ ॥ इतिश्री
पाद्मपुराणेभूमिखण्डेवेनोपाख्यानेगुरुतीर्थवर्णनेच्यवनचरित्रेसप्ताशीतितमोऽध्यायः ॥ ८७ ॥ कुञ्जलउवाच ॥ व्रतंस्तोत्रंमहाज्ञानंध्यानंचैवसुपुत्र
क ॥ मयाख्यातंतवाग्रेवैविष्णोःपापप्रणाशनम् ॥ १ ॥ एवंचतुष्टयंसाहियदापुण्यंसमाचरेत् ॥ प्रयातिवैष्णवंलोकंदेवानामपिदुर्लभम् ॥ २ ॥
इतोगत्वाव्रतंवत्सदिव्यादेवींप्रबोधय ॥ अशून्यशयनंनामव्रतराजंवदस्वताम् ॥ ३ ॥ समुद्धरमहापापाद्राजकन्यांयशस्विनीम् ॥ त्वयापृष्टं
मयाख्यातंपुण्यदंपापनाशनम् ॥ ४ ॥ गच्छगच्छमहाभागइत्युक्त्वाविररामसः ॥ ५ ॥ श्रीविष्णुरुवाच ॥ उज्ज्वलोऽप्येवमुक्तस्तुसपि
त्राकुञ्जलेनहि ॥ प्रणम्यपादौधर्मात्मामातापित्रोर्महामतिः ॥ ६ ॥ जगामत्वरितोराजन्प्लक्षद्वीपंसउज्ज्वलः ॥ तंगिरिंसर्वतोभद्रंनानाधातुसमाकुलम्
॥ ७ ॥ नानारत्नमयैस्तुङ्गैःशिखरैरुपशोभितम् ॥ नानाप्रवाहसम्पूर्णैरुदकैरुज्ज्वलैर्नृप ॥८॥ नद्यःसन्तिस्वच्छनीरास्तस्मिन्गिरिवरोत्तमे ॥ किन्नरा
स्तत्रगायन्तिगन्धर्वाःसुस्वरैर्नृप ॥९॥ अप्सरोभिःसमाकीर्णंदेववृन्दैरुपावृतम् ॥ सिद्धचारणसङ्घुष्टंमुनिवृन्दैरलङ्कृतम् ॥१०॥ नानापक्षिनिनादैश्चसर्व
त्रपरिनादितम् ॥ एवंगिरिंसमासाद्यउज्ज्वलोऽलघुविक्रमः ॥११॥ सुस्वरेणापिसाकन्यागिरौतस्मिन्प्ररोदिति ॥ रोरूयमाणांसप्राज्ञोवचनंचेदमब्रवीत्
॥ १२ ॥ कात्वंभवसिकल्याणिकस्माद्रोदिषिसाम्प्रतम् ॥ कमाश्रितामहाभागेकेनतेविप्रियंकृतम् ॥ समाचक्ष्वममाद्यैवसर्वंदुःखस्यकारणम् ॥ १३ ॥
दिव्यादेव्युवाच ॥ विपाकोहिमहाभागकर्मणांममसाम्प्रतम् ॥ इहतिष्ठामिदुःखेनवैधव्येनसमन्विता ॥ १४ ॥ भवान्कोहिमहाभागकृपयाममपीडितः ॥
पक्षिरूपधरोवत्ससोत्सवंपरिभाषते ॥ १५ ॥ एवमाकर्ण्यतत्सर्वंभाषितंराजकन्यया ॥ अहंपक्षीमहाभागेकृपयातवपीडितः ॥ १६ ॥ पक्षिरूपधरोभ
द्रेनाहंसिद्धोनज्ञानवान् ॥ रुदमानांमहालापैर्भवतींदृष्टवानिह ॥ १७ ॥ ततःपृच्छाम्यहंदेविवदमेकारणंत्विह ॥ पितुर्गेहेयथावृत्तमात्मवृत्तान्तमेवहि
॥ १८ ॥ तयानिवेदितंसर्वंयथासङ्ख्येनदुःखदम् ॥ समासेनसमाकर्ण्यउज्ज्वलस्तुमहामनाः ॥ १९ ॥ तामुवाचमहापक्षीदिव्यादेवींसुदुःखिताम् ॥
यथाविवाहकालेतेभर्तारोमरणंगताः ॥ २० ॥ स्वयंवरनिमित्तंतेक्षयंयाताश्चक्षत्रियाः ॥ एतत्तेचेष्टितंसर्वंमयापितरिभाषितम् ॥ २१ ॥ अन्यजन्मकृतं
कर्मतवपापंसुलोचने ॥ ममपित्राममाग्रेतुकृपयापरिभाषितम् ॥ २२ ॥ तेनदोषेणसम्पुष्टालिप्ताजातावरानने ॥ एतावत्कारणंसर्वंतातेनपरिभाषितम्
॥ २३ ॥ पूर्वकर्मविपाकंतुभुङ्क्ष्वत्वंचसमाश्वस ॥ एवंसाभाषितंतस्यश्रुत्वाकन्योज्ज्वलस्यतत् ॥ २४ ॥ प्रत्युवाचमहात्मानंब्रुवन्तंपक्षिणंपुनः ॥
प्रणतादीनयावाचाकुरुपक्षिन्कृपांमम ॥ २५ ॥ कथयस्वप्रसादेनतस्यपापस्यनिष्कृतिम् ॥ प्रायश्चित्तंसुपुण्यंचममपातकशोधनम् ॥ २६ ॥ येनव्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जाम्यहंपुण्यंविशुद्धाधौतकल्मषा ॥ प्रायश्चित्तंमहाभागवदमेत्वंप्रसादतः ॥ २७ ॥ उज्ज्वलउवाच ॥ तवार्थंतुमहाभागेपितरंपृष्टवानहम् ॥ समा
ख्यातमतःपित्राप्रायश्चित्तमनुत्तमम् ॥ २८ ॥ तत्त्वंकुरुमहाभागेसर्वपातकशोधनम् ॥ ध्यायस्वहिहृषीकेशंशतनामजपस्वच ॥ २९ ॥ भवज्ञानपरा
नित्यंकुरुव्रतमनुत्तमम् ॥ अशून्यशयनंपुण्यंव्रतंपापप्रणाशकम् ॥ ३० ॥ समाचष्टसधर्मात्मासर्वज्ञानप्रकाशकम् ॥ ज्ञानंस्तोत्रंव्रतंध्यानंविष्णोश्चैव
महात्मनः ॥ ३१ ॥ विष्णुरुवाच ॥ तस्मात्साद्विप्रजग्राहसंस्थितानिर्जनेवने ॥ सर्वद्वन्द्वविनिर्मुक्तासञ्जातातपसिस्थिता ॥ ३२ ॥ व्रतंचक्रेजिताहा
रानिराधारासुदुःखिता ॥ कामक्रोधविहीनासावर्गंसंयम्यनित्यशः ॥ ३३ ॥ इन्द्रियाणांमहाराजमहामोहंनिरस्यसा ॥ अब्देचतुर्थकेप्राप्तेसुप्रसन्नो
जनार्दनः ॥ ३४ ॥ तस्यैवरंदातुकामश्चायातोवरनायकः ॥ तस्यैसन्दर्शयामासस्वरूपंवरदःप्रभुः ॥ ३५ ॥ इन्द्रनीलघनश्यामशङ्खचक्रगदाधरम्॥
सर्वाभरणशोभाढ्यंपद्महस्तंमहेश्वरम् ॥ ३६ ॥ बद्धाञ्जलिपुटाभूत्वावेपमानानिराश्रया ॥ उवाचगद्गदैर्वाक्यैःप्रणतामधुसूदनम् ॥ ३७ ॥ तेजसात
वदिव्येनस्थातुंशक्नोमिनैवहि ॥ दिव्यरूपोभवेःकस्त्वंकृपयाममचाग्रतः ॥ ३८ ॥ कथयस्वप्रसादेनकिमत्रतवकारणम् ॥ सर्वमेवप्रसादेनप्रब्रवी
हिमहामते ॥ ३९ ॥ देवमेवंविजानामितेजसाइङ्गितैस्तव ॥ ज्ञानहीनाजगन्नाथनजानेरूपनामनी ॥ ४० ॥ किंब्रह्मावाभवान्विष्णुःकिंवा
शङ्करएवहि ॥ एवमुक्काप्रणम्यैवंदण्डवद्धरणींगता ॥ ४१ ॥ तामुवाचजगन्नाथःप्रणतांराजनन्दिनीम् ॥ ४२ ॥ श्रीभगवानुवाच ॥ त्रयाणा
मपिदेवानामन्तरंनास्तिशोभने ॥ ब्रह्मासमर्चितोयेनशङ्करोवावरानने ॥ ४३ ॥ तेनाहमर्चितोनित्यंनात्रकार्याविचारणा ॥ एतौममाभिन्नतरौ
नित्यंचापित्रिरूपवान् ॥ ४४ ॥ अहंहिपूजितोयैश्चतावेतौतैःसुपूजितौ ॥ अहंदेवोहृषीकेशःकृपयातवचागतः ॥ ४५ ॥ स्तवेनानेनपुण्येनव्रतेन
नियमेनच ॥ सञ्जाताकल्मषैर्हीनावरंवरयशोभने ॥ ४६ ॥ दिव्यादेव्युवाच ॥ विजयस्वहृषीकेशकृष्णक्लेशापहारक ॥ नमामिचरणद्वन्द्वंमामुद्ध
रसुरेश्वर ॥ ४७ ॥ वरंमेदातुकामोऽसिचक्रपाणेप्रसीदमे ॥ आत्मपादयुगस्यापिभक्तिंदेहिममानघ ॥ ४८ ॥ दर्शयस्वजगन्नाथमोक्षमार्गंनिराम
यम् ॥ दासत्वंदेहिवैकुण्ठयदितुष्टोजनार्दन ॥ ४९ ॥ श्रीभगवानुवाच ॥ एवमस्तुमहाभागेगच्छनिर्धूतकल्मषा ॥ वैष्णवंपरमंलोकंदुर्लभंयोगि
भिःसदा ॥ ५० ॥ गच्छगच्छपरंलोकंप्रसादान्ममसाम्प्रतम् ॥ एवमुक्तेततोवाक्येमाधवेनमहात्मना ॥ ५१ ॥ दिव्यादेवीअभूद्दिव्यासूर्यतेजःसमप्र
भा ॥ पश्यतांसर्वलोकानांदिव्याभरणभूषिता ॥ ५२ ॥ दिव्यमालान्वितासाचदिव्यहारविलम्बिनी ॥ गतासावैष्णवंलोकंदाहप्रलयवर्जितम्॥५३॥

१ 'एष एवास्ति मे कामः' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुनःपक्षीसमायातःस्वगृहंहर्षसंयुतः ॥ तत्सर्वंकथयामासपितरंप्रतिसत्तमः ॥९४॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेगुरुतीर्थेच्यवनचरित्रेऽष्टाशीतितमोऽध्यायः ॥८८॥ विष्णुरुवाच ॥ कुञ्जलस्तुसुतंवाक्यंसमुज्ज्वलमथाब्रवीत् ॥ भवान्कथयभोःपुत्रकिमपूर्वंतुदृष्टवान् ॥१॥ तन्मेकथयसुप्रीतःश्रोतुकामोऽस्मिसाम्प्रतम् ॥ एवमादिश्यतंपुत्रंविररामसकुञ्जलः॥२॥पितरंप्रत्युवाचाथविनयावनतस्सुतः ॥३॥समुज्ज्वलउवाच॥हिमवन्तंनगश्रेष्ठंदेववृन्दसमन्वितम् ॥ आहारार्थंप्रगच्छामिभवतश्चात्मनःपितः ॥ ४ ॥ पश्यामिकौतुकंतत्रनदृष्टंनश्रुतंपुरा ॥ प्रदेशमृषिभिःकीर्णमप्सरोभिःप्रशोभितम् ॥ ५ ॥ बहुकौतुकशोभाढ्यंमङ्गल्यंमङ्गलैर्युतम् ॥ बहुपुण्यफलोपेतैर्वनैर्नानाविधैस्ततः ॥ ६ ॥ अनेककौतुकभरैर्मनसःपरिमोहनम् ॥ तत्रदृष्टंमयातातअपूर्वंमानसान्तिके ॥ ७ ॥ बहुहंसैःसमाकीर्णोहंसएकःसमागतः ॥ सचकृष्णोमहाभागत्रयोऽप्यन्येसमागताः ॥ ८ ॥ सितेतरैश्चञ्चुपादैरन्यतःशुक्लविग्रहाः ॥ तादृशास्तेचनीलावैअन्येशुभ्रामहामते ॥९॥ चतस्रस्तत्रवैनार्योरौद्राकाराविभीषणाः ॥ दंष्ट्राकरालसङ्क्रूराऊर्ध्वकेश्योभयानकाः ॥ १० ॥ पश्चात्तास्तुसमायातास्तस्मिन्सरसिमानसे ॥ कृष्णाहंसास्तुसंस्नातामानसेतातमत्पुरः ॥ ११ ॥ विश्रान्ताःपरितश्चान्येनस्नातास्तत्रमानसे ॥ कृष्णान्हंसांस्तुसंस्नाताञ्जहसुस्ताःस्त्रियस्तदा ॥ १२ ॥ तस्मात्तडागान्निष्क्रान्तोहंसएकोमहातनुः ॥ पश्चात्त्रयोविनिष्क्रान्तास्तैश्चाहंसमुपेक्षितः ॥ १३ ॥ याताआकाशमार्गेणविवदन्तःपरस्परम् ॥ तास्तुस्त्रियोमहाभीमाःसमन्तात्परिबभ्रमुः ॥ १४ ॥ विन्ध्यस्यशिखरेपुण्येवृक्षच्छायासुपक्षिणः ॥ निषण्णास्तत्रतेसर्वेदग्धादुःखैःसुदारुणैः ॥ १५ ॥ तेषांसुवीक्षमाणानांभिल्लएकःसमागतः ॥ मृगान्सपीडयित्वातुबाणपाणिर्धनुर्द्धरः ॥ ॥ १६ ॥ शिलातलंसमाश्रित्यनिषसादसुखेनवै ॥ पश्चाद्भिल्लीसमायाताअन्नमादायसोदकम् ॥ १७ ॥ स्वंप्रियंवीक्षतेराज्ञामुदितैर्लक्षणैर्युतम् ॥ अन्यादृशंसमावीक्ष्यस्वकान्तंतेजसावृतम् ॥ १८ ॥ दिव्यतेजःसमाक्रान्तंयथासूर्यंदिविस्थितम् ॥ नरमन्यंपरिज्ञायतंपरित्यज्यसाययौ ॥ १९ ॥ व्याधउवाच ॥ एह्येहित्वंप्रियेचात्रकस्मान्मांत्वंनपश्यसि ॥ क्षुधयापीडयमानोऽहंत्वामहंचावलोकये ॥ २० ॥ तस्यवाक्यंसमाकर्ण्यशीघ्रंव्याधीसमागता ॥ भर्तुःपार्श्वंसमासाद्यविस्मितासाभवत्तदा ॥ २१ ॥ कोऽयंतेजःसमाचारोदेवोऽयंमांसमाह्वयेत् ॥ तमुवाचततोव्याधीभर्तारंदीप्ततेजसम् ॥ अत्रकिंतेकृतंवीरभवान्कोदिव्यलक्षणः ॥ २२ ॥ समुज्ज्वलउवाच ॥ एवमाभाषितोव्याध्याव्याधःप्रियामभाषत ॥ अहंतेवल्लभःकान्तेभवतीचममप्रिया ॥ २३ ॥ कस्मात्त्वंमांनजानासिकथंशङ्काप्रवर्तते ॥ क्षुधयापीडयमानेनपयश्चान्नंप्रतीक्ष्यते ॥ २४ ॥ व्याध्युवाच ॥ बर्बरःकृष्णवर्णश्चरक्ताक्षःकृष्णकञ्चुकः ॥ ईदृशश्चास्तिमेभर्तासर्वसत्त्वभयङ्करः ॥ २५ ॥ भवान्कोदिव्यदेहस्तुप्रियेत्युक्त्वासमाह्वयेत् ॥ एषमेसंशयोजातोवदसत्यंममा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्रतः ॥ २६ ॥ कुलंनामस्वकंग्रामंक्रीडांलिङ्गंसुतंसुताम् ॥ समाचष्टप्रियाग्रेतुतस्याःप्रत्ययहेतवे ॥ २७ ॥ प्रत्युवाचस्वभर्तारंसाव्याधीहृष्टमानसा ॥
कस्मात्तेईदृशःकायःश्वेतकञ्चुकधारकः ॥ २८ ॥ कथंजातःसमाचक्ष्वममाश्चर्यंप्रवर्तते ॥ २९ ॥ समुज्ज्वलउवाच ॥ एवंसम्पृच्छमानस्तुभार्यया
मृगघातकः ॥ प्रत्युवाचततःश्रुत्वातांप्रियांप्रश्रयान्विताम् ॥ ३० ॥ नर्मदाउत्तरेकूलेसङ्गमश्चास्तिसुव्रते ॥ आतपेनाकुलोजीवोममजातोऽतिसुप्रिये
॥ ३१ ॥ अस्मिन्वैसङ्गमेकान्तेश्रमश्रान्तोहिसत्वरः ॥ गतःस्नात्वाजलंपीत्वापश्चाच्चाहंसमागतः ॥ ३२ ॥ तदाप्रभृतिमेकायईदृशस्तेजसावृतः
सञ्जातोवस्त्रसंयुक्तःकञ्चुकःशुभ्रतांगतः ॥ ३३ ॥ पूर्वोक्तलिङ्गसंस्थानैःकुलैःस्थानेनवैतथा ॥ स्वप्रियंलक्षयित्वातुज्ञात्वापुण्यस्यसम्भवम् ॥ ३४ ॥
प्रत्युवाचाथभर्तारंसङ्गमंममदर्शय ॥ तवपश्चात्प्रदास्यामिभोजनंपानसंयुतम् ॥ ३५ ॥ इत्युक्तःप्रिययाव्याधःसत्वरेणजगामह ॥ सङ्गमोदर्शितस्ते
नततोऽग्रेपापनाशनः ॥ ३६ ॥ समुड्डीनामहाभागपक्षिणोलघुविक्रमाः ॥ तयासार्द्धंययुःसर्वैरेवासङ्गमसुत्तमम् ॥ ३७ ॥ तेषांतुवीक्षमाणानांपक्षि
णांममपश्यतः ॥ तयाहिस्नापितोभर्तापुनःस्नाताहिसास्वयम् ॥ ३८ ॥ दिव्यदेहधरौचोभौदिव्यकान्तिसमन्वितौ ॥ सञ्जातौपक्षिणांश्रेष्ठदिव्यवस्त्रा
नुलेपनौ ॥ ३९ ॥ दिव्यमालाम्बरधरौदिव्यगन्धानुलेपनौ ॥ वैष्णवंयानमासाद्यमुनिगन्धर्वपूजितौ ॥ ४० ॥ गतौतौवैष्णवंलोकंवैष्णवैःपरिपूजि
तौ ॥ स्तूयमानौमहात्मानौदम्पतीदृष्टवानहम् ॥ ४१ ॥ व्रजन्तौस्वर्गमार्गेणकूजन्तेपक्षिणस्तथा ॥ तीर्थराजंपरंदृष्ट्वाहर्षव्यक्ताक्षरैस्तदा ॥ ४२ ॥
चत्वारःकृष्णहंसास्तेसङ्गमेपापनाशने ॥ स्नात्वावैभावशुद्धास्तेप्राप्ताउज्ज्वलतांपुनः ॥ ४३ ॥ स्नात्वापीत्वाजलंतेतुपुनर्बहिर्विनिर्गताः ॥ तावत्यस्ताः
स्त्रियःकृष्णामृतास्तत्स्नानमात्रतः ॥ ४४ ॥ क्रन्दमानाविचेष्टन्त्योहाहाकारविकम्पिताः ॥ यमलोकंगतास्तास्तुतातदृष्टामयातदा ॥ ४५ ॥
उड्डीनास्तुततोहंसाःस्वस्थानंप्रतिजग्मिरे ॥ एवंतातमयादृष्टंप्रत्यक्षंकथितंतव ॥ ४६ ॥ कृष्णपक्षामहाकायाधार्तराष्ट्रास्तुताःस्त्रियः ॥ कथ
यस्वप्रसादेनकेभविष्यन्तिवैपितः ॥ ४७ ॥ निर्गतान्मानसान्मध्याद्धार्तराष्ट्रान्वदस्वमे ॥ केभविष्यन्तितेतातकथयत्वंतुसाम्प्रतम् ॥ ४८ ॥
कस्मात्सुकृष्णतांप्राप्ताहंसाःशुद्धाश्चतेपुनः ॥ सञ्जातास्तत्क्षणात्तातकस्मान्मृतास्तुताःस्त्रियः ॥ ४९ ॥ एवंमेसंशयस्तातसञ्जातोदारुणोहृदि ॥
छेत्तुमर्हसिअद्यैवभवाञ्ज्ञानविचक्षणः ॥ ५० ॥ प्रसादसुमुखोभूत्वाप्रणतस्यसदैवमे ॥ एवंसम्भाष्यपितरंविररामसमुज्ज्वलः ॥ ततःप्रवक्तुमारे
भेसशुकःकुञ्जलाभिधः ॥ ५१ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेगुरुतीर्थवर्णनेच्यवनचरित्रेएकोननवतितमोऽध्यायः ॥ ८९ ॥ विष्णु
रुवाच ॥ एवमाकर्ण्यतत्सर्वंसमुज्ज्वलस्यभाषितम् ॥ कुञ्जलःसहिधर्मात्माप्रत्युवाचसुतंप्रति ॥ १ ॥ कुञ्जलउवाच ॥ सम्प्रवक्ष्याम्यहंतात

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रूयतांस्थिरमानसः ॥ सर्वसन्देहविध्वंसंचरित्रंपापनाशनम् ॥ २ ॥ इन्द्रलोकेप्रववृतेसंवादोदेवकौतुकः ॥ सभायांतस्यदेवस्यइन्द्रस्यापिम
हात्मनः ॥ ३ ॥ देवंद्रष्टुंसहस्राक्षंनारदस्त्वरितंययौ ॥ समागतंसहस्राक्षःसूर्यतेजःसमप्रभम् ॥ ४ ॥ तंदृष्ट्वाहर्षमायातःसमुत्थायम
हामतिः ॥ ददावर्घंचपाद्यंचभक्त्याप्रणतमानसः ॥ ५ ॥ बद्धाञ्जलिपुटोभूत्वाप्रणाममकरोत्तदा ॥ आसनेकोमलेपुण्येविनिवेश्यद्विजोत्तमम्
॥ ६ ॥ पप्रच्छप्रणतोभूत्वाश्रद्धयापरयायुतः ॥ कस्माच्चागमनंतेऽद्यकारणंवदसाम्प्रतम् ॥ ७ ॥ इत्युक्तोदेवराजेनप्रत्युवाचमहामुनिः ॥ भव
न्तंद्रष्टुमायातःपृथिव्यास्तुपुरन्दर ॥ ८ ॥ स्नात्वापुण्यप्रदेशेषुतीर्थेषुचसुश्रद्धया ॥ देवान्पितॄन्समभ्यर्च्यदृष्ट्वातीर्थान्यनेकशः ॥ ९ ॥ एतत्ते
सर्वमाख्यातंयत्त्वयापृच्छितंपुरा॥ १० ॥ देवेन्द्रउवाच ॥ दृष्टानिपुण्यतीर्थानिसुक्षेत्राणित्वयामुने ॥ किंतीर्थंप्राप्यमुच्येतब्रह्मघ्नोब्रह्महत्यया ॥ ११ ॥
सुरापोमुच्यतेपापाद्गोघ्नोहेमापहारकः ॥ स्वामिद्रोहान्महाभागनारीहन्ताकथंसुखी॥ १२ ॥ नारदउवाच ॥यानिकानिचतीर्थानिगयादीनिसुरेश्वर ॥
तेषांनैवप्रजानामिविशेषंपापनाशनम् ॥ १३ ॥ सुपुण्यानिसुदिव्यानिपापघ्नानिसमानिच ॥ सर्वाण्येवसुतीर्थानिजानाम्यहंपुरन्दर ॥ १४ ॥ अविशे
षंविशेषंवैनैवजानामिसाम्प्रतम् ॥ प्रत्ययंक्रियतांदेवतीर्थानांगतिदायकम् ॥ १५ ॥ एवमाकर्ण्यतद्वाक्यंनारदस्यमहात्मनः ॥ समाहूतानिचेन्द्रेण
तीर्थानिभूगतानिच ॥ १६ ॥ मूर्तिमन्तिचदिव्यानिसमायातानिशासनात् ॥ बद्धाञ्जलीनिदिव्यानिभूषितानिसुभूषणः ॥ १७ ॥ दिव्याम्बराणि
स्निग्धानितेजोवन्तिचसुव्रत ॥ स्त्रीपुंसोश्चस्वरूपाणिकृतानिचविशेषतः ॥ १८ ॥ हंसचन्द्रप्रकाशानिदिव्यरूपधराणिच ॥ मुक्ताफलस्यवर्णेनप्रभा
सन्तेनरेश्वर ॥ १९ ॥ तप्तकाञ्चनवर्णानिसारुण्यानिचतत्रवै ॥ कान्त्याशुक्लसुपीतानिप्रभावन्तिसभान्तरे ॥ २० ॥ कानिपद्मनिभान्येवमूर्तिमन्ति
चतानितु ॥ सूर्यतेजःप्रकाशानितडित्तेजःसमानिच ॥ २१ ॥ पावकाभानिचान्यानिप्रभासन्तेसभान्तरे ॥ सर्वाभरणशोभाढ्यैःप्रशोभन्तेनरेश्वर
॥ २२ ॥ हारकङ्कणकेयूरमालाभिस्तुसुचन्दनैः॥दिव्यचन्दनदिग्धानिसुरभीणिगुरूणिच ॥२३॥ कमण्डलुकराण्येवआयातानिसभान्तरे॥ गङ्गाचन
र्मदापुण्याचन्द्रभागासरस्वती ॥ २४॥ देविकाविम्बिकाकुब्जाकुञ्जलामञ्जुलाश्रुता ॥ रम्भाभानुमतीपुण्यापाराचैवसुघर्घरा ॥२५॥ शोणाचसिन्धु
सौवीराकावेरीकपिलातथा ॥ कुमुदावेदनदीपुण्यासुपुण्याचमहेश्वरी ॥ २६ ॥ चर्मण्वतीतथाख्यातालोपाचान्यासुकौशिकी ॥ सुहंसीहंसपा
दाचहंसवेगामनोरथा ॥ २७ ॥ सुरुथास्वारुणावेगाभद्रवेणासुपद्मिनी ॥ वाहिनीसरघाचान्यापुण्याचान्यापुलिन्दिका ॥ २८ ॥ हेमामनोर
थादिव्याचन्द्रिकावेदसङ्क्रमा ॥ ज्वालाहुताशनीस्वाहाकालाचैवकपिञ्जला ॥ २९ ॥ स्वधासुकालाकालिङ्गागम्भीराहिमवाहिनी ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवैद्रीचीवीरवाहालक्षहोमाअघापहा ॥३०॥ पाराशरीहेमगर्भासुभद्रावसुपुत्रिका ॥ एतानद्योमहापुण्यामूर्तिमत्योनरेश्वर ॥ ३१ ॥ सर्वाभरणशोभा
व्याःकुम्भहस्ताःसुपूजिताः ॥ प्रयागःपुष्करश्चैवसर्वतीर्थमनोरमः ॥३२॥ वाराणसीमहापुण्याब्रह्महत्याव्यपोहिनी ॥ द्वारावतीप्रभासश्चअवन्तीनैमि
षस्तथा ॥३३॥ चंण्डकश्चमहारत्नोमहेश्वरकलेश्वरौ ॥ कलिञ्जरोब्रह्मक्षेत्रंमाथुरोमानवाहकः ॥३४॥ मायाकान्तीतथान्यानिदिव्यानिविविधानि
च ॥ अष्टषष्टिःसुतीर्थानिनदीनांशतकोटयः ॥३५॥ गोदावरीमुखाःसर्वाःसमायातास्तदाज्ञया ॥ द्वीपानांतुसमस्तानिसुतीर्थानिमहान्तिच ॥३६॥
मूर्तिलिङ्गधराण्येवसहस्राक्षंसुरेश्वरम् ॥ समाजग्मुःसमस्तानितदादेशकराणिच ॥३७॥ प्रणेमुर्देवदेवेशंनतशीर्षाणिसर्वशः ॥ तैःप्रोक्तंतुमहातीर्थैर्देवरा
जस्तुसादरम् ॥ ३८ ॥ कस्मात्त्वयासमाहूतादेवदेववदस्वनः ॥ ब्रूहिनःकारणंसर्वंनमस्तुभ्यंसुराधिप ॥ ३९ ॥ एवमाकर्ण्यतद्वाक्यंदेवराजोऽभ्यभा
षत ॥ कःसमर्थोमहातीर्थोब्रह्महत्यांव्यपोहितुम् ॥ ४० ॥ गोवधाख्यंमहापापंस्त्रीवधाख्यमनुत्तमम् ॥ स्वामिद्रोहाच्चसम्भूतंसुरापानाच्चदारुणम् ॥
॥ ४१ ॥ हेमस्तेयात्तथाजातंगुरुनिन्दासमुद्भवम् ॥ भ्रूणहत्यांमहाघोरांकःसमर्थोनिवार्तितुम् ॥४२॥ राजद्रोहान्महापापंबहुपीडाप्रदायकम् ॥ मित्र
द्रोहात्तथाचान्यदन्यद्विश्वासघातकम् ॥ ४३ ॥ देवभेदंतथाचान्यंलिङ्गभेदमतःपरम् ॥ वृत्तिच्छेदंचविप्राणांगोप्रचारप्रणाशनम् ॥ ४४ ॥ आगा
रदहनंचान्यद्ब्रह्मदीपनकंतथा ॥ षोडशैतेमहापापाअगम्यागमनंतथा ॥ ४५ ॥ स्वामित्यागात्समुद्भूतंरणस्थानात्पलायनात् ॥ एतानिनाशयेत्को
वैसमर्थस्तीर्थउत्तमः ॥ ४६ ॥ समर्थोभवतांमध्येप्रायश्चित्तंविनाध्रुवम् ॥ पश्यतांदेवतानांचनारदस्यचपश्यतः ॥ ४७ ॥ ब्रुवन्तुसर्वेसञ्चिन्त्यवि
चार्यैवंसुनिश्चितम् ॥ एवमुक्तेशुभेवाक्येदेवराज्ञामहात्मना ॥ संमन्त्र्यतीर्थराजेनप्रोचुःशक्रंसभागतम् ॥ ४८ ॥ तीर्थान्यूचुः ॥ श्रूयतामभिधा
यामोदेवराजनमोऽस्तुते ॥ सन्तिवैसर्वतीर्थानिसर्वपापहराणिच ॥ ४९ ॥ ब्रह्महत्यादिकान्यांश्चत्वयाप्रोक्तान्सुरेश्वर ॥ महाघोरान्सुदीप्तांश्चनाशि
तुंनैवशक्नुमः ॥ ५० ॥ प्रयागःपुष्करश्चैवअर्घतीर्थमनुत्तमम् ॥ वाराणसीमहाभागसमर्थापापनाशिनी ॥५१॥ महापातकनाशार्थेचत्वारोऽमि
तविक्रमाः ॥ उपपातकनाशार्थंचत्वारोऽमितमितविक्रमाः ॥ ५२ ॥ सृष्टाधात्राचदेवेन्द्रपुष्कराद्यामहाबलाः ॥ एवमाकर्ण्यतद्वाक्यंतीर्थानांसुरराट्
ततः ॥ ५३ ॥ हर्षेणमहताविष्टस्तेषांस्तोत्रंचकारसः ॥ ५४ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेगुरुतीर्थमाहात्म्येच्यवनचरित्रेनवतितमो
ऽध्यायः ॥ ९० ॥ कुञ्जलउवाच ॥ ब्रह्महत्याभिभूतस्तुसहस्राक्षोयदापुरा ॥ गौतमस्यप्रियासङ्गादगम्यागमनंमहत् ॥ १ ॥ सञ्जातंपातकंतस्यत्य

१ 'देवद्रवी' इ० पा० । २ 'दण्डकश्च' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्तोदेवैश्चब्राह्मणैः ॥ सहस्राक्षस्तपस्तेपेनिरालम्बोनिराश्रयः ॥ २ ॥ तपोऽन्तेदेवताःसर्वाऋषयोयक्षकिन्नराः ॥ देवराजस्यपूजार्थमभिषेकंप्रचक्रिरे ॥ ३ ॥ देशंमालवकंनीत्वादेवराजंसुतोत्तम ॥ चक्रेस्नानंमहाभागकुम्भैरुदकपूरितैः ॥४॥ स्नापितुंप्रथमंनीतोवाराणास्यांस्वयंततः ॥ प्रयागेतुसहस्राक्षअर्घतीर्थेततःपुनः ॥ ५ ॥ पुष्करेणमहात्माऽसौस्नापितःस्वयमेवहि ॥ ब्रह्मादिभिःसुरैःसर्वैर्मुनिवृन्दैर्द्विजोत्तम ॥ ६ ॥ नागैर्यक्षैर्नागसर्पैर्गन्धर्वैस्तुसकिन्नरैः ॥ स्नापितोदेवराजस्तुवेदमन्त्रैःसुसंस्कृतः ॥ ७ ॥ मुनिभिःसर्वपापघ्नैस्तस्मिन्कालेद्विजोत्तम ॥ शुद्धेतस्मिन्महाभागेसहस्राक्षेमहात्मनि ॥ ८ ॥ ब्रह्महत्यागतातस्यअगम्यागमनंतथा ॥ ब्रह्महत्याततोनष्टाअगम्यागमनेनच ॥ ९ ॥ पापेनतेनघोरेणसार्द्धमिन्द्रस्यभूतले ॥ सुप्रसन्नःसहस्राक्षस्तीर्थेभ्योहिवरंददौ ॥ १० ॥ भवन्तस्तीर्थराजानोभविष्यथनसंशयः ॥ मत्प्रसादात्पवित्राश्चयस्मादहंविमोक्षितः ॥ ११ ॥ सुघोरात्किल्बिषादत्रयुष्माभिर्विमलैरहम् ॥ एवंतेभ्योवरंदत्त्वामालवायवरंददौ ॥ १२ ॥ यस्मात्त्वयामलंमेऽद्यविधृतंश्रमदायकम् ॥ तस्मात्त्वमन्नपानैश्चधनधान्यैरलङ्कृतः ॥ १३ ॥ भविष्यसिनसन्देहोमत्प्रसादान्नसंशयः॥ सुदुष्कालैर्विनात्वंतुभविष्यसिसुपुण्यवान् ॥ १४ ॥ एवंतस्मैवरंदत्त्वादेवराजःपुरन्दरः ॥ क्षेत्राणिसर्वतीर्थानिदेशोमालवकस्तथा ॥ १५ ॥ आखण्डलेनसार्द्धंतेस्वस्थानंप्रतिजग्मिरे ॥ तदाप्रभृतिचत्वारःप्रयागःपुष्करस्तथा ॥ १६ ॥ वाराणसीचार्घतीर्थंप्राप्ताराजत्वमुत्तमम् ॥ १७ ॥ अस्तिपञ्चालदेशेषुविदुरोनामक्षत्रियः ॥ तेनमोहप्रसङ्गेनब्राह्मणोनिहतःपुरा॥ १८ ॥ शिखासूत्रविहीनस्तुतिलकेनविवर्जितः ॥ भिक्षार्थमटतेसोऽपिब्रह्मघ्नोऽहंसमागतः ॥ १९॥ ब्रह्मघ्नायसुरापायभिक्षाचान्नंप्रदीयताम् ॥ गृहेष्वेवंसमस्तेषुभ्रमतेयाचतेपुरा ॥ २० ॥ एवंसर्वेषुतीर्थेषुअटित्वैवसमागतः ॥ब्रह्महत्यानतस्यापिप्रयातिद्विजसत्तम ॥२१॥ वृक्षच्छायांसमाश्रित्यदह्यमानेनचेतसा ॥ संस्थितोविदुरःपापोदुःखशोकसमन्वितः ॥ २२ ॥ चन्द्रशर्माततोविप्रोमहामोहेनपीडितः ॥ न्यवसन्मागधेदेशेगुरुघातकरश्वसः ॥ २३ ॥ स्वजनैर्बन्धुवर्गैश्चपरित्यक्तोदुरात्मवान् ॥ सहितत्रसमायातोयत्रासौविदुरःस्थितः ॥ २४ ॥ शिखासूत्रविहीनस्तुविप्रलिङ्गैर्विवर्जितः ॥ तदासौपृच्छितस्तेनविदुरेणदुरात्मना ॥ २५ ॥ भवान्कोहिसमायातोदुर्भगोदग्धमानसः ॥ विप्रलिङ्गविहीनस्तुकस्मात्त्वंभ्रमसेमहीम् ॥ २६ ॥ विदुरेणोक्तमात्रस्तुचन्द्रशर्माद्विजाधमः ॥ आचष्टेसर्वमेवापियथापूर्वकृतंस्वकम् ॥ २७ ॥ पातकंचमहाघोरंवसताचगुरोर्गृहे ॥ महामोहगतेनापिक्रोधेनाकुलितेनच ॥ २८ ॥ गुरोर्घातःकृतःपूर्वंतेनदग्धोऽस्मिसाम्प्रतम् ॥ चन्द्रशर्माचवृत्तान्तमुक्त्वासर्वमपृच्छत ॥ २९ ॥ भवान्कोहिसुदुःखात्मावृक्षच्छायांसमाश्रितः ॥ विदुरेणसमासेनआत्मपापंनिवेदितम् ॥ ३० ॥ अथकश्चिद्द्विजःप्राप्तस्तृतीयःश्रमकर्षितः ॥ वेदशर्मेतिवैनामब

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हुपातकसञ्चयः ॥ ३१ ॥ द्वाभ्यामपिसुसम्पृष्टःकोभवान्दुःखिताकृतिः॥कस्माद्भ्रमसिवैपृथ्वींवदभावंत्वमात्मनः ॥ ३२ ॥ वेदशर्माततःसर्वमात्मचे ष्टितमेवच ॥ कथयामासताभ्यांवैह्यगम्यागमनंकृतम् ॥ ३३ ॥ धिक्कृतःसर्वलोकैश्चअन्यैःस्वजनबान्धवैः ॥ तेनपापेनसंछिप्तोभ्रमाम्येवंमहीमिमाम् ॥ ३४ ॥ वञ्जुलोनामवैश्योऽथसुरापायीसमागतः ॥ सगोघ्नश्चविशेषेणतैश्चपृष्टोयथापुरा ॥३५॥ तेनआवेदितंसर्वंपातकंयत्पुराकृतम् ॥ तैराकर्णि तमन्यैश्चसर्वंतस्यप्रभाषितम् ॥ ३६ ॥ एवंचत्वारःपापिष्ठाएकस्थानंसमागताः ॥ कःकस्यापिनसम्पर्कंभोजनाच्छादनेनच ॥ ३७ ॥ करोतिचमहा भागवार्ताचक्रुःपरस्परम् ॥ नविशन्त्यासनेचैकेनस्वपन्त्येकसंस्तरे ॥ ३८ ॥ एवंदुःखसमाविष्टानानातीर्थेषुवैगताः ॥ तेषांतुपापकाघोराननश्यन्ति चनन्दन ॥ ३९ ॥ सामर्थ्यंनास्तितीर्थानांमहापातकनाशने ॥ विदुराद्यास्ततस्तेतुगताःकालञ्जरंगिरिम् ॥ ४० ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनो पाख्यानेगुरुतीर्थेच्यवनचरित्रेएकनवतितमोऽध्यायः ॥ ९१ ॥ कुञ्जलउवाच॥कालञ्जरंसमासाद्यनिवसन्तिसुदुःखिताः ॥ महापापैस्तुसन्दग्धाहाहाभू ताविचेतनाः ॥ १ ॥ तत्रकश्चित्समायातःसिद्धश्चैवमहायशाः ॥ तेनपृष्टाःसुदुःखार्ताभवन्तःकेनदुःखिताः ॥२॥ सतैःप्रोक्तोमहाप्राज्ञःसर्वज्ञानविशा रदः ॥ तेषांज्ञात्वामहापापंकृपांचक्रेसुपुण्यभाक् ॥ ३ ॥ सिद्धउवाच ॥ अमासोमसमायोगेप्रयागःपुष्करश्चयः ॥ अर्घतीर्थंतृतीयंतुवाराणसीचतुर्थि का ॥ ४ ॥ गच्छन्तुतत्रवैयूयंचत्वारःपातकाविलाः ॥ गङ्गाम्भसियदास्नातास्तदामुक्ताभविष्यथ ॥ ५ ॥ पातकेभ्योनसन्देहोनिर्मलत्वंगमिष्यथ ॥ आदिष्टास्तेनवैसर्वेप्रणेमुस्तंप्रयत्नतः ॥ ६ ॥ कालञ्जरात्ततोजग्मुःसत्वरंपापपीडिताः ॥ वाराणसींसमासाद्यस्नात्वाचैवद्विजोत्तमाः ॥ ७ ॥ प्रयागंपु ष्करंचैवअर्घतीर्थंतुसत्तम ॥ अमासोमंसुसम्प्राप्यजग्मुस्तेचमहापुरीम् ॥ ८ ॥ विदुरश्चन्द्रशर्माचवेदशर्मातृतीयकः ॥ वैश्योवञ्जुलकश्चैवसुरापःपाप चेतनः ॥ ९ ॥ तस्मिन्पर्वणिसम्प्राप्तेस्नातागङ्गाम्भसिद्विज ॥ स्नानमात्रेणमुक्तास्तुगोवधाद्यैश्चकिल्बिषैः ॥ १० ॥ ब्रह्महत्यागुरुहत्यासुरापानादिपात कैः ॥ लिप्तानितानितीर्थानिपरिभ्रमन्तिमेदिनीम् ॥११॥ पुष्करश्चार्घतीर्थस्तुप्रयागःपापनाशनः ॥ वाराणसीचतुर्थीतुलिप्तापापैर्द्विजोत्तम ॥ १२ ॥ कृष्णत्वंपेदिरेसर्वेहंसरूपेणबभ्रमुः ॥ सर्वेष्वेवसुतीर्थेषुस्नानंचक्रुर्द्विजोत्तमाः ॥१३॥ कृष्णत्वंनैवगच्छेतेतेषांपापेनचागतम् ॥ सुतीर्थेषुमहाराजस्ना ताःसर्वेषुवैपुनः ॥ १४ ॥ यंयंतीर्थंप्रयान्त्येतेसर्वेतीर्थाद्विजोत्तम ॥ हंसरूपेणवैयान्तितैःसार्द्धंतुसुदुःखिताः ॥ १५ ॥ भार्याःपातकरूपाश्चभ्रमन्तिप रितस्तथा ॥ अष्टषष्टिसुतीर्थानिहंसरूपेणबभ्रमुः ॥ १६ ॥ तैःसार्द्धंसुमहाराजमहातीर्थैःसमंपुनः ॥ मानसंचागतास्तेचपातकाकुलमानसाः ॥ १७ ॥ तत्रस्नातामहाराजनजहातिचपातकः ॥ लज्जयाविष्टमनसामानसोहंसरूपधृक् ॥ १८ ॥ सञ्जातःकृष्णकायस्तुयंत्वंवैदृष्टवान्पुरा ॥ रेवातीरंततोज

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्मुरुत्तरंपापनाशनम् ॥ १९ ॥ कुब्जायाःसङ्गमेतेतुसुरसिद्धनिषेविते ॥ स्नानमात्रेणमुक्तास्तेपापेभ्योद्विजसत्तम ॥ २० ॥ विहायवर्णमेवैतंशुद्धत्वंप्रतिजग्मिरे ॥ यंयंतीर्थंप्रयान्त्येतेहंसाःस्नानंप्रचक्रमुः ॥ २१ ॥ जहसुस्ताःस्त्रियोदृष्ट्वापातकंनैवगच्छति ॥ तोयानलेनकुब्जायाःपातकंवरमेवच ॥ २२ ॥ भस्मावशेषंसञ्जातंतदामृतास्तुताःस्त्रियः ॥ ब्रह्महत्यागुरोर्हत्यासुरापानागमागमाः ॥ २३ ॥ भस्मीभूतास्तुसञ्जातारेवायाःकुब्जयाहताः ॥ तास्तुहतामहाभागयामृतास्तुसरित्तटे ॥ २४ ॥ अष्टपष्टिसुतीर्थानांहंसरूपेणतानितु ॥ सार्द्धंहंसःसमायातोविद्धितंत्त्वतुमानसम् ॥ २५ ॥ चत्वारःकृष्णहंसाश्वेतेषांनामानिमेशृणु ॥ प्रयागःपुष्करश्चैवअर्घतीर्थमनुत्तमम् ॥ २६ ॥ वाराणसीचतुर्थीचचत्वारःपापनाशनाः ॥ ब्रह्महत्याभिभूतानि चत्वारिपरिबभ्रमुः ॥ २७ ॥ तीर्थान्येतानिदुःखेनतीर्थेषुचमहामते ॥ नगतंपातकंघोरंतेषांतुभ्रमतांसुत ॥ २८ ॥ कुब्जायाःसङ्गमेशुद्धाविमुक्ताःकिल्बिषात्किल ॥ तीर्थानामेवसर्वेषांपुण्यानामिहसंमतः ॥ २९ ॥ राजाप्रयागःसञ्जातइन्द्रस्यपुरतःकिल ॥ तावद्गर्जन्तुतीर्थानियावद्रेवानदृश्यते ॥ ३० ॥ ब्रह्महत्यादिपापानांविनाशायप्रतिष्ठिता ॥ कपिलासङ्गमे[1]पुण्येरेवायाःसङ्गमेतथा ॥ ३१ ॥ मेघनादसमायोगेतथाचैवोरुसङ्गमे ॥ महापुण्यामहाधन्यारेवासर्वत्रदुर्लभा ॥ ३२ ॥ साचोङ्कारेभृगुक्षेत्रेनर्मदाकुब्जसङ्गमे ॥ दुष्प्राप्यामानवैरेवामाहिष्मत्यांसुरोत्तमैः ॥ ३३ ॥ विटङ्कासङ्गमेपुण्याश्रीकण्ठेमङ्गलेश्वरे[2] ॥ सर्वत्रदुर्लभारेवासुरपुण्यसमाकुला ॥ ३४ ॥ तीर्थमातामहादेवीअघराशिविनाशिनी ॥ उभयोःकूलयोर्मध्येयत्रतत्रसुखीनरः ॥ ३५ ॥ अश्वमेधफलंभुङ्क्तेस्नानेनैकेनमानवः ॥ एतत्तेसर्वमाख्यातंयत्त्वयापरिपृच्छितम् ॥ ३६ ॥ सर्वपापापहंपुण्यंगतिदंचापिशृण्वताम् ॥ एवमुक्त्वामहाप्राज्ञतृतीयंपुत्रमब्रवीत् ॥ ३७ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेगुरुतीर्थेच्यवनचरित्रेद्विनवतितमोऽध्यायः ॥ ९२ ॥ कुञ्जल उवाच ॥ किंविज्वलत्वयादृष्टमपूर्वंभ्रमतामहीम् ॥ आश्चर्येणसमायुक्तंतन्मेकथयसुव्रत ॥ १ ॥ इतःप्रयासिकंदेशमाहारार्थंतुसोद्यमः ॥ यद्यद्दृष्टंत्वयाचित्रंसमाख्याहिसुतोत्तम ॥ २ ॥ विज्वलउवाच ॥ अस्तिमेरुगिरेःपृष्ठेआनन्दंनामकाननम् ॥ दिव्यवृक्षैःसमाकीर्णफलपुष्पमयैःसदा ॥ ३ ॥ देववृन्दैःसमाकीर्णंमुनिसिद्धसमन्वितम् ॥ अप्सरोभिःसुरूपाभिर्गन्धर्वैःकिन्नरोरगैः ॥ ४ ॥ वापीकूपतडागैश्चनदीप्रस्रवणैस्तथा ॥ आनन्दकाननंपुण्यंदिव्यभावैःप्रभासते ॥५॥ विमानैःकोटिसङ्ख्यैश्चहंसकुन्देन्दुसन्निभैः ॥ गीतकोलाहलैरम्यैर्मेघध्वनिनिनादितम् ॥६॥ षट्पदानांनिनादेनसर्वत्रमधुरायते ॥ चन्दनैश्चूतवृक्षैश्चचम्पकैःपुष्पितैर्वृतम् ॥ ७ ॥ नानावृक्षैःप्रभात्येवमानन्दवनमुत्तमम् ॥ नानापक्षिनिनादेनबहुकोलाहलान्वितम् ॥ ८ ॥

१ 'वेदिकासङ्गमे' इ० पा० । २ 'कीटकेमण्डलेश्वरे' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमानन्दनंदृष्टंमयातत्रसुशोभनम् ॥विमलंचसरस्तातशोभतेसागरोपमम् ॥ ९ ॥ सम्पूर्णंपुण्यतोयेनपद्मसौगन्धिकैःशुभैः ॥ जलजैस्तुसमाकीर्णंहंस
कारण्डवान्वितम् ॥ १० ॥ एवमासीत्सरस्तस्यसुमध्येकाननस्यहि ॥ देवगन्धर्वसम्बाधैर्मुनिवृन्दैरलङ्कृतम् ॥ ११ ॥ किन्नरोरगगन्धर्वैश्चारणैश्चसु
शोभते ॥ तत्राश्चर्यंमयादृष्टंवक्तुंतातनशक्यते ॥ १२ ॥ विमानेनापिदिव्येनकलशैरुपशोभते ॥ छत्रदण्डपताकाभीराजमानेनसत्तम ॥ १३ ॥ सर्व
भोगाविलेनापिगीयमानेऽथकिन्नरैः ॥ गन्धर्वैरप्सरोभिश्चशोभमानोऽथसुव्रत ॥ १४ ॥ स्तूयमानोमहासिद्धऋषिभिस्तत्त्ववेदिभिः ॥ रूपेणाप्रतिमो
लोकेनदृष्टस्तादृशःक्वचित् ॥ १५ ॥ सर्वाभरणशोभाङ्गोदिव्यमालाविशोभितः ॥ महारत्नकृतामालायस्योरसिविराजते ॥ १६ ॥ तत्समीपेस्थिता
चैकानारीदृष्टावरानना ॥ हेमहारैश्चमुक्तानांवलयैःकङ्कणैर्युता॥ १७ ॥दिव्यवस्त्रैश्चगन्धैश्चचन्दनैश्चारुलेपनैः ॥ स्तूयमानोगीयमानःपुरुषस्तत्रचागतः
॥ १८ ॥ रतिरूपावरारोहापीनश्रोणिपयोधरा ॥ सर्वाभरणशोभाङ्गीतादृशीरूपसम्पदा ॥ १९ ॥ द्वावेतौतौमयादृष्टौविमानेनापिचागतौ ॥ रूपला
वण्यमाधुर्यौसर्वशोभासमाविलौ ॥ २० ॥ समुत्तीर्णौविमानात्तावागतौसरसोऽन्तिके ॥ स्नातौतातमहात्मानौस्त्रीपुंसौकमलेक्षणौ ॥ २१ ॥ प्रगृ
ह्यतौमहाशस्त्रौदम्पतीतुपरस्परम् ॥ तादृशौचशवौतत्रपतितौसरसस्तटे ॥ २२ ॥ प्रभासेतेतदातौतुस्त्रीपुंसौकमलेक्षणौ ॥ रूपेणापिमहाभागता
दृशावेवतौशवौ ॥२३ ॥ देवरूपोपमस्तातयथापुंसस्तथाशवः॥यथारूपंहितस्यापितादृशस्तत्रदृश्यते ॥ २४ ॥ यथारूपंतुभार्यायास्तथाशवोद्विती
यकः ॥ स्त्रीशवस्यतुयन्मांसंशस्त्रेणोत्कृत्यसाततः ॥ २५ ॥ भक्षतेतस्यमांसानिरक्ताप्लुतानितानितु ॥ पुरुषोभक्षतेतद्वच्छवमांसंसमातुरः
॥ २६ ॥ क्षुधयापीडयमानौतौभक्षेतेपिशितंतयोः ॥ यावत्तृप्तिंसमायातौतावन्मांसंप्रभक्षितम् ॥ २७ ॥ सरस्यथजलंपीत्वासञ्जातौसुखितौ
पितः ॥ कियत्कालंस्थितौतत्रविमानेनगतौपुनः ॥ २८ ॥अन्यद्वेतुस्त्रियौतातमयादृष्टेचतत्रवै ॥ रूपसौभाग्यसम्पन्नेतेस्त्रियौचारुलक्षणे ॥ २९ ॥
ताभ्यांप्रभक्षितंमांसंयदातातमहावने ॥ प्रहसेतेतदातेद्वेहास्यैरट्टाट्टकैःपुनः ॥ ३० ॥ भक्षेतेचस्वमांसानितावेतौपरिनित्यशः ॥ कृत्वास्नानादि
कंमांसंपश्यतोममतत्रहि ॥ ३१ ॥ अन्येस्त्रियौमहाभागरौद्राकारसमन्विते ॥ दंष्ट्राकरालवदनेतत्रैवातिविभीषणे ॥ ३२ ॥ ऊचतुस्तौतदातेतुदे
हिदेहीतिवैपुनः ॥ एवंदृष्टंमयातातवसतावनसन्निधौ ॥ ३३ ॥ नित्यमुक्तौयंभक्ष्यतेतौद्वौतुमांसमेवच ॥ जायेतेचसुसम्पूर्णौकायौचशवयोःपुनः
॥ ३४ ॥ नित्यमुत्तीर्यतावेवंतेचाप्यन्येचवैपितः ॥ कुर्वन्तिसदृशींचेष्टांपूर्वोक्तांममपश्यतः ॥ ३५ ॥ एतदाश्चर्यंसञ्जातंदृष्टंतातमयातदा ॥ भ
वतापृच्छितंतातदृष्टमाश्चर्यमेवच ॥ ३६ ॥ मयाख्यातंतवाग्रेवैसर्वसन्देहकारणम् ॥ कथयस्वप्रसादाच्चप्रीयमाणेनचेतसा ॥ ३७ ॥ विमानेना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गतोयोऽसौस्त्रियासार्द्धंद्विजोत्तम ॥ दिव्यरूपधरोयस्तुसकस्तुकमलेक्षणः ॥ ३८ ॥ काचनारीमहाभागमहामांसंप्रभक्षति ॥ सकश्चाप्यागत
स्तातसाचैवाभ्येत्यभक्षति ॥ ३९ ॥ प्रहसेतेतदातेद्वेस्त्रियौतातवदस्वनः ॥ ऊचतुस्तौतथाचान्यंदेहिदेहीतिवापुनः ॥ ४० ॥ तेद्वेत्वंमेसमाच
क्ष्वमहाभीषणकेस्त्रियौ ॥ एतन्मेसंशयंतातच्छेत्तुमर्हसिसुव्रत ॥ ४१ ॥ एवमुक्त्वामहाराजविररामसचाण्डजः ॥ एवंपृष्टस्तृतीयेनविज्वलेनात्मजे
नसः ॥ ४२ ॥ प्रोवाचसर्ववृत्तान्तंच्यवनस्यापिशृण्वतः ॥ ४३ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेगुरुतीर्थेच्यवनचरित्रेत्रिनवति
तमोऽध्यायः ॥ ९३ ॥ कुञ्जलउवाच ॥ श्रूयतामभिधास्यामितत्सर्वंकारणंसुत ॥ यस्मात्तौतादृशौजातौस्वमांसपरिभक्षकौ ॥ १ ॥ सर्व
त्रकारणंकर्मशुभाशुभंनसंशयः ॥ पुण्येनकर्मणापुत्रनरःसौख्यंप्रभुञ्जति ॥ २ ॥ दुष्कृतंभुञ्जतेचात्रपापयुक्तेनकर्मणा ॥ सूक्ष्मवर्त्मविचार्यैवं
शास्त्रज्ञानेनचक्षुषा ॥३॥ स्थूलधर्मंप्रदृष्ट्वैवसुविचार्यपुनःपुनः ॥ समारभेन्नरःकर्ममनसानिपुणेनच ॥ ४ ॥ समूर्तिकारकःशिल्पीरसमावर्त्तयेद्यथा ॥
अग्नेश्चतेजसापुत्रज्वालाभिश्चसमन्ततः ॥ ५ ॥ द्रवीभूतोभवेद्धातुर्वह्निनातापितःशनैः ॥ यादृशंवत्सभक्ष्यंतुरसपक्वंनिषेच्यते ॥ ६ ॥ तादृशंजाय
तेवत्सरूपंचैवनसंशयः ॥ यादृशंक्रियतेकर्मतादृशंपरिभुज्यते ॥ ७ ॥ कर्मएवप्रधानंयद्दर्पारूपेणवर्त्तते ॥ क्षेत्रेषुयादृशंबीजंवपतेकृषिकारकः ॥ ८ ॥
तादृशंभुञ्जतेतातफलमेवनसंशयः॥यादृशंक्रियतेकर्मतादृशंपरिभुज्यते ॥ ९ ॥ विनाशहेतुःकर्मास्यसर्वेकर्मवशावयम् ॥ कर्मदायादकालोकेकर्मसम्ब
न्धिबान्धवाः ॥ १० ॥ कर्माणिचोदयन्तीहपुरुषंसुखदुःखयोः ॥ सुवर्णंरजतंवापियथारूपंनिषिच्यते ॥ ११ ॥ तथानिषिच्यतेजन्तुःपूर्वकर्मवशा
नुगः ॥ पञ्चैतानीहदृश्यन्तेगर्भस्थस्यैवदेहिनः ॥ १२ ॥ आयुःकर्मचवित्तंचविद्यानिधनमेवच ॥ यथामृत्पिण्डतःकर्त्ताकुरुतेयद्यदिच्छति ॥ १३ ॥
तथाकर्मकृतंचैवकर्त्तारंप्रतिपद्यते ॥ देवत्वमथमानुष्यंपशुत्वंपक्षितांतथा ॥ १४ ॥ तिर्यक्त्वंस्थावरत्वंवायातिजन्तुःस्वकर्मभिः ॥ सएवतुतथाभुङ्क्ते
नित्यंविहितमात्मनः ॥१५ ॥आत्मनाविहितंदुःखमात्मनाविहितंसुखम् ॥ गर्भशय्यामुपादायभुञ्जतेपूर्वदेहिकम् ॥ १६ ॥ पूर्वदेहकृतंकर्मनकश्चित्पु
रुषोत्तमः ॥ बलेनप्रज्ञयावापिसमर्थःकर्तुमन्यथा ॥ १७ ॥ स्वकृतान्येवभुञ्जन्तिदुःखानिचसुखानिच ॥ हेतुतःकारणैर्वापिसोऽहङ्कारेणबाध्यते ॥
॥ १८ ॥ यथाधेनुसहस्रेषुवत्सोविन्दतिमातरम् ॥ तद्वच्छुभाशुभंकर्मकर्तारमनुगच्छति ॥ १९ ॥ उपभोगादृतेयस्यनाशएवनविद्यते ॥ प्राक्तनंबन्ध
नंकर्मकोऽन्यथाकर्तुमर्हति ॥२०॥ सुशीघ्रमनुधावन्तंविधानमनुधावति ॥ शोभतेसन्निपातेनयथाकर्मपुराकृतम् ॥२१॥ उपतिष्ठतितिष्ठन्तंगच्छन्तम
नुगच्छति ॥ करोतिकुर्वतःकर्मच्छायेवानुविधीयते ॥२२॥ यथाछायातपौनित्यंसुसम्बद्धौपरस्परम् ॥ उपसर्गाहिविषयाउपसर्गाजरादयः ॥२३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पीडयन्तिनरंपश्चात्पीडितंपूर्वकर्मणा ॥ येनयत्रोपभोक्तव्यंदुःखंवासुखमेवच ॥ २४ ॥ सतत्रबद्धारज्ज्वेवबलाद्दैवेननीयते ॥ दैवंप्राहुश्चभूतानांसुखदुः
खोपपादनम् ॥२५ ॥ अन्यथाकर्मतच्चिन्त्यंजाग्रतःस्वपतोऽपिवा ॥ अन्यथाह्युद्यतेदैवंबध्यतेचजिघांसति ॥ २६ ॥ शस्त्राग्निविषदुर्गेभ्योरक्षितव्यंसु
रक्षति ॥ यथापृथिव्यांबीजानिवृक्षगुल्मतृणान्यपि ॥ २७ ॥ तथैवात्मनिकर्माणितिष्ठन्तिप्रभवन्तिच ॥ तैलक्षयाद्यथादीपोनिर्वाणमधिगच्छति ॥
॥ २८ ॥ कर्मक्षयात्तथाजन्तोःशरीरंनाशमृच्छति ॥ कर्मक्षयात्तथामृत्युस्तत्त्वविद्भिरुदाहृतम् ॥२९॥ विविधाःप्राणिनांरोगाःस्मृतास्तेषांचहेतवः ॥
तस्मात्तत्त्वप्रधानंतुकर्मएवहिप्राणिनाम् ॥ ३० ॥ यत्पुराक्रियतेकर्मतदिहैवप्रभुज्यते ॥ यत्त्वयाद्दष्टमेवापिपृच्छितंतातसाम्प्रतम् ॥ ३१ ॥ तस्या
र्थंतुमयाप्रोक्तंसुज्ञाततौहिसाम्प्रतम् ॥ आनन्देकाननेद्दष्टंतयोःकर्मसुदारुणम् ॥ ३२ ॥ तयोश्चेष्टांप्रवक्ष्यामिशृणुवत्सप्रभाषतः॥कर्मभूमिरियंतातअ
न्याभोगार्थभूमयः ॥ ३३ ॥ सर्गादीनांमहाप्राज्ञतासुगत्वाह्युसुञ्जति ॥ चौलदेशेमहाप्राज्ञःसुबाहुर्नामभूमिपः ॥ ३४ ॥ रूपवान्गुणवान्धीरःपृथि
व्यांनास्तिताद्दशः ॥ विष्णुभक्तोमहाप्राज्ञोवैष्णवानांचसुप्रियः ॥ ३५ ॥ कर्मणात्रिविधेनापिप्रध्यायन्मधुसूदनम् ॥ अश्वमेधादिकान्यज्ञान्यजेतस
कलान्नृप ॥ ३६ ॥ पुरोधास्तस्यचैवास्तिजैमिनिर्नामब्राह्मणः ॥ सचाहूयसुबाहुंतमिदंवचनमब्रवीत् ॥३७॥ राजन्देहिसुदानानियैःसुखंतुप्रभुज्यते ॥
दानैस्तुतरतेलोकान्दुर्गान्प्रेत्यगतोनरः ॥ ३८ ॥ दानेनसुखमाप्नोतियशःप्राप्नोतिशाश्वतम् ॥ दानेनचातुलाकीर्तिर्जायतेमृत्युमण्डले ॥ ३९ ॥
यावत्कीर्तिःस्थिताचात्रतावत्कर्तादिवंवसेत् ॥ तद्दानंदुष्करंप्राहुर्दातुंनैवप्रशक्यते ॥ ४० ॥ तस्मात्सर्वप्रयत्नेनदातव्यंमानवैःसदा ॥ ४१ ॥ सुबा
हुरुवाच ॥ दानाच्चतपसोवापिद्वयोर्मध्येसुदुष्करम् ॥ किंवामहत्फलंप्रेत्यतन्मेब्रूहिद्विजोत्तम ॥ ४२ ॥ जैमिनिरुवाच ॥ दानान्नदुष्करतरंपृथिव्याम
स्तिकिंचन ॥ राजन्प्रत्यक्षमेवैकंद्दश्यतेलोकसाक्षिकम् ॥ ४३ ॥ परित्यज्यप्रियान्प्राणान्धनार्थंलोभमोहिताः ॥ प्रविशन्तिनरालोकेसमुद्रमटवींतथा
॥ ४४ ॥ सेवामन्येप्रपद्यन्तेश्ववृत्तिरितियास्थिता ॥ हिंसाप्रायांबहुक्लेशांकृषिंचैवतथापुरा ॥ ४५ ॥ तस्यदुःखार्जितस्यापिप्राणेभ्योऽपिगरीय
सः ॥ अर्थस्यपुरुषव्याघ्रपरित्यागःसुदुष्करः ॥ ४६ ॥ विशेषतोमहाराजतस्यन्यायार्जितस्यच ॥ श्रद्धयाविधिवत्पात्रेदत्तस्यान्तोनविद्यते
॥ ४७ ॥ श्रद्धाधर्मसुतादेवीपावनीविश्वतारिणी ॥ सावित्रीप्रसवित्रीचसंसारार्णवतारिणी ॥ ४८ ॥ श्रद्धयासाध्यतेधर्मोमहद्भिर्नार्थराशिभिः ॥
निष्किञ्चनास्तुमुनयःश्रद्धाधर्मादिवंगताः ॥ ४९ ॥ सन्तिदानान्यनेकानिनानाभेदैर्नृपोत्तम ॥ अन्नदानात्परंनास्तिप्राणिनांगतिदायक
म् ॥ ५० ॥ तस्मादन्नंप्रदातव्यंपयसाचसमन्वितम् ॥ मधुरेणापिपुण्येनवचसाचसमन्वितम् ॥ ५१ ॥ नास्त्यन्नात्तुपरंदानमिहलोकेपरत्रच ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तारणायहितायैवसुखसम्पत्तिहेतवे ॥ ९२ ॥ श्रद्धयाविधिवत्पात्रेनिर्मलेनापिचेतसा ॥ अन्नैकस्यप्रदानस्यफलंभुङ्क्तेनिरन्तरम् ॥ ९३ ॥
ग्रासाद्ग्रासंप्रदातव्यंमुष्टिप्रस्थंनसंशयः ॥ अक्षयंजायतेतस्यदानस्यापिमहाफलम् ॥ ९४ ॥ नचप्रस्थंनवामुष्टिंनरस्यहिनसम्भवेत् ॥ अना
स्तिक्यप्रभावेनपर्वणिप्राप्यमानवः ॥ ९५ ॥ श्रद्धयाब्राह्मणंचैकंभक्त्याचैवंप्रभोजयेत् ॥ एकस्यापिप्रधानस्यअन्नस्यापिप्रजेश्वर ॥ ९६ ॥
जन्मान्तरंसुसम्प्राप्यनित्यंचान्नंप्रभुञ्जति ॥ पूर्वजन्मनियद्दत्तंभक्त्यापात्रेसकृन्नरैः ॥ ९७ ॥ जन्मान्तरंसुसम्प्राप्यनित्यमेवभुनक्तिच ॥ अन्न
दानंप्रयच्छन्तिब्राह्मणेभ्योहिनित्यशः ॥ ९८ ॥ मिष्टान्नपानंभुञ्जन्तितेनराअन्नदायिनः ॥ अन्नमेववदत्येतऋषयोवेदपारगाः ॥ ९९ ॥ प्राणभूतंन
सन्देहममृताद्धिसमुद्भवम् ॥ प्राणास्तेनप्रदत्ताहियेनचान्नंसमर्पितम् ॥ ६० ॥ अन्नदानंमहाराजदेहित्वंतुप्रयत्नतः ॥ एवमाकर्ण्यवैराजाजैमि
नेस्तुमहात्मनः ॥ पुनःपप्रच्छतंविप्रंजैमिनिंज्ञानपण्डितम् ॥ ६१ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेगुरुतीर्थमाहात्म्येच्यवनचरित्रेचतुर्नव
तितमोऽध्यायः ॥ ९४ ॥ सुबाहुरुवाच ॥ स्वर्गस्यमेगुणान्ब्रूहिसाम्प्रतंद्विजसत्तम ॥ एतत्सर्वंद्विजश्रेष्ठकरिष्यामिस्वभाविकम् ॥ १ ॥ जैमिनि
रुवाच ॥ नन्दनादीनिरम्याणिदिव्यानिविविधानिच ॥ तत्रोद्यानानिपुण्यानिसर्वकामयुतानिच ॥ २ ॥ सर्वकामफलैर्वृक्षैःशोभनानिसमन्ततः ॥
विमानानिसुदिव्यानिसेवितान्यप्सरोगणैः ॥ ३ ॥ सर्वत्रैवविचित्राणिकामगानिवशानिच ॥ तरुणादित्यवर्णानिमुक्ताजालान्तराणिच ॥४॥ चन्द्र
मण्डलशुभ्राणिहेमशय्यासनानिच ॥ सर्वकामसमृद्धाश्चसर्वदुःखविवर्जिताः ॥ ५ ॥ नराःसुकृतिनस्तेषुविचरन्तियथाभुवि ॥ नतत्रनास्तिकायान्ति
नस्तेनानाजितेन्द्रियाः ॥ ६ ॥ ननृशंसानपिशुनानकृतघ्नानमानिनः ॥ सत्यास्तपःस्थिताःशूरादयावन्तःक्षमापराः ॥ ७ ॥ यज्वानोदानशीलाश्च
तत्रगच्छन्तितेनराः ॥ नरोगोनजरामृत्युर्नशोकोनहिमातपौ ॥ ८ ॥ नतत्रक्षुत्पिपासाचकस्यग्लानिर्नविद्यते ॥ एतेचान्येचबहवोगुणाःस्वर्गस्यभूप
ते ॥ ९ ॥ दोषास्तत्रैवयेसन्तितान्छृणुष्वचसाम्प्रतम् ॥ शुभस्यकर्मणःकृत्स्नंफलंतत्रैवभुज्यते ॥ १० ॥ नचात्रक्रियतेभूयःसोऽत्रदोषोमहान्स्मृतः ॥
असन्तोषश्चभवतिदृष्ट्वादीप्तांपरांश्रियम् ॥११॥ सुखव्याप्तमनस्कानांसहसापतनंतथा ॥ इहयत्क्रियतेकर्मफलंतत्रैवभुज्यते ॥ १२ ॥ कर्मभूमिरियंरा
जन्फलभूमिरसौस्मृता ॥१३॥ सुबाहुरुवाच ॥ महान्तस्तुइमेदोषास्त्वयास्वर्गस्यकीर्तिताः ॥ निर्दोषाःशाश्वतायेऽन्येतांस्त्वंलोकान्वदद्विज ॥१४॥
जैमिनिरुवाच ॥ आब्रह्मसदनादेवदोषाःसन्तिचवैनृप ॥ अतएवहिनेच्छन्तिस्वर्गप्राप्तिंमनीषिणः ॥ १५ ॥ आब्रह्मसदनादूर्ध्वंतद्विष्णोःपरमंपदम् ॥
शुभंसनातनंज्योतिःपरंब्रह्मेतितद्विदुः ॥ १६ ॥ नतत्रमूढागच्छन्तिपुरुषाविषयात्मकाः ॥ दम्भमोहभयद्रोहक्रोधलोभैरभिद्रुताः ॥ १७ ॥ निर्ममा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निरहङ्कारानिर्द्वन्द्वास्संयतेन्द्रियाः ॥ ध्यानयोगरताश्चैवतत्रगच्छन्तिसाधवः ॥ एतत्तेसर्वमाख्यातंयन्मांत्वंपरिपृच्छसि ॥ १८ ॥ कुञ्जलउवाच ॥
एवंस्वर्गगुणंश्रुत्वासुबाहुःपृथिवीपतिः॥ तमुवाचमहात्मानंजैमिनिंवदतांवरम् ॥१९॥ नाहंस्वर्गंगमिष्यामिनचैवेच्छाम्यहंमुने ॥ यस्माच्चपतनंप्रोक्तंत
त्कर्मनकरोम्यहम् ॥ २० ॥ दानमेकंमहाभागनाहंदास्येकदाध्रुवम्॥दानाच्चफललोभाच्चतस्मात्पततिवैनरः ॥ २१ ॥ इत्येवमुक्त्वाधर्मात्मासुबाहुः
पृथिवीपतिः ॥ ध्यानयोगेनदेवेशंयजिष्येकमलाप्रियम् ॥ २२ ॥ दाहप्रलयसंवर्जंविष्णुलोकंव्रजाम्यहम् ॥ २३ ॥ जैमिनिरुवाच ॥ सत्यमुक्तंत्वया
भूपसर्वश्रेयःसमाकुलम् ॥ राजानोधर्मशीलाश्चमहायज्ञैर्यजन्तिते ॥ २४ ॥ सर्वदानानिदीयन्तेयज्ञेषुनृपनन्दन ॥ आदावन्नंतुयज्ञेषुवस्त्रंताम्बूलमे
वच ॥२५॥ काञ्चनंभूमिदानंचगोदानंप्रददन्तिच ॥ सुयज्ञैर्वैष्णवंलोकंतेप्रयान्तिनरोत्तमाः ॥ २६ ॥ दानेनतृप्तिमायान्तिसन्तुष्टाःसन्तिभूमिपाः॥
तपस्विनोमहात्मानोनित्यमेवंयजन्तिते ॥ २७ ॥ सुभिक्षांयाचयित्वातुस्वस्थानंतुसमागताः ॥ भिक्षार्थंतस्यभागानिप्रकुर्वन्तिचभूपते ॥ २८ ॥
ब्राह्मणायविभागैकंगोग्रासंतुमहामते ॥ सुपार्श्ववर्तिनांचैकंप्रयच्छन्तितपोधनाः ॥ २९ ॥ तस्यान्नस्यप्रदानेनफलंभुञ्जन्तिमानवाः ॥ क्षुधातृषाविही
नास्तेविष्णुलोकंव्रजन्तिवै ॥ ३० ॥ तस्मात्त्वमपिराजेन्द्रदेहिन्यायार्जितंधनम् ॥ दानाज्ज्ञानंततःप्राप्यज्ञानात्सिद्धिंप्रयास्यसि ॥ ३१ ॥ यइदं
शृणुयान्मर्त्यःपुण्याख्यानमनुत्तमम् ॥ विमुक्तःसर्वपापेभ्योविष्णुलोकंसगच्छति ॥ ३२ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेगुरुतीर्थेच्यवन
चरित्रेपञ्चनवतितमोऽध्यायः ॥ ९५ ॥ सुबाहुरुवाच ॥ कीदृशैःकर्मभिःप्रेत्यगच्छन्तिनरकंनराः ॥ स्वर्गंतुकीदृशैःप्रेत्यतन्मेत्वंवक्तुमर्हसि ॥ १ ॥
जैमिनिरुवाच॥ ब्राह्मण्यंपुण्यमुत्सृज्ययेद्विजालोभमोहिताः ॥ कुकर्माण्युपजीवन्तितेवैनिरयगामिनः ॥ २ ॥ नास्तिकाभिन्नमर्यादाःकन्दर्पविषयो
न्मुखाः ॥ दाम्भिकाश्चकृतघ्नाश्चतेवैनिरयगामिनः ॥ ३ ॥ ब्राह्मणेभ्यःप्रतिश्रुत्यनप्रयच्छन्तियेधनम् ॥ ब्रह्मस्वानांचहर्तारोनरानिरयगामिनः
॥ ४ ॥ पुरुषाःपिशुनाश्चैवमानिनोऽनृतवादिनः ॥ असम्बद्धप्रलापाश्चतेवैनिरयगामिनः ॥ ५ ॥ येपरस्वापहर्तारःपरदूषणसूचकाः ॥ परस्त्री
गामिनोयेचतेवैनिरयगामिनः ॥ ६ ॥ प्राणिनांप्राणहिंसायांयेनरानिरताःसदा ॥ परनिन्दारतायेवैतेवैनिरयगामिनः ॥ ७ ॥ सुकूपानांतडागा
नांप्रपानांचपरन्तप ॥ सरसांचैवभेत्तारोनरानिरयगामिनः॥ ८ ॥ विपर्यस्यन्तियेदारान्छिशून्भृत्यातिथींस्तथा ॥ उत्सन्नपितृदेवेज्यानरानिरयगा
मिनः ॥ ९ ॥ प्रव्रज्यादूषकाराजन्येचैवाश्रमदूषकाः ॥ सखीनांदूषकाश्चैवतेवैनिरयगामिनः ॥ १० ॥ आद्यंपुरुषमीशानंसर्वलोकमहेश्वरम् ॥ न
चिन्तयन्तियेविष्णुंतेवैनिरयगामिनः ॥ ११ ॥ प्रयाजानांमखानांचकन्यानांसुहृदांतथा ॥ साधूनांचगुरूणांचदूषकानिरयङ्गमाः ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काष्ठैर्वाशङ्कुभिर्वापिशूलैरश्मभिरेववा ॥ येमार्गानुपरुन्धन्तितेवैनिरयगामिनः ॥ १३ ॥ सर्वभूतेष्वविश्वस्ताःकामेनार्तास्तथैवच ॥ सर्वभूते षुजिह्माश्चतेवैनिरयगामिनः ॥ १४ ॥ आगतान्भोजनार्थंतुब्राह्मणान्वृत्तिकर्शितान् ॥ प्रतिषेधंचकुर्वन्तितेवैनिरयगामिनः ॥ १५ ॥ क्षेत्रवृत्ति गृहच्छेदंप्रीतिच्छेदंचयेनराः ॥ आशाच्छेदंप्रकुर्वन्तितेवैनिरयगामिनः ॥ १६ ॥ शस्त्राणांचैवकर्त्तारःशल्यानांधनुषांतथा ॥ विक्रेतारश्चराजे न्द्रनरानिरयगामिनः ॥ १७ ॥ अनाथंविक्लवंदीनंरोगार्त्तंवृद्धमेवच ॥ नानुकम्पन्तियेमूढास्तेवैनिरयगामिनः ॥ १८ ॥ नियमान्पूर्वमादा ययेपश्चादजितेन्द्रियाः ॥ अतिक्रामन्तिचाञ्चल्यात्तेवैनिरयगामिनः ॥ १९ ॥ इत्येतेकथिताराजन्नरानिरयगामिनः ॥ स्वर्गलोकस्यगन्ता रोयेजनास्तान्निबोधमे ॥ २० ॥ सत्येनतपसाक्षान्त्यादानेनाध्ययनेनच ॥ येधर्ममनुवर्तन्तेतेनराःस्वर्गगामिनः ॥ २१ ॥ येचहोमपराध्या नदेवतार्चनतत्पराः ॥ आददानामहात्मानस्तेनराःस्वर्गगामिनः ॥ २२ ॥ शुचयश्चशुचौदेशेवासुदेवपरायणाः ॥ पठन्तिविष्णुंगायन्तितेनराः स्वर्गगामिनः ॥ २३ ॥ मातापित्रोश्चशुश्रूषांयेकुर्वन्तिसदादृताः ॥ वर्जयन्तिदिवास्वप्नंतेनराःस्वर्गगामिनः ॥ २४ ॥ सर्वहिंसानिवृत्ताश्चसाधुसङ्गा श्चयेनराः ॥ सर्वस्यापिहितेयुक्तास्तेनराःस्वर्गगामिनः ॥ २५ ॥ सर्वलोभनिवृत्ताश्चसर्वसाहाश्चयेनराः ॥ सर्वस्याश्रयभूताश्चतेनराःस्वर्गगामिनः ॥ २६ ॥ शुश्रूषाभिस्तपोभिश्चगुरूणांमानदानराः ॥ प्रतिग्रहनिवृत्तायेतेनराःस्वर्गगामिनः ॥ २७ ॥ सहस्रपरिवेष्टारस्तथैवचसहस्रदाः ॥ त्रातारश्च सहस्राणांतेनराःस्वर्गगामिनः ॥२८॥ भयात्कामात्तथाऽऽक्रोशाद्दारिद्र्यात्पूर्वकर्मणः ॥ नकुत्सन्तिचयेनूनंतेनराःस्वर्गगामिनः ॥२९॥ आत्मस्वरूप वन्तश्चयौवनस्थाश्चभारत ॥ येवैजितेन्द्रियाधीरास्तेनराःस्वर्गगामिनः ॥ ३० ॥ सुवर्णस्यचदातारोगवांभूमेश्चभारत ॥ अन्नानांवाससांचैवतेनराः स्वर्गगामिनः ॥ ३१ ॥ येयाचिताःप्रहृष्यन्तिप्रियंदत्त्वावदन्तिच ॥ त्यक्तदानफलेच्छाश्चतेनराःस्वर्गगामिनः ॥ ३२ ॥ निवेशनानांधान्यानांनरा णांचपरन्तप ॥ स्वयमुत्पाद्यदातारःपुरुषाःस्वर्गगामिनः ॥ ३३ ॥ द्विषतामपियेदोषान्नवदन्तिकदाचन ॥ कीर्तयन्तिगुणान्येचतेनराःस्वर्गगामिनः ॥ ३४ ॥ येपरेषांश्रियंदृष्ट्वानवितप्यन्तिमत्सरात् ॥ प्रहृष्टाश्चाभिनन्दन्तितेनराःस्वर्गगामिनः ॥ ३५ ॥ प्रवृत्तौचनिवृत्तौचश्रुतिशास्त्रोक्तमेवच ॥ आचरन्तिमहात्मानस्तेनराःस्वर्गगामिनः ॥ ३६ ॥ येनराणांवचोवक्तुंनजानन्तिचविप्रियम् ॥ प्रियवाक्यैकविज्ञातास्तेनराःस्वर्गगामिनः ॥३७॥ येनामभागान्कुर्वन्तिक्षुत्तृष्णाश्रमपीडिताः ॥ हन्तकारस्यकर्तारस्तेनराःस्वर्गगामिनः ॥ ३८ ॥ वापीकूपतडागानांप्रपानांचैववेश्मनाम् ॥ आरामा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णांचकर्तारस्तेनराःस्वर्गगामिनः ॥ ३९ ॥ असत्येष्वपियेसत्याऋजवोनार्जवेष्वपि ॥ रिपुं[1]ष्वपिहितायेचतेनराःस्वर्गगामिनः ॥ ४० ॥ यस्मिन्क
स्मिन्कुलेजाताबहुपुत्राःशतायुषः ॥ सानुक्रोशाःसदाचारास्तेनराःस्वर्गगामिनः ॥ ४१ ॥ कुर्वन्त्यवन्ध्यंदिवसंधर्मेणैकेनसर्वदा ॥ व्रतंगृह्णन्तियेनित्यं
तेनराःस्वर्गगामिनः ॥ ४२ ॥ आं[2]क्रोशन्तंस्तुवन्तंचतुल्यंपश्यन्तियेनराः ॥ शान्तात्मानोजितात्मानस्तेनराःस्वर्गगामिनः ॥ ४३ ॥ येचापिभयस
न्त्रस्तान्ब्राह्मणांश्चतथास्त्रियः ॥ सार्थान्वापरिरक्षन्तितेनराःस्वर्गगामिनः ॥ ४४ ॥ गङ्गायांपुष्करेतीर्थेगयायांचविशेषतः ॥ पितृपिण्डप्रदातारस्तेन
राःस्वर्गगामिनः ॥ ४५ ॥ नवशेचेन्द्रियाणांचयेनराःसंयमस्थिताः ॥ त्यक्तलोभभयक्रोधास्तेनराःस्वर्गगामिनः ॥ ४६ ॥ यूकामत्कुणदंशादीन्ये
जन्तूंस्तुदतस्तनुम् ॥ पुत्रवत्परिरक्षन्तितेनराःस्वर्गगामिनः ॥ ४७ ॥ अज्ञानाच्चयथोक्तेनविधिनासञ्जपन्तिच ॥ सर्वद्वन्द्वसहालोकेतेनराःस्वर्गगामि
नः ॥ ४८ ॥ येपूताःपरदारांश्चकर्मणामनसागिरा ॥ रमयन्तिनसत्त्वस्थास्तेनराःस्वर्गगामिनः ॥ ४९ ॥ निन्दितानिनकुर्वन्तिकुर्वन्तिविहितानिच॥
आत्मशक्तिंविजानन्तितेनराःस्वर्गगामिनः ॥५०॥ एवंतेकथितंसर्वंमयातत्त्वेनपार्थिव ॥ दुर्गतिःसद्गतिश्चैवप्राप्यतेकर्मभिर्यथा ॥५१॥ नरःपरेषांप्रति
कूलमाचरन्प्रयातिघोरंनरकंसुदारुणम् ॥ सदानुकूलस्यनरस्यजीविनःसुखावहामुक्तिरदूरसंस्थिता ॥५२॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्याने
गुरुतीर्थमाहात्म्येच्यवनचरित्रेषण्णवतितमोऽध्यायः ॥९६॥ कुञ्जलउवाच ॥ एवमाकर्ण्यतांराजामुनिनाभाषितांतदा॥धर्माधर्मगतिंसर्वांतंमुनिंसमभा
षत ॥ १ ॥ सुबाहुरुवाच ॥ सोऽहंधर्मंकरिष्यामि[3]सोऽहंपुण्यंद्विजोत्तम ॥ वासुदेवंजगद्योनिंयजिष्येनितरांमुने ॥ २ ॥ होमेनतुजपेनैवपूजयेन्मधुसू
दनम् ॥ यष्ट्वायज्ञंतपस्तप्त्वाविष्णुलोकंसभूपतिः ॥ ३ ॥ पूजितःसर्वकामैश्चप्राप्तवान्सत्वरंमुदा ॥ गतेतस्मिन्महालोकेदेवदेवंनपश्यति ॥ ४ ॥ क्षुधा
जातामहातीव्रातृष्णाचातिप्रवर्तते ॥ तयोश्चापिमहाप्राज्ञजीवपीडाकराबहु ॥ ५ ॥ राजापिप्रिययासार्द्धंक्षुधातृष्णाप्रपीडितः ॥ नपश्यतिहृषीकेशंदुः
खेनमहतान्वितः ॥ ६ ॥ कुञ्जलउवाच ॥ एवंसदुःखितोराजाप्रिययासहसत्तम ॥ आकुलव्याकुलोजातःपीडितःक्षुधयाभृशम् ॥ ७ ॥ इतश्चेतश्चवे
गैश्चधावतेवसुधाधिपः ॥ सर्वाभरणशोभाङ्गोवस्त्रचन्दनभूषितः ॥ ८ ॥ पुष्पमालाप्रशोभाङ्गोहारकुण्डलकङ्कणैः ॥ रत्नदीप्तिप्रशोभाङ्गःप्रययौसमही
पतिः ॥ ९ ॥ एवंदुःखसमाचारःस्तूयमानश्चपाठकैः ॥ दुःखशोकसमाविष्टःस्वप्रियांवाक्यमब्रवीत् ॥ १० ॥ विष्णुलोकमहंप्राप्तस्त्वयासहसुशोभ
ने ॥ ऋषिभिःस्तूयमानोऽपिविमानेनापिभामिनि ॥ ११ ॥ कर्मणाकेनमेचेयंक्षुधाऽतीवप्रवर्द्धते ॥ विष्णुलोकंचसम्प्राप्यनदृष्टोमधुसूदनः ॥ १२ ॥

१ 'प्रवक्तारश्च दातारस्ते नराः स्वर्गगामिनः ' इ० पा० । २ ' मित्रामित्रे स्तुवन्तश्च ' इ० पा० । ३ ' नाहं पापं द्विजोत्तम ' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्किंहिकारणंभद्रेनभुनज्मिमहत्फलम् ॥ कर्मणाथनिजेनापिएतद्दुःखंप्रवर्त्तते ॥ १३ ॥ सैवंश्रुत्वाचतद्वाक्यंराजानमिदमब्रवीत् ॥ सत्यमुक्तंत्वयारा
जन्नास्तिधर्मस्यवैफलम् ॥ १४ ॥ वेदशास्त्रपुराणेषुयेपठन्तिचब्राह्मणाः ॥ दुःखशोकौविधूयेहसर्वदोषैःप्रमुच्यते ॥१५॥ नामोच्चारेणदेवस्यविष्णोश्चै
वसुचक्रिणः ॥ पुण्यात्मानोमहाभागाध्यायमानाजनार्दनम् ॥ १६ ॥ त्वयैवाराधितोदेवःशङ्खचक्रगदाधरः ॥ अन्नादिदानंविप्रेभ्योनप्रदत्तंद्विजोदि
तम् ॥१७॥ फलंतस्यप्रजानामिनहृष्टोमधुसूदनः॥क्षुधामेबाधतेराजंस्तृष्णाचैवप्रशोषयेत् ॥१८॥ कुञ्जलउवाच ॥ एवमुक्तस्तुप्रिययाराजाचिन्ताकु
लेन्द्रियः ॥ ततोदृष्ट्वामहापुण्यमाश्रमंश्रमनाशनम् ॥१९॥ दिव्यवृक्षसमाकीर्णंतडागैरुपशोभितम् ॥ वापीकुण्डतडागैश्चपुण्यतोयप्रपूरितैः ॥२०॥ हं
सकारण्डवाकीर्णंकह्लारैरुपशोभितम् ॥ आश्रमःशोभतेपुत्रमुनिभिस्तत्त्ववेदिभिः ॥२१॥ दिव्यवृक्षसमाकीर्णंमृगव्रातैश्चशोभितम् ॥ नानापुष्पसमा
कीर्णंहृद्यगन्धसमाकुलम् ॥२२॥ द्विजसिद्धैःसमाकीर्णमृषिशिष्यैःसमाकुलम् ॥ योगियोगेन्द्रसङ्घुष्टंदेववृन्दैरलङ्कृतम् ॥२३॥ कदलीवनसम्बाधैः
सुफलैःपरिशोभितम् ॥ नानावृक्षसमाकीर्णंसर्वकामसमन्वितम् ॥ २४ ॥ श्रीखण्डैश्चारुगन्धैश्चसुफलैःशोभितंसदा ॥ एवंपुण्यंसमाकीर्णंब्रह्मलक्ष्यसमा
युतम् ॥२५॥ ससुबाहुस्ततोराजातयासुप्रिययासह ॥ प्रविवेशमहापुण्यंतद्वनंसर्वकामदम् ॥२६॥ भासमानोदिशःसर्वायत्रास्तेसूर्यसन्निभः ॥ राज
मानोमहादीप्त्यापरयासूर्यसन्निभः ॥२७॥ योगासनसमारूढोयोगपट्टेनसंवृतः॥ वामदेवऋषिश्रेष्ठोवैष्णवानांवरस्तथा॥२८॥ध्यायमानोहृषीकेशंभु
क्तिमुक्तिप्रदायकम् ॥ वामदेवंमहात्मानंतंदृष्ट्वामुनिसत्तमम् ॥ २९ ॥ त्वरंगत्वाप्रणम्यैवसराजाप्रिययासह ॥ वामदेवस्ततोदृष्ट्वाप्रणतंराजसत्तमम्
॥ ३० ॥ आशीर्भिरभिनन्द्यैवराजानंप्रिययान्वितम् ॥ उपवेश्यासनेपुण्येसुबाहुंराजसत्तमम् ॥ ३१ ॥ आसनादिततःपाद्यैरर्घपूजादिभिस्तथा ॥
मुनिनापूजितोभूपःप्रिययासहचागतः ॥ ३२ ॥ अथपप्रच्छराजानंमहाभागवतोत्तमम् ॥ ३३ ॥ वामदेवउवाच ॥ त्वामहंविष्णुधर्मज्ञंविष्णुभक्तंन
रोत्तमम् ॥ जानेज्ञानेनराजेन्द्रदिव्येनचोलभूमिपम् ॥३४॥ निरामयश्चागतोऽसिताक्ष्यर्याभार्ययासह ॥ ३५ ॥ राजोवाच ॥ निरामयश्चागतोऽस्मि
प्राप्तोविष्णोःपरंपदम् ॥ मयाहिपरयाभक्त्यादेवदेवोजनार्दनः ॥ ३६ ॥ आराधितोजगन्नाथोभक्तिप्रीतःसुरेश्वरम् ॥ कस्मात्पश्याम्यहंतातनदे
वंकमलापतिम् ॥ ३७ ॥ क्षुधामेबाधतेताततृष्णातीवसुदारुणा ॥ ताभ्यांशान्तिनगच्छावसुखंविन्दावनैवच ॥ ३८ ॥ एतन्मेकारणंदुःखंसञ्जातं
मुनिसत्तम ॥ तन्मेत्वंकारणंब्रूहिप्रसादात्सुसुखोभव ॥ ३९ ॥ वामदेवउवाच ॥ त्वंतुभक्तोऽसिराजेन्द्रश्रीकृष्णस्यसदैवहि ॥ आराधितस्त्वयाभ
क्त्यापरयामधुसूदनः ॥ ४० ॥ भक्त्योपचारैःस्नानाद्यैर्गन्धपुष्पादिभिस्तथा ॥ नपूजितोऽथनैवेद्यैःफलैश्चजगतांपतिः ॥ ४१ ॥ दशमींप्राप्यराजे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्द्रत्वयैवचसदाकृतम् ॥ एकभक्तंनदत्तंतुब्राह्मणायसुभोजनम् ॥ ४२ ॥ एकादशींतुसम्प्राप्यनकृतंभोजनंत्वया ॥ विष्णुमुद्दिश्यविप्रायनदत्तं
भोजनंत्वया ॥ ४३ ॥ अन्नंचामृतरूपेणपृथिव्यांसंस्थितंसदा ॥ अन्नदानंविशेषेणकदादत्तंनहित्वया ॥ ४४ ॥ ओषध्यश्चमहाराजनानाभेदास्तुताः
शृणु ॥ कटुतिक्तकषायाश्चमधुराम्लाश्चक्षारकाः ॥४५॥ हिङ्ग्वाद्योपस्कराःसर्वेनानारूपाश्चभूपते ॥अमृताज्ज्ञिरेसर्वाओषध्यःपुष्टिहेतवः ॥ ४६ ॥
अन्नमेवसुसंस्कृत्यऔषधव्यञ्जनान्वितम् ॥ देवेभ्योविष्णुरूपेभ्यइतिसङ्कल्प्यदीयते ॥ ४७ ॥ पितृभ्योविष्णुरूपेभ्योहस्तेचब्राह्मणस्यहि ॥ अतिथि
भ्यस्ततोदत्त्वापरिजनंप्रभोजयेत् ॥ ४८ ॥ स्वयंतुभुञ्जतेपश्चात्तदन्नममृतोपमम् ॥ प्रेत्यदुःखंनचैवास्तितस्यसौख्यंतुभूपते ॥ ४९ ॥ ब्राह्मणाःपित
रोदेवाःक्षत्ररूपाश्चभूपते ॥ यथाहिकर्षकःकश्चित्सुकृषिंकुरुतेसदा ॥ ५० ॥ तद्वन्मर्त्यःकृषिंकुर्यात्क्षेत्रेविप्रास्यकेनृप ॥ स्वभावलाङ्गलेनापिश्रद्धाशस्त्रे
णभेदयेत् ॥ ५१ ॥ वृषभौतुमतौनित्यंबुद्धिश्चैवतपस्तथा ॥ सत्यज्ञानानुभावीशःशुद्धात्मातुप्रतोदकः ॥ ५२ ॥ विप्रनाम्निमहाक्षेत्रेनमस्कारैर्विस
र्जयेत् ॥ स्फोटयेत्कल्मषंनित्यंकृषकोहियथानृप ॥ ५३ ॥ क्षेत्रस्यउद्यमेयुक्तोविष्णुकामःप्रसादयेत् ॥ तद्वद्वाक्यैःशुभैःपुण्यैर्विप्रांश्चापिप्रसादयेत्
॥ ५४ ॥ पर्वतीर्थातिकालश्चघनरूपोऽभिवर्षणे ॥ वप्तुकामोभवेत्क्षेत्रीततःक्षेत्रेप्रवापयेत् ॥ ५५ ॥ तद्वद्रूपप्रसन्नायविप्रायपरिदीयते ॥ क्षेत्रस्यउप्तबी
जस्ययथाक्षेत्रीप्रभुञ्जति ॥५६॥ फलमेवमहाराजतथादाताभुनक्तिच ॥ प्रेत्यचात्रैवनित्यंचतृप्तोभवतिनान्यथा ॥ ५७ ॥ ब्राह्मणाःपितरोदेवाःक्षेत्ररू
पानसंशयः ॥ मानवानांमहाराजवापिताःप्रददन्तिच ॥ ५८ ॥ फलमेवंनसन्देहोयादृशंतादृशंध्रुवम् ॥ कटुकाद्भिनजायेतराजन्मधुरएवच ॥५९॥
तद्वच्चमधुराख्याच्चनजायेत्कटुकःपुनः ॥ यादृशंवपतेबीजंतादृशंफलमश्नुते ॥ ६० ॥ नवापयतियःक्षेत्रंनसभुञ्जतितत्फलम् ॥ तद्वद्विप्राश्चदेवाश्चपि
तरःक्षेत्ररूपिणः ॥६१॥ दर्शयन्तिफलंराजन्दत्तस्यापिनसंशयः ॥ यादृशंहिकृतंकर्मत्वयैवचशुभाशुभम् ॥६२॥ तादृशभुङ्क्ष्ववैराजन्नन्यथातन्नजा
यते ॥ नपुरादेवविप्रेभ्यःपितृभ्यश्चकदाचन ॥ ६३॥ मिष्टान्नपानमेवापिदत्तंसुमनसातदा ॥ सुभोज्यैर्भोजनैर्मृष्टैर्मधुरैश्चोष्यपेयकैः ॥ ६४॥ सुभक्ष्यै
रात्मनाभुक्तंकस्मैदत्तंनचत्वया ॥ स्वशरीरंत्वयापुष्टमन्नैरमृतसन्निभैः ॥ ६५ ॥ यस्मात्कृतंमहाराजतस्मात्क्षुधाप्रवर्तते ॥ कर्मैवकारणंराजन्नराणां
सुखदुःखयोः ॥ ६६ ॥ जन्ममृत्योर्महाभागभुङ्क्ष्वतत्कर्मणःफलम् ॥ पूर्वेऽपिचमहात्मानोदिवंप्राप्ताःस्वकर्मणा ॥ ६७ ॥ पुनःप्रयाताभूलोकंक
र्मणःक्षयकालतः ॥ नलोभगीरथश्चैवविश्वामित्रोयुधिष्ठिरः ॥ ६८ ॥ कर्मणैवहिसम्प्राप्ताःस्वर्गंराजन्स्वकालतः ॥ दिष्टंहिप्राक्तनंकर्मतेनदुःखंसु
खंलभेत् ॥ ६९ ॥ तदुल्लङ्घयितुंराजन्कःसमर्थोऽपिहीश्वरः ॥ अथतस्मान्नृपश्रेष्ठस्वर्गंतस्यापितेऽभवत् ॥ ७० ॥ क्षुत्तृष्णासम्भवोवेगस्ततोदुष्ट

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हिकर्मते ॥ यदितेक्षुत्प्रतीकारोह्यभीष्टोनपसत्तम ॥ ७१ ॥ तद्गत्वाभुङ्क्ष्वकायंस्वमानन्दारण्यसंस्थितम् ॥ तवचेयंमहाराज्ञीक्षुत्क्षामातीवदृश्यते ॥ ७२ ॥ सुबाहुरुवाच ॥ कियत्कालमिदंकर्मकर्तव्यंप्रिययासह ॥ तन्मेब्रूहिमहाभागानुग्रहोदृश्यतेकदा ॥ ७३ ॥ कस्यदानेनकिंपुण्यंद्रव्यस्यमुनिसत्तम ॥ तत्प्रब्रूहिमहाप्राज्ञयदितुष्टोऽसिसाम्प्रतम् ॥ ७४ ॥ वामदेवउवाच ॥ अन्नदानान्महासौख्यमुदकस्यमहामते ॥ भुञ्जन्तिमर्त्याःस्वर्गंवैपीड्यन्तेनैवपातकैः ॥ ७५ ॥ यदादानंनदत्तंतुभवेदपिहिमानवैः ॥ मृत्युकालेऽपिसम्प्राप्तेदानंसर्वेंददन्तिच ॥ ७६ ॥ आदावेवप्रदातव्यमन्नंचोदकसंयुतम् ॥ सुच्छत्रोपानहौदद्याज्जलपात्रंसुशोभनम् ॥ ७७ ॥ भूमिंसुकाञ्चनंधेनुमष्टौदानानियोऽर्पयेत् ॥ स्वर्गेनजायतेतस्यक्षुधातृष्णादिसम्भवः॥७८॥ क्षुधानबाधतेराजन्नन्नदानात्सतृप्तिमान्॥ तष्णातीव्रानहिस्याद्वैतृप्तोभवतिसर्वदा॥७९॥उदकस्यप्रदानेनच्छत्रदानेनभूपते॥ छायामाप्नोतिदातावैवाहनंचनृपोत्तम ॥ ८० ॥ उपानहःप्रदानेनअन्यदेवंवदाम्यहम्॥ भूमिदानान्महाभागसर्वकामानवाप्नुयात् ॥८१ ॥गोदानेनमहाराजरसैःपुष्टोभवेत्सदा ॥ सर्वान्भोगान्प्रभुञ्जानःस्वर्गलोकेवसेन्नरः ॥८२॥ तृप्तोभवतिवैदातागोदानेननसंशयः ॥ नीरुजःसुखम्पन्नःसन्तुष्टस्तुधनान्वितः ॥८३॥काञ्चनेनसुवर्णस्तुजायतेनात्रसंशयः ॥श्रीमांश्चरूपवांस्त्यागीरत्नभोक्ताभवेन्नरः ॥८४॥ मृत्युकालेतुसम्प्राप्तेतिलदानंप्रयच्छति ॥सर्वभोगपतिर्भूत्वाविष्णुलोकंप्रयातिसः ॥८५॥ एवंदानविशेषेणप्राप्यतेपरमंसुखम् ॥ गोदानंभूमिदानंतुअन्नोदकेचवैत्वया ॥ ८६ ॥ जीवमानेनराजेन्द्रनदत्तंब्राह्मणायवै ॥ मृत्युकालेऽपिनोदत्तंतस्मात्क्षुधाप्रवर्तते ॥ ८७ ॥ एतत्तेकारणंप्रोक्तंजातंकर्मवशानुगम् ॥ यादृशंतुकृतंकर्मतादृशंपरिभुज्यते ॥ ८८ ॥ सुबाहुरुवाच ॥ कथंक्षुधाप्रशान्तिमेप्रयातिमुनिसत्तम ॥ अनयाशोषितःकायोह्यतीवपरिदूयते ॥ ८९ ॥ क्षुधांप्रतिद्विजश्रेष्ठप्रायश्चित्तंवदस्वनौ ॥ कर्मणश्चास्यघोरस्ययथाशान्तिर्भवेन्मम ॥ ९० ॥ वामदेवउवाच ॥ प्रायश्चित्तंनचैवास्तिऋतेभोगान्नृपोत्तम ॥ कर्मणोऽस्यफलंसर्वंभवान्स्वस्थःप्रभोक्ष्यति ॥ ९१ ॥ यत्रतेपतितःकायःप्रियायाश्चैवभूपते ॥ युवाभ्यांहिप्रगन्तव्यमितश्चैवनसंशयः ॥९२॥ उभाभ्यामपिभोक्तव्यंकायमक्षयमेवतत् ॥ स्वंस्वंराजन्नसन्देहस्त्वयावैप्रिययासह ॥ ९३ ॥ राजोवाच ॥ कियत्कालंप्रभोक्तव्यंमयैवंप्रिययासह ॥ तदादिशमहाभागप्रमाणंतद्वचोमम ॥९४॥ वामदेवउवाच॥ वासुदेवमहास्तोत्रंमहापातकनाशनम्॥यदात्वंश्रोष्यसेपुण्यंतदामोक्षंप्रयास्यसि ॥ ९५ ॥ एतत्तेसर्वमाख्यातंगच्छराजन्प्रभुङ्क्ष्वहि ॥ एवंश्रुत्वाततोराजाभार्ययासहवैपुनः ॥ ९६ ॥ स्वशरीरस्यवैमांसंभक्षतेप्रिययासह ॥ नित्यमेवमहाप्राज्ञतद्वत्पूर्णंभवेद्वपुः ॥ ९७ ॥ नित्यंप्रभक्षतेराजाराज्ञी

१ 'रत्नदानाद्भवेन्नरः' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यचपुत्रक ॥ यथायथाचराजाचभक्षतेचकलेवरम् ॥ ९८ ॥ हसेतेवैसदानार्यौतयोभार्वंवदाम्यहम् ॥ प्रज्ञासार्द्धमहासाध्वीचरित्रंतस्यभूपतेः ॥
॥ ९९ ॥ हास्यंहिकुरुतेनित्यंतस्यश्रद्धानपायिनी ॥ प्रज्ञयाप्रेर्यमाणेननदत्तंश्रद्धयान्वितम् ॥ १०० ॥ ब्राह्मणेभ्यःसुसङ्कल्प्यअन्नमुद्दिश्यवैष्णवे ॥
एवंसभक्षतेमांसंस्वस्वकायस्यनित्यशः ॥ १ ॥ योषिदप्यात्मकायंचरसैश्चामृतसन्निभैः ॥ ततोवर्षशतान्तेतुवामदेवंमहामुनिम् ॥ २ ॥ स्मृत्वासगर्ह
यामासआत्मानंप्रतिसुव्रत ॥ नदत्तंपितृदेवेभ्योब्राह्मणेभ्यःकदामया ॥ ३ ॥ नदत्तमतिथिभ्योहिवृद्धेभ्यश्चविशेषतः ॥ दीनेभ्योहिनदत्तंचकृपयाचा
तुरायच ॥ ४ ॥ एवंसभुङ्क्तेस्वंमांसंगर्हयन्स्वीयकर्मच ॥ एवंस्वमांसंभुञ्जानंसुबाहुंप्रिययासह ॥ ५ ॥ हसेतेचतदादृष्ट्वाप्रज्ञाश्रद्धाचद्वेस्त्रियौ॥तस्यकर्म
विपाकस्यशुभात्माहसतेनृप ॥ ६ ॥ ममसङ्गप्रसङ्गेननदत्तंपापचेतन ॥ प्रज्ञाचवचनैस्तैस्तुराजानंहसतेपुनः ॥ ७ ॥ क्वगतोऽसौमहामोहोयेनत्वंमो
हितोनृप ॥ लोभेनमोहयुक्तेनतमोगर्तेनिपात्यते ॥८॥ तत्रापतित्वामामैवपतितंदुःखसङ्कटे॥दानमार्गंपरित्यज्यलोभमार्गंगतोनृप ॥९॥ भार्ययासहभु
ङ्क्ष्वत्वंव्यापितःक्षुधयाभृशम्॥एवंतंहसतेप्रज्ञासुबाहुंप्रिययान्वितम्॥११०॥एतद्धिकारणंसर्वंतयोर्हास्यपुत्रक॥भक्ष्यमाणस्यभूपस्यदेहंस्वंदुःखितेत
दा॥११॥ऊचतुर्देहिदेहीतियाच्यमानःसदैवहि॥क्षुधातृष्णामहाप्राज्ञभीमरूपेभयानके॥१२॥ पयसामिश्रितंभक्ष्येयाचेतेनृपतीश्वरम्॥एतत्तेसर्वमाख्या
तंयत्त्वयापरिपृच्छितम् ॥ १३ ॥ अन्यत्किंतेप्रवक्ष्यामितद्वदस्वमहामते ॥ १४ ॥ विज्वलउवाच ॥ वासुदेवाभिधानंतत्स्तोत्रंकथयमेपितः॥येनमोक्षं
व्रजेद्राजातद्विष्णोःपरमंपदम्॥ १५ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेगुरुतीर्थमाहात्म्येच्यवनचरित्रेसप्तनवतितमोऽध्यायः ॥९७॥ विष्णु
रुवाच ॥ एवमुक्तेशुभेवाक्येविज्वलेनमहात्मना ॥ कुञ्जलोवदतांश्रेष्ठःस्तोत्रंपुण्यमुदैरयत् ॥ १ ॥ ध्यात्वानत्वाहृषीकेशंसर्वक्लेशविनाशनम् ॥ सर्व
श्रेयःप्रदातारंहरेःस्तोत्रमुदीरितम् ॥ २ ॥ वासुदेवाभिधानंतत्सर्वश्रेयःप्रदायकम् ॥ मोक्षद्वारंसुखोपेतंशान्तिदंपुष्टिवर्द्धनम् ॥ ३ ॥ सर्वकामप्रदातारं
ज्ञानदंज्ञानवर्द्धनम् ॥ वासुदेवस्ययत्स्तोत्रंविज्वलायप्रकाशितम् ॥ ४ ॥ वासुदेवाभिधानंचप्रमेयंपुण्यवर्द्धनम् ॥ सोऽवगम्यपितुःसर्वंविज्वलःपक्षि
णांवरः ॥ ५ ॥ तत्रगन्तुंप्रचक्रामपितुःपृष्टंतदानघ ॥ एवंगन्तुकृतमतिंविज्वलंज्ञानपारगम् ॥ ६ ॥ उवाचपुत्रंधर्मात्माउपकारसमुद्यतम् ॥ ७ ॥
कुञ्जलउवाच ॥ पुत्रतस्यमहज्ज्ञानेपातकंभूपतेःशृणु ॥ यतोगत्वापठस्वत्वंसुबाहोश्चोपशृण्वतः ॥ ८ ॥ यथायथाश्रोष्यतिस्तोत्रमुत्तमंतथातथाज्ञान ॥९७॥
मयोभविष्यति ॥ श्रीवासुदेवस्यनसंशयोवैतस्यप्रसादात्सुशिवंमयोक्तम् ॥ ९ ॥ आमन्त्र्यसगुरुंपश्चादुड्डीयलघुविक्रमः ॥ आनन्दकाननंपुण्यंसम्प्रा
प्तोविज्वलस्तदा ॥ १० ॥ वृक्षच्छायांसमाश्रित्यउपविष्टोमुदान्वितः ॥ समालोक्यसराजानंविमानेनागतंपुनः ॥ ११ ॥ एष्यत्यसौकदाराजासु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बाहुःप्रिययासह ॥ पातकान्मोचयिष्यामिस्तोत्रेणानेनवैकदा ॥ १२ ॥ तावद्विमानःसम्प्राप्तःकिङ्किणीजालमण्डितः ॥ घण्टारवसमाकीर्णोवीणावेणुसमन्वितः ॥ १३ ॥ गन्धर्वस्वरसङ्घुष्टश्चाप्सरोभिःसमन्वितः ॥ सर्वकामसमृद्धस्तुअन्नोदकविवर्जितः ॥ १४ ॥ तस्मिन्यानेस्थितोराजासुबाहुःप्रिययासह ॥ समुत्तीर्णोविमानात्ससुताक्ष्यंप्रिययासह ॥ १५ ॥ शस्त्रमादायतीक्ष्णंतुयावत्कृन्ततितच्छवम् ॥ तावद्धिविज्वलेनापिसमाह्वानंकृतंतदा ॥ १६ ॥ भोभोःपुरुषशार्दूलदेवोपमभवानिदम् ॥ करोतिनिर्घृणंकर्मनृशंसैर्नचशक्यते ॥ १७ ॥ कर्तुंपुरुषशार्दूलकोऽयंविधिविपर्ययः ॥ दुष्कृतंसाहसंकर्मनिन्द्यंलोकेषुसर्वदा ॥ १८ ॥ वेदाचारविहीनंतुकस्मात्प्रारब्धवानिह ॥ तन्मेत्वंकारणंसर्वंकथयस्वयथातथा ॥ ॥ १९ ॥ इत्येवंभाषितंतस्यविज्वलस्यमहात्मनः ॥ समाकर्ण्यमहाराजःस्वप्रियांवाक्यमब्रवीत् ॥ २० ॥ प्रियेवर्षशतंभुक्तंमयेदंपापकर्मणा ॥ कदानभाषितंकेनयथायंपरिभाषते ॥ २१ ॥ ममैवपीडयमानस्यक्षुधयाहृदयंप्रिये ॥ निर्गतंचोत्सुकंकान्तेशान्तिश्चित्तेप्रवर्तते ॥ २२ ॥ यावदस्यश्रुतंवाक्यंसर्वदुःखस्यशान्तिदम् ॥ तावच्चित्तेसमाह्लादोवर्ततेचारुहासिनि ॥ २३ ॥ कोऽयंदेवोनुगन्धर्वःसहस्राक्षोभविष्यति ॥ मुनीनांस्याद्वचःसत्यंयदुक्तंमुनिनापुरा ॥ २४ ॥ एवमाभाषितंश्रुत्वाप्रियस्यानन्तरंप्रिया ॥ राजानंप्रत्युवाचाथभार्यापतिपरायणा ॥ २५ ॥ सत्यमुक्तंत्वयानाथइदमाश्चर्यमुत्तमम् ॥ यथातेवर्ततेकान्तममचित्तेतथापुनः ॥ २६ ॥ पक्षिरूपधरःकोऽयंपृच्छतेहितकारिवत् ॥ एवमाभाषितंश्रुत्वाप्रियायाःपृथिवीपतिः ॥ २७ ॥ बद्धाञ्जलिपुटोभूत्वापक्षिणंवाक्यमब्रवीत् ॥ स्वागतंतेमहाप्राज्ञपक्षिरूपधरप्रभो ॥ २८ ॥ शिरसाभार्ययासार्द्धंतवपादाम्बुजद्वयम् ॥ नमस्करोम्यहंपुण्यमस्तुनस्त्वत्प्रसादतः ॥ २९ ॥ भवान्कःपक्षिरूपेणपुण्यमेवंप्रभाषते ॥ यादृशंक्रियतेकर्मपूर्वदेहेनसत्तम ॥ ३० ॥ सुकृतंदुष्कृतंवापिततदिहैवप्रभुज्यते ॥ अथतेनात्मकंवृत्तंतस्याग्रेचनिवेदितम् ॥ ३१ ॥ यथोक्तंकुञ्जलेनापिपित्रापूर्वंश्रुतंतथा ॥ कथयस्वात्मवृत्तान्तंभवान्कोमांप्रभाषते ॥ ३२ ॥ सुबाहुंप्रत्युवाचेदंवाक्यंपक्षिवरस्तदा ॥ ३३ ॥ विज्वलउवाच ॥ शुकजात्यांसमुत्पन्नःकुञ्जलोनाममेपिता ॥ तस्याहंविज्वलोनामतृतीयस्तुसुतेष्वहम् ॥ ३४ ॥ नाहंदेवोनगन्धर्वोनचसिद्धोमहाभुज ॥ नित्यमेवप्रपश्यामिकर्मचैवंसुदारुणम् ॥ ३५ ॥ कियत्कालंमहत्कर्मसाहसाकारसंयुतम् ॥ करिष्यसिमहाराजतन्मेकथयसाम्प्रतम् ॥ ३६ ॥ सुबाहुरुवाच ॥ वासुदेवाभिधानंयत्पूर्वमुक्तंहिब्राह्मणैः ॥ श्रोष्याम्यहंयदाभद्रगतिंस्वांप्राप्नुयांतदा ॥ ३७ ॥ पुण्यात्मनाभाषितंवैमुनिनासंयतात्मना ॥ तदाहंपातकान्मुक्तोभविष्यामिनसंशयः ॥ ३८ ॥ विज्वलउवाच ॥

१ 'सरसस्तस्य सन्निधौ' इ० पा०। २ 'प्रिये युगसहस्रं तु वर्तते मम अत्र च' इ० पा०। ३ 'यमोऽम्बुपो धर्मः' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तवार्थेपृच्छितस्तातस्तेनमेकथितंचयत् ॥ तत्तेऽद्याहंप्रवक्ष्यामिशाश्वतंशृणुसत्तम ॥ ३९ ॥ ॐअस्यश्रीवासुदेवाभिधानस्तोत्रस्यनारदऋषिरनुष्टु
प्छन्दःॐकारोदेवतासर्वपातकनाशनार्थेचतुर्वर्गसाधनार्थेचजपेविनियोगः ॥ ॐनमोभगवतेवासुदेवायइतिमन्त्रः ॥ पावनंपरमंपुण्यंवेदज्ञंवेदमन्दि
रम् ॥ विद्याधारंभवाधारंप्रणवंवैनमाम्यहम् ॥४०॥ निरावासंनिराकारंसुप्रकाशंमहोदयम् ॥ निर्गुणंगुणसम्बद्धंनमामिप्रणवंपरम् ॥४१॥ महाकान्तं
महोत्साहंमहामोहविनाशनम्॥आचिन्वन्तंजगत्सर्वंगुणातीतंनमाम्यहम् ॥४२॥ भातिसर्वत्रयोभूत्वाभूतानांभूतिवर्द्धनः॥अभयं[2]भिक्षुसम्बद्धंनमामिप्र
णवंशिवम् ॥४३॥ गायत्रीसामगायन्तंगीतंगीतप्रियंशुभम् ॥ गन्धर्वगीतभोक्तारंप्रणवंप्रणमाम्यहम् ॥ ४४ ॥ विचारंवेदरूपंतंयज्ञस्थंभक्तवत्सलम् ॥
यो[3]निंसर्वस्यलोकस्यओङ्कारंप्रणमाम्यहम् ॥ ४५ ॥ तारकंसर्वभूतानांनौरूपेणविराजितम् ॥ संसारार्णवमग्नानांनमामिप्रणवंहरिम् ॥ ४६ ॥ सर्वलोके
षुवसतेएकरूपेणनैकधा ॥ धामकैवल्यरूपेणनमामिप्रणवंशिवम् ॥ ४७ ॥ सूक्ष्मंसूक्ष्मतरंशुद्धंनिर्गुणंगुणनायकम् ॥ वर्जितंप्राकृतैर्भावैर्वेदस्थानंनमा
म्यहम् ॥ ४८ ॥ देवदैत्यवियोगैश्चवर्जितंतुष्टिभिःसदा ॥ देवश्चयोगिभिर्ध्येयंतमोङ्कारंनमाम्यहम् ॥ ४९ ॥ व्यापकंविश्ववेत्तारंविज्ञानंपरमंशुभम् ॥
शिवंशिवगुणंशान्तंवन्देप्रणवमीश्वरम् ॥ ५०॥ यस्यमायांप्रविष्टास्तुब्रह्माद्याश्चसुरासुराः ॥ नविन्दन्तिपरंशुद्धंमोक्षद्वारंनमाम्यहम् ॥ ५१ ॥ आन
न्दकन्दायवि[4]शुद्धबुद्धयेशुद्धायहंसायपरावराय॥नमोऽस्तुतस्मैगणनायकायश्रीवासुदेवायमहाप्रभाय ॥ ५२ ॥ श्रीपाञ्चजन्येनविराजमानंरविप्रभेणा
पिसुदर्शनेन ॥ गदाब्जकेनापिविराजमानंप्रभुंसदैनंशरणंप्रपद्ये ॥ ५३ ॥ यंवेदगुह्यंसगुणंगुणानामाधारभूतंसचराचरस्य ॥ यंसूर्यवैश्वानरतुल्यतेज
संतंवासुदेवंशरणंप्रपद्ये ॥ ५४ ॥ क्षुधानिधानंविमलंसुरूपमानन्दमानेनविराजमानम् ॥ यंप्राप्यजीवन्तिसुरादिलोकास्तंवासुदेवंशरणंप्रपद्ये ॥
॥ ५५ ॥ तमोघनानांस्वकरैर्विनाशंकरोतिनित्यंयतिधर्महेतुः ॥ उद्द्योतमानंरविदीप्ततेजसंतंवासुदेवंशरणंप्रपद्ये ॥ ५६ ॥ योभातिसर्वत्ररविप्रभा
वैःकरोतिशोषंचरसंददाति ॥ यःप्राणिनामन्तरगःसवायुस्तंवासुदेवंशरणंप्रपद्ये ॥ ५७ ॥ स्वेच्छानुरूपेणसदेवदेवोबिभर्तिलोकान्सकलान्महात्मा ॥
सन्तारणेनौरिववर्ततेयस्तंवासुदेवंशरणंप्रपद्ये ॥ ५८ ॥ अन्तर्गतोलोकमयःसदैवभवत्यसौस्थावरजङ्गमानाम् ॥ स्वाहामुखोदेवगणस्यहेतुस्तंवासुदे
वंशरणंप्रपद्ये ॥ ५९ ॥ रसैःसुपुण्यैःसकलैःसहैवपुष्णातिसौम्योगुणदश्चलोके ॥ अज्ञानियोनिर्मलतेजसैवतंवासुदेवंशरणंप्रपद्ये ॥ ६० ॥ अस्त्येव
सर्वत्रविनाशहेतुःसर्वाश्रयःसर्वमयःससर्वः ॥ विनाहृषी[5]कैर्विषयान्प्रभुङ्क्तेतंवासुदेवंशरणंप्रपद्ये ॥६१॥ जीवस्वरूपेणबिभर्तिलोकांस्ततःस्वमूर्तान्सचरा

१ 'गुण्यम्' इ० पा०। २ 'खमभागाय सद्धर्मं नमामि प्रणवं परम्' इ० पा०। ३ 'उपास्यं सर्वलोकस्य'। इ० पा०। ४ 'च केवलाय' इ०, 'गुणार्णवाय' इ० च पा०। ५ 'तेजःस्वरूपेण' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चरांश्च ॥ निष्केवलोज्ञानमयःसुशुद्धस्तंवासुदेवंशरणंप्रपद्ये ॥ ६२ ॥ दैत्यान्तकंदुःखविनाशमूलंशान्तंपरंशक्तिमयंविशालम् ॥ यंप्राप्यदेवाविनयं
प्रयान्तितंवासुदेवंशरणंप्रपद्ये ॥ ६३ ॥ सुखंसुखान्तंसुखदंसुरेशंज्ञानार्णवंतंमुनिपंसुरेशम् ॥ सत्याश्रयंसत्यगुणोपविष्टंतंवासुदेवंशरणंप्रपद्ये ॥६४॥
यज्ञाङ्गरूपंपरमार्थरूपंमायान्वितंमापतिमुग्रपुण्यम् ॥ विज्ञानमेकंजगतांनिवासंतंवासुदेवंशरणंप्रपद्ये ॥ ६५ ॥ अम्भोधिमध्येशयनंहितस्यनागाङ्ग
भोगेशयनेविशाले ॥ श्रीपादपद्मद्वयमेवतस्यतद्वासुदेवस्यनमामिनित्यम् ॥ ६६ ॥ पुण्यान्वितंशङ्करमेवनित्यंतीर्थैरनेकैःपरिसेव्यमानम् ॥ तत्पाद
पद्मद्वयमेवतस्यश्रीवासुदेवस्यअघापहंतत्॥६७॥पादाम्बुजंरक्तमहोत्पलाभमम्भोजसच्छिह्नजयोपयुक्तम्॥अलङ्कृतंनूपुरमुद्रिकाभिःश्रीवासुदेवस्यनमा
मिनित्यम् ॥६८॥ देवैःसुसिद्धैर्मुनिभिःसदैवनुतंसुभक्त्याउरगाधिपैश्च ॥ तत्पादपङ्केरुहमेवपुण्यंश्रीवासुदेवस्यनमामिनित्यम् ॥६९॥ यस्यापिपादा
म्भसिमज्जमानाःपूतादिवंयान्तिविकल्मषास्ते॥मोक्षंलभन्तेमुनयःसुतुष्टास्तंवासुदेवंशरणंप्रपद्ये ॥७०॥पादोदकंतिष्ठतियत्रविष्णोर्गङ्गादितीर्थानिसदैव
तत्र॥पिबन्तियेऽद्यापिसपापदेहास्तेयान्तिशुद्धाःसुगृहंमुरारेः॥७१॥पादोदकेनाप्यभिषिच्यमानाउग्रैश्चपापैःपरिलिप्तदेहाः ॥तेयान्तिमुक्तिंपरमेश्वरस्य
तस्यैवपादौसततंनमामि॥७२॥नैवेद्यमात्रेणसुभक्षितेनसुचक्रिणस्तस्यमहात्मनस्तु॥श्रीवाजपेयस्यफलंलभन्तेसर्वार्थयुक्ताश्चनराभवन्ति॥७३॥नाराय
णंतंनरकाधिनाशनंमायाविहीनंसकलंगुणज्ञम्॥यंध्यायमानाःसुगतिंप्रयान्तितंवासुदेवंशरणंप्रपद्ये ॥७४॥योवन्द्यस्त्वृषिसिद्धचारणगणैर्देवैःसदापूज्य
तेयोविश्वस्यविसृष्टिहेतुकरणेब्रह्मादिकानांप्रभुः ॥ यःसंसारमहार्णवेनिपतितस्योद्धारकोवत्सलस्तस्यैवापिनमाम्यहंसुचरणौभक्त्यावरौपावनौ
॥ ७५ ॥ योदृष्टोमखमण्डपेसुरगणैःश्रीवामनःसामगःसामोद्गीतकुतूहलःसुरगणैस्त्रैलोक्यएकःप्रभुः ॥ कुर्वन्तंनयनेक्षणैःशुभकरैर्निष्पापतांतद्बलेस्त
स्याहंचरणारविन्दयुगलंवन्देपरंपावनम् ॥७६॥ राजन्तंद्विजमण्डलेमखमुखेब्रह्मश्रियाशोभितंदिव्येनापिसुतेजसाकरमयंयंचेन्द्रनीलोपमम् ॥ देवा
नांहितकाम्ययासुतनुजंवैरोचनस्यार्पितंयाचन्तंममदीयतांत्रिपदकंवन्देप्रभुंवामनम् ॥ ७७ ॥ तंद्रष्टुंरविमण्डलेमुनिगणैःसम्प्राप्तवन्तंदिवंचन्द्रार्कास्तम
यान्तरेकिलपदासंछादयन्तंतदा ॥ तस्यैवापिसुचक्रिणःसुरगणाःप्रापुर्लयंसाम्प्रतंकायेविश्वविकोशकेतमतुलंनौमिप्रभोर्विक्रमम् ॥ ७८ ॥ इतिश्रीपा
द्मपुराणेभूमिखण्डेवेनोपाख्यानेगुरुतीर्थमाहात्म्येच्यवनचरित्रेऽष्टनवतितमोऽध्यायः ॥ ९८ ॥ विष्णुरुवाच ॥ स्तोत्रंपवित्रंपरमंपुराणंपापापहंपुण्यम
यंशिवंच ॥ धन्यंसुसूक्तंपरमंसुजाप्यंनिशम्यराजाससुखीबभूव ॥ १ ॥ गतासुतृष्णाक्षुधयासमेतादेवोपमोभूमिपतिर्बभूव ॥ भार्याचतस्यापिविभा
तिरूपैर्युक्ताबुभौपापविमुक्तदेहौ ॥ २ ॥ देवःसुदेवैःपरिवारितोऽसौविप्रैःसुसिद्धैर्हरिभक्तियुक्तैः ॥ आगत्यभूपंगतकल्मषंतंश्रीशङ्खचक्राब्जग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दासिधर्ता ॥ ३ ॥ श्रीनारदोभार्गवव्यासपुण्याःसमागतस्तत्रमृकण्डसूनुः ॥ वाल्मीकिनामामुनिर्विष्णुभक्तःसमागतोब्रह्मसुतोवसिष्ठः ॥ ४ ॥
गर्गोमहात्माहरिभक्तियुक्तोजाबालिरैभ्यावथकश्यपश्च ॥आजग्मुरेतेहरिणासमेताविष्णुप्रियाभागवतावरिष्ठाः ॥५॥पुण्याःसुधन्यागतकल्मषास्तेहरेः
सुपादाम्बुजभक्तियुक्ताः ॥ श्रीवासुदेवंपरिवार्यतस्थुःस्तुवन्तिभूपंविविधप्रकारैः ॥ ६ ॥ देवाश्चसर्वेहुतभुङ्मुखाश्चब्रह्माहरिश्चापिसुदिव्यदेव्यः ॥
गायन्तिदिव्यंमधुरंमनोहरंगन्धर्वराजादिसुगायनाश्च ॥७॥ सुवेदयुक्तैःपरमार्थसंमितैःस्तवैःसुपुण्यैर्मुनयःस्तुवन्ति॥ दृष्ट्वापतिंभूपतिमेवदेवोहरिर्बभाषे
वचनंमनोहरम् ॥८॥ वरंयथेष्टंवरयस्वभूपतेददाम्यहंतेपरितोषितोयतः ॥ हरेस्तुवाक्यंसनिशम्यराजादृष्ट्वासुरारिंवदमानमग्रे ॥९॥ नीलोत्पलाभंमुर
घातिनंप्रभुंतंशङ्खचक्रासिगदाग्रधारिणम्॥श्रियासमेतंपरमेश्वरंतंरत्नोज्ज्वलंकङ्कणहारभूषितम् ॥१०॥ रविप्रभंदेवगणैःसुसेवितंमहार्घहाराभरणैःसुभूषि
तम् ॥ सुदिव्यगन्धैर्वरलेपनैर्हरिंसुभक्तिभावैरवनींगतोनृपः ॥ ११ ॥ दण्डप्रणामैःसततंननामजयेत्युवाचाथमहामुदंगतः ॥ दासोऽस्मिभृत्यो
ऽस्मिपुरःसतेसदाभक्तिंनजानेनचभावमुत्तमम् ॥१२॥ जायान्वितंमामिहचागतंहरेप्रपाहिवैत्वांशरणंप्रपन्नम् ॥ धन्यास्तुतेमाधवमानवाद्विजाःसदै
वतेध्यानमनोविलीनाः ॥ १३ ॥ समुच्चरन्तोभवमाधवेतिप्रयान्तिवैकुण्ठमितःसुनिर्मलाः ॥ तवैवपादाम्बुजनिर्गतंपयःपुण्यंतथायेशिरसावहन्ति ॥
॥ १४ ॥ समस्ततीर्थोद्भवतोयआप्लुतास्तेमानवायान्तिहरेःसुधाम ॥ १५ ॥ नास्तियोगोनमेभक्तिर्ज्ञानंनास्तिनमेक्रिया ॥ कस्यपुण्यस्यसङ्गेनवरं
महांप्रयच्छसि ॥१६॥ हरिरुवाच ॥ वासुदेवाभिधानंयन्महापातकनाशनम् ॥ भवताविज्वलात्पुण्याच्छ्रुतंराजन्किल्मषम् ॥ १७ ॥ तेनत्वंमुक्ति
भागीचसञ्जातोनात्रसंशयः ॥ ममलोकेप्रभुङ्क्ष्वत्वंदिव्यान्भोगान्मनोऽनुगाम् ॥ १८ ॥ राजोवाच॥यदिदेववरोदेयोममदीनस्यवैत्वया ॥ विज्वला
यप्रयच्छत्वंप्रथमंवरमुत्तमम् ॥ १९ ॥ हरिरुवाच ॥ विज्वलस्यपितापुण्यःकुञ्जलोज्ञानपण्डितः ॥ वासुदेवमहास्तोत्रंनित्यंपठतिभूपते ॥ २० ॥
पुत्रैःप्रियासमेतोऽसौममगेहंप्रयास्यति ॥ एतत्तुजपतेस्तोत्रंसदादास्याम्यहंफलम् ॥२१॥ एवमुक्तेशुभेवाक्येराजाकेशवमब्रवीत् ॥ इदंस्तोत्रंमहापुण्यं
सफलंकुरुकेशव ॥ २२ ॥ हरिरुवाच॥कृतेयुगेमहाराजयदास्तोष्यन्तिमानवाः॥तदामोक्षंप्रयास्यन्तितत्क्षणान्नात्रसंशयः ॥ २३ ॥ त्रेतायांमासमात्रे
णषड्भिर्मासैस्तुद्वापरे ॥ वर्षेणैकेनचकलौयेजपन्तिचमानवाः ॥ २४ ॥ स्वर्गंप्रयान्तिराजेन्द्रवैष्णवंगतिदायकम् ॥ त्रिकालमेककालंवास्नातोजपति
ब्राह्मणः ॥ २५ ॥ यंयंतुवाञ्छतेकामंसंसतस्यभविष्यति ॥ क्षत्रियोजयमाप्नोतिधनधान्यैरलङ्कृतः ॥ २६ ॥ वैश्योभविष्यतिश्रीमान्सुखीशूद्रोभवि
ष्यति ॥ अन्त्यजंश्रावयेद्योऽयंपापान्मुक्तोभविष्यति ॥२७॥ श्रावकोनरकंघोरंकदाचिन्नैवपश्यति ॥ ममस्तोत्रप्रसादाच्चसर्वसिद्धोभविष्यति॥२८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भुञ्जानेषुचविप्रेषुश्राद्धकालेतुयःपठेत् ॥ पितरोवैष्णवंलोकंतृप्तायास्यन्तिभूपते ॥ २९ ॥ तर्पणान्तेजपंकुर्याद्ब्राह्मणोवाथक्षत्रियः ॥ पिबन्तिचामृतंतत
स्यपितरोहृष्टमानसाः ॥ ३० ॥ होमेषुयज्ञमध्येचभावाज्जपतिमानवः ॥ तत्रविघ्नानजायन्तेसर्वसिद्धिर्भविष्यति ॥ ३१ ॥विषमेदुर्गसंस्थानेहिंस्रव्या
घ्रस्यसङ्कटे ॥ चौराणांसङ्कटेप्राप्तेतत्रस्तोत्रमुदीरयेत् ॥३२॥ तत्रशान्तिर्महाराजभविष्यतिनसंशयः ॥ अन्येष्वेवसुभव्येषुराजद्वारेगतेनरे ॥ ३३ ॥
वासुदेवाभिधानस्यअयुतंजपतेनरः ॥ ब्रह्मचर्येणसंस्नातःक्रोधलोभविवर्जितः ॥ ३४ ॥ तिलतण्डुलकैर्होमंदशांशमाज्यमिश्रितम्[1] ॥ वासुदेवंप्रपूज्यैवद
द्यात्प्रयतमानसः ॥ ३५ ॥ श्लोकंप्रतिततोदेयंहोमंध्यानेनमानवैः ॥ तेषांसुभृत्यवन्नित्यंपार्श्वंनैवत्यजाम्यहम् ॥ ३६ ॥ कलौयुगेसुसम्प्राप्तेस्तोत्रेदास्यं
प्रयास्यति ॥ वेदभङ्गप्रसङ्गेनयस्यकस्यनदीयते ॥ ३७ ॥ सर्वकामसमृद्धार्थःसचैवहिभविष्यति ॥ एवंहिसफलंस्तोत्रंमयाभूपकृतंशृणु ॥ ३८ ॥ ब्रह्म
णानिर्मितंतेनजप्तंरुद्रेणवैपुरा ॥ ब्रह्महत्याविनिर्मुक्तइन्द्रोमुक्तश्चकिल्बिषात् ॥ ३९ ॥ देवाश्चऋषयोगुह्याःसिद्धविद्याधरामराः ॥ नागैस्तुपूजितंस्तोत्र
मापुःसिद्धिंयथेप्सिताम् ॥४०॥ पुण्योधन्यःसवैदातापुत्रवान्हिभविष्यति ॥ जपिष्यतिममस्तोत्रंनात्रकार्याविचारणा ॥ ४१ ॥ आगच्छत्वंस्त्रिया
सार्धंममस्थानंनृपोत्तम॥हस्तावलम्बनंदत्तंहरिणातस्यभूपतेः ॥ ४२ ॥ नेदुर्दुन्दुभयस्तत्रगन्धर्वाललितंजगुः ॥ ननृतुश्चाप्सरःश्रेष्ठाःपुष्पवृष्टिंप्रचक्रि
रे ॥ ४३ ॥ देवाश्चऋषयःसर्वेवेदस्तोत्रैःस्तुवन्तिते ॥ ततोदयितयासार्द्धंजगामनृपतिर्हरिम् ॥ ४४ ॥ तंस्तूयमानंसुरसिद्धसङ्घैःसविज्वलःपश्यति
हृष्टमानसः॥ समागतस्तिष्ठतियत्रवैपितामाताचवेगेनमहाप्रभावः ॥ ४५ ॥ इतिश्रीपाद्म० भूमिखण्डेवेनोपाख्यानेगुरुतीर्थेच्यवनचरित्रेनवनवतितमो
ऽध्यायः ॥९९॥ विष्णुरुवाच ॥ नर्मदायास्तटेरम्येवटेतिष्ठतिवैपिता ॥ विज्वलोऽपिसमायातःपितरंप्रणिपत्यसः ॥ १ ॥ वासुदेवाभिधानस्यस्तोत्र
स्याऽपिमहामतिः॥समाचष्टेसधर्मात्मामहिमानंपितुःपुरः ॥२॥ यथाविष्णुःसमागत्यददौतस्मैवरंशुभम् ॥ तत्सर्वंकथयामाससुप्रसन्नेनचेतसा॥३॥
कुञ्जलोऽपिचवृत्तान्तंसमाकर्ण्यसभूपतेः ॥ हर्षेणमहताविष्टःपुत्रमालिङ्ग्यविज्वलम् ॥४॥ आहपुण्यंकृतंवत्सत्वयाराज्ञेमहात्मने ॥ उपकारंमहापुण्यं
वासुदेवस्यकीर्तनात् ॥ ५ ॥ एवमाभाष्यतंपुत्रमाशीर्भिरभिनन्द्यच ॥ पुत्रंदेवसमोपेतंस्तुत्वाचैवपुनःपुनः ॥ ६ ॥ स्थितःसरित्तटेरम्येच्यवनस्यो
पपश्यतः ॥ एतत्तेसर्वमाख्यातंतेषांवृत्तंमहात्मनाम् ॥ ७ ॥ वैष्णवानांमहाराजअन्यत्किंतेवदाम्यहम् ॥ ८ ॥ वेनउवाच ॥ अमृतंशङ्खपात्रेणपाना
र्थंममचार्पितम् ॥ तस्मात्कस्यनचश्रद्धापातुंमर्त्यस्यभूतले ॥ ९ ॥ उत्तमंवैष्णवंज्ञानंपानानामिहसर्वदा ॥ त्वयैवंकथ्यमानस्यपानेतृप्तिर्नजायते

१ 'द्विलक्षं बिल्वकैर्होमं घृतगुग्गुलसंयुतम्' इ० पा।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १० ॥ श्रोतुंहिदेवदेवेशममश्रद्धाविवर्द्धते॥कथयस्वप्रसादान्मेकुञ्जलस्यापिचेष्टितम् ॥११॥ महात्मनाकिमुक्तंचचतुर्थंतनयंप्रति॥तत्त्वंसुविस्तरादे
वकृपयाकथयस्वमे ॥ १२ ॥ श्रीभगवानुवाच ॥ श्रूयतामभिधास्यामिचरित्रंकुञ्जलस्यच ॥ बहुश्रेयःसमायुक्तंचरित्रंच्यवनस्यच ॥ १३ ॥ इदंपुण्यं
नरश्रेष्ठआख्यानंपापनाशनम् ॥ यःशृणोतिनरोभक्त्यागोसहस्रफलंलभेत् ॥ १४ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेगुरुतीर्थमाहात्म्येच्यव
नचरित्रेशततमोऽध्यायः ॥ १०० ॥ सूतउवाच ॥ देवदेवोहृषीकेशस्त्वङ्गपुत्रंनृपोत्तमम् ॥ समाचष्टमहाश्रेयआख्यानंपापनाशनम् ॥ १ ॥ श्रूयता
मभिधास्यामिचरित्रंक्षेमदायकम् ॥ द्विजस्यापिचवृत्तान्तंकुञ्जलस्यमहात्मनः ॥ २ ॥ विष्णुरुवाच ॥ कुञ्जलश्चापिधर्मात्माचतुर्थंपुत्रमेवच ॥ समा
हूयसुदायुक्तउवाचैनंकपिञ्जलम् ॥ ३ ॥ किंतुपुत्रत्त्वयादृष्टमपूर्वंकथयस्वमे ॥ भोजनार्थंतुयासित्वमितःकस्मिन्सुतोत्तम ॥ ४ ॥ तदाचक्ष्वमहाभाग
यदिदृष्टंसुपुण्यदम् ॥५॥ कपिञ्जलउवाच ॥ यच्चतातत्वयापृष्टमपूर्वंप्रवदाम्यहम् ॥ यन्नदृष्टंश्रुतंकेनकस्मान्नैवश्रुतंमया ॥ ६ ॥ तदिहैवप्रवक्ष्यामिशू
यतामधुनापितः ॥ शृण्वन्तुभ्रातरःसर्वेमातस्त्वंशृणुसाम्प्रतम् ॥ ७ ॥ कैलासःपर्वतश्रेष्ठोधवलश्चन्द्रसन्निभः ॥ नानाधातुसमाकीर्णोनानावृक्षोपशो
भितः ॥ ८ ॥ गङ्गाजलैःशुभैःपुण्यैःक्षालितःसर्वतःपितः ॥ नदीनांतुसहस्राणिदिव्यानिविविधानिच ॥ ९ ॥ यस्मात्तातप्रसूतानिजलानिविविधा
निच ॥ तडागानिसहस्राणिसोदकानिमहागिरौ ॥ १० ॥ नद्यःसन्तिविशालिन्योहंससारससेविताः ॥ तस्मिञ्छिखरिणांश्रेष्ठेपुण्यदाःपापनाशनाः
॥ ११ ॥ वनानिविविधान्येवपुष्पितानिफलानिच ॥ नानावृक्षोपयुक्तानिहरितानिशुभानिच ॥ १२ ॥ किन्नराणांगणैर्युक्तश्चाप्सरोभिःसमाकुलः ॥
गन्धर्वचारणैःसिद्धैर्देववृन्दैःसुशोभितः ॥१३॥ दिव्यवृक्षवनोपेतोदिव्यभावैःसमाकुलः ॥ दिव्यगन्धैःसुशोभाढ्यैर्नानारत्नसमन्वितः ॥ १४ ॥ शि
लाभिःस्फटिकस्यापिशुक्लाभिस्तुसुशोभनः ॥ सूर्यतेजोमयोराजंस्तेजोभिस्तुसमाकुलः ॥ १५ ॥ चन्दनैश्चारुगन्धैश्चबकुलैर्नीलपुष्पकैः ॥ नानापु
ष्पमयैर्वृक्षैःसर्वत्रसमलङ्कृतः ॥ १६ ॥ पक्षिणांसुनिनादैश्चदिव्यानांमधुरायते ॥ षट्पदानांनिनादैश्चवृक्षौघैर्मधुरायते ॥ १७ ॥ रुतैश्चकोकिलानां
तुशोभतेसवनोगिरिः ॥ गणकोटिसमाकीर्णंतत्रास्तिशिवमन्दिरम् ॥ १८ ॥ अंशुभिर्धवलंपुण्यंपुण्यराशिशिलोच्चयम् ॥ सिंहैश्चगर्जमानैश्चसैरिभैः
कुञ्जरैस्ततः ॥ १९ ॥ दिग्गजानांसुघोषैश्चशब्दितंचसमन्ततः ॥ नानामृगैःसमाकीर्णंशाखामृगगणाकुलम् ॥ २० ॥ मयूरकेकाघोषैश्चगुहासुचवि
नादितम् ॥ कन्दरैर्लेपनैःकूटैःसानुभिश्चविराजितम् ॥ २१ ॥ नानाप्रस्रवणोपेतमोषधीभिर्विराजितम् ॥ दिव्यंदिव्यगुणंपुण्यंपुण्यधामसमाकुलम्
॥ २२ ॥ सेवितंपुण्यलोकैश्चपुण्यराशिंमहागिरिम् ॥ पुलिन्दभिल्लकोलैश्चसेवितंपर्वतोत्तमम् ॥ २३ ॥ विकटैःशिखरैःकोटैरद्रिराजाप्रकाशते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्यैर्नानाविधैःपुण्यैःकौतुकैर्मङ्गलैःशुभैः ॥ २४ ॥ गङ्गोदकप्रवाहैश्चमहाशब्दंप्रसुस्रुवे ॥ शङ्करस्यगृहंतत्रकैलासंगतवानहम् ॥ २५ ॥ तत्रा
श्चर्यंमयादृष्टंयन्नदृष्टंकदाश्रुतम् ॥ श्रूयतामभिधास्यामितातसर्वंमयोदितम् ॥ २६ ॥ शिखराद्गिरिराजस्यमेरोःपुण्यान्महोदयात् ॥ हिमक्षीरसुव
र्णस्तुप्रवाहःपततेभुवि ॥ २७ ॥ गङ्गायाश्चमहाभागरंहसाघोषभूषितः ॥ कैलासस्यशिरःप्राप्यतत्रविस्तरतांगतः ॥ २८ ॥ दशयोजनमाने
नतत्रगङ्गाह्रदोमहान् ॥ महातोयेनपुण्येनविमलेनविराजते ॥ २९ ॥ सर्वतोभद्रतांप्राप्तोमहाहंसैःप्रशोभते ॥ सामोच्चारेणपुण्येनदिव्येनमधुरेणच
॥ ३० ॥ हंसास्तत्रप्रकूजन्तिसरस्तेनविराजते ॥ तस्यतीरेशिलायांवैहिमकन्यामहामते ॥ ३१ ॥ आसीनासुक्तकेशान्तारूपद्रविणशालिनी ॥
दिव्यरूपसुसम्पन्नासगुणादिव्यलक्षणा ॥ ३२ ॥ दिव्यालङ्कारभूषाचतस्यास्तीरेविराजते॥ नजानेगिरिराजस्यतनयावामहोदधेः ॥३३॥ नोवास्तिब्र
ह्मणःपत्नीनोवास्वाहाभविष्यति ॥ इन्द्राणीवामहाभागारोहिणीवाभविष्यति ॥ ३४ ॥ ईदृशीरूपसम्पत्तिर्युवतीनांनदृश्यते ॥ अन्यासांच
सुदिव्यानांनारीणांतातसर्वथा ॥ ३५ ॥ यादृशंरूपसम्भावंगुणशीलंप्रदृश्यते ॥ अप्सरसांकदानास्तितादृशंरूपलक्षणम् ॥ ३६ ॥ यादृशंतुम
यादृष्टंतदङ्गेविश्वमोहनम् ॥ शिलापदेसमासीनादुःखेनापिसमाकुला ॥ ३७ ॥ रुदतेसुस्वरैर्बालाअनेकैःस्वजनैर्विना ॥ अश्रूणिमुञ्चमानासा
मुक्ताभानिबहूनिच ॥३८॥ निर्मलानिसरस्यत्रपतन्त्येवमहामते ॥ बिन्दवोमौक्तिकाभास्तेनिपतन्तिमहोदके ॥३९॥ तेभ्योभवन्तिपद्मानिहृद्यानिसु
रभीणितु॥ पद्मानिजज्ञिरेतेभ्योनेत्राश्रुभ्योमहामते॥४०॥गङ्गाम्भसितरन्त्येवअसङ्ख्यातानितानितु॥पतितानिसुहृद्यानिरंहसायानितानितु ॥४१॥
गङ्गाप्रवाहमध्येतुहंसवृन्दैःसुसेविते ॥ भागीरथ्याःप्रवाहस्तुतस्मात्स्थानाद्विनिर्गतः ॥४२॥ कैलासशिखरंप्राप्यरत्नाख्यंचारुकन्दरम् ॥वर्ततेतोयपूर्ण
स्तुयोजनद्वयविस्तृतः॥४३॥हंसवृन्दसमाकीर्णोजलपक्षिसमाकुलः ॥नानावर्णविशेषाणिसन्तिपद्मानितत्रच॥४४॥प्रवाहेनिर्मलेतातमुनिवृन्दनिषेविते
अश्रुभ्योयानिजातानिप्रभातेकमलानितु ॥४५॥ गङ्गोदकप्लुतान्येवसौरभाणिमहान्तिच ॥ प्रतरन्तिप्रवाहेतुनिर्मलेजलपूरिते ॥ ४६ ॥ मध्येमध्ये
सुहंसैश्चजलपक्षिनिनादिते ॥ रत्नाख्येतुगिरौतस्मिन्रत्नेश्वरमहेश्वरः ॥ ४७ ॥ देवदैत्यसुपूज्योऽपितिष्ठतेतातसर्वदा ॥ तत्रदृष्टोमयाताातकश्चित्पुण्यम
योमुनिः ॥ ४८ ॥ जटाभारसमाक्रान्तोनिर्वासादण्डधारकः ॥ निराधारोनिराहारस्तपसातीवदुर्बलः॥ ४९ ॥ कृशाङ्गोऽप्यस्थिसङ्घातस्त्वचामात्रे
णवेष्टितः ॥ भस्मोद्धूलितमात्राणिसर्वाङ्गानिमहात्मनः ॥ ५० ॥ शुष्कपत्राणिभक्षेतशीर्णानिपतितानिच ॥ शिवभक्तिसमासीनोदुराधारोमहातपाः ॥
॥ ५१ ॥ अश्रुभ्योयानिजातानिपद्मानिसुरभीणिच ॥ गङ्गातोयात्समानीयदेवदेवंप्रपूजयेत् ॥ ५२ ॥ रत्नेश्वरंमहाभागोगीतनृत्यविशारदः ॥ गा

CC-0. In Public Domain. Digitization by eGangotri

यतेनृत्यतेतस्यद्वारस्थस्त्रिपुरद्विषः ॥ ९३ ॥ मठमागत्यधर्मात्मारोदतेसुस्वरैरपि ॥ एतद्दृष्टंमयातातअपूर्ववंवदतांवर ॥ ९४ ॥ कथयस्वप्रसादान्मेय दित्वंवेत्सिकारणम् ॥ साकानारीमहाभागाकस्मात्तातप्ररोदिति ॥ ९५ ॥ कस्मात्सदेवपुरुषोदेवमर्चेन्महेश्वरम् ॥ तन्मेत्वंविस्तराद्ब्रूहिसर्वसन्देह कारणम् ॥ ९६ ॥ एवमुक्तोमहाप्राज्ञःकुञ्जलोऽपिसुतेनहि ॥ कपिञ्जलेनप्रोवाचविस्तराच्छृण्वतोमुनेः ॥ ९७ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवे नोपाख्यानेगुरुतीर्थमाहात्म्येच्यवनचरित्रएकाधिकशततमोऽध्यायः ॥ १०१ ॥ कुञ्जलउवाच ॥ सर्ववत्सप्रवक्ष्यामियत्त्वयोक्तंममाधुना ॥ उभयो र्देवनंयत्तुयस्माज्जातंद्विजोत्तम ॥ १ ॥ एकदातुमहादेवीपार्वतीप्रमदोत्तमा ॥ क्रीडमानामहात्मानमीश्वरंवाक्यमब्रवीत् ॥ २ ॥ ममोरसिमहादेवजातं महत्सुदोहदम् ॥ दर्शयस्वममाग्रेत्वंकाननंकाननोत्तमम् ॥ ३ ॥ श्रीमहादेवउवाच ॥ एवमस्तुमहादेविनन्दनंदेवसङ्कुलम् ॥ दर्शयिष्यामितेपुण्यं द्विजसिद्धनिषेवितम् ॥ ४ ॥ एवमाभाष्यतांदेवींतयासहगणैस्ततः ॥ जग्मतुर्वत्सतौदेवौनन्दनंवनमेवतु ॥ ५ ॥ सर्वाङ्गसुन्दरंदिव्यपृष्ठमाभरणै र्युतम् ॥ घण्टामालाभिसंयुक्तंकिङ्किणीजालमालिनम् ॥ ६ ॥ चामरैःपट्टसूत्रैश्चमुक्तामालासुशोभितम् ॥ हंसचन्द्रप्रतीकाशंवृषभंचारुलक्षणम् ॥ ॥ ७ ॥ समारूढोमहादेवोगणकोटिसमावृतः ॥ नन्दिभृङ्गिमहाकालस्कन्दचण्डमनोहराः ॥ ८ ॥ वीरभद्रोगणेशश्चपुष्पदन्तोगणेश्वरः ॥ अति बलःसुबलोनाममेघनादोवटावहः ॥ ९ ॥ घण्टाकर्णश्चकालिन्दःपुलिन्दोवीरबाहुकः ॥ केशरीकिङ्करोनामचन्द्रहासःप्रजापतिः ॥ १० ॥ एते चान्येचबहवःसनकाद्यास्तपोबलाः ॥ गणैश्चकोटिसङ्ख्यातैःसशिवःपरिवारितः ॥ ११ ॥ नन्दनंवनमेवापिसेवितंदेवकिन्नरैः ॥ प्रविवेशमहादेवोगणै र्देव्यासमन्वितः ॥ १२ ॥ दर्शयामासदेवेशोगिरिजायैसुशोभनम् ॥ नानापादपसम्पन्नंबहुपुष्पसमाकुलम् ॥ १३ ॥ दिव्यरम्भावनाकीर्णं पुष्पवद्भिस्तुचम्पकैः ॥ मल्लिकाभिःसुपुष्पाभिर्मालतीजालसङ्कुलम् ॥ १४ ॥ नित्यंपुष्पितशाखाभिःपाटलानांवनोत्तमैः ॥ राजमानंमहावृक्षैश्च न्दनैश्चारुगन्धिभिः ॥ १५ ॥ देवदारुवनैर्जुष्टंतुङ्गवृक्षैःसमाकुलम् ॥ सरलैर्नारिकेलैश्चतद्वत्पूगीफलद्रुमैः ॥ १६ ॥ खर्जूरपनसैर्दिव्यैःफलभाराव नामितैः ॥ परिमलोद्गारसंयुक्तैर्गुरुवृक्षसमाकुलम् ॥ १७ ॥ अग्नितेजःसमाभासैःसप्तपर्णैःसुशोभितम् ॥ राजवृक्षैःकदम्बैश्चपुष्पशोभान्वितंसदा ॥ ॥ १८ ॥ जम्बूनिम्बमहावृक्षैर्मातुलिङ्गैःसमाकुलम् ॥ नारङ्गैःसिन्धुवारैश्चप्रियालैःशालतिन्दुकैः ॥ १९ ॥ उदुम्बरैःकपित्थैश्चजम्बूपादपशोभि तम् ॥ लकुचैःपुष्पसौगन्धैःस्फुटनागैःसमाकुलम् ॥ २० ॥ चूतैश्चफलराजाद्यैर्नीलैश्चैवघनोपमैः ॥ नीलैःशालवनैर्दिव्यैर्जालानांतुवनैस्ततः ॥ ॥ २१ ॥ तमालैस्तुविशालैश्चसेवितंतपनोपमैः ॥ शोभितंनन्दनंपुण्यंशिवेनपरिदर्शितम् ॥ २२ ॥ शोभितंचद्रुमैश्चान्यैःसर्वैर्नीलवनोपमैः ॥ सर्व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कामफलोपेतैःकल्याणफलदायकैः ॥ २३ ॥ कल्पद्रुमैर्महापुण्यैःशोभितंनन्दनंवनम् ॥ नानापक्षिनिनादैश्चसङ्कुलंमधुरस्वरैः ॥ २४ ॥ कोकिलानांरुतैःपुण्यैरुद्घुष्टंमधुकारिभिः ॥ मकरन्दविलुब्धानांपक्षिणांरुतनादितम् ॥ २५ ॥ नानावृक्षैःसमाकीर्णंनानामृगगणायुतम् ॥ वृक्षेभ्योविविधैःपुष्पैस्सौगन्धैःपतितैर्भुवि ॥ २६ ॥ साचभूराजतेपुत्रपूजितेवसुगन्धिभिः ॥ तत्रवाप्योमहापुण्याःपद्मसौगन्धनिर्मलाः ॥ २७ ॥ तोयैस्ताःपूरिताःपुत्रहंसकारण्डसेविताः ॥ तडागैःसागरप्रख्यैस्तोयसौगन्धपूजितैः ॥ २८ ॥ नन्दनंभातिसर्वत्रगणैरप्सरसांमहत् ॥ विमानैःकलशैःशुभ्रैर्हेमदण्डैःसुशोभनैः ॥ २९ ॥ नन्दनोवनराजस्तुप्रासादैस्तुसुधान्वितैः ॥ यत्रतत्रप्रभात्येवकिन्नराणांमहागणैः ॥ ३० ॥ गन्धर्वैरप्सरोभिश्चसुरूपाभिर्द्विजोत्तम ॥ देवतानांविनोदैश्चमुनिवृन्दैःसुयोगिभिः ॥ ३१ ॥ सर्वत्रशुशुभेपुण्यसंस्थानंनन्दनस्यच ॥ ३२ ॥ एवंसमालोक्यमहानुभावोभवःसुदेव्यासहितोमहात्मा ॥ श्रीनन्दनंपुण्यवतांनिवासंसुखाकरंशान्तिगुणोपपन्नम् ॥ ३३ ॥ आदित्यतेजःसमतेजसांगणैःप्रभातिवैरश्मिभिर्जातरूपः ॥ पुष्पैःफलैःकामगुणोपपन्नःकल्पद्रुमोनन्दनकाननेऽपि ॥ ३४ ॥ एवंविधंपादपराजमेवसंवीक्ष्यदेवीचशिवंबभाषे ॥ अस्याभिधानंकथयस्वनाथसर्वस्यपुण्यस्यनगस्यपुण्यम् ॥३५॥ तेजस्विनांसूर्यवरःसमन्तात्सदेवदेवींचशिवोबभाषे ॥३६॥ शिवउवाच॥अस्यप्रतिष्ठामहतीशुभाख्यादेवेषुमुख्योमधुसूदनश्च॥नदीषुमुख्यासुरनिम्नगापिविसृष्टिकर्तापियथैवधाता ॥३७॥ सुखावहानांचयथासुचन्द्रोभूतेषुमुख्याचयथैवपृथ्वी॥ नगेन्द्रराजोहियथानगानांजलाशयेष्वेवयथासमुद्रः ॥ ३८ ॥ महौषधीनामिवदेविचान्नंमहीधराणांहिमवान्यथैव ॥ विद्यासुमध्येचयथात्मविद्यालोकेषुसर्वेषुयथानरेन्द्रः ॥ तथैवमुख्यस्तरुराजएषसर्वातिथिर्देवपतेःप्रियोऽयम् ॥३९॥ श्रीपार्वत्युवाच ॥ गुणान्नुशम्भोममकीर्त्तयस्ववृक्षाधिपस्यास्यशुभान्सुपुण्यान् ॥ आकर्ण्यदेवोवचनंबभाषेदेव्यास्तुसर्वंसुतरोर्हितस्य ॥ ४० ॥ यंयंकल्पयन्तिसुपुण्यदेवादेवोपमादेववराश्चकान्ते ॥ तंतंहितेभ्यःप्रददातिवृक्षःकल्पद्रुमोनामवरिष्ठएषः ॥४१ ॥ अस्माच्चसर्वंप्रभवन्तिपुण्याद्दुष्प्राप्यमत्रैवतपोऽधिकास्ते ॥ जीवाधिकंरत्नमयंसुदिव्यंदेवास्तुभुञ्जन्तिमहाप्रधानाः ॥ ४२ ॥ शुश्रावदेवीवचनंशिवस्यआश्चर्यभूतंमनसाविचिन्त्य ॥ तस्यानुमत्यापरिकल्पितंचस्त्रीरत्नमेकंसुगुणंसुरूपम् ॥ ४३ ॥ सर्वाङ्गरूपांसगुणांसुरूपांतस्मात्सुवृक्षाद्गिरिजाप्रलेभे ॥ विश्वस्यमोहाययथोपविष्टासाहाय्यरूपामकरध्वजस्य ॥ ४४ ॥ क्रीडानिधानंसुखसिद्धिरूपंसर्वोपपन्नाकमलायताक्षी ॥ पद्मानानापद्मकरासुपद्माचामीकरस्यापियथासुमूर्तिः ॥ ४५ ॥ प्रभासुतद्वद्विमलासुतेजालीलासुतेजाश्चसुकुञ्चितास्ते ॥ प्रलम्बकेशाःपरिसूक्ष्मबद्धाःपुष्पैःसुगन्धैःपरिलेपिताश्च ॥ ४६ ॥ प्रबद्धकुन्तादृढकेशबन्धैर्विभातिसारूपवरेणबाला ॥ सीमन्तमार्गेचमुक्ताफलानांमालाविभात्ये

CC-0. In Public Domain. Digitization by eGangotri

वयथातरूणाम् ॥ ४७ ॥ सीमन्तमूलेतिलकंसुदेव्यायथोदितोदैत्यगुरुःसतेजाः ॥ भालेषुपद्मेमृगनाभिपद्मसमुत्थतेजःप्रकरैर्विभाति ॥ ४८ ॥ सीम
न्तमूलेतिलकस्यतेजःप्रकाशयेद्रूपश्रियंसुलोके ॥ केशेषुमुक्ताफलकेचभालेतस्याःसुशोभांविकरोतिनित्यम् ॥ ४९ ॥ यथासुचन्द्रःपरिभातिभासासा
रम्यचेष्टेवविभातितद्वत् ॥ सम्पूर्णचन्द्रोऽपियथाविभातिज्योत्स्नावितानेनहिमांशुजालः ॥ ५० ॥ तस्यास्तुवक्रंपरिभातितद्वच्छोभाकरंविश्वविशार
दंच ॥ हिमांशुरेवापिकलङ्कयुक्तःसंक्षीयतेनित्यकलाविहीनः ॥ ५१ ॥ सम्पूर्णमस्त्येवसदैवहृष्टंतस्यास्तुवक्रंपरिनिष्कलङ्कम् ॥ गन्धंविकाशंकमले
स्वकीयंततःसमालोक्यसुखंनलेभे ॥ ५२ ॥ पद्माननासर्वगुणोपपन्नामदीयभावैःपरिनिर्मितेयम् ॥ गन्धंस्वकीयंतुविपश्यपद्मंतस्यामुखाद्वातिजगत्स
मीरः ॥५३॥ लज्जाभियुक्तःसहसाबभूवजलंसमाश्रित्यसदैवतिष्ठति ॥५४॥ कतिमतिनियतबुद्धयासुधियोवदन्तिसुमदननृपतेःकोशंससुद्रकलाभिः ॥
सुवरदशनरत्नैर्हास्यलीलाभियुक्ताअरुणअधरविम्बंशोभमानस्तुआस्यः ॥ ५५ ॥ सुभ्रूःसुनासिकातस्याःसुकर्णौरत्नभूषितौ ॥ हेमकान्तिसमोपेतौ
कपोलौदीप्तिसंयुतौ ॥ ५६ ॥ रेखात्रयंप्रशोभेतग्रीवायांपरिसंस्थितम् ॥ सौभाग्यशीलशृङ्गारैस्तिस्रोरेखाइहैवहि ॥ ५७ ॥ सुस्तनौकठिनौपीनौवर्तु
लाकारसन्निभौ ॥ तस्याःकन्दर्पकलशावभिषेकायकल्पितौ॥ ५८॥ अंसावतीवशोभेतेसुसमौमानसान्वितौ॥ सुभुजौवर्तुलौश्लक्ष्णौसुवर्णौलक्षणान्वि
तौ॥ ५९ ॥ सुसमौकरपद्मौतुपद्मवर्णौसुशीतलौ ॥ दिव्यलक्षणसम्पन्नौपद्मस्वस्तिकसंयुतौ ॥ ६०॥ सरलाःपद्मसंयुक्ताअङ्गुल्यस्तुनखान्विताः ॥ न
खानिचसुतीक्ष्णानिजलबिन्दुनिभानिच ॥ ६१ ॥ पद्मगर्भप्रतीकाशोवर्णस्तदङ्गसम्भवः ॥ पद्मगन्धाचसर्वाङ्गेपद्मेवभातिभामिनी ॥ ६२ ॥ सर्वलक्ष
णसम्पन्नानगकन्यासुशोभना ॥ रक्तोत्पलनिभौपादौसुश्लक्ष्णौचातिशोभनौ ॥ ६३ ॥ रत्नज्योतिःसमाकारानखाःपादाग्रसम्भवाः ॥ यथोद्दिष्टंचशा
स्त्रेषुतथाचाङ्गेषुदृश्यते ॥६४॥ सर्वाभरणशोभाङ्गीहारकङ्कणनूपुरा ॥ मेखलाकटिसूत्रेणकाञ्चीनादेनराजते ॥६५॥ नीलेनपट्टवस्त्रेणपरांशोभांगताशु
भा ॥ कञ्चुकेनापिदिव्येनसुरक्तेनगुणान्विता ॥ ६६ ॥ पार्वतीकल्पिताद्भावाद्गुणंप्राप्तामहोदयम् ॥ कल्पद्रुमान्मुदंलेभेशङ्करंवाक्यमब्रवीत् ॥६७॥
यथोक्तंतुत्वयादेवतथादृष्टोमयाद्रुमः ॥ यादृशंकल्प्यतेभावस्तादृशंपरिदृश्यते ॥ ६८ ॥ सूतउवाच ॥ अथसाचारुसर्वाङ्गीतयोःपार्श्वंसमेत्यच ॥ पादा
म्बुजंननामाथसाभक्त्याभवयोस्तदा ॥ ६९ ॥ उवाचवचनंस्निग्धंहृद्यंहारिचसातदा ॥ कस्मात्सृष्टात्वयामातःकथयस्वात्रकारणम् ॥ ७० ॥ श्रीदे
व्युवाच ॥ वृक्षस्यकौतुकाद्भावान्मयावैप्रत्ययःकृतः ॥ सद्यःप्राप्तंफलंभद्रेभवतीरूपसम्पदा ॥ ७१ ॥ अशोकसुन्दरीनाम्नालोकेख्यातिंप्रयास्यसि ॥
सर्वसौभाग्यसम्पन्नाममपुत्रीनसंशयः ॥ ७२॥ सोमवंशेषुविख्यातोयथादेवःपुरन्दरः ॥ नहुषोनामराजेन्द्रस्तवनाथोभविष्यति ॥ ७३ ॥ एवंदत्त्वाव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रंतस्यैजगामगिरिजागिरिम् ॥ कैलासंशङ्करेणापिमुदापरमयायुता ॥ ७४ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेगुरुतीर्थमाहात्म्येच्यवनचरित्रे द्व्यधिकशततमोऽध्यायः ॥ १०२ ॥ कुञ्जलउवाच ॥ अशोकसुन्दरीजातासर्वयोषिद्वरातदा ॥ रेमेसुनन्दनेपुण्येसर्वकामगुणान्विते ॥ १ ॥ सुरूपाभिःसुकन्याभिर्देवानांचारुहासिनी ॥ सर्वान्भोगान्प्रभुञ्जानागीतनृत्यविचक्षणा ॥ २ ॥ विप्रचित्तेःसुतोहुण्डोरौद्रस्तीव्रश्चसर्वदा ॥ स्वेच्छाचारोमहाकामीनन्दनंप्रविवेशह ॥ ३ ॥ अशोकसुन्दरींदृष्ट्वासर्वालङ्कारसंयुताम् ॥ तस्यास्तुदर्शनाद्दैत्योविद्धःकामस्यमार्गणैः ॥ ४ ॥ तामुवाचमहाकायःकात्वंकस्यासिवाशुभे ॥ कस्मात्त्वंकारणाच्चात्रआगताऽसिवनोत्तमम् ॥ ५ ॥ अशोकसुन्दर्युवाच ॥ शिवस्यापिसुपुण्यस्यसुताहंशृणुसांप्रतम् ॥ स्वसाहंकार्तिकेयस्यजननीगोत्रजापिमे ॥ ६ ॥ बालभावेनसम्प्राप्तालीलयानन्दनंवनम् ॥ भवान्कोहिकिमर्थंतुमामेवंपरिपृच्छति ॥ ७ ॥ हुण्डउवाच ॥ विप्रचित्तेःसुतश्चाहंगुणलक्षणसंयुतः ॥ हुण्डेतिनाम्नाविख्यातोबलवीर्यमदोद्धतः ॥ ८ ॥ दैत्यानामप्यहंश्रेष्ठोमत्समोनास्तिराक्षसः ॥ देवेषुमर्त्यलोकेषुतपसायशसाकुले ॥ ९ ॥ अन्येषुनागलोकेषुधनभोगैर्वरानने ॥ दर्शनात्तेविशालाक्षिहतःकन्दर्पमार्गणैः ॥ १० ॥ शरणंतेह्यहंप्राप्तःप्रसादसुमुखीभव ॥ भवस्ववल्लभाभार्याममप्राणसमाप्रिया ॥ ११ ॥ अशोकसुन्दर्युवाच ॥ श्रूयतामभिधास्यामिसर्वसम्बन्धकारणम् ॥ भवितव्यासुजातस्यलोकेस्त्रीपुरुषस्यहि ॥ १२ ॥ भवितव्यस्तथाभर्तास्त्रियायःसदृशोगुणैः ॥ संसारेलोकमार्गोऽयंशृणुहुण्डयथाविधि ॥ १३ ॥ अस्त्येवकारणंचात्रयथातेनभवाम्यहम् ॥ सुभार्यादैत्यराजेन्द्रशृणुष्वयतमानसः ॥ १४ ॥ वृक्षराजादहंजातायदाकालेमहामते ॥ शम्भोर्भावंसुसङ्कल्प्यपार्वत्याकल्पिताह्यहम् ॥ १५ ॥ देवस्यानुमतेदेव्यासृष्टोभर्ताममैवहि ॥ सोमवंशेमहाप्राज्ञःसधर्मात्माभविष्यति ॥ १६ ॥ जिष्णुर्जिष्णुसमोवीर्येतेजसापावकोपमः ॥ सर्वज्ञःसत्यसन्धश्चत्यागेवैश्रवणोपमः ॥ १७ ॥ यज्वादानपतिःसोऽपिरूपेणमन्मथोपमः ॥ नहुषोनामधर्मात्मागुणशीलमहानिधिः ॥ १८ ॥ देव्यादेवेनमेदत्तःख्यातोभर्ताभविष्यति ॥ तस्मात्सर्वगुणोपेतंपुत्रमाप्स्यामिसुन्दरम् ॥ १९ ॥ इन्द्रोपेन्द्रसमंलोकेययातिंजनवल्लभम् ॥ लप्स्याम्यहंरणेधीरंतस्माच्छम्भोःप्रसादतः ॥ २० ॥ अहंपतिव्रतावीरपरंभार्याविशेषतः[1] ॥ अतस्त्वंसर्वथाहुण्डत्यजभ्रान्तिमितोव्रज ॥ २१ ॥ प्रहस्यैववचोब्रूतेअशोकसुन्दरींप्रति ॥ २२ ॥ हुण्डउवाच ॥ नैवयुक्तंत्वयाप्रोक्तंदेव्यादेवेनचैवहि ॥ नहुषोनामधर्मात्मासोमवंशेभविष्यति ॥ २३ ॥ भवतीवयसाश्रेष्ठाकनिष्ठोनसयुज्यते ॥ कनिष्ठास्त्रीप्रशस्तातुपुरुषोनप्रशस्यते ॥ २४ ॥ कदासपुरुषोभद्रेतवभर्ताभविष्यति ॥ तारुण्यंयौ

---

१ 'वीरभार्या' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

वनंचापिनाशमेवंप्रयास्यति ॥ २५ ॥ यौवनस्यबलेनापिरूपवत्यःसदास्त्रियः ॥ पुरुषाणांवल्लभत्वंप्रयान्तिवरवर्णिनि ॥ २६ ॥ तारुण्यंहिमहामूलं
युवतीनांवरानने ॥ तस्याधारेणभुञ्जन्तिभोगान्कामान्मनोऽनुगान् ॥ २७ ॥ कदासोऽभ्येष्यतेभद्रेआयोःपुत्रःशृणुष्वमे ॥ यौवनंवर्ततेऽद्यैववृथाचैव
भविष्यति ॥ २८ ॥ गर्भत्वंचशिशुत्वंचकौमारंचनिशामय ॥ कदासौयौवनोपेतस्तवयोग्योभविष्यति ॥ २९ ॥ यौवनस्यप्रभावेनपिबस्वमधुमा
धवीम् ॥ मयासहविशालाक्षिरमस्वत्वंसुखेनवै ॥ ३० ॥ हुण्डस्यवचनंश्रुत्वाशिवस्यतनयापुनः ॥ उवाचदानवेन्द्रंतंसाध्वसेनसमन्विता ॥ ३१ ॥
अष्टाविंशतिकेप्राप्तेद्वापराख्येयुगेतदा ॥ शेषावतारोधर्मात्मावसुदेवसुतोबलः ॥ ३२ ॥ रेवतस्यसुतांदिव्यांभार्यांसचकरिष्यति ॥ सापिजातामहाभा
गकृताख्येहियुगोत्तमे ॥ ३३ ॥ युगत्रयप्रमाणेनसाहिज्येष्ठाबलादपि ॥ बलस्यसाप्रियाजातारेवतीप्राणसंमिता ॥ ३४ ॥ भविष्यद्वापरेप्राप्तइहसातु
भविष्यति ॥ मायावतीपुराजातागन्धर्वतनयावरा ॥३५॥ अपहृत्यनियम्यैवशम्बरोदानवोत्तमः॥तस्याभर्तासमाख्यातोमाधवस्यसुतोबली ॥३६॥
प्रद्युम्नोनामवीरेशोयादवेश्वरनन्दनः ॥ तस्मिन्युगेभविष्येतुभाव्यंदृष्टंपुरातनैः ॥ ३७ ॥ व्यासादिभिर्महाभागैर्ज्ञानवद्भिर्महात्मभिः ॥ एवंहिदृश्यते
दैत्यवाक्यंदेव्यातदोदितम् ॥ ३८ ॥ मांप्रतिहिजगद्धात्र्यापुत्र्याहिमवतस्तदा ॥ त्वंतुलोभेनकामेनलुब्धोवदसिदुष्कृतम् ॥ ३९ ॥ किल्बिषेणसमा
जुष्टंवेदशास्त्रविवर्जितम् ॥ यद्यस्यदिष्टमेवास्तिशुभंवाप्यशुभंदृढम् ॥ ४० ॥ पूर्वकर्मानुसारेणतत्तस्यपरिजायते ॥ देवानांब्राह्मणानांचवदनेयत्सुभा
षितम् ॥ ४१ ॥ निःसरेद्यदिसत्यंतदन्यथानैवजायते ॥ मद्भाग्यादेवमाज्ञातंनहुषस्यापितस्यच ॥ ४२ ॥ समायोगंविचार्यैवंदेव्याप्रोक्तंशिवेनच ॥
एवंज्ञात्वाशमंगच्छत्यजभ्रान्तिंमनःस्थिताम् ॥ ४३ ॥ नैवशक्तोभवान्दैत्यमेमनश्चालितुंध्रुवम् ॥ पतिव्रतादृढंचित्तंसकोमेचालितुंक्षमः ॥ ४४ ॥
महाशापेनधक्ष्यामिइतोगच्छमहासुर ॥ एवमाकर्ण्यतद्वाक्यंहुण्डोवैदानवोबली ॥ ४५ ॥ मनसाचिन्तयामासकथंभार्याभवेदियम् ॥ विचिन्त्य
हुण्डोमायावीअन्तर्धानंसमागतः ॥ ४६ ॥ अन्यस्मिन्दिवसेप्राप्तेमायांकृत्वातमोमयीम् ॥ दिव्यंमायामयंरूपंकृत्वानार्यास्तुदानवः ॥ ४७ ॥ माय
याकन्यकारूपोबभूवममनन्दन ॥ साकन्याऽपिवरारोहामायारूपाऽऽगमत्ततः ॥ ४८ ॥ हास्यलीलासमायुक्तायत्रास्तेभवनन्दिनी ॥ उवाचवाक्यं
स्निग्धेवअशोकसुन्दरींप्रति ॥ ४९ ॥ कासिकस्यासिसुभगेतिष्ठसित्वंतपोवने ॥ किमर्थंक्रियतेबालेकामशोषणकंतपः ॥ ५० ॥ तन्ममाचक्ष्वसुभगे
किन्निमित्तंसुदुष्करम्॥तन्निशम्यशुभंवाक्यंदानवेनापिभाषितम् ॥५१॥ मायारूपेणछन्नेनसाभिलाषेणसत्वरम्॥आत्मसृष्टिसुवृत्तान्तंप्रवृत्तंतुयथापुरा

१'घृष्टम्' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ५२ ॥ तपसःकारणंसर्वंसमाचष्टसुदुःखिता ॥ उपप्लवंतुतस्यापिदानवस्यदुरात्मनः ॥ मायारूपंनजानातिसौहृदात्कथितंतया ॥ ५३ ॥
हुण्डउवाच ॥ पतिव्रतासिहेदेविसाधुव्रतपरायणा ॥ साधुशीलसमाचारासाधुचारामहासती ॥ ५४ ॥ अहंपतिव्रताभद्रेपतिव्रतपरायणा ॥ तप
श्चरामिसुभगेभर्तुरर्थेमहासती ॥ ५५ ॥ ममभर्ताहतस्तेनहुण्डेनापिदुरात्मना ॥ तस्यनाशायवैघोरंतपस्यामिमहत्तपः ॥ ५६ ॥ एहिमेस्वाश्रमे
पुण्येगङ्गातीरेवसाम्यहम् ॥ अन्यैर्मनोहरैर्वाक्यैरुक्ताप्रत्ययकारकैः ॥ ५७ ॥ हुण्डेनसखिभावेनमोहिताशिवनन्दिनी ॥ समाकृष्टासुवेगेनमहामोहे
नमोहिता ॥ ५८ ॥ आनीताऽऽत्मगृहंदिव्यमनौपम्यंसुशोभनम् ॥ मेरोस्तुशिखरेपुत्रवैडूर्याख्यंपुरोत्तमम् ॥ ५९ ॥ अस्तिसर्वगुणोपेतंकाञ्चनाख्यं
महाशिवम् ॥ तुङ्गप्रासादसम्बाधैःकलशैर्दण्डचामरैः ॥ ६० ॥ नानावृक्षसमोपेतैर्वनैर्नीलैर्घनापमः ॥ वापीकूपतडागैश्चनदीभिस्तुजलाशयैः
॥ ६१ ॥ शोभमानंमहारत्नैःप्राकारैर्हैमसंयुतैः ॥ सर्वकामसमृद्धार्थंसम्पूर्णंदानवस्यहि ॥ ६२ ॥ ददृशेसापुरंरम्यमशोकसुन्दरीतदा ॥ कस्यदेवस्यसं
स्थानंकथयस्वसखेमम ॥ ६३ ॥ सोवाचदानवेन्द्रस्यदृष्टपूर्वस्यवैत्वया ॥ तस्यस्थानंमहाभागेसोऽहंदानवपुङ्गवः ॥ ६४ ॥ मयात्वंतुसमानीतामाय
यावरवर्णिनि ॥ तामाभाष्यगृहंनीताशातकौम्भंसुशोभनम् ॥ ६५ ॥ नानावेश्मैःसमाजुष्टंकैलासशिखरोपमम् ॥ निवेश्यसुन्दरींतत्रदोलायांकामपी
डितः ॥ ६६ ॥ पुनःस्वरूपीदैत्येन्द्रःकामबाणप्रपीडितः ॥ करसम्पुटमाबध्यउवाचवचनंतदा ॥ ६७ ॥ यंयंत्वंवाञ्छसेभद्रेतंतंदद्मिनसंशयः ॥
भजमांत्वंविशालाक्षिभजन्तंकामपीडितम् ॥ ६८ ॥ अशोकसुन्दर्युवाच ॥ नैवचालयितुंशक्तोभवान्मांदानवेश्वर ॥ मनसापिनवैधार्यंममगोहंसमा
गतम् ॥ ६९ ॥ भवादृशैर्महापापैर्दैवैर्वादानवाधमैः ॥ दुष्प्राप्याहंनसन्देहोमावदस्वपुनःपुनः ॥ ७० ॥ स्कन्दानुजासातपसाभियुक्ताजाज्वल्यमा
नामहतारुषाच ॥ संहर्तुकामापरिदानवंतंकालस्यजिह्वेवयथास्फुरन्ती ॥ ७१ ॥ पुनरुवाचसादेवीतमेवंदानवाधमम् ॥ उग्रंकर्मकृतंपाप
चात्मनाशनहेतवे ॥ ७२ ॥ आत्मवंशस्यनाशायस्वजनस्यास्यवैत्वया ॥ दीतास्वगृहमानीतासुशिखाकृष्णवर्त्मनः ॥ ७३ ॥ यथाऽशुभः
कूटपक्षीसवर्शोकैःसमुद्गतः ॥ गृहंतुविशतेयस्यतस्यनाशंप्रयच्छति ॥ ७४ ॥ स्वजनस्यचसर्वस्यसधनस्यकुलस्यच ॥ सद्विजोनाशमिच्छे
तविशत्येवयदागृहम् ॥ ७५ ॥ तथा:तेऽहंगृहंप्राप्तातवनाशंसमीहती ॥ पुत्राणांधनधान्यस्यतववंशस्यसाम्प्रतम् ॥ ७६ ॥ जीवंकुलंध
नंधान्यंपुत्रपौत्रादिकंतव ॥ सर्वंतेनाशयित्वाहंयास्यामिचनसंशयः ॥ ७७ ॥ यथात्वयाहमानीताचरन्तीपरमंतपः ॥ पतिकामाप्रवाञ्छन्तीनहु
षंचायुनन्दनम् ॥ ७८ ॥ तथात्वांममभर्ताचनाशयिष्यतिदानव ॥ मन्निमित्तउपायोऽयंदृष्टोदेवेनवैपुरा ॥ ७९ ॥ सत्येयंलौकिकीगा

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

थायांगायन्तिविदोजनाः ॥ प्रत्यक्षंदृश्यतेलोकेनविन्दन्तिकुबुद्धयः ॥ ८० ॥ येनयत्रप्रभोक्तव्यंयस्माद्दुःखसुखादिकम् ॥ सएवभुञ्जतेतत्र
तस्मादेवनसंशयः ॥ ८१ ॥ कर्मणोऽस्यफलंभुङ्क्ष्वस्वकीयस्यमहीतले ॥ यास्यसेनिरयस्थानंपरदाराभिमर्शनात् ॥ ८२ ॥ सुतीक्ष्णंहि
सुधारंतुसुखड्गंचविघट्टति ॥ अङ्गुल्यग्रेणकोपायतथामांविद्धिसाम्प्रतम् ॥ ८३ ॥ सिंहस्यसंमुखंगत्वाक्रुद्धस्यगर्जितस्यच ॥ कोलुनातिमुखा
त्केशान्साहसाकारसंयुतः ॥ ८४ ॥ सत्याचारांदमोपेतांनियतांतपसिस्थिताम् ॥ निधनंचेच्छतेयोवैसवैमांभोक्तुमिच्छति ॥ ८५ ॥ समर्णिक्तृष्णस
र्पस्यजीवमानस्यसाम्प्रतम् ॥ ग्रहीतुमिच्छतेसोहियथाकालेनप्रेषितः ॥ ८६ ॥ भवांस्तुप्रेषितोमूढकालेनकालमोहितः ॥ तदातेईदृशीजाताकुम
तिःकिंनपश्यसि ॥ ८७ ॥ ऋतेतुआयुपुत्रेणसमालोकयतेहिकः ॥ अन्योहिनिधनंयातिममरूपावलोकनात् ॥ ८८ ॥ एवमाभाषयित्वातंगङ्गा
तीरंगतासती ॥ सशोकादुःखसंविग्नानियतानियमान्विता ॥ ८९ ॥ पूर्वमाचरितंघोरंपतिकामनयातपः ॥ तवनाशार्थमिच्छन्तीचरिष्येदारुणंपु
नः ॥ ९० ॥ यदात्वांनिहतंदुष्टंनहुषेणमहात्मना ॥ निशितैर्वज्रसङ्काशैर्बाणैराशीविषापमः ॥ ९१ ॥ रणेनिपतितंपापमुक्तकेशंसलोहितम् ॥ गता
सुंचप्रपश्यामितदायास्याम्यहंपतिम् ॥ ९२ ॥ एवंसुनियमंकृत्वागङ्गातीरमनुत्तमम् ॥ संस्थिताहुण्डनाशायनिश्चलाशिवनन्दिनी ॥ ९३ ॥ वह्ने
र्यथादीप्तिमतीशिखोज्ज्वलातेजोऽभियुक्ताप्रदहेत्सुलोकान् ॥ क्रोधेनदीप्ताविबुधेशपुत्रीगङ्गातटेदुश्चरमाचरत्तपः ॥ ९४ ॥ कुञ्जलउवाच ॥ एवमु
क्त्वामहाभागशिवस्यतनयागता ॥ गङ्गाम्भसिततःस्नात्वास्वपुरेकाञ्चनाह्वये ॥ ९५ ॥ तपश्चचारतन्वङ्गीहुण्डस्यवधहेतवे ॥ अशोकसुन्दरीबा
लासत्येनचसमन्विता ॥९६॥ हुण्डोऽपिदुःखितोभूतःशापदग्धेनचेतसा ॥ चिन्तयामाससन्तप्तअतीववचनानलैः ॥ ९७ ॥ समाहूयअमात्यंतंकम्प
नाख्यमथाब्रवीत् ॥ समाचष्टसवृत्तान्तंतस्याःशापोद्भवंमहत् ॥ ९८ ॥ शप्तोऽस्म्यशोकसुन्दर्याशिवस्यापिसुकन्यया ॥ नहुषस्यापिमेभर्त्तुस्त्वंतुह
स्तान्मरिष्यसि ॥ ९९ ॥ नैवजातस्त्वसौगर्भआयोर्भार्याचगुर्विणी ॥ यथासस्याद्व्यलीकस्तुतस्याःशापस्तथाकुरु ॥ १०० ॥ कम्पनउवाच ॥ अप
हृत्यप्रियांतस्यआयोश्चापिसमानय ॥ अनेनापिप्रकारेणतवशत्रुर्नजायते ॥ १ ॥ नोवाप्रपातयस्वत्वंगर्भंतस्याःप्रभीषणैः ॥ अनेनापिप्रकारेण
तवशत्रुर्नजायते ॥ २ ॥ जन्मकालंप्रतीक्षस्वनहुषस्यदुरात्मनः ॥ अपहृत्यसमानीयजहित्वंपापचेतनम् ॥ ३ ॥ एवंसंमन्त्र्यतेनापिकम्पनेनसदान
वः ॥ अभूत्सउद्यमोपेतोनहुषस्यप्रणाशने ॥४॥ ऐलंपुत्रोमहाभागआयुर्नामक्षितीश्वरः ॥ सार्वभौमःसधर्मात्मासत्यव्रतपरायणः ॥ ५ ॥ इन्द्रोपेन्द्र

१ 'अङ्गपुत्र महाभाग' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समोराजातपसायशसाबलैः ॥ दानयज्ञैःसुपुण्यैश्चसत्यननियमेनच ॥ ६ ॥ एकच्छत्रणवैराज्यंचक्रेभूपतिसत्तमः ॥ पृथिव्यांसर्वधर्मज्ञःसोमवंश
स्यभूषणम् ॥ ७ ॥ पुत्रंनविन्दतेराजातेनदुःखीव्यजायत ॥ चिन्तयामासधर्मात्माकथंमेजायतेसुतः ॥ ८ ॥ इतिचिन्तांसमापेदेआयुश्चपृथिवीप
तिः ॥ पुत्रार्थंपरमंयत्नमकरोत्सुसमाहितः ॥ ९ ॥ अत्रिपुत्रोमहात्मावैदत्तात्रेयोमहामुनिः ॥ क्रीडमानःस्त्रियासार्द्धंमदिरारुणलोचनः ॥ ११० ॥
वारुण्यामत्तधर्मात्मास्त्रीवृन्दैश्चसमावृतः ॥ अङ्केयुवतिमाधायसर्वयोषिद्वरांशुभाम् ॥ ११ ॥ गायतेनृत्यतेविप्रःसुरांचपिबतेभृशम् ॥ विनायज्ञो
पवीतेनमहायोगीश्वरोत्तमः ॥ १२ ॥ पुष्पमालाभिर्दिव्याभिर्मुक्ताहारपरिच्छदैः ॥ चन्दनागुरुदिग्धाङ्गोराजमानोमुनीश्वरः ॥ १३ ॥ तस्याश्र
मंनृपोगत्वातंदृष्ट्वाद्विजसत्तमम् ॥ प्रणाममकरोन्मूर्ध्नादण्डवत्सुसमाहितः ॥ १४ ॥ अत्रिपुत्रःसधर्मात्मासमालोक्यनृपोत्तमम् ॥ आगतं
पुरतोभक्त्याअथध्यानंसमास्थितः ॥ १५ ॥ एवंवर्षशतंप्राप्तंतस्यभूपस्यसत्तम ॥ निश्चलंशान्तिमापन्नंमानसंभक्तितत्परम् ॥ १६ ॥
समाहूयउवाचेदंकिमर्थंक्लिश्यसेनृप ॥ ब्रह्माचारेणहीनोऽस्मिब्रह्मत्वंनास्तिमेकदा ॥ १७ ॥ सुरामांसप्रलुब्धोऽस्मिस्त्रियासक्तःसदैवहि ॥
वरदानेनमेशक्तिरन्यंशुश्रूषब्राह्मणम् ॥ १८ ॥ आयुरुवाच ॥ भवादृशोमहाभागनास्तिब्राह्मणसत्तमः ॥ सर्वकामप्रदातावैत्रैलोक्येपरमेश्वरः
॥ १९ ॥ अत्रिवंशेमहभागगोविन्दःपरमेश्वरः ॥ ब्राह्मणस्यस्वरूपेणभवान्वैगरुडध्वजः ॥ १२० ॥ नमोऽस्तुदेवदेवेशनमोऽस्तुपरमेश्वर ॥
त्वामहंशरणंप्राप्तःशरणागतवत्सल ॥ २१ ॥ उद्धरस्वहृषीकेशमायांकृत्वाप्रतिष्ठसि ॥ विश्वस्थानांप्रजानांतुविद्वांसंविश्वनायकम् ॥ २२ ॥
जानाम्यहंजगन्नाथंभवन्तंमधुसूदनम् ॥ मामेवरक्षगोविन्दविश्वरूपनमोऽस्तुते ॥ २३ ॥ कुञ्जलउवाच ॥ गतेबहुतिथेकालेदत्तात्रेयोनृ
पोत्तमम् ॥ उवाचमत्तरूपेणकुरुष्ववचनंमम ॥ २४ ॥ कपालेमेसुरांदेहिपाचितंमांसभोजनम् ॥ एवमाकर्ण्यतद्वाक्यंसचायुःपृथिवीपतिः
॥ २५ ॥ उत्सुकस्तुकपालेनसुरामाहृत्यवेगवान्[1] ॥ पलंसुपाचितंचवच्छित्त्वाहस्तेनसत्वरम् ॥ २६ ॥ नृपेन्द्रःप्रददौचापिदत्तात्रेयायसत्तम ॥
अथप्रसन्नचेताःससञ्जातोमुनिपुङ्गवः ॥ २७ ॥ दृष्ट्वाभक्तिप्रभावंचगुरुशुश्रूषणंपरम् ॥ समुवाचनृपेन्द्रंतमायुंप्रणतमानसम् ॥ २८ ॥ वरंवर
यभद्रंतेदुर्लभंभुविभूपते ॥ सर्वमेवप्रदास्यामियंयमिच्छसिसाम्प्रतम् ॥ २९ ॥ राजोवाच ॥ भवान्दातावरंसत्यंकृपयामुनिसत्तम ॥ पुत्रंदे
हिगुणोपेतंसर्वज्ञंगुणसंयुतम् ॥ १३० ॥ देवतीर्थार्चनकरमजेयंदेवदानवैः ॥ क्षत्रियैराक्षसैर्घोरैर्दानवैःकिन्नरैस्तथा ॥ ३१ ॥ देवब्राह्मणस

१ 'उत्प्लुतेन' इ० पा०।

CC-0. In Public Domain. Digitization by eGangotri

म्भक्तःप्रजापालोविशेषतः ॥ यज्वादानपतिःशूरःशरणागतवत्सलः ॥ ३२ ॥ दाताभोक्तामहात्माचवेदशास्त्रेषुपण्डितः ॥ धनुर्वेदेषुनिपुणः शास्त्रेषुचपरायणः ॥ ३३ ॥ अनाहतमतिर्धीरःसङ्ग्रामेष्वपराजितः ॥ एवंगुणःसुरूपश्चयस्माद्वंशःप्रसूयते ॥ ३४ ॥ देहिपुत्रंमहाभागममवंशप्रधारकम् ॥ यदिचापिवरोदेयस्त्वयामेकृपयाविभो ॥ ३५ ॥ दत्तात्रेयउवाच ॥ एवमस्तुमहाभागतवपुत्रोभविष्यति ॥ गृहेवंशकरःपुण्यःसर्वजीवदयाकरः ॥ ३६ ॥ एभिर्गुणैस्तुसंयुक्तोवैष्णवांशेनसंयुतः ॥ राजाचसार्वभौमश्चइन्द्रतुल्योनरेश्वरः ॥ ३७ ॥ एवंखलुवरंदत्त्वाददौफलमनुत्तमम् ॥ भूपमाहमहायोगीसुभार्यायैप्रदीयताम् ॥ ३८ ॥ एवमुक्त्वाविसृज्यैवतमायुंप्रणतंपुरः ॥ आशीर्भिरभिनन्द्यैवअन्तर्द्धानमधीयत ॥ १३९ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेगुरुतीर्थमाहात्म्येच्यवनचरित्रेत्र्यधिकशततमोऽध्यायः ॥ १०३ ॥ कुञ्जलउवाच ॥ गतेतस्मिन्महाभागेदत्तात्रेयेमहामुनौ ॥ आजगाममहाराजआयुश्चस्वपुरंप्रति ॥ १ ॥ इन्दुमत्यागृहंहृष्टःप्रविवेशश्रियान्वितम् ॥ सर्वकामसमृद्धार्थमिन्द्रस्यसदनोपमम् ॥ २ ॥ राज्यंचक्रेसमेधावीयथास्वर्गेपुरन्दरः ॥ स्वर्भानुसुतयासार्द्धमिन्दुमत्याद्विजोत्तम ॥ ३ ॥ साचइन्दुमतीराज्ञीगर्भमापफलाशनात् ॥ दत्तात्रेयस्यवचनाद्दिव्यतेजःसमन्वितम् ॥ ४ ॥ इन्दुमत्यामहाभागस्वप्नंदृष्टमनुत्तमम् ॥ रात्रौदिवान्वितंतातबहुमङ्गलदायकम् ॥ ५ ॥ गृहान्तरेविशन्तंचपुरुषंसूर्यसन्निभम् ॥ मुक्तामालान्वितंविप्रंश्वेतवस्त्रेणशोभितम् ॥ ६ ॥ श्वेतपुष्पकृतामालातस्यकण्ठेविराजते ॥ सर्वाभरणशोभाङ्गोदिव्यगन्धानुलेपनः ॥ ७ ॥ चतुर्भुजःशङ्खपाणिर्गदाचक्रासिधारकः ॥ छत्रेणध्रियमाणेनचन्द्रबिम्बानुकारिणा ॥ ८ ॥ शोभमानोमहातेजादिव्याभरणभूषितः ॥ हारकङ्कणकेयूरैर्नूपुराभ्यांविराजितः ॥ ९ ॥ चन्द्रबिम्बानुकाराभ्यांकुण्डलाभ्यांविराजितः ॥ एवंविधोमहाप्राज्ञोनरःकश्चित्समागतः ॥ १० ॥ इन्दुमतींसमाहूयस्नापिताऽपयसातदा ॥ शङ्खेनक्षीरपूर्णेनशशिवर्णेनभामिनी ॥ ११ ॥ रत्नकाञ्चनबद्धेनसम्पूर्णेनपुनःपुनः ॥ श्वेतंनागंसुरूपंचसहस्रशिरसंवरम् ॥ १२ ॥ महामणियुतंदीप्तंधामज्वालासमाकुलम् ॥ क्षिप्तंतेनमुखप्रान्तेदत्तंमुक्ताफलंपुनः ॥ १३ ॥ कण्ठेतस्याःसदेवेशइन्दुमत्यामहायशाः ॥ पद्मंहस्तेततोदत्त्वास्वस्थानंप्रतिजग्मिवान् ॥ १४ ॥ एवंविधंमहास्वप्नंतयादृष्टंसुतोत्तमम् ॥ समाचष्टमहाभागाआयुंभूमिपतीश्वरम् ॥ १५ ॥ समाकर्ण्यमहाराजश्चिन्तयामासवैपुनः ॥ समाहूयगुरुंपश्चात्कथितंस्वप्नमुत्तमम् ॥ १६ ॥ शौनकंसुमहाभागंसर्वज्ञंज्ञानिनांवरम् ॥ १७ ॥ राजोवाच ॥ अद्यरात्रौमहाभागममपत्न्याद्विजोत्तम ॥ विप्रोगेहंविशन्दृष्टःकिमिदंस्वप्नकारणम् ॥ १८ ॥ शौनकउवाच ॥ वरोदत्तस्तुतेपूर्वं

१ 'महात्यागी' इ० पा० । २ 'चतुर्वेदेषु' इ० पा० । ३ 'शक्रप्रस्थपुरं प्रति' इ० पा० । ४ 'कुबेरभवनोपमम्' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दत्तात्रेयेणधीमता ॥ आदिष्टंचफलंराज्ञांसुगुणंसुतहेतवे ॥ १९ ॥ तत्फलंकिंकृतंराजन्कस्मैत्वयानिवेदितम् ॥ सुभार्यायैमयादत्तमितिराज्ञोदितंवचः ॥ २० ॥ श्रुत्वोवाचमहाप्राज्ञःशौनकोद्विजसत्तमः ॥ दत्तात्रेयप्रसादेनतवगेहेसुतोत्तमः ॥ २१ ॥ वैष्णवांशेनसंयुक्तोभविष्यतिनसंशयः स्वप्नस्यकारणंराजन्नेतत्तेकथितंमया ॥ २२ ॥ इन्द्रोपेन्द्रसमःपुत्रोदिव्यवीर्योभविष्यति ॥ पुत्रस्तेसर्वधर्मात्मासोमवंशस्यवर्द्धनः ॥ २३ ॥ धनुर्वेदेचवेदेचसगुणोऽसौभविष्यति ॥ एवमुक्त्वासराजानंशौनकोगतवान्गृहम् ॥ २४ ॥ हर्षेणमहताविष्टोराजाभूत्प्रिययासह ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेगुरुतीर्थमाहात्म्येच्यवनचरित्रेचतुरधिकशततमोऽध्यायः ॥ १०४ ॥ कुञ्जलउवाच ॥ गतासानन्दनवनंसखीभिःसहक्रीडितुम् ॥ तत्राकर्ण्यमहद्वाक्यमप्रियंतुतदापितुः ॥ १ ॥ चारणानांसुसिद्धानांभाषतांहर्षणेनतु ॥ आयोर्गेहेमहावीर्योविष्णुतुल्यपराक्रमः ॥ २ ॥ भविष्यतिसुतश्रेष्ठोहुण्डस्यान्तंकरिष्यति ॥ एवंविधंमहद्वाक्यमप्रियंदुःखदायकम् ॥३॥ समाकर्ण्यसमायातापितुरग्रेनिवेदितम् ॥ समासेनतयातस्यपुरतोदुःखदायकम् ॥ ४ ॥ पितुरग्रेजगादाथपिताश्रुत्वासविस्मितः ॥ शापमशोकसुन्दर्याःसस्मारचपुराकृतम् ॥ ५ ॥ एतस्यार्थेतपस्तेपेसेयंचाशोकसुन्दरी॥ गर्भस्यनाशनायैवइन्दुमत्याःसदानवः ॥ ६ ॥ विचक्रेउद्यमंदुष्टःकालाकृष्टोदुरात्मवान् ॥ छिद्रान्वेषीततोभूत्वाइन्दुमत्यास्तुनित्यशः ॥७॥ यदापश्यतितांराज्ञींरूपौदार्यगुणान्विताम् ॥ दिव्यतेजःसमायुक्तांरक्षितांविष्णुतेजसा ॥ ८ ॥ दिव्येनतेजसायुक्तांसूर्यबिम्बोपमांतुताम् ॥ तस्याःपार्श्वेमहाभागरक्षणार्थंस्थितःसदा ॥ ९ ॥ दूरात्सदानवोदुष्टस्तस्याश्चबहुदर्शयन् ॥ नानाविधांमहोग्रांचभीषिकांसुविभीषिकाम् ॥१०॥ गर्भस्यतेजसायुक्तारक्षिताविष्णुतेजसा ॥ भयंनजायतेतस्यामनस्येवकदापुनः ॥ ११ ॥ विफलोदानवोजातउद्यमश्चनिरर्थकः ॥ मनीषितंनैवजातंहुण्डस्यापिदुरात्मनः ॥ १२ ॥ एवंवर्षशतंपूर्णंपश्यमानस्यतस्यच ॥ प्रसूतासाहिपुत्रंचस्वर्भानोस्तनयातदा ॥ १३ ॥ रात्रावेवसुतश्रेष्ठतस्याःपुत्रोव्यजायत ॥ तेजसातीवभात्येषयथासूर्योनभस्तले ॥ १४ ॥ अथदासीमहादुष्टाकाचित्सूतिगृहागता ॥ अशौचाचारसंयुक्तामहामङ्गलवादिनी ॥ १५ ॥ तस्याःसर्वंसमाज्ञायसहुण्डोदानवाधमः ॥ दास्याअङ्गंप्रविश्यैवप्रविष्टश्चायुमन्दिरे ॥ १६ ॥ महाजनेप्रसुप्तेचनिद्रयातीवमोहिते ॥ तंपुत्रंदेवगर्भाभमपहृत्यबहिर्गतः ॥ १७ ॥ काञ्चनाख्यंपुरंप्राप्तःस्वकीयंदानवाधमः ॥ समाहूयप्रियांभार्यांविपुलांवाक्यमब्रवीत् ॥ १८ ॥ वधस्वैनंमहापापंबालरूपंरिपुंमम ॥ पश्चात्सूदस्यवैहस्तेभोजनार्थंप्रदीयताम् ॥ १९ ॥ नानाभेदैर्विभेदैश्चपाचयस्वहिनिर्घृणम् ॥ सूदहस्तान्महाभागेपश्चाद्भोक्ष्ये

१ 'धर्मात्मानं महामतिम्' इ० पा० । २ 'विद्युद्दाम्' इ० पा० । सर्वत्र विपुलाशब्दे 'विपदा' इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

नसंशयः ॥ २० ॥ वाक्यमाकर्ण्यतद्भर्तुर्विपुलाविस्मिताभवत् ॥ कस्मान्निर्घृणतांयातिभर्त्तामममुनिप्रुरः ॥ २१ ॥ सर्वलक्षणसम्पन्नंदेव गर्भोपमंसुतम् ॥ कस्यकस्मात्प्रभक्ष्येतक्षमाहीनःसुनिर्घृणः ॥ २२ ॥ इत्येवंचिन्तयामासकारुण्येनसमन्विता ॥ पुनःपप्रच्छभर्तारंकस्माद्भक्ष्यसि बालकम् ॥ २३ ॥ कस्माद्भवसिसङ्क्रुद्धोअतीवनिरपत्रपः ॥ सर्वमेकारणंब्रूहितत्त्वेनदनुजेश्वर ॥ २४ ॥ आत्मदोषंचवृत्तान्तंसमासेननिवेदितम् ॥ शापमशोकसुन्दर्याहुण्डेनापिदुरात्मना ॥ २५ ॥ तयाज्ञातंतुतत्सर्वंकारणंदानवस्यवै ॥ वध्योऽयंबालकःसत्यंनोवाभर्त्तामरिष्यति ॥ २६ ॥ इत्येवं प्रविचार्यैवविपुलाक्रोधमूर्च्छिता ॥ मेकलांतुसमाहूयसैरन्ध्रींवाक्यमब्रवीत् ॥ २७ ॥ जह्येनंबालकंदुष्टंमेकलेऽद्यमहानसे ॥सूदहस्तेप्रदेहित्वंहुण्डभोज नहेतवे ॥ २८ ॥ मेकलाबालकंगृह्यसूदमाहूयचाब्रवीत् ॥ राजादेशंकुरुष्वाद्यपचस्वैनंहिबालकम् ॥ २९ ॥ एवमाकर्णितंतेनसूदेनापिमहात्मना ॥ आदायबालकंहस्ताच्छस्त्रमुद्यम्यचोद्यतः ॥ ३० ॥ एषवैदेवदेवस्यदत्तात्रेयस्यतेजसा ॥ रक्षितस्त्वायुपुत्रश्चसजहासपुनःपुनः ॥ ३१ ॥ हसन्तंतंसमा लोक्यससूदःकृपयान्वितः ॥ सैरन्ध्रीचकृपायुक्तासूदंतंप्रत्यभाषत ॥३२॥ नैषवध्यस्त्वयासूदशिशुरेवमहामते ॥ दिव्यलक्षणसम्पन्नःकस्यजातःसुस त्कुले ॥ ३३ ॥ सूदउवाच ॥ सत्यमुक्तंत्वयाभद्रेवाक्यंवैकृपयान्वितम् ॥ राजलक्षणसम्पन्नोरूपवान्कस्यबालकः ॥ ३४ ॥ कस्माद्भोक्ष्यतिदुष्टा त्माहुण्डोऽयंदानवाधमः ॥ येनवैरक्षितोवंशःपूर्वमेवसुकर्मणा ॥ ३५ ॥ आपत्स्वपिसजीवेतदुर्गेषुनान्यथाभवेत् ॥ सिन्धुवेगेननीतस्तुवह्निमध्येग तोऽथवा ॥ ३६ ॥ जीवतेनात्रसन्देहोयश्चकर्मसहायवान् ॥ तस्माद्धिक्रियतेकर्मधर्मपुण्यसमन्वितम् ॥ ३७ ॥ आयुष्मन्तोनरास्तेनप्रवदन्तिसुखं ततः ॥ तारकंपालकंकर्मरक्षतेजाग्रतेहितत् ॥ ३८ ॥ मुक्तिदंजायतेनित्यंमैत्रस्थानप्रदायकम् ॥ दानपुण्यान्वितंकर्मप्रियवाक्यसमन्वितम् ॥३९॥ उ पकारयुतंयश्चकरोतिशुभकृत्तदा ॥ तमेवरक्षतेकर्मसर्वदैवनसंशयः ॥ ४० ॥ अन्ययोनिंप्रयातिस्मप्रेरितःस्वेनकर्मणा ॥ किंकरोतिपितामाताअन्ये स्वजनबान्धवाः ॥ कर्मणानिहतोयस्तुनस्युस्तस्यचरक्षणे ॥ ४१ ॥ कुञ्जलउवाच ॥ येनैवकर्मणाचैवरक्षितश्चायुनन्दनः ॥ ४२ ॥ तस्मात्कृपान्वि तोजातःसूदःकर्मवशानुगः ॥ सैरन्ध्रीचतथाजाताप्रेरितातस्यकर्मणा ॥ ४३ ॥ द्वाभ्यामेवसुतश्चायोरक्षितश्चारुलक्षणः ॥ रात्रावेवप्रणीतोऽसौतस्मा द्गेहान्महाश्रमे ॥ ४४ ॥ वसिष्ठस्याश्रमेपुण्येसैरन्ध्र्यापुण्यकर्मणा ॥ शुभेपर्णकुटीद्वारेतस्मिन्नेवमहाश्रमे ॥ ४५ ॥ गतासास्वगृहंपश्चान्निक्षिप्यबा लकोत्तमम् ॥ एणंनिपात्यसूदेनपाचितंमांसमेवहि ॥ ४६ ॥ भोजयित्वासुदैत्येन्द्रोहुण्डोहृष्टोऽभवत्तदा ॥ शापमशोकसुन्दर्यामोघंमेनेतदासुरः ॥ ४७ ॥ हर्षेणमहताविष्टःसहुण्डोदानवेश्वरः ॥ प्रभातेविमलेजातेवसिष्ठोमुनिसत्तमः ॥ ४८ ॥ बहिर्गतोहिधर्मात्माकुटीद्वारात्प्रपश्यति ॥ सम्पूर्णं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बालकंदृष्ट्वादिव्यलक्षणसंयुतम् ॥४९ ॥ सम्पूर्णेन्दुप्रतीकाशंसुन्दरंचारुलोचनम् ॥ ५० ॥ वशिष्ठउवाच ॥ पश्यन्तुमुनयःसर्वेयूयमागत्यबालकम् ॥
कस्यकेनसमानीतंरात्रौद्वाराङ्गणेमम ॥ ५१ ॥ देवगन्धर्वगर्भाभंराजलक्षणसंयुतम् ॥ कन्दर्पकोटिसङ्काशंपश्यन्तुमुनयोऽमलम् ॥ ५२ ॥ महाकौ
तुकसंयुक्ताहृष्टाद्विजवरास्ततः ॥ समंपश्यन्सुतंतेतुआयोश्चैवमहात्मनः ॥ ५३ ॥ वसिष्ठःसतुधर्मात्माज्ञानेनालोक्यबालकम् ॥ आयुपुत्रंसमाज्ञातं
चरित्रेणसमन्वितम् ॥ ५४ ॥ वृत्तान्तंतस्यदुष्टस्यहुण्डस्यापिदुरात्मनः ॥ कृपयाब्रह्मपुत्रस्तुसमुत्थायसुबालकम् ॥ ५५ ॥ कराभ्यामथगृह्णातियावद्वि
जवरोत्तमः ॥ तावत्पुष्पसुवृष्टिंचचक्रुर्देवाःसुतोपरि ॥५६॥ ललितंसुस्वरंगीतंजगुर्गन्धर्वकिन्नराः ॥ ऋषयोवेदमन्त्रैस्तुस्तुवन्तिनृपनन्दनम् ॥५७॥ व
सिष्ठस्तंसमालोक्यवरंवैदत्तवांस्तदा ॥ नहुषेत्येवतेनामख्यातंलोकेभविष्यति ॥ ५८ ॥ हुषितोनैवतेनापिबालभावैर्नराधिप ॥ तस्मान्नहुषतेनामदेवपू
ज्योभविष्यसि ॥ ५९ ॥ जातकर्मादिकंकर्मतस्यचक्रेद्विजोत्तमः ॥ व्रतदानंविसर्गंचगुरुशिष्यादिलक्षणम् ॥ ६० ॥ वेदंचाधीत्यसम्पूर्णंषडङ्गंसपद
क्रमम् ॥ सर्वाण्येवचशास्त्राणिअधीत्यद्विजसत्तमात् ॥ ६१ ॥ वशिष्ठाच्चधनुर्वेदंसरहस्यंमहामतिः ॥ शस्त्राण्यस्त्राणिदिव्यानिग्राहमोक्षयुतानिच ॥६२॥
ज्ञानशास्त्रादिकंन्यायराजनीतिगुणादिकान् ॥ वशिष्ठादायुपुत्रश्चशिष्यरूपेणभक्तिमान् ॥ ६३ ॥ एवंससर्वनिष्पन्नोनहुषश्चातिसुन्दरः ॥ वशिष्ठस्य
प्रसादाच्चचापबाणधरोऽभवत् ॥ ६४ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेगुरुतीर्थमाहात्म्येच्यवनचरित्रेपञ्चोत्तरशततमोऽध्यायः ॥ १०५ ॥
कुञ्जलउवाच ॥ आयुभार्यामहाभागास्वर्भानोस्तनयासुतम् ॥ अपश्यन्तीसुबालंतंदेवोपममनौपमम् ॥ १ ॥ हाहाकारंमहत्कृत्वारुरोदवरवर्णिनी ॥
केनमेलक्षणोपेतोहृतोबालःसुलक्षणः ॥ २ ॥ तपसादानयज्ञैश्चनियमैर्दुष्करैःसुतः ॥ संम्प्राप्तोहिमयावत्सकष्टैश्चदारुणैःपुनः ॥३॥ दत्तात्रेयेणपुण्येनस
न्तुष्टेनमहात्मना ॥ दत्तःपुत्रोहृतःकेनरुरोदकरुणान्विता ॥४॥ हापुत्रवत्समेताततहाबालगुणमन्दिर ॥ क्वासिकेनापनीतोऽसिममशब्दःप्रदीयताम् ॥५॥
सोमवंशस्यसर्वस्यभूषणोऽसिनसंशयः ॥ केनत्वमपनीतोऽसिममप्राणैःसमन्वितः ॥ ६ ॥ राजसुलक्षणैर्दिव्यैःसम्पूर्णःकमलेक्षणः ॥ केनाद्यापहृतोव
त्सःकिंकरोमिक्वयाम्यहम् ॥ ७ ॥ स्फुटंजानाम्यहंकर्मह्यन्यजन्मनियत्कृतम् ॥ न्यासनाशःकृतःकस्यतस्मात्पुत्रोहृतोमम ॥ ८ ॥ किंवाछलंकृ
तंकस्यपूर्वजन्मनिपापया ॥ कर्मणस्तस्यवैदुःखमनुभुञ्जामिनान्यथा ॥ ९ ॥ रत्नापहारिणीजातापुत्ररत्नंहृतंमम ॥ तस्माद्दैवेनमेदिव्यअनौपम्य
गुणाकरः ॥ १० ॥ किंवावितर्कितोविप्रःकर्मणस्तस्यवैफलम् ॥ प्राप्तंमयानसन्देहःपुत्रशोकान्वितंभृशम् ॥ ११ ॥ किंवाशिशुविरोधश्चकृ

१ 'त्वं प्राप्तोऽसि मया वत्स' इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

तोजन्मान्तरेमया ॥ तस्यपापस्यभुञ्जामिकर्मणःफलमीदृशम् ॥ १२ ॥ याचमानस्यचैवाग्रेवैश्वदेवस्यकर्मणः ॥ किंवाऽपिनार्पितंचान्नंव्याहृतीभिर्हु
तंद्विजैः ॥ १३ ॥ एवंसुदेवमानाच्चस्वर्भानोस्तनयातदा ॥ इन्दुमतीमहाभागशोकेनकरुणाकुला ॥ १४ ॥ पतितामूर्च्छिताशोकाद्विह्वल
त्वंगतासती ॥ निःश्वासान्मुञ्चमानासावत्सहीनायथाहिगौः ॥ १५ ॥ आयूराजासशोकेनदुःखेनमहतान्वितः ॥ बालंश्रुत्वाहृतंतंतुधैर्यंतत्याजपा
र्थिवः ॥ १६ ॥ तपसश्चफलंनास्तिनास्तिदानस्यवैफलम् ॥ यस्मादेवंहृतःपुत्रस्तस्मान्नास्तिनसंशयः ॥ १७ ॥ दत्तात्रेयःप्रसादेनवरंमेदत्तवान्पुरा॥
अजेयंचजयोपेतंपुत्रंसर्वगुणान्वितम् ॥ १८ ॥ तस्यवरप्रदानस्यकथंविघ्नोह्यजायत ॥ इतिचिन्तापरोराजादुःखितःप्रारुदद्भृशम् ॥ १९ ॥ इतिश्री
पाद्मपुराणेभूमिखण्डेवेनोपाख्यानेगुरुतीर्थमाहात्म्येच्यवनचरित्रेनाहुषाख्यानेषडधिकशततमोऽध्यायः ॥१०६॥ कुञ्जलउवाच ॥ अथासौनारदःस्व
र्गादायुराजानमागतः ॥ आगत्यकथयामासकस्माद्राजन्प्रशोचसे ॥ १ ॥ पुत्रापहरणंतेऽद्यक्षेमंजातंमहामते ॥ देवादीनांमहाराजएवंज्ञात्वातुमाशुचः
॥ २ ॥ सर्वज्ञंःसगुणोभूत्वासर्वविज्ञानसंयुतः ॥ सर्वकलाभिसम्पूर्णआगमिष्यतितेसुतः ॥ ३ ॥ येनाप्यपहृतस्तेऽद्यबालोदेवगुणोपमः ॥ आत्मगेहे
महाराजकालेनीतोनसंशयः ॥ ४ ॥ तस्याप्यन्तंसवैकर्त्तामहावीर्योमहाबलः ॥ सत्वामभ्येष्यतेभूपशिवस्यसुतयासह ॥ ५ ॥ इन्द्रोपेन्द्रसमःपुत्रो
भविष्यतिस्वतेजसा ॥ इन्द्रत्वंभोक्ष्यतेसोऽपिनिजैश्चपुण्यकर्मभिः ॥ ६ ॥ एवमाभाष्यराजानमायुंदेवर्षिसत्तमः ॥ जगामसहसातस्यपश्यतःसानु
गस्यह ॥ ७ ॥ गतेतस्मिन्महाभागेनारदेदेवसंमिते ॥ आयुरागत्यतांराज्ञींतत्सर्वंविन्यवेदयत् ॥ ८ ॥ दत्तात्रेयेणयोदत्तःपुत्रोदेववरोत्तमः ॥ सवैरा
ज्ञिकुशलयास्तेविष्णोश्चैवप्रसादतः ॥ ९ ॥ येनाप्यसौहृतःपुत्रःसगुणोमेवरानने ॥ शिरस्तस्यगृहीत्वातुपुनरेवागमिष्यति ॥ १० ॥ इत्याहनारदो
भद्रेमाकृथाःशोकमेवच ॥ त्यजचैनंमहामोहंकार्यधर्मविनाशनम् ॥ ११ ॥ भर्तुर्वाक्यंनिशम्यैवंराज्ञीइन्दुमतीततः ॥ हर्षेणापिसमाविष्टापुत्रस्यागम
नंप्रति ॥ १२ ॥ यथोक्तंदेवऋषिणातत्तथैवभविष्यति ॥ दत्तात्रेयेणमेदत्तस्तनयोह्यजरामरः ॥ १३ ॥ भविष्यतिनसन्देहःप्रतिभात्येवमेवहि ॥
इत्येवंचिन्तयित्वातुननामद्विजपुङ्गवम् ॥ १४ ॥ नमोऽस्तुतस्मैपरिसिद्धिदायअत्रेःसुपुत्रायमहात्मनेच ॥ यस्यप्रसादेनमयासुपुत्रःप्राप्तःसुधीरःसुगु
णःसुपुण्यः ॥ १५ ॥ एवमुक्त्वातुसादेवीविररामसुहर्षिता ॥ आगमिष्यन्तमाज्ञायनहुषंतनयंपुनः ॥ १६ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्या
नेगुरुतीर्थमाहात्म्येच्यवनचरित्रेनाहुषाख्यानेसप्तोत्तरशततमोऽध्यायः ॥ १०७ ॥ कुञ्जलउवाच ॥ ब्रह्मपुत्रोमहातेजावसिष्ठस्तपतांवरः ॥ नहुषंतंसमा

१ 'अक्षयं यौवनोपेतम्' इ० पा० । २ 'सर्वविद्यागुणांश्चापि वरान्कामांस्तथैव च ॥ लब्ध्वा कामाभिसम्पूर्णो ह्यागमिष्यति ते सुतः' ॥ इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हूयइदंवचनमब्रवीत् ॥ १॥ वनंगच्छस्वशीघ्रेणवन्यमानयपुष्कलम् ॥ समाकर्ण्यमुनेर्वाक्यंनहुषोवनमाययौ ॥ २ ॥ तत्रकिंचित्सुवृत्तान्तंशुश्रावनहुषोबलः ॥ अयमेषसधर्मात्मानहुषोनामवीर्यवान् ॥ ३ ॥ आयोःपुत्रोमहाप्राज्ञोबाल्यान्मात्रावियोजितः ॥ अस्यैवातिवियोगेनआयुभार्याप्ररोदिति ॥ ४ ॥ अशोकसुन्दरीतेपेतपःपरमदुष्करम् ॥ कदापश्यतिसादेवीपुत्रमिन्दुमतीशुभा ॥ ५ ॥ नहुषंनामधर्मज्ञंहृतंपूर्वंतुदानवैः ॥ तपस्तेपेनिरालम्बा शिवस्यतनयावरा ॥ ६ ॥ अशोकसुन्दरीबालाआयुपुत्रस्यकारणात् ॥ अनेनापिकदासाहिसङ्गतातुभविष्यति ॥ ७ ॥ एवंसांसारिकंवाक्यंदिविचारणभाषितम् ॥ शुश्रावसहिधर्मात्मानहुषोविभ्रमान्वितः ॥ ८ ॥ सगत्वावन्यमादायवसिष्ठस्याश्रमंप्रति ॥ वन्यंनिवेद्यधर्मात्मावसिष्ठायमहात्मने ॥ ९ ॥ बद्धाञ्जलिपुटोभूत्वाभक्त्यानमितकन्धरः ॥ तमुवाचमहाप्राज्ञंवसिष्ठंतपतांवरम् ॥ १० ॥ भगवञ्छ्रूयतांवाक्यमपूर्वंचारणेरितम् ॥ एषवैनहुषोनाम्नाआयुपुत्रोवियोजितः ॥ ११ ॥ मात्रासहसुदुःखैस्तुइन्दुमत्याहिदानवैः ॥ शिवस्यतनयाबालातपस्तेपेसुदुश्चरम् ॥ १२ ॥ निमित्तमस्यधीरस्य नहुषस्येतिवैगुरो ॥एवमाभाषितंतैस्तुतत्सर्वंहिमयाश्रुतम् ॥ १३ ॥ कोऽसावायुःसधर्मात्माकासात्विन्दुमतीशुभा ॥ अशोकसुन्दरीकासानहुषेतिकउच्यते ॥ १४ ॥ एतन्मेसंशयंजातंतद्भवांश्छेत्तुमर्हति ॥ अन्यःकोऽपिमहाप्राज्ञः[१]कुत्रासौनहुषेतिच ॥ १५ ॥ तत्सर्वंतातमेब्रूहिकारणान्तरमेवहि ॥१६॥ वसिष्ठउवाच ॥ आयूराजासधर्मात्मासप्तद्वीपाधिपोबली ॥ भार्याइन्दुमतीतस्यसत्यरूपायशस्विनी ॥ १७ ॥ तस्यामुत्पादितःपुत्रोभवान्वैगुणमन्दिरम् ॥ आयुनाराजराजेनसोमवंशस्यभूषणम् ॥ १८ ॥ हरस्यकन्यासुश्रोणीगुणरूपैरलङ्कृता ॥ अशोकसुन्दरीनाम्नासुभगाचारुहासिनी ॥१९॥ तस्यहेतोस्तपस्तेपेनिरालम्बातपोवने ॥ तस्याभर्ताभवान्सृष्टोधात्रायोगेननिश्चितः ॥ २० ॥ गङ्गायास्तीरमाश्रित्यध्यानयोगसमन्विताम् ॥ हुण्डश्चदानवेन्द्रोयोदृष्ट्वाचैकाकिनींसतीम् ॥२१॥ तपसाप्रज्वलन्तींचसुभगांकमलेक्षणाम् ॥ रूपौदार्यगुणोपेतांकामबाणैःप्रपीडितः ॥२२॥ तांबभाषेऽन्तिकंगत्वाममभार्याभवेतिच ॥ एवंसातद्वचःश्रुत्वातमुवाचतपस्विनी ॥२३॥ माहुण्डसाहसंकार्षीर्माजल्पस्वपुनःपुनः ॥अप्राप्याहंत्वयावीरपरभार्याविशेषतः ॥ २४ ॥ दैवेनमेपुरासृष्टआयुपुत्रोमहाबलः ॥ नहुषोनाममेधावीभविष्यतिनसंशयः ॥२५॥ देवदत्तोमहातेजाअन्यथात्वंकरिष्यसि ॥ ततःशापंप्रदास्यामियेनभस्मीभविष्यसि ॥२६॥ एवमाकर्ण्यतद्वाक्यंकामबाणैःप्रपीडितः ॥ व्याजेनापिहृतातेनप्रणीतानिजमन्दिरे ॥ २७ ॥ ज्ञात्वातयामहाभागशप्तोऽसौदानवाधमः ॥ नहुषस्यैवहस्तेनतवमृत्युर्भविष्यति ॥२८॥ अजातेत्वयिसज्ञातावदसित्वंयथैवतत् ॥ सत्वमायुसुतोवीरहृतोहुण्डेनपा

१ 'इहासीन्नहुषेति च 'इ० पा०।

CC-0. In Public Domain. Digitization by eGangotri

पिना ॥ २९ ॥ सूदेनरक्षितोदास्याप्रेषितोममचाश्रमम् ॥ भवन्तंवनमध्येचदृष्ट्वाचारणकिन्नरैः ॥ ३० ॥ यत्तुवैश्राविंतंवत्समयातेकथितंपुनः ॥ जहि तंपापकर्तारंहुण्डाख्यंदानवाधमम् ॥ ३१ ॥ नेत्राभ्यांहिप्रमुञ्चन्तीमश्रूणिपरिमार्जय ॥ इतोगत्वाप्रपश्यत्वंगङ्गातीरंमहाबलम् ॥३२॥ निपात्यदानवेन्द्रंतंकारागृहात्समानय ॥ अशोकसुन्दरीयाहितस्याभर्ताभवस्वहि ॥ ३३ ॥ एतत्तेसर्वमाख्यातंप्रश्नस्यास्यहिकारणम् ॥ आभाष्यनहुषंविप्रोविरराम महामतिः ॥ ३४ ॥ आकर्ण्यसर्वंमुनिनाप्रयुक्तमाश्चर्यभूतंसहिचिन्त्यमानः ॥ तस्यान्तमेकःपरिकर्तुकामआयोःसुतःकोपमथोचकार ॥ ३५ ॥ इति श्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेगुरुतीर्थमाहात्म्येच्यवनचरित्रेनाहुषाख्यानेऽष्टोत्तरशततमोऽध्यायः ॥ १०८ ॥ कुञ्जलउवाच ॥ प्रणिपत्यप्रसाद्यैववसिष्ठंतपतांवरम् ॥ आमन्त्यनिर्जगामाथबाणपाणिर्धनुर्धरः ॥१॥ एणस्यमांसंसुविपाच्यभोजितंबालस्तयारक्षितएवबुद्ध्या ॥ आयोःसुपुत्रःसगुणःसुरूपोदेवोपमोदेवगुणैश्चयुक्तः ॥ २ ॥ तेनैवमांसेनसुसंस्कृतेनमृष्टेनपक्वेनरसानुगेन ॥ तमेवदैत्यंपरिभाष्यसूदोदुष्टंसुहर्षेणव्यभोजयत्तदा ॥ ३ ॥ बुभुजेदानवोमांसंरसस्वादुसमन्वितम् ॥ हर्षेणापिसमाविष्टोजगामाशोकसुन्दरीम् ॥ ४ ॥ तामुवाचततस्तूर्णंकामोपहतचेतनः ॥ आयुपुत्रोमयाभद्रे भक्षितःपतिरेवते ॥ ५ ॥ मामेवभजचार्वङ्गिभुङ्क्ष्वभोगान्मनोऽनुगान् ॥ किंकरिष्यसितेनत्वंमानुषेणगतायुषा ॥ ६ ॥ प्रत्युवाचसमाकर्ण्यशिवकन्यातपस्विनी ॥ भर्तामेदैवतैर्दत्तोअजरोदोषवर्जितः ॥ ७ ॥ तस्यमृत्युर्नैवदृष्टोदेवैरपिमहात्मभिः ॥ एवमाकर्ण्यतद्वाक्यंदानवोदुष्टचेष्टितः ॥ ८ ॥ तामुवाचविशालाक्षींप्रहस्यैवपुनःपुनः ॥ अद्यैवभक्षितंमांसमायुपुत्रस्यसुन्दरि ॥ ९ ॥ जातमात्रस्यबालस्यनहुषस्यदुरात्मनः ॥ एवमाकर्ण्यसावाक्यंकोपंचक्रेसुदारुणम् ॥१०॥ प्रोवाचसत्यसंस्थासातपसाभावितापुनः॥तपएवमयातप्तंमनसानियमेनवै ॥ आयुसुतश्चिरायुश्चसत्येनैवभविष्यति ॥ ॥ ११ ॥ इतोगच्छदुराचारयदिजीवितुमिच्छसि ॥ अन्यथात्वामहंशप्स्येपुनरेवनसंशयः ॥ १२ ॥ एवमाकर्णितंतस्याःसूदेननृपतिंप्रति ॥ परित्यज्यमहाराजएतामन्यांसमाश्रय ॥ १३ ॥ सूदेनप्रेषितोदैत्यःसहुण्डःपापचेतनः ॥ निर्जगामत्वरायुक्तःसस्वांभार्यांप्रियांप्रति ॥ १४ ॥ चेष्टितंनैवजानातिदास्यासूदेनयत्कृतम् ॥ तस्यैनिवेदितंसर्वंप्रियायैवृत्तमेवच ॥ १५ ॥ अशोकसुन्दरीसाचमहतातपसाकिल ॥ दुःखशोकेनसन्तप्ताकृशीभूतातपस्विनी ॥ १६ ॥ चिन्तयन्तीप्रियंकान्तंतंध्यायतिपुनःपुनः ॥ किंनकुर्वन्तिवैदैत्याउपायैर्विविधैरपि ॥ १७ ॥ उपायज्ञाःसदाबुद्ध्याउद्यमेनापिसर्वदा ॥ वर्तन्तेदनुजश्रेष्ठानानाभावैश्चसर्वदा ॥ १८ ॥ मायोपायेनयोगेनहृताहंपापिनापुरा ॥ तथासघातितःपुत्रआयोश्चैवभविष्यति ॥ १९ ॥ यंदृष्ट्वादैवयोगेनभवितारमनामयम् ॥ उद्यमेनापिपश्येतकिंवानश्यतिवानवा ॥ २० ॥ किंवासउद्यमःश्रेष्ठःकिंवातत्कर्मजंफलम् ॥ भाविभावःकथंन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्येत्ततोवेदःप्रतिष्ठति ॥२१॥ विशेषोभावितोदेवैःसकथंचान्यथाभवेत् ॥ एवमेवंमहाभागाचिन्तयन्तीपुनःपुनः ॥ २२॥ किन्नरोविद्वरोनामबृहद्वंशोम
हातनुः ॥ सनाभ्योऽर्धनरःकायःपक्षाभ्यांहिविवर्जितः ॥ २३ ॥ द्विभुजोवंशहस्तस्तुहारकङ्कणशोभितः ॥ दिव्यगन्धानुलिप्ताङ्गोभार्ययासहचाग
तः ॥ २४ ॥ तामुवाचनिरानन्दांसम्तांशङ्करस्यहि ॥ किमर्थंचिन्तसेदेविविद्वरंविद्धिचागतम् ॥ २५ ॥ किन्नरंविष्णुभक्तंमांप्रेषितंदेवसत्तमैः ॥ दुःख
मेवंनकर्तव्यंभवत्यानहुषंप्रति ॥ २६ ॥ हुण्डेनपापचारेणवधार्थंतस्यधीमतः ॥ कृतमेवाखिलंकर्महृतश्चायुसुतःशुभे ॥ २७ ॥ सतुवैरक्षितोदेवैरुपायै
र्विविधैरपि ॥ हुण्डएवंविजानातिआयुपुत्रोहृतोमया ॥ २८ ॥ भक्षितस्तुविशालाक्षिइतिजानातिवैशुभ ॥ भवतींश्रावयित्वाहिगतोऽसौदानवोऽध
मः ॥ २९ ॥ स्वेनकर्मविपाकेनपुण्यस्यापिमहायशाः ॥ पूर्वजन्मार्जितेनैवतवभर्त्तासजीवति ॥ ३० ॥ पुण्यस्यापिबलेनैवयेषामायुर्विनिर्मित
म् ॥ स्वर्जितस्यमहाभागेनाशमिच्छन्तिघातकाः ॥ ३१ ॥ दुष्टात्मानोमहापापाःपरतेजोविदूषकाः ॥ तेषांयशोविनाशार्थंप्रपञ्चन्तिदिनेदिने
॥ ३२ ॥ नानाविधैरुपायस्तेविषशस्त्रादिभिस्ततः ॥ हन्तुमिच्छन्तितंपुण्यंपुण्यकर्माभिरक्षितम् ॥ ३३ ॥ पापिनश्चैवहुण्डाद्यामोहनस्तम्भना
दिभिः ॥ पीडयन्तिमहापापानानाभेदैर्बलाविलैः ॥ ३४ ॥ सुकृतस्यप्रयोगेणपूर्वजन्मार्जितेनहि ॥ पुण्यस्यापिमहाभागेपुण्यवन्तंसुरक्षितम् ॥
॥ ३५ ॥ वैफल्यंयान्तितेपांवैउपायाःपापिनांशुभे ॥ यन्त्रतन्त्राणिमन्त्राश्चशस्त्राग्निविषबन्धनाः ॥ ३६ ॥ रक्षयन्तिमहात्मानंदेवपुण्यःसुरक्षितम् ॥
कर्तारोभस्मतांयान्तिसवैतिष्ठतिपुण्यभाक् ॥३७॥ आयुपुत्रस्यवीरस्यरक्षकादेवताःशुभे ॥ पुण्यस्यसञ्चयंसर्वेतपसांनिधिमेवतु ॥३८॥ तस्माच्चरक्षि
तोवीरोनहुषोबलिनांवरः ॥ सत्येनतपसातेनपुण्यैश्चसंयमैर्दमैः ॥ ३९ ॥ माकृथादारुणंदुःखंमुञ्चशोकमकारणम् ॥ सहिजीवतिधर्मात्मामात्रापि
त्राविनावने ॥ ४० ॥ तपोवनेवसत्येकस्तपस्विपरिपालितः ॥ वेदवेदाङ्गतत्त्वज्ञोधनुर्वेदस्यपारगः ॥ ४१ ॥ यथाशशीविराजेतस्वकलाभिःस्वते
जसा ॥ तथाविराजतेसोऽपिस्वकलाभिःसुमध्यमे ॥ ४२ ॥ विद्याभिस्तुमहापुण्यैस्तपोभिर्यशसातथा ॥ राजतेपरवीरघ्नोरिपुहासुरवल्लभः ॥४३॥
हुण्डंनिहत्यदैत्येन्द्रंत्वामेवंहिप्रलप्स्यते ॥ त्वयासार्द्धंप्रियाचैवपृथिव्यामेकभूपतिः ॥ ४४ ॥ भविष्यतिमहायोगीयथास्वर्गेतुवासवः ॥ त्वंतस्मा
त्प्राप्स्यसेभद्रेसुपुत्रंवासवोपमम् ॥ ४५ ॥ ययातिंनामधर्मज्ञंप्रजापालनतत्परम् ॥ तथाकन्याशतंचापिरूपौदार्यगुणान्वितम् ॥ ४६ ॥ यासां
पुण्यैर्महाराजइन्द्रलोकंप्रयास्यति ॥ इन्द्रत्वभोक्ष्यतेदेविनहुषःपुण्यविक्रमः ॥४७॥ ययातिर्नामधर्मात्माआत्मजस्तेभविष्यति ॥ प्रजापालोमहाराजः
सर्वजीवदयापरः ॥ ४८ ॥ तस्यपुत्रास्तुचत्वारोभविष्यन्तिमहौजसः ॥ बलवीर्यसमोपेताधनुर्वेदस्यपारगाः ॥ ४९ ॥ प्रथमश्चतुरुर्नामपुरुर्नामपद्वि

CC-0. In Public Domain. Digitization by eGangotri

तीयकः ॥ उरुर्नामतृतीयश्चचतुर्थोवीर्यवान्यदुः ॥ ५० ॥ एवंपुत्रामहावीर्यास्तेजस्विनोमहाबलाः ॥ भविष्यन्तिमहात्मानः सर्वतेजःसमन्विताः ॥ ॥ ५१ ॥ यदोश्चैवसुतावीराःसिंहतुल्यपराक्रमाः ॥ तेषांनामानिभद्रंतेगदतःशृणुसाम्प्रतम् ॥ ५२ ॥ भोजश्चभीमकश्चापिअन्धकःकुञ्जरस्तथा ॥ वृष्णिर्नामसुधर्मात्मासत्याधारोभविष्यति ॥ ५३ ॥ षष्ठस्तुश्रुतसेनश्चश्रुताधारस्तुसप्तमः ॥ कालदंष्ट्रोमहावीर्यःसमरेकालजिद्बली ॥ ५४ ॥ यदोः पुत्रामहावीर्यायादवाख्यावरानने ॥ तेषांतुपुत्राःपौत्रास्तेभविष्यन्तिसहस्रशः ॥ ५५ ॥ एवंनहुषवंशोवैतवदेविभविष्यति ॥ दुःखमेवपरित्यज्यसुखे नानुप्रवर्तय ॥ ५६ ॥ समेष्यतिमहाप्राज्ञस्तवभर्ताशुभानने ॥ निहत्यदानवंहुण्डंत्वामेवंपरिणेष्यति ॥ ५७ ॥ दुःखजातानिसोष्णानिनेत्राभ्यांहिप तन्तिच ॥ अश्रूणिचेन्दुमत्याश्चसंमार्जयतिमानदः ॥ ५८ ॥ आयोश्चदुःखमुद्धृत्यस्वकुलंतारयिष्यति ॥ सुखिनंपितरंकृत्वाप्रजापालोभविष्यति ॥ ॥ ५९ ॥ एतत्तेसर्वमाख्यातंदेवानांकथनंशुभे ॥ दुःखंशोकंपरित्यज्यसुखेनपरिवर्त्तय ॥ ६० ॥ अशोकसुन्दर्युवाच ॥ कदाह्येष्यतिमेभर्त्ताविहितोदै वतैर्यदि ॥ सत्यंवदस्वधर्मज्ञममसौख्यंविवर्द्धय ॥ ६१ ॥ विद्वरउवाच ॥ अचिराद्द्रक्ष्यसिभर्तारंत्वमेवंशृणुसुन्दरि ॥ एवमुक्त्वाजगामाथगन्धर्वो विबुधालयम् ॥ ६२ ॥ अशोकसुन्दरीसाचतपस्तेपेहितत्रवै ॥ कामंक्रोधंपरित्यज्यलोभंचापिशिवात्मजा ॥ ६३॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपा ख्यानेगुरुतीर्थेच्यवनचरित्रेनाहुषाख्यानेनवाधिकशततमोऽध्यायः ॥ १०९ ॥ कुञ्जलउवाच ॥ आमन्त्र्यसमुनीन्सर्वान्वसिष्ठंतपतांवरम् ॥ समु त्सुकोगन्तुकामोनहुषोदानवंप्रति ॥१॥ ततस्तेमुनयःसर्वेवसिष्ठाद्यास्तपोधनाः ॥ आशीर्भिरभिनन्द्यैनमायुपुत्रंमहाबलम् ॥२॥ आकाशेदेवताःसर्वाज घ्नुर्वैदुन्दुभीन्मुदा ॥ पुष्पवृष्टिंप्रचक्रुस्तेनहुषस्यचमूर्धनि ॥३॥ अथदेवःसहस्राक्षःसुरैःसार्द्धसमागतः ॥ ददौशस्त्राणिचास्त्राणिसूर्यतेजोपमानिच ॥ ॥ ४ ॥ देवेभ्योनृपशार्दूलोजगृहेद्विजसत्तम ॥ तानिदिव्यानिचास्त्राणिदिव्यरूपोपमोऽभवत् ॥ ५ ॥ अथतादेवताःसर्वाःसहस्राक्षमथाब्रुवन् ॥ स्य न्दनोदीयतामस्मैनहुषायसुरेश्वर ॥ ६ ॥ देवानांमतमाज्ञायवज्रपाणिःस्वसारथिम् ॥ आहूयमातलिंतंतुआदिदेशततोद्विज ॥७॥ एनंगच्छमहात्मा नमुह्यतांस्यन्दनेनवै ॥ सध्वजेनमहाप्राज्ञमायुजंसमरोद्यतम् ॥ ८ ॥ सचोवाचसहस्राक्षंकरिष्येतवशासनम् ॥ एवमुक्त्वाजगामाशुह्यायुपुत्रंरणोद्यतम् ॥ ९ ॥ राजानंप्रत्युवाचैवदेवराजस्यभाषितम् ॥ विजयीभवधर्मज्ञरथेनानेनसङ्गरे ॥ १० ॥ इत्युवाचसहस्राक्षस्त्वामेवनृपतीश्वर ॥ जहित्वंदानवं सङ्ख्येतंहुण्डंपापचेतनम् ॥ ११ ॥ समाकर्ण्यसराजेन्द्रःसानन्दपुलकोद्गमः ॥ प्रसादादेवदेवस्यवसिष्ठस्यमहात्मनः ॥ १२ ॥ दानवंसूदयिष्यामिस

१ 'कुञ्जरान्धकः' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मरेपापचेतनम् ॥ देवानांचविशेषेणममायापचारितम् ॥ १३ ॥ एवमुक्तमहावाक्येनहुषेणमहात्मना ॥ अथायातःस्वयंदेवःशङ्खचक्रगदाधरः ॥ ॥ १४ ॥ चक्राचक्रंसमुत्पाद्यसूर्यबिम्बोपमंमहत् ॥ज्वलतातेजसादीप्तंसुवृत्तारंशुभावहम् ॥ १५ ॥ नहुषायददौदेवोहर्षेणमहताकिल ॥ तस्मैशूलंददौशम्भुःसुतीक्ष्णंतेजसान्वितम् ॥ १६ ॥ तेनशूलवरेणासौशोभतेसमरोद्यतः ॥ द्वितीयःशङ्करश्चासौत्रिपुरघ्नोयथाप्रभुः ॥ १७ ॥ ब्रह्मास्त्रंदत्तवान्ब्रह्मा वरुणःपाशमुत्तमम् ॥ चन्द्रतेजःप्रतीकाशंशङ्खंचनादमङ्गलम् ॥ १८ ॥ वज्रमिन्द्रस्तथाशक्तिंवायुश्चापंसमार्गणम् ॥ आग्नेयास्त्रंतथावह्निर्ददौतस्मैमहात्मने ॥ १९ ॥ शस्त्राण्यस्त्राणिदिव्यानिबहूनिविविधानिच ॥ ददुर्देवामहात्मानस्तस्मैराज्ञेमहौजसे ॥ २० ॥ अथआयुसुतोवीरोदैवतैःपरिमानितः ॥ आशीर्भिर्नन्दितश्चापिमुनिभिस्तत्त्ववेदिभिः ॥२१॥ आरुरोहरथंदिव्यंभास्वरंरत्नमालिनम्॥घण्टारवैःप्रणदन्तंक्षुद्रघण्टासमाकुलम् ॥२२॥ रथेनतेनदिव्येनशुशुभेनृपनन्दनः ॥ दिविमार्गेयथासूर्यस्तेजसास्वेनवैकिल ॥२३॥ प्रतपंस्तेजसातद्वद्दैत्यानांमस्तकेषुसः ॥ जगामशीघ्रंवेगेनयथा वायुःसदागतिः ॥ २४ ॥ यत्रासौदानवःपापस्तिष्ठतेस्वबलैर्युतः ॥ तेनमातलिनासार्द्धंवाहकेनमहात्मना ॥ २५ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेगुरुतीर्थमाहात्म्येच्यवनचरित्रेनहुषाख्यानेदशाधिकशततमोऽध्यायः ॥११०॥ कुञ्जलउवाच ॥ निर्गच्छमानेसमरायवीरेनहुषेहितस्मिन्सुरराजतुल्य ॥सकौतुकामङ्गलगीतयुक्ताःस्त्रियस्तुसर्वाःपरिजग्मुरत्र ॥ १ ॥ देवतानांवरानार्योरम्भाद्यप्सरसस्तथा ॥ किन्नर्यःकौतुकौत्सुक्योजगुःस्वरेणसत्तम ॥ २ ॥ गन्धर्वाणांतथानार्योरूपालङ्कारसंयुताः ॥ कौतुकायगतास्तत्रयत्रराजासतिष्ठति ॥३॥ पुरंमहोदयंनामहुण्डस्यापिदुरात्मनः ॥ नन्दनोपवनैर्दिव्यैःसर्वत्रसमलङ्कृतम् ॥ ४ ॥ सप्तकक्षान्वितैर्गेहैःकलशैरुपशोभितम् ॥ सपताकैर्महादण्डैःशोभमानंपुरोत्तमम् ॥ ५ ॥ कैलासशिखराकारैःसोन्नतैर्दिवमास्थितैः ॥ सर्वश्रियान्वितैर्दिव्यैर्भ्राजमानंपुरोत्तमम् ॥ ६ ॥ वनैश्चोपवनैर्दिव्यैस्तडागैःसागरोपमैः ॥ जलपूर्णैःसुशोभैस्तुपद्मैरक्तोत्पलान्वितः ॥ ७ ॥ प्राकारैश्चमहारत्नैरट्टालकशतैरपि ॥ परिखाभिःसुपूर्णाभिर्जलैःस्वच्छैःप्रशोभितम् ॥ ८ ॥ अन्यैश्चैवमहारत्नैर्गजाश्वैश्चविराजितम् ॥ सुनारीभिःसमाकीर्णंपुरुषैश्चमहाप्रभैः ॥ ९ ॥ नानाप्रभावैर्दिव्यैश्चशोभमानंमहोदयम् ॥ राजश्रेष्ठोमहावीरोनहुषोदद्दशेपुरम् ॥ १० ॥ पुरप्रान्तेवनंदिव्यंदिव्यवृक्षैरलङ्कृतम् ॥ तद्विवेशमहावीरोनन्दनंहियथाऽमरः ॥ ११ ॥ रथेनसहधर्मात्मातेनमातलिनासह ॥ प्रविष्टःसतुराजेन्द्रोवनमध्येसरित्तटे ॥ १२ ॥ तत्रतारूपसंयुक्तादिव्यानार्यःसमागताः ॥ गन्धर्वागीततत्त्वज्ञाजगुर्गीतैर्नृपोत्तमम् ॥ १३ ॥ सूताश्चमागधाःसर्वेतंस्तुवन्तिनृ

१ एतस्याग्रे-"निर्गच्छमानं मुनिदेववृन्दैर्दृष्टं नृपेन्द्रं बलवीर्यकोशम् । इन्द्रोपमं विष्णुसमं सुसङ्ख्ये वधाय हुण्डस्य समुत्सुकं तम्" इति पाठो बहुषु पुस्तकेषूपलभ्यते-परं क्रियादिसंबन्धो नावगम्यते।

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

पोत्तमम् ॥ राजानमायुपुत्रंतंभ्राजमानंयथारविम् ॥ १४ ॥ शुश्रावगीतमधुरंनहुषःकिन्नरेरितम् ॥ १५ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्याने
गुरुतीर्थमाहात्म्येच्यवनचरित्रेनहुषाख्यानेएकादशाधिकशततमोऽध्यायः ॥१११॥ कुञ्जलउवाच॥तदेवगानंचसुराङ्गनाभिर्गीतंसमाकर्ण्यचगीतकेर्ध्रु
वैः ॥ समाकुलाचापिबभूवतत्रसाशम्भुपुत्रीपरिचिन्तमाना ॥१॥ आसनात्तूर्णमुत्थायमहोत्साहेनसंयुता ॥ तूर्णंगतावरारोहातपोभावसमन्विता ॥२॥
तंदृष्ट्वादेवसङ्काशंदिव्यरूपसमप्रभम् ॥ दिव्यगन्धानुलिप्ताङ्गंदिव्यमालाभिशोभितम् ॥३॥ दिव्यैराभरणैर्वस्त्रैःशोभितंनृपनन्दनम् ॥ दीप्तिमन्तंयथासू
र्यंदिव्यलक्षणसंयुतम् ॥४॥ किंवादेवोमहाप्राज्ञोगन्धर्वोवाभविष्यति ॥ किंवानागसुतःसोऽयंकिंवाविद्याधरोभवेत् ॥५॥ देवेषुनैवपश्यामिकुतोयक्षेषु
जायते ॥ अनयालीलयावीरःसहस्राक्षोऽपिजायते ॥ ६ ॥ शम्भुरेषभवेत्किंवाकिंवाचायंमनोभवः ॥ किंवापितुःसखामेस्यात्पौलस्त्योऽयंधनाधिपः
॥ ७ ॥ एवंसमाचिन्तयतीचयावत्तावत्त्वरंरूपगुणाधिपासा ॥ समेत्यरम्भासुमहासखीभिरुवाचतांशम्भुसुतांप्रहस्य ॥ ८ ॥ इतिश्रीपाद्मपु
राणेभूमिखण्डेवेनोपाख्यानेगुरुतीर्थमाहात्म्येच्यवनचरित्रेनहुषाख्यानेद्वादशाधिकशततमोऽध्यायः ॥ ११२ ॥ रम्भोवाच ॥ तपएतत्परित्यज्यकिं
वाऽऽलोकयसेशुभे ॥ तपसःक्षरणंस्याद्वैपुरुषस्यापिचिन्तनात् ॥ १ ॥ अशोकसुन्दर्युवाच ॥ तपसिमेमनोलीनंनहुषस्यापिकाम्यया ॥ नमांचालयि
तुंशक्तादेवासुरमहोरगाः ॥ २ ॥ एनंदृष्ट्वामहाभागेमेमनश्चलतेभृशम् ॥ रन्तुमिच्छाम्यहंगत्वाएवमुत्सुकतांगतम् ॥ ३ ॥ एवंविपर्ययश्चासीन्मनसोमेव
रानने ॥ तन्मेत्वंकारणंब्रूहियद्यस्तिज्ञानमुत्तमम् ॥ ४ ॥ आयुपुत्रस्यभार्याहंदेवैःसृष्टामहात्मभिः॥कस्मान्मेधावतेचेतउत्सुकंरन्तुमेवच ॥ ५ ॥ रम्भो
वाच ॥ सर्वेष्वेवमहाभागेदेहरूपेषुभामिनि ॥ वसत्यात्मास्वयंब्रह्मज्ञानरूपःसनातनः ॥ ६ ॥ यद्यपिप्रक्रियाबद्धैरिन्द्रियैरुपकारिभिः ॥ मोहपाशमयै
र्बद्धस्तथासिद्धस्तुसर्वदा ॥ ७ ॥ प्रकृतिंनैवजानातिज्ञानविज्ञानकीकलाम् ॥ अयंशुद्धश्चधर्मज्ञआत्मावेत्तिचसुन्दरि ॥ ८ ॥ गच्छन्त्यपिमनस्तापमेनं
दृष्ट्वामहामतिम् ॥ पापमेवंपरित्यज्यसत्यमेवंप्रधावति ॥ ९ ॥ भर्तायमायुपुत्रस्तेएतत्सत्यंनसंशयः ॥ अन्यंदृष्ट्वाविशङ्केतपुरुषंपापलक्षणम् ॥ १० ॥
एवंविधिःकृतोदेवैःसत्यपाशेनबन्धितः ॥ यदस्याआयुपुत्रोऽपिभर्तृत्वमुपयास्यति ॥ ११ ॥ एवमाकर्णितंभद्रेआत्मनातंचसुन्दरि ॥ तद्भावसत्यसम्ब
न्धंपरिगृह्यस्थितःस्वयम्॥१२॥ अन्यंभावंनजानातिआयुपुत्रंचविन्दति॥प्रकृतिर्नैवतेदेविपतिंजानातिचागतम् ॥१३॥ एवंज्ञात्वाप्रधानात्मातवाद्यैव
प्रधावति ॥ आत्मासर्वंप्रजानातिआत्मादेवःसनातनः ॥ १४ ॥ अयमेषसवीरेन्द्रोनहुषोनामवीर्यवान् ॥ तस्माद्गच्छतिचेतस्तेसत्यंसम्बन्धमिच्छते

१ 'एवं समालोकयन्ती बलरूपगुणान्वितम् ॥ समेत्य तं सखीभिस्तु रम्भाद्याभिः स्थिताभवत् ॥' इ० पा० । २ 'मनः संरक्ष वै साध्वी पुरुषस्य विचिन्तनात्' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १५ ॥ ज्ञात्वाचायोःसुतंभद्रेअन्यंचैवनगच्छति ॥ एतत्तेसर्वमाख्यातंशाश्वतंत्वन्मनोगतम् ॥ १६ ॥ हुण्डंहत्वामहाघोरंसमरेदानवाधमम् ॥ त्वां नयिष्यतिस्वस्थानमायोश्चगृहमुत्तमम् ॥ १७ ॥ हृतोदैत्येनवीरेन्द्रोनिजपुण्येनशोषितः ॥ बाल्यात्प्रभृतिवीरेन्द्रोवियुक्तःस्वजनेनवै ॥१८॥ पितृमातृ विहीनस्तुगतोवृद्धिंमहावने ॥ यास्यत्येवपितुर्गेहंत्वयैवसहसाम्प्रतम् ॥ १९ ॥ एवमाभाषितंश्रुत्वारम्भायाःशिवनन्दिनी ॥ हर्षेणमहताविष्टातामुवाच संमुद्रजाम्[1] ॥ २० ॥ अयमेवससत्यात्मामामभर्तासुवीर्यवान् ॥ मनोमेधावतेऽत्यर्थंशोकाकुलितविह्वलम् ॥ २१ ॥ नास्तिचित्तसमोदेवोजानातिसु विनिश्चितम् ॥ सत्यमेतन्मयादृष्टंसुचित्रंचारुहासिनी ॥ २२ ॥ मनोभवसमानंतुपुरुषंदिव्यलक्षणम् ॥ नधावतिमहाचेतएनंदृष्ट्वायथासखि ॥२३॥ तथानधावतेभद्रेपुंसमन्यंनमन्यते ॥ एनंगन्तव्यमावाभ्यांसखीभिर्गृहमेवहि ॥२४॥ एवमाभाष्यसारम्भागमनायोपचक्रमे ॥ गमनायोत्सुकांज्ञात्वा नहुषस्यान्तिकंप्रति ॥ २५ ॥ तामुवाचततोरम्भाकस्मादेविनगम्यते ॥ २६ ॥ कुञ्जलउवाच ॥ सख्याचरम्भयासार्द्धंनहुषंवीरलक्षणम् ॥ तस्यान्ति कंसुसम्प्राप्यप्रेषयामासतांसखीम् ॥ २७ ॥ एनंगच्छमहाभागेनहुषंदेवरूपिणम् ॥ कथयस्वकथामेतांतवार्थेआगतायतः ॥ २८ ॥ रम्भोवाच ॥ एवं सखिकरिष्यामिसुप्रियंतवसुव्रते ॥ एवमुक्त्वागतारम्भानहुषंराजनन्दनम् ॥ २९ ॥ चापबाणधरंवीरंद्वितीयमिववासवम्॥ प्रत्युवाचगतारम्भासख्या वचनमुत्तमम् ॥ ३० ॥ आयुपुत्रमहाभागरम्भाहंसमुपागता ॥ शिवस्यकन्ययावीरतयाहंपरिप्रेषिता ॥ ३१ ॥ तवार्थंदेवदेवेनदेव्यादेवेनवैपुरा[2] ॥ भार्यारूपंवरंश्रेष्ठंसृष्टंलोकेषुदुर्लभम् ॥ ३२ ॥ दुष्प्राप्यंतुनरश्रेष्ठैर्देवैस्सेन्द्रैस्तपोधनैः ॥ गन्धर्वैःपन्नगैःसिद्धैश्चारणैःपुण्यलक्षणैः ॥ ३३ ॥ स्वयमेवस मायातंतवार्थेश्रृणुसाम्प्रतम् ॥ स्त्रीरत्नंतन्महाप्राज्ञसम्पूर्णंपुण्यनिर्मितम् ॥ ३४ ॥ अशोकसुन्दरीनामतवार्थंतपसिस्थिता ॥ अत्यर्थंतुतपस्तप्तंभवन्त मिच्छतेसदा ॥३५ ॥ एवंज्ञात्वामहाभागभजमानांभजस्वहि ॥ त्वामृतेसावरारोहापुरुषंनैवयाचते ॥ ३६ ॥ नहुषेणतयोक्तंतुश्रुत्वाऽवधारितंवचः॥ प्रत्युत्तरंददौचाथरम्भेमेश्रूयतांवचः ॥ ३७ ॥ तत्तुसर्वंविजानामियत्त्वयोक्तंममाग्रतः ॥ ममाग्रेकथितंपूर्ववसिष्ठेनमहात्मना ॥३८॥ सर्वमेवविजाना मिअस्यास्तुतपउत्तमम् ॥ श्रूयतांकारणंभद्रेयथासौख्यंभविष्यति ॥ ३९ ॥ अहत्वादानवंहुण्डंनगच्छामिवराङ्गनाम् ॥ सर्वमेतत्सुवृत्तान्तमहंजाने तथैवहि ॥ ४० ॥ ममार्थेतवसम्भूतिस्तपश्चचरितंत्वया ॥ ममभार्यानसन्देहोभवतीविधिनाकृता ॥ ४१ ॥ ममार्थेनिश्चयंकृत्वातपआचरितंत्वया ॥ हृतातस्मात्सुपापेनभवतीनियमान्विता ॥ ४२ ॥ सूतिगृहादहंतेनदानवेनाधमेनवै ॥ बालभावस्थितोदेविपितृमातृविनाकृतः ॥ ४३ ॥ तस्मात्तं तु

१ 'समुद्रजां रम्भामित्यर्थः'। २ 'उमया दिव्यया पुरा' इ० पा०।

CC-0. In Public Domain. Digitization by eGangotri

हनिष्यामिहुण्डंवैदानवाधमम् ॥ पश्चात्त्वामुपनेष्येऽहंवशिष्ठस्याश्रमंप्रति ॥ ४४ ॥ एवंकथयभद्रंतेरम्भेमत्प्रियकारिणीम् ॥ एवंविसर्जितातेनसत्व
रंसागतापुनः ॥ ४५ ॥ अशोकसुन्दरींदेवींकथयामासतस्यच ॥ समासेनतथासर्वंरम्भासाद्विजसत्तम ॥ ४६ ॥ अशोकसुन्दरीसातुअवधार्यसुभा
पितम् ॥ नहुषस्यसुवीरस्यहर्षेणचसमन्विता ॥ ४७ ॥ तस्थौतत्रतयासार्द्धंसुसख्यारम्भयातदा ॥ भर्तुश्चकीदृशंवीर्यमितिपश्यामिवैसदा ॥ ४८ ॥
इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेगुरुतीर्थमाहात्म्येच्यवनचरित्रेनहुषाख्यानेत्रयोदशाधिकशततमोऽध्यायः ॥ ११३ ॥ कुञ्जलउवाच ॥ अथ
तेदानवाःसर्वेहुण्डस्यपरिचारकाः ॥ नहुषस्यापिसंवादंरम्भयातुयथाश्रुतम् ॥ १ ॥ आचचक्षुश्चदैत्येन्द्रंहुण्डंसर्वंसुभाषितम् ॥ तमाकर्ण्य
सचुक्रोधदूतंवाक्यमथाब्रवीत् ॥ २ ॥ गच्छवीरममादेशाज्जानीहिपुरुषंहितम् ॥ सम्भाषतेतयासार्द्धंपुरुषःशिवकन्यया ॥ ३ ॥ स्वामि
निर्देशमाकर्ण्यजगामलघुदानवः ॥ विविक्तेनहुषंवीरमिदंवचनमब्रवीत् ॥ ४ ॥ रथेनसाश्वसूतेनदिव्येनपरितिष्ठसि ॥ धनुषादिव्यबाणैस्तु
सभायांहिभयङ्करः ॥ ५ ॥ कस्यकेनतुकार्येणप्रेषितःकेनवैभवान् ॥ अनयारम्भयातेऽद्यअन्ययाशिवकन्यया ॥ ६ ॥ किमुक्तंतत्स्फुटंसर्वंकथयस्व
ममाग्रतः ॥ हुण्डस्यदेवमर्दस्यनबिभेतिभवान्कथम् ॥७॥ एतन्मेसर्वमाचक्ष्वयदिजीवितुमिच्छसि ॥ सत्वरंगच्छमातिष्ठदुःसहोदानवाधिपः ॥८॥
नहुषउवाच ॥ योऽसावायुर्बलीराजासप्तद्वीपाधिपःप्रभुः ॥ तस्यमांतनयंविद्धिसर्वदैत्यविनाशनम् ॥ ९ ॥ नहुषंनामविख्यातंदेवब्राह्मणपूजकम् ॥
हुण्डेनापहृतंबाल्येस्वामिनातवदानव ॥ १० ॥ सेयंकन्याशिवस्यापिदैत्येनापहृतापुरा ॥ घोरंतपश्चरत्येषाहुण्डस्यापिवधायच ॥ ११ ॥ योऽहमा
दौहृतोबालस्त्वयायःसूतिकागृहात् ॥ दास्याअपिकरेदत्तःसूदस्यापिदुरात्मना ॥ १२ ॥ वधार्थंश्रूयतांपापसोऽहमद्यसमागतः ॥ अस्यापिहुण्डदैत्य
स्यदुष्टस्यपापकर्मणः ॥१३॥ अन्यांश्चदानवान्घोरान्नयिष्येयमसादनम् ॥ मामेवंविद्धिपापिष्ठएवंकथयदानवम् ॥ १४ ॥ एवमाकर्ण्यतत्सर्वंनहुष
स्यमहात्मनः ॥ गत्वाहुण्डंसदुष्टात्माआचचक्षेऽस्यभाषितम् ॥ १५ ॥ निशम्यतन्मुखात्तूर्णंचुक्रोधदितिजेश्वरः ॥ कस्मात्सूदेनपापेनतयादास्यान
घातितः ॥१६॥ सोऽयंवृद्धिंसमायातोमयाव्याधिरुपेक्षितः ॥ अथैनंघातयिष्यामिअनयाशिवकन्यया ॥ १७ ॥ आयोःपुत्रंखलंयुद्धेबाणैरेभिःशि
लाशितैः ॥ एवंसचिन्तयित्वातुसारथिंवाक्यमब्रवीत् ॥ १८ ॥ स्यन्दनंयोजयस्वत्वंतुरगैःसाधुभिःशिवैः ॥ सेनाध्यक्षंसमाहूयइत्युवाचसमातुरः
॥ १९ ॥ सज्जतांममसैन्यंत्वंशूरान्नागान्प्रकल्पय ॥ सारोहैस्तुरगान्योधान्पताकाच्छत्रचामरैः ॥ २० ॥ चतुरङ्गबलंमेऽद्ययोजयस्वहिसत्वरम् ॥
एवमाकर्ण्यतत्तस्यहुण्डस्यापिततोलघुः ॥ २१ ॥ सेनाध्यक्षोमहाप्राज्ञःसर्वंचक्रेयथाविधि ॥ चतुरङ्गेनतेनासौबलेनमहतावृतः ॥ २२ ॥ जगामनहु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षवीरंचापबाणधरंरणे ॥ इन्द्रस्यस्यन्दनेयुक्तंसर्वशस्त्रभृतांवरम् ॥ २३ ॥ उद्यन्तंसमरेवीरंदुरापंदेवदानवैः ॥ पश्यन्तिगगनेदेवाविमानस्थामहौजसः ॥ २४ ॥ तेजोज्वालासमाकीर्णद्वितीयमिवभास्करम् ॥ अथतेदानवाःसर्वेववृषुस्तंशरोत्तमैः ॥ २५ ॥ खड्गैःपाशैर्महाशूलैःशक्तिभिस्तुपरश्वधैः ॥ युयुधुःसंयुगेतेननहुषेणमहात्मना ॥ २६ ॥ संरब्धागर्जमानास्तेयथामेघागिरौतथा ॥ तद्विक्रमंसमालोक्यआयुपुत्रःप्रतापवान् ॥ २७ ॥ इन्द्रायुधसमंचापंविस्फार्यसगुणस्वरम् ॥ वज्रस्फोटसमःशब्दश्चापस्यापिमहात्मनः ॥ २८ ॥ नहुषेणकृतोविप्रादानवानांभयप्रदः ॥ महतातेनघोषेणदानवाःप्रचकम्पिरे ॥२९॥ कश्मलाविष्टहृदयाभग्नसत्वामहाहवे ॥३०॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेगुरुतीर्थमाहात्म्येच्यवनचरित्रेनहुषाख्याने चतुर्दशाधिकशततमोऽध्यायः ॥ ११४ ॥ कुञ्जलउवाच ॥ ततस्त्वसौसंयतिराजमानःसमुद्यतश्चापधरोमहात्मा ॥ यथैवकालःकुपितःसलोकान्संहर्तुमैच्छत्तुतथासुदानवान् ॥ १ ॥ महास्त्रजालैरवितेजतुल्यैःसुदीप्तिमद्भिर्निजघानदानवान् ॥ वायुर्यथोन्मूलयतीहपादपांस्तथैवराजानिजघानदानवान् ॥ २ ॥ वायुर्यथामेघचयंचदिव्यंसञ्चालयेत्स्वेनबलेनतेजसा ॥ तथासराजाअसुरान्मदोत्कटाननाशयद्बाणवरैःसुतीक्ष्णैः ॥ ३ ॥ नशेकुर्दानवाःसर्वेबाणवर्षमहात्मनः ॥ मृताःकेचिद्द्रुताःकेचित्केचिन्नष्टामहाहवात् ॥ ४ ॥ महातेजंमहाप्राज्ञंमहादानवनाशनम् ॥ चुक्रोधहुण्डोदुष्टात्मादृष्ट्वातंनृपनन्दनम् ॥ ५ ॥ स्थितोगत्वेदमाभाष्यतिष्ठतिष्ठेतिचाहवे ॥ त्वामद्यचनयिष्यामिआयुपुत्रयमान्तिकम् ॥ ६ ॥ नहुषउवाच ॥ स्थितोऽस्मिसमरेपश्यत्वामहंहन्तुमागतः ॥ [1]अहंत्वांतुहनिष्यामिदानवंपापचेतनम् ॥ ७ ॥ इत्युक्त्वाधनुरादायबाणानग्निशिखोपमान् ॥ छत्रेणध्रियमाणेनशुशुभेसोऽपिसंयुगे ॥ ८ ॥ इन्द्रस्यसारथिंदिव्यंमातलिंवाक्यमब्रवीत् ॥ वाहयतुरथंमेऽद्यहुण्डस्यसंमुखंभवान् ॥ ९॥ इत्युक्तस्तेनवीरेणमातलिर्लघुविक्रमः ॥ तुरगांश्चोदयामासमहावातजवोपमान् ॥ १० ॥ उत्पेतुश्चततोवाहाहंसाइवयथाम्बरे ॥ छत्रेणइन्दुवर्णेनरथेनापिपताकिना ॥ ११ ॥ नभस्तलंतुसम्प्राप्ययथासूर्योविराजते ॥ आयुपुत्रस्तथासङ्ख्येतेजसाविक्रमेणतु ॥ १२ ॥ अथहुण्डोरथस्थोऽपिराजमानःस्वतेजसा ॥ सर्वायुधैश्चसंयुक्तस्तद्वद्वीरव्रतेस्थितः ॥१३॥ उभयोर्वीरयोर्युद्धंदेवविस्मयकारकम्॥ तदाआसीन्महाप्राज्ञदारुणंभीतिदायकम् ॥ १४ ॥ सुबाणैर्निशितैस्तीक्ष्णैःकङ्कपत्रैःशिलीमुखैः ॥ हुण्डेनताडितोराजासुबाह्वोरन्तरेतदा ॥१५॥ सुभालेपञ्चभिर्बाणैर्विद्धःक्रुद्धोऽभवत्तदा ॥ सविद्धस्तुतदाबाणैरधिकंशुशुभेनृपः ॥१६॥ सारुणःकरमालाभिरुदयंश्चदिवाकरः ॥ रुधिरेणतुदिग्धाङ्गोहेमबाणैस्तनुस्थितैः ॥१७॥ सूर्यवच्छोभतेराजापूर्वकालस्यचाम्बरे॥दृष्ट्वातुपौरुषंतस्यदा

१ 'अहत्वा नैव यास्यामि' इ० पा० । २'युयुधे' इ० पा० । ३'सर्वायुधास्त्रसंयुक्तस्तद्वत्सोऽप्यम्बरे स्थितः' इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

नवंवाक्यमब्रवीत् ॥१८॥ तिष्ठंतिष्ठक्षणंदैत्यपश्यमेलाघवपुनः ॥ इत्युक्त्वातुरणेदैत्यंजघानदशभिःशरैः ॥१९॥ मुखेभालेहतस्तेनमूर्च्छितोनिपपातह
॥ पश्यमानैःसुरैर्दिव्यैरथोपरिमहाबलः ॥२०॥ देवैश्चचारणैःसिद्धैःकृतःशब्दःसुहर्षजः ॥ जयजयेतिराजेन्द्रशङ्खान्दध्मुःपुनःपुनः ॥२१॥सकोलाहल
शब्दस्तुतुमलोदेवतेरितः ॥ कर्णरन्ध्रमाविवेशहुण्डस्यमूर्छितस्यच ॥ २२ ॥ श्रुत्वासधनुरादायबाणमाशीविषोपमम् ॥ स्थीयतांस्थीयतांयुद्धेनमृतो
ऽस्मित्वयाहतः ॥२३ ॥ इत्युक्त्वापुनरुत्थायलाघवेनसमन्वितः ॥एकविंशतिभिर्बाणैर्नहुषंचाहनत्पुनः ॥२४ ॥ एकेनमुष्टिमध्येतुचतुर्भिर्बाहुमध्यतः
चतुर्भिश्चमहाश्वांश्चछत्रमेकेनतेनवै ॥ २५ ॥ पञ्चभिर्मातलिंविद्धारथनीडंतुसप्तभिः ॥ ध्वजदण्डंत्रिभिस्तीक्ष्णैर्दानवःशिखिपत्रिभिः ॥ २६ ॥ आ
दानंतुनिदानंतुलक्षमोक्षंदुरात्मनः ॥ लाघवंतस्यसदृष्ट्वादेवताविस्मयंगताः ॥२७ ॥ तस्यपौरुषमापश्यसराजादानवोत्तमम् ॥ शूरोऽसिकृतविद्योऽसि
धीरोऽसिरणपण्डितः ॥२८॥ इत्युक्त्वादानवंतंतुधनुर्विस्फार्यभूपतिः ॥ मार्गणैर्दशभिस्तंतुविव्याधलघुविक्रमः ॥२९॥ त्रिभिर्ध्वजंप्रचिच्छेदसपपात
धरातले ॥ तुरगान्पातयामासचतुर्भिस्तस्यसायकैः ॥३०॥ एकेनछत्रंतस्यापिचकर्तलघुविक्रमः ॥ दशभिःसारथिस्तस्यप्रेषितोयममन्दिरम् ॥३१॥
दशनंदशभिश्छित्त्वाशरैश्चविदलीकृतः ॥ सर्वाङ्गेषुचत्रिंशद्भिर्विव्याधदनुजेश्वरम् ॥ ३२ ॥ हताश्वोविरथोजातोबाणपाणिर्धनुर्धरः ॥ अभ्यधावत्स
वेगेनवर्षयन्निशितैःशरैः ॥ ३३ ॥ खड्गचर्मधरोदैत्योराजानंतमधावत ॥ धावमानस्यहुण्डस्यखड्गंचिच्छेदभूपतिः ॥ ३४ ॥ क्षुरप्रैर्निशितैर्बाणैश्च
र्मचिच्छेदभूपतिः ॥ अथहुण्डःसदुष्टात्मासमालोक्यसमन्ततः ॥ ३५ ॥ जग्राहमुद्गरंतूर्णंमुमोचलघुविक्रमः ॥ वज्रवेगंसमायान्तंददर्शनृपति
स्तदा ॥ ३६ ॥ मुद्गरंस्वनवन्तंचापातयदम्बरात्ततः ॥ दशभिर्निशितैर्बाणैःक्षुरप्रैश्चस्वविक्रमात् ॥ ३७ ॥ मुद्गरंपतितंदृष्ट्वादशखण्डमयंभुवि ॥ गदा
मुद्यम्यवेगेनराजानमभ्यधावत ॥ ३८ ॥ खड्गेनतीक्ष्णधारेणतस्यबाहुंविचिच्छिदे ॥ सगदंपतितंभूमौसाङ्गदंकटकान्वितम् ॥ ३९ ॥ महारावंततः
कृत्वावज्रस्फोटसमंतदा ॥ रुधिरेणापिदिग्धाङ्गोधावमानोमहाहवे ॥ ४० ॥ क्रोधेनमहताविष्टोग्रस्तुमिच्छतिभूपतिम् ॥ दुर्निवार्यःसमायातःपार्श्वं
तस्यचभूपतेः ॥ ४१ ॥ नहुषेणमहाशक्त्याताडितोहृदिदानवः ॥ पतितःसहसाभूमौवज्राहतइवाचलः ॥ ४२ ॥ तस्मिन्दैत्येगतेभूमावितरेदानवाग
ताः ॥ विविशुःकतिदुर्गेषुकतिपातालमाश्रिताः ॥ ४३ ॥ देवाःप्रहर्षमाजग्मुर्गन्धर्वाःसिद्धचारणाः ॥ हतेतस्मिन्महापापेनहुषेणमहात्मना ॥ ४४ ॥
तस्मिन्हतेदैत्यवरेमहाहवेदेवाश्चसर्वेप्रमुदंप्रलेभिरे ॥ तांदेवरूपांतपसाप्रवर्द्धितांसआयुपुत्रःप्रतिलभ्यहर्षितः ॥४५॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनो
पाख्यानेगुरुतीर्थमाहात्म्येच्यवनचरित्रेनहुषाख्यानेपञ्चदशाधिकशततमोऽध्यायः ॥ ११५ ॥ कुञ्जलउवाच ॥ अशोकसुन्दरीपुण्यारम्भयासह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हर्षिता ॥ नहुषंप्राप्यविक्रान्तंतमुवाचतपस्विनी ॥ १ ॥ अहंतेधर्मतःपत्नीदेवैर्दिष्टातपस्विनी ॥ उद्वाहयस्वमांवीरयदिधर्ममिहेच्छसि ॥ २ ॥ सदैवचि
न्त्यमानाचत्वामहंतपसिस्थिता ॥ भवान्धर्मप्रसादेनमयाप्राप्तोनृपोत्तम ॥ ३ ॥ नहुषउवाच ॥ मदर्थेनियताभद्रेयदित्वंतपसिस्थिता ॥ गुरोर्वाक्या
न्मुहूर्तेनतवभर्ताभवाम्यहम् ॥४॥ अनयारम्भयासार्द्धमावांगच्छावभामिनि ॥ समारोप्यरथेतांतुतांरम्भांतुमनोरमाम् ॥ ५ ॥ तेनैवरथवर्येणवसिष्ठ
स्याश्रमंप्रति ॥ जगामलघुवेगेनताभ्यांसहमहायशाः ॥ ६ ॥ तमाश्रमगतंविप्रंसमालोक्यप्रणम्यच ॥ तयासार्द्धमहातेजाहर्षेणमहतान्वितः ॥ ७ ॥
यथायुद्धंरणेजातंनिहतोदानवाधमः ॥ निवेदयामाससर्वंवसिष्ठायमहात्मने ॥ ८ ॥ वसिष्ठोऽपिसमाकर्ण्यनहुषस्यविचेष्टितम् ॥ हर्षेणमहताविष्टआ
शीर्भिरभिनन्द्यतम् ॥ ९ ॥ तिथौलग्नेशुभेप्राप्तेतयोस्तुमुनिपुङ्गवः ॥ विवाहंकारयामासअग्निब्राह्मणसन्निधौ ॥ १० ॥ आशीर्भिरभिनन्द्यैवमिथुनंप्रे
षितंपुनः ॥ मातरंपितरंपश्यद्रुतंगत्वामहामते ॥११॥ त्वांचदृष्ट्वाहितेमातापितासौतवसुव्रत ॥ हर्षेणवृद्धिमाप्नोतुपर्वणीवतुसागरः ॥१२॥ एवंसम्प्रेषि
तोवीरोमुनिनाब्रह्मसूनुना ॥ तेनैवरथवर्येणजगामलघुविक्रमः ॥ १३ ॥ नमस्कृत्यद्विजेन्द्रंतंगतोमातलिनातदा ॥ स्वपुरंपितरंद्रष्टुंतथैवचस्वमातरम् ॥
॥ १४ ॥ अप्सरामेनकानामप्रेषितादैवतैस्ततः ॥ आयोर्भार्यासुदुःखेनपतिताशोकसागरे ॥ १५ ॥ तामुवाचमहाभागांदेवीमिन्दुमतींप्रति ॥ मुञ्चशो
कंमहाभागेतनयंपश्यसत्सुषम् ॥ १६ ॥ निहत्यदानवंपापंतवपुत्रापहारकम् ॥ समायान्तंसभार्यांचवीरश्रियासमन्वितम् ॥ १७ ॥ सुवृत्तंसङ्गरेतस्यन
हुषेणयथाकृतम् ॥ तस्यैनिवेदयामासइन्दुमत्यैचमेनका ॥ १८ ॥ मेनकायावचःश्रुत्वाहर्षेणमहताऽन्विता ॥ सखिसत्यंब्रवीषित्वामित्युवाचसग
द्गदम् ॥ १९ ॥ साम्प्रतंसुप्रियंप्रोक्तंमनःप्रोत्साहकारकम् ॥ जीवादिकंमयादेयंत्वयिसर्वस्वमेवहि ॥ २० ॥ एवमाभाष्यतांदेवीराजानमिदमब्रवीत् ॥
तवपुत्रोमहाबाहुःसमायातोहिसाम्प्रतम् ॥ २१ ॥ आख्यातिचमहाराजएषामेवैवराप्सराः ॥ भर्तारमेवमाभाष्यविररामसुहर्षिता ॥ २२ ॥ समाकर्ण्य
नृपेन्द्रस्तुतामुवाचप्रियांप्रति ॥पुराप्रोक्तंमहाभागेमुनिनानारदेनहि ॥२३॥ पुत्रंप्रतिनकर्तव्यंदुःखंराजंस्त्वयाकदा ॥ तंनिहत्यसुवीर्येणदानवंचैष्यतेसु
तः ॥ २४ ॥ सञ्जातंसत्यमेवंवैमुनिनाभाषितंपुरा ॥ अन्यथावचनंतस्यकथंदेविभविष्यति ॥ २५ ॥ दत्तात्रेयोमुनिश्रेष्ठःसाक्षाद्देवोभविष्यति ॥ शुश्रू
षितस्त्वयादेविमयाचतपसापुरा ॥ २६ ॥ पुत्ररत्नंतेनदत्तंवैष्णवांशप्रधारकम् ॥ सदाहनिष्यतिपरंदानवंपापचेतनम् ॥ २७ ॥ सर्वदैत्यप्रहर्ताचप्रजा
पालोमहाबलः ॥ दत्तात्रेयेणमेदत्तोवैष्णवांशःसुतोत्तमः ॥ २८ ॥ एवंसम्भाष्यतांदेवींराजाचेन्दुमतींतदा ॥ महोत्सवंततश्चक्रेपुत्रस्यागमनंप्रति॥२९॥

CC-0. In Public Domain. Digitization by eGangotri

हर्षेणमहताविष्टो विष्णुंसस्मारवैपुनः ॥ ३० ॥ सर्वोपपन्नंसुरवर्गयुक्तमानन्दरूपंपरमार्थमेकम् ॥ क्लेशापहंसौख्यप्रदंनराणांसद्वैष्णवानामिहमोक्षदंपरम्
॥ ३१ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेगुरुतीर्थमाहात्म्येच्यवनचरित्रेनहुषाख्यानेषोडशाधिकशततमोऽध्यायः ॥ ११६ ॥ कुञ्जलउवा
च ॥ नहुषःप्रिययासार्द्धंतयाचैवसरम्भया ॥ ऐन्द्रेणापिसदिव्येनस्यन्दनेनवरेणच ॥ १ ॥ नागाह्वयंपुरंप्राप्तःसर्वशोभासमन्वितम् ॥ दिव्यैर्मङ्गल
कैर्युक्तंभवनैरुपशोभितम् ॥ २ ॥ हेमतोरणसंयुक्तंपताकाभिरलङ्कृतम् ॥ नानावादित्रनादैश्चबन्दिचारणशोभितम् ॥ ३ ॥ देवरूपोपमैःपुण्यैःपुरु
षैःसमलङ्कृतम्॥ नारीभिर्दिव्यरूपाभिर्गजाश्वैःस्यन्दनैस्तथा ॥४॥ नानामङ्गलशब्दैश्चवेदध्वनिसमाकुलम् ॥ गीतवादित्रशब्दैश्चवीणावेणुस्वनैस्ततः
॥ ५ ॥ सर्वशोभासमाकीर्णंविवेशसपुरोत्तमम् ॥ वेदमङ्गलघोषैश्चब्राह्मणैश्चैवपूजितः ॥ ६ ॥ ददर्शपितरंवीरोमातरंचसुपुण्यकाम् ॥ हर्षेणमहताविष्टः
पितुःपादौननामसः ॥ ७ ॥ अशोकसुन्दरीसातुतयोःपादौपुनःपुनः ॥ ननामभक्त्याभावेनउभयोःसावरानना ॥८॥ रम्भाचसाननामाथप्रीतिंचैवा
प्यदर्शयत् ॥ नमस्कृत्वासमाभाष्यस्वगुरुंनृपनन्दनः ॥ ९ ॥ अनामयंचपप्रच्छमातरंपितरंप्रति ॥ एवमुक्तोमहाभागःसानन्दपुलकोद्गमः ॥ १० ॥
आयुरुवाच ॥ अद्यैवव्याधयोनष्टादुःखशोकावुभौगतौ ॥ भवतोदर्शनात्पुत्रसुतुष्टयाहृष्यतेजगत् ॥ ११ ॥ कृतकृत्योऽस्मिसञ्जातस्त्वयि
जातेमहौजसि ॥ स्ववंशोद्धरणंकृत्वाअहमेवसमुद्धृतः ॥ १२ ॥ इन्दुमत्युवाच ॥ पर्वणिप्राप्यइन्दोस्तुतेजोदृष्ट्वामहोदधिः ॥ वृद्धिंयातिमहाभाग
तथाहंतवदर्शनात्॥१३॥वर्द्धितास्मिसुहृष्टास्मिआनन्देनसमाकुला ॥ दर्शनात्तेमहाप्राज्ञधन्याजातास्मिमानद॥१४॥एवंसम्भाष्यतंपुत्रमालिङ्ग्यतन
योत्तमम् ॥ शिरश्चाघ्रायतस्यापिवत्संधेनुर्यथास्वकम् ॥ १५ ॥ अभिनन्द्यसुतंप्राप्तंनहुषंदेवरूपिणम् ॥ आशीर्भिश्चार्चयद्देवीपुण्याइन्दुमतीतदा
॥ १६ ॥ अथासौमातरंपुण्यांदेवीमिन्दुमतींसुतः ॥ कथयामासवृत्तान्तंयथाहरणमात्मनः ॥ १७ ॥ स्वभार्यायास्तथोत्पत्तिंप्रीतिंचैवमहायशाः ॥
हुण्डेनापियथायुद्धंहुण्डस्यापिनिपातनम् ॥ १८ ॥ समासेनसमस्तंतदाख्यातंस्वयमेवहि ॥ मातापित्रोर्यथावृत्तंतयोरानन्ददायकम् ॥ १९ ॥ माता
पितरावाकर्ण्यपुत्रस्यविक्रमोद्यमम् ॥ हर्षेणमहताविष्टौसञ्जातौपूर्णमानसौ ॥ २० ॥ नहुषोधनुरादायइन्द्रस्यस्यन्दनेनवै ॥ जिगायपृथिवींसर्वांसप्त
द्वीपांसपत्तनाम् ॥ २१ ॥ पित्रेसमर्पयामासवसुपूर्णांवसुन्धराम् ॥ पितरंहर्षयन्नित्यंदानधर्मैःसुकर्मभिः ॥ २२ ॥ पितरंयाजयामासराजसूयादिभिस्त
दा ॥ महायज्ञैश्चदानैश्चव्रतैर्नियमसंयमैः ॥ २३ ॥ सुदानैर्यशसापुण्यैर्यज्ञैःपुण्यमहोदयैः ॥ सुसम्पूर्णौकृतौतौतुपितरौचायुसूनुना ॥ २४ ॥ अथ

१ 'अर्चोपपन्नम्' इ० पा० । २ एवं वक्ष्यमाणप्रकारेणेत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवाःसमागत्यनागाह्वयंपुरोत्तमम् ॥ अभ्यषिञ्चन्महात्मानंनहुषंवीरमर्दनम् ॥ २५ ॥ मुनिभिश्चसुसिद्धैश्चआयुनातेनभूभुजा ॥ अभिषिच्यस्वराज्ये
तंसमेतंशिवकन्यया ॥ २६ ॥ भार्यायुक्तःस्वकायेनआयूराजामहायशाः ॥ दिवंजगामधर्मात्मादेवैःसिद्धैःसुपूजितः ॥ २७ ॥ ऐन्द्रंपदंपरित्यज्यब्रह्म
लोकंगतःपुनः ॥ हरलोकंजगामाथमुनिभिर्देवपूजितः ॥ २८ ॥ स्वकर्मभिर्महाराजःपुत्रस्यापिसुतेजसा ॥ हरेर्लोकंगतःपुण्यैर्निवसत्येषभूपतिः
॥ २९ ॥ पुरुषैःपुण्यकर्माख्यैरीदृशंपुण्यमुत्तमम् ॥ जनितव्यंमहाभागकिमन्यैःशोककारकैः ॥ ३० ॥ यथाजातःसधर्मात्मानहुषःपितृतारकः ॥
कुलस्यधर्त्तासर्वस्यनहुषोज्ञानपण्डितः ॥ ३१ ॥ एतत्तेसर्वमाख्यातंचरित्रंतस्यभूपतेः ॥ अन्यत्किंतेप्रवक्ष्यामिवदपुत्रकपिञ्जल ॥ ३२ ॥ एवंविधं
पुण्यमयंपवित्रंचरित्रमेतद्यशसासमेतम् ॥ आयोःसुतस्यापिशृणोतिमर्त्योभोगान्सभुक्त्वैतिपदंमुरारेः ॥ ३३ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्या
नेगुरुतीर्थमाहात्म्येच्यवनचरित्रेनहुषाख्यानेसप्तदशाधिकशततमोऽध्यायः ॥ ११७ ॥ कपिञ्जलउवाच ॥ गङ्गामुखेपुरातातरोदमानावराङ्गना ॥
नेत्राभ्यामश्रुबिन्दूनिपतन्तिचमहाजले ॥ १ ॥ गङ्गामध्येनिमज्जन्तिभवन्तिकमलानिच ॥ पुष्पाणिदिव्यरूपाणिसौगन्धानिमहान्तिच ॥ २ ॥ तस्यास्ता
तसुनेत्राभ्यांकिमर्थंप्रपतन्तिच ॥ गङ्गोदकेमहाभागनिर्मलाअश्रुबिन्दवः ॥ ३ ॥ अस्थिचर्मावशेषस्तुजटाचीरधरःपुनः ॥ तानिसौगन्ध्ययुक्ता
निपद्मानिविचिनोतिसः ॥ ४ ॥ हेमवर्णानिदिव्यानिनीत्वाशिवंसमर्चयेत् ॥ साकानारीसमाचक्ष्वसवाकोहिमहामते ॥ ५ ॥ अर्चयित्वाशिवं
सोऽथकस्मात्पश्चात्प्रदेवति ॥ एतन्मेसर्वमाचक्ष्वयद्यहंवल्लभस्तव ॥ ६ ॥ कुञ्जलउवाच ॥ शृणुवत्सप्रवक्ष्यामिवृत्तान्तंदेवनिर्मितम् ॥ चरित्रंसर्वपाप
घ्नंविष्णोश्चैवमहात्मनः ॥ ७ ॥ योऽसौहुण्डोमहावीर्योनहुषेणहतोरणे ॥ तस्यपुत्रस्तुविख्यातोविहुण्डस्तपआस्थितः ॥ ८ ॥ निहतंपितरंश्रुत्वासा
मात्यंसपरिच्छदम् ॥ आयुपुत्रेणवीरेणनहुषेणबलीयसा ॥ ९ ॥ तपस्तपतिसक्रोधादेवान्हन्तुंसमुद्यतः ॥ पौरुषंतस्यदुष्टस्यतपसावर्द्धितस्यच ॥ १० ॥
जानन्तिदेवताःसर्वादुःसहंसमराङ्गणे ॥ हुण्डात्मजोविहुण्डस्तुत्रैलोक्यंहन्तुमुद्यतः ॥ ११ ॥ पितुर्वैरंकरिष्यामिहनिष्येमानवान्सुरान् ॥ एवंसमुद्य
तःपापीदेवब्राह्मणकण्टकः ॥ १२ ॥ उपद्रवंसमारेभेप्रजाःपीडयतेचसः ॥ तस्यैवतेजसादग्धादेवाश्चेन्द्रपुरोगमाः ॥ १३ ॥ शरणंदेवदेवस्यजग्मु
र्विष्णोर्महात्मनः ॥ देवदेवंजगन्नाथंशङ्खचक्रगदाधरम् ॥ १४ ॥ ऊचुश्चपाहिनोनित्यंविहुण्डस्यमहाभयात् ॥ १५ ॥ श्रीविष्णुरुवाच ॥ वर्द्धन्तु
देवताःसर्वाःसुसुखेनमहेश्वराः ॥ विहुण्डंनाशयिष्यामिपापिष्ठंदेवकण्टकम् ॥ १६ ॥ एवमाभाष्यतान्देवान्मायांकृत्वाजनार्दनः ॥ स्वयमेवस्थित
स्तत्रनन्दनेसुमहायशाः ॥ १७ ॥ मायामयंचकाराथस्त्रीरूपंचगुणान्वितम् ॥ विष्णुमायामहाभागासर्वविश्वप्रमोहिनी ॥ १८ ॥ चकाररूपमतुलं

विष्णोर्मायाप्रमोहिनी ॥ विहुण्डस्यवधार्थायरूपलावण्यशालिनी ॥ १९ ॥ सदेवानांवधार्थायदिव्यमार्गंजगामह ॥ नन्दनान्तेततोमायामपश्य
द्दितिजेश्वरः ॥ २० ॥ तयाविमोहितोदैत्यःकामबाणकृतान्तरः ॥ आत्मनाशंनजानातिकालरूपांवरस्त्रियम् ॥ २१ ॥ तांदृष्ट्वानवहेमाभांरूपद्रविण
शालिनीम् ॥ लुब्धोविहुण्डःपापात्मातामुवाचवराङ्गनाम् ॥ २२ ॥ कासिकस्यवरारोहेममचित्तप्रमाथिनि ॥ सङ्गमंदेहिमेभद्रेरक्षरक्षवरानने ॥
॥ २३ ॥ सङ्गमात्तवदेवेशियद्यदिच्छसिसाम्प्रतम् ॥ तत्तद्दद्मिमहाभागेदुर्लभंदेवदानवैः ॥ २४ ॥ मायोवाच ॥ मामेवभोक्तुमिच्छाचेद्दा
यंमेदेहिदानव ॥ सप्तकोटिमितैश्चैवपुष्पैःपूजयशङ्करम् ॥ २५ ॥ कामोदसम्भवैर्दिव्यैःसौगन्धैर्देवदुर्लभैः ॥ तेषांपुष्पकृतांमालांममकण्ठेतु
दानव ॥ २६ ॥ आरोपयमहाभागएतद्दायंप्रदेहिमे ॥ तदाहंसुप्रियाभार्याभविष्यामिनसंशयः ॥ २७ ॥ विहुण्डउवाच ॥ एवंदेविकरिष्यामि
वरंदद्मिप्रयाचितम् ॥ वनानियानिपुण्यानिदिव्यानिदितिजेश्वरः ॥ २८ ॥ बभ्राममन्मथाविष्टोनचपश्यतितंद्रुमम् ॥ कामोदकाख्यंपप्रच्छयत्रतत्र
गतःस्वयम् ॥ २९ ॥ कामोदाख्यद्रुमोनास्तिवदन्त्येवंमहाजनाः ॥ पृच्छमानःसदुष्टात्माकामबाणैःप्रपीडितः ॥ ३० ॥ पप्रच्छभार्गवं
गत्वाभक्त्यानमितकन्धरः ॥ कामोदकंद्रुमंब्रूहिकान्तपुष्पसमन्वितम् ॥ ३१ ॥ शुक्रउवाच ॥ कामोदःपादपोनास्तियोषिदेवास्तिदानव ॥ यदा
साहसतेचैवप्रसङ्गेनप्रहर्षिता ॥ ३२ ॥ तद्धासाज्जज्ञिरेदैत्यसुगन्धीनिवराण्यपि ॥ सुमान्येतानिदिव्यानिकामोदायानसंशयः ॥ ३३ ॥ हृद्यानि
पीतपुष्पाणिसौरभेणयुतानिच ॥ तेनाप्येकेनपुष्पेणयःसमर्चतिशङ्करम् ॥ ३४ ॥ तस्येप्सितंमहाकामंसम्पूरयतिशङ्करः ॥ अस्याश्चरोदना
द्दैत्यप्रभवन्तिनसंशयः ॥ ३५ ॥ तादृशान्येवपुष्पाणिलोहितानिमहान्तिच॥ सौरभेणविनादैत्यतेषांस्पर्शंनकारयेत् ॥ ३६ ॥ एवमाकर्णितंतेनवाक्यं
शुक्रस्यभाषितम् ॥ उवाचसातुकुत्रास्तिकामोदाभृगुनन्दन ॥ ३७ ॥ शुक्रउवाच ॥ गङ्गाद्वारेमहापुण्येमहापातकनाशने ॥ कामोदाख्यंपुरंतत्रनिर्मि
तंविश्वकर्मणा ॥ ३८ ॥ कामोदपत्तनेनारीदिव्यभोगैरलङ्कृता ॥ तथाचाभरणैर्भातिसर्वदेवैःसुपूजिता ॥ ३९ ॥ त्वयातत्रैवगन्तव्यंपूजितव्यावरा
प्सराः ॥ उपायेनापिपुण्येनतांप्रहासयदानव ॥ ४० ॥ एवमुक्त्वातुयोगीन्द्रःसशुक्रोदानवंप्रति ॥ विररामहातेजाःस्वकार्यायोद्यतोऽभवत्॥ ४१ ॥
इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेगुरुतीर्थेच्यवनचरित्रेकामोदाख्यानेऽष्टादशाधिकशततमोऽध्यायः ॥ ११८ ॥ कपिञ्जलउवाच ॥ यस्याः ॥ ११३ ॥
प्रहसनात्तातसुहृद्यानिभवन्तिवै ॥ पुष्पाणिदिव्यगन्धीनिदुर्लभानिसुरासुरैः ॥ १ ॥ कस्मात्तुदेवताःसर्वाःप्रवाञ्छन्तिमहामते ॥ शङ्करःसुखमाया

१ 'कस्मात्तु दानवः प्राप वाञ्छितानि महामते' इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

तिहास्यपुष्पैःसुपूजितः ॥ २ ॥ कोगुणस्तस्यपुष्पस्यतन्मेकथयविस्तरात् ॥ कामोदासाभवेत्कातुकस्यपुत्रीवराङ्गना ॥ ३ ॥ हास्यात्तस्यामहाभागस्सुपुष्पाणिभवन्तिच ॥ कोगुणस्तत्कथंब्रूहिसकलंविस्तरेणच ॥ ४ ॥ कुञ्जलउवाच ॥ पुरादेवमहादैत्यैःकृत्वासौहार्दमुत्तमम् ॥ ममन्थुःसागरंक्षीरममृतार्थंसमुद्यताः ॥ ५ ॥ मथनाद्देवदैत्यानांकन्यारत्नचतुष्टयम् ॥ वरुणेनदर्शितंपूर्वंसोमेनैवतथापुनः ॥ ६ ॥ पश्चात्सन्दर्शितंपुण्यममृतंकलशेस्थितम् ॥ कन्याचतुष्टयंपूर्वंदेवानांहितमिच्छति ॥ ७ ॥ सुलक्ष्मीर्नामसाचैकाद्वितीयावारुणीतथा ॥ ज्येष्ठानामतथाख्याताकामोदान्याप्रचक्षते ॥ ८ ॥ तासांमध्येवराश्रेष्ठापूर्वंजातामहामते ॥ तस्मांज्ज्येष्ठेतिविख्यातालोकेपूज्यासदैवहि ॥ ९ ॥ वारुणीपानरूपाचपयःफेनसमुद्भवा ॥ अमृतस्यतरङ्गाच्चकामोदाख्याबभूवह ॥ १० ॥ सोमोराजातथालक्ष्मीर्जज्ञातेअमृतादपि ॥ त्रैलोक्यभूषणःसोमःसञ्जातःशङ्करप्रियः ॥ ११ ॥ मृत्युरोगहराजातासुराणांवारुणीतथा ॥ ज्येष्ठासुपुण्यदाजातालोकानांहितमिच्छताम् ॥ १२ ॥ अमृतादुत्थितादेवीकामोदानामपुण्यदा ॥ विष्णोःप्रीत्यैभविष्येतुवृक्षरूपंप्रयास्यति ॥ १३ ॥ विष्णुप्रीतिकरीसातुभविष्यतिसदैवहि ॥ तुलसीनामसापुण्याभविष्यतिनसंशयः ॥ १४ ॥ तयासहजगन्नाथोरंस्यतिनसंशयः ॥ तुलस्याःपत्रमेकंयोनीत्वाकृष्णायदास्यति ॥ १५ ॥ मेनेतस्योपकाराणांकिमस्मैचददाम्यहम् ॥ इत्येवंचिन्तयेन्नित्यंतस्यप्रीतिकरोभवेत् ॥ १६ ॥ एवंकामोदनामासौपूर्वंजातासमुद्रजा ॥ यदासाहसतेदेवीहर्षगद्गदभाषिणी ॥ १७ ॥ सौहृद्यानिसुगन्धीनिमुखात्तस्याःपतन्तिवै ॥ अम्लानानिसुपुष्पाणियोगृह्णातिसमुद्यतः ॥१८॥ पूजयेच्छङ्करंदेवंब्रह्माणंमाधवंतथा ॥ तस्यदेवाःप्रतुष्यन्तियदिच्छतिददन्तितत् ॥ १९ ॥ रोदित्येपायदासाचकेनदुःखेनदुःखिता ॥ नेत्राश्रुभ्योहितस्यास्तुप्रभवन्तिपतन्तिच ॥ २० ॥ तानिचैवमहाभागहृद्यानिसुमहान्तिच ॥ सौरभेणविनातैस्तुयःपूजयतिशङ्करम् ॥ २१ ॥ तस्यदुःखंचसन्तापोजायतेनात्रसंशयः ॥ पुष्पैस्तुतादृशैर्देवान्सकृदर्चतिपापधीः ॥ २२॥ तस्यदुःखंप्रकुर्वन्तिदेवास्तत्रनसंशयः ॥ एतत्तेसर्वमाख्यातंकामोदाख्यानमुत्तमम् ॥ २३ ॥ अथकृष्णोविचिन्त्यैवदृष्ट्वाविक्रमसाहसम् ॥ विहुण्डस्यापिपापस्यउद्यमंसाहसंतदा ॥ २४ ॥ नारदंप्रेषयामाससमोहयैनंदुरासदम् ॥ नारदस्त्वथसंश्रुत्यवाक्यंविष्णोर्महात्मनः ॥ २५ ॥ गच्छमानंदुरात्मानंकामोदांप्रतिदानवम् ॥ गत्वातमाहदैत्येन्द्रंनारदःप्रहसन्निव ॥ २६ ॥ क्वयासित्वंचदैत्येन्द्रसत्वरंचसमातुरः॥ साम्प्रतंकेनकार्येणकस्यार्थंकेननोदितः ॥ २७ ॥ ब्रह्मात्मजंनमस्कृत्यप्रत्युवाचकृताञ्जलिः ॥ कामोदपुष्पार्थमहंप्रस्थितोद्विजसत्तम ॥ २८ ॥ तमुवाचसधर्मात्मापुष्पैःकिंतेप्रयोजनम् ॥

१ ‘ तुलसीति समाख्याता ’ इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

विप्रवर्यंपुनःप्राहकार्यकारणमात्मनः ॥ २९ ॥ नन्दनस्यवनोद्देशेकाचिन्नारीवरानना ॥ तस्यादर्शनमात्रेणगतोऽहंकामवश्यताम् ॥ ३० ॥ तयाप्रो
क्तोऽस्मिविप्रेन्द्रपुष्पैःकामोदसम्भवैः ॥ पूजयस्वमहादेवंपुष्पैस्तुसप्तकोटिभिः ॥ ३१ ॥ ततस्तेसुप्रियाभार्याभविष्यामिनसंशयः ॥ तदर्थेप्रस्थितो
ऽस्म्यद्यकामोदाख्यंपुरंप्रति ॥ ३२ ॥ तामहंकामयिष्यामिसिन्धुजांशृणुसाम्प्रतम् ॥ मनोल्हासैर्महाहासैर्हासयिष्याम्यहंपुनः ॥ ३३ ॥ प्रीतासती
महाभागाहसिष्यतिपुनःपुनः ॥ तद्धास्यंगद्गदंविप्रममकार्यप्रवर्द्धनम् ॥३४॥ तस्माद्धास्यात्पतिष्यन्तिदिव्यानिकुसुमानिच ॥ तैस्तुदेवमुमाकान्तंपू
जयिष्यामिसाम्प्रतम् ॥ ३५ ॥ तेनपूजाप्रदानेनतुष्टोदास्यतिमेफलम् ॥ ईश्वरःसर्वभूतेशःशङ्करोलोकभावनः ॥ ३६ ॥ नारदउवाच ॥ तत्रदैत्य
नगन्तव्यंकामोदाख्येपुरोत्तमे ॥ विष्णुरस्तिसुमेधावीसर्वदैत्यक्षयावहः ॥ ३७ ॥ येनोपायेनपुष्पाणिकामोदाख्यानिदानवः ॥ तवहस्तेप्रयास्य
न्तितमुपायंवदाम्यहम् ॥३८॥ गङ्गातोयेषुदिव्यानिपतिष्यन्तिनसंशयः ॥ वाहितानिजलैर्दिव्यैरागमिष्यन्तिसाम्प्रतम् ॥ ३९ ॥ तानित्वंतुप्रतिगृह्य
णसुहृद्यानिमहान्तिच ॥ गृहीत्वातानिपुष्पाणिसाधयस्वमनीषितम् ॥ ४० ॥ नारदोदानवश्रेष्ठंमोहयित्वाततःपुनः ॥ ततश्चसतुधर्मात्माचिन्तया
मासवैपुनः ॥ ४१ ॥ कथमश्रूणिसामुञ्चेत्केनोपायेनदुःखिता ॥ चिन्तमानस्यतस्यैवंक्षणंवैनारदस्यच ॥ ४२ ॥ ततोबुद्धिःसमुत्पन्नाकामोदाख्यं
पुरंगतः ॥ ४३ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेगुरुतीर्थेच्यवनचरित्रेकामोदाख्यानेएकोनविंशत्यधिकशततमोऽध्यायः ॥ ११९ ॥
कुञ्जलउवाच ॥ कामोदाख्यंपुरंदिव्यंसर्वदेवसमाकुलम् ॥ सर्वकामसमृद्ध्यर्थमपश्यन्नारदस्ततः ॥ १ ॥ कामोदायागृहंप्राप्यप्रविवेशद्विजो
त्तमः ॥ कामोदांतुततोदृष्ट्वासर्वकामसमाकुलाम् ॥ २ ॥ तयासम्पूजितोविप्रःसुवाक्यैःस्वागतादिभिः ॥ दिव्यासनेसमारूढस्तांपप्रच्छद्विजो
त्तमः ॥ ३ ॥ सुखेनस्थीयतेभद्रेविष्णुतेजःसमुद्भवे ॥ अनामयंचपप्रच्छआशीर्भिरभिनन्द्यताम् ॥ ४ ॥ कामोदोवाच ॥ प्रसादाद्भवतांविष्णोःसु
खेनवर्तयाम्यहम् ॥ कथयस्वमहाप्राज्ञत्वंप्रश्नोत्तरकारणम् ॥ ५ ॥ महामोहःसमुत्पन्नोममाङ्गेमुनिपुङ्गव ॥ व्यापकःसर्वलोकानांममाङ्गेमतिनाशकः
॥ ६ ॥ तस्मान्निद्रासमुत्पन्नायथामर्त्येषुवर्तते ॥ सुप्तयातुमयादृष्टःस्वप्नोवैदारुणोमुने ॥ ७ ॥ केनाप्युक्तंसमेत्यैवपुरतोद्विजसत्तम ॥ अव्यक्तोऽसौ
हृषीकेशःसंसारंसगमिष्यति ॥ ८ ॥ तदाप्रभृतिदुःखेनव्यापिताहंमहामते ॥ तन्मेत्वंकारणंब्रूहिभवाञ्ज्ञानवतांवरः ॥ ९ ॥ नारदउवाच ॥ वातिकः
पैत्तिकश्चैवकफजःसान्निपातिकः ॥ स्वप्नःप्रवर्ततेभद्रेमानवेषुनसंशयः ॥ १० ॥ नजायतेचदेवेषुस्वप्नोनिद्राचसुन्दरि ॥ आदित्योदयवेलायांदृश्यते

१ 'तामहं मानयिष्यामि' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्वप्नउत्तमः ॥ ११ ॥ सत्स्वप्नोमानवानांहिपुण्यस्यफलदायकः ॥ अन्यदेवप्रवक्ष्यामिस्वप्नस्यकारणंशुभे ॥ १२ ॥ महावातान्दोलनैश्चचलन्त्यापो
वरानने ॥ त्रुटन्त्यम्बुकणाःसूक्ष्मास्तस्मादुदकसञ्चयात् ॥ १३ ॥ बहिरेवपतन्त्येतेनिर्मलाम्बुकणाःशुभे ॥ पुनर्लयंप्रयान्त्येतेदृश्यादृश्याभवन्तिवै
॥ १४ ॥ तद्वत्स्वप्नस्यवैभावःकथ्यतेशृणुभामिनि ॥ आत्माशुद्धोविरक्तस्तुरागद्वेषविवर्जितः ॥ १५ ॥ पञ्चभूतात्मकानांचसुषित्वैवसुनिश्चलः ॥
षड्विंशतिसुतत्त्वानांमध्येचैषविराजते ॥ १६ ॥ शुद्धात्माकेवलोनित्यःप्रकृतेःसङ्गतिंगतः ॥ तद्भावैर्वायुरूपैश्चचलतेस्थानतोयदा ॥ १७ ॥ आत्मन
स्तेजसश्चैवप्रतितेजःप्रजायते ॥ अन्तरात्माशुभं[1]नामतस्यएवप्रकथ्यते ॥१८॥ पयसश्चयथाभिन्नाभवन्त्यम्बुकणाःशुभे ॥ आत्मनस्तुतथातेजअन्त
रात्माप्रकथ्यते ॥ १९ ॥ सहिपृथ्वीसवैवायुःसचाप्याकाशएवहि ॥ सवैतोयंसदीप्यतएतेपञ्चपुराकृताः ॥ २० ॥ आत्मनस्तेजसोभूतामलरूपामहा
त्मनः ॥ तस्यापिसङ्गतिंप्राप्ताएकत्वंहिप्रयान्तिते ॥२१॥ स्वात्मभावप्रदोषेणनाशयन्तिवरानने ॥ तत्पिण्डमन्यमिच्छन्तिवारंवारंवरानने ॥ २२ ॥
तेषांक्रीडाविहारोऽयंसृष्टिसम्बन्धकारणम् ॥ उदकस्यतरङ्गस्तुजायतेचविलीयते ॥ २३ ॥ पुनर्भूतिःपुनर्हानिस्तादृशस्यपुनःपुनः ॥ अपांरूपस्यदृ
ष्टान्तंतद्वदेषांनसंशयः ॥ २४ ॥ आत्माननश्यतेदेवितेजोवायुर्ननश्यति ॥ ननश्यतोधराकाशौननश्यन्त्यापएवच ॥ २५ ॥ पञ्चैवआत्मनासार्द्धं
प्रभवन्तिप्रयान्तिच ॥ आत्मादयो[2]ह्यमीभद्रेनित्यरूपानसंशयः ॥ २६ ॥ पिण्डएवप्रणश्येततेषांसं[3]ज्ञातएवच ॥ विषयाणांसुदोषैःसरागद्वेषादिभि
र्हतः ॥ २७ ॥ प्राणाः[4]प्रयान्तिवैपिण्डात्पञ्चपञ्चात्मकाद्विज ॥ पिण्डान्तेवसतेआत्माप्रतिरूपस्तुतस्यच ॥२८॥ अन्तरात्मायथाचाग्नेःस्फुलिङ्गस्तु
प्रकाशते ॥ तथाप्रकाशमायातिदृश्यादृश्यःप्रजायते ॥ २९ ॥ शुद्धात्माचपरंब्रह्मसदाजागर्तिनित्यशः ॥ अन्तरात्माप्रबद्धस्तुप्रकृतेश्चमहागुणैः ॥
॥ ३० ॥ अन्नाहारेणसम्पुष्टैरन्तरात्मासुखंव्रजेत् ॥ सुसुखाज्जायतेमोहस्तस्मान्मनःप्रमुह्यति ॥ ३१ ॥ पश्चात्सञ्जायतेनिद्रातामसीलयवर्द्धिनी ॥
नाडीमार्गेणयःसूर्योमेरुमुल्लङ्घ्यगच्छति ॥ ३२ ॥ तदारात्रिःप्रजायेतयावन्नोदयतेरविः ॥ विषयान्धकारैर्मुक्तस्तुअन्तरात्माप्रकाशते ॥ ३३ ॥
भावैस्तत्त्वात्मकानांतुपञ्चतत्त्वैःप्रपोषितैः ॥ पूर्वजन्मस्थितैःपिण्डैरन्तरात्माप्रगृह्यते ॥ ३४ ॥ सयास्यतिचवैस्थानमुच्चावचंमहामते ॥ संसारअन्त
रात्मावैदोषैर्बद्धःप्रणीयते ॥ ३५ ॥ कायंरक्षतिजीवात्मापश्चात्तिष्ठतिमध्यगः ॥ उदानःस्फुरतेतीव्रस्तस्माच्छब्दःप्रजायते ॥ ३६ ॥ शुष्काभस्त्रायथा
श्वासंकुरुतेवायुपूरिता ॥ तद्वच्छब्दवशाच्छ्वासमुदानःकुरुतेबलात् ॥ ३७ ॥ आत्मनस्तुप्रभावेणउदानोबलवान्भवेत् ॥ एवंकायःप्रमुग्धस्तुमृतक

१ 'द्युमन्नाम' इ० पा० । २ 'अस्मदादयः' इ० पा० । ३ 'सङ्घात एव च' इ० पा० । ४ 'प्रणाशं यान्ति वै दोषा न च पञ्चात्मका द्विज ।' इ० पा० । ५ 'शशी' इ० पा० ।

लपःप्रजायते ॥ ३८ ॥ ततोनिद्रामहामायातस्याङ्गेषुप्रयातिसा ॥ हृदिकण्ठेतथाचास्येनासिकाग्रेप्रतिष्ठति ॥ ३९ ॥ बाहूसङ्कुच्यसन्तिष्ठेद्धृतोना
भिमण्डले ॥ आत्मनस्तुप्रभावाच्चउदानोनाममारुतः ॥ ४० ॥ प्रजायतेमहातीव्रोबलरोधंकरोतिसः ॥ यथारज्ज्वाप्रबद्धस्तुदारुकीलधरःस्थितः ॥
॥ ४१ ॥ तथाचात्मसुसंलग्नःप्राणवायुर्नसंशयः ॥ अन्तरात्मप्रसक्तस्तुप्राणवायुःशुभानने ॥ ४२ ॥ बुद्धिवद्रोहितोभद्रेअन्तरात्माप्रधावति ॥ पू
र्वजन्मार्जितान्वासान्स्मृत्वातत्रप्रधावति ॥ ४३ ॥ तत्रसंस्थोमहाप्राज्ञःस्वेच्छयारमतेपुनः ॥ एवंनानाविधान्स्वप्नानन्तरात्माप्रपश्यति ॥ ४४ ॥
उत्तमांश्चविरुद्धांश्चकर्मयुक्तान्प्रपश्यति ॥ गिरींस्तथासुदुर्गांश्चउच्चावचान्प्रपश्यति ॥ ४५ ॥ तदेववातिकंविद्धिकफवत्तद्वदाम्यहम् ॥ जलंनदींतडागं
चपयःस्थानानिपश्यति ॥ ४६ ॥ अग्निंचपश्यतेदेविबहुकाञ्चनमुत्तमम् ॥ तदेवपैत्तिकंविद्धिभाव्यंचैववदाम्यहम् ॥ ४७ ॥ प्रभातेदृश्यतेस्वप्नोभ
व्योवाऽभव्यएवच ॥ कर्मयुक्तोवरारोहेलाभालाभप्रकाशकः ॥ ४८ ॥ स्वप्नस्यापिअवस्थातेकथितावरर्णिनि ॥ तद्भाव्यंचवरारोहेविष्णोश्चैवभवि
ष्यति ॥ ४९ ॥ तन्निमित्तंत्वयादृष्टोदुःस्वप्नःसतुप्रेक्षितः ॥ ५० ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेगुरुतीर्थेच्यवनचरित्रेकामोदाख्याने
विंशाधिकशततमोऽध्यायः ॥ १२० ॥ कामोदोवाच ॥ नविदुर्देवताःसर्वायस्यान्तंरूपमेवच ॥ यस्मिँल्लीनस्तुसर्वोऽयंसचैकात्माप्रकथ्यते ॥ १ ॥
यस्यमायाप्रपञ्चस्तुसंसारःशृणुनारद ॥ कस्मात्प्रयातिसंसारंममस्वामीजगत्पतिः ॥ २ ॥ पापैश्चापिसुपुण्यैश्चनरोबद्धस्तुकर्मभिः ॥ संसारंसरते
विप्रहरिःकस्माद्व्रजेद्वद ॥ ३ ॥ नारदउवाच ॥ शृणुदेविप्रवक्ष्यामियत्कृतंतेनचक्रिणा ॥ भृगोरग्रेप्रतिज्ञातंयज्ञरक्षांकरोम्यहम् ॥ ४ ॥ इन्द्रस्यव
चनात्सद्योगतोऽसौदानवैःसह ॥ योद्धुंविहायगोविन्दोभृगोश्चैवमखोत्तमम् ॥ ५ ॥ मखंत्यक्त्वागतेदेवेपश्चात्तैर्दानवोत्तमैः ॥ आगत्यध्वंसितःसर्वः
सयज्ञःपापचेतनैः ॥ ६ ॥ हरिंक्रुद्धःसयोगीन्द्रःशशापभृगुरेवतम् ॥ दशजन्मानिभुङ्क्ष्वत्वंमच्छापकलुषीकृतः ॥ ७ ॥ कर्मणःस्वस्यसम्भो
गंसम्भोक्ष्यतिजनार्दनः ॥ तन्निमित्तंत्वयादेविदुःस्वप्नःपरिवीक्षितः ॥ ८ ॥ इत्युक्त्वातांगतोविप्रोब्रह्मलोकंसनारदः ॥ कृष्णस्यापिसुदुःखेनदुःखि
तासाभवत्तदा ॥ ९ ॥ रुरोदकरुणंबालाहाहेतिवदतीमुहुः ॥ गङ्गातीरोपविष्टासाजलान्तेशृणुनन्दन ॥१०॥ सुनेत्राभ्यांतथाश्रूणिदुःखेनापिप्रमुञ्चति॥
तान्यश्रूणिप्रमुक्तानिगङ्गातोयेपतन्त्यपि ॥ ११ ॥ जलेचैवनिमज्जन्तितस्याश्चाप्यश्रुबिन्दवः ॥ सम्भवन्तिपुनस्तातपद्मरूपाणितानिच ॥ १२ ॥
गङ्गातोयेप्रफुल्लानिवाहितानिप्रयान्तिवै ॥ ददर्शदानवश्रेष्ठोविष्णुमायाप्रमोहितः ॥ १३ ॥ दुःखजानिनजानातिमुनिनाकथितान्यपि ॥ हर्षेणमहता
विष्टःपरिजग्राहसोऽसुरः ॥ १४ ॥ पद्मैस्तुपुष्पितैःसोऽपिपूजयेद्गिरिजाप्रियम् ॥ सप्तकोटिभिर्दैत्येन्द्रोविष्णुमायाप्रमोहितः ॥ १६ ॥ अथक्रुद्धाज

CC-0. In Public Domain. Digitization by eGangotri

गद्धात्रीशङ्करंवाक्यमब्रवीत् ॥ पश्यैतस्यविकर्मत्वंदानवस्यमहामते ॥ १६ ॥ शोकोत्पन्नैःप्रफुल्लैश्चभवन्तंपरिपूजयेत् ॥ प्राप्यतेदुःखसंतापंसुदंप्रा
प्तुंनचार्हति ॥ १७ ॥ ईश्वरउवाच ॥ सत्यमुक्तंत्वयाभद्रेअनेनपापकारिणा ॥ सत्योद्यमःपरित्यक्तःकामोदार्थःकृतःपुरा ॥ १८ ॥ शोकोत्पन्नानि
पद्मानिगङ्गातोयगतानिवै ॥ अयमेषप्रगृह्णातिकामाकुलितचेतनः ॥ १९ ॥ पूजयेच्चापिदुष्टात्माशोकसन्तापकारकैः ॥ दुःखजैःशोकजैःपुष्पैस्तैःसु
श्रेयःकथंभवेत् ॥ २० ॥ यादृशेनापिभावेनमामेवपरिपूजयेत् ॥ तादृशेनापिभावेनअस्यसिद्धिर्भविष्यति ॥ २१ ॥ सत्यध्यानविहीनोऽयंकामोदा
न्यस्तमानसः ॥ सञ्जातःपापचारित्रोजहिदेविस्वतेजसा ॥ २२ ॥ एवमाकर्ण्यतद्वाक्यंशम्भोश्चैवमहात्मनः ॥ अस्यैवसंक्षयंशम्भोकरिष्येतवशास
नात् ॥ २३ ॥ एवमुक्त्वाततोदेवीतस्यापिवधकाङ्क्षया ॥ वर्त्ततेहिविहुण्डस्यवधोपायंव्यचिन्तयत् ॥२४॥ कृत्वामायामयंरूपंब्राह्मणस्यमहात्मनः ॥
पूजयेच्छङ्करंनाथंसुपुष्पैःपारिजातजैः ॥ २५ ॥ समेत्यदानवःपापोदिव्यांपूजांविनाशयेत् ॥ कामाकुलःसुदुःखार्तस्तद्गतोभावतत्परः ॥ २६ ॥ वि
ष्णोश्चैवमहामायांपूर्वदृष्टांसदानवः ॥ सस्मारदानवःपापःकामबाणैःप्रपीडितः ॥ २७ ॥ तस्याःस्मरणमात्रेणकन्दर्पेणबलीयसा ॥ विरहाकुलदुःखा
र्तोरोदतेहिमुहुर्मुहुः ॥ २८ ॥ कालाकृष्टःसदुष्टात्माशोकजातानितानिसः ॥ परिगृह्यसमायातःपूजनार्थीमहेश्वरम् ॥ २९ ॥ देव्याकृतांहिपूजांच
सुपुष्पैःपारिजातजैः ॥ तांनिर्णाश्यसुलोभेनशोकजैःपरिपूजयेत् ॥ ३० ॥ नेत्राभ्यांतस्यदुष्टस्यबिन्दवस्तेऽश्रुसम्भवाः ॥ अविरलास्ततो
वत्सपतन्तिलिङ्गमस्तके ॥ ३१ ॥ देवीब्राह्मणरूपेणतमुवाचमहामते ॥ कोभवान्पूजयेद्देवंशोकाकुलमनाःसदा ॥ ३२ ॥ पतन्त्यश्रूणिदे
वस्यमस्तकेशोकजानिते ॥ अपवित्राणिमेब्रूहिएतमर्थंममाग्रतः ॥ ३३ ॥ विहुण्डउवाच ॥ पूर्वंदृष्टामयानारीसर्वसौभाग्यसम्पदा ॥ सर्वल
क्षणसम्पन्नाकामस्यायतनंमहत् ॥ ३४ ॥ तस्यामोहेनसन्दग्धःकामेनाकुलतांगतः ॥ तयाप्रोक्तंहिसम्भोगेदेहिमेदायमुत्तमम् ॥ ३५ ॥ का
मोदसम्भवैःपुष्पैःपूजयस्वमहेश्वरम् ॥ तेषांपुष्पकृतांमालांममकण्ठेपरिक्षिप ॥ ३६ ॥ कोटिभिःसप्तसङ्ख्यातैःपूजयस्वमहेश्वरम् ॥ तदर्थंपूजयाम्ये
वईश्वरंफलदायकम् ॥ ३७ ॥कामोदसम्भवैःपुष्पैर्दुर्लभैर्देवदानवैः ॥३८ ॥श्रीदेव्युवाच॥ कतेभावःकतेध्यानंकतेज्ञानंदुरात्मनः ॥ईश्वरस्यापिसम्ब
न्धोनास्तिकिंचित्त्वयैवहि ॥ ३९ ॥ कामोदायावरंरूपंकीदृशंवदसाम्प्रतम् ॥ कलब्धानिसुपुष्पाणितस्याहास्योद्भवानिच ॥ ४० ॥ विहुण्ड
उवाच ॥ भावंध्यानंनजानामिनदृष्टासामयाकदा ॥ गङ्गातोयगतान्येवपरिगृह्णामिनित्यशः ॥ ४१ ॥ तैरहंपूजयाम्येकंशङ्करंप्रवदाम्यहम् ॥ म
माग्रेकथितंविप्रशुक्रेणापिमहात्मना ॥ ४२ ॥ वचनात्तस्यदेवेशमर्चयामिदिनेदिने ॥ एतत्तेसर्वमाख्यातंयच्चपृष्टोऽस्मिसाम्प्रतम् ॥ ४३ ॥ श्रीदे

CC-0. In Public Domain. Digitization by eGangotri

व्युवाच ॥ कामोदारोदनाज्जातैःपुष्पैस्तैर्दुःखसम्भवैः ॥ लिङ्गमर्चयसेदुष्टप्रभातेनित्यमेवच ॥ ४४ ॥ यादृशेनापिभावेनपुष्पैश्चयादृशैस्त्वया ॥
अर्चितोदेवदेवेशस्तादृशंफलमाप्नुहि ॥ ४५ ॥ दिव्यपूजांविनाश्यैवंशोकपुष्पैःप्रपूजसि ॥ असौदोषस्तवैवाद्यसमुत्पन्नःसुदारुणः ॥ ४६ ॥ तस्माद्द
ण्डंप्रदास्यामिभुङ्क्ष्वस्वकर्मजंफलम् ॥ तस्यावाक्यंसमाकर्ण्यकालकृष्टोबभाषताम् ॥४७॥ रेरेदुष्टदुराचारममकर्मप्रदूषक ॥ हन्मित्वामिहखड्गेनअ
नेनापिनसंशयः ॥४८॥ इत्युक्त्वाब्राह्मणंतंसनिशितंखड्गमाददे ॥ हन्तुकामःसदुष्टात्माअभ्यधावतदानवः ॥४९॥ सादेवीविप्ररूपेणसङ्क्रुद्धापरमे
श्वरी ॥ स्वस्थानमागतंदृष्ट्वाहुङ्कारंविससर्जह ॥५०॥ तेनहुङ्कारनादेनपतितोदानवाधमः ॥ निश्चेष्टःकामरूपेणवज्राहतइवाचलः ॥५१॥ पतितेदानवे
तस्मिन्सर्वलोकविनाशके ॥ लोकाःस्वास्थ्यंगताःसर्वेदुःखतापविवर्जिताः ॥ ५२ ॥ एतस्मात्कारणाद्वत्ससास्त्रीवैपरिदेवति ॥ गङ्गातीरेवरारोहादुःख
व्याकुलमानसा ॥ ५३ ॥ एतत्तेसर्वमाख्यातंयत्त्वयापरिपृच्छितम् ॥ ५४ ॥ विष्णुरुवाच ॥ एवमुक्त्वासुपुत्रंतंकुञ्जलअण्डजेश्वरः॥ विररामसहाप्रा
ज्ञःकिञ्चिन्नोवाचभूपते॥५५॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेगुरुतीर्थमाहात्म्येच्यवनचरित्रेकामोदाख्यानेएकविंशत्यधिकशततमोऽध्यायः
॥ १२१ ॥ विष्णुरुवाच ॥ कुञ्जलोधर्मपक्षीसइत्युक्त्वातान्सुतान्प्रति ॥ विररामसहाप्राज्ञःकिंचिन्नोवाचतान्प्रति ॥१॥ वटाधःस्थोद्विजश्रेष्ठस्तमुवाच
महाशुकम् ॥ कोभवान्धर्मवक्ताहिपक्षिरूपेणवर्तते ॥ २ ॥ किंवादेवोऽथगन्धर्वःकिंवाविद्याधरोभवान् ॥ कस्यशापादिमांप्राप्तोयोनिंकीरस्यपातकीम्
॥ ३ ॥ कस्मात्तेईदृशंज्ञानंवर्ततेऽतीन्द्रियंशुक ॥ सुपुण्यस्यतुकस्यापिकस्यवैतपसःफलम्॥४॥किंवाच्छन्नेनरूपेणअनेनापिमहामते॥कस्त्वंसिद्धोऽसि
देवोवातन्मेकथयकारणम् ॥५॥ कुञ्जलउवाच॥भोःसिद्धत्वामहंजानेकुलंतेगोत्रमुत्तमम् ॥ विद्यांतपःप्रभावंचयस्माद्भ्रमसिमेदिनीम् ॥६॥ सर्वंविप्रप्रव
क्ष्यामिस्वागतंतवसुव्रत ॥ उपविश्यासनेपुण्येछायामाश्रयशीतलाम् ॥ ७ ॥ अव्यक्तप्रभवोब्रह्मातस्माज्जज्ञेप्रजापतिः॥ब्राह्मणस्तुगुणैर्युक्तोभृगुर्ब्रह्मसमो
द्विजः ॥ ८ ॥ भार्गवोनामतस्यासीत्सर्वधर्मार्थतत्त्ववित् ॥ तस्यान्वयेभवान्विप्रच्यवनःख्यातिमान्भुवि ॥ ९ ॥ नाहंदेवोनगन्धर्वोनाहंविद्याधरःपु
नः ॥ योऽहंविप्रप्रवक्ष्यामितन्मेनिगदतःशृणु ॥ १० ॥ कश्यपस्यकुलेजातःकश्चिद्ब्राह्मणसत्तमः॥वेदवेदाङ्गतत्त्वज्ञःसर्वकर्मप्रकाशकः॥ ११॥विद्याध
रेतिविख्यातःकुलशीलगुणैर्युतः ॥ राजमानःश्रियाविप्रआचारैस्तपसातदा ॥ १२ ॥ सम्बभूवुःसुतास्तस्यविद्याधरस्यतेत्रयः॥वसुशर्मानामशर्माधर्म
शर्माचतेत्रयः ॥ १३ ॥ तेषामहंधर्मशर्माकनिष्ठोगुणवर्जितः ॥ वसुशर्माममभ्रातावेदशास्त्रार्थकोविदः॥१४॥आचारेणसुसम्पन्नोविद्यादिसुगुणैःपुनः ॥
नामशर्मामहाप्राज्ञस्तद्वच्चासीद्गुणाधिकः ॥ १५ ॥ अहमेकोमहामूर्खःसञ्जातःशृणुसत्तम ॥ विद्यानामुत्तमंविप्रभावमर्थंशुभंकदा ॥ १६ ॥ नशृणो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मिनवैयामिगुरुगेहमनुत्तमम् ॥ ततस्तुजनकोमेतुमामेवंपरिचिन्तयेत् ॥ १७ ॥ धर्मशर्मेतिपुत्रस्यनामास्यतुनिरर्थकम् ॥ सञ्जातःक्षितिमध्येतुनवि
द्वान्मेगुणाकरः ॥ १८ ॥ इतिसञ्चिन्त्यधर्मात्मामामुवाचसुदुःखितः ॥ व्रजपुत्रगुरोर्गेहंविद्यार्थंपरिसाधय ॥ १९ ॥ एवमाकर्ण्यतत्तस्यपितुर्वाक्यं
मयाशुभम् ॥ नाहंतातगमिष्यामिगुरोर्गेहंसुदुःखदम् ॥ २० ॥ यत्रवैताडनंनित्यंभ्रूभङ्गादिचक्रोशनम् ॥ अन्नंनदृश्यतेतत्रकर्मणाशृणुसत्तम ॥ २१ ॥
दिवारात्रौननिद्रास्तिनास्तिसुखस्यसाधनम् ॥ तस्माद्दुःखमयंतातनयास्येगुरुमन्दिरम् ॥ २२ ॥ विद्याकार्यंकरिष्येनक्रीडार्थमहमुत्सुकः ॥
भोक्ष्येस्वप्स्येप्रसादात्तेकरिष्येक्रीडनंपितः ॥ २३ ॥ डिम्भैःसार्द्धंसुखेनापिदिवारात्रमतन्द्रितः ॥ मामुवाचसधर्मात्मामूढंज्ञात्वासुदुःखितः ॥ २४ ॥
मापुत्रसाहसंकार्षीर्विद्यार्थमुद्यमंकुरु ॥ विद्ययाप्राप्यतेसौख्यंयशःकीर्तिस्तथातुला ॥ २५ ॥ ज्ञानंस्वर्गश्चमोक्षश्चतस्माद्विद्यांप्रसाधय ॥ पूर्वंसुदुःख
मूलातुपश्चाद्विद्यासुखप्रदा ॥ २६ ॥ तस्मात्साधयपुत्रत्वंविद्यांगुरुगृहंव्रज ॥ पितुर्वाक्यमकुर्वाणअहमेवंदिनेदिने ॥ २७ ॥ यत्रयत्रस्थितोनि
त्यमर्थहानिंकरोम्यहम् ॥ उपहासःकृतोलोकैर्ममविप्रप्रकुत्सनम् ॥ २८ ॥ ममलज्जासमुत्पन्नाजीवनाशकरीतदा ॥ विद्यार्थमुद्यतोविप्रकंगुरुंप्रार्थ
याम्यहम् ॥ २९ ॥ इतिचिन्तापरोजातोदुःखशोकसमाकुलः ॥ कथंविद्यामहंजानेकथंविन्दाम्यहंगुणान् ॥ ३० ॥ कथंमेजायतेस्वर्गःकथंमोक्षं
व्रजाम्यहम् ॥ इत्येवंचिन्तयन्विप्रवार्द्धक्यमगमंपुनः ॥ ३१ ॥ देवतायतनेदुःखीउपविष्टस्त्वहंकदा ॥ मद्भाग्यैःप्रेरितःकश्चित्सिद्धएकःसमागतः
॥ ३२ ॥ निराश्रयोजिताहारःसदानन्दस्तुनिःस्पृहः ॥ एकान्तमास्थितोविप्रयोगयुक्तोजितेन्द्रियः ॥ ३३ ॥ परब्रह्मणिसंलीनोज्ञानध्यानसमाधि
मान् ॥ तमहंसंश्रितोविप्रज्ञानरूपंमहामतिम् ॥ ३४ ॥ अहंशुद्धेनभावेनभक्त्यानमितकन्धरः ॥ नमस्कृत्यमहात्मानंपुरतस्तस्यसंस्थितः ॥ ३५ ॥
दीनरूपोह्यहंजातोमन्दभाग्यस्तथापुनः ॥ तेनाहंपृच्छितोविप्रकस्माद्भवान्प्रशोचति ॥ ३६ ॥ केनाभिप्रायभावेनदुःखमेवभुनक्तिवै ॥ तेनेत्युक्तो
ऽस्मिविप्रेन्द्रज्ञानिनायोगिनातदा ॥ ३७ ॥ सुमूढेनमयातस्यपूर्ववृत्तान्तमेवहि ॥ तमेवंश्रावितंसर्वंसर्वज्ञत्वंकथंव्रजेत् ॥ ३८ ॥ एतदर्थंमहादुःखीभवा
न्ममगतिःसदा ॥ सचोवाचमहात्मामेसर्वज्ञानस्यकारणम् ॥ ३९ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेगुरुतीर्थमाहात्म्येच्यवनचरित्रेद्वाविंश
त्यधिकशततमोऽध्यायः ॥ १२२ ॥ सिद्धउवाच ॥ श्रूयतामभिधास्यामिज्ञानरूपंतवाग्रतः ॥ ज्ञानस्यनास्तिवैदेहोहस्तौपादौचचक्षुषी ॥ १ ॥ नासा
कर्णौनज्ञानस्यनास्तिचैवास्थिसङ्ग्रहः ॥ केनदृष्टंतुवैज्ञानंकानिलिङ्गानितस्यवै ॥ २ ॥ आकारैर्वर्जितंनित्यंसर्ववेत्तिससर्ववित् ॥ दिवाप्रकाशकःसूर्यो
रात्रौप्रकाशयेच्छशी ॥ ३ ॥ गृहंप्रकाशयेद्दीपोलोकमध्येस्थिताअमी ॥ तत्पदंकेनवैधाम्नादृश्यतेशृणुसत्तम ॥ ४ ॥ नविन्दन्तिहिमूढास्तेमोहितावि

CC-0. In Public Domain. Digitization by eGangotri

ष्णुमायया ॥ कायमध्येस्थितंज्ञानंध्यानदीतमनोपमम् ॥५॥ तत्पदंतेनदृश्येतचन्द्रसूर्यादिभिर्नच ॥ हस्तपादौविनाज्ञानमचक्षुःकर्णवर्जितम् ॥६॥
सर्वत्रगतिमच्चास्तिसर्वंगृह्णातिपश्यति ॥ सर्वमाघ्रातिविप्रेन्द्रश्शृणोत्येवंनसंशयः ॥ ७ ॥ नास्तिज्ञानसमोदीपःसर्वान्धकारनाशने ॥ स्वर्गेभूमौचपा
तालेस्थानेस्थानेचदृश्यते ॥ ८ ॥ कायमध्येस्थितंज्ञानंनविन्दन्तिकुबुद्धयः ॥ ज्ञानस्थानंप्रवक्ष्यामियस्माज्ज्ञानंप्रजायते ॥ ९ ॥ प्राणिनांहृदयेनि
त्यंनिहितंसर्वदाद्विज ॥ कामादीन्सुमहाभोगान्महामोहादिकांस्तथा ॥ १० ॥ विवेकवह्निनासर्वान्दिधक्षतिसदैवयः ॥ सर्वशान्तिमयोभूत्वाइन्द्रि
यार्थप्रमर्दयेत् ॥ ११ ॥ ततस्तुजायतेज्ञानंसर्वतत्त्वार्थदर्शकम् ॥ तत्त्वमूलमिदंज्ञानंनिर्मलंसर्वदर्शकम् ॥ १२ ॥ तस्माच्छान्तिंकुरुष्वत्वंसर्वसौख्यप्र
वर्द्धिनीम् ॥ समःशत्रौचमित्रेचयथात्मनितथापरे ॥ १३ ॥भवस्वनियतोनित्यंजिताहारोजितेन्द्रियः ॥ मैत्रंनैवप्रकर्तव्यंवैरंदूरेपरित्यजेत् ॥ १४ ॥
निःसङ्गोनिःस्पृहोभूत्वाएकान्तस्थानमाश्रितः ॥ सर्वप्रकाशकोज्ञानीसर्वदर्शीभविष्यसि ॥१५॥ एकस्थानस्थितोवत्सत्रैलोक्येयद्भविष्यति ॥ वृत्ता
न्तंवेत्स्यसित्वंतुमत्प्रसादान्नसंशयः ॥ १६ ॥ कुञ्जलउवाच ॥ सिद्धेनतेनमेविप्रज्ञानरूपंप्रकाशितम् ॥ तस्यवाक्येस्थितोनित्यंतद्भावेनापिभावितः
॥ १७ ॥ त्रैलोक्येवर्त्ततेयद्यदेकस्थानेस्थितोह्यहम् ॥ तत्तदेवप्रजानामिप्रसादात्तस्यसद्गुरोः ॥ १८ ॥ एतत्तेसर्वमाख्यातमात्मवृत्तान्तमेवहि ॥ अन्य
त्किंतेप्रवक्ष्यामितद्ब्रूहिद्विजसत्तम ॥ १९ ॥ च्यवनउवाच ॥ कीरयोनिंकथंप्राप्तोभवाञ्ज्ञानवतांवरः ॥ तन्मेत्वंकारणंब्रूहिसर्वसन्देहनाशनम् ॥२०॥
कुञ्जलउवाच ॥ संसर्गाज्जायतेपापंसंसर्गात्पुण्यमेवहि ॥ तस्माद्विवर्जयेच्छुद्धोभव्यंविरुद्धमेवच ॥ २१ ॥ लुब्धकेनापिपापेनकेनाप्येकःशुकःशिशुः॥
बन्धयित्वासमानीतोविक्रयार्थंसमुद्यतः ॥ २२ ॥चाटुकारंसुरूपंतंपटुवाक्यंसमीक्ष्यच ॥ गृहीतोब्राह्मणैकेनममप्रीत्यासमर्पितः ॥ २३ ॥ ज्ञानध्यान
स्थितोनित्यमहमेवद्विजोत्तम ॥ समेबालस्वभावेनकौतुकात्करसंस्थितः ॥ २४ ॥ तस्यकौतुकवाक्यैर्वामुग्धोऽहंद्विजसत्तम ॥ शुकस्यपुत्ररूपस्यनि
त्यंतत्परमानसः ॥ २५ ॥ मामेवंवदतेसोऽपितातताततिआस्यताम् ॥ स्नातुंगच्छमहाभागदेवमर्चयसाम्प्रतम् ॥ २६ ॥ इत्यादिचाटुकै
र्वाक्यैर्मामेवंपरिभाषयेत् ॥ तस्यवाक्यविनोदेनविस्मृतंज्ञानमुत्तमम् ॥ २७ ॥ पुष्पार्थंफलभोगार्थंगतोऽहंवनमेवच ॥ नीतःशुकोबि
डालेनममदुःखस्यहेतवे ॥ २८ ॥ ममसंसर्गिभिःसर्वैर्वयस्यैःसाधुचारिभिः ॥ बिडालेनहतःपक्षीतेनैवभक्षितोहिसः ॥ २९ ॥ श्रुत्वामृ
त्युंगतंविप्रशुकंतंचाटुकारकम् ॥ महतादुःखभावेनअसुखेनातिदुःखितः ॥ ३० ॥ तस्यदुःखेनमुग्धोऽस्मितीव्रेणापिसुपीडितः ॥ महता

१ वयस्यैः वयस्येभ्यः सकाशात् 'विडालेन पक्षी हतः तेनैव च भक्षितः' इति मृत्युं गतं शुकं श्रुत्वा इति तृतीयार्द्धकस्थेनार्थसंगतिरवधेया।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मोहजालेनबद्धोऽहंद्विजपुङ्गव ॥ ३१ ॥ प्रालपंरामचन्द्रेतिशुकराजेतिपण्डित ॥ श्लोकराजेतितंविप्रमोहाच्चलितमानसः ॥ ३२ ॥ ततोऽहंदुःखस
न्ततप्तःसञ्जातःस्वेनकर्मणा ॥ वियोगेनापिविप्रेन्द्रशुकस्यशृणुसाम्प्रतम् ॥ ३३ ॥ विस्मृतंतन्मयाज्ञानंसिद्धेनापिप्रकाशितम् ॥ संस्मरञ्छो
कसन्तप्तस्तंशुकंचाटुकारकम् ॥ ३४ ॥ वत्सवत्सेतिनित्यंवैप्रलपञ्छृणुभार्गव ॥ गद्यपद्यमयैर्वाक्यैःसंस्कृताक्षरसंयुतैः ॥ ३५ ॥ त्वांवि
नाकश्चमांवत्सबोधयिष्यतिसाम्प्रतम् ॥ कथाभिस्तुविचित्राभिःपक्षिराजप्रसाद्यमाम् ॥ ३६ ॥ अस्मिन्सुनिर्जनोद्यानेविहायक्वगतोभवान् ॥
केनदोषेणलिप्तोऽस्मितन्मेकथयसाम्प्रतम् ॥ ३७ ॥ एवंविधैरहंवाक्यैःकरुणैस्तैस्तुमोहितः ॥ एवमादिप्रलप्याहंशोकेनापिसुपीडितः ॥ ३८ ॥
मृतोऽहंतेनमोहेनतद्भावेनापिमोहितः ॥ मरणेयादृशोभावोमतिश्चासीच्चयादृशी ॥ ३९ ॥ तादृशेनापिभावेनजातोऽहंद्विजसत्तम ॥ गर्भवा
सोमयाप्राप्तोज्ञानस्मृतिविधायकः ॥ ४० ॥ स्मृतंपूर्वकृतंकर्मस्वयमेवविचेष्टितम् ॥ मयापापेनमूढेनकिंकृतंह्यकृतात्मना ॥ ४१ ॥ गर्भ
योगसमारूढःपुनस्तंचिन्तयाम्यहम् ॥ तनमेनिर्मलंज्ञानंजातंवैसर्वदर्शकम् ॥ ४२ ॥ गुरोस्तस्यप्रसादाच्चप्राप्तंवैज्ञानमुत्तमम् ॥ तस्यवाक्योदकैः
स्वच्छैःकायस्यमलमेवच ॥ ४३ ॥ सबाह्याभ्यन्तरंविप्रक्षालितंनिर्मलंकृतम् ॥ तिर्यक्त्वंचमयाप्राप्तंशुकजातिसमुद्भवम् ॥ ४४ ॥ शुकस्यध्यानभा
वेनमरणेसमुपस्थिते ॥ तस्मिन्कालेमृतोविप्रतद्भावेनापिभावितः ॥ ४५ ॥ तादृशोऽस्मिपुनर्जातःशुकरूपोमहीतले ॥ मरणेयादृशोभावःप्राणिनां
परिजायते ॥ ४६ ॥ तादृशाःस्युस्तुसत्त्वास्तेतद्रूपास्तत्परायणाः ॥ तद्गुणास्तत्स्वरूपास्तेभावभूताभवन्तिहि ॥ ४७ ॥ मृत्युकालस्यविप्रेन्द्रभावे
नापिनसंशयः ॥ अतुलंप्राप्तवाञ्ज्ञानमहमत्रमहामते ॥ ४८ ॥ तेनसर्वंविपश्यामियद्भूतंयद्भविष्यति ॥ वर्तमानंमहाप्राज्ञज्ञानेनापिमहामते ॥ ४९ ॥
सर्वंविदाम्यहंह्यत्रसंस्थितोऽपिनसंशयः ॥ तारणायमनुष्याणांसंसारेपरिवर्तताम् ॥ ५० ॥ नास्तितीर्थंगुरुसमंबन्धच्छेदकरंद्विज ॥ एतत्तेसर्वमाख्या
तंशृणुभार्गवनन्दन ॥ ५१ ॥ यत्त्वयापृच्छितंविप्रतत्तेसर्वंप्रकाशितम् ॥ स्थलजाच्चोदकात्सर्वंबाह्यंमलंप्रणश्यति ॥ ५२ ॥ जन्मान्तरकृतान्पापान्गु
रुतीर्थंप्रणाशयेत् ॥ संसारतारणायैवजङ्गमंतीर्थमुत्तमम् ॥ ५३ ॥ विष्णुरुवाच ॥ शुकएवंमहाप्राज्ञश्च्यवनायमहात्मने ॥ तत्त्वंप्रकाशयित्वातुविर
रामनृपोत्तम ॥५४॥ एतत्तेसर्वमाख्यातंजङ्गमंतीर्थमुत्तमम्॥वरंवरयभद्रंतेयत्तेमनसिवर्त्तते ॥५५॥ वेनउवाच ॥ नाहंराज्यस्यकामार्थीनान्यत्किंचित्प्र
कामये ॥ सदेहोगन्तुमिच्छामितवकायंजनार्दन ॥५६ ॥ एवंवरमहंमन्येयदिदातुमिहेच्छसि ॥५७॥ विष्णुरुवाच ॥ यजत्वमश्वमेधेनराजसूयेनभूप
ते ॥ गोभूस्वर्णाम्बुधान्यानांकुरुदानंमहामते ॥ ५८ ॥ दानान्नश्यतिवैपापंब्रह्मवध्यादिघोरकम् ॥ चतुर्वर्गस्तुदानेनसिद्ध्यत्येवनसंशयः ॥ ५९ ॥

CC-0. In Public Domain. Digitization by eGangotri

तस्माद्दानंप्रकर्तव्यंमामुद्दिश्यचभूपते ॥ यादृशेनापिभावेनमामुद्दिश्यददातियः ॥ ६० ॥ तादृशंतस्यवैभावंसत्यमेवंकरोम्यहम् ॥ ऋषीणांदर्शनात्स्प
शार्द्ध्रष्टस्तेपापसञ्चयः ॥ ६१ ॥ आगमिष्यसियज्ञान्तेममदेहंनसंशयः ॥ एवमाभाष्यतंवेनमन्तर्द्धानंगतोहरिः ॥ ६२ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डे
पञ्चाधिकपञ्चाशत्सहस्रसंहितायांवेनोपाख्यानेगुरुतीर्थमाहात्म्यसम्पूर्तिवर्णनेच्यवनचरित्रसमाप्तौचत्रयोविंशत्यधिकशततमोऽध्यायः ॥ १२३ ॥
सूतउवाच॥अन्तर्द्धानंगतेविष्णौवेनोराजामहामतिः ॥ क्कगतोदेवदेवेशइतिचिन्तापरोऽभवत् ॥१॥ हर्षेणमहताविष्टश्चिन्तयित्वानृपोत्तमः ॥ समाहूय
नृपश्रेष्ठंतंपृथुंमधुराक्षरैः ॥ २ ॥ तमुवाचमहात्मानंहर्षेणमहतातदा ॥ त्वयापुत्रेणभूलोकेतारितोऽस्मिसुपातकात् ॥ ३ ॥ नीतउज्ज्वलतांवत्सवंशोमे
साम्प्रतंपृथो ॥ मयाविनाशितोदोषैस्त्वयागुणैःप्रकाशितः ॥४ ॥ यजेऽहमश्वमेधेनदास्येदानान्यनेकशः ॥ विष्णुलोकंव्रजाम्यद्यसकायस्तेप्रसादतः
॥ ५ ॥ सम्भरस्वमहाभागसम्भारांस्त्वंनृपोत्तम ॥ आमन्त्रयमहाभागब्राह्मणान्वेदपारगान् ॥ ६ ॥ एवंपृथुःसमादिष्टोवेनेनापिमहात्मना ॥ प्रत्यु
वाचमहात्मासवेनंपितरमादरात् ॥७॥ कुरुराज्यंमहाराजभुङ्क्ष्वभोगान्मनोऽनुगान् ॥ दिव्यान्वामानुषान्पुण्यान्यज्ञैर्यजजनार्दनम् ॥८॥ एवमुक्त्वा
प्रणम्यैवपितरंज्ञानतत्परम् ॥ धनुरादायपृथ्वीशःसबाणंयत्नपूर्वकम् ॥ ९ ॥ आदिदेशभटान्सर्वान्घोषध्वंभूतलेमम ॥ पापमेवनकर्तव्यंकर्मणात्रि
विधेनवै ॥१०॥ करिष्यन्तिचयत्पापंआज्ञावेनस्यभूपतेः ॥ उल्लङ्घ्यवध्यतांसोहियास्यतेनात्रसंशयः ॥११॥ दानमेवप्रदातव्यंयज्ञैश्चैवजनार्दनम् ॥
यजध्वंमानवाःसर्वेतन्मनस्काविमत्सराः ॥ १२ ॥ एवंशिक्षांप्रदत्त्वासौराज्यंभृत्येषुवेनजः ॥ निक्षिप्यचगतोविप्रास्तपसोऽर्थंतपोवनम् ॥ १३ ॥
सर्वान्दोषान्परित्यज्यसंयम्यविषयेन्द्रियान् ॥ शतवर्षप्रमाणंवैनिराहारोबभूवह ॥ १४ ॥ तपसातस्यवैतुष्टोब्रह्मापृथुमुवाचह ॥ तपस्तपसिकस्मात्त्वं
तन्मेत्वंकारणंवद ॥ १५ ॥ पृथुरुवाच ॥ वेनएषमहाप्राज्ञःपितामेकीर्तिवर्द्धनः ॥ समाचरतियःपापमस्यराज्येनराधमः ॥ १६ ॥ शिरश्छेत्ता
भवत्वेषतस्यदेवोजनार्दनः ॥ अदृष्टैश्चमहाचक्रैर्हरिःशास्ताभवेत्स्वयम् ॥ १७ ॥ मनसाकर्मणावाचाकर्तुंवाञ्छन्तिपातकम् ॥ तेषांशिरांसित्रुटयन्तु
फलंपक्कंयथाद्रुमात् ॥ १८ ॥ एतदेववरंमन्येत्वत्तःशृणुसुरेश्वर ॥ प्रजानांदोषभावेननलिप्यतिपितामम ॥ १९ ॥ तथाकुरुष्वदेवेशवरंदातुंयदीच्छसि॥
ददस्वउत्तमंकामंचतुर्मुखनमोऽस्तुते ॥ २० ॥ ब्रह्मोवाच ॥ एवमस्तुमहाभागपितातेपूततांगतः ॥ विष्णुनाशासितोवत्सपुत्रेणापित्वयापृथो॥ २१ ॥
एवंपृथुंसमुद्दिश्यवरंदत्त्वागतोविभुः ॥ पृथुरेवसमायातोराज्यकर्मणिसंस्थितः ॥ २२ ॥ वैन्यस्यराज्येविप्रेन्द्राःपापंकश्चिन्नचाचरेत् ॥ यस्तुचिन्त
यतेपापंत्रिविधेनापिकर्मणा ॥ २३ ॥ शिरश्छेदोभवेत्तस्ययथाचक्रैर्निकृन्तितः ॥ तदाप्रभृतिवैपापंनैवकोऽपिसमाचरेत् ॥ २४ ॥ इत्याज्ञावर्ततेतस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वैन्यस्यापिमहात्मनः ॥सर्वलोकाःसमाचारैःपरिवर्तन्तिनित्यशः ॥२५॥ दानभोगैःप्रवर्तन्तेसर्वधर्मपरायणाः ॥ सर्वसौख्यैःप्रवर्द्धन्तेप्रसादात्तस्यभूप
तेः ॥२६॥ इतिश्रीपाद्मपुराणेभूमिखण्डेवेनोपाख्यानेचतुर्विंशत्यधिकशततमोऽध्यायः॥१२४॥सूतउवाच॥वेनस्याज्ञांसुसम्प्राप्यपृथुःपरमधार्मिकः ॥
सम्बभ्रेसर्वसम्भारान्नानापुण्यान्नृपात्मजः ॥१॥ निमन्त्र्यब्राह्मणान्सर्वान्नानादेशोद्भवानपि॥अथवेनइयाजासावश्वमेधेनभूपतिः ॥२॥ दानान्यदाद्ब्राह्म
णेभ्योनानारूपाण्यनेकशः ॥ जगामवैष्णवंलोकंसकायोजगतीपतिः ॥३॥ विष्णुनासहधर्मात्मानित्यमेवप्रवर्तते ॥एतद्वःसर्वमाख्यातंचरित्रंतस्यभूप
तेः ॥ ४ ॥ सर्वपापप्रशमनंसर्वदुःखविनाशनम् ॥ पृथुरेवसधर्मात्माराजापृथ्वींप्रशासति ॥ ५ ॥ त्रैलोक्येनसमंपृथ्वींदुदोहनृपसत्तमः ॥ प्रजास्तुर
ञ्जितास्तेनपुण्यधर्मानुकर्मभिः ॥६॥ एतत्तेसर्वमाख्यातंभूमिखण्डमनुत्तमम् ॥ प्रथमंसृष्टिखण्डंतुद्वितीयंभूमिखण्डकम् ॥ ७ ॥ भूमिखण्डस्यमाहात्म्यं
कथयिष्याम्यहंपुनः ॥ अस्यखण्डस्यवैश्लोकंयःशृणोतिनरोत्तमः ॥ ८ ॥ दिनस्यैकस्यवैपापंतस्यचैवप्रणश्यति ॥ योनरोभावसंयुक्तोऽध्यायंसंशृणुते
सुधीः ॥ ९ ॥ तस्यपुण्यंप्रवक्ष्यामिश्रूयतांद्विजसत्तमाः ॥ दत्तस्यगोसहस्रस्यब्राह्मणेभ्यःसुपर्वणि ॥ १० ॥ यत्फलंतत्प्रजायेतविष्णुस्तस्यप्रसीदति ॥
अस्यपद्मपुराणस्यपठमानस्यनित्यशः ॥ ११ ॥ कलौयुगेतुविघ्नाश्चनजायन्तेनरस्यवै ॥ १२॥ व्यासउवाच ॥ कस्मात्कलौनजायन्तेशृण्वानस्यचप
द्मज ॥ नरस्यपुण्ययुक्तस्यनानाविघ्नाःसुदारुणाः ॥ १३ ॥ ब्रह्मोवाच ॥ मखस्याप्यश्वमेधस्ययत्फलंपरिकथ्यते ॥ तत्फलंदृश्यतेतातपुराणेपद्मसंज्ञ
के ॥ १४ ॥ अश्वमेधमखःपुण्यःकलौनैवप्रवर्तते ॥ पुराणंचापियत्तद्वदश्वमेधसमंकिल ॥ १५ ॥ अश्वमेधस्ययत्पुण्यंस्वर्गमोक्षफलप्रदम् ॥ नभुञ्जन्ति
नराःपापाःपापमार्गेषुसंस्थिताः ॥ १६ ॥ पुराणस्यास्यपुण्यस्यपद्मसंज्ञस्यसत्तम ॥ अश्वमेधसमंपुण्यंनभुञ्जन्तिकलौनराः ॥ १७॥ कलौयुगेनरैः
पापैर्गन्तव्यंनरकार्णवम् ॥ कस्माच्छ्रोष्यन्तितत्पुण्यंचतुर्वर्गप्रसाधनम् ॥ १८ ॥ येनश्रुतमिदंपुण्यंपुराणंपद्मसंज्ञकम् ॥ सर्वंहिसाधितंतेनचतुर्वर्गस्य
साधनम् ॥ १९ ॥ अश्वमेधादयोयज्ञास्तस्मान्नष्टामहामते ॥ कलौयुगेगताःस्वर्गेसवेदाःसाङ्गसस्वराः ॥ २० ॥ यःकोऽपिसत्त्वसम्पन्नःश्रद्धावान्भगव
त्परः ॥श्रोतुमिच्छतिधर्मात्मासपुत्रोभार्ययासह ॥ २१ ॥ श्रवणार्थंमहाश्रद्धापूर्वंतस्यप्रजायते ॥ शृण्वानस्यनरस्यापिमहाविघ्नोनसञ्चरेत् ॥ २२ ॥
अश्रद्धाजायतेपूर्वंपाठकस्यनरस्यच ॥ लोभश्चजायतेतस्यशृण्वानस्यद्विजोत्तम ॥ २३ ॥ प्रेषितोविष्णुदेवेनमहामोहःसदारुणः ॥ अकरोत्सविना
शंतुशृण्वतश्चास्यनित्यशः ॥ २४ ॥ दूषकाःकुत्सकाःपापाःसम्भवन्तिदिनेदिने ॥ ज्ञातव्यंतुसुबुद्धेनविघ्नरूपंममाधुना ॥ २५ ॥ सञ्जातंदृश्यतेव्या

१ इयं ब्रह्मणो व्यासं प्रत्युक्तिः ।

CC-0. In Public Domain. Digitization by eGangotri

सतथाहोमंसमाचरेत् ॥ वैष्णवैश्चमहामन्त्रैर्विष्णुसूक्तैःसुपुण्यदैः ॥ २६ ॥ विष्णोरराटमन्त्रेणसहस्रशीर्षकेनच ॥ इदंविष्णुसुमन्त्रेणआब्रह्मेणपुनः
पुनः ॥ २७ ॥ त्र्यम्बकेनचमन्त्रेणहोममेवंसमाचरेत् ॥ बृहत्साम्नासुमन्त्रेणद्वादशाक्षरकेणच ॥ २८ ॥ यस्यदेवस्ययोहोमस्तस्यमन्त्रेणहोमयेत् ॥
अष्टोत्तरतिलाज्यैश्चपालाशैःसमिधैरपि ॥ २९ ॥ ग्रहाणामपिकर्त्तव्यंस्थापनंपूजनंद्विज ॥ विघ्नेशंपूजयेत्तत्रशारदांचसुरेश्वरीम् ॥ ३० ॥ जातवेदां
महामायांचण्डिकांक्षेत्रनायकम् ॥ तिलैश्चतण्डुलैराज्यैस्तेषांमन्त्रसमुद्यतैः ॥ ३१ ॥ एवंहोमःप्रकर्त्तव्योब्राह्मणेभ्योददेद्धनम् ॥ यथासम्भविकांतात
दक्षिणांधेनुसंयुताम् ॥ ३२ ॥ ततोविघ्नाःप्रणश्यन्तिपुराणंसिद्धिमाप्नुयात् ॥ एवंनकुरुतेयोहितस्यविघ्नंवदाम्यहम् ॥३३॥ तस्याङ्गेजायतेरोगोवहुपी
डाप्रदायकः ॥ भार्याशोकःपुत्रशोकोधनहानिःप्रजायते ॥ ३४ ॥ नानाविधान्महारोगान्भुञ्जतेनात्रसंशयः ॥ यस्यगेहेनास्तिवित्तमुपवासंसमाचरेत्
॥ ३५ ॥ एकादशींसुसम्प्राप्यपूजयेन्मधुसूदनम् ॥ षोडशैश्चोपचारैश्चभावयुक्तेनचेतसा ॥ ३६ ॥ ब्राह्मणान्भोजयेत्पश्चाद्यथावित्तानुसारतः ॥केश
वायततोदत्त्वासङ्कल्पंहविषान्वितम् ॥ ३७ ॥ स्वयंकुर्यात्ततःप्राज्ञोभोजनंसहबान्धवैः ॥ पुत्रैस्तुभार्ययायुक्तस्ततःसिद्धिमवाप्नुयात् ॥३८॥ पुराणसं
हितापूर्णाश्रोतव्याधर्मतत्परैः ॥ चतुर्वर्गस्यवैसिद्धिर्जायतेतस्यनान्यथा ॥ ३९ ॥ सपादंलक्षमेकंतुब्रह्माख्यंपुष्करंशृणु ॥ कृतेयुगेतुनिष्पापाःशृण्व
न्तिमनुजाद्विज ॥ ४० ॥ लक्षस्यार्द्धंततःकृत्स्नंपुराणंपद्मसंज्ञकम् ॥ श्लोकानांतुसहस्राभ्यांद्वाभ्यामेवतथाधिकम् ॥ ४१ ॥ त्रेतायुगेतथाप्राप्तेयदाश्रो
ष्यन्तिमानवाः ॥ चतुर्वर्गफलंभुक्त्वातेयास्यन्तिहरिंपुनः ॥ ४२ ॥ द्वाविंशतिसहस्राणिसंहितापद्मसंज्ञिता ॥ द्वापरेकथिताविप्रब्रह्मणापरमात्मना
॥ ४३॥ द्वादशैवसहस्राणांपद्माख्यासातुसंहिता ॥ कलौयुगेपठिष्यन्तिमानवाविष्णुतत्पराः ॥ ४४ ॥ एकोऽर्थश्चैकभावश्चचतुर्ष्वपिप्रवर्तितः॥संहिता
स्वेवविप्रेन्द्रशेषाख्यानप्रविस्तरः ॥४५॥ द्वादशैवसहस्राणिनाशंयास्यन्तिसत्तम ॥ कलौयुगेतुसम्प्राप्तेप्रथमंहिभविष्यति ॥४६॥ भूमिखण्डंनरःश्रुत्वा
सर्वपापैःप्रमुच्यते ॥ [1]मुच्यतेसर्वदुःखेभ्यःसर्वरोगःप्रमुच्यते ॥ ४७ ॥ अन्यत्सर्वंपरित्यज्यजपंदानंतथाश्रुतम् ॥श्रोतव्यंहिप्रयत्नेनपद्माख्यंपापनाशन
म् ॥ ४८ ॥ प्रथमंसृष्टिखण्डंतुद्वितीयंभूमिखण्डकम् ॥ तृतीयंस्वर्गखण्डचपातालंतुचतुर्थकम् ॥ ४९ ॥ पञ्चमंचोत्तरंखण्डंसर्वपापप्रणाशनम् ॥ यः
शृणोतिनरोभक्त्यापञ्चखण्डान्यनुक्रमात् ॥५०॥ गोप्रदानसहस्रस्यमानवोलभतेफलम् ॥ महाभाग्येनलभ्यन्तेपञ्चखण्डानिभूसुराः ॥५१॥ श्रुतानि
मोक्षदानिस्युःसत्यंसत्यंनसंशयः ॥ ५२ ॥ इतिश्रीपाद्मपुराणेभूमिखण्डेपञ्चपञ्चाशत्सहस्रसंहितायांवेनोपाख्यानेपञ्चविंशत्यधिकशततमो
ऽध्यायः॥ १२५ ॥ समाप्तोऽयं भूमिखण्डो द्वितीयः ॥ २ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

१ 'रोगैर्दुःखैः शत्रुभिश्च विमुक्तः सुखमाप्नुयात्' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ श्रीपाद्मे महापुराणे तृतीयं स्वर्गखण्डं प्रारभ्यते ॥

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॐ नमोविघ्नहर्त्रेॐनमःश्रीमत ॥ नमामिगोविन्दपदारविन्दंसदेन्दिरावन्दितमुत्तमाढ्यम् ॥ जगज्जनानांहृदिसंनिविष्टंमहाजनैकायनमुत्तमोत्तमम्॥ ॥ १ ॥ एकदामुनयःसर्वेज्वलज्ज्वलनसन्निभाः ॥ हिमवद्वासिनोवेदवेदाङ्गपरिनिष्ठिताः ॥२॥ त्रिकालज्ञामहात्मानोनानापुण्याश्रमाश्रयाः॥महेन्द्राद्रिरतायेचयेचविन्ध्यनिवासिनः ॥३॥ येऽर्बुदारण्यनिरताःपुष्करारण्यवासिनः॥श्रीशैलनिरतायेचकुरुक्षेत्रनिवासिनः ॥४॥ धर्म्मारण्यरतायेचदण्डकारण्यवासिनः ॥ जम्बूमार्गरतायेचयेचसत्यनिवासिनः ॥५॥ एतेचान्येचबहवःसशिष्यामुनयोऽमलाः ॥ नैमिषंसमुपायाताःशौनकंद्रष्टुमुत्सुकाः ॥६॥ तंपूजयित्वाविधिवत्तेनतेचसुपूजिताः ॥ आसनेषुविचित्रेषुबृस्यादिषुयथाक्रमम् ॥७॥ शौनकेनप्रदत्तेषुआसीनास्तेतपोधनाः ॥ कृष्णाश्रिताःकथाःपुण्याःपरस्परमथाब्रुवन् ॥८॥ कथान्तेततस्तेषांमुनीनांभावितात्मनाम् ॥ आजगाममहातेजाःसूतस्तत्रमहाद्युतिः ॥९॥ व्यासशिष्यःपुराणज्ञोरोमहर्षणसंज्ञकः॥तान्प्रणम्ययथान्यायंसतैश्चैवाभिपूजितः ॥१०॥ उपविष्टंयथायोग्यंशौनकाद्यामहर्षयः ॥ व्यासशिष्यंसुखासीनंसूतंवैरोमहर्षणम् ॥११॥ तंपप्रच्छुर्महाभागाःशौनकाद्यास्तपोधनाः ॥ १२ ॥ ऋषयऊचुः ॥ पौराणिकमहाबुद्धेरोमहर्षणसुव्रत ॥ त्वत्तःश्रुतामहापुण्याःपौराणिक्यःकथाःपुरा ॥ १३ ॥ साम्प्रतंचप्रवृत्ताःस्मकथायांसक्षणाहरेः ॥ सवैपुंसांपरोधर्मोयतोभक्तिरधोक्षजे ॥ १४ ॥ पुनःपुराणमाचक्ष्वहरिवार्तासमन्वितम् ॥ हरेरन्याकथासूतश्मशानसदृशीस्मृता ॥१५॥ हरिस्तीर्थस्वरूपेणस्वयंतिष्ठतितच्छ्रुतम् ॥ तीर्थानांपुण्यदातणांनामानिकिलकीर्तय ॥ १६ ॥ कुतएतत्समुत्पन्नंकेनवापरिपाल्यते ॥ कस्मिन्विलयमभ्येतिजगदेतच्चराचरम् ॥१७॥ क्षेत्राणिकानिपुण्यानिकेचपूज्याःशिलोच्चयाः ॥नद्यश्चकाःपराःपुण्यानृणांपापहराःशुभाः ॥ १८ ॥ एतत्सर्वंमहाभागकथयस्वयथाक्रमम् ॥ १९ ॥ सूतउवाच ॥ साधुसाधुमहाभागाःसाधुपृष्टंतपोधनाः ॥ तंप्रणम्यप्रवक्ष्यामिपुराणंपद्मसंज्ञकम् ॥२०॥ पाराशर्यंपरमपुरुषंविश्ववेदैकयोनिंविद्याधारंविपुलमतिदंवेदवेदान्तवेद्यम् ॥ शश्वच्छान्तंस्वमतिविषयंशुद्धतेजोविशालंवेदव्यासंविततयशसंसर्वदाहंनमामि ॥ २१ ॥ नमोभगवतेतस्मैव्यासायामिततेजसे ॥ यस्यप्रसादाद्वक्ष्यामिनारायणकथामिमाम् ॥२२॥प्रवक्ष्यामिमहापुण्यंपुराणंपद्मसंज्ञितम् ॥ सहस्रंपञ्चपञ्चाशत्सप्तखण्डैःसमन्वितम् ॥२३॥ तत्रादौसृष्टिखण्डंस्याद्भूमिखण्डंततःपरम् ॥ तृतीयंस्वर्गखण्डंचचतुर्थंब्रह्मखण्डकम् ॥ २४ ॥ पातालंपञ्चमंखण्डंषष्ठमुत्तरमेवच॥क्रियाखण्डंसप्तमंस्यादित्येवंखण्डसप्तकम् ॥ २५ ॥ एतदेवमहापद्ममद्भुतंयन्मयंजगत् ॥ तद्वृत्तान्ताश्रयंतस्मात्पाद्ममित्युच्यतबुधैः ॥ २६ ॥ एतत्पुराणममलंविष्णुमाहात्म्यमुत्तमम् ॥ देवदेवोहरिर्यद्वब्रह्मणेप्रोक्तवान्पुरा ॥ २७ ॥ ब्रह्मातन्नारदायाहनारदोऽस्मद्गुरोःपुरः ॥ व्यासःसर्वपुराणानिसेतिहासानिसंहिताः ॥ २८ ॥ अध्यापयामासमुहुर्मामतिप्रियमात्मनः॥

CC-0. In Public Domain. Digitization by eGangotri

तदहंसम्प्रवक्ष्यामिपुराणमतिदुर्लभम् ॥२९॥ यच्छ्रुत्वाब्रह्महत्यादिपापेभ्योमुच्यतेनरः ॥ सवतीर्थाभिषेकंचलभतेशृणुतेह्यियः ॥३०॥ श्रद्धयापरया
भक्त्याश्रुतमात्रेणमुक्तिदः ॥ अश्रद्धयापिशृणुतेलभतेपुण्यसञ्चयम् ॥३१॥ तस्मात्सर्वप्रयत्नेनपाद्मंशृणुतमन्मुखात् ॥ ३२ ॥ तत्रा[1]दिखण्डंवक्ष्यामिपु
ण्यंपापविनाशनम् ॥ शृण्वन्तुमुनयःसर्वेसशिष्यास्त्वत्रयेस्थिताः ॥ ३३ ॥ इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेप्रथमोऽध्यायः ॥१॥ सूतउवाच ॥ आ
दिसर्गमहंतावत्कथयामिद्विजोत्तमाः ॥ ज्ञायतेयेनभगवान्परमात्मासनातनः ॥ १ ॥ जगतःप्रलयादूर्ध्वंनासीत्किञ्चिद्द्विजोत्तमाः ॥ ब्रह्मसंज्ञमभूदेकं
ज्योतिर्वैसर्वकारकम् ॥२॥ नित्यंनिरञ्जनंशान्तंनिर्मलंनित्यनिर्मलम् ॥ आनन्दसागरंस्वच्छंयत्काङ्क्षन्तिमुमुक्षवः ॥ ३ ॥ सर्वज्ञंज्ञानरूपत्वादनन्तम
जमव्ययम् ॥ अविनाशिसदास्वच्छमच्युतंव्यापकंमहत् ॥ ४ ॥ सर्गकालेतुसम्प्राप्तेज्ञात्वातज्ज्ञानरूपकम् ॥ आत्मलीनंविकारंचतत्स्रष्टुमुपचक्रमे ॥
॥ ५ ॥ तस्मात्प्रधानमुद्भूतंततश्चापिमहानभूत् ॥ सात्त्विकोराजसश्चैवतामसश्चत्रिधामहान् ॥६॥ प्रधानेनावृतोह्येवत्वचाबीजमिवावृतम् ॥ वैकारिक
स्तैजसश्चभूतादिश्चैवतामसः ॥ ७ ॥ त्रिविधोऽयमहङ्कारोमहत्तत्त्वादजायत ॥ यथाप्रधानेनमहान्महतासतथावृतः ॥ ८ ॥ भूतादिस्तुविकुर्वाणःशब्द
तन्मात्रकंततः॥ससर्जशब्दतन्मात्रादाकाशंशब्दलक्षणम् ॥९॥ शब्दमात्रंतथाकाशंभूतादिःसममावृणोत्॥शब्दमात्रंतथाकाशंस्पर्शमात्रंससर्जह॥१०॥
बलवानभवद्वायुस्तस्यस्पर्शोगुणोमतः ॥ आकाशंशब्दमात्रंतुस्पर्शमात्रंसमावृणोत ॥ ११ ॥ ततोवायुर्विकुर्वाणोरूपमात्रंससर्जह ॥ ज्योतिरुत्पद्य
तेवायोस्तद्रूपगुणमुच्यते ॥ १२ ॥ स्पर्शमात्रस्तुवैवायूरूपमात्रंसमावृणोत् ॥ ज्योतिश्चापिविकुर्वाणंरसमात्रंससर्जह ॥ १३ ॥ सम्भवन्ति
ततोऽम्भांसिरसमात्राणितानितु ॥ रसमात्राणिचाम्भांसिरूपमात्रंसमावृणोत ॥१४॥ विकुर्वाणानिचाम्भांसिगन्धमात्रंससर्जिरे ॥ तस्माज्जातामही
चेयंसर्वभूतगुणाधिका ॥ १५ ॥ ससङ्घातोयतस्तस्मात्तस्यगन्धोगुणोमतः ॥ तस्मिंस्तस्मिंस्तुतन्मात्रात्तेनतन्मात्रतास्मृता ॥ १६ ॥ तन्मात्राण्य
विशेषाणिविशेषाःक्रमशोऽपराः ॥ भूततन्मात्रसर्गोऽयमहङ्कारात्तुतामसात् ॥ १७ ॥ कीर्तितस्तुसमासेनमुनिवर्यास्तपोधनाः ॥ तैजसानीन्द्रिया
ण्याहुर्देवावैकारिकादश ॥१८॥ एकादशंमनश्चात्रकीर्तितंतत्त्वचिन्तकैः ॥ ज्ञानेन्द्रियाणिपञ्चात्रपञ्चकर्मेन्द्रियाणिच ॥१९॥ तानिवक्ष्यामितेषांचकर्मा
णिकुलपावनाः ॥ श्रवणंत्वक्चक्षुर्जिह्वानासिकाचैवपञ्चमी ॥२०॥ शब्दादिज्ञानसिद्ध्यर्थंबुद्धियुक्तानिपञ्चवै ॥ पायूपस्थंहस्तपादौकीर्तितावाक्चप ॥ १ ॥
ञ्चमी ॥२१॥ विसर्गानन्दनादानगत्युक्तिकर्मतत्स्मृतम् ॥ आकाशवायुतेजांसिसलिलंपृथिवीतथा ॥२२॥ शब्दादिभिर्गुणैर्विप्राःसंयुक्ताउत्तरोत्तरैः ॥

[1] तत्रादिखण्डमित्ययं श्लोकः क्वचित्पुस्तके न दृश्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नानावीर्याःपृथग्भूतास्ततस्तेसंहतिंविना ॥ २३ ॥ नाशक्नुवन्प्रजाःस्रष्टुमसमागत्यकृत्स्नशः ॥ समेत्यान्योन्यसंयोगंपरस्परमथाश्रयात् ॥ २४ ॥
एकसङ्घातलक्ष्याश्चसम्प्राप्यैक्यमशेषतः ॥ पुरुषाधिष्ठितत्वाच्चप्रधानानुग्रहेणच ॥ २५ ॥ महदादयोविशेषान्ताअण्डमुत्पादयन्तिते ॥ तत्क्रमेण
विवृद्धंतुजलबुद्बुदवत्सदा ॥ २६ ॥ भूतेभ्योऽण्डंमहाप्राज्ञावृद्धंतदुदकेशयम् ॥ प्राकृतंब्रह्मरूपस्यविष्णोःस्थानमनुत्तमम् ॥ २७ ॥ तत्राव्यक्तस्व
रूपोऽसौविष्णुर्विश्वेश्वरःप्रभुः ॥ ब्रह्मरूपंसमास्थायस्वयमेवव्यवस्थितः ॥ २८ ॥ स्वेदजाण्डमभूत्तस्यजरायुश्चमहीधराः ॥ गर्भोदकंसमुद्राश्चतस्या
भून्महदात्मनः ॥ २९ ॥ साद्रिद्वीपसमुद्राश्चसज्योतिर्लोकसङ्ग्रहः ॥ तस्मिन्नण्डेऽभवत्सर्वंसदेवासुरमानुषम् ॥ ३० ॥ अनादिनिधनस्यैवविष्णो
र्नाभेःसमुत्थितम् ॥ यत्पद्मंतद्धैममण्डमभूच्छ्रीकेशवेच्छया ॥३१॥ रजोगुणधरोदेवःस्वयमेवहरिःपरः ॥ ब्रह्मरूपंसमास्थायजगत्स्रष्टुंप्रवर्तते ॥ ३२ ॥
सृष्टंचपात्यनुयुगंयावत्कल्पविकल्पना ॥ नारसिंहादिरूपेणरुद्ररूपेणसंहरेत् ॥ ३३ ॥ सब्रह्मरूपंविसृजन्महात्माजगत्समस्तंपरिपातुमिच्छन् ॥
रामादिरूपंसतुगृह्यपातिबभूवरुद्रोजगदेतदत्तुम् ॥ ३४ ॥ इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेद्वितीयोऽध्यायः ॥ २ ॥ ऋषयऊचुः ॥ नदीनांपर्वतानांच
नामधेयानिसर्वशः ॥ तथाजनपदानांचयेचान्येभूमिमाश्रिताः ॥ १ ॥ प्रमाणंचप्रमाणज्ञपृथिव्याःकिलसर्वतः ॥ निखिलेनसमाचक्ष्वकाननानिच
सत्तम ॥ २ ॥ सूतउवाच ॥ पञ्चेमानिमहाप्राज्ञमहाभूतानिसङ्ग्रहात् ॥ जगतीस्थानिसर्वाणिसमान्याहुर्मनीषिणः ॥ ३ ॥ भूमिरापस्तथावायुरग्नि
राकाशमेवच ॥ गुणोत्तराणिसर्वाणितेषांभूमिःप्रधानतः ॥४॥ शब्दःस्पर्शश्चरूपंचरसोगन्धश्चपञ्चमः ॥ भूमेरेतेगुणाःप्रोक्ताऋषिभिस्तत्त्ववेदिभिः ॥५॥
चत्वारोऽप्सुगुणाविप्रागन्धस्तत्रनविद्यते ॥ शब्दःस्पर्शश्चरूपंचतेजसोऽथगुणास्त्रयः ॥ ६ ॥ शब्दःस्पर्शश्चवायोस्तुआकाशेशब्दएवच ॥ एतेपञ्च
गुणाविप्रामहाभूतेषुपञ्चसु ॥ ७ ॥ वर्तन्तेसर्वलोकेषुयेषुभूताःप्रतिष्ठिताः ॥ अन्योन्यंनातिवर्तन्तेसाम्यंभवतिवैतदा ॥ ८ ॥ यदातुविषमीभावमावि
शन्तिपरस्परम् ॥ तदादेहैर्देहवन्तोव्यतिरोहन्तिनान्यथा ॥ ९ ॥ आनुपूर्व्याविनश्यन्तिजायन्तेचानुपूर्वशः ॥ सर्वाण्यपरिमेयाणितदेषांरूपमैश्वरम्
॥ १० ॥ यत्रयत्रहिदृश्यन्तेधावन्तिपाञ्चभौतिकाः ॥ तेषांमनुष्यास्तर्केणप्रमाणानिप्रचक्षते ॥ ११ ॥ अचिन्त्याःखलुयेभावास्तान्नतर्केणसाध
येत् ॥ सुदर्शनंप्रवक्ष्यामिद्वीपंतुमुनिपुङ्गवाः ॥१२॥ परिमण्डलोमहाभागाद्वीपोऽसौचक्रसंस्थितः ॥ नदीजलपरिच्छिन्नःपर्वतैश्चाब्धिसन्निभैः ॥१३॥
पुरैश्चविविधाकारैरम्यैर्जनपदैस्तथा ॥ वृक्षैःपुष्पफलोपेतैःसम्पन्नोधनधान्यवान् ॥ १४ ॥ लवणेनसमुद्रेणसमन्तात्परिवारितः ॥ यथाहिपुरुषःप
श्येदादर्शेमुखमात्मनः ॥ १५ ॥ एवंसुदर्शनोद्वीपोदृश्यतेचक्रमण्डलः ॥ द्विरंशेपिप्पलस्तस्यद्विरंशेचशशोमहान् ॥ १६ ॥ सर्वौषधीःसमा

CC-0. In Public Domain. Digitization by eGangotri

दायसर्वतःपरिवारितः ॥ आपस्ततोऽन्याविज्ञेयाःशेपःसंक्षेपउच्यते ॥ १७ ॥ ऋषयऊचुः ॥ उक्तोयस्यचसंक्षेपोबुद्धिमन्विधिवत्त्वया ॥ तत्त्वज्ञ
श्चासिसर्वस्यविस्तरंसूतनोवद ॥ १८ ॥ यावान्भूम्यवकाशोऽयंदृश्यतेशशलक्षणे ॥ तस्यप्रमाणंप्रब्रूहिततोवक्ष्यसिपिप्पलम् ॥ १९ ॥ एवंतैः
किलपृष्टःससूतोवाक्यमथाब्रवीत् ॥ २० ॥ सूतउवाच ॥ प्रागायतामहाप्राज्ञाःषडेतेरत्नपर्वताः ॥ अवगाढाह्युभयतःसमुद्रौपूर्वपश्चिमौ ॥ २१ ॥
हिमवान्हेमकूटश्चनिपधश्चनगोत्तमः ॥ नीलश्चवैडूर्यमयःश्वेतश्चशशिसंन्निभः ॥ २२ ॥ सर्वधातुपिनद्धश्चशृङ्गवान्नामपर्वतः ॥ एतेवैपर्वताविप्राःसिद्ध
चारणसेविताः ॥ २३ ॥ तेषामन्तरविष्कम्भायोजनानिसहस्रशः ॥ तत्रपुण्याजनपदास्तानिवर्षाणिसत्तमाः ॥ २४ ॥ वसन्तितेषांसत्त्वानिनाना
जातीनिसर्वशः ॥ इदंतुभारतंवर्षंततोहैमवतंपरम् ॥ २५ ॥ हेमकूटात्परंचैवहरिवर्षंप्रचक्षते ॥ दक्षिणेनतुनीलस्यनिषधस्योत्तरेणच ॥ २६ ॥ प्रागा
यतोमहाभागामाल्यवान्नामपर्वतः ॥ ततःपरंमाल्यवतःपर्वतोगन्धमादनः ॥ २७ ॥ परिमण्डलस्तयोर्मध्येमेरुःकनकपर्वतः ॥ आदित्यतरुणाभा
सोविधूमइवपावकः ॥ २८ ॥ योजनानांसहस्राणिचतुरशीतिरुच्छ्रितः ॥ अधस्ताच्चतुरशीतिर्योजनानांद्विजोत्तमाः ॥ २९ ॥ ऊर्ध्वमधश्चतिर्यक्च
लोकानावृत्यतिष्ठति ॥ तस्यपार्श्वेष्वमीद्वीपाश्चत्वारःसंस्थिताद्विजाः ॥ ३० ॥ भद्राश्वःकेतुमालश्चजम्बूद्वीपश्चसत्तमाः ॥ उत्तराश्चैवकुरवःकृतपुण्य
प्रतिश्रयाः ॥ ३१ ॥ विहङ्गःसुमुखोयस्तुसुपार्श्वस्यात्मजःकिल ॥ सवैविचिन्तयामाससौवर्णान्प्रेक्ष्यवायसान् ॥ ३२ ॥ मेरुरुत्तममध्यानामधमा
नांचपक्षिणाम् ॥ अविशेषकरोयस्मात्तस्मादेनंत्यजाम्यहम् ॥ ३३ ॥ तमादित्योऽनुपर्येतिसततंज्योतिषांवरः ॥ चन्द्रमाश्चसनक्षत्रोवायुश्चैवप्रदक्षि
णः ॥ ३४ ॥ सपर्वतोमहाप्राज्ञादिव्यपुष्पसमन्वितः ॥ भवनैरावृतैःसर्वैर्जाम्बूनदमयैःशुभैः ॥ ३५ ॥ तत्रदेवगणाविप्रागन्धर्वासुरराक्षसाः ॥
अप्सरोगणसंयुक्ताःशैलेक्रीडन्तिसर्वदा ॥ ३६ ॥ तत्रब्रह्माचरुद्रश्चशक्रश्चापिसुरेश्वरः ॥ समेत्यविविधैर्यज्ञैर्यजन्तेऽनेकदक्षिणैः ॥ ३७ ॥ तुम्बुरुर्ना
रदश्चैवविश्वावसुर्हाहाहूहूः ॥ अभिगम्यामरश्रेष्ठंस्तुवन्तिविविधैःस्तवैः ॥ ३८ ॥ सप्तर्षयोमहात्मानःकश्यपश्चप्रजापतिः ॥ तत्रगच्छन्तिभद्रवः
सदापर्वणिपर्वणि ॥ ३९ ॥ तस्यैवमूर्द्धन्युशनाकाव्योदैत्यैर्महीयते ॥ तस्यहैमानिरत्नानितस्यैतेरत्नपर्वताः ॥ ४० ॥ तस्मात्कुबेरोभग
वांश्चतुर्थंभागमश्नुते ॥ ततःकलांशंवित्तस्यमनुष्येभ्यःप्रयच्छति ॥ ४१ ॥ पर्वतस्यान्तरेदिव्यंसर्वर्तुकुसुमैश्चितम् ॥ कर्णिकारवनंरम्यं
शिलाजालसमुच्छ्रितम् ॥ ४२ ॥ तत्रसाक्षात्पशुपतिर्दिव्यभूतैःसमावृतः ॥ उमासहायोभगवान्रमतेभूतभावनः ॥ ४३ ॥ कर्णि
कारमयींमालांबिभ्रदापादलम्बिनीम् ॥ त्रिभिर्नेत्रैःकृतोद्द्योतस्त्रिभिःसूर्यैरिवोदितैः ॥ ४४ ॥ तमुग्रतपसःसिद्धाःसुव्रताःसत्यवादिनः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पश्यन्तिनहिदुर्वृत्तैःशक्योद्रष्टुंमहेश्वरः ॥ ४५ ॥ तस्यशैलस्यशिखरात्क्षीरधाराद्विजोत्तमाः ॥ विश्वरूपात्परिमितभीमनिर्घातनिस्वनाः ॥ ४६ ॥
पुण्यापुण्यतमैर्जुष्टा गङ्गाभागीरथीशुभा ॥ प्लवन्तीचप्रवेगेनह्रदेचन्द्रमसःशुभे ॥ ४७ ॥ तयाह्युत्पादितःपुण्यःसह्रदःसागरोपमः ॥ तांधारयामास
तदादुर्द्धरांपर्वतैरपि ॥ ४८ ॥ शतंवर्षसहस्राणिशिरसैवपिनाकधृक् ॥ मेरोस्तुपश्चिमेपार्श्वेकेतुमालोद्विजोत्तमाः ॥ ४९ ॥ जम्बूखण्डेतुतत्रैवमहाजन
पदोद्विजाः ॥ आयुर्दशसहस्राणिवर्षाणांतत्रसत्तमाः ॥ ५० ॥ सुवर्णवर्णाश्चनराःस्त्रियश्चाप्सरसांसमाः ॥ अनामयावीतशोकानित्यंमुदितमानसाः
॥ ५१॥ जायन्तेमानवास्तत्रनिष्टप्तकनकप्रभाः ॥ गन्धमादनशृङ्गेषुकुबेरःसहराक्षसैः ॥ ५२ ॥ संवृतोऽप्सरसांसङ्घैर्मोदतेगुह्यकाधिपः ॥ गन्धमादन
पार्श्वेतुपरेविगतपातकाः ॥ ५३ ॥ एकादशसहस्राणिवर्षाणांपरमायुषः ॥ तत्रकृष्णानराविप्रास्तेजोयुक्तामहाबलाः ॥ ५४ ॥ स्त्रियश्चोत्पलपत्रा
भाःसर्वाःसुप्रियदर्शनाः ॥ नीलोत्पलधरंश्वेतंश्वेताद्धैरण्यकंवरम् ॥ ५५ ॥ वर्षमैरावतंविप्रानानाजनपदावृतम् ॥ धनुषीतेमहाभागाद्वेवर्षेदक्षिणोत्तरे
॥ ५६ ॥ इलावृतंमध्यगंतुपञ्चवर्षाणिचैवहि ॥ उत्तरोत्तरमेतेभ्योवर्षमुद्रिच्यतेगुणैः ॥ ५७ ॥ आयुःप्रमाणमारोग्यंधर्मतःकामतोऽर्थतः ॥ समन्वि
तानिभूतानितेषुसर्वेषुसत्तमाः ॥ ५८ ॥ एवमेषामहाभागाःपर्वतैःपृथिवीचिता ॥ हेमकूटस्तुसुमहान्कैलासोनामपर्वतः ॥ ५९ ॥ तत्रवैश्रवणोदेवो
गुह्यकैःसहमोदते ॥ अस्त्युत्तरेणकैलासंमैनाकंपर्वतंप्रति ॥ ६० ॥ हिरण्यशृङ्गःसुमहान्दिव्योमणिमयोगिरिः ॥ तस्यपार्श्वेमहद्दिव्यंशुभ्रंकाञ्चनवालु
कम् ॥ ६१ ॥ रम्यंविष्णुसरोनामयत्रराजाभगीरथः ॥ दृष्ट्वाभागीरथींगङ्गामुवासबहुलाःसमाः ॥ ६२ ॥ यूपामणिमयास्तत्रक्षेत्राश्चापिहिरण्म
याः ॥ तत्रेष्ट्वातुगतःसिद्धिंसहस्राक्षोमहायशाः ॥ ६३ ॥ स्रष्टाभूतिपतिर्यत्रसर्वलोकैःसनातनः ॥ उपास्यतेतिग्मतेजायत्रभूतैःसमन्ततः ॥ ६४ ॥ नर
नारायणौब्रह्मामनुःस्थाणुश्चपञ्चमः ॥ तत्रदिव्यात्रिपथगाप्रथमंतुप्रतिष्ठिता ॥ ६५ ॥ ब्रह्मलोकादपाक्रान्तासप्तधाप्रतिपद्यते ॥ वटोदकासानलिनी
पार्वतीचसरस्वती ॥ ६६ ॥ जम्बूनदीचसीताचगङ्गासिन्धुश्चसप्तमी ॥ अचिन्त्यादिव्यसंज्ञासाप्रभावैश्चसमन्विता ॥ ६७ ॥ उपास्यतेयत्रसत्रं
सहस्रयुगपर्यये ॥ दृश्याऽदृश्याचभवतितत्रतत्रसरस्वती ॥ ६८ ॥ एतादिव्याःसप्तगङ्गास्त्रिषुलोकेषुविश्रुताः ॥ रक्षांसिवैहिमवतिहेमकूटेचगुह्यकाः
॥ ६९ ॥ सर्पानागाश्चनिषधेगोकर्णंचतपोवनम् ॥ देवासुराणांसर्वेषांश्वेतःपर्वतउच्यते ॥ ७० ॥ गन्धर्वानिषधेनित्यंनीलेब्रह्मर्षयस्तथा ॥ शृङ्गवां
स्तुमहाभागादेवानांप्रतिसञ्चरः ॥ ७१ ॥ इत्येतानिमहाभागाःसप्तवर्षाणिभागशः ॥ भूतान्युपनिविष्टानिगतिमन्तिध्रुवाणिच ॥ ७२ ॥ तेषामृद्धि
र्बहुविधादृश्यतेदैवमानुषा ॥ अशक्यंपरिसङ्ख्यातुंश्रद्धेयातुविभूषिता ॥७३॥ यांतुपृच्छथमांविप्रादिव्यामेनांशशाकृतिम् ॥ पार्श्वेशशस्यद्वेवर्षेउक्तेये

CC-0. In Public Domain. Digitization by eGangotri

दक्षिणोत्तरे ॥७४॥ कर्णेतुनागद्वीपश्चकाश्यपद्वीपएवच ॥ कर्णद्वीपशिलोविप्राःश्रीमान्मलयपर्वतः ॥७५॥ एतद्वितीयंद्वीपस्यदृश्यतेशशिसंस्थितम्
॥७६॥ इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेतृतीयोऽध्यायः ॥३॥ ऋषयऊचुः ॥ मेरोरथोत्तरंपश्चात्पूर्वमाचक्ष्वसूतनः ॥ निखिलेनमहाबुद्धेमाल्यवन्तंच
पर्वतम् ॥१॥ सूतउवाच ॥ दक्षिणेनतुनीलस्यमेरोःपार्श्वेतथोत्तरे॥उत्तराःकुरवोविप्राःपुण्याःसिद्धनिषेविताः ॥२॥ तत्रवृक्षामधुफलानित्यपुष्पफलो
पगाः ॥ पुष्पाणिचसुगन्धीनिरसवन्तिफलानिच ॥३॥ सर्वकामफलास्तत्रकेचिद्वृक्षाद्विजोत्तमाः॥अपरेक्षीरिणोनामवृक्षास्तत्रद्विजोत्तमाः ॥४॥ येक्ष
रन्तिसदाक्षीरंतत्रपञ्चामृतोपमम् ॥ वस्त्राणिचप्रसूयन्तेफलेष्वाभरणानिच ॥ ५ ॥ सर्वामणिमयीभूमिःसूक्ष्मकाञ्चनवालुका ॥ सर्वर्तुसुखसंस्पर्शा
निर्मलाश्चतपोधनाः ॥६॥ देवलोकच्युताःसर्वेजायन्तेतत्रमानवाः ॥ शुक्लाभिजनसम्पन्नाःसर्वेसुप्रियदर्शनाः ॥ ७ ॥ मिथुनानिचजायन्तेस्त्रियश्चाप्स
रसोपमाः ॥ तेषांतेक्षीरिणांक्षीरंपिबन्त्यमृतसन्निभम् ॥८॥ मिथुनंजायतेकालेसमन्ताच्चप्रवर्द्धते ॥ तुल्यरूपगुणोपेतंसमवेशंतथैवच ॥९॥ एकमेवानु
रूपंचचक्रद्वयसमंद्विजाः ॥ निरामयाश्चतेलोकानित्यंमुदितमानसाः ॥१०॥ दशवर्षसहस्राणिदशवर्षशतानिच ॥ जीवन्तितेमहाभागानचान्योन्यंजह
त्युत ॥११॥ भारुडानामशकुनास्तीक्ष्णतुण्डामहाबलाः॥तान्निर्हरन्तीहमृतान्दरीषुप्रक्षिपन्तिच ॥१२॥ उत्तराःकुरवोविप्राव्याख्यातास्तेसमासतः ॥
मेरुपार्श्वमहंपूर्वंप्रवक्ष्यामियथातथम् ॥१३॥ तस्यमूर्द्धाभिषेकस्तुभद्राश्वस्यतपोधनाः॥भद्रशालवनंयत्रकालाम्राश्चमहाद्रुमाः ॥१४॥ कालाम्रास्तुम
हाभागानित्यंपुष्पफलाःशुभाः ॥ द्रुमाश्चयोजनोत्सेधाःसिद्धचारणसेविताः ॥ १५ ॥ तत्रतेपुरुषाःश्वेतास्तेजोयुक्तामहाबलाः ॥ स्त्रियःकुमुदवर्णाश्च
सुन्दर्यःप्रियदर्शनाः ॥ १६ ॥ चन्द्रवर्णाश्चतुर्वर्णाःपूर्णचन्द्रनिभाननाः ॥ चन्द्रशीतलगात्राश्चनृत्यगीतविशारदाः ॥ १७ ॥ दशवर्षसहस्राणितत्रा
युर्द्विजसत्तमाः ॥ कालाम्ररसपीतास्तेनित्यंसंस्थितयौवनाः ॥ १८ ॥ दक्षिणेनतुनीलस्यनिषधस्योत्तरेणतु ॥ सुदर्शनोनाममहाजम्बूवृक्षःसनातनः
॥ १९ ॥ सर्वकामफलःपुण्यःसिद्धचारणसेवितः ॥ तस्यनाम्नासमाख्यातोजम्बूद्वीपःसनातनः ॥ २० ॥ योजनानांसहस्रंचशतंचद्विजसत्तमाः ॥
तथामाल्यवतःशृङ्गेपूर्वेपूर्वानुगान्तकाः ॥ २१ ॥ योजनानांसहस्राणिपञ्चाशन्माल्यवान्द्विजाः ॥ महारजतसङ्काशाजायन्तेतत्रमानवाः ॥२२॥ ब्रह्म
लोकच्युताःसर्वेसर्वेचब्रह्मवादिनः ॥ तपस्तप्यन्तितेदिव्यंभवन्तिह्यूर्ध्वरेतसः ॥ २३ ॥ रक्षणार्थंतुभूतानांप्रविशन्तिदिवाकरम्॥षष्टिस्तानिसहस्राणिष ॥ ३ ॥
ष्टिरेवशतानिच ॥२४॥ अरुणस्याग्रतोयान्तिपरिवार्यदिवाकरम् ॥ षष्टिवर्षसहस्राणिषष्टिरेवशतानिच ॥२५॥ आदित्यतापतप्तास्तेविशन्तिशशिम
ण्डलम्॥२६॥इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेचतुर्थोऽध्यायः ॥४॥ ऋषयऊचुः॥वर्षाणांचैवनामानिपर्वतानांचसत्तम॥आचक्ष्वनोयथातत्त्वंयेचपर्वत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वासिनः ॥ १ ॥ सूतउवाच ॥ दक्षिणेनतुश्वेतस्यनिषधस्योत्तरेणतु ॥ वर्षंरमणकंनामजायन्तेतत्रमानवाः ॥ २ ॥ शुक्लाभिजनसम्पन्नाःसर्वेतेप्रियद र्शनाः ॥निःसपत्नाश्चतेसर्वेजायन्तेतत्रमानवाः ॥३॥ दशवर्षसहस्राणिशतानिदशपञ्च च ॥ जीवन्तितेमहाभागानित्यंमुदितमानसाः ॥४॥ दक्षिणेनतु नीलस्यनिषधस्योत्तरेणतु ॥ वर्षंहिरण्मयंनामयत्रहैरण्वतीनदी ॥ ५ ॥ यत्रचायंमहाप्राज्ञाःपक्षिराट्पतगोत्तमः ॥ यज्ञानुगाविप्रवराधन्विनःप्रियदर्श नाः ॥ ६ ॥ महाबलास्तत्रजनाविप्रामुदितमानसाः ॥ एकादशसहस्राणिवर्षाणांतेतपोधनाः ॥ ७ ॥ आयुःप्रमाणंजीवन्तिशतानिदशपञ्च च ॥ शृङ्गा णिचपवित्राणित्रीण्येवद्विजपुङ्गवाः ॥ ८ ॥ एकंमणिमयंतत्रतथैकंरौक्ममद्भुतम् ॥ सर्वरत्नमयंचैकंभवनैरुपशोभितम् ॥ ९ ॥ तत्रस्वयंप्रभादेवीनि त्यंवसतिशृङ्गिनी ॥ उत्तरेणतुशृङ्गस्यसमुद्रान्तेद्विजोत्तमाः ॥ १० ॥ वर्षमैरावतंनामतस्माच्छृङ्गवतःपरम् ॥ नतुतत्रसूर्यगतिर्जीर्यन्तेनचमानवाः ॥ ११ ॥ चन्द्रमाश्चसनक्षत्रोज्योतिर्भूतइवावृतः ॥ पद्मप्रभाःपद्मवर्णाःपद्मपत्रनिभेक्षणाः ॥ १२ ॥ पद्मपत्रसुगन्धाश्चजायन्तेतत्रमानवाः ॥ अनिष्प न्नानष्टगन्धानिराहाराजितेन्द्रियाः ॥१३॥ देवलोकच्युताःसर्वेतथाविरजसोद्विजाः ॥ त्रयोदशसहस्राणिवर्षाणांतेद्विजोत्तमाः ॥१४॥ आयुःप्रमाणंजी वन्तिनराधार्मिकपुङ्गवाः ॥ क्षीरोदस्यसमुद्रस्यतथैवोत्तरतःप्रभुः ॥ १५ ॥ हरिस्तिष्ठतिवैकुण्ठःशकटेकनकामये ॥ अष्टचक्रंहितद्यानंभूतयुक्तंमनोजव म् ॥१६॥ अग्निवर्णंमहातेजोजाम्बूनदविभूषितम् ॥ सप्रभुःसर्वभूतानांविभुश्चद्विजसत्तमाः ॥१७ ॥ संक्षेपेविस्तरेचैवकर्ताकारयितातथा ॥ पृथिव्याप स्तथाकाशंवायुस्तेजश्चसत्तमाः ॥१८॥ सयज्ञःसर्वभूतानामास्यंतस्यहुताशनः ॥१९॥ इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेपञ्चमोऽध्यायः ॥ ५ ॥ ऋष यऊचुः ॥ यदिदंभारतंवर्षंपुण्यंपुण्यविधायकम् ॥ तत्सर्वंनःसमाचक्ष्वत्वंहिनोबुद्धिमान्मतः ॥ १ ॥ सूतउवाच ॥ अत्रवःकीर्त्तयिष्यामिवर्षंभारतमुत्त मम् ॥ प्रियमित्रस्यदेवस्यमनोर्वैवस्वतस्यच ॥२॥ पृथोश्चप्राज्ञावैन्यस्यतथेक्ष्वाकोर्महात्मनः ॥ ययातेरम्बरीषस्यमान्धातुर्नहुषस्यच ॥ ३ ॥ तथैव मुचुकुन्दस्यकुवेरोशीनरस्यच ॥ ऋषभस्यतथैलस्यनृगस्यनृपतेस्तथा ॥ ४ ॥ कुशिकस्यैवराजर्षेर्गाधेश्चैवमहात्मनः ॥ सोमस्यचैवराजर्षेर्दिलीपस्य तथैवच ॥ ५ ॥ अन्येषांचमहाभागाःक्षत्रियाणांबलीयसाम् ॥ सर्वेषामेवभूतानांप्रियंभारतमुत्तमम् ॥ ६ ॥ ततोवर्षंप्रवक्ष्यामियथाश्रुतमहोद्विजाः ॥ महेन्द्रोमलयःसह्यःशक्तिमानृक्षवानपि ॥ ७ ॥ विन्ध्यश्चपारियात्रश्चसप्तैतेकुलपर्वताः ॥ तेषांसहस्रशोविप्राःपर्वतास्तेसमीपतः ॥८॥ अविज्ञाताःसार वन्तोविपुलाश्चित्रसानवः॥अन्येतुयेपरिज्ञाताह्रस्वाह्रस्वोपजीविनः ॥९॥ आर्यम्लेच्छसधर्माणस्तेमिश्राःपुरुषद्विजाः ॥ नदींपिबन्तिविमलांगङ्गांसि न्धुंसरस्वतीम् ॥१०॥ गोदावरींनर्मदांचबहूदांचमहानदीम्॥शतद्रुंचन्द्रभागांचयमुनांचमहानदीन् ॥११॥ दृषद्वतींवितस्तांचविपाशांस्वच्छवालुका

CC-0. In Public Domain. Digitization by eGangotri

म् ॥ नदींवेत्रवतींचैवकृष्णांवेणींचनिम्नगाम् ॥ १२ ॥ इरावतींवितस्तांचपयोष्णींदेविकामपि ॥ वेदस्मृतिंवेदशिरांत्रिदिवांसिन्धुलाकृमिम् ॥ १३ ॥
करीषिणींचित्रवहांत्रिसेनांचैवनिम्नगाम् ॥ गोमतींधूतपापांचचन्दनांचमहानदीम् ॥ १४ ॥ कौशिकींत्रिदिवांहृद्यांनाचितांरोहितारणीम् ॥ रह
स्यांशतकुम्भांचसरयूंचद्विजोत्तमाः ॥१५॥ चर्मण्वतींवेत्रवतींहस्तिसोमांदिशंतथा ॥ शरावतींपयोष्णींचभीमांभीमरथीमपि ॥१६॥ कावेरींचुलुकांचा
पितापींशतमलामपि ॥ नीवारांमहितांचापिसुप्रयोगांतथानदीम् ॥१७॥ पवित्रांकृष्णलांसिन्धुंवाजिनींपुरमालिनीम् ॥ पूर्वाभिरामांवीरांचभीमांमा
लावतींतथा ॥१८॥ पलाशिनींपापहरांमहेन्द्रांपाटलावतीम् ॥ करीषिणीमसिक्नींचकुशचीरींमहानदीम् ॥ १९ ॥ मरुतांप्रवरांमेनांहेमांघृतवतींतथा ॥
अनावतीमनुष्णांचसेव्यांकापींचसत्तमाः ॥२०॥ सदावीरामधृष्यांचकुशचीरांमहानदीम्॥रथचित्रांज्योतिरथांविश्वामित्रांकपिञ्जलाम्॥२१॥ उपेन्द्रां
बहुलांचैवकुचीरामम्बुवाहिनीम् ॥ वैनन्दींपिङ्गलांवेणांतुङ्गवेगांमहानदीम् ॥२२॥ विदिशांकृष्णवेणांचताम्रांचकपिलामपि ॥ धेनुंसकामांवेदस्वांह
विःस्रावांमहापथाम् ॥२३॥ क्षिप्रांचपिच्छलांचैवभारद्वाजींचनिम्नगाम् ॥ कौणिकींनिम्नगांशोणांबाहुदामथचन्द्रमाम् ॥२४॥ दुर्गामन्तःशिलांचैवब्र
ह्ममेध्यांदृषद्वतीम् ॥ परोक्षामथरोहींचतथाजम्बूनदीमपि ॥२५॥ सुनासांतमसांदासींसामान्यांवरणामसिम् ॥ नीलांधृतिकरींचैवपर्णाशांचमहानदीम्
॥२६॥ मानवींवृषभांभासांब्रह्ममेध्यांदृषद्वतीम् ॥ एताश्चान्याश्चबहुलामहानद्योद्विजर्षभाः ॥२७॥ सदानिरामयांकृष्णांमन्दगांमन्दवाहिनीम् ॥ ब्राह्म
णींचमहागौरींदुर्गामपिचसत्तमाः ॥२८॥ चित्रोत्पलांचित्ररथामतुलांरोहिणींतथा॥मन्दाकिनींवैतरणींकोकांचापिमहानदीम् ॥२९॥ शुक्तिमतीमनङ्गां
चतथैववृषसाह्वयाम्॥ लोहित्यांकरतोयांचतथैववृषकाह्वयाम् ॥३०॥ कुमारीमृषितुल्यांचमारिषांचसरस्वतीम् ॥ मन्दाकिनींसुपुण्यांचसर्वांगङ्गांचस
त्तमाः ॥३१॥ विश्वस्यमातरःसर्वाःसर्वाश्चैवमहाफलाः॥तथानद्यःसुप्रकाशाःशतशोऽथसहस्रशः॥३२॥इत्येतास्सरितोविप्राःसमाख्यातायथास्मृति॥
अतऊर्द्ध्वंजनपदान्निबोधतवदाम्यहम् ॥३३॥ तत्रेमेकुरुपाञ्चलाःशाल्वमात्रेयजाङ्गलाः ॥ शूरसेनाःपुलिन्दाश्चबौधामालास्तथैवच ॥३४॥ मत्स्याः
कुशट्टाःसौगन्ध्याःकुत्सपाःकाशिकोशलाः॥चेदिमत्स्यकरूषाश्चभोजाःसिन्धुपुलिन्दकाः ॥३५॥ उत्तमाश्चदशार्णाश्चमेकलाश्चोत्कलैःसह ॥पञ्चालाः
कोशलाश्चैवनैकपृष्ठयुगन्धराः॥३६॥बोधमद्राःकलिङ्गाश्चकाशयोऽपरकाशयः ॥ जठराःकुकुराश्चैवसुदशार्णाःसुसत्तमाः॥३७॥कुन्तयोऽवन्तयश्चैवतथै ॥ ४ ॥
वापरकुन्तयः॥ गोमन्तामल्लकाःपुण्ड्राविदर्भानूपवाहिकाः ॥३८॥ अश्मकाःसोत्तराश्चैवगोपराष्ट्राःकनीयसः ॥ अधिराज्यकुशट्टाश्चमल्लराष्ट्राश्चकेर
लाः ॥३९॥ मालवाश्चोपवास्याश्चचक्रावक्रालयाःशकाः॥विदेहामगधाःसह्मामलजाविजयास्तथा ॥४०॥ अङ्गावङ्गाःकलिङ्गाश्चयकृल्लोमानएवच॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मल्लाःसुदेष्णाःप्रह्लादामहिषाःशशकास्तथा ॥ ४१ ॥ बाह्लिकावाटधानाश्चआभीराःकालतोयकाः ॥ अपरान्ताःपरान्ताश्चपङ्कलाश्चर्मचण्डिकाः
॥४२॥ अटवीशेखराश्चैवमेरुभूताश्चसत्तमाः॥उपावृतानुपावृताःसुराष्ट्राःकेकयास्तथा ॥४३॥ कुट्टापरान्तामाहेयाःकक्षाःसामुद्रनिष्कुटाः ॥ अन्धाश्च
बहवोविप्राअन्तर्गिर्यस्तथैवच ॥ ४४ ॥ बहिर्गिर्य्योऽङ्गमलदामगधामालवार्घटाः ॥ सत्वतराःप्रावृषेयाभार्गवाश्चद्विजर्षभाः ॥ ४५ ॥ पुण्ड्राभार्गाः
किरातश्चसुदेष्णाभासुरास्तथा ॥ शकानिषादानिषधास्तथैवानर्तनैर्ऋताः ॥४६॥ पूर्णलाःपूतिमत्स्याश्चकुन्तलाःकुशकास्तथा ॥ तरिग्रहाश्शूरसेना
ईजिकाःकल्पकारणाः ॥४७॥ तिलभागामसाराश्चमधुमत्ताःककुन्दकाः ॥ काश्मीराःसिन्धुसौवीरागान्धारादर्शकास्तथा ॥४८॥ अभीसाराःकुद्रुता
श्चसौरिलाबाह्लिकास्तथा ॥ दर्वीचमालवादर्वावातजामरथोरगाः ॥ ४९ ॥ बलरट्टास्तथाविप्राःसुदामानःसुमल्लिकाः ॥ बन्धाकरीकषाश्चैवकुलिन्दा
गन्धिकास्तथा ॥ ५० ॥ वनायवोदशाःपार्श्वरोमाणःकुशबिन्दवः ॥ काच्छागोपालकच्छाश्चजाङ्गलाःकुरुवर्णकाः ॥ ५१ ॥ किराताबर्बराःसिद्धा
वैदेहास्ताम्रलिप्तिकाः ॥ ओड्रम्लेच्छाःससैरिन्ध्राःपार्वतीयाश्चसत्तमाः ॥ ५२ ॥ अथापरेजनपदादक्षिणामुनिपुङ्गवाः ॥ द्रविडाःकेरलाःप्राच्यामूषि
काबालमूषिकाः ॥ ५३ ॥ कर्णाटकामाहिषकाविकन्धामूषिकास्तथा ॥ झल्लिकाःकुन्तलाश्चैवसौहृदानलकाननाः ॥ ५४ ॥ कौक्कुटकास्तथाबो
लाःकोकणामणिवालकाः ॥ समङ्गाःकनकाश्चैवकुकुराङ्गारमारिषाः ॥ ५५ ॥ ध्वजिन्युत्सवसङ्केतास्त्रिवर्गामाल्यसेनयः ॥ व्यूढकाःकोरकाःप्रोष्टाःस
ङ्गवेगधरास्तथा ॥ ५६ ॥ तथैवविन्ध्यरुलिकाःपुलिन्दाबल्वलैःसह ॥ मालवामलराश्चैवतथैवापरवर्तकाः ॥ ५७ ॥ कुलिन्दाःकालदाश्चैवचण्डकाःकु
रटास्तथा ॥ मुशलास्तनवालाश्चसतीर्थापूतिसृञ्जयाः ॥ ५८ ॥ अनिदायाःशिवाटाश्चतपनाःसूतपास्तथा ॥ ऋषिकाश्चविदर्भाश्चस्तङ्गनापरतङ्गकाः
॥ ५९ ॥ उत्तराश्चापरेम्लेच्छाजनाहिमुनिपुङ्गवाः ॥ जवनाश्चसकाङ्गोजादारुणाम्लेच्छजातयः ॥ ६०॥ सकृद्गृहाःकुलत्थाश्चहूणाःपारसिकैःसह ॥
तथैवरमणाश्चान्यास्तथाचदशमालिकाः ॥ ६१ ॥ क्षत्रियोपनिवेशाश्चवैश्यशूद्रकुलानिच ॥ शूराभीराश्चदरदाःकाश्मीराःपशुभिःसह ॥ ६२ ॥ खां
ण्डीकाश्चतुषाराश्चपह्नगागिरिगह्वराः ॥ आद्रेयाःसभिरादाजास्तथैवस्तनपोषकाः ॥ ६३ ॥ द्रोषकाश्चकलिङ्गाश्चकिरातानांचजातयः ॥ तोमराहन्य
मानाश्चतथैवकरभञ्जकाः ॥६४॥ एतेचान्येजनपदाःप्राच्योदीच्यास्तथैवच॥उद्देशमात्रेणमयादेशाःसङ्कीर्तिताद्विजाः ॥६५॥ यथागुणबलंचापित्रिव
र्गस्यमहाफलम् ॥ ६६ ॥ इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेषष्ठोऽध्यायः ॥ ६ ॥ ऋषयऊचुः ॥ भारतस्यास्यवर्षस्यतथाहैमवतस्यच ॥ प्रमाणमा
युषःसूतबलंचापिशुभाशुभम् ॥ १ ॥ अनागतमतिक्रान्तंवर्तमानंचसत्तम ॥ आचक्ष्वनोविस्तरेणहरिवर्षंतथैवच ॥ २ ॥ सूतउवाच ॥ चत्वारिभार

CC-0. In Public Domain. Digitization by eGangotri

तेवर्षेयुगानिमुनिपुङ्गवाः ॥ कृतंत्रेताद्वापरंचकलिश्चद्विजसत्तमाः ॥ ३ ॥ पूर्वंकृतयुगंनामततस्त्रेतायुगंद्विजाः ॥ तत्पश्चाद्वापरंचाथततस्तिष्यःप्रवर्तते
॥ ४ ॥ चत्वारितुसहस्राणिवर्षाणांमुनिपुङ्गवाः ॥ आयुःसङ्ख्याकृतयुगेसङ्ख्याताहितपोधनाः ॥ ५ ॥ तथात्रीणिसहस्राणित्रेतायामायुषोविदुः ॥ द्वे
सहस्रेद्वापरेतुभुवितिष्ठन्तिसाम्प्रतम् ॥ ६ ॥ तत्प्रमाणस्थितिर्ह्यस्तितिष्येतुमुनिपुङ्गवाः ॥ गर्भस्थाश्चम्रियन्तेऽत्रतथाजाताम्रियन्तिच ॥ ७ ॥ महाब
लामहासत्त्वाःप्रज्ञागुणसमन्विताः ॥ प्रजायन्तेचजाताश्चशतशोऽथसहस्रशः ॥ ८ ॥ द्विजाःकृतयुगेविप्राबलिनःप्रियदर्शनाः ॥ प्रजायन्तेचजाताश्च
मुनयोवैतपोधनाः ॥ ९ ॥ महोत्साहामहात्मानोधार्मिकाःसत्यवादिनः ॥ प्रियदर्शावपुष्मन्तोमहावीर्याधनुर्धराः ॥ १० ॥ वीराहियुधिजायन्तेक्ष
त्रियाःशूरसंमताः ॥ त्रेतायांक्षत्रियास्तावत्सर्वेवैचक्रवर्तिनः ॥११॥ सर्ववर्णाश्चजायन्तेसदैवद्वापरेयुगे ॥ महोत्साहावीर्यवन्तःपरस्परवधैषिणः ॥१२॥
तेजसान्धेनसंयुक्ताःक्रोधनाःपुरुषाःकिल ॥ लुब्धाश्चानृतकाश्चैवतिष्येजायन्तिभोद्विजाः ॥ १३ ॥ ईर्ष्यामानस्तथाक्रोधोमायाऽसूयातथैवच ॥ ति
ष्येभवन्तिभूतानांरागोलोभश्चसत्तमाः ॥ १४ ॥ संक्षेपोवर्त्ततेविप्राद्वापरेयुगमध्यगे ॥ गुणोत्तरंहैमवतंहरिवर्षंततःपरम् ॥ १५ ॥ इतिश्रीपाद्मेमहापुरा
णेस्वर्गखण्डेसप्तमोऽध्यायः ॥७॥ ऋषयऊचुः ॥ जम्बूखण्डस्त्वयाप्रोक्तोयथावदिहसत्तम ॥ विष्कम्भस्यचप्रब्रूहिपरिमाणंहितत्त्वतः ॥१॥ समुद्रस्य
प्रमाणंचसम्यगच्छिद्रदर्शन ॥ शाकद्वीपंचनोब्रूहिकुशद्वीपंचधार्मिक ॥२॥ शाल्मलंचैवतत्त्वेनक्रौञ्चद्वीपंतथैवच ॥ ३ ॥ सूतउवाच ॥ विप्राःसुबहवोद्वी
पायैरिदंसन्ततंजगत् ॥ सप्तद्वीपान्प्रवक्ष्यामिशृणुध्वंद्विजपुङ्गवाः ॥ ४ ॥ अष्टादशसहस्राणियोजनानिद्विजोत्तमाः ॥ षट्छतानिचपूर्णानिविष्कम्भोज
म्बुपर्वतः ॥ ५ ॥ लवणस्यसमुद्रस्यविष्कम्भोद्विगुणःस्मृतः ॥ नानाजनपदाकीर्णोमणिविद्रुमचित्रितः ॥ ६ ॥ नैकधातुविचित्रैश्चपर्वतैरुपशोभितः ॥
सिद्धचारणसङ्कीर्णःसागरःपरिमण्डलः ॥ ७ ॥ शाकद्वीपंचवक्ष्यामियथावदिहसत्तमाः ॥ शृणुताद्ययथान्यायंब्रुवतोममधार्मिकाः ॥ ८ ॥ जम्बूद्वीपप्र
माणेनद्विगुणःसद्विजर्षभाः ॥ विष्कम्भनमहाभागाःसागरोऽपिविभागशः ॥ ९ ॥ क्षीरोदोमुनिशार्दूलायेनसम्परिवारितः ॥ तत्रपुण्याजनपदास्तत्रन
म्रियतेजनः ॥१०॥ कुतएवहिदुर्भिक्षंक्षमातेजोयुताहिते॥शाकद्वीपस्यसंक्षेपोयथावन्मुनिसत्तमाः ॥ उक्तएषमहाभागाःकिमन्यत्कथयामिवः ॥११॥
ऋषयऊचुः ॥ शाकद्वीपस्यसंक्षेपोयथावदिहधार्मिक ॥ उक्तस्त्वयामहाप्राज्ञविस्तरंब्रूहितत्त्वतः ॥१२॥ सूतउवाच ॥तथैवपर्वताविप्राःसप्तात्रमणिपर्व
ताः ॥ रत्नाकरास्तथानद्यस्तेषांनामानिवर्णये ॥ १३ ॥ अतीवगुणवत्सर्वंतत्त्वंपृच्छथधार्मिकाः ॥ देवर्षिगन्धर्वयुतःप्रथमोमेरुरुच्यते ॥ १४ ॥ प्रागा
यतोमहाभागामलयोनामपर्वतः ॥ ततोमेघाःप्रवर्त्तन्तेप्रभवन्तिचसर्वशः ॥ १५ ॥ ततःपरंणमुनयोजलधारोमहागिरिः ॥ ततोनित्यमुपादत्तेवास

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वःपरमंजलम् ॥ १६ ॥ ततोवर्षंप्रभवतिवर्षाकालेद्विजोत्तमाः ॥ उच्चैर्गिरीरैवतकोयत्रनित्यंप्रतिष्ठितम् ॥ १७ ॥ रेवतीदिविनक्षत्रंपितामहकृतो
विधिः ॥ उत्तरेणतुविप्रेन्द्राःश्यामोनाममहागिरिः ॥ १८ ॥ नवमेघप्रभःप्रांशुःश्रीमानुज्ज्वलविग्रहः ॥ यतःश्यामत्वमापन्नाःप्रजामुदितमानसाः
॥ १९ ॥ ऋषयऊचुः ॥सुमहान्संशयोऽस्माकंप्राप्तोऽयंसूतयत्त्वया ॥ प्रजाःकथंसूतसम्यक्सम्प्राप्ताःश्यामतामिह ॥ २० ॥ सूतउवाच ॥ सर्वेष्वेवम
हाप्राज्ञाद्वीपेषुमुनिपुङ्गवाः ॥ गौरःकृष्णश्चपतगस्तयोर्वर्णान्तरेद्विजाः ॥ २१ ॥ श्यामोयस्मात्प्रवृत्तोवैतस्माच्छ्यामगिरिःस्मृतः ॥ ततःपरंमुनि
श्रेष्ठादुर्गशैलोमहोदयः ॥ २२ ॥ केशरीकेशरयुतोयतोवातःप्रवर्त्तते ॥ तेषांयोजनविष्कम्भोद्विगुणःप्रविभागशः ॥ २३ ॥ वर्षाणितेषुविप्रेन्द्राःस
म्प्रोक्तानिमनीषिभिः ॥ महामेरुर्महाकाशोजलदःकुमुदोत्तरम् ॥ २४ ॥ जलधारोमहाप्राज्ञःसुकुमारइतिस्मृतः ॥ रेवतस्यतुकौमारःश्यामश्चमणि
काञ्चनः ॥ २५ ॥ केशरस्याथमौदाकीपरेणतुमहान्पुमान् ॥ परिवार्य्यतुविप्रेन्द्रादैर्घ्यंह्रस्वत्वमेवच ॥ २६ ॥ जम्बूद्वीपेनसङ्ख्यातस्तस्यमध्येमहा
द्रुमः ॥ शाकोनाममहाप्राज्ञाःप्रजास्तस्यसहानुगाः ॥ २७ ॥ तत्रपुण्याजनपदाःपूज्यतेतत्रशङ्करः ॥ तत्रगच्छन्तिसिद्धाश्चचारणादैवतानिच ॥
॥ २८ ॥ धार्मिकाश्चप्रजाःसर्वाश्चत्वारोगतमत्सराः ॥ वर्णाःस्वकर्मनिरतानचस्तेनोऽत्रदृश्यते ॥ २९ ॥ दीर्घायुषोमहाप्राज्ञाजरामृत्युविवर्जिताः ॥
प्रजास्तत्रविवर्द्धन्तेवर्षास्विवसमुद्रगाः ॥ ३० ॥ नद्यःपुण्यजलास्तत्रगङ्गाचबहुधागता ॥ सुकुमारीकमारीचशीताशीतोदकातथा ॥ ३१ ॥ महा
नदीचभोविप्रास्तथामणिजलानदी ॥ इक्षुवर्द्धनिकाचैवनदीमुनिवराःस्मृताः ॥ ३२ ॥ ततःप्रवृत्ताःपुण्योदानद्यःपरमशोभनाः ॥ सहस्राणांशता
न्येवयतोवर्षतिवासवः ॥ ३३ ॥ नतासांनामधेयानिपरिस्मर्तुंतथैवच ॥ शक्यन्तेपरिसङ्ख्यातुंपुण्यास्ताहिसरिद्वराः ॥ ३४ ॥ ततःपुण्याजनपदाश्च
त्वारोलोकविश्रुताः ॥ मृगाश्चमशकाश्चैवमानसामछकास्तथा ॥ ३५ ॥ मृगाश्चब्रह्मभूयिष्ठाःस्वकर्मनिरताद्विजाः ॥ मशकेषुतुराजन्याधार्मिकाः
सर्वकामदाः ॥ ३६ ॥ मानसाश्चमहाभागावैश्यधर्मोपजीविनः ॥ सर्वकामसमायुक्ताःशूराधर्मार्थनिश्चिताः ॥ ३७ ॥ शूद्रास्तुमछकानित्यंपुरुषाध
र्मशीलिनः ॥ नतत्रराजाविप्रेन्द्रानदण्डोनचदण्डिकाः ॥ ३८ ॥ स्वधर्मेणैवधर्मज्ञास्तेरक्षन्तिपरस्परम् ॥ एतावदेवशक्यंतुतत्रद्वीपेप्रभाषितुम् ॥ ३९ ॥
एतदेवचश्रोतव्यंशाकद्वीपेमहौजसि ॥ ४० ॥ इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेऽष्टमोध्यायः ॥ ८ ॥ सूतउवाच ॥उत्तरेषुचभोविप्राद्वीपेषुश्रूयतेकथा ॥
एवंतत्रमहाभागाब्रुवतस्तन्निबोधत ॥ १ ॥ घृततोयःसमुद्रोऽथदधिमण्डोदकोऽपरः ॥ सुरोदसागरश्चैवतथान्योदुग्धसागरः ॥ २ ॥ परस्परेणद्वि
गुणाःसर्वेद्वीपाद्विजर्षभाः ॥ पर्वताश्चमहाप्राज्ञाःसमुद्रैःपरिवारिताः ॥ ३ ॥ गौरस्तुमध्यमेद्वीपेगिरिर्मनःशिलोमहान् ॥ पर्वतःपश्चिमेकृष्णोनाराय

CC-0. In Public Domain. Digitization by eGangotri

णसखोद्विजाः ॥ ४ ॥ तत्ररत्नानिदिव्यानिस्वयंरक्षतिकेशवः ॥ प्रसन्नश्चाभवत्तत्रप्रजानांव्यदधात्सुखम् ॥ ५ ॥ शरद्वीपेकुशस्तम्बोमध्येजनपद
स्यह ॥ सम्पूज्यतेशाल्मलिश्चद्वीपेशाल्मलिकेद्विजाः ॥ ६ ॥ क्रौञ्चद्वीपेमहाक्रौञ्चोगिरीरत्नचयाकरः ॥ सम्पूज्यतेभोविप्रेन्द्राश्चातुर्वर्ण्येननित्यशः
॥ ७ ॥ गोमन्तःपर्वतोविप्राःसुमहान्सर्वधातुकः ॥ यत्रनित्यंनिवसतिश्रीमान्कमललोचनः ॥ ८ ॥ मोक्षिभिःसङ्गतोनित्यंप्रभुर्नारायणोहरिः ॥
कुशद्वीपेतुविप्रेन्द्राःपर्वतोविद्रुमैश्चितः ॥ ९ ॥ सुनामाचसुदुर्धर्षोद्वितीयोहेमपर्वतः ॥ द्युतिमान्नामविप्रेन्द्रास्तृतीयःकुमुदोगिरिः ॥ १० ॥ चतुर्थःपु
ष्पवान्नामपञ्चमस्तुकुशेशयः ॥ षष्ठोहरिगिरिर्नामषडेतेपर्वतोत्तमाः ॥ ११ ॥ तेषामन्तरविष्कम्भोद्विगुणःप्रविभागशः ॥ औद्भिदंप्रथमंवर्षंद्वितीयं
रेणुमण्डलम् ॥ १२ ॥ तृतीयंसुरथंनामचतुर्थंलम्बनंस्मृतम् ॥ धृतिमत्पञ्चमंवर्षंषष्ठंवर्षंप्रभाकरम् ॥ १३ ॥ सप्तमंकापिलंवर्षंसप्तैतेवर्षलम्बकाः ॥ एते
षुदेवगन्धर्वाःप्रजाश्चमुदिताद्विजाः ॥ १४ ॥ विहरन्तिरमन्तेचनतेषुम्रियतेजनः ॥ नतेषुदस्यवःसन्तिम्लेच्छजात्योऽपिवाद्विजाः ॥ १५ ॥ गौरप्रा
योजनःसर्वःसुकुमारश्चसत्तमाः ॥ अवशिष्टेषुसर्वेषुवक्ष्यामिद्विजपुङ्गवाः ॥ १६ ॥ यथाश्रुतंमहाप्राज्ञावर्ण्यतेशृणुतद्विजाः ॥ क्रौञ्चद्वीपेमहाभागाः
क्रौञ्चोनाममहागिरिः ॥१७॥ क्रौञ्चात्परोवामनकोवामनादन्धकारकः ॥ अन्धकारात्परोविप्रामैनाकःपर्वतोत्तमः ॥ १८ ॥ मैनाकात्परतोविप्रागो
विन्दोगिरिरुत्तमः ॥ गोविन्दात्परतश्चैवपुण्डरीकोमहागिरिः ॥ १९ ॥ पुण्डरीकात्परश्चापिप्रोच्यतेदुन्दुभिस्वनः ॥ पुरस्ताद्द्विगुणस्तेषांविष्कम्भोमु
निङ्गवाः ॥ २० ॥ देशांस्तत्रप्रवक्ष्यामितन्मेनिगदतःशृणु ॥ क्रौञ्चस्यकुशलोदेशोवामनस्यमनोऽनुगः ॥ २१ ॥ मनोऽनुगात्परोदेशउष्णोनामतपो
धनः ॥ उष्णात्परःप्रावरकःप्रावरादन्धकारकः ॥ २२ ॥ अन्धकारकदेशात्तुमुनिदेशःपरःस्मृतः ॥ मुनिदेशात्परश्चैवप्रोच्यतेदुन्दुभिस्वनः
॥ २३ ॥ सिद्धचारणसङ्कीर्णोगौरःप्रायोजनःस्मृतः ॥ एतेदेशाःसमाख्यातादेवगन्धर्वसेविताः ॥ २४ ॥ पुष्करेपुष्करोनामपर्वतोमणिरत्नवा
न् ॥ तत्रनित्यंप्रसरतिस्वयंदेवःप्रजापतिः ॥ २५ ॥ पर्युपासन्तितंनित्यंदेवाःसर्वेमहर्षयः ॥ वाग्भिर्मनोऽनुकूलाभिःपूजयन्तिद्विजोत्तमाः ॥
॥ २६ ॥ जम्बूद्वीपात्प्रवर्त्तन्तेरत्नानिविविधानिच ॥ द्वीपेषुतेषुसर्वेषुप्रजानांमुनिसत्तमाः ॥ २७ ॥ विप्राणांब्रह्मचर्येणसत्येनचदमेनच ॥ आरो
ग्यायुष्प्रमाणाभ्यांद्विगुणंद्विगुणंततः ॥ २८ ॥ एतेजनपदाविप्राद्वीपेषुतेषुसत्तमाः ॥ उक्ताजनपदायेषुधर्मश्चैकःप्रवर्त्तते ॥ २९ ॥ ईश्वरो
दण्डमुद्यम्यस्वयमेवप्रजापतिः ॥ द्वीपानेतान्मुनिवरारक्षंस्तिष्ठतिसर्वदा ॥ ३० ॥ सराजासशिवोविप्राःसपितासपितामहः ॥ गोपायतिद्विजश्रे
ष्ठाःप्रजाःसद्विजपण्डिताः ॥ ३१ ॥ भोजनंचात्रविप्रेन्द्राःप्रजाःस्वयमुपस्थितम् ॥ सिद्धमेवमहाभागाभुञ्जतेतद्विनित्यशः ॥ ३२ ॥ ततःपरंमहाशै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लोदृश्यतेलोकसंस्थितिः ॥ चतुरस्रोमहाप्राज्ञःसर्वतःपरिमण्डलः ॥ ३३ ॥ तत्रतिष्ठन्तिविप्रेन्द्राश्चत्वारोलोकसंमताः ॥ दिग्गजाहिमुनिश्रेष्ठावामनै
रावताञ्जनाः ॥ ३४ ॥ सुप्रतीकस्तथाविप्राःप्रभिन्नकरटामुखाः ॥ तस्येहपरिमाणंनसङ्ख्यातुमहमुत्सहे ॥ ३५ ॥ असङ्ख्यातःसुनित्यंहितिर्यगूर्द्ध
मधस्तथा ॥ तत्रवैवायवोवान्तिदिग्भ्यःसर्वाभ्यएवच ॥ ३६ ॥ असम्बन्धामुनिश्रेष्ठास्तान्निगृह्णन्तितेगजाः ॥ पुष्करैःपद्मसङ्काशैर्विकर्षन्तिमहाप्र
भैः ॥ ३७ ॥ शतधापुनरेवाशुतेतान्मुञ्चन्तिनित्यशः ॥ श्वसद्भिर्मुखनासाभ्यांदिग्गजैरिवमारुताः ॥ ३८ ॥ आगच्छन्तिद्विजश्रेष्ठास्तत्रतिष्ठन्तिवै
प्रजाः ॥यथोद्दिष्टंमयाप्रोक्तंसनिर्माणमिदंजगत् ॥३९॥ श्रुत्वेदंपृथिवीमानंपुण्यदंचमनोऽनुगम् ॥ श्रीमांस्तरतिविप्रेन्द्राःसिद्धार्थःसाधुसंमतः ॥४०॥
आयुर्बलंचकीर्त्तिश्चतस्यतेजश्चवर्द्धते ॥ यःशृणोतिसमाख्यानंपर्वणीदंधृतव्रतः ॥ ४१ ॥ प्रीयन्तेपितरस्तस्यतथैवचपितामहाः ॥ ४२ ॥ इतिश्रीपा
द्मेमहापुराणेस्वर्गखण्डेनवमोऽध्यायः ॥ ९ ॥ ऋषयऊचुः ॥ पृथिव्याहिपरीमाणंसंस्थानंसरितस्तथा ॥ त्वत्तःश्रुत्वामहाभागअमृतंपीतमेवच ॥ १ ॥
तत्रभूमौचतीर्थानिपावनानीतिनःश्रुतम् ॥ आचक्ष्वतानिसर्वाणियथाफलकराणिच ॥ २ ॥ सविशेषंमहाप्राज्ञश्रोतुमिच्छामहेतव ॥३॥ सूतउवाच ॥
धन्यंपुण्यंमहाख्यानंपृष्टमेवतपोधनाः ॥ यथामतिप्रवक्ष्यामियथायोगंयथाश्रुतम् ॥ ४ ॥ पुरावृत्तंप्रवक्ष्यामिदेवर्षेर्नारदस्यहि ॥ युधिष्ठिरेणसंवा
दंशृणुतद्विजसत्तमाः ॥ ५ ॥ हृतराज्याःपाण्डुपुत्रावनेतस्मिन्महारथाः ॥ निवसन्तिमहाभागाद्रौपद्यासहपाण्डवाः ॥ ६ ॥ अथापश्यन्महात्मानंदे
वर्षितत्रनारदम् ॥ दीप्यमानंश्रियाब्राह्म्यादीप्ताग्निसमतेजसम् ॥ ७ ॥ सतैःपरिवृतःश्रीमान्भ्रातृभिःकुरुनन्दनः ॥ दिविभातिहिदीप्तौजादेवैरिवशत
क्रतुः ॥ ८ ॥ यथाचदेवान्सावित्रीयाज्ञसेनीतथापतीन् ॥ नजहौधर्मतःपार्थान्मेरुमर्कप्रभायथा ॥ ९ ॥ प्रतिगृह्यततःपूजांनारदोभगवानृषिः ॥ आ
श्वासयद्धर्म्मपुत्रंयुक्तरूपप्रियेणच ॥ १० ॥ उवाचचमहात्मानंधर्म्मराजंयुधिष्ठिरम् ॥ ब्रूहिधर्म्मभृतांश्रेष्ठकिंप्रार्थ्यंहिददामिते ॥ ११ ॥ अथधर्म
सुतोराजाप्रणम्यभ्रातृभिःसह ॥ उवाचप्राञ्जलिर्वाक्यंनारदंदेवसंमितम् ॥ १२ ॥ त्वयितुष्टेमहाभागसर्वलोकाभिपूजिते ॥ कृतमित्येवमन्येहिप्रसादा
त्तवसुव्रत ॥ १३ ॥ यदित्वहमनुग्राह्योभ्रातृभिःसहितोऽनघ ॥ सन्देहंमेमुनिश्रेष्ठहृत्स्थंत्वंछेत्तुमर्हसि ॥ १४ ॥ प्रदक्षिणांयःकुरुतेपृथिवींतीर्थतत्परः ॥
किंफलंतस्यकार्त्स्न्येनतद्ब्रह्मन्वक्तुमर्हसि ॥१५॥ नारदउवाच ॥ शृणुराजन्नवहितोदिलीपेनयथापुरा ॥ वसिष्ठस्यसकाशाद्वैसर्वमेतदुपश्रुतम् ॥१६॥
पुराभागीरथीतीरेदिलीपोराजसत्तमः ॥ धर्म्यंव्रतंसमास्थायन्यवसन्मुनिवत्तदा ॥ १७ ॥ शुभेदेशेमहाराजपुण्येदेवर्षिपूजिते ॥ गङ्गाद्वारेमहातेजादे
वगन्धर्वसेविते ॥ १८ ॥ सपितॄंस्तर्पयामासदेवांश्चपरमद्युतिः ॥ ऋषींश्चतर्पयामासविधिदृष्टेनकर्मणा ॥ १९ ॥ कस्यचित्त्वथकालस्यजपन्नेवमहाम

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

नाः ॥ ददर्शभूतसङ्काशंवसिष्ठमृषिमुत्तमम् ॥ २० ॥ पुरोहितंसतंदृष्ट्वादीप्यमानमिवश्रिया॥प्रहर्षमतुलंलेभेविस्मयंपरमंययौ ॥ २१ ॥ उपस्थितंमहा
राजपूजयामासभारत ॥ सहिधर्म्मभृतांश्रेष्ठोविधिदृष्टेनकर्मणा ॥ २२॥ शिरसाचार्घ्यमादायशुचिःप्रयतमानसः ॥ नामसङ्कीर्त्तयामासतस्मिन्ब्रह्मर्षि
सत्तमे ॥ २३ ॥ दिलीपोऽहंतुभद्रंतेदासोऽस्मितवसुव्रत ॥ तवसन्दर्शनादेवमुक्तोऽहंसर्वकिल्बिषैः ॥२४॥ एवमुक्त्वामहाराजोदिलीपोद्विपदांवरः ॥वा
ग्यतःप्राञ्जलिर्भूत्वातूष्णीमासीद्युधिष्ठिर ॥ २५ ॥ तंदृष्ट्वानियमेनाथस्वाध्यायेनचकर्शितम् ॥ दिलीपंनृपतिश्रेष्ठंमुनिःप्रीतमनाभवत् ॥ २६ ॥ इति
श्रीपाद्मेमहापुराणेस्वर्गखण्डेदशमोऽध्यायः ॥१०॥ वसिष्ठउवाच ॥ अनेनतवधर्मज्ञप्रश्रयेणदमेनच ॥ सत्येनचमहाभागतुष्टोऽस्मितवसर्वशः ॥ १ ॥
यस्येदृशस्तेधर्मोऽयंपितरस्तारितास्त्वया ॥ तेनपश्यसिमांपुत्रयाज्यश्चासिममानघ ॥२॥ प्रीतिर्मेवर्द्धतेतेऽद्यब्रूहिकिंकरवाणिते ॥ यद्वक्ष्यसिनरश्रेष्ठत
स्यदातास्मितेऽनघ ॥ ३॥ दिलीपउवाच ॥ वेदवेदाङ्गतत्त्वज्ञसर्वलोकाभिपूजित ॥ कृतमित्येवमन्येहियदहंदृष्टवान्प्रभुम् ॥ ४॥ यदित्वहमनुग्राह्यस्त
वधर्मभृतांवर ॥ प्रक्ष्यामिहृत्स्थंसन्देहंतन्मेत्वंवक्तुमर्हसि ॥ ५ ॥ अस्तिमेभगवन्कश्चित्तीर्थेयोधर्मसंशयः ॥ तदहंश्रोतुमिच्छामिपृथक्सङ्कीर्तनंत्वया॥
॥ ६ ॥ प्रदक्षिणांयःपृथिवींकरोतिद्विजसत्तम ॥ किंफलंतस्यविप्रर्षेतन्मेब्रहितपोधन ॥ ७॥ वसिष्ठउवाच ॥ कथयिष्यामितदहमृषीणांमत्परायण
म् ॥ तदेकाग्रमनास्तातशृणुतीर्थेषुयत्फलम् ॥ ८ ॥ यस्यहस्तौचपादौचमनश्चैवसुसंयतम् ॥ विद्यातपश्चकीर्तिश्चसतीर्थफलमश्नुते ॥ ९ ॥ प्रतिग्रहादु
पावृत्तःसन्तुष्टोनियतःशुचिः ॥ अहङ्कारनिवृत्तश्चसतीर्थफलमश्नुते ॥ १० ॥ अकल्किकोनिराहारोऽलब्धाहारोजितेन्द्रियः ॥ विमुक्तःसर्वदोषैर्यःसती
र्थफलमश्नुते ॥११॥ अक्रोधनश्चराजेन्द्रसत्यशीलोदृढव्रतः॥आत्मोपमश्चभूतेषुसतीर्थफलमश्नुते ॥१२॥ ऋषिभिःक्रतवःप्रोक्तादेवेष्वपियथाक्रमम् ॥
फलंचैवयथातत्त्वंप्रत्यचेहचसर्वशः ॥१३॥ नतेशक्यादरिद्रेणयज्ञाःप्राप्तुंमहीपते ॥ बहूपकरणायज्ञानानासम्भरविस्तराः ॥ १४ ॥ प्राप्यन्तेपार्थिवै
रेतेसमृद्धैर्वानरैःक्वचित् ॥ ननिर्धनैर्नरगणैरेकात्मभिरसाधनैः ॥ १५ ॥ योदरिद्रैरपिविधिःशक्यःप्राप्तुंजनेश्वर ॥ तुल्योयज्ञफलैःपुण्यैस्तंनिबोधम
हीपते ॥ १६ ॥ ऋषीणांपरमंगुह्यमिदंधर्म्मभृतांवर ॥ तीर्थाभिगमनंपुण्यंयज्ञैरपिविशिष्यते ॥ १७ ॥ अनुपोष्यत्रिरात्राणितीर्थाभिगमनेनच ॥ अद
त्वाकाञ्चनंगाश्चदरिद्रोनामजायते ॥ १८ ॥ अग्निष्टोमादिभिर्यज्ञैरिष्ट्वाविपुलदक्षिणैः ॥ नतत्फलमवाप्नोतितीर्थाभिगमनेनयत् ॥१९॥ नृलोकेदेवलो
कस्यतीर्थंत्रैलोक्यविश्रुतम् ॥ पुष्करंतीर्थमासाद्यदेवदेवसमोभवेत् ॥२०॥ दशकोटिसहस्राणितीर्थानांवैमहीपते ॥ सान्निध्यंपुष्करेयेषांत्रिसन्ध्यंसूर्य
वंशज ॥ २१ ॥ आदित्यावसवोरुद्राःसाध्याश्चसमरुद्गणाः ॥ गन्धर्वाप्सरसश्चैवतत्रसन्निहिताःप्रभो ॥ २२ ॥ यत्रदेवास्तपस्तप्त्वादैत्याब्रह्मर्षयस्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

था ॥ दिव्ययोगामहाराजपुण्येनमहताद्विजाः ॥२३॥ मनसाप्यभिकामस्यपुष्कराणिमनीषिणः ॥ पूयन्तेसर्वपापानिनाकपृष्ठेचपूज्यते ॥२४॥ अ
स्मिंस्तीर्थेमहाभागनित्यमेवपितामहः ॥ उवासपरमप्रीतोदेवदानवसंमतः ॥ २५ ॥ पुष्करेषुमहाभागदेवाःसर्षिपुरोगमाः ॥ सिद्धिंपरमिकांप्राप्ताःपु
ण्येनमहतान्विताः ॥ २६ ॥ तत्राभिषेकंयःकुर्यात्पितृदेवार्चनेरतः ॥ अश्वमेधाद्दशगुणंप्रवदन्तिमनीषिणः ॥ २७ ॥ अप्येकंभोजयेद्विप्रंपुष्करारण्य
माश्रितः ॥ तेनैतिपूजिताँल्लोकान्ब्रह्मणःसदनेस्थितान् ॥ २८ ॥ सायंप्रातःस्मरेद्यस्तुपुष्कराणिकृताञ्जलिः ॥ उपस्पृष्टंभवेत्तेनसर्वतीर्थेषुपार्थिव
॥ २९ ॥ जन्मप्रभृतियत्पापंस्त्रियोवापुरुषस्यवा ॥ पुष्करेगतमात्रस्यसर्वमेवप्रणश्यति ॥ ३० ॥ यथासुराणांसर्वेषामादिस्तुमधुसूदनः ॥ तथैवपु
ष्करोराजंस्तीर्थानामादिरुच्यते ॥३१॥ उष्वाद्वादशवर्षाणिपुष्करेनियतःशुचिः ॥ क्रतून्सर्वानवाप्नोतिब्रह्मलोकंचगच्छति ॥ ३२ ॥ यस्तुवर्षशतंपू
र्णमग्निहोत्रमुपाचरेत् ॥ कार्तिकींवावसेदेकांपुष्करेसममेवतत् ॥ ३३ ॥ दुष्करंपुष्करेगन्तुंदुष्करंपुष्करेतपः ॥ दुष्करंपुष्करेदानंवस्तुंचैवसुदुष्करम्
॥ ३४ ॥ त्रीणिशृङ्गाणिशुभ्राणित्रीणिप्रस्रवणानिच ॥ पुष्कराण्यादितीर्थानिनविद्मस्तत्रकारणम् ॥ ३५ ॥ उष्वाद्वादशवर्षाणिनियतोनियताशनः॥
समुक्तःसर्वपापेभ्यःसर्वक्रतुफलंलभेत् ॥ ३६ ॥ इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेपुष्करतीर्थमाहात्म्यवर्णनंनामैकादशोऽध्यायः ॥ ११ ॥ वसि
ष्ठउवाच ॥ प्रदक्षिणमुपावृत्तोजम्बूमार्गेसमाविशेत् ॥ जम्बूमार्गंसमाविश्यपितृदेवर्षिपूजितम् ॥ १ ॥ अश्वमेधमवाप्नोतिविष्णुलोकंचगच्छति ॥
तत्रोष्यरजनीःपञ्चषष्ठेकालेश्नुऽवन्नरः ॥२॥ नदुर्गतिमवाप्नोतिसिद्धिंचाप्नोत्यनुत्तमाम् ॥ जम्बूमार्गादुपावृत्तोगच्छेत्तन्दुलिकाश्रमम् ॥ ३ ॥ नदुर्गति
मवाप्नोतिस्वर्गलोकेचपूज्यते ॥ अगस्त्याश्रममासाद्यपितृदेवार्चनेरतः ॥ ४ ॥ त्रिरात्रोपोषितोराजन्नग्निष्टोमफलंलभेत् ॥ शाकवृत्तिःफलैर्वापिकौ
मारंविन्दतेपरम् ॥ ५ ॥ कन्याश्रमंसमासाद्यश्रीपुष्टंलोकपूजितम् ॥ धर्मारण्यंहितत्पुण्यमाद्यंचपार्थिवर्षभ ॥ ६ ॥ यत्रप्रविष्टमात्रोवैपापेभ्योविप्रमु
च्युते ॥ अर्चयित्वापितॄन्देवान्प्रयतोनियताशनः ॥ ७ ॥ सर्वकामसमृद्धस्ययज्ञस्यफलमश्नुते ॥ प्रादक्षिण्यंततःकृत्वाययातिपतनंव्रजेत् ॥ ८ ॥
हयमेधस्ययज्ञस्यफलमाप्नोतितत्रवै ॥ महाकालमतोगच्छेन्नियतोनियताशनः ॥९॥ कोटितीर्थमुपस्पृश्यहयमेधफलंलभेत् ॥ ततोगच्छेतधर्मज्ञस्था
नंतीर्थमुमापतेः ॥ १० ॥ नाम्नाभद्रवटंनामत्रिषुलोकेषुविश्रुतम् ॥ तत्राभिगम्यचेशानंगोसहस्रफलंलभेत् ॥ ११ ॥ महादेवप्रसादाच्चगाणपत्यमवा
प्नुयात् ॥ समृद्धमसपत्नंतुश्रियायुक्तंनरोत्तम ॥ १२ ॥ नर्मदांतुसमासाद्यनदींत्रैलोक्यविश्रुताम् ॥ तर्पयित्वापितॄन्देवानग्निष्टोमफलंलभेत् ॥ १३॥
इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेद्वादशोऽध्यायः ॥ १२॥ युधिष्ठिरउवाच ॥ वसिष्ठेनदिलीपायकथितंतीर्थमुत्तमम् ॥ नर्मदेतिचविख्यातंपापपर्वतदा

CC-0. In Public Domain. Digitization by eGangotri

रणम् ॥ १ ॥ भूयश्चश्रोतुमिच्छामितन्मेकथयनारद ॥ नर्मदायाश्चमाहात्म्यंवसिष्ठोक्तंद्विजोत्तम ॥ २ ॥ कथमेषामहापुण्यानदीसर्वत्रविश्रुता ॥ नर्मदानामविख्यातातन्ममब्रूहिनारद ॥ ३ ॥ नारदउवाच ॥ नर्मदासरितांश्रेष्ठासर्वपापप्रणाशिनी ॥ तारयेत्सर्वभूतानिस्थावराणिचराणिच ॥ ४ ॥ नर्मदायास्तुमाहात्म्यंवसिष्ठोक्तंमयाश्रुतम् ॥ तदेतद्धिमहाराजसर्वंहिकथयामिते ॥ ५ ॥ पुण्याकनखलेगङ्गाकुरुक्षेत्रेसरस्वती ॥ ग्रामेवायदिवाऽरण्येपुण्यासर्वत्रनर्म्मदा ॥ ६ ॥ त्रिभिःसारस्वतंतोयंसप्ताहेनतुयामुनम् ॥ सद्यःपुनातिगाङ्गेयंदर्शनादेवनार्मदम् ॥७॥ कलिङ्गदेशेपश्चार्द्धेपर्वतेऽमरकण्टके ॥ पुण्याचत्रिषुलोकेषुरमणीयामनोरमा ॥ ८ ॥ सदेवासुरगन्धर्वाऋषयश्चतपोधनाः ॥ तपस्तप्त्वामहाराजसिद्धिंचपरमांगताः ॥ ९ ॥ तत्रस्नात्वामहाराजनियमस्थोजितेन्द्रियः ॥ उपोष्यरजनीमेकांकुलानांतारयेच्छतम् ॥ १० ॥ जनेश्वरेनरःस्नात्वापिण्डंदत्त्वायथाविधि ॥ पितरस्तस्यतृप्यन्तियावदाभूतसम्प्लवम् ॥ ११ ॥ पर्वतस्यसमन्तात्तुरुद्रकोटिःप्रतिष्ठिता ॥ स्नानंयःकुरुतेतत्रगन्धमाल्यानुलेपनम् ॥ १२ ॥ प्रीतातस्यभवेत्सर्वारुद्रकोटिर्नसंशयः ॥ पर्वतेपश्चिमस्यान्तेस्वयंदेवोमहेश्वरः ॥ १३ ॥ तत्रस्नात्वाशुचिर्भूत्वाब्रह्मचारीजितेन्द्रियः ॥पितृकार्यंतुकुर्वीतविधिदृष्टेनकर्मणा ॥ १४ ॥ तिलोदकेनतत्रैवतर्पयेत्पितृदेवताः ॥ आसप्तमंकुलंतस्यस्वर्गेतिष्ठतिपाण्डव ॥ १५ ॥ षष्टिवर्षसहस्राणिस्वर्गलोकेमहीयते ॥ अप्सरोगणसङ्कीर्णोदिव्यस्त्रीपरिवारितः ॥ १६ ॥ दिव्यगन्धानुलिप्तश्चदिव्यालङ्कारभूषितः ॥ ततःस्वर्गात्परिभ्रष्टोजायतेविपुलेकुले ॥ १७॥ धनवान्दानशीलश्चधार्मिकश्चैवजायते ॥ पुनःस्मरतितत्तीर्थगमनंतत्रकुर्वते ॥ १८॥ तारयित्वाकुलशतंरुद्रलोकंसगच्छति ॥ योजनानांशतंसाग्रंश्रूयतेसरिदुत्तमा ॥ १९ ॥ विस्तारेणतुराजेन्द्रयोजनद्वयमन्तरम् ॥ षष्टिस्तीर्थसहस्राणिषष्टिकोट्यस्तथैवच ॥२०॥ पर्वतस्यसमन्तात्तुतिष्ठन्त्यमरकण्टके ॥ ब्रह्मचारीशुचिर्भूत्वाजितक्रोधोजितेन्द्रियः ॥ २१ ॥ सर्वहिंसानिवृत्तश्चसर्वभूतहितेरतः ॥ एवंसर्वसमाचारःक्षेत्रपालान्परिव्रजेत् ॥ २२ ॥ तस्यपुण्यफलंराजञ्छृणुष्वावहितोहिमे ॥ शतंवर्षसहस्राणांस्वर्गेमोदेतपाण्डव ॥ २३ ॥ अप्सरोगणसङ्कीर्णेदिव्यस्त्रीपरिचारिते ॥ दिव्यगन्धानुलिप्तश्चदिव्यालङ्कारभूषितः ॥ २४ ॥ क्रीडतेदेवलोकेतुदैवतैःसहमोदते ॥ ततःस्वर्गात्परिभ्रष्टोराजाभवतिवीर्यवान् ॥ २५ ॥ गृहंसलभतेचैवनानारत्नविभूषितम् ॥ स्तम्भैर्मणिमयैर्दिव्यवज्रवैडूर्यभूषितैः ॥ २६ ॥ आलेख्यसहितंदिव्यंदासीदाससमन्वितम् ॥ मत्तमातङ्गशब्दैश्चहयानांह्रेषितेनच ॥ २७ ॥ क्षुभ्यतेतस्यतद्वारमिन्द्रस्यभवनंयथा ॥ राजराजेश्वरःश्रीमान्सर्वस्त्रीजनवल्लभः ॥ २८ ॥ तस्मिन्गृहेउषित्वातुक्रीडाभोगसमन्वितः ॥ जीवेद्वर्षशतंसाग्रंसर्वरोगविवर्जितः ॥ २९ ॥ एवंभोगोभवेत्तस्ययोमृतोऽमरकण्टके ॥ अग्निप्रवेशेऽथजलेतथाचैवअनाशने ॥ ३० ॥ अनिवर्तिकाग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिस्तस्यपर्वतस्याम्बरेयथा ॥ पतनंपततेयस्तुसनरोमानवाधिपः ॥ ३१ ॥ कन्यास्त्रीणिसहस्राणिएकैकस्यापिचापरे ॥ तिष्ठन्तिभवनेतस्यप्रेषणं प्रार्थयन्तिच ॥ ३२ ॥ दिव्यभोगसमुत्पन्नःक्रीडतेकालमक्षयम् ॥ पृथिव्यामासमुद्रायामीदृशोनैवजायते ॥ ३३ ॥ यादृशोऽयंनरश्रेष्ठपर्वतेऽमरकण्टके ॥ कोटितीर्थंतुविज्ञेयंपर्वतस्यतुपश्चिमे ॥ ३४ ॥ रुद्रोजालेश्वरोनामत्रिषुलोकेषुविश्रुतः ॥ तस्यपिण्डप्रदानेनसन्ध्योपासनकर्मणा ॥ ३५ ॥पितरोदशवर्षाणितर्पितास्तुभवन्तिते ॥ दक्षिणेनर्मदायास्तुकपिलाख्यामहानदी ॥ ३६ ॥ सरलार्जुनसञ्छन्नानातिदूरेव्यवस्थिता ॥ अस्तिपुण्यामहाभागात्रिषुलोकेषुविश्रुता ॥ ३७ ॥ तत्रकोटिशतंसाग्रंतीर्थानांतुयुधिष्ठिर ॥ पुराणेश्रूयतेराजन्सर्वंकोटिगुणंभवेत् ॥ ३८ ॥ तस्यास्तीरेतुयेवृक्षाःपतिताःकालपर्ययात् ॥ नर्मदातोयसंयुक्तास्तेऽपियान्तिपरांगतिम् ॥ ३९ ॥ द्वितीयातुमहाभागविशल्यकरणाशुभा ॥ तत्रतीरेनरःस्नात्वाविशल्योभवतिक्षणात् ॥ ४० ॥ तत्रदेवगणाःसर्वेसकिन्नरमहोरगाः ॥ यक्षराक्षसगन्धर्वाऋषयश्चतपोधनाः ॥ ४१ ॥ सर्वेसमागतास्तत्रपर्वतेऽमरकण्टके ॥ तैश्चसर्वैःसमागम्यमुनिभिश्चतपोधनैः ॥ ४२ ॥ नर्मदासंश्रितापुण्याविशल्यानामनामतः ॥ उत्पादितामहाभागासर्वपापप्रणाशिनी ॥ ४३ ॥ तत्रस्नात्वानरोराजन्ब्रह्मचारीजितेन्द्रियः ॥ उपोष्यरजनीमेकांकुलानांतारयेच्छतम् ॥ ४४ ॥ कपिलाचविशल्याचश्रूयतेराजसत्तम ॥ ईश्वरेणपुराणोक्तालोकानांहितकाम्यया ॥ ४५ ॥ तत्रस्नात्वानरोराजन्नश्वमेधफलंलभेत् ॥ अनशनंतुयःकुर्यात्तस्मिंस्तीर्थेनराधिप ॥ ४६ ॥ सर्वपापविशुद्धात्माइन्द्रलोकंसगच्छति ॥ नर्मदायांतुराजेन्द्रपुराणयच्छ्रुतंमया ॥ ४७ ॥ तत्रतत्रनरःस्नात्वाअश्वमेधफलंलभेत् ॥ येवसन्त्युत्तरेकूलइन्द्रलोकेवसन्तिते ॥ ॥ ४८ ॥ सरस्वत्यांचगङ्गायांनर्मदायांयुधिष्ठिर ॥ समंदानंचस्नानंचयथामेशङ्करोऽब्रवीत् ॥ ४९ ॥ परित्यजतियःप्राणान्पर्वतेऽमरकण्टके ॥ वर्षकोटिशतंसाग्रमिन्द्रलोकेमहीयते ॥ ५० ॥ नर्मदायाजलंपुण्यंफेनोर्मिसमलङ्कृतम् ॥ पवित्रंशिरसावन्द्यंसर्वपापैःप्रमुच्यते ॥ ५१ ॥ नर्मदासर्वपुण्याचब्रह्महत्यापहारिणी ॥ अहोरात्रोपवासेनमुच्यतेब्रह्महत्यया ॥ ५२ ॥ एवंपुण्याचरम्याचनर्मदापाण्डुनन्दन ॥ त्रयाणामपिलोकानांपुनात्येषामहानदी ॥५३॥ वटेश्वरेमहापुण्येगङ्गाद्वारेतपोवने॥एतेषुसर्वस्थानेषुयेऽर्दिताःसंशितव्रताः ॥५४॥ श्रूयतेदशगुणंपुण्यंनर्मदोद्वाससङ्गमे ॥५५॥ इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेत्रयोदशोऽध्यायः ॥ १३ ॥ नारदउवाच ॥ नर्मदातुनदीश्रेष्ठापुण्यापुण्यतमात्रिषु ॥ मुनिभिस्तुमहाभागैर्विभक्ताधर्मकाङ्क्षिभिः ॥ १ ॥ यज्ञोपवीतमात्राणिप्रविभक्तानिपाण्डव ॥ तेषुस्नात्वातुराजेन्द्रसर्वपापैःप्रमुच्यते ॥ २ ॥ जलेश्वरंचयत्तीर्थंत्रिषुलोकेषुविश्रुतम् ॥

१ 'प्राङ्नर' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

तस्योत्पत्तिंकथयतःशृणुपाण्डवनन्दन ॥ ३ ॥ पुरामुनिगणाःसर्वेसेन्द्राश्चैवमरुद्गणाः ॥ स्तुवन्तितेमहात्मानंदेवदेवंमहेश्वरम् ॥ ४ ॥ स्तुवमानास्तु
सम्प्राप्तायत्रदेवोमहेश्वरः ॥ विज्ञापयन्तिदेवेशंसेन्द्राश्चैवमरुद्गणाः ॥ ५॥ भयोद्विग्नान्विरूपाक्षपरित्रायस्वनःप्रभो ॥ ६ ॥ ईश्वरउवाच ॥ स्वागतंतु
मुनिश्रेष्ठाःकिमर्थमिहचागताः ॥ किंदुःखंकोनुसन्तापःकुतोवाभयमागतम् ॥ ७ ॥ कथयध्वंमहाभागाएतदिच्छामिवेदितुम् ॥ एवमुक्तास्तुरुद्रेणाक
थयन्नमितव्रताः ॥ ८ ॥ ऋषयऊचुः ॥ अपिघोरोमहावीर्योदानवोबलदर्पितः ॥ बाणोनामेतिविख्यातोयस्यवैत्रिपुरंपुरम् ॥ ९ ॥ गगनेतुवसेद्दिव्यं
भ्रमतेतस्यतेजसा ॥ तस्माद्भीताविरूपाक्षत्वामेवशरणंगताः ॥ १० ॥ त्रायस्वमहतोदुःखाद्देवत्वंहिपरागतिः ॥ एवंप्रसादंदेवेशसर्वेषांकर्तुमर्हसि ॥
॥ ११ ॥ येनदेवाःसुप्रसन्नाःसुखमेधन्तिशङ्कर ॥ परांनिर्वृतिमायान्तितत्प्रभोकर्तुमर्हसि ॥ १२ ॥ देवउवाच ॥ एतत्सर्वंकरिष्यामिमाविषादंकरिष्य
थ ॥ अचिरेणैवकालेनकुर्यांयुष्मत्सुखावहम् ॥१३॥ आश्वासयित्वातान्सर्वान्नर्मदातटमास्थितः ॥ चिन्तयामाससर्वेशस्तद्वधंप्रतिपाण्डव ॥ १४ ॥
कथंकेनप्रकारेणहन्तव्यस्त्रिपुरोमया ॥ एवंसञ्चिन्त्यभगवान्नारदंस्मरतेतदा ॥ १५॥ स्मरणादेवसम्प्राप्तोनारदःसमुपस्थितः ॥ १६ ॥ नारदउवाच॥
आज्ञापयमहादेवकिमर्थंसंस्मृतोह्यहम् ॥ किंकार्यंतुमयादेवकर्तव्यंकथयस्वमे ॥ १७ ॥ ईश्वरउवाच ॥ गच्छनारदतत्रैवयत्रतत्त्रिपुरंपुरम् ॥ बाण
स्यदानवेन्द्रस्यशीघ्रंगच्छाथतत्कुरु ॥ १८ ॥ भर्तारोदेवताभाश्चस्त्रियश्चाप्सरसोपमाः ॥ तासांवैतेजसाविप्रभ्रमतेत्रिपुरंदिवि ॥ १९ ॥ तत्र
गत्वातुविप्रेन्द्रमन्त्रमन्यंप्रचोदय ॥ देवस्यवचनंश्रुत्वामुनिस्त्वरितविक्रमः ॥ २० ॥ स्त्रीणांहृदयनाशायप्रविष्टस्तंपुरंप्रति ॥ शोभतेतत्पु
रंदिव्यंनानारत्नोपशोभितम् ॥ २१ ॥ शतयोजनविस्तीर्णंततोद्विगुणमायतम् ॥ ततःपश्यतितत्रैवबाणंतुबलदर्पितम् ॥ २२ ॥ माला
कुण्डलकेयूरैर्मुकुटेनविराजितम् ॥ हाररत्नैश्चसंछन्नंचन्द्रकान्तिविभूषितम् ॥ २३ ॥ ललनास्तस्यरत्नाढ्यकराःकनकमण्डिताः ॥ उत्थि
तोनारदंदृष्ट्वादानवेन्द्रोमहाबलः ॥ २४ ॥ बाणउवाच ॥ सदेवर्षिःस्वयंप्राप्तोमद्गृहंप्रतिसम्प्रति ॥ अर्घंपाद्यंयथान्यायंक्रियतांद्विज
सत्तम ॥ २५ ॥ चिरात्समागतोविप्रस्थीयतामिदमासनम् ॥ एवंसम्भावयित्वातुनारदंसमुपस्थितम् ॥ २६ ॥ तस्यभार्यामहादेवीअनौप
म्यातुनामतः ॥ २७ ॥ अनौपम्योवाच ॥ भगवन्मानुषेलोकेदेवास्तुष्यन्तिकेनवै ॥ व्रतेननियमेनापिदानेनतपसाथवा ॥ २८ ॥ नारदउवाच ॥ ति
लधेनुंचयोदद्याद्ब्राह्मणेवेदपारगे ॥ ससागरानवद्वीपादत्ताभवतिमेदिनी ॥ २९ ॥ सूर्यकोटिप्रतीकाशैर्विमानैःसर्वकामिकैः ॥ मोदतेचाक्षयंकालंसुचि ॥ ९ ॥
रंकृतशासनः ॥ ३० ॥ आम्रातककपित्थानिकदलीवनमेवच ॥ कदम्बचम्पकाशोकाअनेकविविधद्रुमाः ॥ ३१ ॥ अष्टमीचचतुर्थींचद्वादशीचतथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उभे ॥ सङ्क्रान्तिर्विषुवंचैवदिनच्छिद्रमुखंतथा ॥३२॥ पुण्यान्येतानिसर्वाणिउपवसन्तियाःस्त्रियः॥तासांतुधर्म्मयुक्तानांस्वर्गेवासोनसंशयः ॥३३॥ कलिकालात्तुनिर्मुक्ताःसर्वपापविवर्जिताः ॥ उपवासरतानार्योनोपसर्पन्तितापसाः ॥ ३४ ॥ एवंश्रुत्वातुसुश्रोणियथेष्टंकर्तुमर्हसि ॥ नारदस्यवचःश्रुत्वाराज्ञीवचनमब्रवीत् ॥ ३५ ॥ प्रसादंकुरुविप्रेन्द्रदानंगृह्णयथेप्सितम् ॥ सुवर्णमणिरत्नानिवस्त्राण्याभरणानिच ॥३६ ॥ तत्तेदास्याम्यहंविप्रयच्चान्यदपिदुर्लभम् ॥ प्रतिगृह्णद्विजश्रेष्ठप्रीयेतांहरिशङ्करौ ॥३७॥ नारदउवाच ॥ अन्यस्मैदीयतांभद्रेक्षीणवृत्तिश्चयोद्विजः ॥ वयंतुशीलसम्पन्नाभक्तिस्तुक्रियतेमया ॥३८ ॥ एवंतासांमनोहृत्वासर्वासामुपदिश्यवा ॥ जगामभरतश्रेष्ठस्वकीयंस्थानकंपुनः ॥ ३९॥ अन्याकृष्टमनास्तास्तुअन्यत्रगतमानसाः ॥ पुरिच्छिद्रंसमुत्पन्नंबाणस्यतुमहात्मनः ॥ ४० ॥ इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेचतुर्दशोध्यायः ॥ १४ ॥ नारदउवाच ॥ यन्मांपृच्छसिकौन्तेयतन्निबोधचतच्छृणु ॥ एतस्मिन्नन्तरेरुद्रोनर्मदातटमास्थितः ॥ १ ॥ नाम्नामहेश्वरंस्थानंत्रिषुलोकेषुविश्रुतम् ॥ तस्मिन्स्थानेमहादेवश्चिन्तयंस्त्रैपुरंवधम् ॥ २ ॥ गाण्डीवंमन्दरंकृत्वागुणंकृत्वातुवासुकिम् ॥ स्थानंकृत्वातुवैशाखंविष्णुंकृत्वाशरोत्तमम् ॥ ३ ॥ अग्रेचाग्निंप्रतिष्ठाप्यमुखेवायुःसमर्पितः ॥ हयाश्चचतुरोवेदाःसर्वदेवमयंरथम् ॥ ४ ॥ चक्रगौचाश्विनौदेवावक्षेचक्रधरःस्वयम् ॥ स्वयमिन्द्रश्चचापान्तेबाणेवैश्रवणःस्थितः ॥ ५ ॥ यमस्तुदक्षिणेहस्तेवामेकालस्तुदारुणः ॥ चक्राणामारकेन्यस्तागन्धर्वालोकविश्रुताः ॥ ६ ॥ प्रजापतीरथश्रेष्ठेब्रह्माचैवतुसारथिः ॥ एवंकृत्वातुदेवेशःसर्वदेवमयंरथम् ॥ ७ ॥ सोऽतिष्ठत्स्थाणुभूतोहिसहस्रंपरिवत्सरान् ॥ यदात्रीणिसमेतानिअन्तरिक्षचराणिच ॥ ८ ॥ त्रिपुराणित्रिशल्येनतदातानिबिभेदसः ॥ शरःप्रचोदितस्तत्ररुद्रेणत्रिपुरंप्रति ॥ ९ ॥ भ्रष्टतेजास्त्रियोजाताबलंतेषांव्यशीर्यत ॥ उत्पाताश्चपुरेतस्मिन्प्रादुर्भूताःसहस्रशः ॥ १० ॥ त्रिपुरस्यविनाशायकालरूपोऽभवत्तदा ॥ अट्टहासंप्रमुञ्चन्तिरूपाःकाष्ठमयास्तथा ॥११॥ निमेषोन्मेषणंचैवकुर्वन्तिचित्रकर्मणा ॥ स्वप्नेपश्यन्तिचात्मानंरक्तान्तरविभूषितम् ॥ १२ ॥ स्वप्नेपश्यन्तितेचैवंविपरीतानियानितु ॥ एतान्पश्यन्तितूत्पातांस्तत्रस्थानेतुयेजनाः ॥ १३ ॥ तेषांबलंचबुद्धिश्चहरक्रोधेननाशितम् ॥ संवर्तकोनामवायुर्युगान्तप्रतिमोमहान् ॥१४॥ समीरितोऽनलश्रेष्ठउत्तमाङ्गेषुबाधते ॥ ज्वलन्तिपादपास्तत्रपतन्तिशिखराणिच ॥ १५ ॥ सर्वतव्याकुलीभूतंहाहाकारमचेतनम् ॥ भग्नोद्यानानिसर्वाणिक्षिप्रंतुप्रज्वलन्तिच ॥ १६ ॥ तेनैवदीपितंसर्वंज्वलतेविशिखैःशिखैः ॥ द्रुमाआरामगण्डानिगृहाणिविविधानिच ॥ १७ ॥ दशदिक्षुप्रवृत्तोऽयंसमिद्धोहव्यवाहनः ॥ ततःशिलाःप्रमुञ्चन्तिदिशोदशविभागशः ॥ १८ ॥ शिखासहस्रैरत्युग्रैःप्रज्वलन्तिहुताशनैः ॥ सर्वंकिंशुकसम्प्रख्यंज्वलितंदृश्यतेपुरम् ॥ १९ ॥ गृहाद्गृहान्तरेनैवगन्तुं

CC-0. In Public Domain. Digitization by eGangotri

धूमैश्चशक्यते ॥ हरकोपानलादग्धंक्रन्दमानंसुदुःखितम् ॥ २० ॥ प्रदीप्तंसर्वतोदिक्षुदह्यतेत्रिपुरंपुरम् ॥ प्रासादशिखराग्राणिविशीर्यन्तिसहस्रशः
॥ २१ ॥ नानारत्नविचित्राणिविमानान्यप्यनेकधा ॥ गृहाणिचैवरम्याणिदह्यन्तेदीप्तवह्निना ॥ २२ ॥ बाह्यतोद्रुमखण्डेषुजनस्थानेतथैवच ॥
देवागारेषुसर्वेषुप्रज्वलन्तेज्वलन्त्यपि ॥ २३ ॥ सीदन्तिचानलस्पृष्टाःक्रन्दन्तिविविधैःस्वरैः ॥ गिरिकूटनिभास्तत्रदृश्यन्तेऽङ्गारराशयः ॥ २४ ॥
स्तुवन्तिदेवदेवेशंपरित्रायस्वमांप्रभो ॥ अन्योन्यंचपरिष्वज्यहुताशनप्रपीडिताः ॥ २५ ॥ दह्यन्तेदानवास्तत्रशतशोऽथसहस्रशः ॥ हंसकार
ण्डवाकीर्णानलिनीसहपङ्कजा ॥ २६ ॥ दह्यतेऽनलदग्धानिपुरोद्यानानिदीर्घिकाः ॥ अम्लानैःपङ्कजैश्छन्नाविस्तीर्णायोजनैःशतैः ॥ २७ ॥
गिरिकूटनिभास्तत्रप्रासादारत्नभूषिताः ॥ पतन्त्यनलनिर्दग्धानिस्तोयाजलदाइव ॥ २८ ॥ सहस्त्रीबालवृद्धेषुगोषुपक्षिषुवाजिषु ॥ निर्दयोदहतेवह्नि
र्हरकोपेनप्रेरितः ॥ २९ ॥ सपत्नीकाश्चैवसुप्ताःसंसुप्ताबहवोजनाः ॥ पुत्रमालिङ्ग्यतेगाढंदह्यतेत्रिपुरारिणा ॥ ३० ॥ अथतस्मिन्पुरेदीप्तेस्त्रियश्चाप्स
रसोपमाः ॥ अग्निज्वालाहतास्तत्रपतन्तिधरणीतले ॥ ३१ ॥ काचिद्बालाविशालाक्षीमुक्तावलिविभूषिता ॥ धूमेनाकुलितासातुप्रतिबुद्धाशिखार्दिता
॥३२॥ सुतंसञ्चिन्तमानासापतिताधरणीतले ॥ काचित्सुवर्णवर्णाभानीलरत्नैर्विभूषिता ॥३३॥ धूमेनाकुलितासातुपतिताधरणीतले॥अन्यागृहीतह
स्तातुदह्यतेसहबालकैः ॥ ३४ ॥ अनेनदिव्यरूपान्याहृष्टासदविमोहिता ॥ शिरसाप्राञ्जलिंकृत्वाविज्ञापयतिपावकम् ॥ ३५ ॥ यदित्वमिच्छसे
वैरंपुरुषेष्वपकारिषु ॥ स्त्रियःकिमपराध्यन्तेगृहपञ्जरकोकिलाः ॥ ३६ ॥ पापनिर्दयनिर्लज्जकस्तेकोपोऽङ्गनासुवै ॥ नदाक्षिण्यंनतेलज्जानसत्यं
शौचवर्तिता ॥ ३७ ॥ अनेकरूपवर्णाढ्याउपलभ्यावदस्वह ॥ किंत्वयानश्रुतंलोकेअवध्याःसर्वयोषितः ॥ ३८ ॥ किंतुतुभ्यंगुणाह्येतेदहनरुयर्दनंप्र
ति ॥ नकारुण्यंदयावापिदाक्षिण्यंवाङ्गनोपरि ॥३९॥ दयांकुर्वन्तिम्लेच्छाश्चदहनप्रेक्ष्ययोषितः ॥ म्लेच्छानामपिकष्टोऽसिदुर्निवार्योह्यचेतनः ॥४०॥
एतेचैवगुणास्तुभ्यंदहनोत्सादनंप्रति ॥ आसामपिदुराचारस्त्रीणांकिंविनिपातने ॥ ४१ ॥ दुष्टनिर्घृणनिर्लज्जहुताशमन्दभाग्यक॥निराशस्त्वंदुराचार
बालान्दहसिनिर्दय ॥ ४२ ॥ एवंप्रलपमानास्ताजलपमानाबहुस्वरम् ॥ अन्याःक्रोशन्तिसङ्क्रुद्धाबालशोकेनमोहिताः ॥ ४३॥ दहतेनिर्दयोवह्निः
सङ्क्रुद्धःसर्वशत्रुवत् ॥ पुष्करिण्यांजलेज्वालाकूपेष्वपितथैवच ॥ ४४॥ अस्मान्सन्दह्यम्लेच्छत्वंकांगतिंप्राप्स्यसेऽशुभाम् ॥ एवंप्रलपतांतासांवह्नि
र्वचनमब्रवीत् ॥ ४५ ॥ वैश्वानरउवाच ॥ स्ववशोनैवयुष्माकंविनाशंतुकरोम्यहम् ॥ अहमादेशकर्तावैनाहंकर्त्ताऽस्म्यनुग्रहम् ॥ ४६ ॥ अत्रक्रोधस
माविष्टोविचरामियदृच्छया ॥ ततोबाणोमहातेजास्त्रिपुरंवीक्ष्यदीपितम् ॥ ४७॥ आसनस्थोऽब्रवीदेवमहंदेवैर्विनाशितः ॥ अल्पसारैर्दुराचारैरीश्वरस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निवेदितः ॥ ४८ ॥ अपरीक्ष्यह्यहंदग्धःशङ्करेणमहात्मना ॥ नान्यःशत्रुस्तुमांहन्तुंवर्जयित्वामहेश्वरम् ॥ ४९ ॥ उत्थितःशिरसाकृत्वालिङ्गंत्रिभुवने
श्वरम् ॥ निर्गतःसपुरद्वारात्परित्यज्यसुहृत्स्वयम् ॥ ५० ॥ रत्नानिसुविचित्राणिस्त्रियोनानाविधास्तथा ॥ गृहीत्वाशिरसालिङ्गंन्यस्तंनगरमण्डले
॥ ५१ ॥ स्तुवतेदेवदेवेशंत्रैलोक्याधिपतिंशिवम् ॥ हरत्वयाऽहंनिर्दग्धोयदिवध्योऽस्मिशङ्कर ॥ ५२ ॥ त्वत्प्रसादान्महादेवमामेलिङ्गंविनश्यतु॥
अर्चितंहिमहादेवभक्त्यापरमयासदा ॥ ५३ ॥ त्वयायद्यपिवध्योऽहंमामेलिङ्गंविनश्यतु ॥ प्राप्यमेतन्महादेवत्वत्पादग्रहणंमम ॥ ५४ ॥ जन्मजन्म
महादेवत्वत्पादनिरतोह्यहम् ॥ तोटकच्छन्दसादेवंस्तुत्वातुपरमेश्वरम् ॥ ५५ ॥ ओंशिवशङ्करसर्वकरायनमोभवभीममहेशशिवायनमः ॥कुसुमायुध
देहविनाशकरत्रिपुरान्तकरान्धकचूर्णकर ॥ ५६ ॥ प्रमदाप्रियकामविभक्तनमोहिनमःसुरसिद्धगणैर्नमितः ॥ हयवानरसिंहगजेन्द्रमुखैरतिह्रस्वसु
दीर्घमुखैश्वगणैः ॥ ५७ ॥ उपलब्धुमशक्यतरैरसुरैर्व्यथितोनशरीरशतैर्बहुभिः ॥ प्रणतोभगवान्बहुभक्तिमताचलचन्द्रकलाधरदेवनमः ॥ ५८ ॥ सह
पुत्रकलत्रकलापधनैःसततंजयदेहिअनुस्मरणम् ॥ व्यथितोऽस्मिशरीरशतैर्बहुभिर्गमिताऽद्यमहानरकस्यगतिः ॥ ५९ ॥ ननिवर्ततियन्ममपापगतिः
शुचिकर्म्मविशुद्धमपित्यजति ॥ अनुकम्पतिदिग्भ्रमतिभ्रमतिभ्रमएषकुबुद्धिंनिवारयति ॥ ६० ॥ यःपठेत्तोटकंदिव्यंप्रयतःशुचिमानसः ॥ बाणस्यै
वयथारुद्रस्तस्यैववरदोभवेत् ॥ ६१ ॥ इमंस्तवंमहादिव्यंश्रुत्वादेवोमहेश्वरः ॥ प्रसन्नस्तुतदातस्यस्वयंदेवोमहेश्वरः ॥ ६२ ॥ ईश्वरउवाच ॥ न
भेतव्यंत्वयावत्ससौवर्णेतिष्ठदानव ॥ पुत्रपौत्रैःसपत्नीकैर्भार्याभृत्यजनैःसह ॥ ६३ ॥ अद्यप्रभृतिबाणत्वमवध्यस्त्रिदशैरपि ॥ भूयस्तस्यवरोदत्तोदेव
देवेनपाण्डव ॥ ६४ ॥ अक्षयश्चाव्ययोलोकेविचचारहनिर्भयः ॥ ततोनिवारयामासरुद्रःसप्तशिखंतथा ॥ ६५ ॥ तृतीयंरक्षितंतस्यशङ्करेणमहात्मना॥
भ्रमतेगगनेनित्यंरुद्रतेजःप्रभावतः ॥ ६६ ॥ एवंतुत्रिपुरंदग्धंशङ्करेणमहात्मना ॥ ज्वालामालाप्रदीप्तंतुपतितंधरणीतले ॥ ६७ ॥ एकंनिपातितंतस्य
श्रीशैलेत्रिपुरान्तके ॥ द्वितीयंपातितंतत्रपर्वतेऽमरकण्टके ॥ ६८ ॥ दग्धेतुत्रिपुरेराजन्रुद्रकोटिःप्रतिष्ठिता ॥ ज्वलन्तंपातितंतत्रतेनज्वालेश्वरःस्मृतः
॥ ६९ ॥ ऊर्ध्वेनप्रस्थितातस्यदिव्याज्वालादिवंगता ॥ हाहाकारस्तदाजातोसदेवासुरकिन्नरान् ॥ ७० ॥ तंशरंस्तम्भयेद्रुद्रोमाहेश्वरपुरोत्तमे ॥ एवं
व्रजेतयस्तस्मिन्पर्वतेऽमरकण्टके ॥ ७१ ॥ चतुर्दशभुवनानिसभुक्त्वापाण्डुनन्दन ॥ वर्षकोटिसहस्रंतुत्रिंशत्कोटयस्तथापराः ॥ ७२ ॥ ततोमहीतलं
प्राप्यराजाभवतिधार्मिकः ॥ पृथिवीमेकच्छत्रेणभुङ्क्तेनास्त्यत्रसंशयः ॥ ७३ ॥ एषपुण्योमहाराजसर्वतोऽमरकण्टकः ॥ चन्द्रसूर्योपरागेषुगच्छेद्योऽम
रकण्टकम् ॥ ७४ ॥ अश्वमेधाद्दशगुणंप्रवदन्तिमनीषिणः ॥ स्वर्गलोकमवाप्नोतिदृष्ट्वातत्रमहेश्वरम् ॥ ७५ ॥ सन्निहत्यागमिष्यन्तिराहुग्रहस्तेदिवा

CC-0. In Public Domain. Digitization by eGangotri

करे ॥ तदेवनिखिलंपुण्यंपर्वतेऽमरकण्टके ॥७६॥ पुण्डरीकस्ययज्ञस्यफलंप्राप्नोतिमानवः ॥ तत्रज्वालेश्वरोनामपर्वतेऽमरकण्टके ॥ ७७ ॥ तत्रस्ना
त्वादिवंयान्तियेमृतास्तेऽपुनर्भवाः॥ज्वालेश्वरेमहाराजयस्तुप्राणान्परित्यजेत् ॥ ७८ ॥ चन्द्रसूर्योपरागेतुभक्त्यापिशृणुतत्फलम् ॥ अमरानामदेवा
स्तेपर्वतेऽमरकण्टके ॥७९॥ रुद्रलोकमवाप्नोतियावदाभूतसम्प्लवम्॥अमरेश्वरस्यदेवस्यपर्वतस्यतटेजले ॥८०॥ कोटिशऋषिमुख्यास्तेतपस्तप्यन्ति
सुव्रताः ॥ समन्ताद्योजनंराजन्क्षेत्रंचामरकण्टकम् ॥ ८१ ॥ अकामोवासकामोवानर्मदायांशुभेजले ॥ स्नात्वामुच्येतपापेभ्योरुद्रलोकंसगच्छति
॥ ८२ ॥ इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेपञ्चदशोऽध्यायः ॥ १५ ॥ सूतउवाच ॥ पृच्छन्तितेमहात्मानोनारदंहिमहाजनाः ॥ युधिष्ठिरपराः
सर्वेंऋषयश्चतपोधनाः ॥ १ ॥ आख्याहिभगवंस्तथ्यंकावेरीसङ्गमंमहत् ॥ लोकानांचहितार्थायअस्माकंचविवृद्धये ॥ २ ॥ सदापापरतायेतुनरा
दुष्कृतिकारिणः ॥ मुच्यन्तेसर्वपापेभ्योगच्छन्तिपरमंपदम् ॥ ३ ॥ एतदिच्छामोविज्ञातुंभगवन्वक्तुमर्हसि ॥ ४ ॥ नारदउवाच ॥ शृणुध्वंसहिताः
सर्वेयुधिष्ठिरपुरोगमाः ॥ अत्रकृत्वामहायज्ञंकुबेरःसत्यविक्रमः ॥ ५ ॥ इदंतीर्थमनुप्राप्यसाम्राज्यादधिकोऽभवत् ॥ सिद्धिंप्राप्तोमहाराजतन्मेनिग
गदतःशृणु ॥ ६ ॥ कावेरीनर्मदांयत्रसङ्गतालोकविश्रुताम् ॥ तत्रस्नात्वाशुचिर्भूत्वाकुबेरःसत्यविक्रमः ॥ ७ ॥ तपस्तप्यतियक्षेन्द्रोदिव्यंवर्षशतंमह
त् ॥ तस्यतुष्टोमहादेवःप्रदद्याद्वरमुत्तमम् ॥ ८ ॥ भोभोयक्षमहासत्त्ववरंब्रूहियथेप्सितम् ॥ ब्रूहिकार्यंयथेष्टंतुयद्वामनसिवर्त्तते ॥ ९ ॥ कुबेरउवाच ॥
यदितुष्टोऽसिदेवेशयदिदेयोवरोमम ॥ आदिकृच्चैवसर्वेषांयक्षाणामधिपोभवेत् ॥ १० ॥ कुबेरस्यवचःश्रुत्वातुष्टोदेवोमहेश्वरः ॥ एवमस्तुततश्चोक्त्वा
तत्रैवान्तरधीयत ॥ ११ ॥ सोऽपिलब्धवरोयक्षःशीघ्रंयक्षकुलंगतः ॥ पूजितःसर्वयक्षेन्द्रैरभिषिक्तस्तुपार्थिवः ॥ १२ ॥ कावेरीसङ्गमंतत्रसर्वपाप
प्रणाशनम् ॥ येनरानाभिजानन्तिवञ्चितास्तेनसंशयः ॥ १३ ॥ तस्मात्सर्वप्रयत्नेनतत्रस्नायीतमानवः ॥ कावेरीचमहापुण्यानर्मदाचमहानदी
॥ १४ ॥ तत्रस्नात्वातुराजेन्द्रअर्चयेद्वृषभध्वजम् ॥ अश्वमेधफलंप्राप्यरुद्रलोकेमहीयते ॥ १५ ॥ अग्निप्रवेशंयःकुर्याद्यश्चकुर्य्यादनाशनम् ॥ अनि
वर्तिकागतिस्तस्ययथामेशङ्करोऽब्रवीत् ॥ १६ ॥ सेव्यमानोवरस्त्रीभिर्मोदतेदिविरुद्रवत् ॥ षष्टिवर्षसहस्राणिषष्टिकोटयस्तथापरे ॥ १७ ॥
मोदतेरुद्रलोकस्थोयत्रयत्रैवगच्छति ॥ पुण्यक्षयात्परिभ्रष्टोराजाभवतिधार्मिकः ॥ १८ ॥ भोगवान्धर्मशीलश्चमहांश्चैवकुलोद्भवः ॥ तत्रपीत्वाजलंस
म्यक्चान्द्रायणफलंलभेत् ॥ १९ ॥ स्वर्गंगच्छन्तितेमर्त्यायेपिबन्तिजलंशुभम् ॥ गङ्गायमुनयोर्मध्येयत्फलंयान्तिमानवाः ॥ २० ॥ कावेरीसङ्गमेस्ना
त्वातत्फलंतस्यजायते ॥ एवंतुतस्यराजेन्द्रकावेरीसङ्गमंमहत् ॥ २१ ॥ पुण्यंमहत्फलंतत्रसर्वपापप्रणाशनम् ॥ २२ ॥ इतिश्रीपाद्मेमहापुराणेस्वर्गख

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ण्डेषोडशोऽध्यायः ॥ १६ ॥ नारदउवाच ॥ उत्तरेनर्मदाकूलेतीर्थंयोजनविस्तृतम् ॥ पत्रेश्वरेतिविख्यातंसर्वपापहरंपरम् ॥ १ ॥ तत्रस्नात्वानरोराज
न्देवतैःसहमोदते ॥ पञ्चवर्षसहस्राणिक्रीडतेकामरूपधृत् ॥ २ ॥ गर्जनंतुततोगच्छेद्यत्रमेघउपस्थितः ॥ इन्द्रजिन्नामसम्प्राप्तंतस्यतीर्थप्रभावतः ॥३॥
मेघरावंततोगच्छेद्यत्रमेघाभिगर्जितम् ॥ मेघनादोगणस्तत्रवरसम्पन्नतांगतः ॥ ४ ॥ ततोगच्छेतराजेन्द्रब्रह्मावर्तमितिस्मृतम् ॥ तत्रसन्निहितोब्रह्मानि
त्यमेवयुधिष्ठिर ॥ ५ ॥ तत्रस्नात्वातुराजेन्द्रब्रह्मलोकेमहीयते ॥ ततोऽङ्गारेश्वरेतीर्थेनियतोनियमाशनः ॥६॥ सर्वपापविशुद्धात्मारुद्रलोकंसगच्छति॥
ततोगच्छेतराजेन्द्रकपिलातीर्थमुत्तमम् ॥ ७ ॥ तत्रस्नात्वानरोराजन्गोप्रदानफलंलभेत् ॥ काञ्चीतीर्थंततोगच्छेद्देवर्षिगणसेवितम् ॥ ८ ॥ तत्रस्नात्वा
नरोराजन्गोलोकंसमवाप्नुयात् ॥ ततोगच्छेत्तुराजेन्द्रकुण्डलेश्वरमुत्तमम् ॥ ९ ॥ तत्रसन्निहितोरुद्रस्तिष्ठतेउमयासह ॥ तत्रस्नात्वातुराजेन्द्रअवध्यस्त्रि
दशैरपि ॥ १० ॥ पिप्पलेशंततोगच्छेत्सर्वपापप्रणाशनम् ॥ तत्रगत्वातुराजेन्द्ररुद्रलोकेमहीयते ॥ ११ ॥ ततोगच्छेत्तुराजेन्द्रविमलंविमलेश्वरम्॥
तत्रदेवशिखारम्याईश्वरेणनिपातिता ॥ १२ ॥ तत्रप्राणान्परित्यज्यरुद्रलोकमवाप्नुयाम् ॥ ततःपुष्करिणींगच्छेत्तत्रस्नानंसमाचरेत् ॥ १३ ॥ स्नान
मात्रेनरस्तत्रइन्द्रस्यार्द्धासनंलभेत् ॥ नर्मदासरितांश्रेष्ठारुद्रदेहाद्विनिःसृता ॥ १४ ॥ तारयेत्सर्वभूतानिस्थावराणिचराणिच ॥ सर्वदेवातिदेवेनईश्वरेण
महात्मना ॥ १५ ॥ कथिताऋषिसङ्घेभ्योह्यस्माकंचविशेषतः ॥ मुनिभिःसंस्तुताह्येषानर्मदाप्रवरानदी ॥ १६ ॥ रुद्रदेहाद्विनिष्क्रान्तालोकानांहि
तकाम्यया ॥ सर्वपापहरानित्यंसर्वप्राणिनमस्कृता ॥ १७ ॥ संस्तुतादेवगन्धर्वैरप्सरोभिस्तथैवच ॥ नमःपुण्यजलेआद्येनमःसागरगामिनि
॥ १८ ॥ नमोऽस्तुतेऋषिगणैःशङ्करदेहनिःसृते ॥ १९ ॥ नमोऽस्तुतेधर्मवृतेवराननेनमोऽस्तुतेदेवगणैकवन्दिते ॥ नमोऽस्तुतेसर्वपवित्रपावनेनमो
ऽस्तुतेसर्वजगत्सुपूजिते ॥ २० ॥ यश्चेदंपठतस्तोत्रंनित्यंशुद्धस्तुमानवः ॥ ब्राह्मणोवेदमाप्नोतिक्षत्रियोविजयीभवेत् ॥ २१ ॥ वैश्यस्तुलभतेलाभं
शूद्रश्चैवशुभांगतिम् ॥ अन्नार्थीलभतेह्यन्नंस्मरणादेवनित्यशः ॥ २२ ॥ नर्मदांसेवतेनित्यंस्वयंदेवोमहेश्वरः ॥ तेनपुण्यानदीज्ञेयाब्रह्महत्यापहारिणी
॥ २३ ॥ इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेसप्तदशोऽध्यायः ॥ १७ ॥ नारदउवाच ॥ तदाप्रभृतिब्रह्माद्याऋषयश्चतपोधनाः ॥ सेवन्तेनर्मदांराजन्का
मक्रोधविवर्जिताः ॥ १ ॥ तस्मिन्निपतितंदृष्ट्वाशूलंदेवस्यभूतले ॥ तस्यपुण्यंसमाख्यातंशङ्करेणमहात्मना ॥ २ ॥ शूलभेदेतिविख्यातंतीर्थंपुण्यतमं
महत् ॥ तत्रस्नात्वार्चयेद्देवंगोसहस्रफलंलभेत् ॥ ३ ॥ त्रिरात्रंकारयेद्यस्तुतस्मिंस्तीर्थेनराधिप ॥ अर्चयित्वामहादेवंपुनर्जन्मनविद्यते ॥ ४ ॥ भीमे
श्वरंततोगच्छेन्नर्मदेश्वरमुत्तमम् ॥ आदित्येशंमहापुण्यंतथाऽऽज्यमधुनासह ॥ ५ ॥ मल्लिकेश्वरमभ्यर्च्यपर्याप्तंजन्मनःफलम् ॥ वरुणेशंततःपश्ये

Nepal Sanskrit University, Balmeeki Camp

CC-0. In Public Domain. Digitization by eGangotri

न्नीराजेश्वरमुत्तमम् ॥ ६ ॥ सर्वतीर्थफलंतस्यपञ्चायतनदर्शनात् ॥ ततोगच्छेतराजेन्द्रयुद्धंवैयत्रसाधितम् ॥ ७ ॥ कोटितीर्थंतुविख्यातमसुरायत्रयो
धिताः ॥ यत्रतेनिहताराजन्दानवाबलदर्पिताः ॥ ८ ॥ तेषांशिरांसिगृह्यन्तेनिहतास्तेसमागताः ॥ तैस्तुसंस्थापितोदेवःशूलपाणिर्महेश्वरः ॥ ९ ॥
कोटिर्विनिहतातत्रतेनकोटीश्वरःस्मृतः ॥ दर्शनात्तस्यतीर्थस्यसदेहःस्वर्गमावहेत् ॥ १० ॥ तदाइन्द्रेणक्षुद्रत्वाद्वज्रकीलेनयन्त्रितः ॥ तदाप्रभृतिलोका
नांस्वर्गमत्वंनिवारितम् ॥ ११ ॥ सघृतंश्रीफलंदत्त्वाकृत्वाचान्तेप्रदक्षिणम् ॥ सर्वतःसहदेवेनशिरसाऽऽदायधारयेत् ॥ १२ ॥ सर्वकामेनसम्पूर्णोरा
जाभवतिपाण्डव ॥ मृतोरुद्रत्वमाप्नोतिनचेहजायतेपुनः ॥ १३ ॥ स्वर्गंगत्वाततोराज्यंकृत्वाऽऽगत्यततोदिवम् ॥ महादेवंतथोपास्यत्रयोदश्यांहि
मानवाः ॥ १४ ॥ स्नातमात्रोनरस्तत्रसर्वयज्ञफलंलभेत् ॥ ततोगच्छेतराजेन्द्रतीर्थंपरमशोभनम् ॥ १५ ॥ नराणांपापनाशायअगस्त्येश्वरमुत्तमम् ॥
तत्रस्नात्वानरोराजन्मुच्यतेब्रह्महत्यया ॥ १६ ॥ कार्तिकस्यतुमासस्यकृष्णपक्षचतुर्दशी ॥ घृतेनस्नापयेद्देवंसमाधिस्थोजितेन्द्रियः ॥ १७ ॥ एकविं
शकुलोपेतोनमुच्येदैश्वरात्पदात् ॥ यानंचोपानहौछत्रंतथादद्याच्चकम्बलम् ॥ १८ ॥ भोजनंचैवविप्राणांसर्वंकोटिगुणंभवेत् ॥ ततोगच्छेतराजेन्द्रर
विस्तवमनुत्तमम् ॥ १९ ॥ तत्रस्नात्वानरोराजन्सिंहासनगतिर्भवेत् ॥ नर्म्मदादक्षिणेकूलेतीर्थंशक्रस्यविश्रुतम् ॥ २० ॥ उपोष्यरजनीमेकांस्नानंतत्र
समाचरेत् ॥ स्नानंकृत्वायथान्यायमर्चयेत्तुजनार्दनम् ॥ २१ ॥ गोसहस्रफलंतस्यविष्णुलोकंसगच्छति ॥ ऋषितीर्थंततोगच्छेत्सर्वपापहरंनृणाम् ॥
॥ २२ ॥ स्नातमात्रोनरस्तत्रशिवलोकेमहीयते ॥ नारदस्यचतत्रैवतीर्थंपरमशोभनम् ॥ २३ ॥ स्नातमात्रोनरस्तत्रगोसहस्रफलंलभेत् ॥ देवतीर्थंततो
गच्छेद्ब्रह्मणानिर्मितंपुरा ॥ २४ ॥ तत्रस्नात्वानरोराजन्ब्रह्मलोकेमहीयते ॥ अमरकण्टकंततोगच्छेदमरस्थापितंपुरा ॥ २५ ॥ स्नातमात्रोनरस्तत्र
गोसहस्रफलंलभेत ॥ ततोगच्छेतराजेन्द्रवामनेश्वरमुत्तमम् ॥ २६ ॥ तत्रवामनकंदृष्ट्वामुच्यतेब्रह्महत्यया ॥ ऋषितीर्थंततोगच्छेदीशानेशंपुमान्ध्रुवम्
॥ २७ ॥ वटेश्वरंततोदृष्ट्वापर्य्याप्तंजन्मनःफलम् ॥ भीमेश्वरंततोगच्छेत्सर्वव्याधिविनाशनम् ॥ २८ ॥ स्नातमात्रोनरोराजन्सर्वदुःखा
त्प्रमुच्यते ॥ ततोगच्छेतराजेन्द्रवारणेश्वरमुत्तमम् ॥ २९ ॥ तत्रस्नात्वानरोराजन्सर्वदुःखात्प्रमुच्यते ॥ सोमतीर्थंततोगच्छेत्पश्येच्चन्द्रमनु
त्तमम् ॥ ३० ॥ तत्रस्नात्वानरोराजन्भक्त्यापरमयायुतः ॥ तत्क्षणाद्दिव्यदेहस्थःशिववन्मोदतेचिरम् ॥ ३१ ॥ षष्टिवर्षसहस्राणिशिवलोकेमहीयते
॥ ततोगच्छेतराजेन्द्रपिङ्गलेश्वरमुत्तमम् ॥ ३२ ॥ अहोरात्रोपवासेनत्रिरात्रफलमाप्नुयात् ॥ तस्मिंस्तीर्थेतुराजेन्द्रकपिलांयःप्रयच्छति ॥ ३३ ॥
यावन्तितस्यारोमाणितत्प्रसूतकुलस्यच ॥ तावद्वर्षसहस्राणिरुद्रलोकेमहीयते ॥ ३४ ॥ यस्तुप्राणपरित्यागंतत्रकुर्य्यान्नराधिप ॥ अक्षयंमोदतेकालं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यवच्चन्द्रदिवाकरौ ॥ ३५ ॥ नर्मदातटमाश्रित्यतिष्ठन्तियेतुमानवाः ॥ तेमृताःस्वर्गमायान्तितथासुकृतिनोयथा ॥३६॥सुरभिकेश्वरंगच्छन्नारकंको टिकेश्वरम् ॥ गङ्गावतरणेतत्रदिनेपुण्योनसंशयः ॥३७॥ नन्दितीर्थंततोगच्छेत्स्नानंतत्रसमाचरेत् ॥ तुष्यतेतस्यनन्दीशःसोमलोकेमहीयते ॥३८॥ ततोद्वीपेश्वरंगच्छेद्व्यासतीर्थंतपोवनम् ॥ निवर्तितापुरातत्रव्यासभीतामहानदी ॥ ३९ ॥ हुङ्कारितातुव्यासेनदक्षिणेनततोगता ॥ प्रदक्षिणंतुयःकुर्यात्तस्मिंस्तीर्थेनराधिप ॥ ४० ॥ व्यासस्तस्यभवेत्प्रीतोवाञ्छितंलभतेफलम् ॥ सूत्रेणवेष्टयेद्यस्तुदीप्तंदेवंसवेदिकम् ॥ ४१ ॥ क्रीडतेह्यक्षयंकालंयथा रुद्रस्तथैवसः ॥ ततोगच्छेतराजेन्द्रएरण्डीतीर्थमुत्तमम् ॥ ४२ ॥ सङ्गमेतुनरःस्नात्वामुच्यतेसर्वपातकैः ॥ एरण्डीत्रिषुलोकेषुविख्यातापापनाशिनी ॥ ४३ ॥ अथवाश्वयुजेमासेशुक्लपक्षस्यचाष्टमी ॥ शुचिर्भूत्वानरःस्नात्वासोपवासपरायणः ॥ ४४ ॥ ब्राह्मणंभोजयेदेकंकोटिर्भवतिभोजिता ॥ एरण्डीसङ्गमेस्नात्वाभक्तिभावानुरञ्जितः ॥ ४५ ॥ शुक्तिकांशिरसिस्थाप्यअवगाह्यचवैजलम् ॥ नर्मदोदकसंमिश्रंमुच्यतेसर्वकिल्बिषैः ॥ ४६ ॥ प्रदक्षिणंतुयःकुर्यात्तस्मिंस्तीर्थेनराधिप ॥ प्रदक्षिणीकृतातेनसप्तद्वीपावसुन्धरा ॥ ४७ ॥ ततःसुवर्णतिलकेस्नात्वादत्त्वाचकाञ्चनम् ॥ काञ्चनेनवि मानेनरुद्रलोकेमहीयते ॥ ४८ ॥ ततःस्वर्गच्युतःकालाद्राजाभवतिवीर्यवान् ॥ ततोगच्छेतराजेन्द्रइक्षुनद्यास्तुसङ्गमम् ॥ ४९ ॥ त्रैलोक्येविश्रुतं दिव्यंतत्रसन्निहितःशिवः ॥ तत्रस्नात्वानरोराजन्गाणपत्यमवाऽऽप्नुयात् ॥ ५० ॥ स्कन्दतीर्थंततोगच्छेत्सर्वपापप्रणाशनम् ॥ आजन्मनःकृतंपा पंस्नानमात्राद्व्यपोहति ॥ ५१ ॥ आङ्गिरसंततोगच्छेत्स्नानंतत्रसमाचरेत् ॥ गोसहस्रफलंतस्यरुद्रलोकेमहीयते ॥ ५२ ॥ लाङ्गलतीर्थंततोगच्छे त्सर्वपापप्रणाशनम् ॥ तत्रगत्वातुराजेन्द्रस्नानंतत्रसमाचरेत् ॥ ५३ ॥ सप्तजन्मकृतैःपापैर्मुच्यतेनात्रसंशयः ॥ वटेश्वरंततोगच्छेत्सर्वतीर्थमनुत्त मम् ॥ ५४ ॥ तत्रस्नात्वानरोराजन्गोसहस्रफलंलभेत् ॥ सङ्गमेशंततोगच्छेत्सर्वपापहरंपरम् ॥ ५५ ॥ तत्रस्नात्वानरोराज्यंलभतेनात्रसंशयः ॥ भद्रतीर्थंसमासाद्यदानंदद्यात्तुयोनरः ॥ ५६ ॥ तस्यतीर्थप्रभावेणसर्वंकोटिगुणंभवेत् ॥ अथनारीभवेत्कापितत्रस्नानंसमाचरेत् ॥ ५७ ॥ गौरीतुल्याभवेत्सातुइन्द्रंयातिनसंशयः ॥ अङ्गारेशंततोगच्छेत्स्नानंतत्रसमाचरेत् ॥ ५८ ॥ स्नातमात्रोनरस्तत्ररुद्रलोकेमहीयते ॥ अङ्गा रक्यांचतुर्थ्यांतुस्नानंतत्रसमाचरेत् ॥ ५९ ॥ अक्षयंमोदतेकालंसुरारिकृतशासनः ॥ अयोनिसङ्गमेस्नात्वानपश्येद्योनिमन्दिरम् ॥ ६० ॥ पाण्ड वेश्वरकंगत्वास्नानंतत्रसमाचरेत् ॥ अक्षयंमोदतेकालमवध्यस्तुसुरासुरैः ॥ ६१ ॥ विष्णुलोकंततोगत्वाक्रीडाभोगसमन्वितः ॥ तत्रभुक्त्वामहा भोगान्मर्त्येराजाभिजायते ॥ ६२ ॥ कम्बोतिकेश्वरंगच्छेत्स्नानंतत्रसमाचरेत् ॥ उत्तरायणेसम्प्राप्तेयदिच्छेत्तस्यतद्भवेत ॥ ६३ ॥ चन्द्रभागांत

CC-0. In Public Domain. Digitization by eGangotri

तोगच्छेत्स्नानंतत्रसमाचरेत् ॥ स्नातमात्रोनरस्तत्रसोमलोकेमहीयते ॥ ६४ ॥ ततोगच्छेतराजेन्द्रतीर्थंशक्रस्यविश्रुतम् ॥ पूजितंदेवराजेनदेवैर
पिनमस्कृतम् ॥ ६५ ॥ तत्रस्नात्वानरोराजन्दानंदत्त्वाचकाञ्चनम् ॥ अथवानीलवर्णाभंवृषभंयःसमुत्सृजेत् ॥ ६६ ॥ वृषभस्यतुरोमाणितत्प्रसूति
कुलेषुच ॥ तावद्वर्षसहस्राणिनरोहरपुरेवसेत् ॥ ६७ ॥ ततःस्वर्गात्परिभ्रष्टोराजाभवतिवीर्यवान् ॥ अश्वानांश्वेतवर्णानांसहस्रेषुनराधिप ॥ ६८ ॥
स्वामीभवतिमर्त्येषुतस्यतीर्थप्रभावतः ॥ ततोगच्छेतराजेन्द्रब्रह्मावर्त्तमनुत्तमम् ॥ ६९ ॥ तत्रस्नात्वानरोराजंस्तर्पयेत्पितृदेवताः ॥ उपोष्यरज
नीमेकांपिण्डंदत्त्वायथाविधि ॥ ७० ॥ कन्यागतेयथाऽऽदित्यंअक्षयंसञ्चितंभवेत् ॥ ततोगच्छेतराजेन्द्रकपिलातीर्थमुत्तमम् ॥ ७१ ॥ तत्रस्ना
त्वानरोराजन्कपिलांयःप्रयच्छति ॥ सम्पूर्णांपृथिवींदत्त्वायत्फलंतदवाप्नुयात् ॥ ७२ ॥ नर्मदेशात्परंतीर्थंनभूतंनभविष्यति ॥ तत्रस्नात्वानरोरा
जन्नश्वमेधफलंलभेत् ॥ ७३ ॥ तत्रसर्वगतोराजापृथिव्यामभिजायते ॥ सर्वलक्षणसम्पूर्णःसर्वव्याधिविवर्जितः ॥ ७४ ॥ नार्मदीयोत्तरेकूलेती
र्थंपरमशोभनम् ॥ आदित्यायतनंरम्यमीश्वरेणतुभावितम् ॥ ७५ ॥ तत्रस्नात्वातुराजेन्द्रदानंदत्त्वाचशक्तितः ॥ तस्यतीर्थप्रभावेणदत्तंभवतिचाक्ष
यम् ॥ ७६ ॥ दरिद्राव्याधितायेतुयेचदुष्कृतकर्मिणः ॥ मुच्यन्तेसर्वपापेभ्यःसूर्यलोकंप्रयान्तिच ॥ ७७ ॥ माघमासेतुसम्प्राप्तेशुक्लपक्षस्यसप्तमीम्॥
वसेदायतनेयस्तुनिरन्नोयोजितेन्द्रियः ॥ ७८ ॥ नजायतेव्याधितश्चकालेऽन्धोवधिरस्तथा ॥ सुभगोरूपसम्पन्नःस्त्रीणांभवतिवल्लभः ॥ ७९ ॥
इदंतीर्थंमहापुण्यंमार्कण्डेयेनभाषितम् ॥ येप्रयान्तिनराजेन्द्रवञ्चितास्तेनसंशयः ॥ ८० ॥ मासेश्वरंततोगच्छेत्स्नानंतत्रसमाचरेत् ॥ स्नातमात्रोनर
स्तत्रस्वर्गलोकमवाप्नुयात् ॥ ८१ ॥ मोदतेस्वर्गलोकस्थोयावदिन्द्राश्चतुर्दश ॥ ततःसमीपतःस्थित्वानागेश्वरंतपोवनम् ॥ ८२ ॥ तत्रस्नात्वा
तुराजेन्द्रशुचिर्भूत्वासमाहितः ॥ बहुभिर्नागकन्याभिःक्रीडतेकालमक्षयम् ॥ ८३ ॥ कुबेरभवनंगच्छेत्कुबेरोयत्रसंस्थितः ॥ कालेश्वरंपरंतीर्थंकुबेरोय
त्रतोषितः ॥ ८४ ॥ यत्रस्नात्वातुराजेन्द्रसर्वसम्पदमाप्नुयात् ॥ ततःपश्चिमतोगच्छेन्मरुतालयमुत्तमम् ॥ ८५ ॥ तत्रस्नात्वातुराजेन्द्रशुचिर्भूत्वासमा
हितः ॥ काञ्चनंतुततोदद्यादन्नंशक्त्यातुबुद्धिमान् ॥ ८६ ॥ पुष्पकेणविमानेनवायुलोकंसगच्छति ॥ यमतीर्थंततोगच्छेन्माघमासेयुधिष्ठि
र ॥ ८७ ॥ कृष्णपक्षेचतुर्दश्यांस्नानंतत्रसमाचरेत् ॥ नक्तंभोज्यंततःकुर्यान्नगच्छेद्योनिसङ्कटम् ॥ ८८ ॥ अहल्यातीर्थंततोगच्छेत्स्नानंतत्रसमा
चरेत् ॥ स्नातमात्रोनरस्तत्रअप्सरोभिःप्रमोदते ॥ ८९ ॥ पारमेश्वरेतपस्तप्त्वाअहल्यामुक्तिमागमत् ॥ चैत्रमासेतुसम्प्राप्तेशुक्लपक्षेत्रयोदशी ॥ ९० ॥
कामदेवदिनेतस्मिन्नहल्यांतुप्रपूजयेत् ॥ यत्रतत्रसमुत्पन्नोनरस्तत्रप्रियोभवेत् ॥ ९१ ॥ स्त्रीवल्लभोभवेच्छ्रीमान्कामदेवइवापरः ॥ अयोध्यांतुसमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साद्यतीर्थंशक्रस्यविश्रुतम् ॥ ९२ ॥ स्नातमात्रोनरस्तत्रगोसहस्रफलंलभेत् ॥ सोमतीर्थंततोगच्छेत्स्नानमात्रंसमाचरेत् ॥ ९३ ॥ स्नातमात्रोनरस्त
त्रसर्वपापैःप्रमुच्यते ॥ सोमग्रहेतुराजेन्द्रपापक्षयकरंभवेत् ॥ ९४ ॥ त्रैलोक्यविश्रुतंराजन्सोमतीर्थंमहाफलम् ॥ यस्तुचान्द्रायणंकुर्यात्तस्मिंस्तीर्थे
नराधिप ॥ ९५ ॥ सर्वपापविशुद्धात्मासोमलोकंसगच्छति ॥ अग्निप्रवेशेतुजलेऽप्यथवाऽपिह्यनाशने ॥ ९६ ॥ सोमतीर्थेमृतोयस्तुनासौमर्त्योऽभि
जायते ॥ स्तम्भतीर्थेततोगच्छेत्स्नानंतत्रसमाचरेत् ॥ ९७ ॥ स्नातमात्रोनरस्तत्रसोमलोकेमहीयते ॥ ततोगच्छेतराजेन्द्रविष्णुतीर्थमनुत्तमम् ॥ ९८ ॥
योधनीपुरविख्यातंविष्णुतीर्थमनुत्तमम् ॥ असुरायोधितास्तत्रवासुदेवेनकोटिशः ॥ ९९ ॥ तत्रतीर्थंसमुत्पन्नंविष्णुःप्रीतोभवेदिह ॥ अहोरात्रोपवासे
नब्रह्महत्यांव्यपोहति ॥ १०० ॥ ततोगच्छेत्तुराजेन्द्रतापसेश्वरमुत्तमम् ॥ अमोहकमितिख्यातंपितॄन्यस्तत्रतर्पयेत् ॥ १ ॥ पौर्णमास्याममावास्यां
श्राद्धंकुर्याद्यथाविधि ॥ तत्रस्नात्वानरोराजन्पितृपिण्डंतुदापयेत् ॥ २ ॥ गजरूपाःशिलास्तत्रतोयमध्येप्रतिष्ठिताः ॥ तस्मिंस्तुदापयेत्पिण्डंवैशाखे
तुविशेषतः ॥ ३ ॥ तृप्यन्तिपितरस्तावद्यावत्तिष्ठतिमेदिनी ॥ ततोगच्छेतराजेन्द्रसिद्धेश्वरमनुत्तमम् ॥ ४ ॥ तत्रगत्वातुराजेन्द्रगणपत्यन्तिकंव्रजेत्॥
ततोगच्छेतराजेन्द्रलिङ्गोयत्रजनार्दनः ॥ ५ ॥ तत्रस्नात्वातुराजेन्द्रविष्णुलोकेमहीयते ॥ नर्मदादक्षिणेकूलेतीर्थंपरमशोभनम् ॥ ६ ॥ कामदेवःस्वयं
तत्रतपस्तप्यत्यसौमहान् ॥ दिव्यंवर्षसहस्रंतुशङ्करंपर्युपासते ॥ ७ ॥ समाधिपर्वदग्धस्तुशङ्करेणमहात्मना ॥श्वेतपर्वोपमश्चैवहुताशःशुक्रपर्वणि ॥८॥
एतेदग्धास्तुतेसर्वेकुसुमेश्वरसंस्थिताः ॥ दिव्यवर्षसहस्रेणतुष्टस्तेषांमहेश्वरः ॥ ९ ॥ उमयासहितोरुद्रस्तेषांतुष्टोवरप्रदः ॥ विमोक्षयित्वातान्सर्वान्नर्म्म
दातटमास्थितान् ॥ ११० ॥ तस्यतीर्थप्रभावेणपुनर्देवत्वमागतः ॥ त्वत्प्रसादान्महादेवतीर्थंचभवतूत्तमम् ॥ ११ ॥ अर्धयोजनविस्तीर्णंतीर्थंदिक्षुस
मन्ततः ॥ तस्मिंस्तीर्थेनरःस्नात्वाउपवासपरायणः ॥ १२ ॥ कुसुमायुधरूपेणरुद्रलोकेमहीयते ॥ वैश्वानरेयमेनैवकामदेवेनवायवे ॥ १३ ॥ तपस्त
प्त्वातुराजेन्द्रतत्रैवचपुरागतैः ॥ अन्धोनस्यसमीपेतुनातिदूरेतुतस्यवै ॥ १४ ॥ स्नानंदानंचतत्रैवभोजनंपिण्डपातनम् ॥ अग्निवेशेजलेवापिअथवा
पिअनाशने ॥ १५ ॥ अनिवर्तिकागतिस्तस्यमृतस्याप्यर्द्धयोजने ॥ त्रैयम्बकेणतोयेनस्नापयेन्नरपुङ्गवः ॥ १६ ॥ अन्धोनमूलेदत्त्वातुपिण्डंचैवयथा
विधि ॥ पितरस्तस्यतृप्यन्तियावच्चन्द्रदिवाकरौ ॥ १७ ॥ उत्तरायणेसम्प्राप्तेतत्रस्नानंकरोतियः ॥ पुरुषोवापिस्त्रीवापिवसेदायतनेशुचिः ॥ १८ ॥
सिद्धेश्वरस्यदेवस्यप्रभातेपूजनान्नरः ॥ सतांगतिमवाप्नोतिनतांसर्वैर्महामखैः ॥ १९ ॥ यदाचतीर्थकालेनरूपवान्सुभगोभवेत् ॥ मर्त्येभवतिराजासावा
समुद्रान्तगोचरे ॥ १२० ॥ क्षेत्रपालंनपश्येच्चदण्डपालंमहाबलम् ॥ वृथातस्यभवेद्यात्राअदृष्ट्वाकर्णकुण्डलम् ॥ २१ ॥ एतत्तीर्थफलंज्ञात्वासर्वेदेवाःस

CC-0. In Public Domain. Digitization by eGangotri

मागताः ॥ मुञ्चन्तिपुष्पवृष्टिंतुस्तुवन्तिकुसुमेश्वरम् ॥ १२२ ॥ इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेअष्टादशोऽध्यायः ॥ १८ ॥ नारदउवाच ॥ भार्ग
वेशंततोगच्छेद्गत्त्यायत्रचविष्णुना ॥ हुङ्कारितास्तुदेवेनदानवाःप्रलयंगताः ॥ १ ॥ तत्रस्नात्वातुराजेन्द्रसर्वपापैःप्रमुच्यते ॥ शुक्लतीर्थस्यचोत्पत्तिं
शृणुत्वंपाण्डुनन्दन ॥ २ ॥ हिमवच्छिखरेरम्येनानाधातुविचित्रिते ॥ तरुणादित्यसङ्काशेतप्तकाञ्चनसन्निभे ॥३ ॥ वज्रस्फटिकसोपानेचित्रपट्टशिला
तले ॥ जाम्बूनदमयेदिव्येनानापुष्पोपशोभिते ॥ ४ ॥ तत्रासीनंमहादेवंसर्वज्ञंप्रभुमव्ययम् ॥ लोकानुग्राहकंशान्तंगणवृन्दैःसमावृतम्॥ ५ ॥ स्कन्दन
न्दिमहाकालैर्वीरभद्रगणादिभिः ॥ उमयासहितंदेवंमार्कण्डःपरिपृच्छति ॥६॥ देवदेवमहादेवइन्द्रकामादिसंस्तुत ॥ संसारभवभीतोऽहंसुखोपायंब्रवी
हिमे ॥ ७ ॥ भगवन्भूतभव्येशसर्वपापप्रणाशनम् ॥ तीर्थानांपरमंतीर्थंतद्वदस्वमहेश्वर ॥ ८ ॥ ईश्वरउवाच ॥ शृणुविप्रमहाभागसर्वशास्त्रविशारद ॥
स्नानादिकुरुगच्छत्वंऋषिसङ्घैस्समावृतः ॥ ९ ॥ मन्वत्रियाज्ञवल्क्याश्चकाश्यपश्चैवचाङ्गिराः ॥ यमापस्तम्बसंवर्ताःकात्यायनबृहस्पती ॥ १० ॥
नारदोगौतमश्चैवपृच्छन्तिधर्मकाङ्क्षिणः ॥ गङ्गाकनखलेपुण्याप्रयागंपुष्करंगया ॥ ११ ॥ कुरुक्षेत्रंतुपुण्यंचराहुग्रस्तेदिवाकरे ॥ दिवावायदिवारात्रौ
शुक्लतीर्थमहाफलम् ॥ १२ ॥ दर्शनात्स्पर्शनाच्चैवस्नानाद्ध्यानात्तपोऽर्जनात् ॥ होमाच्चैवोपवासाच्चशुक्लतीर्थफलंमहत् ॥ १३ ॥ शुक्लतीर्थंमहापुण्यं
नद्यांतुसंव्यवस्थितम् ॥ चाणिक्योनामराजर्षिःसिद्धिंतत्रसमागतः ॥ १४ ॥ एतत्क्षेत्रंसमुत्पन्नंयोजनावृत्तिसंस्थितम् ॥ शुक्लतीर्थंमहापुण्यंसर्वपापप्र
णाशनम् ॥ १५ ॥ पादपाग्रेणदृष्टेनब्रह्महत्यांव्यपोहति ॥ अहमत्रऋषिश्रेष्ठतिष्ठामिह्युमयासह ॥ १६ ॥ वैशाखेविमलेमासिकृष्णपक्षेचतुर्दशी ॥
कैलासाच्चापिनिर्गत्यतत्रसन्निहितोह्यहम् ॥ १७ ॥ देवकिन्नरगन्धर्वाःसिद्धविद्याधरास्तथा ॥ गणाश्चाप्सरसोनागाःसर्वेदेवाःसमागताः ॥ १८ ॥
गगनस्थास्तुतिष्ठन्तिविमानैःसर्वकामकैः ॥ शुक्लतीर्थेतुराजेन्द्रआगताधर्मकाङ्क्षिणः ॥ १९ ॥ रजकेनयथावस्त्रंशुक्लंभवतिवारिणा ॥
आजन्मसञ्चितंपापंशुक्लतीर्थेव्यपोहति ॥२०॥ स्नानंदानंमहापुण्यंमार्कण्डऋषिसत्तम ॥ शुक्लतीर्थात्परंतीर्थंनभूतंनभविष्यति ॥ २१ ॥ पूर्ववयसि
कर्माणिकृत्वापापानिमानवः ॥ अहोरात्रोपवासेनशुक्लतीर्थेव्यपोहति ॥ २२ ॥ तपसाब्रह्मचर्येणयज्ञैर्दानेनवापुनः ॥ देवदानेनयापुष्टिर्नसाक्रतु
शतैरपि ॥ २३ ॥ कार्तिकस्यचमासस्यकृष्णपक्षेचतुर्दशी ॥ घृतेनस्नापयेद्देवमुपोष्यपरमेश्वरम् ॥ २४ ॥ एकविंशत्कुलोपेतोनच्यवेच्चैश्वरात्प
दात् ॥ शुक्लतीर्थंपरंतीर्थंमृषिसिद्धनिषेवितम् ॥ २५ ॥ तत्रस्नात्वाततोराजन्पुनर्जन्मनविद्यते ॥ स्नात्वावैशुक्लतीर्थेऽपिअर्चयेद्वृषभध्वजम् ॥२६॥
जागरंकारयेत्तत्रनृत्यगीतादिमङ्गलैः ॥ प्रभातेशुक्लतीर्थेतुस्नानंवैदेवतार्चनम् ॥ २७ ॥ आचार्यंभोजयत्पश्चाच्छिवव्रतपरःशुचिः ॥ भोजनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चयथाशक्त्यावित्तशाठ्यंनकारयेत् ॥ २८ ॥ प्रदक्षिणंततःकृत्वाशनैर्देवान्तिकंव्रजेत् ॥ एवंवैकुरुतेयस्तुतस्यपुण्यफलंशृणु ॥ २९ ॥ दिव्ययानस
मारूढःस्तूयमानोऽप्सरोगणैः ॥ शिवतुल्यबलोपेतस्तिष्ठत्याभूतसम्प्लवम् ॥ ३० ॥ शुक्लतीर्थेतुयानारीददातिकनकंशुभम् ॥ घृतेनस्नापयेद्देवंकु
मारंचाभिपूजयेत् ॥ ३१ ॥ एवंयाकुरुतेभक्त्यातस्याःपुण्यफलंशृणु ॥ मोदतेदेवलोकस्थायावदिन्द्राश्चतुर्दश ॥ ३२ ॥ अयनेवाचतुर्दश्यांस
ङ्क्रान्तौविषुवेतथा ॥स्नात्वातुसोपवासःसनिर्जितात्मासमाहितः ॥३३॥ दानंदद्याद्यथाशक्त्याप्रीयेतांहरिशङ्करौ ॥शुक्लतीर्थप्रभावेणसर्वंभवतिचाक्ष
यम् ॥ ३४ ॥ अनाथंदुर्गतंविप्रंनाथवन्तमथापिवा ॥ उद्वाहयतियस्तीर्थेतस्यपुण्यफलंशृणु ॥ ३५ ॥ यावत्तद्रोमसङ्ख्यातुतत्प्रसूतिकुलेषुच ॥
तावद्वर्षसहस्राणिशिवलोकेमहीयते ॥ ३६ ॥ इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेएकोनविंशोऽध्यायः ॥ १९ ॥ नारदउवाच ॥ ततस्तुनरकंगच्छेत्स्ना
नंतत्रसमाचरेत् ॥ स्नातमात्रोनरस्तत्रनरकंनचपश्यति ॥ १ ॥ अस्यतीर्थस्यमाहात्म्यंशृणुत्वंपाण्डुनन्दन ॥ तस्मिंस्तीर्थेतुराजेन्द्रयान्यस्थीनिविनि
क्षिपेत् ॥ २ ॥ विलयंयान्तिसर्वाणिरूपवाञ्जायतेनरः ॥ गोतीर्थंतुततोगच्छेद्दृष्ट्वापापात्प्रमुच्यते ॥ ३ ॥ ततोगच्छेतराजेन्द्रकपिलातीर्थमुत्तमम् ॥
तत्रस्नात्वानरोराजन्गोसहस्रफलंलभेत् ॥ ४ ॥ ज्येष्ठमासेतुसम्प्राप्तेचतुर्दश्यांविशेषतः ॥ तत्रोपोष्यनरोभक्त्याकपिलांयःप्रयच्छति ॥ ५ ॥ घृतेन
दीपंप्रज्वाल्यघृतेनस्नापयेच्छिवम् ॥ सघृतंश्रीफलंदत्त्वाकृत्वाचान्तेप्रदक्षिणम् ॥६॥ घण्टाभरणसंयुक्तांकपिलांयःप्रयच्छति ॥ शिवतुल्योनरोभूत्वा
नचेहजायतेपुनः ॥ ७ ॥ अङ्गारकदिनेप्राप्तेचतुर्थ्यांतुविशेषतः ॥ स्नापयित्वाशिवंभक्त्याब्राह्मणेभ्यस्तुभोजनम् ॥ ८ ॥ अङ्गारकनवम्यांतुअमा
वास्यांतथैवच ॥ स्नापयेत्तत्रयत्नेनरूपवान्सुभगोभवेत् ॥ ९ ॥ घृतेनस्नापयेल्लिङ्गंपूजयेद्भक्तितोद्विजान् ॥ पुष्पकेणविमानेनसहस्रैःपरिवारितः
॥ १० ॥ शैवंपदमवाप्नोतिनात्रचाभिगतंभवेत् ॥ अक्षयंमोदतेकालंयथारुद्रस्तथैवच ॥११॥ यदातुकर्मसंयोगान्मर्त्यलोकमुपागतः ॥ राजाभवति
धर्मिष्ठोरूपवाञ्जायतेबली ॥ १२ ॥ ततोगच्छेतराजेन्द्रऋषितीर्थमनुत्तमम् ॥ तृणबिन्दुऋषिर्नामशापदग्धोव्यवस्थितः ॥१३॥ सतत्तीर्थप्रभावेण
पापमुक्तोऽभवद्द्विजः ॥ ततोगच्छेतराजेन्द्रगणेश्वरमनुत्तमम् ॥ १४ ॥ श्रावणेमासिसम्प्राप्तेकृष्णपक्षेचतुर्दशीम् ॥ स्नातमात्रोनरस्तत्ररुद्रलोकेमही
यते ॥ १५ ॥ पितॄणांतर्पणंकृत्वामुच्यतेचऋणत्रयात् ॥ गणेश्वरसमीपेतुगङ्गावदनमुत्तमम् ॥ १६ ॥ अकामोवासकामोवातत्रस्नात्वातुमानवः ॥
आजन्मजनितःपापैर्मुच्यतेनात्रसंशयः ॥ १७ ॥ सर्वदापर्वदिवसेस्नानंतत्रसमाचरेत् ॥ पितॄणांतर्पणंकृत्वामुच्यतेचऋणत्रयात् ॥ १८ ॥ प्रयागे
यत्फलंदृष्टंशङ्करेणमहात्मना ॥ तदेवनिखिलंपुण्यंगङ्गारावर्कसङ्गमे ॥ १९ ॥ तस्यैवंपश्चिमेस्थानेसमीपेनातिदूरतः ॥ दशाश्वमेधिकंनामत्रिषुलोके

CC-0. In Public Domain. Digitization by eGangotri

पुविश्रुतम् ॥ २० ॥ उपोष्यरजनीमेकांमासिभाद्रपदेतथा ॥ अमावस्यांनरःस्नात्वात्रजेद्वैयत्रशङ्करः ॥ २१ ॥ सर्वदापर्वदिवसेस्नानंतत्रसमाचरे
त् ॥ पितृणांतर्पणंकृत्वाअश्वमेधफलंलभेत् ॥२२॥ दशाश्वमेधात्पश्चिमतोभृगुर्ब्राह्मणसत्तमः ॥ दिव्यंवर्षसहस्रंतुईश्वरंपर्युपासत ॥ २३ ॥ वल्मीका
वस्थितश्चासौदक्षिणंचनिकेतनम् ॥ आश्चर्यंचमहज्जातमुमायाःशङ्करस्यच ॥ २४ ॥ गौरीतुपृच्छतंदेवंकोऽयमत्रतुसंस्थितः ॥ देवोवादानवोवाथकथ
यस्वमहेश्वर ॥ २५ ॥ ईश्वरउवाच ॥ भृगुर्नामद्विजश्रेष्ठऋषीणांप्रवरोमुनिः ॥ ध्यायतेमांसमाधिस्थोवरंप्रार्थयतेप्रिये ॥ २६ ॥ तत्रप्रहसितादेवीई
श्वरंप्रत्यभाषत॥ धूमावर्तशिखाजातातातोऽद्यापिनतुष्यसि ॥ दुराराध्योसितेनत्वंनात्रकार्याविचारणा ॥२७॥ देवउवाच ॥ नजानासिमहादेविअयं
क्रोधनचेष्टितः ॥ दर्शयामियथातथ्यंप्रियंतेचकरोम्यहम् ॥ २८ ॥ स्मारितोदेवदेवेनधर्मरूपोवृषस्तदा ॥ स्मरणादेवदेवस्यवृषःशीघ्रमुपस्थितः
॥ २९ ॥ प्राहासौमानुषींवाचमादेशोदीयतांप्रभो ॥ वल्मीकैश्छादितोविप्रएनंभूमौनिपातय ॥ ३० ॥ योगस्थस्तुततोध्यायंस्ततस्तेननिपातितः ॥
तत्क्षणात्क्रोधसन्तप्तोहस्तमुत्क्षिप्तवान्वृषम् ॥ ३१ ॥ एवंसम्भाषमाणस्तुकुत्रगच्छसिभोवृष ॥ अद्यत्वामथपाप्मानंप्रत्यक्षंहन्म्यहंवृष ॥ ३२ ॥ धर्षि
तस्तुतदाविप्रोह्यन्तरिक्षंगतंवृषम् ॥ आकाशेप्रेक्षतेभूपएतदद्भुतमुत्तमम् ॥ ३३ ॥ ततःप्रहसितेरुद्रेऋषिरग्रेव्यवस्थितः ॥ तृतीयंलोचनंदृष्ट्वावैलक्ष्या
त्पतितोभुवि ॥प्रणम्यदण्डवद्भूमौस्तुतेवैपरमेश्वरम् ॥३४॥ प्रणिपत्यभूतनाथंभवोद्भवंत्वामहंदिव्यरूपम् ॥ भवभीतोभुवनपतेभूतंविज्ञापयेकिंचित् ॥
॥ ३५ ॥ त्वद्गुणनिकरान्वक्तुंकःशक्तोभवतिमानुषोनाथ ॥ वासुकिरयंहिकदाचिद्वदनसहस्रंभवेद्यस्य ॥ ३६ ॥ भक्त्यातवापिशङ्करभुवनपतेत्वत्स्तुतौ
तुमुखरस्य ॥ वन्द्यक्षमस्वभगवन्प्रसीदमेतवचरणपतितस्य ॥ ३७ ॥ सत्त्वंरजस्तमस्त्वंस्थित्युत्पत्तौविनाशनेदेव ॥ त्वांमुक्त्वाभुवनपतेभुवनेश्वरनैव
दैवतंकिंचित् ॥ ३८ ॥ यमनियमयज्ञदानैर्वेदाभ्यासावधारणोद्योगात् ॥ त्वद्भक्तेःसर्वमिदंनार्हतिकलासहस्रांशेन ॥ ३९ ॥ उत्कृष्टरसरसायनखड्गा
ञ्जनपादुकादिसिद्धिर्वा ॥ चिह्नानिभवत्प्रणतानांदृश्यन्तइहजन्मनिप्रकटम् ॥ ४० ॥ शाठ्येननमतियद्यपिददासित्वंधर्ममिच्छतांदेव ॥ भक्तिर्भव
च्छेदकरीमोक्षायविनिर्मितानाथ ॥ ४१ ॥ परदारपरस्वरतंपरिभवपरिदुःखशोकसन्तप्तम् ॥ परवदनवीक्षणपरंपरमेश्वरमांपरित्राहि ॥ ४२ ॥ अली
काभिमानदग्धंक्षणभङ्गुरविभवविलसितंदेव ॥ क्रूरंकुपथाभिमुखंपतितंमांत्राहिदेवेश ॥ ४३ ॥ दीनेन्द्रियगणसार्थैर्बन्धुजनैरेवपूरिताआशा ॥ तुच्छा
तथापिशङ्करकिंमूढंमांविडम्बयसि ॥ ४४ ॥ तृष्णांहरस्वशीघ्रंलक्ष्मींमेदेहिहृदयवासिनींनित्याम् ॥ छिन्धिमदमोहपाशानुत्तारयमांमहादेव ॥४५॥
करुणाभ्युदयंनामस्तोत्रमिदंसिद्धिदंदिव्यम् ॥ यःपठतिभक्तियुक्तस्तस्यतुतुष्येद्भृगोर्यथाहिशिवः ॥४६॥ ईश्वरउवाच ॥ अहंतुष्टोऽस्मितेविप्रवरंप्रा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्थयस्वेप्सितम् ॥ उमयासहितोदेवोवरंतस्यहिदापयेत् ॥ ४७ ॥ भृगुरुवाच ॥ यदितुष्टोऽसिदेवेशयदिदेयोवरोमम ॥ रुद्रवेदीभवेदेवमेतत्सम्पादय
स्वमे ॥ ४८ ॥ ईश्वरउवाच ॥ एवंभवतुविप्रेन्द्रक्रोधस्थानंभविष्यति ॥ नपितापुत्रयोश्चैवएकवाक्यंभविष्यति ॥ ४९ ॥ तदाप्रभृतिब्रह्माद्याःसर्वेदे
वाःसकिन्नराः ॥ उपासतेभृगोस्तीर्थंतुष्टोयत्रमहेश्वरः ॥ ५० ॥ दर्शनात्तस्यतीर्थस्यसद्यःपापात्प्रमुच्यते ॥ अवशाःस्ववशाश्चापिम्रियन्तेतत्रजन्तवः
॥ ५१ ॥ गुह्यातिगुह्यस्यगतिस्तेषांनिःसंशयाभवेत् ॥ एतत्क्षेत्रंसुविपुलंसर्वपापप्रणाशनम् ॥ ५२ ॥ तत्रस्नात्वादिवंयान्तियेमृतास्तेऽपुनर्भवाः ॥ औ
पानहंतदाछत्रंदेयमन्नंचकाञ्चनम् ॥ ५३ ॥ भोजनंचयथाशक्त्याअक्षयंतस्यतद्भवेत् ॥ सूर्योपरागेयोदद्याद्दानंचैवयथेच्छया ॥ ५४ ॥ तीर्थस्नानंतुय
द्दानमक्षयंतस्यतद्भवेत् ॥ चन्द्रसूर्योपरागेषुवृषोत्सर्गमनुत्तमम् ॥ ५५ ॥ नजानन्तिनरामूढाविष्णुमायाविमोहिताः ॥ नर्मदायांस्थितंदिव्यंवृषतीर्थं
नराधिप ॥ ५६ ॥ भृगुतीर्थस्यमाहात्म्यंयःशृणोतिनरःसकृत् ॥ विमुक्तःसर्वपापेभ्योरुद्रलोकंसगच्छति ॥ ५७ ॥ ततोगच्छेतराजेन्द्रगौतमेश्वरमु
त्तमम् ॥ तत्रस्नात्वानरोराजन्नुपवासपरायणः ॥ ५८ ॥ काञ्चनेनविमानेनब्रह्मलोकेमहीयते ॥ धौतपापंततोगच्छेद्धौतंयत्रवृषेणतु ॥ ५९ ॥ नर्मदायां
स्थितंराजन्सर्वपातकनाशनम् ॥ तत्रतीर्थेनरःस्नात्वाब्रह्महत्यांव्यपोहति ॥ ६० ॥ तस्मिंस्तीर्थेमहाराजप्राणत्यागंकरोतियः ॥ चतुर्भुजस्त्रिनेत्रस्तुरु
द्रतुल्यबलोभवेत् ॥ ६१ ॥ वसेत्कल्पायुतंसाग्रंरुद्रतुल्यपराक्रमः ॥ कालेनमहताप्राप्तःपृथिव्यामेकराड्भवत् ॥६२॥ ततोगच्छेतराजेन्द्रएरण्डीतीर्थमु
त्तमम् ॥ प्रयागेयत्फलंदृष्टंमार्कण्डेयेनभाषितम् ॥ ६३ ॥ तत्फलंलभतेराजन्स्नातमात्रस्तुमानवः ॥ मासिभाद्रपदेचैवशुक्लपक्षस्यचाष्टमीम् ॥ ६४ ॥
उपोष्यरजनीमेकांतत्रस्नानंसमाचरेत् ॥ यमदूतैर्नबाध्येतइन्द्रलोकंसगच्छति ॥ ६५ ॥ ततोगच्छेतराजेन्द्रसिद्धोयत्रजनार्दनः ॥ हिरण्यद्वीपविख्यातं
सर्वपापप्रणाशनम् ॥ ६६ ॥ तत्रस्नात्वानरोराजन्धनवान्रूपवान्भवेत् ॥ ततोगच्छेतराजेन्द्रतीर्थंकनखलंमहत् ॥ ६७ ॥ गरुडेनतपस्तप्तंतस्मिंस्ती
र्थेनराधिप ॥ विख्यातंसर्वलोकेषुयोगिनीतत्रतिष्ठति ॥ ६८ ॥ क्रीडतेयोगिभिःसार्धंशिवेनसहनृत्यति ॥ तत्रस्नात्वानरोराजन्रुद्रलोकेमहीयते ॥६९॥
ततोगच्छेतराजेन्द्रईशतीर्थमनुत्तमम् ॥ ईशस्तत्रविनिर्मुक्तोगतऊर्ध्वंनसंशयः ॥७०॥ ततोगच्छेतराजेन्द्रसिद्धोयत्रजनार्दनः ॥ वाराहंरूपमास्थायअ
चिन्त्यःपरमेश्वरः ॥ ७१ ॥ वराहतीर्थेनरःस्नात्वाद्वादश्यांतुविशेषतः ॥ विष्णुलोकमवाप्नोतिनरकंतुनगच्छति ॥ ७२ ॥ ततोगच्छेतराजेन्द्रसोमतीर्थ
मनुत्तमम् ॥ पौर्णमास्यांविशेषेणतत्रस्नानंसमाचरेत् ॥ ७३ ॥ प्रणिपत्यचईशानंबलिस्तस्यप्रसीदति ॥ हरिश्चन्द्रपुरंदिव्यमन्तरिक्षेतुदृश्यते ॥७४॥
चक्रध्वजेसमावृत्तेसुप्तेनागारिकेतने ॥ नर्मदातोयवेगेनरुरुकच्छोपसेवितम् ॥ ७५ ॥ तस्मिन्स्थानेनिवासंचविष्णुःशङ्करमब्रवीत् ॥ द्वीपेश्वरेनरःस्ना

CC-0. In Public Domain. Digitization by eGangotri

त्वालभेद्बहुसुवर्णकम् ॥ ७६ ॥ ततोगच्छेतराजेन्द्ररुद्रकन्यांतुसङ्गमे ॥ स्नातमात्रोनरस्तत्रदेव्याःस्थानमवाप्नुयात् ॥ ७७ ॥ देवतीर्थंततोगच्छेत्सर्व
देवनमस्कृतम् ॥ तत्रस्नात्वातुराजेन्द्रदैवतैःसहमोदते ॥ ७८ ॥ ततोगच्छेतराजेन्द्रशिखितीर्थमनुत्तमम् ॥ तत्रवैदीयतेदानंसर्वंकोटिगुणंभवेत् ॥ ७९ ॥
अपरपक्षेऽमावायांस्नानंतत्रसमाचरेत् ॥ ब्राह्मणंभोजयेदेकंकोटिर्भवतिभोजिता ॥ ८० ॥ भृगुतीर्थेतुराजेन्द्रतीर्थकोटिर्व्यवस्थिता ॥ अकामोवा
सकामोवातत्रस्नायीतमानवः ॥ ८१ ॥ अश्वमेधमवाप्नोतिदैवतैःसहमोदते ॥ तत्रसिद्धिमवाप्नोतिभृगुस्तुमुनिपुङ्गवः ॥ ८२ ॥ अवतारःकृ
तस्तेनशङ्करेणमहात्मना ॥ ८३ ॥ इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेविंशतितमोऽध्यायः ॥ २० ॥ नारदउवाच ॥ ततोगच्छेतराजेन्द्रविहगे
श्वरमुत्तमम् ॥ दर्शनात्तस्यराजेन्द्रमुच्यतेसर्वपातकैः ॥ १ ॥ ततोगच्छेतराजेन्द्रनर्मदेश्वरमुत्तमम् ॥ तत्रस्नात्वानरोराजन्स्वर्गलोकेमहीयते ॥ २ ॥ अ
श्वतीर्थंततोगच्छेत्स्नानंतत्रसमाचरेत् ॥ सुभगोदर्शनीयश्चभोगवाञ्जायतेनरः ॥ ३ ॥ पितामहंततोगच्छेद्ब्रह्मणानिर्मितंपुरा ॥ तत्रस्नात्वानरोभ
क्त्यापितृपिण्डंतुदापयेत् ॥ ४ ॥ तिलदर्भविमिश्रंतुउदकंतुप्रदापयेत् ॥ तस्यतीर्थप्रभावेणसर्वंभवतिचाक्षयम् ॥ ५ ॥ सावित्रीतीर्थमासाद्ययस्तु
स्नानंसमाचरेत् ॥ विधूयसर्वपापानिब्रह्मलोकेमहीयते ॥ ६ ॥ मनोहरंचतत्रैवतीर्थंपरमशोभनम् ॥ तत्रस्नात्वानरोराजन्पितृलोकेमहीयते ॥ ७ ॥
ततोगच्छेतराजेन्द्रमानसंतीर्थमुत्तमम् ॥ तत्रस्नात्वानरोराजन्रुद्रलोकेमहीयते ॥ ८ ॥ ततोगच्छेतराजेन्द्रक्रतुतीर्थमनुत्तमम् ॥ विख्यातंसर्व
लोकेषुसर्वपापप्रणाशनम् ॥ ९ ॥ यान्यान्प्रार्थयतेकामान्पशुपुत्रधनानिच ॥ प्राप्नुयात्तानिसर्वाणितत्रस्नात्वानराधिप ॥ १० ॥ ततोगच्छेतरा
जेन्द्रत्रिदशज्योतिविश्रुतम् ॥ तत्रताऋषिकन्यास्तुतपस्तप्यन्तिसुव्रताः ॥ ११ ॥ भर्त्ताभवतुसर्वासामीश्वरःप्रभुरव्ययः ॥ प्रीतस्तेषांमहादेवश्चण्डरूप
धरोहरः ॥ १२ ॥ विकृताननबीभत्सस्तत्रतीर्थमुपागतः ॥ तत्रकन्यामहाराजवरायपरमेश्वरः ॥ १३ ॥ कन्याऋद्धिंचयःसेवेत्कन्यादानंप्रयच्छति ॥
तीर्थंतत्रमहाराजदशकन्येतिविश्रुतम् ॥ १४ ॥ तत्रस्नात्वार्चयेद्देवंसर्वपापैःप्रमुच्यते ॥ ततोगच्छेतराजेन्द्रस्वर्गबिन्दुरितिश्रुतम् ॥ १५ ॥ तत्रस्नात्वा
नरोराजन्दुर्गतिंचनपश्यति ॥ अप्सरेशंततोगच्छेत्स्नानंतत्रसमाचरेत् ॥ १६ ॥ क्रीडतेनागलोकस्थोऽप्सरोभिःसहमोदते ॥ ततोगच्छेतराजेन्द्रनरकं
तीर्थमुत्तमम् ॥ १७ ॥ तत्रस्नात्वार्चयेद्देवंनरकंचनगच्छति ॥ भारभूतंततोगच्छेदुपवासपरायणः ॥ १८ ॥ एतत्तीर्थंसमासाद्यअवतारंतुशाम्भवम् ॥
अर्चयित्वाविरूपाक्षंरुद्रलोकेमहीयते ॥ १९ ॥ तस्मिंस्तीर्थेनरःस्नात्वाभारभूतेमहात्मनः ॥ यत्रतत्रमृतस्यापिध्रुवंगाणेश्वरीगतिः ॥ २० ॥ कार्तिक
स्यतुमासस्यअर्चयित्वामहेश्वरम् ॥ अश्वमेधाच्छतगुणंप्रवदन्तिमनीषिणः ॥ २१ ॥ दीपकानांशतंकृत्वाघृतपूर्णंतुदापयेत् ॥ विमानैःसूर्यसङ्काशैर्व्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जतेयत्रशङ्करः ॥ २२ ॥ वृषभंयःप्रयच्छेतशङ्खकुन्देन्दुसंनिभम् ॥ वृषयुक्तेनयानेनरुद्रलोकंसगच्छति ॥ २३ ॥ चरुमेकंतुयोदद्यात्तस्मिंस्तीर्थेनराधिप ॥ पायसंमधुसंयुक्तंभक्ष्याणिविविधानिच ॥ २४ ॥ यथाशक्त्यनुराजेन्द्रभोजयेत्सहदक्षिणम् ॥ तस्यतीर्थप्रभावेणसर्वंकोटिगुणंभवेत् ॥ २५ ॥ नर्मदायाजलंसिक्त्वाअर्चयित्वावृषध्वजम् ॥ दुर्गतिंचनपश्यन्तितत्तीर्थस्यप्रभावतः ॥ २६ ॥ एतत्तीर्थंसमासाद्ययस्तुप्राणान्परित्यजेत् ॥ सर्वपापविशुद्धात्माव्रजतेयत्रशङ्करः ॥ २७ ॥ जलप्रवेशंयःकुर्यात्तस्मिंस्तीर्थेनराधिप ॥ हंसयुक्तेनयानेनरुद्रलोकंसगच्छति ॥ २८ ॥ यावच्चन्द्रश्चसूर्यश्चहिमवांश्चमहोदधिः॥ गङ्गाद्याःसरितोयावत्तावत्स्वर्गेमहीयते ॥२९॥ अनाशनंतुयःकुर्यात्तस्मिंस्तीर्थेनराधिप॥ गर्भवासेतुराजेन्द्रनपुनर्जायतेनरः ॥३०॥ ततोगच्छेतराजेन्द्रअटवीतीर्थमुत्तमम् ॥ तत्रस्नात्वानरोराजन्निन्द्रस्यार्द्धासनंलभेत् ॥३१॥ शृङ्गतीर्थंततोगच्छेत्सर्वपापप्रणाशनम्॥ तत्रापिस्नातमात्रस्यध्रुवंगाणेश्वरीगतिः ॥ ३२ ॥ एरण्डीनर्मदायाश्चसङ्गमंलोकविश्रुतम् ॥ तत्रतीर्थंमहापुण्यंसर्वपापप्रणाशनम् ॥ ३३ ॥ उपवासपरोभूत्वानित्यंब्रह्मपरायणः ॥ तत्रस्नात्वातुराजेन्द्रमुच्यतेब्रह्महत्यया ॥३४ ॥ ततोगच्छेतराजेन्द्रनर्मदोदधिसङ्गमम् ॥जमदग्निरितिख्यातंसिद्धोयत्रजनार्दनः ॥३५॥ यत्रेष्ट्वाबहुभिर्यज्ञैरिन्द्रोदेवाधिपोऽभवत् ॥ तत्रस्नात्वानरोराजन्नर्मदोदधिसङ्गमे ॥ ३६ ॥ त्रिगुणस्याश्वमेधस्यफलंप्राप्नोतिमानवः ॥ पश्चिमोदधिसायुज्यंमुक्तिद्वारविघाटनम् ॥ ३७ ॥ तत्रदेवाःसगन्धर्वाऋषयःसिद्धचारणाः ॥ आराधयन्तिदेवेशंत्रिसन्ध्यंविमलेश्वरम् ॥ ३८ ॥ सर्वपापविशुद्धत्मारुद्रलोकेमहीयते ॥ विमलेशपरंतीर्थंनभूतंनभविष्यति ॥३९॥ तत्रोपवासंकृत्वायेपश्यन्तिविमलेश्वरम् ॥ सर्वपापविनिर्मुक्तारुद्रलोकंव्रजन्तिते ॥ ४० ॥ ततोगच्छेतराजेन्द्रकेशिनीतीर्थमुत्तमम् ॥ तत्रस्नात्वानरोराजन्नुपवासपरायणः ॥ ४१ ॥ उपोष्यरजनीमेकांनियतोनियताशनः ॥ तत्रतीर्थप्रभावेणमुच्यतेब्रह्महत्यया ॥ ४२ ॥ सर्वतीर्थाभिषेकंचयःपश्येत्सागरेश्वरम् ॥ योजनाभ्यन्तरेतिष्ठेदावर्तेसंस्थितःशिवः ॥ ४३ ॥ तंदृष्ट्वासर्वतीर्थानिदृष्टानिस्युर्नसंशयः ॥ सर्वपापविनिर्मुक्तोयत्ररुद्रःसगच्छति ॥ ४४ ॥ नर्मदासङ्गमंयावद्यावच्चामरकण्टकम् ॥ तत्रान्तरेमहाराजतीर्थकोट्योदशस्थिताः ॥ ४५ ॥ तीर्थात्तीर्थाटनंचर्याऋषिकोटिनिषेविता ॥ अग्निहोत्रैश्चदिव्यांशैःसर्वैर्ज्ञानपरायणैः ॥ ४६ ॥ सेवितास्तेनराजेन्द्रईप्सितार्थप्रदायिकाः ॥ यश्चेदंवैपठेन्नित्यंशृणुयाद्वापिभक्तितः ॥ ४७ ॥ तंतुतीर्थानिसर्वाणिअभिषिञ्चन्तिपाण्डव ॥ नर्मदाचसदाप्रीताभवेद्वैनात्रसंशयः ॥ ४८ ॥ प्रीतस्तस्यभवेद्रुद्रोमार्कण्डेयोमहामुनिः ॥ वन्ध्याचलभतेपुत्रान्दुर्भगासुभगाभवेत् ॥ ४९ ॥ कुमारींलभतेभर्त्तायच्चयोवाञ्छतेफलम् ॥ तदेवलभतेसर्वंनात्रकार्याविचारणा ॥ ५० ॥ ब्राह्मणोवेदमाप्नोतिक्षत्रियोविजयीभवेत् ॥ वैश्यस्तुलभतेधान्यंशूद्रःप्राप्नोतिसद्गतिम्

Nepal Sanskrit University Valmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

॥ ८१ ॥ मूर्खस्तुलभतेविद्यांत्रिसन्ध्यंयःपठेन्नरः ॥ नरकंचनपश्यतवियोनिंचनगच्छति ॥ ८२ ॥ इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेएकविंशो
ऽध्यायः ॥ २१ ॥ नारदउवाच ॥ एवंतकथितंराजन्नर्मदातीर्थमुत्तमम् ॥ पुरागन्धर्वकन्यानांशापजंभयमुल्बणम् ॥ १ ॥ नाशितंतन्महाराज
रेवाजलकणाग्निना ॥ रेवाजलकणस्पर्शान्मुक्तोभवतिमानवः ॥ २ ॥ युधिष्ठिरउवाच ॥ भगवन्बहुकन्याभिःशापोलब्धःकथंकुतः ॥ कस्याप
त्यानितास्तासांनामकिंकीदृशंवयः ॥ ३ ॥ कथंरेवाजलस्पर्शाद्विपाकाच्छापसम्भवात् ॥ विमुक्ताःकुत्रताःसन्तुःसर्वमेकथयप्रभो ॥ ४ ॥ नर्म
दातीर्थमाहात्म्यंचमत्कारकरंभवेत् ॥ श्रवणादपिपापानांमलनाशनमुच्यते ॥ ५ ॥ नर्मदानर्मदाशब्दोयेनकेनचिदुच्यते ॥ तस्यस्याच्छाश्वतीमु
क्तिर्यावदाचन्द्रतारकम् ॥ ६ ॥ व्याहृतंभवतापूर्वंरेवामाहात्म्यमुत्तमम् ॥ तथापिचरितंसाधोयदेतत्तन्निगद्यताम् ॥ ७ ॥ अथचोत्तमवार्तायासे
वितव्यामनीषिभिः ॥ अतःपृच्छामिविप्रेन्द्ररेवामाहात्म्यमुत्तमम् ॥ इतिहासंवदविभोकन्यानांचरितोज्ज्वलम् ॥ ८ ॥ नारदउवाच ॥ श्रूयतांरा
जशार्दूलधर्मगर्भापराकथा ॥ यथारणिर्वह्निगर्भाधर्म्मस्तुब्रह्मसूरिव ॥ ९ ॥ गन्धर्वःशुकसञ्ज्ञीतिस्तस्यकन्याप्रमोहिनी ॥ सुशीलस्यसुशीलाचसु
स्वरास्वरवेदिनः ॥ १० ॥ सुताराचन्द्रकान्तस्यचन्द्रिकासुप्रभस्यच ॥ इमानिवरनामानितासामप्सरसांनृप ॥ ११ ॥ कुमार्यःपञ्चसर्वास्ता
वयसासुभगाःपुनः ॥ भाषन्तेचमिथस्तास्तुभगिन्यइवसर्वदा ॥१२॥ चन्द्रादिवविनिष्क्रान्ताश्चन्द्रिकाइवसोज्ज्वलाः ॥ चन्द्राननाःसुकेश्यश्चचन्द्रका
न्ताइवोज्ज्वलाः ॥ १३ ॥ देवेष्वेताविलासिन्यःकौमुद्यःकैरवेष्विव ॥ लावण्यपिण्डसम्भूतादिव्यरूपामनोहराः ॥ १४ ॥ उद्भिन्नकुचपद्मिन्यः
केतक्यइवमाधवे ॥ उत्पन्नयौवनैःकान्तावल्लीवनवपल्लवैः ॥ १५ ॥ हेमगौराश्चहेमाभाहेमाभरणभूषिताः ॥ हेमचम्पकमालिन्योहेमच्छविसुवास
सः ॥ १६ ॥ स्वरग्रामावलीहासुविविधामूर्च्छनासुच ॥ तालवाद्यविनोदेषुवेणुवीणाप्रवादने ॥ १७ ॥ मृदङ्गनादसम्भिन्नलास्यमध्यलयेषुच ॥
चित्रादिषुविनोदेषुकलासुचविशारदाः ॥ १८ ॥ एवंभूताश्चताःकन्यामुमुहुःक्रीडनैर्वरैः ॥ पितृभिर्लालिताःसर्वाश्चेरुश्चधनदालये ॥ १९ ॥ कौतुका
देकदापञ्चमिलित्वामासिमाधवे ॥ कन्यामन्दारपुष्पाणिविचिन्वन्त्योवनाद्वनम् ॥ २० ॥ गौरींसमाराधयितुंसुराङ्गनाःकदाचिदच्छोदसरोवरंय
युः ॥ हेमाम्बुजानिप्रवराणिताःपुनस्तस्मादुपादायवरोत्पलैःसह ॥२१॥ वैडूर्यशुद्धस्फटिकप्रकुट्टिमेस्नात्वातुघट्टेपरिधायचाम्बरम् ॥मौनेनचस्थण्डि ॥ १७ ॥
लपिण्डिकामुमांसुवर्णमुक्ताभरणांविनिर्ममुः ॥ २२ ॥ समर्चितांचन्दनगन्धकुङ्कुमैरभ्यर्च्यगौरींवरपङ्कजादिभिः ॥ नानोपहारैःशुभभक्तिभाविताला
स्यप्रयोगैर्ननृतुःकुमारिकाः ॥ २३ ॥ गान्धर्वमाश्रित्यपरंस्वरंततोगेयंस्वभावध्वनिभिःसमूर्छनम् ॥ एणीदृशस्ताःप्रजगुःकलाक्षरंतारप्रवृद्धंगतिभिश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुस्वरम् ॥ २४ ॥ तस्मिन्सुभावेरसवर्षहर्षकन्यास्वलंनिर्भरचित्तवृत्तिषु ॥ अच्छोदतीर्थेप्रवरेतदागतःस्नातुंमुनेर्वेदनिधेःसुतोऽग्रजः ॥ २५ ॥ रूपे
णनिःसीमतरोवराननःप्रफुल्लपद्मायतलोचनोयुवा ॥ विस्तीर्णवक्षाःसुभुजोऽतिसुन्दरःश्यामच्छविःकामइवापरोहिसः ॥ २६ ॥ सब्रह्मचारीसुशिखो
हिशोभतेदण्डेनयुक्तोधनुषेवमन्मथः ॥ एणाजिनप्रावरणःसमुद्धृद्धेमाभमौञ्जीकटिमेखलःपरः ॥ २७ ॥ तंदृष्ट्वाब्राह्मणंबालास्तास्तत्रसरसस्तटे ॥
जहृषुःकौतुकाविष्टाअयंनोभवितातिथिः ॥ २८ ॥ सन्त्यक्तगीतनृत्यास्तास्तस्यालोकनलालसाः ॥ हरिण्योलुब्धकेनैवविद्धाःकामेनसायकैः ॥२९॥
पश्यपश्येतिजल्पन्त्योमुग्धाःपञ्चससम्भ्रमम् ॥ तस्मिन्विप्रवरेयूनिकामदेवभ्रमंययुः ॥ ३० ॥ पुनःपुनस्तमभ्यर्च्यनयनैःपङ्कजैरिव ॥ पश्चाद्विचार
मारब्धमप्सरोभिःपरस्परम् ॥ ३१ ॥ यद्ययंकामदेवोहिरतिहीनःकथंभवेत् ॥ अथवाह्यश्विनौदेवौतावुभौयुगचारिणौ ॥ ३२ ॥ गन्धर्वःकिन्नरोवाथ
सिद्धोवाकामरूपधृक् ॥ ऋषिपुत्रोऽथवाकश्चित्कश्चिद्वामनुजोत्तमः ॥ ३३ ॥ अस्तिवाकश्चिदेवायंधात्रासृष्टोहिनःकृते ॥ यथाभाग्यवतामर्थेनिधानं
पूर्वकर्मभिः ॥ ३४ ॥ तथास्माकंकुमारीणांगौर्याऽऽनीतोवरोत्तमः ॥ करुणाजलकल्लोललब्धार्द्रीकृतचित्तया ॥ ३५ ॥ मयावृतस्त्वयाचायंत्वयावृत
स्तथानया ॥ एवंपञ्चसुकन्यासुवदन्तीषुनपोत्तम ॥ ३६ ॥ श्रुत्वातद्वचनंतत्रकृतमाध्याह्निकक्रियः ॥ चिन्तयामाससमेधावीकिंकृत्वासुकृतंभवेत्
॥ ३७ ॥ गाधिसम्भवपराशरादयःकण्डुदेवलमुखाश्चयेद्विजाः ॥ तेऽपियोगिबलिनोविमोहितालीलयातदबलाभिरद्भुतम् ॥ ३८ ॥ योषितांनयन
तीक्ष्णसायकैर्भ्रूलतासुदृढचापनिर्गतैः ॥ धन्विनामकरकेतुनाहतःकस्यनोपततिवामनोमृ . ॥३९॥ तावदेवनयधीर्विराजतेतावदेवजनताभयंभवेत् ॥
तावदेवधृतचित्तताभृशंतावदेवगणनाकुलस्यच ॥४०॥ तावदेवतपसःप्रगल्भतातावदेवशमसेवनंनृणाम् ॥ यावदेवललनेक्षणासवैर्माद्यतेद्भुतमदैर्नपूरु
षः ॥ ४१ ॥ मोहयन्तिमदयन्तिरागिणंयोषितःस्वललितैर्मनोहरैः ॥ मोदयन्तिमदयन्तिमाभिमाधर्मरक्षणपरंहिस्वैर्गुणैः ॥ ४२ ॥ मांसरक्तमलमूत्र
निर्मितेयोषितांवपुपिनिर्गुणेऽशुचौ ॥ कामिनस्तुपरिकल्प्यचारुतामाविशन्तिसुविमूढचेतसः ॥४३॥ दारुणाहिपरिकीर्तिताङ्गनासाधुभिर्विमलबुद्धि
भिर्बुधैः ॥ यावदेवनसमीपगाइमास्तावदेवहिगृहंव्रजाम्यहम् ॥४४॥ समीपंतस्ययावन्नआगच्छन्तिवरस्त्रियः॥वैष्णवेनप्रभावेणतावदन्तर्दधेद्विजः ॥
॥ ४५ ॥ तस्ययोगबलाद्रूपगतस्यादर्शनंतदा ॥ दृष्ट्वातदद्भुतंकर्मवैष्णवब्रह्मचारिणः ॥ ४६ ॥ वित्रस्तनयनाबालाःकुरङ्ग्यइवकातराः ॥ सङ्क्रान्त
नयनाशून्यादद‍ृशुस्तादिशोदश ॥४७॥ कन्याऊचुः॥इन्द्रजालंस्फुटंवेत्तिमायांजानातिवापुनः ॥ दृष्टोऽप्यदृष्टरूपोऽभूदित्यूचुस्ताःपरस्परम् ॥ ४८ ॥
व्याप्तंचहृदयंतासांतदैवविरहाग्निना ॥ ज्वलद्दावानलेनैवसुस्निग्धंसर्वकाननम् ॥४९॥ त्यजेन्द्रजालिकांविद्यांकान्तदर्शयसत्वरम् ॥ आत्मानंनहिते

CC-0. In Public Domain. Digitization by eGangotri

त्कंप्राग्ग्रासेमक्षिकोपमम् ॥ ५० ॥ हाकष्टंदर्शितःकस्माद्धात्रात्वंघटितःकुतः ॥ ज्ञातंमहानुसन्तापहेतुर्नःस्वंविनिर्मितः ॥ ५१ ॥ कच्चित्तेनिर्दयंचेतः
कच्चिदस्मासुनोमतिः ॥ कच्चित्क्रूरोऽसिहेकान्तकच्चिन्मुष्णासिनोमनः ॥ ५२ ॥ कच्चिन्नप्रत्ययोऽस्मासुकच्चिदस्मान्परीक्षसे ॥ कच्चिन्निर्ममताशीलःक
च्चिन्मायाविशारदः ॥ ५३ ॥ कच्चिच्चित्तेप्रवेष्टुंचवेत्सिविज्ञानलाघवम् ॥ कच्चिन्निष्क्रमणोपायंनजानासिकुतःपुनः ॥ ५४ ॥ कच्चिद्विनापराधंतुकिम
स्मासुप्रकुप्यसे ॥ कच्चिद्दुःखंनजानासिपरेषांविप्रलम्भनम् ॥ ५५ ॥ त्वद्दर्शनंविनानद्यात्हृदयेश्वरसाम्प्रतम् ॥ नजीवामोऽथजीवामःपुनस्त्वद्दर्शनाश
या ॥ ५६ ॥ वयंनीयामहैतत्रशीघ्रंयत्रगतोभवान् ॥ त्वद्दर्शनहरोधाताव्यधान्मोदाङ्कुरच्छिदाम् ॥ ५७ ॥ सर्वथादर्शनंदेहिकारुण्यंभजसर्वथा ॥
पर्य्यन्तंनप्रपश्यन्तिकस्यचित्सुजनाजनाः ॥ ५८ ॥ इत्थंविलप्यताःकन्याःप्रतीक्ष्यचबहुक्षणम् ॥ पितुर्भयाद्गृहंगन्तुंशीघ्रमारेभिरेततः ॥ ५९ ॥
तत्प्रेमनिगडैर्बद्धाभृशंविरहविक्लवाः ॥ कथंचिद्धैर्यमालम्ब्यताःस्वंस्वंगृहमागताः ॥ ६० ॥ आगत्यपतिताःसर्वामातॄणांतुसमीपतः ॥ किमेतन्मातृ
भिःपृष्टाःकुतःकालात्ययोऽभवत् ॥ ६१ ॥ कन्याऊचुः ॥ क्रीडन्त्यःकिन्नरीभिस्तुसार्द्धंसञ्जातकंयदा ॥ संस्थितास्तेननज्ञातोदिवसोऽच्छोदसरोवरे
॥६२॥ पथिश्रान्तावयंमातःसन्तापस्तेननस्तनौ ॥ मोहेनमहतावक्तुंनकेनाप्युत्सहामहे ॥६३॥ नारदउवाच ॥ इत्युक्त्वालुठितास्तत्रमणिभूमौकुमारि
काः ॥ आकारंगोपयन्त्यस्तामुग्धाजल्पन्तिमातृभिः ॥ ६४ ॥ काचिन्नर्तयतिक्रीडामयूरंनमुदातदा ॥ नपाठयतितंकीरंपञ्जरेऽन्याकुतूहलात् ॥६५॥
लालयेन्नकुलंनान्यानोल्लापयतिसारिकाम् ॥ अपरातीवसंमुग्धानैवखेलतिसारसैः ॥ ६६ ॥ भेजिरेनविनोदंतारेमिरेनैवमन्दिरे ॥ ऊचिरेबान्धवैर्नालं
वीणावाद्यंनचक्रिरे ॥६७॥ कल्पद्रुमप्रसूनंयत्सर्वंतच्चानलोपमम् ॥ मन्दारकुसुमामोदिनपपुर्मधुरंमधु ॥६८॥ योगिन्यइवताःकन्यानासाग्रन्यस्तलोच
नाः ॥ अलक्ष्यध्यानसन्तानाःपुरुषोत्तममानसाः ॥६९॥ चन्द्रकान्तमणिच्छन्नेस्रवद्वारिणिकन्दरे ॥ क्षणंवातायनेस्थित्वाजलयन्त्रगृहेक्षणम् ॥७०॥
रचयन्तिक्षणंशय्यांदीर्घिकाम्भोजिनीदलैः ॥ वीज्यमानाःसखीभिस्ताःशीतलैर्नलिनीदलैः ॥७१॥ इत्थंयुगसमांरात्रिमनयंस्तावरस्त्रियः॥कथंचिद्वार,
णंकृत्वाविह्वलाःसज्वराइव ॥ ७२ ॥ प्रातर्व्योममणिंदृष्ट्वामन्यमानाःस्वजीवितम् ॥ विज्ञाप्यमातरंस्वांस्वांगौरींपूजयितुंगताः ॥७३॥ स्नात्वातेनवि
धानेनपुष्पैर्धूपैस्तथापुनः ॥ विधायपूजनंदेव्यागायन्त्यस्तत्रताःस्थिताः ॥ ७४ ॥ एतस्मिन्नन्तरेविप्रःस्नातुंसोऽपिसमागतः ॥ पितुराश्रमतस्तस्मा
दच्छोदेऽत्रसरोवरे ॥ ७५ ॥ मित्रंदृष्ट्वैवरात्र्यन्तेपद्मिन्यइवकन्यकाः ॥ तत्फुल्लनयनाजातास्तंदृष्ट्वाब्रह्मचारिणम् ॥ ७६ ॥ गत्वातत्रैवताःकन्याःसमीपं
ब्रह्मचारिणः ॥ सव्यापसव्यबन्धेनभुजपाशंचचक्रिरे ॥ ७७ ॥ गतोऽसिप्रियपूर्वेद्युर्गन्तुमद्यनलभ्यते ॥ वृतस्त्वंनूनमस्माभिर्नात्रतेऽस्तिविचारणा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ७८ ॥ इत्युक्तोब्राह्मणःप्राहप्रहसन्बाहुपाशगः ॥ युष्माभिरुच्यतेभद्रमनुकूलंप्रियंवचः ॥७९॥ प्रथमाश्रमनिष्ठस्यकिंतुनश्येतमेव्रतम् ॥ विद्याभ्य सनशीलस्यनाभूत्पारंगुरोःकुले ॥ ८० ॥ आश्रमेयत्रयोधर्मोरक्षणीयःसुपण्डितैः ॥ विवाहोऽयमतोमन्येनधर्मइतिकन्यकाः ॥ ८१ ॥ आकर्ण्यविप्र वाक्यानिविप्रमूचुर्वरस्त्रियः ॥ सकलध्वनिसोत्कण्ठयःकोकिलाइवमाधवे ॥८२॥ धर्मादर्थोऽर्थतःकामःकामात्सुखफलोदयः ॥ इत्येवंनिश्चयज्ञास्तेव र्णयन्तिविपश्चितः ॥८३॥ सकामोधर्मबाहुल्यात्पुरतस्तेसमुत्थितः ॥ सेव्यतांविविधैर्भोगैःस्वच्छाभूमिरियंयतः ॥ ८४ ॥ श्रुत्वातद्वचनंतासांप्राहग म्भीरयागिरा ॥ तथ्यंवोवचनंकिंतुममाप्यावश्यकंव्रतम् ॥ ८५ ॥ प्राप्यानुज्ञांगुरोःकुर्वेविवाहकर्मनान्यथा ॥ इत्युक्ताःपुनरूचुस्ताःस्फुटंमूढोऽसि सुन्दर ॥ ८६ ॥ सिद्धौषधंब्रह्मधियारसायनंसिद्धिर्निधिःसाधुकुलावराङ्गनाः ॥ मन्त्रस्तथासिद्धरसश्चधर्मतोमुनेनिषेव्याःसुधियासमागताः ॥८७॥ कार्यंनुदैवाद्यदिसिद्धिमागतंतस्मिन्नुपेक्षांनचयान्तिनीतिगाः ॥ यस्मादुपेक्षानपुनःफलप्रदातस्मान्नदीर्घीकरणंप्रशस्यते ॥ ८८ ॥ विषादप्यमृतं ग्राह्यममेध्यादपिकाञ्चनम् ॥ नीचादप्युत्तमांविद्यांस्त्रीरत्नंदुष्कुलादपि ॥ ८९ ॥ सान्द्रानुरागाःकुलजन्मनिर्मलाःस्नेहार्द्रचित्तासुगिरःस्वयंवराः ॥ कन्याःसुरूपाःखलुचारुयौवनाधन्यालभन्तेऽत्रनरास्तुनेतरे ॥९०॥ क्ववयंसुरसुन्दर्य्यःक्वभवांस्तापसोबटुः ॥ दुर्घटस्यविधानेनमन्येधातैवपण्डितः ॥ ९१ ॥ तस्मादस्मानिदानींतुस्वीकुर्य्यान्मङ्गलंभवान् ॥ गान्धर्वेणविवाहेनअन्यथानोपजीवनम् ॥ ९२ ॥ श्रुत्वावाक्यंततःप्राहब्राह्मणोधर्म वित्तमः ॥ भोमृगाक्ष्यःकथंत्याज्योधर्मोधर्मधनैर्नरैः ॥ ९३ ॥ धर्मश्चार्थश्चकामश्चमोक्षश्चैतच्चतुष्टयम् ॥ यथोक्तंफलदंज्ञयंविपरीतंतुनिष्फ लम् ॥ ९४ ॥ नाकालेऽहंव्रतीकुर्यामतोदारपरिग्रहम् ॥ नक्रियाफलमाप्नोतिक्रियाकालंनवेत्तियः ॥ ९५ ॥ यतोधर्मविचारेऽस्मिन्प्रसक्तंममभान सम् ॥ तस्माच्छृणुतहेकन्यानसमीहेस्वयंवरम् ॥ ९६ ॥ एवंज्ञात्वाऽऽशयंतस्यसमीक्ष्यैवपरस्परम् ॥ करात्करंविमुच्याथजग्राहाङ्घ्रिंप्रमोहिनी ॥ ९७ ॥ भुजौजगृहतुस्तस्यसुशीलासुस्वरातथा ॥ आलिलिङ्गसुताराचवक्त्रंचुम्बतिचन्द्रिका ॥ ९८ ॥ तथापिनिर्विकारोऽसौप्रलयानलसन्निभः ॥ शशापब्रह्मचारीताःक्रोधनात्यन्तमूर्छितः ॥ ९९ ॥ पिशाच्यइवमांलग्नास्ततपिशाच्योभविष्यथ ॥ एवंतेनाशुशप्तास्तास्तंत्यक्त्वापुरतःस्थिताः ॥ १०० ॥ किमेतच्चेष्टितंपापंह्यनागसिविचेष्टया ॥ प्रियङ्कतोऽप्रियंकृत्वाधिक्त्वांधर्मकृतान्तकम् ॥ १ ॥ अनुरक्तेषुभक्तेषुमित्रेषुद्रोहकारिणः ॥ पुंसोलोकोभयोःसौख्यंनाशमेतीतिनःश्रुतम् ॥ २ ॥ तस्मात्त्वमपिनःशापात्पिशाचोभवसत्वरम् ॥ इत्युक्त्वापिचताबालानिःश्वसन्त्यःक्रुधाकुलाः ॥ ३ ॥ तदेवान्योन्यसंरम्भात्तस्मिन्सरसिपार्थिव ॥ ताःकन्याब्रह्मचारीचसर्वेपैशाच्यमागताः ॥ ४ ॥ सपिशाचःपिशाच्यस्ताःक्रन्दमानाःसुदारु

णम् ॥ क्षपयन्तिविपाकांस्तान्पूर्वोपात्तस्यकर्म्मणः ॥ ५ ॥ स्वकालेप्रभवत्येवपूर्वोपात्तंशुभाशुभम् ॥ स्वच्छायेवचदुर्वारंदेवानामपिपार्थिव ॥ ६ ॥
क्रन्दन्तिपितरस्तासांमातरस्तत्रतत्रच ॥ भ्रातरश्चैवबालानांदैवंहिदुरतिक्रमम् ॥ ७ ॥अतऊर्ध्वंपिशाचास्तेआहारार्थंसुदुःखिताः ॥ इतस्ततश्चधाव
न्तोवसन्तिसरसस्तटे ॥ १०८ ॥ इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेद्वाविंशोध्यायः ॥ २२ ॥ नारदउवाच ॥ एवंबहुतिथेकालेलोमशोमुनिसत्तमः ॥
आगतश्चमहाभागस्तत्रयादृच्छिकोमुनिः ॥ १ ॥ तंदृष्ट्वाब्राह्मणंसर्वेपिशाचाःक्षुत्समाकुलाः ॥ धावन्तोह्यत्तुकामास्तेमिलित्वायूथवर्तिनः ॥ २ ॥ द
ह्यमानास्तुतीव्रेणतेजसालोमशस्यतु ॥ असमर्थाःपुरःस्थातुंतेसर्वेदूरतःस्थिताः ॥३॥ तत्रपूर्वकर्मबलात्पिशाचःसहवैद्विजः ॥ समीक्ष्यलोमशंराजन्सा
ष्टाङ्गंप्रणिपत्यच ॥ ४ ॥ उवाचसूनृतांवाचंबद्ध्वाशिरसिचाञ्जलिम् ॥ महाभाग्योदयेविप्रसाधूनांसङ्गतिर्भवेत् ॥ ५ ॥ गङ्गादिपुण्यतीर्थेषुयोनरःस्ना
तिसर्वथा ॥ यःकरोतिसतांसङ्गंतयोःसत्सङ्गमोवरः ॥ ६ ॥ गुरूणांसङ्गमोविप्रदृष्टादृष्टफलोभुवि ॥ स्वर्गदोरोगहारीचकिंतमोऽपहरोमतः ॥ ७ ॥
इत्युक्त्वाकथयामासपूर्ववृत्तान्तमद्भुतम् ॥ इमागन्धर्वकन्यास्तामुनेसोऽहंद्विजात्मजः ॥ ८ ॥ सर्वेपिशाचरूपेणमिथःशापविमोहिताः ॥ दीनानना
स्सुतिष्ठामस्तवाग्रेमुनिसत्तम ॥ ९ ॥ त्वद्दर्शनेनबालानांनिस्तारोनोभविष्यति ॥ सूर्योदयेतमस्तोमःकिंननश्येतपुष्कलः ॥ १० ॥ श्रुत्वैतल्लोमशो
वाक्यंकृपार्द्रीकृतमानसः ॥ प्रत्युवाचमहातेजादुःखितंतंमुनेःसुतम् ॥ ११ ॥ मत्प्रसादाच्चसर्वेषांस्मृतिःसपदिजायताम् ॥ धर्मेचवर्ततांयेनमिथःशा
पोलयंव्रजेत्॥१२॥ पिशाचउवाच ॥ महर्षेकथ्यतांधर्मोमुच्येमयेनकिल्बिषात् ॥ नायंकालोविलम्बस्यशापाग्निर्दारुणोयतः ॥१३॥ लोमशउवाच॥
मयासार्द्धंप्रकुर्वन्तुरेवास्नानंविधानतः ॥ शापान्मोक्ष्यतिवोरेवानान्यथानिष्कृतिर्भवेत् ॥१४॥ शृणुष्वावहितोविप्रपापनाशोध्रुवंनृणाम् ॥ रेवास्नानेन
जायेतइतिमेनिश्चितामतिः ॥१५॥सप्तजन्मकृतंपापंवर्तमानंचपातकम् ॥रेवास्नानंदहेत्सर्वंतूलराशिमिवानलः॥१६ ॥प्रायश्चित्तंनपश्यन्तियस्मिन्पापे
पिशाचक॥तत्सर्वंनर्मदातोयेस्नानमात्रेणनश्यति॥१७॥ ज्ञानकृन्नर्म्मदास्नानमतोमोक्षफलाहिसा॥हिमवत्पुण्यतीर्थानिसर्वपापहराणिवै॥१८॥इन्द्रलो
कप्रदंहीदंनिर्मितंब्रह्मवादिभिः ॥सर्वकामफलारेवामोक्षदापरिकीर्तिता ॥१९॥पापघ्नीपापहारिणीसर्वकामफलप्रदा॥ विष्णुलोकदआप्लावोनार्मदःपाप
नाशनः ॥ २० ॥ यामुनःसूर्यलोकायभवेदाप्लावउत्तमः ॥ सारस्वतोऽघविध्वंसीब्रह्मलोकफलप्रदः ॥ २१ ॥ विशालफलदाप्रोक्ताविशालाहिपिशाच
क ॥ पापेन्धनदवाग्निस्तुगर्भहेतुक्रियापहः ॥२२॥ विष्णुलोकायमोक्षायनार्मदःपरिकीर्तितः ॥ सरयूगण्डकीसिन्धुश्चन्द्रभागाचकौशिकी ॥ २३ ॥
तापीगोदावरीभीमापयोष्णीकृष्णवेणिका ॥ कावेरीतुङ्गभद्राचअन्याश्चापिसमुद्रगाः ॥ २४ ॥ तासुरेवापराप्रोक्ताविष्णुलोकप्रदायिनी ॥ रेवातुप्राप्य

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेपुण्यैःपूर्वजन्मकृतैर्द्विज ॥ अपुनर्भवदंतत्रमज्जनंसुनिपुत्रक ॥ २५ ॥ गायन्तिदेवाःसततंदिविष्ठारेवाकदादृष्टिगताहिनोभवेत ॥ स्नातानरायत्र नगर्भंवेदनांपश्यन्तितिष्ठन्तिचविष्णुसन्निधौ ॥ २६ ॥ ॥ मज्जन्तियेप्रत्यहमत्रमानवारेवासुतोयेबहुपापकञ्चुकाः ॥ मज्जन्तितेनोनिरयेषुधर्म्मतःस्व र्गेतुतेचारुचरन्तिदेववत् ॥ २७ ॥ तीर्थैर्व्रतैर्दानतपोभिरध्वरैःसार्धंविधात्रातुलयाधृतापुरा ॥ रेवापिशाचाशुतयोर्द्वयोरभूद्रेवावरातत्रचमोक्षसाधिका ॥२८॥ नारदउवाच॥एतच्छ्रुत्वावचस्तस्यलोमशस्यपिशाचकाः॥तेनसार्द्धंययुःशीघ्रंरेवामज्जनहेतवे ॥२९॥ ततोदैवात्समुत्पन्नोरेवारोधसिमारुतः ॥ तेषांप्रवाहस्पृष्टानांगात्रेजलकणप्रदः ॥ ३० ॥ रेवाजलकणस्पर्शात्पैशाच्यात्तेविमोचिताः ॥ तत्क्षणाद्दिव्यवपुषःप्रशशंसुश्चनर्मदाम् ॥ ३१ ॥ ततो लोमशवाक्येनताश्चगन्धर्वकन्यकाः ॥ परिणीताःसुखंतेनविप्रेणनर्मदातटे ॥ ३२ ॥ उवासस्सुचिरंकालंस्नानपानावगाहनैः ॥ अर्चित्वानर्मदामत्र विष्णुलोकंगताश्चते ॥ ३३ ॥ एवंतेकथितोराजन्नर्मदागुणसंश्रयः ॥ इतिहासोमहापुण्यःश्रवणात्पापनाशनः ॥ ३४ ॥ इतिश्रीपाद्मेमहापुराणे स्वर्गखण्डेत्रयोविंशोऽध्यायः ॥२३॥ युधिष्ठिरउवाच ॥ अथान्यानितुतीर्थानिवासिष्ठोक्तानिमेवद ॥ श्रुत्वायानिचपापानिविलयंयान्तिनारद ॥१॥ नारदउवाच ॥ शृणुष्वात्रहितीर्थानिवसिष्ठोक्तानिपार्थिव ॥ दक्षिणंसिन्धुमासाद्यब्रह्मचारीजितेन्द्रियः ॥ २ ॥ अग्निष्टोममवाप्नोतिविमानंचाधिरो हति ॥ चर्मण्वतींसमासाद्यनियतोनियताशनः ॥ ३ ॥ रन्तिदेवाभ्यनुज्ञातश्चाग्निष्टोमफलंलभेत् ॥ ततोगच्छेतधर्मज्ञहिमवत्सुतमर्बुदम् ॥ ४ ॥ पृथिव्यायत्रवैछिद्रंपूर्वमासीद्युधिष्ठिर ॥ तत्राश्रमोवसिष्ठस्यत्रिषुलोकेषुविश्रुतः ॥ ५ ॥ तत्रोष्यरजनीमेकांगोसहस्रफलंलभेत् ॥ पिङ्गातीर्थ मुपस्पृश्यब्रह्मचारीनराधिप ॥ ६ ॥ कपिलानांनरव्याघ्रशतस्यफलमाप्नुयात् ॥ ततोगच्छेतधर्मज्ञप्रभासंलोकविश्रुतम् ॥ ७ ॥ यत्रसन्निहितोनित्यं स्वयमेवहुताशनः ॥ देवतानांमुखंवीरअनलोऽनिलसारथिः ॥ ८ ॥ तस्मिंस्तीर्थवरेस्नात्वाशुचिःप्रयतमानसः ॥ अग्निष्टोमातिरात्राभ्यांफलंप्राप्नो तिमानवः ॥ ९ ॥ ततोगत्वासरस्वत्याःसागरस्यचसङ्गमम् ॥ गोसहस्रफलंप्राप्यस्वर्गलोकेमहीयते ॥ १० ॥ दीप्यमानोऽग्निवन्नित्यंप्रभयाभर तर्षभ ॥ तीर्थेसलिलराजस्यस्नात्वाप्रयतमानसः ॥ ११ ॥ त्रिरात्रमुषितस्तत्रतर्पयेत्पितृदेवताः ॥ विराजतियथासोमोवाजिमेधंचविन्दति ॥ १२ ॥ वरदानंततोगच्छेत्तीर्थभरतसत्तम ॥ विष्णोर्दुर्वाससायत्रवरोदत्तोयुधिष्ठिर ॥ १३ ॥ वरदानेनरःस्नात्वागोसहस्रफलंलभेत् ॥ ततोद्वारवतींगच्छेन्नि यतोनियताशनः ॥ १४ ॥ पिण्डारकेनरःस्नात्वालभेद्बहुसुवर्णकम् ॥ तस्मिंस्तीर्थेमहाराजपद्मलक्षणलक्षिताः ॥ १५ ॥ अद्यापिमुद्रादृश्यन्तेतदद्भुत मरिन्दम ॥ त्रिशूलाङ्कानिपद्मानिदृश्यन्तेकुरुनन्दन ॥ १६ ॥ महादेवस्यसान्निध्यंतत्रैवभरतर्षभ॥सागरस्यचसिन्धोश्चसङ्गमंप्राप्यभारत ॥ १७ ॥

CC-0. In Public Domain. Digitization by eGangotri

तीर्थेसलिलराजस्यस्नात्वाप्रयतमानसः ॥ तर्पयित्वापितृन्देवानृषींश्चभरतर्षभ ॥ १८ ॥ प्राप्नोतिवारुणंलोकंदीप्यमानःस्वतेजसा ॥ शङ्कुकर्णेश्वरंदे
वमर्चयित्वायुधिष्ठिर ॥ १९ ॥ अश्वमेधंदशगुणंप्रवदन्तिमनीषिणः ॥ प्रदक्षिणमुपावृत्यगच्छेतभरतर्षभ ॥२०॥ तीर्थंकुरुवरश्रेष्ठत्रिषुलोकेषुविश्रुतम्
॥ तिमीतिनाम्नाविख्यातंसर्वपापप्रमोचनम् ॥ २१ ॥ यत्रशक्रादयोदेवाउपासन्तेमहेश्वरम् ॥ तत्रस्नात्वाऽर्चयित्वाचरुद्रंदेवगणैर्वृतम् ॥ २२ ॥ ज
न्मप्रभृतिपापानिकृतानितुदतेनरः ॥ तिमिरत्रनरश्रेष्ठसर्वदेवैरभिष्टुतः ॥ २३ ॥ तत्रस्नात्वानरश्रेष्ठहयमेधमवाप्नुयात् ॥ जित्वातत्रमहाप्राज्ञाविष्णु
नादितिनन्दनम् ॥ २४ ॥ पुराशौचंकृतंराजन्हत्वादैवतकण्टकम् ॥ ततोगच्छेतधर्मज्ञवसुधाराममभिष्टुताम्॥ २५॥ गमनादेवतस्यांहिहयमेधमवाप्नुया
त् ॥ स्नात्वाकुरुवरश्रेष्ठप्रयतात्मातुमानवः ॥ २६ ॥ तर्पयित्वापितृन्देवान्विष्णुलोकेमहीयते ॥ तीर्थंचापिपरंतत्रवसूनांभरतर्षभ ॥ २७ ॥ तत्र
स्नात्वाचपीत्वाचवसूनांसंमतोभवेत् ॥ सिन्धुत्तममितिख्यातंसर्वपापप्रणाशनम् ॥ २८ ॥ तत्रस्नात्वानरश्रेष्ठलभेद्बहुसुवर्णकम् ॥ ब्रह्मतुङ्गंसमासा
द्यशुचिःप्रयतमानसः ॥ २९ ॥ ब्रह्मलोकमवाप्नोतिसुकृतीविरजानरः ॥ कुमारिकाणांशक्रस्यतीर्थंसिद्धनिषेवितम् ॥ ३० ॥ तत्रस्नात्वानरश्रेष्ठश
क्रलोकमवाप्नुयात् ॥ रेणुकायाश्चतत्रैवतीर्थंदेवनिषेवितम् ॥ ३१ ॥ स्नात्वातत्रभवेद्विप्रोविमलश्चन्द्रमाइव ॥ अथपञ्चनदंगत्वानियतोनिय
ताशनः ॥ ३२ ॥ पञ्चयज्ञानवाप्नोतिक्रमशोयेतुकीर्तिताः ॥ ततोगच्छेतधर्मज्ञभीमायाःस्थानमुत्तमम् ॥ ३३ ॥ तत्रस्नात्वानयोन्यां
वैनरोभरतसत्तम ॥ देव्याःपुत्रोभवेद्राजंस्तत्रकुण्डलविग्रहः ॥ ३४ ॥ गवांशतसहस्रस्यफलंचैवाप्नुयान्महत् ॥ गिरिकुञ्जंसमासाद्यत्रिषुलो
केषुविश्रुतम् ॥ ३५ ॥ पितामहंनमस्कृत्यगोसहस्रफलंलभेत् ॥ ततोगच्छेतधर्मज्ञाविमलंतीर्थमुत्तमम् ॥ ३६ ॥ अद्यापियत्रदृश्यन्तेम
त्स्याःसौवर्णराजताः ॥ तत्रस्नात्वानरश्रेष्ठवाजपेयमवाप्नुयात् ॥ ३७ ॥ सर्वपापविशुद्धात्मागच्छेत्परमिकांगतिम् ॥ ३८ ॥ इतिश्रीपा
द्मेमहापुराणेस्वर्गखण्डेचतुर्विंशोऽध्यायः ॥ २४ ॥ नारदउवाच ॥ वितस्तांचसमासाद्यसन्तर्प्यपितृदेवताः ॥ नरःफलमवाप्नोतिवाजपेयस्य
भारत ॥ १ ॥ काश्मीरेष्वेवनागस्यभवनंतक्षकस्यच ॥ वितस्ताख्यमितिख्यातंसर्वपापप्रमोचनम् ॥२ ॥ तत्रस्नात्वानरोनूनंवाजपेयमवाप्नुयात् ॥
सर्वपापविशुद्धात्मागच्छेतपरमांगतिम् ॥ ३ ॥ ततोगच्छेतमलदंत्रिषुलोकेषुविश्रुतम् ॥ पश्चिमायांतुसन्ध्यायामुपस्पृश्ययथाविधि ॥ ४ ॥ चरुंस
प्तार्चिषेराजन्यथाशक्तिनिवेदयेत् ॥ पितणामक्षयंदानंप्रवदन्तिमनीषिणः ॥ ५ ॥ गवांशतसहस्रेणराजसूयशतेनच ॥ अश्वमेधसहस्रेणश्रेया
न्सप्तार्चिषश्चरुः ॥ ६ ॥ ततोनिवृत्तोराजेन्द्ररुद्रास्पदमथाविशेत् ॥ अभिगम्यमहादेवमश्वमेधफलंलभेत् ॥ ७ ॥ मणिमन्तंसमासाद्यब्रह्मचारीसमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हितः ॥ एकरात्रोषितोराजन्नग्निष्टोमफलंलभेत् ॥ ८ ॥ अथगच्छेतराजेन्द्रदेविकांलोकविश्रुताम् ॥ प्रसूतिर्यत्रविप्राणांश्रूयतेभरतषभ ॥ ९ ॥ त्रिशूल
पाणेःस्थानंयत्रिषुलोकेषुविश्रुतम् ॥ देविकायांनरःस्नात्वाअभ्यर्च्यचमहेश्वरम् ॥ १० ॥ यथाशक्तिनरस्तत्रनिवेद्यभरतर्षभ ॥ सर्वकामसमृद्धस्य
यज्ञस्यलभतेफलम् ॥ ११ ॥ कामाख्यंतत्ररुद्रस्यतीर्थंदेवर्षिसंमतम् ॥ तत्रस्नात्वानरःक्षिप्रंसिद्धिमाप्नोतिभारत ॥ १२ ॥ यजनंयाजनंगत्वातथै
वब्रह्मबालकम् ॥ पुष्पन्यासउपस्पृश्यनशोचेन्मरणंततः ॥ १३ ॥ अर्द्धयोजनविस्तारांपञ्चयोजनमायताम् ॥ एतावदेविकामाहुःपुण्यांदेवर्षिसंमता
म् ॥ १४ ॥ ततोगच्छेतधर्मज्ञदीर्घसत्रंयथाक्रमम् ॥ यत्रब्रह्मादयोदेवाःसिद्धाश्चपरमर्षयः ॥ १५ ॥ दीर्घसत्रमुपासन्तेदीक्षितानियतव्रताः ॥ गम
नादेवराजेन्द्रदीर्घसत्रमरिन्दम ॥ १६ ॥ राजसूयाश्वमेधाभ्यांफलंप्राप्नोतिमानवः ॥ ततोविनाशनंगच्छेन्नियतोनियताशनः ॥ १७ ॥ गच्छत्यन्त
र्हितायत्रमेरुपृष्ठेसरस्वती ॥ चमसेचशिवोद्भेदेनागोद्भेदेचदृश्यते ॥ १८ ॥ स्नात्वातुचमसोद्भेदेअग्निष्टोफलंलभेत् ॥ शिवोद्भेदेनरःस्नात्वागोस
हस्रफलंलभेत् ॥ १९ ॥ नागोद्भेदेनरःस्नात्वानागलोकमवाप्नुयात् ॥ शशयानंचराजेन्द्रतीर्थमासाद्यदुर्लभम् ॥ २० ॥ शशरूपप्रतिच्छन्नाः
पुष्करायत्रभारत ॥ सरस्वत्यांमहाभागअनुसंवत्सरंहिते ॥ २१ ॥ स्नायन्तेभरतश्रेष्ठवृत्तावैकार्त्तिकींसदा ॥ तत्रस्नात्वानरव्याघ्रद्योततेशिववत्स
दा ॥ २२ ॥ गोसहस्रफलंचैवप्राप्नुयाद्भरतर्षभ ॥ कुमारकोटिमासाद्यनियतःकुरुनन्दन ॥ २३ ॥ तत्राभिषेकंकुर्वीतपितृदेवार्चनेरतः ॥ गवाम
युतमाप्नोतिकुलंचैवसमुद्धरेत् ॥ २४ ॥ ततोगच्छेतधर्मज्ञरुद्रकोटिंसमाहिताः ॥ पुरायत्रमहाराजऋषिकोटिःसमाहिता ॥ २५ ॥ वर्षेणचसमावि
ष्टादेवदर्शनकाङ्क्षया ॥ अहंपूर्वमहंपूर्वंद्रक्ष्यामिवृषभध्वजम् ॥ २६ ॥ एवंसम्प्रस्थिताराजन्नृषयःकिलभारत ॥ ततोयोगीश्वरेणापियोगमास्थायभू
पते ॥ २७ ॥ तेषांमन्युप्रशान्त्यर्थमृषीणांभावितात्मनाम् ॥ सृष्टातुकोटीरुद्राणामृषीणामग्रतःस्थिता ॥ २८ ॥ मयापूर्वंहरोदृष्टइतितेमेनिरेपृथ
क् ॥ तेषांतुष्टोमहादेवऋषीणामुग्रतेजसाम् ॥ २९ ॥ भक्त्यापरमयाराजन्वरंतेषांप्रदत्तवान् ॥ अद्यप्रभृतियुष्माकंधर्मवृद्धिर्भविष्यति ॥ ३० ॥
तत्रस्नात्वानरव्याघ्ररुद्रकोट्यांनरःशुचिः ॥ अश्वमेधमवाप्नोतिकुलंचैवसमुद्धरेत् ॥ ३१ ॥ ततोगच्छेतराजेन्द्रसङ्गमंलोकविश्रुतम् ॥ सरस्वत्यांमहा
पुण्यमुपासीतजनार्दनम् ॥ ३२ ॥ यत्रब्रह्मादयोदेवाऋषयःसिद्धचारणाः ॥ अभिगच्छन्तिराजेन्द्रचैत्रशुक्लचतुर्दशीम् ॥ ३३ ॥ तत्रस्नात्वानरव्याघ्र
विन्देद्बहुसुवर्णकम् ॥ सर्वपापविशुद्धात्माशिवलोकंचगच्छति ॥३४॥ ऋषीणांयत्रसत्राणिसमाप्तानिनराधिप ॥ तत्रावसानमासाद्यगोसहस्रफलंलभेत
॥ ३५ ॥ इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेपञ्चविंशोऽध्यायः ॥ २५ ॥ नारदउवाच ॥ ततोगच्छेतराजेन्द्रकुरुक्षेत्रमभिष्टुतम् ॥ पापेभ्योविप्रमुच्य

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

न्तेतद्गताःसर्वजन्तवः ॥ १ ॥ कुरुक्षेत्रंगमिष्यामिकुरुक्षेत्रेवसाम्यहम् ॥ यएवंसततंब्रूयात्सर्वपापैःप्रमुच्यते ॥ २ ॥ तत्रमासंवसेद्वीरःसरस्वत्यांनराधि
प ॥ यत्रब्रह्मादयोदेवायत्रब्रह्मर्षिचारणाः ॥ ३ ॥ गन्धर्वाप्सरसोयक्षाःपन्नगाश्चमहीपते ॥ ब्रह्मक्षेत्रंमहापुण्यमभिगच्छन्तिभारत ॥ ४ ॥ मनसाप्यभि
कामस्यकुरुक्षेत्रेयुधिष्ठिर ॥ पापानिविप्रणश्यन्तिब्रह्मलोकंचगच्छति ॥५॥ गत्वाहिश्रद्धयायुक्तःकुरुक्षेत्रंकुरूद्वह॥राजसूयाश्वमेधाभ्यांफलंप्राप्नोतिमा
नवः ॥ ६ ॥ ततोमत्तर्णकंराजन्द्वारपालंमहाबलम् ॥ यंवैसमभिवाद्यैवगोसहस्रफलंलभेत् ॥ ७ ॥ ततोगच्छेतधर्मज्ञविष्णोःस्थानमनुत्तमम् ॥ सत
तंनामराजेन्द्रयत्रसन्निहितोहरिः ॥ ८ ॥ तत्रस्नात्वाचदृष्ट्वाचत्रिलोकप्रभवंहरिम् ॥ अश्वमेधमवाप्नोतिविष्णुलोकंचगच्छति ॥ ९ ॥ ततःपारिप्ल
वंगच्छेत्तीर्थंत्रैलोक्यविश्रुतम् ॥ अग्निष्टोमातिरात्राभ्यांफलंप्राप्नोतिमानवः ॥ १० ॥ पृथिव्यांतीर्थमासाद्यगोसहस्रफलंलभेत ॥ ततःशालिविकिनीं
गत्वातीर्थसेवीनराधिप ॥११॥ दशाश्वमेधिकेस्नात्वातदेवलभतेफलम् ॥ सर्पनीविंसमासाद्यनागानांतीर्थमुत्तमम् ॥ १२ ॥ अग्निष्टोममवाप्नोति
नागलोकंचगच्छति ॥ ततोगच्छेतधर्मज्ञद्वारपालमतर्णकम् ॥ १३ ॥ तत्रोष्यरजनीमेकांगोसहस्रफलंलभेत् ॥ ततःपञ्चनदंगत्वानियतोनियताशनः
॥ १४ ॥ कोटितीर्थमुपस्पृश्यहयमेधफलंलभेत् ॥ अश्विनीतीर्थमागम्यरूपवानभिजायते ॥१५॥ ततोगच्छेतधर्मज्ञवाराहंतीर्थमुत्तमम् ॥ विष्णु
र्वाराहरूपेणपुरायत्रस्थितोऽभवत ॥१६॥ तत्रस्थित्वानरव्याघ्रअग्निष्टोमफलंलभेत् ॥ ततोजयिन्यांराजेन्द्रसोमतीर्थंसमाविशेत् ॥ १७॥ स्नात्वा
फलमवाप्नोतिराजसूयस्यमानवः ॥ एकहंसेनरःस्नात्वागोसहस्रफलंलभेत् ॥ १८ ॥ कृतशौचंसमासाद्यतीर्थसेवीकुरूद्वह ॥ पुण्डरीकमवा
प्नोतिकृतशौचोभवेन्नरः ॥ १९ ॥ ततोमुञ्जावटंनाममहादेवस्यधीमतः ॥ तत्रोष्यरजनीमेकांगाणपत्यमवाप्नुयात् ॥ २० ॥ तत्रैवचम
हाराजजयांलोकपरिश्रुताम् ॥ स्नात्वाभिगम्यराजेन्द्रसर्वकाममवाप्नुयात् ॥ २१ ॥ कुरुक्षेत्रस्यतद्वारंविश्रुतंभरतर्षभ ॥ प्रदक्षिणमुपावृत्य
तीर्थसेवीसमावृतः ॥ २२ ॥ संस्मृतेपुष्कराणांतुस्नात्वार्च्यपितृदेवताः ॥ जामदग्न्येनरामेणआहूतेवैमहात्मना ॥ २३ ॥ कृतकृत्योभवे
द्राजन्नश्वमेधंचविन्दति ॥ ततोरामह्रदंगच्छेत्तीर्थसेवीनराधिप ॥ २४ ॥ यत्ररामेणराजेन्द्रतरसादीप्ततेजसा ॥ क्षत्रमुत्सार्यवीर्येणह्रदाःपञ्च
निषेविताः ॥ २५ ॥ पूरयित्वानरव्याघ्ररुधिरेणेतिनःश्रुतम् ॥ पितरस्तर्पिताःसर्वेतथैवप्रपितामहाः ॥ २६ ॥ ततस्तेपितरःप्रीतारामसूचुर्महीपते ॥
रामराममहाभागप्रीताःस्मस्तवभार्गव ॥ २७ ॥ अनयापितृभक्त्याचविक्रमेणचतेऽनघ ॥ वरंवृणीष्वभद्रंतेकिमिच्छसिमहामते ॥ २८ ॥ एवमुक्तःस
राजेन्द्ररामःप्रवदतांवरः ॥ अब्रवीत्प्राञ्जलिर्वाक्यंपितॄन्सगगनेस्थितान् ॥ २९ ॥ भवन्तोयदिमेप्रीतायद्यनुग्राह्यतामयि ॥ पितृप्रसादादिच्छेयंतपसा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्यायनंपुनः ॥ ३० ॥ यच्चरोषाभिभूतेनक्षत्रमुत्सादितंमया ॥ ततश्चपापान्मुच्येयंयुष्माकंतेजसाह्यहम् ॥ ३१ ॥ ह्रदाश्चतीर्थभूतामेभवेयुर्भुविविश्रु
ताः ॥ एतच्छ्रुत्वाशुभंवाक्यंरामस्यपितरस्तदा ॥ ३२ ॥ प्रत्यूचुःपरमप्रीतारामंतोषसमन्विताः ॥ तपस्तेवर्द्धतांभूयःपितृभक्त्याविशेषतः ॥ ३३ ॥
यच्चरोषाभिभूतेनक्षत्रमुत्सादितंत्वया ॥ ततश्चपापान्मुक्तस्त्वंनिहतास्तेस्वकर्म्मणा ॥ ३४ ॥ ह्रदाश्चतवतीर्थत्वंगमिष्यन्तिनसंशयः ॥ ह्रदेष्वेतेषुयः
स्नात्वापितॄन्सन्तर्पयिष्यति ॥ ३५ ॥ पितरस्तस्यवैप्रीतादास्यन्तिभुविदुर्लभम् ॥ ईप्सितंमनसःकामंस्वर्गलोकंचशाश्वतम् ॥३६॥ एवंदत्त्वावरंरा
जन्रामस्यपितरस्तदा ॥ आमन्त्र्यभार्गवंप्रीतास्तत्रैवान्तर्दधुस्ततः ॥ ३७ ॥ एवंरामह्रदाःपुण्याभार्गवस्यमहात्मनः ॥ स्नात्वाह्रदेषुरामस्यब्रह्मचारी
शुभव्रतः ॥ ३८ ॥ राममभ्यर्च्यराजेन्द्रलभेद्बहुसुवर्णकम् ॥ वंशमूलंसमासाद्यतीर्थसेवीकुरूद्वह ॥ ३९ ॥ स्ववंशमुद्धरेद्राजन्स्नात्वावैवंशमूलके ॥
कायशोधनमासाद्यतीर्थंभरतसत्तम ॥ ४० ॥ शरीरशुद्धिमाप्नोतिस्नातस्तस्मिन्नसंशयः ॥ शुद्धदेहस्तुसंयातिशुभाँल्लोकाननुत्तमान् ॥ ४१ ॥ ततो
गच्छेतराजेन्द्रतीर्थंत्रैलोक्यदुर्लभम् ॥ लोकायत्रोद्धृताःपूर्वंविष्णुनाप्रभविष्णुना ॥ ४२ ॥ लोकोद्धारंसमासाद्यतीर्थंत्रैलोक्यविश्रुतम् ॥ स्नात्वातीर्थ
वरेराजँल्लोकानुद्धरतेस्वकान् ॥ ४३ ॥ श्रीतीर्थंचसमासाद्यविन्दतेश्रियमुत्तमाम् ॥ कपिलातीर्थमासाद्यब्रह्मचारीसमाहितः ॥ ४४ ॥ तत्रस्नात्वाऽर्च
यित्वाचदेवानिहपितॄंस्तथा ॥ कपिलानांसहस्रस्यफलंविन्दतिमानवः ॥ ४५ ॥ सूर्यतीर्थंसमासाद्यस्नात्वानियतमानसः ॥ अर्चयित्वापितॄन्देवानुप
वासपरायणः ॥ ४६ ॥ अग्निष्टोममवाप्नोतिसूर्यलोकंचगच्छति ॥ गवांभवनमासाद्यतीर्थसेवीयथाक्रमम् ॥ ४७ ॥ तत्राभिषेकंकुर्वाणोगोसहस्रफलंल
भेत् ॥ गङ्गातीर्थंसमासाद्यतीर्थसेवीनराधिप ॥ ४८ ॥ केव्यास्तीर्थेनरःस्नात्वालभतेवीर्यमुत्तमम् ॥ ततोगच्छेतराजेन्द्रद्वारपालंलवर्णकम् ॥ ४९ ॥
तस्यतीर्थेसरस्वत्यांयथेन्द्रस्यमहात्मनः ॥ तत्रस्नात्वानरोराजन्नग्निष्टोमफलंलभेत् ॥ ५० ॥ ततोगच्छेतधर्मज्ञब्रह्मावर्तंनराधिप ॥ ब्रह्मावर्तेनरःस्ना
त्वाब्रह्मलोकमवाप्नुयात् ॥ ५१ ॥ ततोगच्छेतधर्मज्ञसुतीर्थकमनुत्तमम् ॥ यत्रसन्निहितानित्यंपितरोदैवतैःसह ॥ ५२ ॥ तत्राभिषेकंकुर्वीतपितृदेवार्च
नेरतः ॥ अश्वमेधमवाप्नोतिपितृलोकंचगच्छति ॥ ५३ ॥ ततोऽन्यतीर्थंधर्मज्ञसमासाद्ययथाक्रमम् ॥ काशीश्वरस्यतीर्थेषुस्नात्वाभरतसत्तम ॥५४॥
सर्वव्याधिविनिर्मुक्तोब्रह्मलोकेमहीयते ॥ मातृतीर्थंचतत्रैवयत्रस्नातस्यपार्थिव ॥ ५५ ॥ प्रजाविवर्द्धतेराजन्स्वर्गतिंसमवाप्नुयात् ॥ ततःशीतवनंगच्छे
न्नियतोनियताशनः ॥ ५६ ॥ तीर्थंतत्रमहाराजमहदन्यत्रदुर्लभम् ॥ पुनातिदर्शनादेवदण्डेनैकंनराधिप ॥ ५७ ॥ केशानावप्यवैतस्मिन्पूतोभवतिभार
त ॥ तत्रतीर्थवरंचान्यत्स्नातलोकार्तिहंस्मृतम् ॥ ५८ ॥ तत्रविप्रानरव्याघ्रविद्वांसस्तत्रतत्पराः ॥ गतिंगच्छन्तिपरमांस्नात्वाभरतसत्तम ॥ ५९ ॥ स्व

CC-0. In Public Domain. Digitization by eGangotri

र्णलोमापनयनेतीर्थेभरतसत्तम ॥ प्राणायामैर्निर्हरन्तिस्वलोमानिद्विजोत्तमाः ॥ ६० ॥ पूतात्मानश्चराजेन्द्रप्रयान्तिपरमांगतिम् ॥ दशाश्वमेधिकेचैव तस्मिंस्तीर्थेमहीपते ॥ ६१ ॥ तत्रस्नात्वानरव्याघ्रगच्छन्तिपरमांगतिम् ॥ ततोगच्छेतराजेन्द्रमानुषंलोकविश्रुतम् ॥ ६२ ॥ तत्रकृष्णामृगाराजन्व्याधेनशरपीडिताः ॥ विगाह्यतस्मिन्सरसिमानुषत्वमुपागताः ॥६३॥ तस्मिंस्तीर्थेनरःस्नात्वाब्रह्मचारीसमाहितः ॥ सर्वपापविशुद्धात्मास्वर्गलोकेमहीयते ॥६४॥ मानुषस्यतुपूर्वेणक्रोशमात्रंमहीपते ॥ आपगानामविख्यातानदीसिद्धनिषेविता ॥ ६५ ॥ श्यामाकभोजनंतत्रयःप्रयच्छतिमानवः ॥ देवान्पितॄन्समुद्दिश्यतस्यधर्मफलंमहत् ॥ ६६ ॥ एकस्मिन्भोजितेविप्रेकोटिर्भवतिभोजिता ॥ तत्रस्नात्वार्चयित्वाचदैवतानिपितॄंस्तथा ॥६७॥ उषित्वारजनीमेकामग्निष्टोमफलंलभेत् ॥ ततोगच्छेतधर्मज्ञब्रह्मणःस्थानमुत्तमम् ॥ ६८ ॥ ब्रह्मानुस्वरमित्येवंप्रकाशंभुविभारत ॥ तत्रसप्तर्षिकुण्डेषुस्नातस्यभरतर्षभ ॥ ६९ ॥ केदारेचैवराजेन्द्रकपिलस्यमहात्मनः ॥ ब्रह्माणमभिगम्याथशुचिःप्रयतमानसः ॥ ७० ॥ सर्वपापविशुद्धात्माब्रह्मलोकंप्रपद्यते ॥ कपिष्ठलस्यकेदारंसमासाद्यसुदुर्लभम् ॥ ७१ ॥ अन्तर्धानमवाप्नोतितपसादग्धकिल्बिषः ॥ततोगच्छेतराजेन्द्रसर्वकंलोकविश्रुतम् ॥ ७२ ॥ कृष्णपक्षेचतुर्दश्यामभिगम्यवृषध्वजम् ॥ लभतेसर्वकामान्हिस्वर्गलोकंचगच्छति ॥७३ ॥ तिस्रःकोट्यश्चतीर्थानांप्रवरंकुरुनन्दन ॥ रुद्रकोट्यांतथाकूपेह्रदेषुचसमन्तकः ॥ ७४ ॥ इलास्पदंचतत्रैवतीर्थंभरतसत्तम ॥ तत्रस्नात्वार्चयित्वाचदैवतानिपितॄनपि ॥७५॥ नदुर्गतिमवाप्नोतिवाजपेयंचविन्दति ॥ किन्दानेचनरःस्नात्वाकिंयज्ञेचमहीपते ॥ ७६ ॥ अप्रमेयमवाप्नोतिदानंयज्ञंतथैवच ॥ कलश्यांवाप्र्युपस्पृश्यश्रद्दधानोजितेन्द्रियः ॥ ७७ ॥ अग्निष्टोमस्ययज्ञस्यफलंप्राप्नोतिमानवः॥सरकस्यतुपूर्वेणनारदस्यमहात्मनः ॥७८॥ कुरुश्रेष्ठशुभंतीर्थंरामजन्मेतिविश्रुतम्॥तत्रतीर्थेनरःस्नात्वाप्राणांश्चोत्सृज्यभारत ॥७९॥ नारदेनाभ्यनुज्ञातोलोकानाप्नोतिदुर्लभान् ॥ शुक्लपक्षेदशम्यांतुपुण्डरीकंसमाविशेत् ॥८०॥ तत्रस्नात्वानरोराजन्पुण्डरीकफलंलभेत्॥ततस्त्रिविष्टपंगच्छेत्त्रिषुलोकेषुविश्रुतम् ॥ ८१ ॥ तत्रवैतरणीपुण्यानदीपापप्रमोचनी ॥ तत्रस्नात्वार्चयित्वाचशूलपाणिंवृषध्वजम् ॥ ८२ ॥ सर्वपापविशुद्धात्मागच्छेतपरमांगतिम् ॥ ततोगच्छेतराजेन्द्रफलकीवनमुत्तमम् ॥ ८३ ॥ तत्रदेवाःसदाराजन्फलकीवनमाश्रिताः ॥ तपश्चरन्तिविपुलंबहुवर्षसहस्रकम् ॥ ८४ ॥ दृषत्पानेनरःस्नात्वातर्पयित्वाचदेवताः ॥ अग्निष्टोमातिरात्राभ्यांफलंविन्दतिमानवः ॥ ८५ ॥ तीर्थेचसर्वदेवानांस्नात्वाभरतसत्तम ॥ गोसहस्रस्यराजेन्द्रफलमाप्नोतिमानवः ॥ ८६ ॥ पाणिख्यातेनरःस्नात्वातर्पयित्वाचदेवताः ॥ अवाप्नुतेराजसूयमृषिलोकंचगच्छति॥ ८७ ॥ ततोगच्छेतधर्मज्ञमिश्रकंलोकविश्रुतम् ॥ तत्रतीर्थानिराजेन्द्रमिश्रितानिमहात्मना ॥ ८८ ॥ व्यासेननृपशार्दूलद्विजार्थमितिनःश्रुतम् ॥ सर्वतीर्थेषु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सस्नातिमिश्रकेस्नातियोनरः ॥८९॥ ततोव्यासवनंगच्छेन्नियतोनियताशनः ॥ मनोजवेनरःस्नात्वागोसहस्रफलंलभेत् ॥ ९० ॥ गत्वामधुवनींचा
पिदेव्याःस्थानंनरःशुचिः ॥ तत्रस्नात्वाऽर्चयेद्देवान्पितॄंश्चनियतःशुचिः ॥ ९१ ॥ सदेव्यासमनुज्ञातोगोसहस्रफलंलभेत् ॥ कौशिक्याःसङ्गमेयस्तुदृ
षद्वत्याश्चभारत ॥ ९२ ॥ स्नातोवैनियताहारःसर्वपापैःप्रमुच्यते ॥ ततोव्यासस्थलीनामयत्रव्यासेनधीमता ॥ ९३ ॥ पुत्रशोकाभितप्तेनदेहत्यागाय
निश्चयः ॥ कृतोदेवैश्चराजेन्द्रपुनरुत्थापितस्तथा ॥ ९४ ॥ अभिगम्यस्थलींतस्यगोसहस्रफलंलभेत् ॥ ऋणान्तंकूपमासाद्यतिलप्रस्थंप्रदायच
॥ ९५ ॥ गच्छेतपरमांसिद्धिमृणैर्मुक्तोनरेश्वर ॥ वेदीतीर्थेनरःस्नात्वागोसहस्रफलंलभेत् ॥ ९६ ॥ अहश्चसुदिनश्चैवद्वेतीर्थेनृपदुर्लभे ॥ तयोःस्नात्वा
नरश्रेष्ठसूर्यलोकमवाप्नुयात् ॥ ९७ ॥ मृगधूमंततोगच्छेत्त्रिषुलोकेषुविश्रुतम् ॥ तत्ररुद्रपदेस्नात्वासमभ्यर्च्यचमानवः ॥ ९८ ॥ शूलपाणिमहात्मा
नमश्वमेधफलंलभेत् ॥ कोटितीर्थेनरःस्नात्वागोसहस्रफलंलभेत् ॥ ९९ ॥ अथवामनकंगत्वात्रिषुलोकेषुविश्रुतम् ॥ तत्रविष्णुपदेस्नात्वासमभ्य
र्च्यचवामनम् ॥ १०० ॥ सर्वपापविशुद्धात्माविष्णुलोकमवाप्नुयात् ॥ कुलम्पुनेनरःस्नात्वापुनातिस्वकुलंनरः ॥ १ ॥ पवनस्यह्रदंगत्वामरुतांती
र्थमुत्तमम् ॥ तत्रस्नात्वानरव्याघ्रवायुलोकेमहीयते ॥ २ ॥ अमराणांह्रदेस्नात्वासमभ्यर्च्यामराधिपम् ॥ अमराणांप्रभावेणस्वर्गलोकेमहीयते ॥३॥
शालिहोत्रस्यराजेन्द्रशालिसूर्येयथाविधि ॥ स्नात्वानरवरश्रेष्ठगोसहस्रफलंलभेत् ॥ ४ ॥ श्रीकुञ्जंचसरस्वत्यांतीर्थंभरतसत्तम ॥ तत्रस्नात्वानरोरा
जन्नग्निष्टोमफलंलभेत् ॥ ५ ॥ ततोनैमिषिकुञ्जंचसमासाद्यसुदुर्लभम् ॥ ऋषयःकिलराजेन्द्रनैमिषेयास्तपोधनाः ॥ ६ ॥ तीर्थयात्रांपुरस्कृत्यकुरुक्षेत्रे
गताःपुरा ॥ ततःकुञ्जःसरस्वत्यांकृतोभरतसत्तम ॥ ७ ॥ ऋषीणामवकाशःस्याद्यथातुष्टिकरोमहान् ॥ तस्मिन्कुञ्जेनरःस्नात्वागोसहस्रफलंलभेत्
॥ ८ ॥ इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेषड्विंशोऽध्यायः ॥ २६ ॥ नारदउवाच ॥ ततोगच्छेतधर्मज्ञकन्यातीर्थमनुत्तमम्॥ कन्यातीर्थेनरःस्नात्वाअ
ग्निष्टोमफलंलभेत् ॥ १ ॥ ततोगच्छेन्नरव्याघ्रब्रह्मणःस्थानमुत्तमम् ॥ तत्रवर्णावरःस्नात्वाब्राह्मण्यंलभतेनरः ॥ २ ॥ ब्राह्मणस्तुविशुद्धात्मागच्छेतपर
मांगतिम् ॥ ततोगच्छेन्नरव्याघ्रसोमतीर्थमनुत्तमम् ॥ ३ ॥ तत्रस्नात्वानरोराजन्सोमलोकमवाप्नुयात् ॥ सप्तसारस्वतंतीर्थंततोगच्छेन्नराधिप॥ ४ ॥
यत्रमङ्कणकःसिद्धोब्रह्मर्षिर्लोकविश्रुतः ॥ पुरामङ्कणकोराजन्कुशाग्रेणेतिविश्रुतम् ॥ ५ ॥ क्षतःकिलकरेराजंस्तस्यशाकरसोऽस्रवत् ॥ सवैशाकरसंदृ
ष्ट्वाहर्षाविष्टोमहातपाः ॥ ६ ॥ ननर्तकिलविप्रर्षिर्विस्मयोत्फुल्ललोचनः ॥ ततस्तस्मिन्प्रनृत्तेवैस्थावरंजङ्गमंचयत् ॥ ७ ॥ प्रनृत्तमुभयंवीरतेजसातस्य
मोहितम् ॥ ब्रह्मादिभिस्ततोदेवैर्ऋषिभिश्चतपोधनैः ॥ ८ ॥ विज्ञप्तोवैऋषेरर्थेमहादेवोनराधिप ॥ नायंनृत्येद्यथादेवतथात्वंकर्तुमर्हसि ॥ ९ ॥ ततोदे

CC-0. In Public Domain. Digitization by eGangotri

वोमुनिंदृष्ट्वाहर्षाविष्टेनचेतसा ॥ नृत्यन्तमब्रवीच्चैनंस्थिराणांहितकाम्यया ॥ १० ॥ अहोमहर्षेधर्मज्ञकिमर्थंनृत्यतेभवान् ॥ हर्षस्थानंकिमर्थंवातवाद्य
मुनिपुङ्गव ॥ ११ ॥ ऋषिरुवाच ॥ तपस्विनोधर्म्मपथेस्थितस्यद्विजसत्तम ॥ किंनपश्यसिमेब्रह्मन्क्षताच्छाकरसंसृतम् ॥ १२ ॥ यंदृष्ट्वासम्प्रनृत्तोऽहं
हर्षेणमहतावृतः ॥ तंप्रहस्याब्रवीद्देवऋषिंरागेणमोहितम् ॥१३॥ अहंतुविस्मयंविप्रनगच्छामीहपश्यमाम् ॥ एवमुक्त्वानरश्रेष्ठमहादेवेनवैतदा ॥१४॥
अङ्गुल्यग्रेणराजेन्द्रस्वाङ्गुष्ठस्ताडितोऽनघ ॥ तस्यभस्मक्षताद्राजन्निस्सृतंहिमसन्निभम् ॥ १५ ॥ तंदृष्ट्वाव्रीडितोराजन्समुनिःपादयोर्गतः ॥ नान्यंदेव
महंमन्येरुद्रात्परतरंमहत् ॥ १६ ॥ सुरासुरस्यजगतोगतिस्त्वमसिशूलधृक् ॥ त्वयासृष्टमिदंविश्वंत्रैलोक्यंसचराचरम् ॥ १७ ॥ त्वामेवभगवन्सर्वे
प्रविशन्तियुगक्षये॥देवैरपिनशक्यस्त्वंपरिज्ञातुंकुतोमया ॥१८॥ त्वयिसर्वेशदृश्यन्तेसुराःशक्रादयोऽनघ ॥ सर्वस्त्वमसिलोकानांकर्ताकारयिताऽन्व
हम् ॥१९॥ त्वत्प्रसादात्सुराःसर्वेमोदन्तेऽत्राकुतोभयाः॥एवंस्तुत्वामहादेवंसऋषिःप्रणतोऽब्रवीत् ॥२०॥ त्वत्प्रादान्महादेवतपोमेनक्षरेतवै॥ततोदेवः
प्रहृष्टात्माब्रह्मर्षिमिदमब्रवीत् ॥ २१ ॥ तपस्तेवर्द्धतांविप्रमत्प्रसादात्सहस्रधा ॥ आश्रमेचेहवत्स्यामित्वयासार्द्धंमहामुने ॥ २२ ॥ सप्तसारस्वतेस्ना
त्वाअर्चयिष्यन्तियेतुमाम्॥नतेषांदुर्लभंकिञ्चिदिहलोकेपरत्रवा॥२३॥गच्छेत्सारस्वतंचापिलोकंनास्त्यत्रसंशयः ॥२४॥ नारदउवाच॥एवमुक्त्वामहा
देवस्तत्रैवान्तरधीयत ॥ ततस्त्वौशनसंगच्छेत्रिषुलोकेषुविश्रुतम् ॥२५॥ यत्रब्रह्मादयोदेवाऋषयश्चतपोधनाः॥कार्तिकेयश्चभगवांस्त्रिसन्ध्यंकिलभारत
॥२६॥ सान्निध्यमकरोत्तत्रभार्गवप्रियकाम्यया॥कपालमोचनंतीर्थंसर्वपापप्रणाशनम् ॥ २७ ॥ तत्रस्नात्वानरव्याघ्रसर्वपापैःप्रमुच्यते॥अग्नितीर्थंततो
गच्छेत्स्नात्वाचभरतर्षभ ॥ २८ ॥ अग्निलोकमवाप्नोतिकुलंचैवसमुद्धरेत् ॥ विश्वामित्रस्यतत्रैवतीर्थंभरतसत्तम ॥२९॥ तत्रस्नात्वामहाराजब्राह्मण्य
मभिजायते ॥ ब्रह्मयोनिंसमासाद्यशुचिःप्रयतमानसः ॥३०॥ तत्रस्नात्वानरव्याघ्रब्रह्मलोकंप्रपद्यते ॥ पुनात्यासप्तमंचैवकुलंनास्त्यत्रसंशयः ॥३१॥
ततोगच्छेतराजेन्द्रतीर्थंत्रैलोक्यविश्रुतम् ॥ पृथूदकमितिख्यातंकार्तिकेयस्यवैनृप ॥ ३२ ॥ तत्राभिषेकंकुर्वीतपितृदेवार्चनेरतः ॥ अज्ञानाज्ज्ञानतोवा
पिस्त्रियावापुरुषेणवा ॥ ३३ ॥ यत्किञ्चिदशुभंकर्मकृतंमानुषबुद्धिना ॥ तत्सर्वंनश्यतेतत्रस्नातमात्रस्यभारत ॥ ३४ ॥ अश्वमेधफलंचापिलभतेस्वर्ग
मेवच ॥ पुण्यमाहुःकुरुक्षेत्रंकुरुक्षेत्रात्सरस्वतीम् ॥३५॥ सरस्वत्याश्चतीर्थानितीर्थेभ्यश्चपृथूदकम् ॥ उत्तमेसर्वतीर्थानांयस्त्यजेदात्मनस्तनुम् ॥३६॥
पृथूदकेजप्यपरोनैवसंसरणंलभेत् ॥ गीतंसनत्कुमारेणव्यासेनचमहात्मना ॥ ३७ ॥ वेदेचनियतंराजन्नभिगच्छेत्पृथूदकम् ॥ पृथूदकात्पुण्यतमंनान्य

१ 'किं मे नान्यः समो ब्रह्मन् क्षताच्छाकरसोऽस्रवत' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्तीर्थंनरोत्तम ॥ ३८ ॥ एतन्मेध्यंपवित्रंचपावनंचनसंशयः ॥ तत्रस्नात्वादिवंयान्तिअपिपापकृतोजनाः ॥ ३९ ॥ पृथूदकेनरश्रेष्ठप्राहुरेवंमनीषिणः ॥
मधुंस्रवंचतत्रैवतीर्थंभरतसत्तम ॥ ४० ॥ तत्रस्नात्वानरोराजन्गोसहस्रफलंलभेत् ॥ ततोगच्छेन्नरश्रेष्ठतीर्थंदेव्यायथाक्रमम् ॥ ४१ ॥ सरस्वत्यारुणा
याश्वसङ्गमंलोकविश्रुतम् ॥ त्रिरात्रोपोषितःस्नात्वामुच्यतेब्रह्महत्यया ॥ ४२ ॥ अग्निष्टोमातिरात्राभ्यांफलंचैवसमश्नुते ॥ पुनात्यासप्तमंचैवकुलंना
स्त्यत्रसंशयः ॥ ४३ ॥ अवकीर्णंचतत्रैवतीर्थंकुरुकुलोद्वह ॥ विप्राणामनुकम्पार्थंदर्भिणानिर्मितंपुरा ॥ ४४ ॥ व्रतोपनयनाभ्यांचाप्युपवासेनवा
द्विजः ॥ क्रियामन्त्रैश्चसंयुक्तोब्राह्मणःस्यान्नसंशयः ॥ ४५ ॥ क्रियामन्त्रविहीनोऽपितत्रस्नात्वानरर्षभ ॥ चीर्णव्रतोभवेद्विप्रोदृष्टमेतत्पुरातनम् ॥४६॥
समुद्राश्चापिचत्वारःसमानीताश्चदर्भिणा ॥ तत्रस्नात्वानरव्याघ्रनदुर्गतिमवाप्नुयात् ॥ ४७ ॥ फलानिगोसहस्राणांचतुर्णांविन्दतेचसः ॥ ततोगच्छेत
राजेन्द्रतीर्थंशतसहस्रकम् ॥ ४८ ॥ साहस्रकंचतत्रैवद्वेतीर्थेलोकविश्रुते ॥ उभयोर्हिनरःस्नात्वागोसहस्रफलंलभेत् ॥ ४९ ॥ दानंवाप्युपवासोवासह
स्रगुणितोभवेत् ॥ ततोगच्छेतराजेन्द्ररेणुकातीर्थमुत्तमम् ॥ ५० ॥ तत्राभिषेकंकुर्वीतपितृदेवार्चनेरतः ॥ सर्वपापविशुद्धात्माअग्निष्टोमफलंलभेत
॥ ५१ ॥ विमोचनउपस्पृश्यजितमन्युर्जितेन्द्रियः ॥ प्रतिग्रहकृतैःपापैःसर्वैःसम्परिमुच्यते ॥ ५२ ॥ ततःपञ्चवटंगत्वाब्रह्मचारीजितेन्द्रियः ॥ पुण्ये
नमहतायुक्तःस्वर्गलोकेमहीयते ॥ ५३ ॥ यत्रयोगीश्वरःस्थाणुःस्वयमेववृषध्वजः ॥ तमर्चयित्वादेवेशंगमनादेवसिध्यति ॥ ५४ ॥ तैजसंवारुणंतीर्थं
दीप्यतेस्वेनतेजसा ॥ यत्रब्रह्मादिभिर्देवैर्ऋषिभिश्चतपोधनैः ॥ ५५ ॥ सैनापत्येचदेवानामभिषिक्तोगुहस्तदा ॥ तैजसस्यतुपूर्वेणकुरुतीर्थंकुरूद्वह
॥ ५६ ॥ कुरुतीर्थेनरःस्नात्वाब्रह्मचारीजितेन्द्रियः ॥ सर्वपापविशुद्धात्मारुद्रलोकंप्रपद्यते ॥ ५७ ॥ स्वर्गद्वारंततोगच्छेन्नियतोनियताशनः ॥
अग्निष्टोममवाप्नोतिब्रह्मलोकंचगच्छति ॥ ५८ ॥ ततोगच्छेदनरकंतीर्थसेवीनराधिप ॥ तत्रस्नात्वानरोराजन्नदुर्गतिमवाप्नुयात् ॥ ५९ ॥ तत्रब्रह्मास्व
यंनित्यंदेवैस्सहमहीयते ॥ अध्यास्तेपुरुषव्याघ्रनारायणपुरोगमैः ॥ ६० ॥ सान्निध्यंचैवराजेन्द्ररुद्रवेद्यांकुरूद्वह ॥ अभिगम्यतुतांदेवींनदुर्गतिमवाप्नु
यात् ॥ ६१ ॥ तत्रैवचमहाराजविश्वेश्वरमुमापतिम् ॥ अभिगम्यमहादेवंमुच्यतेसर्वकिल्बिषैः ॥ ६२ ॥ नारायणंचाभिगम्यपद्मनाभमरिन्दम ॥
शोभमानोमहाराजविष्णुलोकंप्रपद्यते ॥ ६३ ॥ तीर्थेषुसर्वदेवानांस्नातमात्रोनराधिप ॥ सर्वदुःखपरित्यक्तोद्योततेशिववत्सदा ॥ ६४ ॥ ततस्त्वस्थि
पुरंगच्छेत्तीर्थसेवीनराधिप ॥ पावनंतीर्थमासाद्यतर्पयेत्पितृदेवताः ॥ ६५ ॥ अग्निष्टोमस्ययज्ञस्यफलमाप्नोतिभारत ॥ गङ्गाह्रदश्चतत्रैवकूपश्चभर

१ 'मधुपूरम्' ॥ 'मधुसूरम्'। 'मधुसूदम्' इ० च पा०।

CC-0. In Public Domain. Digitization by eGangotri

तर्षभ ॥ ६६ ॥ तिस्रःकोटयस्तुतीर्थानांतस्मिन्कूपेमहीपते ॥ तत्रस्नात्वानरोराजन्ब्रह्मलोकंप्रपद्यते ॥ ६७ ॥ आपगायांनरःस्नात्वाअर्चयित्वामहे
श्वरम् ॥ गतिंपरामवाप्नोतिकुलंचैवसमुद्धरेत् ॥ ६८ ॥ ततःस्थाणुवटंगच्छेत्रिषुलोकेषुविश्रुतम् ॥ तत्रस्नात्वास्थितोरात्रिंरुद्रलोकमवाप्नुयात्
॥ ६९ ॥ बदरीणांवनंगच्छेद्वसिष्ठस्याश्रमंततः ॥ बदरीभक्ष्यतेयत्रत्रिरात्रोपोषितोनरः ॥ ७० ॥ सम्यग्द्वादशवर्षाणिबदरींभक्षयेत्तुयः ॥ त्रिरात्रो
पोषितश्चैवभवेत्तुल्योनराधिप ॥ ७१ ॥ इन्द्रमार्गंसमासाद्यतीर्थसेवीनराधिप ॥ अहोरात्रोपवासेनस्वर्गलोकेमहीयते ॥ ७२ ॥ एकरात्रंसमासाद्यए
करात्रोपितोनरः ॥ नियतःसत्यवादीचब्रह्मलोकेमहीयते ॥ ७३ ॥ तथागच्छेच्चराजेन्द्रतीर्थंत्रैलोक्यविश्रुतम् ॥ आदित्यस्याश्रमोयत्रतेजोराशेर्महा
त्मनः ॥ ७४ ॥ तस्मिंस्तीर्थेनरःस्नात्वापूजयित्वाविभावसुम् ॥ आदित्यलोकंव्रजतिकुलंचैवसमुद्धरेत् ॥ ७५ ॥ सोमतीर्थेनरःस्नात्वातीर्थसेवी
कुरूद्वह ॥ सोमलोकमवाप्नोतिनरोनास्त्यत्रसंशयः ॥ ७६ ॥ ततोगच्छेतधर्मज्ञदधीचस्यनराधिप ॥ तीर्थंपुण्यतमंराजन्पावनंलोकविश्रुतम्
॥ ७७ ॥ यत्रसारस्वतोयातःसिद्धिंसतपसोनिधिः ॥ तस्मिंस्तीर्थेनरःस्नात्वावाजपेयफलंलभेत् ॥ ७८ ॥ सारस्वतींमतिंचैवलभतेनात्रसंशयः ॥
ततःकन्याश्रमंगत्वानियतोब्रह्मचर्यया ॥ ७९ ॥ त्रिरात्रमुषितोराजन्नुपवासपरायणः ॥ लभेत्कन्याशतंदिव्यंब्रह्मलोकंचगच्छति ॥ ८० ॥
ततोगच्छेतधर्मज्ञतीर्थंसन्निहितीमपि ॥ यत्रब्रह्मादयोदेवाऋषयश्चतपोधनाः ॥ ८१ ॥ मासिमासिसमेष्यन्तिपुण्येनमहतान्विताः ॥ सन्निहित्यामुप
स्पृश्यराहुग्रस्तेदिवाकरे ॥ ८२ ॥ अश्वमेधशतंतेनइष्टंभवतिशाश्वतम् ॥ पृथिव्यांयानितीर्थानिअन्तरिक्षचराणिच ॥ ८३ ॥ उदपाना
श्चविप्राश्चपुण्यान्यायतनानिच ॥ निस्संशयममायांवैसमेष्यन्तिनराधिप ॥ ८४ ॥ मासिमासिनरव्याघ्रसन्निहित्यांजनेश्वर ॥ तीर्थसन्नयना
देवसन्निहितीभुविश्रुता ॥ ८५ ॥ तत्रस्नात्वाचपीत्वाचस्वर्गलोकेमहीयते ॥ अमावास्यांतथाचैवराहुग्रस्तेदिवाकरे ॥ ८६ ॥ यःश्राद्धंकुरुतेमर्त्य
स्तस्यपुण्यफलंशृणु ॥ अश्वमेधसहस्रस्यसम्यगिष्टस्ययत्फलम् ॥ ८७ ॥ स्नातएवतदाप्नोतिश्राद्धंकृत्वाचमानवः ॥ यत्किञ्चिद्दुष्कृतंकर्म्मस्त्रिया
वापुरुषस्यवा ॥ ८८ ॥ स्नातमात्रस्यतत्सर्वंनश्यतेनात्रसंशयः ॥ पद्मवर्णेनयानेनब्रह्मलोकंसगच्छति ॥ ८९ ॥ अभिवाद्यततोनाम्नाद्वारपालंमचक्रु
कम् ॥ गङ्गाह्रदश्चतत्रैवतीर्थंभरतसत्तम ॥ ९० ॥ तत्रस्नायीतधर्मज्ञब्रह्मचारीसमाहितः ॥ राजसूयाश्वमेधाभ्यांफलंविन्दतिमानवः ॥ ९१ ॥ पृथि
व्यांनैमिषंपुण्यमन्तरिक्षेचपुष्करम् ॥ त्रयाणामपिलोकानांकुरुक्षेत्रंविशिष्यते ॥ ९२ ॥ पांसवोऽपिकुरुक्षेत्रेवायुनाऽतिसमीरिताः ॥ अपिदुष्कृतक

१ 'यत्र सारस्वतो जातः सिद्धिराट्' इ० पा० । २ 'मतर्णकम्' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्माणंनयन्तिपरमांगतिम् ॥ ९३ ॥ दक्षिणेनसरस्वत्यामुत्तरेणसरस्वतीम् ॥ येवसन्तिकुरुक्षेत्रेतेवसन्तित्रिविष्टपे ॥ ९४ ॥ कुरुक्षेत्रंगमिष्यामिकुरुक्षे त्रेवसाम्यहम् ॥ अप्येवंवाचमुत्सृज्यस्वर्गलोकेमहीयते ॥ ९५ ॥ ब्रह्मवेद्यांकुरुक्षेत्रंपुण्यंब्रह्मर्षिसेवितम् ॥ तस्मिन्वसन्तियेराजन्नतेशोच्याःकथञ्चन ॥ ९६ ॥ तरण्डकारण्डकयोर्यदन्तरंरामह्रदानांचमचक्रुकस्यच ॥ एतत्कुरुक्षेत्रसमन्तपञ्चकंपितामहस्योत्तरवेदिरुच्यते ॥ ९७ ॥ इतिश्रीपाद्मेमहापु राणेस्वर्गखण्डेसप्तविंशतितमोऽध्यायः ॥ २७ ॥ नारदउवाच ॥ ततोगच्छेतधर्म्मज्ञधर्म्मतीर्थंपुरातनम् ॥ यत्रधर्मोमहाभागस्तत्तवानुत्तमंतपः ॥१॥ तेनतीर्थंकृतंपुण्यंस्वेननाम्नाचचिह्नितम् ॥ तत्रस्नात्वानरोराजन्धर्मशीलःसमाहितः ॥ २ ॥ आसप्तमंकुलंचैवपुनीतेनात्रसंशयः ॥ ततोगच्छेतधर्मज्ञ कलापवनमुत्तमम् ॥ ३ ॥ कृच्छ्रेणमहतागत्वातत्रस्नात्वासमाहितः ॥ अग्निष्टोममवाप्नोतिविष्णुलोकंचगच्छति ॥ ४ ॥ सौगन्धिकंवनंराजंस्ततोग च्छेतमानवः ॥ यत्रब्रह्मादयोदेवाऋषयश्चतपोधनाः ॥ ५ ॥ सिद्धचारणगन्धर्वाःकिन्नराःसमहोरगाः ॥ तद्वनंप्रविशन्नेवसर्वपापैःप्रमुच्यते ॥ ६ ॥ त तोहिंसासरिच्छ्रेष्ठानदीनामुत्तमानदी ॥ प्लक्षादेवीस्मृताराजन्महापुण्यासरस्वती ॥ ७ ॥ तत्राभिषेकंकुर्वीतवल्मीकान्निस्सृतेजले ॥ अर्चयित्वापि तॄन्देवानश्वमेधफलंलभेत् ॥ ८ ॥ ईशानाध्युषितंनामतत्रतीर्थंसुदुर्लभम् ॥ षड्गुणंयन्निपातेषुवल्मीकादितिनिश्चयः ॥ ९ ॥ कपिलानांसहस्रंचवाजि मेधंचविन्दति ॥ तत्रस्नात्वानरव्याघ्रदृष्टमेतत्पुरातनैः ॥ १० ॥ सुगन्धांशतकुम्भांचपञ्चयज्ञांचभारत ॥ अभिगम्यनरश्रेष्ठस्वर्गलोकेमहीयते॥ ११ ॥ त्रिशूलपात्रंतत्रैवतीर्थमासाद्यदुर्लभम् ॥ तत्राभिषेकंकुर्वीतपितृदेवार्चनेरतः ॥१२॥ गाणपत्यंचलभतेदेहंत्यक्त्वानसंशयः ॥ ततोराजगृहंगच्छेद्देव्याः स्थानंसुदुर्लभम् ॥ १३ ॥ शाकम्भरीतिविख्यातात्रिषुलोकेषुविश्रुता ॥ दिव्यंवर्षसहस्रंचशाकेनकिलभारत ॥ १४ ॥ आहारंसाकृतवतीमासिमासि नराधिप ॥ ऋषयोऽभ्यागतास्तत्रदेव्याभक्तास्तपोधनाः ॥ १५ ॥ आतिथ्यंचकृतंतेषांशाकेनकिलभारत ॥ ततःशाकम्भरीत्येवंनामतस्याःप्रतिष्ठि तम् ॥१६॥ शाकम्भरींसमासाद्यब्रह्मचारीसमाहितः ॥ त्रिरात्रमुषितःशाकंभक्षयेन्नियतःशुचिः ॥१७॥ शाकाहारस्ययत्सम्यग्वर्षैर्द्वादशभिःफलम् ॥ तत्फलंतस्यभवतिदेव्याश्छन्देनभारत ॥ १८ ॥ ततोगच्छेत्सुवर्णाख्यंत्रिषुलोकेषुविश्रुतम् ॥ यत्रकृष्णःप्रसादार्थंरुद्रमाराधयत्पुरा ॥ १९ ॥ वरांश्च सुबहूँल्लेभेदेवैरपिसुदुर्लभान् ॥ उक्तश्चत्रिपुरघ्नेनपरितुष्टेनभारत ॥ २० ॥ अपिचात्मप्रियतरोलोकेकृष्णभविष्यसि ॥ त्वन्मुखंचजगत्कृत्स्नंभविष्य तिनसंशयः ॥ २१ ॥ तत्राभिगम्यराजेन्द्रपूजयित्वावृषध्वजम् ॥ अश्वमेधमवाप्नोतिगाणपत्यंचविन्दति ॥ २२ ॥ धूमावतींततोगच्छेत्त्रिरात्रमुषितो

१ 'यातिपानीयम्' 'याति पातेषु' । इ०च पा० ।

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

नरः ॥ मनसाप्रार्थितान्कामाँल्लभतेनात्रसंशयः ॥ २३ ॥ देव्यास्तुदक्षिणार्धेनरथावर्त्तोनराधिप ॥ तत्रागत्यतुधर्मज्ञश्रद्दधानोजितेन्द्रियः ॥ २४ ॥
महादेवप्रसादेनगच्छेतपरमांगतिम् ॥ प्रदक्षिणमुपावृत्यगच्छेतभरतर्षभ ॥ २५ ॥ धरांनाममहाप्राज्ञसर्वपापप्रणाशिनीम् ॥ तत्रस्नात्वानरव्याघ्रन
शोचतिनराधिप ॥ २६ ॥ ततोगच्छेन्नरव्याघ्रनमस्कृत्यमहागिरिम् ॥ स्वर्गद्वारेणतत्तुल्यंगङ्गाद्वारंनसंशयः ॥ २७ ॥ तत्राभिषेकंकुर्वीतकोटितीर्थेस
माहितः ॥ लभतेपुण्डरीकंतुकुलंचैवसमुद्धरेत् ॥ २८ ॥ उष्यैकांरजनींतत्रगोसहस्रफलंलभेत् ॥ सप्तगङ्गेत्रिगङ्गेचशक्रावर्त्तेचतर्पयेत् ॥ २९ ॥ देवा
न्पितॄंश्चविधिवत्पुण्यलोकेमहीयते ॥ ततःकनखलेस्नात्वात्रिरात्रोपोषितोनरः ॥ ३० ॥ अश्वमेधमवाप्नोतिस्वर्गलोकंचगच्छति ॥ कपिलावटंतुग
च्छेततीर्थसेवीनराधिप ॥ ३१ ॥ उष्यैकांरजनींतत्रगोसहस्रफलंलभेत् ॥ नागराजस्यराजेन्द्रकपिलस्यमहात्मनः ॥ ३२ ॥ तीर्थंकुरुवरश्रेष्ठसर्वलोके
षुविश्रुतम् ॥ तत्राभिषेकंकुर्वीतनागतीर्थेनराधिप ॥ ३३ ॥ कपिलानांसहस्रस्यफलंप्राप्नोतिमानवः ॥ ततोललितकांगच्छेच्छन्तनोस्तीर्थमुत्तमम्
॥ ३४ ॥ तत्रस्नात्वानरोराजन्नदुर्गतिमवाप्नुयात् ॥ ३५ ॥ इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेऽष्टाविंशोध्यायः ॥ २८ ॥ नारदउवाच ॥ ततोगच्छेत
राजेन्द्रकालिन्दीतीर्थमुत्तमम् ॥ तत्रस्नात्वानरोराजन्नदुर्गतिमवाप्नुयात् ॥ १ ॥ पुष्करेतुकुरुक्षेत्रेब्रह्मावर्त्तेपृथूदके ॥ अविमुक्तेसुवर्णाख्येयत्फलंलभते
नरः ॥२॥ तत्फलंसमवाप्नोतियमुनायांनरोत्तम॥स्वर्गभोगेऽतिरागोवैयेषांमनसिवर्तते॥३॥ यमुनायांविशेषेणस्नानदानेनसत्तम ॥ आयुरारोग्यसम्प
त्तौरूपयौवनतागुणे ॥ ४ ॥ येषांमनोरथस्तैस्तुनत्याज्यंयमुनाजलम् ॥ येबिभ्यतिनरकादेदारिद्र्याद्येत्रसन्तिच ॥५॥ सर्वथातैःप्रयत्नेनतत्रकार्यंनि
मज्जनम् ॥ दारिद्र्यपापदौर्भाग्यपङ्कप्रक्षालनायवै ॥ ६ ॥ ऋतेवैयामुनंतोयंनचान्योऽस्तियुधिष्ठिर॥श्रद्धाहीनानिकर्माणिमतान्यर्धफलानिवै॥७॥फ
लंददातिसम्पूर्णंयामुनंस्नानमात्रतः॥अकामोवासकामोवायामुनेसलिलेनृप॥८॥इहामुत्रचदुःखानिमज्जनान्नैवपश्यति ॥पक्षद्वयेयथाचन्द्रःक्षीयतेवर्द्धते
तथा ॥९॥ पातकंनश्यतेतत्रस्नानात्पुण्यंविवर्द्धते॥यथाब्धौसुखमायान्तिरत्नानिविविधानिच ॥१०॥ आयुर्वत्तंकलत्राणिसम्पदःसम्भवन्तिच॥काम
धेनुर्यथाकामंचिन्तामणिर्विचिन्तितम् ॥११॥ ददातियमुनास्नानंतद्वत्सर्वमनोरथम् ॥ कृतेतपःपरंज्ञानंत्रेतायांयजनंतथा ॥१२॥ द्वापरेचकलौदानं
कालिन्दीसर्वदाशुभा ॥ सर्वेषांसर्ववर्णानामाश्रमाणांचभूपते ॥ १३ ॥ यामुनेमज्जनंधर्मधाराभिःखलुवर्षति ॥ अस्मिन्वैभारतेवर्षेकर्मभूमौविशेषतः
॥ १४ ॥ कालिन्द्यस्नायिनांनृणांनिष्फलंजन्मकीर्त्तितम् ॥ नैश्वर्यंगगनेयद्वच्चान्द्रेऽमायांतुमण्डले ॥ १५ ॥ तद्वन्नभातिसत्कर्मयमुनामज्जनंविना ॥

१'उपावृत्ता' इ० पा० । २'नोलभेन्नरः' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्रतैर्दानैस्तपोभिश्चनतथाप्रीयतेहरिः ॥ १६ ॥ तत्रमज्जनमात्रेणयथाप्रीणातिकेशवः ॥ नसमंविद्यतेकिञ्चित्तेजःसौरेणतेजसा ॥ १७ ॥ तद्वन्नयमुना
स्नानसमानाःक्रतुजाःक्रियाः ॥ प्रीतयेवासुदेवस्यसर्वपापापनुत्तये ॥ १८ ॥ कालिन्द्यांमज्जनंकुर्यात्स्वर्गलाभायमानवः ॥ किंरक्षितनदेहेनसुपुष्टेन
बलीयसा ॥ १९ ॥ अध्रुवेणसुदेहेनयमुनामज्जनंविना ॥ अस्थिस्तम्भंस्नायुबन्धंमांसक्षतजलेपनम् ॥ २० ॥ चर्मावनद्धंदुर्गन्धंपूर्णंमूत्रपुरीषयोः ॥
जराशोकविपद्व्याप्तंरोगमन्दिरमातुरम् ॥ २१ ॥ रागमूलमनित्यंचसर्वदोषसमाश्रयम् ॥ परोपकारपापार्तंपरद्रोहपरेर्षिकम् ॥ २२ ॥ लोलुपंपिशु
नंक्रूरंकृतघ्नंक्षणिकंतथा ॥ निष्ठुरंदुर्धरंदुष्टंदोषत्रयविदूषितम् ॥ २३ ॥ अशुचितापिदुर्गन्धितापत्रयविमोहितम् ॥ निसर्गतोऽधर्मरतंतृष्णाशतसमाकु
लम् ॥२४॥ कामक्रोधमहालोभनरकद्वारसंस्थितम् ॥ कृमिवर्चस्तुभस्मादिपरिणामगुणावहम् ॥२५॥ ईदृक्छरीरंव्यर्थंहियमुनामज्जनंविना ॥ बुद्बुदा
इवतोयेषुप्रत्यण्डाइवपक्षिषु ॥ २६ ॥ जायन्तेमरणायैवयमुनास्नानवर्जिताः ॥ अवैष्णवोहतोविप्रोहतंश्राद्धमपिण्डकम् ॥ २७ ॥ अब्रह्मण्यंहतंक्षत्रम
नाचारहतंकुलम् ॥ सदम्भश्चहतोधर्म्मःक्रोधेनैवहतंतपः ॥ २८ ॥ अदृढंचहतंज्ञानंप्रमादेनहतंश्रुतम् ॥ परभक्त्याहतानारीब्रह्मचारीस्त्रियाहतः ॥२९॥
अदीप्तेऽग्नौहतोहोमोहताभक्तिःसमायिका ॥ उपजीव्याहताकन्यास्वार्थेपाकक्रियाहता ॥ ३० ॥ शूद्रभक्षोहतोयोगःकृपणस्यहतंधनम् ॥ अनभ्यासह
ताविद्याहतोबोधोविरोधकृत् ॥ ३१ ॥ जीवितार्थंहतंतीर्थंजीवनाथहतंव्रतम् ॥ असत्याचहतावाणीतथापैशुन्यवादिनी ॥ ३२ ॥ षट्कर्मगोहतोमन्त्रो
व्यग्रचित्तोहतोजपः ॥ हतमश्रोत्रियेदानंहतोलोकश्चनास्तिकः ॥ ३३ ॥ अश्रद्धयाहतंसर्वंयत्कृतंपारलौकिकम् ॥ इहलोकेहतोनृणांदरिद्राणांयथानृप
॥ ३४ ॥ मनुष्याणांहतंजन्मकालिन्दीमज्जनंविना ॥ उपपातकसर्वाणिपातकानिमहान्तिच ॥३५॥ भस्मीभवन्तिसर्वाणियमुनामज्जनान्नृप ॥ वेपन्ते
सर्वपापानियमुनायांगतेनरे ॥३६॥ नाशकेसर्वपापानांयदिस्नास्यन्तिवारिणि ॥ पावकाइवदीप्यन्तेयमुनायांनरोत्तमाः ॥ ३७ ॥ विमुक्ताःसर्वपापे
भ्योमेघेभ्यइवचन्द्रमाः ॥ आर्द्रंशुष्कंलघुस्थूलंवाङ्मनःकर्मभिःकृतम् ॥३८॥ तत्रस्नानंदहेत्पापंपावकःसमिधोयथा ॥ प्रामादिकंचयत्पापंज्ञानाज्ञा
नकृतंचयत् ॥ ३९ ॥ स्नानमात्रेणनश्येतयमुनायांनृपोत्तम ॥ निष्पापास्त्रिदिवंयान्तिपापिष्ठायान्तिशुद्धताम् ॥४०॥ सन्देहोनात्रकर्त्तव्यःस्नानेवैय
मुनाजले ॥ सर्वेऽधिकारिणोह्यत्रविष्णुभक्तौतथानृप ॥ ४१ ॥ सर्वेषांसर्वदादेवीयमुनापापनाशिका ॥ एषएवपरोमन्त्रएतच्चपरमंतपः ॥४२॥ प्रायश्चि
त्तंपरंचैवयमुनास्नानमुत्तमम्॥नृणांजन्मान्तराभ्यासात्कालिन्दीमज्जनेमतिः ॥४३॥ अध्यात्मज्ञानकौशल्यंजन्माभ्यासाद्यथानृप ॥ संसारकर्दमाले

१ 'मदाद्धतः' इ० पा० । २ 'ससंशयो' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पप्रक्षालनविशारदम् ॥४४॥ पावनंपावनानांचयमुनास्नानमुत्तमम् ॥ स्नातास्तत्रचयेराजन्सर्वकामफलप्रदे ॥४५॥ शुभांश्चभुञ्जतेभोगांश्चन्द्रसूर्यग्रहो
पमान्॥यमुनामोक्षदाप्रोक्तामथुरासङ्गतायदि ॥४६॥ मथुरायांचकालिन्दीपुण्याधिकविवर्द्धिनी ॥अन्यत्रयमुनापुण्यामहापातकहारिणी ॥४७॥विष्णु
भक्तिप्रदादेवीमथुरासङ्गताभवेत् ॥ भक्तिभावेनसंयुक्तःकालिन्द्यांयदिमज्जयेत् ॥ ४८ ॥ कल्पकोटिसहस्राणिवसतेसन्निधौहरेः ॥ मुक्तिंप्रयान्तिमनुजा
नूनंसाङ्ख्येनवार्जिताः ॥४९॥ पितरस्तस्यतृप्यन्तितृप्ताःकल्पशतैर्दिवि॥ येपिबन्तिनराराजन्यमुनासलिलंशुभम्॥ ५०॥ पञ्चगव्यसहस्रैस्तुसेवितैः
किंप्रयोजनम्॥ कोटितीर्थसहस्रैस्तुसेवितैःकिंप्रयोजनम् ॥ ५१॥ तत्रदानंचहोमश्चसर्वंकोटिगुणंभवेत्॥ ५२॥ इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेएकोन
त्रिंशोऽध्यायः ॥ २९ ॥ नारदउवाच ॥ अत्रतेवर्णयिष्यामिइतिहासंपुरातनम् ॥ पुराकृतयुगेराजन्निषधेनगरेवरे ॥ १ ॥ आसीद्वैश्यःकुबेराभोनाम
तोहेमकुण्डलः ॥ कुलीनःसत्क्रियोदेवद्विजपावकपूजकः ॥ २ ॥ कृषिवाणिज्यकर्त्तासौविविधक्रयविक्रयी ॥ गोघोटकमहिष्यादिपशुपोषण
तत्परः ॥ ३ ॥ पयोदधीनितक्राणिगोमयानितृणानिच ॥ काष्ठानिफलमूलानिलवणार्द्रादिपिप्पली ॥ ४ ॥ धान्यानिशाकतैलानिवस्त्राणिविविधा
निच ॥ धातूनिक्षुविकारांश्चविक्रीणीतेससर्वदा ॥ ५ ॥ इत्थंनानाविधैर्वैश्यउपायैरपरैस्तथा ॥ उपार्जयामाससदाअष्टौहाटककोटयः ॥ ६ ॥
एवंमहाधनःसोऽथह्याकर्णपलितोऽभवत् ॥ पश्चाद्विचार्यसंसारक्षणिकत्वंस्वचेतसि ॥ ७ ॥ तद्धनस्यषडंशेनधर्मकार्यंचकारसः ॥ विष्णोरायतनंचक्रे
गृहंचक्रेशिवस्यच ॥ ८ ॥ तडागंखानयामासविपुलंसागरोपमम् ॥ वाप्यश्चपुष्करिण्यश्चबहुधातेनकारिताः ॥ ९ ॥ वटाश्वत्थाम्रकंकोलजम्बूनिम्बा
दिकाननम् ॥ [1]स्वसत्त्वेनतदाचक्रेतथापुष्पवनंशुभम् ॥ १० ॥ उदयास्तमनंयावदन्नदानंचकारसः ॥ पुराद्बहिश्चतुर्दिक्षुप्रपांचक्रेऽतिशोभनाम् ॥ ११ ॥
पुराणेषुप्रसिद्धानियानिदानानिभूपते ॥ ददौतानिसधर्म्मात्मानित्यंदानपरस्तदा ॥१२॥ यावज्जीवकृतेपापेप्रायाश्चित्तमथाकरोत् ॥ देवपूजापरोनित्यं
नित्यंचातिथिपूजकः ॥ १३॥ तस्येत्थंवर्त्तमानस्यसञ्जातौद्वौसुतौनृप ॥ तौसुप्रसिद्धनामानौश्रीकुण्डलविकुण्डलौ ॥ १४ ॥ तयोर्मूर्ध्निगृहंत्यक्त्वा
जगामतपसेवनम् ॥ तत्राराध्यपरंदेवंगोविन्दंवरदंप्रभुम् ॥ १५ ॥ तपःक्लिष्टशरीरोऽसौवासुदेवमनाःसदा ॥ प्राप्तःसवैष्णवंलोकंयत्रगत्वानशोचति
॥ १६ ॥ अथतस्यसुतौराजन्महामानसमन्वितौ ॥ तरुणौरूपसम्पन्नौधनगर्वेणगर्वितौ ॥ १७॥ दुःशीलौव्यसनासक्तौधर्मकर्माद्यदर्शकौ ॥ नवा
क्यंचागतौमातुर्वृद्धानांवचनंतथा ॥ १८ ॥ कुमार्गगौदुरात्मानौपितृमित्रनिषेधकौ ॥ अधर्मनिरतौदुष्टौपरदाराभिगामिनौ ॥ १९ ॥ गीतवादित्र

१ 'आरोपितं स्वसत्त्वेन' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निरतौवीणावेणुविनोदिनौ ॥ वारस्त्रीशतसंयुक्तौगायन्तौचेरतुस्तदा ॥ २० ॥ चाटुकारजनैर्युक्तौबिम्बोष्ठीषुविशारदौ ॥ सुवेषौचारुवसनौचारुचन्द
नरूषितौ ॥ २१ ॥ तथासुगन्धिमालाढ्यौकस्तूरीलक्ष्मलक्षितौ ॥ नानालङ्कारशोभाढ्यौमौक्तिकाहारहारिणौ ॥ २२ ॥ गजवाजिरथौघेनक्रीडन्तौ
तावितस्तदा ॥ मधुपानसमायुक्तौपरस्त्रीरतिमोहितौ ॥ २३ ॥ नाशयन्तौपितृद्रव्यंसहस्रंददतुःशतम् ॥ तस्थतुःस्वगृहेरम्येनित्यंभोगपरायणौ
॥ २४ ॥ इत्थंतुतद्धनंताभ्यांविनियुक्तमसद्व्ययैः ॥ वारस्त्रीविटशैलूषमल्लचारणबन्दिषु ॥ २५ ॥ अपात्रेतद्धनंदत्तंक्षिप्तंबीजमिवोषरे ॥ नसत्पात्रेच
तद्दत्तंनब्राह्मणमुखेहुतम् ॥ २६ ॥ नार्चितोभूतभृद्विष्णुःसर्वपापप्रणाशनः ॥ उभयोरेवतद्द्रव्यमचिरेणक्षयंययौ ॥ २७ ॥ ततस्तौदुःखमापन्नौकार्पण्यं
परमंगतौ ॥ शोचमानौतुमुह्यन्तौक्षुत्पीडादुःखपीडितौ ॥ २८ ॥ तयोस्तुतिष्ठतोर्गेहेनास्तियद्भुज्यतेतदा ॥ स्वजनैर्बान्धवैस्सर्वैःसेवकैरुपजीविभिः
॥ २९ ॥ द्रव्याभावेपरित्यक्तौचिन्तमानौततःपुरे ॥ पश्चाच्चौर्य्यंसमारब्धंताभ्यांचनगरेनृप ॥ ३० ॥ राजतोलोकतोभीतौस्वपुरान्निस्सृतौतदा ॥ चक्र
तुर्वनवासंतौसर्वेषामुपपीडितौ ॥ ३१ ॥ जघ्नतुःसततंमूढौशितैर्बाणैर्विषार्पितैः ॥ नानापक्षिवराहांश्चहरिणान्रोहितांस्तथा ॥ ३२ ॥ शशकाञ्छल्लका
न्गोधाञ्छ्वापदांश्चेतरान्बहून् ॥ महाबलौभिल्लसङ्गावाखेटकभुजौसदा ॥ ३३ ॥ एवंमांसमयाहारौपापाहारौपरन्तप ॥ कदाचिद्भूधरंप्राप्तोह्येकोऽन्यश्च
वनंगतः ॥ ३४ ॥ शार्दूलेनहतोज्येष्ठःकनिष्ठःसर्पदंशितः ॥ एकस्मिन्दिवसेराजन्पापिष्ठौनिधनंगतौ ॥ ३५ ॥ यमदूतैस्ततोबद्ध्वापाशैर्नीतौयमालयम् ॥
गत्वाभिजगदुःसर्वेतेदूताःपापिनावुभौ ॥ ३६ ॥ धर्मराजनरावेतावानीतौतवशासनात् ॥ आज्ञांदेहिस्वभृत्येषुप्रसीदकरवामकिम् ॥ ३७ ॥ आलोच्य
चित्रगुप्तेनतदादूताञ्जगौयमः ॥ एकस्तुनीयतांवीरनिरयंतीव्रवेदनम् ॥ ३८ ॥ अपरःस्थाप्यतांस्वर्गेयत्रभोगाह्यनुत्तमाः ॥ कृतान्ताज्ञांततःश्रुत्वादूतैश्चक्षि
प्रकारिभिः ॥ ३९ ॥ निक्षिप्तोरौरवेघोरेयोज्येष्ठोहिनराधिप ॥ तेषांदूतवरःकश्चिदुवाचमधुरंवचः ॥ ४० ॥ विकुण्डलमयासार्द्धमेहिस्वर्गंददामिते ॥ भुङ्क्ष्व
भोगान्सुदिव्यांस्त्वमर्जितान्स्वेनकर्मणा ॥ ४१ ॥ इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेत्रिंशोऽध्यायः ॥ ३० ॥ नारदउवाच ॥ ततोहृष्टमनाःसोऽथ
दूतंपप्रच्छतंपथि ॥ सन्देहंहृदिकृत्वातुविस्मयंपरमंगतः ॥ विचारयन्हृदिस्वर्गःकस्यहेतोःफलंमम ॥ १ ॥ विकुण्डलउवाच ॥ हेदूतवरपृच्छामिसं
शयंत्वामहंपरम् ॥ आवांजातौकुलेतुल्येतुल्यंकर्मतथाकृतम् ॥ २ ॥ दुर्मृत्युरपितुल्योऽभूत्तुल्योदृष्टोयमस्तथा ॥ कथंसनरकेक्षिप्तस्तुल्यकर्म्मामम
ग्रजः ॥ ३ ॥ ममाभवत्कथंनाकमितिमेछिन्धिसंशयम् ॥ देवदूतनपश्यामिममस्वर्गस्यकारणम् ॥ ४ ॥ देवदूतउवाच ॥ मातापितासुतोजायास्वसा
भ्राताविकुण्डल ॥ जन्महेतोरियंसंज्ञाजन्तोःकर्म्मोपभुक्तये ॥ ५ ॥ एकस्मिन्पादपेयद्वच्छकुनानांसमागमः ॥ यद्यत्समीहितंकर्मकुरुतेपूर्वभावितः

CC-0. In Public Domain. Digitization by eGangotri

॥ ६ ॥ तस्यतस्यफलंभुङ्क्तेकर्म्मणःपुरुषःसदा ॥ सत्यंवदामितेप्रीत्यानरैःकर्मशुभाशुभम् ॥ ७ ॥ स्वकृतंभुज्यतेवैश्यकालेकालेपुनःपुनः ॥ एकः
करोतिकर्माणिएकस्तत्फलमश्नुते ॥ ८ ॥ अन्योनलिप्यतेवैश्यकर्मणान्यस्यकुत्रचित् ॥ अपतन्नरकेपापैस्तवभ्रातासुदारुणैः ॥ त्वंचधर्मेणधर्मज्ञस्व
र्गंप्राप्नोषिशाश्वतम् ॥ ९ ॥ विकुण्डलउवाच ॥ आबाल्यान्ममपापेषुनपुण्येषुरतंमनः ॥ अस्मिञ्जन्मनिहेदूतदुष्कृतंहिकृतंमया ॥ १० ॥ देवदूतन
जानामिसुकृतंकर्मचात्मनः ॥ यदिजानासिमत्पुण्यंतन्मेत्वंकृपयावद ॥ ११ ॥ देवदूतउवाच ॥ शृणुवैश्यप्रवक्ष्यामियत्त्वयापुण्यमर्जितम् ॥ जाना
मितदहंसर्वंनत्वंवेत्सिसुनिश्चितम् ॥ १२ ॥ हरिमित्रसुतोविप्रःसुमित्रोवेदपारगः ॥ आसीत्तस्याश्रमःपुण्योयमुनादक्षिणेतटे ॥ १३ ॥ तेनसख्यं
वनेतस्मिंस्तवजातंविशांवर ॥ तत्सङ्गेनत्वयास्नातंमाघमासद्वयंतथा ॥ १४ ॥ कालिन्दीपुण्यपानीयेसर्वपापहरेवरे ॥ तत्तीर्थेलोकविख्याते
नाम्नापापप्रणाशने ॥ १५ ॥ एकेनसर्वपापेभ्योविमुक्तस्त्वंविशांपते ॥ द्वितीयमाघपुण्येनप्राप्तःस्वर्गस्त्वयानघ ॥ १६ ॥ त्वंतत्पुण्यप्रभावेणमो
दस्वसततंदिवि ॥ नरकेषुतवभ्रातामहतींपापयातनाम् ॥ १७ ॥ छिद्यमानोऽसिपत्रैश्चभिद्यमानस्तुमुद्गरैः ॥ चूर्ण्यमानःशिलापृष्ठेतप्ताङ्गारेषुभर्जितः
॥ १८ ॥इतिदूतवचःश्रुत्वाभ्रातृदुःखेनदुःखितः ॥ पुलकाङ्कितसर्वाङ्गोदीनोऽसौविनयान्वितः ॥ १९ ॥ उवाचतंदेवदूतंमधुरंनिपुणंवचः ॥ मैत्री
सप्तपदीसाधोसतांभवतिसत्फला ॥ २० ॥ मित्रभावंविचिन्त्यत्वंमामुपाकर्तुमर्हसि ॥ ततोहिश्रोतुमिच्छामिसर्वज्ञस्त्वंमतोमम ॥ २१ ॥
यमलोकंनपश्यन्तिकर्मणाकेनमानवाः ॥ गच्छन्तिनिरयंयेनतन्मेत्वंकृपयावद ॥ २२ ॥ देवदूतउवाच ॥ सम्यक्पृष्टंत्वयावैश्यनष्टपापोऽसि
साम्प्रतम् ॥ विशुद्धेहृदयेपुंसांबुद्धिःश्रेयसिजायते ॥ २३ ॥ यद्यप्यवसरोनास्तिममसेवापरस्यवै ॥ तथापिचतवस्नेहात्प्रवक्ष्यामियथा
मति ॥ २४ ॥ कर्मणामनसावाचासर्वावस्थासुसर्वदा ॥ परपीडांनकुर्वन्तिनतेयान्तियमालयम् ॥ २५ ॥ नवेदैर्नचदानैश्चनतपोभिर्न
चाध्वरैः ॥ कथञ्चित्स्वर्गतिंयान्तिपुरुषाःप्राणिहिंसकाः ॥ २६ ॥ अहिंसापरमोधर्मोह्यहिंसैवपरंतपः ॥ अहिंसापरमंदानमित्याहुर्मुनयःसदा
॥ २७ ॥ मशकान्सरीसृपान्दंशान्यूकाद्यान्मानवांस्तथा ॥ आत्मौपम्येनपश्यन्तिमानवायेदयालवः ॥२८॥ तप्ताङ्गारमयस्कीलंमादंप्रेततरङ्गिणीम्
दुर्गतिंनैवगच्छन्तिकृतान्तस्यचतेनराः ॥ २९ ॥ भूतानियेऽत्रहिंसन्तिजलस्थलचराणिच ॥ जीवनार्थंचतेयान्तिकालसूत्रंचदुर्गतिम् ॥ ३० ॥
श्वमांसभोजनास्तत्रपूयशोणितपायिनः ॥ मज्जन्तश्चवसापङ्केदष्टाःकीटैरधोमुखैः ॥ ३१ ॥ परस्परंचखादन्तोध्वान्तेचान्योन्यघातिनः ॥ वसन्तिक
ल्पानेकांस्तेरुदन्तोदारुणंरवम् ॥ ३२ ॥ कृमियोनिशतंगत्वास्थावराःस्युश्चिरंतुते ॥ ततोगच्छन्तितेक्रूरास्तिर्यग्योनिशतेषुच ॥ ३३ ॥ पश्चाद्भवन्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जातान्धाःकाणाःकुब्जाश्चपङ्गवः ॥ दरिद्राश्चाङ्गहीनाश्चमानुषाःप्राणिहिंसकाः ॥ ३४ ॥ तस्माद्वैश्यपरत्रेहकर्मणामनसागिरा ॥ लोकद्वयसुखप्रेप्सु धर्मज्ञोनतदाचरेत् ॥ ३५ ॥ लोकद्वयेनविन्दन्तिसुखानिप्राणिहिंसकाः ॥ येनहिंसन्तिभूतानिनतेबिभ्यतिकुत्रचित ॥ ३६ ॥ प्रविशन्तियथानद्यःस मुद्रमृजुवक्रगाः ॥ सर्वेधर्माअहिंसायांप्रविशन्तितथादृढम् ॥ ३७ ॥ सस्नातःसर्वतीर्थेषुसर्वयज्ञेषुदीक्षितः ॥ अभयंयेनभूतेभ्योदत्तमत्रविशांवर ॥ ३८ ॥ येनियोगांश्चशास्त्रोक्तान्धर्माधर्मविमिश्रितान् ॥ पालयन्तीहयेवैश्यनतेयान्तियमालयम् ॥ ३९ ॥ ब्रह्मचारीगृहस्थश्चवानप्रस्थोयतिस्त था ॥ स्वधर्मनिरताःसर्वेनाकपृष्ठेवसन्तिते ॥ ४० ॥ यथोक्तचारिणःसर्वेवर्णाश्रमसमन्विताः ॥ नराजितेन्द्रियायान्तिब्रह्मलोकंतुशाश्वतम् ॥४१॥ इष्टापूर्तरतायेचपञ्चयज्ञरताश्चये ॥ दयान्विताश्चयेनित्यंनेक्षन्तेतेयमालयम् ॥४२॥ इन्द्रियार्थनिवृत्तायेसमर्थावेदवादिनः ॥ अग्निपूजारतानित्यंतेवि प्राःस्वर्गगामिनः ॥ ४३ ॥ अदीनवदनाःशूराःशत्रुभिःपरिवेष्टिताः ॥ आहवेषुविपन्नायेतेषांमार्गोदिवाकरः ॥ ४४ ॥ अनाथस्त्रीद्विजार्थेचशरणागत पालने ॥ प्राणांस्त्यजन्तियेवैश्यनच्यवन्तिदिवस्तुते ॥ ४५ ॥ पङ्ग्वन्धबालवृद्धांश्चरोग्यनाथदरिद्रितान् ॥ येपुष्णन्तिसदावैश्यतेमोदन्तेसदादि वि ॥ ४६ ॥ गांदृष्ट्वापङ्कनिर्मग्नांरोगमग्नंद्विजंतथा ॥ उद्धरन्तिनरायेचतेषांलोकोऽश्वमेधिनाम् ॥ ४७ ॥ गोग्रासंयेप्रयच्छन्तियेशुश्रूषन्तिगाःसदा ॥ येनारोहन्तिगोपृष्ठेतेस्वर्लोकनिवासिनः ॥ ४८ ॥ गर्तमात्रंतुयेचक्रुर्यत्रगौस्तृपाभवेत् ॥ यमलोकमदृष्ट्वैवतेयान्तिस्वर्गतिंनराः ॥ ४९ ॥ अग्निपूजादे वपूजागुरुपूजारताश्चये ॥ द्विजपूजारतानित्यंतेविप्राःस्वर्गगामिनः ॥ ५० ॥ वापीकूपतडागादौधर्मस्यान्तोनविद्यते ॥ पिबन्तिस्वेच्छयायत्रजल स्थलचरास्तदा ॥५१॥ नित्यंदानपरःसोऽत्रकथ्यतेविबुधैरपि ॥ यथायथाचपानीयंपिबन्तिप्राणिनोभृशम् ॥५२॥ तथातथाऽक्षयःस्वर्गोधर्मबुद्ध्या विशांवर ॥ प्राणिनांजीवनंवारिप्राणावारिणिसंस्थिताः ॥५३॥ नित्यस्नानेनपूयन्तेयेऽपिपातकिनोनराः ॥ प्रातस्स्नानंहरेद्वैश्यबाह्याभ्यन्तरजंमलम् ॥५४॥ प्रातःस्नानेननिष्पापोनरोननिरयंव्रजेत् ॥ स्नानंविनातुयोभुङ्क्तेमलाशीससदानरः ॥५५॥ अस्नायीयोनरस्तस्यविमुखाःपितृदेवताः ॥ स्ना नहीनोनरःपापःस्नानहीनोनरोऽशुचिः ॥ ५६ ॥ अस्नायीनरकंभुङ्क्तेपुंस्कीटादिषुजायते ॥ येपुनःस्रोतसिस्नानमाचरन्तीहपर्वणि ॥५७॥ तेनैवनरकं यान्तिनजायन्तेकुयोनिषु ॥ दुःस्वप्नादुष्टचिन्ताश्चवन्ध्याभवन्तिसर्वदा ॥ ५८ ॥ प्रातःस्नानेनशुद्धानांपुरुषाणांविशांवर ॥ तिलांश्चतिलपात्रांश्चति लप्रस्थंयथाविधि ॥ ५९ ॥ दत्त्वाप्रेतपतेर्भूमौनव्रजन्तिनराःक्वचित् ॥ पृथिवींकाञ्चनंगांचदत्त्वादानानिषोडश ॥ ६० ॥ गत्वानविनिवर्तन्तेस्वर्ग

१ 'ये नो रोहन्ति वृषभम्' इ० पा०।

CC-0. In Public Domain. Digitization by eGangotri

लोकाद्दिकुण्डल ॥ पुण्यासुतिथिषुप्राज्ञोव्यतीपातेचसङ्क्रमे ॥ ६१ ॥ स्नात्वादत्त्वाचयत्किञ्चिन्नैवमज्जतिदुर्गतौ ॥ नैवाक्रामन्तिदातारोदारुणंरौरवं
पथम् ॥ ६२ ॥ इहलोकेनजायन्तेकुलेधनविवर्जिते ॥ सत्यवादीसदामौनीप्रियवादीचयोनरः ॥ ६३ ॥ अक्रोधनःसमाचारोनातिवाद्यनसूयकः ॥
सदादाक्षिण्यसम्पन्नःसदाभूतदयान्वितः ॥ ६४ ॥ परस्यमर्मणांगोप्तावक्तापरगुणस्यच ॥ परस्वंतृणमात्रंचमनसापिनयोहरेत् ॥ ६५ ॥ नपश्यन्ति
विशांश्रेष्ठह्येतेनरकयातनाम् ॥ परापवादीपाखण्डःपापेभ्योऽपिमतोऽधिकः ॥ ६६ ॥ पच्यतेनरकेतावद्यावदाभूतसम्प्लवम् ॥ वक्तापरुषवाक्यानांम
न्तव्योनरकागतः ॥ ६७ ॥ सन्देहोनविशांश्रेष्ठपुनर्यातिचदुर्गतिम् ॥ नतीर्थैर्नतपोभिश्चकृतघ्नस्यास्तिनिष्कृतिः ॥ ६८ ॥ सहतेयातनांघोरांसनरोन
रकेचिरम् ॥ पृथिव्यांयानितीर्थानितेषुमज्जतियोनरः ॥ ६९ ॥ जितेन्द्रियोजिताहारोनसयातियमालयम् ॥ नतीर्थेपातकंकुर्यान्नचतीर्थोपजीवनम्
॥ ७० ॥ तीर्थेप्रतिग्रहस्त्याज्यस्त्याज्योधर्मस्यविक्रयः ॥ दुर्जरंपातकंतीर्थेदुर्जरश्चप्रतिग्रहः ॥ ७१ ॥ तीर्थेचदुर्जरंसर्वमेतत्किन्नरकंव्रजेत् ॥ सकृद्गङ्गा
म्भसिस्नातःपूतोगाङ्गेयवारिणा ॥ ७२ ॥ ननरोनरकंयातिअपिपातकराशिकृत् ॥ व्रतदानतपोयज्ञाःपवित्राणीतराणिच ॥ ७३ ॥ गङ्गाबिन्द्वभिषि
क्तस्यनसमाइतिनःश्रुतम् ॥ अन्यतीर्थसमांगङ्गांयोब्रवीतिनराधमः ॥ ७४ ॥ सयातिनरकंवैश्यदारुणंरौरवंमहत ॥ धर्मद्रवंह्यपांबीजंवैकुण्ठचरण
च्युतम् ॥ ७५ ॥ धृतंमूर्ध्निमहेशेनयद्गाङ्गममलंजलम् ॥ तद्ब्रह्मैवनसन्देहोनिर्गुणंप्रकृतेःपरम् ॥७६॥ तेनकिंसमतांगच्छेदपिब्रह्माण्डगोचरे ॥ गङ्गागङ्गेति
योब्रूयाद्योजनानांशतैरपि ॥७७॥ नरोननरकंयातिकिंतयासदृशंभवेत् ॥ नान्येनदह्यतेसद्यःक्रियानरकदायिनी ॥७८॥ गङ्गाम्भसिप्रयत्नेनस्नातव्यंते
नमानवैः ॥ प्रतिग्रहनिवृत्तोयःप्रतिग्रहक्षमोऽपिसन् ॥७९॥ सद्विजोद्योततेवैश्यतारारूपश्चिरंदिवि ॥ गामुद्धरन्तियेपङ्काद्येरक्षन्तिचरोगिणः॥८०॥म्रिय
न्तेगोग्रहेयेचतेषांनभसितारकाः ॥ यमलोकंनपश्यन्तिप्राणायामपरायणाः ॥८१॥ अपिदुष्कृतकर्माणस्तैरेवहतकिल्बिषाः ॥ दिवसेदिवसेवैश्यप्राणा
यामास्तुषोडश ॥८२॥ अपिब्रह्महणंसाक्षात्पुनन्त्यहरहःकृताः ॥ तपांसियानितप्यन्तेव्रतानिनियमाश्चये ॥ ८३ ॥ गोसहस्रप्रदानंचप्राणायामस्तुतत्स
मः ॥ अब्बिन्दुंयःकुशाग्रेणमासेमासेनरःपिबेत् ॥८४॥ संवत्सरशतंसाग्रंप्राणायामस्तुतत्समः ॥ पातकंतुमहद्यच्चतथाक्षुद्रोपपातकम् ॥८५॥ प्राणाया
मैःक्षणात्सर्वंभस्मसात्कुरुतेनरः ॥ मातृवत्परदारान्येसन्यन्तेवैनरोत्तमाः ॥८६॥ नतेयान्तिनरश्रेष्ठकदाचिद्यमयातनाम् ॥ मनसापिपरेषांयःकलत्रा
णिनसेवते ॥ ८७ ॥ सहलोकद्वयेनास्तितेनवैश्यधराधृता ॥ तस्माद्धर्म्मान्वितैस्त्याज्यंपरदारोपसेवनम् ॥ ८८ ॥ नयन्तिपरदारास्तुनरकाने
कविंशतिम् ॥ लोभोनजायतेयेषांपरदारेषुमानसे ॥ ८९ ॥ तेयान्तिदेवलोकंतुनयमंवैश्यसत्तम ॥ शश्वत्क्रोधनिदानेषुयःक्रोधेननजीयते ॥ ९० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जितस्वर्गःसमन्तव्यःपुरुषोऽक्रोधनोभुवि ॥ मातरंपितरंपुत्रआराधयतिदेववत् ॥९१॥ अप्राप्तेवार्द्धकेकालेनयातिचयमालयम् ॥ पितुश्चाधिकभावे
नयेऽर्चयन्तिगुरुंनराः ॥ ९२ ॥ भवन्त्यतिथयोलोकेब्रह्मणस्तेविशांवर ॥ इहचैवस्त्रियोधन्याःशीलस्यपरिरक्षणात् ॥ ९३ ॥ शीलभङ्गेचनारीणांय
मलोकःसुदारुणः ॥ शीलंरक्ष्यंसदास्त्रीभिर्दुष्टसङ्गविवर्जनात् ॥ ९४ ॥ शीलेनहिपरःस्वर्गःस्त्रीणांवैश्यनसंशयः ॥ शूद्रस्यपाकयज्ञेननिषिद्धाचरणे
नच ॥ ९५ ॥ दुर्गतिर्विहितावैश्यतस्यसानारकीगतिः ॥ विचारयन्तियेशास्त्रंवेदाभ्यासरताश्चये ॥ ९६ ॥ पुराणंसंहितांयेचश्रावयन्तिपठन्तिच ॥
व्याकुर्वन्तिस्मृतीर्येचयेधर्मप्रतिबोधकाः ॥ ९७ ॥ वेदान्तेषुनिषण्णायेतैरियंजगतीधृता ॥ तत्तदभ्यासमाहात्म्यैःसर्वेतेहतकिल्बिषाः ॥ ९८ ॥ ग
च्छन्तिब्रह्मणोलोकंयत्रमोहोनविद्यते ॥ ज्ञानमज्ञाययोदद्याद्वेदशास्त्रसमुद्भवम् ॥९९ ॥ अपिवेदास्तमर्चन्तिभवबन्धविदारणम् ॥ श्रूयतामद्भुतंह्येतद्रह
स्यंवैश्यसत्तम ॥ १०० ॥ सम्मतंधर्मराजस्यसर्वलोकामृतप्रदम् ॥ नयमंयमलोकंचनभूतान्घोरदर्शनान् ॥ १ ॥ पश्यन्तिवैष्णवानूनंसत्यंसत्यंमयो
दितम् ॥ प्राहास्मान्यमुनाभ्रातासदैवहिपुनःपुनः ॥ २ ॥ भवद्भिर्वैष्णवास्त्याज्यानतेस्युर्ममगोचराः ॥ स्मरन्तियेसकृद्भूताःप्रसङ्गेनापिकेशवम् ॥
॥ ३ ॥ तेविध्वस्ताखिलाघौघायान्तिविष्णोःपरंपदम् ॥ दुराचारोदुष्कृतोऽपिसदाचाररतोऽपियः ॥ ४ ॥ भवद्भिःससदात्याज्योविष्णुंचभजतेनरः
॥ वैष्णवोयद्गृहेभुङ्क्तेयेषांवैष्णवसङ्गतिः ॥ ५ ॥ तेऽपिवःपरिवार्याःस्युस्तत्सङ्गहतकिल्बिषाः ॥ इत्थंवैश्यानुशास्त्यस्मान्देवोदण्डधरःसदा ॥ ६ ॥
अतोनोवैष्णवायान्तिराजधानींयमस्यतु ॥ विष्णुभक्तिविनानॄणांपापिष्ठानांविशांवर ॥ ७ ॥ उपायोनास्तिनास्त्यन्यःसन्तर्तुंनरकाम्बुधिम् ॥ श्वपा
कमपिनेक्षेतलोकेष्टंवैश्यवैष्णवम् ॥८॥ वैष्णवोवर्णबाह्योऽपिपुनातिभुनवत्रयम् ॥९॥ एतावतालमघनिर्हरणायपुंसांसङ्कीर्तनंभगवतोगुणकर्मनाम्नाम्॥
विक्रुश्यपुत्रमघवान्यदजामिलोऽपिनारायणेतिम्रियमाणइयायमुक्तिम् ॥१०॥ नरकेतुचिरंमग्नाःपूर्वेयेचकुलद्वये ॥ तदैवयान्तितेस्वर्गंयदार्चन्तिमुदा
हरिम् ॥ ११ ॥ विष्णुभक्तस्ययेदासावैष्णवान्नभुजश्चये ॥ तेतुक्रतुभुजांवैश्यगतिंयान्तिनिराकुलाः ॥१२॥ प्रार्थयेद्वैष्णवस्यान्नंप्रयत्नेनविचक्षणः॥
सर्वपापविशुद्ध्यर्थंतदभावेजलंपिबेत् ॥ १३ ॥ गोविन्देतिजपन्मन्त्रंकुत्रचिन्म्रियतेयदि ॥ सनरोनयमंपश्येत्तंचनेक्षामहेवयम् ॥ १४ ॥ साङ्गंससुद्रं
सध्यानंसऋषिच्छन्ददैवतम् ॥ दीक्षयाविधिवन्मन्त्रंजपेद्वैद्वादशाक्षरम् ॥ १५ ॥ अष्टाक्षरंचमन्त्रेशंयेजपन्तिनरोत्तमाः ॥ तान्दृष्ट्वाब्रह्महाशुद्ध्येद्राज
तेविष्णुवत्स्वयम् ॥ १६ ॥ शङ्खिनश्चक्रिणोभूत्वाब्रह्माभ्यन्तरगामिनः ॥ वसन्तिवैष्णवेलोकेविष्णुरूपेणतेनराः ॥ १७ ॥ हृदिसूर्येजलेवाथप्रतिमा
स्थण्डिलेऽपिच ॥ समभ्यर्च्यहरिंयान्तिनरास्तद्वैष्णवंपदम् ॥ १८ ॥ अथवासर्वदापूज्योवासुदेवोमुमुक्षुभिः ॥ शालग्रामेमणौचक्रेवज्रकीटविनिर्मि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ते ॥ १९ ॥ अधिष्ठानंहितद्विष्णोःसर्वपापप्रणाशनम् ॥ सवपुण्यप्रदंवैश्यसर्वेषामपिमुक्तिदम् ॥ १२० ॥ यःपूजयद्धरिंचक्रेशालग्रामशिलोद्भवे ॥ रा
जसूयसहस्रेणतेनेष्टंप्रतिवासरे ॥ २१ ॥ सदामनन्तिवेदान्ताब्रह्मनिर्वाणमच्युतम् ॥ तत्प्रसादोभवेन्नॄणांशालग्रामशिलार्चनात् ॥ २२॥ महाकाष्ठस्थि
तोवह्निर्मखस्थानेप्रकाशते ॥ यथातथाहरिर्व्यापीशालग्रामेप्रकाशते ॥ २३ ॥ अपिपापसमाचाराःकर्म्मण्यनधिकारिणः ॥ शालग्रामार्चकावैश्यनैव
यान्तियमालयम् ॥ २४ ॥ नतथारमतेलक्ष्म्यांनतथास्वपुरेहरिः ॥ शालग्रामशिलाचक्रेयथासरमतेसदा ॥ २५ ॥ अग्निहोत्रंकृतंतेनदत्तापृथ्वीससा
गरा ॥ येनार्चितोहरिश्चक्रेशालग्रामशिलोद्भवे ॥ २६ ॥ शिलाद्वादशभोवैश्यशालग्रामशिलोद्भवाः ॥ विधिवत्पूजितायेनतस्यपुण्यंवदामिते ॥
॥ २७ ॥ कोटिद्वादशलिङ्गैस्तुपूजितैःस्वर्णपङ्कजैः ॥ यत्स्याद्द्वादशकालेषुदिनेनैकेनतद्भवेत् ॥ २८ ॥ यःपुनःपूजयेद्भक्त्याशालग्रामशिलाशतम् ॥
उषित्वासहरेर्लोकेचक्रवर्त्तीहजायते ॥ २९ ॥ कामैःक्रोधःप्रलोभैश्चव्याप्तोयत्रनराधमः ॥ सोऽपियातिहरेर्लोकंशालग्रामशिलार्चनात् ॥ १३० ॥
यःपूजयेच्चगोविन्दंशालग्रामेसुदानरः ॥ आभूतसम्प्लवंयावन्नसप्रच्यवतेदिवः ॥३१॥ विनातीर्थैर्विनादानैर्विनायज्ञैर्विनामतिम्॥मुक्तिंयान्तिनरावैश्य
शालग्रामशिलार्चनात् ॥ ३२ ॥ नरकंगर्भवासंचतिर्यक्त्वंकृमियोनिताम् ॥ नयातिवैश्यपापोऽपिशालग्रामशिलार्चकः ॥ ३३ ॥ दीक्षाविधा
नमन्त्रज्ञोयश्चक्रेबलिमाहरेत् ॥ गङ्गागोदावरीरेवानद्योमुक्तिप्रदाश्चयाः ॥ ३४ ॥ निवसन्तिहिताःसर्वाःशालग्रामशिलाजले ॥ नैवेद्यैर्विविधैःपु
ष्पैर्धूपदीपैर्विलेपनैः ॥ ३५ ॥ गीतवादित्रस्तोत्राद्यैःशालग्रामशिलाचनम् ॥ कुरुतेमानवोयस्तुकलौभक्तिपरायणः ॥३६॥ कल्पकोटिसहस्राणिर
मतेसन्निधौहरेः ॥ लिङ्गैस्तुकोटिभिर्दृष्टैर्यत्फलंपूजितैस्तुतैः ॥ ३७ ॥ शालग्रामशिलायास्तुह्येकेनाह्नाहितत्फलम् ॥ सकृदभ्यर्चितेलिङ्गेशालग्रामशि
लोद्भवे ॥ ३८ ॥ मुक्तिंप्रयान्तिमनुजानूनंसाङ्ख्येनवर्जिताः ॥ शालग्रामशिलारूपीयत्रतिष्ठतिकेशवः ॥ ३९ ॥ तत्रदेवाःसुरायक्षाभुवनानिचतुर्दश
॥ शालग्रामशिलायांतुयःश्राद्धंकुरुतेनरः ॥ १४० ॥ पितरस्तस्यतिष्ठन्तितृप्ताःकल्पशतंदिवि ॥ यपिबन्तिनरानित्यंशालग्रामशिलाजलम् ॥
॥ ४१ ॥ पञ्चगव्यसहस्रैस्तुसेवितैःकिंप्रयोजनम् ॥ कोटितीर्थसहस्रस्तुसेवितैःकिंप्रयोजनम् ॥ ४२ ॥ तोयंयदिपिबेत्पुण्यंशालग्रामशिला
ज्जजम् ॥ शालग्रामशिलायत्रतत्तीर्थंयोजनत्रयम् ॥ ४३ ॥ तत्रदानंचहोमश्चसर्वंकोटिगुणंभवेत् ॥ शालग्रामशिलातोयंयःपिबेद्बिन्दुनास
मम् ॥ ४४ ॥ मातुःस्तन्यंपुनर्नैवसपिबेद्विष्णुभाङ्नरः ॥ शालग्रामसमीपेतुक्रोशमात्रंसमन्ततः ॥ ४५ ॥ कीटकोऽपिमृतोयावैकुण्ठभ
वनंपरम् ॥ शालग्रामशिलाचक्रंयोदद्याद्दानमुत्तमम् ॥ ४६ ॥ भूचक्रंतेनदत्तंस्यात्सशैलवनकाननम् ॥ शालग्रामशिलायायोमूल्यमुत्पादयेन्नरः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥४७॥ विक्रेताचानुमन्तायःपरीक्षासुचमोदते ॥ तेसर्वेनरकंयान्तियावदाभूतसम्प्लवम् ॥ ४८ ॥ ततःसंवर्जयेद्वैश्यचक्रस्यक्रयविक्रयम् ॥ बहुनोक्तेन
किंवैश्यकर्तव्यंपापभीरुणा ॥ ४९ ॥ स्मरणंवासुदेवस्यसर्वपापहरंहरेः ॥ तपस्तप्त्वानरोघोरमरण्येनियतेन्द्रियः ॥ १५० ॥ यत्फलंसमवाप्नोतितन्न
त्वागरुडध्वजम् ॥ कृत्वापिबहुशःपापंनरोमोहसमन्वितः ॥ ५१ ॥ नयातिनरकंनत्वासर्वपापहरंहरिम् ॥ पृथिव्यांयानितीर्थानिपुण्यान्यायतनानि
च ॥ ५२ ॥ तानिसर्वाण्यवाप्नोतिविष्णोर्नामानुकीर्तनात् ॥ देवंशार्ङ्गधरंविष्णुंयप्रपन्नाःपरायणाः ॥ ५३ ॥ नतेषांयमसालोक्यंनतेस्युर्नरकौक
सः ॥ वैष्णवःपुरुषोवैश्यशिवनिन्दांकरोतियः ॥ ५४ ॥ नविन्देद्वैष्णवंलोकंसयातिनरकंमहत् ॥ उपोष्यैकादशीमेकांप्रसङ्गेनापिमानवः ॥ ५५ ॥
नयातियातनांयामींमितिलोमशतःश्रुतम् ॥ नेदृशंपावनंकिञ्चित्त्रिषुलोकेषुविद्यते ॥ ५६ ॥ उभयंपद्मनाभस्यदिनंपातकनाशनम् ॥ तावत्पापानिदे
हेऽस्मिन्वसन्तीहविशांवर ॥ ५७ ॥ यावन्नोपवसेज्जन्तुःपद्मनाभदिनंशुभम् ॥ अश्वमेधसहस्राणिराजसूयशतानिच ॥ ५८ ॥ एकादश्युपवासस्यक
लांनार्हन्तिषोडशीम् ॥ एकादशेन्द्रियैःपापंयत्कृतंवैश्यमानवैः ॥ ५९ ॥ एकादश्युपवासेनतत्सर्वंविलयंव्रजेत् ॥ एकादशीसमंकिञ्चित्पुण्यंलोकेन
विद्यते ॥ १६० ॥ व्याजेनापिकृतायैस्तुवशंयान्तिनभास्करेः ॥ स्वर्गमोक्षप्रदाह्येषाशरीरारोग्यदायिनी ॥ ६१ ॥ सुकलत्रप्रदाह्येषाजीवत्पुत्रप्रदा
यिनी ॥ नगङ्गानगयावैश्यनकाशीनचपुष्करम् ॥ ६२ ॥ नचापिवैष्णवंक्षेत्रंतुल्यंहरिदिनेनतु ॥ यमुनाचन्द्रभागानतुल्याहरिदिनेनतु ॥ ६३ ॥
अनायासेनयेनात्रप्राप्यतेवैष्णवंपदम् ॥ रात्रौजागरणंकृत्वासमुपोष्यहरेर्दिने ॥ ६४ ॥ दशवैपैतृकेपक्षेमातृकेदशपूर्वजाः ॥ प्रियायादशयेवैश्यतानु
द्धरतिनिश्चितम् ॥६५॥ द्वन्द्वसङ्गपरित्यक्तानागारिकृतकेतनाः ॥ स्रग्विणःपीतवसनाःप्रयान्तिहरिमन्दिरम् ॥ ६६ ॥ बालत्वेयौवनेवापिवार्द्धके
वाविशांवर ॥ उपोष्यैकादशींनूनंनैतिपापोऽतिदुर्गतिम् ॥ ६७ ॥ उपोष्येहत्रिरात्राणिकृत्वावातीर्थमज्जनम् ॥ दत्त्वाहेमतिलान्गाश्चस्वर्गंयान्तीहमा
नवाः ॥ ६८ ॥ तीर्थेस्नान्तिनयेवैश्यनदत्तंकाञ्चनंचयैः ॥ नैवतप्तंतपःकिञ्चित्तेस्युःसर्वत्रदुःखिताः ॥ ६९ ॥ संक्षिप्यकथितंधर्म्मंनरकस्यनिरूपणम्॥
अद्रोहःसर्वभूतेषुवाङ्मनःकायकर्मभिः ॥ १७० ॥ इन्द्रियाणांनिरोधश्चदानंचहरिसेवनम् ॥ वर्णाश्रमक्रियाणांचपालनंविधितःसदा ॥७१॥ स्वर्गा
र्थीसर्वदावैश्यतपोदानंनकीर्तयेत् ॥ यथाशक्तितथादद्यादात्मनोहितकाम्यया ॥ ७२ ॥ उपानद्वस्त्रमन्नानिपत्रंमूलंफलंजलम् ॥ अवन्ध्यंदिवसंका
र्य्यंदरिद्रेणापिवैश्यक ॥ ७३ ॥ इहलोकेपरेचैवनदत्तंनोपतिष्ठते ॥ दातारोनैवपश्यन्तितांतांवैयमयातनाम् ॥ ७४ ॥ दीर्घायुषोधनाढ्याश्चभवन्तीह
पुनःपुनः ॥ किमत्रबहुनोक्तेनयान्त्यधर्मेणदुर्गतिम् ॥ ७५ ॥ आरोहन्तिदिवंधर्म्मैर्नराःसर्वत्रसर्वदा ॥ तेनबालत्वमारभ्यकर्तव्योधर्मसङ्ग्रहः ॥७६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतितेकथितंसर्वंकिमन्यच्छ्रोतुमिच्छसि ॥ ७७ ॥ विकुण्डलउवाच ॥ श्रुत्वात्वद्वचनंसौम्यप्रसन्नंचित्तमेवमे ॥ गङ्गोदंपापहंसद्यःपापहारिसतांवचः
॥ ७८ ॥ उपकर्तुंप्रियंवक्तुंगुणोनैसार्गिकःसताम् ॥ शीतांशुःक्रियतेकेनशीतलोऽमृतमण्डलः ॥ ७९ ॥ देवदूततत्तोब्रूहिकारुण्यान्ममपृच्छतः ॥ नरका
न्निष्कृतिःसद्योभ्रातुर्मेजायतेकथम् ॥१८० ॥ इतितस्यवचःश्रुत्वादेवदूतोजगादह ॥ ध्यानंदृष्ट्वाक्षणंध्यात्वातन्मैत्रीरज्जुबन्धनः ॥ ८१ ॥ यत्तेवैश्या
ष्टमेपुण्यंत्वयाजन्मनिसञ्चितम् ॥ तद्भ्रात्रेदीयतांसर्वंस्वर्गंतस्ययदीच्छसि ॥ ८२ ॥ विकुण्डलउवाच ॥ किंतत्पुण्यंकथंजातंकिंजन्मचपुरातनम् ॥
तत्सर्वंकथ्यतांदूततत्तोदास्यामिसत्वरम् ॥ ८३ ॥ देवदूतउवाच ॥ शृणुवैश्यप्रवक्ष्यामितत्पुण्यंचसहेतुकम् ॥ पुरामधुवनेपुण्येऋषिरासीच्चशाकुनिः
॥ ८४ ॥ तपोऽध्ययनसम्पन्नस्तेजसाब्रह्मणासमः ॥ जज्ञिरेतस्यरेवत्यांनवपुत्राग्रहाइव ॥ ८५ ॥ ध्रुवःशीलोबुधस्तारोज्योतिष्मानुतपञ्चमः ॥ अग्नि
होत्ररताह्येतेगृहधर्मेषुरेमिरे ॥ ८६ ॥ निर्मोहोजितकामश्चध्यानकोशोगुणाधिकः ॥ एतेगृहविरक्ताश्चचत्वारोद्विजसूनवः ॥ ८७ ॥ चतुर्थाश्रममापन्नाः
सर्वकामविनिस्पृहाः ॥ ग्रामैकवासिनःसर्वेनिःसङ्गानिष्परिग्रहाः ॥ ८८ ॥ निराशानिष्प्रयत्नाश्चसमलोष्टाश्मकाञ्चनाः ॥ येनकेनचिदाच्छन्नायेन
केनचिदाशिताः ॥ ८९ ॥ सायंग्रहास्तथानित्यंविष्णुध्यानपरायणाः ॥ जितनिद्राजिताहारावातशीतसहिष्णवः ॥ १९० ॥ पश्यन्तोविष्णुरूपेण
जगत्सर्वंचराचरम् ॥ चरन्तिलीलयापृथ्वींतेऽन्योन्यंमौनमास्थिताः ॥ ९१ ॥ नकुर्वन्तिक्रियांकाञ्चिदर्थमात्रंहियोगिनः ॥ दृष्टज्ञानाअसन्देहाश्चि
द्विकारविशारदाः ॥ ९२ ॥ एवंतेतवविप्रस्यपूर्वमष्टमजन्मनि ॥ तिष्ठतोमध्यदेशेषुपुत्रदारकुटुम्बिनः ॥ ९३ ॥ गेहंतावकमाजग्मुर्मध्याह्नेक्षुत्पि
पासिताः ॥ वैश्वदेवान्तरेकालेत्वयादृष्टागृहाङ्गणे ॥ ९४ ॥ सगद्गदंसाश्रुनेत्रंसहर्षंचससम्भ्रमम् ॥ दण्डवत्प्रणिपातेनबहुमानपुरःसरम् ॥ ९५ ॥
प्रणम्यचरणौमूर्ध्नाकृत्वापाणियुगाञ्जलिम् ॥ तदाभिनन्दिताःसर्वेतयासूनृतयागिरा ॥ ९६ ॥ अद्यमेसफलंजन्मजीवितंसफलंतथा ॥ अद्य
विष्णुःप्रसन्नोमेसनाथोऽद्यास्मिपावनः ॥ ९७ ॥ धन्योऽस्म्यद्यगृहंधन्यंधन्याअद्यकुटुम्बिनः ॥ ममाद्यपितरोधन्याधन्यागावःश्रुतंधनम्
॥ ९८ ॥ यद्दृष्टौभवतांपादौतापत्रयहरौमया ॥ भवतांदशनयस्माद्धन्यस्यैवहरेरिव ॥ ९९ ॥ एवंसम्पूज्यकृत्वातुपादप्रक्षालनंतथा ॥ धृतं
मूर्ध्निविशांश्रेष्ठश्रद्धयापरयातदा ॥ २०० ॥ यत्रपादोदकंवैश्यश्रद्धयाशिरसाधृतम् ॥ गन्धपुष्पाक्षतैर्धूपैर्दीपैर्भावपुरःसरम् ॥ १ ॥ सम्पूज्य ॥ ३० ॥
सुन्दरान्नेनभोजितायतयस्तथा ॥ तृप्ताःपरमहंसास्तेविश्रान्तामन्दिरेनिशि ॥ २ ॥ ध्यायन्तश्चपरंब्रह्मयज्ज्योतिर्ज्योतिषांमतम् ॥ तेषामा
तिथ्यजंपुण्यंजातंयत्तेविशांवर ॥ ३ ॥ नतद्वक्त्रसहस्रेणवक्तुंशक्नोम्यहंखलु ॥ भूतानांप्राणिनःश्रेष्ठाःप्राणिनांमतिजीविनः ॥ ४ ॥ मति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मत्सुसुराःश्रेष्ठानरेषुब्रह्मजातयः ॥ ब्राह्मणेषुचविद्वांसोविद्वत्सुकृतबुद्धयः ॥ ५ ॥ कृतबुद्धिषुकर्तारःकर्तृषुब्रह्मवेदिनः ॥ अतएवसुपूज्यास्तेतस्माच्छ्रेष्ठा जगत्त्रये ॥ ६ ॥ तत्सङ्गतिर्विशांश्रेष्ठमहापातकनाशिनी ॥ विश्रान्तागृहिणोगेहेसन्तुष्टाब्रह्मवेदिनः ॥ ७ ॥ आजन्मसञ्चितंपापंनाशयन्तीक्षणेनवै ॥ सञ्चितंयद्गृहस्थस्यपापमामरणान्तिकम् ॥ ८ ॥ विनिर्दहतितत्सर्वमेकरात्रोषितोयतिः ॥ स्वश्रात्रेदेहितत्पुण्यंनरकाद्येनमुच्यते ॥ ९ ॥ इतिदूतवचःश्रुत्वाददौपुण्यंससत्वरम् ॥ हृष्टेनचेतसाभ्रातानिरयात्सोऽपिनिर्गतः ॥ २१० ॥ देवैस्तुपुष्पवर्षेणपूजितौचदिवंगतौ ॥ ताभ्यांसम्पूजितःसम्यग्गतोदूतोयथागतः ॥ ११ ॥अखिलभुवनबोधंदेवदूतस्यवाक्यंनिगमवचनतुल्यंवैश्यपुत्रोनिशम्य ॥ स्वकृतसुकृतदानाद्भ्रातरंतारयित्वासुरपतिवरलोकंतेन सार्द्धंजगाम ॥ १२ ॥ इतिहासमिमंराजन्यःपठेच्छृणुयादपि ॥ सगोसहस्रदानस्यविशोकोलभतेफलम् ॥ २१३ ॥ इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डएकत्रिंशोऽध्यायः ॥ ३१ ॥ नारदउवाच ॥ ततोगच्छेत्तराजेन्द्रसुगन्धंलोकविश्रुतम् ॥ सर्वपापविशुद्धात्माब्रह्मलोकेमहीयते ॥ १ ॥ रुद्रावर्तंततोगच्छेत्तीर्थसेवीनराधिप ॥ तत्रस्नात्वानरोराजन्स्वर्गलोकेमहीयते ॥ २ ॥ गङ्गायाश्चनरश्रेष्ठसरस्वत्याश्चसङ्गमे ॥ स्नातोऽश्वमेधमाप्नोतिस्वर्गलोकंचगच्छति ॥ ३ ॥ तत्रकर्णह्रदेस्नात्वादेवमभ्यर्च्यशङ्करम् ॥ नदुर्गतिमवाप्नोतिस्वर्गलोकंचगच्छति ॥ ४ ॥ ततःकुब्जाम्रकंगच्छेत्तीर्थसेवीयथाक्रमम् ॥ गोसहस्रमवाप्नोतिस्वर्गलोकंचगच्छति ॥ ५ ॥ अरुन्धतीवटंगच्छेत्तीर्थसेवीनराधिप ॥ सामुद्रकमुपस्पृश्यत्रिरात्रोपोषितोनरः ॥ ६ ॥ गोसहस्रफलंविन्देत्स्वर्गलोकंचगच्छति ॥ ब्रह्मावर्त्तंततोगच्छेद्ब्रह्मचारीसमाहितः ॥ ७ ॥ अश्वमेधमवाप्नोतिस्वर्गलोकंचगच्छति ॥ यमुनाप्रभवंगच्छेत्समुपस्पृश्ययामुनम् ॥८॥ अश्वमेधफलंलब्ध्वाब्रह्मलोकेमहीयते ॥ दर्वीसङ्क्रमणंप्राप्यतीर्थंत्रैलोक्यविश्रुतम् ॥९॥ अश्वमेधमवाप्नोतिस्वर्गलोकंचगच्छति ॥ सिन्धोश्चप्रभवंगत्वासिद्धगन्धर्वसेवितम् ॥ १० ॥ तत्रोष्यरजनीःपञ्चदद्याद्बहुसुवर्णकम् ॥ अथदेवींसमासाद्यनरःपरमदुर्गमाम् ॥ ११ ॥ अश्वमेधमवाप्नोतिगच्छेच्चौशनसींगतिम् ॥ ऋषिकुल्यांसमासाद्यवसिष्ठंचैवभारत ॥ १२ ॥ वसिष्ठंसमतिक्रम्यसर्वेवर्णाद्विजातयः ॥ ऋषिकुल्यांनरःस्नात्वाऋषिलोकंप्रपद्यते ॥ १३ ॥ यदितत्रवसेन्मासंशाकाहारोनराधिप ॥ भृगुतुङ्गंसमासाद्यवाजिमेधफलंलभेत् ॥ १४ ॥ गत्वावीरप्रमोक्षंचसर्वपापैःप्रमुच्यते ॥ कार्त्तिकमाघयोश्चैवतीर्थमासाद्यदुर्लभम् ॥ १५ ॥ अग्निष्टोमातिरात्राभ्यांफलंप्राप्नोतिपुण्यकृत ॥ ततःसंन्ध्यांसमासाद्यविद्यातीर्थमनुत्तमम् ॥ १६ ॥ उपस्पृशेत्सविद्यानांसर्वासांपारगोभवेत ॥ महाश्रमेवसेद्रात्रिंसर्वपापप्रमोचने ॥ १७ ॥ एककालंनिराहारोलोकान्संवसतेशुभान् ॥ षष्ठकालोपवासेनमासमुष्यमहालये ॥ १८ ॥ तीर्णस्तारयतेजन्तून्दशपूर्वान्दशापरान् ॥ दृष्ट्वामाहेश्वरंपुण्यंपरंसुरनमस्कृतम् ॥ १९ ॥ कृतार्थःसर्वकृत्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुनशोचेन्मरणंक्वचित् ॥ सर्वपापविशुद्धात्माविन्देद्बहुसुवर्णकम् ॥ २० ॥ अथवेतसिकांगच्छेत्पितामहनिषेविताम् ॥ अश्वमेधमवाप्नोतिगतिंचपर
मांव्रजेत् ॥२१॥ अथसुन्दरिकांतीर्थंप्राप्यसिद्धनिषेविताम् ॥ रूपस्यभागीभवतिदृष्टमेतत्पुरातनैः ॥२२॥ ततोब्राह्मणिकांगत्वाब्रह्मचारीसमाहितः ॥
पद्मवर्णेनयानेनब्रह्मलोकंप्रपद्यते ॥ २३॥ ततश्चनैमिषंगच्छेत्पुण्यंद्विजनिषेवितम् ॥ तत्रनित्यंनिवसतिब्रह्मादेवगणैःसह ॥ २४॥ नैमिषंप्रार्थयानस्यपा
पस्यार्द्धंप्रणश्यति ॥ प्रविष्टमात्रस्तुनरःसर्वपापात्प्रमुच्यते ॥ २५ ॥ तत्रमासंवसेद्धीरोनैमिषेतीर्थतत्परः ॥ पृथिव्यांयानितीर्थानिनैमिषेतानिभारत
॥ २६ ॥ अभिषेकंतत्रकृत्वानियतोनियताशनः ॥ राजसूयस्ययज्ञस्यफलंप्राप्नोतिमानवः ॥ २७ ॥ पुनात्यासप्तमंचैवकुलंभरतसत्तम ॥ यस्त्यजेन्नै
मिषेप्राणानुपवासपरायणः ॥ २८॥ समोदेत्स्वर्गलोकस्थएवमाहुर्मनीषिणः ॥ नित्यंमेध्यंचपुण्यंचनैमिषंनृपसत्तम ॥ २९ ॥ गङ्गोद्भेदंसमासाद्यत्रिरा
त्रोपोषितोनरः ॥ वाजपेयमवाप्नोतिब्रह्मभूतोभवेत्सदा ॥ सरस्वतींसमासाद्यतर्पयेत्पितृदेवताः ॥ सारस्वतेषुलोकेषुमोदतेनात्रसंशयः ॥ ३१ ॥
ततश्चबाहुदांगच्छेत्तीर्थसेवीनराधिप ॥ तत्रोष्यरजनीमेकांस्वर्गलोकेमहीयते ॥ ३२ ॥ देवसत्रस्ययज्ञस्यफलंप्राप्नोतिमानवः ॥ ततश्चरजनींगच्छेत्पु
ण्यांपुण्यजनैर्वृताम् ॥ ३३ ॥ पितृदेवार्चनरतोवाजपेयमवाप्नुयात् ॥ विमलाशोकमासाद्यविराजतियथाशशी ॥ ३४ ॥ तत्रोष्यरजनीमेकांस्वर्गलोके
महीयते ॥ गोप्रतारंततोगच्छेत्सरयूतीर्थमुत्तमम् ॥ ३५ ॥ यत्ररामोगतःस्वर्गंसभृत्यबलवाहनः ॥ गेहंत्यक्त्वापुराराजंस्तस्यतीर्थस्यतेजसा ॥ ३६ ॥
रामस्यचप्रसादेनव्यवसायाच्चभारत ॥ तस्मिंस्तीर्थेनरःस्नात्वागोप्रतारेनराधिप ॥ ३७ ॥ सर्वपापविशुद्धात्मास्वर्गलोकेमहीयते ॥ रामतीर्थेनरःस्ना
त्वागोमत्यांकुरुनन्दन ॥ ३८ ॥ अश्वमेधमवाप्नोतिपुनातिस्वकुलंनरः ॥ शतसाहस्रकंतत्रतीर्थंभरतसत्तम ॥ ३९ ॥ तत्रोपस्पर्शनंकृत्वानियतोनिय
ताशनः ॥ गोसहस्रफलंपुण्यमाप्नोतिभरतर्षभ ॥ ४० ॥ ततोगच्छेतधर्मज्ञऊर्ध्वस्थानमनुत्तमम् ॥ कोटितीर्थेनरःस्नात्वाअर्चयित्वागुहंनृप ॥ ४१ ॥
गोसहस्रफलंविन्देत्तेजस्वीचापिजायते ॥ ततोवाराणसींगत्वापूजयित्वावृषध्वजम् ॥ ४२ ॥ कपिलानांह्रदेस्नात्वाराजसूयफलंलभेत् ॥मार्कण्डेयस्यरा
जेन्द्रतीर्थमासाद्यदुर्लभम्॥ ४३॥ गोमतीगङ्गयोश्चैवसङ्गमेलोकविश्रुते ॥ अग्निष्टोममवाप्नोतिकुलंचैवसमुद्धरेत् ॥४४॥ इतिश्रीपाद्मेमहापुराणेस्वर्गख
ण्डेद्वात्रिंशोऽध्यायः ॥ ३२॥ युधिष्ठिरउवाच ॥वाराणस्याश्चमाहात्म्यंसंक्षेपात्कथितंत्वया ॥ विस्तरेणमुनेब्रूहितदाप्रीणातिमेमनः ॥१॥ नारदउवाच ॥
अत्रेतिहासंवक्ष्यामिवाराणस्यागुणाश्रयम् ॥यस्यश्रवणमात्रेणमुच्यतेब्रह्महत्यया ॥ २ ॥ मेरुशृङ्गेपुरादेवमीशानंत्रिपुरद्विषम्॥ देवासनगतादेवीमहादे
वमपृच्छत ॥ ३ ॥ देव्युवाच ॥ देवदेवमहादेवभक्तानामार्तिनाशन ॥ कथंत्वांपुरुषोदेवमचिरादेवपश्यति ॥ ४ ॥ साङ्ख्ययोगस्तथाध्यानंकर्मयो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गोऽथवैदिकः ॥ आयासबहुलालोकेयानिचान्यानिशङ्कर ॥ ५ ॥ येनविश्रान्तचित्तानांयोगिनांकर्मिणामपि ॥ दृश्योहिभगवान्सूक्ष्मःसर्वेषामथदे
हिनाम् ॥ ६ ॥ एतद्गुह्यतमंज्ञानंगूढंशक्रादिसेवितम् ॥ हितायसर्वभूतानांब्रूहिकामाग्निनाशनम् ॥ ७ ॥ ईश्वरउवाच ॥ अवाच्यमत्रविज्ञानंज्ञानमज्ञै
र्बहिष्कृतम् ॥ वक्ष्येतवयथातत्त्वंयदुक्तंपरमर्षिभिः ॥ ८ ॥ परंगुह्यतमंक्षेत्रंममवाराणसीपुरी ॥ सर्वेषामेवभूतानांसंसारार्णवतारिणी ॥ ९ ॥ तत्रभ
क्त्यामहादेविमदीयंव्रतमास्थिताः ॥ निवसन्तिमहात्मानःपरंनियममास्थिताः ॥ १० ॥ उत्तमंसर्वतीर्थानांस्थानानामुत्तमंचयत् ॥ ज्ञानानामुत्त
मंज्ञानमविमुक्तंपरंमम ॥ ११ ॥ स्थानान्तरपवित्राणितीर्थान्यायतनानिच ॥ श्मशानसंस्थितान्येवदिव्यभूमिगतानिच ॥ १२ ॥ भूलोकेनैवसंल
ग्नमन्तरिक्षेममालयम् ॥ अमुक्तास्तत्रपश्यन्तिमुक्ताःपश्यन्तिचेतसा ॥ १३ ॥ श्मशानमेतद्विख्यातमविमुक्तमितिश्रुतम् ॥ कालोभूत्वाजगदिदंसंह
राम्यत्रसुन्दरि ॥ १४ ॥ देवीदंसर्वगुह्यानांस्थानंप्रियतरंमम ॥ मद्भक्तास्तत्रगच्छन्तिमामेवप्रविशन्तिच ॥ १५ ॥ दत्तंजप्तंहुतंचेष्टंतपस्तप्तंकृतंचय
त् ॥ ध्यानमध्ययनंज्ञानंसर्वंतत्राक्षयंभवेत् ॥ १६॥ जन्मान्तरसहस्रेषुयत्पापंपूर्वसञ्चितम् ॥ अविमुक्तंप्रविष्टस्यतत्सर्वंव्रजतिक्षयम् ॥ १७॥ ब्राह्मणाः
क्षत्रियावैश्याःशूद्राश्चवर्णसङ्कराः ॥ स्त्रियोम्लेच्छाश्चयेचान्येसङ्कीर्णाःपापयोनयः ॥ १८ ॥ कीटाःपिपीलिकाश्चैवयेचान्येमृगपक्षिणः ॥ कालेननि
धनंप्राप्ताअविमुक्तेवरानने ॥ १९ ॥ चन्द्रार्द्धमौलयस्त्र्यक्षामहावृषभवाहनाः ॥ शिवेममपुरेदेविजायन्तेतत्रमानवाः ॥ २० ॥ नाविमुक्तेमृतःकश्चि
न्नरकंयातिकिल्बिषी ॥ ईश्वरानुगृहीताहिसर्वेयान्तिपरांगतिम् ॥ २१ ॥ मोक्षंसुदुर्लभंमत्वासंसारंचातिभीषणम् ॥ अर्चनाचरणेमुक्त्वावाराणस्यांव
सेन्नरः ॥ २२ ॥ दुर्लभातपसाचापिमृतस्यपरमेश्वरि ॥ यत्रतत्रविपन्नस्यगतिःसंसारमोक्षणी ॥ २३ ॥ प्रसादाज्जायतेसम्यङ्ममशैलेन्द्रनन्दिनि ॥
अप्रवृद्धानपश्यन्तिममामायाविमोहिताः ॥ २४ ॥ विण्मूत्ररेतसांमध्येतेवसन्तिपुनःपुनः ॥ हन्यमानोऽपियोविद्वान्वसेद्विघ्नशतैरपि ॥ २५ ॥ सया
तिपरमंस्थानंयत्रगत्वानशोचति ॥ जन्ममृत्युजरामुक्तंपरंयान्तिशिवालयम् ॥ २६ ॥ अपुनर्मरणानांहिसागतिर्मोक्षकाङ्क्षिणाम् ॥ यांप्राप्यकृतकृ
त्यःस्यादितिमन्यन्तिपण्डिताः ॥ २७ ॥ नदानैर्नतपोभिश्चनयज्ञैर्नापिविद्यया ॥ प्राप्यतेगतिरुत्कृष्टायाऽविमुक्तेतुलभ्यते ॥ २८ ॥ नानावर्णाविव
र्णाश्चचाण्डालाद्याजुगुप्सिताः ॥ किल्बिषैःपूर्णदेहाश्चविशिष्टैःपातकैस्तथा ॥ २९ ॥ भेषजंपरमंतेषामविमुक्तंविदुर्बुधाः ॥ अविमुक्तंपरंज्ञानमविमुक्तं
परंपदम् ॥ ३० ॥ अविमुक्तंपरंतत्त्वमविमुक्तंपरंशिवम् ॥ कृत्वावैनैष्ठिकींदीक्षामविमुक्तेवसन्तिये ॥ ३१ ॥ तेषांतत्परमंज्ञानंददाम्यन्तेपरंपदम् ॥ प्र
यागंनैमिषारण्यंश्रीशैलोऽथमहाबलम् ॥ ३२ ॥ केदारंभद्रकर्णंतुगयापुष्करमेवच ॥ कुरुक्षेत्रंभद्रकोटिर्नर्मदाम्रातकेश्वरी ॥ ३३ ॥ शालग्रामं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चकुब्जाम्रंकोकामुखमनुत्तमम् ॥ प्रभासंविजयेशानंगोकर्णंभद्रकर्णकम् ॥ ३४ ॥ एतानिपुण्यस्थानानित्रैलोक्यविश्रुतानिह ॥ नयास्यन्तिपरं
तत्त्वंवाराणस्यांयथामृताः ॥ ३५ ॥ वाराणस्यांविशेषेणगङ्गात्रिपथगामिनी ॥ प्रविष्टानाशयेत्पापंजन्मान्तरशतैःकृतम् ॥ ३६ ॥ अन्यत्रसुलभा
गङ्गाश्राद्धंदानंतपोजपः ॥ व्रतानिसर्वमेवैतद्वाराणस्यांसुदुर्ल्लभम् ॥ ३७ ॥ जपेच्चजुहुयान्नित्यंददात्यर्चयतेऽमरान् ॥ वायुभक्षश्चसततंवाराणस्यां
स्थितोनरः ॥ ३८ ॥ यदिपापोयदिशठोयदिवाऽधार्मिकोनरः ॥ वाराणसींसमासाद्यपुनातिसकलंकुलम् ॥ ३९ ॥ वाराणस्यांयेऽर्चयन्तिम
हादेवंस्तुवन्तिवै ॥ सर्वपापविनिर्मुक्तास्तेविज्ञेयागणेश्वराः ॥ ४० ॥ अन्यत्रयोगज्ञानाभ्यांसंन्यासादथवान्यतः ॥ प्राप्यतेतत्परंस्थानंसहस्रे
णैवजन्मनाम् ॥ ४१ ॥ येभक्तादेवदेवेशिवाराणस्यांवसन्तिवै ॥ तेविन्दन्तिपरंमोक्षमेकेनैवतुजन्मना ॥ ४२ ॥ यत्रयोगस्तथाज्ञानंमुक्तिरेकेनजन्म
ना ॥ अविमुक्तंतदासाद्यनान्यदिच्छेत्तपोवनम् ॥ ४३ ॥ यतोमयाऽविमुक्तंतदविमुक्तंततःस्मृतम् ॥ तदेवगुह्यंगुह्यानामेतद्विज्ञानमुच्यते ॥४४॥ ज्ञा
नाज्ञानाभिनिष्ठानांपरमानन्दमिच्छताम् ॥ यागतिर्विंदितासुभ्रूःसाऽविमुक्तेमृतस्यतु ॥ ४५ ॥ यानिचैवाविमुक्तस्यदेहेदृष्टानिकृत्स्नशः ॥ पु
रीवाराणसीतेभ्यःस्थानेभ्योऽप्यधिकाशुभा ॥ ४६ ॥ यत्रसाक्षान्महादेवोदेहान्तेस्वयमीश्वरः ॥ व्याचष्टेतारकंब्रह्मतत्रैवह्यविमुक्तये ॥ ४७ ॥
यत्तत्परतरंतत्त्वमविमुक्तमितिश्रुतम् ॥ एकेनजन्मनादेविवाराणस्यांतदाप्नुयात् ॥ ४८ ॥ भ्रूमध्येनाभिमध्येचहृदयेचैवमूर्धनि ॥ यथाऽविमु
क्तमादित्येवाराणस्यांव्यवस्थितम् ॥ ४९ ॥ वरणायास्तथाचास्यामध्येवाराणसीपुरी ॥ तत्रैवसंस्थितंतत्त्वंनित्यमेवंविमुक्तकम् ॥ ५० ॥
वाराणस्याःपरंस्थानंनभूतंनभविष्यति ॥ यत्रनारायणोदेवोमहादेवोदिवीश्वरः ॥ ५१ ॥ तत्रदेवाःसगन्धर्वाःसयक्षोरगराक्षसाः ॥ उपास
तेयंसततंदेवदेवःपितामहः ॥ ५२ ॥ महापातकिनोदेवियेतेभ्यःपापकृत्तमाः ॥ वाराणसींसमासाद्यतेयान्तिपरमांगतिम् ॥ ५३ ॥ तस्मा
न्मुमुक्षुर्नियतोवसेद्वैमरणान्तकम् ॥ वाराणस्यांमहादेवाज्ज्ञानंलब्ध्वाविमुच्यते ॥ ५४ ॥ किंतुविघ्नाभविष्यन्तिपापोपहतचेतसः ॥ ततोनै
वाचरेत्पापंकायेनमनसागिरा ॥ ५५ ॥ एतद्रहस्यंदेवानांपुराणानांचसुव्रते ॥ अविमुक्ताश्रयंज्ञानंनकश्चिद्वेत्तितत्त्वतः ॥ ५६ ॥ नारदउवाच ॥
देवतानामृषीणांचशृण्वतांपरमेष्ठिनाम् ॥ देवदेवेनकथितंसर्वपापविनाशनम् ॥ ५७ ॥ यथानारायणःश्रेष्ठोदेवानांपुरुषोत्तमः ॥ यथेश्वरा ॥ ३२ ॥
णांगिरिशःस्थानानामेतदुत्तमम् ॥ ५८ ॥ यैःसमाराधितोरुद्रःपूर्वस्मिन्नेकजन्मनि ॥ तेविन्दन्तिपरंक्षेत्रमविमुक्तंशिवालयम् ॥ ५९ ॥ कलिकल्मष
सम्भूतायेषामपहतामतिः ॥ नतेषांवेदितुंशक्यंस्थानंतत्परमेष्ठिनः ॥६०॥ येस्मरन्तिसदाकालंवदन्तिचपुरीमिमाम् ॥ तेषांविनश्यतिक्षिप्रमिहामुत्रच

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पातकम् ॥ ६१ ॥ यानिचेहप्रकुर्वन्तिपातकानिकृतालयाः ॥ नाशयेत्तानिसर्वाणिदेवःकालतनुःशिवः ॥ ६२ ॥ आगच्छेत्तदिदंस्थानंसेवितंमोक्ष
काङ्क्षिभिः ॥ मृतानांचपुनर्जन्मनभूयोभवसागरे ॥ ६३ ॥ तस्मात्सर्वप्रयत्नेनवाराणस्यांवसेन्नरः ॥ योगीवाप्यथवाऽयोगीपापीवापुण्यकृत्तमः
॥ ६४ ॥ नलोकवचनात्पित्रोर्नचैवगुरुवादतः ॥ मतिर्नक्रमणीयास्यादविमुक्तगतिंप्रति ॥ ६५ ॥ इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेत्रयस्त्रिंशोऽध्या
यः ॥ ३३ ॥ नारदउवाच ॥ तत्रेदंविमलंलिङ्गमोङ्कारंनामशोभनम् ॥ यस्यस्मरणमात्रेणमुच्यतेसर्वपातकैः ॥ १ ॥ एतत्परतरंज्ञानंपञ्चायतनमुत्त
मम् ॥ सेवितंमुनिभिर्नित्यंवाराणस्यांविमोक्षणम् ॥ २ ॥ तत्रसाक्षान्महादेवःपञ्चायतनविग्रहः ॥ रमतेभगवान्रुद्रोजन्तूनामपवर्गदः ॥ ३ ॥ एत
त्पाशुपतंज्ञानंपञ्चायतनमुच्यते ॥ तदेतद्विमलंलिङ्गमोङ्कारंसमुपस्थितम् ॥४॥ शान्त्यतीतातथाशान्तिर्विद्याचैवापरावरा ॥ प्रतिष्ठाचनिवृत्तिश्चप
ञ्चात्मंलिङ्गमैश्वरम् ॥५॥ पञ्चानामपिलिङ्गानांब्रह्मादीनांसमाश्रयम् ॥ ॐकारबोधकंलिङ्गंपञ्चायतनमुच्यते ॥६॥ संस्मरेदीश्वरंलिङ्गंपञ्चायतनमव्य
यम् ॥ देहान्तेपरमंज्योतिरानन्दंविशतेबुधः ॥ ७ ॥ तत्रदेवर्षयःपूर्वंसिद्धाब्रह्मर्षयस्तथा ॥ उपास्यदेवमीशानमापुरन्तेपरंपदम् ॥ ८ ॥ मत्स्योदर्या
स्तटेपुण्येस्थानंगुह्यतमंशुभम् ॥ गोचर्ममात्रंराजेन्द्रॐकारेश्वरमुत्तमम् ॥ ९ ॥ कृत्तिवासेश्वरंलिङ्गंमध्यमेश्वरमुत्तमम् ॥ विश्वेश्वरंतथोङ्कारंकन्दर्पे
श्वरमेवच ॥ १० ॥ एतानिगुह्यलिङ्गानिवाराणस्यांयुधिष्ठिर ॥ नकश्चिदिहजानातिविनाशम्भोरनुग्रहात् ॥ ११ ॥ कृत्तिवासेश्वरस्यैवमाहात्म्यं
शृणुपार्थिव ॥ तस्मिन्स्थानेपुरादैत्योहस्तीभूत्वाशिवान्तिकम् ॥ १२ ॥ ब्राह्मणान्हन्तुमायातोयत्रनित्यमुपासते ॥ तेषांलिङ्गान्महादेवःप्रादुरासी
त्रिलोचनः ॥ १३ ॥ रक्षणार्थंमहादेवोभक्तानांभक्तवत्सलः ॥ हत्वागजाकृतिंदैत्यंशूलेनावज्ञयाहरः ॥ १४ ॥ वासस्तस्याकरोत्कृत्तिंकृत्तिवासेश्वर
स्ततः ॥ तत्रसिद्धिंपरांप्राप्तामुनयोहियुधिष्ठिर ॥ १५ ॥ तेनैवचशरीरेणप्राप्तास्तत्परमंपदम् ॥ विद्याविद्येश्वरारुद्राःशिवायेचप्रकीर्तिताः ॥ १६ ॥
कृत्तिवासेश्वरंलिङ्गंनित्यमाश्रित्यसंस्थिताः ॥ ज्ञात्वाकलियुगंघोरमधर्मबहुलंजनाः ॥ १७ ॥ कृत्तिवासंनमुञ्चन्तिकृतार्थास्तेनसंशयः ॥ जन्मान्त
रसहस्रेणमोक्षोयच्चाप्यतेनवा ॥१८॥ एकेनजन्मनामोक्षःकृत्तिवासेऽत्रलभ्यते ॥ आलयंसर्वसिद्धानामेतत्स्थानंवदन्तिहि ॥१९॥ गोपितंदेवदेवेनमहा
देवेनशम्भुना॥युगेयुगेह्यत्रदान्ताब्राह्मणावेदपारगाः ॥२०॥ उपासतेमहात्मानंजपन्तिशतरुद्रियम् ॥ स्तुवन्तिसततंदेवंत्र्यम्बकंकृत्तिवाससम् ॥ ध्या
यन्तिहृदयेदेवंस्थाणुंसर्वान्तरंशिवम् ॥ २१ ॥ गायन्तिसिद्धाःकिलगीतकानिवाराणसीयेनिवसन्तिविप्राः ॥ तेषामथैकेनभवेद्विमुक्तिर्येकृत्तिवासं
शरणंप्रपन्नाः ॥२२॥ सम्प्राप्यलोकेजगतामभीष्टंसुदुर्लभंविप्रकुलेषुजन्म ॥ ध्यानेसमाधायजपन्तिरुद्रंध्यायन्तिचित्तेयतयोमहेशम् ॥२३॥ आराध

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यन्तिप्रभुमीक्षितारंवाराणसीमध्यगतामुनीन्द्राः ॥ यजन्तियज्ञैरभिसन्धिहीनाःस्तुवन्तिरुद्रंप्रणमन्तिशम्भुम् ॥ २४ ॥ नमोभवायामलयोगधाम्ने स्थाणुंप्रपद्येगिरिशंपुराणम् ॥ स्मरामिरुद्रंहृदयेनिविष्टंजानेमहादेवमनेकरूपम् ॥२५॥ इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेचतुस्त्रिंशोऽध्यायः ॥३४॥ नारदउवाच॥अथान्यत्तत्रवैलिङ्गंकपर्दीश्वरमुत्तमम्॥स्नात्वातत्रविधानेनतर्पयित्वापितॄन्नृप ॥ १ ॥ मुच्यतेसर्वपापेभ्योभुक्तिंमुक्तिंचविन्दति ॥ पिशाचमोचनंनामतीर्थमन्यत्ततःस्थितम् ॥२॥ तत्राश्चर्यमयोदेवोमुक्तिदःसर्वदोषहा ॥ कश्चिद्दैत्योजगामेदंशार्दूलोघोररूपधृक् ॥३॥ मृगीमेकांभक्षयितुंकपर्दीश्वरमुत्तमम् ॥ तत्रसाभीतहृदयाकृत्वाकृत्वाप्रदक्षिणम् ॥ ४ ॥ धावमानासुसम्भ्रान्ताव्याघ्रस्यवशमागता ॥ तांविदार्यनखैस्तीक्ष्णैःशार्दूलःसमहाबलः॥५॥ जगामचान्यंविजनंदेशंदृष्ट्वामुनीश्वरान् ॥ मृतमात्राचसाबालाकपर्दीशाग्रतोमृगी ॥६॥ अदृश्यतमहाज्वालाव्योम्निसूर्यसमप्रभा ॥ त्रिनेत्रानीलकण्ठाचशशाङ्काङ्कितमूर्द्धजा ॥७॥ वृषाधिरूढापुरुषैस्तादृशैरेवसंवृता ॥ पुष्पवृष्टिंविमुञ्चन्तिखेचरास्तत्समन्ततः ॥ ८ ॥ गणेश्वरीस्वयंभूत्वानदृष्टातत्क्षणात्ततः ॥ दृष्ट्वातदाश्चर्यवरंप्रशशंसुःसुरादयः ॥ ९ ॥ तन्महेशस्यवैलिङ्गंकपर्दीश्वरमुत्तमम् ॥ स्मृत्वैवाशेषपापौघात्क्षिप्रमेवविमुच्यते ॥ १० ॥ कामक्रोधादयोदोषावाराणसीनिवासिनाम् ॥ विघ्नाःसर्वेविनश्यन्तिकपर्दीश्वरपूजनात् ॥ ११ ॥ तस्मात्सदैवद्रष्टव्यःकपर्दीश्वरउत्तमः ॥ पूजितव्यंप्रयत्नेनस्तोतव्यंवैदिकैःस्तवैः ॥ १२ ॥ ध्यायतांचात्रनियतंयोगिनांशान्तचेतसाम् ॥ जायतेयोगसिद्धिःसाषण्मासेननसंशयः ॥१३॥ ब्रह्महत्यादयःपापाविनश्यन्त्यस्यपूजनात् ॥ पिशाचमोचनेकुण्डेस्नातःस्यात्प्रशमोयतः ॥ १४ ॥ तस्मिन्क्षेत्रेपुराविप्रस्तपस्वीसंशितव्रतः॥ शङ्कुकर्णइतिख्यातःपूजयामासशङ्करम् ॥ १५ ॥ जजापरुद्रमनिशंप्रणवंब्रह्मरूपिणम् ॥ पुष्पधूपादिभिःस्तोत्रैर्नमस्कारैःप्रदक्षिणैः ॥ १६ ॥ उपासीतात्रयोगात्माकृत्वादीक्षांतुनैष्ठिकीम् ॥ कदाचिदागतंप्रेतंपश्यतिस्मक्षुधान्वितम् ॥ १७ ॥ अस्थिचर्मपिनद्धाङ्गंविश्वसन्तंमुहुर्मुहुः ॥ तंदृष्ट्वासमुनिश्रेष्ठःकृपयापरयायुतः ॥ १८ ॥ प्रोवाचकोभवान्कस्माद्देशाद्देशमिमंश्रितः ॥ तस्मैपिशाचःक्षुधयापीड्यमानोऽब्रवीद्वचः ॥ १९ ॥ पूर्वजन्मन्यहंविप्रोधनधान्यसमन्वितः ॥ पुत्रपौत्रादिभिर्युक्तःकुटुम्बभरणोत्सुकः ॥ २० ॥ नपूजितामयादेवागावोऽप्यतिथयस्तथा ॥ नकदाचित्कृतंपुण्यमल्पंवानल्पमेवच ॥ २१ ॥ एकदाभगवान्देवोवृषभेश्वरवाहनः ॥ विश्वेश्वरोवाराणस्यांदृष्टःस्पृष्टोनमस्कृतः ॥ २२ ॥ तदाचिरेणकालेनपञ्चत्वमहमागतः ॥ नदृष्टंतन्महाघोरंयमस्यसदनंमुने ॥ २३ ॥ पिपासयाऽधुनाऽऽक्रान्तोनजानामिहिताहितम् ॥ यदिकश्चित्समुद्धर्तुमुपायंपश्यसिप्रभो ॥ २४ ॥ कुरुष्वतंनमस्तुभ्यंत्वामहंशरणंगतः ॥ इत्युक्तःशङ्कुकर्णोऽथपिशाचमिदमब्रवीत् ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वादृशोनहिलोकेऽस्मिन्विद्यतेपुण्यकृत्तमः ॥ यत्त्वयाभगवान्पूर्वंदृष्टोविश्वेश्वरःशिवः ॥ २६ ॥ संस्पृष्टोवन्दितोभूयःकोऽन्यस्त्वत्सदृशोभुवि ॥ तेनकर्मविपाकेनदेशमेतंसमागतः ॥ २७ ॥ स्नानंकुरुष्वशीघ्रंत्वमस्मिन्कुण्डेसमाहितः ॥ येनेमांकुत्सितांयोनिंक्षिप्रमेवप्रहास्यसि ॥ २८ ॥ सएवमुक्तोमुनिनापिशाचोदयालुनादेववरंत्रिनेत्रम् ॥ स्मृत्वाकपर्दीश्वरमीशितारंचक्रेसमाधायमनोऽवगाहम् ॥ २९ ॥ तदावगाढोमुनिसन्निधानेममारदिव्याभरणोपपन्नः ॥ अदृश्यतार्कप्रतिमोविमानेशशाङ्कचिह्नीकृतचारुमौलिः ॥ ३० ॥ विभातिरुद्रैःसहितोदिविष्ठैःसमावृतोयोगिभिरप्रमेयैः ॥ सवालखिल्यादिभिरेषदेवोयथोदयेभानुरशेषदेवः ॥ ३१॥ स्तुवन्तिसिद्धादिविदेवसङ्घानृत्यन्तिदिव्याप्सरसोऽभिरामाः ॥ मुञ्चन्तिवृष्टिंकुसुमाम्बुमिश्रागन्धर्वविद्याधरकिन्नराद्याः ॥३२॥ संस्तूयमानोऽथमुनीन्द्रसङ्घैरवाप्यबोधंभगवत्प्रसादात् ॥ समाविशन्मण्डलमेतदग्र्यंत्रयीमयंयत्रविभातिरुद्रः ॥ ३३ ॥ दृष्ट्वाविमुक्तंसपिशाचभूतंमुनिःप्रहृष्टोमनसामहेशम् ॥ विचिन्त्यरुद्रंकविमेकमग्निंप्रणम्यतुष्टावकपर्दिनंतम् ॥ ३४ ॥ शङ्कुकर्णउवाच ॥ कपर्दिनंत्वांपरतःपरस्ताद्गोप्तारमेकंपुरुषंपुराणम् ॥ व्रजामियोगेश्वरमीशितारमादित्यमग्निंकपिलाधिरूढम् ॥ ३५ ॥ त्वांब्रह्मसारंहृदिसंनिविष्टंहिरण्मयंयोगिनमादिमंतम् ॥ व्रजामिरुद्रंशरणंदिविष्ठंमहामुनिंब्रह्ममयंपवित्रम् ॥३६॥ सहस्रपादाक्षिशिरोऽभियुक्तंसहस्ररूपंतमसःपरस्तात् ॥ तंब्रह्मपारंप्रणमामिशम्भुंहिरण्यगर्भाधिपतिंत्रिनेत्रम् ॥ ३७ ॥ यत्रप्रसूतिर्जगतोविनाशोयेनावृतंसर्वमिदंशिवेन ॥ तंब्रह्मपारंभगवन्तमीशंप्रणम्यनित्यंशरणंप्रपद्ये ॥ ३८ ॥ अलिङ्गमालोकविहीनरूपंस्वयम्प्रभुंचित्पतिमेकरूपम् ॥ तंब्रह्मपारंपरमेश्वरंत्वांनमस्करिष्येनयतोऽन्यदस्ति ॥ ३९ ॥ यंयोगिनस्त्यक्तसबीजयोगालब्ध्वासमाधिंपरमात्मभूताः ॥ पश्यन्तिदेवंप्रणतोऽस्मिनित्यंतंब्रह्मपारंपरमस्वरूपम् ॥ ४० ॥ नयत्रनामादिविशेषक्लृप्तिर्नसन्दृशेतिष्ठतियत्स्वरूपम् ॥ तंब्रह्मपारंप्रणतोऽस्मिनित्यंस्वयम्भुवंत्वांशरणंप्रपद्ये ॥ ४१ ॥ यद्वेदवादाभिरताविदेहंसब्रह्मविज्ञानमभेदमेकम् ॥ पश्यन्त्यनेकंभवतःस्वरूपंतंब्रह्मपारंप्रणतोऽस्मिनित्यम् ॥ ४२ ॥ यतःप्रधानंपुरुषःपुराणोबिभर्तितेजःप्रणमन्तिदेवाः ॥ नमामितंज्योतिषिसन्निविष्टंकालंबृहन्तंभवतःस्वरूपम् ॥ ४३ ॥ व्रजामिनित्यंशरणंगुहेशंस्थाणुंप्रपद्येगिरिशंपुराणम् ॥ शिवंप्रपद्येहरमिन्दुमौलिंपिनाकिनंत्वांशरणंव्रजामि ॥ ४४ ॥ स्तुत्वैवंशङ्कुकर्णोऽपिभगवन्तंकपर्दिनम् ॥ पपातदण्डवद्भूमौप्रोच्चरन्प्रणवंपरम् ॥४५॥ तत्क्षणात्परमंलिङ्गंप्रादुर्भूतंशिवात्मकम् ॥ ज्ञानमानन्दमत्यन्तकोटिज्वालाग्निसन्निभम् ॥ ४६ ॥ शङ्कुकर्णोऽथमुक्तात्मातदात्मासर्वगोऽमलः ॥ निलिल्येविमलेलिङ्गेतदद्भुतमिवाभवत् ॥ ४७ ॥ एतद्रहस्यमाख्यातंमाहात्म्यंतेकपर्दिनः ॥ नकश्चिद्वेत्तितमसाविद्वानप्यत्रमुह्यति ॥४८॥ यइमांशृणुयान्नित्यंकथांपापप्रणाशिनीम् ॥ त्यक्तपापोविशुद्धात्मारुद्रसामीप्यमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्नुयात् ॥४९॥ पठेच्चसततंशुद्धोब्रह्मपारंमहास्तवम्॥प्रातर्मध्याह्नसमयेसयोगंप्राप्नुयात्परम्॥५०॥ इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेवाराणसीमाहात्म्ये
पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥ नारदउवाच ॥ वाराणस्यांमहाराजमध्यमेशःपरात्परः ॥ तस्मिन्स्थानेमहादेवोदेव्यासहमहेश्वरः ॥ १ ॥ रमतेभगवा
न्नित्यंरुद्रैश्चपरिवारितः ॥ तत्रपूर्वंहृषीकेशोविश्वात्मादेवकीसुतः ॥ २ ॥ उवासवत्सरंकृष्णःसदापाशुपतैर्युतः ॥ भस्मोद्धूलितसर्वाङ्गोरुद्राध्ययनतत्परः
॥ ३ ॥ आराधयन्हरिःशम्भुंकृत्वापाशुपतंव्रतम् ॥ तस्यतेबहवःशिष्याब्रह्मचर्यपरायणाः ॥ ४ ॥ लब्ध्वातद्वदनाज्ज्ञानंदृष्टवन्तोमहेश्वरम् ॥ तस्य
देवोमहादेवःप्रत्यक्षंनीललोहितः ॥ ५ ॥ ददौकृष्णस्यभगवान्वरदोवरमुत्तमम् ॥ येऽर्चयन्तिचगोविन्दंमद्भक्ताविधिपूर्वकम् ॥ ६ ॥ तेषांतदैश्वरं
ज्ञानमुत्पत्स्यतिजगन्मयम् ॥ नमस्योऽर्चयितव्यश्चध्यातव्योमत्परैर्जनैः ॥ ७ ॥ भविष्यन्तिनसन्देहोमत्प्रसादाद्द्विजातयः ॥ येऽत्रद्रक्ष्यन्तिदेवेशं
स्नात्वादेवंपिनाकिनम् ॥ ८ ॥ ब्रह्महत्यादिकंपापंतेषामाशुविनश्यति ॥ प्राणांस्त्यक्ष्यन्तियेमर्त्याःपापकर्मरताअपि ॥९॥ तेयान्तितत्परंस्थानंना
त्रकार्याविचारणा ॥ धन्यास्तुखलुतेविज्ञामन्दाकिन्यांकृतोदकाः ॥ १० ॥ अर्चयित्वामहादेवंमध्यमेश्वरमीश्वरम् ॥ ज्ञानंदानंतपःश्राद्धंपिण्डनिर्वप
णंत्विह ॥ ११ ॥ एकैकशःकृतंकर्मपुनात्यासप्तमंकुलम् ॥ सन्निहत्यामुपस्पृश्यराहुग्रस्तेदिवाकरे ॥१२॥ यत्फलंलभतेमर्त्यस्तस्माद्दशगुणंत्विह ॥
एवमुक्तंमहाराजमाहात्म्यंमध्यमेश्वरे ॥ यःशृणोतिपरंभक्त्यासयातिपरमंपदम् ॥ १३ ॥ इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेवाराणसीमाहात्म्येषट्त्रिं
शोऽध्यायः ॥ ३६ ॥ नारदउवाच ॥ अन्यानिचमहाराजतीर्थानिपावनानितु ॥ वाराणस्यांस्थितानीहसंशृणुष्वयुधिष्ठिर ॥ १ ॥ प्रयागादधि
कंतीर्थंप्रयागंपरमंशुभम् ॥ विश्वरूपंतथातीर्थंतालतीर्थमनुत्तमम् ॥ २ ॥ आकाशाख्यंमहातीर्थंतीर्थंचैवार्षभंपरम् ॥ सुनीलंचमहातीर्थगौरीती
र्थमनुत्तमम् ॥ ३ ॥ प्राजापत्यंतथातीर्थंस्वर्गद्वारंतथैवच ॥ जम्बुकेश्वरमित्युक्तंधर्माख्यंतीर्थमुत्तमम् ॥ ४ ॥ गयातीर्थंपरंतीर्थंतीर्थंचैवमहानदी ॥
नारायणपरंतीर्थंवायुतीर्थमनुत्तमम् ॥ ५ ॥ ज्ञानतीर्थंपरंगुह्यंवाराहंतीर्थमुत्तमम् ॥ यमतीर्थंमहापुण्यंतीर्थंसम्मूर्तिकंशुभम् ॥ ६ ॥ अग्नितीर्थं
महाराजकलशेश्वरमुत्तमम् ॥ नागतीर्थंसोमतीर्थंसूर्यतीर्थंतथैवच ॥ ७ ॥ पर्वताख्यंमहागुह्यंमणिकर्ण्यमनुत्तमम् ॥ घटोत्कचंतीर्थवरंश्रीतीर्थंच
पितामहम् ॥ ८ ॥ गङ्गातीर्थंतुदेवेशंययातेस्तीर्थमुत्तमम् ॥ कापिलंचैवसोमेशंब्रह्मतीर्थमनुत्तमम् ॥ ९ ॥ तत्रलिङ्गंपुराणीयंस्थातुंब्रह्माय
थागतः ॥ तदानींस्थापयामासविष्णुस्तल्लिङ्गमैश्वरम् ॥ १० ॥ तत्रस्नात्वासमागम्यब्रह्माप्रोवाचतंहरिम् ॥ मयानीतमिदंलिङ्गंकस्मात्स्था
पितवानसि ॥ ११ ॥ तमाहविष्णुस्त्वत्तोऽपिरुद्रेभक्तिर्दृढामम ॥ तस्मात्प्रतिष्ठितंलिङ्गंनाम्नातवभविष्यति ॥ १२ ॥ भूतेश्वरंतथातीर्थंतीर्थं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धर्मसमुद्भवम् ॥ गन्धर्वतीर्थंसुशुभंवाह्नेयंतीर्थमुत्तमम् ॥ १३ ॥ दौर्वासिकंव्योमतीर्थंचन्द्रतीर्थंयुधिष्ठिर ॥ चिन्ताङ्गदेश्वरंतीर्थंपुण्यंविद्याधरेश्वरम् ॥ १४ ॥ केदारतीर्थमुग्राख्यंकालञ्जरमनुत्तमम् ॥ सारस्वतंप्रभासंचरुद्रकर्णह्रदंशुभम् ॥ १५ ॥ कोकिलाख्यंमहातीर्थंतीर्थंचैवमहालयम् ॥ हिरण्यगर्भंगोप्रेक्षंतीर्थंचैवमनुत्तमम् ॥ १६ ॥ उपशान्तंशिवंचैवव्याघ्रेश्वरमनुत्तमम् ॥ त्रिलोचनंमहातीर्थंलोकार्कंचोत्तराह्वयम् ॥ १७ ॥ कपालमोचनंतीर्थंब्रह्महत्याविनाशनम् ॥ शुक्रेश्वरंमहापुण्यमानन्दपुरमुत्तमम् ॥ १८ ॥ एवमादीनितीर्थानिवाराणस्यांस्थितानिवै ॥ नशक्यंविस्तराद्वक्तुंकल्पकोटिशतैरपि ॥ १९ ॥ इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेवाराणसीमाहात्म्येसप्तत्रिंशोऽध्यायः ॥ ३७ ॥ नारदउवाच ॥ वाराणस्याश्चमाहात्म्यंतस्यांतीर्थानिचप्रभो ॥ कथितानिसमासेनतीर्थान्यन्यानिसंशृणु ॥ १ ॥ ततोगयांसमासाद्यब्रह्मचारीसमाहितः ॥ अश्वमेधमवाप्नोतिगमनादेवभारत ॥२॥ यत्राक्षय्यवटोनामत्रिषुलोकेषुविश्रुतः ॥पितृणांतत्रवैदत्तमक्षयंभवतिप्रभो ॥ ३ ॥ महानद्यामुपस्पृश्यतर्पयेत्पितृदेवताः ॥ अक्षयान्प्राप्नुयाल्लोकान्कुलंचैवसमुद्धरेत् ॥ ४ ॥ ततोब्रह्मसरोगच्छेद्ब्रह्मारण्योपसेवितम् ॥ पुण्डरीकमवाप्नोतिप्रभातमिवशर्वरी ॥ ५ ॥ सरसिब्रह्मणातत्रयूपश्रेष्ठःसमुच्छ्रितः ॥ यूपप्रदक्षिणंकृत्वावाजपेयफलंलभेत् ॥ ६ ॥ ततोगच्छेतराजेन्द्रधेनुकंलोकविश्रुतम् ॥ एकरात्रोषितोराजन्प्रयच्छेत्तिलधेनुकाम् ॥ ७ ॥ सर्वपापविशुद्धात्मासोमलोकंव्रजेद्ध्रुवम् ॥ तत्रचिह्नंमहाराजअद्यापिहिनसंशयः ॥ ८ ॥ कपिलासहवत्सावैपर्वतेविचरत्युत ॥ सवत्सायाःपदान्यस्याद्दृश्यन्तेऽद्यापिभारत ॥ ९ ॥ तेषूपस्पृश्यराजेन्द्रपदेषुनृपसत्तम ॥ यत्किञ्चिदशुभंपापंतत्प्रणश्यतिभारत ॥ १० ॥ ततोगृध्रवटंगच्छेत्स्थानंदेवस्यशूलिनः ॥ स्नायात्तुभस्मनातत्रसङ्गम्यवृषभध्वजम् ॥ ११ ॥ ब्राह्मणेनभवेच्चीर्णंव्रतंद्वादशवार्षिकम् ॥ इतरेषांतुवर्णानांसर्वपापंप्रणश्यति ॥ १२ ॥ गच्छेतततउद्यन्तंपर्वतंगीतनादितम् ॥ सावित्रंतुपदंतत्रदृश्यतेभरतर्षभ ॥ १३ ॥ तत्रसन्ध्यामुपासीतब्राह्मणःसंशितव्रतः ॥ उपास्ताहिभवेत्सन्ध्यातेनद्वादशवार्षिकी ॥ १४ ॥ योनिद्वारंचतत्रैवविश्रुतंभरतर्षभ ॥ तत्राभिगम्यमुच्येतपुरुषोयोनिसङ्कटात् ॥ १५ ॥ शुक्लकृष्णावुभौपक्षौगयायांयोवसेन्नरः ॥ पुनात्यासप्तमंराजन्कुलंनास्त्यत्रसंशयः ॥ १६ ॥ एष्टव्याबहवःपुत्रायद्यप्येकोगयांव्रजेत् ॥ यजेतवाश्वमेधेननीलंवावृषमुत्सृजेत् ॥ १७ ॥ ततःफल्गुंव्रजेद्राजंस्तीर्थसेवीनराधिप ॥ अश्वमेधमवाप्नोतिसिद्धिंचपरमांव्रजेत् ॥ १८ ॥ ततोगच्छेतराजेन्द्रधर्मपृष्ठंसमाहितः ॥ यत्रधर्मोमहाराजनित्यमास्तेयुधिष्ठिर ॥ १९ ॥ धर्मंतत्राभिसङ्गम्यवाजिमेधफलंलभेत् ॥ ततोगच्छेतराजेन्द्रब्रह्मणस्तीर्थमुत्तमम् ॥ २० ॥ तत्राभिगम्यब्रह्माणमर्चयेन्नियतव्रतः ॥ राजसूयाश्वमेधाभ्यांफलंप्राप्नोतिभारत ॥ २१ ॥ ततोराजगृहंगच्छेत्तीर्थसेवीनराधिप ॥ उपस्पृश्यततस्तत्रकक्षीवानिवमोदते ॥ २२ ॥ यक्षिण्यानै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्यकंतत्रप्रागग्निपुरुषःशुचिः ॥ यक्षिण्यास्तुप्रसादेनमुच्यतेब्रह्महत्यया ॥ २३ ॥ मणिनागंततोगच्छेद्गोसहस्रफलंलभेत् ॥ नैत्यकंभुञ्जतेयस्तुमणिना
गस्यमानवः ॥ २४ ॥ दष्टस्याशीविषेणास्यनविषंक्रमतेनृप ॥ तत्रोष्यरजनीमेकांसर्वपापैःप्रमुच्यते ॥ २५ ॥ ततोगच्छेतब्रह्मर्षेर्गौतमस्यवनंनृप ॥
अहल्यायाह्रदेस्नात्वाव्रजेतपरमांगतिम् ॥ २६ ॥ अभिगम्यश्रियंराजन्विन्दतेश्रियमुत्तमाम् ॥ तत्रोदपानोधर्म्मज्ञत्रिषुलोकेषुविश्रुतः ॥ २७ ॥ तत्रा
भिषेकंकुर्वीतवाजिमेधमवाप्नुयात् ॥ जनकस्यतुराजर्षेःकूपस्त्रिदशपूजितः ॥ २८ ॥ तत्राभिषेकंकृत्वाचविष्णुलोकमवाप्नुयात् ॥ ततोविनाशनंगच्छे
त्सर्वपापप्रमोचनम् ॥ २९ ॥ वाजिमेधमवाप्नोतिसोमलोकंचगच्छति ॥ गण्डकींचसमासाद्यसर्वतीर्थजलोद्भवाम् ॥ ३० ॥ वाजपेयमवाप्नोतिसूर्य
लोकंचगच्छति ॥ततोध्रुवस्यधर्मज्ञसमाविश्यतपोवनम् ॥३१॥ गुह्यकेषुमहाभागमोदतेनात्रसंशयः ॥ कर्मदांतुसमासाद्यनदींसिद्धनिषेविताम् ॥३२॥
पुण्डरीकमवाप्नोतिसोमलोकंचगच्छति ॥ ततोविशालामासाद्यनदींत्रैलोक्यविश्रुताम् ॥ ३३ ॥ अग्निष्टोममवाप्नोतिस्वर्गलोकंचगच्छति ॥ अथमा
हेश्वरींधारांसमासाद्यनराधिप ॥ ३४ ॥ अश्वमेधमवाप्नोतिकुलंचैवसमुद्धरेत् ॥ दिवौकसांपुष्करिणींसमासाद्यनरःशुचिः ॥३५॥ नदुर्गतिमवाप्नोति
वाजपेयंचविन्दति ॥ माहेश्वरपदंगच्छेद्ब्रह्मचारीसमाहितः ॥ ३६ ॥ माहेश्वरपदेस्नात्वावाजिमेधफलंलभेत् ॥ तत्रकोटिस्तुतीर्थानांविश्रुताभरतर्षभ
॥ ३७ ॥ कूर्मरूपेणराजेन्द्रअसुरेणदुरात्मना ॥ ह्रियमाणाऽऽहृताराजन्विष्णुनाप्रभविष्णुना ॥ ३८ ॥ तत्राभिषेकंकुर्वीततीर्थकोट्यांनराधिप ॥ पुण्ड
रीकमवाप्नोतिविष्णुलोकंचगच्छति ॥ ३९ ॥ ततोगच्छेन्नरश्रेष्ठस्थानंनारायणस्यच ॥ सदासन्निहितोयत्रहरिर्वसतिभारत ॥ ४० ॥ यत्रब्रह्मादयोदेवा
ऋषयश्चतपोधनाः ॥ आदित्यावसवोरुद्राजनार्दनमुपासते ॥ ४१ ॥ शालग्रामइतिख्यातोविष्णोरद्भुतकर्मणः ॥ अभिगम्यत्रिलोकेशंवरदंविष्णुमच्यु
तम् ॥४२॥ अश्वमेधमवाप्नोतिविष्णुलोकंचगच्छति॥तत्रोदपानोधर्मज्ञसर्वपापप्रमोचनः ॥४३॥ समुद्रास्तत्रचत्वारःकूपेसन्निहिताःसदा ॥ तत्रोपस्पृ
श्यराजेन्द्रनदुर्गतिमवाप्नुयात् ॥४४॥ अभिगम्यमहादेवंवरदंविष्णुमव्ययम् ॥ विराजतेयथासोमऋणैर्मुक्तोयुधिष्ठिर ॥४५॥ जातिस्मरउपस्पृश्यशु
चिःप्रयतमानसः ॥ जातिस्मरत्वंप्राप्नोतिस्नात्वातत्रनसंशयः ॥ ४६ ॥ वटेश्वरपुरंगत्वाअर्चयित्वाचकेशवम् ॥ ईप्सितॉंल्लभतेलोकानुपवासान्नसंश
यः ॥४७॥ ततस्तुवामनंगत्वासर्वपापप्रणाशनम् ॥ अभिवाद्यहरिंदेवंनदुर्गतिमवाप्नुयात् ॥४८॥ भरतस्याश्रमंगत्वासर्वपापप्रमोचनम् ॥ कौशिकीं ॥ ३९ ॥
तत्रसेवेतमहापातकनाशिनीम् ॥ ४९ ॥ राजसूयस्ययज्ञस्यफलंप्राप्नोतिमानवः ॥ ततोगच्छेतधर्मज्ञचम्पकारण्यमुत्तमम् ॥ ५० ॥ तत्रोष्यरजनीमेकां
गोसहस्रफलंलभेत् ॥ अथगोविन्दमासाद्यतीर्थंपरमसम्मतम् ॥५१ ॥ उपोष्यरजनीमेकामग्निष्टोमफलंलभेत् ॥ तत्रविश्वेश्वरंदृष्ट्वादेव्यासहमहाद्युतिम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ५२ ॥ मित्रावरुणयोर्लोकान्प्राप्नुयाद्भरतर्षभ ॥ त्रिरात्रोपोषितस्तत्रअग्निष्टोमफलंलभेत् ॥५३॥ कन्यावसथमासाद्यनियतोनियताशनः ॥ मनोः
प्रजापतेर्लोकानाप्नोतिभरतर्षभ ॥५४॥ कन्यायांयेप्रयच्छन्तिदानमण्वपिभारत ॥ तदक्षयमितिप्राहुर्ऋषयःसंशितव्रताः ॥ ५५॥ निष्ठावासंसमासा
द्यत्रिषुलोकेषुविश्रुतम्॥अश्वमेधमवाप्नोतिविष्णुलोकंचगच्छति ॥५६॥ येतुदानंप्रयच्छन्तिनिष्ठायाःसङ्गमेनराः ॥ तेयान्तिनरशार्दूलब्रह्मलोकमना
मयम् ॥ ५७ ॥ तत्राश्रमोवसिष्ठस्यत्रिषुलोकेषुविश्रुतः ॥ तत्राभिषेकंकुर्वाणोवाजपेयमवाप्नुयात् ॥ ५८ ॥ देवकूटंसमासाद्यदेवर्षिगणसेवितम् ॥
अश्वमेधमवाप्नोतिकुलंचैवसमुद्धरेत् ॥ ५९ ॥ ततोगच्छेतराजेन्द्रकौशिकस्यमुनेर्ह्रदम् ॥ यत्रसिद्धिंपरांप्रापविश्वामित्रोऽथकौशिकः ॥ ६० ॥ त
त्रमासंवसेद्वीरःकौशिक्यांभरतर्षभ ॥ अश्वमेधस्ययत्पुण्यंतन्मासेनाधिगच्छति ॥ ६१ ॥ सर्वतीर्थवरंचैवयोवसेतमहाह्रदम् ॥ नदुर्गतिमवाप्नो
तिविन्देद्बहुसुवर्णकम् ॥६२॥ कुमारमभिगम्याथवीराश्रमनिवासिनम् ॥ अश्वमेधमवाप्नोतिशक्रलोकंसगच्छति ॥ ६३ ॥ नन्दिन्यांचसमासाद्यकू
पंत्रिदशसेवितम् ॥ नरमेधस्ययत्पुण्यंतत्प्राप्नोतिकुरूद्वह ॥ ६४ ॥ कालिकासङ्गमेस्नात्वाकौशिक्यारुणयोर्यतः ॥ त्रिरात्रोपोषितोविद्वान्सर्वपापैः
प्रमुच्यते ॥ ६५ ॥ उर्वशीतीर्थमासाद्यतथासोमाश्रमंबुधः ॥ कुम्भकर्णाश्रमेस्नात्वापूज्यतेभुविमानवः ॥ ६६ ॥ तथाकोकामुखेस्नात्वाब्रह्मचारीस
माहितः ॥ जातिस्मरत्वंप्राप्नोतिदृष्टमेतत्पुरातनैः ॥ ६७ ॥ सकृन्नदींसमासाद्यकृतार्थोभवतिद्विजः॥सर्वपापविशुद्धात्मास्वर्गलोकंचगच्छति ॥६८॥
ऋषभद्वीपमासाद्यसेव्यक्रौञ्चनिषूदनम् ॥ सरस्वत्यामुपस्पृश्यविमानस्थोविराजते ॥ ६९ ॥ औद्यानकंमहाराजतीर्थंमुनिनिषेवितम् ॥ तत्राभिषेकं
कुर्वीतसर्वपापैःप्रमुच्यते ॥ ७० ॥ ब्रह्मतीर्थंसमासाद्यपुण्यंब्रह्मर्षिसेवितम् ॥ वाजपेयमवाप्नोतिनरोनास्त्यत्रसंशयः ॥ ७१ ॥ ततश्चम्पांसमासाद्यभा
गीरथ्यांकृतोदकः ॥ दण्डार्पणंसमासाद्यगोसहस्रफलंलभेत् ॥ ७२ ॥ लाविढिकांततोगच्छेत्पुण्यांपुण्यनिषेविताम् ॥ वाजपेयमवाप्नोतिविमान
स्थश्चपूज्यते ॥ ७३ ॥ इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेगयादितीर्थमाहात्म्यकथनंनामाष्टात्रिंशोऽध्यायः ॥ ३८ ॥ नारदउवाच ॥ अथसन्ध्यां
समासाद्यसद्विद्यांतीर्थमुत्तमम् ॥ उपस्पृश्यनरोविद्वान्भवेन्नास्त्यत्रसंशयः ॥ १ ॥ रामस्यचप्रसादेनतीर्थराजंकृतंपुरा ॥ तल्लौहित्यंसमासाद्यविन्द्या
द्बहुसुवर्णकम् ॥ २ ॥ करतोयांसमासाद्यत्रिरात्रोपोषितोनरः ॥ अश्वमेधमवाप्नोतिशक्रलोकंचगच्छति ॥ ३ ॥ गङ्गायास्त्वथराजेन्द्रसागरस्य
चसङ्गमे ॥ अश्वमेधंदशगुणंप्रवदन्तिमनीषिणः ॥ ४ ॥ गङ्गायास्तुपरंद्वीपंप्राप्ययःस्नातिभारत ॥ त्रिरात्रोपोषितोराजन्सर्वकाममवाप्नुयात्
॥ ५ ॥ ततोवैतरणींगत्वानदींपापप्रमोचनीम् ॥ विरजंतीर्थमासाद्यविराजतियथाशशी ॥ ६ ॥ प्रभावेचकुलंपूत्वासर्वपापंव्यपोहति ॥ गोसहस्रफ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लंलब्ध्वापुनातिस्वकुलंनरः ॥ ७ ॥ शोणस्यज्योतिरथ्याश्वसङ्गमेनिवसञ्छुचिः ॥ तर्पयित्वापितॄन्देवानग्निष्टोमफलंलभेत् ॥ ८ ॥ शोणस्यनर्मदा
याश्वप्रभवेकुरुपुङ्गव ॥ वंशगुल्ममुपस्पृश्यवाजिमेधफलंलभेत ॥९॥ ऋषभंतीर्थमासाद्यकोशलायांनराधिप ॥ वाजिमेधमवाप्नोतित्रिरात्रोपोषितो
नरः ॥ १० ॥ कोशलायांसमासाद्यकालतीर्थमुपस्पृशेत् ॥ वृषभैकादशगुणंलभतेनात्रसंशयः ॥ ११ ॥ पुष्पवत्यामुपस्पृश्यत्रिरात्रोपोषितोनरः ॥
गोसहस्रफलंविन्देत्कुलंचैवसमुद्धरेत् ॥ १२ ॥ ततोबदरिकातीर्थेस्नात्वाप्रयतमानसः ॥ दीर्घायुष्यमवाप्नोतिस्वर्गलोकंचगच्छति ॥ १३ ॥
ततोमहेन्द्रमासाद्यजामदग्न्यनिषेवितम् ॥ रामतीर्थेनरःस्नात्वावाजिमेधफलंलभेत् ॥ १४ ॥ मतङ्गस्यतुकेदारंतत्रैवभरतर्षभ ॥ तत्रस्नात्वा
नरोराजन्गोसहस्रफलंलभेत् ॥ १५ ॥ श्रीपर्वतंसमासाद्यनदीतीरमुपस्पृशेत् ॥ अश्वमेधमवाप्नोतिपरांसिद्धिंचगच्छति ॥ १६ ॥ श्रीप
र्वतेमहादेवोदेव्यासहमहाद्युतिः ॥ न्यवसत्परमप्रीतोब्रह्माचत्रिदशैर्वृतः ॥ १७ ॥ तत्रदेवह्रदेस्नात्वाशुचिःप्रयतमानसः ॥ अश्वमेधमवाप्नो
तिपरांसिद्धिंचगच्छति ॥ १८ ॥ ऋषभंपर्वतंगत्वाभाण्डेषुसुरपूजितम् ॥ वाजपेयमवाप्नोतिनाकपृष्ठेचमोदते ॥ १९ ॥ ततोगच्छेतकावेरीं
वृतामप्सरसांगणैः ॥ तत्रस्नात्वानरोराजन्गोसहस्रफलंलभेत् ॥ २० ॥ तत्रतीर्थेसमुद्रस्यकन्यातीर्थमुपस्पृशेत् ॥ तत्रोपस्पृश्यराजेन्द्रसर्वपापैः
प्रमुच्यते ॥ २१ ॥ अथगोकर्णमासाद्यत्रिषुलोकेषुविश्रुतम् ॥ समुद्रमध्येराजेन्द्रसर्वलोकनमस्कृतम् ॥ २२ ॥ यत्रब्रह्मादयोदेवामुनयश्चतपो
धनाः ॥ भूतयक्षाःपिशाचाश्चकिन्नराःसमहोरगाः ॥ २३ ॥ सिद्धचारणगन्धर्वामानुषाःपन्नगास्तथा ॥ सरितःसागराःशैलाउपासतउमापतिम्
॥ २४ ॥ तत्रेशानंसमभ्यर्च्यत्रिरात्रोपोषितोनरः ॥ दशाश्वमेधमाप्नोतिगाणपत्यंचविन्दति ॥ २५ ॥ उपोष्यद्वादशरात्रंकृतार्थोजायतेनरः॥
तस्मिन्नेवतुगायत्र्याःस्थानंत्रैलोक्यविश्रुतम् ॥ २६ ॥ त्रिरात्रमुषितस्तत्रगोसहस्रफलंलभेत् ॥ निदर्शनंचप्रत्यक्षंब्राह्मणानांनराधिप ॥ २७॥
गायत्रींपठतेयस्तुयोनिसङ्करजोद्विजः ॥ गाथावागीतिकावाणीतस्यसम्पद्यतेनृप ॥ २८ ॥ अब्राह्मणस्यपठतःसावित्रीतूपनश्यति ॥ संवर्तस्यतु
विप्रर्षेर्वापीमासाद्यदुर्लभाम् ॥ २९ ॥ रूपस्यभागीभवतिसुभगश्चाभिजायते ॥ ततोवेणांसमासाद्यतर्पयेत्पितृदेवताः ॥३०॥ मयूरहंससंयुक्तंविमानं
लभतेनरः ॥ ततोगोदावरींप्राप्यनित्यसिद्धनिषेविताम् ॥ ३१ ॥ गवामयुतमाप्नोतिवायुलोकंचगच्छति ॥ वेणायाःसङ्गमेस्नात्वावाजपेयफलंलभे
त् ॥ ३२ ॥ वरदासङ्गमेस्नात्वागोसहस्रफलंलभेत् ॥ ब्रह्मस्थूणांसमासाद्यत्रिरात्रोपोषितोनरः ॥ ३३ ॥ गोसहस्रफलंविन्देत्स्वर्गलोकंचगच्छति ॥
कुब्जावनंसमासाद्यब्रह्मचारीसमाहितः ॥ ३४ ॥ त्रिरात्रोपोषितःस्नात्वागोसहस्रफलंलभेत् ॥ ततोदेवह्रदेस्नात्वाकृष्णवेणाजलोद्भवे ॥ ३५ ॥ ज्योति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्मात्रह्रदेचैवतथाकन्याश्रमेनृप ॥ यत्रक्रतुशतैरिष्ट्वादेवराजोदिवंगतः ॥ ३६ ॥ अग्निष्टोमशतंविन्देद्गमनादेवतत्रतु ॥ सर्वदेवह्रदेस्नात्वागोसहस्रफलंल
भेत् ॥ ३७ ॥ जातिमात्रह्रदेस्नात्वाभवेज्जातिस्मरोनरः ॥ ततोवापींमहापुण्यांपयोष्णींसरितांवराम् ॥ ३८ ॥ पितृदेवार्चनरतोगोसहस्रफलंलभेत् ॥
दण्डकारण्यमासाद्यमहाराजउपस्पृशेत् ॥३९॥ शरभङ्गाश्रमंगत्वाशुकस्यचमहात्मनः ॥नदुर्गतिमवाप्नोतिपुनातिस्वकुलंनरः ॥ ४० ॥ ततःसूर्यारकंग
च्छेज्जमदग्निनिषेवितम् ॥ रामतीर्थेनरःस्नात्वाविन्देद्बहुसुवर्णकम् ॥४१॥ सप्तगोदावरींस्नात्वानियतोनियताशनः ॥ महापुण्यमवाप्नोतिदेवलोकंच
गच्छति ॥ ४२ ॥ ततोदेवपथंगच्छेन्नियतोनियताशनः ॥ देवसत्रस्ययत्पुण्यंतदवाप्नोतिमानवः ॥ ४३ ॥ तुङ्गकारण्यमासाद्यब्रह्मचारीजितेन्द्रियः॥
वेदानध्यापयत्तत्रमुनीन्सारस्वतःपुरा ॥ ४४ ॥ तत्रवेदान्प्रनष्टांस्तुमुनेराङ्गिरसःसुतः ॥ उपविष्टोमहर्षीणामुत्तरीयेषुभारत ॥ ४५ ॥ ॐकारेणयथा
न्यायंसम्यगुच्चारितनह ॥ येनयत्पूर्वमभ्यस्तंतत्स्यतत्समुपस्थितम् ॥ ४६ ॥ ऋषयस्तत्रदेवाश्चवरुणोऽग्निःप्रजापतिः ॥ हरिर्नारायणोदेवोमहादेवस्त
थैवच ॥ ४७ ॥ पितामहश्चभगवान्देवैस्सहमहाद्युतिः ॥ भृगुंनियोजयामासयाजनार्थेमहाद्युतिम् ॥ ४८ ॥ ततःसचक्रेभगवानृषीणांविधिवत्तदा ॥
सर्वेषांपुनराधानंदेवदृष्टेनकर्मणा ॥४९॥ आज्यभागेनवैतत्रतर्पितास्तुयथाविधि ॥ देवास्त्रिभुवनंयाताऋषयश्चयथासुखम् ॥५०॥ तदरण्यंप्रविष्टस्य
तुङ्गकंराजसत्तम ॥पापंविनश्यतेसद्यःस्त्रियावैपुरुषस्यवा ॥५१॥ तत्रमासंवसेद्धीरोनियतोनियताशनः ॥ब्रह्मलोकंव्रजेद्राजन्पुनीतेचकुलंपुनः ॥५२॥
मेधावनंसमासाद्यपितृदेवांश्चतर्पयेत् ॥ अग्निष्टोममवाप्नोतिस्मृतिंमेधांचविन्दति ॥ ५३ ॥ तत्रकालञ्जरंगत्वागोसहस्रफलंलभेत् ॥ आत्मानंसाधये
तत्रगिरौकालञ्जरेनृप ॥ ५४ ॥ स्वर्गलोकेमहीयेतनरोनास्त्यत्रसंशयः ॥ ततोगिरिवरश्रेष्ठेचित्रकूटेविशांपते ॥ ५५ ॥ मन्दाकिनींसमासाद्यनदींपा
पविमोचनीम् ॥ अत्राभिषेकंकुर्वाणःपितृदेवार्चनेरतः ॥ ५६ ॥ अश्वमेधमवाप्नोतिगतिंचपरमांव्रजेत् ॥ ततोगच्छेतराजेन्द्रगुहस्थानमनुत्तमम्
॥ ५७ ॥ यत्रदेवोमहासेनोनित्यंसन्निहितोनृप ॥ पुमांस्तत्रनरश्रेष्ठगमनादेवसिद्ध्यति ॥ ५८ ॥ कोटितीर्थेनरःस्नात्वागोसहस्रफलंलभेत् ॥ प्रदक्षि
णमुपावृत्यशिवस्थानंव्रजेन्नरः ॥ ५९ ॥ अभिगम्यमहादेवंविराजतियथाशशी ॥ तत्रकूपोमहाराजविश्रुतोभरतर्षभ ॥ ६० ॥ समुद्रायत्रचत्वारोनिव
सन्तियुधिष्ठिर ॥ तत्रोपस्पृश्यराजेन्द्रकृत्वाचापिप्रदक्षिणम् ॥ ६१ ॥ नियतात्मानरःपूतोगच्छेतपरमांगतिम् ॥ ततोगच्छेत्कुरुश्रेष्ठशृङ्गवेरपुरंमहत
॥ ६२॥ यत्रतीर्णोमहाप्राज्ञोरामोदाशरथिःपुरा ॥गङ्गायांतुनरःस्नात्वाब्रह्मचारीजितेन्द्रियः ॥६३॥ विधूतपाप्माभवतिवाजपेयंचविन्दति॥ ततोमुञ्ज
वटंगच्छेत्स्थानंदेवस्यधीमतः ॥ ६४ ॥ अभिगम्यमहादेवमभ्यर्च्यचनराधिप ॥ प्रदक्षिणमुपावृत्यगाणपत्यमवाप्नुयात् ॥ ६५ ॥ ततोगच्छेतराजे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्द्रप्रयागमृषिसंस्तुतम् ॥ यत्रब्रह्मादयोदेवादिशश्चसदिगीश्वराः ॥ ६६ ॥ लोकपालाश्चसिद्धाश्चनिरताःपितरस्तथा ॥ सनत्कुमारप्रमुखास्तथैवच
महर्षयः ॥ ६७ ॥ तथानागाःसुपर्णाश्चसिद्धाःशुक्रधरास्तथा ॥ सरितःसागराश्चैवगन्धर्वाप्सरसस्तथा ॥ ६८ ॥ हरिश्चभगवानास्तेप्रजापतिपुर
स्कृतः ॥ तत्रत्रीण्यपिकुण्डानितयोर्मध्येनजाह्नवी ॥ ६९ ॥ प्रयागात्समतिक्रान्तासर्वतीर्थपुरस्कृता ॥ तपनस्यसुतातत्रत्रिषुलोकेषुविश्रुता ॥ ७० ॥
यमुनागङ्गयासार्द्धसङ्गतालोकभाविनी ॥ गङ्गायमुनयोर्मध्येपृथिव्याजघनंस्मृतम् ॥ ७१ ॥ प्रयागंजघनस्यान्तमुपस्थमृषयोविदुः ॥ प्रयागंसु
प्रतिष्ठानंकम्बलाश्वतरावुभौ ॥ ७२ ॥ तीर्थंभोगवतीचैववेदीप्रोक्ताप्रजापतेः ॥ तत्रवेदाश्चयज्ञाश्चमूर्त्तिमन्तोयुधिष्ठिर ॥ ७३ ॥ प्रजापतिमुपासन्तऋ
षयश्चमहानघाः ॥ यजन्तेक्रतुभिर्देवांस्तथाचक्रधरानृप ॥ ७४ ॥ ततःपुण्यतमंनास्तित्रिषुलोकेषुभारत ॥ प्रयागंसर्वतीर्थेभ्यःप्रभावेणाधिकंप्रभो
॥ ७५ ॥ श्रवणात्तस्यतीर्थस्यनामसङ्कीर्तनादपि ॥ मूर्धकानमनाद्वापिसर्वपापैःप्रमुच्यते ॥ ७६॥ तत्राभिषेकंयःकुर्यात्सङ्गमेसंशितव्रतः ॥ पुण्यंसुम
हदाप्नोतिराजसूयाश्वमेधयोः ॥ ७७ ॥ एषायजनभूमिर्हिदेवानामपितत्कथा ॥ दत्तंतत्रस्वल्पमपिमहद्भवतिभारत ॥ ७८ ॥ नदेववचनात्तातनलोक
वचनादपि ॥ मतिरुत्क्रमणीयातेप्रयागमरणंप्रति ॥ ७९ ॥ दशतीर्थसहस्राणिषष्टिकोटचस्तथापराः ॥ येषांसान्निध्यमत्रैवकीर्त्तितंकुरुनन्दन॥ ८० ॥
चतुर्विद्येचयत्पुण्यंसत्यवादिषुचैवयत्॥ स्नातएवतदाप्नोतिगङ्गायामुनसङ्गमे ॥८१॥ततोभोगवतोनामवासुकेस्तीर्थमुत्तमम् ॥तत्राभिषेकंयःकुर्यात्सो
ऽश्वमेधमवाप्नुयात् ॥ ८२॥ तत्रहंसप्रपतनंतीर्थंत्रैलोक्यविश्रुतम् ॥ दशाश्वमेधिकंचैवगङ्गायांकुरुनन्दन॥८३॥ कुरुक्षेत्रसमागङ्गायत्रतत्रावगाहिता॥
विशेषोवैकनखलेप्रयागंपरमंमहत् ॥८४ ॥ यद्यकार्यशतंकृत्वाकृतंगङ्गावसेवनम् ॥ सवतत्तस्यगङ्गापोदहन्त्यग्निरिवेन्धनम् ॥८५॥सर्वंदहन्तिगङ्गाप
स्तूलराशिमिवानलः ॥सर्वंकृतयुगेपुण्यंत्रेतायांपुष्करंस्मृतम् ॥८६॥द्वापरेतुकुरुक्षेत्रंगङ्गाकलियुगेस्मृता ॥पुष्करेतुतपस्तप्येद्दानंदद्यान्महालये ॥८७॥
मलयेत्वग्निमारोहेद्भृगुतुङ्गेत्वनाशनम् ॥पुष्करेतुकुरुक्षेत्रेगङ्गापोमध्यगेषुच ॥८८॥ सद्यस्तारयतेजन्तुःसप्तसप्तावरांस्तथा ॥पुनातिकीर्तितापापंदृष्ट्वापु
ण्यंप्रयच्छति॥८९॥अवगाढाचपीताचपुनात्यासप्तमंकुलम् ॥यावदस्थिमनुष्यस्यगङ्गायाःस्पृशतेजलम्॥९०॥तावत्सपुरुषोराजन्स्वर्गलोकेमहीयते॥
यथापुण्यानितीर्थानिपुण्यान्यायतनानिच ॥९१॥ उपास्यपुण्यंलब्ध्वाचभवतिपरलोकभाक्॥नगङ्गासदृशंतीर्थंनदेवःकेशवात्परः ॥९२॥ब्राह्मणेभ्यः
परंनास्तिएवमाहपितामहः॥यत्रगङ्गामहाराजसदेशस्तत्तपोवनम्॥९३॥ सिद्धक्षेत्रंचविज्ञेयंगङ्गातीरसमाश्रितम्॥इदंसत्यंद्विजातीनांसाधूनांमानसेषुच
॥ ९४ ॥ मुक्तिंचैवजपेत्कर्णेशिष्टस्यानुगतस्यच ॥ इदंधर्म्ममिदंमेध्यमिदंस्वर्ग्यमिदंसुखम् ॥ ९५ ॥ इदंपुण्यतमंरम्यंपावनंधर्म्यमुत्तमम् ॥ महर्षी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णामिदंगुह्यंसर्वपापप्रमोचनम् ॥ ९६ ॥ अधीत्यद्विजमध्येचनिर्मलत्वमवाप्नुयात् ॥ श्रीमत्स्वर्ग्यंमहापुण्यंसपत्नशमनंशिवम् ॥ ९७ ॥ मेधाजननम
ग्र्यंवैतीर्थवंशानुकीर्त्तनम् ॥ अपुत्रोलभतेपुत्रमधनोधनमाप्नुयात् ॥९८॥ महींविजयतेराजावैश्योधनमवाप्नुयात् ॥ शूद्रोयातीप्सितान्कामान्ब्राह्मणः
पारगःपठन् ॥ ९९ ॥ यश्चेदंशृणुयान्नित्यंतीर्थपुण्यंसदाशुचि ॥ जातिस्मरत्वमाप्नोतिनाकपृष्ठेचमोदते ॥ १०० ॥ गम्यान्यपिचर्तीर्थानिकीर्तिता
न्यगमान्यपि ॥ मनसाप्यभिगच्छेतसर्वतीर्थमनीषया ॥ १ ॥ एतानिवसुभिःसाध्यैरादित्यैर्मरुदश्विभिः ॥ ऋषिभिर्देवकल्पैश्चकृतानिसुकृतैषिभिः
॥ २ ॥ एवंत्वमपिकौरव्यविधिनाऽनेनसुव्रत ॥ व्रजतीर्थानिनियतःपुण्यंपुण्येनवर्द्धते ॥ ३ ॥ भावितैःकारणैःपूर्वमास्तिक्याच्छ्रुतिदर्शनात् ॥
प्राप्यन्तेतानितीर्थानिसद्भिःशिष्टानुदर्शिभिः ॥ ४ ॥ नाकृतोनाकृतात्माचनाशुचिर्नचतस्करः ॥ स्नातितीर्थेषुकौरव्यनचवक्रमतिर्नरः ॥ ५ ॥ त्व
यातुसम्यग्वृत्तेननित्यंधर्मार्थदर्शिना ॥ पितरस्तर्पितास्तातसर्वेचप्रपितामहाः ॥ ६ ॥ पितामहपुरोगाश्चदेवाःसर्षिगणास्तथा ॥ त्वंचधर्मेणधर्मज्ञनि
त्यमेवाभितोषितः ॥ ७ ॥ दिलीपकीर्तिंमहतींप्राप्स्यसेभुविशाश्वतीम् ॥ एवमुक्त्वाभ्यनुज्ञाप्यवसिष्ठोभगवानृषिः ॥ ८ ॥ प्रीतःप्रीतेनमनसातत्रैवा
न्तरधीयत ॥ दिलीपःकुरुशार्दूलशास्त्रतत्त्वार्थदर्शनात् ॥ ९ ॥ वसिष्ठवचनाच्चैवपृथिवीमनुचक्रमे ॥ एवमेषामहाभागप्रतिष्ठानेप्रतिष्ठिता ॥ ११० ॥
तीर्थयात्रामहापुण्यासर्वपापप्रमोचनी ॥ अनेनविधिनायस्तुपृथिवींपर्यटिष्यति ॥ ११ ॥ अश्वमेधशतंसाग्रंफलंप्रेत्यैषभोक्ष्यते ॥ ततश्चाष्टगुणंपार्थ
प्राप्स्यसेधर्ममुत्तमम् ॥ १२ ॥ दिलीपःपार्थनृपतिर्यथापूर्वमवाप्तवान् ॥ नेताचत्वमृषीन्यस्मात्तस्मात्तेऽष्टगुणंफलम् ॥ १३ ॥ रक्षोगणविकीर्णानि
तीर्थान्येतानिभारत ॥ नगतिर्विद्यतेऽन्यस्यत्वामृतेकुरुनन्दन ॥ १४ ॥ इदंदेवर्षिचरितंसर्वतीर्थानुसंश्रितम् ॥ यःपठेत्कल्यमुत्थायसर्वपापैःप्रमुच्यते
॥ १५ ॥ ऋषिमुख्याःसदायत्रवाल्मीकिस्त्वथकश्यपः ॥ आत्रेयस्त्वथकौण्डिन्योविश्वामित्रोऽथगौतमः ॥ १६ ॥ असितोदेवलश्चैवमार्कण्डेयोऽथ
गालवः ॥ भरद्वाजस्यशिष्यश्चमुनिरुद्दालकस्तथा ॥ १७ ॥ शौनकःसहपुत्रेणव्यासश्चतपतांवरः ॥ दुर्वासाश्चमुनिश्रेष्ठोजाबालिश्चमहातपाः ॥१८॥
एतेऋषिवराःसर्वेत्वत्प्रतीक्षास्तपोधनाः ॥ एभिःसहमहाभागतीर्थान्येतान्यनुव्रज ॥ १९ ॥ प्राप्स्यसेमहतींकीर्तिंयथाराजामहाभिषः ॥ यथायया
तिर्धर्मात्मायथाराजापुरूरवाः ॥ १२० ॥ तथात्वंकुरुशार्दूलस्वेनधर्मेणशोभसे ॥ यथाभगीरथोराजायथारामश्चविश्रुतः ॥ २१ ॥ यथावैवृत्रहास
र्वान्सपत्नानदहत्पुरा ॥ त्रैलोक्यंपालयामासदेवराड्विगतज्वरः ॥ २२ ॥ तथाशत्रुक्षयंकृत्वात्वंप्रजाःपालयिष्यसि ॥ स्वधर्मेणार्जितामुर्वींप्राप्यरा
जीवलोचन ॥ ख्यातिंयास्यसिवीर्येणकार्त्तवीर्यार्जुनोयथा ॥ २३ ॥ सूतउवाच ॥ एवमाभाष्यराजानंनारदोभगवानृषिः ॥ अनुज्ञाप्यमहाराजंत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रैवान्तरधीयत ॥ २४ ॥ युधिष्ठिरोऽपिधर्मात्माऋषिभिःसहसुव्रतः ॥ जगामाखिलतीर्थानिसादरःपृथिवीपतिः ॥२५॥ मयोक्तामृषयःसर्वेतीर्थयात्रा
श्रयांकथाम् ॥ यःपठेच्छृणुयाद्वापिसमुक्तःसर्वपातकैः ॥ २६ ॥ मयोक्तमखिलंतत्त्वंकिंभूयःश्रोतुमिच्छथ ॥ ऋषीणांपुण्यकीर्तीनांनावक्तव्यंममा
स्तिवै ॥ १२७ ॥ इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेनानाविधतीर्थकथनंनामनवत्रिंशोऽध्यायः ॥ ३९ ॥ सूतउवाच ॥ एवमुक्तानितीर्थानिविष्णुदेहा
निसुव्रताः ॥ एषामन्यतमासङ्गान्मुक्तोभवतिमानवः ॥ १ ॥ तीर्थानुश्रवणंधन्यंधन्यंतीर्थनिषेवणम् ॥ पापराशिनिपातायनान्योपायःकलौयुगे
॥ २ ॥ वासंकुर्यामहंतीर्थेतीर्थस्पर्शमहंतथा ॥ एवंयोऽनुदिनंब्रूतेसयातिपरमंमहत् ॥ ३ ॥ पापानितस्यनश्यन्तितीर्थालापनमात्रतः ॥ तीर्थानि
खलुधन्यानिधन्यसेव्यानिसुव्रताः ॥ ४ ॥ तीर्थानांसेवनादेवसेवितोभवतिप्रभुः ॥ नारायणोजगत्कर्तानास्तितीर्थात्परंपदम् ॥ ५ ॥ ब्राह्मणस्तु
लसीचैवअश्वत्थस्तीर्थसञ्चयः ॥ विष्णुश्चपरमेशानःसेव्यएवसदानृभिः ॥ ६ ॥ ब्राह्मणानांविशेषेणसेवनंमुनिपुङ्गवाः ॥ सर्वतीर्थावगाहादेरधिकं
विदुरग्रजाः ॥ ७ ॥ तस्माद्द्विजपदंसाक्षात्सर्वतीर्थमयंशुभम् ॥ भजेतानुदिनंविद्वांस्तत्रतीर्थाधिकंभवेत् ॥ ८ ॥ अश्वत्थस्यतुलस्याश्चगवांकुर्यात्प्रद
क्षिणम् ॥सर्वतीर्थफलंप्राप्यविष्णुलोकेमहीयते॥९॥ तस्माद्दुष्कृतकर्माणिनाशयेत्तीर्थसेवनात्॥ अन्यथानरकंयातिकर्म्मभोगाद्विशाम्यति ॥१०॥पा
पिनांनरकेवासःसुकृतीस्वर्गमश्नुते ॥ तस्मात्पुण्यंनिषेवेततीर्थंखलुविचक्षणः ॥११॥ ऋषयऊचुः ॥श्रुतानिकिलतीर्थानिसमाहात्म्यानिसुव्रत ॥ इदा
नींश्रोतुमिच्छामःप्रयागस्यविशेषकम् ॥ १२॥ प्रयागंतुपुराप्रोक्तंसंक्षेपात्सूतयत्त्वया ॥ विशेषाच्छ्रोतुमिच्छामःसूतनःकथ्यतामिति ॥ १३ ॥ सूतउ
वाच ॥ साधुपृष्टंमहाभागाःप्रयागंप्रतिसुव्रताः ॥ हन्ताहंतत्प्रवक्ष्यामिप्रयागस्योपवर्णनम् ॥ १४ ॥ मार्कण्डेयेनकथितंयत्पुरापाण्डुसूनवे ॥ भारते
तुतदावृत्तेभ्रातराज्येपृथासुते ॥ १५ ॥ एतस्मिन्नन्तरेराजाकुन्तीपुत्रोयुधिष्ठिरः ॥ भ्रातृशोकेनसन्तप्तश्चिन्तयंस्तुपुनःपुनः ॥ १६ ॥ आसीद्दुर्योध
नोराजाएकादशचमूपतिः ॥ अस्मान्सन्ताप्यबहुशःसर्वेतेनिधनंगताः ॥ १७ ॥ वासुदेवंसमाश्रित्यपञ्चशेषास्तुपाण्डवाः ॥ कथंद्रोणंचभीष्मंचक
र्णंचैवमहाबलम् ॥ १८ ॥ दुर्योधनंचराजानंभ्रातृपुत्रसमन्वितम् ॥ राजानोनिहताःसर्वेयेचान्येशूरमानिनः ॥ १९ ॥ किंनोराज्येनकर्तव्यंकिंभोगै
र्जीवितेनवा ॥ धिक्कष्टमितिसञ्चिन्त्यराजाविह्वलतांगतः ॥ २० ॥ निश्चेष्टोऽथनिरुत्साहःकिञ्चित्तिष्ठत्यधोमुखः ॥ लब्धसंज्ञोयदाराजाचिन्तमानःपु
नःपुनः ॥ २१ ॥ कंचरेविधिनायोगंनियमंतीर्थमेववा ॥ येनाहंशीघ्रमामुच्येमहापातककिल्बिषात् ॥ २२ ॥ यत्रस्नात्वानरोयातिविष्णुलोक
मनुत्तमम् ॥ कथंपृच्छामिवैकृष्णंयेनेदंकारितंमहत् ॥ २३ ॥ धृतराष्ट्रंकथंपृच्छेयस्यपुत्रशतंहतम् ॥ व्यासंकथमहंपृच्छेयस्यगोत्रक्षयःकृतः ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंवैक्लव्यमापन्नोधर्मपुत्रोयुधिष्ठिरः ॥ रुदन्तःपाण्डवाःसर्वेभ्रातृशोकपरिप्लुताः ॥ २५ ॥ येचतत्रमहात्मानःसमेताःपाण्डवाश्रिताः ॥ कुन्तीचद्रौप
दीचैवयेचतत्रसमागताः ॥ २६ ॥ भूमौनिपतिताःसर्वेरोदमानाःसमन्ततः ॥ वाराणस्यांतुमार्कण्डस्तेनज्ञातोयुधिष्ठिरः ॥ २७ ॥ यथाविक्लव
मापन्नोरोदमानःसुदुःखितः ॥ अचिरेणैवकालेनमार्कण्डस्तुमहातपाः ॥ २८ ॥ हस्तिनापुरमायातोराजद्वारेसतिष्ठति ॥ द्वारपालोऽपितंदृष्ट्वाराज्ञः
कथितवान्द्रुतम् ॥ २९ ॥ त्वांद्रष्टुकामोमार्कण्डोद्वारेतिष्ठत्यसौमुनिः ॥ त्वरितोधर्मपुत्रस्तुद्वारमेत्याहतत्परः ॥ ३० ॥ युधिष्ठिरउवाच ॥ स्वा
गतंतेमहाप्राज्ञस्वागतंतेमहामुने ॥ अद्यमेसफलंजन्मअद्यमेपावितंकुलम् ॥ ३१ ॥ अद्यमेपितरस्तृप्तास्त्वयिदृष्टेमहामुने ॥ सिंहासनउपस्थाप्यपाद
शौचार्चनादिभिः ॥ ३२ ॥ युधिष्ठिरोमहात्मावैपूजयामासतंमुनिम् ॥ ततस्तमूचेमार्कण्डःपूजितोऽहंत्वयाविभो ॥ ३३ ॥ आख्याहित्वरि
तोराजन्किमर्थंत्वरितंत्वया ॥ केनवाविक्लवीभूतःकथयस्वममाग्रतः ॥ ३४ ॥ युधिष्ठिरउवाच ॥ अस्माकंचैवयद्वृत्तंराज्यस्यार्थेमहामुने ॥ एतत्सर्वं
विदित्वातुभगवानिहचागतः ॥ ३५ ॥ मार्कण्डेयउवाच ॥ शृणुराजन्महाबाहोयत्रधर्मोव्यवस्थितः ॥ नैवदृष्टंरणेपापंयुध्यमानस्यधीमतः
॥ ३६ ॥ किंपुनाराजधर्मेणक्षत्रियस्यविशेषतः ॥ तदेवंहृदयेकृत्वातस्मात्पापंनचिन्तयेत् ॥ ३७ ॥ ततोयुधिष्ठिरोराजाप्रणम्यशिरसामुनिम् ॥
पृच्छामित्वांमुनिश्रेष्ठसदात्रैकाल्यदर्शनम् ॥ कथयस्वसमासेनमुच्येऽहंयेनकिल्बिषात् ॥ ३८ ॥ मार्कण्डेयउवाच ॥ शृणुराजन्महाभागयन्मांपृच्छ
सिभारत ॥ एवंसाङ्ख्यंचयोगंचतीर्थंचैवयुधिष्ठिर ॥३९॥ किंपुनर्ब्राह्मणैःपुण्यैःकीर्तितंवैपुराविभो ॥ प्रयागगमनंश्रेष्ठंनराणांपुण्यकर्मणाम्॥ ४० ॥
इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेचत्वारिंशोऽध्यायः ॥ ४० ॥ युधिष्ठिरउवाच ॥ भगवञ्छ्रोतुच्छामिपुराकल्पेयथास्थितम् ॥ कथंप्रयागगमनंनरा
णांतत्रकीदृशम् ॥ १ ॥ मृतानांकागतिस्तत्रस्नातानांचैवकिंफलम् ॥ येवसन्तिप्रयागेतुब्रूहितेषांचकिंफलम् ॥ एतन्मेसर्वमाख्याहिपरंकौतूहलंहिमे
॥ २ ॥ मार्कण्डेयउवाच ॥ कथयिष्यामितेवत्सप्रयागस्यतुयत्फलम् ॥ पुराऋषीणांविप्राणांकथ्यमानंमयाश्रुतम् ॥ ३ ॥ आप्रयागात्प्रतिष्ठाना
द्धर्मकीवासुकीह्रदात् ॥ कम्बलाश्वतरौनागौनागाश्चबहुमूलिकाः ॥ ४ ॥ एतत्प्रजापतिक्षेत्रंत्रिषुलोकेषुविश्रुतम् ॥ अत्रस्नात्वादिवंयान्तियेमृता
स्तेपुनर्भवाः ॥ ५ ॥ तत्रब्रह्मादयोदेवारक्षांकुर्वन्तिसङ्गताः ॥ अन्येचबहवस्तीर्थाःसर्वपापप्रणाशनाः ॥६॥ नशक्याःकथितुंराजन्बहुवर्षशतैरपि ॥
संक्षेपेणप्रवक्ष्यामिप्रयागस्यचकीर्त्तनम् ॥ ७ ॥ षष्टिर्धनुःसहस्राणिपरिरक्षन्तिजाह्नवीम् ॥ यमुनांरक्षतिसदासवितासप्तवाहनः ॥ ८ ॥ प्रयागंतु
विशेषेणस्वयंरक्षतिवासवः ॥ मण्डलंरक्षतिहरिर्दैवैःसहसुसंमतम् ॥ ९ ॥ तंवटंरक्षतेनित्यंशूलपाणिर्महेश्वरः ॥ स्थानंरक्षतिवैदेवःसर्वपापहरंशुभम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥१०॥ अधर्मेणवृतोलोकेनैवगच्छतितत्पदम् ॥ स्वल्पमल्पतरंपापंयदातस्यनराधिप ॥११॥ प्रयागंस्मरमाणस्यसर्वमायातिसंक्षयम् ॥ दर्शनात्तस्य
तीर्थस्यनामसङ्कीर्तनादपि ॥१२॥ मृत्तिकालभनाद्वापिनरःपापाद्विमुच्यते ॥ पञ्चकुण्डानिराजेन्द्रयेषांमध्येतुजाह्नवी ॥१३॥ प्रयागेतुप्रविष्टस्यपापं
क्षरतितत्क्षणात् ॥ योजनानांसहस्रेषुगङ्गांस्मरतियोनरः ॥ १४ ॥ अपिदुष्कृतकर्मासौलभतेपरमांगतिम् ॥ कीर्तनान्मुच्यतेपापैर्दृष्ट्वाभद्राणिपश्य
ति ॥ १५ ॥ अवगाह्यचपीत्वाचपुनात्यासप्तमंकुलम् ॥ सत्यवादीजितक्रोधोअहिंसांपरमांस्थितः ॥ १६ ॥ धर्मानुसारीतत्त्वज्ञोगोब्राह्मणहिते
रतः ॥ गङ्गायमुनयोर्मध्येस्नातोमुच्येतकिल्बिषात् ॥१७॥ मनसाचिन्तितान्कामान्सम्यक्प्राप्नोतिपुष्कलान् ॥ ततोगत्वाप्रयागंतुसर्वदेवाभिरक्षि
तम् ॥१८॥ ब्रह्मचारीवसेन्मासंपितृदेवांश्चतर्पयेत् ॥ ईप्सितांल्लँभतेकामान्यत्रतत्राभिजायते ॥१९॥ तपनस्यसुतादेवीत्रिषुलोकेषुविश्रुता ॥ समागता
महाभागायमुनायत्रनिम्नगा ॥ २० ॥ तत्रसन्निहितोनित्यंसाक्षाद्देवोमहेश्वरः ॥ दुष्प्रापंमानुषैःपुण्यंप्रयागंतुयुधिष्ठिर ॥ २१ ॥ देवदानवगन्धर्वाऋ
षयःसिद्धचारणाः ॥ तत्रोपस्पृश्यराजेन्द्रस्वर्गलोकंसुखंगताः ॥ २२ ॥ इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डएकचत्वारिंशोऽध्यायः ॥ ४१ ॥ मार्कण्डे
यउवाच ॥ शृणुराजन्प्रयागस्यमाहात्म्यंपुनरेवतु ॥ यंश्रुत्वासर्वपापेभ्योमुच्यतेनात्रसंशयः ॥ १ ॥ आर्तानांचदरिद्राणांनिश्चितव्यवसायिनाम् ॥
स्थानंमुक्त्वाप्रयागंतुनाक्षयंतुकदाचन ॥२॥ गङ्गायमुनमासाद्ययस्तुप्राणान्परित्यजेत् ॥ दीप्तकाञ्चनवर्णाभेविमानेसूर्यवर्चसि ॥ ३ ॥ गन्धर्वाप्सर
सांमध्येस्वर्गेमोदतिमानवः ॥ ईप्सितांल्लभतेकामान्वदन्तिऋषिपुङ्गवाः ॥४॥ सर्वरत्नमयैर्दिव्यैर्नानाध्वजसमाकुलैः ॥ वराङ्गनासमाकीर्णैर्मोदतेशु
भलक्षणैः ॥५॥ गीतावादित्रनिर्घोषैःप्रसुप्तःप्रतिबुध्यते॥यावन्नस्मरतेजन्मतावत्स्वर्गेमहीयते ॥६॥ तत्रस्वर्गात्परिभ्रष्टःक्षीणकर्मादिवश्च्युतः ॥ हिरण्य
रत्नसम्पूर्णेसमृद्धेजायतेकुले ॥७॥ तदेवस्मरतेतीर्थस्मरणात्तत्रगच्छति ॥ देशस्थोयदिवारण्येविदेशेयदिवागृहे ॥८॥ प्रयागंस्मरमाणोऽपियस्तुप्राणा
न्परित्यजेत्॥सब्रह्मलोकमाप्नोतिवदन्तिऋषिपुङ्गवाः॥९॥सर्वकामफलावृत्तामहीयत्रहिरण्मयी॥ऋषयोमुनयःसिद्धायत्रलोकेप्रगच्छति॥१०॥स्त्रीसहस्रा
कुलेरम्येमन्दाकिन्यास्तटेशुभे ॥मोदतेऋषिभिःसार्द्धंस्वकृतेनेहकर्मणा ॥११॥ सिद्धचारणगन्धर्वैःपूज्यतेदिविदैवतैः॥ततःस्वर्गात्परिभ्रष्टोजम्बूद्वीपप
तिर्भवेत्॥ १२ ॥ ततःशुभानिकर्माणिचिन्तमानःपुनःपुनः ॥ गुणवान्वित्तसम्पन्नोभवतीहनसंशयः ॥१३॥ कर्मणामनसावाचासत्यधर्मप्रतिष्ठितः॥
गङ्गायमुनयोर्मध्येयस्तुदानंप्रयच्छति ॥ १४ ॥ सुवर्णंमणिमुक्तांवायदिधान्यंप्रतिग्रहम् ॥ स्वकार्येपितृकार्येवादेवताभ्यर्चनेऽपिवा ॥१५॥ निष्फलं
तस्यतत्तीर्थंयावत्तत्फलमश्नुते ॥ एवंतीर्थेनगृह्णीयात्पुण्येष्वायतनेषुच ॥१६॥ निमित्तेषुचसर्वेषुअप्रमत्तोद्विजोभवेत्॥ कपिलांपाटलावर्णांप्रयागेयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रयच्छति ॥ १७ ॥ स्वर्णशृङ्गींरौप्यखुरांचैलकण्ठींपयस्विनीम् ॥ प्रयागेश्रोत्रियंसाधुंग्राहयित्वायथाविधि ॥ १८ ॥ शुक्लाम्बरधरंशान्तंधर्मज्ञंवेदपारगम्॥सागौस्तस्मैचदातव्यागङ्गायमुनसङ्गमे ॥१९॥ वासांसिचमहार्हाणिरत्नानिविविधानिच ॥ यावद्रोमाणितस्यागोःसन्तिगात्रेषुसत्तम ॥२०॥ तावद्वर्षसहस्राणिस्वर्गलोकेमहीयते ॥ यत्रासौलभतेजन्मसागौस्तत्राभिजायते ॥ २१ ॥ नचपश्यत्यसौघोरंनरकंतेनकर्मणा ॥ उत्तरान्सकुरून्प्राप्य मोदतेकालमक्षयम् ॥ २२ ॥ गवांशतसहस्रेभ्योदद्यादेकांपयस्विनीम् ॥ पुत्रान्दारांस्तथाभृत्यान्गौरेकाप्रतितारयेत् ॥ २३ ॥ तस्मात्सर्वेषुदानेषुगोदानंतुविशिष्यते ॥ दुर्गमेविषमेघोरेमहापातकसम्भवे ॥ गौरेवरक्षांकुरुतेतस्माद्देयाद्विजातये ॥ २४ ॥ इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेद्विचत्वारिंशोऽध्यायः ॥ ४२ ॥ युधिष्ठिरउवाच ॥ यथाप्रयागस्यमुनेमाहात्म्यंकथितंत्वया ॥ तथातथाप्रमुच्येऽहंसर्वपापैर्नसंशयः ॥१॥ भगवन्केनविधिना गन्तव्यंधर्मनिश्चयैः ॥ प्रयागेयोविधिःप्रोक्तस्तंमेब्रूहिमहामुने ॥ २ ॥ मार्कण्डेयउवाच ॥ कथयिष्यामितेवत्सतीर्थयात्राविधिक्रमम् ॥ योगच्छेतकुरुश्रेष्ठप्रयागंदेवसंयुतम् ॥ ३ ॥ बलीवर्दसमारूढःशृणुतस्यापियत्फलम् ॥ वसतेनरकेघोरेगवांक्रोधेसुदारुणे ॥ ४ ॥ सलिलंचनगृह्णन्तिपितरस्तस्य देहिनः ॥ यस्तुपुत्रांस्तथाबालान्स्नापयेत्पाययेत्तथा ॥ ५ ॥ यथात्मनस्तथासर्वान्दानंविप्रेषुदापयेत् ॥ ऐश्वर्यलोभान्मोहाद्वागच्छेद्यानेनयो नरः ॥ ६ ॥ निष्फलंतस्यतत्तीर्थंतस्माद्यानंपरित्यजेत् ॥ गङ्गायमुनयोर्मध्येयस्तुकन्यांप्रयच्छति ॥ ७ ॥ आर्षेणतुविधानेनयथाविभवसम्भवम् ॥ नपश्यतियमंघोरंनरकंतेनकर्मणा ॥८॥ उत्तरान्सकुरून्गत्वामोदतेकालमक्षयम् ॥ पुत्रांस्तुदाराँल्लभतेधार्मिकान्नयसंयुतान् ॥ ९ ॥ तत्रदानंप्रदातव्यं यथाविभवसम्भवम् ॥ तेनतीर्थफलेनैववर्द्धतेनात्रसंशयः ॥ १० ॥ स्वर्गेतिष्ठतिराजेन्द्रयावदाभूतसम्प्लवम् ॥ वटमूलंसमाश्रित्ययस्तुप्राणान्परित्यजेत् ॥ ११ ॥ सर्वलोकानतिक्रम्यरुद्रलोकंचगच्छति ॥ तत्रतेद्वादशादित्यास्तपन्तेरुद्रमाश्रिताः ॥१२॥ निर्दहन्तिजगत्सर्ववटमूलंनदह्यते ॥ नष्टचन्द्रार्कपवनंयदाचैकार्णवंजगत् ॥ १३ ॥ स्वपित्यत्रैववैविष्णुर्जायमानःपुनःपुनः ॥ देवदानवगन्धर्वाऋषयःसिद्धचारणाः ॥ १४ ॥ सदासेवन्तितत्तीर्थंगङ्गायमुनसङ्गमे ॥ तत्रगच्छन्तिराजेन्द्रप्रयागेसंयुतंचयत् ॥ १५ ॥ तत्रब्रह्मादयोदेवादिशश्चैवदिगीश्वराः ॥ लोकपालाश्चसाध्याश्चपितरो लोकसंमताः ॥ १६ ॥ सनत्कुमारप्रमुखास्तथैवपरमर्षयः ॥ अङ्गिरप्रमुखाश्चैवतथाब्रह्मर्षयःपरे ॥ १७ ॥ तथानागाश्चसिद्धाश्चसुपर्णाःखेचराश्चये ॥ सरितःसागराःशैलानागाविद्याधरास्तथा ॥ १८ ॥ हरिश्चभगवानास्तेप्रजापतिपुरस्कृतः ॥ गङ्गायमुनयोर्मध्येपृथिव्याजघनंस्मृतम् ॥ १९ ॥ प्रयागंराजशार्दूलत्रिषुलोकेषुविश्रुतम् ॥ ततःपुण्यतमंनास्तित्रिषुलोकेषुभारत ॥ २० ॥ श्रवणात्तस्यतीर्थस्यनामसङ्कीर्तनादपि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मृत्तिकालम्भनाद्वापिनर पापात्प्रमुच्यते ॥ २१ ॥ तत्राभिषेकंयःकुर्य्यात्सङ्गमेसंशितव्रतः ॥ तुल्यंफलमवाप्नोतिराजसूयाश्वमेधयोः ॥ २२ ॥ न
वेदवचनात्तातनलोकवचनादपि ॥ मतिरुत्क्रमणीयातेप्रयागगमनंप्रति ॥ २३ ॥ दशतीर्थसहस्राणिषष्टिकोट्यस्तथापराः ॥ येषांसान्निध्यमत्रैवकीर्त
नात्कुरुनन्दन ॥ २४ ॥ यागतिर्योगयुक्तस्यसदुत्थस्यमनीषिणः ॥ सागतिस्त्यजतःप्राणान्गङ्गायमुनसङ्गमे ॥ २५ ॥ तेनजीवन्तिलोकेऽस्मि
न्यत्रयत्रयुधिष्ठिर ॥ येप्रयागंनसम्प्राप्तास्त्रिषुलोकेषुविश्रुतम् ॥ २६ ॥ एवंदृष्ट्वातुतत्तीर्थंप्रयागंपरमंपदम् ॥ मुच्यतेसर्वपापेभ्यःशशाङ्कइवराहुणा ॥
॥ २७ ॥ कम्बलाश्वतरौनागौयमुनादक्षिणेतटे ॥ तत्रस्नात्वाचपीत्वाचमुच्यतेसर्वपातकैः ॥ २८ ॥ तत्रगत्वातुतत्स्थानंमहादेवस्यधीमतः ॥ नर
स्तारयतेसर्वान्दशातीतान्दशापरान् ॥ २९ ॥ कृत्वाभिषेकंतुनरःसोऽश्वमेधफलंलभेत् ॥ स्वर्गलोकमवाप्नोतियावदाभूतसम्प्लवम् ॥ ३० ॥
पूर्वपार्श्वेतुगङ्गायांत्रिषुलोकेषुभारत ॥ कूपंचैवतुसामुद्रंप्रतिष्ठानंतुविश्रुतम् ॥ ३१ ॥ ब्रह्मचारीजितक्रोधस्त्रिरात्रंयदितिष्ठति ॥ सर्वपापविशुद्धा
त्मासोऽश्वमेधफलंलभेत् ॥ ३२ ॥ उत्तरेणप्रतिष्ठानाद्भागीरथ्यास्तुपूर्वतः ॥ हंसप्रपतनंनामतीर्थंत्रैलोक्यविश्रुतम् ॥ ३३ ॥ अश्वमेधफलंत
स्मिन्स्नातमात्रस्यभारत ॥ यावच्चन्द्रश्चसूर्यश्चतावत्स्वर्गेमहीयते ॥ ३४ ॥ उर्वशीपुलिनेरम्येविपुलेहंसपाण्डुरे ॥ सलिलैस्तर्प्पयेद्यस्तुपितॄं
स्तत्रविमत्सरः ॥ ३५ ॥ षष्टिवर्षसहस्राणिषष्टिवर्षशतानिच ॥ सेवतेपितृभिःसार्द्धंस्वर्गलोकंनराधिप ॥ ३६ ॥ पूज्यतेसततंतत्रऋषिगन्धर्व
किन्नरैः ॥ ततःस्वर्गपरिभ्रष्टःक्षीणकर्मादिवश्च्युतः ॥ ३७ ॥ ॥ उर्वशीसदृशीनांतुकन्यानांलभतेशतम् ॥ गवांशतसहस्राणांभोक्ताभवतिभूमिप ॥
॥ ३८ ॥ काञ्चीनूपुरशब्देनसुप्तोऽसौप्रतिबुध्यते ॥ भुक्त्वातुविपुलान्भोगांस्तत्तीर्थंलभतेपुनः ॥ ३९ ॥ कुशासनधरोनित्यंनियतःसंयतेन्द्रियः ॥
एककालंतुभुञ्जानोमासंभोगपतिर्भवेत् ॥ ४० ॥ सुवर्णालङ्कृतानांतुनारीणांलभतेशतम् ॥ पृथिव्यामासमुद्रायांमहाभोगपतिर्भवेत् ॥ ४१ ॥
दशग्रामसहस्राणांभोक्ताभवतिभूमिपः ॥ धनधान्यसमायुक्तोदाताभवतिनित्यशः ॥ ४२ ॥ सभुक्त्वाविपुलान्भोगांस्तत्तीर्थंस्मरतेपुनः ॥
अथतस्मिन्वटेरम्येब्रह्मचारीजितेन्द्रियः ॥ ४३ ॥ उपोष्ययोगयुक्तश्चब्रह्मज्ञानमवाप्नुयात् ॥ कोटितीर्थंसमासाद्ययस्तुप्राणान्परित्यजेत् ॥ ४४ ॥
कोटिवर्षसहस्राणिस्वर्गलोकेमहीयते ॥ ततःस्वर्गात्परिभ्रष्टःक्षीणकर्मादिवश्च्युतः ॥ ४५ ॥ सुवर्णमणिमुक्ताढ्येकुलेभवतिरूपवान् ॥ ततोभगवतींगत्वा
वासुकेरुत्तरेणतु ॥ ४६ ॥ दशाश्वमेधकंतत्रतीर्थंतत्रापरंभवेत् ॥ कृत्वाभिषेकंतुनरःसोऽश्वमेधफलंलभेत् ॥ ४७ ॥ धनाढ्योरूपवान्दक्षोदाताभवतिधा
र्मिकः ॥ चतुर्वेदेषुयत्पुण्यंसत्यवादिषुयत्फलम् ॥ ४८ ॥ अहिंसायांतुयोधर्मोगमनादेवतद्भवेत् ॥ कुरुक्षेत्रसमागङ्गायत्रतत्रावगाह्यते ॥४९॥ कुरुक्षेत्रा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्दशगुणायत्रसिन्ध्वासमागता ॥ यत्रगङ्गामहाभागाबहुतीर्थतपोधना ॥५०॥ सिद्धक्षेत्रंहितज्ज्ञेयंनात्रकार्याविचारणा ॥ क्षितौतारयतेमर्त्यान्नागांस्तार
यतेऽप्यधः ॥५१॥ दिवितारयतेदेवांस्तेनसात्रिपथास्मृता ॥ यावदस्थीनिगङ्गायांतिष्ठन्तितस्यदेहिनः ॥५२॥ तावद्वर्षसहस्राणिस्वर्गलोकेमहीयते॥
तीर्थानांतुपरंतीर्थंनदीनामुत्तमानदी ॥ ५३ ॥ मोक्षदासर्वभूतानांमहापातकिनामपि ॥ सर्वत्रसुलभागङ्गात्रिषुस्थानेषुदुर्लभा ॥ ५४ ॥ गङ्गाद्वारेप्रयागे
चगङ्गासागरसङ्गमे ॥ तत्रस्नात्वादिवंयान्तियेमृतास्तेऽपुनर्भवाः ॥५५॥ सर्वेषांचैवभूतानांपापोपहतचेतसाम् ॥ गतिमन्वेषमाणानांनास्तिगङ्गासमाग
तिः ॥ ५६ ॥ पवित्राणांपवित्रंयामङ्गलानांचमङ्गलम् ॥ महेश्वरशिरोभ्रष्टासर्वपापहराशुभा ॥ ५७ ॥ इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेप्रयागमाहात्म्ये
त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥ मार्कण्डेयउवाच ॥ शृणुराजन्प्रयागस्यमाहात्म्यंपुनरेवतु ॥ यच्छ्रुत्वासर्वपापेभ्योमुच्यतेनात्रसंशयः ॥ १ ॥ मानसं
नामतत्तीर्थंगङ्गायामुत्तरेतटे ॥ त्रिरात्रोपोषितोभूत्वासर्वान्कामानवाप्नुयात् ॥२॥ गोभूहिरण्यदानेनयत्फलंप्राप्नुयान्नरः ॥ एतत्फलमवाप्नोतितत्तीर्थंस्म
रतेपुनः ॥३॥ अकामोवासकामोवागङ्गायांयोविपद्यत ॥ मृतस्तुभवतिस्वर्गेनरकंनचपश्यति ॥४॥ अप्सरोगणसङ्गीतैःसुप्तोऽसौप्रतिबुध्यते ॥ हंससार
सयुक्तेनविमानेनसगच्छति ॥५॥ बहुवर्षाणिराजेन्द्रषट्सहस्राणिभुञ्जते ॥ ततःस्वर्गात्परिभ्रष्टःक्षीणकर्मादिवश्च्युतः ॥६॥ सुवर्णमणिमुक्ताढ्येजायतेस
महाकुले ॥ षष्टितीर्थसहस्राणिषष्टितीर्थशतानिच ॥७॥ माघेमासिगमिष्यन्तिगङ्गायमुनसङ्गमे ॥ गवांशतसहस्रस्यसम्यग्दत्तस्ययत्फलम् ॥८॥ प्रया
गेमाघमासेतुत्र्यहंस्नानस्यतत्फलम् ॥ गङ्गायमुनयोर्मध्येपञ्चाग्निंयस्तुसाधयेत् ॥९॥ अहीनाङ्गोह्यरोगश्चपञ्चेन्द्रियसमन्वितः ॥ यावन्तिरोमकूपाणि
तस्यगात्रस्यदेहिनः ॥१०॥ तावद्वर्षसहस्राणिस्वर्गलोकेमहीयते ॥ ततःस्वर्गात्परिभ्रष्टोजम्बूद्वीपपतिर्भवेत् ॥११॥ सभुक्त्वाविपुलान्भोगांस्तत्तीर्थंभ
जतेनरः ॥ जलप्रवेशंयःकुर्यात्सङ्गमेलोकविश्रुते ॥१२॥ राहुग्रस्तोयथासोमोविमुक्तःसर्वपातकैः ॥ सोमलोकमवाप्नोतिसोमेनसहमोदते ॥१३॥ षष्टिव
र्षसहस्राणिषष्टिवर्षशतानिच ॥ स्वर्गलोकमवाप्नोतिऋषिगन्धर्वसेवितः ॥१४॥ परिभ्रष्टस्तुराजेन्द्रसमृद्धेजायतेकुले ॥ अधःशिरास्तुयोज्वालामूर्ध्व
पादःपिबेन्नरः ॥१५॥ शतवर्षसहस्राणिस्वर्गलोकेमहीयते ॥ परिभ्रष्टस्तुराजेन्द्रअग्निहोत्रीभवेन्नरः ॥१६॥ भुक्त्वातुविपुलान्भोगांस्तत्तीर्थंभजतेनरः ॥
यस्तुदेहंविकर्तित्वाशकुनिभ्यःप्रयच्छति ॥१७॥ विहङ्गैरुपभुक्तस्यशृणुतस्यापियत्फलम् ॥ शतंवर्षसहस्राणांसोमलोकेमहीयते ॥१८॥ ततःस्वर्गात्प
रिभ्रष्टोराजाभवतिधार्मिकः ॥ गुणवान्रूपसम्पन्नोविद्वान्सुप्रियदेहवान् ॥ १९ ॥ भुक्त्वातुविपुलान्भोगांस्तत्तीर्थंभजतेपुनः ॥ यामुनेचोत्तरेकूलेप्रयाग
स्यतुदक्षिणे २०॥ ऋणप्रमोचनंनामतीर्थंतत्परमंस्मृतम् ॥ एकरात्रोषितोभूत्वाऋणैःसर्वैःप्रमुच्यते ॥ २१ ॥ सूर्यलोकमवाप्नोतिअनृणीचसदाभवेत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥२२॥ इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेप्रयागमाहात्म्येचतुश्चत्वारिंशोऽध्यायः ॥४४॥ युधिष्ठिरउवाच ॥ एतच्छ्रुत्वाप्रयागस्ययत्त्वयाकीर्तनंकृतम्॥
विशुद्धमेतद्धृदयंप्रयागस्यचकीर्तनात् ॥ अनाशकफलंब्रूहिभगवंस्तत्रकीदृशम् ॥ १ ॥ मार्कण्डेयउवाच ॥ शृणुराजन्प्रयागेतुअनाशकफलंविभो ॥
प्राप्नोतिपुरुषोधीमाञ्छ्रद्दधानश्चयादृशम् ॥२॥ अहीनाङ्गोविरोगश्चपञ्चेन्द्रियसमन्वितः ॥ अश्वमेधफलंतस्यगच्छतस्तुपदेपदे ॥३॥ कुलानितारयेद्रा
जन्दशपूर्वान्दशापरान् ॥ मुच्यतेसर्वपापेभ्योगच्छेतपरमंपदम् ॥ ४ ॥ युधिष्ठिरउवाच ॥ महाभागोऽसिधर्मज्ञदानंवदसिमेप्रभो ॥ अल्पेनैवप्रदानेन
बहून्धर्मानवाप्नुयात् ॥ ५ ॥ अश्वमेधस्तुबहुभिःसुकृतैःप्राप्यतेइह ॥ एतन्मेसंशयंब्रूहिपरंकौतूहलंहिमे ॥ ६ ॥ मार्कण्डेयउवाच ॥ शृणुराजन्महा
वीरयदुक्तंपद्मयोनिना ॥ ऋषीणांसन्निधौपूर्वंकथ्यमानंमयाश्रुतम् ॥ ७ ॥ पञ्चयोजनविस्तीर्णंप्रयागस्यतुमण्डलम् ॥ संप्रविष्टस्यतद्भूमावश्वमेधंपदे
पदे ॥ ८ ॥ व्यतीतान्पुरुषान्सप्तभविष्यांश्चचतुर्दश ॥ नरस्तारयतेसर्वान्यस्तुप्राणान्परित्यजेत् ॥ ९ ॥ एवंज्ञात्वातुराजेन्द्रसदाश्रद्धापरोभवेत् ॥
अश्रद्दधानाःपुरुषाःपापोपहतचेतसः ॥ नप्राप्नुवन्तितत्स्थानंप्रयागंदेवनिर्मितम् ॥ १० ॥ युधिष्ठिरउवाच ॥ स्नेहाद्वाद्रव्यलोभाद्वायेतुकामवशंग
ताः ॥ कथंतीर्थफलंतेषांकथंपुण्यमवाप्नुयुः ॥ ११ ॥ विक्रयंसर्वभाण्डानांकार्याकार्यमजानतः ॥ प्रयागेकागतिस्तस्यएवंब्रूहिमहामुने ॥ १२ ॥
मार्कण्डेयउवाच ॥ शृणुराजन्महागुह्यंसर्वपापप्रणाशनम् ॥ मासंवसंस्तुराजेन्द्रप्रयागेनियतेन्द्रियः ॥१३॥ मुच्यतेसर्वपापेभ्योयथादिष्टंस्वयम्भुवा॥
शुचिस्तुप्रयतोभूत्वाऽहिंसकःश्रद्धयान्वितः ॥१४॥ मुच्यतेसर्वपापेभ्यःसगच्छेत्परमंपदम् ॥ विस्रम्भघातकानांतुप्रयागेशृणुयत्फलम् ॥१५॥ त्रिका
लमेवस्नायीतआहारंभैक्ष्यमाचरेत् ॥ त्रिभिर्मासैःप्रमुच्येतप्रयागात्तुनसंशयः ॥ १६ ॥ प्रज्ञानेनतुयस्येहतीर्थयात्रादिकंभवेत् ॥ सर्वकामसमृद्धस्तुस्व
र्गलोकेमहीयते ॥ १७ ॥ स्थानंसलभतेनित्यंधनधान्यसमाकुलम् ॥ एवंज्ञानेनसम्पूर्णःसदाभवतिभोगवान् ॥१८॥ तारिताःपितरस्तेननरकात्प्रपि
तामहाः ॥ धर्मानुसारेतत्त्वज्ञपृच्छतस्तेपुनःपुनः ॥ त्वत्प्रियार्थंसमाख्यातंगुह्यमेतत्सनातनम् ॥ १९ ॥ युधिष्ठिरउवाच ॥ अद्यमेसफलंजन्मअद्यमे
सफलंकुलम् ॥ प्रीतोऽस्म्यनुगृहीतोऽस्मिदर्शनादेवतेऽद्यवै ॥ त्वद्दर्शनात्तुधर्मात्मन्मुक्तोऽहंसर्वपातकैः ॥ २० ॥ मार्कण्डेयउवाच ॥ दिष्ट्यातेसफलं
जन्मदिष्ट्यातेतारितंकुलम् ॥ कीर्तनाद्वर्द्धतेपुण्यंश्रुतंपापप्रणाशनम् ॥ २१ ॥ युधिष्ठिरउवाच ॥ यमुनायांतुकिंपुण्यंकिंफलंतुमहामुने ॥ एतन्मेसर्व
माख्याहियथादृष्टंयथाश्रुतम् ॥ २२ ॥ मार्कण्डेयउवाच ॥ तपनस्यसुतादेवीत्रिषुलोकेषुविश्रुता ॥ समागतामहाभागायमुनायत्रनिम्नगा
॥ २३ ॥ येनैवनिस्सृतागङ्गातेनैवयमुनागता ॥ योजनानांसहस्रेषुकीर्तनात्पापनाशिनी ॥ २४ ॥ तत्रस्नात्वाचपीत्वाचयमुनायांयुधिष्ठिर ॥ की

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्तनाल्लभतेपुण्यंदृष्ट्वाभद्राणिपश्यति ॥ २५ ॥ अवगाढाचपीताचपुनात्यासप्तमंकुलम् ॥ प्राणांस्त्यजतियस्तत्रसयातिपरमांगतिम् ॥ २६ ॥ अग्नि
तीर्थमितिख्यातंयमुनादक्षिणेतटे ॥ पश्चिमेधर्मराजस्यतीर्थंहरवरंस्मृतम् ॥ २७ ॥ तत्रस्नात्वादिवंयान्तियेमृतास्तेऽपुनर्भवाः ॥ एवंतीर्थसहस्रा
णियमुनादक्षिणेतटे ॥ २८ ॥ उत्तरेणप्रवक्ष्यामिआदित्यस्यमहात्मनः ॥ तीर्थंतुविरजंनामयत्रदेवाःसवासवाः ॥ २९ ॥ उपासतेस्मसन्ध्यांतुनि
त्यकालंयुधिष्ठिर ॥ देवाःसेवन्तितत्तीर्थंयेचान्येविदुषोजनाः ॥३०॥ श्रद्धादानपरोभूत्वाकुरुतीर्थाभिषेचनम् ॥ अन्येचबहवस्तीर्थाःसर्वपापहराःशु
भाः ॥ ३१ ॥ तेषुस्नात्वादिवंयान्तियेमृतास्तेऽपुनर्भवाः ॥ गङ्गाचयमुनाचैवउभेतुल्यफलेस्मृते ॥ ३२ ॥ केवलंश्रेष्ठभावेनगङ्गासर्वत्रपूज्यते ॥ ए
वंकुरुष्वकौन्तेयस्वर्गतीर्थाभिषेचनम् ॥ ३३ ॥ यावज्जीवकृतंपापंतत्क्षणादेवनश्यति ॥ यस्त्विदंकल्यउत्थायपठतेचशृणोतिवा ॥ ३४ ॥ मुच्यते
सर्वपापेभ्यःस्वर्गलोकंचगच्छति ॥ ३५ ॥ इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेयमुनामाहात्म्येपञ्चचत्वारिंशोध्यायः ॥ ४५॥ युधिष्ठिरउवाच ॥ श्रु
तंमेब्रह्मणाप्रोक्तंपुराणेपुण्यसम्मितम् ॥ तीर्थानांतुसहस्राणिशतानिनियुतानिच ॥ १ ॥ सर्वेपुण्याःपवित्राश्चगतिश्चपरमास्मृता ॥ पृथिव्यांनैमिषंपु
ण्यमन्तरिक्षेचपुष्करम् ॥ २ ॥ प्रयागमपिलोकानांकुरुक्षेत्रंविशिष्यते ॥ सर्वाणिसम्परित्यज्यकथमेकंप्रशंससि ॥ ३ ॥ अप्रमाणमिदंप्रोक्तमश्रद्धेय
मनुत्तमम् ॥ गतिंचपरमांदिव्यांभोगांश्चैवयथेप्सितान्॥४॥किमर्थमल्पयोगेनबहुधर्मंप्रशंससि॥एतंमेसंशयंब्रूहियथादृष्टंयथाश्रुतम् ॥५॥ मार्कण्डेयउ
वाच॥अश्रद्धेयंनवक्तव्यंप्रत्यक्षमपितद्भवेत्॥नरस्यश्रद्दधानस्यपापोपहतचेतसः ॥६॥ अश्रद्दधानोह्यशुचिर्दुर्मतिस्त्यक्तमङ्गलः ॥ एतेपातकिनःसर्वेतेने
दंभाषितंमया ॥ ७ ॥ शृणुप्रयागमाहात्म्यंयथादृष्टंयथाश्रुतम् ॥ प्रत्यक्षंचपरोक्षंचयथान्यत्सम्भविष्यति ॥ ८ ॥ यथैवान्यन्मयादृष्टंपुराराज
न्यथाश्रुतम् ॥ शास्त्रंप्रमाणंकृत्वातुपूज्यतेयोगमात्मनः ॥ ९ ॥ क्लिश्यतेचापरस्तत्रनैवयोगमवाप्नुयात् ॥ जन्मान्तरसहस्रेभ्योयोगोलभ्येतमानवैः
॥ १० ॥ यथायोगसहस्रेणयोगोलभ्येतमानवैः ॥ यस्तुसर्वाणिरत्नानिब्राह्मणेभ्यःप्रयच्छति ॥ ११ ॥ तेनदानेनदत्तेनयोगोलभ्येतमानवैः ॥ प्र
यागेतुमृतस्येदंसर्वंभवतिनान्यथा ॥१२॥ प्रधानहेतुंवक्ष्यामिश्रद्दधत्सुचभारत ॥ यथासर्वेषुभूतेषुसर्वत्रैवतुदृश्यते ॥१३॥ ब्रह्मनैवास्तिवैकिञ्चिद्यदृक्तुं
त्विदमुच्यते ॥ यथासर्वेषुभूतेषुब्रह्मसर्वत्रपूज्यते ॥ १४ ॥ एवंसर्वेषुलोकेषुप्रयागःपूज्यतेबुधैः ॥ पूज्यतेतीर्थराजश्चसत्यमेतद्युधिष्ठिर ॥ १५ ॥ ब्रह्मा
पिस्मरतेनित्यंप्रयागंतीर्थमुत्तमम् ॥ तीर्थराजमनुप्राप्यनैवान्यत्किञ्चिदिच्छति ॥ १६ ॥ कोहिदेवत्वमासाद्यमानुषत्वंचिकीर्षति ॥ अनेनैवानु
मानेनत्वंज्ञास्यसियुधिष्ठिर ॥ १७ ॥ यथापुण्यमपुण्यवातथैवकथितंमया ॥ १८ ॥ युधिष्ठिरउवाच ॥ श्रुतंतद्यत्त्वयाप्रोक्तंविस्मितोऽहंपुनःपु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नः ॥ कथंयोगेनतत्प्राप्तिःस्वर्गलोकस्तुकर्मणा ॥ १९ ॥ तदाचलभतेभोगान्गांचतत्कर्मणांफलम् ॥ तानिकर्माणिपृच्छामिपुनर्यैःप्राप्यते
महीम् ॥ २० ॥ मार्कण्डेयउवाच ॥ शृणुराजन्महाबाहोयथोक्तकर्मणामही ॥ गामग्निंब्राह्मणंशास्त्रंकाञ्चनंसलिलंस्त्रियः ॥ २१ ॥ मातरं
पितरंचैवयोनिन्दतिनराधिप ॥ नैतेषामूर्ध्वगमनमेवमाहप्रजापतिः ॥ २२ ॥ एवंयोगस्यसम्प्राप्तिःस्थानंपरमदुर्लभम् ॥ गच्छन्तिनरकं
घोरंयेनराःपापकारिणः ॥ २३ ॥ हस्त्यश्वंगामनड्वाहंमणिमुक्तादिकाञ्चनम् ॥ परोक्षंहरतेयस्तुपश्चाद्दानंप्रयच्छति ॥ २४ ॥ नतेगच्छन्ति
वैस्वर्गंदातारोयत्रभोगिनः ॥ अनेनकर्मणायुक्ताःपच्यन्तेनरकेऽधमाः ॥ २५ ॥ एवंयोगंचधर्मंचदातारंचयुधिष्ठिर ॥ यथासत्यमसत्यंवा
अस्तिनास्तीतियत्फलम् ॥ २६ ॥ निरुक्तंतुप्रवक्ष्यामियथायंस्वयमाप्नुयात् ॥ इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेप्रयागमाहात्म्येषट्चत्वारिं
शोऽध्यायः ॥ ४६ ॥ मार्कण्डेयउवाच ॥ शृणुराजन्प्रयागस्यमाहात्म्यंपुनरेवतु ॥ नैमिषंपुष्करंचैवगोतीर्थंसिन्धुसागरम् ॥ १ ॥ कु
रुक्षेत्रंगयांचैवगङ्गासागरमेवच ॥ एतेचान्येचबहवोयेचपुण्याःशिलोच्चयाः ॥ २ ॥ दशतीर्थसहस्राणित्रिंशत्कोटयस्तथापरे ॥ प्रयागेसंस्थि
तानित्यमेवमाहुर्मनीषिणः ॥ ३ ॥ त्रीणिचाप्यग्निकुण्डानियेषांमध्येतुजाह्नवी ॥ प्रयागादभिनिष्क्रान्तासर्वतीर्थपुरस्कृता ॥ ४ ॥ तपनस्यसुतादे
वीत्रिषुलोकेषुविश्रुता ॥ गङ्गायमुनयासार्धंसंस्थितालोकभाविनी ॥ ५ ॥ गङ्गायमुनयोर्मध्येपृथिव्याजघनंस्मृतम् ॥ प्रयागंराजशार्दूलकलांनार्ह
न्तिषोडशीम् ॥ ६ ॥ तिस्रःकोटयोऽर्द्धकोटीचतीर्थानांवायुरब्रवीत् ॥ दिविभुव्यन्तरिक्षेचतत्सर्वंजाह्नवीस्मृता ॥ ७ ॥ प्रयागंसमधिष्ठानंकम्बलाश्वत
रावुभौ ॥ भोगवत्यथयाचैववेदिरेषाप्रजापतेः ॥ ८ ॥ तत्रदेवाश्चयज्ञाश्चमूर्तिमन्तोयुधिष्ठिर ॥ पूजयन्तिप्रयागंतऋषयश्चतपोधनाः ॥९॥ यजन्तेक्र
तुभिर्देवास्तथाबहुधनानृपाः ॥ ततःपुण्यतमोनास्तित्रिषुलोकेषुभारत ॥ १० ॥ प्रभावात्सर्वतीर्थेभ्यःप्रभवत्यधिकंविभो ॥ दशतीर्थसहस्राणितिस्रः
कोट्यस्तथापरे ॥ ११ ॥ यत्रगङ्गामहाभागासदेशस्तत्तपोवनम् ॥ सिद्धक्षेत्रंतुतज्ज्ञेयंगङ्गातीरसमाश्रितम् ॥ १२ ॥ इतिसत्यंद्विजातीनांसाधूना
मात्मजस्यवा ॥ सुहृदांचजपेत्कर्णेशिष्यस्यानुगतस्यवा ॥ १३ ॥ इदंधन्यमिदंस्वर्ग्यमिदंसेव्यमिदंशुभम् ॥ इदंपुण्यमिदंरम्यंपावनंधर्ममुत्तमम्
॥ १४ ॥ महर्षीणामिदंगुह्यंसर्वपापप्रणाशनम् ॥ अधीत्यचद्विजोध्यायन्निर्मलत्वमवाप्नुयात् ॥ १५ ॥ यश्चेदंशृणुयान्नित्यंतीर्थंपुण्यंसदाशुचिः ॥ जा
तिस्मरत्वंलभतेनाकपृष्ठेचमोदते ॥ १६ ॥ प्राप्यन्तेतानितीर्थानिसद्भिःशिष्टार्थदर्शिभिः ॥ स्नाहितीर्थेषुकौरव्यनचवक्रमतिर्भव ॥ १७ ॥ त्वयातु
सम्यक्पृष्टेनकथितंतुमयाविभो ॥ पितरस्तारिताःसर्वेतारिताश्चपितामहाः ॥ १८ ॥ प्रयागस्यतुसर्वेतेकलांनार्हन्तिषोडशीम् ॥ एवंज्ञानंचयोगंच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तीर्थंचैवयुधिष्ठिर ॥१९॥ बहुक्लेशेनयुज्यन्तेततोयान्तिपरांगतिम् ॥ प्रयागस्मरणाल्लोकःस्वर्गलोकंचगच्छति ॥ २० ॥ इतिश्रीपाद्मेमहापुराणेस्वर्गख
ण्डेप्रयागमाहात्म्येसप्तचत्वारिंशोऽध्यायः ॥४७॥ युधिष्ठिरउवाच ॥ कथासर्वात्वियंप्रोक्ताप्रयागस्यमहामुने ॥ एवंमेसर्वमाख्याहियथाचममतारयेत्
॥१॥ मार्कण्डेयउवाच ॥ शृणुराजन्प्रवक्ष्यामिप्रोक्तंसर्वमिदंजगत् ॥ ब्रह्माविष्णुस्तथेशानोदेवताप्रभुरव्ययः ॥२॥ ब्रह्मासृजतिभूतानिस्थावरंजङ्गमंच
यत् ॥ तान्येतानिपरोलोकेविष्णुःपालयतिप्रजाः ॥ ३ ॥ कल्पान्तेतत्समग्रंहिरुद्रःसंहरतेजगत् ॥ नददातिचनाध्येतिनकदाचिद्विनश्यति ॥ ४ ॥
ईश्वरःसर्वभूतानांयःपश्यतिसपश्यति ॥ उत्तरेणप्रतिष्ठानादिदानींब्रह्मतिष्ठति ॥ ५ ॥ महेश्वरोवटेभूत्वातिष्ठतेपरमेश्वरः ॥ ततोदेवाःसगन्धर्वाःसि
द्धाश्चपरमर्षयः ॥ ६ ॥ रक्षन्तिपरमंनित्यंपापकर्मपरायणान् ॥ येतुचान्येचतिष्ठन्तिनयान्तिपरमांगतिम् ॥ ७ ॥ युधिष्ठिरउवाच ॥ अप्याहमे
यथातत्त्वंयथैषांतिष्ठतेश्रुतम् ॥ केनवाकारणेनैवतिष्ठन्तिलोकसंमताः ॥८॥ मार्कण्डेयउवाच ॥ प्रयागेनिवसन्त्येतेब्रह्मविष्णुमहेश्वराः ॥ कारणंतुप्रव
क्ष्यामिशृणुतत्त्वंयुधिष्ठिर ॥९॥ पञ्चयोजनविस्तीर्णंप्रयागस्यतुमण्डलम् ॥ तिष्ठन्तिरक्षणार्थायपापकर्मनिवारणाः ॥ १० ॥ तस्मिंस्तुस्वल्पकंपापंन
रकेपातयिष्यति ॥ एवंब्रह्माचविष्णुश्चप्रयागेसमहेश्वरः ॥ ११ ॥ सप्तद्वीपाःसमुद्राश्चपर्वताश्चमहीतले ॥ तिष्ठन्तिध्रियमाणाश्चयावदाभूतसम्प्लवम् ॥
॥ १२ ॥ येचान्येबहवःसर्वेतिष्ठन्तिचयुधिष्ठिर ॥ पृथिवीस्थानमारभ्यनिर्मितंदैवतैस्त्रिभिः ॥१३॥ प्रजापतेरिदंक्षेत्रंप्रयागमितिविश्रुतम् ॥ एतत्पुण्यं
पवित्रंचप्रयागंतुयुधिष्ठिर ॥ १४ ॥ स्वराज्यंकुरुराजेन्द्रभ्रातृभिःसहितोभव ॥ ५५ ॥ इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेप्रयागमाहात्म्येऽष्टचत्वारिं
शोऽध्यायः ॥ ४८ ॥ सूतउवाच ॥ भ्रातृभिःसहिताःसर्वेपाण्डवाधर्मनिश्चयाः ॥ ब्राह्मणेभ्योनमस्कृत्वागुरुदेवांस्त्वतर्पयन् ॥ १ ॥ वासुदेवोऽपितत्रै
वक्षणेनाभ्यागतस्तदा ॥ पाण्डवैःसहितैःसर्वैःपूज्यमानःसमाधवः ॥ २ ॥ कृष्णेनसहितैःसर्वैःपुनरेवमहात्मभिः ॥ अभिषिक्तःस्वराज्येतुधर्मपुत्रो
युधिष्ठिरः ॥ ३ ॥ एतस्मिन्नन्तरेचैवमार्कण्डेयोमहात्मवान् ॥ ततःस्वस्तीतिचोक्त्वावैक्षणादाश्रममागतः ॥ ४ ॥ युधिष्ठिरोऽपिधर्मात्माभ्रातृभिः
सहितस्तुसः ॥ महादानंददौचाथधर्मपुत्रोयुधिष्ठिरः ॥ ५ ॥ यस्त्विदंकल्यमुत्थायपठतेवाशृणोतिवा ॥ मुच्यतेसर्वपापेभ्योविष्णुलोकंसगच्छति
॥ ६ ॥ वासुदेवउवाच ॥ ममवाक्यंतुकर्तव्यंतवस्नेहाद्ब्रवीम्यहम् ॥ नित्यंयज्ञरतोभूत्वाप्रयागेविगतज्वरः ॥ ७ ॥ प्रयागंसंस्मरन्नित्यंसहास्माभि
र्युधिष्ठिर ॥ स्वयंप्राप्स्यसिराजेन्द्रस्वर्गलोकंतुशाश्वतम् ॥ ८ ॥ प्रयागमनुगच्छेद्वावसतेवापियोनरः ॥ सर्वपापविशुद्धात्मास्वर्गलोकंचगच्छति
॥ ९ ॥ प्रतिग्रहादुपावृत्तःसन्तुष्टोनियतःशुचिः ॥ अहङ्कारनिवृत्तश्चसतीर्थफलमश्नुते ॥१०॥ अकोपनश्चराजेन्द्रसत्यवादीदृढव्रतः ॥ आत्मोपमश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूतेषुसतीर्थफलमश्नुते ॥११॥ ऋषिभिःक्रतवःप्रोक्तादेवैश्चापियथाक्रमम् ॥ नहिशक्यादरिद्रेणयज्ञाःप्राप्तुंमहीपते ॥ १२ ॥ बहूपकरणोयज्ञोनाना
सम्भारसम्भ्रमः ॥ प्राप्यतेविविधैरर्थ्यैःसमृद्धैर्वानरैःक्वचित् ॥ १३ ॥ योदरिद्रैरपिवुधैःशक्यःप्राप्तुंनरेश्वर ॥ ततोयज्ञफलैःपुण्यैस्तन्निबोधजनेश्वर
॥ १४ ॥ ऋषीणांपरमंगुह्यमिदंभरतसत्तम ॥ तीर्थाभिगमनंपुण्यंयज्ञैरपिविशिष्यते ॥ १५ ॥ दशकोटिसहस्राणित्रिंशत्कोटचस्तथापरे ॥ माघमासे
तुगङ्गायांगमिष्यन्तिनरर्षभ ॥१६॥ स्वस्थोभवमहाराजभुङ्क्ष्वराज्यमकण्टकम् ॥ पुनर्द्रक्ष्यसिराजन्द्रयजमानोविशेषतः ॥१७॥ इतिश्रीपाद्मेमहा
पुराणेस्वर्गखण्डेप्रयागमाहात्म्यंनामैकोनपञ्चाशत्तमोऽध्यायः ॥ ४९ ॥ ऋषयऊचुः ॥ भवताकथितंसर्वंयत्किञ्चित्पृष्टमेवच ॥ इदानीमपिपृच्छाम
एकंवदमहामते ॥ १ ॥ एतेषांखलुतीर्थानांसेवनाद्यत्फलंलभेत् ॥ सर्वेषांकिलकृत्वैकंकर्मकेनचलभ्यते ॥ २ ॥ एतन्नोब्रूहिसर्वज्ञकर्मैवंयदिवर्तते॥ ३ ॥
सूतउवाच ॥ कर्मयोगःकिलप्रोक्तोवर्णानांद्विजपूर्वशः ॥ नानाविधोमहाभागास्तत्रचैकंविशिष्यते ॥ ४ ॥ हरिभक्तिःकृतायेनमनसावचसागिरा ॥
जितंतेनजितंतेनजितमेवनसंशयः ॥ ५ ॥ हरिरेवसमाराध्यःसर्वदेवेश्वरेश्वरः ॥ हरिनाममहामन्त्रैर्नश्येत्पापपिशाचकम् ॥ ६ ॥ हरेःप्रदक्षिणंकृत्वास
कृदप्यमलाशयाः ॥ सर्वतीर्थसमाप्लावंलभन्तेयन्नसंशयः ॥ ७ ॥ प्रतिमांचहरेर्दृष्ट्वासर्वतीर्थफलंलभेत् ॥ विष्णुनामपरंजप्त्वासर्वमन्त्रफलंलभेत् ॥८॥
विष्णुप्रसादतुलसीमाघ्रायद्विजसत्तमाः ॥ प्रचण्डंविकरालंतद्यमस्यास्यंनपश्यति ॥९॥ सकृत्प्रणामीकृष्णस्यमातुःस्तन्यंपिबेन्नहि ॥ हरिपादेमनोये
षांतेभ्योनित्यंनमोनमः ॥१०॥ पुल्कसःश्वपचोवापियेचान्येम्लेच्छजातयः ॥ तेऽपिवन्द्यामहाभागाहरिपादैकसेवकाः॥११॥किंपुनर्ब्राह्मणाःपुण्याभ
क्ताराजर्षयस्तथा॥हरौभक्तिंविधायैवगर्भवासंनपश्यति ॥१२॥ हरेरग्रेस्वनैरुच्चैर्नृत्यंस्तन्नामकृन्नरः॥पुनातिभुवनंविप्रागङ्गादिसलिलंयथा॥१३॥दर्शना
त्स्पर्शनात्तस्यआलापादपिभक्तितः ॥ ब्रह्महत्यादिभिःपापैर्मुच्यतेनात्रसंशयः ॥ १४ ॥ हरेःप्रदक्षिणंकुर्वन्नुच्चैस्तन्नामकृन्नरः ॥ करतालादिसन्धानं
सुस्वरंकलशब्दितम् ॥१५॥ ब्रह्महत्यादिकंपापंतेनैवकरतालितम् ॥ हरिभक्तिकथामुक्त्वाख्यायिकांशृणुयाच्चयः ॥ १६ ॥ तस्यसन्दर्शनादेवपूतोभव
तिमानवः ॥ किंपुनस्तस्यपापानामाशङ्कामुनिपुङ्गवाः ॥१७॥ तीर्थानांचपरंतीर्थकृष्णनाममहर्षयः॥तीर्थीकुर्वन्तिजगतींगृहीतंकृष्णनामयैः ॥१८॥
तस्मान्मुनिवराःपुण्यंनातःपरतरंविदुः ॥ विष्णुप्रसादनिर्माल्यंभुक्त्वाधृत्वाचमस्तके ॥१९॥ विष्णुरेवभवेन्मर्त्योयमशोकविनाशनः ॥ अर्चनीयो
नमस्कार्योहरिरेवनसंशयः ॥२०॥ तस्मादनादिनिधनंविष्णुमात्मानमव्ययम् ॥ हरिंचैकंप्रपश्यध्वंपूजयध्वंतथैवहि ॥ २१ ॥ येसमानंप्रपश्यन्ति
हरिंवैदेवतान्तरम् ॥ तेयान्तिनरकान्घोरान्नतांस्तुगणयेद्धरिः ॥ २२ ॥ मूर्खंवापण्डितंवापिब्राह्मणंकेशवप्रियम् ॥ श्वपाकंवामोचयतिनारायणःस्वय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म्प्रभुः ॥ २३ ॥ नारायणात्परोनास्तिपापराशिदवानलः ॥ कृत्वापिपातकंघोरंकृष्णनाम्नाविमुच्यते ॥ २४ ॥ स्वयंनारायणोदेवःस्वनाम्निजगतां
गुरुः ॥ आत्मनोऽभ्यधिकांशक्तिंस्थापयामाससुव्रताः ॥ २५ ॥ अत्रयेविवदन्तेवैआयासलघुदर्शनात् ॥ फलानांगौरवाच्चापितेयान्तिनरकंबहु
॥ २६ ॥ तस्माद्धरौभक्तिमान्स्याद्धरिनामपरायणः ॥ पूजकंपृष्ठतोरक्षेन्नामिनंवक्षसिप्रभुः ॥ २७ ॥ हरिनाममहावज्रंपापपर्वतदारणे ॥ तस्यपादौ
तुसफलौतदर्थगतिशालिनौ ॥ २८ ॥ तावेवधन्यावाख्यातौयौतुपूजाकरौकरौ ॥ उत्तमाङ्गमुत्तमाङ्गंतद्धरौनम्रमेवयत् ॥ २९ ॥ साजिह्वायाहरिं
स्तौतितन्मनस्तत्पदानुगम् ॥ तानिलोमानिचोच्यन्तेयानितन्नाम्निचोत्थितिम् ॥ ३० ॥ कुर्वन्तितच्चनेत्राम्बुयदच्युतप्रसङ्गतः ॥ अहोलोकाअतित
रांदैवदोषेणवञ्चिताः ॥३१॥ नामोच्चारणमात्रेणमुक्तिदंनभजन्तिवै ॥ वञ्चितास्तेचकलुषाःस्त्रीणांसङ्गप्रसङ्गतः ॥ ३२ ॥ प्रतिष्ठन्तिचलोमानियेषांनो
कृष्णशब्दने ॥ तेमूर्खाह्यकृतात्मानःपुत्रशोकादिविह्वलाः ॥ ३३ ॥ रुदन्तिबहुलालापैर्नकृष्णाक्षरकीर्तने ॥ जिह्वांलब्ध्वापिलोकेऽस्मिन्कृष्णनामज
पेन्नहि ॥३४॥ लब्ध्वापिमुक्तिसोपानंहेलयैवच्यवन्तिते ॥ तस्माद्यत्नेनवैविष्णुंकर्मयोगेनमानवः ॥ ३५ ॥ कर्मयोगार्च्चितोविष्णुःप्रसीदत्येवनान्य
था ॥ तीर्थादप्यधिकंतीर्थंविष्णोर्भजनमुच्यते ॥ ३६ ॥ सर्वेषांखलुतीर्थानांस्नानपानावगाहनैः ॥ यत्फलंलभतेमर्त्यस्तत्फलंकृष्णसेवनात् ॥३७॥
यजन्तेकर्मयोगेनधन्याएवनराहरिम् ॥ तस्माद्भजध्वंमुनयःकृष्णंपरममङ्गलम् ॥ ३८ ॥ इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेविष्णुभक्तिप्रशंसनंनामप
ञ्चाशत्तमोध्यायः ॥ ५०॥ ऋषयऊचुः ॥ कर्मयोगःकथंसूतयेनचाराधितोहरिः ॥ प्रसीदतिमहाभागवदनोवदतांवर ॥ १ ॥ येनासौभगवानीशः
समाराध्योमुमुक्षुभिः ॥ तद्वदाखिललोकानांरक्षणंधर्मसङ्गतम् ॥ २ ॥ तंकर्मयोगंवदनःसूतमूर्तिमयस्तुयः ॥ इतिशुश्रूषवोविप्राभवदग्रेव्यवस्थिताः
॥ ३ ॥ सूतउवाच ॥ एवमेवपुरापृष्टोव्यासःसत्यवतीसुतः ॥ ऋषिभिरग्निसङ्काशैर्व्यासस्तानाहतच्छृणु ॥ ४ ॥ व्यासउवाच ॥ शृणुध्वमृषयःसर्वे
वक्ष्यमाणंसनातनम् ॥ कर्मयोगंब्राह्मणानामात्यन्तिकफलप्रदम् ॥ ५ ॥ आम्नायसिद्धमखिलंब्राह्मणार्थंप्रदर्शितम् ॥ ऋषीणांशृण्वतांपूर्वमनुराहप्रजा
पतिः ॥ ६ ॥ सर्वव्याधिहरंपुण्यमृषिसङ्घैर्निषेवितम् ॥ समाहितधियोयूयंशृणुध्वंगदतोमम ॥ ७ ॥ कृतोपनयनोवेदानधीयीतद्विजोत्तमः ॥ गर्भा
ष्टमेऽष्टमेवाऽब्देस्वसूत्रोक्तविधानतः ॥ ८ ॥ दण्डीचमेखलीसूत्रीकृष्णाजिनधरोमुनिः ॥ भिक्षाहारोगुरुहितोवीक्षमाणोगुरोर्मुखम् ॥ ९ ॥ कार्पासमुप
वीतार्थंनिर्मितंब्रह्मणापुरा ॥ ब्राह्मणानांत्रिवृत्सूत्रंकौशंवावस्त्रमेववा ॥ १० ॥ सदोपवीतीचैवस्यात्सदाबद्धशिखोद्विजः ॥ अन्यथायत्कृतंकर्मतद्भव
त्ययथाकृतम् ॥ ११ ॥ वसीताविकृतंवासःकार्पासंवाकषायकम् ॥ तदेवपरिधानीयंशुक्लंतान्तवमुत्तमम् ॥ १२ ॥ उत्तरंतुसमाम्नातंवासःकृष्णाजिनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुभम् ॥ अभावेगावयमपिरौरवंवाविधीयते ॥ १३ ॥ उद्धृत्यदक्षिणंबाहुंसव्यबाहौसमर्पितम् ॥ उपवीतंभवेन्नित्यंनिवीतंकण्ठसज्जने ॥ १४ ॥ सव्यबाहुंसमुद्धृत्यदक्षिणेतुधृतंद्विजाः ॥ प्राचीनावीतमित्युक्तंपित्र्येकर्मणियोजयेत् ॥ १५ ॥ अग्न्यगारेगवांगोष्ठेहोमेतप्येतथैवच ॥ स्वाध्यायेभोजनेनित्यंब्राह्मणानांचसन्निधौ ॥ १६ ॥ उपासनेगुरूणांचसन्ध्ययोःसाधुसङ्गमे ॥ उपवीतीभवेन्नित्यंविधिरेषसनातनः ॥ १७ ॥ मौञ्जींत्रिवृत्समांश्लिष्टांकुर्याद्विप्रस्यमेखलाम् ॥ मुञ्जाभावेकुशेनाहुर्ग्रन्थिनैकेनवात्रिभिः ॥१८॥ धारयेद्वैणवपालाशौदण्डौकेशान्तिकौद्विजः ॥ यज्ञार्हवृक्षजंवाथसौम्यमव्रणमेवच ॥ १९ ॥ सायंप्रातर्द्विजःसन्ध्यामुपासीतसमाहितः ॥ कामाल्लोभाद्भयान्मोहात्त्यक्त्वैनांपतितोभवेत् ॥ २० ॥ अग्निकार्यंततःकुर्यात्सायंप्रातःप्रसन्नधीः ॥ स्नात्वासन्तर्पयेद्देवानृषीन्पितृगणांस्तथा ॥ २१ ॥ देवताभ्यर्चनंकुर्यात्पुष्पैःपत्रैर्यवाम्बुभिः ॥ अभिवादनशीलःस्यान्नित्यंवृद्धेषुधर्मतः ॥ २२ ॥ असावहंभोनामेतिसम्यक्प्रणतिपूर्वकम् ॥ आयुरारोग्यसिद्ध्यर्थंतन्द्रादिपरिवर्जितः ॥ २३ ॥ आयुष्मान्भवसौम्येतिवाच्योविप्रोऽभिवादने ॥ आकारश्चास्यनाम्नोऽन्तेवाच्यःपूर्वाक्षरप्लुतः॥२४॥ योनवेत्त्यभिवादस्यविप्रःप्रत्यभिवादनम् ॥ नाभिवाद्यःसविदुषायथाशूद्रस्तथैवसः ॥ २५ ॥ व्यत्यस्तपाणिनाकार्यंपादसङ्ग्रहणंगुरोः ॥ सव्येनसव्यःस्प्रष्टव्योदक्षिणे नतुदक्षिणः ॥ २६ ॥ लौकिकंवैदिकंवापितथाध्यात्मिकमेववा ॥ अवाप्यप्रयतोज्ञानंतंपूर्वमभिवादयेत् ॥ २७ ॥ नोदकंधारयेद्भैक्ष्यंपुष्पाणिसमिधस्तथा ॥ एवंविधानिचान्यानिनदेवार्थेषुकर्मसु ॥ २८ ॥ ब्राह्मणंकुशलंपृच्छेत्क्षत्रबन्धुमनामयम् ॥ वैश्यंक्षेमंसमागम्यशूद्रमारोग्यमेवच ॥ २९ ॥ उपाध्यायःपिताज्येष्ठोभ्राताभ्राताचभीतितः ॥ मातुलःश्वशुरश्चैवमातामहपितामहौ ॥ ३० ॥ वर्णश्रेष्ठःपितृव्यश्चपुंसोऽत्रगुरवःस्मृताः ॥ मातामातामहीगुर्वीपितुर्मातुश्चसोदराः ॥ ३१ ॥ श्वश्रूःपितामहीज्येष्ठाधात्रीचगुरवःस्त्रियः ॥ ज्ञेयस्तुगुरुवर्गोऽयंमातृतःपितृतोद्विजाः ॥३२॥ अनुवर्तनमेतेषांमनोवाक्कायकर्मभिः ॥ गुरून्दृष्ट्वासमुत्तिष्ठेदभिवाद्यकृताञ्जलिः ॥ ३३ ॥ नैतैरुपविशेत्साद्धंविवदेन्नात्मकारणात् ॥ जीवितार्थमपिद्वेषाद्गुरुभिर्नैवभाषणम् ॥ ३४ ॥ उद्रिक्तोऽपिगुणैरन्यैर्गुरुद्वेषीपतत्यधः ॥ गुरूणामपिसर्वेषांपञ्चपूज्याविशेषतः ॥ ३५ ॥ तेषामाद्यास्त्रयःश्रेष्ठास्तेषांमातासुपूजिता ॥ योभावयतियासूतेयेनविद्योपदिश्यते ॥ ३६ ॥ ज्येष्ठोभ्राताचभर्ताचपञ्चैतेगुरवःस्मृताः ॥ आत्मनःसर्वयत्नेनप्राणत्यागेनवापुनः ॥ ३७ ॥ पूजनीयाविशेषेणपञ्चैतेभूतिमिच्छता ॥ यावत्पिताचमाताचद्वावेतौनिर्विकारिणौ ॥ ३८ ॥ तावत्सर्वंपरित्यज्यपुत्रःस्यात्तत्परायणः ॥ पितामाताचसुप्रीतौस्यातांपुत्रगुणैर्यदि ॥३९॥ सपुत्रःसकलंधर्मंप्राप्नुयात्तेनकर्मणा ॥ नास्तिमातृसमंदैवंनास्तिपितृसमोगुरुः ॥ ४० ॥ तयोःप्रत्युपकारोऽपिनकथञ्चनविद्यते ॥ तयोर्नित्यंप्रियंकुर्यात्कर्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णामनसागिरा ॥ ४१ ॥ नताभ्यामननुज्ञातोधर्ममन्यंसमाचरेत् ॥ वर्जयित्वामुक्तिफलंनित्यंनैमित्तिकंतथा ॥४२॥ धर्मसारःसमुद्दिष्टःप्रेत्यानन्तफ
लप्रदः ॥ सम्यगाराध्यवक्तारंविसृष्टस्तदनुज्ञया ॥४३॥ शिष्योविद्याफलंभुङ्क्तेप्रेत्यचापद्यतेदिवि ॥ योभ्रातरंपितृसमंज्येष्ठंमूढोऽवमन्यते ॥४४॥ तेन
दोषेणसम्प्रेत्यनिरयंघोरमृच्छति॥पुंसांवर्त्मनिसृष्टेनपूज्योभर्तातुसर्वदा ॥४५॥ अपिमातरिलोकेऽस्मिन्नुपकाराद्धिगौरवम्॥मातुलांश्चपितृव्यांश्चश्वशुरा
नृत्विजोगुरून् ॥ ४६ ॥ असावहमितिब्रूयात्प्रत्युत्थायाभिवादयेत् ॥ अवाच्योदीक्षितोनाम्नायवीयानपियोभवेत् ॥ ४७ ॥ भोभवत्पूर्वकंत्वेनमभि
भाषेतधर्मवित् ॥ अभिवाद्यश्चपूज्यश्चशिरसानम्यएवच ॥ ४८ ॥ ब्राह्मणक्षत्रियाद्यैश्चश्रीकामैःसादरंसदा ॥ नाभिवाद्याश्चविप्रेणक्षत्रियाद्याःकथं
चन ॥ ४९ ॥ ज्ञानकर्मगुणोपेतायद्यप्येतेबहुश्रुताः ॥ ब्राह्मणःसर्ववर्णानांस्वस्तिकुर्यादितिश्रुतिः ॥ ५० ॥ सवर्णेनसवर्णानांकार्यमेवाभिवादनम् ॥
गुरुरग्निर्द्विजातीनांवर्णानांब्राह्मणोगुरुः ॥ ५१ ॥ पतिरेकोगुरुःस्त्रीणांसर्वत्राभ्यागतोगुरुः ॥ विद्याकर्मवयोबन्धुर्वित्तंभवतिपञ्चमम् ॥ ५२ ॥ मान्य
स्थानानिपञ्चाहुःपूर्वंपूर्वंगुरूत्तरात॥पञ्चानांत्रिषुवर्णेषुभूयांसिबलवन्तिच ॥५३॥ यत्रस्युःसोऽत्रमानार्हःशूद्रोऽपिदशमींगतः॥पन्थादेयोब्राह्मणायस्त्रियै
राज्ञेविचक्षुषे ॥५४॥ वृद्धायभारभग्नायरोगिणेदुर्बलायच ॥ भिक्षामाहृत्यशिष्टानांगृहेभ्यःप्रयतोऽन्वहम् ॥ ५५ ॥ निवेद्यगुरवेऽश्नीयाद्वाग्यतस्तद
नुज्ञया ॥ भवत्पूर्वंचरेद्भैक्ष्यमुपवीतीद्विजोत्तमः ॥ ५६ ॥ भवन्मध्यंतुराजन्योवैश्यस्तुभवदुत्तरम् ॥ मातरंवास्वसारंवामातुर्वाभगिनींनिजाम्
॥५७॥ भिक्षेतभिक्षांप्रथमंयाचैनंनविमानयेत् ॥ सजातीयगृहेष्वेवसार्ववर्णिकमेववा ॥५८॥ भैक्ष्यस्याचरणंप्रोक्तंपतितादिविवर्जितम् ॥ वेदयज्ञैर
हीनानांप्रशस्तानांस्वकर्मसु ॥५९॥ ब्रह्मचार्य्याहरेद्भैक्ष्यंगृहेभ्यःप्रयतोऽन्वहम् ॥ गुरोःकुलेनभिक्षेतनज्ञातिकुलबन्धुषु ॥६०॥ अलाभेत्वन्यगेहानांपू
र्वंपूर्वंविवर्जयेत ॥ सर्ववाविचरेद्ग्रामंपूर्वोक्तानामसम्भवे ॥ ६१ ॥ नियम्यप्रयतोवाचंदिशस्त्वनवलोकयन् ॥ समाहृत्यतुभैक्ष्यान्नंयावदर्थममायया
॥६२॥ भुञ्जीतप्रयतोनित्यंवाग्यतोऽनन्यमानसः ॥ भैक्ष्येणवतयन्नित्यंनैवैकान्नोभवेद्व्रती ॥ ६३ ॥ भैक्ष्येणवर्त्तिनोवृत्तिरुपवाससमास्मृता ॥ पूजये
दशनंनित्यंमदाच्चैनमकुत्सयन् ॥६४॥ दृष्ट्वाहृष्येत्प्रसीदेच्चप्रतिनन्देच्चसर्वशः ॥ अनारोग्यमनायुष्यमस्वर्ग्यंचातिभोजनम् ॥ ६५ ॥ अपुण्यंलोकवि
द्विष्टंतस्मात्तत्परिवर्जयेत् ॥ प्राङ्मुखोऽन्नानिभुञ्जीतसूर्याभिमुखमेववा ॥६६॥ नाद्यादुदङ्मुखोनित्यंविधिरेषसनातनः ॥ प्रक्ष्याल्यपाणिपादौचभु
ञ्जानोद्विरुपस्पृशेत् ॥ ६७ ॥ शुद्धेदेशेसमासीनोभुक्त्वाचद्विरुपस्पृशेत् ॥ ६८ ॥ इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेकर्मयोगकथनंनामैकपञ्चाशत्तमो
ऽध्यायः ॥ ५१ ॥ व्यासउवाच ॥ भुक्त्वापीत्वाचसुप्त्वाचस्नात्वारथ्योपसर्पणे ॥ ओष्ठावलोमकौस्पृष्ट्वावासोविपरिधायच ॥ १ ॥ रेतोमूत्रपुरीषाणा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सुत्सर्गेऽनृतभाषणे ॥ष्ठीवित्वाऽध्ययनारम्भेकासश्वासागमेतथा ॥ २ ॥ चत्वरंवाश्मशानंवासमाक्रम्यद्विजोत्तमः॥सन्ध्ययोरुभयोस्तद्वदाचान्तोऽप्या
चमेत्पुनः ॥ ३ ॥ चण्डालम्लेच्छसम्भाषेस्त्रीशूद्रोच्छिष्टभाषणे ॥ उच्छिष्टंपुरुषंदृष्ट्वाभोज्यंचापितथाविधम् ॥ ४ ॥ आचामेदश्रुपातेवालोहितस्यतथै
वच ॥ भोजनेसन्ध्ययोःस्नात्वापीत्वामूत्रपुरीषयोः ॥५॥ आगतोवाचमेत्सुप्त्वासकृत्सकृदथान्यतः ॥ अग्नेर्गवामथालम्भेस्पृष्ट्वाप्रयतमेववा ॥ ६ ॥
स्त्रीणामथात्मनःस्पर्शेनीलींवापरिधायच ॥ उपस्पृशेज्जलंवार्द्रंतृणंवाभूमिमेवच ॥ ७ ॥ केशानांचात्मनःस्पर्शेवाससःस्खलितस्यच ॥ अनुष्णाभिर
केशाभिरदुष्टाभिश्चधर्मतः ॥ ८ ॥ शौचेप्सुःसर्वदाचामेदासीनःप्रागुदङ्मुखः ॥ शिरःप्रावृत्यकण्ठंवामुक्तकेशशिखोऽपिवा ॥ ९ ॥ अकृत्वापादयोः
शौचंमार्गतोनशुचिर्भवेत् ॥ सोपानत्कोजलस्थोवानोष्णीषीचाचमेद्बुधः ॥ १० ॥ नचैववर्षधाराभिर्नतिष्ठन्नुद्धृतोदकैः ॥ नैकहस्तार्पितजलैर्विनासू
त्रेणवापुनः ॥ ११ ॥ नपादुकासनस्थोवाबहिर्जानुरथापिवा ॥ नजलपन्नहसन्प्रेक्षञ्छयानस्तल्पएवच ॥ १२ ॥ नाविक्षिताभिःफेनाद्यैरुपेता
भिरथापिवा ॥ शूद्राशुचिकरोन्मुक्तैर्नक्षाराभिस्तथैवच ॥ १३ ॥ नचैवाङ्गुलिभिःशब्दंनकुर्यान्नान्यमानसः ॥ नवर्णरसदुष्टाभिर्नचैवप्रदरोद
कैः ॥ १४ ॥ नपाणिक्षुभिताभिर्वानबहिर्गन्धएववा ॥ हृद्गाभिःपूज्यतेविप्रःकण्ठ्याभिःक्षत्रियःशुचिः ॥ १५ ॥ प्राशिताभिस्तथावैश्यः
स्त्रीशूद्रौस्पर्शतोऽन्ततः ॥ अङ्गुष्ठमूलान्तरतोरेखायांब्राह्ममुच्यते ॥ १६ ॥ अन्तराङ्गुष्ठदेशिन्योःपितॄणांतीर्थमुच्यते ॥ कनिष्ठामूलतःपश्चा
त्प्राजापत्यंप्रचक्षते ॥ १७ ॥ अङ्गुल्यग्रंस्मृतंदैवंतद्देवार्षंप्रकीर्तितम् ॥ मूलेनदैवमार्षंस्यादाग्नेयंमध्यतःस्मृतम् ॥ १८ ॥ तदेवसौमिकंती
र्थमेतज्ज्ञात्वानमुह्यति ॥ ब्राह्मेणैवतुतीर्थेनद्विजोनित्यमुपस्पृशेत् ॥ १९ ॥ होमयेद्वाथदैवेननतुपित्र्येणवैद्विजाः ॥ त्रिःप्राश्नीयादपःपूर्वंब्राह्मे
णप्रयतस्ततः ॥ २० ॥ संमृज्याङ्गुष्ठमूलेनमुखंवैसमुपस्पृशेत् ॥ अङ्गुष्ठानामिकाभ्यांतुस्पृशेन्नेत्रद्वयंततः ॥ २१ ॥ तर्जन्यङ्गुष्ठयोगेनस्पृशेन्नासा
पुटद्वयम् ॥ कनिष्ठाङ्गुष्ठयोगेनश्रवणेसमुपस्पृशेत् ॥२२॥ सर्वासामथयोगेनहृदयंतुतलेनवा ॥ स्पृशेद्वैशिरसस्तद्वदङ्गुष्ठेनांसकद्वयम् ॥ २३ ॥ त्रिः
प्राश्नीयाद्यदम्भस्तुप्रीतास्तेनास्यदेवताः ॥ ब्रह्माविष्णुर्महेशश्चभवन्तीत्यनुशुश्रुम ॥ २४ ॥ गङ्गाचयमुनाचैवप्रीयेतेपरिमार्जनात् ॥ संस्पृष्टयोर्लोच
नयोःप्रीयेतेशशिभास्करौ ॥ २५ ॥ नासत्यदस्रौप्रीयेतेस्पृशेन्नासापुटद्वयम् ॥ कर्णयोःस्पृष्टयोस्तद्वत्प्रीयेतेचानिलानलौ ॥ २६ ॥ संस्पृष्टेहृदयेचा
स्यप्रीयन्तेसर्वदेवताः॥मूर्ध्निसंस्पर्शनादेकःप्रीतःसपुरुषोभवेत् ॥२७॥ नोच्छिष्टंकुर्वतेवक्त्रेविप्रुषोऽङ्गंलगन्तियाः ॥ दन्तवद्दन्तलग्नेषुजिह्वास्पर्शेऽशुचि
र्भवेत् ॥२८॥ स्पृशन्तिबिन्दवःपादौयआचामयतःपरान् ॥ भूमिपांसुसमाज्ञेयानतैरस्पृश्यताभवेत् ॥ २९ ॥ मधुपर्केचसोमेचताम्बूलस्यचभक्षणे ॥

CC-0. In Public Domain. Digitization by eGangotri

फलमूलेचेक्षुदण्डेनदोषंप्राहवैमनुः ॥ ३० ॥ प्रचरंश्चान्नपानेषुद्रव्यहस्तोभवेन्नरः ॥ भूमौनिक्षिप्यतद्रव्यमाचम्याभ्युक्षयेत्तुतत् ॥ ३१ ॥ तैजसंवैस
मादाययद्युच्छिष्टोभवेद्द्विजः ॥भूमौनिक्षिप्यतद्रव्यमाचम्याभ्युक्षयेत्तुतत् ॥३२॥ यद्यद्रव्यंसमादायभवेदुच्छेषणान्वितः ॥ अनिधायैवतद्रव्यंभूमौत्व
शुचितामियात् ॥३३॥ वस्त्रादिषुविकल्पःस्यात्तत्संस्पृश्याचमेदिह ॥अरण्येनिर्जनेरात्रौचौरव्याघ्राकुलेपथि ॥३४॥ कृत्वामूत्रंपुरीषंवाद्रव्यहस्तोनदु
ष्यति ॥ निधायदक्षिणेकर्णेब्रह्मसूत्रमुदङ्मुखः ॥ ३५ ॥ अह्निकुर्याच्छकृन्मूत्रंरात्रौचेद्दक्षिणामुखः ॥ अन्तर्धायमहींकाष्ठैःपत्रैर्लोष्टतृणेनवा ॥३६॥
प्रावृत्यचशिरःकुर्याद्विण्मूत्रस्यविसर्जनम् ॥ छायाकूपनदीगोष्ठचैत्याम्भःपथिभस्मसु ॥ ३७ ॥ अग्नौचैवश्मशानेचविण्मूत्रंनसमाचरेत् ॥ नगोमये
नकाष्ठेवामहावृक्षेऽथशाद्वले ॥ ३८ ॥ नतिष्ठन्नचनिर्वासानचपर्वतमण्डले ॥ नजीर्णदेवायतनेवल्मीकेनकदाचन ॥ ३९ ॥ नससत्त्वेषुगर्तेषुनगच्छन्न
समाचरेत् ॥ तुषाङ्गारकपालेषुराजमार्गेतथैवच ॥४०॥ नक्षेत्रेनबिलेवापिनतीर्थेनचतुष्पथे ॥ नोद्यानेऽपांसमीपेवानोषरेनगराशये ॥४१॥ नसोपा
नत्पादुकोवाछत्रीवानान्तरिक्षके ॥ नचैवाभिमुखःस्त्रीणांगुरुब्राह्मणयोर्गवाम् ॥४२॥ नदेवदेवालययोरपामपिकदाचन ॥ नज्योतींषिनिरीक्षन्वानवा
प्रतिमुखोऽथवा ॥ ४३ ॥ प्रत्यादित्यंप्रत्यनलंप्रतिसोमंतथैवच ॥ आहृत्यमृत्तिकांकूलाल्लेपगन्धापकर्षणीम् ॥ ४४ ॥ कुर्यादतन्द्रितःशौचंविशुद्धैरु
द्धृतोदकैः ॥ नाहरेन्मृत्तिकांविप्रःपांसुलांनसकर्दमाम् ॥ ४५ ॥ नमार्गान्नोषराद्देशाच्छौचशिष्टांपरस्यच ॥ नदेवायतनात्कूपाद्ग्रामान्नचजलात्तथा
॥ ४६ ॥ उपस्पृशेत्ततोनित्यंपूर्वोक्तेनविधानतः ॥ ४७ ॥ इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेकर्मयोगकथनेद्विपञ्चाशत्तमोऽध्यायः ॥ ५२ ॥ व्यास
उवाच ॥ एवंदण्डादिभिर्युक्तःशौचाचारसमन्वितः ॥ आहूतोऽध्ययनंकुर्याद्वीक्षमाणोगुरोर्मुखम् ॥ १ ॥ नित्यमुद्यतपाणिःस्यात्साध्वाचारःसुसंय
तः ॥ आस्यतामितिचोक्तःसन्नासीताभिमुखंगुरोः ॥ २ ॥ प्रतिश्रवणसम्भाषेशयानोनसमाचरेत् ॥ आसीनोनचभुञ्जानोनतिष्ठन्नपराङ्मुखः ॥३॥
नीचैःशय्यासनंचास्यसर्वदागुरुसन्निधौ ॥ गुरोस्तुचक्षुर्विषयेनयथेष्टासनोभवेत् ॥ ४ ॥ नोदाहरेदस्यनामपरोक्षमपिकेवलम् ॥ नचैवास्यानुकुर्वीत
गतिभाषणचेष्टितम् ॥ ५ ॥ गुरोर्यत्रपरीवादोनिन्दावापिप्रवर्तते ॥ कर्णौतत्रपिधातव्यौगन्तव्यंवाततोऽन्यतः ॥ ६ ॥ दूरस्थोनार्चयेदेनंनक्रुद्धोनान्ति
केस्त्रियः ॥ नचवास्योत्तरंब्रूयात्स्थितोनासीतसन्निधौ ॥ ७ ॥ उदकुम्भंकुशान्पुष्पंसमिधोऽस्याहरेत्सदा ॥ मार्जनंलेपनंनित्यमङ्गानांवैसमाच
रेत् ॥ ८ ॥ नास्यनिर्माल्यशयनंपादुकोपानहावपि ॥ आक्रामेदासनंचास्यच्छायादीन्वाकदाचन ॥ ९ ॥ साधयेद्दन्तकाष्ठादीँल्लँब्धंचास्मैनिवेद
येत् ॥ अनापृच्छ्यनगन्तव्यंभवेत्प्रियहितेरतः ॥१०॥ नपादौसारयेदस्यसन्निधानेकदाचन॥जृम्भितंहसितंचैवकण्ठप्रावरणंतथा ॥११॥ वर्जयेत्सन्नि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धौनित्यमङ्गस्फोटनमेवच ॥ यथाकालमधीयीतयावन्नविमनागुरुः ॥ १२ ॥ आसीनोऽधोगुरोःपार्श्वेसेवांचसुसमाहितः ॥ आसनेशयनेयानेनैवति
ष्ठेत्कदाचन ॥ १३ ॥ धावन्तमनुधावेतगच्छन्तमनुगच्छति ॥ गोऽश्वोष्ट्रयानप्रासादेतथाऽधोविष्टरेषुच ॥ १४ ॥ आसीतगुरुणासार्द्धंशिलाफलक
नौषुच ॥ जितेन्द्रियःस्यात्सततंवश्यात्माऽक्रोधनःशुचिः ॥ १५ ॥ प्रयुञ्जीतसदावाचंमधुरांहितकारिणीम् ॥ गन्धमाल्यंरसंकल्पंशुक्तिप्राणिविहिंस
नम् ॥ १६ ॥ अभ्यञ्जनाञ्जनेपानंछत्रधारणमेवच ॥ कामंलोभंभयंनिद्रांगीतवादित्रनर्तनम् ॥ १७ ॥ आतर्जनंपरीवादंस्त्रीप्रेक्षालम्भनंतथा ॥ परो
पघातंपैशुन्यंप्रयत्नेनविवर्जयेत ॥ १८ ॥ उदकुम्भंसुमनसोगोशकृन्मृत्तिकाकुशान् ॥ आहरेद्यावदन्नानिभैक्ष्यंचाहरहश्चरेत् ॥ १९ ॥ घृतंचलवणं
सर्ववर्ज्यंपर्युषितंचयत् ॥ अनृत्यदर्शीसततंभवेद्गीतादिनिस्पृहः ॥ २० ॥ नादित्यंवैसमीहेतनाचरेद्दन्तधावनम् ॥ एकान्तमशुचिस्त्रीभिःशूद्राद्यैरभि
भाषणम् ॥ २१ ॥ गुरूच्छिष्टंभेषजार्थंप्रयुञ्जीतनकामतः ॥ मलापकर्षणंस्नानंनाचरेद्धिकदाचन॥२२॥नकुर्यान्मानसंविप्रोगुरोस्त्यागेकथञ्चन॥मोहा
द्वायदिवालोभात्त्यक्त्वातुपतितोभवेत् ॥२३ ॥लौकिकंवैदिकंवापितथाऽऽध्यात्मिकमेववा ॥ आददीतयतोज्ञानंतंनद्रुह्येत्कदाचन॥२४॥गुरोरप्यवलि
प्तस्यकार्याकार्यमजानतः ॥ उत्पथंप्रतिपन्नस्यमनुस्त्यागमथाब्रवीत्॥२५॥गुरोर्गुरौसन्निहितेगुरुवद्वृत्तिमाचरेत् ॥ नत्वाऽभिसृष्टोगुरुणास्वान्गुरूनभि
वादयेत् ॥२६॥ विद्यागुरुष्वेतदेवनित्यावृत्तिषुयोगिषु॥प्रतिषेधत्सुचाधर्माद्धितंचोपदिशत्सुच॥२७॥ श्रेयस्सुगुरुवद्वृत्तिंनित्यमेवसमाचरेत्॥गुरुपुत्रेषु
दारेषुगुरोश्चैवस्वबन्धुषु ॥ २८ ॥ बालःसंमानयेन्मान्याञ्छिष्योवायज्ञकर्मणि ॥ अध्यापयन्गुरोःसूनुर्गुरुवन्मानमर्हति ॥ २९ ॥ उत्सादनंचगा
त्राणांस्नापनोच्छिष्टभोजने ॥ नकुर्याद्गुरुपुत्रस्यपादयोःशौचमेवच ॥ ३० ॥ गुरुवत्प्रतिपूज्याश्चसवर्णागुरुयोषितः ॥ असवर्णाश्चसम्पूज्याःप्रत्यु
त्थानाभिवादनैः ॥ ३१ ॥ अभ्यञ्जनंस्नापनंचगात्रोत्सादनमेवच ॥ गुरुपत्न्यानकार्याणिकेशानांचप्रसाधनम् ॥ ३२ ॥ गुरुपत्नीतुयुवतीनाभि
वाद्यातुपादयोः ॥ कुर्वीतवन्दनंभूम्यामसावहमितिब्रुवन् ॥ ३३॥ विप्रोष्यपादग्रहणपूर्वकंचाभिवादनम् ॥ गुरुदारेषुकुर्वीतसतांधर्ममनुस्मरन्॥३४॥
मातृष्वसामातुलानीश्वश्रूश्चाथापितृष्वसा ॥ सम्पूज्यागुरुपत्नीवत्समास्तागुरुभार्यया ॥ ३५ ॥ भ्रातृभार्याश्चसङ्ग्राह्यासवर्णाहन्यहन्यपि ॥ विप्रो
ष्यतूपसङ्ग्राह्याज्ञातिसम्बन्धियोषितः ॥ ३६ ॥ पितुर्भगिन्यामातुश्चज्यायस्यांचस्वसर्यपि ॥ मातृवद्वृत्तिमातिष्ठेन्माताताभ्योगरीयसी ॥ ३७ ॥
एवमाचारसम्पन्नमात्मवन्तमदाम्भिकम् ॥ वेदमध्यापयेद्धर्मंपुराणाङ्गानिनित्यशः ॥ ३८ ॥ संवत्सरोषितेशिष्येगुरुर्ज्ञानमनिर्दिशन् ॥ हरतेदुष्कृ
तंतस्यशिष्यस्यवसतोगुरुः ॥ ३९ ॥ आचार्यपुत्रःशुश्रूषुर्ज्ञानदोधार्मिकःशुचिः ॥ शक्तोऽन्नदोऽम्बुदःसाधुरध्याप्यादशधर्मतः ॥ ४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृतकण्ठस्तथाऽद्रोहीमेधावीगुरुकृन्नरः ॥ आप्तःप्रियोऽथविधिवत्षडध्याप्याद्विजातयः ॥ ४१ ॥ एतेषुब्राह्मणेदानमन्यत्रतुयथोचितम् ॥ आचम्यसं
यतोनित्यमधीयीतउदङ्मुखः ॥ ४२ ॥ उपसङ्गृह्यतत्पादौवीक्षमाणोगुरोर्मुखम् ॥ अधीष्वभोइतिब्रूयाद्विरामोऽस्त्वितिचाऽऽऽरमेत् ॥४३॥ प्राक्कू
लान्पर्युपासीतपवित्रैश्चैवपावकः ॥ प्राणायामैस्त्रिभिःपूतस्ततओङ्कारमर्हति ॥४४॥ ब्राह्मणःप्रणवंकुर्यादन्तेऽपिविधिवद्द्विजाः ॥ कुर्यादध्यापनंनित्यं
सब्रह्माञ्जलिपूर्वतः ॥ ४५ ॥ सर्वेषामेवभूतानांवेदश्चक्षुःसनातनम् ॥ अधीयीताप्ययंनित्यंब्राह्मण्याद्धीयतेऽन्यथा ॥ ४६ ॥ अधीयीतऋचोनित्यंक्षी
राहुत्यासदेवताः ॥ प्रीणातितर्पयन्कालंकामैर्हूताःसदैवताः ॥ ४७ ॥ यजूंष्यधीतेनियतंदध्नाप्रीणातिदेवताः ॥ सामान्यधीतेप्रीणातिघृताहुतिभिर
न्वहम् ॥ ४८ ॥ अथर्वाङ्गिरसोनित्यंमध्वाप्रीणातिदेवताः ॥ धर्माङ्गानिपुराणानिमांसैस्तर्पयतेसुरान् ॥ ४९ ॥ प्रातश्चसायंप्रयतोनैत्यकंविधिमाश्रि
तः ॥ गायत्रींसमधीयीतगत्वारण्यंसमाहितः ॥ ५० ॥ सहस्रपरमांदेवींशतमध्यांदशावराम् ॥ गायत्रींवैजपेन्नित्यंजपयज्ञःप्रकीर्तितः ॥ ५१ ॥ गाय
त्रींचैववेदांश्चतुलयाऽतोलयत्प्रभुः ॥ एकतश्चतुरोवेदागायत्रीचतथैकतः ॥५२॥ ओङ्कारमादितःकृत्वाव्याहृतीस्तदनन्तरम्॥ततोऽधीयीतसावित्रीमे
काग्रःश्रद्धयान्वितः ॥ ५३ ॥ पुराकल्पेसमुत्पन्नाभूर्भुवःस्वःसनातनाः ॥ महाव्याहृतयस्तिस्रःसर्वाशुभनिबर्हणाः ॥ ५४ ॥ प्रधानंपुरुषःकालोविष्णु
ब्रह्ममहेश्वराः ॥ सत्वंरजस्तमस्तिस्रःक्रमाद्व्याहृतयःस्मृताः ॥ ५५ ॥ ॐकारस्तत्परंब्रह्मसावित्रीस्यात्तदुत्तरम् ॥ एषमन्त्रोमहायोगःसारात्सारउदाहृ
तः ॥ ५६ ॥ योऽधीतेऽहन्यहन्येतांगायत्रींवेदमातरम् ॥ विज्ञायार्थंब्रह्मचारीसयातिपरमांगतिम् ॥ ५७ ॥ गायत्रीवेदजननीगायत्रीलोकपावनी ॥
गायत्र्यानपरंजप्यमेतद्विज्ञायमुच्यते ॥ ५८ ॥ श्रावणस्यतुमासस्यपौर्णमास्यांद्विजोत्तमाः ॥ आषाढ्यांप्रोष्ठपद्यांवावेदोपाकरणंस्मृतम् ॥ ५९ ॥
यत्सूर्ययाम्यगमनंमासान्विप्रोऽर्द्धपञ्चमान् ॥ अधीयीतशुचौदेशेब्रह्मचारीसमाहितः ॥६०॥ पुष्येतुच्छन्दसांकुर्याद्बहिरुत्सर्जनंद्विजः ॥ मासिशुक्ल
स्यवाप्राप्तेपूर्वाह्णेप्रथमेऽहनि ॥६१॥ छन्दांसिचद्विजोऽभ्यस्येच्छुक्लपक्षेतुवैद्विजः॥वेदाङ्गानिपुराणानिकृष्णपक्षेषुमानवः ॥६२॥ इमान्नित्यमनध्याया
नधीयानोविवर्जयेत् ॥ अध्यापनंचकुर्वाणोऽभ्यस्यन्नपिप्रयत्नतः ॥ ६३ ॥ कर्णश्रवेऽनिलेरात्रौदिवापांसुसमूहने ॥ विद्युत्स्तनितवर्षेषुमहोल्कानांच
सम्प्लुवे ॥ ६४ ॥ अकालिकमनध्यायमेतेष्वाहप्रजापतिः ॥ एतानभ्युदितान्विद्याद्यदाप्रादुष्कृताग्निषु ॥६५॥ तदाविद्यादनध्यायमनृतौचाभ्रदर्शने ॥
निर्घातेभूमिचलनेज्योतिषांचोपसर्जने ॥६६॥ एतानाकालिकान्विद्यादनध्यायानृतावपि ॥ प्रादुष्कृतेष्वग्निषुचविद्युत्स्तनितनिस्वने ॥६७॥ सज्यो
तिःस्यादनध्यायःशेषेरात्रौयथादिवा ॥ नित्यानध्यायएवस्याद्ग्रामेषुनगरेषुच ॥ ६८ ॥ धर्मनैपुण्यकामानांपूतिगन्धंचनित्यशः ॥ अन्तःशवगतेग्रा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मेवृपलस्यचसन्निधौ ॥६९॥ अनध्यायोरुद्यमानेसमयेजलदस्यच ॥ उदकेचार्धरात्रेचविण्मूत्रंचविसर्जयन् ॥७०॥ उच्छिष्टःश्राद्धभुक्चैवमनसापिन
चिन्तयेत्॥प्रतिगृह्यद्विजोविद्वानेकोद्दिष्टस्यवेतनम्॥७१॥त्र्यहंनकारयेद्ब्रह्मराज्ञोराहोश्चसूतके॥यावदेकान्ननिष्ठास्यात्स्नेहालोपश्चतिष्ठति॥७२॥विप्रस्य
विदुषोदेहेतावद्ब्रह्मनकीर्तयेत्॥शयानःप्रौढपादश्चकृत्वाचैवावसक्थिकाम् ॥७३॥ नाधीयीतामिषंजग्ध्वाशूद्रश्राद्धान्नमेवच ॥ नीहारेबाणशब्देचसन्ध्य
योरुभयोरपि ॥७४॥ अमावास्याचतुर्दश्योःपौर्णमास्यष्टमीषुच ॥ उपाकर्मणिचोत्सर्गेत्रिरात्रंक्षपणंस्मृतम् ॥७५॥ अष्टकासुअहोरात्रमृत्वन्तासुचरात्रि
षु ॥ मार्गशीर्षेतथापौषेमाघमासेतथैवच ॥७६॥ तिस्रोऽष्टकाःसमाख्याताःकृष्णपक्षेषुसूरिभिः ॥ श्लेष्मातकस्यच्छायायांशाल्मलेर्मधुकस्यच ॥७७॥
कदाचिदपिनाध्येयंकोविदारकपित्थयोः ॥ समानविद्येचमृतेतथासब्रह्मचारिणि ॥७८॥ आचार्येसंस्थितेचापित्रिरात्रंक्षपणंस्मृतम् ॥ छिद्राण्येतानिवि
प्राणामनध्यायाःप्रकीर्त्तिताः ॥ ७९ ॥ हिंसन्तिराक्षसास्तेषुतस्मादेतान्विवर्जयेत् ॥ नैत्यकेनास्त्यनध्यायःसन्ध्योपासनएवच ॥ ८० ॥ उपा
कर्मणिचोत्सर्गेहोममध्येतथैवच ॥ एकामृचमथैकंवायजुःसामानिवापुनः ॥ ८१ ॥ नाष्टकाद्यास्वधीयीतमारुतेचाभिधावति ॥ अनध्यायस्तु
नाङ्गेषुनेतिहासपुराणयोः ॥ ८२ ॥ नधर्मशास्त्रेष्वन्येषुसर्वाण्येतानिवर्जयेत् ॥ एषधर्मःसमासेनकीर्तितोब्रह्मचारिणः ॥ ८३ ॥ ब्रह्मणाऽभिहितः
पूर्वमृषीणांभावितात्मनाम् ॥ योऽन्यत्रकुरुतेयत्नमनधीत्यश्रुतिंद्विजः ॥ ८४ ॥ ससंमूढोनसम्भाष्योवेदबाह्योद्विजातिभिः ॥ नवेदपाठमात्रेणसन्तु
ष्टोवैभवेद्विजः ॥८५॥ पाठमात्रावसानस्तुपङ्केगौरिवसीदति ॥ योऽधीत्यविधिवद्वेदंवेदार्थंनविचारयेत् ॥ ८६ ॥ ससंमूढःशूद्रकल्पःपात्रतांनप्रपद्य
ते ॥ यदित्वात्यन्तिकंवासंकर्तुमिच्छतिवैगुरौ ॥ ८७ ॥ युक्तःपरिचरेदेनमाशरीरविमोक्षणम् ॥ गत्वावनंचविधिवज्जुहुयाज्जातवेदसम् ॥ ८८ ॥
अधीयीततथानित्यंब्रह्मनिष्ठःसमाहितः ॥ सावित्रींशतरुद्रीयंवेदान्तांश्वविशेषतः ॥ अभ्यसेत्सततंयुक्तोभिक्षाशनपरायणः ॥ ८९ ॥ एतद्विधानं
परंपुराणंवेदागमेसम्यगिहोदितंवः ॥ पुरामहर्षिप्रवराभिपृष्टःस्वायम्भुवोयन्मनुराहदेवः ॥ ९० ॥ इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेकर्मयोगकथनं
नामत्रिपञ्चाशत्तमोऽध्यायः ॥५३॥ व्यासउवाच ॥ वेदंवेदौतथावेदान्वेदाङ्गानितथाद्विजाः ॥ अधीत्यचाधिगम्यार्थंततःस्नायाद्विजोत्तमः ॥ १ ॥
गुरवेतुधनंदत्त्वास्नायीततदनुज्ञया ॥ तीर्णव्रतोऽथयुक्तात्माशक्तोवास्नातुमर्हति ॥ २ ॥ वैणवींधारयेद्यष्टिमन्तर्वासस्तथोत्तरम् ॥ यज्ञोपवीतद्वि
तयंसोदकंचकमण्डलुम् ॥ ३ ॥ छत्रंचोष्णीषममलंपादुकेचाप्युपानहौ ॥ रौक्मेचकुण्डलेधार्येकृत्तकेशनखःशुचिः ॥ ४ ॥ अन्यत्रकाञ्चनाद्वि
प्रोनरक्तांबिभृयात्स्रजम् ॥ शुक्लाम्बरधरोनित्यंसुगन्धःप्रियदर्शनः ॥ ५ ॥ नजीर्णमलवद्वासाभवेद्वैविभवेसति ॥ नरक्तमुल्बणंचान्यधृतंवासोनकु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ण्डलम् ॥ ६ ॥ नोपानहौस्रजंचाथपादुकेचप्रयोजयेत् ॥ उपवीतमलङ्कारंदर्भान्कृष्णाजिनंतथा ॥ ७ ॥ नापसव्यंपरीदध्याद्वासोनविकृतंवसेत् ॥
आहरेद्विधिवद्दारान्सदृशानात्मनःशुभान् ॥ ८ ॥ रूपलक्षणसंयुक्तान्योनिदोषविवर्जितान् ॥ असपिण्डांचवैमातुरसमानार्षगोत्रजाम् ॥ ९ ॥
आहरेद्ब्राह्मणोभार्यांशीलशौचसमन्विताम् ॥ ऋतुकालाभिगामीस्याद्यावत्पुत्रोऽभिजायत ॥ १० ॥ वर्जयेत्प्रतिषिद्धानिप्रयत्नेनदिनानितु ॥ षष्ठ्य
ष्टमीपञ्चदशीर्द्वादशींचचतुर्दशीम् ॥ ११ ॥ ब्रह्मचारीभवेन्नित्यंतद्वज्जन्मत्रयाहनि ॥ आदधीतविवाहाग्निंजुहुयाज्जातवेदसम् ॥१२॥ एतानिस्नातको
नित्यंपावनानिचपावयेत् ॥ वेदोदितंस्वकंकर्मनित्यंतुकुर्यादतन्द्रितः ॥ १३ ॥ अकुर्वाणःपतत्याशुनरकानतिभीषणान् ॥ अभ्यसेत्प्रयतोवेदंम
हायज्ञान्नहापयेत ॥ १४ ॥ कुर्याद्गृह्याणिकार्याणिसन्ध्योपासनमेवच ॥ सख्यंसमाधिकैःकुर्यादुपेयादीश्वरंसदा ॥ १५ ॥ दैवतान्यभिगच्छेतकुर्या
द्भार्याभिपोषणम् ॥ नधर्मंख्यापयेद्विद्वान्नपापंगूहयेदपि ॥ १६ ॥ कुर्वीतात्महितंनित्यंसर्वभूतानुकम्पकः ॥ वयसःकर्मणोऽर्थस्यश्रुतस्याभिजनस्य
च ॥ १७ ॥ देशवाग्बुद्धिसारूप्यमाचरन्विचरेत्सदा ॥ श्रुतिस्मृत्युदितंसम्यक्साधुभिर्यश्चसेवितः ॥ १८ ॥ तमाचारंनिषेवेतनेहेतान्यत्रकर्हिचि
त् ॥ येनास्यपितरोयातायेनयाताःपितामहाः ॥ १९ ॥ तेनयायात्सतांमार्गतेनगच्छन्नदुष्यति ॥ नित्यंस्वाध्यायशीलःस्यान्नित्यंयज्ञोपवीतवान्
॥ २० ॥ सत्यवादीजितक्रोधोलोभमोहविवर्जितः ॥ सावित्रीजापनिरतःश्राद्धकृन्मुच्यतेगृही ॥ २१ ॥ मातापित्रोर्हितयुक्तोब्राह्मणस्यहितेरतः ॥
दातायज्वादेवभक्तोब्रह्मलोकेमहीयते ॥ २२ ॥ त्रिवर्गसेवीसततंदेवानांचसमर्चनम् ॥ कुर्यादहरहर्नित्यंनमस्येत्प्रयतःसुरान् ॥ २३ ॥ विभागशीलः
सततंक्षमायुक्तोदयालुकः ॥ गृहस्थस्तुसमाख्यातोनगृहेणगृहीभवेत् ॥ २४ ॥ क्षमादयाचविज्ञानंसत्यंचैवदमःशमः ॥ अध्यात्मनित्यताज्ञानमेतद्ब्रा
ह्मणलक्षणम् ॥ २५ ॥ एतस्मान्नप्रमाद्येतविशेषेणद्विजोत्तमः ॥ यथाशक्तिचरन्धर्मंनिन्दितानिविवर्जयेत् ॥ २६ ॥ विधूयमोहकलिलंलब्ध्वायो
गमनुत्तमम् ॥ गृहस्थोमुच्यतेबन्धान्नात्रकार्याविचारणा ॥२७॥ विगर्हितजयक्षेपहिंसाबन्धवधात्मनाम् ॥ अन्यमन्युसमुत्थानांदोषाणांमर्षणंक्षमा
॥२८॥ स्वदुःखेष्वेवकारुण्यंपरदुःखेषुसौहृदम् ॥ दयेतिमुनयःप्राहुःसाक्षाद्धर्मस्यसाधनम् ॥२९॥ चतुर्दशानांविद्यानांधारणाहिपरार्थतः ॥ विज्ञान
मितितद्विद्याद्येनधर्मोविवर्धते ॥ ३० ॥ अधीत्यविधिवद्विद्यामर्थंचैवोपलभ्यते ॥ धर्मकार्याणिकुर्वीतह्येतद्विज्ञानमुच्यते ॥ ३१ ॥ सत्येनलोकं
जयतिसत्यंतत्परंपदम् ॥ यथाभूताप्रमादंतुसत्यमाहुर्मनीषिणः ॥ ३२ ॥ दमःशरीरोपरतिःशमःप्रज्ञाप्रसादतः ॥ अध्यात्ममक्षरंविद्यायत्रगत्वान
शोचति ॥ ३३ ॥ ययासदेवोभगवान्विद्ययाविद्यतेपरः ॥ साक्षादेवहृषीकेशस्तज्ज्ञानमितिकीर्तितम् ॥ ३४ ॥ तन्निष्ठस्तत्परोविद्वान्नित्यमक्रोधनः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुचिः ॥ महायज्ञपरोविप्रोलभतेतदनुत्तमम् ॥ ३५ ॥ धर्मस्यायतनयत्नाच्छरीरंपरिपालयेत् ॥ नहिदेहंविनाविष्णुःपुरुषैर्विद्यतेपरः ॥३६॥ नित्यं धर्मार्थकामेषुयुज्येतनियतोद्विजः॥नधर्मवर्जितंकाममर्थंवामनसास्मरेत् ॥३७॥सीदन्नपिहिधर्मेणनत्वधर्मंसमाचारेत्॥धर्मोहिभगवान्देवोगतिःसर्वेषु जन्तुषु ॥३८॥ भूतानांप्रियकारीस्यान्नपरद्रोहकर्मधीः ॥ नवेददेवतानिन्दांकुर्यात्तैश्चनसंवसेत् ॥३९॥ यस्त्विमंनियतोमर्त्योधर्माध्यायंपठेच्छुचिः ॥ अध्यापयेच्छावयेद्वाब्रह्मलोकेमहीयते ॥ ४० ॥ इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेचतुष्पञ्चाशत्तमोऽध्यायः ॥ ५४ ॥ व्यासउवाच ॥ नहिंस्यात्सर्वभूतानिनानृतंवावदेत्कचित् ॥ नाहितंनाप्रियंवाच्यंनस्तेनःस्यात्कदाचन॥ १ ॥ तृणंवायदिवाशाकंमृदंवाजलमेवच ॥ परस्यापहरञ्जन्तुर्नरकंप्रतिपद्यते ॥ २ ॥ नराज्ञःप्रतिगृह्णीयान्नशूद्रात्पतितादपि ॥ नचान्यस्मादशक्तश्चेन्निन्दितान्वर्जयेद्बुधः ॥ ३ ॥ नित्यंयाचनकोनस्यात्पुनस्तंनैवयाचयेत् ॥ प्राणानपहरत्येवंयाचकस्तस्यदुर्मतेः ॥४॥ नदेवद्रव्यहारीस्याद्विशेषेणद्विजोत्तमः ॥ ब्रह्मस्वंवानापहरेदापत्स्वपिकदाचन ॥ ५ ॥ नविषंविषमित्याहुर्ब्रह्मस्वंविषमुच्यत ॥ देवस्वंचापियत्नेनसदापरिहरेत्ततः ॥६॥ पुष्पंशाकोदकंकाष्ठंतथामूलंफलंतृणम् ॥ अदत्तानिचनस्तेयंमनुःप्राहप्रजापतिः ॥७॥ ग्रहीतव्यानिपुष्पाणिदेवार्चनविधौद्विजाः ॥ नकस्मादेवनियतमननुज्ञायकेवलम् ॥ ८ ॥ तृणंकाष्ठंफलंपुष्पंप्रकाशंवैहरेद्बुधः ॥ धर्मार्थंकेवलंप्राहुरन्यथापतितोभवेत् ॥९॥ तिलमुद्गयवादीनांमुष्टिर्ग्राह्यापथिस्थितैः ॥ क्षुधितैर्नान्यथाविप्राधर्मादिभिरितिस्थितिः ॥१०॥ नधर्मस्यापदेशेनपापंकृत्वाव्रतंचरेत् ॥ व्रतेनपापंव्याग्रुह्यकुर्वन्स्त्रीशूद्रदम्भनम् ॥ ११ ॥ प्रेत्येहचेदृशोविप्रोगर्ह्यतेब्रह्मवादिभिः ॥ छद्मनाचरितंयच्चव्रतंरक्षांसिगच्छति ॥ १२ ॥ अलिङ्गीलिङ्गिवेषेणयोवृत्तिमुपतिष्ठति ॥ सलिङ्गिनोहरेदेनस्तिर्यग्योनौचजायते ॥ १३ ॥ याचनयोनिसम्बन्धंसहवासंचभाषणम् ॥ कुर्वाणःपततेनित्यंतस्माद्यत्नेनवर्जयेत् ॥ १४ ॥ देवद्रोहंनकुर्वीतगुरुद्रोहंतथैवच ॥ देवद्रोहाद्गुरुद्रोहःकोटिकोटिगुणाधिकः ॥ १५ ॥ जनापवादोनास्तिक्यंतस्मात्कोटिगुणाधिकम् ॥ गोभिश्चदैवतैर्विप्रैःकृष्याराजोपसेवया ॥ १६ ॥ कुलान्यकुलतांयान्तियानिहीनानिधर्मतः ॥ कुविचारैःक्रियालोपैर्वेदानध्ययनेनच ॥ १७ ॥ कुलान्यकुलतांयान्तिब्राह्मणातिक्रमेणच ॥ अनतात्पारदार्याच्चतथाऽभक्ष्यस्यभक्षणात् ॥ १८ ॥ अगोत्रधर्माचारणात्क्षिप्रंनश्यतिवैकुलम् ॥ अश्रोत्रियेषुदानाच्चवृषलेषुतथैवच ॥ १९ ॥ विहिताचारहीनेषुक्षिप्रंनश्यतिवैकुलम् ॥ अधार्मिकैर्वृतंग्रामेनव्याधिबहुलेवसेत ॥ २० ॥ शूद्रराज्येचनवसेन्नपाखण्डजनैर्वृते॥हिमवद्विन्ध्ययोर्मध्यंपूर्वपश्चिमयोःशुभम् ॥२१॥ मुक्त्वासमुद्रयोर्देशंनान्यत्रनिवसेद्द्विजः॥ कृष्णोवायत्रचरतिमृगोनित्यंस्वभावतः ॥ २२ ॥ पुण्यावाविश्रुतानद्यस्तत्रवानिवसेद्द्विजः ॥ अर्द्धक्रोशंनदीकूलंवर्जयित्वाद्विजोत्तमः ॥ २३ ॥ नान्यत्रनिवसेत्पुण्यंना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्त्यजग्रामसन्निधौ ॥ नसंवसेच्चपतितैर्नचाण्डालैर्नपुल्कसैः ॥ २४ ॥ नमूर्खैर्नावलिप्तैश्चनान्यैर्जायावसायिभिः ॥ एकशय्यासनेपङ्क्तिर्भाण्डेपक्वान्न मिश्रणम् ॥ २५ ॥ याजनाध्यापनेयोनिस्तथैवसहभोजनम् ॥ सहाध्यायस्तुदशमःसहयाजनमेवच ॥ २६ ॥ एकादशसमुद्दिष्टादोषाःसाङ्कर्यसंस्थिताः ॥ समीपेचाप्यवस्थानात्पापंसङ्क्रमतेनृणाम् ॥२७॥ तस्मात्सर्वप्रयत्नेनसाङ्कर्यंपरिवर्जयेत् ॥ एकपङ्क्त्युपविष्टायेनस्पृशन्तिपरस्परम् ॥ २८ ॥ भस्मनाकृतमर्यादानतेषांसङ्करोभवेत् ॥ अग्निनाभस्मनाचैवसलिलेनविलेखतः ॥ २९ ॥ द्वारेणस्तम्भमार्गेणषड्भिःपङ्क्तिर्विभिद्यते ॥ नकुर्याच्छुष्कवैराणिविवादंनचपैशुनम् ॥ ३० ॥ परक्षेत्रेगांचरन्तींनचाचक्षीतकर्हिचित् ॥ नसंवसेत्सूचकेननकंवैमर्मणिस्पृशेत ॥ ३१ ॥ नसूर्यपरिवेषंवानेन्द्रचापंशराग्निकम् ॥ परस्मैकथयेद्विद्वाञ्छशिनंवाथकाञ्चनम् ॥ ३२ ॥ नकुर्याद्बहुभिःसार्द्धंविरोधंबन्धुभिस्तथा ॥ आत्मनःप्रतिकूलानिपरेषांनसमाचरेत ॥ ३३ ॥ तिथिंपक्षस्यनब्रूयान्नक्षत्राणिननिर्दिशेत ॥ नोदक्यामभिभाषेतनाशुचिंवाद्विजोत्तमः ॥ ३४ ॥ नदेवगुरुविप्राणांदीयमानंतुवारयेत ॥ नचात्मानंप्रशंसेद्वापरनिन्दांचवर्जयेत् ॥३५॥ वेदनिन्दांदेवनिन्दांप्रयत्नेनविवर्जयेत् ॥ यस्तुदेवानृषींश्चवेदान्वानिन्दतेद्विजः ॥ ३६ ॥ नतस्यनिष्कृतिर्दृष्टाशास्त्रेष्विहमुनीश्वराः ॥ निन्दयेद्वागुरुंदेवंवेदंवासोपबृंहणम् ॥ ३७ ॥ कल्पकोटिशतंसाग्रंरौरवेपच्यतेनरः ॥ तूष्णीमासीतनिन्दायांनब्रूयात्किञ्चिदुत्तरम् ॥ ३८ ॥ कर्णौपिधायगन्तव्यंनचैनमवलोकयेत ॥ वर्जयेद्वैरहस्यानिपरेषांगर्हणंबुधः ॥ ३९ ॥ विवादंस्वजनैःसार्द्धंनकुर्याद्वैकदाचन ॥ नपापंपापिनांब्रूयादपापंवाद्विजोत्तमः ॥ ४० ॥ सत्येनतुल्योदोषःस्यादसत्याद्दोषवान्भवेत् ॥ नृणांमिथ्याभिशस्तानांपतन्त्यश्रूणिरोदनात् ॥ ४१ ॥ तानिपुत्रान्पशून्घ्नन्तितेषांमिथ्याभिशंसिनाम् ॥ ब्रह्महत्यासुरापानेस्तेयेगुर्वङ्गनागमे ॥ ४२ ॥ दृष्टंवैशोधनंवृद्धैर्नास्तिमिथ्याभिशंसने ॥ नेक्षेतोद्यन्तमादित्यंशशिनंवाऽनिमित्ततः ॥ ४३ ॥ नास्तंयान्तंनवारिस्थंनोपसृष्टंनमध्यगम् ॥ तिरोहितंसमीक्षेतनादर्शाद्यनुगामिनम् ॥ ४४ ॥ ननग्नांस्त्रियमीक्षेतपुरुषंवाकदाचन ॥ नचमूत्रंपुरीषंवानचसंसृष्टमैथुनम् ॥ ४५ ॥ नाशुचिःसूर्यसोमादीन्ग्रहानालोकयेद्बुधः ॥ नाभिभाषेतचपरमुच्छिष्टोवाऽवगुण्ठितः ॥ ४६ ॥ नपश्येद्व्योमसंस्पर्शंनक्रुद्धस्यगुरोर्मुखम् ॥ नतैलोदकयोश्छायांनपङ्क्तिभोजनेसति ॥ ४७ ॥ नमुक्तबन्धनंपश्यन्नोन्मत्तंगजमेववा ॥ नाश्नीयाद्भार्ययासार्द्धंनैनामीक्षेतचाश्नतीम् ॥ ४८ ॥ क्षुवतींजृम्भमाणांवानासनस्थांयथासुखम् ॥ नोदकेचात्मनोरूपंशुभंवाऽशुभमेववा ॥ ४९ ॥ नलङ्घयेच्चमतिमान्नाधितिष्ठेत्कदाचन ॥ नशूद्रायमतिंदद्यात्कृसरंपायसंदधि ॥ ५० ॥ नोच्छिष्टंवामधुघृतंनचकृष्णाजिनंहविः ॥ नचैवास्मैव्रतंब्रूयान्नचधर्मंवदेद्बुधः ॥ ५१ ॥ नचक्रोधवशंगच्छेद्द्वेषंरागंच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वजयत् ॥ लोभंदम्भंतथाशाठयंह्यसूयांज्ञानकुत्सनम् ॥ ५२ ॥ ईर्ष्यांमदंतथाशोकंमोहंचपरिवर्जयेत् ॥ नकुर्यात्कस्यचित्पीडांसुतंशिष्यंतुताडये
त् ॥ ५३ ॥ नहीनानुपसेवेतनचतृष्णामतिःक्वचित्॥नात्मानंचावमन्येतदैन्यंयत्नेनवर्जयेत् ॥५४॥ नविशिष्टमसत्कुर्यान्नात्मानंवासनाद्बुधः ॥ नन
खेनलिखेद्भूमिंगांचसंवेशयेन्नहि ॥ ५५ ॥ ननदीषुनदींब्रूयात्पर्वतेषुचपर्वतान् ॥ आवासेभोजनेवापिनत्यजेत्सहयायिनम् ॥ ५६ ॥ नावगाहेदपोन
ग्नोवह्निनातिस्पृशेत्तथा॥शिरोऽभ्यङ्गावशिष्टेनतैलेनाङ्गंनलेपयेत् ॥ ५७ ॥ नसर्पशस्त्रैःक्रीडेतस्वानिखानिनसंस्पृशेत् ॥ रोमाणिचरहस्यानिनाशिष्टेन
सहव्रजेत् ॥ ५८ ॥ नपाणिपादवाङ्नेत्रचापल्यंसमुपाश्रयेत्॥नशिश्नोदरचापल्यंनचश्रवणयोःक्वचित् ॥ ५९ ॥ नचाङ्गनखवाद्यंवैकुर्यान्नाञ्जलिना
पिबेत् ॥ नाभिहन्याज्जलंपद्भ्यांपाणिनावाकदाचन ॥ ६० ॥ नशातयेदिष्टिकाभिर्मूलानिचफलानिच ॥ नम्लेच्छभाषणंशिक्षेन्नाकर्षेच्चपदासनम् ॥
॥ ६१ ॥ नखभेदनमास्फोटंछेदनंवाविलेखनम् ॥ कुर्य्याद्विमर्दनंधीमान्नाकस्मादेवनिष्फलम् ॥६२॥ नोत्सङ्गेभक्षयेद्भक्ष्यंवृथाचेष्टांनचाचरेत् ॥ न
नृत्येदथवागायेन्नवादित्राणिवादयेत् ॥ ६३ ॥ नसंहताभ्यांपाणिभ्यांकण्डूयदात्मनःशिरः ॥ नलौकिकैःस्तवैर्देवांस्तोषयेद्वाक्पतेरपि ॥ ६४ ॥
नाक्षैःक्रीडेन्नधावेतनाप्सुविण्मूत्रमाचरेत् ॥ नोच्छिष्टःसंविशेन्नित्यंननग्नःस्नानमाचरेत् ॥ ६५ ॥ नगच्छंस्तुपठेद्वापिनचैवस्वशिरःस्पृशेत् ॥ नदन्तैर्न
खरोमाणिच्छिन्द्यात्सुप्तंनबोधयेत् ॥ ६६ ॥ नबालातपमासेवेत्प्रेतधूमंविवर्जयेत् ॥ नैवस्वप्याच्छून्यगेहेस्वयंनोपानहौहरेत् ॥ ६७ ॥ नाकारणा
द्वानिष्ठीवेन्नबाहुभ्यांनदींतरेत् ॥ नपादक्षालनंकुर्यात्पादेनैवकदाचन ॥ ६८ ॥ नाग्नौप्रतापयेत्पादौनकांस्येधावयेद्बुधः ॥ नाभिप्रसारयेद्देवंब्राह्मणा
न्गामथापिवा ॥६९॥ वाय्वग्निनपविप्रान्वासूर्यंवाशशिनंप्रति॥अशुद्धःशयनंपानंस्वाध्यायंस्नानभोजनम् ॥ ७० ॥ बहिर्निष्क्रमणंचवनकुर्वीतकदा
चन ॥ स्वप्नमध्ययनंस्नानमुद्वर्तंभोजनंगतिम् ॥७१॥ उभयोःसन्ध्ययोर्नित्यंमध्याह्नेचैववर्जयेत् ॥ नस्पृशेत्पाणिनोच्छिष्टोविप्रोगोब्राह्मणानलान्
॥७२॥ नचालनंपदावापिनदेवप्रतिमांस्पृशेत्॥नाशुद्धोऽग्निंपरिचरेन्नदेवान्कीर्तयेदृषीन् ॥७३॥ नावगाहेदगाधाम्बुधावयेन्नाऽनिमित्ततः ॥ नवामह
स्तेनोद्धृत्यपिबेद्वक्त्रेणवाजलम् ॥७४॥ नोत्तरेदनुपस्पृश्यनाप्सुरेतःसमुत्सृजेत्॥अमेध्यालिप्तमहंवालोहितंवाविषाणिवा ॥७५॥ व्यतिक्रामेन्नस्रवन्तीं
नाप्सुमैथुनमाचरेत् ॥ चैत्यवृक्षंनवैछिन्द्यान्नाप्सुष्ठीवनमाचरेत् ॥ ७६ ॥ नास्थिभस्मकपालानिनकेशान्नचकण्टकान् ॥ तुषाङ्गारकरीषंवानाधितिष्ठे ॥ ४९ ॥
त्कदाचन ॥ ७७ ॥ नचाग्निंलङ्घयेद्धीमान्नोपदध्यादधःक्वचित् ॥ नचैनंपादतःकुर्याच्छूर्पेणनधमेद्बुधः ॥ ७८ ॥ नवृक्षमवरोहेतनावेक्षेताशुचिः
क्वचित् ॥ अग्नौनचक्षिपेदग्निंनाद्भिःप्रशमयेत्तथा ॥ ७९ ॥ सुहृन्मरणमात्रंवास्वयंनश्रावयेत्परान् ॥ अपण्यंकूटपण्यंवाविक्रयेनप्रयोजयेत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ८० ॥ नवह्निंमुखनिःश्वासैर्ज्वालयेन्नाशुचिर्बुधः ॥ पुण्यस्थानोदकस्थानेसीमान्तंवाहयेन्नतु ॥ ८१ ॥ नभिन्द्यात्पूर्वसमयमभ्युपेतंकदाचन ॥
परस्परंपशून्व्याघ्रान्पक्षिणोनचयोधयेत् ॥ ८२ ॥ परबाधांनकुर्वीतजलवातातपादिभिः ॥ कारयित्वासुकर्माणिगुरून्पश्चान्नवञ्चयेत् ॥ ८३ ॥
सायंप्रातर्गृहद्वारान्रक्षार्थंपरिघट्टयेत् ॥ बहिर्माल्यंसुगन्धिंवाभार्ययासहभोजनम् ॥ ८४ ॥ विगृह्यवादंकृत्वावाप्रवेशंचविवर्जयेत् ॥ नखादन्ब्राह्मण
स्तिष्ठेन्नजल्पेद्वाहसेद्बुधः ॥८५ ॥ स्वमग्निंचैवहस्तेनस्पृशेन्नाप्सुचिरंवसेत् ॥ नपक्षकेणोपधमेन्नशूर्पेणचपाणिना ॥ ८६ ॥ मुखेनाग्निंसमिन्धीतमुखा
दग्निरजायत ॥ परस्त्रियंनभाषेतनायाज्यंयाजयद्बुधः ॥ ८७ ॥ ॥ नैकश्चरेत्सदाविप्रःसमुदायंचवर्जयेत् ॥ नदेवायतनंगच्छेत्कदाचिद्वाऽप्रदक्षिणम्
॥ ८८ ॥ नपीडयेद्वावस्त्राणिनदेवायतनेस्वपेत् ॥ नैकोऽध्वानंप्रपद्येतनाधार्मिकजनैःसह ॥ ८९ ॥ नव्याधिदूषितैर्वापिनशूद्रैःपतितेनवा ॥
नोपानद्वर्जितोवाथजलादिरहितस्तथा ॥ ९० ॥ नवर्त्मनिचितिंवाममतिक्रामेत्कचिद्द्विजः ॥ ननिन्देद्योगिनःसिद्धान्व्रतिनोवायतींस्तथा
॥ ९१ ॥ देवतायतनंप्राज्ञादेवानांचैवसत्रिणाम् ॥ नाक्रामेत्कामतश्छायांब्राह्मणानांचगोरपि ॥ ९२ ॥ स्वांतुनाक्रामयेच्छायांपतिताद्यैर्न
रोगिभिः ॥ नाङ्गारभस्मकेशादिष्वधितिष्ठेत्कदाचन ॥ ९३ ॥ वर्जयेन्माजनीरेणंस्नानवस्त्रघटोदकम् ॥ नभक्षयेदभक्ष्याणिनापेयंचपि
बेद्द्विजः ॥ ९४ ॥ इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेपञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥ व्यासउवाच ॥ नाद्याच्छूद्रस्यविप्रोऽन्नंमोहाद्वायदि
कामतः ॥ सशूद्रयोनिंव्रजतियस्तुभुङ्क्तेत्वनापदि ॥ १ ॥ षण्मासान्योद्विजोभुङ्क्तेशूद्रस्यान्नंविगर्हितम् ॥ जीवन्नेवभवेच्छूद्रोमृतःश्वाचाभिजाय
ते ॥ २ ॥ ब्राह्मणक्षत्रियविशांशूद्रस्यचमुनीश्वराः ॥ यस्यान्नेनोदरस्थेनमृतस्तद्योनिमाप्नुयात् ॥ ३ ॥ राजान्नंनर्तकान्नंचषण्ढान्नंचर्मकारि
णाम् ॥ गणान्नंगणिकान्नंचषडन्नंचविवर्जयेत् ॥ ४ ॥ चक्रोपजीविरजकतस्करध्वजिनांतथा ॥ गान्धर्वलोहकारान्नंमृतकान्नंविवर्जयेत
॥ ५ ॥ कुलालचित्रकारान्नंवार्धुषेःपतितस्यच ॥ पौनर्भवच्छत्रिकयोरभिशप्तस्यचैवहि ॥ ६ ॥ सुवर्णकारशैलूषव्याधवन्ध्यातुरस्यच ॥
चिकित्सकस्यचैवान्नंपुंश्चल्यादण्डकस्यच ॥ ७ ॥ स्तेननास्तिकयोरन्नंदेवतानिन्दकस्यच ॥ सोमविक्रयिणश्चान्नंश्वपाकस्यविशेषतः ॥ ८ ॥
भार्याजितस्यचैवान्नंयस्यचोपपतिर्गृहे ॥ उत्सृष्टस्यकदर्यस्यतथैवोच्छिष्टभोजिनः ॥ ९ ॥ पापीयोऽन्नंचसङ्घान्नंशस्त्राजीवस्यचैवहि ॥ भीत
स्यरुदितस्यान्नमवकुष्टंपरिक्षतम् ॥ १० ॥ ब्रह्मद्विषःपापरुचेःश्राद्धान्नंमृतकस्यच ॥ वृथापाकस्यचैवान्नंशावान्नंचातुरस्यच ॥ ११ ॥
अग्रजसांतुनारीणांकृतघ्नस्यतथैवच ॥ कारुकान्नंविशेषेणशस्त्रविक्रयिणस्तथा ॥ १२ ॥ शौण्डान्नंघाण्टिकान्नंचभिषजामन्नमेवच ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्धत्प्रजननस्यान्नंपरिवेत्रन्नमेवच ॥ १३ ॥ पुनर्भुवोविशेषेणतथैवदिधिषूपतेः ॥ अवज्ञातंचावधूतंसरोषविस्मयान्वितम् ॥ १४ ॥ गुरो
रपिनभोक्तव्यमन्नंसंस्कारवर्जितम् ॥ दुष्कृतंहिमनुष्यस्यसर्वमन्नेव्यवस्थितम् ॥ १५ ॥ योयस्यान्नंसमश्नातिसतस्याश्नातिकिल्बिषम् ॥
आर्धिकःकुलमित्रंचगोपालोवाहनापितौ ॥ १६ ॥ एतेशूद्रेषुभोज्यान्नायश्चात्मानंनिवेदयेत् ॥ कुशीलवःकुम्भकश्चक्षेत्रकर्मकएवच ॥ १७ ॥
एतेशूद्रेषुभोज्यान्नादत्त्वास्वल्पगुणंबुधैः ॥ पायसंस्नेहपक्कंचगोरसश्चैवसक्तवः ॥ १८ ॥ पिण्याकंचैवतैलंचशूद्राद्ग्राह्यंद्विजातिभिः ॥ वृन्ताकंनालि
काशाकंकुसुम्भंभस्मकंतथा ॥ १९ ॥ पलाण्डुंलशुनंशुक्तंनिर्यासंचैववर्जयेत् ॥ छत्राकंविड्वराहंचस्विन्नंपीयूषमेवच ॥ २० ॥ विलयंविमुखंचैवकोर
काणिविवर्जयेत् ॥ गृञ्जनंकिंशुकंचैवकूष्माण्डंचतथैवच ॥ २१ ॥ उदुम्बरमलाबुंचजग्ध्वापततिवैद्विजः ॥ तथाकृसरसंयावौपायसापूपमेवच ॥
॥ २२ ॥ अनुपाकृतमांसंचदेवान्नानिहवींषिच ॥ यवागूमातुलिङ्गंचमत्स्यानप्यनुपाकृतान् ॥ २३ ॥ नीपंकपित्थंप्लक्षंचप्रयत्नेनविवर्जयेत् ॥ पिण्या
कंचोद्धृतस्नेहंदेवधान्यंतथैवच ॥ २४ ॥ रात्रौचतिलसम्बन्धंप्रयत्नेनदधित्यजेत् ॥ नाश्नीयात्पयसातक्रंनाभक्ष्यानुपयोजयेत् ॥ २५ ॥ कृमिदुष्टं
भावदुष्टंमृत्संसर्गंचवर्जयेत्॥कृमिकीटावपन्नंचसुहृत्क्लेदंचनित्यशः ॥२६॥ श्वाघ्रातंचपुनःसिद्धंचण्डालावेक्षितंतथा ॥ उदक्ययाचपतितैर्गवासङ्घ्रा
तमेवच ॥२७॥ असङ्गतंपर्य्युषितंपर्यस्तान्नंचनित्यशः ॥ काककुक्कुटसंस्पृष्टंकृमिभिश्चैवसङ्गतम् ॥ २८ ॥ मनुष्यैरप्यवघ्रातंकुष्ठिनास्पृष्टमेवच ॥
नरजस्वलयादत्तंनपुंश्चल्यासरोगया ॥ २९ ॥ मलवद्वाससावापिपरवासोऽथवर्जयेत् ॥ विवत्सायाश्चगोःक्षीरंमेषस्यानिर्दशस्यच ॥ ३० ॥ आवि
कंसन्धिनीक्षीरमपेयंमनुरब्रवीत् ॥ बलाकंहंसदात्यूहंकलविङ्कंशुकंतथा ॥ ३१ ॥ कुररंचचकोरंचजालपादंचकोकिलम् ॥ वायसान्खञ्जरीटांश्चश्येनं
गृध्रंतथैवच ॥ ३२ ॥ उलूकंचक्रवाकंचभासंपारावतंतथा ॥ कपोतंटिट्टिभंचैवग्रामकुक्कुटमेवच ॥ ३३ ॥ सिंहंव्याघ्रंचमार्जारंश्वानंसूकरमेवच ॥
शृगालंमर्कटंचैवगर्दभंनचभक्षयेत् ॥ ३४ ॥ नभक्षयेत्सर्वमृगाञ्छिखिनोऽन्यान्वनेचरान् ॥ जलेचरान्स्थलचरान्प्राणिनश्चेतिधारणा ॥ ३५ ॥ गो
धाकूर्मःशशःखङ्गःसल्लकश्चेतिसत्तमाः ॥ भक्ष्यान्पञ्चनखान्नित्यंमनुराहप्रजापतिः ॥३६॥ मत्स्यान्सशल्कान्भुञ्जीतमांसंरौरवमेवच ॥ निवेद्यदेवता
भ्यस्तुब्राह्मणेभ्यश्चनान्यथा ॥ ३७ ॥ मयूरंतित्तिरंचैवकपोतंचकपिञ्जलम् ॥ वार्ध्रीणसंबकंभक्ष्यंमीनंप्राहप्रजापतिः ॥ ३८ ॥ शफरीसिंहतुण्डंचतथा
पाठीनरोहितौ ॥ मत्स्याश्चैतेसमुद्दिष्टाभक्षणीयाद्विजोत्तमाः ॥ ३९ ॥ प्रोक्षितंभक्षयेदेषांमांसंचद्विजकाम्यया ॥ यथाविधिप्रयुक्तंचप्राणानामपिचा
त्यये ॥ ४० ॥ भक्षयेन्नैवमांसानिशेषभोजीनलिप्यते ॥ औषधार्थमशक्तोवानियोगाद्यज्ञकारणात् ॥ ४१ ॥ आमन्त्रितश्चयःश्राद्धेदैवेवामांसमुत्सृजे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त् ॥ यावन्तिपशुरोमाणितावन्नरकमृच्छति ॥ ४२ ॥ अदेयंवाप्यपेयंवातथैवास्पृश्यमेववा ॥ द्विजातीनामनालोक्यंनित्यंमद्यमितिस्थितिः ॥४३॥ तस्मात्सर्वप्रयत्नेनमद्यंनित्यंविवर्जयेत् ॥ पीत्वापततिकर्मभ्यस्त्वसम्भाष्योभवेद्द्विजः ॥ ४४ ॥ भक्षयित्वाप्यभक्ष्याणिपीत्वाऽपेयान्यपिद्विजः ॥ नाधिकारीभवेत्तावद्यावत्तन्नजहात्यधः ॥ ४५ ॥ तस्मात्परिहरेन्नित्यमभक्ष्याणिप्रयत्नतः ॥ अपेयानिचविप्रोवैतथाचेद्यातिरौरवम् ॥ ४६ ॥ इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेभक्ष्याभक्ष्यनियमोनामषट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥ व्यासउवाच ॥ अथातःसम्प्रवक्ष्यामिदानधर्ममनुत्तमम् ॥ ब्रह्मणाभिहितंपूर्वमृषीणांब्रह्मवादिनाम् ॥ १ ॥ अर्थानामुचितेपात्रेश्रद्धयाप्रतिपादनम् ॥ दानमित्यभिनिर्दिष्टंभुक्तिमुक्तिफलप्रदम् ॥ २ ॥ योददातिविशिष्टेभ्यःश्रद्धयापरयायुतः ॥ तद्वैवित्तमहंमन्येशेषंकस्यापिरक्षति ॥ ३ ॥ नित्यंनैमित्तिकंकाम्यंत्रिविधंदानमुच्यते ॥ चतुर्थंविमलंप्रोक्तंसर्वदानोत्तमोत्तमम् ॥ ४ ॥ अहन्यहनियत्किञ्चिद्दीयतेऽनुपकारिणे ॥ अनुद्दिश्यफलंतस्माद्ब्राह्मणायतुनित्यकम् ॥ ५ ॥ यत्तुपापोपशान्त्यर्थंदीयतेविदुषांकरे ॥ नैमित्तिकंतदुद्दिष्टंदानंसद्भिरनुत्तमम् ॥ ६ ॥ अपत्यविजयैश्वर्यसुखार्थंयत्प्रदीयते ॥ दानंतत्काम्यमाख्यातमृषिभिर्धर्मचिन्तकैः ॥ ७ ॥ यदीश्वरस्यप्रीत्यर्थंब्रह्मवित्सुप्रदीयते ॥ चेतसाधर्मयुक्तेनदानंतद्विमलंशिवम् ॥ ८ ॥ दानधर्मंनिषेवेतपात्रमासाद्यशक्तितः ॥ एपास्यतेतुतत्पात्रंयत्तारयतिसर्वतः ॥ ९ ॥ कुटुम्बभुक्तिवसनाद्देयंयदतिरिच्यते ॥ अन्यथादीयतेयद्धैनतद्दानंफलप्रदम् ॥ १० ॥ श्रोत्रियायकुलीनायविनीतायतपस्विने ॥ व्रतस्थायदरिद्रायप्रदेयंभक्तिपूर्वकम् ॥ ११ ॥ यस्तुदद्यान्महींभक्त्याब्राह्मणायाहिताग्नये ॥ सयातिपरमंस्थानंयत्रगत्वानशोचति ॥१२॥ इक्षुभिःसंयुतांभूमिंयवगोधूमशालिनीम् ॥ ददातिवेदविदुषेयःसभूयोनजायते ॥ १३ ॥ गोचर्ममात्रामपिवायोभूमिंसम्प्रयच्छति ॥ ब्राह्मणायदरिद्रायसर्वपापैःप्रमुच्यते ॥ १४ ॥ भूमिदानात्परंदानंविद्यतेनेहकिञ्चन ॥ अन्नदानंतेनतुल्यंविद्यादानंततोऽधिकम् ॥ १५ ॥ योब्राह्मणायशान्तायशुचयेधर्मशीलिने ॥ ददातिविद्यांविधिनाब्रह्मलोकेमहीयते ॥ १६ ॥ दद्यादहरहःस्वर्णंश्रद्धयाब्रह्मचारिणे ॥ सर्वपापविनिर्मुक्तोब्रह्मणःस्थानमाप्नुयात् ॥ १७ ॥ गृहस्थायान्नदानेनफलमाप्नोतिमानवः ॥ अन्नमेवास्यदातव्यंदत्त्वाप्नोतिपरांगतिम् ॥ १८ ॥ वैशाख्यांपौर्णमास्यांतुब्राह्मणान्सप्तपञ्चवा ॥ उपोष्यविधिनाशान्तःशुचिःप्रयतमानसः ॥ १९ ॥ पूजयित्वातिलैःकृष्णैर्मधुनाचविशेषतः ॥ प्रीयतांधर्मराजेतियदामनसिवर्त्तते ॥ २० ॥ यावज्जीवंतुयत्पापंतत्क्षणादेवनश्यति ॥ कृष्णाजिनेतिलान्कृत्वाहिरण्यंमधुसर्पिषी ॥ २१ ॥ ददातियस्तुविप्रायसर्वंतरतिदुष्कृतम् ॥ घृतान्नमुदकुम्भंचवैशाख्यांतुविशेषतः ॥ २२ ॥ निर्दिश्यधर्मराजायविप्रेभ्योमुच्यतेभयात् ॥ सुवर्णतिलयुक्तैस्तुब्राह्मणान्सप्तपञ्चवा ॥ २३ ॥ तर्पयेदु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दपात्रैस्तुब्रह्महत्यांव्यपोहति ॥ माघमासेतमिस्रेतुद्वादश्यांसमुपोषितः ॥ २४ ॥ शुक्लाम्बरधरःकृष्णैस्तिलैर्हुत्वाहुताशनम् ॥ प्रदद्याद्ब्राह्मणेभ्यस्तुति
लानेवसमाहितः ॥ २५ ॥ जन्मप्रभृतियत्पापंसर्वंतरतिवैद्विजः ॥ अमावास्यामनुप्राप्यब्राह्मणायतपस्विने ॥ २६ ॥ यत्किञ्चिद्देवदेवेशंदद्याचोद्दि
श्यकेशवम् ॥ प्रीयतामीश्वरोविष्णुर्हृषीकेशःसनातनः ॥ २७ ॥ सप्तजन्मकृतंपापंतत्क्षणादेवनश्यति ॥ यस्तुकृष्णचतुर्दश्यांस्नात्वादेवंपिनाकिनम्
॥ २८ ॥ आराधयेद्द्विजमुखेनतस्यास्तिपुनर्भवः ॥ कृष्णाष्टम्यांविशेषेणधार्मिकायद्विजातये ॥ २९ ॥ स्नात्वाभ्यर्च्ययथान्यायंपादप्रक्षालनादि
भिः ॥ प्रीयतांमेमहादेवोदद्याद्द्रव्यंस्वकीयकम् ॥ ३० ॥ सर्वपापविनिर्मुक्तःप्राप्नोतिपरमांगतिम् ॥ द्विजैःकृष्णचतुर्दश्यांकृष्णाष्टम्यांविशेषतः
॥ ३१ ॥ अमावास्यांतथाभक्तैःपूजनीयस्त्रिविक्रमः ॥ एकादश्यांनिराहारोद्वादश्यांपुरुषोत्तमम् ॥ ३२ ॥ अर्चयेद्ब्राह्मणमुखेसगच्छेत्परमंपदम् ॥
एषातिथिर्वैष्णवीस्याद्द्वादशीशुक्लपक्षतः ॥ ३३ ॥ तस्यामाराधयेद्देवंप्रयत्नेनजनार्दनम् ॥ यत्किञ्चिद्देवमीशानमुद्दिश्यब्राह्मणेशुचौ ॥ ३४ ॥
दीयतेविष्णुमेवापितदनन्तफलंस्मृतम् ॥ योहियांदेवतामिच्छेत्समाराधयितुंनरः ॥ ३५ ॥ ब्राह्मणान्पूजयेद्यत्नात्सतुतांतोषयेत्ततः ॥ द्विजानांवपुरा
स्थायनित्यंतिष्ठन्तिदेवताः ॥३६॥ पूज्यन्तेब्राह्मणालाभेप्रतिमादिषुतैःक्वचित् ॥ प्रतिमादिषुयत्नेनतस्मात्फलमभीप्सता ॥३७॥ द्विजेषुदेवतानित्यं
पूजनीयाविशेषतः ॥ विभूतिकामःसततंपूजयेद्विपुरन्दरम् ॥ ३८ ॥ ब्रह्मवर्चसकामस्तुब्रह्माणंज्ञानकामुकः ॥ आरोग्यकामोऽथरविंधनकामोहुता
शनम् ॥ ३९॥ कर्मणांसिद्धिकामस्तुपूजयेद्वैविनायकम् ॥ भोगकामस्तुशशिनंबलकामःसमीरणम् ॥४०॥ मुमुक्षुःसर्वसंसारात्प्रयत्नेनार्चयेद्धरिम् ॥
यस्तुयोगंतथामोक्षमन्विच्छेज्ज्ञानमैश्वरम् ॥ ४१ ॥ अर्चयेतविरूपाक्षंप्रयत्नेनसुरेश्वरम् ॥ येवाञ्छन्तिमहाभोगाञ्ज्ञानानिचमहेश्वरम् ॥ ४२ ॥ ते
पूजयन्तिभूतेशंकेशवंचापिभोगिनः ॥ वारिदस्तृप्तिमाप्नोतिजलदानंततोऽधिकम् ॥ ४३ ॥ तैलप्रदःप्रजामिष्टांदीपदश्चक्षुरुत्तमम् ॥ भूमिदःसर्वमा
प्नोतिदीर्घमायुर्हिरण्यदः ॥ ४४ ॥ गृहदाताग्र्यवेश्मानिरूप्यदोरूपमुत्तमम् ॥ वासोदश्चन्द्रसालोक्यमश्वदोयानमुत्तमम् ॥ ४५ ॥ अन्नदाता
श्रियंस्वेष्टांगोदोब्रध्नस्यविष्टपम् ॥ यानशय्याप्रदोभार्यामैश्वर्यमभयप्रदः ॥ ४६ ॥ धान्यदःशाश्वतंसौख्यंब्रह्मदोब्रह्मशाश्वतम् ॥ धान्यान्यपिय
थाशक्तिविप्रेषुप्रतिपादयेत् ॥ ४७ ॥ वेदविद्याविशिष्टेषुप्रेत्यस्वर्गंसमश्नुते ॥ गवांचान्नप्रदानेनसर्वपापैःप्रमुच्यते ॥ ४८ ॥ इन्धनानांप्रदानेन
दीप्ताग्निर्जायतेनरः ॥ फलमूलानिपानानिशाकानिविविधानिच ॥ ४९ ॥ प्रदद्याद्ब्राह्मणेभ्यस्तुमुदायुक्तःसदाभवेत् ॥ औषधंस्नेहमाहारंरोगि ॥ ६१ ॥
णोरोगशान्तये ॥ ५० ॥ ददानोरोगरहितःसुखीदीर्घायुरेवच ॥ असिपत्रवनंमार्गंक्षुरधारासमन्वितम् ॥ ५१ ॥ तीक्ष्णतापंचतरतिच्छत्रोपानत्प्रदो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नरः ॥ यद्यदिष्टतमंलोकेयच्चास्यापेक्षितंगृहे ॥ ५२ ॥ तत्तद्गुणवतेदेयंतदेवाक्षयमिच्छता ॥ अयनेविषुवेचैवग्रहणेचन्द्रसूर्ययोः ॥ ५३ ॥ स
ङ्क्रान्त्यादिषुकालेषुदत्तंभवतिचाक्षयम् ॥ प्रयागादिषुतीर्थेषुपुण्येष्वायतनेषुच ॥ ५४ ॥ दत्त्वाचाक्षयमाप्नोतिनदीप्रस्रवणेषुच ॥ दानधर्मा
त्परोधर्मोभूतानांनेहविद्यते ॥ ५५ ॥ तस्माद्विप्रायदातव्यंश्रोत्रियायद्विजातिभिः ॥ स्वर्गायभूतिकामेनतथापापोपशान्तये ॥ ५६ ॥ मुमु
क्षुणातुदातव्यंब्राह्मणेभ्यस्तथान्वहम् ॥ दीयमानंतुयोमोहाद्गोविप्राग्निसुरेषुच ॥ ५७ ॥ निवारयत्यधर्मात्मातिर्यग्योनिंव्रजेतसः ॥ यस्तुद्रव्या
र्जनंकृत्वानार्चयेद्ब्राह्मणान्सुरान् ॥ ५८ ॥ सर्वस्वमपहृत्यैनंराजाराष्ट्रात्प्रवासयेत् ॥ यस्तुदुर्भिक्षवेलायामन्नाद्यंनप्रयच्छति ॥ ५९ ॥ म्रिय
माणेषुविप्रेषुब्राह्मणःसतुगर्हितः ॥ नतस्मात्प्रतिगृह्णीयुर्नवसेयुश्चतेनहि ॥ ६० ॥ अङ्कयित्वास्वकाद्राष्ट्राद्राजातंविप्रवासयेत् ॥ पश्चात्सद्द्रव्यो
ददातीहस्वद्रव्यंधर्मसाधनम् ॥ ६१ ॥ सपूर्वाभ्यधिकःपापीनरकेपच्यतेनरः ॥ स्वाध्यायवन्तोयेविप्राविद्यावन्तोजितेन्द्रियाः ॥ ६२ ॥ सत्य
संयमसंयुक्तास्तेभ्योदद्याद्द्विजोत्तमाः ॥ प्रभुक्तमपिविद्वांसंधार्मिकंभोजयेद्द्विजम् ॥ ६३ ॥ नचमूर्खमवृत्तस्थंदशरात्रमुपोषितम् ॥ सन्निकृष्टमतिक्रम्यश्रो
त्रियंयःप्रयच्छति ॥ ६४ ॥ सतेनकर्मणापापीदहत्यासप्तमंकुलम् ॥ यदिस्यादधिकोविप्रःशीलविद्यादिभिःस्वयम् ॥ ६५ ॥ तस्मैयत्नेनदातव्यमतिक्र
म्यचसन्निधिम् ॥ योऽर्चितंप्रतिगृह्णीयाद्दद्यादर्चितमेवच ॥ ६६ ॥ तावुभौगच्छतःस्वर्गंनरकंतुविपर्यये ॥ नवार्यपिप्रयच्छेतनास्तिकेहैतुकेऽपिच
॥ ६७ ॥ नपाखण्डेषुसर्वेषुनावेदविदिधर्मवित् ॥ रूप्यंचैवहिरण्यंचगामश्वंपृथिवींतिलान् ॥ ६८ ॥ अविद्वान्प्रतिगृह्णीयाद्भस्मीभवतिकाष्ठवत् ॥ द्विजा
तिभ्योधनंलिप्सेत्प्रशस्तेभ्योद्विजोत्तमः ॥ ६९ ॥ अपिराजन्यवैश्याभ्यांनतुशूद्रात्कथञ्चन ॥ वृत्तिसङ्कोचमन्विच्छेन्नेहेतधनविस्तरम् ॥ ७० ॥
धनलोभेप्रसक्तस्तुब्राह्मण्यादेवहीयते ॥ वेदानधीत्यसकलान्यज्ञांश्चावाप्यसर्वशः ॥ ७१ ॥ नतांगतिमवाप्नोतिसन्तोषाद्यामवाप्नुयात् ॥ प्रतिग्रहरु
चिर्नस्याच्छूद्रान्नंतुसमाहरेत् ॥ ७२ ॥ स्थित्यर्थादधिकंगृह्णन्ब्राह्मणोयात्यधोगतिम् ॥ यस्तुयातिनसन्तोषंनसस्वर्गस्यभाजनम् ॥ ७३ ॥ उद्वेजयतिभूता
नियथाचौरस्तथैवसः ॥ गुरुंभृत्यांश्चोज्जिहीर्षुस्तर्पयन्देवतातिथीन् ॥ ७४ ॥ सर्वतःप्रतिगृह्णीयान्नतुतृप्येत्स्वयंततः ॥ एवंगृहस्थोयुक्तात्मादेवतातिथि
पूजकः ॥ ७५ ॥ वर्तमानःसंयतात्मायातितत्परमंपदम् ॥ पुत्रेषुभार्यांनिक्षिप्यगत्वारण्यंतुतत्त्ववित् ॥ ७६ ॥ एकाकीविचरेन्नित्यमुदासीनःसमाहितः ॥
एषवःकथितोधर्मोगृहस्थानांद्विजोत्तमाः ॥ ज्ञात्वाऽनुतिष्ठेन्नियतंतथानुष्ठापयेद्द्विजान् ॥ ७७ ॥ इतिदेवमनादिमेकमीशंगृहधर्मेणसमर्चयेदजस्रम् ॥ समती
त्यससर्वभूतयोनिंप्रकृतिंयातिपरंनयातिजन्म ॥ ७८ ॥ इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेगृहस्थधर्मनिर्णयोनामसप्तपञ्चाशत्तमोऽध्यायः ॥ ५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यासउवाच ॥एवंगृहाश्रमेस्थित्वाद्वितीयंभागमायुषः ॥ वानप्रस्थाश्रमंगच्छेत्सदारःसाग्निरेवच ॥१॥ निक्षिप्यभार्यांपुत्रेषुगच्छेद्वनमथापिवा॥ दृष्ट्वा
पत्यस्यवापत्यंजर्जरीकृतविग्रहः ॥ २ ॥ शुक्लपक्षस्यपूर्वाह्णेप्रशस्तेचोत्तरायणे ॥ गत्वारण्यंनियमवांस्तपःकुर्यात्समाहितः ॥ ३ ॥ फलमूलानिपूता
निनित्यमाहारमाहरेत् ॥ यदाहारोभवेत्तेनपूजयेत्पितृदेवताः ॥ ४ ॥ पूजयेदतिथिंनित्यंस्नात्वाचाभ्यर्चयेत्सुरान् ॥ गृहादादायचाश्नीयादष्टौग्रासा
न्समाहितः ॥ ५ ॥ जटाश्चबिभृयान्नित्यंनखरोमाणिनोत्सृजेत् ॥ स्वाध्यायंसर्वथाकुर्यान्नियच्छेद्वाचमन्यतः ॥ ६ ॥ अग्निहोत्रंचजुहुयात्पञ्चयज्ञा
न्समाचरेत् ॥ उत्पन्नैर्विविधैर्मेध्यैःशाकमूलफलेनवा ॥ ७ ॥ चीरवासाभवेन्नित्यंस्नायात्त्रिषवणंशुचिः ॥ सर्वभूतानुकम्पश्चप्रतिग्रहविवर्जितः ॥ ८ ॥
दर्शेनपौर्णमासेनयजेतनियतंद्विजः ॥ ऋक्ष्विष्टयाग्रयणेचैवचातुर्मास्यानिकारयेत् ॥९॥ उत्तरायणंचक्रमशोदक्षिणायनमेवच ॥ वासन्तशारदैर्मेध्यैरु
त्पन्नैःस्वयमाहृतैः ॥ १० ॥ पुरोडाशांश्चरूंश्चैवविधिवन्निर्वपेत्पृथक् ॥ देवताभ्यःपितृभ्यश्चदत्त्वामेध्यतरंहविः ॥ ११ ॥ शेषंसमुपभुञ्जीतलवणंचस्व
यङ्कृतम् ॥ वर्जयेन्मद्यमांसानिभौमानिकवकानिच ॥ १२ ॥ भूस्तृणंशष्पकंचैवश्लेष्मातकफलानिच ॥ नफालकृष्टमश्नीयादुत्सृष्टमपिकेनचित
॥ १३ ॥ नग्रामजातान्यार्तोऽपिपुष्पाणिचफलानिच ॥ श्रावणेनैवविधिनावह्निंपरिचरेत्सदा ॥ १४ ॥ नद्रुह्येत्सर्वभूतानिनिर्द्वन्द्वोनिर्भयोभवेत् ॥
ननक्तंकिञ्चिदश्नीयाद्रात्रौध्यानपरोभवेत् ॥ १५ ॥ जितेन्द्रियोजितक्रोधस्तत्त्वज्ञानविचिन्तकः ॥ ब्रह्मचारीभवेन्नित्यंनपत्नीमपिसंश्रयेत् ॥ १६ ॥
यस्तुपत्न्यावनंगत्वामैथुनंकामतश्चरेत ॥ तद्व्रतंतस्यलुप्येतप्रायश्चित्तीयतेद्विजः ॥ १७ ॥ तत्रयोजायतेगर्भोनसस्पृश्योद्विजातिभिः ॥ नहिवेदेऽधि
कारोऽस्यतद्वंशेऽप्येवमेवहि ॥ १८ ॥ भूमौशयीतसततंसावित्रीजप्यतत्परः ॥ शरण्यःसर्वभूतानांसद्विभागपरःसदा ॥ १९॥ परिवादंमृषावादंनिद्रा
लस्येचवर्जयेत् ॥ एकाग्निरनिकेतःस्यात्प्रोक्षितांभूमिमाश्रयेत् ॥ २० ॥ मृगैःसहचरेद्दान्तस्तैःसहैवचसंवसेत् ॥ शिलायांशर्करायांवाशयीतसुसमा
हितः ॥ २१ ॥ सद्यःप्रक्षालकोवास्यान्मासस्सञ्चयिकोऽपिवा ॥ षण्मासनिचयोवापिसमानिचयएववा ॥ २२ ॥ नक्तंचान्नंसमश्नीयाद्दिवाचाहृत्य
शक्तितः ॥ चतुर्थकालकोवास्यात्किंवाप्यष्टमकालिकः ॥ २३ ॥ चान्द्रायणविधानैर्वाशुक्लेकृष्णेचवर्जयेत् ॥ पक्षेपक्षेसमश्नीयाद्यवागूंक्कथितां
सकृत् ॥ २४ ॥ पुष्पमूलफलैर्वापिकेवलैर्वर्तयेत्सदा ॥ स्वाभाविकैःस्वयंशीर्णैर्वैखानसमतेस्थितः ॥ २५ ॥ भूमौवापरिवर्तेततिष्ठेद्वाप्रपदैर्दिनम् ॥
स्थानासनाभ्यांविहरेन्नक्वचिद्धैर्यमुत्सृजेत् ॥ २६ ॥ ग्रीष्मेपञ्चतपाश्चस्याद्वर्षास्वभ्रावकाशिकः ॥ आर्द्रवासाश्चहेमन्तेक्रमशोवर्द्धयेत्तपः ॥ २७ ॥
उपस्पृशेत्त्रिषवणंपितृदेवांश्चतर्पयेत् ॥ एकपादेनतिष्ठेतमरीचिंवापिबेत्सदा ॥२८॥ पञ्चाग्निधूमगोवास्यादूष्मगःसोमपोऽपिवा ॥ पयःपिबेच्छुक्लपक्षे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृष्णपक्षेतुगोमयम् ॥ २९ ॥ शीर्णपर्णाशनोवास्यात्कृच्छ्रैर्वावर्तयेत्सदा ॥ योगाभ्यासरतश्चस्याद्रुद्राध्यायीभवेत्सदा ॥ ३० ॥ अथर्वशिरसोऽध्ये
तावेदान्ताभ्यासतत्परः ॥ यमान्सेवेतसततंनियमांश्चाप्यतन्द्रितः ॥ ३१ ॥ कृष्णाजिनीसोत्तरीयःशुक्लयज्ञोपवीतवान् ॥ अथचाग्नीन्समारोप्य
स्वात्मनिध्यानतत्परः ॥ ३२ ॥ अनग्निरनिकेतोवामुनिर्मोक्षपरोभवेत् ॥ तापसेष्वेवविप्रेषुयात्रिकंभैक्षमाहरेत् ॥३३॥ गृहमेधिषुचान्येषुद्विजेषुवन
चारिषु ॥ ग्रामादाहृत्यचाश्नीयादष्टौग्रासान्वनेवसन् ॥ ३४ ॥ प्रतिगृह्यपुटेनैवपाणिनाशकलेनवा ॥ विविधाश्चोपनिषदआत्मसंसिद्ध्येजपेत
॥ ३५ ॥ विद्याविशेषान्सावित्रींरुद्राध्यायंतथैवच ॥ महाप्रस्थानिकंवासौकुर्यादनशनंतथा ॥ अग्निप्रवेशमन्यद्वाब्रह्मार्पणविधौस्थितः ॥ ३६ ॥
इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेवानप्रस्थाश्रमाचारधर्मोनामाष्टपञ्चाशत्तमोऽध्यायः ॥ ५८ ॥ व्यासउवाच ॥ एवंवनाश्रमेस्थित्वातृतीयंभागमा
युषः ॥ चतुर्थंचायुषोभागंसंन्यासेननयेत्क्रमात् ॥ १ ॥ अग्नीनात्मनिसंस्थाप्यद्विजःप्रव्रजितोभवेत् ॥ योगाभ्यासरतःशान्तोब्रह्मविद्यापराय
णः ॥ २ ॥ यदामनसिसम्पन्नंवैराग्यंसर्ववस्तुषु ॥ तदासंन्यासमिच्छेच्चपतितःस्याद्विपर्यये ॥ ३ ॥ प्राजापत्यांनिरूप्येष्टिमाग्नेयीमथवापुनः ॥
दान्तःशुक्लकषायोऽसौब्रह्माश्रममुपाश्रयेत् ॥ ४ ॥ ज्ञानसंन्यासिनःकेचिद्वेदसंन्यासिनोऽपरे ॥ कर्मसंन्यासिनस्त्वन्येत्रिविधाःपरिकीर्तिताः ॥ ५ ॥
यःसर्वत्रविनिर्मुक्तोनिर्द्वन्द्वश्चैवनिर्भयः ॥ प्रोच्यतेज्ञानसंन्यासीआत्मन्येवव्यवस्थितः ॥ ६ ॥ वेदमेवाभ्यसेन्नित्यंनिराशीर्निष्परिग्रहः ॥
प्रोच्यतेवेदसंन्यासीमुमुक्षुर्विजितेन्द्रियः ॥ ७ ॥ यस्त्वग्निमात्मसात्कृत्वाब्रह्मार्पणपरोद्विजः ॥ ज्ञेयःसकर्मसंन्यासीमहायज्ञपरायणः ॥ ८ ॥
त्रयाणामपिचैतेषांज्ञानीत्वभ्यधिकोमतः ॥ नतस्यविद्यतेकार्यंनलिङ्गंवाविपश्चितः ॥ ९ ॥ निर्ममोनिर्भयःशान्तोनिर्द्वन्द्वःपर्णभोजनः ॥ जीर्ण
कोपीनवासाःस्यान्नग्नोवाध्यानतत्परः ॥ १० ॥ ब्रह्मचारीजिताहारोग्रामादन्नंसमाहरेत् ॥ अध्यात्मरतिरासीतनिरपेक्षोनिराशिषः ॥ ११ ॥ आ
त्मनैवसहायेनसुखार्थंविचरेदिह ॥ नाभिनन्देतमरणंनाभिनन्देतजीवनम् ॥ १२ ॥ कालमेवप्रतीक्षेतनिर्वेशंभृतकोयथा ॥ नाध्येतव्यंनवर्तव्यंश्रोत
व्यंनकदाचन ॥ १३ ॥ एवंज्ञानपरोयोगीब्रह्मभूयायकल्पते ॥ एकवासाश्चवाविद्वान्कौपीनाच्छादनोऽपिवा ॥ १४ ॥ मुण्डीशिखीवाथभवेत्रिदण्डी
निष्परिग्रहः ॥ काषायवासाःसततंध्यानयोगपरायणः ॥ १५ ॥ ग्रामान्तेवृक्षमूलेवावसेद्देवालयेऽपिवा ॥ समःशत्रौतथामित्रेतथामानापमानयोः
॥ १६ ॥ भैक्ष्येणवर्तयेन्नित्यंनैकान्नादीभवेत्क्वचित् ॥ यस्तुमोहेनवान्यस्मादेकान्नादीभवेद्यतिः ॥ १७ ॥ नतस्यनिष्कृतिःकाचिद्धर्मशास्त्रेषुदृश्यते
॥ रागद्वेषवियुक्तात्मासमलोष्टाश्मकाञ्चनः ॥ १८ ॥ प्राणिहिंसानिवृत्तश्चमौनीस्यात्सर्वनिस्पृहः ॥ दृष्टिपूतंन्यसेत्पादंवस्त्रपूतंजलंपिबेत् ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्यपूतांवदेद्वाणींमनःपूतंसमाचरेत् ॥ नैकत्रनिवसेद्देशेवर्षाभ्योऽन्यत्रभिक्षुकः ॥ २० ॥ स्नात्वाशौचयुतोनित्यंकमण्डलुकरःशुचिः ॥ ब्रह्मचर्यरतो
नित्यंवनवासरतोभवेत् ॥ २१ ॥ मोक्षशास्त्रेषुनिरतोब्रह्मसूत्रीजितेन्द्रियः ॥ दम्भाहङ्कारनिर्मुक्तोनिन्दापैशुन्यवर्जितः ॥ २२ ॥ आत्मज्ञानगुणोपेतो
यदिमोक्षमवाप्नुयात् ॥ अभ्यसेत्सततंदेवंप्रणवाख्यंसनातनम् ॥ २३ ॥ स्नात्वाऽऽचम्यविधानेनशुचिर्देवालयादिषु ॥ यज्ञोपवीतीशान्तात्माकुश
पाणिःसमाहितः ॥ २४ ॥ धौतकाषायवसनोभस्माच्छन्नतनूरुहः ॥ अधियज्ञंब्रह्मजपेदाधिदैविकमेवच ॥ २५ ॥ आध्यात्मिकंचसततंवेदान्ताभि
हितंचयत् ॥ पुत्रेषुचाथनिवसन्ब्रह्मचारीयतिर्मुनिः ॥२६॥ वेदमेवाभ्यसेन्नित्यंसयातिपरमांगतिम् ॥ अहिंसासत्यमस्तेयंब्रह्मचर्यंतपःपरम् ॥२७॥
क्षमादयाचसन्तोषोव्रतान्यस्यविशेषतः ॥ वेदान्तज्ञाननिष्ठोवापञ्चयज्ञान्समाहितः ॥ २८॥ कुर्यादहरहःस्नात्वाभिक्षार्थैनैवतेनहि ॥होममन्त्राञ्जपेन्नि
त्यंकालेकालेसमाहितः ॥ २९ ॥ स्वाध्यायंचान्वहंकुर्यात्सावित्रींसन्ध्ययोर्जपेत् ॥ ध्यायेच्चसततंदेवमेकान्तेपरमेश्वरम् ॥ ३० ॥ एकान्नंवर्जयेन्नि
त्यंकामंक्रोधंपरिग्रहम् ॥ एकवासाद्विवासावाशिखीयज्ञोपवीतवान् ॥ कमण्डलुकरोविद्वांस्त्रिदण्डोयातितत्परम् ॥ ३१ ॥ इतिश्रीपाद्मेमहापुराणेस्वर्ग
खण्डेयतिधर्मनिरूपणंनामैकोनषष्टितमोऽध्यायः ॥ ५९ ॥ व्यासउवाच ॥ एवंत्वाश्रमनिष्ठानांयतीनांनियतात्मनाम् ॥ भैक्ष्येणवर्तनंप्रोक्तंफलमूलै
रथापिवा ॥ १ ॥ एककालंचरेद्भैक्ष्यंनप्रसज्येतविस्तरे ॥ भैक्ष्येप्रसक्तोहियतिर्विषयेष्वपिसज्जति ॥ २ ॥ सप्तागारंचरेद्भैक्ष्यमलाभेनपुनश्चरेत् ॥
गोदोहमात्रंतिष्ठेतकालंभिक्षुरधोमुखः ॥ ३ ॥ भिक्षेत्युक्त्वासकृत्तूष्णीमाद्याद्वाग्यतःशुचिः ॥ प्रक्ष्याल्यपाणीपादौचसमाचम्ययथाविधि ॥ ४ ॥
आदित्यंदर्शयित्वान्नंभुञ्जीतप्राङ्मुखोनरः ॥ हुत्वाप्राणाहुतीःपञ्चग्रासानष्टौसमाहितः ॥ ५ ॥ आचम्यदेवंब्रह्माणंध्यायेतपरमेश्वरम् ॥ अलाबुदारु
पात्रेचमृन्मयंवैणवंतथा ॥ ६ ॥ चत्वारियतिपात्राणिमनुराहप्रजापतिः ॥ प्राग्रात्रेमध्यरात्रेचपररात्रेतथैवच ॥ ७ ॥ सन्ध्यासूक्तिविशेषेणचिन्त
येन्नित्यमीश्वरम् ॥ कृत्वाहृत्पद्मनिलयेविश्वाख्यंविश्वसम्भवम् ॥८॥ आत्मानंसर्वभूतानांपरस्तात्तमसःस्थितम् ॥ सर्वस्याधारमव्यक्तमानन्दंज्योति
रव्ययम् ॥९ ॥ प्रधानपुरुषातीतमाकाशंदहनंशिवम् ॥ तदन्तंसर्वभावानामीश्वरंब्रह्मरूपिणम् ॥१०॥ ओङ्कारान्तेऽथवात्मानंसमाप्यपरमात्मनि ॥
आकाशेदेवमीशानंध्यायेदाकाशमध्यगम् ॥ ११ ॥ कारणंसर्वभावानामानन्दैकसमाश्रयम् ॥ पुराणपुरुषंविष्णुंध्यायन्मुच्येतबन्धनात् ॥१२॥
यद्वागुहादौप्रकृतौजगत्संमोहनालये ॥ विचिन्त्यपरमंव्योमसर्वभूतैककारणम् ॥ १३ ॥ जीवनंसर्वभूतानांयत्रलोकःप्रलीयते ॥ आनन्दंब्रह्मणःसूक्ष्मं
यत्पश्यन्तिमुमुक्षवः ॥ १४ ॥ तन्मध्येनिहितंब्रह्मकेवलंज्ञानलक्षणम् ॥ अनन्तंसत्यमीशानंविचिन्त्यासीतवाग्यतः ॥ १५ ॥ गुह्याद्गुह्यतमंज्ञानंयती

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नामेतदीरितम् ॥ योऽवतिष्ठेत्सदानेनसोऽश्नुतेयोगमैश्वरम् ॥ १६ ॥ तस्माज्ज्ञानरतोनित्यमात्मविद्यापरायणः ॥ ज्ञानंसमभ्यसेद्ब्रह्मयेनमुच्येतबन्ध
नात् ॥ १७ ॥ मत्वापृथक्त्वमात्मानंसर्वस्मादेवकेवलम् ॥ आनन्दमक्षरंज्ञानंध्यायेतचततःपरम् ॥ १८ ॥ यस्माद्भवन्तिभूतानियज्ज्ञात्वानेहजाय
ते ॥ सतस्मादीश्वरोदेवःपरस्ताद्योऽधितिष्ठति ॥ १९ ॥ यदन्तरेतद्गमनंशाश्वतंशिवमव्ययम् ॥ यइदंस्वपरोक्षस्तुसदेवःस्यान्महेश्वरः ॥ २० ॥
व्रतानियानिभिक्षूणांविहितानितथायमः ॥ एकैकातिक्रमेणैवप्रायश्चित्तंविधीयते ॥ २१ ॥ उपेत्यचस्त्रियंकामात्प्रायश्चित्तंसमाहितः ॥ प्राणायामस
मायुक्तंकुर्यात्सान्तपनंशुचिः ॥ २२ ॥ ततश्चरेतनियमात्कृच्छ्रंसंयतमानसः ॥ पुनराश्रममागम्यचरेद्भिक्षुरतन्द्रितः ॥ २३ ॥ नधर्मयुक्तमनृतंहिनस्ती
तिमनीषिणः ॥ तथापिचनकर्तव्यःप्रसङ्गोह्येषदारुणः ॥ २४ ॥ एकरात्रोपवासश्चप्राणायामशतंतथा ॥ उक्त्वाऽनृतंप्रकर्तव्यंयतिनाधर्मलिप्सुना
॥२५॥ परमापद्गतेनापिनकार्यंस्तेयमन्यतः ॥ स्तेयादभ्यधिकःकश्चिन्नास्त्यधर्मइतिस्मृतिः ॥२६॥ हिंसाचैवापरातृष्णायाच्ञात्मज्ञाननाशिका ॥
यदेतद्द्रविणंनामप्राणाह्येतेबहिश्चराः ॥ २७ ॥ सतस्यहरतेप्राणान्योयस्यहरतेधनम् ॥ एवंकृत्वासदुष्टात्माभिन्नवृत्तोव्रतच्युतः ॥२८॥ भूयोनिर्वेदमाप
न्नश्चरेद्भिक्षुरतन्द्रितः ॥ अकस्मादेवहिंसांतुयदिभिक्षुःसमाचरेत् ॥ २९ ॥ कुर्यात्कृच्छ्रातिकृच्छ्रंतुचान्द्रायणमथापिवा ॥ स्कन्देतेन्द्रियदौर्बल्यात्स्त्रि
यंदृष्ट्वायतिर्यदि ॥ ३० ॥ तेनधारयितव्यावैप्राणायामास्तुषोडश ॥ दिवास्कन्देत्रिरात्रंस्यात्प्राणायामशतंबुधाः ॥ ३१ ॥ एकान्नेमधुमांसेचनवश्रा
द्धेतथैवच ॥ प्रत्यक्षलवणेचोक्तंप्राजापत्यंविशोधनम् ॥ ३२ ॥ ध्याननिष्ठस्यसततंनश्यतेसर्वपातकम् ॥ तस्मान्नारायणंध्यात्वातस्यध्यान
परोभवेत् ॥ ३३ ॥ यद्ब्रह्मणःपरंज्योतिःप्रविष्टाक्षरमव्ययम् ॥ योऽन्तरात्मापरंब्रह्मसविज्ञेयोमहेश्वरः ॥ ३४॥ एषदेवोमहादेवःकेवलःपरमशिवः ॥
तदेवाक्षरमद्वैतंतदनित्यंपरंपदम् ॥ ३५ ॥ तस्मान्महीयतेदेवेस्वधाम्निज्ञानसंज्ञिते ॥ आत्मयोगात्परेतत्त्वेमहादेवस्ततःस्मृतः ॥ ३६ ॥ नान्यंदेवंम
हादेवाद्व्यतिरिक्तंप्रपश्यति ॥ तमेवात्मानमन्वेतियःसयातिपरंपदम् ॥ ३७ ॥ मन्यन्तेयेस्वमात्मानंविभिन्नंपरमेश्वरात् ॥ नतेपश्यन्तितंदेवंवृथातेषांप
रिश्रमः ॥ ३८ ॥ एकमेवपरंब्रह्मविज्ञेयंतत्त्वमव्ययम् ॥ सदेवस्तुमहादेवोनैतद्विज्ञायबध्यते ॥ ३९ ॥ तस्माद्यतेतनियतंयतिःसंयतमानसः ॥ ज्ञान
योगरतःशान्तोमहादेवपरायणः ॥ ४० ॥ एषवःकथितोविप्रायतीनामाश्रमःशुभः ॥ पितामहेनमुनिनाविभुनापूर्वमीरितः ॥ ४१ ॥ नापुत्रशिष्य
योगिभ्योदद्यादेवमनुत्तमम् ॥ ज्ञानंस्वयम्भुवाप्रोक्तंयतिधर्माश्रयंशिवम् ॥ ४२ ॥ इतियतिनियमानामेतदुक्तंविधानंसुरवरपरितोषेयद्भवेदेकहेतुः ॥
नभवतिपुनरेषामुद्भवोवाविनाशःप्रणिहितमनसोयेनित्यमेवाचरन्ति ॥ ४३ ॥ इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेषष्टितमोऽध्यायः ॥ ६० ॥ सूतउ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाच ॥ एवमुक्तंपुराविप्राव्यासेनामिततेजसा ॥ एतावदुक्त्वाभगवान्व्यासःसत्यवतीसुतः ॥ १ ॥ समाश्वास्यमुनीन्सर्वाञ्जगामचयथागतम् ॥ भव
द्भ्यस्तुमयाप्रोक्तंवर्णाश्रमविधानकम् ॥ २ ॥ एवंकृत्वाप्रियोविष्णोर्भवत्येवनचान्यथा ॥ रहस्यंतत्रवक्ष्यामिशृणुतद्विजसत्तमाः ॥ ३ ॥ येचात्रकथि
ताधर्मावर्णाश्रमनिबन्धनाः ॥ हरिभक्तिकलांशांशसमानानहितेद्विजाः ॥ ४ ॥ पुंसामेकेहवैसाध्याहरिभक्तिःकलौयुगे ॥ युगान्तरेणधर्माहिसेवित
व्यानरेणहि ॥ ५ ॥ कलौनारायणंदेवंयजतेयःसधर्मभाक् ॥ दामोदरंहृषीकेशंपुरुहूतंसनातनम् ॥ ६ ॥ हृदिकृत्वापरंशान्तंजितमेवजगत्त्रयम् ॥
कलिकालोरगादंशात्किल्बिषात्कालकूटतः ॥ ७ ॥ हरिभक्तिसुधांपीत्वाउल्लङ्घ्योभवतिद्विजः ॥ किंजपैःश्रीहरेर्नामगृहीतंयदिमानुषैः ॥ ८ ॥
किंस्नानैर्विष्णुपादाम्बुमस्तकेयेनधार्यते ॥ किंयज्ञेनहरेःपादपद्मंयेनधृतंहृदि ॥ ९ ॥ किंदानेनहरेःकर्मसभायांवैप्रकाशितम् ॥ हरेर्गुणगणाञ्छ्रुत्वायः
प्रहृष्येत्पुनःपुनः ॥ १० ॥ समाधिनाप्रहृष्टस्यसागतिःकृष्णचेतसः ॥ तत्रविघ्नकराःप्रोक्ताःपाखण्डालापपेशलाः ॥ ११ ॥ नार्यस्तत्सङ्गिनश्चापिह
रिभक्तिविघातकाः ॥ नारीणांनयनादेशःसुराणामपिदुर्जयः ॥ १२ ॥ सयेनविजितोलोकेहरिभक्तःसउच्यते ॥ माद्यन्तिमुनयोऽप्यत्रनारीचरितलोलु
पाः ॥ १३ ॥ हरिभक्तिःकुतःपुंसांनारीभक्तिजुषांद्विजाः ॥ राक्षस्यःकामिनीवेषाश्चरन्तिजगतिद्विजाः ॥ १४ ॥ नराणांबुद्धिकवलंकुर्वन्तिसततंहि
ताः ॥ तावद्विद्याप्रभवतितावज्ज्ञानंप्रवर्तते ॥ १५ ॥ तावत्सुनिर्मलामेधासर्वशास्त्रविधारिणी ॥ तावज्जपस्तपस्तावत्तावत्तीर्थनिषेवणम् ॥ १६ ॥
तावच्चगुरुशुश्रूषातावद्वितरणेमतिः ॥ तावत्प्रबोधोभवतिविवेकस्तावदेवहि ॥१७॥ तावत्सतांसङ्गरुचिस्तावत्पौराणलालसा ॥ यावत्सीमन्तिनीलो
लनयनान्दोलनंनहि ॥ १८ ॥ जनोपरिपतेद्विप्राःसर्वधर्मविलोपनम् ॥ तत्रयेहरिपादाब्जमधुलेशप्रसादिताः ॥१९॥ तेषांननारीलोलाक्षिक्षेपणंहिप्रभु
र्भवेत् ॥ जन्मजन्महृषीकेशसेवनंयैःकृतंद्विजाः ॥ २० ॥ द्विजेदत्तंहुतंवह्नौविरतिस्तत्रतत्रहि ॥ नारीणांकिलकिंनामसौन्दर्यंपरिचक्षते ॥ २१ ॥
भूषणानांचवस्त्राणांचाकचक्यंतदुच्यते ॥ स्नेहात्मज्ञानरहितंनारीरूपंकुतःस्मृतम् ॥ २२ ॥ पूयमूत्रपुरीषासृक्त्वङ्मेदोस्थिवसान्वितम् ॥ कलेवरं
हितन्नामकुतःसौन्दर्य्यमत्रहि ॥ २३ ॥ तदेवंपृथगाचिन्त्यस्पृष्ट्वास्नात्वाशुचिर्भवेत् ॥ तैःसंहितंशरीरंहिदृश्यतेसुन्दरंजनैः ॥ २४ ॥ अहोऽतिदुर्दशानृ
णांदुर्दैवघटिताद्विजाः ॥ कुचावृतेऽङ्गेपुरुषोनारीबुद्ध्याप्रवर्त्तते ॥ २५ ॥ कानारीवापुमान्कोवाविचारेसतिकिञ्चन ॥ तस्मात्सर्वात्मनासाधुर्नारी
सङ्गंविवर्जयेत् ॥ २६ ॥ कोनामनारीमासाद्यसिद्धिंप्राप्नोतिभूतले ॥ कामिनीकामिनीसङ्गसङ्गमित्यपिसन्त्यजेत् ॥ २७ ॥ तत्सङ्गाद्रौरवमितिसा
क्षादेवप्रतीयते ॥ अज्ञानाल्लोलुपालोकास्तत्रदैवेनवञ्चिताः ॥ २८ ॥ साक्षान्नरककुण्डेऽस्मिन्नारीयोनौपचेन्नरः ॥ यतएवागतःपृथ्व्यांतस्मिन्नेवपुनार

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मेत् ॥ २९ ॥ यतःप्रसरतनित्यंमूत्रंरेतोमलोत्थितम् ॥ तत्रैवरमतेलोकःकस्तस्मादशुचिभवत् ॥ ३० ॥ तत्रातिकष्टलोकेऽस्मिन्नहोदवविडम्बना ॥ पुनःपुनारमेत्तत्रअहोनिस्त्रपतानृणाम् ॥ ३१ ॥ तस्माद्विचारयेद्धीमान्नारीदोषगणान्बहून् ॥ मैथुनाद्बलहानिःस्यान्निद्रातितरुणायते ॥ ३२ ॥ निद्रयाऽपहृतज्ञानःस्वल्पायुर्जायतेनरः ॥ तस्मात्प्रयत्नतोधीमान्नारींमृत्युमिवात्मनः ॥३३॥ पश्येद्गोविन्दपादाब्जेमनोवैरमयेद्बुधः ॥ इहामुत्रसुखंतद्धि गोविन्दपदसेवनम् ॥ ३४ ॥ विहायकोमहामूढोनारीपादंहिसेवते ॥ जनार्दनाङ्घ्रिसेवाहिह्यपुनर्भवदायिनी ॥ ३५ ॥ नारीणांयोनिसेवाहियोनिसङ्कटकारिणी ॥ पुनःपुनःपतेद्योनौयन्त्रनिष्पाचितोयथा ॥ ३६ ॥ पुनस्तामेवाभिलषेद्विद्यादस्यविडम्बनम् ॥ ऊर्ध्वबाहुरहंवच्मिशृणुमेपरमंवचः ॥ ३७ ॥ गोविन्देधेहिहृदयंनयोनौयातनाजुषि ॥ नारीसङ्गंपरित्यज्ययश्चापिपरिवर्त्तते ॥ ३८ ॥ पदेपदेऽश्वमेधस्यफलमाप्नोतिमानवः ॥ कुलाङ्गनादैवयोगादूढायदिनृणांसती ॥ ३९ ॥ पुत्रमुत्पाद्ययस्तत्रतत्सङ्गंपरिवर्जयेत् ॥ तस्यतुष्टोजगन्नाथोभवत्येवनसंशयः ॥ ४० ॥ नारीसङ्गोहिधर्मज्ञैरसत्सङ्गःप्रकीर्त्यते ॥ तस्मिन्सतिहरौभक्तिःसुदृढानैवजायते ॥ ४१ ॥ सर्वसङ्गंपरित्यज्यहरौभक्तिंसमाचरेत् ॥ हरिभक्तिश्चलोकेऽत्रदुर्लभाहिमताम ॥ ४२ ॥ हरौयस्यभवेद्भक्तिःसकृतार्थोनसंशयः ॥ तत्तदेवाचरेत्कर्महरिःप्रीणातियेनहि ॥ ४३ ॥ तस्मिंस्तुष्टेजगत्तुष्टंप्रीणितेप्रीणितंजगत् ॥ हरौभक्तिविनानृणांवृथाजन्मप्रकीर्तितम् ॥ ४४ ॥ ब्रह्मेशादिसुरायस्ययजन्तेप्रीतिहेतवे ॥ नारायणमनाव्यक्तंनतंसेवेतकोजनः ॥ ४५ ॥ तस्यमातामहाभागापितातस्यमहाकृती ॥ जनार्दनपदद्वन्द्वंहृदयेयेनधार्यते ॥ ४६ ॥ जनार्दनजगद्वन्द्यशरणागतवत्सल ॥ इतीरयन्तियेमर्त्यानतेषांनिरयेगतिः ॥ ४७ ॥ ब्राह्मणाहिविशेषेणप्रत्यक्षंहरिरूपिणः ॥ पूजयेयुर्यथायोगंहरिस्तेषांप्रसीदति ॥ ४८ ॥ विष्णुर्ब्राह्मणरूपेणविचरेत्पृथिवीमिमाम् ॥ ब्राह्मणेनविनाकर्मसिद्धिंप्राप्नोतिनैवहि ॥ ४९ ॥ द्विजपादाम्बुभक्त्यायैःपीत्वाशिरसिचार्पितम् ॥ तर्पितःपितरस्तेनआत्मापिकिलतारितः ॥ ५० ॥ ब्राह्मणानांमुखेयेनदत्तंमधुरमर्चितम् ॥ साक्षात्कृष्णमुखेदत्तंतद्वैभुङ्क्तेहरिःस्वयम् ॥ ५१ ॥ अहोऽतिदुर्भगालोकाःप्रत्यक्षेकेशवेद्विजे ॥ प्रतिमादिषुसेवन्तेतदभावेहितत्क्रिया ॥ ५२ ॥ ब्राह्मणानामधिष्ठानात्पृथ्वीधन्येतिगीयते ॥ तेषांपाणौचयद्दत्तंहरिपाणौतदर्पितम् ॥ ५३ ॥ तेभ्यःकृतान्नमस्कारात्तिरस्कारोहिपाप्मनाम् ॥ मुच्यतेब्रह्महत्यादिपापेभ्योविप्रवन्दनात् ॥ ५४ ॥ तस्मात्सतांसमाराध्योब्राह्मणोविष्णुबुद्धितः ॥ क्षुधितस्यद्विजस्यास्येयत्किञ्चिद्दीयतेयदि ॥ ५५ ॥ प्रेत्यपीयूषधाराभिःसिञ्चतेकल्पकोटिकम् ॥ द्विजतुण्डंमहाक्षेत्रमनूपरमकण्टकम् ॥५६॥ तत्रचेदुप्यतेकिञ्चित्कोटिकोटिफलंलभेत ॥ सघृतंभोजनंचास्मैदत्त्वाकल्पंसमोदते ॥५७॥ नानासुमिष्टम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्नंयोददातिद्विजतुष्टये ॥ तस्यलोकामहाभोगाःकोटिकल्पान्तमुक्तिदाः ॥५८॥ ब्राह्मणंचपुरस्कृत्यब्राह्मणेनानुकीर्तितम् ॥ पुराणंशृणुयान्नित्यंमहा
पापदवानलम् ॥ ५९ ॥ पुराणंसर्वतीर्थेषुतीर्थंचाधिकमुच्यते ॥ यस्यैकपादश्रवणाद्धरिरेवप्रसीदति ॥ ६० ॥ यथासूर्यवपुर्भूत्वाप्रकाशायचरेद्धरिः॥
सर्वेषांजगतामेवहरिरालोकहेतवे ॥ ६१ ॥ तथैवान्तःप्रकाशायपुराणावयवोहरिः ॥ विचरेदिहभूतेषुपुराणंपावनंपरम् ॥ ६२ ॥ तस्माद्यदिहरेःप्रीते
रुत्पादेधीयतेमतिः ॥ श्रोतव्यमनिशंपुम्भिःपुराणंकृष्णरूपिणः ॥ ६३ ॥ विष्णुभक्तेनशान्तेनश्रोतव्यमपिदुर्लभम् ॥ पुराणाख्यानममलममलीकर
णंपरम् ॥ ६४ ॥ यस्मिन्वेदार्थमाहृत्यहरिणाव्यासरूपिणा ॥ पुराणंनिर्मितंविप्रतस्मात्तत्परमोभवेत् ॥ ६५ ॥ पुराणेनिश्चितोधर्मोधर्मश्चकेशवः
स्वयम्॥तस्मात्कृतेपुराणेहिश्रुतेविष्णुर्भवेदिति ॥६६॥ साक्षात्स्वयंहरिर्विप्रःपुराणंचतथाविधम् ॥ एतयोःसङ्गमासाद्यहरिरेवभवेन्नरः ॥ ६७ ॥ तथा
गङ्गाम्बुसेकेननाशयेत्किल्बिषंस्वकम् ॥ केशवोद्भवरूपेणपापात्तारयतेमहीम् ॥ ६८ ॥ वैष्णवोविष्णुभजनस्याकाङ्क्षीयदिवर्तते ॥ गङ्गाम्बुसेकमम
लममलीकरणंचरेत् ॥६९॥ विष्णुभक्तिप्रदादेवीगङ्गाभुविचगीयते ॥ विष्णुरूपाहिसागङ्गालोकनिस्तारकारिणी ॥ ७० ॥ ब्राह्मणेषुपुराणेषुगङ्गायां
गोषुपिप्पले ॥ नारायणधियापुम्भिर्भक्तिःकार्याह्यहैतुकी ॥७१॥ प्रत्यक्षविष्णुरूपाहितत्त्वज्ञैर्निश्चिताअमी॥तस्मात्सततमभ्यर्च्याविष्णुभक्त्यभिला
षिणा ॥ ७२ ॥ विष्णौभक्तिविनानणांनिष्फलंजन्मउच्यते ॥ कलिकालपयोराशिपापग्राहसमाकुलम् ॥७३॥ विषयामज्जनावतदुर्बोधफेनिलंपरम् ॥
महादुष्टजनव्यालमहाभीमंभयानकम् ॥ ७४ ॥ दुस्तरंचतरन्त्येवहरिभक्तितरिस्थिताः ॥ तस्माद्यतेतवैलोकोविष्णुभक्तिप्रसाधने ॥ ७५ ॥
किंसुखंलभतेजन्तुरसद्वार्तावधारणे ॥ हरेरद्भुतलीलस्यलीलाख्यानेनसज्जते ॥ ७६ ॥ तद्विचित्रकथालोकेनानाविषयमिश्रिताः ॥ श्रोतव्यायदिवैनॄ
णांविषयेसज्जतेमनः ॥७७॥ निर्वाणेयदिवाचित्तंश्रोतव्यातदपिद्विजाः ॥ हेलयाश्रवणाच्चापितस्यतुष्टोभवेद्धरिः ॥ ७८ ॥ निष्क्रियोऽपिहृषीकेशो
नानाकर्मचकारसः ॥ शूश्रूषूणांहितार्थायभक्तानांभक्तवत्सलः ॥ ७९ ॥ नलभ्यतेकर्मणापिवाजपेयशतादिना ॥ राजसूयायुतेनापियथाभक्त्यासल
भ्यते ॥ ८० ॥ यत्पदंचेतसासेव्यंसद्भिराचरितंमुहुः ॥ भवाब्धितरणेसारमाश्रयध्वंहरेःपदम् ॥ ८१ ॥ ररविषयसंलुब्धाःपामरानिष्ठुरान
राः ॥ रौरवेहिकिमात्मानमात्मनापातयिष्यथ ॥ ८२ ॥ विनागोविन्दसौम्याङ्घ्रिसेवनंमागमिष्यथि ॥ अनायासेनदुःखानांतरणंयदिवाञ्छथ ॥
॥ ८३ ॥ भजध्वंकृष्णचरणावपुनर्भवकारणे ॥ कुतएवागतोमर्त्यःकुतएवपुनर्व्रजेत् ॥ ८४ ॥ एतद्विचार्यमतिमानाश्रयेद्धर्मसङ्ग्रहम् ॥
नानानरकसम्पातादुत्थितोयदिपूरुषः ॥ ८५ ॥ स्थावरादितनुंलब्ध्वायदिभाग्यवशात्पुनः ॥ मानुष्यंलभतेतत्रगर्भवासोऽतिदुःखदः ॥ ८६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततःकर्मवशाज्जन्तुर्यदिवाजायतेभुवि ॥ बाल्यादिबहुदोषेणपीडितोभवतिद्विजाः ॥८७॥ पुनर्यौवनमासाद्यदारिद्र्येणप्रपीड्यते ॥ रोगेणगुरुणावापिअ
नावृष्ट्यादिनातथा ॥ ८८ ॥ वार्द्धकेनलभेत्पीडामनिर्वाच्यामितस्ततः ॥ मनसश्चलनाद्व्याधेस्ततोमरणमाप्नुयात् ॥ ८९ ॥ नतस्मादधिकंदुःखंसंसारे
ऽप्यनुभूयते ॥ ततःकर्मवशाज्जन्तुर्यमलोकेप्रपीड्यते ॥ ९० ॥ तत्रातियातनांभुक्त्वापुनरेवप्रजायते ॥ जायतेम्रियतेजन्तुर्म्रियतेजायतेपुनः ॥ ९१ ॥
अनाराधितगोविन्दचरणस्येदृशीदशा ॥ अनायासेनमरणंविनायासेनजीवनम् ॥ ९२ ॥ अनाराधितगोविन्दचरणस्यनजायते ॥ धनंयदिभवेद्गेहे
रक्षणात्तस्यकिंफलम् ॥ ९३ ॥ यदासौकृष्यतेयाम्यैर्दूतैःकिंधनमन्वियात् ॥ तस्माद्द्विजातिसत्कार्यंद्रविणंसर्वसौख्यदम् ॥ ९४ ॥ दानंस्वर्ग
स्यसोपानंदानंकिल्बिषनाशनम् ॥ गोविन्दभक्तिभजनंमहापुण्यविवर्द्धनम् ॥ ९५ ॥ बलंयदिभवेन्मर्त्येनवृथातद्व्ययंचरेत् ॥ हरेरग्रेनृत्यगीतं
कुर्यादेवमतन्द्रितः ॥ ९६ ॥ यत्किञ्चिद्विद्यतेपुंसांतच्चकृष्णेसमर्पयेत् ॥ कृष्णार्पितंकुशलदमन्यार्पितमसौख्यदम् ॥ ९७ ॥ चक्षुर्भ्यांश्री
हरेरेवप्रतिमादिनिरूपणम् ॥ श्रोत्राभ्यांकलयेत्कृष्णगुणनामान्यहर्निशम् ॥ ९८ ॥ जिह्वयाहरिपादाम्बुस्वादितव्यंविचक्षणैः ॥ घ्राणेनाघ्रायगो
विन्दपादाब्जतुलसीदलम् ॥ ९९ ॥ त्वचास्पृष्ट्वाहरेर्भक्तंमनसाध्यायतत्पदम् ॥ कृतार्थोजायतेजन्तुर्नात्रकार्याविचारणा ॥ १०० ॥ तन्मना
हिभवेत्प्राज्ञस्तथास्यात्तद्गताशयः ॥ तमेवान्तेऽभ्येतिलोकोनात्रकार्याविचारणा ॥ १ ॥ चेतसाचाप्यनुध्यातःस्वपदंयःप्रयच्छति ॥ नारायणमना
द्यन्तंनतंसेवेतकोजनः ॥ २ ॥ सततनियतचित्तोविष्णुपादारविन्देवितरणमनुशक्तिप्रीतयेतस्यकुर्यात् ॥ नतिमतिरतिमस्याङ्घ्रिद्वयेसंविदध्यात्सहि
खलुनरलोकेपूज्यतामाप्नुयाच्च ॥ १०३ ॥ इतिश्रीपाद्मेमहापुराणेस्वर्गखण्डेएकषष्टितमोऽध्यायः ॥ ६१ ॥ सूतउवाच ॥ एवंयन्महिमालो
केलोकनिस्तारकारणम् ॥ तस्यविष्णोःपरेशस्यनानाविग्रहधारिणः ॥ १ ॥ एकंपुराणंरूपंवैतत्रपाद्मंपरंमहत् ॥ ब्राह्मंमूर्धाहरेरेवहृदयंपद्मसंज्ञितम्
॥ २ ॥ वैष्णवंदक्षिणोबाहुःशैवंवामोमहेशितुः ॥ ऊरूभागवतंप्रोक्तंनाभिःस्यान्नारदीयकम् ॥ ३ ॥ मार्कण्डेयंचदक्षाङ्घ्रिर्वामोह्याग्नेयमुच्यते ॥
भविष्यंदक्षिणोजानुर्विष्णोरेवमहात्मनः ॥ ४ ॥ ब्रह्मवैवर्तसंज्ञंतुवामजानुरुदाहृतः ॥ लैङ्गंतुगुल्फकंदक्षंवाराहंवामगुल्फकम् ॥ ५ ॥ स्कान्दंपुराणं
लोमानित्वगस्यवामनंस्मृतम् ॥ कौर्मंपृष्ठंसमाख्यातंमात्स्यंमेदःप्रकीर्तितम् ॥ ६ ॥ मज्जातुगारुडंप्रोक्तंब्रह्माण्डमस्थिगीयते ॥ एवमेवाभवद्विष्णुः
पुराणावयवोहरिः ॥ ७ ॥ हृदयंतत्रवैपाद्मंयच्छ्रुत्वामृतमश्नुते ॥ पाद्ममेतत्पुराणंतुस्वयंदेवोऽभवद्धरिः ॥ ८ ॥ यस्यैकाध्यायमध्याप्यसर्वैःपापैःप्रमु
च्यते ॥ तत्रादिमंस्वर्गमिदंसर्वपाद्मफलप्रदम् ॥९॥ स्वर्गखण्डंसमाकर्ण्यमहापातकिनोऽपिये ॥ मुच्यन्तेतेऽपिपापेभ्यस्त्वचोजीर्णाद्यथोरगाः ॥१०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अपिचेत्सुदुराचारःसर्वधर्मबहिष्कृतः ॥ आदिस्वर्गंसमाकर्ण्यपूयतेनात्रसंशयः ॥ ११ ॥ सर्वंपुराणमाकर्ण्यंयत्फलंलभतेनरः ॥ तत्सर्वंसमवाप्नो
तिश्रुत्वापाद्ममहोद्विजाः ॥ १२ ॥ समग्रंपाद्ममाकर्ण्ययत्फलंसमवाप्नुयात् ॥ आदिस्वर्गमिदंश्रुत्वातत्फलंलभतेनरः ॥ १३ ॥ माघेमासेप्रयागेतुस्ना
त्वाप्रतिदिनंनरः ॥ यथापापात्प्रमुच्येतततथाहिश्रवणाद्भवेत् ॥ १४ ॥ दत्तातेनस्वर्णतुलादत्ताचैवधराखिला ॥ कृतंवितरणंतेनदरिद्रेयहणंकृतम्
॥ १५ ॥ हरेर्नामसहस्राणिपठितानिह्यभीक्ष्णशः ॥ सर्वेवेदास्तथाधीतास्तत्तत्कर्मकृतंतथा ॥ १६ ॥ अध्यापकाश्चबहवःस्थापितावृत्तिदानतः
अभयंभयलोकेभ्योदत्तंतेनतथाद्विजाः ॥ १७ ॥ गुणवन्तोज्ञानवन्तोधर्मवन्तोऽनुमानिताः ॥ मेषकर्कटयोर्मध्येतोयंदत्तंसुशीतलम् ॥ १८ ॥
ब्राह्मणार्थेगवार्थेचप्राणास्त्यक्ताश्चतेनहि ॥ अन्यानिचसुकर्माणिकृतानितेनधीमता ॥ १९ ॥ येनादिखण्डंसदसिश्रुतंसंश्रावितंतथा ॥ स्वर्गखण्डं
समाधीत्यनानाभोगान्समश्नुते ॥ २० ॥ अन्तःपुरगनारीणांसुखसुप्तःप्रबुध्यते ॥ किङ्किणीरवसन्नादैस्तथामधुरभाषणैः ॥ २१ ॥ इन्द्रस्यार्धासनं
भुङ्क्तेइन्द्रलोकेवसेच्चिरम् ॥ ततःसूर्यस्यभवनंचन्द्रलोकंततोव्रजेत ॥ २२ ॥ सप्तर्षिभवनेभोगान्भुक्त्वायातिततोध्रुवम् ॥ ततश्चब्रह्मणोलोकंप्राप्यते
जोमयंवपुः ॥ २३ ॥ तत्रैवज्ञानमासाद्यनिर्वाणंपरमृच्छति ॥ सद्भिःसहवसेद्धीमान्सत्तीर्थेस्नानमाचरेत् ॥ २४ ॥ कुर्यादेवसदालापंसच्छास्त्रंश्रृणुया
न्नरः ॥ तत्रपाद्ममहाशास्त्रंसर्वाम्नायफलप्रदम् ॥२५॥स्वर्गखण्डंचतन्मध्येमहापुण्यफलप्रदम् ॥२६॥ भजध्वंगोविन्दंनमतहरिमेकंसुरवरंगमिष्यध्वंलो
कानतिविमलभोगानातितराम् ॥ शृणुध्वंहेलोकावदतहरिनामैकमतुलंयदीच्छावीचीनांसुखतरणमिष्टानिलभत ॥ २७ ॥ इतिश्रीपाद्मेमहापुराणे
स्वगखण्डेद्विषष्टितमोऽध्यायः ॥ ६२ ॥ सम्पूर्णमिदमादिखण्डापरनामकमादिस्वर्गखण्डंस्वर्गखण्डंवा ॥ शुभमस्तु ॥ श्रीरस्तु ॥ ॥ छ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ श्रीपाद्मे महापुराणे चतुर्थं ब्रह्मखण्डं प्रारभ्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीवेदव्यासायनमः ॥ शौनकउवाच ॥ कलौसमागतेसूतप्राणिनांकेनकर्मणा ॥ उद्धारोवैभवेत्तत्त्वंकथयस्वममाग्रतः ॥ १ ॥ सूतउवाच ॥ साधुसा
धुमुनिश्रेष्ठपुण्यात्मप्रवरोभवान् ॥ सर्वेषांचजनानांत्वंशुभवाञ्छोनिरन्तरम् ॥ २ ॥ एतद्व्यासःपुराविप्रःसर्वज्ञःसर्वपूजितः ॥ पृष्टोजैमिनिनातंसयदाह
शृणुवैष्णव ॥ ३ ॥ दण्डवत्प्रणिपत्यासौव्यासंसर्वार्थपारगम् ॥ गुरुंसत्यवतीसूनुंपप्रच्छमुनिपुङ्गवः ॥ ४ ॥ जैमिनिरुवाच ॥ कलौनृणांभवेत्केनमो
क्षोवैकथयस्वमे ॥ अल्पेनापिचपुण्येनमर्त्याश्चाल्पायुषोयतः ॥५॥ व्यासउवाच ॥ साधुसङ्गाद्भवेद्विप्रशास्त्राणांश्रवणंप्रभो ॥ हरिभक्तिर्भवेत्तस्मात्त
तोज्ञानंततोगतिः ॥ ६ ॥ नरोचतेकथाभूमौपापिष्ठायजनायवै ॥ वैष्णवीसतुविज्ञेयःपापिष्ठप्रवरोद्विजः ॥७॥ श्रीकृष्णस्यकथांश्रुत्वाऽऽनन्दीभवति
वैष्णवः ॥ असत्यांतांतुयोब्रूयाज्ज्ञेयःसपापिनांगुरुः ॥ ८ ॥ यस्मिन्यस्मिन्स्थलेविप्रकृष्णस्यवर्ततेकथा ॥ तस्मात्तस्माज्जगन्नाथोयातित्यक्त्वान
कर्हिचित् ॥ ९ ॥ कृष्णस्ययःकथारम्भेकुर्याद्विघ्नंनराधमः ॥ नरकान्निष्कृतिर्नास्तिमन्वन्तरशतावधि ॥ १० ॥ येपुराणकथांश्रुत्वानिन्दन्त्युपहस
न्तिवै॥तेषांकरस्थानरकाबहुक्लेशकराःसदा॥११॥ जन्मान्तरार्जितंपापंतत्क्षणादेवनश्यति ॥श्रीकृष्णचरितंयोवैश्रोतुमिच्छांकरोत्यपि ॥१२॥ भक्त्या
योवैनरःकुर्याच्छ्रीकृष्णचरितंतथा ॥ नजानेश्रवणेतस्यकागतिर्वाभविष्यति ॥ १३ ॥ ब्रह्महत्यादिकंपापमकालमरणंतथा ॥ सुरापानंतथास्तेयंसर्वं
नश्यतिपापिनः ॥ १४ ॥ पापंकृत्वातुयोमर्त्यःपश्चात्पापंनिवर्तयेत् ॥ तस्यपापंव्रजेन्नाशमग्निनातूलराशिवत् ॥ १५ ॥ श्रीकृष्णचरितंविप्रति
ष्ठेद्वैपुस्तकंगृहे ॥ तस्यगृहसमीपंहिनायान्तियमकिङ्कराः ॥ १६ ॥ जैमिनिरुवाच ॥ वदन्तिवैष्णवान्कांश्चवाञ्छाब्रूहिगुरोमम ॥ इदानींता
न्समाज्ञातुंतेषांमाहात्म्यमुत्तमम् ॥ १७ ॥ व्यासउवाच ॥ योनरोमस्तकेभक्त्यावैष्णवाङ्घ्र्यम्भसोद्विज ॥ करोतिसेचनंपापीतीर्थस्नानेनत
स्यकिम् ॥ १८ ॥ साधुसङ्गंतुयःकुर्यात्क्षणंवार्द्धक्षणंद्विज ॥ तस्यनश्यन्तिपापानिब्रह्महत्यासुखानिच ॥ १९ ॥ यत्रयत्रकुलेचैवएकोभ
वतिवैष्णवः ॥ कुलंतस्ययदापापैर्युक्तंतन्मोक्षगामिवै ॥ २० ॥ हिंसादम्भकामक्रोधैर्वर्जिताश्चैवयेनराः ॥ लोभमोहपरित्यक्ताज्ञेयास्तेवैष्णवा
द्विज ॥ २१ ॥ पितृभक्तादयायुक्ताःसर्वप्राणिहितेरताः ॥ अमत्सरावैष्णवायेविज्ञेयाःसत्यभाषिणः ॥ २२ ॥ विप्रभक्तिरतायेचपरस्त्रीषुन
पुंसकाः ॥ एकादशीव्रतरताविज्ञेयास्तेचवैष्णवाः ॥ २३ ॥ गायन्तिहरिनामानितुलसीमाल्यधारकाः ॥ हर्यङ्घ्रिसलिलैःसिक्ताविज्ञेयास्तेचवै
ष्णवाः ॥ २४ ॥ श्रोत्रयोर्मस्तकेयेषांतुलस्याःपर्णमुत्तमम् ॥ कर्हिचिद्दृश्यतेविप्रविज्ञेयास्तेचवैष्णवाः ॥ २५ ॥ पाखण्डसङ्गरहिताविप्रद्वेषवि

१ 'परस्त्रीहरणं' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वर्जिताः ॥ सिञ्चेयुस्तुलसींयेचज्ञातव्यावैष्णवानराः ॥ २६ ॥ पूजयन्तिहरिंयेचतुलस्याचार्चयन्तिये ॥ कन्यादानरतायेचयेवैह्यतिथिपूजकाः
॥ २७ ॥ शृण्वन्तिविष्णुचरितंविज्ञेयावैष्णवानराः ॥ यस्यगृहेसुप्रतिष्ठेच्छालग्रामशिलापिच ॥ २८ ॥ मार्जयन्तिहरेःस्थानंपितृयज्ञप्रवर्तकाः ॥
जनेदीनेदयायुक्ताविज्ञेयास्तेचवैष्णवाः ॥ २९ ॥ परस्वंब्राह्मणद्रव्यंपश्यन्तिविषवच्चये ॥ हरेर्नैवेद्यंयेऽश्नन्तिविज्ञेयावैष्णवाजनाः ॥ ३० ॥ वेदशा
स्त्रानुरक्तायेतुलसीवनपालकाः ॥ राधाष्टमीव्रतरताविज्ञेयास्तेचवैष्णवाः ॥ ३१ ॥ श्रीकृष्णपुरतोयेचदीपंयच्छन्तिश्रद्धया ॥ परनिन्दांनकुर्वन्तिविज्ञे
यास्तेचवैष्णवाः ॥ ३२ ॥ सूतउवाच ॥ पृष्टोजैमिनिनाव्यासइत्युवाचयथाक्रमम् ॥ मयेदंकथ्यतेब्रह्मन्यत्प्रसङ्गाद्गुरोःश्रुतम् ॥३३॥ अध्यायंश्रद्धया
युक्तायेशृण्वन्तिनरोत्तमाः ॥ सर्वपापविनिर्मुक्तायान्तिविष्णोःपरंपदम् ॥ ३४ ॥ इतिश्रीपाद्मेमहापुराणेब्रह्मखण्डेव्यासजैमिनिसंवादेप्रथमोऽध्यायः
॥ १ ॥ सूतउवाच ॥ शृणुशौनकवक्ष्यामिचान्यधर्मंपुरातनम् ॥ व्यासजैमिनिसंवादंश्रोतॄणांपापनाशनम् ॥ १ ॥ जमिनिरुवाच ॥ कर्मणाहिगुरोके
नमन्दिरंजगतीपतेः ॥ यातितत्कथयस्वाद्यनरःपापीचमेप्रभो ॥ २ ॥ व्यासउवाच ॥ श्रीकृष्णमन्दिरेयोवैलेपनंकुरुतेनरः ॥ सर्वपापविनिर्मुक्तश्चा
न्तेयातिहरेर्गृहम् ॥३॥ यश्चाम्बुलेपनंकुर्यात्संक्षपाच्छृणुजैमिने॥तस्यपुण्यमहंवच्मिमन्दिरेजगतीपतेः ॥४॥ तत्रयावन्तिवैसन्तिरजांसिचद्विजोत्तम॥
तावत्कल्पसहस्राणिसवसेद्विष्णमन्दिरे ॥ ५ ॥पुराऽऽसीद्दण्डकोनाम्नाचौरोलोकभयप्रदः ॥ ब्रह्मस्वहारीमित्रघ्नोयुगेद्वापरसंज्ञके ॥ ६ ॥ असत्यभाषी
क्रूरश्चपरस्त्रीगमनेरतः ॥ गोमांसाशीसुरापश्चपाखण्डजनसङ्गभाक् ॥ ७ ॥वृत्तिच्छेदीद्विजातीनांन्यासापहारकस्तथा ॥ शरणागतहन्ताचवेश्यावि
भ्रमलोलुपः ॥ ८ ॥ एकदासद्विजश्रेष्ठकस्यचिद्विष्णमन्दिरम् ॥ जगामहरणार्थायविष्णोर्द्रव्यंसमूढधीः ॥ ९ ॥ अथद्वारिप्रविश्यासावङ्घ्रिंकर्दमसंयु
तम्॥प्रोज्झयामासवैनिम्नेभूमौदेवगृहस्यच ॥१०॥ तेनैवकर्मणाभूमिर्निम्नरिक्ताबभूवह ॥ लोहस्यचशलाकाभ्यामुद्धाट्यत्ववरंमुदा ॥११॥ प्रविवेशहरे
र्गेहंवितानवरशोभितम् ॥ रत्नकाञ्चनदीपाढ्यंपरिध्वस्तमहत्तमः ॥ १२ ॥ नानापुष्पसुगन्धाढ्यंनानापात्रसमाकुलम् ॥ सुवासितस्यतैलस्यगन्धे
नपरिपूरितम् ॥ १३ ॥ अनेनहारकेणाथपर्यंकेसुमनोहरे ॥ शायितोराधयासार्द्धंदृष्टःपीताम्बरोऽच्युतः ॥ १४ ॥ प्रणम्यराधिकानाथंनिष्पापःसो
ऽभवत्तदा ॥ नेष्याम्यथननेष्यामिअनेनकिंभवेन्मम ॥ १५ ॥ सेवांकर्तुमशक्तोऽहंयतश्चौरोऽस्मिसर्वदा ॥ द्रव्येणकार्यमस्तीतितन्नेतुंकृतवान्मनः
॥ १६ ॥ पातयित्वांशुकंभूमौकौशेयंकमलापतेः ॥ बबन्धवस्तुजातंचपाणौकृत्वासकम्पितः ॥ १७ ॥ विष्णोर्मायापतेश्चाथतानिसर्वाणिजैमिने ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृत्वाशब्दंसुघोरंचपतितान्यथतांनिवै ॥१८॥ परित्यज्यसुनिद्रांचधावन्तइतिकिंन्वहो ॥ आगताबहुशोलोकाश्चोरोद्रव्यंजवेनच॥१९॥त्यक्त्वाधनंच
चौरोऽपित्रस्तःकिञ्चिज्जगामह ॥ दंशितःकालसर्पेणमृतोऽसौगतकिल्बिषः ॥ २० ॥ यमाज्ञयातस्यदूताःपाशमुद्गरपाणयः ॥ आगतास्तंसमानेतुंदं
ष्ट्रिणश्चर्मवाससः ॥ २१ ॥ बबन्धुश्चर्मपाशेननिन्युर्दुर्गमवर्त्मना ॥ दृष्ट्वातंशमनःक्रुद्धःपप्रच्छसचिवंप्रति ॥ २२ ॥ यमउवाच ॥ अनेनकिंकृतंकर्म
पापंवापुण्यमेववा ॥ समूलंवदहेप्राज्ञचित्रगुप्तममाग्रतः ॥ २३ ॥ चित्रगुप्तउवाच ॥ सृष्टानियानिपापानिविधात्रापृथिवीतले ॥ कृतान्यनेनमूढेनस
त्यमेतन्मयोदितम् ॥ २४ ॥ किंत्वाकर्णयलोकेशसुकृतंचास्यवर्त्तते ॥ मन्येऽहंयमुनाभ्रातःसर्वपापविलोपितत् ॥ २५ ॥ धर्मराजउवाच ॥ किं
पुण्यंवर्ततेऽमात्यवदसारंममान्तिके ॥ श्रुत्वैवंतद्विधास्यामियत्रयोग्योभवेदसौ ॥२६॥ व्यासउवाच ॥ यमस्यवचनंश्रुत्वासभयश्चित्रगुप्तकः ॥ कृत्वा
हस्ताञ्जलिंप्राहचात्मनःस्वामिनेद्विज ॥ २७ ॥ चित्रगुप्तउवाच ॥ हरणार्थंहरेर्द्रव्यंगतोऽसौपापिनांवरः ॥ प्रोज्झितःकर्दमोराजन्पादयोर्द्वारतोह
रेः ॥ २८ ॥ बभूवलिप्तासाभूमिर्बिलच्छिद्रविवर्जिता ॥ तेनपुण्यप्रभावेणनिर्गतंपातकंमहत् ॥ वैकुण्ठंप्रतियोग्योऽसौनिर्गतस्तवदण्डतः ॥ २९ ॥
व्यासउवाच ॥ श्रुत्वासवचनंतस्यपीठंकनकनिर्मितम् ॥ ददौतस्मैचोपविष्टस्तत्रपूज्योयमेनसः ॥ ननामशिरसातंवैप्रोवाचविनयान्वितः ॥ ३० ॥
यमउवाच ॥ पवित्रंमन्दिरंमेऽद्यपादयोस्तवरेणुभिः ॥ कृतार्थोऽस्मिकृतार्थोऽस्मिकृतार्थोऽस्मिनसंशयः ॥ ३१ ॥ इदानींगच्छभोसाधोहरेर्मन्दिर
मुत्तमम् ॥ नानाभोगसमायुक्तंजन्ममृत्युनिवारणम् ॥ ३२ ॥ व्यासउवाच ॥ इत्युक्त्वाधर्मराजोऽसौस्यन्दनेस्वर्णनिर्मिते ॥ राजहंसयुतेदिव्ये
तमारोप्यगतैनसम् ॥ ३३ ॥ समस्तसुखदंस्थानंप्रेषयामासचक्रिणः ॥ एवंप्रविष्टोवैकुण्ठेतत्रतस्थौसुखंचिरम् ॥ ३४ ॥ लेपनंयेप्रकुर्वन्तिभक्त्या
तुहरिमन्दिरे ॥ तेषांकिंवाभविष्यतिनजानेऽहंद्विजोत्तम ॥ ३५ ॥ यइदंशृणुयाद्भक्त्यापठेद्योवासमाहितः ॥ कोटिजन्मार्जितंपापंनश्यत्येवनसंश
यः ॥ ३६ ॥ इतिश्रीपाद्मेमहापुराणेब्रह्मखण्डेहरिमन्दिरलेपनमाहात्म्यंनामद्वितीयोऽध्यायः ॥ २ ॥ शौनकउवाच ॥ कार्त्तिकस्यचमाहात्म्यं
ब्रूहिसूतममाग्रतः ॥ तद्व्रतस्यफलंकिंवादोषंकिंतदकुर्वतः ॥ १ ॥ सूतउवाच ॥ पुरैकदामुनिश्रेष्ठव्यासंसत्यवतीसुतम् ॥ जैमिनिःपृष्टवानेतदारेभे
कथितंमुनिः ॥ २ ॥ व्यासउवाच ॥ तिलतैलंमैथुनंयःशुभदेकार्त्तिकेत्यजेत् ॥ बहुजन्मकृतैःपापैर्मुक्तोयातिहरेर्गृहम् ॥ ३ ॥ मत्स्यंचमैथुनं
योवैकार्त्तिकेनपरित्यजेत् ॥ प्रतिजन्मनिसंमूढःशूकरश्चभवेद्ध्रुवम् ॥ ४ ॥ कार्त्तिकेतुलसीपत्रैःपूजयेद्वैजनार्दनम् ॥ पत्रेपत्रेऽश्वमेधस्यफलंप्राप्नो

१ 'भूतले' । इ० पा०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिमानवः ॥ ५ ॥ कार्तिकेमुनिपुष्पैर्यःपूजयेन्मधुसूदनम् ॥ देवानांदुर्लभंमोक्षंप्राप्नोतिकृपयाहरेः ॥ ६ ॥ कार्त्तिकेमुनिशाकंवैयोऽश्नातिचनरो
त्तमः ॥ संवत्सरकृतंपापंशाकेनैकेननश्यति ॥ ७ ॥ फलंतस्यनरोऽश्नातिचोर्जेयोवैहरिप्रिये ॥ प्रदायतुहरेर्ब्रह्मन्वृजिनंकोटिजन्मजम् ॥ ८ ॥
सुरसंसर्पिषायुक्तंदद्याद्योहरयेऽपिच ॥ सर्वपापैर्विनिर्मुक्तःसगच्छेद्धरिमन्दिरम् ॥ ९ ॥ कार्तिकेयोनरोदद्यादेकपद्मंहरावपि ॥ अन्तेविष्णुपदंगच्छे
त्सर्वपापविवर्जितः ॥ १० ॥ प्रातःस्नानंनरोयोवैकार्तिकेश्रीहरिप्रिये ॥ करोतिसर्वतीर्थेषुयत्स्नात्वातत्फलंलभेत् ॥ ११ ॥ कार्तिकेयोनरोदद्यात्प्रदीपं
नभसिद्विजः ॥ विप्रहत्यादिभिःपापैर्मुक्तोगच्छेद्धरेर्गृहम् ॥ १२ ॥ मुहूर्तमपियोदद्यात्कार्त्तिकेप्रीतयेहरेः ॥ दीपंनभसिविप्रेन्द्रतस्मिंस्तुष्टःसदाहरिः
॥ १३ ॥ योदद्याच्चगृहेदीपंकृष्णस्यसघृतंद्विजः ॥ कार्तिकेचाश्वमेधस्यफलंस्याद्वैदिनेदिने ॥ १४ ॥ प्रदीपस्यचमाहात्म्यंविशेषमुच्यतेमया ॥
निशामयद्विजश्रेष्ठसेतिहासंसमाहितः ॥ १५ ॥ पूर्वंत्रेतायुगेविप्रोवैकुण्ठोनामतःशुचिः ॥ यस्यसङ्गप्रभावेणमुक्तोभवतिपातकी ॥ १६ ॥ एकदाकार्ति
केसोऽपिप्रदीपंपुरतोहरेः ॥ दत्त्वागृहंगतोविप्रोघृतपूर्णंद्विजर्षभः ॥ १७ ॥ सर्पिस्तत्खादितुंचाखुरागतोऽपिप्रदीपतः ॥ यावत्खादितुमारेभेबोधितो
ऽसौप्रदीपकः ॥ १८ ॥ मूषकोऽग्निभयात्तत्रवेगेनापिपलायितः ॥ आखोश्चसकलंपापंविनष्टंकृपयाहरेः ॥ १९ ॥ सर्पेणदंशितश्चाखुःप्राण
त्यागंचकारह ॥ ततोयमाज्ञयादूताःपाशमुद्गरपाणयः ॥ २० ॥ आगतास्तंसमानेतुंबबन्धुश्चर्मरज्जुभिः ॥ यावन्नेतुंमनश्चक्रुःशङ्खचक्रगदाध
राः ॥ २१ ॥ आगतागरुडारूढाविष्णुदूताश्चतुर्भुजाः ॥ विमानंगगनेचैवराजहंसयुतंशुभम् ॥ २२ ॥ निर्मितंकनकैःशुद्धैःकामगंकृपयाहरेः ॥
पाशंछित्त्वाततोदूताःप्रोचुस्तेयमकिङ्करान् ॥ २३ ॥ विष्णुभक्तोऽप्यसौमूढाव्यर्थंतुबन्धनंकृतम् ॥ गच्छध्वंशमनप्रेष्यायदिवाञ्छास्तिजीवितुम्
॥ २४ ॥ श्रुत्वाप्रकम्पितास्तेवैपृच्छन्तिविनयान्विताः ॥ केनपुण्यप्रभावेणयुष्माभिर्नीयतेपुरम् ॥ २५ ॥ असौविष्णोर्महापापीयूयंतद्वक्तु
मर्हथ ॥ २६ ॥ विष्णुदूताऊचुः ॥ पुरतोवासुदेवस्यप्रदीपबोधनंकृतम् ॥ तेनैवकर्मणादूतानयामोविष्णुमन्दिरम् ॥ २७ ॥ अनिच्छयापियः
कुर्याद्विष्णोर्दीपस्यबोधनम् ॥ कोटिजन्मार्जितंपापंत्यक्त्वायातिहरेर्गृहम् ॥ २८ ॥ भक्त्याप्रदीपंयोदद्यात्कार्तिकेतुहरेर्दिने ॥ तस्यपुण्यंसमाख्या
तुंनशक्तोहरिणाविना ॥ २९ ॥ घृतपूर्णप्रदीपंयोभक्त्यादद्याद्धरेर्गृहे ॥ अश्वमेधसहस्रेणतस्यकिंवाप्रयोजनम् ॥ ३० ॥ अश्वमेधप्रकर्तायःस्वर्गं
यातिहरेर्दिने ॥ कार्तिकेदीपदाताचसगच्छेद्धरिमन्दिरम् ॥ ३१ ॥ व्यासउवाच ॥ इतिश्रुत्वाततोदूतागतास्तेवैयथागताः ॥ विष्णुदूतार
थेकृत्वागतास्तंविष्णुमन्दिरम् ॥ ३२ ॥ विष्णुसान्निध्यएवास्यमन्वन्तरशतंगतम् ॥ ततोमर्त्येराजकन्याबभूवकृपयाहरेः ॥ ३३ ॥ पुत्रपौत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समायुक्ताचिरंभोगंचकारसा ॥ इतःपुनर्गतासातुगोलोकंहरिसेवया ॥ ३४ ॥ सूतउवाच ॥ भक्त्याशृणोतियोमर्त्योदीपमाहात्म्यमुत्तमम् ॥
सर्वपापविनिर्मुक्तःसयातिविष्णुमन्दिरम् ॥ ३५ ॥ इतिश्रीपाद्मेमहापुराणेब्रह्मखण्डेदीपदानमाहात्म्यंनामतृतीयोऽध्यायः ॥ ३ ॥ शौनकउवाच ॥
जयन्त्याःसूतमाहात्म्यंकदासाक्रियतेजनैः ॥ कथयस्वममत्वंवैपोतःसंसारसागरे ॥ १ ॥ सूतउवाच ॥ शृणुविप्रप्रवक्ष्यामियत्पृष्टोमुनिसत्तम ॥
पुराब्रह्मानारदेनपृष्टएतत्सुरालये ॥ २ ॥ नारदउवाच ॥ जयन्त्याश्चैवमाहात्म्यंकथयस्वपितामह ॥ यच्छ्रुत्वाहंगमिष्यामितद्विष्णोःपरमंपदम् ॥
॥ ३ ॥ ब्रह्मोवाच ॥ शृणुष्वावहितोविप्रतवाग्रेकथयाम्यहम् ॥ जयन्त्याउपवासेनविष्णुलोकंसगच्छति ॥ ४ ॥ स्मरणात्कीर्तनात्पापंसप्तजन्मा
र्जितंमुने ॥ जयन्तीदहतेतच्चकिंपुनःसोपवासकृत् ॥ ५ ॥ जन्माष्टमीचनवमीचैत्रेमासिसिताशुभा ॥ कृष्णाचतुर्दशीकुम्भेमेषेशुक्लाचतुर्दशी ॥ ६ ॥
दुर्गाष्टम्याश्विनेशुक्लाद्वादशीश्रवणान्विता ॥ महापुण्याश्चशुभदाजयन्त्यःषट्प्रकीर्तिताः ॥ ७ ॥ कृष्णजन्माष्टमीपूर्वाप्रसिद्धापापनाशिनी ॥ क्रतु
कोटिसमाह्येषातीर्थानामयुतैःसमा ॥ ८ ॥ कर्तागवांसहस्रंतुयोददातिदिनेदिने ॥ तत्फलंसमवाप्नोतिजयन्त्यांसमुपोषणे ॥ ९ ॥ हेमभारसह
स्रंतुकुरुक्षेत्रेरविग्रहे ॥ तत्फलंसमवाप्नोतिजयन्त्यांसमुपोषणे ॥ १० ॥ कृष्णाजिनसहस्राणितिलधेनुशतानिच ॥ तत्फलंसमवाप्नोतिजयन्त्यां
समुपोषणे ॥ ११ ॥ कन्याकोटिसहस्राणांदानेभवतियत्फलम् ॥ तत्फलंसमवाप्नोतिजयन्त्यांसमुपोषणे ॥ १२ ॥ ससागरामिमांपृथ्वींद
त्त्वायल्लभतेफलम् ॥ तत्फलंसमवाप्नोतिजयन्त्यांसमुपोषणे ॥१३॥ वापीकूपतडागादिकर्तव्यंदेवतालये ॥ तत्फलंसमवाप्नोतिजयन्त्यांसमुपोषणे
॥ १४ ॥ मातापित्रोर्गुरूणांचभक्तियुक्तःकरोतियः ॥ तत्फलंसमवाप्नोतिजयन्त्यांसमुपोषणे ॥ १५ ॥ आपदाहरणार्थायतीर्थसेवाकृतात्मनाम्
॥ सत्यव्रतानांयत्पुण्यंजयन्त्यांसमुपोषणे ॥ १६ ॥ गङ्गायांनर्मदायांयत्पुण्यंसारस्वतेजले ॥ स्नात्वापुण्यमवाप्नोतिजयन्त्यांसमुपोषणे ॥ १७ ॥
यत्पुण्यंश्राद्धकर्तॄणांपितॄणामिन्दुसंक्षये ॥ तत्फलंसमवाप्नोतिजयन्त्यांसमुपोषणे ॥ १८ ॥ नारदउवाच ॥ केनकेनकृतापूर्वंकथयस्वपितामह
॥ १९ ॥ ब्रह्मोवाच ॥ कार्तवीर्येणकर्णेनकुमारेणचधीमता ॥ सगरेणदिलीपेनकाकुत्स्थेनकृतापुरा ॥ २० ॥ गौतमेनचगार्ग्येणजामदग्न्येन
धीमता ॥ वाल्मीकिनाकृतापूर्वंद्रौपद्येनसाधुना ॥ २१ ॥ ददातिवाञ्छितान्कामान्भाद्रकस्यसिताष्टमी ॥ प्राजापत्यर्क्षसंयुक्ताविशेषेण
मताष्टमी ॥ २२ ॥ वर्षेवर्षेप्रकर्तव्याप्रीत्यर्थेचक्रपाणिनः ॥ कोटिजन्मार्जितंपापंमुहूर्तेनविलीयते ॥ २३ ॥ रात्रौजागरणंकृत्वानिष्ठापूर्वं
जितेन्द्रियः ॥ गन्धपुष्पादिनैवेद्यैःपूजनीयःपृथक्पृथक् ॥ २४ ॥ एवंयःकुरुतेविप्रजयन्तीसमुपोषणम् ॥ कोटिजन्मार्जितंपापंज्ञानतो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽज्ञानतःकृतम् ॥ २५ ॥ प्रसादाद्देवकीसूनोर्यामार्द्धेनविलीयते ॥ जयन्तीतिथिसम्प्राप्तौभुञ्जतेयेनराधमाः ॥ २६ ॥ त्रैलोक्यसम्भवंपापं
भुञ्जतेतेनसंशयः ॥ सागराद्यानितीर्थानिमुक्तिस्थानानिसर्वशः ॥ २७ ॥ गृहेतिष्ठन्तिसर्वाङ्गेजयन्तीव्रतकारिणः ॥ तस्यसर्वाणितीर्थानि
देहेतिष्ठन्तिदेवताः ॥ २८ ॥ करोतियोनरोभक्त्याजयन्तींकृष्णवल्लभाम् ॥ नवेदेनपुराणेनमयादृष्टंमहामुने ॥ २९ ॥ तत्समंनाधिकंवा
पिकृष्णराधाष्टमीव्रतम् ॥ नकरोतिनरोभक्त्यासभवेत्क्रूरराक्षसः ॥ ३० ॥ योनरोऽश्नातिमूढात्माजयन्तीवासरेद्विज ॥ महानरकमश्ना
तियथाचहरिवासरे ॥ ३१ ॥ अतीतमागमिष्यच्चकुलमेकोत्तरंशतम् ॥ पतेत्तुनरकेघोरेजयन्त्यांभोजनेनवै ॥ ३२ ॥ जयन्तीबुधवारेचरोहिण्यासहि
तायदा ॥ भवेच्चमुनिशार्दूलकिंकृतैर्व्रतकोटिभिः ॥ ३३ ॥ कृतेत्रेतायुगेचैवद्वापरेचकलौयुगे ॥ कृतासम्यग्विधानेनजयन्तीपापनाशिनी ॥ ३४ ॥
जागरेपद्मनाभस्यपुराणंपाठयेत्तुयः ॥ आजन्मोपार्जितंपापंदहतेतूलराशिवत् ॥ ३५ ॥ यःशृणोतिनरोभक्त्यापुराणंहरिवासरे ॥ कोटिजन्मार्जितं
तस्यपापंनश्यतितत्क्षणात् ॥ ३६ ॥ वासरेपद्मनाभस्यपूजयेद्वाचकंमुने ॥ कुलकोटिंसमुद्धृत्यविष्णुलोकेसपूज्यते ॥ ३७ ॥ जयन्त्यामुपवासेचयो
नरोऽत्रपराङ्मुखः ॥ सर्वधर्मविनिर्मुक्तोयात्यसौनरकंध्रुवम् ॥ ३८ ॥ गन्धपुष्पैश्चधूपैश्चघृतपूर्णप्रदीपकैः ॥ पूजयेद्भक्तिभावैश्चदद्याद्विप्रायदक्षिणाम्
॥ ३९ ॥ विधिनानेनयोविप्रजयन्तींप्रकरोतिच ॥ नरोवैतारयेद्भक्त्यापुरुषानेकविंशतिम् ॥ ४० ॥ नदौर्भाग्यंनवैधव्यंनभवेत्कलहोगृहे ॥ सन्त
तेर्नविरोधंचनपश्यतिधनक्षयम् ॥ ४१ ॥ यान्यांश्चिकीर्षतेकामाञ्जयन्तीसमुपोषकः ॥ तांस्तान्प्राप्नोतिसकलान्विष्णुलोकंसगच्छति ॥ ४२ ॥
विष्णुभक्तिपरानित्यंजयन्तीव्रतमानसाः ॥ तेधन्यास्तेकुलीनास्तईश्वरास्तेचपण्डिताः ॥ ४३ ॥ यानिकानिचतीर्थानिव्रतानिनियमानिच ॥ जय
न्तीवासरस्यैवकलांनार्हन्तिषोडशीम् ॥ ४४ ॥ भाद्रेवैचोभयेपक्षेयःकरोतिसभार्यकः ॥ राधाकृष्णाष्टमींवत्सप्राप्नोतिहरिसन्निधिम् ॥ ४५ ॥ व्रतं
चपुण्यकारंचयःकरोतिसदाहरेः ॥ सयातिविष्णोर्वैकुण्ठंजयन्तीसमुपोषकः ॥ ४६ ॥ अनाचारंकुलभ्रष्टंकीर्तिहीनंकुयोनिजम् ॥ नाशयत्या
शुपापंचजयन्तीहरिवल्लभा ॥ ४७ ॥ मेरुतुल्यानिपापानिब्रह्महत्यादिकानिच ॥ सनिर्दहतिसर्वाणिजयन्त्यांसमुपोषकः ॥ ४८ ॥ पुत्रार्थीलभ
तेपुत्रंधनार्थीलभतेधनम् ॥ मोक्षार्थीलभतेमोक्षंजयन्त्यांसमुपोषकः ॥ ४९ ॥ जयन्तीकरणेचित्तंयेषांभवतितत्परम् ॥ यमोऽपिशङ्कतेनित्यंतेयान्ति
परमांगतिम् ॥ ५० ॥ सूतउवाच ॥ कथयित्वानारदंतुययौसचयथागतः ॥ मयापिकथितंब्रह्मन्यत्पृष्टोऽहंत्वयामुने ॥ ५१ ॥ माहात्म्यंचजयं
न्त्यायेशृण्वन्तिभक्तिभावतः ॥ तेऽपियान्तिपरंधामविमुक्ताःसर्वपातकैः ॥ ५२ ॥ पुराणवाचकंब्रह्मञ्जयन्तीव्रतिनंतथा ॥ येपश्यन्तिनराःपापास्ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यान्तिपरमंपदम् ॥९३॥ इतिश्रीपाद्मेमहापुराणेब्रह्मखण्डेब्रह्मनारदसंवादेजयन्तीव्रतमाहात्म्यंनामचतुर्थोऽध्यायः ॥ ४ ॥ शौनकउवाच ॥ कथयस्व
महाप्राज्ञपुत्रहीनोजनोभवेत् ॥ कर्मणाकेनवैसूतपुत्रोभवतिकेनच ॥ १ ॥ सूतउवाच ॥ एतत्पृष्टःपुराब्रह्मानारदेनमहात्मना ॥ सयदाहतदातं
चशृणुष्वमुनिपुङ्गव ॥ २ ॥ नारदउवाच ॥ पितामहमहाप्राज्ञसर्वतत्त्वार्थपारग ॥ अपुत्रोवैभवेन्मर्त्यःकर्मणाकेनपद्मज ॥ ३ ॥ वन्ध्यास्त्रीवाभवेत्केन
वृजिनेनममाग्रतः ॥ कथयशृण्वतोवैमेसर्वप्राणिहितेरत ॥ ४ ॥ दुहिताजायतेकेनकर्मणावानपुंसकः ॥ मृतवत्सोभवेत्केनमृतवत्सातिदुःखिता ॥
केनपुण्येनभोब्रह्मन्पुनःपुत्रोभवेद्वद ॥५॥ ब्रह्मोवाच ॥ कथयामिसमासेनसावधानेनतच्छृणु ॥ वृत्तान्तंपृच्छसित्वंवैशृण्वतांविस्मयप्रदम् ॥ ६ ॥ पूर्व
जन्मनियोमर्त्योवर्तनंब्राह्मणस्यच ॥ हरेद्वाहारयेदत्रपुत्रहीनोभवेत्किल ॥ ७ ॥ इहजन्मनियोमर्त्यःपुराणश्रवणंहिच ॥ ससस्यभूमेर्दानंचकुर्याद्वैश्र
द्धयान्वितः ॥ ८ ॥ धेनुंबहुगुणांहैमींबहुदुग्धांसदक्षिणाम् ॥ सुवर्णप्रतिमांचैवतस्यपुत्रोभवेद्ध्रुवम् ॥ ९ ॥ पूर्वजन्मनियानारीपरबालकघातनम् ॥
करोतिकपटेनैबालहीनाभवेद्ध्रुवम् ॥ १० ॥ सौवर्णप्रतिमादानंयानारीश्रद्धयान्विता ॥ कुर्यात्पानंब्राह्मणस्यभक्त्यावैचरणाम्बुनः ॥ ११ ॥ पुराण
श्रवणंचैवदद्याद्वैबहुदक्षिणाम् ॥ बह्वपत्याजीववत्साभवेन्नास्त्यत्रसंशयः ॥ १२ ॥ जलेनिमग्नंबालंयोदृष्ट्वायानसमुद्धरेत् ॥ इहजन्मन्यपुत्रोवैसा
पुत्रीचभवेद्ध्रुवम् ॥ १३ ॥ वृषभंचैवकूष्माण्डंससुवर्णंसवस्त्रकम् ॥ दद्याद्दानंब्राह्मणस्यकुर्याद्वालव्रतंशुभम् ॥ १४ ॥ गौरींकन्यांतथाकुर्यात्पुराणश्रव
णंहियः ॥ पुत्रोवैजायतेतस्यसर्वपातकनाशनम् ॥ १५ ॥ पूर्वजन्मनियोमर्त्योनिराशंचातिथिंद्विज ॥ कुर्यात्क्रोधेनदण्डंचपुत्रहीनोभवेद्ध्रुवम् ॥१६॥
ब्राह्मणंचातिथिंचैवकुर्याद्भक्त्याप्रपूजनम् ॥ अन्नदानंजलंचैवतथादेवालयंशुभम् ॥ १७ ॥ पूर्वजन्मनियानारीभ्रूणहत्यांचयोनरः ॥ कुर्यात्सामृतव
त्साचमृतवत्सोभवेद्ध्रुवम् ॥ १८ ॥ यानारीस्वामिसहिताकुर्याच्चहरिवासरम् ॥ सुपुत्राभर्तृसुभगाभवेत्साप्रतिजन्मनि ॥ १९ ॥ योनरोगोदमंकुर्या
च्छूद्रःकुर्याद्विमोहितः ॥ ब्राह्मणीहरणंवापिकर्मणासनपुंसकः ॥ २० ॥ इदंतुवृजिनंकृत्वापश्चात्पुण्यंकरोतियः ॥ इहपुण्यप्रभावेणदुहिताजायतेद्विज
॥ २१ ॥ आसीत्त्रेतायुगेराजाश्रीधरोनामतोद्विज ॥ अपुत्रोधनवांस्तस्यजायाहेमप्रभावती ॥ २२ ॥ व्यासंसकलशास्त्रज्ञंसर्वलोकहितैषिणम् ॥
आगतंचैवपप्रच्छचापुत्रोऽहंकथंद्विज ॥ २३ ॥ उवाचनृपतेःश्रुत्वावचनंविनयान्वितम् ॥ राज्ञादत्तेचपीठेचनिर्मितेकनकादिभिः ॥ २४ ॥ राजा
राज्ञीतस्यपादौधौतौकृत्वाचहर्षितौ ॥ पीत्वापादोदकंद्वौचसर्वपातकनाशनम् ॥ २५ ॥ व्यासउवाच ॥ राजञ्छृणुष्वयत्पृष्टमपुत्रोयेनकर्मणा ॥ तवे
यंराज्ञीचापुत्रीचैकपत्नीव्रतस्तथा ॥ २६ ॥ पूर्वजन्मनिचन्द्रस्त्वंनाम्नावरतनुःस्मृतः ॥ भार्यातवापिशुभ्राङ्गीनाम्नावैशङ्करीस्मृता ॥२७॥ एकदापथि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यातौचनीचपुत्रजलेऽपिच ॥ मग्नंदृष्ट्वाहेलयाचगतौसपञ्चतांगतः ॥ २८ ॥ बहुपुण्यप्रभावेणराज्ञीराजागतौयुवाम् ॥ तेनकर्मविपाकेनयुवयोर्नभवेत्सुतः ॥ २९ ॥ राजोवाच ॥ इदानींकेनपुण्येनसुतोवैजायतेप्रभो ॥ अपुत्रस्यमनुष्यस्यजीवनंहिनिरर्थकम् ॥ ३० ॥ व्यासउवाच ॥ सवस्त्रंचैवकूष्माण्डंवृषभंससुवर्णकम् ॥ देहिदानंब्राह्मणस्यकुरुबालव्रतंतथा ॥ ३१ ॥ गौरींकन्यांतथादेहिपुराणश्रवणंकुरु ॥ पुत्रोवैजायतेतत्रसर्वपातकनाशनम् ॥ ३२ ॥ ब्रह्मोवाच ॥ इतिश्रुत्वाततोराजाव्यासोक्तंदानमुत्तमम् ॥ पुराणश्रवणंचैवचकारगतकिल्बिषः ॥ ३३ ॥ ततःपुत्रोवर्षमध्येबभूवसर्वपूजितः ॥ अभूद्राजासार्वभौमःसुन्दरःकुलनायकः ॥ ३४ ॥ सूतउवाच ॥ यइदंशृणुयाद्भक्त्याकरोतिदानमुत्तमम् ॥ अपुत्रोलभतेपुत्रंसंक्षेपात्कथितंमया ॥ ३५ ॥ भक्त्याश्रुत्वातुयानारीकुर्याद्ब्राह्मणपूजनम् ॥ सुपुत्रासाभवेन्नित्यंशास्त्रोक्तविधिनाद्विज ॥ ३६ ॥ सुवर्णंरजतंवस्त्रंपुष्पमाल्यंचचन्दनम् ॥ योदद्यात्पुस्तकेभक्त्यासर्वपापप्रणाशनम् ॥ ३७ ॥ पूर्वजन्मनियोमूढोब्रह्मबालकघातकः ॥ तस्यक्रूरोभवेत्पुत्रःसप्तजन्मान्तरैर्द्विज ॥ ३८ ॥ इति श्रीपाद्मेपुराणेब्रह्मखण्डेब्रह्मनारदसंवादेकर्मविपाककथनंनामपञ्चमोऽध्यायः ॥ ५ ॥ शौनकउवाच॥ केनपुण्येनभोसूतवैकुण्ठंसमवाप्यते ॥ तद्वदस्वशृण्वतोमेपोतोहिभवसागरे ॥ १ ॥ सूतउवाच ॥ साधुसाधुमुनिश्रेष्ठसर्वमङ्गलकारक ॥ कथयामिसमासेनशृण्वतांपापनाशनम् ॥ २ ॥ विष्णवेब्राह्मणायैवमृदावेश्मविनिर्मितम् ॥ योवेदद्याद्द्विजश्रेष्ठतस्यपुण्यंनिशामय ॥ ३ ॥ विष्णुलोकेचविप्रःससर्वपापविवर्जितः ॥ सौधवासीभवेन्नित्यंविष्णुलोकेप्रपूज्यते ॥ ४ ॥ विष्णवेसौधगेहंयोदद्याद्वैब्राह्मणायच ॥ हरेर्निकेतनंप्राप्यस्वर्गवासीभवेद्ध्रुवम् ॥ ५ ॥ अन्तेविष्णुपुरंगत्वायुक्तःकोटिकुलैर्द्विज ॥ स्वर्णसौधेगृहेस्थित्वाकुर्याद्भोगंयथासुखम् ॥ ६ ॥ ब्राह्मणस्थापनेपुण्यंयद्वैभवतिभोमुने ॥ सङ्ख्यांकर्तुमशक्तस्तुतद्वेधाःसर्वकारकः ॥ ७ ॥ गण्यन्तेरेणवश्चैवगण्यन्तेवृष्टिबिन्दवः ॥ नगण्यतेविधात्रादिब्रह्मसंस्थापनेफलम् ॥ ८ ॥ नारदेनपुराब्रह्मापृष्टःसंसारसम्भवः ॥ वेधास्तंकथयामासतच्छृणुष्वमहामुने ॥ ९ ॥ पुरासीद्द्वापरेब्रह्मन्वारनारीसुशोभना ॥ सुकेशीहरिणीनेत्रासुमध्याचारुहासिनी ॥ १० ॥ नाम्नासाचञ्चलापाङ्गीययौदेशान्तरंकदा ॥ सर्वपापसमायुक्तानरकेपातयन्तिच ॥११॥ सहजारेणसावित्तकामान्देवालयंगता ॥ तत्रक्षणंसोपविष्टाताम्बूलभक्षणंकृतम् ॥ १२ ॥ शेषंचूर्णंसौधभित्तौदत्त्वानिश्चेकुतूहलात् ॥ ततोगताजारकाङ्क्षीधनार्थंनगरंप्रति ॥ १३ ॥ जारेणकेनचित्सार्द्धंसङ्केतःसहसाकृतः ॥ सङ्केतंतुगतावेश्यावनंरात्रौविमोहिता ॥ १४ ॥ सङ्केतंनागतोवैश्योव्यशङ्किष्टविलोकिता ॥ कथंकान्तोनागतोमेसर्पव्याघ्रैश्चभक्षितः ॥ १५ ॥ सङ्केतनंकथंहित्वागतःकिंकामविह्वलः ॥ अन्ययाज्ञातयासार्द्धमभिलाषीभवेत्किमु ॥ १६ ॥ परामृश्येतिद्व्यन्तःकोटपालभयाद्द्विज ॥ नगरंनागतासाहिलोकमार्गेतमोवृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ते ॥ १७ ॥ एतस्मिन्नन्तरेव्याघ्रःकामरूपीक्षुधातुरः ॥ प्रेषितःकालदेवेनाग्रसदागत्यतांद्विज ॥ १८ ॥ ततस्तुयमुनाभ्रातुर्दूतास्तेभीमवर्ष्मिणः ॥ आगतागिरिकूटाङ्गानेतुंतांपापकर्मणा ॥ १९ ॥ वक्रपादावक्रमुखाउन्नासाबहुदंष्ट्रिणः ॥ चर्मरज्जूर्मुद्गरांश्चगृहीत्वापांसुलान्द्विज ॥ २० ॥ बन्धयामासुरुन्मत्तागणिकांचर्मरज्जुभिः ॥ शङ्खचक्रगदापद्मधारिणोवनमालिनः ॥२१॥ प्रेषितादेवदेवेनतद्भक्तवत्सलेनच ॥ कृष्णजीमूतसङ्काशाः स्फुरद्वदनपङ्कजाः ॥ २२ ॥ श्रेणीधराश्चारुनासादिव्यकुण्डलभूषिताः ॥ ददृशुःपथिगच्छन्तोविष्णोर्दूतामहाबलाः ॥२३॥ विष्णुदूताऊचुः ॥ केयूयंविकृताकारालक्ष्यध्वेकर्बुराइव ॥ इमांविष्णोःप्रियतमांनीत्वाक्वव्रजथोत्तमाम् ॥२४॥ इदंवचनमाकर्ण्यतेषांतेतुद्रुतंययुः ॥ अथतेक्रोधसम्पन्नाविष्णोर्दूतामहाबलाः ॥ २५ ॥ जघ्नुस्तेसन्देशहरान्यमस्यजगतःप्रभोः ॥ चक्रादिशस्त्रसङ्घैश्चसूर्यकोटिसमप्रभैः ॥ २६ ॥ कृतान्तस्यभटाःसर्वेरुदन्तस्तेपलायिताः ॥ यमंप्रोचुःसुभीताश्चवृत्तान्तंसकलंद्विज ॥ यमोऽपितत्कथांश्रुत्वाचित्रगुप्तमुवाचह ॥ २७ ॥ धर्मउवाच ॥ केनपुण्येनभोमन्त्रिन्वेश्यामुक्तिसमागता ॥ एतन्मेपृच्छतःसर्वंकथयस्वयथार्हतः ॥ २८ ॥ चित्रगुप्तउवाच ॥ तयापापान्यर्जितानिजन्मतःसुबहून्यपि ॥ किंत्वाकर्णयलोकेशयदस्याःपुण्यमस्तितत् ॥ २९ ॥ गणिकैकदाधर्मराजसर्वालङ्कारभूषिता ॥ काञ्चित्पुरींजगामाशुजारकामाधनार्थिनी ॥ ३० ॥ तत्रदेवालयेतस्मिन्स्थित्वाताम्बूलभक्षणम् ॥ कृत्वातच्छेषचूर्णंतुददौभित्तौतुकौतुकात् ॥ ३१ ॥ तेनपुण्यप्रभावेणगणिकागतपातका ॥ वैकुण्ठंप्रतिसायातिनिर्गतातवदण्डतः ॥ ३२ ॥ सूतउवाच ॥ इतिश्रुत्वाततोदूतायमोऽपिवचनंद्विज ॥ व्यापारेचान्यतश्चित्तंददुःसागणिकापिच ॥ ३३ ॥ आरूढास्यन्दनेदिव्येराजहंसयुतेतथा ॥ विष्णुलोकंययौसाचवेष्टिताविष्णुकिङ्करैः ॥ ३४ ॥ श्रीविष्णोराज्ञयासाथकुलकोटियुतापिच ॥ तस्थौसौधगृहेविप्रनानाभोगंचकारह ॥ ३५ ॥ भक्त्यायोवैहरेर्गेहेदद्याच्चूर्णंप्रयत्नतः ॥ पुण्यंकिंवाभवेत्तस्यनजानेद्विजपुङ्गव ॥ ३६ ॥ भक्त्याध्यायंपठेद्योवैश्रृणोतिसादरोऽपिच ॥ सर्वपापविनिर्मुक्तोयात्यसौहरिमन्दिरम् ॥ ३७ ॥ इतिश्रीपाद्मेमहापुराणेब्रह्मखण्डेब्रह्मनारदसंवादेषष्ठोऽध्यायः ॥ ६ ॥ शौनकउवाच ॥ कथयस्वमहाप्राज्ञगोलोकंयातिकर्मणा ॥ सुमतेदुस्तरात्केनजनःसंसारसागरात् ॥ राधायाश्चाष्टमीसूततस्यामाहात्म्यमुत्तमम् ॥ १ ॥ सूतउवाच ॥ ब्रह्माणंनारदोऽपृच्छत्पुराचैतन्महामुने ॥ तच्छृणुष्वसमासेनपृष्टवान्सयथाद्विज ॥ २ ॥ नारदउवाच ॥ पितामहमहाप्राज्ञसर्वशास्त्रविदांवर ॥ राधाजन्माष्टमीतातकथयस्वममाग्रतः ॥ ३ ॥ तस्याःपुण्यफलंकिंवाकृतंकेनपुराविभो ॥ अकुर्वतांजनानांहिकिंकिल्बिषंकिंभवेद्विभो ॥ ४ ॥ केनैववुविधानेनकर्तव्यंतद्व्रतंकदा ॥ कस्माज्जाताचसाराधातन्मेकथयमूलतः ॥ ५ ॥ ब्रह्मोवाच ॥ राधाजन्माष्टमींवत्सश्रृणुष्वसुसमाहितः ॥ कथया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मिसमासेनसमग्रंहरिणाविना ॥ ६ ॥ कथितुंतत्फलंपुण्यंनशक्नोत्यपिनारद ॥ कोटिजन्मार्जितंपापंब्रह्महत्यादिकंमहत् ॥ ७ ॥ कुर्वन्तियेस
कृद्भक्त्यातेषांनश्यतितत्क्षणात् ॥ एकादश्याःसहस्रेणयत्फलंलभतेनरः ॥ ८ ॥ राधाजन्माष्टमीपुण्यंतस्माच्छतगुणाधिकम् ॥ मेरुतुल्यसुवर्णा
निदत्त्वायत्फलमाप्यते ॥ ९ ॥ सकृद्राधाष्टमींकृत्वातस्माच्छतगुणाधिकम् ॥ कन्यादानसहस्रेणयत्पुण्यंप्राप्यतेजनैः ॥ १० ॥ वृषभानुसुताष्ट
म्यातत्फलंप्राप्यतेजनैः ॥ गङ्गादिषुचतीर्थेषुस्नात्वातुयत्फलंलभेत् ॥ ११ ॥ कृष्णप्राणप्रियाष्टम्याफलंप्राप्नोतिमानवः ॥ एतद्व्रतंतुयःपापीहे
लयाश्रद्धयापिवा ॥ १२ ॥ करोतिविष्णुसदनंगच्छेत्कोटिकुलान्वितः ॥ पुराकृतयुगेवत्सवारनारीसुशोभना ॥ १३ ॥ सुमध्याहरिणीनेत्रा
शुभाङ्गीचारुहासिनी ॥ सुकेशीचारुकर्णीचनाम्नालीलावतीस्मृता ॥ १४ ॥ तयाबहूनिपापानिकृतानिसुदृढानिच ॥ धनाशयाचैकदासा
निस्सृत्यपुरतःस्वतः ॥ १५ ॥ गतान्यनगरंतत्रदृष्ट्वासुज्ञजनान्बहून् ॥ राधाष्टमीव्रतपरान्सुन्दरेदेवतालये ॥ १६ ॥ गन्धपुष्पैर्धूपदीपैर्वस्त्रै
र्नानाविधैःफलैः ॥ भक्तिभावैःपूजयतोराधायामूर्तिमुत्तमाम् ॥ १७ ॥ केचिद्गायन्तिनृत्यन्तिपठन्तिस्तवमुत्तमम् ॥ तालवेणुमृदङ्गांश्चवादय
न्तिचकेमुदा ॥ १८ ॥ तांस्तांस्तथाविधान्दृष्ट्वाकौतूहलसमन्विता ॥ जगामतत्समीपंसापप्रच्छविनयान्विता ॥ १९ ॥ भोभोःपुण्यात्मानोयू
यंकिंकुर्वन्तोमुदान्विताः ॥ कथयध्वंपुण्यवन्तोमांचैवविनयान्विताम् ॥ २० ॥ तस्यास्तुवचनंश्रुत्वापरकार्यहितेरताः ॥ आरेभिरेतदावक्तुंवैष्ण
वाव्रततत्पराः ॥ २१ ॥ राधाव्रतिनऊचुः ॥ भाद्रेमासिसिताष्टम्यांजाताश्रीराधिकायतः ॥ अष्टमीसाद्यसम्प्राप्ताकुर्महेतांप्रयत्नतः ॥२२॥ गोघात
जनितंपापंस्तेयजंब्रह्मघातजम् ॥ परस्त्रीहरणाच्चैवतथाचगुरुतल्पजम् ॥ २३ ॥ विश्वासघातजंचैवस्त्रीहत्याजनितंतथा ॥ एतानिनाशयत्याशुकृता
याचाष्टमीनृणाम् ॥ २४ ॥ तेषांचवचनंश्रुत्वासर्वपातकनाशनम् ॥ करिष्याम्यहमित्येवपरामृश्यपुनःपुनः ॥ २५ ॥ तत्रैवव्रतिभिःसार्द्धंकृत्वासाव्र
तमुत्तमम् ॥ दैवात्सापञ्चतांयातासर्पघातेननिर्मला ॥२६॥ ततोयमाज्ञयादूताःपाशमुद्गरपाणयः ॥ आगतास्तांसमानेतुंबबन्धुरतिकृच्छ्रतः ॥ २७ ॥
यदानेतुंमनश्चक्रुर्यमस्यसदनंप्रति ॥ तदागताविष्णुदूताःशङ्खचक्रगदाधराः ॥ २८ ॥ हिरण्मयंविमानंचराजहंसयुतंशुभम् ॥ छिन्नंचचक्रधाराभिः
पाशंकृत्वात्वरान्विताः ॥ २९ ॥ रथेचारोपयामासुस्तांनारींगतकिल्बिषाम् ॥ निन्युर्विष्णुपुरंतेचगोलोकाख्यंमनोहरम् ॥ ३० ॥ कृष्णेनराधयातत्र ॥ ९ ॥
स्थिताव्रतप्रसादतः ॥ राधाष्टमीव्रतंतातयोनकुर्याच्चमूढधीः ॥ ३१ ॥ नरकान्निष्कृतिर्नास्तिकोटिकल्पशतैरपि ॥ स्त्रियश्चयानकुर्वन्तिव्रतमेतच्छु
भप्रदम् ॥ ३२ ॥ राधाविष्णोःप्रीतिकरंसर्वपापप्रणाशनम् ॥ अन्तेयमपुरींगत्वापतन्तिनरकेचिरम् ॥ ३३ ॥ कदाचिज्जन्मचासाद्यपृथिव्यांविधवाध्रु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वम् ॥ एकदापृथिवीवत्सदुष्टसङ्घैश्चताडिता ॥२४॥ गौर्भूत्वाचभृशंदीनाचाययौसाममान्तिकम् ॥ निवेदयामासदुःखंरुदन्तीचपुनःपुनः ॥२५॥ तद्वा
क्यंचसमाकर्ण्यगतोऽहंविष्णुसन्निधिम्॥कृष्णेनिवेदितश्चाशुपृथिव्यादुःखसञ्चयः ॥२६॥ तेनोक्तंगच्छभोब्रह्मन्देवैःसार्द्धंचभूतले ॥ अहंतत्रापिगच्छा
मिपश्चान्ममगणैःसह ॥ २७ ॥ तच्छ्रुत्वासहितोदेवैरागतःपृथिवीतलम् ॥ ततःकृष्णःसमाहूयराधांप्राणगरीयसीम् ॥ २८ ॥ उवाचवचनंदेविगच्छे
ऽहंपृथिवीतलम् ॥ पृथिवीभारनाशायगच्छत्वंमर्त्यमण्डलम् ॥ २९ ॥ इतिश्रुत्वापिसाराधाऽप्यागतापृथिवींततः ॥ भाद्रेमासिसितेपक्षेअष्टमी
संज्ञकेतिथौ ॥ ४० ॥ वृषभानोर्यज्ञभूमौजातासाराधिकादिवा ॥ यज्ञार्थंशोधितायांचदृष्टासादिव्यरूपिणी ॥ ४१ ॥ राजानन्दमनाभूत्वातां
प्राप्यनिजमन्दिरम् ॥ दत्तवान्महिषींहस्तेसाचतांपर्यपालयत् ॥ ४२ ॥ इतितेकथितंवत्सत्वयापृष्टंचयद्वचः ॥ गोपनीयंगोपनीयंगोपनीयंप्रयत्नतः
॥ ४३ ॥ सूतउवाच ॥ यइदंशृणुयाद्भक्त्याचतुर्वर्गफलप्रदम् ॥ सर्वपापविनिर्मुक्तश्चान्तेयातिहरेर्गृहम् ॥ ४४ ॥ इतिश्रीपाद्मेमहापुराणेब्रह्मखण्डेब्रह्म
नारदसंवादेश्रीराधाष्टमीमाहात्म्यंनामसप्तमोऽध्यायः ॥७॥ शौनकउवाच ॥ समुद्रमथनंसूतपुराकस्मात्कृतंगुरो ॥ हृदयेकौतुकंजातंश्रोतुमेवद्चाम
रैः ॥ १ ॥ सूतउवाच ॥ ब्रह्मन्वच्मिसमासेनसिन्धोर्मथनकारणम् ॥ दुर्वाससेन्द्रसंवादमितिहासंशृणुष्वतत् ॥ २ ॥ महातपामहातेजादुर्वासाईश्वरां
शजः ॥ ब्रह्मर्षिःप्रययौस्वर्गमिन्द्रंद्रष्टुंसचैकदा ॥ ३ ॥ तस्मिन्ददर्शकालेतंगजारूढंशचीपतिम् ॥ दृष्ट्वास्रजंपारिजातांददौतस्मैमहामुनिः ॥ ४ ॥
गृहीत्वातांस्रजंचेन्द्रोविन्यस्यगजमूर्द्धनि ॥ देवराट्प्रययौब्रह्मन्ससैन्योनन्दनंप्रति ॥ ५ ॥ हस्तीचादायतांमालांछित्त्वातुधरणीतले ॥ चिक्षेपचमहा
क्रुद्धस्तमित्याहमहामुनिः ॥ ६ ॥ त्रैलोक्यैकश्रियायुक्तोयस्मात्त्वमवमन्यसे ॥ तवत्रैलोक्यश्रीर्नष्टाभवत्येवनसंशयः ॥ ७ ॥ ततःशक्रोजगामाशुस
त्रश्चस्वपुरंपुनः ॥ ददर्शजगतांमाताचान्तर्द्धानंगतास्वयम् ॥ ८ ॥ तस्यामन्तर्हितायांतुसर्वंनष्टंजगत्त्रयम् ॥ क्षुत्पिपासान्विताःसर्वेचुक्रुशुर्वैनिरन्तर
म् ॥ ९ ॥ नववर्षुर्वारिवाहाःशुष्काश्चैवजलाशयाः ॥ सर्वेतेशाखिनःशुष्काःफलपुष्पविवर्जिताः ॥ १० ॥ क्षुत्पिपासार्दिताःसर्वेब्रह्मणःसन्निधिंय
युः ॥ तंसर्वेकथयामासुर्दुःखशोकंपितामहम् ॥ ११ ॥ देवानांवचनंश्रुत्वाधातादेवगणैःसह ॥ भृग्वादिमुनिभिश्चैवप्रययौक्षीरसागरम् ॥ १२ ॥
विष्णुंसमर्चयामासक्षीराब्धेरुत्तरेतटे ॥ मन्त्रमष्टाक्षरंवेधाजपन्ध्यायन्जगत्पतिम् ॥ १३ ॥ ततःप्रसन्नोभगवान्सर्वेषांचदिवौकसाम् ॥ वैनतेयंसमा
रुह्यचागतःसदयःप्रभुः ॥ १४ ॥ पीतवस्त्रंचतुर्बाहुंशङ्खचक्रगदाधरम् ॥ दृष्ट्वातंजगतामीशंपुण्डरीकनिभेक्षणम् ॥ १५ ॥ विष्णुंभवोदधेःपोतंवन
मालाविभूषितम् ॥ श्रीवत्सकौस्तुभोरस्कमानन्दाश्रुपरिप्लुताः ॥ तुष्टुवुर्जयशब्देननमश्चक्रुर्निरन्तरम् ॥ १६ ॥ श्रीभगवानुवाच ॥ वरंवृणीध्वंभोदे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाःकस्माद्यूयसमागताः ॥ वरदोऽस्मितद्वदतवोददामिचनान्यथा ॥१७॥ देवाऊचुः ॥ कृपालोब्रह्मशापेनसम्पद्धीनंजगत्त्रयम् ॥ क्षुत्पिपासार्दितंना
थसदेवासुरमानुषम् ॥ रक्षसर्वांनिमाँह्लोकान्याताःस्मशरणंतव ॥१८॥ श्रीभगवानुवाच ॥ इन्दिराब्रह्मशापेनचान्तर्द्धानंगतासुराः ॥ यस्याःकटाक्षमा
त्रेणजगदैश्वर्यसंयुतम् ॥ १९ ॥ तदायूयंसुराःसवचोत्पाट्यस्वर्णपर्वतम् ॥ मन्दरंघर्घरंकृत्वासर्पराजेनवेष्टितम् ॥ २० ॥ कुरुध्वंमथनंदेवाःसदैत्याःक्षी
रवारिधेः ॥ तस्मादुत्पत्स्यतेलक्ष्मीर्जगन्माताचभोःसुराः ॥ २१ ॥ तयाद्दृष्टामहाभागाभविष्यथनसंशयः ॥ धारयाम्यहमेवाद्रिंकूर्मरूपेणसर्वतः
॥२२॥ इत्युक्त्वाभगवान्विष्णुरन्तर्द्धानंजगामसः॥जग्मुःसुरासुराःसर्वेसमुद्रंद्विजपुङ्गव ॥२३॥ इतिश्रीपाद्मेमहापुराणेब्रह्माण्डेसमुद्रमथनोद्योगोनामा
ष्टमोऽध्यायः ॥ ८ ॥ सूतउवाच ॥ ततोऽमरगणास्तेचसगन्धर्वाःसदानवाः ॥ उत्पाट्यमन्दरंशैलंचिक्षिपुःपयसांनिधौ ॥ १ ॥ ततःसनातनःश्रीमा
न्दयालुर्जगदीश्वरः ॥ अधारयद्गिरेर्मूलंकूर्मरूपेणपृष्ठतः ॥ २ ॥ अनन्तंतत्रसंवेष्ट्यममन्थुर्दुग्धसागरम् ॥ एकादश्यांमथ्यमानेचोद्भूतंप्रथमंद्विज ॥३॥
कालकूटविषंतेतुदृष्ट्वासर्वेप्रदुद्रुवः ॥ ततस्तान्विद्रुतान्दृष्ट्वाशङ्करश्चोक्तवानिदम् ॥ ४ ॥ भोभोऽमरगणायूयंविषंकुरुतमेकरे ॥ वारयिष्याम्यहंतूर्णं
कालकूटंमहाविषम् ॥ ५ ॥ इत्युक्त्वापार्वतीनाथोध्यायन्नारायणंहृदि ॥ महामन्त्रंसमुच्चार्यविषमादद्भयङ्करम् ॥ ६ ॥ महामन्त्रप्रभावेणविषंजीर्णम
भून्महत् ॥ अच्युतानन्तगोविन्दइतिनामत्रयंहरेः ॥ ७ ॥ योजपेत्प्रयतोभक्त्याप्रणवाद्यंनमोऽन्तिकम् ॥ विषभोगाग्निजंतस्यनास्तिमृत्योर्भयंतथा
॥ ८ ॥ प्रहृष्टमनसोदेवाममन्थुःक्षीरसागरम् ॥ ततोऽलक्ष्मीःसमुत्पन्नाकालास्यारक्तलोचना ॥ ९ ॥ रूक्षपिङ्गलकेशाचजरतींबिभ्रतीतनुम् ॥ साच
ज्येष्ठाब्रवीद्देवान्किंकर्तव्यंमयेतिवै ॥ १० ॥ देवास्तथाब्रुवंस्तांचदेवींदुःखस्यभाजनम् ॥ येषांनणांगृहेदेविकलहःसम्प्रवर्तते ॥ ११ ॥ तत्रस्थानंप्रय
च्छामोवसज्येष्ठेशुभान्विता ॥ निष्ठुरंवचनंयेचवदन्तियेऽनृतंनराः ॥ १२ ॥ सन्ध्यायांयेहिचाश्नन्तिदुःखदातिष्ठतद्गृहे ॥ कपालकेशभस्मास्थितु
षाङ्गाराणियत्रतु ॥ १३ ॥ स्थानंज्येष्ठेतत्रतवभविष्यतिनसंशयः ॥ अकृत्वापादयोर्धौतिंयेचाश्नन्तिनराधमाः ॥ १४ ॥ तद्गृहेसर्वदातिष्ठदुःखदारि
द्र्यदायिनी ॥ वालुकालवणाङ्गारैःकुर्वन्तिदन्तधावनम् ॥ १५ ॥ तेषांगेहेसदातिष्ठदुःखदाकलिनासह ॥ छत्राकंश्रीफलंशिष्टंयेखादन्तिनराधमाः
॥ १६ ॥ गेहेतेषांतवस्थानंज्येष्ठेकलुषदायिनि ॥ तिलपिष्टमलाबुंयेगृञ्जनंपोतिकादलम् ॥ १७ ॥ कलम्बुकंपलाण्डुंयेचाश्नन्तिपापबुद्धयः ॥ तेषांगृ
हेतवस्थानंभविष्यतिनसंशयः ॥१८॥ गुरुदेवातिथीनांचयत्रपूजानविद्यते ॥ यत्रवेदध्वनिर्नास्तितत्रतिष्ठसदाऽशुभे ॥१९॥ दम्पत्योःकलहोयत्रपितृ
देवार्चनंनवै ॥ दुरोदररतायत्रतत्रतिष्ठसदाऽशुभे ॥२०॥ परदाररतायत्रपरद्रव्यापहारिणः ॥ विप्रसज्जनवृद्धानांयत्रपूजानविद्यते ॥२१॥ तत्रस्थानेसदा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिष्ठपापदारिद्र्यदायिनी ॥ इत्यादिश्यसुराज्येष्ठांसर्वेतांकलिवल्लभाम् ॥ क्षीराब्धेर्मथनंचक्रुःपुनस्तेसुसमाहिताः ॥ २२ ॥ इतिश्रीपाद्मेमहा
पुराणेब्रह्मखण्डेसूतशौनकसंवादेसमुद्रमथनंनामनवमोऽध्यायः ॥ ९ ॥ सूतउवाच ॥ ऐरावतस्ततोजज्ञेतथैवोच्चैःश्रवाहयः ॥ धन्वन्तरिःपारिजातः
सुरभिश्चाप्सरोगणः ॥ १ ॥ ततःप्रभातसमयेद्वादश्यामुदितेरवौ ॥ उत्पन्नाश्रीमहालक्ष्मीःसर्वलक्षणशोभिता ॥ २ ॥ ददृशुस्तांमहादेवींमातरंधर्मदे
वताः ॥ प्रहृष्टाःसर्वजन्तूनांश्रीकृष्णहृदयालयाम् ॥ ३ ॥ लक्ष्मीभ्राताशीतरश्मिर्जातश्चसुधयाततः ॥ उत्पन्नासाहरेर्जायातुलसीलोकपावनी
॥ ४ ॥ तंशैलंपूर्ववत्स्थाप्यपरिपूर्णमनोरथाः ॥ समेत्यमातरंस्तुत्वाजेपुःश्रीसूक्तमुत्तमम् ॥ ५ ॥ ततःप्रसन्नासादेवीसर्वान्देवानुवाचह ॥ वरं
वृणीध्वंभद्रंवोवरदाहंसुरोत्तमाः ॥ ६ ॥ देवाऊचुः ॥ प्रसीदकमलेदेविसर्वमातर्हरिप्रिये ॥ त्वयाविनाजगच्छून्यंकुरुप्राणप्ररक्षणम् ॥ ७ ॥ इत्युक्ता
सामहालक्ष्मीःप्राहनारायणप्रिया ॥ इदानींसर्वजन्तूनांप्राणरक्षांकरोम्यहम् ॥ ८ ॥ ततोनारायणःश्रीमाञ्छङ्खचक्रगदाधरः ॥ आविर्बभूवसहसाद
यालुर्जगदीश्वरः ॥ ९ ॥ ततस्तेतुष्टुवुर्देवाःप्रणम्यजगतांपतिम् ॥ कृताञ्जलिपुटाःप्रोचुर्हर्षगद्गदभाषिणः ॥ १० ॥ गृहाणमातरंविष्णोमहिषींवल्लभांत
व ॥ संसाररक्षणार्थायलक्ष्मीमनपगामिनीम् ॥ यावत्प्रतिज्ञांनोचक्रेतावत्प्राहेन्दिराहरिम् ॥ ११ ॥ लक्ष्मीरुवाच ॥ अविवाह्यकथंज्येष्ठामलक्ष्मींम
धुसूदन ॥ तस्याःकनिष्ठांमांनाथव्युदूढांकर्तुमिच्छसि ॥ ज्येष्ठायांचस्थितायांवैकनिष्ठापरिणीयते ॥ १२ ॥ सूतउवाच ॥ इतिश्रुत्वाततोविष्णुर्ददौचो
द्दालकायच ॥ वेदवाक्यानुरूपेणह्यलक्ष्मींनिर्जरैःसह ॥ १३ ॥ ततोनारायणःश्रीमाँल्लक्ष्मीमङ्गीचकारह ॥ ततःसुरगणाःसर्वेनमश्चक्रुःपुनःपुनः
॥ १४ ॥ अथतेचासुरान्सर्वाञ्जघ्नुःसर्वेबलाधिकाः ॥ सर्वेतेक्रन्दमानाश्चगताश्चैवदिशोदश ॥ १५ ॥ सुधांतत्खादितुंचक्रुर्देवाःपङ्क्तियथाक्रमम् ॥ श्री
विष्णोराज्ञयासर्वेचोचुश्चैवपरस्परम् ॥ १६ ॥ त्वंचदेहित्वंचदेहित्वंचदेहीतिचाब्रुवन् ॥ नशक्तोऽस्मिनशक्तोऽस्मिनशक्तोऽस्मीतिचाब्रुवन् ॥ १७ ॥ ततो
विष्णुःसमुत्तस्थौस्त्रीरूपंचदधारह ॥ चकारस्वर्णपात्रेणपीयूषपरिवेषणम् ॥ १८ ॥ पीयूषभक्षणंराहुर्यावत्कुर्याद्द्विजोत्तम ॥ चन्द्रसूर्यौचोक्तवन्तौराक्ष
सोऽसौछलागतः ॥ १९ ॥ ततःक्रुद्धोजगन्नाथोजघानस्वर्णपात्रतः ॥ शिरस्तस्यपपातोर्व्यांकेतुर्नाम्नाबभूवह ॥ २० ॥ राहुकेतूततस्तूर्णंगतौतौभयविह्व
लौ ॥ इदानींतद्दिनेप्राप्तेचन्द्रसूर्यौसयुध्यति ॥ २१ ॥ कुर्याद्ग्रासंसैंहिकेयस्तत्क्षणंदुर्लभंभवेत् ॥ सर्वगङ्गासमंतोयंवेदव्याससमाद्द्विजाः ॥ २२ ॥
स्नातिवायसतीर्थेयोगङ्गास्नानफलंलभेत् ॥ दानमक्षयपुण्यंस्यात्कोटिजन्मार्जितंतथा ॥ २३ ॥ पापंनश्येत्समूलंचकिंपुनःक्रतुकोटिभिः ॥ विद्या
र्थीलभतेविद्यांपुत्रार्थीपुत्रमाप्नुयात् ॥ २४ ॥ मोक्षार्थीलभतेमोक्षंमन्त्रसिद्धिर्भवेद्ध्रुवम् ॥ इतितेकथितंविप्रसमुद्रमथनंतुतत् ॥ २५ ॥ इतिश्रीपाद्मेमहापुराणे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मखण्डेसूतशौनकसंवादेसमुद्रमथनंनामदशमोऽध्यायः ॥ १० ॥ शौनकउवाच ॥ इदानींश्रोतुमिच्छामिकथयस्वयथार्थतः ॥ हरिस्वरूपिणासा क्षाद्वेदव्यासेनशासित ॥ १ ॥ निरहङ्कारहेसूतलोकानुग्रहकारक ॥ केनस्यात्सुभगानारीपापिनीचसुदुर्भगा ॥ २ ॥ पतिप्रियाऽङ्गकेनस्याद्रूपि ताचक्षुषोःसुधा ॥ केनवाजायतेलक्ष्मीस्तन्मेब्रूहितपोधन ॥ ३ ॥ सूतउवाच ॥ यदिपुण्यमिदंविप्रवृत्तंपरमदुर्लभम् ॥ शृणुष्वभोःसमासेनकथ यामिविधानतः ॥ ४ ॥ आसीद्भद्रश्रवाराजायुगेद्वापरसंज्ञके ॥ सौराष्ट्रदेशवासीचवेदवेदाङ्गपारगः ॥ ५ ॥ भार्यातस्यचसञ्जातानाम्नासुरतिचन्द्रि का ॥ तस्यांवभूवुःश्रीराज्ञःसप्तपुत्रामनोरमाः ॥ ६ ॥ ततोऽभिजातादुहितासुन्दरीसत्यवादिनी ॥ श्यामबालाचविप्रेन्द्रनाम्नाप्रीतिकरीपितुः ॥७॥ अथैकदाश्यामबालासुवर्णसिकतासुच ॥ गूढैर्मनोहरैरत्नैःसखीभिःक्रीडितुंमुदा ॥ ८ ॥ जगामनीपवृक्षस्यतलंपरमदुर्लभम् ॥ एतस्मिन्नन्तरेविप्रल क्ष्मीःसंसारतारिणी ॥ ९ ॥ लोकानांनीतिदासाथसमायातास्वयंपुरः ॥ धृत्वाचब्राह्मणीरूपंपलिताङ्गीचभूसुर ॥ १० ॥ अखिलानांचलोकानांशा स्तूराज्ञःक्षयंविना ॥ केषांक्षुद्रतराणांहिगृहेगच्छामिसाम्प्रतम् ॥ ११ ॥ इतिसञ्चिन्त्यमनसागताराजनिकेतनम् ॥ सुवर्णभित्तिभिर्युक्तंपताकाभिर लङ्कृतम् ॥ १२ ॥ सिंहद्वारमतिक्रम्यप्राहदौवारिकींततः ॥ द्वारंजहिहिभोद्वारिनियुक्तेशुभलक्षणे ॥ १३ ॥ यामिवेगेनपश्यामिराज्ञींसुरतिचन्द्रिकाम्॥ तच्छ्रुत्वावचनंतस्यारत्नदण्डकराचसा ॥ कोकिलावाक्यवन्मुक्तंपरमंहर्षमाययौ ॥१४॥ द्वारनियुक्तोवाच ॥ किंनाभवहसेवृद्धेकःपतिस्तावकःपुनः ॥ आगताऽसिकथंकिंतेकार्यंराज्ञ्याश्चदर्शने ॥ कस्मात्किंब्रूहिविप्रेत्वंश्रोतुंकौतूहलंहिमे ॥ १५ ॥ वृद्धोवाच ॥ शृणुपोष्येमहाराजपत्न्यादण्डकरेयदा॥ श्रोतुंकौतूहलंतेऽस्तिमदागमनकारणम् ॥ १६ ॥ प्रसिद्धाकमलानाम्नाचाहंप्राणेश्वरोमम ॥ भुवनेशइतिख्यातोनाम्नाद्वारवतीपुरी ॥ १७ ॥ तस्यांवै वर्ततेपोष्येममप्राणेश्वरस्ततः ॥ आगताहंरत्नवेत्रकरेशृणुसकौतुकम् ॥ १८ ॥ ममागमनकार्यंहिवच्मीदानींतवाग्रतः ॥ पुरासीद्वैश्यकुलजाराज्ञीतव चदुःखिनी ॥ १९ ॥ एकस्मिन्दिवसेपोष्येपतिनाकलहःकृतः ॥ तयानार्याचदुःखिन्याततोवैभर्तृपीडिता ॥ २० ॥ बहिर्भूयद्रुतंगेहाद्रुदन्तीचपुनःपु नः ॥ तस्याश्वरोदनंश्रुत्वाचागताहंसमीपतः ॥ २१ ॥ अपृच्छंसर्ववृत्तान्तंकथितोवैयथार्थतः ॥ तयाततोव्रतवरस्योपदेशंददाम्यहम् ॥२२॥ ममोपदे शतःसावैचक्रेव्रतवरंमुदा ॥ तस्यप्रसादाद्धोद्वाःस्थेसञ्जातासुखिताचसा ॥२३॥ कदाचिद्वैश्यकुलजापत्यामृत्योर्वशंगता ॥ समानेतुंततस्तौतुविहिता खिलघातकौ ॥२४॥ किङ्करान्प्रेषयामासचण्डाद्यान्धर्मराट्प्रभुः ॥ यमाज्ञयासमायातायमदूताभयङ्कराः ॥ २५ ॥ बद्धातौचर्मपाशेनलोहमुद्गरपाण यः ॥ उद्यमंचक्रिरेगन्तुंयमस्यशरणंप्रति ॥ २६॥ अत्रान्तरेचलक्ष्म्यास्तेदूताविष्णुपरायणाः ॥ समानेतुंसमायाताःशङ्खचक्रगदाधराः॥२७॥दृष्ट्वात

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

थाविधांस्तांश्चयमदूताःपलायिताः ॥ लक्ष्मीदूतामहात्मानःस्वप्रकाशादयस्तथा ॥ २८ ॥ पाशंछित्त्वासमारोप्यराजहंसयुतेरथे ॥ जग्मुर्लक्ष्मीपुरं सर्वेसहसाऽऽकाशवर्त्मना ॥ २९ ॥ यावद्वारंव्रतंचक्रेपुरावैश्याचसातदा ॥ तावत्कल्पसहस्राणितस्थतुःकमलापुरे ॥ ३० ॥ पुण्यशेषस्यभोगार्थंजातौराजान्वयेऽधुना ॥ व्रतंचविस्मृतौद्वाःस्थेराजसम्पत्तिगर्वितौ ॥ तस्माच्चतवतस्यापिचोपदेशार्थमागता ॥ ३१ ॥ द्वाःस्थोवाच ॥ केनैवतुविधानेनवृद्धेव्रतवरंकृतम्॥कस्मिन्मासेव्रतंश्रेष्ठंदेवताकाचपूज्यते ॥ एतत्सर्वंमहाभागेयथावद्वक्तुमर्हसि ॥ ३२ ॥ कमलोवाच ॥ कार्त्तिकेचव्यतिक्रान्तेमार्गशीर्षेसमागते ॥ तस्मिन्मासेचभोपोष्येवासरेगुरुसंज्ञके ॥ ३३ ॥ ततःपूर्वाह्णसमयेसकलैर्व्रतिभिर्वृता ॥ नारायणेनसहितांलक्ष्मींसम्पूजयेत्ततः ॥३४॥ मिष्टैःपायसयुक्तैश्चभुक्तैश्चखण्डमिश्रितैः॥लक्ष्मींसन्तोषयेत्प्रेष्येततःसम्प्रार्थयेदिदम् ॥ ३५ ॥ त्रैलोक्यपूजितेदेविकमलेविष्णुवल्लभे ॥ यथात्वमचलाकृष्णेतथाभवमयिस्थिता ॥३६॥ ईश्वरीकमलेदेविशरणंचभवानघे ॥ नानोपहारद्रव्यैश्चलक्ष्मीमाज्ञाप्यतोषयेत् ॥३७॥ शास्त्रैश्चपूजयेद्देवींमहोत्सवसमन्विताम् ॥ ततोनैवेद्यशेषान्सम्भोज्यब्राह्मणसत्तमम् ॥ ३८ ॥ आत्मानंस्वपतिंपुत्रान्पोष्येऽन्यानपिसेवकान् ॥ द्वितीयेतुगुरोर्वारेविशेषंशृणुसुन्दरि ॥ ३९ ॥ चित्रधूलीप्रशस्तैश्चधूपैर्गोधूमनिर्मितैः ॥ तोषणंकमलादेव्याःकुर्याद्वैभक्तिभावतः ॥ ४० ॥ तृतीयेखण्डसंयुक्तंदध्योदननिवेदनम् ॥ शामाकशालिकासारैश्चतुर्थेपूजयेन्मुदा ॥ ४१ ॥ लक्ष्मीदेवींप्रयत्नेनरत्नदण्डकरेततः ॥ लक्ष्मीदेवीप्रीतयेतुब्राह्मणान्पूजयेद्धनैः ॥ ४२ ॥ वस्त्रालङ्कारभोज्यैश्चफलर्नानाविधैस्तथा ॥ ४३ ॥ पोष्योवाच ॥ अत्रैवतिष्ठभोवृद्धेराज्ञींसुरतिचन्द्रिकाम् ॥ विज्ञाप्यत्वांनयिष्यामिमाक्रोधंकुरुसत्तमे ॥ ४४ ॥ इत्युक्त्वासातुचार्वङ्गीगताराज्ञीसमीपतः ॥ शिरस्यञ्जलिमाधायपोष्याब्रह्मन्समूलतः ॥ ४५ ॥ आरभ्यसाङ्गपर्यन्तंयदूचेकमलालया ॥ तत्सर्वंकथयामासराज्ञींसुरतिचन्द्रिकाम् ॥ ४६ ॥ द्वारपालीवचःश्रुत्वाराज्ञीसुरतिचन्द्रिका ॥ जगामब्राह्मणीपार्श्वंसगर्वाप्राहसुन्दरी ॥ ४७ ॥ राज्ञ्युवाच ॥ वृद्धेब्राह्मणिकिंवृत्तंचोपदेशार्थमागता ॥ कथयस्वचिरंमह्यंभयंत्यक्त्वायथासुखम् ॥ ४८ ॥ ब्राह्मण्युवाच ॥ तवानीतिमहंदृष्ट्वागन्तुमिच्छामिचञ्चला ॥ कथयिष्यामिकिंदुष्टेव्रतंपरमदुर्लभम् ॥४९॥ इन्दिरावासरेचाद्यचाण्डालेनकरोषियत् ॥ तद्दृष्टंमयिकादुष्टेतद्गेहेगार्वितेऽधुना ॥ ५० ॥ तच्छ्रुत्वाब्राह्मणीवाक्यंक्रोधसंरक्तलोचना ॥ जरन्तींब्राह्मणींचैवप्रजहारतदाचसा ॥ ५१ ॥ ततःसाकमलावृद्धाक्रन्दमानापलायिता ॥ क्रीडमानाततःश्यामाब्राह्मणीक्रन्दनध्वनिम् ॥ आगतास्याःसमीपंतुश्रुत्वाबालातपोधना ॥ ५२ ॥ श्यामाबालोवाच ॥ वृद्धेव्यथेदृशीकेनदत्तातुभ्यंवदस्वमे ॥ तस्यावचनमाकर्ण्यशोकगद्गदयागिरा ॥ ५३ ॥ कमलाकथितंसर्ववृत्तान्तंद्विजसत्तम ॥ श्यामाबालाततःश्रुत्वाव्रतं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

परमदुर्लभम् ॥ ५४ ॥ शास्त्रोक्तविधिनाचक्रेसश्रद्धंचसभक्तितः ॥ त्रिवारेपरिपूर्णेतुतुर्यवारेसमागते ॥ ५५ ॥ विवाहकर्मसंसिद्धंद्विजलक्ष्मीप्रसादतः॥
श्रीसिद्धेश्वरदेवस्यनृपतेर्भूपतेजसः ॥ ५६ ॥ मालाधरोनामसुतोगृहीत्वातांगृहंगतः ॥ अथतस्यांगतायांतुब्रह्मञ्छृणुष्वकौतुकम् ॥ ५७ ॥ राज्ञीगृहेच
सर्वाणिस्थितानिसुबहूनिच ॥ द्रव्याणिकेननीतानिनज्ञातान्यपिभूसुर ॥ ५८ ॥ निर्वित्ताबुद्धिहीनासाचान्नवस्त्रविवर्जिता ॥ उपदिष्टाचकेनापिग
न्तुंचदुहितुर्गृहम् ॥ ५९ ॥ प्रेषयामासभर्त्तारंकिञ्चित्प्रार्थनहेतवे ॥ तस्यमालाधरस्यापिग्रामेचसरसीतटे ॥ ६० ॥ कालेनकियताविप्रप्रविवेशच
कष्टतः ॥ तस्माज्जलंसमानेतुंतस्यादास्यःसमागताः ॥ तंदृष्ट्वादुःखिनांश्रेष्ठंपप्रच्छुःसानुकम्पिताः ॥ ६१ ॥ दास्यऊचुः ॥ कस्त्वंकुतःसमायातोमां
सरक्तविवर्जितः ॥ रूक्षाङ्गोरूक्षकेशश्चतत्सर्वंकथयस्वनः ॥ ६२ ॥ दरिद्रउवाच ॥ श्यामाबालापिताचाहंसौराष्ट्रनगरागतः ॥ कथयध्वंचभोदास्यः
श्यामाबालासमीपतः ॥ ६३ ॥ तच्छ्रुत्वावचनंतस्यकौतूहलसमन्विताः ॥ परस्परमुखाःसर्वाजहसुःस्वपुरंगताः ॥ ६४ ॥ श्यामाबालायैकथितं
सर्ववृत्तंचभोद्विज ॥ श्रुत्वैतद्वचनंतासांप्रेषयामाससेवकान् ॥ ६५ ॥ पुष्पतैलंदिव्यमस्त्रंचन्दनंपर्णवीटिकाम् ॥ घोटकंचतथादत्त्वापितरंप्रतिसुन्द
री ॥ ६६ ॥ गत्वाथसर्वेतेभृत्याःकृत्वासुवेषमुत्तमम् ॥ श्यामाबालागृहंनिन्युर्देवराजगृहोपमम् ॥ ६७ ॥ श्यामाबालाततश्चैवपितरंदुःखिनांवरम् ॥
शाल्यन्नंसघृतंचैवभोजयामासयत्नतः ॥६८॥ तुर्येषुसमतीतेषुदिवसेषुतपोधन ॥ प्रेषयामासतंदत्त्वागुप्तपात्रस्थितंधनम् ॥६९॥ ततःप्रविश्यस्वगृहेध
नंपात्रान्तरस्थितम् ॥ ददर्शाङ्गारनिचयंरुरोदभृशदुःखितः ॥ ७० ॥ दुहितुःसदनंयातुंनिःससारगृहागतः ॥ तत्रैवसरसीकूलेप्रविवेशचदुःखिनी
॥ ७१ ॥ तथैनांचसमानीतांयथास्याःप्राणवल्लभाम् ॥ तथैवपूजयामासमातृस्नेहात्पतिव्रता ॥ ७२ ॥ एतस्मिन्समयेविप्रलक्ष्मीवास
रमुत्तमम् ॥ श्यामाबालाकारयितुंमनश्चक्रेचमातरम् ॥ ७३ ॥ तस्यामातादरिद्राणिभुक्त्वावैकान्तिकेऽपिच ॥ शावकानांतुचोच्छिष्टंल
क्ष्मीकोपसमन्विता ॥ ७४ ॥ इन्दिरायास्तृतीयानिवासराणिगतान्यपि ॥ चतुर्थवासरेतांतत्कारयामाससादृढम् ॥ ७५ ॥ आगतान
गरंसावैराज्ञीसुरतिचन्द्रिका ॥ दृष्ट्वागृहंतथादिव्यमिन्दिरायाःप्रसादतः ॥ ७६ ॥ श्यामाबालाचविप्रेन्द्रकदाचित्समयेपुनः ॥ मातुर्गृहंग
ताचाथऐश्वर्यस्यदिदृक्षया ॥ ७७ ॥ श्यामाबालांततोदूराद्दृष्ट्वासङ्कुपिताचसा ॥ नपश्यामिमुखंतस्याइत्युक्त्वाऽलक्षितास्थिता ॥ ७८ ॥
गत्वागृहान्तरालंचगृहीत्वासैन्धवंचसा ॥ आगतास्वगृहंकिञ्चित्तूष्णींलक्ष्मीसमाश्रितम् ॥ ७९ ॥ राजास्वामीचपप्रच्छतांसाध्वींपतिदेवताम् ॥

१ 'पुत्रहीना' इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

किमानीतंत्वयाकान्तेकथयस्वममाग्रतः ॥ ८० ॥ कान्तोवाच ॥ राज्यसारंसमानीतंदर्शयिष्यामिभोजने ॥ इत्युक्त्वासातदापाकंकृत्वा चलवणंविना ॥ ८१ ॥ अन्नादिकंततोदत्त्वामालाधरायभूभुजे ॥ ततोमालाधरोराजाव्यञ्जनंलवणंविना ॥ ८२ ॥ भुक्त्वावैगुण्यतांप्रा तोराज्यसारंददौचसा ॥ तदाहृष्टमनाराजाभोजनंकृतवान्द्विज ॥ ८३ ॥ प्रशशंसचतांनारींधन्याधन्याइतिब्रुवन् ॥ एतद्व्रतंचयानारी नकरोतिमहादरात् ॥ ८४ ॥ जन्मजन्मनिसानारीदरिद्रादुर्भगाभवेत् ॥ इदंयाशृणुयाद्भक्त्यापठेद्योवासमाहितः ॥ ८५ ॥ सर्वपापैर्विनिर्मुक्तोल क्ष्मीलोकंलभेच्चसः ॥ इमांव्रतकथांयातुनश्रुत्वाकुरुतेव्रतम् ॥ तस्याव्रतफलंचैवनश्यत्येवनसंशयः ॥ ८६ ॥ इतिश्रीपाद्मेमहापुराणेब्रह्मखण्डेसूतशौ नकसंवादएकादशोऽध्यायः ॥ ११ ॥ शौनकउवाच ॥ केनपुण्येनभोसूतचान्येनगतपातकः ॥ नरोयातिहरेःस्थानंतद्वदस्वानुकम्पया ॥ १ ॥ सूतउवाच ॥ ब्राह्मणस्यधनैरन्यैःप्राणैर्वाऽपिद्विजोत्तम ॥ रक्षांकरोतियोमर्त्योविष्णुलोकंसगच्छति ॥ २ ॥ पुराराजादीननाथोयुगेद्वापरसंज्ञके ॥ आ सीदपुत्रोबलवान्वैष्णवःसतुयाजकः ॥ ३ ॥ एकदागालवंराजापप्रच्छविनयान्वितः ॥ केनपुण्येनजायेतपुत्रोवैकरुणार्णव ॥ ४ ॥ वदस्वमुनिशार्दू लकरिष्यामितवाज्ञया ॥ येषांनृणांनास्तिसुतोजीवनंहिनिरर्थकम् ॥ ५ ॥ गालवउवाच ॥ राजञ्छृणुष्वावहितोयत्पृष्टोऽस्मितवाग्रतः ॥ कथयामिस मासेनपुत्रस्योद्भवकारणम् ॥ ६ ॥ क्रतुंचनरमेधाख्यंकुरुष्वराजसत्तम ॥ तदातेसन्ततिःस्याद्वैसर्वलक्षणसंयुता ॥ ७ ॥ राजोवाच ॥ नरमेधंमहा यज्ञंयज्ञानांप्रवरंद्विज ॥ कीदृशंनरमानीयकरिष्यामिगुरोवद ॥ ८ ॥ गालवउवाच ॥ सुन्दराङ्गःसुवदनःसमस्तशास्त्रविद्भवेत् ॥ सत्कुलेयदिजातः सतदायज्ञायकल्पते ॥ ९ ॥ अङ्गहीनःकृष्णवर्णोमूर्खोयोग्योभवेन्नहि ॥ एवमुक्तोगालवेनसराजामनुजेश्वरः ॥ १० ॥ प्रेषयामासदूतांश्चकथयित्वा मुनेर्वचः ॥ द्रविणंबहुदत्त्वाचगालवप्रमुखान्द्विजान् ॥११॥ यज्ञार्थेवरयामाससमस्तशास्त्रपारगान् ॥ ततोराजाज्ञयादूतादेशंदेशंसमुदागताः ॥१२॥ ग्रामेग्रामेद्विजश्रेष्ठपत्तनेऽपिसमाहिताः ॥ कुत्रापिनप्राप्तवन्तोगताजनपदंततः ॥ १३ ॥ नाम्नादशपुरंविप्रप्रकीर्णंगुणिभिर्द्विजैः ॥ यत्रनारीःसुकेशीश्च मृगशावकचक्षुषः ॥१४॥ दृष्ट्वामुह्यन्तिपुरुषाश्चन्द्रमुख्यश्चतायतः ॥तस्मिन्पुरेमनोरम्येकृष्णदेवइतिद्विजः ॥१५॥ आसीत्पुत्रैस्त्रिभिःसार्द्धभार्ययाचसु शीलया ॥ वैष्णवःप्रियवादीचविष्णुपूजारतःसदा ॥ १६ ॥ साग्निकःपितृभक्तश्चवैष्णवानांप्रियङ्करः ॥ प्रार्थनांचक्रुरथतेराज्ञोदूताद्विजोत्तम ॥१७॥ पुत्रंदेहीतिदेहीतिवदन्तोब्राह्मणर्षभ ॥नास्तिराज्ञोद्विजश्रेष्ठपुत्रःसन्तापनाशनः ॥१८॥ तदर्थंनरमेधाख्येयज्ञेभवतिदीक्षितः ॥नेष्यामस्तवपुत्रंवैबलिंदातुं महाक्रतौ ॥ १९ ॥ सुवर्णानांचतुर्लक्षंब्रह्मन्नयसमाहितः ॥ सुखेनयदिदातव्योनोपुत्रःपुत्रलालसात् ॥२०॥ तदाबलेननेष्यामोराजाज्ञाकारिणोवयम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दूतानांवचनंश्रुत्वाब्राह्मणौशोकविह्वलौ ॥ २१ ॥ अभूतांविगतप्राणाविवसंशयमानसौ ॥ किंधनेनसुवर्णेनजीवनेनापिसद्मना ॥ प्रोवाचेदंवचः
सोऽपिब्राह्मणोराजपूरुषान् ॥२२॥ ब्राह्मणउवाच ॥ यदिदूताःसमानेतुंपुत्रंशोकतमोऽपहम् ॥ आगतानिश्चितंयूयंशृणुध्वंवचनंमम॥२३॥ स्थित्वापृथि
व्यांकोश्रद्धांराजाज्ञांकर्तुमिच्छति ॥ पुत्रंहित्वाकिंतुयूयंवृद्धंमांनयतद्विजम् ॥ २४ ॥ इतितस्यवचःश्रुत्वादूताःक्रोधसमन्विताः ॥ बलात्कारेणतद्गेहे
सुवर्णानिचतत्यजुः ॥ २५ ॥ यदानेतुंमनश्चक्रुस्तंपुत्रंकिलतेक्रुधा ॥ बद्धाञ्जलिपुटोभूत्वारुदन्प्रोवाचसद्विजः ॥ २६ ॥ पुत्राणांज्येष्ठपुत्रंमेहित्वा
न्यंपुत्रमुत्तमम्॥ नयतेतिवचोवक्तुंवक्रे नायातिहेजनाः ॥२७॥ द्विजस्यवचनंश्रुत्वाब्राह्मणींरुदतींसतीम्॥प्रोचुर्दूताःकनीयांसंपुत्रंदेहीतिसत्तम ॥ २८ ॥
तेषामितिवचःश्रुत्वाब्राह्मणीभूमितस्तदा ॥ पपातवात्यया सार्द्धरम्भेवभृशदुःखिनी ॥ २९ ॥ मुद्गरंसासमादायमौलौचाताडयद्बलात् ॥ कनिष्ठंमत्सु
तंदूतानापिदास्यामिसर्वथा ॥ ३० ॥ एतस्मिन्समयेविप्रविप्रस्यमध्यमःसुतः ॥ प्रोवाचविनयाविष्टःप्रणम्यपितरौरुदन् ॥ ३१ ॥ मातायदिविषंद
द्यात्पित्राविक्रीयतेसुतः ॥ राजाहरतिसर्वस्वंकस्तत्रपालकोभवेत् ॥ ३२ ॥ इत्युक्त्वातत्सुतोमूर्ध्नाप्रणम्यपितरौसह ॥ दूतैर्जगामत्वरितैराज्ञोऽस्यदीक्षि
तस्यच ॥३३॥ अथतौब्राह्मणौपुत्रविच्छेदक्लिष्टमानसौ ॥ रुदित्वाचरुदित्वाचअन्धभावंप्रजग्मतुः ॥३४॥ अथतेपथ्यगच्छन्तविश्वामित्रमुनेःकिल॥
आश्रमंशिष्ययुक्तंचसेवितंमृगशावकैः ॥३५॥ समुनीराजपुरुषान्दृष्ट्वापप्रच्छसादरम् ॥ केयूयंभोकुत्रगतायथाकावृत्तिरुच्यताम् ॥३६॥ राजदूताऊ
चुः ॥ शृणुष्वावहितोविप्रराज्ञःपुत्रोनजायते ॥ तदर्थंनरमेधाख्येयज्ञेराजासुदीक्षितः ॥३७॥ नयामस्तत्रबल्यर्थमिमंब्राह्मणपुत्रकम् ॥ इतितेषांवचःश्रु
त्वासविप्रःसदयोऽभवत् ॥ ३८ ॥ प्राणाममापिगच्छन्तुसुखीभवतुबालकः ॥ बालकार्थेद्विजार्थेचस्वाम्यर्थेयेजनाइह ॥ ३९ ॥ त्यजन्तितृणवत्प्रा
णांस्तेषांलोकाःसनातनाः ॥ विमृश्येतिमुनिःस्वान्तेसप्रोवाचद्विजर्षभः ॥ ४० ॥ यज्ञेबलिंसमादातुमिमंब्राह्मणबालकम् ॥ हित्वामांनयथाथाशु
द्वयंबालकउत्तमः ॥ ४१ ॥ संसारेजन्मसम्प्राप्यनलब्धंसुखमत्रच ॥ अनेनबालकेनापिमरिष्यतिकथंत्वयम् ॥ ४२ ॥ आगतेऽस्मिन्गृहाद्दूताःपित
रावस्यदुःखितौ ॥ हतभाग्यौगतोनूनंयमस्येवगृहंप्रति ॥ ४३ ॥ एवंतस्यवचःश्रुत्वादूताःप्रोचुरथद्विजम् ॥ भूपालस्यविनाज्ञांवैदीननाथस्यभू
सुर ॥ ४४ ॥ नेतुंत्वांपलितंप्राज्ञनेष्यामोहिकथंवयम् ॥ एवमुक्त्वाचतेदूताजग्मूराज्ञःपुरींतदा ॥ ४५ ॥ समुनिर्दूतसङ्घैश्चगतवान्यज्ञमन्दिरम् ॥
राजानंकथयामासुर्दूताविप्रस्यचेष्टितम् ॥ ४६ ॥ तच्छ्रुत्वाशङ्कितमनाःप्रोवाचेदंवचःसतम् ॥ मुनेयदितुमेयज्ञेकृतेपुत्रोभविष्यति ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बलिंविनापिभोब्रह्मंस्तदाविप्रसुतंनय ॥ ४८ ॥ मुनिरुवाच ॥ [1]यज्ञेत्वयाकृतेराजन्महापुत्रोभविष्यति ॥ अत्रतेसंशयोमाभूदमोघमपिदर्शनम् ॥ ४९ ॥ इतितस्यवचःश्रुत्वाराजात्यन्तसहर्षकः ॥ चक्रेपूर्णाहुतिंयज्ञेसमस्तैर्मुनिभिःसह ॥ ५० ॥ अथातःसमुनिःश्रेष्ठोब्राह्मणस्यसुतंचतम् ॥ गृह्यदशपुरंनामनगरंगतवांस्तदा ॥ ५१ ॥ भवनंतस्यगत्वाचउक्तवान्वचनंमुनिः ॥ गृहेत्वंतिष्ठसेविप्रतिष्ठामिमृतवन्मुने ॥ ५२ ॥ राजाबलेनमेपुत्रंनीतवान्किंकरोम्यहम् ॥ पुत्रेगतेचभोविप्रदम्पत्योरावयोःपुनः ॥५३॥ गतानिचान्धभावंवैक्रन्दनैर्लोचनान्यपि ॥ अथासौमुनिशार्दूलःपुत्रंपश्यनयेतिच ॥ ५४ ॥ उक्तवांस्तौयदाविप्रब्राह्मणौजातहर्षकौ ॥ पुत्रायाकारणंकृत्वागतावेतौबहिःक्षणात् ॥ ५५ ॥ मुनेर्वचनसिद्धित्वात्तत्क्षणंलोचनंतयोः ॥ आलोकंतुगतंतूर्णंपुत्रस्यदर्शनादपि ॥ ५६ ॥ पुत्रस्यमुखपद्मंतौलोचनैरलिसन्निभैः ॥ पीत्वामुनिंचिरंतंचनमस्कृत्यपुनःपुनः ॥ ५७ ॥ प्रोचतुर्वचनंविप्राब्राह्मणौप्रियवादिनौ ॥ अहोमुनेजीवदानमावयोःसुकृतंकिल ॥५८॥ तयोरेवंवचःश्रुत्वासमुनिःकरुणार्णवः ॥ दत्त्वाऽऽशिषंचतौविप्रजगामनिजमाश्रमम् ॥ ५९ ॥ मुनिःकरगतंचैवकृत्वाविष्णोःपरंपदम् ॥ तपस्तेपेमहाभागोदैवतैरपिदुर्लभम् ॥ ६० ॥ किञ्चित्कालेगतेविप्रतस्यराज्ञोऽभवत्सुतः ॥ सुन्दरोराजयोग्यश्चइन्दुःक्षीरनिधाविव ॥ ६१॥ पुत्रोत्सवेसोऽपिविप्रराजादत्त्वाधनानिवै ॥ बुभुजेदेववद्भूम्यांविशोकोजातकौतुकः ॥ ६२ ॥ विप्रान्पालयतेयस्तुप्राणान्दत्त्वाधनान्यपि ॥ सयातिविष्णुभवनंपुनरावृत्तिदुर्लभम् ॥ ६३ ॥ पठन्तियेऽत्रभक्त्याचशृण्वन्तिविप्रतःकथाम् ॥ आख्यानंश्लोकमेकंवागच्छन्तिविष्णुमन्दिरम् ॥ ६४ ॥ इतिश्रीपाद्मेमहापुराणेब्रह्मखण्डेसूतशौनकसंवादेब्राह्मणपालनंनामद्वादशोऽध्यायः ॥ १२ ॥ शौनकउवाच ॥ कृष्णजन्माष्टमीसूततस्यामाहात्म्यमुत्तमम् ॥ कथयस्वमहाप्राज्ञचोद्धरस्वभवार्णवात् ॥ १ ॥ सूतउवाच ॥ कृष्णजन्माष्टमींब्रह्मन्भक्त्याकरोतियोनरः ॥ अन्तेविष्णुपुरंयातिकुलकोटियुतोद्विज ॥ २ ॥ अष्टमीबुधवारेचसोमेचैवद्विजोत्तम ॥ रोहिणीऋक्षसंयुक्ताकुलकोटिविमुक्तिदा ॥ ३ ॥ महापातकसंयुक्तःकरोतिव्रतमुत्तमम् ॥ सर्वपापविनिर्मुक्तश्चान्तेयातिहरेर्गृहम् ॥ ४ ॥ कृष्णजन्माष्टमींब्रह्मन्नकरोतिनराधमः ॥ इहदुःखमवाप्नोतिसप्रेत्यनरकंव्रजेत् ॥ ५ ॥ नकरोतिचयानारीकृष्णजन्माष्टमीव्रतम् ॥ वर्षेवर्षेतुसामूढानरकंयातिदारुणम् ॥६॥ जन्माष्टमीदिनेयोवैनरोऽश्नातिविमूढधीः ॥ महानरकमश्नातिसत्यंसत्यंवदाम्यहम् ॥७॥ दिलीपेनपुरापृष्टोवसिष्ठोमुनिसत्तमः ॥ तच्छृणुष्वमहाप्राज्ञसर्वपातकनाशनम् ॥८॥ दिलीपउवाच ॥ भाद्रेमास्यसिताष्टम्यांयस्यांजातोजनार्दनः ॥ तदहंश्रोतुमिच्छामिकथयस्वमहामुने ॥९॥ कथंवाभग

१ 'बलिं विनापि भो राजन्' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वान्जातःशङ्खचक्रगदाधरः ॥ देवकीजठरेविष्णुःकिंकर्तुंकेनहेतुना ॥ १० ॥ वसिष्ठउवाच ॥ शृणुराजन्प्रवक्ष्यामिकस्माज्जातोजनार्दनः ॥
पृथिव्यांत्रिदिवंत्यक्त्वाभवतेकथयाम्यहम् ॥ ११ ॥ पुरावसुन्धराह्यासीत्कंसादिनृपपीडिता ॥ स्वाधिकारप्रमत्तेनकंसदूतेनताडिता ॥ १२ ॥
क्रन्दतीक्रन्दतीसातुययौघूर्णितलोचना ॥ यत्रतिष्ठतिदेवेशउमाकान्तोवृषध्वजः ॥ १३ ॥ कंसेनताडितानाथइतितस्मैनिवेदितुम् ॥ बाष्प
वारीणिवर्षन्तीविवर्णासाविमानिता ॥ १४ ॥ क्रन्दन्तींतांसमालोक्यकोपेनस्फुरिताधरः ॥ उमयासहितःसर्वैर्देववृन्दैरनुद्रुतः ॥ १५ ॥ आ
जगाममहादेवोविधातृभवनंरुषा ॥ गत्वाचोवाचब्रह्माणंकंसध्वंसनहेतवे ॥ १६ ॥ उपायःसृज्यतांब्रह्मन्भवताविष्णुनासह ॥ ऐश्वरंतद्वचः
श्रुत्वादेववृन्दैर्हरादिभिः ॥ १७ ॥ क्षीरोदेयत्रवैकुण्ठःसुप्तोऽस्तिभुजगोपरि ॥ हंसपृष्ठंसमारुह्यहरेरन्तिकमाययौ ॥ १८ ॥ तत्रगत्वाचतं
धातादेववृन्दैर्हरादिभिः ॥ संयुक्तःप्रास्तवीद्वाग्भिःकोमलंवाग्विदांवरः ॥ १९ ॥ नमःकमलनेत्रायहरयेपरमात्मने ॥ जगतःपालयित्रेचलक्ष्मी
कान्तनमोऽस्तुते ॥ २० ॥ इतितेभ्यःस्तुतिंश्रुत्वाप्रत्युवाचजनार्दनः ॥ देवान्क्लिष्टमुखान्सर्वान्भवद्भिरागतंकथम् ॥ २१ ॥ ॥ ब्रह्मोवाच ॥
शृणुदेवजगन्नाथयस्मादस्माकमागतम् ॥ कथयामिसुरश्रेष्ठतदहंलोकभावन ॥ २२ ॥ शूलिदत्तवरोन्मत्तःकंसोराजादुरासदः ॥ वसुधाताडि
तातेनकरघातेनपीडिता ॥ २३ ॥ वरंदत्त्वापुराप्यग्रेमाययातुप्रवञ्चितः ॥ भागिनेयंविनाशम्भोमरणंभवितानमे ॥ २४ ॥ तस्माद्गच्छस्वयंदेवकंसं
हन्तुंदुरासदम् ॥ देवकीजठरेजन्मलब्ध्वागत्वाचगोकुलम् ॥ २५ ॥ ब्रह्मणाप्रेरितोदेवःप्रत्युवाचचशूलिनम् ॥ पार्वतींदेहिदेवेशअब्दंस्थित्वाऽऽगमि
ष्यति ॥ २६ ॥ उमयारक्षयासार्द्धंशङ्खचक्रगदाधरः ॥ उद्दिश्यमथुरांचक्रेप्रयाणंकमलासनः ॥ २७ ॥ देवकीजठरेजन्मलेभेतत्रगदाधरः ॥ यशोदा
कुक्षिमध्यास्तेशर्वाणीमृगलोचना ॥ २८ ॥ नवमासांश्वविश्रम्यकुक्षौनवदिनान्तकान् ॥ भाद्रमास्यसितेपक्षेचाष्टमीसंज्ञकातिथिः ॥ २९ ॥ रोहिणी
तारकायुक्तारजनीघनघोपिता ॥ तस्यांजातोजगन्नाथःकंसारिर्वसुदेवजः ॥ ३० ॥ वैराटीनन्दपत्नीचयशोदाऽजीजनत्सुताम् ॥ पुत्रंपद्मकरंप
द्मनाभंपद्मदलेक्षणम् ॥ ३१ ॥ तदाहर्षितुमारेभेदृष्ट्वाह्यानकदुन्दुभिः ॥ कंसासुरभयत्रस्ताप्रोवाचदेवकीतदा ॥ ३२ ॥ वैराटींगच्छभोनाथसुतं
प्रत्यर्पितुंकिल ॥ पुत्रंदत्त्वायशोदायैसुतांतस्याःसमानय ॥ ३३ ॥ तस्यावचःसमाकर्ण्यवसुदेवोऽपिदुःखितः ॥ अङ्केकुमारमादायवैराट्यभिमुखं
ययौ ॥ ३४ ॥यमुनाजलसम्पूर्णातत्पथेमध्यवर्त्मनि ॥ आसीद्घोरमहादीर्घागम्भीरोदकपूरभाक् ॥ ३५ ॥ एवंदृष्ट्वातटेस्थित्वायमुनामवलोकयन् ॥
वसुदेवोऽपिदुःखार्तोविललापातिचिन्तया ॥ ३६ ॥ किंकरोमिक्वगच्छामिविधिनाऽपिहिवञ्चितः ॥ कथमत्रगमिष्यामिवैराटींनन्दमन्दिरम् ॥३७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हरिणातत्रसानन्दंमाययावञ्चितःपिता ॥ क्षणमात्रंतटेस्थित्वायमुनामवलोकयन् ॥ ३८ ॥ तेनदृष्टापुनःसापिक्षणाज्जानुवहाऽभवत् ॥ तांदृष्ट्वाहृष्ट उत्तस्थौप्रस्थानमकरोद्यथा ॥ ३९ ॥ मायांकृत्वाजगन्नाथःपितुरङ्काज्जलेऽपतत् ॥ तंपुत्रंपतितंदृष्ट्वाहाहाकृत्वासुदुःखितः ॥ ४० ॥ महोपायंपुनः कर्तुंविधिनातेनवञ्चितः ॥ त्राहिमांजगतांनाथसुतंरक्षसुरोत्तम ॥ ४१ ॥ जनकक्रन्दितंदृष्ट्वाकंसारिःकृपयामुहुः ॥ जलक्रीडांसमाचर्यपितुःक्रोडमगा त्पुनः ॥ ४२ ॥ यथातेनयदुश्रेष्ठोजगामनन्दमन्दिरम् ॥ सुतंदत्त्वायशोदायैसुतांतस्याःसमानयत् ॥ ४३ ॥ निजागारंततःप्राप्यपत्न्यैप्रत्यर्पितासु ता ॥ देवकीचप्रसूतेतिवार्ताप्राप्तासुरारिणा ॥ ४४ ॥ आनेतुंप्रस्थितादूताःसुतंदुहितरंतदा ॥ आगत्यकंसदूतास्तेसुतांनेतुंप्रचक्रमुः ॥ ४५ ॥ बलादे नांसमाकृष्यदेवकीवसुदेवयोः ॥ कंसदूतैर्गृहीत्वासाअर्पितातुसुरारये ॥ ४६ ॥ सधृत्वातांमहाराजःसभयोऽभूद्दुरासदः ॥ शुद्धकाञ्चनवर्णाभांपूर्णेन्दु सदृशाननाम्[1] ॥ ४७ ॥ कंसोहसन्तींतांदृष्ट्वाविद्युत्स्फुरितलोचनाम् ॥ आदिदेशासुरश्रेष्ठोजहिनीत्वाशिलोपरि ॥ ४८ ॥ आज्ञांलब्ध्वाऽसुरास्तेवै निष्पेष्टुंतांप्रवर्तिताः ॥ विद्युच्छीघ्रतयागौरीजगामशङ्करान्तिकम् ॥ ४९ ॥ गौर्युवाच ॥ शृणुराजन्प्रवक्ष्यामियत्रास्तेशत्रुरुत्तमः ॥ नन्दस्यनिलये गुप्तस्तवहन्ताऽसुरोत्तम ॥ ५० ॥ वसिष्ठउवाच ॥ एवमुक्त्वातुसादेवीजगामनिजमन्दिरम् ॥ श्रुत्वावाक्यंततोदेव्याःकंसोराजासुदुःखितः ॥ ५१ ॥ भगिनींपूतनामाहगच्छत्वंनन्दमन्दिरम् ॥ छद्मनातंसुतंहत्वाऽऽगच्छतेवाञ्छितंबहु ॥ ५२ ॥ दास्यामिशत्रुंहन्तुंमेव्रजशीघ्रतरंशुभे ॥ आज्ञांप्राप्यराक्ष सीसागोकुलाभिमुखंगता ॥ ५३ ॥ माययासुन्दरीरूपाप्रविष्टातत्रगोकुले ॥ पयोधरेगरंसातुधृत्वाहन्तुमुपागता ॥ ५४ ॥ पशुपानांगृहद्वारिप्रविष्टा लक्षितेतिच ॥ गत्वान्तरुत्थाप्यशिशुंस्तनंदत्त्वाऽऽपसद्गतिम् ॥ ५५ ॥ ततस्तुशकटंक्षिप्त्वातृणावर्तादिमर्दनम् ॥ कालीयदमनंकृत्वागतोमधुपुरींततः ॥ ५६ ॥ गत्वाकंसोहतःक्रूरःकंसमल्लानजीजयत् ॥ एतत्तेकथितंराजन्विष्णोर्जन्मदिनव्रतम् ॥ ५७ ॥ श्रुत्वापापानिनश्यन्तिकुर्यात्किंवाभविष्यति ॥ यइदंकुरुतेमर्त्योयाचनारीहरेर्व्रतम् ॥ ५८ ॥ ऐश्वर्यमतुलंप्राप्यजन्मन्यत्रयथेप्सितम् ॥ पूर्वविद्धानकर्त्तव्यातृतीयाषष्ठिरेवच ॥ ५९ ॥ अष्टम्येका दशीभूताधर्मकामार्थवाञ्छुभिः ॥ वर्जयित्वाप्रयत्नेनसप्तमीसंयुताष्टमीम् ॥ ६० ॥ विनाऋक्षेऽपिकर्तव्यानवमीसंयुताष्टमी ॥ उदयेचाष्टमीकिञ्चित्स कलानवमीयदि ॥ ६१ ॥ मुहूर्तंरोहिणीयुक्तासम्पूर्णाचाष्टमीभवेत् ॥ अष्टमीबुधवारेणरोहिणीसहितायदि ॥ ६२ ॥ सोमेनैवभवेद्राजन्किंकृतैर्व्रतको टिभिः ॥ नवम्यामुदयात्किञ्चित्सोमेसापिबुधेऽपिच ॥ ६३ ॥ अपिवर्षशतेनापिलभ्यतेवानलभ्यते ॥ विनाऋक्षंनकर्त्तव्यानवमीसंयुताष्टमी

१ 'सहसाम्बरम्' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ६४ ॥ कार्याविद्धापिसप्तम्यांरोहिणीसंयुताष्टमी ॥ कलाकाष्ठामुहूर्तेऽपियदाकृष्णाष्टमीतिथिः ॥ ६५ ॥ नवम्यांसैववाग्राह्यासप्तमीसंयुतानहि ॥
किंपुनर्बुधवारेणसोमेनापिविशेषतः ॥ ६६ ॥ किंपुनर्नवमीयुक्ताकुलकोट्यास्तुमुक्तिदा ॥ पलवेधेनराजेन्द्रसप्तम्याअष्टमींत्यजेत् ॥ सुरायाबिन्दुना
स्पृष्टंगङ्गाम्भःकलशंयथा ॥ ६७ ॥ दिलीपउवाच ॥ केनचादौकृतंचेदंकेनवातत्प्रकाशितम् ॥ किंपुण्यंकिंफलंदेवकथयस्वमहामुने ॥ ६८ ॥
वसिष्ठउवाच ॥ चित्रसेनोमहाराजोमहापापपरोमहान् ॥ अगम्यागमनंकृत्वास्वर्णस्तेयंद्विजस्यच ॥ ६९ ॥ सुरायांचसदातृप्तोवृथामांसेसदारतः ॥
एवंपापसमायुक्तोनित्यंप्राणिवधेरतः ॥ ७० ॥ चाण्डालैःपतितैःसार्द्धमालापंसर्वदाकरोत ॥ एतदेवंविधोराजामृगयायांमनोदधे ॥ ७१ ॥ अरण्ये
द्वीपिनंज्ञात्वावेष्टयित्वाचसर्वतः ॥ सावधानंभटान्सर्वान्वाक्यमेतदुवाचह ॥ ७२ ॥ अहमेवनिहन्म्येनंयोऽन्योऽस्मिन्प्रहरिष्यति ॥ सवध्यो
नात्रसन्देहोव्याघ्रोराज्ञःपथाययौ ॥ ७३ ॥ सलज्जोऽपिततोराजाव्याघ्रंपश्चाज्जगामह ॥ अनेकक्लेशदुःखेनव्याघ्रंहन्तुंसमाहितः ॥ ७४ ॥ क्षुत्पिपा
साकुलक्लेशःसन्ध्यायांयमुनातटे ॥ अष्टमीरोहिणीयुक्तातद्दिनंजन्मवासरम् ॥ ७५ ॥ स्वःकन्यायमुनायांवैव्रतंचक्रुर्नराधिप ॥ नानोपहारैर्द्रव्य
श्चधूपदीपैःसुशोभनैः ॥ ७६ ॥ गन्धपुष्पंतथाद्रव्यंकुङ्कुमादिमनोहरम् ॥ अन्नंबहुगुणंदृष्ट्वाभोक्तुंतन्मानसङ्कृतम् ॥ ७७ ॥ राजोवाच ॥
अन्नाभावान्ममाद्याशुप्राणायास्यन्तिनिश्चितम् ॥ ७८ ॥ स्त्रियऊचुः ॥ जन्माष्टम्यांहरेराजन्नभोक्तव्यंत्वयानघ ॥ गृध्रमांसंखरंकाकंगोमां
समन्नमेवच ॥ ७९ ॥ भुक्तवान्नात्रसन्देहोयोभुङ्क्तेकृष्णजन्मनि ॥ किंकिंछिद्रंनसञ्जातंसंसारेवसतांनृणाम् ॥ ८० ॥ येनदेहेस्थितेप्राणे
जयन्तीनकृतानृप ॥ तत्राकृतोपवासस्यशासनंयममन्दिरम् ॥ ८१ ॥ यद्दत्तंपितरोनित्यंनगृह्णन्तियथाविधि ॥ पितरःपातिताःसर्वेजयन्त्याभोज
नेकृते ॥ ८२ ॥ इतिश्रुत्वाततोराजाव्रतंचक्रेनराधिप ॥ किञ्चित्पुष्पंकियद्गन्धंवस्त्रंचानीयहर्षितः ॥ ८३ ॥ एतद्व्रतंसमायुक्तंतिथिभान्तेचपा
रणम् ॥ व्रतस्यास्यप्रभावेणचित्रसेनोहरेर्गृहम् ॥ ८४ ॥ दिव्यंविमानमारुह्यगतवान्पितृभिःसह ॥ यत्फलंमथुरांगत्वादृष्ट्वाकृष्णमुखा
म्बुजम् ॥ ८५ ॥ तत्फलंप्राप्यतेपुंसाकृष्णजन्माष्टमीव्रतात् ॥ यत्फलंद्वारकांगत्वादृष्टेविश्वेश्वरेहरौ ॥ तत्फलंप्राप्यतेदीनैःकृत्वाजन्माष्टमी
व्रतम् ॥ ८६ ॥ इतिश्रीपाद्मेमहापुराणेब्रह्मखण्डेहरिजन्माष्टमीव्रतमाहात्म्यंनामत्रयोदशोऽध्यायः ॥ १३ ॥ शौनकउवाच ॥ कथयस्वमहा
प्राज्ञब्राह्मणस्यकृपार्णव ॥ माहात्म्यंसर्ववर्णानांश्रेष्ठस्यकृपयाचमे ॥ १ ॥ सूतउवाच ॥ ब्राह्मणःसर्ववर्णानांगुरुरेवद्विजोत्तम ॥
सर्वामराश्रयोज्ञेयःसाक्षान्नारायणःप्रभुः ॥ २ ॥ कुर्यात्प्रणामंयोविप्रंहरिबुद्ध्यातुभूसुरम् ॥ भक्त्यातस्यद्विजश्रेष्ठवर्द्धतेसम्पदादिकम् ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननमेद्ब्राह्मणंदृष्ट्वाहेलयापिचगर्वितः ॥ छेदनंतस्यशिरसःकर्तुमिच्छेत्सदाहरिः ॥ ४ ॥ कृतापराधंविप्रंयेद्विषन्तिपापबुद्धयः ॥ हरिद्विषो
हितेज्ञेयानिरयंयान्तिदारुणम् ॥ ५ ॥ यःकर्तुंप्रार्थनांविप्रंपश्येत्क्रोधेनचागतम् ॥ कृतान्तश्चक्षुषोस्तस्यतप्तसूचींददातिवै ॥६॥ कुरुतेभूसुरंमूढोभर्त्सि
तंयोनराधमः ॥ यमदूताविक्षिपन्तितन्मुखेतप्तलोहकम् ॥ ७ ॥ येषांनिकेतनेभुङ्क्तेक्ष्मासुरोवैतपोधनः ॥ सुपर्वभिःस्वयंकृष्णोभुङ्क्तेतेषांनिकेतने ॥८॥
नश्यन्तिसर्वपापानिद्विजहत्यादिकानिच ॥ कणमात्रंपिबेद्यस्तुविप्राङ्घ्रिसलिलंनरः ॥ ९ ॥ योनरश्चरणौधौतौकुर्याद्धस्तेनभक्तितः ॥ द्विजातेर्व
च्मिसत्यंतेसमुक्तःसर्वपातकैः ॥ १० ॥ पुत्रहीनाचयानारीमृतवत्साचयाङ्गना ॥ सपुत्राजीववत्सासाद्विजपद्माङ्घ्रिसेवनात् ॥ ११ ॥ ब्रह्माण्डेया
नितीर्थानितानितीर्थानिसागरे ॥ उदधौयानितीर्थानितिष्ठन्तिद्विजपादयोः ॥ १२ ॥ द्विजाङ्घ्रिसलिलैर्नित्यंसेचितंयस्यमस्तकम् ॥ सस्नातःसर्व
तीर्थेषुसमुक्तःसर्वपातकैः ॥ १३ ॥ शृणुशौनकवक्ष्यामिमाहात्म्यंपापनाशनम् ॥ विप्रपादोदकस्याहमितिहासंतपोधन ॥ १४ ॥ आसीत्पुराद्विजश्रे
ष्ठवैश्यवृत्तिपरायणः ॥ शूद्रोभीमोद्वापरेचब्रह्महत्यासहस्रकृत् ॥ १५ ॥ निष्ठुरःसर्वदादुष्टःसमहान्वैश्ययापुनः ॥ शूद्राचारपरिभ्रष्टोभीमोऽसौगुरुत
ल्पगः ॥ १६ ॥ प्रत्येकंवच्मिकिंतस्यदस्योःसङ्ख्यानविद्यते ॥ पापानांमुनिशार्दूलभीमस्यदुष्टचेतसः ॥ १७ ॥ एकदासगतःकिञ्चिद्ब्राह्मणस्यनिवेश
नम् ॥ गत्वासतस्यगेहात्तुद्रव्यंनेतुंमनोदधे ॥ १८ ॥ तत्रोवासब्राह्मणस्यबहिर्द्वारसमीपतः ॥ दैन्ययुक्तंवचःप्राहक्ष्मासुरंसतपोधनम् ॥ १९ ॥ भो
स्वामिञ्छृणुमेवाक्यंदयालुरिवदृश्यते ॥ क्षुधार्तोऽहंदेहिचान्नंप्राणायास्यन्तिमेद्रुतम् ॥ २० ॥ ब्राह्मणउवाच ॥ क्षुधार्त्तशृणुमेकश्चिद्वाक्यंकर्तुंनविद्य
ते ॥ पाकंमेतण्डुलानित्वंनीत्वाभुङ्क्ष्वयथासुखम् ॥ २१ ॥ नास्तिमेजनकोमातानास्तिसूनुःसहोदरः ॥ नास्तिजायामातृबन्धुर्मृताःसर्वेविहायमाम्
॥ २२ ॥ तिष्ठाम्येकोगृहेऽकर्माभाग्यहीनोऽतिथेहरिः ॥ एकोमेवसतौचास्तिनजानेतद्विनाकिल ॥ २३ ॥ भीमउवाच ॥ ममकश्चिद्द्विजश्रेष्ठनास्तिसे
वांतवापिच ॥ शूद्रोऽहंनिलयेजात्याकृत्वास्थास्यामितेसदा ॥ २४ ॥ सूतउवाच ॥ इतितस्यवचःश्रुत्वासानन्दःक्ष्मासुरस्तदा ॥ पाकंविधायतूर्णंस
ददावन्नंतपोधन ॥ २५ ॥ सोऽपिहर्षसमायुक्तस्तस्थौतत्रद्विजालये ॥ सेवांकुर्वन्स्नेहयुक्तांभूसुरस्यमनोहराम् ॥ २६ ॥ अद्यश्वोवाहनिष्यामिद्रव्यम
स्यममापिच ॥ नेतुंयदाकरिष्यामिनेष्यामिनात्रसंशयः ॥ २७ ॥ परामृश्यचहृद्यन्तःकृत्वातस्यक्रियांवदेत् ॥ पादधौतादिकंचासौशिरसागतपात
कः ॥ २८ ॥ आचम्याङ्घ्रिजलंदध्रेच्छद्मनाप्रत्यहंद्विज ॥ एकदाहारकःकश्चिद्द्रव्यंनेतुंसमागतः ॥ २९ ॥ उत्पाट्यरात्रावररंगतोऽसौतद्गृहान्तरम् ॥
दृष्ट्वाभीमंप्रहारार्थंदण्डहस्तःसमागतः ॥ ३० ॥ हारकोमस्तकंतस्यछित्त्वातूर्णंपलायितः ॥ अथतस्यभटाविष्णोःशङ्खचक्रगदाधराः ॥ ३१ ॥ समा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यातास्तथानेतुंभीमंतवीतकिल्विषम् ॥ स्यन्दनंचागतंदिव्यंराजहंसयुतंद्विज ॥ ३२ ॥ तत्रारूढोययौविष्णोर्भवनंदुर्लभंकिल ॥ माहात्म्यंभूमिदेव
स्यमयातेतत्प्रकीर्तितम् ॥ शृणुयाद्योनरोभक्त्यातस्यपातकनाशनम् ॥ ३३ ॥ इतिश्रीपाद्मेमहापुराणेब्रह्मखण्डेसूतशौनकसंवादेब्राह्मणमाहात्म्यंनाम
चतुर्दशोऽध्यायः ॥ १४ ॥ शौनकउवाच ॥ कथयस्वमहाभागमाहात्म्यंपापनाशनम् ॥ एकादश्याःफलंकिंवाकिल्बिषंस्यादकुर्वतः ॥ १ ॥ सूतउ
वाच ॥ एकादश्यास्तुमाहात्म्यंकिमहंवच्मिसाम्प्रतम्॥श्रुत्वाचैकादशीनामयमदूताश्चशङ्किताः॥२॥ भवन्तिनात्रस्सन्देहःसर्वप्राणिभयङ्कराः॥व्रतानां
चैवसर्वेषांश्रेष्ठांचैकादशींशुभाम् ॥ ३ ॥ उपोष्यजागृयाद्विष्णोःकुर्याच्चमण्डनंमहत् ॥ तुलसीदलैस्तुयोमर्त्योहरिपूजांकरोतिवै ॥ ४ ॥ दलेनैकेनलभ
तेकोटियज्ञफलंद्विज ॥ अगम्यागमनेचैवयत्पापंसमुदाहृतम् ॥ ५ ॥ तत्पापंयातिविलयंचैकादश्यामुपोषणात् ॥ घृतपूर्णप्रदीपंयोदद्याद्विष्णुदिनेद्वि
ज ॥ ६ ॥ अन्तेविष्णुपुरंयातितमोहत्वास्वतेजसा ॥ धन्याजनपदास्तेवैधन्यःसचमहीपतिः ॥ ७ ॥ हरेर्दिनेयस्यराज्येचैकादश्यामहोत्सवः ॥
नारायणस्यशयनेपार्श्वस्यपरिवर्त्तने ॥ ८ ॥ विशेषेणप्रबोधिन्यांनिराहाराभवन्तिये ॥ मदन्तिकंनानयध्वंप्राणिनःपुण्यभागिनः ॥ ९ ॥ अहर्निशं
पितृपतिःसमादिशतिदूतकान् ॥ एकादशीजगन्नाथवल्लभापुण्यवर्धिनी ॥ १० ॥ विष्णुर्देहंदहत्येवतस्यामन्नस्यभक्षणे ॥ तेषांधिग्जीवनंसम्पद्धिक्सौ
न्दर्यंचवर्तनम् ॥ ११ ॥ येऽन्नमश्नन्तिपापिष्ठाश्चैकादश्यांहिविड्भुजः ॥ एकादश्यांद्विजश्रेष्ठभुक्तिमाश्रित्यकेवलम् ॥१२॥ बहूनिविविधान्येवतिष्ठ
न्तिदुरितानिच ॥ दर्शकालेयथास्त्रीणांसङ्गमेकलुषंमहत् ॥ १३ ॥ एकादश्यांतथैवान्नभक्षणेवृजिनंभवेत् ॥ रोगिणश्चतथाखञ्जकाससोदरकुष्ठकाः
॥ १४ ॥ भवन्तिप्राणिनस्तेवैतस्यामन्नस्यभक्षणे ॥ ग्रामसूकरतांयान्तिदारिद्र्यंचप्रयान्तिवै ॥ १५ ॥ राजबद्धाद्विजश्रेष्ठतस्यामन्नस्यभक्षणे ॥ संसारे
यानिपापानितानिविप्रहरेर्दिने ॥ १६ ॥ भुक्तिमाश्रित्यतिष्ठन्तिजलभक्षणमाज्ञया ॥ कुर्वतांसर्वपापानिनरकान्निष्कृतिर्भवेत् ॥ १७ ॥ ननिष्कृतिर्भ
वेन्नृणांभुञ्जतांचहरेर्दिने ॥ नरायावन्तिचान्नानिभुञ्जतेचहरेर्दिने ॥ १८ ॥ प्रत्यन्नंचब्रह्महत्याकोटिजंवृजिनंभवेत् ॥ पुनर्वच्मिपुनर्वच्मिश्रूयतां
श्रूयतांनराः ॥ १९ ॥ नभोक्तव्यंनभोक्तव्यंनभोक्तव्यंहरेर्दिने ॥ गङ्गादिषुचतीर्थेषुस्नात्वायत्फलमाप्यते ॥ २० ॥ चन्द्रसूर्योपरागेचचैकाद
श्यामुपोषितः ॥ अर्चित्वोत्पलमालाभिस्तस्यांचकमलापतिम् ॥ २१ ॥ विधिवत्पारणंकृत्वानमातुर्गर्भभाजनम् ॥ एकादश्यांहरेर्गेहेकरोति
मण्डनंद्विज ॥ २२ ॥ परमांगतिमासाद्यतिष्ठेद्विष्णुनिकेतने ॥ एकादशींसमासाद्यनिराहाराभवन्तिये ॥ २३ ॥ तेषांविष्णुपुरेशश्वन्निवासो
ऽपिनसंशयः ॥ तुलसीभक्तिसंलीनंमनोयेषांविराजते ॥२४॥ तेयान्तिपरमंविष्णोःस्थानमेवनसंशयः ॥ परद्रव्येष्वभिरुचिर्येषांचैवनविद्यते ॥२५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सन्तुष्टमनसोयेऽपितेषांविष्णुपुरंध्रुवम् ॥ दुर्भिक्षकालमासाद्यप्राणिभ्योयेनरोत्तमाः ॥२६॥ ददत्यन्नंहरेःसद्मतेषांचैवनसंशयः ॥ गवांद्विजानांत्राणाय स्वामिनोयोषितस्तथा ॥ २७ ॥ प्राणान्मुञ्चन्तियेमर्त्यास्तेषांविष्णुपुरंध्रुवम् ॥ प्राणिभिर्दशमीविद्धानचोपोष्याकदाचन ॥ २८ ॥ परिहार्यंद्विजश्रेष्ठदुर्जनस्यान्तिकंयथा ॥ अरुणोदयवेलायांदशमीसङ्गतायदि ॥२९॥ तत्रोपोष्याद्वादशीस्यात्त्रयोदश्यांतुपारणम् ॥ दशमीशेषसंयुक्तोयदिस्यादरुणोदयः ॥ ३० ॥ वैष्णवेननकर्त्तव्यंतद्दिनैकादशीव्रतम् ॥ चतस्रोघटिकाःप्रातररुणोदयउच्यते॥३१॥ यतीनांस्नानकालोऽयंगङ्गाम्भःसदृशःस्मृतः ॥ अरुणोदयकालेतुदशमीयदिदृश्यते ॥ ३२ ॥ नतत्रैकादशीकार्याधर्मकामार्थनाशिनी ॥ स्वल्पांचदशमीविद्धांत्यजेदेकादशींबुधः ॥३३॥ सुराबिन्दोस्तुसम्पर्काद्घृतकुम्भंत्यजेद्यथा ॥ सम्पूर्णैकादशीयत्रद्वादश्यांपुनरेवसा ॥ ३४ ॥ उत्तरायतिभिःकार्यापूर्वामुपवसेद्गृही ॥ एकादशीकलायत्रद्वादशीपरतोनचेत् ॥ ३५ ॥ तत्रक्रतुशतंपुण्यंत्रयोदश्यांतुपारणम् ॥ एकादशीविलुप्ताचेत्परतोद्वादशीयुता ॥ ३६ ॥ उपोष्याद्वादशीपूर्णायदीच्छेत्परमांगतिम् ॥ सम्पूर्णैकादशीयत्रप्रभातेपुनरेवसा ॥ ३७ ॥ सर्वैरेवोत्तराकार्यापरतोद्वादशीयदि ॥ एकादशीव्रतेयेषांमनःसंलीयतेनृणाम् ॥ ३८ ॥ तेषांस्वर्गोहिवासोऽथयान्तितेसदनंहरेः ॥ एकादश्याःपरंनास्तिपरलोकस्यसाधनम् ॥३९॥ बहुपापसमायुक्तःकरोतिहरिवासरम्॥सर्वपापविनिर्मुक्तःसयातिहरिमन्दिरम् ॥ ४० ॥ पतिसहितायायोषित्करोतिहरिवासरम् ॥ सुपुत्रास्वामिसुभगायातिप्रेत्यहरेर्गृहम् ॥ ४१ ॥ योयच्छतिहरेरग्रेप्रदीपंभक्तिभावतः ॥ हरेर्दिनेद्विजश्रेष्ठपुण्यसङ्ख्यानविद्यते ॥ ४२ ॥ याङ्गनाभर्तृसहिताकुरुतेजागरंहरेः ॥ हरेर्निकेतनेतिष्ठेच्चिरंपत्यासहद्विज ॥ ४३ ॥ यत्किञ्चिद्धरयेवस्तुभक्त्यायच्छतियोद्विज ॥ हरेर्दिनेतस्यपुण्यमक्षयंचैवसर्वदा ॥ ४४ ॥ पुरासीद्वद्भभोनाम्नानगरेकाञ्चनाह्वये ॥ धनेनपुष्कलेनापिराजतेसधनेश्वरः ॥ ४५ ॥ तस्यप्रियामहारूपानाम्नाहेमप्रभाद्विज ॥ गरीयान्मुखरस्तत्रबाधतेचकलेर्गुणः ॥४६॥ सासदाकलहंकुर्यात्पत्यासहतपोधन ॥ शश्वद्गुरुजनान्कामंभर्त्सनान्नीचभाषया ॥ ४७ ॥ पाकपात्रेसदाश्नीयाद्धुतासैकान्तिकेमला ॥ उच्छिष्टंगुरुजनेभ्योदद्याद्वैप्रतिवासरम् ॥ ४८ ॥ जारेसदास्थितंचित्तमहंसाध्वीतिसावदेत् ॥ स्वामिनःकलहैर्ब्रह्मंश्चित्तोद्वेगकरासदा ॥ ४९ ॥ एकदाचागतांदृष्ट्वाचकारभर्त्सनांचताम् ॥ भर्त्तातस्याःप्रहारंचसर्वपापयुतांद्विज ॥ ५० ॥ सैवरोषसमायुक्तागताशून्यगृहेतुवै ॥ सुप्ताऽज्ञातास्थिताकस्मिञ्जलान्नंनचखादह ॥ ५१ ॥ दैवात्तत्रदिनेविष्णोःपार्श्वस्यपरिवर्तनम् ॥ एकादशीव्रतंविप्रसर्वपापप्रणाशनम् ॥ ५२ ॥ ततःप्रभातेरजनीद्वादशीश्रवणान्विता ॥ आगतातत्रसानारीरोषनिर्भरमानसा ॥ ५३ ॥ निराहारौकृतौद्वौचनिर्मलासाबभूवह ॥ रात्रौचपञ्चतांयाताजयन्तीवासरेद्विज ॥ ५४ ॥ यमाज्ञयाततोदूताआगतास्तांतथाविधाम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नेतुंभयङ्करास्तेचपाशमुद्गरपाणयः ॥ ९५ ॥ बद्धानेतुंमनश्चक्रुः कृतान्तसदनंयदा ॥ तदाऽऽगताविष्णुदूताः शङ्खचक्रगदाधराः ॥ ९६ ॥ छित्त्वापाशं
ततोदिव्येस्यन्दनेतांगतैनसम्॥ तेवैचारोहयामासुर्निर्मलांभवनंहरेः॥९७॥गतातैर्वेष्टितासाथदुर्लभंनिर्जरैःशुभम्॥विष्णोर्दिवसमाहात्म्यंकथितंतेद्विज
र्षभ ॥ ९८ ॥ अनिच्छयापियःकुर्यात्सयातिहरिमन्दिरम् ॥ एकादश्यादिनेमर्त्योदीपंदातुंहरेर्गृहे ॥ ९९ ॥ गच्छेत्प्रतिपदंसोऽपिचाश्वमेधफलाधि
कम् ॥ शृण्वन्तिचपुराणानिपठन्तिचहरेर्दिने ॥ प्रत्यक्षरंलभन्तेतेकपिलादानजंफलम् ॥ ६० ॥ इतिश्रीपाद्मेमहापुराणेब्रह्मखण्डेसूतशौनकसं
वादेहरिवासरमाहात्म्यकथनंनामपञ्चदशोऽध्यायः ॥ १५ ॥ शौनकउवाच ॥ कर्मणाकेनभोःसूतचैनसांसंक्षयोभवेत् ॥ श्रीहरेश्चकृपाभूयात्तद्वद
स्वानुकम्पया ॥ १ ॥ सूतउवाच ॥ शृणुशौनकवक्ष्यामिशृण्वतांपापनाशनम् ॥ येनविष्णोःकृपास्याद्वैवृजिनक्षयकारिणी ॥ २ ॥ पौर्णमास्यांतुयो
विप्रोभक्तिभावसमन्वितः ॥ कुर्यान्नानाविधानेनसपर्याश्रीजगद्विभोः ॥ ३ ॥ कलुषंतस्यनश्येतकोटिजन्मार्जितंमुने ॥ तस्मिञ्छ्रीरमणस्यास्यकृपा
जाताभवेद्ध्रुवम् ॥ ४ ॥ द्वादश्यामन्नदानंयोभक्त्याकुर्याद्विजातये ॥ तस्यनश्यन्तिपापानितमांसीवारुणोदये॥ ५ ॥ योनरःश्रीहरेःकुर्यात्स्नपनंपयसा
द्विज ॥ तत्प्रीतिःश्रीहरेःसद्योद्वादश्यांशर्करादिभिः ॥ ६ ॥ मन्त्रंविनातुयोविप्रदद्याच्छ्रीहरयेकिल ॥ पाषाणसदृशंपुष्पंदातायातित्वधोगतिम् ॥७ ॥
क्ष्मासुरायचमूर्खायपाषाणसदृशंतुयत ॥ दद्यादानंनरोयोवैतस्यपुण्यंनविद्यते ॥ ८ ॥ विद्याहीनोद्विजोमोहाद्दानंगृह्णातिमूढधीः ॥ कालान
लंयथाजीर्णंसतेननिरयंव्रजेत् ॥ ९ ॥ यथादारुमयोहस्तीमृगश्चित्रमयोयथा ॥ विद्याहीनोद्विजोविप्रत्रयस्तेनामधारकाः ॥ १० ॥ यथा
ध्वनिस्थितंवारिपवनार्केणशुद्ध्यति ॥ भक्त्यातुपार्षदंदृष्ट्वातस्यनश्यतिकल्मषम् ॥ ११ ॥ योनरश्चाश्विनेमासिसघृतान्पूर्णिमादिने ॥ दद्या
च्छ्रीहरयेलाजान्क्रीडार्थंतुवराटिकाम् ॥ १२ ॥ भक्त्यायातिहरेःस्थानंपुनरावृत्तिवर्जितः ॥ नदद्याद्योनरोमोहात्तस्मिन्नतुष्टिदोहरिः ॥ १३ ॥
वराटिकांयावतींयोहरयेपौर्णिमादिने ॥ तावद्दिनंहरेःस्थानंचाश्विनेसंवसेद्ध्रुवम् ॥ १४ ॥ करवीरपुरेह्यासीत्पुराशूद्रोऽपिनिर्दयः ॥ कालद्वि
जोद्विजश्रेष्ठनाम्नापापीभयङ्करः ॥ १५ ॥ स्वकार्यनिरतःसोऽपिस्वामिकार्यप्रणाशकः ॥ एकदापञ्चतांयातोयमदूताभयङ्कराः ॥ १६ ॥
आगतास्तंसमानेतुंयमस्यतुनिकेतनम् ॥ बद्धानिन्युश्चतंदृष्ट्वापृष्टवान्सचिवंयमः ॥ १७ ॥ यमउवाच ॥ अस्यकिंविद्यतेऽमात्यकर्मापिचशुभा
शुभम् ॥ कथयस्वसमूलंतुचित्रगुप्तविचक्षण ॥ १८ ॥ चित्रगुप्तउवाच ॥ असौपापीदुराचारःस्वामिकार्यप्रणाशकः ॥ नास्तिपुण्यंचाणु
मात्रंनरकेपरिपच्यताम् ॥ १९ ॥ शतमन्वन्तरंराजन्नागयोनौचनिष्ठुरः ॥ पाषाणेजन्मचासाद्यगृहेस्थातुंनिरन्तरम् ॥ २० ॥ सूतउवाच ॥ तावत्का

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लंततोविप्रनिरयेसपपातह ॥ ततोऽप्यश्मगृहेनागयोनौजातःसुदुःखितः ॥ २१ ॥ एकदाचाश्विनेमासिपौर्णमासीदिनेद्विज ॥ लाजान्वराटिकानागो
बिलात्प्राक्षेपयद्बहिः ॥ २२ ॥ पतितासाहरेरग्रेपापमस्यस्वयंहरिः ॥ तूर्णंतुनाशयामासदयालुर्दुःखनाशकः ॥ २३ ॥ कदाचित्प्रातकालस्तुप
श्चत्वंसजगामह ॥ यमदूतास्तमानेतुंचागताबहुशोद्विज ॥ २४ ॥ बद्ध्वानेतुंयदाचक्रुर्यमस्यसदनंप्रति ॥ तदागताविष्णुदूताःशङ्खचक्रगदाधराः
॥२५ ॥ पाशंछित्त्वारथेदिव्येतमाशुगतकिल्बिषम् ॥ तत्रचारोपयासुर्यमदूताःपलायिताः ॥ २६ ॥ ततोनिकेतनंविष्णोर्नागस्तैर्वैद्विितोययौ ॥ तत्रत
स्थौहरेरग्रेपुनरावर्त्तिवर्जितः ॥ २७ ॥ भक्त्यायोहरयेदद्याल्लाजांश्चसघृतान्द्विज ॥ वराटिकांतस्यपुण्यंनजानेकिंभवेद्ध्रुवम् ॥ २८ ॥ यइमंशृणुया
द्विप्रचाध्यायंपापनाशनम् ॥ तस्यनश्यन्तिपापानिश्रीहरेःकृपयापिच ॥ २९ ॥ इतिश्रीपाद्मेमहापुराणेब्रह्मखण्डेसूतशौनकसंवादेषोडशोऽध्यायः
॥ १६ ॥ शौनकउवाच ॥ विष्णुपादोदकस्यापिमाहात्म्यंपापनाशनम् ॥ कथयस्वमहाप्राज्ञसमूलंमेकृपार्णव ॥ १ ॥ सूतउवाच ॥ समस्तपात
कध्वंसिविष्णुपादोदकंशुभम् ॥ कणमात्रंवहेद्यस्तुसर्वतीर्थफलंलभेत् ॥ २ ॥ विष्णुपादोदकंब्रह्मन्स्पर्शतःपापनाशनम् ॥ अकालमरणंनास्तिगङ्गा
स्नानफलंलभेत् ॥ ३ ॥ विष्णुपादोदकंपापीयःपिबेत्तस्यकिल्बिषम् ॥ शरीरस्थंक्षयंयातिकृतंब्रह्मन्नसंशयः ॥ ४ ॥ तुलसीपर्णसंयुक्तंविष्णुपादोदकं
द्विज ॥ योवहेच्छिरसाभक्त्याचान्तेयातिहरेर्गृहम् ॥ ५ ॥ मेरुतुल्यसुवर्णानिदत्त्वायत्फलमाप्यते ॥ हरिपादोदकंस्पृष्ट्वाप्राप्यतेतत्फलंनरैः ॥ ६ ॥
धेनुकोटिसहस्राणियत्फलंलभ्यतेनरैः ॥ दत्त्वापादोदकंस्पृष्ट्वातत्फलंप्राप्यतेध्रुवम् ॥ ७ ॥ यज्ञकोटिसहस्राणिकृत्वायत्फलमाप्यते ॥ हरिपादोद
कंस्पृष्ट्वातस्मात्कोटिगुणंनरैः ॥ ८ ॥ कोटिकन्याप्रदानेनयत्फलंलभ्यतेजनैः ॥ विष्णुपादोदकंस्पृष्ट्वाफलंतस्माद्द्विजाधिकम् ॥ ९ ॥ दन्तिकोटि
प्रदानेनसप्तिकोटिप्रदानतः ॥ यत्फलंलभतेमर्त्यःस्पृष्ट्वापादोदकंहरेः ॥ १० ॥ दत्त्वामर्त्यःसतद्वीपांससस्यांयत्फलंलभेत् ॥ विष्णुपादोदकंस्पृष्ट्वा
तस्माद्विप्राधिकंलभेत ॥ ११ ॥ शृणुविप्रप्रवक्ष्यामिसंक्षेपेणाधिकंकिमु ॥ विष्णुपादोदकंस्पृष्ट्वापापीयातिहरेर्गृहम् ॥ १२ ॥ शौनकउवाच ॥
स्पृष्ट्वापीत्वापुराकेनप्राणिनाऽप्रापिवैगृहम् ॥ कथयस्वहरेःसूतममत्वंचानुकम्पया ॥१३ ॥ सूतउवाच॥पुरात्रेतायुगेपापीनाम्नाविप्रःसुदर्शनः ॥ जना
र्दनदिनेनित्यमश्नीयात्सद्विजोत्तम ॥१४॥ शास्त्रनिन्दाकरोनित्यंव्रतनिन्दाकरःसदा ॥ असावन्यंनजानातिकेवलंस्वोदरंविना ॥ १५ ॥ एकदाप्रा
प्तकालस्तुनिधनंप्राप्तवान्द्विज॥ यमदूताःसमायाताबद्ध्वानीतोयमालयम् ॥१६॥ तंदृष्ट्वायमुनाभ्रातापप्रच्छसचिवंरुषा ॥भोऽमात्यचास्ययत्पुण्यंपापं
वदसमूलतः ॥ १७ ॥ असौविप्रोमहापापीक्रूरकर्मैवदृश्यते ॥१८॥ चित्रगुप्तउवाच ॥ आकर्णयचास्यपापंपुण्यंनास्त्यणुमात्रकम् ॥ वासरेऽपिहरे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

र्नित्यमकरोद्भोजनविभो ॥१९॥ वासरेकमलाभर्तुश्चाश्नीयाद्योनराधमः ॥ पुरीषंसोऽश्नीयाद्राजन्निरयंयातिदारुणम् ॥ २० ॥ मन्वन्तरशतंदेहिस्था
नंतुनिरयेऽस्यवै ॥ ग्रामक्रोडस्ययोनौहिततोजन्मभविष्यति ॥२१॥ सूतउवाच ॥ यमाज्ञयाततोविप्रस्सचदूतैर्भयङ्करैः ॥ पातितस्तुपुरीषेवैमन्वन्तर
शताधिकम् ॥ २२ ॥ ततोमुक्तोऽभवच्चासौपृथिव्यांग्रामसूकरः ॥ चिरंनरकमश्नीयाद्धरिवासरभोजनात् ॥ २३ ॥ ततोविप्रप्राप्तकालःपञ्चत्वंसजगा
मह ॥ काकयोनौपुनर्जन्मलेभेऽसौविड्भुजःसदा ॥२४॥ एकस्मिन्दिवसेविप्रश्रीहरेश्चरणोदकम् ॥ द्वारदेशेस्थितंपीत्वासर्वपापविवर्जितः ॥ २५ ॥
तस्मिन्नेवदिनेकाकःपतितःशबरस्यच ॥ कालेमृत्युदशांप्राप्तोव्याधेनवायसोऽपिच ॥२६ ॥ आगतेस्यन्दनेदिव्येराजहंसयुतेशुभे ॥आरुह्यबलिभुग्वि
प्रययौसहरिमन्दिरम् ॥ २७ ॥ पादोदकस्यमाहात्म्यंकथितंपापनाशनम् ॥ यःशृणोतिनरःपापीतस्यपापंविनश्यति ॥ २८ ॥ इतिश्रीपाद्मेमहापुराणे
ब्रह्मखण्डेसूतशौनकसंवादेचरणोदकमाहात्म्येसप्तदशोऽध्यायः ॥ १७ ॥ शौनकउवाच ॥ अगम्यागमनंसूतकुर्याद्योवैविमोहितः ॥ तस्यशुद्धिर्भवे
त्केनकथयस्वसमूलतः ॥१॥ सूतउवाच ॥ अभिगच्छतिचाण्डालींश्वपाकींयोद्विजोत्तमः ॥ उपवासत्रयंकुर्यात्प्राजापत्यंचरेत्ततः ॥ २ ॥ सशिखंव
पनंचैवदद्याद्गोद्वयमेवच॥यथार्थदक्षिणांदत्त्वाशुद्धिमाप्नोतिसद्द्विजः ॥३॥ क्षत्रियोवापिचाण्डालींवैश्योवायदिगच्छति ॥ प्राजापत्यंसकृच्छ्रंचदद्याद्गो
मिथुनद्वयम् ॥४ ॥ अनुगच्छतिशूद्रोहिश्वपाकींचतपोधन ॥ चतुर्गोमिथुनंदद्यात्प्राजापत्यंव्रतंचरेत् ॥५॥ मातरंयदिवागच्छेद्भगिनींस्वसुतामपि॥वधूं
चमोहितोगच्छंस्त्रीणिकृच्छ्राण्यथाचरेत् ॥६॥ चान्द्रायणत्रयंकृत्वादद्याद्गोमिथुनत्रयम्॥ सशिखंवपनंकृत्वापञ्चगव्यंपिबेत्ततः ॥७॥ हुतेह्यग्नौतथाप्य
त्रशुद्ध्यत्येवंतपोधन॥पितृदारान्द्विजश्रेष्ठमातुश्चभगिनींतथा ॥८॥ गुरुपत्नींमातुलानींभ्रातुर्भार्यांस्वगोत्रजाम्॥यदिगच्छतिमोहेनप्राजापत्यद्वयंचरेत्
॥९॥ चान्द्रायणत्रयंब्रह्मन्पञ्चगोमिथुनानिच॥विप्रेभ्योदक्षिणांदद्याच्छुध्यतेनात्रसंशयः ॥१०॥ गांचगच्छतियोमूढउपवासत्रयंचरेत् ॥धेनुंदत्त्वातथा
चात्रशुद्ध्यत्यत्रनसंशयः ॥११॥ वेश्यांखरींसूकरींचकपिंचमहिषींद्विज ॥ आकण्ठतःसमाक्षिप्यगोमयोदककर्दमे॥१२॥तत्रतिष्ठन्निराहारोत्रिरात्रेणैवशु
द्ध्यति ॥ सशिखंवपनंकृत्वात्रिरात्रमुपवासयेत ॥ १३ ॥ एकरात्रंजलेस्थित्वाशुद्ध्यत्येवनसंशयः ॥ ब्राह्मणींतुयदागच्छेद्योनरःकाममोहितः॥१४॥
प्राजापत्यत्रयंकुर्याच्चान्द्रायणत्रयंतथा ॥ गोत्रयंतुतथादद्याच्छुद्ध्यत्येवतपोधन ॥ १५ ॥ ब्राह्मणींपञ्चगव्यंतुपञ्चरात्रंपिबेद्द्विज ॥ गोद्वयंदक्षिणांदद्या
च्छुध्यत्यत्रनसंशयः ॥१६॥ पराङ्गनांयदागच्छेत्कृच्छ्रंसान्तपनंचरेत् ॥ यथार्गलातथायोषित्तस्मात्तांपरिवर्जयेत् ॥१७॥ वर्णबाह्यांतथानीचामनुग
च्छेत्सकृन्नरः ॥ प्राजापत्यंचरेत्कृच्छ्रंशुद्ध्यत्येवनसंशयः ॥ १८ ॥ अङ्गारसदृशीयोषित्सर्पिष्कुम्भसमःपुमान् ॥ तस्याःपरिसरेब्रह्मन्नस्थातव्यं

CC-0. In Public Domain. Digitization by eGangotri

कदाचन ॥ १९ ॥ जारेणजनयेद्गर्भंयाचनारीकुलान्तका ॥ त्याज्यासासर्वथाब्रह्मंस्तत्रदोषोनविद्यते ॥ २० ॥ याचनारीगृहाद्गच्छेत्त्यक्त्वाबन्धून्स्वं कानपि ॥ नष्टासाचकुलभ्रष्टानतस्याःसङ्गमःपुनः ॥ २१ ॥ याचनारीयदागच्छेन्मोहितापरपूरुषम् ॥ प्राजापत्यंचरेत्कृच्छ्रंपञ्चगव्यंपिबेत्ततः॥२२॥ गोद्वयंतुततोदद्याच्छुध्यत्येवनसंशयः ॥ ब्राह्मणीबालिशाब्रह्मन्मोहितापरपूरुषम् ॥ २३ ॥ यदागच्छेत्तदात्याज्याजनैर्दोषोनविद्यते ॥ योगच्छेद्ब्राह्मणींविप्रभूसुरःकाममोहितः ॥ गोतिलांश्चतदादद्याच्छुद्ध्यत्यत्रनसंशयः॥ २४ ॥ इतिश्रीपाद्मेमहापुराणेब्रह्मखण्डेसूतशौनकसंवादेअष्टादशोऽध्यायः ॥ १८ ॥ सूतउवाच ॥ अज्ञानात्प्राश्यविण्मूत्रंसुरांसंस्पृश्यवापुनः ॥ यथाशुद्धिर्भवेत्तेषांकथयामिशृणुद्विज ॥१॥ प्राजापत्यद्वयंकुर्यात्तीर्थाभिगमनं मुने ॥ वृषैकादशगोदानंसशिखंवपनंततः ॥ २ ॥ गत्वाचतुष्पथंसर्वंप्राजापत्यव्रतंतथा ॥ गोद्वयंतुततोदद्यात्पञ्चगव्यंपिबेत्ततः ॥ ३ ॥ ब्राह्मणान्भोजयित्वातुशुध्यत्यत्रनसंशयः ॥ चाण्डालान्नंजलंचैवज्ञानतोऽपिविपत्तिषु ॥ ४ ॥ यदिभुङ्क्तेनरःकश्चित्कृच्छ्रंचान्द्रायणंचरेत् ॥ सशिखंवपनं कृत्वापञ्चगव्यंततःपिबेत् ॥ ५॥ एकद्वित्रिचतुर्गावोदद्याद्विप्रेष्वनुक्रमात् ॥ वृषलान्नंसूतकान्नमभोज्यान्नंजलंचवै ॥ ६ ॥ शूद्रोच्छिष्टंयदाभुङ्क्तेज्ञानतो वाविपत्तिषु ॥ प्राजापत्यद्वयंकुर्याच्चान्द्रायणत्रयंतथा ॥ ७ ॥ गोद्वयंतुततोदद्यात्पञ्चगव्यंपिबेद्द्विज ॥ हुत्वाह्यग्नौबहून्विप्रान्भोज्यशुद्धोभवेद्ध्रुवम् ॥ ८ ॥ आखुनकुलमार्जारैरन्नंचेद्भक्षितंद्विज ॥ तिलदर्भोदकैःप्रोक्ष्यशुध्यत्येवनसंशयः ॥ ९ ॥ पलाण्डुंलशुनंशिग्रुमलाबुंगृञ्जनंपलम् ॥ भुङ्क्तेयो वैनरोब्रह्मन्व्रतंचान्द्रायणंचरेत् ॥ १० ॥ मद्यमांसप्रियंशूद्रंनीचकर्मानुवर्त्तिनः ॥ तंशूद्रंवर्जयेद्विप्रश्वपाकमिवदूरतः ॥ ११ ॥ द्विजसेवानुरक्तायेमद्य मांसविवर्जिताः ॥ दानस्वकर्मनिरतास्तेज्ञेयावृषलोत्तमाः ॥ १२ ॥ अज्ञानाद्भुञ्जतेविप्रसूतकेमृतकेयदि ॥ गायत्रीदशभिर्विप्रःसहस्रैश्चशुचिर्भवेत ॥ १३ ॥ सहस्रैःक्षत्रियश्चैववैश्यःपञ्चसहस्रकैः ॥ पञ्चगव्यैर्भवेच्छुद्धोवृषलोऽपितपोधन ॥ १४ ॥ आज्यंतुतोयंनीचस्यभाण्डस्थंदधियःपिबेत् ॥ अज्ञानतोऽपियोवर्णःप्राजापत्यव्रतंचरेत् ॥१५॥ दानंबहुतरंदद्याच्छुद्धोह्यग्नौयथाविधि ॥ शूद्राणांनोपवासोऽपिदानेनैवविशुद्ध्यति ॥१६॥ सशिखं वपनंकुर्यादहोरात्रोपवासतः ॥ नीचैर्दण्डादिभिश्चैवताडितोयोनरोद्विज ॥ १७ ॥ प्राजापत्यव्रतंकुर्याच्चान्द्रायणव्रतंतुवा ॥ सशिखंवपनंचैवपञ्चगव्यं पिबेत्ततः ॥ १८ ॥ गोद्वयंतुततोदद्यादग्नौचान्नादिकंहुतम् ॥ मद्यपानंगृहेविप्रज्ञानतोऽपियदृच्छया ॥ १९ ॥ यदिभुङ्क्तेनरःकश्चित्पात्यःसोऽपिकुलान्नरः ॥ गोबीजहन्तायोविप्रच्छेदकश्चदलस्यच ॥ २० ॥ स्वर्णस्तेयीभवेत्कृच्छ्रंप्राजापत्यत्रयंचरेत् ॥ सशिखंवपनंकृत्वापञ्चगव्यंतथापिबेत् ॥२१॥ यथाविधिहुतंचाग्नौदद्याद्धेनुत्रयंतथा ॥ तस्यभुक्तंजलंचैवग्राह्यंस्याद्धैतपोधन ॥ २२ ॥ प्रातरुत्र्यहंतुचाश्नीयात्र्यहंसायमयाचितम् ॥ त्र्यहंचैवतुनाश्नी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यात्प्राजापत्यमिदंव्रतम् ॥ २३ ॥ गोमूत्रंगोमयंक्षीरंदधिसार्पिःकुशोदकम् ॥ दिनद्वयंपिबेद्विप्रचैकरात्रमुपोषितः ॥२४॥ सर्वपापहरंकृच्छ्रंमुनेसान्तपनंस्मृतम् ॥ ग्रासंत्र्यहंतुचैकैकंप्रातःसायमयाचितम् ॥ २५ ॥ अद्यात्र्यहंचोपवसेदतिकृच्छ्रमिदंव्रतम् ॥ प्रतित्र्यहंपिबेदुष्णंजलंक्षीरंघृतंद्विज ॥ २६ ॥ सकृत्स्नायीततप्तकृच्छ्रंस्मृतंपापहरंमुने ॥ अभोजनंद्वादशाहंकृच्छ्रोऽयंपापनाशनः ॥ २७ ॥ पराकोनामविज्ञेयःप्रसिद्धश्चतपोधन ॥ एकैकंवर्द्धयेत्पिण्डंशुक्लेकृष्णेचह्रासयेत् ॥ २८ ॥ इन्दुक्ष ेनभुञ्जीतचान्द्रायणव्रतंस्मृतम् ॥ अश्नीयाच्चतुरःप्रातःपिण्डान्विप्रसमाहितः ॥ २९ ॥ चतुरोऽस्तमितेचार्केशिशुचान्द्रायणंस्मृतम् ॥ कूष्माण्डघातिनीनारीपञ्चगव्यंपिबेत्र्यहम् ॥ ३० ॥ कूष्माण्डपञ्चकंदद्यात्ससुवर्णंसवस्त्रकम् ॥ तस्यावारितथाभक्तंग्राह्यंस्याद्वैतपोधन ॥ ३१ ॥ इतिश्रीपाद्मेमहापुराणेब्रह्मखण्डेसूतशौनकसंवादएकोनविंशोऽध्यायः ॥ १९ ॥ शौनकउवाच ॥ सुकृतंकिंतथाप्राहुःकृत्वासंसारसागरात् ॥ तरिष्यन्तिकलौसूततमोऽन्धकूपमण्डुकाः ॥ १ ॥ सूतउवाच ॥ राधाकृष्णप्रियेचौजप्रातःस्नानंसमाचरेत ॥ राधादामोदरंभक्त्याकुर्यात्पूजांसमाहिता ॥ २ ॥ त्यक्त्वामिषादिकंब्रह्मन्पतिसेवापरायणा ॥ सायातिश्रीहरेःस्थानंगोलोकाख्यंसुदुर्लभम् ॥ ३ ॥ राधादामोदराभ्यांयाधूपदीपंतुकार्तिके ॥ दद्यात्साभवनंविष्णोर्यातिवैत्यक्तपातका ॥ ४ ॥ योषिद्याकार्तिकेविप्रदद्याद्वस्त्रंनिकेतने ॥ राधादामोदराभ्यांतुवसेत्साश्रीहरेश्चिरम् ॥ ५ ॥ राधादामोदराभ्यांयापुष्पंमाल्यंसुवासितम् ॥ कार्तिकेमासिसादद्याद्यातिवैकुण्ठमन्दिरम् ॥ ६ ॥ गन्धंयाचापिनैवेद्यंदद्याद्वैशर्करादिकम् ॥ राधादामोदराभ्यांसागच्छेद्वैविष्णुमन्दिरम् ॥७॥ यत्किञ्चिद्यच्छतिब्रह्मन्कार्त्तिकेचद्विजातये ॥ राधादामोदरप्रीत्यैतस्याःपुण्याक्षयोऽभवेत् ॥ ८ ॥ यानारीकार्त्तिकेभक्त्याराधादामोदरंद्विज ॥ प्रातःसपर्यांसायातिनकुर्यान्निरयंचिरम् ॥ ९ ॥ कदाचिज्जन्मभूमौसाविधवाप्रतिजन्मनि ॥ भवेच्चासाद्यपूर्वंवैचाप्रियास्वामिनोऽपिच ॥ १० ॥ पुरात्रेतायुगेविप्रवृषलोनामशङ्करः॥सौराष्ट्रदेशवासीचतस्यजायाकलिप्रिया ॥ ११ ॥ जारकामासदानाम्नातृणवन्मन्यतेपतिम् ॥ असौपतिर्नमेयोग्योमेस्वामीपरपूरुषः ॥ १२ ॥ इतिमत्वासदातस्मैचोच्छिष्टंतुददातिवै ॥ नीचसङ्गान्महामूढामद्यमांसंचखादह ॥ १३ ॥ स्वामिनोभर्त्सनांनित्यंकुर्यात्कामंतुनिष्ठुरा ॥ पादरज्जुर्भवेच्चासौकस्माद्वैनमृतोऽपिच ॥ १४ ॥ मृतेतस्मिन्नहंभोगंकरिष्यामियदृच्छया ॥ विचार्येतिह्रदामूढाजारेणैकेनसातदा ॥ १५ ॥ अन्यदेशंगमिष्यावःसङ्केतमकरोद्विज ॥ सुप्तस्यस्वामिनोरात्रौचासिनातद्गलंद्विज ॥ १६ ॥ छित्त्वाजारकृतेसापिसङ्केतस्यस्थलंगता ॥ आगतंजारपुरुषंद्वीपिनाभक्षितंद्विज ॥ १७ ॥ दृष्ट्वासारोदनंकृत्वामूर्च्छितानिपपातह ॥ चिरादाश्वस्यसामूढाकरुणंविललापह ॥ १८ ॥ कलिप्रियोवाच ॥ स्वकीयंस्वामिनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हत्वाचागतापरपूरुषम् ॥ तज्जारंस्वामिनंदैवाच्छार्दूलोऽभक्षयन्मम ॥ किंकरोमिक्वगच्छामिविधात्रावञ्चितास्म्यहम् ॥ १९ ॥ सूतउवाच ॥ ततः
कलिप्रियाब्रह्मन्नागतास्वगृहंप्रति ॥ लपनेस्वामिनोदत्त्वामुखंचविललापसा ॥ २० ॥ कलिप्रियोवाच ॥ हानाथकिंकृतंकर्ममयाहन्तातिदारुणम् ॥
कंलोकंवागमिष्यामिवदस्वामिन्मनाग्गिरम् ॥ २१ ॥ भर्त्सनांतुयथाकामंकुर्य्यांचाहंसुनिन्दिता ॥ किञ्चिन्नवदसिस्वामिन्नेनोयन्मेनविद्यते ॥२२॥
सूतउवाच ॥ ननामचरणेतस्यगतान्यनगरंप्रति ॥ तत्रप्रविष्टासायोषिद्दृष्ट्वापुण्यजनान्बहून् ॥ २३ ॥ ऊर्जेस्नानपरान्प्रातर्नर्मदायांचवैष्णवान् ॥
तत्रनद्यांस्त्रियश्चापिराधादामोदरंद्विज ॥ २४ ॥ सपर्यांचकृतांचैवशङ्खनादैर्महोत्सवैः ॥ गन्धपुष्पैर्धूपदीपैर्वस्त्रैर्नानाविधैःफलैः ॥ २५ ॥ मुखवासै
र्भक्तियुक्ताद्दृष्ट्वासाविनयान्विता ॥ पप्रच्छब्रूतयूयंमेकिमेतत्क्रियतेस्त्रियः ॥ २६ ॥ स्त्रियऊचुः ॥ सर्वमासोत्तमेचोर्जेराधादामोदरौशुभौ ॥ पूजया
मोवयंमातःसर्वपापहरौशुभौ ॥ २७॥ कोटिजन्मार्जितंपापंनष्टंप्रातंनिकेतनम् ॥ सपर्यामामिषंत्यक्त्वाकृत्वासाचहरेर्दिने ॥ २८ ॥ निधनंवैपौर्णमा
स्यांगतासानिर्मलाद्विज ॥ किङ्कराश्चागतास्तूर्णंयमस्यनिलयंप्रति ॥ २९ ॥ नेतुंतांक्रोधसंयुक्ताबबन्धुश्चर्मरज्जुभिः ॥ तदाऽऽगताविष्णुदूताविमा
नंस्वर्णनिर्मितम् ॥ ३० ॥ शङ्खचक्रगदापद्मधारिणोवनमालिनः ॥ निजघ्नुश्चक्रधाराभिर्यमदूताःपलायिताः ॥ ३१ ॥ राजहंसयुतेविप्रविमानेस्वर्ण
निर्मिते ॥ आरूढासागतातैस्तुवेष्टिताविष्णुमन्दिरम् ॥ ३२ ॥ तत्रतस्थौचिरंभोगंकृत्वासावैयथेप्सितम् ॥ याकुर्यात्कार्त्तिकेविप्रराधादामोदरा
र्चनम् ॥ ३३ ॥ यातिपूजात्यक्तपापागोलोकाख्यंमनोहरम् ॥ यइदंशृणुयाद्भक्त्यायाचनारीसमाहिता ॥ कोटिजन्मार्जितंपापंतस्यतस्याविन
श्यति ॥ ३४ ॥ इतिश्रीपाद्मेमहापुराणेब्रह्मखण्डेसूतशौनकसंवादेराधादामोदरपूजामाहात्म्यकथनंनामविंशतितमोऽध्यायः ॥ २० ॥ शौनक
उवाच ॥ कथयस्वमुनेसूतसर्वमासोत्तमस्यच ॥ कार्त्तिकस्यविधिंसम्यङ्नियमान्वक्तुमर्हसि ॥ १ ॥ सूतउवाच ॥ आश्विनस्यद्विजश्रेष्ठपौर्ण
मास्यांसमाहितः ॥ कार्त्तिकस्यव्रतंकुर्याद्यावदुद्बोधिनीभवेत् ॥ २ ॥ दिवाविप्रनरःकुर्यान्मलमूत्रमुदङ्मुखः ॥ भवेन्मौनीचसर्वज्ञरात्रौचेद्दक्षिणामु
खः ॥ ३ ॥ पथ्यम्भसिचगोष्ठेषुश्मशानेवल्मिकेद्विज ॥ कुर्यादुत्सर्जनंनैवव्रतीमूत्रपुरीषयोः ॥ ४ ॥ अत्युत्तमेषुस्थानेषुमलमूत्रंनकारयेत् ॥ शुद्धां
मृदंगृहीत्वाऽथवामंप्रक्षालयेत्करम् ॥ ५ ॥ अद्भिर्मृदापिशुद्ध्यर्थंपूर्वंविंशतिसङ्ख्यया ॥ एकालिङ्गेगुदेपञ्चतथावामकरेदश ॥ ६ ॥ उभयोर्दशदातव्या
पादयोश्चत्रिभिस्त्रिभिः ॥ मुखशुद्धिंततःकुर्यात्सङ्कल्पंस्नपनस्यच ॥ ७ ॥ हृदिदामोदरंध्यात्वाइमंमन्त्रंततोवदेत् ॥ कार्त्तिकेऽहंकरिष्यामिप्रातःस्ना
नंजनार्दन ॥ ८ ॥ दामोदरस्यप्रीत्यर्थंराधयापापनाशनम् ॥ नमःपङ्कजनाभायकृष्णायजलशायिने ॥ ९ ॥ नमस्तेराधयासार्द्धंगृहाणार्घंप्रसीद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मे ॥ स्नानंकुर्यात्ततोविप्रतिलकंतुयथाविधि ॥ १० ॥ ऊर्ध्वपुण्ड्रविहीनस्तुकिञ्चित्कर्मकरोतियः ॥ निष्फलंकर्मतत्सर्वंसत्यमेतन्मयोच्यते ॥११॥
यच्छरीरंमनुष्याणामूर्ध्वपुण्ड्रविनाकृतम् ॥ तद्दर्शनंनकर्तव्यंदृष्ट्वासूर्यंनिरीक्षयेत् ॥ १२ ॥ ऊर्ध्वपुण्ड्रंमृदाशुभ्रंललाटेयस्यदृश्यते ॥ चाण्डालोऽपिवि
शुद्धात्मापूज्यएवनसंशयः ॥ १३ ॥ अच्छिद्रमूर्ध्वपुण्ड्रंतुयेकुर्वन्तिनराधमाः ॥ तेषांललाटेसततंशुनःपादोनसंशयः ॥ १४ ॥ प्रातःकालोदितंकर्मस
माप्यहरिवल्लभाम् ॥ पूजयेद्भक्तितोविप्रतुलसींपापनाशिनीम् ॥ १५ ॥ पौराणींतुकथांश्रुत्वाश्रीहरेःस्थिरमानसः ॥ ततोविप्रंव्रतीभक्त्यापूजयेत्तंयथा
विधि ॥ १६ ॥ परासनंपरान्नंचपरशय्यांपराङ्गनाम् ॥ सर्वदावर्जयेद्विप्रकार्त्तिकेचविशेषतः ॥ १७ ॥ सौवीरकंतथामाषानामिषंचतथाम
धु ॥ राजमाषादिकंनित्यंवर्जयेत्कार्त्तिकव्रती ॥ १८ ॥ जम्बीरमामिषंचूर्णमन्नंपर्युषितंद्विज ॥ धान्येमसूरिकाप्रोक्तागवांदुग्धमनामिषम् ॥
॥ १९ ॥ लवणंभूमिजंविप्रप्राण्यङ्गमामिषंखलु ॥ द्विजक्रीतारसाःसर्वेजलंचाल्पसरःस्थितम् ॥ २० ॥ ब्रह्मचर्यंतुर्यकालेपत्रावल्यांचभो
जनम् ॥ कुर्याद्वैद्विजशार्दूलतैलाभ्यङ्गंचवर्जयेत् ॥ २१ ॥ छत्राकंनालिकंहिङ्गुंपलाण्डुंपूतिकादलम् ॥ लशुनंमूलकंशिग्रुंतथैवतुम्बिकाफलम्
॥ २२ ॥ कपित्थंचैववृन्ताकंकूष्माण्डंकांस्यभोजनम् ॥ द्विष्पाचितंसूतिकान्नंमत्स्यंशय्यांरजस्वलाम् ॥ २३ ॥ द्विस्त्रिश्चान्नंस्त्रियःस
ङ्गंवर्जयेत्कार्त्तिकव्रती ॥ धात्रीफलंगृहीविप्रवर्वौतत्सर्वदात्यजेत् ॥ २४ ॥ कूष्माण्डेधनहानिःस्याद्बृहत्यांनस्मरेद्धरिम् ॥ पटोलेतुनवृद्धिःस्याद्बल
हानिश्चमूलके ॥ २५ ॥ कलङ्कीजायतेबिल्वेतिर्यग्योनिश्चनिम्बुके ॥ तालेशरीरनाशःस्यान्नारिकेलेचमूर्खता ॥ २६ ॥ तुम्बीगोमांसतु
ल्यास्याद्गोवधंस्यात्कलिन्दके ॥ शिम्बीपापकराप्रोक्तापूतिकाब्रह्मघातिका ॥२७॥ वार्ताक्यांसुतनाशःस्याच्चिररोगीचमाषके ॥ मांसेचबहुपापंस्या
त्यजेत्प्रतिपदादिषु ॥ २८ ॥ यत्किञ्चिद्वर्जयेद्योऽन्नंश्रीहरेःप्रीतयेद्विज ॥ तत्पुनर्भूसुरेदत्त्वाव्रतान्तेतस्यभोजनम् ॥२९॥ कार्त्तिकव्रतिनंविप्रयथोक्तका
रिणंनरम् ॥ यमदूताःपलायन्तेसिंहंदृष्ट्वायथागजाः ॥ ३० ॥ श्रेष्ठंविष्णुव्रतंविप्रतत्तुल्यानशतंमखाः ॥ कृत्वाक्रतुंव्रजेत्स्वर्गंवैकुण्ठंकार्त्तिकव्रती ॥
॥ ३१ ॥ यत्किञ्चिद्दुष्कृतंविप्रमनोवाक्कायकर्मजम् ॥ दृष्ट्वातुविलयंयातिकार्त्तिकव्रतिनंक्षणात् ॥३२॥ कार्त्तिकव्रतिनःपुण्यंब्रह्माचैवचतुर्मुखः ॥ नस
मर्थोभवेद्वक्तुंयथोक्तव्रतकारिणः ॥ ३३ ॥ यत्कृत्वाकलुषंसर्वंव्रजेद्विप्रदिशोदश ॥ क्वगच्छामिक्वतिष्ठामिकार्त्तिकव्रतिनोभयात् ॥३४॥ पौर्णमास्यांय
थाशक्तिचान्नवस्त्रादिकंद्विज ॥ दद्याद्वैश्रीहरेःप्रीत्यैब्राह्मणानपिभोजयेत् ॥३५॥ रात्रौजागरणंकुर्यान्नृत्यगीतादिभिर्व्रती॥यइदंशृणुयाद्भक्त्यातस्यपापं

१ 'भार्यां' इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रणश्यति ॥ ३६ ॥ इतिश्रीपाद्मेमहापुराणेब्रह्मखण्डेसूतशौनकसंवादेएकविंशोध्यायः ॥ २१ ॥ शौनकउवाच ॥ माहात्म्यंब्रूहिसर्वज्ञश्रृण्वतांपापनाश
नम् ॥ सर्वप्राणिहितार्थायतुलस्याअनुकम्पया ॥ १ ॥ सूतउवाच ॥ तुलस्याःपरिसरेयस्यकाननंतिष्ठतिद्विज ॥ गृहस्यतीर्थरूपत्वान्नायान्तियमकि
ङ्कराः ॥ २ ॥ तुलस्याःकाननंविप्रसर्वपापहरंशुभम् ॥ रोपयन्तिनराःश्रेष्ठास्तेनपश्यन्तिभास्करिम् ॥ ३ ॥ रोपणंपालनंसेवांदर्शनंस्पर्शनंतुयः ॥ कु
र्यात्तस्यप्रनष्टंस्यात्सर्वपापंद्विजोत्तम ॥ ४ ॥ कोमलैस्तुलसीपत्रैरर्चयन्तिहरिंतुये ॥ कालस्यसदनंविप्रतेनयान्तिमहाशयाः ॥५॥ गङ्गाद्याःसरितःश्रे
ष्ठाविष्णुब्रह्ममहेश्वराः ॥ देवैस्तीर्थैःपुष्कराद्यैस्तिष्ठन्तितुलसीदले ॥६॥ योयुक्तस्तुलसीपत्रैःपापीप्राणान्विमुञ्चति ॥ विष्णोर्निकेतनंयातिसत्यमेतन्म
योदितम् ॥ ७ ॥ तुलसीमृत्तिकालिप्तोयुक्तःपापशतैरपि ॥ विमुञ्चतिनरःप्राणान्सयातिहरिमन्दिरम् ॥ ८ ॥ योनरोधारयेद्विप्रतुलसीकाष्ठचन्दनम् ॥
तस्याङ्गंनस्पृशेत्पापंसयातिपरमंपदम् ॥ ९॥ तुलसीकाष्ठमालांतुकण्ठस्थांवहतेतुयः ॥ अप्यशौचोऽप्यनाचारोभक्त्यायातिहरेर्गृहम् ॥ १० ॥ धात्री
फलकृतामालातुलसीकाष्ठसम्भवा ॥ दृश्यतेयस्यदेहेतुसवैभागवतोनरः ॥ ११ ॥ तुलसीदलजांमालांकण्ठस्थांवहतेतुयः ॥ विष्णूच्छिष्टांविशेषेणसन
मस्योदिवौकसाम् ॥ १२॥ यःपुनस्तुलसीमालांकण्ठेकृत्वाजनार्दनम् ॥ पूजयेत्पुण्यमाप्नोतिप्रतिपुष्पंगवायुतम् ॥१३॥ धारयन्तिनयेमालांहैतुकाः
पापबुद्धयः॥नरकान्ननिवर्तन्तेदग्धाःकोपाग्निनाहरेः ॥१४॥ नजह्यात्तुलसीमालांधात्रीमालांविशेषतः॥महापातकसंहर्त्रींधर्मकामार्थदायिनीम् ॥१५॥
स्पृशेद्यावन्तिलोमानिधात्रीमालाकलौनृणाम् ॥ तावद्वर्षसहस्राणिवसतेकेशवालये ॥ १६ ॥ निवेद्यकेशवेमालांतुलसीकाष्ठसम्भवाम् ॥ वहतेयोनरो
भक्त्यातस्यवैनास्तिपातकम् ॥ १७ ॥ तुलसीकाष्ठमालांतुप्रेतराजस्यदूतकाः ॥ दृष्ट्वानश्यन्तिदूरेणवातोद्धूतंयथादलम् ॥ १८ ॥ तुलस्याविपिनेधा
त्र्याश्छायासुयोनरोत्तमः ॥ पिण्डंददातिपितरोमुक्तिंयान्तिद्विजोत्तम ॥ १९ ॥ पाणौमूर्ध्निगलेचैवकर्णयोश्चमुखेद्विज ॥ धात्रीफलंयस्तुधत्तेसविज्ञेयो
हरिःस्वयम् ॥२०॥ धात्रीपत्रैःफलैर्विप्रश्रीहरिंचार्चयेद्द्विज ॥ कोटिजन्मार्जितंपापंपूजयानश्यतिक्षणात् ॥ २१ ॥ यज्ञादेवाश्चमुनयस्तीर्थानिकार्त्तिके
द्विज ॥ धात्रीवृक्षंसमाश्रित्यतिष्ठन्तिकार्त्तिकेसदा॥२२॥ धात्रीपत्रंकार्त्तिकेचद्वादश्यांतुलसीदलम् ॥ चिनोतियोनरोगच्छेन्निरयंयातनामयम् ॥२३ ॥
धात्रीच्छायासुयोविप्रचान्नंभुनक्तिकार्त्तिके ॥ अन्नसंसर्गजंपापमावर्षंतस्यनश्यति ॥ २४ ॥ तुलसीवनमध्येचधात्रीमूलेचकार्त्तिके ॥ कुर्याद्धर्य
र्चनंविप्रवैकुण्ठंयातिसध्रुवम् ॥ २५ ॥ तुलसीमूलदेशेऽपिस्थितंवारिद्विजोत्तम ॥ गृह्णातिमस्तकेभक्त्यापापीयातिहरेर्गृहम् ॥ २६ ॥ तुलसीपत्रग

१ 'चातिदारुणम्' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लितंयस्तोयंशिरसावहेत् ॥ सर्वतीर्थेषुसस्नातश्चान्तेयातिहरेर्गृहम् ॥ २७ ॥ पुराकश्चिद्द्विजश्रेष्ठोद्वापरेऽभून्महामुने ॥ स्नात्वैकदातुलस्यैसवनंदत्त्वा गृहंगतः ॥ २८ ॥ आदित्योवर्चसानाम्नामार्त्तण्डइवपुण्यतः ॥ तृषार्तोभक्षकःकश्चिदागतोबहुकल्मषः ॥ २९ ॥ तुलस्यामूलतस्तोयंपीत्वासौहतकल्मषः ॥ त्वरयाप्यागतोव्याधोनाम्नायश्वासिमर्दनः ॥ ३० ॥ उवाचभुक्तंचान्नंचभुक्त्वाभग्नंगतःकिमु ॥ कृत्वामेपाकभाण्डस्थंचागतोहिंसकस्यते ॥३१॥ विव्याधतंगतप्राणंनेतुंवैशमनाज्ञया ॥ आगताःकिङ्कराःक्रुद्धाःपाशमुद्गरपाणयः ॥ ३२ ॥ बद्ध्वानेतुंमनश्चक्रुरागताविष्णुकिङ्कराः ॥ तदाछित्त्वाचर्मपाशंस्यन्दनेतंमनोहरे ॥ ३३ ॥ तूर्णमारोहयामासुःपप्रच्छुर्विनयान्विताः ॥ तऽपिपुण्येनभोःसन्तःकेनवैनीयतेऽप्यसौ ॥३४॥ ऊचुस्तेऽसौपुराराजापुण्यंबहुतरंकृतम्॥अहरत्सुन्दरींकाञ्चिचाङ्गनामेववैतदा ॥३५॥ अनेनचांहसाराजागतोवैशमनक्षयम् ॥ तत्रक्लेशंतुयुष्माभिर्दत्तंवैशमनाज्ञया ॥ ३६ ॥ ताम्रमय्यास्त्रियासार्द्धंक्रीडांसुस्वाचकारसः ॥ तप्तायांलोहशय्यायांवैक्लव्यंकर्मणानृप ॥ ३७ ॥ तप्तायोभीषणंतप्तंलोहस्तम्भंयमाज्ञया ॥ ततःस्थितःसमालिङ्ग्यभुक्त्वादुःखंचिरंनपः ॥ ३८ ॥ सिक्तःक्षाराम्बुधाराभिरन्यैर्वैशमनालये ॥ ततोनरकशेषेचपापयोनौमुहुर्मुहुः ॥ ३९ ॥ जन्मासाद्यचिरंदुःखमनुभूतंस्वकर्मणा ॥ तुलसीमूलजंवारिपीत्वायातिहरेर्गृहम् ॥४०॥ इदानींतद्वचःश्रुत्वागतादूतायथागताः ॥ तेनसार्द्धंविष्णुदूतागतावैकुण्ठमन्दिरम् ॥४१॥ माहात्म्यंकथितंब्रह्मंस्तुलस्याःपापनाशनम् ॥ कुर्वन्तिसेवांयेभक्त्यानजानेकिंभवेन्मुने ॥ ४२ ॥ इतिश्रीपाद्मेमहापुराणे ब्रह्मखण्डेसूतशौनकसंवादेतुलस्यामाहात्म्यंनामद्वाविंशोऽध्यायः ॥ २२ ॥ शौनकउवाच ॥ कथयस्वमुनेसूतमाहात्म्यंकलुषक्षयम् ॥ शेषपञ्चदिनस्यापिकार्त्तिकस्यानुकम्पया ॥ १ ॥ सूतउवाच ॥ शृणशौनकयत्पृष्टंमाहात्म्यंपापनाशनम् ॥ वक्ष्याम्यहंवैचोर्जस्यशेषपञ्चदिनस्यच ॥ २ ॥ व्रतानांमुनिशार्दूलप्रवरंविष्णुपञ्चकम् ॥ तस्मिन्यःपूजयेद्भक्त्याश्रीहरिंराधयासह ॥३॥ गन्धपुष्पैर्धूपदीपैर्वस्त्रैर्नानाविधैःफलैः ॥ सयातिविष्णुसदनंसर्वपापविवर्जितः ॥ ४ ॥ ब्रह्मचारीगृहस्थोवावानप्रस्थोऽथवायतिः ॥ नप्राप्नोतिपरंस्थानमकृत्वाविष्णुपञ्चकम् ॥ ५ ॥ सर्वपापहरंपुण्यंविख्यातंविष्णुपञ्चकम् ॥ तत्रस्नानंतुयःकुर्यात्सर्वतीर्थफलंलभेत् ॥ ६ ॥ श्रीहरेःपुरतोविप्रतुलस्याश्चसमीपतः ॥ प्रदीपंसर्पिषापूर्णंदद्याद्योभक्तिभावतः ॥ ७ ॥ नभसिश्रीहरेःप्रीत्यैयात्यसौविष्णुमन्दिरम् ॥ पापीयातिहरेर्धामसत्यमेतन्मयोदितम् ॥ ८ ॥ स्नापयेच्चाच्युतंभक्त्यामधुक्षीरघृतादिभिः ॥ दद्यात्किंनोहरिःप्रीतस्तस्मैसाधुजनायवै ॥ ९ ॥ नैवेद्यंदेवदेवेशंपरमान्नंनिवेदयेत् ॥ तस्यपुण्यंप्रसङ्ख्यातुंनशक्तोवैचतुर्मुखः ॥ १० ॥ अर्चयित्वाहृषीकेशमेकादश्यांसमाहितः ॥ निष्प्राश्यगोमयंसम्यगुपास्तेमन्त्रवच्चयः ॥ ११ ॥ गोमूत्रंमन्त्रवद्भूयोद्वादश्यांप्राशयेद्व्रती ॥ क्षीरंतथात्रयोदश्यांचतुर्दश्यांतथादधि ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सम्प्राप्यपापशुद्ध्यथलङ्घयित्वाचतुर्दिनम् ॥ पञ्चमेतुदिनेस्नात्वाविधिवत्पूज्यकेशवम् ॥ १३ ॥ भोजयेद्ब्राह्मणान्भक्त्यातेभ्योदद्याच्चदक्षिणाम् ॥ ततोनक्तंसमश्नीयात्पञ्चगव्यंसुमन्त्रितम् ॥ १४ ॥ एवंकर्तुमशक्तोयःफलमूलस्यभोजनम् ॥ कुर्याद्धविष्यंवाविप्रयथोक्तविधिनाहवै ॥ १५ ॥ श्रीहरेः पञ्चकंविप्रकुर्याद्यस्तुलसीदलैः ॥ पूजयेत्तंसविज्ञेयःस्वयंनारायणःप्रभुः ॥ १६ ॥ पुरात्रेतायुगेशूद्रोदस्युवृत्तिपरायणः ॥ नाम्नादण्डकरोनित्यंधर्मनिन्दांकरोतियः ॥ १७ ॥ असत्यभाषीमित्रघ्नोवेश्याविभ्रमलोलुपः ॥ ब्रह्मस्वहारीक्रूरश्चपरस्त्रीगमनेरतः ॥ १८ ॥ शरणागतहन्ताचपाखण्डजनसङ्गभाक् ॥ गोमांसाशीसुरापश्चपरनिन्दाकरःसदा ॥ १९ ॥ विश्वासघातीज्ञातीनांवृत्तिच्छेदीद्विजोत्तम ॥ दुष्टंसर्वेसमालोक्यताहृशंतद्गृहेद्विज ॥ आगताज्ञातयःक्रुद्धास्तंचपापपरायणम् ॥ २० ॥ ज्ञातयऊचुः ॥ रेरेमूढदुराचारविनाशंप्रतिनीयते ॥ याप्रतिष्ठाऽर्जितापूर्वैरस्माकंनिर्मलेऽन्वये ॥ २१ ॥ इति क्रुद्धाद्विजश्रेष्ठअपकीर्तिभयादपि ॥ पापिनांप्रवरंसर्वेतत्यजुस्तंकुलादरम् ॥ २२ ॥ ततोगतोमहारण्यंविनष्टाखिलवैभवः ॥ कुर्यात्सदस्युभिःसार्द्धंदस्युकर्मनिरन्तरम् ॥ २३ ॥ पथिप्रगच्छतांतेषांभयाद्विप्रनखादितुम् ॥ प्राप्तंकिञ्चित्क्षुधार्त्तास्तेगताश्चान्यस्थलंप्रति ॥ २४ ॥ तत्रप्रविष्टास्तेसर्वेदृष्ट्वापुण्यजनान्बहून् ॥ धात्रीमूलेस्थितान्ब्रह्मन्वैष्णवान्द्विजसत्तमान् ॥ २५ ॥ सर्वेतेदस्यवोविप्रगतादण्डकरोऽपिसः ॥ तेषांपरिसरंगत्वाप्रणामंवैचकारह ॥ ॥ २६ ॥ दण्डकरउवाच ॥ क्षुधार्तोऽहंद्विजश्रेष्ठाःप्राणायास्यन्तिमेध्रुवम् ॥ मेदध्वंखादितुंकिञ्चिद्युष्मांस्तुशरणंगतः ॥ २७ ॥ आकर्ण्यवचनंतस्यचोचुस्तेधर्मतत्पराः ॥ सर्वपापहरेत्वंचविख्यातेविष्णुपञ्चके ॥ २८ ॥ कथमन्नंखादितुंतेवाञ्छात्वद्यहरेर्दिने ॥ विशेषंतेब्रूहिसंज्ञाकातेभवतिसाम्प्रतम् ॥ २९ ॥ सउवाचमुदाविप्रान्नाम्नादण्डकरोऽप्यहम् ॥ सर्वपापसमायुक्तश्चोद्धारोमेकथंभवेत् ॥ ३० ॥ ऊचुस्तेवैव्रतंश्रेष्ठंकुरुष्वविष्णुपञ्चकम् ॥ विप्राणामाज्ञयाविप्रचकारविष्णुपञ्चकम् ॥ ३१ ॥ सप्रेत्यचहरेःस्थानमारुह्यस्यन्दनेवरे ॥ आसाद्यश्रीहरेरूपंतस्थौजन्मविवर्जितः ॥ ३२ ॥ यइदंशृणुयाद्भक्त्याचाख्यानंपापनाशनम् ॥ कोटिजन्मार्जितंपापंतस्यनश्यतितत्क्षणात् ॥ ३३ ॥ इतिश्रीपाद्मेमहापुराणेब्रह्मखण्डेसूतशौनकसंवादेविष्णुपञ्चकमाहात्म्यंनामत्रयोविंशोऽध्यायः ॥ २३ ॥ शौनकउवाच ॥ विदुषांवरतत्त्वज्ञकथयस्वमहामते ॥ इदानींममदानानांमाहात्म्यंक्रमतोमुने ॥ १ ॥ सूतउवाच ॥ क्षितिदानंमुनिश्रेष्ठदानानामुत्तमंमतम् ॥ येनवैतत्कृतंदानंसर्वदानफलंमतम् ॥ २ ॥ क्षितिंससस्यांयोदद्याद्ब्राह्मणायद्विजोत्तम ॥ विष्णुलोकेसुखंभुङ्क्तेयावदिन्द्राश्चतुर्दश ॥ ३ ॥ पृथिव्यांजन्मचासाद्यसार्वभौमस्ततोनृप ॥ महींसर्वांचिरंभुक्त्वाव्रजेद्वैश्रीहरेर्गृहम् ॥ ४ ॥ गोचर्ममात्रांभूमिंयःप्रयच्छतिद्विजातये ॥ सगच्छतिहरेर्गेहंसर्वपापविवर्जितः ॥ ५ ॥ शतंगावोवृषश्चैकोयत्रतिष्ठन्त्ययन्त्रिताः ॥ गोचर्ममात्रांतांभूमिंप्रवदन्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महर्षयः ॥ ६ ॥ भूमिनेताभूमिदाताद्वौचापिस्वर्गगामिनौ ॥ ग्राह्याभूमिर्द्विजैःप्राज्ञैस्त्यक्त्वादानशतान्यपि ॥ ७ ॥ अज्ञानीभूसुरोयस्तुत्यजेद्भूमिंवि
मोहितः ॥ प्रतिजन्मन्यसौविप्रोभवेच्चात्यन्तदुःखभाक् ॥ ८ ॥ अन्यतोयःसमासाद्यदद्याद्भूमिंद्विजातये ॥ तस्मैविप्रजगन्नाथोददातिपरमंपदम्
॥ ९ ॥ स्वदत्तांपरदत्तांचमेदिनींयोहरेद्द्विज ॥ युक्तःकोटिकुलैर्यातिनरकंचातिदारुणम् ॥ १० ॥ हरेद्योवैमहींविप्रदेवब्राह्मणयोरपि ॥ नहद्यानिष्कृति
स्तस्यकोटिकल्पशतैर्मुने ॥ ११ ॥ भूमिंयोऽपरदत्तांचरक्षतिक्ष्मापतिर्द्विज ॥ पुण्यंकोटिगुणंस्याद्वैतस्यदातृजनादपि ॥ १२ ॥ सप्तद्वीपांमहींदत्त्वाय
त्पुण्यंप्राप्यतेद्विज ॥ तत्पुण्यंप्राप्नुयान्मर्त्योधेनुंयच्छन्द्विजातये ॥ १३ ॥ ददातिवृषभंयस्तुदरिद्रायकुटुम्बिने ॥ सर्वपापविनिर्मुक्तःशिवलोकंसगच्छ
ति ॥ १४ ॥ तिलप्रमाणंस्वर्णंयोब्राह्मणायप्रयच्छति ॥ हरेर्निकेतनंयातियुक्तःकोटिकुलैरपि ॥ १५ ॥ योदद्याद्रजतंविप्रसाधवेभूसुरायवै ॥ प्राप्नो
तिचन्द्रलोकंचपिबेत्तत्रामृतंसदा ॥ १६ ॥ प्रवालंमौक्तिकंचैवहीरकंचमणिंतथा ॥ योददातिद्विजश्रेष्ठस्वर्गलोकंसगच्छति ॥ १७ ॥
तुलापुरुषदानेनयत्पुण्यंलभतेजनः ॥ शालग्रामशिलांदत्त्वातस्मात्कोटिगुणंलभेत् ॥ १८ ॥ सप्तद्वीपांक्षितिंदत्त्वासशैलवनकाननाम् ॥
यत्पुण्यंलभतेतद्वैशालग्रामशिलाप्रदः ॥ १९ ॥ शालग्रामशिलांयोवैदद्याद्भूमिसुरायच ॥ तेनविप्रप्रदत्तानिभुवनानिचतुर्दश ॥ २० ॥
तुलापुरुषदानंयःकरोतिद्विजपुङ्गव ॥ जनन्याश्चोदरेतस्यपुनर्जन्मनविद्यते ॥ २१ ॥ सालङ्कारांद्विजश्रेष्ठकन्यांयच्छतियोनरः ॥ सगच्छेद्ब्रह्म
सदनंपुनर्जन्मनविद्यते ॥ २२ ॥ कन्याविक्रयिणोनास्तिनरकान्निष्कृतिःपुनः ॥ कन्यादानकृतोनास्तिस्वर्गादागमनंपुनः ॥ २३ ॥ उपानहौवात
पत्रंयोददातिद्विजातये ॥ प्रेत्यचेन्द्रपुरंगत्वावसेत्कल्पचतुष्टयम् ॥ २४ ॥ वस्त्रंयच्छतियोदिव्यंसाधवेवैद्विजातये ॥ स्वर्गेदिव्याम्बरधरश्चिरं
तिष्ठेद्द्विजोत्तम ॥ २५ ॥ धेनुंपुरातनींयच्छेद्वस्त्रंचजरितंद्विज ॥ नूत्नांरजोवतींकन्यांसगच्छेन्निरयंतथा ॥ २६ ॥ कन्याविक्रयिणोब्रह्मन्नपश्येद्व
पनंबुधः ॥ दृष्ट्वाचाज्ञानतोवापिकुर्यान्मार्तण्डदर्शनम् ॥ २७ ॥ फलदातानरोगच्छेत्त्रिदिवंचद्विजोत्तम ॥ भुङ्क्तेकल्पसहस्राणिफलंतत्रामृतोपमम्
॥ २८ ॥ शाकंयच्छतियोमर्त्यश्शिवस्यभवनंद्विज ॥ यातिकल्पद्वयंभुङ्क्तेदुर्लभंपायसंसुरैः ॥ २९ ॥ घृतदोदधिदश्चैवतक्रदोदुग्धदस्तथा ॥ वि
ष्णोर्निकेतनंगत्वासुधापानंकरोतिसः ॥ ३० ॥ गन्धदःपुष्पदश्चैवमर्त्योयातिसुरालयम् ॥ तिष्ठेद्युगसहस्राणिगन्धपुष्पविभूषितः ॥ ३१ ॥ शय्या
दानंदानसारंब्राह्मणायददातियः ॥ सयातिब्रह्मसदनंपर्य्यङ्केशेष्यतेचिरम् ॥ ३२ ॥ पीठदातादीपदातासर्वदुष्कृतवर्जितः ॥ स्वर्गेसिंहासनेतिष्ठेज्ज्व
लद्दीपावलीवृतः ॥ ३३ ॥ ताम्बूलंयोनरोदद्याद्भूमिंभुङ्क्तेऽखिलांसुखम् ॥ स्वर्गेदेवाङ्गनाक्रोडेसुप्तस्ताम्बूलमत्तिवै ॥ ३४ ॥ विद्यादानंदानवरंकरोतियो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नरोत्तमः ॥ प्रेत्यससन्निधिंविष्णोस्तिष्ठेद्युगशतत्रयम् ॥ ३५ ॥ प्राप्यज्ञानंततस्तत्रदुर्लभंवैद्विजर्षभ ॥ दुर्लभंमोक्षमाप्नोतिश्रीहरेःकृपयाद्विज ॥३६॥
अनाथंदुखिःतंविप्रंपाठयेद्यैनरोत्तमः ॥ श्रीहरेर्भवनंयातिपुनर्जन्मविवर्जितः ॥ ३७ ॥ योनरःपुस्तकंदद्याद्भक्तिश्रद्धासमन्वितः ॥ प्रतिवर्णंलभेत्पुण्यं
कपिलाकोटिदानजम् ॥ ३८ ॥ मधुदोगुडदश्चैवमर्त्योयातीक्षुसागरम् ॥ लवणदोनरोयातिवारुणंलोकमेवच ॥ ३९ ॥ सर्वेषामेवदानानामन्न
दानंद्विजोत्तम ॥ तत्त्वज्ञैर्मुनिभिःसर्वैःप्रवरंवैप्रकीर्तितम् ॥ ४० ॥ अन्नंवारिद्विजश्रेष्ठयेनदत्तंमहीतले ॥ तेनदत्तानिदानानिसर्वाणिचद्विजर्षभ
॥ ४१ ॥ अन्नदोयोनरोविप्रप्राणदश्चप्रकीर्तितः ॥ तस्मात्समस्तदानानामन्नदोलभतेफलम् ॥ ४२ ॥ यथाचान्नंतथावारिद्वितुल्येचप्रकीर्तिते ॥ वारि
णाचविनाचान्नंसिद्धंनस्याद्द्विजोत्तम ॥४३॥ क्षुधातृषाद्विजव्याघ्रद्वेचतुल्येप्रकीर्तिते ॥ अतश्चान्नंचतोयंचश्रेष्ठंप्रोक्तंबुधैरपि ॥४४॥ अन्नदानंक्षितौब्रह्म
न्येकुर्वन्तिनरोत्तमाः ॥ सर्वपापविनिर्मुक्तागच्छन्तिहरिमन्दिरम् ॥ ४५ ॥ यावन्त्यन्नानिभोविप्रयच्छतिक्षितिमण्डले ॥ ब्रह्महत्याश्चतावन्त्यो
नश्यन्त्येवतपोधन ॥४६॥ यच्छतांचान्नदानानिशरीराणिचपातकम् ॥ गात्राणिगृह्णतांत्यक्त्वासहसायान्तिशौनक ॥४७॥ अतःपापीयसोऽन्नानि
नगृह्णन्तिमनीषिणः ॥ गृह्णन्तिमोहाद्येमूढाभवन्तिपापभागिनः ॥४८॥ कुर्याद्भूमिष्ठमुदकंचैकंभोद्विजसत्तम ॥ सर्वपापैर्विनिर्मुक्तोव्रजेत्सहरिमन्दिरम्
॥४९॥ प्रयत्नेनद्विजश्रेष्ठकर्तव्योधनसञ्चयः॥सञ्चितंचधनंब्रह्मन्दानकर्मणिविक्षिपेत् ॥५०॥ रक्षन्तियेचकार्पण्याद्धनंतेचातिदुःखिनः ॥ अन्तेसर्वधनं
त्यक्त्वानिःस्वागच्छन्तिभोमुने ॥ ५१ ॥ मानवायेसदादानंदत्त्वादत्त्वादरिद्रति ॥ दरिद्रास्तेनविज्ञेयानरलोकेमहेश्वराः ॥ ५२ ॥ परलोकेद्विजव्या
घ्रसाधुसंयमवर्जिते ॥ निर्दयेबन्धुहीनेचनदत्तंनोपतिष्ठते ॥ ५३ ॥ स्थितेधनेनरोयोवैनाश्नातिनददातिसः ॥ दरिद्रइवविज्ञेयःप्रेत्यनिश्वासमुत्सृ
जेत् ॥ ५४ ॥ तपसोऽपिवरंदानंप्रोक्तंचतत्त्वदर्शिभिः ॥ अतोयत्नाद्द्विजश्रेष्ठदानकर्मसमाचरेत् ॥ ५५ ॥ दातादानंनदद्याद्वैसमुत्सृज्यद्वि
जातये ॥ सयातिनिरयंघोरंसर्वजन्तुभयावहम् ॥ ५६ ॥ दानंदाताप्रतिग्राहीनस्मरेच्चनयाचते ॥ निरयेचोभयोर्वासोयावच्चन्द्रदिवाकरौ
॥ ५७ ॥ ब्रह्महत्यादिपापानियानिवैद्विजसत्तम ॥ तानिदानेनहन्यन्तेतस्माद्दानंसमाचरेत् ॥ ५८ ॥ इतिश्रीपाद्मेमहापुराणेब्रह्मखण्डेसूतशौ
नकसंवादेचतुर्विंशतितमोऽध्यायः ॥ २४ ॥ शौनकउवाच ॥ श्रीप्रदंविष्णुचरितंसर्वोपद्रवनाशनम् ॥ सर्वपापक्षयकरंदुष्टग्रहनिवारणम्
॥ १ ॥ विष्णुसान्निध्यदंचैवचतुर्वर्गफलप्रदम् ॥ यःशृणोतिनरोभक्त्याचान्तेयातिहरेर्गृहम् ॥ २ ॥ नामोच्चारणमाहात्म्यंश्रूयतेमहदद्भुत
म् ॥ यदुच्चारणमात्रेणनरोयायात्परंपदम् ॥ ३ ॥ तद्वदस्वाधुनासूतविधानंनामकीर्तने ॥ ४ ॥ सूतउवाच ॥ शृणुशौनकवक्ष्यामिसंवादं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मोक्षसाधनम् ॥ नारदः पृष्टवान्पूर्वंकुमारंतद्वदामिते ॥ ५ ॥ एकदायमुनातीरे निविष्टंशान्तमानसम् ॥ सनत्कुमारंपप्रच्छनारदोरचिताञ्जलिः ॥
श्रुत्वानानाविधान्धर्मान्धर्मव्यतिकरांस्तथा ॥ ६ ॥ श्रीनारदउवाच ॥ योऽसौभगवताप्रोक्तोधर्मव्यतिकरोनृणाम् ॥ कथंतस्यविनाशःस्या
दुच्यतांभगवत्प्रिय ॥ ७ ॥ श्रीसनत्कुमारउवाच ॥ शृणुनारदगोविन्दप्रियगोविन्दधर्मवित ॥ यत्पृष्टंलोकनिर्मुक्तिकारणंतमसःपरम् ॥ ८ ॥ सर्वा
चारविवर्जिताःशठधियोव्रात्याजगद्वञ्चकादम्भाहङ्कृतिपानपैशुनपराःपापाश्रयेनिष्ठुराः ॥ यचान्येधनदारपुत्रनिरताःसर्वेऽधमास्तेऽपिहिश्रीगोवि
न्दपदारविन्दशरणाःशुद्धाभवन्तिद्विज ॥ ९ ॥ तमपिदेवकरंकरुणाकरंस्थविरजङ्गममुक्तिकरंपरम् ॥ अतिचरन्त्यपराधपराजनायइहतान्हरिनाम
पुनातिहि ॥ १० ॥ सर्वापराधकृदपिमुच्यतेहरिसंश्रयः ॥ हरेरप्यपराधान्यःकुर्याद्द्विपदपांसनः ॥ ११ ॥ नामाश्रयःकदाचित्स्यात्तरत्येवसना
मतः ॥ नाम्नोहिसर्वसुहृदोह्यपराधात्पतत्यधः ॥ १२ ॥ श्रीनारदउवाच ॥ केतेऽपराधाविप्रेन्द्रनाम्नोभगवतःकृताः ॥ विनिघ्नन्तिनृ
णांकृत्यंप्राकृतंह्यानयन्तिच ॥ १३ ॥ श्रीसनत्कुमारउवाच ॥ सतांनिन्दानाम्नःपरममपराधंबुधजनावदन्त्येनांकर्तुंनखलुमनुजःकोऽपि
यतते ॥ शिवस्यश्रीविष्णोर्यइहगुणनामादिसकलंधियाभिन्नंपश्येत्सखलुहरिनामाहितकरः ॥ १४ ॥ गुरोरवज्ञाश्रुतिशास्त्रनिन्दनंतथार्थवादोहरि
नाम्निकल्प्यते ॥ नामापराधस्यहिपापबुद्धेर्नविद्यतेतस्ययमैर्हिशुद्धिः ॥ १५ ॥ धर्मव्रतत्यागहुतादिसर्वशुभक्रियासाम्यमपिप्रमादः ॥ अश्रद्दधानोवि
मुखोऽप्यश्रृण्वन्यश्चोपदेशःशिवनामापराधः ॥ १६ ॥ श्रुत्वापिनाममाहात्म्यंयःप्रीतिरहितोऽधमः ॥ अहंममादिपरमोनाम्निसोऽप्यपराधकृत् ॥ १७ ॥
एवंनारदशङ्करेणकपयामह्यंमुनीनांपरंप्रोक्तंनामसुखावहंभगवतोवर्ज्यंसदायत्नतः ॥ येज्ञात्वाऽपिनवर्जयन्तिसहसानाम्नोऽपराधान्दशक्रुद्धामातरम
प्यभोजनपराःखिद्यन्तितेबालवत ॥ १८ ॥ अपराधविमुक्तोहिनाम्निजप्तेसदाचर ॥ नाम्नैवतवदेवर्षेसर्वंसेत्स्यतिनान्यतः ॥ १९ ॥ श्रीनारदउवाच ॥
सनत्कुमारप्रियसाहसानांविवेकवैराग्यविवर्जितानाम् ॥ देहप्रियार्थात्मपरायणानांमुक्तापराधाःप्रभवन्तिनःकथम् ॥ २० ॥ श्रीसनत्कुमारउवाच ॥ जाते
नामापराधेतुप्रमादेनकथञ्चन ॥ सदासङ्कीर्तयन्नामतदेकशरणोभवेत् ॥ २१ ॥ नामापराधयुक्तानांनामान्येवहरन्त्यघम् ॥ अविश्रान्तिप्रयुक्तानितान्ये
वार्थकराणियत् ॥ २२ ॥ नामैकंयस्यचिह्नंस्मरणपथगतंश्रोत्रमूलंगतंवाशुद्धंवाऽशुद्धवर्णंव्यवहितरहितंतारयत्येवसत्यम् ॥ तच्चेदेहद्रविणवनितालो
भपाखण्डमध्येनिक्षिप्तंस्यान्नफलजनकंशीघ्रमेवात्रविप्र ॥ २३ ॥ इदंरहस्यंपरमंपुरानारदशङ्करात् ॥ श्रुतंसर्वाशुभहरमपराधनिवारकम् ॥ २४ ॥
विदुर्विष्णवभिधानंयेह्यपराधपरानराः ॥ तेषामपिभवेन्मुक्तिःपठनादेवनारद ॥ २५ ॥ नाम्नोमाहात्म्यमखिलंपुराणेपरिगीयते ॥ ततःपुराण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मखिलंश्रोतुमर्हसिमानद ॥ २६ ॥ पुराणश्रवणेश्रद्धायस्यस्याद्भ्रातरन्वहम् ॥ तस्यसाक्षात्प्रसन्नःस्याच्छिवोविष्णुश्चसानुगः ॥ २७ ॥ यत्स्ना
त्वापुष्करेतीर्थेप्रयागेसिन्धुसङ्गमे ॥ तत्फलंद्विगुणंतस्यश्रद्धयायैश्शृणोतियः ॥ २८ ॥ येपठन्तिपुराणानिश्शृण्वन्तिचसमाहिताः ॥ प्रत्यक्षरंलभ
न्त्येतेकपिलादानजंफलम् ॥ २९ ॥ अपुत्रोलभतेपुत्रंधनार्थीलभतेधनम् ॥ विद्यार्थीलभतेविद्यांमोक्षार्थीमोक्षमाप्नुयात् ॥ ३० ॥ येशृण्वन्तिपुरा
णानिकोटिजन्मार्जितंखलु ॥ पापजालंतुतेहित्वागच्छन्तिहरिमन्दिरम् ॥ ३१ ॥ पुराणवाचकंविप्रंपूजयेद्भक्तिभावतः ॥ गोभूहिरण्यवस्त्रैश्चगन्धपु
ष्पादिभिर्मुने ॥ ३२ ॥ कांस्यैर्वैनिर्मितंपात्रंजलपात्रंमुदान्वितः ॥ कर्णकुण्डलकंचैवमुद्रिकांस्वर्णनिर्मिताम् ॥ ३३ ॥ आसनंतुतथादद्यात्पुष्पंमा
ल्यंतपोधन ॥ वित्तशाठ्यंनकुर्वीतदानंहीनफलंयतः ॥ ३४ ॥ पुराणंवाचयेद्विप्रसर्वकामार्थसिद्धये ॥ सुवर्णंरजतंवस्त्रंपुष्पमाल्यंतुचन्दनम्॥३५॥
दद्याद्योपुस्तकंभक्त्यासगच्छेद्धरिमन्दिरम् ॥कुर्वन्तिविधिनानेनसम्पूर्णंपुस्तकंचये ॥ ३६ ॥ तेषांनामानिलिम्पेतचित्रगुप्तोऽर्चनाद्द्विज ॥ ३७ ॥ इति
श्रीपाद्मेमहापुराणेब्रह्मखण्डेसूतशौनकसंवादेपञ्चविंशतितमोऽध्यायः ॥ २५ ॥ शौनकउवाच ॥ श्रोतुमिच्छामितेप्राज्ञकथयस्वसमूलकम् ॥ प्रतिज्ञा
पालनेपुण्यंखण्डनेकिंचकिल्बिषम् ॥ १ ॥ अनृतेशपथेकिंवासत्येकिंचिद्भवेन्मुने ॥ दक्षिणांकिंकरंदत्त्वाकृपांकृत्वाकृपार्णव ॥ २ ॥ सूतउवाच ॥ शृ
णुष्वमुनिशार्दूलकथयामिसमूलतः ॥ वैष्णवानांत्वमग्र्योऽसिसर्वलोकहितेरतः ॥ ३ ॥ धेनूनांतुशतंदत्त्वायत्फलंलभतेनरः ॥ तस्मात्कोटिगुणंपुण्यं
प्रतिज्ञापालनेद्विज ॥ ४ ॥ प्रतिज्ञाखण्डनान्मूढोनिरयंयातिदारुणम् ॥ शतमन्वन्तरंयावत्पच्यतेनात्रसंशयः ॥५॥ ततोऽत्रजन्मचासाद्यनिर्धनस्य
निकेतने ॥ अन्नवस्त्रैर्विहीनःस्यात्क्लेशीचापिस्वकर्मणा ॥ ६ ॥ सत्येनशपथंकुर्याद्देवाग्निगुरुसन्निधौ ॥ तावद्दहतिवैगात्रंविष्णोर्वशोनलुप्यते ॥ ७ ॥
मिथ्यायांशपथेविप्रकिमहंवच्मिसाम्प्रतम् ॥ शतमन्वन्तरंविप्रनिरयंमिथ्ययाकिमु ॥ ८ ॥ निर्माल्यंश्रीहरेःस्पृष्ट्वासत्येनमुनिपुङ्गव ॥ गृहीत्वापुरुषा
न्सप्तपच्यतेनिरयेचिरम् ॥ ९॥ कदाचिज्जन्मसम्प्राप्यकुष्ठीचप्रतिजन्मनि ॥ सत्येनैवंभवेद्विप्रअनृतेवैकिमुच्यते ॥ १०॥ योमर्त्योदक्षिणंदत्त्वाकरंतत्प्र
तिपालयेत् ॥ तस्यप्रातोभवेत्कृष्णःसत्यंसत्यंवदाम्यहम् ॥ ११ ॥ करंदत्त्वातुयोमर्त्योवचनस्यचपालनम् ॥ तावन्नकुर्यात्पितरःप्राप्नुवन्तिचयात
नाम् ॥ १२ ॥ स्वयंतुमुनिशार्दूलनिरयंयातिदारुणम् ॥ उद्धारंकोटिपुरुषैर्मृतोयातिनसंशयः ॥ १३ ॥ शौनकउवाच ॥ कृष्णप्राप्तिःपुराकस्यक
रस्यप्रतिपालनात् ॥ दक्षिणस्यमुनेब्रूहिश्रोतुमिच्छामिसादरात् ॥ १४ ॥ सूतउवाच ॥ पुराकिश्चित्पुरेशूद्रोनाम्नाऽऽसीद्वीरविक्रमः ॥ बह्वाशी
पृथुलाङ्गश्चबहुवक्तातिसुन्दरः ॥ १५ ॥ धनवान्पुत्रवान्सभ्योविद्वान्सर्वजनप्रियः ॥ विप्राणामतिथीनांचपूजकःसर्वदैवतु ॥ १६ ॥ पितृभक्तोद्वि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जश्रेष्ठप्रतिज्ञापालकःसदा ॥ वाचांगुरुजनानांचपालकोहरिसेवकः ॥ १७ ॥ एकदासुन्दरोगेहंश्वपचस्तस्यछद्मना ॥ प्राप्तोधृत्वाब्राह्मणस्यरूपंवै
तरुणःसुधीः ॥ १८ ॥ ब्राह्मणउवाच ॥ शृणुमेवचनंधीरममजायामृताशुभा ॥ किंकरोमिक्वगच्छामिकथयाद्यानुकम्पया ॥ १९ ॥ विवाहंयोजनःकु
र्याद्ब्राह्मणस्यविशेषतः ॥ किमुदानैःकिंचतीर्थैःकिंयज्ञैर्व्रतकोटिभिः ॥ २० ॥ इतिश्रुत्वात्वसौविप्रंचोक्तवान्वीरविक्रमः ॥ शृणुमेवचनंब्रह्मन्बालास्ति
ममकन्यका ॥ २१ ॥ यदीच्छातेभवेद्विप्रदास्यामिविधिपूर्वकम् ॥ नयमेदक्षिणंहस्तंदास्यामिचान्यथानहि ॥ २२ ॥ तस्यैतद्वचनंश्रुत्वाजग्रा
हदक्षिणंकरम् ॥ श्वपचोहर्षयुक्तोवैप्रोवाचवचनंत्विति ॥ २३ ॥ ब्राह्मणउवाच ॥ कृत्वाशुभक्षणंमह्यंदेहिकन्यांशुभान्विताम् ॥ विलम्बेबहु
विघ्नंस्यादितिशास्त्रेषुनिश्चितम् ॥ २४ ॥ वीरविक्रमउवाच ॥ तुभ्यंश्वःकन्यकांब्रह्मन्दास्यामिनास्तिचान्यथा ॥ दक्षिणंचकरंदत्त्वानकुर्यात्पु
रुपाधमः ॥ २५ ॥ सूतउवाच ॥ ब्राह्मणंकृष्णशर्माणंचाहूयाकथयन्मुने ॥ पुरोहितमिदंसर्वंप्रोवाचसंविदंद्विज ॥ २६ ॥ कथंविप्रायतं
कन्यांशूद्रायदातुमिच्छसि ॥ अज्ञातायाकुलीनायनददस्वविशेषतः ॥ २७ ॥ ऊचुस्तज्ज्ञातयःसर्वेजनकाद्यास्तपोधन ॥ अस्माकंवचनंतातशृणुष्व
वीरविक्रम ॥ २८ ॥ नज्ञायतेकुलंयस्यदेशगोत्रधनंतथा ॥ शीलंवयस्तस्यकन्यास्वजनैर्नचदीयते ॥ २९ ॥ सउवाचद्विजश्रेष्ठदत्तंमेदक्षिणंकरम् ॥
कदाचिदन्यथाकर्तुंनशक्नोमिचसर्वथा ॥३०॥ इत्युक्त्वातान्सविप्रायकन्यांदातुंप्रचक्रमे ॥ दृष्ट्वेतिज्ञातयःसर्वेविस्मयमद्भुतंययुः ॥ ३१ ॥ सत्यंतद्व
चनंश्रुत्वाशङ्खचक्रगदाधरः ॥ आविर्बभूवसहसाचारुह्यगरुडंमुने ॥ ३२ ॥ श्रीभगवानुवाच ॥ धन्यंतेचकुलंधर्मोधन्यस्तेजननीपिता ॥ धन्यंतेवच
नंसत्यंधन्यंतेदक्षिणंकरम् ॥ ३३ ॥ धन्यंकर्मचतेजन्मत्रैलोक्येनैवविद्यते ॥ एवंतेकर्मणासाधोचोद्धारंकुरुषेकुलम् ॥ ३४ ॥ सूतउवाच ॥ एवंब्रुवति
श्रीकृष्णेविमानंस्वर्णनिर्मितम् ॥ आगतंहिगणैर्युक्तंसर्वत्रगरुडध्वजम् ॥ ३५ ॥ सर्वंतस्यकुलंब्रह्मन्सश्वपाकपुरोहितम् ॥ रथेचारोपयामासशङ्खपद्मध
रःस्वयम् ॥३६॥ गृहीत्वातान्हरिःसर्वान्गतोवैकुण्ठमन्दिरम् ॥ तत्रतस्थुश्चिरंतेचकृत्वाभोगंसुदुर्लभम् ॥३७॥ वचनंलङ्घयेद्यस्तुयस्तुवादक्षिणंकरम्॥
सकुलोनिरयंयातिसत्यंसत्यंवदाम्यहम् ॥ ३८ ॥ तस्यान्नंतुजलंब्रह्मन्नग्राह्यंपितृदैवतैः ॥ त्यक्त्वाधर्मोगृहंतस्यभीत्यायातिद्विजोत्तम ॥ ३९ ॥ दत्त्वा
ऽऽशांयोजनःकुर्यान्नैराश्यंचैवमूढधीः॥सस्वकान्कोटिपुरुषान्गृहीत्वानरकंव्रजेत् ॥४०॥ वचनंलङ्घयेद्यस्तुधर्मस्तस्यविलुप्यते॥नृपाग्नितस्करैर्विप्रस
त्यंसत्यंसुनिश्चितम् ॥ ४१ ॥ स्वर्गोत्तरमिमंसम्यक्छ्रुत्वास्वर्गोत्तरंव्रजेत् ॥ जीवन्मुक्तस्त्विहामुत्रकृष्णाख्यंधामचोत्तमम् ॥ ४२ ॥ इतिश्रीपाद्मेमहा
पुराणेब्रह्मखण्डेसूतशौनकसंवादेषड्विंशतितमोऽध्यायः ॥ २६ ॥ ॥ इतिस्वर्गोत्तरापरनामकंब्रह्मखण्डंसम्पूर्णम् ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

१ 'शीलं च वयसा हीनं स्वजनेन न दीयते । इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ श्रीपाद्मे महापुराणे पंचमपातालखण्डप्रारंभः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पातालखंडाचीं चित्रें.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ श्रीकुलदेवतायैनमः ॥ श्रीगुरुचरणारविन्दाभ्यांनमः ॥ नारायणंनमस्कृत्यनरंचैवनरोत्तमम् ॥ देवींसरस्वतींव्यासंततोजयमुदी
रयेत् ॥ १ ॥ ऋषयऊचुः ॥ श्रुतंसर्वंमहाभागस्वर्गखण्डंमनोहरम् ॥ त्वत्तोऽधुनावदायुष्मञ्छ्रीरामचरितंहिनः ॥ २ ॥ सूतउवाच ॥ अथैकदाधरा
धारंपृष्टवान्भुजगेश्वरम् ॥ वात्स्यायनोमुनिवरःकथामेतांसुनिर्मलाम् ॥ ३ ॥ श्रीवात्स्यायनउवाच ॥ शेषश्रुताःकथास्त्वत्तोजगत्सर्गलयादिकाः ॥
भूगोलश्चखगोलश्चज्योतिश्चक्रविनिर्णयः ॥ ४ ॥ महत्तत्त्वादिसृष्टीनांपृथक्तत्त्वविनिर्णयः ॥ नानाराजचरित्राणिकथितानित्वयानघ ॥ ५ ॥ सूर्य
वंशभवानांचराज्ञांचारित्रमद्भुतम् ॥ तत्रानेकमहापापहरारामकथास्तुताः ॥ ६ ॥ तस्यवीरस्यरामस्यहयमेधकथाश्रुता ॥ संक्षेपतोमयात्वत्तस्तामि
च्छामिसविस्तराम् ॥ ७ ॥ याश्रुतासंस्मृताचोक्तामहापातकहारिणी ॥ चिन्तितार्थप्रदात्रीचभक्तचित्तप्रतोषदा ॥ ८ ॥ शेषउवाच ॥ धन्योऽसि
द्विजवर्यत्वंयस्यतेमतिरीदृशी ॥ रघुवीरपदद्वन्द्वमकरन्दस्पृहावती॥९॥वदन्तिमुनयःसर्वेसाधूनांसङ्गमंवरम् ॥ यस्मात्पापक्षयकरीरघुनाथकथाभवेत्
॥ १० ॥ त्वयामेऽनुग्रहःसृष्टोयद्रामःस्मारितःपुनः ॥ सुरासुरकिरीटौघमणिनीराजिताङ्घ्रिकः ॥ ११ ॥ रावणारिकथावार्द्धौमशकोमादृशःकिया
न् ॥ यत्रब्रह्मादयोदेवामोहितानविदन्त्यपि ॥ १२ ॥ तथापिभोमयातुभ्यंवक्तव्यंस्वीयशक्तितः ॥ पक्षिणःस्वगतिंश्रित्वाखेगच्छन्तिसुविस्तरे॥१३॥
चरितंरघुनाथस्यशतकोटिप्रविस्तरम् ॥ येषांवैयादृशीबुद्धिस्तेवदन्त्येवतादृशम् ॥ १४ ॥ रघुनाथसतीकीर्तिर्मद्बुद्धिंनिर्मलीमसाम् ॥ करिष्यतिस्वस
म्पर्कात्कनकंत्वनलोयथा ॥ १५॥ सूतउवाच ॥ इत्युक्त्वातंमुनिवरंध्यानस्तिमितलोचनः ॥ ज्ञानेनालोकयाञ्चक्रेकथांलोकोत्तरांशुभाम् ॥१६॥ गद्ग
दस्वरसंयुक्तोमहाहर्षाङ्किताङ्गकः ॥ कथयामासविशदांकथांदाशरथेःपुनः ॥ १७ ॥ शेषउवाच ॥ लङ्केश्वरेविनिहतेदेवदानवदुःखदे ॥ अप्सरो
गणवक्त्राब्जचन्द्रमःकान्तिहर्तरि ॥ १८ ॥ सुराःसर्वेसुखंप्रापुरिन्द्रप्रभृतयस्तदा ॥ सुखंप्राप्ताःस्तुतिंचक्रुर्दासवत्प्रणतिंगताः ॥ १९ ॥ लङ्कायांच
प्रतिष्ठाप्यधर्मयुक्तंविभीषणम् ॥ सीतयासहितोरामःपुष्पकंसमुपाश्रितः ॥ २० ॥ सुग्रीवहनुमत्सीतालक्ष्मणैःसंयुतस्तदा ॥ लङ्कामपश्यद्बहुधाभग्न
प्राकारतोरणाम् ॥ २१ ॥ दृष्ट्वाऽशोकवनंतत्रसीतास्थानंमुमूर्च्छह ॥ शिंशपास्तत्रवृक्षांश्चपुष्पितान्कोरकैर्युतान् ॥२२ ॥ राक्षसीभिःसमाकीर्णान्मृता
भिर्हनुमद्भयात् ॥ इत्थंसर्वंविलोक्याशुरामःप्रायात्पुरींप्रति ॥२३ ॥ विभीषणोऽपिसचिवैरन्वगाद्विरहोत्सुकः ॥ ब्रह्मादिदेवैःसहितःस्वीयस्वीयविमा
नकैः ॥ २४ ॥ देवदुन्दुभिनिर्घोषाञ्छृण्वञ्छ्रोत्रसुखावहान् ॥ तथैवाप्सरसांनृत्यैःपूज्यमानोरघूत्तमः ॥ २५॥ सीतायैदर्शयन्मार्गेतीर्थान्याश्रमवन्ति
च ॥ मुनींश्चमुनिपुत्रांश्चमुनिपत्नीःपतिव्रताः ॥ २६ ॥ यत्रयत्रकृतावासाःपूर्वंरामेणधीमता ॥ तान्सर्वान्दर्शयामासलक्ष्मणेनसमन्वितः ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्येवंदर्शयंस्तस्यैरामोऽद्राक्षीत्स्वकांपुरीम् ॥ तस्याःपुनःसमीपेतुनन्दिग्रामंददर्शह ॥ २८ ॥ यत्रवैभरतोराजापालयन्धर्ममास्थितः ॥ भ्रातुर्वियोग
जनितंदुःखचिह्नंवहन्बहु ॥ २९ ॥ गतशायीब्रह्मचारीजटावल्कलसंयुतः ॥ कृशाङ्गयष्टिर्दुःखार्तःकुर्वन्रामकथांमुहुः ॥ ३० ॥ यवान्नमपिनोभुङ्क्तेजलं
पिबतिनोमुहुः ॥ उद्यन्तंसवितारंयोनमस्कृत्यब्रवीतिच ॥ ३१ ॥ जगन्नेत्रसुरस्वामिन्हरमेदुष्कृतंमहत् ॥ मदर्थेरामचन्द्रोऽपिजगत्पूज्योवनंय
यौ ॥ ३२ ॥ सीतयासुकुमाराङ्ग्यासेव्यमानोऽटवींगतः ॥ यासीतापुष्पपर्यङ्केवृन्तमासाद्यदुःखिता ॥ ३३ ॥ यासीतारविसन्तापंकदापिप्रा
पनोसती ॥ मदर्थेजानकीसाचप्रत्यरण्यंभ्रमत्यहो ॥ ३४ ॥ यासीताराजवृन्दैश्चनदृष्टानयनैःकदा ॥ सासीतादृश्यतेनूनंकिरातैःकालरूपि
भिः ॥ ३५ ॥ यासीतामधुरंत्वन्नंभोजितानबुभुक्षति ॥ सासीताद्यवनस्थानिफलानिप्रार्थयत्यहो ॥ ३६ ॥ इत्येवमन्वहंसूर्यमुपस्थाय
वदत्यदः ॥ प्रातःप्रातर्महाराजोभरतोरामवल्लभः ॥ ३७ ॥ यश्चोच्यमानःसचिवैःसमदुःखसुखैर्बुधैः ॥ नीतिज्ञैःशास्त्रनिपुणैरितिप्रोवाचतान्
नृपः ॥ ३८ ॥ अमात्यादुर्भगंमांकिंप्रब्रूतपुरुषाधमम् ॥ यदर्थमग्रजोरामोवनंप्राप्यावसीदति ॥ ३९ ॥ दुर्भगस्यममप्रस्वाः[1]पापमार्जनमा
दरात् ॥ करोमिरामचन्द्राङ्घ्रिंस्मारंस्मारंसुमन्त्रिणः ॥ ४० ॥ धन्यासुमित्रासुतरांवीरसूःस्वपतिप्रिया ॥ यस्यास्तनूजोरामस्यचरणौसे
वतेऽन्वहम् ॥ ४१ ॥ यत्रग्रामेस्थितोनूनंभरतोभ्रातृवत्सलः ॥ विलापंप्रकरोत्युच्चैस्तंग्रामंसददर्शह ॥ ४२ ॥ इतिश्रीपाद्मपुराणेपातालख
ण्डेशेषवात्स्यायनसंवादेरामाश्वमेधेरघुनाथस्यभरतावासनन्दिग्रामदर्शनंनामप्रथमोऽध्यायः ॥ १ ॥ शेषउवाच ॥ अथतद्दर्शनोत्कण्ठाविह्व
लीकृतचेतसा ॥ पुनःपुनःस्मृतोभ्राताभरतोधार्मिकाग्रणीः ॥ १ ॥ उवाचचहनूमन्तंबलवन्तंसमीरजम् ॥ प्रस्फुरद्दशनव्याजचन्द्रकान्तिहृ
तान्धकः ॥ २ ॥ शृणुवीरहनूमंस्त्वंमद्गिरंभ्रातृनोदिताम् ॥ चिरन्तनवियोगेनगद्गदीकृतविह्वलाम्[2] ॥ ३ ॥ गच्छतंभ्रातरंवीरसमीरणतनू
द्भव ॥ मद्वियोगकृशांयष्टिंवपुषोबिभ्रतंहठात् ॥ ४ ॥ योवल्कलंपरीधत्तेजटांधत्तेशिरोरुहे ॥ फलानांभक्षणमपिनकुर्याद्विरहातुरः ॥ ५ ॥
परस्त्रीयस्यमातेवलोष्टवत्काञ्चनंपुनः ॥ प्रजाः[3]पुत्रानिवोद्रक्षेद्बान्धवोममधर्मवित् ॥ ६ ॥ मद्वियोगजदुःखाग्निज्वालादग्धकलेवरम् ॥ मदागमनस
न्देशपयोवृष्ट्याशुसिञ्चतम् ॥ ७ ॥ सीतयासहितंराममंलक्ष्मणेनसमन्वितम् ॥ सुग्रीवादिकपीन्द्रैश्चरक्षोभिः[4]सविभीषणैः ॥ ८ ॥ प्राप्तंनिवेदयसु
खात्पुष्पकासनसंस्थितम् ॥ येनमेसोऽनुजःशीघ्रंसुखमेतिमदागमात् ॥ ९ ॥ इतिश्रुत्वाततोवाक्यंरघुवीरस्यधीमतः ॥ जगामभरतावासंनन्दिग्रामं

१ प्रस्वाः मातुः कैकेय्याः इत्यर्थः। २ 'गद्गदीकृतविग्रहाम्' इ० पा०। ३ 'प्रजाः पुत्रानिवेक्षेद्यो' इ० पा०। ४ 'राजभिः' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निदेशकृत् ॥ १० ॥ गत्वासनन्दिग्रामंतुमन्त्रिवृद्धैःसुसंयुतम् ॥ भरतंभ्रातृविरहक्लिन्नंधीमान्ददर्शह ॥११॥ कथयन्तंमन्त्रिवृद्धान्रामचन्द्रकथानकम्॥
तदीयपदपाथोजमकरन्दसुनिर्भरः ॥ १२ ॥ नमश्चकारभरतंधर्ममूर्तिंयुतंकिल ॥ विधात्रासकलांशेनसत्त्वेनैवविनिर्मितम् ॥ १३ ॥ तंदृष्ट्वाभरतःशी
घ्रंप्रत्युत्थायकृताञ्जलिः ॥ स्वागतंचेतिहोवाचरामस्यकुशलंवद ॥ १४ ॥ इत्येवंवदतस्तस्यभुजोदक्षिणतोऽस्फुरत् ॥ हृदयाच्चगतःशोकोहर्षास्रैःपूरि
ताननः ॥ १५ ॥ विलोक्यतादृशंभूपंप्रत्युवाचकपीश्वरः ॥ निकटेहिपुरःप्राप्तंविद्धिरामंसलक्ष्मणम् ॥ १६ ॥ रामागमनसन्देशामृतसिक्तकलेवरः ॥
प्रापयद्धर्षपूरंहिसहस्रास्योनवेद्म्यहम् ॥ १७ ॥ जगादममतन्नास्तियत्तुभ्यंदीयतेमया ॥ दासोऽस्मिजन्मपर्यन्तंरामसन्देशहारक ॥ १८ ॥ वसिष्ठो
ऽपिगृहीत्वार्घ्यंमन्त्रिवृद्धाःसुहर्षिताः ॥ जग्मुस्तेरामचन्द्रंचहनुमद्दर्शिताध्वना ॥ १९ ॥ दृष्ट्वादूरात्समायान्तंरामचन्द्रंमनोरमम् ॥ पुष्पकासनमध्य
स्थंससीतंसहलक्ष्मणम् ॥ २० ॥ रामोऽपिदृष्ट्वाभरतंपादचारेणसङ्गतम् ॥ जटावल्कलकौपीनपरिधानसमन्वितम् ॥ २१ ॥ अमात्यान्भ्रातृवेषेणस
मवेषाञ्जटाधरान् ॥ नित्यंतपःक्लिष्टतयाकृशरूपान्ददर्शह ॥ २२ ॥ रामोऽपिचिन्तयामासदृष्ट्वावैतादृशंनृपम् ॥ अहोदशरथस्यायंराजराजस्यधी
मतः ॥ २३ ॥ पुत्रःपदातिरायातिजटावल्कलवेषभृत् ॥ नदुःखंतादृशंमेऽन्यद्वनमध्यगतस्यहि ॥ २४ ॥ यादृशंमद्वियोगेनचैतस्यपरिवर्तते ॥ अ
होपश्यतमेभ्राताप्राणात्प्रियतमःसखा ॥ २५ ॥ श्रुत्वामांनिकटेप्राप्तंमन्त्रिवृद्धैःसुहर्षितः ॥ द्रष्टुंमांभरतोऽभ्येतिवसिष्ठेनसमन्वितः ॥ २६ ॥ इतिब्रुवन्न
रपतिःपुष्पकान्नभसोऽङ्गणात ॥ विभीषणहनूमद्भ्यांलक्ष्मणेनकृतादरः ॥ २७ ॥ यानादवततारांशुविरहक्लिन्नमानसः ॥ भ्रातर्भ्रातःपुनर्भ्रातर्भ्रातर्भ्रात
र्वदन्मुहुः ॥ २८ ॥ दृष्ट्वासमुत्तीर्णमिमंरामचन्द्रंसुरैर्युतम् ॥ भरतोभ्रातृविरहक्लिन्नंधीमान्ददर्शह ॥२९॥ हर्षाश्रूणिप्रमुञ्चंश्चदण्डवत्प्रणनामह ॥ रघुना
थोऽपितंदृष्ट्वादण्डवत्पतितंभुवि ॥ ३० ॥ उत्थाप्यजगृहेदोर्भ्यांहर्षालोकसमन्वितः ॥ उत्थापितोऽपिहिभृशंनोदतिष्ठद्रुदन्मुहुः ॥ रामचन्द्रपदाम्भो
जग्रहणासक्तबाहुभृत् ॥ ३१ ॥ भरतउवाच ॥ दुराचारस्यदुष्टस्यपापिनोमेकृपांकुरु ॥ रामचन्द्रमहाबाहोकारुण्यात्करुणानिधे ॥ ३२ ॥ यस्तेवि
देहजापाणिस्पर्शंक्रूरममन्यत ॥ सएवचरणोरामवनेबभ्राममत्कृते ॥ ३३ ॥ इत्युक्त्वाश्रुमुखोदीनःपरिरभ्यपुनःपुनः ॥ प्राञ्जलिःपुरतस्तस्थौहर्षविह्व
लिताननः ॥ ३४ ॥ रघुनाथस्तमनुजंपरिष्वज्यकृपानिधिः ॥ प्रणम्यचमहामन्त्रिमुख्यानापृच्छ्यसादरम् ॥ ३५ ॥ भरतेनसमंभ्रात्रापुष्पकासन
मास्थितः ॥ सीतांददर्शभरतोभ्रातृपत्नीमनिन्दिताम् ॥ ३६ ॥ अनसूयामिवात्रेःकिंलोपामुद्रांघटोद्भवः ॥ पतिव्रतांजनकजाममन्यतननामच
॥ ३७ ॥ मातःक्षमस्वयदघंमयाकृतमबुद्धिना ॥ त्वत्सदृश्यःपतिपराःसर्वेषांसाधुकारिकाः ॥ ३८ ॥ जानक्यपिमहाभागादेवरंवीक्ष्यसादरम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आशीर्भिरभियुज्याथसमपृच्छदनामयम् ॥ ३९ ॥ विमानवरमारूढास्तेसर्वेनभसोऽङ्गणे ॥ क्षणादालोकयाञ्चक्रुर्निकटेस्वपितुःपुरीम् ॥ ४० ॥ इति
श्रीपाद्मेमहापुराणेपातालखण्डेरामाश्व०रामराजधानीदर्शनंनामद्वितीयोऽध्यायः ॥ २ ॥ शेषउवाच ॥ दृष्ट्वारामोराजधानींनिजलोकनिवासिता
म् ॥ जहर्षमतिमान्वीरश्चिरदर्शनलालसः ॥ १ ॥ भरतोऽपिस्वकंमित्रंसुमुखंनगरंप्रति ॥ प्रेषयामाससचिवंनगरोत्सवसिद्धये ॥ २ ॥ भरतउवाच ॥
कुर्वन्तुलोकास्त्वरितंरघुनाथागमोत्सवम् ॥ मन्दिरेमन्दिरेरम्यंकृतकौतुकचित्रकम् ॥ ३ ॥ विपांसुकाराजमार्गाश्चन्दनद्रवसेचिताः ॥ प्रसूनभरसङ्कु
लाहृष्टपुष्टजनावृताः ॥४॥ विचित्रवर्णध्वजभाचित्रिताखिलस्वाङ्गणाः ॥ मेघागमेधनुरिवपश्यन्त्वेववलीमुखाः ॥ ५ ॥ प्रतिगेहंतुलोकानांकारयन्त्व
गरूक्षणम् ॥ यद्धूमंवीक्ष्यशिखिनोनृत्यंकुर्वन्तिलीलया ॥ ६ ॥ हस्तिनोममशैलाभानाधोरणसुयन्त्रितान् ॥ विचित्रयन्तुबहुशोगैरिकाद्युपधातुभिः
॥ ७ ॥ वाजिनश्चित्रिताभूयःसुशोभन्तुमनोजवाः ॥ यद्वेगवीक्षणादेवगर्वंत्यजतिस्वर्हयः ॥ ८ ॥ कन्याःसहस्रशोरम्याःसर्वाभरणभूषिताः ॥ गजो
परिसमारूढामुक्ताभिर्विकिरन्तुच ॥९॥ ब्राह्मण्यःपात्रहस्ताश्चदूर्वाहारिद्रसंयुताः॥सुवासिन्योमहाराजंरामंनीराजयन्तुताः ॥१०॥कौसल्यापुत्रसंयोग
सन्देशविधुरासती ॥ हर्षंप्राप्नोतुसुकृशातदीक्षणसुलालसा ॥ ११ ॥ इत्येवमादिरचनाःपुरशोभाविधायिकाः ॥ करोतुजनताहृष्टारामस्यागमनंप्रति
॥१२॥ शेषउवाच ॥ इतिश्रुत्वाततोवाक्यंसुमुखोमन्त्रवित्तमः ॥ प्रययौनगरींकतुकृतकौतुकतोरणाम् ॥१३॥ गत्वाथनगरींतांवैमन्त्रीतुसुमुखाभिधः॥
ख्यापयामासलोकानांरामागममहोत्सवम् ॥१४॥ लोकाःश्रुत्वापुरींप्राप्तंरघुनाथंसुहर्षिताः ॥ पूर्वंतदीयविरहत्यक्तभोगसुखादयः ॥१५॥ ब्राह्मणावेदस
म्पन्नाःपवित्रादर्भपाणयः ॥ धौतोत्तरीयवलिताजग्मुःश्रीरघुनायकम् ॥ १६ ॥ क्षत्रियायेशूरतमाधनुर्बाणधरावराः ॥ सङ्ग्रामेबहुशोवीराजेतारोयथुर
प्यसुम् ॥१७॥ वैश्याधनसमृद्धाश्चमुद्राशोभितपाणयः ॥ शुभ्रवस्त्रपरीधानाअभिजग्मुर्नरेश्वरम् ॥१८॥ शूद्राद्विजेषुयेभक्ताःस्वीयाचारसुनिष्ठिताः ॥
वेदाचाररतायेवैतेऽपिजग्मुःपुरीपतिम् ॥१९॥ येयेवृत्तिकरालोकाःस्वेस्वेकर्मण्यधिष्ठिताः ॥ स्वकंवस्तुसमादाययुःश्रीरामभूपतिम् ॥२०॥ इत्थंभूप
तिसन्देशात्प्रमोदाप्लवसंयुताः ॥ नानाकौतुकसंयुक्ताआजग्मुर्मनुजेश्वरम् ॥२१॥ रघुनाथोऽपिसकलैर्दैवतैःस्वस्वयानगैः ॥ परीतःप्रविवेशोच्चैःपुरींर
चितमोहनाम् ॥ २२ ॥ प्लवङ्गाःप्लवनैर्युक्ताआकाशपथचारिणः ॥ स्वस्वशोभापरीताङ्गाश्चानुजग्मुःपुरोत्तमम् ॥ २३ ॥ पुष्पकादवरुह्याशुनरयानम
थारुहत् ॥ सीतयासहितोरामःपरिवारसमावृतः ॥२४॥ अयोध्यांप्रविवेशाथकृतकौतुकतोरणाम् ॥ हृष्टपुष्टजनाकीर्णामुत्सवैःपरिभूषिताम् ॥ २५ ॥
वीणापणवभेर्यादिवादित्रैराहतैभृशम् ॥ शोभमानःस्तूयमानःसूतमागधवन्दिभिः ॥ २६ ॥ जयराघवरामेतिजयसूर्यकुलाङ्गद ॥ जयदाशरथेदेव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जयताल्लोकनायकः ॥ २७ ॥ इतिशृण्वञ्छुभांवाचंपौराणांहर्षिताङ्गिनाम् ॥ रामदर्शनसञ्जातपुलकोद्भेदशोभिनाम् ॥ २८ ॥ प्रविवेशवरंमार्गंरथ्या
चत्वरभूषितम् ॥ चन्दनोदकसंसिक्तंपुष्पपल्लवसंयुतम् ॥२९॥ तदापौराङ्गनाःकाश्चिद्गवाक्षबिलमाश्रिताः[1] ॥ रघुनाथस्वरूपेक्षाजातकामाअथाब्रुवन्
॥ ३० ॥ पौराङ्गनाऊचुः ॥ धन्याअभूवन्बतभिल्लकन्यावनेषुयारामसुखारविन्दम् ॥ स्वलोचनेन्दीवरकैरथापिबन्स्वभाग्यसञ्जातमहोदयाइमाः
॥ ३१ ॥ धन्यंमुखंपश्यतवीरधाम्नःश्रीरामदेवस्यसरोजनेत्रम् ॥ यद्दर्शनंधातृमुखाःसुराअपिप्रापुर्महद्भाग्ययुतावयंत्वहो ॥ ३२ ॥ एतन्मुखंपश्यत
चारुहासंकिरीटसंशोभिनिजोत्तमांगम् ॥ बन्धूकधिक्कारलसच्छविप्रदंदन्तच्छदंबिभ्रतमुच्चनासम् ॥ ३३ ॥ इतिगदितवतीस्ताःस्नेहभारेणरामो
नलिनदलसदृक्षैर्नेत्रपातैर्निरीक्ष्य[2] ॥ निखिलगुरुरनूनप्रेमभारंनृलोकंजननिगृहमियेषप्रोषिताङ्गेनहृष्टः ॥ ३४ ॥ इतिश्रीपाद्मपुराणेपातालखण्डेशेषवा०
रामा०रघुनाथस्यपुरप्रवेशनंनामतृतीयोऽध्यायः ॥ ३ ॥ वात्स्यायनउवाच ॥ भुजगाधीश्वरेशानधराभारधरक्षम ॥ शृण्वेकंसंशयंमह्यंकृपयाकथय
स्वतम् ॥ १ ॥ रघुनाथस्यगमनंवनंप्रतियदाह्यभूत् ॥ तदाप्रभृतिदेहेनस्थिताशून्येनचेतसा ॥ २ ॥ तद्विप्रयोगविधुराकृशदेहातिदुःखिता ॥ सुमुखा[3]
न्मन्त्रिणःश्रुत्वारघुनाथंसमागतम् ॥ ३ ॥ कथंजहर्षकिमभूत्कीदृशंतत्रचिह्नितम् ॥ रामचन्द्रस्यसन्देशहर्तारंकिमुवाचसा ॥ ४ ॥ एतंमेसंशयं
छिन्धिरघुनाथगुणोदयम् ॥ यथावच्छृण्वतेमह्यंकथयस्वप्रसादतः ॥ ५ ॥ शेषउवाच ॥ साधुपृष्टंमहाभागद्विजवर्यपुरस्कृत ॥ तन्मेनिगदतःसाक्षा
च्छृणुष्वैकमनाःकिल ॥ ६ ॥ सावैतद्वदनाम्भोजच्युतंरामागमामृतम् ॥ पीत्वापीत्वाबभूवाहोस्थगिताङ्गेनविह्वला ॥ ७ ॥ किंमेस्वप्नोविमूढायाः
किंवाभ्रमकरंवचः ॥ ममवैमन्दभाग्यायाःकथंरामेक्षणंपुनः ॥ ८ ॥ बहुनातपसाकृत्वाप्राप्तोऽयंवैसुतःशिशुः ॥ केनचिन्ममपापेनविप्रयोगंगतःपुनः
॥ ९ ॥ सुमन्त्रिन्कुशलीरामःसीतालक्ष्मणसंयुतः ॥ कथंमांस्मरतेवीरोवनचारीसुदुःखिताम् ॥ १० ॥ इतिसाविललापोच्चैरघुनाथस्मृतिंगता ॥
नविवेदनिजंकिञ्चित्परकीयंविमोहिता ॥ ११ ॥ सुमुखोऽपितथादृष्ट्वादुःखितांमातरंभृशम् ॥ वीजयामासवासोग्रःसंज्ञामापचसापुनः ॥ १२ ॥
उवाचजननींसौम्यंवचोहर्षकरंमुहुः ॥ रघुनाथागमस्मारहृष्टांतांव्यदधात्पुनः ॥ १३ ॥ मातर्विद्धिगृहंप्राप्तंरघुनाथंसलक्ष्मणम् ॥ सीतयासहितंपश्य
चाशीर्भिरभियुङ्क्ष्वच ॥ १४ ॥ इतितथ्यंवचःश्रुत्वासुमुखेनप्रभाषितम् ॥ यादृशंहर्षमापेदेतादृशंवेद्म्यहंनहि ॥ १५ ॥ उत्थायचाजिरेप्राप्तारोमा
ञ्चिततनूरुहा ॥ हर्षविह्वलिताङ्गयश्रुमुञ्चन्तीराममैक्षत ॥ १६ ॥ तावत्सरामोराजेन्द्रोनरयानमधिश्रितः ॥ प्राप्तःस्वमातुर्भवनंकैकेय्याःसुनयाःपुरः

---

१ 'गवाक्षवलभीश्रिताः' इ० पा० । २ 'प्रसाद्य' इ० पा० । ३ सुमुखनाम्नो मन्त्रिणः सकाशात् इत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १७ ॥ कैकेय्यपित्रपाभारनम्रारामंपुरःस्थितम् ॥ नोवाचकिंचिन्महतींचिन्तांप्राप्तवतीमुहुः ॥ १८ ॥ सूर्यवंशध्वजोरामोमातरंवीक्ष्यलज्जिताम् ॥ उवाचसान्त्वयंस्तांचवाक्यैर्विनयमिश्रितैः ॥ १९ ॥ मातर्मयावनंगत्वासर्वमाचरितंतथा ॥ अधुनाकरवैकिंवात्वदाज्ञातोजनन्यहो ॥ २० ॥ मया न्यूनंकृतंनास्तिकथंमांनेक्षसेपुनः ॥ आशीर्भिरभिनन्द्यैनंभरतंमांचवीक्षय ॥२१ ॥ इतिश्रुत्वापितद्वाक्यंसानम्रवदनानघ ॥ शनैःशनैःप्रत्युवाचराम गच्छस्वमालयम् ॥ २२ ॥ रामोऽपिश्रुत्वावचनंजनन्याःपुरुषोत्तमः ॥ नमस्कृत्ययययौगेहंसुमित्रायाःकृपानिधिः ॥ २३ ॥ सुमित्रापुत्रसहितंरामं दृष्ट्वामहामनाः ॥ चिरंजीवचिरंजीवह्याशीर्भिरितिचाभ्यधात् ॥ २४ ॥ मातुश्चरामभद्रोऽपिचरणौप्रणिपत्यच ॥ परिष्वज्यमुदायुक्तोजगादवचनं पुनः ॥ २५ ॥ रत्नगर्भेममभ्रात्राकेनापिनकृतंतथा ॥ यथायमकरोद्धीमान्ममदुःखापनोदनम् ॥ २६ ॥ रावणेनहृतासीतामयायत्प्राप्यतेपुनः ॥ मातस्तत्सर्वमाविद्धिलक्ष्मणस्यविचेष्टितम् ॥ २७ ॥ दत्तामाशिषमागृह्यशिरसायंसुमित्रया ॥ निजमातुश्चभवनंप्रययौविबुधैर्वृतः ॥ २८ ॥ मातरं वीक्ष्यहृषितांनिजदर्शनलालसाम् ॥ स्वयानादवरुह्याशुचरणावग्रहीद्धरिः ॥ २९ ॥ मातातद्दर्शनोत्कण्ठाविह्वलीकृतमानसा ॥ परिष्वज्यपरिष्व ज्यरामंमुदमवापसा ॥ ३० ॥ शरीरेरोमहर्षोऽभूद्गद्गदावागभूत्तदा ॥ हर्षाश्रूणितुसोष्णानिप्रवाहंप्रापुरापदात् ॥ ३१ ॥ जननींवीक्ष्यविनयीताटङ्कद्व यवर्जिताम् ॥ कराकल्पपदाकल्परहितांबिभ्रतींतनुम् ॥ ३२ ॥ किञ्चित्स्वदर्शनाद्धृष्टांकुशाङ्गींतांसशोकभाक् ॥ दुःखस्यसमयोनायमितिमत्वाजगा दताम् ॥ ३३ ॥ श्रीरामउवाच ॥ मातर्मयात्वच्चरणौचिरकालंनसेवितौ ॥ ततःक्षमस्वापराधंभाग्यहीनस्यवैमम ॥ ३४ ॥ येपुत्रामातापित्रोर्न शुश्रूषायांसमुत्सुकाः ॥ तेमन्तव्याःपरामातःकीटकारेतसोभवाः ॥ ३५ ॥ किंकुर्वेजनकाज्ञातोगतोवैदण्डकंवनम् ॥ तत्रापित्वत्कृपापाङ्गा त्तीर्णोऽस्मिदुःखसागरम् ॥ ३६ ॥ रावणनहृतासीतालङ्कायांगमितापुनः ॥ त्वत्कृपातोमयालब्धातंहत्वाराक्षसेश्वरम् ॥ ३७ ॥ सीतेयंत्वच्च रणयोःपतितावैपतिव्रता ॥ सम्भावयाशुचकितांत्वत्पादार्पितमानसाम् ॥ ३८ ॥ इतिश्रुत्वातुतद्वाक्यंपादयोःपतितांस्नुषाम् ॥ आशीर्भिरभि युज्यैनांबभाषेतांपतिव्रताम् ॥ ३९ ॥ सीतेस्वपतिनासार्द्धंचिरंविलसभामिनि ॥ पुत्रौप्रसूयचकुलंस्वकंपावयपावने ॥ ४० ॥ त्वत्सदृश्यःपति पराःपतिदुःखसुखानुगाः ॥भवन्तिदुःखभागिन्योनहिसत्यंजगत्त्रये ॥४१॥ विदेहपुत्रिस्वकुलंत्वयापावितमात्मना ॥ रामपादाब्जयुगलमनुयान्त्या महावने ॥ ४२ ॥ किंचित्रंयत्पुमांसस्तुवैरिकोटिप्रभञ्जनाः ॥ येषांगेहेसतीभार्यास्वपतिप्रियवाञ्छिका ॥४३॥ इत्युक्त्वारघुनाथस्यभार्यामञ्चितलो

१ 'पराम्' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चनाम् ॥ तूष्णींबभूवहृषिताग्रंहृष्टस्वतनूरुहा ॥ ४४ ॥ अथभ्रातास्यभरतःपित्रादत्तंनिजंमहत् ॥ राज्यंनिवेदयामासरामचन्द्रायधीमते ॥ ४५ ॥
मन्त्रिणस्तेप्रहृष्टाङ्गाःदैवज्ञान्मन्त्रकोविदान् ॥ आंहूयसुमुहूर्तंतेपप्रच्छुःपरमादरात्॥ ४६ ॥शुभेमुहूर्तेसुदिनेशुभनक्षत्रसंयुते ॥ अभिषेकंमहाराज्येकार
यामासुरुद्यताः ॥ ४७ ॥ सप्तद्वीपवतींपृथ्वींव्याघ्रचर्मणिसुन्दरे ॥ लिखित्वोपरिराजेन्द्रोमहाराजोऽधितस्थिवान् ॥ ४८ ॥तद्दिनादेवसाधूनांमनांसि
प्रमुदंययुः ॥ दुष्टानांचेतसोग्लानिरभवत्परतापिनाम् ॥४९॥ स्त्रियस्तुपतिभक्त्याचपतिव्रतपरायणाः ॥ मनसापिकदापापंनाचरन्तिजनामुने॥५०॥
दैत्यादेवास्तथानागायक्षासुरमहोरगाः ॥ सर्वेन्यायपथेस्थित्वारामाज्ञांशिरसादधुः ॥ ५१ ॥ परोपकरणेयुक्ताःस्वधर्मसुखनिर्वृताः ॥ विद्याविनोद
गमितादिनरात्रिक्षणाःशुभाः ॥ ५२ ॥ वातोऽपिमार्गसंस्थानांबलान्नाहरतेमहान् ॥ वासांस्यपितुसूक्ष्माणितत्रचौरकथानहि ॥ ५३ ॥ धनदोद्य
र्थिनांरामःकारुण्यश्चकृपानिधिः॥भ्रातृभिःसहितोनित्यंगुरुदेवस्तुतिंव्यधात् ॥५४॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशेषवा॰रामाश्व॰रघुवरस्यरा
ज्याभिषेकोनामचतुर्थोऽध्यायः ॥ ४ ॥ शेषउवाच ॥ अथाभिषिक्तंरामंतुतुष्टुवुःप्रणताःसुराः ॥ रावणाभिधदैत्येन्द्रवधहर्षितमानसाः ॥ १ ॥ देवा
ऊचुः ॥ जयदाशरथेसुरार्तिहञ्जयजयदानववंशदाहक ॥ जयदेववराङ्गनागणग्रहणव्यग्रकरारिदारक ॥ २ ॥ तवयद्दनुजेन्द्रनाशनंकवयोवर्णयितुंस
मुत्सुकाः ॥ प्रलयेजगतांततीःपुनर्ग्रससेत्वंभुवनेशलीलया ॥ ३ ॥ जयजन्मजरादिदुःखकैःपरिमुक्तप्रबलोद्धरोद्धर ॥ जयधर्मकरान्वयाम्बुधौकृत
जन्मन्नजरामराच्युत ॥ ४ ॥ तवदेववरस्यनामभिर्बहुपापाअपितेपवित्रिताः ॥ किमुसाधुद्विजवर्यपूर्वकाःसुतनुंमानुषतामुपागताः ॥ ५ ॥ हरविरि
ञ्चिनुतंतवपादयोर्युगलमीप्सितकामसमृद्धिदम् ॥ हृदिपवित्रयवादिकचिह्नितैःसुरचितंमनसास्पृहयामहे ॥ ६ ॥ यदिभवान्नदधात्यभयंभुवोमदन
मूर्तितिरस्करकान्तिभृत् ॥ सुरगणाहिकथंसुखिनःपुनर्ननुभवन्तिघृणामयपावन ॥ ७ ॥ यदायदानोदनुजाहिदुःखदास्तदातदात्वंभुविजन्मभाग्भ
वेः ॥ अजोऽव्ययोऽपीशवरोऽपिसन्विभोस्वभावमास्थायनिजंनिजार्चितः ॥ ८ ॥ मृतसुधासदृशैरघनाशनैःसुचरितैरवकीर्यमहीतलम् ॥ अम
नुजैर्गुणशंसिभिरीडितःप्रविशचाशुपुनर्हिस्वकंपदम् ॥९॥ अनादिराद्योऽजरूपधारीहारीकिरीटीमकरध्वजाभः ॥ जयंकरोतुप्रसभंहतारिःस्मरारिसंसे
वितपादपद्मः ॥ १० ॥ इत्युक्त्वातेसुराःसर्वेब्रह्मेन्द्रप्रमुखामुहुः ॥ प्रणेमुररिनाशनप्रीणितारघुनायकम् ॥ ११ ॥ इतिस्तुत्यातिसंहृष्टोरघुनाथोम
हायशाः ॥ प्रोवाचतान्सुरान्वीक्ष्यप्रणतान्नतकन्धरान् ॥१२॥ श्रीरामउवाच ॥ सुरावृणुतमेयूयंवरंकिञ्चित्सुदुर्लभम् ॥ यंकोऽपिदेवोदनुजोनयक्षःप्राप

१ 'समुद्गततनूरुहा' इ॰ पा॰। २ 'आहूय मुहूर्तं पप्रच्छुः पदस्य परमेष्ठिनः' इ॰ पा॰। ३ 'बहुपापाश्च गताः पवित्रताम्' इ॰ पा॰।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सादरः ॥१३॥ सुराऊचुः ॥ स्वामिन्भगवतःसर्वंप्राप्तमस्माभिरुत्तमम् ॥ यदयंनिहतःशत्रुरस्माकंतुदशाननः ॥१४॥ यदायदाऽसुरोऽस्माकंबाधांपरि
दधातिभोः ॥ तदातदेतिकर्तव्यमेतावद्वैरिनाशनम् ॥१५॥ तथेत्युक्त्वापुनर्वीरःप्रोवाचरघुनन्दनः ॥१६॥ श्रीरामउवाच॥सुराःशृणुतमद्वाक्यमादरेण
समन्विताः ॥ भवत्कृतंमदीयैर्वैगुणैर्ग्रथितमद्भुतम् ॥ १७ ॥ स्तोत्रंपठिष्यतिमुहुःप्रातर्निशिसकृन्नरः ॥ तस्यवैरिपराभूतिर्नभविष्यतिदारुणा
॥ १८ ॥ नचदारिद्र्यसंयोगोनचव्याधिपराभवौ ॥ मदीयचरणद्वन्द्वेभक्तिस्तेषांतुभूयसी ॥ १९ ॥ भविष्यतिमुदायुक्तेस्वान्तेपुंसांतुपाठतः॥
इत्युक्त्वासोऽभवत्तूष्णींनरदेवशिरोमणिः ॥ २० ॥ सुराःसर्वेप्रहृष्टास्तेययुर्लोकंस्वकंस्वकम् ॥ रघुनाथोऽपिभ्रातृंस्तान्पालयंस्तातवद्बुधान् ॥ २१ ॥
प्रजाःपुत्रानिवस्वीयाँल्लालयँल्लोकनायकः ॥ यस्मिञ्छासतिलोकानांनाकालमरणंनृणाम् ॥२२॥ नरोगादिपराभूतिर्गृहेषुचमहीयसी ॥ नेंतिः[1]कदापि
दृश्येतवैरिजंभयमेवच ॥ २३ ॥ वृक्षाःसदैवफलिनोमहीभूयिष्ठधान्यका ॥ पुत्रपौत्रपरीवारसनाथीकृतजीवनाः ॥ २४ ॥ कान्तासंयोगजसुखै
र्निरस्तविरहक्लमाः॥ नित्यंश्रीरघुनाथस्यपादपद्मकथोत्सुकाः ॥२५॥ कदापिपरनिन्दासुवाचस्तेषांभवन्तिन॥कारवो[2]ऽपिकदापापंनाचरन्तिमनस्यहो
॥ २६ ॥ रघुनाथकराघातदुःखशङ्काभिशंसिनः ॥ सीतापतिमुखालोकनिश्चलीभूतलोचनाः ॥२७॥ लोकाबभूवुःसततंकारुण्यपरिपूरिताः ॥ राज्यं
प्राप्तमसापत्नंसमृद्धबलवाहनम् ॥ २८ ॥ ऋषिभिर्हृष्टपुष्टैश्चरम्यंहाटकभूषणैः ॥ सम्पुष्टमिष्टापूर्तानांधर्माणांनित्यकर्तृभिः ॥ २९ ॥ सदासम्पन्नसस्यं
चसुवसुक्षेत्रसंयुतम् ॥ सुदेशंसुप्रजःस्वस्थंसुतृणंबहुगोधनम् ॥३०॥ देवतायतनानांचराजिभिःपरिराजितम् ॥ सुपूर्णायत्रवैग्रामाःसुवित्तर्द्धिविराजिताः
॥३१॥ सुपुष्पकृत्रिमोद्यानाःसुस्वादुफलपादपाः ॥सपद्मिनीककासारायत्रराजन्तिभूमयः ॥३२॥ सदम्भानिम्नगायत्रनयत्रजनता[3]क्वचित् ॥ कुलान्ये
वकुलीनानिवर्णानांनधनानिच ॥ ३३ ॥ विभ्रमोयत्रनारीषुनविद्वत्सुचकर्हिचित् ॥ नद्यःकुटिलगामिन्योनयत्रविषयेप्रजाः ॥ ३४ ॥ तमोयुक्ताःक्षपा
यत्रबहुले[4]षुनमानवाः ॥ रजोयुजःस्त्रियोयत्रनाधर्मबहुलानराः ॥ ३५ ॥ धनैरनन्धो[5]यत्रास्तिजनोनैवचभोजने ॥ अनयःस्यन्दनोयत्रनचवैराजपूरुषः
॥ ३६ ॥ दण्डःपरशुकुद्दालवालव्यजनराजिषु ॥ आतपत्रेषुनान्यत्रक्वचित्क्रोधोपरोधजः ॥ ३७ ॥ अन्यत्राक्षिकवृन्देभ्यःक्वचिन्नपरिदेवनम् ॥ आ
क्षिकाएवदृश्यन्तेयत्रपाशकपाणयः ॥ ३८ ॥ जाड्यवार्ताजलेष्वेवस्त्रीमध्या[6]एवदुर्बलाः ॥ कठोरहृदयायत्रसीमन्तिन्योनमानवाः ॥३९॥ औषधेष्वे

१ ईतिः शलभमूषककीटकादिजं भयमित्यर्थः । २ शिल्पिन इत्यर्थः । ३ यत्र जनता जनसमूहः सदम्भा दम्भसहिता न किंतु निम्नगा नदी सदम्भा निर्मलजलवतीत्यर्थः । ४ कृष्णपक्षेष्वित्यर्थः । ५ अनन्धः आंध्यरहितः ओदनरहितश्च । ६ स्त्रीणां कटिभागाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वयत्रास्तिकुष्ठयोगोनमानवे ॥ वेधोयत्रसुरत्नेषुशूलंमूर्तिकरेषुवै॥४०॥कम्पःसात्त्विकभावोत्थोनभयात्कापिकस्यचित्॥ सञ्ज्वरःकामजोयत्रदारिद्र्यं कलुषस्यच ॥४१ ॥ दुर्लभत्वंसदैवस्यसुकृतेनचवस्तुनः ॥ इभाएवप्रमत्तावैयुद्धेवीच्योजलाशये ॥४२ ॥ दानहानिर्गजेष्वेवतीक्ष्णाएवहिकण्टकाः॥ ॥ बाणेषुगुणविश्लेषोबन्धोक्तिःपुस्तकेदृढा ॥४३ ॥ स्नेहत्यागःखलेष्वेवनचवैस्वजनेजने ॥ तंदेशंपालयामासलालयल्लाँलिताःप्रजाः ॥४४॥ धर्मसंस्थापयन्देशेदुष्टेदण्डधरोपमः ॥ एवंपालयतोदेशंधर्मेणधरणीतलम् ॥४५ ॥ सहस्रंचव्यतीयुर्वैवर्षाण्येकादशप्रभोः ॥ तत्रनीचजनाच्छ्रुत्वासीतायाअपमाननम् ॥ ४६ ॥ स्वांचनिन्दांरजकतस्तांतत्याजरघूद्वहः ॥ पृथ्वींपालयमानस्यधर्मेणनृपतेस्तदा ॥४७॥ सीताविरहितामेकांनिदेशेनसुरक्षिताम् ॥ कदाचित्संसदोमध्येह्यासीनस्यमहामतेः ॥४८॥ आजगाममुनिश्रेष्ठःकुम्भोत्पत्तिर्मुनिर्महान् ॥ गृहीत्वार्घ्यंसमुत्तस्थौवसिष्ठेनसमन्वितः ॥४९ ॥ जनताभिर्महाराजोवार्धिशोषकमागतम् ॥ स्वागतेनसुसम्भाव्यपप्रच्छतमनामयम् ॥ सुखोपविष्टंविश्रान्तंबभाषेरघुनन्दनः ॥ ५० ॥ इतिश्रीपाद्मे महापुराणेपातालखण्डेशेषवात्स्यायनसंवादेरामाश्वमेधेऽगस्त्यसमागमोनामपञ्चमोऽध्यायः ॥५॥ शेषउवाच ॥इत्थंस्वागतसन्तुष्टंब्रह्मचर्यतपोनिधिम् ॥ उवाचमतिमान्वीरःसर्वलोकगुरुर्मुनिम् ॥ १ ॥ श्रीरामउवाच ॥ स्वागतंतेमहाभागकुण्डयोनेतपोनिधे ॥ त्वद्दर्शनेनसर्वेवैपाविताःसकुटुम्बकाः ॥ २ ॥ कच्चिन्मतिस्तेवेदेषुशास्त्रेषुपरिवर्तते ॥ त्वत्तपोविघ्नकर्तावैनास्तिभूमण्डलेक्वचित् ॥ ३ ॥ लोपामुद्रामहाभागयाचतेधर्मचारिणी ॥ यस्याःपतिव्रताधर्मात्सर्वंभवतिशोभनम् ॥ ४ ॥ अपिशंसमहाभागधर्ममूर्तेकृपानिधे ॥ अलोलुपस्यकिंकार्यंकरवाणिमुनीश्वर ॥ ५ ॥ त्वत्तपोयोगतःसर्वंभवतिस्वेच्छयाबहु ॥ तथापिमयिकृत्वैवकृपांशंसमुनीश्वर ॥ ६ ॥ शेषउवाच ॥ इत्युक्तोलोकगुरुणाराजराजेनधीमता ॥ उवाचरामंलोकेशंविनीततरभाषया[1] ॥ ७ ॥ अगस्त्यउवाच ॥ स्वामिंस्तवसुदुर्दर्शंदर्शनंदैवतैरपि ॥ मत्वासमागतंविद्धिराजराजकृपानिधे ॥ ८ ॥ हतस्त्वयारावणाख्यस्त्वसुरोलोककण्टकः ॥ दिष्ट्याऽद्यदेवाःसुखिनोदिष्ट्याराजाविभीषणः ॥ ९ ॥ रामत्वद्दर्शनान्मेऽद्यगतंवैदुष्कृतंकिल[2] ॥ सम्पूर्णोमेमनःकोशआनन्देनसुरोत्तम ॥ १०॥ इत्युक्त्वासबभूवाशुतूष्णींकुम्भसमुद्भवः ॥ रामसन्दर्शनाह्लादविह्वलीकृतमानसः ॥ ११ ॥ रामःपप्रच्छतंभूयोमुनिंज्ञानविशारदम् ॥ लोकातीतंभवद्भाविसवज्ञानासिसर्वतः[3] ॥ १२ ॥ ॥ मुनेकथयमेसर्वंपृच्छतोहिसुविस्तरम् ॥ कोऽसौमयाहतोयोहिरावणोविबुधार्दनः ॥ १३ ॥ कुम्भकर्णोऽपिकस्त्वेपकाजातिर्वैदुरात्मनः ॥ देवोदैत्यःपिशाचोवाराक्षसोवामहामुने[4] ॥ १४ ॥ सर्वमाख्याहिसर्वज्ञसर्वंजा

१ 'विनीतनरभाषया' इ० पा० । २ 'हतं सर्व सुदुष्कृतम्' इ० पा० । ३ 'सर्वज्ञातारमिङ्गितम्' इ० पा० । ४ 'मानवो वा' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नासिविस्तरात् ॥ अतःकथयमेसर्वंकृपांकृत्वाममोपरि ॥ १५ ॥ इतिश्रुत्वाततोवाक्यंकुम्भजन्मातपोनिधिः ॥ यत्पृष्टंरघुराजेनप्रवक्तुंतत्प्र
चक्रमे ॥ १६ ॥ राजन्सृष्टिकरोब्रह्मापुलस्त्यस्तत्सुतोऽभवत् ॥ ततस्तुविश्रवाजज्ञेवेदविद्याविशारदः ॥ १७ ॥ तस्यपत्नीद्वयंजातंपातिव्रत्यचरि
त्रभृत् ॥ एकामन्दाकिनीनाम्नीद्वितीयाकैकसीस्मृता ॥ १८ ॥ पूर्वस्यांधनदोजज्ञेलोकपालविलासभृत् ॥ योऽसौशिवप्रसादेनलङ्कावासमचीकरत्
॥ १९ ॥ विद्युन्मालिसुतायांतुपुत्रत्रयमभून्महत् ॥ रावणःकुम्भकर्णश्चतथापुण्योविभीषणः ॥ २० ॥ राक्षस्युदरजन्मत्वात्सन्ध्यासमयसम्भ
वात ॥ द्वयोरधर्मनिपुणामतिरासीन्महामते ॥ २१ ॥ एकदातुविमानेनपुष्पकेणसुशोभिना ॥ काञ्चनीयोपकल्पेनकिङ्किणीजालमालिना ॥२२॥
आरुह्यपितरौद्रष्टुंप्रायाच्छोभासमन्वितः ॥ स्वगणैःसंस्तुतोभूत्वानानारत्नविभूषणैः ॥ २३ ॥ आगत्यपित्रोश्चरणेपतित्वाचिरमात्मजः ॥ हर्षवि
ह्वलितात्माचरोमाञ्चिततनूरुहः ॥ २४ ॥ उवाचमेऽद्यसुदिनंमहाभाग्यफलोदयः ॥ यन्मेयुष्मत्पदौदृष्टौमहापुण्यददर्शनौ ॥ २५ ॥ इत्यादिभिः
स्तुतिपदैःस्तुत्वाऽगान्मन्दिरंस्वकम् ॥ पितरावपिसंहृष्टौपुत्रस्नेहाद्बभूवतुः ॥ २६ ॥ तंदृष्ट्वारावणोधीमाञ्जगादनिजमातरम् ॥ कोऽयंपुमान्सुरोवा
थयक्षोवाथनरोत्तमः ॥ २७ ॥ योऽसौममपितुःपादौसंनिषेव्यगतःपुनः ॥ महाभाग्यनिधिःस्वीयैर्गणैःसुपरिवारितः ॥ २८ ॥ केनेदंतपसालब्धंवि
मानंवायुवेगधृत्॥उद्यानाराममलीलादिविलासस्थानमुत्तमम् ॥२९॥ शेषउवाच ॥इतिवाक्यंसमाकर्ण्यजननीरोषविक्लवा ॥ उवाचपुत्रंविमनाःकिञ्चिन्ने
त्रविकारिणी ॥३०॥ रेपुत्रशृणुमद्वाक्यंबहुशिक्षासमन्वितम् ॥ एतस्यजन्मकर्मादिविचारचतुराधिकम्॥३१॥ सपत्न्याममकुक्षिस्थंविधानंसमुपस्थि
तम् ॥ येनस्वमातुर्विमलंकुलमुज्ज्वलितंमहत् ॥ ३२ ॥ त्वंतुमत्कुक्षिजःकीटःपापःस्वोदरपूरकः ॥ यथाखरःस्वकंभारंजानातिनचतद्गुणम् ॥ ३३ ॥
तथात्वंलक्ष्यसेज्ञानीशयनासनभोगवान् ॥ सुप्तोगतःक्वचिद्भ्रष्टइत्येवतवसम्भवः ॥ ३४ ॥ अनेनतपसालब्धंशिवसन्तोषकारिणा ॥ लङ्कावासोमनो
वेगंविमानंराज्यसम्पदः ॥ ३५ ॥ सुधन्याजननीत्वस्यसुभाग्यासुमहोदया ॥ यस्याःपुत्रोनिजगुणैर्लब्धवान्महतांपदम् ॥ ३६ ॥ इतिक्रुधाभाषि
तमार्तयातयामात्रास्वयाऽऽकर्ण्यदुरात्मसत्तमः ॥ रोषंविधायात्मगतंपुनर्वचोजगादतांनिश्चयभृत्तपःप्रति ॥ ३७ ॥ रावणउवाच ॥ जनन्याकर्ण
यवचोममगर्वसमन्वितम् ॥ रत्नगर्भात्वमेवासियस्याःपुत्रास्त्रयोवयम् ॥ ३८ ॥ कोऽसौकीटःसधनदःक्वतपःस्वल्पकंपुनः ॥ कालङ्काकिंतुतद्रा
ज्यंस्वल्पसेवकसंयुतम् ॥ ३९ ॥ मातःशृणुममोत्साहात्प्रतिज्ञांकरुणान्विते ॥ नकेनापिकृतांकर्त्रामहाभाग्येहिकैकसि ॥ ४० ॥ यद्यहंभुवनंसर्वं

१ 'तथा कुरु मदादेशम्' इ० पा०। २ 'कारणान्विताम्' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वशेनस्थापयामिवै ॥ तपोभिर्दुष्कृतैःकृत्वाब्रह्मसन्तोषकारकः ॥ ४१ ॥ अन्नोदकेसदात्यक्त्वानिद्रांक्रीडांतथापुनः ॥ चेत्तदापितृलोकस्यघा
तात्पापंभवेन्मम ॥ ४२ ॥ कुम्भकर्णोऽपिकृतवान्विभीषणसमन्वितः ॥ रावणेनसहभ्रात्रेत्युक्त्वाऽगाद्गिरिकाननम् ॥ ४३ ॥ इतिश्रीपाद्मेमहापुराणे
पातालखण्डेशेषवा०रामा०रावणोत्पत्तिर्नामषष्ठोऽध्यायाः ॥ ६ ॥ अगस्त्यउवाच ॥ अथोग्रंसतपोदैत्योदशवर्षसहस्रकम् ॥ चकारभानुम
क्ष्णाचर्पश्यन्[1]नूर्ध्वपदेस्थितः ॥ १ ॥ कुम्भकर्णोऽपिकृतवांस्तपःपरमदुश्चरम् ॥ विभीषणस्तुधर्मात्माचचारपरमंतपः ॥ २ ॥ तदाप्रसन्नोभगवान्देव
देवःप्रजापतिः ॥ देवदानवयक्षादिमुकुटैःपरिसेवितः ॥ ३ ॥ ददौराज्यंचसुमहद्भुवनत्रयभास्वरम् ॥ वपुश्चकृतवान्रम्यंदेवदानवसेवितम् ॥ ४ ॥ त
दासन्तापितोभ्राताधनदोधर्मबुद्धिमान् ॥ विमानंतुततोनीतंलङ्काचनगरीहठात् ॥ ५ ॥ भुवनंतापितंसर्वंदेवाश्चैवदिवोगताः ॥ हतवान्ब्राह्मणकुलं
मुनीनांमूलकृन्तनः ॥ ६ ॥ तदातिदुःखितादेवाःसेन्द्राब्रह्माणमाययुः ॥ स्तुतिंचक्रुर्महात्मानोदण्डवत्प्रणतिंगताः ॥ ७ ॥ तेतुष्टुवुःसुराःसर्वेवाग्भिर[2]
थ्याभिरादृताः ॥ ततःप्रसन्नोभगवान्किंकरोमीतिचाब्रवीत् ॥८॥ ततोनिवदेयाञ्चक्रुर्ब्रह्मणेविबुधाःपुरः[3] ॥ दशग्रीवाच्चसङ्कष्टंतथानिजपराभवम् ॥९॥
क्षणंध्यात्वाययौब्रह्माकैलासंत्रिदशैःसह ॥तस्यशैलस्यपार्श्वेतुवैचित्र्येणसमाकुलाः ॥१०॥स्थिताःसन्तुष्टुवुर्देवाःशम्भुशक्रपुरोगमाः ॥नमोभवायशर्वा
यनीलग्रीवायतेनमः ॥११ ॥नमःस्थूलायसूक्ष्मायबहुरूपायतेनमः ॥ इतिसर्वमुखेनोक्तांवाणीमाकर्ण्यशङ्करः ॥१२॥ प्रोवाचनन्दिनंदेवानानयेतिम
मान्तिकम् ॥ एतस्मिन्नन्तरेदेवाआहूतानन्दिनाचते ॥१३॥ प्रविश्यान्तःपुरेदेवाददृशुर्विस्मितेक्षणाः ॥ ब्रह्मागत्यददर्शाथशङ्करंलोकशङ्करम् ॥१४॥
गणकोटिसहस्रैस्तुसेवितंमोदशालिभिः ॥ नग्नैर्विरूपैःकुटिलैर्धूसरैर्विकटैस्तथा ॥ १५ ॥ प्रणिपत्याग्रतःस्थित्वासहदेवैःपितामहः ॥ उवाचदेवदेवे
शंपश्यावस्थांदिवौकसाम् ॥ १६ ॥ कृपांकुरुमहादेवशरणागतवत्सल ॥ दुष्टदैत्यवधार्थंत्वंसमुद्योगंविधेहिभोः ॥ १७ ॥ सोऽपितद्वचनंश्रुत्वा
दैन्यशोकसमन्वितम् ॥ त्रिदशैःसहितःसर्वैराजगामहरेःपदम् ॥ १८ ॥ तुष्टुवुर्मुनयःसर्वेससुरोरगकिन्नराः ॥ जयमाधवदेवेशजयभक्तजनार्तिहन्
॥ १९ ॥ विलोकयमहादेवलोकयस्वस्वसेवकान् ॥ इत्युच्चैर्जगदुःसर्वेदेवाःशर्वपुरोगमाः ॥ २० ॥ इत्युक्तमाकर्ण्यसुराधिनाथोदृष्ट्वासुरार्तिंपरिचि
न्त्यविष्णुः ॥ जगाददेवाञ्जलदोच्चयागिरादुःखंतुतेषांप्रशमंनयन्निव ॥ २१ ॥ भोब्रह्मशर्वेन्द्रपुरोगमामराःशृण्वन्तुवाचंभवतांहितेरताम् ॥ जानेद
शग्रीवकृतंभयंवस्तन्नाशयाम्यद्यकृतावतारः ॥ २२ ॥ पुरीत्वयोध्यारविवंशजातैर्नृपैर्महादानमखादिसत्क्रियैः ॥ प्रपालिता[4]भूतलमण्डनीयाविराजते

१'पश्यन्नूर्ध्वपदे स्थितः' इ० पा० । २'वाग्भिस्तथ्याभिः' इति पा० । ३'पुरा' इ० पा० । ४'प्रपालिता भूतलमण्डलालया विराजते राजितभूमिभागैः' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राजतभूमिभागैः ॥ २३ ॥ तस्यांदशरथोराजानिरपत्यःश्रियान्वितः ॥ पालयत्यधुनाराज्यंदिक्चक्रजयवान्विभुः ॥ २४ ॥ सतुवन्ध्याद्दष्यशृङ्गा
त्प्रार्थितात्पुत्रकाम्यया ॥ पुत्रेष्ट्यांविधिनायज्वामहाबलसमन्वितः ॥ २५ ॥ ततोऽहंप्रार्थितःपूर्वंतपसातेनभोःसुराः ॥ पत्नीषुतिसृषुप्रीत्याचतुर्धापि
भवत्कृते ॥ २६ ॥ रामलक्ष्मणशत्रुघ्नभरताख्यासमन्वितः ॥ कर्तास्मिरावणोद्धारंसमूलबलवाहनम् ॥ २७ ॥ भवन्तोऽपिस्वकैरंशैरवतीर्यचरन्त्वि
ह ॥ ऋक्षवानररूपेणसर्वत्रपृथिवीतले ॥ २८ ॥ इत्युक्त्वाविररामाशुनभसीरितवाङ्मुने ॥ देवाःश्रुत्वामहद्वाक्यंसर्वेसंहृष्टमानसाः ॥ २९ ॥ तेचक्रु
र्गदितंयादृग्देवदेवेनधीमता ॥ स्वैःस्वैरंशैर्महीपूर्णाऋक्षवानररूपिभिः ॥ ३० ॥ योऽसौविष्णुर्महादेवोदेवानांदुःखनाशकः ॥ सत्वमेवमहाराजभग
वान्कृतविग्रहः ॥३१॥ भरतोऽयंलक्ष्मणश्चशत्रुघ्नश्चमहामते ॥ तावकांशाद्दशग्रीवोजनितश्चसुरार्दनः ॥ ३२ ॥ पूर्ववैरानुबन्धेनजानकींहृतवान्पुनः ॥
सत्वयानिहतोदैत्योब्रह्मराक्षसजातिमान् ॥ ३३ ॥ पुलस्त्यपुत्रोदैत्येन्द्रःसर्वलोकैककण्टकः ॥ पातितःपृथिवीसर्वासुखमापमहेश्वर ॥ ३४ ॥ ब्राह्मणा
नांसुखंत्वद्यमुनीनांतापसंबलम् ॥ शिवानिसर्वतीर्थानिसर्वेयज्ञाःसुसंहिताः ॥ ३५ ॥ त्वयिराज्ञिजगत्सर्वंसदेवासुरमानुषम् ॥ सुखंप्रपेदेविश्वात्मञ्च
गद्योनेनरोत्तम ॥३६॥ एतत्तेसर्वमाख्यातंयत्पृष्टोऽहंत्वयानघ ॥ उत्पत्तिश्चविपत्तिश्चमयामत्यनुसारतः ॥ ३७ ॥ इत्थंनिशम्यदिति[1]जेन्द्रकुलानुकारि
वार्तांमहापुरुषईश्वरईशिताच ॥ संरुद्धबाष्पगलदश्रुमुखारविन्दोभूमौपपातसदसिप्रथितप्रभावः ॥३८॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशेषवा०
रामाश्व०रावणोत्पत्तिविपत्तिकथनंनामसप्तमोऽध्यायः ॥ ७ ॥ शेषउवाच ॥ वात्स्यायनमुनिश्रेष्ठकथापापप्रणाशिनी ॥ ब्रह्मण्यदेवदेवस्यसर्वध
मैंकरक्षितुः ॥१॥ राजानंमूर्च्छितंदृष्ट्वाकुम्भजन्मातपोनिधिः ॥ शनैःशनैःकरेणाशुपस्पर्शाशुजगादच ॥२॥ भोरामाश्वसिहिक्षिप्रंकिमर्थमवसीदसि ॥
भवान्दैत्यकुलच्छेत्तामहाविष्णुःसनातनः ॥ ३ ॥ भूतंभव्यंभवच्चैवजगत्स्थाणुचरिष्णुच ॥ त्वदृतेनास्तिसश्चारीकिमर्थमिहमूर्च्छितः ॥ ४ ॥ श्रु
त्वावाक्यंमहाराजःकुम्भजन्मसमीरितम् ॥ उत्तस्थौविगलन्नेत्रबाष्पपूरितसन्मुखः ॥ ५ ॥ उवाचदीनदीनंचविस्पष्टाक्षरविस्तरम् ॥ त्रपा[2]भरनमन्मू
र्तिर्ब्रह्मद्रोहपराङ्मुखः ॥६॥ श्रीरामउवाच ॥ अहोमेपश्यताज्ञानंविमूढस्यदुरात्मनः ॥ यद्ब्राह्मणकुलेरूढंहतवान्कामलोलुपः ॥ ७ ॥ महिलार्थेत्वहं
विप्रंवदशास्त्रविवेकवान् ॥ हतवान्वाडवकुलंबुद्धिहीनोऽतिदुर्मतिः ॥ ८ ॥ इक्ष्वाकूणांकुलेजातुब्राह्मणोनदुरुक्तिभाक् ॥ ईदृशंकुर्वताकर्ममयैतत्सुक
लङ्कितम् ॥ ९ ॥ येब्राह्मणास्तुपूजार्हादानसम्मानभोजनैः ॥ तेमयानिहताविप्राःशरसङ्घातसंहितैः ॥ १० ॥ काँल्लोकान्नुगमिष्यामिकुम्भीपाकोऽपि

१'दितिजेन्द्रकुलान्तकारी' इ० पा० । २'त्रपाभरनमन्मूर्धा' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुःसहः ॥ नतादृशंतीर्थमस्तियन्मांपावयितुंक्षमम् ॥ ११ ॥ नयज्ञोनतपोदानंनंवाचैवव्रतादिकम् ॥ यत्तुवैब्राह्मणद्रोग्धुर्ममपावनताकरम् ॥ १२ ॥
यैःकोपितंब्रह्मकुलंनरैर्निरयगामिभिः ॥ तेनराबहुशोदुःखंभोक्ष्यन्तिनिरयंगताः ॥ १३ ॥ वेदामूलंतुधर्माणांवर्णाश्रमविवेकिनाम् ॥
तन्मूलंब्राह्मणकुलंसर्ववेदैकशाखिनः ॥ १४ ॥ मूलच्छेत्तुर्ममौद्धत्यात्कोलोकोनुभविष्यति ॥ किमद्यकरणीयंवैयेनमेहिशिवंभवेत् ॥ १५ ॥ शेष
उवाच ॥ विलपन्तंभृशंरामंराजेन्द्रंरघुपुङ्गवम् ॥ मायामनुष्यवपुषंकुम्भजन्माब्रवीद्वचः ॥ १६ ॥ अगस्त्यउवाच ॥ माविषादंमहाधीरकुरुराजन्म
हामते ॥ नतेब्राह्मणहत्यास्याद्बुधानांनाशमिच्छतः ॥ १७ ॥ त्वंपुराणःपुमान्साक्षादीश्वरःप्रकृतेःपरः ॥ कर्ताहर्ताऽवितासाक्षीनिर्गुणःस्वेच्छयागुणी
॥ १८ ॥ सुरापोब्रह्महत्याकृत्स्वर्णस्तेयीमहाघकृत् ॥ सर्वेत्वन्नामवादेनपूताःशीघ्रंभवन्तिहि ॥ १९ ॥ इयंदेवीजनकजामहाविद्यामहामते ॥ यस्याः
स्मरणमात्रेणमुक्तायास्यन्तिसद्गतिम् ॥ २० ॥ रावणोऽपिनवैदैत्योवैकुण्ठेतवसेवकः ॥ ऋषीणांशापतोऽवाप्तोदैत्यत्वंदनुजान्तक ॥ २१ ॥
तस्यानुग्रहकर्तात्वंनतुहन्ताद्विजन्मनः ॥ एवंसञ्चिन्त्यमाभूयोनिजंशोचितुमर्हसि ॥ २२ ॥ इतिश्रुत्वाततोवाक्यंरामःपरपुरञ्जयः ॥ उवाच
मधुरंवाक्यंगद्गदस्वरभाषितम् ॥ २३ ॥ श्रीरामउवाच ॥ पातकंद्विविधंप्रोक्तंज्ञाताज्ञाताविभेदतः ॥ ज्ञातंयद्बुद्धिपूर्वंहिअज्ञातंतद्विवर्जितम् ॥ २४ ॥
बुद्धिपूर्वंकृतंकर्मभोगेनैवविनश्यति ॥ नश्येदनुशयादन्यदिदंशास्त्रविनिश्चितम् ॥ २५ ॥ कुर्वतोबुद्धिपूर्वंमेब्रह्महत्यांसुनिन्दिताम् ॥ नमेदुः
खापनोदायसाधुवादःसुसंमतः ॥ २६ ॥ प्रब्रूहितादृशंमह्यंयादृशंपापदाहकम् ॥ व्रतंदानंमखंकिञ्चित्तीर्थमाराधनंमहत् ॥ २७ ॥ येनमेविम
लाकीर्तिर्लोकान्वैपावयिष्यति ॥ पापाचाराप्तकालुष्यान्ब्रह्महत्याहतप्रभान् ॥ २८ ॥ शेषउवाच ॥ इत्युक्तवन्तंतंरामंजगादसतपोनिधिः ॥
सुरासुरनमन्मौलिमणिनीराजिताङ्घ्रिकम् ॥ २९ ॥ शृणुराममहावीरलोकानुग्रहकारक ॥ विप्रहत्यापनोदायतवयद्वचनंब्रुवे ॥ ३० ॥ सर्वसपापंत
रतियोऽश्वमेधंयजेतवै ॥ तस्मात्त्वंयजविश्वात्मन्वाजिमेधेनशोभिना ॥ ३१ ॥ सप्ततन्तुर्महीभर्त्रात्वयासाध्योमनीषिणा ॥ महासमृद्धियुक्तेनमहाबल
सुशालिना ॥ ३२ ॥ सवाजिमेधोविप्राणांहत्यायाःपापनोदनः ॥ कृतवान्यंमहाराजोदिलीपस्तवपूर्वजः ॥ ३३ ॥ शतक्रतुःशतंकृत्वाक्रतूनांपुरुषर्ष
भः ॥ पदमापामरावत्यांदेवदैत्यसुसेवितम् ॥ ३४ ॥ मनुश्चसगरोराजामरुत्तोनहुषात्मजः ॥ एतेतेपूर्वजाःसर्वेयज्ञंकृत्वापदंगताः ॥ ३५ ॥ त
स्मात्त्वंकुरुराजेन्द्रसमर्थोऽसिसमन्ततः ॥ भ्रातरोलोकपालाभावर्तन्तेतवभावुकाः ॥ ३६ ॥ इत्युक्तमाकर्ण्यमुनेःसभाग्यवान्रघूत्तमोब्राह्मणघातभी

१ 'नदेवप्रतिमादिकम्' इ०पा०।२ 'साक्षात्' इ० पा०। ३ 'ब्राह्मणवाक्यभीतः' इ० पा०।

CC-0. In Public Domain. Digitization by eGangotri

तः ॥ पप्रच्छयागेसुमतिंचिकीर्षन्विधिंपुराविप्परिगीयमानः ॥ ३७ ॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशेषवा०रामाश्व०रघुनाथस्यागस्त्योपदे
शोनामाष्टमोऽध्यायः ॥ ८ ॥ श्रीरामउवाच ॥ कीदृशोऽश्वस्तत्रभाव्यःकोविधिस्तत्रपूजने ॥ कथंवाशक्यतेकर्तुंकेजेयास्तत्रवैरिणः ॥ १ ॥ अगस्त्य
उवाच ॥ गङ्गाजलसमानेनवर्णेनवपुषाशुभः ॥ कर्णेश्यामोमुखेरक्तःपीतःपुच्छेसुलक्षितः ॥ २ ॥ मनोवेगःसर्वगतिरुच्चैःश्रवस्समप्रभः ॥ वाजिमेधेह
यःप्रोक्तःशुभलक्षणलक्षितः ॥ ३ ॥ वैशाखपौर्णमास्यांतुपूजयित्वायथाविधि ॥ पत्रंलिखित्वाभालेतुस्वनामबलचिह्नितम् ॥ ४ ॥ मोचनीयःप्रय
त्नेनरक्षकैःपरिरक्षितः ॥ यत्रगच्छतियज्ञाश्वस्तत्रगच्छेत्सुरक्षकः ॥ ५ ॥ यस्तंबलान्निबध्नातिस्ववीर्यबलदर्पितः ॥ तस्मात्प्रसभमानेयःपरिरक्षाकरैर्हयः
॥ ६ ॥ कर्त्रातावत्सुविधिनास्थातव्यंनियमादिह ॥ मृगशृङ्गधरोभूत्वाब्रह्मचर्यसमन्वितः ॥ ७ ॥ व्रतंपालयमानश्चयावद्वर्षमतिक्रमेत् ॥
तावद्दीनान्धकृपणाःपरितोष्याधनादिभिः ॥ ८ ॥ अन्नंतुबहुशोदेयंधनंवाभूरिमारिष ॥ यद्यत्प्रार्थयतेधीमांस्तत्तद्देवददातिहि ॥ ९ ॥ एवंप्रकुर्वतः
कर्मयज्ञःसम्पूर्णतांगतः ॥ करोतिसर्वपापानांनाशनंरिपुनाशन ॥ १० ॥ तस्माद्भवान्समर्थोऽस्तिकरणेपालनेऽर्चने ॥ कृत्वाकीर्तिंसुविमलांपावया
न्याञ्जनान्नृप ॥ ११ ॥ श्रीरामउवाच ॥ विलोकयद्विजश्रेष्ठवाजिशालांममाधुना ॥ तादृशाःसन्तिनोवाश्वाःशुभलक्षणलक्षिताः ॥ १२ ॥ इतिश्रु
त्वातुतद्वाक्यमगस्त्यःकरुणाकरः ॥ उत्तस्थौवीक्षमाणोऽयंयागार्हान्वाजिनःशुभान् ॥ १३ ॥ गत्वाथतत्रशालायांरामचन्द्रसमन्वितः ॥ ददर्शा
श्वान्विचित्राङ्गान्मनोवेगान्महाबलान् ॥ १४ ॥ अवनितलगताःकिंवाजिराजस्यवंश्याःकिमथरघुपतीनामेकतःकीर्तिपिण्डाः ॥ किमिदममृतराशि
र्वाहरूपेणसिन्धोर्मुनिरितिमनसोऽन्तर्विस्मयंप्रापपश्यन् ॥ १५ ॥ एकतःशोणदेहानांवाजिनांपङ्क्तिरुत्तमा ॥ एकतःश्यामकर्णाश्वकस्तूरीकान्तिसप्र
भाः ॥ १६ ॥ एकतःकनकाभाश्चत्वन्यतोनीलवर्णिनः ॥ एकतःशबलैर्वर्णैर्विशिष्टैर्वाजिभिर्वृताः ॥ १७ ॥ एवंपश्यन्मुनिःसर्वान्कौतुकावि
ष्टमानसः ॥ ययावन्यत्रतान्द्रष्टुंयागयोग्यान्हयान्मुनिः ॥ १८ ॥ ददर्शतत्रशतशोबद्धांस्तादृशवर्णकान् ॥ दृष्ट्वाविस्मयमापेदेसमुनिर्हर्षिता
ङ्गकः ॥ १९ ॥ एकतःश्यामकर्णांश्चसर्वाङ्गैःक्षीरसन्निभान् ॥ पीतपुच्छान्मुखेरक्ताञ्छुभलक्षणलक्षितान् ॥ २० ॥ निरीक्ष्यपरितोऽनघान्वि
मलनीरधारानिभान्मनोजवनशोभितान्विमलकीर्तिपुञ्जप्रभान् ॥ पयोनिधिविशोषकोमुनिरुवाचसीतापतिंविचित्रहयदर्शनाद्धृषितनेत्रवक्त्रप्र
भः ॥ २१ ॥ अगस्त्यउवाच ॥ हयमेधक्रतौयोग्यान्वाहांस्तेबहुशःशुभान् ॥ पश्यतोनेत्रयोर्मेऽद्यतृप्तिर्नास्तिरघूत्तम ॥ २२ ॥ रामचन्द्र

१ 'प्रभञ्जनमनोजवान्' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महाभागसुरासुरनमस्कृत ॥ यज्ञंकुरुमहाराजहयमेधंसुविस्तरम् ॥ २३ ॥ सुरपतिरिवसर्वान्यज्ञसङ्घान्करिष्यंस्तपनइवसुपर्वारातितोयंविशो
ष्यन् ॥ हतरिपुगणमुख्यंसाम्परायंविजित्यक्षितितलसुखभोगंकुर्विदंभूरिभाग ॥ २४ ॥ इत्येवंवाक्यवादेनपरितुष्टाखिलेन्द्रियः ॥ सर्वान्वैयज्ञसम्भा
रानाजहारमनोहरान् ॥ २५ ॥ मुन्यन्वितोमहाराजःसरयूतीरमागतः ॥ सुवर्णलाङ्गलैर्भूमिंविचकर्षमहीयसीम् ॥ २६ ॥ विलिख्यभूमिंबहुशश्चतुर्यो
जनसंमिताम् ॥ मण्डपान्रचयामासयज्ञार्थंसनरोत्तमः ॥ २७ ॥ कुण्डंतुविधिवत्कृत्वायोनिमेखलयान्वितम् ॥ अनेकरत्नरचितंसर्वशोभासमन्वितम्
॥ २८ ॥ मुनीश्वरोमहाभागोवसिष्ठःसुमहातपाः ॥ सवतत्कारयामासवेदशास्त्रविधिश्रितम् ॥ २९ ॥ प्रेषितास्तेनमुनिनाशिष्यामुनिवराश्रमान् ॥
कथयामासुरुद्युक्तंहयमेधेरघूत्तमम् ॥ ३० ॥ आकारितास्तदासर्वऋषयस्तपतांवराः ॥ आजग्मुःपरमेशस्यदर्शनेत्वतिलालसाः ॥ ३१ ॥ नारदो
ऽसितनामाचपर्वतःकपिलोमुनिः ॥ जातूकर्ण्योऽङ्गिराव्यासआर्ष्टिषेणोऽत्रिरासुरिः ॥ ३२ ॥ हारीतोयाज्ञवल्क्यश्चसंवतःशुकसंज्ञितः ॥ इत्येवमाद
योरामहयमेधवरंययुः ॥ ३३ ॥ तान्सर्वान्पूजयामासरघुराजोमहामनाः ॥ प्रत्युत्थानाभिवादाभ्यामर्घ्यविष्टरकादिभिः ॥ ३४ ॥ गांहिरण्यंददौते
भ्यःप्रायशोदृष्टविक्रमः ॥ महद्भाग्यंत्वद्यमेऽस्तियद्यूयंदर्शनंगताः ॥ ३५ ॥ शेषउवाच ॥ एवंसमाकुलेब्रह्मन्नृषिवर्यसमागमे ॥ धर्मवार्ताबभूवाहोव
र्णाश्रमसुसंमता ॥ ३६ ॥ वात्स्यायनउवाच ॥ काधर्मवार्तातत्रासीत्किंवाकथितमद्भुतम् ॥ साधवःसर्वलोकानांकारुण्यात्किमुताब्रुवन् ॥ ३७ ॥
शेषउवाच ॥ तान्समेतान्मुनीन्दृष्ट्वारामोदाशरथिर्महान् ॥ पप्रच्छसर्वधर्मांश्चसर्ववर्णाश्रमोचितान् ॥ ३८ ॥ तेतुपृष्टाहिरामेणधर्मान्प्रोचुर्महागुणा
न् ॥ तान्प्रवक्ष्यामितेसर्वान्यथाविधिश्शृणुष्वतान् ॥ ३९ ॥ ऋषयऊचुः ॥ ब्राह्मणेनसदाकार्यंयजनाध्ययनादिकम् ॥ वेदान्पठित्वाविरजेन्नोवा
गार्हस्थ्यमाविशेत् ॥ ४० ॥ ब्राह्मणेनसदात्याज्यंनीचसेवानुजीवनम् ॥ आपद्गतोऽपिजीवेतनश्ववृत्त्याकदाचन ॥ ४१ ॥ ऋतुकालाभिगमनंधर्मो
ऽयंगृहिणःपरः॥ स्त्रीणांवरमनुस्मृत्यापत्यकामोऽथवाभवेत् ॥४२॥ दिवाभिगमनंपुंसामनायुष्यकरंमतम् ॥ श्राद्धाहःसर्वपर्वाणियतस्त्याज्यानिधी
मता ॥ ४३ ॥ तत्रगच्छेत्स्त्रियंमोहाद्धर्मात्प्रच्यवतेपरात् ॥ ऋतुकालाभिगामीयःस्वदारनिरतश्चयः ॥ ४४ ॥ सर्वदाब्रह्मचारीहविज्ञेयःसगृहाश्रमी ॥
ऋतुःषोडशयामिन्यश्चतस्रस्तासुगर्हिताः ॥४५॥ पुत्रदास्तासुयायुग्माअयुग्माःकन्यकाप्रदाः॥त्यक्त्वाचन्द्रमसंदुष्टंमघांमूलंविहायच ॥४६॥ शुचिः
सन्निर्विशेत्पत्नींपुंनामर्क्षेविशेषतः ॥ शुचिंपुत्रंप्रसूयेतपुरुषार्थप्रसाधनम् ॥ ४७ ॥ आर्षेविवाहेगोद्वन्द्वंयदुक्तंतत्प्रशस्यते ॥ शुल्कमण्वपिकन्यायाः
कन्याक्रेतुस्तुपापकृत् ॥ ४८ ॥ वाणिज्यंनृपतेःसेवावेदानध्ययनंतथा ॥ कुविवाहःक्रियालोपःकुलपातनहेतवः ॥ ४९ ॥ अन्नोदकपयोमूलफलैर्वापि

CC-0. In Public Domain. Digitization by eGangotri

गृहाश्रमी ॥ गोदानेनतुयत्पुण्यंपात्रायविधिपूर्वकम् ॥ ५० ॥ अनर्चितोऽतिथिर्गेहाद्भग्नाशोयस्यगच्छति ॥ आजन्मसञ्चितात्पुण्यात्क्षणात्सहिविहि
र्भवेत् ॥ ५१ ॥ पितृदेवमनुष्येभ्योदत्त्वाश्नीतामृतंगृही ॥ स्वार्थंपचत्यघंभुङ्क्तेकेवलंस्वोदरम्भरिः ॥ ५२ ॥ षष्ठ्यष्टम्योर्विशेत्पापंतैलेमांसेसदैवहि ॥
चतुर्दश्यांतथामायांत्यजेत्क्षुरमङ्गनाम् ॥ ५३ ॥ रजस्वलांनसेवेतनाश्नीयात्सहभार्यया ॥ एकवासानभुञ्जीतनभुञ्जीतोत्कटासने ॥ ५४ ॥ नाश्न
न्तींस्त्रियमीक्षेततेजःकामोनरोत्तमः ॥ मुखेनोपधमेन्नाग्निंनग्नांनेक्षेतयोषितम् ॥ ५५ ॥ नाङ्घ्रीप्रतापयेदग्नौनवस्त्वशुचिनिक्षिपेत् ॥ प्राणिहिंसांनकु
र्वीतनाश्नीयात्सन्ध्ययोर्द्वयोः ॥ ५६ ॥ नाचक्षीतधयन्तींगांनेन्द्रचापंप्रदर्शयेत् ॥ नदिवोद्धृतसारंचभक्षयेद्दधिनोनिशि ॥ ५७ ॥ स्त्रींधर्मिणींनाभिव
देन्नाघ्रायादातृप्तिरात्रिषु ॥ तौर्यत्रिकप्रियोनस्यात्कांस्येपादौनधावयेत् ॥ ५८ ॥ नधारयेदन्यभुक्तंवासश्चोपानहावपि ॥ नभिन्नभाजनेऽश्नीयान्ना
श्नीतान्नंविदूषितम् ॥ ५९ ॥ संविशेन्नार्द्रचरणोनोच्छिष्टःक्वचिदाव्रजेत् ॥ शयानोवानचाश्नीयान्नोच्छिष्टःसंस्पृशेच्छिरः ॥ ६० ॥ नमनुष्यस्तुतिं
कुर्यान्नात्मानमवमानयेत ॥ अभ्युद्यतंनप्रणमेत्परमर्माणिनोवदेत् ॥ ६१ ॥ एवंगार्हस्थ्यमाश्रित्यवानप्रस्थाश्रमंव्रजेत् ॥ सस्त्रीकोवागतस्त्रीकोविर
ज्येतततःपरम् ॥ ६२ ॥ इत्येवमादयोधर्मागदिताऋषिभिस्तदा ॥ श्रुतारामेणमहतासर्वलोकहितैषिणा ॥६३॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डे
शेषवा०रामाश्व०सर्वधर्मोपदेशोनामनवमोऽध्यायः ॥ ९ ॥ शेषउवाच ॥ इत्थंसंशृण्वतोधर्मान्वसन्तःसमुपस्थितः ॥ यत्रयज्ञक्रियादीनांप्रार
म्भःसुमहात्मनाम् ॥ १ ॥ दृष्ट्वातंसमयंधीमान्वसिष्ठःकलशोद्भवः ॥ रामचन्द्रंमहाराजंप्रत्युवाचयथोचितम् ॥ २ ॥ वसिष्ठउवाच ॥ रामचन्द्र
महाबाहोसमयःपर्यभूत्तव ॥ हयोयत्रप्रमुच्येतयज्ञार्थंपरिपूजितः ॥ ३ ॥ सामग्रीक्रियतांतत्रआहूयन्तांद्विजोत्तमाः ॥ करोतुपूजांभगवान्ब्राह्मणा
नांयथोचिताम् ॥ ४ ॥ दीनान्धकृपणानांचदानंस्वान्तेसमुत्थितम् ॥ ददातुविधिवत्तेषांप्रतिपूज्याधिमान्यच ॥ ५ ॥ भवान्कनकसत्पत्न्या
दीक्षितश्चरताद्व्रतम् ॥ भूमिशायीब्रह्मचारीवसुभोगविवर्जितः ॥ ६ ॥ मृगशृङ्गधरःकट्यांमेखलाजिनदण्डभृत् ॥ करोतुयज्ञसम्भारंसर्वद्रव्यसम
न्वितम् ॥ ७ ॥ इतिश्रुत्वामहद्वाक्यंवसिष्ठस्ययथार्थकम् ॥ उवाचलक्ष्मणंधीमान्नानार्थपरिबृंहितम् ॥ ८ ॥ श्रीरामउवाच ॥ शृणुलक्ष्मणमद्वा
क्यंश्रुत्वातत्कुरुसत्वरम् ॥ हयमानययत्नेनवाजिमेधक्रियोचितम् ॥ ९ ॥ शेषउवाच ॥ श्रुत्वावाक्यंरघुपतेःशत्रुजिल्लक्ष्मणस्तदा ॥
सेनापतिमुवाचेदंवचोविविधवर्णनम् ॥ १० ॥ लक्ष्मणउवाच ॥ वीराकर्णयमेवचःसुमधुरंश्रुत्वात्वरातःपुनःकार्यंतत्क्षितिपालमौलिमुकुटैर्घृष्टा
ङ्घ्रिरामाज्ञया ॥ सेनांकालबलप्रभञ्जनबलप्रोद्यत्समर्थाङ्गिनींसज्जांसद्रथहस्तिपत्तिसुहयारोहैर्विधेह्यन्विताम् ॥ ११ ॥ सज्जीकृतावायुयवास्तुरङ्गा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तरङ्गमालाललिताङ्घ्रिपाताः ॥ सदश्वचारैर्बहुशस्त्रधारिभिःसंरोहितावैरिबलप्रहारिभिः ॥१२॥ संलक्ष्यन्तांहस्तिनःपर्वताभाआधोरणैःप्रासकुन्ता
ग्रहस्तैः ॥ शूरैःसास्त्रैर्भूरिदानोपहाराःक्षीबाणस्तेसर्वशस्त्रास्त्रपूर्णाः ॥ १३ ॥ विततबहुसमृद्धिभ्राजमानारथामेपवनजवनवेगैर्वाजिभिर्युज्यमानाः ॥
विविधरिपुविनाशस्मारकैरायुधास्त्रैर्भृतवलभिविभागानीयतांसूतवृन्दैः ॥ १४ ॥ पत्तयःशतशोमह्यमायान्त्वस्त्राग्र्यपाणयः ॥ हयमेधार्हवाहस्यरक्ष
णेविततोद्यमाः ॥ १५ ॥ इत्याकर्ण्यवचस्तस्यलक्ष्मणस्यमहात्मनः ॥ सेनानीःकालजिन्नामाकारयामाससज्जताम् ॥ १६ ॥ दशध्रुवकमण्डितोल
घुसुरोमशोभान्वितोविविक्तगलशुक्तिभृद्विततकण्ठकोशेमणिः ॥ मुखेविशदकान्तिधृत्त्वसितकान्तिभृत्कर्णयोर्व्यराजततदाहयोधृतकराग्ररश्मिच्छटः
॥ १७ ॥ कलासंशोभितमुखःस्फुरद्रत्नविशोभितः ॥ मुक्ताफलानांमालाभिःशोभितोनिर्ययौहयः ॥ १८ ॥ श्वेतातपत्ररचितःसितचामरशोभितः ॥
बहुशोभापरीताङ्गोनिर्ययौहयराट्ततः ॥ १९ ॥ अग्रतोमध्यतश्चैकेपृष्ठतःसैनिकास्तथा ॥ देवाहरिंयथापूर्वंसेवन्तेसेवनोचितम् ॥ २० ॥ अथसैन्यं
समाहूयसर्वमाज्ञापयत्तदा ॥ हस्त्यश्वरथपादातवृन्दैःसुबहुसङ्कुलम् ॥ २१ ॥ ततस्ततःसमेतानांसैन्यानांश्रूयतेध्वनिः ॥ ततोदुन्दुभिनादोऽभूत्तस्मि
न्पुरवरेतदा ॥ २२ ॥ तन्निनादेनशूराणांप्रियेणमहतातदा ॥ कम्पन्तेगिरिशृङ्गाणिप्रासादाविचलन्तिच ॥ २३ ॥ हेषारवोमहानासीद्वाजिनांमुद्य
तांनृप ॥ रथाङ्गघातसंघुष्टाधरासञ्चलतीवसा ॥ २४ ॥ चलितैर्गजयूथैश्चपृथ्वीरुद्धासमन्ततः ॥ रजस्तुप्रचलत्तत्रजनान्तर्द्धानमादधात् ॥ २५ ॥
निर्जगाममहासैन्यंछत्रैःसंछाद्यभास्करम् ॥ सेनान्याकालजिन्नाम्नाप्रेरितंजनसङ्कुलम् ॥ २६ ॥ गर्जन्तस्तलवीराग्र्याःकुर्वन्तोरणसम्भ्रमम् ॥ रघु
नाथस्ययागायसज्जास्तेप्रययुर्मुदा ॥ २७ ॥ मृगमदमयमङ्गेष्वङ्गरागंदधानाःकुसुमविमलमालाशोभितस्वोत्तमाङ्गाः ॥ मुकुटकटकभूषाभूषिताङ्गाः
समस्ताःप्रययुरवनिनाथप्रेरितास्तेऽपिसर्वे ॥ २८ ॥ इत्येवंतेमहाराजंययुःसेनाचरावराः ॥ धनुर्धराःपाशधराःखड्गधराःस्फुटक्रमाः ॥ २९ ॥ एवं
शनैःशनैःप्राप्तोमण्डपंयागचिह्नितम् ॥ हयःखुरक्षततलांभूमिंकुर्वन्नभःप्लुवन् ॥ ३० ॥ रामोदृष्ट्वाहरिंप्राप्तंबहुसन्तुष्टमानसः ॥ वसिष्ठंप्रेरयामासक्रिया
कर्तव्यतांप्रति ॥ ३१ ॥ वसिष्ठोराममाहूयस्वर्णपत्नीसमन्वितम् ॥ प्रयोगंकारयामासब्रह्महत्यापनोदनम् ॥३२॥ ब्रह्मचर्यव्रतधरोमृगशृङ्गपरिग्रहः॥
तत्कर्मकारयामासरामःपरपुरञ्जयः ॥३३॥ प्रारेभेयागकर्माथकुण्डंमण्डपसंमितम् ॥ तत्राचार्योऽभवद्धीमान्वदशास्त्रविचारवित् ॥ ३४ ॥ वसिष्ठोरघु
नाथस्यकुलपूर्वगुरुर्मुनिः ॥ ब्राह्मंतत्राचरद्ब्रह्मन्कर्मागस्त्यस्तपोनिधिः ॥ ३५ ॥ वाल्मीकिर्मुनिरध्वर्युर्मुनिःकण्वस्तुद्वारपः ॥ अष्टौद्वाराणितत्रास
न्सतोरणशुभानिवै ॥ ३६ ॥ द्वारिद्वारिद्वयंविप्रब्राह्मणस्याधिमंत्रवित् ॥ पूर्वद्वारिमुनिश्रेष्ठौदेवलासितसंज्ञितौ ॥ ३७ ॥ दक्षिणद्वारिभूमानौक

CC-0. In Public Domain. Digitization by eGangotri

श्यपात्रीतपोनिधी ॥ पश्चिमद्वारिऋषभौजातूकर्ण्योऽथजाजलिः ॥ ३८ ॥ उत्तरद्वारितुमुनीद्रौद्वितैकततापसौ ॥ एवंद्वारविधिंकृत्वावसिष्ठःकल
शोद्भवः ॥ ३९ ॥ हयवर्यस्यसत्पूजांकर्तुमारभतद्विज ॥ सुवासिन्यःस्त्रियस्तत्रवासोऽलङ्कारभूषिताः ॥ ४० ॥ हरिद्राक्षतगन्धाद्यैःपूजयामासुर
र्चितम् ॥ नीराजनंततःकृत्वाधूपयित्वागुरूक्षणैः ॥ ४१ ॥ वर्धापनंततोवेश्याश्चक्रुस्तावाडवाज्ञया ॥ एवंसम्पूज्यविमलेभालेचन्दनचर्चिते
॥ ४२ ॥ कुङ्कुमादिकगन्धाढ्यसर्वशोभासमन्विते ॥ बबन्धभास्वरंपत्रंतप्तहाटकनिर्मितम् ॥ ४३ ॥ तत्रालिखद्दाशरथेःप्रतापबलमूर्जितम् ॥ सूर्यवं
शध्वजोधन्वीधनुर्दीक्षागुरुर्गुरुः[1] ॥ ४४ ॥ यंदेवाःसासुराःसर्वेनमन्तिमणिमौलिभिः ॥ तस्यात्मजोवीरबलदर्पहारीरघूद्वहः ॥ ४५ ॥ रामचन्द्रोमहा
भागःसर्वशूरशिरोमणिः ॥ तन्माताकोसलनृपपत्नीगर्भसमुद्भवा ॥ ४६ ॥ तस्याःकुक्षिभवंरत्नंरामःशत्रुक्षयङ्करः ॥ करोतिहयमेधंवैब्राह्मणेनसुशि
क्षितः ॥ ४७ ॥ रावणाभिधविप्रेन्द्रवधपापापनुत्तये ॥ मोचितस्तेनवाहानांमुख्योऽसौवाजिनांवरः ॥ ४८ ॥ महाबलपरीवारपरिखाभिःसुरक्षि
तः ॥ तद्रक्षकोऽस्तितद्भ्राताशत्रुघ्नोलवणान्तकः ॥ ४९ ॥ हस्त्यश्वरथपादातसेनासङ्घसमन्वितः ॥ यस्यराज्ञइतिश्रेष्ठोमानःस्यात्स्वबलोन्मदात
॥ ५० ॥ वयंधनुर्धराःशूराःश्रेष्ठावयमिहोत्कटाः ॥ तेगृह्णन्तुबलाद्वाहंरत्नमालाविभूषितम् ॥ ५१ ॥ मनोवेगंकामजवंसर्वगत्यधिभास्वरम् ॥
ततोमोचयिताभ्राताशत्रुघ्नोलीलयाहयम् ॥ ५२ ॥ शरासनविनिर्मुक्तवत्सदन्तैःशिलाशितैः ॥ ५३ ॥ इत्येवमादिविलिलेखमहामुनीन्द्रःश्रीराम
चन्द्रभुजवीर्यलसत्प्रतापम् ॥ शोभानिधानमतिचञ्चलवायुवेगंपातालभूतलविशेषगतिंमुमोच ॥ ५४ ॥ शत्रुघ्नमादिदेशाथरामःशस्त्रभृतांवरः ॥
याहिवाहस्यरक्षार्थंपृष्ठतःस्वैरगामिनः ॥ ५५ ॥ शत्रुघ्नगच्छवाहस्यमार्गंभद्रंभवेत्तव ॥ भवेतांशत्रुविजयौरिपुकर्षणतेभुजौ ॥ ५६ ॥
येयोद्धारःप्रतिरणगतास्तेत्वयावारणीयावाहंरक्षस्वकगुणगणैःसंयुतःसन्महोर्व्याम् ॥ सुप्तान्भ्रष्टान्विगतवसनान्भीतभीतांस्तुनम्रांस्तान्माहन्याःसु
कृतकृतिनोयेनशंसन्तिकर्म ॥ ५७ ॥ विरथाभयसन्त्रस्तायेवदन्तिवयंतव ॥ तेत्वयानहिहन्तव्याःशत्रुघ्नसुकृतैषिणा ॥ ५८ ॥ योहन्याद्विमदं
मत्तंसुप्तंभग्नंभयातुरम् ॥ तावकोऽहन्नुवाणंचसव्रजत्यधमांगतिम् ॥ ५९ ॥ परस्वेचित्तवृत्तिंत्वंमाकृथाःपारदारिके ॥ नीचेरतिंनकुर्वीथाःसर्वस
द्गुणपूरितः ॥ ६० ॥ वृद्धानांप्रेरणंपूर्वंमाकुर्वीथारणञ्जय[2] ॥ पूज्यपूजातिक्रमंत्वंमाविधेहिदयान्वितः ॥ ६१ ॥ गांविप्रंचनमस्कुर्यावैष्णवंधर्मसंयुतम् ॥
अभिवाद्ययतोगच्छेस्तत्रसिद्धिमवाप्नुयाः ॥ ६२ ॥ विष्णुःसर्वेश्वरःसाक्षीसव्यापकदेहभृत् ॥ येतदीयामहाबाहोतद्रूपाविचरन्तिहि ॥ ६३ ॥ येस्मरन्ति

१ 'धनुर्दीक्षागुरोर्गुरुः' इ० पा०। २ 'पूर्वं प्रहारं वृद्धानां मा कुर्वीथा हरिञ्जय' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महाविष्णुंसर्वभूतहृदिस्थितम् ॥ तेमन्तव्यामहाविष्णुसमरूपारघूद्वह ॥ ६४ ॥ यस्यस्वीयोनपारक्योयस्यमित्रसमोरिपुः ॥ तवैष्णवाःक्षणादेवपापि
नंपावयन्तिहि ॥ ६५ ॥ येषांप्रियंभागवतंयेषांवैब्राह्मणाःप्रियाः ॥ वैकुण्ठात्प्रेषितास्तेऽत्रलोकपावनहेतवे ॥ ६६ ॥ येषांवक्त्रेहरेर्नामहृदिविष्णुः
सनातनः ॥ उदरेविष्णुनैवेद्यंसश्वपाकोऽपिवैष्णवः ॥ ६७ ॥ येषांवेदाःप्रियतमानचसंसारजंसुखम् ॥ स्वधर्मनिरतायेचतान्नमस्कुर्विहान्वितान्
॥ ६८ ॥ शिवेविष्णौनवाभेदोनचब्रह्ममहेशयोः ॥ तेषांपादरजःपूतंवहाम्यघविनाशनम् ॥ ६९ ॥ गौरीगङ्गामहालक्ष्मीर्यस्यनास्तिपृथक्क्रया ॥ ते
मन्तव्यानराःसर्वेस्वर्गलोकादिहागताः ॥ ७० ॥ शरणागतरक्षीचमानदानपरायणः ॥ यथाशक्तिहरेःप्रीत्यैसज्ञेयोवैष्णवोत्तमः ॥ ७१ ॥ यस्यना
ममहापापराशिंदहतिसत्वरम् ॥ तदीयचरणद्वन्द्वेभक्तिर्यस्यसवैष्णवः ॥ ७२ ॥ इन्द्रियाणिवशेयेषांमनोऽपिहरिचिन्तकम् ॥ तान्नमस्कृत्यपूया
त्सद्याजन्ममरणान्तिकात् ॥ ७३ ॥ परस्त्रियंत्वंकरवालवत्त्यजन्भवेर्यशोभूषणभूतिभूमिः ॥ एवंममादेशमथाचरंश्चलभेःपरंधामसुयोगमीडयम्
॥७४॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशेषवा०रामाश्व०शत्रुघ्नशिक्षाकथनंनामदशमोऽध्यायः ॥ १० ॥ शेषउवाच ॥ एवमाज्ञाप्यभगवान्रामश्श्वा
मित्रकर्षणः॥ वीरानालोकयन्भूयोजगादशुभयागिरा ॥१॥ शत्रुघ्नस्यममभ्रातुर्वाजिरक्षाकरस्यवै ॥ कोगन्तापृष्ठतोरक्षंस्तन्निदेशप्रपालकः ॥२॥ यःस
र्ववीरान्प्रतिमुख्यमागतान्विनिर्जयेन्मर्मभिदस्त्रसङ्घैः ॥ गृह्णात्वसौमेकरवीटकंतद्भूमौयशःस्वंप्रथयन्सुविस्तरम् ॥ ३ ॥ इत्युक्तवतिरामेतुपुष्कलोभर
तात्मजः ॥ जग्राहवीटकंतस्माद्रघुराजकराम्बुजात् ॥४॥ स्वामिन्गच्छामिशत्रुघ्नपृष्ठरक्षाकरोऽन्वहम् ॥ सन्नद्धःसर्वशस्त्रास्त्रचापबाणधरःप्रभो ॥ ५ ॥
सर्वमद्यक्षितितलंत्वत्प्रतापोविजेष्यते ॥ एतेनिमित्तभूतावैरामचन्द्रमहामते ॥ ६ ॥ भवत्कृपातःसकलंससुरासुरमानुषम् ॥ उपस्थितंप्रयुद्धायतन्निषे
धेक्षमोह्यहम् ॥ ७ ॥ सर्वस्वामीज्ञास्यतियन्ममविक्रमदर्शनात् ॥ एषगन्तास्मिशत्रुघ्नपृष्ठरक्षाप्रकारकः ॥ ८ ॥ एवंब्रुवन्तंभरतात्मजंसप्रस्तूयसा
ध्वित्यनुमोदमानः ॥ शशंससर्वान्कपिवीरमुख्यान्प्रभञ्जनोद्भूतमुखान्हरिःप्रभुः ॥ ९ ॥ भोहनूमन्महावीरश्शृणुमद्वाक्यमादृतः ॥ त्वत्प्रसादान्म
याप्राप्तमिदंराज्यमकण्टकम् ॥ १० ॥ सीतयाममसंयोगेयोभवाञ्जलधिंतरेत् ॥ चरितंतद्धरेवेद्मिसर्वंतवकपीश्वर ॥ ११ ॥ त्वंगच्छममसैन्यस्य
पालकःसन्ममाज्ञया ॥ शत्रुघ्नःसोदरोमह्यंपालनीयस्त्वहंयथा ॥ १२ ॥ यत्रयत्रमतिभ्रंशःशत्रुघ्नस्यप्रजायते ॥ तत्रतत्रप्रबोद्धव्योभ्राताममममहाम
ते ॥ १३ ॥ इतिश्रुत्वामहद्वाक्यंरामचन्द्रस्यधीमतः ॥ शिरसातत्समाधायप्रणाममकरोत्तदा ॥ १४ ॥ अथादिशन्महाराजोजाम्बवन्तंकपीश्वरम् ॥

१ ‘ परस्त्रियं वै कुरु मातृवत्त्वं ’ इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

रघुनाथस्यसेवायैकेपिपूत्तमतेजसम् ॥ १५ ॥ अङ्गदोगवयोमैन्दस्तथादधिमुखःकपिः ॥ सुग्रीवःप्लवगाधीशःशतवलयक्षिकौकपी ॥ १६ ॥
नीलोनलोमनोवेगोऽधिगन्तावानराङ्गजः ॥ इत्येवमादयोयूयंसज्जीभूताभवन्तुभोः ॥ १७ ॥ सर्वैर्गजैःसदश्वैश्चतप्तहाटकभूषणैः ॥ कवचैःसशिर
स्त्राणैर्भूषितायान्तुसत्वराः ॥ १८ ॥ शेषउवाच ॥ सुमन्तमाहूयसुमन्त्रिणंतदाजगादरामोबलवीर्यशोभनः ॥ अमात्यमौलेवदकेऽत्रयोज्यानराहयं
पालयितुंसमर्थाः ॥ १९ ॥ तदुक्तमेवमाकर्ण्यजगादपरवीरहा ॥ हयस्यरक्षणेयोग्यान्बलिनोऽत्रनराधिपान् ॥ २० ॥ रघुनाथशृणुष्वैतान्नव
वीरान्सुसंहितान् ॥ धनुर्धरान्महाविद्यान्सर्वशस्त्रास्त्रकोविदान् ॥ २१ ॥ प्रतापाग्र्यंनीलरत्नंतथालक्ष्मीनिधिंनृपम् ॥ रिपुतापंचोग्रहयंत
थाशस्त्रविदंनृपम् ॥ २२ ॥ राजन्योऽसौनीलरत्नोमहावीरोरथाग्रणीः ॥ सएवलक्षंरक्षेतलक्षंयुध्येतनिर्भयः ॥ २३ ॥ अक्षौहिणीभिर्दशभिर्यातुवा
हस्यरक्षणे ॥दंशितैस्सशिरस्त्राणैर्महाबाहुभिरुद्धतैः ॥२४॥ प्रतापाग्र्योयोह्ययंचरिपुवर्गमशातयत्॥ सव्यापसव्यबाणानांमोक्तासर्वास्त्रवित्तमः॥२५॥
एषोऽक्षौहिणिविंशत्यायातुयज्ञहयावने ॥ सन्नद्धोरिपुनाशाययुवाकोदण्डदण्डभृत् ॥२६॥ तथालक्ष्मीनिधिस्त्वेषयातुराजन्यसत्तमः ॥ यस्तपोभिः
शतधृतिंप्रसाद्यास्त्राणिचाभ्यसत ॥ २७ ॥ ब्रह्मास्त्रंपाशुपत्यास्त्रंगारुडंनागसंज्ञितम् ॥ मायूरंनाकुलंरौद्रंवैष्णवंमेघसंज्ञितम् ॥ २८ ॥ वज्रंपार्वतसंज्ञं
चतथावायव्यसंज्ञितम् ॥ इत्यादिकानामस्त्राणांसम्प्रयोगविसर्गवित् ॥ २९ ॥ सएषनिजसैन्यानामक्षौहिण्यैकयायुतः ॥ प्रयातुशूरस्सुकुटःसर्ववैरि
प्रभञ्जनः ॥ ३० ॥ रिपुतापोऽयमेवाद्यगच्छत्वग्र्योधनुर्भृताम् ॥ सर्वशस्त्रास्त्रकुशलोरिपुवंशदवानलः ॥ ३१ ॥ गच्छतात्सेनयाबह्व्याचतुरङ्गसमेत
या ॥ शत्रुघ्नाज्ञांशिरस्येतेदधत्वद्यबलोत्कटाः ॥ ३२ ॥ उग्राश्वोऽपिमहाराजस्तथाशस्त्रविदेषच ॥ सर्वेयान्तुसुसंनद्धास्तववाहस्यपालकाः ॥ ३३ ॥
इतिभाषितमाकर्ण्यमन्त्रिणःप्रजहर्षच ॥ आज्ञापयामासचतान्सुमन्त्रकथितान्भटान् ॥ ३४ ॥ तेऽनुज्ञांरघुनाथस्यप्राप्यमोदंप्रपेदिरे ॥ चिरकालंसा
म्परायंवाञ्छन्तोयुद्धदुर्मदाः ॥ ३५ ॥ सन्नद्धाःकवचाद्यैश्चतथाशस्त्रास्त्रवर्तनैः ॥ ययुःशत्रुघ्नसंवासंसीतापतिप्रणोदिताः ॥ ३६ ॥ अथोक्तऋषिणारामो
विधिनाऽपूजयत्क्रमात् ॥ आचार्यादीनृषीन्सर्वान्यथोक्तवरदक्षिणैः ॥ ३७ ॥ आचार्यायददौरामोहस्तिनंषष्टिहायनम् ॥ हयमेकंमनोवेगंरत्नमाला
विभूषितम् ॥ ३८ ॥ पौरटंरथमेकंचमणिरत्नविभूषितम् ॥ चतुर्भिर्वाजिभिर्युक्तंसर्वोपस्करसंयुतम् ॥ ३९ ॥ मणिलक्षंतुप्रत्यक्षंमुक्ताफलतुलाशतम् ॥
विद्रुमस्यतुलानांतुसहस्रंस्फुटतेजसाम्॥४०॥ ग्राममेकंसुसम्पन्नंनानाजनसमाकुलम्॥विचित्रसस्यनिष्पन्नंविविधैर्मन्दिरैर्वृतम् ॥४१॥ब्रह्मणेऽपितथैवा

१ रघुनाथस्य शत्रुघ्नस्य इत्यर्थः । २ 'कपीश्वरमजः प्रभुः' इ० पा० । ३ 'रिपुवर्गम् इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दाद्धोत्रेऽप्यध्वर्यवेददौ ॥ ऋत्विग्भ्योभूरिशोदत्त्वाप्रणनामरघूत्तमः ॥ ४२ ॥ सर्वेतेऽवर्धयन्वाग्भिराशीर्भिरभिपूजिताः ॥ चिरंजीवमहाराजरामचन्द्र
रघूद्वह ॥४३ ॥ कन्यादानंभूमिदानंगजदानंतथैवच ॥ अश्वदानंस्वर्णदानंतिलदानंसमौक्तिकम् ॥४४॥ अन्नदानंपयोदानमभयदानमुत्तमम् ॥ रत्नदा
नानिसर्वाणिविप्रेभ्यश्चादिशन्महान् ॥ ४५ ॥ देहिदेहिधनंदेहिमानेतिब्रूहिकस्यचित् ॥ ददात्वन्नंददात्वन्नंसवभोगसमन्वितम् ॥ ४६ ॥ इत्थंप्रावर्त
तमखोरघुनाथस्यधीमतः ॥ सदक्षिणोद्विजवरैः पूर्णःसर्वशुभक्रियः ॥४७॥ अथरामानुजोगत्वामातरंप्रणनामह ॥ आज्ञापयाश्वरक्षार्थमेषगच्छामिशोभ
ने ॥ ४८ ॥ त्वत्कृपातोरिपुकुलंजित्वाशोभासमन्वितः ॥ आयास्यामिमहाराजैर्हयवर्यसमन्वितः ॥४९ ॥ मातोवाच ॥ पुत्रगच्छमहावीरशिवाःप
न्थानएवते ॥ सर्वान्रिपुगणाञ्जित्वापुनरागच्छसन्मते ॥ ५० ॥ पुष्कलंपालयनिजभ्रातृजंधर्मवित्तमम् ॥ महाबलिनमद्यापिबालकंलीलयायुतम्
॥ ५१ ॥ पुत्रागच्छसिचेद्युक्तःपुष्कलेनशुभान्वितः ॥ तदाममप्रमोदःस्यादन्यथाशोकभागहम् ॥ ५२ ॥ इतिसम्भाषमाणांस्वांमातरंप्रत्युवाचसः
॥ त्वदीयचरणद्वन्द्वंस्मरन्प्राप्स्यामिशोभनम् ॥ ५३ ॥ पुष्कलंपालयित्वाहंनिजाङ्गमिवशोभने ॥ स्वनामसदृशंकृत्वापुनरेष्यामिमोदवान् ॥५४॥
इत्युक्त्वाप्रययौवीरोरामंसमखमण्डपे ॥ आसीनंमुनिवर्याग्र्यैर्यज्ञवेषधरंवरम् ॥ ५५ ॥ उवाचमतिमान्वीरःसर्वशोभासमन्वितः ॥ रामाज्ञापयरक्षार्थं
हयस्यात्रमहामखे ॥५६॥ रघुनाथोऽपितच्छ्रुत्वाभद्रमस्त्वितिचाब्रवीत् ॥ बालंस्त्रियंप्रमत्तंत्वंमाहन्याःशस्त्रवर्जितम् ॥५७॥ तदालक्ष्मीनिधिर्भ्राताजा
नक्याजनकात्मजः ॥ प्रहस्यकिञ्चिन्नयनेनतंयत्रामममब्रवीत ॥ ५८ ॥ लक्ष्मीनिधिरुवाच ॥ रामचन्द्रमहाबाहोसर्वधर्मपरायण ॥ शत्रुघ्नंशिक्षय
तथायथालोकोत्तरोभवेत ॥ ५९ ॥ कुलोचितंकर्मकुर्वन्नग्रजाचरितंतथा ॥ गच्छेत्सपरमंधामतेजोबलसमन्वितम् ॥ ६० ॥ त्वयाप्रोक्तंमहाराजब्रा
ह्मणंनावमानयेत् ॥ पित्रातवहतोविप्रःपितृभक्तिपरायणः ॥ ६१ ॥ त्वयापिसुमहत्कर्मकृतंलोकविगर्हितम् ॥ अवध्यांमहिलांयस्त्वंहतवान्नियतंततः
॥ ६२ ॥ अग्रजोऽस्यमहाराजकृतवान्यंपराक्रमम् ॥ सनकेनकृतःपूर्वंराक्षस्याःकर्णकर्तनम् ॥ ६३ ॥ एवंकरिष्यतिनृपशत्रुघ्नःशिक्षयातव ॥ यदि
नायंतथाकुर्यात्कुलस्यासदृशंभवेत् ॥ ६४ ॥ इत्युक्तवन्तंतंरामःप्रत्युवाचहसन्निव ॥ मेघगम्भरियावाचासर्ववाक्यविशारदः ॥ ६५ ॥ शृण्वन्तुयो
गिनःशान्ताःसमदुःखसुखाःपुनः ॥ जानन्त्यपारसंसारनिस्तारतरणादिकम् ॥ ६६ ॥ येशूराःसमहेष्वासाःसर्वशस्त्रास्त्रकोविदाः ॥ तेचजानन्तियु
द्धस्यवार्तांनतुभवादृशाः॥ ६७॥ परोपतापिनोयेवैयेचोत्पथविसारिणः ॥ तेहन्तव्यानृपैःसर्वैःसर्वलोकहितैषिभिः ॥६८॥ इत्युक्तमाकर्ण्यसभासदस्ते

१'मुनिवेषधरम्' इ० पा०।

CC-0. In Public Domain. Digitization by eGangotri

सर्वेस्मितंचक्रुररिन्दमस्य ॥ कुम्भोद्भवःपूजितमेनमश्वंविमोचयामाससुशोभितंहि ॥ ६९ ॥ इमंमन्त्रंसमुच्चार्यवसिष्ठःकलशोद्भवः ॥ कराग्रेणस्पृशन्न
श्वंमुमोचजयकाङ्क्षया ॥ ७० ॥ वाजिन्गच्छयथालीलंसर्वत्रधरणीतले ॥ यागार्थेमोचितोयेनपुनरागच्छसत्वरः ॥ ७१ ॥ अश्वस्तुमोचितःसर्वैर्भ
टैःशस्त्रास्त्रकोविदैः ॥ परीतःप्रययौप्राचींदिशंवायुजवान्वितः ॥ ७२ ॥ प्रचचारबलंसर्वंकम्पयद्धरणीतलम् ॥ शेषोऽपिकिञ्चिन्नतयाफणयाधृतवान्भु
वम् ॥ ७३ ॥ दिशःप्रसेदुःपरितःक्ष्मातलंशोभयान्वितम् ॥ वायवस्तंतुशत्रुघ्नंपृष्ठतोमन्दगामिनः ॥ ७४ ॥ शत्रुघ्नस्यप्रयाणायाभ्युद्यतस्यभुजो
ऽस्फुरत् ॥ दक्षिणःशुभमाशंसञ्जयायचबभूवह ॥७५॥ पुष्कलःस्वगृहंरम्यंप्रविवेशसमृद्धिमत् ॥ वितर्दिभिर्वलक्षाभिःशोभितंरत्नवेदिकम् ॥ ७६ ॥
तत्रापश्यन्निजांभार्यांपतिव्रतपरायणाम् ॥ किञ्चित्स्वदर्शनाद्धृष्टांभर्तृदर्शनलालसाम् ॥ ७७ ॥ मुखारविन्देनचनागवल्लीदलंसुकर्पूरयुतंचचर्वती ॥
नासाफलंतोयभवंमहाधनंबाह्वोर्मृणालीसदृशोःसुकङ्कणे ॥ ७८ ॥ कुचौतुमालूरफलोपमौवरौनितम्बबिम्बंवरनीविशोभितम् ॥ पादौतुलाकोटि
धरौसुकोमलौदधत्यहोऐक्षतसत्पतिंस्वकम् ॥ ७९ ॥ परिरभ्यप्रियांधीरोगद्गदस्वरभाषिणीम् ॥ तदुरोजपरीरम्भनिर्भरीकृतदेहिकाम् ॥ ८० ॥
उवाचभद्रेगच्छामिशत्रुघ्नपृष्ठरक्षकः ॥ रामाज्ञयायाज्ञमश्वंपालयन्रथसंयुतः ॥ ८१ ॥ त्वयामेमातरःपूज्याःपादसंवाहनादिभिः ॥ तदुच्छिष्टंहिभु
ञ्जानातत्कर्मकरणादरा ॥ ८२ ॥ सर्वाःपतिव्रतानार्योलोपामुद्रादिकाःशुभाः ॥ नावमान्यास्त्वयाभीरुस्वतपोबलशोभिताः ॥ ८३ ॥ इतिश्रीपा
द्मेपुराणेपातालखण्डेशेषवा०रामाश्व०हयमोचनपुष्कलभार्यासमागमोनामैकादशोऽध्यायः ॥ ११ ॥ शेषउवाच ॥ इत्युक्तवन्तंस्वपतिंवीक्ष्य
प्रेम्णासुनिर्भरम् ॥ प्रत्युवाचहसन्तीवकिञ्चिद्गद्गदभाषिणी ॥ १ ॥ नाथतेविजयोभूयात्सर्वत्ररणमण्डले ॥ शत्रुघ्नाज्ञाप्रकर्तव्याहयरक्षायथाभवेत
॥ २ ॥ स्मरणीयाहिसर्वत्रसेविकात्वत्पदानुगा ॥ कदापिमानसंनाथत्वत्तोनान्यत्रगच्छति ॥ ३ ॥ परमायोधनेकान्तस्मर्तव्याहंनजातुचित् ॥
सत्यांमयितवस्वान्तेयुद्धेविजयसंशयः ॥ ४ ॥ पद्मनेत्रतथाकार्यमूर्मिलाद्यायथामम ॥ हास्यंनैवप्रकुर्वन्तिमांवीक्ष्यकरताडनैः ॥ ५ ॥ इयंपत्नीम
हाभीरोःसङ्ग्रामेप्रपलायितुः ॥ कातरायर्हियुद्धयन्तिशूराणांसमयःकुतः ॥ ६ ॥ इत्येवंनहसन्त्युच्चैर्यथामेदेवराङ्गनाः ॥ तथाकार्यंमहाबाहोराम
स्यहयरक्षणे ॥ ७ ॥ योद्धात्वमादौसर्वत्रपरेयेतवपृष्ठतः ॥ धनुष्टङ्कारबधिराःक्रियन्तांबलिनःपरे ॥ ८ ॥ तवप्रोद्यत्कराम्भोजकरवालभियाबल
म् ॥ परेषांभवतात्क्षिप्रमन्योन्यभयसङ्कुलम् ॥ ९ ॥ कुलंमहदलङ्कार्यंपरान्विजयतात्वया ॥ गच्छस्वामिन्महाबाहोतवश्रेयोभवत्विह ॥ १० ॥
इदंधनुर्गृहाणाशुमहद्गुणविभूषितम् ॥ यस्यगर्जितमाकर्ण्यवैरिवृन्दंभयातुरम् ॥११॥ इमौतेत्विषुधीर्वीरबध्येतांशंयथाभवेत् ॥ वैरिकोटिविनिष्पेषबा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णकोटिसुपूरितौ ॥ १२ ॥ कवचंत्विदमाधेहिशरीरेकामसुन्दरे ॥ वज्रप्रभामहादीप्तिहतसन्तमसंदृढम्॥ १३ ॥ शिरस्त्राणंनिजोत्तंसेकुरुकान्तमनोरम
म् ॥ इमेवतंसेविशदेमणिरत्नविभूषिते ॥ १४ ॥ इतिसुविमलवाचंवारिपुत्रींप्रपश्यन्नयनकमलदृष्ट्यावीक्षमाणस्तदङ्गम् ॥ अधिगतपरिमोदोभारतिःश
त्रुजेतारणकरणसमर्थस्तांजगादातिधीरः ॥ १५ ॥ पुष्कलउवाच ॥ कान्तेयत्त्वंवदसिमांतथासर्वंचराम्यहम् ॥ वीरपत्निभवेत्कीर्तिस्तवकान्तिमती
प्सिता ॥ १६ ॥ इतिकान्तिमतीदत्तंकवचंमुकुटंवरम् ॥ धनुर्महेषुधीखड्गंसर्वंजग्राहवीर्यवान् ॥ १७ ॥ परिधायचतत्सर्वंबहुशोभासमन्वितः ॥ शुशु
भेऽतीवसुभटःसर्वशस्त्रास्त्रकोविदः ॥१८॥ तमस्त्रशस्त्रशोभाढ्यंवीरमालाविभूषितम् ॥ कुङ्कुमागुरुकस्तूरीचन्दनादिकचर्चितम् ॥१९ ॥ नानाकुसुम
मालाभिराजानुपरिशोभितम् ॥ नीराजयामाससमुहुस्तत्रकान्तिमतीसती ॥ २० ॥ नीराजयित्वाबहुशःकिरन्तीमौक्तिकैर्मुहुः ॥ गलदश्रुचलन्नेत्रापरि
रेभेपतिंनिजम् ॥ २१ ॥ दृढंसपरिरभ्यैतांचिरमाश्वासयत्तदा ॥ वीरपत्निकान्तिमतिविरहंमाकृथामम ॥ २२ ॥ एषगच्छामिसविधात्तवभामेपतिव्र
ते ॥ इत्युक्त्वातांनिजांपत्नींरथमारुरुहेवरम् ॥ २३ ॥ तंप्रयान्तंपतिंश्रेष्ठंनयनैर्निमिषोज्झितः ॥ विलोकयामासतदापतिव्रतपरायणा ॥ २४ ॥ सय
यौजनकंद्रष्टुंजननींप्रेमविह्वलाम् ॥ गत्वापितरमम्बांचववन्देशिरसामुदा ॥ २५ ॥ मातापुत्रंपरिष्वज्यस्वाङ्कमारोपयत्तदा ॥ मुञ्चन्तीबाष्पनिचयं
स्वस्त्यस्त्विततिजगादसा ॥ २६ ॥ पितरंप्राहभरतंरामोयज्ञकरःपरः ॥ पालनीयोलक्ष्मणनभवद्भिश्चमहात्मभिः ॥ २७ ॥ आज्ञप्तोऽसौजनन्याचपि
त्राहृषितंयागिरा ॥ ययौशत्रुघ्नकटकंमहावीरविभूषितम् ॥२८॥ रथिभिःपत्तिभिर्वीरैःसदश्वैःसादिभिर्वृतः ॥ययौमुदारघूत्तंसमहायज्ञहयाग्रणीः॥२९॥
गच्छन्पाञ्चालदेशांश्चकुरूंश्चैवोत्तरान्कुरून् ॥ दशार्णाञ्छ्रीविशालांश्चसर्वशोभासमन्वितः ॥३० ॥ तत्रतत्रोपशृण्वानोरघुवीरयशोऽखिलम् ॥ रावणा
सुरघातेनभक्तरक्षाविधायकम् ॥ ३१ ॥ पुनश्चहयमेधादिकार्यमारभ्यपावनम् ॥ यशोवितन्वन्भुवनेलोकात्रामोऽविताभयात् ॥ ३२ ॥ तेभ्यस्तुष्टो
ददौहारान्रत्नानिविविधानिच ॥ महाधनानिवासांसिशत्रुघ्नःप्रवरोमहान् ॥ ३३ ॥ सुमतिर्नामतेजस्वीसर्वविद्याविशारदः ॥ रघुनाथस्यसचिवःशत्रु
घ्नानुचरोवरः ॥ ३४ ॥ ययौतेनमहावीरोग्रामाञ्जनपदान्बहून् ॥ रघुनाथप्रतापेननकोऽपिहृतवान्हयम् ॥३५॥ देशाधिपायेबहवोमहाबलपराक्रमाः॥
हस्त्यश्वरथपादातचतुरङ्गसमन्विताः ॥ ३६ ॥ सम्पदोबहुशोनीत्वामुक्तामाणिक्यसंयुताः ॥ शत्रुघ्नंहयरक्षार्थमागतंप्रणतामुहुः ॥ ३७ ॥ इदंरा
ज्यंधनंसर्वंसपुत्रपशुबान्धवम् ॥ रामचन्द्रस्यसर्वंहिनमदीयंरघूद्वह ॥ ३८ ॥ एवंतदुक्तमाकर्ण्यशत्रुघ्नःपरवीरहा ॥ आज्ञांस्वांतत्रसंज्ञाप्ययययौतैःस

१ 'पित्रा च हृषिताङ्गिना' । इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

हितःपथि ॥३९॥ एवंक्रमणसम्प्राप्तःशत्रुघ्नोहयसंयुतः ॥ अहिच्छत्रांपुरींब्रह्मन्नानाजनसमाकुलाम् ॥४०॥ ब्रह्मद्विजसमाकीर्णांनानारत्नविभूषिताम् ॥
सौवर्णैःस्फाटिकैर्हर्म्यैर्गोपुरैःसमलङ्कृताम् ॥ ४१ ॥ यत्ररम्भातिरस्कारकारिण्यःकमलाननाः ॥ दृश्यन्तेसर्वहर्म्येषुललनालीलयान्विताः॥ ४२ ॥ य
त्रस्वाचारललिताःसर्वभोगैकभोगिनः ॥ धनदानुचरायद्वत्तथालीलासमन्विताः ॥४३॥ यत्रवीराधनुर्हस्ताःशरसन्धानकोविदाः ॥ कुर्वन्तितत्रराजा
नंसुहृष्टंसुमदाभिधम् ॥ ४४ ॥ एवंविधंददर्शासौनगरंदूरतःप्रभुः ॥ पार्श्वेतस्यसुरश्रेष्ठमुद्यानंशोभयान्वितम् ॥ ४५ ॥पुन्नागैर्नागचम्पैश्चतिलकैर्देवदारु
भिः ॥ अशोकैःपाटलैश्चूतैर्मन्दारैःकोविदारकैः ॥ ४६ ॥ आम्रजम्बुकदम्बैश्चप्रियालपनसैस्तथा ॥ शालैस्तालैस्तमालैश्चमल्लिकाजातियूथिभिः
॥ ४७ ॥ नीपैःकदम्बैर्बकुलैश्चम्पकैर्मदनादिभिः ॥ शोभितंसददर्शाथशत्रुघ्नःपरवीरहा ॥ ४८ ॥ हयोगतस्तद्वनमध्यदेशेतमालतालादिसुशोभितेवै॥
ययौततःपृष्ठतएववीरोधनुर्धरैःसेवितपादपद्मः ॥ ४९ ॥ ददर्शतत्ररचितंदेवायतनमद्भुतम् ॥ इन्द्रनीलैश्चवैडूर्यैस्तथामारकतैरपि ॥५०॥ शोभितंसुर
सेवार्हंकैलासप्रस्थसन्निभम् ॥ जातरूपमयैःस्तम्भैःशोभितंसद्मनांवरम् ॥ ५१ ॥ दृष्ट्वातद्रघुनाथस्यभ्रातादेवालयंवरम् ॥ पप्रच्छसुमतिंस्वीयंमन्त्रि
णंवदतांवरम् ॥ ५२ ॥ शत्रुघ्नउवाच ॥ वदामात्यवरेदंकिंकस्यदेवस्यकेतनम् ॥ कादेवतापूज्यतेऽत्रकस्यहेतोःस्थितानघ ॥ ५३ ॥ एवमाकर्ण्यस
र्वज्ञोमन्त्रविन्निजगादह ॥ शृणुष्वैकमनावीरयथावदिहसर्वशः ॥ ५४ ॥ कामाक्षायाःपरंस्थानंविद्धिविश्वैकशर्मदम् ॥ यस्यादर्शनमात्रेणसर्वसिद्धिः
प्रजायते ॥ ५५ ॥ देवासुरास्तुयांस्तुत्वानत्वाप्राप्ताखिलांश्रियम् ॥ धर्मार्थकाममोक्षाणांदात्रीभक्तानुकम्पिनी॥५६॥याचितासुमदेनात्राहिच्छत्रापति
नापुरा ॥ स्थिताकरोतिसकलंभक्तानांदुःखहारिणी ॥ ५७ ॥ तांनमस्कुरुशत्रुघ्नसर्ववीरशिरोमणे ॥ नत्वाशुसिद्धिंप्राप्नोषिससुरासुरदुर्लभाम्॥५८॥
इतिश्रुत्वाथतद्वाक्यंशत्रुघ्नःशत्रुतापनः ॥ पप्रच्छसकलांवार्तांभवान्याःपुरुषर्षभः ॥ ५९ ॥ शत्रुघ्नउवाच ॥ कोऽहिच्छत्रापतीराजासुमदःकिंतपः
कृतम् ॥ येनेयंसर्वलोकानांमातातुष्टाऽत्रसंस्थिता ॥ ६० ॥ वदसर्वंमहामात्यनानार्थपरिबृंहितम् ॥ यथावत्त्वंहिजानासितस्माद्वदमहामते ॥ ६१ ॥
सुमतिरुवाच ॥ हेमकूटोगिरिःपूतःसर्वदेवोपशोभितः ॥ तत्रास्तितीर्थंविमलमृषिवृन्दनिषेवितम् ॥ ६२ ॥ सुमदोहितपस्तेपेहतमातृपितृप्रजः॥ अरि
भिःसर्वसामन्तैर्जगामतपसेहितम् ॥६३॥ वर्षाणित्रीणिसपदात्वेकेनमनसास्मरन्॥जगतांमातरंध्यौनासाग्रस्तिमितेक्षणः ॥६४॥ वर्षाणित्रीणिशुष्का
णांपर्णानांभक्षणंचरन् ॥ चकारपरमुग्रंसतपःपरमदुश्चरम् ॥६५॥ अब्दानित्रीणिसलिलेशीतकालेममज्जसः॥ग्रीष्मेचचारपञ्चाग्नीन्प्रावृट्सुजलदोन्मुखः

१ विसर्गलोपः संधिश्चार्षौ। प्राप्ताः अखिलां श्रियम् इति पदच्छेदः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ६६ ॥ त्रीणिवर्षाणिपवनंसंरुध्यस्वान्तगोचरम् ॥ भवानींसंस्मरन्धीरोनचकिञ्चनपश्यति ॥ ६७ ॥ वर्षेतुद्वादशेऽतीतेदृष्ट्वैतत्परमंतपः ॥ विभा
व्यमनसातीवशक्रःपस्पर्धतंभयात् ॥ ६८ ॥ आदिदेशसकामंतुपरिवारपरीवृतम् ॥ अप्सरोभिःसुसंयुक्तंब्रह्मेन्द्रादिजयोद्यतम् ॥ ६९ ॥ गच्छकाम
सखेमह्यंप्रियमाचरमोहन ॥ सुमदस्यतपोविघ्नंसमाचरयथाभवेत् ॥ ७० ॥ इतिश्रुत्वामहद्वाक्यंतुरासाहःस्वयंप्रभुः ॥ उवाचविश्वविजयेप्रौढगर्वोरघू
द्वह ॥ ७१ ॥ कामउवाच ॥ स्वामिन्कोऽसौहिसुमदःकिंतपःस्वल्पकंपुनः ॥ ब्रह्मादीनांतपोभङ्गंकरोम्यस्यतुकाकथा ॥ ७२ ॥ मद्बाणबलनिर्भिन्नश्च
न्द्रस्तारांगतःपुरा ॥ त्वमप्यहल्यांगतवान्विश्वामित्रस्तुमेनकाम् ॥ ७३ ॥ चिन्तांमाकुरुदेवेन्द्रसेवकेमयिसंस्थिते ॥ एषगच्छामिसुमदंदेवान्पालय
मारिष ॥ ७४ ॥ एवमुक्त्वाकामदेवोहेमकूटंगिरिंययौ ॥ वसन्तेनयुतःसख्यातथैवाप्सरसांगणैः ॥ ७५ ॥ वसन्तस्तत्रसकलान्वृक्षान्पुष्पफलैर्युतान् ॥
कोकिलान्षट्पदश्रेण्याघुष्टानाशुचकारह ॥ ७६ ॥ वायुःसुशीतलोवातिदक्षिणांदिशमाश्रितः ॥ कृतमालासरित्तीरलवङ्गकुसुमान्वितः ॥ ७७ ॥ एवं
विधेवनेवृत्तेरम्भानामाप्सरोवरा ॥ सखीभिःसंवृतातत्रजगामसुमदान्तिकम् ॥७८॥ तत्रारभतगानंसाकिन्नरस्वरशोभना ॥ मृदङ्गपणवानेकवाद्यभेद
विशारदा ॥ ७९ ॥ तद्गानमाकर्ण्यनराधिपोऽसौवसन्तमालोक्यमनोहरंच ॥ तथान्यपुष्टारटितंमनोरमंचकारचक्षुःपरिवर्तनंबुधः ॥ ८० ॥ तंप्रबुद्धं
नृपंवीक्ष्यकामःपुष्पायुधस्त्वरन् ॥ चकारसत्वरंसज्यंधनुस्तत्पृष्ठतोऽनघ ॥ ८१ ॥ एकाप्सरास्तत्रनृपस्यपादयोःसंवाहनंनर्तितनेत्रपल्लवा ॥ चकार
चान्यातुकटाक्षमोक्षणंचकारकाचिद्भृशमङ्गचेष्टितम् ॥ ८२ ॥ अप्सरोभिस्तथाकीर्णःकामविह्वलमानसः ॥ चिन्तयामाससमतिमाञ्जितेन्द्रियशिरो
मणिः ॥ ८३ ॥ एतामेतपसोविघ्नकारिण्योऽप्सरसांवराः ॥ शक्रेणप्रेषिताःसर्वाःकरिष्यन्तियथातथम् ॥ ८४ ॥ इतिसञ्चिन्त्यसुतपास्ताउवाचवरा
ङ्गनाः ॥ कायूयंकुत्रसंस्थाःकिंभवतीनांचिकीर्षितम् ॥ ८५ ॥ अत्यद्भुतंजातमहोयद्भवत्योऽक्षिगोचराः ॥ यास्तपोभिःसुदुष्प्राप्यास्तामेतपसआग
ताः ॥ ८६ ॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशेषवा०रामाश्व०कामाक्षोपाख्यानंनामद्वादशोऽध्यायः ॥ १२ ॥ शेषउवाच ॥ इतिवाक्यंसमा
कर्ण्यसुमदस्यतपोनिधेः ॥ जगदुःकामसेनास्तंरम्भाद्यप्सरसोमुदा ॥१॥ त्वत्तपोभिर्वयंकान्तप्राप्ताःसर्ववराङ्गनाः ॥ तासांयौवनसर्वस्वंभुङ्क्ष्वत्यज
तपःफलम् ॥ २ ॥ इयंघृताचीसुभगाचम्पकाभशरीरभृत् ॥ कर्पूरगन्धललितंभुनक्तुत्वन्मुखामृतम् ॥ ३ ॥ एतांमहाभागसुशोभिविभ्रमांमनोहराङ्गींघ
नपीनसत्कुचाम् ॥ कान्तोपभुङ्क्ष्वाशुनिजोग्रपुण्यतःप्राप्तांपुनस्त्वंत्यजदुःखजातम् ॥ ४ ॥ मामप्यनर्घ्याभरणोपशोभितांमन्दारमालापरिशोभि
वक्षसम् ॥ नानारताख्यानविचारचंचुरांदृढंयथास्यात्परिरम्भणंकुरु ॥ ५ ॥ पिबामृतंमामकवक्त्रनिर्गतंविमानमारुह्यवरंमयासह ॥ सुमेरुशृङ्गंबहुपु

Nepal Sanskrit University, Balmeeki Campus Collection

CC-0. In Public Domain. Digitization by eGangotri

ण्यसेवितंसम्प्राप्यभोगंकुरुसत्तपःफलम् ॥ ६ ॥ तिलोत्तमायौवनरूपशोभिताग्रहातुतेमूर्धनितापवारणम् ॥ सुचामरौसन्ततधारयाङ्कितौगङ्गाप्रवा
हाविवसुन्दरोत्तम ॥ ७ ॥ शृणुष्वभोःकामकथांमनोहरांपिबामृतंदेगवणादिवाञ्छितम् ॥ उद्यानमासाद्यचनन्दनाभिधंवराङ्गनाभिर्विहरंकुरुप्रभो
॥ ८ ॥ इत्युक्तमाकर्ण्यमहामतिर्नृपोविचारयामासकुतोह्युपस्थिताः ॥ मयासुसृष्टास्तपसासुराङ्गनाःप्रत्यूहएवात्रविधेयमेपकिम् ॥ ९ ॥ इतिचिन्ता
तुरोराजास्वान्तेसञ्चिन्तयन्सुधीः ॥ जगादमतिमान्वीरःसुमदोदेवताङ्गनाः ॥ १० ॥ यूयंतुममचित्तस्थाजगन्मातृस्वरूपकाः ॥ मयासञ्चिन्त्यतेया
हिसापित्वद्रूपिणीमता ॥ ११ ॥ इदंतुच्छंस्वर्गसुखंत्वयोक्तंसविकल्पकम् ॥ मत्स्वामिनीमयाभक्त्यासेवितादास्यतेवरम् ॥ १२ ॥ यत्कृपातोविधिः
सत्यलोकंप्राप्तोमहानभूत् ॥ सामेदास्यतिसर्वंहिभक्तदुःखान्तकारिणी ॥ १३ ॥ किंनन्दनंकिंतुगिरिःकनकेनसुमण्डितः ॥ किंसुधास्वल्पपुण्येनप्रा
प्यादानवदुःखदा ॥ १४ ॥ इतिवाक्यंसमाकर्ण्यकामस्तुविविधैःशरैः ॥ प्राहरन्नरदेवस्यकर्तुंकिञ्चिन्नवैप्रभुः ॥ १५ ॥ कटाक्षैर्नूपुरारावैःपरिरम्भैर्विलो
कनैः ॥ नतस्यचित्तंविभ्रान्तंकर्तुंशक्तावरानना ॥ १६ ॥ गत्वायथागतंशक्रंजगदुर्धीरधीर्नृपः ॥ तच्छ्रुत्वामघवाभीतोमोघमारम्भमात्मनः
॥ १७ ॥ अथनिश्चितमालोक्यपादपद्मेस्वकेऽम्बिका ॥ जितेन्द्रियंमहाराजंप्रत्यक्षाऽभूत्सुतोषिता ॥ १८ ॥ पञ्चास्यपृष्ठललितापाशाङ्कुशधरा
वरा ॥ धनुर्बाणधरामाताजगत्पावनपावनी ॥ १९ ॥ तांवीक्ष्यमातरंधीमान्सूर्यकोटिसमप्रभाम् ॥ धनुर्बाणसृणीपाशान्दधानांहर्षमाप्तवान्
॥ २० ॥ शिरसाबहुशोनत्वामातरंभक्तिभाविताम् ॥ हसन्तींनिजदेहेषुस्पृशन्तींपाणिनामुहुः ॥ २१ ॥ तुष्टावभक्त्युत्कलितचित्तवृत्तिर्महा
मतिः ॥ गद्गदस्वरसंयुक्तःकण्टकाङ्गोपशोभितः ॥ २२ ॥ जयदेविमहादेविभक्तवृन्दैकसेविते ॥ ब्रह्मरुद्रादिदेवेन्द्रसेविताङ्घ्रियुगेऽनघे ॥२३॥
मातस्तवकलाविद्धमेतद्भातिचराचरम् ॥ त्वदृतेनास्तिसर्वंतन्मातर्भद्रेनमोऽस्तुते ॥ २४ ॥ महीत्वयाऽऽधारशक्त्यास्थापिताचलतीहन ॥ सप
र्वतवनोद्यानदिग्गजैरुपशोभिता ॥ २५ ॥ सूर्यस्तपतिखेतीक्ष्णैरंशुभिःप्रतपन्महीम् ॥ त्वच्छक्त्यावसुधासंस्थंरसंगृह्णन्विमुञ्चति ॥ २६ ॥
अन्तर्बहिःस्थितोवह्निर्लोकानांप्रकरोतिशम् ॥ त्वत्प्रतापान्महादेविसुरासुरनमस्कृते ॥ २७ ॥ त्वंविद्यात्वंमहामायाविष्णोर्लोकैकपालिनः ॥
स्वशक्त्यासृजसीदंत्वंपालयस्यपिमोहिनि ॥ २८ ॥ त्वत्तःसर्वेसुराःप्राप्यसिद्धिंसुखमयन्तिवै ॥ मांपालयकृपानाथेवन्दितेभक्तवल्लभे ॥ २९ ॥
रक्षमांसेवकंमातस्त्वदीयचरणारणम् ॥ कुरुमेवाञ्छितांसिद्धिंमहापुरुषपूर्वजे ॥ ३० ॥ सुमतिरुवाच ॥ एवंतुष्टाजगन्मातावृणीष्ववरमुत्तम
म् ॥ उवाचभक्तंसुमदंतपसाकृशदेहिनम् ॥ ३१ ॥ इत्येतद्वाक्यमाकर्ण्यप्रहृष्टःसुमदोनृपः ॥ वव्रेनिजंहृतंराज्यंहतदुर्जनकण्टकम् ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महेशीचरणद्वन्द्वेभक्तिमव्यभिचारिणीम् ॥ प्रान्तेमुक्तिंतुसंसारवारिधेस्तारिणींपुनः ॥ ३३ ॥ कामाक्षोवाच ॥ राज्यंप्राप्नुहिसुमदसवत्रहतकण्टकम् ॥
महिलारत्नसञ्जुष्टपादपद्मद्वयोभव ॥ ३४ ॥ तववैरिपराभूतिर्माभूयात्सुमदाभिध ॥ यदातुरावणंहत्वारघुनाथोमहायशाः ॥ ३५ ॥ करिष्यत्यश्वमे
धंहिसर्वसम्भारशोभितम् ॥ तस्यभ्रातामहावीरःशत्रुघ्नःपरवीरहा ॥ ३६ ॥ पालयन्हयमायास्यत्यत्रवीरादिभिर्वृतः ॥ तस्मैसर्वंसमर्प्यत्वंराज्यमृद्धं
धनादिकम् ॥ ३७ ॥ पालयिष्यसियोधैःस्वैर्धनुर्धारिभिरुद्भटैः ॥ ततःपृथिव्यांसर्वत्रभ्रमिष्यसिमहामते ॥ ३८ ॥ ततोरामंनमस्कृत्यब्रह्मेन्द्रेशादिसे
वितम् ॥ मुक्तिंप्राप्स्यसिदुष्प्रापांयोगिभिर्यमसाधनैः ॥ ३९ ॥ तावत्कालमिहस्थास्येयावद्रामहयागमः ॥ पश्चात्त्वांतुसमुद्धृत्यगन्तास्मिपरमंपद
म् ॥ ४० ॥ इत्युक्त्वान्तर्दधेदेवीसुरासुरनमस्कृता ॥ सुमदोऽप्यहिच्छत्रायांशत्रून्हत्वानृपोऽभवत् ॥ ४१ ॥ एषराजासमर्थोऽपिबलवाहनसंयुतः ॥
नग्रहीष्यतितेवाहंमहामायासुशिक्षितः ॥ ४२ ॥ श्रुत्वाप्राप्तंपुरीपार्श्वेहयमेधहयोत्तमम् ॥ त्वांचसर्वैर्महाराजैःसेविताङ्घ्रिंमहामतिम् ॥ ४३ ॥ सर्वं
दास्यतिसर्वज्ञराजासुमदनामधृत् ॥ अधुनातन्महाराजरामचन्द्रप्रतापतः ॥ ४४ ॥ शेषउवाच ॥ इतिवृत्तंसमाकर्ण्यसुमदस्यमहायशाः ॥ साधुसा
ध्वितिचोवाचजहर्षमतिमान्बली ॥ ४५ ॥ अहिच्छत्रापतिःसर्वैःस्वगणैःपरिवारितः ॥ सभायांसुखमास्तेयोबहुराजन्यसेवितः ॥ ४६ ॥ ब्राह्मणा
वेदविदुषोवैश्याधनसमृद्धयः ॥ राजानंपर्युपासन्तेसुमदंशोभयान्वितम् ॥४७॥ वेदविद्याविनोदेनन्यायिनोब्राह्मणावराः ॥ आशीर्वदन्तितंभूपंसर्व
लोकैकरक्षकम् ॥४८॥ एतस्मिन्समयेकश्चिदागत्यनृपतिंजगौ ॥ स्वामिन्नजानेकस्यास्तिहयःपत्रधरोऽन्तिके ॥ ४९ ॥ तच्छ्रुत्वासेवकंश्रेष्ठंप्रेषयामा
ससत्वरः ॥ जानीहिकस्यराज्ञोऽयमश्वोममपुरान्तिके ॥ ५० ॥ गत्वाथसेवकस्तत्रज्ञात्वावृत्तान्तमादितः ॥ निवेदयामासनृपंमहाराजन्यसेवितम् ॥
॥ ५१ ॥ सश्रुत्वारघुनाथस्यहयंनित्यमनुस्मरन् ॥ आज्ञापयामासजनंसर्वंराजाविशारदः ॥ ५२ ॥ लोकामदीयाःसर्वेयेधनधान्यसमाकुलाः ॥ तो
रणादीनिगेहेषुमङ्गलानिसृजन्त्विह ॥ ५३ ॥ कन्याःसहस्रशोरम्याःसर्वाभरणभूषिताः ॥ गजोपरिसमारूढायान्तुशत्रुघ्नसंमुखम् ॥ ५४ ॥ इत्यादिस
र्वमाज्ञाप्यययौराजास्वयंततः ॥ पुत्रपौत्रमहिष्यादिपरिवारसमावृतः ॥ ५५ ॥ शत्रुघ्नःसुमहामात्यैःसुभटैःपुष्कलादिभिः ॥ संयुतोभूपतिंवीरंददर्श
सुमदाभिधम् ॥ ५६ ॥ हस्तिभिःसादिसंयुक्तैःपत्तिभिःपरतापनैः ॥ वाजिभिर्भूषितैर्वीरैःसंयुतंवीरशोभितम् ॥ ५७ ॥ अथागत्यमहाराजःशत्रुघ्नंनत
वान्मुदा ॥ धन्योऽस्मिकृतकृत्योऽस्मिसत्कृतंचकृतंवपुः ॥ ५८ ॥ इदंराज्यंगृहाणाशुमहाराजोपशोभितम् ॥ महामाणिक्यमुक्तादिमहाधनसुपूरित
म् ॥ ५९ ॥ स्वामिंश्चिरंप्रतीक्षेऽहंहयस्यागमनंप्रति ॥ कामाक्षाकथितंपूर्वंजातंसम्प्रतितत्तथा ॥ ६० ॥ विलोकयपुरंमह्यंकृतार्थान्कुरुमानवान् ॥ पा

CC-0. In Public Domain. Digitization by eGangotri

वयास्मत्कुलंसर्वंरामानुजमहीपते ॥ ६१ ॥ इत्युक्त्वाऽऽरोहयामासकुञ्जरंचन्द्रसुप्रभम् ॥ पुष्कलंचमहावीरंतथास्वयमथारुहत् ॥ ६२ ॥ भेरीपणवतूर्याणांवीणादीनांस्वनस्तदा ॥ व्याप्नोतिस्ममहाराजसुमदेनप्रणोदितः ॥ ६३ ॥ कन्याःसमागत्यमहानरेन्द्रशत्रुघ्नमिन्द्रादिकसेविताङ्घ्रिम् ॥ करिस्थितामौक्तिकवृन्दसङ्घैर्वर्धापयामासुरनिप्रयुक्ताः ॥ ६४ ॥ शनैःशनैःसमागत्यपुरीमध्येजनैर्मुदा ॥ वर्धापितोगृहंप्रापतोरणादिकभूषितम् ॥ ६५ ॥ हयरत्नेनसंयुक्तस्तथावीरैःसुशोभितः ॥ राज्ञापुरस्कृतोराजाशत्रुघ्नःप्रापमन्दिरम् ॥ ६६ ॥ अर्घादिभिःपूजयित्वारघनाथानुजंतदा ॥ सर्वंसमर्पयामासरामचन्द्रायधीमते ॥६७॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशेषवा०रामाश्व०शत्रुघ्नाहिच्छत्रापुरीप्रवेशोनामत्रयोदशोऽध्यायः ॥ १३ ॥

शेषउवाच ॥ अथस्वागतसन्तुष्टंशत्रुघ्नंप्राहभूमिपः ॥ रघुनाथकथांश्रेष्ठांशुश्रूषुःपुरुषर्षभः ॥ १ ॥ सुमदउवाच ॥ कच्चिदास्तेसुखंरामःसर्वलोकशिरोमणिः ॥ भक्तरक्षावतारोऽयंममसानुग्रहकारकः ॥ २ ॥ धन्यालोकाइमेपुर्यांरघुनाथमुखाम्बुजम् ॥ येपिबन्त्यनिशंचाक्षिपुटकैःपरिमोदिताः ॥ ३ ॥ अथजातंमदीयंचनितरांपुरुषर्षभ ॥ कृतार्थंकुलभूम्यादिवस्तुजातंमहामते ॥ ४ ॥ कामाक्ष्याप्रसादोमेकृतःपूर्वंदयार्द्रया ॥ रघुनाथमुखाम्भोजंद्रक्ष्येऽद्यसकुटुम्बकः ॥ ५ ॥ इत्युक्तवतिवीरेतुसुमदेपार्थिवोत्तमे ॥ सर्वंतत्कथयामासरघुनाथगुणोदयम् ॥ ६ ॥ त्रिरात्रंतत्रवैस्थित्वारघुनाथानुजःपरम् ॥ गन्तुंचकारधिषणांराज्ञासहमहामतिः ॥ ७ ॥ तज्ज्ञात्वासुमदःशीघ्रंपुत्रंराज्येऽभ्यषेचयत् ॥ शत्रुघ्नेनमहाराजपुष्कलेनानुमोदितः ॥ ८ ॥ वासांसिबहुरत्नानिधनानिविविधानिच ॥ शत्रुघ्नसेवकेभ्योऽसौप्रादात्तत्रमहामतिः ॥ ९ ॥ ततोगमनमारेभेमन्त्रिभिर्बहुवित्तमैः ॥ पत्तिभिर्वाजिभिर्नागैःसदश्वैरथकोटिभिः ॥ १० ॥ शत्रुघ्नःसहितस्तेनसुमदेनधनुर्भृता ॥ जगाममार्गेविहसन्रघुनाथप्रतापभृत् ॥ ११ ॥ पयोष्णीतीरमासाद्यजगामसहयोत्तमः ॥ पृष्ठतोऽनुययुःसर्वेयोधावैहयरक्षिणः ॥ १२ ॥ आश्रमान्विविधान्पश्यन्नृषीणांसुतपोभृताम् ॥ तत्रतत्रविशृण्वानोरघुनाथगुणोदयम् ॥ १३ ॥ एषधीमान्हरिर्यातिहरिणापरिरक्षितः ॥ हरिभिर्हरिभक्तैश्चहरिवर्यानुगैर्मुहुः ॥ १४ ॥ इतिशृण्वञ्छुभावाचोमुनीनांपरितःप्रभुः ॥ तुतोषभक्त्युत्कलितचित्तवृत्तिभृतांमहान् ॥ १५ ॥ ददर्शचाश्रमंशुद्धंजनजन्तुसमाकुलम् ॥ वेदध्वनिहताशेषामङ्गलंशृण्वतांनृणाम् ॥ १६ ॥ अग्निहोत्रहविर्धूमपवित्रितनभस्स्थलम् ॥ मुनिवर्यकृतानेकयागयूपसुशोभितम् ॥ १७ ॥ यत्रगावस्तुहरिणापाल्यन्तेपालनोचिताः ॥ मूषकानखनन्त्यस्मिन्बिडालस्यभयाद्बिलम् ॥ १८ ॥ मयूरैर्नकुलैःसार्द्धंक्रीडन्तिफणिनोऽनिशम् ॥ गजैःसिंहैर्नित्यमत्रस्थीयतेमित्रतांगतैः ॥ १९ ॥ एणास्तत्रत्यनीवारभक्षणेषुकृतादराः ॥ नभयंकुर्वतेकालाद्रक्षितामुनिवृन्दकैः ॥ २० ॥ गावःकुम्भसमोधस्कानन्दिनी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समविग्रहाः ॥ कुर्वन्तिचरणोत्थेनरजसेलांपवित्रिताम् ॥ २१ ॥ मुनिवर्याःसमित्पाणिपद्मैर्धर्मक्रियोचिताम् ॥ दृष्ट्वापप्रच्छसुमतिंसर्वज्ञंराममन्त्रिणम्
॥ २२ ॥ शत्रुघ्नउवाच ॥ सुमतेकस्यसंस्थानंमुनेर्भातिपुरोगतम् ॥ निर्वैरिजन्तुसंसेव्यंमुनिवृन्दसमाकुलम् ॥ २३ ॥ श्रोष्यामिमुनिवार्तांचविद
धामिपवित्रताम् ॥ निजंवपुस्तदीयाभिर्वार्ताभिर्वर्णनादिभिः ॥ २४ ॥ इतिश्रुत्वामहद्वाक्यंशत्रुघ्नस्यमहात्मनः ॥ कथयामाससचिवोरघुनाथस्य
धीमतः ॥२५॥ सुमतिरुवाच ॥ च्यवनस्याश्रमंविद्धिमहातापसशोभितम् ॥ निर्वैरिजन्तुसङ्कीर्णंमुनिपत्नीभिरावृतम् ॥ २६ ॥ योऽसौमहामुनिःस्व
र्गवैद्ययोर्भागमादधात् ॥ स्वायम्भुवमहायज्ञेशक्रमानविभेदनः ॥ २७ ॥ महामुनेःप्रभावोऽयंनकेनापिसमाप्यते ॥ तपोबलसमृद्धस्यवेदमूर्तिधर
स्यह ॥ २८ ॥ श्रुत्वारामानुजोवार्तांच्यवनस्यमहामुनेः ॥ सर्वंप्रपच्छसुमतिंशक्रमानादिभञ्जनम् ॥ २९ ॥ शत्रुघ्नउवाच ॥ कदासौदस्रयोर्भागंच
कारसुरपङ्क्तिषु ॥ किंकृतंदेवराजेनस्वायम्भुवमहामखे ॥ ३० ॥ सुमतिरुवाच ॥ ब्रह्मवंशेऽतिविख्यातोमुनिर्भृगुरितिश्रुतः ॥ कदाचिद्गतवान्सायं
समिदाहरणंप्रति ॥ ३१ ॥ तदामखविनाशायदमनोराक्षसोबलिः ॥ आगत्योच्चैर्जगादेदंमहाभयकरंवचः ॥ ३२ ॥ कुत्रास्तिमुनिबन्धुःसकुत्रतन्म
हिलानघा ॥ पुनःपुनरुवाचेदंवचोरोषसमाकुलः ॥ ३३ ॥ तदाहुतवहोज्ञात्वाराक्षसाद्भयमागतम् ॥ दर्शयामासतज्जायामन्तर्वत्नीमनिन्दिताम्
॥ ३४ ॥ जहारराक्षसस्तांतुरुदन्तींकुररीमिव ॥ भृगोरक्षपतेरक्षरक्षनाथतपोनिधे ॥ ३५ ॥ एवंवदन्तीमार्तांतांगृहीत्वानिरगाद्बहिः ॥ दुष्टोवाक्यप्र
हारेणधर्षयन्सभृगोःसतीम् ॥ ३६ ॥ ततोमहाभयत्रस्तोगर्भश्चोदरमध्यतः ॥ पपातप्रज्वलन्नेत्रोवैश्वानरइवाङ्गजः ॥ ३७ ॥ तेनोक्तंमात्रजाशुत्वंभ
स्मीभवसुदुर्मते ॥ नहिसाध्वीपरामर्शंकृत्वाश्रेयोऽधियास्यसि ॥ ३८ ॥ इत्युक्तःसपपाताशुभस्मीभूतकलेवरः ॥ मातातदार्भकंनीत्वाजगामाश्रमसु
न्मनाः ॥ ३९ ॥ भृगुर्वह्निकृतंसवज्ञात्वाकोपसमाकुलः ॥ शशापसर्वभक्षस्त्वंभवदुष्टारिसूचक ॥ ४० ॥ तदाशप्तोऽतिदुःखार्तोजग्राहाङ्घ्रीतनून
पात् ॥ कुरुमेऽनुग्रहंस्वामिन्कृपार्णवमहामते ॥ ४१ ॥ मयानृतंवचोभीत्याकथितंनगुरुद्रुहा ॥ तस्मान्ममोपरिकृपांकुरुधर्मशिरोमणे ॥ ४२ ॥
तदानुग्रहमाधाच्चसर्वभक्षोभवान्छुचिः ॥ इत्युक्तवान्हुतभुजंदयार्द्रोमुनितापसः ॥ ४३ ॥ गर्भाच्च्युतस्यपुत्रस्यजातकर्मादिकंशुचिः ॥ चकारविधि
वद्विप्रोदर्भपाणिःसुमङ्गलः ॥ ४४ ॥ च्यवनाच्च्यवनंप्राहुःपुत्रंसर्वेतपस्विनः ॥ शनैःशनैःसववृधेशुक्लप्रतिपदीन्दुवत् ॥ ४५ ॥ सजगामतपःकर्तुं
रेवांलोकैकपावनीम् ॥ शिष्यैःपरिवृतःसर्वैस्तपोबलसमन्वितैः ॥ ४६ ॥ गत्वातत्रतपस्तेपेवर्षाणामयुतंमहान् ॥ अंसयोःकिंशुकौजातौवल्मीकोप
रिशोभितौ ॥ ४७ ॥ मृगाआगत्यतस्याङ्गेकण्डूंविदधुरुत्सुकाः ॥ नकिञ्चित्सहिजानातिदुर्वारतपसावृतः ॥ ४८ ॥ कदाचिन्मनुरुद्युक्तस्तीर्थयात्रां

CC-0. In Public Domain. Digitization by eGangotri

प्रतिप्रभुः ॥ सकुटुम्बोययौरेवांमहाबलसमावृतः ॥ ४९ ॥ तत्रस्नात्वामहानद्यांसन्तर्प्यपितृदेवताः ॥ दानानिब्राह्मणेभ्यश्चप्रादाद्विष्णुप्रतुष्टये
॥ ५० ॥ तत्कन्याविचरन्तीसावनमध्येइतस्ततः ॥ सखीभिःसहितारम्यातप्तहाटकभूषणा ॥ ५१ ॥ तत्रदृष्ट्वाथवल्मीकंमहातरुसुशोभितम् ॥
निमेषोन्मेषरहितंतेजःकिञ्चिद्ददर्शसा ॥ ५२ ॥ गत्वातत्रशलाकाभिरतुदद्रुधिरंस्रवत् ॥ दृष्ट्वाराज्ञोऽङ्गजाखेदंप्राप्तवत्यतिदुःखिता ॥ ५३ ॥ न
जनन्यैतथापित्रेशशंसाघेनविप्लुता ॥ स्वयमेवात्मनात्मानंसाशुशोचभयातुरा ॥ ५४॥ तदाभूश्चलिताराजन्दिवश्चोल्कापपातह ॥ धूम्रादिशोऽभव
न्सर्वाःसूर्यश्चपरिवेषितः ॥ ५५॥ तदाराज्ञोहयानष्टाहस्तिनोबहवोमृताः ॥ धनंनष्टंरत्नयुतंकलहोऽभून्मिथस्तदा ॥५६ ॥ तदालोक्यनृपोभीतःकिञ्चि
दुद्विग्नमानसः ॥ जनानपृच्छत्केनापिमुनयेत्वपराधितम् ॥ ५७॥ पारम्पर्येणतज्ज्ञात्वास्वपुत्र्याःपरिचेष्टितम् ॥ ययौसुदुःखितस्तत्रसमृद्धबल
वाहनः ॥ ५८ ॥ तंवैतपोनिधिंवीक्ष्यमहतातपसायुतम् ॥ स्तुत्वाप्रसादयामासमुनिवर्यदयांकुरु ॥ ५९ ॥ तस्मैतुष्टोजगादायंमुनिवर्योमहात
पाः ॥ तवात्मजाकृतंसर्वमुत्पाताद्यमवेहितत् ॥ ६० ॥ तवपुत्र्यामहाराजचक्षुर्विस्फोटनंकृतम् ॥ बहुसुस्रावरुधिरंजानतीत्वामुवाचन् ॥ ६१ ॥
तस्मादियंमहाभूपमह्यंदेयायथाविधि ॥ ततश्चोत्पातशमनंभविष्यतिनसंशयः ॥ ६२ ॥ तच्छ्रुत्वादुःखितोराजाप्रज्ञाचक्षुषआत्मजाम् ॥ ददौ
कुलवयोरूपशीललक्षणसंयुताम् ॥ ६३ ॥ दत्तायदानृपेणेयंकन्याकमललोचना ॥ तदोत्पाताःशमंयाताःसर्वेमुनिरुषोद्भताः ॥ ६४ ॥ राजाद
त्त्वाऽऽत्मजांतस्मैमुनयेतपसांनिधे ॥ प्रापस्वांनगरींभूयोदुःखितोऽयंदयायुतः ॥ ६५ ॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशेषवा०रामाश्व०च्यवनो
पाख्यानंनामचतुर्दशोऽध्यायः ॥ १४ ॥ सुमतिरुवाच ॥ अथर्षिःस्वाश्रमंगत्वामानव्यासहभार्यया ॥ मुदंप्रापहताशेषपातकोयोगयुक्तया ॥ १ ॥
सामानवीतंवरमात्मनःपतिंनेत्रेणहीनंजरसागतौजसम् ॥ सिषेवएनंहरिमेधसोत्तमंनिजेष्टदात्रींकुलदेवतांयथा ॥ २ ॥ शुश्रूषतीस्वंपतिमिङ्गितज्ञा
महानुभावंतपसांनिधिंप्रियम् ॥ परांमुदंप्रापसतीमनोहराशचीयथाशक्रनिषेवणोद्यता ॥ ३ ॥ चरणौसेवतेतन्वीसर्वलक्षणलक्षिता ॥ राजपुत्री
सुन्दराङ्गीफलमूलोदकाशना ॥ ४ ॥ नित्यंतद्वाक्यकरणेतत्परापूजनेरता ॥ कालक्षेपंप्रकुरुतेसर्वभूतहितेरता ॥ ५ ॥ विसृज्यकामंदम्भंचद्वे
षंलोभमघंमदम् ॥ अप्रमत्तोद्यतानित्यंच्यवनंसमतोषयत् ॥ ६ ॥ एवंतस्यप्रकुर्वाणासेवांवाक्कायकर्मभिः ॥ सहस्राब्दंमहाराजसाचकामंम ॥ १५ ॥
नस्यधात् ॥ ७ ॥ कदाचिद्देवभिषजावागतावाश्रमेमुनेः ॥ स्वागतेनसुसम्भाव्यतयोःपूजांचकारसा ॥ ८ ॥ शर्यातिकन्याकृतपूजना
र्घपाद्यादिनातोषितचित्तवृत्ती ॥ तावूचतुःस्नेहवशेनसुन्दरौवरंवृणीष्वेतिमनोहराङ्गीम् ॥ ९ ॥ तुष्टौतौवीक्ष्यभिषजौदेवानांवरयाचने ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मतिंचकारनृपतेःपुत्रीमतिमतांवरा ॥ १० ॥ पत्यभिप्रायमालक्ष्यवाचमूचनृपात्मजा ॥ दत्तंमेचक्षुषीपत्युर्यदितुष्टौयुवांसुरौ ॥ ११ ॥ इत्येत
द्वचनंश्रुत्वासुकन्यायामनोहरम् ॥ सतीत्वंचविलोक्येदमूचतुर्भिषजांवरौ ॥ १२ ॥ त्वत्पतिर्यदिदेवानांभागंयज्ञेददात्यसौ ॥ आवयोरधुनाकुर्वश्च
क्षुषोःस्फुटदर्शनम् ॥ १३ ॥ च्यवनोऽप्योमितिप्राहभागदानेवरौजसोः ॥ तदाहृष्टावश्विनौतमूचतुस्तपतांवरम् ॥ १४ ॥ निमज्जतांभवानस्मिन्ह्र
देसिद्धविनिर्मिते ॥ इत्युक्तोजरयाग्रस्तदेहोधमनिसन्ततः ॥ १५ ॥ ह्रदंप्रवेशितोऽश्विभ्यांस्वयंचामज्जतांह्रदे ॥ पुरुषास्त्रयउत्तस्थुरपीच्यावनिताप्रि
याः ॥ १६ ॥ रुक्मस्रजःकुण्डलिनस्तुल्यरूपाःसुवाससः ॥ तान्निरीक्ष्यवरारोहासुरूपान्सूर्यवर्चसः ॥ १७ ॥ अजानतीपतिंसाध्वीह्यश्विनौशरणं
ययौ ॥ दर्शयित्वापतिंतस्यैपातिव्रत्येनतोषितौ ॥ १८ ॥ ऋषिमामन्त्र्यययतुर्विमानेनत्रिविष्टपम् ॥ यक्ष्यमाणेक्रतौस्वीयभागकार्याशयायुतौ
॥ १९ ॥ कालेनभूयसाक्षामांकर्शितांव्रतचर्यया ॥ प्रेमगद्गदयावाचापीडितःकृपयाब्रवीत् ॥ २० ॥ तुष्टोऽहमद्यतवभामिनिमानदायाःशुश्रूषयापर
मयाहृदिचैकभक्त्या ॥ योदेहिनामयमतीवसुहृत्स्वदेहोनावेक्षितःसमुचितःक्षपितुंमदर्थे ॥ २१ ॥ येमेस्वधर्मनिरतस्यतपःसमाधिविद्यात्मयोगवि
जिताभगवत्प्रसादाः ॥ तानेवतेमदनुसेवनयाऽविरुद्धान्दृष्टिंप्रपश्यवितराम्यभयानशोकान् ॥ २२ ॥ अन्येपुनर्भगवतोभ्रुवउद्विजृम्भविस्रंसितार्थ
रचनाःकिमुरुक्रमस्य ॥ सिद्धासिभुङ्क्ष्वविभवान्निजधर्मदोहान्दिव्यान्नरैर्दुरधिगान्नृपविक्रियाभिः ॥ २३ ॥ एवंब्रुवाणमबलाखिलयोगमायावि
द्याविचक्षणमवेक्ष्यगताधिरासीत् ॥ सम्प्रश्रयप्रणयविह्वलयागिरेषद्व्रीडाविलोकविलसद्धसिताननाह ॥ २४ ॥ सुकन्योवाच ॥ राद्धंबतद्विजवृषैतद
मोघयोगमायाधिपेत्वयिविभोतदवैमिभर्तः ॥ यस्तेऽभ्यधायिसमयःसकृदङ्गसङ्गोभूयाद्गरीयसिगुणःप्रसवःसतीनाम् ॥ २५ ॥ तत्रेतिकृत्यमुपशिक्ष्य
यथोपदशयनैषकर्शिततमोऽतिरिरंसयात्मा ॥ सिध्येततेकृतमनोभवधर्षितायादीनस्तदीशभवनंसदृशंविचक्ष्व ॥ २६ ॥ सुमतिरुवाच ॥ प्रियायाः
प्रियमन्विच्छंश्च्यवनोयोगमास्थितः ॥ विमानंकामगंराजंस्तर्ह्येवाविरचीकरत् ॥२७॥ सर्वकामदुघंरम्यंसर्वरत्नसमन्वितम् ॥ सवार्थोपचयोदर्कंमणि
स्तम्भैरुपस्कृतम् ॥२८॥ दिव्योपस्तरणोपेतंसर्वकालसुखावहम् ॥ पट्टिकाभिःपताकाभिर्विचित्राभिरलङ्कृतम् ॥ २९ ॥ स्रग्भिर्विचित्रमालाभिर्मञ्जु
शिञ्जत्षडङ्घ्रिभिः॥दुकूलक्षौमकौशेयैर्नानावस्त्रैर्विराजितम् ॥ ३० ॥ उपर्युपरिविन्यस्तनिलयेषुपृथक्पृथक् ॥ क्लृप्तैःकशिपुभिःकान्तंपर्यङ्कव्यजना
दिभिः ॥३१॥ तत्रतत्रविनिक्षिप्तनानाशिल्पोपशोभितम्॥महामरकतस्थल्याजुष्टंविद्रुमवेदिभिः॥द्वाःसुविद्रुमदेहल्याभातंवज्रकपाटकम् ॥३२॥ शिखरे
ष्विन्द्रनीलेषुहेमकुम्भैरधिश्रितम् ॥३३॥ चक्षुष्मत्पद्मरागाग्र्यैर्वज्रभित्तिषुनिर्मितैः॥जुष्टंविचित्रवैतानैर्मुक्ताहारावलम्बितैः ॥३४॥ हंसपारावतव्रातैस्त

CC-0. In Public Domain. Digitization by eGangotri

त्रतत्रनिकूजितम् ॥ कृत्रिमानिविमानानित्वधिरुह्यावरुह्यच ॥ ३५ ॥ विहारस्थानविश्रामसंवेशप्राङ्गणाजिरैः ॥ यथोपजोषंरचितैर्विस्मापन
मिवात्मनः ॥ ३६ ॥ एवंगृहंप्रपश्यन्तींनातिप्रीतेनचेतसा ॥ सर्वभूताशयाभिज्ञःस्वयंप्रोवाचतांप्रति ॥ ३७ ॥ निमज्ज्यास्मिन्ह्रदेभीरुविमानमिद
मारुह ॥ सुभ्रूर्भर्तुःसमादायवचःकुवलयेक्षणा ॥ ३८ ॥ सरजोबिभ्रतीवासोवेणीभूतांश्चमूर्द्धजान् ॥ अङ्गंचमलपङ्केनसञ्छन्नंशबलस्तनम्॥ ३९ ॥
आविवेशसरस्तत्रमुदाशिवजलाशयम् ॥ सान्तःसरसिवेश्मस्थाःशतानिदशकन्यकाः ॥ ४० ॥ सर्वाःकिशोरवयसोददर्शोत्पलगन्धिनीः ॥ तांदृ
ष्ट्वाशीघ्रमुत्थायप्रोचुःप्राञ्जलयःस्त्रियः ॥ ४१ ॥ कर्मकर्योवयंतुभ्यंशाधिनःकरवामकिम् ॥ स्नानेनतामहार्हेणस्नापयित्वामनस्विनीम् ॥ ४२ ॥
दुकूलेनिर्मलेनूत्नेददुरस्यैचमानद ॥ भूषणानिपरार्ध्यानिवरीयांसिद्युमन्तिच ॥ ४३ ॥ अन्नंसर्वगुणोपेतंपानंचैवामृतासवम् ॥ अथादर्शेस्वमात्मानं
स्रग्विणंविरजोऽम्बरम् ॥ ४४ ॥ ताभिःकृतस्वस्त्ययनंकन्याभिर्बहुमानितम् ॥ हारेणचमहार्हेणरुचकेनचभूषितम् ॥ ४५ ॥ निष्कग्रीवंवलयिनं
क्वणत्काञ्चननूपुरम् ॥ श्रोण्योरध्यस्तयाकाञ्च्याकाञ्चन्याबहुरत्नया ॥ ४६ ॥ सुभ्रुवासुदताशुक्लस्निग्धापाङ्गेनचक्षुषा ॥ पद्मकोशस्पृधानीलैरलकै
श्चलसन्मुखम् ॥ ४७ ॥ यदासस्मारदयितमृषीणांवल्लभंपतिम् ॥ तत्रचास्तेसहस्त्रीभिर्यत्रास्तेसमुनीश्वरः ॥ ४८ ॥ भर्तुःपुरस्तादात्मानंस्त्रीसह
स्रवृतंतदा ॥ निशाम्यतद्योगगतिंसंशयंप्रत्यपद्यत ॥ ४९ ॥ सतांकृतमलस्नानांविभ्राजन्तीमपूर्ववत् ॥ आत्मनोबिभ्रतींरूपंसंवीतरुचिरस्तनीम्
॥ ५० ॥ विद्याधरीसहस्रेणसेव्यमानांसुवाससम् ॥ जातभावोविमानंतदारोहयदमित्रहन् ॥ ५१ ॥ तस्मिन्नलुप्तमहिमाप्रिययाऽनुषक्तोविद्याधरी
भिरुपचीर्णवपुर्विमाने ॥ बभ्राजउत्कचकुमुद्गणवानपीच्यस्ताराभिरावृतइवोडुपतिर्नभःस्थः ॥ ५२ ॥ तेनाष्टलोकपविहारकुलाचलेन्द्रद्रोणीष्वनङ्ग
सखमारुतसौभगासु ॥ सिद्धैर्नुतोद्युधुनिपातशिवस्वनासुरेमेचिरंधनदवल्ललनावरूथी ॥ ५३ ॥ वैश्रम्भकेसुरवनेनन्दनेपुष्पभद्रके ॥ मानसे
चैत्ररथ्येचसरेमेरामयारतः ॥ ५४ ॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशेषवा० रामाश्व० च्यवनस्यतपोभोगवर्णनंनामपञ्चदशोऽध्यायः ॥ १५ ॥
सुमतिरुवाच ॥ एवंतयाक्रीडमानःसर्वत्रधरणीतले ॥ नाबुध्यतगतानब्दान्छतसङ्ख्यापरीमितान् ॥ १ ॥ ततोज्ञात्वाऽथतद्विप्रःस्वकाल
परिवार्तिनीम् ॥ मनोरथैश्चसम्पूर्णास्वस्यप्रियतमांवराम् ॥ २ ॥ न्यवर्तताश्रमंश्रेष्ठंपयोष्णीतीरसंस्थितम् ॥ निर्वैरजन्तुजनतासङ्कुलंमृगसे
वितम् ॥ ३ ॥ तत्रावसत्ससुतपाःशिष्यैर्वेदसमन्वितैः ॥ सेविताङ्घ्रियुगोनित्यंततापपरमंतपः ॥ ४ ॥ कदाचिदथशर्यातिर्यष्टुमैच्छतदेवताः ॥
तदाच्यवनमानेतुंप्रेषयामाससेवकान् ॥ ५ ॥ तैराहूतोद्विजवरस्तत्रागच्छन्महातपाः ॥ सुकन्ययाधर्मपत्न्यास्वाचारपरिनिष्ठया ॥ ६ ॥ आगतंतं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुनिवरंपत्न्यापुत्र्यामहायशाः ॥ ददर्शदुहितुःपार्श्वेपुरुषंसूर्यवर्चसम् ॥ ७ ॥ राजादुहितरंप्राहकृतपादाभिवन्दनाम् ॥ आशिषोनप्रयुञ्जानोनातिप्री
तमनाइव ॥ ८ ॥ चिकीर्षितंतेकिमिदंपतिस्त्वयाप्रलम्भितोलोकनमस्कृतोमुनिः ॥ यात्वंजराग्रस्तमसंमतंपतिंविहायजारंभजसेऽमुमध्वगम् ॥ ९ ॥
कथंमतिस्तेऽवगतान्यथासतांकुलप्रसूतेःकुलदूषणंत्विदम् ॥ बिभर्षिजारंयदपत्रपाकुलंपितुःस्वभर्तुश्चनयस्यधस्तमाम् ॥ १० ॥ एवंब्रुवाणंपितरंस्म
यमानाशुचिस्मिता ॥ उवाचतातजामातातवैषभृगुनन्दनः ॥ ११ ॥ शशंसपित्रेतत्सर्वंवयोरूपाभिलम्भनम् ॥ विस्मितःपरमप्रीतस्तनयांपरिषस्वजे
॥ १२॥ सोमेनायाजयद्वीरंग्रहंसोमस्यचाग्रहीत् ॥ असोमपोरप्यश्विनोश्च्यवनःस्वेनतेजसा ॥१३॥ ग्रहंतुग्राहयामासतपोबलसमन्वितः॥ वज्रंगृहीत्वा
शक्रस्तुहन्तुंब्राह्मणसत्तमम् ॥ १४ ॥ अपङ्क्तिपावनौदेवौकुर्वाणंपङ्क्तिगोचरौ ॥ शक्रंवज्रधरंदृष्ट्वामुनिःस्वहननोद्यतम् ॥ १५ ॥ हुङ्कारमकरोद्धीमान्स्त
म्भयामासतद्भुजम् ॥ इन्द्रःस्तब्धभुजस्तत्रदृष्टःसर्वैश्चमानवैः ॥ १६ ॥ कोपेनश्वसमानोऽहिर्यथामन्त्रनियन्त्रितः ॥ तुष्टावसमुनिंशक्रःस्तब्धबाहुस्त
पोनिधिम् ॥ १७ ॥ अश्विभ्यांभागदानंचकुर्वन्तंनिर्भयान्तरम् ॥ कथयामासभोःस्वामिन्दीयतामश्विनोर्बलिः ॥१८॥ मयानवार्यतेतातक्षमस्वाघं
महत्कृतम् ॥ इत्युक्तःसमुनिःकोपंजहौतूर्णंकृपानिधिः ॥ १९ ॥ इन्द्रोमुक्तभुजोऽप्यासीत्तदानींपुरुषर्षभ ॥ एतद्वीक्ष्यजनाःसर्वेकौतुकाविष्टमानसाः
॥ २० ॥ शशंसुर्ब्राह्मणबलंतेतुदेवादिदुर्लभम् ॥ ततोराजाबहुधनंब्राह्मणेभ्योऽददन्महान् ॥ २१ ॥ चक्रेचावभृथस्नानंयागान्तेशत्रुतापनः ॥
त्वयापृष्टंयदाचक्ष्वच्यवनस्यमहोदयम् ॥ २२ ॥ समयाकथितःसर्वस्तपोयोगसमन्वितः ॥ नमस्कृत्यतपोमूर्तिमिमंप्राप्यजयाशिषः ॥ २३ ॥
प्रेषयत्वंसपत्नीकंरामयज्ञेमनोरमे ॥ २४॥ शेषउवाच ॥ एवंतुकुर्वतोर्वार्तांहयःप्रापाश्रमंप्रति ॥ विदधद्वायुवेगेनपृथ्वींखुरविलक्षिताम् ॥२५॥ दूर्वाङ्कु
रान्मुखाग्रेणचरंस्तत्रमहाश्रमे ॥ मुनयोयावदादायदर्भान्स्नातुंगतानदीम् ॥ २६ ॥ शत्रुघ्नःशत्रुसेनायास्तापनःशूरसंमतः ॥ तावत्प्रापमुनेर्वासंच्य
वनस्यातिशोभितम् ॥ २७ ॥ गत्वातदाश्रमेवीरोददर्शच्यवनंमुनिम् ॥ सुकन्यायाःसमीपस्थंतपोमूर्तिमिवस्थितम् ॥ २८ ॥ ववन्देचरणौतस्यस्वा
भिधांसमुदाहरन् ॥ शत्रुघ्नोऽहंरघुपतेर्भ्रातावाहस्यपालकः ॥ २९ ॥ नमस्करोमियुष्मभ्यंमहापापोपशान्तये ॥ इतिवाक्यंसमाकर्ण्यजगादमुनिस
त्तमः ॥ ३० ॥ शत्रुघ्नतवकल्याणंभूयान्नरवरर्षभ ॥ यज्ञंपालयमानस्यकीर्तिस्तेविपुलाभवेत् ॥ ३१ ॥ चित्रंपश्यतभोविप्रारामोऽपिमखकारकः ॥
यन्नामस्मरणादीनिकुर्वन्तिपापनाशनम् ॥ ३२ ॥ महापातकसंयुक्ताःपरदाररतानराः ॥ यन्नामस्मरणोद्युक्तामुक्तायान्तिपरांगतिम् ॥ ३३ ॥ पादपद्म
समुत्थेनरेणुनाग्रावमूर्तिभृत ॥ तत्क्षणाद्गौतमार्धाङ्गीजातामोहनरूपधृत् ॥ ३४ ॥ मामकीयस्वरूपस्यध्यानेनप्रेमनिर्भरा ॥ सर्वपातकराशिंसादग्ध्वा

CC-0. In Public Domain. Digitization by eGangotri

प्राप्तासुरूपताम् ॥ ३५ ॥ दैत्यायस्यमनोहारिरूपंप्रधनमण्डले ॥ पश्यन्तःप्रापुरेतस्यरूपंविकृतिवर्जितम् ॥ ३६ ॥ योगिनोध्याननिष्ठायेयंध्यात्वा
योगमास्थिताः ॥ संसारभयनिर्मुक्ताःप्रयाताःपरमंपदम् ॥ ३७ ॥ धन्योऽहमद्यरामस्यमुखंद्रक्ष्यामिशोभनम् ॥ पयोजदलनेत्रान्तंसुनसंसुभ्रुसून्न
तम् ॥ ३८ ॥ साजिह्वारघुनाथस्यनामकीर्तनमादरात ॥ करोतिविपरीतायाफणिनोरसनासमा ॥ ३९ ॥ अद्यप्राप्तंतपःपुण्यमद्यपूर्णामनोरथाः ॥
यद्द्रक्ष्येरामचन्द्रस्यमुखंब्रह्मादिदुर्लभम् ॥ ४० ॥ तत्पादरेणुनास्वाङ्गंपवित्रंविदधाम्यहम् ॥ विचित्रतरवार्ताभिःपावयेरसनांस्वकाम् ॥ ४१ ॥
इत्यादिरामचरणस्मरणप्रवुद्धप्रेमव्रजप्रसृतगद्गदवाग्मुदश्रुः ॥ श्रीरामचन्द्ररघुपुङ्गवधर्ममूर्तेभक्तानुकम्पकसमुद्धरसंसृतेर्माम् ॥ ४२ ॥ जल्पन्नश्रुकला
पूर्णोमुनीनांपुरतस्तदा ॥ नाज्ञासीत्तत्रपारक्यंनिजध्यानेनसंस्थितः ॥ ४३ ॥ शत्रुघ्नस्तंमुनिंप्राहस्वामिन्नोमखसत्तमः ॥ क्रियतांभवतापादरजसासु
पवित्रितः ॥ ४४ ॥ महद्भाग्यंरघुपतेर्यद्युष्मन्मानसान्तरे ॥ तिष्ठत्यसौमहाबाहुःसर्वलोकसुपूजितः ॥४५॥ इत्युक्तःसपरीवारःसर्वाग्निपरिसंवृतः ॥ ज
गामच्यवनस्तत्रप्रमोदह्रदसम्प्लुतः ॥ ४६ ॥ हनूमांस्तंपदायान्तंरामभक्तमवेक्ष्यह ॥ शत्रुघ्नंनिजगादासौवचोविनयसंयुतः ॥ ४७ ॥ स्वामिन्कथ
यसित्वंचेन्महापुरुषसुन्दरम् ॥ रामभक्तंमुनिवरंनयामिस्वपुरीमहम् ॥ ४८ ॥ इतिश्रुत्वामहद्वाक्यंकपिवीरस्यशत्रुहा ॥ आदिदेशहनूमन्तंगच्छप्रापय
तंमुनिम् ॥ ४९ ॥ हनूमांस्तंमुनिंस्वीयेपृष्ठआरोप्यवेगवान् ॥ सकुटुम्बंनिनायाशुवायुःखइवसर्वगः ॥ ५० ॥ आगतंतंमुनिंदृष्ट्वारामोमतिमतांवरः ॥
अर्घ्यपाद्यादिकंचक्रेप्रीतःप्रणयविह्वलः ॥ ५१ ॥ धन्योऽस्मिमुनिवर्यस्यदर्शनेनतवाधुना ॥ पवित्रितोमखोमेऽद्यसर्वसम्भारसम्भृतः ॥ ५२ ॥ इतिवा
क्यंसमाकर्ण्यच्यवनोमुनिसत्तमः ॥ उवाचप्रेमनिर्भिन्नपुलकाङ्गोऽतिनिर्वृतः ॥ ५३ ॥ स्वामिन्ब्रह्मण्यदेवस्यतववाडवपूजनम् ॥ युक्तमेवमहाराज
धर्ममार्गप्ररक्षितुः ॥ ५४ ॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशेषवा०रामाश्व०च्यवनाश्रमेहयगमनंनामषोडशोऽध्यायः ॥ १६ ॥ शेषउवाच ॥
शत्रुघ्नश्च्यवनस्याथदृष्ट्वाऽचिन्तयंतपोबलम् ॥ प्रशशंसतपोब्राह्मंसर्वलोकैकवन्दितम् ॥ १ ॥ अहोपश्यतयोगस्यसिद्धिंब्राह्मणसत्तमे ॥ यःक्षणादे
वदुष्प्रापंतद्विमानमचीकरत् ॥ २ ॥ क्वभोगसिद्धिर्महतीमुनीनाममलात्मनाम् ॥ क्वतपोबलहीनानांभोगेच्छामनुजात्मनाम् ॥ ३ ॥ इतिस्वगतमा
शंसञ्छत्रुघ्नश्च्यवनाश्रमे ॥ क्षणंस्थित्वाजलंपीत्वासुखसम्भोगमाप्तवान् ॥ ४ ॥ हयस्तस्याःपयोष्ण्याख्यनद्याःपुण्यजलात्मनः ॥ पयःपीत्वाययौ
मार्गेवायुवेगगतिर्महान् ॥५॥ योधास्तन्निर्गमंदृष्ट्वापृष्ठतोऽनुययुस्तदा ॥ हस्तिभिःपत्तिभिःकेचिद्रथैःकेचनवाजिभिः ॥ ६ ॥ शत्रुघ्नोऽमात्यवर्येण
सुमत्याख्येनसंयुतः ॥ पृष्ठतोऽनुजगामाशुरथेनहयशोभिना ॥ ७ ॥ गच्छन्वाजीपुरंप्राप्तोविमलाख्यस्यभूपतेः ॥ रत्नातटाख्यंचजनैर्हृष्टपुष्टैःसमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुलम् ॥ ८ ॥ ससेवकादुपश्रुत्यरघुनाथहयोत्तमम् ॥ पुरोऽन्तिकेहिसम्प्रातंसर्वयोधसमन्वितम् ॥ ९ ॥ तदागजानांसप्तत्याचन्द्रवर्णसमानया ॥
अश्वानामयुतैःसार्धंरथानांकाञ्चनत्विषाम् ॥ १० ॥ सहस्रेणचसंयुक्तःशत्रुघ्नंप्रतिजग्मिवान् ॥ शत्रुघ्नंसनमस्कृत्यसर्वान्प्राप्तान्महारथान् ॥ ११ ॥
वसुकोशंधनंसर्वंराज्यंतस्मैनिवेद्यच ॥ किंकरोमीतिराजातंजगादपुरतःस्थितः ॥ १२ ॥ राजापितंस्वीयपदेप्रणम्रंदोर्भ्यांदृढंसम्परिषस्वजेमहान् ॥
जगामसाकंतनयेस्वराज्यंनिक्षिप्यसर्वंबहुधन्विभिर्वृतः ॥ १३ ॥ रामचन्द्राभिधांश्रुत्वासर्वेश्रुतिमनोहराम् ॥ सर्वेप्रणम्यतंवाहंददुर्वसुमहाधनम्
॥ १४ ॥ राजानंपूजयित्वातुशत्रुघ्नःपरयामुदा ॥ सेनयासहितोऽगच्छद्वाजिनःपृष्ठतस्तदा ॥ १५ ॥ एवंसगच्छंस्तन्मार्गेपर्वताग्र्यंददर्शह ॥ स्फाटि
केःकानकैरौप्यैराजितंप्रस्थराजिभिः ॥ १६ ॥ जलनिर्झरसंह्रादंनानाधातुकभूतलम् ॥ गैरिकादिकसद्धातुलाक्षारङ्गविराजितम् ॥ १७ ॥ यत्रसिद्धा
ङ्गनाःसिद्धैःसङ्क्रीडन्तेऽकुतोभयाः ॥ गन्धर्वाप्सरसोनागायत्रक्रीडन्तिलीलया ॥ १८ ॥ गङ्गातरङ्गसंस्पर्शशीतवायुनिषेवितम् ॥ वीणारणद्वंसशु
कक्कणसुन्दरशोभितम् ॥ १९ ॥ पर्वतंवीक्ष्यशत्रुघ्नउवाचसुमतिंत्विदम् ॥ तद्दर्शनसमुद्भूतविस्मयाविष्टमानसः ॥ २० ॥ कोऽयंमहागिरिवरोविस्मा
पयतिमेमनः ॥ महारजतसत्प्रस्थोमार्गेराजतिमेऽद्भुतः ॥ २१ ॥ अत्रकिंदेवतावासोदेवानांक्रीडनस्थलम् ॥ यदेतन्मनसःक्षोभंकरोतिश्रीसमुच्चयैः
॥ २२ ॥ इतिवाक्यंसमाकर्ण्यजगादसुमतिस्तदा ॥ वक्ष्यमाणगुणागाररामचन्द्रपदाब्जधीः ॥ २३ ॥ नीलोऽयंपर्वतोराजन्पुरतोभातिभूमिप ॥ म
नोहरैर्महाशृङ्गैःस्फाटिकाद्यैःसमन्ततः ॥ २४ ॥ एनंपश्यन्तिनोपापाःपरदाररतानराः ॥ विष्णोर्गुणगणान्येवैनमन्यन्तेनराधमाः ॥ २५ ॥ श्रुतिस्मृ
तिसमुत्थंयेधर्मंसद्भिःसुसाधितम् ॥ नमन्यन्तेस्वबुद्धिस्थहेतुवादविचारणाः ॥ २६ ॥ नीलीविक्रयकर्तारोलाक्षाविक्रयकारकाः ॥ योब्राह्मणोघृतादी
निविक्रीणातिसुरापकः ॥ २७ ॥ कन्यांरूपेणसम्पन्नांनदद्यात्कुलशालिने ॥ विक्रीणातिद्रव्यलोभात्पितापापेनमोहितः ॥ २८ ॥ पत्नींदूषयतेयस्तु
कुलशीलवतींनरः ॥ स्वयमेवात्तिमधुरंबन्धुभ्योनददातियः ॥२९॥ भोजनेब्राह्मणार्थेचपाकभेदंकरोतियः ॥ कृसरंपायसंवापिनिजार्थेपाचयेत्कुधीः
॥ ३० ॥ अतिथीनवमन्यन्तेसूर्योढान्सुक्षुधार्दितान् ॥ अन्तरिक्षभुजोयेचयेचविश्वासघातकाः ॥ ३१॥ नपश्यन्तिमहाराजरघुनाथपराङ्मुखाः ॥ अ
सौपुण्योगिरिवरःपुरुषोत्तमशोभितः ॥ ३२ ॥ पवित्रयतिसर्वान्नोदर्शनेनमनोहरः ॥ अत्रतिष्ठतिदेवानांमुकुटैरर्चिताङ्घ्रिकः ॥ ३३ ॥ पुण्यवद्भिर्दर्श
नार्हःपुण्यदःपुरुषोत्तमः ॥ श्रुतयोनेतिनेतीतिब्रुवाणानविदन्तियम् ॥३४॥ यत्पादरजइन्द्रादिदेवैर्मृग्यंसुदुर्लभम् ॥ वेदान्तादिभिरन्यूनैर्वाक्यैर्विन्द
न्तियंबुधाः ॥ ३५ ॥ सोऽत्रश्रीमान्नीलशैलेवसतेपुरुषोत्तमः ॥ आरुह्यतंनमस्कृत्यसम्पूज्यसुकृतादिना ॥३६॥ नैवेद्यंभक्षयित्वावैभूपभूयाश्चतुर्भुजः॥

CC-0. In Public Domain. Digitization by eGangotri

अत्राप्युदाहरन्तीममितिहासंपुरातनम् ॥ ३७ ॥ तंशृणुष्वमहाराजसर्वाश्चर्यसमन्वितम् ॥ रत्नग्रीवस्यनृपतेर्यद्वृत्तंसकुटुम्बिनः ॥३८॥ चतुर्भुजादिकं
प्राप्तंदेवदानवदुर्लभम् ॥ आसीत्काञ्चीमहाराजपुरीलोकेषुविश्रुता ॥३९॥ महाजनपरीवारसमृद्धबलवाहना ॥ यस्यांवसन्तिविप्राग्र्याःषट्कर्मनिरता
भृशम् ॥४०॥ सर्वभूतहितेयुक्तारामभक्तिषुलालसाः ॥ क्षत्रियारणकर्तारःसङ्ग्रामेऽप्यपलायिनः ॥४१॥ परदारपरद्रव्यपरद्रोहपराङ्मुखाः ॥ वैश्याः
कुसीदकृष्यादिवाणिज्यशुभवृत्तयः ॥ ४२ ॥ कुर्वन्तिरघुनाथस्यपदाम्भोजेरतिंसदा ॥ शूद्राब्राह्मणसेवाभिर्गतरात्रिदिनान्तराः ॥ ४३ ॥ कुर्वन्तिक
थनंरामरामेतिरसनाग्रतः ॥ प्राकृताःकेऽपिनोपापंकुर्वन्तिमनसात्रवै ॥ ४४ ॥ दानंदयादमःसत्यंतत्रतिष्ठन्तिनित्यशः ॥ वदतेनपराबाधंवाक्यंको
ऽपिनरोऽनघः ॥ ४५ ॥ नपारक्येधनेलोभंकुर्वन्तिनहिपातकम् ॥ एवंप्रजामहाराजरत्नग्रीवेणपाल्यते ॥ ४६ ॥ षष्ठांशंतत्रगृह्णातिनान्यंलोभविवर्जि
तः ॥ एवंपालयमानस्यप्रजाधर्मेणभूपतेः ॥ ४७ ॥ गतानिबहुवर्षाणिसर्वभोगविलासिनः ॥ विशालाक्षींमहाराजएकदाह्यूचिवानिदम् ॥ ४८ ॥ पति
व्रतांधर्मपत्नींपतिव्रतपरायणाम् ॥ पुत्राजाताविशालाक्षिप्रजारक्षाधुरन्धराः ॥ ४९ ॥ परीवारोमहान्मह्यंवर्ततेविगतज्वरः ॥ हस्तिनोममशैलाभावा
जिनःपवनोपमाः ॥ ५० ॥ रथाश्वसुहयैर्युक्तावर्तन्तेममनित्यशः ॥ महाविष्णुप्रसादेनकिञ्चिन्न्यूनंममास्तिन ॥ ५१ ॥ एवंमनोरथस्त्वेकस्ति
ष्ठतेमानसेमम ॥ परंतीर्थंमयानाद्यकृतंपरमशोभने ॥ ५२ ॥ गर्भवासविरामायक्षमंगोविन्दशोभितम् ॥ वृद्धोजातोऽस्म्यहंतावद्वलीपलितदेहवान्
॥ ५३ ॥ करिष्यामिमनोहारितीर्थसेवनमादृतः ॥ योनरोजन्मपर्यन्तंस्वोदरस्यप्रपूरकः ॥ ५४ ॥ नकरोतिहरेःपूजांसनरोगोवृषःस्मृतः ॥ तस्माद्ग
च्छामिभोभद्रेतीर्थयात्रांप्रतिप्रिये ॥ ५५ ॥ सकुटुम्बःसुतेन्यस्यधुरंराज्यस्यनिर्भृताम् ॥ इतिव्यवस्यसन्ध्यायांहरिंध्यायन्निशान्तरे ॥ ५६ ॥
अद्राक्षीत्स्वप्नमप्येकंब्राह्मणंतापसंवरम् ॥ प्रातरुत्थायराजासौकृत्वासन्ध्यादिकाःक्रियाः ॥ ५७ ॥ सभांमन्त्रिजनैःसार्द्धंसुखमासेदिवान्महान् ॥
तावद्विप्रंददर्शाथतापसंकृशदेहिनम् ॥ ५८ ॥ जटावल्कलकौपीनधारिणंदण्डपाणिनम् ॥ अनेकतीर्थसेवाभिःकृतपुण्यकलेवरम् ॥ ५९ ॥ राजा
तंवीक्ष्यशिरसाप्रणनाममहाभुजः ॥ अर्घ्यपाद्यादिकंचक्रेप्रहृष्टात्मामहीपतिः ॥ ६० ॥ सुखोपविष्टंविश्रान्तंपप्रच्छविदितंद्विजम् ॥ स्वामिंस्त्व
द्दर्शनान्मेऽद्यगतंदेहस्यपातकम् ॥ ६१ ॥ महान्तःकृपणान्पातुंयान्तितद्गेहमादरात् ॥ तस्मात्कथयभोविप्रवृद्धस्यममसम्प्रति ॥ ६२ ॥ कोदेवोगर्भना
शायकिंतीर्थंचक्षमंभवेत् ॥ यूयंसर्वगताःश्रेष्ठाःसमाधिध्यानतत्पराः ॥६३॥ सर्वतीर्थावगाहेनकृतपुण्यात्मनोऽमलाः॥ यथावच्छृण्वतेमह्यंश्रद्दधानाय
विस्तरात् ॥६४॥ कथयस्वप्रसादेनसर्वतीर्थविचक्षण ॥६५॥ ब्राह्मणउवाच ॥ शृणुराजेन्द्रवक्ष्यामियत्पृष्टंतीर्थसेवनम् ॥ कस्यदेवस्यकृपयागर्भनि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्वारणंभवेत् ॥६६॥ सेव्यःश्रीरामचन्द्रोऽसौसंसारज्वरनाशकः ॥ पूज्यःसएवभगवान्पुरुषोत्तमसंज्ञकः ॥६७॥ नानापुर्योमयादृष्टाःसर्वपापक्षयङ्कराः॥
अयोध्यासरयूस्तापीतथाद्वारंहरेःपरम्॥६८॥अवन्तीविमलाकाञ्चीरेवासागरगामिनी ॥गोकर्णंहाटकाख्यंचहत्याकोटिविनाशनम्॥६९॥मल्लिकाख्यो
महाशैलोमोक्षदःपश्यतांनृणाम् ॥ यत्राङ्गेषुनृणांतोयंश्यामंवानिर्मलंभवेत् ॥७०॥ पातकस्यापहारीदंमयादृष्टंतुतीर्थकम् ॥मयाद्वारवतीदृष्टासुरासुरनि
षेविता ॥७१॥ गोमतीयत्रवहतिसाक्षाद्ब्रह्मजलाशुभा ॥ यत्रस्वापोलयःप्रोक्तोमृतिर्मोक्षइतिश्रुतिः ॥७२॥ यस्यांसंवसतांनॄणांनकलिःप्रभवेत्क्वचित् ॥
चक्राङ्कायत्रपाषाणामानवाअपिचक्रिणः ॥ ७३ ॥ पशवःकीटपक्ष्याद्याःसर्वेचक्रशरीरिणः॥ त्रिविक्रमोवसेद्यस्यांसर्वलोकैकपालकः ॥ ७४ ॥ सापुरी
तुमहापुण्यैर्मयादृग्गोचरीकृता॥ कुरुक्षेत्रंमयादृष्टंसर्वहत्यापनोदनम् ॥७५॥ स्यमन्तपञ्चकंयत्रमहापातकनाशनम् ॥वाराणसीमयादृष्टाविश्वनाथकृता
लया॥यत्रोपदिशतेमन्त्रंतारकंब्रह्मसंज्ञितम्॥७६॥यस्यांमृताःकीटपतङ्गभृङ्गाःपश्वादयोवासुरयोनयोवा ॥स्वकर्मसम्भोगसुखंविहायगच्छन्तिकैलासम
तीतदुःखाः ॥७७॥ मणिकर्णियत्रतीर्थंयस्यामुत्तरवाहिनी॥करोतिसंसृतेर्बन्धच्छेदंपापकृतामपि॥७८॥कपार्दिनःकुण्डलिनःसर्पभूषाधरावराः॥गजचर्म
परीधानावसन्तिगतदुःखकाः ॥ ७९॥ कालभैरवनामात्रकरोतियमशासनम् ॥ नकरोतिनृणांवार्तांयमोदण्डधरःप्रभुः ॥८०॥ एतादृशीमयादृष्टाकाशी
विश्वेश्वराङ्किता ॥ अनेकान्यपितीर्थानिमयादृष्टानिभूमिप ॥ ८१ ॥ परमेकंमहच्चित्रंयदृष्टंनीलपर्वते ॥ पुरुषोत्तमसान्निध्येतन्नक्वाप्यक्षिगोचरम्॥८२॥
इतिश्रीपाद्मेमहापुराणेपातालखण्डेशेषवा०रामाश्व०ब्राह्मणसमागमोनामसप्तदशोऽध्यायः ॥ १७ ॥ ब्राह्मणउवाच ॥ राजंस्त्वंशृणुयद्वृत्तंनीलेपर्वतस
त्तमे ॥ यच्छ्रद्दधानाःपुरुषायान्तिब्रह्मसनातनम् ॥ १ ॥ मयापर्यटतातत्रगतंनीलाभिधेगिरौ ॥ गङ्गासागरतोयेनक्षालितप्राङ्गणेमुहुः ॥ २ ॥ तत्रभि
ल्लामयादृष्टाःपर्वताग्रेधनुर्भृतः ॥ चतुर्भुजामूलफलैर्भक्ष्यैर्निर्वाहितक्लमाः ॥ ३ ॥ तदामेमनसिक्षिप्रंसंशयःसुमहानभूत् ॥ चतुर्भुजाःकिमेतेवैधनुर्बाण
धरानराः ॥४॥वैकुण्ठवासिनांरूपंदृश्यतेविजितात्मनाम् ॥ कथमेतैरुपालब्धंब्रह्माद्यैरपिदुर्लभम् ॥५॥शङ्खचक्रगदाशार्ङ्गपद्मोल्लसितपाणयः ॥ वनमा
लापरीताङ्गाविष्णुभक्ताइवान्तिके ॥६॥संशयाविष्टचित्तेनमयापृष्टंतदानृप ॥ यूयंकेबतयुष्माभिर्लब्धंचातुर्भुजंकथम् ॥७॥तदातैर्बहुहास्यंतुकृत्वामांप्र
तिभाषितम् ॥ ब्राह्मणोऽयंनजानातिपिण्डमाहात्म्यमद्भुतम् ॥ ८ ॥ इतिश्रुत्वाऽवदंचाहंकःपिण्डःकस्यदीयते ॥ तन्ममब्रूतधर्मिष्ठाश्चतुर्भुजशरीरिणः

१ 'गच्छन्ति मुक्तिं समतीतदुःखा'' इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

॥ ९ ॥ तदासद्वाक्यमाकर्ण्यकथितंतैर्महात्मभिः ॥ सर्वंतत्रतुयद्वृत्तंचतुर्भुजभवादिकम् ॥१०॥ किराताऊचुः ॥ शृणुब्राह्मणवृत्तान्तमस्माकंपृथुकःशि
शुः ॥ नित्यंजम्बूफलादीनिभक्षयन्क्रीडयाचरन् ॥ ११ ॥ एकदारममाणस्तुगिरिशृङ्गंमनोरमम् ॥ समारुरोहशिशुभिःसमन्तात्परिवारितः॥१२॥
तदातत्रददर्शाथदेवायतनमद्भुतम् ॥ गारुत्मतादिमणिभिःखचितंस्वर्णभित्तिकम् ॥ १३ ॥ स्वकान्त्यातिमिरश्रेणींदारयद्दविवर्द्धशम् ॥ दृष्ट्वाविस्मय
मापेदेकिमिदंकस्यवैगृहम् ॥ १४ ॥ गत्वाविलोकयामीतिकिमिदंमहतांपदम् ॥ इतिसञ्चिन्त्यगेहान्तर्जगामबहुभाग्यतः ॥ १५ ॥ ददर्शतत्रदेवेशंसु
रासुरनमस्कृतम् ॥ किरीटहारकेयूरग्रैवेयाद्यैर्विराजितम् ॥१६॥ मनोहरावतंसौचधारयन्तंसुनिर्मलौ ॥ पादपद्मेतुलसिकागन्धमत्तषडङ्घ्रिके॥१७॥
शङ्खचक्रगदाशार्ङ्गपद्माद्यैर्मूर्तिसंयुतैः ॥ उपासिताङ्घ्रिश्रीमूर्तिनारदाद्यैःसुसेवितम् ॥१८॥ केचिद्गायन्तिनृत्यन्तिहसन्तिपरमाद्भुतम् ॥ प्रीणयन्तिम
हाराजंसर्वलोकैकवन्दितम् ॥ १९ ॥ हरिंवीक्ष्यमदीयोऽर्भस्तत्रसञ्जग्मिवान्मुने ॥ देवास्तत्रविधायोच्चैःपूजांधूपादिसंयुताम् ॥ २० ॥ नैवेद्यंश्रीप्रि
यस्यार्थेकृत्वानीराजनंततः ॥ जग्मुःस्वंस्वंगृहंराजन्कृपांपश्यन्तआदरात् ॥ २१ ॥ महाभाग्यवशात्तेनप्राप्तंनैवेद्यसिक्थकम् ॥ पतितंब्रह्मदेवाद्यैर्दुर्लभं
सुरमानुषैः ॥२२॥ तद्भक्षणंचकृत्वाऽथोश्रीमूर्तिमवलोक्यच ॥ चतुर्भुजत्वमाप्तंवैपृथुकेनसुशोभिना ॥ २३ ॥ तदास्माभिर्गृहंप्राप्तोबालकोवीक्षितोमु
हुः ॥ चतुर्भुजत्वंसम्प्राप्तःशङ्खचक्रादिधारकः ॥ २४ ॥ अस्माभिःपृष्टमेतस्यकिमेतज्जातमद्भुतम् ॥ तदाप्रोवाचनःसर्वान्बालकःपरमाद्भुतम् ॥२५॥
शिखराग्रेगतःपूर्वंतत्रदृष्टःसुरेश्वरः ॥ तत्रनैवेद्यसिक्थंतुमयाप्राप्तंमनोहरम् ॥२६॥ तस्यभक्षणमात्रेणकारणेनतुसाम्प्रतम् ॥ चतुर्भुजत्वंसम्प्राप्तोविस्मये
नसमन्वितः ॥२७॥ तच्छ्रुत्वातुवचस्तस्यसद्यःसम्प्राप्तविस्मयैः॥अस्माभिरप्यसौदृष्टोदेवःपरमदुर्लभः॥२८॥अन्नादिकंतत्रभुक्तंसर्वस्वादसमन्वितम्॥
वयंचतुर्भुजाजातादेवस्यकृपयापुनः ॥२९॥ गत्वात्वमपिदेवस्यदर्शनंकुरुसत्तम ॥ भुक्त्वातत्रान्नसिक्थंतुभवविप्रचतुर्भुजः ॥ त्वयापृष्टंयदाश्चर्यंतदुक्तं
वाडवर्षभ ॥३०॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशेषवा०रामाश्व०ब्राह्मणोपदेशोनामाष्टादशोऽध्यायः ॥१८॥ ब्राह्मणउवाच ॥ इतिश्रुत्वातुतद्वा
क्यंभिल्लानांमहदद्भुतम् ॥ अत्याश्चर्यमिदंमत्वाप्रहृष्टोऽभवमित्युत ॥ १ ॥ गङ्गासागरसंयोगेस्नात्वापुण्यकलेवरः ॥ शृङ्गमारुरुहेतत्रमणिमाणि
क्यचित्रितम् ॥ २ ॥ तत्रापश्यंमहाराजदेवंदेवादिवन्दितम् ॥ नमस्कृत्यकृतार्थोऽहंजातोऽन्नप्राशनेनच ॥ ३ ॥ चतुर्भुजत्वंसम्प्राप्तःशङ्खचक्रादिचिह्नि
तम् ॥ पुरुषोत्तमदर्शनेननपुनर्गर्भमाविशम् ॥ ४ ॥ राजंस्त्वमपितत्राशुगच्छनीलाभिधंगिरिम् ॥ कृतार्थंकुरुचात्मानंगर्भदुःखविवर्जितम् ॥ ५ ॥
इत्याकर्ण्यवचस्तस्यवाडवाग्र्यस्यधीमतः ॥ पप्रच्छहृष्टगात्रस्तुतीर्थयात्राविधिंमुनिम् ॥ ६ ॥ राजोवाच ॥ साधुविप्राग्र्यहेसाधोत्वयाप्रोक्तंममान

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

घ ॥ पुरुषोत्तममाहात्म्यंशृण्वतांपापनाशनम् ॥ ७ ॥ ब्रूहितत्तीर्थयात्रायांविधिंश्रुतिसमन्वितम् ॥ विधिनाकेनसम्पूर्णफलप्राप्तिर्नृणांभवेत् ॥ ८ ॥
ब्राह्मणउवाच ॥ शृणुराजन्प्रवक्ष्यामितीर्थयात्राविधिंशुभम् ॥ येनसम्प्राप्यतेदेवःसुरासुरनमस्कृतः ॥ ९ ॥ वलीपलितदेहोवायौवनेनान्वितोऽपि
वा ॥ ज्ञात्वामृत्युमनिस्तीर्यंहरिंशरणमाव्रजेत् ॥ १० ॥ तत्कीर्तनेतच्छ्रवणेवन्दनेतस्यपूजने ॥ मतिरेवप्रकर्तव्यानान्यत्रवनितादिषु ॥११॥ सर्वंनश्व
रमालोक्यक्षणस्थायिसुदुःखदम् ॥ जन्ममृत्युजरातीतंभक्तिवल्लभमच्युतम् ॥ १२ ॥ क्रोधात्कामाद्भयाद्द्वेषाल्लोभाद्दम्भान्नरःपुनः ॥ यथाकथञ्चिद्धि
भजन्नसदुःखंसमश्नुते ॥१३॥ सहरिर्ज्ञायतेसाधुसङ्गमात्पापवर्जितात् ॥ यषांकृपातःपुरुषाभवन्त्यसुखवर्जिताः ॥१४॥ तेसाधवःशान्तरागाःकाम
लोभविवर्जिताः ॥ ब्रुवन्तियन्महाराजतत्संसारनिवर्तकम् ॥१५ ॥ तीर्थेषुलभ्यतेसाधूरामचन्द्रपरायणः ॥ यद्दर्शनंनृणांपापराशिदाहाशुशुक्षणिः ॥
॥ १६ ॥ तस्मात्तीर्थेषुगन्तव्यंनरैःसंसारभीरुभिः ॥ पुण्योदकेषुसततंसाधुश्रेणिविराजिषु ॥ १७ ॥ तानितीर्थानिविधिनादृष्टानिप्रहरन्त्यघम् ॥
तंविधिंनृपशार्दूलकुरुष्वश्रुतिगोचरम् ॥ १८ ॥ विरागंजनयेत्पूर्वंकलत्रादिकुटुम्बके ॥ असत्यभूतंतज्ज्ञात्वाहरिंतुमनसास्मरेत् ॥ १९ ॥ क्रोशमात्रं
ततोगत्वारामरामेतिचब्रुवन् ॥ तत्रतीर्थादिषुस्नात्वाक्षौरंकुर्याद्विधानवित् ॥ २० ॥ मनुष्याणांचपापानितीर्थानिप्रतिगच्छताम् ॥ केशानाश्रित्यति
ष्ठन्तितस्माद्वपनमाचरेत् ॥२१॥ ततोदण्डंतुनिर्ग्रन्थिकमण्डलुमथाजिनम् ॥ बिभृयाल्लोभनिर्मुक्तस्तीर्थवेषधरोनरः ॥ २२ ॥ विधिनागच्छतांनणां
फलावाप्तिर्विशेषतः ॥ तस्मात्सर्वप्रयत्नेनतीर्थयात्राविधिंचरेत् ॥ २३ ॥ यस्यहस्तौचपादौचमनश्चैवसुसंहितम् ॥ विद्यातपश्चकीर्तिश्चसतीर्थफ
लमश्नुते ॥ २४ ॥ हरेकृष्णहरेकृष्णभक्तवत्सलगोपते ॥ शरण्यभगवन्विष्णोमांपाहिबहुसंसृतेः ॥ २५ ॥ इतिब्रुवन्रसनयामनसाचहरिंस्मरन् ॥
पादचारीगतिंकुर्यात्तीर्थंप्रतिमहोदयः ॥ २६ ॥ यानेनगच्छन्पुरुषःसमभागफलंलभेत् ॥ उपानद्भ्यांचतुर्थांशंगोयानेगोवधादिकम् ॥ २७ ॥
व्यवहर्तातृतीयांशंसेवयाष्टमभागभाक् ॥ अनिच्छयाव्रजंस्तत्रतीथमधफलंलभेत् ॥ २८ ॥ यथायथंप्रकर्तव्यातीथानामभियात्रिका ॥ पाप
क्षयोभवत्येवविधिदृष्ट्याविशेषतः ॥ २९ ॥ तत्रसाधून्नमस्कुर्यात्पादवन्दनसेवनैः ॥ तद्द्वाराहरिभक्तिर्हिप्राप्यतेपुरुषोत्तमे ॥ ३० ॥ इतिती
र्थविधिःप्रोक्तःसमासेननविस्तरात् ॥ एवंविधिंसमाश्रित्यगच्छत्वंपुरुषोत्तमम् ॥ ३१ ॥ तुभ्यंतुष्टोमहाराजदास्यतेभक्तिमच्युतः ॥ यथासं
सारनिर्वाहःक्षणादेवभविष्यति ॥ ३२ ॥ तीर्थयात्राविधिंश्रुत्वासर्वपातकनाशनम् ॥ मुच्यतेसर्वपापेभ्यउग्रेभ्यःपुरुषर्षभ ॥ ३३ ॥ सुमति
रुवाच ॥ इतिवाक्यंसभाकर्ण्यववन्देचरणौमहान् ॥ तत्तीर्थदर्शनौत्सुक्यविह्वलीकृतमानसः ॥ ३४ ॥ आदिदेशनिजामात्यंमन्त्रवित्तमसुत्तमम् ॥

CC-0. In Public Domain. Digitization by eGangotri

तीर्थयात्रेच्छयासर्वान्सहनेतुंमनोदधत् ॥ ३५ ॥ मन्त्रिन्पौरजनान्सर्वानादिशत्वंममाज्ञया ॥ पुरुषोत्तमपादाब्जदर्शनप्रीतिहेतवे ॥ ३६ ॥
येमदीयेपुरेलोकायेचमद्वाक्यकारकाः ॥ सर्वेनिर्यान्तुमत्पुर्यामयासहनरोत्तमाः ॥ ३७ ॥ येतुमद्वाक्यमुल्लङ्घ्यस्थास्यन्तिपुरुषागृहे ॥ तेद
ण्डचायमदण्डेनपापिनोऽधर्महेतवः ॥ ३८ ॥ किंतेनसुतवृन्देनबान्धवैःकिंसुदुर्नयैः ॥ यैर्नदृष्टःस्वचक्षुर्भ्यांपुण्यदःपुरुषोत्तमः ॥ ३९ ॥ सूक
रीयूथवत्तेषांप्रसूतिर्विट्प्रभक्षिका ॥ येषांपुत्राश्चपौत्रावाहरिंनशरणंगताः ॥ ४० ॥ योदेवोनाममात्रेणसर्वान्पावयितुंक्षमः ॥ तंनमस्कुरुतक्षि
प्रंमदीयाःप्रकृतिव्रजाः ॥ ४१ ॥ इतिवाक्यंमनोहारिभगवद्गुणगुम्फितम् ॥ प्रजहर्षमहामात्यउत्तमःसत्यनामधृत् ॥ ४२ ॥ हस्तिनंवरमा
रोप्यपटहेनव्यघोषयत ॥ यदादिष्टंनृपेणेहतीर्थयात्रांसमिच्छता ॥ ४३ ॥ गच्छन्तुत्वरितालोकाराज्ञासहमहागिरिम् ॥ दृश्यतांपापसंहारीपु
रुषोत्तमनामधृत् ॥ ४४ ॥ क्रियतांसर्वसंसारसागरोगोष्पदंपुनः ॥ भूष्यतांशङ्खचक्रादिचिह्नैःस्वस्वतनुर्नरैः ॥ ४५ ॥ इत्यादिघोषयामा
सराज्ञादिष्टंयदद्भुतम् ॥ सचिवोरघुनाथाङ्घ्रिध्याननिर्वारितश्रमः ॥ ४६ ॥ तच्छ्रुत्वाताःप्रजाःसर्वाआनन्दरससम्प्लुताः ॥ मनोदधुः
स्वनिस्तारेपुरुषोत्तमदर्शनात् ॥ ४७ ॥ निर्ययुर्ब्राह्मणास्तत्रशिष्यैःसहसुवेषिणः ॥ आशिषंवरदानाढ्यांददतोभूमिपंप्रति ॥ ४८ ॥ क्षत्रियाधन्वि
नोवीरावैश्यावस्तुक्रयाश्रिताः ॥ शूद्राःसंसारनिस्तारहर्षितस्वीयविग्रहाः ॥ ४९ ॥ रजकाश्चर्मकाःक्षौद्राःकिराताभित्तिकारकाः ॥ सूचीवृत्त्याचजीव
न्तस्ताम्बूलक्रयकारकाः ॥ ५० ॥ तालवाद्यधरायेचयेचरङ्गोपजीविनः ॥ तैलविक्रयिणश्चैववस्त्रविक्रयिणस्तथा ॥५१॥ सूतावदन्तःपौराणींवार्तांहर्ष
समन्विताः ॥ मागधावन्दिनस्तत्रनिर्गताभूमिपाज्ञया ॥५२॥ भिषग्वृत्त्याचजीवन्तस्तथापाशककोविदाः ॥ पाकस्वादुरसाभिज्ञाहास्यवाक्यानुरञ्ज
काः ॥ ५३ ॥ ऐन्द्रजालिकविद्याधास्तथावार्तासुकोविदाः ॥ प्रशंसन्तोमहाराजंनिर्ययुःपुरमध्यतः ॥ ५४ ॥ राजापितत्रनिर्वर्त्यप्रातःसन्ध्यादिकाःक्रि
याः ॥ ब्राह्मणंतापसश्रेष्ठमानिनायसुनिर्मलम् ॥५५॥ तदाज्ञयामहाराजोनिर्जगामपुराद्बहिः॥लोकैरनुगतोराजाबभौचन्द्रइवोडुभिः ॥५६॥ क्रोशमा
त्रंसगत्वाऽथक्षौरंकृत्वाविधानतः ॥ दण्डंकमण्डलुंबिभ्रन्मृगचर्मतथाशुभम् ॥५७॥ शुभवेषेणसंयुक्तोहरिध्यानपरायणः ॥ कामक्रोधादिरहितंमनोबिभ्र
न्महायशाः ॥५८॥ तदादुन्दुभयोभेर्यआनकाःपणवास्तथा ॥ शङ्खवीणादिकाश्चैवाध्मातास्तद्वादकैर्मुहुः ॥५९॥ जयदेवेशदुःखघ्नपुरुषोत्तमसंज्ञित॥
दर्शयस्वतनुंमह्यंवदन्तोनिर्ययुर्जनाः ॥६०॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशेषवा०रामाश्व०रत्नग्रीवस्यतीर्थप्रयाणंनामैकोनविंशोऽध्यायः॥१९॥
सुमतिरुवाच ॥ अथप्रयातेभूपालेसर्वलोकसमन्विते ॥ महाभागैर्वैष्णवैश्चगायकैःकृष्णकीर्तनम्॥ १ ॥ शुश्रावासौमहाराजोमार्गेगोविन्दकीर्तनम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जयमाधवभक्तानांशरण्यपुरुषोत्तम ॥ २ ॥ मार्गेतीर्थान्यनेकानिकुर्वन्पश्यन्महोदयम् ॥ तापसब्राह्मणात्तेषांमहिमानमथाशृणोत् ॥ ३ ॥ विचित्रवि
ष्णुवार्ताभिर्विनोदितमनानृपः ॥ मार्गेमार्गेमहाविष्णुंगापयामासगायकान् ॥ ४ ॥ दीनान्धकृपणानांचपङ्गूनांवासनोचितम् ॥ दानंददौमहाराजो
बुद्धिमान्विजितेन्द्रियः ॥ ५ ॥ अनेकतीर्थविरजमात्मानंभव्यतांगतम् ॥ कुर्वन्ययौस्वीयलोकैर्हरिध्यानपरायणः ॥ ६ ॥ नृपोगच्छन्ददर्शाग्रेनदीं
पापप्रणाशिनीम्॥ चक्राङ्कितग्रावयुतांमुनिमानसनिर्मलाम्॥ ७ ॥अनेकमुनिवृन्दानांबहुश्रेणिविराजिताम् ॥ सारसादिपतत्रीणांकूजितैरुपशोभिताम्
॥ ८ ॥ दृष्ट्वापप्रच्छविप्राग्र्यंतापसंधर्मकोविदम् ॥ अनेकतीर्थमाहात्म्यविशेषज्ञानजृम्भितम् ॥ ९ ॥ स्वामिन्केयंनदीपुण्यामुनिवृन्दनिषेविता ॥ क
रोतिममचित्तस्यप्रमोदभरनिर्भरम् ॥ १० ॥ इतिश्रुत्वावचस्तस्यराजराजस्यधीमतः ॥ वक्तुंप्रचक्रमेविद्वांस्तीर्थमाहात्म्यमुत्तमम् ॥११ ॥ ब्राह्मणउवा
च ॥ गण्डकीयंनदीराजन्सुरासुरनिषेविता ॥ पुण्योदकपरीवाहहतपातकसञ्चया ॥ १२ ॥ दर्शनान्मानसंपापंस्पर्शनात्कर्मजंदहेत् ॥ वाचिकंस्वीय
तोयस्यपानतःपापसञ्चयम् ॥ १३ ॥ पुरादृष्ट्वाप्रजानाथःप्रजाःसर्वाविपापिनीः ॥ स्वगण्डविप्रुषोऽनेकपापघ्नींसृष्टवानिमाम् ॥ १४ ॥ एनांनदींयेपु
ण्योदांस्पृशन्तिसुतरङ्गिणीम् ॥ तेगर्भभाजोनैवस्युरपिपापकृतोनराः ॥ १५ ॥ अस्यांभवायेचाश्मानश्चक्रचिह्नैरलङ्कृताः ॥ तेसाक्षाद्भगवन्तोहिस्व
स्वरूपधराःपराः ॥ १६ ॥ शिलांसम्पूजयेद्यस्तुनित्यंचक्रयुतांनरः ॥ नजातुसजनन्यावैजठरंसमुपाविशेत् ॥ १७ ॥ पूजयेद्योनरोधीमाञ्शालग्राम
शिलांवराम् ॥ तेनाचारवताभाव्यंदम्भलोभवियोगिना ॥ १८ ॥ परदारपरद्रव्यविमुखेननरेणहि ॥ पूजनीयःप्रयत्नेनशालग्रामःसचक्रकः॥ १९ ॥
द्वारवत्यांभवंचक्रंशिलावैगण्डकीभवा ॥ पुंसांक्षणाद्धरत्येवपापंजन्मशतार्जितम् ॥ २० ॥ अपिपापसहस्राणांकर्तातावन्नरोभवेत् ॥शालग्रामशिला
तोयंपीत्वापूतोभवेत्क्षणात् ॥ २१ ॥ ब्राह्मणःक्षत्रियोवैश्यःशूद्रोवेदपथिस्थितः ॥ शालग्रामंपूजयित्वागृहस्थोमोक्षमाप्नुयात् ॥ २२ ॥ नजातुचि
त्स्त्रियाकार्यंशालग्रामस्यपूजनम् ॥ भर्तृहीनाथसुभगास्वर्गलोकहितैषिणी ॥ २३ ॥ मोहात्स्पृष्ट्वापिमहिलाजन्मशीलगुणान्विता ॥ हित्वापुण्यसमू
हंसासत्वरंनरकंव्रजेत ॥ २४ ॥ स्त्रीपाणिमुक्तपुष्पाणिशालग्रामशिलोपरि ॥ पवेरधिकपातानिवदन्तिब्राह्मणोत्तमाः ॥ २५ ॥ चन्दनंविषसङ्काशं
कुसुमंवज्रसन्निभम् ॥ नैवेद्यंकालकूटाभंभवेद्भगवतःकृतम् ॥ २६ ॥ तस्मात्सर्वात्मनात्याज्यःस्त्रियास्पर्शःशिलोपरि ॥ कुर्वतीयातिनरकंयावदिन्द्रा
श्चतुर्दश ॥ २७ ॥ अपिपापसमाचारोब्रह्महत्यायुतोऽपिवा ॥ शालग्रामशिलातोयंपीत्वायातिपरांगतिम् ॥ २८ ॥ तुलसीचन्दनंवारिशङ्खोघण्टाथच
क्रकम् ॥ शिलाताम्रस्यपात्रंतुविष्णोर्नामपदामृतम् ॥ २९ ॥ पदामृतंतुनवभिःपापराशिप्रदाहकम् ॥ वदन्तिमुनयःशान्ताःसर्वशास्त्रार्थकोविदाः ॥

CC-0. In Public Domain. Digitization by eGangotri

॥ ३० ॥ सर्वतीर्थपरिस्नानात्सर्वक्रतुसमर्चनात् ॥ पुण्यंभवतियद्राजन्बिन्दौबिन्दौतदद्भुतम्॥ ३१ ॥शालग्रामशिलायत्रपूज्यतेपुरुषोत्तमैः ॥ तत्रयो
जनमात्रंतुतीर्थकोटिसमन्वितम् ॥ ३२ ॥ शालग्रामाःसमाःपूज्याःसमेषुद्वितयंनहि ॥ विषमाएवसम्पूज्याःविषमेषुत्रयंनहि ॥ ३३॥ द्वारावतीभवंच
क्रंतथावैगण्डकीभवम् ॥ उभयोःसङ्गमोयत्रतत्रगङ्गासमुद्रगा॥ ३४ ॥ रूक्षाःकुर्वन्तिपुरुषानायुःश्रीबलवर्जितान्[1] ॥ तस्मात्स्निग्धामनोहारिरूपिण्यो
ददतिश्रियम् ॥ ३५ ॥ अयुष्कामोनरोयस्तुधनकामोहियःपुमान् ॥ पूजयन्सर्वमाप्नोतिपारलौकिकमैहिकम् ॥ ३६ ॥ प्राणान्तकालेपुंसस्तुभवेद्भा
ग्यवतोनृप ॥ वाचिनामहरेःपुण्यंशिलाहृदितदन्तिक ॥ ३७ ॥ गच्छत्सुप्राणमार्गेषुयस्यविश्रम्भतोऽपिचेत् ॥ शालग्रामशिलास्फूर्तिस्तस्यमुक्तिर्नसं
शयः ॥ ३८ ॥ पुराभगवताप्रोक्तमम्बरीषायधीमते ॥ ब्राह्मणान्यासिनःस्निग्धाःशालग्रामशिलास्तथा॥३९॥स्वरूपत्रितयंमह्यमेतद्धिक्षितिमण्डले॥
पापिनांपापनिर्हारंकर्तुंधृतमुदञ्चता ॥ ४० ॥ निन्दन्तिपापिनोयेवाशालग्रामशिलांसकृत् ॥ कुम्भीपाकेप्रपच्यन्तेयावदाभूतसम्प्लवम् ॥ ४१ ॥
पूजांसमुद्यतंकर्तुंयोवारयतिमूढधीः ॥ तस्यमातापितावन्धुवर्गानरकभागिनः ॥ ४२ ॥ योवाकथयतिप्रेष्ठंशालग्रामार्चनंकुरु ॥ सकृतार्थोनय
त्याशुवैकुण्ठंस्वस्यपूर्वजान् ॥ ४३॥ अत्रैवोदाहरन्तीममितिहासंपुरातनम् ॥ मुनयोवीतरागाश्चकामक्रोधविवर्जिताः ॥४४॥ पुराकीकटसंज्ञेवैदेशेध
र्मविवर्जिते ॥ आसीत्पुल्कसजातीयोनरःशबरसंज्ञितः ॥ ४५ ॥ नित्यंजन्तुवधोद्युक्तःशरासनधरोमुहुः ॥ तीर्थप्रतियियासूनांबलाद्धरतिजीवितम्
॥ ४६ ॥ अनेकप्राणिहत्याकृत्परस्वेनिरतःसदा ॥ सदारागादिसंयुक्तःकामक्रोधादिसंयुतः ॥ ४७ ॥ विचरत्यनिशंभीमेवनेप्राणिवधङ्करः ॥ विष
संसक्तबाणाग्ररूढचापगुणोद्धुरः ॥ ४८ ॥ सकदापर्यटन्व्याधःप्राणिमात्रभयङ्करः ॥ कालंप्राप्तंनजानातिसमीपेऽप्युग्रमानसः[2] ॥ ४९ ॥ यमदूतास्तुस
म्प्राप्ताःपाशमुद्गरपाणयः ॥ ताम्रकेशादीर्घनखालम्बदंष्ट्राभयानकाः ॥ ५० ॥ श्यामालोहस्यनिगडान्बिभ्रतोमोहकारकाः ॥ बध्नन्तुपापिनंह्येनंप्राणि
मात्रभयङ्करम् ॥५१॥ कदाचिन्मनसानायंप्राणिमात्रोपकारकः ॥ परदारपरद्रव्यपरद्रोहपरायणः ॥५२॥ एतस्यजिह्वांमहतीमहंनिष्कासयाम्यतः ॥
एकोवदतिचैतस्यचक्षुरुत्पाटयाम्यहम् ॥५३॥ एकोवदतिचैतस्यकरौकृन्तामिपापिनः ॥ अन्योवदत्यहंकर्णौकर्तयामिदुरात्मनः ॥५४॥ एवंवदन्तः
सुभृशंदन्तैर्दन्तनिपीडकाः ॥ आगत्यतंदुरात्मानंसायुधास्तस्थुरुन्मदाः ॥ ५५ ॥ एकोदूतस्तदासर्परूपंधृत्वाऽदशत्पदे ॥ सदष्टमात्रःसहसागतासुः
पर्यजायत ॥ ५६ ॥ तदातंलोहपाशेनबद्धातेयमकिङ्कराः ॥ कशाभिस्ताडयामासुर्मुद्गरैःप्राहरन्क्रुधा ॥ ५७ ॥ अहोदुष्टदुरात्मंस्त्वंकदाचिन्ना

१ 'आयुःश्रीकान्तिवार्जितान्' इ० । आयुःश्रीकीर्तिवार्जितान्'–इ० 'आयुर्वित्तविवार्जितान्'इ० च पा० । २ 'मुग्धमानसः' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चरःशुभम् ॥ मनसापियतस्त्वांवैक्षेप्स्यामोरौरवेषुच ॥ ५८ ॥ त्वङ्मांसंवायसारौद्राभक्षयिष्यन्तिवैक्षुधा ॥ आजन्मतस्तुभवतानकृतंहरिसेवनम्
॥ ५९ ॥ त्वयाकलत्रपुत्राद्याद्रोहंकृत्वासुपोपिताः ॥ नकदाचित्स्मृतोदेवःपापहारीजनार्दनः ॥ ६० ॥ तस्मात्त्वांलोहशङ्कौवाकुम्भीपाकेचरौरवे ॥
धर्मराजाज्ञयासर्वेनेष्यामोबहुताडनैः ॥ ६१ ॥ एवमुक्त्वायदानेतुंसमैच्छन्यमकिङ्कराः ॥ तावत्प्राप्तोमहाविष्णुचरणाब्जपरायणः ॥ ६२ ॥
यमदूतास्तदादृष्टावैष्णवेनमहात्मना ॥ पाशमुद्गरदण्डादिदुष्टायुधधरागणाः ॥ ६३ ॥ पुल्कसंलोहनिगडैर्बद्धायातुंसमुद्यताः ॥ बन्धबन्धग्रस
च्छिन्धिभिन्धिभिन्धीतिवादिनः ॥ ६४ ॥ तदाकृपालुस्तंप्रेक्ष्यपद्मनाभपरायणः ॥ अत्यन्तकृपयायुक्तंचेतस्तत्रतदाकरोत् ॥ ६५ ॥ असौमहा
दुष्टपीडांमायातुममसन्निधौ ॥ मोचयाम्यहमद्यैवयमदूतेभ्यएवच ॥ ६६ ॥ इतिकृत्वामतिंतस्मिन्कृपायुक्तोमुनीश्वरः ॥ शालग्रामशिलांहस्तेगृही
त्वास्यगतोऽन्तिके ॥ ६७ ॥ तस्यपादोदकंपुण्यंतुलसीदलमिश्रितम् ॥ मुखेविनिक्षिपन्कर्णेरामनामजजापह ॥ ६८ ॥ तुलसींमस्तकेतस्यधार
यामासवैष्णवः ॥ शिलांहृदिमहाविष्णोर्धृत्वाप्राहसवैष्णवः ॥ ६९ ॥ गच्छन्तुयमदूतावैयातनासुपरायणाः ॥ शालग्रामशिलास्पर्शोदहतात्पा
तकंमहत् ॥ ७० ॥ इत्युक्तवतितस्मिन्वैगणाविष्णोर्महाद्भुताः ॥ आययुस्तस्यसं[1]विधेशिलास्पर्शाद्धृतांहसः ॥ ७१ ॥ पीतवस्त्राःशङ्खचक्रगदापद्म
विराजिताः ॥ आ[2]गत्यमोचयामासुर्लोहपाशाद्दुरासदात् ॥ ७२ ॥ मोचयित्वामहापापकारकंपुल्कसंनरम् ॥ ऊचुःकिमर्थंबद्धोऽयंवैष्णवःपूज्यदेह
भृत् ॥ ७३ ॥ कस्याज्ञाकारकायूयंयदधर्मप्रकारकाः ॥ मुञ्चन्तुवैष्णवंत्वेनंकिमर्थंविधृतोह्ययम् ॥ ७४ ॥ इतिवाक्यंसमाकर्ण्यजगदुर्यमकिङ्कराः ॥
धर्मराजाज्ञयाप्राप्तानेतुंपापिनमुद्यताः ॥ ७५ ॥ नासौकदाचिन्मनसाप्राणिमात्रोपकारकः ॥ प्राणिहत्यामहापापकारीदुष्टशरीरभृत् ॥ ७६ ॥
नॄन्बहूंस्तीर्थयात्रायांगच्छतोऽसौव्यलुण्ठयत् ॥ परदाररतोनित्यंसर्वपापाधिकारकः ॥ ७७ ॥ तस्मान्नेतुंवयंप्राप्ताःपापिनंपुल्कसंनरम् ॥ भवद्भि
र्मोचितःकस्मादकस्मादागतैर्भटैः ॥ ७८ ॥ विष्णुदूताऊचुः ॥ ब्र[3]ह्महत्यादिकंपापंप्राणिकोटिवधोद्भवम् ॥ शालग्रामशिलास्पर्शःसर्वंदहतित
त्क्षणात् ॥ ७९ ॥ रामेतिनामयच्छ्रोत्रेविश्रम्भादागतंयदि ॥ करोतिपापसन्दाहंतूलंवह्निकणोयथा ॥ ८० ॥ तुलसीमस्तकेयस्यशिलाहृदिम
नोहरा ॥ मुखेकर्णेऽथवारामनाममुक्तस्तदैवसः ॥ ८१ ॥ तस्मादनेनतुलसीमस्तकेविधृतापुरा ॥ श्राविरंरामनामाशुशिलाहृदिसुधारिता ॥ ८२ ॥
तस्मात्पापसमूहोऽस्यदग्धःपुण्यकलेवरः ॥ यास्यतेपरमंस्थानंपापिनांयत्सुदुर्लभम् ॥ ८३ ॥ वर्षायुतंतत्रभुक्त्वाभोगान्सर्वमनोहरान् ॥ भारते

---

१ 'गण्डक्याः' इ० पा० । २ एतत्पूर्वम्–"मुञ्चन्तु वैष्णवं त्वेनं किमर्थं विधृतो ह्ययम्" इ० पा० । ३ 'ब्रह्महत्याकरो वास्तु प्राणिकोट्यपकारकः' इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

जन्मसम्प्राप्यसमाराध्यजगद्गुरुम् ॥ ८४ ॥ प्राप्स्यतेपरमंस्थानंसुरासुरसुदुर्लभम् ॥ नज्ञातोमहिमासम्यक्छिलायाःपरमेष्ठिनः ॥ ८५ ॥ दृष्टास्पृ
ष्टाऽर्चितावापिसर्वपापहराक्षणात् ॥ इत्युक्त्वाविरताःसर्वेमहाविष्णोर्गणामुदा ॥ ८६ ॥ याम्यास्तेकिङ्कराराज्ञेकथयामासुरद्भुतम् ॥ वैष्णवोहर्षमा
पेदेरघुनाथपरायणः ॥ ८७ ॥ मुक्तोऽसौयमपाशाच्चगमिष्यतिपरंपदम् ॥ तदाऽऽजगामविमलंकिङ्किणीजालमण्डितम् ॥ ८८ ॥ विमानंदेवलोका
त्तुमनोहारिमहाद्भुतम् ॥ तत्रारुह्यगतःस्वर्गंमहापुण्यैर्निषेवितम् ॥ ८९ ॥ भोगान्भुक्त्वासविपुलानाजगाममहीतलम् ॥ काश्यांजन्मसमासाद्यशु
चिवाडवसत्कुले ॥ ९० ॥ आराध्यजगतामीशंगतवान्परमंपदम् ॥ सपापीसाधुसङ्गत्याशालग्रामशिलांस्पृशन् ॥ ९१ ॥ महापीडाविनिर्मुक्तो
गतवान्परमंपदम् ॥ मयातेऽभिहितंराजन्गण्डकीचरितंमहत् ॥ ९२ ॥ श्रुत्वाविमुच्यतेपापैर्भुक्तिमुक्तिंचविन्दति ॥९३॥ इतिश्रीपाद्मेमहापुराणेपाता
लखण्डेशेषवा०रामाश्व०गण्डकीमाहात्म्यंनामविंशोऽध्यायः ॥२०॥ सुमतिरुवाच ॥ एतन्माहात्म्यमतुलंगण्डक्याःकर्णगोचरम् ॥ कृत्वाकृतार्थमा
त्मानममन्यतनृपोत्तमः ॥ १ ॥ स्नात्वातीर्थेपितॄन्त्सर्वान्त्सन्तर्प्यजहृषेमहान् ॥ शालग्रामशिलापूजांकुर्वन्वाडववाक्यतः ॥ २ ॥ चतुर्विंशच्छिला
स्तत्रगृहीत्वासनृपोत्तमः ॥ पूजयामासप्रेम्णाचचन्दनाद्युपचारकैः ॥ ३ ॥ तत्रदानानिदत्त्वाचदीनान्धेभ्योविशेषतः ॥ गन्तुंप्रचक्रमेराजापुरुषोत्त
ममन्दिरम् ॥ ४ ॥ एवंक्रमेणसम्प्राप्तोगङ्गासागरसङ्गमम् ॥ कृत्वाक्षिगोचरंतंचब्राह्मणंपृष्टवान्मुदा ॥ ५ ॥ स्वामिन्वदकियद्दूरेनीलाख्यःपर्वतोमहा
न् ॥ पुरुषोत्तमसंवासःसुरासुरनमस्कृतः ॥ ६ ॥ तदाश्रुत्वामहद्वाक्यंरत्नग्रीवस्यभूपतेः ॥ उवाचविस्मयाविष्टोराजानंप्रतिसादरम् ॥ ७ ॥
राजन्नेतत्स्थलंनीलपर्वतस्यनमस्कृतम् ॥ किमर्थंदृश्यतेनैवमहापुण्यफलप्रदम् ॥ ८ ॥ पुनःपुनरुवाचेदंस्थलंनीलस्यभूभृतः ॥ कथंनदृश्य
तेराजन्पुरुषोत्तमवासभृत् ॥ ९ ॥ अत्रस्नातंमयासम्यग्भिल्लाश्चात्राक्षिगोचराः ॥ अनेनैवपथाराजन्नारूढंपर्वतोपरि ॥ १० ॥ इतितद्वा
क्यमाकर्ण्यविव्यथेमानसेनृपः ॥ नीलभूधरदर्शायकुर्वन्नुत्कण्ठितंमनः ॥ ११ ॥ उवाचतत्कथंविप्रदृश्येतपुरुषोत्तमः ॥ कथंवादृश्यतेनीलस्त
दुपायंवदस्वनः ॥ १२ ॥ तदावाक्यंसमाकर्ण्यरत्नग्रीवस्यभूपतेः ॥ तापसोब्राह्मणोवाक्यमुवाचनृपविस्मितः ॥ १३ ॥ गङ्गासागरसंयोगे
स्नात्वाऽस्माभिर्महीपते ॥ स्थातव्यंतावदेवात्रयावन्नीलोनदृश्यते ॥ १४ ॥ गीयतेपापहादेवःपुरुषोत्तमसंज्ञितः ॥ करिष्यतेकृपामाशुभक्तवत्सल
नामधृत् ॥ १५ ॥ त्यजत्यसौनवैभक्तान्देवदेवशिरोमणिः ॥ अनेकैरक्षिताभक्तास्तद्ध्यायस्वमहामते ॥ १६ ॥ इतिवाक्यंसमाकर्ण्यराजाव्यथित
चेतसा॥ स्नात्वागङ्गाब्धिसंयोगेततोऽनशनमादधात् ॥१७॥ करिष्यतिकृपांयर्हिदर्शनेपुरुषोत्तमः ॥पूजांकृत्वाऽशनंकुर्यामन्यथाऽनशनंव्रतम्॥१८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिकृत्वासनियमंगङ्गासागररोधसि ॥ गायन्हरिगुणग्राममुपवासमथाचरत् ॥१९॥ राजोवाच॥जयदीनदयाकरप्रभोजयदुःखापहमङ्गलाह्वय ॥जय
भक्तजनार्तिनाशनकृतवर्ष्मञ्जयदुष्टघातक ॥२०॥ अम्बरीषमथवीक्ष्यदुःखितंविप्रशापहतसर्वमङ्गलम् ॥ धारयन्निजकरेसुदर्शनंसंररक्षजठराधिवासतः
॥२१॥ दैत्यराजपितृकारितव्यथःशूलपाशजलवह्निपातनैः ॥ श्रीनृसिंहतनुधारिणात्वयारक्षितःसपदिपश्यतःपितुः ॥२२॥ ग्राहवक्रपतिताङ्घ्रिमुद्भटं
वारणेन्द्रमतिदुःखपीडितम् ॥ वीक्ष्यसाधुकरुणार्द्रमानसस्त्वंगरुत्मतिकृतारुहक्रियः ॥२३॥ त्यक्तपक्षिपतिरात्तचक्रकोवेगकम्पयुतमालिकाम्बरः ॥
गीयसेऽसुभिरसुष्यनक्रतोमोचकःसपदितद्विनाशकः ॥ २४ ॥ यत्रयत्रतवसेवकार्दनंतत्रतत्रबतदेहधारिणा ॥ पाल्यतेचभवतानिजःप्रभोपापहारिचरि
तैर्मनोहरैः ॥ २५ ॥ दीननाथसुरमौलिहीरकाघृष्टपादतलभक्तवल्लभ ॥ पापकोटिपरिदाहकप्रभोदर्शयस्वममपादपङ्कजम् ॥ २६ ॥ पापकृद्यदिजनो
ऽयमागतोमानसेतवतथाहिदर्शय ॥ तावकावयमघौघनाशनंविस्मृतंनहिसुरासुरार्चित ॥२७॥ येवदन्तितवनामनिर्मलंतेतरन्तिसकलाघसागरम् ॥
संस्मृतिर्यदिकृतातदामयाप्राप्यतांसकलदुःखवारक ॥ २८ ॥ सुमतिरुवाच ॥ एवंगायन्गुणान्रात्रौदिवावापिमहीपतिः ॥ क्षणमात्रंनविश्रान्तोनिद्रामा
पनवैसुखम् ॥२९॥ गायन्गच्छन्गृणंस्तिष्ठन्वदत्येतदहर्निशम् ॥ दर्शयस्वकृपानाथस्वतनुंपुरुषोत्तम ॥३०॥ एवंराज्ञःपञ्चदिनंगतंगङ्गाब्धिसङ्गमे ॥
तदाकृपाब्धिःकृपयाचिन्तयामासगोपतिः ॥ ३१ ॥ असौराजामदीयेनगानेनविगताघकः ॥ पश्यतान्मामकींप्रेष्ठांसुरासुरनमस्कृताम् ॥ ३२ ॥
इतिसञ्चिन्त्यभगवान्कृपापूरितमानसः ॥ संन्यासिवेषमास्थाययर्यौराज्ञोऽन्तिकंविभुः ॥ ३३ ॥ तत्रगत्वामहाराजत्रिदण्डियतिवेषधृत् ॥ भक्तानु
कम्पयाप्राप्तोवीक्षितस्तापसेनहि ॥ ३४ ॥ ॐनमोविष्णवेत्युक्त्वानमश्चक्रेनृपोत्तमः ॥ अर्घ्यपाद्यासनैःपूजांचकारहरिमानसः ॥ ३५ ॥ उवाच
भाग्यमतुलंयद्भवानक्षिगोचरः ॥ अतःपरंदास्यतेमेगोविन्दोनिजदर्शनम् ॥ ३६ ॥ इतिश्रुत्वातुतद्वाक्यंसंन्यासीनिजगादतम् ॥ राजञ्छृणुष्वकथितं
ममवाक्यंविनिःसृतम् ॥ ३७ ॥ अहंज्ञानेनजानामिभूतंभव्यंभवच्चयत् ॥ तस्मादहंब्रुवेकिञ्चिच्छृणुष्वैकाग्रमानसः ॥ ३८ ॥ श्वोमध्याह्नेहरिर्दाता
दर्शनंब्रह्मदुर्लभम् ॥ पञ्चभिःस्वजनैःसाकंयास्यसेपरमंपदम् ॥ ३९ ॥ त्वममात्यश्चमहिलातवतापसवाडवः ॥ पुरेतवकरम्बाख्यःसाधुश्चतन्तु
वायकः ॥ ४० ॥ एतैःपञ्चभिरेतस्मिन्नीलेपर्वतसत्तमे ॥ यास्यसेब्रह्मदेवेन्द्रवन्दितंसुरपूजितम् ॥ ४१ ॥ इत्युक्त्वाऽदृश्यतांप्राप्तोयतिःक्वापि
नदृश्यते ॥ तदाकर्ण्यनृपोहर्षंप्रापचाशुसविस्मयम् ॥ ४२ ॥ राजोवाच ॥ स्वामिन्कोऽसौसमागत्यसंन्यासीमांयदूचिवान् ॥ नदृश्यतेपुनःकुत्र
गतोऽसौचित्तहर्षदः ॥ ४३ ॥ तापसउवाच ॥ राजंस्तवमहाप्रेम्णाकृष्टचित्तःसमभ्यगात् ॥ पुरुषोत्तमनामायंसर्वपापप्रणाशनः ॥ ४४ ॥ श्वोम

CC-0. In Public Domain. Digitization by eGangotri

ध्यान्तेतवपुरोभविष्यतिमहान्गिरिः ॥ तमारुह्यहरिंदृष्ट्वाकृतार्थस्त्वंभविष्यसि ॥ ४५॥ इतिवाक्यसुधापूरनाशितस्वान्तसञ्ज्वरः ॥ हर्षंयमापसनृपो
ब्रह्मापिनहिवेत्तितम् ॥ ४६ ॥ तदादुन्दुभयोनेदुर्वीणापणवगोमुखाः ॥ महानन्दस्तदाह्यासीद्राजराजस्यचेतसि ॥ ४७ ॥ गायन्हरिंक्षणंतिष्ठन्हसञ्ज
ल्पन्ब्रुवन्नमन् ॥ आनन्दंप्रापसुघनंसर्वसन्तापनाशनम् ॥ ४८ ॥ इतिश्रीपाद्मपुराणेपातालखण्डेशेषवा०रामाश्व०संन्यासिदर्शनंनामैकविंशो
ऽध्यायः ॥ २१ ॥ सुमतिरुवाच ॥ अथसर्वंदिनंनीत्वाहरिस्मरणकीर्तनैः ॥ रात्रौसुष्वापगङ्गायारोधस्युरुफलप्रदे ॥ १ ॥ ददर्शस्वप्नमध्येतुसस्वा
त्मानंचतुर्भुजम् ॥ शङ्खचक्रगदापद्मशार्ङ्गकोदण्डधारिणम् ॥ २ ॥ नृत्यन्तंपुरुषोत्तमस्यपुरतःशर्वादिदेवैःसहश्रीमद्भिःस्वतनूधृतैररिगदाम्बूत्थाब्जहे
त्यादिभिः ॥ विष्वक्सेनवरैर्गणैःसुतनुभिःश्रीशंसदोपासितंदृष्ट्वाविस्मयमापलोकविषयंहर्षंतथात्यद्भुतम् ॥ ३ ॥ ददतंमनसोऽभीष्टंपुरुषोत्तमसंज्ञि
तम् ॥ आत्मानंचकृपापात्रममन्यतमहामतिः ॥ ४ ॥ इत्येवंस्वप्नविषयेददर्शनृपसत्तमः ॥ प्रातःप्रबुद्धोविप्रायजगादस्वप्नमीक्षितम् ॥ ५ ॥ तच्छ्रु
त्वावाडवोधीमान्कथयामासविस्मितः ॥ राजंस्त्वयाऽसौदृष्टोयःपुरुषोत्तमसंज्ञितः ॥ ६ ॥ दास्यतेशङ्खचक्रादिचिह्नितांस्वतनुंहरिः ॥ इतिश्रुत्वातु
तद्वाक्यंरत्नग्रीवोमहामनाः ॥ ७ ॥ दापयामासदानानिदीनानांमानसोचितम् ॥ स्नात्वागङ्गाब्धिसंयोगेतर्पयित्वापितॄन्सुरान् ॥ ८ ॥ गायन्हरिगुण
ग्रामंप्रत्यैक्षतचदर्शनम् ॥ ततोमध्याह्नसमयेदिविदुन्दुभयोमुहुः ॥ ९ ॥ नेदुःसुरकराघातबहुशब्दसुशब्दिताः ॥ अकस्मात्पुष्पवृष्टिश्चबभूवनृपम
स्तके ॥ १० ॥ धन्योऽसिनृपवर्यत्वंनीलंपश्याक्षिगोचरम् ॥ शृणोतीतियदावाक्यंनृपोदेवप्रणोदितम् ॥ ११ ॥ तदाससूर्यकोटीनामधिकान्तिध
रोऽद्भुतः ॥ राज्ञोऽक्षिगोचरोजातोनीलनामामहागिरिः ॥ १२ ॥ राजतैःकानकैःशृङ्गैःसमन्तात्परिराजितः ॥ किमग्निःप्रज्वलत्येषद्वितीयःकिमुभा
स्करः ॥ १३ ॥ किमयंवैद्युतःपुञ्जोह्यकस्मात्स्थिरकान्तिधृत् ॥ तापसब्राह्मणोदृष्ट्वानीलप्रस्थंसुशोभितम् ॥ १४ ॥ राज्ञेनिवेदयामासएषपुण्योमहा
गिरिः ॥ तच्छ्रुत्वानृपतिश्रेष्ठःशिरसाप्रणनामह ॥१५॥ धन्योऽस्मिकृतकृत्योऽस्मिनीलोमेदृष्टिगोचरः ॥ अमात्योराजपत्नीचकरम्बस्तन्तुवायकः
॥ १६ ॥ नीलदर्शनसंहृष्टाबभूवुःपुरुषर्षभ ॥ पञ्चैतेविजयेकालेनीलपर्वतमारुहन् ॥ १७ ॥ महादुन्दुभिनिर्घोषाञ्छृण्वन्तोह्यमरैःकृतान् ॥
तस्योपरितनेशृङ्गेचित्रपादपराजिते ॥ १८ ॥ ददर्शहाटकाबद्धंदेवालयमनुत्तमम् ॥ ब्रह्मागत्यसदापूजांकरोतिपरमेष्ठिनः ॥ १९ ॥ नैवेद्यंकुरुते
यत्रहरिसन्तोषकारकम् ॥ दृष्ट्वाथतत्रविमलंदेवायतनमुत्तमम् ॥ २० ॥ प्रविवेशपरीवारैःपञ्चभिःसहसंवृतः ॥ तत्रदृष्ट्वाजातरूपेमहामणिविचित्रिते

१ 'नृत्यञ्जल्पन्हसन्ब्रुवन्' इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २१ ॥ सिंहासनेविराजन्तंचतुर्भुजमनोहरम् ॥ चण्डप्रचण्डविजयजयादिभिरुपासितम् ॥ २२ ॥ प्रणनामसपत्नीकोराजासेवकसंयुतः ॥ प्रणम्यपरमात्मानंमहाराजःसुरोत्तमम् ॥ २३ ॥ स्नापयामासविधिवद्वेदोक्तैःस्नानमन्त्रकैः ॥ अर्घ्यपाद्यादिकंचक्रेप्रीतेनमनसानृपः ॥ २४ ॥ चन्दनेन विलिप्यैनंसुवस्त्रेविनिवेद्यच ॥ धूपमारार्तिकंकृत्वासर्वस्वादुमनोहरम् ॥ २५ ॥ नैवेद्यंभगवन्मूर्त्यैन्यवेदयदथोनृपः ॥ प्रणम्यचस्तुतिंचक्रेतापसब्रा ह्मणेनच ॥ २६ ॥ यथामतिगुणग्रामगुम्फितस्तोत्रसञ्चयैः ॥ २७ ॥ राजोवाच ॥ एकस्त्वंपुरुषःसाक्षाद्भगवान्प्रकृतेःपरः ॥ कार्यकारणतोभिन्नोमहत्त त्त्वादिपूजितः ॥ २८ ॥ त्वन्नाभिकमलाज्जज्ञेब्रह्मासृष्टिविचक्षणः ॥ तथासंहारकर्ताचरुद्रस्त्वन्नेत्रसम्भवः ॥ २९ ॥ त्वयाऽऽज्ञप्तःकरोत्यस्यविश्वस्यप रिचेष्टितम् ॥ त्वत्तोजातंपुराणाद्यज्जगत्स्थास्नुचरिष्णुच ॥ ३० ॥ चेतनाशक्तिमाविश्यत्वमेनंचेतयस्यहो ॥ तवजन्मतुनास्त्येवनान्तस्तवजगत्पते ॥ ३१ ॥ वृद्धिक्षयपरीणामास्त्वयिसन्त्येवनोविभो ॥ तथापिभक्तरक्षार्थंधर्मस्थापनहेतवे ॥ ३२ ॥ करोषिजन्मकर्माणिह्यनुरूपगुणानिच ॥ त्वयामा त्स्यंवपुर्धृत्वाशङ्खस्तुनिहतोऽसुरः ॥ ३३ ॥ वेदाःसुरक्षिताब्रह्मन्महापुरुषपूर्वज ॥ शेषोनवेत्तिनापित्वांभारत्यपिमहेश्वरी ॥ ३४ ॥ किमुतान्येमहा विष्णोमादृशास्तुकुबुद्धयः ॥ मनसात्वांनचाप्नोतिवागियंपरमेश्वरी ॥ ३५ ॥ तस्मादहंकथंत्वांवैस्तोतुंस्यामीश्वरःप्रभो ॥ इतिस्तुत्वासशिरसाप्रणाम मकरोन्मुहुः ॥ ३६ ॥ गद्गदस्वरसंयुक्तोरोमहर्षाङ्किताङ्गकः ॥ इतिस्तुत्याप्रहृष्टात्माभगवान्पुरुषोत्तमः ॥ उवाचवचनंसत्यंराजानंप्रतिसार्थकम् ॥ ३७ ॥ श्रीभगवानुवाच ॥ तवस्तुत्याप्रहर्षोऽभून्ममराजन्महामते ॥ जानीहित्वंमहाराजमांचप्रकृतितःपरम् ॥ ३८ ॥ नैवेद्यभक्षणंत्वंहिशीघ्रंकुरुम नोहरम् ॥ चतुर्भुजत्वमाप्तःसन्गन्तासिपरमंपदम् ॥ ३९ ॥ त्वत्कृतस्तुतिरत्नेनयोमांस्तोष्यतिमानवः ॥ तस्यापिदर्शनंदास्येभुक्तिमुक्तिवरप्रदम् ॥ ४० ॥ इत्येवंवचनंराजाश्रुत्वाभगवतोदितम् ॥ नैवेद्यभक्षणंचक्रेचतुर्भिःसहसेवकैः ॥ ४१ ॥ ततोविमानंसम्प्राप्तंकिङ्किणीजालमण्डितम् ॥ अप्स रोवृन्दसंसेव्यंसर्वभोगसमन्वितम् ॥ ४२ ॥ पुरुषोत्तमसंज्ञंचपश्यन्राजासधार्मिकः ॥ ववन्देचरणौतस्यकृपापात्रकृतात्मकः ॥ ४३ ॥ तदाज्ञयाविमा नेसआरुह्यमहिलायुतः ॥ जगामपश्यतस्तस्यदिविवैकुण्ठमद्भुतम् ॥ ४४ ॥ मन्त्रीधर्मपरोराज्ञःसर्वधर्मविदुत्तमः ॥ ययौसाकंविमानेनललनावृन्दसे वितः ॥ ४५ ॥ तापसब्राह्मणस्तत्रसर्वतीर्थावगाहकः ॥ चतुर्भुजत्वंसम्प्राप्तोययौदेवैर्विमानिभिः ॥ ४६ ॥ करम्बोऽपिमहाराजगानपुण्येनदर्शनम् ॥ प्राप्तोययौसुरावासंसर्वदेवादिदुर्लभम् ॥ ४७ ॥ सर्वेप्रचलिताविष्णुलोकंपरममद्भुतम् ॥ चतुर्भुजाःशङ्खचक्रगदापाथोजधारिणः ॥ ४८ ॥ सर्वेमेघ श्रियःशुद्धालसदम्भोजपाणयः ॥ हारकेयूरकटकैर्भूषिताङ्गाययुर्दिवम् ॥ ४९ ॥ तद्विमानावलींदृष्ट्वालोकैःप्रकृतिभिस्तदा ॥ दुन्दुभीनांतुनिर्घोषस्तैः

CC-0. In Public Domain. Digitization by eGangotri

कृतः कर्णगोचरः ॥ ५० ॥ तदैकोब्राह्मणोह्यासीद्विष्णुपादाब्जवल्लभः ॥ गतस्तद्विरहाकृष्टचेताजातश्चतुर्भुजः ॥ ५१ ॥ तच्चित्रंवीक्ष्यलोकास्तेप्रशंस
न्तोमहोदयम् ॥ गङ्गासागरसंयोगेस्नात्वाऽगुस्तंपुरंप्रति ॥ ५२ ॥ अहोभाग्यंभूमिपतेरत्नग्रीवस्यसन्मतेः ॥ जगामानेनदेहेनतद्विष्णोःपरमंपदम्
॥ ५३ ॥ राजन्नसौनीलगिरिःपुरुषोत्तमसत्कृतः ॥ यंवीक्ष्यैवव्रजन्त्यद्धावैकुण्ठंपरमायनम् ॥ ५४ ॥ एतन्नीलस्यमाहात्म्यंयःशृणोतिसभाग्यवान् ॥
यःश्रावयतिलोकान्वैतौगच्छेतांपरंपदम् ॥ ५५ ॥ एतच्छ्रुत्वातुदुःस्वप्नोनश्यतिस्मृतिमात्रतः ॥ प्रान्तेसंसारनिस्तारंददातिपुरुषोत्तमः ॥ ५६ ॥
योऽसौनीलाधिवासीचसरामःपुरुषोत्तमः ॥ सीतासाक्षान्महालक्ष्मीःसर्वकारणकारणम् ॥ ५७ ॥ हयमेधंचरित्वासलोकान्वैपावयिष्यति ॥ यन्ना
मब्रह्महत्यायाःप्रायश्चित्तेप्रदिश्यते ॥ ५८ ॥ इदानींत्वद्वयःप्राप्तोनीलेपर्वतसत्तमे ॥ पुरुषोत्तमदेवंत्वंनमस्कुरुमहामते ॥५९॥ तत्रनिष्पापिनोभूत्वा
यास्यामःपरमंपदम् ॥ यस्यप्रसादाद्वहवोनिस्तीर्णाभवसागरात् ॥६०॥ एवंप्रवदतस्तस्यप्राप्तोऽश्वोनीलपर्वतम् ॥वायुवेगेनपृथिवींकुर्वन्संक्षुण्णमण्ड
लाम् ॥६१॥ तदाराजापितत्पृष्ठचारीनीलाभिधंगिरिम् ॥ प्राप्तोगङ्गाब्धिसंयोगेस्नात्वाऽगात्पुरुषोत्तमम् ॥६२॥ स्तुत्वानत्वाचदेवेशंसुरासुरनमस्कृत
म् ॥ जातंकृतार्थमात्मानममन्यतसशत्रुहा ॥६३॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशेषवा०रामाश्व०नीलगिरिमहिमवर्णनंनामद्वाविंशोऽध्यायः
॥ २२ ॥ शेषउवाच ॥ क्षणंस्थित्वातृणंजग्ध्वाययौवाजीमनोजवः ॥ वीरश्रेणीवृतःपत्रंभालेधृत्वासचामरः ॥ १ ॥ शत्रुघ्नेनसुवीरेणलक्ष्मीनिधिनृ
पेणच ॥ पुष्कलेनोग्रवाहेनप्रतापाग्र्येणरक्षितः ॥ २ ॥ ययौपुरींसचक्राङ्कांसुबाहुपरिरक्षिताम् ॥ अनेकवीरकोटीभीरक्षितोऽनुगतःप्रभो
॥ ३ ॥ तदापुत्रोऽस्यदमनोमृगयामास्थितोमहान् ॥ ददर्शाश्वंभालपत्रंचन्दनादिकचर्चितम् ॥ ४ ॥ विलोक्यसेवकंप्राहकस्याश्वोमे
ऽक्षिगोचरः ॥ भालेपत्रंधृतंकिंनुचामरंकिंतुशोभनम् ॥ ५ ॥ इतिराज्ञोवचःश्रुत्वासेवकःप्रययौततः ॥ यत्रासौवर्ततेवाजीभालपत्रःसुशोभनः
॥ ६ ॥ गृहीत्वातंकेशसङ्घेरत्नमालाविभूषितम् ॥ निनायचाग्रेभूपस्यसुबाहुकुलधारिणः ॥ ७ ॥ सपत्रंवाचयामाससुन्दराक्षरशोभितम् ॥
अयोध्याधिपतिश्चासीद्राजादशरथोबली ॥ ८ ॥ तस्यात्मजोरामभद्रःसर्वशूरशिरोमणिः ॥ नान्योऽस्तितत्समःपृथ्व्यांधनुर्धरणविक्र
मः ॥ ९ ॥ तेनासौमोचितोवाजीचन्दनादिकचर्चितः ॥ तंपालयतिधर्मात्माशत्रुघ्नःपरवीरहा ॥ १० ॥ येचशूरावयंवीराधनुर्हस्ताइमेवयम् ॥
तेगृह्णन्तुबलाद्वाहंरत्नमालाविभूषितम् ॥ ११ ॥ तंचमोक्ष्यतिशत्रुघ्नःसर्ववीरशिरोमणिः ॥ अन्यथापादयोस्तस्यप्रणतिंयान्तुधन्विनः ॥ १२ ॥ इत्य
भिप्रायमालोक्यजगादनृपनन्दनः ॥ रामएवधनुर्धारीनवयंक्षत्रियाःस्मृताः ॥ १३ ॥ तातेमेऽवस्थितेपृथ्व्यांकोऽयंगर्वोमहान्भुवि ॥ प्राप्नोतुगर्वस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फलंममनिर्मुक्तसायकैः ॥ १४ ॥ अद्यमेनिशिताबाणाःशत्रुघ्नंकिंशुकंयथा ॥ पुष्पितंविदधत्वद्धाक्षतावृतशरीरकम् ॥ १५ ॥ दारयन्तुकपोलां
श्चसायकाममदन्तिनाम् ॥ अश्वान्पश्यन्तुशतशोरुधिरौघपरिप्लुतान् ॥ १६ ॥ पिबन्तुयोगिनीसङ्घारुधिराणिनृमस्तकैः ॥ शिवाभवन्तुसन्तुष्टा
मद्वैरिक्रव्यभक्षणैः ॥ १७ ॥ पश्यन्तुसुभटास्तस्यममबाहुबलंमहत् ॥ कोदण्डदण्डनिर्मुक्ताःशरकोटीर्विमुञ्चतः ॥ १८ ॥ इत्थमुक्त्वामहीपस्यतनु
जोदमनाभिधः ॥ स्वपुरंप्रेषयित्वातंप्रहृष्टोऽभवदुद्भटः ॥ १९ ॥ सेनापतिमुवाचेदंसज्जीकुरुमहामते ॥ सेनांपरिमितांमह्यंवैरिवृन्दनिवारणे ॥ २० ॥
सज्जांसेनांविधायाशुसंमुखोरणमण्डले ॥ स्थितवान्यावदत्युग्रस्तावत्प्राप्ताहयानुगाः ॥ २१ ॥ क्वासौहयोमहाराज्ञोभालपत्रेणचिह्नितः ॥ पप्रच्छु
स्तेतुचान्योन्यमतिव्याकुलितामुहुः ॥ २२ ॥ तावद्ददर्शपुरतःप्रतापाग्र्यःपरन्तपः ॥ सज्जीभूतंतुकटकंवीरशब्दनिनादितम् ॥ २३ ॥ तत्रावदञ्जनाःके
चिन्नीतोऽश्वोऽनेनभूपते ॥ अन्यथासंमुखस्तिष्ठेत्कथंवीरोबलानुगः ॥२४ ॥इत्याकर्ण्यप्रतापाग्र्यःप्रेषयामाससेवकम् ॥ सगत्वातत्रपप्रच्छकुत्राश्वोरा
मभूपतेः ॥ २५ ॥ केननीतःकुतोनीतोरामंजानातिनोकुधीः ॥ यंशक्रप्रमुखादेवाबलिमादायसन्नताः ॥ २६ ॥ तस्यवैधर्मराजस्यकुपितंतुबलंमहत्॥
सर्वथाहिग्रसेतैनंप्रणतिंचेन्नयास्यति ॥ २७ ॥ इत्थमुक्तंसमाकर्ण्यतदाराजसुतोबली ॥ तंवैधिक्कारयामासवाग्जालेनसुदुर्मनाः ॥ २८ ॥ मयानीतो
यज्ञहयःपत्रचिह्नाद्यलङ्कृतः ॥ येशूरास्तेतुमांजित्वामोचयन्तुबलादिह ॥ २९ ॥ सेवकस्तद्वचःश्रुत्वारोषपूर्णोहसन्ययौ ॥ राज्ञेनिवेदयामासयथावद्
पवर्णितम् ॥ ३० ॥ तच्छ्रुत्वारोषताम्राक्षःप्रतापाग्र्योमहाबलः ॥ ययौयोद्धुंराजपुत्रंमहावीरपुरस्कृतम् ॥ ३१ ॥ रथेनकनकाङ्गेनचतुर्वाजिसुशोभि
ना ॥ सुकूबरेणसर्वास्त्रपूरितेनययौबली ॥ ३२ ॥ धनुष्टङ्कारयामासमहाबलसमन्वितः ॥ पुनःपुनर्जहासोच्चैःकोपादुद्गमिताश्रुकः ॥ ३३ ॥ अश्ववाह
गजारूढाःखड्गोल्लसितपाणयः ॥ अन्वयुस्तेप्रतापाग्र्यंरोषपूर्णाकुलेक्षणम् ॥ ३४ ॥ हस्तिनःपत्तयश्चैवकोटिशःप्रधनोद्यताः ॥ चिरकालमभीप्सन्तो
रणंवीरेणकारितम् ॥ ३५ ॥ तदोद्यतंसमाज्ञायरिपुसैन्यंनृपात्मजः ॥ प्रत्युज्जगामवीराग्र्योमहावनपरीवृतः ॥ ३६ ॥ सन्नद्धःकवचीखड्गीशरासनध
रोयुवा ॥ लीलयैवययौयोद्धुंमृगराड्गजतामिव ॥ ३७ ॥ तदायोधाःप्रकुपिताःपरस्परवधैषिणः ॥ छिन्धिभिन्धीतिभाषन्तोरणकार्यविशारदाः
॥ ३८ ॥ पत्तयःपत्तिसङ्घेनगजारूढाश्वसादिभिः ॥ रथारूढारथस्थैश्ववाहारूढाश्ववाहगैः ॥ ३९ ॥ गजाभिन्नाद्विधाजाताहयाश्चद्विदलीकृताः॥
अनेकनरमस्तिष्कैर्मेदिनीपूरिताह्यभूत् ॥ ४० ॥ तदाप्रकुपितोराजाप्रतापाग्र्योमहाबलः ॥ स्वसैन्यकदनोद्युक्तंराजपुत्रंसमीक्ष्यच ॥ ४१ ॥ उवाच

१'भटाः' इ० पा० । २'गजसहायाभ्यां च' इति गजशब्दात्समूहार्थे तल्, गजानां समूहो गजता तामित्यर्थः 'गजयूथकम्' इ० वा पा० ।

CC-0. In Public Domain. Digitization by eGangotri

सारथिंतत्रप्रापयाश्वान्यतोमम॥सैन्यस्यकदनासक्तोराजपुत्रोमहारथः ॥४२॥ अथवीरशिरोरत्नमिताङ्घ्रिर्नृपात्मजः॥ ययौसंमुखमेवास्यप्रतापाग्र्य
स्यवीर्यवान् ॥ ४३ ॥ सारथिःप्रापयामासप्रतापाग्र्यस्यवाजिनः ॥ यत्रासौदमनोवीरःसर्वशूरशिरोमणिः ॥ ४४ ॥ गत्वातमाह्वयामासराजपुत्रंरणो
द्यतम् ॥ रथेपुरटनिर्णिक्तेतिष्ठन्कोदण्डदण्डभृत् ॥ ४५ ॥ रेराजपुत्रकशिशोत्वयाबद्धोऽश्वसत्तमः ॥ नजानासिमहाराजंसर्ववीरेन्द्रसेवितम् ॥ ४६ ॥
यस्यप्रतापंदैत्येन्द्रोनशक्तःसोढुमद्भुतम्॥तस्यत्वंवाजिनंनीत्वागतोऽसिपुटभेदनम् ॥४७॥ मांजानीहिपुरःप्राप्तंकालरूपंतुवैरिणम्॥मुञ्चाश्वमर्भगच्छा
शुबालक्रीडनकंकुरु ॥४८॥ कस्यात्मजस्त्वंकुत्रत्यःकथंनोऽदीर्घदर्शिना॥धृतोऽश्वस्त्वथसंजाताघृणाममशिशोत्वयि ॥४९॥ इत्थमाकर्ण्यदमनःस्मितं
चक्रेमहामनाः॥उवाचचप्रतापाग्र्यंतृणीकुर्वंश्चतद्बलम् ॥५०॥ दमनउवाच ॥ मयाबद्धोबलादश्वोनीतःस्वपुटभेदनम् ॥ नार्पयिष्येऽद्यसप्राणःकुरुयुद्धं
महाबल ॥ ५१ ॥ त्वयायदुक्तंबालस्त्वंगत्वाक्रीडनकंकुरु ॥ तन्मेपश्यमहाराजक्रीडनंरणमूर्धनि ॥ ५२ ॥ शेषउवाच ॥ इत्युक्त्वासगुणंचापंविधाय
भूभुजोऽङ्गजः॥शराणांशतमाधत्तप्रतापाग्र्यस्यवक्षसि ॥५३॥ सन्धायबाणशतकंशङ्खंदध्मौप्रतापवान्॥तेनशङ्खनिनादेनकातराणांभयंह्यभूत ॥५४॥
ताडयामासहृदयेबाणानांशतकेनसः॥प्रतापाग्र्यःप्रचिच्छेदलघुहस्तःसुपर्वणः ॥५५॥ सबाणच्छेदनंदृष्ट्वाकुपितोव्यसृजच्छरान् ॥कङ्कपक्षान्वितांस्ती
क्ष्णभल्लात्राजात्मजोबली ॥५६॥ आकाशेभुविमध्येचबाणादृष्टशिरेऽञ्चिताः॥स्वनामचिह्नितास्तीक्ष्णधारापातसुशोभिताः ॥५७॥ शरास्तद्वाह्वहृद
येलग्नावह्निकणान्बहून् ॥ सृजन्तःकुर्वतेसैन्यदाहंनतदभून्महत् ॥५८॥ प्रतापाग्र्यःप्रकुपितस्तिष्ठतिष्ठेतिचब्रुवन् ॥ शरेणदशसङ्ख्येनताडयामासमूर्ध
नि ॥ ५९ ॥ तेबाणाराजपुत्रस्यललाटेपरिनिष्ठिताः ॥ विराजन्तेस्मचमुनेदशशाखास्तरोरिव ॥६०॥ तेनबाणप्रहारेणविव्यथेनमहामनाः॥यष्टिकाप्र
हतोयद्वत्कुञ्जरःसप्तवर्षकः॥६१॥बाणान्धनुषिसन्धायमुमोचत्रिशताञ्छुभान्॥सुवर्णपुङ्खरचितान्महाकालानलोपमान् ॥६२॥ तेबाणास्तुप्रतापाग्र्य
वक्षोभित्त्वागताह्यधः ॥ शोणिताक्तायथारामचन्द्रभक्तिपराङ्मुखाः ॥६३॥ प्रतापाग्र्यःप्रकुपितःशरान्मुञ्चन्सहस्रशः॥अकरोद्विरथंसूनुंसुबाहोस्तत्क्ष
णाद्भुतम् ॥ ६४ ॥ चतुर्भिश्चतुरोवाहान्द्वाभ्यांध्वजमशातयत् ॥ एकेनसारथेःकायाच्छिरोमह्यामपातयत् ॥ ६५ ॥ चतुर्भिस्ताडयामासतंसूनुं
नृपतेःपुनः ॥ तत्क्षणाच्चापमेकेनगुणयुक्तंतुचिच्छिदे ॥ ६६ ॥ सोऽन्यंरथंसमारुह्यहयरत्नसुशोभितम् ॥ धनुःकरेसमादायसज्यंचक्रेमहामनाः ॥
॥६७॥ प्रत्युवाचप्रतापाग्र्यंत्वयाविक्रान्तमद्भुतम् ॥ पश्येदानींपराक्रान्तिंधनुषोममसद्भट ॥ ६८ ॥ एवमुक्त्वातुदमनोबाणान्दशसमाददे ॥ चतुर्भि
श्चतुरोवाहान्निनाययमसादनम् ॥ ६९ ॥ चतुर्भिस्तिलशःकृत्तोरथश्चक्रसमन्वितः ॥ एकेनहृदिविव्याधबाणेनैकेनसारथिम् ॥ ७० ॥ जगर्जशङ्खं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मापूर्यशङ्खशब्दसमन्वितः ॥ तत्कर्मपूजयामाससाधुवीरमहाबल ॥ ७१ ॥ इतिविक्रान्तमालोक्यप्रतापाग्र्योरुषान्वितः ॥ अन्यंरथंसमास्थाययया
योद्धुंनपात्मजम् ॥ ७२ ॥ उवाचवीरपश्यत्वंममविक्रान्तमद्भुतम् ॥ इत्युक्त्वाऽऽशुमुमोचौघाञ्छराणांशितपर्वणाम् ॥ ७३ ॥ शराःसर्वत्रदृश्यन्तेकु
ञ्जरेषुहयषुच ॥ परब्रह्मेवसर्वत्रव्याप्ताश्चान्तरगोचराः ॥ ७४ ॥ तंराजपुत्रंशितबाणकोटिभिर्व्याप्तंविधायाशुजगर्जविक्रमी ॥ संहर्षयन्स्वीयगणान्परा
न्महान्कुर्वन्हृदाशून्यतमान्गतासुकान् ॥ ७५ ॥ सराजपुत्रःशितसायकव्रजैःसम्पूर्णमात्मानमवेक्ष्यरोषितः ॥ जग्राहशस्त्राणिदुरन्तविक्रमोधनुश्चधु
न्वन्भुजदण्डयोर्महान् ॥ ७६ ॥ चकर्तसर्वाण्यस्त्राणिशस्त्राणिचमहाबलः ॥ रोषताम्रेक्षणोमुञ्चञ्छरान्वैरिविदारिणः ॥ ७७ ॥ तच्छस्त्रजालंनिर्धूयरा
जपुत्रोजगादतम् ॥ क्षमस्वैकंप्रहारंमेयदिशूरोऽसिमारिष ॥ ७८ ॥ यद्यनेनभवन्तंवैरथाच्चेत्पातयामिन ॥ प्रतिज्ञांशृणुमेवीरममगर्वेणनिर्मिताम् ॥७९॥
वेदंनिन्दन्तियेमत्ताहेतुवादविचक्षणाः ॥ तेषांपापंममैवास्तुनरकार्णवमज्जकम् ॥८०॥ इत्युक्त्वाबाणमासाद्यकोदण्डेकालसन्निभम् ॥ ज्वालामालाकु
लंतीक्ष्णंनिषङ्गादुद्धृतंवरम् ॥ ८१ ॥ समुक्तोनृपवर्येणहृदिलक्ष्यीकृतःशरः ॥ जगामतरसातंवैकालानलसमप्रभः ॥ ८२ ॥ प्रतापाग्र्यःशरंदृष्ट्वास्वपात
नसमुद्यतम् ॥ बाणान्धनुष्यथाधत्तशरच्छेदायवैशितान् ॥ ८३ ॥ सबाणःसर्वबाणांस्तांश्छिन्दन्मध्यतएवहि ॥ जगामवैप्रतापाग्र्यहृदयंधैर्यसंयुतम्
॥ ८४ ॥ संलग्नोहृदिनालीकःप्रविवेशतदन्तरम् ॥ राजाकृतप्रहारस्तुपपातंधरणीतले ॥ ८५ ॥ मूर्च्छितंचेतनाहीनंरथोपस्थाद्गतंभुवि ॥ सारथिस्तंस
मादायापोवाहरणमण्डलात् ॥ ८६ ॥ हाहाकारोमहानासीद्बलंभग्नंगतंततः ॥ यत्रशत्रुघ्ननामासौवीरकोटिपरीवृतः ॥ ८७ ॥ राजात्मजोजयंप्राप्यप्र
तापाग्र्यंविजित्यसः ॥प्रतीक्षांतुचकारास्यशत्रुघ्नस्यचभूपतेः ॥८८॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशेषवा०रामाश्व०राजपुत्रयुद्धकथनंनामत्रयोविं
शोऽध्यायः ॥२३॥ शेषउवाच ॥ शत्रुघ्नस्तुक्रुधाविष्टोदन्तान्दन्तैर्विनिष्पिषन् ॥ हस्तौधुन्वँल्लेलिहानमधरंजिह्वयाऽसकृत् ॥१॥ पुनःपुनस्तान्पप्रच्छ
केनाश्वोनीयतेमम ॥ प्रतापाग्र्यःकेनजितःसर्वशूरशिरोमणिः ॥ २ ॥ सेवकास्तेतदाप्रोचुर्दमनोनामशत्रुहन् ॥ सुबाहुजःप्रतापाग्र्यंजितवान्हयमाहरत
॥ ३ ॥ इतिश्रुत्वाहयंनीतंदमनेनस्ववैरिणा ॥ आजगामसवेगेनयत्राभूद्रणमण्डलम् ॥ ४ ॥ तत्रापश्यत्सशत्रुघ्नोगजान्दीर्णकपोलकान् ॥ पर्वतानि
वरक्तोदेमज्जमानान्मदोद्धतान् ॥ ५ ॥ हयास्तत्रनिजारोहकर्तृभिःसहिताःक्षताः ॥ मृतावीरेणददृशेशत्रुघ्नेनसुकोपिना ॥ ६ ॥ नरान्रथान्गजान्भग्ना
न्वीक्षमाणःसशत्रुहा ॥ अतीवचुक्रुधेयद्वत्प्रलयेप्रलयार्णवः ॥७॥ पुरतोदमनंवीक्ष्यहयनेतारमुद्भटम् ॥ प्रतापाग्र्यस्यजेतारंतृणीकृत्यनिजंबलम् ॥
॥ ८ ॥ तदाराजाप्रत्युवाचयोधान्कोपाकुलेक्षणः ॥ कोऽसौदमनजेताऽत्रसर्वशस्त्रास्त्रधारकः ॥ ९ ॥ योवैराजसुतंवीरंरणकर्मविशारदम् ॥ जेष्यत्य

CC-0. In Public Domain. Digitization by eGangotri

स्त्रेणनिर्भीतःसञ्जीभूतोभवत्वयम् ॥१०॥ इतिवाक्यंसमाकर्ण्यपुष्कलःपरवीरहा ॥ दमनंजेतुमुद्युक्तोजगादवचनंत्विदम् ॥ ११ ॥ स्वामिन्कायंदम
नकःकृतेऽपरिमितंबलम् ॥ जेष्येऽहंत्वत्प्रतापेनगच्छाम्येषमहामते ॥ १२ ॥ सेवकेमयियुद्धायस्थितेकैर्नीयतेहयः ॥ रघुनाथप्रतापोऽयंसर्वंकृत्यंक
रिष्यति ॥ १३ ॥ स्वामिञ्छृणुप्रतिज्ञांमेतवमोदप्रदायिनीम् ॥ विजेष्येदमनंयुद्धेरणकर्मविचक्षणम् ॥१४॥ रामचन्द्रपदाम्भोजमध्वास्वादवियोगि
नाम् ॥ यदघंतुभवेत्तन्मेदमनंनंजयेयदि ॥ १५ ॥ पुत्रोयोमातृपादान्यत्तीर्थंमत्वातयासह ॥ विरुद्धयेत्तत्तमोमह्यंनजयेदमनंयदि ॥ १६ ॥ अ
द्यमद्बाणनिर्भिन्नमहोरस्कोनृपाङ्गजः ॥ अलङ्करोतुप्रधनेभूतलंशयनेनहि ॥ १७॥ शेषउवाच ॥ इतिप्रतिज्ञामाकर्ण्यपुष्कलस्यरघूद्वहः ॥ जहर्ष
चित्तेतेजस्वीनिदिदेशरणंप्रति ॥ १८ ॥ आज्ञप्तोऽसौययौसैन्यैर्बहुभिःपरिवारितः ॥ यत्रास्तेदमनोराजपुत्रःशूरकुलोद्भवः ॥ १९ ॥ दमनो
ऽपितमाज्ञायह्यागतंरणमण्डले ॥ प्रत्युज्जगामवीराग्र्यःस्वसैन्यपरिवारितः ॥ २० ॥ अन्योन्यंतौसंमिलितौरथस्थौरथशोभिनौ ॥ समरेशक्रदैत्यौ
किंयुद्धार्थंरणमागतौ ॥ २१ ॥ उवाचपुष्कलस्तंवैराजपुत्रंमहाबलम् ॥ राजपुत्रदमनकमांजानीहिसमागतम् ॥ २२ ॥ सप्रतिज्ञंतुयुद्धायभर
तात्मजमुद्भटम् ॥ पुष्कलेनस्वनाम्नाचलक्षितंविद्धिसत्तम ॥ २३ ॥ रघुनाथपदाम्भोजनित्यसेवामधुव्रतम् ॥ त्वांजेष्येशस्त्रसङ्घेनसञ्जीभव
महामते ॥ २४ ॥ इतिवाक्यंसमाकर्ण्यदमनःपरवीरहा ॥ प्रत्युवाचहसन्वाग्मीनिर्भयोदृष्टविक्रमः ॥ २५ ॥ सुबाहुपुत्रंदमनंपितृभक्तिस्त
तावकम् ॥ विद्धिमामश्वनेतारंशत्रुघ्नस्यमहीपतः ॥ २६ ॥ जयोदैवविसृष्टोऽयंयस्यचालङ्करिष्यति ॥ सप्राप्नोतिनिरीक्षस्वबलंमेरणमूर्धनि
॥ २७ ॥ इत्युक्त्वासशरंचापंविधायाकर्णपूरितम् ॥ मुमोचबाणान्निशितान्वैरिप्राणापहारिणः ॥ २८ ॥ तेबाणास्त्वाविलीभूताश्छादयामा
सुरम्बरम् ॥ सूर्यभानुप्रभायत्रबाणच्छायानिवारिता ॥ २९ ॥ गजानांकटभित्त्योघेलग्नासायकसन्ततिः ॥ अलङ्करोतिधातूनांरागाइवविचि
त्रिताः ॥ ३० ॥ पतितास्तत्रदृश्यन्तेनरावाहागजारथाः ॥ शरव्रातेननृपतेःसुतेनपरिताडिताः ॥ ३१ ॥ तद्विक्रान्तंसमालोक्यपुष्कलःपर
वीरहा ॥ शराणांछाययाव्याप्तंरणमण्डलमीक्ष्यच ॥३२॥ शरासनेसमाधत्तबाणंवह्न्यभिमन्त्रितम् ॥ आचम्यसम्यग्विधिवन्मोचयामाससायकम्
॥ ३३ ॥ ततोऽग्निःप्रादुरभवत्तत्रसङ्ग्राममूर्धनि ॥ ज्वालाभिर्विलिहन्व्योमप्रलयाग्निरिवोत्थितः ॥३४॥ ततोऽस्यसैन्यंनिर्दग्धंत्रासंप्राप्तंरणाङ्गणे ॥
पलायनपरंजातंवह्निज्वालाभिपीडितम् ॥ ३५ ॥ छत्राणितुप्रदग्धानिचन्द्राकाराणिधन्विनाम् ॥ दृश्यन्तेजातरूपाभकान्तिधारीणितत्रह ॥ ३६ ॥
हयादग्धाःपलायन्तेकेसरेषुचवैरिणाम् ॥ रथाअपिगतादाहंसुकूबरसमन्विताः ॥ ३७ ॥ मणिमाणिक्यरत्नानिवहन्तःकरभास्ततः ॥ पलायन्ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दहनभूज्वालामालाभिपीडिताः ॥ ३८ ॥ कुत्रचिद्दन्तिनोनष्टाःकुत्रचिद्धयसादिनः ॥ कुत्रचित्पत्तयोनष्टावह्निदग्धकलेवराः ॥ ३९ ॥ शराःसर्वेंनृप
सुतप्रमुक्ताःप्रलयंगताः ॥ आशुशुक्षणिकीलाभिर्भस्मीभूताःसमन्ततः ॥४० ॥ तदास्वसैन्येदग्धेचदमनोरोषपूरितः ॥ सर्वास्त्रवित्तच्छान्त्यर्थंवारुणा
स्त्रमथाददे॥ ४१॥ वारुणंवह्निशान्त्यर्थंमुक्तंतेनमहीभृता ॥ आप्लावयद्बलंतस्यरथवाजिसमाकुलम् ॥४२॥ रथाविप्लावितास्तोयैर्दृश्यन्तेपरिपन्थिना
म् ॥ गजाश्चापिपरिप्लुष्टाःस्वीयाःशान्तिमुपागताः ॥ ४३ ॥ वह्निश्चशान्तिमगमद्व्यस्त्रपरिमोचितः ॥ शान्तिमापबलंस्वीयंवह्निज्वालाभिपीडि
तम् ॥ ४४ ॥ कम्पिताःशीततोयेनसीत्कुर्वन्तिचवैरिणा ॥ करकावृष्टिभिःक्षिप्तावायुनाचप्रपीडिताः ॥ ४५ ॥ तदास्वबलमालोक्यतोयपूरेणपीडि
तम् ॥ कम्पितंक्षुभितंनष्टंवारुणेनविनिर्हतम् ॥ ४६ ॥ तदातिकोपताम्राक्षःपुष्कलोभरतात्मजः ॥ वायव्यास्त्रंसमाधत्तधनुष्येकंमहाशरम्
॥ ४७ ॥ ततोवायुर्महानासीद्वायव्यास्त्रप्रचोदितः ॥ नाशयामासवेगेनघनानीकमुपस्थितम् ॥ ४८ ॥ वायुनास्फालितानागाःपरस्परसमाह
ताः ॥ अश्वाश्वसंहतान्योन्यंस्वस्वारोहसमन्विताः ॥ ४९ ॥ नराःप्रभञ्जनोद्धूतामुक्तकेशानिरोजसः ॥ पतन्तोऽत्रसमीक्ष्यन्तेवेतालाइवभूग
ताः ॥ ५० ॥ वायुनास्वबलंसर्वंपरिभूतंविलोक्यसः ॥ राजपुत्रःपर्वतास्त्रंधनुष्येवंसमादधे ॥ ५१ ॥ तदातुपर्वताःपेतुर्मस्तकोपरियुध्यताम् ॥
वायुःसञ्छादितस्तैस्तुनप्रचक्रामकुत्रचित् ॥ ५२ ॥ पुष्कलोवज्रसंज्ञंतुसमाधत्तशरासने ॥ वज्रेणकृत्तास्तेसर्वेजाताश्चतिलशःक्षणात् ॥ ५३ ॥
वज्रंनगान्रजःशेषान्कृत्वाबाणाभिमन्त्रितम् ॥ राजपुत्रोरसिप्रोच्चैःपपातस्वनवद्भृशम् ॥ ५४ ॥ सत्वाकुलितचेतस्कोहृदिविद्धःक्षतो
भृशम् ॥ विव्यथेबलवान्वीरःकश्मलंपरमापसः ॥ ५५ ॥ तंवैकश्मलितंदृष्ट्वासारथिर्नयकोविदः ॥ अपोवाहरणात्तस्मात्क्रोशमात्रंनरेन्द्र
जम् ॥ ५६ ॥ ततोयोधाराजसूनोःप्रनष्टाःप्रपलायिताः ॥ गत्वापुरींसमाचख्युःकश्मलस्थंनृपात्मजम् ॥ ५७ ॥ पुष्कलोजयमाप्यैवंरणमूर्धनिधर्म
वित् ॥ नप्रहर्तुंपुनःशक्तोरघुनाथवचःस्मरन् ॥५८॥ ततोदुन्दुभिनिर्घोषोजयशब्दोमहानभूत ॥ साधुसाध्वितिवाचश्चप्रावर्तन्तमनोहराः ॥ ५९ ॥ हृ
र्षंप्रापसशत्रुघ्नोजयिनंवीक्ष्यपुष्कलम् ॥ प्रशशंससुमत्यादिमन्त्रिभिःपरिवारितः ॥ ६० ॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशेषवा०रामाश्व०पुष्क
लविजयोनामचतुर्विंशतितमोऽध्यायः ॥२४॥ शेषउवाच॥अथवीक्ष्यभटान्निजान्नृपोरुधिरौघेणपरिप्लुताङ्गकान् ॥सुखंमापनवैशुशोचतान्परिपप्रच्छ
सुतस्यचेष्टितम् ॥ १ ॥ गदताखिलकर्मतस्यवैसकथंचाहरदश्ववर्यकम् ॥ कथयन्तुपुनःकियद्बलंबतवीराःकतियोद्धुमागताः ॥ २ ॥ अथशत्रुबलो

१ 'शमयन्निव तच्छुशोचवान्' इ० पा०।

CC-0. In Public Domain. Digitization by eGangotri

न्मुखः कथंममवीरोदमनोरणंव्यधात् ॥ विजयंचविधायदुर्जयंकिलवीरंबतकोऽप्यशातयत् ॥ ३ ॥ इत्याकर्ण्यवचोराज्ञःप्रत्यूचुस्तेऽस्यसेवकाः ॥ क्षतजेनपरिक्लिन्नगात्रवस्त्रादिधारिणः ॥४॥ राजन्नश्वंसमालोक्यपत्रचिह्नाद्यलङ्कृतम् ॥ ग्राहयामासगर्वेणतृणीकृत्यरघूत्तमम् ॥५॥ ततोहयानुगःप्राप्तःस्वल्पसैन्यसमावृतः ॥ तेनसाकमभूद्युद्धंतुमुलंरोमहर्षणम् ॥६॥ तंमूर्च्छितंततःकृत्वातवपुत्रःस्वसायकैः ॥ यावत्तिष्ठत्यथायातःशत्रुघ्नभ्रातृपुत्रकः ॥७॥ ततोयुद्धंमहदभूच्छस्त्रास्त्रपरिबृंहितम् ॥ बहुशोजयमापेदेतवपुत्रोमहाबलः ॥ ८ ॥ इदानींमुक्तमस्त्रंतुशत्रुघ्नभ्रातृसूनुना ॥ मूर्च्छितःप्रधनेराजन्क्वतोवीरःसुतस्तव ॥ ९ ॥ इतिवाक्यंसमाकर्ण्यरोषशोकसमन्वितः ॥ स्थगिताङ्गइवासीत्ससमुद्रइवपर्वणि ॥ १० ॥ उवाचसेनाधिपतिंरोषप्रस्फुरिताधरः ॥ दन्तैर्दन्तांल्लिहन्नोष्ठंजिह्वयाशोककर्शितः ॥ ११ ॥ सेनापतेकुरुष्वारान्ममसेनांतुसज्जिताम् ॥ योत्स्येरामस्यसुभटैर्ममपुत्रोपघातकैः ॥ १२ ॥ अद्याहंममपुत्रस्यदुःखदंनिशितैःशरैः ॥ पातयिष्येयदिह्येनंरक्षितापिमहेश्वरः ॥ १३ ॥ सेनापतिरिदंवाक्यंप्रोक्तंसुभुजभूपतेः ॥ निशम्यचतथाकृत्वासज्जीभूतोऽभवत्स्वयम् ॥ १४ ॥ राज्ञेनिवेदयामाससंसज्जांचतुरङ्गिणीम् ॥ सेनांकालबलप्रख्यांहतदुर्जनकोटिकाम् ॥ १५ ॥ श्रुत्वासेनापतेर्वाक्यंसुबाहुःपरवीरहा ॥ निर्जगामततोयत्रशत्रुघ्नःस्वसुतार्दनः ॥ १६ ॥ कुञ्जरैश्चमदोन्मत्तैर्हयैश्चापिमनोजवैः ॥ रथैश्चसर्वशस्त्रास्त्रपूरितैरिपुजेतृभिः ॥ १७ ॥ भूश्चकम्पेतदातत्रसैन्यभारेणभूरिणा ॥ संमर्दःसुमहानासीत्तत्रसैन्येविसर्पति ॥ १८ ॥ राजानंनिर्गतंदृष्ट्वारथेनकनकाङ्गिना ॥ शत्रुघ्नबलमुद्युक्तंसर्ववैरिप्रहारकम् ॥ १९ ॥ सुकेतुस्तस्यवैभ्रातागदायुद्धविशारदः ॥ रथेनाश्वाजगामायंसर्वशस्त्रास्त्रपूरितः ॥ २० ॥ चित्राङ्गस्तुसुतोराज्ञःसर्वयुद्धविचक्षणः ॥ जगामस्वरथेनाशुशत्रुघ्नबलमुन्मदम् ॥ २१ ॥ तस्यानुजोविचित्राख्योविचित्ररणकोविदः ॥ ययौरथेनहैमेनभ्रातृदुःखेनपीडितः ॥ २२ ॥ अन्येशूरामहेष्वासाःसर्वशस्त्रास्त्रकोविदाः ॥ ययुर्नृपसमादिष्टाःप्रधनंवीरपूरितम् ॥ २३ ॥ राजासुबाहुःसंरोषादागतःप्रधनाङ्गणे ॥ विलोकयामाससुतंमूर्च्छितंशरपीडितम् ॥ २४ ॥ रथोपस्थस्थितंमूढंस्वसुतंदमनाभिधम् ॥ वीक्ष्यदुःखंमुहुःप्रापवीजयामासपल्लवैः ॥ २५ ॥ जलेनसिक्तःसंस्पृष्टोराज्ञाकोमलपाणिना ॥ संज्ञामापशनैर्वीरोदमनःपरमास्त्रवित् ॥ २६ ॥ उत्थितःक्वधनुर्मेऽस्तिक्वपुष्कलइतोगतः ॥ संसज्यसमरंत्यक्त्वामद्बाणव्रणपीडितः ॥ २७ ॥ इतिवाक्यंसमाकर्ण्यसुबाहुःपुत्रभाषितम् ॥ परमंहर्षमापेदेपरिरभ्यसुतंस्वकम् ॥ २८ ॥ दमनोवीक्ष्यजनकंनृपंनम्रशिरोधरः ॥ पपातपादयोर्भक्त्याक्षतदेहोऽस्त्रराजिभिः ॥ २९ ॥ स्वसुतंरथसंस्थंतुविधायनृपतिःपुनः ॥ जगादसेनाधिपतिंरणकर्मविशारदः ॥ ३० ॥ व्यूहंरचयसंग्रामेक्रौञ्चाख्यंरिपुदुर्जयम् ॥ यमाविश्यजयेसैन्यंशत्रुघ्नस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महीपतेः ॥ ३१ ॥ तद्वाक्यमाकर्ण्यसुबाहुभूपतेःक्रौञ्चाख्यसद्व्यूहविशेषमादधात् ॥ यन्नोविशन्तेसहसारिपोर्गणामहाबलाःशस्त्रसमूहधारिणः ॥३२॥
मुखेसुकेतुस्तस्यासीद्गलेचित्राङ्गसंज्ञकः ॥ पक्षयोराजपुत्रौद्वौपुच्छेराजाप्रतिष्ठितः ॥ ३३ ॥ मध्येसैन्यंमहत्तस्यचतुरङ्गैस्तुशोभितम् ॥ कृत्वान्यवे
दयद्राज्ञेक्रौञ्चव्यूहंविचित्रितम् ॥ ३४ ॥ राजादृष्ट्वासुसन्नद्धंक्रौञ्चव्यूहंसुनिर्मितम् ॥ रणायस्वमतिंचक्रेशत्रुघ्नकटकेस्थितैः ॥ ३५ ॥ इतिश्रीपाद्मेमहापु
राणेपातालखण्डेशेषवा०रामाश्व०सुबाहुसैन्यसमागमोनामपञ्चविंशोऽध्यायः ॥ २५ ॥ शेषउवाच ॥ शत्रुघ्नस्तद्बलंदृष्ट्वाभीषणाकृतिमेघवत् ॥
हस्त्यश्वरथपादातैर्बहुभिःपरिवारितम् ॥ १ ॥ सुमतिंप्रत्युवाचेदंवचोगम्भीरशब्दयुक् ॥ नानावाक्यविचारज्ञैःपण्डितैःपरिसेवितः ॥ २ ॥ शत्रुघ्न
उवाच ॥ सुमतेकस्यनगरंप्राप्तोमेहयसत्तमः ॥ बलमेतन्निरीक्षेऽहंपयोनिधितरङ्गवत् ॥ ३ ॥ कस्यैतद्बलमुद्धर्षंचतुरङ्गसमन्वितम् ॥ पुरतोभाति
युद्धायसमुपस्थितमादरात् ॥ ४ ॥ एतत्सर्वंसमाचक्ष्वयथावत्पृच्छतोमम ॥ यज्ज्ञात्वायुद्धसंस्थायैनिर्दिशामिस्वकान्भटान् ॥ ५ ॥ इतिवाक्यं
समाकर्ण्यसुमतिःशुभबुद्धिमान् ॥ उवाचवचनंप्रीतःशत्रुघ्नंवैरितापनम् ॥ ६ ॥ सुमतिरुवाच ॥ चक्राङ्कानगरीराजन्वर्ततेसविधेशुभा ॥ यस्यां
सन्तिनराःपापरहिताविष्णुभक्तितः ॥ ७ ॥ तस्याःपुर्याःपतिरयंसुबाहुर्धर्मवित्तमः ॥ तवायंपुरतोभातिपुत्रपौत्रसमावृतः ॥ ८ ॥ स्वदारनिर
तोनित्यंपरदारपराङ्मुखः ॥ विष्णोःकथास्यकर्णस्थानापरार्थप्रकाशिनी ॥ ९ ॥ परस्वंनसमादत्तेषष्ठांशादधिकंनृपः ॥ ब्राह्मणाविष्णुभक्त्यै
वपूज्यन्तेतेनधर्मिणा ॥ १० ॥ नित्यंसेवारतोविष्णुपादपद्ममधुव्रतः ॥ एषस्वधर्मनिरतःपरधर्मपराङ्मुखः ॥ ११ ॥ एतस्यबलतुल्यंहिनवीराणां
बलंक्वचित् ॥ पुत्रस्यपतनंश्रुत्वारोपशोकसमाकुलः ॥ १२ ॥ चतुरङ्गसमेतोऽयंयुद्धायसमुपस्थितः ॥ तवापिवीराबहवोलक्ष्मीनिधिमुखाअ
मून् ॥ १३ ॥ जेष्यन्तिशस्त्रसङ्घेननिर्दिशाशुपरंहितान् ॥ शत्रुघ्नस्तद्वचःश्रुत्वाप्रोवाचस्वभटान्वरान् ॥ १४ ॥ रणप्राप्तिभवोद्धर्षपूरपूरितमान
सान् ॥ क्रौञ्चव्यूहोऽद्यरचितःसुबाहुपरिसैनिकैः ॥ १५ ॥ मुखपक्षस्थितायोधास्तान्कोभेत्स्यतिशस्त्रवित् ॥ यस्यभेदेनिजाशक्तिर्योवीरविजयो
द्यतः ॥ १६ ॥ सगृह्णातुमदीयाद्धिपाणिपद्माच्चवीटकम् ॥ तदालक्ष्मीनिधिर्वीरोजग्राहक्रौञ्चभेदने ॥१७॥ सर्वशस्त्रास्त्रविद्वीरैर्बहुभिःपरिवारितः ॥
उवाचवचनंराजन्यास्येऽहंक्रौञ्चभेदने ॥ १८ ॥ भार्गवःपूर्वमेवासीत्क्रौञ्चभेत्तातथाह्यहम् ॥ तथान्यंवीरमावोचत्कोऽस्यसाधंगमिष्यति ॥ १९ ॥
पुष्कलःपृष्ठतस्तस्ययातुंचक्रेमतिंततः ॥ रिपुतापोनीलरत्नउग्राश्वोवीरमर्दनः ॥ २० ॥ सर्वेशत्रुघ्नसन्देशाद्ययुस्तत्क्रौञ्चभेदने ॥ शत्रुघ्नोऽपिरथस्थश्च
सर्वायुधधरःपरः ॥ २१ ॥ पृष्ठतोऽस्यपरीयायबहुभिःसैनिकैर्वृतः ॥ तदाप्रचलितौदृष्ट्वान्योन्यबलवारिधी ॥ २२ ॥ प्रलयंकर्तुमुद्युक्तौजगतःसुत

CC-0. In Public Domain. Digitization by eGangotri

रङ्गिणौ ॥ तदाभेर्यःसमाजघ्नुरुभयोःसेनयोर्दृढाः ॥ २३ ॥ रणभेर्यःशङ्खनादाःश्रूयन्तेतत्रतत्रह ॥ हेषन्तेवाजिनस्तत्रगर्जन्तिद्विरदाभृशम् ॥ २४ ॥
हुंहुंकुर्वन्तिवीराग्र्यानदन्तिरथनेमयः ॥ तत्रप्रकुपिताःशूराःसुबाहुबलदर्पिताः ॥ २५ ॥ छिन्धिभिन्धीतिभाषन्तोदृश्यन्तेबहवोरणे ॥ एवंभूतेरणो
द्युक्तेसैन्येशत्रुघ्नवैरिणोः ॥ मुखसंस्थंसुकेतुंतंलक्ष्मीनिधिरुवाचह ॥ २६ ॥ लक्ष्मीनिधिरुवाच ॥ जनकस्यसुतंविद्धिलक्ष्मीनिधिरितिस्मृतम् ॥
सर्वशस्त्रास्त्रकुशलंसर्वयुद्धविशारदम् ॥ २७ ॥ मुञ्चाश्वंरामचन्द्रस्यसर्वदानवदंशितुः ॥ नोचेन्मद्बाणनिर्भिन्नोयास्यसेयमसादनम् ॥ २८ ॥ इतिब्रुव
न्तंवीराग्र्यंसुकेतुःसहसात्वरन् ॥ सज्यंचापंविधायाशुबाणान्मुञ्चन्स्थिरोऽभवत् ॥ २९ ॥ तेबाणाःशितपर्वाणःस्वर्णपुङ्खाःसमन्ततः ॥ दृश्यन्तेव्या
पिनस्तत्ररणमध्येसुदुर्भराः ॥ ३० ॥ तद्बाणजालंतरसानिहत्यलक्ष्मीनिधिश्चापमथाततज्यम् ॥ विधायतस्योरसिबाणषट्कंमुमोचतीक्ष्णंशितपर्वशो
भितम् ॥ ३१ ॥ तद्बाणाःसुभुजभ्रातुर्हृदयंसंविदार्यच ॥ गतास्तेभुविदृश्यन्तेरुधिराक्तामलीमसाः ॥ ३२ ॥ तद्बाणभिन्नहृदयःसुकेतुःको
पपूरितः ॥ जघानशरविंशत्यातीक्ष्णयानतपर्वया ॥ ३३ ॥ उभौबाणविभिन्नाङ्गावुभौक्षतजविप्लुतौ ॥ सैनिकैःपरिदृश्यन्तेकिंशुकाविव
पुष्पितौ ॥ ३४ ॥ मुञ्चन्तौबाणकोटीश्चसन्दधन्तौद्रुतंशरान् ॥ नकेनापिविलक्ष्येतेलघुहस्तौमहाबलौ ॥ ३५ ॥ कुण्डलीकृतसच्चापौ
वर्षन्तौबाणधारया ॥ नवाम्बुदाविवदिविशक्रनिर्देशकारिणौ ॥ ३६ ॥ तयोर्बाणागजान्वाहान्नराञ्छूरान्विमस्तकान् ॥ कुर्वन्तःकेवलंदृष्टा
नचसन्धानमोक्षणे ॥ ३७ ॥ पृथिवीसुभटैःपूर्णासकिरीटैःसकुण्डलैः ॥ धनुर्बाणकरैरोषसन्दष्टाधरयुग्मकैः ॥ ३८ ॥ तयोःप्रयुध्यतोर्दर्पा
त्सर्वशस्त्रास्त्रवेदिनोः ॥ युद्धंसमभवद्घोरंदेवविस्मापनंमहत् ॥ ३९ ॥ संमर्दोऽभवदत्यन्तंवीरकोटिविदारणः ॥ नकेनचित्क्वचिद्दृष्टंशरजा
लान्तरेऽम्बरम् ॥ ४० ॥ तस्मिंस्तुसमयेलक्ष्मीनिधिर्वीरोऽरिमर्दनः ॥ बाणांश्चापेसमाधत्तवसुसङ्ख्यान्दृढाञ्छितान् ॥ ४१ ॥ चतुर्भिस्तुरगा
न्वीरःसुकेतोरनयत्क्षयम् ॥ एकेनध्वजमत्युग्रंचिच्छेदतरसाहसन् ॥ ४२ ॥ एकेनसारथेःकायाच्छिरोभूमावपातयत् ॥ एकेनचापंसगुणमच्छिन
द्रोषपूरितः ॥ ४३ ॥ एकेनहृदिविव्याधसुकेतोर्वेगवान्नृपः ॥ तत्कर्माद्भुतमुद्वीक्ष्यवीराविस्मयमाययुः ॥ ४४ ॥ सच्छिन्नधन्वाविरथोहताश्वो
हतसारथिः ॥ महतींसगदांधृत्वायोद्धुकामोऽभ्युपेयिवान् ॥ ४५ ॥ तमायान्तंसमालक्ष्यगदायुद्धविशारदम् ॥ महत्यागदयायुक्तंरथादवततार
सः ॥ ४६ ॥ गदामादायमहतींसर्वायसविनिर्मिताम् ॥ जातरूपविचित्राङ्गींसर्वशोभापुरस्कृताम् ॥ ४७ ॥ लक्ष्मीनिधिर्भृशंक्रुद्धःसुकेतोर्वक्ष
सित्वरन् ॥ पातयामाससुदृढंगदांवज्राग्निसन्निभाम् ॥ ४८ ॥ गदयाताडितोवीरोनाकम्पतमहामुने ॥ मदोन्मत्तोयथादन्तीबालेनस्रग्भिराहतः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ४९ ॥ उवाचतंसवीराग्र्योनृपंलक्ष्मीनिधिंतदा ॥ सहस्वैकंप्रहारंमेयदिशूरःपरन्तप ॥ ५० ॥ इत्युक्त्वाताडयामासललाटेगदयाभृशम् ॥
गदयाताडितोभालेऽसृग्वमन्कुपितोभृशम् ॥ ५१ ॥ मूर्ध्नितंताडयामासगदयाकालरूपया ॥ सुकेतुरपितंस्कन्धेताडयामासधर्मवित् ॥ ५२ ॥
एवंभृशंप्रकुपितौगदायुद्धविशारदौ ॥ गदायुद्धंप्रकुर्वाणौपरस्परजयैषिणौ ॥ ५३ ॥ अन्योन्याघातविमतौपरस्परवधोद्यतौ ॥ नकोऽपितत्रही
येतनकोजीयतसंयुगे ॥ ५४ ॥ मूर्ध्निभालेतथास्कंधेहृदिगात्रेषुसर्वतः ॥ रुधिरौघपरिक्लिन्नौमहाबलपराक्रमौ ॥ ५५ ॥ तदालक्ष्मीनिधिःक्रु
द्धोगदामुद्यम्यवेगवान् ॥ जगामप्रबलंहन्तुंहृदिराजानुजंबली ॥ ५६ ॥ तमायान्तमथालोक्यस्वगदांमहतींदधत् ॥ ययौतंतरसाहन्तुंराजभ्रा
ताबलाद्बलम् ॥ ५७ ॥ गदांतेनविनिक्षिप्तांस्वकरेधृतवानयम् ॥ तयैवगदयातस्यहृदिजघ्नेमहाबलः ॥ ५८ ॥ स्वगदांतेनवैनीतांदृष्ट्वालक्ष्मीनि
धिर्नृपः ॥ बाहुयुद्धेनतंयोद्धुमियेषबलवत्तमम् ॥ ५९ ॥ तदाराजानुजःक्रुद्धोबाहुभ्यामुपगृह्यतम् ॥ युयुधेसर्वयुद्धस्यज्ञातावीरेषुसत्तमः ॥ ६० ॥
तदालक्ष्मीनिधिस्तस्यहृदिजघ्नेस्वमुष्टिना ॥ तदासोऽपिशिरस्येनंमुष्टिमुद्यम्यचाहनत् ॥ ६१ ॥ मुष्टिभिर्वज्रसङ्काशैस्तलस्फोटैश्चदारुणैः ॥
अन्योन्यंजघ्नतुःक्रुद्धौसन्दष्टाधरपल्लवौ ॥ ६२ ॥ मुष्टीमुष्टिदन्तादन्तिकचाकचिनखानखि ॥ उभयोरभवद्युद्धंतुमुलंरोमहर्षणम् ॥ ६३ ॥ तदाप्रकु
पितोभ्रातानृपतेश्चरणेनृपम् ॥ गृहीत्वाभ्रामयित्वाथपातयामासभूतले ॥ ६४ ॥ लक्ष्मीनिधिःकरेगृह्यतंनृपानुजमुच्चकैः ॥ भ्रामयित्वाशतगुणंगजो
परस्थेजघानतम् ॥ ६५ ॥ सतदापतितोभूमौसंज्ञांप्राप्यक्षणादनु ॥ तथैवभ्रामयामासव्योम्निवेगेनविक्रमी ॥ ६६ ॥ एवंप्रयुध्यमानौतौबाहुयुद्धं
गतौपुनः ॥ पादेपादंकरेपाणिंहृदिहृद्वदनेमुखम् ॥६७॥ एवंपरस्परंश्लिष्टौ[1]परस्परवधैषिणौ ॥ उभावपिपराक्रान्तावुभावपिमुमूर्च्छतुः ॥६८॥ तद्दृष्ट्वा
विस्मयंप्राप्ताःप्रशशंसुःसहस्रशः ॥ धन्योलक्ष्मीनिधिभूपोधन्योराजानुजोबली ॥ ६९ ॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशेषवा०रामाश्व०गदायु
द्धंनामषड्विंशतितमोऽध्यायः ॥२६ ॥ शेषउवाच ॥ चित्राङ्गःक्रौञ्चकण्ठस्थोरथस्थोवीरशोभितः ॥ गाहयामासतत्सैन्यंवाराहइववारिधिम् ॥ १ ॥
धनुर्विस्फार्यसुदृढंमेघनादनिनादितम्॥ मुमोचबाणान्निशितान्वैरिकोटिविदाहकान् ॥२॥ तद्बाणभिन्नसर्वाङ्गाःशेरतसुभटाभृशम्॥सकिरीटतनुत्राणाः
सन्दष्टदशनच्छदाः ॥३॥ एवंप्रवृत्तेसङ्ग्रामेययौयोद्धुंसपुष्कलः ॥ मणिचित्रितमादायचापंवैरिप्रतापनम् ॥ ४ ॥ तयोःसङ्गतयोरूपंदृश्यतेऽतिमनो
हरम् ॥ पुरातारकसङ्ग्रामेस्कन्दतारकयोर्यथा ॥ ५ ॥ विस्फारयन्धनुःशीघ्रंसव्यसाचीतुपुष्कलः ॥ ताडयामासतंक्षिप्रंशरैःसन्नतपर्वभिः ॥६ ॥

१ 'परस्परजयैषिणौ' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चित्राङ्गोऽपिरुषाक्रान्तःशरासनइपूङ्छितान्॥दधद्द्वयमुच्चद्बहुशोरणमण्डलमूर्धनि ॥७॥ नादानंनचसन्धानंनमोचनमथापिवा॥दृष्टंतावेवसन्दृष्टौकुण्ड
लीकृतचापिनौ ॥८॥ तदासौपुष्कलःक्रुद्धःशराणांशतकेनतम् ॥ विव्याधवक्षःस्थलकेमहायोद्धारमुद्भटम् ॥ ९ ॥ चित्राङ्गस्ताञ्छरान्सर्वांश्चिच्छेदति
लशःक्षणात्॥ताडयामासचाङ्गेषुपुष्कलंशितसायकैः ॥१०॥ पुष्कलस्तद्रथंदिव्यंभ्रामकास्त्रेणशोभिना॥नभसिभ्रामयामासतदद्भुतमिवाभवत् ॥११॥
भ्रान्त्वामुहूर्तमात्रंतुसरथोहयसंयुतः ॥ स्थितिंलेभेऽतिकष्टेनसन्धृतोरणमण्डले ॥ १२ ॥ सचास्यविक्रमंदृष्ट्वाचित्राङ्गःकुपितोभृशम् ॥ उवाचपुष्कलं
धीमान्सर्वास्त्रेषुविशारदः ॥ १३ ॥ चित्राङ्गउवाच ॥ त्वयासाधुकृतंकर्मसुभटैर्युधिसंमतम् ॥ मद्रथोवाजिसंयुक्तोभ्रामितोनभसिक्षणम् ॥१४॥ प
राक्रमंसमीक्षस्वममापिसुभटेरितम् ॥ आकाशचारीतुभवान्भवत्वमरपूजितः ॥ १५ ॥ इत्युक्त्वासमुमोचास्त्रंरणेपरमदारुणम् ॥ धनुषापरमा
स्त्रज्ञःसर्वधर्मविदुत्तमः ॥ १६ ॥ तेनबाणेनसंविद्धःखेबभ्रामपतङ्गवत् ॥ सरथःसहयःसङ्ख्येसध्वजश्चससारथिः ॥ १७ ॥ भ्रान्त्वासरथवर्य
स्तुनभसित्वरयान्वितः ॥ यावत्स्थितिंनलभतेतावन्मुक्तोऽपरःशरः ॥ १८ ॥ पुनश्चपरिबभ्रामरथःसूतसमन्वितः ॥ तत्कर्मवीक्ष्यपुत्रस्यराज्ञोविस्म
यमापसः ॥ १९ ॥ कथंचित्स्थितिमप्यापपुष्कलःपरवीरहा ॥ रथंजघानबाणैश्चससूतहयमस्यच ॥ २० ॥ सभग्नस्यन्दनोवीरःपुनरन्यंसमाश्रि
तः ॥ सोऽपिभग्नःशरैराशुपुष्कलेनरणाङ्गणे ॥२१॥ पुनरन्यंसमास्थाययावदायातिसंमुखम् ॥ तावद्बभञ्जनिशितैःसायकैस्तद्रथंपुनः ॥ २२ ॥ एवं
दशरथाभग्नानृपतेरात्मजस्यहि ॥ पुष्कलेनतुवीरेणमहासंयुगशालिना ॥ २३ ॥ तदाचित्राङ्गकःसङ्ख्येरथेस्थित्वाविचित्रिते ॥ आजगामहवेगेनपु
ष्कलंप्रतियोधितुम् ॥ २४ ॥ पुष्कलंपञ्चभिर्बाणैस्ताडयामाससंयुगे ॥ तैर्बाणैर्निहतोऽत्यन्तंविव्यथेभरतात्मजः ॥२५॥ सक्रुद्धश्चापमुद्यम्यबाणान्द
शशितान्महान् ॥ मुमोचहृदयेतस्यस्वर्णपुङ्खसुशोभितान्॥२६॥तेबाणाःपपुरेतस्यरुधिरंबहुदारुणाः ॥ पीत्वापेतुःक्षितौकूटसाक्षिणःपूर्वजाइव॥२७॥
तदाचित्राङ्गकःक्रुद्धोभल्लान्पञ्चसमाददे॥मुमोचभालेपुत्रस्यभरतस्यमहौजसः॥२८॥ तैर्भल्लैराहतःक्रुद्धःशरासनवरेशरम्॥दधत्प्रतिज्ञामकरोच्चित्राङ्गनि
धनंप्रति ॥ २९ ॥ शृणुवीरममक्षिप्रंप्रतिज्ञांत्वद्वधाश्रिताम् ॥ तज्ज्ञात्वासावधानेनयोद्धव्यंचत्वयात्रहि ॥ ३० ॥ बाणेनानेनचेत्त्वांवैनकुर्यांप्राणवर्जि
तम् ॥ सतींसन्दूष्यवनितांशीलाचारसुशोभिताम् ॥ ३१ ॥ योलोकःप्राप्यतेलोकैर्यमस्यवशवर्तिभिः ॥ सलोकोममवैभूयात्सत्यंममप्रतिश्रुतम्
॥ ३२ ॥ इतिश्रेष्ठंवचःश्रुत्वाजहासपरवीरहा ॥ उवाचमतिमान्वीरःपुष्कलंवचनंशुभम् ॥ ३३ ॥ मृत्युर्वैप्राणिनांभाव्यःसर्वत्रैवचसर्वदा ॥ तस्मान्मे

१ 'मन्यते' इ० पा० । २ 'यावत्स्थितिं स लभते' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निधनेदुःखंनास्तिशूरशिरोमणे ॥ ३४ ॥ प्रतिज्ञायाकृतावीरत्वयावीरत्वशालिना ॥ सासत्यैवपुनर्मेऽद्यश्रूयतांव्याहृतंमहत् ॥ ३५ ॥ त्वद्बाणंमद्वधो
द्युक्तंनच्छिन्द्यांयदिचेदहम् ॥ तदाप्रतिज्ञांशृणुमेसर्ववीराभिमानिनः ॥ ३६ ॥ तीर्थंजिगमिषोर्योवैकुर्यात्स्वान्तविखण्डनम् ॥ एकादशीव्रतादन्य
ज्ञानातिव्रतमुच्चकैः ॥ ३७ ॥ तस्यपापंममैवास्तुप्रतिज्ञापरिघातिनः ॥ इतिवाक्यमुदीर्यैवतूष्णीम्भूतोधनुर्दधे ॥ ३८ ॥ तदानेननिषङ्गात्स्वादुद्धृत्य
सायकंवरम् ॥ कथयामासविशदंवाक्यंशत्रुवधावहम् ॥३९ ॥ पुष्कलउवाच ॥ यदिरामाङ्घ्रियुगलंनिष्कापट्येनचेतसा ॥ उपासितंमयातर्हिमम
वाक्यमृतंभवेत् ॥ ४० ॥ यदिस्वमहिलांमुक्त्वानान्यांजानामिचेतसा ॥ तेनसत्येनमेवाक्यंसत्यंभवतुसङ्गरे ॥४१॥ इतिवाक्यमुदीर्याशुबाणंधनुषि
संहितम् ॥ कालानलोपमंवीरशिरश्छेदनमाक्षिपत् ॥ ४२ ॥ तंबाणंमुक्तमालोक्यसतुराजसुतोवली ॥ बाणंशरासनेऽधत्ततीक्ष्णंकालानलोपमम्
॥४३॥तेनबाणेनसंछिन्नोबाणःस्ववधउद्यतः॥ हाहाकारोमहानासीच्छिन्नेतस्मिञ्छरेतदा॥४४॥परार्धंपतितंभूमौपूर्वार्धंफलसंयुतम्॥शिरोधरांचकर्ताशु
पद्मनालमिवक्षणात् ॥ ४५ ॥ तदाभूमौपतन्तंतुदृष्ट्वातत्तस्यसैनिकाः ॥ हाहाकृत्वाभृशंसर्वेपलायनपरागताः ॥ ४६ ॥ पृथ्व्यांतन्मस्तकंश्रेष्ठंसकिरी
टंसकुण्डलम् ॥ शुशुभेऽतीवपतितंचन्द्रबिम्बंदिवोयथा ॥ ४७ ॥ तंवीक्ष्यपतितंवीरःपुष्कलोभरतात्मजः ॥ व्यगाहतव्यूहमिमंसर्ववीरैकशोभितम्
॥ ४८ ॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशेषवा०रामाश्व०चित्राङ्गवधोनामसप्तविंशतितमोऽध्यायः ॥ २७ ॥ शेषउवाच ॥ अथपुत्रंसमालोक्य
पतितंव्यसुमुद्धतम् ॥ विललापभृशंराजासुतदुःखेनदुःखितः ॥ १ ॥ मूर्ध्निसन्ताडयामासपाणिभ्यामतिदुःखितः ॥ कम्पमानोभृशंचाश्रूण्यमुञ्च
न्नयनाब्जयोः ॥ २ ॥ गृहीत्वापतितंवक्त्रंचन्द्रबिम्बमनोरमम् ॥ पुष्कलेषुक्षतासृग्भिःक्लिन्नंकुण्डलशोभितम् ॥ ३ ॥ कुटिलभ्रूयुगंश्रेष्ठंसन्दष्टाधरप
ल्लवम् ॥ सचुम्बन्मुखपाद्मेनविलपन्निदमब्रवीत ॥ ४ ॥ हापुत्रवीरकथमुत्सुकचेतसंमांकिंनेक्षसेविशदनेत्रयुगेनशूर ॥ किंमद्विनोदकथयारहितस्त्वमेवं
रोषोदधिप्लुतमनाःकिललक्ष्यसेच ॥ ५ ॥ वदपुत्रकथंमांत्वंप्रब्रूषेनहसन्पुनः ॥ अमृतैर्मधुरास्वादैर्विनोदयसिपुत्रक ॥ ६ ॥ शत्रुघ्नाश्वंगृहाणत्वंसित
चामरशोभितम् ॥ स्वर्णपत्रेणशोभाढ्यंत्यजनिद्रांमहामते ॥ ७ ॥ एषप्रतापविशदःप्रतापाग्र्यःपरन्तपः ॥ धनुर्बिभ्रत्पुरोभातिपुष्कलःपरवीरहा
॥ ८ ॥ एनंवारयसत्तीक्ष्णैर्बाणैःकोदण्डनिर्गतैः ॥ कथंत्वंरणमध्येवैशेषवीरविमोहितः ॥ ९ ॥ हस्तिनःपत्तयश्चैवरथारूढाभयार्दिताः ॥ शरणंत्वांस
मायान्तितानीक्षस्वमहामते ॥ १० ॥ पुत्रत्वयाविनासोढुंकथंशक्तोरणाङ्गणे ॥ शत्रुघ्नसायकांस्तीक्ष्णांश्चण्डकोदण्डनिर्गतान् ॥ ११ ॥ अतोमांतुत्व
याहीनंकोवापालयितुंक्षमः ॥ यदित्यक्ष्यसिनिद्रांत्वंजयायाहंक्षमस्तदा ॥ १२ ॥ इत्थंविलप्यसुभृशंतताडहृदयंस्वकम् ॥ बहुशःपाणिनाराजापुत्र

CC-0. In Public Domain. Digitization by eGangotri

दुःखेनदुःखितः ॥ १३ ॥ तदाविचित्रदमनौस्वस्वस्यन्दनसंस्थितौ ॥ पितुश्चरणयोर्नत्वाऊचतुःसमयोचितम् ॥ १४ ॥ राजन्नस्मासुजीवत्सुकिं
दुःखंहृदितद्वद ॥ वीराणांप्रधनेमृत्युर्वाञ्छितोजायतेमहान् ॥ १५ ॥ धन्योऽयंबतचित्राङ्गोयोवीरभुविशोभते ॥ सकिरीटस्तुसन्दष्टदन्तच्छदयुगः
प्रभुः ॥ १६ ॥ कथयाशुकिमद्यैवकुर्वस्तेकार्यमीप्सितम् ॥ शत्रुघ्नवाहिनींसर्वांहन्वआवामनाथिनीम् ॥ १७ ॥ अद्यैवपुष्कलंभ्रातुर्वधकारिणमाहवे॥
पातयावोरथाच्छित्त्वाशिरोमुकुटमण्डितम् ॥ १८ ॥ त्यजशोकंसुदुःखार्तःकथंभासिमहामते ॥ आज्ञापयावांमानार्हकुरुयुद्धेमतिंतथा ॥ १९ ॥ इति
वाक्यंसमाकर्ण्यपुत्रयोर्वीरमानिनोः ॥ शोकंत्यक्त्वामहाराजोयुद्धायमतिमादधात् ॥ २० ॥ तावपिप्रतियोद्धारंवाञ्छन्तौरणदुर्मदौ ॥ जग्मतुःकट
केशत्रोरनन्तभटपूरिते ॥२१॥ रिपुतापेनदमनोनीलरत्नेनचेतरः ॥ युयुधातेरणेवीरौप्रावृषीवबलाहकौ ॥२२॥ राजाकनकसन्नद्धेरथेमणिविचित्रिते ॥
रत्नकूबरशोभाढ्येतिष्ठंश्चापधरोबली ॥२३॥ ययौयोद्धुंतुशत्रुघ्नंवीरकोटिभिरावृतम् ॥ तृणीकुर्वन्महावीरान्धनुर्विद्याविशारदान् ॥२४॥ तंयोद्धुमागतं
दृष्ट्वासुबाहुंरोषपूरितम् ॥ पुत्रनाशेनकुर्वन्तंसर्वसैन्यवधादिकम् ॥ २५ ॥ शत्रुघ्नपार्श्वसञ्चारीहनूमांस्तमुपाद्रवत् ॥ नखायुधोमहानादंकुर्वन्मेघइवाह
वे ॥२६॥ सुबाहुस्तंहनूमन्तमागच्छन्तंमहारवम् ॥ उवाचप्रहसन्वाक्यंरोषपूरितलोचनः ॥२७॥ क्वगतःपुष्कलोहत्वामत्पुत्रंरणमण्डले ॥पातयाम्यद्य
तस्याशुशिरोज्वलितकुण्डलम् ॥२८॥ क्वशत्रुघ्नोवाहपालःक्वचरामःकुतोभटाः॥प्राणहन्तारमायान्तंपश्यन्तुप्रधनेतुमाम् ॥२९॥ इतितद्वाक्यमाकर्ण्य
हनूमान्निजगादतम् ॥ शत्रुघ्नोलवणच्छेत्तावर्ततेसैन्यपालकः ॥ ३० ॥ सकथंप्रधनेयुध्येत्सेवकेऽग्रेस्थितेनृप ॥ मांविजित्यरणेतंचत्वंगन्तासिनरर्षभ
॥ ३१ ॥ इत्युक्तवन्तंतरसाविव्याधदशसायकैः ॥ हृदिवानरमत्युग्रंपर्वताग्र्यमिवस्थितम् ॥ ३२ ॥ सबाणानागतांस्तांश्चगृहीत्वाकरसम्पुटे ॥ चूर्ण
यामासतिलशःशितान्वैरिविदारणान् ॥ ३३ ॥ चूर्णयित्वाशरांस्तांस्तुनिनदन्घनगर्जितैः ॥ पुच्छेनावेष्टयतस्योच्चैरथंनिन्येमहाबलः ॥३४ ॥ तदातं
नृपवर्योऽसावाकाशेस्थितएषसः॥लांगूलंताडयामासशिताग्रैःसायकैर्मुहुः ॥ ३५ ॥ सताडितस्तुपुच्छाग्रेशरैःसन्नतपर्वभिः ॥ मुमोचतद्रथंदिव्यंक
नकेनविचित्रितम् ॥ ३६ ॥ समुक्तस्तेनतरसाशरैस्तीक्ष्णैर्जघानतम् ॥ हनूमन्तंकपिवरंरोषसम्पूरितेक्षणः ॥ ३७ ॥ हनूमान्बाणविच्छिन्नःसर्वत्ररुधिरा
प्लुतः ॥ महारोषंसमाधत्तनृपोपरिकपीश्वरः ॥ ३८ ॥ गृहीत्वातस्यदंष्ट्राभीरथंहयसमन्वितम् ॥ चूर्णयामासवेगेनतदद्भुतमिवाभवत् ॥ ३९ ॥ स्वरथं
भज्यमानंतुदृष्ट्वाराजात्वरन्बली ॥ अन्यंरथंसमास्थाययुयुधेतंमहाबलम् ॥ ४० ॥ पुच्छेमुखेऽथोरसिचभुजेचरणयोर्नृपः ॥ जघानशरसन्धानकोवि
दःपरमास्त्रवित् ॥४१॥ तदाक्रुद्धःकपिवरस्ताडयामासवक्षसि॥पादेनोत्प्लुत्यवेगेनराज्ञःसुभटशोभिनः ॥४२॥ सपदाप्रहतोभूमौपपातकिलमूर्च्छितः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुखाद्वमन्नसृक्चोष्णंश्वासपूरप्रवेपितः ॥ ४३ ॥ तदाप्रकुपितोऽत्यन्तंहनूमान्प्रधनाङ्गणे ॥ अश्वान्वीरान्गजांश्चापिचूर्णयामासवेगतः ॥ ४४ ॥
तदासुकेतुस्तद्भ्राताऽतथालक्ष्मीनिधिर्नृपः ॥ उभावपिसुसन्नद्धौयुद्धायसमुपस्थितौ ॥ ४५ ॥ राजानंमूर्च्छितंदृष्ट्वाप्रपलाय्यगतानराः ॥ इतस्ततोबाण
सङ्घैःक्षताःपुष्कलवर्षितैः ॥ ४६ ॥ तद्भज्यमानंस्वबलंवीक्ष्यराजात्मजोबली ॥ दमनःस्तम्भयामाससेतुर्वार्धिमिवोच्चलम् ॥ ४७ ॥ तदातुमूर्च्छि
तोराजास्वप्नमेकंददर्शह ॥ रणमध्येकपिवरप्रपदाघातताडितः ॥ ४८ ॥ रामचन्द्रस्त्वयोध्यायांसरयूतीरमण्डपे ॥ ब्राह्मणैर्याज्ञिकश्रेष्ठैर्बहुभिःपरिवा
रितः ॥ ४९ ॥ तत्रब्रह्मादयोदेवास्तत्रब्रह्माण्डकोटयः ॥ कृतप्राञ्जलयस्तेवैस्तुवन्तिस्तुतिभिर्मुहुः ॥ ५० ॥ रामंश्यामंसुनयनंमृगशृङ्गपरिग्रहम् ॥
गायन्तिनारदाद्याश्चवीणोल्लसितपाणयः ॥ ५१ ॥ नृत्यन्त्यप्सरसस्तत्रघृताचीमेनकादयः ॥ वेदामूर्तिधराभूत्वाउपतिष्ठन्तिराघवम् ॥ ५२ ॥ यच्चकि
ञ्चिद्वस्तुजातंसर्वशोभासमन्वितम् ॥ तस्यदातारमखिलंभक्तानांभोगदायकम् ॥ ५३ ॥ इत्येवमादिसम्पश्यञ्जाग्रत्संज्ञामवापसः ॥ ब्रह्मशापहतज्ञानः
किंदृष्टमितिवैवदन् ॥ ५४ ॥ उत्थायप्रययौपद्भ्यांशत्रुघ्नचरणंप्रति ॥ भृत्यकोटिपरीवारोरथकोटिपरीवृतः ॥५५॥ सुकेतुंतुसमाहूयविचित्रंदमनंतथा ॥
युद्धंकर्तुंसमुद्युक्तान्वारयामासधर्मवित् ॥५६॥ उवाचतान्महाराजोधर्मात्माधर्मसंयुतः ॥ भ्रातःपुत्रौशृणुतमेवाक्यंधर्मसमन्वितम् ॥ ५७ ॥ मायुद्धं
कुरुतक्षिप्रमनयस्तुमहानभूत ॥ यद्रामचन्द्रवाहंत्वमगृह्णादमनोर्जितम् ॥ ५८ ॥ एषरामःपरंब्रह्मकार्यकारणतःपरम् ॥ चराचरजगत्स्वामीनमानुषव
पुर्धरः ॥ ५९ ॥ एतद्विब्रह्मविज्ञानमधुनाज्ञातवानहम् ॥ पुराऽसिताङ्गशापेनहृतज्ञानधनोऽनघाः ॥ ६० ॥ अहंपुरातीर्थयात्रांगतस्तत्त्वविवित्सया ॥
तत्रानेकेमयादृष्टामुनयोधर्मवित्तमाः ॥ ६१ ॥ असिताङ्गंमुनिमहंगतवाञ्ज्ञातुमिच्छया ॥ तदाप्रोवाचमांविप्रःकृपांकृत्वाममोपरि ॥ ६२ ॥ योऽसा
वयोध्याधिपतिःसपरब्रह्मशब्दितः ॥ तस्ययाजानकीदेवीसाक्षात्साचिन्मयीस्मृता ॥ ६३ ॥ एनंतुयोगिनःसाक्षादुपासतेयमादिभिः ॥ दुस्तरापारसं
सारवारिधिंसन्तितीर्षवः ॥ ६४ ॥ स्मृतमात्रोमहापापहारीसगरुडध्वजः ॥ यएनंसेवतेविद्वान्ससंसारंतरिष्यति ॥ ६५ ॥ तदाहमहसंविप्रंकोऽयंरामस्तु
मानुषः ॥ केयंसाजानकीदेवीहर्षशोकसमाकुला ॥ ६६ ॥ अजन्मनःकथंजन्मअकर्तुःकृत्यमत्रकिम् ॥ जन्मदुःखजरातीतंकथयस्वमुनेमम ॥ ६७ ॥
इत्युक्तवन्तंमांक्रुद्धःशशापसमुनीश्वरः ॥ अज्ञात्वातत्स्वरूपंत्वंप्रतिब्रूषेममाधम ॥ ६८ ॥ एनंनिन्दसिरामंत्वंमानुषोऽयमिदंहसन् ॥ तस्मात्त्वंतत्त्वसंमू
ढोभविष्यस्युदरम्भरिः ॥ ६९ ॥ तदाहंतस्यचरणावगृह्णंसदयायुतः ॥ दृष्ट्वामेविनयंमांतुप्रावोचत्करुणानिधिः ॥ ७० ॥ त्वंरामस्यमखेविघ्नंकरिष्यसि
यदानृप ॥ तदाङ्घ्रिणाहनूमांस्त्वांताडयिष्यतिवेगतः ॥७१॥ तदात्वंज्ञास्यसेराजन्नान्यथास्वमनीषया ॥ पुराहमुक्तस्तेनैवंतद्दृष्टमधुनामया ॥७२॥

Nepal Sanskrit University, Valmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

यदामांहनुमान्क्रुद्धस्ताडयामासवक्षसि ॥ तदाऽदर्शंरमानाथंपूर्णब्रह्मस्वरूपिणम् ॥ ७३ ॥ तस्मादश्वंतुशोभाढ्यमानयन्तुमहाबलाः ॥ धनानिचैववा
सांसिराज्यंचेदंसमर्पये ॥ ७४ ॥ रामंदृष्ट्वाकृतार्थःस्यामहंयज्ञेऽतिपुण्यदे ॥ आनयन्तुहयंमह्यंरोचतेतुतदर्पणम् ॥ ७५ ॥ इतिश्रीपाद्मेपुराणेपातालख
ण्डेशेषवा०रामाश्व०सुबाहुपराजयोनामाष्टाविंशतितमोऽध्यायः ॥ २८ ॥ शेषउवाच ॥ तेतुतातवचःश्रुत्वाहर्षिताःसम्प्रहारिणः ॥ तथेत्यूचुर्महाराजं
रामदर्शनलालसम् ॥ १ ॥ पुत्राऊचुः ॥ राजन्भवत्पदाम्भोजान्नान्यंजानीमहेवयम् ॥ यत्तवस्वान्ततोजातंतद्भवत्वद्यवेगतः ॥ २ ॥ अश्वोऽयंनीय
तांतत्रसितचामरभूषितः ॥ रत्नमालातिशोभाढ्यश्चन्दनादिकचर्चितः ॥ ३ ॥ राज्यमाज्ञाफलंस्वामिन्कोशाबहुसमृद्धयः ॥ वासांसिसुमहार्हाणिसू
क्ष्माणिसुगुणानिच ॥ ४ ॥ चन्दनंचन्द्रकंचैववाजिनःसुमनोहराः ॥ हस्तिनस्तुमदोद्धूतारथाःकाञ्चनकूबराः ॥ ५ ॥ विचित्रतरवर्णादिनानाभूषण
भूषिताः ॥ दास्यःशतसहस्रंचदासाश्चसुमनोरमाः ॥ ६ ॥ मणयःसूर्यसङ्काशारत्नानिविविधानिच ॥ मुक्ताफलानिशुभ्राणिगजकुम्भभवानिच
॥ ७ ॥ विद्रुमाःशतसाहस्रायच्चद्रस्तुमहोदयम् ॥ तत्सर्वंरामचन्द्रायदेहिराजन्महामते ॥ ८ ॥ सुतानस्मान्किङ्करांश्चसर्वानर्पयभूपते ॥ कथंनकुरुषेरा
जंस्तदधीनंनृपासनम् ॥ ९ ॥ शेषउवाच ॥ इतिपुत्रवचःश्रुत्वाहर्षितोऽभून्महीपतिः ॥ उवाचचसुतान्वीरान्स्ववाक्यकरणोद्यतान् ॥ १० ॥ राजो
वाच ॥ आनयन्तुहयंसर्वेसन्नद्धाःशस्त्रपाणयः ॥ नानारथपरीवारास्ततोयास्येनृपंप्रति ॥ ११ ॥ शेषउवाच ॥ इतिराज्ञोःवचःश्रुत्वाविचित्रो
दमनस्तथा ॥ सुकेतुःसमरेशूराजग्मुस्तस्याज्ञयोद्यताः ॥ १२ ॥ तेगत्वाथपुरींशूरावाजिनंसुमनोरमम् ॥ सितचामरसंयुक्तंस्वर्णपत्राद्यलङ्कृतम्
॥ १३ ॥ रत्नमालाविभूषाढ्यंचित्रपत्रेणशोभितम् ॥ विचित्रमणिभूषाढ्यंमुक्ताजालस्वलङ्कृतम् ॥ १४ ॥ रज्ज्वाधृतंमहावीरैःपूर्वतःपृष्ठतो
भटैः ॥ महाशस्त्रास्त्रसंयुक्तैःसर्वशोभासमन्वितैः ॥ १५ ॥ सितातपत्रमस्योच्चैर्भातिमूर्धनिवाजिनः ॥ सुचामरद्वयंयस्यध्रियतेपुरतोमुहुः ॥ १६ ॥
कृष्णागर्वादिधूपैश्चधूपितंवायुवेगिनम् ॥ राज्ञःपुरोनिनायाश्वंहयमेधस्यसत्क्रतोः ॥ १७ ॥ तमानीतंहयंदृष्ट्वारत्नमालाविभूषितम् ॥ मनोजवंकामरू
पंजहर्षमतिमान्नृपः ॥ १८ ॥ जगामपद्भ्यांशत्रुघ्नंराजचिह्नाद्यलङ्कृतः ॥ स्वपुत्रपौत्रैःसंयुक्तोराजापरमधार्मिकः ॥ १९ ॥ ययौकर्तुंधनानांससद्व्ययं
चलगामिनाम् ॥ एतद्विनश्वरंमत्वादुःखदंसक्तचेतसाम् ॥ २० ॥ शत्रुघ्नंसददर्शाथसितच्छत्रेणशोभितम् ॥ चामरैर्वीज्यमानञ्चसेवकैःपुरतःस्थितैः
॥ २१ ॥ सुमतिंपरिपृच्छन्तंरामचन्द्रकथानकम् ॥ भयवार्ताविनिर्मुक्तंवीरशोभास्वलङ्कृतम् ॥ २२ ॥ वीरैःकोटिभिराकीर्णंनेत्रपाताभिकाङ्क्षिभिः ॥
वानराणांसहस्रैश्चसमन्तात्परिवारितम् ॥२३॥ दृष्ट्वाशत्रुघ्नचरणौप्रणनामसपुत्रकः॥धन्योऽहमितिसंहृष्टोवदन्नामैकमानसः ॥२४॥ शत्रुघ्नस्तंप्रणयिनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृष्ट्वाराजानमुद्धटम्॥उत्थायासनतःसर्वैर्भटैर्दोर्भ्यांससस्वजे ॥२५॥ दृढंसम्पूज्यराजातंशत्रुघ्नंपरवीरहा ॥ उवाचहर्षमापन्नोगद्गदस्वरयागिरा ॥ २६ ॥
सुबाहुरुवाच॥अद्यधन्योऽस्मिससुतःसकुटुम्बःसवाहनः॥यद्युष्मच्चरणौद्रक्ष्येनृपकोटिभिरीडितौ ॥२७॥ अज्ञानिनासुतेनायंगृहीतोवाजिनांवरः॥दम
नेनानयंत्वस्यक्षमस्वकरुणानिधे ॥२८॥ नजानातिरघूत्तंसंसर्वदेवाधिदैवतम्॥लीलयाविश्वस्रष्टारंहन्तारमपिपालकम् ॥२९॥ इदंराज्यंसमृद्धाङ्गंसमृद्ध
बलवाहनम् ॥ इमेकोशाधनैःपूर्णाइमेपुत्राइमेवयम् ॥३०॥ सर्वेवयंरामनाथास्त्वदाज्ञाप्रतिपालकाः ॥ गृहाणसवसफलंनमेऽस्तिकश्चिदुन्नतम् ॥३१॥
क्वासौहनूमान्रामस्यचरणाम्भोजषट्पदः ॥ यत्प्रसादादहंप्राप्स्येराजराजस्यदर्शनम् ॥ ३२ ॥ साधूनांसङ्गमेकिंकिंप्राप्यतेनमहीतले ॥ यत्प्रसादाद
हंमूढोब्रह्मशापमतीतरम् ॥ ३३ ॥ दृष्ट्वात्वद्यमहाराजंपद्मपत्रनिभेक्षणम् ॥ प्राप्स्यामिजन्मनःसवफलंदुर्लभमत्रच ॥ ३४ ॥ ममतावद्गतंचायुर्बहुराम
वियोगिनः ॥ स्वल्पमुर्वरितंतत्रकथंद्रक्ष्येरघूत्तमम् ॥ ३५ ॥ मह्यंदर्शयतंरामंयज्ञकर्मविचक्षणम्॥ यदङ्घ्रिरजसापूताशिलाभूतामुनिप्रिया ॥ ३६ ॥
काकःपरंपदंप्राप्तोयद्घ्राणस्पर्शनात्खगः ॥ अनेकेयस्यवक्त्राब्जंवीक्ष्यसङ्ख्येपदंगताः ॥३७॥ येत्वस्यरघुनाथस्यनामगृह्णन्तिसादराः ॥ तेयान्तिपर
मंस्थानंयोगिभिर्यद्विचिन्त्यते ॥ ३८ ॥ धन्योऽयोध्याभवोलोकोयोराममुखपङ्कजम् ॥ स्वलोचनपुटैःपीत्वासुखंयातिमहोदयम् ॥ ३९ ॥ इतिस
म्भाष्यनृपतिंवाहंराज्यंधनानिच ॥ सवसमर्प्यचावोचत्किङ्करोऽस्मिमहीपते ॥ ४० ॥ इतिवाक्यंसमाकर्ण्यराज्ञःपरपुरञ्जयः ॥ प्रत्युवाचेतितंभूपंवा
ग्ग्मीवाक्यविशारदः ॥४१॥ शत्रुघ्नउवाच॥कथंराजन्निदंब्रूषेत्वंवृद्धोममपूजितः॥सर्वंत्वदीयंत्वद्राज्यंदमनोविदधात्वयम् ॥४२॥ क्षत्रियाणामिदंकृत्यं
सङ्ग्रामकरणंतुयत्॥सर्वंराज्यंधनंचेदंप्रतियातुममाज्ञया ॥ ४३ ॥ यथामेरघुनाथस्तुपूज्योवाङ्मनसासदा॥तथात्वमपिमत्पूज्योभविष्यसिमहीपते
॥ ४४ ॥ भवान्सज्जोभवत्वद्यहयस्यानुगमंप्रति ॥ सन्नद्धःकवचीखड्गीगजाश्वरथसंयुतः ॥ ४५ ॥ इतिवाक्यंसमाकर्ण्यशत्रुघ्नस्यमहीपतिः ॥
पुत्रंराज्येऽभिषेच्यैवशत्रुघ्नेनसुपूजितः ॥ ४६ ॥ महारथैःपरिवृतोनिजंपुत्रंरणाङ्गणे ॥ पुष्कलेनहतंभूपःसंस्कृत्यविधिपूर्वकम् ॥४७॥ क्षणंशुशोचतत्त्व
ज्ञोलोकदृष्ट्यामहारथः ॥ ज्ञानेनानाशयच्छोकंरघुनाथमनुस्मरन् ॥४८॥ सज्जीभूतोरथेतिष्ठन्महासैन्यसमावृतः ॥ आजगामसशत्रुघ्नंमहारथिपुरस्कृ
तः ॥ ४९ ॥ राजातमागतंदृष्ट्वासर्वसैन्यसमन्वितम् ॥ गन्तुंचकारधिषणांहयवर्यस्यपालने ॥ ५० ॥ सोऽश्वोविमोचितस्तेनभालेपत्रेणचिह्नितः॥वा
मावर्तंभ्रमन्प्रायात्पौर्वाञ्जनपदान्बहून् ॥ ५१ ॥ तत्रतत्रत्यभूपालैर्महाशूराभिपूजितः ॥ प्रणतिःक्रियतेतस्यनकोऽपितमगृह्णत ॥ ५२ ॥ केचिद्वासां
सिचित्राणिकेचिद्राज्यंस्वकंमहत् ॥ केचिद्धनंजनंकेचिदानीयप्रणमन्तितम् ॥५३॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशेषवा०रामाश्व०शत्रुघ्नस्यसु

CC-0. In Public Domain. Digitization by eGangotri

बाहुनासहनिर्याणंनामैकोनत्रिंशत्तमोऽध्यायः ॥ २९ ॥ शेषउवाच ॥ अथतेजःपुरंप्राप्तस्तुरगःपत्रशोभितः ॥ यस्यांपालयतेराजाप्रजाःसत्येनसत्य
वान् ॥ १ ॥ रथकोटिपरीवारोरघुनाथानुजस्ततः ॥ हयानुगोययौतस्यपुरतःपुरधर्षणः ॥ २ ॥ तद्दृष्ट्वानगरंरम्यंचित्रप्राकारशोभितम् ॥ काञ्चनैः
कलशैस्तत्रपरितःप्रतिभासितम् ॥ ३ ॥ देवायतनसाहस्रैःसर्वतश्चविराजितम् ॥ यतीनांतुमठास्तत्रशोभन्तेयतिपूरिताः ॥ ४ ॥ वहत्यत्रमहादेवीशि
खिलोचनमूर्धगा ॥ हंसकारण्डवाकीर्णामुनिवृन्दनिषेविता ॥ ५ ॥ ब्राह्मणानांप्रत्यगारमग्निहोत्रभवःपुनः ॥ धूमस्तत्रपुनात्यङ्गपातकाप्लुतमानसान्
॥६॥ उवाचसुमतिंराजाशत्रुघ्नःशत्रुतापनः ॥ तत्पुरप्रेक्षणोद्भूतहर्षविस्मितमानसः ॥ ७ ॥ शत्रुघ्नउवाच ॥ मन्त्रिन्कथयकस्येदंपुरंमेदृष्टिगोचरम् ॥
करोतिमानसाह्लादंधर्मेणप्रतिपालितम् ॥ ८ ॥ शेषउवाच ॥ इतिवाक्यंसमाकर्ण्यशत्रुघ्नस्यमहीपतेः ॥ उवाचसुमतिःसर्वंयथातथमनुद्धतम्
॥ ९ ॥ सुमतिरुवाच ॥ शृणुष्वावहितःस्वामिन्वैष्णवस्यकथाःशुभाः ॥ याःश्रुत्वामुच्यतेपापाद्ब्रह्महत्यासमादपि ॥ १० ॥ जीवन्मुक्तोवरीवर्ति
रामाङ्घ्र्यम्बुजषट्पदः ॥ सत्यवान्यज्ञयज्ञाङ्गज्ञाताकर्ताऽवितामहान् ॥ ११ ॥ धेनुंप्रसाद्यबहुभिर्व्रतैर्यंप्रापतत्पिता ॥ ऋतम्भराख्योजगतिख्यातःप
रमधार्मिकः ॥ १२ ॥ गौःप्रसन्नाददौपुत्रमनेकगुणसंस्कृतम् ॥ सत्यवन्तंसुशोभाढ्यंतंजानीहिनृपोत्तमम् ॥ १३ ॥ शत्रुघ्नउवाच ॥ कोवाऋतम्भरो
राजाकिमर्थंधेनुपूजनम् ॥ कथंप्राप्तःसुतस्तस्यवैष्णवोविष्णुसेवकः ॥ १४ ॥ सर्वमेतत्समाचक्ष्ववैष्णवस्यकथानकम् ॥ श्रुतंहरतिजन्तूनांमहापातक
पर्वतम् ॥ १५ ॥ शेषउवाच ॥ इतिवाक्यंसमाकर्ण्यशत्रुघ्नस्यमहार्थकम् ॥ कथयामासविशदंतदुत्पत्तिकथानकम् ॥ १६ ॥ ऋतम्भरोनरपतिरन
पत्यःपुराऽभवत् ॥ कलत्राणिबहून्यस्यनपुत्रंप्रापतेध्रुवे ॥ १७ ॥ तदाजाबालिनामानंमुनिंदैवादुपागतम् ॥ पप्रच्छकुशलोद्युक्तःसपुत्रोत्पत्तिकारणम्
॥ १८ ॥ ऋतम्भरउवाच ॥ स्वामिन्वन्ध्यस्यमेब्रूहिपुत्रोत्पत्तिकरंवचः ॥ यत्कृत्वाजायतेऽपत्यंममवंशधरंपरम् ॥ १९ ॥ तज्ज्ञात्वाभवतो
भव्यंप्रकुर्यान्निश्चितंवचः ॥ दानंव्रतंवातीर्थंवामखंवामुनिसत्तम ॥ २० ॥ इतिराज्ञोवचःश्रुत्वाजगादमुनिसत्तमः ॥ सुतोत्पत्तिकरंवाक्यंप्रणतायसुता
र्थिनः ॥ २१ ॥ अपत्यप्राप्तिकामस्यसन्त्युपायास्त्रयःप्रभो ॥ विष्णोःप्रसादोगोश्चापिशिवस्याप्यथवापुनः ॥ २२ ॥ तस्मात्त्वंकुरुवैपूजांधेनोर्दे
वतनोर्नृप ॥ यस्याःपुच्छेमुखेशृङ्गेपृष्ठेदेवाःप्रतिष्ठिताः ॥ २३ ॥ सातुष्टादास्यतिक्षिप्रंवाञ्छितंधर्मसंयुतम् ॥ एवंविदित्वागोपूजांविधेहित्वमृतम्भर॥
॥ २४ ॥ योवैनित्यंपूजयतिगांगेहेयवसादिभिः ॥ तस्यदेवाश्चपितरोनित्यंतृप्ताभवन्तिहि ॥ २५ ॥ योवैगवाह्निकंदद्यान्नियमेनशुभव्रतः ॥ तेन
सत्येनतस्यस्युःसर्वेपूर्णामनोरथाः ॥ २६ ॥ तृषितागौर्गृहेबद्धागेहेकन्यारजस्वला ॥ देवताचसनिर्माल्याहन्तिपुण्यंपुराकृतम् ॥ २७ ॥ योवैगां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतिषिद्धयेतचरन्तींस्वंतृणंनरः ॥ तस्यपूर्वेचपितरःकम्पन्तेपतनोन्मुखाः ॥ २८ ॥ योवैयष्ट्याताडयतिधेनुंमर्त्योविमूढधीः ॥ धर्मराजस्यनगरंस
यातिकरवर्जितः ॥ २९ ॥ योवैदंशान्वारयतितस्यपूर्वेह्यधोगताः ॥ नत्यन्तिमत्सुतोह्यस्मांस्तारयिष्यतिभाग्यवान् ॥ ३० ॥ अत्रैवोदाहरन्तीममि
तिहासंपुरातनम् ॥ जनकस्यपुरावृत्तंधर्मराजपुरेऽद्भुतम् ॥ ३१ ॥ एकदाजनकोराजायोगेनासून्समत्यजत् ॥ तदाविमानंसम्प्राप्तंकिङ्किणीजालभूषि
तम् ॥ ३२ ॥ तदारुह्यगतोराजासेवकैरूढदेहवान् ॥ मार्गेजगामधर्मस्यसंयमिन्याःपुरोऽन्तिके ॥ ३३ ॥ तदानरककोटीषुपीड्यन्तेपापकारिणः ॥
जनकस्याङ्गपवनंप्राप्यसौख्यंप्रपेदिरे ॥ ३४ ॥ निरयेदाहजापीडाजातैषांसुखकारिणी ॥ महादुःखंतदानष्टंजनकस्याङ्गवायुना ॥ ३५ ॥
तदातंनिर्गतंदृष्ट्वाजन्तवःपापपीडिताः ॥ अत्यन्तंचुक्रुशुर्भीतास्तद्वियोगमनिच्छवः ॥ ३६ ॥ ऊचुस्तेकरुणांवाचंमागच्छसुकृतिन्नितः ॥ त्वद
ङ्गवायुसंस्पर्शात्सुखिनःस्यामपीडिताः ॥ ३७ ॥ इतिवाक्यंसमाकर्ण्यराजापरमधार्मिकः ॥ मानसेचिन्तयामासकरुणापूरपूरितः ॥ ३८ ॥
चेन्मत्तःप्राणिनांसौख्यंभवेदिहतदापुनः ॥ अत्रैवचपुरेस्थास्येस्वर्गएषमनोरमः ॥ ३९ ॥ एवंकृत्वानृपस्तस्थौतत्रैवनिरयाग्रतः ॥ विदधत्प्राणिनां
सौख्यमनुकम्पितमानसः ॥ ४० ॥ तत्रधर्मस्तुसम्प्राप्तोनिरयद्वारिदुःखदे ॥ कारयन्यातनास्तीव्रानानापातककारिणाम् ॥ ४१ ॥ तदाददर्श
राजानंजनकंद्वारिसंस्थितम् ॥ विमानेनमहापुण्यकारिणंदययायुतम् ॥ ४२ ॥ तमुवाचप्रेतपतिर्जनकंसहसन्गिरा ॥ राजन्कुतस्त्वंसम्प्राप्तःसर्वधर्मशि
रोमणिः ॥ ४३ ॥ एतत्स्थानंपातकिनांदुष्टानांप्राणघातिनाम् ॥ नायान्तिपुरुषाभूपत्वादृशाःपुण्यकारिणः ॥ ४४ ॥ अत्रायान्तिनरास्तेवैयेपरद्रोहत
त्पराः ॥ परापवादनिरताःपरद्रव्यपरायणाः ॥ ४५ ॥ योवैकलत्रंधर्मिष्ठंनिजसेवापरायणम् ॥ अपराधादृतेजह्यात्सनरोऽत्रसमाव्रजेत् ॥ ४६ ॥
मित्रंवञ्चयतेयस्तुधनलोभेनलोभितः ॥ आगत्यात्रनरःपीडांमत्तःप्राप्नोतिदारुणाम् ॥४७॥ योरामंमनसावाचाकर्मणादम्भतोऽपिवा ॥ द्वेषाद्वाचोपहा
साद्वानस्मरत्येवमूढधीः ॥ ४८ ॥ तंबध्नामिपुनस्त्वेषुनिक्षिप्यश्रपयामिच ॥ यैःस्मृतोनरमानाथोनरकक्लेशवारकः[१] ॥ ४९ ॥ तावत्पापंमनुष्याणा
मङ्गेषुनृपतिष्ठति ॥ यावद्रामंनरसनागृणातिकलिदुर्मतेः ॥५०॥ महापापकराराजन्येभवन्तिमहामते ॥ तानानयन्तिमद्भृत्यास्त्वादृशान्द्रष्टुमक्षमाः
॥ ५१ ॥ तस्माद्गच्छमहाराजभुङ्क्ष्वभोगाननेकशः ॥ विमानवरमारुह्यभुङ्क्ष्वपुण्यमुपार्जितम् ॥५२॥ इतिवाक्यंसमाकर्ण्यधर्मराजस्यतत्पतेः ॥
उवाचधर्मराजंसकरुणापूरपूरितः ॥ ५३ ॥ जनकउवाच ॥ अहंगच्छामिनोनाथजीवानामनुकम्पया ॥ मदङ्गवायुनाह्येतेसुखंप्राप्ताःस्म

१ 'यैःस्मृतो वै रमानाथो नरकक्लेशवारकः । ते मत्स्थानं विहायाशु वैकुण्ठाख्यं प्रयान्त्यहो' ॥ इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संस्थिताः ॥ ५४ ॥ एतान्मुञ्चसिचेद्राजन्सर्वान्वैनिरयस्थितान् ॥ ततोगच्छामिसुखितःस्वगपुण्यजनाश्रितम् ॥५५॥ जाबालिरुवाच ॥ इतिवाक्य
मथाश्रुत्यजनकंप्रत्युवाचसः ॥ प्रत्येकंनिर्दिशञ्जीवान्निरयस्थानेनेकशः ॥ ५६ ॥ धर्मउवाच ॥ अयंमित्रकलत्रंवैविश्वस्तमनुजग्मिवान् ॥
तस्मादेनंलोहशङ्कौवर्षायुतमपीपचम् ॥ ५७ ॥ पश्चादेनंसूकराणांयोनौनिक्षिप्यदोषिणम् ॥ मानुषेष्ववतार्योऽयंषण्ढचिह्नेनचिह्नितः ॥ ५८ ॥
अनेनपरदाराश्चबलादालिङ्गितामुहुः ॥ तस्मादयंपच्यतेऽत्ररौरवेशतहायनम् ॥ ५९ ॥ अयंतुपरकीयंस्वंमुषित्वाबुभुजेकुधीः ॥ तस्मादस्य
करौछित्त्वापचेयंपूयशोणितं ॥ ६० ॥ अयंसायन्तनेप्राप्तमतिथिंक्षुधयार्दितम् ॥ वाण्यापिनोसच्चकारनाब्रवीत्स्वागतंवचः ॥ ६१ ॥
तस्मादयंपातनीयस्तामिस्रेऽन्धेनपूरिते ॥ भ्रमरैःपीडितोयातुयातनांशतहायनम् ॥ ६२ ॥ अयंतावत्परस्योच्चैर्निन्दांकुर्वन्नलज्जितः ॥ अयम
प्यशृणोत्कर्णौप्रेरयन्बहुशस्तुताम् ॥ ६३ ॥ तस्मादिमावन्धकूपेपतितौदुःखदुःखितौ ॥ अयंमित्रध्रुगुद्विग्नःपच्यतेरौरवेभृशम् ॥ ६४ ॥
तस्मादेतान्पापभोगान्कारयित्वाविमोचये ॥ त्वंगच्छनरशार्दूलपुण्यराशिविधायकः ॥ ६५ ॥ जाबालिरुवाच ॥ एवंसनिर्दिशञ्जी
वांस्तूष्णीमासाघकारिणः ॥ प्रोवाचरामभक्तोऽसौकरुणापूरितेक्षणः ॥ ६६॥ जनकउवाच ॥ कथंनिरयनिर्मुक्तिर्जीवानांदुःखिनांभवेत् ॥ तदाशु
कथयत्वंवैयत्कृत्वासुखमाप्नुयुः ॥६७ ॥धर्मउवाच ॥ नैभिराराधितोविष्णुर्नैभिस्तस्यकथाःश्रुताः ॥ कथंनिरयनिर्मुक्तिर्भवेद्वैपापकारिणाम् ॥६८॥
यदित्वंमोचयस्येतान्महापापकरानपि ॥ तर्ह्यर्पयमहाराजपुण्यंतत्कथयामियत् ॥ ६९ ॥ एकदाप्रातरुत्थायशुद्धभावेनचेतसा ॥ ध्यातःश्रीरघुना
थोऽसौमहापापहराभिधः ॥७० ॥ रामरामेतियच्चोक्तंत्वयाशुद्धेनचेतसा ॥ तत्पुण्यमर्पयैतेभ्योयेनस्यान्निरयाच्च्युतिः ॥ ७१ ॥ जाबालिरुवाच ॥
एतच्छ्रुत्वावचस्तस्यधर्मराजस्यधीमतः ॥ पुण्यंददौमहाराजआजन्मसमुपार्जितम् ॥ ७२ ॥ यदाजन्मकृतैःपुण्यैरघुनाथार्चनोद्भवैः ॥ एतेषांनिर
यान्मुक्तिर्भवत्वत्रमनोरमा ॥ ७३ ॥ एवंकथयतस्तस्यजीवानिरयसंस्थिताः ॥ तत्क्षणान्निरयान्मुक्ताजातादिव्यवपुर्धराः ॥ ७४ ॥ ऊचुस्तेजनकं
राजंस्त्वत्प्रसादाद्वयंक्षणात् ॥ दुःखदान्निरयान्मुक्तायास्यामःपरमंपदम् ॥ ७५ ॥ तान्दृष्ट्वासूर्यसङ्काशान्नरान्निरयनिःसृतान् ॥ तुतोषचित्तेसुभृशंसर्व
भूतदयापरः ॥७६॥ तेसर्वेप्रययुर्लोकंदिवंदेवैरलङ्कृतम् ॥ जनकंतुप्रशंसन्तोमहाराजंदयानिधिम् ॥७७॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशेषवा०
रामाश्व०सत्यवदाख्यानेजनकेननरकस्थप्राणिमोचनंनामत्रिंशोऽध्यायः ॥ ३० ॥ जाबलिरुवाच ॥ अथतेषुप्रयातेषुनरकस्थेषुवैनृषु ॥ राजापप्रच्छ

१ 'खञ्जचिन्हेन' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कीनाशंसर्वधर्मविदांवरम् ॥ १ ॥ राजोवाच ॥ धर्मराजत्वयाप्रोक्तंयत्पातककरानराः ॥ आयान्तितवसंस्थानंनचधर्मकथारताः ॥ २ ॥ मदागमन
मत्राभूत्केनपापेनधार्मिक ॥ तद्वैकथयसर्वंमेपापकार्यंयथातथा ॥ ३ ॥ इतिश्रुत्वातुतद्वाक्यंधर्मराजःपरन्तप ॥ कथयामासतस्यैवंयमपुर्यागमंतदा
॥ ४ ॥ धर्मराजउवाच ॥ राजंस्तवमहत्पुण्यंनैतादृक्कस्यभूतले ॥ रघुनाथपदद्वन्द्वमकरन्दमधुव्रत ॥ ५ ॥ त्वत्कीर्तिस्वर्धुनीसर्वान्पापिनोमलसंयु
तान् ॥ पुनातिपरमाह्लादकारिणीदुष्टतारिणी ॥ ६ ॥ तथापिपापलेशस्तेवर्ततेनृपसत्तम ॥ येनसंयमिनीपार्श्वमागतःपुण्यपूरितः ॥ ७ ॥ एकदातुच
रन्तींगांवारयामासवैभवान् ॥ तेनपापविपाकेननिरयद्वारदर्शनम् ॥ ८ ॥ इदानींपापनिर्मुक्तोबहुपुण्यसमन्वितः ॥ भुङ्क्ष्वभोगान्सुविपुलान्निजपु
ण्यार्जितान्बहून् ॥ ९ ॥ एतेषांकरुणावार्धीरघुनाथोसुखंहरन् ॥ संयमिन्यामहामार्गेप्रेरयामासवैष्णवम् ॥ १० ॥ नागमिष्योयदित्वंवैमार्गेणानेन
सुव्रत ॥ अभविष्यत्कथंतेषांनिरयात्परिमोचनम् ॥ ११ ॥ त्वादृशाःपरदुःखेनदुःखिताःकरुणालयाः ॥ प्राणिनांदुःखविच्छेदंकुर्वन्त्येवमहामते
॥ १२॥ जाबालिरुवाच ॥ एवंवदन्तंशमनंप्रणम्यसदिवंगतः ॥ दिव्येनसुविमानेनअप्सरोगणशोभिना ॥ १३ ॥ तस्माद्गावोऽनिशंपूज्यामनसापि
नगर्हयेत् ॥ गर्हयन्निरयंयातियावदिन्द्राश्चतुर्दश ॥ १४ ॥ तस्मात्त्वंनृपतिश्रेष्ठगोपूजांवैसमाचर ॥ सातुष्टादास्यतिक्षिप्रंपुत्रंधर्मपरायणम् ॥ १५ ॥
सुमतिरुवाच ॥ तच्छ्रुत्वाधेनुपूजांसपप्रच्छकथमादरात् ॥ पूजनीयाप्रयत्नेनकीदृशंकुरुतेनरम् ॥ १६ ॥ जाबालिःकथयामासधेनुपूजांयथाविधि॥
प्रत्यहंविपिनंगच्छेच्चारणार्थंव्रतीतुगोः ॥ १७ ॥ गवेयवांस्तुसम्भोज्यगोमयस्थान्समाहरेत् ॥ भक्षणीयाययवास्तेतुपुत्रकामेनभूपते ॥ १८ ॥ सा
यदापिबतेतोयंतदापेयंजलंशुचि ॥ सोच्चैःस्थानेयदातिष्ठेत्तदानींचासनस्थितः ॥ १९ ॥ दंशान्निवारयेन्नित्यंयवसंस्वयमाहरेत् ॥ एवंप्रकुर्वतःपुत्रं
दास्यतेधर्मतत्परम् ॥ २० ॥ सुमतिरुवाच ॥ इतिवाक्यंसमाकर्ण्यपुत्रकामऋतम्भरः ॥ व्रतंचकारधर्मात्माधेनुपूजांसमाचरन् ॥ २१ ॥ प्रत्यहंकुरुते
गांवैयवसाद्येनतोषिताम् ॥ दंशान्यवारयद्धीमान्यवभक्षकृतादरः ॥ २२ ॥ एवंधेनुंपूजयतोगतास्तुदिवसाघनाः ॥ वनमध्येतृणादींश्चचरन्तीमकुतो
भयाम् ॥ २३ ॥ एकदानृपतिस्तस्यवनस्यश्रीनिरीक्षणे ॥ न्यस्तदृष्टिःसपरितोबभ्रामसकुतूहली ॥ २४ ॥ तदागत्याहनद्गांवैपञ्चास्यःकाननान्त
रात् ॥ क्रोशन्तींबहुधादीनांसिंहभारेणदुःखिताम् ॥ २५ ॥ तदानृपःसमागत्यविलोक्यनिजमातरम् ॥ सिंहेननिहतांपश्यन्नरोदातीवविह्वलः ॥२६॥
सदुःखितःसमागत्यजाबालिंमुनिसत्तमम् ॥ निष्कृतिंतस्यपप्रच्छगोवधस्यप्रमादतः ॥ २७ ॥ ऋतम्भरउवाच ॥ स्वामिंस्त्वदाज्ञयाधेनुंपालयन्वन
मास्थितः ॥ कुतोऽप्यागत्यतांसिंहोजघानादृष्टिगोचरः ॥ २८ ॥ तस्यपापस्यनिष्कृत्यैकिंकरोमित्वदाज्ञया ॥ कथंवाव्रतसम्पूर्तिर्ममपुत्रप्रदायिनी

CC-0. In Public Domain. Digitization by eGangotri

॥ २९ ॥ इत्युक्तवन्तंतंभूपंजगादमुनिसत्तमः ॥ सन्त्युपायामहीपालपापस्यास्यापनुत्तये ॥ ३० ॥ ब्रह्मघ्नस्यकृतघ्नस्यसुरापस्यमहामते ॥
प्रायश्चित्तानिवर्तन्तेसर्वपापहराणिच ॥३१॥ कृच्छ्रैश्चान्द्रायणैर्दानैर्व्रतैःसनियमैर्यमैः ॥ पापानिप्रलयंयान्तिनियमादनुतिष्ठतः ॥ ३२ ॥ द्वयोश्च
निष्कृतिर्नास्तिपापपुञ्जकृतोस्तयोः ॥ मत्यागोवधकर्तुश्चनारायणविनिन्दितुः ॥ ३३ ॥ गवांयोमनसादुःखंवाञ्छत्यधमसत्तमः ॥ सयाति
निरयस्थानंयावदिन्द्राश्चतुर्दश ॥ ३४ ॥ योऽपिदेवंहरिंनिन्देत्सकृद्दुर्भाग्यवान्नरः ॥ सचापिनरकंपश्येत्पुत्रपौत्रपरीवृतः ॥ ३५ ॥ तस्मा
ज्ज्ञात्वाहरिंनिन्दन्गोषुदुःखंसमाचरन् ॥ कदापिनरकान्मुक्तिंनप्राप्नोतिनरेश्वर ॥ ३६ ॥ अज्ञानप्राप्तगोहत्याप्रायश्चित्तंतुविद्यते ॥ रामभक्तं
तुधीमन्तंयाहित्वमृतुपर्णकम् ॥ ३७ ॥ सवैसमदृशासर्वाञ्छत्रून्मित्राणिपश्यति ॥ कथयिष्यतितेक्षिप्रंगोवधस्यास्यनिष्कृतिम् ॥ ३८ ॥
तस्यदेशांस्त्वमाक्रामंस्तेननिर्वासितःपुरा ॥ वैरिभावंपरित्यज्यगच्छत्वमृतुपर्णकम् ॥ ३९ ॥ सयद्वदिष्यतिक्षिप्रंतत्कुरुष्वसमाहितः ॥
यथात्वत्कृतपापस्यनिष्कृतिर्हिभविष्यति ॥ ४० ॥ सतुतद्वचनंश्रुत्वाजगामऋतुपर्णकम् ॥ रामभक्तंरिपौमित्रेसमदृष्ट्यासमञ्जसम् ॥ ४१ ॥
सतस्मैकथयामासयज्जातंगोवधादिकम् ॥ तस्यपापस्यनिष्कृत्यैह्युपायंसोऽप्यचिन्तयत् ॥ ४२ ॥ क्षणंध्यात्वाथतंराजाऋतुपर्णऋतम्भरम् ॥ उवा
चप्रहसन्वाक्यंबुद्धिमान्धर्मकोविदः ॥ ४३ ॥ कोऽहंराजन्मुनीनांवैपुरतःशास्त्रवेदिनाम् ॥ तान्हित्वाकिंतुमांप्राप्तोमूर्खंपण्डितमानिनम् ॥ ४४ ॥ तव
मय्यस्तिचेच्छ्रद्धातदाकिञ्चिद्ब्रवीम्यहम् ॥ शृणुष्वनरशार्दूलगदितंममसादरः ॥ ४५ ॥ भजश्रीरघुनाथंत्वंकर्मणामनसागिरा ॥ नैष्कापट्येनलोकेशं
तोषयस्वमहामते ॥ ४६ ॥ सतुष्टोदास्यतेसर्वंत्वद्धृदिस्थंमनोरथम् ॥ अज्ञानकृतगोहत्यापापनाशंकरिष्यति ॥ ४७ ॥ रामंस्मरंस्त्वंधर्मात्मन्धेनुंपा
लयसत्तम ॥ दत्त्वाद्विजायकनकंपापनिष्कृतिमाप्स्यसि ॥ ४८ ॥ सुमतिरुवाच ॥ एतच्छ्रुत्वातुतद्वाक्यमृतम्भरनृपस्तदा ॥ विधायरामस्मरणंपूता
त्माव्रतमाचरत् ॥ ४९ ॥ पूर्ववत्पालयन्धेनुंजगामविपिनंमहत् ॥ रामनामस्मरन्नित्यंसर्वभूतहितेरतः ॥ ५० ॥ तस्मैतुष्टातुसुरभिःप्रोवाचपरितोषि
ता ॥ राजन्वरयमत्तोवैवरंहृत्स्थंमनोरथम् ॥ ५१ ॥ तदाप्रोवाचवैराजापुत्रंदेहिमनोरमम् ॥ रामभक्तंपितृरतंस्वधर्मप्रतिपालकम् ॥ ५२ ॥ तुष्टाद
त्त्वावरंसापितस्मैराज्ञेसुतार्थिने ॥ जगामादर्शनंदेवीकामधेनुःकृपावती ॥५३ ॥ सकालेप्राप्तवान्पुत्रंवैष्णवंरामसेवकम् ॥ सत्यवत्संज्ञयायुक्तमकरोत्त
त्रतत्पिता ॥ ५४ ॥ सत्यवन्तंसुतंलब्ध्वापितृभक्तिपरंमहान् ॥ परमंहर्षमापेदेशक्रतुल्यपराक्रमम् ॥ ५५ ॥ सराजाधार्मिकंपुत्रंप्राप्यहर्षेणनिर्भरः ॥
राज्यंतस्मिन्महन्न्यस्यजगामतपसेवनम् ॥ ५६ ॥ तत्राराध्यहृषीकेशंभक्तियुक्तेनचेतसा ॥ निर्धूतपापःसतनुरगाद्धरिपदंनृपः ॥ ५७ ॥ इतिश्रीपाद्मे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महापुराणेपातालखण्डेशेषवा०रामाश्व०सत्यवदाख्यानेधेनुव्रतवर्णनंनामैकत्रिंशोऽध्यायः ॥ ३१ ॥ सुमतिरुवाच ॥ असावपिनृपःसौम्यसत्यवान्नाम
विश्रुतः ॥ निजधर्मेणलोकेशंरघुनाथमतोषयत् ॥ १ ॥ अस्मैतुष्टोरमानाथोददौभक्तिमचञ्चलाम् ॥ निजांघ्रिपद्मयजतांदुर्लभांपुण्यकोटिभिः ॥२ ॥
नित्यंश्रीरघुनाथस्यकथानकमनातुरः ॥ कुरुतेसर्वलोकानांपावनंकृपयायुतः ॥ ३ ॥ योनपूजयतेदेवंरघुनाथंरमापतिम् ॥ सतेनताडयतेदण्डैर्यम
स्यापिभयावहैः ॥ ४ ॥ अष्टमाद्वत्सरादूर्ध्वमशीतिवत्सरोभवेत् ॥ तावदेकादशीसर्वैर्मानुषैःकारिताऽमुना ॥ ५ ॥ तुलसीवल्लभायस्यकदाचिद्य
च्छिरोधराम् ॥ नमुञ्चतिरमानाथपादपद्मस्रगुत्तमा ॥ ६ ॥ ऋषीणामपिपूज्योऽयमितरेषांकथंनहि ॥ रघुनाथस्मृतिप्रीतिर्धूतपाप्माहताशुभः ॥ ७ ॥
ज्ञात्वायंरामचन्द्रस्यवाजिनंपरमाद्भुतम् ॥ आगत्यतुभ्यंसन्दास्यत्येतद्राज्यमकण्टकम् ॥ ८ ॥ त्वयायद्वदितंराजंस्तत्तेकथितमुत्तमम् ॥ पुनःकिंपृ
च्छसेस्वामिन्नाज्ञापयकरोमितत् ॥९॥ शेषउवाच ॥ गतोऽश्वस्तत्पुरान्तस्तुनानाश्चर्यसमन्वितः॥तंदृष्ट्वाजनताःसर्वाराज्ञेगत्वान्यवेदयन् ॥१०॥ ज
नताऊचुः ॥ कोऽप्यश्वःसितवर्णेनगङ्गाजलसमेनवै ॥ भालेसौवर्णपत्रेणराजमानःसमागतः ॥ ११ ॥ तच्छ्रुत्वावचनंरम्यंजनानांहयमीरितम् ॥ ताः
प्रत्याहहसन्भूपोज्ञायतांकस्यवैहयः ॥ १२ ॥ ताश्चैनंकथयामासुःशत्रुघ्नेनप्रपालितः ॥ आयात्यश्वोमहीभर्तूरामस्यपुरमध्यतः ॥ १३ ॥ रामस्यना
मसश्रुत्वाद्व्यक्षरंसुमनोरमम् ॥ जहर्षचित्तेसुभृशंगद्गदस्वरचिह्नितः ॥ १४ ॥ मयायोध्यापतिर्नित्यंयोरामश्चिन्त्यतेहृदि ॥ तस्याश्वःसहशत्रुघ्नःस
मायातःपुरंमम ॥ १५ ॥ हनूमांस्तत्ररामाङ्घ्रिसेवाकर्ताभविष्यति ॥ कदाचिदपियोरामंनविस्मरतिमानसे ॥ १६ ॥ गच्छामियत्रशत्रुघ्नोयत्रमारुतन
न्दनः ॥ अन्येऽपियत्रपुरुषारामपादाब्जसेवकाः ॥ १७ ॥ अमात्यमादिदेशाथसर्वंराजधनंमहत् ॥ गृहीत्वातुमयासार्द्धमागच्छत्वरयायुतः ॥१८॥
यास्येऽहंरघुनाथस्यहयंपालयितुंवरम्॥कर्तुंचरामपादाब्जपरिचर्यांसुदुर्लभाम् ॥१९॥ इत्युक्त्वानिर्जगामाथशत्रुघ्नंप्रतिसैनिकैः ॥ तावत्पुरीमथप्राप्तो
रामभ्रातासमैनिकः ॥ २० ॥ वीरागर्जन्तिप्रबलारथाःसुनिनदन्तिच ॥ जयशङ्खस्वनास्तत्रवेणुनादाश्चसर्वतः ॥२१॥ आगत्यसत्यवान्राजामन्त्रि
भिःसुसमन्वितः ॥ चरणेप्रणिपत्यास्मैराज्यंप्रादान्महाधनम् ॥ २२ ॥ शत्रुघ्नस्तंतुराजानंज्ञात्वाराममनुव्रतम् ॥ तद्राज्यंतस्यपुत्रायरुक्मनाम्नेददौम
हत् ॥ २३ ॥ हनूमन्तंपरीरभ्यसबाहुंरामसेवकम् ॥ अन्यान्वैरामभक्तांश्चपरिरभ्यमहायशाः ॥२४॥ कृतार्थमिवचात्मानंमेनेसत्यसमन्वितः ॥ नन
न्दचेतसितदाशत्रुघ्नेनसमन्वितः ॥२५॥ हयस्तावद्गतोदूरंवीरैःसुपरिरक्षितः ॥ शत्रुघ्नस्तेनभूपेनययौवीरसमन्वितः ॥ २६ ॥ इतिश्रीपाद्मेमहापुराणेपा
तालखण्डेशेषवात्स्यायनसंवादेरामाश्वमेधेसत्यवत्समागमोनामद्वात्रिंशोऽध्यायः ॥ ३२ ॥ शेषउवाच ॥ गच्छत्सुरथिवर्येषुशत्रुघ्नादिषुभूरिषु ॥ महा

CC-0. In Public Domain. Digitization by eGangotri

राजेषुसर्वेषुरथकोटियुतेषुच ॥ १ ॥ अकस्मादभवन्मार्गेतमःपरमदारुणम् ॥ यस्मिन्स्वीयोनपारक्योलक्ष्यतेज्ञातिभिर्नरैः ॥ २ ॥ रज
साव्यावृतंव्योमविद्युत्स्तनितसङ्कुलम् ॥ एतादृशेतुसम्मर्देमहाभयकरेततः ॥ ३ ॥ मेघावर्षन्तिरुधिरंपूयामेध्यादिकंबहु ॥ अत्याकुलाबभू
वुस्तेवीराःपरमवैरिणः ॥ ४ ॥ आकुलीकृतलोकेतुकिमिदंकिमितिस्थितिः ॥ तमोव्याप्तानिलोकानांचक्षूंषिप्रथितौजसाम् ॥ ५ ॥ जहारा
श्वंरावणस्यसुहृत्पातालसंस्थितः ॥ विद्युन्मालीतिविख्यातोराक्षसश्रेणिसंवृतः ॥ ६ ॥ कामगेसुविमानेतुसर्वायसनिषेविणि ॥ आरूढोऽश्वंतुवीरा
णांभयंकुर्वञ्जहारह ॥ ७ ॥ मुहूर्तात्ततमोनष्टमाकाशंविमलंबभौ ॥ वीराःशत्रुघ्नमुख्यास्तेप्रोचुःकुत्रहयोऽस्तिसः ॥ ८ ॥ तेसर्वेहयराजंतुलो
कयन्तःपरस्परम् ॥ ददृशुर्नयदावाहंहाहाकारस्तदाऽभवत् ॥ ९ ॥ कुत्राश्वोहयमेधस्यकेननीतःकुबुद्धिना ॥ इतिवाचमवोचंस्तेतावत्सदनुजे
श्वरः ॥ १० ॥ ददृशेसुभटैःसर्वैरथस्थैःशौर्यशोभितैः ॥ विमानवरमारूढैराक्षसाग्र्यैःसमावृतः ॥ ११ ॥ दुर्मुखाविकरालास्या
लम्बदंष्ट्राभयानकाः ॥ राक्षसास्तत्रदृश्यन्तेसैन्यग्रासायचोद्यताः ॥ १२ ॥ तदातंवेदयामासुःशत्रुघ्नंनृवरोत्तमम् ॥ हयोनीतोनजानीमःखेविमानवि
लासिना ॥ १३ ॥ तमसाव्याकुलान्कृत्वावीरानस्मान्समाययौ ॥ जग्राहनृपशार्दूलहयंकुरुयथोचितम् ॥ १४ ॥ शत्रुघ्नस्तद्वचःश्रुत्वामहारोषसमा
वृतः ॥ कोऽस्त्ययेपराक्षसोयोमेहयंजग्राहवीर्यवान् ॥ १५ ॥ विमानंतत्पतत्वद्यमद्बाणव्रजनिर्हतम् ॥ पतत्वद्यशिरस्तस्यक्षुरप्रैर्ममवैरिणः ॥ १६ ॥ सञ्जी
यन्तांरथाःसर्वैर्महाशस्त्रास्त्रपूरिताः ॥ यान्तुतंप्रतिसंहतुयोद्धारोवाजिहारिणम् ॥ १७ ॥ इत्युक्त्वारोषताम्राक्षउवाचनिजमन्त्रिणम् ॥ नयानय
विदंशूरंयुद्धकार्यविशारदम् ॥ १८ ॥ शत्रुघ्नउवाच ॥ मन्त्रिन्कथयकेयोज्याराक्षसस्यवधोद्यताः ॥ महाशस्त्रामहाशूराःपरमास्त्रविदुत्तमाः ॥ १९ ॥
कथयाशुविचार्यैवंतत्करोमिभवद्वचः ॥ वीरान्कथयतस्यैवंयोग्यान्सर्वास्त्रकोविदान् ॥ २० ॥ एतच्छ्रुत्वातुसचिवःप्राहवाक्यंयथोचितम् ॥ वीरात्र
णवरेयोग्यान्दर्शयंस्तरसानतान् ॥ २१ ॥ सुमतिरुवाच ॥ जेतुंगच्छतुतद्रक्षःसमरेविजयोद्यतः ॥ महाशस्त्रास्त्रसंयुक्तःपुष्कलःपरतापनः ॥ २२ ॥ त
थालक्ष्मीनिधिर्यातुशस्त्रसङ्घसमन्वितः ॥ करोतुतस्ययानस्यभङ्गंतीक्ष्णैःस्वसायकैः ॥ २३ ॥ हनूमान्दृष्टकर्मात्रराक्षसैर्योधितुंक्षमः ॥ करोतुमुखपु
च्छाभ्यांताडनंरक्षसांप्रभो ॥ २४ ॥ वानराअपियेवीरारणकर्मविशारदाः ॥ गच्छन्तुतेऽखिलायोद्धुंतववाक्यप्रणोदिताः ॥ २५ ॥ सुमदश्चसुबा
हुश्चप्रतापाग्र्यश्चसत्तमाः ॥ गच्छन्तुसायकैस्तीक्ष्णैस्तान्योद्धुंराक्षसाधमान् ॥ २६ ॥ भवानपिमहाशस्त्रपरिवारोरथेस्थितः ॥ करोतुयुद्धेविजयंराक्ष ॥ ३५ ॥
संहन्तुमुद्यतः ॥ २७ ॥ एतन्ममतंराजन्ययेयोधास्तत्प्रमर्दनाः ॥ तेगच्छन्तुरणेशूराःकिमन्यैर्बहुभिर्भटैः ॥ २८ ॥ इत्युक्तवतिवीराग्र्येऽमात्येसुमति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संज्ञके ॥ शत्रुघ्नः कथयामास वीरान्सङ्ग्रामकोविदान् ॥ २९॥ भोवीराः पुष्कलाद्या ये सर्वशस्त्रास्त्रकोविदाः ॥ ते वदन्तु प्रतिज्ञां वै मत्पुरो राक्षसार्दने॥३०॥
कृत्वा प्रतिज्ञां विपुलां स्वपराक्रमशोभिनीम् ॥ गच्छन्तु रणमध्ये हि भवन्तो बलसंयुताः ॥ ३१ ॥ इति वाक्यं समाकर्ण्य शत्रुघ्नस्य महाबलाः ॥ स्वां स्वां प्र
तिज्ञां महतीं चक्रुस्ते तेजसान्विताः ॥ ३२ ॥ तत्रादौ पुष्कलो वीरः श्रुत्वा वाक्यं महीपतेः ॥ परमोत्साहसम्पन्नः प्रतिज्ञामूचिवानिमाम् ॥ ३३ ॥ पुष्कल
उवाच ॥ शृणुष्व नृपशार्दूल मत्प्रतिज्ञां पराक्रमात् ॥ विहितां सर्वलोकानां शृण्वतां परमाद्भुताम् ॥ ३४ ॥ चेन्न कुर्यां क्षुरप्रायैस्तीक्ष्णैः कोदण्डनिर्गतैः ॥ दै
त्यं मूर्च्छासमाक्रान्तं कीर्णकेशाकुलाननम् ॥ ३५ ॥ कन्यास्वभोक्तुर्यत्पापं यत्पापं देवनिन्दने ॥ तत्पापं मम वै भूयाच्चेत्कुर्यां स्ववचोऽनृतम् ॥ ३६ ॥
यदि मद्बाणनिर्भिन्नाः सैनिकाः सुमहाबलाः ॥ न पतन्ति महाराज प्रतिज्ञां तत्र मे शृणु ॥ ३७ ॥ विष्णवीशयोर्विभेदं यः शिवशक्त्योः करोत्यपि ॥ तत्पापं
मम वै भूयाच्चेन्न कुर्यामृतं वचः ॥ ३८ ॥ सर्वं मद्वाक्यमित्युक्तं रघुनाथपदाम्बुजे ॥ भक्तिर्मे निश्चला यास्ति सैव सत्यं करिष्यति ॥ ३९ ॥ पुष्कलस्य प्रतिज्ञां
तां श्रुत्वा लक्ष्मीनिधिर्नृपः ॥ प्रतिज्ञां व्यदधात्सत्यां स्वपराक्रमशोभिताम् ॥ ४० ॥ लक्ष्मीनिधिरुवाच ॥ वेदानां निन्दनं श्रुत्वा आस्ते यो मौनिवन्नरः ॥
मानसे रोचयेद्यस्तु सर्वधर्मबहिष्कृतः ॥ ४१ ॥ ब्राह्मणो यो दुराचारो रसलाक्षादिविक्रयी ॥ विक्रीणाति च गां मूढो धनलोभेन मोहितः ॥ ४२ ॥ म्लेच्छ
कूपोदकं पीत्वा प्रायश्चित्तं तु नाचरेत् ॥ तत्पापं मम वै भूयाद्विमुखश्चेद्भवाम्यहम् ॥ ४३ ॥ तत्प्रतिज्ञामथाश्रुत्य हनूमान्रणकोविदः ॥ रामाङ्घ्रिस्म
रणं कृत्वा प्रोवाच वचनं शुभम् ॥ ४४ ॥ मत्स्वामी हृदये नित्यं ध्येयो वै योगिभिर्मुहुः ॥ यं देवाः सासुराः सर्वे नमन्ति मणिमौलिभिः ॥ ४५ ॥ रामः श्रीमा
नयोध्यायाः पतिर्लोकेशपूजितः ॥ तं स्मृत्वा यद्ब्रुवे वाक्यं तद्वै सत्यं भविष्यति ॥ ४६ ॥ राजन्कोऽयं लघुर्दैत्यो दुर्बलः कामगे स्थितः ॥ कथयाशु मया
कार्यमेकेन विनिपातनम ॥ ४७ ॥ मेरुं देवेन्द्रसहितं लाङ्गूलाग्रेण तोलये ॥ जलधिं शोषये सवसां वत वा पिबाम्यहम् ॥ ४८ ॥ राज्ञः श्रीरघुनाथस्य
जानक्याः कृपया मम ॥ तन्नास्ति भूतले राजन्यदसाध्यं कदा भवेत् ॥ ४९ ॥ एतद्वाक्यं मया प्रोक्तमनृतं स्याद्यदि प्रभो ॥ तदैव रघुनाथस्य भक्तिदूरो भवा
म्यहम् ॥ ५० ॥ यः शूद्रः कपिलां गां वै पयोबुद्ध्याऽनुपालयेत् ॥ तस्य पापं ममैवास्तु चेत्कुर्यामनृतं वचः ॥ ५१ ॥ ब्राह्मणीं गच्छते मोहाच्छूद्रः कामविमो
हितः ॥ तस्य पापं ममैवास्तु चेत्कुर्यामनृतं वचः ॥ ५२ ॥ यद्घ्राणान्नरकं गच्छेत्स्पर्शनाच्चापि रौरवम् ॥ तां पिबेन्मदिरां यो वा जिह्वास्वादेन लोलुपः
॥ ५३ ॥ तस्य यज्जायते पापं तन्ममैवास्तु निश्चितम् ॥ चेन्न कुर्यां प्रतिज्ञातं सत्यं रामकृपाबलात् ॥ ५४ ॥ एवमुक्ते महावीरैर्योद्धारस्तरसा युताः ॥
चक्रुः प्रतिज्ञां महतीं स्वपराक्रमशालिनीम् ॥ ५५ ॥ शत्रुघ्नोऽपि व्यधात्तत्र प्रतिज्ञां पश्यतां नृणाम् ॥ साधु साधु प्रशंसन्वै तान्वीरान्युद्धकोविदान् ॥ ५६ ॥

CC-0. In Public Domain. Digitization by eGangotri

कथयामिपुरोवःस्वांप्रतिज्ञांसत्त्वशोभिताम् ॥ तच्छृण्वन्तुमहाभागायुद्धोत्साहसमन्विताः ॥ ५७ ॥ चेत्तस्यशिरआहत्यपातयामिनसायकैः ॥
विमानाच्चकबन्धाच्चभिन्नंछिन्नंचभूतले ॥ ५८ ॥ यत्पापंकूटसाक्ष्येणयत्पापंस्वर्णचौर्यतः ॥ यत्पापंब्रह्मनिन्दायांतन्ममास्त्वद्यनिश्चयात् ॥ ५९ ॥
इतिशत्रुघ्नसद्वाक्यंश्रुत्वातेवीरपूजिताः ॥ धन्योऽसिराघवभ्रातःकस्त्वदन्योवदेदिदम् ॥ ६० ॥ त्वयावैनिहतोदैत्योदेवदानवदुःखदः ॥ लव
णोनामलोकेशमधुपुत्रोमहाबलः ॥ ६१ ॥ कोऽयंवैराक्षसोदुष्टःक्वचास्यबलमल्पकम् ॥ करिष्यसिक्षणादेवतस्यनाशंमहामते ॥ ६२ ॥ इत्यु
क्तातेमहावीराःसज्जीभूतारणाङ्गणे ॥ प्रतिज्ञांस्वामृतांकर्तुंययुस्तेराक्षसंमुदा ॥ ६३ ॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशेषवा०रामाश्व०
वीरप्रतिज्ञाकथनंनामत्रयस्त्रिंशत्तमोऽध्यायः ॥ ३३ ॥ शेषउवाच ॥ रथैःसदश्वैःशोभाढ्यैःसर्वशस्त्रास्त्रपूरितैः ॥ नानारत्नसमायुक्तैर्ययुस्ते
राक्षसाधमम् ॥ १ ॥ तान्दृष्ट्वाकामगेयानेस्थितःप्रोवाचराक्षसः ॥ मेघगम्भीरयावाचातर्जयन्निवभूरिशः ॥ २ ॥ मायान्तुसुभटायोद्धुंगच्छ
न्तुनिजमन्दिरम् ॥ मात्यजन्तुस्वकान्प्राणान्नमोक्ष्येवाजिनंवरम् ॥ ३ ॥ विद्युन्मालीतिविख्यातोरावणस्यसुहृत्सखा ॥ मत्सख्युःप्रेतभूतस्यनिष्कृ
तिंकर्तुमेयिवान् ॥ ४ ॥ क्वासौरामोयआहत्यसखायंरावणंगतः ॥ तस्यभ्रातापिकुत्रास्तेसर्वशूरशिरोमणिः ॥ ५ ॥ तंहत्वानिष्कृतिंतस्यप्राप्स्ये
रामस्यचानुजम् ॥ पिबन्रुधिरमुद्भूतंकण्ठनालस्यबुद्बुदैः ॥ ६ ॥ इतिवाक्यंसमाकर्ण्ययोधानांप्रवरोत्तमः ॥ पुष्कलोनिजगादैनंवीर्यशौर्यसम
न्वितम् ॥ ७ ॥ पुष्कलउवाच ॥ विकत्थनंनकुर्वन्तिसङ्ग्रामेसुभटानराः ॥ पराक्रमंदर्शयन्तिनिजशस्त्रास्त्रवर्षणैः ॥ ८ ॥ रावणोनिहतोयेन
ससुहृत्स्वजनैर्वृतः ॥ तस्यवाजिनमाहृत्यकुत्रगन्तासिदुर्मद ॥ ९ ॥ पतिष्यसित्वंशत्रुघ्नबाणैःकोदण्डनिर्गतैः ॥ त्वामत्स्यन्तिशिवाभूमौपति
तंप्राणवर्जितम् ॥ १० ॥ मागर्जदुष्टरामस्यसेवकेमयिसंस्थिते ॥ गर्जन्तिसुभटायुद्धेशत्रुंजित्वामहोदयात् ॥ ११ ॥ शेषउवाच ॥ एवंब्रुवन्तं
तंवीरंपुष्कलंरणदुर्मदम् ॥ जघानशक्त्यासुभृशंहृदिराक्षससत्तमः ॥ १२ ॥ आयान्तींतांमहाशक्तिमायसींकाञ्चनाश्रिताम् ॥ चिच्छेदत्रिभिरत्यु
ग्रैःशितैर्बाणैःसपुष्कलः ॥ १३ ॥ सात्रिधाह्यपतद्भूमौविशिखैर्निष्प्रभीकृता ॥ पतन्तीविरराजासौविष्णोःशक्तित्रयीवकिम् ॥ १४ ॥ तांछिन्नां
शक्तिकांदृष्ट्वाराक्षसःपरतापनः ॥ जग्राहशूलंतरसात्रिशिखंलोहनिर्मितम् ॥ १५ ॥ तीक्ष्णाग्रंज्वलनप्रख्यंराक्षसेन्द्रोऽभ्यमोचयत् ॥ आयान्तंति
लशश्चक्रेबाणैःपुष्कलसंज्ञितः ॥ १६ ॥ छित्त्वात्रिशूलंतरसाराघवस्यहिसेवकः ॥ पुष्कलश्चापआधत्तबाणांस्तीक्ष्णान्मनोजवान् ॥ १७ ॥
तेबाणाहृदितस्याशुलग्नारागंबतासृजन् ॥ वैष्णवस्ययथास्वान्तेगुणाविष्णोर्मनोहराः ॥ १८ ॥ तद्बाणवेधदुःखार्तोविद्युन्मालीसुदुर्मदः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जग्राहमुद्गरंघोरंपुष्कलंहन्तुमुद्यतः ॥ १९ ॥ मुद्गरःप्रहितस्तेनविद्युन्माल्यभिधेनहि ॥ हृदिलग्नोऽसृजच्छीघ्रंकश्मलंतदकारयत् ॥ २० ॥ मुद्ग
रप्रहतोवीरःकम्पमानःसवेपथुः ॥ पपातस्यन्दनोपस्थेपुष्कलःशत्रुतापनः ॥ २१ ॥ उग्रदंष्ट्रोऽथतद्भ्रातालक्ष्मीनिधिमयोधयत् ॥ शस्त्रास्त्रैर्ब
हुधामुक्तैर्वीरप्राणापहारकैः ॥ २२ ॥ पुष्कलस्तत्क्षणात्प्राप्यसंज्ञांराक्षसमब्रवीत् ॥ धन्योऽसिराक्षसश्रेष्ठमहीयांस्तेपराक्रमः ॥ २३ ॥ पश्ये
दानींममाप्युच्चैःप्रतिज्ञांशूरमानिताम् ॥ विमानात्पातयाम्यद्यभूमौत्वांशितसायकैः ॥ २४ ॥ इत्युक्त्वानिशितंबाणंसमगृह्णाद्दुरासदम् ॥ ज्वल
न्तमग्नितेजस्कंमहौदार्यसमन्वितम् ॥ २५ ॥ सयावत्तत्प्रतीकर्तुंविधत्तेस्वपराक्रमम् ॥ तावद्धृदिगतोऽत्युग्रस्तीक्ष्णधारःससायकः ॥ २६ ॥ ते
नबाणेनविभ्रान्तोभ्रमच्चित्तःसराक्षसः ॥ पपातकामगोपस्थाद्भूमौविगतचेतनः ॥ २७ ॥ उग्रदंष्ट्रेणवैदृष्टःपतमानोनिजाग्रजः ॥ गृहीत्वातंविमाना
न्तर्निनायरिपुशङ्कितः ॥ २८ ॥ प्राहचारिंमहारोषात्पुष्कलंबलिनांवरम् ॥ मद्भ्रातरंपातयित्वाकुत्रयास्यसिदुर्मते ॥ २९ ॥ मांवैयुधिविनिर्जि
त्यगन्तासिजयमुत्तमम् ॥ स्थितेमयितवस्वान्तेजयाशाविनिवर्त्यताम् ॥ ३० ॥ एवंब्रुवन्तंतरसाजघानदशभिःशरैः ॥ हृदयेतस्यदुष्टस्यरोषपूरित
लोचनः ॥३१॥ सताडितोदशशरैःपुष्कलेनमहात्मना ॥ चुक्रोधहृदिदुर्बुद्धिस्तंहन्तुमुपचक्रमे ॥३२॥ दन्तान्निष्पिष्यसक्रोधोमुष्टिमुद्यम्यचाहनत् ॥
व्यनदद्वज्रनिर्घातपातशङ्कांसृजन्हृदि ॥ ३३ ॥ मुष्टिनाभिहतोवीरःपुष्कलःपरमास्त्रवित् ॥ नाकम्पतविनिष्पेषंवाञ्छंस्तस्यदुरात्मनः ॥ ३४ ॥
वत्सदन्तान्महातीक्ष्णान्मुमोचहृदिसायकान् ॥ तैर्बाणैर्व्यथितोदैत्यस्त्रिशूलंतुसमाददे ॥ ३५ ॥ जाज्वल्यमानंत्रिशिखंज्वालामालातिभीषणम् ॥
लग्नंहृदिमहावीरपुष्कलस्यतुदारुणम् ॥ ३६ ॥ मूर्च्छितस्तेनशूलेननिहतोधन्विसत्तमः ॥ कश्मलंपरमंप्राप्तःपपातस्यन्दनोपरि ॥ ३७ ॥ मूर्च्छांप्रा
तंतमाज्ञायहनूमान्पवनात्मजः ॥ कोपव्याकुलितस्वान्तोबभाषेतंतुराक्षसम् ॥ ३८ ॥ कुत्रगच्छसिदुर्बुद्धेमयियोद्धरिसंस्थिते ॥ त्वांहन्मिचरणा
घातैर्वाजिहर्तारमागतम् ॥ ३९ ॥ एवमुक्त्वामहादैत्याञ्जघानपरसैनिकान् ॥ विमानस्थान्नखाग्रेणदारयन्नभसिस्थितः ॥ ४० ॥ लाङ्गूलेनाहताः
केचित्केचित्पादतलाहताः ॥ बाहुभ्यांदारिताःकेचित्पवनस्यतनूभुवा ॥ ४१ ॥ नश्यन्तिकेचिन्निहताःकेचिन्मूर्च्छन्तिसंहताः ॥ पलायन्तेप
दाघातभयपीडाहतास्ततः ॥ ४२ ॥ अनेकेनिहतास्तत्रराक्षसाश्चातिदारुणाः ॥ छिन्नाभिन्नाद्विधाजाताःपवनस्यसुतेनवै ॥ ४३ ॥ कामगं
तुविमानंतच्छिन्नप्राकारतोरणम् ॥ हाहाकुर्वद्भिरसुरैःसमन्तात्परिवारितम् ॥ ४४ ॥ हनूमतिमहाशूरेक्षणंभूमौक्षणंदिवि ॥ इतस्ततःप्रदृश्येतकाम
यानंदुरासदम् ॥४५॥ यत्रयत्रविमानंतत्तत्रतत्रसमीरजः ॥ प्रहरन्नेवदृश्येतकामरूपधरःकपिः ॥४६॥ एवंतदाकुलीभूतेविमानस्थेमहाजने ॥ उग्रदंष्ट्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तुदैत्येन्द्रोहनूमन्तमुपेयिवान् ॥४७॥ कपेत्वयामहत्कर्मकृतंयद्भटपातनम् ॥ क्षणंतिष्ठसिचेत्कुर्वेतवप्राणवियोजनम् ॥४८॥ एवमुक्त्वाहनूमन्तंप्रज
घानसदुर्मतिः ॥ त्रिशूलेनसुतीक्ष्णेनज्वलत्पावककान्तिना ॥४९॥ तदागतंत्रिशूलंचमुखेजग्राहवीर्यवान्॥चूर्णयामासकलंसर्वलोहविनिर्मितम् ॥५०॥
चूर्णयित्वात्रिशूलंतदायसंदैत्यमोचितम् ॥ जघानतंचपेटाभिर्बह्वीभिर्हनुमान्बली ॥ ५१ ॥ सआहतःकपीन्द्रेणचपेटाभिरितस्ततः ॥ व्यथि
तोव्यसृजन्मायांसर्वलोकभयङ्करीम् ॥ ५२ ॥ तदातमोऽभवत्तीव्रंयत्रकोवानलक्ष्यते ॥ यत्रस्वीयोनपारक्योविदामासजनान्बहून् ॥ ५३ ॥
शिलाःपर्वतशृङ्गाभाःपतन्तिसुभटोपरि ॥ ताभिर्हतास्तुतेसर्वेव्याकुलाअथजज्ञिरे ॥ ५४ ॥ विद्युतोविलसन्त्यत्रगर्जन्तिजलदाघनम् ॥
वर्षन्तिपूयरुधिरंमुञ्चन्तिसमलंजलम् ॥ ५५ ॥ आकाशात्पतमानानिकबन्धानिबहूनिच ॥ दृश्यन्तेछिन्नशीर्षाणिसुकुण्डलयुतानिच ॥ ५६ ॥
नग्नाविरूपाःसुभृशंकीर्णकेशाःसुदुर्मुखाः ॥ दृश्यन्तेसर्वतोदैत्यादारुणाभयकारिणः ॥ ५७ ॥ तदाव्याकुलितालोकाःपरस्परभयाकुलाः ॥ प
लायनपराजातामहोत्पातममंसत ॥ ५८ ॥ तदाशत्रुघ्नआयातोरथेस्थित्वामहायशाः ॥ श्रीरामस्मरणंकृत्वाचापेसन्धायसायकान् ॥ ५९ ॥ तांमा
यांसविधूयाथमोहनास्त्रेणवीर्यवान् ॥ शरधाराःकिरन्व्योम्निववर्षसमरेऽसुरम् ॥ ६० ॥ तदादिशःप्रसेदुस्तारविस्त्वपरिवेषवान् ॥ मेघायथागतं
याताविद्युतःशान्तिमागताः ॥ ६१ ॥ तदाविमानंपुरतोदृश्यतेराक्षसैर्युतम् ॥ छिन्धिभिन्धीतिभाषाभिर्व्याकुलंसुतरांमहत् ॥६२॥ बाणाश्चशतसाह
स्राःस्वर्णपुङ्खैश्चशोभिताः ॥ पेतुर्विमानेनभसिस्थितेकामगमेमुहुः ॥ ६३ ॥ तदाभग्नंविमानंहिदृश्यतेपतदुच्चकैः ॥ स्वपुरीखण्डमेकत्रभग्नाङ्गमिवभू
तले ॥ ६४ ॥ तदाप्रकुपितोदैत्योबाणान्धनुषिसन्दधे ॥ तैर्बाणैर्विकिरन्रामभ्रातरंचाभिगर्जितः ॥ ६५ ॥ तेबाणाःशतशस्तस्यलग्नावपुषिभूरिशः ॥
शोभामापुःशोणितौघान्वहन्तस्तीक्ष्णवक्त्रिणः ॥ ६६ ॥ शत्रुघ्नःपरयाशक्त्यासंयुक्तोवायुदैवतम् ॥ अस्त्रंधनुषिचाधत्तराक्षसानांप्रकम्पनम् ॥ ६७ ॥
तेनास्त्रेणविमानात्स्वात्पतन्तोमुक्तमूर्धजाः ॥ दृश्यन्तेभूतवेतालसङ्घाइवनभश्चराः ॥ ६८ ॥ तदस्त्रंरघुनाथस्यभ्रात्रामुक्तंविलोक्यसः ॥ अस्त्रंचपा
शुपत्यंसचापेऽधाद्दनुजात्मजः ॥ ६९ ॥ ततःप्रवृत्तावेतालाभूताःप्रेतनिशाचराः ॥ कपालकर्तरीयुक्ताःपिबन्तःशोणितंबहु ॥ ७० ॥ तेवैशत्रुघ्नवीराणां
रुधिराणिपपुर्मुदा ॥ जीवतामपिदुर्वाराःकर्तरीपाणिशोभिताः ॥ ७१ ॥ तदस्त्रंव्याप्नुवद्दृष्ट्वासर्ववीरप्रभञ्जनम् ॥ मुमोचतन्निरासायचास्त्रंनारायणा
भिधम् ॥ ७२ ॥ नारायणास्त्रंतान्सर्वान्वारयामासतत्क्षणात् ॥ तेसर्वेविलयंप्रापुर्निशाचरप्रणोदिताः ॥ ७३ ॥ तदाक्रुद्धोनिशाचारीविद्युन्मालीत्रि
मादद ॥ त्रिशूलंनिशितंघोरंशत्रुघ्नंहन्तुमुल्बणम् ॥ ७४ ॥ शूलहस्तंसमायान्तंविद्युन्मालिनमाहवे ॥ सायकैःप्राहरत्तस्यभुजेत्वर्धशशिप्रभैः ॥७५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तैर्बाणैश्छिन्नहस्तः सशिरसाहन्तुमुद्यतः ॥ हतोऽसियाहिशत्रुघ्नकस्त्वांत्राताभविष्यति ॥ ७६ ॥ इतिब्रुवाणंतरसाचिच्छेदशितसायकैः ॥ मस्तकंत
स्यबलिनःशूरस्यसहकुण्डलम्.॥ ७७ ॥ तंछिन्नशिरसंदृष्ट्वाउग्रदंष्ट्रःप्रतापवान् ॥ मुष्टिनाहन्तुमारेभेशत्रुघ्नंशूरसेवितम् ॥ ७८ ॥ शत्रुघ्नस्तुक्षुरप्रेणसा
यकेनाच्छिनच्छिरः ॥ प्रधावतोरणेवीरान्सर्वशस्त्रास्त्रकोविदान् ॥ ७९ ॥ हतशेषाययुःसर्वेराक्षसानाथवर्जिताः ॥ शत्रुघ्नंप्राणिपत्याथददुर्वाजिनमाहृ
तम् ॥८०॥ ततोवीणानिनादाश्चशङ्खनादाःसमन्ततः ॥ श्रूयन्तेशूरवीराणांजयनादामनोहराः ॥८१॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशेषवा०रा
माश्व०विद्युन्मालिनामराक्षसपराजयोनामचतुस्त्रिंशत्तमोऽध्यायः ॥ ३४ ॥ शेषउवाच ॥ प्राप्यतंवाजिनंराजाशत्रुघ्नोराक्षसैर्हृतम् ॥ अत्य
न्तंहर्षमापेदेपुष्कलेनसमन्वितः ॥ १ ॥ रुधिरैःसिक्तगात्रास्तेयोधालक्ष्मीनिधिस्तथा ॥ रणोत्साहेनसंयुक्तंप्रशशंसुर्महानृपम् ॥ २ ॥ हते
तस्मिन्महादैत्येविद्युन्मालिनिदुर्जये ॥ सुराःसर्वेभयंत्यक्त्वासुखमापुर्मुनेमहत् ॥ ३ ॥ नद्यस्तुविमलाजातारविस्तुविमलोऽभवत् ॥ वाताव
वुःसुगन्धोदसिक्ताविमलशुष्मिणः ॥ ४ ॥ सन्नद्धास्तेमहावीरारथस्थाविमलाङ्गकाः ॥ राजानमूचुस्तेसर्वेजयलक्ष्म्यासमन्विताः ॥ ५ ॥
वीराऊचुः ॥ दिष्ट्याहतस्त्वयादैत्योविद्युन्मालीमहामते ॥ यद्भयात्त्रासमापन्नाःसुराःस्वर्गान्निराकृताः ॥ ६ ॥ दिष्ट्याप्राप्तोमहावाजीरघुनाथस्यशो
भनः ॥ दिष्ट्यागन्तासिसर्वत्रजयंतुक्षितिमण्डले ॥ ७ ॥ स्वामिन्मुञ्चत्विमंवाहंमनोवेगंमनोरमम् ॥ समयस्यविलम्बोमाभवत्वत्रमहामते ॥ ८ ॥
शेषउवाच ॥ इतिश्रुत्वातुतद्वाक्यंवीराणांसमयोचितम् ॥ साधुसाधुप्रशस्यैतान्मुमोचहयसत्तमम् ॥ ९ ॥ समुक्तश्चोत्तरामाशांबभ्रामाथसुरक्षितः ॥
रथपत्तिहयश्रेष्ठैःसर्वशस्त्रास्त्रकोविदैः ॥ १० ॥ तत्रयद्वृत्तमेतस्यशत्रुघ्नस्यमनोहरम् ॥ वात्स्यायनशृणुष्वैतत्पापराशिप्रदाहकम् ॥ ११ ॥ रेवातीरम
थप्राप्तोमुनिवृन्दनिषेवितम् ॥ नीलरत्नसमूहस्यरसःकिंतुपयोमिषात् ॥ १२ ॥ तांस्तान्मुनिवरान्सर्वान्प्रणमञ्छूरसेवितः ॥ जगामहयरत्नस्यपृष्ठतः
कामगामिनः ॥ १३ ॥ गच्छंस्तत्राश्रमंजीर्णपलाशपर्णनिर्मितम् ॥ रेवायाजलकल्लोलैःसिक्तंपापहराश्रयम् ॥ १४ ॥ तंदृष्ट्वासुमतिंप्राहसर्वज्ञंनयको
विदम् ॥ शत्रुघ्नःसर्वधर्मार्थकर्मकर्तव्यकोविदः ॥ १५ ॥ राजोवाच ॥ मन्त्रिन्कथयकस्यायमाश्रमःपुण्यदर्शनः ॥ विचारचतुरश्रेष्ठवदैतन्ममपृच्छ
तः ॥ १६ ॥ शेषउवाच ॥ इतिवाक्यंसमाकर्ण्यसुमतिःप्राहतंनृपम् ॥ विशदस्मेरयावाचादर्शयन्नात्मसौहृदम् ॥ १७ ॥ सुमतिरुवाच ॥
एनंदृष्ट्वामहाराजधूतपापावयंखलु ॥ भविष्यामोमुनिश्रेष्ठंसर्वशास्त्रपरायणम् ॥ १८ ॥ तस्मान्नत्वातमापृच्छसर्वंतेकथयिष्यति ॥ रघुनाथपदा
म्भोजमकरन्दातिलोलुपः ॥ १९ ॥ नाम्नात्वारण्यकंख्यातंरघुनाथाङ्घ्रिसेवकम् ॥ अत्युग्रतपसापूर्णंसर्वशास्त्रार्थकोविदम् ॥ २० ॥ इतिश्रुत्वा

तुतद्वाक्यंधर्मार्थपरिबृंहितम् ॥ जगामतमथोद्रष्टुंस्वल्पसेवकसंयुतः ॥ २१ ॥ हनूमान्पुष्कलोवीरःसुमतिर्मन्त्रिसत्तमः ॥ लक्ष्मीनिधिःप्रता
पाग्र्यःसुबाहुःसुमदस्तथा ॥ २२ ॥ एतैःपरिवृतोराजाशत्रुघ्नःप्रापदाश्रमम् ॥ नमस्कर्तुंद्विजवरमारण्यकमुदारधीः ॥ २३ ॥ गत्वातंतापसश्रे
ष्ठंनमस्कारमथाकरोत् ॥ सर्वैस्तैःसहितोवीरैर्विनयानतकन्धरैः ॥ २४ ॥ तान्दृष्ट्वासन्नतान्सर्वाञ्छत्रुघ्नप्रमुखान्नृपान् ॥ अर्घ्यपाद्यादिकंचक्रेफलमूला
दिभिस्तदा ॥२५॥ उवाचतान्नृपान्सर्वान्भवन्तःकुत्रसङ्गताः ॥ कथमत्रसमायातास्तत्सर्ववदतानघाः ॥ २६ ॥ तच्छ्रुत्वावाक्यमेतस्यमुनिवर्यस्यवा
डव ॥ सुमतिःकथयामासवाक्यवादविचक्षणः ॥ २७ ॥ सुमतिरुवाच ॥ रघुवंशनृपस्यायमश्वोवैपाल्यतेऽखिलैः ॥ यागंकरिष्यतेवीरःसर्वसम्भारस
म्भृतम् ॥ २८ ॥ तच्छ्रुत्वावचनंतेषांजगादमुनिसत्तमः ॥ दन्तकान्त्याखिलंघोरंतमोनिर्वारयन्निव ॥ २९ ॥ आरण्यकउवाच ॥ किंयागैर्विविधैरन्यैः
सर्वसम्भारसम्भृतैः ॥ स्वल्पपुण्यप्रदैर्नूनंक्षयिष्णुपददातृभिः ॥ ३० ॥ मूढोलोकोहरिंत्यक्त्वाकरोत्यन्यसमर्चनम् ॥ रघुवीरंरमानाथंस्थिरैश्वर्यप
दप्रदम् ॥ ३१ ॥ योनरैःस्मृतमात्रोऽपिहरतेपापपर्वतम् ॥ तमुक्त्वाक्लिश्यतेमूढोयागयोगव्रतादिभिः ॥ ३२ ॥ अहोपश्यतमूढत्वंलोकानामति
वञ्चितम् ॥ सुलभंरामभजनंमुक्त्वादुर्लभमाचरेत् ॥३३॥ सकामैर्योगिभिर्वापिचिन्त्यतेकामवर्जितैः॥ अपवर्गप्रदंनॄणांस्मृतमात्राखिलाघहम् ॥३४॥
पुराहंतत्त्ववित्सायांज्ञानिनंसुविचारयन् ॥ अगमंबहुतीर्थानितत्त्वंकोऽपिनमेऽदिशत् ॥ ३५ ॥ तदैकंहिमहाभाग्यात्प्राप्तंवैलोमशंमुनिम् ॥ स्वर्गलो
कात्समायातंतीर्थयात्राचिकीर्षया ॥ ३६ ॥ तमहंप्रणिपत्याथपर्यपृच्छंमहामुनिम् ॥ महायुषंमहायोगिसंसेवितपदद्वयम् ॥ ३७ ॥ स्वामिन्मयाद्य
मानुष्यंप्राप्तमद्भुतदुर्लभम् ॥ संसारघोरजलधिंकिंकर्तव्यंतितीर्षुणा ॥ ३८ ॥ विचार्यकथयत्वंतद्व्रतंदानंजपोमखः ॥ देवोवाविद्यतेयोवैसंसृत्यम्भोधि
तारकः ॥ ३९ ॥ यज्ज्ञात्वासंसृतिंघोरांतरामित्वत्कृपाब्धितः ॥ तन्मेकथययोगेशसर्वशास्त्रार्थपारग ॥ ४० ॥ इतिमद्वाक्यमाकर्ण्यजगादमुनिस
त्तमः ॥ शृणुष्वैकमनाविप्रश्रद्धयापरयायुतः ॥ ४१ ॥ सन्तिदानानितीर्थानिव्रतानिनियमायमाः ॥ योगायज्ञास्तथानेकेवर्तन्तेस्वर्गदायकाः ॥
॥ ४२ ॥ परंगुह्यंप्रवक्ष्यामिसर्वपापप्रणाशनम् ॥ तच्छृणुष्वमहाभागसंसाराम्भोधितारकम् ॥ ४३ ॥ नास्तिकायनवक्तव्यंनचाऽश्रद्धालवेपुनः ॥
निन्दकायशठायापिनदेयंभक्तिवैरिणे ॥ ४४ ॥ रामभक्तायशान्तायकामक्रोधवियोगिने ॥ वक्तव्यंसर्वदुःखस्यनाशकारकमुत्तमम् ॥ ४५ ॥ रामा
न्नास्तिपरोदेवोरामान्नास्तिपरंव्रतम् ॥ नहिरामात्परोयोगोनहिरामात्परोमखः ॥ ४६ ॥ तंस्मृत्वाचैवजप्त्वाचपूजयित्वानरःपरम् ॥ प्राप्नोतिपरमा
मृद्धिमैहिकामुष्मिकींतथा ॥ ४७ ॥ संस्मृतोमनसाध्यातःसर्वकामफलप्रदः ॥ ददातिपरमांभक्तिंसंसाराम्भोधितारिणीम् ॥ ४८ ॥ श्वपाकोऽपिहि

CC-0. In Public Domain. Digitization by eGangotri

संस्मृत्यरामंयातिपरांगतिम् ॥ येवेदशास्त्रनिरतास्त्वादृशास्तत्रकिंपुनः ॥ ४९ ॥ सर्वेषांवेदशास्त्राणांरहस्यंतेप्रकाशितम् ॥ समाचरतथात्वंवैयथा स्यात्तेमनीषितम् ॥ ५० ॥ एकोदेवोरामचन्द्रोव्रतमेकंतदर्चनम् ॥ मन्त्रोऽप्येकश्चतन्नामशास्त्रंतद्ध्येवतत्स्तुतिः ॥ ५१ ॥ तस्मात्सर्वात्मनारामचन्द्रं भजमनोहरम् ॥ यथागोष्पदवत्तुच्छोभवेत्संसारसागरः ॥ ५२ ॥ श्रुत्वाहंतुमुनेर्वाक्यंपुनःप्रश्नमकारिषम् ॥ कथंवाध्यायतेदेवःकथंवापूज्यतेनरैः ॥ ५३ ॥ कथयस्वमहाबुद्धेसर्वज्ञममविस्तरात् ॥ यज्ज्ञात्वाहंकृतार्थःस्यांत्रिलोक्यांमुनिसत्तम ॥ ५४ ॥ एतच्छ्रुत्वातुमद्वाक्यंविचार्यसतुलोमशः॥ कथयामासमेसर्वंरामध्यानपुरःसरम् ॥ ५५ ॥ शृणुविप्रेन्द्रवक्ष्यामियत्पृष्टंतुत्वयानघ ॥ यथातुष्येद्रमानाथःसंसारज्वरदाहकः ॥ ५६ ॥ अयोध्या नगरेरम्येचित्रमण्डपशोभिते ॥ ध्यायेत्कल्पतरोर्मूलेसर्वकामसमृद्धिदे ॥ ५७ ॥ महामरकतस्वर्णनीलरत्नादिशोभितम् ॥ सिंहासनंचित्तहरंकान्त्या तामिस्रनाशनम् ॥ ५८ ॥ तस्योपरिसमासीनंरघुराजंमनोरमम् ॥ दूर्वादलश्यामतनुंदेवदेवेन्द्रपूजितम् ॥ ५९ ॥ राकायांपूर्णशीतांशुकान्तिधिक्का रिवक्त्रिणम् ॥ अष्टमीचन्द्रशकलसमभालाधिधारिणम् ॥ ६० ॥ नीलकुन्तलशोभाढ्यंकिरीटमणिरञ्जितम् ॥ मकराकारसौन्दर्यकुण्डलाभ्यांविरा जितम् ॥ ६१ ॥ विद्रुमच्छविसत्कान्तिरदच्छदविराजितम् ॥ तारापतिकराकारद्विजराजिसुशोभितम् ॥ ६२ ॥ जपापुष्पाभयामाध्व्याजिह्वया शोभिताननम् ॥ यस्यांवसन्तिनिगमाऋगाद्याःशास्त्रसंयुताः ॥ ६३ ॥ कम्बुकान्तिधरग्रीवाशोभयासमलङ्कृतम् ॥ सिंहवदुच्चकौस्कन्धौमांसलौ बिभ्रंतंवरम् ॥ ६४ ॥ बाहूदधानंदीर्घाङ्गौकेयूरकटकाङ्कितौ ॥ मुद्रिकाहीरशोभाभिर्भूषितौजानुलम्बिनौ ॥ ६५ ॥ वक्षोदधानंविपुलंलक्ष्मीवासेन शोभितम् ॥ श्रीवत्सादिविचित्राङ्कैरङ्कितंसुमनोहरम् ॥६६॥ महोदरंमहानाभिंशुभकट्याविराजितम् ॥ काञ्च्यावैमणिमत्याचविशेषेणश्रियान्वितम्॥ ॥ ६७ ॥ ऊरुभ्यांविमलाभ्यांवैजानुभ्यांशोभितंश्रिया ॥ चरणाभ्यांवज्ररेखायवाङ्कुशसुरेखया ॥ ६८ ॥ युताभ्यांयोगिध्येयाभ्यांकोमलाभ्यांविरा जितम् ॥ ध्यात्वास्मृत्वाचसंसारसागरंत्वंतरिष्यसि ॥६९॥ तमेवपूजयन्नित्यंचन्दनादिभिरिच्छया ॥ प्राप्नोतिपरमामृद्धिमैहिकामुष्मिकींपराम् ॥ ॥ ७०॥ त्वयापृष्टंमहाराजरामस्यध्यानमुत्तमम् ॥ तत्तेकथितमेतद्वैसंसारजलधिंतर ॥७१॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशेषवा०रामाश्व०आर ण्यकोपाख्यानेलोमशारण्यकसंवादोनामपञ्चत्रिंशत्तमोध्यायः ॥३५॥ शेषउवाच ॥एतच्छ्रुत्वातुविप्रेन्द्रोलोमशात्परमंमहत् ॥ पुनःप्रपच्छतमृषिंसर्व ज्ञंयोगिनांवरम् ॥ १ ॥ आरण्यकउवाच ॥ मुनिश्रेष्ठवदैतन्मेपृच्छामित्वांमहामते ॥ गुरवःकृपयायुक्ताभाषन्तेसेवकेऽखिलम् ॥ २ ॥ कोऽसौरामो महाभागयोनित्यंध्यायतेत्वया ॥ तस्यकानिचरित्राणिवदस्वत्वंद्विजर्षभ ॥ ३ ॥ किमर्थमवतीर्णोऽसौकस्मान्मानुषतांगतः ॥ तत्सर्वंकथयाशुत्वंम

मसंशयनुत्तये ॥ ४ ॥ शेषउवाच ॥ इतिवाक्यंसमाकर्ण्यमुनेःपरमशोभनम् ॥ लोमशःकथयामासरामचारित्रमद्भुतम् ॥ ५ ॥ लोकान्निरयसंमग्ना न्ज्ञात्वायोगेश्वरेश्वरः ॥ कीर्तिंप्रथयितुंलोकेययाघोरंतरिष्यति ॥ ६ ॥ एवंज्ञात्वादयावार्धिःपरमेशोमनोहरः ॥ अवतारंचकारात्रचतुर्धासश्रियान्वितः ॥ ७ ॥ पुरात्रेतायुगेप्राप्तेपूर्णांशोरघुनन्दनः ॥ सूर्यवंशेसमुत्पन्नोरामोराजीवलोचनः ॥ ८ ॥ सरामोलक्ष्मणसखःकाकपक्षधरोयुवा ॥ तातस्यवचनात्तौतुविश्वामित्रमनुव्रतौ ॥ ९ ॥ यज्ञसंरक्षणार्थायराज्ञादत्तौकुमारकौ ॥ दान्तौधनुर्धरौवीरौविश्वामित्रमनुव्रतौ ॥ १० ॥ पथिप्रव्रजतोस्तत्रताटकानामराक्षसी ॥ सङ्गताचवनेघोरेतयोर्वैविघ्नकारणात् ॥ ११ ॥ ऋषेरनुज्ञयारामस्ताटकांयमयातनाम् ॥ प्रावेशयद्धनुर्वेदविद्याभ्यासेनराघवः ॥१२॥ यस्यपादतलस्पर्शाच्छिलावासवयोगजा ॥ अहल्यागौतमवधूःपुनर्जातास्वरूपिणी ॥१३॥ विश्वामित्रस्ययज्ञेतुसुप्रवृत्तेरघूत्तमः ॥ मारीचंचसुबाहुंचजघानपरमेषुभिः ॥ १४ ॥ ईश्वरस्यधनुर्भग्नंजनकस्यगृहेस्थितम् ॥ रामःपञ्चदशेवर्षेषड्वर्षामथमैथिलीम् ॥ १५ ॥ उपयेमेविवाहेनरम्यांसीतामयोनिजाम् ॥ कृतकृत्यस्तदाजातःसीतांसम्प्राप्यराघवः ॥ १६ ॥ ततोद्वादशवर्षाणिरेमेरामस्तयासह ॥ सप्तविंशतिमेवर्षेयौवराज्यमकल्पयत् ॥ १७ ॥ राजानमथकैकेयीवरद्वयमयाचत ॥ तयोरेकेनरामस्तुससीतःसहलक्ष्मणः ॥ १८ ॥ जटाधरःप्रव्रजतुवर्षाणीहचतुर्दश ॥ भरतस्तुद्वितीयेनयौवराज्याधिपोऽस्तुमे ॥ १९ ॥ जानकीलक्ष्मणसखंरामंप्राव्राजयन्नृपः ॥ त्रिरात्रमुदकाहारश्चतुर्थेऽह्निफलाशनः ॥ २० ॥ पञ्चमेचित्रकूटेतुरामःस्थानमकल्पयत् ॥ अथत्रयोदशेवर्षेपञ्चवट्यांमहामुने ॥ २१ ॥ रामोविरूपयामासशूर्पणखांनिशाचरीम् ॥ वनेविचरतस्तस्यजानक्यासहितस्यच ॥ २२ ॥ आगतोराक्षसस्तांतुहर्तुंपापविपाकतः ॥ ततोमाघासिताष्टम्यांमुहूर्तेवृन्दसंज्ञिते[1] ॥ २३ ॥ राघवाभ्यांविनासीतांजहारदशकन्धरः ॥ तेनैवंह्रियमाणासाचक्रन्दकुररीयथा ॥ २४ ॥ रामरामेतिमांरक्षरक्षमांरक्षसाहृताम् ॥ यथाश्येनःक्षुधाक्रान्तःक्रन्दन्तींवर्त्तिकांनयेत् ॥ २५ ॥ तथाकामवशंप्राप्तोरावणोजनकात्मजाम् ॥ नयत्येवंजनकजांजटायुःपक्षिराट्तदा ॥ २६ ॥ युयुधेराक्षसेन्द्रेणसरावणहतोऽपतत् ॥ मार्गशुक्लनवम्यांतुवसन्तींरावणालये ॥ २७ ॥ सम्पातिर्दशमेमासआचख्यौवानरेषुताम् ॥ एकादश्यांमहेन्द्राद्रेःपुप्लुवेशतयोजनम् ॥ २८ ॥ हनूमान्निशितस्यांतुलङ्कायांपर्यकालयत् ॥ तद्रात्रिशेषेसीतायादर्शनंहिहनूमतः ॥ २९ ॥ द्वादश्यांशिंशपावृक्षेहनूमान्पर्यवस्थितः ॥ तस्यांनिशायांजानक्याविश्वासालापसंकथा ॥ ३० ॥ अक्षादिभिस्त्रयोदश्यांततोयुद्धमवर्तत ॥ ब्रह्मास्त्रेणचतुर्दश्यांबद्धःशक्रजिताकपिः ॥ ३१ ॥ वह्निनापुच्छयुक्तेनलङ्कायादहनंकृतम् ॥

१ 'वेदसंज्ञिते' इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

पूर्णिमायांमहेन्द्राद्रौपुनरागमनंकपेः ॥ ३२ ॥ मार्गासितप्रतिपदः पञ्चभिः पथिवासरैः ॥ पुनरागत्यषष्ठेऽह्निध्वस्तंमधुवनंकिल ॥ ३३ ॥ सप्तम्यांप्रत्यभिज्ञानदानंसर्वनिवेदनम् ॥ अष्टम्युत्तरफल्गुन्यांमुहूर्तेविजयाभिधे ॥ ३४ ॥ मध्यंप्राप्तेसहस्रांशौप्रस्थानंराघवस्यच ॥ रामःकृत्वाप्रतिज्ञांतुप्रयातोदक्षिणांदिशम् ॥ ३५ ॥ तीर्त्वाहंसागरमपिहनिष्येराक्षसेश्वरम् ॥ दक्षिणाशांप्रयातस्यसुग्रीवोऽप्यभवत्सखा ॥ ३६ ॥ वासरैःसप्तभिःसिन्धोःस्कन्धावारनिवेशनम् ॥ पौषशुक्लप्रतिपदस्तृतीयायावदम्बुधेः ॥ ३७ ॥ उपस्थानंससैन्यस्यराघवस्यबभूवह ॥ विभीषणश्चतुर्थ्यांतुरामेणसहसङ्गतः ॥ ३८॥ समुद्रतरणार्थायपञ्चम्यांमन्त्रउद्यतः ॥ प्रायोपवेशनंचक्रेरामोदिनचतुष्टयम् ॥ ३९ ॥ समुद्रवरलाभश्चसहोपायप्रदर्शनम् ॥ ततोदशम्यामारम्भस्त्रयोदश्यांसमापनम् ॥ ४० ॥ चतुर्दश्यांसुवेलाद्रौरामःसैन्यंन्यवेशयत ॥ पौर्णमास्याद्वितीयान्तंत्रिदिनैःसैन्यतारणम् ॥ ४१ ॥ तीर्त्वातोयनिधिंरामोवानरेश्वरसैन्यवान् ॥ रुरोधचपुरींलङ्कांसीतार्थंसहलक्ष्मणः ॥ ४२ ॥ तृतीयादिदशम्यन्तंनिवेशश्चदिनाष्टकम् ॥ शुकसारणयोस्तत्रप्राप्तिरेकादशेदिने ॥ ४३ ॥ पौषासिताख्यद्वादश्यांसैन्यसङ्ख्यानमेवच ॥ शार्दूलेनकपीन्द्राणांसहसासैन्यवर्णनम् ॥ ४४ ॥ त्रयोदश्याअमावास्यांलङ्कायांदिवसैस्त्रिभिः ॥ रावणःसैन्यसङ्ख्यानंरणोत्साहंतदाकरोत् ॥ ४५ ॥ प्रययावङ्गदोदौत्यंमाघशुक्लाद्यवासरे ॥ सीतायाश्चततोभर्तुर्मायामूर्द्धादिदर्शनम् ॥ ४६ ॥ माघद्वितीयादिदिनैःसप्तभिर्यावदष्टमी ॥ रक्षसांवानराणांचयुद्धमासीच्चसङ्कुलम् ॥ ४७ ॥ माघशुक्लनवम्यांतुरात्राविन्द्रजितारणे ॥ रामलक्ष्मणयोर्नागपाशबन्धःकृतःकिल ॥ ४८ ॥ आकुलेषुकपीशेषुनिरुत्साहेषुसर्वशः ॥ नागपाशविमोक्षार्थंदशम्यांपवनोऽजपत् ॥ ४९ ॥ कर्णेस्वरूपंरामस्यगरुडागमनंततः ॥ एकादश्यांचद्वादश्यांधूम्राक्षस्यवधःकृतः ॥ ५० ॥ त्रयोदश्यांतुतेनैवनिहतःकम्पनोरणे ॥ माघशुक्लचतुर्दश्यायावत्कृष्णादिवासरम् ॥ ५१ ॥ त्रिदिनेनप्रहस्तस्यनीलेनविहितोवधः ॥ माघकृष्णद्वितीयायाश्चतुर्थ्यन्तंत्रिभिर्दिनैः ॥ ५२ ॥ रामेणतुमुलेयुद्धेरावणोद्रावितोरणात् ॥ पञ्चम्याअष्टमीयावद्रावणेनप्रबोधितः ॥ ५३ ॥ कुम्भकर्णस्तदाचक्रेऽभ्यवहारंचतुर्दिनम् ॥ कुम्भकर्णोदिनैःषड्भिर्नवम्यास्तुचतुर्दशीम् ॥ ५४ ॥ रामेणनिहतोयुद्धेबहुवानरभक्षकः ॥ अमावास्यादिनेशोकादवहारोबभूवह ॥ ५५ ॥ फाल्गुनादिप्रतिपदश्चतुर्थ्यन्तंचतुर्दिनैः ॥ विसतन्तुप्रभृतयोनिहताःपञ्चराक्षसाः ॥ ५६ ॥ पञ्चम्याःसप्तमीयावदतिकायवधस्तथा ॥ अष्टम्याद्द्वादशीयावन्निहतौदिनपञ्चकात् ॥ ५७ ॥ निकुम्भकुम्भावूर्ध्वंतुमकराक्षस्त्रिभिर्दिनैः ॥ फाल्गुनासितद्वितीयायांदिनेशक्रजिताजितम् ॥ ५८ ॥ तृतीयादिसप्तम्यन्तंदिनपञ्चकमेवच ॥ ओष

१ 'सिन्धो रोधस्यारान्निवेशनम्' इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

ध्यानयनव्यग्रादवहारोबभूवह ॥ ५९ ॥ ततस्त्रयोदशीयावद्दिनैः पञ्चभिरिन्द्रजित ॥ लक्ष्मणेनहतोयुद्धेविख्यातबलपौरुषः ॥ ६० ॥ चतुर्दश्यांदश ग्रीवोदीक्षांप्रापावहारतः ॥ अमावास्यादिनेप्रायाद्युद्धायदशकन्धरः ॥ ६१ ॥ चैत्रशुक्लप्रतिपदः पञ्चमीदिनपञ्चकैः ॥ रावणेयुद्ध्यमानेतुप्रचुरो रक्षसांवधः ॥ ६२ ॥ चैत्रषष्ठयाष्टमीयावन्महापार्श्वादिमारणम् ॥ चैत्रशुक्लनवम्यांतुसौमित्रेःशक्तिभेदनम् ॥ ६३ ॥ कोपाविष्टेनरामेणद्राविता दशकन्धरः ॥ द्रोणाद्रिराञ्जनेयेनलक्ष्मणार्थमुपाहृतः ॥ ६४ ॥ दशम्यामवहारोऽभूद्रात्रौयुद्धेतुरक्षसाम् ॥ एकादश्यांतुरामायरथंमातलिसारथिः ॥ ६५ ॥ प्रेरितोवासवेनाजावर्पयामासभक्तितः ॥ कोपवानथद्वादश्यायावत्कृष्णचतुर्दशी ॥ ६६ ॥ अष्टादशदिनैरामोरावणंद्वैरथेऽवधीत॥ सङ्ग्रामेतुमुलेजातेरामोजयमवाप्तवान् ॥ ६७ ॥ माघशुक्लद्वितीयायाश्चैत्रकृष्णचतुर्दशीम् ॥ सप्ताशीतिदिनेष्वेवमध्यंपञ्चदशाहकम् ॥ ६८ ॥ युद्धावहारःसङ्ग्रामोद्वासप्ततिदिनान्यभूत् ॥ संस्कारोरावणादीनाममावस्यादिनेऽभवत ॥ ६९ ॥ वैशाखादितिथौरामउवासरणभूमिषु ॥ अभिषिक्तोद्वितीयायांलङ्काराज्येविभीषणः ॥ ७० ॥ सीताशुद्धिस्तृतीयायांदेवेभ्योवरलम्भनम् ॥ हत्वाऽचिरेणलङ्केशंलक्ष्मणाग्रजएवसः ॥ ७१ ॥ गृहीत्वाजानकींपुण्यांदुःखितांराक्षसेनतु ॥ आदायपरयाप्रीत्याजानकींसन्यवर्तत ॥ ७२ ॥ वैशाखस्यचतुर्थ्यांतुरामःपुष्पक माश्रितः ॥ विहायसानिवृत्तस्तुभूयोऽयोध्यांपुरींप्रति ॥ ७३ ॥ पूर्णेचतुर्दशेवर्षेपञ्चम्यांमाधवस्यतु ॥ भरद्वाजाश्रमेरामःसगणःसमुपावि शत ॥ ७४ ॥ नन्दिग्रामेतुषष्ठयांसभरतेनसमागतः ॥ सप्तम्यामभिषिक्तोऽसावयोध्यायांरघूद्वहः ॥ ७५ ॥ दशैकाधिकमासांस्तुचतुर्दशाहानि मैथिली ॥ उवासरामरहितारावणस्यनिवेशने ॥ ७६ ॥ द्विचत्वारिंशकेवर्षेरामोराज्यमकारयत् ॥ सीतायाश्चत्रयस्त्रिंशद्वत्सराश्चतदाऽभवन् ॥७७॥ सचतुर्दशवर्षान्तेप्रविश्यचपुरींप्रभुः ॥ अयोध्यांमुदितोरामोहत्वारावणमाहवे ॥ ७८ ॥ भ्रातृभिःसहितस्तत्ररामोराज्यमथाकरोत् ॥ राज्यंप्रकुर्वत स्तस्यपुरोधावदतांवरः ॥ ७९ ॥ अगस्त्यःकुम्भसम्भूतिस्तमागन्तारघोःपतिम् ॥ तद्वाक्याद्रघुनाथोऽसौकरिष्यतिहयक्रतुम् ॥ ८० ॥ तस्यागमि ष्यतिहयोह्याश्रमेतवसुव्रत ॥ तस्ययोधाःप्रमुदिताआयास्यन्तितवाश्रमम् ॥ ८१ ॥ तेषामग्रेरामकथाःकरिष्यसिमनोहराः ॥ तैःसाकंत्वमयोध्यायां गन्तासिवैद्विजर्षभ ॥८२॥ दृष्ट्वाराममयोध्यायांपद्मपत्रनिभेक्षणम् ॥ तत्क्षणादेवसंसारवार्धिनिस्तारवान्भव ॥ ८३ ॥ इत्युक्त्वामांमुनिवरोलोमशः सर्वबुद्धिमान् ॥ उवाचतेकिंप्रष्टव्यंतदाहमवदंहितम् ॥ ८४ ॥ ज्ञातंत्वत्कृपयासर्वंरामचारित्रमद्भुतम् ॥ त्वत्प्रसादादवाप्स्येऽहंरामस्यचरणाम्बुजम् ॥

१ अमांतमासगणनया सप्ताशीति दिनानि भवन्ति। पूर्णिमांतमासगणनया तावंति न जायन्ते। अतोऽत्र शुक्लादिमास एव बोद्धव्यः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ८५ ॥ ययानमस्कृतःपश्चाज्जगामसमुनीश्वरः ॥ तत्प्रसादान्मयावाप्तंरामस्यचरणार्चनम् ॥ ८६ ॥ सोऽहंस्मरामिरामस्यचरणावन्वहंमुहुः ॥
गायामितस्यचरितंमुहुर्मुहुरतन्द्रितः॥८७॥पावयामिजनानन्यान्गानेनस्वान्तहारिणा ॥ हृष्यामितन्मुनेर्वाक्यंस्मारंस्मारंतदीक्षया॥ ८८ ॥धन्योऽहं
कृतकृत्योऽहंसभाग्योऽहंमहीतले ॥ रामचन्द्रपदाम्भोजदिदृक्षामेभविष्यति ॥ ८९ ॥ तस्मात्सर्वात्मनारामोभजनीयोमनोहरः ॥ वन्दनीयोहिसर्वेषां
संसाराब्धितितीर्षया ॥ ९० ॥ तस्माद्यूयंकिमर्थंवैप्राप्ताःकोवानराधिपः ॥ यागंकरोतिधर्मात्माहयमेधंमहाक्रतुम् ॥ ९१ ॥ तत्सर्वंकथयन्त्वत्रयान्तु
वाहस्यपालने ॥ स्मरन्तुरघुनाथाङ्घ्रिंस्मृत्वास्मृत्वापुनःपुनः ॥ ९२ ॥ इतिवाक्यंसमाकर्ण्यमुनेर्विस्मयमागताः ॥ रघुनाथंस्मरन्तस्तेप्रोचुरारण्यकंमु
निम् ॥ ९३ ॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशेषवा०रामाश्व०लोमशारण्यकसंवादेरामचरित्रकथनंनामषट्त्रिंशत्तमोऽध्यायः॥३६॥शेषउवाच॥
तेपृष्टास्तुनिवर्येणरामचारित्रमद्भुतम् ॥धन्यंसभाग्यंमन्वानाःप्रोचुरात्मानमादरात् ॥ १ ॥ जनाऊचुः ॥ पवित्रितावयंसर्वेदर्शनेनतवाधुना ॥ यद्राम
कथयास्मान्वैपावयस्यधुनाजनान् ॥ २ ॥ शृणुष्ववचनंतथ्यंभवान्ब्रह्मर्षिसत्तमः ॥ त्वयापृष्टंयदस्मभ्यंसर्वंतत्कथयामवै ॥ ३ ॥ अगस्त्यवाक्या
च्छ्रीरामोविप्रहत्यापनुत्तये ॥ यागंकरोतिसुमहान्सर्वसम्भारसम्भृतम् ॥ ४ ॥ पालयमानास्तंसर्वेत्वदाश्रममुपागताः ॥ अश्वेनसहिताविप्रतज्जानीहि
महामते ॥ ५ ॥ इतिवाक्यंसमाकर्ण्यमनोहारिरसायनम् ॥ अत्यन्तंहर्षमापेदेब्राह्मणोरामभक्तिमान् ॥६॥ अद्यमेफलितोवृक्षोमनोरथश्रियान्वितः ॥
अद्यमेजननीधन्याजातामांसुषुवेतुया ॥ ७ ॥ अद्यराज्यंमयाप्राप्तंकण्टकेनविवर्जितम् ॥ अद्यकोशाःसुसम्पन्नाअद्यदेवाःसुतोषिताः ॥ ८ ॥ अग्निहोत्र
फलंत्वद्यप्राप्तंमेहविषाहुतम् ॥ यद्द्रक्ष्येरामचन्द्रस्यचरणाम्भोरुहोर्युगम् ॥ ९ ॥ योनित्यंध्यायतेस्वान्तअयोध्यायाःपतिःप्रभुः ॥ समेदृग्गोचरोनूनं
भविष्यतिमनोहरः ॥१०॥ हनूमान्मांसमालिङ्ग्यप्रक्ष्यतेकुशलंमम ॥ भक्तिंमेमहतींदृष्ट्वातोषंप्राप्स्यतिसत्तमः ॥११॥ इतिवाक्यंसमाकर्ण्यहनूमान्क
पिसत्तमः ॥ जग्राहपादयुगलंमुनेरारण्यकस्यहि ॥ १२ ॥ स्वामिन्हनूमान्विप्रर्षेसेवकोऽहंपुरःस्थितः ॥ जानीहिरामदासस्यरेणुकल्पंमुनीश्वर
॥ १३ ॥ इत्युक्तवतितस्मिन्वैमुनिःपरमहर्षितः ॥ आलिलिङ्गहनूमन्तंरामभक्त्यासुशोभितम् ॥ १४ ॥ उभौप्रेमविनिर्भिन्नावुभावपिसुधाप्लुतौ ॥
स्थगितौचित्रलिखिताविवतत्रबभूवतुः ॥ १५ ॥ उपविष्टौकथास्तत्रचक्रतुःसुमनोहराः ॥ रघुनाथपदाम्भोजप्रीतिनिर्भरमानसौ ॥ १६ ॥ हनूमांस्त
मुवाचेदंवचोविविधशोभनम् ॥ आरण्यकंमुनिवरंरामाङ्घ्रिध्याननिर्भृतम् ॥१७॥ स्वामिन्नयंदशरथकुलहीराङ्कुरोमहान् ॥ रामभ्रातामहाशूरःशत्रुघ्नः
प्रणमत्यसौ ॥१८॥ लवणोयेननिहतःसर्वलोकभयङ्करः॥कृताश्चसुखिनःसर्वेमुनयःसुतपोधनाः ॥१९॥ एषपुष्कलनामात्वांनमत्युद्भटसेवितः ॥येना

CC-0. In Public Domain. Digitization by eGangotri

धुनामहावीराजिताःसमरमण्डले ॥ २० ॥ जानीह्येनंबहुगुणंराममामात्यंमहाबलम् ॥ प्राणप्रियंरघुपतेःसर्वज्ञंधर्मकोविदम् ॥ २१ ॥ सुबाहुरयमत्युग्रो
वैरिवंशदवानलः ॥ रामपादाब्जरोलम्बोनमतित्वांमहायशाः ॥ २२ ॥ सुमदोऽप्येषपार्वत्यादत्तरामाङ्घ्रिसेवया ॥ प्राप्तोऽधुनाऽसौसंसारवार्धिनिस्त
रणंमहत् ॥ २३ ॥ सत्यवानयमश्वंयःप्राप्तमाशुत्यसेवकात् ॥ राज्यंनिवेदयामाससत्वांप्रणमतिक्षितौ ॥ २४ ॥ इतिवाक्यंसमाकर्ण्यसमालिंग्यसमा
दरात् ॥ चकारारण्यकऋषिःस्वागतंफलकादिना ॥ २५ ॥ तेहृष्टास्तत्रवसतिंचक्रुर्मुनिवराश्रमे ॥ प्रातर्नित्यक्रियांकृत्वारेवायांतेमहोद्यमाः
॥ २६ ॥ नरयानमथारोप्यसेवकैःसहितंमुनिम् ॥ शत्रुघ्नःप्रापयामासायोध्यांरामकृतालयाम् ॥ २७ ॥ सदूरान्नगरींदृष्ट्वासूर्यवंशनृपोषिताम् ॥ पदा
तिरभवद्वेगाद्रघुनाथदिदृक्षया ॥ २८ ॥ सम्प्राप्यनगरींरम्यामयोध्यांजनशोभिताम् ॥ मनोरथसहस्रेणसंरूढोरामदर्शने ॥ २९ ॥ ददर्शतत्रसरयूती
रेमण्डपशोभिते ॥ रामंदूर्वादलश्यामंकञ्जकान्तिविलोचनम् ॥ ३० ॥ मृगशृङ्गंकटौरम्यंधारयन्तंश्रियान्वितम् ॥ ऋषिवृन्दैर्व्यासमुख्यैर्वृतंशूरैःसुसे
वितम् ॥ ३१ ॥ भरतेनसुमित्रायास्तनूजेनपरीवृतम् ॥ ददतंदीनसङ्घेभ्योदानानिप्रार्थितानितम् ॥ ३२ ॥ विलोक्यारण्यकाख्योऽसौकृतार्थइत्यम
न्यत ॥ मल्लोचनेपद्मदलसमानेरामलोकके ॥ ३३ ॥ अद्यमेसर्वशास्त्रस्यज्ञातृत्वंबहुसार्थकम् ॥ येनश्रीराममाज्ञायप्राप्तोऽयोध्यापुरीमिमाम् ॥३४॥
इत्येवमादिवचनानिबहूनिहृष्टोरामाङ्घ्रिदर्शनसुहर्षितगात्रशोभी ॥ प्रायाद्रमेश्वरसमीपमगम्यमन्यैर्योगेश्वरैरपिविचारपरैःसुदूरम् ॥३५॥ धन्योऽहम
द्यरामस्यचरणावक्षिगोचरौ ॥ करिष्यामिवचोरम्यंवदन्राममवेक्षयन् ॥३६॥ रामोऽपिवाडवश्रेष्ठंज्वलन्तंस्वेनतेजसा॥तपोमूर्तिधरंवीक्ष्यप्रत्युत्थानम
थाकरोत् ॥ ३७ ॥ रामचन्द्रस्तस्यपादौसुचिरंनतवान्महान् ॥ ब्रह्मण्यदेवपावित्र्यंकृतमद्यतनोर्मम ॥३८॥ इतिवाक्यंवदंस्तस्यपादयोःपतितःप्रभुः॥
सुरासुरनमन्मौलिमणिनीराजिताङ्घ्रिकः ॥ ३९ ॥ प्रणतंतंनृपश्रेष्ठंवाडवेन्द्रोमहातपाः ॥ गृहीत्वाभुजयोर्मध्यमालिलिङ्गप्रियंप्रभुम् ॥ ४० ॥ कौ
सल्यातनयस्तंवाउच्चैर्मणिमयासने ॥ संस्थाप्यचपदोर्युग्मंजलेनाक्षालयत्प्रभुः ॥ ४१ ॥ पादावनेजनोदंतुमस्तकेऽधाद्धरिःस्वयम् ॥ पवित्रितो
ऽद्यसगणःसकुटुम्बइतिब्रुवन् ॥ ४२ ॥ चन्दनेनविलिप्याथगांचप्रादात्पयस्विनीम् ॥ उवाचचवचोरम्यंदेवदेवेन्द्रसेवितः ॥ ४३ ॥ स्वामिन्मखो
मयावाजिमेधसंज्ञःक्रियेतह ॥ सोऽयंत्वच्चरणापातादद्यपूर्णोभविष्यति ॥ ४४ ॥ अद्यमेब्रह्महत्योत्थपापहानिंकरिष्यति ॥ अश्वमेधःक्रतुर्युष्मच्च
रणेनपवित्रितः ॥ ४५ ॥ इतिवाक्यंब्रुवाणंतंराजराजेन्द्रसेवितम् ॥ आरण्यकउवाचेदंहसन्माध्व्यागिरामुनिः ॥ ४६ ॥ स्वामिंस्तवतुयुक्तंहिवचोब्रह्म
ण्यभूमिप ॥ त्वन्मूर्तयोमहाराजब्राह्मणावेदपारगाः ॥ ४७ ॥ त्वंयदाब्रह्मपूजादिशुभंकर्मकरिष्यसि ॥ ततोऽखिलानृपाविप्रंपूजयिष्यन्तिभूमिप ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ४८ ॥ त्वयोक्तंयन्महाराजविप्रहत्यापनुत्तये ॥ यागंकरोमिविमलंतत्तुहास्यकरंवचः ॥ ४९ ॥ त्वन्नामस्मरणान्मूढःसर्वशास्त्रविवर्जितः ॥ सर्व
पापाब्धिमुत्तीर्यसगच्छेत्परमंपदम् ॥ ५० ॥ सर्ववेदेतिहासानांसारार्थोऽयमितिस्फुटम् ॥ यद्रामनामस्मरणंक्रियतेपापतारकम् ॥ ५१ ॥ तावद्गर्ज
न्तिपापानिब्रह्महत्यासमानिच ॥ नयावत्प्रोच्यतेनामरामचन्द्रतवस्फुटम् ॥५२॥ त्वन्नामगर्जनंश्रुत्वामहापातककुञ्जराः ॥ पलायन्तेमहाराजकुत्रचि
त्स्थानलिप्सया ॥ ५४ ॥ तस्मात्तवकथंहत्यामहापुण्यददर्शन ॥ रामत्वत्सुकथांश्रुत्वापूतःसद्योभविष्यति ॥ ५४ ॥ मयापूर्वंकृतयुगेगङ्गायास्तीरवा
सिनाम् ॥ ऋषीणांमुखतोवाक्यंश्रुतमेतत्पुराविदाम् ॥ ५५ ॥ तावत्पापभियःपुंसांकातराणांसुपापिनाम् ॥ यावन्नवदतेवाचारामनाममनोहरम्
॥ ५६ ॥ तस्माद्धन्योऽहमधुनाममसंसृतिनाशनम् ॥ साम्प्रतंसुलभंरामचन्द्रत्वद्दर्शनादभूत् ॥ ५७ ॥ इत्युक्तवन्तंसमुनिंपूजयामासतत्रवै ॥ सर्वेमु
निजनाःसाधुसाधुवाक्यमितिब्रुवन् ॥ ५८ ॥ शेषउवाच ॥ अत्याश्चर्यमभूत्तत्रतन्मेनिगदतःशृणु ॥ वात्स्यायनमुनिश्रेष्ठरामभक्तिपरायण ॥ ५९ ॥
रामंदृष्ट्वामहाराजंयादृशंध्यानगोचरम् ॥ अत्यन्तंहर्षमापन्नोजगादसमुनीश्वरान् ॥ ६० ॥ मुनीश्वराःसंशृणुतमद्वाक्यंसुमनोहरम् ॥ मादृशःकोनभू
लोकेभविष्यतिसुभाग्यवान् ॥ ६१ ॥ नास्तिमत्सदृशःकोऽपिनजातोनभविष्यति ॥ यद्रामभद्रोमांनत्वास्वागतंपरिपृष्टवान् ॥ ६२ ॥ यत्पादपङ्क
जरजःश्रुतिमृग्यंसदैवहि ॥ सोऽद्यमत्पादयोःपाथःपीत्वापूतममन्यत ॥६३॥ एवंप्रवदतस्तस्यब्रह्मस्फोटोऽभवत्तदा ॥ निर्गतंतद्भवंतेजोविवेशरघुना
यके ॥६४॥ पश्यतांसर्वलोकानांसरयूतीरमण्डपे ॥ सायुज्यमुक्तिसम्प्रापदुर्लभांयोगिभिर्जनैः ॥ ६५ ॥ दिवितूर्यनिनादोऽभूद्वीणानादोऽभवत्तदा ॥
पुष्पवृष्टिःपपाताग्रेपश्यतांचित्रमद्भुतम् ॥ ६६ ॥ मुनयोऽप्येतदीक्षित्वाप्रशंसन्तोमुनीश्वरम् ॥ कृतार्थोऽयंमुनिश्रेष्ठोयद्रामवपुषीक्षितः ॥ ६७ ॥ इति
श्रीपाद्मेपुराणेपातालखण्डेशेषवा०रामाश्व०आरण्यकमुनेर्विष्णुलोकगमनंनामसप्तत्रिंशत्तमोऽध्यायः ॥ ३७ ॥ व्यासउवाच ॥ एतदाख्यानकंश्रु
त्वावात्स्यायनउदारधीः ॥ परमंहर्षमापेदेजगादचफणीश्वरम् ॥१॥ वात्स्यायनउवाच॥कथांसंशृण्वतेमह्यंतृप्तिर्नास्तिफणीश्वर ॥ रघुनाथस्यभक्तार्ति
हारिकीर्तिकरस्यवै ॥२॥ धन्यआरण्यकोनाममुनिर्वेदधरःपरः॥रघुनाथंसमालोक्यदेहंतत्याजनश्वरम् ॥३॥ ततोराज्ञोहयःकुत्रगतःकेननियन्त्रितः ॥
कथंतत्ररमानाथकीर्तिर्जाताफणीश्वर ॥ ४ ॥ सर्वंकथयमेतथ्यंसर्वज्ञोऽस्तियतोभवान् ॥ धराधरवपुर्धारीसाक्षात्तस्यस्वरूपधृत् ॥५॥ व्यासउवाच ॥
इतिवाक्यंसमाकर्ण्यप्रहृष्टेनान्तरात्मना ॥ उवाचरामचारित्रंतत्तद्गुणकथोदयम् ॥ ६ ॥ शेषउवाच ॥ साधुपृच्छसिविप्रर्षेरघुनाथगुणान्मुहुः ॥
श्रुतानश्रुतवत्कृत्वातेषुलोलुपतांदधन् ॥ ७ ॥ ततोनिरगमद्वाहःसैनिकैर्बहुभिर्वृतः ॥ रेवातीरेमनोज्ञेतुमुनिवृन्दनिषेविते ॥ ८ ॥ सेनाचरास्ततःसर्वेय

CC-0. In Public Domain. Digitization by eGangotri

त्रवाहस्ततस्ततः ॥ प्रसर्पन्तिनिरीक्षन्तस्तन्मार्गरणकोविदाः ॥ ९ ॥ वाजीगतोऽथरेवायाह्रदेऽगाधजलान्विते ॥ भालेस्वर्णभवंपत्रंधारयन्पूजिता
ङ्ककः ॥ ॥ १० ॥ ततोजलेममज्जासौरामचन्द्रहयोवरः ॥ तदासर्वेमहाशूरास्तत्रविस्मयमागताः ॥ ११ ॥ तैःपरस्परमेवोचेकथंहयसमागमः ॥ को
ऽत्रगन्ताजलेवाहमानेतुंतंमहोद्यम् ॥१२॥ इतियावत्समुद्विग्नामन्त्रयन्तेपरस्परम् ॥ तावद्वीरशतैःसार्धमाजगामरघोःपतिः ॥ १३ ॥ तान्सर्वान्विम
नस्कान्सदृष्ट्वाशत्रुघ्नसंज्ञितः ॥ पप्रच्छमेघगम्भीरवाचावीरशिरोमणिः ॥ १४ ॥ किंस्थितंनिखिलैरद्ययुष्माभिःसङ्घशोजले ॥ कुत्राश्वोरघुनाथस्यस्व
र्णपत्रेणशोभितः ॥ १५ ॥ जलेकिंविनिमग्नोऽसौहृतोवाकेनमानिना ॥ तन्मेकथयतक्षिप्रंकथंयूयंविमोहिताः ॥ १६ ॥ इतिवाक्यंसमाकर्ण्यराज्ञोरघुव
रस्यहि ॥ कथयामासुस्तेसर्वेवीराःशूरशिरोमणिम् ॥ १७ ॥ जनाऊचुः ॥ स्वामिन्वयंनजानीमोमुहूर्तमभवज्जले ॥ निममज्जततोनायाद्धय
स्तवमनोहरः ॥ १८ ॥ त्वमेवतत्रगत्वेमंवाहमानयवेगतः ॥ अस्माभिस्तत्रगन्तव्यंत्वयासार्द्धंमहामते ॥ १९ ॥ शेषउवाच ॥ इतिश्रुत्वा
वचस्तेषांसैनिकानांरघूद्वहः ॥ खेदंप्रापजनान्पश्यञ्जलसन्तरणोद्यतान् ॥ २० ॥ उवाचमन्त्रिमुख्यंसकिंकर्तव्यमतःपरम् ॥ कथंवाहस्यसम्प्रा
प्तिर्भविष्यतिवदस्वतत् ॥ २१ ॥ केतत्रशूराःसंयोज्याजलेऽन्वेषयितुंहयम् ॥ कोवाऽऽनयिष्यतेवाहंकेनोपायेनतद्वद ॥ २२ ॥ इतिराज्ञोवचः
श्रुत्वासुमतिर्मन्त्रिसत्तमः ॥ उवाचसमयेयोग्यंशत्रुघ्नंहर्षयन्निव ॥२३॥ सुमतिरुवाच ॥ स्वामिन्नस्तितवश्रीमञ्छक्तिरद्भुतकर्मणः ॥ पातालगमनेशक्ति
र्जलमध्यादिहस्फुटम् ॥ २४ ॥ अन्यच्चपुष्कलस्यापिशक्तिरस्तिमहात्मनः ॥ हनूमतोऽपिरामस्यपादसेवापरस्यच ॥ २५ ॥ तस्माद्यूयंत्र
योगत्वाहयमानयतध्रुवम् ॥ यतोभवेद्वाहमेधोरघुनाथस्यधीमतः ॥ २६ ॥ शेषउवाच ॥ इतिवाक्यंसमाश्रुत्यशत्रुघ्नःपरवीरहा ॥ स्वयंविवे
शतोयान्तर्हनुमत्पुष्कलान्वितः ॥ २७ ॥ यावज्जलंविवेशासौतावत्पुरमदृश्यत ॥ अनेकोद्यानशोभाढ्यममेयंपुटभेदनम् ॥ २८ ॥ तत्रमाणिक्य
रचितेस्तम्भेस्वर्णमयेहयम् ॥ बद्धंददर्शरामस्यस्वर्णपत्रसुभोभितम् ॥ २९ ॥ स्त्रियस्तत्रमनोहारिरूपधारिण्यउत्तमाः ॥ सेवन्तेसुन्दरीमेकांपर्यङ्केसुख
मास्थिताम् ॥ ३० ॥ तान्दृष्ट्वाताःस्त्रियःसर्वाःप्रावोचन्स्वामिनींप्रति ॥ एतेऽल्पवर्ष्मवयसोमांसपुष्टकलेवराः ॥ ३१ ॥ भविष्यन्तितवश्रेष्ठमाहार
स्यफलंमहत् ॥ एतेषांशोणितंस्वादुपुरुषाणांगतायुषाम् ॥ ३२ ॥ एतद्वचःसमाकर्ण्यसेविकानांवराङ्गना ॥ जहासकिञ्चिद्वदनंनर्तयन्तीभ्रुवानघा
॥ ३३ ॥ तावत्त्रयस्तेसम्प्राप्ताःसन्नाहश्रीविशोभिताः ॥ शिरस्त्राणानिदधतःशौर्यवीर्यसमन्विताः ॥ ३४ ॥ तान्दृष्ट्वामहिलास्तत्रसौन्दर्यश्रीसमन्वि
ताः ॥ प्रोचुस्तेविस्मयंविप्रकिमिदंदृश्यतेमहत् ॥ ३५ ॥ नमश्चक्रुर्महात्मानःसर्वेदेववराङ्गनाः ॥ किरीटमणिविद्योतद्योतिताङ्घ्रियुगास्ततः ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सातान्पप्रच्छपुरुषान्सर्वश्रेष्ठातुभामिनी ॥ केयूयमत्रसम्प्राप्ताःकथंचापधरानराः ॥ ३७ ॥ मत्स्थलंसर्वदेवानामगम्यंमोहनंमहत् ॥ अत्रप्राप्तस्यतु
कापिनिवृत्तिर्नभवत्युत ॥ ३८ ॥ अश्वोऽयंकस्यराज्ञोवैकथंचामरवीजितः ॥ स्वर्णपत्रेणशोभाढ्यःकथयन्तुममाग्रतः ॥ ३९ ॥ इतितस्यावचःश्रु
त्वामोहनाचारसंयुतम् ॥ हनूमांस्तांप्रत्युवाचगतभीःप्रहसन्निव ॥ ४० ॥ वयंवैकिङ्कराराज्ञस्त्रैलोक्यस्यशिखामणेः ॥ त्रिलोकीयंप्रणमतेसर्वदेवशि
रोमणिम् ॥ ४१ ॥ रामभद्रस्यजानीहिहयमेधप्रवर्तितुः ॥ प्रमुश्चवाहमस्माकंकथंबद्धोवराङ्गने ॥ ४२ ॥ वयंसर्वास्त्रकुशलाःसर्वशस्त्रास्त्रकोविदाः ॥
नयिष्यामोबलाद्वाहंहत्वातत्प्रतिरोधकान् ॥ ४३ ॥ इतिवाक्यंसमाकर्ण्यप्लवङ्गस्यवराङ्गना ॥ विवरस्थाप्रत्युवाचहसन्तीवाक्यकोविदा ॥ ४४ ॥
मयानीतमिमंवाहंनकोमोचयितुंक्षमः ॥ वर्षायुतेननिशितैर्बाणकोटिभिरुच्छ्रिखैः ॥ ४५ ॥ परंरामस्यपादाब्जसेवकीकर्मकारिणी ॥ नग्रहीष्यामि
तद्वाहंराजराजस्यधीमतः ॥ ४६ ॥ महानविनयोजातोममनेत्र्याःसुवाजिनः ॥ क्षमताद्रामचन्द्रस्तच्छरण्योभक्तवत्सलः ॥ ४७ ॥ यूयंक्लिष्टास्त
त्पुरुषाहयार्थंतस्यरक्षितुः ॥ याचध्वंवरमप्राप्यंदेवानामपिसत्तमाः ॥ ४८ ॥ यथामेऽमीवमत्युग्रंक्षमेऽतपुरुषोत्तमः ॥ व्रीडांत्यक्त्वाऽखिलांयूयंवृणु
ध्वंवरमुत्तमम् ॥ ४९ ॥ तस्यावचःपरंश्रुत्वाहनूमान्निजगादताम् ॥ रघुनाथप्रसादेनसर्वमस्माकमूर्जितम् ॥ ५० ॥ तथापियाचेवरमेकमुत्तमंवि
धेहितन्मेमनसःसमीहितम् ॥ भवेभवेनोरघुनायकःपतिर्वयंचतत्कर्मकराश्चकिङ्कराः ॥ ५१ ॥ एतद्वचनमाकर्ण्यप्लवगस्यतदाङ्गना ॥ उवाचवाक्यं
मधुरंप्रहस्यगुणपूजितम् ॥ ५२ ॥ भवद्भिःप्रार्थितंयद्वैदुर्लभंसर्वदैवतैः ॥ तद्भविष्यत्यसन्देहःसेवकास्तद्रघोःपतेः ॥ ५३ ॥ तथापिवरमेकंवैदास्या
मिकृतहेलना ॥ रघुनाथस्यतुष्ट्यर्थंतद्दत्तंमेभवेद्वचः ॥ ५४ ॥ अग्रेवीरमणिर्भूपोमहावीरसमन्वितः ॥ ग्रहीष्यतिभवद्वाहंशिवेनपरिरक्षितः ॥ ५५ ॥
तज्जयार्थंमहास्त्रंमेगृह्णीतसुमहाबलाः ॥ द्वैरथेसतुयोद्धव्यःशत्रुघ्नेनत्वयामहान् ॥ ५६ ॥ इदमस्त्रंयदात्वंतुक्षेपयिष्यसिसङ्गरे ॥ अनेनपूतोरामस्यस्व
रूपंज्ञास्यतेपुनः ॥ ५७ ॥ ज्ञात्वातंवाजिनंदत्त्वाचरणेप्रपतिष्यति ॥ तस्माद्गृह्णीध्वमस्त्रंतन्ममवैरिविदारणम् ॥ ५८ ॥ तच्छ्रुत्वारघुनाथस्य
भ्राताजग्राहचास्त्रकम् ॥ उदङ्मुखःपवित्राङ्गोयोगिन्यादत्तमद्भुतम् ॥ ५९ ॥ तत्प्राप्याणंमहातेजाबभूवरिपुकर्शनः ॥ दुष्प्रधर्ष्योदुराराध्यो
वैरिवारणसत्सृणिः ॥ ६० ॥ तांनत्वाराघवश्रेष्ठःशत्रुघ्नोहयसत्तमम् ॥ गृहीत्वागाज्जलात्तस्माद्देवातीरेसुखोचिते ॥ ६१ ॥ तंहष्ट्वासैनिकाःसर्वेप्र
हृष्टाङ्गामुदान्विताः ॥ साधुसाधुप्रशंसन्तःपप्रच्छुर्हयनिर्गमम् ॥ ६२ ॥ हनूमान्कथयामासहयस्यागमनंमहत ॥ वरप्राप्तिंचतेभ्योवैतेऽपिश्रुत्वामु
दंगताः ॥६३॥ इतिश्रीपाद्मपुराणेपातालखण्डेशेषवा०रामाश्व०शत्रुघ्नस्ययोगिनीदर्शनपूर्वकंजलमध्याद्वाहप्राप्तिर्नामाष्टात्रिंशत्तमोऽध्यायः ॥ ३८ ॥

CC-0. In Public Domain. Digitization by eGangotri

शेषउवाच ॥ निनदत्सुमृदङ्गेषुवीणानादेषुसर्वतः ॥ मुक्तोवाहस्ततोदेवपुरंदेवविनिर्मितम् ॥१॥ यत्रस्फाटिककुडयानांरचनाभिर्गृहानृणाम ॥ हसन्ति
विन्ध्यंविमलंपर्वतंनागसेवितम् ॥२॥ राजतानिगृहाण्यत्रदृश्यन्तेप्रकृतेरपि ॥ विचित्रमणिसन्नद्धानानामाणिक्यगोपुराः ॥३॥ पद्मिन्योयत्रलोकानां
गेहेगेहेमनोहराः ॥ हरन्तिचित्तानिनृणांमुखपद्मकलेक्षिताः ॥ ४ ॥ पद्मरागमणिर्यत्रगेहेगेहेसुभूमिषु ॥ बद्धःसंलक्ष्यतेविप्रतदोष्ठस्पर्धयातुकिम् ॥
॥ ५ ॥ क्रीडाशैलाःप्रत्यगारंनीलरत्नविनिर्मिताः ॥ कुर्वन्तिशङ्कांमेघस्यमयूराणांकलापिनाम् ॥ ६ ॥ हंसायत्रनृणांगेहेस्फाटिकेसुनियन्त्रिताः ॥
कुर्वन्तिमेघाम्नोभीतिंमानसंनस्मरन्तिच ॥ ७ ॥ निरन्तरंशिवस्थानेध्वस्तंचन्द्रिकयातमः ॥ शुक्लकृष्णविभेदोनपक्षयोस्तत्रवैनृणाम् ॥ ८ ॥
तत्रवीरमणीराजाधार्मिकेष्वग्रणीर्महान् ॥ राज्यंकरोतिविपुलंसर्वभोगसमन्वितम् ॥ ९ ॥ तस्यपुत्रोमहाशूरोनाम्नारुक्माङ्गदोवली ॥ वनिताभिर्गतोर
म्यदेहाभिःक्रीडितुंवनम् ॥१०॥ तासांमञ्जीरसंरावःकङ्कणानांरवस्तथा ॥ मनोहरतिकामस्यकिमन्यस्यकथात्रभोः ॥ ११ ॥ वनंजगामसुमहत्सुपुष्प
नगसंयुतम् ॥ सदाशिवकृतस्थानमृतुषट्कैर्विराजितम् ॥१२॥ चम्पकायत्रबहुशःफुल्लकोरकशोभिताः ॥ कुर्वन्तिकामिनांतत्रहृच्छयार्तिंविलोकिताः
॥१३॥चूताःफलादिभिर्नम्रामञ्जरीकोटिसंयुताः ॥ नागाःपुन्नागवृक्षाश्चशालास्तालास्तमालकाः॥१४॥कोकिलानांसमारावायत्रचश्रुतिगोचराः॥सदा
मधुपझङ्कारगतनिद्राःसुमल्लिकाः॥१५॥ दाडिमानांसमूहाश्चकर्णिकारैःसमन्विताः ॥ केतकीकानकीवन्यवृक्षराजिविराजिताः ॥१६॥ तस्मिन्वनेप्रमद
संयुतचित्तवृत्तिर्गायन्कलंमधुरवाग्विजिहीर्षयोच्चैः ॥ उद्यत्कुचाभिरभितोवनिताभिरागाच्छोभानिधानवपुरुज्झितभीर्विवेश ॥ १७ ॥ काश्चित्तंनृत्य
विद्याभिस्तोषयन्तिस्मशोभनम् ॥ काश्चिद्गानकलाभिश्चकाश्चिद्वाक्चतुरोचितैः॥१८॥ भ्रूसंज्ञाभिःपराःकाश्चित्तोषयामासुरुन्मदाः॥ परिरम्भणचातुर्यै
स्तंहृष्टंविदधुःस्त्रियः ॥ १९॥ ताभिःपुष्पोच्चयंकृत्वाभूषयामासताःस्त्रियः ॥ वाण्याकोमलयाशंसन्प्रेमेकामवपुर्धरः ॥ २० ॥ एवंप्रवृत्तेसमयेराजराज
स्यधीमतः ॥ प्रायात्तद्वनदेशंसहयःपरमशोभनः ॥२१॥ तंस्वर्णपत्ररचितैकललाटदेशंगङ्गासमंघुसृणकुङ्कमपिञ्जराङ्गम्॥गत्याऽसमंपवनवेगतिरस्करि
ण्याहष्ट्वास्त्रियःपरमकौतुकधामदेहम् ॥२२॥ ऊचुःपतिंकमलमध्यपिशङ्गवर्णास्ताम्राधरप्रतिभयाहतविद्रुमाभाः॥दन्तव्रजप्रमितहास्यसुशोभिवक्त्राःका
मस्यबाणनयनादिविमोहनाभाः ॥ २३ ॥ स्त्रियऊचुः ॥ कान्तकोऽयंमहानर्वास्वर्णपत्रैकशोभितः ॥ कस्यवाभातिशोभाढ्योगृहाणस्वबलादिमम् ॥
॥ २४ ॥ शेषउवाच ॥ तदुक्तंवचआकर्ण्यलीलाललितलोचनः ॥ जग्राहहयमेकेनकरपद्मेनलीलया ॥२५॥ वाचयित्वास्वर्णपत्रंस्पष्टवर्णसमन्वितम् ॥
जहासमहिलामध्येजगादवचनंपुनः ॥ २६ ॥ रुक्माङ्गदउवाच ॥ पृथिव्यांनास्तिमेपित्रासमःशौर्येणचश्रिय ॥ तस्मिन्कथंविधत्तेसउत्सेकंरामभूमि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पः ॥ २७ ॥ यस्यरक्षांप्रकुरुतेसदारुद्रःपिनाकधृत् ॥ यंदेवादानवायक्षानमन्तिमणिमौलिभिः ॥ २८ ॥ कुरुताद्वाजिमेधंवैजनकोमेमहाबलः ॥ यात्वेषवाजिशालायांबध्नन्तुममवैभटाः ॥ २९ ॥ इतिवाक्यंसमाकर्ण्यमहिलास्तामनोहराः ॥ प्रहृष्टवदनाजाताःकान्तंतुपरिरेभिरे ॥ ३० ॥ गृहीत्वाचहयंपुत्रोराज्ञोवीरमणेर्महान् ॥ पुरंपत्नीसमायुक्तोमहोत्साहमवीविशत् ॥ ३१ ॥ मृदङ्गध्वनिषुप्रोच्चैराहतेषुसमन्ततः ॥ बन्दिभिःसंस्तुतःप्रागात्स्वपितुर्मन्दिरंमहत् ॥ ३२ ॥ तस्मैसकथयामासहयंनीतंरघोःपतेः ॥ वाजिमेधायनिर्मुक्तंस्वच्छन्दगतिमद्भुतम् ॥ ३३ ॥ रक्षितंशत्रुसूदेनमहाबलसमेतिना ॥ तच्छ्रुत्वावचनंतस्यनृपोवीरमणिर्महान् ॥ ३४ ॥ नातिप्रशंसयामासतत्कर्मसुमहामतिः ॥ नीत्वापुनःसमायान्तंचौरस्येवविचेष्टितम् ॥ ३५ ॥ कथयामासजामात्रेशिवायाद्भुतकर्मणे ॥ अर्धाङ्गनाधरायाङ्गभूपायचन्द्रधारिणे ॥ ३६ ॥ तेनसंमन्त्रयामासनृपोवीरमणिर्महान् ॥ पुत्रसृष्टंमहत्कर्मविनिन्द्यंमहतांमतः ॥ ३७ ॥ शिवउवाच ॥ राजन्पुत्रेणभवतःकृतंकर्ममहाद्भुतम् ॥ योजहारमहावाहंरामचन्द्रस्यधीमतः ॥ ३८ ॥ अद्ययुद्धंमहद्भातिसुरासुरविमोहनम् ॥ शत्रुघ्नेनमहीभर्त्रावीरकोट्येकरक्षिणा ॥ ३९ ॥ मयायोध्रियतेस्वान्तेजिह्वयाप्रोच्यतेह्रियः ॥ तस्यरामस्ययज्ञाङ्गंजहारतवपुत्रकः ॥ ४० ॥ परमत्रमहाँल्लाभोभविष्यतिरणाङ्गणे ॥ यद्रामचरणाम्भोजंद्रक्ष्यामःस्वीयसेवितम् ॥ ४१ ॥ अत्रयत्नोमहान्कार्योहयस्यपरिरक्षणे ॥ नयिष्यन्तिबलाद्वाहंमयारक्षितमप्यमुम् ॥ ४२ ॥ तस्मादिमंमहाराजराज्येनसहसन्नतः ॥ वाजिनेभोजनंदत्त्वाप्रेक्षस्वाङ्घ्रियुगंततः ॥ ४३ ॥ इतिवाक्यंसमाकर्ण्यशिवस्यसनृपोत्तमः ॥ उवाचतंसुरेन्द्रादिवन्द्यपादाम्बुजद्वयम् ॥ ४४ ॥ वीरमणिरुवाच ॥ क्षत्रियाणामयंधर्मोयत्प्रतापस्यरक्षणम् ॥ तदसौक्रान्तुमुद्युक्तःक्रतुनाहयसंज्ञिना ॥ ४५ ॥ तस्माद्रक्ष्यःस्वप्रतापोयेनकेनापिमानिना ॥ यावच्छक्यंकर्मकृत्वाशरीरव्ययकारिणा ॥ ४६ ॥ सर्वंकृतंसुतेनेदंगृहीतोऽश्वःपुनर्यतः ॥ कोपितंराममभूपालंसमयार्हंकुरुप्रभो ॥ ४७ ॥ क्षत्रियाणामिदंकर्मकर्तव्यार्हंभवेन्नहि ॥ यदकस्माद्रिपोःपादौप्रणमेद्भयविह्वलः ॥ ४८ ॥ रिपवोविहसन्त्येनंकातरोऽयंनृपाधमः ॥ क्षुद्रःप्राकृतवन्नीचोनतवान्भयविह्वलः ॥ ४९ ॥ तस्माद्भवान्यथायोग्यंयोद्धव्येसमुपस्थिते ॥ यद्विधेयंविचार्यैवकर्तव्यंभक्तरक्षणम् ॥ ५० ॥ शेषउवाच ॥ इतिवाक्यंसमाकर्ण्यचन्द्रचूडोऽवदद्वचः ॥ प्रहसन्मेघगम्भीरवाण्यासंमोहयन्मनः ॥ ५१ ॥ यदिदेवास्त्रयस्त्रिंशत्कोटयःसमुपस्थिताः ॥ तथापित्वत्तःकेनाश्वोगृह्यतेममरक्षितुः ॥ ५२ ॥ यदिरामःसमागत्यस्वात्मानंदर्शयिष्यति ॥ तदाहंचरणौतस्यप्रणमामिसुकोमलौ ॥ ५३ ॥ स्वामिनानहियोद्धव्यंमहाननयउच्यते ॥ अन्येवीरास्तृणप्रायाःकिञ्चित्कर्तुंनवैक्षमाः ॥ ५४ ॥ तस्माद्युद्धस्वराजेन्द्ररक्षकेमयिसुस्थिते ॥ कोगृह्णातिबलाद्वाहंत्रिलोकीयदिसङ्गता ॥ ५५ ॥ एतद्वचःपरंश्रुत्वाचन्द्रचूडस्यभूमिपः ॥ जहर्षमानसेऽत्यन्तंयुद्धकर्मणिकौ

CC-0. In Public Domain. Digitization by eGangotri

तुकी ॥ ५६ ॥ इतिश्रीपाद्मेपुराणेपातालखण्डेशेषवा॰रामाश्व॰वीरमणिपुत्रेणहयग्रहणंनामैकोनचत्वारिंशत्तमोऽध्यायः ॥३९॥ शेषउवाच ॥ सेनाच
रास्तुरामस्यमहाबलसमन्विताः ॥ समागतास्तंपश्यन्तोहयंरामस्यभूपतेः ॥ १ ॥ क्वासावश्वःकेननीतःकथंवादृश्यतेनसः ॥ कोगन्तायमपुर्यां
वैवाहंहत्वासुमन्दधीः ॥ २ ॥ विलोकयन्तस्तन्मार्गंयावत्सेनाचरारघोः ॥ तावत्प्राप्तोमहाराजोमहासैन्यपरीवृतः ॥ ३ ॥ पप्रच्छसेवकान्सर्वा
न्कुत्राश्वोममसाम्प्रतम् ॥ नदृश्यतेकथंवाहःस्वर्णपत्रसुशोभितः ॥ ४ ॥ इतितद्वचनंश्रुत्वासेवकास्तेहयानुगाः ॥ प्रोचुर्नाथमनोवेगोवाहःकेनापिका
नने ॥ ५ ॥ हृतोनलक्ष्यतेतस्मादस्माभिर्मार्गकोविदैः ॥ तदत्रयत्नःकर्तव्योहयप्राप्तिंप्रतिप्रभो ॥ ६ ॥ तेषांवचनमाकर्ण्यपप्रच्छसुमतिंनृप ॥ शत्रुघ्नः
शत्रुसंहारकारीमोहनरूपधृत् ॥ ७ ॥ शत्रुघ्नउवाच ॥ कोऽत्रराजानिवसतिकथंवाहस्यसङ्गमः ॥ कियद्दूरंभूमिपतेर्येनमेऽद्यहृतोहयः ॥ ८ ॥
सुमतिरुवाच ॥ राजन्देवपुरंह्येतद्देवेनैवविनिर्मितम् ॥ कैलासमिवदुर्गम्यंवैरिसङ्घैःसुसंहतैः ॥ ९ ॥ अस्मिन्वीरमणीराजामहाशूरःप्रतापवान् ॥
राज्यंकरोतिधर्मेणशिवेनपरिरक्षितः ॥ १० ॥ योऽसौप्रलयकारीसआस्तेभक्त्यावशीकृतः ॥ चन्द्रचूडाःस्वभक्तस्यपक्षपातंसृजन्सदा ॥ ११ ॥
तस्मादत्रमहद्युद्धंगृहीतश्चेद्भविष्यति ॥ यत्ताःसन्तःप्रकुर्वन्तुरक्षणंकटकस्यहि ॥ १२ ॥ एवंश्रुत्वासशत्रुघ्नःसर्वभूपशिरोमणिः ॥ सैन्यव्यूहंरचित्वासौ
तिष्ठतिस्ममहायशाः ॥ १३ ॥ अथतंसुखमासीनंमन्त्रयन्तंसुमन्त्रिणा ॥ आजगामसदेवार्षिर्युद्धकौतुकसंयुतः ॥ १४ ॥ तमागतंमुनिंदृष्ट्वाशत्रुघ्न
स्तपसांनिधिम् ॥ अभ्युत्थायासनेस्थाप्यमधुपर्कमथार्पयत् ॥ १५ ॥ स्वागतेनचसन्तुष्टंनारदंमुनिसत्तमम् ॥ उवाचप्रीणयन्वाचावाक्यवादविशा
रदः ॥ १६ ॥ शत्रुघ्नउवाच ॥ मदीयोऽश्वःकुत्रविप्रकथयस्वमहामते ॥ नलक्ष्यतेगतिस्तस्यसेवकैर्ममकोविदैः ॥ १७ ॥ शंसतयेनवानीतंक्षत्रिये
णचमानिना ॥ कथमत्रहयप्राप्तिर्भविष्यतितपोधन ॥ १८ ॥ इतिवाक्यंसमाकर्ण्यशत्रुघ्नस्यसनारदः ॥ उवाचवीणांरणयन्गायन्रामकथांमुहुः ॥
॥ १९ ॥ नारदउवाच ॥ एतद्दैवपुरंराजन्भूपोवीरमणिर्महान् ॥ तत्पुत्रेणवनस्थेनगृहीतस्तववाजिराट् ॥ २० ॥ तत्रयुद्धंमहत्तेऽद्यभविष्यतिसुदारु
णम् ॥ अत्रवीराःपतिष्यन्तिबलशौर्यसमन्विताः ॥ २१ ॥ तस्मादत्रमहायत्नात्स्थातव्यंतेमहाबल ॥ रचयव्यूहरचनांदुर्गमांपरसैनिकैः ॥ २२ ॥
जयस्तेभविताराजन्कृच्छ्रेणास्मान्नृपोत्तमात् ॥ रामंकोनुपराजीयाद्भुवनेसकलेह्यपि ॥ २३ ॥ इत्युक्त्वान्तर्दधेविप्रोनभसिस्थितवांस्ततः ॥ यु
द्धंसुदारुणंद्रक्ष्यन्देवदानवयोरिव ॥ २४ ॥ शेषउवाच ॥ अथराजावीरमणिःसर्वशूरशिरोमणिः ॥ पटहंघोषितुंस्वीयेपुरमध्येमहारवम् ॥ २५ ॥
आह्वयामाससेनान्यंरिपुवीरंमहोन्नतम् ॥ कथयामासचक्षिप्रंमेघगम्भीरयागिरा ॥ २६ ॥ वीरमणिरुवाच ॥ सेनानीःपटहस्याज्ञांदेहिमेशोभने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

पुरे ॥ तच्छ्रुत्वामेसुसन्नद्धाःशत्रुघ्नंप्रतियान्तुते ॥ २७ ॥ इतिवाक्यंसमाकर्ण्यराज्ञोवीरमणेस्तदा ॥ कारयामासपटहंमहारवनिनादितम् ॥
॥ २८ ॥ गेहेगेहेचरथ्यायांश्रूयतेपटहध्वनिः ॥ शत्रुघ्नंयान्तुयेसर्वेवीराराजपुरेस्थिताः ॥ २९ ॥ येवैराज्ञःसमुल्लङ्घ्यशासनंवीरमानिनः॥
पुत्रावाभ्रातरोवापितेवध्याःस्युर्नृपाज्ञया ॥ ३० ॥ शृण्वन्तुवीराःपुनरप्याहतेपटहेरवम् ॥ श्रुत्वाविधीयतामाशुकर्तव्यंमाविलम्बितम् ॥ ३१ ॥
शेषउवाच ॥ इतिपटहरवंस्वकर्णगोचरं[1]नरवरवीरवराययुर्नृपोत्तमम् ॥ कनककवचभूषितस्वदेहाःसमरमहोत्सवहृष्टचित्तकोशाः ॥ ३२ ॥ केचि
द्ययुःशिरस्त्राणंधृत्वाशिरसिशोभनम् ॥ कवचेनसुशोभाढ्याःशतकोटिसुशोभिताः ॥ ३३ ॥ रथेनहययुग्मेनमणिकाञ्चनशोभिना ॥ ययुस्ते
राजसन्देशान्नृवरायुद्धदुर्मदाः ॥ ३४ ॥ केचिन्मतङ्गजैर्मत्तैःकेचिद्वाहैःसुशोभनैः ॥ ययुर्नृपगृहंसर्वेराजसन्देशकारकाः ॥ ३५ ॥ विविक्तस्व
र्णकवचशिरस्त्राणसुशोभितः ॥ रुक्माङ्गदोऽपिचनिजेरथेतिष्ठन्मनोजवे ॥ ३६ ॥ शुभाङ्गदोऽनुजस्तस्यमहारत्नमयंदधन् ॥ कवचंवपुषिश्रेष्ठं
निजंप्रायाद्रणोत्सवे ॥ ३७ ॥ राजभ्रातावीरसिंहःसर्वशस्त्रास्त्रकोविदः ॥ ययौनृपाज्ञयातत्रशासनंभूमिपस्यहि ॥ ३८ ॥ जामेयस्तस्यरा
ज्ञोऽपिबलमित्रइतिस्मृतः ॥ सन्नद्धःकवचीखड्गीजगामनृपमन्दिरम् ॥ ३९ ॥ सेनानीरिपुवारोऽपिसेनांतांचतुरङ्गिणीम् ॥ सज्जांविधायभूपाय
न्यवेदयदथोमहान् ॥ ४० ॥ अथराजावीरमणिःसर्वशस्त्रास्त्रपूरितम् ॥ मणिसृष्टोच्चचक्रोच्चमारोहत्स्यन्दनोत्तमम् ॥ ४१ ॥ ततोवीरार्णवेशङ्ख
निनादश्चसमन्ततः ॥ श्रूयतेकातरान्वीरान्प्रेरयन्निवसङ्गरे ॥ ४२ ॥ भेर्यःसमन्ततोजघ्नुःशुभवादकवादिताः ॥ अनीकान्यत्रतस्यासन्सङ्ग्रामा
यप्रतस्थुषः ॥ ४३ ॥ सर्वेकृतस्वस्त्ययनाःसर्वाभरणभूषिताः ॥ सर्वशस्त्रास्त्रसम्पूर्णाययुःसमरमण्डलम् ॥ ४४ ॥ भेरीशङ्खनिनादेनपूरिता
श्चनगागुहाः ॥ आकारितुंगतःकिंनुतद्रवःस्वर्गसंस्थितान् ॥ ४५ ॥ तस्मिन्कोलाहलेवृत्तेराजावीरमणिर्महान् ॥ रणोत्साहेनसंयुक्तोययौप्र
धनमण्डलम् ॥ ४६ ॥ आगत्यसंस्थितस्तावद्रथपत्तिसमाकुलम् ॥ समुद्रइवतत्स्थानात्प्लावितुंपुरुषानयात् ॥ ४७ ॥ तदागतंबलंदृष्ट्वा
रथिभिःशस्त्रकोविदैः ॥ कोलाहलीकृतंसर्वमुवाचसुमतिंनृपः ॥ ४८ ॥ शत्रुघ्नउवाच ॥ समागतोवीरमणिर्ममवाजिधरोबली ॥ योद्धुंमांमह
ताभूयःसैन्येनचतुरङ्गिणा ॥ ४९ ॥ कथंयुद्धंप्रकर्तव्यंकेयोत्स्यन्तिबलोत्कटाः ॥ तान्सर्वान्दिशमेवीरान्यथास्याज्जयईप्सितः ॥ ५० ॥
सुमतिरुवाच ॥ स्वामिन्नसौमहाराजोमहासैन्यपरीवृतः ॥ समागतःसयुद्धार्थंशिवभक्तिसमन्वितः ॥ ५१ ॥ साम्प्रतंयुद्धयतांवीरःपुष्कलःपरमा

१ कृत्वेति शेषः । श्रुत्वेत्यर्थः ।

CC-0. In Public Domain. Digitization by eGangotri

स्त्रवित् ॥ अन्येऽपिनीलरत्नाद्यायोद्धारोयुद्धकोविदाः ॥ ५२ ॥ शिवेनसहयोद्धव्यंराज्ञावाभवताऽनघ ॥ द्वन्द्वयुद्धेनजेतव्योमहाबलपराक्रमः ॥ ५३ ॥ अनेनविधिनाराजञ्जयस्तेऽत्रभविष्यति ॥ पश्चाद्यद्रोचतेस्वामिंस्तत्कुरुष्वमहामते ॥ ५४ ॥ शेषउवाच ॥ इतिवाक्यंसमाकर्ण्यशत्रुघ्नःपरवीरहा ॥ सुभटानादिदेशाथयुद्धायकृतनिश्चयः ॥ ५५ ॥ सर्वैःससैन्यैर्युद्धाथराजभिःशस्त्रकोविदैः ॥ यथास्यान्मेजयःक्षिप्रंयतितव्यंतथापुनः ॥ ५६ ॥ जयार्थंराघवस्यैवश्रुत्वातेरणकोविदाः ॥ महोत्साहेनसंयुक्ताययुर्योद्धुंतुसैनिकैः ॥ ५७ ॥ इतिश्रीपाद्मेपुराणेपातालखण्डेशेषवा०रामाश्व०वीरमणिनासहयुद्धनिश्चयोनामचत्वारिंशत्तमोऽध्यायः ॥ ४० ॥ शेषउवाच ॥ युद्धायतेसुसन्नद्धाःशत्रुघ्नस्यमहाबलाः ॥ ययुर्वीरमणेःसैन्यमध्येशौर्यसमन्विताः ॥ १ ॥ शरान्विमुञ्चमानास्तेभिन्दन्तःसैनिकान्बहून् ॥ व्यदृश्यन्तरणान्तःस्थाःशरासनधरानराः ॥ २ ॥ अनेकेनिहतास्तत्रगजामणिमयारथाः ॥ भग्नावाहसमेताश्चदृश्यन्तेरणमण्डले ॥ ३ ॥ विहितंकदनंतेषांश्रुत्वारुक्माङ्गदोबली ॥ रथेमणिमयेतिष्ठन्ययौयोद्धुंससैनिकान् ॥४॥ शरासनेशरान्धास्यन्निषुधीअक्षयौदधत् ॥ शोणनेत्रान्तरोभीमोमहाकोपसमन्वितः ॥ ५ ॥ अनेकबाणसंविग्नान्कुर्वञ्छूरान्सहस्रशः ॥ हाहाकारंकारयंस्तद्ययौरुक्माङ्गदोबली ॥ ६ ॥ राजपुत्रःस्वसदृशंबलेनयशसाश्रिया ॥ आह्वयामासशत्रुघ्नभारतिंपुष्कलंबली ॥ ७ ॥ रुक्माङ्गदउवाच ॥ आगच्छवीरकर्मात्वंमहाबलपराक्रम ॥ मयायोद्धुंतुबलिनाराजपुत्रेणभास्वता ॥ ८ ॥ किमन्यैस्त्रासितैर्वीरनिहतैःकोटिभिर्नरैः ॥ मयासमंमहायुद्धंविधायजयमाप्नुहि ॥ ९ ॥ इत्युक्तवन्तंतरसाप्रहसन्पुष्कलोबली ॥ जघानविपुलेमध्येवक्षसस्तीक्ष्णपर्वभिः ॥ १० ॥ तदमृष्यन्राजपुत्रोमहाचापेदधञ्शरान् ॥ जघानदशभिर्वीरंपुष्कलंवक्षसोऽन्तरे ॥ ११ ॥ उभौसमरसंरब्धावुभावपिजयैषिणौ॥रेजातेसमरेतौहिकुमारतारकौयथा ॥ १२ ॥ बाणान्धनुषिसन्धायदशसङ्ख्यान्महाशितान् ॥ अकरोत्पुष्कलोवीरोविरथंराजपुत्रकम् ॥ १३ ॥ चतुर्भिश्चतुरोवाहान्द्वाभ्यांसूतमपातयत् ॥ एकेनध्वजमेतस्यद्वाभ्यांस्यन्दनरक्षकौ ॥ १४ ॥ नकेनहृदिविव्याधराजपुत्रस्यवेगवान् ॥ तदद्भुतंकर्मदृष्ट्वासर्वेवीराःप्रतोषिताः ॥ १५ ॥ सच्छिन्नधन्वाविरथोहताश्वोहतसारथिः ॥ अत्यन्तंकोपमापन्नःस्यन्दनंपरमाविशत् ॥ १६ ॥ सस्थित्वास्यन्दनवरेहयरत्नेनभूषिते ॥ शरासनंमहद्धृत्वासुदृढंगुणपूरितम् ॥ १७ ॥ उवाचपुष्कलंवीरंरुक्माङ्गदइदंवचः ॥ महापराक्रमंकृत्वाक्वयास्यसिपरन्तप ॥ ॥ १८ ॥ पश्यमेऽद्यपराक्रान्तिंयद्बलेनविनिर्मिताम् ॥ यत्नात्तिष्ठस्वभोवीरनयामित्वद्रथंनभः ॥ १९ ॥ इत्युक्त्वाशरमत्युग्रंदधारस्वशरासने ॥ मन्त्रयित्वाततश्चास्त्रंभ्रामकंपौष्कलेरथे ॥ २० ॥ मुमोचनिशितंबाणंस्वर्णपुङ्खैकशोभितम् ॥ तेनबाणेननीतोऽस्यरथोयोजनमात्रकम् ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धृतः कृच्छ्रेणसूतेनरथोबभ्रामभूतले ॥ कृच्छ्रेणप्राप्यस्वस्थानंपुष्कलःपरमास्त्रवित् ॥ २२ ॥ जगादवचनंतंवैबाणंबिभ्रच्छरासने ॥ स्वर्गंप्राप्नुहिवीराग्र्यसर्वदेवैश्चसेवितम् ॥ २३ ॥ त्वादृशाःपृथिवीयोग्यानभवन्तिनृपोत्तम ॥ शतक्रतुसभायोग्यास्तद्गच्छत्वंसुरालयम् ॥ २४ ॥ इत्युक्त्वासमुमोचास्त्रमाकाशप्रापकंमहत् ॥ तेनबाणेनसरथोययौखमनुलोमतः ॥ २५ ॥ सर्वाँल्लोकानतिक्राम्यययौसूर्यस्यमण्डलम् ॥ तज्ज्वालयारथोदग्धोहयसूतसमन्वितः ॥ २६ ॥ तत्करैर्दग्धभूयिष्ठकलेवरःसुदुखितः ॥ पपातचन्द्रचूडंसधृत्वाहृद्यसुखार्दनम् ॥ २७ ॥ भूमौनिपतितस्तत्रकरदग्धकलेवरः ॥ अत्यन्तंदुःखमापन्नोमुमूर्च्छेरणमण्डले ॥ २८ ॥ तस्मिन्निपतितेभूमौमूर्च्छितेराजपुत्रके ॥ हाहाकारोमहानासीत्तत्रसङ्ग्राममूर्धनि ॥ २९ ॥ वैरिणोजयलक्ष्मींतेप्रापुःपुष्कलमुख्यकाः ॥ पलायनपराजातावैरिणोहयरक्षकाः ॥ ३० ॥ तदापुत्रस्यवैमूर्च्छांदृष्ट्वावीरमणिर्नृपः ॥ प्रायात्समरमध्यस्थंपुष्कलंकोपपूरितः ॥ ३१ ॥ तदाभूमिश्चचालेयंसपर्वतवनोत्तमा ॥ शूरावैहर्षमापन्नाःकातराभयपीडिताः ॥ ३२ ॥ चापंमहद्दधानःसइषुधीअक्षयावपि ॥ रोषान्निःश्वासमामुञ्चन्नाह्वयामासवैरिणम् ॥ ३३ ॥ इतिश्रीपाद्मेपुराणेपातालखण्डेशेषवा०रामाश्व०रुक्माङ्गदपराजयपुष्कलविजयोनामैकचत्वारिंशत्तमोऽध्यायः ॥ ४१ ॥ शेषउवाच ॥ आह्वयन्तंमहासैन्यवारिधौपुष्कलंनृपम् ॥ समालक्ष्यकपीन्द्रोऽपिहनूमांस्तमधावत ॥ १ ॥ लाङ्गूलमुद्यम्यविशालदेहंसरावमातत्यपयोदघोषम् ॥ रणस्थितान्वीरवरान्कपीन्द्रोजगामतंवीरमणिंनृपेन्द्रम् ॥२॥ आयान्तंतंहनूमन्तंवीक्ष्यपुष्कलउद्भटः ॥ विलोकयामासदृशावैरिक्रोधसुशोणया ॥ ३ ॥ जगादतंहनूमन्तंपुष्कलःपरमास्त्रवित ॥ मेघगम्भीरयावाचानादयन्रणमण्डलम् ॥ ४ ॥ पुष्कलउवाच ॥ कथंत्वंसमरेयोद्धुमागतोऽसिमहाकपे ॥ कियद्बलंस्वल्पमेतद्राज्ञोवीरमणेर्महत ॥ ५ ॥ यत्रत्रिजगतीसर्वासंमुखेसमुपागता ॥ तत्रत्वंलीलयायोद्धुंयातुमिच्छसिवानवा ॥ ६ ॥ कोऽयंराजावीरमणिःकियद्बलमथाल्पकम् ॥ अत्रागमनमत्युग्रंतववीरनभाव्यते ॥ ७ ॥ रघुनाथकृपापाङ्गादहंनिस्तीर्यदुस्तरम् ॥ क्षणान्निर्यामिकीशेन्द्रमाचिंत्तंकुरुसङ्गरे[1] ॥ ८ ॥ त्वयाराक्षसपाथोधिस्तीर्णोरामकृपावशात् ॥ तथारामंसुसंस्मृत्यनिस्तरिष्यामिदुस्तरम् ॥ ९ ॥ येकेचिद्दुस्तरंप्राप्यरघुनाथंस्मरन्तिच ॥ तेषांदुःखोदधिःशुष्कोभविष्यतिनसंशयः ॥ १० ॥ तस्माद्व्रजमहावीरशत्रुघ्नसविधेबलिन् ॥ एषआयामिनिर्जित्यभूपंवीरमणिंक्षणात् ॥ ११ ॥ शेषउवाच ॥ इतिधीरांसमाकर्ण्यवाणींपुष्कलभाषिताम् ॥ जगादवचनंभूयःपुष्कलंपरवीरहा ॥ १२ ॥ हनुमानुवाच ॥ पुत्रमासाहसंकार्षीर्भूपंवीरमणिंप्रति ॥ एषदाताशरण्यश्चबलशौर्यसमन्वितः ॥ १३ ॥ त्वंबालःस्थविरोभूपोऽखि

---

१ 'चिन्ताम्' इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

लशस्त्रास्त्रवित्तमः ॥ अनेकेविजिताःसङ्ख्येवीराःशौर्यसुशोभिनः ॥ १४ ॥ जानीहिपार्श्वेतस्यत्वंरक्षितारंसदाशिवम् ॥ भक्त्यावशीकृतंस्थाणुंसोमं
चैतत्पुरिस्थितम् ॥ १५ ॥ तस्मादहमनेनैवयोत्स्येभूपेनपुष्कल ॥ अन्यान्वीरान्विजित्यत्वंकीर्तिमाप्नुहिपुष्कलाम् ॥ १६ ॥ पुष्कलउवाच ॥
शिवोभक्त्यावशीकृत्यस्वपुरेस्थापितोऽमुना ॥ परमस्याशुहृदयेनतिष्ठतिमहेश्वरः ॥ १७ ॥ सदाशिवोयमाराध्यपरमंस्थानमागतः ॥ सरामोमन्म
नस्त्यक्त्वानक्वापिपरिगच्छति ॥ १८ ॥ यत्ररामस्तत्रविश्वंसर्वंस्थास्नुचरिष्णुच ॥ तस्मादहंजयिष्यामिरणेवीरमणिंनृपम् ॥ १९ ॥ व्रजत्वंसमरेयो
द्धुमन्यान्मानिवरान्नृपान् ॥ वीरसिंहमुखान्कीशमचिन्तांमाकुरुप्रभो ॥ २० ॥ वाचमित्थंसमाकर्ण्यहनूमान्धीरसेविताम् ॥ जगामससमरेयोद्धुंवीर
सिंहंनृपानुजम् ॥ २१ ॥ लक्ष्मीनिधिःसुतेनास्यशुभाङ्गदसुसंज्ञिना ॥ द्वैरथेनप्रयुयुधेमहाशस्त्रास्त्रवेदिना ॥ २२ ॥ बलमित्रेणसुमदःस्वप्रतापबलो
र्जितः ॥ योद्धुंसशस्त्रःसङ्ग्रामंविचचारनृपात्मजः ॥ २३ ॥ आह्वयन्तंनृपंदृष्ट्वाद्वैरथेयुद्धकोविदः ॥ पुष्कलोरत्नखचितेरथेतिष्ठन्ययौहितम् ॥ २४ ॥
राजातमागतंदृष्ट्वापुष्कलंयुद्धकोविदम् ॥ उवाचनिर्भयावाण्यारणमध्येसुभाषितः ॥ २५ ॥ वीरमणिरुवाच ॥ बालमायाहिमांक्रुद्धंसङ्ग्रामे
चण्डकोपनम् ॥ गच्छप्राणपरीप्सायैमायुद्ध्यस्वमयासह ॥ २६ ॥ त्वादृशान्बालकान्भूपामादृशाःकृपयन्तिहि ॥ प्रहरन्तिनचैतान्वैतस्माद्गच्छरणा
द्बहिः ॥ २७ ॥ यावत्त्वंनमयादृष्टश्चक्षुर्भ्यांतावदुन्मनाः ॥ साम्प्रतंत्वांप्रहतुनमनःसमभिकाङ्क्षति ॥ २८ ॥ यत्त्वयामत्सुतोबाणैर्भिन्नोमूर्च्छीकृतःपुनः ॥
सर्वंमयाक्षान्तमद्यतवबालधियोमहत् ॥ इतिवाक्यंसमाकर्ण्यपुष्कलोनिजगादतम् ॥ २९ ॥ पुष्कलउवाच ॥ बालोऽहंत्वंमहावृद्धःसर्वशस्त्रास्त्रकोवि
दः ॥ क्षत्रियाणांमतंचैवयेबलाधिक्यसंयुताः ॥ ३० ॥ तएववृद्धाभूपाग्र्यनवयोवृद्धतांगताः ॥ मयातेमूर्च्छितःपुत्रःसशौर्यबलदर्पितः ॥ ३१ ॥ इदा
नींत्वामहंशस्त्रैःपातयिष्यामिसङ्गरे ॥ तस्मात्त्वंयत्नतस्तिष्ठराजन्संग्राममूर्धनि ॥ ३२ ॥ रामभक्तंनमांकश्चिज्जयतीन्द्रपदेस्थितः ॥ इत्थंभाषितमा
श्रुत्यपुष्कलस्यनृपाग्रणीः ॥ ३३ ॥ जहासबालंसंवीक्ष्यकोपंचव्यदधात्पुनः ॥ तंवैकुपितमालक्ष्यभरतात्मजउन्मदः ॥ ३४ ॥ जघानशरविंशत्या
राजानंहृदितीक्ष्णया ॥ राजातानागतान्दृष्ट्वाबाणांस्तेनविमोचितान् ॥ ३५ ॥ चिच्छेदपरमक्रुद्धःशरैस्तीक्ष्णैरनेकधा ॥ तद्बाणच्छेदनंदृष्ट्वाभारतिः
परवीरहा ॥ ३६ ॥ चुकोपहृदयेऽत्यन्तंराजानंचत्रिभिःशरैः ॥ विव्याधभालेभूपालपुत्रःपुष्कलसंज्ञकः ॥ ३७ ॥ तत्रलग्नाविरेजुस्तेत्रिकूटशिखराणि
किम् ॥ तैर्बाणैर्व्यथितोराजाजघाननवभिःशरैः ॥ ३८ ॥ हृदयेपुष्कलंवीरंमहाकोपसमन्वितः ॥ तैर्वत्सदन्तैर्बह्वस्रंपीतंरामानुजाङ्गजम ॥ ३९ ॥

१ अत्र अङ्गशब्दस्याङ्गजे लक्षणा तेन रामानुजस्य भरतस्याङ्गमङ्गजः रामानुजाङ्गं पुष्कलः तस्मा ज तं रामानुजाङ्गजं बहु अस्रं पीतमिति सङ्गतिः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्पाआशीविषायद्वत्क्रुद्धास्तद्वपुषिस्थिताः ॥ परमंकोपमापन्नःपुष्कलोभूमिपंपुनः ॥४० ॥ बाणानांशतकेनाशुबिभेदशितपर्वणाम् ॥ तैर्बाणैःकवचं भिन्नंकिरीटःसशिरस्त्रकः ॥ ४१ ॥ रथोधनुर्महत्सज्यंछिन्नंकोपपरिप्लुवात् ॥ क्षतजेनपरिप्लुष्टोबाणभिन्नकलेवरः ॥ ४२ ॥ अन्यंस्यन्दनमारुह्यजगाम भरतात्मजम् ॥ धन्योऽसिवीररामस्यचरणाब्जमधुव्रत ॥ ४३ ॥ महत्कृतंकर्मतेऽद्ययदहंविरथीकृतः ॥ प्राणान्रक्षस्वभोवीरसाम्प्रतंमयियुद्ध्यति ॥ ४४ ॥ सुलभानतवप्राणाःकालरूपेमयिस्थिते ॥ इत्युक्त्वाव्यहनद्बाणैरसङ्ख्यैःशस्त्रकोविदः ॥ ४५ ॥ भूमौदिशिचतद्बाणान्नान्यद्दृश्येततत्रह ॥ अनेकेगजसाहस्राभिन्नाअश्वाःसमन्ततः ॥ ४६ ॥ रथारथियुतास्तेनच्छिन्नाभिन्नाद्विधाकृताः ॥ शोणितौघासरित्तत्रप्रसुस्रावरणाङ्गणे ॥ ४७ ॥ यत्रोन्मदाहिमातङ्गादृश्यन्तेशैलशृङ्गवत् ॥ केशाःशैवाललक्ष्यास्तेसुहुःप्राणिशिरःस्थिताः ॥ ४८ ॥ अनेकेपाणयश्छिन्नावीराणांमुद्रिकाश्रियः ॥ दृश्यन्तेअहिवत्तत्रचन्दनादिकरूषिताः ॥ ४९ ॥ शिरांसिचभटाग्र्याणांकच्छपाभांवहन्तिवै ॥ मांसानिपङ्कायत्रासन्वीराणांमहतांततः ॥ ५० ॥ एवंव्यतिकरेवृत्तेयोगिन्यःशतशोरणे ॥ पपुःपात्रेणरुधिरंप्राणिनांरणपातिनाम् ॥५१ ॥ मांसानिबुभुजुस्तावैहर्षकौतुकसंयुताः ॥ पीत्वातुशोणितंतत्र भक्षित्वामांससुन्मदाः ॥५२॥ ननृतुर्जहसुःप्रोचैरुज्जगुःप्रधनाङ्गणे ॥ पिशाचास्तत्रसमरेप्राणिनांमस्तकानिवै ॥५३ ॥ धृत्वाकराभ्यांमत्ताङ्गास्तालव द्वादनोद्यताः ॥ शिवास्तत्रमहामांसंपतितानांरणाङ्गणे ॥५४ ॥ भक्षित्वाव्यनदन्मत्ताःकातराणांभयप्रदाः ॥ कातरास्तत्रसन्त्रस्तागताःकुञ्जरकोटरे ॥५५॥ भक्षितायोगिनीभिस्तेपापिनांक्वापिनस्थितिः ॥एतत्कदनमालक्ष्यस्वसैन्यस्यरथाग्रणीः ॥५६॥ पुष्कलोऽपिचकारात्रकदनंरणमण्डले॥भिद्य न्तेगजशीर्षाणिपतन्तिमौक्तिकानितु ॥५७॥ दृश्यतेलोमभिःपूर्णाताम्रपर्णीवतन्नदी ॥ पुष्कलप्रहिताबाणानृणामङ्गेषुसङ्गताः ॥५८॥ कुर्वन्तिप्राणवि च्छेदंवीराणामपिसर्वतः ॥ सर्वेरुधिरसिक्ताङ्गाःसर्वेच्छिन्ननिजाङ्गकाः ॥ ५९ ॥ दृश्यन्तेकिंशुकायद्वत्सुभटाःप्रधनाङ्गणे ॥ एतस्मिन्समयेक्रुद्धःस माभाष्यमहीपतिम् ॥ ६० ॥ जघानबहुबाणैस्तंरोषपूरपरिप्लुतः ॥ तद्बाणवेधभिन्नाङ्गोविशीर्णकवचोनृपः ॥ ६१ ॥ महाबलंतमन्वानःप्राहरच्छर कोटिभिः ॥ तैर्बाणैःकवचान्मुक्तंसुस्रावबहुशोणितम् ॥ ६२ ॥ वपुर्बभूवरुचिरंशरपञ्जरगोचरम् ॥ शरपञ्जरमध्यस्थोविह्वलीकृतमानसः ॥ ६३ ॥ शरान्नेतुंचसन्धातुंनक्षमःसचभारतिः ॥ रामंस्मृत्वाधनुर्धृत्वाकरेसज्जंमहद्दृढम् ॥ ६४ ॥ मुमोचबाणान्निशितान्वैरिवृन्दनिवारणान् ॥ तैर्बाणैःशरजा लंतद्विधूयमुनिपुङ्गव ॥ शङ्खंप्रध्मायसमरेजगादगतभीर्नृपम् ॥ ६५ ॥ पुष्कलउवाच ॥ त्वयाकृतंमहत्कर्मयन्मांबाणस्यपञ्जरे ॥ गोचरंकृतवान्वीर वीरतापनमुद्भटम् ॥ ६६ ॥ वृद्धत्वान्ममान्योऽसिसाम्प्रतंरणमण्डले ॥ पश्यमेऽद्यपराक्रान्तिंराजन्वीरमणेमहत् ॥ ६७ ॥ बाणत्रयेणभोवीरमूर्च्छि

CC-0. In Public Domain. Digitization by eGangotri

तंकरवैनहि ॥ तार्हैप्रतिज्ञांशृणुवैसर्ववीरविमोहिनीम् ॥ ६८ ॥ गङ्गांप्राप्यापियोवैतांनिन्दित्वापापहारिणीम् ॥ नमज्जतिमहापापोमहामूढविचेष्टितः॥
॥ ६९ ॥ तस्यपापंममैवास्तुचेन्नत्वांरणमण्डले ॥ पातयेमूर्च्छितंवीरसन्नद्धोभवभूपते ॥ ७० ॥ इतिवाक्यंसमाकर्ण्यपुष्कलस्यनृपोत्तमः ॥ चुकोप
भृशमुद्विग्नःसन्दधेनिशिताञ्छरान् ॥ ७१ ॥ तेशराह्रदयंभित्त्वागतास्तेभारतेर्महत् ॥ पेतुःक्षितावधोयद्वद्रामभक्तिपराङ्मुखाः ॥ ७२ ॥
ततःशरंमुमोचास्मैनिशितंवह्निसप्रभम् ॥ लक्षीकृत्यमहद्वक्षःकपाटतटविस्तृतम् ॥ ७३ ॥ सबाणोभूमिपतिनाद्विधाच्छिन्नःशरेणहि ॥ पपात
रथमध्येसरविमण्डलवज्ज्वलन् ॥ ७४ ॥ अपरंबाणमाधत्तमातृभक्तिभवंततः ॥ निधायपुण्यंसोऽप्येषचिच्छेदमहतापुनः ॥ ७५ ॥ तदा
खिन्नःसहृदयेकिंकर्तव्यमितिस्मरन् ॥ रामंहृदिनिजार्तिघ्नंमुमोचपरमास्त्रवित् ॥ ७६ ॥ सबाणस्तस्यहृदयेलग्नआशीविषोपमः ॥ मूर्च्छा
मगमयत्तंवैज्वलन्सूर्यसमप्रभः ॥ ७७ ॥ ततोहाहाकृतंसर्वंपलायनपरायणम् ॥ राज्ञिसंमूर्च्छितेजातेपुष्कलोजयमाप्तवान् ॥ ७८ ॥ इति
श्रीपाद्मेपुराणेपातालखण्डेशेषवा०रामाश्व०वीरमणेःपराभवोनामद्विचत्वारिंशत्तमोऽध्यायः ॥ ४२ ॥ शेषउवाच ॥ हनूमान्वीरसिंहंतुसमाग
त्याब्रवीद्वचः ॥ तिष्ठयासिकुतोवीरजेष्यामित्वांक्षणादिह ॥ १ ॥ एवमुक्तंसमाकर्ण्यप्लवगस्यवचोमहत् ॥ कोपपूरपरिप्लुष्टःकार्मुकंज
लदस्वनम् ॥ २ ॥ विनद्यघोरान्निशितान्बाणान्मुञ्चन्बभौरणे ॥ आषाढेजलदस्येवधारासारेमनोहरः ॥ ३ ॥ तान्दृष्ट्वानिशितान्बाणान्स्व
देहेसुविलग्नकान् ॥ चुकोपहृदयेऽत्यन्तंहनूमानञ्जनीसुतः ॥ ४ ॥ मुष्टिनाताडयामासहृदयेवज्रसारिणा ॥ समुष्टिनाहतोवीरःपपातधरणीतले ॥५॥
मूर्च्छितंतंसमालोक्यपितृव्यंसशुभाङ्गदः ॥ रुक्माङ्गदोऽपिसंमूर्च्छांत्यक्त्वागाद्रणमण्डलम् ॥ ६ ॥ बाणान्समभिवर्षन्तौमेघाविवमहास्वनौ ॥
कुर्वन्तौकदनंघोरंप्लवगंप्रतिजग्मतुः ॥ ७ ॥ तौदृष्ट्वासमरेवीरौसमायातौकपीश्वरः ॥ लाङ्गूलेनचसंवेष्टयसरथौचापधारकौ ॥ ८ ॥ स्फोटयामास
भूदेशेतत्क्षणान्मूर्च्छितावुभौ ॥ निश्चेष्टौसमभूतान्तौरुधिरारक्तदेहकौ ॥९॥ बलमित्रश्चिरंयुद्धंविधायसुमदेनहि ॥ मूर्च्छामगमयत्तंवैबाणैःसुशितपर्वभिः
॥ १० ॥ पुष्कलेनक्षणान्नीतोमूर्च्छांचैतन्यवर्जिताम् ॥ जयमाप्तंतुकटकंशत्रुघ्नस्यभटार्दनम् ॥ ११ ॥ एतस्मिन्समयेसाम्बःस्यन्दनंवरमास्थितः ॥
विस्फारयन्धनुर्दिव्यमुपाधावद्भटानिमान् ॥ १२ ॥ जटाजूटान्तरगतांचन्द्ररेखांवहन्महान् ॥ सर्पाभूषांमनःस्पर्शांदधदाजगवंधनुः ॥ १३ ॥
मूर्च्छितान्स्वजनान्दृष्ट्वाभक्तार्तिघ्नोमहेश्वरः ॥ योद्धुंप्रायान्महासैन्यैःशत्रुघ्नस्यभटानिमान् ॥ १४ ॥ सगणःसपरीवारःकम्पयन्पृथिवीतलम् ॥

१ 'तं हन्तु मन आदधे' इ० पा० । २ 'शर्वः' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भक्तरक्षार्थमागच्छंस्त्रिपुरंतुपुरायथा ॥ १५ ॥ कोपाच्छोणतरेनेत्रेवहन्प्रलयकारकः ॥ पश्यन्वीरान्बहुमतीन्पिनाकीदेववन्दितः ॥ १६ ॥ तमाग
तंमहेशानंवीक्ष्यरामानुजोबली ॥ जगामसमरेयोद्धुंसर्वदेवशिरोमणिम् ॥ १७ ॥ अथागतंतुशत्रुघ्नंरुद्रोवीक्ष्यपिनाकधृत् ॥ उवाचपरमापन्नःकोपं
सगुणचापधृत् ॥ १८ ॥ पुष्कलेनमहत्कर्मकृतंगमाङ्घ्रिसेविना ॥ मद्भक्तंयोरणेहत्वागतःसमरमण्डलम् ॥ १९ ॥ अद्यकास्तिपरोवीरःपुष्कलःप
रमास्त्रवित् ॥ तंहत्वासुखमाप्स्यामिसमरेभक्तपीडनम् ॥ २० ॥ शेषउवाच ॥ इत्युक्त्वावीरभद्रंसप्रेषयामासपुष्कलम् ॥ याहित्वंसमरेयोद्धुंपुष्कलं
सेवकार्दनम् ॥ २१ ॥ नन्दिनंप्रेषयामासहनूमन्तंमहाबलम् ॥ कुशध्वजंप्रचण्डंतुभृङ्गिणंचसुबाहुकम् ॥ २२ ॥ सुमदंचण्डनामानंगणंस्वी
यंसमादिशत् ॥ पुष्कलस्तुसमायान्तंवीरभद्रंमहागणम् ॥ २३ ॥ महारुद्रस्यसंवीक्ष्ययोद्धुंप्रायान्महामनाः ॥ पुष्कलःपञ्चभिर्बाणैस्ताडया
माससंयुगे ॥ २४ ॥ तद्बाणैःक्षतगात्रस्तुत्रिशूलंससमादिशत् ॥ सत्रिशूलंक्षणाच्छित्त्वाव्यगर्जतमहाबलः ॥ २५ ॥ छिन्नंस्वीयंत्रिशूलंवैवी
क्ष्यरुद्रानुगोबली ॥ खट्वाङ्गेनजघानाशुमस्तकेभारतिंद्विज ॥ २६ ॥ खट्वाङ्गाभिहतःसोऽथसुमूर्च्छेक्षणमुद्भटः ॥ विहायमूर्च्छांसद्वीरःपुष्कलः
परमास्त्रवित् ॥ २७ ॥ शरैश्चिच्छेदखट्वाङ्गंकरस्थंतस्यतत्क्षणात् ॥ वीरभद्रःस्वकेच्छिन्नेखट्वाङ्गेकरसंस्थिते ॥ २८ ॥ परमक्रोधमापन्नोबभञ्ज
रथिनोरथम् ॥ भङ्क्त्वारथंतुवीरस्यपदातिंचविधायसः ॥ २९ ॥ बाहुयुद्धेनयुयुधेपुष्कलेनमहात्मना ॥ सपुष्कलोरथंत्यक्त्वाचूर्णितंतेनवेगतः ॥
॥ ३० ॥ मुष्टिनाताडयामासवीरभद्रंमहाबलः ॥ अन्योन्यंमुष्टिभिर्घ्नन्तावूरुभिर्जानुभिस्तथा ॥ ३१ ॥ परस्परवधोद्युक्तौपरस्परजयैषिणौ ॥
एवंचतुर्दिनमभूद्रात्रिंदिवमपीशयोः ॥ ३२ ॥ नकोऽपितत्रहीयेतनजीयेतमहाबलः ॥ पञ्चमेतुदिनेवृत्तेवीरभद्रोमहाबलः ॥ ३ ॥ गृहीत्वानभउ
ड्डीनोमहावीरंतुपुष्कलम् ॥ तत्रयुद्धंतयोरासीद्देवासुरविमोहनम् ॥ ३४ ॥ मुष्टिनाचरणाघातैर्बाहुभिःसुखुरैर्महत् ॥ तदात्यन्तंप्रकुपितःपुष्कलोवीर
भद्रकम् ॥ ३५ ॥ गृहीत्वाकण्ठदेशेतुताडयामासभूतले ॥ तत्प्रहारेणव्यथितोवीरभद्रोमहाबलः ॥३६॥ गृहीत्वापुष्कलंपादेजघानास्फालयन्मुहुः ॥
॥ ताडयित्वामहीदेशेपुष्कलंसुमहाबलः ॥ ३७ ॥ त्रिशूलेनचकर्ताशुशिरोज्वलितकुण्डलम् ॥ जगर्जपुष्कलंहत्वावीरभद्रोमहाबलः ॥ ३८ ॥ गर्ज
तातेनशार्वेणप्रापितास्त्राःसमुद्भटाः ॥ हाहाकारोमहानासीत्पुष्कलेपतितेरणे ॥ ३९ ॥ त्रासंप्रापुर्जनाःसर्वेरणमध्येसुकोविदाः॥तेशशंसुश्चशत्रुघ्नंपुष्क
लंपतितंरणे ॥ ४० ॥ निहतंवीरभद्रेणमहेश्वरगणेनवै ॥ इत्याश्रुत्यमहावीरःपुष्कलस्यवधंतदा ॥४१॥ दुःखंप्राप्तोरणेऽत्यन्तंकम्पमानःशुचामहान् ॥
तंदुःखितंचशत्रुघ्नंज्ञात्वारुद्रोऽब्रवीद्वचः ॥४२॥ शत्रुघ्नंसमरेवीरंशोचन्तंपुष्कलेहते ॥ रेशत्रुघ्नरणशोकंमाकृथाःसुमहाबल ॥४३॥ वीराणांरणमध्ये

CC-0. In Public Domain. Digitization by eGangotri

तुपतनंकीर्तयेस्मृतम् ॥ धन्योवीरःपुष्कलाख्योयश्चवैदिनपञ्चकम् ॥४४॥ युयुधेवीरभद्रेणमहाप्रलयकारिणा॥येनक्षणाद्विनिहतोदक्षोमदपमानकृत॥
॥ ४५॥ क्षणाद्विनिहतायेनदैत्यास्त्रिपुरसैनिकाः ॥तस्माद्युद्धयस्वराजेन्द्रशोकंत्यक्त्वामहाबल ॥ ४६ ॥ यत्नात्तिष्ठाद्यवीराग्र्यमयियोद्धरिसंस्थिते ॥
शोकंसन्त्यज्यशत्रुघ्नोवीरश्चुक्रोधशङ्करम्॥४७॥ आत्तसज्जधनुर्बाणैःप्रचच्छादमहेश्वरम्॥तेबाणाःसुरशीर्षण्यवपुषंक्षतविक्षतम्॥४८॥ अकुर्वतमहच्चि
त्रंभक्तरक्षार्थमागतम् ॥ तेबाणाःशङ्करस्यापिबाणानभसिसंस्थिताः ॥ ४९ ॥ व्याप्यैतत्सकलंविश्वंचित्रकारिमुनेरपि ॥ तद्बाणयोर्युद्धबलंवी
क्ष्यसर्वत्रमेनिरे ॥ ५० ॥ प्रलयंलोकसंहारकारकंसर्वमोहकम् ॥ आकाशेतुविमानानिसंश्रित्यस्वपुरस्थिताः ॥ ५१ ॥ विलोकयितुमागत्यप्रशंस
न्तितयोर्भृशम् ॥ अयंलोकत्रयस्यास्यप्रलयोत्पत्तिकारकः ॥ ५२ ॥ असावपिमहाराजरामचन्द्रस्यचानुजः ॥ किमिदंभविताकोवाजेष्यतिक्षिति
मण्डले ॥ ५३ ॥ पराजयंवाकोवीरःप्राप्स्यतेरणमूर्धनि ॥ एवमेकादशाहानिवृत्तंयुद्धंपरस्परम् ॥ ५४ ॥ द्वादशेदिवसेप्राप्तेमुमोचास्त्रंनराधिपः ॥
ब्रह्मसंज्ञंमहादेवंहन्तुंक्रोधसमन्वितः ॥ ५५ ॥ सविज्ञायमहास्त्रंतन्मुक्तंशत्रुघ्नवैरिणा ॥ हसन्नप्यपिबत्तेनमुक्तंब्रह्मशिरोमहत् ॥ ५६ ॥ अत्यन्तंविस्म
यंप्राप्यकिंकर्तव्यमतःपरम् ॥ एवंविचारयुक्तस्यहृदयेज्वलनोपमम् ॥ ५७ ॥ शरंवैनिचखानाशुदेवदेवशिरोमणिः ॥ तेनबाणेनशत्रुघ्नोमूर्च्छितो
रणमण्डले ॥ ५८ ॥ हाहाभूतमभूत्सर्वंकटकंभटसेवितम् ॥ वीराःसर्वेरुद्रगणैःपातिताःपृथिवीतले ॥ ५९ ॥ सुबाहुदमनप्रेष्ठाःस्वबाहुबलदर्पिताः ॥
पतितंमूर्च्छयावीक्ष्यशत्रुघ्नंशरपीडितम् ॥ ६० ॥ पुष्कलंतुरथेस्थाप्यसेवकैःपरिरक्षितुम् ॥ हनूमानागतोयोद्धुंशिवंसंहारकारकम् ॥ ६१ ॥ श्रीराम
स्मरणाद्योधान्स्वीयान्विप्रप्रहर्षितान् ॥ प्रकुर्वन्रोपितस्तीव्रंलाङ्गूलंचप्रकम्पयन् ॥ ६२ ॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशेषवा०रामाश्व०पु
ष्कलशत्रुघ्नपराजयोनामत्रिचत्वारिंशत्तमोऽध्यायः ॥ ४३ ॥ शेषउवाच ॥ आगत्यसविधेरुद्रंसमराङ्गणमूर्धनि ॥ जगादहनुमान्वीरःसञ्जिहीर्षुः
सुराधिपम् ॥ १ ॥ हनूमानुवाच ॥ त्वंयदाचरसेरुद्रधर्मस्यप्रतिकूलनम् ॥ तस्मात्त्वांशास्तुमिच्छामिरामभक्तवधोद्यतम् ॥ २ ॥ मयापुराश्रु
तंदेवऋषिभिर्बहुधोदितम् ॥ रघुनाथपदस्मारीनित्यंरुद्रःपिनाकभृत् ॥ ३ ॥ तत्सर्वंतुमृषाजातंशत्रुघ्नंप्रतियुध्यतः ॥ पुष्कलोमेहतःशूरःशत्रुघ्नो
ऽपिविमूर्च्छितः ॥४॥ तस्मात्त्वांपातयाम्यद्यत्रैलोक्यप्रलयोद्यतम् ॥ यत्नात्तिष्ठस्वभोःशर्वरामभक्तिपराङ्मुखः ॥५॥ शेषउवाच॥ इत्युक्तवन्तंप्लवगंप्रो ॥ ४८ ॥
वाचसमहेश्वरः ॥ धन्योऽसिवीरवर्यस्त्वंभवान्वदतिनोमृषा ॥ ६ ॥ मत्स्वामीरामचन्द्रोऽयंसुरासुरनमस्कृतः ॥ तदश्वमानयामासशत्रुघ्नःपरवीरहा
॥ ७ ॥ तद्रक्षार्थंसमायातस्तद्भक्त्यातुवशीकृतः ॥ यथाकथञ्चिद्भक्तोऽसौरक्ष्यःस्वात्माइतिस्थितिः ॥ ८ ॥ रघुनाथःकृपांकृत्वाविलोकयतुनिस्त्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पम् ॥ मांस्वभक्तंसुदुःखेनकिञ्चित्कोपंदधन्महान् ॥ ९ ॥ एवंवदतिचण्डीशेहनूमान्कुपितोभृशम् ॥ शिलामादायमहतींताडयामासतद्रथम् ॥
॥ १० ॥ शिलयाताडितस्तस्यरथःशकलतांगतः ॥ ससूतःसहयःकेतुपताकाभिःसमन्वितः ॥ ११ ॥ नभःस्थादेवताःसर्वाःप्रशशंसुःकपीश्वरम् ॥
धन्योऽसिप्लवगाधीशमहत्कर्मत्वयाकृतम् ॥१२॥ श्रीशिवंविरथंदृष्ट्वानन्दीतंसमुपाद्रवत् ॥ उवाचश्रीमहादेवंमत्पृष्ठंगम्यतामिति ॥ १३ ॥ वृषस्थि
तंतुभूतेशंहनूमान्कुपितोभृशम् ॥ शिलामुत्पाट्यतरसाजघानहृदयेतदा ॥ १४ ॥ तदाऽऽहतोभूतपतिःशूलंतीक्ष्णंसमाददे ॥ जाज्वल्यमानंत्रिशिखंव
ह्निज्वालासमप्रभम् ॥ १५ ॥ आयातंतन्महद्दृष्ट्वाशूलंप्रज्वलनप्रभम् ॥ हस्तेगृहीत्वातरसाबभंजतिलशःक्षणात् ॥१६॥ भग्नेत्रिशूलेतरसाकपीन्द्रेण
क्षणाच्छिवः ॥ शक्तिंकरेसमाधत्तसर्वलोहविनिर्मिताम् ॥ १७ ॥ साशक्तिःशिवनिर्मुक्ताहृदयेतस्यधीमतः ॥ लग्नाक्षणादभूत्तत्रविक्लवःप्लवगाधिपः ॥
॥१८॥ क्षणाच्चतद्व्यथांतीर्त्वागृहीत्वावृक्षमुल्बणम् ॥ ताडयामासहृदयेमहाव्यालविभूषिते ॥ १९ ॥ ताडितास्तेनवीरेणफणीन्द्रास्त्रासमागताः ॥ इत
स्ततस्तेतंमुक्त्वागताःपातालमुज्ज्वलाः ॥२०॥ शिवस्तस्मिन्नगेमुक्तेवक्षसिस्वेनिरीक्ष्यच॥कुपितोव्यदधाद्घोरंमुसलंकरयुग्मके ॥२१॥ हतोऽसिगच्छस
ग्रामात्पलाय्यप्लवगाधम॥एषतेप्राणहन्ताहंमुसलेनक्षणादिह ॥२२॥ मुसलंवीक्ष्यनिर्मुक्तंशिवेनकुपितेनवै ॥ कीशस्तद्वञ्चयामाससमहावेगाद्धरिंस्मरन्॥
॥ २३॥ मुसलंतत्पपाताधःशिवमुक्तंमहायसम्॥विदार्यपृथिवींसर्वांजगामचरसातलम् ॥२४॥ तदाप्रकुपितोऽत्यन्तंहनूमान्रामसेवकः॥गृहीत्वापर्वतंह
स्तेताडयामासवक्षसि ॥ २५ ॥ सयावत्पर्वतंछेत्तुंमतिंचक्रेसतीपतिः ॥ तावद्धतःकपीन्द्रेणशालेनबहुशाखिना ॥ २६ ॥ तमपिच्छेत्तुमुद्युक्तोयाव
त्तावच्छिलाहतः ॥ शिलास्ताभेदितुंस्वान्तंचकारमृडउद्यतः ॥२७॥ तावद्वृष्टिंचकारायंशिलाभिर्नगपर्वतैः ॥ लाङ्गूलेनचसंवेष्ट्यताडयत्येषभूतपम्॥
॥ २८ ॥ शिलाभिःपर्वतैर्वृक्षैःपुच्छास्फोटेनभूरिशः ॥ नन्दीप्राप्तोमहात्रासंचन्द्रोऽपिशकलीकृतः ॥ २९ ॥ अत्यन्तंविह्वलोजातोमहेशानःप्रको
पनः ॥ क्षणेक्षणेप्रहारेणविह्वलंकुर्वतंभृशम् ॥ ३० ॥ जगादप्लवगाधीशंधन्योऽसिरघुपानुग ॥ महत्कर्मकृतंतेऽद्ययत्तेऽहंसुप्रतोषितः ॥ ३१ ॥ नदा
नेननयज्ञेननाल्पेनतपसाह्यहम् ॥ सुलभोऽस्मिमहावेगतस्मात्प्रार्थयमेवरम् ॥ ३२ ॥ शेषउवाच ॥ एवंब्रुवन्तंतंदृष्ट्वाहनूमान्निजगादतम् ॥ प्रहस
न्निर्भियावाण्यामहेशानंसुतोषितम् ॥ ३३ ॥ हनूमानुवाच ॥ रघुनाथप्रसादेनसर्वंमेऽस्तिमहेश्वर ॥ तथापियाचेहिवरंत्वत्तःसमरतोषितात् ॥ ३४ ॥
एषपुष्कलसंज्ञोनःसमरेपतितोहतः ॥ तथैवरामावरजःशत्रुघ्नोमूर्च्छितोरणे ॥ ३५ ॥ अन्येचवीराबहवःपतिताःशरविक्षताः ॥ मूर्च्छिताःपतिताः
केचित्तान्रक्षस्वगणैःसह ॥ ३६ ॥ यथाचैतान्महाभूतावेतालाश्चपिशाचकाः ॥ नहरन्तिनखादन्तिश्वशृगालादयस्तथा ॥ ३७ ॥ एतेषां

Nepal Sanskrit University Valmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

वपुषोभेदोनभवेत्त्वंतथाचर ॥ यावदिन्द्रगणंजित्वाऽऽनयामिद्रोणपर्वतम् ॥ ३८ ॥ तत्रस्थाओषधीर्वापिनीत्वासंस्थापितान्भटान् ॥ जीवयामिबलात्सर्वांस्तावत्त्वंरक्षसर्वशः ॥३९॥एषगच्छामितंनेतुंद्रोणंपर्वतसत्तमम् ॥यस्मिन्वसन्त्योषधयःप्राणिसञ्जीवनङ्कराः ॥४०॥एतद्वचःसमाकर्ण्यतथेतिनिजगादतम् ॥याहिशीघ्रंनगंतंतुरक्षामित्वद्भटान्मृतान् ॥ ४१ ॥ तच्छ्रुत्वावाक्यमीशस्यजगामद्रोणपर्वतम् ॥ द्वीपान्सर्वानतिक्रम्यजगाम क्षीरसागरम् ॥४२॥ अत्रतुस्वगणैश्चायंरक्षतिस्मशिवोमहान् ॥ श्मशानंतद्गणैःस्वीयैर्महाबलपराक्रमैः॥४३॥हनूमान्द्रोणमासाद्यद्रोणंनाममहागिरिम् ॥ लाङ्गूलेतंनिधायाशुप्रतस्थेरणमण्डलम् ॥४४ ॥ तंनेतुमुद्यतेविप्रचकम्पेसचपर्वतः ॥ कम्पमानंतुतंदृष्ट्वातत्पालादेवतागणाः ॥ ४५ ॥ हाहेतिकृत्वाप्रोचुस्तेकिमिदंभवितागिरौ॥ कोह्येनंनयतेवीरोमहाबलपराक्रमः ॥४६॥ एवंकृत्वासुराःसर्वेसंहतादहशुःकपिम् ॥ मुञ्चैनमितितंप्रोच्यजघ्नुःशस्त्रास्त्रकोटिभिः॥४७॥तान्सर्वान्निघ्नतोदृष्ट्वाहनूमान्कुपितोभृशम् ॥ जघानतान्क्षणाद्वीरःशक्रःसर्वासुरान्यथा ॥४८॥ केचित्पदाहतास्तत्रकेचित्करविमर्दिताः ॥ लाङ्गूलेनहताःकेचित्केचिच्छृङ्गेणचाहताः ॥ ४९ ॥ सर्वेतेनाशमापन्नाःक्षणात्कीशेनताडिताः ॥ केचिन्निपतिताभूमौरुधिरेणपरिप्लुताः ॥ ५० ॥ केचित्कीशभयात्त्रस्ताजग्मुःशक्रंसुराधिपम् ॥ क्षतेनचपरिप्लुष्टारुधिरक्षतदेहिनः ॥ ५१ ॥ तान्दृष्ट्वाभयसंविग्नान्रुधिरेणपरिप्लुतान् ॥ सुरान्जगादविमनाःशक्रःसर्वसुरोत्तमः ॥ ५२ ॥ कथंयूयंभयत्रस्ताःकथंरुधिरविप्लुताः ॥ केनदैत्येननिहताराक्षसेनाधमेनवा ॥ ५३ ॥ सर्वंशंसतमेतथ्यंयथाज्ञात्वाव्रजामितम् ॥ निहत्यबद्ध्वाचायामियुष्मद्धातकमुन्मदम् ॥ ५४ ॥ इतिवाक्यंसमाकर्ण्यतुरासाहंसुरोत्तमाः ॥ जगदुर्दीनयावाचासुरासुरनमस्कृतम् ॥ ५५ ॥ देवाऊचुः ॥ इहागत्यनजानीमःकश्चिद्वानररूपधृत ॥ नेतुंद्रोणंसमुद्युक्तोलाङ्गूलेवेष्टयतंगिरिम् ॥ ५६ ॥ गन्तुंकृतमतिस्तावद्वयंसर्वेसुसंहताः ॥ यद्धंचक्रमसन्नद्धाःसर्वशस्त्रास्त्रवर्षिणः ॥ ५७ ॥ तेनसर्वेवयंयुद्धेनिर्जिताबलशालिना ॥ अनेकेनिहतास्तत्रभूमौपेतुःसुरोत्तमाः ॥ ५८ ॥ वयंतुबहुभिःपुण्यैर्जीविताइहचागताः ॥ शोणितेनसुसिक्ताङ्गाःक्षतपीडासमन्विताः ॥ ५९ ॥ एतद्वाक्यंसमाकर्ण्यसुराणांसपुरन्दरः ॥ आदिदेशसुरान्सर्वान्महाबलसमन्वितान् ॥ ६० ॥ यातमहाद्रोणगिरिंकपिंबद्धुंमहाबलम् ॥ बद्ध्वाऽऽनयतयूयंवैसुराणांरणपातकम् ॥ ६१ ॥ इत्याज्ञताययुस्तेवैद्रोणंपर्वतसत्तमम् ॥ यत्रास्तेबलवान्वीरोहनूमान्कपिसत्तमः ॥ ६२ ॥ गत्वातेप्राहरन्सर्वेहनूमन्तंमहाबलम् ॥ हनूमताते निहतामुष्टिभिःकरताडनैः ॥ ६३ ॥ पतितास्तेक्षणात्तत्ररुधिरक्षतविग्रहाः ॥ अन्येपलायनपराजग्मुस्तेत्रिदिवेश्वरम् ॥ ६४ ॥ तच्छ्रुत्वाकुपितःशक्रःसर्वानमरसत्तमान् ॥ आदिदेशमहावीरंवानरेन्द्रंसुरोत्तमः ॥६५॥ तदाज्ञताययुस्तेवैयत्रकीशेश्वरोबली ॥ तान्सर्वानागतान्दृष्ट्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जगादकपिसत्तमः ॥ ६६ ॥ मायान्तुवीराःसमरेसंहर्तारंहिमांबलात् ॥ नेष्यामियुष्मानधुनासंयमिन्याःपुरोऽन्तिके ॥ ६७ ॥ इत्युक्ताअपितेस
र्वेसन्नद्धाःप्राहरन्कपिम् ॥ शस्त्रास्त्रैर्बहुधामुक्तैर्महाबलसमन्विताः ॥६८॥ केचिच्छूलैःपरशुभिःकेचित्खड्गैश्चपट्टिशैः ॥ मुसलैःशक्तिभिःकेचित्क्रोधेन
कलुषीकृताः ॥६९॥ सआहतोऽमरवरैर्विविधैरायुधैर्बली॥ शिलाभिस्तान्जघानाशुसर्वानमरसत्तमान् ॥७०॥ केचित्पलाय्यआहुस्तेगताःशक्रसमी
पकम् ॥ तदुक्तंवाक्यमाकर्ण्यभयंप्रापसुराधिपः ॥ ७१ ॥ बृहस्पतिंसुराध्यक्षंमन्त्रिणंस्वर्गवासिनाम् ॥ पप्रच्छसविधेगत्वानत्वासुरगुरुंवरम् ॥७२॥
इन्द्रउवाच ॥ कोऽसौयोवानरोद्रोणंनेतुंस्वामिन्समागतः ॥ येनमेनिहतावीराअमराःशस्त्रधारिणः ॥ ७३ ॥ शेषउवाच ॥ एतच्छ्रुत्वातुतद्वाक्यमुक्त
माङ्गिरसोमहान् ॥ जगादभयसंविग्नंतुरासाहंसुराधिपम् ॥७४॥ बृहस्पतिरुवाच ॥ योरावणमहन्सङ्ख्येकुम्भकर्णमदीदहत ॥ येनतेवैरिणःसर्वेहता
स्तस्यैवसेवकः ॥७५॥ येनलङ्कासत्रिकूटानिर्दग्धापुच्छवह्निना ॥ अक्षश्चनिहतोयेनहनूमन्तमवेहितम् ॥७६ ॥ तेनसर्वेविनिहताद्रोणार्थमयमुद्यतः॥
हयमेधंमहाराजःकरोतिबलिसत्तमः ॥ ७७ ॥ तस्याश्वंशिवभक्तस्तुनृपोवीरमणिर्महान् ॥ जहारतत्रसमभूद्रणंसुरविमोहनम् ॥ ७८ ॥ शिवेन
निहताःसङ्ख्येवीरारामस्यभूरिशः ॥ तान्वैजीवयितुंद्रोणंनेष्यत्येवमहाबलः ॥७९ ॥ नायंवर्षशतैर्जेयोभवताबलसंयुतः ॥ तस्मात्प्रसादयकपिंदेहि
तत्रत्यमौषधम् ॥ ८० ॥ इतिश्रीपाद्मपुराणेपातालखण्डेशेषवा०रामाश्व०द्रोणगिरौदेवानांपराजयोनामचतुश्चत्वारिंशत्तमोऽध्यायः ॥ ४४ ॥
शेषउवाच ॥ गुरुभाषितमाकर्ण्यवृषपर्वरिपुःस्वराट् ॥ ज्ञात्वारामस्यकार्यार्थमागतंपवनात्मजम् ॥ १ ॥ भयंतत्याजमनसिवानरात्समुपस्थि
तम् ॥ जहर्षचित्तेचभृशंवाचस्पतिमुवाचह ॥ २ ॥ इन्द्रउवाच ॥ कथंकार्यंसुराधीशद्रोणोऽयंनीयतेयदि ॥ देवानांजीवनंभूयःकथंस्यादितिमे
वद ॥ ३ ॥ इदानींपवनोद्भूतंप्रसादययथातथम् ॥ रामःप्रीतिंपरांयातिदेवानांचसुखंभवेत् ॥ ४ ॥ देवाधिपस्यवचनंश्रुत्वावाचस्पतिस्तदा ॥
शक्रंतुपुरतःकृत्वासर्वदेवैःपरीवृतम् ॥ ५ ॥ जगामतत्रयत्रास्तेहनूमान्निर्भयःकपिः ॥ गर्जतिप्रसभंजित्वासुरान्सर्वान्सुखासिनः ॥ ६ ॥ तेगत्वा
सन्निधौतस्यबृहस्पतिपुरोगमाः ॥ पेतुस्तेचरणौनत्वासमीरतनुजस्यहि ॥ ७ ॥ बृहस्पतिश्चतंवीरंजगादप्रेरितोऽमुना ॥ सुराधीशेनलोकस्यगुरुणा
वदतांवरः ॥ ८ ॥ बृहस्पतिरुवाच ॥ अजानद्भिःकृतंकर्मदेवैस्तवपराक्रमम् ॥ श्रीरामचरणस्यत्वंसेवकोऽसिमहामते ॥ ९ ॥ किमर्थमय
मारम्भःकथमत्रसमागमः ॥ तत्करिष्यामहेसर्वेसन्नतास्तवभाषितम् ॥ १० ॥ रोषंत्यक्त्वाकृपांकृत्वादेवाधीशंविलोकय ॥ पवनात्मजदैत्यानां
भयङ्करवपुर्दधन् ॥ ११ ॥ शेषउवाच ॥ इत्थंभाषितमाकर्ण्यदेवानांसगुरोर्वचः ॥ उवाचदेवान्सकलान्गुरुंचैवमहायशाः ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

राज्ञोवीरमणेःसङ्ख्येहताःशर्वेणभूरिशः ॥ भटास्तान्वैजीवयितुंद्रोणंनेष्यामिपर्वतम् ॥ १३ ॥ तंयेनिवारयिष्यन्तिस्ववीर्यबलदर्पिताः ॥ तान्ने
ष्यामिक्षणादेवयमस्यसदनंप्रति ॥ १४ ॥ तस्माद्ददतमेयूयंद्रोणंवाथतदौषधम् ॥ येनसञ्जीवयिष्यामिमृतान्वीरान्रणाङ्गणे ॥ १५ ॥ शेषउवाच॥
इतिवाक्यंसमाकर्ण्यवायुसूनोर्महात्मनः ॥ तेसर्वेप्रणतिंगत्वाददुःसञ्जीवनौषधम् ॥ १६ ॥ तेप्रहृष्टाभयंत्यक्त्वासुराःस्वर्गौकसःस्वयम् ॥
ययुःसुरपतिंकृत्वापुरःसौख्यसमन्विताः ॥ १७ ॥ हनुमान्भेषजंतत्तुसमादायागतोरणम् ॥ स्तुतःसर्वैःसुरगणैर्महाकर्मसमुत्सुकैः ॥ १८ ॥
तमागतंहनूमन्तंवीक्ष्यसर्वेऽपिवैरिणः ॥ साधुसाधुप्रशशंसुस्तेचाद्भुतंमेनिरेकपिम् ॥ १९ ॥ कपिःसमागत्यमहामुदायुतःपुरोभटंपुष्कलमागतंमृतम् ॥
शिवेनसंरक्षितमुग्रमण्डलेश्रीरामचित्तंसविधेजगामह॥२०॥ सुमतिंचसमाहूयमन्त्रिणंमहतांमतम्॥उवाचजीवयाम्यद्यसर्वान्वीरान्रणेमृतान् ॥२१॥एव
मुक्त्वाभेषजंतत्पुष्कलस्यमहोरसि ॥शिरःकायेनसन्धायजगादवचनंशुभम्॥२२॥यद्यहंमनसावाचाकर्मणाराघवंपतिम् ॥जानामितर्हिएतेनभेषजेना
शुजीवतु ॥ २३ ॥ इतिवाक्यंयदावक्तितावत्पुष्कलउत्थितः ॥ रणाङ्गणेऽदशद्रोषाद्दन्तान्वीरशिरोमणिः ॥ २४ ॥ क्वगतोवीरभद्रोऽसौमांसंमूर्च्छ्य
रणाङ्गणे ॥ सद्योऽहंपातयाम्येनंक्वास्तिमेधनुरुत्तमम् ॥ २५ ॥ इतितंभाषमाणंवैप्राहवीरंकपीन्द्रकः ॥ धन्योऽसिवीरयद्भूयोवदस्येनंरणाङ्गणे ॥२६॥
त्वंहतोवीरभद्रेणरघुनाथप्रसादतः ॥ पुनःसञ्जीवितोऽस्येहिशत्रुघ्नंयाममूर्च्छितम् ॥ २७ ॥ इत्युक्त्वाप्रययौतत्रसङ्ग्रामवरमूर्धनि ॥ श्वसन्नास्ते
सशत्रुघ्नःशिवबाणप्रपीडितः ॥ २८ ॥ तत्रगत्वासमीपंतच्छत्रुघ्नस्यमहात्मनः ॥ निधायभेषजंतस्यवचसिश्वासमागते ॥२९॥ उवाचहनुमांस्तंवैजी
वशत्रुघ्नसत्तम ॥ मूर्च्छितोऽसिरणेकस्मान्महाबलपराक्रम ॥ ३० ॥ यद्यहंब्रह्मचर्यंचजन्मपर्यन्तमुद्यतः ॥ पालयामितदावीरःशत्रुघ्नोजीवतुक्षणात
॥ ३१ ॥ उक्तमात्रेणतेनंदंजीवितःक्षणमात्रतः ॥ क्वशिवःक्वशिवोयातोविहायरणमण्डलम् ॥ ३२ ॥ अनेकेनिहताःसङ्ख्येश्रीरुद्रेणपिनाकिना ॥ तेस
र्वेजीवितावीराःकपीन्द्रेणमहात्मना ॥ ३३ ॥ तदासर्वेसुसन्नद्धारोषपूरितमानसाः ॥ स्वेस्वेरथेस्थिताःशत्रून्प्रययुःक्षतविग्रहाः ॥ ३४ ॥ पुष्कलोवीर
भद्रंतुचण्डंचैवकुशध्वजः ॥ नन्दिनंहनुमान्वीरःशत्रुघ्नःसङ्गरेशिवम् ॥३५॥ धनुर्विस्फारयन्तंतंशत्रुघ्नंबलिनांवरम् ॥ सङ्ग्रामेशिवमाहूयतिष्ठन्तंप्रय
यौनृपः ॥ ३६ ॥ राजावीरमणिर्वीरःशत्रुघ्नःसमरेबली ॥ अन्योन्यंचक्रतुर्युद्धंमुनिविस्मयकारकम् ॥ ३७ ॥ राज्ञाचवीरमणिनारथाभग्नाःशता
धिकाः ॥ शत्रुघ्नस्यनरेन्द्रस्यतिलशःक्षणतोद्विज ॥ ३८ ॥ तदाप्रकुपितोऽत्यन्तंशत्रुघ्नोरणमण्डले ॥ आग्नेयास्त्रंमुमोचाशुदग्धुंसैन्यसमन्वितम्
॥ ३९ ॥ दाहकंतन्महद्दृष्ट्वामहास्त्रंशत्रुमोचितम् ॥ अत्यन्तंकुपितोराजावारुणास्त्रंसमाददे ॥ ४० ॥ वारुणास्त्रेणशीतार्तिंवीक्ष्यरामानुजोबली ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वायव्यास्त्रंमुमोचास्मैतेनवायुर्महानभूत् ॥ ४१ ॥ वायुनासंहतामेघाययुस्तेसर्वतोदिशम् ॥ इतस्ततोगताःसर्वेसैन्यंतत्सुखितंबभौ ॥ ४२ ॥ सैन्ये पवनपीडार्तेनृपोवीरमणिर्महान् ॥ पर्वतास्त्रंरिपूद्धारिजग्राहचशरासने ॥४३॥ पर्वतैःस्तम्भितोवायुर्नचासर्पतसङ्गरे ॥ तद्वीक्ष्यरामात्ररजोवज्रास्त्रंतुसमाददे ॥ ४४ ॥ वज्रास्त्रेणहताःसर्वेनगास्तुतिलशःकृताः ॥ चूर्णतांप्रापुरेतस्मिन्रणेवीरवरार्चिते ॥ ४५ ॥ वज्रास्त्रेणविदीर्णाङ्गावीराःशोणितशोभिताः॥ बभूवुःसमरप्रान्तेचित्रंसमभवद्रणम् ॥ ४६ ॥ तदाप्रकुपितोऽत्यन्तंराजावीरमणिर्महान् ॥ ब्रह्मास्त्रंचापआधत्तवैरिदाहकमद्भुतम् ॥ ४७॥ ब्रह्मास्त्रे संहितेसोऽपिसस्मारसुमनोहरम् ॥ अस्त्रंतद्योगिनीदत्तंसर्ववैरिविमोहनम् ॥ ४८ ॥ ब्रह्मास्त्रंतत्करभ्रष्टमागतंवैरिणंप्रति ॥ तावच्छत्रुघ्ननाम्नातुतन्मुक्तं मोहनास्त्रकम् ॥ ४९ ॥ मोहनास्त्रेणतद्ब्राह्मंद्विधाच्छिन्नंक्षणादिह ॥ लग्नंराज्ञोहृदिक्षिप्रंमूर्च्छांसम्प्रापयन्नृपम् ॥ ५० ॥ तेबाणाःशतशोमुक्ताःशत्रुघ्नेन महीभृता ॥ सर्वेऽपिमूर्च्छितावीरागणारुद्रस्ययेपुनः ॥५१॥ शिवस्यचरणोपस्थेमूढाःपेतुर्महीतले ॥ तदाशिवःप्रकुपितोरथेतिष्ठन्ययौनृपम् ॥५२॥ शिवेनसहसायोद्धुंसमायातोरणाङ्गणे ॥ शत्रुघ्नःसज्जमात्तज्यंधनुःकृत्वाव्ययुद्धचत ॥ ५३ ॥ तयोःसमभवद्युद्धंघोरंवैरिविदारणम् ॥ शस्त्रास्त्रैर्बहुधामुक्तैरादीपितदिगन्तरम् ॥ ५४ ॥ अस्त्रप्रत्यस्त्रसङ्घातैस्ताडनप्रतिताडनैः ॥ देवानामपिदैत्यानांनैताद्दग्रणमण्डलम् ॥ ५५ ॥ तदाव्याकुलितोऽत्यन्तं शत्रुघ्नःशिवसङ्गरे ॥ सस्मारस्वामिनंतत्रपावनेरुपदेशतः ॥ ५६ ॥ हानाथभ्रातरत्युग्रःशिवःप्राणापहारणम् ॥ करोतिधनुरुद्यम्यत्रायस्वरणमण्डले ॥ ५७ ॥ अनेकेदुःखपाथोधितीर्णारामतवाख्यया ॥ मामप्युद्धरदुःखस्थंरामरामकृपानिधे ॥ ५८ ॥ इत्थंवक्तियदातावद्दीक्षितोरणमण्डले ॥ नीलोत्पलदलश्यामोरामोराजीवलोचनः ॥५९॥ मृगशृङ्गंकटौधृत्वादीक्षितंवपुरुद्वहन् ॥ तंदृष्ट्वाविस्मयंप्रापशत्रुघ्नःसमराङ्गणे ॥६०॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशेष०रामाश्व०श्रीरामसमागमोनामपञ्चचत्वारिंशत्तमोऽध्यायः ॥ ४५ ॥ शेषउवाच ॥ आगतंवीक्ष्यश्रीरामंशत्रुघ्नःप्रणतार्तिहम् ॥ भ्रातरंसकलाद्दुःखान्मुक्तोऽभूद्द्विजसत्तम ॥ १ ॥ हनूमान्वीक्ष्यविभ्रान्तोरामस्यचरणौमुदा ॥ ववन्देभक्तरक्षार्थमागतंनिजगादच ॥ २ ॥ स्वामिंस्तवैतद्युक्तंतुस्वभक्तपरिपालनम् ॥ यत्सङ्ग्रामेजितंसर्वंपाशबद्धममोचयः ॥३॥ वयंत्विदानींधन्यावैयद्रक्ष्यामोभवत्पदे ॥ जेष्यामोऽरीन्क्षणादेवत्वत्कृपातोरघूद्वह ॥ ४ ॥ शेषउवाच ॥ स्थाणुस्तदागतंरामंयोगिनांध्यानगोचरम् ॥ पतित्वापादयोर्विप्रजगादप्रणताभयम् ॥ ५ ॥ एकस्त्वंपुरुषःसाक्षात्प्रकृतेःपरईर्यसे ॥ यःस्वांशकलयाविश्वंसृजस्यवसिहंसिच ॥ ६ ॥ अरूपस्त्वमशेषस्यजगतःकारणंपरम् ॥ एकएवत्रिधारूपंगृह्णासिकुहकान्वितः ॥ ७ ॥ सृष्टौविधातृरूपेणपालनेस्वयमासच ॥ प्रलयेजगतःसाक्षादहंशर्वाख्यतांगतः ॥ ८ ॥ तवयत्परमेशस्यहयमेधक्रतु

क्रिया ॥ ब्रह्महत्यापनोदायतद्विडम्बनमद्भुतम् ॥ ९ ॥ यत्पादशौचममलंगङ्गाख्यंशिरसोऽन्तरा ॥ वहामिपापशान्त्यर्थंतस्यतेपातकंकुतः
॥ १० ॥ मयाबह्वपकारायकृतंकर्मतवस्फुटम् ॥ क्षम्यतांतत्कृपालोहिभवतोऽव्यवधायकम् ॥ ११ ॥ किंकरोमिमयासत्यपालनार्थमिदंकृतम् ॥
जानन्प्रभावंभवतोभक्तरक्षार्थमागतः ॥ १२ ॥ असौपुराउज्जयिन्यांमहाकालनिकेतने ॥ स्नात्वाशिप्राख्यसरितितपस्तेपेमहाद्भुतम्
॥ १३ ॥ ततःप्रसन्नोजातोऽहंजगादभूमिपंप्रति ॥ याचस्वेतिमहाराजसवव्रेराज्यमद्भुतम् ॥ १४ ॥ मयाप्रोक्तंदेवपुरेतवराज्यंभविष्यति ॥
यावद्रामहयःपुर्यामागमिष्यतियाज्ञिकः ॥ १५ ॥ तावत्प्रभृत्यहंस्थास्येतवरक्षार्थमुद्यतः ॥ एषदत्तवरोरामकिंकरोमिस्वसत्यतः ॥ १६ ॥
घृणितोऽस्म्यधुनाराज्ञासपुत्रपशुबान्धवः ॥ हयंसमर्प्यतेपादसेवांराजाविधास्यति ॥ १७ ॥ शेषउवाच ॥ इतिवाक्यंसमाकर्ण्यमहे
शस्यरघूत्तमः ॥ उवाचधीरयावाचाकृपयापूर्णलोचनः ॥ १८ ॥ रामउवाच ॥ देवानामयमेवास्तिधर्मोभक्तस्यपालनम् ॥ त्वया
साधुकृतंकर्मयद्भक्तोरक्षितोऽधुना ॥ १९ ॥ ममासिहृदयेशर्वभवतोहृदयेत्वहम् ॥ आवयोरन्तरंनास्तिमूढाःपश्यन्तिदुर्धियः ॥ २० ॥ येभेदंविदध
त्यद्धाआवयोरेकरूपयोः ॥ कुम्भीपाकेषुपच्यन्तेनराःकल्पसहस्रकम् ॥ २१ ॥ येत्वद्भक्तास्तएवासन्मद्भक्ताधर्मसंयुताः ॥ मद्भक्ताअपिभूयस्याभ
क्त्यातवनतिङ्कराः ॥ २२ ॥ शेषउवाच ॥ इत्थंभाषितमाकर्ण्यशर्वोवीरमणिंनृपम् ॥ मूर्च्छितंजीवयामासकरस्पर्शादिनाप्रभुः ॥ २३ ॥ अन्यानपि
सुतानस्यमूर्च्छितान्छरपीडितान् ॥ जीवयामाससमृडःसमर्थःप्रभुरीश्वरः ॥ २४ ॥ सज्जंविधायतंभूपंश्रीरामपदयोर्नतिम् ॥ कारयामासभूतेशःपुत्र
पौत्रैःपरीवृतम् ॥ २५ ॥ धन्योराजावीरमणिर्योददर्शरघूत्तमम् ॥ योगिभिर्योगनिष्ठाभिर्दुष्प्रापमयुतायुतैः ॥ २६ ॥ तेनत्वारघुनाथंतंकृतार्थीकृतवि
ग्रहाः ॥ ब्रह्मादिभिःपूज्यतमाअभूवन्द्विजसत्तम ॥ २७ ॥ शत्रुघ्नहनुमद्भ्यांचपुष्कलादिभिरुद्भटैः ॥ परिष्टुतायरामायददौराजाहयोत्तमम् ॥ २८ ॥
राज्येनसहितंसर्वंसपुत्रपशुबान्धवम् ॥ शर्वेणप्रेरितःप्रादाद्भूपोवीरमणिस्तदा ॥ २९ ॥ ततोरामोनुतःसर्वैर्वीरैभिर्निजसेवकैः ॥ शत्रुघ्नादिभिरत्यन्तमु
त्सुकैश्चविशेषतः ॥ ३० ॥ रथेमणिमयेतिष्ठन्बभूवसतिरोहितः ॥ अन्तर्हितेरामभद्रेसर्वेप्रापुःसुविस्मयम् ॥ ३१ ॥ माजानीहिमनुष्यंतंरामंलोकैकव
न्दितम् ॥ जलेस्थलेचसर्वत्रवर्ततेसंस्थितःसदा ॥ ३२ ॥ ततोवीराअलंहृष्टाअन्योन्यंपरिरेभिरे ॥ तूर्यमङ्गलवादित्रैःसुमहानुत्सवोऽभवत् ॥ ३३ ॥
ततोमुक्तोहयःसर्वैर्वीरैःशस्त्रास्त्रकोविदैः ॥ सर्वैरनुगतःप्रीतैर्विस्मयेनसमन्वितैः ॥ ३४ ॥ शर्वःसत्यप्रतिज्ञश्चतमनुज्ञाप्यसेवकम् ॥ श्रीरामंशरणंप्रोच्य
याहिलोकैकदुर्लभम् ॥ ३५ ॥ स्वयमन्तर्हितस्तत्रप्रलयोत्पत्तिकारकः ॥ कैलासमगमच्छर्वःसेवकैःपरिशोभितः ॥ ३६ ॥ भूपोवीरमणिर्ध्यायञ्छ्रीराम

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चरणोदजम् ॥ शत्रुघ्नेनययौसाकंबलिनाबलसंयुतः ॥ ३७ ॥ एतद्रामस्यचरितंयेशृण्वन्तिनरोत्तमाः ॥ तेषांसंसारजंदुःखंनभविष्यतिकर्हिचित् ॥ ॥ ३८ ॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशेषवा०रामाश्व०हयप्रस्थानंनामषट्चत्वारिंशत्तमोऽध्यायः ॥४६॥ शेषउवाच ॥ हयोगतोहेमकूटंभारतान्तेततोद्विज ॥ अनेकभटसाहस्रैरक्षितोबद्धचामरः ॥ १ ॥ योवैविस्तरतोदैर्घ्याद्योजनानांसमन्ततः ॥ अयुतेनसुशृङ्गैश्चराजतैःकाञ्चनादिभिः ॥२॥ तत्रोद्यानंमहच्छ्रेष्ठंपादपैःपरिशोभितम् ॥ शालैस्तालैस्तमालैश्चकार्णिकारैःसमन्ततः ॥ ३ ॥ हिन्तालैर्नागपुन्नागैःकोविदारैःसबिल्वकैः ॥ चम्पकैर्बकुलैर्मैंधैर्मदनैःकुटजादिभिः ॥ ४ ॥ जातिकाभिर्यूथिकाभिर्नवमालिकयातथा ॥ आम्रैर्माधवद्राक्षाभिर्दाडिमैःशोभितंवनम् ॥ ५ ॥ अनेकपक्षिसङ्घुष्टंभ्रमरैस्सुनिनादितम् ॥ मयूरकेकारवितंसर्वर्तुसुखदंहयः ॥ ६ ॥ प्रविवेशसशत्रुघ्नोमनोवेगसमन्वितः ॥ स्वर्णपत्रंविशालेस्वेभालेबिभ्रन्मनोहरम् ॥ ७ ॥ गच्छतस्तस्यवाहस्यहयमेधक्रतोस्तदा ॥ अकस्मादभवच्चित्रंतच्छृणुष्वद्विजोत्तम ॥ ८ ॥ गात्रस्तम्भोऽभवत्तस्यनचचालपथिस्थितः ॥ हेमकूटइवाचाल्योबभूवहयसत्तमः ॥ ९ ॥ तदातद्रक्षकाःसर्वेकशाघातान्वितेनिरे ॥ तदाहतोऽपिनययौस्तब्धगात्रोहयोत्तमः ॥ १० ॥ शत्रुघ्नसविधेगत्वाचुकुशुर्वाहरक्षकाः ॥ स्वामिन्वयंनजानीमःकिमभूद्धयसत्तमे ॥ ११ ॥ गच्छतोवाहवर्यस्यमनोवेगस्यभूपते ॥ आकस्मिकोऽभवत्तस्यगात्रस्तम्भोमहामते ॥ १२ ॥ कशाभिस्ताडितोऽस्माभिःपरंतत्रचचालन ॥ एवंविचार्ययत्कार्यंतत्कुरुष्वनृपोत्तम ॥ १३ ॥ तदाविस्मयमापन्नोभूपतिःसहसैनिकैः ॥ जगामसहितःसर्वैर्हयस्यमहतोऽन्तिके ॥ १४ ॥ पुष्कलोबाहुनाधृत्वाचरणौतस्यभूतलात् ॥ उत्पाटयामासतदापरंनोचेलतुस्ततः ॥१५॥ बलेनबलिनाऽऽक्रान्तोनाकम्पतहयस्तदा ॥ हनूमांस्तंसमुद्धर्तुंमतिंचक्रेमहामनाः ॥ १६ ॥ लाङ्गूलेनसमावेष्ट्यबलेनबलिनांवरः ॥ आचकर्षबलाद्वाहंनचचालतथापिसः ॥ १७ ॥ तदोवाचकपिश्रेष्ठोहनूमान्विस्मयान्वितः ॥ शत्रुघ्नंबलिनांश्रेष्ठंवीराणांपरिशृण्वताम् ॥ १८ ॥ मयाद्रोणोलाङ्गुलेनलीलयोत्पाटितोऽधुना ॥ परमत्रमहाश्चर्यंकम्पतेनहयोऽल्पकः ॥ १९ ॥ दृष्टमत्रनिदानंहिवीरैर्बलिभिरुद्धतैः ॥ आकृष्टोऽपिनचस्थानाच्चचालतिलमात्रतः ॥ २० ॥ कपिभाषितमाकर्ण्यशत्रुघ्नोविस्मयान्वितः ॥ सुमतिंमन्त्रिणांश्रेष्ठमुवाचवदतांवरः ॥ २१ ॥ शत्रुघ्नउवाच ॥ मन्त्रिन्किमभवद्वाहेस्तम्भनंवपुषोऽनघ ॥ कोऽत्रोपायोविधेयःस्याद्येनवाहगतिर्भवेत् ॥२२॥ सुमतिरुवाच ॥स्वामिन्कश्चिन्मुनिर्मृग्योऽखिलज्ञानविचक्षणः ॥ देशोद्भवमहंजानेप्रत्यक्षंनपरोक्षजम् ॥ २३ ॥ शेषउवाच ॥ इतिवाक्यंसमाकर्ण्यसुमतेर्धर्मकोविदः ॥ अन्वेषयामासमुनिंसेवकैःसहशोभनम् ॥ २४ ॥ तेसर्वेसर्वतोगत्वामुनिंधर्मविदंभटाः ॥ व्यालोकयन्तःसर्वत्रनचापश्यन्मुनीश्वरम् ॥ २५ ॥ एकस्त्वनुचरोविप्रगतोयोजनमात्रतः ॥ पूर्वस्यांदिशिचोद्युक्तःपश्य

CC-0. In Public Domain. Digitization by eGangotri

तिस्ममहाश्रमम् ॥ २६ ॥ यत्रनिर्वैरिणःसर्वेपशवोजनतास्तथा ॥ गङ्गास्नानहताशेषकिल्बिषाःसुमनोहराः ॥ २७ ॥ यत्रकेचित्तपःश्रेष्ठंकुर्वन्तिस्महु
ताशनैः ॥ धूमैरधोमुखाःपत्रैर्वायुभिःस्वोदरम्भराः ॥ २८॥ यत्राग्निहोत्रजोधूमःपवित्रयतिसर्वदा ॥ अनेकमुनिसंहृष्टोमुक्तपत्रलतोत्तमः ॥२९॥ तमाश्र
मंमुनेर्ज्ञात्वाशौनकस्यमनोहरम् ॥ न्यवेदयन्नृपायासौविस्मयाविष्टचेतसे ॥३० ॥ तच्छुत्वाहर्षितोऽत्यन्तंशत्रुघ्नःसहसेवकैः ॥ हनूमत्पुष्कलाद्यैश्चसंयुतो
ऽगात्तदाश्रमम् ॥३१॥ तत्रवीक्ष्यमुनिश्रेष्ठंसम्यग्घुतहुताशनम् ॥ प्राणमद्दण्डवत्तस्यचरणौपापहारिणौ ॥३२॥ तमागतंनृपंज्ञात्वाशत्रुघ्नंबलिनांवरम् ॥
अर्घ्यपाद्यादिकंचक्रेप्रीतस्तद्दर्शनादभूत् ॥३३॥ सुखोपविष्टंविश्रान्तंनृपंप्राहमुनीश्वरः ॥ किमर्थमटनंदेवमहत्पर्यटनंतव ॥३४॥ त्वादृशाःपृथिवींसर्वां
नृपावैनभ्रमन्तिचेत् ॥ तदादुष्टजनाःसाधून्बाधन्तेविगतज्वरान् ॥ ३५ ॥ कथयस्वमहीपालशत्रुघ्नबलिनांवर ॥ सर्वंशुभायनोभूयात्तवपर्यटनादि
कम् ॥ ३६ ॥ शेषउवाच ॥ इत्युक्तवन्तंभूदेवंप्रत्युवाचमहीश्वरः ॥ गद्गदस्वरयावाण्याहर्षितस्वीयविग्रहः ॥ ३७ ॥ शत्रुघ्नउवाच ॥ अकस्माद
भवच्चित्रंरामाश्वस्यमनोहृतः ॥ नातिदूरेत्वदावासात्तच्छृणुष्वविदांवर ॥ ३८ ॥ उद्यानेतवशोभाढ्येयदृच्छातोहयोगतः ॥ तत्प्रान्ततस्यवाहस्यगात्र
स्तम्भोऽभवत्क्षणात् ॥ ३९ ॥ तदामेबलिनोवीराःपुष्कलाद्यामदोत्कटाः ॥ बलादाचकृषुर्वाहंनचचालतथाप्यसौ ॥ ४० ॥ अस्मानपारदुःखाब्धौम
ग्नान्प्रतितरिःस्मृतः ॥ दैवाद्दृष्टःसुभाग्यैस्त्वंकथयस्वनिदानकम् ॥ ४१ ॥ शेषउवाच ॥ एवंपृष्टोमुनिवरःक्षणंदध्यौमहामतिः ॥ हयस्यचरणस्तम्भ
कारणंतुविचारयन् ॥ ४२ ॥ क्षणात्तत्तुसविज्ञायविस्मयोत्फुल्ललोचनः ॥ जगादसमहीपालंदुःखितंसंशयान्वितम् ॥ ४३ ॥ शौनकउवाच ॥
शृणुराजन्प्रवक्ष्यामिहयस्तम्भस्यकारणम् ॥ यच्छ्रुत्वामुच्यतेदुःखादतिचित्रकथानकम् ॥४४ ॥गौडदेशेमहारण्येकावेरीतीरभूषिते ॥ वाडवःसात्त्वि
कोनाम्नाचचारपरमंतपः ॥ ४५ ॥ एकाहंपयसःप्राशीदिनैकंवायुभक्षकः ॥ दिनैकंतुनिराहारएवंत्रिदिनमुन्नयेत् ॥ ४६ ॥ एवंव्रतेप्रवृत्तस्यकालःसर्वक्ष
यङ्करः ॥ जग्राहस्वस्यदंष्ट्रायांमृतिंप्रापमहाव्रती ॥ ४७ ॥ विमानेसर्वशोभाढ्येसर्वरत्नविभूषिते ॥ अप्सरोभिःसहक्रीडन्ययौमेरोःशिखास्थितौ
॥ ४८ ॥ जम्बूनाममहावृक्षस्तत्रसेव्यरसोऽभवत् ॥ नदीजाम्बवतीसंज्ञास्वर्णद्रवसमन्विता ॥४९॥ तस्यांतुमुनयस्सर्वेतपोध्यानसमन्विताः ॥ अनेक
तपसापुण्याःसर्वसौख्यसमन्विताः ॥ ५० ॥ तत्रासौस्वेच्छयाक्रीडन्नप्सरोभिर्मुदान्वितः ॥ प्रतीपमाचरत्तेषांस्वाभिमानमदोद्धतः ॥ ५१ ॥ ततः
शप्तःसमुनिभीराक्षसोभवदुर्मुखः ॥ ततोऽतिदुःखितःप्राहमुनीन्विद्यातपोधनान् ॥ ५२ ॥ अनुगृह्णन्तुमांसर्वेविप्रायूयंकृपालवः ॥ तदातैरनुगृहीतो
दारामहयंभवान् ॥ ५३ ॥ स्तम्भयिष्यतिवेगेनततोरामकथाश्रुतिः ॥ पश्चान्मुक्तिर्भवित्रीतेशापादस्मात्सुदारुणात् ॥ ५४ ॥ सप्रोक्तोमुनिभिर्देवो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राक्षसत्वमितःप्रभो ॥ स्तम्भयामासरामाश्वंमोचयानघकीर्तनैः ॥ ५५ ॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशेषवा० रामाश्व० शापकीर्तनंनाम
सप्तचत्वारिंशत्तमोऽध्यायः ॥ ४७ ॥ शेषउवाच ॥ इतिप्रोक्तंतुमुनिनासंश्रुत्यपरवीरहा ॥ विस्मयंमानयामासहृदिशौनकमब्रवीत् ॥ १ ॥ शत्रुघ्न
उवाच ॥ कर्मणोगहनावार्तायथासात्त्विकनामधृत् ॥ दिवंप्राप्तोऽपिमहताकर्मणाराक्षसीकृतः ॥ २ ॥ स्वामिन्वदमहर्षेत्वंकर्मणांस्वगतिर्यथा ॥ येन
कर्मविपाकेनयादृशंनरकंभवेत् ॥ ३ ॥ शौनकउवाच ॥ धन्योऽसिराघवश्रेष्ठयत्तेमतिरियंशुभा ॥ जानन्नपिहितार्थायलोकानांत्वंब्रवीषिभोः
॥ ४ ॥ कथयामिविचित्राणांकर्मणांविविधागतीः ॥ ताःशृणुष्वमहाराजयच्छ्रुत्वामोक्षमाप्नुयात् ॥ ५ ॥ परवित्तंपरापत्यंकलत्रंपारकंचयः ॥ बला
त्कारेणगृह्णातिभोगबुद्ध्याचदुर्मतिः ॥ ६ ॥ कालपाशेनसम्बद्धोयमदूतैर्महाबलैः ॥ तामिस्रेपात्यतेतावद्यावद्वर्षसहस्रकम् ॥ ७ ॥ तत्रताडनमुद्धताः
कुर्वन्तियमकिङ्कराः ॥ पापभोगेनसन्तप्तस्ततोयोनिंतुसौकरीम् ॥ ८ ॥ तत्रभुक्त्वामहादुःखंमानुषत्वंगमिष्यति ॥ रोगादिचिह्नितंतत्रदुर्यशोज्ञापकं
स्वकम् ॥ ९ ॥ भूतद्रोहंविधायैवकेवलंस्वकुटुम्बकम् ॥ पुष्णातिपापनिरतःसोऽन्धतामिस्रकेपतेत् ॥ १० ॥ येनराइहजन्तूनांवधंकुर्वन्तिवैमृषा ॥
तेरौरवेनिपात्यन्तेभिद्यन्तेरुरुभीरुषा ॥ ११ ॥ यःस्वोदरार्थेभूतानांवधमाचरतिस्फुटम् ॥ महारौरवसंज्ञेतुपात्यतेसयमाज्ञया ॥ १२ ॥ योवैनिजंतु
जनकंब्राह्मणंद्वेष्टिपापकृत् ॥ कालसूत्रेमहादुष्टेयोजनायुतविस्तृते ॥ १३ ॥ यावन्तिपशुरोमाणिगवांद्वेषंकरोतियः ॥ तावद्वर्षसहस्राणिपच्यतेयमकि
ङ्करैः ॥ १४ ॥ योभूमौभूपतिर्भूत्वादण्डायोग्यंतुदण्डयेत् ॥ करोतिब्राह्मणस्यापिदेहदण्डंचलोलुपः ॥ १५ ॥ ससूकरमुखैर्दुष्टैःपीडयतेयमकिङ्करैः ॥
पश्चाद्दुष्टासुयोनीषुजायतेपापमुक्तये ॥ १६ ॥ ब्राह्मणानांगवांयेतुद्रव्यंवृत्तंतथाल्पकम् ॥ वृत्तिंवागृह्णतेमोहाल्लुम्पन्तिस्वबलान्नराः ॥ १७ ॥ तेपर
त्रान्धकूपेचपात्यन्तेचमहार्दिताः ॥ योऽन्नंस्वयमुपाहृत्यमधुरंचात्तिलोलुपः ॥ १८ ॥ नदेवायनसुहृदेददातिरसनापरः ॥ सपतत्येवनरकेकृमिभोजन
संज्ञिते ॥ १९ ॥ अनापदिनरोयस्तुहिरण्यादीन्यपाहरेत् ॥ ब्रह्मस्वंवामहादुष्टेसन्दंशेनरकेपतेत् ॥ २० ॥ यःस्वदेहंप्रपुष्णातिनान्यंजानातिमूढधीः ॥
सपात्यतेतैलतप्तेकुम्भीपाकेऽतिदारुणे ॥ २१ ॥ योनाऽगम्यांस्त्रियंमोहाद्योषिद्वावाचकामयेत् ॥ तंतयाकिङ्कराःसूर्म्यापरिरम्भंचकुर्वते ॥ २२ ॥ ये
बलाद्वेदमर्यादांलुम्पन्तिस्वबलोद्धताः ॥ तेवैतरण्यांपतितामांसशोणितभक्षकाः ॥ २३ ॥ वृषलींयःस्त्रियंकृत्वातयागार्हस्थ्यमाचरेत् ॥ पूयोदेनिपत
त्येवमहादुःखसमन्वितः ॥ २४ ॥ येदम्भमाश्रयन्तेवैधूर्तालोकस्यवञ्चने ॥ वैशसेनरकेमूढाःपतन्तियमताडिताः ॥ २५ ॥ येसवर्णासुतुस्त्रीषुस्वंरेतःपा
तयन्तिच ॥ रेतःकुल्यासुतेपापारेतःपानेषुतत्पराः ॥ २६ ॥ येचौरावह्निदादुष्टागरदाग्रामलुण्ठकाः ॥ सारमेयादनेतेवैपात्यन्तेपातकान्विताः ॥ २७ ॥

CC-0. In Public Domain. Digitization by eGangotri

कूटसाक्ष्यंवदत्यद्धापुरुषःपापसम्भृतः॥परकीयंतुद्रव्यंयोहरतिप्रसभंबली ॥२८॥ सोऽवीचिनरकेपापीअवाग्वक्त्रःपतत्यधः ॥ तत्रदुःखंमहद्भुक्त्वाएपि
ष्टांयोनिमाव्रजेत् ॥२९॥ योनरोरसनास्वादात्सुरांपिबतिमूढधीः ॥ तंपाययन्तिलोहस्यरसंधर्मस्यकिङ्कराः ॥३०॥ योगुरूनवमन्येतस्वविद्याचारद
र्पितः ॥ समृतःपात्यतेक्षारनरकेऽधोमुखःपुमान् ॥३१॥ विश्वासघातंकुर्वन्तियेनराधर्मनिष्कृताः ॥ शूलप्रोतेचनरकेपात्यन्तेबहुयातने ॥३२॥ पिशु
नोयोनरान्सर्वानुद्वेजयतिवाक्यतः ॥ दन्दशूकेचपतितोदन्दशूकैःसदश्यते ॥३३॥ एवंराजन्ननेकेवैनरकाःपापकारिणाम् ॥ पापंकृत्वाप्रयान्त्येतेपीडां
यान्तिसुदारुणाम् ॥३४॥ यैर्नश्रुतारामकथानपरोपकृतिःकृता ॥ तेषांसर्वाणिदुःखानिभवन्तिनरकान्तरे ॥३५॥ अत्रयस्यसुखंस्वर्गेभूयात्तस्यइतीर्य
ते॥ येदुःखिनोरोगयुतानरकादागताश्चते ॥३६॥ शेषउवाच ॥ एतच्छ्रुत्वामहीपालःकम्पमानःक्षणेक्षणे ॥ पप्रच्छभूयस्तंविप्रंसर्वसंशयनुत्तये ॥३७॥
शत्रुघ्नउवाच ॥ तत्तत्पापस्यचिह्नानिकथयस्वमहामुने ॥ केनपापेनकिंचिह्नंभूलोकउपजायते ॥ ३८ ॥ शेषउवाच ॥ इतिश्रुत्वातुतद्वाक्यंमुनिः
प्रोवाचभूपतिम् ॥ ३९ ॥ शौनकउवाच ॥ शृणुराजन्प्रवक्ष्यामिचिह्नानिपापकारिणाम् ॥ सुरापःश्यावदन्तश्चनरकान्तेप्रजायते ॥ ४० ॥
अभक्ष्यभक्षकारीचजायतेगुल्मकोदरः ॥ उदक्यावीक्षितंभुक्त्वाजायतेकृमिलोदरः ॥ ४१ ॥ श्वमार्जारादिसंस्पृष्टंभुक्त्वादुर्गन्धवान्भवेत् ॥
अनिवेद्यसुरादिभ्योभुञ्जानोजायतेनरः ॥ ४२ ॥ उदरेरोगवान्दुःखीमहारोगप्रपीडितः ॥ परान्नविघ्नकरणादजीर्णमभिजायते ॥ ४३ ॥ मन्दो
दराग्निर्भवतिसतिद्रव्येकदन्नदः ॥ विषदश्छार्दिरोगीस्यान्मार्गहापादरोगवान् ॥ ४४ ॥ पिशुनोनरकस्यान्तेजायतेश्वासकासवान् ॥ धूर्तोऽपस्मा
ररोगीस्याच्छूलीचपरतापनः ॥ ४५ ॥ दावाग्निदायकश्चैवरक्तातीसारवान्भवेत् ॥ सुरालयेजलेवापिशकृत्क्षेपंकरोतियः ॥ ४६ ॥ गुदरो
गोभवेत्तस्यपापरूपःसुदारुणः ॥ गर्भपातनजारोगायकृत्प्लीहजलोदराः ॥ ४७ ॥ प्रतिमाभङ्गकारीचअप्रतिष्ठश्चजायते ॥ दुष्टवादीखण्डितः
स्यात्खल्वाटःपरनिन्दकः ॥ ४८ ॥ सभायांपक्षपातीचजायतेपक्षघातवान् ॥ परोक्तहास्यकृत्काणःकुनखीविप्रहेमहृत् ॥ ४९ ॥ तुन्दीव
रीताम्रचौरःकांस्यहृत्पुण्डरीकिकः ॥ त्रपुहारीचपुरुषोजायतेपिङ्गमूर्धजः ॥ ५० ॥ शीसहारीचपुरुषोजायतेशीर्षरोगवान् ॥ घृतचौरस्तुपु
रुषोजायतेनेत्ररोगवान् ॥ ५१ ॥ लोहहारीचपुरुषोवर्बराङ्गःप्रजायते ॥ चर्महारीचपुरुषोजायतेमेदसावृतः ॥ ५२ ॥ मधुचौरस्तुपुरुषो
जायतेबस्तिगन्धवान् ॥ तैलचौर्येणभवतिनरःकण्ड्वातिपीडितः ॥ ५३ ॥ आमान्नहरणाच्चैवदन्तहीनःप्रजायते ॥ पक्वान्नहरणाच्चैवजिह्वारो
गयुतोभवेत् ॥ ५४ ॥ मातृगामीचपुरुषोजायतेलिङ्गवर्जितः ॥ गुरुजायाभिगमनान्मूत्रकृच्छ्रःप्रजायते ॥ ५५ ॥ भगिनींचैवगमनेपीतकुष्ठः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रजायते ॥ स्वसुतागमनेचैवरक्तकुष्ठःप्रजायते ॥ ५६॥ भ्रातृभार्याभिगमनेगुल्मकुष्ठःप्रजायते ॥ स्वामिपत्न्यादिगमनेजायतेदद्रुमण्डलम् ॥ ५७ ॥
विश्वस्तभार्यागमनेगजचर्माप्रजायते ॥ पितृष्वस्रभिगमनेदक्षिणाङ्गेव्रणीभवेत् ॥५८॥ मातुलान्यास्तुगमनेवामाङ्गेव्रणवान्भवेत् ॥ पितृव्यपत्नीग
मनेकटौकुष्ठःप्रजायते ॥ ५९ ॥ मित्रभार्याभिगमनेमृतभार्यःप्रजायते ॥ स्वगोत्रस्त्रीप्रसङ्गेनजायतेचभगन्दरः ॥ ६० ॥ तपस्विनीप्रसङ्गेनप्रमे
होजायतेनरे ॥ श्रोत्रियस्त्रीप्रसङ्गेनजायतेनासिकाव्रणी ॥ ६१ ॥ दीक्षितस्त्रीप्रसङ्गेनजायतेदुष्टरक्तसृक् ॥ स्वजातिजायागमनेजायतेहृदयव्रणी ॥
॥ ६२ ॥ जात्युन्नतस्त्रीगमनेजायतेमस्तकव्रणी ॥ पशुयोनौचगमनान्मूत्रघातःप्रजायते ॥ ६३ ॥ एतेदोषानराणांस्युर्नरकान्तेनसंशयः ॥
स्त्रीणामपिभवन्त्येतेतत्तत्पुरुषसङ्गमात् ॥ ६४ ॥ एवंराजन्हिचिह्नानिकीर्तितानिसुपापिनाम् ॥ दानपुण्यप्रसङ्गेनतीर्थादिक्रिययातथा
॥ ६५ ॥ रामस्यचरितंश्रुत्वातपसावाऽक्षयंव्रजेत् ॥ सर्वेषामेवपापानांहरिकीर्तिंधुनीनृणाम् ॥ ६६ ॥ क्षालयेत्पापिनांपङ्कंनात्रकार्याविचा
रणा ॥ यश्चावमन्येतहरिंतंगङ्गानपुनातिहि ॥ ६७ ॥ तीर्थान्यपिसुपुण्यानिपावितुंनक्षमाणितम् ॥ हसतेकीर्त्यमानंयश्चरित्रंज्ञानदुर्बलः ॥६८ ॥ नत
स्यनरकान्मुक्तिःकल्पान्तेऽपिभविष्यति ॥ याहिराजन्विमोक्षार्थंहयस्यानुचरैःसह ॥ श्रावयश्रीशचरितंयतोवाहगतिर्भवेत् ॥ ६९ ॥ शेषउवाच ॥
इतिश्रुत्वाप्रहृष्टोऽभूच्छत्रुघ्नःपरवीरहा ॥ प्रणम्यतंपरिक्रम्यययौसेवकसंयुतः ॥ ७० ॥ तत्रगत्वासहनुमान्हयवर्यस्यपार्श्वतः ॥ उवाचरामचरितंमहा
दुर्गतिनाशकम् ॥ ७१ ॥ याहिदेवविमानंस्वंरामकीर्तनपुण्यतः ॥ स्वैरंचरस्वलोकेत्वंमुक्तोभवकुयोनितः ॥ ७२ ॥ इतिवाक्यंसमाकर्ण्यशत्रुघ्नोया
वदास्थितः ॥ तावद्ददर्शविमलंदेवंवैमानिकंवरम् ॥ ७३ ॥ सउवाचविमुक्तोऽहंरामकीर्तनसंश्रुतेः ॥ यामिस्वंभवनंराजन्नाज्ञापयमहामते ॥ ७४ ॥
इत्युक्त्वाप्रययौदेवोविमानेस्वेपरिस्थितः ॥ तदाविस्मयमापुस्तेशत्रुघ्नेनसहानुगाः ॥ ७५ ॥ ततोवाहोविनिर्मुक्तोगात्रस्तम्भाच्चभूतलात् ॥ ययौ
तद्विपिनंसर्वंभ्रमन्पक्षिसमाकुलम् ॥ ७६ ॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशेषवा०रामाश्व०हयनिर्मुक्तिर्नामाष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥ शेष
उवाच ॥ मासाःसप्ताभवंस्तस्यहयवर्यस्यहेलया ॥ चरतोभारतंवर्षमनेकनृपपूरितम् ॥ १ ॥ सपूजितोभूपवरैःपरीत्यवरभारतम् ॥ परीवृतोवीरवीरैःश
त्रुघ्नादिभिरुद्भटैः ॥ २ ॥ सबभ्रामबहून्देशान्हिमालयसमीपतः ॥ नकोऽपितंनिजग्राहहयंरामबलंस्मरन् ॥ ३ ॥ अङ्गवङ्गकलिङ्गानांराजभिःसंस्तुतो
हयः ॥ जगामराज्ञोनगरेसुरथस्यमनोहरे ॥ ४ ॥ कुण्डलंनामनगरमदितेर्यत्रकुण्डलम् ॥ कर्णयोःपतितंभूमौहर्षभयसुकम्पयोः ॥ ५ ॥ यत्रधर्मव्यति
क्रान्तिंनकरोतिकदापिना ॥ श्रीरामस्मरणंप्रेम्णाकरोतिजनतान्वहम् ॥ ६ ॥ अश्वत्थानांतुयत्रार्चातुलस्याःप्रत्यहंनृभिः ॥ क्रियतेरघुनाथस्यसेवकैः

CC-0. In Public Domain. Digitization by eGangotri

पापवर्जितैः ॥ ७ ॥ यत्रदेवालयारम्याराघवप्रतिमायुताः ॥ पूज्यन्तेप्रत्यहंशुद्धचित्तैःकपटवर्जितैः ॥८॥ वाचिनामहरेर्यत्रनवैकलहसङ्कथा ॥ हृदि ध्यानंतुतस्यैवनचकामफलस्मृतिः ॥ ९ ॥ देवनंयत्ररामस्यवार्त्ताभिःपूतदेहिनाम् ॥ नजातुचिन्नृणामस्तिसत्यव्यसनमानिनाम् ॥ १० ॥ तस्मिन्वसतिधर्मात्मासुरथःसत्यवान्बली ॥ रघुनाथपदस्मारहृष्टचित्तःपरोन्मदः ॥ ११ ॥ किंवर्णयामिरामस्यसेवकंसुरथंवरम् ॥ यस्या शेषगुणाभूमौविस्तृताःपावयन्त्यघम् ॥ १२ ॥ सेवकास्तस्यभूपस्यपर्यटन्तःकदाचन ॥ अपश्यन्हयमेधस्यहयंचन्दनचर्चितम् ॥ १३ ॥ तेदृ ष्ट्वाविस्मयंप्राप्ताहयपत्रमलोकयन् ॥ स्पष्टाक्षरसमायुक्तंचन्दनादिकचर्चितम् ॥१४॥ ज्ञात्वारामेणसंमुक्तंहयंनेत्रमनोहरम् ॥ हृष्टाराज्ञेसभास्थायकथ थयामासुरुत्सुकाः ॥ १५ ॥ स्वामिन्नयोध्यानगरीपतिस्तस्यास्तुराघवः ॥ हयमेधक्रतोर्योग्योहयोमुक्तःपरिभ्रमन् ॥ १६ ॥ सतेपुरस्यनिकटेप्राप्तः सेवकसंयुतः ॥ गृहाणत्वंमहाराजहयंतंसुमनोहरम् ॥ १७ ॥ शेषउवाच ॥ इतिश्रुत्वानिजप्रोक्तंवाक्यंहर्षपरिप्लुतः ॥ उवाचवीरान्बलिनोमेघगम्भी रयागिरा ॥ १८ ॥ सुरथउवाच ॥ धन्यावयंराममुखंपश्यामःसहसेवकाः ॥ ग्रहीष्यामिहयंतस्यभटकोटिपरीवृतम् ॥ १९ ॥ तदामोक्ष्यामिवाहंतं यदारामःसमाव्रजेत् ॥ कृतार्थंममभक्तस्यचिरंध्यानरतस्यवै ॥ २० ॥ शेषउवाच ॥ इत्थमुक्त्वामहीपालःसेवकान्स्वयमादिशत् ॥ गृह्णन्तु वाहंप्रसभंमोच्योनाश्वोऽक्षिगोचरः ॥ २१ ॥ अनेनसुमहाँल्लाभोभविष्यतितुमेमतम् ॥ यद्रामचरणौप्रेक्षेब्रह्मशक्रादिदुर्लभौ ॥ २२ ॥ सएवध न्यःस्वजनःपुत्रोवाबान्धवोऽथवा ॥ पशुर्वावाहनंवापिरामाप्तिर्येनसम्भवेत् ॥ २३ ॥ तस्माद्गृहीत्वाक्रत्वश्वंस्वर्णपत्रेणशोभितम् ॥ बध्नन्तुवाजिशा लायांकामवेगंमनोरमम् ॥ २४ ॥ इत्युक्तास्तेततोगत्वावाहंरामस्यशोभितम् ॥ गृहीत्वातरसाराज्ञेददुःसर्वशुभाङ्गिनम् ॥ २५ ॥ राजाप्राप्यमुदाचा श्वंरामस्यदनुजार्दनः ॥ सेवकान्प्राहबलिनोधर्मकृत्यविचक्षणः ॥ २६ ॥ वात्स्यायनमहाबुद्धेश्शृणुष्वैकाग्रमानसः ॥ नतस्यविषयेकश्चित्परदाररतो नरः ॥२७॥ नपरद्रव्यनिरतोनचकामेषुलम्पटः ॥ नजिह्वाभिरतोमार्गेकीर्त्तयेद्रामकीर्तनात् ॥२८॥ यःसेवकान्नृपोवक्तियूयंसेवार्थमागताः ॥ कथयन्तु भवच्चेष्टांधर्मकर्मविशारदाः ॥२९॥ एकपत्नीव्रतधरानपरद्रव्यलोलुपाः ॥ परापवादनिरतानचवेदोत्पथंगताः ॥३०॥ श्रीरामस्मरणादीनिकुर्वन्तिप्रत्य हंभटाः॥तानहंरामसेवार्थंरक्षाम्यन्तककोपवान्॥३१॥ एतद्विरुद्धधर्माणोयेनराःपापसंयुताः॥ तानहंविषयेमेतुवासयामिनदुर्मतीन् ॥ ३२ ॥ तस्यदेशे नपापिष्ठाःपापंकुर्वन्तिमानसे ॥ हरिध्यानहताशेषपातकामोदसंयुताः ॥३३॥ यदैवमभवद्देशोराजाधर्मेणसंयुतः ॥ तदातत्स्थानराःसर्वेमृतागच्छन्ति निर्वृतिम् ॥३४॥ यमानुचरनिर्वेशोनाभवत्सौरथेपुरे॥तदायमोमुनेरूपंधृत्वाप्रागान्महीश्वरम् ॥३५॥ वल्कलाम्बरधारीचजटाशोभितशीर्षकः ॥सुरथं

॥ ६४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुसभामध्येददर्शहरिसेवकम् ॥ ३६ ॥ तुलसीमस्तकेयस्यवाचिनामहरेःपरम् ॥ धर्मकर्मरतांवार्तांश्रावयन्तंनिजाञ्जनान् ॥ ३७ ॥ तदामुनिंनृपो
दृष्ट्वातपोमूर्तिमिवस्थितम् ॥ ववन्देचरणौतस्यपाद्यादिकमथाकरोत् ॥ ३८ ॥ सुखोपविष्टंविश्रान्तंमुनिंप्राहनृपाग्रणीः ॥ धन्यमद्यजनुर्मह्यंधन्यमद्य
गृहंमम ॥३९॥ कथाःकथयतान्मह्यंरामस्यविविधावराः ॥ याःशृण्वतांपापहानिर्भविष्यतिपदेपदे ॥४०॥ इत्थमुक्तंसमाकर्ण्यजहाससमुनिर्भृशम् ॥
दन्तान्प्रदर्शयन्सर्वांस्तालास्फालितपाणिकः ॥ ४१ ॥ हसन्तंतंमुनिंप्राहहसनेकारणंकिमु ॥ कथयस्वप्रसादेनयथास्यान्मनसःसुखम् ॥ ४२ ॥ ततो
मुनिर्नृपंप्राहशृणुराजन्धियायुतः ॥ यदहंतऽभिधास्यामिस्मितेकारणमुत्तमम् ॥ ४३ ॥ त्वयाप्रोक्तंहरेःकीर्तिंकथयस्वममाग्रतः ॥ कोहरिःकस्यवा
कीर्तिःसर्वेकर्मवशानराः ॥४४॥ कर्मणाप्राप्यतेस्वर्गःकर्मणानरकंव्रजेत् ॥ कर्मणैवभवेत्सर्वंपुत्रपौत्रादिकंबहु ॥ ४५ ॥ शक्रःशतंक्रतूनांतुकृत्वाऽगात्प
रमंपदम् ॥ब्रह्मापिकर्मणालोकंप्राप्यसत्याख्यमद्भुतम् ॥४६॥ अनेकेकर्मणासिद्धामरुदादयईशिनः ॥कुर्वन्तिभोगसौख्यंचअप्सरोगणसेविताः ॥४७॥
तस्मात्कुरुष्वयज्ञादीन्यजस्वकिलदेवताः ॥ यथातेविमलाकीर्तिर्भविष्यतिमहीतले ॥ ४८ ॥ इतिश्रुत्वातुतद्वाक्यंकोपक्षुभितमानसः ॥ उवाचरामै
कमनाविप्रंकर्मविशारदम् ॥ ४९ ॥ माब्रूहिकर्मणोवार्तांक्षयिष्णुफलदायिनीम् ॥ गच्छमन्नगरोपान्ताद्बहिर्लोकविगर्हितः ॥ ५० ॥ इन्द्रःपतिष्यति
क्षिप्रंपतिष्यत्यपिपद्मजः ॥ नपतिष्यन्तिमनुजारामस्यभजनोत्सुकाः ॥ ५१ ॥ पश्यध्रुवंचप्रह्लादंविभीषणमथाद्भुतम् ॥ येचान्येरामभक्तावैकदापि
नपतन्तिते ॥ ५२ ॥ येरामनिन्दकादुष्टास्तानिमेयमकिङ्कराः ॥ ताडयिष्यन्तिलोहस्यमुद्गरैःपाशबन्धनैः ॥ ५३ ॥ ब्राह्मणत्वादेहदण्डंनकुर्यां
तेद्विजाधम ॥ गच्छगच्छमदालोकात्ताडयिष्यामिचान्यथा ॥ ५४ ॥ इत्थमुक्तवतिश्रेष्ठेभूपेसुरथसंज्ञिते ॥ सेवकाबाहुनाधृत्वानिष्कासयितुमु
द्यताः ॥ ५५ ॥ तदायमोनिजंरूपंधृत्वालोकैकवन्दितम् ॥ प्राहभूपंप्रतुष्टोऽस्मियाचस्वहरिसेवक ॥ ५६ ॥ मयाप्रलोभितोवाग्भिर्बह्वीभिरपि
सुव्रत ॥ चलितोऽसिनरामस्यसेवायाःसाधुसेवितः ॥ ५७ ॥ तदाप्रोवाचभूमीशोयमंदृष्ट्वासुतोषितम् ॥ उवाचयदितुष्टोऽसिदेहिमेवरमुत्तमम् ॥५८॥
तावन्ममनवैमृत्युर्यावद्रामसमागमः ॥ नभयंमेभवत्तोहिकदाचनहिधर्मराट् ॥ ५९ ॥ तदोवाचयमोभूपमिदंतवभविष्यति ॥ सर्वंत्वदीप्सितंतथ्यं
करिष्यतिरघोःपतिः ॥ ६० ॥ इत्युक्त्वान्तर्हितोधर्मोजगामस्वपुरंप्रति ॥ प्रशस्यतस्यचरितंहरिभक्तिपरात्मनः ॥ ६१ ॥ सराजाधार्मिकोरामसेवकः
परयामुदा ॥ गृहीत्वाऽश्वंप्रत्यवाचसेवकान्हरिसेवकान् ॥ ६२ ॥ मयागृहीतोवाहोऽसौराघवस्यमहीपतेः ॥ सज्जीभवन्तुसर्वत्रयूयंरणविशारदाः ॥
॥ ६३ ॥ इतिप्रोक्तास्तुतेसर्वेभटाराज्ञोमहाबलाः ॥ सज्जीभूताःक्षणादेवसभायांजग्मुरुत्सुकाः ॥ ६४ ॥ राज्ञोवीरादशसुताश्चम्पकोमोहकस्तथा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रिपुञ्जयोऽतिदुर्वारःप्रतापीबलमोदकः ॥६५॥ हर्यक्षःसहदेवश्चभूरिदेवःसुतापनः ॥ इतिराज्ञोदशसुताःसज्जीभूतारणाङ्गणे ॥ ६६ ॥ यातुमिच्छामकुर्वं
स्तेमहोत्साहसमन्विताः ॥ राजापिस्वरथंचित्रंहेमशोभाविनिर्मितम् ॥ ६७ ॥ आह्वयामाससुजवैर्वाजिभिःसमलङ्कृतम् ॥ रणोत्साहेनसंयुक्तःस
र्वसैन्यपरीवृतः ॥६८॥ सभायांसेवकान्सर्वान्दिशन्नास्तेमहीपतिः ॥ ६९ ॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशेषवा०रामाश्व०सुरथेनराज्ञाहयग्रहणं
नामैकोनपञ्चाशत्तमोऽध्यायः ॥ ४९ ॥ शेषउवाच ॥ अथरामानुजोवेगात्समागत्यस्वसेवकान् ॥ पप्रच्छकुत्रवाहोऽसौयाज्ञिकःसुमनोहरः ॥ १ ॥
तदातेवचनंप्रोचुःशत्रुघ्नंसुमहाबलाः ॥ नजानीमोभटाःकेचिद्धयंनीत्वागताःपुरे ॥ २ ॥ वयंचधिक्कृताःसर्वेबलिभीराजसेवकैः ॥ अत्रप्रमाणंभगवा
नितिकर्तव्यतांप्रति ॥ ३ ॥ तच्छ्रुत्वावचनंतेषांशत्रुघ्नःकुपितोभृशम् ॥ दशन्रोषात्स्वदशनाञ्जिह्वयालेलिहन्मुहुः ॥४॥ उवाचवीरोमद्वाहंहृत्वाकुत्रग
मिष्यति ॥ इदानींपातयेबाणैःपुरंजनसमन्वितम् ॥ ५ ॥ इत्युक्त्वासुमतिंप्राहकस्येदंपुटभेदनम् ॥ कोवर्ततेऽस्याधिपतिर्योमेवाहमजीहरत्
॥ ६ ॥ शेषउवाच ॥ इतिवाक्यंसमाकर्ण्यभूपतेःकोपसंयुतम् ॥ जगादमन्त्रीसुगिरास्फुटाक्षरसमन्वितम् ॥ ७ ॥ विद्धीदंकुण्डलंनामनगरंसुमनो
हरम् ॥ अस्मिन्वसतिधर्मात्मासुरथःक्षत्रियोबली ॥ ८ ॥ नित्यंधर्मपरोरामचरणद्वन्द्वसेवकः ॥ मनसाकर्मणावाचाहनूमानिवसेवकः ॥ ९ ॥
चरितान्यस्यशतशोवर्तन्तेधर्मकारिणः ॥ महाबलपरीवारःसुरथःसर्वशोभनः ॥ १० ॥ महद्युद्धंभवेदत्रहृतश्चेद्वाहसत्तमः ॥ अनेकेप्रपतिष्यन्ति
वीरारणविशारदाः ॥ ११ ॥ एवमुक्तसमाश्रुत्यशत्रुघ्नःसचिवंप्रति ॥ उवाचपुनरप्येवंवचनंवदतांवरः ॥ १२ ॥ शत्रुघ्नउवाच ॥ कथमत्रप्रक
र्तव्यंरामाश्वोऽनेनचेद्धृतः ॥ नायातियोद्धुंप्रबलंकटकंवीरसेवितम् ॥ १३ ॥ सुमतिरुवाच ॥ दूतःप्रेष्योमहाराजराजानंप्रतिवाग्मिकः ॥ यद्वा
क्येनसमायातिबलेनबलिनांवरः ॥ १४ ॥ नोचेदज्ञानतोवाहोधृतःकेनापिमानिना ॥ अर्पयिष्यतिनःसाधुमश्वंक्रतुवरंशुभम् ॥ १५ ॥ इतिश्रुत्वा
तुतद्वाक्यंशत्रुघ्नोबुद्धिमान्बली ॥ अङ्गदंप्रत्युवाचेदंवचनंविनयान्वितम् ॥ १६ ॥ शत्रुघ्नउवाच ॥ याहित्वंनिकटस्थेवैसुरथस्यमहापुरे ॥
दूतत्वेनततोगत्वाप्रब्रूहिनृपतिंप्रति ॥ १७ ॥ त्वयाधृतोरामवाहोज्ञानतोऽज्ञानतोऽपिवा ॥ अर्पयतुनवायातुप्रधनंवीरसंयुतम् ॥ १८ ॥ रामस्यदौत्यं
लङ्कायांरावणंप्रतियत्कृतम् ॥ तथैवकुरुभूयिष्ठबलसंयुतबुद्धिमन् ॥ १९ ॥ शेषउवाच ॥ एतच्छ्रुत्वाङ्गदोवीरओमितिप्रोच्यभूमिपम् ॥ जगा ॥ ५५ ॥
मसंसदोमध्येवीरश्रेणिसमन्विते ॥ २० ॥ ददर्शसुरथंभूपंतुलसीमञ्जरीधरम् ॥ रामभद्रंरसनयाब्रुवन्तंसेवकान्निजान् ॥ २१ ॥ राजापिदृष्ट्वाप्लवगं
मनोहरवपुर्धरम् ॥ शत्रुघ्नदूतंमत्वापिवालिजंप्रत्यभाषत ॥ २२ ॥ सुरथउवाच ॥ प्लवगाधिपकस्मात्त्वमागतोऽत्रकथंभवान् ॥ ब्रूहिमेकारणं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वंयथाज्ञात्वाकरोमितत् ॥ २३॥ शेषउवाच ॥ इतिसम्भाषमाणंतंप्रत्युवाचकपीश्वरः ॥ विस्मयंश्वेतसिभृशंरामसेवाकरंनृपम् ॥२४॥ जानीहिमांनृप श्रेष्ठवालिपुत्रंहरीश्वरम् ॥ शत्रुघ्नेनचदूतत्वेप्रेषितोभवतोऽन्तिकम् ॥२५॥ सेवकैःकैश्चिदागत्यधृतोऽश्वोममसाम्प्रतम् ॥ अज्ञानतोमहान्याय्यंकुर्वद्भिः सहसानृप ॥ २६ ॥ तमश्वंसहराज्येनसहपुत्रैर्मुदान्वितः ॥ शत्रुघ्नंयाहिचरणेपतित्वाऽऽशुप्रदेहिच ॥ २७ ॥ नोचेच्छत्रुघ्ननिर्मुक्तनाराचैःक्षतविग्रहः॥ पृथ्वीतलमलङ्कर्वञ्छयिष्यसिविशीर्षकः ॥ २८ ॥ येनलङ्कापतिर्नाशंप्रापितोलीलयाक्षणात् ॥ तस्याश्वंयागयोग्यंतुहृत्वाकुत्रगमिष्यसि ॥ २९ ॥ शेषउवाच ॥ इत्यादिभाषमाणंतंप्रत्युवाचमहीश्वरः ॥ सर्वंतथ्यंब्रवीषित्वंनानृतंतवभाषितम् ॥ ३० ॥ परंशृणुष्वमाद्वाक्यंशत्रुघ्नपदसेवक ॥ मयाधृतोमहानश्वोरामचन्द्रस्यधीमतः ॥ ३१ ॥ नमोक्ष्येसर्वथावाहंशत्रुघ्नादिभयादहम् ॥.. चेद्रामःस्वयमागत्यदर्शनंदास्यतेमम ॥ ॥ ३२ ॥ तदाहंचरणौनत्वादास्यामिसुतसंयुतः ॥ सर्वंराज्यंकुटुम्बंचधनंधान्यंबलंबहु ॥ ३३ ॥ क्षत्रियाणामयंधर्मःस्वामिनापिविरुद्धयते ॥ धर्मेणयुद्धंतत्रापिरामदर्शनमिच्छता ॥ ३४ ॥ शत्रुघ्नादीन्प्रवीरांस्तानधुनाहंक्षणादपि ॥ जित्वाबध्नामिमद्गेहेनोचेद्रामःसमाव्रजेत् ॥ ३५ ॥ शेषउवाच ॥ इतिश्रुत्वाङ्गदोधीमाञ्जहासनृपतिंतदा ॥ उवाचचमहद्वाक्यंमहाधैर्यसमन्वितम् ॥ ३६ ॥ अङ्गदउवाच ॥ बुद्धिहीनःप्रवदसिवृद्धत्वात्सागतातव ॥ यत्त्वंशत्रुघ्ननृपतिंधिक्करोषिधियाबली ॥ ३७ ॥ योमान्धातृरिपुंदैत्यंलवणंलीलयावधीत ॥ येनानेकेजिताःसङ्ख्येवैरिणःप्र[1]बलोद्धताः ॥ ३८ ॥ विद्युन्मालीहतोयेनराक्षसःकामगेस्थितः ॥ त्वंतंबध्नासिवीरेन्द्रंमतिहीनःप्रभासिमे ॥ ३९ ॥ भ्रातृजोयस्यसुबलीपुष्कलःपरमास्त्रवित् ॥ येनरुद्रगणःसङ्ख्येवीरभद्रःसुतोषितः ॥४०॥ वर्णयामिकिमेतस्यपराक्रान्तिबलोर्जिताम् ॥ येननास्तिसमःपृथ्व्यांबलेनयशसाश्रिया ॥ ॥ ४१ ॥ हनूमान्यस्यनिकटेरघुनाथपदाब्जधीः ॥ यस्यानेकानिकर्माणिभविष्यन्तिश्रुतानिते ॥ ४२ ॥ सत्रिकूटाराक्षसपूर्दग्धायेनक्षणाद्बलात् ॥ अक्षोयेनहतःपुत्रोराक्षसेन्द्रस्यदुर्मतेः ॥ ४३ ॥ द्रोणोनामगिरिर्येनपुच्छाग्रेणसदैवतः ॥ आनीतोजीवनार्थंतुसैनिकानांमुहुर्मुहुः ॥ ४४ ॥ जानातिरामश्चारित्रंनान्योजानातिमूढधीः ॥ यंकपीन्द्रंमनाक्स्वान्तान्नविस्मरतिसेवकम् ॥ ४५ ॥ सुग्रीवाद्याःकपीन्द्रायेपृथ्वींसर्वांग्रसन्तिये ॥ तेशत्रुघ्नंनृपंसर्वेसेवन्तेप्रेक्षणोत्सुकाः ॥ ४६ ॥ कुशध्वजोनीलरत्नोरिपुतापोमहास्त्रवित् ॥ प्रतापाग्र्यःसुबाहुश्चविमलःसुमं[2]दस्तथा ॥ ४७ ॥ राजावीरमणिःसत्ययुतोरामस्यसेवकः ॥ एतेऽन्येऽपिनृपाभूमेःपतयःपर्युपासते ॥ ४८ ॥ तत्रत्वंवीरजलधौमशकःकोभवानिति ॥ तज्ज्ञात्वागच्छशत्रुघ्नंकृपालुंपुत्र

---

१ 'प्रवलोद्धराः' इ० पा० । २ 'सुदमस्तथा' इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

कैर्युतः ॥ ४९ ॥ वाहंसमर्प्यगन्तासिरामंराजीवलोचनम् ॥ दृष्ट्वाकृतार्थीकुरुषेस्वाङ्गानिजनुषासह ॥ ५० ॥ शेषउवाच ॥ राजाप्रोवा
चतंदूतंप्रब्रुवन्तमनेकधा ॥ एतान्दर्शयसिक्षिप्रंसर्वेनममगोचराः ॥ ५१ ॥ यादृशंमद्बलंदूततादृशंनहनूमतः ॥ योरामंपृष्ठतःकृत्वाप्रागाद्वा
गस्यपालने ॥ ५२ ॥ यद्यहंमनसावाचाकर्मणाकुतुकान्वितः ॥ भजामिरामंतर्ह्याशुदर्शयिष्यतिस्वांतनुम् ॥ ५३ ॥ अन्यथाहनुमन्मु
ख्यावीराबध्नन्तुमांवलात् ॥ गृह्णन्तुवाहंतरसारामभक्तिसमन्विताः ॥ ५४ ॥ गच्छत्वंनृपशत्रुघ्नंकथयस्वममोदितम् ॥ सज्जीभवन्तुसुभटाएषयामि
रणेबली ॥ ५५ ॥ सविचार्ययथायुक्तंकरिष्यतिरणाङ्गणे ॥ मोचयन्तुमहावाहंनवामामाददन्तुते ॥ ५६ ॥ शेषउवाच॥इतिश्रुत्वास्मितंकृत्वाय
यौवीरोयतोनृपः ॥ गत्वानिवेदयामासयथोक्तंसुरथेनवै ॥ ५७ ॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशेषवा०रामाश्व०अङ्गदस्यदूतत्ववाक्यं
नामपञ्चाशत्तमोऽध्यायः ॥ ५० ॥ शेषउवाच ॥ तच्छ्रुत्वाभाषितंतस्यसुरथस्याङ्गदाननात् ॥ सज्जीभूतारणेसर्वेरथस्थारणकोविदाः ॥ १ ॥
पटहानांनिनादोऽभूद्भेरीनादस्तथैवच ॥ वीराणांगर्जनानादाःप्रादुर्भूतारणाङ्गणे ॥ २ ॥ रथचीत्कारशब्देनगजानांबृंहितेनच ॥ व्याप्तंतत्सकलंविश्वं
दिवंयातोमहारवः ॥ ३ ॥ रणोत्साहेनसंयुक्तावीरारणविशारदाः ॥ कुर्वन्तिविविधान्नादान्कातरस्यभयङ्करान् ॥४॥ एवंकोलाहलेवृत्तेसुरथोनामभूमि
पः ॥ स्वसुतैःसैनिकैश्चाथवृतःप्रायाद्रणाङ्गणे ॥ ५ ॥ गजैरथैर्हयैःपत्तिव्रजैःपूर्णांतुमेदिनीम् ॥ कुर्वन्समुद्रइवतांप्लावयन्ददृशेभटैः ॥ ६ ॥ शङ्खनादेन
सङ्घुष्टंजयनादैस्तथैवच ॥ वीक्ष्यतंप्रधनोद्युक्तंसुमतिंप्राहभूमिपः ॥७॥ शत्रुघ्नउवाच ॥ एषराजासमायातोमहासैन्यपरीवृतः ॥ अत्रयत्कृत्यमस्मा
कंतद्वदस्वमहामते ॥८॥ सुमतिरुवाच ॥ योद्धव्यमत्रबहुभिर्वीरैरणविशारदैः ॥ पुष्कलादिभिरत्युग्रैःसर्वशस्त्रास्त्रकोविदैः ॥ ९ ॥ राज्ञासहसमीरस्य
पुत्रःपरमशौर्यवान् ॥ युद्धंकरोतुसुबलःपरयुद्धविशारदः ॥ १० ॥ शेषउवाच ॥ इतिब्रुतेमहामात्येयावत्तावन्नृपात्मजाः ॥ रणाङ्गणेधनूंष्य
द्धास्फारयामासुरुद्धताः ॥ ११ ॥ तान्वीक्ष्ययोधाःसुबलाःपुष्कलाद्यारणोत्कटाः ॥ अभिजग्मुःस्यन्दनैःस्वैर्धनुर्बाणकरामताः ॥ १२ ॥ चम्प
केनमहावीरःपुष्कलःपरमास्त्रवित् ॥ द्वैरथेनैवयुयुधेमहावीरेणशालिना ॥ १३ ॥ मोहकंयोधयामासजानकिःसकुशध्वजः ॥ रिपुञ्जयेनविमलोदुर्वा
रेणसुबाहुकः ॥ १४ ॥ प्रतापिनाप्रतापाग्र्योबलमोदेनचाङ्गदः ॥ हर्यक्षेणनीलरत्नःसहदेवेनसत्यवान् ॥ १५ ॥ राजावीरमणिर्भूरिदेवेनयुयुधे ॥ ९६ ॥
बली ॥ असुतापेनचोग्राश्वोयुयुधेबलसंयुतः ॥ १६ ॥ द्वैरथंतुमहद्युद्धमकुर्वन्युद्धकोविदाः ॥ सर्वेशस्त्रास्त्रकुशलाःसर्वेयुद्धविशारदाः ॥ १७ ॥ एवं
प्रवृत्तेसङ्ग्रामेसुरथस्यसुतैस्तदा ॥ अत्यन्तंकदनंतत्रबभूवमुनिसत्तम ॥ १८ ॥ पुष्कलश्चम्पकंप्राहकिन्नामासिनृपात्मज ॥ धन्योऽसियोमया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साधरणमध्यमुपेयिवान् ॥ १९ ॥ इदानींतिष्ठकिंयासिकथंतेजीवितंभवेत् ॥ एहियुद्धंमयासार्धंसर्वशस्त्रास्त्रकोविद ॥ २० ॥ इत्यभिव्याहृतं
तस्यश्रुत्वाराजात्मजोबली ॥ जगादपुष्कलंवीरोमेघगम्भीरयागिरा ॥ २१ ॥ चम्पकउवाच ॥ ननाम्नानकुलेनेदंयुद्धमत्रभविष्यति ॥ तथा
पितववक्ष्येऽहंस्वनामबलपूर्वकम् ॥ २२ ॥ मममाताराघवेशोमत्पिताराघवःस्मृतः ॥ ममबन्धूरामचन्द्रःस्वजनोममराघवः ॥ २३ ॥ मन्नामराप
दासश्चसदारामस्यसेवकः ॥ तारयिष्यतिमांयुद्धेरामोभक्तकृपाकरः ॥ २४ ॥ लोकानांमतमास्थायप्रब्रवीमितवाधुना ॥ सुरथस्यसुतश्चाहंमाता
वीरवतीमम ॥ २५ ॥ मन्नामयोमधौसर्वाञ्छोभनान्विदधातिवै ॥ मधुपायंरसावासंत्यजन्तिमधुमोहिताः ॥ २६ ॥ वर्णेनस्वर्णसदृशोमध्ये
लिङ्गवपुर्धरः ॥ तदाख्ययाभिधांवीरजानीहिममबोहिनीम् ॥ २७ ॥ युध्यस्वबाणैःप्रधनेनकोजेतुंहिमांक्षमः ॥ इदानींदर्शयिष्यामिस्वपराक्र
ममद्भुतम् ॥ २८ ॥ शेषउवाच ॥ इतिश्रुत्वामहद्वाक्यंपुष्कलोहृदितोषितः ॥ तंदुर्जयंमन्यमानःशरान्मुञ्चन्रणेऽभवत् ॥ २९ ॥ शरसङ्घंप्रमु
ञ्चन्तकोटिधापुष्कलंययौ ॥ चम्पकःकोपसंयुक्तोधनुःसज्यमथाकरोत् ॥ ३० ॥ मुमोचनिशितान्बाणान्वैरिवृन्दविदारणान् ॥ स्वनामचिह्नि
तान्स्वर्णपुङ्खभागसमन्वितान् ॥ ३१ ॥ तांश्चिच्छेदमहावीरःपुष्कलःप्रधनाङ्गणे ॥ शरान्धकारंसर्वत्रमुञ्चन्बाणाञ्छिलाशितान् ॥ ३२ ॥ स्व
बाणच्छेदनंदृष्ट्वाकृतंवीरेणचम्पकः ॥ आह्वयामासबलिनंपुष्कलंकोपपूरितः ॥ ३३ ॥ माप्रयाहिरणंत्यक्त्वेतिब्रुवन्समरेपुनः ॥ पुष्कलंहृदये
बाणैर्विव्याधदशभिस्त्वरन् ॥ ३४ ॥ तेबाणाःपुष्कलस्याहोहृदयेतीव्रवेगिनः ॥ आगत्यसुभृशंलग्नाःशोणितंपपुरूर्जितम् ॥ ३५ ॥ तैर्बाणै
र्व्यथितोवीरःशरान्पञ्चसमाददे ॥ सुतीक्ष्णाग्रान्महाकोपाद्दारयन्पर्वतानिव ॥ ३६ ॥ तेबाणास्तस्यबाणाश्चपरस्परमथोर्जिताः ॥ आकाशेरचि
ताश्छिन्नाःशतधाराजसूनुना ॥ ३७ ॥ छित्त्वाबाणान्सुतीक्ष्णाग्रान्सुरथाङ्गोद्भवोबली ॥ बाणाञ्छतंसमाधत्तपुष्कलंताडितुंहृदि ॥ ३८ ॥
तेबाणाःशतधाच्छिन्नाःपुष्कलेनमहात्मना ॥ अपतन्समरोपान्तेशरवेगप्रपीडिताः ॥ ३९ ॥ तदातत्सुमहत्कर्मदृष्ट्वाराज्ञःसुतोबली ॥ सहस्रेण
शराणांचताडयन्वक्षसिस्फुटम् ॥ ४० ॥ तानप्याशुप्रचिच्छेदपुष्कलःपरमास्त्रवित् ॥ पुनरप्याशुस्वेचापेसमाधत्तायुतंशरान् ॥ ४१ ॥ ता
नप्याशुप्रचिच्छेदपुष्कलःपरमास्त्रवित् ॥ ततोऽत्यन्तंप्रकुपितःशरवृष्टिमथाकरोत् ॥ ४२ ॥ शरवृष्टिंसमायान्तींमत्वाचम्पकवीरहा ॥ साधु
साधुप्रशंसन्तंपुष्कलंसमताडयत् ॥ ४३ ॥ पुष्कलश्चम्पकंदृष्ट्वामहावीर्यसमन्वितम् ॥ ब्रह्मणोऽस्त्रंसमाधत्तस्वेचापेसर्वशस्त्रवित् ॥ ४४ ॥
तेनमुक्तंमहाशस्त्रंप्रजज्वालदिशोदश ॥ खंरोदसीव्याप्यविश्वंप्रलयंकर्तुमुद्यतम् ॥ ४५ ॥ चम्पकोमुक्तमस्त्रंतदृष्ट्वासर्वास्त्रकोविदः ॥ तत्संहतु

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

तदेवास्त्रंमुमोचरिपुमुद्यतम् ॥ ४६ ॥ द्वयोरेकतमंतेजःप्रलयंमेनिरेजनाः ॥ सञ्जहारतदास्त्रास्त्रमेकीभूतंपरास्त्रकम् ॥ ४७ ॥ तत्कर्मचाद्भुतं दृष्ट्वापुष्कलस्तिष्ठतिष्ठच ॥ ब्रुवञ्छरानमोघांस्तुचम्पकंसक्रुधाहनत ॥ ४८ ॥ चम्पकस्ताञ्छरान्मुक्तानगणय्यमहामनाः ॥ रामास्त्रंप्रमुमोचाथ पुष्कलंप्रतिदारुणम् ॥ ४९ ॥ तन्मुक्तमस्त्रमालोक्यचम्पकेनमहात्मना ॥ छेत्तुंयावन्मनश्चक्रेतावद्ग्रस्तःशरेणसः ॥ ५० ॥ बद्धश्चम्पकवीरेण रथेस्वेस्थापितःपुनः ॥ पुरंप्रेषयितुंतावन्मनश्चक्रेमहामनाः ॥ ५१ ॥ हाहाकारोमहानासीद्बद्धेपुष्कलसंज्ञके ॥ शत्रुघ्नंप्रययुर्योधाःपलायनप रायणाः ॥ ५२ ॥ भग्नांस्तान्वीक्ष्यशत्रुघ्नोहनूमन्तमुवाचह ॥ केनवीरेणमेभग्नंबलंवीरैरलङ्कृतम् ॥ ५३ ॥ तदोवाचमहीनाथपुष्कलंपरवीरहा ॥ वद्धानयतिवीरोऽसौचम्पकःस्वपदोद्धुरः ॥ ५४ ॥ तस्येदृग्वाक्यमाकर्ण्यशत्रुघ्नःकोपसंयुतः ॥ उवाचपवनोद्भूतंमोचयाशुनृपात्मजात् ॥ ५५ ॥ महाबलःसुतश्चास्यबद्धायःपुष्कलंभटम् ॥ तस्मान्मोचयवीराग्र्यकथंतिष्ठसिचाहवे ॥५६॥ एतद्वाक्यंसमाकर्ण्यहनूमानोमितिब्रुवन् ॥ जगामतंमोच यितुंपुष्कलंचम्पकाद्भटात् ॥ ५७ ॥ हनूमन्तमथालोक्यतंमोचयितुमागतम् ॥ बाणैःशतैश्चसाहस्रैर्जघानपरकोपनः ॥ ५८ ॥ बाणांस्तान्सबभञ्जा शुमुक्तांस्तेनमहात्मना ॥ पुनरप्येनमेवाशुबाणान्मुञ्चन्महानभूत् ॥ ५९ ॥ तान्सर्वांश्चूर्णयामासनाराचान्वैरिमोचितान् ॥ शालंकरेसमाधृत्य जघाननृपनन्दनम् ॥ ६० ॥ शालंतेनविनिर्मुक्तंतिलशःकृत्तवान्बली ॥ गजोहनूमतामुक्तोनृपनन्दनमस्तके ॥ ६१ ॥ सोऽप्याहतश्चम्पकेनमृतोभूमौ पपातसः ॥ शिलाःसंमोचयामासहनूमान्परमास्त्रवित् ॥ ६२ ॥ चम्पकस्ताःशिलाःसर्वाःक्षणाच्चूर्णितवान्भृशम् ॥ बाणयन्त्रिकयाब्रह्मन्महच्चित्रमभू दिदम् ॥ ६३ ॥ स्वमुक्तास्ताःशिलाःसर्वाश्चूर्णितावीक्ष्यमारुतिः ॥ चुकोपहृदयेऽत्यन्तंबहुवीर्यमितिस्मरन् ॥ ६४ ॥ आगत्यचकरेधृत्वानभस्यु त्पतितःकपिः ॥ तावद्ययौनेत्रपथादुपरिक्षिप्रवेगवान् ॥ ६५ ॥ चम्पकस्तंहनूमन्तंयुयुधेनभसिस्थितः ॥ बाहुयुद्धेनमहताताडितःकपिपुङ्गवः ॥ ॥ ६६ ॥ चुकोपमानसेवीरोगर्वपर्वतदारुणः ॥ पदाधृत्वाचम्पकंतंताडयामासभूतले ॥ ६७ ॥ ताडितोऽसौकपीन्द्रेणक्षणादुत्थायवेगवान् ॥ हनूम न्तंतुलाङ्गूलेधृत्वावभ्रामसर्वतः ॥ ६८ ॥ कपीन्द्रस्तद्बलंवीक्ष्यहसन्पादेऽग्रहीत्पुनः ॥ भ्रामयित्वाशतगुणंगजोपस्थेह्यपातयत् ॥ ६९ ॥ पपातभूमौ सुबलोराजसूनुःसचम्पकः ॥ मूर्छितोवीरभूषाढ्यमलङ्कुर्वन्रणाङ्गणम् ॥ ७० ॥ तदाहाहेतिवैलोकाश्चुक्रुशुश्चम्पकानुगाः ॥ पुष्कलंमोचयामासबद्धं चम्पकपाशतः ॥७१ ॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशेषवा०रामाश्व०पुष्कलमोचनंनामैकपञ्चाशत्तमोऽध्यायः ॥५१ ॥ शेषउवाच ॥ चम्पकं

१' वद्धः' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पतितंदृष्ट्वासुरथःक्षत्रियोबली ॥ पुत्रदुःखपरीताङ्गोजगामस्यन्दनेस्थितः ॥ १ ॥ कपीन्द्रमाजुहावाथसुरथःकोपसंयुतः ॥ निःश्वासांश्चबहून्मुञ्च
न्महाबलसमन्वितः ॥ २ ॥ आह्वयन्तंनृपंदृष्ट्वानिजंवीरःकपीश्वरः ॥ जगामतंमहावीरोमहावेगसमन्वितः ॥ ३ ॥ तमागतंहनूमन्तंतृणीकुर्वन्तमुद्भ
टान् ॥ उवाचसुरथोराजामेघगम्भीरसुस्वरः ॥ ४ ॥ सुरथउवाच ॥ धन्योऽसिकपिवर्यत्वंमहाबलपराक्रमः ॥ येनराममहत्कृत्यंकृतंराक्षसकेपुरे ॥
॥ ५ ॥ त्वंरामचरणस्यासिसेवकोभक्तिसंयुतः ॥ त्वयावीरेणमत्पुत्रःपातितश्चम्पकोबली ॥ ६ ॥ इदानींत्वांतुसम्बध्यगन्तास्मिनगरे
मम ॥ यत्नात्तिष्ठकपीशेशसत्यमुक्तंमयास्मृतम् ॥ ७ ॥ इतिभाषितमाकर्ण्यसुरथस्यकपीश्वरः ॥ उवाचधीरयावाण्यारणेवीरैकभूषितं ॥ ८ ॥
हनूमानुवाच ॥ त्वंरामचरणस्मारीवयंरामस्यसेवकाः ॥ बध्नासिचेन्मांप्रसभंमोचयिष्यतिमत्प्रभुः ॥ ९ ॥ कुरुवीरभवत्स्वान्तस्थितंसत्यं
प्रतिश्रुतम् ॥ रामंस्मरन्वैदुःखान्तंयातिवेदावदन्त्यदः ॥ १० ॥ शेषउवाच ॥ इतिब्रुवन्तंसुरथःप्रशस्यपवनात्मजम् ॥ विव्याधबाणैर्बहुभिः
शितैःशाणेनदारुणैः ॥११॥ तान्मुक्तानगणय्याथबाणाञ्छोणितपातिनः ॥ करेजग्राहकोदण्डंसज्यंशरसमन्वितम् ॥१२ ॥ गृहीत्वाकरयोश्चापंबभञ्ज
कुपितःकपिः ॥ चीत्कुर्वंस्त्रासयन्वीरान्नखैर्दीर्णान्सृजन्भटान् ॥ १३ ॥ तेनभग्नंधनुर्दृष्ट्वास्वकीयंगुणसंयुतम् ॥ अपरंधनुरादत्तमहद्गुणविशोभितम् ॥
॥ १४ ॥ तच्चापिजगृहेरोषात्कपिश्चापंबभञ्जतत् ॥ अन्यच्चापंसमादत्ततद्बभञ्जमहाबलः ॥ १५ ॥ तस्मिंश्चापेप्रभग्नेऽपिसोऽन्यद्धनुरुपाददे ॥ सोऽपि
चापंबभञ्जाशुमहावेगसमन्वितः ॥ १६ ॥ एवंराज्ञस्तुचापानामशीतिर्विदलीकृता ॥ क्षणेक्षणेमहारोषात्कुर्वन्नादाननेकधा ॥ १७ ॥ तदात्यन्तंप्रकुपि
तःशक्तिमुग्रामथाददे ॥ शक्त्यासताडितोवीरःपपातक्षणमुत्सुकः ॥ १८ ॥ उत्थायस्यन्दनंराज्ञोजग्राहकुपितोभृशम् ॥ उड्डीनस्तंगृहीत्वातुसमुद्रमति
वेगतः ॥ १९ ॥ तमुड्डीनंसमालक्ष्यसुरथःपरवीरहा ॥ ताडयामासपरिघैर्हृदिमारुतिमुद्यतम् ॥ २० ॥ मुक्तस्तेनरथोदूराच्चूर्णीभूतोऽभवत्क्षणात् ॥
सोऽन्यंरथंसमारुह्ययर्योवेगात्समीरजम् ॥ २१ ॥ हनूमांस्तद्रथंपुच्छेसंवेष्ट्यप्रधनाङ्गणे ॥ हयसारथिसंयुक्तंबभञ्जसपताकिनम् ॥ २२ ॥ अन्यंरथंस
मास्थाययर्यौराजामहाबलः ॥ बभञ्जतरथंवेगान्मारुतिःकुपिताङ्गकः ॥२३॥ भग्नंतंस्यन्दनंवीक्ष्यसुरथोऽन्यंसमाश्रितः ॥ भग्नःसतेनसहसाहयसारथिसं
युतः ॥ २४ ॥ एवमेकोनपञ्चाशद्रथाभग्नाहनूमता ॥ तत्कर्मवीक्ष्यराजापिस्मयंप्रापससैनिकः ॥ २५ ॥ कुपितःप्राहकीशेन्द्रंधन्योऽसिपवनात्मज ॥
पराक्रमन्त्विदंकर्मनकर्तानकरिष्यति ॥ २६ ॥ क्षणमेकंप्रतीक्षस्वयावत्सज्यंधनुस्त्वहम् ॥ करोमिपवनोद्भूतरामपादाब्जषट्पद ॥ २७ ॥ इत्युक्त्वा
चापमात्तज्यंकृत्वारोषपरिप्लुतः ॥ अस्त्रंपाशुपतंनामसंदधेशरउल्वणे ॥ २८ ॥ ततोभूताश्चवेतालाःपिशाचायोगिनीमुखाः ॥ प्रादुर्बभूवुःसहसाभीष

CC-0. In Public Domain. Digitization by eGangotri

यन्तःसमीरजम् ॥ २९ ॥ कपिःपाशुपतैरस्त्रैर्बद्धोलोकैरभीक्षितः ॥ हाहेतिचवदन्त्येतेयावत्तावत्समीरजः ॥ ३० ॥ स्मृत्वारामंस्वमनसात्रोटया
मासतत्क्षणात् ॥ समुक्तगात्रःसहसायुयुधेसुरथंनृपम् ॥ ३१ ॥ तंमुक्तगात्रंसंवीक्ष्यसुरथःपरमास्त्रवित्॥ महाबलंमन्यमानोब्राह्ममस्त्रंसमाददे ॥३२॥
मारुतिर्ब्राह्ममस्त्रंतुनिजगालहसन्बली ॥ तन्निगीर्णंनृपोदृष्ट्वारामंसस्मारभूमिपः ॥ ३३ ॥ स्मृत्वादाशरथिंरामंरामास्त्रंस्वशरासने ॥ सन्धायतंजगादेदं
बद्धोऽसिकपिपुङ्गव ॥ ३४ ॥ श्रुत्वातत्प्रक्रमेद्यावत्तावद्बद्धोरणाङ्गणे ॥ राज्ञारामास्त्रतोवीरोहनूमात्रामसेवकः ॥ ३५ ॥ उवाचभूपंहनुमान्किंकरोमि
महीपते ॥ मत्स्वाम्यस्त्रेणसम्बद्धोनान्येनप्राकृतेनवै ॥३६॥ तन्मानयामिभूपालनयस्वस्वपुरंप्रति ॥ मोचयिष्यतिमत्स्वामीआगत्यसदयानिधिः ॥
॥ ३७ ॥ बद्धेसमीरजेक्रुद्धःपुष्कलोभूमिपंययौ ॥ तंपुष्कलंसमायातंविव्याधबहुभिःशरैः ॥ ३८ ॥ अनेकबाणसाहस्रैर्निजघाननृपंबली ॥
राज्ञानेकेशरास्तस्यच्छिन्नाःप्रधनमण्डले ॥ ३९ ॥ एवंसमरसङ्क्रुद्धेसुरथेपुष्कलेतथा ॥ बाणैर्व्याप्तंजगत्सर्वंस्थास्नुभूयश्चरिष्णुच ॥ ४० ॥
तेषांरणोद्यमंवीक्ष्यमुमुहुःसुरसैनिकाः ॥ मानवानांतुकावार्ताक्षणात्रासंसमीयुषाम् ॥ ४१ ॥ अस्त्रप्रत्यस्त्रविगमैर्महामन्त्रपरिष्टुतैः ॥ बभूवतुमुलं
युद्धंवीराणांरोमहर्षणम् ॥ ४२ ॥ तदाप्रकुपितोराजानाराचंतुसमाददे ॥ छिन्नःसतुक्रुधामुक्तैर्वत्सदन्तैःसभारतेः ॥ ४३ ॥ छिन्नेतस्मिञ्छरेराजाकोपा
दन्यंसमाददे ॥ छिनत्तियावत्सशरंतावद्भग्नोहृदिक्षतः ॥ ४४ ॥ मूर्च्छांप्रापमहातेजाःपुष्कलोमहदद्भुतम् ॥ युद्धंविधायसुमहद्राज्ञासहमहामतिः ॥
॥ ४५ ॥ पुष्कलेपतितेराजाशत्रुघ्नःशत्रुतापनः ॥ सुरथंप्रतिसङ्क्रुद्धोजगामस्यन्दनस्थितः ॥ ४६ ॥ उवाचसुरथंभूपंरामभ्रातामहाबलः ॥ त्वया
महत्कृतंकर्मयद्बद्धःपवनात्मजः ॥ ४७ ॥ पुष्कलोऽपिमहावीरस्तथान्येममसैनिकाः ॥ पातिताःप्रधनेघोरेमहाबलपराक्रमाः ॥ ४८ ॥ इदानींतिष्ठ
मद्वीरान्पातयित्वारणाङ्गणे ॥ कुत्रयास्यसिभूमीशसहस्वममसायकान् ॥ ४९ ॥ इत्थमाश्रुत्यवीरस्यभाषितंसुरथोबली ॥ जगादरामपादाब्जंदधच्चे
तसिशोभनम् ॥५०॥ मयातेपातिताःसंङ्ख्येवीरामारुतजोन्मुखाः ॥ इदानींपातयिष्यामित्वामपिप्रधनाङ्गणे ॥ ५१ ॥ स्मरस्वरामंयोवीरस्त्वामा
गत्यप्ररक्षति ॥ अन्यथाजीवितंनास्तिमत्पुरःशत्रुतापन ॥५२॥ इत्युक्त्वाबाणसाहस्रैस्तंजघानमहीपतिः ॥ शत्रुघ्नंशरसङ्घातपञ्जरेन्यदधात्परम् ॥
॥ ५३ ॥ शत्रुघ्नःशरसङ्घातंमुञ्चन्तंवह्निदैवतम् ॥ अस्त्रंमुमोचदाहार्थंशराणांनतपर्वणाम् ॥ ५४ ॥ तदस्त्रंमुक्तमालोक्यराजावैसुरथोमहान् ॥ वारु ॥ ५८ ॥
णास्त्रेणशमयन्विव्याधशरकोटिभिः ॥ ५५ ॥ तदातद्योगिनीदत्तमस्त्रंधनुषिसन्दधे ॥ मोहनंसर्ववीराणांनिद्राप्रापकमद्भुतम् ॥ ५६ ॥ तन्मोहनंमहा
स्त्रंसवीक्ष्यराजाहरिंस्मरन् ॥ जगादशत्रुघ्नमयंसर्वशस्त्रास्त्रकोविदः ॥ ५७ ॥ मोहितस्यममश्रीमद्रामस्यस्मरणेनह ॥ नान्यन्मोहनमाभातिममापि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भयतापदम् ॥ ५८ ॥ इत्युक्तवतिवीरेतुसुमोचसमहास्त्रकम् ॥ तेनबाणेनसंछिन्नंपपातरणमण्डले ॥ ५९ ॥ तन्मोहनंमहास्त्रंतुनिष्फलंवीक्ष्यभूमिपे ॥
अत्यन्तंविस्मयंप्राप्यबाणंधनुषिसन्दधे ॥ ६० ॥ लवणोयेननिहतोमहासुरविमर्दनः ॥ तंबाणंचापआधत्तघोरंकान्त्यानलप्रभम् ॥ ६१ ॥ तंवी
क्ष्यराजाप्रोवाचबाणोऽयमसतांहृदि ॥ लगतेरामभक्तस्यसंमुखेऽपिनभात्यसौ ॥ ६२ ॥ इत्येवंभाषमाणंतुबाणेनानेनशत्रुहा ॥ विव्याधहृदयेक्षिप्रंव
ह्निज्वालासमप्रभम् ॥ ६३ ॥ तेनबाणेनदुःखार्तोमहापीडासमन्वितः ॥ रथोपस्थेक्षणंमूर्च्छामवापपरतापनः ॥ ६४ ॥ सक्षणात्तांव्यथांतीर्त्वाजगाद
रिपुमग्रतः ॥ सहस्वैकंप्रहारंमेकुत्रयासिममाग्रतः ॥ ६५ ॥ एवमुक्त्वामहासङ्ख्येबाणमाधत्तसायके ॥ ज्वालामालापरीताङ्गंस्वर्णपुङ्खसमन्वितम्॥
॥ ६६ ॥ सबाणोधनुषोमुक्तःशत्रुघ्नेनपथिस्थितः ॥ छिन्नोऽप्यग्रफलेनाशुहृदयेसमपद्यत ॥ ६७ ॥ तेनबाणेनसंमूर्छ्यपपातस्यन्दनोपरि ॥ ततोहाहा
कृतंसैन्यंभग्नंसर्वंपराद्रवत् ॥ ६८॥ सुरथोजयमापेदेसङ्ग्रामेरामसेवकः ॥ दशवीरादशसुतैर्मूर्च्छिताःपतिताःक्वचित् ॥ ६९ ॥ इतिश्रीपाद्मेमहापुराणे
पातालखण्डेशेषवा०रामाश्व०सुरथविजयोनामद्विपञ्चाशत्तमोऽध्यायः ॥५२॥ शेषउवाच ॥ सुग्रीवस्तच्चकटकंभग्नंवीक्ष्यरणाङ्गणे॥ स्वामिनंमूर्च्छितं
वापिययौयोद्धुंनृपंप्रति ॥ १ ॥ आगच्छभूपसर्वान्नोमूर्च्छयित्वाकुतोभवान् ॥ गच्छतिक्षिप्रंमेदेहियुद्धंरणविशारद ॥ २ ॥ एवमुक्त्वानगंकंचिद्वि
शालंशाखयायुतम् ॥ उत्पाट्यप्राहरत्तस्यमस्तकेबलसंयुतः ॥ ३ ॥ तेनप्रहारेणमहाबलोनृपःसंवीक्ष्यसुग्रीवमथोस्वचापे ॥ बाणान्समाधायशितान्स
रोषाज्जघानवक्षस्यतिपौरुषोबली ॥ ४ ॥ तान्बाणान्व्यधमत्सर्वान्सुग्रीवःसहसाहसन् ॥ ताडयामासहृदयेसुरथंसुमहाबलः ॥ ५ ॥ पर्वतैःशिखरै
श्चैवनगैर्द्विरदवर्ष्मभिः ॥ वेगात्सन्ताडयामाससदारयन्सुरथंनखैः ॥ ६ ॥ तमप्याशुबबन्धास्त्राद्रामसंज्ञात्सुदारुणात् ॥ बद्धःकपिवरोमेनेसुरथंरामसे
वकम् ॥ ७ ॥ गजोयथाऽऽयसमयीं शृङ्खलांपादलम्बिताम् ॥ प्राप्यकिञ्चिन्नवैकर्तुशक्नोतिसतथाह्यभूत् ॥ ८ ॥ जितंतेनमहाराजासुरथेनसुपत्रिणा ॥
सर्वान्वीरान्रथेस्थाप्यययौस्वनगरंप्रति ॥ ९ ॥ गत्वासभायांसुमहान्बद्धंमारुतिमब्रवीत् ॥ स्मरश्रीरघुनाथंत्वंदयालुंभक्तपालकम् ॥ १० ॥ यथा
त्वांबन्धनात्सद्योमोचयिष्यतितुष्टधीः ॥ नान्यथाऽयुतवर्षेणमोचयिष्यामिबन्धनात् ॥ ११ ॥ इत्युक्तमाकर्ण्यसमीरजस्तदासुबद्धमात्मानमवेक्ष्य
वीरान् ॥ संमूर्च्छिताञ्छत्रुशराभिघातपीडायुतान्बन्धनमुक्तयेऽस्मरत् ॥ १२ ॥ श्रीरामचन्द्रंरघुवंशजातंसीतापतिंपङ्कजपत्रनेत्रम् ॥ स्वमुक्तयेबन्ध
नतःकृपालुंसस्मारसर्वैःकरणैर्विशोकैः ॥ १३ ॥ हनूमानुवाच ॥ हानाथहानरवरोत्तमहादयालोसीतापतेरुचिरकुन्तलशोभिवक्र ॥ भक्तार्तिदाहक
मनोहररूपधारिन्मांबन्धनात्सपदिमोचयमाविलम्बम् ॥ १४ ॥ संमोचितास्तुभवतागजपुङ्गवाद्यादेवाश्चदानवकुलाग्निसुदह्यमानाः ॥ तत्सुन्दरी

CC-0. In Public Domain. Digitization by eGangotri

 शिरसिसंस्थितकेशबन्धःसंमोचितस्तुकरुणालयमांस्मरस्व ॥ १५ ॥ त्वंयागकर्मनिरतोऽसिमुनीश्वरेन्द्रैर्धर्मंविचारयसिभूमिपतीडचपाद ॥
 अत्राहमद्यसुरथेनविगाढपाशबद्धोऽस्मिमोचयमहापुरुषाशुदेव ॥ १६ ॥ नोमोचयस्यथयदिस्मरणातिरेकात्त्वंसर्वदेववरपूजितपादपद्म ॥ लोकोभव
न्तमिदमुच्छसितोऽहसिष्यत्तस्माद्विलम्बमिहमाऽऽचरमोचयाशु ॥ १७ ॥ इतिश्रुत्वाजगन्नाथोरघुवीरःकृपानिधिः ॥ भक्तंमोचयितुंप्रागात्पुष्पकेणाशु
वेगिना ॥ १८ ॥ लक्ष्मणेनानुगेनाथभरतेनसुशोभितम् ॥ मुनिवृन्दैर्व्यासमुख्यैःसमेतंददृशेकपिः ॥१९॥ तमागतंनिजंनाथंवीक्ष्यभूपंसमब्रवीत्॥पश्य
राजन्निजंमोक्तुमायातंकृपयाहरिम् ॥२०॥ अनेकेमोचिताःपूर्वंस्मरणात्सेवकानिजाः ॥ तथामांपाशतोबद्धंसंमोचयितुमागतः ॥२१॥ श्रीरामभद्रमा
यान्तंवीक्ष्यासौसुरथःक्षणात् ॥ नतीश्चशतशश्चक्रेभक्तिपूरपरिप्लुतः ॥२२॥ श्रीरामस्तंनिजैर्दोर्भिःपरिरेभेचतुर्भुजः॥मूर्ध्निसिञ्चन्नश्रुजलैर्हर्षाद्भक्तंस्वकं
मुहुः ॥ २३ ॥ उवाचधन्यदेहोऽसिमहत्कर्मकृतंत्वया ॥ कपीश्वरस्त्वयाबद्धोहनूमान्सर्वतोबलः ॥ २४ ॥ श्रीरामःकपिवर्यंतंमोचयामासबन्धनात् ॥
मूर्छितांस्तान्भटान्सर्वान्वीक्ष्यदृष्ट्यास्वजीवयत् ॥ २५ ॥ तेमूर्च्छांतत्यजुर्दृष्ट्वारामेणासुरघातिना ॥ उत्थितादद‍ृशुःश्रीमद्रामचन्द्रंमनोरमम् ॥ २६ ॥
प्रणतास्तेरघुपतिंतेनपृष्टाअनामयम् ॥ सुखीभूतानृपंप्रोचुःसर्वंस्वकुशलंनृपाः ॥ २७ ॥ सुरथोवीक्ष्यरामंचकृपार्थंसेवकात्मनः ॥ आगतंसकलंराज्यं
सहयंसुसुदार्पयत् ॥ २८ ॥ अनेकवरिवस्याभिःश्रीरामंसमतोषयत् ॥ कथयामासमेऽन्याय्यंकृतंतेक्षमराघव ॥ श्रीरामस्तमुवाचाथकृतंतेवाह
रक्षणम् ॥ २९ ॥ श्रीरामउवाच ॥ क्षत्रियाणामयंधर्मःस्वामिनासहयुद्ध्यते ॥ त्वयासाधुकृतंकर्मरणेवीराःप्रतोषिताः ॥ ३० ॥ इत्युक्तवन्तंनृहरिंपूज
यन्ससुतोऽभवत् ॥ श्रीरामस्त्रिदिनंस्थित्वाययौतमनुमन्त्र्यच ॥ ३१ ॥ कामगेनविमानेनमुनिभिःसहितोमहान् ॥ तंदृष्ट्वाविस्मितास्तस्यकथाश्चक्रुर्म
नोहराः ॥ ३२ ॥ चम्पकंस्वपुरेस्थाप्यसुरथःक्षत्रियोबली ॥ शत्रुघ्नेनसमंयातुंमनश्चक्रेमहाबलः ॥ ३३ ॥ शत्रुघ्नःस्वहयंप्राप्यभेरीनादानकारयत् ॥
शङ्खनादान्बहुविधान्सर्वत्रसमवादयत् ॥ ३४ ॥ सुरथेनसमंवीरोयज्ञवाहममूमुचत् ॥ सब्रामापरान्देशान्नकोऽपिजगृहेबली ॥ ३५ ॥ यत्रयत्रग
तोवाहस्तत्रतत्रपरिभ्रमन् ॥ सैन्येनमहतायातःशत्रुघ्नःसुरथेनच ॥ ३६ ॥ कदाचिज्जाह्नवीतीरेवाल्मीकेराश्रमंवरम् ॥ गतोमुनिवरैर्जुष्टंप्रातर्धूमेनचिह्नि
तम् ॥ ३७ ॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशेषवा०रामाश्व०रघुनाथसमागमोनामत्रिपञ्चाशत्तमोऽध्यायः ॥५३॥ शेषउवाच ॥ गतःप्रातःक्रियां
कर्तुंसमिधस्तत्क्रियार्हकाः ॥ आनेतुंजानकीसूनुर्वृतोमुनिसुतैर्लवः ॥ १ ॥ ददर्शतत्रयज्ञाश्वंस्वर्णपत्रेणचिह्नितम् ॥ कुङ्कुमागरुकस्तूरीदिव्यगन्धेन
वासितम् ॥ २ ॥ विलोक्यजातकुतुकोमुनिपुत्रानुवाचसः ॥ अर्वाकस्यमनोवेगःप्रातोदैवान्मदाश्रमम् ॥ ३ ॥ आगच्छन्तुमयासार्धंप्रेक्षन्तांमाभयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृथाः ॥ इत्युक्त्वासलवस्तूर्णंवाहस्यनिकटेगतः ॥४॥ सरराजसमीपस्थोवाहस्यरघुवंशजः ॥ धनुर्बाणधरःस्कन्धेजयन्तइवदुर्जयः ॥ ५ ॥ गत्वा
मुनिसुतैःसार्धंवाचयामासपत्रकम् ॥ भालस्थितंस्पष्टवर्णराजिराजितमुत्तमम् ॥ ६ ॥ विवस्वतोमहान्वंशःसर्वलोकेषुविश्रुतः ॥ यत्रकोऽपिपराबा
धीनपरद्रव्यलम्पटः ॥ ७ ॥ सूर्यवंशध्वजोधन्वीधनुर्दीक्षागुरुर्गुरुः ॥ यंदेवाःसानुगाःसर्वेनमन्तिमणिमौलिभिः ॥ ८॥ तस्यात्मजोवीरबलदर्पहारी
रघूद्वहः ॥ रामचन्द्रोमहाभागःसर्वशूरशिरोमणिः ॥९॥ तन्माताकोशलनृपपुत्रीरत्नसमुद्भवा ॥ तस्याःकुक्षिभवंरत्नंरामःशत्रुक्षयङ्करः ॥१०॥ करोति
हयमेधंसब्राह्मणेनसुशिक्षितः ॥ रावणाभिधविप्रेन्द्रवधपापानुत्तये ॥ ११ ॥ मोचितस्तेनवाहानांमुख्योऽसौयाज्ञिकोहयः ॥ महाबलपरीवार
परिखाभिःसुरक्षितः ॥ १२ ॥ तद्रक्षकोऽस्तिमद्भ्राताशत्रुघ्नोलवणान्तकः ॥ हस्त्यश्वरथपादातसङ्घसेनासमन्वितः ॥ १३ ॥ यस्यराज्ञइतिश्रेष्ठोमानो
जायेत्स्वकान्मदात् ॥ शूरावयंधनुर्धारिश्रेष्ठावयमिहोत्कटाः ॥१४॥ तेगृह्णन्तुबलाद्वाहंरत्नमालाविभूषितम्॥मनोवेगंकामजवंसर्वगत्याधिभास्वरम् ॥
॥ १५ ॥ ततोमोचयिताभ्राताशत्रुघ्नोलीलयाहठात् ॥ शरासनविनिर्मुक्तवत्सदन्तकृतव्यथात् ॥ १६ ॥ येक्षत्रियाःक्षत्रियकन्यकायांजाताश्चसत्क्षेत्र
कुलेषुसत्सु ॥ गृह्णन्तुतेतद्विपरीतदेहानमन्तुराज्यंरघवेनिवेद्य ॥१७॥ इतिसंवाच्यकुपितोलवःशस्त्रधनुर्धरः ॥ उवाचमुनिपुत्रांस्तात्रोषगद्गदभाषितः ॥
॥ १८ ॥ पश्यतक्षिप्रमेतस्यधृष्टत्वंक्षत्रियस्यवै ॥ लिलेखयोभालपत्रेस्वप्रतापबलंनृपः ॥१९॥ कोऽसौरामःकशत्रुघ्नःकीटाःस्वल्पबलाश्रिताः ॥ क्षत्रि
याणांकुलेजाताएतेनवयमुत्तमाः ॥ २० ॥ एतस्यवीरसूर्माताजानकीनकुशप्रसूः ॥ यारत्नंकुशसंज्ञंतुदधाराग्निमिवारणिः ॥ २१ ॥ इदानींक्षत्रिय
त्वादिदर्शयिष्यामिसर्वतः ॥ यदिक्षत्रियभूरेषभविष्यतिचशत्रुहा ॥ २२ ॥ गृहीष्यतिमयाबद्धंवाहंयज्ञक्रियोचितम् ॥ नोचेत्क्षत्रत्वमुन्मुच्यकुशस्य
चरणार्चकः ॥ २३ ॥ अधुनामद्धनुर्मुक्तैःशरैःसुप्तोभविष्यति ॥ अन्येयेचमहावीरारणमण्डलभूषणाः ॥ २४ ॥ इत्यादिवाक्यमुच्चार्यलवोजग्राहतं
हयम् ॥ तृणीकृत्यनृपान्सर्वांश्चापबाणधरोवरः ॥ २५ ॥ तदामुनिसुताःप्रोचुर्लवंहयजिहीर्षकम् ॥ अयोध्यानृपतीरामोमहाबलपराक्रमः ॥ २६ ॥
तस्यवाहंनगृह्णातिशक्रोऽपिस्वबलोद्धतः ॥ मागृहाणशृणुष्वेदंमद्वाक्यंहितसंयुतम् ॥ २७ ॥ इत्युक्तंसश्रुतौधृत्वाजगादसद्विजात्मजान् ॥ यूयंबलंन
जानीथक्षत्रियाणांद्विजोत्तमाः ॥ २८ ॥ क्षत्रियावीर्यशौण्डीर्याद्विजाभोजनशालिनः ॥ तस्माद्यूयंगृहेगत्वाभुञ्जन्तुजननीहृतम् ॥ २९ ॥ इत्युक्तास्ते
ऽभवंस्तूष्णींप्रेक्षन्तस्तत्पराक्रमम् ॥ लवस्यमुनिपुत्रास्तेसन्तस्थुर्दूरतोबहिः ॥ ३० ॥ एवंव्यतिकरेवृत्तेसेवकास्तस्यभूपतेः ॥ आयातास्तंहयंबद्धंदृष्ट्वा
प्रोचुस्तदालवम् ॥ ३१ ॥ बबन्धकोहयमहोरुष्टःकस्यचधर्मराट् ॥ कोबाणव्रजमध्यस्थःप्राप्स्यतेपरमांव्यथाम् ॥ ३२ ॥ तदालवोजगादाशुमया

बद्धोऽश्वउत्तमः ॥ योमोचयतितस्याशुरुष्टोभ्राताकुशोमहान् ॥ ३३ ॥ यमःकरिष्यतिकिमुह्यागतोऽपिस्वयंप्रभुः ॥ नत्वागमिष्यतिक्षिप्रंशरवृष्ट्या
सुतोषितः ॥ ३४ ॥ शेषउवाच ॥ इतिवाक्यंसमाकर्ण्यबालोऽयमितितेऽब्रुवन् ॥ समागतामोचयितुंहयंबद्धंतुयेहरेः ॥ ३५ ॥ तान्वैमोचयितुं
प्राप्तान्छत्रुघ्नस्यचसेवकान् ॥ कोदण्डंकरयोर्धृत्वाक्षुरप्रान्सममूमुचत् ॥३६॥ तेच्छिन्नबाहवःशोकाच्छत्रुघ्नंप्रतिसङ्गताः ॥ पृष्टास्तेजगदुःसर्वेलवात्स्व
भुजकृन्तनम् ॥ ३७ ॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशेषवा०रामाश्व०लवेनहयबन्धनंनामचतुष्पञ्चाशत्तमोऽध्यायः ॥ ५४ ॥ व्यास
उवाच ॥ एतांश्रुत्वाकथांरम्यांलवस्यबलिनोमुनिः ॥ संशयानःपर्यपृच्छन्नागंदशशताननम् ॥ १ ॥ श्रीवात्स्यायनउवाच ॥ त्वयो
क्तंतुपुरारामःसीतामेकाकिनींवने ॥ रजकस्यदुरुक्त्यासौतत्याजमहिलोलुपः ॥ २ ॥ जानक्यांक्वसुतौजातौक्वधनुर्धरतांगतौ ॥ कथंचशिक्षिता
विद्यायोराममहयमाहरत् ॥ ३ ॥ व्यासउवाच ॥ इतिश्रुत्वामुनेर्वाक्यंशेषोनागोमहामतिः ॥ प्रशस्यविप्रंजगदेरामचारित्रमद्भुतम् ॥ ४ ॥
शेषउवाच ॥ रामोराज्यमयोध्यायांभ्रातृभिःसहितोऽकरोत् ॥ धर्मेणपालयन्सर्वंक्षितिखण्डंस्वयास्त्रिया ॥ ५ ॥ सीतादधारतद्वीर्यंमासाःपञ्चाभवंस्त
दा ॥ अत्यन्तंशुशुभेदेवीत्रयीवपुरुषन्धरा ॥ ६ ॥ कदाचित्समयेरामःपप्रच्छचविदेहजाम् ॥ कीदृशोदोहदःसाध्विमयातेसाध्यतेहिसः ॥ ७ ॥
रहस्येवतुसापृष्टात्रपमाणापतिंसती ॥ लज्जागद्गदवाग्रामंनिजगादवचोऽमृतम् ॥ ८ ॥ सीतोवाच ॥ त्वत्कृपातोमयासर्वंभुक्तंभोक्ष्यामिशोभनम् ॥
नकश्चिन्मानसेकान्तविषयोह्यतिरिच्यते ॥ ९ ॥ यस्याभवादृशःस्वामीदेवसंस्तुतसत्पदः ॥ तस्याःसर्वंवरीवर्तिनकिञ्चिदवशिष्यते ॥ १० ॥ त्वमा
ग्रहात्पृच्छसिमांदोहदंमनसिस्थितम् ॥ ब्रवीमिपुरतःसत्यंतवस्वामिन्मनोहर ॥ ११ ॥ चिरंजातंमयासत्योलोपामुद्रादिकाःस्त्रियः॥दृष्टाःस्वामिन्म
नोद्घुंताउत्सुकतिसुन्दरीः ॥ १२ ॥ राज्यंप्राप्तात्वयासार्द्धमनेकसुखमास्थिता ॥ कृतघ्नाहंकदापीहतानमस्कर्तुमानसा ॥ १३ ॥ तत्रगत्वातपःकोशा
न्वस्त्राद्यैःपरिपूजये॥रत्नानिचैवभास्वन्तिभूषाअपिसमर्पये ॥१४॥ यथामेतोषिताःसत्योददत्याशीर्मनोहराः ॥ एषमेदोहदःकान्तपरिपूरयमानसम् ॥
॥ १५ ॥ इत्थमाकर्ण्यवचनंसीतायाःसुमनोहरम्॥जगादपरमप्रीतोरामचन्द्रःप्रियांप्रति ॥१६॥ धन्यासिजानकिप्रातर्गमिष्यसितपोधनाः॥प्रक्ष्यता
स्तुकृतार्थात्वमागमिष्यसिमेऽन्तिकम् ॥१७॥इतिरामवचःश्रुत्वापरसांप्रीतिमापसा ॥ प्रातर्ममभवत्यद्धातापसीनांसमीक्षणम् ॥ १८ ॥ अथतन्निशि
रामेणचाराःकीतनिजांश्रुताम् ॥ प्रेक्षितुंप्रेषितास्तेतुनिशीथेह्यगमञ्छनैः ॥ १९ ॥ तेप्रत्यहंरामकथाःशृण्वन्तःसुमनोहराः ॥ तद्दिनेगतवन्तस्तु
धनाढ्यस्यगृहंमहत् ॥ २० ॥ दीपंवीक्ष्यप्रज्वलन्तंवचनंवीक्ष्यमानुषम् ॥ स्थितास्तत्रक्षणंचाराःसमशृण्वन्यशोभृशम् ॥ २१ ॥ तत्रकाचनवामाक्षी

बालकंप्रतिहर्षिता ॥ स्तनन्धयंतंनिजगौवाक्यंतुसुमनोहरम् ॥ २२ ॥ पिबपुत्रयथेष्टंत्वंस्तन्यंमममनोहरम् ॥ पश्चात्तवसुदुष्प्रापंभविष्यतिममा
त्मज ॥ २३ ॥ एतत्पुर्याःपतीरामोनीलोत्पलदलप्रभः ॥ तत्पुरीस्थजनानांतुनभविष्यतिवैजनुः ॥ २४ ॥ जन्माभावात्कथंपानंस्तन्यस्यसुवि
जायते ॥ तस्मात्पिबमुहुःस्तन्यंदुर्लभंह्यदिमन्यच ॥ २५ ॥ यश्रीरामंस्मरिष्यन्तिध्यायन्तिचवदन्तिये ॥ तेषामपिपयःपानंनभविष्यतिजातुचित् ॥
॥ २६ ॥ इत्यादिवाक्यंसंश्रुत्यश्रीरामयशसोऽमृतम् ॥ हर्षिताःप्रययुर्गेहमन्यद्भाग्यवतोमहत् ॥ २७ ॥ तावदन्यश्चरस्तत्रमनोरममिदंगृहम् ॥ मत्वा
तिष्ठन्हिरामस्यशुश्रूषुर्यशसःक्षणम् ॥ २८ ॥ तत्रकाचिन्निजंकान्तंपर्यङ्कोपरिसुस्थितम् ॥ ताम्बूलंचर्वतींदत्तंभर्त्रास्नेहेनसुन्दरी ॥ २९ ॥ कङ्कणस्वर
शोभाढ्याकर्पूरागरुधूपिता ॥ कान्तंवीक्ष्यचलन्नेत्राकामरूपमवोचत ॥ ३० ॥ नाथत्वंतादृशोमह्यंभासियादृग्रघोःपतिः ॥ अत्यन्तंसुन्दरतरंवपुर्बिभ्र
त्सुकोमलम् ॥ ३१ ॥ पद्मप्रान्तंनेत्रयुग्मंवक्षोमोहनविस्तृतम् ॥ भुजौचसाङ्गदौबिभ्रत्साक्षाद्रामइवासिमे ॥ ३२ ॥ इतिवाक्यंसमाकर्ण्यकान्तायाः
सुमनोहरम् ॥ उवाचनेत्रयोःप्रान्तंनर्तयन्कामसुन्दरः ॥ ३३ ॥ शृणुकान्तत्वयाप्रोक्तंसाध्व्यातुसुमनोहरम् ॥ पतिव्रतानांतद्योग्यंस्वकान्तोराम
एवहि ॥ ३४ ॥ परंक्वाहंमन्दभाग्यःक्वरामोभाग्यवान्महान् ॥ क्वाहंकीटवत्तुच्छःक्वब्रह्मादिसुरार्चितः ॥ ३५ ॥ खद्योतःक्वनभोरत्नंशलभःक्वनु
पामरः ॥ गजारिःक्वमृगेन्द्रोऽसौशशकःक्वनुमन्दधीः ॥ ३६ ॥ क्वचसाजाह्नवीदेवीक्वरथ्याजलमुत्पथम् ॥ क्वमेरुःसुरसंवासःक्वगुञ्जापुञ्जको
ऽल्पकः ॥ ३७ ॥ तथाहंक्वक्वरामोऽसौयत्पादरजसाङ्गना ॥ शिलीभूताक्षणाज्जाताब्रह्ममोहनरूपधृत् ॥ ३८ ॥ इतिवाक्यंप्रब्रुवाणंपरिरेभेनिजं
पतिम् ॥ जातकामाहृतप्रेम्णानर्तित धनुर्धरा ॥ ३९ ॥ इत्यादिवाक्यंसंश्रुत्यगतश्चान्यनिवेशनम् ॥ तावदन्यश्चरोवाक्यंशुश्रावयशसान्वितम् ॥ ४० ॥
काचित्पुष्पमयींशय्यांचन्दनंसहचन्द्रकम् ॥ सवविधायकामाहजगादवचनंपतिम् ॥ ४१ ॥ पतेकुरुष्वभोगार्हेशयनंपुष्पमञ्चके ॥ चन्दनादिकलेपंच
तथाभोगमनेकधा ॥ ४२ ॥ वादृशाएवभोगार्हानचरामपराङ्मुखाः ॥ सर्वंरामकृपाप्राप्तमुपभुङ्क्ष्वयथातथम् ॥ ४३ ॥ मत्सदृशीकामिनीतेचन्दनंताप
हारकम् ॥ पर्यङ्कःपुष्परचितःसर्वंरामकृपाभवम् ॥ ४४ ॥ येरामंनभजिष्यन्तितेनराजठरंस्वयम् ॥ नभर्तुंशक्नुवन्त्येववस्त्रभोगादिवर्जिताः ॥ ४५ ॥ इति
ब्रुवन्तींमहिलांहर्षितःपतिरब्रवीत् ॥ सर्वंतथ्यंब्रवीषित्वंममरामकृपाभवम् ॥ ४६ ॥ इत्येवंरामभद्रस्ययशःश्रुत्वागतश्चरः ॥ तावदन्यस्यवेश्मस्थश्चरोऽन्यः
शुश्रुवेवचः ॥ ४७ ॥ काचित्कान्तेनपर्यङ्केवीणावादनतत्परा ॥ कान्तेनरामसत्कीर्तिंगायमानापतिंजगौ ॥ ४८ ॥ स्वामिन्वयंधन्यतमायेषांपुर्याःपतिः
प्रभुः ॥ श्रीरामःस्वप्रजाःपुत्रानिवपातिचरक्षकः ॥ ४९ ॥ योमहत्कर्मदुःसाध्यंकृतवान्सुलभंनतत् ॥ समुद्रंयोनिजग्राहसेतुंतत्रबबन्धच ॥ ५० ॥ रावणंयोरिपुं

CC-0. In Public Domain. Digitization by eGangotri

हत्वालङ्कांसम्भज्यवानरैः ॥ जानकीमाजहारात्रमहदाचारमाचरत् ॥ ५१ ॥इतिप्रोक्तंसमाकर्ण्यवचःसुमधुराक्षरम् ॥पतिःस्मितंचकारेमांवाक्यंपुनर
थाब्रवीत्॥५२॥मुग्धेनेदंमहत्कर्मरामचन्द्रस्यभामिनि॥दशाननवधादीनिसमुद्रदमनानिच॥५३॥लीलयायोऽवनिंप्राप्तोब्रह्मादिप्रार्थितोमहान्॥करोति
सच्चरित्राणिमहापापहराणिच ॥५४॥ माजानीहिनरंरामंकौसल्यानन्ददायकम् ॥सृजत्यवतिहन्त्येतद्विश्वंलीलात्तमानुषः ॥५५॥ धन्यावयंयेरामस्य
पश्यामोमुखपङ्कजम्॥ब्रह्मादिसुरदुर्दर्शंमहापुण्यकृतोवयम् ॥५६॥ अशृणोद्रामचन्द्रस्यचरित्रंश्रुतिसौख्यदम् ॥इत्यादिवाक्यंशुश्रावचारोद्वारिस्थितो
मुहुः ॥५७॥ अन्योह्यन्यगृहंगत्वातस्थौश्रोतुंहरेर्यशः ॥ तत्रापिरामभद्रस्ययशःशुश्रावशोभनम् ॥ ५८ ॥ खेलन्तीस्वामिनासार्धंद्यूतेनसुमनोहरा ॥
उवाचवाक्यंमधुरंनर्तयन्तीवकङ्कणे ॥ ५९ ॥ जितंमयाकान्तजवेनसवकंरिष्यसित्वंकिमुहारिमानसः ॥ इत्यादिवाक्यंपरिहासपूर्वकंकृत्वास्वकान्तं
परिषस्वजेमुदा ॥ ६० ॥ उवाचकान्तश्चार्वङ्गिजितमेवसुशोभने ॥ रामंमेस्मरतोनित्यंनकुत्रापिपराजयः ॥६१ ॥ इदानींत्वांतुजेष्यामिरामंस्मृत्वा
मनोहरम् ॥ देवायथापुरास्मृत्वादितिजानजयन्क्षणात् ॥६२॥ एवमुक्त्वापाशकानांपरिवर्तनमाकरोत् ॥ तावज्जयंप्रपेदेऽसौहर्षितोवाक्यमब्रवीत ॥
॥ ६३ ॥ ममप्रोक्तमृतंजातंजितात्वंनवयौवना ॥ रामस्मारीकदाप्येवनभवेद्रिपुतोभयी ॥ ६४ ॥ इत्येवंतौवदन्तौचपरस्परमथोत्सुकौ ॥ परि
रभ्यदृढंप्रेम्णाततश्चारोगतोगृहम् ॥ ६५ ॥ एवंपञ्चमहाचाराराज्ञःसंश्रुत्यवैयशः ॥ परस्परंप्रशंसन्तोगेहंस्वंस्वंययुर्मुदा ॥ ६६ ॥ एकःषष्ठश्चरः
कारुगेहानालोक्यतत्रह ॥ जगामश्रोतुकामोऽसौयशोराज्ञोमहीपतेः ॥ ६७ ॥ रजकःक्रोधसंस्पृष्टोभार्यामन्यगृहोषिताम् ॥ पदासन्ताडयामास
धिक्कुर्वञ्छोणनेत्रवान् ॥ ६८ ॥ गच्छत्वंमद्गृहात्तस्यगेहंयत्रोषितादिनम् ॥ नाहंगृह्णामिभवतींदुष्टांवचनलङ्घिनीम् ॥ ६९ ॥ तदास्यमाताप्रोवाचमा
त्यजैनांगृहागताम् ॥ अपराधेनरहितांदुष्टकर्मविवर्जिताम् ॥ ७० ॥ मातरंप्रत्युवाचाथरजकःक्रोधसंयुतः ॥ नाहंरामइवप्रेष्ठांगृह्णाम्यन्यगृहोषिताम् ॥
॥ ७१ ॥ सराजायत्करोत्येवतत्सर्वंनीतिमद्भवेत् ॥ अहंगृह्णामिनोभार्यांपरवेश्मनिसंस्थिताम् ॥ ७२ ॥ पुनःपुनरुवाचेदंनाहंरामोमहीश्वरः ॥ यः
परस्यगृहेसंस्थांजानकींवैररक्षसः ॥ ७३ ॥ इतिवाक्यंसमाश्रुत्यचारःक्रोधपरिप्लुतः ॥ खड्गंगृहीत्वास्वकरेतंहन्तुंविदधेमनः ॥ ७४ ॥ सरामोक्तंच
सस्मारनवध्यःकोऽपिमेजनः ॥ इतिज्ञात्वासरोषंतुसञ्जहारमहामनाः ॥ ७५ ॥ तदाश्रुत्वासुदुःखार्तःपञ्चचारायतःस्थिताः ॥ ततोगतःप्रकुपितो
निःश्वसन्मुहुरुच्छ्वसन्॥७६॥ तेवैपरस्परंतत्रमिलितास्तुसमब्रुवन् ॥स्वश्रुतंरामचरितंसर्वलोकैकपूजितम्॥७७॥ तेतद्भाषितमाकर्ण्यपरस्परममन्त्रयन् ॥

१ 'धनं त्वदीयं ग्लहरूपितं यत्' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नवाच्यंरघुनाथायावाच्यंदुष्टजनोदितम् ॥ ७८ ॥ इतिसंमन्त्र्यतेगेहंगत्वासुषुपुरुत्सुकाः ॥ प्राताराज्ञेप्रशंसामइतिबुद्ध्याव्यवस्थिताः ॥ ७९ ॥
इतिश्रीपाद्मेमहापुराणेपातालखण्डेशेषवा०रामाश्व०चारनिरीक्षणंनामपञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥ शेषउवाच ॥ प्रातर्नित्यंविधायासौब्राह्म
णान्वेदवित्तमान् ॥ हिरण्यदानैःसन्तर्प्यविधिवत्संसदंययौ ॥ १ ॥ लोकाःसर्वेनमस्कर्तुंरघुनाथंमहीपतिम् ॥ पुत्रवत्स्वप्रजाःसर्वाःपालयन्तं
ययुःसभाम् ॥ २ ॥ लक्ष्मणेनातपत्रंतुधृतंमूर्धनिभूपतेः ॥ तदाभरतशत्रुघ्नौचामरद्वन्द्वधारिणौ ॥ ३ ॥ वसिष्ठप्रमुखास्तत्रमुनयःपर्युपासत ॥
सुमन्तप्रमुखास्तत्रमन्त्रिणोन्[1]यायकर्तृकाः ॥ ४ ॥ एवंप्रवृत्तेसमयेषट्चारास्तेस्वलङ्कृताः ॥ समाजग्मुर्नरपतिंनमस्कर्तुंसभास्थितम् ॥ ५ ॥ तान्वक्तु
कामान्संवीक्ष्यचारान्नृपतिसत्तमः ॥ सभायामन्तरावेश्मरहःप्राविशदुत्सुकः ॥ ६ ॥ एकान्तेतांश्चरान्सर्वान्पप्रच्छसुमतिर्नृपः ॥ कथयन्तु
चरामह्यंयथातथ्यमरिन्दमाः ॥ ७ ॥ लोकाब्रुवन्तिमेकीदृग्भार्यायाममकीदृशम् ॥ मन्त्रिणांकीदृशंलोकावदन्तिचरितंकथम् ॥ ८ ॥ इतिवाक्यं
समाकर्ण्यचारारामममथाब्रुवन् ॥ मेघगम्भीरयावाचापृच्छन्तंरघुनायकम् ॥ ९ ॥ चाराऊचुः ॥ नाथकीर्तिर्जनान्सर्वान्पावयत्यधुनाभुवि ॥
गृहेगृहेश्रुतास्माभिःपुरुषैःस्त्रीभिरीडिता ॥१०॥ विवस्वतोमहावंशंभवतापरमेष्ठिना॥ अलङ्कर्तुंगतंभूमौकीर्तिर्विस्तारिताबहुः ॥११॥ अनेकेसगराद्या
श्चकीर्तिमन्तोमहाबलाः ॥ अभवंस्तादृशीकीर्तिस्तेषांनाभूद्यथातव ॥१२॥ त्वयानाथेनसकलाःकृतार्थाश्चप्रजाःकृताः ॥ यासांनाकालमरणंनचरोगाद्यु
पद्रुतिः ॥१३॥यादृशश्चन्द्रमालोकेयादृशीजाह्नवीसरित्॥ तादृक्तवचसत्कीर्तिःप्रकाशयतिभूतलम ॥१४॥ब्रह्मादिकाभवत्कीर्तिमाकर्ण्यत्रपिताभृशम्॥
नाथसर्वत्रतेकीर्तिःपावयत्यधुनाजनान् ॥ १५ ॥ वयंधन्यतमाःसर्वेयेचारास्तवभूपते ॥ क्षणेक्षणेतवमुखंलोकयाममनोहरम् ॥ १६ ॥ वचःश्रुत्वातु
चाराणांपश्चानांराघवस्तदा ॥ षष्ठंपप्रच्छचारंतंविलक्षणमुखाङ्कितम् ॥ १७ ॥ रामउवाच ॥ सत्यंवदमहाबुद्धयच्छुतंलोकसङ्करे ॥ तादृक्प्रशंसमेसर्व
मन्यथापातकादिकृत् ॥ १८ ॥ पुनःपुनश्चतंरामःपप्रच्छाशुसविस्तरम् ॥ तथापिनब्रवीत्येवरामंलौकिकभाषितम् ॥ १९ ॥ तदारामः
प्रत्यवोचच्चारंमुखविलक्षितम् ॥ शपामित्वांतुसत्यनशंससर्वंयथातथम् ॥ २० ॥ तदारामंप्रत्युवाचचारोवाक्यंशनैःशनैः ॥ अकथ्य
मपितेवाच्यंवाक्यंकारुजनोदितम् ॥ २१ ॥ चारउवाच ॥ स्वामिन्सर्वत्रतेकीर्तिर्दशाननवधादिका ॥ अन्यत्रराक्षसगृहेस्थितायास्तेस्त्रिया
अहो ॥ २२ ॥ कारुरेकस्तुरजकोनिशीथेमहिलांस्वकाम् ॥ अन्यगेहोषितांदृष्ट्वाधिक्कुर्वन्समताडयत् ॥ २३ ॥ तन्मातापत्युवाचेमांकथं

[1] 'न्यायवृत्तकाः' इ० पा०।

CC-0. In Public Domain. Digitization by eGangotri

ताडयसेऽनघाम् ॥ गृहाणमाकृथानिन्दांस्त्रियंमद्वाक्यमाचर ॥ २४ ॥ तदावोचत्सरजकोनाहंरामोमहीपतिः ॥ यद्राक्षसगृहेऽध्युष्टांसीता
मङ्गीचकारसः ॥ २५ ॥ सवराज्ञःकृतंकर्मनीतिमद्भवतिप्रभो ॥ अन्येषांपुण्यकर्तॄणामपिकृत्यमनीतिमत् ॥ २६ ॥ पुनःपुनरुवाचासौनाहंरामो
महीपतिः ॥ चुक्रुधेसमयेराजन्मयावाक्यंतवस्मृतम् ॥ २७ ॥ तदानींशिरआच्छिद्यपातयामिमहीतले ॥ कृतःपुनर्विचारोमेक्वरामोरजकःक्वनु ॥
॥ २८ ॥ अयंदुष्टोऽनृतंवक्तिनहीदंतथ्यमुच्यते ॥ आज्ञापयसिचेद्रामसाम्प्रतंमारयामितम् ॥ २९ ॥ अवाच्यमपितेप्रोक्तंत्वदाग्रहतउन्नयम् ॥ राजा
प्रमाणमत्रेदंविचारयतुसङ्गतम् ॥ ३० ॥ शेषउवाच ॥ इतिवाक्यंसमाकर्ण्यमहावज्रनिभाक्षरम् ॥ निःश्वसन्मुहुरुच्छ्वासमाचरन्मूर्च्छितोऽपतत् ॥
॥ ३१ ॥ तंमूर्च्छितंनृपंदृष्ट्वाचारादुःखसमन्विताः ॥ वीजयामासुर्वासोग्रैर्दुःखापनयहेतवे ॥ ३२ ॥ सलब्धसंज्ञोनृपतिर्मुहूर्तेनजगादतान् ॥ गच्छन्तु
भरतंशीघ्रंप्रेषयन्तुचमांप्रति ॥ ३३ ॥ तेदुःखिताश्चरास्तूर्णंभरतस्यगृहंगताः ॥ कथयामासूरामस्यसन्देशंनयहारकाः ॥ ३४ ॥ भरतोरामसन्देशं
श्रुत्वाधीमान्ययौसदः ॥ रामंप्रतिरहःसंस्थंश्रुत्वातंत्वरयायुतः ॥ ३५ ॥ आगत्यतंप्रतीहारंप्रत्युवाचमहामनाः ॥ कुत्रास्तेरामभद्रोऽसौममभ्राताकृपा
निधिः ॥३६॥ तन्निर्दिष्टंगृहंवीरोययौरत्नमनोहरम् ॥ रामंविलोक्यविक्रान्तंभयमापसमानसे ॥३७॥ किंवासौकुपितोरामःकिंवादुःखमिदंविभोः॥तदा
प्रोवाचनृपतिंनिःश्वसन्तंमुहुर्मुहुः ॥ ३८ ॥ स्वामिन्सुखसमाराध्यंवक्त्रेतेकथमानतम् ॥ अश्रुभिर्लक्ष्यतेराहुग्रस्तदेहःशशीवते ॥ ३९ ॥ सर्वमेकारणं
तथ्यंब्रूहिमांकिंकरोमिते ॥ त्यजदुःखंमहाराजकथंदुःखस्यभाजनम् ॥४० ॥ एवंभ्रात्राप्रोच्यमानोगद्गदस्वरयागिरा ॥ प्रोवाचभ्रातरंवीरोरामचन्द्रश्च
धार्मिकः ॥ ४१ ॥ शृणुभ्रातर्वचोमह्यंममदुःखस्यकारणम् ॥ तन्मार्जनंकुरुष्वाद्यभ्रातःप्रातर्महामते ॥ ४२ ॥ वंशेवैवस्वतेराजानकश्चिदयशः
क्षतः ॥ मत्कीर्तिरद्यकलुषागङ्गायमुनयागता ॥ ४३ ॥ येषांयशोनृणांभूमौतेषामेवसुजीवितम् ॥ अपकीर्तिक्षतानांतुजीवितंमृतकैःसमम्॥
॥ ४४ ॥ येषांयशोभवेद्भूमौतेषांलोकाःसनातनाः ॥ अपकीर्त्युरगीदष्टास्तेषांभूयादधोगतिः ॥ ४५ ॥ अद्यमेकलुषाकीर्तिःस्वर्धुनीलोक
विश्रुता ॥ तच्छृणुष्ववचोमेऽद्यरजकेनयथोदितम् ॥ ४६ ॥ अस्मिन्पुरेऽद्यरजकउक्तवाञ्जानकीभवम् ॥ किञ्चिद्वाच्यंततोभ्रातःकिंकरोमिमही
तले ॥ ४७ ॥ किमात्मानंजहाम्यद्यकिमेनांजानकींस्त्रियम् ॥ उभयोःकिंमयाकार्यंभवांस्तथ्यंब्रवीतुतत् ॥ ४८ ॥ इत्युक्त्वानिर्गलद्बाष्पो
वेपथुक्षुभिताङ्गकः ॥ पपातभूमौविरजोधार्मिकाणांशिरोमणिः ॥ ४९ ॥ भ्रातरंपतितंदृष्ट्वाभरतोःदुःखसंयुतः ॥ संवीक्ष्यशनकैरामंप्राप्तसंज्ञं
चकारसः ॥ ५० ॥ संज्ञांप्राप्तंतुसंवीक्ष्यरामचन्द्रंसुदुःखितम् ॥ उवाचदुःखनाशायवाक्यंतुसुमनोहरम् ॥ ५१ ॥ कोऽयंवैरजकःकिंतुवाच्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाक्यंयथाब्रवीत् ॥ जिह्वाच्छेदंकरिष्यामिजानकीवाच्यकारिणः ॥ ५२ ॥ तदारामोऽब्रवीद्वाक्यंरजकस्यमुखोद्गतम् ॥ श्रुतंचारेणतत्सर्वंभरतायमहात्मने ॥ ५३ ॥ तच्छ्रुत्वाभरतःप्राहभ्रातरंदुःखशोकिनम् ॥ जानकीवह्निशुद्धाभूल्लङ्कायांवीरपूजिता ॥ ५४ ॥ ब्रह्माब्रवीदियंशुद्धा पितादशरथस्तव ॥ कथंसारजकोक्तित्वाद्धातव्यालोकपूजिता ॥ ५५ ॥ ब्रह्मादिसंस्तुताकीर्तिस्तवलोकान्पुनातिहि ॥ साकथंरजकोक्त्या वैकलुषाद्यभविष्यति ॥ ५६ ॥ तस्मात्त्यजमहादुःखंसीतावाच्यसमुद्भवम् ॥ कुरुराज्यंतयासार्धमन्तर्वत्न्यासुभाग्यया ॥ ५७ ॥ त्वंकथं स्वशरीरंतुहातुमिच्छसिशोभनम् ॥ वयंहताःस्मसर्वेऽद्यत्वांविनादुःखनाशकम् ॥ ५८ ॥ क्षणंसीतानजीवेतत्वांविनासुमहोदया ॥ तस्मात्प तिव्रतासाकंभुनक्तुविपुलांश्रियम् ॥ ५९ ॥ इतिवाक्यंसमाकर्ण्यभरतस्यचधार्मिकः ॥ पुनरेवजगादेमंवाक्यंवाक्यविदांवरः ॥ ६० ॥ यत्त्वं कथयसिभ्रातस्तत्सर्वंधर्मसंयुतम् ॥ परंयद्वच्म्यहंवाक्यंतत्कुरुष्वममाज्ञया ॥ ६१ ॥ जानाम्येनांवह्निशुद्धांपवित्रांलोकपूजिताम् ॥ लोकापवा दाद्भीतोऽहंत्यजामिस्वांतुजानकीम् ॥ ६२ ॥ तस्मात्करेशितंधृत्वाकरवालंसुदारुणम् ॥ शिरश्छिन्ध्यथवाजायांजानकींमुञ्चवैवने ॥ ६३ ॥ इतिवाक्यंसमाकर्ण्यरामस्यभरतोऽपतत् ॥ मूर्च्छितःसन्क्षितौदेहेकम्पयुक्तःसबाष्पकः ॥ ६४ ॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशेषवा०रामाश्व० भरतवाक्यंनामषट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥ वात्स्यायनउवाच ॥ जगत्पवित्रसत्कीर्तिजानक्यावाच्यवाचनम् ॥ कथंसमकरोत्स्वामी तन्मेकथयसुव्रत ॥ १ ॥ यथामेमनसःसौख्यंभविष्यतिसुशोभनम् ॥ तथाकुरुष्वशेषाद्यत्वन्मुखान्निःसृतामृतम् ॥ पिबतस्तृप्तिरेवस्याद्यया संसृतिकृन्तनम् ॥ २ ॥ शेषउवाच ॥ मिथिलायांमहापुर्यांजनकोनामभूपतिः ॥ तस्यांकरोतिसद्राज्यंधर्मेणाराधयन्प्रजाः ॥ ३ ॥ तस्य सङ्कर्षतोभूमिंसीतयादीर्घमुख्यया ॥ सीरध्वजस्यनिरगात्कुमारीह्यतिसुन्दरी ॥ ४ ॥ तदात्यन्तंमुदंप्राप्तःसीरकेतुर्महीपतिः ॥ सीतानामाकरो त्तस्यामोहिन्याजगतःश्रियः ॥ ५ ॥ सैकदोद्यानविपिनेखेलन्तीसुमनोहरा ॥ अपश्यत्स्वमनःकान्तंशुकशुक्योर्युगंवदत् ॥ ६ ॥ अत्यन्तं हर्षमापन्नमन्यन्तंकामलोलुपम् ॥ परस्परंभाषमाणंस्नेहेनशुभयागिरा ॥ ७ ॥ रममाणंतदायुग्मंनभसिक्षिप्रवेगतः ॥ समुत्पतन्नगोपस्थेस्थितं शब्दंचकारतत् ॥ ८ ॥ रामोमहीपतिर्भूमौभविष्यतिमनोहरः ॥ तस्यसीतेतिनाम्नातुभविष्यतिमहेलिका ॥ ९ ॥ सतयासहवर्षाणांसहस्राण्ये कयुग्दश ॥ राज्यंकरिष्यतेधीमान्कर्षन्भूमिपतीन्बली ॥ १० ॥ धन्यासाजानकीदेवीधन्योऽसौरामसंज्ञितः ॥ यौपरस्परमापन्नौपृथिव्यांरंस्य तोमुदा ॥११॥ इतिसम्भाषमाणंतुशुकयुग्मंतुमैथिली ॥ ज्ञात्वेदंदेवतायुग्मंवाणींतस्यविलोक्यच ॥१२॥ मदीयास्तुकथारम्याःकुरुतेशुकयोर्युगम् ॥

CC-0. In Public Domain. Digitization by eGangotri

एतद्गृहीत्वापृच्छामिसववाक्यंगतार्थकम् ॥ १३ ॥ एवंविचार्यसास्वीयाःसखीःप्रतिजगादह ॥ गृह्णन्तुशनकैरेतत्पक्षियुग्मंमनोहरम् ॥ १४ ॥
सख्यस्तास्तद्गिरिंगत्वागृह्णन्पक्षियुगंवरम् ॥ निवेदयामासुरिदंस्वसख्याःप्रियकाम्यया ॥ १५ ॥ बहुधाविविधाञ्छब्दान्कुर्वद्वीक्ष्यमनोहरम् ॥
आश्वासयामासतदापप्रच्छतदिदंवचः ॥ १६ ॥ सीतोवाच ॥ माभैष्टंतुयुवांरम्यौकौवांकुत्रसमागतौ ॥ कोरामःकाचसासीतातज्ज्ञानंतुकुतः
स्मृतम् ॥ १७ ॥ तत्सर्वंशंसतंक्षिप्रंमत्तोवांप्येतुयद्भयम् ॥ इतिपृष्टंतयापक्षियुगंसर्वमशंसत ॥ १८ ॥ पक्षियुग्ममुवाच ॥ वाल्मीकिरास्ते
सुमहानृषिर्धर्मविदुत्तमः ॥ आवांतदाश्रमस्थानेसर्वदासुमनोहरे ॥१९॥ सशिष्यान्गापयामासभाविरामायणंमुनिः ॥ प्रत्यहंतत्पदस्मारीसर्वभूतहिते
रतः ॥२०॥ तदावाभ्यांश्रुतंसवभाविरामायणंमहत् ॥ मुहुर्मुहुर्गीयमानमायातंपरिपाठतः ॥ २१ ॥ शृण्वावांतेऽभिधास्यावोयोरामोयाचजानकी॥
यद्यद्भविष्यतेतस्यारामेणक्रीडितात्मना ॥ २२ ॥ ऋष्यशृङ्गकृतेष्ट्यांचचतुर्धात्वंगतोहरिः ॥ प्रादुर्भविष्यतिश्रीमान्सुरस्त्रीगीतसत्कथः ॥ २३ ॥
सकौशिकेनमिथिलांप्राप्स्यतेभ्रातृसंयुतः ॥ धनुष्पाणिस्तदादृष्ट्वादुर्ग्राह्यमन्यभूभुजाम् ॥ २४ ॥ धनुर्भङ्क्त्वाजनकजांप्राप्स्यतेसुमनोहराम् ॥
तयासहमहद्राज्यंकरिष्यतिश्रुतंवरे ॥२५॥ एतदन्यच्चतत्रस्थैःश्रुतमस्माभिरुद्धतैः ॥ कथितंतवचार्वङ्गिमुञ्चावांगन्तुकामुकौ ॥ २६ ॥ इतिवाक्यंतयो
र्धृत्वाश्रोत्रयोःसुमनोहरम् ॥ पुनरेवजगादेदंवाक्यंपक्षियुगंप्रति ॥२७॥ सरामःकुत्रवर्तेतकस्यपुत्रःकथंतुताम् ॥ परिग्रहीष्यतिवरःकीदृग्रूपधरोनरः ॥
॥ २८ ॥ मयापृष्टमिदंसर्वंयुवांब्रूतंयथातथम् ॥ पश्चात्सर्वंकरिष्यामिप्रियंयुष्मन्मनोहरम् ॥ २९ ॥ तच्छ्रुत्वातांतुकामेनपीडितांवीक्ष्यसाशुकी ॥
जानकींहृदयेज्ञात्वापपाठपुरतस्ततः ॥ ३० ॥ सूयवंशध्वजोधीमान्राजापङ्क्तिरथोबली ॥ यंदेवाःश्रित्यसर्वारीन्विजेष्यन्तेचसर्वशः ॥ ३१ ॥ तस्य
भार्यात्रयंभाविशक्रमोहनरूपधृत् ॥ तस्मिन्नपत्यचातुष्कंभविष्यतिबलोन्नतम् ॥ ३२ ॥ सर्वेषामग्रजोरामोभरतस्तदनुस्मृतः ॥ लक्ष्मणस्तदनुश्रीमा
ञ्छत्रुघ्नःसर्वतोवरः ॥ ३३ ॥ रघुनाथइतिख्यातिंगमिष्यतिमहामनाः ॥ तेषामनन्तनामानिरामस्यबलिनःसखि ॥ ३४ ॥ पद्मकोशइवशोभनंमुखं
पङ्कजाभनयनेसुदीर्घके ॥उन्नतापृथुमनोहरानसावल्गुसङ्गतमनोहरेभ्रुवौ ॥३५॥ जानुलम्बितमनोहरौभुजौकम्बुशोभिगलकोऽतिह्रस्वकः ॥सत्कपाट
तलविस्तृतश्रिकंवक्षएतदमलंसलक्ष्मकम् ॥ ३६ ॥ शोभनोरुकटिशोभयायुतंजानुयुग्ममममलंस्वसेवितम् ॥ पादपद्ममखिलैर्निजैःसदासेवितंरघुपतिं
सुशोभनम् ॥३७॥ एतद्रूपधरोरामोमयाकिंतुसवर्ण्यते ॥ शताननोऽपिनोयातिपक्षिणःकिमुमादृशाः ॥ ३८ ॥ यद्रूपंवीक्ष्यललितामनोहरवपुर्धरा ॥
लक्ष्मीर्मुमोहभुविकावर्ततेयानमुह्यति ॥ ३९ ॥ महाबलोमहावीर्योमहामोहनरूपधृत् ॥ किंवर्णयामिश्रीरामंसर्वैश्वर्यगुणान्वितम् ॥ ४० ॥ धन्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साजानकीदेवीमहामोहनरूपधृत्॥रंस्यतेतेनसहयावर्षाणामयुतंमुदा ॥४१॥ त्वंकासिकिंनुतेनामवदसुन्दरियत्तुमाम्॥परिपृच्छसिवैदग्ध्याद्रामकीर्तन
मादरात् ॥ ४२ ॥ एतद्वाक्यंसमाकर्ण्यजानकीपक्षिणोर्यगम् ॥ उवाचजन्मललितंशंसन्तीस्वस्यमोहनम् ॥ ४३ ॥ यात्वयाजानकीप्रोक्तासाहंजनक
पुत्रिका॥सरामोमांयदाभ्येत्यप्राप्स्यतेसुमनोहरः ॥४४॥ तदावांमोचयाम्यद्धानान्यथावाक्यलोभिता॥लीलयाचसुखेनस्त्वंमद्गेहेमधुरादकौ ॥ ४५ ॥
इत्युक्तंतत्समाकर्ण्यपक्षिणौभयमापतुः ॥ परस्परंप्रक्षुभितौजानकीमित्यवोचताम् ॥४६॥ वयंवैपक्षिणःसाध्विवनस्थावृक्षगोचराः ॥ परिभ्रमामसर्वत्र
नोसुखंनोभवेद्गृहे ॥ ४७ ॥ अन्तर्वत्नीस्वकेस्थानेगत्वासंसूयपुत्रकान् ॥ त्वत्स्थानमागमिष्यामिसत्यंमेह्युदितंवचः ॥ ४८ ॥ एवंप्रोक्तातयासा
तुनमुमोचशुकींस्वयम् ॥ तदापतिस्तांप्रोवाचविनीतवदनुत्सुकः ॥४९॥ सीतेमुञ्चकथंभार्यांरक्षसेमेमनोहरीम् ॥ आवांगच्छावविपिनेविचरावःसुखं
वने ॥ ५० ॥ अन्तर्वत्नीतुवर्ततेभार्याममममनोरमा ॥ तस्याःप्रसूतिंकृत्वात्वामागमिष्यामिशोभने ॥ ५१ ॥ इत्युक्तानिजगादेमंसुखंगच्छमहा
मते ॥ एतांरक्षामिसुखिनींमत्पार्श्वेप्रियकारिणीम् ॥५२॥ इत्युक्तोदुःखितःपक्षीतामूचेकरुणान्वितः ॥ योगिभिःप्रोच्यतेयद्वैतद्वचस्तथ्यमेवहि॥५३॥
नवक्तव्यंनवक्तव्यंमौनमाश्रित्यतिष्ठताम् ॥ नोचेत्सवाक्यदोषेणप्राप्नोत्यालानमुन्मदः ॥ ५४ ॥ वयंचेदत्रवाक्यंनाकरिष्यामनगोपरि ॥ बन्धनंकथ
मावांस्यात्तस्मान्मौनंसमाचरेत् ॥५५॥ इत्युक्त्वातांप्रत्युवाचनाहंजीवामिसुन्दरि ॥ एतयाभार्ययाहीनस्तस्मान्मुञ्चमनोहरे ॥ ५६ ॥ अनेकविध
वाक्यैःसाबोधितानामुचत्तदा ॥ कुपितादुःखिताभार्याशशापजनकात्मजाम् ॥५७॥ यथात्वंपतिनासार्धंवियोजयसिमामितः ॥ तथात्वमपिरामेण
वियुक्ताभवगर्भिणी ॥५८॥ इत्युक्तवत्यांतस्यांतुदुःखितायांपुनःपुनः॥प्राणानिरगमन्दुःखात्पतिदुखेनपूरितात् ॥५९॥ रामंरामंस्मरन्त्याश्चवदन्त्या
श्चपुनःपुनः ॥ विमानमागतंसुष्टुपक्षिणीस्वगताबभौ ॥६०॥ तस्यांमृतायांदुःखार्तोभर्तातस्याःसपक्षिराट् ॥ परमंक्रोधमापन्नोजाह्नव्यांदुःखितोऽप
तत ॥ ६१ ॥ तथाभवामिरामस्यनगरेजनपूरिते ॥ मद्वाक्यादियमुद्विग्नावियोगनसुदुःखिता ॥ ६२ ॥ इत्युक्त्वासपपातोदेजाह्नव्याभ्रमशोभिते ॥
दुःखितःकुपितोभीतस्तद्वियोगेनकम्पितः ॥६३॥ क्रुद्धत्वाद्दुःखितत्वाच्चसीतायाअपमाननात् ॥ अन्त्यजत्वंपरंप्राप्तोरजकःक्रोधनाभिधः ॥ ६४ ॥
यःक्रोधाच्चस्वकान्प्राणान्महतांदुष्टमाचरन् ॥ सन्त्यजेत्समृतोयातिअन्त्यजत्वंद्विजोत्तमः ॥ ६५ ॥ तज्जातरजकोत्त्यासौनिन्दिताचवियोजिता ॥
रजकस्यचशापेनवियुक्तासावनंगता ॥ ६६ ॥ एतत्तेकथितंविप्रयत्तपृष्टंविदेहजाम् ॥ पुनरत्रपरंवृत्तंशृणुष्वनिगदामितत् ॥ ६७ ॥ इतिश्रीपाद्मे
महापुराणेपातालखण्डेशेषवा०रामश्व०रजकप्राग्जन्मकथनंनामसप्तपञ्चाशत्तमोऽध्यायः ॥५७॥ शेषउवाच॥भरतंमूर्च्छितंदृष्ट्वारघुनाथःसुदुःखितः ॥

CC-0. In Public Domain. Digitization by eGangotri

 प्रतिहारमुवाचेदंशत्रुघ्नंप्रापयाशुमाम् ॥ १ ॥ तद्वाक्यंप्रोक्तमाकर्ण्यक्षणाच्छत्रुघ्नमानयत् ॥ यत्ररामोनिजभ्राताभरतेनसहस्थितः ॥ २ ॥ भरतंमूर्छितं
दृष्ट्वारघुनाथंचदुःखितम् ॥ प्रणम्यदुःखितोऽवोचत्किमिदंदारुणंमहत् ॥ ३ ॥ तदारामोऽन्त्यजप्रोक्तंवाक्यंलोकविगर्हितम् ॥ तंप्रत्युवाचरामो
 ऽसौशत्रुघ्नंपदसेवकम् ॥ ४ ॥ अधोमुखोदीनरवोगद्गदाक्षरवेपथुः ॥ शृणुभ्रातर्वचोमेऽद्यकुरुतत्क्षिप्रमादरात् ॥५॥ यथास्याद्विमलाकीर्तिर्गङ्गेवपृथिवीं
गता ॥ सीतायावाच्यमतुलंलोकेश्रुतवान्त्यजोदितम् ॥ ६ ॥ हातुमिच्छामिदेहंस्वमेनांवाजानकींकिल ॥ इतिवाक्यंसमाकर्ण्यरामस्यकिलशत्रुहा
॥ ७ ॥ सवेपथुःपपातोर्व्यांदुःखितःपरदारणः ॥ संज्ञांप्राप्यमुहूर्तेनरघुनाथमवोचत ॥८॥ शत्रुघ्नउवाच ॥किमेतदुच्यतेस्वामिञ्जानकींप्रतिदारुणम् ॥
पाखण्डैर्दुष्टचित्तैश्चसर्वधर्मबहिष्कृतैः ॥ ९ ॥ निन्दिताश्रुतिरग्राह्याभवतित्वग्र्यजन्मनाम् ॥ जाह्नवीसर्वलोकानांपापघ्नीदुरितापहा ॥ १० ॥
निस्पृष्टापापिभिःपुम्भिःसास्पर्शेनार्हितासताम् ॥सूर्योजगत्प्रकाशायसमुदेतिजगत्यहो ॥११॥ उलूकानांरुचिकरोनभवेत्तत्रकाक्षतिः ॥ तस्मात्त्वमेनां
गृह्णीष्वमात्यजानिन्दितांस्त्रियम् ॥१२ ॥ श्रीरामभद्रकृपयाकुरुष्ववचनंमम ॥ एतच्छ्रुत्वावचस्तस्यशत्रुघ्नस्यमहात्मनः ॥ १३ ॥ पुनःपुनर्जगादेदं
यदुक्तंभरतंप्रति ॥ तन्निशम्यवचोभ्रातुर्दुःखपूरपरिप्लुतः ॥ १४ ॥ पपातमूर्च्छितोभूमौछिन्नमूलइवद्रुमः ॥ भ्रातरंपतितंवीक्ष्यशत्रुघ्नंदुःखितोभृशम्
॥ १५ ॥ प्रतीहारमुवाचेदंलक्ष्मणंत्वानयान्तिकम् ॥ सलक्ष्मणगृहंगत्वान्यवेदयदिदंवचः ॥१६॥ प्रतीहारउवाच ॥ स्वामिन्रामोभवन्तंतुसमाह्वयति
वेगतः ॥ सतच्छ्रुत्वासमाह्वानंरामचन्द्रेणवेगतः ॥ १७ ॥ जगामतरसातत्रयत्रसभ्रातृकोऽनघः ॥ भरतंमूर्च्छितंदृष्ट्वाशत्रुघ्नमपिमूर्च्छितम् ॥ १८ ॥
श्रीरामचन्द्रंदुःखार्तंदुःखितोवाक्यमब्रवीत ॥ किमेतद्दारुणंराजन्दृश्यतेमूर्च्छनादिकम् ॥१९॥ तदाशुशंसमांसर्वंकारणंमुख्यतोऽनघ ॥ एवंवदन्तंनृपति
वृत्तान्तंसर्वमादितः ॥ २० ॥ शशंसलक्ष्मणंक्षिप्रंदुःखपूरपरिप्लुतम् ॥ लक्ष्मणस्तद्वचःश्रुत्वासीतायास्त्यागसम्भवम् ॥ २१ ॥ निःश्वसन्मुहुर
च्छ्वासंस्तब्धगात्रइवाभवत् ॥ भ्रातरंस्तब्धगात्रंचकम्पमानंमुहुर्मुहुः ॥२२॥ नकिंचनवदन्तंतंवीक्ष्यशोकार्दितोऽब्रवीत् ॥ किंकरिष्याम्यहंभूमौस्थित्वा
दुर्यशसाङ्कितः ॥ २३ ॥ त्यजामीदंवपुःश्रीमँल्लोकभीत्याचशोकवान् ॥ सर्वदाभ्रातरोमह्यंमद्वाक्यकरणोत्सुकाः ॥ २४ ॥ इदानींतेऽपिदैवेनप्रति
कूलवचस्कराः ॥ कुत्रगच्छामिकंयामिहसिष्यन्तिनृपाभुवि ॥ २५ ॥ दुर्यशोलाञ्छितंमांवैकुष्ठिनंरूपवन्नराः ॥ मनोर्वंशेपुराभूपाजाताजातागुणा
धिकाः ॥ २६ ॥ इदानींमयिजातेतुविपरीतंबभूवतत् ॥ इतिसम्भाषमाणंतंरामभद्रंसमीक्ष्यसः ॥२७॥ संस्तभ्याश्रूणिविपुलान्युवाचविकलस्वरः॥
स्वामिन्विषादंमाकार्षीःकथंत्वमतिर्हिता ॥ २८ ॥ सीतामनिन्दितांकोनुत्यजतिश्रुतवान्भवान् ॥ आकारयामिरजकंपरिपृच्छामितंप्रति ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथंत्वयानिन्दितासाजानकीयोषितांवरा ॥ तवदेशेबलात्कश्चिद्बाध्यतेनजनोऽल्पकः ॥ ३० ॥ तस्मात्तस्ययथास्वान्तेप्रतीतिःस्यात्तथाऽऽचर ॥ किमर्थंत्यज्यतेभीरुःपतिव्रतपरायणा ॥ ३१ ॥ मनसावचसानान्यंजानातिजनकात्मजा ॥ तस्मादेनांगृहाणत्वमेतांमात्यजजानकीम् ॥ ३२ ॥ ममोपरिकृपांकृत्वामदुक्तंसंश्रयाशुतत् ॥ एवंवदन्तंप्रत्यूचेरामःशोकेनकर्शितः ॥ ३३ ॥ लक्ष्मणंधर्मवाक्येनबोधयंस्त्यजनोद्यमः ॥ ३४ ॥ राम उवाच ॥ कथंतुमांब्रवीषित्वंमात्यजैनामनिन्दिताम् ॥ लोकापवादात्त्यक्ष्येऽहंजानन्नपिविपापिनीम् ॥ ३५ ॥ स्वयशःकारणेऽहंस्वंदेहंत्यक्ष्याम्यशोभनम् ॥ त्वामपिभ्रातरंत्यक्ष्येलोकवादाद्विगर्हितम् ॥ ३६ ॥ किमुतान्येगृहाःपुत्रामित्राणिवसुशोभनम् ॥ स्वयशःकारणेसर्वंत्यजामिकिमुमैथिलीम् ॥ ३७ ॥ नतथामेप्रियोभ्रातानकलत्रंनबान्धवाः ॥ यथामेविमलाकीर्तिर्वल्लभालोकविश्रुता ॥ ३८ ॥ इदानींरजकोनैवप्रष्टव्योभवतिध्रुवम् ॥ कालेनसर्वंभविताऽलोकचित्तस्यरञ्जनम् ॥ ३९ ॥ आमयोयद्वदामस्तुनचिकित्स्योभवेत्क्षितौ ॥ सकालेनपरीपाकाद्भेषजादेवनश्यति ॥ ४० ॥ तथाकालेनसम्भाविसाम्प्रतंमाविलम्बय[1]॥त्यजैनांविपिनेसाध्वींमांवाखड्गेनघातय ॥४१॥ इत्युक्तंवाक्यमाकर्ण्यदुःखितोऽभूत्तदामहान्[2] ॥ चिन्तयामासचस्वान्तेलक्ष्मणःशोककर्शितः ॥४२॥ पित्राज्ञतोजामदग्न्योमातरंचाप्यघातयत्॥गुरोराज्ञानैवलङ्घ्यायुक्ताऽयुक्ताऽपिसर्वथा ॥४३॥ तस्मादेनांत्यजाम्येवरामस्यप्रियकाम्यया ॥ इतिसञ्चिन्त्यमनसिभ्रातरंप्रत्युवाचसः ॥ ४४ ॥ लक्ष्मणउवाच ॥ अकृत्यमपिकार्यंवैगुर्वाज्ञांनैवलङ्घयेत् ॥ तस्मात्कुर्वेभवद्वाक्यंयत्त्वंवदसिसुव्रत ॥ ४५ ॥ इत्येवंभाषमाणंतंलक्ष्मणंप्रत्युवाचसः ॥ साधुसाधुमहाप्राज्ञत्वयामेतोषितंमनः ॥ ४६ ॥ अद्यैवरात्रौजानक्यादोहदस्तापसीक्षणे ॥ तन्मिषेणरथेस्थाप्यमोचयैनांमहावने[3] ॥४७॥ इत्थंभाषितमाकर्ण्यविशुष्यद्वदनोऽभितः ॥ रुदन्बाष्पकलांमुञ्चञ्जगामस्वंनिवेशनम् ॥ ४८ ॥ सुमन्त्रंतुसमाहूयवचनंतमथाब्रवीत् ॥ रथंमेकुरुसज्जंवैसदश्ववरभूषितम् ॥ ४९ ॥ सतद्वाक्यंसमाकर्ण्यरथमानीतवांस्तदा ॥ आनीतंतंरथंदृष्ट्वालक्ष्मणःशोककर्शितः ॥ ५० ॥ परमंदुःखमापन्नःसंरुद्धस्यन्दनंवरम् ॥ निःश्वसञ्जानकीगेहंप्रतस्थेभ्रातृसेवकः ॥ ५१ ॥ गत्वाचान्तःपुरेभ्रातारामस्यमिथिलात्मजाम् ॥ प्रत्यूचेनिःश्वसन्वाक्यंदुःखपूरपरिप्लुतः ॥ ५२ ॥ मातर्जानकिरामेणप्रेषितोभवनंतव ॥ तापसीःप्रतियाहित्वंदोहदप्राप्तिहेतवे ॥ ५३ ॥ इतिवाक्यंसमाकर्ण्यलक्ष्मणस्यविदेहजा ॥ परमंहर्षमापन्नालक्ष्मणंप्रत्यभाषत ॥ ५४ ॥ जानक्युवाच ॥ धन्याहंमैथिलीराज्ञीरामस्यचरणस्मरा ॥ यस्यादोहदपूर्त्यर्थंप्रेषयामासलक्ष्मणम् ॥ ५५ ॥ अद्याहंतावनचरीस्तापसीः

१ 'विलङ्घ्य' इ० पा० । २ 'क्षणं तदा' इ० पा० । ३ 'महामते' इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

पतिदेवताः ॥ नमस्कुर्यांचवासोभिःपूजयामिमनोहराः ॥ ५६ ॥ इत्युक्त्वारम्यवस्त्राणिमहार्हाभरणानिच ॥ मणीन्विमलमुक्ताश्चकर्पूरा
दिसुगन्धिमत् ॥ ५७ ॥ चन्दनादिकवस्तूनिविचित्राणिसहस्रधा ॥ जग्राहरघुनाथस्यपत्नीस्वप्रियं[1]काम्यया ॥ ५८ ॥ सीतागृही
त्वासर्वाणिदासीनांकरयोर्मुहुः ॥ लक्ष्मणंप्रतिगच्छन्तीदेहल्यांचास्खलत्तदा ॥ ५९ ॥ अविचार्यतदौत्सुक्याल्लक्ष्मणंप्रियकारिणम् ॥ उवाच
कुत्रसरथोयेनमांप्रापयिष्यसि ॥ ६० ॥ सनिःश्वसन्रथंहैमंजानक्यासहनिर्विशत् ॥ सुमन्त्रंप्रत्युवाचासौचालयाश्वान्मनोजवान् ॥ ६१ ॥ ससुयुक्तं
रथंवाक्याल्लक्ष्मणस्यतुचाह्वयत् ॥ अश्रुपूर्णमुखंपश्यल्लँक्ष्मणंससुहुर्मुहुः ॥ ६२ ॥ आहतास्तेनकशयावाहास्तस्यापतन्पथि ॥ नचलन्तियदावाहा
स्तदालक्ष्मणमब्रवीत् ॥ ६३ ॥ सुमन्त्रउवाच ॥ स्वामिंश्चलन्तिनोवाहायत्नेनपरिचालिताः ॥ किंकरोमिनजानेऽत्रकारणंवाहपातने ॥ ६४ ॥ एवं
ब्रुवन्तंप्रत्यूचेलक्ष्मणोगद्गदस्वरः ॥ सारथिंधैर्यमास्थायताडयैतान्कशादिभिः ॥ ६५ ॥ एतच्छ्रुत्वोदितंयन्ताकथञ्चित्समचालयत् ॥ तदाऽस्फुरद्दक्ष
नेत्रंजानक्यादुःखशंसकम् ॥ ६६ ॥ तदैवहृदयेशोकःसमभूद्दुःखशंसकः ॥ तदैवपक्षिणःपुण्याःकुर्वन्तिपरिवर्तनम् ॥ ६७ ॥ एवंवीक्ष्यैववैदेहीप्रत्युवा
चाथदेवरम् ॥ कथंमेतापसीक्षायैयातुमिच्छारघूद्वह ॥ ६८ ॥ रामेभूयाद्धिकल्याणंभरतवातथानुजे ॥ तत्प्रजासुचसर्वत्रमाभवन्तुविपर्ययाः ॥
॥ ६९ ॥ एवंब्रुवन्तींसंवीक्ष्यजानकींचसलक्ष्मणः ॥ नकिञ्चिदुक्तवान्रुद्धकण्ठोबाष्पप्रपूरितः ॥ ७० ॥ सागच्छन्तीमृगान्वामंपरिवर्तनकारकान् ॥
अपश्यद्दुःखसङ्घातकारकान्समभाषत ॥७१ ॥ अद्ययन्मेमृगावामंवर्तयन्तितदिष्यते ॥ श्रीरामचरणौमुक्त्वागच्छन्त्याश्युक्तमेवतत् ॥ ७२ ॥ महि
लानांपरोधर्मःस्वभर्तृचरणार्चनम् ॥ तन्मुक्त्वाऽन्यत्रयान्त्यामेयद्भवेद्युक्तमेवतत् ॥ ७३ ॥ एवंपथिविचारंतुकुर्वन्त्यापरमार्थतः ॥ जाह्नवीददृशे
देव्यामुनिवृन्दैकसेविता ॥ ७४ ॥ यस्यांजलस्यकल्लोलादृश्यन्तेदुग्धसन्निभाः ॥ तरङ्गोदृश्यतेयत्रस्वर्गसोपानमूर्तिभृत् ॥ ७५ ॥ यस्यावारिकण
स्पर्शान्महापातकसञ्चयः ॥ पलायतेनकुत्रापिस्थानमीक्षन्समन्ततः ॥ ७६ ॥ गङ्गांप्राप्याथसौमित्रिर्जानकींस्यन्दनेस्थिताम् ॥ उवाचनिर्गलद्बाष्प
एहिसीतेरथाद्भुवि ॥७७॥ सीतातद्वाक्यमाकर्ण्यक्षणादवततारसा ॥ लक्ष्मणेनधृताबाहौस्खलन्तीपथिकण्टकैः ॥७८॥ इतिश्रीपाद्मेमहापुराणेपाताल
खण्डेशेषवा०रामाश्व०जानक्यागङ्गादर्शनंनामाष्टपञ्चाशत्तमोऽध्यायः ॥५८॥ शेषउवाच ॥ अथनावासमुत्तीर्यजाह्नवींलक्ष्मणस्तदा ॥ जानकींपरत ॥ ६९ ॥
स्तीरेहस्तेधृत्वावनंययौ ॥ १ ॥ साचलन्तीपथितदाशुष्यद्वदनलक्षिता ॥ कण्टकक्षतसत्पादास्खलन्तीचपदेपदे ॥ २ ॥ लक्ष्मणस्तांमहाघोरेविपिने

१ 'प्रियकरी वरा' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुःखदायिनि ॥ प्रवेशयामासतदाराघवाज्ञाविधायकः ॥३॥ यत्रवृक्षामहाघोराबर्बूलाःखदिराघनाः॥श्लेष्मातकाश्चिञ्चिणीकाःशुष्कादावेनवह्निना ॥
॥ ४ ॥ कोटरस्थामहासर्पाःफूत्कुर्वन्तिसुकोपिताः ॥ घूकाघूत्कुर्वतेयत्रलोकचित्तभयङ्कराः ॥ ५ ॥ व्याघ्राःसिंहाःसृगालाश्चद्वीपिनोऽतिभयङ्कराः ॥
दृश्यन्तेयत्रसरलामनुष्यादाःसुकोपनाः ॥ ६ ॥ महिषाःसूकरादुष्टादंष्ट्राद्वयविलक्षिताः ॥ कुर्वन्तिप्राणिनांतापंमानसस्यमदोद्धुराः ॥ ७ ॥ ईदृग्वनं
प्रपश्यन्तीभयेनोपगतज्वरा ॥ कण्टकैर्दष्टचरणालक्ष्मणंवाक्यमब्रवीत् ॥८॥ जानक्युवाच ॥ वीरर्षिमुनिसंसेव्यानाश्रमान्नेत्रसौख्यदान् ॥ नाहंपश्यामि
नोतेषांपत्नीश्चसुतपोधनाः ॥ ९ ॥ पश्यामिकेवलंघोरान्पक्षिणःशुष्कवृक्षकान् ॥ दावानलेनतत्सर्वंदह्यमानमिदंवनम् ॥ १० ॥ त्वांचपश्याम्मि
दुःखार्तमश्रुपूर्णाकुलेक्षणम् ॥ शकुनेतरसाहस्रंभवेन्ममपदेपदे ॥११॥ तन्मेकथयवीराग्र्यकथंमुक्तामहात्मना ॥ रामेणदुष्टहृदयाक्षिप्रंकथयमेहितत ॥
॥ १२ ॥ इतिवाक्यंसमाकर्ण्यलक्ष्मणःशोककर्शितः ॥ संरुद्धबाष्पवदनोनकिञ्चित्प्रोक्तवांस्तदा ॥ १३ ॥ तदेवविपिनंघोरंगच्छन्तीलक्ष्मणान्विता ॥
पुनरप्याहतंवीरंदुःखार्तापश्यतीमुखम् ॥ १४ ॥ तदापिसनतांवक्तिकिमपिप्रेक्षुलोलुपः ॥ तदासात्यन्तनिर्बन्धंचकारपरिपृच्छती ॥ १५ ॥ आग्रहेण
यदापृष्टोलक्ष्मणःसीतयातदा ॥ रुद्धकण्ठोमुहुःशोचन्नवदत्त्यागसम्भवम् ॥ १६ ॥ तद्वाक्यंपविनातुल्यंनिशम्यमुनिसत्तम ॥ सुलताकृत्तमूलेवबभू
वाकल्पवार्जिता ॥ १७ ॥ तदैवपृथिवीतांनजग्राहतनयामिमाम् ॥ रामोविपापिनींसीतांनजह्यादितिशङ्किनी ॥ १८ ॥ पतितांतांतुवैदेहींदृष्ट्वासौमित्रि
रुत्सुकः ॥ पल्लवाग्र्यसमीरेणसंज्ञितांतुचकारसः ॥ १९ ॥ संज्ञांप्राप्ताह्युवाचेदंमाहास्यंकुरुदेवर ॥ कथंमांपापरहितांत्यजतेसरघूद्वहः ॥ २० ॥
एवंबहुविलप्याथलक्ष्मणंदुःखसंयुतम् ॥ संवीक्ष्यमूर्च्छिताभूमौपपातपरिदुःखिता ॥ २१ ॥ मुहूर्तेनापिसंज्ञांसाप्राप्यदुःखपरिप्लुता ॥ जगादराम
चरणौस्मरन्तीशोकविक्षता ॥ २२ ॥ रघुनाथोमहाबुद्धिस्त्यजतेमांकथंमहान् ॥ योमदर्थेपयोराशिंबद्धवान्वानरैर्युतः ॥ २३ ॥ सकथंमांमहावीरो
निष्पापांरजकोक्तितः ॥ त्यजिष्यतिममैवात्रदैवंतुप्रतिकूलितम् ॥२४॥ एवंवदन्तीपुनरपिमूर्च्छांप्राप्ताविदेहजा ॥ मूर्च्छितांतांसमीक्ष्याथरुरोदविकृत
स्वरः ॥ २५ ॥ पुनःसंज्ञामवाप्यैवंसौमित्रिंनिजगादसा ॥ दुःखातुरंवीक्षमाणारुद्धकण्ठंसुदुःखिता ॥२६॥ सौमित्रेगच्छरामंत्वंधर्ममूर्तिंयशोनिधिम्॥
मद्वाक्यमेवैतद्ब्रूयाःसमक्षंतपसांनिधेः ॥२७॥ मांत्यजभवान्यद्वैजानन्नपिविपापिनीम् ॥ कुलस्यसदृशंकिंवाशास्त्रज्ञानस्यतत्फलम् ॥ २८ ॥ नित्यं
तवपदेरक्तांत्वदुच्छिष्टभुजंहिमाम् ॥ भवांस्तत्याजतत्सर्वंममदैवंतुकारणम् ॥२९॥ कल्याणंतवसर्वत्रभूयाद्वीरवरोत्तम ॥ अहंतावद्वनेत्वांहिस्मरन्तीप्राण
धारिका ॥३०॥ मनसाकर्मणावाचाभवानेवममोत्तमः ॥ अन्येतुच्छीकृताःसर्वेमनसारघुवंशज ॥३१॥ भवेभवेभवानेवपतिर्भूयान्महीश्वर ॥ त्वत्पद

CC-0. In Public Domain. Digitization by eGangotri

स्मरणानेकहतपापासतीश्वरी ॥३२॥ श्वश्रूजनंब्रूहिसर्वंमत्सन्देशंरघूत्तम ॥ त्यक्तावनेमहाघोरेरामेणनिरघासती ॥३३॥ स्मरामिचरणौयुष्मद्वनेमृगगणै
र्युते ॥ अन्तर्वत्नीवनेत्यक्तारामेणसुमहात्मना ॥३४॥ सौमित्रेशृणुमद्वाक्यंभद्रंभूयाद्रघूत्तमे ॥ इदानींसन्त्यजेप्राणान्रामवीर्यंसुरक्षती ॥ ३५ ॥ त्वंराम
वचनंतथ्यंयत्करोषिशुभंतव ॥ परतन्त्रेणतत्कार्यंरामपादाब्जसेविना ॥३६ ॥ गच्छत्वंरामसविधेशिवाःपन्थानएवते ॥ ममोपरिकृपाकार्यास्मर्तव्याहं
कदाकदा ॥ ३७ ॥ इत्युक्त्वामूर्च्छिताभूमौपपातपुरतस्तदा ॥ लक्ष्मणोदुःखमापेदेवीक्ष्यमूर्च्छितजानकीम् ॥ ३८ ॥ वीजयामासवासोग्रैःसंज्ञांप्राप्तां
प्रणम्यच ॥ सौमित्रिःसान्त्वयामासवचनैर्मधुरैर्मुहुः ॥ ३९ ॥ लक्ष्मणउवाच ॥ एषगच्छामिरामंवैगत्वाशंसामिसर्वशः ॥ समीपेतेमुनेरस्ति
वाल्मीकेराश्रमोमहान् ॥ ४० ॥ इत्युक्त्वातांपरिक्रम्यदुःखितोबाष्पपूरितः ॥ मुञ्चन्नश्रुकलांदुःखाद्ययौरामंमहीपतिम् ॥ ४१ ॥ जानकीदेवरंयान्तं
वीक्ष्यविस्मितलोचना ॥ हसत्ययंमहाभागोलक्ष्मणोदेवरोमम ॥ ४२ ॥ कथंमांप्राणतःश्रेष्ठांविपापांराघवोऽत्यजत् ॥ इतिसञ्चिन्तयन्तीसातमैक्षिष्ट
निमेषणा ॥ ४३ ॥ जाह्नवींसर्वथोत्तीर्णांज्ञात्वासत्यंस्वहापनम् ॥ पतिताप्राणसन्देहंप्राप्ताभूर्च्छांगतातदा ॥४४ ॥ तदाहंसाःस्वपक्षाभ्यांजलमानीय
सर्वतः ॥ सिषिचुर्मधुरोवायुर्ववौपुष्पसुगन्धिमान् ॥ ४५ ॥ करिणःपुष्करैःस्वीयैर्जलपूर्णैःसमन्ततः ॥ व्याप्तंशरीरंरजसाक्षालयन्तइवागताः ॥
॥ ४६ ॥ मृगास्तदन्तिकंप्राप्यसन्तस्थुर्विस्मितेक्षणाः ॥ नगाःपुष्पयुताआसंस्तत्कालंमधुनाविना ॥ ४७ ॥ एतस्मिन्समयेवृत्तेसंज्ञांप्राप्यतदा
सती ॥ विललापसुदुःखार्तारामरामेतिजल्पती ॥४८॥ हानाथदीनबन्धोहेकरुणापयसांनिधे ॥ अपराधादृतेमांत्वंकथंत्यजसिवैवने ॥ ४९ ॥ इत्ये
वमादिभाषन्तीविलपन्तीमुहुर्मुहुः ॥ इतस्ततःप्रपश्यन्तीसंमूर्च्छन्तीपुनःपुनः ॥ ५० ॥ तदास्वशिष्यैर्भगवान्वाल्मीकिःसङ्गतोवनम् ॥ शुश्राव
रुदितंतत्रकरुणास्वरभाषितम् ॥ ५१ ॥ शिष्यान्प्रतिजगादाथपश्यन्तुवनमध्यतः ॥ कोरोदितिमहाघोरेविपिनेदुःखितस्वरः ॥ ५२ ॥ तेप्रयुक्ताश्च
मुनिनासञ्जग्मुर्यत्रजानकी ॥ रामरामेतिभाषन्तीबाष्पपूरपरिप्लुता ॥ ५३ ॥ तांदृष्ट्वास्त्रियमौत्सुक्याद्वाल्मीकिंप्रत्यगुर्मुनिम् ॥ श्रुत्वातदीरितंवाक्यं
जगामासौततोमुनिः ॥ ५४ ॥ दृष्ट्वातंतपसांराशिंजानकीपतिदेवता ॥ नमोऽस्तुमुनयेवेदमूर्तयेव्रतवार्धये ॥ ५५ ॥ इत्युक्तवन्तींतांसीतामाशीर्भि
रभ्यनन्दयत् ॥ भर्त्रासहचिरंजीवपुत्रौप्राप्नुहिशोभनौ ॥ ५६ ॥ कासित्वंकिंवनेघोरेसङ्गताऽसिकिमीदृशी ॥ सर्वंमेशंसजानीयांतवदुःखस्य
कारणम् ॥ ५७ ॥ सातदाप्रत्युवाचेमंरामस्यमहिलामुनिम् ॥ निःश्वसन्तीकरुणयागिरासञ्जातवेपथुः ॥ ५८ ॥ शृणुमेवाक्यमर्थोक्तंसर्वं
दुःखस्यकारणम् ॥ जानीहिमांभूमिपतेरघुनाथस्यसेविकाम् ॥ ५९ ॥ अपराधंविनात्यक्तानजानेतत्रकारणम् ॥ लक्ष्मणोमांविमुच्यात्रगतवान्राघवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञया ॥६०॥ इत्युक्त्वाश्रुकलापूर्णंबिभ्रतींमुखपङ्कजम् ॥ वाल्मीकिःसान्त्वयन्प्राहजानकींकमलेक्षणाम् ॥ ६१ ॥ वाल्मीकिंमांविजानीहिपितुस्तव
गुरुंमुनिम् ॥ दुःखंमाकुरुवैदेहिह्यागच्छममचाश्रमम् ॥ ६२ ॥ भिन्नस्थानेपितुर्गेहंजानीहिपतिदेवते ॥ ईदृशेकर्मणिममरोषोऽस्त्वेवमहीपतेः ॥६३॥
एवंवचःसमाकर्ण्यजानकीपतिदेवता ॥ दुःखपूर्णाश्रुवदनाकिञ्चित्सुखमवापसा ॥ ६४ ॥ शेषउवाच ॥ वाल्मीकिःसान्त्वयित्वैनांदुःखपूरा
कुलेक्षणाम् ॥ निनायस्वाश्रमंपुण्यंतापसीवृन्दपूरितम् ॥ ६५ ॥ सागच्छन्तीपृष्ठतोऽस्यवाल्मीकेस्तपसांनिधेः ॥ रराजेन्दोःपृष्ठतोवैतारकेवमनो
हरा ॥ ६६ ॥ वाल्मीकिःप्राप्यचस्वीयमाश्रमंमुनिपूरितम् ॥ तापसीःप्रतिसञ्चख्यौजानकींस्वाश्रमंगताम् ॥ ६७ ॥ वैदेहींतापसीःसर्वानमश्चक्रे
महामनाः ॥ परस्परंप्रहृषिताःपरिरम्भंसमाचरन् ॥ ६८ ॥ वाल्मीकिर्निजशिष्यान्सप्रत्युवाचतपोनिधिः ॥ रच्यतांवतजानक्याःपर्णशाला
मनोरमा ॥ ६९ ॥ इत्युक्तंवाक्यमाकर्ण्यवाल्मीकेःसुमनोरमम् ॥ व्यरचन्पत्रकैःशालांदारुभिःसुमनोहराम् ॥ ७० ॥ तत्रावसद्धिवैदेहीपतिव्रतपरा
यणा ॥ वाल्मीकेःपरिचर्यांचकुर्वन्तीफलभक्षिका ॥ ७१ ॥ जपन्तीरामरामेतिमनसावचसास्वयम् ॥ निनायदिवसांस्तत्रजानकीपतिदेवता ॥
॥ ७२ ॥ कालेसासूतपुत्रौद्वौमनोहरवपुर्धरौ ॥ रामचन्द्रप्रतिनिधीह्यश्विनाविवजानकी ॥ ७३ ॥ तच्छ्रुत्वातुमुनिर्हृष्टोजानक्याःपुत्रसम्भवम् ॥
चकारजातकर्मादिसंस्कारान्मन्त्रवित्तमः ॥ ७४ ॥ कुशैर्लवैश्चवाल्मीकिर्मुनिःकर्माणिचाचरत् ॥ तन्नाम्नापुत्रयोराख्याकुशोलवइतिस्फुटा ॥७५॥
वाल्मीकिर्यत्रविरजामङ्गलंतद्यथाचरत् ॥ अत्यन्तंहृष्टचित्तासावभूवकमलेक्षणा ॥ ७६ ॥ तद्दिनेलवणंहत्वाशत्रुघ्नःस्वल्पसैनिकः ॥ आगम
च्चाश्रमेचास्यवाल्मीकेर्निशिशोभने ॥ ७७ ॥ तदावाल्मीकिनाशिष्टःशत्रुघ्नोरघुनायकम् ॥ माशंसजानकीपुत्रौकथयिष्याम्यहंपुरः ॥ ७८ ॥
जानकीपुत्रकौतत्रववृधातेमनोरमौ ॥ कन्दमूलफलैःपुष्टौव्यदधादुन्मदौवरौ॥७९॥शुक्लप्रतिपदायाश्चशशीवसुमनोहरौ॥कालेनसंस्कृतौजातावुपनीतौ
मनोहरौ ॥ ८० ॥ उपनीयमुनिर्वेदंसाङ्गमध्यापयत्सुतौ ॥ सरहस्यंधनुर्वेदंरामायणमपाठयत् ॥ ८१ ॥ वाल्मीकिनाचधनुषीदत्तेस्वर्णसुभूषिते ॥
अभेद्येसगुणेश्रेष्ठेवैरिवृन्दविदारणे ॥ ८२ ॥ इषुधीबाणसम्पूर्णौअक्षयेकरवालके ॥ वर्माण्यभेद्यानिददौजानक्यात्मजयोस्तदा ॥ ८३ ॥ धनुर्धरौधनु
र्वेदपारगावाश्रमेमुदा ॥ चरन्तौतत्ररेजातेअश्विनाविवशोभनौ ॥ ८४॥ जानकीवीक्ष्यपुत्रौद्वौखड्गचर्मधरौवरौ ॥ परमंहर्षमापन्नाविरहोद्भवमत्यजत्॥
॥ ८५ ॥ एषतेकथितोविप्रजानक्याःपुत्रसम्भवः ॥ अतःशृणुष्वयद्वृत्तंवीरबाहुविकृन्तनम् ॥ ८६ ॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशेषवा०
रामाश्व०कुशलवोत्पत्तिकथानकंनामैकोनषष्टितमोऽध्यायः ॥ ५९ ॥ शेषउवाच ॥ शत्रुघ्नोनिजवीराणांछिन्नान्बाहून्निरीक्षयन् ॥ उवाचतान्सुकु

CC-0. In Public Domain. Digitization by eGangotri

पितोरोषसन्दंशिताधरः ॥ १ ॥ केनवीरेणवोबाहुकृन्तनंसमकारिभोः ॥ तस्याहंबाहूकृन्तामिदेवगुप्तस्यवैभटाः ॥ २ ॥ नजानातिमहामूढो
रामचन्द्रबलंमहत् ॥ इदानींदर्शयिष्यामिपराक्रान्त्याबलंस्वकम् ॥ ३ ॥ सकुत्रवर्ततेवीरोहयःकुत्रमनोरमः ॥ कोवाऽगृह्णात्सुप्तसर्पान्मूढोऽज्ञात्वा
पराक्रमम्॥४॥ इतितेकथितावीराविस्मितादुःखिताभृशम् ॥ रामचन्द्रप्रतिनिधिंबालकंसमशंसत ॥५॥सश्रुत्वारोषताम्राक्षोबालकेनहयग्रहम्॥सेनान्यं
वैकालजितमाज्ञापयद्युयुत्सुकः ॥ ६ ॥ सेनानीःसकलांसेनांव्यूहयस्वममाज्ञया ॥ रिपुःसम्प्रतिगन्तव्योमहाबलपराक्रमः ॥ ७ ॥ नायंबालो
हरिर्नूनंभविष्यतिहयन्धरः ॥ अथवात्रिपुरारिःस्यान्नान्यथामद्धयापहृत् ॥ ८ ॥ अवश्यंकदनंभाविसैन्यस्यबलिनोमहत् ॥ स्वच्छन्दचरितैःखेलन्ना
स्तेनिर्भयधीःशिशुः ॥ ९ ॥ तत्रगन्तव्यमस्माभिःसन्नद्धैरिपुदुर्जयैः ॥ एतन्निशम्यवचनंशत्रुघ्नस्यससैन्यपः ॥ १० ॥ सज्जीचकारसेनांतांदुर्व्यूढां
चतुरङ्गिणीम्॥ सज्जांतांशत्रुजिद्दृष्ट्वाचतुरङ्गयुतांवराम् ॥११॥ आज्ञापयत्ततोगन्तुंयत्रबालोहयन्धरः ॥साचचालतदासेनाचतुरङ्गसमन्विता ॥१२ ॥
कम्पयन्तीमहीभागंत्रासयन्तीरिपून्बलात् ॥ सेनानीस्तंददर्शाथबालकंरामरूपिणम् ॥ १३ ॥ विचार्यरामप्रतिममब्रवीद्वचनंहितम् ॥ बालमुञ्च
हयश्रेष्ठंरामस्यबलशालिनः ॥ १४ ॥ सेनानीःकालजिन्नामतस्यभूपस्यदुर्मदः ॥ त्वांरामप्रतिमंदृष्ट्वाकृपामेहृदिजायते ॥ १५ ॥ अन्यथातव
मेदौस्थ्याज्जीवितंनभविष्यति ॥ एतद्वाक्यंसमाकर्ण्यशत्रुघ्नस्यभटस्यहि ॥ १६ ॥ जहासकिञ्चिदाकोपादुवाचचवचोऽद्भुतम् ॥ गच्छमुक्तोऽसितं
रामंकथयस्वहयग्रहम् ॥ १७ ॥ त्वत्तोबिभेमिनोशूरवाक्येननयशालिना ॥ ममात्रगणनानास्तित्वादृशाःकोटयोयदि ॥ १८ ॥ मातृपाद
प्रसादेनतूलीभूतानसंशयः ॥ कालजित्तवयन्नाममात्राकारिमनोज्ञया ॥ १९ ॥ पक्वबिम्बफलस्येववर्णतोनचवीर्यतः ॥ दर्शयस्वाधुनावीर्यंस्वनाम
बलचिह्नितः ॥ मांकालंतवसञ्जित्यसत्यनामाभविष्यसि ॥ २० ॥ शेषउवाच ॥ सवाक्यैःपविनातुल्यैर्भिन्नःसुभटशेखरः ॥ चुकोपहृदयेऽत्यन्तं
जगादवचनंपुनः ॥ २१ ॥ कस्मिन्कुलेसमुत्पत्तिःकिन्नामासिचबालक ॥ त्वन्नामनाभिजानामिकुलंशीलंवयस्तथा ॥ २२ ॥ पादचाररंथस्थो
ऽहमधर्मेणकथंजये ॥ तदात्यन्तंप्रकुपितोजगादवचनंपुनः ॥ २३ ॥ कुलेनकिंचशीलेननाम्नावासुमनोहृता ॥ लवोऽहंलवतःसर्वाञ्जेष्यामिरिपु
सैनिकान् ॥ २४ ॥ इदानींत्वामपिभटंकरिष्येपादचारिणम् ॥ इत्थमुक्त्वाधनुःसज्यंचकारसलवोबली ॥ २५ ॥ टङ्कारयामासतदावीरानाकम्पय
न्हृदि ॥ वाल्मीकिंप्रथमंस्मृत्वाजानकींमातरंलवः ॥ २६ ॥ मुमोचबाणान्निशितान्सद्यःप्राणापहारिणः ॥ कालजित्स्वधनुःकृत्वासज्यंकोपसम
न्वितः ॥ २७ ॥ ताडयामासजवनोलवंरणविशारदः ॥ तद्बाणाञ्छतधाछित्त्वाक्षणाद्वेगात्कुशानुजः ॥ २८ ॥ सेनान्यंविरथंचक्रेवसुभिःस्वशरो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्तमैः ॥ विरथोगजमानीतमारुरोहभटैर्निजैः ॥ २९ ॥ मदोन्मत्तंमहावेगंसप्तधाप्रस्रवान्वितम् ॥ गजारूढंतुतंदृष्ट्वादशभिर्धनुषोगतैः ॥ ३० ॥
बाणैर्विव्याधविहसन्सर्वान्रिपुगणाञ्जयी ॥ कालजित्तस्यवीर्यंतुदृष्ट्वाविस्मितमानसः ॥ ३१ ॥ गदांमुमोचमहतींमहायसविनिर्मिताम् ॥ आपतन्तीं
गदांवेगाद्धारायुतविनिर्मिताम् ॥ ३२ ॥ त्रिधाचिच्छेदतरसाक्षुरप्रैःसकुशानुजः ॥ परिघंनिशितंघोरंवैरिप्राणहरोदितम् ॥ ३३ ॥ मुक्तंपुनस्तेन
लवश्चिच्छेदतरसान्वितः ॥ छित्वातत्परिघंघोरंकोपादारक्तलोचनः ॥ ३४ ॥ गजोपस्थेसमारूढंमन्यमानश्चुकोपह ॥ तत्क्षणादच्छिनत्तस्य
शुण्डांखड्गेनदन्तिनः ॥ ३५ ॥ दन्तयोश्चरणौधृत्वारुरोहगजमस्तके ॥ मुकुटंशतधाकृत्वाकवचंतुसहस्रधा ॥ ३६ ॥ केशेष्वाकृष्यसेनान्यं
पातयामासभूतले ॥ पातितःस्मगजोपस्थात्सेनानीःकुपितःपुनः ॥ ३७ ॥ हृदयेताडयामासमुष्टिनावज्रमुष्टिना ॥ सआहतोमुष्टिभिस्तुक्षुरप्रा
न्निशितान्छरान् ॥ ३८ ॥ मुमोचहृदयेक्षिप्रंकुण्डलीकृतधन्ववान् ॥ सरराजरणोपान्तेकुण्डलीकृतचापवान् ॥ ३९ ॥ शिरस्त्रंकवचंबिभ्रदभेद्यंशर
कोटिभिः ॥ सविद्धःसायकैस्तीक्ष्णैस्तंहन्तुंखड्गमाददे ॥ ४० ॥ दशन्रोषात्स्वदशनान्निःश्वसन्नुच्छ्वसन्मुहुः ॥ खड्गहस्तंसमायान्तंशूरंसेनापतिं
लवः ॥ ४१ ॥ चिच्छेदभुजमध्यंतुसखड्गःपाणिरापतत् ॥ छिन्नंखड्गधरंहस्तंवीक्ष्यकोपाच्चमूपतिः ॥ ४२ ॥ वामेनगदयाहन्तुंप्रचक्रामभुजेन
तम् ॥ सोऽपिच्छिन्नोभुजस्तस्यसाङ्गदस्तीक्ष्णसायकैः ॥ ४३ ॥ तदाप्रकुपितोवीरःपादाभ्यामहनल्लवम् ॥ लवःपादाहतस्तस्यनचचालरणाङ्गणे ॥
॥ ४४ ॥ सजाहतोद्विपइवचरणच्छेदनंव्यधात् ॥ तदापितंमौलिनासौप्रहर्तुमुपचक्रमे ॥ ४५ ॥ तदालवश्चमूनाथंमन्यमानोऽधिपौरुषम् ॥
करवालंसमादायकरेकालानलोपमम् ॥ ४६ ॥ अच्छिनच्छिरएतस्यमहामुकुटशोभितम् ॥ हाहाकारोमहानासीच्चमूनाथेनिपातिते ॥ ४७ ॥
सैनिकाःपरिसङ्क्रुद्धालवंहन्तुंसमागताः ॥ लवस्तान्स्वशराघातैःपलायनपरान्व्यधात ॥ ४८ ॥ छिन्नाभिन्नाङ्गकाःकेचिद्गताःकेचिद्रणाङ्गणात् ॥
सनिवार्याखिलान्योधान्विजगाहेचमूंमुदा ॥ ४९ ॥ वाराहइवनिःश्वस्यप्रलयेसुमहार्णवम् ॥ गजाभिन्नाद्विधाजातामौक्तिकैःपूरितामही ॥ ५० ॥
दुर्गमाभूद्रथाग्र्याणांपर्वतैर्व्याप्तायथा ॥ अश्वाःकनकपल्याणारुचिरारत्नराजिताः ॥ ५१ ॥ अपतन्रुधिराप्लुष्टेहदेबलसुशोभिताः ॥ रथिनःकर
मध्यस्थधनुर्दण्डसुशोभिनः ॥ ५२ ॥ रथोपस्थेनिपतिताःस्वर्गगाइववैसुराः ॥ सन्दष्टौष्ठपुटावक्रभ्रमल्लक्ष्मीविलक्षिताः ॥ ५३ ॥ पतितास्तत्र
दृश्यन्तेवीरारणविशारदाः ॥ सुस्रावशोणितसरिद्धयमस्तककच्छपा ॥ ५४ ॥ महाप्रवाहललितावैरिणांभयकारिका ॥ केषांचिद्बाहवश्छिन्नाःकेषां
पादाविकर्तिताः ॥५५॥ केषांकर्णाश्चनासाश्चकेषांकवचकुण्डले॥एवंतुकदनंजातंसेनान्यांपतितेरणे ॥५६॥ सर्वेनिपतितावीरानकेचिज्जीवितास्ततः ॥

CC-0. In Public Domain. Digitization by eGangotri

लवोजयंरणेप्राप्यवैरिवृन्दंविजित्यच ॥ ५७ ॥ अन्यागमनशङ्कायांमनःकुर्वन्नवैक्षत ॥ केचिदुर्वरितायुद्धाद्भाग्येननरणेमृताः ॥ ५८ ॥ शत्रुघ्नंसविधे
जग्मुःशंसितुंवृत्तमद्भुतम् ॥ गत्वातेकथयामासुर्यथावृत्तंरणाङ्गणे ॥ ५९ ॥ कालजिन्निधनंबालाच्चित्रकारिरणोद्यमम् ॥ तच्छ्रुत्वाविस्मयंप्राप्तःशत्रुघ्न
स्तानुवाचह ॥ ६० ॥ हसन्नोपादशन्दन्तान्बालग्राहहयंस्मरन् ॥ रेवीराःकिंमदोन्मत्तायूयंकिंवाछलग्रहाः ॥ ६१ ॥ किंवावैकल्यमायातंकालजि
जिन्मरणंकथम् ॥ यःसङ्ख्येवैरिवृन्दानांदारुणःसमितिञ्जयः ॥ ६२ ॥ तंकथंबालकोजीयाद्यमस्यापिदुरासदम् ॥ शत्रुघ्नवाक्यंसंश्रुत्यवीराः
प्रोचुरसृक्प्लुताः ॥ ६३ ॥ नास्माकंमदमत्तादिनच्छलोनचदेवनम् ॥ कालजिन्मरणंसत्यंलवाज्जानीहिभूपते ॥ ६४ ॥ बलंचकृत्स्नंमथितं
बालेनातुलशौण्डिना ॥ अतःपरंतुयत्कार्यंयेप्रेष्यानृवरोत्तमाः ॥ ६५ ॥ बालंज्ञात्वाभवान्नात्रकरोतुबलसाहसम् ॥ इतिश्रुत्वावचस्तेषांवीराणां
शत्रुहातदा ॥ ६६ ॥ सुमतिंचमतिश्रेष्ठमुवाचरणकारणे ॥ ६७ ॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशेषवा०रामाश्व०कुशलवयुद्धेसैन्यपराजयकाल
जित्सेनानीमरणंनामपष्टितमोऽध्यायः ॥ ६० ॥ शत्रुघ्नउवाच ॥ जानासिकिंमहामन्त्रिन्कोबालोहयमाहरत् ॥ येनमेक्षपितंसर्वबलंवारिधिसन्निभम्॥
॥ १ ॥ सुमतिरुवाच ॥ स्वामिन्नयंमुनिश्रेष्ठवाल्मीकेराश्रमोमहान् ॥ क्षत्रियाणामत्रवासोनास्त्येवपरतापन ॥ २ ॥ इन्द्रोभविष्यतिपरममर्षीहयमा
हरत् ॥ पुरारिर्वान्यथावाहंतवकःसमुपाहरेत् ॥ ३ ॥ कालजिद्येननाशंवैप्राप्तःपरमदारुणः॥ तंप्रतिश्रीमहाराजगन्ताकःपुष्कलान्वितः ॥ ४ ॥ त्वंच
वीरैर्भटैःसर्वैराजभिःपरिवारितः ॥ तत्रगच्छस्वसैन्येनमहताशत्रुकृन्तन ॥ ५ ॥ गत्वासजीवितंवीरंबद्ध्वातुकुतुकार्थिने ॥ दर्शयिष्यामिरामायमतंमे
त्विदमाहतम् ॥६॥ इतिवाक्यंसमाकर्ण्यवीरान्सर्वान्समादिशत्॥सैन्येनमहतायातयूयमायामिपृष्ठतः ॥७॥ निर्दिष्टास्तेक्षणाद्वीराजग्मुर्यत्रलवोबली॥
धनुर्विस्फारयंस्तत्रसुदृढंगुणपूरितम् ॥८॥ आयातंतन्महद्दृष्ट्वाबलंवीरप्रपूरितम् ॥ नकिञ्चिन्मनसाबिभ्येलवेनबलशालिना ॥९॥ लवःसिंहइवोत्तस्थौ
मृगान्मत्वाऽखिलान्भटान् ॥ धनुर्विस्फारयन्रोषाच्छरान्मुञ्चन्सहस्रशः ॥ १० ॥ तेशरैःपीड्यमानास्तुमहारोषेणपूरिताः ॥ वीरंबालंमन्यमानाः
सम्मुखंप्राद्रवंस्तदा ॥११॥ वीरान्सहस्रशोदृष्ट्वाग्निमिभिःपर्यवस्थितान्॥लवोजवेनसन्धायशरान्रोषप्रपूरितः ॥ १२ ॥ अग्निराद्यासहस्रेणद्वितीयाऽयुत
सङ्ख्यया ॥ तृतीयायुतयुग्मेनतुरीयाऽयुतपञ्चभिः ॥ १३ ॥ पञ्चमीलक्षयोधानांषष्ठीयोधायुताधिकैः ॥ सप्तमीलक्षयुग्मेनसप्तभिर्ग्निमिभिर्वृतः॥
॥ १४ ॥ मध्येलवोग्निमिव्याप्तःसञ्चरन्वह्निवत्तदा ॥ दाहयामाससर्वान्वैसैनिकान्ग्निमिकारकान् ॥ १५ ॥ काचित्खड्गैःशरैःकाचित्का
चित्प्रासैश्चकुन्तलैः ॥ पट्टिशैःपरिघैःसर्वाग्निमिर्भग्नामहात्मना ॥ १६ ॥ सप्तभिर्ग्निमिभिर्मुक्तोरराजसकुशानुजः ॥ मेघवृन्दविनिर्मुक्तःशशीव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शरदागमे ॥ १७ ॥ प्राहरत्सर्वथायोधान्भिन्दन्गजकरान्बहून् ॥ छिन्दञ्छिरांसिवीराणांचक्रश्रूणिमहान्तिच ॥ १८ ॥ अनेकेपतितावीरालवबाण
प्रपीडिताः ॥ मुमुहुःसमरेऽथान्येनष्टाअन्येसुकातराः ॥ १९ ॥ पलायनपरंसैन्यंलवबाणप्रपीडितम् ॥ वीक्ष्यवीरोरणेयोद्धुंप्रायात्पुष्कलसंज्ञकः ॥
॥ २० ॥ तिष्ठतिष्ठेतिचवदन्रोषपूरितलोचनः ॥ रथेसुहयशोभाढ्येतिष्ठन्प्रायाद्धवंबली ॥ २१ ॥ सलवंप्रत्युवाचाथपुष्कलःपरमास्त्रवित् ॥ तिष्ठ
दत्तेमयासङ्ख्येरथेसुहयशोभिते ॥२२॥ पदातिनात्वयायुद्धंकरोमिकथमाहवे ॥ तस्मात्तिष्ठरथेपश्चाद्युद्धयेऽहंभवतासह ॥ एतद्वाक्यंनिशम्यासौलवः
पुष्कलमब्रवीत् ॥ २३ ॥ लवउवाच ॥ त्वयादत्तेरथेस्थित्वायुद्धंकुर्यामहंरणे ॥ तदामेपापमेवस्याज्जयःसन्दिग्धएवहि ॥२४॥ नवयंब्राह्मणावीरप्रति
ग्रहपरायणाः ॥ वयंतुक्षत्रियानित्यंदानकर्मक्रियारताः ॥ २५ ॥ इदानींत्वद्रथंकोपाद्भनज्मिप्रत्यहंभवान् ॥ पादचारीभवत्येवपश्चाद्युद्धंकरिष्यति॥
॥ २६ ॥ पुष्कलोवाक्यमाकर्ण्यधर्मधैर्यसमन्वितम् ॥ स्मयमापचिरंचित्तेधनुःसज्यमथाकरोत् ॥ २७ ॥ तमात्तधनुषंदृष्ट्वालवःकोपसमन्वितः ॥
चापंचिच्छेदपाणिस्थंशरसन्धानमाचरन् ॥ २८ ॥ सयावत्सगुणंचापंकुरुतेतावदुद्धतः ॥ रथभङ्गंचकारास्यसमरेप्रहसन्बली ॥ २९ ॥ भग्नंरथंस्वकं
वीक्ष्यधनुश्छिन्नंमहात्मना ॥ महावीरंमन्यमानःपदातिःप्राद्रवद्रणे ॥३०॥ उभौधनुर्धरौवीराबुभावपिशरोद्धतौ ॥ उभौक्षतजविप्लुष्टौछिन्नसन्नाहिता
वुभौ ॥ ३१ ॥ परस्परंबाणघातविशीर्णतनुलक्षितौ ॥ जयाकाङ्क्षांप्रकुर्वन्तौपरस्परवधैषिणौ ॥ ३२ ॥ जयन्तकार्तिकेयौवापुरारिःपुर
भिद्यथा ॥ एवंपरस्परंयुद्धंप्रकुर्वाणौरणाङ्गणे ॥ ३३ ॥ पुष्कलःप्रत्युवाचाथबालंशूरशिरोमण ॥ त्वादृशोनमयादृष्टःकश्चिद्वीरशिरोमणिः ॥ ३४ ॥
शिरस्तेपातयाम्यद्यबाणैःशितसुपर्वभिः ॥ मापलायस्वसमरेप्राणान्रक्षस्वसंयतः ॥ ३५ ॥ एवमुक्त्वालवंवीरंचकारशरपञ्जरे ॥ पुष्कलस्यशरा
भूमौनभसिव्याप्यसंस्थिताः ॥ ३६ ॥ शरपञ्जरमध्यस्थोलवःपुष्कलमब्रवीत् ॥ महत्कर्मकृतंवीरयन्मांबाणैरपीडयत् ॥ ३७ ॥ इत्युक्त्वाबाण
सङ्घातंप्रच्छिद्यवचनंपुनः ॥ जगादपुष्कलंवीरःशरसन्धानकोविदः ॥ ३८ ॥ पालयात्मानमाजिस्थंमच्छराघातपीडितः ॥ पतिष्यसिमहीपृष्ठेरुधिरेण
परिप्लुतः ॥ ३९ ॥ एवमुक्तंसमाकर्ण्यपुष्कलःकोपसंयुतः ॥ रणेसंयोधयामासलवंवीरंमहाबलम् ॥ ४० ॥ लवःप्रकुपितोबाणंतीक्ष्णंवैरिविदारणम् ॥
जग्राहलवतःकोशादाशीविषमिवक्रुधा ॥ ४१ ॥ जाज्वल्यमानःसशरश्चापमुक्तोलवस्यच ॥ हृदयंभेत्तुमुद्युक्तश्छिन्नोभारतिनाशुसः ॥ ४२ ॥ छिन्ने
भारतिनासङ्ख्येशरेणप्राणहारिणा ॥ अत्यन्तंकुपितोघोरंशरमन्यंसमाददे ॥४३॥ आकर्णाकृष्टचापेनसमुक्तोनिशितःशरः ॥ बिभेदहृदयंतस्यपुष्क
लस्यमहारणे ॥४४॥ भिन्नोवक्षसिवीरेणसायकेनाशुगामिना ॥ पपातधरणीपृष्ठेमहाशूरशिरोमणिः ॥४५॥ पतितंतंसमालोक्यपुष्कलंपवनात्मजः ॥

CC-0. In Public Domain. Digitization by eGangotri

गृहीत्वाराघवभ्रात्रेददौमूर्च्छासमन्वितम् ॥ ४६ ॥ मूर्च्छितंतंसमालोक्यशोकविह्वलमानसः ॥ हनूमन्तंलवंहन्तुंनिदिदेशक्रुधान्वितः ॥ ४७ ॥
हनूमान्क्रोधसम्प्लुष्टोलवंसङ्ख्येमहाबलम् ॥ विजेतुंतरसाप्रागाद्वृक्षमुद्यम्यशाल्मलिम् ॥ ४८ ॥ वृक्षेणहतवान्मूर्ध्निलवस्यहनुमान्बली ॥
तमापतन्तंतरसाचिच्छेदशतधालवः ॥ ४९ ॥ छिन्नेनगेपुनःकोपाद्वृक्षानुत्पाट्यमूलतः ॥ ताडयामासहृदयेमस्तकेचमहाबलः ॥ ५० ॥
यान्यान्वृक्षान्समादत्तेताडनायसमारुतिः ॥ तांस्तांश्चिच्छेदतरसाबलवान्नतपर्वभिः ॥ ५१ ॥ तदाशिलाःसमुत्पाट्यगण्डशैलोपमाःकपिः ॥ पातया
मासशिरसिक्षिप्रवेगेनमारुतिः ॥ ५२ ॥ सआहतःशिलासङ्घैःसङ्कुचेकोदण्डमुन्नयन् ॥ बाणैस्ताश्चूर्णयामासयन्त्रिकाभिर्यथाकणाः ॥ ५३ ॥ तदा
त्यन्तंप्रकुपितोमारुतिःपुच्छवेष्टनम् ॥ चकारसमरोपान्तेलवस्यबलिनःकृती ॥ ५४ ॥ स्वंपुच्छेनसमाविद्धंवीक्ष्यस्वाम्बांहृदिस्मरन् ॥ मुष्टिना
ताडयामासलाङ्गूलंमारुतेर्बली ॥ ५५ ॥ तन्मुष्टिघातव्यथितोमारुतिस्तममूमुचत् ॥ समुक्तःपुच्छतोयुद्धेशरान्मुञ्चन्नभूद्बली ॥ ५६ ॥ दुर्वारशर
घातेनसम्पीडिततनुःकपिः ॥ बाणवर्षंमन्यमानोदुःसहंसमरेबहु ॥ ५७ ॥ किंकर्तव्यमितोऽस्माभिःपलाय्ययदिगम्यते ॥ तदामेस्वामिनोलज्जाताडयेद्बाल
कोऽत्रमाम् ॥ ५८ ॥ ब्रह्मदत्तवरत्वाचुमूर्च्छानमरणंनहि ॥ दुःसहाबाणपीडात्रकिंकर्तव्यंमयाधुना ॥ ५९ ॥ शत्रुघ्नःसमरेगत्वाजयंप्राप्नोतुबालकात् ॥
अहंतावज्जयाकाङ्क्षीशयेकपटमूर्च्छया ॥ ६० ॥ इत्येवंमानसेकृत्वापपातरणमण्डले ॥ पश्यतांसर्ववीराणांकपटेनविमूर्च्छितः ॥ ६१ ॥ तंमूर्छितं
समाज्ञायहनूमन्तंमहाबलम् ॥ जघानसर्वान्नृपतीञ्छरमोक्षविचक्षणः ॥ ६२ ॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशेषवा०रामाश्व०हनुमत्पतनंनामैक
षष्टितमोऽध्यायः ॥ ६१ ॥ शेषउवाच ॥ मूर्च्छितंमारुतिंश्रुत्वाशत्रुघ्नःशोकमाययौ ॥ किंकर्तव्यंमयासङ्ख्येबालकोऽयंमहाबलः ॥ १ ॥ स्वयंरथेहेममये
तिष्ठन्वीरवरैःसह ॥ योद्धुंप्रागाल्लवोयत्रविचित्ररणकोविदः ॥ २ ॥ लवंददर्शशिशुतांप्राप्तंराममिवक्षितौ ॥ धनुर्बाणकरंवीरान्क्षिपन्तंरणमूर्धनि ॥
॥ ३ ॥ विचारयामासतदाकोऽयंरामस्वरूपधृत् ॥ नीलोत्पलदलश्यामंवपुर्बिभ्रन्मनोहरम् ॥ ४ ॥ एषवैदेहतनुजासुतोभवतिनान्यथा ॥ अस्मा
न्विजित्यसमरेयास्यतेमृगराडिव ॥ ५ ॥ अस्माकंनोजयोभाव्यःशक्त्याविरहितात्मनाम् ॥ अशक्ताःकिंकरिष्यामःसमरेरणकोविदाः ॥ ६ ॥
इत्येवंसविचार्याथबालकंतुवचोऽब्रवीत् ॥ रणेकुतुककर्तारंवीरकोटिनिपातकम् ॥ ७ ॥ कस्त्वंबालरणेऽस्माकंवीरान्पातयसिक्षितौ ॥ नजानीषे
बलंराज्ञोरामस्यदनुजार्दिनः ॥ ८ ॥ कातेमातापिताकस्तेसुभाग्योजयमाप्तवान् ॥ नामकिंविश्रुतंलोकेजानीयांतेमहाबल ॥ ९ ॥ मुञ्चवाहं
कथंबद्धःशिशुत्वात्तत्क्षमामिते ॥ आयाहिरामंवीक्षस्वदास्यतेबहुलंतव ॥ १० ॥ इत्युक्तोबालकोवीरोवचःशत्रुघ्नमावदत् ॥ किंतेनाम्नाथपित्रावा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुलेनवयसातथा ॥ ११ ॥ युध्यस्वसमरेवीरचेत्त्वंबलयुतोभवः ॥ कुशंवीरंनमस्कृत्यपादयोर्याहिनान्यथा ॥ १२ ॥ भ्रातारामस्यवीरोऽभूर्नावयो
र्बलिनांवरः ॥ वाहंविमोचयबलाच्छक्तिस्तेविद्यतेयदि ॥१३॥ इत्युक्त्वाशरसन्धानंकृत्वाप्राहरदुद्भटः ॥ हृदयेमस्तकेचैवभुजयोरणमण्डले ॥ १४ ॥
तदाप्रकुपितोराजाधनुःसज्यमथाकरोत् ॥ नादयन्मेघगम्भीरंत्रासयन्निवबालकम् ॥ १५ ॥ बाणानपरिसङ्ख्यातान्मुमोचबलिनांवरः ॥ बालोबलेन
चिच्छेदसर्वांस्तान्सायकव्रजान् ॥ १६ ॥ लवस्यानेकधामुक्तैर्बाणैर्व्याप्तंमहीतलम् ॥ व्यतीपातेप्रदत्तस्यदानस्येवाक्षयंगताः ॥ १७ ॥ तेबाणा
व्योमसकलंव्याप्यवर्ह्लवसंहिताः ॥ सूर्यमण्डलमासाद्यप्रवर्तन्तेसमन्ततः ॥ १८ ॥ मारुतोनाविशद्यत्रबाणपञ्जरगोचरे ॥ मनुष्याणांतुकावार्ताक्षण
जीवितशंसिनाम् ॥ १९ ॥ तद्बाणान्विस्तृतान्दृष्ट्वाशत्रुघ्नोविस्मयंगतः ॥ अच्छिनच्छतसाहस्रंबाणमोचनकोविदः ॥ २० ॥ ताञ्छिन्नान्साय
कान्सर्वान्स्वीयान्दृष्ट्वाकुशानुजः ॥ धनुश्चिच्छेदतरसाशत्रुघ्नस्यमहीपतेः ॥ २१ ॥ सोऽन्यद्धनुरुपादाययावन्मुञ्चतिसायकान् ॥ तावद्बभञ्जसरथं
सायकैःशितपर्वभिः ॥ २२ ॥ करस्थमच्छिनच्चापंसुदृढंगुणपूरितम् ॥ तत्कर्मापूजयन्वीरारणमण्डलवर्तिनः ॥ २३ ॥ सच्छिन्नधन्वाविरथोहताश्वो
हतसारथिः ॥ अन्यंरथंसमास्थायययौयोद्धुंलवंबलात् ॥२४॥ अनेकबाणनिर्भिन्नःस्रवद्रक्तकलेवरः ॥ पुष्पितःकिंशुकइवशुशुभेरणमध्यगः ॥२५॥
शत्रुघ्नबाणप्रहतःपरंकोपमुपागमत् ॥ बाणसन्धानचतुरःकुण्डलीकृतचापवान् ॥२६॥ विशीर्णकवचंदेहंशिरोमुकुटवर्जितम्॥स्रवद्रक्तपरिप्लुष्टंशत्रुघ्नस्य
चकारसः ॥ २७ ॥ तदारामानुजःक्रुद्धोदशबाणाञ्छिताग्रकान् ॥ मुमोचप्राणसंहारकारकान्कुपितोभृशम् ॥ २८ ॥ सतांस्तांस्तिलशःकृत्वाबाणै
र्निशितपर्वभिः ॥ ताडयामासहृदयेशत्रुघ्नस्याष्टभिःशरैः ॥२९॥ अत्यन्तंबाणपीडार्तोलवंबलिनमुत्स्मरन् ॥ दुःसहंमन्यमानस्तंशरान्मुञ्चन्नभूत्तदा॥
॥ ३० ॥ तदालवेनतीक्ष्णेनहृदिभिन्नोविशालके ॥ अर्धचन्द्रसमानेनतीक्ष्णपर्वसुशोभिना ॥ ३१ ॥ सविद्धोहृदिबाणेनपीडांप्राप्तः सुदारुणाम् ॥
पपातस्यन्दनोपस्थेधनुष्पाणिःसुशोभितः ॥ ३२ ॥ शत्रुघ्नंमूर्छितंदृष्ट्वानृपाश्चसुरथादयः ॥ दुद्रुवुर्लवमुद्युक्ताजयप्राप्त्यैरणंतदा ॥ ३३ ॥ सुरथो
विमलोवीरोराजावीरमणिस्तथा ॥ सुमदोरिपुतापाद्याःपरिवव्रुश्चसंयुगे ॥३४॥ केचित्क्षुरप्रैर्मुसलैःकेचिद्बाणैःसुदारुणैः ॥ प्रासैःपरशुभिःकेचित्सर्वतः
प्राहरन्नृपाः ॥ ३५ ॥ तानधर्मेणयुद्धोत्कान्दृष्ट्वावीरशिरोमणिः ॥ दशभिर्दशभिर्बाणैस्ताडयामाससंयुगे ॥ ३६ ॥ तेबाणवर्षविहतारणमध्येसुको
पनाः ॥ केचित्पलायिताःकेचिन्मुमुहुर्युद्धमण्डले ॥ ३७ ॥ तावत्सराजाशत्रुघ्नोमूर्छांसन्त्यज्यसङ्गरे ॥ लवंप्रायान्महावीरंयोद्धुंबलसमन्वितः ॥
॥ ३८ ॥ आगत्यतंलवंप्राहधन्योऽसिशिशुसन्निभः ॥ नबालस्त्वंसुरःकश्चिच्छलितुंमांसमागतः ॥ ३९ ॥ केनापिनहिवीरेणपातितोरणमण्डले॥

CC-0. In Public Domain. Digitization by eGangotri

त्वयाहंप्रापितोमूर्छांसमक्षंममपश्यतः ॥४०॥ इदानींपश्यमेवीयत्वांसङ्ख्येपातयाम्यहम् ॥ सहस्वबाणमेकंत्वंमापलायस्वबालक ॥४१॥ इत्युक्त्वा
समरेबालंशरमेकंसमाददे ॥ यमवक्रसमंघोरंलवणोयेनघातितः ॥ ४२ ॥ सन्धायबाणंनिशितंहृदिभेत्तुंमनोदधत् ॥ लवंवीरसहस्राणांवह्निवत्सर्व
दाहकम् ॥४३॥ तंबाणंप्रज्वलन्तंसद्योतयन्तंदिशोदश ॥ दृष्ट्वासस्मारबलिनंकुशंवैरिनिपातिनम् ॥४४॥ यद्यस्मिन्समयेवीरोभ्रातास्याद्बलवान्मम॥
तदाशत्रुघ्नवशतानमेस्याद्भयमुल्बणम् ॥ ४५ ॥ एवंतर्कयतस्तस्यलवस्यचमहात्मनः ॥ हृदिलग्नोमहाबाणोघोरःकालानलोपमः ॥ ४६ ॥ मूर्च्छां
प्रापतदावीरोभूपसायकसंहतः ॥ सङ्गरेसर्ववीराणांशिरोभिःसमलङ्कृते ॥ ४७ ॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशेषवा०रामाश्व०लवमूर्च्छानाम
द्विषष्टितमोऽध्यायः ॥ ६२ ॥ शेषउवाच ॥ लवंविमूर्च्छितंदृष्ट्वाबलिवैरिविदारणम् ॥ शत्रुघ्नोजयमापेदेरणमूर्ध्निमहाबलः ॥ १ ॥ लवंबालं
रथेस्थाप्यशिरस्त्राणाद्यलङ्कृतम् ॥ रामप्रतिनिधिंमूर्त्याततोगन्तुमियेषसः ॥ २ ॥ स्वमित्रंशत्रुणाग्रस्तमितिदुःखसमन्विताः ॥ बालामात्रेऽस्य
सीतायैत्वरिताःसंन्यवेदयन् ॥ ३ ॥ बालाऊचुः ॥ मातर्जानकितेपुत्रोबलाद्वाहमपाहरत् ॥ कस्यचिद्भूपवर्यस्यबलयुक्तस्यमानिनः ॥ ४ ॥ ततोयुद्ध
मभूद्घोरंतस्यसैन्येनजानकि ॥ तदावीरेणपुत्रेणतवसर्वंनिपातितम् ॥५॥ पश्चादपिजयंप्राप्तःसुतस्तवमनोहरः ॥ तंभूपंमूर्छितंकृत्वाजयमापरणाङ्गणे॥
॥ ६ ॥ ततोमूर्च्छांविहायपराजापरमदारुणः ॥ सङ्कुप्यपातयामासतवपुत्रंरणाङ्गणे ॥७॥ अस्माभिर्वारितःपूर्वंमागृहाणहयोत्तमम् ॥ अस्मान्सर्वांश्च
धिक्कृत्यब्राह्मणान्वेदपारगान् ॥ ८ ॥ इतिवाक्यंशिशूनांसासमाकर्ण्यसुदारुणम् ॥ पपातभूतलोपस्थेदुःखयुक्तारुरोदह ॥ ९ ॥ सीतोवाच ॥ कथं
नृपोदयाहीनोबालेनसहयुध्यति ॥ अधर्मकृतदुर्बुद्धिर्योमद्बालंन्यपातयत् ॥ १० ॥ लववीरभवान्कुत्रवर्ततेऽतिबलान्वितः ॥ कथंत्वंनिष्कृपस्याहो
राज्ञोऽहार्षीर्हयोत्तमम् ॥ ११ ॥ त्वंबालस्तेदुराक्रान्ताःसर्वशस्त्रविशारदाः ॥ रथस्थाविरथस्त्वंवैकथंयुद्धंसमंभवेत ॥ १२ ॥ ताताहंतुत्वयासार्द्धंराम
त्यागासुखंजहौ ॥ इदानींरहितायुष्मन्कथंजीवामिकानने ॥१३॥ एहिमांमुञ्चयज्ञाश्वंगच्छत्वेषमहीपतिः॥मद्दुःखंनाभिजानासिममदुःखप्रमार्जकः ॥
॥ १४ ॥ कुशोयद्यभविष्यत्सरणेवीरशिरोमणिः ॥ अमोचयिष्यदधुनाभवन्तंभूपपार्श्वतः ॥ १५ ॥ सोऽपिमद्दैवतोनास्तिसमीपेकिंकरोम्यतः ॥
दैवमेवममाप्यत्रकारणंदुःखसम्भवे ॥ १६ ॥ एवमादिबहुश्रीमत्येषावैविललापह ॥ पादाङ्गुष्ठेनलिखतीभूमिंनेत्रद्वयाश्रुभिः ॥ १७ ॥ बालान्प्रति
जगादासौपृथुकाःसचभूपतिः॥कथंमत्सुतमापात्यरणेकुत्रगमिष्यति ॥१८॥ इतिवाक्यंवदत्येषाजानकीपतिदेवता ॥ तावत्कुशस्तुसम्प्राप्तउज्जयिन्या
महर्षिभिः ॥ १९ ॥ माघासितचतुर्दश्यांमहाकालंसमर्च्यच ॥ प्राप्यभूरिवरांस्तस्मादागमन्मातृसन्निधौ ॥ २० ॥ जानकींविह्वलांदृष्ट्वानेत्रोद्भूता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रुविक्कवाम् ॥ शोकविह्वलदीनाङ्गींबभाषेयावदुत्सुकः ॥ २१ ॥ तदास्वबाहुरवदत्स्फुरन्युद्धाभिशंसनः ॥ हृदयेचरणोत्साहोबभूवातिरथस्यहि ॥
॥ २२ ॥ सप्रत्युवाचजननींदीनगद्गदभाषिणीम् ॥ मातस्तवगतंदुःखंमयिपुत्रउपस्थिते ॥ २३ ॥ मयिजीवतितेनेत्रादश्रूणिभुविनोऽपतन् ॥ प्रस्वं
चोवाचाश्रुखिन्नांदीनगद्गदभाषिणीम् ॥२४॥ कुशोदुःखमितःसद्योदुःखितांधीरमानसः ॥ ममभ्रातालवःकुत्रवर्ततेवैरिमर्दनः ॥२५॥ सदामामागतं
ज्ञात्वाप्रहर्षन्सन्निधावियात् ॥ नदृश्यतेकथंवीरःकुत्ररन्तुंगतोबली ॥ २६ ॥ केनवासहबालत्वाद्गतोमांवैनिरीक्षितुम् ॥ किंत्वंरोदिषिमेमातर्लवःकुत्र
सवर्तते ॥२७॥ तन्मेकथयसर्वंयत्तवदुःखस्यकारणम् ॥ तच्छ्रुत्वापुत्रवाक्यंसादुःखिताकुशमब्रवीत् ॥ २८ ॥ जानक्युवाच ॥ लवोधृतोनृपेणात्रकेन
चिद्धयरक्षिणा ॥ बबन्धबालकोमेऽत्रहयंयागक्रियोचितम् ॥ २९ ॥ तद्रक्षकान्बहूञ्जिग्यएकोऽनेकान्त्रिपून्बली ॥ राजातंमूर्च्छितंकृत्वाबबन्धरण
मूर्धनि ॥ ३० ॥ बालकाइतिमामूचुःसहगन्तारएवहि ॥ ततोऽहंदुःखिताजातानिशम्यलवमाधृतम् ॥ ३१ ॥ त्वंमोचयबलात्तस्मात्कालेप्राप्तोनृपो
त्तमात् ॥ निशम्यमातुर्वचनंकुशःकोपसमन्वितः ॥ जगादतांदशन्नोष्ठंदन्तैर्दन्तान्विनिष्पिषन् ॥ ३२ ॥ कुशउवाच ॥ मातर्जानीहितंमुक्तंलवं
पाशस्यबन्धनात्॥इदानींहन्मितंबाणैःसमग्रबलवाहनम् ॥३३॥ यदिदेवोऽमरोवापियदिशर्वःसमागतः ॥ तथापिमोचयेतस्माद्बाणैर्निशितपर्वभिः ॥
॥ ३४ ॥ मारोदिषिमातरिहवीराणांरणमूर्जितम् ॥ कीर्तयेऽत्रभवत्येवपलायनमकीर्तये ॥ ३५ ॥ देहिमेकवचंदिव्यंधनुर्गुणसमन्वितम् ॥ शिरस्त्राणं
चमेमातःकरवालंतथाशितम् ॥ ३६ ॥ इदानींयामिसमरेपातयामिबलंमहत् ॥ मोचयामिभ्रातरंस्वंरणमध्याद्विमूर्छितम् ॥ ३७ ॥ नमोचयाम्यद्य
पुत्रंतवमातर्महारणात् ॥ तदातौमेभवत्पादौसंस्पृष्टौभवतांक्षितौ ॥ ३८ ॥ शेषउवाच ॥ इतिवाक्येनसन्तुष्टाजानकीशुभलक्षणा ॥ सर्वंप्रादादस्त्र
वृन्दंजयाशीर्भिर्नियुज्यतम् ॥३९॥ प्रयाहिपुत्रसङ्ग्रामंलवंमोचयमूर्च्छितम् ॥ इत्याज्ञप्तःकुशःसङ्ख्येकवचीकुण्डलीबली ॥४०॥ मुकुटीकरवालीच
चर्मधारीधनुर्धरः ॥ अक्षयाविषुधीकृत्वास्कन्धयोःसिंहवीर्ययोः ॥ ४१ ॥ जगामतरसानत्वामातृपादौरथाग्रणीः ॥ वेगेनयावद्युद्धायगच्छतिक्षिप्र
माहवे॥४२॥तावद्ददर्शस्वलवंवैरिवृन्दनिपातितम्॥आयान्तंतंकुशंवीराददृशुःसुमहाभटाः ॥४३॥ कृतान्तमिवसंहर्तुंसर्वंविश्वमुपस्थितम्॥लवोमहाबलं
दृष्ट्वाकुशंभ्रातरमागतम् ॥४४॥ अत्यन्तंवह्निवद्युद्धेदिदीपेवायुनासमम्॥रथादुन्मुच्यचात्मानंयुद्धायसविनिर्गतः॥४५॥कुशःसर्वान्रणस्थान्वैवीरान्पूर्व
दिशिक्षिपेत्॥पश्चिमायांदिशिलवःकोपात्सर्वान्समैरयत् ॥४६॥ कुशबाणव्यथाव्याप्तालवसायकपीडिताः॥सैन्येजनामुनेसर्वउत्कल्लोलाम्बुधिभ्रमाः॥
॥ ४७॥ कुशेनचलवेनाथशरव्रातैःप्रपीडितम्॥नशर्मलेभेसकलंसैन्यंवीरप्रपूरितम् ॥४८॥ इतस्ततःप्रभग्नंतद्बलंत्रस्तंपुनःपुनः॥नकुत्रचिद्रणेस्थित्वायुद्ध

CC-0. In Public Domain. Digitization by eGangotri

मैच्छद्बलान्वितः॥४९॥एतस्मिन्समयेराजाशत्रुघ्नःपरतापनः ॥कुशंवीरंययौयोद्धुंतादृशंलवसन्निभम्॥५०॥कुशंदृष्ट्वाबलाक्रान्तंराममूर्तिंसमप्रभम्॥रथे
तिष्ठन्हेममयेजगादपरवीरहा ॥ ५१ ॥ शत्रुघ्नउवाच ॥ कोऽसित्वंसन्निभोभ्रात्रालवेनसुमहाबलः ॥ किन्नामासिमहावीरकस्तेतातःक्वतेप्रसूः ॥ ५२ ॥
कथंवनेद्विजैर्जुष्टेतिष्ठसित्वंनरर्षभ ॥ सर्वंशंसयथायुध्येत्वयासहमहाबल ॥ ५३ ॥ इतिवाक्यंसमाकर्ण्यकुशःप्रोवाचभूमिपम् ॥ मेघगम्भीरयावाचा
नादयन्रणमण्डलम् ॥ ५४ ॥ केवलंसुषुवेसीतापतिव्रतपरायणा ॥ वनेवसावोवाल्मीकेश्चरणार्चनतत्परौ ॥ ५५ ॥ मातृसेवासमुद्युक्तौसर्वविद्याविशा
रदौ ॥ कुशोलवइतिप्रख्यामागतौभूपतेऽनघ ॥ ५६ ॥ कस्त्वंवीरोरणश्लाघीकिमर्थंहयसत्तमः ॥ मुक्तोऽस्तिसमरेत्वद्यजेतासिबलसंयुतः ॥ ५७ ॥
युध्यस्वत्वंमयासार्द्धंयदिवीरोऽसिभूमिप ॥ इदानींपातयिष्यामिभवन्तंरणमूर्धनि ॥ ५८ ॥ शत्रुघ्नस्तंसुतंज्ञात्वासीतायारामसम्भवम् ॥ विसिष्मियें
स्वयंचित्तेकोपाद्धनुरुपाददत् ॥ ५९ ॥ तमात्तधनुषंदृष्ट्वाकुशःकोपसमन्वितः ॥ विस्फारयामासधनुःस्वीयंसुदृढमुत्तमम् ॥ ६० ॥ मुमोचबाणा
न्निशिताञ्छत्रुघ्नःसर्वशस्त्रवित् ॥ तांश्चिच्छेदकुशःसर्वाँल्लीलयाप्रहसन्रणे ॥ ६१ ॥ बाणाश्चशतसाहस्राःकुशस्यचनृपस्यच ॥ भुवनंव्याप्नुवन्सर्वंतच्चित्र
मभवन्मुने ॥६२॥ अग्न्यस्त्रेणनृपःसर्वान्ददाहतरसाबली ॥ शमयामासतंकुशःपर्जन्यास्त्रेणवीर्यवान् ॥६३॥ शमयामासतंभूपःवायव्येनातिविक्रमः॥
तदावायुरभूत्तीव्रःसर्वतोरणमण्डले ॥ ६४ ॥ पर्वतास्त्रेणतंवायुंसकुशस्तुसमावृणोत ॥ वज्रास्त्रेणनृपःसद्धयेचिच्छेदसनगोपलान् ॥ ६५ ॥ तदा
नारायणास्त्रंसमुमोचकुशउद्भटः ॥ नारायणंतदाभूपंनाशकत्परिबाधितुम् ॥६६ ॥ तदाप्रकुपितोऽत्यन्तंकुशःकोपपरायणः ॥ उवाचभूपंशत्रुघ्नंमहाबल
पराक्रमम् ॥ ६७ ॥ जानामित्वांमहावीरंसङ्ग्रामेजयकारिणम् ॥ यत्त्वांनारायणास्त्रंमेनबबाधभयानकम् ॥ ६८ ॥ इदानींपातयाम्यद्यभूमौत्वांनृपते
शरैः ॥ त्रिभिश्चेन्नकरोम्येतत्प्रतिज्ञांतर्हिमेशृणु ॥ ६९ ॥ योमनुष्यवपुःप्राप्यदुर्लभंपुण्यकोटिभिः ॥ तन्नाद्रियेतसंमोहात्तस्यमेऽस्त्वत्रपातकम् ॥७० ॥
सावधानोभवानत्रभवतुप्रधनाङ्गणे ॥ पातयामिक्षितौसद्यइत्युक्त्वास्वशरासने ॥७१ ॥ शरंसंरोपयामासघोरंकालानलप्रभम् ॥ लक्षीकृत्यरिपोर्वक्षो
विपुलंकठिनंमहत् ॥ ७२ ॥ तंसंहितंशरंदृष्ट्वाशत्रुघ्नःकोपमूर्च्छितः ॥ मुमोचबाणान्निशितान्कुशत्वग्भेदकारकान् ॥ ७३ ॥ सबाणोहृदयंतस्यभेत्तुं
तत्प्रचचालवै ॥ घोररूपोवह्निसमआशीविषवदुच्छ्वसन् ॥ ७४ ॥ सबाणोनृपवर्येणरामंस्मृत्वाशुलक्षितः ॥ चिच्छेदकुशमुक्तंससायकंशितपर्वकम् ॥ ॥ ७१ ॥
॥ ७५ ॥ तदात्यन्तंप्रकुपितःकुशोबाणस्यकृन्तनात् ॥ अपरंसायकंचापेदधारशितपर्वकम् ॥ ७६ ॥ सयावत्तदुरोभेत्तुंकरोतिचबलोद्धुरः ॥ तंतावद
च्छिनत्तस्यशरंकालानलप्रभम् ॥ ७७॥ तदाकुशोमातृपादौस्मृत्वारोषसमन्वितः ॥ तृतीयंचापकेस्वीयेदधारशरमद्भुतम् ॥७८॥ शत्रुघ्नस्तमपिक्षिप्रं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

छेत्तुंबाणंसमाददे ॥ तावद्विद्धःशरेणासौपपातधरणीतले ॥ ७९ ॥ हाहाकारोमहानासीच्छत्रुघ्नेविनिपातिते ॥ जयमापकुशस्तत्रस्वबाहुबलदर्पितः ॥
॥ ८० ॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशेषवा०रामाश्व०शत्रुघ्नमूर्च्छनेकुशजयोनामत्रिषष्टितमोऽध्यायः ॥६३॥ शेषउवाच ॥ शत्रुघ्नंपतितंवीक्ष्य
सुरथःप्रवरोनृपः ॥ प्रययौमणिनासृष्टेरथेतिष्ठन्महाद्भुते ॥ १ ॥ पुष्कलस्तुरणेपूर्वंपातितःसविचारयन् ॥ लवंययौतदायोद्धुंमहावीरबलोन्नतम् ॥
॥२॥ सुरथःकुशमासाद्यबाणान्मुञ्चन्ननेकधा ॥ व्यथयामाससमरेमहावीरशिरोमणिः ॥३॥ सुरथंविरथंचक्रेबाणैर्दशभिरुच्छ्रितैः ॥ धनुश्चिच्छेदतरसा
सुदृढंगुणपूरितम् ॥४॥ अस्त्रप्रत्यस्त्रसंहारैःक्षेपणैःप्रतिक्षेपणैः ॥ अभवत्तुमुलंयुद्धंवीराणांरोमहर्षणम् ॥५॥ अत्यन्तंसमरोद्युक्तेसुरथेदुर्जयेनृपे ॥ कुशः
सञ्चिन्तयामासकिंकर्तव्यंरणेमया ॥६॥ विचार्यनिशितंघोरंसायकंसमुपाददे ॥हननायनृपस्यास्यमहाबलसमन्वित ॥७॥ तमागतंशरंदृष्ट्वाकालानल
समप्रभम् ॥ छेत्तुंमतिंचकाराशुतावच्छ्रोमहाशरः ॥ ८ ॥ मुमूर्च्छसमरेवीरोमहावीरबलस्ततः ॥ पपातस्यन्दनोपस्थेसारथिस्तमुपाहरत् ॥ ९ ॥ सुरथे
पतितेदृष्ट्वाकुशंजयसमन्वितम् ॥ त्रासयन्तंवीरगणानियायपवनात्मजः ॥१०॥ समीरसूनुंप्रबलमायान्तंवीक्ष्यवानरम् ॥ जहासदर्शयन्दन्तान्कोपय
न्निवतंक्रुधा ॥११ ॥ उवाचचहनूमन्तमेहित्वंममसंमुखम ॥ भेत्स्येबाणसहस्रेणमृतोयास्यसियामिनीम् ॥ १२ ॥ इत्युक्तोहनुमाञ्ज्ञात्वारामसूनुंमहा
बलम् ॥ स्वामिकार्यंप्रकर्तव्यमितिकृत्वाप्रधावितः ॥ १३ ॥ शालमुत्पाट्यतरसाविशालंशतशाखिनम् ॥ कुशंवक्षसिसंलक्ष्ययौयोद्धुंमहाबलः ॥
॥ १४ ॥ शालहस्तंसमायान्तंहनूमन्तंमहाबलम् ॥ त्रिभिःक्षुरप्रैर्विव्याधसोऽर्धचन्द्रोपमैर्बली ॥ १५ ॥ सबाणविद्धस्तरसाकुशेनबलशालिना ॥
शालेनहृदिसञ्जघ्नेदन्तान्निष्पिष्यमारुतिः ॥ १६ ॥ शालाहतस्तदाबालःकिञ्चिन्नाकम्पतस्मयात् ॥ तदावीराःप्रशंसांतुप्रचक्रुस्तस्यबाल्यतः ॥
॥ १७ ॥ सशालेनहतोवीरःसंहारास्त्रंसमाददे ॥ संहन्तुंवैरिणंकोपात्कुशःसपरमास्त्रवित् ॥ १८ ॥ संहारास्त्रंसमालोक्यदुर्जयंकुशमोचितम् ॥
दध्यौरामंस्वमनसाभक्तविघ्नविनाशकम् ॥ १९ ॥ तदामुक्तंकुशेनाशुतदस्त्रंहृदिमारुतेः ॥ लग्नंमहाव्यथाकारितेनमूर्च्छामितःपुनः ॥ २० ॥
मूर्च्छांप्राप्तंतुतंदृष्ट्वाप्लवगंबलसंयुतः ॥विव्याधसायकैस्तीक्ष्णैःसैन्यंतत्सकलंमहत् ॥२१॥ तस्यबाणायुतैर्भग्नंबलंसर्वंरणाङ्गणे ॥पलायनपरंजातंचतुरङ्ग
समन्वितम् ॥ २२ ॥ तदाकपिपतिःकोपात्सुग्रीवोरक्षकोमहान् ॥ अभ्यधावन्नगान्नैकानुत्पाट्यकुशमुद्भटम् ॥ २३ ॥ कुशःसर्वान्प्रचिच्छेदलीलयाप्रहस
न्नगान् ॥ पुनरप्यागतान्वृक्षांश्चिच्छेदतरसाबली ॥ २४ ॥ अनेकबाणव्यथितःसुग्रीवःसमराङ्गणे ॥ जग्राहपर्वतंघोरंकुशमस्तकमध्यतः ॥ २५ ॥
कुशस्तंनगमायान्तंवीक्ष्यबाणैरनेकधा ॥ निष्पिपेषचकाराशुमहारुद्राङ्गयोग्यताम् ॥ २६ ॥ सुग्रीवस्तन्महत्कर्मदृष्ट्वाबालेननिर्मितम् ॥ जयाशां

CC-0. In Public Domain. Digitization by eGangotri

प्रतिनिर्वृत्तोबभूवसमराङ्गणे ॥ २७ ॥ रणमध्येदुराक्रान्तंकुशंलाङ्गूलताडकम् ॥ अत्यमर्षीरुषाक्रान्तस्तंहन्तुंनगमाददे ॥ २८ ॥ आत्मानं
 हन्तुमुद्युक्तंवीक्ष्यसुग्रीवमादरात् ॥ ताडयामासबहुभिःसायकैःशितपर्वभिः ॥ २९ ॥ सताडितोबहुविधैःशरैःपीडासमन्वितः ॥ कुशंहन्तुंसमा
 रब्धोययौशालंसमाददे ॥ ३० ॥ तदापिचकुशोवीरोवारुणास्त्रंसमाददे ॥ बबन्धतंचपाशेनदृढेनसलवाग्रजः ॥ ३१ ॥ सबद्धःपाशकैःस्निग्धैः
कुशेनबलशालिना ॥ पपातरणमध्येवैमहावीरैरलङ्कृते ॥ ३२ ॥ सुग्रीवंपतितंदृष्ट्वावीराःसर्वत्रदुद्रुवुः ॥ जयमापलवभ्रातामहावीरशिरोमणिः॥३३॥
तावल्लवोभटाञ्जित्वापुष्कलंचाङ्गदंतथा ॥ प्रतापाग्र्यंवीरमणिंतथान्यानपिभूभुजः ॥ ३४ ॥ जयंप्राप्यरणेवीरोलवोभ्रातरमागमत् ॥ सङ्ग्रामे
जयकर्तारंवैरिकोटिनिपातकम् ॥ ३५ ॥ परस्परंप्रहर्षितौपरिरम्भंप्रकुर्वतः ॥ जयंप्राप्तौतदावार्तांमुनेचक्रतुरुन्मदौ ॥ ३६ ॥ लवउवाच ॥ भ्रातस्तव
प्रसादेननिस्तीर्णोरणतोयधिः ॥ इदानींवीररणकंशोधयावःसुशोभितम् ॥ ३७ ॥ इत्युक्त्वाराजसविधेजगामसलवःकुशः ॥ राज्ञोमौलिमणिं
चित्रंजग्राहकनकाचितम् ॥ ३८ ॥ पुष्कलस्यलवोवीरोजग्राहमुकुटंशुभम् ॥ अङ्गदेचमहानर्घ्येशत्रुघ्नस्यापरस्यच ॥ ३९ ॥ गृहीत्वाशस्त्रसङ्घातं
हनूमन्तंकपीश्वरम् ॥ सुग्रीवंसविधेगत्वाउभावपिबबन्धतुः ॥ ४० ॥ पुच्छेवायुसुतस्यायंगृहीत्वातुकुशानुजः ॥ भ्रातरंप्रत्युवाचेदंनेष्यामिस्वक
मन्दिरम् ॥ ४१ ॥ आवयोर्जननीप्रीत्यैगृहीत्वापुच्छकेत्वहम् ॥ क्रीडार्थमृषिपुत्राणांकौतुकार्थममैवच ॥ ४२ ॥ एतच्छ्रुत्वाततोवाक्यमुवाचच
कुशोलवम् ॥ अहमेनंग्रहीष्यामिवानरंबलिनंदृढम् ॥ ४३ ॥ इत्येवंभाषमाणौतौबद्ध्वातौबलिनांवरौ ॥ पुच्छयोर्बलिनौधृत्वाजग्मतुःस्वाश्रमंप्रति ॥
॥ ४४ ॥ स्वाश्रमायप्रगच्छन्तौवीक्ष्यतौकपिसत्तमौ ॥ कम्पमानौजगदतुरन्योन्यंभीतयागिरा ॥ ४५ ॥ हनूमान्कपिराजानंप्रत्युवाचभयार्द्रधीः॥
एतौरामसुतावस्मान्नेष्यतःस्वाश्रमंप्रति ॥ ४६ ॥ मयापूर्वंकृतंकर्मजानकींप्रतिगच्छता ॥ तत्रमेजानकीदेवीसंमुखाभून्मनोहरा ॥ ४७ ॥ सामां
द्रक्ष्यतिवैदेहीबद्धंपाशेनवैरिणा ॥ तदाहसिष्यतिवरात्रपामेऽत्रभविष्यति ॥ ४८ ॥ मयाकिमत्रकर्तव्यंप्राणत्यागोभविष्यति ॥ महद्दुःखंचापतितं
सरामःकिंकरिष्यति ॥ ४९ ॥ सुग्रीवस्तद्वचःश्रुत्वाममाप्येवंमहाकपे ॥ नेष्यतेयदिमामेवंनिधनंतुभविष्यति ॥ ५० ॥ एवंकथयतोरेवह्यन्योन्यंभय
भीतयोः ॥ कुशोलवश्चभवनंमातुःप्रापतुरोजसा ॥ ५१ ॥ तावायातौसमीक्ष्यैवजहर्षजननीतयोः ॥ अन्योन्यंपरमप्रीत्यापरिरेभेनिजौसुतौ॥५२॥
ताभ्यांपुच्छगृहीतौतौवानरौवीक्ष्यजानकी ॥ हनूमन्तंचसुग्रीवंसर्ववीरंकपीश्वरम् ॥ ५३ ॥ जहासपाशबद्धौतौवीक्षमाणावराङ्गना ॥ उवाचच
विमोक्षार्थंवदन्तीवचनंवरम् ॥ ५४ ॥ पुत्रौप्रमुञ्चतंकीशौमहावीरौमहाबलौ ॥ द्रक्ष्यतोमांयदिस्फीतौप्राणत्यागंकरिष्यतः ॥ ५५ ॥ अयंवैहनु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मान्वीरोयोददाहदनोःपुरीम् ॥ अयमप्यृक्षराजोहिसर्ववानरभूमिपः ॥ ५६ ॥ किमर्थंविधृतौकुत्रकिंवाकृतमनादरात् ॥ पुच्छेयुवाभ्यांविधृतौसमहा
न्विस्मयोऽस्तिमे ॥ ५७ ॥ इतिमातुर्वचःश्लक्ष्णंश्रुत्वातांपुत्रकौतदा ॥ ऊचतुर्विनयश्रेष्ठौमहाबलसमन्वितौ ॥ ५८ ॥ मातःकश्चनभूपालोरामोदाश
रथिर्बली ॥ तेनमुक्तोहयःस्वर्णभालपत्रःसुशोभितः ॥ ५९ ॥ तत्रैवंलिखितंमातरेकवीराप्रसूर्मम ॥ येक्षत्रियास्तेगृह्णन्तुनोचेत्पादतलार्चकाः ॥
॥ ६० ॥ तदामयाविचारोवैकृतःस्वान्तेपतिव्रते ॥ भवतीक्षत्रियाकिंनवीरसूःकिंनवाभवेत् ॥ ६१ ॥ धाष्टर्यंतद्वीक्ष्यभूपस्यगृहीतोऽश्वोमयाबलात् ॥
जितंकुशेनवीरेणसैन्यंतत्पातितंरणे ॥ ६२ ॥ मुकुटोऽयंभूमिपतेर्जानीहिपतिदेवते ॥ अयमप्यन्यवीरस्यपुष्कलस्यमहात्मनः ॥ ६३ ॥
जानीहिमुकुटंत्वन्यंमणिमुक्ताविराजितम् ॥ अश्वोऽयंमेमनोहारीकामयानोहिभूपतेः ॥ ६४ ॥ आरोहणायमद्भ्रातुर्जानीहिबलिनोवरे ॥ इमौ
कीशौमयारन्तुमानीतौबलिनांवरौ ॥ ६५॥ कौतुकार्थंतवैवैतौसङ्ग्रामेयुद्धकारकौ ॥ इतिवाक्यंसमाकर्ण्यजानकीपतिदेवता ॥ ६६ ॥ जगादपुत्रौतौ
वीरौवीरवानरमुक्तये ॥ ६७ ॥ सीतोवाच ॥ युवाभ्यामनयःसृष्टोहृतोरामहयोमहान् ॥ अनेकेपातितावीराइमौबद्धौकपीश्वरौ ॥ ६८ ॥ पितु
स्तवहयोवीरौयागार्थंमोचितोऽमुना ॥ तस्यापिहृतवन्तौकिंवाजिनंमखसत्तमे ॥ ६९ ॥ मुञ्चतंप्लवगावेतौमुञ्चतंवाजिनांवरम् ॥ क्षाम्यतांभूपते
र्भ्राताशत्रुघ्नःपरकोपनः ॥ ७० ॥ जनन्यास्तद्वचःश्रुत्वाऊचतुस्तांबलान्वितौ ॥ क्षात्रधर्मेणतंभूपंजितवन्तौबलान्वितम् ॥ ७१ ॥ नास्माक
मनयोभाविक्षात्रधर्मेणयुध्यताम् ॥ वाल्मीकिनापुराप्रोक्तमस्माकंपठतांपुरः ॥७२॥ दुष्यन्तेनसमंयुद्धंभरतेनकृतंपुरा ॥ कण्वस्याश्रमकेवाहंधृत्वायाग
क्रियोचितम् ॥७३॥ तस्मात्सुतःस्वपित्रापियुध्येद्भ्रात्रापिचानुजः ॥ गुरुणाशिष्यएवापितस्मान्नोपापसम्भवः ॥७४॥ त्वदाज्ञातोऽधुनाचावांदास्यावो
हयमुत्तमम् ॥ मोक्ष्यावःकीशावेतौहिकरिष्यावोवचस्तव ॥ ७५ ॥ इत्युक्त्वामातरंवीरौगतौरणेकपीश्वरौ ॥ अमुञ्चतांहयंचापिहयमेधक्रियो
चितम् ॥७६॥ सीतादेवीस्वपुत्राभ्यांश्रुत्वासैन्यंनिपातितम्॥श्रीरामंमनसाध्यात्वाभानुमैक्षतसाक्षिणम् ॥७७॥ यद्यहंमनसावाचाकर्मणारघुनायकम्॥
भजामिनान्यंमनसातर्हिजीवेदयंनृपः ॥७८॥ सैन्यंचापिमहत्सर्वंयन्नाशितमिदंबलात् ॥ पुत्राभ्यांतत्तुजीवेतमत्सत्याज्जगतांपते ॥ ७९ ॥ इतियाव
द्वचोब्रूतेजानकीपतिदेवता ॥ तावद्बलंचतत्सर्वंजीवितंरणमूर्द्धनि ॥ ८० ॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशेषवा०रामाश्व०सैन्यजीवनंनाम
चतुःषष्टितमोऽध्यायः ॥ ६४ ॥ शेषउवाच ॥ क्षणान्मूर्च्छांजहौवीरःशत्रुघ्नःसमराङ्गणे ॥ अन्येऽपिवीराबलिनोमूर्च्छांप्राप्ताःसुजीविताः ॥ १ ॥
शत्रुघ्नोवाजिनांश्रेष्ठंददर्शपुरतःस्थितम् ॥ आत्मानंचशिरस्त्राणरहितंसैन्यजीवितम् ॥ २ ॥ वीक्ष्यचित्रमिदंस्वान्तेचकारचजगादह ॥ सुमतिं

CC-0. In Public Domain. Digitization by eGangotri

मन्त्रिणांश्रेष्ठंमूर्च्छाविरहितंतदा ॥ ३ ॥ कृपांकृत्वाहयंप्रादाद्वालोयज्ञस्यपूर्तये ॥ गच्छामरामंतरसाहयागमनकाङ्क्षिणम् ॥ ४ ॥ इत्युक्तासरथे
स्थित्वाहयमादायवेगतः ॥ ययौतदाश्रमाद्दूरंभेरीशङ्खविवर्जितः ॥ ५ ॥ तत्पृष्ठतोमहासैन्यंचतुरङ्गसमन्वितम् ॥ चचालकुर्वन्सम्भग्नंस्वभारेणफणी
श्वरम् ॥ ६ ॥ जवेनजाह्नवींतीर्त्वाकल्लोलजलशालिनीम् ॥ जगामविषयेस्वीयेस्वकीयजनशोभिते ॥ ७ ॥ पुष्कलेनयुतोराजासुरथेनसमन्वितः ॥
रथेमणिमयेतिष्ठन्महाकोदण्डधारकः ॥ ८ ॥ हयंतंपुरतःकृत्वारत्नमालाविभूषितम् ॥ श्वेतातपत्रंतस्यैवमूर्ध्निचामरभूषितम् ॥ ९ ॥ अनेकरथ
साहस्रैःपरीतोबलिभिर्नृपैः ॥ उद्यत्कोदण्डललितैर्वीरनादविभूषितैः ॥ १० ॥ क्रमेणनगरींप्रापसूर्यवंशविभूषिताम् ॥ अनेकैःकेतुभिःश्रेष्ठैर्भूषितांदुर्ग
राजिताम् ॥ ११ ॥ रामःश्रुत्वाहयंप्राप्तंशत्रुघ्नेनसहामुना ॥ पुष्कलेनचवीरेणययौहर्षमनेकधा ॥ १२ ॥ कटकंनिर्दिदेशासौचतुरङ्गंमहाबलम् ॥
लक्ष्मणंप्रेषयामासभ्रातरंबलिनांवरम् ॥ १३ ॥ लक्ष्मणःसैन्यसहितोगत्वाभ्रातरमागतम् ॥ परिरेभेमुदाक्रान्तःक्षतशोभितगात्रकम् ॥ १४ ॥ सर्वत्र
कुशलंपृष्टोवार्तांचात्रचकारसः ॥ परमंहर्षमापन्नःशत्रुघ्नःसङ्गतोमुदा ॥ १५ ॥ सौमित्रिःस्वरथेस्थित्वाभ्रात्रासहमहामनाः ॥ सैन्येनमहतावीरोययौ
स्वनगरींप्रति ॥१६॥ सरयूःपुण्यसलिलापवित्रितजगत्त्रया ॥ रामपादरजःपूताशरच्चन्द्रसमप्रभा ॥ १७ ॥ हंसकारण्डवाकीर्णाचक्रवाकोपशोभिता ॥
विचित्रतरवर्णैश्चपक्षिभिर्नादिताभृशम् ॥ १८ ॥ मण्डपास्तत्रबहुशोरामचन्द्रेणकारिताः ॥ ब्राह्मणानांवेदविदांपृथक्पाठनिनादकाः ॥ १९ ॥
क्षत्रियास्तत्रबहवोधनुष्पाणिसुशोभिताः ॥ ज्याटङ्कारेणबहुनानादयन्तोमहीतलम् ॥२०॥ भुञ्जतेब्राह्मणायत्रविचित्रान्नैर्मनोहरैः ॥ परस्परंप्रपश्यन्तो
वार्ताचक्रुर्मनोहराम् ॥ २१ ॥ पायसान्नानिशुभ्राणिचन्द्रकान्तिसमानिच ॥ क्षीराज्यबहुयुक्तानिशर्करामिश्रितानिच ॥२२॥ अपूपास्तत्रबहुलाश्चन्द्र
बिम्बसमाःश्रिया ॥ कर्पूरादिसुगन्धेनवासिताःसुमनोहराः ॥ २३ ॥ फेनिकाघटकाःस्निग्धाःशतच्छिद्राविरन्ध्रकाः ॥ शष्कुल्योमण्डकामृष्टामधु
रान्नसमन्विताः ॥ २४ ॥ भक्तंकुमुदसङ्काशंमुद्गदालिविमिश्रितम् ॥ सुगन्धेनसमायुक्तमत्यन्तंप्रीतिदायकम् ॥ २५ ॥ कर्पूरेणान्वितोदध्नायथेष्टंसिक्त
ओदनः॥ स्वादुपाककरैःसृष्टःपात्रेमुक्तःप्रवेषकैः॥२६॥ तत्रकेचिद्द्विजाःपात्रेनिक्षिप्तंवीक्ष्यपायसम्॥ परस्परंतेप्रत्यूचुःकिमिदंदृश्यतेऽद्भुतम् ॥२७॥ किं
चन्द्रबिम्बंनभसःपतितंतमसोभयात् ॥अमृतंतुभवत्यत्रमृत्युनाशकमद्भुतम् ॥२८॥ तच्छ्रुत्वारोषताम्राक्षःप्रोवाचान्योद्विजोत्तमः॥ नभवत्येवचन्द्रास्य
बिम्बंत्वमृतविप्लुतम् ॥ २९ ॥ एकमिन्दोर्वपुस्त्वेतद्दृश्यतेसदृशंकथम् ॥ ब्राह्मणानांसहस्रस्यपात्रेपात्रेपृथक्पृथक् ॥ ३० ॥ ततोजानीहिकुमुदंकर्पूरंवा
भविष्यति ॥माजानीहिमृगाङ्कस्यबिम्बंशुभ्रश्रियान्वितम् ॥३१॥ तावदन्योरुषाक्रान्तोधुन्वन्स्वंमस्तकंतथा ॥ नजानन्तिद्विजामूढाःस्वादुज्ञानाविच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षणाः ॥२२॥ इदंतुक्षौद्रकन्दस्यरसेनपरिपाचितम्॥ जानीहिशतपत्रस्यपुष्पाणिमधुराणिच ॥२३॥ एवंपरस्परंविप्राःकन्दमूलफलाशिनः॥तर्कयन्ति मुनेप्रीतारसज्ञानेऽतिलोलुपाः ॥ २४ ॥ तावदन्योद्विजःप्राहक्षत्रियाणांवरंजनुः ॥ भोक्ष्यन्तेतादृशंत्वन्नंमहापुण्यैरुपस्कृतम् ॥ २५ ॥ तदातंप्राब्रवी द्विप्रोदत्तस्यफलमीदृशम् ॥ येददत्यग्रजन्मभ्यःप्राप्नुवन्तितदीप्सितम् ॥ २६ ॥ यैरर्चितोनैवहरिर्नैवेद्यैर्विविधैर्मुहुः ॥ तषामेतादृशंभोज्यंनभवेदक्षि गोचरम् ॥ २७ ॥ यैर्नरैरग्रजन्मानोभोजिताविविधैरसैः ॥ भुञ्जतेतेस्वादुरसंपापिनांचक्षुरुज्झितम् ॥२८॥ एवंविधैरसैर्मिष्टैर्भोजिताद्विजसत्तमाः ॥ मण्डपेविपठन्तस्तेशब्दब्रह्मविचक्षणाः ॥ २९॥ नृत्यन्त्येकेहसन्त्येकेनदन्त्येकेप्रहर्षिताः ॥ उत्सवोबहुरुद्भातितत्रशत्रुघ्नआगमत् ॥४०॥ रामःशत्रुघ्न मायान्तंपुष्कलेनसमन्वितम् ॥ निरीक्ष्यमुदमुद्भूतांरक्षितुंनाशकत्तदा ॥ ४१ ॥ यावदुत्तिष्ठतेरामोभ्रातरंहयपालकम् ॥ तावद्रामपदेलग्नःशत्रुघ्नोभ्रातृ वत्सलः ॥ ४२ ॥ पादयोःपतितंवीक्ष्यभ्रातरंविनयान्वितम् ॥ परिरेभेदृढंप्रीतःक्षतसंशोभिताङ्गकम् ॥ ४३ ॥ अश्रूणिबहुधामुञ्चन्हर्षा च्छिरसिराघवः ॥ अत्यन्तंपरमांप्रापमुदंवचनदूरगाम् ॥ ४४ ॥ पुष्कलंस्वीयपदयोर्नम्रंविनयविह्वलः ॥ सुदृढंभुजयोर्मध्येविनीयापीडय द्भृशम् ॥ ४५ ॥ हनूमन्तंतथावीरंसुग्रीवंचाङ्गदंतथा ॥ लक्ष्मीनिधिंजनकजंप्रतापाग्र्यंरिपुञ्जयम् ॥ ४६ ॥ सुबाहुंसुमदंवीरंविमलंनीलरत्नकम् ॥ सत्यवन्तंवीरमणिंसुरथंरामसेवकम् ॥ ४७ ॥ अन्यानपिमहाभागान्रघुनाथःस्वयंतदा ॥ परिरेभेदृढंस्निग्धान्पादयोःप्रणतान्नृपान् ॥ ४८ ॥ सुमतिः श्रीरघुपतिंभक्तानुग्रहकारकम् ॥ परिरभ्यदृढंप्रीतःसंमुखेऽतिष्ठदुन्नतः ॥ ४९ ॥ तदारामोनिजामात्यंवीक्ष्यसान्निध्यमागतम् ॥ उवाचपरमप्रीत्या मन्त्रिणंवदतांवरः ॥५०॥ श्रीरामउवाच॥सुमतेमन्त्रिणांश्रेष्ठशंसमेवाग्मिनांवर ॥ कएतेभूमिपाःसर्वेकथमत्रसमागताः ॥५१॥ कुत्रकुत्रहयःप्राप्तःकेन केननियन्त्रितः ॥ कथंवैमोचितोभ्रात्रामहाबलसुशालिना ॥ ५२ ॥ शेषउवाच ॥ इत्युक्तोमन्त्रिणांश्रेष्ठःसुमतिःप्राहराघवम् ॥ प्रहसन्मेघगम्भीर नादेनचसुबुद्धिमान् ॥ ५३ ॥ सुमतिरुवाच ॥ सर्वज्ञस्यपुरस्तेऽद्यमयाकथमुदीर्यते ॥ पृच्छसित्वंलोकरीत्यासर्वंजानासिसर्वदृक् ॥ ५४ ॥ तथापि तवनिर्देशंशिरस्याधायसर्वदा ॥ ब्रवीमितच्छृणुष्वाद्यसर्वराजशिरोमणे ॥ ५५ ॥ त्वत्प्रसादादहोस्वामिन्सर्वत्रजगतीतले ॥ परिबभ्रामतेवाहोभाल पत्रसुशोभितः ॥ ५६ ॥ नकश्चित्तंनिजग्राहस्वनामबलदर्पितः ॥ स्वंस्वंराज्यंसमर्प्याथप्रणेमुस्तेपदाम्बुजम् ॥ ५७ ॥ कोवारावणदैत्येन्द्रनिहन्तु र्वाजिसत्तमम् ॥ गृह्णातिविजयाकाङ्क्षीजरामरणवर्जितः॥५८॥अहिच्छत्रांगतस्तावत्तववाजीमनोरमः ॥ तद्राजासुमदःश्रुत्वाहयंप्राप्तंतवप्रभो ॥ ५९ ॥ सपुत्रःप्रबलःसर्वसैन्येनवलिनावृतः ॥ सर्वंसमर्पयामासराज्यंनिहतकण्टकम्॥६०॥योराजाजगतांनेत्रींमातरंजगदम्बिकाम् ॥ प्रसाद्यचिरमायुष्यंलेभे

CC-0. In Public Domain. Digitization by eGangotri

राज्यमकण्टकम् ॥ ६१ ॥ सएषत्वांप्रणमतिसुमदः प्रभुसेवितम् ॥ तंगृहाणकृपादृष्ट्याचिराद्दर्शनकाङ्क्षकम् ॥६२॥ ततःसुबाहुभूपस्यनगरेबलपूरिते ॥
दमनस्तस्यवैपुत्रःप्रजग्राहहयोत्तमम् ॥ ६३ ॥ तेनसाकंमहद्युद्धंबभूवदमनेनच ॥ पुष्कलोजयमापेदेसंमूर्च्छ्यसुभुजात्मजम् ॥ ६४ ॥ ततःसुबाहुः
सङ्क्रुद्धोरणेपवनजंबलात् ॥ युयुधेतवपादाब्जसेवकंबलिनांवरम् ॥ ६५ ॥ तस्यपादाहतोज्ञानंप्राप्यशापतिरस्कृतम् ॥ तुभ्यंसमर्प्यसकलंवाजिनः
पालकोऽभवत्॥६६॥एषत्वांसुभुजोराजाप्रणमत्युन्नताङ्गकः ॥ कृपादृष्ट्याभिषिञ्चत्वंसुबाहुंनयकोविदम् ॥६७॥ ततोमुक्तोहयोरेवाह्रदेसनिममज्जह ॥
तत्रप्राप्तंमोहनास्त्रंशत्रुघ्नेनबलीयसा ॥ ६८ ॥ ततोदेवपुरेप्रागाच्छिववासविभूषिते ॥ तत्रत्यंतुविजानासियतस्त्वंतत्रचागतः ॥ ६९ ॥
विद्युन्मालीहतोदैत्यःसत्यवान्सङ्गतस्ततः ॥ सुरथेनसमंयुद्धंजानासित्वंमहामते ॥ ७० ॥ ततःकुण्डलकान्मुक्तोहयोबभ्रामसर्वतः ॥ नकश्चि
त्तंनिजग्राहस्ववीर्यबलदर्पितः ॥ ७१ ॥ वाल्मीकेराश्रमेरम्येहयःप्राप्तोमनोरमः ॥ तत्रयत्कुतुकंजातंतच्छृणुष्वनरोत्तम ॥ ७२ ॥ तत्रार्भस्तव
सारूप्यंबिभ्रत्षोडशवार्षिकः ॥ जग्राहवीक्ष्यपत्राङ्कंवाजिनंबलवत्तमः ॥ ७३ ॥ तत्रकालजितायुद्धंमहज्जातंनरोत्तम ॥ निहतस्तेनवीरेणशित
धारेणहेतिना ॥ ७४ ॥ अनेकेनिहताःसङ्ख्येपुष्कलाद्यामहाबलाः ॥ मूर्च्छितंचापिशत्रुघ्नंचक्रेवीरशिरोमणिः ॥ ७५ ॥ तदाराजामह
दुःखंविचार्यहृदिसंयुगे ॥ कोपेनमूर्च्छितंचक्रेवीरोहिबलिनांवरः ॥ ७६ ॥ सयावन्मूर्च्छितोराज्ञातावदन्यःसमागतः ॥ तेनैतेनचसञ्जीव्यनाशि
तंकटकंतव ॥ ७७ ॥ सर्वेषांमूर्च्छितानांतुशस्त्राण्याभरणानिच ॥ गृहीत्वावानरौबद्धौजग्मतुःस्वाश्रमंप्रति ॥ ७८ ॥ कृपांकृत्वापुनस्तेन
दत्तोऽश्वोयज्ञियोमहान् ॥ जीवनंप्रापितंसर्वंकटकंनष्टजीवितम् ॥ ७९ ॥ वयंगृहीत्वातंवाहंप्राप्तास्तवसमीपतः ॥ एतदेवमयाज्ञातंतदुक्तंतेपुरोवचः ॥
॥८०॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशेषवा०रामाश्व०सुमतिनिवेदनंनामपञ्चषष्टितमोऽध्यायः ॥६५॥ शेषउवाच ॥ कथितौवैसुमतिनावाल्मीके
राश्रमेशिशू ॥ पुत्रौस्वीयावितिज्ञात्वावाल्मीकिंप्रतिसञ्जगौ ॥ १ ॥ श्रीरामउवाच ॥ कौशिशूममसारूप्यधारकौबलिनांवरौ ॥ किमर्थंतिष्ठतस्तत्र
धनुर्विद्याविशारदौ ॥ २ ॥ अमात्यकथितौश्रुत्वाविस्मयोममजायत ॥ यौशत्रुघ्नंहनूमन्तंलीलयाङ्गंबबन्धतुः ॥ ३ ॥ तस्माच्छंसमुनेसर्वंबालयोश्च
विचेष्टितम् ॥ यथामेपरमाप्रीतिर्भवत्येवमभीप्सिता ॥४॥ इतितत्कथितंश्रुत्वाराजराजस्यधीमतः ॥ उवाचपरमंवाक्यंस्पष्टाक्षरसमन्वितम् ॥ ५ ॥
वाल्मीकिरुवाच ॥ तवान्तर्यामिणोनृणांकथंज्ञानंचनोभवेत् ॥ तथापिकथयाम्यत्रतवसन्तोषहेतवे ॥ ६ ॥ राजन्यौबालकौमह्यमाश्रमेबलिनांवरौ ॥
त्वत्सारूप्यधरौस्वाङ्गमनोहरवपुर्धरौ ॥७॥ त्वयायदावनेत्यक्ताजानकीवैनिरागसी ॥ अन्तर्वत्नीवनेघोरेविलपन्तीमुहुर्मुहुः ॥८॥ कुररीमिवदुःखार्ता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वीक्ष्याहंतववल्लभाम् ॥ जनकस्यसुतांपुण्यामाश्रमेत्वानयंतदा ॥९॥तस्याःपर्णकुटीरम्यारचितामुनिपुत्रकैः॥तस्यामसूतपुत्रौद्वौभासयन्तौदिशोदश॥
॥ १० ॥ तयोरकरवंनामकुशोलवइतिस्फुटम् ॥ ववृधातेऽनिशंतत्रशुक्लपक्षेयथाशशी ॥ ११ ॥ कालेनोपनयाद्यानिसर्वाणिकृतवानहम् ॥
वेदान्साङ्गानहंसर्वान्ग्राहयामासभूपते ॥ १२ ॥ सर्वाणिसरहस्यानिशृणुष्वमुखतोमम ॥ आयुर्वेदंधनुर्विद्यांशस्त्रविद्यांतथैवच ॥ १३ ॥ विद्यां
जालन्धरींचाथसङ्गीतकुशलौकृतौ ॥ गङ्गाकूलेगायमानौलताकुञ्जवनेषुच ॥ १४ ॥ चञ्चलौचलचित्तौतौसर्वविद्याविशारदौ ॥ तदाहमतिसन्तोषं
प्राप्तःपरमबालयोः ॥ १५ ॥ दत्त्वासर्वाणिचास्त्राणिमस्तकेनिहितःकरः ॥ अतीवगानकुशलौदृष्ट्वालोकोविसिष्मिये ॥ १६ ॥ षड्जमध्यम
गान्धारस्वरभेदविशारदौ ॥ तथाविधौविलोक्याहंगापयामिमनोहरम् ॥ १७ ॥ भविष्यज्ज्ञानयोगाच्चकृतंरामायणंशुभम् ॥ मृदङ्गपणवाद्यादियन्त्र
वीणाविशारदौ ॥१८॥ वनेवनेचगायन्तौमृगपक्षिविमोहकौ॥अद्भुतंगीतमाधुर्यंतवरामकुमारयोः ॥१९॥ श्रोतुंतौवरुणोबालावानिनायविभावरीम् ॥
मनोहरवयोरूपौगानविद्याब्धिपारगौ ॥ २० ॥ कुमारौजगदुस्तत्रलोकेशादेशतःकलम् ॥ परमंमधुरंरम्यंपवित्रंचरितंतव ॥ २१ ॥ शुश्राववरुणः
सार्द्धंकुटुम्बेनचगायकैः ॥ शृण्वन्नैवगतस्तृप्तिंमित्रेणवरुणःसह ॥ २२ ॥ सुधातोऽपिपरंस्वादुचरितंरघुनन्दन ॥ गानानन्दमहालोभहृतप्राणेन्द्रिय
क्रियः ॥२३॥ प्रत्यागन्तुंदिदेशासौकुमारौनहितावकौ ॥ रमणीयमहाभोगैर्लोभितावपिबालकौ ॥२४॥ चलितौनगुरोश्चात्ममातुःपादाम्बुजस्मृतेः ॥
अहंचापिगतःपश्चाद्वरुणालयमुत्तमम् ॥ २५ ॥ वरुणःप्रेमसहितःपूजांचक्रेममप्रभो ॥ पृच्छतेजन्मकर्मादिसर्वंज्ञायापिबालयोः ॥२६॥ वरुणायाब्रुवं
सर्वंजन्मविद्याद्युपागमम् ॥ श्रुत्वासीतासुतौदेवःसचक्रेऽम्बरभूषणैः ॥२७॥ देवदत्तमतोग्राह्यमितिमद्वाक्यगौरवात् ॥ आहृतंराजपुत्राभ्यांयद्दत्तंवरु
णेनतत् ॥ २८ ॥ प्रसन्नेनतयोर्वाद्यगानविद्यावयोगुणैः ॥ ततोमामब्रवीत्सीतामुद्दिश्यवरुणःकृती ॥२९॥ सीतापतिव्रताधुर्यारूपशीलवयोऽन्विता ॥
वीरपुत्रामहाभागात्यागंनार्हतिकर्हिचित् ॥ ३० ॥ महतीहानिरेतस्यास्त्यागेहिरघुनन्दन ॥ सिद्धीनांपरमासिद्धिरेषातेह्यनपायिनी ॥ ३१ ॥
पामरैर्महिमानास्याज्ञायतेयदिदूषितैः ॥ काहानिस्तावतारामपुण्यश्रवणकीर्तन ॥ ३२ ॥ अस्मत्साक्षिकमेतस्याःपावनंचरितंसदा ॥ सद्यस्ते
सिद्धिमायान्तियेसीतापदचिन्तकाः ॥३३॥ यस्याःसङ्कल्पमात्रेणजन्मस्थितिलयादिकाः ॥ भवन्तिजगतांनित्यंव्यापाराऐश्वराअमी ॥३४॥ सीता
मृत्युःसुधाचेयंतपत्येषाचवर्षति॥स्वर्गोमोक्षस्तपोयोगोदानंचतवजानकी ॥३५॥ ब्रह्माणंशिवमन्यांश्चलोकपालान्मदादिकान् ॥ करोत्येषाकरोत्येव
नान्यासीतातवप्रिया ॥ ३६ ॥ त्वंपितासर्वलोकानांसीताचजननीत्यतः ॥ कुदृष्टिरत्रतुक्षेमयोग्यानतवकर्हिचित् ॥ ३७ ॥ वेत्तिसीतांसदाशुद्धां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वज्ञोभगवान्स्वयम् ॥ भवानपिसुतांभूमेःप्राणादपिगरीयसीम् ॥ ३८ ॥ आदर्तव्यात्वयातस्मात्प्रियाशुद्धेतिजानकी ॥ नचशापपराभूतिः
सीतायांत्वयिवाविभो ॥ ३९ ॥ इमानिममवाक्यानिवाच्यानिजगतांपतिम् ॥ रामंप्रतित्वयासाक्षाद्वाल्मीकेमुनिसत्तम ॥ ४० ॥ इत्युक्तो
वरुणंनाहंसीतासङ्ग्रहकारणात् ॥ एवमेवहिसर्वैश्चलोकपालैरपिप्रभो ॥ ४१ ॥ श्रुतंरामायणोद्गानंपुत्राभ्यांतेसुरासुरैः ॥ गन्धर्वैरपिसर्वैश्चकौतुकाविष्ट
मानसैः ॥ ४२ ॥ प्रसन्नाएवसर्वेऽपिप्रशशंसुःसुतौचते ॥ त्रैलोक्यंमोहितंताभ्यांरूपगानवयोगुणैः ॥४३॥ दत्तंयल्लोकपालैस्तुसुताभ्यांस्वीकृतंहितत्॥
ऋषिभिश्चवराआभ्यामन्येभ्यःकीर्तिरेवच ॥ ४४ ॥ एकरामंजगत्सर्वंपूर्वंमुनिविलोकितम् ॥ त्रिराममधुनाजातंसुताभ्यांतेऽखिलेक्षितम् ॥ ४५ ॥
एककामपरामूर्तिर्लोकेपूर्वमवेक्षिता ॥ कामैश्चतुर्भिरद्यायंजायतेचयतस्ततः ॥ ४६ ॥ सर्वत्रान्यत्रराजेन्द्ररामपुत्रौकुशीलवौ ॥ गीयेतेअत्रसङ्कोचः
किंकृतोविदुषित्वयि ॥ ४७ ॥ कृतेषुतवसर्वेषुश्रूयतेमहतीस्तुतिः ॥ त्यागादन्यत्रसीतायाःपुण्यश्लोकशिरोमणे ॥ ४८ ॥ त्वयात्रैलोक्यनाथेन
गार्हस्थ्यमनुकुर्वता ॥ अङ्गीकार्यौसुतौरामविद्याशीलगुणान्वितौ ॥ ४९ ॥ नतौस्वांमातरंहित्वास्थास्यतोभवदन्तिके ॥ जनन्यासहितौतस्मादा
कार्यौभवतासुतौ ॥ ५० ॥ दत्तएवतयेदानींसेनासञ्जीवनात्पुनः ॥ प्रत्ययःसर्वलोकानांपावनःपततामपि ॥ ५१ ॥ नाज्ञातंतेनचास्माकंनामराणां
चमानद ॥ शुद्धौतस्यास्तुलोकानांयन्नदृष्टंतदिहध्रुवम् ॥ ५२ ॥ शेषउवाच ॥ इतिवाल्मीकिनारामःसर्वज्ञोऽप्यवबोधितः ॥ स्तुत्वानत्वाच
वाल्मीकिंप्रत्युवाचसलक्ष्मणम् ॥ ५३ ॥ गच्छताताधुनासीतामानेतुंधर्मचारिणीम् ॥ सपुत्रांरथमास्थायसुमन्तसहितःसखे ॥ ५४ ॥ श्रावयित्वा
ममेमानिमुनेश्चवचनान्यपि ॥ सम्बोध्यचपुरीमेतांसीतांप्रत्यानयाशुताम् ॥ ५५ ॥ लक्ष्मणउवाच ॥ यास्यामितवसन्देशात्सर्वेषांनःप्रभो
विभो ॥ देव्यायास्यतिचेद्देवयात्रामेसफलाततः ॥५६ ॥मयिसासाभ्यसूयैवपूर्वदोषवशात्सती ॥ अनागतायांतस्यांतुक्षमस्वागन्तुकंहिमाम् ॥५७॥
इत्युक्त्वालक्ष्मणोरामंरथेस्थित्वानृपाज्ञया ॥ सुमित्रमुनिशिष्याभ्यांयुतोऽगाद्भूमिजाश्रमम् ॥ ५८ ॥ कथंप्रसादनीयास्यात्सीताभगवतीमया ॥ पूर्वं
दोषंविजानन्तीरामःधीनस्यमेसदा ॥ ५९ ॥ एवंसञ्चिन्तयन्नन्तर्हर्षसङ्कोचमध्यगः ॥ लक्ष्मणःप्रापसीतायाआश्रमंश्रमनाशनम् ॥ ६० ॥ रथात्सो
ऽथावरुह्यारादश्रुरुद्धविलोचनः ॥ आर्येपूज्येभगवतिशुभेइतिवदन्मुहुः ॥ ६१ ॥ पपातपादयोस्तस्यावेपमानाखिलाङ्गकः ॥ उत्थापितस्तयादेव्या
प्रीतिविह्वलयासच ॥ ६२॥ सीतोवाच ॥ किमर्थमागतःसौम्यवनंमुनिजनप्रियम् ॥ आस्तेसकुशलीदेवःकौसल्याशुक्तिमौक्तिकः ॥ ६३ ॥ अरोषो
मयिकच्चित्सकीर्त्याकेवलयाहतः ॥ कीर्त्यतेसर्वलोकैश्चकल्याणगुणसागरः ॥६४॥ अकीर्तिभीतिमापन्नस्त्यक्तुमांत्वांनियुक्तवान् ॥ यदिततश्चलोकेषु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कीर्तिस्तस्यामलाभवत् ॥ ६५ ॥ मृत्वाऽपिपतिसत्कीर्तिंकुर्वन्त्यामेहिसुस्थिरा ॥ पतिसामीप्यमेवाशुभूयादेवहिदेवर ॥ ६६ ॥ त्यक्तयापिमयातेन नासौत्यक्तोमनागपि ॥ फलंहिसाधनायत्तंहेतुःफलवशोनतु ॥ ६७ ॥ कौसल्याशल्यशून्यासौकृपापूर्णासदामयि ॥ आस्तेकुशलिनीयस्याःपुत्रस्त्रैलोक्यपालकः ॥ ६८ ॥ सर्वेकुशलिनःसन्तिभरताद्याश्चबान्धवाः ॥ सुमित्राचमहाभागायस्याःप्राणादहंप्रिया ॥ ६९ ॥ मद्वर्तिंकित्वमपित्यक्तःसर्वलोकेषुकीर्तये ॥ राज्ञःकिंदुस्त्यजंतस्यस्वात्मापियस्यनप्रियः ॥ ७० ॥ इत्येवंबहुधापृष्टस्तयारामानुजःसताम् ॥ उवाचकुशलीदेवःकुशलंत्वयिपृच्छति ॥ ७१॥ कौसल्याचसुमित्राचयाश्चान्याराजयोषितः ॥ पप्रच्छुःकुशलंदेविप्रीत्यात्वामाशिषासह ॥ ७२ ॥ कुशलप्रश्नपूर्वंहितवपादाभिवन्दनम् ॥ निवेदयामिशत्रुघ्नभरताभ्यांकृतंशुभे ॥ ७३ ॥ गुरुभिर्गुरुपत्नीभिःसर्वाभिरपितेशुभे ॥ दत्ताशीःकुशलप्रश्नःकृतश्चत्वयिजानकि ॥ ७४ ॥ आकारयतिदेवस्त्वांनिर्व्यलीकेनचात्मना ॥ अलभ्यान्यरतिस्त्वत्तोऽन्यत्रसर्वत्रभामिनि ॥ ७५ ॥ शून्याएवदिशःसर्वास्त्वांविनाजनकात्मजे ॥ पश्यन्नोदितिनाथोनोरोदयन्नितरानपि ॥ ७६ ॥ यत्रदेविस्थितासित्वंनित्यंस्मरतिराघवः ॥ अशून्यंतुतमेवासौमन्यमानोविदेहजे ॥ ७७ ॥ धन्योऽयमाश्रमोजातोवाल्मीकेर्यत्रजानकी ॥ कालंक्षपतिवार्ताभिर्मदीयाभिर्वदन्निति ॥ ७८ ॥ उक्तवान्यद्वदन्किञ्चित्स्वामीनस्त्वयितच्छृणु ॥ व्यक्तीभवतिवक्तुर्यद्धृतंतदसंशयम् ॥ ७९ ॥ लोकावदन्तिमामेवसर्वेषामीश्वरेश्वरम् ॥ अहंत्वदृष्टमेवैषांस्वतन्त्रंकारणंब्रुवे ॥ ८० ॥ अदृष्टमेवकार्येषुसर्वेशोऽप्यनुगच्छति ॥ ईशनीयाःकुतोनैतदन्वीयुःसुखदुःखयोः ॥ ८१ ॥ धनुर्भङ्गमतिभ्रंशेकैकेय्यामरणेपितुः ॥ अरण्यगमनेतत्रहरणेतववारिधेः ॥ ८२ ॥ तरणेरक्षसांभर्तुर्मारणेऽपिरणेरणे ॥ सहायीभवनेमह्यमृक्षवानररक्षसाम् ॥ ८३ ॥ लाभेतवप्रतिज्ञायाःसत्यत्वेचसतीमणे ॥ पुनःस्वबन्धुसम्बन्धेराज्यप्राप्तौचभामिनि ॥ ८४ ॥ पुनःप्रियावियोगेचकारणंयदवारणम् ॥ प्रसीदतितदेवाद्यसंयोगेपुनरावयोः ॥ ८५ ॥ वेदोऽन्यथाकृतोयेन[1]लोकोत्पत्तिलयौयतः ॥ लोकाननुगतस्तस्मात्कारणंप्रथमंत्वहम् ॥ ८६ ॥ अदृष्टमनुवर्तन्तेलोकाःसम्प्रतिबोधकाः॥भोगेनजीर्यतेऽदृष्टंतत्तद्भुक्तंत्वयावने ॥८७॥ स्नेहोऽकारणकःसीतेवर्धमानोममत्वयि ॥ लोकादृष्टेतिरस्कृत्यत्वामाह्वयतआदरात् ॥ ८८॥ शङ्कितेनापिदोषेणस्नेहनैर्मल्यमञ्जनम् ॥ भवतीतिसवैशुद्धआस्वाद्योविबुधैःसदा ॥८९॥ स्नेहशुद्धिरियंभद्रेकृतामेत्वयिनान्यथा ॥ मन्तव्यंरक्षितोऽप्येषलोकःशिष्टानुवर्तिना ॥ ९० ॥ आवयोर्निन्दयादेविसर्वावस्थासुशुद्धये ॥ लोकोनश्येद्धिसंमूढश्चरितैर्महतामयम् ॥ ९१ ॥ आवयोरुज्ज्वला

१ 'यत्र' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

कीर्तिरावयोरुज्ज्वलोरसः ॥ आवयोरुज्ज्वलौवंशावावयोरुज्ज्वलाःक्रियाः ॥ ९२ ॥ भवेयुरावयोःकीर्तिर्गायकाउज्ज्वलाभुवि ॥ आवयोर्भक्ति
मन्तोयेतेयान्त्यन्तेभवाम्बुधेः ॥ ९३ ॥ इत्युक्ताभवतीतेनप्रीयमाणेनतेगुणैः ॥ पत्युःपादाम्बुजेद्रष्टुंकरोतुसदयंमनः ॥ ९४ ॥ वासांसिरमणीयानि
भूषणानिमहान्तिच ॥ अङ्गरागस्तथागन्धामनोज्ञास्त्वयियोजिताः ॥ ९५ ॥ रथोदास्यश्चरामेणप्रेषिताउत्सवायते ॥ छत्रंचचामरेशुभ्रेगजाअश्वाश्च
शोभने ॥ ९६ ॥ स्तूयमानाद्विजश्रेष्ठैःसूतमागधबन्दिभिः ॥ वन्द्यमानापुरस्त्रीभिःसेव्यमानाचयोद्धृभिः ॥९७॥ पुष्पैःसंछाद्यमानाचदेवीदेवाङ्गना
दिभिः ॥ धनानिददतीतेभ्योद्विजातिभ्योयथेप्सितम् ॥ ९८॥ गजारूढौकुमारौचपुरस्कृत्यजनेश्वरी ॥ मयानुगम्यमानाचगच्छायोध्यांनिजां
पुरीम् ॥ ९९ ॥ त्वयितत्रगतायांतुसङ्गतायांप्रियेणते ॥ सर्वासांराजनारीणामागतानांचसर्वशः ॥ १०० ॥ सर्वासामृषिपत्नीनांकौसलानांतथैवच ॥
मङ्गलैर्वाद्यगीताद्यैर्भवत्वद्यमहोत्सवः ॥१॥ शेषउवाच ॥इतिविज्ञापनांदेवीश्रुत्वासीतातमाहसा ॥ नाहंकीर्तिकरीराज्ञोह्यपकीर्तिःस्वयंत्वहम् ॥२॥ किं
मयातस्यसाध्यंस्याद्धर्मकामार्थशून्यया ॥ सत्येवंभवतांभूपेकोविश्वासोनिरङ्कुशे ॥ ३ ॥ प्रत्यक्षावापरोक्षावाभर्तुर्दोषामनःस्थिताः ॥ नवाच्या
जातुमादृश्याकल्याणकुलजातया ॥ ४ ॥ पाणिग्रहणकालेमेयद्रूपोहृदयेस्थितः ॥ तद्रूपोहृदयान्नासौकदाचिदपसर्पति ॥ ५ ॥ लक्ष्मणेमौकुमारौमे
तत्तेजोंशसमुद्भवौ ॥ वंशाङ्कुरौमहाशूरौधनुर्विद्याविशारदौ ॥६॥ नीत्वापितुःसमीपंतुलालनीयौप्रयत्नतः॥तपसाराधयिष्यामिरामंकाममिहस्थिता॥
॥ ७ ॥ वाच्यंत्वयामहाभागपूज्यपादाभिवन्दनम् ॥ सर्वेभ्यःकुशलंचापिगत्वेतोमदपेक्षया ॥ ८ ॥ पुत्रौसमादिशत्सीतागच्छतंपितुरन्तिकम् ॥
शुश्रूषणीयएवासौभवद्भ्यांस्वपदप्रदः ॥९॥ आज्ञप्तावप्यनिच्छन्तौतौकुमारौकुशीलवौ ॥ वाल्मीकिवचनात्तत्रजग्मतुश्चसलक्ष्मणौ ॥१०॥ वाल्मीके
रेवपादाब्जसमीपंतत्सुतौगतौ ॥ लक्ष्मणोऽपिववन्देतंगत्वाबालकसंयुतः ॥ ११ ॥ वाल्मीकिर्लक्ष्मणस्तौतुकुमारौमिलिताअमी ॥ सभायांसंस्थितं
रामंज्ञात्वातेजग्मुरुत्सुकाः ॥ १२ ॥ लक्ष्मणःप्रणिपत्याथसीतावाक्यादिसर्वशः ॥ कथयामासरामायहर्षशोकयुतःसुधीः ॥ १३ ॥ सीतासन्देश
वाक्येभ्योरामोमूर्च्छांसमन्वभूत ॥ संज्ञामवाप्यचोवाचलक्ष्मणंनयकोविदम् ॥ १४ ॥ गच्छमित्रपुनस्तत्रयत्नेनमहताचताम् ॥ शीघ्रमानयभद्रंतेम
द्वाक्यानिनिवेद्यच ॥ १५ ॥ अरण्येकिंतपस्यन्त्यागतिरन्याविचिन्तिता ॥ श्रुताहृष्टाऽथवामत्तोयन्नागच्छसिजानकि ॥ १६ ॥ त्वदिच्छयात्वमेवेतो
गतारण्यंमुनिप्रियम् ॥ पूजितामुनिपत्न्यस्ताहृष्टामुनिगणास्त्वया ॥ १७ ॥ पूर्णोमनोरथस्तेऽद्यकिंनागच्छसिभामिनि ॥ नदोषंमयिपश्येस्त्वंस्वात्मे

१ 'कौशल्यानां तथा मखे' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्छायाविलोकनात् ॥ १८ ॥ गत्वागत्वाऽथवामोरुपतिरेवगतिःस्त्रियाः ॥ निर्गुणोऽपिगुणाम्भोधिःकिंपुनर्मनसेप्सितः ॥ १९ ॥ यायाक्रिया
कुलस्त्रीणांसासापत्युःप्रतुष्टये ॥ पूर्वमेवप्रतुष्टोऽहमिदानींसुतरांत्वयि ॥ १२० ॥ यागोजपस्तपोदानंव्रतंतीर्थंदयादिकम् ॥ देवाश्रमयिसन्तुष्टेतुष्टमेत
दसंशयम् ॥ २१ ॥ शेषउवाच ॥ इतिसन्देशमादायसीतांप्रतिजगत्पतेः ॥ आहलक्ष्मणआत्मेशमानतःप्रणयाद्धरौ ॥ २२ ॥ सीतानयनमुद्दिश्य
प्रसन्नस्त्वंयदूचिवान् ॥ कथयिष्यामितद्वाक्यंविनयेनसमन्वितम् ॥ २३ ॥ इत्युक्त्वापादयोर्नत्वारघुनाथस्यलक्ष्मणः ॥ जगामत्वरितःसीतांरथे
तिष्ठन्महाजवे ॥२४ ॥ वाल्मीकिःश्रीयुतौवीक्ष्यरामपुत्रौमहौजसौ ॥ उवाचस्मितमाधायमुखंकृत्वामनोहरम् ॥ २५ ॥ युवांप्रगायतंपुत्रौरामचारित्र
मद्भुतम् ॥ वीणांप्रवादयन्तौचकलगानेनशोभितम् ॥ २६ ॥ इत्युक्तौतौसुतौरामचारित्रंबहुपुण्यदम् ॥ अगायतांमहाभागौसुवाक्यपदचित्रितम् ॥
॥ २७ ॥ यस्मिन्धर्मविधिःसाक्षात्पातिव्रत्यंतुयत्स्थितम् ॥ भ्रातृस्नेहोमहान्यत्रगुरुभक्तिस्तथैवच ॥ २८ ॥ स्वामिसेवकयोर्यत्रनीतिर्मूर्तिमतीकिल॥
अधर्मकरशास्तिर्वैयत्रसाक्षाद्रघूद्वहात् ॥ २९ ॥ तद्गानेनजगद्व्याप्तंदिविदेवाअपिस्थिताः ॥ किन्नराअपियद्गानंश्रुत्वामूर्च्छामिताःक्षणात् ॥ १३० ॥
वीणायारणितंश्रुत्वातालमानेनशोभितम् ॥ निखिलापरिषत्तत्रशालभञ्जीवचित्रिता ॥ ३१ ॥ हर्षादश्रूणिमुञ्चन्तोरामाद्याभूमिपास्तथा ॥ तद्गानपञ्च
मालापमोहिताश्चित्रितोपमाः ॥ ३२ ॥ तत्ररामःसुतौदृष्ट्वामहागानविमोहकौ ॥ अदात्ताभ्यांसुवर्णस्यलक्षंलक्षंपृथक्पृथक् ॥ ३३ ॥ तदादानपरंदृष्ट्वा
वाल्मीकिंमुनिसत्तमम् ॥ अब्रूतांप्रहसन्तौतौकिञ्चिद्रक्तभ्रुवौततः ॥३४॥ मुनेमहानयोऽनेनक्रियतेभूमिपनवै ॥ यदावाभ्यांसुवर्णानिदातुमिच्छतिलोभ
यन् ॥३५॥ प्रतिग्रहोब्राह्मणानांशस्यतेनेतरेषुवै ॥प्रतिग्रहपरोराजानरकायैवकल्पते ॥३६॥ आवयोःकृपयामुक्तंराज्यंभुङ्क्तेमहीपतिः ॥कथंदातुंसुवर्णा
निवाञ्छतिश्रेयसाश्रितः ॥३७॥ इत्युक्तवन्तौतौदृष्ट्वावाल्मीकिःकृपयायुतः ॥ अशंसद्युष्मत्पितरंजानीथांनीतिवित्तमौ ॥ ३८ ॥ इतिश्रुत्वामुनेर्वाक्यं
बालकौनृपपादयोः ॥ लग्नौविनयसंयुक्तौमातृभक्त्यातिनिर्मलौ ॥३९॥ रामोबालौदृढंस्वाङ्केपरिरभ्यमुदान्वितः ॥ मेनेस्वीयौतदाधर्मौमूर्तिमन्तावुप
स्थितौ ॥१४०॥ सभापिरामसुतयोर्वीक्ष्यवक्त्रेमनोरमे ॥ जानकीपतिभक्तिस्त्वंसत्यंमेनेमुनीश्वर ॥४१॥ इतिशेषमुखप्रोक्तंश्रुत्वावात्स्यायनोऽब्रवीत् ॥
रामायणंश्रोतुमनाःसर्वधर्मसमन्वितम् ॥ ४२ ॥ वात्स्यायनउवाच ॥ कस्मिन्कालेकृतंस्वामिन्रामायणमिदंमहत् ॥ कस्माच्चकारकिन्तत्रवर्णनंतद्व
दस्वमे ॥ ४३ ॥ शेषउवाच ॥ एकदागतवान्विप्रोवाल्मीकिर्वैपिनंमहत् ॥ यत्रतालास्तमालाश्चकिंशुकायत्रपुष्पिताः ॥ ४४ ॥ केतकीयत्ररजसा
कुर्वतीसौरभंवनम् ॥ शशिप्रभेवमहतीदृश्यतेशुभ्रकर्णभृत् ॥ ४५ ॥ चम्पकोबकुलश्चापिकोविदारःकुरण्टकः ॥ अनेकेपुष्पितायत्रपादपाःशोभने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वने ॥ ४६ ॥ कोकिलानांविरावेणषट्पदानांचशब्दितैः ॥ सङ्घुष्टंसवतोरम्यंमनोहरवयोन्वितम् ॥ ४७ ॥ तत्रक्रौञ्चयुगंरम्यंकामबाणप्रपी
डितम् ॥ परस्परंप्रहर्षितंरेमेस्निग्धतयास्थितम् ॥ ४८॥ तदाव्याधःसमागत्यतयोरेकंमनोहरम् ॥ अवधीन्निर्दयःकश्चिन्मांसास्वादनलोलुपः ॥४९ ॥
तदाक्रौञ्चीव्याधहतंस्वपतिंवीक्ष्यदुःखिता ॥ विललापभृशंदुःखान्मुञ्चन्तीरावमुच्चकैः ॥ १५० ॥ तदामुनिःप्रकुपितोनिषादंक्रौञ्चघातकम् ॥
शशापवार्युपस्पृश्यसरितःपावनंशुभम् ॥ ५१ ॥ मानिषादप्रतिष्ठांत्वमगमःशाश्वतीःसमाः ॥ यत्क्रौञ्चपक्षिणोरेकमवधीःकाममोहितम् ॥ ५२ ॥
तदाप्रबन्धंश्लोकस्यजातंमत्वाह्यनुद्विजाः ॥ ऊचुर्मुनिंप्रहृष्टास्तेशंसन्तःसाधुसाध्विति ॥ ५३ ॥ स्वामिञ्छापोदितेवाक्येभारतीश्लोकमातनोत् ॥
अत्यन्तंमोहनोजातःश्लोकोऽयंमुनिसत्तम ॥ ५४ ॥ तदामुनिःप्रहृष्टात्माबभूववाडवर्षभ ॥ तस्मिन्कालेसमागत्यब्रह्मापुत्रैःसमन्वितः ॥ ५५ ॥
वचोजगादवाल्मीकिंधन्योऽसित्वंमुनीश्वर ॥ भारतीत्वन्मुखेस्थित्वाश्लोकत्वंसमपद्यत ॥ ५६ ॥ तस्माद्रामायणंरम्यंकुरुष्वमधुराक्षरम् ॥
येनतेविमलाकीर्तिराकल्पान्तंभविष्यति ॥ ५७ ॥ धन्यासैवमुखेवाणीरामनाम्नासमन्विता ॥ अन्याकामकथानॄणांजनयत्येवपातकम् ॥ ५८ ॥
तस्मात्कुरुष्वरामस्यचरितंलोकविश्रुतम् ॥ येनस्यात्पापिनांपापहानिरेवपदेपदे ॥ ५९ ॥ इत्युक्त्वान्तर्दधेस्रष्टासर्वदेवैःसमन्वितः ॥ ततःस
चिन्तयामासकथंरामायणंभवेत् ॥ ६० ॥ तदाध्यानपरोजातोनदीतीरेमनोरमे ॥ तस्यचेतस्यथोरामःप्रादुर्भूतोमनोहरः ॥ ६१ ॥ नीलोत्पलदल
श्यामंरामंराजीवलोचनम् ॥ निरीक्ष्यतस्यचरितंभूतंभाविभवच्चयत् ॥ ६२ ॥ तदात्यन्तंमुदंप्राप्तोरामायणमथासृजत् ॥ मनोरमपदैर्युक्तंवृत्तै
र्बहुविधैरपि ॥ ६३ ॥ षट्काण्डानिसुरम्याणियत्ररामायणेऽनघ ॥ बालमारण्यकंचान्यत्किष्किन्धासुन्दरंतथा ॥ ६४ ॥ युद्धमुत्तरमन्यच्चषडे
तानिमहामते ॥ शृणुयाद्योनरःपुण्यात्सर्वपापैःप्रमुच्यते ॥ ६५ ॥ तत्रबालेतुसन्तुष्टःपुत्रेष्ट्याचतुरस्सुतान् ॥ प्रापपङ्क्तिरथःसाक्षाद्धरिंब्रह्मसनातनम्॥
॥६६॥ सकौशिकमखंगत्वासीतामुद्वाह्यभार्गवम् ॥ आगत्यपुरमुत्कृष्टोयौवराज्यप्रगल्भकः ॥ ६७ ॥ मातृवाक्याद्वनंप्रागाद्गङ्गामुत्तीर्यपर्वतम् ॥ चित्र
कूटंमहिलयालक्ष्मणेनसमन्वितः ॥ ६८ ॥ भरतस्तंवनेश्रुत्वाजगामभ्रातरंनयी ॥ तमप्राप्यस्वयंनन्दिग्रामेवासमचीकरत् ॥ ६९ ॥ बालमेत ॥ ७७ ॥
च्छृणुष्वान्यदारण्यकसमुद्भवम् ॥ मुनीनामाश्रमेवासस्तत्रतत्रोपवर्णनम् ॥ १७० ॥ नासाच्छेदःशूर्पणख्याःखरदूषणनाशनम् ॥ मायामारीच
हननंदैत्याद्रामापहारणम् ॥ ७१ ॥ वनेविरहिणाभ्रान्तंमनुष्यचरितंभृतम् ॥ कबन्धप्रेक्षणंतत्रपम्पायांगमनंतथा ॥ ७२ ॥ हनूमतासङ्ग

१' रामनाम्ना समन्विता'इ०पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मनमित्येतद्वनसंज्ञितम् ॥ अपरंचशृणुमुनेसंक्षिप्यकथयाम्यहम् ॥ ७३ ॥ सप्ततालप्रभेदश्चवालेर्मारणमद्भुतम् ॥ सुग्रीवेराज्यदानंचनगवर्णन
मित्युत ॥ ७४ ॥ लक्ष्मणात्कर्मसन्देशःसुग्रीवस्यविवासनम् ॥ तथासैन्यसमुद्देशःसीतान्वेषणमप्युत ॥ ७५ ॥ सम्पातिप्रेक्षणंतत्रवारिधि
र्लङ्घनंतथा ॥ परतीरेकपिप्राप्तिःकैष्किन्धंकाण्डमद्भुतम् ॥ ७६ ॥ सुन्दरंशृणुकाण्डंवैयत्ररामकथाद्भुता ॥ प्रतिगेहंपरिभ्रान्तिःकपेश्चित्रस्यदर्श
नम् ॥ ७७ ॥ सीतासन्दर्शनंतत्रजानक्याभाषणंतथा ॥ वनभङ्गःप्रकुपितैर्बन्धनंवानरस्यच ॥ ७८ ॥ ततोलङ्काप्रज्वलनंवानरैःसङ्गतिस्ततः ॥
रामाभिज्ञानदानंचसैन्यप्रस्थानमेवच ॥ ७९ ॥ समुद्रेसेतुकरणंशुकसारणसङ्गतिः ॥ इतिसुन्दरमाख्यातंयुद्धेसीतासमागमः ॥ १८० ॥ उत्तरे
ऋषिसंवादोयज्ञप्रारम्भएवच ॥ तत्रानेकारामकथाःशृण्वतांपापनाशिकाः ॥ ८१ ॥ इतिषट्काण्डमाख्यातंब्रह्महत्यापनोदनम् ॥ संक्षेपतो
मयातुभ्यमाख्यातंसुमनोहरम् ॥ ८२ ॥ चतुर्विंशतिसाहस्रंषट्काण्डपरिचिह्नितम् ॥ तद्वैरामायणंप्रोक्तंमहापातकनाशनम् ॥ ८३ ॥ तच्छ्रुत्वा
राघवःप्रीतःपुत्रावाधायचासने ॥ दृढंतौपरिरभ्याथसीतांसस्मारवल्लभाम् ॥ १८४ ॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशेषवा०रामाश्व०रामायण
गानंनामषट्षष्टितमोऽध्यायः ॥ ६६ ॥ शेषउवाच ॥ अथसौमित्रिरागत्यजानकींनतवान्मुहुः ॥ प्रेमगद्गदयाशंसन्वाचंरामप्रणोदिताम् ॥ १ ॥
सीतासमागतंदृष्ट्वालक्ष्मणंविनयान्वितम् ॥ तन्मुखाद्रामसन्देशंश्रुत्वोवाचविलज्जिता ॥ २ ॥ सौमित्रेकथमागच्छेरामत्यक्तामहावने ॥ तिष्ठामि
रामंस्मरन्तीवाल्मीकेराश्रमेत्वहम् ॥ ३ ॥ तस्यामुखोदितंवाक्यंश्रुत्वासौमित्रिरब्रवीत् ॥ मातःपतिव्रतेरामस्त्वामाकारयतेमुहुः ॥ ४ ॥ पतिव्रता
पतिकृतंदोषंनानयतेहृदि ॥ तस्मादागच्छहिमयास्थित्वास्यन्दनउत्तमे ॥ ५ ॥ इत्यादिवचनंश्रुत्वाजानकीपतिदेवता ॥ मनोरोषंपरित्यज्यतस्थौ
सौमित्रिणारथे ॥ ६ ॥ तापसीःसकलानत्वामुनींश्चनिगमोज्ज्वलान् ॥ रामंस्मरन्तीमनसारथेस्थित्वाऽगमत्पुरीम् ॥ ७ ॥ क्रमेणनगरींप्राप्तामहार्हा
भरणान्विता ॥ सरयूंसरितंप्राप्ययत्ररामःस्वयंस्थितः ॥ ८ ॥ रथादुत्तीर्यललितालक्ष्मणेनसमन्विता ॥ रामस्यपादयोर्लग्नापतिव्रतपरायणा॥
॥ ९ ॥ रामस्तामागतांदृष्ट्वाजानकींप्रेमविह्वलाम् ॥ साध्वित्वयासहेदानींकुर्वेयज्ञसमापनम् ॥ १० ॥ वाल्मीकिंसानमस्कृत्यतथान्यान्विप्र
सत्तमान् ॥ जगाममातृपदयोःसन्नतिंकर्तुमुत्सुका ॥ ११ ॥ कौसल्यातामथायान्तींवीरसूंजानकींप्रियाम् ॥ आशीर्भिरभिसंयुज्ययौहर्षमनेकधा॥
॥ १२ ॥ कैकेयीपदयोर्नम्रांवीक्ष्यवैदेहपुत्रिकाम् ॥ भर्त्रासहचिरंजीवसपुत्रेत्याशिषंव्यधात् ॥ १३ ॥ सुमित्रास्वपदेनम्रांवीक्ष्यवैदेहपुत्रिकाम् ॥
आशिषंव्यदधात्तस्याःपुत्रपौत्रप्रदायिनीम् ॥ १४ ॥ सीताताःसर्वतोनत्वारामचन्द्रप्रियासती ॥ परमंहर्षमापन्नाबभूवकिलवाडव ॥ १५ ॥ समा

CC-0. In Public Domain. Digitization by eGangotri

गतांवीक्ष्यपत्नींरामचन्द्रस्यकुम्भजः ॥ सुवर्णपत्नींधिक्कृत्यतामधाद्धर्मचारिणीम् ॥१६॥ रामस्तदायज्ञमध्येशुशुभेसीतयासह ॥ तारयानुगतोयद्व
च्छशीवशरदुत्प्रभः ॥१७॥ प्रयोगमकरोत्तत्रकालेप्राप्तेमनोरमे ॥ वैदेह्याधर्मचारिण्यासर्वपापापनोदनम् ॥१८॥ सीतयासहितंरामंप्रसक्तंयज्ञकर्मणि ॥
निरीक्ष्यजहृषुस्तत्रकौतुकेनसमन्विताः ॥१९॥ वसिष्ठंप्राहसुमतिंरामस्तत्रक्रतौवरे ॥ किंकर्तव्यंमयास्वामिन्नतःपरमवश्यकम् ॥ २० ॥ रामस्यवचनं
श्रुत्वागुरुःप्राहमहामतिः ॥ ब्राह्मणानांप्रकर्तव्यापूजासन्तोषकारिका ॥ २१ ॥ मरुत्तेनक्रतुःसृष्टःपूर्वंसम्भारसम्भृतः ॥ ब्राह्मणास्तत्रवित्ताद्यैस्तोषिता
अभवंस्तदा ॥ २२ ॥ अत्यन्तंवित्तसम्भारंनेतुंतमशकन्नहि ॥ प्राक्षिपन्हिमवद्देशेवित्तभारासहाद्विजाः ॥ २३ ॥ तस्मात्त्वमपिराजाग्र्यलक्ष्मीवान्नृप
सत्तम ॥ देहिदानादिविप्रेभ्योयथास्यात्प्रीतिरुत्तमा ॥ २४ ॥ एतच्छ्रुत्वासराजाग्र्यःपूज्यंमत्वाघटोद्भवम् ॥ प्रथमंपूजयामासब्रह्मपुत्रंतपोधनम् ॥
॥ २५ ॥ अनेकरत्नसम्भारैःस्वर्णभारैरनेकधा ॥ देशैर्जनैःपरिवृतैरत्यन्तप्रीतिदायकैः ॥ २६ ॥ अगस्त्यंपूजयामाससपत्नीकंमनोरमम् ॥ तथैव
रत्नैःस्वर्णैश्चदेशैश्चविविधैरपि ॥ २७ ॥ व्यासंसत्यवतीपुत्रंतथैवसमपूजयत् ॥ च्यवनंभार्ययासाकंसुरत्नैःसमपूजयत् ॥२८॥ अन्यानपिमुनीन्सर्वा
नृत्विजस्तपसांनिधीन् ॥ पूजयामासरत्नौघैःस्वर्णभारैरनेकधा ॥ २९ ॥ अदात्तदाक्रतौरामोविप्रेभ्योभूरिदक्षिणाम् ॥ लक्षंलक्षंसुवर्णस्यप्रत्येकं
त्वग्रजन्मने ॥ ३० ॥ दीनान्धकृपणेभ्यश्चददौदानमनेकधा ॥ यथासन्तोषविहितैर्वित्तैरत्नैर्मनोहरैः ॥ ३१ ॥ वासांसिचविचित्राणिभोजनानि
मृदूनिच ॥ तत्रप्रादाद्यथाशास्त्रंसर्वेषांप्रीतिदायकम् ॥ ३२ ॥ हृष्टपुष्टजनाकीर्णंसर्वसत्त्वोपबृंहितम् ॥ अत्यन्तमभवद्धृष्टंपुरंपुंस्त्रीसमावृतम् ॥ ३३ ॥
दानंददन्तंसर्वेषांवीक्ष्यकुम्भोद्भवोमुनिः ॥ अत्यन्तपरमप्रीतिंययौक्रतुवरेद्विजः ॥३४॥ तदाभिषेकतोयार्थंपानीयममृतोपमम् ॥ आनेतुंचचतुःषष्टि
नृपान्सस्त्रीन्समाह्वयत् ॥ ३५ ॥ रामस्तुसीतयासार्द्धमानेतुमुदकंययौ ॥ घटेनस्वर्णवर्णेनसर्वालङ्कारशोभया ॥ ३६ ॥ सौमित्रिरप्यूर्मिलयामाण्डव्या
भरतोनृपः ॥ शत्रुघ्नःश्रुतकीर्त्याचकान्तिमत्याचपुष्कलः ॥३७॥ सुबाहुःसत्यवत्याचसत्यवान्वीरभूषया ॥ सुमदस्तत्रसत्कीर्त्याराज्ञ्याचविमलोनृपः॥
॥ ३८ ॥ राजावीरमणिस्तत्रश्रुतवत्यामनोज्ञया ॥ लक्ष्मीनिधिःकोमलयारिपुतापोऽङ्गसेनया ॥ ३९ ॥ विभीषणोमहामूर्त्याप्रतापाग्र्यःप्रतीतया ॥ ॥ ७८ ॥
उग्राश्वःकामगमयानीलरत्नोऽधिरम्यया ॥ ४० ॥ सुरथःसुमनोहार्यातथामोहनयाकपिः ॥ इत्यादीन्नृपतीन्विप्रोवसिष्ठःप्राहिणोन्मुनिः ॥ ४१ ॥
वसिष्ठःसरयूंगत्वाशिवपुण्यजलाप्लुताम् ॥ उदकंमन्त्रयामासवेदमन्त्रेणमन्त्रवित् ॥ ४२ ॥ पयःपुनीह्यमुंवाहमुदकेनमनोहृता ॥ यज्ञार्थंरामचन्द्रस्य
सर्वलोकैकरक्षितुः ॥ ४३ ॥ उदकंतन्मुनिस्पृष्टंसर्वेरामादयोनृपाः ॥ आजह्रुर्मण्डपतलेविप्रवर्यैरुपस्तुते ॥ ४४ ॥ पयोभिर्निर्मलैःस्नाप्यवाजिनंक्षीर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सन्निभम् ॥ मन्त्रेणमन्त्रयामासरामहस्तेनकुम्भजः ॥ ४५ ॥ पुनीहिमांमहावाहअस्मिन्ब्रह्मसमाकुले ॥ त्वन्मेधेनाखिलादेवाःप्रीणन्तुपरितोषिताः॥ ॥ ४६ ॥ इत्युक्त्वासनृपोरामःसीतयासममस्पृशत् ॥ तदासर्वेद्विजाश्चित्रममन्यन्तकुतूहलात् ॥ ४७ ॥ परस्परममोचंस्तेयन्नामस्मरणान्नराः ॥ महा पापात्प्रमुच्यन्तेसरामःकिंवदत्यहो ॥ ४८ ॥ इत्युक्तवतिभूमीशेरामेकुम्भोद्भवोमुनिः ॥ करवालंचाभिमन्त्र्यददौरामकरेमुनिः ॥ ४९ ॥ करवाले धृतेस्पृष्टेरामेणसहयःक्रतौ ॥ पशुत्वंतुविहायाशुदिव्यरूपमपद्यत ॥ ५० ॥ विमानवरमारूढश्चाप्सरोभिःसमन्ततः ॥ चामरैर्वीज्यमानश्चवैजयन्त्या विभूषितः ॥ ५१ ॥ तदातंवाजितांत्यक्त्वादिव्यरूपधरंवरम् ॥ वीक्ष्यलोकाःक्रतौसर्वेविस्मयंप्राप्नुवंस्तदा ॥५२॥ तदारामःस्वयंजानञ्ज्ञापयन्सर्वतो नरान् ॥ पप्रच्छदिव्यरूपंतंसुरंपरमधार्मिकः ॥ ५३ ॥ कस्त्वंदिव्यवपुःप्राप्तःकस्मात्त्वंवाजितांगतः ॥ कथंसुरस्त्रीसहितःकिंचिकीर्षसितद्वद ॥ ॥ ५४॥ रामस्यवचनंश्रुत्वादेवःप्रोवाचभूमिपम् ॥ हसन्मेघरवांवाणीमवदत्सुमनोहराम् ॥ ५५ ॥ तवाज्ञातंनसर्वत्रबाह्याभ्यन्तरचारिणः ॥ तथापि पृच्छतेतुभ्यंकथयामियथातथम् ॥ ५६ ॥ अहंपुराभवेरामद्विजःपरमधार्मिकः ॥ अचरंप्रतिकूलंवैवेदस्यरिपुतापन ॥ ५७ ॥ कदाचिद्धूतपापाया स्तीरेऽहंगतवान्पुरा ॥ अनेकवृक्षललितेसर्वत्रसुमनोरमे ॥ ५८ ॥ तत्रस्नात्वापितॄंस्तृप्त्वादानंदत्त्वायथाविधि ॥ ध्यानंतवमहाबाहोकृतवान्वेदसं मितम् ॥ ५९ ॥ तदाजनाःसमायाताबहवस्तत्रभूपते ॥ तेषांप्रवञ्चनार्थायदम्भमेनमकारिषम् ॥ ६० ॥ अनेकक्रतुसम्भारैःपूर्णमजिरमुत्तमम् ॥ वासोभिश्छादितंरम्यंचषालादियुतंमहत् ॥ ६१ ॥ अग्निहोत्रोद्भवोधूमःसर्वतोनभसोऽङ्गणम् ॥ चकाररम्यमतुलंचित्रकारिवपुर्धरः ॥ ६२ ॥ अनेकतिलकश्रीभिःशोभिताङ्गोमहत्तपाः ॥ दर्भशोभःसमित्पाणिर्दम्भोमूर्तिधरःकिमु ॥ ६३ ॥ दुर्वासास्तत्रस्वच्छन्दंपर्यटञ्जगतीतलम् ॥ प्राप तत्रमहातेजाधूतपापासरित्तटे ॥ ६४ ॥ ददर्शमांदम्भकरंमौनधारिणमग्रतः ॥ अनर्घ्यकरमुन्मत्तमस्वागतवचःकरम् ॥ ६५ ॥ दृष्ट्वातीवक्रुधा क्रान्तःसमुद्रइवपर्वणि ॥ शशापासौमुनिस्तीव्रोदम्भिनंमांमहामतिः ॥ ६६ ॥ दम्भंकरोषियत्तीरेसरितस्त्वंसुदुर्मते ॥ तस्मात्प्राप्नुहिनिर्वाच्यं पशुत्वंतापसाधम ॥६७॥ शापंप्रदत्तंसंश्रुत्यदुःखितोऽहंतदाभवम्॥अग्राहिषंपदेतस्यमुनेर्दुर्वाससःकिल॥६८॥ तदामेकृतवान्रामद्विजोऽनुग्रहमुत्तमम्॥ वाजितांप्राप्नुहिमखेराजराजस्यतापस ॥६९॥ पश्चात्तद्धस्तसम्पर्कात्प्राप्यहितत्परमंपदम् ॥ दिव्यंवपुर्मनोहारिधृत्वादम्भविवर्जितम् ॥ ७० ॥ तेनशापो ऽपिसन्दिष्टोममानुग्रहतांगतः ॥ यदहंतवहस्तस्यस्पर्शंप्राप्तोमनोरमम् ॥ ७१ ॥ यदेवरामदेवादिदुर्लभंबहुजन्मभिः ॥ तत्तेऽहंकरजस्पर्शंप्राप्तवानिह दुर्लभम् ॥ ७२ ॥ आज्ञापयमहाराजत्वत्प्रसादादहंमहत् ॥ गच्छामिशाश्वतंस्थानंतवदुःखादिवर्जितम् ॥ ७३ ॥ नयत्रशोकोनजरानमृत्युःकाल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विभ्रमः ॥ तत्स्थानंदेवगच्छामित्वत्प्रसादान्नराधिप ॥७४ ॥ इत्युक्त्वातंपरिक्रम्यविमानवरमारुहत् ॥ अनेकरत्नखचितंसर्वदेवाभिवन्दितम् ॥ ७५ ॥
गतोऽसौशाश्वतंस्थानंरामपादप्रसादतः ॥ पुनरावृत्तिरहितंशोकमोहविवर्जितम् ॥ ७६ ॥ तेनतत्कथितंश्रुत्वारामंज्ञात्वेतरेजनाः ॥ विस्मयंप्रापिरे
सर्वेपरस्परमुदुन्मदाः ॥ ७७ ॥ शृणुद्विजमहाबुद्धेदम्भेनापिस्मृतोहरिः ॥ ददातिमोक्षंसुतरांकिंपुनर्दम्भवर्जनात् ॥ ७८ ॥ यथाकथञ्चिद्रामस्यकर्तव्यं
स्मरणंपरम् ॥ येनप्राप्नोतिपरमंपदंदेवादिदुर्लभम् ॥ ७९ ॥ तच्चित्रंवीक्ष्यमुनयःकृतार्थंमेनिरेनिजम् ॥ यद्रामचरणप्रेक्षाकरस्पर्शपवित्रितम् ॥ ८० ॥
गतेतस्मिन्सुरेस्वर्गंहयरूपधरेपुरा ॥ उवाचरामस्तपसांनिधीन्वेदविदुत्तमान् ॥ ८१ ॥ किंकर्तव्यंमयाब्रह्मन्हयोनष्टोगतःसुखम् ॥ होमःकथंपुरोभावी
सर्वदैवततर्पकः ॥ ८२ ॥ यथास्यात्सुरसन्तृप्तिर्यथामेमखउत्तमः ॥ तथाकुर्वन्तुमुनयोयथामेस्याद्विधिश्रुतम् ॥ ८३ ॥ इतिवाक्यंसमाश्रुत्यजगाद
मुनिसत्तमः ॥ वसिष्ठःसर्वदेवानांचित्ताभिज्ञानकोविदः ॥ ८४ ॥ कर्पूरमाहरक्षिप्रंयेनदेवाःस्वयंपुरा ॥ प्राप्यहव्यंग्रहीष्यन्तिमद्वाक्यप्रेरिताधुना ॥
॥ ८५ ॥ इतिवाक्यंसमाकर्ण्यरामःक्षिप्रमुपाहरत् ॥ कर्पूरंबहुदेवानांप्रीत्यर्थंबहुशोभनम् ॥ ८६ ॥ तदामुनिःप्रहृष्टात्मादेवानाह्वयदद्भुतान् ॥ तेसर्वे
तत्क्षणात्प्राप्ताःस्वपरीवारसंवृताः ॥ ८७ ॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशेषवा०रामाश्व०यज्ञप्रारम्भोनामसप्तषष्टितमोऽध्यायः ॥ ६७ ॥
शेषउवाच ॥ इन्द्रस्तत्रहविर्मृष्टंरामचन्द्रेणवीक्षितम् ॥ परिस्वादन्क्रतौतृप्तिंनप्रापसुरसंयुतः ॥ १ ॥ नारायणोमहादेवोब्रह्मातत्रचतुर्मुखः ॥ वरुणश्च
कुबेरश्चतथाऽन्येलोकपालकाः ॥२॥ तत्रास्वाद्यहविःस्निग्धंवसिष्ठेनपरिष्कृतम् ॥ तत्रपुनर्हिविप्रेन्द्राःक्षुधार्ताइवभोजनात् ॥३॥ सर्वान्देवांश्चसन्तर्प्य
हविषाकरुणानिधिः ॥ वसिष्ठप्रेरितःसर्वमितिकर्तव्यमाचरत् ॥ ४ ॥ ब्राह्मणादानसन्तुष्टाहविस्तुष्टाःसुरावराः ॥ तृप्ताःसर्वेस्वकंभागंगृहीत्वा
स्वालयंययुः ॥५॥ ऋषिभ्योहोतृमुख्येभ्यःप्रादाद्राज्यंचतुर्दिशम् ॥ सन्तुष्टास्तेद्विजाराममाशीर्भिरददुःशुभम् ॥६॥ पूर्णाहुतिंततःकृत्वावसिष्ठःप्राह
सुव्रियः ॥ वर्धापयन्तुभूमीशंयागपूर्तिकरंपरम् ॥ ७ ॥ तद्वाक्यंताःस्त्रियःश्रुत्वालाजैरवाकिरन्मुदा ॥ लावण्यजितकन्दर्पंमहामणिविभूषितम् ॥८॥
ततोऽवभृथस्नानार्थंप्रेरयामासभूमिपम् ॥ ययौरामःसहस्त्रीयैःसरयूतीरमुत्तमम् ॥९॥ अनेकराजकोटीभिःपरीतःपादचारिभिः ॥ जगामससरिच्छ्रेष्ठां
पक्षिवृन्दसमाकुलाम् ॥ १० ॥ तारापतिरिवस्वाभिर्भार्याभिर्वृतउत्प्रभः ॥ विरोचतेतथातद्वद्रामोराजगणैर्वृतः ॥ ११ ॥ तदुत्सवंसमाज्ञायययु ॥ ७९ ॥
र्लोकास्त्वरायुताः ॥ सीतापतिमुखालोकनिश्चलीभूतलोचनाः ॥ १२ ॥ राजेन्द्रंसीतयासाकंगच्छन्तंसरितंप्रति ॥ विलोक्यमुदितालोकाश्चिरंदर्शन
लालसाः ॥१३॥ अनेकनटगन्धर्वागायन्तोयशउज्ज्वलम् ॥ अनुजग्मुर्महीशानंसर्वलोकनमस्कृतम् ॥ १४ ॥ नर्तक्यस्तत्रनृत्यन्त्यःक्षोभयन्त्यःपते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्मनः ॥ जलयन्त्रैश्च सिञ्चन्त्योययुः श्रीरामसेवनम् ॥ १५ ॥ महाराजं विलिम्पन्त्यो हरिद्राकुङ्कुमादिभिः ॥ परस्परं प्रलिम्पन्त्यो मुदं प्रापुर्महत्तराम् ॥
॥ १६ ॥ कुचयुग्मोपरिन्यस्तमुक्ताहारसुशोभिताः ॥ श्रवणद्वन्द्वसंमृष्टस्वर्णकुण्डललक्षिताः ॥ १७ ॥ अनेकनरनारीभिः सङ्कीर्णं मार्गमाचरन् ॥ यथा
वत्सरितं प्राप शिवपुण्यजलाप्लुताम् ॥ १८ ॥ तत्र गत्वा स वैदेह्या रामः कमललोचनः ॥ प्रविवेश जलं पुण्यं वसिष्ठादिभिरन्वितः ॥१९॥ अनुप्रविविशुः
सर्वे राजानो जनतास्तथा ॥ तत्पादरजसा पूतं जलं लोकैकवन्दितम् ॥ २० ॥ परस्परं प्रसिञ्चन्तो जलयन्त्रैर्मनोरमैः ॥ सुशोणनयनाः सर्वे हर्षं प्रापुर्मनो
ऽधिकम् ॥ २१ ॥ स रामः सीतया सार्धं चिरं पुण्यजलप्लवे ॥ क्रीडित्वा जलकल्लोलैर्निरगाद्धर्मसंयुतः ॥ २२ ॥ दुकूलवासाः स्रक्किरीटकुण्डलः केयूर
शोभावरकङ्कणान्वितः ॥ कन्दर्पकोटिश्रियमुद्वहन्नृपो राजाग्र्यवर्यैरुपसंस्तुतो बभौ ॥२३॥ स यागयूपं वरवर्णशोभितं कृत्वा सरित्तीरवरे महामनाः ॥ त्रैलोक्य
लोकश्रियमापद्यद्भुतामन्यैर्दुरापां नृपतिर्भुजैर्निजैः ॥ २४ ॥ एवं जनकपुत्र्यासौ हयमेधत्रयं चरन् ॥ त्रैलोक्ये कीर्तिमतुलां प्राप देवैः सुदुर्लभाम् ॥
॥ २५ ॥ एवं ते वर्णितं तात यत्पृष्टो रामसत्कथाम् ॥ विस्तृतः कथितो मेधो भूयः किं पृच्छसे द्विज ॥ २६ ॥ यः शृणोति हरेर्भक्त्या रामचन्द्रस्य सन्मखम् ॥
ब्रह्महत्यां क्षणात्तीर्त्वा ब्रह्म शाश्वतमाप्नुयात् ॥ २७ ॥ अपुत्रो लभते पुत्रान्निर्धनो धनमाप्नुयात् ॥ रोगार्तो मुच्यते रोगाद्बद्धो मुच्येत बन्धनात् ॥ २८ ॥
यत्कथाश्रवणाद्दुष्टः श्वपचोऽपि परं पदम् ॥ प्राप्नोति किमु विप्राग्र्यो रामभक्तिपरायणः ॥ २९ ॥ रामं स्मृत्वा महाभागं पापिनः परमं पदम् ॥ प्राप्नुयुः परमं
स्वर्गं शक्रदेवादिदुर्लभम् ॥ ३० ॥ ते धन्या मानवा लोके ये स्मरन्ति रघूत्तमम् ॥ ते क्षणात्संसृतिं तीर्त्वा गच्छन्ति सुखमव्ययम् ॥ ३१ ॥ प्रत्येकमक्षरं ब्रह्म
हत्यावंशदवानलः ॥ तं यः श्रावयते धीमांस्तं गुरुं संप्रपूजयेत् ॥३२॥ श्रुत्वा कथां वाचकाय गवां द्वन्द्वं प्रदापयेत् ॥ सपत्नीकाय सम्पूज्य वस्त्रालङ्कारभोजनैः ॥
॥३३॥ कुण्डलाभ्यां विराजन्त्यौ मुद्रिकाभिरलङ्कृते ॥ रामसीते स्वर्णमय्यौ प्रतिमे शोभने वरे ॥३४॥ कृत्वा तु वाचकायैव दातव्ये भो द्विजोत्तम ॥ तस्य देवाश्च
पितरो वैकुण्ठं प्राप्नुयुस्तदा ॥ ३५ ॥ त्वया पृष्टा रामकथा मया ते कथिता पुरा ॥ किमन्यत्कथ्यतां ब्रह्मन्पुरतस्तव धीमतः ॥ ३६ ॥ शृण्वन्ति ये कथामेतां ब्रह्म
हत्यौघनाशिनीम् ॥ ते यान्ति परमं स्थानं यच्च देवैः सुदुर्लभम् ॥ ३७ ॥ गोघ्नश्चापि सुतघ्नश्च सुरापो गुरुतल्पगः ॥ क्षणात्पूतो भवत्येव नात्र संशयितुं क्षमम् ॥
॥ ३८ ॥ इति श्रीपाद्मे महापुराणे पातालखण्डे शेषवा० रामाश्व० श्रवणपठनपुण्यवर्णनं नामाष्टषष्टितमोऽध्यायः ॥ ६८ ॥ इति रामाश्वमेधः समाप्तः ॥
ऋषय ऊचुः ॥ सम्यक्छ्रुतो महाभाग त्वत्तो रामाश्वमेधकः ॥ इदानीं वद माहात्म्यं श्रीकृष्णस्य महात्मनः ॥ १ ॥ सूत उवाच ॥ शृण्वन्तु मुनिशार्दूलाः
श्रीकृष्णचरितामृतम् ॥ शिवाप्रपच्छ भूतेशं यत्तद्वः कीर्तयाम्यहम् ॥ २ ॥ एकदा पार्वती देवी शिवं संस्निग्धमानसा ॥ प्रणयेन नमस्कृत्य प्रोवाच वचनं

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

अनन्तकोटिब्रह्माण्डेतद्वाह्याभ्यन्तरस्थिते: ॥ विष्णो:स्थानंपरंतेषांप्रधानंवरमुत्तमम् ॥ ४ ॥ यत्परंनास्तिकृष्णस्य
त्विदम् ॥ ३ ॥ पार्वत्युवाच ॥ अनन्तकोटिब्रह्माण्डेतद्वाह्याभ्यन्तरस्थिते: ॥ विष्णो:स्थानंपरंतेषांप्रधानंवरमुत्तमम् ॥ ४ ॥ यत्परंनास्तिकृष्णस्य
प्रियंस्थानंमनोरमम् ॥ तत्सर्वंश्रोतुमिच्छामिकथयस्वमहाप्रभो ॥ ५ ॥ ईश्वरउवाच ॥ गुह्याद्गुह्यतरंपुण्यंपरमानन्दकारकम् ॥ अत्यद्भुतंरहःस्थान
मानन्दंपरमंपरम् ॥ ६ ॥ दुर्लभानांचपरमंदुर्लभंमोहनंपरम् ॥ सर्वशक्तिमयंदेविसर्वस्थानेषुगोपितम् ॥ ७ ॥ सात्वतांस्थानमूर्द्धन्यंविष्णोरत्यन्त
दुर्लभम् ॥ नित्यंवृन्दावनंनामब्रह्माण्डोपरिसंस्थितम् ॥ ८ ॥ पूर्णब्रह्मसुखैश्वर्यंनित्यमानन्दमव्ययम् ॥ वैकुण्ठादितदंशांशंस्वयंवृन्दावनंभुवि ॥९॥
गोलोकैश्वर्ययत्किञ्चिद्गोकुलेतत्प्रतिष्ठितम् ॥ वैकुण्ठवैभवंयद्वैद्वारकायांप्रतिष्ठितम् ॥ १० ॥ यद्ब्रह्मपरमैश्वर्यंनित्यंवृन्दावनाश्रयम् ॥ कृष्णधामपरं
तेषांवनमध्येविशेषत: ॥११ ॥ तस्मात्त्रैलोक्यमध्येतुपृथ्वीधन्येतिविश्रुता ॥ यस्मान्माथुरकंनामविष्णोरेकान्तवल्लभम् ॥ १२ ॥ स्वस्थानमधिकं
नामधेयंमाथुरमण्डलम् ॥ निगूढंविविधंस्थानंपुर्यभ्यन्तरसंस्थितम् ॥ १३ ॥ सहस्रपत्रकमलाकारंमाथुरमण्डलम् ॥ विष्णुचक्रपरिभ्रामद्धाम
वैष्णवमद्भुतम् ॥ १४ ॥ कर्णिकापर्णविस्ताररंरहस्यद्रुममीरितम् ॥ प्रधानंद्वादशारण्यंमाहात्म्यंकथितंक्रमात् ॥ १५ ॥ भद्रश्रीलोहभाण्डीरमहाताल
खदीरका: ॥ बकुलंकुमुदंकाम्यंमधुवृन्दावनंतथा ॥ १६ ॥ द्वादशैतावतीसङ्ख्याकालिन्द्या:सप्तपश्चिमे ॥ पूर्वेपञ्चवनंप्रोक्तंतत्रास्तिगुह्यमुत्तमम् ॥
॥ १७ ॥ महारण्यंगोकुलाख्यंमधुवृन्दावनंतथा ॥ अन्यच्चोपवनंप्रोक्तंकृष्णक्रीडारसस्थलम् ॥ १८ ॥ कदम्बखण्डनंनन्दवनंनन्दीश्वरंतथा ॥ नन्द
नन्दनखण्डंचपलाशाशोककेतकी ॥१९॥ सुगन्धमानसंकैलममृतंभोजनस्थलम् ॥ सुखप्रसाधनंवत्सहरणंशेषशायिकम् ॥ २०॥ श्यामपूर्वोदधिग्राम
श्चक्रभानुपुरंतथा ॥ सङ्केतंद्विपदंचैवबालक्रीडनधूसरम् ॥२१॥ कामद्रुमंसुललितमुत्सुकंचापिकाननम् ॥ नानाविधरसक्रीडानानालीलारसस्थलम् ॥
॥ २२ ॥ नागविस्तारविष्टम्भंरहस्यद्रुममीरितम् ॥ सहस्रपत्रकमलंगोकुलाख्यंमहत्पदम् ॥ २३ ॥ कर्णिकातन्महद्धामगोविन्दस्थानमुत्तमम् ॥
तत्रोपरिस्वर्णपीठेमणिमण्डपमण्डितम् ॥ २४ ॥ कर्णिकायांक्रमादिक्षुविदिक्षुदलमीरितम् ॥ यद्दलंदक्षिणेप्रोक्तंपरंगुह्योत्तमोत्तमम् ॥ २५ ॥
तस्मिन्दलेमहापीठंनिगमागमदुर्गमम् ॥ योगीन्द्रैरपिदुष्प्राप्यंसर्वात्मायच्चगोकुलम् ॥ २६ ॥ द्वितीयंदलमाग्नेय्यांतद्रहस्यंदलंतथा ॥ सङ्केतंद्विपदं
चैवकुटीद्वौतत्कुलेस्थितौ ॥ २७॥ पूर्वंदलंतृतीयंचप्रधानस्थानमुत्तमम् ॥ गङ्गादिसर्वतीर्थानांस्पर्शाच्छतगुणंस्मृतम् ॥ २८ ॥ चतुर्थंदलमैशान्यां
सिद्धपीठेऽपितत्पदम् ॥ कात्यायन्यर्चनाद्गोपीतत्रकृष्णंपतिंलभेत् ॥ २९ ॥ वस्त्रालङ्कारहरणंतद्दलेसमुदाहृतम् ॥ उत्तरेपञ्चमंप्रोक्तंदलंसर्वदलोत्त
मम् ॥ ३० ॥ द्वादशादित्यमत्रैवदलंचकर्णिकासमम् ॥ वायव्यांतुदलंषष्ठंतत्रकालीह्रद:स्मृत: ॥३१॥ दलोत्तमोत्तमंचैवप्रधानंस्थानमुच्यते ॥ सर्वो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्तमदलंचैवपश्चिमेसत्तमंस्मृतम् ॥ ३२ ॥ यज्ञपत्नीगणानांचतदीप्सितवरप्रदम् ॥ अत्रासुरोऽपिनिर्वाणंप्रापत्रिदशदुर्लभम् ॥ ३३ ॥ ब्रह्ममोहनमत्रैव दलंब्रह्महृदाभिधम् ॥ नैर्ऋत्यांतुदलंप्रोक्तमष्टमंव्योमघातनम् ॥ ३४ ॥ शङ्खचूडवधस्तत्रनानाकेलिरसस्थलम् ॥ श्रुतमष्टदलंप्रोक्तंवृन्दारण्यान्तर स्थितम् ॥ ३५ ॥ श्रीमद्वृन्दावनंरम्यंयमुनायाःप्रदक्षिणम् ॥ शिवलिङ्गमधिष्ठानंदष्टंगोपीश्वराभिधम् ॥३६॥ तद्बाह्येषोडशदलंश्रियापूर्णंतमीश्वरम् ॥ सर्वासुदिक्षुयत्प्रोक्तंप्रादक्षिण्याद्यथाक्रमम् ॥ ३७ ॥ महत्पदंमहाद्धामस्वधामाधावसंज्ञकम्[१] ॥ प्रथमैकदलंश्रेष्ठंमाहात्म्यंकर्णिकासमम् ॥ ३८ ॥ तत्र गोवर्द्धनगिरौरम्येनित्यरसाश्रये ॥ कर्णिकायांमहलीलातल्लीलारसगह्वरौ ॥ ३९ ॥ यत्रकृष्णोनित्यवृन्दाकाननस्यपतिर्भवेत् ॥ कृष्णोगोविन्दतां प्राप्तःकिमन्यैर्बहुभाषितैः॥४०॥दलंतृतीयमाख्यातंसर्वश्रेष्ठोत्तमोत्तमम्॥चतुर्थंदलमाख्यातंमहाद्भुतरसस्थलम् ॥४१॥ नन्दीश्वरवनंरम्यंतत्रनन्दालयः स्मृतः ॥ कर्णिकादलमाहात्म्यंपञ्चमंदलमुच्यते ॥ ४२ ॥ अधिष्ठाताऽत्रगोपालोधेनुपालनतत्परः ॥ षष्ठंदलंयदाख्यातंतत्रनन्दवनंस्मृतम् ॥ ४३ ॥ सत्तमंबकुलारण्यंदलंरम्यंप्रकीर्तितम् ॥ तत्राष्टमंतालवनंतत्रधेनुवधःस्मृतः ॥ ४४ ॥ नवमंकुमुदारण्यंदलंरम्यंप्रकीर्तितम् ॥ कामारण्यंचदशमं प्रधानंसर्वकारणम् ॥ ४५ ॥ ब्रह्मप्रसाधनंतत्रविष्णुच्छद्मप्रदर्शनम् ॥ कृष्णक्रीडारसस्थानंप्रधानंदलमुच्यते ॥ ४६ ॥ दलमेकादशंप्रोक्तंभक्तानुग्रह कारकम् ॥ निर्माणंसेतुबन्धस्यनानावनमयस्थलम् ॥ ४७ ॥ भाण्डीरंद्वादशदलंवनंरम्यंमनोहरम् ॥ कृष्णःक्रीडारतस्तत्रश्रीदामादिभिरावृतः ॥ ॥ ४८ ॥ त्रयोदशंदलंश्रेष्ठंतत्रभद्रवनंस्मृतम् ॥ चतुर्दशदलंप्रोक्तंसर्वसिद्धिप्रदस्थलम् ॥ ४९ ॥ श्रीवनंतत्ररुचिरंसर्वैश्वर्यस्यकारणम् ॥ कृष्णक्रीडा दलमयंश्रीकान्तिकीर्तिवर्द्धनम् ॥ ५० ॥ दलंपञ्चदशंश्रेष्ठंयत्रलोहवनंस्मृतम् ॥ कथितंषोडशदलंमाहात्म्यंकर्णिकासमम् ॥ ५१ ॥ महावनं तत्रगीतंतत्रास्तिगुह्यमुत्तमम् ॥ बालक्रीडारतस्तत्रवत्सपालैःसमावृतः ॥ ५२ ॥ पूतनादिवधस्तत्रयमलार्जुनभञ्जनम् ॥ अधिष्ठातातत्रबालगोपालः पञ्चमाब्दिकः ॥ ५३ ॥ नाम्नादामोदरःप्रोक्तःप्रेमानन्दरसार्णवः ॥ दलंप्रसिद्धमाख्यातंसर्वश्रेष्ठदलोत्तमम् ॥ ५४ ॥ कृष्णक्रीडाचकिञ्जल्कीविहार दलमुच्यते ॥ सिद्धप्रधानकिञ्जल्कदलंचसमुदाहृतम् ॥ ५५ ॥ पार्वत्युवाच ॥ वृन्दारण्यस्यमाहात्म्यंरहस्यंवाकिमद्भुतम् ॥ तदहंश्रोतुमिच्छामि कथयस्वमहाप्रभो ॥ ५६ ॥ ईश्वरउवाच ॥ कथितंतेप्रियतमेगुह्याद्गुह्योत्तमोत्तमम् ॥ रहस्यानांरहस्यंयद्दुर्लभानांचदुर्लभम् ॥ ५७ ॥ त्रैलोक्यगोपितं देविदेवेश्वरसुपूजितम् ॥ ब्रह्मादिवाञ्छितंस्थानंसुरसिद्धादिसेवितम् ॥५८॥ योगीन्द्राहिसदाभत्त्यातस्यध्यानैकतत्पराः ॥ अप्सरोभिश्चगन्धर्वैर्नृत्य

१ 'स्वाधयाधावसंज्ञकम्' इ०, 'स्वाध्यायाधावसंज्ञितम्' इ० च पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गीतनिरन्तरम् ॥ ५९ ॥ श्रीमद्वृन्दावनंरम्यंपूर्णानन्दरसाश्रयम् ॥ भूरिचिन्तामणिस्तोयममृतंरसपूरितम् ॥६०॥ वृक्षंगुरुद्रुमंतत्रसुरभीवृन्दसेवितम् ॥
स्त्रीलक्ष्मींपुरुषंविष्णुंतद्दशांशसमुद्भवम् ॥ ६१ ॥ तत्रकैशोरवयसंनित्यमानन्दविग्रहम् ॥ गीतनाटचकलालापंस्मितवक्त्रंनिरन्तरम् ॥ ६२ ॥ शुद्ध
सत्त्वैःप्रेमपूर्णैर्वैष्णवैस्तद्वनाश्रितम् ॥ पूर्णब्रह्मसुखेमग्नंस्फुरत्तन्मूर्तितन्मयम् ॥ ६३ ॥ मत्तकोकिलभृङ्गाद्यैःकूजत्कलमनोहरम् ॥ कपोलशुकसङ्गीत
मुन्मत्तालिसहस्रकम् ॥ ६४ ॥ भुजङ्गशत्रुनृत्याढ्यंसकलामोदविभ्रमम् ॥ नानावर्णैश्चकुसुमैस्तद्रेणुपरिपूरितम् ॥ ६५ ॥ पूर्णेन्दुनित्याभ्युदयंसूर्य
मन्दांशुसेवितम् ॥ अदुःखंदुःखविच्छेदंजरामरणवर्जितम् ॥ ६६ ॥ अक्रोधंगतमात्सर्यमभिन्नमनहङ्कृतम् ॥ पूर्णानन्दामृतरसंपूर्णप्रेमसुखार्णवम् ॥
॥ ६७ ॥ गुणातीतंमहद्धामपूर्णप्रेमस्वरूपकम् ॥ वृक्षादिपुलकैर्यत्रप्रेमानन्दाश्रुवर्षितम् ॥ ६८ ॥ किंपुनश्चेतनायुक्तैर्विष्णुभक्तैःकिमुच्यते ॥ गोविन्दा
ङ्घ्रिरजःस्पर्शान्नित्यंवृन्दावनंभुवि ॥ ६९ ॥ सहस्रदलपद्मस्यवृन्दारण्यंवराटकम् ॥ यस्यस्पर्शनमात्रेणपृथ्वीधन्याजगत्त्रये ॥७०॥ गुह्याद्गुह्यतरंरम्यं
मध्येवृन्दावनंभुवि ॥ अक्षरंपरमानन्दंगोविन्दस्थानमव्ययम् ॥ ७१ ॥ गोविन्ददेहतोऽभिन्नंपूर्णब्रह्मसुखाश्रयम् ॥ मुक्तिस्तत्ररजःस्पर्शात्तन्माहात्म्यं
किमुच्यते ॥७२॥ तस्मात्सर्वात्मनादेविहृदिस्थंतद्वनंकुरु ॥ वृन्दावनविहारेषुकृष्णंकैशोरविग्रहम् ॥ ७३ ॥ कालिन्दीचाकरोद्यस्यकर्णिकायाःप्रदक्षि
णाम् ॥ लीलानिर्वाणगम्भीरंजलंसौरभमोहनम् ॥ ७४ ॥ आनन्दामृततन्मिश्रमकरन्दघनालयम् ॥ पद्मोत्पलाद्यैःकुसुमैर्नानावर्णसमुज्ज्वलम् ॥
॥ ७५ ॥ चक्रवाकादिविहगैर्मञ्जुनानाकलस्वनैः ॥ शोभमानंजलंरम्यंतरङ्गातिमनोरमम् ॥ ७६ ॥ तस्योभयतटीरम्याशुद्धकाञ्चननिर्मिता ॥
गङ्गाकोटिगुणःप्रोक्तोयत्रस्पर्शवराटकः ॥ ७७ ॥ कर्णिकायांकोटिगुणोयत्रक्रीडारतोहरिः ॥ कालिन्दीकर्णिकाकृष्णमभिन्नमेकविग्रहम् ॥ ७८ ॥ पार्व
त्युवाच ॥ गोविन्दस्यकिमाश्चर्यंसौन्दर्याकृतिविग्रह ॥ तदहंश्रोतुमिच्छामिकथयस्वदयानिधे ॥ ७९ ॥ ईश्वरउवाच ॥ मध्येवृन्दावनेरम्येमञ्जु
मञ्जीरशोभिते ॥ योजनाश्रितसद्वृक्षशाखापल्लवमण्डिते ॥८०॥ तन्मध्येमञ्जुभवनेयोगपीठंसमुज्ज्वलम् ॥ तदष्टकोणनिर्माणंनानादीप्तिमनोहरम् ॥
॥ ८१ ॥ तस्योपरिचमाणिक्यरत्नसिंहासनंशुभम् ॥ तस्मिन्नष्टदलंपद्मंकर्णिकायांसुखाश्रयम् ॥ ८२ ॥ गोविन्दस्यपरंस्थानंकिमस्यमहिमोच्यते ॥
श्रीमद्गोविन्दमन्त्रस्थवल्लवीवृन्दसेवितम् ॥ ८३ ॥ दिव्यव्रजवयोरूपंकृष्णंवृन्दावनेश्वरम् ॥ व्रजेन्द्रसन्ततैश्वर्यंव्रजबालैकवल्लभम् ॥ ८४ ॥ यौवनो
द्भिन्नकैशोरंवयसाऽद्भुतविग्रहम् ॥ अनादिमादिंसर्वेषांनन्दगोपप्रियात्मजम् ॥ ८५ ॥ श्रुतिमृग्यमजंनित्यंगोपीजनमनोहरम् ॥ परंधामपरंरूपंद्विभुजं
गोकुलेश्वरम् ॥ ८६ ॥ वल्लवीनन्दनंध्यायेन्निर्गुणस्यैककारणम् ॥ सुश्रीमन्तंनवंस्वच्छंश्यामधाममनोहरम् ॥ ८७ ॥ नवीननीरदश्रेणीसुस्निग्धं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मञ्जुकुण्डलम् ॥ फुल्लेन्दीवरसत्कान्तिंसुखस्पर्शंसुखावहम् ॥ ८८ ॥ दलिताञ्जनपुञ्जाभचिक्कणंश्याममोहनम् ॥ सुस्निग्धनीलकुटिलाशेषसौरभ
कुन्तलम् ॥ ८९ ॥ तदूर्ध्वंदक्षिणेभालेश्यामचूडामनोहरम् ॥ नानावर्णोज्ज्वलंराजच्छिखण्डिदलमण्डितम् ॥ ९० ॥ मन्दारमञ्जुगोपुच्छाचूडंचारु
विभूषणम् ॥ क्वचिद्बर्हदलश्रेणीमुकुटेनाभिमण्डितम् ॥ ९१ ॥ अनेकमणिमाणिक्यकिरीटभूषणंक्वचित् ॥ लोलालकवृतंराजत्कोटिचन्द्रसमाननम् ॥
॥ ९२ ॥ कस्तूरीतिलकंभ्राजन्मञ्जुगोरोचनान्वितम् ॥ नीलेन्दीवरसुस्निग्धसुदीर्घदललोचनम् ॥ ९३ ॥ आनृत्यद्भ्रूलताश्लेषस्मिलंसाचिनिरी
क्षणम् ॥ सुचारून्नतसौन्दर्यनासाग्रातिमनोहरम् ॥९४॥ नासाग्रगजमुक्तांशुमुग्धीकृतजगत्त्रयम् ॥ सिन्दूरारुणसुस्निग्धाधरौष्ठसुमनोहरम् ॥ ९५ ॥
नानावर्णोल्लसत्स्वर्णमकराकृतिकुण्डलम् ॥ तद्रश्मिपुञ्जसद्गण्डमुकुराभलसद्द्युतिम् ॥ ९६ ॥ कर्णोत्पलसुमन्दारमकरोत्तंसभूषितम् ॥ श्रीवत्स
कौस्तुभोरस्कंमुक्ताहारस्फुरद्गलम् ॥९७॥ विलसद्दिव्यमाणिक्यंमञ्जुकाञ्चनमिश्रितम् ॥ करेकङ्कणकेयूरंकिङ्किणीकटिशोभितम् ॥९८॥ मञ्जुमञ्जीर
सौन्दर्यश्रीमदङ्घ्रिविराजितम् ॥ कर्पूरागुरुकस्तूरीविलसच्चन्दनादिकम् ॥ ९९ ॥ गोरोचनादिसंमिश्रदिव्याङ्गरागचित्रितम् ॥ स्निग्धपीतपटी
राजत्प्रपदान्दोलिताञ्जनम् ॥ १०० ॥ गम्भीरनाभिकमलरोमराजीनतस्रजम् ॥ सुवृत्तजानुयुगलंपादपद्ममनोहरम् ॥ १ ॥ ध्वजवज्राङ्कुशाम्भोज
कराङ्घ्रितलशोभितम् ॥ नखेन्दुकिरणश्रेणीपूर्णब्रह्मैककारणम् ॥ २ ॥ केचिद्वदन्तितस्यांशंब्रह्मचिद्रूपमद्वयम् ॥ तद्दशांशंमहाविष्णुंप्रव
दन्तिमनीषिणः ॥ ३ ॥ योगीन्द्रैःसनकाद्यैश्चतदेवहृदिचिन्त्यते ॥ त्रिभङ्गंललिताशेषनिर्माणसारनिर्मितम् ॥ ४ ॥ तिर्यग्ग्रीवजितानन्तकोटि
कन्दर्पसुन्दरम् ॥ वामांसार्पितसद्गण्डस्फुरत्काञ्चनकुण्डलम् ॥ ५ ॥ सहापाङ्गेक्षणस्मेरंकोटिमन्मथसुन्दरम् ॥ कुञ्चिताधरविन्यस्तवंशी
मञ्जुकलस्वनैः ॥ ६ ॥ जगत्त्रयंमोहयन्तंमग्नंप्रेमसुधार्णवे ॥ ७ ॥ श्रीपार्वत्युवाच ॥ परमंकारणंकृष्णंगोविन्दाख्यंमहत्पदम् ॥ वृन्दावने
श्वरंनित्यंनिर्गुणस्यैककारणम् ॥ ८ ॥ तत्तद्रहस्यमाहात्म्यंकिमाश्चर्यंचसुन्दरम् ॥ तद्ब्रूहिदेवदेवेशश्रोतुमिच्छाम्यहंप्रभो ॥ ९ ॥ ईश्वरउवाच ॥
यदङ्घ्रिनखचन्द्रांशुमहिमान्तोनगम्यते ॥ तन्माहात्म्यंकियद्देविप्रोच्यतेत्वंमुदाशृणु ॥११०॥ अनन्तकोटिब्रह्माण्डेअनन्तत्रिगुणोच्छ्रये ॥ तत्कला
कोटिकोट्यंशाब्रह्मविष्णुमहेश्वराः ॥ ११ ॥ सृष्टिस्थित्यादिनायुक्तास्तिष्ठन्तितस्यवैभवाः ॥ तद्रूपकोटिकोट्यंशाःकलाःकन्दर्पविग्रहाः ॥ १२ ॥
जगन्मोहंप्रकुर्वन्तितदण्डान्तरसंस्थिताः ॥ तद्देहविलसत्कान्तिकोटिकोट्यंशकोविभुः ॥ १३ ॥ तत्प्रकाशस्यकोट्यंशरश्मयोरविविग्रहाः ॥ तस्य
स्वदेहकिरणैःपरानन्दरसामृतैः ॥ १४ ॥ परमामोदचिद्रूपैर्निर्गुणस्यैककारणैः ॥ तदंशकोटिकोट्यंशाजीवन्तिकिरणात्मकाः ॥ १५ ॥ तदङ्घ्रि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पङ्कजद्वन्द्वनखचन्द्रमणिप्रभाः ॥ आहुःपूर्णब्रह्मणोऽपिकारणंवेददुर्गमम् ॥१६॥ तदंशसौरभानन्तकोट्यंशोविश्वमोहनः ॥ तत्स्पर्शपुष्पगन्धादिनाना
सौरभसम्भवः ॥ १७ ॥ तत्प्रियाप्रकृतिस्त्वाद्याराधिकाकृष्णवल्लभा ॥ तत्कलाकोटिकोट्यंशादुर्गाद्यास्त्रिगुणात्मिकाः ॥ तस्याअङ्घ्रिरजःस्पर्शा
त्कोटिविष्णुःप्रजायते ॥ ११८ ॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेवृन्दावनमाहात्म्येकृष्णचरित्रएकोनसप्ततितमोऽध्यायः ॥६९॥ पार्वत्युवाच ॥
यदाकर्णनमेतस्ययेवापारिषदाःप्रभोः ॥ तदहंश्रोतुमिच्छामिकथयस्वदयानिधे ॥ १ ॥ ईश्वरउवाच ॥ राधयासहगोविन्दंस्वर्णसिंहासनेस्थि
तम् ॥ पूर्वोक्तरूपलावण्यंदिव्यभूषाम्बरस्रजम् ॥ २ ॥ त्रिभङ्गीमञ्जुसुस्निग्धंगोपीलोचनतारकम् ॥ तद्वाह्येयोगपीठेचस्वर्णसिंहासनावृते ॥ ३ ॥
प्रत्यङ्गरभसावेशाःप्रधानाःकृष्णवल्लभाः ॥ ललिताद्याःप्रकृत्यंशामूलप्रकृतिराधिका ॥ ४ ॥ संमुखेललितादेवीश्यामलावायुकोणके ॥ उत्तरे
श्रीमतीधन्याऐशान्यांश्रीहरिप्रिया ॥ ५ ॥ विशाखाचतथापूर्वेशैब्याचाग्नौततःपरम् ॥ पद्माचदक्षिणेपश्चान्नैर्ऋतेक्रमशःस्थिताः ॥ ६ ॥ योगपीठे
केसराग्रेचारुचन्द्रावतीप्रिया ॥ अष्टौप्रकृतयःपुण्याःप्रधानाःकृष्णवल्लभाः ॥ ७ ॥ प्रधानप्रकृतिस्त्वाद्याराधाचन्द्रावतीसमा ॥ चन्द्रावलीचित्ररेखा
चन्द्रामदनसुन्दरी ॥ ८ ॥ प्रियाचश्रीमधुमतीचन्द्ररेखाहरिप्रिया ॥ षोडशाद्याःप्रकृतयःप्रधानाःकृष्णवल्लभाः ॥ ९ ॥ वृन्दावनेश्वरीराधा
तथाचन्द्रावलीप्रिया ॥ अभिन्नगुणलावण्यसौन्दर्याश्चारुलोचनाः ॥ १० ॥ मनोहरामुग्धवेषाःकिशोरीवयसोज्ज्वलाः ॥ अग्रेतनास्तथा
चान्यागोपकन्याःसहस्रशः ॥ ११ ॥ शुद्धकाञ्चनपुञ्जाभाःसुप्रसन्नाःसुलोचनाः ॥ तद्रूपहृदयारूढास्तदाश्लेषसमुत्सुकाः ॥ १२ ॥ श्यामामृत
रसेमग्नाःस्फुरत्तद्भावमानसाः ॥ नेत्रोत्पलार्चितेकृष्णपादाब्जेऽर्पितचेतसः ॥ १३ ॥ श्रुतिकन्यास्ततोदक्षेसहस्रायुतसंयुताः ॥ जगन्मुग्धी
कृताकाराहृद्वर्तिकृष्णलालसाः ॥ १४ ॥ नानासत्त्वस्वरालापमुग्धीकृतजगत्त्रयाः ॥ तत्रगूढरहस्यानिगायन्त्यःप्रेमविह्वलाः ॥ १५ ॥ देव
कन्यास्ततःसव्येदिव्यवेषारसोज्ज्वलाः ॥ नानावैदग्ध्यनिपुणादिव्यभावभरान्विताः ॥ १६ ॥ सौन्दर्यातिशयेनाढ्याःकटाक्षातिमनोहराः ॥
निर्लज्जास्तत्रगोविन्देतदङ्गस्पर्शनोद्यताः[1] ॥ १७ ॥ तद्भावमग्नमनसःस्मितसाचिनिरीक्षणाः ॥ मन्दिरस्यततोबाह्येप्रिययाविशदावृते ॥ १८ ॥
समानवेषवयसःसमानबलपौरुषाः ॥ समानगुणकर्माणःसमानाभरणप्रियाः ॥ १९ ॥ समानस्वरसङ्गीतवेणुवादनतत्पराः ॥ श्रीदामा
पश्चिमेद्वारेवसुदामातथोत्तरे ॥ २० ॥ सुदामाचतथापूर्वेकिङ्किणीचापिदक्षिणे ॥ तद्बाह्येस्वर्णपीठेचसुवर्णमन्दिरावृते ॥ २१ ॥ स्वर्णवेद्यां तरस्थे

१ 'तदङ्गस्पर्शनोत्सुकाः' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुस्वर्णाभरणभूषिते ॥ स्तोककृष्णंसुभद्राद्यैर्गोपालैरयुतायुतैः ॥२२॥ शृङ्गवीणावेणुवेत्रवयोवेषाकृतिस्वरैः ॥ तद्गुणध्यानसंयुक्तैर्गायद्भिरपिविह्वलैः॥
॥२३॥चित्रार्पितैश्चित्ररूपैःसदानन्दाश्रुवर्षिभिः ॥ पुलकाकुलसर्वाङ्गैर्योगीन्द्रैरिवविस्मितैः ॥२४॥क्षरत्पयोभिर्गोवृन्दैरसङ्ख्यातैरुपावृतम् ॥ तद्बाह्ये
स्वर्णप्राकारेकोटिसूर्यसमुज्ज्वले ॥२५॥चतुर्दिक्षुमहोद्यानंमञ्जुसौरभमोहिते॥ पश्चिमेसंमुखेश्रीमत्पारिजातद्रुमाश्रये ॥२६॥ तदधस्तुस्वर्णपीठेस्वर्ण
मण्डनमण्डिते ॥ तन्मध्येमणिमाणिक्यदिव्यसिंहासनोज्ज्वले ॥२७॥ तत्रोपरिपरानन्दंवासुदेवंजगत्प्रभुम् ॥ त्रिगुणातीतचिद्रूपंसर्वकारणकारणम्॥
॥२८॥इन्द्रनीलघनश्यामंनीलकुञ्चितकुन्तलम् ॥पद्मपत्रविशालाक्षंमकराकृतिकुण्डलम्॥२९॥चतुर्भुजंतुचक्रासिगदाशङ्खाम्बुजायुधम्॥आद्यन्तरहितं
नित्यंप्रधानंपुरुषोत्तमम् ॥३०॥ ज्योतीरूपंमहद्धामपुराणंवनमालिनम्॥ पीताम्बरधरंस्निग्धंदिव्यभूषणभूषितम् ॥३१॥ दिव्यानुलेपनंराजच्चित्रिताङ्ग
मनोहरम् ॥ रुक्मिणीसत्यभामाचनाग्नजितीसुलक्षणा ॥३२॥ मित्रविन्दानुविन्दासुनन्दाजाम्बवतीप्रिया॥सुशीलाचाष्टमहिलावासुदेवप्रियास्ततः ॥
॥ ३३ ॥ उद्धाजिताःपारिषदावृत्तयोर्भक्तितत्पराः ॥ उत्तरेसुमहोद्यानेहरिचन्दनसंश्रये ॥३४॥ तत्राधस्तुस्वर्णपीठेमणिमण्डपमण्डिते ॥ तन्मध्येहेम
निर्माणदलेसिंहासनोज्ज्वले ॥३५॥तत्रैवसहरेवत्यासङ्कर्षणहलायुधम् ॥ईश्वरस्यप्रियानन्तमभिन्नगुणरूपिणम् ॥३६॥शुद्धस्फटिकसङ्काशंरक्ताम्बुज
दलेक्षणम् ॥ नीलपट्टधरंस्निग्धंदिव्यभूषास्रगम्बरम् ॥३७॥ मधुपानेसदासक्तंमधुघूर्णितलोचनम् ॥ प्रवीरदक्षिणेभागेमञ्जुनाभ्यन्तरस्थिते ॥३८॥
सन्तानवृक्षमूलेतुमणिमन्दिरमण्डितम् ॥ तन्मध्येमणिमाणिक्यदिव्यसिंहासनोज्ज्वले ॥ ३९ ॥ प्रद्युम्नंचरतींदेवंतत्रोपरिसुखस्थितम् ॥ जगन्मोहन
सौन्दर्यसारश्रेणीरसात्मकम् ॥४०॥ असिताम्भोजपुञ्जाभमरविन्ददलेक्षणम्॥दिव्यालङ्कारभूषाभिर्दिव्यगन्धानुलेपनम्॥४१॥जगन्मुग्धीकृताशेषसौ
न्दर्याश्चर्यविग्रहम्॥पूर्वोद्यानेमहारण्येसुरद्रुमसमाश्रये॥४२॥तत्राधस्तुस्वर्णपीठेहेममण्डपमण्डिते ॥ तस्यमध्येस्थिरेराजद्दिव्यसिंहासनोज्ज्वले॥४३॥
दिव्योपयासमंश्रीमदनिरुद्धंजगत्पतिम् ॥सान्द्रानन्दघनश्यामंसुस्निग्धंनीलकुन्तलम् ॥ ४४ ॥ सुभ्रून्नतलताभङ्गंसुकपोलंसुनासिकम् ॥सुग्रीवंसुन्दरं
वक्षोमनोहरमनोहरम् ॥ ४५॥ किरीटिनंकुण्डलिनंकण्ठभूषाविभूषितम् ॥ मञ्जुमञ्जीरमाधुर्यादतिसौन्दर्यविग्रहम् ॥ ४६ ॥ प्रियभृत्यगणाराध्यंयत्र
सङ्गीतकप्रियम् ॥ पूर्णब्रह्मसदानन्दंशुद्धसत्त्वस्वरूपकम् ॥४७॥ तस्योर्द्ध्वेचान्तरिक्षेचविष्णुंसर्वेश्वरेश्वरम् ॥ अनादिमादिचिद्रूपंचिदानन्दपरंविभुम् ॥
॥ ४८ ॥ त्रिगुणातीतमव्यक्तंनित्यमक्षयमव्ययम् ॥ समेघपुञ्जमाधुर्यसौन्दर्यश्यामविग्रहम् ॥ ४९ ॥ नीलकुञ्चितसुस्निग्धकेशपाशातिसुन्दरम् ॥
अरविन्ददलस्निग्धसुदीर्घचारुलोचनम् ॥ ५० ॥ किरीटकुण्डलोद्दण्डंशुद्धसत्त्वात्मभिर्वृतम् ॥ आत्मारामैश्चचिद्रूपैस्तन्मूर्तिध्यानतत्परैः ॥ ५१ ॥

CC-0. In Public Domain. Digitization by eGangotri

हृदयारूढतद्ध्यानर्नासाग्रन्यस्तलोचनैः ॥ क्रियतेऽहैतुकीभक्तिःकायहृद्वृत्तिभ।षितैः ॥ ५२ ॥ तत्सव्येयक्षगन्धर्वसिद्धविद्याधरादिभिः ॥ सुकान्तै
रप्सरःसङ्घैर्नृत्यसङ्गीततत्परैः ॥ ५३ ॥ तदङ्गभजनंकामंवाञ्छद्भिःकृष्णलालसैः ॥ तदग्रेवैष्णवैःसर्वैश्चान्तरिक्षेसुखासने ॥ ५४ ॥ प्रह्लादनारदाद्यैश्च
कुमारशुकवैष्णवैः ॥ जनकाद्यैर्लसद्भावैर्हृद्भाह्यस्फूर्तितत्परैः ॥ ५५ ॥ पुलकाकुलसर्वाङ्गैःस्फुरत्प्रेमसमाकुलैः ॥ रहस्यामृतसंसिक्तैरर्द्ध
युग्माक्षरोमनुः ॥ ५६ ॥ मन्त्रचूडामणिःप्रोक्तःसर्वमन्त्रैककारणम् ॥ सर्वदेवस्यमन्त्राणांकैशोरंमन्त्रहेतुकम् ॥ ५७ ॥ सर्वकैशोरमन्त्राणांहेतु
श्चूडामणिर्मनुः ॥ जपंकुर्वन्तिमनसापूर्णप्रेमसुखाश्रयाः ॥५८॥ वाञ्छन्तितत्पदाम्भोजेनिश्चलंप्रेमसाधनम् ॥ तद्बाह्येस्फटिकाद्युच्चप्रावारेसुमनोहरे॥
॥ ५९ ॥ कुङ्कुमैःसितरक्ताद्यैश्चतुर्दिक्षुसमाकुलैः ॥ शुक्लंचतुर्भुजंविष्णुंपश्चिमेद्वारपालकम् ॥ ६० ॥ शङ्खचक्रगदापद्मकिरीटादिविभूषितम् ॥
रक्तंचतुर्भुजंपद्मशङ्खचक्रगदायुधम् ॥ ६१ ॥ किरीटकुण्डलोद्दीप्तंद्वारपालकमुत्तरे ॥ गौरंचतुर्भुजंविष्णुंशङ्खचक्रगदायुधम् ॥ ६२ ॥ किरीटकुण्ड
लाद्यैश्चशोभितंवनमालिनम् ॥ पूर्वद्वारेद्वारपालंगौरंविष्णुंप्रकीर्तितम् ॥ ६३ ॥ कृष्णवर्णंचतुर्बाहुंशङ्खचक्रादिभूषणम् ॥ दक्षिणद्वारपालंतुश्रीविष्णुं
कृष्णवर्णकम् ॥ ६४ ॥ श्रीकृष्णचरितंह्येतद्यःपठेत्प्रयतःशुचिः ॥ शृणुयाद्वापियोभक्त्यागोविन्देलभतेरतिम् ॥६५॥ इतिश्रीपाद्मेमहापुराणेपाताल
खण्डेश्रीकृष्णचरितेसप्ततितमोऽध्यायः ॥७०॥ श्रीदेव्युवाच ॥भगवन्सर्वभूतेशसर्वात्मन्सर्वसम्भव ॥देवेश्वरमहादेवसर्वज्ञकरुणाकर ॥१ ॥ त्वयानुक
म्पितैवाहंभूयोप्याहानुकम्पया ॥ त्रैलोक्यमोहनामन्त्रास्त्वयामेकथिताःप्रभो ॥२ ॥ तेनदेवेनगोपीभिर्महामोहनरूपिणा ॥ केनकेनविशेषेणचिक्रीडे
तद्वदस्वमे॥ ३ ॥ महादेवउवाच ॥ एकदावादयन्वीणांनारदोमुनिपुङ्गवः ॥ कृष्णावतारमाज्ञायप्रययौनन्दगोकुलम् ॥ ४॥ गत्वातत्रमहायोगमयेशं
विभुमच्युतम् ॥ बालनाट्यधरंदेवमद्राक्षीन्नन्दवेश्मनि ॥ ५ ॥ सुकोमलपटास्तीर्णहेमपर्यङ्किकोपरि ॥ शयानंगोपकन्याभिःप्रेक्षमाणंसदामुदम्॥ ६ ॥
अतीवसुकुमाराङ्गंमुग्धंमुग्धविलोकनम् ॥विस्रस्तनीलकुटिलकुन्तलावलिमण्डलम्॥७॥किञ्चित्स्मिताङ्कुरव्यञ्जदेकद्विरदकुड्मलम् ॥ स्वप्रभाभिर्भास
यन्तंसमन्ताद्भवनोदरम् ॥८॥ दिग्वाससंसमालोक्यसोऽतिहर्षमवापह ॥ सम्भाष्यगोपतिंनन्दमाहसर्वप्रभुप्रियः ॥९॥ नारायणपराणांतुजीवनंह्यति
दुर्लभम् ॥ अस्यप्रभावमतुलंनजानन्तीहकेचन ॥ १० ॥ भवब्रह्मादयोऽप्यस्मिन्रतिंवाञ्छन्तिशाश्वतीम् ॥ चरितंचास्यबालस्यसर्वेषामेवहर्षणम् ॥
॥ ११ ॥ मुदागायन्तिशृण्वन्तिचाभिनन्दन्तितादृशाः ॥ अस्मिंस्तववसुतेऽचिन्त्यप्रभावेस्निग्धमानसाः ॥ १२ ॥ नराःसन्तिनतेषांवैभवबाधाभवि
ष्यति ॥ मुञ्चेहपरलोकेच्छाःसर्वावल्लवसत्तम ॥ १३ ॥ एकान्तेनैकभावेनबालेऽस्मिन्प्रीतिमाचर ॥ इत्युक्त्वानन्दभवनान्निष्क्रान्तोमुनिपुङ्गवः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १४ ॥ तेनार्चितोविष्णुबुद्ध्याप्रणम्यचविसार्जितः ॥ अथासैसौचिन्तयामासमहाभागवतोमुनिः ॥१९॥ अस्यकान्ताभगवतीलक्ष्मीर्नारायणेहरौ ॥
विधायगोपिकारूपंक्रीडार्थंशार्ङ्गधन्वनः ॥ १६ ॥ अवश्यमवतीर्णासाभविष्यतिनसंशयः ॥ तामहंविचिनोम्यद्यगेहेगेहेव्रजौकसाम् ॥ १७ ॥
विमृश्यैवंमुनिवरोगेहानिव्रजवासिनाम् ॥ प्रविवेशातिथिर्भूत्वाविष्णुबुद्ध्यासुपूजितः ॥ १८ ॥ सर्वेषांवल्लवादीनांरतिंनन्दसुतेपराम् ॥ दृष्ट्वामुनिवरः
सर्वान्मनसाप्रणनामह ॥ १९ ॥ गोपालानांगृहेबालांददर्शश्वेतरूपिणीम् ॥ सदृष्ट्वातर्कयामासरमाह्येषानसंशयः ॥ २० ॥ प्रविवेशततोधीमा
न्नन्दसख्युर्महात्मनः ॥ कस्यचिद्गोपवर्यस्यभानुनाम्नोगृहंमहत् ॥ २१ ॥ आर्चितोविधिवत्तेनसोऽप्यपृच्छन्महामनाः ॥ साधोत्वमसिविख्यातो
धर्मनिष्ठतयाभुवि ॥ २२ ॥ तवाहंधनधान्यादिसमृद्धिंसंविभावये ॥ कच्चित्तेयोग्यःपुत्रोऽस्तिकन्यावाशुभलक्षणा ॥ २३ ॥ यतस्तेकीर्तिरखिलंलोकं
व्याप्यभविष्यति ॥ इत्युक्तोमुनिवर्येणभानुरानीयपुत्रकम् ॥ २४ ॥ महातेजस्विनंदृत्तंनारदायाभ्यवादयत् ॥ दृष्ट्वामुनिवरस्तंतुरूपेणाप्रतिमंभुवि ॥
॥ २५ ॥ पद्मपत्रविशालाक्षंसुग्रीवंसुन्दरभ्रुवम् ॥ चारुदन्तंचारुकर्णंसर्वावयवसुन्दरम् ॥ २६ ॥ तंसमाश्लिष्यबाहुभ्यांस्नेहाश्रूणिविमुच्यच ॥ ततः
सगद्गदंप्राहप्रणयेनमहामुनिः ॥ २७ ॥ नारदउवाच ॥ अयंशिशुस्तेभवितासुसखारामकृष्णयोः ॥ विहरिष्यतिताभ्यांचरात्रिन्दिवमतन्द्रितः ॥
॥ २८ ॥ ततआभाष्यतंगोपप्रवरंमुनिपुङ्गवः ॥ यदागन्तुंमनश्चक्रेतत्रैवंभानुरब्रवीत् ॥ २९ ॥ एकास्तिपुत्रिकादेवदेवपत्न्युपमामम ॥ कनीयसी
शिशोरस्यजडान्धबधिराकृतिः ॥ ३० ॥ उत्साहाद्वृद्धयेयाचेत्वांवरंभगवत्तम ॥ प्रसन्नदृष्टिमात्रेणसुस्थिरांकुरुबालिकाम् ॥ ३१ ॥
श्रुत्वैवंनारदोवाक्यंकौतुकाकृष्टमानसः ॥ अथप्रविश्यभवनंलुठन्तींभूतलेसुताम् ॥ ३२ ॥ उत्थाप्याङ्केनिधायातिस्नेहविह्वलमानसः ॥
भानुरप्यायर्यौभक्तिनम्रोमुनिवरान्तिकम् ॥ ३३ ॥ अथभागवतश्रेष्ठःकृष्णस्यातिप्रियोमुनिः ॥ दृष्ट्वातस्याःपरंरूपमदृष्टाश्रुतमद्भुतम् ॥
॥ ३४ ॥ अभूतपूर्वसमंमुग्धोहरिप्रेमामहामुनिः ॥ विगाह्यपरमानन्दसिन्धुमेकरसायनम् ॥ ३५ ॥ मुहूर्त्तद्वितयंतत्रमुनिरासीच्छिलोपमः ॥
मुनीन्द्रःप्रतिबुद्धस्तुशनैरुन्मील्यलोचने ॥ ३६ ॥ महाविस्मयमापन्नस्तूष्णीमेवस्थितोऽभवत् ॥ अन्तर्हृदिमहाबुद्धिरेवमेवंव्यचिन्तयत् ॥ ३७ ॥
भ्रान्तंसर्वेषुलोकेषुमयास्वच्छन्दचारिणा ॥ अस्यारूपेणसदृशीदृष्टानैवचकुत्रचित् ॥ ३८ ॥ ब्रह्मलोकेरुद्रलोकइन्द्रलोकेचमेगतिः ॥ नको
ऽपिशोभाकोटय्यंशःकुत्राप्यस्याविलोकितः ॥ ३९ ॥ महामायाभगवतीदृष्टाशैलेन्द्रनन्दिनी ॥ यस्यारूपेणसकलंमुह्यतेसचराचरम् ॥ ४० ॥
साप्यस्याःसुकुमाराङ्गीलक्ष्मींनाप्नोतिकर्हिचित् ॥ लक्ष्मीःसरस्वतीकान्तिविद्याद्याश्चवरस्त्रियः ॥ ४१ ॥ छायामपिस्पृशन्त्यस्याःकदाचिन्नैवदृश्यते ॥

CC-0. In Public Domain. Digitization by eGangotri

विष्णोर्यन्मोहिनीरूपंहरोयेनविमोहितः ॥ ४२ ॥ मयादृष्टंचतदपिकुतोऽस्याःसदृशंभवेत् ॥ ततोऽस्यास्तत्त्वमाज्ञातुंनमेशक्तिःकथञ्चन ॥ ४३ ॥
अन्येचापिनजानन्तिप्रायेणैनांहरेःप्रियाम् ॥ अस्याःसन्दर्शनादेवगोविन्दचरणाम्बुजे ॥४४॥ याप्रेमार्द्धिरभूत्सामेभूतपूर्वानकर्हिचित् ॥ एकान्तेनौमि
भवतींदर्शयित्वातिवैभवम् ॥ ४५ ॥ कृष्णस्यसम्भवत्यस्यारूपंपरमतुष्टये ॥ विमृश्यैवंमुनिर्गोपप्रवरंप्रेष्यकुत्रचित् ॥ ४६ ॥ निभृतेपरितुष्टाव
बालिकांदिव्यरूपिणीम् ॥ अपिदेविमहायोगमायेश्वरिमहाप्रभे ॥ ४७ ॥ महामोहनदिव्याङ्गिमहामाधुर्यवर्षिणि ॥ महाद्भुतरसानन्दशिथिलीकृत
मानसे ॥ ४८ ॥ महाभाग्येनकेनापिगतासिममदृक्पथम् ॥ नित्यमन्तर्मुखादृष्टिस्तवदेविविभाव्यते ॥ ४९ ॥ अन्तरेवमहानन्दपरितृप्तेवलक्ष्यसे ॥
प्रसन्नंमधुरंसौम्यमिदंसुमुखमण्डनम् ॥ ५० ॥ व्यनक्तिपरंमाश्चर्यंकमप्यन्तःसुखोदयम् ॥ रजःसम्बन्धिकलिकाशक्तिस्तत्त्वातिशोभने ॥ ५१ ॥
सृष्टिस्थितिसमाहाररूपिणीत्वमधिष्ठिता ॥ तत्त्वंविशुद्धसत्त्वाशुशक्तिर्विद्यात्मिकापरा ॥ ५२॥ परमानन्दसन्दोहंदधतीवैष्णवंपरम् ॥ कात्वयाश्चर्य
विभवेब्रह्मरुद्रादिदुर्गमे ॥ ५३ ॥ योगीन्द्राणांध्यानपथंनत्वंस्पृशसिकर्हिचित् ॥ इच्छाशक्तिर्ज्ञानशक्तिःक्रियाशक्तिस्तवेशितुः ॥ ५४ ॥ तवांश
मात्रमित्येवंमनीषामेप्रवर्त्तते ॥ मायाविभूतयोऽचिन्त्यास्तन्मायार्भकमायिनः ॥ ५५ ॥ परेशस्यमहाविष्णोस्ताःसर्वास्तेकलाकलाः ॥ आनन्द
रूपिणीशक्तिस्त्वमीश्वरिनसंशयः ॥५६ ॥ त्वयाचक्रीडतेकृष्णोनूनंवृन्दावनेवने ॥ कौमारेणैवरूपेणत्वंविश्वस्यचमोहिनी ॥ ५७ ॥ तारुण्यवयसा
स्पृष्टंकीदृक्तेरूपमद्भुतम् ॥ कीदृशंतवलावण्यंलीलाहासेक्षणान्वितम् ॥ ५८ ॥ हरिमानुषलोभेनवपुराश्चर्यमण्डितम् ॥ द्रष्टुंतदहमिच्छामिरूपंतेहरि
वल्लभे ॥ ५९ ॥ येननन्दसुतःकृष्णोमोहंसमुपयास्यति ॥ इदानींममकारुण्यान्निजंरूपंमहेश्वरि ॥ ६० ॥ प्रणतायप्रपन्नायप्रकाशयितुमर्हसि ॥
इत्युक्तामुनिवर्येणतदनुव्रतचेतसा ॥ ६१ ॥ महामाहेश्वरींनत्वामहानन्दमयींपराम् ॥ महाप्रेमतरोत्कण्ठाव्याकुलाङ्गींशुभेक्षणाम् ॥ ६२ ॥ ईक्षमा
णेनगोविन्दमेवंवर्णयतास्थितम् ॥ जयकृष्णमनोहारिञ्जयवृन्दावनप्रिय ॥ ६३ ॥ जयभ्रूभङ्गललितजयवेणुरवाकुल ॥ जयबर्हकृतोत्तंसजयगोपी
विमोहन ॥ ६४ ॥ जयकुङ्कुमलिप्ताङ्गजयरत्नविभूषण ॥ कदाहंत्वत्प्रसादेनअनयादिव्यरूपया ॥ ६५ ॥ सहितंनवतारुण्यमनोहारिवपुःश्रिया ॥
विलोकयिष्येकैशोरेमोहनंत्वांजगत्पते ॥६६॥ एवंकीर्त्तयतस्तस्यतत्क्षणादेवसापुनः ॥ बभूवदधतीदिव्यंरूपमत्यन्तमोहनम् ॥ ६७ ॥ चतुर्दशाब्द
वयसासंमितंललितंपरम् ॥ समानवयसश्चान्यास्तदैवव्रजबालिकाः ॥ ६८ ॥ आगत्यवेष्टयामासुर्दिव्यभूषाम्बरस्रजः ॥ मुनीन्द्रःसतुनिश्चेष्टोबभूवा

१ 'परमानन्दम्' इ० पा० । २ 'पराश्चर्यमयं भवेत्' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्चर्यमोहितः ॥ ६९ ॥ बालायास्तास्तदासख्यश्चरणाम्बुकणैर्मुनिम् ॥ निषिच्यबोधयामासुरूचुश्चकृपयान्विताः ॥ ७० ॥ मुनिवर्यमहाभागमहा
योगेश्वरेश्वर ॥ त्वयैवपरयाभक्त्याभगवान्हरिरीश्वरः ॥७१॥ नूनमाराधितोदेवोभक्तानांकामपूरकः ॥ यदियंब्रह्मरुद्राद्यैर्देवैःसिद्धमुनीश्वरैः ॥ ७२ ॥
महाभागवतैश्चान्यैर्दुर्दर्शादुर्गमापिच ॥ अत्यद्भुतवयोरूपमोहिनीहरिवल्लभा ॥ ७३ ॥ केनाप्यचिन्त्यभाग्येनतवदृष्टिपथंगता ॥ उत्तिष्ठोत्तिष्ठ
विप्रर्षेधर्यमालम्ब्यसत्वरम् ॥७४॥ एनांप्रदक्षिणीकृत्यनमस्कुरुपुनःपुनः॥किंनपश्यसिचार्वङ्गीमत्यन्तव्याकुलामिव ॥७५ ॥ अस्मिन्नेवक्षणेनूनमन्त
र्धानंगमिष्यति ॥ नानयासहसंलापःकथश्चित्तेभविष्यति ॥ ७६ ॥ दर्शनंचपुनर्नास्याःप्राप्स्यसिब्रह्मवित्तम ॥ किंतुवृन्दावनेकापिभात्यशोकलता
शुभा ॥ ७७ ॥ सर्वकालेऽपिपुष्पाढ्यासर्वदिग्व्यापिसौरभा ॥ गोवर्द्धनाददूरेणकुसुमाख्यसरस्तटे ॥७८॥ तन्मूलेह्यर्द्धरात्रेचद्रक्ष्यस्यस्मानशेषतः ॥
श्रुत्वैवंवचनंतासांस्नेहविह्वलचेतसाम् ॥ ७९ ॥ यावत्प्रदक्षिणीकृत्यप्रणमेद्दण्डवन्मुनिः ॥ मुहूर्त्तद्वितयंबालांनानानिर्माणशोभनाम् ॥ ८० ॥
आहूयभानुंप्रोवाचनारदःसर्वशोभनाम् ॥ एवंप्रभावाबालेयंनसाध्यादैवतैरपि ॥ ८१ ॥ किंतुयद्गृहमेतस्याःपदचिह्नविभूषितम् ॥ तत्रनारायणो
देवःस्वयंवसतिमाधवः ॥ ८२ ॥ लक्ष्मीश्चवसतेनित्यंसर्वाभिःसर्वसिद्धिभिः ॥ अद्यएनांवरारोहांसर्वाभरणभूषणाम् ॥ ८३ ॥ देवीमिव
परांगेहेरक्षयत्नेनसत्तम ॥ इत्युक्त्वामनसैवैनांमहाभागवतोत्तमः ॥ ८४ ॥ तद्रूपमेवसंस्मृत्यप्रविष्टोगहनंवनम् ॥ अशोकलतिकामूलमासाद्य
मुनिसत्तमः ॥ ८५ ॥ प्रतीक्षमाणोदेवींतांतत्रैवागमनंनिशि ॥ स्थितोऽत्रप्रेमविकलश्चिन्तयन्कृष्णवल्लभाम् ॥ ८६ ॥ अथमध्यनिशाभागे
युवत्यःपरमाद्भुताः ॥ पूर्वदृष्टास्तथान्याश्चविचित्राभरणस्रजः ॥ ८७ ॥ दृष्ट्वामनसिसम्भ्रान्तोदण्डवत्पतितोभुवि ॥ परिवार्यमुनिंसर्वा
स्तास्ताःप्रविविशुःशुभाः ॥ ८८ ॥ प्रष्टुकामोऽपिसमुनिःकिंचित्स्वाभिमतंप्रियम् ॥ नाशकत्प्रेमलावण्यप्रियभाषाप्रधर्षितः ॥ ८९ ॥ अथा
गतामुनिश्रेष्ठंकृताञ्जलिमवस्थितम् ॥ भक्तिभारानतग्रीवंसविस्मयंससम्भ्रमम् ॥ ९० ॥ सुविनीततमंप्राहतत्रैवकरुणान्विता ॥ अशोकमालिनी
नाम्नाअशोकवनदेवता ॥ ९१ ॥ अशोकमालिन्युवाच ॥ अशोककलिकायांतुवसाम्यस्यांमहामुने ॥ रक्ताम्बरधरानित्यंरक्तमालानुलेपना ॥
॥ ९२ ॥ रक्तसिन्दूरकलिकारक्तोत्पलवतंसिनी ॥ रक्तमाणिक्यकेयूरमुकुटादिविभूषिता ॥ ९३ ॥ एकदाप्रिययासार्द्धंविहरन्त्योमधूत्सवे ॥ तत्रैव
मिलितागोपबालिकाश्चित्रवाससः ॥ ९४ ॥ अहंचाशोकमालाभिर्गोपवेषधरंहरिम् ॥ रमारूपाश्चताःसर्वाभक्त्यासम्यगपूजयम् ॥ ९५ ॥ ततः
प्रभृतिचैतासांमध्येतिष्ठामिसर्वदा ॥ भूषाभिर्विविधाभिश्चतोषयित्वारमापतिम् ॥ ९६ ॥ परात्परमहंसर्वंविजानामीहसर्वतः ॥ गोगोपगोपिकादीनां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रहस्यंचापिवेद्म्यहम् ॥ ९७ ॥ तवजिज्ञासितंसर्वंहृदिप्रत्यभिभाषितम् ॥ तांदेवीमद्भुताकारामद्भुतानन्ददायिनीम् ॥ ९८ ॥ हरेःप्रियांहिरण्याभां
हीरकोज्ज्वलमुद्रिकाम् ॥ कथंपश्यामिलोलाक्षींकथंवातत्पदाम्बुजम् ॥ ९९ ॥ आराध्यतेऽतिभक्त्येतित्वयाब्रह्मन्विमर्शितम् ॥ तत्रतेकथयिष्यामि
वृत्तान्तंसुमहात्मनाम् ॥ १०० ॥ मानसेसरसिस्थित्वातपस्तीव्रमुपेयुषाम् ॥ जपतांसिद्धमन्त्रांश्चध्यायतांहरिमीश्वरम् ॥ १ ॥ मुनीनांकाङ्क्षतांनित्यं
तस्याएवपदाम्बुजम् ॥ एकसप्ततिसाहस्रसङ्ख्यातानांमहौजसाम् ॥२॥ तत्तेऽहंकथयाम्यद्यतद्रहस्यंपरंवने ॥ १०३ ॥ इतिश्रीपाद्मेमहापुराणेपाताल
खण्डेश्रीराधाकृष्णमाहात्म्येएकसप्ततितमोऽध्यायः॥७१॥ईश्वरउवाच ॥ तदेकाग्रमनाभूत्वाशृणुदेविवरानने ॥ आसीदुग्रतपानाममुनिरेकोदृढव्रतः ॥
॥ १ ॥ साग्निकोह्यग्निभक्षश्चचचारात्यद्भुतंतपः ॥ जजापपरमंजाप्यंमन्त्रंपञ्चदशाक्षरम् ॥ २ ॥ काममन्त्रेणपुटितंकामंकामवरप्रदात् ॥ कृष्णायेति
पदंस्वाहासहितंसिद्धिदंपरम् ॥ ३ ॥ दध्यौचश्यामलंकृष्णंरासोन्मत्तंवरोत्सुकम् ॥ पीतपट्टधरंवेणुंकरेणाधरमर्पितम् ॥ ४ ॥ नवयौवनसम्पन्नंकर्षन्तं
पाणिनाप्रियाम् ॥ एवंध्यानपरःकल्पशतान्तेदेहमुत्सृजन् ॥ ५ ॥ सुनन्दनामगोपस्यकन्याऽभूत्समहामुनिः ॥ सुनन्देतिसमाख्यातायावीणां
बिभ्रतीकरे ॥ ६ ॥ मुनिरन्यःसत्यतपाइतिख्यातोमहाव्रतः ॥ सशुष्कपत्रंभुङ्क्तेयःप्रजजापपरंमनुम् ॥ ७ ॥ रत्यन्तंकामबीजेनपुटितंचदशाक्षरम् ॥
सप्रदध्यौमुनिवरश्चित्रवेषधरंहरिम् ॥ ८ ॥ धृत्वारमायादोवल्लीद्वितयंकङ्कणोज्ज्वलम् ॥ नृत्यन्तमुन्मदन्तंचसंश्लिष्यन्तंमुहुर्मुहुः ॥ ९ ॥ हसन्तमुच्चै
रानन्दतरङ्गंजठराम्बरे ॥ दधतंवेणुमाजानुवैजयन्त्याविराजितम् ॥१०॥ स्वेदाम्भःकणसंसिक्तललाटवलिताननम् ॥ त्यक्त्वात्यक्त्वासवैदेहंतपसा
चमहामुनिः ॥ ११ ॥ दशकल्पान्तरेजातोह्ययंनन्दवनादिह ॥ सुभद्रनाम्नोगोपस्यकन्याभद्रेतिविश्रुता ॥ १२ ॥ यस्याःपृष्ठतलेदिव्यंव्यजनं
परिदृश्यते ॥ हरिधामाभिधानस्तुकश्चिदासीन्महामुनिः ॥ १३ ॥ सोऽप्यतप्यत्तपःकृच्छ्रंनित्यंपत्रकंभोजनम्[1] ॥ आशुसिद्धिकरंमन्त्रंविंशत्यर्णं
प्रजप्तवान् ॥ १४ ॥ अनन्तरंकामबीजादध्यारूढंतदेवतु ॥ मायातत्पुरतोव्योमहंसासृग्द्युतिचन्द्रकम् ॥ १५ ॥ ततोदशाक्षरंपश्चान्नमोयुक्तंस्मरा
दिकम् ॥ दध्यौवृन्दावनेरम्येमाधवीमण्डपेप्रभुम् ॥ १६ ॥ उत्तानशायिनंचारुपल्लवास्तरणोपरि ॥ कयाचिदतिकामार्त्तवल्लव्यारक्तनेत्रया ॥ १७ ॥
वक्षोजयुगमाच्छाद्यविपुलोरःस्थलंमुहुः ॥ सञ्चुम्ब्यमानगण्डान्तंतृप्यमानरदच्छदम् ॥ १८ ॥ कलयन्तंप्रियांदोर्भ्यांसहासंसमुदाद्भुतम् ॥ समुनि

१ 'त्यक्त्वैव भोजनम्' इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

श्वबहून्देहांस्त्यक्त्वाकल्पत्रयान्तरे ॥ १९ ॥ सारङ्गनाम्नोगोपस्यकन्याभूच्छुभलक्षणा ॥ रङ्गवेणीतिविख्यातानिपुणाचित्रकर्मणि ॥ २० ॥
यस्यादन्तेषुदृश्यन्तेचित्रिताःशोणविन्दवः ॥ ब्रह्मवादीमुनिःकश्चिज्जाबालिरितिविश्रुतः ॥ २१ ॥ सतपःसुरतोयोगीविचरन्पृथिवीमिमाम् ॥ सएक
स्मिन्महारण्येयोजनायुतविस्तृते ॥ २२ ॥ यदृच्छयागतोऽपश्यदेकांवापींसुशोभनाम् ॥ सर्वतःस्फाटिकाबद्धतटांस्वादुजलान्विताम् ॥ २३ ॥
विकासिकमलामोदवायुनापरिशीलिताम् ॥ तस्याःपश्चिमदिग्भागेमूलेवटमहीरुहः ॥ २४ ॥ अपश्यत्तापसींकाञ्चित्कुर्वन्तींदारुणंतपः ॥ तारुण्य
वयसायुक्तांरूपेणातिमनोहराम् ॥ २५ ॥ चन्द्रांशुसदृशाभासांसर्वावयवशोभनाम् ॥ कृत्वाकटितटेवामपाणिंदक्षिणतस्तदा ॥ २६ ॥ ज्ञान
मुद्रांचबिभ्राणामनिमेषविलोचनाम् ॥ त्यक्ताहारविहारांचसुनिश्चलतयास्थिताम् ॥ २७ ॥ जिज्ञासुस्तांमुनिवरस्तस्थौतत्रशतंसमाः ॥ तदन्तेतांसमु
त्थाप्यचलितांविनयान्मुनिः ॥ २८ ॥ अपृच्छत्कात्वमाश्चर्यरूपेकिंवाऽऽचरिष्यसि ॥ यदियोग्यंभवेत्तर्हिकृपयावक्तुमर्हसि ॥ २९ ॥ अथा
ब्रवीच्छनैर्बालातपसातीवकार्शिता ॥ ब्रह्मविद्याहमतुलायोगीन्द्रैर्याविमृग्यते ॥ ३० ॥ साहंहरिपदाम्भोजकाम्ययासुचिरंतपः ॥ चराम्यस्मिन्वनेघोरे
ध्यायन्तीपुरुषोत्तमम् ॥ ३१ ॥ ब्रह्मानन्देनपूर्णाहंतेनानन्देनतृप्तधीः ॥ तथापिशून्यमात्मानंमन्येकृष्णरतिंविना ॥ ३२ ॥ इदानीमति
निर्विण्णादेहस्यास्यविसर्जनम् ॥ कर्त्तुमिच्छामिपुण्यायांवापिकायामिहैवतु ॥ ३३ ॥ तच्छ्रुत्वावचनंतस्यामुनिरत्यन्तविस्मितः ॥ पतित्वा
चरणेतस्याःकृष्णोपासाविधिंशुभम् ॥ ३४ ॥ पप्रच्छपरमप्रीतस्त्यक्त्वाध्यात्मविरोचनम् ॥ तयोक्तंमन्त्रमाज्ञायजगाममानसंसरः ॥ ३५ ॥
ततोऽतिदुश्चरंचक्रेतपोविस्मयकारकम् ॥ एकपादस्थितःसूर्यंनिर्निमेषंविलोकयन् ॥ ३६ ॥ मन्त्रंजजापपरमंपञ्चविंशतिवर्णकम् ॥ दध्यौपरम
भावेनकृष्णमानन्दरूपिणम् ॥ ३७ ॥ चरन्तंव्रजवीथीषुविचित्रगतिलीलया ॥ ललितैःपादविन्यासैःक्वणयन्तंचनूपुरम् ॥ ३८ ॥
चित्रकन्दर्पचेष्टाभिःसस्मितापाङ्गवीक्षितैः ॥ संमोहनाख्ययावंश्यापञ्चमारुणचित्रया ॥ ३९ ॥ बिम्बौष्ठपुटचुम्बिन्याकलालापैर्मनोज्ञया ॥
हरन्तंव्रजरामाणांमनांसिचवपूंषिच ॥ ४० ॥ श्लथनीवीभिरागत्यसहसालिङ्गिताङ्गकम् ॥ दिव्यमाल्याम्बरधरंदिव्यगन्धानुलेपनम् ॥
॥ ४१ ॥ श्यामलाङ्गप्रभापूरैर्मोहयन्तंजगत्त्रयम् ॥ सएवंबहुदेवेनसमुपास्यजगत्पतिम् ॥ ४२ ॥ नवकल्पान्तरेजातागोकुलेदिव्य
रूपिणी ॥ कन्याप्रचण्डनाम्नस्तुगोपस्यातियशस्विनः ॥ ४३ ॥ चित्रगन्धेतिविख्याताकुमारीचशुभानना ॥ निजाङ्गगन्धैर्विविधैर्मोदयन्ती
दिशोदश ॥ ४४ ॥ तामेनांपश्यकल्याणींवृन्देशोमधुपायिनीम् ॥ अङ्केषुस्वपतिंकृत्वारसावेशसमाकुलाम् ॥ ४५ ॥ अस्याःस्तनपरिष्वङ्गे

हारैःसर्वैर्विहन्यते ॥ वक्षःस्थलात्प्रच्यवद्भिश्चित्रगन्धादिसौरभैः ॥ ४६ ॥ अपरेमुनिवर्यास्तुसततंपूतमानसाः ॥ वायुभक्षास्तपस्तेपुर्जपन्तःपरमं
मनुम् ॥ ४७ ॥ स्मरःकृष्णायकामार्तिकलादि[1]वृत्तिशालिने ॥ आग्नेयीसहितंकृत्वामन्त्रंपञ्चदशाक्षरम् ॥ ४८ ॥ दध्युर्मुनिवराःकृष्णमूर्तिंदिव्य
विभूषणाम् ॥ दिव्यचित्रदुकूलेनपूर्णपीनकटिस्थलाम् ॥ ४९ ॥ मयूरपिच्छकैःकृतचूडामुज्ज्वलकुण्डलाम् ॥ सव्यजङ्घांतआदायदक्षिणंचरणा
म्बुजम् ॥ ५० ॥ भ्रमन्तींसम्पुटीकृत्यचारुहस्ताम्बुजद्वयम् ॥ कक्षदेशविनिक्षिप्तवेणुंपरिचलत्पुटीम् ॥५१॥ आनन्दयन्तींगोपीनांनयनानिमनांसि
च ॥ परमाश्चर्यरूपेणप्रविष्टांरङ्गमण्डपे ॥ ५२ ॥ प्रसूनवर्षैर्गोपीभिःपूर्यमाणांचसर्वतः ॥ अथकल्पान्तरेदेहंत्यक्त्वाजाताइहाधुना ॥ ५३ ॥
यासांकर्णेषुदृश्यन्तेताटङ्का[2]रश्मिदीपिताः ॥ रत्नमाल्यानिकण्ठेषुरत्नपुष्पाणिवेणिषु ॥ ५४ ॥ मुनिःशुचिश्रवानामसुवर्णोनामचापरः ॥ कुश
ध्वजस्यब्रह्मर्षेःपुत्रौतौवेदपारगौ ॥५५॥ ऊर्ध्वपादौतपोघोरंतेपतुर्त्र्यक्षरंमनुम् ॥ [3]ह्रींहंसइतिकृत्वैवजपन्तौयतमानसौ ॥५६॥ ध्यायन्तौगोकुलेकृष्णं
बालकंदशवार्षिकम् ॥ कन्दर्पसमरूपेणतारुण्यललितेनच ॥ ५७ ॥ पश्यन्तींव्रजबिम्बोष्ठीर्मोहयन्तमनारतम् ॥ तौकल्पान्तेतनूत्यक्त्वालब्धवन्तौ
जनिंव्रजे ॥५८॥ सुवीरनामगोपस्यसुतेपरमशोभने ॥ ययोर्हस्तेप्रदृश्येतेसारिकेशुभराविणी ॥५९॥ जटिलोजङ्घपूतश्चघृताशीकर्बुरेवच ॥ चत्वारो
मुनयोवन्याइहामुत्रचनिःस्पृहाः ॥ ६० ॥ केवलेवकभावेनप्रपन्नावल्लवीपतिम् ॥ तेपुस्तेसलिलेमग्नाजपन्तो[4]मनुमेवच ॥ ६१ ॥ रमात्रयेणपुटितं
[5]स्मराद्यन्तंदशाक्षरम् ॥ दध्युश्चगाढभावेनवल्लवीभिर्वनेवने ॥६२॥ भ्रमन्तंनृत्यगीताद्यैर्मानयन्तंमनोहरम् ॥ चन्दनालिप्तसर्वाङ्गंजपापुष्पावतंसकम्॥
॥ ६३ ॥ कह्लारमालयावीतंनीलपीतपटावृतम् ॥ कल्पत्रयान्तेजातास्तेगोकुलेशुभलक्षणाः ॥ ६४ ॥ इमास्ताःपुरतोरम्याउपविष्टानतभ्रुवः ॥ यांस[6]
भर्मकृतान्येववलयानिप्रकोष्ठके ॥ ६५ ॥ विचित्राणिचरत्नाद्यैर्दिव्यमुक्ताफलादिभिः ॥ मुनिर्दीर्घतपानामव्यासोऽभूत्पूर्वकल्पके ॥ ६६ ॥ तत्पुत्रः
शुकइत्येवमुनिःख्यातोवरःसुधीः ॥ सोऽपिबालोमहाप्राज्ञःसदैवानुस्मरन्पदम् ॥६७॥ विहायपितृमात्रादिकृष्णंध्यात्वावनंगतः ॥ सतत्रमानसैर्दिव्यै
रुपचारैरहर्निशम् ॥ ६८ ॥ अनाहारोऽर्चयद्विष्णुंगोपरूपिणमीश्वरम् ॥ रमयापुटितंमन्त्रंजपन्नष्टादशाक्षरम् ॥ ६९ ॥ दध्यौपरमभावेनहरिंहैमतरो
रधः ॥ हैममण्डपिकायांचहेमसिंहासनोपरि ॥ ७० ॥ आसीनंहेमहस्ताग्रैर्दधानंहेमवंशिकाम् ॥ दक्षिणेनभ्रामयन्तंपाणिनाहेमपङ्कजम् ॥ ७१ ॥

१ 'कलादिव्रतशालिने इ०' 'कलादिवृक्षशालिने' इ० च पा०। २ 'रत्ननिर्मिताः' इ० पा०। ३ 'ह्रींहूंस इति' इ० पा०। ४ 'मनुमुत्तमम्' इ० पा०। ५ 'स्मराद्यन्तदशोत्तरम्' इ० पा०।
६ 'यासां धर्मकृतान्येव' इ० पा०।

CC-0. In Public Domain. Digitization by eGangotri

हेमंवर्णेष्टप्रिययापरिकृताङ्गचित्रकम् ॥ हसन्तमतिहर्षेणपश्यन्तंनिजमाश्रमम् ॥ ७२ ॥ हर्षाश्रुपूर्णःपुलकाचिताङ्गःप्रसीदनाथेतिवदन्नथोच्चैः ॥ दण्ड प्रणामायपपातभूमौसंवेपमानस्त्रिजगद्विधातुः ॥७३॥ तंभक्तिकामंपतितंधरण्यामायासितोऽस्मीतिवदन्तमुच्चैः ॥ दण्डप्रणामस्यभुजौगृहीत्वापस्पर्श हर्षोपचितेक्षणेन ॥ ७४ ॥ उवाचचप्रियारूपंलब्धवन्तंशुकंहरिः ॥ त्वंमेप्रियतमाभद्रेसदातिष्ठममान्तिके ॥ ७५ ॥ मद्रूपंचिन्तयन्तीचप्रेमास्पद मुपागता ॥ द्वेचमुख्यतमेगोप्यौसमानवयसीशुभे ॥ ७६ ॥ एकव्रतेएकनिष्ठेएकनक्षत्रनामनी ॥ तप्तजाम्बूनदप्रख्यातत्रैवान्यातडित्प्रभा ॥ ७७ ॥ एकानिद्रायमाणाक्षीपरासौम्यायतेक्षणा ॥ सोऽर्चयत्परयाभक्त्यातेहरेःसव्यदक्षिणे ॥ ७८ ॥ सकल्पान्तेतनुंत्यक्त्वागोकुलेऽभून्महात्मनः ॥ उपनन्दस्यदुहितानीलोत्पलदलच्छविः ॥ ७९ ॥ सेयंश्रीकृष्णवनितापीतशाटीपरिच्छदा ॥ रक्तचोलिकयापूर्णाशातकुम्भघटस्तनी ॥ ८० ॥ दधानारक्तसिन्दूरंसर्वाङ्गस्यावगुण्ठनम् ॥ स्वर्णकुण्डलविभ्राजद्गण्डदेशासुशोभना ॥ ८१ ॥ स्वर्णपङ्कजमालाढ्याकुङ्कुमालिप्तसुस्तनी ॥ यस्या हस्तेचवर्णीयंदृश्यतेहरिणार्पितम् ॥ ८२ ॥ वेणुवाद्यातिनिपुणाकेशवस्यनिषेवणी ॥ कृष्णेनपरितुष्टेनकदाचिद्गीतकर्मणि ॥ ८३ ॥ विन्यस्ता कम्बुकण्ठेऽस्याभातिगुञ्जावलिःशुभा ॥ परोक्षेऽपिचकृष्णस्यकान्तिभिश्चस्मरार्दिता ॥ ८४ ॥ सखीभिर्वादयन्तीभिर्गायन्तीसुस्वरंपरम् ॥ नर्त्तये त्प्रियवेषेणवेषयित्वावधूमिमाम् ॥८५॥ वारंवारंचगोविन्दंभावेनालिङ्ग्यचुम्बति ॥ प्रियासौसर्वगोपीनांकृष्णस्याप्यतिवल्लभा ॥८६॥ श्वेतकेतोः सुतःकश्चिद्वेदवेदाङ्गपारगः ॥ सर्वमेवपरित्यज्यप्रचण्डंतपआस्थितः ॥ ८७ ॥ मुरारेःसेवितपदांसुधामधुरनादिनीम् ॥ गोविन्दस्यप्रियां शक्तिंब्रह्मरुद्रादिदुर्गमाम् ॥ ८८ ॥ भजन्तीमेकभावेनश्रियमेवमनोहराम् ॥ ध्यायञ्जजापसततंमन्त्रमेकादशाक्षरम् ॥ ८९ ॥ हसितंसकलंकृत्वा वंतमायेषुयोजयन् ॥ कान्त्यादिभिर्हसन्तीभिर्वासयन्त्यभितोजगत् ॥९०॥ वसन्तेवसतेत्येवंमन्त्रार्थंचिन्तयन्सदा ॥ सोऽपिकल्पद्वयेनैवसिद्धोऽत्र जनिमाप्तवान् ॥ ९१ ॥ सेयंबालायतेपुत्रीकृशाङ्गीकुड्मलस्तनी ॥ मुक्तावलिलसत्कण्ठीशुद्धकौशेयवासिनी ॥ ९२ ॥ मुक्ताच्छुरितमञ्जीरकङ्कणाङ्गदमुद्रिका ॥ बिभ्रतीकुण्डलेदिव्येअमृतस्राविणीशुभे ॥९३॥ वृत्तकस्तूरिकावेणीमध्येसिन्दूरबिन्दुवत् ॥ दधानाचित्रकंभालेसार्द्धंचन्दनचित्रकैः ॥ ॥ ९४ ॥ यासैवदृश्यतेशान्ताजपन्तीपरमंपदम् ॥ आसीच्चन्द्रप्रभोनामराजार्षिःप्रियदर्शनः ॥ ९५ ॥ तस्यकृष्णप्रसादेनपुत्रोऽभून्मधुराकृतिः ॥ चित्रध्वजइतिख्यातःकौमारावधिवैष्णवः ॥ ९६ ॥ सराजासुसुतंसौम्यंसुस्थिरंद्वादशाब्दिकम् ॥ आदेशयद्विजान्मन्त्रंपरमष्टादशाक्षरम् ॥ ९७ ॥

१ 'हेमद्रवेण प्रियया' इ० पा०। २ 'केशवस्यातितोषिणी' इ० पा०। ३ 'वृक्षमायेषु' इ०, 'वनमार्गेषु' इ० च पा०।

CC-0. In Public Domain. Digitization by eGangotri

अभिषिच्यमानःसशिशुर्मन्त्रामृतमयैर्जलैः ॥ तत्क्षणेभूपतिंप्रेम्णानत्वोदश्रुप्रकल्पितः ॥ ९८ ॥ तस्मिन्दिनेसवैबालःशुचिवस्त्रधरःशुचिः ॥ हार
नूपुरसूत्राद्यैर्ग्रैवेयाङ्गदकङ्कणैः ॥ ९९ ॥ विभूषितोहरेर्भक्तिमुपस्पृश्यामलाशयः ॥ विष्णोरायतनंगत्वास्थित्वैकाकीव्यचिन्तयत् ॥ १०० ॥ कथं
भजामितंभक्तमोहनंगोपयोषिताम् ॥ विक्रीडन्तंसदाताभिःकालिन्दीपुलिनेवने ॥ १ ॥ इत्थमत्याकुलमतिश्चिन्तयन्नेवबालकः ॥ अथापपरमां
विद्यांस्वप्नंचसमपश्यत ॥ २ ॥ आंसीत्कृष्णप्रतिकृतिःपुरतस्तस्यशोभना ॥ शिलामयीस्वर्णपीठेसर्वलक्षणलक्षिता ॥ ३ ॥ साभूदिन्दी
वरश्यामास्निग्धलावण्यशालिनी ॥ त्रिभङ्गललिताकारशिखण्डीपिच्छभूषणा ॥ ४ ॥ कूजयन्तीमुदावेणुंकाञ्चनीमधरेऽर्पिताम् ॥ दक्षसव्यगताभ्यां
चसुन्दरीभ्यांनिषेविताम् ॥ ५ ॥ वर्द्धयन्तींतयोःकामंचुम्बनाश्लेषणादिभिः ॥ दृष्ट्वाचित्रध्वजःकृष्णंतादृग्वेषविलासिनम् ॥ ६ ॥ अवनम्य
शिरस्तस्मैपुरोलज्जितमानसः ॥ अथोवाचहरिर्दक्षपार्श्वगांप्रेयसींहसन् ॥ ७ ॥ सलज्जंपरमंचैनंस्वशरीरासनागतम् ॥ निर्मायात्मसमंदिव्यंयुवती
रूपमद्भुतम् ॥ ८ ॥ चिन्तयस्वशरीरेणह्यभेदंमृगलोचने ॥ अथोत्वदङ्गतेजोभिःस्पृष्टस्त्वद्रूपमाप्स्यति ॥ ९ ॥ ततःसापद्मपत्राक्षीगत्वाचित्र
ध्वजान्तिकम् ॥ निजाङ्गकैस्तदङ्गानामभेदंध्यायतीस्थिता ॥ ११० ॥ अथास्यास्त्वङ्गतेजांसितदङ्गंपर्यपूरयन् ॥ स्तनयोर्ज्योतिषाजातौपीनौ
चारुपयोधरौ ॥ ११ ॥ नितम्बज्योतिषाजातंश्रोणिबिम्बंमनोहरम् ॥ कुन्तलज्योतिषाकेशपाशोऽभूत्करयोःकरौ ॥ १२ ॥ सर्वमेवंसुसम्पन्नंभूषावासः
स्रगादिकम् ॥ कलासुकुशलाजातासौरभेनान्तरात्मनि ॥ १३ ॥ दीपाद्दीपमिवालोक्यसुभगांभुविकन्यकाम् ॥ चित्रध्वजांत्रपाभङ्गिस्मितशोभांमनो
हराम् ॥ १४ ॥ प्रेम्णागृहीत्वाकरयोःसातामपहरन्मुदा ॥ गोविन्दवामपार्श्वस्थांप्रेयसींपरिरभ्यच ॥ १५ ॥ उवाचतवदासीयंनामचास्याश्च
कारय ॥ सेवांचास्यैवदप्रीत्यायथाभिरुचितांप्रियाम् ॥ १६ ॥ अथचित्रकलेत्यस्यैतन्नामचात्ममतेनसा ॥ चकारचाहसेवार्थंधृत्वाचापिविपञ्चिकाम् ॥
॥ १७ ॥ सदात्वंनिकटेतिष्ठगायस्वविविधैःस्वरैः ॥ गुणात्मन्प्राणनाथस्यतवायंविहितोविधिः ॥ १८ ॥ अथचित्रकलात्वाज्ञांगृहीत्वा
ऽऽनम्यमाधवम् ॥ तत्प्रेयस्याश्चचरणंगृहीत्वापादयोरजः ॥ १९ ॥ जगौसुमधुरंगीतंतयोरानन्दकारणम् ॥ अथप्रीत्योपगूढासाकृष्णेनानन्द
मूर्तिना[३] ॥ १२० ॥ यावत्सुखाम्बुधौपूर्णातावदेवाप्यबुध्यत ॥ चित्रध्वजोमहाप्रेम[३]विह्वलःस्मरतत्परः ॥ २१ ॥ तमेवपरमानन्दंमुक्तकण्ठो
रुरोदह ॥ तदारभ्यरुदन्नेवमुर्क्त्वाहारविहारकम्[४] ॥ २२ ॥ आभाषितोऽपिपित्राद्यैर्नैवावोचद्वचःक्वचित् ॥ मासमात्रंगृहेस्थित्वानिशीथेकृष्णसंश्रयः ॥ २३ ॥

१ 'तस्मिन्नायतने आसीत्कृष्णप्रतिकृतिः शुभा' इ० पा०। २ '-त्तन्नामात्ममतेन सा' इ० पा०। ३ 'प्रेमविकलः संस्मरन्परम्' इ० पा०। ४ 'मुक्ताहारविहारकम्.' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निर्गत्यारण्यमचरत्तपोवैमुनिदुष्करम् ॥ कल्पान्तेदेहमुत्सृज्यतपसैवमहामुनिः ॥२४॥ [1]वीरगुप्ताभिधानस्यगोपस्यदुहिताशुभा ॥ जाताचित्रकलेत्येव यस्याःस्कन्धेमनोहरा ॥ २५ ॥ विपञ्चीदृश्यतेनित्यंसप्तस्वरविभूषिता ॥ उपतिष्ठतिवैवामेरत्नभृङ्गारमद्भुतम् ॥ २६ ॥ दधानादक्षिणेहस्तेसावैरत्न पतद्ग्रहम् ॥ अयमासीत्पुरासर्वतापसैरभिवन्दितः ॥२७॥ मुनिःपुण्यश्रवानामकाश्यपःसर्वधर्मवित् ॥ पितातस्याभवच्छैवःशतरुद्रीयमन्वहम् ॥२८॥ प्रस्तुवन्देवदेवेशंविश्वेशंभक्तवत्सलम् ॥ प्रसन्नोभगवांस्तस्यपार्वत्यासहशङ्करः ॥२९॥ चतुर्दश्यामर्द्धरात्रेप्रत्यक्षःप्रददौवरम् ॥ त्वत्पुत्रोभविताकृष्णे भक्तिमान्बालएवहि ॥ १३० ॥ उपनीयाष्टमेवर्षेतस्मैसिद्धमनुस्त्वयम् ॥ उपदिश्यैकविंशत्यायोमयातेनिगद्यते ॥ ३१ ॥ गोपालविद्यानामायं मन्त्रोवाक्सिद्धिदायकः ॥ एतत्साधकजिह्वाग्रेलीलाचरितमद्भुतम् ॥३२॥ अनन्तमूर्तिरायातिस्वयमेववरप्रदः ॥ काममायारमाकण्ठसेन्द्राद्दामोदरो ज्ज्वलाः ॥ ३३ ॥ मध्येदशाक्षरींप्रोच्यपुनस्ताएवनिर्दिशेत् ॥ दशाक्षरोक्तऋष्यादिध्यानंचास्यब्रवीम्यहम् ॥ ३४ ॥ पूर्णामृतनिधेर्मध्येद्वीपं ज्योतिर्मयंस्मरेत् ॥ कालिन्द्यावेष्टितंतत्रध्यायेद्वृन्दावनंवनम् ॥ ३५ ॥ सर्वर्तुकुसुमस्ताविद्रुमवल्लीभिरावृतम् ॥ नटन्मत्तशिखिस्वानंगायत्कोकिल षट्पदम् ॥ ३६ ॥ तस्यमध्येवसत्येकःपरिजाततरुर्महान् ॥ शाखोपशाखाविस्तारैःशतयोजनमुच्छ्रितः ॥ ३७ ॥ तलेतस्याथविमलेपरितो धेनुमण्डलम् ॥ तदन्तर्मण्डलंगोपबालानांवेणुशृङ्गिणाम् ॥ ३८ ॥ तदन्तरेतुरुचिरंमण्डलंव्रजसुभ्रुवाम् ॥ नानोपायनपाणीनांमदविह्वलचेतसाम् ॥ ॥ ३९ ॥ कृताञ्जलिपुटानांचमण्डलंशुक्लवाससाम् ॥ शुक्लाभरणभूषाणांप्रेमविह्वलितात्मनाम् ॥ १४० ॥ चिन्तयेच्छ्रुतिकन्यानांगृह्णन्तीनां वचःप्रियम् ॥ रत्नवेद्यांततोध्यायेद्बकुलावरणंहरिम् ॥ ४१ ॥ ऊरौशयानंराधायाःकदलीकाण्डकोपरि ॥ तद्वक्त्रंचन्द्रसुस्मेरंवीक्षमाणंमनोहरम् ॥ ॥ ४२ ॥ किञ्चित्कुञ्चितवामाङ्घ्रिंवेणुयुक्तेनपाणिना ॥ वामेनालिङ्ग्यदयितांदक्षेणचिबुकंस्पृशन् ॥ ४३ ॥ महामारकताभासंमौक्तिक च्छायमेवच ॥ पुण्डरीकविशालाक्षंपीतनिर्मलवाससम् ॥ ४४ ॥ बर्हभारलसच्छीर्षंमुक्ताहारमनोहरम् ॥ गण्डप्रान्तलसच्चारुमकरा कृतिकुण्डलम् ॥ ४५ ॥ आपादतुलसीमालंकङ्कणाङ्गदभूषणम् ॥ नूपुरैर्मुद्रिकाभिश्चकाञ्च्याचपरिमण्डितम् ॥ ४६ ॥ सुकुमारतरं ध्यायेत्किशोरवयसान्वितम् ॥ पूजादशाक्षरोक्तैववेदलक्षंपुरस्क्रिया ॥ ४७ ॥ इत्युक्त्वान्तर्दधेदेवोदेवीचगिरिजासती ॥ मुनिरागत्यपुत्राय तथैवोपदिदेशह ॥ ४८ ॥ पुण्यश्रवास्तुतन्मन्त्रग्रहणादेवकेशवम् ॥ वर्णयामासविविधैर्जित्वासर्वान्मुनीन्स्वयम् ॥ ४९ ॥ रूपलावण्य

१ 'विरगुप्ताभिधानस्य' इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

वैदग्ध्यसौन्दर्याश्चर्यलक्षणम् ॥ तदाहृष्टमनाबालोनिर्गत्यस्वगृहात्ततः ॥ १५० ॥ वायुभक्षस्तपस्तेपेकल्पानामयुतत्रयम् ॥ तदन्तेगोकुलेजातानन्द
भ्रातुर्गृहेस्वयम् ॥५१॥ लवङ्गाइतितन्नामकृष्णेङ्गितनिरीक्षणा ॥ यस्याहस्तेप्रदृश्येतमुखमार्जनयन्त्रकम् ॥५२॥ इतितेकथिताःकाश्चित्प्रधानाःकृष्ण
वल्लभाः ॥ ५३ ॥ हरिविविधरसाद्यैर्युक्तमध्यायमेतंव्रजवरतनयाभिश्चारुहासेक्षणाभिः ॥ पठतियइहभक्त्यापाठयेद्वामनुष्योव्रजतिभगवतःश्रीवासु
देवस्यधाम ॥ १५४ ॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेश्रीकृष्णमाहात्म्येद्विसप्ततितमोध्यायः ॥ ७२ ॥ ईश्वरउवाच ॥ यत्त्वयापृष्टमाश्चर्यं
तन्मयाभाषितंक्रमात् ॥ यत्रमुह्यन्तिब्रह्माद्यास्तत्रकोवानमुह्यति ॥ १ ॥ तथापितेप्रवक्ष्यामियदुक्तंपरमर्षिणा ॥ महाराज्ञेऽम्बरीषायविष्णुभक्त्य
न्वितायच ॥ २ ॥ बदर्याश्रममासाद्यसमासीनंजितेन्द्रियम् ॥ राजाप्रणम्यतुष्टावविष्णुधर्मविवित्सया ॥३॥ वेदव्यासंमहाभागंसर्वज्ञंपुरुषोत्तमम् ॥
मांत्वंसंसारदुष्पारेपरित्रातुमिहार्हसि ॥४॥ विषयेभ्योविरक्तोऽस्मिनमस्तेभ्योनमोऽखिलम् ॥ यत्तत्पदमनुद्विग्नंसच्चिदानन्दविग्रहम् ॥५॥ परंब्रह्मपरा
काशमनाकाशमनामयम् ॥ यत्साक्षात्कृत्यमुनयोभवाम्भोधितरन्तिहि ॥ ६ ॥ तत्राहंमनसोनित्यंकथंगतिमवाप्नुयाम् ॥७॥ व्यासउवाच ॥ अति
गोप्यंत्वयापृष्टंयन्मयानशुकंप्रति ॥ गदितंस्वंसुतंकिंतुत्वांवक्ष्यामिहरिप्रिय ॥ ८ ॥ आसीदिदंपरंविश्वंयद्रूपंयत्प्रतिष्ठितम् ॥ अव्याकृतमव्यथितं
तदीश्वरमयंशृणु ॥ ९ ॥ मयाकृतंतपःपूर्वंबहुवर्षसहस्रकम् ॥ फलमूलपलाशाम्बुवाय्वाहारनिषेविणा ॥ १० ॥ ततोमामाहभगवान्स्वध्याननिरतं
हरिः ॥ कस्मिन्नर्थेचिकीर्षातेविवित्सावामहामते ॥ ११ ॥ प्रसन्नोऽस्मिवृणुष्वत्वंवरंचवरदर्षभात् ॥ मद्दर्शनान्तःसंसारइतिसत्यंब्रवीमिते ॥ १२ ॥
ततोऽहमब्रुवंकृष्णंपुलकोत्फुल्लविग्रहः ॥ त्वामहंद्रष्टुमिच्छामिचक्षुर्भ्यांमधुसूदन ॥१३॥ यत्तत्सत्यंपरंब्रह्मजगज्ज्योतिर्जगत्पतिम् ॥ वदन्तिवेदशिरस
श्चाक्षुषंनाथमद्भुतम् ॥ १४ ॥ श्रीभगवानुवाच ॥ ब्रह्मणैवंपुरापृष्टःप्रार्थितश्चयथापुरा ॥ यदवोचमहंतस्मैतत्तुभ्यमपिकथ्यते ॥ १५ ॥ मामेकेप्रकृतिं
प्राहुःपुरुषंचतथेश्वरम् ॥ धर्ममेकेधनंचैकेमोक्षमेकेऽकुतोभयम् ॥ १६ ॥ शून्यमेकेभावमेकेशिवमेकेसदाशिवम् ॥ अपरेवेदशिरसिस्थितमेकंसना
तनम् ॥ १७ ॥ सद्भावंविक्रियाहीनंसच्चिदानन्दविग्रहम् ॥ पश्याद्यदर्शयिष्यामिस्वरूपंवेदगोपितम् ॥ १८ ॥ ततोऽपश्यंनृपबालमहंकालाम्बुद
प्रभम् ॥ गोपकन्यावृतंगोपंहसन्तंगोपबालकैः ॥१९॥ कदम्बमूलआसीनंपीतवाससमद्भुतम् ॥ वनंवृन्दावनंनामनवपल्लवमण्डितम् ॥२०॥ कोकिल
भ्रमरारावंमनोभवमनोहरम् ॥ नदीमपश्यंकालिन्दीमिन्दीवरदलप्रभाम् ॥ २१ ॥ गोवर्द्धनंतथापश्यंकृष्णरामकरोद्धृतम् ॥ महेन्द्रदर्पनाशायगो
गोपालसुखावहम् ॥२२॥ गोपालमबलासङ्गमुदितंवेणुवादिनम्॥दृष्ट्वातिहृष्टोह्यभवंसर्वभूषणभूषणम् ॥२३॥ ततोमामाहभगवान्वृन्दावनचरःस्वयम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदिदंमेत्वयादृष्टंरूपंदिव्यंसनातनम् ॥२४॥ निष्कलंनिष्क्रियंशान्तंसच्चिदानन्दविग्रहम् ॥ पूर्णंपद्मपलाशाक्षंनातःपरतरंमम ॥ २५ ॥ इदमेववद न्त्येतेवेदाःकारणकारणम् ॥ सत्यंनित्यंपरानन्दंचिद्घनंशाश्वतंशिवम् ॥ २६ ॥ नित्यांमेमथुरांविद्धिवनंवृन्दावनंतथा ॥ यमुनांगोपकन्याश्चतथा गोपालबालकाः ॥ २७ ॥ ममावतारोनित्योऽयमत्रमासंशयंकृथाः ॥ ममेष्टाहिसदाराधासर्वज्ञोऽहंपरात्परः ॥२८॥ सर्वकामश्चसर्वेशःसर्वानन्दःपरा त्परः ॥ मयिसर्वमिदंविश्वंभातिमायाविजृम्भितम् ॥ २९ ॥ ततोऽहमब्रुवंदेवंजगत्कारणकारणम् ॥ काश्चगोप्यस्तुकेगोपावृक्षोऽयंकीदृशोमतः॥ ॥ ३० ॥ वनंकिंकोकिलाद्याश्चनदीकेयंगिरिश्चकः ॥ कोऽसौवेणुर्महाभागोलोकानन्दैकभाजनम् ॥ ३१ ॥ भगवानाहमांप्रीतःप्रसन्नवदनाम्बुजः ॥ गोप्यस्तुश्रुतयोज्ञेयाऋचोवैगोपकन्यकाः ॥ ३२ ॥ देवकन्याश्चराजेन्द्रतपोयुक्तामुमुक्षवः ॥ गोपालामुनयःसर्वेवैकुण्ठानन्दमूर्तयः ॥ ३३ ॥ कल्प वृक्षःकदम्बोऽयंपरानन्दैकभाजनम् ॥ वनमानन्दकाख्यंहिमहापातकनाशनम् ॥ ३४ ॥ सिद्धाश्चसाध्यागन्धर्वाःकोकिलाद्यानसंशयः ॥ केचिदानन्द हृदयंसाक्षाद्यमुनयातनुम् ॥ ३५ ॥ अनादिर्हरिदासोऽयंभूधरोनात्रसंशयः ॥ वेणुर्यःशृणुतंविप्रंतवापिविदितंतथा ॥ ३६ ॥ द्विजआसीच्छान्तमना स्तपःशान्तिपरायणः ॥ नाम्नादेवव्रतोदान्तःकर्मकाण्डविशारदः ॥ ३७ ॥ सवैष्णवजनव्रातमध्यवर्त्तीक्रियापरः ॥ सकदाचनशुश्रावयज्ञेशोऽस्तीति भूपते ॥ ३८ ॥ तस्यगेहमथाभ्यागाद्द्विजोमद्व्रतनिश्चयः ॥ समद्भक्तःक्वचित्पूजांतुलसीदलवारिणा ॥ ३९ ॥ कृतवांस्तद्गृहेकिंचित्फलंमूलंन्यवेद यत ॥ स्नानवारिफलंकिंचित्तस्मैप्रीत्याददौसुधीः ॥ ४० ॥ अश्रद्धयास्मितंकृत्वासोऽप्यगृह्णाद्द्विजन्मनः ॥ तेनपापेनसञ्जातंवेणुत्वमतिदारुणम् ॥ ॥ ४१ ॥ तेनपुण्येनतस्याथमदीयप्रियतांगतः ॥ असुनासोऽपिराजेन्द्रकेतुमानिवराजते ॥ युगान्तेतद्विष्णुपरोभूत्वाब्रह्मसमाप्स्यति ॥ ४२ ॥ अहो नजानन्तिनरादुराशयाःपुरींमदीयांपरमांसनातनीम् ॥ सुरेन्द्रनागेन्द्रमुनीन्द्रसंस्तुतांमनोरमांतांमथुरांपुरातनीम् ॥ ४३ ॥ काश्यादयोयद्यपिसन्ति पुर्यस्तासांतुमध्येमथुरैवधन्या ॥ यज्जन्ममौञ्जीव्रतमृत्युदाहैर्नृणांचतुर्द्धाविदधातिमुक्तिम् ॥ ४४ ॥ यदाविशुद्धास्तपआदिनाजनाःशुभाशया ध्यानधनानिरन्तरम् ॥ तदैवपश्यन्तिममोत्तमांपुरींनचान्यथाकल्पशतैर्द्विजोत्तमाः ॥ ४५ ॥ मथुरावासिनोधन्यामान्याअपिदिवौकसाम् ॥ अगण्यमहिमानस्तेसर्वएवचतुर्भुजाः ॥ ४६ ॥ मथुरावासिनोयेतुदोषान्पश्यन्तिमानवाः ॥ तेषुदोषंनपश्यन्तिजन्ममृत्युसहस्रजम् ॥ ४७ ॥ अधनाअपितेधन्यामथुरांयेस्मरन्तिते ॥ यत्रभूतेश्वरोदेवोमोक्षदःपापिनामपि ॥ ४८ ॥ ममप्रियतमोनित्यंदेवोभूतेश्वरःपरः ॥ यःकदापि

१ 'वनं नन्दनकाख्यं हि' इ० पा० । २ ' तपःसत्यपरायणः ' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

ममप्रीत्यैनसन्त्यजतितांपुरीम् ॥ ४९ ॥ भूतेश्वरंयोननमेन्नपूजयेन्नवास्मरेद्दुश्चरितोमनुष्यः ॥ नैनांसपश्येन्मथुरांमदीयांस्वयम्प्रकाशां
परदेवताख्याम् ॥ ५० ॥ नकथंमयिभक्तिंसलभतेपापपूरुषः ॥ योमदीयंपरंभक्तंशिवंसम्पूजयेन्नहि ॥ ५१ ॥ मन्मायामोहितधियःप्रायस्ते
मानवाधमाः ॥ भूतेश्वरंननमन्तिनस्मरन्तिस्तुवन्तिये ॥ ५२ ॥ बालकोऽपिध्रुवोयत्रममाराधनतत्परः ॥ प्रापस्थानंपरंशुद्धंयन्नयुक्तंपितामहैः ॥
॥ ५३ ॥ तांपुरींप्राप्यमथुरांमदीयांसुरदुर्लभाम् ॥ खञ्जोभूत्वान्धकोवापिप्राणानेवपरित्यजेत् ॥ ५४ ॥ वेदव्यासमहाभागमाकृथाःसंशयंक्वचित् ॥
रहस्यंवेदशिरसांयन्मयातेप्रकाशितम् ॥ ५५ ॥ इमंभगवताप्रोक्तमध्यायंयःपठेच्छुचिः ॥ शृणुयाद्वापियोभक्त्यामुक्तिस्तस्यापिशाश्वती ॥ ५६ ॥
इतिश्रीपाद्मेमहापुराणेपातालखण्डेवृन्दावनादिमथुरामाहात्म्यकथनंनामत्रिसप्ततितमोऽध्यायः ॥ ७३ ॥ ईश्वरउवाच ॥ एकदारहसिश्रीमानुद्धवोभग
वत्प्रियः ॥ सनत्कुमारमेकान्तेह्यपृच्छत्पार्षदःप्रभोः ॥१॥ यत्रक्रीडतिगोविन्दोनित्यंनित्यसुरास्पदे ॥ गोपाङ्गनाभिर्यत्स्थानंकुत्रवाकीदृशंपरम् ॥२॥
तत्तत्क्रीडनवृत्तान्तमन्यद्यद्यत्तदद्भुतम् ॥ ज्ञातंचेत्तवतत्कथ्यंस्नेहोमेयदिवर्त्तते ॥ ३ ॥ सनत्कुमारउवाच ॥ कदाचिद्यमुनाकूलेकस्यापिचतरोस्तले॥
सुवृत्तेनोपविष्टेनभगवत्पार्षदेनवै ॥ ४ ॥ यद्रहोऽनुभवस्तस्यपार्थेनापिमहात्मना ॥ दृष्टंकृतंचयद्यत्तत्प्रसङ्गात्कथितंमयि ॥ ५ ॥ तत्तेऽहंकथयाम्येत
च्छृणुष्वावहितःपरम् ॥ किंत्वेतद्यत्रकुत्रापिनप्रकाश्यंकदाचन ॥ ६ ॥ अर्जुनउवाच ॥ शङ्कराद्यैर्विरिञ्च्याद्यैरदृष्टमश्रुतंचयत् ॥ सर्वमेतत्कृपाम्भोधे
कृपयाकथयप्रभो ॥ ७ ॥ किंत्वयाकथितंपूर्वमाभीर्यस्तववल्लभाः ॥ तास्ताःकतिविधादेवकतिवासङ्ख्ययापुनः ॥ ८ ॥ नामानिकतिवातासांकावा
कुत्रव्यवस्थिताः ॥ तासांवाकतिकर्माणिवयोवेषश्चकःप्रभो ॥ ९ ॥ काभिःसार्द्धंक्वादेवविहरिष्यसिभोरहः ॥ नित्येनित्यसुखेनित्यविभवेचवनेवने॥
॥ १० ॥ तत्स्थानंकीदृशंकुत्रशाश्वतंपरमंमहत् ॥ कृपाचेत्तादृशीतन्मेसर्ववक्तुमिहार्हसि ॥ ११ ॥ यदपृष्टंमयाप्येवमज्ञातंयद्रहस्तव ॥ आर्तार्तिघ्नमहा
भागसर्वंतत्कथयिष्यसि ॥ १२ ॥ श्रीभगवानुवाच ॥ तत्स्थानंवल्लभास्तामेविहारस्तादृशोमम ॥ अपिप्राणसमानानांसत्यंपुंसामगोचरः ॥ १३ ॥
कथितेद्रष्टुमुत्कण्ठातववत्सभविष्यति ॥ ब्रह्मादीनामदृश्यंयात्किंतदन्यजनस्यवै ॥ १४ ॥ तस्माद्विरमवत्सैतत्किंतुतेनविनातव ॥ एवंभगवतस्तस्य
श्रुत्वावाक्यंसुदारुणम् ॥ १५ ॥ दीनःपादाम्बुजद्वन्द्वेदण्डवत्पतितोऽर्जुनः ॥ ततोविहस्यभगवान्दोर्भ्यांमुत्थाप्यतंविभुः ॥ १६ ॥ उवाचपरमप्रेम्णा
भक्तायभक्तवत्सलः ॥ तत्किंतत्कथनेनात्रद्रष्टव्यंचेत्त्वयाहियत् ॥ १७ ॥ यस्यांसर्वंसमुत्पन्नंयस्यामद्यापितिष्ठति ॥ लयमेष्यतितांदेवींश्रीमत्त्रिपुर

१ ' सुव्रतेन ' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुन्दरीम् ॥१८॥ आराध्यपरयाभक्त्यातस्यैस्वंचनिवेदय ॥ तांविनैतत्पदंदातुंनशक्नोमिकदाचन ॥ १९ ॥ श्रुत्वैतद्भगवद्वाक्यंपार्थोहर्षाकुलेक्षणः ॥
श्रीमत्यास्त्रिपुरादेव्यायर्यौश्रीपादुकातलम् ॥ २० ॥ तत्रगत्वाददर्शैनांश्रीचिन्तामणिवेदिकाम् ॥ नानारत्नैर्विरचितैःसोपानैरतिशोभिताम् ॥ २१ ॥
तत्रकल्पतरुंनानापुष्पैःफलभवैर्नतम् ॥ सर्वर्त्तुकोमलदलैःस्रवन्माध्वीकशीकरैः ॥ २२ ॥ वर्षद्भिर्वायुनालोलैःपल्लवैरुज्ज्वलीकृतम् ॥ शुकैश्चकोकिल
गणैःसारिकाभिःकपोतकैः ॥ २३ ॥ लीलाचकोरकैरम्यैःपक्षिभिश्चनिनादितम् ॥ यत्रगुञ्जद्भृङ्गराजकोलाहलसमाकुलम् ॥ २४ ॥ मणिभिर्भास्वरै
रुद्यद्भास्कराभंमनोहरम् ॥ श्रीरत्नमन्दिरंदिव्यंतलेतस्यमहाद्भुतम् ॥ २५ ॥ रत्नसिंहासनंतत्रमहाहैमाभिमोहनम् ॥ तत्रबालार्कसङ्काशांनानालङ्कार
भूषिताम् ॥२६॥ नवयौवनसम्पन्नांसृणिपाशधनुःशरैः ॥ राजच्चतुर्भुजलतांसुप्रसन्नांमनोहराम् ॥ २७ ॥ ब्रह्मविष्णुमहेशादिकिरीटमणिरश्मिभिः ॥
विराजितपदाम्भोजामणिमादिभिरावृताम् ॥ २८ ॥ प्रसन्नवदनांदेवींवरदांभक्तवत्सलाम् ॥ अर्जुनोऽहमितिज्ञातःप्रणम्यचपुनःपुनः ॥ २९ ॥ विहि
ताञ्जलिरेकान्तेस्थितोभक्तिभरान्वितः॥सातस्योपासितंज्ञात्वाप्रसादंचकृपानिधिः ॥ उवाचकृपयादेवीतस्यस्मरणविह्वला ॥३०॥ भगवत्युवाच ॥
किंवादानंत्वयावत्सकृतंपात्रायदुर्लभम् ॥ इष्टंयज्ञेनकेनात्रतपोवाकिमनुष्ठितम् ॥ ३१ ॥ भगवत्यमलाभक्तिःकावाप्राक्समुपार्ज्जिता ॥ किंवा
ऽन्मिन्दुर्लभंलोकेकिंवाकर्मशुभंमहत् ॥ ३२ ॥ प्रसादस्त्वयियेनायंप्रपन्नेचमुदाकिल ॥ गूढातिगूढश्चानन्यलभ्योभगवताकृतः ॥ ३३ ॥ नैतादृङ्म
र्त्यलोकानांनचभूतलवासिनाम् ॥ स्वर्गिणांदेवतादीनांतपस्वीश्वरयोगिनाम् ॥ ३४ ॥ भक्तानांनैवसर्वेषांनैवनैवचनैवच ॥ प्रसादस्तुकृतोवत्सतव
विश्वात्मनायथा ॥३५॥ तदेहिभजवुद्धैवकुलकुण्डंसरोमम ॥ सर्वकामप्रदादेवीत्वनयासहगम्यताम् ॥३६॥ तत्रैवविधिवत्स्नात्वाद्रुतमागम्यतामिह ॥
तदैवतत्रगत्वासस्नात्वापार्थस्तथाऽऽगतः ॥३७॥ आगतंतंकृतस्नानंन्यासमुद्रार्पणादिकम् ॥ कारयित्वाततोदेव्यातस्यवैदक्षिणश्रुतौ ॥ ३८ ॥ सद्यः
सिद्धिकरीबालाविद्यानिगदितापरा ॥ हकारार्द्धपरार्द्धीपाद्वितीयाविश्वभूषिता ॥ ३९ ॥ अनुष्ठानंचपूजांचजपंञ्चलक्षसङ्ख्यकम् ॥ कोरकैःकरवीराणां
प्रयोगंचयथातथम् ॥४०॥निर्वर्त्यतमुवाचेदंकृपयापरमेश्वरी॥अनेनैवविधानेनक्रियतांमदुपासनम् ॥४१॥ ततोमयिप्रसन्नायांतवानुग्रहकारणात् ॥सद्य
स्तुकृष्णलीलायामधिकारोभविष्यति ॥ ४२ ॥ इत्ययंनियमःपूर्वंस्वयंभगवताकृतः ॥ श्रुत्वैवमर्जुनस्तेनवर्मणातांसमर्चयत् ॥ ४३ ॥ ततःपूजांजपं
चैवकृत्वादेवीप्रसादिता ॥ कृत्वाततःशुभंहोमंस्नानंचविधिनाततः ॥ ४४ ॥ कृतकृत्यमिवात्मानंप्राप्तप्रायमनोरथम् ॥ करस्थांसर्वसिद्धिंचसपार्थः

१ 'मणिभिर्भास्वरैरुद्यद्दीप्यमानमनोहरम्' इ० पा० । २ 'पञ्चलक्षकसङ्ख्यकम्' इ० पा० । ३ मनुना' इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

सममन्यत ॥ ४५ ॥ अस्मिन्नवसरेदेवीतमागत्यस्मितानना ॥ उवाचगच्छवत्सत्वमधुनातद्गृहान्तरे ॥ ४६ ॥ ततःससम्भ्रमःपार्थःसमुत्थाय
मुदान्वितः ॥ असङ्ख्यहर्षपूर्णात्मादण्डवत्तांननामह ॥ ४७ ॥ आज्ञप्तस्तुतयासार्द्धंदेवीवयस्ययार्जुनः ॥ गतोराधापतिस्थानंयत्सिद्धैरप्यगोचरम् ॥
॥ ४८ ॥ ततश्चसउपादिष्टोगोलोकादुपरिस्थितम् ॥ स्थिरंवायुधृतंनित्यंसत्यंसर्वसुखास्पदम् ॥ ४९ ॥ नित्यंवृन्दावनंनामनित्यरासमहोत्सवम् ॥
अपश्यत्परमंगुह्यंपूर्णप्रेमरसात्मकम् ॥ ५० ॥ तस्याहिवचनादेवलोचनैर्वीक्ष्यतद्गृहः ॥ विवशःपतितस्तत्रविवृद्धप्रेमविह्वलः ॥ ५१ ॥ ततःकृच्छ्रा
ल्लब्धसंज्ञोदोर्भ्यामुत्थापितस्तया ॥ सान्त्वनावचनैस्तस्याःकथञ्चित्स्थैर्यमागतः ॥ ५२ ॥ ततस्तपःकिमन्यन्मेकर्त्तव्यंविद्यतेवद ॥ इति
तद्दर्शनोत्कण्ठाभरेणतरलोऽभवत् ॥ ५३ ॥ ततस्तयाकरेतस्यधृत्वातत्पददक्षिणे ॥ प्रतिपेदेसुदेशेनगत्वाचोक्तमिदंवचः ॥ ५४ ॥ स्नानायैत
च्छुभंपार्थविशत्वंजलविस्तरम् ॥ सहस्रदलपद्मस्थसंस्थानंमध्यकोरकम् ॥ ५५ ॥ चतुःसरश्चतुर्धारमाश्चर्यकुलसङ्कुलम् ॥ अस्यान्तरेप्रविश्याथ
विशेषमिहपश्यसि ॥ ५६ ॥ एतस्यदक्षिणेदेशएषचात्रसरोवरः ॥ मधुमाध्वीकपानंयन्नाम्नामलयनिर्झरः ॥ ५७ ॥ एतच्चफुल्लमुद्यानंवसन्तेमद
नोत्सवम् ॥ कुरुतेयत्रगोविन्दोवसन्तकुसुमोचितम् ॥५८॥ यत्रावतारंकृष्णस्यस्तुवन्त्येवदिवानिशम् ॥ भवेद्यत्स्मरणादेवमुनेःस्वान्तेस्मराङ्कुरः ॥
॥ ५९ ॥ ततोऽस्मिन्सरसिस्नात्वागत्वापूर्वसरस्तटम् ॥ उपस्पृश्यजलंतस्यसाधयस्वमनोरथम ॥ ६० ॥ ततस्तद्वचनंश्रुत्वातस्मिन्सरसि
तज्जले ॥ कह्लारकुमुदाम्भोजरक्तनीलोत्पलच्युतैः ॥ ६१ ॥ परागैरञ्जितेमञ्जुवासितेमधुबिन्दुभिः ॥ तुन्दिलेकलहंसादिनादैरान्दोलितेततः ॥
॥ ६२ ॥ रत्नाबद्धचतुस्तीरेमन्दानिलतरङ्गिते ॥ मग्नेजलान्तःपार्थेतुतत्रैवान्तर्दधेऽथसा ॥ ६३ ॥ उत्थायपरितोवीक्ष्यसंभ्रान्ताचारुहासिनी ॥
सद्यःशुद्धस्वर्णरश्मिगौरकान्ततनूलताम् ॥ ६४ ॥ स्फुरत्किशोरवर्षीयांशारदेन्दुनिभाननाम् ॥ सुनीलकुटिलस्निग्धविलसद्रत्नकुन्तलाम् ॥
॥ ६५ ॥ सिन्दूरबिन्दुकिरणप्रोज्ज्वलालकपट्टिकाम् ॥ उन्मीलद्भ्रूलताभङ्गिजितस्मरशरासनाम् ॥ ६६ ॥ घनश्यामलसल्लोलखेलल्लोचन
खञ्जनाम् ॥ मणिकुण्डलतेजोंशुविस्फुरद्गण्डमण्डलाम् ॥ ६७ ॥ मृणालकोमलभ्राजदाश्चर्यभुजवल्लरीम् ॥ शरदम्बुरुहांसर्वश्रीचौरपाणिपल्ल ॥ ९० ॥
वाम् ॥ ६८ ॥ विदग्धरचितस्वर्णकटिसूत्रकृतान्तराम् ॥ कूजत्काञ्चीकलापान्तविभ्राजज्जघनस्थलाम् ॥ ६९ ॥ भ्राजद्दुकूलसंवीतनितम्बोरु
सुमन्दिराम् ॥ शिञ्जानमणिमञ्जीरसुचारुपदपङ्कजाम् ॥ ७० ॥ स्फुरद्विविधकन्दर्पकलाकौशलशालिनीम् ॥ सर्वलक्षणसम्पन्नांसर्वाभरण

१ 'चतुर्द्वार' इ० पा० । २'संभ्रान्तां चासहायिनीम्' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूषिताम्॥७१॥आश्चर्यललनाश्रेष्ठामात्मानंसव्यलोकयत्॥विसस्मारचयत्किञ्चित्पौर्वदेहिकमेवच ॥७२॥ माययागोपिकाप्राणनाथस्यतदनन्तरम् ॥
इतिकर्त्तव्यतामूढातस्थौतत्रसुविस्मिता ॥ ७३ ॥ अत्रान्तरेऽम्बरेधीरध्वनिराकस्मिकोऽभवत् ॥ अनेनैवपथासुभ्रुगच्छपूर्वसरोवरम् ॥ ७४ ॥ उप
स्पृश्यजलंतस्यसाधयस्वमनोरथम् ॥ तत्रसन्तिहिसख्यस्तेमासीदवरवर्णिनि ॥ ७५ ॥ ताहिसम्पादयिष्यन्तिततत्रैववरमीप्सितम् ॥ इतिदैवींगिरं
श्रुत्वागत्वापूर्वसरोऽथसा ॥७६॥ नानापूर्वप्रवाहंचनानापक्षिसमाकुलम्॥स्फुरत्कैरवकह्लारकमलेन्दीवरादिभिः ॥७७॥ भ्राजितंपद्मरागैश्चपद्मसोपान
सत्तटम् ॥ विविधैःकुसुमोद्दामैर्मञ्जुकुञ्जलताद्रुमैः ॥ ७८ ॥ विराजितचतुस्तीरमुपस्पृश्यस्थिताक्षणम् ॥ तत्रान्तरेक्कणत्काञ्चीमञ्जुमञ्जीररञ्जितम् ॥
॥ ७९ ॥ किङ्किणीनांझणत्कारंशुश्रावोत्कर्णसम्पुटे ॥ ततश्चप्रमदावृन्दमाश्चर्ययुतयौवनम् ॥ ८० ॥ आश्चर्यालङ्कृतिन्यासमाश्चर्याकृतिभाषितम् ॥
अद्भुताङ्गमपूर्वंसापृथगाश्चर्यविभ्रमम् ॥ ८१ ॥ चित्रसम्भाषणंचित्रहसितालोकनादिकम् ॥ मधुराद्भुतलावण्यंसर्वमाधुर्यसेवितम् ॥ ८२ ॥ चिह्नंवण्य
गतानन्तमाश्चर्याकुलसुन्दरम् ॥ आश्चर्यस्निग्धसौन्दर्यमाश्चर्यानुग्रहादिकम् ॥ ८३ ॥ सर्वाश्चर्यसमुदयमाश्चर्यालोकनादिकम् ॥ दृष्ट्वातत्परमा
श्चर्यंचिन्तयन्तीह्रदाकियत् ॥८४॥ पादाङ्गुष्ठेनालिखन्तीभुवंनम्राननास्थिता ॥ ततस्तासांसम्भ्रमोऽभूद्दृष्टीनांचपरस्परम् ॥८५॥ केयंमदीयजातीया
चिरेणन्यस्तकौतुका ॥ इतिसर्वाःसमालोक्यज्ञातव्येयमितिक्षणम् ॥ ८६ ॥ आमन्त्र्यमन्त्रणाभिज्ञाःकौतुकाद्द्रष्टुमागताः ॥ आगत्यतासामेकाथ
नाम्नाप्रियमुदामता ॥ ८७ ॥ गिरामधुरयाप्रीत्यातामुवाचमनस्विनी ॥ ८८ ॥ प्रियमुदोवाच ॥ कासित्वंकस्यकन्यासिकस्यत्वंप्राणवल्लभा ॥ जाता
कुत्रासिकेनास्मिन्नानीतावाऽऽगतास्वयम् ॥८९॥ एतच्चसर्वमस्माकंकथ्यतांचिन्तयाकिमु ॥ स्थानेऽस्मिन्परमानन्देकस्यापिदुःखमस्तिकिम् ॥९०॥
इतिपृष्टातयासातुविनयावनतिंगता ॥ उवाचसुस्वरंतासांमोहयन्तीमनांसिच ॥९१॥ अर्जुनउवाच ॥ कावास्मिकस्यकन्यावाप्रजाताकस्यवल्लभा ॥
आनीताकेनवाचात्रकिंवाऽथस्वयमागता ॥ ९२ ॥ एतत्किञ्चिन्नजानामिदेवीजानातुतत्पुनः ॥ कथितंश्रूयतांतन्मेमद्वाक्येप्रत्ययोयदि ॥ ९३ ॥
अस्यैवदक्षिणेपार्श्वेएकमस्तिसरोवरम् ॥ तत्राहंस्नातुमायाताजातातत्रैवसंस्थिता ॥ ९४ ॥ विषमोत्कण्ठितापश्चात्पश्यन्तीपरितोदिशम्॥एकमाकाश
सम्भूतंध्वनिमश्रौषमद्भुतम्॥९५॥ अनेनैवपथासुभ्रुगच्छपूर्वसरोवरम् ॥उपस्पृश्यजलंतस्यसाधयस्वमनोरथम् ॥९६॥ तत्रसन्तिहिसख्यस्तेमासीदवर
वर्णिनि॥ताहिसम्पादयिष्यन्तितत्रतेवरमीप्सितम् ॥९७॥ इत्याकर्ण्यवचस्तस्यतस्मादत्रसमागता ॥ विषादहर्षपूर्णात्माचिन्ताकुलसमाकुला ॥९८॥

१'चित्रलास्यगवानन्तम्' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

आगतास्यजलंस्पृष्ट्वानानाविधशुभध्वनिम् ॥ अश्रौषंचततःपश्चादपश्यंभवतीःपराः ॥ ९९ ॥ एतन्मात्रंविजानामिकायेनमनसागिरा ॥ एतदे
वमयादेव्यःकथितंयदिरोचिते ॥१००॥ कायूयंतनुजाःकेषांक्वजाताःकस्यवल्लभाः ॥ तच्छ्रुत्वावचनंतस्याःसावैप्रियमुदाब्रवीत् ॥ १ ॥ अस्त्वेवंप्राण
सख्यःस्मतस्यैवचवयंशुभे ॥ वृन्दावनकलानाथविहारदारिकाःसुखम् ॥२॥ ताआत्ममुदितास्तेनव्रजबालाइहागताः ॥ एताःश्रुतिगणाःख्याताएता
श्चमुनयस्तथा ॥ ३ ॥ वयंबल्लवबालाहिकथितास्तेस्वरूपतः ॥ अत्रराधापतेरङ्गात्पूर्वायाःप्रेयसीतमाः ॥ ४ ॥ नित्यानित्यविहारिण्योनित्यकेलि
भुवश्वराः ॥ एषापूर्णरसादेवीएषाचरसमन्थरा ॥५॥ एषारसालयानामएषाचरसवल्लरी ॥ रसपीयूषधारेयमेषारसतरङ्गिणी ॥ ६ ॥ रसकल्लोलिनीचै
षाइयंचरसवापिका ॥ अनङ्गसेनाएषैवइयंचानङ्गमालिनी ॥ ७ ॥ मदयन्तीइयंबालाएषाचरसविह्वला ॥ इयंचललितानामइयंललितयौवना ॥
॥ ८ ॥ अनङ्गकुसुमाचैषाइयंमदनमञ्जरी ॥ एषाकलावतीनामइयंरतिकलास्मृता ॥ ९ ॥ इयंकामकलानामइयंहिकामदायिनी ॥ रतिलोला
इयंबालाइयंबालारतोत्सुका ॥ ११० ॥ एषाचरतिसर्वस्वारतिचिन्तामणिस्त्वसौ ॥ नित्यनन्दाःकाश्चिदेतानित्यप्रेमरसप्रदाः ॥ ११ ॥ अतःपरंश्रुति
गणास्तासांकाश्चिदिमाःशृणु ॥ उद्गितैषासुगीतेयंकलगीतात्वियंप्रिया ॥ १२ ॥ एषाकलसुराख्याताबालेयंकलकण्ठिका ॥ विपञ्चीयंक्रमपदाएषा
बहुहुतामता ॥ १३ ॥ एषाबहुप्रयोगेयंख्याताबहुकलाऽबला ॥ इयंकलावतीख्यातामताचैषाक्रियावती ॥ १४ ॥ अतःपरंमुनिगणास्तासांकति
पयाइह ॥ इयमुग्रतपानामएषाबहुगुणास्मृता ॥ १५ ॥ एषाप्रियव्रतानामसुव्रताचइयंमता ॥ सुरेखेयंमताबालासुपर्वेयंबहुप्रदा ॥ १६ ॥ रत्नरेखा
त्वियंख्यातामणिग्रीवात्वसौमता ॥ सुपर्णाचेयमाकल्पासुकल्पारत्नमालिका ॥१७॥ इयंसौदामिनीसुभ्रूरियंचकामदायिनी ॥एषाचभोगदाख्याताइयं
विश्वमतासती ॥ १८ ॥ एषाचधारिणीधात्रीसुमेधाकान्तिरप्यसौ ॥ अपर्णेयंसुपर्णैषामतैषाचसुलक्षणा ॥ १९ ॥ सुदतीयंगुणवती
चैषासौकलिनीमता ॥ एषासुलोचनाख्याताइयंचसुमनाःस्मृता ॥ १२० ॥ अश्रुताचसुशीलाचरतिसौख्यंप्रदायिनी ॥ अतःपरंगोपबालावयमत्रा
गतास्तुयाः ॥ २१ ॥ तासांचपरिचीयन्तांकाश्चिदम्बुरुहानने ॥ असौचन्द्रावलीचैषाचन्द्रिकेयंशुभामता ॥२२॥ एषाचन्द्रावलीचन्द्ररेखेयंचन्द्रिका
प्यसौ ॥ एषाख्याताचन्द्रमालामताचन्द्रालिकात्वियम् ॥२३॥ एषाचन्द्रप्रभाचन्द्रकलेयमबलास्मृता॥ एषावर्णावलीवर्णमालेयंमणिमालिका॥२४॥
वर्णप्रभासमाख्यातासुप्रभेयंमणिप्रभा ॥ इयंहारावलीतारामालिनीयंशुभास्मृता ॥ २५ ॥ मालतीयमियंयूथीवासन्तीनवमल्लिका ॥ मल्लीयंनवमल्लीय

१ 'सुरसेयम्' इ० पा०। २ 'वनमालिका' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सौशफालिकामता ॥ २६ ॥ सौगन्धिकेयंकस्तूरीपद्मिनीयंकुमुद्वती ॥ एषैवहिरसोल्लासाचित्रवृन्दासमात्वियम् ॥ २७ ॥ रम्भेयमुर्वशीचैषासुरेखा स्वर्णरेखिका ॥ एषाकाञ्चनमालेयंसत्यसन्ततिकापरा ॥ २८ ॥ एताःपरिकृताःसर्वाःपरिचेयाःपराअपि ॥ सहितास्माभिरेताभिर्विहरिष्यसिभामिनि ॥ २९ ॥ एहिपूर्वसरस्तीरेतत्रत्वांविधिवत्सखि ॥ स्नापयित्वाऽथदास्यामिमन्त्रंसिद्धिप्रदायकम् ॥ १३० ॥ इतितां सहसानीत्वास्नापयित्वाविधानतः ॥ वृन्दावनकलानाथप्रेयस्यामन्त्रमुत्तमम् ॥ ३१ ॥ ग्राहयामाससंक्षेपादीक्षाविधिपुरस्सरम् ॥ परंवरुणबीजस्यवह्निबीजपुरस्कृतम् ॥ ३२ ॥ चतुर्थस्वरसंयुक्तंनादबिन्दुविभूषितम् ॥ पुटितंप्रणवाभ्यांचत्रैलोक्येचातिदुर्लभम् ॥ ३३ ॥ मन्त्रग्रहणमात्रेणसिद्धिःसर्वाप्रजायते ॥ पुरश्चर्याविधिध्यानंहोमसङ्ख्याजपस्यच ॥ ३४ ॥ तप्तकाञ्चनगौराङ्गींनानालङ्कारभूषिताम् ॥ आश्चर्यरूपलावण्यांसुप्रसन्नांवरप्रदाम् ॥ ३५ ॥ कल्हारैःकरवीराद्यैश्चम्पकैःसरसीरुहैः ॥ सुगन्धकुसुमैरन्यःसौगन्धिकसमन्वितैः ॥ ३६ ॥ पाद्यार्घ्याचमनीयैश्चधूपदीपर्मनोहरैः॥नैवेद्यैर्विविधैर्दिव्यैःसखीवृन्दाहृतैर्मुदा॥३७॥ सम्पूज्यविधिवद्देवींजप्त्वालक्षमनुंततः॥हुत्वाचविधिनास्तुत्वाप्रणम्यदण्डवद्भुवि ॥ ३८ ॥ ततःसासंस्तुतादेवीनिमेषरहितान्तरा ॥ परिकल्प्यनिजांछायांमा[1]ययात्मसमीहया ॥ ३९ ॥ पार्श्वेऽथप्रेयसींतत्रस्थापयित्वाबलादिव ॥ सखीभिरावृताहृष्टाशुद्धैःपूजाजपादिभिः ॥ १४० ॥ स्तवैर्भक्त्याप्रणामैश्चकृपयाऽऽविरभूत्तदा ॥ हेमचम्पकवर्णाभाविचित्राभरणोज्ज्वला ॥ ४१ ॥ अङ्गप्रत्यङ्गलावण्यलालित्यमधुराकृतिः ॥ निष्कलङ्काशरत्पूर्णकलानाथशुभानना ॥ ४२ ॥ स्निग्धमुग्धस्मितालोकजगत्त्रयमनोहरा ॥ निजयाप्रभयाऽत्यन्तंद्योतयन्तीदिशोदश ॥ ४३ ॥ अब्रवीदथसादेवीवरदाभक्तवत्सला ॥ ४४ ॥ देव्युवाच ॥ मत्सखीनांवचःसत्यंतेनत्वंमेप्रियासखी ॥ समुत्तिष्ठसमागच्छकामंतेसाधयाम्यहम् ॥४५॥ अर्जुनीसावचोदेव्याःश्रुत्वाचात्ममनीषितम् ॥ पुलकाङ्कु[2]रमुग्धाङ्गीबाष्पाकुलविलोचना ॥ ४६ ॥ पपातचरणेदेव्याःपुनश्चप्रेमविह्वला ॥ ततःप्रियंवदांदेवींसमुवाचसखीमिमाम् ॥ ४७ ॥ पाणौगृहीत्वामत्सङ्गेसमाश्वास्यसमानय ॥ ततःप्रियंवदादेव्याआज्ञयाजातसम्भ्रमा ॥ ४८ ॥ तांतथैवसमादायसङ्गेदेव्याजगामह ॥ गत्वोत्तरसरस्तीरेस्नापयित्वाविधानतः ॥ ॥ ४९ ॥ सङ्कल्पादिकपूर्वंतुपूजयित्वायथाविधि ॥ श्रीगोकुलकलानाथमन्त्रंतच्चसुसिद्धिदम् ॥ १५० ॥ ग्राहयामासतांदेवीकृपयाहरिवल्लभा ॥ व्रतंगोकुलनाथाख्यंपूर्वंमोहनभूषितम् ॥ ५१ ॥ सर्वसिद्धिप्रदंमन्त्रंसर्वतन्त्रेषुगोपितम् ॥ गोविन्दे[3]रितविज्ञासौददौभक्तिमचञ्चलाम् ॥ ५२ ॥

---

१ 'माययातत्त्वमीहया' इ० पा० । २ 'पुलकाकुलमुग्धाङ्गी' इ० पा० । ३ 'गोविन्दगीतविज्ञाद्यौ' इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

ध्यानंचकथितंतस्यैमन्त्रराजंचमोहनम् ॥ उक्तंचमोहनेतन्त्रेस्मृतिरप्यस्यसिद्धिदा ॥ ९३ ॥ नीलोत्पलदलश्यामंनानालङ्कारभूषितम् ॥ ९४ ॥
कोटि-कन्दर्पलावण्यंध्यायेद्रासरसाकुलम् ॥ प्रियंवदामुवाचेदंरहस्यंपावनेच्छया ॥ श्रीराधिकोवाच ॥ अस्यायावद्भवेत्पूर्णंपुरश्चरणमुत्त
मम् ॥ तावद्धिपालयैनांत्वंसावधानासहालिभिः ॥ ९५ ॥ इत्युक्त्वासाययौकृष्णपादाम्बुरुहसन्निधिम् ॥ छायामात्मभवामात्मप्रेय
सीनांनिधायच ॥ ९६ ॥ तस्थौतत्रयथापूर्वंराधिकाकृष्णवल्लभा ॥ अत्रप्रियंवदादेशात्पद्ममष्टदलंशुभम् ॥ ९७ ॥ गोरोचनाभि
र्निर्मायकुङ्कुमेनापिचन्दनैः ॥ एभिर्नानाविधैर्द्रव्यैःसंमिश्रैःसिद्धिदायकम् ॥ ९८ ॥ लिखित्वायन्त्रराजंचशुद्धंमन्त्रंतमद्भुतम् ॥ कृत्वा
न्यासादिकंपाद्यमर्घ्यंचापियथाविधि ॥ ९९ ॥ नानर्तुसम्भवैःपुष्पैःकुङ्कुमैरपिचन्दनैः ॥ धूपदीपैश्चनैवेद्यस्ताम्बूलैर्मुखवासनैः ॥ १६० ॥
वासोऽलङ्कारमाल्यैश्चसम्पूज्यनन्दनन्दनम् ॥ परिवारैःसमंसर्वैःसायुधंचसवाहनम् ॥ ६१ ॥ स्तुत्वाप्रणम्यविधिवच्चेतसास्मरणंययौ ॥ ततो
भक्तिवशोदेवोयशोदानन्दनःप्रभुः ॥ ६२ ॥ स्मितावलोकितापाङ्गतरङ्गिततरेङ्गितम् ॥ उवाचराधिकांदेवींतामानयइहाशुच ॥ ६३ ॥ आज्ञता
चैवसादेवीप्रस्थाप्यशारदांसखीम् ॥ तामानिनायसहसापुरोवासुरसात्मनः ॥ ६४ ॥ श्रीकृष्णस्यपुरस्तात्सासमेत्यप्रेमविह्वला ॥
पपातकाञ्चनीभूमौपश्यन्तीसर्वमद्भुतम् ॥ ६५ ॥ कृच्छ्रात्कथञ्चिदुत्थायशनैरुन्मील्यलोचने ॥ स्वेदाम्भःपुलकोत्कम्पभावभाराकुलासती ॥
॥ ६६ ॥ ददर्शप्रथमंतत्रस्थलंचित्रंमनोरमम् ॥ ततःकल्पतरुस्तत्रलसन्मरकतच्छदः ॥ ६७ ॥ प्रवालपल्लवैर्युक्तःकोमलोहेमदण्डकः ॥
स्फटिकप्रवालमूलश्चकामदःकामसम्पदाम् ॥ ६८ ॥ प्रार्थकाभीष्टफलदस्तस्याधो[2]रत्नमन्दिरम् ॥ रत्नसिंहासनंतत्रतत्राष्टदलपद्मकम् ॥ ६९ ॥
शङ्खपद्मनिधीतत्रसव्यापसव्यसंस्थितौ ॥ चतुर्दिक्षुयथास्थानंसहिताःकामधेनवः ॥ १७० ॥ परितोनन्दनोद्यानंमलयानिलसेवितम् ॥
ऋतूनांचैवसर्वेषांकुसुमानांमनोहरैः ॥ ७१ ॥ आमोदैर्वासितंसर्वंकालागुरुपराजितम् ॥ मकरन्दकणावृष्टिशीतलंसुमनोहरम् ॥ ७२ ॥ मकरन्द
रसास्वादमत्तानांभृङ्गयोषिताम् ॥ वृन्दशोझङ्कृतैःशश्वच्चैवंमुखरितान्तरम् ॥ ७३ ॥ कलकण्ठीकपोतानांसारिकाशुकयोषिताम् ॥ अन्यासांपत्रि
कान्तानांकलनादैर्निनादितम् ॥ ७४ ॥ नृत्यैर्मत्तमयूराणामाकुलंस्मरवर्द्धनम् ॥ रसाम्बुसेकसंमृष्टतमाञ्जनतनुद्युतिम् ॥ ७५ ॥ सुस्निग्धनीलकुटिल
कपायावासिकुन्तलम् ॥ मदमत्तमयूराद्यशिखण्डाबद्धचूडकम् ॥७६॥ भृङ्गसेवितसव्योपक्रमपुष्पावतंसकम् ॥ लोलालकालिविलसत्कपोलादर्शका

१ 'भूत्वा' इ० पा० । २ 'रतमन्दिरम्' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शितम् ॥ ७७॥ विचित्रतिलकोद्दामभालशोभाविराजितम् ॥ तिलपुष्पपतङ्गेशचञ्चुमञ्जुलनासिकम् ॥७८॥ चारुबिम्बाधरंमन्दस्मितदीपितमन्म
थम् ॥ वन्यप्रसूनसङ्काशग्रैवेयकमनोहरम् ॥७९ ॥ मदोन्मत्तभ्रमद्भृङ्गीसहस्रकृतसेवया ॥ सुरद्रुमस्रजाराजन्मुग्धपीनांसकद्वयम् ॥८० ॥ मुक्ताहार
स्फुरद्वक्षःस्थलकौस्तुभभूषितम् ॥ श्रीवत्सलक्षणंजानुलम्बिबाहुमनोहरम् ॥ ८१ ॥ गम्भीरनाभिपद्मास्यमध्यमध्यातिसुन्दरम् ॥ सुजातद्रुमसद्वृत्त
मदूरजानुमञ्जुलम् ॥ ८२ ॥ कङ्कणाङ्गदमञ्जीरैर्भूषितंभूषणैःपरैः ॥ पीतांशुकलयाविष्टनितम्बघटनायकम् ॥ ८३ ॥ लावण्यैरपिसौन्दर्यजितकोटि
मनोभवम् ॥ वेणुप्रवर्त्तितैर्गीतरागैरपिमनोहरैः ॥ ८४ ॥ मोहयन्तंसुखाम्भोधौमज्जयन्तंजगत्त्रयम् ॥ प्रत्यङ्गमदनावेशधररासरसालसम् ॥ ८५ ॥
चामरंव्यजनंमाल्यंगन्धंचन्दनमेवच ॥ ताम्बूलंदर्पणंमानपात्रंचर्वितपात्रकम् ॥८६॥ अन्यत्क्रीडाभवंयद्यत्तत्सर्वंचपृथक्पृथक् ॥ रसालंविविधंयन्त्रं
कलयन्तीभिरादरात् ॥८७॥ यथास्थाननियुक्ताभिःपश्यन्तीभिस्तदिङ्गितम्॥तन्मुखाम्भोजदत्ताक्षिचञ्चलाभिरनुक्रमात् ॥ ८८ ॥ श्रीमत्याराधिका
देव्यावामभागेससंभ्रमम् ॥ आराधयन्त्याताम्बूलमर्पयन्त्याशुचिस्मितम् ॥ ८९ ॥ समालोक्यार्जुनीयासौमदनावेशविह्वला ॥ ततस्तांचतथा
ज्ञात्वाहृषीकेशोऽपिसर्ववित् ॥ १९० ॥ तस्याःपाणिंगृहीत्वैवसर्वक्रीडावनान्तरे ॥ यथाकामंरहोरेमेमहायोगेश्वरोविभुः ॥ ९१ ॥ ततस्तस्याःस्कन्ध
देशेप्रदत्तभुजपल्लवः ॥ आगत्यशारदांप्राहपश्चिमेऽस्मिन्सरोवरे ॥ ९२ ॥ शीघ्रंस्नापयतन्वङ्गींक्रीडाश्रान्तांमृदुस्मिताम् ॥ ततस्तांशारदादेवीतस्मि
न्क्रीडासरोवरे ॥९३॥ स्नानंकुर्वित्युवाचैनांसाचश्रान्तातथाकरोत् ॥ जलाभ्यन्तरमाप्तासौपुनरर्जुनतांगतः ॥ ९४ ॥ उत्तस्थौयत्रदेवेशःश्रीमद्वैकुण्ठ
नायकः ॥ दृष्ट्वातमर्जुनंकृष्णोविषण्णंभग्नमानसम् ॥ माययापाणिनास्पृष्ट्वाप्रकृतंविदधेपुनः ॥ ९५ ॥ श्रीकृष्णउवाच ॥ धनञ्जयत्वामाशंसे
भवान्प्रियसखोमम ॥ त्वत्समोनास्तिमेकोऽपिरहोवेत्ताजगत्त्रये ॥ ९६ ॥ यद्रहस्यंत्वयापृष्टमनुभूतंचतत्पुनः ॥ कथ्यतेयदितत्कस्मैशपसेमां
तदार्जुन ॥ ९७ ॥ सनत्कुमारउवाच ॥ इतिप्रसादमासाद्यशपथैर्जातनिर्णयः ॥ ययौहृष्टमनास्तस्मात्स्वधामाद्भुतसंस्मृतिः ॥ ९८ ॥ इति
तेकथितंसर्वंरहोयद्गोचरंमम ॥ गोविन्दस्यतथाचास्मैकथनेशपथस्तव ॥ ९९ ॥ ईश्वरउवाच ॥ इतिश्रुत्वावचस्तस्यसिद्धिमौपगविर्गतः ॥
नरनारायणावासंवृन्दारण्यमुपाव्रजत् ॥ २०० ॥ तत्रास्तेऽद्यापिकृष्णस्यनित्यलीलाविहारवित् ॥ नारदेनापिपृष्टोऽहंनाब्रवंतद्रहस्यकम् ॥ १ ॥
प्राप्तंतथापितेनेदंप्रकृतित्वमुपेत्यच ॥ तुभ्यंयत्तुमयाप्रोक्तंरहस्यंस्नेहकारणात् ॥ २ ॥ तन्नकस्मैचिदाख्येयंत्वयाभद्रेस्वयोनिवत् ॥ इमंश्रीभ
गवद्भक्तमहिमाध्यायमद्भुतम् ॥ ३ ॥ यःपठेच्छृणुयाद्वापिसरतिंविन्दतेहरौ ॥ २०४ ॥ इतिश्रीपाद्मपुराणेपातालखण्डेऽर्जुन्यन्नुनयोनाम

Nepal Sanskrit University Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुःसप्ततितमोऽध्यायः ॥ ७४ ॥ पार्वत्युवाच ॥ वृन्दावनरहस्यंचबहुधाकथितंविभो ॥ केनपुण्यविशेषेणनारदःप्रकृतिंगतः ॥ १ ॥ ईश्वर
उवाच ॥ एकदाश्चर्यवृत्तान्तंयया जिज्ञासितंपुरा ॥ ब्रह्मणाकथितंगुह्यंश्रुतंकृष्णमुखाम्बुजात ॥ २ ॥ नारदःपृष्टवान्मह्यंतदाहंप्रातत्रानिदम् ॥
अहंवक्तुंनशक्नोमितन्माहात्म्यंकथञ्चन ॥ ३ ॥ किंकुर्वेशपनंतस्यस्मृत्वासीदामिमानसे ॥ इतिश्रुत्वाममवचोदुर्मनाःसोऽभवद्यदा ॥ ४ ॥
तदाब्रह्माणमाहूयअहमादिष्टवान्प्रिये ॥ त्वयायत्कथितंमह्यंनारदायवदस्वतत् ॥ ५ ॥ ब्रह्मातदाममवचोनिशम्यसहनारदः ॥ जगामकृष्णसविधं
नत्वापृच्छत्तदेवतु ॥ ब्रह्मोवाच ॥६॥ किमिदंद्वात्रिंशद्वनंवृन्दारण्यंविशांपते ॥ श्रोतुमिच्छामिभगवन्यदियोग्योऽस्मिमेवद ॥७॥ श्रीभगवानुवाच ॥
इदंवृन्दावनंरम्यंममधामैवकेवलम् ॥ यत्रेमेपशवःसाक्षाद्वृक्षाःकीटानरामराः ॥ ८ ॥ येवसन्तिममान्त्येतेमृतायान्तिममान्तिकम् ॥ अत्रयागोप
पत्न्यश्चनिवसन्तिममालये ॥९॥ योगिन्यस्तास्तुएवंहिममदेवाःपरायणाः ॥ पञ्चयोजनमेवंहिवनंमेदेवरूपकम् ॥१० ॥ कालिन्दीयंसुषुम्नाख्यापर
मामृतवाहिनी ॥ यत्रदेवाश्चभूतानिवर्तन्तेसूक्ष्मरूपतः ॥११॥ सर्वतोव्यापकश्चाहंनत्यक्ष्यामिवनंक्वचित् ॥ आविर्भावस्तिरोभावोभवेदत्रयुगेयुगे ॥
॥ १२ ॥ तेजोमयमिदंस्थानमदृश्यंचर्मचक्षुषाम् ॥ रहस्यंमेप्रभावंचपश्यवृन्दावनंयुगे ॥ ब्रह्मादीनांदेवतानांनदृश्यंतत्कथञ्चन ॥ १३ ॥ ईश्वर
उवाच ॥ तच्छ्रुत्वानारदोनत्वाकृष्णंब्रह्माणमेवच ॥ आजगामहभूलोकेमिश्रकंनैमिषंवनम् ॥ १४ ॥ तत्रासौसत्कृतश्चापिशौनकाद्यैर्मुनीश्वरैः ॥ पृष्ट
श्चाप्यागतोब्रह्मन्कुतस्त्वमधुनावद ॥ १५ ॥ तच्छ्रुत्वानारदःप्राहगोलोकादागतोऽस्म्यहम् ॥ श्रुत्वाकृष्णमुखाम्भोजाद्वृन्दावनरहस्यकम् ॥ १६ ॥
नारदउवाच ॥ तत्रनानाविधाःप्रश्नाःकृताश्चैवपुनःपुनः ॥ समस्तामनवस्तत्रयोगा[१]श्चैवमयाश्रुताः ॥१७॥ तानेवकथयिष्यामियथाप्रश्नंचतत्त्वतः ॥
॥ १८ ॥ शौनकादयऊचुः ॥ वृन्दारण्यरहस्यंहियदुक्तंब्रह्मणात्वयि ॥ तदस्माकंसमाचक्ष्वयद्यस्मासुकृपातव ॥ १९ ॥ नारदउवाच ॥ कदाचि
त्सरयूतीरेदृष्टोऽस्माभिश्चगौतमः ॥ मनस्वीचमहादुःखीचिन्ताकुलितचेतनः ॥ २० ॥ मांदृष्ट्वागौतमोदेवःपपातधरणीतले ॥ उत्तिष्ठवत्सवत्सेति
तमुवाचाहमेवहि ॥ २१ ॥ कथंभवान्मनस्वीतिप्रोच्यतांयदिरोचते ॥२२॥ गौतमउवाच॥ श्रुतंतवमुखादेवकृष्णतत्त्वंचतादृशम् ॥ द्वारकाख्यंमाथु
राख्यंरहस्यंबहुशोमया ॥ २३ ॥ वृन्दावनरहस्यंतुनश्रुतंत्वन्मुखाम्बुजात् ॥ यतोमेमनसःस्थैर्यंभविष्यतिचसद्गुरो ॥ २४ ॥ नारदउवाच ॥
इदंतुपरमंगुह्यंरहस्यातिरहस्यकम् ॥ पुरामेब्रह्मणाप्रोक्तंतादृग्वृन्दावनोद्भवम् ॥ २५ ॥ रहस्यंवददेवेशवृन्दारण्यस्यमेपितः ॥ इतिजिज्ञासितंश्रुत्वा

१ 'यागाश्चैव' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षणंमौनीसचाभवत् ॥ २६ ॥ ततोमाहमहाविष्णुंगच्छवत्सप्रभुंमम ॥ मयापितत्रगन्तव्यंत्वयासहनसंशयः ॥ २७ ॥ इत्युक्त्वामांगृहीत्वाचगतो
विष्णोश्चधामनि ॥ महाविष्णौचकथितंमयोक्तंयत्तदेवहि ॥ २८ ॥ तच्छ्रुत्वाचमहाविष्णुःस्वयम्भुवमथादिशत् ॥ त्वमेवादेशतोमह्यंनीत्वावैनारदं
मुनिम् ॥२९॥ स्नानायविनियुङ्क्ष्वामुंसरस्यमृतसंज्ञके ॥महाविष्णुसमादिष्टःस्वयम्भूर्मांतथाकरोत् ॥३०॥ तत्रामृतसरश्चाहंप्रविश्यस्नानमाचरम्॥
तत्क्षणात्तत्सरःपारेयोषितांसविधेऽभवम् ॥ ३१ ॥ सर्वलक्षणसम्पन्नायोषिद्रूपातिविस्मिता ॥ मांदृष्ट्वाताःसमायान्तीमपृच्छंश्चमुहुर्मुहुः ॥ ३२ ॥
स्त्रियऊचुः ॥ कात्वंकुतःसमायाताकथमात्मविचेष्टितम् ॥ तासांप्रियकथांश्रुत्वामयोक्तंतन्निशामय ॥ ३३ ॥ कुतःकोऽहंसमायातःकथंवायोषिदा
कृतिः ॥ स्वप्नवद्दृश्यतेसर्वंकिंवामुग्धोऽस्मिभूतले ॥३४॥ तच्छ्रुत्वामद्वचोदेवीप्रोवाचमधुरस्वनैः ॥ वृन्दानाम्नीपुरीचेयंकृष्णचन्द्रप्रियासदा ॥३५ ॥
अहंचललितादेवीतुर्यातीताचनिष्कला ॥ इत्युक्त्वाचमहादेवीकरुणासान्द्रमानसा ॥ ३६ ॥ मांप्रत्याहपुनर्देवीसमागच्छमयासह ॥ अन्याश्च
योषितःसर्वाःकृष्णपादपरायणाः ॥ ३७ ॥ ताश्चमांप्रवदन्त्येवंसमागच्छानयासह ॥ ततोऽनुकृष्णचन्द्रस्यचतुर्दशाक्षरोमनुः ॥३८॥ कृपयाकथित
स्तस्यादेव्याश्चापिमहात्मनः ॥ तत्क्षणादेवतत्साम्यमलभंविविधोपमा[1] ॥ ३९ ॥ ताभिःसहगतास्तत्रयत्रकृष्णःसनातनः ॥ केवलंसच्चिदानन्दः
स्वयंयोषिन्मयःप्रभुः ॥ ४० ॥ योषिदानन्दहृदयोदृष्ट्वामांप्राब्रवीन्मुहुः ॥ समागच्छप्रियेकान्तेभक्त्यामांपरिरम्भय ॥ ४१ ॥ रेमेवर्षप्रमाणेन
तत्रचैवद्विजोत्तम ॥ तदोक्तंरमणेशेनतांदेवींराधिकांप्रति ॥४२॥ इयंमेप्रकृतिस्तत्रचासीन्नारदरूपधृत्॥नीत्वामृतसरोरम्यंस्नानार्थंसन्नियोजय ॥४३॥
तयामेरमणस्यान्तेगदितंप्रियभाषितम् ॥ अहंचललितादेवीराधिकायाचगीयते ॥ ४४ ॥ अहंचवासुदेवाख्योनित्यंकामकलात्मकः ॥ सत्यंयोषि
त्स्वरूपोऽहंयोषिच्चाहंसनातनी ॥ ४५ ॥ अहंचललितादेवीपुंरूपाकृष्णविग्रहा ॥ आवयोरन्तरंनास्तिसत्यंसत्यंहिनारद ॥ ४६ ॥ एवंयोवेत्तिमे
तत्त्वंसमयंचतथामनुम् ॥ ससमाचारसङ्केतंललितावत्समेप्रियः ॥ ४७ ॥ इदंवृन्दावनंनामरहस्यंममवैगृहम् ॥ नप्रकाश्यंकदाकुत्रवक्तव्यंनपशौ
क्वचित् ॥ ४८ ॥ ततोऽनुराधिकादेवीमांनीत्वातत्सरोवरे ॥ स्थित्वासाकृष्णचन्द्रस्यचरणान्तेगतापुनः ॥ ४९ ॥ ततोनिमज्जनादेवनारदोऽहमुपा
गतः ॥ वीणाहस्तोगानपरस्तद्रहस्यंमुहुर्मुदा ॥ ५० ॥ स्वयम्भुवंनमस्कृत्यतत्रागांविष्णुपार्षदम् ॥ स्वयम्भुवातथादृष्टेनोक्तंकिञ्चित्तदापुनः ॥५१॥
इतितेकथितंवत्ससुगोप्यंचमयात्वयि ॥ त्वयापिकृष्णचन्द्रस्यकेवलंधामचित्कलम् ॥ ५२ ॥ गोपनीयंप्रयत्नेनमातुर्जारइवप्रियस् ॥ यथाप्रोक्तं

१ 'विबुधोपमा' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मयाशिष्येगौतमेसरहस्यकम् ॥ ५३ ॥ तथाभवत्सुकात्स्र्येनकथितंचातिगोपितम् ॥ यत्रकुत्रकदाचित्तुप्रकाश्यंमुनिपुङ्गवाः ॥ ५४ ॥ तदाशापोभवे
द्विप्राःकृष्णचन्द्रस्यनिश्चितम्॥इमंकृष्णस्यलीलाभिर्युतमध्यायमुत्तमम् ॥५५॥ यःपठेच्छृणुयाद्वापिसयातिपरमंपदम् ॥५६॥ इतिश्रीपाद्मेमहापुराणे
पातालखण्डेवृन्दावनमाहात्म्येनारदीयानुनयोनामपञ्चसप्ततितमोऽध्यायः ॥ ७५ ॥ ईश्वरउवाच ॥ अत्रशिशुपालंनिहतंश्रुत्वादन्तवक्रःकृष्णेनयोद्धुं
मथुरामाजगाम ॥ १ ॥ कृष्णस्तुतच्छुत्वारथमारुह्यतेनसहमथुरामाययौ ॥ २ ॥ अथतंहत्वायमुनामुत्तीर्यनन्दव्रजंगत्वापितरावभिवाद्याश्वास्य
ताभ्यामालिङ्गितःसकलगोपवृद्धान्परिष्वज्यतानाश्वास्यबहुवस्त्राभरणादिभिस्तत्रस्थान्सर्वान्सन्तर्पयामास ॥ ३ ॥ कालिन्द्याःपुलिनेरम्ये
पुण्यवृक्षसमाकीर्णेगोपस्त्रीभिरहर्निशंक्रीडासुखेनत्रिरात्रंतत्रसमुवास ॥ ४ ॥ तत्रस्थलेनन्दगोपादयःसर्वेजनाःपुत्रदारसहिताःपशुपक्षिमृगादयो
ऽपिवासुदेवप्रसादेनदिव्यरूपधराविमानसमारूढाःपरमंलोकंवैकुण्ठमवापुः ॥ ५ ॥ श्रीकृष्णस्तुनन्दगोपव्रजौकसांसर्वेषांनिरामयंस्वपदंदत्त्वादेव
गणैःस्तूयमानःश्रीमतींद्वारावतींविवेश ॥ ६ ॥ तत्रवसुदेवोग्रसेनसङ्कर्षणप्रद्युम्नानिरुद्धाक्रूरादिभिःप्रत्यहंसम्पूजितःषोडशसहस्राष्टाधिकमहिषी
भिश्चविश्वरूपधरोदिव्यरत्नमयलतागृहान्तरेषुसुरतरुकुसुमाचितश्लक्ष्णतरपर्यङ्केषुरमयामास ॥ ७ ॥ एवंहितार्थायसर्वदेवानांसमस्तभूभार
विनाशाययदुवंशेऽवतीर्यसकलराक्षसविनाशंकृत्वामहान्तमुर्वीभारंनाशयित्वानन्दव्रजद्वारिकावासिनःस्थावरजङ्गमान्भवबंधनान्मोचयित्वापरमेशा
श्वतेयोगिध्येयेरम्येधाम्निसंस्थाप्यनित्यंदिव्यमहिष्यादिभिःसंसेव्यमानोवासुदेवोऽखिलेपूवाच ॥ ८ ॥ असीदव्याकृतंब्रह्मकरकाघृतयोरिव ॥
प्रकृतिस्थोगुणान्मुक्तोद्रवीभूत्वादिवंगतः ॥९॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेवृन्दावनमाहात्म्येपार्वतीशिवसंवादेषट्सप्ततितमोऽध्यायः ॥७६॥
पार्वत्युवाच ॥ विस्तरेणसमाचक्ष्वनामार्थपदगौरवम् ॥ ईश्वरस्यस्वरूपंचतत्स्थानानांविभूतयः ॥ १ ॥ तद्विष्णोःपरमंधामव्यूहभेदास्तथाहरेः ॥
निर्वाणाख्याहितत्त्वेनममसर्वसुरेश्वर ॥ २ ॥ ईश्वरउवाच ॥ सारेवृन्दावनेकृष्णंगोपीकोटिभिरावृतम् ॥ तत्रगङ्गापराशक्तिस्तत्स्थमानन्दकान
नम् ॥ ३ ॥ नानासुकुसुमामोदसमीरसुरभीकृतम् ॥ कलिन्दतनयादिव्यतरङ्गरागशीतलम् ॥ ४ ॥ सनकाद्यैर्भागवतैःसंसृष्टंमुनिपुङ्गवैः ॥
आह्लादिमधुरारावैर्गोवृन्दैरभिमण्डितम् ॥ ५ ॥ रम्यस्रग्भूषणोपेतैर्नृत्यद्भिर्बालकैर्वृतम् ॥ तत्रश्रीमान्कल्पतरुर्जाम्बूनदपरिच्छदः ॥ ६ ॥ नाना
रत्नप्रवालाढ्योनानामणिफलोज्ज्वलः ॥ तस्यमूलेरत्नवेदीरत्नदीधितिदीपिता ॥ ७ ॥ तत्रत्रयीमयंरत्नसिंहासनमनुत्तमम् ॥ तत्रासीनंजग

१ 'मन्त्रार्थपदगौरवम्' इ० पा० । २ 'एकमानन्दकाननम्' इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

न्नाथंत्रिगुणातीतमव्ययम् ॥ ८ ॥ कोटिचन्द्रप्रतीकाशंकोटिभास्करभास्वरम् ॥ कोटिकन्दर्पलावण्यंभासयन्तंदिशोदश ॥ ९ ॥ त्रिनेत्रंद्विभुजं गौरंतप्तजाम्बूनदप्रभम् ॥ श्लिष्यमाणमङ्गनाभिःसुदामानंचसर्वशः ॥१०॥ ब्रह्माद्यैःसनकाद्यैश्चध्येयंभक्तवशीकृतम् ॥ सदाघूर्णितनेत्राभिर्नृत्यन्तीभि र्महोत्सवैः ॥ ११ ॥ चुम्बन्तीभिर्हसन्तीभिःश्लिष्यन्तीभिर्मुहुर्मुहुः ॥ अवातगोपीदेहाभिःश्रुतिभिःकोटिकोटिभिः ॥ १२ ॥ तत्पादाम्बुज माध्वीकचित्ताभिःपरितोवृतम् ॥ तासांतुमध्येयादेवीतप्तचामीकरप्रभा ॥१३॥ द्योतमाना दिशः सर्वाःकुर्वतीविद्युदुज्ज्वलाः ॥ प्रधानंयाभगवतीयया सर्वमिदंततम् ॥ १४ ॥ सृष्टिस्थित्यन्तरूपायाविद्याविद्यात्रयीपरा ॥ स्वरूपाशक्तिरूपाचमायारूपाचचिन्मयी ॥ १५ ॥ ब्रह्मविष्णुशिवादीनांदेह कारणकारणम् ॥ चराचरंजगत्सर्वंयन्मायापरिरम्भितम् ॥ १६ ॥ वृन्दावनेश्वरीनाम्नाराधाधात्रानुकारणात् ॥ तामालिङ्ग्यवसन्तंतंमुदावृन्दावने श्वरम् ॥ १७ ॥ अन्योन्यचुम्बनाश्लेषमदावेशविघूर्णितम् ॥ ध्यायेदेवंकृष्णदेवंसचसिद्धिमवाप्नुयात् ॥ १८ ॥ मन्त्रराजमिमंगुह्यंतस्यमन्त्रंचमन्त्र वित् ॥ योजपेच्छृणुयाद्वापिसमहात्मासुदुर्लभः ॥ १९ ॥ राधिकाचित्ररेखाचचन्द्रामदनसुन्दरी ॥ श्रीप्रियाश्रीमधुमतीशशिरेखाहरिप्रिया ॥ २० ॥ सुवर्णशोभासंमोहाप्रेमरोमाञ्चराजिता ॥ वैवर्ण्यस्वेदसंयुक्ताभावासक्ताप्रियंवदा ॥ २१ ॥ सुवर्णमालिनीशान्तासुरासरसिकातथा ॥ सर्वस्त्रीजीवना दीनवत्सलाविमलाशया ॥ २२ ॥ निपीतनामपीयूषासाराधापरिकीर्तिता ॥ सुदीर्घस्मितसंयुक्तातप्तचामीकरप्रभा ॥ २३ ॥ मूर्च्छेत्प्रेमनदीराधा चरणालोचनाञ्जना ॥ मायामात्सर्यसंयुक्तादानसाम्राज्यजीवना ॥ २४ ॥ सुरतोत्सवसङ्ग्रामाचित्ररेखाप्रकीर्तिता ॥ गौराङ्गीनातिदीर्घाचसदावादन तत्परा ॥ २५ ॥ दैन्यानुरागनटनामूर्च्छारोमाञ्चविह्वला ॥ हरिदक्षिणपार्श्वस्थासर्वमन्त्रप्रियातथा ॥ २६ ॥ अनङ्गलोभमाधुर्याचन्द्रासापरि कीर्तिता ॥ सलीलमन्थरगतिर्मञ्जुमुद्रितलोचना ॥ २७ ॥ प्रेमधारोज्ज्वलाकीर्णादलिताञ्जनशोभना ॥ कृष्णानुरागरसिकारासध्वनिसमुत्सुका ॥ ॥ २८ ॥ अहङ्कारसमायुक्तामुखनिन्दितचन्द्रमाः ॥मधुरालापचतुराजितेन्द्रियशिरोमणिः ॥२९॥ सुन्दरस्मितसंयुक्तासावैमदनसुन्दरी ॥ विविक्तरास रसिकाश्यामाश्याममनोहरा ॥ ३० ॥ प्रेम्णाप्रेमकटाक्षेणहरेश्चित्तविमोहिनी ॥ जितेन्द्रियाजितक्रोधासाप्रियापरिकीर्तिता ॥ ३१ ॥ सुतप्तस्वर्ण गौराङ्गीलीलागमनसुन्दरी ॥ स्मरोत्थप्रेमरोमाञ्चवैचित्र्यमधुराकृतिः ॥ ३२ ॥ सुन्दरस्मितसंयुक्तमुखनिन्दितचन्द्रमाः ॥ मधुरालापचतुरा जितेन्द्रियशिरोमणिः ॥ ३३ ॥ कीर्तितासामधुमतीप्रेमसाधनतत्परा ॥ संमोहज्वररोमाञ्चप्रेमधारासमन्विता ॥ ३४ ॥ दानधूलिविनोदा

१ 'ध्यायेदेतद्विधंदेवम्' इ० पा० । २ 'चन्द्ररेखा च' इ० पा० । ३ 'सरसा रसिका तथा' इ० पा० । ४ 'प्रेमरोदनतत्परा' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चरासध्वनिमहानटी ॥ शशिरेखाचविज्ञेयागोपालप्रेयसीसदा ॥ ३५ ॥ कृष्णात्मासोत्तमाश्यामामधुपिङ्गललोचना ॥ तत्पादप्रेमसंमोहा
त्कचित्पुलकचुम्बिता ॥ ३६ ॥ शिवकुण्डेशिवानन्दानन्दिनीदेहिकातटे ॥ रुक्मिणीद्वारवत्यांतुराधावृन्दावनेवने ॥ ३७ ॥ देवकी
मथुरायांतुजातामेपरमेश्वरी ॥ चन्द्रकूटेतथासीताविन्ध्येविन्ध्यनिवासिनी ॥ ३८ ॥ वाराणस्यांविशालाक्षीविमलापुरुषोत्तमे ॥ वृन्दा
वनाधिपत्यंचदत्तंतस्यैप्रसीदता ॥ ३९ ॥ कृष्णेनान्यत्रदेवीतुराधावृन्दावनेवने ॥ नित्यानन्दतनुःशौरिर्योऽशरीरीतिभाष्यते ॥ ४० ॥
वाय्वग्निनाकभूमीनामङ्गाधिष्ठितदेवता ॥ निरूप्यतेब्रह्मणोऽपितथागोविन्दविग्रहः ॥ ४१ ॥ सेन्द्रियोऽपियथासूर्यस्तेजसानोपलक्ष्यते ॥
तथाकान्तियुतःकृष्णःकालंमोहयतिध्रुवम् ॥ ४२ ॥ नतस्यप्राकृतीमूर्तिर्मेदोमांसास्थिसम्भवा ॥ योगीचैवेश्वरश्चान्यःसर्वात्मानित्यविग्रहः ॥
॥ ४३ ॥ काठिन्यंदैवयोगेनकरकाघृतयोरिव ॥ कृष्णस्यामिततत्त्वस्यपादपृष्ठंनदेवता ॥ ४४ ॥ वृन्दावनरजोवृन्देतत्रस्युर्विष्णु
कोटयः ॥ आनन्दकिरणेवृन्दव्याप्तविश्वकलानिधिः ॥ ४५ ॥ गुणात्मताऽऽत्मनियथाजीवास्तत्किरणाङ्ककाः ॥ भुजद्वयवृतःकृष्णोनकदाचिच्चतु
र्भुजः ॥ ४६ ॥ गोप्यैकयावृतस्तत्रपरिक्रीडतिसर्वदा ॥ गोविन्दएवपुरुषोब्रह्माद्याःस्त्रियएवच ॥ ४७ ॥ ततएवस्वभावोऽयंप्रकृतेर्भावईश्वरः ॥ पुरुषः
प्रकृतिश्चाद्यौराधावृन्दावनेश्वरौ ॥ ४८ ॥ प्रकृतेर्विकृतंसर्वंविनावृन्दावनेश्वरम् ॥ ४९ ॥ समुद्भवेनैवसमुद्भवेदिदंभेदंगतंतस्यविनाशतोहि ॥ स्वर्णस्य
नाशोनहिविद्यतेतथामत्स्यादिनाशेऽपिनकृष्णविच्युतिः ॥ ५० ॥ त्रिगुणादिप्रपञ्चोऽयंवृन्दावनविहारिणः ॥ ऊर्मीवाब्धेस्तरङ्गस्ययथाब्धिर्नैव
जायते ॥ ५१ ॥ नराधिकासमानारीनकृष्णसदृशःपुमान् ॥ वयःपरंनकैशोरात्स्वभावःप्रकृतेःपरः ॥ ५२ ॥ ध्येयंकैशोरकंध्येयंवनंवृन्दावनंवनम् ॥
श्याममेवपरंरूपमादिदेवंपरोरसः ॥ ५३ ॥ बाल्यंपञ्चमवर्षान्तंपौगण्डंदशमावधि ॥ अष्टपञ्चककैशोरंसीमापञ्चदशावधि ॥ ५४ ॥ यौवनोद्भिन्न
कैशोरंनवयौवनमुच्यते ॥ तद्वयस्तस्यसर्वस्वंप्रपञ्चमितरद्वयः ॥५५॥ बाल्यपौगण्डकैशोरंवयोवन्देमनोहरम् ॥ बालगोपालगोपालंस्मरगोपालरूपि
णम् ॥ ५६ ॥ वन्देमदनगोपालंकैशोराकारमद्भुतम् ॥ यमाहुर्यौवनोद्भिन्नश्रीमन्मदनमोहनम् ॥ ५७ ॥ अखण्डातुलपीयूषरसानन्दमहार्णवम् ॥
जयतिश्रीपतेर्गूढंवपुःकैशोररूपिणः ॥ ५८ ॥ एकमप्यव्ययंपूर्वंवल्लवीवृन्दमध्यगम् ॥ ध्यानगम्यंप्रपश्यन्तिरुचिभेदात्पृथग्धियः ॥ ५९ ॥ यन्नखेन्दु
रुचिर्ब्रह्मध्येयंब्रह्मादिभिःसुरैः ॥ गुणत्रयमतीतंतंवन्देवृन्दावनेश्वरम् ॥ ६० ॥ वृन्दावनपरित्यागोगोविन्दस्यनविद्यते ॥ अन्यत्रयद्वपुस्तत्तुकृत्रिमं

१ 'देविकातटे' इ० पा० । २ 'चित्रकूटे' इ० पा० । ३ 'प्रभुर्मता' इ० पा० । ४ 'विनाशने हि इ०, 'विनाशनं हि' इ० च पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तन्नसंशयः ॥६१॥ सुलभंव्रजनारीणांदुर्ल्लभंतन्मुमुक्षुणाम् ॥ तंभजेनन्दसूनुंयन्नखतेजःपरंमनुः ॥६२॥ पार्वत्युवाच ॥ भुक्तिमुक्तिस्पृहायावत्पिशाची
हृदिवर्त्तते ॥ तावत्प्रेमसुखस्यात्रकथमभ्युदयोभवेत् ॥ ६३ ॥ ईश्वरउवाच ॥ साधुपृष्टंत्वयाभद्रेयन्मेमनसिवर्त्तते ॥ तत्सर्वंकथयिष्यामिसाव
धानानिशामय ॥ ६४ ॥ स्मृत्वागुणान्स्मरन्नामगानंवामनरञ्जनम् ॥ बोधयत्यात्मनात्मानंसततंप्रेम्णिलीयते ॥ ६५ ॥ इतिश्रीपाद्मेमहापुराणेपाताल
खण्डेवृन्दावनमाहात्म्येपार्वतीशिवसंवादेश्रीकृष्णरूपवर्णनंनामसप्तसप्ततितमोऽध्यायः ॥ ७७ ॥ पार्वत्युवाच ॥ वैष्णवानांचयद्धर्मंसर्वंतथ्यंचमे
वद ॥ यत्कृत्वामानवाःसर्वेभवाम्भोधितरन्तिहि ॥१॥ ईश्वरउवाच ॥ अथद्वादशधाशुद्धिर्वैष्णवानामिहोच्यते ॥ गृहोपलेपनंचैवतथानुगमनंहरेः ॥
॥ २ ॥ भक्त्याप्रदक्षिणाचैवपादयोःशोधनंपुनः ॥ पूजाथपत्रपुष्पाणांभक्त्यवोत्तोलनंहरेः[1] ॥ ३ ॥ करयोःसर्वशुद्धीनामियंशुद्धिर्विशिष्यते ॥ तन्नाम
कीर्तनंचैवगुणानामपिकीर्त्तनम् ॥४ ॥ भक्त्याश्रीकृष्णदेवस्यवचसःशुद्धिरिष्यते ॥ तत्कथाश्रवणंचैवतस्योत्सवनिरीक्षणम् ॥ ५ ॥ श्रोत्रयोर्नेत्रयो
श्चैवशुद्धिःसम्यगिहोच्यते ॥ पादोदकंचनिर्माल्यंमालानामपिधारणम् ॥ ६ ॥ उच्यतेशिरसःशुद्धिःप्रणतस्यहरेःपुरः ॥ आघ्राणंतस्यपुष्पादेर्निर्मा
ल्यस्यतथाप्रिये ॥ ७ ॥ विशुद्धिःस्यादन्तरस्यघ्राणस्यापिविधीयते ॥ यत्रपुष्पादिकंयच्चकृष्णपादयुगार्पितम् ॥ ८ ॥ तदेकंपावनंलोकेतद्धिसर्वं
विशोधयेत् ॥ पूजाचपञ्चधाप्रोक्तातासांभेदंशृणुष्वमे ॥ ९ ॥ अभिगमनमुपादानंयोगःस्वाध्यायएवच ॥ इज्यापञ्चप्रकारार्चाक्रमेणकथयामित ॥
॥ १०॥ तत्त्वाभिगमनंनामदेवतास्थानमार्जनम् ॥ उपलेपंचनिर्माल्यदूरीकरणमेवच ॥ ११ ॥ उपादानंनामगन्धपुष्पादिचयनंतथा ॥ योगोनामस्व
देवस्यस्वात्मनैवात्मभावना ॥ १२ ॥ स्वाध्यायोनाममन्त्रार्थानुसन्धापूर्वकोजपः ॥ सूक्तस्तोत्रादिपाठश्चहरेःसङ्कीर्त्तनंतथा ॥१३ ॥ तत्त्वादिशास्त्रा
भ्यासश्चस्वाध्यायःपरिकीर्तितः ॥ इज्यानामस्वदेवस्यपूजनंचयथार्थतः ॥ १४ ॥ इतिपञ्चप्रकारार्चाकथितातवसुव्रते ॥ सार्ष्टिसामीप्यसालोक्य
सायुज्यसारूप्यदाक्रमात् ॥ १५ ॥ प्रसङ्गात्कथयिष्यामिशालग्रामशिलार्चनम् ॥ केशवादेश्चतुर्बाहोर्दक्षिणोर्ध्वकरक्रमात् ॥ १६ ॥ शङ्खचक्रगदा
पद्मीकेशवाख्योगदाधरः ॥नारायणःपद्मगदाचक्रशङ्खायुधैःक्रमात् ॥१७॥ माधवश्चक्रशङ्खाभ्यांपद्मनगदयाभवेत् ॥गदाब्जशङ्खचक्रीचगोविन्दाख्यो
गदाधरः ॥ १८ ॥ पद्मशङ्खारिगदिनेविष्णुरूपायतेनमः ॥ सशङ्खाब्जगदाचक्रमधुसूदनमूर्तये ॥ १९ ॥ नमोगदारिशङ्खाब्जयुक्तत्रिविक्र
मायच ॥ सारिकौमोदकीपद्मशङ्खवामनमूर्त्तये ॥ २० ॥ चक्राब्जशङ्खगदिनेनमःश्रीधरमूर्त्तये ॥ हृषीकेशसारिगदाशङ्खपद्मिन्नमोऽस्तुते ॥

१'भक्त्यैवोच्चयनं हरेः' इ० पा०।

CC-0. In Public Domain. Digitization by eGangotri

॥ २१ ॥ साब्जशङ्खगदाचक्रपद्मनाभस्वमूर्त्तये ॥ दामोदरशङ्खगदाचक्रपद्मिन्नमोऽस्तुते ॥ २२ ॥ शङ्खाब्जचक्रगदिनेनमःसङ्कर्षणायच ॥
सारिशङ्खगदाब्जायवासुदेवनमोऽस्तुते ॥ २३ ॥ शङ्खचक्रगदाब्जायधृतप्रद्युम्नमूर्त्तये ॥ नमोऽनिरुद्धायगदाशङ्खाब्जारिविधारिणे ॥
॥ २४ ॥ साब्जशङ्खगदाचक्रपुरुषोत्तममूर्त्तये ॥ नमोऽधोक्षजरूपायगदाशङ्खारिपद्मिने ॥ २५ ॥ नृसिंहमूर्त्तयेपद्मगदाशङ्खारिधारिणे ॥
पद्मारिशङ्खगदिनेनमोऽस्त्वच्युतमूर्त्तये ॥ २६ ॥ सगदाब्जारिशङ्खायनमःश्रीकृष्णमूर्त्तये ॥ शालग्रामशिलाद्वारगतलग्नद्विचक्रधृत ॥
॥ २७ ॥ शुक्लाभरेखःशोभाढ्यःसदेवःश्रीगदाधरः ॥ लग्नद्विचक्रोरक्ताभःपूर्वभागस्तुपुष्कलः ॥ २८ ॥ सङ्कर्षणोऽथप्रद्युम्नःसूक्ष्मचक्रस्तुपीतकः ॥
सुदीर्घसुषिरच्छिद्रोह्यनिरुद्धस्तुवर्त्तुलः ॥ २९ ॥ नीलोद्वारेत्रिरेखश्चअथनारायणोऽसितः ॥ मध्येगदाकृतीरेखानाभिपद्मंमहोन्नतम् ॥ ३० ॥
पृथुचक्रोनृसिंहोयःकपिलोयस्त्रिबिन्दुकः[1] ॥ अथवापञ्चबिन्दोस्तुपूजनब्रह्मचारिणः ॥ ३१ ॥ वराहःसत्रिलिङ्गोयोविषमद्वयचक्रकः ॥ नीलस्त्रि
रेखःस्थूलोऽथकूर्ममूर्तिःसबिन्दुकः ॥ ३२ ॥ कृष्णःसवर्तुलावर्त्तपाण्डुरोधृतपृष्ठकः ॥ श्रीधरःपञ्चरेखश्चवनमालीगदाङ्कितः ॥ ३३ ॥
वामनोवर्तुलोनाममध्यचक्रःसनीलकः ॥ नानावर्णानेकमूर्तिर्नागभोगीत्वनन्तकः ॥ ३४ ॥ स्थूलोदामोदरोनीलोमध्येचक्रःसनीलकः ॥ सङ्क
र्षणद्वारकोऽव्यादथब्रह्मासुलोहितः ॥ ३५ ॥ सुदीर्घरेखासुषिरएकचक्राम्बुजःपृथुः ॥ पृथुचक्रःस्थूलछिद्रःकृष्णोबिन्दुश्चबिन्दुमान् ॥ ३६ ॥
हयग्रीवोऽङ्कुशाकारःपञ्चरेखःसकौस्तुभः ॥ वैकुण्ठोऽमलंवद्भातिएकचक्रमयोऽसितः[2] ॥ ३७ ॥ मत्स्योदीर्घाम्बुजाकारोदीर्घरेखंश्चपाण्डुरः[3] ॥ रामचक्रोदक्ष[4]
रेखोयःश्यामःसत्रिविक्रमः ॥ ३८ ॥ शालग्रामद्वारकायांस्थितायगदिनेनमः ॥ एकेनलक्षितोयोऽव्याद्गदाधारीसुदर्शनः ॥ ३९ ॥ लक्ष्मी
नारायणोद्वाभ्यांत्रिभिश्चैवत्रिविक्रमः ॥ चतुर्भिश्चचतुर्व्यूहोवासुदेवश्चपञ्चभिः ॥ ४० ॥ प्रद्युम्नःषड्भिरेवाव्यात्सङ्कर्षणश्चसप्तभिः ॥ पुरुषोत्तमोऽष्ट
भिश्चस्यान्नवव्यूहोनवोहितः ॥ ४१ ॥ दशावतारोदशभिरनिरुद्धोवतादथ ॥ द्वादशात्माद्वादशभिरतऊर्ध्वमनन्तकः ॥ ४२ ॥ ब्रह्माचतुर्मुखोदण्डीकमण्डलुं[5]
सगुन्नतः ॥ महेश्वरःपञ्चवक्रोदशबाहुर्वृषध्वजः ॥ ४३ ॥ यथायुधस्तथागौरीचण्डिकाचसरस्वती[6] ॥ महालक्ष्मीर्मातरश्चपद्महस्तोदिवाकरः ॥ ४४ ॥
गजास्यश्चगजस्कन्धःषण्मुखोऽनेकधागणाः ॥ एतेस्थिताःस्थापिताःस्युःप्रासादेवाथपूजिताः ॥ ४५ ॥ धर्मार्थकाममोक्षाहिप्राप्यन्तेपुरुषेणच ॥ ४६ ॥
इतिश्रीपाद्मेमहापुराणेपातालखण्डेशालग्रामनिर्णयोनामाष्टसप्ततितमोऽध्यायः ॥ ७८ ॥ ईश्वरउवाच ॥ शालग्रामेमणौयन्त्रेमण्डलेप्रतिमासुच ॥

१ 'कपिलोऽव्यात् त्रिबिन्दुकः' इ० पा० । २ 'पल्लवद्भाति' इ०, 'बलवद्भाति' इ० पा० । ३ 'द्वारग्खश्च' इ० पा० । ४ 'रामचन्द्रः' इ० पा० । ५ 'कमण्डलुधृग्गुन्नतः' इ० पा० । ६ 'यथाशुद्धः' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नित्यंतुश्रीहरेःपूजाकेवलेभवनेनतु ॥१॥ गण्डक्यामेकदेशेतुशालग्रामस्थलंमहत् ॥ पाषाणंतद्भवंपातुशालग्राममितिस्थितम् ॥ २ ॥ शालग्रामशिला स्पर्शात्कोटिजन्माघनाशनम् ॥ किंपुनःपूजनंतत्रहरेःसान्निध्यकारणम् ॥ ३ ॥ शालग्रामैकयजनाच्छतलिङ्गीफलंलभेत् ॥ बहुभिर्जन्मभिःपुण्यै र्यदिकृष्णशिलांलभेत् ॥ ४ ॥ गोष्पदेनचचिह्नेनजगुस्तेनसमाप्यते ॥ आदौशिलांपरीक्षेतस्निग्धांश्रेष्ठांचमेचकाम् ॥ ५ ॥ आकृष्णामध्यमाप्रोक्ता मिश्रामिश्रफलप्रदा ॥ सदाकाष्ठेस्थितोवह्निर्मथनेनप्रकाश्यते[1]॥६॥ यथातथाहरिर्व्यापीशालग्रामेप्रतीयते॥ प्रत्यहंद्वादशशिलाःशालग्रामस्ययोऽर्चयेत्॥ ॥७॥ द्वारवत्याःशिलायुक्ताःसवैकुण्ठेमहीयत ॥ शालग्रामशिलायांतुगह्वरंलक्षतेनरः ॥८॥ पितरस्तस्यतिष्ठन्तितृप्ताःकल्पान्तकंदिवि ॥ वैकुण्ठभवनं तत्रयत्रद्वारावतीशिला ॥९॥ मृतोविष्णुपुरंयातितत्तीर्थंयोजनत्रयम् ॥ जपःपूजाचहोमश्चसर्वंकोटिगुणंभवेत् ॥ १० ॥ मनस्कामसमाभीष्टंक्रोशमात्रंन संशयः॥कीटकोऽपिमृतोयातिवैकुण्ठभवनंयतः ॥११॥ शालग्रामशिलायांयोमूल्यमुद्घाटयेन्नरः ॥ विक्रेताचानुमन्ताचयःपरीक्षानुमोदकः ॥ १२ ॥ सर्वेतेनरकंयान्तियावत्सूर्यश्चसम्प्लवः ॥ अतस्तद्वर्जयेद्देविचक्रक्रयणविक्रयम् ॥ १३ ॥ शालग्रामोद्भवोदेवोयोदेवोद्वारकोद्भवः ॥ उभयोःसङ्गमोयत्र मुक्तिस्तत्रनसंशयः ॥ १४ ॥ द्वारकोद्भवचक्राढ्योबहुचक्रेणचिह्नितः ॥ चक्रासनशिलाकारचित्स्वरूपोनिरञ्जनः ॥ १५ ॥ नमोऽस्त्वोङ्काररूपाय सदानन्दस्वरूपिणे[2] ॥ शालग्राममहाभागभक्तस्यानुग्रहंकुरु ॥१६॥ तवानुग्रहकामस्यऋणग्रस्तस्यमेप्रभो ॥ अतःपरंप्रवक्ष्यामितिलकस्यविधिंमुदा ॥ ॥१७॥यच्छ्रुत्वामानवाःसर्वेविष्णुसारूप्यमाप्नुयुः ॥ ललाटेकेशवंविद्यात्कण्ठेश्रीपुरुषोत्तमम् ॥१८॥ नाभौनारायणंदेवंवैकुण्ठंहृदयेतथा ॥ दामोदरं वामपार्श्वेदक्षिणेचत्रिविक्रमम् ॥ १९ ॥ मूर्ध्निचैवहृषीकेशंपद्मनाभंचपृष्ठतः ॥ कर्णयोर्यमुनांगङ्गांबाह्वोःकृष्णंहरिंतथा ॥२०॥ यथास्थानेषुतुष्यन्ति देवताद्वादशस्मृताः॥द्वादशैतानिनामानिकर्तव्येतिलकेपठेत् ॥२१॥ सर्वपापविशुद्धात्माविष्णुलोकंसगच्छति॥ऊर्ध्वपुण्ड्रमूर्ध्वरेखंललाटेयस्यदृश्यते॥ ॥२२॥ चण्डालोऽपिसशुद्धात्मापूज्यएवनसंशयः॥यस्योर्ध्वपुण्ड्रदृश्येतनललाटेनरस्यहि ॥ २३ ॥ तद्दर्शनंनकर्तव्यंदृष्ट्वासूर्यंनिरीक्षयेत॥त्रिपुण्ड्रंयस्य विप्रस्यऊर्ध्वपुण्ड्रंनदृश्यते ॥ २४ ॥ तंदृष्ट्वाप्यथवास्पृष्ट्वासचैलंस्नानमाचरेत् ॥ सान्तरालंप्रकर्तव्यंपुण्ड्रंहरिपदाकृति ॥२५॥ निरन्तरालंयःकुर्यादूर्ध्व पुण्ड्रंद्विजाधमः ॥ ललाटेतस्यसततंशुनःपादोनसंशयः ॥२६॥ नासादिकेशपर्यन्तमूर्ध्वपुण्ड्रंसुशोभनम् ॥ मध्येछिद्रसमायुक्तंतंविद्याद्धरिमन्दिरम्॥ ॥२७॥ वामभागेस्थितोब्रह्मादक्षिणेतुसदाशिवः ॥ मध्येविष्णुंविजानीयात्तस्मान्मध्यंनलेपयेत् ॥२८॥ वीक्ष्यादर्शेजलेवापियोविदध्यात्प्रयत्नतः ॥

१ 'प्रकाशते' इ० पा०। २ 'सदाचन्द्रस्वरूपिणे' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऊर्द्ध्वपुण्ड्रं महाभाग ःसयातिपरमांगतिम् ॥२९॥ अग्निरापश्चवेदाश्चचन्द्रादित्यौतथानिलः ॥ विप्राणांनित्यमेतेहिकर्णेतिष्ठन्तिदक्षिणे ॥३०॥ गङ्गाचदक्षिणे श्रोत्रेनासिकायांहुताशनः ॥ उभयोरपिसंस्पर्शात्तत्क्षणादेवशुध्यति ॥३१॥ कृत्वाचैवोदकंशङ्खेवैष्णवानांमहात्मनाम् ॥ तुलसीमिश्रितंदद्यात्पिबेन्मूर्ध्नाभिवन्दयेत् ॥ ३२ ॥ प्राश्नीयात्प्रोक्षयेद्देहंपुत्रमित्रपरिग्रहम् ॥ विष्णोःपादोदकंपीतंकोटिजन्माघनाशनम् ॥ ३३ ॥ तदेवाष्टगुणंपापंभूमौबिन्दुनिपातनात् ॥ जलशङ्खंकरेकृत्वास्तुत्वानत्वाप्रदक्षिणम् ॥३४॥ सततंधार्यतेवारितेनाप्तंजन्मनःफलम् ॥ शङ्खोयस्यगृहेनास्तिघण्टावागरुडान्विता ॥३५॥ पुरतोवासुदेवस्यनसभागवतःकलौ ॥ यानैर्वापादुकाभिर्वायानंभगवतोगृहे ॥ ३६ ॥ देवोत्सवेषुसेवाचअप्रणामस्तदग्रतः ॥ उच्छिष्टेचैवचाशौचेभगवद्वन्दनादिकम् ॥ ३७ ॥ एकहस्तप्रणामश्चतत्पुरस्तात्प्रदक्षिणम् ॥ पादप्रसारणंचाग्रेतथापर्यङ्कसेवनम् ॥ ३८ ॥ शयनंभक्षणंचापिमिथ्याभाषणमेवच ॥ उच्चैर्भाषामिथोजल्पोरोदनानिचविग्रहः ॥३९॥ निग्रहानुग्रहौचैवस्त्रीषुसाकूतभाषणम् ॥ कम्बलावरणंचैवपरनिन्दापरस्तुतिः ॥४०॥ अश्लीलभाषणंचैवअधोवायुविमोक्षणम् ॥ शक्तौगौणोपचारश्चअनिवेदितभक्षणम् ॥ ४१ ॥ तत्तत्कालोद्भवानांचफलादीनामनर्पणम् ॥ विनियुक्तावशिष्टस्यप्रदानंव्यञ्जनस्ययत् ॥ ४२ ॥ स्पष्टीकृत्याशनंचैवपरनिन्दापरस्तुतिः ॥ गुरौमौनंनिजस्तोत्रंदेवतानिन्दनंतथा ॥४३॥ अपराधास्तथाविष्णोर्द्वात्रिंशत्परिकीर्तिताः ॥ ४४ ॥ "अपराधसहस्राणिक्रियन्तेऽहर्निशंमया ॥ तवाहमितिमांमत्वाक्षमस्वमधुसूदन" ॥ ४५ ॥ इतिमन्त्रंसमुच्चार्यप्रणमेद्दण्डवद्भुवि ॥ अपराधसहस्राणिक्षमतेसर्वदाहरिः ॥ ४६ ॥ सायंप्रातर्द्विजातीनांश्रुत्युक्तमशनंतथा ॥ विष्णुभक्तावशिष्टस्यदिनपापात्प्रमुच्यते ॥ ४७ ॥ अन्नंब्रह्मारसोविष्णुःखादयेन्मांसमुच्चरन् ॥ एवंज्ञात्वातुयोभुङ्क्तेसोऽन्नदोषैर्नलिप्यते ॥ ४८ ॥ अलाबुंवर्त्तुलाकारंमसूरंचसवल्कलम् ॥ तालंशुक्तंचवृन्ताकंनखादेद्वैष्णवोनरः ॥ ४९ ॥ वटाश्वत्थार्कपत्रेषुकुम्भीतिन्दुकपत्रयोः ॥ कोविदारेकदम्बेचनखादेद्वैष्णवोनरः ॥५०॥ श्रावणेवर्जयेच्छाकंदधिभाद्रपदेत्यजेत् ॥ आश्विनेमासिदुग्धंचकार्तिकेचामिषंत्यजेत् ॥५१॥ दग्धमन्नंतुजम्बीरंयद्विष्णोरनिवेदितम् ॥ बीजपूरंचशाकंचप्रत्यक्षलवणंतथा ॥ ॥ ५२ ॥ यदिदैवाच्चभुञ्जीततदातन्नामसंस्मरेत् ॥ हैमन्तिकंसितास्विन्नंधान्यंमुद्गास्तिलायवाः ॥५३॥ कलापकङ्गुनीवाराःशाकंचहिलमोचिका ॥ कालशाकंचवास्तूकंमूलकंरक्तकेतरत् ॥ ५४ ॥ लवणेसिन्धुसामुद्रेगव्येचदधिसार्पिषी ॥ पयोऽनुद्धृतसारंचपनसाम्रहरीतकी ॥ ५५ ॥ पिप्पलीजीरकंचैवनागरङ्गकतिन्तिडी ॥ कदलीलवलीधात्रीफलान्यगुडमैक्षवम् ॥ ५६ ॥ अतैलपक्कंमुनयोहविष्यान्नंप्रचक्षते ॥ तुलसीपत्रपुष्पाद्यैर्माल्यं

१ 'गुन्द्राः' इ०पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वहतियोनरः ॥ ५७ ॥ विष्णुंतमपिजानीयात्सत्यंसत्यंनसंशयः ॥ धात्रीवृक्षंसमारोप्यविष्णुतुल्योभवेन्नरः ॥ ५८ ॥ कुरुक्षेत्रंविजानीयात्सार्द्धंहस्त
शतत्रयम् ॥ तुलसीकाष्ठघटितैरुद्राक्षाकारकारितैः ॥ ५९ ॥ निर्मितांमालिकांकण्ठेनिधायार्चनमारभेत् ॥ तथाऽऽमलकमालांचसम्यक्पुष्करमालि
काम् ॥ ६० ॥ कण्ठेमालांचयत्नेनधारयेद्विष्णुपूजकः ॥ निर्माल्यंतुलसीमालांशिरस्यपिचधारयेत् ॥ ६१ ॥ निर्माल्यचन्दनेनाङ्गमङ्कयेत्तस्य
नामभिः ॥ ललाटेचगदाधार्यामूर्ध्निचापंशरस्तथा ॥६२॥ नन्दकंचैवहृन्मध्येशङ्खंचक्रंभुजद्वये ॥ शङ्खचक्रान्वितोविप्रःश्मशानेम्रियतेयदि ॥६३॥
प्रयागेयागतिःप्रोक्तासागतिस्तस्यनिश्चिता ॥ योधृत्वातुलसीपत्रंशिरसाविष्णुतत्परः ॥ ६४ ॥ करोतिसर्वकार्याणिफलमाप्नोतिचाक्षयम् ॥
तुलसीकाष्ठमालाभिर्भूषितःकर्मआचरन् ॥ ६५ ॥ पितॄणांदेवतानांचकृतंकोटिगुणंभवेत् ॥ निवेद्यकेशवेमालांतुलसीकाष्ठनिर्मिताम् ॥ ६६ ॥
वहतेयोनरोभक्त्यातस्यनश्यतिपातकम् ॥ पाद्यादिभिरथाभ्यर्च्यइमंमन्त्रमुदीरयेत् ॥ ६७ ॥ याहष्टानिखिलाघसङ्घशमनीस्पृष्टावपुःपावनी
रोगाणामभिवन्दितानिरसनीसिक्तान्तकत्रासिनी ॥ प्रत्यासत्तिविधायिनीभगवतःकृष्णस्यसंरोपितान्यस्तातच्चरणेविमुक्तिफलदातस्यैतुलस्यैनमः ॥
॥६८॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेवृन्दावनमाहात्म्येदेवीश्वरसंवादेतिलकादिनिर्णयोनामैकोनाशीतितमोऽध्यायः ॥७९॥ पार्वत्युवाच॥घोरे
कलियुगेप्राप्तेविषयग्राहसङ्कुले ॥ पुत्रदारधनाद्यार्तौतत्कथंधार्यतेविभो ॥तदुपायंमहादेवकथयस्वकृपानिधे॥१॥ ईश्वरउवाच॥ हरेर्नामहरेर्नामहरेर्नामै
वकेवलम् ॥ हरेरामहरेकृष्णकृष्णकृष्णेतिमङ्गलम् ॥२॥ एवंवदन्तियेनित्यंनहितान्बाधतेकलिः ॥ अन्तरान्तरकर्माणिकृत्वानामानिचस्मरेत् ॥३॥
कृष्णकृष्णेतिकृष्णेतिकृष्णेत्याहपुनःपुनः ॥मन्नामचैवत्वन्नामयोजयित्वाव्यतिक्रमात् ॥४॥ सोऽपिपापात्प्रमुच्येततूलराशेरिवानलः ॥ जयाद्येतत्त्व
यावाप्यथवाश्रीशब्दपूर्वकम् ॥५॥ तच्चमेमङ्गलंनामजपन्पापात्प्रमुच्यते ॥ दिवानिशिचसन्ध्यायांसर्वकालेषुसंस्मरेत् ॥६॥ अहर्निशंस्मरन्नामंकृष्णं
पश्यतिचक्षुषा ॥ अशुचिर्वाशुचिर्वापिसर्वकालेषुसर्वदा ॥ ७ ॥ नामसंस्मरणादेवसंसारान्मुच्यतेक्षणात् ॥ नानापराधयुक्तस्यनामापिचहरत्यघम् ॥
॥८॥ यज्ञव्रततपोदानंसाङ्गंनैवकलौयुगे ॥ गङ्गास्नानंहरेर्नामनिरपायमिदंद्वयम् ॥ ९ ॥ हत्यायुतंपापसहस्रमुग्रंगुर्वङ्गनाकोटिनिषेवणंच ॥ स्तेयान्य
थान्यानिहरेःप्रियेणगोविन्दनाम्नानचसन्तिभद्रे ॥ १० ॥ अपवित्रःपवित्रोवासर्वावस्थांगतोऽपिवा ॥ यःस्मरेत्पुण्डरीकाक्षंसबाह्याभ्यन्तरःशुचिः ॥
॥ ११ ॥ नामसंस्मरणादेवतथातस्यार्थचिन्तनात् ॥ सौवर्णीराजतींवापितथापैष्टींस्रगाकृतिम् ॥ १२ ॥ पादयोश्चिह्नितांकृत्वापूजांचैवसमारभेत् ॥

१'कदम्बमालां यत्नेन' इ० पा०। २'अर्चयेत्' इ० 'चर्चयेत् इ० च पा०। ३'जयशङ्कर' इति''गौरीहर'इति,'वा नामग्रहणमित्यर्थः। ४'तत्पादचिन्तनात्' इ०पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दक्षिणस्यपदोऽङ्गुष्ठमूलेचक्रंबिभार्तियः ॥१३॥ तत्रनम्रजनस्यापिसंसारच्छेदनायच॥ मध्यमाङ्गुलिमूलेतुधत्तेकमलमच्युतः ॥ १४ ॥ ध्यातृचित्त
द्विरेफाणांलोभनायातिशोभनम्॥ पद्मस्याधोध्वजंधत्तेसर्वानर्थजयध्वजम् ॥१५॥ कनिष्ठामूलतोवज्रंभक्तपापौघभेदनम् ॥ पार्श्वमध्येऽङ्कुशंभक्तचित्ते
रभसकारणम् ॥१६॥ भोगसम्पन्मयंधत्तेयवमङ्गुष्ठपर्वणि ॥ मूलेगदांचपापाद्रिभेदनींसर्वदेहिनाम् ॥१७॥ सर्वविद्याप्रकाशायधत्तेसभगवानजः ॥
पद्मादीन्यपिचिह्नानितत्रदक्षेणयत्पुनः ॥ १८ ॥ वामपादेवसेत्सोऽयंबिभर्तिकरुणानिधिः ॥तस्माद्गोविन्दमाहात्म्यमानन्दरससुन्दरम्॥१९॥ शृणुया
त्कीर्त्तयेन्नित्यंसनिर्मुक्तोनसंशयः ॥ मासकृत्यंप्रवक्ष्यामिविष्णोःप्रीतिकरंपरम् ॥२०॥ ज्येष्ठेतुस्नापनंकुर्याच्छ्रीविष्णोर्यत्नतःशुचिः॥ दैनन्दिनंतुदुरितं
पक्षमासर्त्तुवर्षजम् ॥२१॥ ब्रह्महत्यासहस्राणिज्ञाताज्ञातकृतानिच ॥ स्वर्णस्तेयसुरापानगुरुतल्पायुतानिच ॥ २२ ॥ कोटिकोटिसहस्राणिह्युपपापानि
यानिच ॥ सर्वाण्यथप्रणश्यन्तिपौर्णमास्यांतुवासरे ॥२३॥ आसिञ्चेदच्युतंमूर्ध्नितदैतत्कलशोदकम्॥पुरुषसूक्तमन्त्रेणपावमानीभिरेवच ॥२४॥नालि
केरोदकेनाथतथातालफलाम्बुना ॥ रत्नोदकेनगन्धेनतथापुष्पोदकेनच ॥ २५ ॥ पञ्चोपचारैराराध्ययथाविभवविस्तरैः ॥ घंघण्टायैनमइतिघण्टा
वाद्यंप्रदापयेत् ॥ २६ ॥ पतितस्यमहाध्वानन्यस्तपातकसञ्चये ॥ पाहिमांपापिनंघोरसंसारार्णवपातिनम् ॥ २७ ॥ यएवंकुरुतेविद्वान्ब्राह्मणःश्रोत्रियः
शुचिः ॥ सर्वपापैःप्रमुच्येतविष्णलोकंसगच्छति ॥ २८ ॥ आषाढशुक्लैकादश्यांकुर्यात्स्वापमहोत्सवम् ॥ आषाढेचरथंकुर्याच्छ्रावणेश्रवणा
विधिम् ॥ २९ ॥ भाद्रेचजन्मदिवसउपवासपरोभवेत् ॥ प्रसुतस्यपरीवर्तमाश्विनेमासिकारयेत् ॥३०॥ उत्थानंश्रीहरेःकुर्यादन्यथाविष्णुद्रोहकृत्॥
शुभेचैवाश्विनेमासिमहामायांचपूजयेत ॥ ३१ ॥ सौवर्णींराजतींवापिविष्णुरूपांबलिंविना ॥ हिंसाद्वेषौनकर्तव्यौधर्मात्माविष्णुपूजकः ॥ ३२ ॥
कार्त्तिकेपुण्यमासेचकामतःपुण्यमाचरेत् ॥ दामोदरायदीपंचप्रांशुस्थानेप्रदापयेत् ॥ ३३ ॥ सप्तवार्तिप्रमाणेनदीपःस्याच्चतुरङ्गुलः ॥ पक्षान्तेचप्रक
र्तव्यादीपमालावलिःशुभा ॥ ३४ ॥ मार्गशीर्षेसितेपक्षेषष्ठ्यांचसितवस्त्रकैः ॥ पूजयेज्जगदीशंचब्रह्माणंचविशेषतः ॥३५॥ पौषेपुष्पाभिषेकंचवर्जये
च्चन्दनंश्लथम् ॥ सङ्क्रान्त्यांमाघमासेचसाधिवासिततण्डुलात् ॥ ३६ ॥ नैवेद्यंविष्णवेदद्यादिमंमन्त्रमुदीरयेत् ॥ ब्राह्मणान्भोजयेद्भक्त्यादेवदेवपुरः
स्थितान् ॥ ३७ ॥ अभ्यर्च्यभगवद्भक्तान्द्विजांश्चभगवद्धिया ॥ एकस्मिन्भोजितेभक्तेकोटिर्भवतिभोजिता ॥ ३८ ॥ विप्रभोजनमात्रेणव्यङ्गंसाङ्गं
ध्रुवंभवेत् ॥ पञ्चम्यांशुक्लपक्षेतुस्नापयित्वाचकेशवम् ॥ ३९ ॥ पूजयित्वाविधानेनचूत[3]पल्लवसंयुतैः ॥ फलचूर्णैश्चविविधैर्वासितैःपटसाधितैः ॥४०॥

१ 'निवेदयेत्' इ० पा०। २ 'सितपत्रकैः' इ० पा०। ३ 'चतुःपल्लवसंयुतैः' इ० पा०।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काननंरमणीयंचप्रदीप्तंदीपदीपितम् ॥ द्राक्षेक्षुरम्भाजम्बीरनागरङ्गंचपूगकम् ॥ ४१ ॥ नालिकेरंचधात्रींचपनसंचहरीतकीम् ॥ अन्यैश्चवृक्षखण्डैश्च सर्वर्तुकुसुमान्वितैः ॥ ४२ ॥ अन्यैश्चविविधैश्चैवफलपुष्पसमन्वितैः ॥ वितानैःकुसुमोद्दामैर्वारिपूर्णघटैस्तथा ॥ ४३ ॥ चूतशाखोपशाखाभिः शोभितंछत्रचामरैः ॥ जयकृष्णेतिसंस्मृत्यप्रदक्षिणपुरस्सरम् ॥४४॥ विशेषतःकलियुगेदोलोत्सवोविधीयते ॥ फाल्गुनेचचतुर्दश्यामष्टमेयामसंज्ञके॥ ॥ ४५ ॥ अथवापौर्णमास्यांतुप्रतिपत्सन्धिसंज्ञके ॥ पूजयेद्विधिवद्भक्त्याफल्गुचूर्णैश्चतुर्विधैः ॥ ४६ ॥ सितरक्तैर्गौरपीतैःकर्पूरादिविमिश्रितैः ॥ हरिद्रारागयोगाच्चरङ्गरूपैर्मनोहरैः ॥ ४७ ॥ अन्यैर्वारङ्गरूपैश्चप्रीणयेत्परमेश्वरम् ॥ एकादश्यांसमारभ्यपञ्चम्यांतंसमापयेत् ॥ ४८ ॥ पञ्चाहानि त्र्यहानिवादोलोत्सवोविधीयते ॥ दक्षिणाभिमुखंकृष्णंदोलमानंसकृन्नराः ॥ ४९ ॥ दृष्ट्वापराधनिचयैर्मुक्तास्तेनात्रसंशयः ॥ निक्षिप्यजलपात्रेच मासिमाधवसंज्ञके ॥ ५० ॥ सौवर्णपात्रेरौप्येवाताम्रेवाप्यथमृन्मये ॥ तोयस्थंयोऽर्चयेद्देवंशालग्रामसमुद्भवम् ॥ ५१ ॥ प्रतिमांवामहाभागेतस्य पुण्यंनगण्यते ॥ दमनारोपणंकृत्वाश्रीविष्णौचसमर्पयेत् ॥ ५२ ॥ वैशाखेश्रावणेभाद्रेकर्तव्यंवातदर्पणम् ॥ पूर्वेपूर्वेतुवातस्थेदमनादिषुकर्मसु॥ ॥ ५३ ॥ प्रकर्तव्यंविधानेनअन्यथानिष्फलंभवेत् ॥ वैशाखेचतृतीयायांजलमध्येविशेषतः ॥ ५४ ॥ अथवामण्डलेकुर्यान्मण्डपेवाबृहद्वने ॥ सुगन्धचन्दनेनाङ्गंसुपुष्टंचदिनेदिने ॥ ५५ ॥ यथाप्रयत्नतःकुर्यात्कृशाङ्गस्येवपुष्टिदम् ॥ चन्दनागुरुह्रीबेरकृष्णकुङ्कुमरोचना ॥ ५६ ॥ जटामांसी मुराचैवविष्णोर्गन्धाष्टकंविदुः ॥ तैस्तैर्गन्धयुतैश्चापिविष्णोरङ्गानिलेपयेत् ॥ ५७ ॥ घृष्टंचतुलसीकाष्ठंकर्पूरागुरुयोगतः ॥ अथवाकेसरैर्योज्यंहरि चन्दनमुच्यते ॥५८॥ यात्राकालेचयेकृष्णंभक्त्यापश्यन्तिमानवाः ॥ नतेषांपुनरावृत्तिःकल्पकोटिशतैरपि ॥ ५९ ॥ सुगन्धमिश्रितैस्तोयैर्देवदेवंगल न्तिये॥अथवापुष्पमध्येतुस्थापयेज्जगदीश्वरम् ॥६०॥ वृन्दावनंतत्रगत्वाउपस्कृत्यफलानिच ॥ विष्णुभक्तेनयोग्येनभोजयेत्तदशेषतः ॥६१॥ नालि केरफलंबीजकोशंचोद्धृत्यदापयेत् ॥ घोण्टाफलंचपनसंकोशमुद्धृत्यदापयेत् ॥ ६२ ॥ दध्नाविमिश्रितंचान्नंघृतेनाप्लुत्यदापयेत् ॥ पाचितंपिष्टकं पूपमधादशघृतेनच ॥ ६३ ॥ तैलैश्चतिलसंमिश्रैःफलंपक्वंप्रदापयेत् ॥ यद्यद्देवात्मनःप्रीतंतत्तदीशायदापयेत् ॥ ६४ ॥ दत्त्वानैवेद्यवस्त्रादिनाददीत कथञ्चन ॥ त्यक्तंचविष्णुमुद्दिश्यतद्भक्तेभ्योविशेषतः ॥ ६५ ॥ इतितेकथितंकिञ्चित्समासेनमहेश्वरि ॥ गोपनीयंप्रयत्नेनस्वयोनिरिवपार्वति ॥६६॥ श्रीकृष्णरूपगुणवर्णनशास्त्रवर्गबोधाधिकारइहचेदलमन्यपाठैः ॥ तत्प्रेमभावरसभक्तिविलासनामहारेषुचेत्खलुमनःकिमुकामिनीभिः ॥ ६७ ॥

१ 'निवातस्थे' इ० पा०।

Nepal Sanskrit University, Valmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तच्चेतसाप्रभजतांव्रजबालकेन्द्रंवृन्दावनक्षितितलंयमुनाजलंच ॥ तल्लोकनाथपदपङ्कजधूलिमिश्रलिप्तंवपुःकिलवृथाऽगरुचन्दनाद्यैः ॥ ६८ ॥ इति श्रीपाद्मेमहापुराणेपातालखण्डेउमामहेश्वरसंवादेवृन्दावनमाहात्म्येऽशीतितमोऽध्यायः ॥ ८० ॥ ऋषयऊचुः ॥ सूतजीवचिरंसाधोश्रीकृष्णचरितामृतम् ॥ त्वयाप्रकाशितंसर्वंभक्तानांभवतारणम् ॥ १ ॥ श्रीकृष्णलीलांनिखिलांब्रूहिदैनन्दिनींप्रभो ॥ ययाकर्णितयासाधोकृष्णेभक्तिर्विवर्द्धते ॥ ॥ २ ॥ गुरोःशिष्यस्यमन्त्रस्यविधानंलक्षणंपृथक् ॥ वदास्माकंमहाभागत्वंहिनःपरमःसुहृत् ॥ ३ ॥ सूतउवाच ॥ एकदायमुनातीरेसमासीनंजगद्गुरुम् ॥ नारदःप्रणिपत्याहदेवदेवंसदाशिवम् ॥ ४ ॥ नारदउवाच ॥ देवदेवमहादेवसर्वज्ञजगदीश्वर ॥ भगवन्धर्मतत्त्वज्ञकृष्णमन्त्रविदांवर ॥ ५ ॥ कृष्णमन्त्रामयालब्धास्त्वत्तोयेचपितुःपरे ॥ तेसर्वेसाधितायत्नान्मन्त्रराजादयोमया ॥ ६ ॥ बहुवर्षसहस्रैस्तुशाकमूलफलाशिना ॥ शुष्कपर्णाम्बुवाय्वादिभोजिनाचनिराशिना ॥ ७ ॥ स्त्रीणांसन्दर्शनालापवर्जिनाभूमिशायिना ॥ कामादिषड्गुणंजित्वाबाह्येन्द्रियनियम्यता ॥ ८ ॥ एवंकृतेऽपि नैवात्मासन्तुष्टोममशङ्कर ॥ तद्ब्रूहियत्प्रसिध्येतसंस्काराद्यैर्विनाप्रभो ॥९॥ सकृदुच्चारणादेवददातिफलमुत्तमम्॥ यदियोग्योऽस्मिदेवेशतदामेकृपयावद ॥ १० ॥ शिवउवाच ॥ साधुपृष्टंमहाभागत्वयालोकहितैषिणा[1] ॥ सुगोप्यमपिवक्ष्यामिमन्त्रचिन्तामणिंतव ॥११॥ रहस्यानांरहस्यंयद्गुह्यानांगुह्यमुत्तमम् ॥ नमयाकथितंदेव्यैनाग्रजेभ्यःपुरातव ॥ १२ ॥ वक्ष्यामियुगलंतुभ्यंकृष्णमन्त्रमनुत्तमम् ॥ मन्त्रचिन्तामणिर्नामयुगलंद्वयमेवच ॥ ॥ १३ ॥ पर्यायाअस्यमन्त्रस्यतथापञ्चपदीतिच ॥ गोपीजनपदंवल्लभान्तंतुचरणानिति ॥ १४ ॥ शरणंचप्रपद्येचएषपञ्चपदात्मकः ॥ मन्त्रचिन्तामणिःप्रोक्तःषोडशार्णोमहामनुः ॥ १५ ॥ नमोगोपीजनेत्युक्त्वावल्लभाभ्यांवदेत्ततः ॥ पदद्वयात्मकोमन्त्रोदशार्णःखलुकथ्यते ॥१६॥ एतांपञ्चपदींजप्त्वाश्रद्धयाऽश्रद्धयासकृत् ॥ कृष्णप्रियाणांसान्निध्यंगच्छत्येवनसंशयः ॥ १७ ॥ नपुरश्चरणप्रेक्षानास्यन्यासविधिक्रमः ॥ नदेशकालनियमोनारिमित्रादिशोधनम् ॥ १८ ॥ सर्वेऽधिकारिणश्चात्रचण्डालान्तामुनीश्वर ॥ स्त्रियःशूद्रादयश्चापिजडमूकादिपङ्गवः ॥ १९ ॥ अन्येहूणाःकिराताश्चपुलिन्दाःपुष्कसास्तथा ॥ आभीरायवनाःकङ्काःखसाद्याःपापयोनयः ॥ २० ॥ दम्भाहङ्कारपरमाःपापाःपैशून्यतत्पराः ॥ गोब्राह्मणादिहन्तारोमहोपपातकान्विताः ॥ २१ ॥ ज्ञानवैराग्यरहिताःश्रवणादिविवर्जिताः ॥ एतेचान्येचसर्वेस्युर्मनोरस्याधिकारिणः ॥ २२ ॥ यदि भक्तिर्भवेदेषांकृष्णेसर्वेश्वरेश्वरे॥तदाधिकारिणःसर्वेनान्यथामुनिसत्तम ॥२३॥ याज्ञिकोदाननिरतःसर्वतन्त्रोपसेवकः ॥ सत्यवादीयतिर्वापिवेदवेदाङ्ग

१ 'सर्वलोकहितैहिणा' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पारगः ॥२४॥ ब्रह्मनिष्ठःकुलीनोवातपस्वीव्रततत्परः ॥ अत्राधिकारीनभवेत्कृष्णभक्तिविवर्जितः ॥ २५ ॥ तस्मादकृष्णभक्तायकृतघ्नायनमानिने॥
नचश्रद्धाविहीनायवक्तव्यंनास्तिकायच ॥ २६॥ नचाशुश्रूषवेवाच्यंनासंवत्सरसेविने ॥ श्रीकृष्णेऽनन्यभक्तायदम्भलोभविवर्जिने ॥२७॥ कामक्रोध
विमुक्तायदेयमेतत्प्रयत्नतः ॥ ऋषिश्चैवाहमेतस्यगायत्रीच्छन्दउच्यते ॥ २८ ॥ देवतावल्लवीकान्तोमन्त्रस्यपरिकीर्तितः ॥ सप्रियस्यहरेर्दास्येविनि
योगउदाहृतः ॥२९॥ अचक्राद्यैस्तथामन्त्रैःपञ्चाङ्गानिप्रकल्पयेत्॥अथवापिस्वबीजेनकराङ्गन्यासकौचरेत् ॥३०॥ मन्त्रस्यप्रथमोवर्णोबिन्दुनामूर्ध्नि
भूषितः ॥ गमित्येवंभवेद्बीजंनमःशक्तिरिहोदिता ॥ ३१ ॥ अन्तिमार्णैर्दशाङ्गानितैरेवचतथार्चनम् ॥ गन्धपुष्पादिभिस्तच्चजलैरेवाप्यसम्भवे॥
॥ ३२ ॥ न्यासपूर्वविधानेनकर्तव्यंहरितुष्टये ॥ अतएवास्यमन्त्रस्यन्यासाद्यन्येवदन्तिच ॥ ३३ ॥ सकृदुच्चारणादेवकृतकृत्यत्वदायिनः ॥
तथापिदशधानित्यंजपाद्यर्थंप्रविन्यसेत् ॥ ३४॥ अथध्यानंप्रवक्ष्यामिमन्त्रस्यास्यद्विजोत्तम ॥ पीताम्बरंघनश्यामंद्विभुजंवनमालिनम् ॥ ३५ ॥
बर्हिबर्हकृतोत्तंसंशशिकोटिनिभाननम् ॥ घूर्णायमाननयनंकर्णिकारावतंसिनम् ॥ ३६ ॥ अभितश्चन्दनेनाथमध्येकुङ्कुमबिन्दुना ॥ रचितं
तिलकंभालेबिभ्रतंमण्डलाकृतिम् ॥ ३७ ॥ तरुणादित्यसङ्काशकुण्डलाभ्यांविराजितम् ॥ घर्माम्बुकर्णिकाराजद्दर्पणाभकपोलकम् ॥ २८ ॥
प्रियास्यन्यस्तनयनंलीलापाङ्गोन्नतभ्रुवम् ॥ अग्रभागन्यस्तमुक्ताविस्फुरत्प्रोच्चनासिकम् ॥ ३९ ॥ दशनज्योत्स्नयाराजत्पक्वबिम्बफलाधरम् ॥
केयूराङ्गदसद्रत्नमुद्रिकाभिर्लसत्करम् ॥ ४० ॥ बिभ्रतंमुरलींवामेपाणौपद्मंतथैवच ॥ काञ्चीदामस्फुरन्मध्यंनूपुराभ्यांलसत्पदम् ॥ ४१ ॥
रतिकेलिरसावेशचपलंचपलेक्षणम् ॥ हसन्तंप्रिययासार्द्धंहासयन्तंचतांमुहुः ॥ ४२ ॥ इत्थंकल्पतरोर्मूलेरत्नसिंहासनोपरि ॥ वृन्दारण्येस्मरे
त्कृष्णंसंस्थितंप्रिययासह ॥ ४३ ॥ वामपार्श्वेस्थितांतस्यराधिकांचस्मरेत्ततः ॥ नीलचैलकसंवीतांतप्तहेमसमप्रभाम् ॥ ४४ ॥ पट्टाञ्चलेनावृतार्द्ध
सुस्मेराननपङ्कजाम् ॥ कान्तवक्त्रेन्यस्तनेत्रांचकोरीचञ्चलेक्षणाम् ॥ ४५ ॥ अङ्गुष्ठतर्जनीभ्यांचनिजकान्तमुखाम्बुजे ॥ अर्पयन्तींपूगफलंपर्णचूर्ण
समन्वितम् ॥ ४६ ॥ मुक्ताहारस्फुरच्चारुपीनोन्नतपयोधराम् ॥ क्षीणमध्यांपृथुश्रोणींकिङ्किणीजालमण्डिताम् ॥ ४७ ॥ रत्नताटङ्ककेयूरमुद्रा
वलयधारिणीम् ॥ रणत्कटकमञ्जीररत्नपादाङ्गुलीयकाम् ॥ ४८ ॥ लावण्यसारमुग्धाङ्गींसर्वावयवसुन्दरीम् ॥ आनन्दरससंमग्नांप्रसन्नांनव
यौवनाम् ॥ ४९ ॥ सख्यश्चतस्याविप्रेन्द्रसत्समानवयोगुणाः ॥ तत्सेवनपराभाव्याश्चामरव्यजनादिभिः ॥ ५० ॥ अथतुभ्यंप्रवक्ष्यामिमन्त्रार्थं

१ 'अन्तिमार्णैरष्टाङ्गानि' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शृणुनारद ॥ बहिरङ्गःप्रपञ्चस्यस्वांशैर्मायादिशक्तिभिः ॥ ५१ ॥ अन्तरङ्गैस्तथानित्यविभूतैस्तैश्चिदादिभिः ॥ गोपनादुच्यतेगोपीराधिका
कृष्णवल्लभा ॥ ५२ ॥ देवीकृष्णमयीप्रोक्ताराधिकापरदेवता ॥ सर्वलक्ष्मीस्वरूपासाकृष्णाह्लादस्वरूपिणी ॥ ५३ ॥ ततःसाप्रोच्यतेविप्रह्लादिनीति
मनीषिभिः ॥ तत्कलाकोटिकोटयंशदुर्गाद्यास्त्रिगुणात्मिकाः ॥ ५४ ॥ सातुसाक्षान्महालक्ष्मीःकृष्णोनारायणःप्रभुः ॥ नैतयोर्विद्यतेभेदःस्वल्पोऽपि
मुनिसत्तम ॥ ५५॥ इयंदुर्गाहरीरुद्रःकृष्णःशक्रइयंशची ॥ सावित्रीयंहरिर्ब्रह्माधूमोर्णासौयमोहरिः ॥५६॥ बहुनाकिंमुनिश्रेष्ठविनाताभ्यांनकिञ्चन ॥
चिदचिल्लक्षणंसर्वंराधाकृष्णमयंजगत् ॥ ५७ ॥ इत्थंसर्वंतयोरेवविभूतिंविद्धिनारद ॥ नशक्यतेमयावक्तुंवर्षकोटिशतैरपि॥ ५८ ॥ त्रैलोक्येपृथिवी
मान्याजम्बूद्वीपंततोवरम् ॥ तत्रापिभारतंवर्षंतत्रापिमथुरापुरी ॥ ५९ ॥ तत्रवृन्दावनंनामतत्रगोपीकदम्बकम् ॥ तत्रराधासखीवर्गस्तत्रापिराधिका
वरा ॥६०॥ सान्निध्याधिक्यतस्तस्याआधिक्यंस्याद्यथोत्तरम् ॥ पृथिवीप्रभृतीनांतुनान्यत्किञ्चिदिहोदितम्॥६१॥ सैषाहिराधिकागोपीजनस्तस्याः
सखीगणः ॥ तस्याःसखीसमूहस्यवल्लभौप्राणनायकौ ॥६२॥ राधाकृष्णौतयोःपादाःशरणंस्यादिहाश्रये ॥ प्रपद्येगतवानस्मिजीवोऽहंभृशदुःखितः॥
॥ ६३ ॥ सोऽहंयःशरणंप्राप्तोममतस्ययदस्तिच ॥ सर्वंताभ्यांतदर्थंहितद्भोग्यंनह्यहंमम ॥ ६४ ॥ इत्यसौकथितोविप्रमन्त्रस्यार्थःसमासतः ॥
युगलार्थस्तथान्यासःप्रपत्तिःशरणागतिः ॥ ६५ ॥ आत्मार्पणमिमेपञ्चपर्यायास्तेमयोदिताः ॥ अयमेवचिन्तनीयोदिवानक्तमतन्द्रितैः ॥ ६६ ॥
इतिश्रीपाद्मेमहापुराणेपातालखण्डेवृन्दावनमाहात्म्यएकाशीतितमोऽध्यायः ॥८१॥ शिवउवाच॥अथदीक्षाविधिंवक्ष्येशृणुनारदतत्त्वतः ॥ श्रवणादेव
मुच्येतविनातस्यविधानतः ॥ १ ॥ आविरिञ्चिजगत्सर्वंविज्ञायनश्वरंबुधः ॥ आध्यात्मिकादित्रिविधदुःखमेवानुभूयच ॥ २ ॥ अनित्यत्वाच्चसर्वेषां
सुखानांमुनिसत्तम ॥ दुःखपक्षेविनिक्षिप्यतानितेभ्योविवर्जितः ॥ ३ ॥ विरज्यसंसृतेर्हानौसाधनानिविचिन्तयेत् ॥ अनुत्तमसुखस्यापिसम्प्राप्तौ
भृशनिर्वृतः ॥ ४ ॥ नराणांदुष्करत्वंहिविज्ञायचमहामतिः ॥ भृशमार्त्तस्ततोविप्रःश्रीगुरुंशरणंव्रजेत् ॥ ५ ॥ शान्तोविमत्सरःकृष्णेभक्तोऽनन्यप्रयो
जनः ॥ अनन्यसाधनःश्रीमान्कामलोभविवार्जितः ॥ ६ ॥ श्रीकृष्णरसतत्त्वज्ञःकृष्णमन्त्रविदांवरः ॥ कृष्णमन्त्राश्रयोनित्यंमन्त्रभक्तःसदाशुचिः॥
॥७॥ सद्धर्मशासकोनित्यंसदाचारनियोजकः ॥ सम्प्रदायीकृपापूर्णोविरागीगुरुरुच्यते ॥८॥ एवमादिगुणप्रायःशुश्रूषुर्गुरुपादयोः॥गुरौनितान्तभक्त
श्चमुमुक्षुःशिष्यउच्यते ॥ ९ ॥ यत्साक्षात्सेवनंतस्यप्रेम्णाभगवतोभवेत् ॥ समोक्षःप्रोच्यतेप्राज्ञैर्वेदवेदाङ्गवेदिभिः ॥ १० ॥ आश्रित्यस्वगुरोःपादौ
निजवृत्तंनिवेदयेत् ॥ ससन्देहानपाकृत्यबोधयित्वापुनःपुनः ॥ ११ ॥ स्वपादप्रणतंशान्तंशुश्रूषुंनिजपादयोः ॥ अतिहृष्टमनाःशिष्यंमनुमध्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पयेत्परम् ॥ १२ ॥ चन्दनेनमृदावापिविलिखेद्बाहुमूलयोः ॥ वामदक्षिणयोर्विप्रशङ्खचक्रयथाक्रमम् ॥ १३ ॥ ऊर्द्ध्वपुण्ड्रंततःकुर्यात्फालादिषुविधानतः ॥ ततोमन्त्रद्वयंतस्यदक्षकर्णेविनिर्दिशेत् ॥ १४ ॥ मन्त्रार्थंचवदेत्तस्मैयथावदनुपूर्वशः ॥ दासशब्दयुतंनामधार्यंतस्यप्रयत्नतः ॥ १५ ॥ ततोऽतिभक्त्यासस्नेहंवैष्णवान्भोजयेद्बुधः ॥ श्रीगुरुंपूजयेच्चापिवस्त्रालङ्करणादिभिः ॥ १६ ॥ सर्वस्वंगुरवेदद्यात्तदर्द्धंवामहामुने ॥ स्वदेहमपिनिक्षिप्यगुरौस्थेयमकिञ्चनैः ॥ १७ ॥ यएतैःपञ्चभिर्विद्वान्संस्कारैःसंस्कृतोभवेत् ॥ दास्यभागीसकृष्णस्यनान्यथाकल्पकोटिभिः ॥ १८ ॥ अङ्कनंचोर्द्ध्वपुण्ड्रश्चमन्त्रोनामविधारणम् ॥ पञ्चमोयागइत्युक्ताःसंस्काराःपूर्वसूरिभिः ॥ १९ ॥ अङ्कनंशङ्खचक्राद्यैःसच्छिद्रंपुण्ड्रमुच्यते ॥ दासशब्दयुतंनाममंन्त्रोयुगलसंज्ञकः ॥ २० ॥ गुरुवैष्णवयोःपूजायागइत्यभिधीयते ॥ एतेपरमसंस्कारामयातेपरिकीर्तिताः ॥ २१ ॥ अथतुभ्यंप्रपन्नानांधर्मान्वक्ष्यामिनारद ॥ यानास्थायगमिष्यन्तिहरिधामनराःकलौ ॥ २२ ॥ इत्थंगुरोर्लब्धमन्त्रोगुरुभक्तिपरायणः ॥ सेवमानोगुरुंनित्यंतत्कृपांभावयेत्सुधीः ॥ २३ ॥ सतांधर्मास्ततःशिक्षेत्प्रपन्नानांविशेषतः ॥ स्वेष्टदेवधियानित्यंवैष्णवान्परितोषयत् ॥ २४ ॥ ताडनंभर्त्सनंकामीभोग्यत्वेनयथास्त्रियः ॥ गृह्णातिवैष्णवानांचतत्तद्ग्राह्यंतथाबुधैः ॥ २५ ॥ ऐहिक्यामुष्मिकीचिन्तानैवकार्याकदाचन ॥ ऐहिकंतुसदाभाव्यंपूर्वाचरितकर्मणा ॥ २६ ॥ आमुष्मिकंतथाकृष्णःस्वयमेवकरिष्यति ॥ अतोहितत्कृतेत्याज्यःप्रयत्नःसर्वथानरैः ॥ २७ ॥ सर्वोपायपरित्यागःकृष्णीयात्मतयार्चनम् ॥ सुचिरंप्रोषितेकान्तेयथापतिपरायणा ॥ २८ ॥ प्रियानुरागिणीदीनातस्यसङ्गैककाङ्क्षिणी ॥ तद्गुणान्भावयेन्नित्यंगायत्यपिशृणोतिच ॥ २९ ॥ श्रीकृष्णगुणलीलादिस्मरणादितथाचरेत् ॥ नपुनःसाधनत्वेनकार्यंतत्तुकदाचन ॥ ३० ॥ चिरंप्रोष्यागतंकान्तंप्राप्यकान्तधियायथा ॥ चुम्बन्तीवाश्लिष्यन्तीवनेत्रान्तेनपिबन्त्यपि ॥ ॥ ३१ ॥ ब्रह्मानन्दगतेवाशुसेवतेपरयामुदा ॥ श्रीमदर्चावतारेणतथापरिचरेद्धरिम् ॥ ३२ ॥ अनन्यशरणोनित्यंतथैवानन्यसाधनः ॥ अनन्यसाधनार्थत्वात्स्यादनन्यप्रयोजनः ॥ ३३ ॥ नान्यंचपूजयेद्देवंननमेत्तंस्मरेन्नच ॥ नचपश्येन्नगायेच्चनचनिन्देत्कदाचन ॥ ३४ ॥ नान्योच्छिष्टंचभुञ्जीतनान्यशेषंचधारयेत् ॥ अवैष्णवानांसम्भाषावन्दनादिविवर्जयेत् ॥ ३५ ॥ ईशवैष्णवयोर्निन्दांशृणुयान्नकदाचन ॥ कर्णौपिधायगन्तव्यंशक्तौदण्डंसमाचरेत् ॥ ३६ ॥ आश्रित्यचातकींवृत्तिंदेहपातावधिद्विज ॥ द्वयस्यार्थंभावयित्वास्थेयमित्येवमेमतिः ॥ ३७ ॥ सरःसमुद्रनद्यादीन्विहायचातकोयथा ॥ तृषितोम्रियतेवापियाचतेवापयोधरम् ॥ ३८ ॥ एवमेवप्रयत्नेनसाधनानिविचिन्तयेत् ॥ स्वेष्टदेवःसदायाच्योगतिस्त्वंमेभवेरिति ॥ ३९ ॥ स्वेष्टदेवतदीयानांगुरोरपिविशेषतः ॥ आनुकूल्येसदास्थेयंप्रातिकूल्यंविवर्जयेत् ॥ ४० ॥ सकृत्प्रपन्नोवक्ष्यामिकल्याणगुणतांतयोः ॥ विचिन्त्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विश्वसेदेतौमामिमावुद्धरिष्यतः ॥४१॥ संसारसागरान्नाथौमित्रपुत्रगृहाकुलात ॥ गोप्तारौमेयुवामेवप्रपन्नभयभञ्जनौ ॥४२॥ योऽहंममास्तियत्किञ्चि
दिहलोकेपरत्रच ॥ तत्सर्वंभवतोरद्यचरणेषुसमर्पितम् ॥ ४३ ॥ अहमस्म्यपराधानामालयस्त्यक्तसाधनः ॥ अगतिश्चततोनाथौभवन्तावेव
मेगतिः ॥ ४४ ॥ तवास्मिराधिकाकान्तकर्मणामनसागिरा ॥ कृष्णकान्तेतवैवास्मियुवामेवगतिर्मम ॥ ४५ ॥ शरणंवांप्रपन्नोऽस्मिकरुणा
निकराकरौ ॥ प्रसादंकुरुतंदास्यंमयिदुष्टेऽपराधिनि ॥ ४६ ॥ इत्येवंजपतानित्यंस्थातव्यंपद्यपञ्चकम् ॥ अचिरादेवतद्दास्यमिच्छतामुनि
सत्तम ॥ ४७ ॥ बाह्यधर्मामयाह्येतेसंक्षेपेणोपवर्णिताः ॥ आन्तरःपरमोधर्मःप्रपन्नानामथोच्यते ॥ ४८ ॥ कृष्णप्रियासखीभावंसमाश्रित्यप्रय
त्नतः ॥ तयोःसेवांप्रकुर्वीतदिवानक्तमतन्द्रितः ॥ ४९ ॥ उक्तोमन्त्रस्तदङ्गानितथातस्याधिकारिणः ॥ तद्धर्माश्चतथातेभ्यःफलंमन्त्रस्यनारद ॥
॥ ५० ॥ अनुतिष्ठत्वमप्येतत्तयोर्दास्यमवाप्स्यसि ॥ स्वाधिकारक्षयेविप्रसन्देहोनात्रकश्चन ॥ ५१ ॥ सकृन्मात्रप्रपन्नायतवास्मीतिचयाचते ॥
निजदास्यंहरिर्दद्यान्नमेऽत्रास्तिविचारणा ॥ ५२ ॥ अत्रतेवर्णयिष्यामिरहस्यंपरमाद्भुतम् ॥ श्रुतपूर्वंमयाकृष्णात्साक्षाद्भगवतःपरम् ॥ ५३ ॥ एषते
कथितोधर्मआन्तरोमुनिसत्तम ॥ गुह्यादेषगुह्यतमोगोपनीयःप्रयत्नतः ॥५४॥ मन्त्ररत्नमहंपूर्वंजपन्कैलासमूर्धनि॥ध्यायन्नारायणंदेवमवसंगहनेवने ॥
॥ ५५ ॥ ततस्तुभगवांस्तुष्टःप्रादुरासममाग्रतः ॥ व्रियतांवरइत्युक्तेमयाप्युद्घाटचलोचने ॥ ५६ ॥ दृष्टोदेवःप्रियायुक्तःसंस्थितोगरुडोपरि ॥ प्रणि
पत्यावोचमहंवरदंकमलापतिम् ॥ ५७ ॥ यद्रूपंतेकृपासिन्धोपरमानन्ददायकम् ॥ सर्वानन्दाश्रयंनित्यंमूर्तिमत्सर्वतोऽधिकम् ॥ ५८ ॥ निर्गुणं
निष्क्रियंशान्तंयद्ब्रह्मेतिविदुर्बुधाः ॥ तदहंद्रष्टुमिच्छामिचक्षुर्भ्यांपरमेश्वर ॥ ५९ ॥ ततोमामाहभगवान्प्रपन्नंकमलापतिः ॥ तदद्यद्रक्ष्यसेरूपंयत्ते
मनसिकाङ्क्षितम् ॥ ६० ॥ यमुनापश्चिमेतीरेगच्छवृन्दावनंमम ॥ इत्युक्त्वान्तर्दधेदेवःप्रियायुक्तोजगत्पतिः[1] ॥ ६१ ॥ अहमप्यागतस्तर्हियमुनाया
स्तटंशुभम् ॥ तत्रकृष्णमपश्यंचसर्वदेवेश्वरेश्वरम् ॥ ६२ ॥ गोपवेषधरंकान्तंकिशोरवयसान्वितम् ॥ प्रियास्कन्धेसुविन्यस्तवामहस्तंमनोहरम् ॥
॥ ६३ ॥ हसन्तंहासयन्तंतांमध्येगोपीकदम्बके ॥ स्निग्धमेघसमाभासंकल्याणगुणमन्दिरम् ॥ ६४ ॥ प्रहस्यचततःकृष्णोमामाहामृतभाषणः ॥
अहंतेदर्शनंयातोज्ञात्वारुद्रतवेप्सितम् ॥ ६५ ॥ यदद्यमेत्वयादृष्टमिदंरूपमलौकिकम् ॥ घनीभूतामलप्रेमसच्चिदानन्दविग्रहम् ॥६६॥ नीरूपंनिर्गुणं
व्यापिक्रियाहीनंपरात्परम् ॥ वदन्त्युपनिषत्सङ्घाइदमेवममानघम् ॥ ६७ ॥ प्रकृत्युत्थगुणाभावादनन्तत्वात्तथेश्वरम् ॥ असिद्धत्वान्मद्गुणानां

१ 'श्रिया सार्धम्' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निर्गुणंमांवदन्तिहि ॥ ६८ ॥ अदृश्यत्वान्ममैतस्यरूपस्यचर्मचक्षुषा ॥ अरूपंमांवदन्त्येतेवेदाःसर्वेमहेश्वर ॥ ६९ ॥ व्यापकत्वाच्चिदंशेनब्रह्मेति
चविदुर्बुधाः ॥ अकर्तृत्वात्प्रपञ्चस्यनिष्क्रियंमांवदन्तिहि ॥ ७० ॥ मायागुणैर्यतोमेंऽशाःकुर्वन्तिसर्जनादिकम् ॥ नकरोमिस्वयंकिञ्चित्सृष्ट्यादिक
महंशिव ॥ ७१ ॥ अहमासांमहादेवगोपीनांप्रेमविह्वलः ॥ क्रियान्तरंनजानामिनात्मानमपिनारद ॥ ७२॥ विहराम्यनयानित्यमस्याःप्रेमवशीकृतः ॥
इमांतुमत्प्रियांविद्धिराधिकांपरदेवताम् ॥ ७३ ॥ अस्याश्चपरितःपश्यसख्यःशतसहस्रशः ॥ नित्याःसर्वाइमारुद्रयथाहंनित्यविग्रहः ॥ ७४ ॥ गोपा
गावोगोपिकाश्चसदावृन्दावनंमम ॥ सर्वमेतन्नित्यमेवचिदानन्दरसात्मकम् ॥ ७५ ॥ इदमानन्दकन्दाख्यंविद्धिवृन्दावनंमम ॥ यस्मिन्प्रवेशमात्रेणन
पुनःसंसृतिंविशेत् ॥ ७६ ॥ मद्वनंप्राप्ययोमूढःपुनरन्यत्रगच्छति ॥ सआत्महाभवेद्देवसत्यंसत्यंमयोदितम् ॥ ७७ ॥ वृन्दावनंपरित्यज्यनैवगच्छा
म्यहंक्वचित् ॥ निवसाम्यनयासार्द्धमहमत्रैवसर्वदा ॥ ७८ ॥ इत्येवंसर्वमाख्यातंयत्तेरुद्रहृदिस्थितम् ॥ कथयस्वममेदानींकिमन्यच्छ्रोतुमिच्छसि॥
॥ ७९ ॥ ततस्तमब्रवंदेवमहंचमुनिसत्तम ॥ ईदृशस्त्वंकथंलभ्यस्तमुपायंवदस्वमे ॥ ८० ॥ ततोमामाहभगवान्साधुरुद्रत्वयोदितम् ॥ अतिगुह्यतमं
ह्येतद्गोपनीयंप्रयत्नतः ॥ ८१ ॥ सकृदावांप्रपन्नोयउपास्तेत्यक्तसाधनः ॥ गोपीभावेनदेवेशसमामेतिनचेतरः ॥ ८२ ॥ सकृदावांप्रपन्नोवा
मत्प्रियामेकिकामुत॥सेवतेऽनन्यभावेनसमामेतिनसंशयः ॥८३॥ योमामेवप्रपन्नश्चमत्प्रियांनमहेश्वर॥नकदापिसचाप्नोतिमामेवंतेमयोदितम् ॥८४॥
सकृदेवप्रपन्नोयस्तवास्मीतिवदेदपि ॥ साधनेनविनाप्येवमामाप्नोतिनसंशयः ॥ ८५ ॥ तस्मात्सर्वप्रयत्नेनमत्प्रियांशरणंव्रजेत् ॥ आश्रित्यमत्प्रियां
रुद्रमांवशीकर्त्तुमर्हसि ॥८६॥ इदंरहस्यंपरमंमयातेपरिकीर्तितम् ॥ त्वयाप्येतन्महादेवगोपनीयंप्रयत्नतः ॥ ८७ ॥ त्वमप्येनांसमाश्रित्यराधिकांमम
वल्लभाम् ॥ जपन्मेयुगलंमन्त्रंसदातिष्ठमदालये ॥ ८८ ॥ शिवउवाच ॥ इत्युक्त्वादक्षिणेकर्णेममकृष्णोदयानिधिः ॥ उपदिश्यपरंमन्त्रंसंस्कारांश्च
विधायहि ॥८९॥ सगणोऽन्तर्दधेविप्रतत्रैवममपश्यतः॥अहमप्यत्रतिष्ठामितदारभ्यनिरन्तरम् ॥९०॥ सर्वमेतन्मयातुभ्यंसाङ्गमेवप्रकीर्तितम्॥अधुना
वदविप्रेन्द्रकिंभूयःश्रोतुमिच्छसि ॥९१॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेवृन्दावनमाहात्म्येद्व्यशीतितमोऽध्यायः ॥ ८२ ॥ नारदउवाच ॥ भग
वन्सर्वमाख्यातंयद्यत्पृष्टंमयागुरो ॥ अधुनाश्रोतुमिच्छामिभावमार्गमनुत्तमम् ॥ १ ॥ शिवउवाच ॥ साधुविप्रत्वयापृष्टंसर्वलोकहितैषिणा ॥ रहस्य
मपिवक्ष्यामितन्मेनिगदतःशृणु ॥२॥ दास्यःसखायःपितरौप्रेयस्यश्चहरेरिह॥सर्वेनित्यामुनिश्रेष्ठवसन्तिगुणशालिनः[1] ॥ ३ ॥ यथाप्रकटलीलायांपुरा

१ 'तत्तुल्यागुणशालिनः' इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

णेषुप्रकीर्तिताः ॥ तथातेनित्यलीलायांसन्तिवृन्दावनेभुवि ॥४॥गमनागमनेनित्यंकरोतिवनगोष्ठयोः ॥गोचारणंवयस्यैश्चविनाऽसुरविघातनम् ॥५॥
परकीयाभिमानिन्यस्तथातस्यप्रियाजनाः ॥ प्रच्छन्नेनैवभावेनरमयन्तिनिजप्रियम् ॥६॥ आत्मानंचिन्तयेत्तत्रतासांमध्येमनोरमाम् ॥ रूपयौवन
सम्पन्नांकिशोरींप्रमदाकृतिम् ॥७॥ नानाशिल्पकलाभिज्ञांकृष्णभोगानुरूपिणीम् ॥ प्रार्थितामपिकृष्णेनतत्रभोगपराङ्मुखीम् ॥८॥राधिकानुचरींतत्र
तत्सेवनपरायणाम्॥कृष्णादप्यधिकंप्रेमराधिकायांप्रकुर्वतीम् ॥९॥प्रीत्यानुदिवसंयत्नात्तयोःसङ्गमकारिणीम् ॥तत्सेवनसुखाह्लादभावेनातिसुनिर्वृताम्
॥१०॥ इत्यात्मानंविचिन्त्यैवतत्रसेवांसमाचरेत् ॥ ब्राह्मंमुहूर्त्तमारभ्ययावत्स्यात्तुमहानिशा ॥११॥ नारदउवाच॥हरेर्दैनन्दिनींलीलांश्रोतुमिच्छामि
तत्त्वतः॥लीलामजानतासेव्योमनसातुकथंहरिः ॥ १२ ॥ शिवउवाच ॥ नाहंजानामितांलीलांहरेर्नारदतत्त्वतः ॥ वृन्दादेवीमितोगच्छसातेलीलांप्रव
क्ष्यति ॥१३॥ अविदूरइतःस्थानात्केशीतीर्थसमीपतः ॥सखीसङ्घवृतासास्तेगोविन्दपरिचारिका ॥१४॥ सूतउवाच॥इत्युक्तस्तंपरिक्रम्यहृष्टोनत्वापुनः
पुनः ॥वृन्दाश्रमंजगामाथनारदोमुनिसत्तमः ॥१५॥ वृन्दापिनारदंदृष्ट्वाप्रणम्यचपुनःपुनः ॥उवाचचमुनिश्रेष्ठकथमत्रागतिस्तव ॥१६॥ नारदउवाच॥
त्वत्तोवेदितुमिच्छामिनैत्यकंचरितंहरेः ॥ तदादितोममब्रूहियदियोग्योऽस्मिशोभने ॥१७॥ वृन्दोवाच ॥ रहस्यमपिवक्ष्यामिकृष्णभक्तोऽसिनारद ॥
नप्रकाश्यंत्वयाप्येतद्गुह्याद्गुह्यतरंमहत् ॥ १८ ॥ मध्येवृन्दावनेरम्येपञ्चाशत्कुञ्जमण्डिते ॥ कल्पवृक्षनिकुञ्जेतुदिव्यरत्नमयेगृहे ॥ १९ ॥ निद्रितौ
तिष्ठतस्तल्पेनिबिडालिङ्गितौमिथः ॥ मदाज्ञाकारिभिःपश्चात्पक्षिभिर्बोधितावपि ॥ २० ॥ गाढालिङ्गनजानन्दमाप्तौतद्भङ्गकातरौ ॥ नमनःकुरुत
स्तल्पात्समुत्थातुंमनागपि ॥ २१ ॥ ततश्चसारिकासङ्घैःशुकाद्यैःपरितोमुहुः ॥ बोधितौविविधैर्वाक्यैःस्वतल्पादुदतिष्ठताम् ॥ २२ ॥ उपविष्टौ
ततोदृष्ट्वासख्यस्तल्पेमुदान्वितौ ॥ प्रविश्यसेवांकुर्वन्तितत्कालेह्युचितांतयोः ॥ २३ ॥ पुनश्चसारिकावाक्यैस्तावुत्थायस्वतल्पतः ॥ गच्छतःस्वस्व
भवनंभीत्युत्कण्ठाकुलौततः ॥ २४ ॥ प्रातश्चबोधितोमात्रातल्पादुत्थायसत्वरः ॥ कृत्वाकृष्णोदन्तकाष्ठंबलदेवसमन्वितः ॥ २५ ॥ मात्रानुमोदितो
यातिगोशालांसखिभिर्वृतः ॥ राधापिबोधिताविप्रवयस्याभिःस्वतल्पतः ॥ २६ ॥ उत्थायदन्तकाष्ठादिकृत्वाभ्यङ्गंसमाचरेत् ॥ स्नानवेदींततो
गत्वास्नापितासानिजालिभिः ॥ २७॥ भूषागृहेव्रजेत्तत्रवयस्याभूषयन्त्यपि ॥ भूषणैर्विविधैर्दिव्यैर्गन्धमाल्यानुलेपनैः ॥ २८ ॥ ततःसखीजनैस्तस्याः
श्वश्रूंसम्प्रार्थ्ययत्नतः ॥ पक्तुमाहूयतेस्वन्नंससखीसायशोदया ॥ २९ ॥ नारदउवाच ॥ कथमाहूयतेदेवीपाकार्थंतुयशोदया ॥ सतीषुपाककर्त्रीषु
रोहिणीप्रमुखास्वपि ॥ ३० ॥ वृन्दोवाच ॥ पूर्वंदुर्वाससादत्तोवरस्तस्यैमहामुने ॥ इतिकात्यायनीवक्त्राच्छ्रुतमासीन्मयापुरा ॥ ३१ ॥ त्वया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्पच्यतेदेवितदन्नंमदनुग्रहात् ॥ मिष्टंस्यादमृतस्पर्द्धिभोक्तुरायुष्करंतथा॥ ३२॥ इत्याह्वयतितांनित्यंयशोदापुत्रवत्सला॥आयुष्मान्मेभवेत्पुत्रःस्वादु
लोभात्तथासती ॥ ३३ ॥ श्रुत्वानुमोदिताहृष्टासापिनन्दालयंव्रजेत् ॥ ससखीप्रकरातत्रगत्वापाकंकरोतिच ॥ ३४ ॥ कृष्णोऽपिदुग्ध्वागाःकाश्चि
द्दोहयित्वाजनैःपराः ॥ आगच्छतिपितुर्वाक्यात्स्वगृहंसखिभिर्वृतः ॥ ३५ ॥ अभ्यङ्गमर्दनंकृत्वादासैःसंस्नापितोमुदा॥ धौतवस्त्रधरःस्रग्वीचन्दनाक्त
कलेवरः ॥ ३६ ॥ द्विफालबद्धचिकुरैर्ग्रीवाभालोपरिस्फुरन् ॥ चन्द्राकारस्फुरद्भालतिलकालकरञ्जितः ॥ ३७ ॥ कङ्कणाङ्गदकेयूररत्नमुद्रालसत्करः ॥
मुक्ताहारस्फुरद्वक्षामकराकृतिकुण्डलः ॥ ३८ ॥ मुहुराकारितोमात्राप्रविशेद्भोजनालयम् ॥ अवलम्ब्यकरंसख्युर्बलदेवमनुव्रतः ॥ ३९ ॥ भुङ्क्तेऽथ
विविधान्नानिमात्राचसखिभिर्वृतः ॥ हासयन्विविधैर्हास्यैःसखींस्तैर्हसतिस्वयम् ॥ ४० ॥ इत्थंभुक्त्वातथाचम्यदिव्यखट्वोपरिक्षणम् ॥ विश्रम्यसेवकै
र्दत्तताम्बूलंविभजन्नदन् ॥ ४१ ॥ गोपवेषधरःकृष्णोधेनुवृन्दपुरस्सरः ॥ व्रजवासिजनैःप्रीत्यासर्वैरनुगतःपथि ॥४२॥ पितरंमातरंनत्वानेत्रान्तेनापि
तंगणम् ॥ यथायोग्यंतथाचान्यान्विनिवर्त्यवनंव्रजेत् ॥ ४३ ॥ वनंप्रविश्यसखिभिःक्रीडयित्वाक्षणंततः ॥ विहारैर्विविधैस्तत्रवनेविक्रीडतेमुदा ॥
॥ ४४ ॥ वञ्चयित्वाततःसर्वान्द्वित्रैःप्रियसखैर्वृतः ॥ सङ्केतकंव्रजेद्धर्षात्प्रियासन्दर्शनोत्सुकः ॥ ४५ ॥ सापिकृष्णंवनंयातंदृष्ट्वास्वंगृहमागता ॥
सूर्यादिपूजाव्याजेनकुसुमाहृतयेतथा ॥ ४६ ॥ वञ्चयित्वागुरून्यातिप्रियसङ्गेच्छयावनम् ॥ इत्थंतौबहुयत्नेनमिलित्वाकाननेततः ॥ ४७ ॥
विहारैर्विविधैस्तत्रदिनंविक्रीडतोमुदा ॥ दोलायांचसमारूढौसखिभिर्दोलितौक्वचित् ॥ ४८ ॥ क्वापिवेणुंकरस्रस्तंप्रिययापह्नुतंहरिः ॥ अन्वेषयन्नुपा
लब्धोविप्रलब्धप्रियागणैः ॥ ४९॥ हसितैर्बहुधाताभिर्हासितस्तत्रतिष्ठति ॥ वसन्तवायुनाजुष्टंवनखण्डंमुदाक्वचित् ॥५० ॥ प्रविश्यचन्दनाम्भोभिः
कुङ्कुमादिजलैरपि ॥ निषिञ्चतोयंत्रमुक्तैस्तत्पङ्कैर्लिम्पतोमिथः ॥ ५१ ॥ सख्योऽप्येवंनिषिञ्चन्तितताश्चतौसिञ्चतःपुनः ॥ वसन्तवायुजुष्टेषुवन
षण्डेषुसर्वतः ॥ ५२ ॥ तत्तत्कालोचितैर्नानाविहारैःसगणौद्विज ॥ श्रान्तौक्वचिद्वृक्षमूलमासाद्यमुनिसत्तम ॥ ५३ ॥ उपविश्यासनेदिव्येमधुपानंप्रच
क्रतुः ॥ ततोमधुमदोन्मत्तौनिद्रयामीलितेक्षणौ ॥ ५४ ॥ मिथःपाणीसमालम्ब्यकामबाणवशंगतौ ॥ रिरंसूविशतःकुञ्जंस्खलद्वाङ्मनसौपथि ॥
॥ ५५ ॥ क्रीडतश्चततस्तत्रकरिणीयूथपौयथा ॥ सख्योऽपिमधुभिर्मत्तानिद्रयापीडितेक्षणाः ॥ ५६ ॥ अभितोमञ्जुकुञ्जेषुसर्वाएवापिशिश्यिरे ॥
पृथगेकेनवपुषाकृष्णोऽपियुगपद्विभुः ॥ ५७॥ सर्वासांसंनिधिंगच्छेत्प्रिययाप्रेरितोमुहुः ॥ रमयित्वाचताःसर्वाःकरिणीर्गजराडिव ॥ ५८ ॥ प्रियया
चतथाताभिःक्रीडार्थंचसरोव्रजेत् ॥ जलसेकैर्मिथस्तत्रक्रीडतःसगणौततः ॥ ५९ ॥ वासःस्रक्चन्दनैर्दिव्यैर्भूषणैरपिभूषितौ ॥ तत्रैवसरसस्तीरे

CC-0. In Public Domain. Digitization by eGangotri

दिव्यरत्नमयेगृहे ॥६०॥ प्रागेवफलमूलानिकल्पितानिमयामुने ॥ हरिस्तुप्रथमंभुक्त्वाकान्तयापरिवेष्टितः ॥ ६१ ॥ द्वित्राभिःसेवितोगच्छेच्छय्यां
पुष्पविनिर्मिताम्॥ताम्बूलैर्व्यजनैस्तत्रपादसंवाहनादिभिः ॥६२॥ सेव्यमानोहसंस्ताभिर्मोदतेप्रेयसींस्मरन् ॥ राधिकापिहरौसुप्तेसगणामुदितान्तरा॥
॥ ६३ ॥ अपितत्रगतप्राणातदुच्छिष्टंभुनक्तिच ॥ किञ्चिदेवततोभुक्त्वाव्रजेच्छय्यानिकेतनम् ॥ ६४ ॥ द्रष्टुंकान्तमुखाम्भोजंचकोरीवनिशाकरम् ॥
ताम्बूलचर्वितंतस्यतत्रत्याभिर्निवेदितम् ॥ ६५ ॥ ताम्बूलान्यपिचाश्नातिविभजन्तीप्रियालिषु ॥ कृष्णोऽपितासांशुश्रूषुःस्वच्छन्दभाषितंमिथः ॥
॥ ६६ ॥ प्राप्तनिद्रइवाभातिविनिद्रोऽपिपटावृतः ॥ ताश्चक्ष्वेलीक्षणंकृत्वाकुतश्चिदनुमानतः ॥ ६७ ॥ विदश्यरसनांदद्भिःपश्यन्त्योऽन्योन्य
माननम् ॥ विलीनाइवलज्जान्धौक्षणमूचुर्नकिञ्चन ॥ ६८ ॥ क्षणादेवततोवस्त्रंदूरीकृत्यतदङ्गतः ॥ साधुनिद्रांगतोऽसीतिहासयन्त्योहसन्ति
च ॥ ६९ ॥ एवंतैर्विविधैर्हास्यैरममाणौगणःसह ॥ अनुभूयक्षणंनिद्रासुखंचमुनिसत्तम ॥ ७० ॥ उपविश्यासनेदिव्येसगणौविस्तृतेमुदा ॥
पणीकृत्यमिथोहारचुम्बाश्लेषपरिच्छदान् ॥ ७१ ॥ अक्षैर्विक्रीडतःप्रेम्णानर्मालापपुरस्सरम् ॥ पराजितोऽपिप्रिययाजितोऽहमितिवैब्रुवन् ॥ ७२ ॥
हारादिग्रहणेतस्याःप्रवृत्तस्ताडयतेतया ॥ तयैवंताडितःकृष्णःकरेणास्यसरोरुहे ॥ ७३ ॥ विषण्णमानसोभूत्वागन्तुंप्रकुरुतेमतिम् ॥ जितोऽस्मि
चेत्त्वयादेविगृह्यतांयत्पणीकृतम् ॥ ७४ ॥ चुम्बनादिमयादत्तमित्युक्त्वासातथाचरेत ॥ कौटिल्यंतद्भ्रुवोर्द्रष्टुंश्रोतुंतद्भर्त्सनंवचः ॥ ७५ ॥ ततः
सारीशुकानांचश्रुत्वावागाहवंमिथः ॥ निर्गच्छतस्ततःस्थानाद्गन्तुकामौगृहंप्रति ॥ ७६ ॥ कृष्णःकान्तामनुज्ञाप्यगवामभिमुखंव्रजेत् ॥ सातुसूर्यगृहं
गच्छेत्सखीमण्डलसंयुता ॥ ७७ ॥ कियद्दूरंततोगत्वापरावृत्यहरिःपुनः ॥ विप्रवेषंसमास्थाययातिसूर्यगृहंप्रति ॥ ७८ ॥ सूर्यंप्रपूजयेत्तत्रप्रार्थितस्त
त्सखीजनैः ॥ तदैवकल्पितैर्वेदैःपरिहासविगर्भितैः ॥७९॥ ततस्ताज्ञापितंकान्तंपरिज्ञायविचक्षणाः ॥ आनन्दसागरेमग्नानविदुःस्वंनचापरम्॥८०॥
विहारैर्विविधैरेवंसार्द्धयामद्वयंमुने ॥ नीत्वागृहंव्रजेयुस्ताःसचकृष्णोगवांव्रजेत् ॥८१॥ सङ्गम्यस्वसखीन्कृष्णोगृहीत्वागाःसमन्ततः ॥ आगच्छति
व्रजंहर्षान्नादयन्मुरलींमुने ॥८२॥ ततोनन्दादयःसर्वेश्रुत्वावेणुरवंहरेः ॥ गोधूलिपटलव्याप्तंदृष्ट्वाचापिनभस्तलम् ॥ ८३ ॥ विसृज्यसर्वकर्माणिस्त्रियो
बालादयोऽपिच ॥ कृष्णस्याभिमुखंयान्तितद्दर्शनसमुत्सुकाः ॥ ८४ ॥ राजमार्गेव्रजद्वारियत्रसर्वेव्रजौकसः ॥ कृष्णोऽपितान्समागम्ययथावदनु
पूर्वशः ॥८५॥ दर्शनस्पर्शनैर्वाचास्मितपूर्वावलोकनैः ॥ गोपवृद्धान्नमस्कारैःकायिकैर्वाचिकैरपि ॥ ८६ ॥ अष्टाङ्गपातैःपितरौरोहिणीमपिनारद ॥
नेत्रान्तसूचितेनैवविनयेनप्रियांतथा ॥८७॥ एवंतैस्तद्यथायोग्यंव्रजौकोभिःप्रपूजितः ॥ गवालयेतथागाश्चसम्प्रवेश्यसमन्ततः॥८८॥पितृभ्यामर्थितो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यातिभ्रात्रासहनिजालयम् ॥ स्नात्वापीत्वातत्रकिञ्चिद्भुक्त्वामात्रानुमोदितः ॥ ८९ ॥ गवालयंपुनर्यातिदोग्धुकामोगवांपयः ॥ ताश्चदुग्ध्वादोह
यित्वापाययित्वाचकाञ्चन ॥ ९० ॥ पित्रासार्द्धंगृहंयातितत्रभावशतानुगः ॥ तत्रपित्रापितृव्यैश्चतत्पुत्रैश्चबलेनच ॥ ९१ ॥ भुनक्तिविविधान्नानि
चर्व्यचोष्यादिकानिच ॥ तन्मतिःप्रार्थनात्पूर्वंराधिकाचतदैवह ॥ ९२ ॥ प्रस्थापयेत्सखीद्वारापक्वान्नानितदालयम् ॥ श्लाघयंश्चहरिस्तानिभुक्त्वा
पित्रादिभिःसह ॥ ९३ ॥ सभागृहंव्रजेत्तैश्चजुष्टंबन्दिजनादिभिः ॥ पक्वान्नानिगृहीत्वायाःसख्यस्तत्रपुरागताः ॥ ९४ ॥ बहूनिचपुनस्तानि
प्रदत्तानियशोदया ॥ सख्यस्तत्रतयादत्तंकृष्णोच्छिष्टंनयन्तिच ॥ ९५ ॥ सर्वंताभिःसमानीयराधिकायैनिवेद्यते ॥ सापिभुक्त्वासखीवर्गयुतातदनु
पूर्वशः ॥ ९६ ॥ सखीभिर्मण्डितातिष्ठदभिसतुसमुद्यता ॥ प्रस्थाप्यतेमयाकाचिदितएवततःसखी ॥ ९७ ॥ तयाभिसारितासाथयमुनायाः
समीपतः ॥ कल्पवृक्षनिकुञ्जेऽस्मिन्दिव्यरत्नमयेगृहे ॥ ९८ ॥ सितकृष्णनिशायोग्यवेषायातिसखीवृता ॥ कृष्णोऽपिविविधंतत्रदृष्ट्वा
कौतूहलंततः ॥ ९९ ॥ कात्यायन्यामनोज्ञानिश्रुत्वासङ्गीतकान्यपि ॥ धनधान्यादिभिस्ताश्चप्रीणयित्वाविधानतः ॥ १०० ॥ जनैरारा
धितोमात्रायातिसख्यानिकेतनम् ॥ मातरिप्रस्थितायांचभोजयित्वाततोगृहम् ॥ १ ॥ सङ्केतकंकान्तयात्रसमागच्छेदलक्षितः ॥ मिलित्वा
तावुभावत्रक्रीडतोवनराजिषु ॥ २ ॥ विहारैर्विविधैरासलास्यहासपुरस्सरैः ॥ सार्द्धयामद्वयंनीत्वारात्रेरेवंविहारतः ॥ ३ ॥ सुषुप्सूविशतः
कुञ्जपक्षिणीभिरलक्षितौ ॥ एकान्तेकुसुमैःकॢप्तेकेलितल्पेमनोहरे ॥ ४ ॥ सुप्तावातिष्ठतस्तत्रसेव्यमानौनिजालिभिः ॥ इतितेसर्वमाख्यातंनैत्यकं
चरितंहरेः ॥ पापिनोऽपिविमुच्यन्तेश्रवणादस्यनारद ॥ ५ ॥ नारदउवाच ॥ धन्योऽस्म्यनुगृहीतोऽस्मित्वयादेविनसंशयः ॥ हरेर्दैनन्दिनी
लीलायतोमेऽद्यप्रकाशिता ॥ ६ ॥ सूतउवाच ॥ इत्युक्त्वातांपरिक्रम्यतयाचापिप्रपूजितः ॥ अन्तर्धानंगतोब्रह्मन्नारदोमुनिसत्तमः ॥ ७ ॥
मयाप्येतच्चानुपूर्व्यात्सर्वमेवप्रकीर्तितम् ॥ जपेन्नित्यंप्रयत्नेनमन्त्रयुग्ममनुत्तमम् ॥ ८ ॥ कृष्णवक्त्रादिदंलब्धंपुरारुद्रेणयत्नतः ॥ तेनोक्तंनारदा
यापिनारदेनममोदितम् ॥ ९ ॥ संस्कारांश्चविधायैवमयाप्येतत्तवोदितम् ॥ त्वयाप्येतद्गोपनीयंरहस्यंपरमाद्भुतम् ॥ ११० ॥ शौनकउवाच ॥
कृतकृत्योऽभवंसाक्षात्त्वत्प्रसादादहंगुरो ॥ रहस्यानांरहस्यंयत्त्वयामह्यंप्रकाशितम् ॥ ११ ॥ सूतउवाच ॥ धर्मानेतानुपातिष्ठञ्जल्पन्मन्त्र
महर्निशम् ॥ अचिरादेवतद्दास्यमवाप्स्यसिनसंशयः ॥ १२ ॥ मयापिगम्यतेब्रह्मन्नित्यमायतनंविभोः ॥ गुरोर्गुरोर्भानुजायाःकूलेगोपीश्वरस्यच ॥

---

१ 'एष लीलागीतपुरःसरैः' इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

॥ १३ ॥ इदंचरित्रंपरमंपवित्रंप्रोक्तंमहेशेनमहानुभावम् ॥ शृण्वन्तियेभक्तियुतामनुष्यास्तेयान्तिनित्यंपदमच्युतस्य ॥ १४ ॥ धन्यंयशस्यमायुष्य
मारोग्याभीष्टसिद्धिदम् ॥ स्वर्गापवर्गसम्पत्तिकारणंपापनाशनम् ॥ १५ ॥ भक्त्यापठन्तियेनित्यंमानवाविष्णुतत्पराः ॥ नतेषांपुनरावृत्तिर्विष्णु
लोकात्कथञ्चन ॥ ११६ ॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेश्रीवृन्दावनमाहात्म्येत्र्यशीतितमोऽध्यायः ॥ ८३ ॥ समाप्तंवृन्दावनमाहात्म्यम् ॥
ऋषयऊचुः ॥ सूतसूतमहाभागरोमहर्षणनन्दन ॥ कथारम्यात्वयाप्रोक्तालोकस्यानन्ददायिनी ॥ १ ॥ श्रीकृष्णस्यमहाभागचरितंमहदद्भुतम् ॥
श्रुतंसर्वंत्वयाप्रोक्तंनिर्वृतिस्तेनचाभवत् ॥ २ ॥ अहोश्रीकृष्णमाहात्म्यंभक्तानांगतिदायकम् ॥ यतस्तेनमहाभागनिर्वृतिंकोनचाप्नुयात् ॥ ३॥ अतः
पुनरपिश्रीमत्कृष्णस्यचरितंमहत् ॥ श्रोतुमिच्छामहेचान्यद्व्रतदानार्हणादिकम् ॥४॥ स्नानंवापिमहाभागयथायेनकृतंपुरा ॥ तत्सर्वंविस्तराद्ब्रूहि
यथानोनिर्वृतिर्भवेत् ॥ ५ ॥ सूतउवाच ॥ साधुपृष्टंद्विजश्रेष्ठालोकानांतारणंपरम् ॥ यूयंकृतार्थाःकृष्णस्यभक्त्यासम्पूर्णमानसाः ॥ ६ ॥
श्रीकृष्णचरितंपुण्यंसाधूनांहर्षदंपरम् ॥ प्रवक्ष्यामिद्विजश्रेष्ठामहदाख्यानमुत्तमम् ॥७॥ एकदानारदोलोकान्पर्यटन्भगवत्प्रियः ॥ मथुरायामम्ब
रीषंकृष्णाराधनतत्परम् ॥८॥ महाभागंव्रतपरंददर्शमुनिसत्तमः ॥ सआगतंमुनिवरंसत्कृत्यमुनिसत्तमः ॥ भवन्तइवपप्रच्छश्रद्धयाहृष्टमानसः ॥९॥
अम्बरीषउवाच ॥ यन्मुने[1]परमंब्रह्मवेदवादिभिरुच्यते ॥ सदेवःपुण्डरीकाक्षःस्वयंनारायणःपरः ॥ १० ॥ योऽमूर्तोमूर्तिमानीशोव्यक्तोऽव्यक्तः
सनातनः ॥ सर्वभूतमयोऽचिन्त्योध्यातव्यःसकथंहरिः ॥ ११ ॥ यस्मिन्सर्वमिदंविश्वमोतंप्रोतंप्रतिष्ठितम् ॥ अव्यक्तमेकंपरमंपरमात्मेतिविश्रुतम्॥
॥ १२ ॥ यतोजन्मा[2]दिजगतोयोनिर्मायस्वयम्भुवम् ॥ ददौतस्मैचनिगमानात्मन्येवव्यवस्थितान् ॥ १३ ॥ कथमाराध्यतेसोऽयंसमग्रपुरुषार्थदः॥
योगिनामपिदुर्गम्यस्तदेतत्कृपयावद ॥ १४ ॥ अनाराधितगोविन्दानविदन्तिहितोदयम् ॥ नतपोयज्ञदानानांलभतेफलमुत्तमम् ॥ १५ ॥
अनास्वादितगोविन्दपदाम्बुजरसश्रयः ॥ मनोरथपथातीतं[3]स्फीतंनाकलयेत्फलम् ॥ १६ ॥ हरेराराधनंहित्वादुरितौघनिवारणम् ॥ नान्यत्पश्यामि
जन्तूनांप्रायश्चित्तंपरंमुने ॥ १७ ॥ यद्भ्रूनर्तनवर्तिन्यःश्रूयन्तेसिद्धयोऽखिलाः ॥ कथमाराध्यतेसोऽयंकेशवःक्लेशनाशनः ॥ १८ ॥ उपास्यतेस
भगवान्कथंनारायणोनरैः ॥ प्रीतं[4]श्चसर्वमेतन्मेहितायजगतोवद ॥ १९ ॥ भक्तिप्रियोऽसौभगवान्कयाभक्त्याप्रसीदति ॥ कथंतस्मिन्भवेद्भक्तिः
सर्वैराराध्यतेकथम् ॥ २० ॥ वैष्णवोऽसिहरेस्तस्यप्रियोऽसिपरमार्थवित् ॥ तेनत्वामेवपृच्छामिब्रह्मन्ब्रह्मविदुत्तम ॥ २१ ॥ श्रोतारमथवक्तारं

१ 'यदेतत्परमं ब्रह्म' इ० पा० । २ 'यतोऽभयम्' इ० पा० । ३'कथमाकलयेत्फलम्' इ० पा० । ४'स्त्रीभिश्च' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रष्टारंपुरुषंहरेः ॥ प्रश्नःपुनातिकृष्णस्यतदङ्घ्रिसलिलंयथा ॥ २२ ॥ दुर्लभोमानुषोदेहोदेहिनांक्षणभङ्गुरः ॥ तत्रापिदुर्लभंमन्येवैकुण्ठप्रिय
दर्शनम् ॥ २३ ॥ संसारेऽस्मिन्क्षणार्धोऽपिसत्सङ्गःशेवधिर्नृणाम् ॥ यस्मादवाप्यतेसर्वंपुरुषार्थचतुष्टयम् ॥ २४ ॥ भगवन्भवतोयात्रास्वस्तये
सर्वदेहिनाम् ॥ बालानांतुयथापित्रोरुत्तमश्लोकवर्त्मनाम् ॥ २५ ॥ भूतानांदेवचरितंदुःखायचसुखायच ॥ सुखायैवहिसाधूनांत्वादृशामच्युतात्म
नाम् ॥ २६ ॥ भजन्तियेयथादेवान्देवाअपितथैवतान् ॥ छायेवकर्मसचिवाःसाधवोदीनवत्सलाः ॥२७॥ तस्मात्त्वंभगवन्मह्यंवैष्णवंधर्ममादिश ॥
यस्योपदेशदानेनलभतेवेदजंफलम् ॥ २८ ॥ नारदउवाच ॥ साधुपृष्टंमहीपालविष्णुभक्तिमतात्वया ॥ जानतापरमंधर्ममेकंमाधवसेवनम् ॥ २९ ॥
यस्मिन्नाराधितेविष्णौविश्वमाराधितंभवेत् ॥ तुष्टेचराचरंतुष्टंसर्वदेवमयेहरौ ॥ ३० ॥ यस्यस्मरणमात्रेणमहापातकसंहतिः ॥ तत्क्षणान्नाश
मायातिससेव्योहरिरेवहि ॥ ३१ ॥ कोनुराजन्निन्द्रियवान्मुकुन्दचरणाम्बुजम् ॥ नभजेत्सर्वतोमृत्युरुपास्यममृषिदैवतैः ॥ ३२ ॥ श्रुतोऽनुपठितो
ध्यातआदृतश्चानुमोदितः ॥ सद्यःपुनातिसद्धर्मोवीरोविश्वद्रुहोऽपिहि ॥ ३३ ॥ योऽयंकारणकार्यादिकारणस्यापिकारणम् ॥ अनन्यकारणं
योगीजगज्जीवोजगन्मयः ॥ ३४ ॥ अणुर्बृहत्कृशःस्थूलोनिर्गुणोगुणभृन्महान् ॥ अजोजन्मलयातीतोध्यातव्यःसहरिःसदा ॥ ३५ ॥ सम्य
गेतद्व्यवसितंभवतापुरुषर्षभ ॥ यत्पृच्छसेभागवतान्धर्मांस्त्वंविश्वभावनान् ॥ ३६ ॥ ॥ प्रसङ्गेनसतामात्ममनःश्रुतिरसायनाः ॥ भवन्ति
कीर्तनीयस्यकथाःकृष्णस्यनिर्मलाः ॥ ३७ ॥ भावसाध्योह्ययंदेवःस्वयंजानातितद्भवान् ॥ तथापिवक्ष्येजगतोहितायतवगौरवात् ॥ ३८ ॥
यदाहुःपरमंब्रह्मप्रधानपुरुषात्परम् ॥ यन्माययाततंसर्वंसर्वंयच्छतिसोऽच्युतः ॥ ३९ ॥ पुत्रान्कलत्रंदीर्घायूराज्यंस्वर्गापवर्गकम् ॥ सदद्यादीप्सितं
सर्वंभक्त्यासम्पूजितोऽजितः[1] ॥ ४० ॥ कर्मणामनसावाचातत्परायेहिमानवाः ॥ तेषांव्रतानिवक्ष्यामिप्रीतयेभूपसत्तम[2] ॥ ४१ ॥ अहिंसासत्यमस्तेयं
ब्रह्मचर्यमकल्पता[3] ॥ एतानिमानसान्याहुर्व्रतानिहरितुष्टये ॥ ४२ ॥ एकभक्तंतथानक्तमुपवासमयाचितम् ॥ इत्येवंकायिकंपुंसांव्रतमुक्तंनरेश्वर ॥
॥ ४३ ॥ वेदस्याध्ययनंविष्णोःकीर्तनंसत्यभाषणम् ॥ अपैशुन्यमिदंराजन्वाचिकंव्रतमुत्तमम् ॥ ४४ ॥ चक्रायुधस्यनामानिसदासर्वत्रकीर्तयेत् ॥
नाशौचंकीर्तनेतस्यसपवित्रकरोयतः ॥ ४५ ॥ वर्णाश्रमाचारवतापुरुषेणपरःपुमान् ॥ विष्णुराराध्यतेपन्थानान्यःसन्तोषकारणम् ॥ ४६ ॥
पतिप्रियहिताभिश्चमनोवाक्कायसंयमैः ॥ व्रतैराराध्यतेस्त्रीभिर्वासुदेवोदयानिधिः ॥ ४७ ॥ आगमोक्तेनमार्गेणस्त्रीशूद्रैरपिपूजनम् ॥ कर्तव्यंकृष्ण

१ 'अच्युतः' इ० पा० । २ 'तव भूपते' इ० पा० । ३ 'अकल्कता' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चन्द्रस्यद्विजातिवररूपिणः ॥ ४८ ॥ त्रयोवर्णास्तुवेदोक्तमार्गाराधनतत्पराः ॥ स्त्रीशूद्रादयएवस्युर्नाम्नाऽऽराधनतत्पराः ॥ ४९ ॥ नपूजनैर्नयजनैर्न व्रतैरपिमाधवः ॥ तुष्यतेकेवलंभक्तिप्रियोऽसौसमुदाहृतः ॥५०॥ स्त्रीणांपतिव्रतानांतुपतिरेवहिदैवतम् ॥ सतुपूज्योविष्णुभक्त्यामनोवाक्कायकर्मभिः॥ ॥५१॥ कर्तव्यंश्रद्धयाविष्णोश्चिन्तयित्वापतिंहृदि ॥ शूद्राणांचैवभवतिनाम्नावैदेवतार्चनम् ॥५२॥ सर्वेऽप्यागममार्गेणकुर्युर्वेदानुकारिणा ॥ स्त्रीणा मप्यधिकारोऽस्तिविष्णोराराधनादिषु॥५३॥पतिप्रियरतानांचश्रुतिरेषासनातनी॥स्वकुलोचितधर्मेणयद्यस्यविहितंव्रतम् ॥५४॥तत्तदेवाचरेद्यस्तुतेन तुष्यतिकेशवः ॥ हविषाग्नौजलेपुष्पैर्ध्यानेनहृदयेहरिम् ॥ ५५ ॥ यजन्तिसूरयोनित्यंजपेनरविमण्डले ॥ अहिंसाप्रथमंपुष्पंद्वितीयंकरण ग्रहः ॥ ५६ ॥ तृतीयकंभूतदयाचतुर्थंक्षान्तिरेवच ॥ शमस्तुपञ्चमंपुष्पंदमःषष्ठंचसप्तमम् ॥ ५७ ॥ ध्यानंसत्यंचाष्टमंचह्येतैस्तुष्यतिकेशवः ॥ एतैरेवाष्टभिःपुष्पैस्तुष्यत्येवार्चितोहरिः ॥ ५८ ॥ पुष्पान्तराणिसन्त्येवबाह्यानिमनुजोत्तम ॥ भक्त्याकृतानियैर्विष्णुःपूजितःपरितुष्यति ॥ ५९ ॥ वारुणंसलिलंपुष्पंसौम्यंघृतपयोदधि ॥ प्राजापत्यंतथान्नादिआग्नेयंधूपदीपकम् ॥ ६० ॥ फलपुष्पादिकंचैववानस्पत्यंतुपञ्चमम् ॥ पार्थिवं कुशमूलाद्यंवायव्यंगन्धचन्दनम् ॥६१॥ श्रद्धाख्यंविष्णुपुष्पंचवाद्यंविष्णुपदंस्मृतम्॥एभिस्तुपूजितःपुष्पैरपिविष्णुःप्रसीदति॥६२॥सूर्योऽग्निर्ब्राह्मणो गावोवैष्णवःखंमरुज्जलम् ॥ भूरात्मासर्वभूतानिपूजास्थानानिवाहरेः ॥६३॥ सूर्येतुमन्त्रजाप्येनहविषाग्नौयजेत्ततः ॥ आतिथ्येनतुविप्राग्र्येगोषुग्रास रसादिना ॥ ६४ ॥ वैष्णवेबन्धुसत्कृत्याहृदयेध्याननिष्ठया ॥ वायौमुख्यधियातोयेद्रव्यैस्तोयपुरस्कृतैः ॥ ६५ ॥ स्थण्डिलेमन्त्रहृदयैर्भोगै रात्मानमात्मनि ॥ क्षेत्रज्ञंसर्वभूतेषुसमत्वेनार्चयेद्विभुम् ॥ ६६ ॥ धिष्ण्येष्वेतेषुतद्रूपंशङ्खचक्रगदाम्बुजैः ॥ युक्तंचतुर्भुजंशान्तंध्यायन्नर्चेत्समा हितः ॥ ६७ ॥ ब्राह्मणैःपूजितैरेवपूजितोऽयंनसंशयः ॥ निर्भर्त्सितैश्चतैर्भूपभवेन्निर्भर्त्सितोविभुः ॥६८॥ निगमोधर्मशास्त्रंचयदाधारेप्रवर्तते ॥ विप्रा स्तेवैष्णवीमूर्तिःपावनीपरमामता ॥ ६९ ॥ सर्वंशुभंजगतिधर्मतएवलभ्यंधर्मोगतिर्निगमतोनृपधर्मशास्त्रात् ॥ नूनंतयोरपिगतिर्भुविभूमिदेवास्तै रर्चितैरिहजगत्पतिरर्चितःस्यात् ॥ ७० ॥ नयज्ञयोगैर्नतपोभिरन्यैर्नयोगयुक्त्यानसमर्चनेन ॥ तथाविभुस्तुष्यतिदेवदेवोयथामहीदैवततोषणेन ॥ ॥ ७१ ॥ ब्रह्मण्योब्रह्मविद्ब्रह्माब्रह्मवेदप्रवर्तकः ॥ ब्राह्मणैरेवतुष्येततोषितैर्ब्रह्मदैवतैः ॥ ७२ ॥ नरकेऽपिचिरंमग्नाःपूर्वजायेकुलद्वये ॥ तदैव

१ 'पुष्पमिन्द्रियनिग्रहः । सर्वभूतदया पुष्पं शान्तिपुष्पं विशिष्यते । शमः पुष्पं दमः पुष्पं ध्यानपुष्पं च सप्तमम् ॥ सत्यं चैवाष्टमं पुष्पमेतैस्तुष्यति केशवः ॥' इ० पा० । २ 'पुष्पान्तराणि सत्यं च वाद्यं विष्णुपदं स्मृतम्' इ० पा० । ३ 'एतैरेव तु तुष्येत यतो भक्तिप्रियोऽच्युतः' इ० पा० । ४ 'भूतात्मा' इ० पा० । ५ 'वर्षं तु विद्यया त्रय्या हविषाग्नौ जपेत्तु वम्' इ० पा० । ६ 'स द्विजो वैष्णवी मूर्तिः कीर्तिता पावनी नृणाम्' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यान्तितेस्वर्गंयदार्चतिसुतोहरिम् ॥ ७३ ॥ किंतेपांजीवितेनेहपशुवच्चेष्टितेनकिम् ॥ येषांनप्रवणंचित्तंवासुदेवेजगन्मये ॥७४॥ ध्यानंतस्यप्रवक्ष्यामि यन्नदृष्टंतुकेनचित् ॥ श्रूयतांभूपकैवल्यंकेवलंमलवर्जितम् ॥ ७५ ॥ यथादीपोनिवातस्थोनिश्चलोवायुवर्जितः ॥ प्रज्वलन्नाशयेत्सर्वमन्धकारं महामते ॥ ७६ ॥ तद्वद्दोषविहीनात्माभवत्येवनिरामयः ॥ निराशोनिश्चलोवीरोनमित्रंनरिपुस्तथा ॥ ७७ ॥ शोकहर्षौविषादश्चनलोभोमत्सरो भ्रमः ॥ सम्भ्रमालापमोहैश्चसुखदुःखैर्विमुच्यते ॥ ७८ ॥ विषयैश्चापिसर्वैश्चइन्द्रियाणांप्रमुच्यते ॥ तदासकेवलज्ञानीकैवल्यत्वंप्रजायते ॥ ७९ ॥ ज्वालाकर्मप्रसङ्गेनदीपस्तैलंप्रशोषयेत् ॥ वर्त्याधारेणराजेन्द्रनिर्द्वन्द्वोवायुवर्जितः ॥ ८० ॥ कज्जलंवमतेपश्चात्तैलस्यापिमहामते ॥ कृष्णा सन्दृश्यतेरेखादीपस्याग्रेमहामते ॥ ८१ ॥ स्वयमाकृष्यतत्तैलंतेजसानिर्मलोभवेत् ॥ कायेचान्तःस्थितस्तद्वत्कर्मतैलंप्रशोषयेत् ॥ ८२ ॥ विषयान्कज्जलंकृत्वाप्रत्यक्षान्सम्प्रदर्शयेत् ॥ ज्वालावन्निर्मलोभूत्वास्वयमेवप्रकाशयेत् ॥ ८३ ॥ क्रोधलोभादिभिःसर्वैर्वायुभिःपरिवर्जितः ॥ निःस्पृहोनिश्चलोभूत्वातेजश्चस्वयमुज्ज्वलेत् ॥ ८४ ॥ त्रैलोक्यंपश्यतेसर्वंस्वस्थानस्थंस्वतेजसा ॥ केवलज्ञानरूपोऽयंमयातेपरिकीर्तितः ॥ ८५ ॥ ध्यानंचैवप्रवक्ष्यामिद्विविधंतस्यचक्रिणः ॥ केवलज्ञानरूपेणदृश्यतेपरचक्षुषा ॥ ८६ ॥ योगयुक्तामहात्मानःपरमार्थपरायणाः ॥ यंनपश्यन्ति मुग्धास्तुसर्वज्ञंसर्वदर्शकम् ॥ ८७ ॥ हस्तपादविहीनश्चसर्वत्रपरिगच्छति ॥ सर्वंगृह्णातित्रैलोक्यंस्थावरंजङ्गमंपुनः ॥ ८८ ॥ नासामुखविहीन स्तुघ्रातिभक्षतिभूपते ॥ अकर्णःशृणुतेसर्वंसर्वसाक्षीजगत्पतिः ॥८९॥ अरूपोरूपसम्बद्धःपञ्चवर्गवशंगतः ॥ सर्वलोकस्ययःप्राणःपूज्यतेसचराचरैः ॥ ॥ ९० ॥ अजिह्वोवदतेसर्वंवेदशास्त्रानुगंतथा ॥ अत्वचःस्पर्शमेवापिसर्वेषामेवविन्दति ॥ ९१ ॥ सदानन्दोविविक्ताक्षएकरूपोनिराश्रयः ॥ निर्गुणोनिर्ममोव्यापीसगुणोनिर्मलोऽनघः ॥९२॥ अवश्यःसर्ववश्यात्मासर्वदःसर्ववित्तमः ॥तस्यमातानचैवास्तिसवैसर्वमयोविभुः॥९३॥ एवंसर्वमयं ध्यानंयश्चपश्यत्यनन्यधीः ॥ सयातिपरमंस्थानममृत्तममृतोपमम् ॥ ९४ ॥ द्वितीयंतुप्रवक्ष्यामितच्छृणुष्वमहामते ॥ मूर्त्ताकारंतुसाकारंनिराकारं

१ 'नित्यं मलविवर्जितम्' इ० पा० । २ 'वह्निरूपधृत' इ० पा० । ३ 'नृपोत्तम' इ० पा० । ४ इतः परं पुस्तकान्तरेषु पद्यपाठा अन्यविधा एव सन्ति, ते च श्लोकाः– "निराशो निश्चलो भूप वैरमैत्रीविवर्जितः ॥ शोकदुःखभयद्वेषलोभमोहभ्रमादिभिः ॥ १ ॥ विषयैरिन्द्रियाणां च कृष्णध्यायी विमुच्यते ॥ यथा ज्वालाप्रसङ्गेन दीपस्तैलं प्रशोषयेत् ॥ २ ॥ तथा ध्यानप्रसङ्गेन कर्मणोऽपि क्षयो भवेत् ॥ तद्ध्यानं द्विविधं तस्य प्रोक्तं शङ्करपूर्वकैः ॥३॥ निर्गुणं सगुणं वापि तत्राद्यं शृणु मानद ॥ केवलं ज्ञानदृष्ट्यासौ दृश्यते योगयुक्तिभिः ॥ ४ ॥ परमात्मपरै राजन्सततं ध्यानतत्परैः ॥ हस्तपादविहीनश्च सर्वं गृह्णाति गच्छति ॥ ५ ॥" इति । ५ 'त्वग्विहीनः स्पृशेत्सर्वं शीतोष्णादि नराधिप ॥' इ० पा० । ६ 'अदृश्यः सर्वदृश्यात्मा' इ० पा० ७ 'पाता' इ० पा० । ८ 'तस्य ध्यानं महात्मनः' इ० पा० । ९ 'निरालम्बम्' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निरामयम् ॥९५॥ ब्रह्माण्डंसर्वमतुलंवासितंयस्यवासनात ॥ सतस्माद्वासुदेवस्तुप्रोच्यतेनृपनन्दन ॥९६॥ वर्षमाणस्यमेघस्ययद्वासातस्यतद्भवेत् ॥
सूर्यतेजःप्रतीकाशंचतुर्बाहुंसुरेश्वरम्॥९७॥दक्षिणेशोभतेशङ्खोहेमरत्नविभूषितः॥कौमोदकीगदातस्यमहासुरविनाशिनी॥९८॥वामेचशोभतेवीरहस्ते
तस्यमहात्मनः ॥ महापद्मंसुगन्धाढ्यंतस्यदक्षिणहस्तगम् ॥ ९९ ॥ शोभमानंसदैवास्तेसायुधंकमलश्रियम् ॥ कम्बुग्रीवंसुवृत्तास्यंपद्मपत्रनिभेक्षणम्॥
॥ १०० ॥ राजमानंहृषीकेशंदशनैःकुन्दसंन्निभैः ॥ गुडाकेशस्ययस्यास्तेअधरोविद्रुमाकृतिः॥ १०१ ॥ शोभतेपुण्डरीकाक्षःकिरीटेनापिभास्वता॥
विशालेनापिरूपेणकेशवस्तुसुवक्षसा ॥ २ ॥ कौस्तुभेनाङ्कितेनैवराजमानोजनार्दनः ॥ सूर्यतेजःप्रतीकाशकुण्डलाभ्यांप्रभातिच ॥ ३ ॥ श्रीवत्सा
ङ्केनपुण्येनसर्वदाराजतेहरिः ॥ केयूरकङ्कणैर्हारैर्मौक्तिकैर्ऋक्षसन्निभैः ॥ ४ ॥ वपुषाभ्राजमानस्तुविजयोजयतांवरः ॥ भ्राजतेसोऽपिगोविन्दो
हेमवर्णेनवाससा॥५॥मुद्रिकाभिस्तुयुक्ताभिरङ्गुलीषुविराजते ॥ सर्वायुधैःसुसम्पूर्णैर्दिव्यैराभरणैर्हरिः ॥ ६ ॥ वैनतेयसमारूढोलोककर्त्ताजगत्पतिः॥
एवंयोध्यायतेनित्यमनन्यमनसानरः ॥ ७ ॥ मुच्यतेसर्वपापेभ्योविष्णुलोकंसगच्छति ॥ एतत्तेसर्वमाख्यातंध्यानभेदंजगत्पतेः॥ १०८ ॥
इतिश्रीपाद्मेमहापुराणेपातालखण्डेनारदाम्बरीषसंवादेवैशाखमाहात्म्येभगवद्ध्यानवर्णनंनामचतुरशीतितमोऽध्यायः ॥८४॥ अम्बरीषउवाच ॥ साधु
साधुमुनिश्रेष्ठलोकानुग्रहकारक ॥ विष्णोर्ध्यानंत्वयाप्रोक्तंसगुणंनिर्गुणंचयत् ॥१॥ अधुनालक्षणंब्रूहिभक्तेःसाधुकृपाकर॥ यादृशीक्रियतेयेनयथायत्र
यदातथा ॥ २ ॥ सूतउवाच ॥ इत्युक्तमाकर्ण्यनृपोत्तमस्यमुनिःप्रहृष्टोनिजगादभूपम् ॥ शृणुष्वराजन्निखिलाघहारिणींभक्तिंहरेस्तेप्रददामि
सम्यक् ॥३॥ अथभक्तिंप्रवक्ष्यामिविविधांपापनाशिनीम् ॥ विविधाभक्तिरुद्दिष्टामनोवाक्कायसम्भवा ॥४॥ लौकिकीवैदिकीचापिभवेदाध्यात्मिकी
तथा ॥ ध्यानधारणयाबुद्ध्यावेदानांस्मरणंहियत् ॥ ५ ॥ विष्णुप्रीतिकरीचैषामानसीभक्तिरुच्यते ॥ मन्त्रवेदसमुच्चारैरविश्रान्तविचिन्तनैः ॥ ६ ॥
जाप्यैश्चारण्यकैश्चैववाचिकीभक्तिरुच्यते ॥ व्रतोपवासनियमैःपञ्चेन्द्रियजयेनच ॥७॥ कायिकीसैवनिर्दिष्टाभक्तिःसर्वार्थसाधिनी ॥ भूषणैर्हेमरत्नाङ्कै

१ 'विधिपूर्वकैः' इ० पा० । २ 'महार्मणिविचित्रितः' इ० पा० । ३ 'पद्मं चक्रं जगत्पतेः' इ० पा० । ४ 'रत्नसन्निभैः' इ० पा० । ५ 'पद्मनाभाख्यः' इ० पा० । ६ "विलासी लक्ष्मलक्ष्मी च केशवः कौस्तुभान्वितः ॥ जनार्दनः सूर्यतेजःकुण्डलाभ्यां विराजितः ॥ १ ॥ केयूरहारकटककटिसूत्राङ्गुलीयकैः ॥ विराजते भ्राजमानो वपुषालङ्कृतेन च ॥ २ ॥ वाससा हेमवर्णेन प्रावृतो गरुडासनः॥ध्यातव्यः स्वगुणो राजन्भक्ताघौघहरो हरिः॥३॥ एवं ते ध्यानमुद्दिष्टं द्विविधं नृपसत्तम।यत्कृत्वा मुच्यते पापैर्मनोवाक्कायसंभवैः ॥४॥ यंयं चाभिलषेत्कामं तं तं प्राप्नोतिनिश्चितम् ॥ पूज्यते देववर्गैश्च विष्णुलोकं स गच्छति ॥ ५ ॥ "इ० पा० । ७ 'वेदमन्त्रनमस्कारैः' इ० पा० । ८ 'जितेन्द्रियविबोधितः' इ० पा० ; ९ अत्र पाठभेदश्लोकाः–"सिद्धिविधायिनी । पाद्यार्घ्याद्युपचारैश्च नृत्यवादित्रगीतकैः ॥ बलिभिर्जागरार्चाभिर्लौकिकी भक्तिरीरिता ॥ १ ॥ ऋग्यजुःसामजप्यैश्च संहिताध्ययनादिभिः ॥ हविर्होमक्रियाभिश्च या भक्तिः सा तु वैदिकी ॥ २ ॥ दर्शश्च पौर्णमासश्च विषुवादिषु यः पुनः ॥ यागः सङ्कीर्तितो विज्ञैर्वैदिकीभक्तिसाधकः ॥ ३ ॥"

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्चित्राभिर्वाग्भिरेवच ॥ ८ ॥ वासःप्रतिसरैःसूत्रैःपावकव्यजनोच्छ्रितैः ॥ नृत्यवादित्रगीतैश्चसर्वबल्युपहारकैः ॥ ९ ॥ भक्ष्यभोज्यान्नपानैश्चयापूजा क्रियतेनरैः॥नारायणंसमुद्दिश्यभक्तिःसालौकिकीमता ॥१०॥ कायिकीसैवनिर्दिष्टाभक्तिःसर्वार्थसाधिका ॥ ऋग्यजुःसामजाप्यानिसंहिताध्ययनानि च ॥ ११ ॥ क्रियन्तेविष्णुमुद्दिश्यवैदिकीभक्तिरुच्यत ॥ वेदमन्त्रहविर्यागैःक्रियायावैदिकीमता ॥ १२ ॥ दर्शेचपौर्णमास्यांचकर्त्तव्यंचाग्नि होत्रकम् ॥ प्राशनंदक्षिणादानंपुरोडाशंचरुक्रिया ॥१३॥ इष्टिर्धृतिःसोमपानंयाज्ञियंकर्मसर्वशः ॥ अग्निभूम्यनिलाकाशद्युतिशङ्करभास्करम् ॥१४॥ तमुद्दिश्यकृतंकर्मतत्सर्वंविष्णुदैवतम् ॥ आध्यात्मिकीतिविविधाब्रह्मभक्तिस्थितानृप ॥ १५ ॥ साङ्ख्याख्यांयोगसञ्ज्ञातांशृणुभूपयथोदिताम् ॥ चतुर्विंशतितत्त्वानिप्रधानादीनिसङ्ख्यया ॥ १६ ॥ अचेतनानिभोग्यानिपुरुषःपञ्चविंशकः ॥ चेतनःससमुद्दिष्टोकर्ताभोक्ताचकर्मणाम् ॥ १७ ॥ आत्मानित्योऽव्ययश्चैवअधिष्ठाताप्रयोजकः ॥ पुरुषोऽव्यक्तनित्यःस्यात्कारणंचमहेश्वरः ॥१८॥ तत्त्वसर्गोभावसर्गोभूतसर्गश्चतत्त्वतः॥सङ्ख्यायाः परिसङ्ख्यायाःप्रधानंचगुणात्मकम् ॥ १९ ॥ ज्ञात्वासाधर्म्यवैधर्म्यंप्रधानंचविधर्मिच ॥ कारणंब्रह्मणश्चैवकामित्वमिदमुच्यते ॥ २० ॥ प्रयोज्यत्वंप्रधानस्यवैधर्म्यमिदमुच्यते ॥ सर्वत्रकर्तृताब्रह्मपुरुषस्याप्यकर्तृता ॥ २१ ॥ अचेतनप्रधानेनसमत्वमिदमुच्यते ॥ तत्त्वान्तरंचतत्त्वानां कार्यकारणमेवच ॥ २२ ॥ प्रयोजनंप्रयोज्यत्वंज्ञात्वातत्त्वप्रसङ्ख्यया ॥ सङ्ख्यातमुच्यतेप्राज्ञैर्विजयाथविचिन्तकैः ॥ २३ ॥ इतिमत्वास्यसद्भावं तत्त्वंसङ्ख्यांचतत्त्वतः ॥ ब्रह्मतत्त्वाधिकंचापिभूतंतत्त्वंविदुर्बुधाः ॥ २४ ॥ साङ्ख्यैःकृताभक्तिरेषाभक्तिराध्यात्मिकीस्मृता ॥ योगजामपितेभूप शृणुभक्तिंवदाम्यहम् ॥ २५ ॥ प्राणायामपरोनित्यंध्यानवान्नियतेन्द्रियः ॥ भैक्ष्यभक्षव्रतीचापिसर्वप्रत्याहृतेन्द्रियः ॥ २६ ॥ धारणंहृदयेकृत्वा ध्यायमानोमहेश्वरम् ॥ हृत्पद्मकर्णिकासीनंपीतवस्त्रंसुलोचनम् ॥२७॥ पश्यन्नुद्द्योतितमुखंब्रह्मसूत्रकटीतटम् ॥ श्वेतवर्णंचतुर्बाहुंवरदाभयहस्तकम् ॥ ॥२८॥ योगजामानसीसिद्धिर्विष्णुभक्तिःपरास्मृता॥यएवंभक्तिमान्देवंविष्णुभक्तिःसउच्यते ॥२९॥ एवंभक्तिःसमुद्दिष्टाविविधानृपनन्दन॥सात्त्विकी राजसीचैवतामसीभेदतस्त्विमाः ॥ ३० ॥ नानाप्रकाराविज्ञेयाविष्णोरमिततेजसः ॥ यथाग्निःसुसमृद्धार्चिःकरोत्येधांसिभस्मसात ॥३१॥ पापानि

---

१ 'विश्वदैवतम्' इ० पा० । २ 'राजेन्द्र' इ० पा० । 'सचेतनो हि राजेन्द्र' इ० च पा० । ३ 'व्यक्तिस्थश्चेतनो नित्यः' 'कारणानां च कारणम्' इ० पा० । ४ 'च प्रसङ्ख्यातम्' इ० पा० । ५ 'पुस्तकान्तरे त्वन्यथा पाठः–"गुणात्मनः । कारणत्वं ब्रह्मणश्च साधर्म्यमिदमुच्यते ॥नानात्वं चात्र वैधर्म्यं प्रधानस्य विदुर्बुधाः ॥" इति । ६ 'सर्वतत्त्वार्थचिन्तकैः' इ० पा० । ७ 'ज्ञात्वा तत्त्वम्' इ० 'तत्त्वातत्त्वम्' इ० च पा० । ८ 'वक्ष्यामि भक्तिमाध्यात्मिकींशृणु' इ० पा० । ९ 'भक्तयो विविधाज्ञेयाः' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भगवद्भक्तिस्तथादहतितत्क्षणात् ॥३२॥ यावज्जनोनशृणुतेभुविविष्णुभक्तिसाक्षात्सुधारसमशेषरसैकसारम्॥ तावज्जरामरणजन्मशताभिघातदुःखानि
तानिलभतेबहुदेहजानि ॥ ३३॥ सङ्कीर्तितःकीर्तितएवनित्यंश्रुतानुभावोभगवाननन्तः ॥ समन्ततोऽघंविनिहन्तिमेघंवायुर्यथाभानुरिवान्धकारम् ॥
॥ ३४॥ नदानदेवार्चनयागतीर्थस्नानश्रुताचारतपःक्रियाभिः ॥ तथाविशुद्धिंलभतेऽन्तरात्मायथाहृदिस्थेभगवत्यनन्ते ॥३५ ॥कथाविशुद्धानरनाथ
तथ्यास्ताएवपथ्याहरिनाथपथ्याः॥सङ्कीर्तितायत्रपवित्रमूर्तेःसंश्रूयतेचश्रुतसाधुकीर्तिः ॥३६॥धन्योऽसिधीरधरणीधरधर्मधुर्यध्यानैकतानहृदयःपुरुषो
त्तमस्य ॥ यन्नैष्ठिकीमतिरसौतवसौभगश्रीःश्रीकृष्णनाथसुकृतश्रवणेप्रवृत्ता ॥ ३७ ॥ अनाराध्यहरिंभक्त्यावरदंविष्णुमव्ययम् ॥ कुतःश्रेयोभवेद्भूप
पुरुषस्यात्ममानिनः ॥ ३८ ॥ मायाजनिरमायोऽसौभक्त्याराजन्नमायया ॥ साध्यतेसाधुपुरुषःस्वयंजानातितद्भवान् ॥ ३९ ॥ नविद्यतेतेनृपधर्म
तत्त्वमज्ञातमेतद्विमलंपुनर्माम् ॥ त्वंपृच्छसेतीर्थपदप्रसङ्गात्कथारसंवैष्णवगौरवेण ॥ ४० ॥ नातःपरंपरमतोषविशेषपोषंपश्यामिपुण्यमुचितंच
परस्परेण ॥ सन्तःप्रसह्ययदनन्तगुणाननन्तश्रेयोनिधीनधिकभावभुजोभजन्ति ॥ ४१ ॥ ब्राह्मणाःसुरभीसत्यश्रद्धायागतपांसिच ॥ श्रुतिस्मृतिदया
दीक्षाशान्तयस्तनवोहरेः ॥ ४२ ॥ आदित्यश्चन्द्रमावायुर्भूमिरापोऽम्बरंदिशः ॥ ब्रह्माविष्णुश्चरुद्रश्चसर्वभूतमयोविभुः ॥ ४३ ॥ विश्वरूपःस्वयंचक्रे
जगदेतच्चराचरम् ॥ स्वयंब्राह्मणमाविश्यसदान्नमुपभुञ्जते ॥ ४४ ॥ ततस्तुतीर्थास्पदपादरेणून्धराधरात्मालयभूमिदेवान् ॥ परात्मनःपूजयपुण्य
लक्ष्मीसर्वस्वभूतानखिलात्मभूतान् ॥ ४५ ॥ ब्राह्मणंविष्णुबुद्ध्यायोविद्वांस्संसाधुपश्यति ॥ सएववैष्णवोयश्चस्वस्वकर्मैकनिष्ठितः ॥ ४६ ॥ किञ्चिदे
तन्मयाप्रोक्तंरहस्यंसमयोहिमे ॥ स्नातुंगन्तुंचगङ्गायांनकथावसरोऽधिकः ॥ ४७ ॥ प्राप्तोऽयंमाधवोमासःपुण्योमाधववल्लभः ॥ तस्यापिसप्तमीशुक्ला
गङ्गायामतिदुर्लभा ॥ ४८ ॥ वैशाखशुक्लसप्तम्यांजाह्नवीजह्नुनापुरा ॥ क्रोधात्पीतापुनस्त्यक्ताकर्णरन्ध्रात्तुदक्षिणात् ॥ ४९ ॥ तस्यांसमर्चयेद्देवीं
गङ्गांगगनमेखलाम् ॥ स्नात्वासम्यग्विधानेनसधन्यःसुकृतीनरः ॥ ५० ॥ तस्यांयस्तर्पयेद्देवान्पितॄन्मर्त्योयथाविधि ॥ साक्षात्पश्यतितंगङ्गास्नातकं
गतपापकम् ॥ ५१ ॥ नमाधवसमोमासोनगङ्गासदृशीनदी ॥ दुर्लभःखलुयोगोऽयंहरिभक्त्यैवलभ्यते ॥ ५२ ॥ विष्णुपादोदकोद्भूताब्रह्मलोकादुपा
गता ॥ त्रिभिःस्रोतोभिरश्रान्तायापुनातिजगत्त्रयम् ॥ ५३ ॥ स्वर्गारोहणनिःश्रेणीसततानन्दकारिणी ॥ अनेकदुरितोद्गारहारिणीदुर्गतारिणी ॥५४॥
श्रीमहेशजटाजूटवासिनीदुःखनाशिनी ॥ भजमानजनस्वान्तकान्तकेलिविनाशिनी ॥ ५५ ॥ सगरान्वयनिर्वाणकारिणीधर्मधारिणी ॥ त्रिमार्ग

१ 'सङ्कीर्त्यते यासुपवित्रकीर्तिर्विशुद्धमूर्तिर्निजदत्तभक्तिः' इ० पा० । २ ' सभाज्य सम्पूजय पुण्यलक्ष्मीसर्वस्वभूतान्' इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

चारिणीदेवीलोकालङ्कृतिकारिणी ॥ ५६ ॥ दर्शनस्पर्शनस्नानकीर्त्तनध्यानसेवनैः ॥ पुण्यानपुण्यान्पुरुषान्पावयन्तीसहस्रशः ॥ ५७ ॥ गङ्गागङ्गेति
गङ्गेतियैस्त्रिसन्ध्यमितीरितम् ॥ सुदूरस्थैश्चतत्पापंहन्तिजन्मत्रयार्जितम् ॥ ५८ ॥ योजनानांसहस्रेषुगङ्गांयःस्मरतेनरः ॥ अपिदुष्कृतकर्मासौलभते
परमांगतिम् ॥ ५९ ॥ वैशाखेशुक्लसप्तम्यांदुर्लभासाविशेषतः ॥ प्राप्यतेजगतीपालहरिविप्रप्रसादतः ॥६०॥ नमाधवसमोमासोनमाधवसमोविभुः ॥
पोतोहिदुरिताम्भोधौमज्जमानजनस्ययः ॥ ६१ ॥ दत्तंजप्तंहुतंस्नातंयद्भक्त्यामासिमाधवे ॥ तदक्षयंभवेद्भूपपुण्यंकोटिशताधिकम् ॥ ६२ ॥ यथा
देवेषुविश्वात्मादेवोनारायणोहरिः ॥ यथाजप्येषुगायत्रीसरितांजाह्नवीतथा ॥ ६३ ॥ यथोमासर्वनारीणांतपतांभास्करोयथा ॥ आरोग्यलाभो
लाभानांद्विपदांब्राह्मणोयथा ॥ ६४॥ परोपकारःपुण्यानांविद्यानांनिगमोयथा ॥ मन्त्राणांप्रणवोयद्वद्ध्यानानामात्मचिन्तनम् ॥ ६५ ॥ सत्यंस्वधर्म
वर्तित्वंतपसांचयथावरम् ॥ शौचानामर्थशौचंचदानानामभयंयथा ॥६६॥ गुणानांचयथालोभक्षयोमुख्योगुणःस्मृतः ॥ मासानांप्रवरोमासस्तथासौ
माधवोमतः ॥ ६७ ॥ तत्रयत्क्रियतेश्राद्धंयज्ञदानमुपोषणम् ॥ तपोऽध्ययनपूजादितदक्षयफलंस्मृतम् ॥ ६८ ॥ वैशाखान्तानिपापानिसूर्यान्तानि
तमांसिच ॥ परापकारपैशुन्यप्रान्तानिसुकृतानिच ॥ ६९॥ कार्त्तिकेमासियत्किञ्चित्तुलासंस्थेदिवाकरे ॥ स्नानंदानादिकंराजंस्तत्परार्धगुणंभवेत् ॥
॥ ७० ॥ तस्मात्सहस्रगुणितंमाघेमकरगेरवौ ॥ ततोऽपिशतसङ्ख्यातंवैशाखेमेषगेरवौ ॥ ७१ ॥ तेधन्यास्तेसुकृतिनोनरावैशाखमासिये ॥ प्रातः
स्नात्वाविधानेनपूजयन्तिमधुद्विषम् ॥ ७२ ॥ प्रातःस्नानंचवैशाखेयज्ञदानमुपोषणम् ॥ हविष्यंब्रह्मचर्यंचमहापातकनाशनम् ॥ ७३ ॥ पुनःकलियुगे
राजन्नेतद्द्रोष्यंभविष्यति ॥ अश्वमेधादिकंयस्मान्माहात्म्यंमाधवस्ययत् ॥ ७४ ॥ अश्वमेधमखःपुण्यःकलौनैवप्रवर्तते ॥ एषमाधवमासस्यहयमेध
समोविधिः ॥ ७५ ॥ अश्वमेधस्ययत्पुण्यंस्वर्गमोक्षफलप्रदम् ॥ नवेत्स्यन्तिकलौपापाजनादुरितबुद्धयः ॥ ७६ ॥ तस्मिन्भवैर्नरैःपापैर्गन्तव्यंनरका
र्णवे ॥ अतस्तुविरलस्तस्यप्रचारोयेननिर्मितः ॥ ७७ ॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेवैशाखमाहात्म्येपञ्चाशीतितमोऽध्यायः ॥ ८५ ॥
सूतउवाच ॥ इतितस्यवचःश्रुत्वानारदस्यमहात्मनः ॥ अम्बरीषश्चराजर्षिर्विस्मितोवाक्यमब्रवीत् ॥ १ ॥ अम्बरीषउवाच ॥ मार्गशीर्षादिकान्मासा
न्हित्वापुण्यान्महामुने ॥ सर्वमासाधिकंमासंवैशाखंकिंप्रशंससि ॥ २ ॥ सर्वेभ्योऽप्यधिकःकस्मान्माधवोमाधवप्रियः ॥ कोविधिस्तत्रकिंदानंकिं
तपःकाचदेवता ॥ ३ ॥ त्वत्पादाम्भोजरजसापावितस्यचमेमुने ॥ उपदेशप्रसादेनप्रसादंकर्तुमर्हसि ॥ ४ ॥ धर्मज्ञोधर्ममार्गाणामुद्धर्तासिमहामुने ॥

१ 'स्नानदानादि यत्किञ्चित्तदक्षयफलं स्मृतम्' इ० पा०। २ 'उपदेष्टासि वै मुने' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्वमेकोऽखिलतत्त्वार्थवेत्ताधर्मोपदेशकः ॥ ५ ॥ कर्तोपदेष्टामन्तावानुमन्तापिप्रयोजकः ॥ शास्त्रविद्भिर्मुनिवरस्मर्यन्तेसमभागिनः ॥ ६ ॥ व्रतसत्र
तपोदानैर्यत्फलंसमवाप्यते ॥ धर्मोपदेशनेनैवतत्सर्वमुपलभ्यते ॥ ७ ॥ तीर्थस्नानंतपोयज्ञकर्मयत्कुरुतेमुने ॥ ३पितत्फलभागीस्याद्यःप्रवर्तयिता
भवेत् ॥ ८ ॥ यद्यदाचरतिश्रेष्ठस्तत्तदेवेतरोजनः ॥ सयत्प्रमाणंकुरुतेलोकस्तदनुवर्तते ॥ ९ ॥ तदर्हतिभवान्धर्ममुपदेष्टुंतदद्भुतम् ॥ दुर्लभो
गुरुसम्बोधोदेशकालोपपत्तयः ॥ १० ॥ नकेचनतथाभावाश्चेतःशीतलयन्तिनः ॥ राज्यलाभादयोऽप्येतेयथातवसमागमः ॥ ११ ॥
सूतउवाच ॥अथमन्दमृदुस्मेरस्फुरदन्तप्रभानुगः॥ अम्बरीषंप्रत्युवाचनारदोमुनिसत्तमः ॥१२॥ नारदउवाच॥शृणुराजन्प्रवक्ष्यामिहितायजगतस्तव॥
विधिर्माधवमासस्ययच्छ्रुतोब्रह्मणःपुरा ॥ १३ ॥ दुर्लभंभारतेवर्षेजन्मतस्मान्मनुष्यता ॥ मानुष्येदुर्लभेलोकेस्वस्वधर्मप्रवर्तनम् ॥ १४ ॥
ततोऽपिभक्तिर्भूपालवासुदेवेऽतिदुर्लभा ॥ तत्रापिदुर्लभोमासोमाधवोमाधवप्रियः ॥१५॥ तमवाप्यततोमासंस्नानदानजपादिकम् ॥ कुर्वन्तिविधिना
येतुधन्यास्तेकृतिनोनराः ॥ १६ ॥ तेषांदर्शनमात्रेणपापिनोऽपिविकिल्बिषाः ॥ भवन्तिभगवद्भावभाविताधर्मकाङ्क्षिणः ॥ १७ ॥ माधवेमासियैः
स्नातंप्रातर्नियमसंयुतैः ॥ तेकोटिवर्षपर्यन्तंक्रीडन्तेनन्दनेवने ॥ १८ ॥ यथानवारिधिसमोलोकेकोऽपिजलाशयः ॥ तथामासोनवैशाखसदृशोमाधव
प्रियः ॥ १९ ॥ तावत्पापानितिष्ठन्तिमनुष्याणांकलेवरे ॥ यावत्किलमलध्वंसीमासोनायातिमाधवः ॥ २० ॥ अवशिष्टदिनान्येवपञ्चमासस्य
तस्यवै ॥ एकादशींसमारभ्यसर्वमाससमानिवै ॥ २१ ॥ वैशाखेपूजितोदेवोमाधवोमधुहातुयैः ॥ नानोपचारैराजेन्द्रतैःप्राप्तंजन्मनःफलम् ॥ २२ ॥
किंकिंनदुर्लभतरंप्राप्यतेमासिमाधवे ॥ स्नानेनपरमेशस्यपूजनेनयथाविधि ॥ २३ ॥ नदत्तंनहुतंजप्तंनतीर्थेमरणंकृतम् ॥ यैर्हिनारायणोनैवध्यातो
निखिलपापहा ॥ २४ ॥ तेषांजन्मनृणांलोकेज्ञातव्यंनिष्फलंनृप ॥ द्रव्येषुविद्यमानेषुकृपणोयोभवेन्नरः ॥ २५ ॥ अदत्त्वाम्रियतेयोहितस्यद्रव्यं
निरर्थकम् ॥ तीर्थस्नानादितपसासत्कुलेजन्मलभ्यते ॥ २६ ॥ नदानेनविनाभूपकिञ्चिदप्युपतिष्ठति ॥ वैशाखस्नानमाहात्म्यादपिपञ्चदिनात्मकात्॥
॥ २७ ॥ सत्कुलेप्राप्यतेजन्मवैभवंविविधंतथा ॥ सुपुत्रःसुकुलंभूपधनंधान्यंवरस्त्रियः ॥ २८ ॥ सुजन्ममरणंचापिसुभोगाःसुखमेवच ॥ सदादाने
ऽधिकाप्रीतिरौदार्यंधैर्यमुत्तमम् ॥ २९ ॥ प्रसादात्तस्यदेवस्यविष्णोश्चैवमहात्मनः ॥ नारायणस्यजायन्तेसिद्धयोभूपवाञ्छिताः ॥ ३० ॥ ऊर्जे
मासितपोमासिमाधवेमाधवप्रिये ॥ स्नात्वादामोदरंभक्त्यामाधवंमधुसूदनम् ॥ ३१ ॥ विशेषेणसमभ्यर्च्यदत्त्वादानानिशक्तितः ॥ ऐहिकंसुखमासाद्य

३ 'अपि यत्क्रियया लोकान्प्रवर्तयितुमेव तत्' इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नरोहरिपदंव्रजेत् ॥३२॥ अनेकजन्मार्जितपातकावलीविलीयतेमाधवमज्जनेन ॥ सूर्योदयेभूपयथातमिस्रंवचःस्वयम्भुरिदमादिशन्मे ॥३३॥ चकार
विष्णुर्विपुलप्रचारंमासस्यवैमाधवसंज्ञकस्य ॥ यमस्यगुप्तंवचसाविचिन्त्यमनुष्यलोकंगमितंचकार ॥ ३४ ॥ तस्मादस्मिन्समायातेमाधवेमासि
वैष्णवैः ॥ स्नात्वापुण्यजलेतीर्थेगङ्गायाःपावनेनृणाम् ॥ ३५ ॥ रेवायावामहाराजयामुनेशारदेऽथवा ॥ प्रातस्त्वनुदितेभानौविधानेननृपोत्तम ॥
॥ ३६ ॥ पूजयित्वाचदेवेशंमुकुन्दंमधुसूदनम् ॥ पुत्रपौत्रधनैःश्रेयोवाञ्छितानिसुखानिच ॥ ३७ ॥ अनुभूयतपस्त्वन्तेस्वर्गमक्षयमाप्नुयात् ॥ एवं
ज्ञात्वामहाभागमधुसूदनमर्चय ॥ ३८ ॥ स्नात्वासम्यग्विधानेनवैशाखेतुविशेषतः ॥ देवमाराध्यगोविन्दंनारायणमनामयम् ॥ ३९ ॥ प्राप्स्यसित्वं
सुखंपुत्रंधनानिचहरेःपदम् ॥ देवदेवंनमस्कृत्यमाधवंपापनाशनम् ॥ ४० ॥ प्रारभेतव्रतमिदंपौर्णमास्यांमधोर्नृप ॥ यमैश्चनियमैर्युक्तःशक्त्या
किञ्चित्प्रदायच ॥ ४१ ॥ हविष्यभुग्भूमिशायीब्रह्मचर्यव्रतेस्थितः ॥ कृच्छ्रादितपसाक्षामोध्यायन्नारायणंहृदि ॥ ४२ ॥ एवंप्राप्यच
वैशाखींदद्यान्मधुतिलादिकम् ॥भोजनंद्विजमुख्येभ्योभक्त्याधेनुंसदक्षिणाम्॥४३॥ अच्छिद्रंप्रार्थयेच्चापितस्यस्नानस्यभूसुरान्॥यथालक्ष्मीःप्रियाभूप
माधवस्यजगत्पतेः॥४४॥तथैवमाधवोमासोमधुसूदनवल्लभः॥ एवंविधियुतोमर्त्यःस्नात्वाद्वादशवत्सरम् ॥४५॥ उद्यापनंचरेच्छक्त्यामधुसूदनतुष्टये ॥
इदंमाधवमासस्यमाहात्म्यंकथितंतव ॥ ४६ ॥ यत्पुराब्रह्मणोवक्त्राच्छ्रुतमासीन्मयानृप ॥४७॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेवैशाखमासमाहा
त्म्येषडशीतितमोऽध्यायः ॥८६॥ सूतउवाच ॥ इतितस्यवचःश्रुत्वानारदस्यस्यभूपतिः ॥ प्रणम्यविस्मितःप्राहचिन्तयन्मनसाहरिम् ॥१॥ अम्बरीष
उवाच ॥ कथमेतद्विमुह्यामःस्वल्पायासेनवैमुने ॥ प्राप्यतेस्नानमात्रेणफलंचैवातिदुर्लभम् ॥ २ ॥ नारदउवाच ॥ सत्यमुक्तंत्वयाराजन्नल्पायासेनय
न्महत् ॥ फलंसम्प्राप्यतेतत्रश्रद्धत्स्वविधिभाषितम् ॥ ३ ॥ धर्मस्यगतयःसूक्ष्मादुर्ज्ञेयाहीश्वरैरपि ॥ मुह्यन्तेचात्रविद्वांसोऽचिन्त्यशक्तिर्हरेःकृतौ ॥४॥
विश्वामित्रादयोराजन्धर्माधिक्येनबाहुजाः॥ ब्राह्मण्यंसमुपायाताःसूक्ष्माधर्मगतिस्त्वतः॥५॥ अजामिलोऽपिभूपालदासीपतिरितिश्रुतः॥धर्मपत्नीपरि
त्यागीनित्यंपापपथिस्थितः॥६॥म्रियप्राणःसुतस्नेहात्प्रोच्यनारायणेतिच॥तद्ध्याननामग्रहणात्पदंलेभेसुदुर्लभम्॥७॥ अनिच्छयापिदहतिस्पृष्टोहुतव
होयथा॥तथादहतिगोविन्दनामव्याजादपीरितम्॥८॥कानीनस्यमुनेःपौत्राभ्रातृजायाभिगामिनः॥गोलकस्यचवैपाण्डोःपुण्डाःकुण्डाःस्वयंतथा॥९॥
तेपञ्चापिचभूपालपाण्डवाद्रौपदीरताः ॥तेषांचपुण्यश्लोकत्वंसूक्ष्माधर्मगतिस्ततः ॥ १० ॥ विचित्राणिचकर्माणिविचित्राभूतभावनाः ॥ विचित्राणि
चभूतानिविचित्राःकर्मशक्तयः ॥ ११ ॥ कदाचित्सुकृतंकर्मकूटस्थंयदवस्थितम् ॥ केनचित्कर्मणाभूपशुभेनपरिवर्धते ॥ १२ ॥ फलंददातिसुमह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्कस्मिन्नपिचजन्मनि ॥ सूक्ष्मोधर्मोऽतिगहनोमीयतेनयथातथा ॥१३॥ नैतस्यफलदानस्यश्रूयतेभूपनिश्चयः ॥ यत्किञ्चित्सुकृतंकर्मच्छन्नंपापान्तरै
रपि ॥ १४ ॥ तदागत्यकुतःक्वापिस्वंफलंचप्रयच्छति ॥ कृतस्यनेहनाशोऽस्तिपुण्यस्यदुरितस्यच ॥ १५ ॥ तथापिबहुभिःपुण्यैर्दुरितंयातिदारुणम्॥
यदुक्तंभवताराजन्नायासाधिक्यतोभवेत् ॥ १६ ॥ महत्पुण्यंचतत्रापिकारणंमेनिशामय ॥ स्वल्पायासमहायासौयद्यल्पत्वमहत्त्वयोः ॥१७॥ महापु
ण्यास्ततस्तेस्युःसन्ततंकर्षकादयः ॥ मन्त्रोच्चारंचसिंहादेरायासंबहुलंत्वतः ॥ १८ ॥ पञ्चगव्यंप्रशस्तंहिव्रताङ्गत्वेननोभवेत् ॥ इतिकर्तव्यबाहुल्यं
महत्त्वंचतदल्पता ॥१९॥ जलाग्न्यादिप्रवेशस्यप्रसज्येतव्रतान्तरात् ॥ इदमल्पंमहच्चैतदितिनैवनियामकम्॥२०॥ फलंयच्चोदितंशास्त्रेतदेवस्यान्मह
न्नृप ॥ यथाल्पनाशोमहतामहन्नाशस्तथाल्पतः ॥ २१ ॥ किंत्वल्पविस्फुलिङ्गेनतृणराशिःप्रदह्यते ॥ २२ ॥ हत्यायुतंपापसहस्रमुग्रंगुर्वङ्गनाकोटि
निषेवणंच ॥ स्तेयादिपापानिचकृष्णभक्तेरज्ञानजातानिलयंह्रियन्ते ॥ २३ ॥ विष्णुभक्तिमतावीरयत्किञ्चित्क्रियतेऽल्पकम् ॥ सुकृतंसाधुविदुषा
तदक्षयफलंलभेत् ॥ २४ ॥ सन्देहोनात्रकर्त्तव्योमाधवेमासिमाधवम् ॥ समाराध्यनरोभक्त्यातत्तद्वाञ्छितमाप्नुयात् ॥२५॥ अपत्यंद्रविणंरत्नंदारा
हर्म्यंहयागजाः ॥ सुखानिस्वर्गमोक्षौचनदूरेहरिभक्तितः ॥ २६ ॥ एवंशास्त्रोक्तविधिनास्वल्पेनापिनसंशयः ॥ पापस्यमहतोऽपिस्यात्क्षयोवृद्धिः
सुकर्मणः ॥ २७ ॥ फलाधिक्यंभवेद्भूपत्वाधिक्याद्भावकर्मणोः ॥ सूक्ष्माधर्मस्यविज्ञेयागतिस्तुविविधैरपि ॥ २८ ॥ प्रियोमाधवमासोऽयंमाधवस्य
महात्मनः ॥ एकोऽप्यनुष्ठितोलोकैःसमग्रेप्सितदायकः ॥ २९ ॥ पुण्येनगाङ्गेनजलेनकालेदेशेऽपियःस्नानपरोऽपिभूप ॥ आजन्मतोभावहतोऽपि
दातानशुद्धिमेतीतिमतंममैतत् ॥ ३० ॥ गङ्गादितीर्थेषुवसन्तिजीवादेवालयेपक्षिगणाश्चनित्यम् ॥ विनाशमायान्तिकृतोपवासाभावोज्झितानैवगतिं
लभन्ते ॥३१॥ भावंततोहृत्कमलेनिधायश्रीमाधवंमाधवमासिभक्त्या ॥ यजेतयःस्नानपरोविशुद्धःपुण्यंनशक्तावयमस्यवक्तुम्॥३२॥प्रज्वाल्यवह्निं
घृततैलसिक्तंप्रदक्षिणावर्तशिखंस्वकाले ॥ प्रविश्यदग्धःकिलभावदुष्टोनस्वर्गमाप्नोतिफलंनचान्यत् ॥ ३३ ॥ श्रद्धत्स्वभूपतस्मात्त्वंमाधवस्यफलं
प्रति ॥ स्वल्पंचापिशुभंकर्मविकर्मशतनाशनम् ॥३४॥ यथाहरेर्नामभयेनभूपनश्यन्तिसर्वेदुरितस्यवृन्दाः ॥ नूनंरवौमेषगतेविभातेस्नानेनतीर्थेचहरि
स्तवेन ॥ ३५ ॥ तेजसावैनतेयस्यपाप्मानःपन्नगाइव ॥ विद्रवन्तिचवैशाखस्नानेनोषसिनिश्चितम् ॥ ३६ ॥ गङ्गायांनर्मदायांवास्नात्वामेषगतेरवौ॥
पापप्रशमनस्तोत्रंयःपठेद्भक्तिभावतः ॥ ३७ ॥ एककालंद्विकालंवात्रिसन्ध्यमपिभूपते ॥ सयातिपरमंस्थानंसर्वपापविवर्जितः ॥ ३८ ॥
अम्बरीषमहापुण्यप्राप्तयेकुरुवीक्षणम् ॥ माधवेमासिवैस्नानंप्रातर्नियमसंस्थितः ॥ ३९ ॥ यदानर्त्तपुरेप्रोक्तंवसतांवर्षकोटिभिः ॥ तत्प्रातर्माधवेमासि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्नानेनैकेनलभ्यते ॥ ४० ॥ ईहार्थेयत्पुरावृत्तंतदाकर्णयभूपते ॥ भार्ययासहसंवादंदेवशर्मद्विजन्मनः ॥४१॥ रेवातीरेसुपुण्येचतीर्थेचामरकण्टके ॥ कौशिकस्यसुतोजातोदेवशर्माद्विजोत्तमः ॥४२ ॥ धनपुत्रविहीनस्तुबहुदुःखसमन्वितः ॥ दारिद्र्येणसुदुःखेनसर्वदैवप्रपीडितः ॥ ४३ ॥ पुत्रोपायंधनस्यापिदिवारात्रौप्रचिन्तयेत् ॥ एकदातुप्रियातस्यसुमनानामसुव्रता ॥ ४४ ॥ भर्तारंचिन्तयोपेतमधोमुखमलक्षयत् ॥ समालोक्यतदाकान्तंतमुवाचयशस्विनी ॥ ४५ ॥ दुःखजालैरसङ्ख्यैस्तुतवचित्तंप्रकर्शितम् ॥ व्यामोहेनप्रमूढोऽसित्यजचिन्तांमहामते ॥ ४६ ॥ ममदुःखंसमाचक्ष्वस्वस्थोभवसुखंव्रज ॥ नास्तिचिन्तासमंदुःखंकायशोषणमेवहि ॥ ४७ ॥ तांसन्त्यज्यप्रवर्तेतससुखेनप्रमोदते ॥ चिन्तायाःकारणंविप्रकथयस्वममप्रभो ॥ ४८ ॥ नारदउवाच ॥ प्रियावाक्यंससंश्रुत्यदेवशर्मामहामतिः ॥ उवाचवचनंप्रीतोदुःखितोऽपिसतीसखः ॥ ४९ ॥ देवशर्मोवाच ॥ यत्त्वयाचिन्तितंभद्रेकिञ्चिद्दुःखस्यकारणम् ॥ तत्सर्वंतुप्रवक्ष्यामिश्रुत्वाचैवावधार्यताम् ॥ ५० ॥ नजानेकेनपापेनधनहीनोऽस्मिसुव्रते ॥ तथापुत्रविहीनोऽस्मिएतद्दुःखस्यकारणम् ॥५१॥ सुमनोवाच॥श्रूयतामभिधास्यामिसर्वसन्देहनाशनम्॥स्वरूपमुपदेशस्यसर्वविज्ञानदर्शनम् ॥५२॥ सन्तोषएवपरमंपुण्यंसौख्यादिकारणम् ॥ असन्तोषःपरंपापमित्याहभगवान्हरिः ॥ ५३ ॥ लोभःपापस्यबीजोऽयंमोहोमूलंचतस्यवै ॥ असत्यंतस्यहिस्कन्धोमहाशाखासुविस्तरात् ॥ ५४ ॥ मदकौटिल्यपत्राणिकुबुद्ध्यापुष्पितःसदा ॥ अनृतंतस्यसौगन्ध्यमज्ञानंफलमेवच ॥ ५५ ॥ कुडयंपाषण्डचौराश्चक्रूराःकूटाश्चपापिनः ॥ पक्षिणोमोहवृक्षस्यमहाशाखासमाश्रिताः ॥ ५६ ॥ अज्ञानंसुफलंतस्यरसोधर्मफलस्यहि ॥ भावोदकेनसंवृद्धिस्तस्यश्रद्धाकृतुप्रिया ॥ ५७ ॥ अधर्मेसुरसस्तस्यउत्केदैर्मधुरायते ॥ तादृशैश्चफलैश्चैवसफलोलोभपादपः ॥ ५८ ॥ तस्यच्छायांसमाश्रित्ययोनरःपरिवर्तते ॥ फलानितस्यसोऽश्नातिस्वपक्वानिदिनेदिने ॥५९॥ फलानांचरसेनापिअधर्मेणतुपोषितः ॥ ससम्पुष्टोभवेन्मर्त्यःपतनायप्रयच्छति ॥ ६० ॥ तस्माच्चिन्तांपरित्यज्यस्वामिलोभंनकारयेत् ॥ धनपुत्रकलत्राणांचिन्तामेतांनकारयेत् ॥ ६१ ॥ योहिविद्वान्नचेत्कान्तमूर्खाणांपथमेवहि ॥ मृषाचिन्तयतेनित्यंदिवारात्रौविमोहितः ॥६२॥ शुभार्थंचप्रविन्दामिकथंपुत्रानहंलभे ॥ एवंचिन्तयतेनित्यंदिवारात्रौविमोहितः ॥६३॥ क्षणमेकंप्रपश्येत्सचिन्तामध्येमहत्सुखम् ॥ पुनश्चैतन्यमायातिमहादुःखेनपीडयते ॥ ६४ ॥ चिन्तामोहौपरित्यज्यअनुवर्तस्वतंद्विज ॥ संसारेनास्तिसम्बन्धः

१ इयमेव देवशर्मसुमनाकथा द्वितीये भूमिखण्डे यथानुपूर्वीकानुवर्णिता। सैवेह वैशाखमाहात्म्यप्रसङ्गेन पुनरनूदिता। अन्येषु पुस्तकेषु नास्ति। परमेकस्मिँल्लिखितपुस्तके समुपलब्धा। अतस्तथैवात्र स्थापितेति बोद्धव्यं सुधीभिः। नात्रानवधानदोषः शङ्कनीयः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

केनसार्धंमहामते ॥ ६५ ॥ मित्राणिबान्धवाःपुत्राःपितामातासुतास्तथा ॥ स्वसम्बन्धाभवन्त्येतेकलत्रादितथैवच ॥ ६६ ॥ देवशर्मोवाच ॥
सम्बन्धःकीदृशोभद्रेतंमेविस्तरतोवद ॥ येनजायन्तितेसर्वेधनपुत्रादिबान्धवाः ॥ ६७ ॥ सुमनोवाच ॥ भर्तःपञ्चविधाःपुत्राजायन्तेतान्वदाम्य
हम् ॥ न्यासापहारकंचैकमृणसम्बन्धिनंपरम् ॥ ६८ ॥ रिपुंलभ्यमुदासीनमितिकान्तभवन्तिते ॥ लक्षणानिप्रवक्ष्यामितेषामीशपृथक्पृथक् ॥
॥६९॥ पुत्रामित्रंप्रियाभार्यापितामाताचबान्धवाः ॥ स्वेनस्वेनहिजायन्तेसम्बन्धेनमहीतले ॥ ७० ॥ न्यासापहारभावेनयस्ययेनहृतंभुवि ॥ न्यास
स्वामीभवेत्पुत्रोगुणवान्रूपवान्भुवि ॥ ७१ ॥ येनह्यपहृतंन्यासंतस्यगेहेनसंशयः ॥ न्यासापहरणंदुःखंसदत्त्वादारुणंगतः ॥७२॥ न्यासस्वामीसुपुत्रो
ऽभून्न्यासापहारकस्यच ॥गुणवान्रूपवांश्चैवसर्वलक्षणसंयुतः॥७३॥भक्तिंचदर्शयेत्तस्यपुत्रोभूत्वादिनेदिने ॥ प्रियवाङ्मधुरोवाग्ग्मीबहुस्नेहंविदर्शयेत्॥
॥७४॥ स्वीयंद्रव्यंसमुद्ग्राह्यप्रीतिमुत्पाद्यचातुलाम् ॥ यथातेनप्रदत्तंतंन्यासापहरणात्परम्॥७५॥दुःखमेवंमहाभागदारुणंप्राणनाशनम् ॥ तादृशंतस्य
सोदद्यात्पुत्रोभूत्वामहागुणः ॥ ७६ ॥ अल्पायुष्कस्तथाभूत्वामरणंचोपगच्छति ॥ दुःखंदत्त्वाप्रयात्येवंप्रहृत्यैवंपुनःपुनः ॥ ७७ ॥ यदाहपुत्रपुत्रेति
प्रलापंहिकरोतियः ॥ तदाहास्यंकरोत्येपकस्तुपुत्रोहिकस्यच ॥ ७८ ॥ अनेनापहृतंन्यासंमदीयंपापचारिणा ॥ द्रव्यापहरणेनापिममप्राणागताः
किल ॥७९ ॥ दुःखेनमहताचैवअसह्येनचवैपुरा ॥ तदादुःखंमयादत्त्वाद्रव्यमुद्ग्राह्यमुत्तमम्॥८०॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेवैशाखमाहात्म्ये
सप्ताशीतितमोऽध्यायः ॥ ८७ ॥ सुमनोवाच ॥ ऋणसम्बन्धिनंपुत्रंप्रवक्ष्यामितवाग्रतः ॥ ऋणंयस्यगृहीत्वायःप्रयातिमरणंकिल ॥ १ ॥ अर्थदाता
सुतोभूत्वाभ्रातावाथपिताप्रिया ॥ मित्ररूपेणवर्तेतअन्तर्दुष्टःसदैवसः ॥२॥गुणंनैवप्रपश्येतसक्रोनिष्ठुराकृतिः ॥ जल्पतेनिष्ठुरंवाक्यंसदैवस्वजनेषुच॥
॥ ३ ॥ मिष्टंमिष्टंसमश्नातिभोगान्भुङ्क्तेचनित्यशः ॥ द्यूतकर्मरतोनित्यंचौरकर्मणिसस्पृहः ॥ ४ ॥ गृहाद्द्रव्यंचोरयतिवार्यमाणःसकुप्यति ॥
पितरंमातरंचैवकुत्सतेचदिनेदिने ॥ ५ ॥ द्रावकस्त्रासकश्चैवबहुनिष्ठुरजल्पकः ॥ एवमुद्ग्राह्यतद्द्रव्यंसुखेनपरितिष्ठति ॥ ६ ॥ जातकर्मादिभि
र्बाल्येद्रव्यंगृह्णातिदारुणम् ॥ पुनर्विवाहसंयोगान्नानाभेदैरनेकदा ॥ ७ ॥ एवंसंक्षीयतेद्रव्यमेवमेतद्वदत्यपि ॥ गृहंक्षेत्रादिकंसर्वंममैवहिनसंशयः ॥
॥ ८ ॥ पितरंमातरंचैवहिनस्त्येवदिनेदिने ॥ सुदण्डैर्मुसलैश्चैवकेशोत्पाटैश्चदारुणैः ॥ ९ ॥ मृतेतुतस्मिन्पितरिमातरिचातिनिष्ठुरः ॥ निःस्नेहो
निष्ठुरश्चैवजायतेनात्रसंशयः ॥ १० ॥ श्राद्धकार्याणिदानानिनकरोतिसदैवसः ॥ एवंविधाःप्रियाःपुत्राभवन्तिचमहीपते ॥ ११ ॥ रिपुंपुत्रंप्रवक्ष्यामि

१ रुत्वोत्वविधानमत्रार्षम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तवाग्रेद्विजसत्तम ॥ बाल्येवयसिसम्प्राप्तेपुत्रत्वेवर्ततेसदा ॥ १२ ॥ पितरंमातरंचैवक्रीडमानोहिताडयेत् ॥ ताडयित्वाप्रयात्येवंप्रहस्यैवंपुनःपुनः ॥
॥ १३ ॥ पुनरायातितंतत्रपितरंमातरंपुनः ॥ सक्रोधोवर्ततेनित्यंकुत्सतेचदिनेदिने ॥ १४ ॥ एवंसंवर्ततेनित्यंवैरकर्मणिसम्पदा ॥ पितरंताडयित्वा
चमातरंचततःपुनः ॥ १५ ॥ प्रयात्येवंसदुष्टात्मापूर्ववैरानुभावतः ॥ अथातःसम्प्रवक्ष्यामियथालभ्योभवेत्प्रियः ॥ १६ ॥ जातमात्रःप्रियंकुर्या
द्बाल्येक्रीडनताडनैः ॥ वयःप्राप्यप्रियंकुर्यान्मातापित्रोरनन्तरम् ॥ १७ ॥ भक्त्यासन्तोषयेन्नित्यंतावुभौपरितोषयेत् ॥ स्नेहेनवचसाचैवप्रिय
सम्भाषणेनच ॥ १८॥ मृतौगुरूसमाज्ञायस्नेहेनरुदतेपुनः ॥ श्राद्धकर्माणिसर्वाणिपिण्डदानादिकांक्रियाम् ॥ १९ ॥ करोत्येवसुदुःखार्तस्तेभ्योयात्रां
प्रयच्छति ॥ ऋणत्रयान्वितःस्नेहान्मोचयेद्यस्तुनिश्चितः ॥ २० ॥ यस्माल्लभ्यंभवेत्कान्तप्रयच्छतिनसंशयः ॥ पुत्रोभूत्वामहाप्राज्ञअनेनविधिना
किल ॥ २१ ॥ उदासीनंप्रवक्ष्यामितवाग्रेप्रियसाम्प्रतम् ॥ उदासीनेनभावेनसदैवपरिवर्तते ॥ २२ ॥ ददातिनैवगृह्णातिनचकुप्यतितुष्यति ॥
नोवाप्रयातिसन्त्यज्यउदासीनोद्विजोत्तम ॥ २३ ॥ भृत्याश्चापिसमाख्याताःपशवस्तुरगास्तथा ॥ गजामहिष्योदास्यश्चऋणसम्बन्धिनस्त्वमी ॥
॥ २४ ॥ गृहीतंमाययाकिञ्चिदावाभ्यांतुनकस्यहि ॥ न्यासमेवंनकस्यापिकृतंवैपूर्वजन्मनि ॥ २५ ॥ राधयामिनकस्यापिक्षणंकान्तशृणुष्व
हि ॥ नवैरमस्तिकेनापिपूर्वजन्मनिवैकृतम् ॥ २६ ॥ आबाल्येनतुविप्रेन्द्रनचत्यक्तोमयापतिः ॥ एवंज्ञात्वाशमंगच्छत्यजचिन्तामनर्थिकाम् ॥
॥ २७ ॥ हृतंनैवचकस्यापिनैवदत्तंत्वयापुनः ॥ कथंतेधनमायातिविस्मयंव्रजमाविभो ॥ २८ ॥ प्राप्तमेवहियत्रैवरक्षितुश्चनतिष्ठति ॥ एवंज्ञात्वा
शमंगच्छत्यजचिन्तामनर्थिकाम् ॥ २९ ॥ कस्यपुत्राःप्रियाभार्याकस्यस्वजनबान्धवाः ॥ कःकस्यनास्तिसंसारेनसम्बन्धोद्विजोत्तम ॥ ३० ॥
मायामोहेनसंमूढामानवाःपापचेतनाः ॥ इदंगृहमयंपुत्रइयंभार्याममैवहि ॥ ३१ ॥ अनृतंदृश्यतेकान्तसंसारस्यहिबन्धनम् ॥ ३२ ॥ इति
श्रीपाद्मेमहापुराणेपातालखण्डेवैशाखमाहात्म्येऽष्टाशीतितमोऽध्यायः ॥ ८८ ॥ नारदउवाच ॥ एवंसम्बोधितोविप्रोदेवशर्माद्विजोत्तमः ॥ पुनः
प्राहप्रियांभार्यांसहितांज्ञानवादिनीम् ॥ १ ॥ सत्यमुक्तंत्वयाभद्रेसर्वसन्देहनाशनम् ॥ तथाहिवंशमिच्छन्तिसाधवःसत्यपण्डिताः ॥ २ ॥
यथापुत्रस्यचिन्तामेनधनस्यतथाप्रिये ॥ येनकेनाप्युपायेनपुत्रमुत्पादयाम्यहम् ॥ ३ ॥ सुमनोवाच ॥ पुत्रेणलोकाञ्जयतिपुत्रस्तारयते
कुलम् ॥ सुपुत्रेणमहाभागपितामाताप्रजीवतः ॥ ४ ॥ एकःपुत्रोवरःकान्तबहुभिर्निर्गुणैस्तुकिम् ॥ एकस्तारयतेवंशमन्येसन्तापकारकाः ॥
॥ ५ ॥पूर्वमेवमयाप्रोक्तमन्येसम्बन्धभागिनः ॥ पुण्येनप्राप्यतेपुत्रःपुण्येनप्राप्यतेकुलम् ॥ ६ ॥ सुगर्भःप्राप्यतेपुण्यैर्दुर्मृत्युःपातकैस्तथा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुखानांनिचयंकान्तसत्यमेववदाम्यहम् ॥ ७ ॥ ब्रह्मचर्येणसत्येनतपसानित्यवर्तनैः ॥ दानेननियमैश्चापिक्षमाशौचेनवल्लभ ॥ ८ ॥ अहिंसया
चशक्त्यावाऽस्तेयेनापिप्रवतत ॥ एतैर्दशभिरङ्गैश्चधर्ममेवंप्रसूयते ॥ ९ ॥ सम्पूर्णोजायतेधर्मोह्यङ्गैर्गर्भोयथोदरे ॥ धर्मंसृजतिधर्मात्मात्रिवि
धेनैवकर्मणा ॥ १० ॥ तस्यधर्मःप्रसन्नात्मापुण्यसौख्यंप्रयच्छति ॥ यंयंचिन्तयतेप्राज्ञस्तंतंप्राप्नोतिदुर्लभम् ॥ ११ ॥ देवशर्मोवाच ॥ सर्वंदेवि
समाख्यातंधर्माख्यंज्ञानमुत्तमम् ॥ कथंपुत्रमहंविद्यांवैष्णवंगुणसंयुतम् ॥ १२ ॥ वदत्वंमेमहाभागेयदिजानासिसुव्रते ॥ धर्ममार्गस्त्वया
सर्वःपितुःप्राप्तःपुरानघे ॥ १३ ॥ ममैतद्विदितंकान्तेभवतीब्रह्मवादिनी ॥ च्यवनस्यप्रसादेनविष्णोस्तुष्टस्यतेपुरा ॥ १४ ॥ सुमनोवाच ॥
वसिष्ठंगच्छधर्मज्ञंतंप्रार्थयमहामुनिम् ॥ तस्मात्प्राप्स्यसितंपुत्रंधर्मज्ञंधर्मवत्सलम् ॥ १५ ॥ एवमुक्तेतयावाक्येदेवशर्माद्विजोत्तमः ॥
करिष्येतवकल्याणिमतमेवंनसंशयः ॥ १६ ॥ एवमुक्त्वाजगामासौदेवशर्माद्विजोत्तमः ॥ वसिष्ठंसर्ववेत्तारंदीप्यन्तंतपतांवरम् ॥ १७ ॥
गङ्गातीरेस्थितंपुण्यमासनस्थंद्विजोत्तमम् ॥ तेजोज्वालासमाकीर्णंद्वितीयमिवभास्करम् ॥ १८ ॥ राजमानंमहात्मानंब्रह्मसिंहंद्विजोत्तमम् ॥
भक्त्याप्रणम्यसमुनिंदण्डवत्तंपुनःपुनः ॥ १९ ॥ तमुवाचमहातेजाब्रह्मसूनुरकल्मषम् ॥ उपविशासनेपुण्येसुखेनसुमहामते ॥ २० नारद
उवाच ॥ उपविष्टःसयोगीन्द्रःपुनःप्राहतपोधनम् ॥ गृहेपुरुषतेवत्सदारभृत्येषुसर्वदा ॥ २१ ॥ क्षेममस्तिमहाभागपुण्यकर्मसुचाग्निषु॥
निरामयोऽसिचाङ्गेषुधर्मंपालयसेसदा ॥ २२ ॥ एवमुक्त्वामहाप्राज्ञःपुनःप्राहमहीसुरम् ॥ किंकरोमिप्रियंकामंसुप्रियंतेद्विजोत्तम ॥ २३ ॥
नारदउवाच ॥ एवंसम्भाष्यतंविप्रंविररामशुभंवचः ॥ ततोविप्रोमहाभागोवसिष्ठंमुनिपुङ्गवम् ॥ २४ ॥ सहोवाचमहात्मानंवसिष्ठंतपतांवरम् ॥ भग
वञ्छ्रूयतांवाक्यंयतःप्राप्तोद्विजोत्तम ॥ २५ ॥ दारिद्र्यंकेनभावेनपुत्रसौख्यंकथंनहि ॥ एषमेसंशयस्तातकस्मात्पापाद्वदस्वमे ॥ २६ ॥ महामोहेन
संमुग्धःप्रिययाबोधितोद्विज ॥ तयाहंप्रेषितस्तातत्तवपार्श्वंसमागतः ॥२७॥ तत्सर्वंहिसमाचक्ष्वसर्वसन्देहनाशकम् ॥ मुक्तिदाताभवस्वत्वंममसंसार
बन्धनात् ॥ २८ ॥ वसिष्ठउवाच ॥ पुत्रोमित्रंतथाभ्राताअन्येस्वजनबान्धवाः ॥ पञ्चभेदास्तुसम्बन्धाःपुरुषस्यभवन्तिते ॥ २९ ॥ तेतेसुमनसा
प्रोक्ताःपूर्वमेवतवाग्रतः ॥ ऋणसम्बन्धिनःसर्वेतेकुपुत्राद्विजोत्तम ॥ ३० ॥ पुत्रस्यलक्षणंपुण्यंतवाग्रेप्रवदाम्यहम् ॥ पुण्यप्रसक्तोयस्यात्मासत्यधर्म ॥ १११ ॥
रतःसदा ॥ ३१ ॥ शुद्धिमाञ्ज्ञानसम्पन्नस्तपस्वीवाग्विदांवरः ॥ सर्वकर्मसुसंवीतोवेदाध्ययनतत्परः ॥ ३२ ॥ सर्वशास्त्रप्रवेदीचदेवब्राह्मणपूजकः ॥
याज्ञिकःसर्वयज्ञानांदातात्यागीप्रियंवदः ॥ ३३ ॥ विष्णुध्यानपरोनित्यंशान्तोदान्तःसुहृत्सदा ॥ पितृमातृपरोनित्यंसर्वस्वजनवत्सलः ॥ ३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुलस्यतारकोविद्वान्स्वकुलस्यचपोषकः ॥ एवंगुणैस्तुसंयुक्तःसुपुत्रःसुखदायकः ॥ ३५ ॥ अन्येसम्बन्धयुक्ताश्चशोकसन्तापकारकाः ॥ उदासीनेन
किंकार्यंफलहीनेनतेऽनघ ॥३६॥ आयान्तियान्तितेसर्वेदुःखंदत्त्वासुदारुणम् ॥ पुत्ररूपेणतेसर्वेसंसारेद्विजसत्तम ॥ ३७ ॥ पूर्वजन्मकृतंकर्मयत्त्वया
परिपालितम् ॥ तत्सर्वंहिप्रवक्ष्यामिश्रूयतामद्भुतंपुनः ॥ ३८ ॥ भवाञ्छूद्रोमहाप्राज्ञपूर्वजन्मनिनान्यथा ॥ कृषिकर्त्ताज्ञानहीनोमहालोभेन
संयुतः ॥ ३९ ॥ एकभार्यःसदाद्वेषीबहुपुत्रोह्यदत्तवान् ॥ धर्मंनैवविजानासिसत्यंचपरिनिष्ठितम् ॥ ४० ॥ दानंनैवत्वयादत्तंशास्त्रंनैवपरिश्रुतम् ॥
कृतंनैवत्वयातीर्थंनचयात्रामहामते ॥ ४१ ॥ एवंकृतस्त्वयाविप्रकृषिमार्गःपुनःपुनः ॥ पशूनांपालनंपूर्वंगच्छंश्चैवद्विजोत्तम ॥ ४२ ॥ महिषीणांतथा
श्वीनांपालनंचपुनःपुनः ॥ एवंपूर्वंकृतंकर्मत्वयैवचद्विजोत्तम ॥ ४३ ॥ विपुलंतुधनंतद्वल्लोभेनपरिसञ्चितम् ॥ तस्यव्ययस्तुपुण्येननकृतस्तुत्वया
कदा ॥ ४४ ॥ पात्रेदानंनदत्तंहिदृष्ट्वावादुर्बलंचतत् ॥ कृषिंकृत्वानदत्तंतुभवताधनमेवहि ॥ ४५ ॥ गोमयंहित्विदंसर्वंपशूनांसञ्चयंचवै ॥ विक्रीयच
धनंविप्रसञ्चितंविपुलंत्वया ॥ ४६ ॥ तक्रंघृतंतथाक्षीरंविक्रीतंसततंदधि ॥ दुष्कालश्चिन्तितोविप्रमोहितोविष्णुमायया ॥ ४७ ॥ कृत्वा
महार्घमेवैतद्धनंब्राह्मणसत्तम ॥ निर्दयेनत्वयादानंनदत्तंतुतदाकिल ॥ ४८ ॥ देवानांपूजनंविप्रभवतानकृतंसदा ॥ पर्वाणिप्राप्यविप्रेभ्योद्रव्यं
नैवसमर्पितम् ॥ ४९ ॥ श्राद्धकालंचसम्प्राप्यश्रद्धयानकृतंत्वया ॥ भार्यावदतितेसाध्वीदिनमध्येसमागते ॥ ५० ॥ श्वशुरश्राद्धकालश्च
श्वश्र्वाश्चैवमहामते ॥ तच्छ्रुत्वातद्वचस्तेपांगृहंत्यक्त्वापलायसे ॥ ५१ ॥ धर्ममार्गोनदृष्टोहिश्रुतोनैवकदात्वया ॥ लोभोमातापिताभ्राता
लोभःस्वजनबान्धवाः ॥ ५२ ॥ पालितोलोभएवैकस्त्वयत्त्वाधर्मंसदैवहि ॥ तस्माद्दुःखीभवाञ्जातोदारिद्र्येणातिपीडितः ॥ ५३ ॥ दिनेदिने
महातृष्णाहृदयेतेप्रवर्त्तते ॥ यदायदागृहेद्रव्यंवृद्धिमायातितेसदा ॥ ५४ ॥ तृष्णयादह्यमानस्तुतदात्वंवह्निरूपया ॥ रात्रौवात्वंप्रसुप्तस्तु
लोभंचिन्तयसेऽधिकम् ॥ ५५ ॥ दिनंप्राप्यमहामोहैर्व्यापितोहिसदैवहि ॥ सहस्रंलक्षतःकोटिःकदावार्बुदमेवच ॥ ५६ ॥ भविष्यतिकदाखर्वो
निखर्वश्चाथमेगृहे ॥ एवंसहस्रंलक्षंचकोटिरर्बुदमेवच ॥ ५७ ॥ खर्वोनिखर्वःसञ्जातस्तृष्णानैवप्रगच्छति ॥ एवंकालंपरित्यज्यवृद्धिमायातिसर्वदा ॥
॥ ५८ ॥ नैवदत्तंहुतंविप्रभुक्तंनैवकदात्वया ॥ निश्चितंभूमिमध्येतत्क्षिप्तंपुत्रानजानते ॥ ५९ ॥ अन्यमेवमुपायंतुद्रव्यागमनकारणात् ॥
कुरुषेसर्वदाविप्रलोकान्पृच्छसिबुद्धिमान् ॥ ६० ॥ खनित्रमञ्जनंवादंधातुवादमतःपरम् ॥ पृच्छमानोभ्रमस्येकस्तृष्णयापरिमोहितः ॥ ६१ ॥
सर्वांश्चिन्तयसेनित्यंकल्पान्सिद्धिप्रदायकान् ॥ प्रवेशंचित्रवर्णानांचिन्तामणिंचपृच्छसि ॥ ६२ ॥ तृष्णानलेनदग्धोऽसिसुखंनैवप्रगच्छसि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तृष्णानलप्रदीप्तोऽसिहाहाभूतोऽप्रचेतनः ॥ ६३ ॥ एवंभूतोऽसिविप्रेन्द्रगतस्त्वंकालवश्यताम् ॥ दारपुत्रेषुतद्द्रव्यंपृच्छमानेषुवैत्वया ॥ ६४ ॥
कथितंनैवतद्दत्तंप्राणांस्त्यक्त्वागतोयमम् ॥ एवंसर्वंमयाख्यातंवृत्तान्तंतवपूर्वकम् ॥ ६५ ॥ अनेनकर्मणाविप्रदरिद्रोऽपिचनिर्धनः ॥ संसारे
यस्यसत्पुत्राभक्तिमन्तःसदैवहि ॥ ६६ ॥ सुशीलाज्ञानसम्पन्नाःसत्यधर्मरताःसदा ॥ सम्भवन्तिगृहेतस्ययस्यविष्णुःप्रसीदति ॥ ६७ ॥ धनं
धान्यंकलत्रंतुपुत्रपौत्रमनन्तकम् ॥ सभुङ्क्तेमर्त्यलोकेवैयस्यविष्णुःप्रसन्नवान् ॥६८ ॥ विनाविष्णोःप्रसादेनदाराःपुत्राभवन्तिन ॥ सुजन्मचकुलेविप्र
तद्विष्णोःपरमंपदम् ॥ ६९ ॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेवैशाखमाहात्म्येदेवशर्मोपाख्यानेएकोननवतितमोऽध्यायः ॥ ८९॥ देवशर्मोवाच॥
पूर्वजन्मकृतंपापंत्वयाख्यातंममैवतत् ॥ शूद्रत्वेनहिविप्रेन्द्रमयैवंधनमार्जितम् ॥ १ ॥ विप्रत्वंहिमयाप्राप्तंतत्कथंद्विजसत्तम ॥ तत्सर्वंकारणंब्रूहि
ज्ञानविज्ञानपण्डित ॥ २ ॥ दुर्लभंभारतेवर्षेजन्मतस्मान्मनुष्यता ॥ मानुष्येब्राह्मणत्वंचसुतरांसत्कुलोदितम् ॥ ३ ॥ तत्रापीदृग्विधाभार्यासर्वज्ञा
प्रियवादिनी ॥ सतीसर्वगुणोपेतादुर्लभासाकुतोऽभवत् ॥ ४ ॥ वसिष्ठउवाच ॥ यत्त्वयाचेष्टितंपूर्वंधर्मकर्मकृतंद्विज ॥ तदहंसम्प्रवक्ष्यामि
श्रूयतांयदिमन्यसे ॥ ५ ॥ ब्राह्मणोऽभूत्सुधर्मात्मासदाचारःसुपण्डितः ॥ विष्णुभक्तस्तुधर्मात्मानित्यंविष्णुपरायणः ॥ ६ ॥ स्नानार्थमपि
तीर्थानांभ्रमत्येकःसमेदिनीम् ॥ अटमानःसमायातस्तवगेहेमहामतिः ॥ ७ ॥ तस्यदर्शनमात्रेणसमुत्पन्नासुधीस्तव ॥ यतोधर्मगतेगेहेसतामागमनं
भवेत् ॥ ८ ॥ किंकिंनलभ्यतेविप्रविप्रवैष्णवसेवया ॥ दुर्लभंयच्चलोकेस्यान्मोक्षस्थानमपिस्थिरम् ॥९॥याचितंस्थानमेकंवैवासार्थंतेनसत्तम ॥ तवैव
भार्ययादत्तंत्वयाचसहपुत्रकैः ॥ १० ॥ एयतामेयतांब्रह्मन्सुखेनचगृहेमम ॥ वैष्णवंब्राह्मणंपुण्यमित्युवाचपुनःपुनः ॥११॥ सुखेनस्थीयतामत्रवेश्मेदं
तवसुव्रत ॥ अद्यधन्योऽस्म्यहंपुण्योऽस्म्यद्यतीर्थमहंगतः ॥१२ ॥ अद्यतीर्थफलंप्राप्तंमयातेविप्रदर्शनात् ॥ गवांस्थानंपरंपुण्यंवासस्थानंप्रदर्शितम् ॥
॥ १३ ॥ अङ्गसंवाहनंसम्यक्पादौचैवप्रमर्दितौ ॥ क्षालितौचपुनस्तोयैःस्नातःपादोदकेनहि ॥ १४ ॥ सद्योघृतंदधिक्षीरमन्यमन्यंप्रदत्तवान् ॥ ब्राह्म
णायतदातस्मैत्वंतथाऽहृष्टनोदितः ॥ १५ ॥ एवंसन्तोषितोविप्रस्त्वयैवसहभार्यया ॥ पुत्रैःसार्धंमहाभागोवैष्णवोज्ञानपण्डितः ॥ १६ ॥ अथप्रभाते
विमलेस्नानार्थंमासिमाधवे ॥ गङ्गांतुगच्छतातेनतुष्टेनदययाकिल ॥ १७ ॥ वैशाखस्नानमाहात्म्यमुपदिष्टंतवाग्रतः ॥कारितस्तुयथान्यायंसभार्या
तनयोभवान् ॥ १८ ॥ यथानवारिधिसमोलोकेकोऽपिजलाशयः ॥ तथामासोनवैशाखसदृशोमाधवप्रियः ॥ १९ ॥ तावत्पापानितिष्ठन्ति
निष्प्रत्यूहंकलेवरे ॥ यावत्किलमलध्वंसीमासोनैतिसमाधवः ॥२०॥ तस्यवाक्यंसमाकर्ण्यवैशाखेसेवनंकृतम् ॥ तुष्टेनमनसाविप्रपूजितोमधुसूदनः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २१ ॥ अवशिष्टदिनान्येवपञ्चमासस्यतस्यवै ॥ एकादशींसमारभ्यस्नानंचविधिवत्कृतम् ॥ २२ ॥ ब्राह्मणस्यप्रसङ्गेनरेवायांतुदिनेत्वया ॥
प्रातःस्नानंकृतंविप्रवैशाखेमासितावता ॥ २३ ॥ पूजितोदेवदेवेशोमधुहापरमेश्वरः ॥ नैवात्तःसकलोमासःस्नानार्थंतवपूर्वतः ॥२४॥ एवंस्नानंत्वया
चीर्णमपिपञ्चदिनात्मकम् ॥ तेनपुण्येनसङ्गत्याब्राह्मणस्यविशेषतः ॥ २५ ॥ गोविन्दस्यप्रसादेनत्वंतुब्राह्मणतांगतः ॥ त्वयातन्मासयोगेनप्राप्त
मेतन्महत्कुलम् ॥ २६ ॥ दुर्लभंभूमिदेवानांसत्यधर्मसमन्वितम् ॥ भार्यापिसुसतीप्राप्तासाध्वीसर्वगुणान्विता ॥ २७ ॥ च्यवनस्यगृहोत्पन्नासर्वज्ञा
ब्रह्मवादिनी ॥ रूपमेवपरंस्त्रीणांभूषणंचमहामुने ॥ २८ ॥ शीलमेवद्वितीयंचतृतीयंसत्यमेवच ॥ सदार्यत्वंचतुर्थंतुपञ्चमंपुण्यमुत्तमम् ॥२९॥ मधुरत्वं
तथाषष्ठंशुद्धत्वंसप्तमंमहत् ॥ बाह्यान्तःसततंस्त्रीणांसर्वाभरणसत्तमम् ॥ ३० ॥ अष्टमंतुपतौभावःशुश्रूषानवमंकिल ॥ सहिष्णुताचदशमंरतिरेका
दशंतथा ॥ ३१ ॥ पतिव्रतत्वंविप्रेन्द्रद्वादशंयोषितांस्मृतम् ॥ एतैःसम्भूषिताभार्यासाध्वीतेब्रह्मवादिनी ॥ ३२ ॥ वैशाखस्नानयोगेनलब्धापुण्येन
सादरम् ॥ किंकिंनदुर्लभतरंप्राप्यतेमासिमाधवे ॥ ३३ ॥ स्नानेनपरमेशस्यपूजनेनयथाविधि ॥ अथमोहप्रमुग्धोऽसितृष्णयाव्यापितंमनः ॥
॥ ३४ ॥ पूर्वजन्मनितेविप्रद्रव्यमेवप्रसञ्चितम् ॥ नदत्तंब्राह्मणेभ्योहिदीनेष्वन्येषुवैत्वया ॥ ३५ ॥ नबन्धुवर्गेनोपुत्रदारेषुचकथञ्चन ॥ म्रियमाणेन
भवतालोभएवहिचिन्तितः ॥ ३६ ॥ नदत्तंनहुतंजप्तंनतीर्थेमरणंकृतम् ॥ नहिनारायणोदेवोध्यातोवाखिलपापहा ॥ ३७ ॥ द्रव्येषुविद्यमानेषुकृपणो
जायतेनरः ॥ अदत्त्वाम्रियतेयस्तुततोदुःखतरंनुकिम् ॥ ३८ ॥ तीर्थस्नानादितपसाकुलेजन्मैवलभ्यते ॥ नोदानेनविनाविप्रकिञ्चिदेवोपतिष्ठति ॥
॥ ३९ ॥ तस्यपापस्यभावेनदरिद्रत्वमुपागतम् ॥ अपुत्रवान्भवाञ्जातःसततंदुःखपीडितः ॥ ४० ॥ वैशाखस्नानमाहात्म्यादपिपञ्चदिनात्मकात् ॥
तदैवहरिपूजायाःसङ्गत्याब्राह्मणस्यच ॥४१॥ लब्धंजन्मकुलेविप्रविप्रत्वमपिदुर्लभम् ॥ सुपुत्रश्चकुलंविप्रधनंधान्यंवरस्त्रियः ॥४२॥ सुजन्ममरणंचैव
सुभोगःसुखमेवच ॥ सदादानेऽधिकाबुद्धिरौदार्यंधैर्यमुत्तमम् ॥ ४३ ॥ प्रसादात्तस्यदेवस्यविष्णोश्चैवमहात्मनः ॥ नारायणस्यजायन्तेसिद्धयो
विप्रवाञ्छिताः ॥४४॥ ऊर्जेमासितपोमासिमाधवेमाधवप्रिये ॥ स्नात्वादामोदरंभक्त्यामाधवंमधुसूदनम् ॥४५॥ विशेषेणसमभ्यर्च्यदत्त्वादानानि
भक्तितः ॥ ऐहिकंसुखमासाद्यजनोयातिततोहरिम् ॥ ४६ ॥ अनेकजन्मार्जितपातकावलीविलीयतेमाधवमज्जनेन ॥ सूर्योदयेविप्रयथातमिस्रा
वचःस्वयम्भूरिदमादिदेश ॥४७॥ चकारविष्णुर्विमलंविचारंमासंविधिंमाधवमेकमादौ ॥ यमस्यगुप्तंमनसाविचिन्त्यमनुष्यलोकेर्गमितुंचनाके ॥४८॥
तस्मादस्मिन्समायातेमाधवेमासिमाधवे ॥ स्नात्वापुण्यजलेतीर्थेरवावनुदितेऽधुना ॥ ४९ ॥ पूजयित्वाविधानेनमुकुन्दंमधुसूदनम् ॥ पुत्रपौत्रधनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रेयोवाञ्छितानिसुखानिच ॥ ९० ॥ अनुभूयततस्त्वन्तेस्वर्गमक्षयमाप्स्यसि ॥ पूर्वजन्मकृतंसर्वंयत्त्वयापरिचेष्टितम् ॥ ९१ ॥ तन्मयाकथितं
विप्रतवाग्रेपरिचेष्टितम् ॥ एवंज्ञात्वामहाभागवैशाखेचविशेषतः ॥ ९२ ॥ स्नात्वासम्यग्विधानेनमधुसूदनमर्चय ॥ देवमाराध्यगोविन्दंनारायण
मनामयम् ॥ ९३ ॥ प्राप्स्यसित्वंसुखंपुत्रधनानिहरिमव्ययम् ॥ ९४ ॥ नारदउवाच ॥ ब्रह्मात्मजेनापिमहानुभावःसविप्रवर्यःपरिबोधितो
हि ॥ हर्षेणयुक्तःसमहानुभावोभक्त्यावसिष्ठंप्रणिपत्यतत्र ॥ ९५ ॥ आमन्त्र्यविप्रंसजगामगेहंतांप्राहभार्यांसुमनांमहर्षिः ॥ सर्वंहिवृत्तंमम
पूर्वचेष्टितंतेनैवविप्रेणतवप्रसादात् ॥ ९६ ॥ भद्रेवसिष्ठेनविकाशनीतमद्यैवमोहःपरिनाशितोमे ॥ आराधयिष्येमधुसूदनंतुश्रीमाधवेमासिनिमज्ज्य
भक्त्या ॥ ९७ ॥ नारदउवाच ॥ आकर्ण्यवाक्यंपरमंपवित्रंसुमङ्गलंमङ्गलहेतुमुच्चैः ॥ हर्षेणयुक्तातमुवाचकान्तंधन्योऽसिविप्रेणविबोधितस्त्वम् ॥
॥ ९८ ॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेवैशाखमाहात्म्येदेवशर्मोपाख्यानेनवतितमोऽध्यायः ॥ ९० ॥ नारदउवाच ॥ देवशर्मामहा
प्राज्ञःसमंसुमनयातया ॥ तीर्थेकनखलेपुण्येगङ्गायामतिविश्रुते ॥ १ ॥ वैशाखेविधिनास्नानंचक्रेमेषस्थितेरवौ ॥ पूजयामासविधिव
न्मधुसूदनमच्युतम् ॥ २ ॥ यमैःसनियमैर्युक्तःशक्त्याकिञ्चिददौततः ॥ हविष्यभुग्भूमिशायीब्रह्मचर्यव्रतस्थितः ॥ ३ ॥ कृच्छ्रादितपसा
क्षामोध्यायन्नारायणंहृदि ॥ तत्रप्राप्यसवैशाखींदत्त्वामधुतिलादिकम् ॥ ४ ॥ विप्रेभ्योभोजनंदत्त्वाभक्त्याधेनुंसदक्षिणाम् ॥ अच्छिद्रंप्रार्थया
मासतत्रस्नानस्यभूसुरान् ॥ ५ ॥ सापिसाध्वीचसुश्रोणीपतिभक्तिपरायणा ॥ पतिंशुश्रूषतेनित्यंस्नात्वासम्पूज्यकेशवम् ॥ ६ ॥ तौ
दम्पतीततोयातौस्वगेहंसाधुहर्षितम् ॥ कृतकृत्यावथात्मानौमन्यमानावसंशयम् ॥ ७ ॥ तेनपुण्यप्रभावेणकालेनकियताकिल ॥ बभूवुरमिता
स्तस्यधनधान्यानिसम्पदः ॥ ८ ॥ तनयाविनयोपेताश्चत्वारःश्रुतिकोविदाः ॥ धर्मज्ञावैष्णवानित्यंपितृमातृपरायणाः ॥ ९ ॥ बभूवुरमित
प्रज्ञाःपुरुषार्थायबोधिताः ॥ विख्याताविधितत्त्वज्ञाब्रह्मज्ञाब्रह्मतत्पराः ॥ १० ॥ समग्रगुणसम्पन्नाःसम्प्रतिष्ठन्तिकीर्तयः ॥ ११ ॥ तौदम्पतीसुतसमग्रसमृद्ध
सौख्यंपुण्योदयंसमुपयुज्यततश्चिरेण ॥ स्नानंपरंपरममीयतुरस्यभक्त्याश्रीमाधवेचसुकृतस्यनृपप्रसादात् ॥ १२ ॥ यथैवमाधवःसाक्षाद्विद्यालक्ष्मी
धवःस्मृतः ॥ तथैवमाधवोमासोमधुसूदनवल्लभः ॥ १३ ॥ इदंमाधवमाहात्म्यंकिञ्चित्संक्षेपतोऽनघ ॥ मयातेकथितंवीरयत्पुराचपितुःश्रुतम् ॥ १४ ॥
इतिश्रीपाद्मेमहापुराणेपातालखण्डेनारदाम्बरीषसंवादेवैशाखमाहात्म्येएकनवतितमोऽध्यायः ॥ ९१ ॥ सूतउवाच ॥ इतितस्यवचःश्रुत्वानारदस्य
सभूपतिः ॥ प्रणम्यविस्मितःप्राहचिन्तयन्मनसाहरिम् ॥ १ ॥ अम्बरीषउवाच ॥ कथमेतद्विमुह्यामःस्वल्पायासेनयन्मुने ॥ शूद्रःपापसमाचारो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लेभेब्राह्मण्यमुत्तमम् ॥ २ ॥ ब्राह्मण्यंदुर्लभंतातसुकृतैर्विविधैरपि ॥ कथंमाधवमासस्यस्नानेनैवापसोऽधमः ॥३॥ नयज्ञदानैर्नतपोभिरुग्रैर्नपुण्यसंज्ञै
रपरैरपीश॥अस्मादृशोभूपतयोऽर्थवन्तोनतेलभन्तेऽवनिदेवतत्त्वम् ॥४॥ सगाधिसूनुर्विविधंतपोऽपिचिरंविधायानिशमेवघोरम्॥ कृच्छ्रेणलेभेशतवर्ष
पूर्णैरहोकथञ्चिद्बहुभिःप्रयत्नैः ॥५॥ कथंसवर्णाधमएषपापःस्वधर्महीनोधनवानदाता॥ पुण्यादनायासकृतादमुष्मादल्पादिहावापसरामतत्त्वम् ॥६॥
नारदउवाच ॥ सत्यमुक्तंत्वयाराजन्ब्राह्मण्यमतिदुर्लभम् ॥ तथापिगतयःसूक्ष्मादुर्ज्ञेयाधर्मतत्त्वतः ॥ ७ ॥ विचित्राणिचकर्माणिविचित्राभूत
भावना॥विचित्राणिचभूतानिविचित्राःकर्मशक्तयः ॥८॥ कदाचित्सुकृतंकर्मकूटस्थंयदवापितम्॥केनचित्कर्मणाभूपशुभेनपरिवर्धते ॥९॥ फलंददाति
सुमहत्तस्मिन्नपिचजन्मनि ॥धर्मोगहनसूक्ष्मोऽयंनीयतेनयथातथा ॥१०॥ नतस्यफलदानस्यश्रूयतेकालनिश्चयः ॥ यत्किञ्चित्सुकृतंकर्मच्छन्नंपापा
न्तरैरपि ॥११॥तदागत्यकुतःक्वापिसुफलंचप्रयच्छति ॥कृतस्यनेहनाशोऽस्तिपुण्यस्यदुरितस्यच ॥१२॥ तथापिबहुभिःपुण्यैर्दुरितंयातिदारुणम् ॥
यदुक्तंभवताराजन्नायासाधिक्यतोभवेत् ॥ १३॥ तत्फलंतत्रतत्रापिशृणुसत्यंमयोदितम् ॥ अनायासमहायासौयद्यल्पत्वमहत्त्वयोः ॥१४॥ महाव्रता
स्ततस्तेस्युःस्ततंकर्मकादयः ॥ सिंहव्याघ्रादिमूत्रादौप्रयासाबहुलास्ततः ॥१५ ॥ पञ्चगव्यप्रशस्तत्वंव्रतमध्येततोभवेत् ॥ इतिकर्तव्यबाहुल्यंमहत्त्वं
चेत्तदल्पता ॥१६॥ जलाग्न्यादिप्रवेशस्यप्रसज्येतव्रतान्तरात् ॥इदमल्पंमहत्त्वंतदितिनैवनियामकः ॥१७॥ फलंयथोदितंशास्त्रेतदेवस्यान्महोदयम्॥
यथाल्पनाशोमहतामहन्नाशस्तथाल्पतः ॥ १८ ॥ किंत्वल्पविस्फुलिङ्गनतृणनाशःप्रदृश्यते ॥ अजामिलोऽपिभूपालदास्याःपतिरितिस्मृतः ॥ १९ ॥
धर्मपत्नीपरित्यागीनित्यंपापपथिस्थितः॥म्रियमाणःसुताह्वानंचक्रेनारायणेतिच ॥२०॥ तथायन्नामग्रहणात्पदंलेभेसुदुर्लभम् ॥ अनिच्छयापिदहति
स्पृष्टोहुतवहोयथा ॥२१॥ तथादहतिगोविन्दनामव्याजादपीरितम् ॥२२॥ हत्यायुतंपापसहस्रमुग्रंगुर्वङ्गनाकोटिनिषेवणंच ॥ स्तेयान्यशेषाणिहरेः
प्रियेणगोविन्दनाम्नानिहतानिसद्यः ॥ २३ ॥ विष्णुभक्तिमयंवीरयत्किञ्चित्क्रियतेऽल्पकम् ॥ सुकृतंसाधुविदुषातदक्षयफलंभवेत् ॥ २४ ॥ सन्देहो
नचकर्तव्योमाधवेमासिमाधवम्॥समाराध्यजनोभक्त्यातत्तद्वाञ्छितमाप्नुयात् ॥ २५ ॥ अपत्यंद्रविणंदाराधराहर्म्यंहयागजाः ॥ सुखानिस्वर्गमोक्षौ
चनदूरेहरिभक्तितः ॥ २६ ॥ एवंशास्त्रोक्तविधिनास्वल्पेनापिनसंशयः ॥ पापस्यमहतोऽपिस्यात्क्षयःसम्यग्विधानतः ॥ २७ ॥ फलाधिक्यं
भवेद्भिन्नाधिक्याद्भावकर्मणोः ॥ सूक्ष्माधर्मस्यगतयोदुर्ज्ञेयाविबुधैरपि ॥ २८ ॥ प्रियोमाधवमासोऽयंमाधवस्यमहात्मनः ॥ एकोऽपित्रिषुलोकेषु
समग्रेप्सितदायकः ॥ २९ ॥ पुण्येनगाङ्गेनजलेनकालेदेशेबुधःस्नानपरःकथञ्चित् ॥ आजन्मनोभावहतोऽपिदातानशुध्यतीत्येवमतंममैतत् ॥३०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रज्वाल्यवह्निंघृततैलसिक्तंप्रदक्षिणावर्तशिखंस्वकाले ॥ प्रविश्यदग्धःकिलभावदुष्टोनस्वर्गमाप्नोतिफलंनचान्यत् ॥ ३१ ॥ गङ्गादितीर्थेषुवसन्ति
देवादेवालयेयक्षगणाश्चनित्यम् ॥ विनाशनंयान्तिकृतोपवासाभावोज्झितास्तेनफलंलभन्ते ॥ ३२ ॥ भावंततोहृत्कमलेनिधायश्रीमाधवेमाधव
मासिभक्त्या ॥ यजेतयःस्नानपरोविशुद्धःपुण्यंनशक्तावयमस्यवक्तुम् ॥ ३३ ॥ इहार्थेऽपिपुरावृत्तमाकर्णयमहीपते ॥ विचित्रंकथयिष्यामिफलं
किमपिकर्मणाम् ॥ ३४ ॥ तस्यमाधवमासस्यप्रसादान्माधवस्यच ॥ [१]यथाहिब्राह्मणीकाचित्स्वैरिण्यापशुभंफलम् ॥ ३५ ॥ दिवोदासेतिविख्यातः
पुराकान्तीश्वरोऽभवत्॥तस्यापत्यंमहारत्नंनारीणामुत्तमंसदा ॥३६॥ गुणरूपसमायुक्तासुशीलाचारुमङ्गला ॥ दिव्यादेवीतिविख्यातारूपेणाप्रतिमा
भुवि ॥ ३७ ॥ पित्रात्वालोकितासातुरूपलावण्यसंयुता ॥ सतांदृष्ट्वादिवोदासोदिव्यांदेवींसुतांतदा ॥ ३८ ॥ कस्मैचदीयतेकन्यासुवरायमहा
त्मने ॥ इतिचिन्तापरोभूत्वासमालोक्यनरोत्तमः ॥ ३९ ॥ रूपदेशस्यराजानंसम्यग्ज्ञात्वामहीपतिः ॥ चित्रसेनंमहात्मानंसमाहूयततोनृपः ॥
॥ ४० ॥ कन्यांददौदिवोदासश्चित्रसेनायधीमते ॥ तस्याविवाहकालस्यसम्प्राप्तेसमयेनृप ॥ ४१ ॥ मृतोऽसौचित्रसेनस्तुकालधर्मेणवैकिल ॥ दिवो
दासश्चधर्मात्माचिन्तयामासभूपतिः ॥ ४२ ॥ ब्राह्मणांश्चसमाहूयपप्रच्छनृपनन्दन ॥ अस्याविवाहकालेतुचित्रसेनोदिवंगतः ॥ अस्यास्तु
कीदृशंकर्मभविष्यतिब्रुवन्तुमे ॥ ४३ ॥ ब्राह्मणाऊचुः ॥ विवाहोजायतेराजन्कन्यायास्तुविधानतः ॥ पतिर्मृत्युंप्रयात्येवयोवात्यागं
करोतिच ॥ ४४ ॥ महाधिव्याधिनाभीतस्त्यागंकृत्वाप्रयातिच ॥ प्रव्राजितोभवेद्राजन्धर्मशास्त्रेषुदृश्यते ॥ ४५ ॥ तस्यांरजस्वलायांचअन्यः
पतिर्विधीयते ॥ विवाहंतुप्रधानेनपिताकुर्यान्नसंशयः ॥ ४६ ॥ एवंराजन्समादिष्टंधर्मशास्त्रेशुभैर्जनैः ॥ विवाहःक्रियतामस्याइत्यूचुस्तेद्विजोत्तमाः ॥
॥ ४७ ॥ दिवोदासश्चधर्मात्माब्राह्मणैस्तुप्रणोदितः ॥ विवाहार्थंमहाराजमानसंकृतवान्नृप ॥ ४८ ॥ पुनर्दत्ताप्रदानेनदिव्यादेवीनृपोत्तम ॥
पुष्पसेनायपुण्यायतस्मैराज्ञेमहात्मने ॥ ४९ ॥ मृत्युधर्मंगतोराजाविवाहसमयेऽपिसः ॥ यदायदामहाभागोदिव्यादेव्याश्चभूपतिः ॥
॥ ५० ॥ करोतिसपितोद्योगंविवाहस्यातिदुःखितः ॥ भर्तापिम्रियतेकालेप्राप्तलग्नस्तदातदा ॥ ५१ ॥ एकविंशतिभर्तारःकालेकालेमृतास्ततः ॥
ततोराजामहादुःखीसञ्जातःख्यातविक्रमः ॥ ५२ ॥ समालोक्यतमाहूयमन्त्रिभिःसहनिश्चलः ॥ स्वयंवरेमहाबुद्धिंचकारपृथिवीपतिः ॥ ५३ ॥ अथ
तेनसमाहूताराजानोविविधानृपाः ॥ स्वयंवरार्थंवैतस्याबहवोधर्मतत्पराः ॥५४॥ तस्यास्तुरूपसंक्षुब्धामृत्युनाप्रेषितानृपाः ॥ संग्रामंचक्रिरेमूढामृता

१ इयं दिव्यादेवीकथापि द्वितीये भूमिखण्डे प्रोक्तास्ति । सैवेह वैशाखमासमाहात्म्यप्रसंगेन पुनरनूदितेति बोद्धव्यं सुधीभिः । केषुचित्पुस्तकेष्वत्र दृश्यते । अन्येषु पुस्तकेषु नास्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तऽथपरस्परम् ॥ ५५ ॥ एवंतेषांक्षयोजातःक्षत्रियाणांनरेश्वर ॥ दिव्यादेवीचदुःखार्तारुरोदकरुणंततः ॥ ५६ ॥ बालामालोक्यतांराजारुदन्तींचाति
दुःखिताम् ॥ पुरोधसंचधर्मज्ञंज्ञानवन्तंतपस्विनम् ॥ ५७ ॥ जातूकर्णंप्रणम्यादौविनयान्वितकन्धरः ॥५८॥ दिवोदासउवाच ॥ कथयस्वप्रसादेन
किमेतस्याहिपातकम् ॥ दिव्यादेव्यास्तुमेपुत्र्यायदेतच्चेष्टितंकृतम् ॥ ५९ ॥ जातूकर्णउवाच ॥ तस्यास्तुचेष्टितंवीरदिव्यादेव्यावदाम्यहम् ॥
पूर्वजन्मकृतंसर्वंतन्मेनिगदतःशृणु ॥ ६० ॥ आस्तेवाराणसीपुण्यानगरीपापनाशिनी ॥ तस्यामास्तेमहाप्राज्ञःसुवीरोनामनामतः ॥ ६१ ॥ वैश्य
जात्यांसमुत्पन्नोधनधान्यसमाकुलः ॥ तस्यभार्यामहाप्राज्ञचित्रानामसुविस्मृता ॥६२॥ कुलाचारंपरित्यज्यदुराचारेणवर्तते ॥ नमन्यतेहिभर्तारंरौद्र
कृत्येचवर्तते ॥६३॥ पुण्यकार्यविहीनातुपापंचरतिदुर्मतिः ॥ भर्तारंभर्त्सतेनित्यंस्वैरिणीकलहप्रिया ॥६४॥ नित्यंपरगृहेवासनिरताभ्रमतेऽधिकम् ॥
परच्छिद्रंसमापश्येद्दुष्टाभूतेषुसर्वदा ॥ ६५ ॥ साधुनिन्दारतापापाबहुहास्यकरीसदा ॥ कुसङ्गतिरतावाचाटुराचारजनप्रिया ॥ ६६ ॥ धूर्ताधर्म
जनद्वेषकरीचानृतभाषिणी ॥ विज्ञायैवंसुवीरस्तामुपयेमेततोऽपराम् ॥ ६७ ॥ तयानवीनयावीरोभार्ययासहितोऽनिशम् ॥ यथासुखंसबुभुजेविषया
न्मनसःप्रियान् ॥६८॥ धर्माचारेणपुण्यात्मासत्यपुण्यमतिःसदा ॥ सत्ययामितयासत्यासुमत्याराधितोबभौ ॥६९॥ निरस्तातेनसाचित्राविचित्रा
वरवर्णिनी॥स्वैरिणीगुणसंसर्गधर्मविद्वेषिणीततः ॥७०॥भ्रमतेजारसंयुक्तामुक्ताचारागतत्रपा॥सापापरतसंयुक्तारक्तादूतीविकर्मणि॥७१॥कुशलाकुट्टिनी
कर्मकलासुत्वन्ययोषिताम् ॥ गृहभङ्गमसौचक्रेवक्रेणमनसाहिता ॥ ७२ ॥ साध्वींनारींसमाहूयपापवाक्यैश्चनोदयेत् ॥ नर्मलोभकथाकेलिप्रत्ययो
त्पत्तिहेतुभिः ॥७३॥ मनांसिचालयेत्पापापुरुषाणांचयोषिताम् ॥ साधूनांसास्त्रियोभव्याःपरेभ्यःप्रतिपादयेत् ॥ ७४ ॥ कारयत्येवकपटंधर्मग्राम
विवर्जनम् ॥ एवंवर्षशतंभुक्त्वापश्चाद्वेश्याविधिस्थिता ॥ ७५ ॥ कालेननिधनंप्राप्तासततंपापनिश्चया ॥ जातातवगृहेपुत्रीदिव्यादेवीतिसासुता ॥
सुन्दरीरूपसम्पन्नापुरादृष्टेननोदिता ॥७६॥नारदउवाच॥ इतितस्यवचःश्रुत्वादिवोदासोऽतिविस्मितः ॥ उवाचराजामधुरंजातूकर्णंमुनिंवचः ॥७७॥
दिवोदासउवाच ॥ यदीदृशीसादुरितप्रचारासदादुराचाररताप्रयाता ॥ कथंममश्रीपतिदैवतस्यमहाकुलीनस्यसुतानुरूपा ॥ ७८ ॥ सुदुर्लभं
राजकुलेविशालेलेभेचसाश्रीमतिजन्मधन्यम् ॥ पुण्येनकेनापिमुनेपवित्रेचित्राविचित्रेणचकर्मकर्त्री ॥ ७९ ॥ नारदउवाच ॥ इतितस्यवचःश्रुत्वा
भूमिपस्यमुनिस्ततः ॥ किञ्चिद्विहस्यतुप्राज्ञोवचःसूनृतमब्रवीत् ॥ ८० ॥ जातूकर्णउवाच ॥ चित्राविचित्रसुरतैरथवञ्चयन्तीप्रच्छन्नकामुकविटान्धन
धीविहीनान् ॥ वेश्याबभूवविषपानमितश्चरित्वाकालेननागनगरेमहतिप्रसिद्धे ॥ ८१ ॥ कोऽपितत्रसमायातःसायंविप्रःश्रमार्दितः ॥ अर्द्यमानो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विशुद्धात्मानगरेनागसंज्ञके ॥ ८२ ॥ अपश्यन्नपरंस्थानंमूढश्चित्रागृहंययौ ॥ तयासंमोहितोऽत्यर्थंवेश्ययादृष्टियोगतः ॥ ८३ ॥ पादसंवाहनस्नान
ताम्बूलासनभोजनैः ॥ विलासैस्तोषितःसोऽपिखेदहीनोऽभवत्तदा ॥ ८४ ॥ ततोविचित्रैःसुरतोपचारैरदृष्टबुद्धचैवतयासविप्रः ॥ संसेवितोऽयं
रजनीमशेषामवाहयद्भावविशेषलुब्धः ॥८५॥ प्रातःप्रयाणाभिमुखःकथञ्चिदुवाचचित्रामनुरक्तचित्तः ॥ सन्तोषितःस्वैश्चरितैःस्ववक्तृत्यैर्वचस्तयाचैक
धियातदानीम् ॥ ८६ ॥ ब्रह्मणउवाच ॥ कार्यःप्रत्युपकारस्तेतोषितेनमयाप्रिये ॥ स्वदृढंचनिजंदुःखंकथयाम्यविशेषतः ॥ ८७ ॥ पुराकथांहिवदतां
विप्राणांनर्मदातटे ॥ शुभंयत्सर्वपापघ्नंतदाकर्णयसादरम् ॥ ८८ ॥ योदिनत्रयमपिप्रयत्नतःस्नातिमेषउपयातिभास्करे ॥ भास्करेऽनुदितएव
माधवेमासिसोऽवनिचयैर्विमुच्यते ॥ ८९ ॥ सम्पूर्णमपिवैशाखेयोबहिःस्नानमाचरेत् ॥ विधिनामाधवंदेवमर्चयेत्सोऽपिपापहा ॥ ९० ॥ पुण्यतीर्थे
विशेषेणस्नानदानक्रियादिभिः॥ महापापैर्विमुच्येतमानवोमासिमाधवे ॥ ९१ ॥ तावन्महापापचयःशरीरेशरीरिणस्तिष्ठतिनिर्विशङ्कः ॥ यावन्मुदा
चोषसिमेषराशिमुपागतेमज्जतिनोदिनेशे ॥ ९२ ॥ एवमाकर्णितस्तेषांविप्राणांवदतांमया ॥ अनेकदुरिताम्भोधितरणेपोतउत्तमः ॥ ९३ ॥
अदूरेशिवदेहाचवर्ततेऽसौसरिद्वरा ॥ तत्रस्नातुंगमिष्येऽहंतदाघौघवधायच ॥ ९४ ॥ यदितेरोचतेकान्तेविरक्तंवामनोभवेत् ॥ तन्मयात्वंसमागच्छ
वैशाखस्नानहेतवे ॥९५॥ अनित्यंजीवितमिदंयौवनंचातिसुन्दरम् ॥ हेतुर्नरकवासस्यदुर्वारश्चसनोभवेत् ॥ ९६ ॥ आराधितस्त्वायाहंचपातितो
दुरितार्णवे ॥ महतामपियत्सत्यंदुष्टस्थितशरीरिणाम् ॥९७॥ किमत्रबहुनोक्तेननविलम्बोचितःक्षणः ॥ उद्धरिष्येऽपिभवतींविरक्तिर्यदितेहृदि ॥९८॥
चित्रोवाच ॥ स्वामिन्नदृष्टयोगेनतवसङ्गतिधर्मतः ॥ ध्रुवंविरक्तंमच्चेतोनिन्द्यमेतद्भवंप्रति ॥९९॥ नूनमेवंमयाशास्त्रेश्रुतंयत्साधुसङ्गमः ॥ अचिन्त्यायै
नमस्तस्यैनियतायैततःपुनः ॥ १०० ॥ जातूकर्णउवाच ॥ इत्याभाष्यततस्तेनसमंचित्राययौतदा ॥ विद्यमानंधनंकिञ्चिदादायमुनिनोदिता ॥ १ ॥
ततःपरंसोऽपिपुनर्द्विजन्मावैशाखमासेशिवदेहदेहम् ॥ अवापसस्नौचदिनेशमस्यैस्नानायसद्योऽथददौदयालुः ॥ २ ॥ हृदयालुरयंविप्रःस्नाप
यामासतांतदा ॥ यथोचितविधानेनचित्रासुचित्रभाषिणीम् ॥३॥ वैशाखस्नानमाहात्म्यंतत्रशुश्रावसामुदा ॥ पठमानेषुविप्रेषुपुराणानिपृथक्पृथक् ॥
॥ ४ ॥ यस्यश्रवणमात्रेणक्षीयतेदुरितान्धकः ॥ यथासूर्योदयेनैवतिमिरौघःप्रणश्यति ॥ ५ ॥ साशिवेशिवतनूजलेपुनःस्नानतोऽजनिकरे
विधानतः ॥ स्नानतोविमलमानसोदयासूर्यकान्तिरिवनिर्मलाबभौ ॥६ ॥ तत्रमज्जन्तिरेवायांसेवायांनिरताहरेः ॥ वैशाखेविविधालोकालोकानन्त्य
मभीप्सवः ॥७॥ येनर्मदायामिहशर्मदायामशुद्धकायानपिशोधयन्ति ॥ विशेषतोमाधवमासिमर्त्याभवन्तिमर्त्याधिपलोकलीलाः ॥८॥ आजन्मनो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽघंस्मरणेनरेवानिहन्तिद्दष्टादशजन्मजंपुनः ॥ स्नाताकथञ्चिच्छतयोनिजातंसंसेवितायच्छतिरुद्रलोकम् ॥ ९ ॥ सकलंमाधवंमासंसाचित्रानर्मदा
जले ॥ सस्नौकिञ्चिद्ददौदानंशक्त्याविप्रेषुनित्यशः ॥ ११० ॥ सर्वपापहरंस्तोत्रंशृणोतिश्रद्धयाहरेः ॥ विप्राणांतत्रपठतांसङ्गादस्यद्विजन्मनः ॥
॥ ११ ॥ निमज्ज्यसामाधवमासिपूर्णेरेवाजलेतत्रमहीसुरेभ्यः ॥ अच्छिद्रमासाद्ययथाविधानंतत्रापिचित्रापिचकारमासम् ॥ १२ ॥ कुटीरकंतंतु
नवंविधायसुदेवनामापिसभूमिदेवः ॥ उवासरेवासलिलेनिमज्जंश्चित्रोपरोधाद्निशंदयातः ॥ १३ ॥ अथकालेनकियताकालधर्ममुपेयिवान् ॥ विप्र
स्तदनुसाचित्राचिरेणैवमृतानृप ॥ १४ ॥ तेनमाधवमासस्यसुकृतेनतदैवसा ॥ पुत्रीतवाभवन्नूनमदृष्ट्वायमयातनाम् ॥ १५ ॥ तस्यकर्मविपाकोऽयं
यदात्तंभूपतेःकुलम् ॥ वैष्णवंविशदंवीरदुष्प्राप्यंपापकर्मभिः ॥१६॥ दिव्यादेवीवरंनामजातंचास्यांनरोत्तम ॥ यच्चदत्तवतीचान्नंभोग्यसौख्यसुखानि
च ॥ १७ ॥ ब्राह्मणायपुरातस्मैगणिकात्वेऽपिसङ्गता ॥ स्नात्वाचमाधवेमासिकिञ्चित्तत्रापियद्ददौ ॥ १८ ॥ तस्यदानस्यसाभुङ्क्तेस्नानस्यचफलो
दयम् ॥ पिबतेशीतलंतोयंमिष्टान्नंचतथानिशम् ॥ १९ ॥ दिव्यान्भोगान्प्रभुञ्जानावर्ततेचप्रभोर्गृहे ॥ भुङ्क्तेचविधिदत्तंचदुःखशोकादिपीडिता ॥
॥ १२० ॥ यत्पुरानरनारीणांगृहभङ्गरताभवत् ॥ तस्यकर्मविपाकोऽयमस्याःकिञ्चिदुपस्थितः ॥ २१ ॥ माधवस्नानमाहात्म्याद्द्रिनैव
यमयातनाम् ॥ महापापापितेवीरसुन्दरीसासुताभवत् ॥ २२ ॥ एतत्तेसर्वमाख्यातंतवपुत्र्याविचेष्टितम् ॥ सर्वजन्मभवंवीरकर्मदुष्कर्मसम्भवम् ॥
॥ १२३ ॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेवैशाखमाहात्म्येचित्रोपाख्यानेद्विनवतितमोऽध्यायः ॥ ९२ ॥ नारदउवाच ॥ जातूकर्णवचश्चित्रमेव
माकर्ण्यभूपतिः ॥ तमुवाचनमस्कृत्यज्ञानिनंमुनिमादरात् ॥ १ ॥ दिवोदासउवाच ॥ कथमेषाविमुच्येतदुःखादस्मान्मुनेऽधुना ॥ २ ॥ जातूकर्ण
उवाच ॥ कथयामिमहत्पुण्यंयेनेयंसुखिताभवेत् ॥ अप्रकाश्यमपिप्रायःप्रवक्ष्यामितवाग्रतः ॥ स्वल्पमप्यद्भुतंकर्मविकर्मशतनाशनम् ॥ ३ ॥
यथाहरेर्ध्यानबलेनपापंविनाशमायातिमहत्समग्रम् ॥ प्रातस्तदामाधवमासदानस्नानेनघोरंविलयंप्रयाति ॥ ४ ॥ यथाहरेर्भीतिभयेननागानश्यन्ति
सर्वेनिचयास्तथैव ॥ नूनंरवौमेषगतेविभातिस्नानेनतीर्थेचहरिस्तवेन ॥ ५ ॥ तेजसावैनतेयस्यपन्नगाइवपातकाः ॥ विद्रवन्तिचवैशाखस्नाने
नोषसिनिश्चितम् ॥ ६ ॥ तस्माद्देयापिभूपालदिव्यादेवीपुनःस्वयम् ॥ कृत्वावैशाखश्रवणंश्रुत्वापापहरंस्तवम् ॥७ ॥ भवित्रीभर्तुःसंयोगसुखसम्भोग
भागिनी ॥ सुदेवोऽपिसजातोऽस्तिपाण्ड्यदेशाधिपोबली ॥ ८ ॥ वैशाखमासिरेवायांस्नानपुण्येनभूपते ॥ तस्माएवसुतांदेहिविशुद्धांस्नानत
स्तथा ॥ ९ ॥ माधवस्यपुनःस्तोत्रंश्रवणान्माधवस्यच ॥ सन्देहोनात्रकर्त्तव्योविचित्रंपश्यभूपते ॥ १० ॥ इहामुत्रफलंतस्यसमाख्यंपुण्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्मणः ॥ ११ ॥ नारदउवाच॥इत्याकर्ण्यैवमुदितोराजातमखिलंततः ॥ कारयामासतांपुत्रींजातूकर्णोदितंविधिम् ॥ १२ ॥ वीरसेनेनतेनैवपाण्डय
देशाधिपेनसा ॥ पुराजन्मैकसुहृदादिव्यादेवीविवाहिता ॥ १३ ॥ बुभुजेभूरिविषयांश्चिरंसुचरितव्रता ॥ वीरसेनेनसुहृदापूर्वजन्मकृतेनच ॥ १४ ॥
एतत्तेकिञ्चिदाख्यातमम्बरीषसमासतः ॥ वैशाखस्नानमाहात्म्यंकिमन्यच्छ्रोतुमर्हसि ॥ १५ ॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेवैशाखमाहात्म्ये
चित्रोपाख्यानेत्रिनवतितमोऽध्यायः ॥ ९३ ॥ अम्बरीषउवाच ॥ पापप्रशमनंस्तोत्रंश्रोतुमिच्छामितद्विभो ॥ यस्यश्रवणमात्रेणपापराशिर्विली
यते ॥१॥ धन्योऽस्म्यनुगृहीतोऽस्मिश्रावितोऽस्मिशुभंविधिम् ॥ विकर्मोपार्जितंयस्यश्रवणादेवहीयते ॥२॥ चित्रंकिमत्रमधुसूदनदैवतस्यमासस्य
पुण्यसवनैरिहमाधवस्य ॥ स्नानैरवश्यविहितैरघराशिनाशःस्याद्यस्यनामपठनादपितस्यलोकः ॥ ३ ॥ तदेवपुण्यंपरमंपवित्रंह्यद्यचलोकेसुकृतैक
लभ्यम् ॥ यदुच्यतेकेशवनामधेयंमन्येमुनेमाधवमासिभव्यम् ॥ ४ ॥ धन्यास्तुतेमाधवमासिनामस्मरन्तियेऽहोमधुसूदनस्य ॥ तस्यैव
मेकिञ्चिदहोचरित्रंपुनःपवित्रंवदविश्वजन्यम् ॥ ५ ॥ सूतउवाच ॥ वचःसमाकर्ण्यहरिप्रियस्यप्रीतोमुनिस्तस्यनृपोत्तमस्य ॥ समाधवस्नान
समुत्सुकोऽपिकथारसेनाहसमाधवस्य ॥ ६ ॥ नारदउवाच ॥ सत्यंमहीपालमिथोमुकुन्दकथारसालापविधिर्विशुद्धः ॥ त्वयासमंमाधव
मासधर्मस्नानाधिकोऽयंहरिदैवतेन ॥ ७ ॥ जीवितंयस्यधर्मार्थंधर्मोहर्यर्थमेवच ॥ अहोरात्राणिपुण्यार्थंतमन्येवैष्णवंभुवि ॥ ८ ॥ किञ्चि
द्वक्ष्यामितेराजन्वैशाखस्नानजंफलम् ॥ अस्मत्पितापिनोवक्तुमलंविस्तरतोऽखिलम् ॥ ९ ॥ यत्रमज्जनमात्रेणपापामुक्तिमुपागताः ॥ माधवे
मासितेपापानर्मदासलिलेपरे ॥ १० ॥ पुरातीर्थप्रसङ्गेनभ्रमन्कोऽपिमहीसुरः ॥ मुनिशर्मेतिविख्यातोधर्मात्मासत्यवाक्छुचिः ॥ ११ ॥
युक्तःशमदमाभ्यांचक्षान्तिसन्तोषसंयुतः ॥ युक्तःसपितृकार्येषुश्रुस्मृतिविधानवान् ॥ १२ ॥ युक्तोमधुरवाक्येषुसंयुक्तोहरिपूजने ॥ युक्तो
वैष्णवसंसर्गेत्रिकालज्ञानवान्मुनिः ॥ १३ ॥ स्वकर्मणिरतोधीरोहृदयालुःप्रियाप्रियः ॥ दयालुरतिमेधावीतत्त्वविद्ब्राह्मणप्रियः ॥ १४ ॥
माधवेमासिरेवायांस्नानार्थंप्रतिसञ्चरन् ॥ अग्रतःपञ्चपुरुषान्ददर्शातीवदुःखितान् ॥ १५ ॥ परस्परमसंसर्गकारिणःकृष्णविग्रहान् ॥
वटच्छायामुपाश्रित्यसमासीनानवस्थितान् ॥ १६ ॥ पश्यतोदिक्षुसर्वासुदुरितोद्विग्नचेतसः ॥ तानालोक्यद्विजश्रेष्ठश्चिन्तयामासविस्मितः ॥ ॥ ११६ ॥
॥ १७ ॥ अत्रैतेकेनराभीताविपिनेदीनचेष्टिताः ॥ चौरावाविकृताकाराहृश्यन्तेपापभागिनः ॥ १८ ॥ परस्परंचभाषन्तःकृशाःकृष्णवपुःश्रियः ॥
यावदेवंसविप्राग्र्योविचारयतिधीरधीः ॥ १९ ॥ तावदागम्यतेसर्वेदूरस्थामुनिमादरात् ॥ बद्धाञ्जलिपुटाभूत्वाप्रणम्योचुरितिस्फुटम् ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चपुरुषाऊचुः ॥ भव्यंभवन्तंपुरुषोत्तमंवैविभ्राजमानंचरितेनमान्यम् ॥ मन्यामहेविप्रदयालुमुख्यंवाचंसमाकर्णयनोऽसिमैत्रः ॥२१॥ सन्तःप्रातिष्ठा दीनानांदैवादुद्भूतपाप्मनाम् ॥ आर्तानामार्तिहन्तारोदर्शनादेवसाधवः ॥ २२ ॥ अहंपाञ्चालदेशीयःक्षत्रियोवीरवाहनः ॥ ब्राह्मणंहतवान्मोहा च्छरेणशब्दवेधिना ॥ २३ ॥ शिखासूत्रविहीनस्तुतिलकेनाविवर्जितः ॥ अटामिजगतीमेनांब्रह्मघ्नोऽहमितिब्रुवन् ॥ २४ ॥ ब्रह्मघ्नायातिपापायभिक्षा मह्यंप्रदीयताम् ॥ एवंसर्वेषुतीर्थेषुभ्रमन्नत्रास्मिचागतः ॥ २५ ॥ ब्रह्महत्यानमेऽद्यापिप्रयातिमुनिसत्तम ॥ एवंमेवर्षमेकंहिव्यतीतंकुर्वतोविभो ॥ ॥ २६ ॥ दह्यमानस्यपापेनशोकाकुलितचेतसः ॥ चन्द्रशर्मापरोविप्रोयोऽयंसंलक्ष्यतेद्विज ॥ २७ ॥ गुरुघातीसतुब्रह्मन्मोहाकुलितमानसः ॥ मोहाकुलितचित्तत्वाद्गुरुघातकउच्यते ॥ २८ ॥ निवसन्मागधेदेशेसन्त्यक्तःस्वजनैस्ततः ॥ दैवादसावपिमुनेभ्रमन्निहसमागतः ॥ २९ ॥ शिखासूत्रविहीनस्तुविप्रलिङ्गविवर्जितः ॥ मयापृष्टस्तुवृत्तान्तंसत्यमेवावदद्द्विजः ॥ ३० ॥ वसतायद्गुरोर्गेहेक्रोधाकुलितचेतसा ॥ महामोहगतेनापि यथावैघातितोगुरुः ॥ ३१ ॥ तेनपापेनदग्धोऽसौवर्त्ततेशोकपीडितः ॥ तृतीयोऽयंपुनःस्वामिन्वेदशर्मासमाहितः ॥ ३२ ॥ सुरापोब्राह्मणोजातो मोहाद्वेश्याप्रसङ्गतः ॥ पृष्टोमयायमपिमेयथावृत्तंतथाब्रवीत् ॥ ३३ ॥ आत्मनश्चेष्टितंसर्वंमनस्तापेनपीडितः ॥ निरस्तःसर्वलोकैश्चभार्याबन्धु जनैरपि ॥ ३४ ॥ तेनपापेनसंलिप्तोभ्रमन्नत्रायमागतः ॥ चतुर्थोविधुरोनामवैश्योऽयंगुरुतल्पगः ॥ ३५ ॥ मोहान्मासत्रयंयावद्वेश्याभूतांचमात रम् ॥ बुभुजेसविदेहस्थांज्ञाततत्त्वस्ततश्चरन् ॥ ३६ ॥ दुःखितोऽभ्यागमद्भूमिंभ्रमन्निहमुनेपुनः ॥ पञ्चमोऽयंमहापापीपापिसंसर्गकारकः ॥ ३७ ॥ प्रत्यहंधनलोभेनस्तेयादिकृतवानघम् ॥ वैश्योऽतिपातकैःक्रान्तस्ततस्त्यक्तोजनैःस्वयम् ॥ ३८ ॥ निर्विण्णमानसोदैवान्नन्दनामेहसङ्गतः ॥ एवंपञ्चापिपापिष्ठाःस्थानमेकमुपागताः ॥ ३९ ॥ कःकस्यापिनसम्पर्कंभोजनाच्छादनादिभिः ॥ करोतिचमहाभागविनावार्ताद्विजोत्तम ॥ ४० ॥ विशन्त्येकासनेनैवनस्वपन्त्येकसंस्तरे ॥ एवंदुःखसमाक्रान्तानानातीर्थेषुवैगताः ॥ ४१ ॥ नास्माकंपातकंघोरंप्रयातिमुनिसत्तम ॥ दृष्ट्वाभवन्तं दीप्यन्तंप्रसन्नानिमनांसिनः ॥ ४२ ॥ वदन्तिदुरितप्रान्तंसाधोस्तेपुण्यदर्शनात् ॥ उपायंवदनःस्वामिन्यथापापक्षयोहिनः ॥ ४३ ॥ ज्ञायते करुणोऽस्माभिर्विप्रवेदार्थवित्प्रभो ॥ आर्तानांमार्गमाणानांपश्चात्तापमुपेयुषाम् ॥ मोहादवाप्तपापानांत्वमुद्धर्तासिनिश्चितम् ॥४४॥ नारदउवाच ॥

---

१ 'भव्यं भवन्तं पुरुषोत्तमं वै मन्यामहे विप्रवर प्रसीद ॥ यदात्मदुःखं च वयं विचार्य विज्ञापयामः शृणु तद् द्विजेन्द्र'॥ इ० पा० । इतः परं चैकः श्लोकोऽयमुपलभ्यते कस्मिंश्चित्पुस्तके–भव्यानि भूतानि जनार्दनस्य परोपकाराय चरन्ति विश्वम् ॥ भवादृशानीति वयं विचार्य विज्ञापयामः शृणु तद्विधिं नः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेषामितिवचःश्रुत्वामुनिशर्मामुनिस्ततः ॥ इदमाहविचार्येतिकरुणावरुणालयः ॥४५॥ मुनिशर्मोवाच ॥ यूयमज्ञानतःप्राप्तपातकाःसत्यभाषिणः ॥
अनुतापयुतास्तस्मादनुग्राह्यामयाधुना ॥ ४६ ॥ शृणुध्वंमेवचःसत्यमूर्ध्वबाहुर्वदाम्यहम् ॥ यन्मयाङ्गिरसःपूर्वंश्रुतंमुनिसमागमे ॥ ४७ ॥
दृष्टंवेदेषुशास्त्रेषुश्रुतंगुरुमुखात्तथा ॥ विष्णुनाराधितेनादौस्वयमुक्तंचतत्त्वतः ॥ ४८ ॥ नतृप्तिरशनादन्यानगुरुर्जनकादपि ॥ नपात्रमन्यद्विप्रेभ्योन
देवःकेशवात्परः ॥ ४९ ॥ नगङ्गयासमंतीर्थंनदानंसुरभीसमम् ॥ नगायत्र्यासमंजाप्यंनद्वादश्यासमंव्रतम् ॥ ५० ॥ नभार्ययासमंमित्रंनधर्मोदयया
समः ॥ नस्वातन्त्र्यसमंसौख्यंगार्हस्थ्यान्नाश्रमोवरः ॥ ५१ ॥ नसत्यात्परआचारोनसन्तोषात्परंसुखम् ॥ नमाधवसमोमासोमहापापहरःपरः ॥
॥ ५२ ॥ विधिनानुष्ठितोभक्त्यामधुसूदनवल्लभः ॥ गङ्गादिषुचतीर्थेषुविशेषेणसुदुर्लभः ॥ ५३ ॥ प्रायश्चित्तानिसर्वाणिद्वादशाब्दमुखानिच[१] ॥ ताव
द्गर्जन्तिपापानियावन्नायातिमाधवः ॥ ५४ ॥ वैशाखमखिलंमासंयःस्नातिहरितत्परः ॥ हरिपादसमुद्भूतेसलिलेविमलाशयः ॥ ५५ ॥ सएवसर्व
पापैस्तुमुक्तोयायात्परांगतिम् ॥ निजपापौघनिष्कृत्यैवक्तव्यंतस्यकिन्नरैः ॥ ५६ ॥ मासेतुवैमाधवसंज्ञकेऽस्मिन्यःस्नातिपापैःसविमुच्यतेहि ॥ मेष
स्थितेसम्प्रतिनर्मदायाःशर्मप्रदेवारिणिवारिताघे ॥ ५७ ॥ दुर्लभाहिमहानद्योमाधवेमासिसर्वशः ॥ ततोऽपिदुर्लभागङ्गारेवाचयमुनातथा ॥ ५८ ॥
एतासुतिसृषुप्रायःप्राप्यैकामपिसादरम् ॥ यःस्नातिमाधवेमासिविपापःसहरिंव्रजेत् ॥ ५९ ॥ तस्मादहोसहमयासुकृतैकसारेवैशाखमासिचभवन्त
उपेत्यरेवाम् ॥ मज्जन्तुपातककृतोमुनिवृन्दजुष्टेरेवाजलेनिखिलपापभयापहत्यै ॥ ६० ॥ एवमुक्तास्ततःसर्वेमुदितामुनिनासह ॥ जग्मुस्तेपापिनोरेवां
शंसन्तोऽद्भुतकारिणीम् ॥६१॥ मुनिशर्माततोगच्छंस्तैस्तथानुगतोनरैः ॥ ददर्शपथिसन्त्रस्तान्पिशाचानष्टभीषणान् ॥ ६२ ॥ कुर्वतोविविधाञ्छब्दा
न्भ्रमतोऽपिततस्ततः॥ऊर्द्ध्वकेशोद्धुरक्ताक्षांश्वकृष्णदन्तकृशोदरान्॥६३॥ अरण्येकण्टकाक्रान्तेवृक्षपानीयवर्जिते ॥ सम्मुखंधावतोदृष्ट्वाभयसंविग्नमानसः
॥६४॥ नमोनारायणायेतिरक्षरक्षेतिचाब्रवीत्॥६५॥ नारायणायेतिनमोऽभिधानमाकर्ण्यधर्मैकनिधानमुच्चैः॥भवान्तरेतेमनसापिशाचायर्युर्निजादृष्ट
वशेनलब्धाः ॥ ६६ ॥ विनयान्वितमनसोमुनिशर्माविलोक्यतान् ॥ उवाचमधुराभाषीकेयूयंविकृतानराः ॥ ६७ ॥ किंवाकेनकृतंकर्मयेन
प्राप्ताचवैकृतिः ॥ कथमेवंविधाःसर्वेदुःखिनोऽतीवभीषणाः ॥ ६८ ॥ प्रेताऊचुः ॥ क्षुत्पिपासार्दितानित्यंनानादुःखचयाकुलाः ॥ कृतबुद्धेहृदि
क्रूरानष्टसंज्ञाविचेतसः ॥ ६९ ॥ नजानीमोदिशःक्वापिमूढामानवघातिनः ॥ तदेतद्दुःखमाख्यातमेतदेवासुखंपुनः ॥ ७० ॥ प्रभातमिवसम्भाति

१ 'वाजिमेधमुखान्यपि' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भास्करोदयदर्शनात् ॥ श्रुत्वानारायणेत्युच्चैर्भाषितंतवकोमलम् ॥ ७१ ॥ दृष्ट्वाचदर्शनंविप्रशुद्धभावंगतावयम् ॥ दर्शनेनैवतेविप्रनामश्रवणतो
हरेः ॥ ७२ ॥ भवान्तरमनुप्राप्तावयंप्राप्तादयालवः ॥ विनाशयत्यपयशोबुद्धिंविशदयत्यपि ॥ ७३ ॥ प्रतिष्ठापयतिप्रायोनृणां
वैष्णवदर्शनम् ॥ अहंपर्युषितोनामसूचकोऽयंद्वितीयकः ॥ ७४ ॥ शीघ्रगोरोधकश्चान्यःपञ्चमोऽयंचलेखकः ॥ षष्ठोऽयमितिवाग्दुष्टःसप्तमोऽयं
विदैवतः ॥ ७५ ॥ नित्यंयाचनकश्चायमष्टमःकष्टदायकः ॥ ७६ ॥ मुनिशर्मोवाच ॥ प्रेतानांकर्मजातानांनामानिभवतांकुतः ॥ किंतत्कारण
मुद्दिश्ययेनयूयंसनामकाः ॥ ७७ ॥ प्रेताऊचुः ॥ मयास्वादुसदाभुक्तंदत्तंपर्युषितंद्विजे ॥ आज्येसतिनिराज्यंचतेनपर्युषितोऽस्म्यहम् ॥ ७८ ॥
मिथ्यामिथ्यापरच्छिद्रमर्मान्वेषीस्वभावतः ॥ सूचयामासतेनासौसूचकोऽशुचिरातुरः ॥ ७९ ॥ शीघ्रंनश्यतिविप्रेणयाचितःक्षुभितेनवै ॥ एत
त्कारणमुद्दिश्यशीघ्रगोद्विजसत्तम ॥ ८० ॥ गृहोपरिसदास्वादुभुक्तमेतेनपापिना ॥ एकाकिनाकुमनसातेनासौरोधकःस्मृतः ॥ ८१ ॥ मौने
नापिस्थितोनित्यंपादेनलिखतेमहीम् ॥ अस्माकमपिपापिष्ठोलेखकोलोकसङ्गतः ॥ ८२ ॥ गुणिनोऽयंगुणान्द्वेष्टिनिर्गुणेचगुणज्ञताम् ॥ असंज्ञे
ज्ञानयोगीचवाग्दुष्टोऽसौततःस्मृतः ॥ ८३ ॥ नास्तिक्यभावादनिशंपितृदैवतमानवान् ॥ नमन्यतेचसत्कर्मपापस्तेनविदैवतः ॥ ८४ ॥
सदायाचनकोमिथ्यामिथ्यादौर्गत्यदर्शकः ॥ सभूतोद्विजकोलुब्धस्तेनयाचनकस्त्वयम् ॥ ८५ ॥ एभिःपूर्वकृतैःपापैर्भुक्त्वानरकयातनाम् ॥ प्रेता
स्तेदर्शनादद्यपुनर्जाताःस्मसुस्थिताः ॥ ८६ ॥ एतत्तेसर्वमाख्यातमात्मवृत्तान्तसम्भवम् ॥ प्रष्टुंचयदितेश्रद्धापृच्छान्यत्कथयामिते ॥ ८७ ॥ ब्राह्मण
उवाच ॥ येजीवाभुवितिष्ठन्तिसर्वआहारमूलकाः ॥ युष्माकमपिआहारंश्रोतुमिच्छामितत्त्वतः ॥ ८८ ॥ प्रेताऊचुः ॥ शृणुष्वाहारमस्माकंसर्वं
सत्त्वविगर्हितम् ॥ यंश्रुत्वानिन्दसेब्रह्मन्भूयोभूयश्चनित्यशः ॥८९॥ श्लेष्ममूत्रपुरीषेणयोषिदङ्गमलेनच ॥ गृहाणित्यक्तशौचानितानिभुञ्जन्तितत्रवै ॥
॥ ९० ॥ स्त्रीदग्धानिप्रकीर्णानिप्रकीर्णावस्कराणिच ॥ कुत्सितानिमलेनापिप्रेतावैतत्रभुञ्जते ॥ ९१ ॥ माधवंयत्रनार्चन्तिस्त्रीजितानिगृहाणिच ॥दया
क्षान्तिविहीनानिप्रेतास्तत्रैवभुञ्जते ॥९२॥ यत्राभद्रागृहेवाचःशौचहीनाश्चयोषितः॥कलहोयत्रसततंप्रेतास्तेतत्रभुञ्जते ॥९३॥ नयत्रजामयोगेहेपूज्यन्ते
नग्नाःस्त्रियः ॥ यत्रदुर्जनसंसर्गस्तत्रभोक्ष्यामहेवयम् ॥ ९४ ॥ नयत्रहरिसेवावानकथायत्रवैष्णवी ॥ नयत्रवैष्णवीप्रीतिःप्रेतावैतत्रभुञ्जते ॥ ९५ ॥
येषामेवंगृहेप्रीताभुञ्जतेतेऽपिसत्वरम् ॥ प्रेताभवन्तिपापेननिजवंशविनाशकाः ॥ ९६ ॥ तस्यमेजायतेब्रह्मन्वदतोभोजनंनिजम् ॥ अस्मात्पापतरं
चान्यत्किञ्चिद्वक्तुंनशक्यते ॥ ९७ ॥ निर्विण्णःप्रेतभावेनपृच्छामित्वांदृढव्रतम् ॥ यथानजायतेप्रेतोमुक्तिःप्रेतत्वतोयथा ॥ ९८ ॥ ब्राह्मणउवाच ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकादश्यादिभिःपुण्यैर्व्रतैरच्युतकीर्तनैः ॥ देवतातिथिपूजाभिर्गुरुपूजादिभिस्तथा ॥ ९९ ॥ आचारैःसाधुचरितैःश्रुतिस्मृत्युदितैर्दिनैः ॥ एवं
श्राद्धक्रियादानैर्यथाविधिविनिर्मितैः ॥ १०० ॥ दयादानदमक्षान्तिशीलशिष्टाभिवादनैः ॥ इत्येवमादिभिर्धर्मैःप्रेतानस्युःकुलेऽपिवै ॥ १ ॥
गोविप्रतीर्थामरपर्वताग्र्यनदीनदाश्वत्थतरूननेकशः ॥ योवन्दतेबन्धुजनेविनीतःप्रेतोनलोकेभवतीहनूनम् ॥२॥ क्रमादर्चयतेयुक्तोविशेषादपिमानवः॥
गङ्गादिपुण्यतीर्थेषुतस्यपुण्यमनन्तकम् ॥ ३ ॥ नाहंवर्षसहस्रेषुवक्तुंशक्तःस्वयंविभुः ॥ दर्शनादेवतस्यापिमुक्तःप्रेतत्वतोभवेत् ॥ ४ ॥ ऊर्जमूर्जस्वलं
मासमथदामोदरप्रियम् ॥ तपसामुत्तमंमासंतपोमाधववल्लभम् ॥ ५ ॥ वैशाखंमाधवंमासंमधुसूदनदैवतम् ॥ उत्तमंसर्वमासानांयमेकं
मुनयोविदुः ॥ ६ ॥ येनैवसाधनेनस्यात्सर्वंकृत्यंहिसाधितम् ॥ ब्रह्मविद्यामताभ्येतिसालक्ष्मीर्विश्वकारिणी ॥ ७ ॥ तस्यावासोयतोमासो
माधवोऽसौततःस्मृतः ॥ नमाधवसमोदेवोयथादेवेषुनिश्चितम् ॥ ८ ॥ तथामासेषुसर्वेषुनमासोमाधवप्रियः ॥ तस्यमाधवमासस्यमाहात्म्य
मपिभक्तितः ॥ ९ ॥ श्रुत्वाविमुच्यतेप्रेतयोनितःकिंविधानतः ॥ सतांसम्भाषणादेवपुण्यतीर्थनिषेवणात् ॥ ११० ॥ नारायणेतिपठनात्त
न्नामश्रवणादपि ॥ मुच्यतेपातकैःसर्वैर्जनोभक्तिपरायणः ॥ ११ ॥ यतिष्येतदहंप्रेताभवतामपिमुक्तये ॥ परोपकारजंपुण्यंयतोनस्यान्मखैरपि ॥
॥ १२ ॥ प्रेतायामिततःस्नातुंरेवावारिणिमाधवे ॥ मासिमेषस्थितेभानावेतैरनुगतोनरैः ॥ १३ ॥ पश्चैवतेपुनर्मोहाज्जातपातकसञ्चयाः ॥
स्नातुमायान्तिवचसाममैवकरुणावतः ॥ १४ ॥ तावद्भवन्तस्तुनिदेशतोमेतिष्ठन्तुतत्रैववनेविशोकाः ॥ श्रीनर्मदावारिणियावदेवगत्वा
निजस्नानविधिंविहाय ॥ १५ ॥ निर्मायपुरुषानपिनामतस्मात्कुशस्वरूपानिहनर्मदाके ॥ विधानतोमाधवमासिदीनान्निमज्जयामीतिदया
निबद्धः ॥ १६ ॥ एवंदिनत्रयेणैवमुक्तिर्वःप्रेतयोनितः ॥ नदर्भबटुकस्नानमात्रेणैवनसंशयः ॥ १७ ॥ नारदउवाच ॥ एवमुक्तस्ततस्तैस्तु
प्रतीतैरपिपूजितः ॥ मुनिशर्माययावेतैरनुयातस्तुपञ्चभिः ॥ १८ ॥ तत्रगत्वाततःप्रातःस्नात्वाकृत्वातथाविधिम् ॥ स्नापयामासतान्प्रेतान्नामतोदर्भ
निर्मितान् ॥ १९ ॥ स्मृताश्चमुनिनातीर्थेस्नापितानामतस्तथा ॥ प्रेताःपुण्यवतातेनसद्योमुक्तादिवंययुः ॥१२० ॥ तेपापिनःपञ्चयदैवरेवाजलेनिमग्ना
वचसैवतस्य ॥ श्रीमाधवेमासिविवर्णदेहाःसद्यःसुवर्णैकरुचोबभूवुः ॥ २१ ॥ पापप्रशमनंस्तोत्रंश्रावितामुनिशर्मणा ॥ समक्षंसर्वलोकानांजातास्ते
वरकान्तयः ॥ २२ ॥ तत्रस्थामानवास्तांस्तुविरजान्स्नानमात्रतः ॥ नस्पृशन्तिचराजेन्द्रपापिसंसर्गशङ्कया ॥ २३ ॥ मुनिशर्मानुरोधेनततोधर्मप्रमा
णतः ॥ सद्योदिव्याभवद्वाणीयदेतेविगतैनसः ॥ २४ ॥ स्नातानांमाधवेमासिमुकुन्दहृदयात्मनाम् ॥ पापप्रशमनंस्तोत्रंशृण्वतामिहसादरम् ॥२५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चित्रंकिमत्रयाशुद्धिर्जायतेपापसञ्चयात् ॥ सर्वेषामेवपापानांप्रायश्चित्तमिदंपरम् ॥ २६ ॥ यत्प्रातर्माधवेमासिभक्त्यातीर्थेऽवगाहनम् ॥ यतःप्रेतास्तु तेपापाःस्नापितानाममात्रतः ॥ २७ ॥ स्मृताःपुण्यवतातेनमोचितामुनिशर्मणा ॥ २८ ॥ इत्येवमाकर्ण्यगिरंनभःस्थामत्यद्भुतामाशुततोमनुष्याः॥ शशंसुरेतानपिपञ्चपुण्यान्वैशाखमासंचमुनिंचरेवाम् ॥२९ ॥ अथचाकर्ण्यभूपालःस्तवंदुरितनाशनम् ॥ यदाकर्ण्यनरोभक्त्यामुच्यतेपापराशिभिः ॥ ॥ १३० ॥ यस्यश्रवणमात्रेणपापिनःशुद्धिमागताः ॥ अन्येऽपिबहवोमुक्ताःपापादज्ञानसम्भवात् ॥ ३१ ॥ परदारपरद्रव्यजीवहिंसादिकेयदा ॥ प्रवर्ततेनृणांचित्तंप्रायश्चित्तंस्तुतिस्तदा ॥ ३२ ॥ विष्णवेविष्णवेनित्यंविष्णवेविष्णवेनमः ॥ नमामिविष्णुंचित्तस्थमहङ्कारगतंहरिम् ॥ ३३ ॥ चित्तस्थमीशमव्यक्तमनन्तमपराजितम् ॥ विष्णुमीड्यमशेषाणामनादिनिधनंविभुम् ॥३४॥ विष्णुश्चित्तगतोयन्मेविष्णुर्बुद्धिगतश्चयत् ॥ योऽहंकार गतोविष्णुर्योविष्णुर्मयिसंस्थितः ॥ ३५॥ करोतिकर्तृभूतोऽसौस्थावरस्यचरस्यच ॥ तत्पापंनाशमायातितस्मिन्नेवहिचिन्तिते ॥३६ ॥ ध्यातोहरति यत्पापंस्वप्नेदृष्टस्तुपापिनाम् ॥ तमुपेन्द्रमहंविष्णुंप्रणमामिनातिप्रियम् ॥ ३७ ॥ जगत्यस्मिन्निरालम्बेमधुंसूदनमच्युतम् ॥ हस्तावलम्बनंस्तोत्रं विष्णुंवन्देपरात्परम् ॥ ३८ ॥ सर्वेश्वरेश्वरविभोपरमात्मन्नधोक्षज ॥ हृषीकेशहृषीकेशहृषीकेशनमोऽस्तुते ॥ ३९ ॥ नृसिंहानन्तगोविन्दभूतभावन केशव ॥ दुरुक्तंदुष्कृतंध्यातंशमयाशुजनार्दन ॥ १४० ॥ यन्मयाचिन्तितंदुष्टंस्वचित्तवशवर्तिना ॥ अकार्यमघमत्युग्रंतच्छमंनयकेशव ॥ ४१ ॥ ब्रह्मण्यदेवगोविन्दपरमार्थपरायण ॥ जगन्नाथजगद्धातःपापंशमयमेऽच्युत ॥ ४२ ॥ यच्चापराह्णेसायाह्नेमध्याह्नेचतथानिशि ॥ कायेनमनसावाचा कृतंपापमजानता ॥ ४३ ॥ जानताचहृषीकेशपुण्डरीकाक्षमाधव ॥ नामत्रयोच्चारणतःसर्वंयातुममक्षयम् ॥ ४४ ॥ शारीरंमेहृषीकेशपुण्डरीकाक्ष मानसम् ॥ पापंप्रशममायातुवाक्कृतंममसाधव ॥४५॥ यद्भुञ्जानःपिबंस्तिष्ठन्स्वपञ्जाग्रद्यदास्थितः ॥ अकार्षंपापमर्थार्थंकायेनमनसागिरा ॥४६ ॥ महदल्पंचयत्पापंदुर्योनिनरकावहम् ॥ तत्पापंप्रशमंयातुवासुदेवस्यकीर्तनात् ॥ ४७ ॥ परंब्रह्मपरंधामपवित्रपरमंचयत् ॥ तस्मिन्प्रकीर्तितेविष्णौ यत्पापंतत्प्रणश्यतु ॥ ४८ ॥ यत्प्राप्यननिवर्त्तन्तेगन्धस्पर्शादिवर्जिताः ॥ सूरयस्तत्पदंविष्णोस्तत्सर्वंशमयत्वयम् ॥ ४९ ॥ पापप्रशमनंस्तोत्रंयः पठेच्छृणुयान्नरः ॥ शारीरैर्मानसैर्वाग्जैःकृतैःपापैःसमुच्यते ॥ १५० ॥ मुक्तःपापग्रहादिभ्योयातिविष्णोःपरंपदम् ॥ तस्मात्पापेकृतंजप्यंस्तोत्रंसर्वाघ मर्दनम् ॥ ५१ ॥ प्रायश्चित्तमघौघानांपठितव्यंनरोत्तमैः ॥ प्रायश्चित्तैःस्तोत्रवरैर्व्रतैर्नश्यतिपातकम् ॥ ५२ ॥ ततःकार्याणिसंसिद्ध्यैतानिवैभुक्ति

१ ' ह्यजमक्षरमव्ययम् ' इ० पा० । २ ' विष्णुं प्रणमामि सनातनम् ' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुक्तये ॥ पूर्वजन्मार्जितंपापमैहिकंचनरेश्वर ॥ ९३ ॥ स्तवस्यश्रवणादस्यसद्यएवविलीयते ॥ पापद्रुमकुठारोऽयंपापेन्धनदवानलः ॥ ९४ ॥ पाप
राशितमःस्तोमभानुरेषस्तवोनृप ॥ मयाप्रकाशितस्तुभ्यंतथालोकानुकम्पया ॥९५॥ स्तवोयोऽयंमयाप्राप्तोरहस्यंपितुरादरात् ॥ इतिहासमिमंपुण्यं
यःशृणोतिनराधिप ॥ ९६ ॥ तस्यापिपुण्यमाहात्म्यंवक्तुंशक्तःस्वयंहरिः ॥ स्वस्तितेऽस्तुमहाराजगङ्गायामथसत्वरम् ॥ ९७॥ स्नातुंयामिसमा
यातोमासोऽयंमाधवोमहान् ॥१९८॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेनारदाम्बरीषसंवादेवैशाखमाहात्म्येप्रेतोपाख्यानेपापप्रशमनंनामचतुर्नवति
तमोऽध्यायः ॥ ९४ ॥ सूतउवाच ॥ यातुंतमुद्यतंनत्वामुनिंराजाततोमुदा ॥ विधिंपप्रच्छसंक्षिप्तंस्नानदानक्रियोचितम् ॥ १ ॥ अम्बरीषउवाच ॥
मुनेवैशाखमासेऽस्मिन्कोविधिःकिंतपोऽधिकम् ॥ किंचदानंकथंस्नानंकथंकेशवपूजनम् ॥ २ ॥ कृपयावदविप्रर्षेसर्वज्ञस्त्वंहरिप्रियः ॥ विशेषतो
ऽपिपूजायाविधिंतीर्थपदेवद ॥ ३ ॥ नारदउवाच ॥ मेषसङ्क्रमणेभानोर्माधवेमासिसत्तम ॥ महानद्यांनदीतीरेनदेसरसिनिर्झरे ॥ ४ ॥
देवखातेऽथवास्नायाद्यथाप्राप्तेजलाशये ॥ दीर्घिकाकूपवापीषुनियतात्माहरिंस्मरन् ॥ ५ ॥ मधुमासस्यशुक्लायामेकादश्यामुपोषितः ॥
पञ्चदश्यांचवावीरमेषसङ्क्रमणेऽपिवा ॥ ६ ॥ वैशाखस्नाननियमंब्राह्मणानामनुज्ञया ॥ मधुसूदनमभ्यर्च्यकुर्यात्सुस्नानपूर्वकम् ॥ ७ ॥
वैशाखंसकलंमासंमेषसङ्क्रमणेरवेः ॥ प्रातःसनियमःस्नास्येप्रीयतांमधुसूदनः ॥ ८ ॥ मधुहन्तुःप्रसादेनब्राह्मणानामनुग्रहात् ॥ निर्विघ्न
मस्तुमेपुण्यंवैशाखस्नानमन्वहम् ॥ ९ ॥ माधवेमेषगेभानौमुरारेमधुसूदन ॥ प्रातःस्नानेनमेनाथयथोक्तफलदोभव ॥ १० ॥ यथातेमाधवो
मासोवल्लभोमधुसूदन ॥ प्रातःस्नानेनमेतस्मिन्फलदःपापहाभव ॥ ११ ॥ एवमुच्चार्यतत्तीर्थेपादौप्रक्षाल्यवाग्यतः ॥ स्मरन्नारायणं
देवंस्नानंकुर्याद्विधानतः ॥ १२ ॥ तीर्थंप्रकल्पयेद्धीमान्मूलमन्त्रमिमंपठन् ॥ ॐनमोनारायणायमूलमन्त्रउदाहृतः ॥ १३ ॥ दर्भ
पाणिस्तुविधिवदाचान्तःप्रणतोभुवि ॥चतुर्हस्तसमायुक्तंचतुरस्रंसमन्ततः ॥१४॥ प्रकल्प्यावाहयेद्गङ्गांमन्त्रेणानेनमानवः॥विष्णुपादप्रसूतासिवैष्णवी
विष्णुदेवता ॥ १५ ॥ त्राहिमस्त्वेनसस्तस्मादाजन्ममरणान्तिकात् ॥ तिस्रःकोट्योऽर्द्धकोटीचतीर्थानांवायुरब्रवीत् ॥ १६ ॥ दिविभुव्यन्तरिक्षेच
तानितेसन्तिजाह्नवि ॥ नन्दिनीत्येवतेनामवेदेषुनलिनीतिच ॥ १७ ॥ दक्षापृथ्वीचविहगाविश्वगाथाशिवप्रिया ॥ विद्याधरीमहादेवीतथालोक
प्रसादिनी ॥ १८ ॥ क्षेमङ्करीजाह्नवीचशान्ताशान्तिप्रदायिनी॥ एतानिपुण्यनामानिस्नानकालेप्रकीर्तयेत् ॥ १९ ॥ भवेत्सन्निहितातत्रगङ्गा

१ 'इति ते यन्मया प्रोक्तं स्तोत्र पापप्रणाशनम्' इ० पा०। २ 'वियद्गङ्गा विश्वकाया शिवामृता' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रिपथगामिनी ॥ सप्तवाराभिजप्तेनकरसम्पुटयोजिते ॥ २० ॥ मूर्ध्निकृत्वाजलंभूपश्चतुर्वापञ्चसप्तवा ॥ स्नानकृत्त्वामृदातद्वदामन्त्र्यतुविधानतः ॥
॥ २१ ॥ अश्वक्रान्तेरथक्रान्तेविष्णुक्रान्तेवसुन्धरे ॥ मृत्तिकेहरमेपापंयन्मयादुष्कृतंकृतम् ॥ २२ ॥ उद्धृतासिवराहेणविष्णुनाशतबाहुना ॥
नमस्तेसर्वलोकानांप्रभवारणिसुव्रते ॥ २३ ॥ एवंस्नात्वाततःपश्चादाचम्यतुविधानतः ॥ उत्थायवाससीशुक्लेशुद्धेतुपरिधापयेत ॥२४ ॥ ततस्तुतर्पणं
कुर्य्यात्त्रैलोक्याप्यायनायवै ॥ ब्रह्माणंतर्पयेत्पूर्वंविष्णुंरुद्रंप्रजापतिम् ॥ २५ ॥ देवान्यक्षांस्तथानागान्गन्धर्वाप्सरसोऽसुरान् ॥ क्रूरान्सर्पा
न्सुपर्णांश्चतरूञ्जैजन्तुकान्खगान् ॥ २६ ॥ विद्याधराञ्जलधरांस्तथैवाकाशगामिनः ॥ निराधाराश्चयेजीवाःपापकर्मरताश्चये ॥ २७ ॥ तेषा
माप्यायनार्थायदीयतेसलिलंमया ॥ कृतोपवीतीदेवेषुनिवीतीचभवेन्नरः ॥ २८ ॥ मनुष्यांस्तर्पयेद्भक्त्याब्रह्मपुत्रानृषींस्तथा ॥ सनकःसनन्दनश्चैव
तृतीयश्चसनातनः ॥ २९ ॥ [1]कपिलश्चासुरिश्चैववोढुःपञ्चशिखस्तथा ॥ तेसर्वेतृप्तिमायान्तुमद्दत्तेनाम्बुनासदा ॥ ३० ॥ मरीचिमत्र्यङ्गिरसौपुलस्त्यं
पुलहंक्रतुम् ॥ प्रचेतसंवसिष्ठंचभृगुंनारदमेवच ॥ ३१ ॥ देवब्रह्मऋषीन्सर्वांस्तर्पयेदक्षतोदकैः ॥ अपसव्यंततःकुर्यात्सव्यंजान्वाच्यभूतले ॥
॥ ३२ ॥ अग्निष्वात्तास्तथासौम्याहविष्मन्तस्तथोष्मपाः ॥ कव्यवाडनलान्बर्हिषदश्चवाज्यपाःपुनः ॥ ३३ ॥ सन्तर्पयेत्पितॄन्भक्त्यास
तिलोदकचन्दनैः ॥ यमायधर्मराजायमृत्यवेचान्तकायच ॥ ३४ ॥ वैवस्वतायकालायसर्वभूतक्षयायच ॥ औदुम्बरायदध्नायनीलायपरमेष्ठिने ॥
॥ ३५ ॥ वृकोदरायचित्रायचित्रगुप्तायवैनमः ॥ दर्भपाणिस्तुविधिवत्पितॄन्सन्तर्पयेत्ततः ॥ ३६ ॥ पित्रादीन्नामगोत्रेणतथामातामहानपि ॥
सन्तर्प्यविधिनासर्वानिमंमन्त्रमुदीरयत् ॥ ३७ ॥ येऽबान्धवाबान्धवायेयेऽन्यजन्मनिबान्धवाः ॥ तेतृप्तिमखिलायान्तुयेऽस्मत्तस्तोयकाङ्क्षिणः ॥
॥ ३८ ॥ आचम्यविधिवत्सम्यगालिखेत्पद्ममग्रतः ॥ साक्षतैश्चसपुष्पैश्चसलिलारुणचन्दनैः ॥ ३९ ॥ अर्घंदद्यात्प्रयत्नेनसूर्यनामानु
कीर्त्तनैः ॥ नमस्तेविष्णुरूपायनमस्तेब्रह्मरूपिणे ॥ ४० ॥ सहस्ररश्मयेसूर्यनमस्तेसर्वतेजसे ॥ नमस्तेरुद्रवपुषेनमस्तेभक्तवत्सल ॥ ४१ ॥
पद्मनाभनमस्तेऽस्तुकुण्डलाङ्गदभूषित ॥ नमस्तेसर्वलोकेशसुप्तानामुपबोधन ॥ ४२ ॥ सुकृतंदुष्कृतंचैवसर्वंपश्यसिसर्वदा ॥ सत्यदेवनमस्ते
ऽस्तुप्रसीदममभास्कर ॥ ४३ ॥ दिवाकरनमस्तेऽस्तुप्रभाकरनमोऽस्तुते ॥ एवंसूयनमस्कृत्यसप्तकृत्वाप्रदक्षिणम् ॥ ४४ ॥ द्विजंगांकाञ्चनंस्पृष्ट्वा
पश्चात्स्वगृहंव्रजेत् ॥ आश्रमस्थांस्ततःपूज्यप्रतिमांचापिपूजयत् ॥ ४५ ॥ पूर्वंभक्त्यैवगोविन्दंगृहीचनियतात्मवान् ॥ पूजयेद्भक्तितोराज

[1]'सनत्कुमारश्च तथा कपिलश्चासुरिश्च वै ॥ वोढुः पंचशिखस्तद्वन्मुख्या ऋषिसुता इमे ॥' इ० पा० । [2]'विश्वरूपाय' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्नुभयत्रयथाविधि ॥ ४६ ॥ विशेषादपिवैशाखेयोऽर्चयेन्मधुसूदनम् ॥ सर्वसंवत्सरंयावदर्चितस्तेनमाधवः ॥ ४७ ॥ माधवेमासिसम्प्राप्ते
मेषस्थेकर्मसाक्षिणि ॥ केशवप्रीतयेकुर्यात्केशवव्रतसञ्चयम् ॥ ४८ ॥ दद्यादनेकदानानितिलाज्यप्रभृतीन्यपि ॥ जन्मकोटिसमुद्भूतपातकान्त
कराणिच ॥ ४९ ॥ जलान्नशर्कराधेनुतिलधेनुमुखानिच ॥ वित्तमानेनदेयानिदानानीप्सितसिद्धये ॥ ५० ॥ वैशाखंसकलंमासं
नित्यस्नायीजितेन्द्रियः ॥ जपन्हविष्यंभुञ्जानःसर्वपापैःप्रमुच्यते ॥ ५१ ॥ एकभुक्तमथोनक्तमयाचितमतन्द्रितः ॥ माधवेमासियःकुर्याल्लभते
सर्वमीप्सितम् ॥ ५२ ॥ वैशाखेविधिनास्नानद्वयंनद्यादिकेबहिः ॥ हविष्यंब्रह्मचर्यंचभूशय्यानियमस्थितिः ॥ ५३ ॥ व्रतंदानंजपोहोमो
मधुसूदनपूजनम् ॥ अपिजन्मसहस्रोत्थंपापंदहतिदारुणम् ॥ ५४ ॥ यथैवमाधवोध्यातोविनाशयतिकिल्बिषम् ॥ तथैवमाधवेस्नानंनियमेन
विनिर्मितम् ॥ ५५ ॥ तीर्थेचानुदिनंस्नानंतिलैश्चपितृतर्पणम् ॥ दानंधर्मघटादीनांमधुसूदनपूजनम् ॥ ५६ ॥ माधवेमासिकुर्वीतमधुसूदन
तुष्टिदम् ॥ तिलोदकसुवर्णान्नशर्कराम्बरभूषणम् ॥ ५७ ॥ पादत्राणातपत्राम्बुकुम्भान्दद्याद्द्विजातिषु ॥ त्रिसन्ध्यंपूजयेदीशभक्तितोमधुसूद
नम् ॥ ५८ ॥ साक्षाद्विमलयालक्ष्म्यासमुपेतंसमाहितः ॥ सुवर्णतिलपात्रैश्चब्राह्मणाञ्छक्तितोबहून् ॥ ५९ ॥ तर्पयेदुदपात्रैर्योब्रह्महत्यां
व्यपोहति ॥ वैशाखेमासियःस्नात्वाप्रातर्नद्यांसमाहितः ॥ ६० ॥ पूजयित्वाहरिंभक्त्यापुष्पैःकालोद्भवैःफलैः ॥ पूजयेद्ब्राह्मणंशक्त्यापाखण्डा
लापवर्जितः ॥ ६१ ॥ तर्पयेद्वस्त्रगोदानैरत्नाद्यैर्धनसञ्चयैः ॥ अन्यद्वित्तंयथाशक्तिस्तोकंस्तोकंसमाचरेत् ॥ ६२ ॥ पश्चाद्दिनिःस्वःपुरुषो
माधवेमासिमाधवम् ॥ पुष्पार्चनविधानेनपूजयेन्मधुसूदनम् ॥ ६३ ॥ सर्वपापविनिर्मुक्तःपितॄणांतारयेच्छतम् ॥ सजन्मशतसाहस्रंनशोकफल
भाग्भवेत् ॥ ६४ ॥ नचव्याधिभयंतस्यनदारिद्र्यंनबन्धनम् ॥ सविष्णुभक्तोजायेतधन्योजन्मनिजन्मनि ॥ ६५ ॥ यावद्युगसहस्राणिशतमष्टोत्तरं
भवेत् ॥ तावत्स्वर्गेवसेद्वीरभूपतिश्चपुनर्भवेत् ॥ ६६ ॥ भूपतेविविधान्भोगान्भुक्त्वाचैवयथासुखम् ॥ माधवस्यप्रसादेनमाधवेलीयतेततः ॥ ६७ ॥
शृणुराजन्प्रवक्ष्यामिसमासान्माधवार्चनम् ॥ वैदिकंतान्त्रिकंवापिमिश्रकंपापनाशनम् ॥६८॥ नह्यन्तोऽनन्तपारस्यनान्तःपूजाविधेर्नृप॥अथसंक्षिप्य
चोच्यतेतयथावदनुपूर्वशः॥६९॥वैदिकस्तान्त्रिकोमिश्रःश्रीविष्णोस्त्रिविधोमखः ॥त्रयाणामीप्सितेनैवविधिनाहरिमर्चयेत् ॥७०॥ वैदिकोमिश्रकोवापि
विप्रादीनांविधीयते ॥ तान्त्रिकोविष्णुभक्तस्यशूद्रस्यापिप्रकीर्तितः ॥७१॥ यथास्वनिगमेनोक्तंद्विजत्वंप्राप्यपूरुषः॥यजेच्चविधिवद्विष्णुंब्रह्मचारीसमा ॥ १२० ॥

१ 'वित्तशाठ्यविवर्ज्यानि' इ० पा० । २'दुग्धपात्रैर्यः' इ० पा० । ३'याति सोऽपि परं पदम्' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हितः ॥ ७२ ॥ अर्चयेत्स्थण्डिलेऽग्नौवासूर्येऽप्सुहृदिवाद्विजे ॥ द्रव्येणभक्तियुक्तेनस्वगुरुंतदनुज्ञया ॥ ७३ ॥ पूर्वंस्नानंप्रकुर्वीतधौतदन्तोऽङ्ग
शुद्धये ॥ उभयोरपिचस्नानंमन्त्रैर्मृद्ग्रहणादिना ॥ ७४ ॥ सन्ध्योपास्त्यादिकर्माणिवेदतन्त्रोदितानिवै ॥ पूजान्तेकल्पयेत्सम्यक्सङ्कल्पंकर्मपाव
नम् ॥७५॥ शैलीदारुमयीलौहीलेप्यालेख्याचसैकती ॥ मनोमयीमणिमयीप्रतिमाष्टविधास्मृता ॥७६॥ चलाचलेतिद्विविधाप्रतिष्ठाजीवमन्दिरम्॥
उद्वासावाहनेनस्तःस्थिरायांमाधवार्चने ॥७७॥ अस्थिरायांविकल्पःस्यात्स्थण्डिलेतुभवेद्द्वयम् ॥ स्नापनंत्वविलेप्यायामन्यत्रपरिमार्जनम् ॥७८॥
द्रव्यैःप्रसिद्धैर्देवेज्याप्रतिमादिष्वमायिनः ॥ भक्तस्यचयथालब्धर्भक्तिभावेनचैवहि ॥ ७९ ॥ स्नानालङ्करणंश्रेष्ठमर्चायामेवभूपते ॥ स्थण्डिलेष्वपि
विन्यासोवह्नावाज्यहुतंहविः ॥ ८० ॥ सूर्येचाभ्यर्हणंश्रेष्ठंस्थण्डिलेसलिलादिभिः ॥ श्रद्धयोपहृतंश्रेष्ठंहरौभक्तेनवार्यपि ॥ ८१ ॥ गन्धोधूपःसुमनसो
दीपोऽन्नाद्यंचकिंपुनः ॥ शुचिःसम्भृतसम्भारःप्राग्दर्भैःकल्पितासनः ॥ ८२ ॥ आसीनःप्रागुदग्वक्रोह्यर्चायामथसम्मुखः ॥ कृतन्यासःकृतन्यासां
हर्यर्चांपाणिनास्पृशेत् ॥ ८३ ॥ कलशंप्रोक्षणीयंचयथावदुपसाधयेत् ॥ तदद्भिर्देवयजनंद्रव्याण्यात्मानमेवच ॥ ८४ ॥ प्रोक्ष्यपात्राणित्रीण्यद्भि
स्तैस्तैर्द्रव्यैस्तुसादयेत् ॥ पाद्यार्घ्याचमनीयार्थंत्रीणिपात्राणिदापयत् ॥ ८५ ॥ हृतशीर्ष्णाचशिखयागायत्र्याचाभिमन्त्रयेत् ॥ पिण्डेवाय्वग्नि
संसिद्धेहृत्पद्मस्थांपरांविभोः ॥ ८६ ॥ अण्वींजीवकलांध्यायेन्नादान्तेसिद्धिभाविताम् ॥ तयात्मभूतयापिण्डेव्याप्तेसम्पूज्यतन्मयः ॥ ८७ ॥ आवा
ह्यार्चादिषुस्थाप्यन्यस्तांगांतांप्रपूजयेत्॥पाद्यार्घ्यस्नानार्हणादीनुपचारान्प्रकल्पयेत् ॥ ८८ ॥ धर्मादिभिश्चनवभिःकल्पयित्वासनंहरेः ॥ पद्ममष्ट
दलंतत्रकर्णिकाकेसरोज्ज्वलम् ॥ ८९ ॥ उभाभ्यांवेदतन्त्राभ्यांहरेरुभयसिद्धये ॥ सुदर्शनंपाञ्चजन्यंगदासीषुधनुर्हलम् ॥ ९० ॥ मुसलंकौस्तुभंमालां
श्रीवत्संचानुपूजयेत् ॥ नन्दंसुनन्दंगरुडंप्रचण्डंचण्डमेवच ॥९१॥ महाबलंबलंचैवकुमुदंकुमुदेक्षणम् ॥ दुर्गांविनायकंव्यासंविष्वक्सेनंगुरून्सुरान् ॥
॥ ९२ ॥स्वस्वस्थानेष्वभिमुखान्पूजयेत्प्रोक्षणादिभिः ॥ चन्दनोशीरकर्पूरकुङ्कुमागुरुवासितैः ॥९३॥ सलिलैःस्नापयेन्मन्त्रैर्नित्यंवाविभवेसति ॥
स्वर्णघर्मानुवाकेनमहापुरुषविद्यया ॥ ९४ ॥ पौरुषेणापिसूक्तेनसामनीराजनादिभिः ॥ वस्त्रोपवीताभरणपत्रस्रग्गन्धलेपनैः ॥ ९५ ॥
अलङ्कुर्वीतसप्रेमविष्णुभक्तोयथोचितम् ॥ पाद्यमाचमनीयंचगन्धंसुमनसोऽक्षतान् ॥ ९६ ॥ गन्धधूपोपहार्याणिदद्याद्वैश्रद्धयार्चकः ॥ गुडपायस
सर्पींषिशष्कुल्यापूपमोदकान् ॥ ९७ ॥ पायसंदधिसर्पिश्चनैवेद्यंसविकल्पयेत् ॥ अभ्यङ्गोन्मर्दनादर्शदन्तधावाभिषेचनम् ॥ ९८ ॥ अन्नाद्यंनृत्य
गीतानिसर्वाणिस्युरथान्वहम् ॥ विधिनाविहितेकुण्डेमेखलावर्तवेदिभिः ॥९९॥ अग्निमाधायपरितःसमूहेत्पाणिनोदकम् ॥परिस्तीर्याथपर्युक्ष्यदत्त्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चेध्मंयथाविधि ॥१००॥ प्रोक्षण्यासाद्यद्रव्याणिप्रोक्षण्यैवाज्यंसेचनम् ॥ततजाम्बूनदप्रख्यंशङ्खचक्रगदाम्बुजः ॥१॥ लसच्चतुर्भुजंशान्तंपद्मकिञ्जल्क
वाससम् ॥ स्फुरत्किरीटकटककटिसूत्रवराङ्गदम् ॥ २ ॥ श्रीवत्सवक्षसंभ्राजत्कौस्तुभंवनमालिनम् ॥ ध्यायन्नभ्यर्च्यदारूणिहविषासघृतानि
च ॥३॥ प्रास्याज्यभागावाघारौदत्त्वाचाज्यप्लुतंहविः ॥अभ्यर्च्याथनमस्कृत्यपार्षदेभ्योबलिंहरेत् ॥४॥ मूलमन्त्रंजपेद्ब्रह्मन्स्मरन्नारायणात्मकम् ॥
दत्त्वाचमनमुच्छिष्टंविष्वक्सेनायकल्पयेत् ॥ ५ ॥ मुखवासंतुसुरभिताम्बूलाद्यमुपाहरेत् ॥ उपगायन्गृणन्नित्यंकर्माण्यभिनवाक्षरैः ॥ ६ ॥
सत्कथांश्रावयञ्छृण्वन्मुहूर्तंक्षणिकोभवेत् ॥ स्तवैरुच्चावचैःस्तोत्रैःपौराणैःप्राकृतैरपि ॥ ७ ॥ स्तुत्वाप्रसीदभगवन्नितिवन्देतदण्डवत् ॥ शिरस्त
त्पादयोःकृत्वाबाहुभ्यांचपरस्परम् ॥ ८ ॥ प्रपन्नंपाहिमामीशभीतंमृत्युग्रहार्णवात् ॥ इतिशेषान्हरेर्दत्ताञ्छिरस्याधायसादरम् ॥ ९ ॥
उद्वासयेच्चेदुद्वास्यंज्योतिर्ज्योतिषिचात्मनः ॥ अर्चादिषुपदंयत्रश्रद्धावांस्तत्रचार्चयेत् ॥ ११० ॥ सर्वभूतेष्वात्मनिचसर्वात्मानमवस्थितम् ॥ एवं
क्रियायोगपथैःपुमान्वैदिकतान्त्रिकैः ॥ ११ ॥ अर्चयेच्चयतःसिद्धिंहरेर्विन्दत्यभीप्सिताम् ॥ तामर्चांसम्प्रतिष्ठाप्यमन्दिरंकारयेद्दृढम् ॥ १२ ॥
पुष्पोद्यानानिरम्याणिपूजा[१]यात्रोत्सवादिकम् ॥ पूजादीनांप्रवाहार्थंमहापर्वस्वथान्वहम् ॥ १३ ॥ क्षेत्रापणपुरग्रामान्दत्त्वासायुज्यतामियात् ॥
प्रतिष्ठयासार्वभौमंसद्मनाभुवनत्रयम् ॥ १४ ॥ पूजादिनाब्रह्मलोकंत्रिभिस्तत्साम्यतामियात् ॥ तमेवनैरपेक्षेणभक्तियोगेनविन्दते ॥ १५ ॥
भक्तियोगंसलभतेएवंयःपूजयेद्धरिम्॥१६॥यत्कृष्णप्रणिपातधूलिधवलंतद्वर्ष्मतद्वच्छुभंतेनेत्रेतपसार्जितेसुरुचिरेयाभ्यांहरिर्दृश्यते ॥साबुद्धिर्विमलेन्दु
शङ्खधवलायामाधवव्यापिनीसाजिह्वामृदुभाषिणीनृपमुहुर्यास्तौतिनारायणम् ॥ १७ ॥ मूलमन्त्रेणकर्तव्यंस्त्रीशूद्रैरपिपूजनम् ॥ श्रद्धया
स्वगुरूद्दिष्टमार्गेणान्यैश्चवैष्णवः ॥ १८ ॥ इदंतेसर्वमाख्यातंपावनंमाधवार्चनम् ॥ विशेषान्माधवेमासित्वमेतत्कुरुभूपते ॥ १९ ॥ सूतउवाच ॥
इत्येवमाकर्ण्यवचोविचित्रंपुण्यंपवित्रंविधिनन्दनस्य ॥ प्रणम्यबद्धाञ्जलिराहराजासकौतुकीभागवतप्रधानः ॥ १२० ॥ अम्बरीषउवाच ॥ समस्त
भूमीवलयेश्वरोऽहमव्याहताज्ञोविबुधप्रसेवी ॥गोविन्दपादाम्बुजदत्तचित्तःस्वचित्तसन्तोषितभूमिदेवः ॥२१॥ विख्यातराजोचितवंशरत्नंनिरन्तरंधर्म
रुचिर्यशस्वी ॥ सौन्दर्यशौर्योदयदानशीलःसुपुत्रवानस्मिजितारिवर्गः ॥ २२ ॥ केनापिपुण्येनपवित्रबुद्धिर्जातोऽहमीदृग्गुणसङ्गतश्रीः ॥ इयंपुनः
श्रीरिवपुण्यमूर्तिर्लब्धाकुतःकान्तिमतीचकान्ता ॥ २३ ॥ इदंमेसुकृतंसर्वंपुराजन्मनिचेष्टितम् ॥ समादिशमुनेसम्यक्सर्वज्ञोऽसिदयानिधे ॥ २४ ॥

१ 'पूजाकर्मोपसिद्धये' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नारदउवाच ॥ इयंरूपवतीनामवेश्यासीदन्यजन्मनि ॥ साम्प्रतंतवभार्यायासत्याचारातिसुन्दरी ॥ २५ ॥ वेश्याधर्मेणवर्त्तेतयथोद्दिष्टेनभाविनी ॥
कुर्वतीकिलकर्माणिशुभानिद्विजशासनात् ॥ २६ ॥ देवदासइतिख्यातोहेमकारोभवानभूत् ॥ पूर्वजन्मनिवैतस्यारुचेर्भर्ताभुजङ्गमः ॥ २७ ॥ इयं
भवन्तंभजतेरुचीरूपवतीपुनः ॥ व्ययार्थमयनंधर्मस्थितविज्ञानमुत्तमम् ॥ २८ ॥ आकर्ण्यचैकदाधर्मवैशाखस्नानसम्भवम् ॥ चक्रेधर्मवतीतोये
स्नानंमेषगतेरवौ ॥ २९ ॥ दानंदत्तवतीदक्षावेश्यारूपवतीसदा ॥ ब्राह्मणायनमस्कारंभक्त्यादरपुरःसरम् ॥ १३० ॥ सतयादेवदासस्त्वंबोधितःस्नेह
यन्त्रितः ॥ कृतवान्बुद्धितःस्नानंमाधवेमासिसादरम् ॥ ३१ ॥ तत्रत्रेतायुगस्यादौतृतीयामाप्यनिर्मलाम् ॥ सुवर्णकारंसोवाचदेवदासंतमादरात् ॥
॥ ३२ ॥ वेश्योवाच ॥ उत्तमंकुरुसौवर्णमधुसूदनमच्युतम् ॥ पूजयित्वायवैर्देवमेतैःसन्तर्प्यचानलम् ॥ ३३ ॥ ब्राह्मणायचदास्यामिब्राह्मणानामनु
ज्ञया ॥ दानमेतत्पुराणेषुकथ्यतेतत्रचाक्षयम् ॥ ३४ ॥ अक्षयेतितृतीयासौब्राह्मणेभ्यःश्रुतंमया ॥ शुक्लावैशाखमासस्यतदक्षयफलप्रदम् ॥ ३५ ॥
अस्यांदास्यामितंहैमंमधुसूदनमव्ययम् ॥३६॥ नारदउवाच ॥ इतितस्यावचःश्रुत्वामधुरंहेमकारकः॥चक्रेसुवर्णप्रतिमामच्युतस्यापिसुन्दरीम्॥३७॥
सत्यभावेनधर्मार्थमितिचौर्यविवर्जितः ॥ यथोद्दिष्टस्यचन्द्रस्यप्रतिमांलक्षणान्विताम् ॥ ३८ ॥ ददौसाचविधानेनस्नात्वाविप्रायसुन्दरीम् ॥
पूजयित्वाततस्तस्यामक्षयायांतिथौनृप ॥ ३९ ॥ कालेनकियतावेश्यासामृताधर्मनिष्ठिता ॥ देवदासोऽपिसततोमृतःस्वीयायुषःक्षये ॥ १४० ॥
तेनपुण्येनभूपालहेमकारोऽन्यजन्मनि॥ सत्वंप्राप्तोमहींराजन्नशेषगुणसंयुतः ॥४१॥ सापिरूपवतीवेश्यातेनधर्मेणतेऽभवत् ॥ नाम्नाकान्तिमतीकान्ता
प्रणयेनपरिप्लुता ॥ ४२ ॥ विविधावासनावीरकर्मणांपूर्वसम्भवाः ॥ विचित्रागतयस्तातज्ञायन्तेनबुधैरपि ॥ ४३ ॥ तमेनंमाधवंमासंप्रतिकार्यं
नसंशयः ॥ गोपितंतेनदेवेनब्रह्मणामाधवेनच ॥ ४४ ॥ असाधुसङ्गैरनवाप्तविद्यैरसंयतैराश्रमधर्महीनैः ॥ अभूततीर्थैरकृतव्रतैस्तैर्नलभ्यतेमाधव
मासधर्मः ॥ ४५ ॥ गोविन्दकेशवमुकुन्दहरेमुरारेलक्ष्मीनिवासमधुसूदनकृष्णविष्णो ॥ वाणीवरानवदनेवसतीतियेषांवैशाखमासनियमोभवते
नतेषाम् ॥ ४६ ॥ येसाधुसाधुवचनानिहिताधिकानिनाकर्णयन्तिचहरेश्चरितामृतानि ॥ पश्यन्तियेनकमलापतिकेतनानिवैशाखमासनियमंनहिते
लभन्ते ॥४७॥ शुश्रूषितानगुरवोनवरायकन्यादत्तासमायसमयेसमलङ्कृतायैः ॥ अध्यापितानतनयाविनयादिधर्मवैशाखमासनियमंनहितेलभन्ते ॥
॥ ४८ ॥ सूतउवाच॥ इत्येवमादिश्यमुनिर्नरेशमामन्त्र्यतंमन्त्रविदग्रगण्यः ॥ स्नातुंययौमाधवमासिगङ्गामभ्यर्चितस्तेनतदासविप्राः ॥४९॥ विधिं
सराजापिततश्चकारवैशाखमासस्यमुनिप्रणीतम्॥पत्न्यासमंपुण्यधियातमेवसंचिन्तयँश्लोकपवित्रकीर्तिः ॥१५०॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वैशाखमाहात्म्येनारदाम्बरीषसंवादेपञ्चनवतितमोऽध्यायः ॥ ९५ ॥ ऋषयऊचुः ॥ सूतसूतमहाप्राज्ञजीवजीवशतंसमाः ॥ यद्वयंपुण्यसमयंश्राविता
जगतोहितम् ॥ १ ॥ वदभूयोऽपिभूयिष्ठंपिबामस्तावकंवचः ॥ पायंपायंनतृप्यामोवयंसूततदुत्तमम् ॥ २ ॥ सूतउवाच ॥ अत्राप्युदाहरन्तीम
मितिहासंपुरातनम् ॥ संवादमादिलोकस्यजगतांजगदीशितुः ॥३॥ षट्सहस्राणिचोच्छ्रायोविस्तारेणपुनस्त्रयम् ॥ एवंनवसहस्राणियोजनानांविधाय
च ॥ ४ ॥ वामयादंष्ट्रयागृह्यउद्धृतादौवसुन्धरा ॥ दिव्यवर्षसहस्रंवैदंष्ट्रयाधारितामही ॥ ५ ॥ धर्माख्यानप्रसङ्गेनसोवाचविनयाद्विभुम् ॥ ६ ॥ पृथि
व्युवाच ॥ एतेद्वादशमासावैषष्टिर्दिनशतत्रयम् ॥ एषांकिमुत्तमंपुण्यंप्रियंचतवकेशव ॥ ७ ॥ पवित्रःकार्त्तिकोमासस्तुलासंस्थेदिवाकरे ॥ मकरस्थे
रवौमासःपुराणेपावनःस्मृतः ॥ ८ ॥ मेषस्थेमाधवोमासोभास्करेपठ्यतेबुधैः ॥ मार्गशीर्षोऽपिमासानांपावनःपरिकीर्तितः ॥ ९ ॥ एवंमासाः
पवित्रास्तेवासराःकेऽपिकीर्तिताः ॥ युगादयोयुगान्ताश्चतथाकल्पादयोऽपिच ॥ १० ॥ सर्वेभ्योऽप्यधिकंमासमेतेभ्योवदपावनम् ॥ सर्वयज्ञमय
श्रीमन्नेकंनिश्चित्यमेवद ॥११॥ वराहउवाच ॥ विधिनाविधिनाचैवयेयजन्तिनराधरे॥माधवेमासिमांभक्त्यातैश्चपूज्योऽस्म्यहंसदा॥१२॥ हिरण्याक्षो
वरारोहेमाधवेतुमधुर्हतः ॥ आदिदैत्याउभावेतौहत्वात्वंतुसमुद्धृता ॥ १३॥ त्रेतायुगेत्रयीधर्मोज्ञानवर्णव्यवस्थितिः॥ माधवेमासिसम्भूतातेनमेमाधवः
प्रियः ॥१४ ॥ त्रेतायुगंतृतीयायांशुक्लायांमासिमाधवे ॥ प्रवृत्तंचत्रयीधर्माःप्रवृत्तास्तेप्रवर्द्धिताः ॥ १५ ॥ अक्षयासोच्यतेलोकेतृतीयाहरिवल्लभा ॥
स्नानेदानार्चनेश्राद्धेजपेपूर्वजतर्पणे ॥ १६ ॥ येऽर्चयन्तियवैर्विष्णुंश्राद्धंकुर्वन्तियत्नतः ॥ तेषांददाम्यहंसर्वंयन्मनोऽभीष्टमुत्तमम् ॥ १७ ॥ येदद
त्यपिदानानिधन्यास्तेधार्मिकानराः ॥ येयजन्तिहरिंनित्यमध्वरैर्विविधैरपि ॥ १८ ॥ माधवेयजतेयोमांतेभ्यस्तदधिकंफलम् ॥ स्नानंदानं
जपोहोमस्तपोयज्ञव्रतादिकम् ॥ १९ ॥ वैशाखेयत्कृतंदेवितस्यपुण्यफलंशृणु ॥ मन्वन्तराणांकोटयस्तुदशपञ्चचसप्तच ॥ २० ॥ मत्सान्निध्य
गतास्तेऽपितिष्ठन्तिभयवर्जिताः ॥ यद्यपिस्युर्ग्रहाःसर्वेक्रूराजन्मव्ययाष्टकाः ॥ २१ ॥ प्रातःस्नानेनवैशाखेसर्वेसौम्याभवन्तिते ॥ वैशाखेमासि
योविप्रान्भोजयेद्भक्तितत्परः ॥ सिक्थेसिक्थेभवेत्तृप्तिःपितृणांयुगसङ्ख्यया ॥ २२ ॥ यच्छन्तितत्रमधुराधिकभोजनानियेवायवाशनतिलोदक
भोजनानि ॥ छत्राम्बराणिचरणोचितरक्षणानिधन्यास्तएवपरितोषकराहिविष्णोः ॥ २३ ॥ विशेषादिहदातव्यास्तिलामधुसमन्विताः ॥ धर्माय ॥ १२२ ॥
बृहतेदीर्घदुरितक्षयहेतवे ॥ २४ ॥ एवंकृतेतुयत्पुण्यंप्राप्यतेमनुजैश्चतैः ॥ तत्कैर्गणयितुंशक्यंवर्षकोटिशतैरपि ॥ २५ ॥ पुत्रपौत्रादिसम्पत्तिदीर्घा
यूंषियथेप्सितम् ॥ इहाप्नोतिपरत्रापिमामेवप्रतिपद्यते ॥२६॥ अनेकजन्मार्जितपातकावलीविलीयतेमाधवमज्जनेन ॥ जनस्यतत्रोषसिपुण्यतीर्थेयथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विधानंश्रयतेतथावा ॥ २७ ॥ यःपरित्यज्यवैशाखंव्रतमन्यदुपाचरेत् ॥ सकरस्थंमहारत्नंहित्वालोष्टंहियाचते ॥ २८ ॥ सूतउवाच ॥ एवंसभग
वान्पूर्वमादिदेवोऽवदद्विभुः ॥ माधवंमासमुद्दिश्यजगत्यांजगतीधरः ॥ २९ ॥ किमत्रबहुनोक्तेननतदस्तिमहीसुराः ॥ यदप्राप्यंभवेन्मासिमाधवे
माधवार्चनात् ॥ ३० ॥ शृणुध्वंचपुरावृत्तमिहार्थेपरमाद्भुतम् ॥ ब्राह्मणस्यचसंवादंयमस्यचमहात्मनः ॥ ३१ ॥ मध्यदेशेमहाग्रामोब्राह्मणानां
बभूवह ॥ गङ्गायमुनयोर्मध्येयामुनस्यगिरेरधः ॥ ३२ ॥ विद्वांसस्तत्रभूयिष्ठाब्राह्मणाश्चावसंस्तदा ॥अथप्राहयमःकंचित्पुरुषंकृष्णपिङ्गलम् ॥३३ ॥
रक्ताक्षमूर्द्धरोमाणंकाकजङ्घाक्षिनासिकम् ॥ गच्छत्वंभोमहाग्रामंगत्वाब्राह्मणमानय ॥ ३४ ॥ वसिष्ठगोत्रसम्भूतंनामतोयज्ञदत्तकम् ॥ [१]शमेनिविष्टं
विद्वांसंयज्ञकर्मविशारदम् ॥ ३५ ॥ नचान्यमानयेथास्त्वंसगोत्रंतस्यपार्श्वतः ॥ सहिताद्दग्गुणस्तेनतुल्योऽध्ययनजन्मना ॥ ३६ ॥ आकृत्या
चतथाचिह्नैःसमस्तैनैवसत्तमः ॥ तमानययथोद्दिष्टापूजाकार्याहितस्यमे ॥ ३७ ॥ सगत्वाप्रतिकूलंतुचकारयमशासनम् ॥ तमेवमानया
मासप्रतिषिद्धोयमेनयः ॥ ३८ ॥ तस्मैयमःसमुत्थायपूजांकृत्वाचधर्मवित् ॥ प्रोवाचनीयतामेषसोऽन्यआनीयतामिति ॥ ३९ ॥ सूत
उवाच ॥ एवमुक्तेतुवचनेधर्मराजेनसद्विजः ॥ उवाचधर्मराजंतंनिर्विण्णोगमनायवै ॥ ४० ॥ ब्राह्मणउवाच ॥ कस्मादहमिहानीतःकस्मात्प्रेर
यसेपुनः ॥ गन्तुनैवोत्सहेतत्रमर्त्यलोकंपुनःप्रभो ॥ ४१ ॥ यमउवाच ॥ इहक्षीणायुषांपुंसांवासःपुण्यवतांभवेत् ॥ अयंवैधर्मराजस्य
लोकोधर्मःप्रकीर्तितः ॥ ४२ ॥ सौख्यभूमिरियंसर्वाधर्मराजोऽहमीश्वरः ॥ पुण्यापुण्यानुसारेणजन्तूनांसुखदुःखदः ॥ ४३ ॥ पापिनांयमरूपो
ऽस्मिन्नृणांनिरयदायकः ॥ तथापुण्यवतांसौख्यस्वर्गदोधर्ममूर्तिमान् ॥ ४४ ॥ गच्छविप्रत्वमद्यैवनिलयंस्वंयथागतः ॥ अद्यापिदशवर्षाणा
मायुस्तेपरिवर्तते ॥ ४५ ॥ क्षयेतवायुषःप्राप्तिर्लोकस्यास्यभविष्यति ॥ प्रष्टव्यंचेत्त्वयाह्यन्यत्पृच्छस्वप्रब्रवीमिते ॥ ४६ ॥ ब्राह्मणउवाच ॥
यत्कृत्वासुमहत्पुण्यंस्वर्गःस्याद्ब्रूहितन्मम ॥ सर्वस्यहिप्रमाणंत्वंधर्माधर्मविनिश्चये ॥ ४७ ॥ यदिदेवमयासम्यग्गन्तव्यंनिजमन्दिरे ॥ तद्ब्रूहि
कर्मणाकेनपतन्तिनरकेनराः ॥ ४८ ॥ व्रजन्तिकेनवैस्वर्गंतत्सर्वंकृपयावद ॥ ४९ ॥ यमउवाच ॥ कर्मणामनसावाचायेधर्मविमुखानराः ॥ विष्णु
भक्तिविहीनायेतेवैनिरयगामिनः ॥ ५० ॥ पश्यन्तिभेदबुद्ध्यायेब्रह्माणंशङ्करंहरिम् ॥ विरक्ताविष्णुविद्यासुनरानिरयगामिनः ॥ ५१ ॥ कुलदेशो
चितंकर्मयस्त्यक्त्वान्यत्समाचरेत् ॥ कामाद्वायदिवामोहात्सयातिनरकंनरः ॥ ५२ ॥ अयाज्ययाजकश्चैवयाज्यानांचविवर्जकः ॥ विरतोविष्णु

१ 'स्वधर्मनिष्ठं विद्वांसमध्यापकमनारतम्' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्यासुसभुङ्क्तेनरकान्बहून् ॥ ९३ ॥ अदत्त्वापितृदेवेभ्योविप्रेभ्योमर्त्यबन्धुषु ॥ सधनोम्रियतेपापःसयातिनरकान्बहून् ॥ ९४ ॥ सर्वाण्यन्नानि
सिद्धानिपाकभेदंकरोतियः ॥ अवैश्वदेवंभुञ्जीतसयातिनरकंचिरम् ॥९५ ॥ बहुद्रोहेणभूतानांयेऽर्जयन्तिधनंद्विज ॥ धनवन्तोनिरयगादाम्भिकादुःख
भागिनः ॥ ९६ ॥ नास्तिक्यादथवालोभान्मोहात्कालेयथोदिते ॥ भक्त्यानश्राद्धदायेस्युःपच्यन्तेनरकेषुते ॥ ९७ ॥ दीयमानस्यवित्तस्यब्राह्मणे
भ्यस्तुपापकृत् ॥ विघ्नमाचरतेयोऽसौनरोनिरयगोभवेत् ॥ ९८ ॥ सामान्यदक्षिणांलब्ध्वागृह्णात्येकोर्थमोहितः ॥ नास्तिक्यभावनिरतोनरःस्या
न्नरकालये ॥९९ ॥ असहिष्णुतयातस्यगुणानांकारणंभवेत् ॥ महत्पापंसमुत्पन्नंकारणंनरकस्यतत् ॥ ६० ॥ निर्दोषांसुहृदंभार्यांत्यजन्कालेनयाति
यः ॥ नवहेतयशस्तेपांसनरोनरकेपतेत् ॥ ६१ ॥ अधर्मंधर्ममितियोवदेन्मोहवशंगतः ॥ हैतुकोनास्तिकोयस्तुसनरोनिरयालयः ॥ ६२ ॥ मनसा
योऽन्यभावेनवचसाचान्यथावदेत् ॥ हृदयंकलुषंकुर्यात्सनरोनरकेवसेत् ॥ ६३ ॥ अवमन्यचयेयान्तिभगवत्कीर्तनंनराः ॥ तेयान्तिनरकंघोरंतेन
पापेनकर्मणा ॥ ६४ ॥ पश्यन्तोभगवद्वारंनामशास्त्रपरिच्छदम् ॥ अकृत्वातत्प्रणामादितेयान्तिनरकौकसः ॥ ६५ ॥ विनापराधेननराःकृत्वा
पत्न्यधिवेदनम् ॥ त्यजन्तिसुकलत्रंयेतेयान्तिनरकेनराः ॥ ६६ ॥ नशृणोतिगुरोर्वाक्यंधर्मशास्त्रंचयोनरः ॥ परेषांचेतसःक्लेशकारीनिरयगोभवेत् ॥
॥६७॥ पश्यतांबन्धुबालानांप्रकर्षीमिष्टमश्नुते॥सयातिनरकंघोरंकेवलोदरपूरकः॥ ६८॥ तुलामकरमेषेषुप्रातःस्नानंनयश्चरेत्॥नद्यादिषुचनास्तिक्या
त्तस्यस्यान्नरकालयः ॥ ६९ ॥ वैष्णवंजनमालोक्यनाभ्युत्थानंकरोतियः॥प्रणयादरतोविप्रसनरोनरकातिथिः॥७०॥काष्ठैर्वाशङ्कुभिर्वापिशूलैरश्मभि
रेवच ॥ येमार्गांश्चैवरुन्धन्तितेवैनिरयगामिनः॥ ७१ ॥ आद्यंपुरुषमीशानंसर्वलोकमहेश्वरम् ॥ नचिन्तयन्तियेविष्णुंतेवैनिरयगामिनः॥७२॥क्षेत्रवृत्ति
गृहच्छेदंप्रीतिच्छेदंचयेनराः ॥ आशाच्छेदंचकुर्वन्तितेनरानरकौकसः ॥ ७३ ॥ आगतान्भोजनार्थंचब्राह्मणान्वृत्तिकर्शितान् ॥ यःपरीक्षेतमूढात्मास
ज्ञेयोनरकातिथिः ॥ ७४ ॥ अनाथंवैष्णवंदीनंरोगार्तंवृद्धमेवच ॥ नानुकम्पन्तियेमूढास्तेवैनिरयगामिनः ॥ ७५ ॥ नियमांस्तुसमादाययेपश्चादजिते
न्द्रियाः ॥ विलोपयन्तितान्भूयस्तेवैनिरयगामिनः ॥ ७६ ॥ शृणुविप्रयथायान्तिनराःस्वर्गंदयालवः॥समासेनैववक्ष्यामिकिञ्चित्तेगौरवादहम्॥७७॥
येऽर्चयन्तिहरिंदेवंजिष्णुंविष्णुंसनातनम्॥ नारायणमजंकृष्णंविष्वक्सेनंचतुर्भुजम् ॥७८॥ ध्यायन्तिपुरुषंदिव्यमच्युतंयेस्मरन्तिच ॥ लभन्तेतेऽच्युत
स्थानंश्रुतिरेषापुरातनी॥ ७९॥ इदमेवहिमाङ्गल्यमिदमेवधनार्जनम् ॥ जीवितस्यफलंचैतद्यद्दामोदरकीर्तनम् ॥ ८०॥ कीर्तनाद्देवदेवस्यविष्णोरमित
तेजसः ॥ दुरितानिविलीयन्तेतमांसीवदिनोदये ॥८१॥ गाथांगायन्तियेनित्यंवैष्णवींश्रद्धयान्विताः ॥ स्वाध्यायनिरतानित्यंतेनराःस्वर्गगामिनः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ८२ ॥ सर्वान्क्लेशान्परित्यज्यविष्णुमेवस्तुवन्तिये ॥ स्वधर्मनिरताधीरास्तेनराःस्वर्गगामिनः ॥ ८३ ॥ वासुदेवजपासक्तानपिपापकृतोजनान् ॥ नोपसर्पन्तितान्विप्रयमदूताश्चदारुणाः ॥ ८४ ॥ नान्यत्पश्यन्तिजन्तूनांविहायहरिकीर्तनम् ॥ सर्वपापप्रशमनंप्रायश्चित्तंद्विजोत्तम ॥ ८५ ॥ ये याचिताःप्रहृष्यन्तिप्रियंदत्त्वावदन्तिच ॥ त्यक्तदानफलायेचतेनराःस्वर्गगामिनः ॥८६॥ वर्जयन्तिदिवास्वापंनराःसर्वसहाश्चये ॥ पर्वण्याश्रयभूता येतेमर्त्याःस्वर्गगामिनः ॥ ८७ ॥ द्विषतामपियेदोषान्नवदन्तिकदाचन ॥ कीर्तयन्तिगुणांश्चैवतेनराःस्वर्गगामिनः ॥ ८८ ॥ येपरेषांश्रियंदृष्ट्वान वितप्यन्तिमत्सरात्॥प्रहृष्टाश्चाभिनन्दन्तितेनराःस्वर्गगामिनः॥८९॥प्रवृत्तौचनिवृत्तौचश्रुतिशास्त्रोक्तमेवच॥आदरन्तिप्रतीतायेतेनराःस्वर्गगामिनः॥ ॥९०॥ यस्मिन्कस्मिन्कुलेजातादयावन्तोयशस्विनः॥सानुक्रोशाःसदाचारास्तेनराःस्वर्गगामिनः ॥९१॥ येपूताःपरदारांश्चकर्मणामनसागिरा॥रम यन्तिनसत्त्वस्थास्तेनराःस्वर्गगामिनः ॥ ९२ ॥ सदाकर्मयथोक्तंनकुर्वन्तिविधिनाचये ॥ आत्मशक्तिंचविज्ञायतेनराःस्वर्गगामिनः ॥ ९३ ॥ मनो वाक्कायिकेधर्मेश्रद्धांयःकुरुतेसदा ॥ साधूनांसम्मतोयश्चसभवेद्देवतातिथिः ॥ ९४ ॥ वचोवेगंमनोवेगंयोवेगमुदरोद्भवम् ॥ उपस्थवेगंसहतेसस्वर्गी जायतेनरः ॥ ९५ ॥ येषांगुणेषुसन्तोषोवाणीयेषांश्रुतंप्रति ॥ परमार्थेमतिर्येषांतेशिष्टाःस्वर्गगामिनः ॥ ९६ ॥ व्रतंरक्षन्तियेकोपाच्छ्रियंरक्षन्तिमत्स रात् ॥ विद्यांमानापमानाभ्यामात्मानंतुप्रमादतः ॥ ९७ ॥ मतिंरक्षन्तियेलोभान्मनोरक्षन्तिकामतः ॥ धर्मंरक्षन्तिदुःसङ्गात्तेनराःस्वर्गगामिनः ॥ ॥ ९८ ॥ एकादश्यांचविधिवदुपवासपरायणाः ॥ शुक्लेऽसितेचयेविप्रतेनराःस्वर्गगामिनः ॥ ९९ ॥ मातेवसर्वबालानामौषधंरोगिणामिव ॥ रक्षार्थं सर्वलोकानांनिर्मितैकादशीतिथिः ॥ १०० ॥ एकादशीसमंकिञ्चित्पापत्राणंनविद्यते ॥ तामुपोष्यविधानेनपुरुषाःस्वर्गगामिनः॥१॥ एकादशेन्द्रियैः पापंयत्कृतंभवतिद्विज ॥ नरोनिर्द्धूयतत्तूर्णप्रीतःस्वर्गतिमान्भवेत् ॥ २ ॥ अश्वमेधसहस्राणिराजसूयशतानिच ॥ एकादश्युपवासस्यकलांनार्हन्ति षोडशीम् ॥ ३ ॥ एकतःक्रतवःसर्वेसर्वतीर्थतपांसिच ॥ महादानादिदानानिव्रतंवैष्णवमेकतः ॥४॥ वैष्णवव्रतजोधर्मोधर्मोयज्ञादिसम्भवः ॥ एकत्र तुलितौधात्रातत्रपूर्वोभवेद्गुरुः ॥५॥ हरिवासरभक्तानामच्युतानन्तभाषिणाम् ॥ नाहंशास्ताविशेषेणतेभ्योविप्रबिभेम्यहम् ॥ ६ ॥ येषांपुत्रश्चपौत्रश्च एकादश्यामुपोषितः ॥ सहात्मनासपुरुषान्छतमुद्धरतेबलात् ॥ ७ ॥ उपोषणंततःकुर्यात्पक्षयोरुभयोरपि ॥ एकादश्यांसपुरुषोभुक्ति मुक्त्येकभाजनम् ॥ ८ ॥ जयाचविजयाचैवजयन्तीपापनाशिनी ॥ त्रिस्पृशावञ्जुलाचैवपक्षसंवर्धिनीवरा ॥९॥ तिलदुग्धापराज्ञेयाअखण्डद्वादशी तथा ॥ मनोरथाख्याचपराभीमद्वादशिकातथा ॥ ११० ॥ इत्येवमादयोभेदाद्वादश्याःसन्त्यनेकशः ॥ व्रतेष्वेतेषुयेशक्ताज्ञेयास्तेब्रह्मणिस्थिताः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ११ ॥ श्रोतारोधर्मशास्त्राणांधर्मप्रत्ययसङ्गताः ॥ प्रियङ्कराश्चबालानांस्वर्गलोकंव्रजन्तिते ॥ १२ ॥ मासिमास्येकदिवसेदर्शेश्राद्धव्रतानराः ॥
तृप्यन्तिपितरोयेषांतेधन्याःस्वर्गगामिनः ॥ १३ ॥ भोजनेषूपपन्नेषुभोज्यंयच्छन्तिसादरात् ॥ अभिन्नमुखरागेणशिष्टास्तेस्वर्गगामिनः ॥ १४ ॥
येभक्तिमन्तोमधुसूदनस्यनारायणस्याखिलनायकस्य ॥ सत्येनहीनारजसापियुक्तागच्छन्तितेनाकमनन्तपुण्याः ॥१५॥ वितस्तांयमुनांसीतांपुण्यां
गोदावरींनदीम् ॥ सेवन्तेयेशुभाचाराःस्नानदानपरायणाः ॥ १६ ॥ नतेपश्यन्तिपन्थानंनरकस्यकदाचन ॥१७॥ येनर्मदायामिहशर्मदायांमज्जन्ति
तुष्यन्त्यपिदर्शनेन ॥ विधूयपापानिमहेशलोकंगच्छन्तितेतत्राचिरंरमन्ते ॥ १८ ॥ स्नाताश्चर्मण्वतीतीरेत्रिरात्रंनियतानराः ॥ व्यासाश्रमेविशेषेणते
नरानाकिनःस्मृताः ॥ १९ ॥ गङ्गाजलेप्रयागेचकेदारेपुष्करेतथा ॥ व्यासाश्रमेप्रभासेचमृतास्तेविष्णुगामिनः ॥ १२० ॥ द्वारवत्यांकुरुक्षेत्रेयोगा
भ्यासेनवामृताः॥हरिरित्यक्षरंवक्त्रेयेषांतेनपुनर्भवाः ॥२१॥ त्रिरात्रमपियेविप्रद्वारवत्यांपुरिस्थिताः ॥मज्जन्तिगोमतीतीरेधन्यास्तेकेशवप्रियाः ॥२२॥
नरनारायणावासेत्रिरात्रंयेसमाश्रिताः॥मर्त्यलोकेचनन्दायांधन्यास्तेकेशवप्रियाः ॥ २३ ॥ षण्मासमुषिताविप्रपुरुषोत्तमसन्निधौ॥तेनूनमच्युतात्मानो
दृष्टाःस्युरघहारिणः ॥ २४ ॥ अनेकजन्मार्जितपुण्यतोयेमज्जन्तितोयेमणिकार्णिकायाः ॥ नमन्तिविश्वेशमवाप्यकाशींतेवैमयापीह
भवन्तिवन्द्याः ॥ २५ ॥ पूजयित्वाहरिंयेतुभूमौदर्भतिलैःसह ॥ तिलान्विकीर्यलोहंचदत्त्वाधेनुंपयस्विनीम् ॥ २६ ॥ येमृताविधिवद्विप्र
तेनराःस्वर्गगामिनः ॥ २७ ॥ उत्पाद्यपुत्रान्संस्थाप्यपितृपैतामहेपदे ॥ निर्ममानिरहङ्कारायेमृतास्तेऽपिनाकिनः ॥ २८ ॥ स्तैन्यान्निवृत्ताः
सततंसन्तुष्टाःस्वधनेनच ॥ स्वभाग्येनोपजीवन्तितेनराःस्वर्गगामिनः ॥ २९ ॥ श्लक्ष्णांवाणींनिराबाधांमधुरांपापवर्जिताम् ॥ स्वागतेना
भिभाषन्तेतेनराःस्वर्गगामिनः ॥ १३० ॥ शुभानामशुभानांचकर्मणांफलसञ्चये ॥ विपाकज्ञाश्चयेविप्रतेनराःस्वर्गगामिनः ॥ ३१ ॥
धनधर्मप्रवृत्तानांधर्ममार्गानुयायिनाम् ॥ प्रोत्साहंवर्धयन्तेयेमोदन्तेदिवितेनराः ॥ ३२ ॥ हेमन्तेवह्निदोयश्चतथाग्रीष्मेजलप्रदः ॥ वर्षा
स्वाश्रमदाताचसस्वर्गेमोदतेचिरम् ॥ ३३ ॥ पुण्यकालेषुसर्वेषुनित्यनैमित्तिकादिषु ॥ भक्त्यायःकुरुतेश्राद्धंसनूनंसुरलोकभाक् ॥ ३४ ॥ दानंदरि
द्रस्यविभोःक्षमित्वंयूनांतपोज्ञानवतांचमौनम् ॥ इच्छानिवृत्तिश्चसुखोचितानांदयाचभूतेषुदिवंनयन्ति ॥ ३५ ॥ द्विविधःकर्मसम्बन्धःपापपुण्यसमु
द्भवः ॥ सत्यमेवसमाश्रित्यक्रियतेह्यत्रनिर्णयः ॥ ३६ ॥ तपोध्यानसमायुक्तंतारणायभवाम्बुधेः ॥ पापंतुपतनायोक्तंसत्यमेवनसंशयः ॥ ३७ ॥ बलेन
परिवारेणशौर्येणाभियुतस्यच ॥ पुण्यहीनस्यवैपुंसस्तद्बलादिविलीयते ॥ ३८॥ उन्नतागिरिदुर्गेषुवृक्षाःसन्तिसुपुष्पकाः ॥ पतन्तिवातवेगेनसमूलास्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

घनाअपि ॥ ३९ ॥ सत्यधर्मविहीनास्तेतथायान्तियमालयम् ॥ सामान्यंसर्वजन्तूनांबलंधर्मस्तुकेवलः ॥ १४० ॥ येनसन्तरतेजन्तुरिहलोकेपरत्र
च ॥ मयासर्वमिदंसम्यक्स्वर्गमार्गप्रदायकम् ॥४१ ॥समासेनसमाख्यातंकिंभूयःश्रोतुमिच्छसि ॥ १४२॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेवैशाख
माहात्म्येषण्णवतितमोऽध्यायः ॥ ९६ ॥ ब्राह्मणउवाच ॥ एतन्मूर्खोऽपिजानातिशुभकर्मकरःपुमान् ॥ नयातिनरकंस्वर्गंतथापापक्रियारतः ॥
॥ १ ॥ क्रतुभिर्विविधैरिष्टैर्व्रतदानजपादिभिः ॥ सत्येनाचारकुशलैःस्वर्गसौख्यमवाप्यते ॥ २ ॥ विद्याचारधनोपेतैर्ऋषिभिर्वेदपारगैः ॥ प्राप्यते
पुण्ययोगेनयज्ञैर्नाकस्ततःक्वचित् ॥ ३ ॥ वित्तेनचविनादानंबहुदातुंनशक्यते ॥ विद्यमानधनेनापिकुटुम्बासक्तचेतसा ॥४॥ अग्निहोत्रादयोधर्माविशे
षेणकलौयुगे ॥ दुष्करादानधर्मोऽपिदुष्करोभगवन्मतः ॥ ५ ॥ अल्पायासेनधर्मेणलभ्यतेधर्मसञ्चयः ॥ तन्मेविशेषतोब्रूहिधर्माधर्मप्रदर्शक ॥ ६ ॥
तदेकंकथ्यतांधर्मंसर्वधर्मोत्तमोत्तमम् ॥ कृतेनैकेनयेनेहसर्वपापक्षयोभवेत् ॥ ७ ॥ धनंधान्यंयशोधर्ममायुर्येनाभिवर्धते ॥ मर्त्यलोकेऽपिसौख्यंस्या
त्स्वर्गोयेनाक्षयोभवेत् ॥ ८॥ साक्षान्नारायणोयेनभक्तानामभयप्रदः ॥ तुष्येदस्यप्रसादेनकामःकरतलेस्थितः ॥ ९ ॥ सर्वयज्ञतपोदानतीर्थसेवाधिकं
फलम् ॥लभ्यतेयेनयद्यस्तिवैवस्वततदादिश॥१०॥ अनुग्राह्योह्यहंदेवयदिधर्मोपदेशतः॥सर्वधर्मक्रियासारंतदेकंकृपयावद ॥११॥ पापानामनुरूपाणि
प्रायश्चित्तानियद्यथा ॥ तथातथैवसंस्मृत्यकथितानिमनीषिभिः ॥ १२ ॥ कर्तुंतानिनशक्यन्तेदेवप्रत्येकशोनरैः ॥ सर्वपापहरंपुण्यमेकंचेदस्ति
तद्वद ॥ १३ ॥ सूतउवाच॥इत्युक्त्वाब्राह्मणश्रेष्ठोयमंधर्मस्वरूपिणम् ॥ तुष्टावप्रयतोभूत्वासूक्ष्मधर्माभिकामुकः ॥१४॥ ब्राह्मणउवाच ॥ नमस्तेसर्व
शमननमस्तेजगतांपते ॥ नमोऽस्तुदेवरूपायस्वर्गमार्गप्रदायिने ॥ १५ ॥ धर्मशास्त्रस्वरूपायधर्मराजनमोऽस्तुते ॥ त्वयाभूःपाल्यतेदेवाप्यन्तरिक्षं
चद्यौर्महः ॥ १६ ॥ जनस्तपस्तथासत्यंसर्वस्वंपाल्यतेत्वया ॥ नत्वयारहितंकिञ्चिज्जगत्स्थावरजङ्गमम् ॥ १७ ॥ विद्यतेत्वद्गृहीतंतुसद्योनश्यतिवै
जगत् ॥ त्वमात्मासर्वभूतानांसतांसत्त्वस्वरूपवान् ॥ १८ ॥ राजसानांरजस्त्वंचतामसानांतमस्तथा ॥ चतुष्पदांभवान्देवचतुःशृङ्गस्त्रिलोचनः ॥
॥ १९ ॥ सप्तहस्तस्त्रिधाबद्धोवृषरूपनमोऽस्तुते ॥ सर्वयज्ञमयोधमस्त्वयिविग्रहविग्रहः ॥२०॥ साक्षाद्दृष्टोऽसिलोकेशदेवतुभ्यंनमोनमः ॥ हृदिस्थः
सर्वभूतानांपुण्यपापेक्षिताभवान् ॥ २१ ॥ तेनशास्ताचभूतानांदातादेवप्रशासिता ॥ प्रवर्त्तकोहिधर्मस्यदेवदण्डधरोभुवि ॥ २२ ॥ सर्वधर्ममयंसार
मेकंवदसुनिश्चितम् ॥ २३ ॥ यमउवाच॥परितुष्टोऽस्मितेविप्रस्तोत्रेणचविशेषतः ॥ तथाप्यागमधर्मेणमान्योऽसिममसत्तम ॥ २४ ॥ यन्नकस्यचिदा
ख्यातंतद्गोप्यंपरमंमम ॥ सारमुद्धृत्यसर्वेषांयदेकंनिश्चितंमया ॥ २५ ॥ महानिरयसङ्घातान्निर्वासनकरंपरम ॥ अनाख्येयमपिब्रह्मन्वक्ष्येविनय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तोषितः ॥२६॥ स्युर्मोहायचराचरस्यजगतस्तेतेपुराणागमास्तांतामेवहिदेवतांपरमिकांजल्पन्तुकल्पेविधौ॥सिद्धान्तेपुनरेकएवभगवान्विष्णुःसमस्ता
गमव्यापारेषुविवेकिनांव्यतिकरंनीतेषुनिश्चीयते ॥ २७ ॥ भवोब्रह्माचविष्णुश्चत्रयमेवत्रयीमता ॥ दीपोऽग्निर्वर्तिस्नेहैस्तुयथाविप्रतथाहरिः ॥
॥ २८ ॥ समाराध्यहरिंभक्त्यागोलोकान्प्राप्नुयाच्छुभान् ॥ आराधितेहरौकामाःसर्वेकरतलेस्थिताः ॥ २९ ॥ दानमेवपरंश्रेष्ठंसर्वपुण्येषुवैद्विज ॥
दानेननश्यतेपापंसर्वंदानेनलभ्यते ॥३०॥ नित्यंनैमित्तिकंकाम्यमन्यदभ्युदयात्मकम् ॥ अन्त्यंचपरमंदानमितिपञ्चविधंस्मृतम् ॥ ३१ ॥ प्रातर्मध्या
पराह्णेषुत्रिषुकालेषुयत्नतः ॥यत्किञ्चिदपिदातव्यंनित्यमेवप्रकीर्तितम्॥३२॥ शून्यंदिनंनकर्तव्यमात्मार्थंहितमिच्छताम्॥यस्मिन्कुलेतुदत्तंयत्तत्रतत्रोप
तिष्ठति ॥ ३३ ॥ यःस्वयंभक्षयेन्मोहाददत्त्वाबुद्धिवर्जितः ॥ उत्पादयाम्यहंरोगंतस्यभोगनिवारणम् ॥३४ ॥ तेषुकार्येषुसन्तुष्टंबहुपीडाप्रदायकम् ॥
मन्दानलेनसंयुक्तंद्वारंसन्तापकारकम् ॥ ३५ ॥ त्रिषुकालेषुनोदत्तंब्राह्मणेषुसुरेषुयैः ॥ स्वयंतुभुञ्जतेमिष्टंपापंतैस्तुमहत्कृतम् ॥ ३६ ॥ प्रायश्चित्तेन
रौद्रेणतानहंपरिशोधये ॥ उपवासैर्महीदेवकायशोषकरादिकैः ॥ ३७ ॥ चर्मकारोयथाचर्मकुण्डस्योपरिनिर्घृणे ॥ शोधयेच्चकशाद्यैश्चकुद्रव्यंस्फोटये
द्यथा ॥ ३८ ॥ तथाहंपापकर्तारंशोधयामिनसंशयः ॥ औषधानांसुयोगैश्चकषायैःकटुकैर्ध्रुवम् ॥ ३९ ॥ उष्णोदकैश्चसन्तापैर्वैद्यरूपेणनान्यथा ॥
अन्येभुञ्जन्तितस्याग्रेभोगानन्यान्मनोगतान् ॥ ४० ॥ किंकरोमिसमर्थश्चनदत्तंदानमुत्तमम् ॥ महतारोगरूपेणतमेनंपरिवारयेत् ॥ ४१ ॥ नित्य
कालस्ययद्दानमात्मानंपापिभिर्यथा ॥ नदत्तंचमहीदेवश्रद्धयानिजशक्तितः ॥४२ ॥ तथायातान्प्रधक्ष्येतानुपायैर्दारुणैःकिल ॥ नैमित्तिकंप्रवक्ष्यामि
दानकालंतवाग्रतः ॥ ४३ ॥ महापर्वणिसम्प्राप्तेतीर्थप्राप्तौतथैवच ॥ पितुःक्षयाहदिवसेवैशाखादिषुयत्नतः ॥ ४४ ॥ मासेषुपुण्यकालेषुदानंनैमित्तिकं
स्मृतम् ॥ काम्यकालंप्रवक्ष्यामियद्दानंफलदायकम् ॥ ४५ ॥ व्रतादिकंसमुद्दिश्यकामनाफलकल्पितम् ॥ यत्कामंकथितंसम्यक्सर्वाङ्गैरेवसङ्गतम् ॥
॥ ४६ ॥ तस्यदानप्रभावेणभावनापरिभावितः ॥ तादृक्फलंसमश्नातिमानुषस्तत्प्रसादनात् ॥ ४७ ॥ आभ्युदयंप्रवक्ष्यामियच्चयज्ञादिषुस्मृतम् ॥
जातकर्मादिकार्येषुमौञ्ज्याद्युद्वाहकर्मसु ॥ ४८ ॥ प्रासादध्वजदेवानांप्रतिष्ठासुप्रयत्नतः ॥ इत्यादिकंमहीदेवदानमभ्युदयात्मकम् ॥ ४९ ॥
प्रजावृद्धिकरंभोगयशःस्वर्गसुखप्रदम् ॥ अन्त्यंचैवप्रवक्ष्यामिशृणुदानंद्विजोत्तम ॥ ५० ॥ कामस्यसंक्षयंज्ञात्वाजरयापरिपीडितः ॥ ॥ १२६ ॥
दद्याद्दानानियत्नेनकुर्यादाशांनकस्यचित् ॥ ५१ ॥ मृतेचमयिमेपुत्राजायाबान्धवसोदराः ॥ कथमेतेभविष्यन्तिमांविनासुहृदोमम ॥
॥ ५२ ॥ अहंवित्तविहीनोवाकथंजीवन्पुनस्तथा ॥ भविष्यामीतिविज्ञायनददातिहिकिञ्चन ॥ ५३ ॥ आशापाशशतैर्बद्धोभाग्यादेवकुमायया ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मृत्युंप्रयातिमूढात्मारुदन्तिचततःसुताः ॥ ५४ ॥ दुःखेनपीडिताःकिञ्चिन्मोहेनाकुलचेतसः ॥ स्वल्पमल्पंचवादानंकथञ्चित्कल्पयन्तिते ॥
॥ ५५ ॥ नतत्रास्मिन्गतेकालेमहादुःखगतेसति ॥ विस्मरन्तितदादानंलोभाद्वानददत्यपि ॥ ५६ ॥ मृतोऽयंचपिताज्ञात्वास्नेहपाशोनिवर्त्तते ॥
योऽसौमृतोमहीदेवममपाशैर्नियन्त्रितः ॥ ५७ ॥ तृष्णाक्षुधासमाक्रान्तोबहुदुःखैःप्रपीडितः ॥ पच्यतेनरकेघोरेचिरकालंनसंशयः ॥ ५८ ॥
तस्माद्दानंप्रदातव्यंस्वयमेवनसंशयः ॥कस्यपुत्राश्चपौत्राश्चकस्यभार्याधनंचवा ॥५९॥ संसारेनास्तिकःकस्यस्वयंतस्मात्प्रदीयते॥ पानमन्नंचताम्बूल
मुदकंकाञ्चनंतथा ॥६०॥ वसनंगांचभूमिंचच्छत्रपात्राण्यनेकधा ॥ फलानिभूमिदानानिविविधानिस्वशक्तितः ॥ ६१ ॥ दातव्यानिमहीदेवनात्रकार्या
विचारणा ॥ तीर्थानांलक्षणंविप्रप्रवक्ष्यामितवाग्रतः ॥ ६२॥ सुतीर्थानिइयंगङ्गाभातिपुण्यासरस्वती ॥ रेवाचयमुनातापीनदीचर्मण्वतीतथा ॥ ६३ ॥
सरयूश्चवरावेणीपूर्णापापप्रणाशिनी ॥ कावरीकपिलाचान्याविशल्याविश्वतारिणी ॥ ६४ ॥ गोदावरीसमाख्यातातुङ्गभद्राचगण्डकी ॥
पापानांभीतिदानित्यंनदीभीमरथीस्मृता॥ ६५ ॥ देविकाकृष्णगङ्गाचअन्यायाःसरितांवराः ॥ एतास्तुपुण्यकालेषुसन्तितीर्थान्यनेकशः ॥ ६६ ॥
ग्रामेवायदिवारण्येनद्यःसर्वत्रपावनाः ॥ तत्रतत्रैवकर्त्तव्याःस्नानदानादिकाःक्रियाः ॥ ६७ ॥ यदानज्ञायतेनामतस्यतीर्थस्यभोद्विज ॥
तत्रेत्युच्चारणंकार्यंविष्णुतीर्थमिदंमहत ॥ ६८ ॥ तीर्थस्यदेवताविष्णुःसर्वत्रापिनसंशयः ॥ नारायणेतियन्नामस्मरेत्तीर्थेषुसाधकः ॥ ६९ ॥
तस्यतीर्थफलंसम्यग्विष्णुनाम्नैवजायते ॥ अज्ञातानांचतीर्थानांदेवतानांनसंशयः ॥ ७० ॥ विष्णुनाम्नैवनामानिमानवःपरिकीर्तयेत् ॥ सर्वास्तु
सिद्धयःपुण्यास्तीर्थभूतास्तुसागरः ॥ ७१ ॥ सरांसिमानसादीनिनिर्झराःपल्वलादयः ॥ स्वल्पानद्योऽपिसर्वास्तास्तीर्थानिहरिनामतः ॥ ७२ ॥
पर्वतास्तीर्थरूपाश्चयज्ञोयज्ञमहीतथा ॥ ब्राह्मणायत्रविद्वांसःकौतुकेनाप्यवस्थिताः ॥ ७३ ॥ तदेवतीर्थंसुमहत्सर्वपापहरंस्मृतम् ॥ श्राद्धंचश्राद्धभूमि
श्चदेवशालाचहोमभूः ॥ ७४ ॥ यत्रवेदध्वनिःसम्यग्यत्रविष्णुकथाःशुभाः ॥ स्वगृहंपुण्यसंयुक्तंगोस्थानमपिपावनम् ॥ ७५ ॥ यत्राश्वत्थतरुवनंयत्रा
गारोऽपिपावनः॥ एवमादीनितीर्थानिपितामातातथैवच ॥७६॥ पच्यतेयत्रधर्मार्थंस्वयंतत्रगुरुःस्थितः ॥ साध्वीयत्रास्तिवैभार्यातत्रतीर्थंनसंशयः॥
॥ ७७ ॥ यत्रधर्मरतिर्नित्यंविद्वान्पुत्रःप्रवर्तते ॥ तत्रतस्यहितत्तीर्थंतारणायप्रतिष्ठितम् ॥ ७८ ॥ इत्येवमादितीर्थानिराजवेश्मतथैवच ॥ एव
मादिषुतीर्थेषुपर्वयोगाद्विशेषतः ॥७९॥ अनाराध्यहृषीकेशंसर्वदंसर्वदेहिनाम् ॥ कोऽपिकापिकिमप्यत्रनलभेतेतिनिश्चितम् ॥ ८० ॥ अपत्यंद्रविणं
दारास्तारहर्म्यंहयागजाः ॥ सुखानिस्वर्गमोक्षौचनदूरेहरिभक्तितः ॥८१॥ नारायणःपरोदेवःसत्यरूपोजनार्दनः ॥ त्रिधात्मानंसभगवान्ससर्जपरमे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्वरः ॥ ८२ ॥ रजस्तमोभ्यांयुक्तोऽभूद्रजःसत्त्वाधिकंविभुः ॥ ससर्जनाभिकमलेब्रह्माणंकमलासनम् ॥ ८३ ॥ रजसातमसायुक्तंससरुद्रमसृजद्विभुः ॥
सत्त्वंरजस्तमश्चैवत्रितयंचैतदुच्यते ॥ ८४ ॥ सत्त्वेनमुच्यतेजन्तुःसत्त्वंनारायणात्मकम् ॥ रजसासत्त्वयुक्तेनभवेच्छ्रीमान्यशोऽधिकः॥ ८५ ॥ यद्वेद
वाक्यंधर्मस्यसमुद्दिश्योपसेवते ॥ तद्भद्रमितिविख्यातंविशिष्टंगदितंनृणाम् ॥ ८६ ॥ तेनराजाभवेल्लोकेरजसातमसापुनः ॥ यद्वीनंरजसाधर्मंकेवलं
तामसंचयत् ॥ ८७ ॥ तच्चदुर्गतिदंनृणामिहलोकेपरत्रच ॥ योविष्णुःसस्वयंब्रह्मायोब्रह्मासस्वयंहरः ॥ ८८ ॥ देवास्त्रयोऽपियेज्ञेऽस्मिन्निज्यादेवेषु
नित्यशः ॥ योभेदंकुरुतेतेषांत्रयाणांद्विजसत्तम ॥ ८९ ॥ सपापकारीपापात्माअनिष्टांगतिमाप्नुयात् ॥ विष्णुरेवपरंब्रह्मविष्णुरेवजगद्विज ॥ ९० ॥
तस्यायंमाधवोमासःप्रियःसर्वेषुकर्मसु ॥ कीर्त्यतेहयमेधादिमहाक्रतुफलप्रदः ॥ ९१ ॥ तीर्थस्नानतपोदानजपयज्ञफलाधिकः ॥९२॥ स्नानंविभाते
नियमेननद्यामनारतंमेषगतेरवौये॥कुर्वन्तियेऽस्मिन्नपिविप्रपूजांमहदण्डभाजोनहितेभवन्ति ॥९३॥ हत्वाहत्वाकिङ्करौघंपुरोमेलुप्त्वालुप्त्वाचित्रगुप्तस्य
लेख्यम् ॥ स्नात्वास्नात्वामाधवेमासितीर्थेपूर्वान्पूर्वानुद्धरन्तीहपापात् ॥९४॥ इदंभयच्छेदकरंनतस्मात्प्रकाशनीयंपरमंरहस्यम् ॥ निर्वासहेतुर्नरका
लयस्यममाधिकारक्षयकारणंतत् ॥ ९५ ॥ भागीरथीनर्मदाचयमुनाचसरस्वती ॥ विशोकाचवितस्ताचविन्ध्यस्योत्तरतःस्थिताः ॥ ९६॥ गोदावरी
भीमरथीतुङ्गभद्राचदेविका ॥ तापीपयोष्णीविन्ध्यस्यदक्षिणास्तुप्रकीर्तिताः ॥ ९७ ॥ द्वादशैतामहानद्योनित्यंतेनावगाहिताः ॥ वैशाखेविधिना
स्नानंनद्यांयःप्रातराचरेत् ॥९८॥ सर्वाःसमुद्रगाःपुण्याःसर्वेपुण्यानगोत्तमाः॥सर्वेचायतनाःपुण्याःसर्वेपुण्यावनाश्रयाः ॥९९॥ तेनावगाहिताद्दष्टाः
प्रणताबहुसेविताः॥स्नानमर्द्धोदितेसूर्येवैशाखेनियतश्चरेत् ॥१००॥ तस्यपुण्यंमहीदेवकश्चिद्वक्तुंनशक्नुयात् ॥यदिवक्त्रसहस्राणांसहस्राणिभवन्तिहि॥
॥ १ ॥ आयुश्चब्रह्मणातुल्यंयदिस्याद्विजसत्तम ॥ तदामाधवमासस्यफलंकथयितुंभवेत् ॥ २ ॥ महानिरयकर्षाग्निमाधवोमाधवोयथा ॥
ब्रह्महत्यादिकंपापमगम्यागमनादिकम् ॥ ३ ॥ कामाकामकृतंपापमतिपातकमेवच ॥ उपपापरहस्यंचसङ्करीकरणंपरम् ॥ ४ ॥ जाति
भ्रंशकरंघोरमपात्रीकरणंतथा ॥ मलावहंप्रकीर्णंचवाङ्मनःकायसम्भवम् ॥ ५ ॥ माधवोनिर्दहेन्मासोविधिनासमुपासितः ॥ कल्पकोटिसहस्राणि
कल्पकोटिशतानिच ॥ ६ ॥ वसेद्विष्णुपुरेश्रीमान्माधवेयोऽर्चयेद्धरिम् ॥ १०७ ॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेवैशाखमाहात्म्येसप्त
नवतितमोऽध्यायः ॥ ९७ ॥ सूतउवाच ॥ एतच्छ्रुत्वावचस्तस्यधर्मराजस्यभूसुरः ॥ पुनःपप्रच्छमासस्यमाधवस्यविधिंशुभम् ॥ १ ॥ ब्राह्मण
उवाच ॥ धर्मराजमहाभागसम्यग्गुह्यंप्रकाशितम् ॥ माधवस्नानजंपुण्यंनराणांमुक्तिदंपरम् ॥ २ ॥ माधवंमाधवेमासिस्नात्वाप्रातःसमाहितः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथंसम्पूजयेद्देवंकैःपुष्पैस्तद्विधिंवद ॥ ३ ॥ धर्मराजउवाच ॥ सर्वेषांपत्रजातीनांतुलसीकेशवप्रिया ॥ पुष्करादीनितीर्थानिगङ्गाद्याःसरितस्तथा ॥
॥ ४ ॥ वासुदेवादयोदेवावसन्तितुलसीदले ॥ सर्वदासर्वकालेषुतुलसीविष्णुवल्लभा ॥ ५ ॥ त्यक्त्वातुमालतीपुष्पंमुक्त्वाचसरसीरुहम् ॥ गृहीत्वा
तुलसीपत्रंभक्त्यामाधवमर्चयेत् ॥ ६ ॥ तस्यपुण्यफलंवक्तुमलंशेषोऽपिनोभवेत् ॥ अस्नात्वातुलसींछित्त्वादेवार्थंपितृकर्मणि ॥ ७ ॥
तत्सर्वंनिष्फलंयातिपञ्चगव्येनशुध्यति ॥ दारिद्र्यदुःखभोगादिपापानिसुबहून्यपि ॥ ८ ॥ तुलसीहरतेक्षिप्रंरोगानिवहरीतकी ॥ तुलसीकृष्ण
गौराख्यातयाभ्यर्च्यमधुद्विषम् ॥ ९ ॥ विशेषेणहरेर्भक्तोनरोनारायणोभवेत् ॥ माधवंसकलंमासंतुलस्यायोऽर्चयेद्व्रतः ॥ १० ॥ त्रिसन्ध्यं
मधुहन्तारंनास्तितस्यपुनर्भवः ॥ अलाभेपुष्पपत्राणामन्नाद्येनापिपूजयेत् ॥ ११ ॥ शालितण्डुलगोधूमैर्यववापिहरिंसदा ॥ प्रातःस्नात्वाविधानेन
माधवेमाधवप्रिये ॥ १२ ॥ पितृदेवमनुष्यांश्चतर्पयेत्सचराचरम् ॥ योऽश्वत्थमूलंवैसिञ्चेत्तोयेनबहुनासदा ॥ १३ ॥ कुर्यात्प्रदक्षिणंतंतु
सर्वदेवमयंततः ॥ योऽश्वत्थमर्चयेद्देवमुदकेनसमन्ततः ॥ १४ ॥ कुलानामयुतंतेनतारितंस्यान्नसंशयः ॥ अलक्ष्मीःकालकर्णीचदुःस्वप्नोदुर्वि
चिन्तितम् ॥ १५ ॥ अश्वत्थतर्पणात्तातसर्वंदुःखंविलीयते ॥ तर्पिताःपितरस्तेनतेनविष्णुःसमर्चितः ॥ १६ ॥ योऽश्वत्थमर्चयेद्धीमा
न्ग्रहास्तेनैवपूजिताः ॥ १७ ॥ श्वेताश्वंपुष्पाणितथाशमींचहुताशनंचन्दनमर्कबिम्बम् ॥ अश्वत्थवृक्षंचसमालभेततत्श्चकुर्यान्निजजातिधर्मान् ॥१८॥
कण्डूयनंचगोग्रासंस्नात्वापिप्पलतर्प्पणम् ॥ कृत्वागोविन्दपूजांचनसदुर्गतिमाप्नुयात् ॥ १९ ॥ त्रयोदश्यांचतुर्दश्यांवैशाख्यांचदिनत्रयम् ॥
सर्वाशक्तोऽपिविधिनानारीवापुरुषोऽपिवा ॥ २० ॥ पूर्वोक्तनियमैर्युक्तःप्रातःस्नात्वाचशक्तितः ॥ विमुक्तःपातकैःसर्वैःस्वर्गमक्षयमश्नुते ॥ २१ ॥
वैशाखमासेयोभक्त्याभोजयेद्ब्राह्मणान्दश ॥ त्रिरात्रमुत्थितःस्नात्वासकृच्चप्रयतःशुचिः ॥ २२ ॥ गौरान्वायदिवाकृष्णांस्तिलान्क्षौद्रेणसंयुतान् ॥
दत्त्वाद्वादशविप्रेभ्यस्तैरेवस्वस्तिवाचयेत् ॥ २३ ॥ प्रीयतांधर्मराजोमेपितॄन्देवांश्चतर्पयेत् ॥ यावज्जीवकृतंपापंतत्क्षणादेवनश्यति ॥ अयुता
युतंचतिष्ठेत्सस्वर्गलोकेयथासुखम् ॥२४॥ मामेवतुनपश्येत्सपूजितोऽखिलदैवतैः ॥ पाकान्नोदककुम्भादिपितृदैवततुष्टये ॥ २५ ॥ त्रयोदश्यांचतु
र्दश्यांपूर्णायांचदिनत्रयम् ॥ योदद्याद्भक्तितोविप्रमहापापैःप्रमुच्यते ॥ २६ ॥ सुवर्णतिलपात्रैस्तुब्राह्मणाञ्छक्तितोऽन्वहम् ॥ तर्पयेदुदपात्रैस्तुब्रह्महत्यां

१ 'श्वेतानि पुष्पाणि' इ० पा० । २ 'मुदा' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यपोहति ॥२७॥ वैशाख्यांपौर्णमास्यांचसृष्टाःकमलयोनिना॥ तिलादेयाश्चभक्त्याचश्रेयःसन्ततिहेतवे ॥ २८॥ इहार्थेचपुरावृत्तंतदाकर्णयसुव्रत ॥
फलंमाधवमासस्यपूर्णायांपरमाद्भुतम् ॥ २९ ॥ मेषसङ्क्रममारभ्यतियर्थस्त्रिंशदुत्तमाः ॥ सर्वयज्ञाधिकाःपुण्याःपुराणेषुप्रकीर्तिताः ॥ ३० ॥ विशे
षतोऽपितास्तिस्रःपवित्राःपापिदुर्लभाः ॥ ततोऽपिपूर्णिमापुण्यामाधवीमाधवप्रिया ॥ ३१ ॥ एषावाराहकल्पादितिथिराद्यामहाफला ॥ पुरानारा
यणेनास्यादितिजौद्वाविमौहतौ ॥ ३२ ॥ हिरण्याक्षमधूविप्रपृथिवीचसमुद्धृता ॥ त्रयोदश्यांचतुर्दश्यांपौर्णमास्यामयंविभुः ॥ ३३ ॥ क्रमादेत
त्रयंचक्रेशुक्लेऽस्मिन्मासिमाधवे ॥ ततःप्रभृतिविप्रेन्द्रविशेषादेवपूर्णिमा ॥ ३४ ॥ कल्पादिःपावनाख्याताकर्मणःकल्पसाक्षिणी ॥ येनस्नातंन
वैशाखेप्रातर्नियमशालिना ॥ ३५ ॥ किंतस्यजन्मनाविप्रननमात्मापकारिणा ॥ त्रयोदश्यांचतुर्दश्यांपौर्णमास्यांविशेषतः ॥ ३६ ॥
अपिसम्यग्विधानेननारीवापुरुषोऽपिच ॥ प्रातःस्नातःसनियमःसर्वपापैःप्रमुच्यते ॥ ३७ ॥ स्नानदानार्चनश्राद्धक्रियापुण्यादिवर्जिता ॥
यस्यातीताचवैशाखीसनूनंनिरयालयः ॥ ३८ ॥ नवेदेनसमंशास्त्रंनतीर्थंगङ्गयासमम् ॥ नदानंजलगोतुल्यंनवैशाखीसमातिथिः ॥ ३९ ॥ जल
धेनुंचयोदद्याद्वैशाख्यांविष्णुतत्परः ॥ त्रयाणामपिदेवानांचतुर्थोऽयंविशेषतः ॥ ४० ॥ मातृहापितृहाचैवभ्रूणहागुरुतल्पगः ॥ जलधेनुं
समालोक्यमुच्यतेसर्वपातकैः ॥ ४१ ॥ दशपूर्वान्परान्वंश्यान्नरकात्तारयन्तिते ॥ जलधेनुंप्रयच्छन्तिवैशाख्यांविधिनात्रये ॥ ४२ ॥ शर्करा
फलताम्बूलमुपानत्करपत्रिकाः ॥ प्रयच्छन्तिद्विजाग्र्येभ्योधन्यास्तेचात्रकीर्तिताः ॥ ४३ ॥ मणिकोदककुम्भांश्चपक्वान्नंहैमदक्षिणाम् ॥ यः
प्रयच्छतिवैशाख्यांसोऽश्वमेधफलंलभेत् ॥ ४४॥ अत्राप्युदाहरन्तीममितिहासंपुरातनम् ॥ ब्राह्मणस्यचसंवादंप्रेतैःसार्द्धंमहावने ॥ ४५ ॥ ब्राह्मणोधन
शर्मासीन्मध्यदेशेपुरानघ ॥ कुशाद्यर्थंवनंयातोददर्शेदमथाद्भुतम् ॥४६॥ भीतोऽपश्यदसौप्रेतान्दुष्टांस्त्रीनतिदारुणान् ॥ ऊर्ध्वकेशान्सरक्ताक्षान्कृष्ण
दन्तान्कृशोदरान् ॥ ४७ ॥ कुर्वतोविविधारावान्धावतोऽपियतस्ततः ॥ तान्दृष्ट्वाभयसन्त्रस्तोब्राह्मणोविद्रुतोजवात् ॥ ४८ ॥ क्रन्दमानास्ततस्ते
ऽपितमेवानुययुस्तदा ॥ सधर्ष्यमाणस्तैःप्रेतैरुवाचमधुरंवचः ॥ ४९ ॥ धनशर्मोवाच ॥ केयूयंवःकुतोऽवस्थाजातेतिनिरयोचिता ॥ भयार्त्तमनु
कम्प्यंमांदुःखितंत्रातुमर्हथ ॥५०॥ वैष्णवंबहुभृत्यंचनिःस्वंविप्रंवनागतम् ॥ भवतामपिसश्रेयोनूनंदास्यतिकेशवः ॥ ५१ ॥ ब्रह्मण्योभगवान्विष्णु
स्तुष्टोमय्यनुकम्पया ॥ अतसीपुष्पसङ्काशोविष्णुःपीताम्बरोहरिः ॥ ५२ ॥ यस्यश्रवणमात्रेणनाम्नोयातिमहातमः ॥ अनादिनिधनोदेवःशङ्खचक्र

१'भक्ष्याश्च' इ० पा०। २'पितृदुर्लभाः' इ० पा०। ३'आत्मापहारिणा' इ० पा०। ४'स गम्यमानस्तैः' इ० पा०। ५'करुणम्' इ० पा०। ६'बहुभीतं च' इ० पा०। ७'सर्वपापक्षयो भवेत्' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गदाधरः ॥ अक्षयःपुण्डरीकाक्षःप्रेतमोक्षप्रदायकः ॥ ५३ ॥ यमउवाच ॥ नामश्रवणमात्रेणविष्णोस्तेपरितोषिताः ॥ पिशाचाःपुण्यभावस्थादया
दाक्षिण्ययन्त्रिताः ॥ ५४ ॥ प्रीणितास्तस्यवचसातदादिष्टेननोदिताः ॥ इदमूचुर्द्विजंप्रेताःक्षुत्तृष्णापूरपीडिताः ॥ ५५ ॥ प्रेताऊचुः ॥ दर्शनेनैव
तेविप्रनामश्रवणतोहरेः ॥ भावमन्यमनुप्राप्तावयंजातादयालवः ॥ ५६ ॥ अपाकरोतिदुरितंश्रेयश्चयोजयत्यपि ॥ यशोविस्तारयत्याशुनूनंवैष्णव
सङ्गमः ॥ ५७ ॥ रसायनमयीशीतापरमानन्ददायिनी ॥ नानन्दयतिकंनामवैष्णवामृतचन्द्रिका ॥ ५८ ॥ अयंकृतघ्ननामास्तिद्वितीयोऽयं
विदैवतः ॥ अवैशाखस्तृतीयोऽयंत्रयाणामपिपापकृत् ॥ ५९ ॥ सदैवानुष्ठितानेनपापेनातिकृतघ्नता ॥ तेनास्यकर्मजंनामकृतघ्नाख्यंव्यवस्थितम् ॥
॥ ६० ॥ सुदासइतिनाम्नायंशूद्रोऽभूत्पूर्वजन्मनि ॥ कृतघ्नस्तेनपापेनप्राप्तोऽवस्थामिमांद्विज ॥ ६१ ॥ अतिपापिनिधूर्तेचगुरुस्वाम्यहितेऽपिच ॥
निष्कृतिर्विद्यतेविप्रकृतघ्नेनास्तिनिष्कृतिः ॥ ६२ ॥ नानानिरयसङ्घातंशरीरैर्यातनाक्षमैः ॥ अनुभूयतांत्ववस्थामन्त्यामेतांगतोद्विज ॥ ६३ ॥
अनेनान्नंसदाभुक्तमकृत्वादेवतार्चनम् ॥ अदत्त्वागुरुविप्रेभ्यस्तेनैवायंविदैवतः ॥ ६४ ॥ अयंदशसहस्राणांग्रामाणामीश्वरोनृपः ॥ हरिवीरइति
ख्यातोनाम्नासीत्पूर्वजन्मनि ॥ ६५ ॥ रोषाहङ्कारनास्तिक्यैर्गुर्वाज्ञालङ्घनोद्यतः ॥ अकृत्वैवमहायज्ञान्भुक्तवान्विप्रनिन्दकः ॥ ६६ ॥ कर्मणातेन
पापेनमहानरकसङ्कटम् ॥ अनुभूयततःप्रेतोजातोनाम्नाविदैवतः ॥ ६७ ॥ अवैशाखस्तृतीयोऽहंत्रयाणामपिपापकृत् ॥ तेनमेकर्मजंनामब्राह्मणो
ऽहंव्यवस्थितः ॥ ६८ ॥ मध्यदेशेऽभवंनाम्नागौतमोगोत्रतोऽप्यहम् ॥ विप्रोवासपुरेवासीयज्वाऽऽसंपूर्वजन्मनि ॥ ६९ ॥ मयाकेवलमेवैकंश्रौत
मार्गानुसारिणा ॥ उद्दिश्यमाधवंदेवंनस्नातंमासिमाधवे ॥ ७० ॥ नदत्तंनहुतंकिञ्चिद्वैशाख्यांचाविशेषतः ॥ नार्चितोमधुहातत्रतोषितानमनी
षिणः ॥ ७१ ॥ मणिकोदककुम्भानांनदानैःपितृदेवताः ॥ तर्पितानतिलादत्ताःसक्षौद्राःश्रोत्रियेषुच ॥ ७२ ॥ नपुष्पफलताम्बूलचन्दनव्यजना
म्बरैः ॥ विद्वांसोनार्चितास्तत्रपितृदैवततुष्टये ॥ ७३ ॥ मयानैकापिवैशाखीपूर्णापूर्णफलप्रदा ॥ स्नानदानक्रियापूजासुकृतैःपरिपालिता ॥ ७४ ॥
तेनमेवैदिकंकर्मसर्वंचैवतुनिष्फलम् ॥ ततोऽवैशाखनामाहंप्रेतोजातोऽस्मिसर्वतः ॥ ७५ ॥ एतत्तेसर्वमाख्यातंत्रयाणामपिकारणम् ॥ त्वंनोभव
समुद्धर्तापापाद्विप्रोऽसिवैयतः ॥ ७६ ॥ विमुक्तंब्रह्मतीर्थंचसाधवःपरमंयतः ॥ तारयन्तिमहापापान्निरयेभ्योऽपिसंश्रितान् ॥ ७७ ॥ गङ्गादि
पुण्यतीर्थेषुयोनरःस्नातिसर्वदा ॥ यःकरोतिसतांसङ्गंतयोःसत्सङ्गमोवरः ॥ ७८ ॥ अथवाममपुत्रोऽस्तिधनशर्मेतिविश्रुतः ॥ तंगत्वाबोधय

१ 'अधिका विप्रतीर्थेभ्यो द्विजाः सुकृतसाधवः' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वामिन्नस्मदर्थेकृतोद्यमः ॥ ७९ ॥ कार्येसमुद्यमंकृत्वापरेषांसमुपस्थिते ॥ पुष्कलंफलमाप्नोतियज्ञदानक्रियाधिकम् ॥ ८० ॥ यमउवाच ॥ प्रेत
वाक्यंतदाकर्ण्यधनशर्मातिदुःखितः ॥ सतंजनकमाज्ञायपतितंनिरयेनिजम् ॥ आत्मानमभितोनिन्दन्निदंवचनमब्रवीत् ॥ ८१ ॥ धन
शर्मोवाच ॥ अहंतवसुतःस्वामिन्गौतमस्यनिरर्थकः ॥ यस्तुपुत्रोननिस्तारंपितुःकुर्यादतन्द्रितः ॥ ८२ ॥ आत्मानंपावयेन्नासावदाताद्रव्यवा
निति ॥ धर्मोहिगहनोज्ञेयःप्रयत्नेनापिधीमता ॥ ८३ ॥ यथाममपिताचत्वमिमांप्राप्तोऽसिदुर्गतिम् ॥ यदाचसुखसन्तानंनमत्तःप्राप्तवानसि ॥
॥ ८४ ॥ लोकयोःसुखसन्तानेतथाननतनयोमतः ॥ द्वौगुरूपुरुषस्येहपितामाताचधर्मतः ॥ ८५ ॥ तयोरपिपिताश्रेयान्बीजप्राधान्यदर्शनात्॥
किंकरोमिक्वगच्छामिकथंतातगतिस्तव ॥ ८६ ॥ धर्मतत्त्वंनजानामिसंश्रयामिभवद्वचः ॥ ८७ ॥ प्रेतउवाच ॥ शृणुपुत्रवचःसत्यंभाविनो
ऽर्थस्यमेबलात् ॥ अथपुण्येनकेनापिभवित्रीसुगतिर्मम ॥ ८८ ॥ मयाश्रौतानिकर्माणिकुर्वताकिलगर्वतः ॥ अनादृतंगुरुवचोगुरुस्तत्रा
वमानितः ॥ ८९ ॥ गुरूणामपमानेनप्रहर्षक्रोधविस्मयैः ॥ पुण्यानिक्षयमायान्तियशांसीवहिदुर्नयैः ॥ ९० ॥ पौराणिकविधानेनकर्मश्रौताविरोधि
यत् ॥ केवलंवैदिकंकर्मकृतमज्ञानतोमया ॥ ९१ ॥ पापेन्धनदवज्वालापापद्रुमकुठारिका ॥ कृतानैकापिवैशाखीविधिनापुत्रपूर्णिमा ॥ ९२ ॥
अव्रतायस्यवैशाखीसोऽवैशाखोभवेन्नरः ॥ दशजन्मानिचततस्तिर्यग्योनिषुजायते ॥ ९३ ॥ चिरंभुक्त्वादुःखमन्तेप्रेतःपर्यायतोभवेत् ॥ लभते
मानुषंजन्मकथञ्चिदपिदुर्लभम् ॥ ९४ ॥ उपायंतेवदिष्यामिप्रेतमोक्षकरंपरम् ॥ श्रुतवान्यदहंपूर्वजन्मनिस्वगुरोर्मुखात् ॥ ९५ ॥ गच्छपुत्रगृहं
स्नात्वायमुनायांविधानतः ॥ अद्यतःसर्वगतिदाकल्पाद्यासाप्युपागता ॥ पश्चिमेऽहनिवैशाखीपितृदेवार्चनेहिता ॥ ९६ ॥ पानीयमप्यत्रतिलै
र्विमिश्रंसहोदकुम्भान्नफलानिभक्त्या ॥दद्यात्पितृभ्योभवतीहदत्तंश्राद्धंसदातेनसमासहस्रम्॥९७॥वैशाख्यांपौर्णमास्यांयोभोजयेद्भूमिदेवताः ॥सिक्थे
सिक्थेभवेत्तृप्तिःपितॄणांयुगसङ्ख्यया॥९८॥वैशाख्यांविधिनास्नात्वाभोजयेद्ब्राह्मणान्दश॥पायसंसर्वपापेभ्योमुच्यतेनात्रसंशयः॥९९॥गौरान्वायदि
वाकृष्णांस्तिलान्क्षौद्रेणसंयुतान्॥दत्त्वादशभ्योविप्रेभ्यस्तेनैवस्वस्तिवाचयेत् ॥१००॥ प्रीयतांधर्मराजेतिपितॄन्देवांश्चतर्पयेत्॥यावज्जीवकृतंपापंतत्क्ष
णादेवनश्यति ॥ १ ॥ वैशाख्यांपौर्णमास्यांचसृष्टाःकमलयोनिना॥तिलादेयाश्चभक्त्याचस्पृश्याःसर्वाङ्गतोद्विज ॥ २ ॥ यस्तिलैर्यवसम्मिश्रैःस्नाति ॥ १२८ ॥
सर्वाङ्गतस्तदा ॥तस्यब्रह्माचधर्मोऽत्रददातिवरमीप्सितम् ॥३॥ प्रीतयेधर्मराजस्ययोदद्यादुदकुम्भकान्॥सप्तसप्तकुलंतेनतारितंस्यान्नसंशयः ॥४॥ त्रयो
दश्यांचतुर्दश्यांपूर्णायांभक्तितत्परः ॥स्नात्वाजप्त्वातथाहुत्वादत्त्वासम्पूज्यमाधवम्॥५॥यत्फलंजायतेपुत्रतदस्माकंप्रयच्छभोः ॥ नैतौपरिचितौप्रेतौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हित्वास्वर्गतिमाश्रये ॥ ६ ॥ एतयोरपिपापस्यहन्तोऽयंसमुपस्थितः ॥ ७ ॥ यमउवाच ॥ तथेत्युक्त्वागतःसर्वंततश्चक्रेसवैद्विजः ॥ प्रीतः
परमयाभक्त्यावैशाख्यांस्नानदानकृत् ॥ ८ ॥ स्नातःसमुदितोभक्त्याप्राप्यमाधवपूर्णिमाम् ॥ दत्त्वाबहूनिदानानितेभ्यःपुण्यंददौपृथक् ॥९॥
तत्क्षणादेवतेसर्वेविमानस्थादिवंययुः ॥ तत्पुण्यदानयोगेनमुदिताद्विजसत्तम ॥ ११० ॥ धनशर्मापिविप्रेन्द्रःश्रुतिस्मृतिपुराणवित् ॥ भुक्त्वा
भोगांश्चिरंकालंब्रह्मलोकमवाप्तवान् ॥११॥ एषापुण्यतमातस्माद्वैशाखीविश्वपावनी ॥ कथ्यतेतुमयाविप्रसमासेनातिगौरवात् ॥ १२ ॥ धन्यास्तएव
कृतिनश्चतएवजातालोकेतएवपुरुषाःपुरुषार्थभाजः ॥ येमाधवेमधुनिषूदनमर्चयन्तिप्रातर्निमज्ज्यनियमेनविशुद्धचित्ताः ॥ १३ ॥ योमाधवेमासि
नरःप्रभातेस्नातःसमाराधयतेरमेशम् ॥यमैरुपेतोनियमैरशेषैर्वृतोऽपिनूनंसनिहन्तिपापम् ॥१४॥ तैरेवकालोविजितस्तएवनरेषुधन्याविगतैनसस्ते ॥
तएवगर्भेनविशन्तिभूयोमज्जन्तियेमाधवमासियुक्ताः ॥ १५ ॥ समाधवोगर्जतियज्ञयोगात्तपःक्रियादानविधानयोगात् ॥ यस्मिन्कृतंमासि
कथञ्चिदल्पंपुण्यंपुनःस्यादिहकल्पतुल्यम् ॥ १६ ॥ मज्जतोहिमनुजस्यमाधवेमाधवार्चनकृतेदिनोदये॥ तामसोऽपिजलबिन्दुसङ्गमादङ्गमाहतिपावनं
यतः ॥१७॥ तनिदेहमधुरुह्यदेहिनस्तावदेवविचरन्त्यघानिच ॥ यावदेतिनसमाधवाह्वयःश्रीरमारमणवल्लभोविराट् ॥१८॥ स्नातुंपदानिमनुजोगमने
विभातेतीर्थेददातिमधुसूदनमासियुक्तः॥ भूयोभवन्तिहयमेधसमानितानिश्रीमाधवस्मरणतःपठतोऽस्यनाम ॥१९॥ मेरुमन्दरतुल्यानिपापान्युग्राण्य
नेकशः ॥ दहतेमाधवोमासःस्नातोमाधववल्लभः ॥१२०॥ इदंसंक्षेपतःप्रोक्तंमयातेऽनुग्रहाद्विज ॥ वैशाखस्नानमाहात्म्यंश्रोतुःपापक्षयङ्करम् ॥२१॥
यस्तुश्रोष्यतिभक्त्यैनमितिहासंमयोदितम्॥सोऽपिपापविनिर्मुक्तोनमामालोकयिष्यति ॥ २२॥ ब्रह्महत्यादिपापानिबहुशोऽपिकृतान्यपि ॥ वैशाख
स्यविधानेनतानिनश्यन्तिनिश्चितम् ॥ २३ ॥ त्रिंशत्पूर्वान्परांस्त्रिंशत्त्रिंशच्चैवपरावरान् ॥ वैशाखेविधिनास्नातोनरकादुद्धरेत्पितॄन्॥ २४ ॥ एकतः
सर्वतीर्थानिसर्वेयज्ञाःसदक्षिणाः ॥ एकतोमाधवोमासोनियमादनुपालितः ॥ २५ ॥ यतोभगवतस्तस्यहरेरुत्कृष्टकर्मणः ॥ प्रियोऽसौमाधवो
मासःसर्वेभ्यःप्रवरोऽधिकः ॥ २६ ॥ संशयंनोविधेहीतिमहीदेवकथञ्चन ॥ वैशाखंप्रतिवैमासंसमासाद्यमयोदितम् ॥ २७ ॥ इहार्थेयत्पुरा
वृत्तंतदाकर्णयचाद्भुतम् ॥ अनाख्येयमपीदंतेकथयिष्येकथानकम् ॥ १२८ ॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेवैशाखमाहात्म्येऽष्टनवतितमो
ऽध्यायः ॥ ९८ ॥ यमउवाच ॥बभूवभूपतिःपूर्वंख्यातोनाम्नामहीरथः ॥ पूर्वपुण्यफलावाप्तप्रभूतैश्वर्यसम्पदः ॥ १ ॥ केवलंकामकलनाललना

१ एतच्श्लोकस्थले पुस्तकान्तरेषु--" प्रातः समुत्थाय निमज्ज्यते यैर्गाङ्गे मधुद्वेषि समर्चनाय ॥ अहोतिधन्यः सुकृतैकसारः सर्वाधिको माधवमास एषः॥" अयं श्लोक उपलभ्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ललितस्थितः ॥ तदेकव्यसनासक्तिर्नधर्मार्थव्यवस्थितः ॥ २ ॥ मन्त्रिणिन्यस्तराज्यश्रीर्बुभुजेविषयान्नृपः ॥ सकामिनीसहचरोराज्यकार्य
पराङ्मुखः ॥ ३ ॥ नप्रजानधनंधर्मंनाथकार्यंचपश्यति ॥ केवलंकामिनीकेलिकलनोचितवासनः ॥ ४ ॥ अथकालेनमहतापुरोधास्तस्य
कश्यपः ॥ वचःप्रोवाचतंधर्म्यमितिचेतस्यचिन्तयत् ॥ ५ ॥ नवारयतियोमोहादधर्मान्नृपतिंगुरुः ॥ सोऽपितत्पापभुक्तस्माद्बोधनीयः
पुरोधसा ॥ ६ ॥ बोधितोऽप्यवजानातिसचेद्वाक्यंपुरोधसः ॥ पुरोधास्तत्रनिर्दोषोराजास्यात्सर्वदोषभाक् ॥७॥ शृणुराजन्ममगुरोर्वचोधर्मार्थसंहि
तम् ॥ अभिन्नार्थमुपेतार्थमिच्छारागादिवर्जितम् ॥ ८ ॥ अयमेवपरोधर्मोयद्गुरोर्वचसिस्थितिः ॥ गुर्वाज्ञायालवोराज्ञामायुःश्रीसौख्यवर्द्धनः ॥ ९ ॥
नविप्रास्तर्पितादानैर्विष्णुर्नाराधितस्त्वया ॥ नव्रतंनतपःकिञ्चिन्नतीर्थहिकृतंत्वया ॥ १० ॥ हरिनामत्वयाकामवशगेननचिन्तितम् ॥ हात्वया
भीरुसङ्गत्यानविद्वत्सङ्गतिःकृता ॥ ११ ॥ स्मरचामरवाहिन्योवल्लभाःकस्यनप्रियाः ॥ किंतुताःपवनोल्लोलकदलीदलवच्चलाः ॥ १२ ॥ तरङ्गतरलै
रथैर्भोगैर्भ्रूभङ्गभङ्गुरैः ॥ मुहूर्तपेयैस्तारुण्यैर्नतृप्यन्तेमहाशयाः ॥१३॥ किंविद्ययाचतपसाकिंत्यागेननयेनवा ॥ किंविविक्तेनमनसास्त्रीभिर्यस्यहृतं
मनः ॥ १४ ॥ एकएवसुहृद्धर्मोनिधनेष्वनुयातियः ॥ सर्वमन्यच्छरीरेणसमंनाशंगमिष्यति ॥ १५ ॥ धर्मंशनैःसञ्चिनुयाद्वल्मीकमिवपुत्तिकाः ॥
धर्मेणहिसहायेनतमस्तरतिदुस्तरम् ॥ १६ ॥ अनिलोल्लासितोत्तालजलकल्लोलचञ्चलम् ॥ किंनजानासिराजेन्द्रनृणांजीवितविभ्रमम् ॥१७॥
विनयोरत्नमुकुटःसत्यधर्मौचकुण्डले ॥ त्यागश्चकङ्कणोयेषांकिंतेषांजडमण्डनैः ॥ १८ ॥ मृतंशरीरमुत्सृज्यकाष्ठलोष्टसमंभुवि ॥ विमुखाबान्धवा
यान्तिधर्मस्तमनुगच्छति ॥१९॥ गम्यमानेषुसर्वेषुक्षीयमाणेतथायुषि ॥ जीवितेलुप्यमानेचकिमुत्थायनधावसि ॥२०॥ कुटुम्बंपुत्रदारादिशरीरंद्रव्य
सञ्चयः ॥पारक्यमध्रुवंकिंतुस्वीयेसुकृतदुष्कृते ॥२१॥ यदासर्वंपरित्यज्यगन्तव्यमवशेनते॥अनर्थेकिंप्रसक्तस्त्वंस्वधर्मंनानुतिष्ठसि ॥२२॥ अविश्राम
मनालम्बमपाथेयमदेशिकम् ॥मृतःकान्तारमध्वानंकथमेकोगमिष्यसि ॥२३॥ नहित्वांप्रस्थितंकश्चित्पृष्ठतोऽनुगमिष्यति ॥सुकृतंदुष्कृतंचत्वांयास्य
न्तमनुयास्यति ॥ २४ ॥ श्रुतिस्मृत्युदितंकर्मकुलदेशोचितंहितम् ॥ धर्ममूलंनिषेवस्वसदाचारमतन्द्रितः ॥ २५॥ परित्यजेदर्थकामौस्यातांचेद्धर्मव
र्जितौ॥ धर्मेणप्राप्यतेसर्वमर्थकामादिकंसुखम्॥२६॥इन्द्रियाणांजयंयोगंसमातिष्ठेद्दिवानिशम्॥ जितेन्द्रियोहिशक्नोतिपथिस्थापयितुंप्रजाः ॥२७॥
अतिप्रगल्भललनाकटाक्षचपलाश्रियः ॥ विनयेप्रणिधानेनचिरंतिष्ठन्तिभूभुजाम् ॥ २८ ॥ कामदर्पादिशीलानामविचारितकारिणाम् ॥ आयुषासह
नश्यन्तिसम्पदोमूढचेतसाम् ॥ २९ ॥ भूतिभिर्नष्टदृष्टाभिर्नृत्यन्तेनमहाशयाः ॥ नागताभिर्नयाताभिर्नदीभिश्चीयतेऽम्बुधिः ॥ ३० ॥ व्यसनस्यच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मृत्योश्चव्यसनंकष्टमुच्यते ॥ व्यसन्यधोऽधोव्रजतिस्वर्गाम्यव्यसनीनृपः ॥ ३१ ॥ व्यसनानिदुरन्तानिकामजानिविशेषतः ॥ त्यजतस्मान्महाराज
कामंधर्मविरोधिनम् ॥३२॥ जडानामविवेकानामसुराणांदुरात्मनाम् ॥ भाग्यभोग्यनिराज्यानिसन्त्यनीतिमतामपि॥३३॥नैवस्थिराणितानीहदुरितै
रनुसेवितैः ॥ विलीयन्तेयथावह्निसंसर्गेणेन्धनानिच ॥ ३४ ॥ गच्छतस्तिष्ठतोवापिजाग्रतःस्वपतोऽपिवा ॥ नविचारपरंचेतोयस्यासौमृतएवसः ॥
॥ ३५ ॥ उपदेष्टाश्रुतवतांगुरुरित्युच्यतेयतः ॥ किंतुत्वासन्नविपदामुपदेशाःशिरोरुहाः ॥ ३६ ॥ विषयज्वरमुत्सृज्यसमयास्वस्थयाधिया ॥ युक्त्या
चव्यवहारिण्यास्वार्थःप्राज्ञेनसाध्यते ॥३७॥ अशुभाच्चलितंयातिशुभंतस्मादपीतरम् ॥ जन्तोश्चित्तंचशिशुवत्तस्मात्तच्चालयेद्बलात् ॥३८॥ उपधार्य
मतिंराजन्वृद्धानांधर्मदर्शिनाम् ॥ नियच्छेत्परयाबुद्ध्याचित्तमुत्पथगामियत् ॥ ३९ ॥ नधनान्युपकुर्वन्तिनमित्राणिनबान्धवाः ॥ नहस्त
पादचलनंनदेशान्तरसङ्गतम् ॥ ४० ॥ नकायक्लेशवैधुर्यंनतीर्थायतनादयः ॥ केवलंतन्मनस्कस्यजपेनासाद्यतेपदम् ॥ ४१ ॥ विषयेवर्तमा
नस्यतस्माच्चित्तस्यसंयमे ॥ यत्नंकुर्याद्बुधोराजन्ध्रुवंयन्तेववाजिनाम् ॥ ४२ ॥ तत्तत्कुर्याद्यतोराजन्भवतायेनवञ्चितः ॥ मुनिभिश्चफलैस्तैस्तै
रतोऽप्याकर्णयाधुना ॥ ४३ ॥ मुह्यतापिमनुष्येणप्रष्टव्याःसुहृदोबुधाः ॥ तेचपृष्टायथाब्रूयुस्तत्कर्त्तव्यंयथोचितम् ॥ ४४ ॥ सर्वोपायेनकर्त्तव्यो
निग्रहःकामकोपयोः ॥ श्रेयोऽर्थिनायतस्तौहिश्रेयोघातार्थमुद्यतौ ॥ ४५ ॥ कामोहिबलवान्राजञ्छरीरस्थोरिपुर्महान् ॥ नतस्यवशगोभूया
ज्जनःश्रेयोऽभिलाषुकः ॥ ४६ ॥ यःकामोदेवदेवेनपुरातेनैवशूलिना ॥ ललाटवह्निनादग्धःकृतोऽनङ्गइतिस्थितिः ॥ ४७ ॥ यदावाञ्छत्यसौ
नारींनिहन्तुंसमनोभवः ॥ पुंसांकायंसमाश्रित्यस्वरूपंदर्शयत्यसौ ॥ ४८ ॥ चिन्त्यमानस्यवैपुंसोनार्यारूपंपुनःपुनः ॥ तमदृष्टंसमाश्रित्य
नरमुन्मादयत्यसौ ॥ ४९ ॥ तथैवोन्मादयत्येषयोषिदङ्गंनसंशयः ॥ स्मरःसंस्मरणान्नामजातंतस्यततोनृप ॥ ५० ॥ यादृशस्तादृशो
रङ्गोवस्त्रंवीरसमाश्रयेत् ॥ आत्मतेजःप्रकाशात्सोऽश्रुधारापेयतांव्रजेत् ॥ ५१ ॥ नार्यारूपंसमारुह्यधीरंतमपिमोहयेत् ॥ पुरुषंतुसमाश्रित्य
द्रावयत्येषयोषितम् ॥ ५२ ॥ सएवसहजोराजन्नशरीरीशरीरगः ॥ शरीरकस्यापिविभोकथंपापंविधीयते ॥ ५३ ॥ यंप्राप्यातिपवित्राणि
पञ्चगव्यहवींषिच ॥ अशुचित्वंक्षणंयान्तिकोऽयःस्यादशुचिस्ततः ॥ ५४ ॥ जिघ्रन्नपिस्वदुर्गन्धंपश्यन्नपिमलंस्वकम् ॥ नविरज्यतिलोकोऽयंपीडय
न्नपिनासिकाम् ॥ ५५ ॥ हृद्यान्नमन्नपानानियंप्राप्यसुरभीणिच ॥ अशुचित्वंप्रयान्त्याशुकोऽन्यःस्यादशुचिस्ततः ॥ ५६ ॥ यस्योदर
गतंचान्नंस्वंहिरूपंपरित्यजेत् ॥ कृमिमिश्रममेध्यत्वंशीघ्रंप्रज्ञायतेकिल ॥ ५७ ॥ तथापिदेहेभूपालनिजरूपंपरित्यजेत् ॥ शुनतांयातिवैपश्चा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

त्क्रमिदुर्गन्धिसङ्कुले ॥ ५८ ॥ जायन्तेतत्रवैयूकाःकृमयोवानसंशयः ॥ सकृमिःकुरुतेस्फोटंकण्डूश्चपरिदारुणः ॥ ५९ ॥ व्यथामुत्पादयेद्भूयः
सर्वाङ्गंपरिचालयेत् ॥ नखाग्रैर्घृष्यमाणासाकण्डूःशान्ताप्रजायते ॥ ६० ॥ तद्वत्सुखंभवत्येवसुरतस्यनसंशयः ॥ भुञ्जत्येवंरसान्मर्त्यःसुभक्षा
न्पिवतेपुनः ॥ ६१ ॥ तत्रस्थंपचतेवह्निरपानेपातयेन्मलम् ॥ सारभूतोरसस्तत्रउद्रिक्तस्तुप्रजायते ॥ ६२ ॥ निर्मलःशुद्धवीर्यस्तुब्रह्मस्थानं
प्रयातिच ॥ आकृष्टःससमानेननीतस्तेनापिवायुना ॥ ६३ ॥ स्थानंनलभतेवीर्यंचञ्चलत्वेनवर्तते ॥ प्राणिनांहिकपालेषुकृमयःसन्तिपञ्चवै ॥
॥ ६४ ॥ द्वावेतौकर्णमूलेतुनेत्रस्थानेततःपुनः ॥ कनिष्ठाङ्गुलिमानेनरक्तपुच्छाश्चभूपते ॥ ६५ ॥ नवनीतस्यवर्णेनकृष्णपुच्छानसंशयः ॥ तेषां
नामानिभद्रंतेमत्तोनिगदतःशृणु ॥ ६६ ॥ पिङ्गलीशृङ्गलीनामद्वौकृमीकर्णमूलयोः ॥ शृङ्गलीजङ्गलीचान्यौनेत्रयोरन्तरस्थितौ ॥ ६७ ॥ कृमीणां
शतपञ्चाशत्ताद्दग्भूतानसंशयः ॥ ललाटान्तःस्थिताःसर्वेराजिकायाःप्रमाणतः ॥ ६८॥ कपालरोगिणःसर्वेविकुर्वन्तिनसंशयः ॥ अन्यमेवंप्रवक्ष्यामि
प्राजापत्योमहाकृमिः॥ ६९ ॥ सतण्डुलप्रमाणेनतद्वद्वर्णेनसंशयः ॥ केशद्वयंमुखेतस्यविद्यतेशृणुभूपते ॥ ७० ॥ प्राणिनांसंक्षयाबुद्धिस्तत्क्षणाद्धिन
संशयः ॥ स्वस्थानेसंस्थितस्यापिप्राजापत्यस्यवैमुखे ॥७१॥ तद्वीर्यंरसरूपेणपततेनात्रसंशयः ॥ सुखेनपिबतेवीर्यंतेनमत्तःप्रजायते ॥ ७२ ॥ तालु
स्थानंप्रभेद्यैवचञ्चलत्वेनवर्त्तते ॥ इडाचपिङ्गलानाडीसुषुम्नातत्रसंस्थिताः ॥ ७३ ॥ स्वबलेनापितस्यैवकम्पितानाडिकाक्षणम् ॥ कामकण्डूर्भवेद्राज
न्सर्वेषांप्राणिनांकिल ॥ ७४॥ नरस्यस्फुटतेलिङ्गंनार्यायोनिश्चभूपते ॥ स्त्रीनरौचप्रमत्तौतौगच्छतःसङ्गमंततः ॥७५ ॥ कायेनकायंसङ्घृष्यमैथुनेन
हिजायते ॥ क्षणमात्रंसुखंतत्रपुनःकण्डूश्चताद्दशी ॥ ७६ ॥ ॥ सर्वत्रदृश्यतेवीरभावएवंविधःकिल ॥ विरसःपरिपाकोऽयंविषयस्यनसंशयः ॥ ७७ ॥
धर्मएवपुनःश्रेयान्विधिनासमनुष्ठितः ॥ धैर्यमालम्ब्यचततोधर्ममेवसमाचर ॥ ७८ ॥ श्वासएषचपलःक्षणमध्येयोगतागतशतानिविधत्ते ॥ जीवितं
तनुभृतांतदधीनंकःसमाचरतिधर्मविलम्बम् ॥ ७९ ॥ दशमीमपियातस्यचेतोनाद्यापिभूपते ॥ विषयेभ्योनिषिद्धेभ्योहाहानविरमेच्चलम् ॥ ८० ॥
नजातुकामःकामानामुपभोगेनशाम्यति ॥ हविषाकृष्णवर्त्मेवभूयएवाभिवर्द्धते॥८१॥ पुंश्चल्यापहृतंचित्तंकश्चान्योमोचितुंक्षमः ॥ आत्मारामेश्वरस्मृते
भगवन्तंचमाधवम् ॥ ८२ ॥ तस्मात्सर्वंनिष्फलत्वंप्रयातंकामकश्मलात् ॥ वयस्तेऽप्यधुनाभूपसमाचरहितंनिजम् ॥ ८३ ॥ वदाम्यहंतवनृप
हितंसर्वोत्तमोत्तमम् ॥ पुरोहितोयतस्तेऽहंसदसत्कर्मभागपि ॥८४ ॥ एकतःसर्वपुण्यानिपापनाशायपापिनाम् ॥ एकतोमाधवोमासोमाधवस्यप्रियः
सदा ॥ ८५ ॥ ब्रह्महत्यासुरापानंस्तेयंगुर्वङ्गनागमः ॥ महान्तिपातकान्येवकीर्तितानिमुनीश्वरैः ॥ ८६ ॥ तत्रयन्मनसाकायेत्रेतनापिकृतंनरैः ॥

CC-0. In Public Domain. Digitization by eGangotri

नाशयेन्माधवोमासःसर्वपापतमोमहत् ॥ ८७ ॥ दिवाकरइवध्वान्तंनाशयेन्नृपसर्वशः ॥ तथाश्रीमाधवोमासस्तमाचरविधानतः ॥ ८८ ॥ आज
न्मनोऽपिविहितानिमहान्तिराजन्घोराणितानिदुरितानिविहायमर्त्याः ॥ वैशाखमासविहिताचरणप्रभावपुण्येनतेहरिपुरंमुदितालभन्ते ॥ ८९ ॥
यद्येकमपिवैशाखमाचरन्तिविधानतः ॥ भावतःपापिनोऽप्यन्तेप्रयान्तिहरिमन्दिरम् ॥ ९० ॥ तस्मात्त्वमपिराजेन्द्रमासेऽस्मिन्माधवेऽधुना ॥ प्रातः
स्नात्वाविधानेनसमर्चयमधुद्विषम् ॥ ९१ ॥ तण्डुलस्ययथाचर्मयथाताम्रस्यकालिमा ॥ नश्यन्तिक्रिययावीरपुरुषस्यतथामलः ॥ ९२ ॥ जीवस्य
तण्डुलस्येवसहजोऽपिमलोमहान् ॥ नश्यत्येवनसन्देहस्तस्मात्कर्मोदितंकुरु ॥ ९३ ॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेवैशाखमाहात्म्येनवनवति
तमोऽध्यायः ॥९९॥ श्रीराजोवाच ॥ क्षीरोदजलतुल्याभिःशीतलामलदृष्टिभिः ॥ तथ्याभिश्चविचित्राभिस्त्वयागीर्भिःप्रबोधितः ॥ १ ॥ असाग
रोत्थंपीयूषमद्रव्यंव्यसनौषधम् ॥ त्वयाहंपायितःसौम्यभवरोगनिवारणम् ॥ २ ॥ हर्षप्रदोनृणांपापघ्नानिकृज्जीवनौषधम् ॥ जरामृत्युहरोविप्रसद्भिः
किलसमागमः ॥ ३ ॥ यानियानिदुरापानिवाञ्छितानिमहीतले ॥ प्राप्यन्तेतानितान्येवसाधूनामेवसङ्गमात् ॥ ४ ॥ यःस्नातःपापहरयासाधु
सङ्गमगङ्गया ॥ किंतस्यदानैःकिंतीर्थैःकिंतपोभिःकिमध्वरैः ॥ ५ ॥ निमज्ज्योन्मज्जतांनॄणांभवाब्धौपरमायनम् ॥ सन्तोधर्मविदःशान्तानौर्दृढे
वाप्सुमज्जताम् ॥ ६ ॥ योमेभावःपुराह्यासीत्कामैकसुखलालसः ॥ दर्शनाद्वचनात्तेऽद्यविपरीतोऽभवद्विभो ॥७॥ एकजन्मसुखस्यार्थेसहस्राणिविलो
पयेत् ॥ प्राज्ञोजन्मसहस्राणिसञ्चिनोत्येकजन्मना ॥ ८ ॥ हाहाकामरसास्वादसुखलालसचेतसा ॥ मयामूढेननकृतंकिञ्चिदात्महितंद्विज ॥ ९ ॥
अहोमेमनसोमोहोयेनात्मायोषितांकृते ॥ पातितोव्यसनेघोरेदुःखोदर्केदुरत्यये ॥ १० ॥ भगवन्परितुष्टोऽस्मिबोधितोवचनेनते ॥ उपदेशप्रदानेन
मामुद्धर्तुमिहार्हसि ॥ ११ ॥ पुराचरितपुण्योऽहंभवतावोधितोऽस्मियत् ॥ त्वत्पादरजसावापिविशेषादपिपावितः ॥ १२ ॥ विधिंमाधवमासस्य
ब्रूहिमेवदतांवर ॥ सर्वपापक्षयकरोयस्त्वयापरिकीर्तितः ॥ १३ ॥ किंदानंतत्रकिंस्नानंकोदेवोनियमास्तुके ॥ एतदाचक्ष्वविप्रर्षेदुरितोत्तारणायमे ॥
॥ १४ ॥ यमउवाच ॥ इत्येवमुक्तोभगवान्कश्यपःसदयानिधिः ॥ प्रोवाचवचनंविप्रधर्म्यंविश्वहितंशुभम् ॥ १५ ॥ कश्यपउवाच ॥ पूर्वापरसमा
धानक्षमबुद्ध्याचतेनृप ॥ पृष्टंप्राज्ञेनवक्तव्यंनाधमेपापमानसे ॥ १६ ॥ पापप्रवृत्तस्यतथादत्त्वाभूपशुभांमतिम् ॥ विद्यादानफलंसम्यक्प्राप्यतेनात्र
संशयः ॥ १७ ॥ नापृष्टःकस्यचिद्ब्रूयान्नचान्यायेनपृच्छतः ॥ जानन्नपिहिमेधावीजडवल्लोकआचरेत् ॥ १८ ॥ विदुषामपिशिष्याणांपुत्राणांचक्रिया
वताम् ॥ अपृष्टमपिवक्तव्यंश्रेयःश्रद्धावतांहितम् ॥ १९ ॥ साम्प्रतंशुद्धहृदयोजातस्त्वंवचनान्मम ॥ पुराचरितपुण्येनकेनापिचमहीपते ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पापावस्थंशरीरंतद्व्रतंतवममाश्रयात् ॥ श्रवणाद्धर्मशास्त्रस्यधर्मावस्थंतुतेऽभवत् ॥२१॥ पापावस्थमधर्माख्यंधर्मज्ञानविवर्जितम् ॥ अपरंसद्व्रतंयद्धि
विज्ञेयंतद्धिधार्मिकम् ॥ २२ ॥ धर्माधर्मोपभोगायतत्तृतीयमतीन्द्रियम् ॥ तत्त्रिभेदंशरीरंहिधर्मविद्भिरिहोच्यते ॥ २३ ॥ यावताधर्मभोगश्चमुक्ति
श्चैतत्त्रिभेदकम् ॥ पापावस्थंशरीरंतत्पापसंज्ञतदुच्यते ॥ २४ ॥ इदानींगुरुभक्तिंचकुर्वतश्चवचोमम ॥ शृण्वतोधर्मरूपंतुशरीरंतेव्यवस्थितम् ॥२५॥
तेनैवशुद्धिरमलाजाताधर्मक्रियोचिता ॥ दैवेनदेहिनांनामचेतांसिचरितानिच ॥ २६ ॥ शरीराणिचपुष्यन्तिकालेकालेविपर्ययम् ॥ साम्प्रतंभवत
श्चैतोनूनंधर्मेप्रवर्तते ॥२७॥ तेनत्वांकारयिष्यामिमाधवस्नानमुत्तमम् ॥२८॥ यमउवाच ॥ ततस्तुकारितस्तेनकश्यपेनपुरोधसा ॥सनृपोमाधवेमासि
स्नानंदानंचपूजनम् ॥ २९ ॥ यथादृष्टंपुराशास्त्रेवैशाखस्नानजंविधिम् ॥ समुनिःप्रत्युवाचासौभूपायचयथोदितम् ॥ ३० ॥ श्रावितःस्तोत्रसारंच
पाठितोहरिमेधसः ॥ श्रुतेयस्मिन्नधीतेचससम्यक्फलमाप्नुयात् ॥ ३१ ॥ सकारितस्तेनविशुद्धभावोराजापिचक्रेविधिवत्तदानीम् ॥ श्रीमाधवेमासि
विधानमीडयंततोयथाकर्णितमादरेण ॥ ३२ ॥ प्रातःस्नानंचपाद्यंचह्यर्घंचहरिपूजनम् ॥ नैवेद्यंभक्तिभावेनचकारसनृपोत्तमः ॥ ३३ ॥ दानंयथा
नियमपालनमादरेणवैशाखमासिविदधातिविधानमेवम्॥योभक्तितोऽन्वहमसौप्रतिवर्षमेवंकृत्वाप्रयातिहरिधाममहीसुराग्र्यः ॥३४॥ अथेतरेषुमासेषु
कामिनीकुचकेलिवान् ॥ भोगैकलालसोभूयोभवत्येवंयथारुचि ॥ ३५ ॥ नधर्मनियमंराजकार्येषुनविचारणम् ॥ करोतिकामवशगोहित्वामासंस
माधवम् ॥३६॥ महतामपिविप्राग्र्यदुर्निवार्योमनोभवः ॥ शरीरसहजोनूनमनादिर्वासनाक्रमः ॥३७॥ केशकज्जलशालिन्योदुःस्पर्शालोचनप्रियाः ॥
यस्मादग्निशिखानार्योदहन्तितृणवन्नरम् ॥ ३८ ॥ घोरःशत्रुःशरीरस्थःपुंसांकामोयथोचितम् ॥ मोहधूममयःपापोनकेषामान्ध्यकारकः ॥३९॥ इति
श्रीपाद्मेमहापुराणेपातालखण्डेवैशाखमाससमाहात्म्येशततमोऽध्यायः ॥१००॥ यमउवाच ॥ अथकालकटाक्षेणलक्षितोनृपतिस्तदा॥मृतोऽतिरतिसेवो
त्थक्षयक्षीणकलेवरः ॥ १ ॥ नीयमानोयमगणैस्ताड्यमानोमुहुर्मुहुः ॥ क्रन्दमानोमहारावान्संस्मरन्निजपातकम् ॥२॥ विष्णुदूतैःसमागम्यताडयित्वा
ममानुगान्॥धर्मवानयमित्युक्त्वाविमानमथरोपितः ॥३॥ नीतोहरिपुरंभूपःस्तूयमानोऽप्सरोगणैः॥प्रातःस्नानेनवैशाखमासस्यक्षीणपातकः ॥४॥ अथ
धर्मविहीनोऽयमितिमत्वाचतैःपुनः ॥ देवदूतैर्निदेशेनविष्णोर्भूमिपतिस्तदा ॥ ५ ॥ अदूरादेवनिरयवर्त्मनासससमाहितः ॥ सगच्छन्नपिशुश्रावजीवानां
क्रन्दतांपुनः ॥६॥ निरयेपच्यमानानामारावंविविधंतदा॥पापिनांकथ्यमानानामाक्रन्दमतिदारुणम्॥७॥श्रुत्वाविस्मयवान्विप्रराजाभूदतिदुःखितः ॥

१ 'कामिनीकुलकेलिवान्' इ० पा०। २ 'देवदूतैरदूरेण नरकस्य च वर्त्मनः ॥ आनीतो नपतिर्विष्णोर्निदेशेऽतिविशारदैः' ॥ इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रोवाचदूताः किमयमाक्रन्दोदारुणः श्रुतः ॥ पुनर्नश्रूयतेतन्मेकारणंवक्तुमर्हथ ॥ ८ ॥ दूताऊचुः ॥ जन्तवस्त्यक्तमर्यादाःपापास्त्वाचारवर्जिताः ॥ निरयेषुचघोरेषुतामिस्रादिषुपातिताः ॥ ९ ॥ कृतपातकिनस्त्वत्रप्राणत्यागादनन्तरम् ॥ याम्यंपन्थानमाश्रित्यदुःखमश्नन्तिदारुणम् ॥ १० ॥ यमस्यपुरुषैर्घोरैःकृष्यमाणाइतस्ततः ॥ अन्धकारेनिपतिताभक्ष्यन्तेह्यतिदारुणैः ॥ ११ ॥ श्वभिःश्रृगालैःक्रव्यादैःकाककङ्कबकादिभिः ॥ अग्नितुण्डैर्वृकव्याघ्रैर्भुजगैर्वृश्चिकादिभिः ॥१२॥ अग्निनादह्यमानाश्चतुद्यमानाश्चकण्टकैः ॥ क्रकचैःपाट्यमानाश्चपीड्यमानाश्चतृष्णया ॥ १३ ॥ क्षुधयाबाध्यमानाश्चघोरैर्व्याधिगणैस्तथा ॥ पूयशोणितगन्धेनमूर्छ्यमानाःपदेपदे ॥ १४ ॥ क्वथ्यन्तेचक्वचित्तैलेताड्यन्तेमुशलैःक्वचित् ॥ आयसीषुप्रपच्यन्तेशिलासुक्वचिदेवच ॥१५॥ क्वचिद्वान्तमथाश्नन्तिक्वचित्पूयमसृक्क्वचित् ॥ क्वचिद्विष्ठांक्वचिन्मांसंपूतिगन्धिषुदारुणम् ॥ १६ ॥ कृमिभिर्भक्ष्यमाणाश्चवह्नितुण्डैःक्वचित्क्वचित् ॥ केशशोणितमांसासृग्वसास्थिनिकरेषुच ॥ १७ ॥ आस्थिताःकुणपाःकीर्णाःकृमिभिर्भक्षिताःस्फुटम् ॥ काककङ्कमहागृध्रवदनैर्ध्वंसितेषुच ॥१८॥ शिवदुर्गन्धनीरन्ध्रसङ्घट्टशतकोटिषु ॥ करपात्रशिलापत्रततनिस्तैलकेषुच ॥ १९ ॥ लोहतैलवसास्तम्भकूटशाल्मलसद्मसु ॥ क्षुरकण्टककीलोग्रज्वालास्तम्भविभातिषु ॥ २० ॥ तप्तवैतरणीपूयपूरितेषुपृथक्पृथक् ॥ असिपत्रवनोत्कृत्तनरनारीस्तनेषुच ॥ २१ ॥ घोरान्धकारग्रहणदारुणेषुमुहुर्मुहुः ॥ पापच्यमानाःक्रन्दन्तोदारुणैर्विविधैःस्वरैः ॥ २२ ॥ कण्ठेषुबद्धपाशाश्चभुजगावेष्टिताःक्वचित् ॥ पीड्यमानास्तथायन्त्रैःकृष्यमाणाश्चजानुभिः ॥ २३ ॥ भग्नपृष्ठशिरोग्रीवाःस्तब्धकण्ठाःसुदारुणाः ॥ कूटागारेभ्राम्यमाणाःशरीरैर्यातनाक्षमैः ॥२४॥ पीडयन्तेपापिनोराजन्क्रन्दमानाविकर्मिणः ॥ सहितंविषयास्वादैःक्रन्दनंतैर्विधीयते ॥ २५ ॥ भुज्यतेचकृतंपूर्वमेतत्सर्वैश्चजन्तुभिः ॥ परस्त्रीषुकृतःसङ्गःप्रीतयेदुःखदोहिसः ॥ २६ ॥ मुहूर्तविषयास्वादोजातोऽनेकाब्ददुःखदः ॥ वपुषस्तवराजेन्द्रप्रातःस्नानस्यमाधवे ॥ २७ ॥ विधिनापावनस्यैतेमरुतःस्पर्शमाप्नुतु ॥ लब्धसौख्याःक्षणंजातामहसाप्यायितास्तव ॥ २८ ॥ आक्रन्दरहितास्तेनजातास्तेनिरयेस्थिताः ॥ नामापिपुण्यशीलानांश्रुतंसौख्यायकीर्तितम् ॥ २९ ॥ जायतेतद्वपुस्पर्शवायुस्पर्शःसुखावहः ॥ ३० ॥ यमउवाच ॥ इतिदूतवचःश्रुत्वासराजाकरुणानिधिः ॥ प्रत्युवाचहतान्दूतान्विष्णोरद्भुतकर्मणः ॥ ३१ ॥ कोमलंहृदयंनूनंसाधूनांनवनीतवत् ॥ वह्निसन्तापसन्तप्तंतद्यथाद्रवतिस्फुटम् ॥ ३२ ॥ राजोवाच ॥ नातंजन्तुमहंहित्वापीडितुंगन्तुमुत्सहे ॥ तंपापिष्ठंधिगार्तानामार्तिंशक्तोनहन्तियः ॥३३॥ मदङ्गसङ्गमोच्छिष्टवायुस्पर्शेनतेयदि ॥ जन्तवःसुखिनोजातास्तस्मात्तत्रनयन्तुमाम् ॥ ३४ ॥ पवित्रयन्तिजननीमवनीमपितेनराः ॥ परतापच्छिदोयेतुचन्दनाइवचन्दनम् ॥ ३५ ॥ परोपकृतयेयेतु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पीडयन्तेकृतिनोहिते ॥ सन्तस्तएवयेलोकेपरदुःखविदारणाः ॥ ३६ ॥ आर्तानामार्तिनाशार्थंप्राणायेषांतृणोपमाः ॥ तैरियंधार्यतेभूमिर्नरैःपरहितो
द्यतैः ॥ ३७ ॥ मनसोयत्सुखंनित्यंतत्स्वर्गोनरकोपमः ॥ तस्मात्परसुखेनैवसुखिनःसाधवःसदा ॥ ३८ ॥ वरंनिरयपातोऽत्रवरंप्राणवियोजनम् ॥
नपुनःक्षणमार्तानामार्तिनाशमृतेसुखम् ॥ ३९ ॥ दूताऊचुः ॥ जन्तवोनिरयेघोरेपच्यन्तेतेऽत्रपापिनः ॥ स्वकर्मैवोपजीवन्तिमोहस्थानंनविद्यते ॥
॥ ४० ॥ यैर्नदत्तंनचहुतंतीर्थेस्नानंनवाकृतम् ॥ पुनर्नोपकृतंभक्त्यासुकृतंनकृतंपरम् ॥ ४१ ॥ नेष्टंनततंनोजप्तंयैर्नहृष्टतयानृप ॥ परस्मिन्निहघोरेषु
पच्यन्तेनिरयेषुते ॥ ४२ ॥ दुःशीलायेदुराचाराविहाराहारनिन्दिताः ॥ परापकारिणःपापकारिणोदुर्विहारिणः ॥ ४३ ॥ विदारिणोहिमर्मोक्त्या
पापाःपरहृदांहिये ॥ निरयेतेविपच्यन्तेयेपरस्त्रीविहारिणः ॥ ४४ ॥ एहिनूनंमहीपालगच्छामोहरिमन्दिरम् ॥ नतेपुण्यवतोयुक्तमिहस्थातु
मतःपरम् ॥ ४५ ॥ राजोवाच ॥ यद्यहंसुकृतीदूताःकस्मादस्मिन्महाभये ॥ नारकेपथिवानीतःकिंवामेसुकृतंपरम् ॥ ४६ ॥ मयापिनकृतं
तादृक्सुकृतंकामशालिना ॥ कथंपुरिहरेर्गन्तासंशयानोऽहमस्मिवै ॥ ४७ ॥ दूताऊचुः ॥ सुकृतंनकृतंसत्यंत्वयाकामवशात्मना ॥ नेष्टंयज्ञै
र्नवायज्ञावशिष्टंभवताशितम् ॥ ४८ ॥ किंतुमाधवमासेयद्विधिनावत्सरत्रयम् ॥ प्रातःस्नात्वागुरुवचःप्रेरितेनपुरात्वया ॥ ४९ ॥ भक्त्या
सम्पूजितोविष्णुर्विश्वेशोमधुसूदनः ॥ महापापातिपापौघनिहन्ताभक्तवत्सलः ॥ ५० ॥ सर्वधर्मैकसारेणतेनैकेननरेश्वर ॥ नीयतेपुण्यभव
नंपूज्यमानोमरुद्गणैः ॥ ५१ ॥ महतामपिपापानांनिहन्तामाधवोऽर्चितः ॥ तथैवमाधवोमासोमर्त्यानांविधिनोदितः ॥ ५२ ॥ यथैव
विस्फुलिङ्गेनज्वाल्यतेतृणसञ्चयः ॥ प्रातःस्नानेनवैशाखेतथाघौघोऽपिदह्यते ॥ ५३ ॥ तावद्वपुषिपापानिप्रभवन्तिमहान्त्यपि ॥ यावन्नमाधवे
मासितीर्थेमज्जतिचोषसि ॥ ५४ ॥ वैशाखेमासियोयुक्तोयथोक्तनियमैर्नरः ॥ हरिभक्त्यैवपापौघैर्मुक्तोऽच्युतगृहंव्रजेत् ॥ ५५ ॥ आजन्मनो
हिसुकृतंयत्त्वयानपुराकृतम् ॥ तेनत्वंनिरयस्थानमार्गंनीतोनरेश्वर ॥ ५६ ॥ अथभूमिपतेतूर्णमस्माभिस्तुमरुद्गणैः ॥ स्तूयमानोविमानेन
गच्छगोविन्दमन्दिरम् ॥ ५७ ॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेवैशाखमाहात्म्येएकोत्तरशततमोऽध्यायः ॥ १०१ ॥ यमउवाच ॥
ततस्तुकरुणावार्धिस्तेषांशोकेनपीडितः ॥ भूपतिःश्रीहरेर्दूतान्विनयेनाहवाडव ॥ १ ॥ ऐश्वर्यस्याभिजात्यस्यगुणानांसुकृतस्यच ॥ सन्तः
फलंहिगण्यन्तेयद्भीतपरिरक्षणम् ॥ २ ॥ यद्यस्तिसुकृतंकिञ्चिन्ममतेनैवजन्तवः ॥ स्वर्गंगच्छन्तुमुक्तौघाःस्थानेतेषांवसाम्यहम् ॥ ३ ॥
एवंभूपवचःश्रुत्वातस्यसत्यवतोहिते ॥ ध्यायन्तःसत्यमौदार्यमब्रुवंस्तेवचोनृपम् ॥ ४ ॥ दूताऊचुः ॥ अनेनतवकारुण्यकर्मणावचसानृप ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बभूववृद्धिर्धर्मस्यसञ्चितस्यविशेषतः ॥ ५ ॥ स्नानंदानंजपोहोमस्तपोदेवार्चनादिकम् ॥ कृतंयन्माधवेमासितदनन्तफलंविदुः ॥ ६ ॥ स्वर्गेयज्वाच
दाताचक्रीडतेत्रिदशैःसह ॥ वापीषुहेमपद्मासुकल्पवृक्षतलेऽपिच ॥ ७ ॥ गीयमानोमुदंयातिगीर्वाणरमणीगणैः ॥ जलान्नदानतोलोकंलभतेवारुणं
शुभम् ॥८॥ कुलानिहेलयासप्तसन्तारयतिगोप्रदः ॥ हयंदत्त्वारवेर्लोकंयातिविद्याप्रदोनरः ॥ ९ ॥ ब्रह्मलोकंतथाहेमदानाद्यातिसुरालये ॥ योददाति
तथाकन्यांविष्णुलोकंसगच्छति ॥ १० ॥ माधवेमासियःस्नात्वादत्त्वासम्पूज्यमाधवम् ॥ अवाप्यसकलान्कामान्प्रयातिपदमव्ययम् ॥
॥ ११ ॥ एकतोऽपितपोदानक्रतुसुत्यादिकाःक्रियाः ॥ एकतोविधिवन्मासोमाधवश्चरितोमहान् ॥ १२ ॥ तस्यमाधवमासस्यदिनैकस्यापिभूपते ॥
कृतंयत्सुकृतंतत्तेसर्वदानादिकंपुरा ॥१३ ॥ कारुण्येनदिनैकस्यपुण्यंदेहिधरापते ॥ निरयेपच्यमानेभ्योदुःखितेभ्योदयानिधे ॥ १४ ॥ नदयासदृशो
धर्मोनदयासदृशंतपः ॥ नदयासदृशंदानंनदयासदृशःसखा ॥ १५ ॥ पुण्यदःपुण्यमाप्नोतिनरोलक्षगुणंसदा ॥ कारुण्येनविशेषात्तेधर्मवृद्धिस्ततो
भवेत् ॥ १६ ॥ दुःखितानांहिभूतानांदुःखोद्धर्त्तानरोहियः ॥ सएवसुकृतीलोकेज्ञेयोनारायणांशजः ॥ १७ ॥ वैशाखेमासिपूर्णायांस्नानदानादिकं
त्वया ॥ यत्तीर्थेविहितंवीरसर्वाघविनिषूदनम् ॥ १८ ॥ तदेभ्योदेहिविधिवत्कृत्वासाक्ष्येहरिंप्रभुम् ॥ त्रिवाचिकंचनिरयाद्येनामीस्वर्गमाप्नुयुः॥
॥ १९ ॥ कपोतार्थस्वमांसानिकारुण्येनपुराशिबिः ॥ दत्त्वादयानिधिःस्वर्गेराजतेकीर्तिवारिधिः ॥२०॥ दधीचिरपिराजर्षिर्दत्त्वास्थिचयमात्मनः ॥
त्रैलोक्यकौमुदींकीर्तिंलब्धवान्स्वर्गमक्षयम् ॥ २१ ॥ सहस्रजिच्चराजर्षिःप्राणानिष्टान्महायशाः ॥ ब्राह्मणार्थेपरित्यज्यगतोलोकाननुत्तमान् ॥
॥ २२ ॥ नस्वर्गेनापवर्गेऽपितत्सुखंलभतेनरः ॥ यदार्तजन्तुनिर्वाणदानोत्थमितिनोमतिः ॥ २३ ॥ सर्वेषुदातृजातेषुपुराजातोऽसिभूपते ॥ कर्मणा
नेनसङ्ख्यासुधीरधैर्यंनियोज्यच ॥ २४ ॥ दृष्टातवधियंधर्मदयादानंसुनिश्चलम् ॥ अस्माभिरपितूत्साहःक्रियतेधर्मवादिभिः ॥ २५ ॥ यदितेरोचते
राजन्नविलम्बतयाततः ॥ तदेभ्योदेहितत्पुण्यंयातनादुःखदाहकम् ॥ २६ ॥ इत्युक्तःसतदादेवंकृत्वासाक्ष्येगदाधरम् ॥ तेभ्यस्त्रिवाचिकंपुण्यंदयावा
न्विधिनाददौ ॥ २७ ॥ दत्तेमाधवमासस्यतस्मिन्नेकदिनोद्भवे ॥ सुकृतेजन्तवोयाम्ययातनापरिवर्जिताः ॥ २८ ॥ विमानवरमारूढाःसर्वेतेत्रिदिवं
ययुः ॥ प्रणमन्तःस्तुवन्तश्चपश्यन्तस्तंप्रहर्षिताः ॥२९॥ नृपेणदत्तंतदवाप्यपुण्यंवैशाखमासैकदिनाभिजातम् ॥ सर्वेययुस्तेनरकाद्विमुक्तादिवंविमाना
धिगताहिचित्रम् ॥ ३० ॥ नूनंविचित्रोभुविभूतवर्गःसम्भूतभावोबहुधाविचित्रः ॥ तथाविचित्रोऽखिलकर्मयोगस्तत्कर्मशक्तिप्रचयोविचित्रः ॥
॥३१॥ संस्तूयमानोमुनिदेवसङ्घैर्यस्तद्विशेषाधिकलब्धपुण्यः ॥ परंपदंयोगिवरैरलभ्यंययौजगन्नाथगणाभिवन्द्यः ॥ ३२ ॥ इतिश्रीपाद्मेमहापुराणे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पातालखण्डेवैशाखमासमाहात्म्येद्व्युत्तरशततमोऽध्यायः ॥१०२॥ यमउवाच ॥ एतन्माधवमासस्यसमासात्किञ्चिदीरितम् ॥ माहात्म्यंपूर्णिमायाश्च
विशेषाद्विजसत्तम ॥ १ ॥ वैशाखमासेमधुसूदनस्यप्रियंयएनंपठतीतिहासम् ॥ सयातिकृष्णालयमाशुपूतःकल्पाननेकानिहमोदतेच ॥ २ ॥ धन्यं
यशस्यमायुष्यमिदंस्वस्त्ययनंमहत् ॥ स्वर्ग्यंश्रीदंसौमन्यस्यंप्रशस्यमघमर्षणम् ॥३॥ इदंमाधवमासस्यमाहात्म्यंमाधवप्रियम् ॥ चरित्रंभूपतेस्तस्य
संवादंचावयोरपि ॥ ४ ॥ श्रुत्वापठित्वाविधिवदनुमोद्यमनःप्रियम् ॥ भवेद्भक्तिर्भगवतिययास्यात्पापसंक्षयः ॥ ५ ॥ अथगच्छमहीदेवदेवलोकाद्यथे
च्छया ॥ निपात्यभुविवैदेहंरुदन्त्यद्यापिबान्धवाः ॥ ६ ॥ विलप्यमानैरपिबन्धुभिस्तैर्नयावदग्नौतवतच्छरीरम् ॥ प्रक्षिप्यतेहन्तजवैर्नतावद्याहिस्वयं
सुप्तइवप्रबुद्धः ॥७॥ ममप्रसादादिहपुण्ययोगःश्रुतोयथावत्तमिमंविधेहि ॥ विधानतोवैसमयेसमन्तेसमागमोऽन्तेभवितासुरैश्च ॥ ८ ॥ सूतउवाच ॥
इतिदेववचःश्रुत्वानत्वाधर्माधिपंततः ॥ पुनःपपातसइहपरितुष्टमनाद्विजः ॥ ९ ॥ धर्मराजप्रसादेनततस्तत्रमहीतले॥संसुप्तइवचोत्तस्थौबन्धुवर्गसम
न्वितः ॥ १० ॥ विधिमेनंद्विजोभूमौवर्षेवर्षेचसस्वयम् ॥ स्वयंचकारयामासमाधवस्नापनंजनम् ॥ ११ ॥ यमब्राह्मणसंवादोमयायंपरिकीर्तितः ॥
तस्यमाधवमासस्यपुण्यस्नानप्रसङ्गतः ॥ १२ ॥ वैशाखमासेसततंहरिप्रियेस्नानंविदध्याच्चददातिभक्त्या ॥ दानंचहोमंसुकृतंतथाबुधोहरेःपदंतस्यन
दुर्लभंकदा ॥१३॥ यःशृणोत्येकचित्तेनमाहात्म्यंमेषसूर्यजम् ॥ सर्वपापविनिर्मुक्तोयातिविष्णोःपरंपदम् ॥ १४ ॥ ऋषयऊचुः ॥ सूतसूतमहाप्राज्ञ
त्वयाऽतिकरुणात्मना ॥ वैशाखमासमाहात्म्यंकीर्तितंपापनाशनम् ॥ १५ ॥ नियमामधुहन्तुर्येमाधवेकथितास्त्वया ॥ पूजनंस्नानदानाद्यंश्रौत
स्मार्तविधानतः ॥१६॥ यथाचमाधवोदेवःप्रीयतेपापनाशनः ॥ अधुनाश्रोतुमिच्छामोध्यानंतस्यमहात्मनः॥१७॥कृष्णस्यभक्तवृन्दानांप्रियस्यभव
तारणम् ॥१८॥ सूतउवाच ॥ शृणुध्वंमुनयःसर्वेकृष्णस्यजगदात्मनः ॥ गोगोपगोपीप्राणस्यवृन्दावनचरस्यच ॥ १९ ॥ एकदानारदःपृष्टोगौतमेन
द्विजोत्तमाः ॥ सतस्मैप्राहयद्ध्यानंतद्वक्ष्येपापनाशनम् ॥ २० ॥ नारदउवाच ॥ सुमप्रकरसौरभोद्गलितमाध्विकाद्युल्लसत्सुशाखिनवपल्लव
प्रकरनम्रशोभायुतम् ॥ प्रफुल्लनवमञ्जरीललितवल्लरीवेष्टितंस्मरेतसततंशिवंशितमतिःसुवृन्दावनम् ॥ २१ ॥ विकासिसुमनोरसास्वदनमञ्जुलैःसञ्चरं
च्छिलीमुखमुखोद्गतैर्मुखरितान्तरंझङ्कृतैः ॥ कपोतशुकसारिकापरभृतादिभिःपत्रिभिर्विराणितमितस्ततोभुजगशत्रुनृत्याकुलम् ॥ २२ ॥ कलिन्द
दुहितुश्चलल्लहरिविप्लुषांवाहिभिर्विनिद्रसरसीरुहोदररजश्चयोद्धूसरैः ॥ प्रदीपितमनोभवव्रजविलासिनीवाससांविलोलनपरैर्निषेवितमनारतंमारुतैः ॥ ॥ १२३ ॥
॥ २३ ॥ प्रवालनवपल्लवंमरकतच्छदंमौक्तिकप्रभाप्रकरकोरकंकमलरागनानाफलम् ॥ स्थविष्ठमखिलर्तुभिःसततसेवितंकामदंतदन्तरपिकल्पका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ङ्घ्रिपमुदञ्चितंचिन्तयेत् ॥ २४ ॥ सुहेमशिखराचलेउदितभानुवद्भासुरामधोऽस्यकनकस्थलीममृतशीकरासारिणः ॥ प्रदीप्तमणिकुट्टिमांकुसुमरेणु
पुञ्जोज्ज्वलांस्मरेत्पुनरतन्द्रितोविगतषट्तरङ्गाम्बुधः ॥ २५ ॥ तद्रत्नकुट्टिमनिविष्टमहिष्ठयोगपीठेऽष्टपत्रमरुणंकमलंविचिन्त्य ॥ उद्यद्विरोचनसरो
चिरमुष्यमध्येसञ्चिन्तयेत्सुखनिविष्टमथोमुकुन्दम् ॥ २६ ॥ सुत्रामहेतिदलिताञ्जनमेघपुञ्जप्रत्यग्रनीलजलजन्मसमानभासम् ॥ सुस्निग्धनीलघन
कुञ्चितकेशजालंराजन्मनोज्ञशितिकण्ठशिखण्डचूडम् ॥२७॥ रोलम्बलालितसुरद्रुमसूनसम्पद्युक्तंसमुत्कचनवोत्पलकर्णपूरम् ॥ लोलालिभिःस्फुरित
भालतलप्रदीप्तगोरोचनातिलकमुज्ज्वलचिल्लिचापम् ॥ २८ ॥ आपूर्णशारदगताङ्कशशाङ्कबिम्बकान्ताननंकमलपत्रविशालनेत्रम् ॥ रत्नस्फुर
न्मकरकुण्डलरश्मिदीप्तगण्डस्थलीमुकुरमुन्नतचारुनासम् ॥२९॥ सिन्दूरसुन्दरतराधरमिन्दुकुन्दमन्दारमन्दहसितद्युतिदीपिताशम् ॥वन्यप्रवालकुसु
मप्रचयावकॢप्तग्रैवेयकोज्ज्वलमनोहरकम्बुकण्ठम् ॥ ३० ॥ मत्तभ्रमद्भ्रमरघुष्टविलम्बमानसन्तानकप्रसरदामपरिष्कृतांसम् ॥ हारावलीभगणराजित
पीवरोरुव्योमस्थलीलसितकौस्तुभभानुमन्तम् ॥ ३१ ॥ श्रीवत्सलक्षणसुलक्षितमुन्नतांसमाजानुपीनपरिवृत्तसुजातबाहुम् ॥ आबन्धुरोदरमुदार
गभीरनाभिभृङ्गाङ्गनानिकरमञ्जुलरोमराजिम् ॥३२॥ नानामणिप्रघटिताङ्गदकङ्कणोर्मिग्रैवेयसारसननूपुरतुन्दबन्धम्॥ दिव्याङ्गरागपरिपिञ्जरिताङ्ग
यष्टिमापीतवस्त्रपरिवीतनितम्बबिम्बम् ॥३३॥ चारूरुजानुमनुवृत्तमनोज्ञजङ्घंकान्तोन्नतप्रपदनिन्दितकूर्मकान्तिम् ॥माणिक्यदर्पणलसन्नखराजराजद्र
क्ताङ्गुलिच्छदनसुन्दरपादपद्मम् ॥ ३४ ॥ मत्स्याङ्कुशारिदरकेतुयवाब्जवज्रैःसंलक्षितारुणकराङ्घ्रितलाभिरामम् ॥ लावण्यसारसमुदायविनिर्मिताङ्गं
सौन्दर्यनिन्दितमनोभवदेहकान्तिम् ॥३५॥ आस्यारविन्दपरिपूरितवेणुरन्ध्रलोलत्कराङ्गुलिसमीरितदिव्यरागैः॥ शश्वद्द्रवैःकृतनिविष्टसमस्तजन्तुस
न्तानसन्नतिमनन्तसुखाम्बुराशिम्॥३६॥गोभिर्मुखाम्बुजविलीनविलोचनाभिरूधोभरस्खलितमन्थरमन्दगाभिः॥ दन्ताग्रदष्टपरिशिष्टतृणाङ्कुराभिरा
लम्बिवालधिलताभिरथाभिवीतम् ॥ ३७ ॥ सम्प्रस्नुतस्तनविभूषणपूर्णनिश्चलास्याद्दृढक्षरितफेनिलदुग्धमुग्धैः ॥ वेणुप्रवर्तितमनोहरमन्दगीत
दत्तोच्चकर्णयुगलैरपितर्णकैश्च ॥ ३८ ॥ प्रत्यग्रशृङ्गमृदुमस्तकसम्प्रहारसंरम्भभावनविलोलखुराग्रपातैः ॥ आमेदुरैर्बहुलसास्नगलैरुदग्रपुच्छैश्चवत्सतर
वत्सतरीनिकायैः ॥ ३९॥ हम्भारवक्षुभितदिग्वलयैर्महद्भिरप्युक्षभिःपृथुककुद्भरभारखिन्नैः ॥ उत्तम्भितःश्रुतिपुटीपरिपीतवंशध्वानामृतोद्धतविकासि
विशालघोणैः ॥ ४० ॥ गोपैःसमानगुणशीलवयोविलासवेशैश्चमूर्छितकलस्वनवेणुवीणैः ॥ मन्दोच्चतारपटुगानपरैर्विलोलदोर्वल्लरीललितलास्य
विधानदक्षैः ॥ ४१ ॥ जङ्घान्तपीवरकटीरतटीनिबद्धव्यालोलकिङ्किणिघटारणितैरटद्भिः ॥ मुग्धैस्तरक्षुनखकल्पितकान्तभूषैरव्यक्तमञ्जुवचनैः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पृथुकैःपरीतम् ॥ ४२ ॥ अथसुललितगोपसुन्दरीणांपृथुकबरीषनितम्बमन्थराणाम् ॥ गुरुकुचभरभङ्गुरावलग्नत्रिवलिविजृम्भितरोमराजिभाजान् ॥
॥ ४३ ॥ तदतिरुचिरचारुवेणुवाद्यामृतरसपल्लविताङ्गजाङ्घ्रिपस्य ॥ मुकुलविमलरम्यरूढरोमोद्गमसमलङ्कृतगात्रवल्लरीणाम् ॥ ४४ ॥ तदति
रुचिरमन्दहासचन्द्रातपपरिजृम्भितरागवारिराशेः ॥ तरलतरतरङ्गभङ्गविप्रुट्प्रकरघनश्रमबिन्दुसन्ततानाम् ॥ ४५ ॥ तदतिललितमन्दचिल्लि
चापच्युतनिशितेक्षणमारबाणवृष्ट्या ॥ दलितसकलमर्मविह्वलाङ्गप्रविसृतदुःसहवेपथुव्यथानाम् ॥ ४६ ॥ तदतिरुचिरवेषरूपशोभामृतरसपान
विधानलालसानाम् ॥ प्रणयसलिलपूरवाहिनीनामलसविलोलविलोचनाम्बुजानाम् ॥ ४७ ॥ विस्रंसत्कबरीकलापविगलत्फुल्लप्रसूनास्रव
न्माध्वीलम्पटचञ्चरीकघटयासंसेवितानांमुहुः ॥ मारोन्मादमदस्खलन्मृदुगिरामालोलकाञ्च्युल्लसन्नीवीविश्लथमानचीनसिचयान्तार्चिर्नितम्बत्वि
षाम् ॥४८॥ स्खलितलसितपादाम्भोजमन्दाभिघातच्छुरितमणितुलाकोट्याकुलाशामुखानाम् ॥ चलदधरदलानांकुड्मलापक्ष्मलाक्षिद्वयसरसि
रुहाणामुल्लसत्कुण्डलानाम् ॥ ४९ ॥ द्राघिष्ठश्वसनसमीरणाभितापप्रम्लानीभवदरुणोष्ठपल्लवानाम् ॥ नानोपायनविलसत्कराम्बुजानामालीभिः
सततनिषेवितंसमन्तात् ॥ ५० ॥ तासामायतलोलनीलनयनव्याकोशलीनाम्बुजस्रग्भिःसम्परिपूजिताखिलतनुंनानाविलासास्पदम् ॥ तन्मुग्धा
ननपङ्कजप्रविगलन्माध्वीरसास्वादिनींबिभ्राणंप्रणयान्मदाक्षिमधुल्हन्मालांमनोहारिणीम् ॥५१॥ गोपीगोपपशूनांबहिःस्मरेदग्रतोऽस्यगीर्वाणघटाम्॥
वित्तार्थिनींविरिञ्चित्रिनयनशतमन्युपूर्विकांस्तोत्रपराम् ॥ ५२ ॥ तद्वद्दक्षिणतोमुनिनिकरंदृढधर्मवाञ्छयासमाम्नायपरम् ॥ ५३ ॥ योगीन्द्रानथ
पृष्ठेमुमुक्षमाणान्समाधिनातुसनकाद्यान् ॥५४॥ सव्येसकान्तानथयक्षसिद्धगन्धर्वविद्याधरचारणांश्च ॥ सकिन्नरानप्सरसश्चमुख्याःकामार्थिनीर्नर्तन
गीतवाद्यैः ॥ ५५ ॥ शङ्खेन्दुकुन्दधवलंसकलागमज्ञंसौदामिनीततिपिशङ्गजटाकलापम् ॥ तत्पादपङ्कजगताममलांचभक्तिंवाञ्छन्तमुज्झित
तरान्यसमस्तसङ्गम् ॥ ५६ ॥ नानाविधिश्रुतिगुणान्वितसप्तरागग्रामत्रयीगतमनोहरमूर्छनाभिः ॥ सम्प्रीणयन्तमुदिताभिरपिप्रभक्त्यासञ्चिन्तय
न्नभसिमांद्रुहिणप्रसूतम् ॥५६॥ इतिध्यात्वाऽऽत्मानंपटुविशदधीर्नन्दतनयंनरोबुद्ध्यैवाऽर्घप्रभृतिभिरनिन्द्योपहृतिभिः ॥ यजेद्भूयोभक्त्यास्ववपुषि
बहिष्ठैश्चविभवैरितिप्रोक्तंसर्वंयदभिलषितंभूसुरवराः ॥ ५८ ॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेवैशाखमाहात्म्येत्र्युत्तरशततमोऽध्यायः ॥ १०३ ॥
इतिवैशाखमासमाहात्म्यंसमाप्तम् ॥ ॐ श्रीगणेशाय नमः॥ऋषयऊचुः ॥ भूयोवदमहाभागरामचारित्रमद्भुतम् ॥ राममाहात्म्यसर्वस्वंभक्तानांप्रीति
दायकम् ॥ १ ॥ सूतउवाच॥अश्वमेधंक्रतुवरंकृत्वादाशरथिर्यथा ॥ प्रवृत्तोलोककृत्येषुशास्त्रकृत्येषुकोविदः ॥ २ ॥ अयोध्यांगन्तुकामेनशङ्करेणमहा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्मना ॥ पार्वत्यासहदेवेनउषितंसरयूतटे ॥३॥ मुनयस्तंसमभ्येत्यशङ्करंविश्वरूपिणम्॥कश्यपाद्यामहात्मानःपप्रच्छुरमितौजसम् ॥४॥ स्वागतंतेमुनि
श्रेष्ठसभार्यःकुतआगतः ॥ किमागमनकृत्यंतेकंदेशंगन्तुमुद्यतः ॥५॥ शङ्करउवाच ॥ अहंशम्भुरितिख्यातोविप्रोहिमगिरिस्थितः ॥ द्रष्टुंचराघवंगच्छे
ममकार्यंमहत्ततः ॥ ६ ॥ मामाह्वयतिराजासौपुराणश्रवणेरतः ॥ आगच्छन्तुभवन्तोऽपिराघवःपरितुष्यति ॥ ७ ॥ ततस्तेमुनयःशम्भुर्ययुरामदि
दृक्षया ॥ तानागतान्बलिष्ठस्तुज्ञात्वारामायचोक्तवान् ॥ ८ ॥ ततःसत्वरमुत्थायनिर्ययौसपुरोहितः ॥ अर्घ्यपाद्यादिकैस्सर्वान्पूजयामासतानृषीन् ॥
॥९॥ गृहराजंततःसर्वान्प्रावेशयदरिन्दमः॥प्रत्येकमासनंदत्त्वास्वागतोक्त्यासनस्थितान् ॥१०॥ क्रमेणरघुशार्दूलःपूजयामासतानृषीन्॥वाचामधुरया
प्रीणन्निदमाहासनस्थितान् ॥११॥ श्रीरामउवाच ॥ अद्यमेसफलंजन्मप्राप्तमद्यतपःफलम् ॥ अद्याभ्यासस्यविद्यानांफलकालोऽयमागतः ॥ १२ ॥
अद्यमेपितरस्तुष्टाराज्यंचसफलंमम ॥ अद्यमेसफलंवृत्तमद्यमेसफलंश्रुतम् ॥ १३ ॥ एवंवदन्तंराजानंब्राह्मणाःकश्यपादयः ॥ ऊचुःप्रियतरंवाक्यंरामं
राजीवलोचनम् ॥१४॥ ऋषयऊचुः ॥ अयंशम्भुर्द्विजःप्राप्तःसर्वशास्त्रविशारदः ॥ वेदवेदाङ्गतत्त्वज्ञःसर्वभूतहितेरतः ॥ १५ ॥ कैलासवासीसततंतपसे
कृतनिश्चयः ॥ ब्रह्मणाब्रह्मवर्चस्केतुल्योब्रह्मविदांवरः ॥ १६ ॥ हरिणाब्रह्मवात्सल्येप्रसादेशङ्करोपमः ॥ एवंविधोमहातेजाःशम्भुर्ब्राह्मणपुङ्गवः ॥
॥ १७ ॥ अष्टादशपुराणज्ञोमीमांसान्यायकोविदः ॥ त्वद्भाग्यगौरवादेवप्राप्तोऽयंमुनिसत्तमः ॥ १८ ॥ त्वयाहूतोमुनिवरःकैलासादागतःप्रभो ॥
अतःपृच्छमहाभागपुराणाख्यानमुत्तमम् ॥ १९ ॥ श्रोतुकामावयंप्राप्तास्त्वामद्यरघुनन्दन ॥ अन्तंगतस्यवेदानांसर्वशास्त्रार्थवेदिनः ॥ २० ॥ पुंसो
ऽश्रुतपुराणस्यनसम्यग्ग्यातिदर्शनम् ॥ २१ ॥ सूतउवाच ॥ एवमुक्तोरघुश्रेष्ठोमुनिभिस्तत्त्वदर्शिभिः ॥ प्रहर्षमतुलंलेभेपुराणश्रवणोत्सुकः ॥ २२ ॥
श्रीरामउवाच ॥ लिङ्गार्चनप्रकारंचलिङ्गमाहात्म्यमेवच ॥ महेशनाममाहात्म्यंपूजामाहात्म्यमेवच ॥ २३ ॥ नमस्कारस्यमाहात्म्यंदृष्टिमाहात्म्य
मेवच ॥ जलदानस्यमाहात्म्यंधूपदानस्यसत्तम ॥ २४ ॥ दीपगन्धादिदानस्यपुष्पमाहात्म्यमेवच ॥ नानाख्यानेतिहासानांकथांपापप्रणाशिनीम् ॥
॥ २५ ॥ धर्मार्थकाममोक्षांश्चतदुपायांश्चसुव्रत ॥ तत्सर्वंश्रोतुमिच्छामित्वत्तोमुनिवरोत्तम ॥ २६ ॥ शम्भुरुवाच ॥ रामराममहाबाहोपुण्यवानसि
राघव ॥ राज्यासक्तस्यतेजातापुराणश्रवणेरतिः ॥२७॥ स्यान्महत्सेवयारामपुण्यतीर्थनिषेवणात् ॥ साजिह्वायाशिवंगायेत्तच्चित्तंयत्तदर्पितम् ॥२८॥
तावेवकेवलौश्लाघ्यौयौतत्पूजाकरौकरौ ॥ सुजन्मदेहमत्यर्थंतदेवाशेषजन्मसु ॥ २९ ॥ यदेवोत्पुलकोभासिहरनामानुकीर्तनात् ॥ कृतार्थोऽसिमहा

१ 'त्वद्वाक्यगौरवादेव' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राजतत्प्रश्नानुगतामतिः ॥ ३० ॥ अनन्तरंसमाजग्मुर्जाङ्घिकाःसत्वरश्रमाः ॥ तत्करात्पत्रिकांगृह्यपपाठरघुसत्तमः ॥३१॥ मनसाऽचिन्तयद्रामःकथ
मेतदभूदिति ॥ रामंशम्भुस्तदाप्राहदेव्याब्राह्मणवेषवान् ॥ ३२ ॥ किंचिन्तयसिकाकुत्स्थमुनिष्वग्रेवसत्स्वपि ॥ तद्वाक्यंराघवःश्रुत्वापप्रच्छमुनिपुङ्ग
वान् ॥३३॥ श्रीरामउवाच ॥ विभीषणःकथमसौबद्धःशृङ्खलयानृभिः ॥ मत्स्थापितंशिवंलिङ्गंदृष्ट्वारामेश्वरंत्वहो ॥३४ ॥ द्राविडैःकुटिलैर्दुष्टैरात्मना
तद्विचार्यताम् ॥ विचार्यमुनिवर्यास्तेनेशास्तज्ज्ञातुमल्पतः ॥ ३५ ॥ नजानीमइतिप्राहूरामंरामस्तदाब्रवीत् ॥ पुराणंवीक्ष्यविधिनातत्सर्वंब्रूत
सत्तमाः ॥ ३६॥ भवदज्ञानहेतुश्चविचार्यस्तदनन्तरम् ॥ किंकिंपुराणंप्रेक्ष्यंस्याद्वर्जनीयंतथैवकिम् ॥ ३७ ॥ प्रशस्तःकीदृशःश्लोकस्तदन्यःकीदृशो
भवेत् ॥ कीदृशेषुचकार्येषुकीदृशःपूजकस्तथा ॥ ३८ ॥ पूजाचकीदृशैर्भक्तैःकार्यानिर्णयदर्शने ॥ इतिरामस्यवचनंश्रुत्वातेद्विजसत्तमाः ॥ ३९ ॥
प्रत्यूचुस्तंरघुश्रेष्ठंचिन्ताव्याकुलमानसम् ॥ नवक्तारोवयंरामवीक्ष्यंतांतुपुराणवित् ॥ ४० ॥ तच्छ्रुत्वाराघवःशम्भुंपप्रच्छविनयान्वितः ॥ सोऽपि
तद्वाक्यमाकर्ण्यप्रत्युवाचमहामतिः ॥ ४१ ॥ शम्भुरुवाच ॥ पुराणजीवीपूजार्हःस्वशाखाध्ययनःशुचिः ॥ मीमांसातत्त्वविज्ञानःश्रोत्रियोऽनृतदूषकः॥
॥ ४२ ॥ देवेषुचसमस्तेषुसमदृष्टिःशिवेरतः ॥ शतरुद्रियजापीचसाग्निकश्चातिवाचकः ॥ ४३ ॥ यजुर्वेदीविशेषेणपूजयेत्पुस्तकंसुधीः ॥ श्रीतालपत्र
लिखितंदेवलिप्यन्वितंशुभम् ॥ ४४ ॥ बन्धाद्यतिप्रपञ्चंयद्युगपत्प्रणवाक्षरम् ॥ प्रागूर्द्धरेखयोःप्रान्तेप्रणवस्याग्रयोजिका ॥ ४५ ॥ रेखाभवे
देवमेकाअकारस्तस्यपार्श्वतः ॥ शिरोभागमुपक्रम्यसकोणाधःप्रलम्बिनी ॥ ४६ ॥ आकारःसहिविज्ञेयःपट्टिकादक्षरेखया ॥ वामेषद्वक्र
विन्दूद्वाविकारइतिकीर्तितः ॥ ४७ ॥ तस्यवामशिरोरेखालम्बिन्याईउदाहृतः ॥ सर्वाक्षरेशिरोरेखाअवक्राप्रणवंविना ॥ ४८ ॥ तस्यां
तुलम्बरेखान्यातदन्तेचलवित्रवत् ॥ उकारःसहिविख्यातोलवित्रद्वयतस्तदू ॥ ४९ ॥ एवमन्यानिसर्वाणिअक्षराण्याहभारती ॥ लिप्या
नयैवलिखितंपुराणंतुप्रशस्यते ॥ ५० ॥ ब्राह्मंपाद्मंवैष्णवंचमार्तण्डंनारदेरितम् ॥ मार्कण्डेयमथाग्नेयंकौर्मंवामनमेवच ॥ ५१ ॥ गारुडंलैङ्गमाख्यातं
स्कान्दंमात्स्यंनृसिंहकम् ॥ तथैवगदितंरामपुराणंकापिलंतथा ॥ ५२ ॥ वाराहंब्रह्मवैवर्तंशकुनेषुप्रशस्यते ॥ शैवंभागवतंदौर्गंभविष्योत्तरमेवच ॥
॥५३॥ भविष्यंचोपसंज्ञानित्वन्यानिचविवर्जयेत्॥विमुच्यपुस्तकंरत्नपीठेनिक्षिप्यसंस्कृतम् ॥५४॥ धौतवस्त्रधरःस्नात्वाशुचिरक्रोधनोऽ[1]ज्वरः॥आदा ॥ १२९ ॥
वात्मनमभ्यर्च्यकृत्वासङ्कल्पमेवच ॥ ५५ ॥ अङ्कुशंचाक्षसूत्रंचपाशंपुस्तकमेवच ॥ धारयन्तींसितांध्यायेत्प्रसन्नास्यांसरस्वतीम् ॥ ५६ ॥ गोक्षीर

१ 'अत्वरः' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सदृशाकारंत्रिनेत्रंवृषवाहनम् ॥ सहासवदनंशान्तंशुक्लाम्बरधरंशिवम् ॥५७॥ हरिणंचाभयंचोर्द्ध्वबाहुयुग्मंकिरीटिनम् ॥ व्याख्यामुद्रांचदक्षेऽधोवाम हस्तेवरप्रदम् ॥ ५८ ॥ नानारत्नविभूषाढ्यंगिरिजार्द्धाम्बुजासनम् ॥ बहुभिर्मुनिमुख्यैस्तुध्यायमानपदाम्बुजम् ॥ ५९ ॥ मूर्तिमद्भिस्तथावेदैः स्तूयमानंपुराणकैः ॥ अन्यैःसमस्तलोकैश्चसंसेवितपदाम्बुजम् ॥ ६० ॥ ध्यात्वैवंपूजकःसम्यगादौपूजांसमारभेत् ॥ आपोवाइदमित्येतत्कल शस्याभिमन्त्रणम् ॥ ६१ ॥ तज्जलंचगृहीत्वाचपात्रस्थमभिमन्त्रयेत् ॥ तत्सद्ब्रह्मेतिमन्त्रेणप्रशस्यप्रणवेनतु ॥ ६२ ॥ आत्मानंसर्वपात्राणितत आवाहयेदिति ॥ यद्वागितित्यृचेनैवभारतीषोडशार्चनम् ॥६३॥ पुरुषसूक्तेनवाकुर्याद्गायत्र्यावासमर्चयेत् ॥ ओंनमोभगवतेअमुकपुराणेतिपुराणमर्च येत् ॥ ६४ ॥ काण्डादितिहिमन्त्रेणदूर्वामानीयपूजयेत् ॥ ओंनमोभगवत्यैदूर्वायाइति ॥६५॥ सलोकपालपूजास्यादथकन्यासमर्चनम् ॥ वत्सरा त्पञ्चकादूर्द्ध्वंदशवर्षादधःशुभाः ॥ ६६ ॥ अनुत्पन्नऋतुर्वापितांप्रयत्नेनपूजयेत् ॥ गन्धपुष्पाक्षतैर्धूपैर्दीपताम्बूलभूषणैः ॥ ६७ ॥ पाठयेदप्यमुं मन्त्रंपूजकःकन्यकामिमाम् ॥ ६८ ॥ सत्यंब्रूहिप्रियंब्रूहिभगवतिसरस्वतिनमस्तेनमस्तइति ॥ ६९ ॥ गायत्र्यानुक्रमाथार्त्तुर्दूर्वायुग्मंतुकारयेत्[1] ॥ सन्निधौपुस्तकस्याधःसहस्रपरमेत्यृचा ॥ ७० ॥ दूर्वायुग्मत्रयंदद्यात्तस्याहस्तेविचक्षणः[2] ॥ साप्रक्षिपेत्पुस्तसन्धौशलाकात्रयमन्वतु ॥ ७१ ॥ विसृ ज्यतांपुनर्दद्याच्छिवाभ्यांनमइत्यथ ॥ पत्रयोर्मध्यसंश्लोकःकार्यसिद्धेर्हिसूचकः ॥७२॥ पूर्वपत्रेसमाप्तिःस्याच्छ्लोकस्ययदिराघव ॥ परपत्रेपठेच्छ्लोकं विविर्च्यार्थमुदीरयेत्[4] ॥ ७३ ॥ शनैःशनैःपठेत्प्राज्ञोव्याख्यायच्चशनैःशनैः ॥ त्वरेहनहिकर्तव्याकुप्यतित्वरयातुगीः[3] ॥ ७४ ॥ घटिकायास्तुपादः स्यादत्वरास्यात्ततोऽधिका ॥ त्वरयेन्नचवक्तारंज्ञातंव्यासमनुद्विजम् ॥ ७५ ॥ विविच्यपाठंश्लोकस्यनिश्चित्यार्थंचमानसे ॥ प्रतीपंतन्नवक्तव्यं विविच्यरघुनन्दन ॥ ७६ ॥ यदियुक्तमयुक्तंवाश्लोकमन्यंपठेदसौ ॥ पुस्तकस्थंचहित्वैवपूजकःसद्विजोयदि ॥ ७७ ॥ तत्तथैवहिविज्ञेयंविसंवादोन शस्यते ॥ दैवागतोहिसश्लोकोदैवंहिवलवत्तरम् ॥७८॥ उपश्रुतिषुयद्वच्चनापराधोद्विजस्यतु ॥ विस्मयोनचकर्तव्योदैवस्यकुटिलागतिः ॥७९॥ यत्त त्पदविपर्यासेपत्रेचोपरिवारिणि ॥ तमादेशंतिरस्कृत्यद्वितीयंतुपठेदतः ॥ ८० ॥ ततस्तृतीयंपाठ्यंस्यात्ततःकार्यंविवेचनम् ॥ अविसर्गान्तपूर्वास्तेपवर्गे तरपञ्चमाः ॥ ८१ ॥ स्तुतिलिङ्गर्जितःश्लोकःशकुनेषुप्रशस्यते ॥ अध्यायादिःसमाप्तिश्चवृथापत्रंवृथालिपिः ॥ ८२ ॥ उक्तानुवचनंचैवह्युपस्तुतमथैव च ॥ दग्धपत्रंनष्टलिपिःसन्दिग्धाक्षरमेवच ॥ ८३ ॥ एतानिशकुनेनित्यंवर्जनीयानिपण्डितैः ॥ प्रश्नोहिद्विविधोज्ञेयोदीप्तशान्तप्रभेदतः ॥ ८४ ॥

१'गायत्रीत्रिष्टुबानुष्टुब्दूर्वायुग्मं तु कारयेत्' इ०,'गायत्र्या च कुमार्या तु पूर्वायुग्मं तु कारयेत्' इ० च पा०। २'पूर्वायुग्मं तु' इ० पा०। ३ 'स वाच्यः स्वस्थया धिया' इ० पा०। ४ 'विचार्यार्थम्' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शान्तंचद्विविधंज्ञेयमुत्पत्तिस्थितिवृद्धितः ॥ तत्रशान्तंप्रशस्तंस्याल्लक्षितंपूर्वलक्षणैः ॥ ८५ ॥ कार्यभेदास्तुवर्ण्यन्तेकेचिन्मत्योंपयोगिनः ॥ कस्य
चित्कार्यमादायकश्चित्प्रष्टाभवत्यपि ॥८६॥ सकरोतितदाप्रश्नंसमेत्यस्मरतेऽत्रकिम् ॥ सपुनर्धार्यपत्रंतत्तस्मिन्पत्रंप्रशस्यते ॥ ८७ ॥ अथवातत्क्षमो
पेतंवैराग्यंपरमेवच ॥ यतःकुतश्चिद्दृष्टस्तुस्तुतिपादकमेवच ॥८८॥ परिहृत्यपरंचापितस्मिन्नर्थेशुभावहम् ॥ मृतोगृह्णातिवागर्थमितिप्रश्नोऽशुभप्रदः॥
॥८९॥विवादेविजयप्रश्नेजयद्योतकमिष्यते॥ सृष्टिरप्यत्रशस्तास्यात्क्रूरायांक्लेशतोजयः ॥९०॥ प्रशान्तायामुपायैस्तुमिश्रायांविघ्नोभवेत् ॥ पुरादि
वर्णनंयत्तुमध्यमंयदिचोत्तमम् ॥ ९१ ॥ कलिसम्भावनायास्तुशृङ्गारस्योपवर्णने ॥ राज्यनिर्वाहचिन्तायांराज्यलिङ्गंशुभावहम् ॥ ९२ ॥ यस्यापि
यादृशंयोग्यंविचार्यंतादृशंबुधैः ॥स्तुतिवैराग्ययोःकार्यंविलयःपरिकीर्तितः ॥९३॥ कार्याल्पसिद्धिःस्खलितेनचनिर्वाहमृच्छति॥तस्यान्यार्थस्यान्य
भावोरामशान्तिविचारणे ॥९४॥ विसर्गान्तश्चपूर्वार्द्धविपर्यासोभविष्यतः ॥ सङ्कलिपतान्यथाभावोह्यध्यायस्यसमापने॥ ९५॥ काण्डादेस्तुसमाप्तौ
तुस्यात्तत्कार्यविनाशनम् ॥ तस्मादेतादृशेदोषेशकुनस्यविपर्ययः ॥ ९६ ॥ क्षुतेपुस्तकपातेचत्वाहतेमस्तकादिषु ॥ वक्तावैमाननंयातिततः
शकुननाशनम् ॥ ९७॥ तस्मादेतादृशेदोषेशकुनंपरिवर्जयेत् ॥ उपमायांभवेद्रामकार्याभासोनवस्तुतः ॥ ९८॥ सन्तानंभोऽन्यत्रचोक्तासृष्टिर्मध्यफल
प्रदा ॥ स्तुतिःप्रशस्ताकुत्रापिगुणवत्कार्यनिर्णये ॥९९॥ विवाहेचौषधेदानेव्यवहारेक्रूषौतथा ॥ यथार्थाचस्तुतीरामनिर्वाहेऽपिनदूषणम् ॥ १०० ॥
अयथार्थास्तुतिर्याहितत्रकार्यंनसिध्यति॥ अबुद्धार्थेतथापद्येपुराणादिष्वनादृते॥१॥पलायनेदेशभावेव्याधिसम्भवएवच ॥ चौराद्यभिभवेतस्मिन्घोर
कार्यविनाशनम् ॥ शान्तःस्याद्यदिचप्रश्नइतिप्राहुःपुराविदः ॥ २ ॥ रामउवाच ॥ अबुद्धार्थंकथंपद्यंपुराणज्ञोवदिष्यति ॥ अनुक्तोनश्रुतःसम्यच्छ्रो
तृणामितिनिश्चयः ॥३॥ तदुदाह्रियतांमह्यमर्थश्चापिविचार्यताम् ॥ भागाबोधकमप्यत्रवक्तुमर्हसिपण्डित ॥४॥ शम्भुरुवाच॥मधूनिचमधून्यत्रमधुर्म
धुमुजंमधुः ॥ मधुनामधुनाद्यर्थंविषाणिचविषाणिच ॥ ५ ॥ अबुद्धार्थस्त्वयंश्लोकःशकुनेनहिशस्यते ॥ ६ ॥ रुतीरुतेरुतेरोरौरीरीरारंररीररम् ॥ एवं
करोतिशुद्धात्माब्राह्मणोब्रह्मणोतिथिः ॥७॥ भागाबुद्धस्त्वयंश्लोयःशकुनेनप्रशस्यते ॥ एवमादीनिपद्यानिपुराणेषुरघूत्तम ॥८॥ सन्तितेषांनचव्याख्या
तत्पाठस्तुपरंभवेत् ॥ वक्तुःश्रोतुरवैगुण्यंव्रतेषुनियमेषुच ॥ ९ ॥ वेदवच्चपुराणानिनचिन्त्यानिकथंन्विति ॥ त्रिरुक्तादिवशादर्थधीरप्यस्तुविचारतः॥

१ 'स्तुतिपाठकम्' इ० प०। २'मतो गृह्णाति' ततोगृह्णाति'इ० च पा०। ३'लभते'इ० पा०। ४'क्रीडादेस्तु' इ० पा०। ५'गुणवक्तापि निर्णये' इ० पा०। ६ 'यथार्थवस्तुनो राम' इ० पा०। ७' रुते रुते रुते रोरौ री री रारं ररी ररम्' इ० पा०,'रुते रुते रौरि रिरी रारंररि रिरं ररम्' इ०,'रुते रुते रुतेरोरी रीरी रीरं रिरी रिरम्' इ० च पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ११० ॥ श्लोकार्थंप्रक्रियांचैवविचार्यपरमार्थतः ॥ बलवांस्तत्रहिश्लोकःप्रक्रियातुततोलघुः ॥ ११ ॥ वृथापत्रेवृथायासेदग्धपत्रेविनाशनम् ॥
स्यादन्तरितनिर्वाहपत्रेकार्यविसूत्रता ॥१२॥ शीर्णपत्रेव्ययःप्रोक्तःप्रनष्टलिपिकेतथा ॥ वृथाक्षरेवृथायासःपुनरुक्तेविसंविदे ॥१३॥ उपमानेतुतत्कार्यं
सिध्यतीवनसिध्यति ॥ विलम्बेनाथवासिद्धिरस्पष्टाक्षरकेपुनः ॥ १४ ॥ कार्यसंशयमाप्नोतिनिर्दिष्टदिवसेष्वपि ॥ नप्रत्यहंनिरीक्षेतपुराणशकुनंनृप ॥
॥ १५ ॥ भुक्त्वोत्तिष्ठंस्तथानैवनिरीक्षेतपुराणकम् ॥ पूर्वस्यदिवसस्याथरात्रौपूजांविधायच ॥ १६ ॥ प्रा ःकालेपरेद्युश्चशकुनेरघुनन्दन ॥ पश्चा
न्निरीक्षणंकार्यंसद्यःकालमथापिवा ॥१७॥ प्रक्रियादिविशेषेणविशेषंशकुनंवदेत् ॥ शुभकार्येषुसर्वेषुप्रेतश्राद्धादिवर्जनम् ॥ १८ ॥ दण्डप्रणयनंशापो
देशानांचविपर्ययः ॥ रक्षसांदुष्टसत्त्वानांशुद्धंप्राणिविहिंसनम् ॥१९॥ दहनादेवनिर्माणंष्ठीवनंवमनंरुदिः॥ हासोबीभत्सतादुःखदुःस्वप्नभ्रमपापकाः ॥
॥ १२० ॥ पटादिपूरणंपीडाकलहोमरणंतथा ॥ क्रूराणामागमश्चापिमहतांभयमेवच ॥ २१ ॥ एवमाद्यास्तथाचान्याःप्रक्रियास्तुविवर्जयेत् ॥
श्रियःप्राप्तिविचारेचराजसृष्टिःसुखावहा ॥ २२ ॥ ग्रहाणामुदयोरोगशान्तिरप्यत्रशस्यते ॥ किमत्रबहुनोक्तेनतत्तद्योगंविचारयेत् ॥ २३ ॥
सर्वेषुचपुराणेषुस्कान्दमत्रप्रशस्यते ॥ वैष्णवंकेचिदिच्छन्तिरामायणमथापरे ॥ २४ ॥ सत्यादिसर्वदोषाणांवैष्णवेनैवदोषता ॥ स्कान्देरामायणे
चैवदोषत्वमपिचाल्पता ॥ २५ ॥ किंतुपूजयितुंशक्यंवैष्णवंनैवकेनचित् ॥ सदाचारविहीनेनपूजितंयदिचेद्भवेत् ॥ २६ ॥ तदाशुभमिवा
यातिशकुनंनैवसिध्यति ॥ सर्वाचारसमोपेतेशाखाबन्धेयथावृषः ॥ २७ ॥ सूतउवाच ॥ इत्थंशम्भुद्विजेनाथबोधितोराघवस्तदा ॥ विभीषण
परीक्षायांशकुनायोपचक्रमे ॥ २८ ॥ वसिष्ठंसर्वतत्त्वज्ञंपुराणेषुविशारदम् ॥ बभाषेराघवोवाक्यंपुराणंवीक्ष्यतामिति ॥ २९ ॥ वसिष्ठोऽप्याह
रामंतंमुनेश्चामुष्यसन्निधौ ॥ वक्तुंनिरीक्षितुंरामनशक्तिर्ममविद्यते ॥ १३० ॥ शम्भुंप्राहततोरामोमुनिसम्प्रेक्षिताननम् ॥ भवन्तोऽपिहितत्त्वज्ञाः
पुराणेषुविशारदाः ॥ ३१ ॥ तद्वदन्तुपुराणस्थंशकुनंममकार्यतः ॥ तथेतिशम्भुरुक्त्वातुशुचिर्भूत्वार्चकोऽभवत् ॥ ३२ ॥ स्कान्दमभ्यर्च्यविधिव
त्प्रश्नंकृत्वेतितत्त्वतः ॥ सकिंश्रृङ्खलयाबद्धोममभक्तोविभीषणः ॥ ३३ ॥ अमीदृष्टास्तदाश्लोकास्त्रयआदेशकास्त्रिधा ॥ ३४ ॥ बद्धासमुद्रं
सतुराघवेन्द्रोरुरोधपुर्यांक्षणदाचरेन्द्रान् ॥ योद्धुंविनिर्गत्यसमाययुस्तेलङ्कापुरश्चाप्यतिकायमुख्याः ॥ ३५ ॥ अट्टशूलाजनपदाःशिवशूला
द्विजातयः ॥ प्रमदाःकेशशूलिन्योभविष्यन्तिकलौयुगे ॥३६॥ एवंस्तुतोमहेशस्तुदेवताःप्राहवःशिवः ॥ मोचयिष्येभवत्पत्नीर्म्लेच्छासुरनिरोधिताः ॥
॥ ३७ ॥ श्लोकत्रयंनिरीक्ष्याथबन्धनिश्चयमुक्तवान् ॥ मोचनंत्वरयारामभविष्यतिनसंशयः ॥ ३८ ॥ इतिश्रुत्वामुनेर्वाक्यंरामःसमुनि

Nepal Sanskrit University, Balmeeki Campus

वानरः ॥ कर्तुंविनिर्ययौशीघ्रंविभीषणगवेषणम् ॥ ३९ ॥ श्रीरङ्गनामनगरंत्वरयाप्रविवेशह ॥ रामंतेपूजयामासुःपार्थिवास्तत्रयेस्थिताः ॥ १४० ॥
पूजितस्तानुवाचाथक्वस्थितोऽसौविभीषणः ॥ देवश्रीरामनवयंजानीमस्तुकथामिमाम् ॥ ४१ ॥ प्रेषयामासकाकुत्स्थोवानरान्सर्वतोदिशः ॥ ततो
गत्वाकपिवराद्दृष्टवन्तोनचैवतम् ॥४२॥ अथरामोमुनिंप्राहशम्भुंपश्चाद्ददस्वमे ॥ तथेतिरामसहितोमुनिःशम्भुर्द्विजान्वितः ॥ ४३ ॥ दर्शयेतितथैवेति
विप्रघोषंजगामसः ॥ पृष्टास्तेऽपिद्विजास्तत्रदर्शयामासुरर्चिताः ॥ ४४ ॥ अन्तर्भूमिगृहेबद्धंराक्षसंबहुशृङ्खलैः ॥ अथाहराघवोविप्राःकिमनेन
कृतंत्विति ॥ ४५ ॥ तैरुक्तंब्रह्महत्येतिवृद्धोब्राह्मणसत्तमः ॥ द्विजोऽतिधार्मिकःकश्चिदेकान्तेप्रवयाःकृशः ॥ ४६ ॥ ध्यानायोपवनेतस्थौ
तत्रगत्वाविभीषणः ॥ पादेनाधर्षयद्विप्रंसविप्रोऽप्यतिचूर्णितः ॥ ४७ ॥ पदमेकमतोगन्तुंनशशाकविभीषणः ॥ अस्माभिस्ताडितोदुष्टोनममार
वधैरपि ॥ ४८ ॥ अतोरामनिहन्यैनंपापात्मानंवृषीभव ॥ रामःसंशयमापन्नोविप्रानिदमुवाचह ॥ ४९ ॥ वरंममैवमरणंमद्भक्तोहन्यते
कथम् ॥ राज्यमायुर्मयादत्तंतथैवसभविष्यति ॥ १५० ॥ भृत्यापराधेसर्वत्रस्वामिनांदण्डइष्यते ॥ रामवाक्यंद्विजाःश्रुत्वाविस्मयादिदमब्रु
वन् ॥ ५१ ॥ द्विजाऊचुः ॥ नपट्टबद्धमरणंभोराममुनिसंमतम् ॥ वसिष्ठादिमुनीन्द्रैस्तुविचारंकुरुयद्धितम् ॥ ५२ ॥ रामपृष्टामुनिवराः
प्रायश्चित्तमथोचिरे ॥ अज्ञानब्रह्महत्यातुप्रायश्चित्तैरपोह्यते ॥ ५३ ॥ इयमज्ञानतोहत्याप्रायश्चित्तमपेक्षते ॥ गवांचत्रिशतंषष्टिंददातुसविभी
षणः ॥ ५४ ॥ बन्धकाश्चार्पितेविप्रास्तथेत्यूचुःपरस्परम् ॥ मोचयिष्यामस्तद्रक्षःप्रायश्चित्तंकरोतुसः ॥ ५५ ॥ विमुच्यराक्षसंविप्राराघवाय
न्यवेदयन् ॥ रामोऽपिनाभिभाषेत्तंप्रासङ्गिकमभाषत ॥ ५६ ॥ ज्ञात्वापृष्ट्वामुनीन्कुद्धान्प्रायश्चित्तमतःपरम् ॥ द्विजानुमतितःपापीमामुपै
क्षतुराक्षसः ॥ ५७ ॥ श्रुत्वेतिराघववचोराक्षसःपापसंयुतः ॥ प्रायश्चित्तमृषिप्रोक्तंकृत्वाराममथाभ्यगात् ॥ ५८ ॥ प्रायश्चित्तविशुद्धात्मा
ननामरघुनन्दनम् ॥ रामस्तंप्रहसन्वाक्यमिदमाहसभान्तरे ॥ ५९ ॥ श्रीरामउवाच ॥ अद्यप्रभृतिपौलस्त्यविमृश्यकुरुयद्धितम् ॥ अस्माकं
त्वत्कृतेरक्षःप्रयासोऽयमभूद्यतः ॥ १६० ॥ कृपालुर्भवसर्वत्रभृत्योममयतोभवान् ॥ अथतेमुनयःसर्वेनिश्चितार्थैरघूत्तमे ॥ ऊचुरस्माकमज्ञानं
कथंशीघ्रमुपागतम् ॥ ६१ ॥ शम्भुरुवाच ॥ विप्रावज्ञानतोविप्रांअज्ञानंनाशमेष्यति ॥ ६२ ॥ ऋषयऊचुः ॥ त्रेतायुगेऽभिरामोऽसौ ॥ १३७ ॥
पुराणानिचकृत्स्नशः ॥ द्वापरान्तेभारतंचकथमेतद्धियुज्यते ॥ ६३ ॥ सूतउवाच ॥ पुराणानितथाप्येवंसन्तितन्नामकानितु ॥ व्यासेरितानि

१ धर्मवान्भवत्यर्थः । २ 'विप्रावज्ञानं नाशमेष्यति' इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वद्यवपुराणानिनचान्यथा ॥ ६४ ॥ अद्यापिचविधानंतत्पुराणश्रवणेफलम् ॥ महाभारतमप्यत्रशकुनायविशिष्यते ॥ ६५ ॥ आदिपर्वं
कमभ्यर्च्यनिरीक्षेतविनिश्चयम् ॥ अथवासर्वपर्वाणिप्रशस्तान्यर्थनिर्णये ॥ ६६ ॥ श्लोकादिलक्षणंसर्वंपूर्वोक्तंतदिहापितु ॥ श्लोकानामन्वया
देकस्तात्पर्यादथवापरः ॥ ६७ ॥ अर्थःसम्प्रतिपद्येततात्पर्यंतत्रगृह्यते ॥ अर्थादेवहिसर्वत्रवस्त्वादेस्तुनिरूपणम् ॥ ६८ ॥ यत्रार्थोदृश्यतेतत्र
धातुःससमुदाहृतः ॥ अत्रार्थादेवशब्दानांनमिथ्यवनिरूपणम् ॥ ६९ ॥ तस्मात्सर्वत्रनान्योऽर्थोगृहीतव्योमनीषिभिः ॥ १७० ॥ इतिश्रीपाद्मे
महापुराणेपातालखण्डेशिवराघवसंवादेचतुरुत्तरशततमोऽध्यायः ॥ १०४ ॥ मुनयऊचुः ॥ अतःपरंमहाभागःकिंचकारसराघवः ॥ मुनयश्च
महात्मानःकिमकुर्वंस्ततःपरम् ॥ १ ॥ सूतउवाच ॥ रामचन्द्रेसुखासीनेविभीषणेकपीश्वरे ॥ शम्भुमूचुर्मुनिवराःकथांपुण्यांवदस्वनः ॥ २ ॥
तेषामाकर्ण्यवचनंपार्वतीमाहशङ्करः ॥ इदंकस्यापिविप्रस्यगृहंपरमशोभनम् ॥ ३ ॥ रम्योपवनवापीभिर्वीरुद्भिरुपशोभितम् ॥ कूजन्मधुकर
श्रेण्याआहूतकुसुमायुधम् ॥ ४ ॥ मध्याह्नसन्ध्यामारोढुमिवसूर्यःप्रवर्त्तते ॥ स्वच्छवापीजलस्नातौपरिधायसुवाससी ॥ ५ ॥ मृगनाभिसमुद्घृष्ट
घनसारसुचन्दनम् ॥ आलिप्यसल्लकीदामदृढधम्मिल्लसंयुतौ ॥ ६ ॥ अनल्पघनसारंतुताम्बूलंप्रतिखादितम् ॥ आस्वाद्यमाद्यन्मुदितौयत्रधारागृहे
शुभे ॥ ७ ॥ मयूरनादबहुलेबहिर्मधुरगीतकैः ॥ शय्यायामास्तृतायांचपरस्परसुखस्थितौ ॥ ८ ॥ विशालस्मितरक्तोष्ठमाननंचुम्बितंयदि ॥
संसारफलमाघ्रातमावयोस्तुभविष्यति ॥ ९ ॥ इतीरितमथश्रुत्वाकुपितामुनयस्तुते ॥ उक्तवासुशुभंवाक्यमस्मासुकिमिदंत्वया ॥ १० ॥ विप्रलापः
प्रियासक्तेःकृतोनोऽस्मद्वचःकृतम् ॥ अथकोपपराच्छम्भोराननात्परमाद्भुता ॥ ११ ॥ ज्वालाविनिर्गतासापिकरालवदनाभवत ॥ कस्यचित्तुमुने
र्भार्यामाससादाथसत्वरम् ॥ १२ ॥ पलायनपराचासीद्रामंदृष्ट्वाचबिभ्यती ॥ रामोऽपिब्राह्मणींशुद्धांमोचयामीत्यभाषत ॥ १३ ॥ जगामपुष्पके
णैवब्रुवन्मुक्तिपुनःपुनः॥बाणंचधनुषायोक्तुंनचसस्मारराघवः ॥ १४ ॥ शम्भुरप्यतिपुण्यानिवनान्यायतनानिच ॥ पुराणिचविचित्राणिदृष्ट्वारामंन
चास्मरत् ॥ १५ ॥ क्षणेनचतदाप्राप्तोलोकालोकंमहागिरिम् ॥ दृष्ट्वाथराघवःशैलंगृहमार्गसमाकुलम् ॥ १६ ॥ विप्रयोषिन्महाभागाक्वगतावदत
द्विजाः ॥ इतोगतेतितेप्रोचुस्तमोभागंगिरेरिति ॥ १७ ॥ रामोविवर्णवदनःकष्टमित्यभिचिन्तयन् ॥ अथशम्भुर्महातेजाःप्रकाशमतुलंददौ ॥ १८ ॥
तत्प्रकाशप्रभावेनरामःकृत्यांययावनु ॥ तमोमयीमहाभूमिःसर्वजन्तुविवर्जिता ॥ १९ ॥ आब्रह्माण्डकटाहान्ताशतयोजनकोटितः ॥ महारजत
भूमिश्चतमोमध्येव्यवस्थिता ॥ २० ॥ तत्रनारायणपुरंसूर्यकोटिसमप्रभम् ॥ सरामस्तुनिवर्यास्तुतंदृष्ट्वाविस्मयंययुः ॥ २१ ॥ किमेतदिति

CC-0. In Public Domain. Digitization by eGangotri

चाचिन्त्यनःप्रवेशःकथंभवेत् ॥ किमेषप्रलयाग्निःस्यान्माययापरमात्मनः ॥ २२ ॥ किंवानोमरणंत्वद्यउतश्रेयोभविष्यति ॥ इतिचिन्ताकुलेष्वेव
सरामेषुमुनिष्वथ ॥ २३ ॥ शम्भुराहशृणुष्वाद्यराघवैतद्वदामिते ॥ प्रकल्पितामयामायात्वत्कृतेनैतदद्भुतम् ॥ २४ ॥ नारायणीयमेतत्तुपरम
धामभास्वरम् ॥ उष्णशीताद्यविच्छेद्यंज्ञानगम्यंनचाक्षुषम् ॥ २५ ॥ तत्तुपूजयतश्चोर्ध्वंपश्यब्रह्मपुरोगमान् ॥ दिक्षुसर्वासुचमुनीन्पश्यपूजयतो
ऽमलान् ॥ २६ ॥ चतुरोनिगमान्पश्यस्तुवतःपरमंपदम् ॥ योगिनःसनकाद्यास्तुयोगमास्थाययत्नतः ॥ २७ ॥ ध्यायन्तिपरमंतेजस्तदिदंपश्य
राघव ॥ असुंचरोमशंपश्यप्रदक्षिणनमस्क्रियाः ॥ २८ ॥ कुर्वाणंकोटिकोटीश्चवालखिल्यान्मुनीश्वरान् ॥ लक्ष्म्यादिसर्ववनितापूज्यमानंपरं
पदम् ॥२९॥ साकारंचनिराकारंब्रह्मयत्परिकीर्तितम् ॥ अज्ञानिनोनपश्यन्तिपश्यन्तिज्ञानचक्षुषः ॥३०॥ शम्भुवाक्यादतःसर्वेपूजयामासुरच्युतम् ॥
गिरिकर्णींचतुलसींमल्लिकांमारुतंतथा ॥ ३१ ॥ नीलोत्पलैरम्बुजैश्चकृष्णास्फुटजलैरपि ॥ पूजयन्तोमहात्मानोमहात्मानंजनार्दनम् ॥ ३२ ॥
नारदंखेऽथददृशुर्जटिलंसविपञ्चिकम् ॥ नारायणपदाघोषंलम्बकूर्चोपवीतिनम् ॥ ३३ ॥ सचापिमनसादध्यौकएषइतिनारदः ॥ सपपात
प्रभोःपादेशम्भोरानन्दनिर्भरः ॥ ३४ ॥ शैवींपञ्चाक्षरींविद्यांजजापमनसामुनिः ॥ धन्योऽस्म्यनुगृहीतोऽस्मिजन्माद्यसफलंमम ॥ ३५ ॥
ब्रह्मादिवन्द्यंचागम्यंज्ञातवानस्मितेपदम् ॥ नारदंतमथप्राहशम्भुर्मैवंवदेतिहि ॥ ३६ ॥ यथाचमांनजानन्तितथामेकुरुवर्तनम् ॥ गच्छशीघ्रं
हरिंब्रूहिममागमनमल्पतः ॥ ३७ ॥ अथसत्वरयागत्वासर्वंव्यज्ञापयद्धरिम् ॥ अथसत्वरयाविष्णुरादायार्घोदकंशुभम् ॥ ३८ ॥ कमला
सहितोयोगिकोटिकोटिसमावृतः ॥ निर्ययौनारदंहस्तेगृहीत्वागरुडध्वजः ॥ ३९ ॥ नमोनमोनमोऽस्त्वस्मैशङ्करायेत्युदीरयन् ॥ अर्घपाद्या
दिनासर्वान्पूजयामासकेशवः ॥ ४० ॥ प्रावेशयदमेयात्मानारायणपुरंशुभम् ॥ गृहराजेततःस्थित्वानारायणउवाचह ॥ ४१ ॥ कथमेते
समायाताःकोऽयंराजामहायशाः ॥ अमानुषप्रवेशोऽयंब्रह्माद्यैरप्यगोचरः ॥ ४२ ॥ शम्भुरुवाच ॥ मुनिवेषाःयथाप्राप्तावयमेतेनृपस्तथा ॥
तवांशोनृपतिश्चायंरामचन्द्रःप्रतापवान् ॥ ४३ ॥ एनांसंवीक्षितुंपत्नींतवकेशवकाङ्क्षति ॥ नारायणस्तथेत्युक्त्वाप्रविशेत्याहराघवम् ॥ ४४ ॥
अथप्रविश्यभवनंलक्ष्मींवीक्ष्यनमस्यच ॥ विनयावनतोभूत्वावाचमाहसुचारिणीम् ॥ कृतार्थोऽस्मिनसन्देहोवदत्वंकिंतुमन्यसे ॥ ४५ ॥
श्रीदेव्युवाच ॥ त्वंयुवाकामकृष्टश्चरूपवानसिराघव ॥ सीतासाचारुसर्वाङ्गीतवपत्नीतयाभवान् ॥ ४६ ॥ वियुक्तोऽस्तिपुराचासीदतीवविरहा
कुलः ॥ ममापिवदसर्वंतदथवानचलप्स्यसि ॥ ४७ ॥ सहासान्यथवाक्यानियूनांचित्तहराणिच ॥ श्रुत्वातुतानिसर्वाणिरामभद्रोयता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्मवान् ॥ ४८ ॥ निर्गन्तुंकाङ्क्षतेतत्रआनम्यतन्मुखाम्बुजम् ॥ स्मरबाणेनपद्मेनसम्पीडयरघुशेखरम् ॥ ४९ ॥ अन्वेवनिर्ययौदेवीपद्मापद्मवन
प्रिया ॥ एकपत्नीव्रतंज्ञात्वारामंतेसमुपागमन् ॥ ५० ॥ अथवेपितसर्वाङ्गंस्खलत्पदगतिंनृपम् ॥ शिवनारायणौदृष्ट्वाविस्मयंपरमं
गतौ ॥ ५१ ॥ अहोऽस्यदृढिमाचित्तेमायिनोऽप्यवशात्मनः ॥ धैर्यंपश्येहनियतंतेनरामःसुकीर्तिमान् ॥ ५२ ॥ सर्वतःशिवमेवास्यनाशिवंविद्यते
क्वचित ॥ अथरामोवचःप्राहगच्छेऽहंभगवन्प्रभो ॥५३॥ अनुज्ञातोऽथहरिणापुष्पकेणसराघवः ॥ समुनिःसहशम्भुश्चसहनारायणोययौ ॥ ५४ ॥
लोकालोकंगतःशीघ्रंततःस्वादूदधिंगतः ॥ ततोद्वीपसमुद्रांश्चजम्बूद्वीपंपुनर्गतः ॥५५॥ भरद्वाजाश्रमपदेतस्थिवान्गौतमीतटे ॥ अथस्नात्वामहानद्यां
भरद्वाजोमुनीश्वरः ॥ ५६ ॥ शिष्यैःश्रीमान्परिवृतःपुष्पकंदृष्टवान्मुनिः ॥ तत्ररामंमहाबाहुंशिवनारायणावृषीन् ॥ ५७ ॥ यथावत्पूजयित्वातु
तानुवाचमहामुनिः ॥ ममाश्रमपदेयूयंभोक्तुमर्हथसत्तमाः ॥५८॥ रामस्तुमुनिवाक्येनतथेत्याहकथञ्चन ॥ अथस्नात्वामहानद्यांकृत्वादेवादितर्पणम् ॥
॥ ५९ ॥ भोक्तुकामंतदारामंवसिष्ठोवाक्यमुक्तवान् ॥ धर्मत्यागोभवेद्रामनश्राद्धंक्रियतेयदि ॥ ६० ॥ श्रीरामउवाच ॥ अमायांग्रहणेतीर्थेव्यतीपाते
ऽथसंक्रमे ॥ व्यतीतंयदिचेच्छ्राद्धंभगवन्क्रियतेपुनः ॥ ६१ ॥ नित्यश्राद्धंपुनर्नैवकुर्यादितिवचस्तव ॥ यथाममैवमातॄणांमरणेसमुपस्थिते ॥ ६२ ॥
आशौचेचसमायातेनित्यश्राद्धंनवैकृतम् ॥ व्यतीपातादिकालेषुकृतंतुवचनात्तव ॥ ६३ ॥ वसिष्ठउवाच ॥ एतेहिमुनयःसर्वेतथाशम्भुरयंद्विजः ॥
एतन्मुखादशेषेणनिर्णयस्तुभविष्यति ॥ ६४ ॥ सहसर्वेविनिश्चित्यमुनयःशम्भुमब्रुवन् ॥ वदास्माकमशेषंत्वंद्विजवर्यमहानसि ॥६५॥ शम्भुरुवाच ॥
त्यक्तव्यंयच्चवैश्राद्धंपुनःकर्तव्यमेवच ॥ सूतकेसमनुप्राप्तेविघ्नेषुचवदाम्यहम् ॥ ६६ ॥ मासिकान्युदकुम्भानिश्राद्धानिसकलानिच ॥ प्रतिसांवत्सरं
श्राद्धंसूतकानन्तरंविदुः ॥ ६७ ॥ त्यक्तान्यन्यानियावन्तिसूतकेविघ्नसम्भवे ॥ अनन्तरंहिकार्याणिसर्वाणीतिनसंशयः ॥ ६८ ॥ मासिकानिसम
स्तानिश्राद्धंप्रत्याब्दिकंतथा ॥ सूतकानन्तरंकार्यंविघ्नेऽन्यस्मिन्यतोऽन्यथा ॥ ६९ ॥ एकादश्यांकृष्णपक्षेकर्तव्यंशुभमिच्छता ॥ तत्रव्यतिक्रमेहेता
वमायांक्रियतेतुतत् ॥ ७० ॥ यथोत्तरदिनेष्वेवकर्तव्यंयद्यविघ्नतः ॥ कृष्णपक्षेत्वमायांतुकर्तव्यंरामनोक्तम् ॥ ७१ ॥ मृताहस्ययदामासोनज्ञायेत
कथञ्चन॥ मार्गशीर्षेऽथवामाघेश्राद्धंतद्दिवसेस्मृतम् ॥७२॥ यदातुवासराज्ञानंमासस्यज्ञानमेवच ॥ अमायामेवतन्मासेश्राद्धंसांवत्सरंभवेत् ॥७३॥
दिनमासापरिज्ञानेप्रोषितस्यमृतस्यच ॥ तत्तिथ्यांतद्दिनंग्राह्यंतत्राज्ञानंयदाभवेत ॥ ७४ ॥ आश्विनामाचमार्गामामाघामाचदिनत्रयम् ॥ तत्रवान्य

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

तमंग्राह्यंदिनमासाप्रतीतितः ॥ ७५ ॥ वृंद्धिसप्तमसीमन्तप्रेतश्राद्धानुमासिकम् ॥ नित्योदकुम्भश्राद्धंचमासेस्युरधिकेऽपिच ॥ ७६ ॥ ग्रहणेपुत्र
जन्मादौकर्मण्यपिचशान्तिके ॥ सङ्कल्पितेचसर्वस्मिन्नधिमासोनदुष्यति॥७७ ॥ रोगीयदामनुष्यःस्याच्छ्राद्धकर्मण्युपस्थिते ॥ भार्यांवाभ्रातरंवापि
शिष्यंवापिनियोजयेत् ॥ ७८ ॥ तस्याभावेनहानिःस्यात्कर्मणःश्राद्धसंज्ञिनः ॥ नित्यश्राद्धेयथाशक्तिभोक्तारंतुनियोजयेत् ॥ ७९ ॥ अमावास्या
मासिकंचमृताहव्य।तिरेकियत्॥स्वयंकर्मण्यशक्तश्चेत्सुतंविप्रंनियोजयेत् ॥८०॥ राजकार्यनियुक्तस्यदासेंग्रहणवर्तिनः ॥ व्यसनेषुसमस्तेषुश्राद्धंविप्रेण
कारयेत् ॥८१॥ प्रातःकालेतुनश्राद्धंप्रकुर्वन्तिद्विजोत्तमाः॥नैमित्तिकेषुश्राद्धेषुनकालनियमःस्मृतः ॥८२॥ ग्रहादिव्यतिरिक्तस्यप्रक्रमःकुतपःस्मृतः॥
कुतपादथवाप्यर्वागासन्नकुतपोभवेत् ॥ ८३ ॥ मासेमासेयथाश्राद्धेऽपराह्णस्पृग्विधीयते ॥ अपराह्णव्यापिनीस्यादुभयत्रयदात्वमा ॥ ८४ ॥ क्षयेपूर्वा
तुकर्तव्यावृद्धौसाम्येपरास्मृता ॥ अमावास्यातुयाहिस्यादपराह्णद्वयेसमा ॥ ८५ ॥ क्षयेपूर्वापरावृद्धौसाम्येऽपिचपराभवेत् ॥ क्षीणस्तुचन्द्रमायत्रतत्र
श्राद्धंतुपार्वणम् ॥८६॥ अमाष्टभागेसूक्ष्मोऽसौभूताष्टांशेसनास्तिचेत्॥मध्याह्नव्यापिनीसास्यादेकोद्दिष्टेतिथिर्भवेत् ॥८७॥ सायाह्नव्यापिनीयास्या
त्पार्वणेसातिथिर्भवेत् ॥ अल्पापराह्णगायामाग्राह्याश्राद्धादिकेभवेत् ॥ ८८ ॥ मृताहेत्रिमुहूर्ताचसायङ्कालेतिथिर्भवेत् ॥ परेद्युस्तद्गतायत्रत्रिमुहूर्तंतुपूर्व
वत् ॥८९॥ तत्रापरेद्युःश्राद्धंस्याज्ज्येष्ठपुत्रस्यनाशनम् ॥ अमाश्राद्धंयथाकुर्यान्मृताहेसमुपस्थिते ॥९०॥ मध्याह्नव्यापिनीतत्रग्राह्या!द्विजस्यविधीयते ॥
॥९१॥ रामउवाच॥ श्राद्धक्रममशेषेणमर्त्यकर्मक्रमंतथा॥प्रासङ्गिकानांधर्माणांनिर्णयंवक्तुमर्हसि ॥९२॥ शम्भुरुवाच॥श्राद्धस्यदिवसेप्राप्तेपूर्वेद्युर्नियमा
न्वितः ॥ निमन्त्रयीतविप्रेन्द्रान्विप्रलक्षणसंयुतान् ॥ ९३ ॥ एकभुक्तंब्रह्मचर्यमन्त्यजाद्यैरभाषणम् ॥ दन्तधावनमभ्यङ्गनखकेशनिकृन्तनम् ॥९४॥
कर्ताकुर्वीतपूर्वेद्युस्त्यक्त्वाचैवपरेऽहनि ॥ गृह्णीतनियमानुक्तान्सर्वमेतत्परित्यजेत् ॥ ९५ ॥ त्रिकालंचैवपूजाचेत्प्रातर्देवंयजेत्स्वकम् ॥ अरुणोदय
वेलायांकरोतियदिपूजनम् ॥९६॥ अधःशायीतथाभूतःप्रातरुत्थायकर्मवित् ॥ प्रातस्त्यमपियत्कर्मतत्कृत्वास्नानपूर्वकम् ॥ ९७ ॥ ऋणत्रयविनिर्मुक्तो
यास्यतिब्रह्मतत्परम् ॥ सूर्यस्योदयवेलायांशिवपूजांकरोतियः ॥ ९८ ॥ सूर्येणसमतेजस्वीशिवलोकेमहीयते ॥ उदितेभास्करेपश्चाद्घटिकान्तर
पूजनम् ॥ ९९ ॥ रुद्रेणसमतेजस्वीशिवलोकेमहीयते ॥ द्वितीयघटिकायांतुयदिपूजनमीशितुः ॥ १०० ॥ वायुनासमतेजस्वीशिवलोके
महीयते ॥ तृतीयघटिकायांतुशिवपूजांसमाचरेत् ॥ १ ॥ कुबेरसमतेजस्वीशिवलोकेमहीयते ॥ चतुर्थीपञ्चमीषष्ठीसप्तमीघटिकासुयः॥

१ 'वृद्धीयं स्वस्तीमन्त्वम्' इ०, 'वृद्धीयं समस्यमन्तं' इ० च पा०। २ 'दीर्घग्रहनिवर्तिनः' इ०, 'ह्यर्थग्रहणवर्तिनः' इ० च पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २ ॥ शिवंपूजयतेभक्त्याशिवलोकेमरुत्समः ॥ तत्कालएवक्रियतेपूजायत्कालनोदिता ॥ ३ ॥ यथाप्रतिज्ञमथवागृहीतनियमोयजेत्॥
उपचारेषुशक्त्यावैनियमंपरिपालयेत् ॥ ४ ॥ नियमातिक्रमेवापियागश्चस्याद्विभोर्यदि ॥ ५ ॥ श्रीरामउवाच ॥ क्वपूजादेवदेवस्य
शङ्करस्यामितौजसः ॥ स्मरणात्पापनाशस्यस्मरणान्मोक्षदस्यच ॥ ६ ॥ शिवस्यशिवरूपस्यशिवतत्त्वार्थवेदिनः ॥ सोमस्यसोमभूषस्यसोम
नेत्रस्यराजितुः ॥७॥ वेदमूर्तेरमूर्तेश्चवेदसारस्यवेदिनः ॥ वेदवेदाङ्गवित्तस्यवेद्यावेद्यस्ययोगिनः ॥८॥ गोक्षीरसमदेहस्यगोक्षीरस्नानमोदिनः ॥ गोपा
लिनस्त्रिनेत्रस्यत्रयीनेत्रस्यमायिनः ॥ ९ ॥ प्रश्नमध्येतथारामंशिवज्ञानमथादिशत् ॥ स्थाणुभूतइवासीनोनासाग्रन्यस्तलोचनः ॥ ११० ॥
आनन्दनिष्यन्दविलोचनाश्रुप्रवाहसंस्पृष्टकपोलदेशः ॥ दधारदेवंगिरिशंहृदम्बुजेगोक्षीरसुस्निग्धसुचारुगात्रम् ॥ ११ ॥ प्रतिबिम्ब
मथोगात्रेरामस्यसमदृश्यत ॥ दृष्ट्वैवबिम्बितंशम्भुंचतुर्बाहुंत्रिलोचनम् ॥ १२ ॥ विस्मयंपरमंयाताःसर्वेमुनिहरीश्वराः ॥ शम्भोर्वक्षःस्थितंरामंदृष्ट्वा
दीप्ताकृतिंशुभम् ॥ १३ ॥ तूष्णींबभूवुर्यामार्द्धमथरामसमुदैक्षत ॥ स्वप्रश्नमनुसन्धायप्राहसर्वंवदेतिच ॥ १४ ॥ शम्भुरुवाच ॥ अचलेयासदा
पूजाचलेवापियथेच्छया॥लिङ्गसम्पूजनंमुख्यमलाभेप्रतिमादिषु ॥१५॥ अधिकारविशेषेणतत्रतत्रापिपूजनम्॥विगुणंसगुणंवापिसफलंलिङ्गपूजनम् ॥
॥ १६ ॥ प्रतिमादिकृतापूजाविगुणासफलानहि ॥ अचलेवाचलेवापिपूजालिङ्गेप्रशस्यते ॥ १७ ॥ चलस्यपूजनंवक्ष्येस्थापनोद्वासनेतथा ॥ ते
उभेनविजानातिकश्चिन्मुनिरपिक्वचित् ॥ १८ ॥ स्थापयन्तिहृदब्जेवैगोपयन्तियजन्तिच ॥ उद्वासयन्तिदेवेशंशङ्करंयोगिनःसदा ॥ १९ ॥ क्रिया
चातीवहोतृणांवह्नौदेवंत्रियम्बकम् ॥ पूजकानामशेषाणांशिवलिङ्गेमहेश्वरम् ॥ १२० ॥ लिङ्गस्यस्थापनंपूजाउद्वासनमथैवच ॥ धारणंशङ्करस्यैव
लिङ्गमेवमहेश्वरम् ॥२१॥ सज्जिकंपरमोत्कृष्टंस्वर्णंचैवविनिर्मितम्॥राजतैर्वादलैःकार्यंराजतैर्वैणवैस्तुयत् ॥२२॥ लतासूत्रैरथोवापिरचितंदारुणाथवा॥
वस्त्रेणवाथरचितंमृदाविरचितंभवेत् ॥२३॥ तत्रसंवेष्टयवस्त्रेणसुगन्धेनसमन्विते॥धौतवस्त्रयुगेशुद्धेमृद्वासनसमन्विते ॥२४॥शीतोष्णरहितेपादचतुष्टय
समन्विते ॥ प्रावृत्तिच्छेदनोपेतेकृमिकीटविवर्जिते ॥ २५ ॥ धौतेनमृदुवस्त्रेणसर्वतोवेष्टयतंशिवम् ॥ विन्यस्यसज्जिकामध्येप्रावृत्यचपुनर्विभुम् ॥
॥ २६ ॥ एषाहिसज्जिकारामदेवस्याग्रेऽतिकीर्तिता॥तस्यचस्थापनंपाठोरहस्येचमहेशितुः ॥ २७ ॥ अथवाभित्तिमूलेस्यादेववेद्यामथापिवा ॥ सुर
क्षितेतथादेशेरक्षकंचनियोजयेत् ॥२८॥ प्राणादेरविनाभावंकुर्वीतनियमैःसह ॥ एतद्धिराजसंप्रोक्तंस्थापनंपरमात्मनः ॥२९॥ सात्त्विकंस्वसमीपस्थं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धारणंतामसंपुनः॥ धारणंगात्रसंस्पर्शमशेषदेहगोपनम् ॥१३०॥ मस्तकेधारणंमुख्यंब्रह्मणाचतथाकृतम् ॥ विन्यस्यमुकुटस्यान्तेधारणंशुभमुच्यते॥
॥३१॥ ललाटेधारणंशस्तंयथालक्ष्म्याधृतंशुभम् ॥ बाणेनचधृतंमूर्ध्निदक्षिणोरसिवापुनः ॥ ३२ ॥ कर्णेचहरकर्णेनमुनिनापरमर्षिणा ॥ विनिर्भिद्य
तथागात्रंलोहस्थानंप्रकल्प्यच ॥३३॥धारयन्तितथालिङ्गंराक्षसाःकेचिदुत्तमाः॥अनिकेतनमर्त्यानामशक्तानांशिरोधृतिः ॥३४॥ अधमाधमम्माख्यातं
नीविबन्धादिधारणम्॥तेषुतूच्छिष्टसंप्राप्तौमस्तकेधारणंभवेत् ॥३५॥ अधमाधमवृत्तीनांसदावैलिङ्गधारणम्॥पापिनामपिचाश्चर्यंयमलोकेनविद्यते ॥
॥ ३६ ॥ श्रीरामउवाच ॥ चित्रगुप्तेनलिखिताललाटेयालिपिर्दृढा॥तयातुलिप्यानियतंनरकंकथमन्यथा ॥ करोतिपूजनंशम्भोःपापंनाशयतेकथम्॥
॥३७॥ शम्भुरुवाच॥पापंनाशयतेकृत्स्नमपिजन्मशतार्जितम् ॥ भर्त्सनात्सर्वपापानांस्मरणाच्चमहेशितुः ॥३८॥ भस्मेतिपदमाख्यातंतस्यधारणमुत्त
मम् ॥यथाविधिललाटेवैवह्निवीर्यप्रधारणात् ॥ ३९ ॥ नाशयेल्लिखितांयामीपटस्थामिवहव्यभुक् ॥ कर्णोपरिकृतंपापंनश्येन्मुखधारणे॥१४०॥
कण्ठेचधारणात्कण्ठभोगादिकृतपातकम् ॥ बाह्वोर्बाहुकृतंपापंवक्षसिमनसाकृतम् ॥ ४१ ॥ नाभ्यांशिश्नकृतंपापंपृष्ठेगुदकृतंतथा ॥ पार्श्वयोर्धारणा
द्रामपरस्त्र्यालिङ्गनादिजम् ॥ ४२ ॥ तद्भस्मधारणंशस्तंसर्वत्रैवत्रिपुण्ड्रकम् ॥ ब्रह्मविष्णुमहेशानांत्र्यग्नीनांचधारणम् ॥ ४३ ॥ गुप्त्यैलोकत्रयाणांच
धारणंतेनवैकृतम् ॥ धृतंपञ्चदशस्थानेशुद्धंभस्माभिमन्त्रितम् ॥ ४४ ॥ कोष्ठयुग्मेबाहुयुग्मेकोष्ठोपरियुगेतथा ॥ धारणंसर्वदेहानांपूजायैधर्मसंमतम्॥
॥ ४५ ॥ भस्माशनाभस्मशय्याभस्मोद्धूलितविग्रहाः ॥ भस्मस्नानाःसदापापैर्मुच्यन्तेनात्रसंशयः ॥ ४६ ॥ आदौब्राह्मणदीक्षायांत्रियायुषमिति
स्मृतम् ॥ प्रसवेचमनुष्याणांभूतावेशेऽपिरक्षकम् ॥४७॥ सर्पादिविषहान्यर्थंसर्वेषांसाधनंत्विदम् ॥ अपिवावैष्णवोमर्त्यअथवापीतरोजनः॥ ४८ ॥
भस्मस्नायीभस्मयुक्तःकर्मस्वधिकरोतिवै ॥ ४९ ॥ श्रीरामउवाच ॥ भस्ममाहात्म्यमादौमेभस्मायुष्यंहिकस्यवै॥कथंहिरक्षतेह्येतत्सर्वमेतद्वदस्वमे ॥
॥ १५० ॥ शम्भुरुवाच ॥ आयुष्यवर्द्धनेहेतुस्त्रिविधस्यापिदेहिनः ॥ पापघ्नंशीतमुष्णंचस्पर्शाच्छिवपदप्रदम् ॥५१॥ अत्रतेकीर्तयिष्यामिचेतिहासं
पुरातनम् ॥ आसीद्वासिष्ठवंश्यस्तुधनञ्जयइतिद्विजः ॥५२॥ तस्यभार्याशतंचासीद्रूपलावण्यसंयुतम् ॥ तासामेकातुसुषुवेशामाकाकरुणंमुने ॥५३॥
भार्याणांसङ्ख्ययारामसुताश्चासंस्तपस्विनः ॥ पित्राविभागस्तेषांचविषमःपरिकल्पितः ॥ ५४ ॥ भ्रातृणांचतदाह्येववैरबन्धोमहानभूत् ॥ नैराणा
मेकजातीनांवैरंनियतमेवतु ॥५५॥ अथासौकरुणोगत्वाभवनाशिनिकातटे ॥ नानामुनिगणैःसार्द्धंनरसिंहदिदृक्षया॥५६॥ नृसिंहदर्शनार्थंतुब्राह्मणेन

१ 'अथवा देहगोपनम्' इ० पा०। २ 'ज्ञातित्वे चैकनाशित्वे' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुकेनचित्॥उत्कृष्टफलजम्बीरमानीतंरूपगन्धवत् ॥५७॥करुणस्तुतदादायव्यजिघ्रत्फलमुत्तमम् ॥ तत्रस्थिताद्विजगणाःशापेनतमयोजयन् ॥५८॥
मक्षिकाभवपापात्मन्वर्षाणांशतमप्यतः॥शापावसानंभविताद धीचेनमहात्मना ॥५९॥ अथमक्षिकतांप्राप्तोभार्यामिदमभाषत॥मक्षिकात्वमहंप्राप्तोमां
शुभेपालयस्वभोः ॥१६०॥ इत्युक्त्वासतथाभूतोबभ्रामचततस्ततः॥अथैवंविधमाज्ञायज्ञातयःपापनिश्चयाः ॥६१॥तद्वधेयत्नमास्थायतैलमध्येह्यपात
यन्॥मृतंपतिमथादायदुःखितासाकृशोदरी ॥६२॥ तद्दुःखशमनार्थायप्राहदेवीत्वरुन्धती ॥ अमुंसञ्जीवयाम्यद्यभस्मनैवशुचिस्मिते ॥६३॥ अथाग्नि
होत्रजंभस्मअरुन्धत्यैन्यवेदयत् ॥ मृत्युञ्जयेणमन्त्रेणमृतजन्तौतथाक्षिपत् ॥ ६४ ॥ मन्दवायुंतथाचक्रेव्यजनेनशुचिस्मिता ॥ उदतिष्ठत्ततो
जन्तुर्भस्मनोऽस्यप्रभावतः ॥ ६५ ॥ ततोवर्षशतेपूर्णेज्ञातिरेकोह्यमारयत् ॥ मृतेभर्तरिसासाध्वीदुःखिताचशुचिस्मिता ॥ ६६ ॥ दधीचं
नामविप्रेन्द्रंमहामाहेश्वरंमुनिम् ॥ जगामशरणंसाध्वीप्राहविप्रस्तपोधनः ॥ ६७ ॥ त्रियायुषाविहीनंतुजमदग्निंतपोनिधिम् ॥ भस्मैवजीवयामास
कश्यपंचतथाविधम् ॥ ६८ ॥ देवानपितथाभूतान्मामप्येतादृशंपुरा ॥ तस्मात्तुभस्मनाजन्तुंजीवयामितवानघे ॥ ६९ ॥ इत्येवमुक्त्वा
भगवान्दधीचोमहेश्वरंवैशरणंजगाम ॥ भस्माभिमन्त्र्याथकरेगृहीत्वासञ्जीवयामासधवंसुसाध्व्याः ॥ १७० ॥ महेशस्यकरस्पर्शाद्विशापःकरुणो
ऽभवत् ॥ स्वरूपंचततोगत्वास्वमाश्रमपदंययौ ॥ ७१ ॥ दधीचमपिसासाध्वीगृहमानीयभोजने ॥ प्रार्थयामासविप्रर्षिंभुक्तवानथसद्विजः ॥ ७२ ॥
भुक्तवत्यथविप्रेन्द्रेकोटिशिष्याःसमागताः ॥ अथदेवाःसमायाताभस्मोद्धूलितविग्रहाः ॥ नमस्कृत्यदधीचंतुपप्रच्छुःशिवकाङ्क्षया ॥ ७३ ॥
देवाऊचुः ॥ अस्माकंतुपुराज्ञानंनष्टमासीन्महामते ॥ गौतमस्यतुभार्यांवैदृष्ट्वाकामातुरावयम् ॥ ७४ ॥ तथाचैवंधर्षितादेवीविवाहकृतमङ्गला ॥
तांवैकामयमानानांनष्टंज्ञानमभूच्चनः ॥ ७५ ॥ ततःसर्वेवयंभूतागतादुर्वाससंमुनिम् ॥ सउवाचाधुनासर्वमपनेष्यामिवोमलम् ॥ ७६ ॥ शत
रुद्रियमन्त्रेणमन्त्रितंशम्भुनास्वयम् ॥ ममापिदत्तंतेनैवब्रह्महत्यादिशान्तये ॥ ७७ ॥ इत्येवमुक्त्वादुर्वासादत्तवान्भस्मचोत्तमम् ॥ अथतद्वचना
त्सर्वेवयंविकृतचेतनाः॥७८॥ शतरुद्रियमन्त्रेणभस्मोद्धूलितविग्रहाः॥निर्धूतपातकाःसर्वेसंवृत्तास्तत्क्षणेनहि ॥७९॥ आश्चर्यमेतज्जानीमोभस्मसामर्थ्य
मीदृशम् ॥१८०॥ दधीचउवाच ॥शैवस्यभस्मनःशक्तिंसंक्षेपेणवदामिवः॥विस्तरेणनशक्येतवक्तुंवर्षशतैरपि ॥ ८१ ॥ अत्रवःकीर्तयिष्यामिपुरावृत्तं
तुदेवयोः ॥ हरिशङ्करयोःसर्वेब्रह्महत्यादिनाशनम् ॥ ८२ ॥ पुराचैकार्णवेघोरेब्रह्मणःप्रलयेसति ॥ महाविष्णुस्तुभगवाञ्छेतेस्मप्रलयाम्भसि ॥ ८३ ॥

१ 'शिवकारणम्' इ० 'शिवमम्बिकाम्' इ० च पा०। २ 'न' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यपार्श्वद्वयंप्राप्यब्रह्माण्डानांशतद्वयम्॥विंशतिःपादयोःपार्श्वेविंशतिर्मस्तकान्तरे ॥८४॥ नासामौक्तिकभावेनब्रह्माण्डमदधात्प्रभुः॥तन्नाभिमण्डले
केचिल्लोमशाद्यामुनीश्वराः ॥ ८५ ॥ तपस्तपन्तःसुमहदीश्वरंपर्युपासते ॥ अथविष्णुर्महातेजाश्चिन्तामापसिसृक्षया ॥ ८६ ॥ ध्यानयोगपरोभूत्वा
नकिञ्चित्पर्यपश्यत ॥ अथदुःखेनमहतारुरोदोच्चैःपुनःपुनः ॥८७ ॥ एतस्मिन्नन्तरेदीप्तिःकाचिल्लोकविलक्षणा ॥ दृष्ट्वाचहरिणाभीत्यालोचनेचनिमी
लिते ॥८८॥ आगम्यमानोगोक्षीरसमतेजाःसगात्रवान् ॥ संग्रथ्यकोटिब्रह्माण्डदामयुग्मंकरद्वये ॥८९॥ दधानस्सुरसाधामकोटिब्रह्माण्डकल्पितम् ॥
ब्रह्माण्डमेकंनिपतदुत्पतच्चकरद्वये ॥ १९० ॥ सर्वाभरणसंयुक्तंतथाभूतंतमव्ययम् ॥ विष्णुस्तुष्टावचादृष्ट्वादर्शनायचतस्यवै ॥ ९१ ॥
विष्णुरुवाच ॥ नमस्तेदेवदेवेशनमस्तेशाश्वताव्यय ॥ नजानेऽहंभवन्तंभोस्त्वंचवेत्सिनमोनमः ॥ ९२ ॥ जानामिनचतेभावंदुर्निरीक्ष्याचतेद्युतिः ॥
माणिक्यकुण्डलंहेमदामजालविभूषितम् ॥ ९३ ॥ रत्नाङ्गुलीयंसुभगंबाहुकोष्ठविभूषणम् ॥ तनुरक्तोत्तमाकीर्णदीप्तायतविलोचनम् ॥ ९४ ॥
बाणलोचनसङ्काशंभाललोचनमव्ययम् ॥ कन्दर्पकार्मुकभ्रान्तिजनकभ्रुवमीश्वरम् ॥ ९५ ॥ स्निग्धाधोन्नतचार्वङ्गनासमच्छकपोलकम् ॥ मन्द
स्मितंप्रसन्नास्यंविभुंबालेन्दुदर्शनम् ॥ ९६ ॥ विज्ञानरक्तवसनंवेदकल्पितभूषणम् ॥ शरणंत्वांप्रपन्नोऽस्मिचक्षुर्मेदीयतांविभो ॥ ९७ ॥ दीनान्ध
कृपणाज्ञाननष्टस्यशरणंभव ॥ अथदिव्यंददौचक्षुःस्वात्मदर्शनशक्तिमत् ॥ ९८ ॥ अथदृष्ट्वाहरिःशम्भुंत्रिनेत्रंपुरतःस्थितम् ॥ कोभवानित्यु
वाचाथनजानेत्वांमहायशाः ॥ प्रणामंकेवलंकर्तुंशक्तोऽस्मिनहिवेदितुम् ॥ ९९ ॥ सदाशिवउवाच ॥ तवज्ञानंप्रदास्यामि[1]कुरुस्नानंचवारुणम्॥
भस्मस्नानंततःपश्चात्ततोज्ञानंवदाम्यहम् ॥ २०० ॥ श्रीभगवानुवाच ॥ मत्स्नानयोग्यंसलिलंनचतिष्ठतिकुत्रचित् ॥ इत्युक्तोऽथनिषण्णस्तु
ब्राह्माण्डासक्तविग्रहः ॥ १ ॥ ऊरुदघ्नजलेस्नातुंनयोग्यमभवद्धरेः ॥ शम्भुर्जहासस्नानायजलमत्यधिकंत्वहो ॥ २ ॥ दधीचउवाच ॥ अथ
देवःशिवोविष्णुंभालाक्षेणव्यलोकयत ॥ विलीनसूक्ष्मावयवंवामाक्षेणव्यलोकयत ॥ ३ ॥ ततःसूक्ष्मतनुर्विष्णुःशीतदेहश्चशम्भुना ॥ उक्तश्च
स्नाहिभोविष्णोह्रदएषविकल्पितः ॥ ४ ॥ ततोह्रदेहरिःस्नातुंहराङ्कक्कल्पितेतदा ॥ प्रवेष्टुंनशशाकाथगम्भीरेतद्ध्रदस्यतु ॥ ५ ॥ हरिराहचनो
पन्थाह्रदस्यास्यप्रवेशने ॥ मार्गोमेदीयतांदेवतमथोशम्भुरब्रवीत् ॥ ६ ॥ कोटियोजनगम्भीरंजलमेतन्महत्पुरा ॥ निविष्टस्यैवभवतऊरुदघ्नं
जलंविभो ॥ ७ ॥ इदानींतिष्ठतश्चापिनप्रवेशोह्रदेकथम् ॥ अष्टाङ्गुलप्रमाणोऽयमूरुस्तस्मिन्ह्रदेचमे ॥ ८ ॥ पश्यामिप्रविशत्वंचपादस्पर्शं

१ 'ददामि ते' इ०पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ददामिते ॥ वाक्यमेकंतुसोपानंवेदंमद्वाक्यनिस्सृतम् ॥ ९ ॥ हरिरुवाच ॥ शब्दारोहणसामर्थ्यंकस्यापीहनविद्यते ॥ मूर्तस्यरोहणंशक्य
ग्रहणंवाकथंश्रुतेः ॥ २१० ॥ शम्भुरुवाच ॥ पुंसःशक्तिर्नवस्तूनांधारणारोहणादिषु ॥ गृहाणेमंमहावेदंजग्राहहरिरप्यथ ॥ ११ ॥ नम्रकरश्चा
शक्तेर्हिपतन्निवजनार्दनः ॥ नचशक्यंमयाधर्तुमितिप्राहशिवंहरिः ॥ १२ ॥ शिवःप्रहस्यनिपतीपात्यतेवमहाह्रदे ॥ तत्सोपानमथारुह्य
स्नातुमर्हसिकेशव ॥ १३ ॥ दधीचउवाच ॥ वेदेसोपानभूतेहिऊरुदघ्नोपलब्धिनि ॥ तत्रस्नात्वासविधिनाबहिरुत्तीर्यचोक्तवान् ॥ १४ ॥
स्नातोऽस्मिंकिमतःकार्यंशम्भुराहहरिंततः॥ध्यायसेहृदयेकिंत्वंनचकिञ्चिद्ददस्वमे ॥१५॥ हरिर्नकिञ्चिदित्याहतमथोशम्भुरुक्तवान् ॥ भस्मस्नानेन
संशुद्धोवेत्स्यसेपरमंशुभम् ॥ १६ ॥ दीक्षितस्यहितच्छस्तंतद्रक्षांकरवाण्यहम् ॥ १७ ॥ दधीचउवाच ॥ स्ववक्षःस्थितभस्मैकंनखेनादायशङ्करः ॥
प्रणवेनाभिमन्त्र्याथगायत्र्याब्रह्मभूतया ॥ १८ ॥ अङ्गुलिभ्यामुपादायशिवःपञ्चाक्षरेणवै ॥ हरिमस्तकगात्रेषुसर्वेष्वपिसमाक्षिपत् ॥ १९ ॥
शान्तदृष्टयानिरीक्ष्याथजीवेत्याहहरिंहरः ॥ ध्यायस्वकिंतेहृदयेसचध्यानपरोऽभवत् ॥ २२० ॥ अपश्यद्धृदयेदीपंदीर्घाकारमतिप्रभम् ॥ हरिराह
शिवंसाक्षादीपोदृष्टोमयेतिच ॥ २१ ॥ शिवःप्राहनतेज्ञानंपरिपक्वमथोहरे ॥ भस्मभक्षयतेज्ञानंसमग्रंसम्भविष्यति ॥ २२ ॥ हरिरुवाच ॥
भक्षयिष्येशुभंभस्मस्नातोऽहंभस्मनापुरा ॥ दृष्ट्वेश्वरंभक्तिगम्यंभस्माभक्षयदच्युतः ॥ २३ ॥ तत्राश्चर्यमतीवासीत्पक्वबिम्बसमद्युतिः ॥ वासुदेवः
शुद्धमुक्ताफलवर्णोऽभवत्क्षणात् ॥ २४ ॥ ततःप्रभृतिशुक्लोऽसौवासुदेवःप्रसन्नवान् ॥ पुनर्ध्यानपरोभूत्वादीपमध्येचपूरुषम् ॥ २५ ॥ शुद्ध
स्फटिकसङ्काशंत्रिनेत्रंद्विभुजंशिवम् ॥ वरदंदक्षिणेहस्तेवामेचाभयदंविभुम् ॥ २६ ॥ पञ्चवर्षीयवपुषंशरच्चन्द्रयुतद्युतिम् ॥ माणिक्यकुण्डलंहेमदाम
जालविभूषितम् ॥ २७ ॥ रत्नाङ्गुलीयसुभगंबाहुकोष्ठसुभूषणम् ॥ तनुरक्तोष्ठमाकर्णदीर्घायतविलोचनम् ॥ २८ ॥ बाणलोचनसङ्काशंभाललोचन
मव्ययम् ॥ कन्दर्पकार्मुकभ्रान्तिजनकभ्रुवमीश्वरम् ॥२९॥ स्निग्धोन्नतसुचावङ्गनासमच्छकपोलकम् ॥ मन्दस्मितंप्रसन्नास्यंबालेन्दुदर्शनंविभुम् ॥
॥ २३० ॥ विज्ञानरक्तवसनंवेदकल्पितनूपुरम् ॥ वामाङ्गुलीयमध्यस्थमणिप्रणवमव्ययम् ॥३१॥ दृष्टवानथतंविष्णुःकृतकृत्योऽभवत्तदा ॥ अथाह
शम्भुर्भोविष्णोहृदिदृष्टंत्वयाकिमु ॥ ३२ ॥ हरिराहपुरादृष्टःपुरुषःशान्तविग्रहः ॥ इत्युदीर्यमहाविष्णुःशिवपादेपपातह ॥ ३३ ॥ हरिरुवाच ॥
नशक्तिंभस्मनोजानेप्रभावंवाकुतस्तव ॥ नमस्तेऽस्तुनमस्तेऽस्तुत्वामेवशरणंगतः ॥३४॥ सदाशिवउवाच ॥ वरंवृणुमहाभागमनसायंत्वमिच्छसि ॥
शिववाचमथाकर्ण्यहरिर्वव्रेवरोत्तमम् ॥ ३५ ॥ हरिरुवाच ॥ त्वत्पादयुगलेशम्भोभक्तिरस्तुसदामम ॥ अथदत्त्वावरंशम्भुरिदमाहवचोहरिम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भस्मधारणसम्पन्नोममभक्तोभविष्यसि ॥ २६ ॥ दधीचउवाच ॥ इत्थमुक्तंमहाज्ञानंभस्मसम्भवमादितः ॥ तस्माद्यूयंसुराःसर्वेधारयध्वंतदादरात्॥
॥ ३७ ॥ विस्मयोत्फुल्लनयनादेवाश्चासंस्तदस्त्विति ॥ यइदंशृणुयान्नित्यंपुण्याख्यानमनुत्तमम् ॥३८॥ विमुक्तःसर्वपापेभ्योयात्यसौशाङ्करंपदम् ॥
॥ २३९ ॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशिवराघवसंवादेभस्ममाहात्म्येपञ्चोत्तरशततमोऽध्यायः ॥ १०५ ॥ शुचिस्मितोवाच ॥ आयुष्यवर्द्ध
नंभस्माशनंदृष्टंमहामुने ॥ परलोकगतिंदातुंशक्तमेतंवदस्वमे ॥ १ ॥ दधीचउवाच ॥ अत्रतेकथयिष्यामिइतिहासंपुरातनम् ॥ चित्रगुप्तयमाभ्यां
चयद्विख्यातंवभूवह ॥ २ ॥ मिथिलायांपुराकश्चिच्छुनःपर्यटतेक्षुधा ॥ पुराजन्मशतात्पूर्वंब्राह्मणःपापनिश्चयः ॥ ३ ॥ पूर्ववयसिवेदाढ्यःशास्त्राढ्यश्च
सुबुद्धिमान् ॥ सस्नातुंजाह्नवींगत्वास्नानंकृत्वापितॄनपि ॥ ४ ॥ देवानृषीन्समभ्यर्च्ययौप्रांत्तलिकापुरम् ॥ प्रतिश्रयमथोचक्रेब्राह्मणस्यनिवेशने ॥
॥ ५ ॥ तत्रैकाक्षत्रियसुतायौवनस्थाहतप्रिया ॥ भ्रष्टराज्याचषट्कोटिनिष्कद्रव्येणसंयुता ॥ ६ ॥ भुक्त्वाथशयितंविप्रंसर्वावयवसुन्दरम् ॥ रात्रौ
चन्द्रोदयेशुद्धेज्योत्स्नाहसितदिङ्मुखे ॥ ७ ॥ ब्राह्मणाभ्याशमागत्यतमुदीक्ष्येदमब्रवीत् ॥ कुतस्त्वमागतोविप्रकंवादेशंगमिष्यसि ॥ ८ ॥ ब्राह्मण
उवाच ॥ अकालचर्यासर्वेषांशङ्कामुत्पादयेद्ध्रुवम् ॥ वयःस्थयोर्मिथोवादोरहस्येदास्यमन्दिरे ॥९ ॥ क्षत्रियोवाच ॥ कथाप्रसङ्गेयात्रायांतीर्थेदेशादि
विप्लवे ॥ दुर्भिक्षेग्रामदहनेरहोवादोनदूषितः ॥ १० ॥ प्रतिश्रयस्तुमद्गेहेभवतैवपुराकृतः ॥ मद्गेहवासिनीचाहंनशङ्कात्विहकस्यचित् ॥११॥ ब्राह्मण
उवाच ॥ तूष्णींभावोमयाकार्योगच्छत्वंशीघ्रमग्रतः ॥ इत्युक्ताब्राह्मणेनासौमनसेदमचिन्तयत् ॥ १२ ॥ अनेनसङ्गमोमह्यंयथाभूयात्तथाविधि ॥
रोदनंतुकरिष्यामितथायास्यतिसान्त्वितुम् ॥ १३ ॥ मांचसान्त्वयितुंप्राप्तोमांसमुत्थापयिष्यति ॥ अहमुत्तिष्ठमानैवदोर्लताकण्ठसङ्गिनी ॥ १४ ॥
कुचयुग्मेनतद्गात्रंस्पर्शयन्तीविमूर्च्छिता ॥ गतभानांहिमांदृष्ट्वानिषण्णास्वयमेवसः ॥१५॥ उत्सङ्गेमामकंदेहंनिधास्यतिद्विजाग्रणीः ॥अचेतनेववसन
मपास्यरुदतीवच ॥ १६ ॥ सुस्निग्धंरोमरहितंपक्वाश्वत्थदलाकृति ॥ दर्शयिष्यामितत्स्थानंकामगेहंसुगन्धिच ॥ १७ ॥ मयैवविलुठन्त्याङ्गे
तस्यवस्त्रमपास्यते ॥ विलुप्यमानसंतस्यकरिष्येस्ववशंद्विजम् ॥१८॥ अदृष्टौयादृशंचित्तंदृष्टौनैतादृशंभवेत् ॥दर्शनेयादृशंचित्तंसंलापेनैवतादृश ॥
॥ १९ ॥ संलापेयादृशंचित्तंहास्योक्तौनैवतादृशम् ॥ हास्योक्तौयादृशंचित्तंस्पर्शनेनैवतादृशम् ॥ २० ॥ स्पर्शनेयादृशंचित्तंयोनिदृष्टौनतादृशम् ॥
तद्दृष्टौयादृशंचित्तंयोनिस्पर्शेनतादृशम् ॥ २१ ॥ बाहुमूलकुचद्वन्द्वस्वयोनिस्पर्शदर्शनात् ॥ कस्यनस्खलतेचेतोरेतःस्कन्नंचनोभवेत् ॥

१ करुणब्राह्मणपत्नीयम्। २ 'मातङ्छिकापुरम्' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २२ ॥ दधीचउवाच ॥ इतिसञ्चिन्त्यमनसाक्षत्रियागृहमभ्यगात् ॥ स्वगृहद्वारमासाद्यमन्दंमन्दंरुरोदवै ॥ २३ ॥ चिरंकालंचरुदितंब्राह्मणः करुणानिधिः ॥ २४ ॥ स्त्रीबालवृद्धातुरराजयोगिनांविषाग्नितोयाद्रिनिपातनादिना ॥ दुःखस्यचैवोद्धरणंप्रशस्यतेकूपस्यखानेनसमंवदन्ति ॥ ॥ २५ ॥ इत्थंविचार्यविप्रोऽसौशुचिर्भूतःप्रसन्नधीः ॥ तस्याःसमीपमगमत्तामुवाचततोद्विजः ॥ २६ ॥ अलंशोकेनमहताइहामुत्रविरोधिना ॥ शरीरशोषणंह्येतच्चित्तविध्वंसनंतथा ॥ २७ ॥ त्यजशोकमिमंबालेनचार्थःशोचितेनवै ॥ शोकस्यकारणंकिंवायेनेत्थंरुद्यतेत्वया ॥ २८ ॥ दधीच उवाच ॥ एवमुक्ताद्विजेनाथनसाकिञ्चिदुवाचह ॥ मूर्च्छितेवापतद्भूमौतमदृष्ट्वेववीक्षते ॥ २९ ॥ तामथोत्थापयामासब्राह्मणःपरमार्थवित् ॥ उत्थितो[1] त्थापितातेननिपपातपुनःपुनः ॥ ३० ॥ पतितांपतितांविप्रोनिषद्योत्थाप्यतांपुनः ॥ अङ्कमारोपयामासप्रममार्जविलोचने ॥ ३१ ॥ अथसामूर्च्छि तेवाशुवसनंपरिमुच्यतम् ॥ दर्शयन्तीस्तनौगुह्यंबाहुमूलेविलोचने ॥ ३२ ॥ आलम्ब्यकण्ठेबाहुभ्यांस्तनाभ्यामस्पृशद्द्विजम् ॥ चन्द्रातपश्चविशदो मन्दमारुतसम्भवः ॥ ३३ ॥ अथचिन्तापरोविप्रोनैवकार्यमिदंमम ॥ पितुर्वामातुरुचितंपत्युर्वाथगुरोस्तथा ॥ ३४ ॥ असंबुद्धस्यमेसर्वंविपरीतं विभातिवै ॥ अथकामःसमायातोरहस्येस्थितयोस्तयोः ॥ ३५ ॥ विव्याधनिशितैर्बाणैर्द्विजंकामोदुरात्मवान् ॥ स्मरबाणातुरोविप्रश्चिन्तयामास कामुकः ॥ ३६ ॥ इयंसुचारुसर्वाङ्गीकामिनीवप्रदृश्यते ॥ नोचेद्योनिमुखेह्यस्याःकथंरोमाञ्चसम्भवः ॥ ३७ ॥ तदेतस्याःकुचस्पर्शात्सर्वंव्यक्तंभवि ष्यति ॥ इतिसञ्चिन्त्यमनसाकुचौयोनिंद्विजोऽस्पृशत् ॥३८॥ सापिमूर्च्छितरूपेवमन्दस्मितमुखाभवत् ॥ आलिलिङ्गद्विजंगाढमाननंचचुचुम्बह ॥ ॥ ३९ ॥ तयोरथसमायोगोवर्षाणांशतमप्यभूत् ॥ गतेवर्षशतेपश्चादेकस्मिन्दिवसेद्विजः ॥ ४० ॥ स्नातुंययौनदींप्रातःसापिविप्रप्रसङ्गतः ॥ स्नानंतत्रतथाचक्रेपुराणंश्रुतवानथ ॥ ४१ ॥ कौर्मंसमस्तपापानांनाशनंशिवभक्तिदम् ॥ इदंचपद्यंशुश्रावपुराणज्ञेनभाषितम् ॥ ४२ ॥ ब्रह्महा मद्यपःस्तेनस्तथैवगुरुतल्पगः॥कौर्मंपुराणंश्रुत्वैवमुच्यतेपातकात्ततः ॥४३॥श्रुत्वैतद्वचनंविप्रःपौराणिकमभाषत॥मयाकृतानांपापानांनचसङ्ख्यास्ति काचन ॥ अशेषपापसन्दोहनाशनंतदिहोच्यताम् ॥ ४४ ॥ पौराणिकउवाच ॥ आराधयस्वदेवेशंशङ्करंत्रिदशेश्वरम् ॥ तस्यसम्पूजनाद्विप्र सर्वपापंविनश्यति ॥ ४५ ॥ पापमेवतमःप्रोक्तंज्ञानदीपेननश्यति ॥ अथवापूजयाविप्रसमस्ताघविनाशनम् ॥ ४६ ॥ ज्ञानपूजाविहीनानांनरके पतनंध्रुवम्[2] ॥ ४७ ॥ दधीचउवाच ॥ अथद्विजोह्यभिगतःशिवालयमनुत्तमम् ॥ द्रोणपुष्पसहस्रेणपूजयामासशङ्करम् ॥ ४८ ॥ गृहंजगामचततो

१ 'उत्थापितापि तेनासौ' इ० पा०। २ 'ध्रुवं नापांसुनिर्गमः' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भोजनंकृतवानथ ॥ विहायक्षत्रियांविप्रोजगामेष्टांभुवंततः ॥ ४९ ॥ हविष्यमन्नमादायभुक्त्यशक्तेःशिवालयम् ॥ गत्वादीपस्थिताज्येनभोजनं
कृतवान्बहिः ॥ अथमृत्युवशंप्राप्तोयमलोकंजगामवै ॥५०॥ यमउवाच ॥ त्वयाकृतानांपापानांकेषांचिन्नाशनंपुरा ॥ त्वयैकदिवसेपूजाशङ्करस्ययतः
कृता ॥ ५१ ॥ तवपापसहस्रंचप्रनष्टंभवतोद्विज ॥ स्थितानामपिपापानांफलंनरकपातनम् ॥ ५२ ॥ वर्षकोटिद्वयंविप्रश्वानजन्मशतंपुनः ॥ शिव
दीपाज्यहरणात्फलंनरकसेवनम् ॥५३॥ नरकेचस्थितिस्तस्यशतवर्षंसुभीषणम् ॥ कुम्भीपाकेचकाष्ठत्वंभस्मभूत्वापुनःपुनः ॥ ५४ ॥ वर्षाणांदशकं
त्वेवंकृमिभुक्तिःपरंदश ॥ पुनश्चदीपवर्तित्वंवर्षाणांचतथादश ॥ ५५ ॥ श्लेष्मामेध्यपुरीषेषुमूत्ररेतोह्रदेषुच ॥ उन्मज्ज्यचनिमज्ज्याथश्लेष्मविण्मल
भोजनम् ॥ ५६ ॥ ततोनरकशेषेणश्वानजन्मशतंपरम् ॥ यमवाक्यमितिश्रुत्वाब्राह्मणोनिपपातच ॥ ५७ ॥ अथतस्यप्रियाभार्यापतिचिन्तापरा
भवत् ॥ एतस्मिन्नन्तरेतस्याःसमीपंनारदोऽभ्यगात् ॥ ५८ ॥ नारदस्यपपातासौपादयोरतिदुःखिता ॥ तामुत्थाप्यमुनिःशुद्धांगतायुषमभाषत ॥
॥ ५९॥ अयिमुग्धेविशालाक्षिभर्तारंगन्तुमर्हसि ॥ भर्तातेहिविशालाक्षिमृतोबन्धुविवर्जितः ॥६०॥ नरोदितव्यंतेभद्रेज्वलनंप्रविशस्वभोः ॥ ६१ ॥
ब्राह्मण्युवाच ॥ अशक्यंयदिवाशक्यंमयागन्तुंमुनेवद ॥ अग्निप्रवेशकालोवैव्यतीतोनभवेद्यथा ॥ ६२ ॥ नारदउवाच ॥ योजनानांशतंत्वेकमितः
स्थानात्पुरंहितत् ॥ श्वोदाहःकिलविप्रस्यभवितागन्तुमर्हसि ॥ ६३ ॥ अव्ययोवाच ॥ दूरस्थितंकायनाथंगन्तुमर्हामिहेमुने ॥ तद्वचस्तुसमाकर्ण्य
नारदस्तामभाषत ॥ ६४ ॥ विपञ्चीनालसंस्थात्वंभवगच्छाम्यहंक्षणात् ॥ इत्युदीर्यतदागत्वात्वरांचक्रेगतंचतत् ॥ ६५ ॥ देशंनष्टद्विज
स्थानंतामुवाचाव्ययांमुनिः ॥ रोदनंनेहकर्तव्यंयदितत्राग्निमेष्यसि ॥ ६६ ॥ पापंयदिकृतंभद्रेपरपूरुषसेवनम् ॥ एतद्विशुद्ध्येपुत्रिप्रायश्चित्तं
समाचर ॥ ६७ ॥ तवोपपातकव्रातनाशोवह्निप्रवेशनात् ॥ नान्यत्पश्यामिनारीणांसर्वपापोपशान्तये ॥ अग्निप्रवेशंमुक्त्वैकंप्रायश्चित्तंजगत्त्रये ॥
॥ ६८ ॥ दधीचउवाच ॥ अथनारदवाक्येननोदितासावचोऽब्रवीत ॥ अग्निप्रवेशेनारीणांकिंकर्तव्यंमहामुने ॥ ६९ ॥ नारदउवाच ॥ स्नानंमङ्गल
संस्कारोभूषणाञ्जनधारणम् ॥ गन्धपुष्पंतथाधूपंहरिद्राक्षतधारणम् ॥७०॥ मङ्गलंचतथासूत्रंपादालक्तकमेवच ॥ शक्त्यादानंप्रियोक्तिश्चप्रसन्नास्यत्व
मेवच ॥ ७१ ॥ नानामङ्गलवाद्यानांश्रवणंगीतकस्यच ॥ व्यभिचारकृतेपापेतत्पापस्यप्रशान्तये ॥ ७२ ॥ अतीतंपातकंपृष्ट्वाप्रायश्चित्तंतदीरि
तम् ॥ कुर्यादथस्वकांभूषांविप्रायप्रतिपादयेत ॥ ७३ ॥ भूषाभावेस्वकीयेनप्रायश्चित्तंतुकारयेत् ॥ नान्यथातस्यपापस्यनाशनंवेतिकुत्रचित
॥ ७४ ॥ अव्ययोवाच ॥ सर्वमेतत्करिष्यामिहरिद्रामेनविद्यते ॥ भूषणंकिमुतब्रह्मन्सर्वमेतत्प्रदीयताम् ॥ ७५ ॥ नारदउवाच ॥ नह्यस्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किञ्चित्सौभाग्यद्रव्यमन्यत्त्वपेक्षया ॥ ७६ ॥ दधीचउवाच ॥ अथक्षणेनाभ्यगमत्कैलासंशिवमन्दिरम् ॥ गिरिजामथदृष्ट्वासौप्रणिपत्येदमब्रवीत् ॥ हरिद्रादीयतांमातर्भूषणानिचसूत्रकम् ॥ ७७ ॥ पार्वत्युवाच ॥ विधवायैमयाकिञ्चिद्भूषणंदीयतांकथम् ॥ मयादत्तेहितस्मिन्वैवैधव्यंनोपपद्यते॥७८॥ नारदउवाच ॥ मातर्नविधवायावद्ध्वाङ्क्षंवर्ततेस्त्रियः ॥ आदाहात्सूतकंनास्तितिष्ठत्सौभाग्यमुत्तमम् ॥ ७९ ॥ पार्वत्युवाच ॥ नचान्यदेहोमद्भूषां हरिद्रांधर्तुमर्हति ॥ भूषणादौमयादत्तेचिरंजीवितमिष्यते ॥ ८० ॥ दीयतेहिजयन्त्यैवसर्वमेतत्त्वयोदितम् ॥ जयन्तींसजगामाथतयादत्तमथा हरत् ॥ ८१ ॥ स्नातायाअव्ययायैतुहरिद्रांदत्तवान्मुनिः ॥ ततःससूक्ष्मवसनभूषणानिमुनिर्ददौ ॥ ८२ ॥ आहचैनांतवान्तेष्टिंकःकरोतिनियुङ्क्ष्व तम् ॥ ८३ ॥ अव्ययोवाच ॥ त्वमेवमेसमस्तानांक्रियाणांकारणंमुने ॥ पितासिसर्वंकुर्वद्यनमस्तेमुनिसत्तम ॥ ८४ ॥ दधीचउवाच ॥ अथतं ब्राह्मणंदग्ध्वानारदस्तामुवाचह ॥ अव्ययेगच्छदहनंप्रविशत्वंयदीच्छसि ॥ ८५ ॥ अथसाभूषितासाध्वीत्रिःप्रदक्षिणपूर्वकम् ॥ नारदंतुनमस्कृत्यसा गौर्यामर्पयन्मनः ॥ ८६ ॥ सुसूक्ष्मंमङ्गलंसूत्रंहरिद्रामक्षतांस्तथा ॥ कुसुमानिचवासांसिकस्तूरीचन्दनंतथा ॥ ८७ ॥ सौवर्णकङ्कतिकांचफलानि विविधानिच ॥ स्वदक्षिणादिवस्त्रान्तंस्पर्शयित्वापृथक्पृथक् ॥ ८८ ॥ पार्वतीप्रीतिकामासापुरन्ध्रीभ्योऽखिलंददौ ॥ ज्वालामालाभिराकाशंदहन्त मिवचानलम् ॥ ८९ ॥ त्रिःप्रदक्षिणमागत्यस्थित्वाग्रेःपुरतःसती ॥ इदंप्राहतदावाक्यंप्राञ्जलिःप्रहसन्मुखी ॥ ९० ॥ अव्ययोवाच ॥ इन्द्रादयोदिशां पालामातर्मेदिनिभास्कर ॥ धर्मादयःसुराःसर्वेशृणुध्वंममभाषितम् ॥ ९१ ॥ पाणिपीडनमारभ्यचैतदन्तमहर्निशम् ॥ वाङ्मनःकर्मभिर्भर्तासेवितो यदिभक्तितः ॥ ९२ ॥ व्यभिचारोयथानस्यादवस्थात्रितयेमम ॥ तेनसत्येनमेपत्यासार्द्धयानंप्रयच्छत ॥ ९३ ॥ इत्युक्त्वाथस्वहस्ताग्रपुष्पकंद्रुत[1] माक्षिपत् ॥ प्रविष्टाज्वलनंदीप्तमथापश्यद्विमानकम् ॥ ९४ ॥ सूर्येणसमसुत्कृष्टमप्सरोगीतशोभितम् ॥ आरुरोहविमानंसाभर्त्रासाकंदिवंययौ ॥ ॥ ९५ ॥ यमःप्राहाथसम्पूज्यवनितांतांपतिव्रताम् ॥ अक्षयःस्वर्गएवेहनचपापंतवास्तिवै ॥ ९६ ॥ कोटिद्वयसमास्तत्रनरकेहन्तपातकम् ॥ मृष्टमेव नसन्देहःकिंतुपातकमेवच ॥ ९७ ॥ एकंशिवस्यदीपाज्यभक्षणेनसमार्जितम् ॥ तवापिनरकेपातःश्वानजन्मशतंभवेत् ॥ ९८ ॥ अव्ययोवाच ॥ अग्निप्रवेशशुद्धानांपुनश्चनरकःकथम् ॥ अग्निप्रवेशात्सर्वेषांपापानांनाशनंभवेत् ॥ ९९ ॥ यमउवाच ॥ शिवद्रव्यापहारस्यपातकंनैवनश्यति ॥ इत्थमाहपुराशम्भुरन्येषांनाशनंभवेत् ॥ १०० ॥ अथसश्वानतामाप्यशताब्दंस्यात्ततःपरम् ॥ दधीचमन्दिरंप्राप्तोमृत्योरास्यगतोहिसः ॥ १ ॥

१ 'पुष्पकन्दुकमाक्षिपत्' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यभित्तिसमीपेतुभस्मास्तेह्यभिमन्त्रितम् ॥ भस्मनिश्वापपाताथममारचगतोयमम् ॥ २ ॥ यमःसम्पूज्यावनतोभवान्पुण्यतमोमुनिः ॥
मद्गेहेभवतःस्थानंनयोग्यंगम्यतांबहिः ॥ ३ ॥ अथगत्वाबहिस्तस्थौसारमेयोयमोदितः ॥ सन्तापावस्थितंतंचनारदोदृष्टवानमुम् ॥ ४ ॥
पप्रच्छचकिमर्थंत्वमिहतिष्ठसिदीतिमान् ॥ शिवभस्मस्थितमृतंशैवंजानेमहामते ॥ ५ ॥ शैवानांपापिनांचापिसाहसेनलतुत्यजाम् ॥
यमलोकोनचास्तीतिशिवाज्ञाशिवनोदिता ॥ ६ ॥ दधीचउवाच ॥ इत्थमाभाष्यतंश्वानंकैलासमगमन्मुनिः ॥ दण्डवत्प्रणिपत्येशं
व्यज्ञापयदथोहरम् ॥ ७ ॥ देवकश्चिद्यमपुराद्बहिरास्तेसकुक्कुरः ॥ भस्मन्येवमृतस्तद्बद्धवलोकंसचार्हति ॥ ८ ॥ अथमुख्यगणाविष्टो
वीरभद्रःशिवेरितः ॥ आनयामासतंश्वानंदिव्यरूपधरंतदा ॥ ९ ॥ महेशपादप्रणतंदेवायाथव्यजिज्ञपत ॥ आहमाहेश्वरोदेवंगणमेनं
कुरुष्वमे ॥ ११० ॥ तथेतिचशिवःप्राहगणःश्वानमुखोऽभवत् ॥ ११ ॥ दधीचउवाच ॥ अतुलंभस्ममाहात्म्यंमयोक्तंतेशुचि
स्मिते ॥ इतःपरंहिकिंभूयःश्रोतुमिच्छसिसुव्रते ॥ ११२ ॥ इतिश्रीपाद्ममहापुराणेपातालखण्डेशिवराघवसंवादेविभूतिमाहात्म्येषडुत्तरशत
तमोऽध्यायः ॥ १०६ ॥ शुचिस्मितोवाच ॥ कश्यपंजमदग्निंचदेवानांचपुराकथम् ॥ ररक्षभस्मतद्ब्रह्मन्समाचक्ष्वमुनेमम ॥ १ ॥ दधीचउवाच ॥
कश्यपादियुतादेवाःपूर्वमभ्यागमन्गिरिम् ॥ शोकरंनामविख्यातंगिरिमध्येसुशोभनम् ॥२॥ नानाविहङ्गसङ्कीर्णंनानामुनिगणाश्रयम् ॥ वासुदेवाश्रयं
रम्यमप्सरोगणसेवितम् ॥ ३ ॥ विचित्रवृक्षसंवीतंसर्वर्तुकुसुमोज्ज्वलम् ॥ तथाविधंप्रविश्यैतंगिरिंवयमथापरे ॥ ४ ॥ स्तुवन्तःकेशवं
तत्रगताःस्मगिरिशेश्वरम् ॥ दृष्ट्वातत्रमहाज्वालांप्रविष्टाश्चवयंचताम् ॥ ५ ॥ मामेकंतुतिरस्कृत्यह्यदहद्देवतामुनीन् ॥ मांददाहततःपश्चाद्भस्मीभूतावयं
शुभे ॥ ६ ॥ अस्मानेतादृशान्दृष्ट्वावीरभद्रःप्रतापवान् ॥ केनापिकारणेनासौगतवान्पर्वतंचतम् ॥ ७॥ भस्मोद्धूलितसर्वाङ्गोमस्तकस्थशिवः
शुचिः ॥ एकाकीनिःस्पृहःशान्तोहाहाशब्दमथाशृणोत् ॥ ८ ॥ अथचिन्तापरश्चासीन्म्रियमाणशवध्वनिः ॥ शवानामिवगन्धश्चदृश्यतेत
न्निरीक्षणे ॥ ९ ॥ इतिनिश्चित्यमनसाजगामाग्निमतिप्रभम् ॥ सवह्निर्वीरभद्रंचदग्धुमारब्धवानथ ॥१०॥ तृणाग्निरिवशान्तोऽभूदासाद्यसलिलंयथा ॥
ततोऽपरांमहाज्वालांवीरभद्रस्तुदृष्टवान् ॥ ११ ॥ खेगच्छन्तीमहाकालोज्वालांनिपतितामपि ॥ मनसाचिन्तयच्चापिवीरभद्रःप्रतापवान् ॥ १२ ॥
सर्वेषांनाशिनीज्वालाप्राणिनांशतकोटिशः ॥ तत्सर्वंरक्षणार्थंहिपिपासुश्चाप्यहंत्विमाम् ॥१३ ॥ प्राश्नामिमहतींज्वालांसलिलंतृषितोयथा ॥ एतस्मि

१ 'शौकटम्' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्नन्तरेवीरंवागाहचाशरीरिणी ॥ १४ ॥ भारत्युवाच ॥ वीरमासाहसंकार्षीःक्तृषाकाशुशुक्षणिः ॥ तृषितानांजलेनार्थोविपरीतोवनाग्निना ॥ १५ ॥
निकामंयोजनशिराःप्रनष्टोराक्षसेश्वरः ॥ शतयोजनवक्रश्चशतबाहुस्तथापरः ॥ १६ ॥ अगस्त्यश्चमहाभागोनिःशेषंपीतसागरः ॥ एतानन्यानस
ङ्ख्याताञ्ज्वालेयंतानमारयत् ॥ १७ ॥ वीरभद्रउवाच ॥ भीषिकेयंमहाज्वालात्वदुक्तानहिजायते ॥ सरस्वतिभवत्यांचममरोषश्चजायते॥
सर्वदेवार्चितपदंवीरभद्रमवेहिमाम् ॥ १८ ॥ भारत्युवाच ॥ मयोक्तंहितभावेननद्वेषान्नान्यतोमुने ॥ कोपमुत्सृजवीरत्वमात्मनो
हितमाचर ॥ १९॥ इत्युक्त्वान्तर्दधेदेवीभारतीवीरभीतितः ॥ अथवीरोमहाज्वालमपासीच्छीलयैवतु ॥२०॥ क्षणेनमहतीज्वालाशतयोजनविस्तृता॥
एकेनवीरभद्रेणपीतापरमदुःसहा॥२१॥अथचेन्द्रमुखानांचमुनीनांभस्मराशयः ॥ दृष्टावैवीरभद्रेणआहूताश्चमहात्मना ॥२२॥ नचाब्रुवन्प्रतिवचोमृता
मुनिदिवौकसः ॥ वीरभद्रस्तुविज्ञायनाशंमुनिदिवौकसाम् ॥ २३ ॥ दध्यावमून्कथंसर्वाञ्जीवयाम्यद्यकोविदः ॥ ध्यानेनदृष्टवांश्चापिजीवितंभस्म
देहिनाम्॥२४॥अथाचम्यमृतानांतुभस्मान्यथचभस्मना ॥मृत्युञ्जयेनमन्त्रेणमन्त्रितेनह्यमन्त्रयत्॥२५॥अथोत्थितामुनिवराःस्वंस्वंरूपमुपाश्रिताः॥
अथतेगतवन्तश्चगिरिपार्श्वंमहाप्रभम् ॥ २६ ॥ तत्रापिभक्षिताःसर्वेसर्पेणातिशरीरिणा ॥ अथवीरोमहासर्पसमीपमगमत्प्रभुः ॥ २७ ॥ वीरमागत
मालोक्यभुजगोयोद्धुमारभत् ॥ युयुधेवर्षमेकंतुनानारूपधरःफणी ॥२८॥ अथवीरःप्रगृह्यौष्ठयुगंकरयुगेनच॥ द्विधाचक्रेसमस्ताङ्गंदेवांस्तत्रगतायुषः॥
॥ २९ ॥ दृष्ट्वाथभस्मनैवैताञ्जीवयामासशङ्करः ॥ अथदेवाःसमुनयोवीरभद्रंप्रणम्यतु ॥ ३० ॥ गतवन्तोयथामार्गंददृशूरक्षआगतम् ॥ पञ्चमेढ्रं
महाकायंदोर्भिश्चदशभिर्युतम् ॥३१ ॥ पञ्चपादसमोपेतंशिरोभिर्युतमष्टभिः ॥ काङ्क्षमाणंमहाहारंयुध्यमानोहिवालिना ॥ ३२ ॥ महावराहवपुषो
वासुदेवस्ययद्बलम् ॥ तादृशंद्विगुणीभूतंकपौवालिनिनिश्चितम् ॥३३॥ तादृशंवानरश्रेष्ठंससुग्रीवंसराक्षसः ॥ मुष्टियुद्धेपञ्चपादैःसहसाहत्यवालिनम् ॥
॥ ३४ ॥ सुग्रीवंचकराभ्यांसहन्तुमेवप्रचक्रमे ॥ आस्येनिक्षिप्यसुग्रीवमग्रसत्कवलंयथा ॥ ३५ ॥ वालिसुग्रीवग्रसनंदृष्ट्वाचिन्तामवापह ॥ कथ
मेनंहनिष्यामिरक्षयिष्येकथंकपिम् ॥ ३६ ॥ एवंचिन्तयमानंतंवानरंराक्षसेश्वरः ॥ अग्रसीदेकयत्नेनतथाभूतंचराक्षसम् ॥ ३७ ॥ दृष्ट्वादेवर्षयःसर्वे
पलायनपरास्तथा ॥ पलायमानांस्तान्दृष्ट्वापञ्चमेढ्रःसराक्षसः ॥ ३८ ॥ हस्तैःसमस्तैस्तान्सर्वानादायाभक्षयत्तदा ॥ वीरभद्रस्ततोदृष्ट्वावानरर्षिसुराद
नम् ॥ ३९ ॥ पञ्चाशद्योजनशिलांकरेणादायतंरुषा ॥ निजघानशिरोमध्येमध्यमंपतितंशिरः ॥४०॥ ततआदायशैलस्यशृङ्गंतच्छतयोजनम् ॥

१ 'अम्बिकोदितः' इ०, 'अङ्कोटितः' इ० च पा० । २ 'वारिणा' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थापयित्वादृढतरंराक्षसेन्द्रंतथाहरत् ॥ ४१ ॥ राक्षसोऽथबभाषेतंवीरभद्रंत्रिलोचनम् ॥ ममबाहुबलंपश्यवीक्षितंत्वद्बलंमया ॥ ४२ ॥ असि
द्वयंतैलधौतंपञ्चाशद्योजनोन्नतम् ॥ एकयोजनविस्तारंसुदृढंलक्षणान्वितम् ॥ ४३ ॥ एकंगृहाणाभिमतंवशिष्टंतन्ममप्रियम् ॥ वीरभद्रस्तथेत्युक्त्वा
गृहीत्वासिंमहाबलः ॥ ४४ ॥ करेणाचालयत्तीक्ष्णंक्ष्वेलींचक्रेततःक्रुधा ॥ गृहीतासिस्तथाक्ष्वेलींचक्रेराक्षसपुङ्गवः ॥ ४५ ॥ वीरभद्रंसमभ्येत्यकण्ठं
प्रतिसमर्पयत् ॥ तद्गात्रंभिन्नमभवच्छोणितंनिर्गतंबहु ॥ ४६ ॥ राक्षसस्त्वेकहस्तेनपपौतच्छोणितंततः ॥ वीरभद्रःकण्ठदेशेराक्षसंप्राहरद्रुषा ॥ ४७ ॥
शिरोद्वयंतथाच्छिन्नंपतमानंततोऽग्रहीत् ॥ न्यभक्षयदमेयात्मासिंहनादंचकारह ॥ ४८ ॥ तेननादेनमहताक्षुब्धमासीज्जगत्त्रयम् ॥ अन्योन्यमसि
घातेनभिन्नगात्रौविकस्वरौ ॥४९॥ किंशुकाविवदृश्येतेपुष्पितौरुधिरोक्षितौ ॥ वर्षमेकंतुसंयुध्यसासीदेवासुरौतदा ॥ ५० ॥ अतःपरंवर्षमेकंगदायुद्ध
मभूत्तयोः ॥ असिपुत्रिकयापश्चाद्वर्षमेकमभूद्रणः ॥ ५१ ॥ पुनर्गृहीत्वासियुगंयुयुधातेपरस्परम् ॥ शंभुवाणोमहाखड्गंदंष्ट्राकारोगणेश्वरः ॥ ५२ ॥
सरोषरक्तनयनश्चालयित्वासिमग्रतः ॥ तस्यकण्ठवनंसर्वंचिच्छेदकदलींयथा ॥५३॥ शिरांसिसर्वाण्यादायबभक्षभगनेत्रहा॥ तस्यगात्रंकररुहैर्विदार्या
हृत्यदेवताः ॥ ५४ ॥ कपीन्द्रौचतथाचान्याअद्राक्षीत्परमेश्वरीम् ॥ एतद्युद्धंमहाघोरंनारदोवीक्ष्यचाभ्यगात् ॥५५॥ ब्रह्मणेवासुदेवायशङ्करायव्यजि
ज्ञपत् ॥ मुनयोरक्षितादेवावालिसुग्रीववानरौ ॥ ५६ ॥ एतौसञ्जीवयामासब्रह्मविष्णुशिवात्मकः ॥ रक्षसेशम्भुनादत्तोवरःपरमदारुणः ॥ ५७ ॥
हिरण्यकशिपोराज्येबलवानेकराक्षसः ॥ देवैःसार्द्धंतुयुयुधेवर्षाणांशतमद्भुतम् ॥ ५८ ॥ पलायिताश्चबहुधामृताश्चशतशोऽसुराः ॥ शुक्रेणरक्षितःसो
ऽथगुरुणाचिन्तयत्त्विदम् ॥ ५९ ॥ मृतोऽस्मिशतशःशुक्रजीवितोऽस्मित्वयैवहि ॥ अमृत्यवेत्वमेतस्मादुदरस्थमृतायच ॥ ६० ॥ अन्यथामरणंमह्यं
भविष्यतिनसंशयः ॥ गुरोयमेनसाकंमेयुद्धमासीत्सुदारुणम् ॥ ६१ ॥ मयासौग्रसितोयुद्धेयमराजःप्रतापवान् ॥ ममोदरंप्रविश्यासौबिभेद
चननादच ॥ ६२ ॥ अहंमृतस्तदाचासंत्वयासञ्जीवितःपुनः ॥ तस्मादुदरसंस्थानांमरणायतपेतपः ॥ ६३ ॥ शुक्रउवाच ॥ एवमेतन्नसन्देहो
यथावत्त्वंसमाचर ॥ स्यमन्तपञ्चकंतीर्थंतत्रत्वंतप्तुमर्हसि ॥६४॥ राक्षसउवाच॥तपेमहत्तपोघोरंयन्नचीर्णंसुरासुरैः॥ गुल्फप्रदेशेपादान्तेत्वयःपाशैःप्रब
ध्यच ॥ ६५ ॥ अयःस्तम्भयुगंकृत्वाअयःपट्टिकयान्वितम् ॥ पट्टिकायांपादबन्धंकृत्वाधःशीर्षतांतथा ॥६६॥ विवृतास्यंतथाकल्पंकृत्वाधोमुखमु ॥ १४६ ॥
च्चकैः ॥ स्तम्भोत्तरेणज्वालायांचक्रिकायामितस्ततः ॥ ६७ ॥ अधःशिरास्तथातिष्ठन्नुन्मील्यैवविलोचने ॥ एवंतपश्चरिष्यामिवरदःकोऽपिमे
भवेत् ॥ ६८ ॥ ब्रह्मावावरदःसोऽस्तुशङ्करोविष्णुरेवच ॥ वरदेनतुमेभाव्यंयोवाकोवावरप्रदः ॥ ६९ ॥ इत्थमाभाष्यमुनिनागुरुणाभार्गवेण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सः ॥ तथातपश्चषण्मासंपुनरन्यच्चकारह ॥ ७० ॥ नखाभ्यांस्वशिरश्छित्त्वाजुहावाग्नौसमन्त्रकम् ॥ नमोभद्रायमन्त्रेणचत्वारिचशि
रांसिसः ॥ ७१ ॥ पञ्चमंतुशिरोहातुंयतमानेचराक्षसे ॥ वह्निमध्यात्समुत्तस्थौभगवानम्बिकापतिः ॥ ७२ ॥ शुद्धस्फटिकसङ्काशो
बालचन्द्रविभूषणः ॥ अधःशिरस्कंतद्रक्षइदमाहमहेश्वरः ॥ ७३ ॥ मासाहसंकुथारक्षोवरदोऽस्मिवरंवृणु ॥ ७४ ॥ राक्षसउवाच ॥ बहूनां
चवराणांत्वंदातानूनंमहेश्वरः ॥ हतशीर्षसमुत्पत्तिंग्रस्तजीवमृतिंतथा ॥ ७५ ॥ वराहवपुषोविष्णोरस्तुशक्तिश्चतुर्गुणा ॥ मयितेनहिरोषः
स्यात्सन्निधिस्तुसदामम ॥ ७६ ॥ त्वज्जटोत्पाटनेनैकःपुरुषःसम्भविष्यति ॥ तेनैवमरणंनान्यैरिदमस्तुवृतंमम ॥ ७७ ॥ भविष्यत्येवमेवैतदित्युक्त्वा
न्तर्हितोहरः ॥ एवंलब्धवरःपापीराक्षसोनिहतस्त्वया ॥ ७८ ॥ अथालिङ्ग्यहरिर्वीरंशङ्करश्चपितामहः ॥ यथागतमथोजग्मुरथदेवादियोषितः ॥७९॥
निपत्यदण्डवद्भूमौवीरभद्रमथाब्रुवन् ॥ नमस्तेदेवदेवेशनमस्तेकरुणाकर ॥ नमस्तेशाश्वतानन्तनमस्तेवरदोभव ॥ ८० ॥ वीरभद्रउवाच ॥ भस्मना
जीवयिष्यामिसुरान्समुनिवानरान् ॥ भवतीभिःप्रतोष्टव्यंशोकःकार्योनचाधुना ॥८१॥ इत्युक्त्वावीरभद्रस्तुभस्मनाजीवयत्सतान्॥उत्थितामुनिदेवा
श्चवानरौचोत्थितौततः ॥ ८२ ॥ इदमूचुर्वचोहृष्टाःशिरःस्थाञ्जलयोऽनमन् ॥ त्वयात्रजीवितास्तातपितात्वंधर्मतोहिनः ॥ ८३ ॥ अस्माकंशरणं
नित्यंभवशङ्करसम्भव ॥ शिशूनांदुष्टचरितंदृष्ट्वाशिक्षेस्तथाचतान्॥८४॥रक्षेःपरकृताबाधाव्याधिभ्यश्चयथौरसान्॥ दक्षाध्वरेकृतागस्काःशिक्षिताभव
तानघ॥८५॥इदानींरक्षितास्तातवयंशिशुवदेवते ॥८६॥ वीरभद्रउवाच॥सत्यमेतन्नसन्देहोयत्रबाधाभवेत्तुवः ॥ तत्रमांस्मरतक्षिप्रंबाधानाशंगमिष्यति
॥८७॥ वीरभद्रपदंयेऽपिपठन्त्यष्टशतंततः ॥ प्रणवादिनमोऽन्तंचचतुर्थीसहितंतथा ॥८८॥ तेषांराक्षसपीडानांनाशनंचभविष्यति॥ब्रह्मराक्षसपीडासु
पिशाचादिभयेषुच ॥८९॥ नामानुस्मरणात्सर्वबाधानांचविनाशनम् ॥९०॥ विद्युत्प्रभालोचनमुग्रमीशंबालेन्दुदंष्ट्रारुणशोभिताधरम् ॥ सुनीलगात्रं
चजटाकृतस्रजंदधानमङ्गेभसितत्रिपुण्ड्रकम् ॥९१ ॥ ब्रह्मराक्षसमुक्त्यर्थंस्मरणंत्विदमीरितम् ॥ मन्त्रेचवीरभद्रस्यसर्वमेतदुदीरितम् ॥ ९२ ॥ दधीच
उवाच॥अथैवंविदधेवीरोमुनिदेवास्तथागताः॥एतत्रियायुष्मंप्रोक्तंभस्ममाहात्म्यमुत्तमम् ॥९३॥ पठतःशृण्वतोवापिस्मरतोऽघविनाशनम् ॥ शिवभक्ति
प्रदंपुण्यमायुरारोग्यवर्द्धनम् ॥९४॥ शुचिस्मितोवाच ॥ अहंकृतार्थाधन्याचनारीणामुत्तमास्म्यहम् ॥ हतपापातथाचास्मिनमस्तेमुनिपुङ्गव ॥९५॥
इतिश्रीपाद्मेमहापुराणेपातालखण्डेशिवराघवसंवादेसप्तोत्तरशततमोऽध्यायः ॥१०७॥ श्रीरामउवाच ॥ भस्मोत्पत्तिंमहाभागभस्ममाहात्म्यमेवच ॥

१ 'भालचन्द्रविभूषणः' इ० पा०। '२पश्चावशाङ्गे भसितं त्रिपुण्ड्रकम्' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भस्मसन्धारणेपुण्यंभस्मदानेचतद्वद॥१॥शम्भुरुवाच ॥ भस्मोत्पत्तिंप्रवक्ष्यामिसर्वपापप्रणाशिनीम् ॥ स्मरणात्कीर्तनाद्रामतांशृणुष्वनराधिप ॥२॥
यएकःशाश्वतोदेवोब्रह्मवन्द्यःसदाशिवः॥त्रिलोचनोगुणाधारोगुणातीतोऽक्षरोऽव्ययः॥३॥ सिसृक्षातस्यजाताथवीक्ष्यात्मस्थंगुणत्रयम्॥वेदत्रयमिदंज्ञेयं
वेदत्रयगुणंहियत्॥४॥पृथक्कृत्वात्मनस्तातत्रस्थानंविभज्यच॥दक्षिणाङ्गेऽसृजत्पुत्रंब्रह्माणंवामतोहरिम् ॥५॥ पृष्ठदेशेमहेशानंत्रीन्पुत्रानसृजद्विभुः॥
जातमात्रास्त्रयोदेवाब्रह्मविष्णुमहेश्वराः ॥६॥ इदमूचुर्वचःस्पर्धंकोभवान्केवयंत्विति॥तानाहचशिवःपुत्रान्यूयंपुत्राअहंपिता ॥७॥ इदंगुणत्रयंपुत्राभज
ध्वंकर्महेतुकम् ॥८॥ पुत्राऊचुः॥कंवागुणंकोभजतांकियन्तंकालमीश्वरम् ॥ कथंगुणनिवृत्तिश्चभवेदेतद्वदस्वनः ॥९॥ शिवउवाच॥यावज्ज्ञानंहिभवतां
यावदायुरथापिवा ॥ धारणंतावदेवस्यादेकैकस्यगुणस्यच ॥१०॥ सत्त्वंब्रह्मारजोविष्णुर्भजेन्महेश्वरस्तमः ॥ इत्युक्तमात्रेदेवेशेब्रह्मासत्त्वमथाग्रहीत् ॥
॥ ११ ॥ नचचालयितुंशक्तोधारणेकिमुशक्तिमान् ॥ तेगुणंतुतिरस्कृत्यरजोगुणमथाग्रहीत् ॥ १२ ॥ नचचालयितुंशक्तोजग्राहाथतमोगुणम् ॥ न
चचालयितुंशक्तोनिपपातरुरोदच ॥ १३ ॥ विष्णुश्ववामहस्तेनरजोगुणमधारयत् ॥ अङ्गुलीभ्यांमहेशोऽपितमोगुणमधारयत् ॥ १४ ॥ सत्त्वमेको
ऽङ्गुलीभ्यांचसत्त्वंविष्णुमथादधात् ॥ ब्रह्माणंपादपीठेचदधारचननर्तच ॥१५॥ नृत्यन्तमत्यन्तविलासरूपंगोक्षीररूपंतरुणंत्रिनेत्रम् ॥ सर्वंदधानंकृत
कौतुकंशिवंसमीक्ष्यपुत्रंवरदोबभाषे ॥ १६ ॥ शिवउवाच ॥ प्रीतोऽस्मितवपुत्राहंवरंवृणुयथेप्सितम् ॥ अथाहपितरंपुत्रोवरमेनंददस्वमे ॥ १७ ॥
मामुद्दिश्यकृतापूजातवपूजाभवेच्छिव ॥ तिष्ठेर्मयिसदात्वंचत्वमेवाहंचषाव्ययः ॥ १८ ॥ शिवउवाच ॥ एवमेतन्महाभागभविष्यतिन
संशयः ॥ रक्तगौराविमौपुत्रौब्रह्मविष्णूममैवतु ॥ १९ ॥ बाहुमूलस्थिरौरम्यौममाकारौतथानघौ ॥ अथब्रह्माणमाहेदंभजत्वेकंगुणंभवान् ॥ २० ॥
ब्रह्मोवाच ॥ त्वन्निर्दिष्टंगुणमहंधर्तुंशक्तोनहीश्वर ॥ धारयिष्येरजोदेवसत्त्वंभजतुवैहरिः ॥ अवशिष्टंगुणंचायमीश्वरोधारयिष्यति ॥ २१ ॥
शम्भुरुवाच ॥ गुणानादायतेदेवानशेकुर्नित्यधारणम्॥कर्तुंभरणशक्त्यर्थंशिवमित्यवदत्पुनः ॥२२॥ गुणान्वयंसर्वकालंनचधारयितुंक्षमाः ॥ दीयतां
भगवञ्छक्तिर्यदिभोस्त्वंवरप्रदः ॥२३॥ अथतद्वचनंश्रुत्वाशिवोवाक्यमभाषत ॥२४॥ शिवउवाच ॥ विद्याशक्तिःसमस्तानांशक्तिरित्यभिधीयते ॥
गुणत्रयाश्रयाविद्याअविद्याचतदाश्रया ॥ २५ ॥ गुणत्रयंचदग्ध्वैवतत्सारंधर्तुमर्हथ ॥ यच्चकिञ्चिद्भवेत्तत्रभवद्भिर्ध्रियतांहितत् ॥ २६ ॥ अथाहु
स्तत्सुतावाक्यंनदाहोज्वलनंविना ॥ शिवःप्राहमहेशस्यलोचनेवह्निरस्तिवै ॥ २७ ॥ गुणत्रयमिदंधेनुर्विद्यास्याद्धोमयंशुभम् ॥ मूत्रंचोपनि
षत्प्रोक्तंकुर्याद्भस्मततःपरम् ॥ २८ ॥ वत्सास्तुस्मृतयोयस्यास्तत्सम्भूतंतुगोमयम् ॥ आगावइतिमन्त्रेणधेनुंतत्राभिमन्त्रयेत् ॥ २९ ॥ गावो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भगोगावइतिप्राशयेत्तुतृणंजलम् ॥ उपोष्यचचतुर्दश्यांशुक्लेकृष्णेऽथवाव्रती ॥ ३० ॥ परेद्युःप्रातरुत्थायशुचिर्भूत्वासमाहितः ॥ कृतस्नानोधौ
तवस्त्रोगोमयार्थंव्रजेत्तुगाम् ॥ ३१ ॥ उत्थाप्यतांप्रयत्नेनगायत्र्यामूत्रमाहरेत् ॥ सौवर्णेराजतेताम्रेधारयेन्मृन्मयेघटे ॥३२॥ पौष्करेवापलाशेवापा
त्रेगोशृङ्गएववा ॥ आदधीतहिगोमूत्रंगन्धद्वारेतिगोमयम् ॥३३॥ अभूमिपातंगृह्णीयात्पात्रपूर्वोदितेऽधिके ॥ गोमयंशोधयेद्विद्वाञ्छ्रीर्मेभजतुमन्त्रतः
॥ ३४ ॥ अलक्ष्मीर्मयीतिमन्त्रेणगोमयस्यापमार्जनम् ॥ सन्त्वासिञ्चामिमन्त्रेणगोमूत्रंगोमयेक्षिपेत् ॥ ३५ ॥ पञ्चानांत्वेतिमन्त्रेणपिण्डांश्चैवच
तुर्दश ॥ कुर्यात्संशोष्यकिरणैस्तरणेराहरेत्तुतान् ॥ ३६ ॥ निदध्यादथपूर्वोक्तपात्रेगोमयपिण्डकान् ॥ स्वगृह्योक्तविधानेनप्रतिष्ठाप्याग्नि
मिन्धयेत् ॥ ३७ ॥ पिण्डान्विनिक्षिपेत्तत्तदर्णदेवायपिण्डकान् ॥ आघारावाज्यभागौचप्रक्षिप्यजुहुयात्सुधीः ॥ ३८ ॥ ततोनिधनपतयेत्रयोदश
जयादयः ॥ होतव्याःपञ्चब्रह्माणिनमोहिरण्यबाहवे ॥ ३९ ॥ इतिसर्वाहुतीर्हुत्वाचतुर्थ्यन्तैस्तुमन्त्रकैः ॥ ततःशर्वायरुद्राययस्यवैकङ्कतीतिच ॥
॥ ४० ॥ एतैस्तुजुहुयाद्विद्वाननाज्ञातत्रयंतथा ॥ व्याहृतीरथहुत्वातुततःस्विष्टकृतोहवः ॥ ४१ ॥ इध्मशेषंतुनिर्वर्त्यपूर्णपात्रोदकंततः ॥ पूर्णमासान्त
यजुषाजलेनान्येनबृंहयेत् ॥ ४२ ॥ ब्राह्मणेष्वमृतमितितज्जलंशिरसिक्षिपेत् ॥ प्राच्यामितिदिशांलिङ्गैर्दिक्षुतोयंविनिक्षिपेत् ॥ ४३ ॥ ब्रह्मणे
दक्षिणांदत्त्वाशान्तेपुलकमाहरेत् ॥ ४४ ॥ आहरिष्यामिदेवानांसर्वेषांकर्मगुप्तये ॥ जातवेदसमेनंत्वंपुलाकच्छादयाद्यमे ॥ ४५ ॥ मन्त्रेणानेनतंवह्निं
पुलाकैश्छादयेदथ ॥ त्रिदिनंज्वलनस्थित्यैछादनंपुलकैःस्मृतम् ॥ ४६ ॥ ब्राह्मणान्भोजयेद्दत्त्यास्वयंभुञ्जीतवाग्यतः ॥ भस्माधिकमभीप्संस्तु
ह्यधिकंगोमयंहरेत् ॥ ४७ ॥ दिनत्रयेणयदिवाएकस्मिन्दिवसेबहु ॥ तृतीयेवाचतुर्थेवाप्रातःस्नात्वासिताम्बरः ॥४८॥ शुक्लयज्ञोपवीतीचशुक्लमाल्या
नुलेपनः ॥ शुक्लदन्तोभस्मदिग्धोमन्त्रेणानेनमन्त्रवित् ॥ ४९ ॥ तद्वेतिचोच्चारयित्वाभस्मसत्यंनसन्त्यजेत् ॥ ततआवाहनमुखाउपचारास्तुषोडश॥
॥ ५० ॥ कर्तव्याहुतदानेनततोऽग्निमुपसंहरेत ॥ अग्नेभस्मेतिमन्त्रेणगृह्णीयाद्भस्मचोद्भवम् ॥ ५१ ॥ अग्निरस्मीतिमन्त्रेणप्रमृज्यचततःपरम् ॥
संयोज्यगङ्गासलिलैःकपिलापयसाथवा ॥ ५२ ॥ चन्द्रकुङ्कुमकाश्मीरमुशीरचन्दनंतथा ॥ अगुरुद्वितयंचैवचूर्णयित्वातुसूक्ष्मतः ॥ ५३ ॥
क्षिपेद्भस्मनितच्चूर्णमोमितिब्रह्ममन्त्रतः ॥ ततःपयःसेचनेचगदितःकपिलामनुः ॥ ५४ ॥ अमृतंदेवितेक्षीरंपवित्रमिहबुद्धिदम् ॥ तवप्रसादा
न्मुच्यन्तेमनुजाःसर्वपाप्मनः ॥ ५५ ॥ प्रणवेनावहेद्विद्वान्भस्मनोवटकानथ ॥ अणोरणीयानितिहिमन्त्रेणतुविचक्षणः ॥ ५६ ॥ शम्भुरुवाच ॥
इत्थंतुभस्मसम्पाद्यशुष्कमादायमन्त्रवित् ॥ प्रणवेनविमृज्याथसत्तप्रणवमन्त्रितम् ॥ ५७ ॥ ईशानेनशिरोदेशंमुखंतत्पुरुषेणच ॥ उरोदेशमघोरेण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गुह्यंवामेनमन्त्रयेत् ॥५८॥ सद्योजातेनवैपादौसर्वाङ्गंप्रणवेनतु ॥ ततउद्धूल्यसर्वाङ्गमापादतलमस्तकम् ॥५९॥ ततआचम्यवसनंधौतंश्वेतंप्रधारयेत्॥
पुनराचम्यकर्मस्वंकर्तुमर्हतिसर्वतः[1] ॥ ६० ॥ ततोभस्मसमादायप्रमृज्यप्रणवेनतु ॥ त्रिनेत्रंत्रिगुणाधारंत्रयाणांजनकंविभुम् ॥ ६१ ॥ स्मरन्नमः
शिवायेतिललाटेतुत्रिपुण्ड्रकम्॥नमःशिवाभ्यामित्युक्त्वाबाह्वोर्वापित्रिपुण्ड्रकम् ॥६२॥ अघोरायनमइतिउभाभ्यांचप्रकोष्ठयोः ॥ भीमायेतिततःपृष्ठे
शिरोऽधिपश्चिमेतथा॥६३॥नीलकण्ठायशिरसिक्षिपेत्सर्वात्मनेनमः ॥ प्रक्षाल्याथततोहस्तौकर्मानुष्ठानमाचरेत् ॥६४॥ शिवउवाच॥ यूयमेवंप्रकारेण
भस्मकृत्वाप्रघृष्यच ॥ गुणान्धारयितुंशक्तास्ततःस्रक्ष्यथवैप्रजाः ॥ ६५ ॥ शम्भुरुवाच ॥ इत्थंशिवोदितादेवाब्रह्मविष्णुमहेश्वराः॥तथाकृत्वाचविधि
नाहमहमिकयातदा ॥ ६६ ॥ अन्योन्यबोधनाशक्ताःप्रणम्यशिवमूचिरे ॥ कंगुणंधारयेत्कोवाशिवःप्राहसुतानथ ॥ ६७ ॥ कर्मशक्तितथाज्ञानंमुख
रेण्वैवनश्यति ॥ अल्पायुर्दृश्यतेब्रह्मामनुभिश्चास्यजीवितम् ॥ ६८ ॥ योऽहंब्रह्माण्डमालाभिर्भूषितोब्रह्मगोपनम् ॥ रजोगुणमवष्टभ्यनचजानासि
मांतदा ॥ ६९ ॥ ब्रह्माधिकबलोविष्णुरायुषिब्रह्मणोऽधिकः ॥ ब्रह्माण्डमालाभरणेमहेशस्यममैवतु ॥ ७० ॥ चतुर्निःश्वासमात्रेणविष्णोरायु
रुदाहृतम् ॥ ब्रह्मणोऽधिकसत्त्वत्वात्सत्त्वमालम्बतांहरिः ॥ ७१ ॥ जानातिसर्वकालंमांक्वचिदेवनविस्मरेत् ॥ सात्त्विकैकैवपूजास्यराजसीतामसी
नतु ॥ ७२ ॥ शान्तंशिवंसत्त्वगुणंरजवक्त्रावमानतः[2] ॥ नमोनीलंतथाचैवगुणंशम्भुस्तथाभजत् ॥ ७३ ॥ सत्त्वंरजस्तमश्चापिदधारचपुराकिल ॥
अतोऽस्यत्रिविधापूजाशङ्करस्यविधीयते ॥ ७४ ॥ रजश्चतमसायुक्तंदारुणंपरिकीर्तितम् ॥ दारुणापिततःपूजाशङ्करेगतिदामता ॥ ७५ ॥ रजश्च
तमसायुक्तमलंशास्त्रप्रवर्तकम् ॥ विच्छिन्नापिततःपूजाशङ्करेफलदामता ॥ ७६ ॥ तमश्चसत्त्वसंयुक्तंमिश्रकंचप्रवर्तकम् ॥ मिश्रपूजा[3]विफलदाशङ्करे
लोकशङ्करे ॥ ७७ ॥ यादृशंतादृशंवापिनियमेनार्चनंविभोः ॥ शङ्करस्याशुफलदंयादृशस्यापिदेहिनः ॥ ७८ ॥ शम्भुरुवाच ॥ एतत्संक्षेपतःप्रोक्तं
विधानंभस्मनोऽनघ ॥ वक्तृश्रोतृजनानांचसमस्ताघविनाशनम् ॥७९॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशिवराघवसंवादेभस्मोत्पत्तिविधानंनामा
ष्टोत्तरशततमोऽध्यायः ॥ १०८ ॥ शम्भुरुवाच ॥ अत्रतेकीर्तयिष्यामिकथांपापप्रणाशिनीम् ॥ श्रुत्वायांप्रापधर्मात्माशिवभक्तिमनुत्तमाम् ॥ १ ॥
इक्ष्वाकुर्नामविप्रेन्द्रःपुराह्यासीन्महामतिः ॥ बहुशास्त्रप्रवीणश्चनीतिशास्त्रविशारदः ॥२ ॥ नयष्टानचदाताचनदेवानांचपूजकः ॥ नचाध्यापयितावेदं
नव्याख्याताश्रुतस्यच ॥ ३ ॥ नपुराणेतिहासानांश्रुतीनामागमस्यवा ॥ यत्नाद्धोक्तातथादेहसंस्कारैकप्रवर्तकः ॥ ४ ॥ तादृशस्यद्विजस्याथसमा

१'अर्हखि' इ० पा०। २'रजवक्त्रानुमानतः' इ० पा०। ३'पूजापि' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लक्षायुरत्यगात् ॥ लक्षान्तरेतथैकस्मिन्वत्सरेमासिपञ्चमे ॥५॥ तृतीयदिवसेरात्र्यांपुराणंश्रुतवानिदम् ॥ स्वसम्पादितवित्तस्ययेनदानंनवैकृतम् ॥
॥ ६॥ दिनेदिनेभुज्यमानंनिःसारंस्यात्क्रमेणहि ॥ वर्षाण्येवचतावन्तिनरकेपच्यतेध्रुवम् ॥७॥ कृमियोनिसहस्रंचअनुभूयततःपरम् ॥ दरिद्रोव्याधितो
ऽबन्धुर्दुष्टभार्योबहुप्रजाः ॥ ८॥ दिनेदिनेभिक्षितेनयाचितेनचजीवनम् ॥ यन्नक्कापिचबीजानांमन्नानामथमार्गणात् ॥ ९ ॥ लब्धेनजीवनंकर्मभृत्या
नामथजीवनम्॥मध्येश्रोत्रविहीनश्चनेत्रहीनःस्खलन्मलः ॥१०॥ एवंपुराणंश्रुत्वासाविक्ष्वाकुर्भृशदुःखितः॥मनसाचिन्तयच्चेदंस्मारंस्मारंद्विजाधमः ॥
॥ ११ ॥ रूपपुष्पैर्माहिष्मयीदुर्गापिफलवर्जिता ॥ तथापुराणरहिताविद्यानोगतिदर्शिनी ॥ १२ ॥ बहुशास्त्रंसमभ्यस्यबहुवेदान्सविस्तरान् ॥
पुंसोऽश्रुतपुराणस्यसम्यग्यातिनदर्शनम् ॥ १३ ॥ शम्भुरुवाच ॥ एवंचिन्तयतस्तस्यअकालमरणंत्वभूत् ॥ यमलोकंगतश्चाथयमेनपरि
भाषितः ॥ १४ ॥ यमउवाच ॥ अनेकपापयुक्तोऽसिपुण्येनैवमहत्तव ॥ नवेदाध्यापनात्प्राप्तंपापंचविदितंतव ॥ १५ ॥ कोटिवर्षाणिनरकेत
वस्थितिरितिद्विज ॥ आयुरस्तितवात्यल्पंगम्यतांपौर्विकींतनुम् ॥ १६ ॥ कुरुपुण्यंहितंदानंदेवतापूजनंजपम् ॥ साङ्गमध्यापनंविप्रभो
जनंभस्मधारणम् ॥ १७ ॥ भजविश्वेश्वरंदेवंदेवदेवमुमापतिम् ॥ तस्यप्रयत्नमात्रेणममलोकंनगच्छसि ॥ १८ ॥ यत्किञ्चित्प्रत्यहंपापिन्पुराणं
शृणुसादरम् ॥ ततस्तच्छ्रवणादेवनेक्षसेममयातनाः ॥ १९ ॥ यमस्यवचनंश्रुत्वाब्राह्मणःस्वांययौतनुम् ॥ अथेशपूजनकृतेयत्नमास्थायस
द्विजः ॥२०॥ अगमन्मुनिवर्यंतुजाबालिंशिवपूजकम् ॥ तपःस्वाध्यायसम्पन्नंश्रुतिस्मृतिविवेचकम् ॥२१॥ पुराणतत्त्ववेत्तारंलक्षशिष्यसमावृतम्॥
जराशिथिलसर्वाङ्गंवेदवेदाङ्गपारगम् ॥ २२ ॥ द्रष्टुकामोययौशैलंसुन्दरंचारुकन्दरम् ॥ नानाविहगसम्पूर्णंनानापुष्पलतावृतम् ॥ २३ ॥
सर्वर्त्तुकुसुमोपेतंनानागन्धोपशोभितम् ॥ किन्नराणांचमिथुनैर्गीतपूर्णमहागुहम् ॥ २४ ॥ अनेकरूपलावण्यवनितोषितपादपम् ॥ लम्बमानवि
चित्राभिस्ताभिःशोभितपादपम् ॥ २५ ॥ रतिश्रमप्रसुप्तानांबोधनादितषट्पदम् ॥ कूजन्तिचपिकाःकामंवियुक्तानांयुजेकिल ॥ २६ ॥ नाना
मुनिगणाकीर्णंप्रशान्तमृगचारिणम् ॥ अप्सरोगणसङ्कीर्णंगन्धर्वगणसेवितम् ॥ २७ ॥ नानासिद्धमुखोद्भूतगीतपूर्णवनान्तरम् ॥ विचित्र
फलसम्पूर्णंनानादेवालयान्वितम् ॥ २८ ॥ प्रासादशतसम्बाधंनानागृहसमन्वितम् ॥ सिंहाननैर्गजमुखैरुलूकवदनैरथ ॥ २९ ॥
अमुखैर्विमुखैरुग्रैरर्द्धवक्त्रैर्मृगीमुखैः ॥ रुरुजन्तुकगोधाहिवानरर्क्षमुखैरपि ॥ ३० ॥ व्याघ्रवृश्चिकभल्लोष्ट्रश्वानगर्दभतुण्डकैः ॥ समस्तजीववदनस
दृशास्यैर्गणेश्वरैः ॥३१॥ वल्लीमुखैर्वृक्षमुखैःशिलावक्त्रैरयोमुखैः॥शङ्खमुक्तादिजलजवदनैरुपशोभितम् ॥३२॥ अधिकाङ्गैरनङ्गैश्चजटिलैःशिखिमुण्डि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तैः॥पत्रिवक्त्रैर्द्विषड्वक्त्रैस्त्रिविग्रहमुखैरपि ॥३३॥ घटास्यैः शूर्पवदनकर्णपादमुखैरपि ॥ घण्टामुखैर्वेणुमुखैः किङ्किणीवदनैरपि ॥३४॥ यादृग्वस्तुजगत्य स्तितादृशास्यैरयोमुखैः ॥ कैश्चिन्निभृतकन्दर्परूपलावण्यकोमलैः ॥ ३५ ॥ कोटिसूर्यप्रतीकाशैश्चन्द्रकोटिसमप्रभैः ॥ नानावर्णैर्विश्वमुखैर्विश्वरूपै श्चतुर्मुखैः ॥ ३६ ॥ द्विमुखैः पञ्चवक्त्रैश्चत्रिमुखैः षण्मुखैरपि ॥ एकानेकमुखैः शान्तैः सर्वदासुखिभिर्युतम् ॥३७॥ नानाभोगसमृद्धैश्चरतिकामसमैरपि लक्ष्मीनारायणमुखैरुमेशसमविग्रहैः ॥ ३८ ॥ नानारूपधरैश्चान्यैः सेवितंमन्दराचलम् ॥ धेनवोयत्रवेदाश्चमीमांसावत्ससंयुताः ॥ ३९ ॥ धर्मादयः स वृष्मर्णाः पुराणानिचकर्मणा ॥ स्मृतीतिहासजातानिआगमाश्चशरीरिणः ॥ ४० ॥ स्थिताश्चमन्दरेयत्रसशैलः पापनाशनः ॥ तस्यमध्येमहापुण्यंपुरंप रमशोभितम् ॥४१॥ वापीतडागोपवनप्रासादशतशोभितम् ॥ सप्तप्राकारपरिखंरत्नाट्टालकसंयुतम् ॥४२॥ गोपुरैर्नवभिर्युक्तंविचित्रगृहसंयुतम्॥यस्य चाप्रतिमंतेजउष्णशीतादिवर्जितम् ॥४३॥ तन्मध्येनगरीपुण्यातन्मध्येचसभाशुभा ॥ तस्यांभद्रासनंमध्येवेदपादविचित्रितम् ॥ ४४ ॥ सर्वोपनिषदा कृतंपादपीठंसुशोभनम्॥पुराणान्यागमास्तस्यस्वस्तीतिशिवपादयोः ॥४५॥ तत्रासीनोमहायोगीगोक्षीरसदृशाकृतिः ॥ मन्दस्मितसुचार्वास्योद्व्यष्ट वर्षवयाः प्रभुः ॥ ४६ ॥ दधानउरसामालांमणिरुद्राक्षकल्पिताम् ॥ बिभ्राणउपवीतंचकर्णिकारसमद्युतिः ॥ ४७ ॥ सुरत्नकुण्डलोदेवः किरीटकनका म्बरः॥नानाभूषणसंयुक्तोनानागन्धविलेपनः ॥४८॥ वामाङ्कन्यस्तगिरिजोवीक्षमाणस्तदाननम् ॥ मुग्धांचसुमुखींबालांनवयौवनशोभिताम् ॥४९॥ भूषितांचारुसर्वाङ्गींबिभ्रतींकनकाम्बुजम् ॥ अलिङ्ग्यवामेनकरेणदेवींदक्षेणतस्यामुखमुन्नमय्य ॥ स्पृष्ट्वाशिरोवामकरेणतस्यादक्षेणकुर्वंस्तिलकंच देवः ॥ ५० ॥ भक्तिर्वीजयतेदेवंप्रणवव्यजनेनच ॥ पूजाकान्तापिकुसुमैर्मालांदेवायबिभ्रती ॥ ५१ ॥ ज्ञप्तिर्विरक्तिर्वनितेबिभ्रत्यौयोगचामरे ॥ समाधिःकार्यकर्तास्यधारणायोषिदस्यच ॥ ५२ ॥ यमाश्चनियमाश्चैवकिङ्करास्तस्यकीर्तिताः ॥ प्राणायामःपुरोधास्तुप्रत्याहारःसुवर्णधृत् ॥५३॥ ध्यानंचद्रविणाध्यक्षःसत्यंसेनापतिस्तथा ॥ ब्रह्मप्रभृतिकीटान्ताःपशवस्तत्पतिःशिवः ॥ ५४ ॥ पशूनांपालकोधर्मःस्यादधर्मश्चतस्करः ॥ मायापाशेनतेबद्धामोचनीकाशिकामृतिः ॥ ५५ ॥ नानाविधाश्चप्रमदादेवदेवमुमापतिम् ॥ एतादृशमुमानाथंकोटिजन्तुरनुस्मरेत ॥ ५६ ॥ इष्टान्भोगानवाप्याथशिवलोकेमहीयते ॥ ब्रह्मविष्णुमहेन्द्राद्यास्तत्पुरद्वारपालकाः ॥ ५७ ॥ लक्ष्मीसरस्वतीदेव्यौदेहल्यर्चनउक्षितौ ॥ नियु क्तेदेवदेवस्यदेवाश्चसुरयोषितः ॥ ५८ ॥ दास्योदेवाःसमस्ताश्चदासायस्यमहात्मनः ॥ एतादृशमहाशैलमिक्ष्वाकुःसन्ददर्शह ॥ ५९ ॥

१ 'नम्रमुखीम्' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुनिंप्रणम्यजाबालिमिदमाहवचस्तदा ॥ गन्तुकामोमहाशैलंशक्तोऽस्यस्मिन्नवामुने ॥ ६० ॥ ममायुरल्पंकथितंयमेनज्ञानिनापुरा ॥ नरकश्चबहुः प्रोक्तःकथंश्रेयोभविष्यति ॥ ६१ ॥ जाबालिरुवाच ॥ मयापिसर्वमेतत्तेज्ञातंदिव्येनचक्षुषा ॥ आयुर्दशदिनंब्रह्मन्विद्वानपिनधर्मकृत् ॥ ६२ ॥ नतपस्तेह्यनभ्यासान्नचयोगोऽल्पकामतः ॥ नदानंद्रविणाभावादसामर्थ्यात्तथार्हणा ॥ ६३ ॥ नयज्ञोनव्रतंपूर्तंनचपुण्यमनायुषः ॥ नचाध्यापनतीर्थादिसेवाकालविरोधतः ॥ ६४ ॥ तस्मात्तत्पापनाशायप्रायश्चित्तंनविद्यते ॥ गतिप्रदंतथाधर्मंगच्छवातिष्ठवामुने ॥ ६५ ॥ इक्ष्वाकुरुवाच ॥ यावज्जीवंप्रतिज्ञायक्रियतेयोवृषोद्विज ॥ तेनपापपरीहारोभविष्यतिसुनिश्चितम् ॥ ६६ ॥ तंब्रूहियेनधर्मेणममपापंप्रणश्यति ॥ केनवापुण्ययोगेनस्वर्गतिश्चभविष्यति ॥ ६७ ॥ शरणंभवविप्रर्षेनरकादतिबिभ्यतः ॥ सर्वधर्मफलंप्राहुःशरणागतपालनम् ॥ ६८ ॥ जाबालिरुवाच ॥ सत्यंस्वल्पेनकालेननताहृग्लभ्यतेवृषः ॥ अमृतेत्वनृतेशक्यंवक्तुंस्वप्रान्तरेष्वपि ॥ ६९ ॥ रहस्यमेकंकिञ्चित्तुयस्यकस्यापिनोच्यते ॥ ७० ॥ इक्ष्वाकुरुवाच ॥ शरणंपालयमुनेकालोमेनिर्गमिष्यति ॥ ७१ ॥ जाबालिरुवाच ॥ ममप्राणाधिकंविप्ररहस्यंश्रुतिचोदितम् ॥ शिवलिङ्गार्चनंनामब्रह्मादिभिरनुष्ठितम् ॥ ७२ ॥ समस्तपापशमनंसर्वोपद्रवनाशनम् ॥ भुक्तिमुक्तिप्रदंतस्माच्छिवपूजांसमाचर ॥ ७३ ॥ नातिक्रामेद्यदिमुनेशिवलिङ्गार्चनंशुभम् ॥ यःशम्भुपूजांविच्छिन्द्यात्तेनच्छिन्नंहिमेशिरः ॥ ७४ ॥ वरंशूलविनिक्षेपोवरंशाल्मलिकर्षणम् ॥ वरंप्राणपरित्यागोनैवपूजाव्यतिक्रमः ॥ ७५ ॥ वरंवह्निप्रपतनंवरंचाधःशिरःकृतम् ॥ वरंस्वमलभुक्तिर्वानेशपूजाव्यतिक्रमः ॥ ७६ ॥ अपूजयित्वाचेशानंयोहिभुङ्क्तेनराधमः ॥ पापानामन्नरूपाणांतस्यभोजनमुच्यते ॥ ७७ ॥ अनुच्चार्यपदंशम्भोर्भुङ्क्तेयदिचखादति ॥ शिवेतिमङ्गलंनामयस्यवाचिप्रवर्तते ॥७८॥ भस्मीभवन्तितस्याशुमहापातककोटयः ॥ शिवंप्रदक्षिणीकृत्ययोनमस्यतिमानवः ॥७९ ॥ भूमेःप्रदक्षिणंकृत्वायत्तत्पुण्यमवाप्नुयात् ॥ प्रदक्षिणत्रयंकृत्वानमस्कारंचपञ्चधा ॥ ८० ॥ पुनःप्रदक्षिणंकृत्वानत्वामुच्येतपातकैः ॥ सर्ववाद्यानियःकुर्यात्कारयेद्वाशिवालये ॥ ८१ ॥ बलेनमहतायुक्तोवेदे[2]सेव्यत्रजायते ॥ श्रावयेद्यःपुराणानिदेवदेवंत्रिलोचनम् ॥ ८२ ॥ सर्वपापविनिर्मुक्तोवसेच्छि[3]वपुरेकृती ॥ तंनित्यमादरेणेशोवक्तिवाक्यंप्रियंसदा ॥ ८३ ॥ एतत्संक्षेपतःप्रोक्तमीशपूजनमुत्तमम् ॥ अल्पायुश्चभवान्विप्रशिवपूजनमाचर ॥ ८४ ॥ त्रिकालंवाद्विकालंवाएककालमथापिवा ॥ यामंयामार्धमथवाशिवपूजनमाचर ॥ ८५ ॥ वानप्रस्थाश्रमोभूत्वावानप्रस्थकृताश्रयः ॥

१ धर्म इत्यर्थः। २ 'देवसेव्यत्र जायते' इ० पा०। ३ 'शिववशे' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

वानप्रस्थप्रसूनैश्चप्रातःपूजयशङ्करम् ॥ ८६ ॥ श्रीफलैःशतपत्रैश्चपद्मसौगन्धिकैरपि ॥ नीपैर्जपाभिःपुन्नागैःकरवीरैश्चपाटलैः ॥ ८७ ॥ तुलस्या
चरविंदलैरपराजितयातथा ॥ अपामार्गदलैरुद्रजटादमनकेनच ॥ ८८ ॥ सर्वैरेभिःसमफलैर्बिल्वपत्रैश्चधूर्तकैः ॥ द्रोणैःशिरीषैःशक्रैश्चदूर्वया
कोरकैरपि ॥ ८९ ॥ नन्द्यावर्तैरक्षतैश्चतिलमिश्रैश्चकेवलैः ॥ अन्यैरपियथाशक्तिप्रातःसम्पूजयेच्छिवम् ॥ ९० ॥ कर्णिकारैश्चसौवर्णदूर्वयापि
शिवार्चनम् ॥ मुकुलैर्नार्चयेद्देवंचम्पकैर्जलजंविना ॥ ९१ ॥ जलजानांचसर्वेषांपत्राणामक्षतस्यच ॥ कुशपुष्पस्यरजतसुवर्णकृतयोरपि ॥ ९२ ॥
अन्यत्कृत्वायथायत्तुतैलपक्वंभवेन्नृप ॥ नतत्पर्युषितंप्रोक्तमपूपादिगमिष्यति ॥ ९३ ॥ उक्षितंयत्फलायुक्तंतैलक्षाराम्लजीरकैः ॥ जलेतत्प्रोक्षितं
मूलफलशाकादिकंनृप ॥ ९४ ॥ नचपर्युषितंप्रोक्तंगङ्गातोयंचसागरम् ॥ महानदीजलंसर्वंकेदारजलमेवच ॥९५॥ ह्रदरूपेणयत्तीर्थंकूपतीर्थेनवाडव॥
तडागवापीसरसांकूपेनापांचयद्भवेत् ॥ ९६ ॥ तत्तीर्थतोयंसर्वंचनचपर्युषितंभवेत् ॥ नरात्रौजलमाहार्यंदिवासम्पादयेज्जलम् ॥ ९७ ॥ ससैकतंतथा
धार्यंनचपर्युषितंहितत् ॥ एवंविदित्वापूजांत्वंशिवलिङ्गेसमाचर ॥ ९८ ॥ शम्भुरुवाच ॥ एवमुक्तोऽथमुनिनाइक्ष्वाकुर्ब्राह्मणप्रियः ॥ शिवपूजा
परोभूत्वादिनाष्टकमतिष्ठत ॥ ९९ ॥ नवमेऽथदिनेप्राप्तेप्रातःकालेकृतार्चनः ॥ मरणावसरेप्राप्तेशिवपूजांविधायसः ॥ १०० ॥ स्वान्प्राणा
नुपहारायतत्याजैवमहेशितुः ॥ मृतंतमथविज्ञाययमदूताःसमागताः ॥ १ ॥ यमलोकप्रापकायेयत्नमास्थायतस्थिरे ॥ शैवाश्चापिसमायातादूता
वह्निमुखादयः ॥ २ ॥ तेषामन्योन्यवादोऽभून्मामकोमामकस्त्विति ॥ अथयामःपाशपाणिःशिवदूतमथार्दयत् ॥ ३ ॥ अथवह्निमुखःक्रुद्धो
यमदूतशतंततः ॥ महाकायस्तथाभूत्वागृहीत्वाचकरेणतत् ॥ ४ ॥ शिरांसिचतथैकेनापीडयचिच्छेदशष्पवत् ॥ मारयित्वाततोदूतानादायेक्ष्वाकु
मभ्यगात् ॥ ५ ॥ निवेदयामासचतंवीरभद्रायधीमते ॥ सचापिशङ्करायाथतंप्राहचमहेश्वरः ॥ ६ ॥ त्वयाष्टदिनपूजैवकृताकृष्णादिने
दिने ॥ त्वमनिन्दःपुरामांचलिङ्गंशिश्नाग्रमित्युत ॥ ७ ॥ तनवपापयोगेनशिश्नवक्रोभविष्यसि ॥ शिश्नाग्रेविवरंचक्रंजिह्वानासादिवर्जितः ॥ ८ ॥
पूर्वंमन्नामवकृत्वाद्भक्ताचापिभविष्यसि ॥ अथेशवचनात्सोऽपितथाभूतोऽभवत्क्षणात ॥ ९ ॥ शम्भुरुवाच ॥ यइदंशृणुयान्नित्यंपुराणाख्यान
मुत्तमम् ॥ विमुक्तपापबन्धश्चशिवभक्तोभविष्यति ॥ ११० ॥ सयातिचशिवस्थानेवक्ताचापितथाभवेत् ॥ यश्चवक्तिकथामेनांहरेणसदृशो ॥ १४९ ॥
भवेत् ॥ ११ ॥ उक्त्वाकथामिमांपूर्वमधीरोनामभूमिपः ॥ स्वर्गंसगतवान्राजाकृतपापोऽथभार्यया ॥ ११२ ॥ इतिश्रीपाद्मेमहापुराणेपाताल

१ 'अथवा मोक्षपाणिं च' इ० पा०।

CC-0. In Public Domain. Digitization by eGangotri

खण्डेशिवराघवसंवादेविभूतिमाहात्म्येनवोत्तरशततमोऽध्यायः ॥ १०९ ॥ श्रीरामउवाच ॥ अयमग्निशिखोनामवह्निःशिवगणश्चवै ॥ सकथं
तादृशोभूतस्तन्मेवदनमोऽस्तुते ॥ १ ॥ शम्भुरुवाच ॥ अयमासीत्पुराकश्चित्क्षत्रियःक्रोधनःसदा ॥ नष्टभार्योनष्टसेनोनष्टराष्ट्रोऽतिदुःखितः ॥ २ ॥
लब्ध्वालुलायद्वितयंकृषिंचक्रेसहात्मजैः ॥ ऋणेनमहतायुक्तःपुनश्चातीवदुःखितः ॥ ३ ॥ पुनश्चदुःखितोराजासर्पेणसुतनाशनात् ॥ तथाभूतोमही
पालस्तत्याजकृषिमप्युत ॥४॥ परित्यज्यसुतौचापित्यक्ताहारोरुरोदह ॥ सुतावथसमागम्यप्राहतुःपितरंत्विदम् ॥५॥ किमर्थंरुद्यतेतातनष्टोनायाति
रोदनात् ॥ शरीरशोषणायाथशोकस्तेऽद्यभविष्यति ॥ ६ ॥ शोकेनचक्षुषीनष्टेकण्ठोनष्टस्तथातव ॥ अनुष्ठानंतथानष्टंकिमर्थंपरितप्यसे ॥ ७ ॥
एकोनष्टोनचायातिरक्षपञ्चस्थितानसून् ॥ बहूनांरक्षणंपुण्यमाश्रितानांविशेषतः ॥ अन्याश्रितममुंशत्रुंकथंशोचितुमर्हसि ॥ ८ ॥ पितोवाच ॥ पुत्रः
शत्रुःकथंपुत्रौयुवांशत्रूतथाचमे ॥ अत्यन्तसुखिनंपुत्रंकथंशत्रुमभाषतम् ॥ ९ ॥ सुतावूचतुः ॥ जायमानोहरेद्भार्यांवर्द्धमानोहरेद्धनम् ॥
म्रियमाणस्तथाप्राणान्छत्रुत्वंकिमतःपरम् ॥ १० ॥ यत्सुखंचत्वयाप्रोक्तंस्पर्शनालिङ्गनादिभिः ॥ दुःखोदर्कमिदंराजन्सर्वमेतद्ददामिते ॥
॥ ११ ॥ प्रसूतिकालेपुत्रस्यभार्यानाशविचारणा ॥ जीवितायामथोपत्न्यामात्मनःसुखनाशनम् ॥ १२ ॥ योन्यशुद्धौतुजातायांसंयोगो
नोपपद्यते ॥ आलिङ्गनपरेगाढंस्तन्येनाङ्गपरिप्लुंत[1] ॥ १३ ॥ तथापियदिसंयोगःशिशुरोदनतःस्त्रियाः ॥ दृढंशिशुगतंचित्तंततोवैरस्यमेवच ॥१४॥
अथचेत्पतितोडिम्भोमध्येमैथुनमुद्गतिः ॥ रतिमध्येतुविच्छेदेदुःखंकिञ्चिदसन्निभम् ॥१५॥ सर्वकालेपरिमितेकदाचिद्रतिसम्भवः ॥ तत्कालेभोजनं
नास्तिस्वापोनास्तिचभार्यया ॥ १६ ॥ शिशूनांरक्षणेदुःखंव्याधितर्षग्रहादिभिः[2] ॥ तन्मयंयत्सुखंचित्रंयथाङ्कारोहणंपितुः ॥ १७ ॥ आलिङ्गन
कृतंतातचुम्बनादिकृतंतथा ॥ अत्यन्तमधुरोक्त्यादियत्सुखानिनरेश्वर ॥ १८॥ रतिमध्येविरामस्यकलांनार्हन्तिषोडशीम् ॥ अन्यान्यपिचदुःखानि
सन्तिपुत्रेसहस्रशः ॥१९॥ अनेनत्वंकिंकुरुषेइहामुत्रविरोधिना ॥ त्यजशोकमिदंतस्मादावांपुत्रौस्थिताविह ॥ २० ॥ श्रीराजोवाच ॥ त्यजामिशोकं
दुर्वारंसर्वकार्यविरोधिनम् ॥ आत्मनश्चहितंकार्यमिहामुत्रसुतौमम ॥ २१ ॥ पुरोधसंतुगच्छामिग्रमपूर्वमहागुरुम् ॥ वसिष्ठंमुनिवर्यंचसदास्यतिगतिं
मम ॥ २२ ॥ एवमुक्त्वागतोविप्रंवाराणस्यांस्थितंगुरुम् ॥ दण्डवत्प्रणनामाथमुनिनापरिपूजितः ॥२३॥ आलिङ्गितःशिरोघ्रातोदत्तासनपरिग्रहः॥
उक्तश्चागमनंकिंतेकिंकार्यंकरवाणिवै ॥ २४ ॥ राजोवाच ॥ गतिंप्रयच्छमेविप्रसंसारतरणायहि ॥ खिन्नोऽहंकर्मणाशश्वद्भवन्तंशरणंगतः ॥

१ परिप्लवते-इत्यर्थः—शवभावश्छान्दसः। २ 'व्याधिसर्पग्रहादिभिः' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २५ ॥ वसिष्ठउवाच ॥ गतिंपश्यमहालिङ्गंविश्वेश्वरमितिस्थितम् ॥ एनंपूजयराजेन्द्रदेवदेवंपिनाकिनम् ॥ २६ ॥ यमाराध्यपुराशक्तिररुन्धत्याः सुतोमुनिः ॥ रक्षसाभक्षितश्चापियमलोकंगतोनसः ॥ २७ ॥ किञ्चित्कालगतःस्वर्गंब्रह्मलोकमगादतः ॥ ब्रह्मलोकाद्विष्णुलोकेक्रीडन्नास्तेसुतोमम ॥ ॥ २८ ॥ अमुंपश्यमहाराजलुब्धकंवनचारिणम् ॥ पूजयन्तंहिविश्वेशंपत्रमात्रैःस्वसम्भृतैः ॥ २९ ॥ शमीवृक्षस्यसम्भूतैस्तथापूगप्रसूनकैः ॥ कदम्बकुसुमैरर्ककुसुमैर्यूथिकाभवैः ॥ ३० ॥ एतैरन्यैर्महेशानंपूजयन्तंविलोकय ॥ इतोऽर्द्धयाममात्रेणमरिष्यतितदद्भुतम् ॥ ३१ ॥ अन्तकालेसमायातेलुब्धकोऽपिशिवायवै ॥ उपहारप्रदानायदृष्टवान्पार्श्वतोघटम् ॥ ३२ ॥ तंचूतफलसम्पूर्णंशुनास्पृष्टंविगर्हितम् ॥ सङ्कल्पितोपहारस्यह्यभावाल्लुब्धकस्तथा ॥ ३३ ॥ इदंजगौशुभंवाक्यंलोकानांभक्तिसूचकम् ॥ पुष्पाभावेहरिर्नेत्रंफलाभावेऽङ्गुलंरविः ॥ ३४ ॥ लिङ्गविस्रंसनेकंचजमदग्निऋषिस्तथा ॥ लिङ्गपीठविभेदेचगात्रंनिर्भिद्यदत्तवान् ॥ ३५ ॥ अन्यैर्माहेश्वरैरन्यत्साहसंपरमंकृतम् ॥ ममापितत्तथाकार्यमन्यथादोषभागहम् ॥ ३६ ॥ एतस्मिन्नन्तरेकश्चिदुन्मत्तःशिवमभ्यगात् ॥ अथलुब्धकृतांपूजामाहत्याभक्षयत्क्षणात् ॥ ३७ ॥ वमनंचतथाचक्रेशिवपीठेऽथलुब्धकः ॥ शिवापकारिणंचैनंहन्मिनोवेत्यचिन्तयत् ॥३८॥ अथस्वात्मवधायैवयत्नमास्थायशङ्करः ॥ उन्मत्तेनयथोद्धृत्ताशिवपूजामयाकृता ॥ ३९ ॥ लिङ्गप्रावरणेह्येषातदहंममदेहिनः ॥ प्रावृतिस्त्वगियंत्वद्यनिर्मोक्त्व्यामयाद्भुतम् ॥४०॥ पूजाविमोचनायैतत्फलहानेर्गलंत्यजेत् ॥ इत्थंसङ्कल्प्यसतथातीक्ष्णस्वधितिनाद्भुतम् ॥ ४१ ॥ चक्रेत्वचंदक्षपादंत्वचंछित्त्वाकटेरधः ॥ वामपादंतथाचक्रेकटिपर्यन्तमाशुच ॥४२॥ हृष्टश्चावेपितश्चैवततऊर्ध्वमथाच्छिनत् ॥ करांसोदरहृत्कण्ठत्वचंनिर्भिद्यलुब्धकः ॥ ४३ ॥ मस्तकस्यत्वचंचापिनिर्बिभेदप्रहृष्टवान् ॥ तयोरन्तरतस्तस्माद्गात्रंनिर्भिद्यवर्तुलम् ॥ ॥ ४४ ॥ छित्त्वाङ्गुलिंसमादायदेवायार्पितवांस्त्वचम् ॥ आरादेवतथादिव्यरूपःस्वक्षश्चतुर्भुजः ॥ ४५ ॥ नानाभूषणसंयुक्तःस्थितोवियतिशाङ्करः ॥ अथशैवाःसमायातादूताःशतसहस्रशः ॥ ४६ ॥ विचित्रमुकुटाकाराःसर्वाभरणभूषिताः ॥ त्रिशूलपाणयःसर्वेशुद्धस्फटिकसन्निभाः ॥ ४७ ॥ चतुर्भुजाःसुरूपाश्वविमानवरसंस्थिताः ॥ सर्वेसूर्यसमाःशान्तारम्भावत्प्रिययायुताः ॥ ४८ ॥ सूनुपत्नीबलोत्साहविलासस्त्रीशतान्वितः ॥ तेजसासूर्यसदृशाःपुष्पवृष्टिमवाकिरन् ॥ ४९ ॥ तैराहूतोलुब्धकश्चनागच्छदवदच्चतान् ॥ भार्याबन्धुजनोपेतोगच्छेऽहमथवानवा ॥ ५० ॥ शैवास्तद्वचनंश्रुत्वावाक्यमेतदथोचिरे ॥ येनपुण्यंकृतंपापंतेनभोग्यंहितत्फलम् ॥ ५१ ॥ लुब्धकउवाच ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशौचानांचसर्वेषांधर्माणामेककर्तृकम् ॥ माहेश्वराणांधर्माणांफलंचवृद्धिबहुष्वपि ॥ ५२ ॥ एतस्मिन्नन्तरेप्राप्तोवीरभद्रःशतार्भकः ॥ नाना कोटिगणोपेतएहिलुब्धकबन्धुयुक् ॥ ५३ ॥ सवत्वयोक्तंचतथासभार्योज्ञातिबन्धुयुक् ॥ आरुह्येदंविमानंचशिवंगच्छशिवंतुवः ॥५४॥ अथतद्वचना त्प्राप्तःशिवलोकंविमानगः ॥ ५५ ॥ वसिष्ठउवाच ॥ दृष्टवानसिसर्वत्वमीशपूजांसमाचर ॥ विमुक्तपापबन्धस्त्वंशिवलोकंगमिष्यसि ॥ ५६ ॥ यदिराज्यंत्वयाप्रार्थ्यंसार्जयेशाङ्करणंनृप ॥ गोमयोदकलेपंचनित्यमेवसमाचर ॥ ५७ ॥ एतावताभूमिराज्यंध्रुवंतवभविष्यति ॥ यावदायुश्चतेराज्य मन्तेशिवपदंभवेत् ॥५८॥ नैतस्मिंस्तुभवेद्राज्यसंसिद्धिरनुमृत्युतः ॥ अतोदेहान्तरंप्राप्यशिवसेवाप्रभावतः ॥ भविष्यतिचतेराज्यंशिवभक्तिःस्थिरा तथा ॥५९॥ शम्भुरुवाच ॥ अथकृत्वातथापूजांमृतःस्वर्गगतस्ततः ॥ राजजन्मपुनःप्राप्यराज्यंचक्रेशिवेरतः ॥६०॥ कदाचिदथदेवस्यगृहमभ्यगम न्नृपः॥नानादीपसमोपेतंमणिभिर्नागराडिव ॥६१॥ भटानामथसंमर्दएकोदीपोऽपतन्नृपे॥तदासौकुपितोराजादीपमादायसत्वरम् ॥६२॥ देवालयपुरे रम्येन्यक्षिपत्कोपसंयुतः ॥ दग्धंदेवगृहंतेनएनश्चसमपद्यत ॥ ६३ ॥ अथतेनपुनस्तत्रदग्धंवेश्मगृहादिकम् ॥ निर्मापयामासनृपोमहेशानमथायजत ॥६४॥ अथमृत्युदिनेप्राप्तेराजाराधितशङ्करः॥ भस्मस्नायीभस्मशायीजपन्रुद्रंममारह ॥६५॥ शिवलोकंगतःसोऽयंवीरभद्रेणभाषितः ॥ भवत्वंगण शार्दूलोममवैपरिचारकः ॥ ६६ ॥ शाङ्करान्ममनिर्देशादानयस्वममान्तिकम् ॥ शिरोहीनोभवांश्चापिज्वालावक्रोभविष्यति ॥ ६७ ॥ सतूवाचमहात्मानंवीरभद्रंगणेश्वरम् ॥ चक्षुःश्रोत्रंतथाजिह्वानासिकास्यंशिरोगणः ॥ ६८ ॥ एतैर्विनाव्यवहृतिःकथंमेसम्भविष्यति ॥ अभावे शिरसःकिंवामयापापंकृतंविभो ॥ ६९ ॥ वीरभद्रउवाच ॥ त्वयैवस्वीकृतापूर्वंदेवीपरमसुन्दरी ॥ महेशभवनंनित्यंचातुर्वर्णकरङ्ककैः ॥ ७० ॥ स्वस्तिकंसर्वतोभद्रंनन्द्यावर्तादिकंशुभम् ॥ पद्ममुत्पलमान्दोलपादौव्यजनचामरे ॥ ७१ ॥ त्रिशूलंशङ्खचक्रेचगदाधनुरथैवच ॥ त्रिशूलं डमरुंखड्गंवृषंभृङ्गिरिटिंशिवम् ॥ ७२ ॥ तथाष्टपत्रंकमलमन्यद्यन्त्रादिकंतथा ॥ कल्पयन्तीप्रतिदिनंसेवतेवृषभध्वजम् ॥ ७३ ॥ कदाचिदथसावेश्या देवसद्मन्युपस्थिता ॥ राज्ञःकाराङ्किकःकश्चिद्देववेश्मसमाविशत् ॥ ७४ ॥ अथतांदृष्टवांस्तत्रसइदंवाक्यमुक्तवान् ॥ काराङ्किकउवाच ॥ एकान्त संस्थितावेश्यायुवाहंस्थविरश्चन ॥७५॥ स्थविरंव्याधितंषण्ढमशक्तंधनवर्जितम् ॥ अदीर्घमेहनंदीनंपुरुषंयोषिदुत्सृजेत् ॥ ७६॥ अश्मश्रुलंमलच्छन्नं जडंदुर्गन्धिदूषितम् ॥ स्वल्पमव्यसनंनारीदूरतःपरिवर्जयेत् ॥ ७७ ॥ तस्मान्मेदीयतांवेश्यमैथुनंजीवयाशुमाम् ॥ वेश्योवाच ॥ नियतः

१ 'वृद्धिर्बहुष्वपि' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 सर्वजातीनामिहामुत्रसुखप्रदः ॥ ७८ ॥ पातिव्रत्यंपरोधर्मःस्त्रीणामितिहिशुश्रुम ॥ यदधीनायदावश्यातदानान्येनसङ्गता ॥ ७९ ॥ पतिव्रतेति
विख्यातातस्मात्तंपरिपालयेत् ॥ काराङ्किकउवाच ॥ यदिचैवंमृतिःशीघ्रंभविष्यतिनसंशयः ॥ ८० ॥ अथराजान्तिकंगत्वाराजानमिदमुक्तवान् ॥
वेश्यावेश्यैवनोभार्यानेतिवक्तुंचनोचितम् ॥ ८१ ॥ इत्थंराजानमुक्त्वाथमण्डंचैवारनालजम् ॥ किञ्चिदादायतस्यास्तुमन्दिरंगतवानयम् ॥ ८२ ॥
निद्रावसरमालोक्यप्रसृज्यचकरंततः ॥ ८३ ॥ वस्त्रस्यविवरेतत्रमण्डंचिक्षेपदुष्टधीः ॥ एवंकृत्वाततोगत्वाराजानमिदमुक्तवान् ॥ ८४॥ राजन्निर्गत्य
गत्वाथवेश्याग्र्यांतवयोषितम् ॥ उत्थापयित्वावेश्यांतांसर्वाङ्गंद्रष्टुमर्हसि ॥८५॥ उन्मुक्तबन्धमथवावसनंपश्ययत्नतः ॥ वेश्यावेश्माथगतवान्राजा
काराङ्किकंवचः ॥ ८६ ॥ इदमाहसनिद्रेयंपश्येमांयामिपश्यसि ॥ सतूवाचनृपंतत्रनमेयुक्तमिदंनृप ॥ ८७ ॥ तन्मातरंवापितरंदर्शनायनियोजय ॥
तद्दृष्टौसर्वमेवेदंव्यक्तमाशुभविष्यति ॥ ८८ ॥ आनीताह्यथराज्ञातुमातावीक्षितुमुद्यता ॥ वचनात्तुनृपस्यैववस्त्रंशोधयतीवसा ॥ ८९ ॥ तत्रस्थितं
मण्डमथविज्ञायाम्बाह्यमर्दयत् ॥ मर्दनाद्वसनंक्लिन्नंकिंतदित्याहपार्थिवः ॥ ९० ॥ नकिञ्चिद्देवनोकिञ्चिदितिवेश्याप्रसूरपि ॥ बहुवाक्येनराजाथ
वसनंवीक्ष्यशङ्कया ॥ ९१ ॥ शुक्रक्लिन्नमिदंवासःप्राहैतद्दृश्यतामिति ॥ अथदृष्ट्वासमीपस्थास्तथेत्यूचुर्वचोनृपम् ॥ ९२ ॥ राजाथस्वगृहंगत्वादण्डा
ध्यक्षमभाषत ॥ इदानीमेववेश्यायाःशिरश्छिन्ध्यविचारयन् ॥ ९३ ॥ दर्शनीयंशिरस्तस्याघटिकाभ्यन्तरेमम ॥ दण्डकश्चनृपोक्त्याऽस्यास्तथा
कृत्वाह्यदर्शयत् ॥ ९४ ॥ वीरभद्रउवाच ॥ एवंकृतंत्वयापूर्वंप्राप्तंचफलमद्यते ॥ ज्वालयैवहिवक्तात्वंश्रोताद्रष्टाचजिघ्रसि ॥ रसंजानासिमतिमानति
क्रोधीभविष्यसि ॥ ९५ ॥ शम्भुरुवाच ॥ एवंज्वालामुखोजातोराजामाहेश्वरोऽक्षमी ॥ तस्मात्तुक्षमिणाभाव्यंपरत्रेहसुखेप्सुना ॥९६॥ यइदंशृणुया
न्नित्यंपुण्याख्यानमनुत्तमम् ॥ विमुक्तपापबन्धश्चशिवलोकेभविष्यति ॥९७॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशिवराघवसंवादेशिवपूजामाहात्म्य
कथनंनामदशोत्तरशततमोऽध्यायः ॥ ११० ॥ श्रीरामउवाच ॥ महेशनाममाहात्म्यंपूजामाहात्म्यमेवच ॥ नमस्कारस्यमाहात्म्यंदृष्टिमाहात्म्य
मेवच ॥ १ ॥ जलदानस्यमाहात्म्यंधूपदानस्यसत्तम ॥ दीपगन्धादिदानस्यमाहात्म्यंवदमेगुरो ॥२॥ शम्भुरुवाच ॥ एकैकनाममाहात्म्यंविस्तरान्न
हिशक्यते ॥ संक्षेपेणचतेवच्मिशृणुराघवसादरम् ॥ ३ ॥ पुरात्रेतायुगेराजाविधूतोनामवीर्यवान् ॥ मृतेपितरिबालोऽसौभूमिराज्येऽभिषेचितः ॥ ४ ॥
समानवयसःसर्वान्समीपस्थांश्चकारसः ॥ येवृद्धायेचविद्वांसस्तेचतस्यनसंमताः ॥ ५॥ युवानःसंमतादुष्टाअकार्यकरणास्तथा ॥ सुरूपानयनदक्षाश्च

१ 'विभूतः' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चोरकर्मविशारदाः ॥ ६ ॥ भाण्डवार्तारतालास्यनिपुणास्तस्यसंमताः ॥ वशीकरणमन्त्रज्ञावस्त्रौषधविदस्तथा ॥ ७ ॥ गीतनर्तनशीलाश्चधूर्त्ता
द्यूतविदःप्रियाः ॥ पितृसंमतकर्तॄणांत्यागंचक्रेसपार्थिवः ॥ ८ ॥ विचार्यसचतैःसार्द्धंदुष्टैःकार्यमकारयत् ॥ एतादृशांस्तथाचान्यान्दुष्टान्सहयुयोज
ह ॥ ९ ॥ एतदुक्तिसुपालम्भ्यशिष्टंसुहृदमत्यजत् ॥ उरोमुष्टिंचफेत्कारंयेकुर्युस्तस्यतेप्रियाः ॥ १० ॥ भगलक्षणतत्त्वज्ञारतितन्त्रविशारदाः ॥
राजनीतिविहीनंतद्राज्यंसमभवत्तदा ॥ ११ ॥ गजाश्वरथमुष्ट्राजंगोमहिष्यादिकंचयत् ॥ तत्सर्वंनाशमापन्नमपहारायतस्ततः ॥ १२ ॥ रत्नानिवसु
धान्यानिनदृश्यन्तेपुरेतदा ॥ अथभूपान्तरेणासौनिर्जितःप्रपलायितः ॥ १३ ॥ महारण्यमथोगत्वाऽगिरिदुर्गमकल्पयत् ॥ तत्रचाल्पपरीवारश्चोर
वृत्तिसमाश्रितः ॥ १४ ॥ सुवर्णवस्त्रधान्यादिरत्नगन्धादिकंतथा ॥ तत्रतत्रविनिर्दिश्यचोरानानीयवञ्चकान् ॥ १५ ॥ बन्धाद्यकारयत्तैस्तुद्रव्याहरण
कर्मणि ॥ यदाहारोनविद्येततदाहारमकल्पयत् ॥ १६ ॥ गोमहिष्यादिमांसेनयद्यन्नंनोपलभ्यते ॥ अश्वीयनरमांसेनभोजनंपर्यकल्पयत् ॥ १७ ॥
एतादृशमभूद्वृत्तंसन्ध्योपासादिवर्जितम् ॥ एकस्तुसचिवस्तस्यसुरापोनामराक्षसः ॥ १८ ॥ नियुङ्क्तेसर्वकालंतमाहरप्रहरेतिच ॥ एवंरक्षोमतेस्थित्वा
नानादेशगतान्नरान् ॥ १९ ॥ नृसहस्रपरीवारोह्याद्याद्यादक्रूपालयः ॥ स्वस्याभिमतयोषास्तुज्ञात्वाज्ञात्वासमाहरत् ॥ २० ॥ किञ्चित्कालंचता
भुक्त्वातासांमांसमभक्षयत् ॥ एवंहत्वानरान्नारीराज्यंचक्रेसुदुःसहम् ॥ २१ ॥ एवंवर्षसहस्रंतुराज्यंकृत्वानराधमः ॥ जराशिथिलसर्वाङ्गोवलीपलित
दूषितः ॥ २२ ॥ निर्जीवमभवत्स्थानंसमन्तादृशयोजनम् ॥ अथमृत्युदिनंप्राप्तंराज्ञस्तस्यमहात्मनः ॥ २३ ॥ मृत्युकालेऽथसम्प्राप्तेस्नातंभूमिगतं
नृपम् ॥ तस्यचानुचराःसर्वेपरिवार्योपतस्थिरे ॥ २४ ॥ सुरापःसचिवःप्राहकिंकार्यंममचादिश ॥ अथराजातथाऽशक्तोनिर्गतायुस्तदार्दितः ॥ २५ ॥
नाभेरधस्तुक्षीणासुःकथञ्चिद्वाक्यमुक्तवान् ॥ त्वंसर्वकालेदैत्येन्द्रप्रहरप्राहराहर ॥ २६ ॥ इत्यथोक्त्वाममारासौयमदूताःसमाययुः ॥ विचित्रंबन्धने
यत्नंचक्रुस्ताडनतत्पराः ॥ २७ ॥ चूर्णिताबन्धपाशाश्चहेतिदण्डाश्चचूर्णिताः ॥ तद्गात्रस्पर्शमात्रेचतदद्भुतमिवाभवत् ॥ २८ ॥ अथायातःस्वयंमृत्युःपाशेनैन
मयोजयत् ॥ मृत्युपाशमपिच्छिन्नंवीक्ष्यमृत्युरचिन्तयत् ॥ २९ ॥ सर्वमर्त्यमृतिर्दृष्टादृष्टानैतादृशीक्वचित् ॥ इतिचिन्तापरेमृत्यौज्वालावक्रःप्रतापवान् ॥
॥ ३० ॥ वीरभद्रेणनिर्दिष्टःसहसायाचशूलभृत् ॥ ज्वालावक्रमथालोक्यमृत्युस्तूर्णंपलायितः ॥ ३१ ॥ पलायमानंतंदृष्ट्वामृत्युंवह्निमुखस्तदा ॥ अरेरे
चोरचोरत्वंतिष्ठतिष्ठक्वयास्यसि ॥ ३२ ॥ एनसोमुच्यतेचोरःशूलारोपणमात्रतः ॥ एवमाभाष्यमृत्युंतंशूलप्रोतमकल्पयत् ॥ ३३ ॥ शूलस्कन्धगतंकृत्वा

१ 'तत्र तत्र समाहरत्' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दूतान्सङ्ग्रथ्यरज्जुना ॥ पादशृङ्खलविन्यस्तानादायनृपमध्यगात् ॥३४॥ विमानवरमारोप्यगीतवाद्यसुशोभितम् ॥ वीरान्तिकमथोगत्वासर्वमस्मै
न्यवेदयत् ॥३५॥ वीरभद्रोऽपितत्सवशङ्करायामितात्मने ॥ नानामुनिगणैर्देवैर्ब्रह्मविष्णुपुरःसरैः॥३६॥ सेव्यमानायदेवायपार्वतीसहितायच ॥ प्रणि
पत्यनिवेद्याथशूलस्थंमृत्युमेवच ॥३७॥ तूष्णींबभूवविश्वात्मावीरभद्रःप्रतापवान् ॥३८॥ अन्यासनंवीक्ष्यशिवोनिगर्हयन्कथंत्वयैतद्गणसाहसंकृतम्॥
बिभेषिमृत्योर्नकथंयमाधिकाद्वदस्वसर्वंपरमार्थतोमे ॥ ३९ ॥ प्रणम्यतंवह्निमुखोऽतिरोषोमृत्युंसमालोक्यननर्तहर्षात् ॥ उवाचचौयकृतमेवमृत्युना
तदेषशूलेऽपिमयाप्ररोहितः ॥ ४० ॥ विमोचयामासशिवोऽपिमृत्युंदूतानशेषान्निरुजश्चकार ॥मृत्युंसमालोक्यशिवोबभाषेमन्नामएषांमरणेसमास्ते॥
॥ ४१॥ मच्चेतसामन्यधियांचनामहीनाक्षरंवाधिकवर्णयुक्तम् ॥ ममैवलोकंप्रददामिसत्यंह्यनेननामप्रहरेतिभाषितम् ॥४२॥ प्रशब्दमात्रंत्वधिकंहरेति
पदप्रदंवैपदमीरयन्ति ॥ आरादमूंस्त्वंजपतोनमस्वमदीयवाक्यंचयमंवदस्व ॥४३॥ नतिंयतिंकीतमुपास्तिमाश्रितादास्यंचकैङ्कर्यमथश्रुतिंवदाः ॥
पञ्चाक्षरोक्तिंशतरुद्रियोक्तिशिवस्यकुर्वन्तिनतेविचार्याः ॥ ४४॥ मन्नामरुद्राक्षविभूतिधारणोममाग्रतोयस्तुपुराणवक्ता ॥ सर्वेषुपापेष्वपितेषुसत्सुप्रशा
स्म्यहंनैवयमाधिकारः ॥४५॥ येचापिपापान्वितमायिनोनराःपरान्नवस्त्रादिवधूभुजश्च॥वाराणसीमृत्युपराश्चयेवैश्रीशैलमर्त्याश्चनतेविचार्याः ॥४६॥
यूकाश्चदंशाअपिमत्कुणाश्चमृगादयःकीटपिपीलिकाश्च ॥ सरीसृपावृश्चिकशूकराश्चकाशीमृताःशङ्करमाप्नुवन्ति ॥ ४७ ॥ इदंनामगृणन्ध्यायेद्योवै
हृत्पद्ममन्दिरे ॥ त्रियम्बकंविरूपाक्षंसोमंसोमार्द्धभूषणम् ॥४८॥ त्रिनेत्रकंत्रयीनेत्रंसोमसूर्याग्निलोचनम् ॥ तंनमस्कृत्यदूरस्थोभवमृत्योममाज्ञया ॥
॥४९॥ अथाकर्ण्यशिवप्रोक्तंमृत्युस्तुष्टावशङ्करम् ॥ नमस्तेदेवतानाथनमस्तेदेवमूर्तये ॥ ५० ॥ सर्वज्ञायनमस्तुभ्यंपशूनांपतयेनमः ॥ अथदेवो
महादेवोमृत्युंप्राहवरंवृणु ॥ ५१ ॥ स्तोत्रेणानेनतुष्टोऽस्मिमृत्युर्वरमयाचत ॥ त्वदीयंपालयविभोमांचशङ्करपापिनम् ॥ ५२ ॥ तथेत्युक्त्वामृत्यु
मीशोगच्छवत्सेतिचाब्रवीत् ॥ यमलोकंगतःसोऽपियमायाशेषमुक्तवान् ॥ ५३॥ शम्भुरुवाच ॥ यइदंशृणुयान्नित्यंपुण्याख्यानमनुत्तमम् ॥ विमुक्तः
सर्वपापेभ्योयातिशङ्करसन्निधिम् ॥ ५४ ॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशिवराघवसंवादएकादशोत्तरशततमोऽध्यायः ॥ १११ ॥ शम्भु
रुवाच ॥ अथान्यदपिनिर्वच्मिप्रमदाख्यानमुत्तमम् ॥ सुतयादेवरातस्ययत्प्राप्तंनामकीर्तनात् ॥ १ ॥ देवरातसुताबालाकलानामातिरूपिणी ॥
धनञ्जयसुतस्यासीद्भार्याशोणस्यधीमतः ॥ २ ॥ तावुभौनियतौनित्यंधर्मैकप्रवणौशुभौ ॥ लब्धवन्तौनिधिमथोगङ्गास्नानायतौगतौ॥ ३ ॥ प्रवाह

१ 'यजिम्' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पतितेकूलेमृत्तिकानयनायतौ ॥ कूलादादायमृष्ठोऽदृष्टवन्तौमहाघटम् ॥ ४ ॥ राजतंचोर्द्धपाषाणमथशोणःप्रियांवचः ॥ इदमाहकथंकार्यंकिंकर्तव्यंहि[1]नोहितम् ॥ ५ ॥ भार्योवाच ॥ ननारीमतमालम्ब्यकिञ्चित्कार्यंसमाचरेत् ॥ नचनार्याचरेद्गुह्यमप्रियंवाथकिञ्चन ॥ ६ ॥ यदिनारीसमक्षंतुद्रविणंदृष्टिमापतेत् ॥ वञ्चयीततथानारीत्वीदृशैर्वाक्यसञ्चयैः ॥ ७ ॥ अस्माभिर्नहिसम्प्रेक्ष्यंकिंवातत्रहितिष्ठति ॥ द्रविणंचेन्नसंप्रेक्ष्यंबाधोदर्कंभविष्यति ॥ ८ ॥ अन्याज्ञातंतुयदिचेत्कुतोज्ञानविनिश्चयः ॥ अप्रदृष्टस्त्विदानींचेन्निभृतःकोऽपितिष्ठति ॥ ९ ॥ तिरोधानंनकिञ्चिच्चेन्माययाकोऽपितिष्ठति ॥ नचेन्मायामनुष्याणांक्षेत्रपालस्तुतिष्ठति ॥ १० ॥ नहिचेद्भैरवश्चेहतिष्ठतिब्रह्मराक्षसः ॥ नसोऽपिचेन्महाविद्याराज्ञांतत्रभविष्यति ॥ ११ ॥ नै[2]चजानातिचेद्राजाव्यवहारादिसम्भवः ॥ सचेद्गूढप्रकारेणचोरबाधाभविष्यति ॥ १२ ॥ अप्रमत्तस्यभवतोमहानर्थोभविष्यति ॥ प्रायेणार्थवतांनॄणांभोगलिप्साप्रजायते ॥ १३ ॥ भोगाद्भोगान्तरेच्छाचसर्वानुष्ठाननाशिनी ॥ जानातियदिनारीस्वंभावयोगगतंतथा ॥ १४ ॥ नारीस्वतन्त्रतामेतिरोषाल्लब्धप्रकाशिनी ॥ रोषेविश्वासतांयातितदादोषःपुरोदितः ॥ १५ ॥ विश्वासिनिचविश्रम्भःप्रवासोवान्यचित्तता ॥ विश्रम्भाज्जायतेस्त्रीणांनानाविधिविचेष्टता ॥ १६ ॥ यंकंचित्पुरुषंदृष्ट्वायुवानंप्रीतिरापतेत् ॥ प्रीत्यासञ्जायतेयोगोयोगान्मैथुनसङ्गतिः ॥ १७ ॥ सततंमैथुनेजातेविश्रम्भान्तरमापतेत् ॥ भवतावातथापूर्वंभुक्तेदानींचभुज्यते ॥ १८ ॥ कांप्रतीच्छातवेदानींप्रीतिःकस्यामथापिवा ॥ काविदग्धासुसंस्निग्धापुरुषादन्यतश्चरेत् ॥ १९ ॥ योऽब्रवीदथवाक्यंतांयदिब्रूयास्त्वमद्यमे ॥ सर्वमेवतथावच्मिनान्यथावाक्यमुच्यते ॥ २० ॥ इत्थंचधृष्टतांयातातथारूपान्तरेणच ॥ द्रव्यमादाययत्किञ्चिदनुवर्तेस्वतन्त्रतः ॥ २१ ॥ समारयित्वातांद्रव्यंगृहीत्वापातयिष्यति ॥ अथपूर्वंपतिमृतौप्रविशेन्नाशुशुक्षणिम् ॥ २२ ॥ वैधव्येद्रविणंसर्वंधर्मार्थंमेभविष्यति ॥ इतिनिश्चित्यमनसावैधव्येसमुपस्थिते ॥ २३ ॥ यो[4]निकुण्डंसमासाद्यदिवावायदिवानिशि ॥ एकान्तस्थानमभ्येत्यविवृत्यवसनंभगम् ॥ २४ ॥ इदमूचेवचोदुःखादुपस्थस्थकरासती ॥ किंत्वयावैकृतंयोनेकिंवापापमुपाश्रिता ॥ २५ ॥ शिश्नस्यवाथवापापंयत्वदन्तरवेशनात् ॥ यच्चकर्तृकृतंपापंमादृक्सेवाविर्जनात् ॥ २६ ॥ अतोऽपिकण्डसम्भूतौप्रवेशयेदथाङ्गुलीम् ॥ विचित्रचेष्टांकृत्वातुकण्डूबुद्धेरतःपरम् ॥ २७ ॥ मर्दयित्वाकराभ्यांतत्सन्ताडयचविवृत्यतु ॥ असकृच्छुन्वतीपादौविवृतास्यातिदुःखिता ॥ २८ ॥ खड्वाकाष्ठमथालिङ्ग्यस्तनपीडंयथाप्रियम् ॥ अथोविचित्रचित्तत्वेततःप्रधृष्टताभवत् ॥ २९ ॥ अथवाह्निपुरेस्थित्वाशाकंव्यवहृतंचयत् ॥ आलम्ब्यवेश्मनिनिशिसन्ध्यायांविशि

१ 'मे हितम्' इ० पा० । २ 'महाबाधा' इ० पा० । ३ 'अय' इ० पा० । ४ 'योनिकण्डूम्' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

खासुच ॥ ३० ॥ कृत्वान्यवेषमात्मानंयैःकैरप्युपभुज्यते ॥ अथवाच्यप्रभावेनशङ्कितायोग्यमाहरेत् ॥३१॥ अज्ञातंचगृहंगत्वारमयेदेवनिश्चितम् ॥
नारीसमक्षंलब्धेतुद्रविणेह्येतदिष्यते ॥ तस्मान्मयापिभवतोनविचारप्रयोजनम् ॥ ३२ ॥ शोणउवाच ॥ एवमेतन्नसन्देहोगच्छत्वंतिष्ठदूरतः ॥
मलमूत्रविसर्गार्थंस्थित्वागच्छाम्यतःपरम् ॥ ३३ ॥ तस्यांगतायांशोणोऽपिवस्त्रखण्डंत्वकल्पयत् ॥ एकैकस्मिंस्ततःखण्डेत्वग्रहीद्द्रविणंबहु ॥३४॥
सैकतेविवरंजानुदघ्नंकृत्वाततस्ततः ॥ क्षिप्त्वाधनंपूरयित्वाविष्ठांचक्रेततोपरि ॥ ३५ ॥ वस्त्राधारंघटंतंचप्रतिचिक्षेपकुत्रचित् ॥ सर्वमज्ञातवत्कृत्वा
स्नानायप्रययौमुनिः ॥ ३६ ॥ तस्यभार्याततःस्नानंकृत्वासम्पूज्यपार्वतीम् ॥ गच्छेतिभर्त्रासाप्रोक्तास्ववेश्माभ्यागमत्सती ॥ ३७ ॥ एतामेका
किनींज्ञात्वामारीचोनामराक्षसः ॥ भर्तृरूपमथास्थायकलामेतदुवाचह ॥ ३८ ॥ मारीचउवाच ॥ सतगोदावरीतीरेपवित्रंपापनाशनम् ॥
द्राक्षाराममितिप्रोक्तंयत्रभीमःस्वयंस्थितः ॥ ३९ ॥ भुक्तिमुक्तिप्रदोनृणांस्मरणात्पापनाशनः ॥ तत्रगच्छावहेशीघ्रंत्वंतुनिर्गच्छसुन्दरि ॥ ४० ॥
कलोवाच ॥ इदानीमभिषेकायप्रवृत्तोनाभिषिक्तवान् ॥ कथमेतादृशंत्वंहिपूर्वानुक्तंवदिष्यसि ॥ ४१ ॥ प्रकृतेरन्यथाभावमुत्पातंविदुरुत्तमाः
॥ ४२ ॥ मारीचउवाच ॥ भर्तुरप्रतिकूलत्वंनारीणांधर्मउच्यते ॥ प्रतिकूलानुकूलावाममशीघ्रंवदस्वतत् ॥ ४३ ॥ तूष्णींभूत्वाथसासाध्वीभर्तें
त्येवविचार्यतम् ॥ निर्ययौतेनसाबालावनमध्येगतासती ॥ ४४ ॥ अथमध्याह्नकालेऽसौक्रियतामाह्निकक्रियाः ॥ राक्षसोऽथवचःश्रुत्वानानुष्ठान
स्थलंत्विह ॥ ४५ ॥ यत्रतत्रास्तिगन्तव्यमितोगच्छावहेततः ॥ किञ्चित्प्रदेशंगत्वातुगुहांवीक्ष्यसरस्तथा ॥ ४६ ॥ इहस्थानंहिमेस्थातुंकार्यंस्नानमथ
प्रिये ॥ इत्युक्त्वासरसिस्नात्वाफलाहारंप्रकल्प्यच ॥ ४७ ॥ भोजनावसरेप्राप्तेकलादध्यावुमांशिवम् ॥ अयंधवोममनवाइतिध्यानपराभवत् ॥
॥ ४८ ॥ अथध्यानेनतंचोरंनिश्चित्यचपतिव्रता ॥ भीतातिनम्रवदनाअश्रुपूर्णमुखीतदा ॥ ४९ ॥ कष्टमापतितंपापमित्युक्त्वानिपपातच ॥
रुदतींतामथोदृष्ट्वाराक्षसःपापनिश्चयः ॥ ५० ॥ धर्षितुंतामथारेभेनचैतद्धर्षणंप्रति ॥ बलात्कारमथोकर्तुंयतमानेतुराक्षसे ॥ ५१ ॥ आजानु
नाभिपर्यन्तंशैलस्थानमकल्पयत् ॥ शिलासमभवद्धस्त्रंराक्षसोवीक्ष्यतामथ ॥ ५२ ॥ इत्येवंतांहनिष्यामिखादयिष्याम्यतःपरम् ॥ इत्युक्त्वा
भ्रामयित्वासिंशिरश्छेत्तुंप्रचक्रमे ॥ ५३ ॥ कलाहमत्पतिर्ज्ञात्वाशापंदास्यतिमाहर ॥ इत्युक्तमात्रेवचसिशिरश्चिच्छेदराक्षसः ॥५४॥ प्राप्तायांदुर्मृतिं
तस्यामथशैवाःसमागताः ॥ दूताविचित्राभरणाःसर्वायुधधराःशुभाः ॥ ५५ ॥ एतांविमानमारोप्यशिवालोकमुपागमन् ॥ तामागतांगिरिसुता
हर्षेणप्रतिपूज्यच ॥५६॥ स्वपादप्रणतांशुद्धामुमावाक्यमभाषत ॥ पातिव्रत्येनतेतुष्टाअभीष्टंप्रददामिते ॥ ५७ ॥ कलोवाच ॥ दासीभावंप्रयच्छत्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वत्पादाब्जंममप्रियम् ॥ प्रार्थ्यैः किमन्यैर्बहुभिस्तथास्त्विति शिवाब्रवीत् ॥ ५८ ॥ इन्द्रादिवनिताभिः सापूजिताथकलानिधिः ॥ एतस्मिन्नन्तरेप्राप्तः शोणोमुनिरथोगृहम् ॥ ५९ ॥ नतत्रदृष्ट्वातांभार्यांध्यानयोगपरोऽभवत् ॥ रक्षोहृतांमृतांप्राप्तांशिवालोकमुमांप्रति ॥ ६० ॥ उमादत्तवरांचापिदृष्ट्वा ज्ज्ञानचक्षुषा ॥ किञ्चिद्दुःखश्चिरंध्यात्वापरावृत्यमुनिस्तदा ॥ ६१ ॥ श्वशुरंगतवान्सोऽथदेवरातंमुनीश्वरः ॥ निवेद्यसर्वंसहितोविश्वामित्रमगान्मुनिम् ॥ ६२ ॥ निवेद्यतद्वसिष्ठस्यवसिष्ठोऽप्याहतान्मुनीन् ॥ गत्वाकैलासमादौतुदृष्ट्वादेवंमहेश्वरम् ॥ ६३ ॥ अनुज्ञांशिवतोलब्ध्वापार्वतीमन्दिरेगताः ॥ देव्यैविज्ञाप्यतत्सर्वंयथार्थंप्रवदामतत् ॥ ६४ ॥ तथेत्युक्त्वामुनिवराःकैलासंशङ्करालयम् ॥ गत्वाप्रणम्यदेवेशंवीरभद्रेणपूजिताः ॥ ६५ ॥ विज्ञापयामासुरिदंशोणभार्याहृतेतिच ॥ शिवःप्राहमुनीन्द्रांस्ताञ्ज्ञातमेवमयात्विदम् ॥ ६६ ॥ अकालमरणंत्वस्याआयुर्वर्षशतंस्थितम् ॥ अकालमृत्युयुक्तानांपुनर्जीवनमस्तिच ॥६७॥ दशपुत्रप्रसूर्वीरारूपसौभाग्यवत्यपि ॥ भवद्भिरितिनिश्चित्यसमागतमिहद्विजाः ॥ ६८ ॥ यमलोकगतानांतुसर्वमेतद्विनिश्चितम् ॥ ममलोकगतानांचगतिरन्यानविद्यते ॥ ६९ ॥ अनयाकीर्तितंनामप्राणनिर्गमनेपुरा ॥ तेनायमलिपिर्मृष्टाकथमायुष्यनिर्णयः ॥ ७० ॥अथवागिरिजायैचनिवेदयतकृत्स्नशः ॥ अथतेपार्वतीपाददर्शनायगताद्विजाः ॥ ७१ ॥ प्रणम्यमातरंसर्वेविश्वामित्रोऽब्रवीदिदम् ॥ दीनानाथाकृशाभार्याप्रनष्टपितृकाञ्छिशून् ॥ ७२ ॥ रक्षयित्वापुरामातरिष्टदात्वंसदाह्यभूः ॥ कलापौत्रीममैवेयंत्वामाराध्यपतिंत्वमुम् ॥ ७३ ॥ शोणंलब्धवतीमातस्त्वत्पूजायाःफलंत्विदम् ॥ तपसालभ्यतेऽपर्णेदानेनयदिवापिच ॥ ७४ ॥ व्रतोपवासैरथवाकलासालभ्यतेमया ॥ एतयापरिविष्टान्नंभोक्तुमिच्छामितत्कथम् ॥ ७५ ॥ पार्वत्युवाच ॥ यादृशीचेष्यतेभार्यातादृशीदीयतेमया ॥ नैनांत्यक्तुमहंशक्ताकिंवात्वंमन्यसेमुने ॥ ७६ ॥ विश्वामित्रउवाच ॥ मातात्वमित्येवमयाअविशङ्कितमीरितम् ॥ शोणोमुनिरयंमातस्तवविज्ञापयिष्यति ॥ ७७ ॥ शोणउवाच ॥ तामेवभार्यांप्रतिमेप्रीतिरस्त्युक्तत्कटासति ॥ सैवमेदीयतांभार्याचान्यथामरणंभवेत् ॥ ७८ ॥ पार्वत्युवाच ॥ भार्यापतीसमावेवविषमौतुविगर्हितौ ॥ तवचासदृशीचेयंसदृशींप्रददाम्यहम् ॥ नचमन्मन्दिरेप्राप्तांत्यक्ष्येदेहविवर्जिताम् ॥७९ ॥ शोणउवाच ॥ यदिनोदीयतेचेयंभार्यामन्यांममप्रियाम् ॥ राज्यंमहेश्वरेभक्तिंप्रयच्छवरमुत्तमम् ॥ ८० ॥ भविष्यत्येवमेवैतदित्युक्त्वाचाब्रवीन्मुनीन् ॥ भोक्तव्यमिहयुष्माभिर्ममास्मिन्दिवसत्रयम् ॥ ८१ ॥ प्रतीन्दुवारेदेवस्यमहेशस्यैवतुष्टये ॥ भोजनीयाःसदाकालमष्टौविप्रामुनीश्वराः ॥ ८२ ॥ इच्छयायत्रकुत्रापिव्रतमेतदुपक्रमेत् ॥ वत्सरे

१ 'नष्टा यमलिपिः स्पष्टा' इ० पा० । २ अस्मै शोणाय इति शेषः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परिपूर्णेतुमहाराजतमीश्वरम् ॥ ८३ ॥ चतुर्निष्कप्रमाणेनतदर्द्धेनैवकारयेत् ॥ श्वेतवस्त्रयुगंसूक्ष्मंचामरेव्यजनेतथा ॥ ८४ ॥ पादुकोपानहंछत्रं
सर्वंविप्रेनियोजयेत् ॥ स्वशक्त्यादक्षिणांदत्त्वाब्राह्मणांश्वविसर्जयेत् ॥ ८५ ॥ एतदुद्यापनेकुर्यादादौमध्येतथासुधीः ॥ दिनेदिनेतथापूजा
सोमस्यपरमात्मनः ॥ ८६ ॥ तत्पुरुषस्यविद्महेमहादेवस्यधीमहि ॥ तन्नोरुद्रःप्रचोदयात् ॥ ८७ ॥ इतिपूजामन्त्रः ॥ स्थण्डिलेपूजयेद्देवं
प्रतिमायामथापिवा ॥ एकभक्तंस्वयंकुर्याद्ब्रह्मचर्यसमन्वितम् ॥ ८८ ॥ एतत्सोमव्रतंप्रोक्तंशिवतुष्टिप्रदंशुभम् ॥ यएवंकुरुतेभक्त्यानारीवापुरुषो
ऽपिवा ॥ ८९ ॥ छायेवशङ्करस्यासौनित्यमेवानुवर्तते ॥ अद्यसोमदिनंप्राप्तंमध्याह्नात्परतोभुजिः ॥ ९० ॥ यूयंचसर्वेमुनयःकृतपौर्वाह्णिकक्रियाः ॥
माध्याह्निकींक्रियांकृत्वाभोक्तुमर्हथसत्तमाः ॥ ९१ ॥ मातुर्वचनमाकर्ण्यतथेत्युक्त्वानमस्यच ॥ अनुष्ठानायतेसर्वेगताभागीरथींनदीम्॥ ९२ ॥
सङ्गमेमध्यतोवृत्तेकृत्वामाध्याह्निकींक्रियाम ॥ विश्वेशपूजांकृत्वाचषोडशैरुपचारकैः ॥ ९३ ॥ अथतेपार्वतीगेहंगत्वादेवींप्रणम्यच ॥
लोकमातुर्नियोगेनशालङ्कायनकात्मजः ॥ ९४ ॥ पादप्रक्षालनमुखानुपचारानकल्पयत् ॥ पञ्चगन्धकमादायतान्मुनीनभ्यलेपयत् ॥ ९५ ॥
राज्यंचमहदाप्नोतियोदद्यात्पञ्चगन्धकम् ॥ पञ्चबाणसमोभूत्वास्त्रीणांवल्लभतामियात् ॥ ९६ ॥ विष्णवेयोहिदद्यात्तुसोऽपिमारसमोभवेत् ॥
कामीत्वकामीयःकुर्यात्कैलासेपञ्चवत्सरान् ॥ ९७॥ सर्वगन्धसमोपेतोभोगीचेष्टार्थसंयुतः ॥ यथेष्टवर्तनोभूत्वाततोजायेतभूमिपः ॥ ९८ ॥ कस्तूरी
चन्दनंचन्द्रमगरुद्वितयंतथा ॥ पञ्चगन्धंसमाख्यातंसर्वकार्येषुशोभनम् ॥ ९९ ॥ विलिप्तपञ्चगन्धेषुब्राह्मणेषुमहात्मसु ॥ आसीनेषुतदाभ्यागा
द्ब्राह्मणःस्थविरःकृशः ॥ १०० ॥ उन्मत्तवेषोदिग्वासाजराजर्जरितस्त्वरी ॥ खल्वाटःश्वासकासीचबहुहिक्कीक्षुधान्वितः ॥ १ ॥ लालास्नुतः
श्मश्रुकूर्चःश्लेष्मानम्रःस्खलत्पदः ॥ द्व्यष्टवर्षातथानारीसर्वाभरणभूषिता ॥ २ ॥ रूपलावण्यसंयुक्तालोकोत्कृष्टस्वरूपिणी ॥ पुरुषान्रूपसंयुक्तान्वी
क्षन्तीचततस्ततः ॥ ३ ॥ गायन्तीत्वथनृत्यन्तीतंदृष्ट्वाहसतीपतिम् ॥ प्रबाधतेवृद्धधवंशीघ्रमेहिकुंशाधम ॥ ४ ॥ आलम्ब्यत्वत्करंवृद्धदुःखितानित्य
मस्म्यहम् ॥ भूषणंवसनंघ्राणंस्रग्विलेपनमेवच ॥ ५ ॥ हासोगीतिस्तथापानंमण्डनंशोभनंगृहम् ॥ सर्वमृतुसमृद्धिश्चकामस्यैवाभिवृद्धये ॥ ६ ॥
सर्वेषामेवकामानांरतिरेकाप्रयोजनम् ॥ सुखानिसर्वाण्येकत्ररतिरेकत्रचस्थिता ॥ ७ ॥ तुलयातुलितंसर्वंरतिःशतगुणाधिका ॥ तन्मादृशी
समासाद्यभवन्तंकिंकरिष्यति ॥ ८॥ इतिचान्यानिवाक्यानिब्रुवाणागृह्यवैकरे ॥ तदुत्तरमुवाचेदंकिंकुर्मोभाग्यमीदृशम् ॥ ९ ॥ मामारय

१ 'तदा' इ० पा० । २ 'क्षुधा मम' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुरुक्त्यात्वंमांविज्ञायाथचेदृशम् ॥ एतादृशोद्विजःप्रायात्पार्वतीमन्दिरंतदा ॥ ११० ॥ अविज्ञायैवगिरिजामिदंवचनमब्रवीत् ॥ ११ ॥ द्विज
उवाच ॥ अन्नार्थिनमिहप्राप्तंविद्धिमामतिथिंमुने ॥ भोजनावसरेप्राप्तंब्राह्मणान्नहिभोजय ॥ १२ ॥ तद्भार्यावचनंप्राहकमुनियोंषिदेवहि ॥ अन्धस्य
वचनंसर्वमेवमेतादृशंदृढम् ॥१३॥ पार्वत्युवाच ॥ प्रक्षाल्यचरणावेतमासनेचोपवेशय ॥ जाम्बूनदकृतेऽतीवभोज्येनातर्पयद्विजम् ॥ १४ ॥ सुरत्नच
षकोपेतममृतंब्रह्मवादिनीम् ॥ अरुन्धतीमथाहूयपर्यवेषयदम्बिका ॥ १५ ॥ कलाचारुन्धतीचैवअनसूयापतिव्रता ॥ परिवेषंपदार्थानांस्रग्गन्धा
क्षतभूषणाः ॥ १६ ॥ अकुर्वन्नन्धिकावाक्यात्षड्रसानांपृथक्पृथक् ॥ भुञ्जानेषुतुविप्रेषुदिग्वासाब्राह्मणाकृतिः ॥ १७ ॥ क्षणेनबुभुजेसर्वंदातुंनो
शेकुरङ्गनाः ॥ अथसागिरिजादेवीस्वयंदातुंप्रचक्रमे ॥ १८ ॥ यथादत्तमशेषंतुक्षणेनाश्नातिसद्विजः ॥ भाण्डस्थितमशेषंचभोक्तुमैच्छत्प्रियायुतः॥
॥ १९ ॥ तथाम्बिकासमादायप्रादादक्षय्यमस्त्विति ॥ अथवामकरेणासौभोक्तुमैच्छत्ततःसती ॥ १२० ॥ तत्राप्यक्षय्यमेवास्तुतवान्नमितिचार्प
यत् ॥ करान्तरमथोत्पाद्यभोक्तुमैच्छद्द्विजोत्तमः ॥ २१ ॥ एवंकरसहस्रंचकृत्वैच्छद्भोजनंद्विजः ॥ दत्त्वादत्त्वापुनर्देवीसन्तुष्टानचकोपना ॥ २२ ॥
नचित्तमन्यथाकर्तुंशक्यमस्याइतिद्विज ॥ प्रक्षाल्यहस्तौचरणौहस्तार्पितसुगन्धवान् ॥ २३ ॥ पार्वतींवाक्यमाहेदंतोषितोऽहंवरंवृणु ॥ २४ ॥ पार्व
त्युवाच ॥ ममदातुंवरंशक्तोयदित्वंब्राह्मणोत्तम ॥ वरेणममकिंकार्यंशङ्करोमेयतःपतिः ॥ २५ ॥ तदाहब्राह्मणोदेवींशङ्करःकीदृशस्त्विति॥सदृशोऽसौ
त्वयानोवात्वद्योग्योनान्यथाभवेत् ॥२६॥ स्त्रीवल्लभत्वमप्येवरूपंदाक्ष्यंशुभाङ्गना ॥ नोचेदेतादृशीभार्यामदधीनाकथंभवेत् ॥२७॥ पार्वत्युवाच ॥
त्वद्भार्यावचनंश्रुत्वातववाक्यंतथाद्विज ॥ अपलापस्त्वयंब्रह्मञ्छ्रुतंकिंवातथाविषम् ॥ २८॥ ब्राह्मणउवाच ॥ धम्मिल्लंतेकरिष्यामिममाङ्कंत्वं
समारुह ॥ प्रचलेद्यदितेचित्तंपातिव्रत्यंकुतस्तव ॥ २९ ॥ पार्वत्युवाच ॥ ममव्रतंद्विजश्रेष्ठशङ्कराङ्कारोहणम् ॥ अथतच्चित्तमाज्ञायभवान्याःपरमे
श्वरः ॥ १३० ॥ द्व्यष्टवर्षवयाभूत्वासुस्निग्धकचबन्धनः ॥ सुस्निग्धचारुनयनोगोक्षीरसमविग्रहः ॥ ३१ ॥ कोटिकन्दर्पलावण्यःसर्वाभरणभू
षितः ॥ स्वपार्श्वस्थितनार्यंसेप्रसारितभुजद्वयः ॥३२ ॥ गायन्मन्दंतयासाकमुमयापटुतायथा ॥ अथतांपार्वतींशम्भुःकरेणाकृष्यचस्मयन् ॥३३॥
विन्यस्यहस्तौवनिताद्वयांसेगायन्समस्ताभरणःप्रसन्नदृक्॥ननर्तचानन्दसमृद्धगात्रोमुनीन्द्रगीतश्चसकालवेलम्॥३४॥एतादृशंशिवंध्यात्वाजन्मकोटि
शतेष्वपि ॥ नदुःखंजायतेतस्यसदाहर्षश्चजायते ॥ ३५ ॥ अथस्तुतोमुनिवरैर्नारींकृत्वाहरिंततः ॥ अथसापार्वतीतुष्टादेवंप्राहपिनाकिनम् ॥ ३६ ॥
पार्वत्युवाच ॥ किमित्येतादृशंभावमास्थायत्वमिहागतः ॥ नारींकृत्वातथाविष्णुंकिंप्रकृत्यानचागतौ ॥ ३७ ॥ शिवःप्राहव्रतेचात्रह्यतिथेर्भो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जनंशुभम् ॥ जानेसिद्धिमथोयेषांविषादोनाभिजायते ॥ ३८ ॥ जातेविषादेतुव्रतमसम्यगितिनिश्चयः ॥ सोमवाराःसमायान्तियावन्तोऽब्दश
तानितु ॥ ३९ ॥ तावन्तिमत्पुरेदेविसर्वभोगसमन्वितः ॥ सभार्यपुत्रबन्धुश्चवेदोक्तायुष्यजीवितः ॥ पश्चाद्वाराणसींगत्वामृतोमुक्तिमवाप्स्यति ॥
॥ १४० ॥ शम्भुरुवाच ॥ अथदेवेस्थितेतत्रमुनयस्त्रिःप्रदक्षिणम् ॥ कृत्वापञ्चनमस्कारान्पुनःकृत्वाप्रदक्षिणम् ॥ ४१ ॥ पुनश्चदण्डवद्भूत्वाविसृष्टा
निर्ययुस्ततः ॥ अथशोणःशोभिताङ्गींभार्यामापद्मनिन्दिताम् ॥ ४२ ॥ राज्यंचभारतेवर्षेधर्मेणापालयद्द्विजः ॥ मानुषानखिलान्भोगान्बुभुजेशिवभ
क्तिमान् ॥ ४३ ॥ नित्यंदेवार्चनपरोनित्यंब्राह्मणपूजकः ॥ नित्यदातानित्ययाजीनित्यश्रोतापुराणकम् ॥ ४४ ॥ मृतःसगतवाँल्लोकंशङ्करस्यविभोः
शुभम् ॥ नामकीर्तनमाहात्म्यंप्रसङ्गात्परिकीर्तितम् ॥ ४५ ॥ शृण्वतांसर्वपापघ्नंभक्तानांचतथानृप ॥ सर्वकल्याणदंनित्यंसुभार्याराज्यदंशिवम् ॥
॥४६॥ शिवभक्तिप्रदंगोप्यंयस्यकस्यापिनेरयेत् ॥१४७॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशिवराघवसंवादेशिवनाममाहात्म्येद्वादशोत्तरशततमो
ऽध्यायः ॥ ११२ ॥ श्रीरामउवाच ॥ खेदृश्यन्तेविमानस्थानानारूपधराःशुभाः॥सर्वकामफलोपेताःसुभार्याःशतयोषितः ॥ १ ॥ सह
स्रनरनारीभिःपूज्यमानाःपदेपदे ॥ गायन्तिविंशतिर्योषारूपलावण्यकोमलाः ॥ २ ॥ करङ्कवाहिनीचैकाचामरासक्तबाहवः ॥ ताल
वृन्तद्वयंनार्योवीजयन्तिप्रगृह्यवै ॥ ३ ॥ सचक्रेचाङ्कमध्येऽस्याउपधानंतथापरः ॥ एकस्याःकरयोर्हस्तःस्तावकानेकसंयुतः ॥ ४ ॥
नानाविधपरीहासकृतोत्फुल्लमुखाम्बुजः ॥ एकैकत्रविमानेतुदृश्यतेचन्द्रदीधितिः ॥ ५ ॥ स्त्रीशतेषुविमानेषुदृश्यतेचेश्वरःशुभः ॥ एते
किंपुण्यकर्तारोविष्णुमायाथवामुने ॥ ६ ॥ शम्भुरुवाच ॥ एतेहिब्राह्मणाःपुण्यागृहस्थाश्रमवासिनः ॥ येषामेवचसुग्रामोदत्तोदशर
थेनते ॥ ७ ॥ मच्चित्तानांचतेषांतुकदाचिदभवन्मतिः ॥ यथेहसुखिनःसर्वेवयंचान्योपजीविनः ॥ ८ ॥ अस्मानेवानुजीवन्तिशतशो
मनुजाइह ॥ येनपुण्येनचवयंसर्वेकामानुमोदिनः ॥ ९ ॥ सुखीकृतोपचाराश्चसर्वेराज्यसुखान्विताः ॥ जरामरणहीनाश्चयुवानःसर्वदैवहि ॥ १० ॥
विचार्यैवंद्विजाःसर्वेवसिष्ठस्याश्रमंययुः॥आगतानथसम्पूज्यवसिष्ठोवाक्यमुक्तवान् ॥११॥ किमर्थमागतायूयंशीघ्रंब्रूतद्विजोत्तमाः॥१२॥द्विजाऊचुः॥
वयमिच्छामहेसर्वेसर्वसम्पत्समन्विते ॥ विमानेकामगेरोढुंतत्सम्पादयनोगुरो ॥ १३ ॥ तत्तेषांचिन्तितंश्रुत्वावसिष्ठोवाक्यमब्रवीत् ॥ पुराणंसर्वदा
विप्राःश्रोतव्यंपापनाशनम् ॥ १४ ॥ धर्मश्चार्थश्चकामश्चमोक्षस्तत्रैवदृश्यते ॥ तथेत्युक्त्वाथमुनयःपुराणकुशलंमुनिम् ॥ १५ ॥ जग्मुरङ्गिरसंश्रेष्ठंसर्व
शास्त्रविशारदम् ॥ सर्वागमपुराणज्ञंसदासत्कर्मचारिणम् ॥१६॥ इदमूचुर्नमस्कृत्यवयंसफलजीविनः ॥ कृतकृत्यावयंब्रह्मन्साक्षाद्दृष्टोऽसियन्मुने ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १७ ॥ अङ्गिराउवाच ॥ यदर्थमागतायूयंतत्कार्यंकरवाण्यहम् ॥ पुराणंश्रोतुकामास्तुयूयमत्रसमागताः ॥ १८ ॥ कीर्तयिष्येविधानंवःसमस्ता
घविनाशनम् ॥ सर्वज्ञानप्रदंदेवंतत्त्वविज्ञानसम्भवम् ॥ १९ ॥ शिवभक्तिप्रदंहृद्यंविष्णुभक्तिप्रदंशुभम् ॥ विचित्रस्वगतिप्राप्तिज्ञानदंरमणीप्रदम् ॥
॥ २० ॥ नानाविधशुभज्ञानंरतितन्त्रप्रकाशकम् ॥ भुक्तिमुक्तिप्रधानंचविधिदर्शनदीपकम् ॥ २१ ॥ विचित्रभक्तिकथनंभक्तिसाहसकीर्तनम्॥
॥ व्रतप्रतिष्ठादानादिभस्मपूजाविधिप्रदम् ॥ २२ ॥ पुराणंपाद्मसुदितंब्रह्मपद्मोपनिर्वृतम् ॥ महेश्वरेणकथितंप्रमथाकृतिवर्णनम् ॥ २३ ॥
एतदन्यत्रकथितंपुराणेपाद्मएवतु ॥ दिलीपेनपुरापृष्टोवसिष्ठःप्रोक्तवानिदम् ॥ २४ ॥ तच्छृणुध्वंमुनिवराज्ञानंसर्वंभविष्यति ॥ अथतद्वच
नाद्विप्राःपुराणश्रवणेरताः ॥ २५ ॥ कथंश्रोतव्यमधुनाकिंकृत्वेत्यब्रुवन्मुनिम् ॥ सोऽपिसर्वंसमाचष्टशृणुधर्मंसनातनम् ॥ २६ ॥ नमस्कृत्यपुराणज्ञं
दद्याच्चार्घासनंततः ॥ निषीदतत्रचेत्युक्त्वागन्धपुष्पैःसमर्चयेत् ॥ २७ ॥ आत्मयोगंचताम्बूलमधिकंवासमर्पयेत् ॥ ब्रूहिपुण्यकथांब्रह्मन्पौरा
णिकीमितीरयेत् ॥ २८ ॥ नखट्वासनमारुह्यनोच्चासनमथापिवा ॥ नीचासनोवैशृणुयाद्धर्मकामार्थसिद्धये ॥ २९ ॥ शृण्वित्युक्त्वापुराणज्ञ
इमंमन्त्रमुदीरयेत् ॥ नमोहरिंहरमथोगणेशंभारतीमतः ॥ ३० ॥ इष्टदेवंनमस्कृत्यपुराणंवक्तुमर्हति ॥ अर्द्धयामंप्रतिदिनंयदिवापीच्छयाभवेत् ॥
॥ ३१ ॥ एवंपाठसमाप्तिंचश्रुत्वाकृत्यंसमाचरेत् ॥ श्रोतुश्चतूष्णींमननंतूष्णींश्रवणमेववा ॥ ३२ ॥ अन्यथाभारतीक्रुध्येत्तत्क्रोधान्मूकता
भवेत् ॥ तस्मात्पुराणश्रोत्राचताम्बूलादिसमर्पणम् ॥ ३३ ॥ वक्तुश्चजीविकाकार्यास्वसामर्थ्यानुसारतः ॥ पुराणप्रक्रमेदेयंसचेलोद्गमनीय
कम् ॥ ३४ ॥ सूक्ष्माम्बरमथोवापिवस्त्रद्वितयमर्पयेत् ॥ आसनंतुमहच्चित्रंरम्यमूर्जस्वलंमृदु ॥ ३५ ॥ सुवर्णंवातथादद्याद्गोभूगेहादिकंतथा ॥
एतत्समस्तंविप्रेन्द्राद्दक्षिणामूर्तिनापुरा ॥ ३६ ॥ शङ्करेणमुनीनांहिभाषितंचदिवौकसाम् ॥ अथतेमुनयःसर्वेतंप्रणम्यासनस्थितम् ॥
॥ ३७ ॥ पृथक्पृथक्चताम्बूलंदत्त्वाशुश्रूषवःस्थिताः ॥ तेनापिकथितंसर्वंपुराणंसर्वसम्प्रदम् ॥ उपान्ताध्यायपर्यन्तंश्रुतवन्तोद्विजोत्तमाः ॥
॥ ३८ ॥ दिलीपउवाच ॥ कामगेनविमानेनसर्वसम्पत्समृद्धिना ॥ सर्वतःसुखयुक्तेनपुण्यस्थानमुपस्थितम् ॥ ३९ ॥ वसिष्ठउवाच ॥
नालंपृष्टंत्वयाराजन्नितोऽप्यतिशयान्तरैः ॥ क्रीडमानाभविष्यन्तियेनतत्पुण्यमुच्यते ॥ ४० ॥ सुधाधवलितंकृत्वाशिववेश्मसमन्ततः ॥
स्त्रियोरूपविलासाढ्याःसर्वालङ्कारभूषिताः ॥ ४१ ॥ नानासुगीतकुशलानानानृत्यविशारदाः ॥ चतस्रोऽष्टौषडथवामर्दलध्वनिकाःस्त्रियः ॥ ४२ ॥

१ 'दिनसमाप्तिं च' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वशिन्यौद्वआवजिक्यौकोणिकाधमनेउभे ॥ लासिक्यस्तुचतस्रःस्युःसन्तुद्वैकाथगायिका ॥४३॥ एकोद्वेवासुगीतज्ञेऽमुखरेहिप्रकीर्तित ॥ कोणवाद्य
कृतेद्वेतुतूष्णींभूताःषडष्टवा ॥ ४४ ॥ सर्वारूपविलासिन्यःसर्वाश्चापतितस्तनाः ॥ रतितन्त्राधिकुशलास्ततएवाविशङ्किताः ॥ ४५ ॥ सुसूक्ष्मवस्त्र
वेषाश्चविद्युचञ्चलदृष्टयः ॥ एतादृशीभिर्योषाभिर्येननृत्यंहिकारितम् ॥ ४६ ॥ एकस्मिन्दिवसेराजन्वत्सरान्सविमानगः ॥ शतस्त्रीवीक्षित
मुखोयुवाबहुभिरर्चितः ॥४७॥ आनन्दपोषसम्पूर्णःक्रोधेर्ष्यादिविवर्जितः ॥ पञ्चगन्धविलिप्ताङ्गःसचन्द्राहिदलाननः ॥ ४८ ॥ सूर्योपमस्तुयोपाश्च
सर्वास्तादृशभान्विताः ॥ सद्योविकसितामोदिपारिजातकृतस्रजः ॥ ४९ ॥ सर्वाविकसितारोहिरक्तसन्धिकृतस्रजः ॥ धम्मिल्लेवक्षसितथाबिभ्रत्यः
सुस्मिताधराः ॥५०॥ चरत्येतादृशीभिस्तुनृत्यगीतानुमोदितः ॥ एवंविमानगोभूत्वाउषित्वाकालमक्षयम् ॥ ५१ ॥ पश्चाज्जायेतनृपतिरेवंकृत्वापुन
स्तथा॥राज्यंस्वर्गफलंभुक्त्वाशिवभक्तोभविष्यति ॥५२॥ शम्भुरुवाच ॥ दिलीपायवसिष्ठोक्तंमुनिभ्योऽवददङ्गिराः॥तेतथाकृतवन्तश्चतौर्यत्रिकमुमा
पतेः ॥ ५३ ॥ श्रुत्वापुराणंपाद्मंचसमग्रंसुखिनोऽभवन् ॥ तएतेब्राह्मणाराम विमानवरमास्थिताः ॥ ५४ ॥ दृश्यन्तेखेचसुखिनःसदामुदितमानसाः॥
एतत्तेसर्वमाख्यातंपुराणेषुविनिश्चितम् ॥ ५५ ॥ इतःपरंचकिंभूयःश्रोतुमिच्छसिराघव ॥ ५६ ॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशिवराघव
संवादेत्रयोदशोत्तरशततमोऽध्यायः ॥ ११३ ॥ रामउवाच ॥ कएषदृश्यतेव्योम्निसर्वाभरणभूषितः ॥ विमानस्थोमहादीप्तमध्याह्नार्कइवापरः ॥ १ ॥
दुष्प्रेक्ष्यःसर्वमर्त्यानांतस्याङ्केचारुहासिनी ॥ अपराश्रीरिवभ्रहांस्तथापञ्चसुयोषितः ॥ २ ॥ गायन्तिमधुरांगीतिंसुभ्रूभङ्गनिरीक्षणैः ॥ मन्दस्मितैःकर
तलशब्दास्फोटिकयातथा ॥३॥ क्वचिद्गलकृतैर्गीतैरन्योन्यकरताडनैः ॥ अन्योन्यमुखमालोक्यप्रलोभैर्गीतपूर्वकैः ॥४॥ क्रीडन्नास्तेमहायोगीपद्मकि
ञ्जल्कसन्निभः ॥ एवंचरितपुण्योऽसौकोऽयमेतद्वदस्वमे ॥५॥ शम्भुरुवाच ॥ एषविप्रःपुरारामसर्वसम्पत्समन्वितः॥ नानाविधसुखोपेतोभार्यापोषण
तत्परः ॥ ६ ॥ अपुत्रोदानहीनश्चदेवतार्चनवर्जितः ॥ पञ्चयज्ञविहीनश्चस्वाध्यायपरिवर्जितः ॥ ७ ॥ प्रातर्मध्याह्नसायाह्नभोजनप्रवणोऽशुचिः ॥
कदाचिदगमद्गेहंगौतमस्यमहात्मनः ॥८॥ त्र्यम्बकस्यगिरौपुण्येनानामुनिगणाश्रिते ॥ तत्रापिशोभितगृहंस्फटिकस्तम्भकल्पितम् ॥ ९ ॥ अगुरुद्रव
कस्तूरीचन्द्रकुङ्कुमचर्चिता ॥ भित्तिर्यस्यचसन्तानकुसुमामोदसौष्ठवम् ॥१०॥ कस्तूरिकापुष्परसमुत्सेचितभूतलम् ॥ सूक्ष्मसुश्वेतविविधवितानपरि
शोभितम् ॥११॥ अङ्गणंशोभितमहाकदलीपूगशोभितम् ॥ समीपसरसीजातमञ्जुकूजन्मधुव्रतम् ॥ १२ ॥ पाटीरतरुसम्भूतगन्धपूरितदिङ्मुखम् ॥
शिक्षागीतकृताह्लादगीतपूरितदिङ्मुखम् ॥ १३ ॥ निदाघजनितातापनाशनायविनिर्मितम् ॥ कदलीदलसञ्छादिपावकाकल्पितच्छदम् ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पाटीरतरुसुस्निग्धसान्द्रद्वारकपाटकम् ॥ सौगन्धिकमहामोदिकल्पितान्तरभित्तिकम् ॥ १५ ॥ ईशानभागसुभगरतिकल्पितवेदिकम् ॥ हाटका
कल्पितपदंविचित्रवेदिकायुतम् ॥ १६ ॥ सुस्निग्धनिबिडच्छायंवटमूलोपकल्पितम् ॥ प्रसूनकदलीखण्डसरोभिःप्रान्तशोभितम् ॥
॥ १७ ॥ महावटाग्रसँछन्नतुषारितपयोधरम् ॥ नाकोपवनसम्पन्नविचित्रारामशोभितम् ॥ १८ ॥ वापीकूपतडागाद्यमनेकवनशोभितम् ॥
॥ मन्दम्मन्दंववौवायुर्यत्रगेहेसुखप्रदः ॥ १९ ॥ वादिन्यश्चारुसर्वाङ्ग्योवाद्यानिस्मरसम्पदः ॥ वीणांवेणुंत्रिवेणुंचवादयन्तिवराङ्गनाः ॥
॥ २० ॥ तौर्यत्रिककृतोनार्यश्चतुर्दिक्षुतथोर्द्धतः ॥ सुवर्णादिकपात्रेषुवटकाभस्मनःशुभाः ॥ २१ ॥ वासिताःसर्वगन्धैश्चसुधूपैरपि
धूपिताः ॥ कुशग्रथितसङ्घाश्चअक्षमालाश्चकोटिशः ॥२२॥ कृष्णाजिनसहस्राणिबहिःप्रान्तेस्थितानिच ॥ एतादृशेगृहवरेदेववन्द्योमुनीश्वरः ॥२३॥
कर्पूरादींश्चसंस्थाप्यचतुर्दिक्षुमुनीश्वरः ॥ पाटीरपीठेकर्पूरसिंहासनमकल्पयत् ॥ २४ ॥ सूक्ष्मंश्वेतंचसुस्निग्धमावृत्तंघनसारकैः ॥ सुगन्धवासित
जलैःस्नाप्यक्षीरेणशङ्करम् ॥ २५ ॥ अन्यैश्चवैदिकैर्मन्त्रैःस्नापयित्वासदाशिवम् ॥ दारुचन्द्रोपपीठेतुवस्त्रपीठंनिधायच ॥ २६ ॥ पात्रिकामग्रतः
स्थाप्यस्थापयित्वादलेष्वमून् ॥ एकस्मिन्नक्षताःपात्रेत्वन्यस्मिन्सतिलाक्षताः ॥ २७ ॥ पञ्चगन्धकमेकस्मिन्नन्यस्मिन्नष्टगन्धकम् ॥
काश्मीरंमृगनाभिंतुकर्पूरंचन्दनंतथा ॥ २८ ॥ पात्रेष्वन्येषुविन्यस्यपूजास्थानेप्रकल्प्यच ॥ नानावरणमार्गेणपूजातत्रविधीयते ॥ २९ ॥
लिङ्गमध्येस्थितोदेवःपञ्चवक्त्रःसदाशिवः ॥ तस्यप्रावरणंलिङ्गंशक्तिस्तस्यविधीयते ॥ ३० ॥ शक्तेरावरणंविष्णुर्विष्णोरावरणंविधिः ॥
ब्रह्मप्रावरणंचन्द्रस्तस्यसूर्यस्ततःश्रुतिः ॥ ३१ ॥ दिग्देवतासुतद्व्याप्तिस्तासामावरणंदिशः ॥ दिशामावरणंशम्भुस्तस्यचावरणंगुणाः ॥
॥ ३२ ॥ दशप्रावरणंह्येतच्छिवलिङ्गार्चनंशुभम् ॥ केषाञ्चिन्मतमेतत्स्यादथप्रावरणान्तरम् ॥ ३३ ॥ विद्यावरणमाख्यातंतदुमावरणं
स्मृतम् ॥ विष्णुरावरणंतस्याविष्णोश्चावरणंविधिः ॥ ३४ ॥ ब्रह्मप्रावरणंचन्द्रस्तस्यभानुरथावृतिः ॥ भानोरावरणंचेशइतिषोढावृतिः
स्मृता ॥ ३५ ॥ विधिंविनासमाख्यातंपञ्चावरणमुत्तमम् ॥ शशाङ्कविष्णुशक्तीनामेतदावरणत्रयम् ॥३६॥ अम्बिकावरणंप्रोक्तमेकावरणमुत्तमम् ॥
अथवालोकपालाःस्युरावृतिःसोमपूजने ॥ ३७ ॥ अनावरणमथवापूजनंशस्यतेशिवे ॥ पत्रिकाष्टदलेष्वेवस्थितद्रव्यैर्यजेच्छिवम् ॥ ३८ ॥ पत्रिका
लक्षणंवक्ष्येसर्वकर्मोपयोगिच ॥ स्वर्णेनराजतेनाथताम्रेणाथप्रकल्पितम् ॥ ३९ ॥ मुक्ताशुक्तिनिभंकुर्यात्पत्रिकाष्टदलंशुभम् ॥ पद्मपत्रसमानाष्ट

१ अत्र सर्वत्र पत्रशब्दे पात्रशब्दपाठ एकस्मिन्नेव पुस्तके दृश्यते। २ 'पद्मपत्रसमानेन पत्राकारं प्रकल्पयेत्' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कोणाकारंप्रकल्पेयत्॥४०॥ पलमात्रंततःशस्तंनिर्वृतंविस्तृतंपदम् ॥ अस्थूलमध्यमुपरिपद्माकृतिदलाष्टकम् ॥४१॥ अथवाशक्तिमार्गेणपञ्चपत्रंप्रकल्पयेत् ॥ त्रिपत्रमथवाकुर्याच्छक्तिभावेनतेनच ॥ ४२ ॥ यथास्याच्छोभनंपात्रंतथाकुर्याद्विचक्षणः ॥ शक्त्यान्तरितरुद्राक्षैःकल्पिताष्टशतैःशुभा ॥ ॥ ४३ ॥ मालोपवीतंत्रिंशत्याअष्टकेनप्रकल्पितम् ॥ प्रगण्डयोरथैकैकंबद्धातुद्वेप्रकोष्ठयोः ॥ ४४ ॥ शिरस्येकाधृतातेनकण्ठेचपरमर्षिणा ॥ रुद्राक्षैःस्फटिकैरत्नैःकल्पिताह्यक्षमालिका ॥ ४५ ॥ व्याघ्रचर्मासनंकृत्वापद्मासनगतोमुनिः ॥ आवाहनासनंचार्घ्यंपाद्यंवाचमनीयकम् ॥४६॥ निर्वर्त्य गङ्गासलिलैःस्नापयामासशङ्करम् ॥ अष्टगन्धकसंयुक्तैःपुष्पैर्बकुलपाटलैः ॥ ४७ ॥ स्वर्णभाण्डस्थितैर्वस्त्रशोधितैर्वासितैर्दृढम् ॥ द्वारेताम्रकटाहश्च प्रबन्धद्रोणिनाशुभम् ॥४८॥ गोशृङ्गेणविषाणेनगवयस्यतथाक्वचित् ॥ दक्षिणावर्तशङ्खेनरत्नपात्रैरथापिवा ॥४९॥ स्वर्णैर्वाराजतैर्वापिताम्रैःकांस्यैरथापिवा ॥ स्वर्णैश्चसूक्ष्मकलशैःस्नापयामासचेच्छया ॥५०॥ अथवामृण्मयैःकुर्यात्पद्मपत्रैरथापिवा ॥पालाशैश्चूतजम्ब्वाद्यैःपात्रैःसंस्नापयद्विभुम् ॥ ५१ ॥ स्नानानामथसर्वेषांधारास्नानंविशिष्यते ॥ नमस्तेत्यादिमन्त्रेणशतरुद्रियसंज्ञिना ॥ ५२ ॥ शंचेत्याद्यनुवाकेनशान्तिरूपेणचेश्वरम् ॥ आवृत्यचयथाशक्तिपश्चाद्गङ्गादिविन्यसेत् ॥ ५३ ॥ ततश्चशोभनैःपुष्पैःपत्रैर्बिल्वैःसमर्चयेत् ॥ तुलसीमारुवदलैःकह्लारैश्चमहोत्पलैः ॥ ॥५४॥ नीलोत्पलैरुत्पलैश्चशेषैश्चकरवीरकैः ॥ कर्णिकारैःसिताम्भोजैरपराजितयातथा ॥५५ ॥ तिलाक्षतैरक्षतैश्चश्रीपत्रैस्तिलमिश्रकैः ॥ एवंमहेशमीशानंपूजयामासगौतमः ॥५६॥ कर्पूरागरुकस्तूरीसर्जागरुकचन्दनैः ॥ अन्यैश्चधूपयामासषोडशाथप्रदीपिकाः ॥५७॥कर्पूरवर्त्तिसंयुक्तादीपयन्त्रोपरिस्थिताः॥निवेदितंमहेशायअथनैवेद्यमुत्तमम् ॥५८॥ सुपक्वशालिपिष्टान्नंभक्ष्यंलेह्यंचचोष्यकम् ॥मधुरादिसमोपेतंपञ्चभक्ष्यसमन्वितम् ॥५९॥अनेकपक्वशाकाढ्यमनेकपक्वमिश्रितम् ॥ पानंविंशतिसंयुक्तंद्राक्षारम्भाफलान्वितम् ॥६०॥ सहकारफलैश्चान्यैर्नागरङ्गफलाक्षतैः ॥ शर्करागुडसंयुक्तैराज्यपात्रसमन्वितम् ॥६१॥ सूपाष्टकादिसंयुक्तंयुक्तंमूलफलादिना ॥ यथासम्भवसंयुक्तैरन्यैरप्युपकल्पितम् ॥६२॥ अग्रपुष्पसमोपेतंनैवेद्यंप्रददौमुनिः ॥ सौवर्णपात्रिकान्यस्तनीराजनसहस्रकम् ॥६३॥ सोपहारायदेवायदत्त्वाचैवनमस्यच ॥पूगखण्डानथोघृष्टान्पत्राणिक्षालितानिच ॥६४॥ अपृष्ठाग्राणिसुश्वेतच्छादप्रावृतिकानिच ॥ घनसारकचूर्णंचन्यस्तपत्रत्रयंशुभम् ॥ ६५ ॥ सौवर्णपात्रविन्यस्तमिदंताम्बूलमीश्वरे ॥ अथप्रदक्षिणंकृत्वानमस्कारानन्तरम् ॥ ६६ ॥ अष्टयोषास्ततःप्राप्तास्तन्त्रीवेण्वादिधारिकाः ॥ विचित्रवाद्यवादिन्यःसम्प्राप्तामुनिसन्निधिम् ॥ ६७ ॥ क्षुद्रतालयुगंगृह्य

१ 'पत्रम्' इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

स्वयंगातुंप्रचक्रमे ॥ गौतमेगातुमुद्युक्तेतानंकुर्युरथाङ्गनाः ॥६८॥ मन्दम्मन्दंचवाद्यानिवादयन्तितथापराः ॥ मधुरंगायतिमुनौस्वरामूर्तिभृतस्तथा ॥ ॥ ६९ ॥ प्रानृत्यन्तमहेशाग्रेतदद्भुतमिवाभवत् ॥ एतस्मिन्नन्तरेप्राप्तोभगवान्नारदोमुनिः ॥ ७० ॥ तमागतंगौतमोऽपिसम्पूज्यप्रणिपत्यच ॥ आह चैनंकृतार्थोऽस्मिनचकश्चिन्मयासमः ॥ तवागमनकृत्यंकिंकुतआगमनंतथा ॥७१॥ श्रीनारदउवाच ॥ पातालादागतोऽस्मीहमुक्त्वावैबाणमन्दिरे॥ आयास्यन्तिमहात्मानोबाणशुक्रादयोगृहम् ॥ ७२ ॥ अथक्षणादभ्यगाच्चबाणःपरपुरञ्जयः ॥ विंशत्यक्षौहिणीयुक्तोगजमारुह्यसोऽसुरः ॥ ७३ ॥ अपरंहिगजंशुक्रःप्रह्लादोरथमुत्तमम् ॥ वृषपर्वारथवरंबलिस्तुरगमुत्तमम् ॥ ७४ ॥ आगतानथतान्सर्वानाज्ञायसतुगौतमः ॥ सशिष्योनिर्जगामाथ ह्यादायार्घ्यादिकंतथा ॥ ७५ ॥ गौतमंचापितेवीक्ष्यावरुह्यचगजादिकात् ॥ नमश्चक्रुरथोदैत्यास्तंनमस्कृत्यभार्गवम् ॥ ७६ ॥ आलिङ्गच राक्षसान्सर्वान्पूजयित्वायथाविधि ॥ सेनायाःसन्निवेशंचचकारमुनिपुङ्गवः ॥ ७७ ॥ पादौप्रक्षाल्यशुक्रस्यजलंमूर्ध्निधृतंतथा ॥ विचित्रफलसंयुक्तं दत्तवानर्हणंमुनिः ॥ ७८ ॥ वापीतडागसरसीस्नानपूर्वकृतक्रियाः ॥ सङ्गमेवर्तमानेतुगौतमस्याश्रमेशुभे ॥ ७९ ॥ तद्गेहंतुप्रविश्याथराक्षसास्स पुरोहिताः ॥ देवपूजाप्रपत्तिंचचक्रुःसर्वेद्विजालये ॥ ८० ॥ सद्यःप्रकल्पितायांचवेद्यांशुक्रोऽयजच्छिवम् ॥ तस्यैववामभागेतुप्रह्लादोऽयजदच्युतम् ॥ ॥ ८१ ॥ सोमंचबलिरप्येवमन्येचासुरपुङ्गवाः ॥ अथबाणोऽजयदेवमेकमेवत्रियम्बकम् ॥ ८२ ॥ शुक्रोऽपिभगवन्तंतमुमानाथमपूजयत् ॥ गौतमो ऽप्यथमध्याह्नेपूजयामासशङ्करम् ॥ ८३ ॥ सर्वेशुक्लाम्बरधराभस्मोद्धूलितविग्रहाः ॥ सितेनभस्मनाकृत्वासर्वस्थानेत्रिपुण्ड्रकम् ॥ ८४ ॥ नत्वातुभार्गवंसर्वेभूतशुद्धिंप्रचक्रमुः ॥ हृत्पद्ममध्येसुषिरंतत्रैवभूतपञ्चकम् ॥ ८५ ॥ तेषांमध्येमहाकाशमाकाशेनिर्मलामलम्[1] ॥ तन्मध्येचमहेशानं ध्यायेद्दीप्तिमयंशुभम् ॥ ८६ ॥ अज्ञानसंयुतंभूतंशमलंसर्वसङ्गतम् ॥ तद्देहमाकाशदीपेप्रदहेज्ज्ञानवह्निना ॥ ८७ ॥ आकाशस्यावृतंचाहंदग्ध्वा[2] काशमथोदहेत ॥ दग्ध्वाकाशमथोवायुमग्निभूतंतदादहेत् ॥ ८८ ॥ अब्भूतंचततोदग्ध्वापृथिवीभूतमेवच ॥ तदाश्रितान्गुणान्दग्ध्वाततोदेहंप्रदाह येत् ॥ ८९ ॥ एवंसंदह्यभूतानिदेहोतज्ज्ञानवह्निना ॥ शिखामध्यस्थितंविष्णुमानन्दरसनिर्भरम् ॥ ९० ॥ निष्पन्नचन्द्रकिरणसङ्काशकिरणंशिवम् ॥ शिवाङ्गोत्पन्नकिरणैरमृतद्रवसंयुतैः ॥ ९१ ॥ सुशीतलाततोज्वालाप्रशान्ताचन्द्ररश्मिवत् ॥ प्रसारितसुधारुग्भिःसान्द्रीभूतश्चसम्प्लवः ॥ क्रमेण प्लावितंभूतग्रामंसञ्चिन्तयेत्परम् ॥ ९२ ॥ इत्थंकृत्वाभूतशुद्धिंक्रियाहोमर्त्यःशुद्धोजायतेशुद्धएव ॥ पूजांकर्तुंजाप्यकर्मापिपश्चाद्देवध्याने

१ 'निर्मलासनम्' इ० पा० । २ अहमहङ्कारमित्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्महत्यादिहानिः ॥ ९३ ॥ एवंध्यात्वाचन्द्रदीतिप्रकाशंध्यानेनारोप्याशुलिङ्गेशिवस्य ॥ सदाशिवंदीपमध्येविचिन्त्यपञ्चाक्षरेणार्चनमव्ययंतु ॥
॥ ९४ ॥ आवाहनादीनुपचारांस्तथापिकृत्वास्नानंपूर्ववच्छङ्करस्य ॥ उदुम्बरंराजतंस्वर्णपीठंवस्त्रादिछन्नंसर्वमेवेहपीठम् ॥ ९५ ॥
अन्तेकृत्वाबुद्बुदानांचवृष्टिंपीठेपीठेनागमेकंपुरस्तात् ॥ कुर्यात्पीठेचोर्ध्वकेनागयुग्मंदेवाभ्याशेदक्षिणेवामतश्च ॥ ९६ ॥ जपापुष्पंनागमध्ये
निधायमध्येवस्त्रंद्वादशप्रातिगुण्ये ॥ सुश्वेतेनतस्यमध्येमहेशंलिङ्गाकारंपीठयुक्तंप्रपूज्यम् ॥९७॥ एवंकृत्वाबाणमुख्यादितीशादत्त्वादत्त्वापञ्चगन्धाष्ट
गन्धम्॥पुष्पैःपत्रैःश्रीतिलैरक्षतैश्चतिलोन्मिश्रैःकेवलैश्चप्रपूज्य॥९८॥ धूपंदत्त्वाविधिवत्सम्प्रयुक्तंदीपंदत्त्वाचोक्तमेवोपहारम्॥पूजाशेषंतेसमाप्याथसर्वे
गीतंनृत्यंतत्रतत्रापिचक्रुः ॥ ९९ ॥ अथास्मिन्नन्तरेगौतमस्यप्राप्तःशिष्यःशङ्करात्मेतिनाम्ना ॥ १०० ॥ उन्मत्तवेषोदिग्वासाअनेकावृतिमाश्रितः ॥
क्वचिद्द्विजातिप्रवरःक्वचिच्चण्डालसन्निभः ॥ १ ॥ क्वचिच्छूद्रसमोयोगीतापसःक्वचिदप्युत ॥ गर्जत्युत्पततेचैवनृत्यतिस्तौतिगायति ॥ २ ॥ रोदिति
शृणुतेव्यक्तंपतत्युत्तिष्ठतिक्वचित् ॥ शिवज्ञानैकसम्पन्नःपरमानन्दनिर्भरः ॥३॥ सम्प्राप्तोभोज्यवेलायांगौतमस्यान्तिकंययौ॥बुभुजेगुरुणासाकंक्वचिदु
च्छिष्टमेवच ॥४॥क्वचिच्चलीढेतत्पात्रंतूष्णीमेवाभ्यगात्क्वचित् ॥हस्तंगृहीत्वैवगुरोःस्वयमेवाभुनक्क्वचित्॥५॥ क्वचिद्गृहान्तरेमूत्रंक्वचित्कर्दमलेपनम्॥
सर्वंदातंगुरुर्दृष्ट्वाकरमालम्ब्यमन्दिरम् ॥ ६ ॥ प्रवेश्यस्वीयपीठेतमुपवेश्याभ्यभोजयत् ॥ स्वयंतदस्यपात्रेणबुभुजेगौतमोमुनिः ॥ ७ ॥ तस्यचित्तं
परिज्ञातुंकदाचिदथसुन्दरी ॥ अहल्याशिष्यमाहूयभुङ्क्ष्वेत्युक्त्वाथसाशुभा ॥ ८ ॥ सौवर्णेभाजनेचान्नंनिधायचषकान्तरे ॥ पानादिकमथोदत्त्वा
एकस्मिन्पावकंपुनः ॥९॥ निधायाङ्गारनिचयंकण्टकानांचयंपरे ॥ निधायभुङ्क्ष्वभुङ्क्ष्वेतिसचापिबुभुजेमुनिः ॥ ११० ॥ यथापपौहिपानीयंतथा
वह्निमपिद्विजः ॥ कण्टकानपिभुक्त्वासयथापूर्वमतिष्ठत ॥११ ॥ पुराहिमुनिकन्याभिराहूतोभोजनायच ॥ दिनेदिनेतत्प्रदत्तंलोष्ठमम्बुचगोमयम् ॥
॥ १२॥ कर्दमंकाष्ठदण्डंचभुक्त्वाप्रीत्याथहर्षितः ॥ एतादृशोमुनिरसौचण्डालसदृशाकृतिः ॥१३॥ सुजीर्णोपानहौहस्तेगृहीत्वातुतथाकरे॥अन्त्यजो
चितभाषाभिर्वृषपर्वाणमभ्यगात् ॥१४॥ वृषपर्वेशयोर्मध्येदिग्वासाःसमतिष्ठत ॥वृषपर्वातमज्ञात्वापीडयित्वाशिरोऽच्छिनत् ॥१५॥ हतेतस्मिन्द्विज
श्रेष्ठेजगदेतच्चराचरम् ॥ अतीवकलुषमभवत्तत्रस्थामुनयस्तथा ॥ १६ ॥ गौतमस्यमहाशोकःसञ्जातःसुमहात्मनः ॥ निर्ययौचक्षुषोर्वारिशोकंसन्दर्श
यन्निव ॥१७ ॥ गौतमःसर्वदैत्यानांसन्निधौवाक्यमुक्तवान् ॥ किमनेनकृतंपापंयेनच्छिन्नमिदंशिरः ॥१८॥ ममप्राणाधिकस्येहसर्वदाशिवयोगिनः॥ ॥ १५८ ॥

१ एका एकस्मिन्हस्ते अन्योपानदन्यस्मिकरे–इत्यर्थसङ्गतिर्यथाकथञ्चिद्बोद्धव्या।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ममापिमरणंसत्यंशि[1]ष्यरूपीयतोगुरुः ॥१९॥ शैवानांधर्मयुक्तानांसर्वदाशिववर्तिनाम् ॥ मरणंयत्रदृष्टंस्यात्तत्रनोमरणंध्रुवम्॥१२०॥शुक्रउवाच ॥एनं सञ्जीवयिष्यामिममगोत्रंशिवप्रियम् ॥ किमसौम्रियतेब्रह्मन्पश्यमेतपसोबलम् ॥ २१ ॥ इतिवादिनिविप्रेन्द्रेगौतमोऽपिममारह ॥ तस्मिन्मृतेऽथ शुक्रोऽपिप्राणांस्तत्याजयोगतः ॥ २२ ॥ तस्यापिमृतिमाज्ञायप्रह्लादाद्यादितेस्सुताः ॥ सर्वेमृताःक्षणेनैवतदद्भुतमिवाभवत् ॥ २३ ॥ मृत मासीदथबलंतस्यबाणस्यधीमतः ॥ अहल्याशोकसन्तप्तारुरोदोच्चैःपुनःपुनः ॥२४॥ गौतमेनमहेशस्यपूजयापूजितोविभुः ॥ वीरभद्रोमहायोगीसर्वं दृष्ट्वाचुकोपह ॥ २५ ॥ अहोकष्टमहोकष्टंमाहेशाबहवोमृताः ॥ शिवंविज्ञापयिष्यामितेनोक्तंकरवाण्यहम् ॥ २६ ॥ इतिनिश्चित्यगतवा न्मन्दराचलमव्ययम् ॥ नमस्कृत्यविरूपाक्षमिदंसर्वमथोक्तवान् ॥ २७ ॥ ब्रह्महरीस्थितौतत्रदृष्ट्वाप्राहशिवोवचः ॥ मद्भक्तैःसाहसंकर्मकृतंदृष्ट्वावर प्रदः ॥ २८ ॥ गत्वापश्यामहेविष्णोयुवामप्यागमिष्यथ ॥ अथेशोवृषमारुह्यवायुनाधूतचामरः ॥२९॥ नन्दिकेनसुवेषेणधृतेछत्रेऽतिशोभने ॥ सुश्वे तहेमदण्डेचनान्ययोग्येधृतेविभोः॥१३०॥ महेशानुमतिंलब्ध्वाहरिर्नागान्तकेस्थितः ॥ आरक्तनीलच्छत्राभ्यांशुशुभेलक्ष्यकौस्तुभः ॥३१॥ शिवानु मत्याब्रह्मापिहंसारूढोऽभवत्तदा॥इन्द्रगोपप्रभाकारच्छत्राभ्यांशुशुभेविधिः ॥३२॥ इन्द्रादिसर्वदेवाश्चस्वस्ववाहनसंयुताः ॥ अथतेनिर्ययुःसर्वेनाना वाद्यानुमोदिताः ॥३३॥ कोटिकोटिगणाकीर्णागौतमस्याश्रमंगताः ॥ ब्रह्मविष्णुमहेशानादृष्ट्वातत्परमाद्भुतम् ॥३४॥ स्वभक्तंजीवयामासवामकोण निरीक्षणात् ॥ शङ्करोगौतमंप्राहतुष्टोऽहंतेवरंवृणु ॥ ३५ ॥ गौतमउवाच ॥ यदिप्रसन्नोदेवेशयदिदेयोवरोमम ॥ त्वल्लिङ्गार्चनसामर्थ्यंनित्यमस्तुमहे श्वर ॥ ३६ ॥ वृतमेतन्मयादेवशृणुष्वैतत्रिलोचन ॥ ममशिष्योमहाभागोहेयाहेयादिवार्जितः ॥ ३७ ॥ प्रेक्षणीयंममत्वेननचपश्यतिचक्षुषा ॥ नच घ्राणेनघ्रातव्यंनदातव्यंनचेतरत् ॥३८॥ इतिबुद्ध्वातथाकुर्वन्सहियोगीमहायशाः॥उन्मत्तविकृताकारःशङ्करात्मेतिकीर्तितः ॥ ३९ ॥ नकश्चित्तंप्रतिद्वि ष्यान्नचतंहिंसयेदिति ॥ एतन्मेदीयतांदेवएतेषाममृतिस्तथा ॥१४०॥ श्रीभगवानुवाच ॥ आकल्पमेतेजीवन्तुततोमुक्तिभजन्तुच ॥ त्वयाकृतमिदं वेश्मविस्तृतंविकृतंशुभम् ॥४१॥ तिष्ठामःक्षणमात्रंतुततोयास्याममन्दिरम् ॥४२॥ गौतमउवाच ॥ अयोग्यंप्रार्थयामीशह्यर्थीदोषंनपश्यति ॥ ब्रह्मा द्यलभ्यंदेवेशदीयतांयदिरोचते ॥४३॥ अथेशोविष्णुमालोक्यगृहीत्वातुकरंहरेः ॥ [2]प्रहसन्नम्बुजाभाक्षमित्युवाचसदाशिवः ॥ ४४ ॥ म्लानोदरोऽसि गोविन्ददेयंतेभोजनंकिमु ॥ स्मयंप्रविश्ययदिवास्वयंभुङ्क्ष्वस्वगेहवत् ॥ ४५ ॥ गच्छवापार्वतीगेहंयाकुक्षिंपूरयिष्यति ॥ इत्युक्त्वातत्करालम्बी

१ 'शिष्यच्छद्मा' इ० पा० । २ 'प्रहसन्भुङ्क्ष्वकञ्जाक्ष' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकान्तमगमद्विभुः ॥४६॥ आदिश्यनन्दिनंदेवोद्वाराध्यक्षंयथोक्तवत्॥गौतमंसमुवाचायमुत्तरंविष्णुभाषणम् ॥४७॥ सदाशिवउवाच ॥सम्पादयान्नं
सर्वेषांभोक्तुकामावयंमुने ॥ इत्युक्त्वैकान्तमगमद्वासुदेवेनशङ्करः ॥४८॥ मृदुशय्यांसमारुह्यशायितौदेवतोत्तमौ ॥ अन्योन्यंभाषणंकृत्वाप्रोत्तस्थतु
रुभावपि ॥४९॥ गत्वातटाकंगम्भीरंस्नास्यन्तोदेवसत्तमौ ॥ कराम्बुपानमन्योन्यंपृथक्कृत्वोभयत्रच॥१५०॥मुनयोराक्षसाश्चैवजलक्रीडांप्रचक्रिरे ॥
अथविष्णुर्महेशश्चजलपातानिर्शीघ्रतः ॥५१॥ चक्रतुःशङ्करःपद्मकिञ्जल्काञ्जलिनाहरेः ॥ अवाकिरन्मुखेतस्यपद्मोत्फुल्लविलोचने ॥ ५२ ॥ नेत्रेकेशर
सम्पातान्न्यमीलयतकेशवः ॥ अत्रान्तरेहरेःस्कन्धमारुरोहमहेश्वरः ॥ ५३ ॥ हर्युत्तमाङ्गंबाहुभ्यांगृहीत्वासंन्यमज्जयत् ॥ उन्मज्जयित्वाचपुनःपुन
श्चापिपुनःपुनः ॥ ५४ ॥ पीडितःसहरिःसूक्ष्मंपातयामासशङ्करम् ॥ अथपादौगृहीत्वातुआचकर्षचभ्रामयत् ॥ ५५ ॥ अताडयद्धरेर्वक्षःपातयामास
चाच्युतम् ॥ अथोत्थितोहरिस्तोयमादायाञ्जलिनाततः ॥५६॥ अवाकिरदथोशम्भुमथविष्णुमथोहरः ॥ जलक्रीडैवमभवदथचर्षिगणान्तरे ॥५७॥
जलक्रीडासम्भ्रमेणविस्रस्तजटबन्धनाः ॥ अथसम्भ्रमतस्तेषामन्योन्यजटबन्धनम् ॥५८॥ इतरेतरबद्धासुजटासुचमुनीश्वराः ॥ शक्तिमन्तोऽशक्ति
मतआकर्षन्तिचसव्यथम् ॥ ५९ ॥ पातयन्तोऽन्यतश्चापिक्रोशतोरुदतस्तथा ॥ एवंप्रवृत्तेतुमुलेसम्भूतेतोयकर्मणि ॥ १६० ॥ आकाशेनारदो
हृष्टोननर्तचननादच ॥ विपञ्चींनादयन्वाद्यंललितांगीतिमुज्जगौ ॥ ६१ ॥ सुगीत्याललितायास्तुअगायतविधादश ॥ शुश्रावगीतंमधुरंशङ्करोलोक
भावनः ॥ ६२ ॥ स्वयंगातुंहिललितंमन्दम्मन्दंप्रचक्रमे ॥ स्वयंगायतिदेवेशेमिश्रामङ्गलकैशिकी ॥ ६३ ॥ नारदेनृत्यमानेतुगायतिस्वरभेदिनि ॥
स्वरंध्रुवंसमादायसर्वलक्षणसंयुतम् ॥ ६४ ॥ स्वधारामृतसंयुक्तंगानेनैवमथोऽजयत् ॥ वासुदेवोमर्दलंचकराभ्यामिदमाहनत् ॥ ६५ ॥ अवगाहं
श्चतुर्वक्त्रस्तुम्बुरुर्मुखरोबभौ॥तानकागौतमाद्यास्तुतूष्णींगातुंचवायुतः ॥६६॥ गायकेमधुरंगीतंहनूमतिकपीश्वरे॥म्लानमम्लानमभवत्कृशाःपुष्टास्तदा
भवन् ॥ ६७ ॥ स्वांस्वांगीतिमतःसर्वेतिरस्कृत्यैवमूर्च्छिताः ॥ तूष्णींसर्वेसमभवन्देवर्षिगणदानवाः ॥ ६८ ॥ एकःसहनुमान्गाताश्रोतारःसर्व
एवते ॥ मध्याह्नकालवितते भोजनावसरेसति ॥ ६९ ॥ दुकूलयुगमाधत्तशृण्वन्गीतिंमहेश्वरः ॥ पीतवस्त्रद्वयंविष्णुरारक्तंचतुराननः ॥१७०॥ स्वस्वा
र्हाण्यथसर्वेऽपिकृत्यंकृत्वापिकालिकम् ॥ स्वंस्वंवाहनमारुह्यनिर्गताःसर्वदेवताः ॥ ७१ ॥ गानप्रियोमहेशस्तुजगादप्लवगेश्वरम् ॥ प्लवगत्वं
मयाज्ञतोनिश्शङ्कंवृषमारुह ॥७२॥ ममचाभिमुखोभूत्वागायस्वाशेषगायनम् ॥ अथाहकपिशार्दूलोभगवन्तंमहेश्वरम् ॥ ७३ ॥ वृषभारोहसामर्थ्यं
तवनान्यस्य विद्यते॥तववाहनमारुह्यपातकीस्यामहंविभो ॥७४॥ मामेवारुहदेवेशविहगःशिववाहनः॥तवचाभिमुखंगानंकरिष्यामिविलोकय॥७५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथेश्वरोहनूमन्तमारुरोहवृषंयथा ॥ आरूढंशङ्करेदेवेहनूमान्कन्धराशिरः ॥ ७६ ॥ छित्त्वात्वचंपरावृत्त्यमुखंगायतिपूर्ववत् ॥ शृण्वन्गीतिसुधां शम्भुर्गौतमस्यगृहंगतः ॥ ७७ ॥ सर्वेचाप्यागतास्तत्रदेवार्षिगणदानवाः ॥ पूजितागौतमेनाथभोजनावसरेसति ॥ ७८ ॥ यच्छुष्कदारुसम्भूतंगृहोप करणादिकम् ॥ प्ररूढमभवत्सर्वंगायमानेहनूमति ॥ तस्मिन्गानेसमस्तानांचित्रदृष्टिरतिष्ठत ॥७९॥ द्विबाहुरीशस्यपदाभिवन्दनःसमस्तगात्राभरणो पपन्नः ॥ प्रसन्नमूर्तिस्तरुणःसुमध्येविन्यस्तमूर्द्धाञ्जलिभिःसुरैःस्तुतः ॥ १८० ॥ शिरःकराभ्यांपरिगृह्यशङ्करोहनूमतःपूर्वमुखंचकार ॥ पद्मासनासीन हनूमताञ्जलौनिधायपादंत्वपरंमुखेच ॥ ८१ ॥ पादाङ्गुलीभ्यामथनासिकांविभुःस्नेहेनजग्राहचमन्दमन्दम् ॥ स्कन्धेमुखेत्वंसतलेचकण्ठेवक्षःस्थले चस्तनमध्यमेहृदि ॥ ८२ ॥ ततश्चकुक्षावथनाभिमण्डलेततोद्वितीयंनिदधातिचाञ्जलौ ॥ शिरोगृहीत्वाऽवनमय्यशङ्करःपस्पर्शपृष्ठंचिबुकेनसध्वनि ॥ ॥ ८३ ॥ हारंचमुक्तापरिकल्पितंशिवोहनूमतःकण्ठगतंचकारह ॥ ८४ ॥ अथविष्णुर्महेशानमिदंवचनमुक्तवान् ॥ हनूमतासमोनास्तिकृत्स्नब्रह्माण्ड मण्डले ॥ ८५ ॥ श्रुतिदेवाद्यगम्यंहिपदंतवकिलस्थितम् ॥ सर्वोपनिषदव्यक्तंत्वत्पदंकपिसर्वयुक् ॥ ८६ ॥ यमादिसाधनैर्योगैर्नक्षणंतेपदंस्थितम् ॥ महायोगिहृदम्भोजेबलंस्वच्छंहनूमति ॥८७॥ वर्षकोटिसहस्रेषुतपःकृत्वातुदुष्करम् ॥ त्वद्रूपंनाभिजानन्तिकुतःपादंमुनीश्वराः ॥ ८८ ॥ अहोभाग्यं विचित्रंहिचपलोवानरोमृगः ॥ धत्तेपादयुगंचाङ्क्येयोगिह्यपिनक्षमम् ॥ ८९ ॥ मयावर्षसहस्रंतुसहस्राब्दैस्तथान्वहम् ॥ भक्त्यासम्पूजितोऽपीशपादो नोदर्शितस्त्वया ॥ १९० ॥ लोकेवादोहिसुमहाञ्छम्भुर्नारायणप्रियः ॥ हरिःप्रियस्तथाशम्भोर्नताहृग्भाग्यमस्तिमे ॥ ९१ ॥ सदाशिवउवाच ॥ नत्वयासदृशोमह्यंप्रियोऽस्तिभगवन्हरे ॥ पार्वतीवात्वयातुल्यानचान्योविद्यतेमम ॥ ९२ ॥ अथदेवायमहतेगौतमःप्रणिपत्यच ॥ व्यज्ञापयदमेया त्मन्देवैहिकरुणानिधे ॥ ९३ ॥ मध्याह्नोऽयंव्यतिक्रान्तोभुक्तिवेलाखिलस्यच ॥ अथाचम्यमहादेवोविष्णुनासहितोविभुः ॥ प्रविश्यगौतमगृहंभोज नायोपचक्रमे ॥९४॥ रत्नाङ्गुलीयैरथनूपुराभ्यांदुकूलबन्धेनतडित्सुकाञ्च्या ॥ हारैरनेकैरथकण्ठनिष्कयज्ञोपवीतोत्तरवाससीच ॥ ९५ ॥ विलम्बि चञ्चन्मणिकुण्डलेनसुपुष्पिधम्मिल्लवरेणदेवः ॥ पश्चाङ्गगन्धस्यविलेपनेनबाह्वङ्गदैःकङ्कणकाङ्गुलीयैः ॥ ९६ ॥ इत्थंविभूषितःशिवोनिविष्टउत्तमा सनेस्वसंमुखंहरिंतथान्यवेशयद्वरासने ॥ अन्योन्यसंमुखौस्थितौहरीशौदेवसत्तमौसुवर्णभाजनान्यथोददौसचापिगौतमः ॥ ९७ ॥ त्रिंशत्प्रभेद भक्ष्यकंसुपायसंचतुर्विधंसुपक्वपाकजातकंशतद्वयंप्रकल्पितम् ॥ अपक्वपक्वमिश्रकंशतत्रयंप्रकल्पितंशतंशतंतथासुकन्दशाककंतथामुनिः ॥ ९८ ॥

१ 'पद्माभिवन्धनः' इ० पा० । २ 'कपिस्थितम्' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शाकादिसार्पिपान्वितंददौचपञ्चविंशातिंसुशर्करादिकंतथासुचूतदाडिमादिकम् ॥ मोचाफलंतुगोस्तनींसुखर्जुनागरङ्गकंजम्बूफलंप्रियालुकंविकङ्कतं फलंतथा ॥ ९९ ॥ एवमादीनिचान्यानिद्रव्याण्यर्प्ययथाविधि ॥ दत्त्वाचापोशनंविप्रोभुज्यतामितिचाब्रवीत् ॥ २०० ॥ भुञ्जानेषुचस र्वेषुव्यजनंसूक्ष्मवस्त्रजम् ॥ गौतमःस्वयमादायशिवविष्णूअवीजयत् ॥ १ ॥ परिहासमथोकर्तुमियेषपरमेश्वरः ॥ पश्यविष्णोहनूमन्तंकथंभुङ्क्तेस वानरः ॥ २ ॥ वानरंपश्यतिहरौमण्डकंविष्णुभाजने ॥ चिक्षेपमुनिसङ्घेषुपश्यत्स्वपिमहेश्वरः ॥३॥ हनूमतेदत्तवांश्चस्वोच्छिष्टंपायसादिकम् ॥ त्वदु च्छिष्टमभोज्यंतुतवैववचनाद्विभो ॥ ४ ॥ अनर्हममनैवेद्यंपत्रपुष्पंफलंतथा ॥ मह्यंनिवेद्यसकलंकूपएवविनिक्षिपेत् ॥ अभुक्तेत्वद्वचोनूनंभुक्तेचापि कृपातव ॥ ५ ॥ सदाशिवउवाच ॥ बाणलिङ्गस्वयम्भूतेचन्द्रकान्तेहृ[1]वस्थिते ॥ चान्द्रायणसमंज्ञेयंशम्भोर्नैवेद्यभक्षणम् ॥ ६ ॥ भुक्तिवेलेयमधुना तद्वैरस्यंकथान्तरात् ॥ भुक्त्वातुकथयिष्यामिनिर्विशङ्कंविभुङ्क्ष्वतत् ॥ ७ ॥ अथासौजलसंस्कारंकृतवान्गौतमोमुनिः ॥ ८ ॥ आरक्तसुस्निग्ध सुसूक्ष्मगात्राननेकधाधौतसुशोपिताङ्गान् ॥ तडागतोयैःकृतबीजघर्षितैर्विशोधितैस्तैःकरकानपूरयत् ॥ ९ ॥ नद्याःसैकतवेदिकांनवतरांसञ्छाद्य सूक्ष्माम्बरैःशुद्धैःस्वेततरैरथोपरिघटांस्तोयेनपूर्णान्क्षिपेत् ॥ क्षिप्त्वानालकजातिमास्तपुटकंकङ्कोलकस्तूरिकाचूर्णंचन्दनचन्द्ररश्मिविशदांमालांपुटा न्तांक्षिपेत् ॥ २१० ॥ यामस्यापिपुनश्चवारिवसनेनाशोध्यकुम्भेक्षिपेच्चन्द्रग्रन्थिमथोनिधायबकुलंक्षिप्त्वातथापाटलाम् ॥ ११ ॥ शेफालीस्तबक मथोजलंचतत्रविन्यस्यप्रथमतएवतोयशुद्धिम् ॥ कृत्वाथोमृदुतरसूक्ष्मवस्त्रखण्डेनावेष्टेत्सृणिकमुखंचसूक्ष्मचन्द्रम् ॥ १२ ॥ अनातपप्रदेशेतुनिधाय करकानथ ॥ मन्दवातसमोपेतेसूक्ष्मव्यजनवीजिते ॥ १३ ॥ अथउर्वीशसलिलैःसिञ्चयेत्सृणिकामपि ॥ संस्कृताःस्वायतास्तत्रनरानार्योऽथवा नृप ॥ १४ ॥ तत्कन्यावाक्षालिताङ्गाधौतवस्त्राश्चवासह ॥ मधुपिङ्गलनिर्यासमसान्द्रमगुरुद्रवम् ॥ १५ ॥ बाहुमूलेचकण्ठेचविलिप्यसान्द्रमेवच मस्तकेजाप्यकंन्यस्यपञ्चगन्धविलेपनम् ॥ १६ ॥ पुष्पनद्धसुकेशास्तुताःशुभास्याःसुनिर्मलाः ॥ एवमेवोचितानार्यआत्तकुङ्कुमविग्रहाः ॥ १७ ॥ युवत्यश्चारुसर्वाङ्ग्योनितरांभूषणैरपि ॥ एतादृग्वनिताभिर्वानरैर्वादापयेज्जलम् ॥ १८ ॥ तेऽपिप्रदानसमयेसूक्ष्मवस्त्रालपवेष्टनम् ॥ अथवामकरे न्यस्यकरकंतत्रपश्यहि ॥ १९ ॥ दोरिकान्यस्तमुन्मुच्यततस्तोयंप्रदापयेत् ॥ एवंसत्कारयामासगौतमोभगवान्मुनिः ॥ २२० ॥ महेशादिषुसर्वेषु भुक्तवत्सुमहात्मसु ॥ प्रक्षालिताङ्घ्रिहस्तेषुगन्धोद्वर्तितपाणिषु ॥ २१ ॥ तदासनसमासीनेदेवदेवेमहेश्वरे॥अथनीचसमासीनादेवाःसर्षिगणास्तथा॥

१ 'हृदि स्थिते' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २२ ॥ मणिपात्रेषुसंवेष्टयपूगखण्डान्सुधूपितान् ॥ अकोणवर्तुलान्स्थूलानसूक्ष्मानकृशानपि ॥ २३ ॥ श्वेतपत्राणिसंशोध्यक्षिप्त्वाकर्पूरखण्ड
कम् ॥ चूर्णंचशङ्करायाथनिवेदयतिगौतमे ॥ २४ ॥ गृहाणदेवताम्बूलमित्युक्तवचनेमुनौ ॥ कपेगृहाणताम्बूलंप्रयच्छममखण्डकान् ॥ २५ ॥
उवाचवानरोनास्तिममशुद्धिर्महेश्वर ॥ अनेकफलभुक्तत्वाद्वानरस्तुशुचिःकथम् ॥ २६ ॥ सदाशिवउवाच ॥ मद्वाक्यादखिलंशुध्येन्मद्वाक्यादमृतं
विषम् ॥ मद्वाक्यादखिलावेदामद्वाक्याद्देवतादयः ॥ २७ ॥ मद्वाक्याद्धर्मविज्ञानंमद्वाक्यान्मोक्षउच्यते ॥ पुराणान्यागमाश्चैवस्मृतयोमम
वाक्यतः ॥ २८ ॥ अतोगृहाणताम्बूलंममदद्याःसुखण्डकान् ॥ हरिर्वामकरेणादात्ताम्बूलंपूगखण्डकम् ॥ २९ ॥ ततःपत्राणिसङ्गृह्यततःखण्डा
न्समर्पयत् ॥ कर्पूरमग्रतोदत्तंगृहीत्वाऽभक्षयच्छिवः ॥ २३० ॥ देवेतुकृतताम्बूलेपार्वतीमन्दराचलात् ॥ जयाविजययोर्हस्तंगृहीत्वायान्मुनेर्गृहम् ॥
॥ ३१ ॥ देवपादौततोनत्वाविनम्रवदनाभवत् ॥ उन्नमय्यमुखंतस्याइदमाहत्रिलोचनः ॥ ३२ ॥ त्वदर्थंदेवदेवेशिअपराधःकृतोमया ॥ यत्त्वां
विहायभुक्तंहितथान्यच्छृणुसुन्दरि ॥ ३३ ॥ अथस्वमन्दिरेस्थाप्यदेवदेवविवर्जिते ॥ सर्वबन्धविमुक्तेचमहदेनोमयाकृतम् ॥ ३४ ॥ क्षन्तुमर्हसि
देवेशित्यक्तकोपाविलोकय ॥ नबभाषैवमुक्तासाअरुन्धत्याद्दिनिर्ययौ ॥ ३५ ॥ निर्गच्छन्तींमुनिर्ज्ञात्वादण्डवत्प्रणनामच ॥ तदारभ्यमहेशाय
दण्डप्रणतिसंस्तुतिम् ॥ ३६ ॥ कुर्यादुवाचचशिवागौतमत्वंकिमिच्छसि ॥ ३७ ॥ गौतमउवाच ॥ कृतकृत्योऽस्मिदेवेशियदिदेयोवरोमम ॥ मन्म
न्दिरेमहाभागेभोक्तुमर्हसिसाम्प्रतम् ॥ ३८ ॥ देव्युवाच ॥ भोक्ष्यामितवगेहेऽहंशङ्करानुमतामुने ॥ गत्वेशंगौतमोविप्रोलब्धाज्ञःपुनर्गतः ॥ ३९ ॥
भोजयामासगिरिशंदेवींचारुन्धतींतथा ॥ भुक्त्वाथपार्वतीसर्वंगन्धपुष्पसभूषणा ॥ २४० ॥ सहानुचरकन्याभिःसहस्राभिर्हरंययौ ॥ अथाह
शङ्करोदेवींगच्छगौतममन्दिरम् ॥ ४१ ॥ सव्योपास्तिमहंकृत्वाआगच्छामिपुनर्गृहम् ॥ इत्युक्ताप्रययौदेवीगौतमस्यैवमन्दिरम् ॥ ४२ ॥ सन्ध्या
वन्दनकामाश्चसर्वएवविनिर्गताः ॥ कृतसन्ध्यास्तटाकेतुमहेशाद्यास्तुकृत्स्नशः ॥ ४३ ॥ अथोत्तरमुखःशम्भुर्न्यासंकृत्वाजजापह ॥ अथविष्णु
र्महातेजामहेशमिदमब्रवीत् ॥ ४४ ॥ सर्वैर्नमस्यतेयस्तुसर्वैरेवसमर्च्यते ॥ हूयतेसर्वयज्ञेषुसभवान्किंजपिष्यति ॥ ४५ ॥ रचिताञ्जलयःसर्वेत्वामे
वैकमुपासते ॥ सभवान्देवदेवेशकस्मैवारचिताञ्जलिः ॥ ४६ ॥ नमस्कारादिपुण्यानांफलदस्त्वंमहेश्वर ॥ तवकःफलदोवन्द्यःकोवात्वत्तोऽधिको
वद ॥ ४७ ॥ शङ्करउवाच ॥ ध्यायेनकिञ्चिद्गोविन्दननमस्येहकिञ्चन ॥ नोपास्येकंचनहरेनजपिष्येहकिंचन ॥ ४८ ॥ किंतुनास्तिकजन्तूनांप्रवृ

१ 'विनम्रमदना' इ० पा०। २ 'देवी' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्यर्थमिदंमया ॥ दशनीयंहरेतेस्युरन्यथापापकारिणः ॥ ४९ ॥ तस्माल्लोकोपकारार्थमिदंसर्वंकृतंमया ॥ ओमित्युक्त्वाहरिरथतंनत्वासमतिष्ठत ॥
॥ २५० ॥ अथतेगौतमगृहंप्राप्तादेवगणर्षयः ॥ सर्वेपूजामथोचक्रुर्देवदेवायशम्भवे ॥ ५१ ॥ देवोहनूमतासार्द्धंगायन्नास्तेरघूत्तम ॥ पञ्चाक्षरींमहाविद्यां
सर्वएवतदाजपन् ॥ ५२ ॥ हनूमत्करमालम्ब्यदेव्यभ्याशंगतोहरः ॥ एकशय्यासमासीनौताबुभौदेवदम्पती ॥५३॥ गायन्नास्तेसहहनुमांस्तुम्बुरुर्नारद
स्तथा ॥ नानाविधविलासांश्चचकारपरमेश्वरः ॥ आहूयपार्वतीमीशइदंवाक्यमुवाचह ॥ ५४ ॥ श्रीसदाशिवउवाच ॥ रचयिष्यामिधम्मिल्ल
मेहिमत्पुरतःशुभे ॥ देव्याहनचयुक्तंतद्भर्त्राशुश्रूषणंस्त्रियाः ॥ ५५ ॥ केशप्रसाधनकृतावनर्थान्तरमापतेत् ॥ केशप्रसाधनेदेवतत्त्वंसर्वंनचेप्सि
तम् ॥ ५६ ॥ अथवन्धेकृतेपश्चादंसप्रान्तप्रमार्जनम् ॥ तनोश्वरमसँल्लग्नकेशपुष्पादिमार्जनम् ॥ ५७ ॥ एतस्मिन्वर्तमानेतुमहात्मानोयदा
गमन् ॥ तदाकिमुत्तरंवाच्यंतवदेवादिवन्दित ॥ ५८ ॥ नायान्तिचेदथविभोभीतिर्नाशमुपेष्यति ॥ एवंहिभाषमाणांतांकरेणाकृष्यशङ्करः ॥ ५९ ॥
स्वोर्वोस्तांस्थापयित्वैवविस्रस्यकचबन्धनम् ॥ विभज्यचकराभ्यांसप्रससारनखैरपि ॥ २६० ॥ विष्णुदत्तांपारिजातस्रजंकचगतामपि ॥ कृत्वा
धम्मिल्लमकरोदथमालांकरागताम् ॥ ६१ ॥ मल्लिकास्रजमादायबबन्धकचबन्धने ॥ कल्पप्रसूनमालांचब्रह्मदत्तांमहेश्वरः ॥ ६२ ॥ पार्वतीवसने
गूढगन्धाढ्येचसमादधात् ॥ अथांसपृष्ठसँल्लग्नमार्जनंकृतवान्विभुः ॥ ६३ ॥ श्लथनीवेरधोदेव्यावस्त्रवेष्टेरधोगतः ॥ देवःकिमिदमित्युक्त्वा
नीवीबन्धंचकारह ॥ ६४ ॥ नासाभूषणमेतत्तेपश्यामिसमदात्ततः ॥ इत्युक्त्वास्वयमादायविच्छायंमौक्तिकंसती ॥ ६५ ॥ हरिद्रायाःसमायोगेमुक्ता
फलमदीप्तिमत ॥ इदंनध्रियतांमुक्ताफलंममतवप्रियम् ॥ ६६ ॥ पार्वत्युवाच ॥ अहोत्वन्मन्दिरंशम्भोसर्ववस्तुसमृद्धिमत् ॥ पूर्वमेवमयासर्वं
वस्तुज्ञातंविभूषणैः ॥ ६७ ॥ अहोद्रविणसम्पत्तिर्भूषणैरवगम्यते ॥ शिरोविभूषितंदेवब्रह्मशीर्षस्यमालया ॥ ६८ ॥ नरकस्यतथामालावक्षःस्थल
विभूषणम् ॥ शेषश्चवासुकिश्चैवसविषौतवकङ्कणे ॥ ६९ ॥ दिशोऽम्बरेजटाकेशाभसितंचाङ्गरागकम् ॥ महोक्षोवाहनंगोत्रंकुलंचाज्ञातमेवच ॥
॥ २७० ॥ ज्ञायेतेपितरौनैवविरूपाक्षंतथावपुः ॥ एवंवदन्तींगिरिजांविष्णुःप्राहातिकोपनः ॥ ७१ ॥ किमर्थंनिन्दसेदेविदेवदेवंजगत्पतिम् ॥
त्यक्ष्येप्राणान्प्रियान्भद्रेतवनूनमसंयमम् ॥७२॥ यत्रेशनिन्दनंभद्रेतत्रनोमरणंव्रतम् ॥ इत्युक्त्वाथनखाभ्यांहिहरिश्छेत्तुंशिरोगतः ॥७३॥ महेशस्तु
करंगृह्यप्राहमासाहसंकृथाः ॥ पार्वतीवचनंसर्वंप्रियंमन्नतवाप्रियम् ॥ ७४ ॥ ममाप्रियंहृषीकेशकर्तुंयत्किञ्चिदिष्यते ॥ ओमित्युक्त्वाथभगवांस्तूष्णीं

१ 'देवाय शूलिने सदा' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूतोऽभवद्धरिः ॥ ७५ ॥ हनुमानथदेवायव्यज्ञापयदिदंवचः ॥ अर्थयामिविनिष्कामंममपूजात्रतंतथा ॥ ७६ ॥ पूजार्थमप्यहंगच्छेमामनुज्ञातु
मर्हसि ॥ ७७ ॥ शङ्करउवाच ॥ कस्यपूजाक्वापूजाकिंपुष्पंकिंदलंवद ॥ कोगुरुःकश्चमन्त्रस्तेकीदृशंपूजनंतथा ॥ ७८ ॥ एवंवदतिदेवेशेहनूमानति
कम्पितः ॥ वेपमानसमस्ताङ्गःस्तोतुमेवप्रचक्रमे ॥ ७९ ॥ हनुमानुवाच ॥ नमोदेवायमहतेशङ्करायामितात्मने ॥ योगिनेयोगधात्रेचयोगिनांगुरवे
नमः ॥ २८० ॥ योगिगम्यायदेवायज्ञानिनांपतयेनमः ॥ वेदानांपतयतुभ्यंदेवानांपतयेनमः ॥ ८१ ॥ ध्यानायध्यानगम्यायध्यातॄणांगुरवेनमः ॥
शिष्टायशिष्टगम्यायभूम्यादिपतयेनमः ॥ ८२ ॥ नमस्तेत्यादीनांवेदवाक्यानांनिधयेनमः ॥ आतनुष्वेतिवाक्यैश्चप्रतिपाद्यायतेनमः ॥ ८३ ॥
अष्टमूर्तेनमस्तुभ्यंपशूनांपतयेनमः ॥ त्र्यम्बकायत्रिनेत्रायसोमसूर्याग्निलोचन ॥ ८४ ॥ सुभृङ्गराजधत्तूरद्रोणपुष्पप्रियायते ॥ बृहतीपूगपुन्नाग
चम्पकादिप्रियायच ॥ ८५ ॥ नमस्तऽस्तुनमस्तेऽस्तुभूयएवनमोनमः ॥ शिवोहरिमथप्राहमाभैषीर्वदमेऽखिलम् ॥ ८६ ॥ हनुमानुवाच ॥ शिव
लिङ्गार्चनंकार्यंभस्मोद्धूलितदेहिना ॥ दिवासम्पादितैस्तोयैःपुष्पाद्यैरपितादृशैः ॥ ८७ ॥ देवविज्ञापयिष्यामिशिवपूजाविधिंशुभम् ॥ सायंकाले
तुसम्प्राप्तेह्यशिरःस्नानमाचरेत् ॥ ८८ ॥ क्षालितंवसनंशुष्कंधृत्वाचम्यद्विरग्रधीः ॥ अथभस्मसमादायआग्नेयंस्नानमाचरेत् ॥ ८९ ॥ प्रणवेनसमाम
न्त्र्याप्यष्टवारमथापिवा ॥ पञ्चाक्षरेणमन्त्रेणनाम्नावायेनकेनचित् ॥ २९० ॥ सप्ताभिमन्त्रितंभस्मदर्भपाणिःसमाहरेत् ॥ ईशानःसर्वविद्यानामुक्त्वा
शिरसिपातयेत् ॥ ९१ ॥ तत्पुरुषायविद्महेमुखेभस्मप्रसेचयेत् ॥ अघोरेभ्योऽथघोरेभ्योभस्मवक्षसिनिक्षिपेत् ॥ ९२ ॥ वामदेवायनमइतिगुह्यस्थाने
विनिक्षिपेत् ॥ सद्योजातंप्रपद्यामिनिक्षिपेदथपादयोः ॥ ९३ ॥ उद्धूलयेत्समस्ताङ्गंप्रणवेनविचक्षणः ॥ त्रैवर्णिकानामुदितःस्नानादिविधिरुत्तमः ॥
॥ ९४ ॥ शूद्रादीनांप्रवक्ष्यामियदुक्तंगुरुणातथा ॥ शिवेतिपदमुच्चार्यभस्मसम्मन्त्रयेत्सुधीः ॥ ९५ ॥ सप्तवारमथादायशिवायेतिशिरःक्षिपेत् ॥ शङ्कराय
मुखेप्रोक्तंसर्वज्ञायहृदिक्षिपेत् ॥ ९६ ॥ स्थाणवेनमइत्युक्त्वागुह्येचापिस्वयम्भुवे ॥ उच्चार्यपादयोःक्षिप्त्वाभस्मशुद्धमतःपरम् ॥ ९७ ॥ नमःशिवायेत्युच्चार्य
सर्वाङ्गोद्धूलनंस्मृतम् ॥ प्रक्षाल्यहस्तावाचम्यदर्भपाणिःसमाहितः ॥ ९८ ॥ दर्भाभावेसुवर्णंस्यात्तदभावेगवालकः ॥ तदभावेतुदूर्वाःस्युस्तदभावे
तुराजतम् ॥ ९९ ॥ सन्ध्योपास्तिंजपंदेव्याःकृत्वादेवगृहंव्रजेत् ॥ देववेदिमथोवापिकल्पितंस्थण्डिलंतुवा ॥ ३०० ॥ मृण्मयंकल्पितंशुद्धंपद्मादिरचना
युतम् ॥ चातुर्वर्णकरङ्गैश्चश्वेतेनैकेनवापुनः ॥ १ ॥ विचित्राणिचपद्मानिस्वस्तिकादितथैवच ॥ उत्पलादिगदाशङ्खत्रिशूलंडमरुंतथा ॥ २ ॥ सरोक्त

१ 'शिवोक्तपश्चप्रासादम्' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चप्रासादंशिवलिङ्गमथैवच॥सर्वकामफलंवृक्षंकुलकंकोलकंतथा ॥३॥ षट्कोणंचत्रिकोणंचनवकोणमथापिवा॥कोणद्वादशकांदोलांपादुकाव्यजनानि
च ॥ ४ ॥ चामरच्छत्रयुगलंविष्णुब्रह्मादिकंतथा ॥ चूर्णैर्विरचयेद्देव्यांधीमान्देवालयेऽपिवा ॥ ५ ॥ यत्रापिदेवपूजास्यात्तत्रैवंकल्पयेद्बुधः ॥ स्वहस्त
रचितंमुख्यंक्रीतंचैवतुमध्यमम् ॥६॥ याचितंतुकनिष्ठंस्याद्बलात्कारमथाधमम् ॥ अर्हेषुयत्त्वनर्हेषुबलात्कारात्तुनिष्फलम् ॥७॥ रक्तशालिजपास्थाण
कलमासितरक्तकैः॥तण्डुलैर्व्रीहिमात्रोत्थैःकर्णैश्चैवयथाक्रमम्॥८॥उत्तमैर्मध्यमैश्चैवकथितैरधमैस्तथा॥पद्मादिस्थापनैरेवतत्सम्यग्यागमाचरेत् ॥ ९ ॥
प्रागुत्तरमुखोवापियदिवाप्राङ्मुखोभवेत्॥आसनंचप्रवक्ष्यामियथादृष्टंयथाश्रुतम्॥ ३१०॥कौशंचार्म्मंचैलतलंपदारवंताडपत्रकम्॥काम्बलंकाञ्चनंचैव
राजतंताम्रमेवच ॥११॥ गोकरीषार्कजैर्वापित्वासनंपरिकल्पयेत् ॥ वैयाघ्रंरौरवंचैवहारिणंमार्गमेवच ॥ १२ ॥ चार्मंचतुर्विधंज्ञेयमथबन्धुकमेवच ॥
यथासम्भवमेतेषुह्यासनंपरिकल्पयेत् ॥१३॥ कृतपद्मासनोवापिस्वस्तिकासनएवच॥दर्भभस्मसमासीनःप्राणानायम्यवाग्यतः ॥१४॥ तावत्सदेवता
रूपोध्यानंचान्तःसमाचरेत् ॥ शिखान्तेद्वादशाङ्गुल्येस्थितंसूक्ष्मतनुंशिवम् ॥१५॥ अन्तश्चरन्तंभूतेषुगुहायांविश्वमूर्तिषु ॥ सर्वाभरणसंयुक्तमणिमा
दिगुणान्वितम् ॥१६॥ ध्यात्वातंधारयेच्चित्तेतद्वाय्वाप्यापूरयेन्नृम् ॥ तयादीप्याशरीरस्थंपापंनाशमुपागतम् ॥ १७ ॥ स्वर्णपारदसम्पर्कादृक्तंश्वेतंयथा
भवेत् ॥ तद्वादशदलावृत्तमष्टपञ्चत्रिरेववा ॥१८॥ परिकल्प्यासनंशुद्धंतत्रलिङ्गंनिधायच ॥ गुहास्थितंमहेशानंलिङ्गेसञ्चिन्तयेत्तथा ॥१९॥ शोधिते
कलशेतोयंशोधितंगन्धवासितम् ॥ सुगन्धपुष्पंनिक्षिप्यप्रणवेनाभिमन्त्रितम् ॥ ३२० ॥ प्राणायामश्चप्रणवःशूद्रेषुनविधीयते ॥ प्राणायाम
पदेध्यानंशिवेत्योङ्कारमन्त्रणम् ॥ २१ ॥ गन्धपुष्पाक्षतादीनिपूजाद्रव्याणियानिच ॥ तानिस्थाप्यसमीपेतुततःसङ्कल्पयिष्यते ॥ २२ ॥ शिव
पूजांकरिष्यामिशिवतुष्ट्यर्थमेवच ॥ इतिसङ्कल्पयित्वातुततआवाहनादिकम् ॥ २३ ॥ कृत्वातुस्नानपर्यन्तंततःस्नानंप्रकल्पयेत् ॥ नमस्तेत्यादि
मन्त्रेणशतरुद्रियविधानतः ॥ २४ ॥ अविच्छिन्नातुयाधारामुक्तिधारेतिकीर्तिता ॥ तयायःस्नापयेन्मासंजपन्रुद्रमुपांशुवा ॥ २५ ॥ एकवारं
त्रिवारंचपञ्चसप्तनवापिवा ॥ एकादशमथोवारमथत्रयोदशान्वितम् ॥ २६ ॥ मुक्तिस्नानमिदंज्ञेयंमासंमोक्षप्रदायकम् ॥ शैवयाविद्ययास्नानंकेवल
प्रणवेनच ॥ २७ ॥ मृण्मयैर्नालिकेरस्यशकलैश्चोर्मिभिस्तथा ॥ कांस्येनमुक्तामुक्त्याचपुष्पादिकसरेणवा ॥ २८ ॥ स्नापयेद्देवदेवेशंयथासम्भव ॥ १६२ ॥
मीरितैः ॥ शृङ्गस्यचविधिंवक्ष्येस्नानयोग्यंयथाभवेत् ॥ २९ ॥ पूर्वमन्तस्तुसंशोध्यबहिरन्तस्तुशोधयेत् ॥ सुस्निग्धंलघुकृत्वाथनागंछिन्द्या
त्कथञ्चन ॥ ३३० ॥ नीचैकदेशविन्यस्तद्वारद्रोण्यासुवृत्तया ॥ कुशानुस्रुतयास्नानंदेवायपरिकल्पयेत् ॥ ३१ ॥ एवंगवयश्रृङ्गस्यजलपूर्तिं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रथोच्यते ॥ द्वारेनिषिद्धलोहार्द्धसन्धिद्वारासमन्विते ॥ २२ ॥ योगवक्रंनागदण्डंनागाकारंप्रकल्पयेत् ॥ फलस्थानेतुचषकंदण्डेनसमरन्ध्रकम् ॥३३॥
तत्रवपातयेत्तोयंमूर्द्धयन्त्रघटेस्थितम् ॥ पातयेदथचान्येनवामेनैवकरेणवा ॥ ३४ ॥ मुक्तिधाराकृतातेनपवित्रंपापनाशनम् ॥ एवंसंस्थाप्यदेवेशं
पञ्चगव्यैस्तथैवच ॥ ३५ ॥ पञ्चामृतैरथस्नाप्यमधुरत्रितयेनच ॥ विभूष्यभूषकैर्देवंपुनःस्नाप्यमहेश्वरम् ॥ ३६ ॥ शीतोपचारंकृत्वाथतत
आचमनादिकम् ॥ वस्त्रंतथोपवीतंचपञ्चगन्धकमेवच ॥ ३७ ॥ कर्पूरंमरुवंचापिपाटीरमथवाभवेत् ॥ उभयंमिश्रितंवापिशिवलिङ्गंप्रपूजयेत् ॥
॥ ३८ ॥ कृत्स्नपीठंगन्धपूर्णंयद्वाविभवसारतः ॥ तूष्णीमथोपचारंवाकालियंपुष्पमर्पयेत् ॥ ३९ ॥ श्रीपत्रमरुचित्याजंयथाशक्त्याखिलंयथा ॥
अनेकद्रव्यधूपंचगुग्गुलंकेवलंतथा ॥ ३४० ॥ कपिलाघृतसंयुक्तंसर्वधूपायशस्यते ॥ धूपंदत्त्वायथाशक्तिकपिलाघृतदीपकान् ॥ ४१ ॥ अथ
वाप्याज्यमात्रेणदीपान्दत्त्वोपहारकम् ॥ यथाशक्त्युपपन्नंचदत्त्वापुष्पसमन्वितम् ॥ ४२ ॥ मुखशुद्धिंततोदत्त्वादत्त्वाताम्बूलमादरात् ॥ प्रदक्षिण
नमस्कारौपूजैवंहिसमाप्यते ॥ ४३ ॥ गीताङ्गपञ्चकंपश्चात्तानिविज्ञापयामिते ॥ गीतंवाद्यंपुराणंचनृत्यंहासोक्तिरेवच ॥ ४४ ॥ नीराजनंच
पुष्पाणामञ्जलिश्चाखिलार्पणम् ॥ क्षमाचोद्वासनंचैवकीर्तितंचोपचारकम् ॥ ४५ ॥ भूषणंचतथाछत्रंचामरंव्यजनंतथा ॥ शिवोपवीतंकैङ्कर्यं
षडीशानोपचारकम् ॥ ४६ ॥ द्वात्रिंशदुपचारैस्तुयःसमाराधयेच्छिवम् ॥ एकेनाह्नासमस्तानांपापानांनाशनंध्रुवम् ॥ द्वात्रिंशदुपचारंस्यात्पूजनं
तूत्तमोत्तमम् ॥ ४७ ॥ सदाशिवउवाच ॥ एवमेतत्कपिश्रेष्ठतवपूजांवदाम्यहम् ॥ मत्पादयगलंपूज्यसर्वपूजाकरोभव ॥ आराध्येत्थंयथा
लिङ्गेतन्ममाराधनंकुरु ॥ ४८ ॥ हनुमानुवाच ॥ गुरुणालिङ्गपूजैवनियताकलिपतामम ॥ तांकरोमिपुरादेवपश्चात्त्वत्पादपूजनम् ॥ ४९ ॥
इत्युक्त्वैवनमस्येशंशिवलिङ्गार्चनेऽभवत् ॥ सरस्तीरमथोगत्वाकृत्वासैकतवेदिकाम् ॥ ३५० ॥ तालपत्रैर्विरचितमासनंपर्यकल्पयत् ॥ प्रक्षाल्य
पादौहस्तौतुसमाचम्यसमाहितः ॥ ५१ ॥ भस्मस्नानमथोचक्रेपुनराचम्यवाग्यतः ॥ देववेद्यामथोचक्रेपद्मानिसुमनोहरम् ॥ ५२ ॥ अन
न्तरंतालपत्रंपद्मासनगतःकपिः ॥ प्राणानायम्यसंन्यासंशुक्लध्यानसमन्वितः ॥ ५३ ॥ प्रणम्यगुरुमीशानंजपन्नासीदतःपरम् ॥ अथदेवार्चनंकर्तुं
यत्नमास्थितवानपि ॥ ५४ ॥ पलाशपत्रपुटकद्वयानीतजलंशुचि ॥ शिरःकमण्डलुगतंनिधायाग्निंत्रिमन्त्रितम् ॥५५॥ आवाहनादिकृत्वाथस्नान
पर्यन्तमेवच ॥ अथस्नापयितुंदेवमादायकरसम्पुटे ॥ ५६ ॥ कृत्वानिरीक्षणंदेवंपीठंनोदृष्टवान्कपिः ॥ लिङ्गमात्रंकरगतंदृष्ट्वाभीतिसमन्वितः ॥

१ संन्यासं-न्यासयुक्तं यथा स्यात्तथेत्यर्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 ॥ ५७ ॥ इदमाहमहायोगीकिंवापापंमयाकृतम् ॥ यदेतत्पीठरहितंशिवलिङ्गंकरस्थितम् ॥ ५८ ॥ ममाद्यमरणंसिद्धंपीठंचेन्नागमिष्यति ॥
अथरुद्रंजपिष्यामितदायातिमहेश्वरः ॥ ५९ ॥ इतिनिश्चित्यमनसाजजापशतरुद्रियम् ॥ अथापिनसमायातोमहेशोऽथकपीश्वरः ॥ ३६० ॥ रुद्रं
न्यपातयद्भूम्यांवीरभद्रःसमागतः ॥ किमर्थंरुद्यतेभक्तरुदिहेतुंवदस्वमे ॥ ६१ ॥ हनुमानुवाच ॥ पीठहीनमिदंलिङ्गंपश्यमेपापसञ्चयम् ॥६२॥ वीर
भद्रउवाच ॥ यदिनायातिपीठंतेलिङ्गेमासाहसंकृथाः ॥ दाहयिष्याम्यहंलोकंयदिनायातिपीठकम् ॥ ६३ ॥ पश्यदर्शयमेलिङ्गंपीठंयद्यागतंनवा ॥
अथदृष्ट्वावीरभद्रोलिङ्गंपीठमनागतम् ॥ ६४ ॥ दग्धुकामोऽखिलाँल्लोकान्वीरभद्रःप्रतापवान् ॥ अनलंभुविचिक्षेपक्षणाद्दग्धामहीतदा ॥ ६५ ॥
अथसप्ततलान्दग्ध्वापुनरूर्द्ध्वमवर्तत ॥ पञ्चोर्द्ध्वलोकानदहज्जनलोकनिवासिनः ॥ ६६ ॥ ललाटनेत्रसम्भूतंनखेनादायचानलम् ॥ जम्बीरफलसङ्काशं
कृत्वाकरतलेविभुः ॥ ६७ ॥ यदिनायातिपीठंतेदग्धालोकानसंशयः ॥ अनायातमथोदृष्ट्वावीरभद्रःप्रतापवान् ॥ ६८ ॥ सनकादिमहात्मानो
ज्ञात्वायोगेनचागमन् ॥ गौतमस्याश्रमवरंसमागम्यमहेश्वरम् ॥ ६९ ॥ नदृष्टवन्तोदेवादिसेव्यमानमपिद्विजाः ॥ अस्तुवन्नथचस्तोत्रैःसर्ववेद
समुद्भवैः ॥ ३७० ॥ ॐनमोदेवदेवायतस्मैशुद्धप्रभाचिन्त्यरूपायतस्मै ॥ नमःसुराणामधीशायतस्मैनमोवेदगुह्यायशुद्धायतस्मै ॥ ७१ ॥
नमःशिवायादिदेवायतस्मैनमोव्यालयज्ञोपवीतायतस्मै ॥ नमःसुरानन्दसन्दोहवर्षत्रयीबिन्दुविश्वम्भरायतस्मै ॥ ७२ ॥ पृथिव्यथोवायुराकाश
मापःपुनःशशीवह्निसूर्यौतथात्मा ॥ यस्याष्टैतामूर्तयःशङ्करस्यतस्मैनमोज्ञानगम्यायशश्वत् ॥ ७३ ॥ एतांस्तुतिमथाकर्ण्यभगनेत्रप्रदःशिवः ॥
विष्णुमाहचगच्छत्वंसमानयचतान्द्विजान् ॥ ७४ ॥ आनीतास्तेनहरिणादेवायप्रणतास्तुते ॥ तानाहशङ्करोवाक्यंकिमर्थंयूयमागताः ॥ ७५ ॥
मुनयऊचुः ॥ देवद्वादशलोकानांदृश्यन्तेभस्मराशयः ॥ स्थितमेकंवनमिदंपश्यत्वंलोकसङ्क्षयम् ॥ ७६ ॥ सदाशिवउवाच ॥ ऊर्द्ध्वस्थ
पञ्चलोकानांदाहेसन्देहएवनः ॥ कथमङ्गारवृष्टिश्चकथंनोवामहाध्वनिः ॥ ७७ ॥ मुनयऊचुः ॥ भीतिरस्माकमधुनावर्ततेवीरभद्रतः ॥ सएवा
ङ्गारवृष्टिंचपिपासुरिवतामपात् ॥ ७८ ॥ देवोऽथवीरमाहूयकिंवीरेत्यब्रवीद्भवः ॥ वीरोहनूमतोलिङ्गपीठाभावादिदंकृतम् ॥ ७९ ॥ कपेश्चित्तं
परिज्ञातुंमयाकृतमिदंबृहत् ॥ कृपानिधिरथोदेवोयथापूर्वमकल्पयत् ॥ ३८० ॥ दग्धानप्यखिलाँल्लोकान्पूर्वतःशोभनान्विभुः ॥ कल्पया
मासविश्वात्मावीरभद्रमथाब्रवीत् ॥ ८१ ॥ आलिङ्ग्याघ्रायशिरसिताम्बूलंदत्तवान्हरः ॥ अथासौहनुमानीशपूजनंकृतवानथ ॥ ८२ ॥
एकंवनचरंतत्रगन्धर्वंसविपश्चिकम् ॥ इदमाहमहावीणाममवैर्दीयतामिति ॥ ८३ ॥ गन्धर्वोनमयात्याज्यावीणाप्राणसमामम ॥ ममापिप्राण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सदृशीवीणेत्याहकपीश्वरः ॥ ८४ ॥ अथमुष्टिनिपातेनगन्धर्वेपतितेकपिः ॥ आदायवीणांमहतींस्वरतन्तुसमन्विताम् ॥ ८५ ॥ अलाबुसंयुतां कृत्वाराजवृक्षफलाकृतिम् ॥ तस्योरसिविनिक्षिप्यगायन्नागाच्छिवान्तिकम् ॥ ८६ ॥ बृहतीकुसुमैःशुद्धैर्देवपादावपूजयत् ॥ तस्मैवरमथ प्रादादाकल्पंजीवितंपुनः ॥ ८७ ॥ समुद्रलङ्घनेशक्तिंवरंप्रादादथापरम् ॥ ८८ ॥ समस्तभूषासुविभूषिताङ्गःस्वदीप्तिमन्दीकृतदेवदीप्तिः ॥ प्रसन्नमूर्तिस्तरुणःशिवाङ्कःसम्भावयामाससमस्तदेवान् ॥ ८९ ॥ पीतमुद्रमनीयंचसमादायमहेश्वरः ॥ पीतवस्त्रमिदंदेवत्वंगृहाणहरेशुभम् ॥ ॥ ३९० ॥ ब्रह्मणेरक्तवसनंसर्वेषांवसुदस्तथा ॥ देवर्षिदानवादीनांदत्तवान्वसुयुग्मकम् ॥ ९१ ॥ रामोऽपिचैतदाकर्ण्यशम्भवेयुग्ममार्पयत् ॥ सुसूक्ष्मंबहुमूल्यंचस्वर्णभूषणमेवच ॥ ९२ ॥ अथप्रुक्त्वासुखासीनःसामात्यःसपुरोहितः ॥ नानामुनिगणैर्भूपैर्वानरैर्गौतमीतटे ॥ ९३ ॥ शम्भुंपुराण तत्त्वज्ञंराघवोवाक्यमब्रवीत् ॥ त्वमेवसर्वंजानीषेसर्वधर्मगुहाशतम् ॥ कस्मिन्कस्मिन्युगेब्रह्मन्किंविशिष्टंवदस्वमे ॥ ९४ ॥ शम्भुरुवाच ॥ ध्यानमेव कृतेश्रेष्ठंत्रेतायांयज्ञएवच ॥ द्वापरेचार्चनंतिष्ये[1]दानंचहरिकीर्तनम् ॥ ९५ ॥ सर्वंचशस्तंसर्वत्रध्यानंनचकलौयुगे ॥ नराणांमुग्धचित्तत्वात्कृच्छ्र[2]स्थानां विशांपते ॥ ९६ ॥ नधर्मेनियताबुद्धिर्नवेदेनैवचस्मृतौ ॥ नक्रतौनस्वधाकारेपुराणानांचनश्रुतौ ॥ ९७ ॥ नै[3]यज्ञेनचतीर्थेषुनचशुश्रूषणेसताम् ॥ नेज्यायांदेवतानांचनस्वजातीयकर्मणि ॥ ९८ ॥ नदेवस्मरणेनापिनचक्वापिवृषेनृप ॥ अतश्चदीर्घकालानांपुण्यानामक्षमानराः ॥ ९९ ॥ दानंतु स्वल्पकालत्वात्कर्तुंशक्नोतिमानवः ॥ अं[4]तश्चकलिदुष्टानांप्रायश्चित्तंनविद्यते ॥ ४०० ॥ केषाञ्चित्पापनाशःस्यात्प्रायश्चित्तैस्तुनान्यथा ॥ ब्रह्मज्ञानी गयाश्राद्धीकाशीगन्ताश्रुतौरतः ॥ १ ॥ पुराणज्ञावमाश्चैतेश्रोतातस्यचराघव ॥ युगानामनुसारेणतथार्थस्यविवेचनात् ॥ २ ॥ स्वपरप्रत्ययो त्पादात्परब्रह्मप्रकाशनात् ॥ पुराणवक्तासर्वस्माद्ब्राह्मणस्तुविशिष्यते ॥ ३ ॥ तेनापिचकृतंपापंनसज्येत्किमुतान्यतः ॥ अन्येषामपिकेषांचि त्पुराणंपापनाशनम् ॥ ४ ॥ यःपुराणेषुविश्वासीवक्तारंमन्यतेगुरुम् ॥ ब्रह्मविद्याप्रदातारंविशिष्टंज्ञातिबन्धुतः ॥ ५ ॥ तस्यपापानिसर्वाणि विलयंयान्त्यसंशयम् ॥ अथश्रीशैलगमनंपूजकस्यमहेशितुः ॥ ६ ॥ अतःकलौमनुष्याणांपुराणंपापनाशनम् ॥ पुराकलियुगेरामवृत्तंसङ्की तयेशृणु ॥ ७ ॥ आसीत्तुगौतमोनामब्राह्मणोवेदवर्जितः ॥ तस्यपुष्टिःपशुश्चास्तांभ्रातरौवेदवर्जितौ ॥ ८ ॥ ताभ्यांसहकृषिंचक्रेतत्रवृद्धिमवाप च ॥ धनधान्यादिकंकिंचिद्राज्ञेऽसौदत्तवानथ ॥ ९ ॥ उवाचवचनंकिंचिदधिकारंनिरूपय ॥ अर्थंनगमयिष्यामितौशक्तौभ्रातरौमम ॥ ४१० ॥

१तिष्यनक्षत्रोपलक्षिते कलावित्यर्थः । २'कलिस्थानाम्' इ० पा० । ३'न जपे' इ० पा० । ४ अतः दानादन्यदित्यर्थः । ५'वाचकः' इ०,'तस्यानुवाचकः' इ० च पा० ।

CC-0. In Public Domain. Digitization by eGangotri

राजोवाच ॥ ब्राह्मणस्याधिकारोहिवैदिकेधर्मकर्मणि ॥ तदन्यत्रनियुक्तस्यब्राह्मण्यंविप्रणश्यति ॥ ११ ॥ गौतमउवाच ॥ युगेष्वन्येषुधर्मोऽयं
कलिधर्मोनतादृशः ॥ भूपतित्वंहिभूपालनृपाणांधर्मउच्यते ॥ १२ ॥ ब्राह्मणश्चपरिक्षीणस्तंकुर्वन्नैवदुष्यति ॥ शूद्राणांतुकृषिर्द्धर्मोनापद्यप्य
ग्रजन्मनः ॥ १३ ॥ तस्मात्क्षत्त्रेणवर्तिष्येग्रामान्ममसमादिश ॥ अन्यत्रचात्रक्षात्त्रेणवर्तनंममरोचते ॥ १४ ॥ अन्यन्नतुतथेत्युक्तोददौ
ग्रामान्द्विजन्मनः ॥ ग्रामाधिकारदुष्टस्यवर्तनंत्वन्यथाभवत् ॥ १५ ॥ अभक्षिमांसचांपायिसुराचाभाषिदुर्वचः ॥ परयोषातथागामिपरस्वं
प्रत्यहारिच ॥ १६ ॥ अक्रीडिद्यूतमसकृत्कलञ्जंचादिदुर्भुजा ॥ नापूजिजगतामीशःशिवोवाविष्णुरेववा ॥ १७ ॥ एवंकालेनदुर्वृत्तं
राजावाक्यमभाषत ॥ विप्रविप्रत्वमुत्सृज्यशूद्रत्वंप्राप्तवानसि ॥ १८ ॥ तस्मान्नियोगधर्मेणभवन्तंभ्रंशयामिच ॥ मास्तुविप्रत्वमद्यैवशूद्रतैवव
रंमम ॥ १९ ॥ तद्दतेयदिविप्रास्तेनभोक्ष्यन्तेवरंमम ॥ नहिसर्वमिदंत्यक्तुंशक्तोऽहंपृथिवीपते ॥ ४२० ॥ शम्भुरुवाच ॥ एवं
वदतिदुर्विप्रेराजातूष्णीमतिष्ठत ॥ सतुवैशूद्रतुल्यश्चबुभुजेऽन्नंसहामिषम् ॥ २१ ॥ कदाचिदथदुर्वृत्तःप्रतोलीमण्डपस्थितः ॥ द्विजेनपठ्यमानं
तुपद्यंतुश्रुतवानिदम् ॥ २२ ॥ हृदयेपद्यमेतत्तुद्विजेरितमतिष्ठत ॥ २३ ॥ परात्परतरंयान्तिनारायणपरायणाः ॥ नतेतत्रगमिष्यन्तियेद्विषन्ति
महेश्वरम् ॥ २४ ॥ व्याख्यानमपिचश्रुत्वापौराणिकमभाषत ॥ कीदृङ्नारायणःप्रोक्तःकीदृशोऽपिमहेश्वरः ॥ २५ ॥ किंपरंत्वयनंप्रोक्तंद्वेषः
कीदृगुदाहृतः ॥ किंतत्परमितिख्यातंततःपरतरंचकिम् ॥ २६ ॥ पौराणिकउवाच ॥ परंतद्ब्रह्मणःस्थानंसुखव्यक्तैकलक्षणम् ॥ ततःपरतरं
विष्णोर्द्धामतद्ब्रह्मणोऽधिकम् ॥ २७ ॥ अविनाशितयातत्तुकीर्तितंपरमंपदम् ॥ तन्मध्येपुरुषोविष्णुस्तदङ्गपरमंविभुः ॥ २८ ॥ आपोहिनरजन्मत्वा
न्नाराःप्रोक्तामनीषिभिः ॥ नाराश्चास्यायनंयस्मात्तेननारायणःस्मृतः ॥ २९ ॥ तत्परंवर्तनंयेषांतेप्रोक्तास्तत्परायणाः ॥ महदादीनितत्त्वानि
यानितेषांयईश्वरः ॥ ४३० ॥ सूर्याग्निशशिनेत्रोऽसौमहेशःस्यादुमापतिः ॥ द्वेषोहिवैरंविज्ञेयमीश्वरेपरमात्मनि ॥ ३१ ॥ शम्भुरुवाच ॥
एवंपुराणभट्टेनसमीरितमिदंवचः ॥ चिन्तयन्पुनरप्याहमादृशस्यकथंगतिः ॥ ३२ ॥ पौराणिकोऽथतंप्राहशृणुवक्ष्यामितेगतिम् ॥ कुरुसर्वेण
यत्नेनप्रायश्चित्तंयथाविधि ॥ ३३ ॥ धर्मंचरयथाशक्तियथाकालंयथाविधि ॥ विमुक्तपापःपश्चात्त्वमुत्तमांगतिमेष्यसि ॥ ३४ ॥ पुराणमथवानित्यं
शृणुष्वावहितश्चसन् ॥ निराशोवामहेशानंपूजयस्वपिनाकिनम् ॥ ३५ ॥ देवंवापुण्डरीकाक्षंकेशवंक्लेशनाशनम् ॥ संन्यासमथवानित्यंब्रह्म
ज्ञानपरोभव ॥ ३६ ॥ अथवागच्छकाशींत्वंमुक्तौवामृतिमाप्नुहि ॥ गयांवागच्छतत्रत्वंश्राद्धंकर्तुंप्रयत्नतः ॥ ३७ ॥ अथवासर्ववेदानांसारंपातकनाश

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नम् ॥ रुद्रंरुद्रप्रियकरंजपप्रत्यहमादरात् ॥ ३८ ॥ श्रीशैलमथवागच्छकेदारमथवेच्छया ॥ अथवाप्रतिवर्षंतुमाघस्नानंप्रवर्तय ॥ ३९ ॥ किमत्र
बहुनोक्तेनधर्मभक्तःसदाभव ॥ नैवंनरकवासस्तेभवितातुद्विजाधम ॥ ४४० ॥ गौतमउवाच ॥ श्रुत्वासर्वंकरिष्यामिपुराणंभवतोमुखात् ॥ शास्त्रं
विश्वासहेतुंचवर्ज्यंचापिवदस्वमे ॥ ४१ ॥ पौराणिकउवाच ॥ वर्ज्यंमांसंसुरान्यस्त्रीभोगोद्यूतंविकत्थनम् ॥ पारुष्यमनृतंमायादेवदेवविनिन्दनम् ॥
॥ ४२ ॥ गुरूणांसुरवृद्धानांपुराणस्मृतिभाषिणाम् ॥ निन्दनंश्वेतवृन्ताकंकृतकालाबुवर्तनम् ॥ ४३ ॥ बीजपूरंकुसुम्भंचलोहितंशृङ्गमेवच ॥ अररुं
नालिकेरंचकूष्माण्डकंतथैवच ॥ ४४ ॥ कोविदारफलंतैलपक्कमानवजंपयः ॥ वार्ध्रीणसखरीदुग्धंसूतिकाक्षीरमाविकम् ॥ ४५ ॥ औष्ट्रमेकशफक्षीरं
मार्गमाजंनृसम्भवम् ॥ विवत्सासन्धिनीक्षीरंलवणंचैवयोगियत् ॥ ४६ ॥ नालिकेररसंकांस्येताम्रेमधुचसीसके ॥ काचेतक्रंकरम्भांश्चघृताक्तान्नैव
कारयेत् ॥ ४७ ॥ होमंतुमृण्मयेपात्रेपुरोडाशंतुराजते ॥ नसेवेतपरंलोकेशुभार्थीतुविचक्षणः ॥ ४८ ॥ पात्रान्तश्चूर्णलेपोऽपितत्रभक्षणमेवच ॥
क्रमुकस्यतथाभक्ष्यश्चूर्णपत्रस्यचैवहि ॥ ४९ ॥ क्रमुकस्यापिपक्वस्यभक्षणंक्रिमियोगिनः ॥ पायसेलवणंचैवकेवलंचकरार्पितम् ॥ ४५० ॥ सिन्धु
सौराष्ट्रकाम्बोजमागधेषुचासिंहले ॥ नदोषायभवेत्तत्रक्षीरंचलवणान्वितम् ॥ ५१ ॥ क्षीराणिचसमस्तानिलवणानिचयोगतः ॥ देशेष्वन्येषुदोषाय
पानेचैवेहसंशयः ॥ किमत्रबहुनोक्तेनसद्भिर्निन्द्यंविवर्जयेत् ॥ ५२ ॥ शम्भुरुवाच ॥ एवंतस्यवचःश्रुत्वाब्राह्मणस्यमहात्मनः ॥ स्वमेवभवनंगत्वा
चिन्तयामासदुःखितः ॥ ५३ ॥ रात्रौमृत्युर्दिवाचेतिनजानातिमहानपि ॥ परलोकेसुखंदुःखमिहभोगविनोदनम् ॥ ५४ ॥ कृमिकीटमनुष्याद्यैः
सुखदुःखैःपृथक्पृथक् ॥ प्रतिजीवंतुहेतूनांभेदोऽपिसुविनिश्चयः ॥ ५५ ॥ एकस्यापिहिजीवस्यनास्तिचैकविधास्थितिः ॥ जन्मकालेमहाज्ञानं
शैशवेऽत्यल्पबोधनम् ॥ ५६ ॥ स्खलत्पदेऽल्पविज्ञानंबाल्येचाल्पंतथैवच ॥ कौमारेक्रीडनरतिर्यौवनेविषयेषितम् ॥ ५७ ॥ यौवनेविनिवृत्तेतु
द्रव्यसम्पादनेषणा ॥ वार्द्धकेभोगलिप्साचनभोक्तुंक्षमतेऽपिच ॥ ५८ ॥ दूषिकाश्लेष्मलालाभिर्वलीपलितकम्पनैः ॥ श्वासंकासानिलाक्षिप्तैर्दृषीकै
र्विकलैर्युतः ॥ ५९ ॥ किञ्चिद्वक्तुंनशक्नोतिनचजानातिकिञ्चन ॥ तिष्ठन्तीषुपरस्त्रीषुगुह्यस्थानंप्रदर्शयेत् ॥ ४६० ॥ क्रोशकण्डूयनपरःक्रूरोजीवित
लक्षणैः ॥ कण्डूयतेस्फिचौवस्त्रमुद्धृत्यचविचालयन् ॥ ६१ ॥ भुञ्जानःश्लेष्मणाग्रासंग्रसितुंनचशक्नुयात् ॥ यदाकासस्तदाजज्ञेपायुवायुश्चशब्दवान्
॥ ६२ ॥ निःसृतिश्चमलस्यापिश्लेष्मनिर्गमएवच ॥ स्नुषादिभर्त्सनंबालताऽलहास्यनिदर्शनम् ॥ ६३ ॥ गुरुनिर्गमनादीनिसञ्चिन्त्यचपुनःपुनः ॥

१ 'श्वासकासविलाक्षिप्ताः' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आहूतोभोजनाद्यर्थंभोज्यान्नादिविनिन्दयन् ॥ ६४ ॥ चिरमुष्णंचनिर्भर्त्स्यपुनश्चिन्तामवापसः ॥ अतिदुष्कृतिकर्माहंकथंभोक्ष्येकथंशये ॥ ६५ ॥
कथंतिष्ठेकथंगच्छेपरलोकःकथंभवेत् ॥ इतिचिन्ताकुलोनित्यंननमत्यपरान्वितः ॥ ६६ ॥ द्विजस्यसदनंगत्वापुराणज्ञस्यराघव ॥ लज्जा
वाक्कृतवक्त्रश्चकिंकरोमीत्यभाषत ॥ ६७ ॥ नकिञ्चिदप्युवाचासौद्विजःपौराणिकस्तदा ॥ पापोऽयमितिविज्ञायशिष्येणनिरगामयत् ॥ ६८ ॥
गौतमोऽपिविनिर्गम्यद्वार्येवचबहिःस्थितः ॥ भुव्यासीनंतुविज्ञायपुराणार्थविचारकम् ॥ ६९ ॥ कथंकथमपिप्राप्यपीठंदत्तंचनाभजत् ॥ निषण्णो
भूतलेरामपुराणज्ञमभाषत ॥४७०॥ प्रायश्चित्तंकरिष्यामितदत्रैवविधीयताम् ॥७१॥ ब्राह्मणउवाच ॥पापानिकीर्तयस्वत्वंसर्वथैवकृतानितु ॥सचापिना
कृतंकिञ्चिन्मयापापमितीरयन्॥७२॥रुदन्पपातभूम्यांचकथंतातेतिपीडितः॥ब्राह्मणस्तमथप्राहप्रायश्चित्तंनविद्यते॥७३॥महापापंत्रिरावृत्तेपुनश्चयदिचे
त्कृतम् ॥ ७४ ॥ गौतमउवाच ॥ पौराणिकमहाभागप्राप्यापित्वामहंकथम् ॥ पापयुक्तोद्विजश्रेष्ठसङ्गतिर्विफलाभवेत् ॥ ७५ ॥ पौराणिकउवाच ॥
शास्त्रंप्रमाणंसर्वेषांप्रायश्चित्तविनिर्णये ॥ तद्विनायोहितंब्रूयात्प्रायश्चित्तंनतद्भवेत् ॥ ७६ ॥ सकृत्कृतेसकृत्प्रोक्तंद्वितीयेद्विगुणंभवेत् ॥ तृतीये
त्रिगुणंप्रोक्तंचतुर्थेनास्तिनिष्कृतिः ॥७७॥ त्वयाकृतंतुबहुधाचतुर्विधमपीच्छया ॥ कथंवक्तुमहंशक्तःप्रायश्चित्तंभवादृशे ॥७८॥ गौतमोऽपिपुनःप्राह
क्वगन्तव्यंमयेतिच ॥ पौराणिकोद्विजोरामतूष्णीमेवबभूवह ॥ ७९ ॥ गौतमोऽपिमहाशैलंश्रियाएवजगामह ॥ तत्रनद्यामथस्नात्वादृष्ट्वेशंमल्लिकार्जु
नम् ॥ ४८० ॥ उपवासत्रयंकृत्वाशिवरात्रिमविन्दत ॥ चतुर्थमुपवासंचचकारातीवदुःखितः ॥ ८१ ॥ पारणंचाप्यमायांसकृतवान्फलवल्कलैः ॥
अथप्रदक्षिणंचक्रेश्रीशैलस्यचसद्विजः ॥८२॥ गतवान्मन्दिरंपश्चाच्चिन्तयातिकृशःश्वसन् ॥ कथंपापनिवृत्तिर्मेतूष्णींभूतस्यसेत्स्यति ॥८३ ॥ अनन्त
मविचार्यंकिंपापंचसुमहत्तरम् ॥ श्रुत्वानकोऽपिमेब्रूयात्प्रायश्चित्तंविधीयताम् ॥८४ ॥ किंतुकस्मिन्पुराणेतुश्रुतेज्ञातंभविष्यति ॥ इतिकृत्वामतिंसोऽथ
पुराणज्ञमभाषत ॥८५॥ पुराणमेकंमेतातव्याख्यातुंभगवानिति ॥ जातकर्मादिसंस्कारान्कारयस्वममाशुवै ॥८६ ॥ द्विजोभूत्वाशृणोम्यद्यप्रायश्चित्तं
करोम्यतः ॥ विधायकंपुराणंमेभविष्यतिचं[1]कीर्तितम् ॥ अतःशक्यंकरिष्यामिपुराणार्थविनिश्चयन् ॥ ८७ ॥ पौराणिकउवाच ॥ यथावत्कीर्तयि
ष्यामिपुराणंपापनाशनम् ॥ यथाज्ञानंयथाशक्तियथाशुद्धंयथाविधि ॥ किंवाञ्छसिपुराणंतुकीर्तयिष्येतदेवतु ॥ ८८ ॥ गौतमउवाच ॥ सर्वरुचि
पुराणंमेवक्तव्यंकिंहितंवद ॥ श्रुतेयस्मिन्भिदानैवजायतेतुहरीशयोः ॥८९ ॥ पौराणिकउवाच ॥ कौर्मोक्तंयत्पुराणंतदेवयोरभिदाभिधम् ॥ शृणोति

१'चिकीर्षितम्' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्तत्प्रथमंतस्यपापंविनश्यति ॥ ४९० ॥ तस्यवक्तातुयोविप्रस्तस्यविज्ञान्तरंभवेत् ॥ श्रोतव्यंमन्यतेपापोयदिभार्याविनश्यति ॥ ९१ ॥ किंचैकं
दुष्करंवक्ष्येश्रोतुर्वक्तुरनिन्दकम् ॥ व्याख्यातरियदिप्रीतिर्द्धर्मादेवप्रकाशिनि ॥ ९२ ॥ आचारदर्शनेपुण्येकर्ममोक्षादिदर्शके ॥ तदातुष्टोमहेशः
स्याद्विष्णुरिष्टफलप्रदः ॥ ९३ ॥ पितरस्तारितास्तेनयान्तितेपरमांगतिम् ॥ ४९४ ॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशिवराघवसंवादेचतुर्दशो
त्तरशततमोऽध्यायः ॥ ११४ ॥ श्रीरामउवाच ॥ कथंपातकसङ्घातसङ्क्रमेब्राह्मणाधमे ॥ पुराणज्ञःकथंव्याख्यांचकारद्विजसत्तम ॥ १ ॥
शम्भुरुवाच ॥ अध्यापनेचाध्ययनेजायतेचाथसङ्गमः ॥ सङ्गतौवत्सरंरामयातिपातकिपातकम् ॥ २ ॥ पुराणज्ञेतुकाकुत्स्थसर्वतत्त्वार्थवेदिनि ॥
अपिपातकसन्दोहचीर्णपापंप्रणश्यति ॥ ३ ॥ प्रभूतवह्निनाशेहिधूमराशिर्यथैवहि ॥ शलभोदीपनाशायवह्निनाशायनप्रभुः ॥४॥ कृतंपापंतथान्येषां
नाशनायपुराणिकः ॥ भूतादिग्रस्तमर्त्यानांभूतादिभयमोचकः ॥ ५ ॥ समन्त्रवानपनयेद्यथानस्वयमातुरः ॥ पौराणिकस्तथापापंनकिंचि
त्प्राप्तुमर्हति ॥ ६ ॥ आत्मनाचकृतंपापमन्यैरपिचयत्कृतम् ॥ पुराणज्ञोनाशयतित्वतिदुष्टंस्वकर्मवा ॥ ७ ॥ भवानीशेहृषीकेशेसमवृत्तिर्विवे
कवान् ॥ लोकवेदक्रियावेत्तारुद्रजाप्यतिनिःस्पृहः ॥ ८ ॥ तुष्टःशान्तःक्रियादक्षःप्रभूतोयोगकृद्वशी ॥ यथैवतेपुराणज्ञोवसिष्ठोभगवानृषिः ॥ ९ ॥
नियोगात्तवभूपालअयोध्यायामतिष्ठत ॥ अपालयद्ध्रुवंकृत्स्नांत्वांचरक्षःसमापतत् ॥ १० ॥ सचशुक्रोपदेशेनराक्षसस्त्वामथाभ्यगात ॥ निद्रा
सक्तंहनिष्यामिनान्यथावसरस्त्विति ॥ ११ ॥ अथविप्रोविदित्वैतद्वसिष्ठस्त्वद्धितप्रियः ॥ सुतंप्रमत्तंकाकुत्स्थंरक्षोहन्तिनसंशयः ॥ १२ ॥ ब्रह्म
वात्तवरंतद्धिमयाकार्यंनिवारणम् ॥ इतिसञ्चिन्त्यविप्रर्षिःसेनामादायनिर्गतः ॥ १३ ॥ रक्षोहन्तुमशक्तस्तुमृत्युहीनंततोमुनिः ॥ स्वयंच
राक्षसोभूत्वावाक्यमाहमहामुनिः ॥ १४ ॥ किमर्थमागतोऽसीहवनंमुनिनिषेवितम् ॥ सआहराजारक्षोघ्नस्तमहंहन्तुमागतः ॥ १५ ॥ मुनिरप्याहकिं
तेनजीवितेनमृतेनवा ॥ भुक्त्वामिषंमदीयंतुयुद्धंकृत्वाजयंव्रज ॥ १६ ॥ राक्षसउवाच ॥ कथंत्वंराक्षसोमह्यंभक्षणायभविष्यसि ॥ वसिष्ठोऽप्यथ
मानुष्यमास्थायवियतिस्थितः ॥ १७ ॥ निष्ठीव्यमस्तकेतस्यमुष्टिनातमताडयत् ॥ ताडितोराक्षसस्तेनव्यद्रावयदृषिश्चतम् ॥ १८ ॥ पलायमाना
वन्योन्यंजलधिंतुगतावुभौ ॥ तत्रस्थेनग्रहेणाऽसौगृहीतोराक्षसस्तदा ॥ मुनिःपुनरयोध्यायांपूर्ववत्समतिष्ठत ॥ १९ ॥ शम्भुरुवाच ॥ तस्मात्स्वाभि
मतंकुर्यात्पुराणज्ञोविमत्सरः ॥ श्रवणस्यविधानंचकथयामिशुभंशृणु ॥ २० ॥ शुक्लपक्षेदिनेशुद्धेवारनक्षत्रयोगतः ॥ करणेचापिलग्नेचग्रहताराबला
न्विते ॥ २१ ॥ अमूढेनग्रहेबालेनचवृद्धेगुरौस्थिते ॥ नकृष्णपक्षेग्रहणेनचनास्तिकसन्निधौ ॥ २२ ॥ पूर्वोक्तलक्षणोपेतंपुराणंशृणुयादिति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुद्धगेहेऽथवाशुद्धवेदिकायांमठेऽथवा ॥ २३ ॥ नदीतीरेदेवगेहेसभामण्डपएवच ॥ रथ्यामठेऽथवारम्येपुण्यशालासुराघव ॥ २४ ॥ स्वयंनमस्य
विप्रेन्द्रान्पुराणज्ञंविशेषतः ॥ आसनंकल्पितंकुर्यादूर्ध्वंसर्वविशेषितम् ॥ २५ ॥ एहिधर्मासनमितिवक्तव्यंस्यादनिष्ठुरम् ॥ पुराणप्रक्रमदिनेयत्कार्यं
तदुदीरयेत् ॥ २६ ॥ व्याख्यातारंपुराणस्यवस्त्राद्यैःपरिपूजयेत् ॥ शुभानिदत्त्वावस्त्राणिसूक्ष्माणिचनवानिच ॥ २७ ॥ करकण्ठविभूषादिपात्रमासन
मेवच ॥ गन्धपुष्पाक्षतैःपूज्यताम्बूलंविनिवेद्यच[1] ॥ २८ ॥ शुक्लाम्बरधरंविष्णुंशशिवर्णंचतुर्भुजम् ॥ प्रसन्नवदनंध्यायेत्सर्वविघ्नोपशान्तये ॥ २९ ॥
सभासदश्चसम्पूज्यगणेशंप्रार्थयेत्ततः ॥ ॐनमेत्यदिमन्त्रेणपूजनंभारतीनुतिः ॥ ३० ॥ प्रातःकालेपुराणस्यप्रक्रमंप्रारभेदिति ॥ उपक्रमदिनेरामत्रिप
ञ्चदशवाशुभाः ॥ ३१ ॥ श्लोकाद्वितीयेदिवसेततोद्विगुणिताःशुभाः ॥ तृतीयेदिवसेरामततश्चाधिकमिष्यते ॥ ३२ ॥ दिनानामव्यवच्छेदा
द्व्याख्यानंश्रवणंतथा ॥ व्यवस्थितिर्यदाजातातदापौराणिकंगुरुम् ॥ ३३ ॥ ताम्बूलादिप्रदायाथपरेद्युःशृणुयादपि ॥ पुराणमेवंश्रोतव्यंदैन
न्दिनमितिश्रुतिः ॥ ३४ ॥ व्रतरूपेणयःकश्चित्पुराणंशृणुयान्नरः ॥ यदैवंतत्पुराणंतुतत्रयातिनसंशयः ॥ ३५ ॥ पुराणंश्रोतुकामेनश्लोकश्लो
कोऽपिचेच्छ्रुतः ॥ तद्दिनेतुकृतंपापंनाशयेत्तन्नसंशयः ॥ ३६ ॥ एवंपुराणंशृणुयाच्चयस्तुसब्रह्महत्याकृतपापबन्धात् ॥ सुरापीतिःस्वर्णहरश्चराम
गुर्वङ्गनागश्चविमुक्तिमेति ॥ ३७ ॥ पापानिचान्यानिकृतानिपुम्भिःसर्वाणिनश्यन्तिपुराकृतानि ॥ इहापियान्यब्दशतार्जितानिश्रोतुर्विनश्यन्ति
तथाचवक्तुः ॥ ३८ ॥ कलौसमस्तविप्राणांसर्वज्ञत्वंनविद्यते ॥ विगुणापिततोव्याख्याफलदादानकर्मवत् ॥ ३९ ॥ पुराणानामभिप्रायंव्यासो
वेदनचापरः ॥ अहंवेद्मिविशेषेणव्यासादपिविधेरपि ॥ ४० ॥ नस्वाध्यायस्तपोवापिनमन्त्रोनजुहोतयः ॥ फलन्तिनतथातिष्येपुराणश्रवणंयथा॥
॥ ४१ ॥ एकैकश्रवणादेवपातकंमहदेवतु ॥ नाशमाप्नोत्यसन्देहःश्रीशैलेवर्तनादिव ॥ ४२ ॥ अतोगुरुःपुराणज्ञःश्रोतृवन्द्योऽघनाशनः ॥ नतस्मा
दधिकःकश्चिद्गुरुरस्तिगतिप्रदः ॥ ४३ ॥ मन्त्रेषुगुरवोयेचवेदशास्त्रेषुयेमताः ॥ नेशतेसर्वविज्ञानंदातुंतस्मान्नबोधकाः ॥ ४४ ॥ पिशाचाः
प्रायशोरामब्रह्मराक्षसनामकाः ॥ वेदमन्त्रस्यवेत्तारोदृश्यन्तेनपुराणवित् ॥ ४५ ॥ पुराणविमुखोनैवसर्वःसर्वंहिपश्यति ॥ पुराणज्ञोहितस्तस्मा
त्पापनाशकरःप्रभुः ॥ ४६ ॥ तत्पूजासर्वपूजास्यात्सर्वद्रोहोऽस्यपीडनम् ॥ यथासमस्तदानानांविद्यादानंप्रशस्यते ॥ ४७ ॥ पौराणिकस्तथा
धन्यस्तत्रदानंमहत्फलम् ॥ ४८ ॥ रामउवाच ॥ किंवापौराणिकेदेयंकियत्कीदृशमेवच ॥ पुराणंकीदृशंवर्ज्यंवर्ज्यःकीदृक्पुराणवित् ॥ ४९ ॥

१ 'ताम्बूलं विनिवेद्यच' इ० प०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शम्भुरुवाच ॥ षड्रसानन्नपानानिस्नेहद्रव्याणियानिच ॥ गृहंसोपस्करंरामपुराणज्ञायदापयेत् ॥ ५० ॥ पर्याप्तान्येवसर्वाणिअधिकानिफला
धिकात् ॥ दद्याद्द्रव्यमतोभूयः सचैलंशोभितंमृदु ॥ ५१ ॥ भूषणानियथार्हाणिस्वशक्त्याप्रतिपादयेत् ॥ गन्धपुष्पंप्रतिदिनंकेवलंगन्धमेवच
॥ ५२ ॥ केवलंचतथापुष्पंफलकालेफलान्यपि ॥ ताम्बूलंचतथादद्यान्नमस्कुर्याच्चभक्तितः ॥ ५३ ॥ पुराणस्यसमाप्तौतुदद्याद्दानादिकंतथा ॥
अधिकंतुतथादेयंभूहिरण्यादिकंनृप ॥ ५४ ॥ नचतूष्णीमुपक्रम्यश्रोतुमर्हतिकश्चन ॥ सभासद्भिःकृताचैवयापूजैकेनवाकृता ॥ ५५ ॥ देवस्थाने
यथाशक्तिसर्वैःपूजनमिष्यते ॥ तीर्थेऽपिचयथारामपुण्येष्वायतनेषुच ॥५६॥ स्वशक्त्यापूजनंकुर्यात्पुराणज्ञायराघव ॥ श्रोतुस्तुलक्षणंपूर्वमयोक्तंतु
भवेन्नृप ॥५७॥ पौराणिकस्यसर्वस्यलक्षणंकथयामिते ॥ कुलहीनोमहाव्याधिर्महापापीतिरस्कृतः ॥५८॥ शौचाचारविहीनश्चवेदस्मृतिविवर्जितः॥
अन्यदेवःपूतिवचोव्यङ्गश्चाप्यधिकाङ्गवान् ॥ ५९ ॥ परपूर्वापतिःस्तेनःप्राणिहन्तानिराकृतिः ॥ अथवर्ज्यंपुराणंतेकथयामिनृपोत्तम ॥ ६० ॥
पूर्वज्ञैरुच्यमानंचयत्प्रोक्तंमुनिभिःपरैः ॥ व्यासादयोमुनिवरायत्प्रोचुस्तदुदीरयेत् ॥ ६१॥ पुराणस्थंपठेद्ग्रन्थंव्याख्यायेतविचारयन् ॥ ययाकयापि
वारामभाषयादेशभेदतः ॥ ६२ ॥ नदेशभाषारचितंग्रन्थंश्रुत्वाफलंलभेत् ॥ व्याख्यायाकापिकाकुत्स्थपुराणस्यहिताहिसा ॥ ६३ ॥ तस्मात्त्वं
देवयाचस्वव्याख्यास्येयत्पुराणकम् ॥ ६४ ॥ शम्भुरुवाच ॥ एवंपौराणिकेनोक्तंश्रुतवानपिगौतमः ॥ स्वयंवस्त्रत्रयंप्रादाद्ब्राह्मणायमहात्मने ॥६५॥
कौर्मंपुराणंप्रथमंश्रुतवानितिनःश्रुतम् ॥ दत्तवान्स्वर्णमधिकंवस्त्राणिचशुभानिच ॥ ६६ ॥ अथलैङ्गंचशुश्राववैष्णवंवामनंतथा ॥ पाद्मंचगारुडंचैव
सौरंब्राह्ममथैवच ॥ ६७ ॥ एवमष्टसशुश्रावपुराणानिसगौतमः ॥ अथरामायणंचैवकौर्ममेवपुनश्चसः ॥ ६८ ॥ शिवनारायणेत्येवंजपंचक्रेसदैवहि ॥
अवापनिधनंचापिसगतोब्रह्मणःपदम् ॥ ६९ ॥ ब्रह्मणापूजितोविप्रोविष्णुलोकमथागमत् ॥ विष्णुनापूजितःसोऽथजगामशिवमन्दिरम् ॥ ७० ॥
सर्वेषामेववन्द्योऽसौगौतमोमुनिसत्तमः ॥ भारतश्रवणेचापिनियमायेमयेरिताः ॥ ७१ ॥ पुराव्यासेनमुनिनात्रिवर्षाद्यत्कृतंशुभम् ॥ श्रवणात्तस्य
कृत्स्नस्यव्याकर्ताभारतस्ययः ॥७२॥ नकिञ्चित्प्रणमेद्विप्रंमुक्त्वायोगिनमुत्तमम् ॥ सर्वेषामेववन्द्योऽसौभारतंव्याकरोतियः ॥ ७३ ॥ योमहाभारतं
नित्यंव्याख्यास्यतिपठेच्चवा ॥ ससर्वेभ्योऽधिकोविप्रस्तारयेच्चैवमानवान् ॥ ७४ ॥ व्याकरोतिचपर्वैकंसर्वाणिकतिचित्तुवा ॥ सर्वपापविनिर्मुक्तो
हव्येकव्येविशिष्यते ॥ ७५ ॥ तमेवप्रणमेद्विप्रंतमेवार्हेचपूजयेत् ॥ तमेवभोजयेन्नित्यंसर्वंतस्मैनिवेदयेत् ॥ ७६ ॥ तस्यपूजाविधिःप्रोक्तोव्याख्यान
समयेद्विजः ॥ प्रतिपूज्योऽथवस्त्राद्यैःपूजयेद्विधिमार्गतः ॥७७॥ आदिपर्वसमाप्तौचदद्यात्सूक्ष्माम्बरत्रयम् ॥ सुवर्णंचयथाशक्तिसभापर्वणिवाससी ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ७८ ॥ आनुशासनिकारण्यस्वर्गारोहेषुपर्वसु ॥ आदिपर्वणिपूजायासापूजानृपपुङ्गव ॥ ७९ ॥ कर्णाश्वमेधवैराटशल्यद्रोणेषुपर्वसु ॥ सूक्ष्मवस्त्र
त्रयंशुद्धंनिष्कद्वयमथापिवा ॥ ८० ॥ क्षुद्रपर्वस्वथान्येषुनिष्कावथसमानयेत् ॥ हरिवंशेसनिष्कंतुवस्त्रत्रितयमेवतु ॥ ८१ ॥ भारतस्याखिल
स्यैवसमाप्तौक्षेत्रदोभवेत् ॥ रामायणस्यश्रवणेकाण्डेकाण्डेप्रपूजयेत् ॥ ८२ ॥ क्षेत्रंपर्याप्तमथवासुवर्णमपिदापयेत् ॥ व्याख्यातुर्गुरुवाक्यस्यसर्व
कल्मषनाशनः ॥ ८३ ॥ अर्थोधर्मश्चकामश्चमोक्षश्चनृपसत्तम ॥ व्याख्याश्रवणतःसर्वेसिध्यन्तिचसुबुद्धयः ॥ ८४ ॥ ब्रह्महत्यादिपापानांसर्वेषामपि
नाशनम् ॥ एकेनश्रवणेनास्यकिंनरैर्नश्रुतंभुवि॥८५॥यानवस्त्रसुवर्णाद्यैर्नित्यमेनंप्रपूजयेत्॥व्याख्यातारंयतःपापसन्दोहस्यविनाशनम्॥८६॥ अन्या
न्यपिपुराणानिमुनिप्रोक्तानितान्यपि ॥ श्रोतॄणांपापनाशायवक्तुश्चापिविशेषतः ॥ ८७ ॥ यश्चसर्वपुराणानिषट्त्रिंशत्तुप्रकीर्तयेत् ॥ शृणोतिवा
नतस्यास्तिचित्तच्छेदःकदाचन ॥ ८८ ॥ ब्राह्मंपुराणंप्रथमंद्वितीयंपाद्ममुच्यते ॥ तृतीयंवैष्णवंचैवचतुर्थंशैवमुच्यते ॥ ८९ ॥ अथभागवतं
प्रोक्तंपञ्चमंषष्ठमुच्यते ॥ भविष्यंनारदीयंचसप्तमंपरिकीर्तितम् ॥९०॥ मार्कण्डेयमितिप्रोक्तमष्टमंनवमंतथा ॥ आग्नेयंब्रह्मवैवर्तंदशमंपरिकीर्तितम् ॥
॥ ९१ ॥ लैङ्गंचवामनंचैवस्कान्दंमात्स्यमथैवच ॥ कौर्मंवाराहमुदितंगारुडंवाथकीर्तितम् ॥ ९२ ॥ ब्रह्माण्डमित्यष्टादशपुराणानिविदुर्बुधाः ॥
तथाचोपपुराणानिकथयिष्याम्यतःपरम् ॥ ९३ ॥ आद्यंसनत्कुमाराख्यंनारसिंहमतःपरम् ॥ तृतीयमाण्डमुद्दिष्टंदौर्वाससमथैवच ॥ ९४ ॥
नारदीयमथान्यच्चकापिलंमानवंतथा ॥ तद्वदौशनसंप्रोक्तंब्रह्माण्डंचततःपरम् ॥ ९५ ॥ वारुणंकालिकाह्वानंमाहेशंसाम्बमेवच ॥ सौरंपाराशरंचैव
मारीचंभार्गवाह्वयम् ॥ ९६ ॥ कौमारंचपुराणानिकीर्तितान्यष्टवैदश ॥ अष्टादशपुराणानांव्याकर्तातुभवेन्मनुः ॥ ९७ ॥ इतिश्रीपाद्मेमहापुराणे
पातालखण्डेशिवराघवसंवादेपुराणमाहात्म्यकथनंनामपञ्चदशोत्तरशततमोऽध्यायः ॥ ११५ ॥ सूतउवाच ॥ संध्यावन्दनकर्मक्रियतामितिरामो
मुनिमाचष्टायम् ॥ उष्णद्युतिरप्यस्तमुपैतिद्विजकुलमेतन्नीडमुपैति ॥ १ ॥ स्वयमपिसन्ध्यावन्दनकामोऽव्रजदुत्तरदिशमुज्झितयानः ॥ हाहाहूहू
कृतसङ्गीतिर्वन्दिप्रमुखप्रस्तुतकीर्तिः ॥२॥ गौतमीतटमुपेत्यराघवोवायुनन्दनसुधौतपद्युगः ॥ जाम्बवत्कृतकरावलम्बनःप्रापदुत्तमनदींतुगौतमीम् ॥
॥ ३ ॥ करद्वयेधृतकुशःसराघवःप्रागमद्वरुणदिशामथोत्तमाम् ॥ ४ ॥ दत्त्वाततोऽर्घत्रितयंयथाविधिप्रहृष्टरोमाथजजापसोऽन्तरे ॥ सम्प्रार्थयित्वा
वरुणंयथाक्रमंशम्भुंवसिष्ठंप्रणनामराघवः ॥ ५ ॥ ताभ्यांकृताशीरगमन्मनःपदंहनूमताक्षालितपादपङ्कजः ॥ जुहाववह्निंनथबन्दिमागधैःसंस्तूय
मानोऽथविनिर्ययौबहिः ॥ ६ ॥ प्रहसच्चन्द्रकिरणैःसुधालिप्तमिवाम्बरम् ॥ प्रसन्नताराकुसुमंवितानमिवसर्वतः ॥ ७ ॥ अथागच्छत्सौधतलं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृद्धामात्येनकल्पितम् ॥ नानासनसमोपेतंसभास्थानंययौनृपः ॥ ८॥ अथमुनिंह्युपवेश्यसराघवःस्वयमपिप्रथमासनमाभजत् ॥ कविगणाःपरितः
पृथुविग्रहारचनयास्थितिमाप्रतिपेदिरे ॥ ९ ॥ सुखस्थितंनृपमभिवीक्ष्यसद्विजोवचस्तदासमुचितमाहशम्भुः ॥ इहस्थितोभवतिसमस्तपूजितः
कथंकथानृपवरवर्ततेगुहायाम् ॥ १० ॥ आकर्ण्याथरघूद्वहोद्विजवचःशुश्रूषुरासीत्कथांतत्रस्थोनिपुणंनिवार्यवचनंसर्वैःश्रुतंतत्क्षणात् ॥ शुश्रूषामि
कथंमहाद्भुततयास्वात्माश्रयामन्यथारक्षोबाधनवादिनीमथनृपःकिंत्वेतदित्याहच ॥ ११ ॥ कुम्भश्रोत्रवधःपुरासमजनिप्राप्तोदशास्योवधंपश्चादि
त्ययमन्यथाविरचितंरामायणंभाषते ॥ कोऽयंविप्रवरःसमस्तजनतानास्तिक्यसम्पादकोराज्ञांस्थानमुपेत्यवक्तिसमयादण्डयोऽथपूज्योऽथवा॥१२॥
अथाहजाम्बवानमुंरघूत्तमंकथांप्रतिरामायणंनतावकंत्विदंहिकल्पितंमतम्॥ समस्तमत्रविस्तराद्वदामिदेवतच्छृणुपङ्केरुहस्यसूनुतोमयाश्रुतंपुराह्यभूत्॥
॥ १३ ॥ जाम्बवन्तंविज्ञाप्यरामचन्द्रोवचनमाह॥ श्रीरामउवाच ॥ कीर्तयपुराणंमेशुश्रूषुःकुतूहलादहंप्रणीतंतत्केनचविज्ञातम् ॥ जाम्बवा
नथबभाषेहिविधात्रेनमोनमस्तथैवविधुभूषणकेशवाभ्याम ॥ अथपुरातनंरामायणंकथयामि ॥ यस्यश्रवणेनाखिलजन्मसम्पादितपापक्षयो
जायते ॥ अथतथापिदशरथोदशरथसमानरथीमहीयसाबलेनसुमानसनामनगरजिगीषयापङ्केरुहसुतसुतंवसिष्ठमाहूयनमस्कृत्यमुनिदत्तानुज्ञःशता
क्षौहिणीसेनयासहारुह्यतुरङ्गमंचन्द्रसमानशरीरमतिरोषसमाविष्टोविष्टरश्रवसमाराध्यदण्डयात्रांचकार॥साध्योनामस्वीययासेनयावृतोदशरथाभिमुख
माययौयोद्धुंयुद्धंचान्योन्यमभूत् ॥ मासमेकंयुद्धंकृत्वादशरथस्तंसाध्यंजग्राह ॥ अथसाध्यसूनुर्भूषणोनामाल्पपरिवारोयुयुधेदशरथेन ॥ दशरथोऽपि
साध्यसूनुंभुवोभूपणमवलोक्ययोद्धुमेवनैच्छत् ॥ कथमेतादृशंहन्मिचास्मिन्हतेऽस्यकथंपिताभविष्यतिकथंतन्माताकथमप्रौढयौवनाप्रियाभार्या ॥
अमुष्यहिदेहेसमालिङ्गनचुम्बनपरिवर्तननवीनतरदलारविन्दपदानिकुसुमानीवदृश्यन्ते ॥ एतत्समानवर्णवयाएतादृशःसुभगःपरमप्रीतिवर्द्धनोनाम
पुत्रोभल्लूकभक्षितोमृतःस्मृतिपथंप्राप्यापिमांरक्षयितुमिच्छतीवममहृदयमन्यथाकरोतिइतिमनसावितर्क्यातिबालकंग्रहीतुमारभत ॥ सचासाध्योऽपि
पराधीनोबभूव ॥ सचकुमारेणसहपराजयखेदममत्वासुखमध्युवासच ॥ दशरथोऽपितत्रमासंस्थित्वातत्पुत्रसन्दर्शनसुखमवलोक्याचिन्तयत् ॥
अहोसर्वदुःखापनोदनक्षममेतन्मुखावलोकनंपुत्रसंवर्द्धनंनामसर्वगार्ष्ट्रिकोममजयःपुत्रवियोगमनुस्मरतोदुःखायकेवलंभवति ॥ तदस्यपृच्छांकरोमि
कथमीदृशोजायतेपुत्रइतिवितर्क्यतमपृच्छत्॥साध्योऽपिसकलमोक्षमार्गंक्षितीशायादिशत् ॥ःहरीशानौसहाराध्यसर्वैकादशीरुपोष्यद्वादशीषुब्राह्मणा
नाराध्यतत्तत्कालभवंफलपूर्वमन्नाद्यंव्यञ्जनं पुष्पंचन्यायेनसम्पाद्यकपिलाघृतेनकेशवंस्नापयित्वासुद्रचूर्णेनसँल्लिप्यस्वादूदकेनस्नापयित्वासुरभिपाटीरं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वयमुद्द घृष्टंमृगनाभ्यागुरुसारेणवासमेतंदेवाङ्गेसर्वमुपलिप्यसतुलसीदलैर्यूथिकाकरवीरनीलोत्पलकमलकोकनदद्रोणकुसुममरुवदमनकगिरिकर्णिका
केतकीदलपूर्वैर्यथासम्भवमभ्यर्च्यद्वादशाक्षरेणपुरुषसूक्तेनवानाम्नाषोडशोपचारेणवाराध्यप्रणम्यनृत्यंकृत्वादेवंक्षमापयेत् ॥ तथाव्रतानिविचित्राणि
नारायणप्रीणनायकुर्यात्॥प्रसन्नोभगवान्मुनिरीप्सितंपुत्रंयच्छतितदमुमाराधयस्वेतिदशरथमुक्तवान् ॥ सचाश्विसाध्यंतत्रस्थाप्यगत्वायोध्यांतथासर्वं
कृतवान्॥अथपुत्रकामेष्टौसमाप्तायामाहवनीयाद्यज्ञमूर्तिःशङ्खचक्रगदापाणिरुदतिष्ठत्॥राजानंचवरंवृणीष्वेत्युक्तवान् ॥सचराजावव्रेपुत्रानतिधार्मिका
न्दीर्घायुषश्चतुरोलोकोपकारकान्देहीति ॥ अथराजमहिष्यश्चतस्रःकौशल्यासुमित्रासुरूपासुवेषाचेति ॥ राजानमब्रुवन्देवप्रतियोषमेकैकेनपुत्रेण
भवितव्यम् ॥ अथकौसल्योवाच ॥ एषयदिप्रसन्नोदेवस्तदायमुत्पद्यतांमम ॥ राजोवाच ॥ ममयदिष्टंतदयंप्रार्थ्यसेहरिः ॥ विष्णोप्रसीद
देवेशकमलापतेशङ्खचक्रगदाधरविभीषणसृष्टिसमस्तलोकपालादिपूजितपादयुगलशाश्वतहरेनमस्तेनमस्तेएवंस्तुतोभगवानथराजानमाह ॥ माधव
उवाच ॥ तवपुत्रोभविष्यामिकौशल्यायाम् ॥ अथचरुंप्राविशद्धरिः ॥ तंचरुंहिचतुर्धाविभज्यभार्याभ्योदत्तवान् ॥ अथकौसल्यायांरामो
लक्ष्मणःसुमित्रायांसुरूपायांभरतःसुवेषायांशत्रुघ्नोजज्ञे ॥ खात्पुष्पवृष्टिश्चपपात ॥ अथचतुराननःस्वयमुपेत्यजातकर्मादिकाःक्रियाश्चक्रे ॥
त्रिभुवनाभिरामतयारामइतिनामचक्रेरूपशौर्यादिलक्ष्मीयोग्यतयालक्ष्मणइत्यपरस्यभुवंभारात्तारयतीतिभरतः शत्रून्हन्तीतिशत्रुघ्नइतिनामानिकृत्वा
ब्रह्मास्वभवनंजगाम ॥ शिशवश्चवृद्धिमीयुः ॥ अथपादसञ्चारिणंबालचन्द्रसङ्काशदर्शनंबिम्बाधरमुन्नततिलप्रसूननासंपुरश्चूलिकालम्बमानरत्नपत्रकं
श्रवणलोललम्बमानकुण्डलंवक्षःस्थलविचलितस्थूलमुक्ताहारंविलसत्कार्तस्वरबाहुवलयंशिञ्जन्मणिकङ्करत्नाङ्गुलीयकंहेममणिरचितश्रोणिसूत्रंशिञ्जन्नू
पुरोपशोभितपादमङ्गुलीयोपशोभितपादमध्याङ्गुलीकंवज्राङ्कुशसरोजलाञ्छनशोभितोरुपादतलंतूणीरसदृशजङ्घंकरिकरसदृशोरुंविस्तृतजघनंसूक्ष्मम
ध्यवलावर्तकंगम्भीरनाभिमिन्द्रनीलशिलाविशालवक्षःस्थलंकम्बुग्रीवंचन्द्रबिम्बसदृशवदनमर्द्धचन्द्रसदृशललाटंनीलकुटिलकुन्तलंक्रीडासक्तंधूलि
भिरापाण्डुरंफुल्लपद्मदलारक्तविलोललोचनंमहेश्वरमिवोद्धूलितभूतिंमहेश्वरमिवदिगम्बरंरामंकुमारंराजादशरथोदृष्ट्वाहर्षपरिपूर्णहृदयः पुत्रमालिङ्ग्यचु
म्बित्वावक्षस्यालिलिङ्गदृढम् ॥ अथकुमारोऽपिपार्श्वेनास्याङ्कमारोप्यकलकलितलोचनोयत्किञ्चिदुवाच ॥ याचमानमितस्ततोवीक्षमाणस्तात
गच्छेशयेतातक्रीडामितातेत्यादिपुत्रसुखमनुभूयानुभूयनिर्वृतिंययौ ॥ अथकदाचिद्भोक्तुमागतेराजनिरामचन्द्रोबालक्रीडासक्तहृदयोबहुक्रीडनकर
कमलउत्प्लुत्यधावमानोनरपतिपुरःस्थितमणिखचितसुवर्णभाजनस्थमन्नंवामकरेणगृहीत्वाराजनिचिक्षेप ॥ इदमपिराजासुखायमेने ॥ एता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृशान्यन्यानिचकाररामचन्द्रः ॥ अथकदाचित्क्रीडमानेरामेवात्यारामममपातयद्रामश्चरुदन्नपतत् ॥ एतस्मिन्नन्तरेब्रह्मराक्षसोराममगृह्णात् ॥ रामश्च
मूर्च्छामाप ॥ अथसहचरोबालइतस्ततोरोरूयमाणोरामंतथाविधंराज्ञेव्यज्ञापयत् ॥ अथराजाराममादायवसिष्ठमाहाकिमिदंरामस्येति ॥ अथव
सिष्ठोभस्मादायाभिमन्त्र्यब्रह्मराक्षसंमोचयामास ॥ पप्रच्छकोभवानितिसचाहाहंवेदगर्वितोब्राह्मणोबहुशःपरधनमपहृत्यब्रह्मराक्षसोजातोमेनिष्कृतिं
विचारय ॥ वसिष्ठउवाच ॥ इदानीमितःपरमेकवर्षशतोपभोग्यंराक्षसत्वंनरकंभागीरथीस्नानमेकंशिवायबिल्वपत्रशतंसमर्प्यततःस्नात्वापापाद्विमुक्तो
भवसीति ॥ कदाचित्तादृशंकृतपुण्यंतवपदंप्रयच्छामितदुपरिशिष्टांगतिंभजेतिवसिष्ठवाक्यमाकर्ण्यब्रह्मराक्षसोवसिष्ठोपदिष्टपुण्यवशाद्दिव्यशरीरो
भूत्वानमस्कृत्यस्वर्गंजगाम ॥ अथरामंप्राप्तेकालेउपनीयवसिष्ठोवेदानध्यापयामासषडङ्गानिमीमांसाद्वयंनीतिशास्त्रंच ॥ अथधनुर्वेदमायुर्वेदंभरत
गान्धर्ववास्तुशाकुनविविधयुद्धशास्त्राणिच ॥ अथविवाहंकर्तुकामेनराज्ञादशरथेननानादेशजनपतीन्प्रतिदूताःप्रेरिताः ॥अथकश्चिच्छीघ्रमागत्यराजा
नमिदमब्रवीत्॥राजन्विदर्भदेशाधिपतिर्विदेहोनामराजा ॥ तस्यपुत्रीवैदेहीहोमलब्धारूपेणलक्ष्मीसमासर्वलक्षणसम्पन्नारामयोग्याविद्यते॥ सचतांदातुं
राजारामायोद्यतः॥तद्गम्यतांशीघ्रमिति ॥ अथवसिष्ठादीन्प्रेषयामास ॥ तेचतत्रगत्वातांचनिरीक्ष्यलग्नंनिश्चित्यायोध्यामेत्यराजा ॥ मुक्त्वारामसहि
ताः पृथिवीपतिसमेताःशीघ्रंविविधकरितुरगशकटशिबिकान्दोलिकाभिरतिसुभगरूपभोगविलासक्रियानिपुणविदितविविधचेष्टागन्धर्वाः कामशास्त्र
सुकुशलामृदुकठिनपृथुपयोधरासन्नकण्ठाःस्थूलसूक्ष्मललाटबिम्बदशनच्छदमुखपङ्कजाःकुटिलकुन्तलदीर्घकेशधम्मिल्लाः कनकपत्रकर्णाःस्नानचेष्टयो
त्थितरोमशोभिताजपाकुसुमरक्तदशनाविशदविस्फुरच्छफरीलोचनाःशुक्तिकासदृशश्रवणाः नक्षत्रसदृशस्थूलमुक्तफलोपशोभितनासापुटामुकुरसदृश
कपोलास्तिलप्रसूननासिकाआनम्रमध्यप्रदेशचूचुकाइन्द्रगोपप्रतीकाशाधरपुटदशनक्षताः समदीर्घकाङ्गप्रदर्शनास्थितसर्वप्रदेशर्तुवर्तुलानातिमांसलाः
पिण्डकाग्रन्थिनीव्योवलितबाहुमूलाअनतिचिरकालोत्थितरोमतयाहरिद्रावर्णतयाचकर्णिकारदलसदृशबाहुमूलामृदुस्निग्धवर्तुलसूक्ष्ममध्यप्रदेशाः क
ठिनस्थूलवर्तुलामग्नचूचुकपरस्परस्थानाक्रमणस्पार्द्धपयोधरमध्यलब्धपदकपयोधरोपरिचञ्चलविविधमणिमयहारोपशोभितवक्षःस्थलाः पयोधरपरि
तोलब्धपदतयातरुणदृष्टिपरम्परतया असमानयानाभिकूपोपरितनरोमराज्योपशोभितोदरप्रदेशाभज्यमानमध्यस्थलीकरणएववलीत्रयोपशोभितामु
ष्टिग्राह्यमध्याःकरिकरोपमजघनप्रदेशाअरोमसदृशमृदुस्निग्धामलासमजान्व्यःकदलीस्तम्भसन्निभोरुयुगलाआमग्नजानुकृशकुशवर्तुलपिण्डिकारहि
तजङ्घाआमग्नगुल्फाआसूक्ष्मस्निग्धादीर्घदीर्घाङ्गुलीपादानूपुररवाहूयमानमदनाहंसमतङ्गजगमना दक्षिणाङ्गुष्ठस्पर्शिकच्छाग्राउपरिकच्छंनीवींकृत्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करद्वययुतावस्त्रप्रदेशकण्ठमपावृत्यापरवसनपरिभागावृतस्तनवसनापरभागेवामांसएवदक्षिणपार्श्वगतेनदशाभागेननाभिप्रान्तेनप्रवेशितोपशोभितगा
त्रयष्ट्योयोषितोविवाहमङ्गलकर्मकरणायानेकशआगच्छन्॥ बालिकाश्चविद्युल्लतांशुशोधितगात्रयष्ट्यउद्भिन्नकुचकमलकुड्मलविविधहारोपशोभिवक्ष
सोयत्किञ्चिद्भाषिण्योऽतिचपलमृदुगतयोवृद्धवनिताश्चागच्छन् ॥ अथविदेहपुरतःक्रोशमात्रेचूतवनिकायांविविधविटपविस्तरप्रदेशविविधविहङ्गकूजि
तकर्णनदत्तकर्णवनहरिणशाववत्यांमहारजतनिर्मितोच्चनीचप्रासादोपशोभितप्रदेशविविधविहङ्गायां हेमवल्कलसंवीतभसितोद्धूलितशरीरजटिलमुनि
गणध्यानोपासनोपशोभितवृक्षमालायांविविधविद्याधरवधूपयोधरभाराभिभूतविचरिततरङ्गसरसीयुतायां सरस्तीरमिलितसैरन्ध्रीयुवतिभिराहूयमान
तरुणजनायांनानावर्णकुसुमसौरभवासिताशेषप्रदेशायामितस्ततोरिरंसयाप्रदर्शितस्फारशफरीविलोचनतरलचक्षुषा प्रभाविलसितशरीरवेश्याजनायां
विविधाश्चर्ययुतायांदशरथःसामात्यपुरोहितोऽभिरामरामादिपुत्रसहितःसुखमुवास ॥ अथवैदेहोऽपिमिथिलांनानापताकोपशोभितांविविधप्रासा
दगोपुरोद्यानदेवतायतनोपशोभितामन्योन्यकेलिचतुरयुवतिजनानुकीर्णामुशीरविरचितमहाप्रपांसुकेलीजनोपशोभितविशिखां विविधपण्योपशोभि
तरथ्यांतत्रतत्रब्रह्मघोषशोभितमठांप्रतिमन्दिरंमीमांसादिव्याख्यानसम्पादसीमाध्ययनां सुपुण्यहविर्गन्धसामादिस्वरपदक्रमश्रुतिब्राह्मणवाटिकामने
कपरिवृढमन्दिरप्रवेशनिष्क्रीतागुरुकुङ्कुमाध्वर्युवेषां मृदुलवसनताम्बूलरक्तदन्तच्छदकामिनीं मृदुवचनकठिनवचनकरसंज्ञानिर्धारितप्रतिवचनविवि
धोपायनाहरणकरजनोपशोभितां मृदुधवलजघनपरिवीतवस्त्रोपरिभागेन स्निग्धवर्तुलपरस्परसङ्घर्षपयोधरमध्यप्रदेशोपशोभितवामांसकन्दोपशोभि
तवनितांविविधमुक्ताहारजपासङ्काशदशनच्छदमन्दहासमालाकारसहस्रोपशोभितां पुण्यासवसाधनमन्दिरांतत्रतत्र विचित्रतोरणांविशुद्धवीथिकांतत्र
तत्रस्थापितकल्पपादपांरम्भाविभूषितद्वारांपुरींशोभितांशोभयामास ॥ अथाभिकलनार्थंविलासिन्योनिशादूर्वाक्षतमन्त्रमङ्गलकज्जलितकैशिकध
म्मिल्ललताग्रथितजटोपशोभितसीमन्तशीर्षशोभितनासामुखविचित्राभरणार्हणहेमपात्रावस्थिताज्यगुग्गुलुफलादिसौभाग्यद्रव्यमुद्वहन्तीभिः स्त्रीभि
रन्यैरपिशोभितजनैःसराजानिर्जगाम ॥ तदानींमङ्गलतूर्यघोषादेवदुन्दुभिभेरीनिसाणमर्दलशङ्खादिनादाःप्रादुर्बभूवुः ॥ गायकाश्चमङ्गलानिजगुः
॥ मङ्गलवेदवाक्यानुपाठेनवैदिकाब्राह्मणाःकुलपाठकाभेरीघोषेणचकृत्स्नमाकाशमापूरयन् ॥ अथान्योन्याक्षतपूर्वमङ्गीकुर्वन्तःसूतबन्दिजना
दिभिःस्तूयमानाःपुरंप्रविविशुः ॥ विदेहनगरात्पश्चिमभागेनिर्मितंमन्दिरंदशरथःप्रविवेश ॥ अवशिष्टाश्चयथायोग्यंभवनंविविशुः ॥ अथ
नारदोमिथिलांतदानीमेवागच्छत् ॥ विदेहोऽपिदेवर्षिमभिपूज्यस्वागतंपृष्ट्वाभोजनंकारयित्वासुखासीनायमुनयेसघनसारंताम्बूलंदत्त्वाव्यज्ञा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पयत् ॥ श्वोविवाहेभवान्स्थातुमर्हतिकारयितुंविवाहम् ॥ नारदउवाच ॥ श्वोहिनक्षत्रंसूर्यनक्षत्रदर्शनंतत्रविवाहोनकर्तव्यइति ॥ अथ
मौहूर्तिकंवृद्धगार्ग्यमाहूयराजापप्रच्छ ॥ क्वविवाहमुहूर्तइति ॥ श्वइतिगार्ग्यउवाच ॥ राजाचनारदंगार्ग्यंचोदीक्ष्यभोइदमित्थमितिपप्रच्छ ॥
अथनारदोगार्ग्यमुवाच ॥ कथमुक्तंलग्नंदास्यसि ॥ अथगार्ग्योविषघटिकाश्चविहायलग्नंदास्यामीत्युवाच ॥ नारदोऽपिब्रह्मवचनानिकिंनजानासी
त्युक्तवान्गार्ग्यम् ॥ गार्ग्येणपृष्टस्तान्दोषानपठत् ॥ उल्काचब्रह्मदण्डश्चमोघःकम्पस्तथैवच ॥ सर्वकार्यविनाशायदृष्टावैब्रह्मणापुरा ॥ १४ ॥
प्रतिष्ठासुविवाहेषुमौञ्जीबन्धाभिषेकतः ॥ अन्येषुसर्वकार्येषुविषनाडीर्विवर्जयेत् ॥ १५ ॥ अतःपरंतुकार्याणांकरणेनचदोषभाक् ॥ विवाहा
दिषुकार्येषुदोषमेववदाम्यतः ॥ १६ ॥ उल्कादहेत्कुलंसर्वंब्रह्मदण्डोविनाशयेत् ॥ मोघस्तुमरणायस्यात्कम्पःकम्पायकर्मणः ॥ १७ ॥ इति
नारदोक्तमाकर्ण्यगार्ग्योमुनिर्मौनपरोऽभवत् ॥ दध्यौरविंग्रहपतिंविहायविषनाडीर्विवाहःक्रियतामिति॥नारदउवाच ॥ कथंब्रह्मवचनम्॥ सूर्यउवाच॥
देशभेदेनव्यवस्थोदिता ॥ तदस्मिन्देशेविवाहोविषघटिकाविहायकर्तव्यएव ॥ नारदोऽप्यनुमेने ॥ उवाचश्वःपराह्णेचक्षत्रविवाहश्चभवेदतःस्वयंवरार्थं
नृपाआगच्छन्तुतन्नृपदूतान्प्रेष्य ॥ अथराजादशरथानुमतेनसर्वानेवनृपानागमय्याचिन्तयत् ॥ कथंसर्वानेवतिरस्कृत्यवैदेहीरामायदेयेति ॥ अथ
रात्रौमुहुर्निःश्वस्यनिद्रालुरपिननिद्रामाप ॥ अथमध्येनिशंराजाशुचिर्भूत्वात्र्यम्बकंसाम्बिकंमङ्गलदुकूलधारिणंकमलभवपुरुषोत्तमशक्रप्रमुखनिखि
लदेवैर्भृगुप्रमुखमुनिवरैर्हाहाप्रमुखगन्धर्वैस्तुम्बुरुप्रमुखैश्चश्रुतिस्मृतीतिहासपुराणैर्मूर्तिमद्भिश्चसिद्धविद्याधरादिमातृकागणैश्चनन्दीप्रमुखगणैश्चसेव्यमा
नपादकमलंसर्वामङ्गलपरिमोचकमतिपुण्यसलिलयागङ्गया निष्कलङ्केनचन्द्रमसासेव्यमानशिरोभागंवामाङ्कारूढयागिरिजयाप्रदीयमानवीटिंसहा
संसकामंसहावेक्षणमाददानंगोक्षीरसदृशं प्रतिकूलकस्तूरिकासदृशकण्ठंमृदुसूक्ष्मस्निग्धजटाभिर्विरचितकपर्दंविशुद्धकार्तस्वरकुण्डलोपशोभितगण्ड
भागंद्विरष्टवर्षवयसंगोक्षीरसदृशस्थूलमुक्ताफलकौसुम्भवर्णाञ्चलेनावेष्टितशिरोभागंविविधरत्नविरचितकार्तस्वरभूषितवक्षःस्थलमतिधवलोपवीतेनोप
शोभितशरीरमम्बिकानुलग्नकुङ्कुमारुणसुगन्धिशरीरमीक्षमाणंतर्जमानकाममार्गणंकोटिकन्दर्पसदृशंमनसाचिन्तयत् ॥जजापशतरुद्रियंजुहावचतेनैव
कामाहुतीःप्रास्तुवच्चपुरुषसूक्तेन ॥ अथतादृशएवमहेश्वरस्तत्रप्रादुरभूत् ॥अथराजानमस्कृत्यास्तुवीत ॥राजोवाच॥ क्षितिसलिलगगनपवनदहनरवि
शशियजमानमूर्तिभिरष्टमूर्तेविश्वमूर्तेलोकमूर्तेत्रिभुवनमूर्तेवेदपुराणमूर्तेयज्ञमूर्तेस्तोत्रमूर्तेशास्त्रमूर्ते स्वधामूर्तेनारायणमूर्तेसर्वदेवतामूर्तेत्रयीमयत्रयीप्रमा
णत्रयीनेत्रसामप्रियवसुधाराप्रियभक्तिप्रियभक्तसुलभाभक्तविदूरस्तुतिप्रियधूपप्रियदीपप्रियघृतक्षीरप्रियद्रोणकरवीरप्रियश्रीपत्रप्रियकमलकह्लारप्रियन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्द्यावर्तप्रियबकुलप्रिययूथिकाप्रियकोकनदप्रियग्रीष्मजलावासप्रिययमनियमप्रियनियतेन्द्रियजपप्रियप्रियश्राद्धप्रियगायनप्रियगायत्रीप्रियपञ्चब्रह्म
प्रियसदाचारप्रियगोत्रोत्सादिकमलभवहरिहरनयनसमर्चितपादकमलजयप्रद हरिप्रार्थितजलोत्पादितचक्रप्रदर्शकृत्स्मृतियुक्तिप्रदस्मृतमङ्गलप्रदमृत्यु
ञ्जयनमस्तेनमस्ते॥इतिस्तोत्रमाकर्ण्यभगवान्भवोराजानमुवाचवरदोऽहंवरंवृणु ॥ राजोवाच ॥ श्रीमन्ममकन्यावैदेहीरामायदित्सितास्वयंवरेकुल
रूपबलोत्साहसम्पन्नानेकभूपराक्षसविप्रादिसर्वप्राणिसमागमेरामाधिकबलोयदितामग्रहीष्यत्तदावचनमनृतंममपापंचभविष्यति ॥ प्रत्युतदशरथो
ऽपिसर्वानेवागतान्विजेतुमलंक्षत्रकदनश्चरामोयद्यायास्यतितर्हिममसुतां किं करिष्यतिवाकिंकिंवाप्रेषयिष्यतिकीदृशंकारयिष्यतिममकिंवाकरिष्यति
सर्वथाहिप्रभूतबलवाहनोनरपतिरशेषमपित्रिभुवनंहन्यात् ॥ किमुतमामल्पसत्त्वंकिमुतबहुनाभवानेवशरणंममोपायंवदयथाविवाहेश्रेयोभविष्यति
रामश्चजामाताभविष्यति ॥ शम्भुरपितथाकरोमीत्युवाच ॥ रामएवनाथःसीतायाभविष्यति॥ रामंचकृत्वास्वस्त्ययनैवकरिष्यामिगृहाणाजगवं
धनुरिदम् ॥ राजोवाच ॥ किमेतेनाजगवेनधनुषास्वयंवरेसीतांरामंप्रापय ॥ शङ्करउवाच ॥ इदंधनुरसज्यंमेयस्तुसज्यंकरिष्यति ॥ तस्मै
देयामयासीताप्रतिज्ञामेवमाचर ॥ १८ ॥ इत्येवमुक्त्वाभगवान्गणैरन्तर्दधेहरः ॥ अथादातुंधनूराजानशशाकातियत्नतः ॥ १९ ॥ अथो
ज्ज्वलंशतसहस्रगजबलंसमाहूयगृहाणेत्युवाच ॥ सचापिमातुलंनत्वाट्टहासंकृत्वोत्प्लुत्यधनुर्द्वाभ्यांकराभ्यामुद्दधारजानुपर्यन्तंमातुलोमारीचःश्रुत्वा
एकाकीविप्रवेषंकृत्वाविदेहमयाचत ॥ वैश्वदेवान्तेप्राप्तमतिथिंमामवेहि ॥ राजोवाच ॥ स्वागतंभोइदंब्रह्मन्नासनंतत्रनिषीदेति ॥ सचातिथि
स्तथेत्युक्त्वानिषसाद ॥ अथराजाजलमादायपादौप्रक्षाल्यगन्धपुष्पाक्षतैरभ्यर्च्यमहाजंतस्मैनिवेद्यभोजनायप्रार्थयामास ॥ सचापितदन्नंषड्
सोपेतंसौवर्णभाजनगतमीक्षमाणइवेतस्ततोविलोकयामास ॥ तस्मिन्नेवावसरेसीतापद्मकिञ्जल्कप्रभेषदरुणवसनंबिभ्रतीनीलकुटिलकुन्तलैश्चलद्भिः
यूनांमनांस्याकर्षयद्भिःप्रेक्षमाणदृष्टिभग्नकलैरिवस्त्रीणां चित्तमीदृशमितिदर्शयद्भिरिवोपशोभितललाटानङ्गचापसुभ्रूः पद्मपत्रारुणविलोचनातिलप्रसून
नासामृदुस्निग्धरोमशकपोलानन्तरारक्तोष्ठारक्तासनमाणिक्यनिभदाडिमीदशना जपाकुसुमारुणाधरातिशोभितचिबुकाशुक्तिकर्णासमदीर्घकण्ठाति
मांसलवक्षाःपीनोद्भिन्नकुचकुड्मलानेकहारोपशोभिता सुभगाकारानतिमांसलबाहुलतासुग्धायतसमानाङ्गुलिशिखापद्मारुणपल्लवाविविधबहुरत्नाङ्गु ॥ १७० ॥
लिभूषणासुष्टिग्राह्यमध्या सुरोमराजिगम्भीरनाभिःपृथुजघनाकरिकरोरूस्तूणीरजङ्घासुपादकमलानूपुरादिपादविभूषणापादाङ्गुलीभूषिताविकसितसौ
गन्धिदकंबिधतीभुञ्जानमारीचस्यपुरतश्चागता ॥ वीक्ष्यासावचिन्तयदेनांकथमपहरामिकथमालिङ्गामिकथमन्यत्किञ्चित्करोमीत्येवमवसरमलभमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नस्तूष्णीमेवविनिर्गतः ॥ अथदेवाधनुःसज्जीकरणाययतमानाअहम्पूर्विकयाविद्यमानाअन्योन्यतिरस्कारेणमहेन्द्रःप्रापधनुरुत्तमंप्रान्तद्वयात्परंनावन मयितुंशशाक ॥ अथसूर्योधनुरादायनमयन्नेवनिपपात ॥ वायुर्बलवतांश्रेष्ठोजग्राहाजगवमथस्वेनैवकरेणोत्कर्षयन्नधःपपातधनुश्चवायोरुपरिपपात अहसंस्तदासर्वे ॥ एतस्मिन्नन्तरेतुरगवरमारुह्यवाणासुरःसहस्रबाहुरनेकानेकशिरोभिर्दैत्यैःपरिवृतःप्रह्लादसमेतोविदेहपुरीमाजगाम ॥ अथस्वविभूष णोद्भासितांदिशंकुर्वन्स्वतेजसापयशसोदेवताःकुर्वन्नानाविधिगीतंशृण्वद्द्व्यङ्गुलमात्रेणशक्तोविरराम ॥ प्रह्लादोबलिश्चैवधावातेऽथविरेमतुः ॥ अथ राक्षसेषुतूष्णींभूतेषुराजानोऽतिबलिनःसमागताज्याबन्धाशक्ताअपसृत्यतस्थुः ॥ अथब्राह्मणाःसमागताः ॥ अथविश्वामित्रोधनुरादायएकाङ्गुल पर्यन्तंसज्यंकृत्वाविरराम ॥ निवृत्ताश्चापरे ॥ अथदिनमात्रेधनुषितूष्णींभूतेषुराघवःसहानुजैरागत्यधनुर्निरीक्ष्यास्पृशत् ॥ अथराजकुमाराःशतशः समागताः ॥ सर्वाभरणभूषितोधनुर्दृष्ट्वापस्पृशुर्नचालनक्षमाः ॥ अथदाशरथिप्रमुखाःकुमाराःसमागताः ॥ अथवेत्रझर्झरपाणयःसमागमन्सर्वानेवाप सारयामासुः ॥ अथरामोलक्ष्मणहस्तंगृहीत्वासर्वाभरणभूषितोधनुरासाद्यस्पृष्ट्वानत्वाप्रदक्षिणीकृत्यधनुरादायोद्दधार ॥ तदादानसमयेसर्वएवैत्य सहासमूचुः॥ अत्रभग्नामहारथाइति ॥ अथसरामोधनुर्ज्यास्थानमवनमय्यधनुषिजानुंकृत्वासज्यमेककरेणोत्पादयन्कोट्यामनामयत् ॥ अथसज्जी कृतंदृष्ट्वासर्वएवनासाग्रन्यस्ताङ्गुलयोऽभवन् ॥ रामोऽपीज्यामन्वनादयत् ॥ तेननादेनसर्वेषांमनांसिक्षुभितान्यासन् ॥ रामेणसज्जितंधनुरितिसर्वत्र वादःसञ्जातः ॥ जनकोऽपितांरामायददौराजभिश्चयुद्धंकृत्वाताञ्जित्यस्वपुरीमागात् ॥ अथैकदादशरथोरामंयौवराज्येऽभिषिच्यसुखीबभूवसर्व प्रजारञ्जनाच्चरामोराजानुमतइतिसर्वप्रजावादोऽभूत्॥ अथकेकयदेशाधिपतितनयासुवेषारामंराजानमसहमानाराजानमुवाचममवरदानावसरइतिराजा चिन्तयत्किंदेयमिति ॥ देव्युवाच ॥ चतुर्दशवर्षाणिरामोवनंविशतुपालयतुराज्यंभरतः ॥ राजानृतवचनदोषभयात्कथंकथमपिस्वीचकार ॥ अथ वसिष्ठंभावितयावोचतरामोवनायनिर्गच्छतिअस्यकिंवाभवेदितिविचार्यशुभाशुभंब्रूहि ॥ वसिष्ठोविचार्यसहर्षंराजानमुवाच ॥ गत्वावनंनिखिलदान ववीरहन्ताशम्भोरनेकविधपूजनमातनोति ॥ सीतावियोगरुषितःकपिसेनयाचतीर्त्वोदधिंदशमुखंचनिहन्तिरामः ॥ २० ॥ आगम्यराज्यंरघुनन्द नोऽपिबहूनिवर्षाणिसमातनोति ॥ प्रशस्तकीर्तिर्निखिलेऽपिलोकेशर्वेणदेवेनचिरंन्यवात्सीत् ॥ २१ ॥ सुपुत्रयुक्तोबहुयज्ञयाजीपरिवृढःसर्वगुणा दिकश्च ॥ २२ ॥ इतिवसिष्ठवचनंश्रुत्वादशरथोरामगुणाननुस्मरन्नित्युवाचश्रेयोमेमरणंरामस्यनिर्गमनइति ॥ अथरामोमातरंपितरंगुरुंचवसिष्ठं पितृपत्नीर्नमस्कृत्यवनायजगाम ॥ अथोपवनेदिनमेकंस्थित्वाजटाःकारयित्वावल्कलंवासोधृत्वैकोपवीतीकृतदन्तशुद्धिरेकेनोपवीतेनजटाबद्धाभस्मो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्धूलितसर्वाङ्गोभसितनिष्ठूरकायोमुक्ताफलदाममणिव्यत्यस्तरुद्राक्षमालामुरसिदधानोऽल्पभूषणाधिभूषितसीतासहायोलक्ष्मणानुचरोविवेश वनान्त
रम्॥ अथानेकराक्षसांस्तस्मिन्निजघानभवानिवनिखिलंचकारसीतापहरणादिनिखिलमपिभवतोयथातथास्याथसुग्रीवाश्रममृष्यमूकपर्वतंरामोजगाम
निबिडच्छायंचूतवृक्षमासाद्यलक्ष्मणसहायःपरिश्रयमकल्पयत् ॥ वृक्षेतुधनुर्षीआरोप्यासीनलक्ष्मणाङ्केशिरःकृत्वाहरिचर्मशय्याशयनोलक्षितांगीतिं
शृण्वन्वृक्षफलंनिरीक्षमाणोवानरमेकंमणिकुण्डलंहेमपिङ्गलंसुदृढबद्धमौञ्जीकौपीनमच्छोपवीतिनमतिचञ्चलंफलमादायात्मनिविक्षिपन्तंपुष्पमञ्जरीश्च
किरन्तंगानमनुकुर्वन्तंव्यजनेनरामंवीजयन्तमारुह्यशाखामपितथावीजयन्तमाबद्धचूतफलमात्रंरामोवीक्ष्यलक्ष्मणमभाषत॥लक्ष्मणकोऽयंकपिरिति॥
लक्ष्मणोऽपिनजानइत्युवाच ॥ अथरामःसमाहूयकस्यत्वंकिंनामेत्यपृच्छत् ॥ सचसुग्रीवस्यहनुमानित्युवाच ॥ रामंनत्वासुग्रीवमेत्यनत्वा
देवनारायणइवापरःपुरुषोयुवामेघश्यामोजटीआजानुबाहुरतियशस्वीसूर्यसङ्काशेनसहापरेणनरेणइहास्ते ॥अथतरुच्छायाधःसंस्थितौसर्वलक्षणसम्प
न्नौराजपुत्रौदृष्ट्वाउक्तश्चताभ्यांसुग्रीवायनिवेदयेतितत्त्वयिनिवेदितम् ॥ अथसुग्रीवःसत्वरमुत्थायपुष्पसलिलादिद्रव्यमादायपादप्रक्षालनादिकंकृत्वा
फलानिसमर्प्यव्यज्ञापयत् ॥ कौयुवांकिमर्थमागतौराजपुत्रौतपस्विनावितिसुग्रीववचनमाकर्ण्यलक्ष्मणेनाभाषतरामः ॥ दशरथतनयावावांराम
लक्ष्मणौदुष्टनिग्रहशिष्टपरिपालनायवनंगताविति ॥ अथसुग्रीवआहयुवयोरुपकारमपरंकार्यमस्तीतिलक्ष्यते ॥ अन्यथासेनासमेतावागमिष्यतः ॥
लक्ष्मणआहअस्तिकार्यान्तरम् ॥ अमुष्यभार्याकेनापहृतानज्ञायतेतामन्वेष्टुमागतौतदेवावयोःकार्यमन्यदानुषङ्गिकम् ॥ तदर्थमपिजलधिंतरावअपि
पातालंप्रविशावअपिनाकंसाधयावःअपिमहेन्द्रंपातयावःअपिवलिनंहन्वःकिमपिकुर्वहे ॥ सुग्रीवउवाच ॥ रावणेनापहृतयाकयाचिद्ध्रियमाणागतया
विभूषणानिकानिचित्परित्यक्तानिगतानिमयासङ्गृहीतानितानिदर्शयामीत्याभाष्यरामंमन्दिरमागमय्यदर्शयामास ॥ रामोऽपिनिरीक्ष्यनिश्चित्य
प्ररुद्यक्कगतोऽसौरावणइतिपप्रच्छसचदक्षिणामाशांगतइतिबभाषे ॥ अथरामस्तेनसख्यमकरोत् ॥ अपृच्छच्चकिमर्थमिहभार्याहीनःस्थितइति ॥
सुग्रीवउवाच॥ममभ्रातावालीमहाबलोममभार्यांराज्यंचापहृत्यकिष्किन्धायामास्तेयुद्धेनचाहंपराजितस्तद्धायसर्वथाममचिन्तायथासौत्वयानिहन्य
तेतथाहमपिसागरंबद्ध्वापरतीरेलङ्कायांस्थितांसीतांरावणेनापहृतांतवसमर्पयामीत्याभाष्यशपथंकृत्वासुग्रीवोवालिनातिबलिनायुद्धायाहूतेनयुयुधे ॥ ॥ १७१ ॥
रामोऽप्यनन्तरमनिश्चयाद्वालिनंनाहन् ॥ अथसुग्रीवःपलायितोराममिदमभाषत ॥ तवचित्तमविज्ञायप्रवृत्तोऽहंमरणाय ॥ रामोऽपियुवयोर्विशेषाज्ञा
नान्मयातूष्णींभूतंचिह्नितंत्वांनिरीक्ष्यतंहन्मि ॥ अथसुग्रीवश्चिह्नंकृत्वावालिनंयुद्धायाहूयसमतिष्ठत ॥ ताराबभाषेवालिनम् ॥ सहायवानिव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लक्ष्यतेसुग्रीवोनोचेदेवंनाह्वयतिज्ञातंमयारामलक्ष्मणौदशरथतनयौनारायणांशौभूभारावतरणायसमागतौतावस्यसहायभूतौ॥वाल्युवाच ॥ नीतिमा
न्रामइतिमयाश्रुतम् ॥ नहिबलवन्तंविहायदुर्बलंभजतेताद्दशःसमायातुवारामःप्रतिपन्नमधिकंकृत्वाबिभेतिवीरोयदिरामःस्वयंयुद्धाययातस्तदायुद्धं
कर्तव्यमित्याभाष्यतारांसम्भाव्यसुग्रीवयुद्धायनिर्यातः ॥ अथमुष्टियुद्धमन्योन्यमभूत् ॥ रामोऽपिवालिनंजघान ॥ पपातचवाल्याहचाशस्त्रयुद्धेवा
बाणघातोऽथशोणितसर्वाङ्गोवभूव ॥ अथताराचाङ्गदश्चसमागत्यव्यथितौबभूवतुः ॥ अथराघवंवानराःसमायातावाल्युपान्तेनिपेतूरुरुदुश्च ॥ अथ
तारारामंबभाषेशास्त्रकुशलाःशूराधार्मिकाराघवाःपुराचापिरामकथंपापमकार्षीः ॥ नक्षत्रधर्मंजानीषेराजगणसेवितम् ॥ अन्योन्यंयुद्धचतोर्युद्धेजयो
वामरणंभवेत् ॥ अन्यायदितयोर्हन्याद्ब्रह्महासनिगद्यते ॥ २३ ॥ किंवैरेणवालिनमाहनःकिंवानरमांसाशया ॥ अभोज्यंवानरंमांसंयद्यात्मनोऽप्रिया
त्सुखाभावादपरेपामपितथाभावंमन्यसेअहोविमोहाद्यदिमामादातुमिदंकृतमेकपत्नीव्रतंतव ॥यदिरावणहृतांसीतामानेतुंसुग्रीवसहायायकृतमेवमेवहा
महदन्तरंबलवृद्धेनमहाबलेनवालिनासद्भावेनदिनकरावर्तितान्तरेसीतामानेतुंसमर्थेनस्मरणागतरावणदानसमर्थेन वानरराजेन पञ्चाशत्परार्द्धवानरभ
ल्लूकसेनावताआत्मकार्येणसिध्यतइतिकिंसुग्रीवेणाल्पवीर्येणसप्तपरार्द्धसेनापतिनाकपिनाकिंसिध्यतिकार्यंवचनवतः ॥ अहोज्ञातंसर्वदेवभद्रंयदुक्तो
ऽसि ॥ वक्तिचरामःपृथिवीपतिनामयादुष्टनिग्रहणंकार्यंशिष्टपरिपालनंचवालिनासुग्रीवमहिषीरुमापहृताराज्यंचअतश्चनताद्दग्वधेदोषः॥तारोवाच ॥
सुग्रीवोऽपितर्हिवध्योदुन्दुभिनायुध्यतावालिनाबिलेप्रविष्टेनवत्सरंतत्रोषितंतदन्तरेचमामपहृत्यराज्यंचकृतंसुग्रीवेणतंपूर्वमपिपश्चात्तंहन्तु ॥ राम
उवाच ॥ ॥ कियत्कालात्पूर्वमिदंचवद ॥ तारोवाच ॥ षष्टिवर्षसहस्रादर्वागशीतितमेवर्षेरक्षोयुद्धेसुग्रीवेणराज्यमपहृतम् ॥ पुनश्च
वर्षान्तरेप्राप्तेनवालिनासुग्रीवःपलायितः ॥ अपहृतातस्यभार्याराज्यंचापहृतम् ॥ तस्मिन्नेवदिनेभवतःपितुर्दशरथस्याभिषकः ॥ राघव
उवाच ॥ मयापितुरनुशासनाद्राज्यगतदुष्टनिग्रहणंकृतम् ॥ गुरुवचनस्यानुल्लङ्घनीयत्वात्तदपहरणवेलायांयोराजासनाचरत् ॥ अथवास्वतन्त्रौ
मृगौमृगयोर्हतश्चवालीमृगाणामन्योन्यंदारणाद्यजुगुप्साच ॥ यतोममृगयावदाथवामृगाणाम् ॥ चलितस्थितबद्धानांचलद्भ्रान्तपलायिनाम् ॥ अ
थावसृजतासङ्गमुज्झितामृगयातथा ॥२४॥ मृगयाशास्त्रविधितोमृगयेयंमयाकृता॥दर्शनादर्शनाभ्यांचधावताधावतातथा ॥२५॥अवरोहात्परंस्थानं
सात्त्विकानांप्रभिद्यते ॥ राज्ञश्चमृगयाधर्मोविनाचामिषभोजनम् ॥ २६ ॥ अथरामवचनमाकर्ण्यसर्वएवप्राकम्पयञ्छिरांसि ॥ वालीबभाषे

१ 'सान्त्वयानाम्' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

राममञ्जलिंमस्तकेनिधायनमस्तेरामश्शृणुवचनंमम ॥ शङ्खचक्रगदापाणिःपीतवासाजगद्गुरुः ॥ नारायणःस्वयंसाक्षाद्भवानितिमयाश्रुतम् ॥ ॥ २७ ॥ त्वांयोगिनश्चिन्तयन्तित्वांयजन्तिचयज्विनः ॥ हव्यकव्यभुगेकस्त्वंपितृदेवस्वरूपधृत् ॥ २८ ॥ मरणेचिन्तमानस्यत्वांविमुक्तिर दूरतः ॥ सत्वंमेदर्शनंप्राप्तोराममेपापसंक्षयः ॥ २९ ॥ गृहाणबाणंकाकुत्स्थव्यथितोभृशमस्म्यहम् ॥ ३० ॥ अथरामस्तथेतिबाणमादायवालिन मुवाचकिमिष्टंदीयतांवद ॥ कपिरुवाच ॥ यदिप्रसन्नोभगवान्ममसद्गतिंदेहि ॥ अयंसुग्रीवस्तथारक्षणीयोऽङ्गदोऽथताराचमयापापिनापराधःकृतस्त त्फलमनुभूतम् ॥ अथरामंपश्यन्नेववालीममारस्वर्गंचगतः ॥ अथसुग्रीवंराज्येऽभिषिच्यस्वयंवनंविवेश ॥ अथतेनसहायेनजलधिसमीपंगत्वाक्व लङ्काक्वसीताक्वचारातिरितिसुग्रीवमाहरामः ॥ अथहनुमानाहप्रविश्यलङ्कांविचित्यसीतांसर्वतत्त्वमवगत्ययुद्धंसन्धिर्वाकर्तव्यस्तदुदधिलङ्घनाय कश्चित्समादिशतुभगवान् ॥ अथसुग्रीवमाहरामः ॥ कथमेतद्घटतइति ॥ कपिरुवाच ॥ ममवानराभल्लूप्रमुखाःकोटिशःसन्ति ॥ एकंनियुज्य सर्वमाकलय्ययथायुक्तंतथाकरणीयम् ॥ अथजाम्बवानाह ॥ हनुमानेकोगच्छतुबुध्यतुलङ्काम् ॥ अथहनुमानगमल्लङ्कापुरंविचित्यसीतामशोक वनिकायामासीनांतयाचसम्भाष्यविश्वासंकृत्वावनंबभञ्जवनरक्षकांश्च ॥ बद्धोरक्षसालङ्कांदग्ध्वाउत्तरकूलंगत्वारामंदृष्ट्वावृत्तान्तंकथयित्वातूष्णीमति ष्ठत् ॥ अथरामःसर्वैर्विचारयामासजाम्बवानुवाचरामेणलङ्काकपिभिर्विनश्यतीतिनारदेनममोक्तम् ॥ अथसागरोत्तरणेयत्नआस्थेयः ॥ अथरामः शङ्करमाराध्यसर्वंनिवेदयित्वात्वदुक्तंकरोमीतिवचनमुक्त्वाशिवमभ्यर्च्यप्रणतोभूत्वाव्यजिज्ञपत् ॥ हेमहादेवमहाभूतग्रासमहाप्रलयकारणमहाहि भूषणमहारुद्रशङ्करपरमेश्वरविरूपाक्षनागयज्ञोपवीतकरिकृत्तिवसनब्रह्मशिरःकपालमालाभरभूषणनरकास्थिभूषणभसितपरनारायणप्रिय शुभचरित पञ्चब्रह्मादिदेव पञ्चाननचतुर्वदनवेदवेद्यभक्तसुलभाभक्तदुर्लभपरमानन्दविज्ञानपरपूषदन्तपातनदक्षशिरश्छेदनब्रह्मपञ्चमशिरोहरणपार्वतीवल्लभनारदो पगीयमानशुभचरितशर्वत्रिनेत्रत्रिशूलधर पिनाकपाणेकपर्दिन्ननेकरूपधरवृषभवाहनशुद्धस्फटिकसङ्काशचतुर्भुजनानायुधदक्षिणामूर्तईश्वरदेवपतेगङ्गा धरत्रिपुरहरश्रीशैलनिवासकाशीनाथकेदारेश्वरभूषणसिद्धेश्वरगोकर्णेश्वर[1]कनखलेश्वरपर्वतेश्वरचक्रप्रदबाणचिन्तापादकेसुरहर पूजितचरणकमल[2]सोम सोमभूषणसर्वज्ञज्योतिर्मयजगन्मयनमस्तेनमस्ते ॥ एवंस्तुवतोरामस्यपुरतोलिङ्गमध्यकोपेतस्तेजोमयमूर्तिराविर्बभूव ॥ अभयवानथपुनःपद्मासना सीनमुमाधिष्ठिताङ्कमीशमामुक्तसर्वाभरणंसुकान्तिकिरीटिनंहैमवतीकटिस्पर्शकरद्रे नाभयवरप्रदंनगङ्गिनानेकदिशाभिः पूर्णतेजस्विनंहासमुखंप्रसन्न

१ 'पटहकर्णेश्वर' इ० पा० । २ 'कर्पूरपूजितचरणकमल' इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

वदनंददर्शरामः ॥ परमेशितारंननामबद्धाञ्जलिःपुनश्चदण्डवत्पपात ॥ अथरामंपरमेश्वरोऽपिवरंवृणुत्वंवरदोऽहमित्युक्तवान् ॥ रामउवाच ॥ लङ्कां गमिष्यामिसमुद्रतरणउपायमेकंममदेहिशम्भो ॥ शम्भुरुवाच ॥ ममाजगवंधनुरस्तितत्कालरूपमविकल्पंवाभवति ॥ तदारुह्यसमुद्रंतीर्त्वा लङ्कामाप्नुहि ॥ रामस्तथेतिनिश्चित्यसस्माराजगवम् ॥ आगतंधनुस्ततश्चरामोऽपूजयत् ॥ अथहरोधनुरादायरामायदत्तवान् ॥ रामोऽपिजल धावपातयत् ॥ आरुरुहुःसर्वेवानराःरामलक्ष्मणौचपष्टिपरार्द्धतेषामसङ्ख्येषुवानरेषुधनुरारूढेषुनिकामंययौ ॥ धनुस्तटंवानराश्चततस्ततोगत्वा निरीक्षयामासुः ॥ अथातिकायोनामराक्षसःकपिबलमालोक्यरावणायोक्तवान् ॥ रावणोऽपिकिंकपिभिःशाखामृगैःकिंवामानुषाभ्यांरामलक्ष्म णाभ्यांकिमायातंदैवागतमस्माकंभोजनमित्युवाच ॥ अथसुग्रीवःपश्चिमावलम्बिनिभास्वतिहनूमज्जाम्बवदादिमहाबलैश्चातिकायैरसङ्ख्यातैर्लङ्का पार्श्वंगत्वाउपवनंप्रविश्यनानाफलानि खादित्वा पयः पीत्वोपवनरक्षिराक्षसान्विद्राव्यसर्वविपिनमेकैकशोगृहीत्वाप्राद्रवँल्लङ्कांगोपुरंचगत्वासमारुह्य प्रासादंचविशीर्यैकैकशःकेचित्स्तम्भमादायरक्षोभिर्युयुधुः ॥ एकेचशालांब्रभञ्जुर्गृहाणिचूर्णयामासुर्बालवृद्धस्त्रीजनादिकंसर्वमेवनिजघ्नुः ॥ अथैकं प्राकारंनिर्जितमाज्ञायरावणइन्द्रजितंसन्दिदेश ॥ इन्द्रजिताचयुद्धंवानराःकृत्वाभीताःपलायिताश्च ॥ अथहनुमानखिलंनिर्गतमाज्ञायरावणं ज्ञात्वावानरानाहूयनिर्भर्त्स्यसेनांमहतींकारयित्वादशमुखंकलपयित्वामोदयामास[1] ॥ अथखस्थएवेन्द्रजिद्युयुधेनचवानरास्तंददृश्वन्तः ॥ अथहनु मज्जाम्बवन्तौखमुत्पत्यपर्वतशिखराभ्यामिन्द्रजितंनिजघ्नतुः ॥ अथभुविपपाततंलक्ष्मणश्चयमलोकगामिनंचकार ॥ अथातिकायमहाकायौ वानरसैन्यंबहुशोहत्वालक्ष्मणंपीडयित्वारामेणसंयुध्यसुग्रीवंकृत्वाहनूमज्जाम्बवद्भ्यांयुयुधाते पराजितौ गृहीत्वातौ च योद्धारावादायरामसमीपंगत्वा रामायन्यवेदयताम् ॥ अतिकायमभाषतरामः ॥ रावणस्यममयुद्धंब्रूहिसचिवानामन्येषांमहाभयानांच ॥ अतिकायउवाच ॥ निश्चितमिदंपुरा स्माभिःकार्यंसेनांविभागशःकृत्वाविद्युन्मालीनामराक्षसोमहाबलोविचित्रयोधीदर्शनादर्शनयोधीवानरैःसर्वैरेकएवयुध्यते ॥ अपरेचबलिनोमहान्तः शिक्षितास्त्राश्चागताआवांचयुवाभ्यांयुध्यावोरावणःपुष्पकमारुह्यापरभागेनत्वामेवनिहनिष्यति ॥ अन्येराक्षसाःकुम्भकर्णमुखाश्चात्मरूपंकृत्वात्वां परिवार्यगृहीत्वासीतायैदर्शयित्वातत्सन्निधावेवहनिष्यन्ति ॥ रामःप्राहअहोबलवतांकिमसाध्यमेवंभवतिदैवगतिःकुटिला ॥ सुग्रीवोऽतिकोप नःसक्रोधंदृष्ट्वारामसुवाच ॥ वध्यावेतौनमोचनीयौ ॥ रामःप्राहावध्यौमोचनीयावेतौवसनानिभूषणान्यानयेत्युक्तमात्रेहनूमताताान्यानीतानि

१ 'मोदयामास' इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

रामस्ताभ्यांदत्तवान् ॥ नत्वायदेतल्लङ्काद्वारेदृश्यतेदारुपञ्चवक्त्रंशुक्रेणोक्तमेतेनच्छिन्नेनरावणोहन्यते ॥ अथचदारुच्छेदनसमनन्तरंपातालंगन्त
व्यमितिभार्गवभाषितंशासनंलिखितम् ॥ तस्मात्त्वमिदंदार्वेकप्रयत्नैकबाणनिपातेनपञ्चधाच्छिन्धिततस्तवशक्तिंज्ञात्वायुद्धमतिदृढंकुर्वीमहि ॥
अथभार्गववचोविज्ञायरामःपूर्वकोटयांस्पर्शमात्रेणसज्यंकृत्वाधनुषिबाणंसंयोज्यरक्षोभ्यांहनूमताश्रावयन्नेवबाणंमुमोच ॥ बाणंधनुषश्चलितंतौराक्षसौ
बाणमार्गंनिरीक्षमाणौदारुबाणेनपञ्चधाच्छिन्नंनिरीक्ष्यरामंव्यज्ञापयतामावयोःशिशवोरक्षणीयास्त्वयेतितथेत्याहरामः ॥ राक्षसौलङ्कांप्रविष्टौ ॥ अथ
प्राकारयुद्धंकर्तुंवानराःत्वासर्वतोवरणमात्रंहिपार्ष्णिभिःपादैर्जानुभिःकरैःपृष्ठैश्चतलसमंकृत्वाद्वितीयप्राकारंगतास्तदाचरावणः समागत्यसर्वानेवेषुभि
र्द्रावयित्वातदनुगच्छन्रामगात् ॥ अथराममपिपञ्चभिर्बाणैर्विव्याध ॥ अथरामोदशभिर्बाणैरावणंसव्रणंचकार ॥ अनयोरतिदारुणमन्योन्यंयुद्धं
बभूव ॥ रावणोदशभिर्बाणैर्विव्याध ॥ अथराममबाणैश्चक्षतशरीरोराक्षसःपलायनपरोऽभवत् ॥ वानरालक्ष्मणश्चकोटिकोटिराक्षसानघ्नन् ॥ अथ
परस्मिन्नहनिविभीषणोरावणंविचार्येदमुवाच ॥ तृतीयोपायकालोऽयंचतुर्थंनविचारय ॥ चतुर्थोविपरीतोनशस्तःशस्तार्थकारिणः ॥ ३१ ॥ परस्य
चाऽऽत्मनःशक्तिंविदित्वाचाऽऽत्मनोऽधिकाम् ॥ तदायुद्धंप्रशस्तंस्याद्विपरीतंविनाशकम् ॥ ३२ ॥ रामेणबलिनानैवयुद्धंतेदुर्बलस्यच ॥ एकेषु
वालिहन्ताऽसौवालिर्ज्ञातस्त्वयापुरा ॥ ३३ ॥ मारीचएकबाणेनभवानपिपलायितः ॥ निहताराक्षसाःशूराइन्द्रजिच्चसुतोहतः ॥ ३४ ॥ वरेण्यत्रितयं
भग्नंतेनयुद्धंचनैवते ॥ दासभावमथोवाऽपिदत्त्वासीतामथाप्नुहि ॥ ३५ ॥ गोपुरस्थंतथादारुपञ्चवक्त्रमथेषुणा ॥ चिच्छेदपञ्चधातेनरामस्त्वां
मारयिष्यति ॥ ३६ ॥ त्वदर्थंबहवोनष्टानाशमेष्यन्तिचापरे ॥ एकोन्यायःसुखार्थायनचमौढ्यंसहोदर ॥३७॥ मानुषीमृत्युसंयुक्तामनिच्छन्तींपति
व्रताम् ॥ पत्नींबलवतश्चापिपूजयित्वाविसर्जय ॥ ३८॥ अनिच्छन्त्याःसमायोगेभवेद्दुःखपरम्परा ॥ दुर्गन्धमलसंयुक्तोनारीसङ्गोजुगुप्सितः ॥३९॥
विरक्तिरथचेज्जातादुःखायाकार्यवर्तनम् ॥ अनुरागोयदिभवेन्मरणंनरकंततः ॥ ४० ॥ आत्मनोमरणंव्यर्थंतस्याश्चाद्यसमागमे ॥ त्यागोवामरणंतात
धर्मपत्न्यास्तथाभवेत् ॥ ४१ ॥ एवमादितथाऽन्यच्चकश्मलंसम्भविष्यति ॥ अन्यदाख्यामितेवाक्यंसर्वेषांचप्रियंहितम् ॥ ४२ ॥ गत्वारामान्तिकं
नत्वास्तुत्वाविज्ञाप्यराघवम् ॥ क्षमराममहावीरशरणागतवत्सल ॥४३॥ तामसाराक्षसाःसर्वेवयमेतेसुपापिनः ॥ सीतापहारजंरोषंत्यक्त्वापुत्रानवेहि
नः ॥ ४४ ॥ त्वदधीनावयंरामरक्षवामारयेच्छया ॥ इत्युदीर्यपुरस्तस्यराघवस्यस्थितावयम् ॥ ४५ ॥ स्थिरायुषोभविष्यामःस्थिरराज्यादशा
नन ॥ अथाऽऽहरावणोवाक्यमहोनोराक्षसोभवान् ॥ ४६ ॥ नशूरोराजधर्मंचनचजानासिशाश्वतम् ॥ परनारीपरद्रव्यपरराज्यनिषेवया ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शूराणामुत्तमोधर्मोनषण्ढानांभवादृशाम् ॥ शत्रुपक्षंसमालिङ्ग्यनिर्गच्छेच्छाहिचेन्नृप ॥ ४८ ॥ अथविभीषणोमन्दिरंगत्वारामान्तिकंगत्वातंशरण
मभजत् ॥ अथरावणःपुरान्निर्गत्यरामेणलक्ष्मणवानरैराक्षसाअपियुयुधिरे ॥ अथरावणंमहाबलंहन्तुमशक्तोरामोविभीषणमुखमवलोक्यतदुक्तचिह्न
पदंबाणेननिर्भिद्यामारयत् ॥ अथकुम्भकर्णोमहागदामादायसर्वंनिष्पाद्यवानरानत्रेकशोभक्षयित्वारामोत्तमाङ्गंगदयाऽहन् ॥ अथरामोनिशितबाण
शतेनतमहन्ममारकुम्भकर्णः॥ अथविभीषणेनरावणादेःश्राद्धादिकंकारयित्वाशिवालयंतन्त्राज्ञाकारयित्वातमेवलङ्काराज्येविभीषणमभिषिच्यसीताम
ग्निप्रवेशशुद्धामुमामहेश्वराभ्यांनमयित्वापुरहरेणदत्ताखिलामृतबलायुष्यःसुपुष्पकमारुह्यजलधिमुत्तीर्यपारावारतटेसेनांसमवस्थाप्यशिवप्रतिष्ठांतत्र
कृत्वामुनिभिर्देवैरभ्यर्चितोऽयोध्यामगमत् ॥ अथभरतादिसमुपेतोनागरैर्वसिष्ठेनमुनिभिश्चाभ्यर्चितःस्वगृहमगमत् ॥ आत्मनाऽऽगतानिन्द्रा
दिदेवानासनादिनाऽभ्यर्च्यवानरान्सम्पूज्यमुक्तजटोऽभिषिक्तोराज्येरावणवधहर्षितादेवाराममूचुः ॥ त्वयाऽऽत्मराज्येस्थापितावयंनःसर्वदापरिपा
लयत्वमादिनारायणोदेवोनिखिलदुष्टनिग्रहार्थमवतीर्णोरावणंसबान्धवंहत्वालोकत्रयरक्षकोऽसिश्रियासहसुखीभवेत्युदीर्यस्वर्गंगताः ॥ अथायोध्या
वासिनोरामंप्रहर्षिताऊचुः ॥ हत्वाशत्रून्समायातोदिष्ट्याप्राप्तोऽसिवैशिवम् ॥ दिष्ट्यात्वंराजसेरामदिष्ट्यापालयसेप्रजाः ॥ ४९ ॥ त्वयायज्ञाःकरि
ष्यन्तेत्वयाधर्मोविवर्धते ॥ इतिपौरवचःश्रुत्वारामोराजीवलोचनः ॥ ५० ॥ वस्त्रादिभिरथोसर्वान्नागरान्समपूजयत् ॥ मुनीनुवाचधर्मात्मापूजयित्वा
खिलैर्जनैः ॥५१॥ कच्चित्तपःसमृद्धंवःकच्चिद्यज्ञःस्वनुष्ठितः ॥ कच्चित्स्वदारनिरताःकच्चिदीशोऽभिपूज्यते॥५२॥ कच्चित्सुप्रजसोभार्याःकच्चित्सर्वंसुखो
त्तरम् ॥५३॥ मुनयऊचुः ॥ त्वयिराजनिकाकुत्स्थसर्वंस्वस्थंतपस्विनाम् ॥ गच्छामहेपदमितःकिंवात्वंमन्यसेनृप ॥५४॥ रामउवाच ॥ यस्यविप्राः
प्रसीदन्तितस्यशम्भुःप्रसीदति ॥ यस्यप्रसीदतीशानस्तस्यभद्रंभविष्यति ॥५५॥ तत्कृत्वाभोजनमिहगन्तुमर्हाअनन्तरम् ॥ तथेत्युक्त्वामुनिगणाः
कृत्वाभोजनमुत्तमम् ॥ ५६ ॥ अभिवर्ध्यतमाशीर्भिर्हृष्टाःस्वंस्वंपदंययुः ॥ रामोऽपिपरमप्रीतःसभार्यश्चसहानुजः ॥ अकण्टकंसकृतवान्राज्यंसर्वजन
प्रियः ॥ ५७ ॥ शृणोत्येतदुपाख्यानंयःकश्चिदपिपातकी ॥ सर्वपापविनिर्मुक्तःपरंब्रह्माधिगच्छति ॥ ५८ ॥ नदुर्गतिर्भवेत्तस्ययश्चेदंस्मरतेनरः॥
यश्चापिकीर्तयेत्तस्यएवमेतदुदीरितम् ॥ ५९ ॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशिवराघवसंवादेपुराकल्पीयरामायणकथनंनामषोडशोत्तर
शततमोऽध्यायः ॥ ११६ ॥ सूतउवाच ॥ भारद्वाजगृहेभुक्त्वारामचन्द्रःप्रसन्नधीः ॥ मुनीन्द्रविष्णुसहितोवानरर्क्षसमन्वितः ॥ १ ॥ मेघ
च्छन्नेतथाकाशेमन्दंचरतिमारुते ॥ तद्वनाभ्यन्तरेक्वापिसुदेवगृहमुत्तमम् ॥ २ ॥ अष्टापदस्तम्भयुतंहेमपट्टिककलिपतम् ॥ मणिमौक्तिकसंयुक्तं

CC-0. In Public Domain. Digitization by eGangotri

राजतैःकलशैर्युतम् ॥ ३ ॥ पाटीरचन्द्रकस्तूरीकुङ्कुमैःसुरभीकृतम् ॥ कर्दमैर्जालकयुतंशकलोपरिसंवृति ॥ ४ ॥ चन्द्रोज्योत्स्नागमंसूर्यानिरीक्ष्य
मध्यभित्तिकम् ॥ गृहान्तर्भूतलंकृत्स्नंचन्द्रपुष्परसोक्षितम् ॥ ५ ॥ दिगुदीचीतथाकृत्स्नाभित्तिकल्पनवर्जिता ॥ स्तम्भेस्तम्भेचित्रकारीस्वपादी
परिकल्पितम् ॥ ६ ॥ शतहस्ताङ्गणंतस्यस्फटिकोपरिकल्पितम् ॥ गृहाङ्गणाधिकच्छायःपारिजातमहीरुहः ॥ ७ ॥ कृत्स्नप्रावृतिकं
तत्रनिबिडंकदलीवनम् ॥ कदलीवनसंयुक्तंकेतकीवनसंवृतम् ॥ ८ ॥ मयूरनादबहुलंमञ्जुकूजन्मधुव्रतम् ॥ पारावतगणध्वानंनानोपवनशोभितम् ॥
॥ ९ ॥ प्रासादशतसम्बाधंमत्तकोकिलनादितम् ॥ शाखालम्बिमहारत्नशोभितानेकपादपम् ॥ १० ॥ किन्नरीवनितागीतनादपूरितदिङ्मुखम् ॥ अने
कारामसुभगंगौतमीतटसुत्तमम् ॥ ११ ॥ भारद्वाजगृहंपुण्यमनन्तगुणसेवितम् ॥ रतिकन्दर्पसङ्काशदासीदासशतान्वितम् ॥ १२ ॥ नानो
पकरणोपेतंभारद्वाजगृहंशुभम् ॥ तस्यचान्तर्गतःसौधस्तत्रान्तर्गृहवाटिकाः ॥ १३ ॥ अष्टौतन्मध्यतोह्येकंगृहंपरमशोभनम् ॥ चतुर्दिक्षुमहादेवगृह
प्रासादशोभितम् ॥ १४ ॥ प्रतिदेवगृहंश्यामातौर्यत्रिकसुशोभितम् ॥ स्वर्गस्थितवरस्त्रीणांविश्रामायैवकल्पितम् ॥ १५ ॥ भारद्वाजगृहाद्रामो
निर्गत्याशेषसंयुतः ॥ तस्यैवचग्रहागेहंवनमध्यगतंत्वगात ॥ १६ ॥ तदन्तराच्छादितकम्बलंतदापृथक्स्थवस्त्रासनसंयुतंच ॥ सिंहासनंमध्य
गतंतथैकंशुन्यासनानेकगतंविवेश ॥ १७ ॥ पौराणिकस्यानुपमासनान्तरंभूपालहर्यृक्षवरासनंच ॥ पौराणिकंपूर्वमथोपवेश्यततोवसिष्ठंमुनिपुङ्गवां
श्च ॥ १८ ॥ नारायणंभूमिपतीन्कपींश्चनीचासनंचस्वयमध्यतिष्ठत् ॥ मेघावृतंव्योमदिशःप्रसन्नाःसुपुष्पमुर्वीतलमुत्तबीजम् ॥१९॥ तदङ्गणंनोष्ण
महोनशीतलंसन्तानपुष्पंदमपुष्पगन्धि ॥ शम्भुंविलोक्याथवचोबभाषेरामःकथांकीर्तयशङ्करस्य ॥ २० ॥ तृप्तिर्नजातामुनिवर्यशृण्वतोमाहेशमा
ख्यानमघौघनाशनम् ॥ चकारकिंवानतुगौतमाश्रमेमहेश्वरोदेवगणाधिसंवृतः ॥ २१ ॥ शम्भुरुवाच ॥ महाविपश्चीमवलम्ब्यनिष्ठितःसवायुसूनुः
शिवमन्वपृच्छत् ॥ न्यायार्जितैरेवहिपूजनेविभोःकीदृग्भवेच्चानयजैःफलंवद ॥२२॥ चौर्यैरथोकिंफलमर्पितार्पणेउपाहृतद्रव्यसमर्पणेषु ॥ एकैकशोमे
भगवन्वदेशप्रश्नोत्तरंकिंकथयाशुशम्भो ॥ २३ ॥ अथेश्वरोवानरमाबभाषेवदामिसर्वंतवध्यानतःशृणु ॥ न्यायार्जितैःपूज्यसदाशिवंत्वजंसम्प्राप
चैश्वर्यमिदंहिगौतमः ॥ २४ ॥ पुराद्विजोमङ्कणसूनुराकथःसुशोभनामापसतींद्विजन्मा ॥ दरिद्रएकःकरुणासमन्वितःषष्ठाहभोजीपितृवर्जितश्च ॥
॥ २५ ॥ उपोष्यपश्चाहमथापिभोक्तुंप्रवृत्तएवाथसमापतद्यतिः ॥ यतिर्बभाषेमधुरंतदाकथंमासोपवासीतवभोक्तुमागतः ॥ २६ ॥ तिष्ठामिभुञ्जय
दिचास्तितेमुनेनमेवुभुक्षान्यगृहाद्विभोक्तुम् ॥ २७ ॥ आकथउवाच ॥ नमेभुजिःपञ्चदिनंद्विजेन्द्रषष्ठेदिनेमेभुजिरागतश्च ॥ तदामयाकार्यमचि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्तनीयंप्रक्षालयाम्येहितवाद्यपादौ ॥ २८ ॥ ओमित्यथक्षालितपादयुग्मःसभोजनंकर्तुमियेषयोगी ॥ रम्भांदलांसेवुभुजेतदन्नंविपाच्यसम्पादितमाज्ययुक्तम् ॥ २९ ॥ वन्यैःसुसंयुक्तमथादरेणनकिंचिदुच्छेषितमन्नमस्य ॥ अथाकथोवीक्ष्यमुनिंसुतुष्टंतुतोषभार्यासहितस्तपस्वी ॥ ३० ॥ गतोऽथभुक्त्वापियतिःसचाकथःसन्तुष्टचित्तोऽथजपंचकार ॥ कपोतवृत्तिंसचकारपत्न्यातपोवितानायससज्जनोमनिः ॥ ३१ ॥ पीठेऽथकृत्वातमुमापतिंशिवंलिङ्गेसमाराध्यसमन्वितंगणैः ॥ लिङ्गंनिधायाथनिरीक्षमाणोददर्शचाज्ञातकृशाकृतिंद्विजम् ॥ ३२ ॥ दिगम्बरंपादविहीनमेतंकाणंकुणिंकर्णविहीनकंप्रभुम् ॥ सामोद्गिरन्तंबहुशास्त्रपारगंगृहंसमायान्तमथोददर्श ॥ ३३ ॥ अथाकथोभार्यांसुशोभनामिदमुवाच ॥ अयंहिविकृतवेषोब्राह्मणःसमायाति ॥ अर्द्धंदेयमेतस्मैभोजनंरक्षार्द्धमन्नंचास्मिन्नपिदिनेगतेषष्ठेऽह्निभोजनाभावात्तवजीवितंनतिष्ठतीतिममप्रतीयतेकिंतुत्वंमन्यसेवद ॥ शोभनोवाच ॥ आयुर्ललाटेलिखितंनान्तरानश्यति ॥ आकथआह ॥ यथाबद्धायुषोऽपियंज्ञस्यवीरभद्रेणच्छिन्नंशिरअजस्यात्मनःकिमुतमनुष्याणांपापात्मनामितितदेनंपरिहृत्यत्वयाभुज्यतेयदित्वेतस्मैमयान्नंदीयत ॥ तवेच्छानुसारतोममकर्तव्यम् ॥ भार्याप्राहकथमहंभोक्ष्येत्वय्यभुक्तेमयाकिंपूर्वंभुक्तमिदमपरंशृणु ॥ अन्नंहिप्राणिनांप्राणाःप्रत्यक्षंसर्वदेहिनाम् ॥ तस्मादन्नप्रदोयस्तुप्राणदःसनिगद्यते ॥ ३४ ॥ अन्नाद्भूतानिजायन्तेवर्द्धन्तेतानिवैयतः ॥ तस्मादन्नाधिकंकिंचिन्नास्यदानंमहाफलम् ॥ ३५ ॥ अश्वत्थचलपत्राग्रलीनतोयद्रवास्तिके ॥ जीवितेनहियोदद्यात्तस्यजन्मनिरर्थकम् ॥ ३६ ॥ परलोकसहायोहिधर्मोभार्यानबान्धवाः ॥ भार्यावापितरौपुत्रायावदायुर्नबान्धवाः ॥ ३७ ॥ सम्पद्वयःसुहृदिहइहामुत्रहितंस्थितम् ॥ धमधर्मभृतांश्रेष्ठंभुङ्क्तेचान्येकिमावयोः ॥ ३८ ॥ इतिभार्यावचःश्रुत्वाआकथःकरुणानिधिः ॥ अविशङ्कितमेवास्मैदत्तवानन्नमूर्जितम् ॥ ३९ ॥ अयंसशङ्करोदेवोनानाकरणमागतः ॥ इतिनिश्चित्यमनसातस्याङ्गंपापनाशनम् ॥ ४० ॥ आजानुपादंप्रक्षाल्यपराजङ्घमतःपरम् ॥ गुल्फंचतदधस्तस्यप्रक्षाल्याचामयद्द्विजम् ॥ ४१ ॥ अथाकथोऽपिपत्सन्धिगृहाङ्गणमुपानयत् ॥ उन्मुच्यपादसन्धिंसनिषसादार्पितासने ॥ ४२ ॥ समभ्यर्च्याकथःसम्यग्भोजयामासतंमुनिम् ॥ एतस्मिन्नन्तरेकश्चिदुन्मत्तोगृहमागतः ॥ ४३ ॥ पादसन्धिमथादायगृहबाह्यमुपानयत् ॥ अथादहच्चतद्गेहंदम्पतीचाप्यताडयत् ॥ ४४ ॥ आकथस्ताडितोविप्रोदह्यमानंगृहंतदा ॥ विवेशदेवमीशानमादातुंतूर्णमेववा ॥ ४५ ॥ अथादायमहेशानंदग्धपूजांद्विजोत्तमः ॥ निर्गत्यचततोदृष्ट्वासुखसन्ताप

१'रम्भादलांशे' इ० पा० । २'यक्षस्य' इ० 'दक्षस्य' इ० च पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मेवच ॥ ४६ ॥ दग्धपूजांतिरस्कृत्यवीक्ष्यदग्धाङ्गमच्युत ॥ भार्यामुवाचधर्मात्मायथापूजामहेशितुः ॥ ४७ ॥ तथाममसमस्ताङ्गंकर्त्तव्यमविशङ्कितम् ॥ ४८ ॥ व्यङ्गउवाच ॥ पश्चादपिकृतापूजासफलातेभविष्यति ॥ यथान्यद्रव्यदहनेतादृशंदीयतेजनैः ॥ ४९ ॥ पूजायादहनेतद्वत्पूजास्यक्रियतामिति ॥ ५० ॥ आकथउवाच ॥ चौर्येणाप्यर्जितैर्द्रव्यैःपूजयानहितंभवेत् ॥ नचान्यायार्जितैर्विप्रशम्भोःपूजाशुभप्रदा ॥५१॥ इत्युक्त्वाचाकथस्तूर्णंस्वाङ्गंदग्धुमुपाक्रमत् ॥ दग्धंलिङ्गंतदोन्मत्तोगृहीत्वान्तर्दधेक्षणात् ॥ ५२ ॥ अथव्यङ्गोहरोभूत्वावारयामासचाकथम् ॥ किमर्थंखिद्यतेविप्रवरदोऽहंवरंवृणु ॥ ५३ ॥ आकथोऽपिविभोःपादेभक्तिंवव्रेसुनिश्चलाम् ॥ ५४ ॥ सूतउवाच ॥ एतांश्रुत्वाकथांरामःप्रहृष्टोमुनिभिर्वृतः ॥ भारद्वाजंनमस्कृत्यप्रयाणाज्ञामयाचत ॥ ५५ ॥ अथोभरद्वाजमुनिःप्रसन्नःशम्भुंवसिष्ठंमुनिपुङ्गवंच ॥ नारायणंचर्षिगणांश्चनत्वाव्यसर्जयत्तेऽपिययुःप्रणम्य ॥ ५६ ॥ नैमिषीयाऊचुः ॥ गत्वायोध्यांमहातेजाःसमस्तमुनिसंयुतः ॥ किंचकारततोरामःसचशम्भुर्महायशाः ॥ ५७ ॥ सूतउवाच ॥ कौसल्यामासिकश्राद्धमपरेऽहनिराघवः ॥ चिकीर्षुर्द्विजप्रवरानृषिकल्पान्न्यमन्त्रयत् ॥ ५८ ॥ शम्भुंसमस्ततत्त्वज्ञंनारदंरोमशंभृगुम् ॥ विश्वामित्रमथोरामएकभक्तव्रतीततः ॥ ५९ ॥ भूमौसुखास्तृतायांचसुष्वापाव्याकुलेन्द्रियः ॥ परेद्युरथसम्प्राप्तेप्रातःस्नात्वाविधानवित ॥ ६० ॥ अन्नंशाकादिकंशुद्धंजनैरेवान्वकारयत् ॥ नानान्नानिविचित्राणिचोष्याद्यानितथैवच ॥ ६१ ॥ वटकादींस्तथाभक्ष्यानष्टत्रिंशदकल्पयत् ॥ पायसंषड्विधंचैवपक्वशाकशतद्वयम् ॥ ६२ ॥ अपक्वमिश्रकाणांचशतत्रयमकल्पयत् ॥ कालशाकादिकंशाकंफलानिविविधानिच ॥ ६३ ॥ मूलानिचैककन्दानिवल्कलानिचराघवः ॥ कारयित्वानदींगत्वासहभ्रातृपुरोहितः ॥ ६४ ॥ सरयूसलिलेस्नात्वाहुत्वाग्निंस्वागतान्द्विजान् ॥ उक्त्वातुस्वागतंतांस्तुकृतदेवाचनो नपः ॥ ६५ ॥ प्राणानायम्यसङ्कल्प्यक्षणंचैवप्रदत्तवान् ॥ रोमशंनारदंरामोवैश्वदेवेन्यमन्त्रयत् ॥६६॥ शम्भुंभृगुंकौशिकंचमातृस्थानेन्यमन्त्रयत् ॥ गोमयेनततःकृत्वामण्डलंपूज्यचार्हतः॥६७॥पादप्रक्षालनंचक्रेसीतादत्तोदकेनच ॥ आचामयित्वाताान्विप्रान्गृहंगन्तुमथोद्यतः ॥६८॥ अभ्यागतःसमायातःस्थविरोविकृताकृतिः ॥ कृशःसम्प्रचलद्गात्रोवेपिताङ्गशिरास्तथा ॥ ६९ ॥ लम्बमानत्वगुत्कर्षच्छ्वासकासादिपीडितः ॥ दूषिकाक्लिन्नगण्डश्चलालासम्पृक्तकूर्चकः ॥ ७० ॥ उवाचरामंराजानमहमेकोद्विजःस्थितः ॥ ममापिभोजनंदेयंस्थविरस्यकृशस्यच ॥ ७१ ॥ रामोऽपितद्वचःश्रुत्वालक्ष्मणंवाक्यमब्रवीत ॥ पादौप्रक्षालयास्यत्वमहमभ्यर्चयेद्विजम् ॥ ७२ ॥ अभ्यागतोऽपिवचनमाहराममथाकुलम् ॥ त्वयाप्रक्षालितेपादेममभोजनमिष्यते ॥ ७३ ॥ मत्तोऽधिकाद्विजाःकिंतेयेनमामवमन्यसे ॥ श्राद्धधर्मंनजानीषेमहर्षिगणसेवितम् ॥ ७४ ॥ ममावमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नतःसर्वविप्राणामवमाननम् ॥ श्राद्धंविहन्यतेचापिनरकंचगमिष्यसि ॥ ७५ ॥ अथरामःस्वयंविप्रपादौप्राक्षालयत्तदा ॥ आचामयित्वातंविप्रंगृहं
प्रावेशयत्ततः ॥ ७६ ॥ आचान्तश्चस्वयंरामोविष्टरंदत्तवानथ ॥ आसीनेषुचविप्रेषुप्राणवायुंनिरुध्यच ॥ ७७ ॥ स्वकर्मकरणानुज्ञांलब्ध्वाऽथसतिलं
जलम् ॥ अपहतेतिमन्त्रेणद्वारदेशेविनिक्षिपेत् ॥७८॥ उदीरतामितितथापितृपात्रस्थलेक्षिपेत्॥गायत्र्याचाक्षतजलंदेवपात्रस्थलेक्षिपेत् ॥७९॥ पाक
जातंतथाऽभ्युक्ष्यमन्त्रमेतमुदीरयेत् ॥८०॥ श्राद्धभूमिंगयांध्यात्वाध्यात्वादेवंजनार्दनम्॥वस्वादींश्चपितॄन्ध्यात्वाततःश्राद्धंप्रवर्तयेत् ॥८१॥ विश्वेदे
वार्चनंकुर्याद्यवैर्वातण्डुलैरथ ॥ मूलाग्रयोजितौदर्भौगृहीत्वासाक्षतावथ ॥ ८२ ॥ भूस्पृष्टदक्षजानुस्तुद्विजहस्तेजलार्पणम् ॥ पुरूरवार्द्रवाणांवैदेवाना
मिदमासनम्॥८३॥इतिदत्त्वाऽऽसनंतेषांश्राद्धदःप्रार्थयेत्क्षणम् ॥अर्घंकृत्वाततःपश्चादुत्तराग्रकुशेष्वथ॥८४॥न्युब्जंपात्रंततःकृत्वाकुशग्रन्थिमथोपरि॥
उत्तानंतुततःकृत्वाजलैरभ्युक्ष्यरौक्मकैः ॥८५॥ पवित्रान्तर्हितेपात्रेशंनोदेव्याजलंक्षिपेत ॥ वैश्वदेव्याऽखिलंकर्मयावत्तद्विधिचोदितम् ॥ ८६ ॥ यवो
ऽसिधान्यराजोवाइतिपात्रेक्षिपेद्यवान् ॥ मधुमिश्रांस्तुकरकान्गन्धपुष्पैस्ततोददेत् ॥ ८७ ॥ द्विजतेऽस्त्वर्घइत्युक्त्वात्वस्त्वर्घोत्तरतस्ततः ॥ आवाह
यिष्यतान्देवानितिपृष्ट्वातदुत्तरम् ॥८८॥ विश्वेदेवासइत्युक्त्वाविप्रमूर्ध्निकुशान्क्षिपेत् ॥ विश्वेदेवाःशृणुतेममागच्छन्त्वितिसञ्जपेत् ॥ ८९ ॥ समाग
तोनिषण्णोऽथसदर्भपात्रमाहरेत ॥ दक्षिणेचरणेक्षिप्त्वामुख्यपात्रोदकंततः ॥९०॥ विप्रस्यदक्षिणेहस्तेप्रागग्रेऽथपवित्रके ॥ यादिव्याइतिमन्त्रेणनिक्षि
पेत्पात्रवारितत ॥९१॥ इदंभोअर्घमित्युक्त्वाह्यस्त्वर्घोत्तरतस्ततः ॥ पात्रेधृत्वाऽर्घतोयंचतत्पात्रंस्थापयेत्क्वचित्॥९२॥अथदत्त्वाकरेतोयंयवैरेतानथा
र्चयेत ॥ अर्चतप्रार्चतइतिपृष्ट्वार्चोत्तरतस्ततः ॥९३॥ पादादिमूर्धपर्यन्तमभ्यर्च्यजलदस्ततः ॥ गन्धद्वारेतिमन्त्रेणतथेत्युक्त्वोत्तरस्ततः॥९४॥ पितॄणा
मर्चनंकुर्यादेवमेवापसव्यकम् ॥ उपवीतंद्विजंकृत्वाकुशान्भग्नांस्तिलान्वितान् ॥ ९५ ॥ वामजानुंभूमिगतंकृत्वादद्यात्तदासनम् ॥ दक्षिणाभिमुखो
भूत्वाक्षणप्रश्नमथोवदेत्॥९६॥दक्षिणाग्रेषुदर्भेषुन्युब्जंपात्रत्रयंन्यसेत्॥त्रिकुशग्रन्थिसंयुक्तमुत्तानमथकल्पयेत् ॥९७॥ततःसम्प्रोक्ष्यपात्रेषुसपवित्रतिले
षुच ॥ शन्नोदेव्याजलंक्षिप्त्वातिलोऽसीतितिलान्क्षिपेत ॥९८॥ गन्धपुष्पमथोदत्त्वास्वधार्घइतिपृच्छति ॥ दत्तोत्तरोऽस्त्वर्घइतिपितॄनावाहयेत्ततः
॥९९॥तिलपुष्पकुशैस्तिष्ठन्कल्पितार्घंकरेदधत ॥ उशन्तस्त्वेतिमन्त्रेणत्रिरर्घोदकमर्पयेत् ॥ १०० ॥ अर्चनंतुतदातेषामपसव्यंतुपूर्ववत् ॥ प्रक्षाल्य
भाजनंस्वर्णंदेवानांपरिकल्पयेत् ॥ १ ॥ पितॄणांराजतंकुर्याद्यथासम्भवमेववा ॥ तदभावेतुकांस्यंस्यादनन्याशितमुत्तमम् ॥२॥ पात्राणितदभावेस्युः
पालाशानिनमध्यमम् ॥ रम्भाणिचूतपत्राणिजम्बूपुन्नागकानिच ॥ ३ ॥ पराकान्यथचाम्पानिमधूककुटजान्यपि ॥ मातुलिङ्गस्यपत्राणिश्राद्धे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देयानिवैनृभिः ॥ ४ ॥ दर्व्यामन्नमथाऽऽदायकराभ्यामाज्यमेवच ॥ प्रवेषणंततःपृच्छेत्प्राचीनावीतवान्द्विजम् ॥ ५ ॥ करिष्येऽग्नौकरणमितिकुरुष्वे
तितदुत्तरम् ॥ परिवेष्योपवीतीस्यादभिघार्यसमाहरेत् ॥ ६ ॥ हुनेत्सोमायपितृमतेस्वधानमइतीरयन् ॥ यमायाङ्गिरसेपितृमतेस्वधानम
इति ॥ ७ ॥ द्वितीयामाहुतिंहुत्वाचाभिघार्याक्षतंततः ॥ अग्नयेकव्यवाहनायस्वधानमस्ततःपरम् ॥ ८ ॥ हुत्वाऽपसव्यकृत्वातुपरिवेष्यद्विजा
न्व्रजेत् ॥ मेक्षणेनततोऽभीक्ष्णंपातयेत्पितृपात्रके ॥ ९ ॥ पिण्डपात्रमतःशेषंदर्वींप्रक्षालनंततः ॥ मेक्षणस्याग्निनिक्षेपंततःपात्राण्युपस्तरेत् ॥११०॥
पात्रदक्षिणभागेतुदद्यादन्नमनन्तरम् ॥ भक्ष्याणिभोज्यशाकानिसर्वाण्येवसदत्तवान् ॥ ११॥ अथातिथिर्महावृद्धोवीक्षमाणस्ततस्ततः ॥ उवाचराघवं
शान्तंशीघ्रमेवनमस्कुरु ॥ १२ ॥ बुभुक्षावर्ततेऽस्माकंभोक्ष्येऽहंवातवाऽऽज्ञया ॥ रामोबभाषेवचनंविलम्बयक्षणंमुने ॥ १३ ॥ देवताःपितरोमङ्क्षु
नमस्यन्तेऽधुनामया ॥ इत्युक्त्वाराघवःप्रादादन्नंपात्रगतंतदा ॥ १४ ॥ प्राक्सौम्याग्रान्कुशान्दैवेप्रतीचीदक्षिणाग्रकान् ॥ पित्र्येपवित्रेयेदर्भा
यवानथतिलानपि ॥ १५ ॥ अन्नप्रदानंकुर्वन्तिपृथिवीइतिमन्त्रतः ॥ इदंविष्णुरितिस्पृष्टमङ्गुष्ठेनद्विजस्यतु ॥ १६ ॥ देवेभ्यःप्रथमंदद्याद्वे
वाइतिवैपठन् ॥ पितॄणांचततोदद्याद्दद्यादतिथयेततः ॥ १७ ॥ देवताभ्यइतिमुखानुच्चार्याऽऽपोशनंददेत् ॥ त्रिर्जपित्वातुगायत्रीमुपवीतिपुरोमुखः ॥
॥ १८ ॥ प्राचीनावीतवान्ब्रूयान्मधुत्रयमतःपरम् ॥ भुञ्जध्वमितितानुक्त्वाभुञ्जानेषुद्विजातिषु ॥ १९ ॥ रक्षोघ्नमन्त्रपठनंभक्ष्यभोज्यादिदापयन् ॥
एतस्मिन्नन्तरेविप्रोयोऽतिथिस्तदिदंतथा ॥१२०॥ कृतवान्महदाश्चर्यंतद्वदामिसमासतः ॥ पात्रस्थितमशेषंचग्रासेनैकेनचाग्रसत् ॥२१॥प्राणाहुतीनां
पर्याप्तंदीयतामितिचाब्रवीत् ॥ एतावद्दातुमशक्तःकथंश्राद्धक्रियोद्यतः ॥ २२ ॥ ममैकस्यप्रदानेत्वमशक्तोरामकिंवृथा ॥ बहूनांभोजनंदातुमुद्युक्तोरा
मकिंवृथा ॥ २३ ॥ सहसाकृतकर्माणिनसमाप्तिंप्रयान्तिच ॥ त्वयाकृतमशेषाणांनालंप्राणाहुतिर्मम ॥ २४ ॥ कथंमेदीयतेभुक्तिःकथमेषांतथावद ॥
रामस्तमब्रवीद्धीरोभुङ्क्ष्वत्वंहियथासुखम् ॥ २५ ॥ इत्युदीयनिरीक्ष्यास्यकर्मतत्परमाद्भुतम् ॥ अथशम्भुंसमाहूयप्राहत्वंपरिवेषय ॥ २६ ॥ त्वं
पितापार्वतीमाताशिवादेवीतिमेमतिः ॥ अन्नपूर्णेश्वरीदेवीभवान्येवेतिमेमतिः ॥ २७ ॥ साशाम्भवीवचःप्राहतत्पर्याप्तंददाम्यहम् ॥ अथोमाकांस्य
मादायभिस्सापूर्णमलङ्कृतम् ॥ २८ ॥ स्वर्णदर्व्यासमादायपायसंगन्धकान्तिमत् ॥ अस्याक्षयमिदंभूयादितिप्रादात्तुपायसम् ॥ २९ ॥
द्विजस्यदक्षिणेहस्तेसाऽददात्सत्कृतंमुदा ॥ कम्पमानशिरस्कस्तुऊर्ध्वदृष्टिरथाभवत्॥१३०॥प्रसारितकरश्चाऽऽसीद्गृहीत्वापायसंकरे ॥ दीयतांपायसं
स्वादुसुष्ठुपक्वमिदंतुकिम् ॥ ३१ ॥ शम्भुपत्नीबभाषेतंकरेभुङ्क्ष्वततोददे ॥ अभक्षयत्ततोविप्रःपुनःकरतलेस्थितम् ॥ ३२ ॥ तदक्षयमथज्ञात्वा

॥ १७६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रासारयदथेतरम् ॥ तस्मिन्करतलेदेवीपायसंदत्तवत्युत ॥ ३३ ॥ अन्येषामपिविप्राणांपक्वाक्षय्यमदात्सती ॥ अथपाणिद्वयगतंविज्ञायाक्ष
य्यपायसम् ॥ ३४ ॥ दृष्ट्वाकरान्तरमथोप्रासारयतसद्विजः ॥ उवाचान्नंप्रदातव्यंससूपघृतमुत्तमम् ॥ ३५ ॥ शिवादेवीतथाप्रादादक्षय्यंशम्भु
वल्लभा ॥ यद्यत्प्रादात्तदासाध्वीसर्वमेवतदक्षयम् ॥ ३६ ॥ करान्तरमथोसृष्टंपरिपूर्णंपुनःपुनः ॥ एवंकरसहस्रंतुकृत्वासविररामह ॥ ३७ ॥
उवाचवचनंविप्रोदेहिगण्डूषवारिमे ॥ तार्पितोऽस्मित्वयाभद्रेनरामेणनसीतया ॥ ३८ ॥ शम्भुरुवाच ॥ रामेणसीतयादत्तंमयादत्तंहियत्रच ॥ इतःपरं
हिकिंदेयंपूर्णवात्वंवदस्वमे ॥३९॥ द्विजउवाच ॥ तृप्तोऽस्मिनचमेदेयमधिकंचकरस्थितम् ॥ विद्धन्नतःकरगतंनपपातकथञ्चन ॥ १४० ॥ निषण्णो
हिचिरंदध्यौकथंमेकेवलःकरः ॥ भुक्त्यैकृतमिदंसर्वंनान्यस्मैकर्मणेमम ॥ ४१ ॥ तस्मादन्यकृतेरेतत्सर्वंरिक्तंभविष्यति ॥ इतिनिश्चित्यमनसालिप्ता
ङ्गोऽतिथिराभवत् ॥ ४२ ॥ पश्यत्सुसर्वदेवेषुतदद्भुतमिवाभवत् ॥ तृप्तानथद्विजाञ्ज्ञात्वाराघवःपरमार्थवित् ॥ ४३ ॥ दर्वीकरोऽथतृ ाःस्थ
इतिपृष्ट्वायथाविधि ॥ तृप्ताःस्मइतिविप्रेन्द्राविकीर्यान्नंसमन्त्रकम् ॥४४॥ पात्रस्ययाम्याभिमुखःसन्निधौपिण्डमर्पयेत् ॥ गण्डूषमपिविप्राणांतत्रैवपरि
कल्पयेत् ॥ ४५ ॥ उच्छिष्टपर्णपात्रेषुतेगण्डूषमकुर्वत ॥ गृहान्तरेचतेविप्राविविशुस्त्वतिथिंविना ॥४६॥ आहातिथिर्बहिःकार्यमयाऽऽचमनंविद्यते ॥
उत्थातुंनैवशक्नोमिकरंमेदेहिराघव ॥ ४७ ॥ अथरामःकरंप्रादान्नोत्थितस्तुद्विजोत्तमः ॥ हनूमानथचाप्यस्यदत्तवान्बलवत्करम् ॥ ४८ ॥ इतरेण
गृहीत्वातुकरेणद्विजपुङ्गवम् ॥आचकर्षकपीन्द्रस्तुद्विजःसाक्रोशमुक्तवान् ॥४९॥ द्विजउवाच॥छिद्यतेमेकरोव्यक्तमुत्थापयततोऽन्यतः ॥ लाङ्गूलेन
सपीठंतमावृत्याऽऽमस्तकंबलात् ॥ १५० ॥ अथाधावत्ततःपृथ्वींद्विजस्तुनचचालह ॥ अथवानरवीरस्तुपद्भ्यांचक्रन्ततांमहीम् ॥५१ ॥ पादौ
विन्यस्यसुदृढौद्विजमूधानमाक्षिपत् ॥ विशीर्णमभवद्वेश्मद्विजाःसर्वेबहिस्तथा ॥५२ ॥ सहवृद्धद्विजःसोऽथहनूमान्बहिरभ्यगात् ॥ पीठेचस्थापया
मासब्राह्मणंस्थविरंकृशम् ॥ ५३ ॥ द्विजायजलमादायजाम्बवान्मृन्मयेघटे ॥ आहस्वच्छंजलंविप्रत्वयाऽऽदेयंसभाजनम् ॥ ५४ ॥ सीताप्रक्षा
लयेदङ्गंलक्ष्मणोजलदोभवेत् ॥ जाम्बवानाहतंरामंब्राह्मणोक्तमशेषतः ॥ ५५ ॥ द्विजप्रक्षालनेरामोव्यादिदेशानुजंप्रियाम् ॥ सौमित्रिर्जल
मादायद्विजाङ्गक्षालनेतथा ॥ ५६ ॥ प्राक्षालयदशेषाङ्गंप्रतिमामिवभूभुजः ॥ अथरामोपदेशेनचक्रतुस्तौतथैवच ॥ ५७ ॥ अथातिथिः
स्वगण्डूषंसीतावक्त्रेव्यमुञ्चत ॥ सालङ्काराऽम्बुभिर्व्याताप्राक्षालयदथोसती ॥ ५८ ॥ श्लेष्मलालासुप्रचुरंमुखंविप्रस्यसासती ॥ प्रंममार्जपुनःक्षा
लयनासाश्लेष्माणमत्यजत् ॥ ५९ ॥ आचामयित्वासौमित्रिरुत्तिष्ठेत्यब्रवीद्विजम् ॥ द्विजोनशक्यमित्याहहनुमानप्यथाऽऽगतः ॥ १६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतिथिःप्राहतंविप्रःपीडितोऽहंहनूमता ॥ गृहीत्वोद्धरतापूर्वंपातितोवानरेणच ॥ ६१ ॥ जाम्बवानथतंप्राहलोमाङ्गंममवैमृदु ॥ मयाथध्रियसेविप्रन
चपीडाभविष्यति ॥ ६२ ॥ इत्युक्त्वाजाम्बवान्विप्रंदोर्भ्यामालम्ब्यचोद्धरत् ॥ द्विजप्रान्तमथादायस्थापयामासतंमुनिम् ॥ ६३ ॥ अथरामो
द्विजेन्द्राणांप्रदक्षिणमवर्तत ॥ दत्ताशीरपिविप्रेन्द्रैर्दत्त्वाताम्बूलमग्रतः ॥ ६४ ॥ पादावलम्बकृद्रामोभ्रातृभिःसहचाब्रवीत् ॥ अयिसीतेंऽतिथे
रस्यत्वयानक्षालितंवपुः ॥ ६५ ॥ जङ्घायुगेऽतिथेरस्यमलंचास्यंमलान्वितम् ॥ सम्यक्प्रक्षालयमुखंद्विजोनसहतेमलम् ॥ ६६ ॥ सीतोवाच ॥
अथप्रक्षालितंसम्यगिदानींनिर्गतंपुनः ॥ ६७ ॥ रामउवाच ॥ पुनःप्रक्षालयमलंदोषःस्यादन्यथामम ॥ अथसीतातथाकृत्वातूष्णीमेवबभूवह ॥
॥ ६८ ॥ आहरामंचसीतांचद्विजःपरमकोपवान् ॥ पादौयौममराजेन्द्रतौसीतालम्बयेदिति ॥ ६९ ॥ भवान्करौचभरतोममबीजंप्रयच्छतु ॥
लक्ष्मणःकेशनिचयप्रसाधनकरोभवेत् ॥ १७० ॥ शत्रुघ्नःश्लेष्मनिर्मुक्तिंस्ववस्त्रेणकरोतुमे ॥ ७१ ॥ सूतउवाच ॥ अथतेचक्रुरतिथेरशेषमुदितंतथा ॥
तथापुर्विस्मयंविप्रानरवानरराक्षसाः ॥ ७२ ॥ शिवादेवीचशम्भुश्चसभ्रूभङ्गमुदैक्षताम् ॥ मनसाचाप्यभाषेतामतिथिःशम्भुरेवच ॥ ७३ ॥ अतिथि
श्चप्रसन्नोऽभूच्छङ्खचक्रगदाधरः ॥ पीताम्बरःसमस्ताङ्गभूषितोऽतीवदीप्तिमान् ॥ ७४ ॥ यःपुराराधितःशम्भुःप्रसन्नोऽभूत्त्रिलोचनः ॥ शुद्ध
स्फटिकसङ्काशःसर्वाभरणभूषितः ॥ ७५ ॥ कोटिसूर्यप्रतीकाशःकिरीटीकरुणानिधिः ॥ आलम्ब्यचक्रिणःपाणिमातिष्ठतसदाशिवः ॥ ७६ ॥
रामःपरमधर्मात्मापुलकाञ्चितविग्रहः ॥ दण्डवन्निपपातोर्व्यामानन्दप्लावितेक्षणः ॥ ७७ ॥ अनमन्भ्रातरस्तस्यदण्डवद्भूतलेस्थिताः ॥ शिव
उत्थाप्यकाकुत्स्थमालिङ्ग्याघ्रायमस्तकम् ॥ ७८ ॥ उवाचमधुरंवाक्यंरामंराजीवलोचनम् ॥ ७९ ॥ शिवउवाच ॥ वरंवृणुप्रसन्नोऽस्मि
ब्रह्मादेरपिदुर्लभम् ॥ तवादेयंनमेकिंचिद्वृणुत्वंनचिरायवै ॥ १८० ॥ श्रीरामउवाच ॥ नयाच्यंमेजगन्नाथभूराज्यंममसाम्प्रतम् ॥ स्वर्गश्चकर्मभिः
प्राप्तोभक्तिस्त्वत्पाददर्शनात् ॥ ८१ ॥ आरोग्यंपश्यभुञ्जेऽहंसासीतायोषितांवरा ॥ वशीकृताःसर्वनृपाःप्रजाधर्मसमन्विताः ॥ ८२ ॥ हर्षएव
ममापन्नस्त्वदागमनतोऽच्युत ॥ तथापिवरयेकिंचिद्भक्तिरस्तुस्थिरात्वयि ॥ ८३ ॥ तथाममगृहेदेवत्रिवर्षंतिष्ठहेप्रभो ॥ ब्रुवन्समस्तधर्मांश्च
रूपेणानेनशङ्कर ॥ ८४ ॥ शिवउवाच ॥ एवमस्तुतथारामसर्वंतेसम्भविष्यति ॥ अथाहचक्रीराजानंरामंराजीवलोचनम् ॥ ८५ ॥ वरंवृणु
महाभागप्रसन्नोऽहंयमिच्छसि ॥ श्रीरामआहवचनंममप्राप्यंनचास्तिहि ॥ ८६ ॥ यत्प्राप्यंशम्भुतःप्राप्तमन्यत्सर्वमुदीरितम् ॥ किंचैकंवरये
विष्णोप्रसन्नःसर्वदाभव ॥ ८७ ॥ अथसीतांहरिःप्राहप्रसन्नोऽहंतवाधुना ॥ वरंवृणुप्रयच्छामिततःसीताब्रवीदिदम् ॥ ८८ ॥ वरोवृतःपुरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भर्त्रानचान्योमेवरोवरः ॥ यदिकामंप्रयच्छेथामनश्वपरपूरुषात् ॥ ८९ ॥ सन्निवृत्तंचभवतान्नमस्तेऽस्तुद्विजप्रभो ॥ अथतेमुनयःसर्वेप्रणेमुर्दे
वतोत्तमौ ॥ १९० ॥ अथासौराघवंप्राहभुङ्क्ष्वत्वंबन्धुभिःसह ॥ एकान्तमन्दिरेरम्येदेव्यासहवसामिते ॥ ९१ ॥ विष्णुःसमस्तकरणःसमुद्र
तनयान्वितः ॥ एकस्मिन्मन्दिरेरामतिष्ठतांलोलुपोहिसः ॥ ९२ ॥ अथशुद्धमहागारेपीठाढ्येबहुभाजने ॥ अग्रेवसिष्ठोभगवानुपविष्टस्तयोर्मुनिः
॥ ९३ ॥ अपरेऋषयःसर्वेयथावृद्धंनृपास्तथा ॥ तेषामभिमुखोरामोभ्रातृभिःसहितोनृपः ॥ ९४ ॥ तरुणेसमभागेचआसनेतानवेशयत् ॥
हनूमत्प्रमुखान्भृत्यानाहरामोऽनुसान्त्वयन् ॥ ९५ ॥ भवन्तःपरितिष्ठन्तुपश्चाद्भुञ्जेनचान्यथा ॥ [1]ततस्तेप्रददुःसर्वेपादार्घानानुपूर्वशः ॥ ९६ ॥
[3]बुभुजुश्चापितेसर्वेयेरामस्योपसेविनः ॥ तेषांदत्त्वाथताम्बूलंकपीन्द्रादीनभोजयत् ॥ ९७ ॥ भुक्तवत्सुसमस्तेषुरामोराजीवलोचनः ॥ दीनान्ध
कृपणादीनांपशुपक्षिमृगस्यच ॥ ९८ ॥ दत्त्वाहिभोजनंसन्ध्यांवन्दितुंहिसमारभत ॥ सन्ध्याजपादिकंकृत्वानत्वातेषांनृपस्ततः ॥ ९९ ॥
सिंहासनगतोरामःपौरजानपदादिभिः ॥ सेव्यमानःसभास्थानगतोरेजेसराघवः ॥ २०० ॥ सर्वदेवपरीवारोयथादेवःशचीपतिः ॥ राजकार्य
मशेषंचकृतवान्भ्रातृभिःसह ॥ १ ॥ नाम्नाचैकैकशःसर्वान्विससर्जसराघवः ॥ भ्रातॄन्विसर्जयामासवानरादींस्तथापरान् ॥ २ ॥ अथरामं
महातेजावसिष्ठोवाक्यमुक्तवान् ॥ तवप्रातर्हियत्कार्यंनचविस्मरराघव ॥ ३ ॥ आस्तेशम्भुर्जगन्नाथोभगवानम्बिकापतिः ॥ स्मर्तव्यो
वन्दनीयश्चभगवानथयत्नतः ॥ ४ ॥ [2]तथेत्युक्त्वागुरुंराजानत्वातंचव्यसर्जयत् ॥ स्वयंचभार्यामभजद्देवदेवंविचिन्तयन् ॥ ५ ॥ ऋषयऊचुः ॥
प्रातःसमुत्थायगुरोरामोमतिमतांवरः ॥ किंचकारतदाख्याहिश्रोतुंकौतूहलंहिनः ॥ ६ ॥ सूतउवाच ॥ शम्भुंविलोक्याथततोबभाषे
रामःकथांकीर्त्तयशङ्करस्य ॥ तृप्तिर्नजातामुनिवर्यशृण्वतोमहेशमाहात्म्यमघौघनाशनम् ॥ ७ ॥ शम्भुरुवाच ॥ अथप्रश्नशेषस्यो
त्तरमीशभाषितेतत्कीर्तयिष्यामि ॥ अन्यायोपार्जितद्रव्यैरीश्वरंयउपासतेतेव्यङ्गाजायन्ते ॥ तद्यथाकश्चिद्रूपकोनामराक्षसोऽन्यायार्जितेनद्रव्ये
णशङ्करमाराध्यतेनैवद्रव्येणघण्टामीश्वरप्रीतयेकृतवान् ॥ तस्यपुत्रःसम्पातिरितिख्यातः ॥ चौर्यार्जितैःशङ्करंपूजयामास ॥ तावुभावेक
स्मिन्दिवसेमग्रतुःगतौशिवलोकंवीरभद्रेणभाषितौच ॥ भोरूपकअन्यायार्जितेनद्रव्येणभवतापूजाकृताघण्टादिकंचतेनभावेनव्यङ्गोभूत्वाचौरगणो
भविष्यसि ॥ शिवपदवचनाद्व्यक्तंनामाश्रवणाच्छ्रोत्रंतस्यस्वनेनध्वस्तंभवतिनोदर्शनमेतावतादेवत्वयेश्वरपूजासम्यक्कृता ॥ अतोभक्तिश्चभवि

१ 'चाहम्' इ० पा० । २ 'तथेति' इ० पा० । ३ 'भूभुजः' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्यतिवीरभद्रस्त्वनशनंनामगणंकंचिद्विचरन्तमित्यादिदेश ॥ तौचतथाभूतौशिवलोकेऽतिष्ठताम् ॥ शम्भुरुवाच ॥ अथोपहतद्रव्यपूजा
कथांहनुमतेमहेशभाषितांकथयिष्यामि ॥ शृणुराघवप्रमथानांचरित्रमेकैकस्यकर्मविपाकंकथयिष्यामि ॥ उपहताङ्गगणव्याख्याक्रियता
मितिहनुमत्पृष्टः ॥ शिवउवाच ॥ तदुपहतद्रव्यंज्ञानतोयईश्वरेऽर्पयिष्यतिएतदुक्तंज्ञानिनोऽतःशृणु ॥ एषसर्वाङ्गस्वेदिलःसर्वकालंसर्वाङ्ग
स्वेदिलःस्वेदार्द्रवसनःस्वेदसम्पादितालप्रवाहशरीरोनासाग्रनिपतितस्वेदबिन्दुःस्पर्शायोग्योदृश्यते ॥ सपुरास्वेदकरणेश्वरार्चनंकृतवान् ॥ अत्रे
तिहासंकीर्तयिष्यामि ॥ चेकितानिरितिख्यातोब्राह्मणःकर्षकोऽभवत् ॥ सनित्यंकृषिमुत्पाद्यप्रातःस्नात्वाचनित्यशः ॥ ८ ॥ मध्या
ह्नकालेसम्प्राप्तेसञ्जपन्ब्राह्मणस्त्वसौ ॥ अन्नमानयमेक्षिप्रमितिभार्यामभाषत ॥ ९ ॥ तयानीतेनचान्नेनवेगेनशिवपूजनम् ॥ कृतवानर्क
सन्तप्तःस्वेदिलःसर्वदैवतु ॥२१०॥ गन्धपुष्पाक्षताद्यैश्चस्वेदबिन्दुसमन्वितैः ॥ अथसायन्दिनेप्राप्तेक्षालिताङ्गःसुशोभनः ॥ ११ ॥ पूजयामासदेवेशं
कालसम्भवसाधनैः ॥ममाराथमहाबुद्धिःशिवलोकंगतश्चसः॥१२॥वीरभद्रेणचाप्युक्तोभवत्वंस्वेदिलोगणः ॥ स्वेदस्पृष्टपदार्थैश्चपुराशम्भुःप्रपूजितः॥
॥१३ ॥ नित्यंस्वेदसमायुक्तस्तेनस्वेदगणोभव ॥ १४ ॥ शम्भुरुवाच ॥ वीरेणाथसमादिष्टःप्राप्तोरामगणस्त्वयम् ॥ १५ ॥ अमुंघण्टामुखंपश्यायं
पुरावैश्योविभावसोनामधार्मिकोमहादानकर्ता नित्यंब्राह्मणभोजनंकारयित्वाकृतानुष्ठानःप्रातःकालेशिवंनमस्कृत्यकुसुमैःसम्पूज्यकिञ्चित्प्रदेशंगोमये
नोपलिप्यपद्मादिकमर्जयित्वादेवायसमर्प्यउपहतघण्टानादंकृतवान् ॥ रामउवाच ॥ कथमुपहतघण्टा ॥ शम्भुरुवाच ॥ आसीत्पुराबलः
कश्चित्सोमइत्यभिविश्रुतः ॥ तस्यपुत्रश्चमन्दाख्योदशवर्षवयाअभूत ॥ १७ ॥ सचाग्निपक्वकल्माषान्घण्टायांप्राक्षिपन्नृप ॥ तानभक्षयद
प्येषतेनचोपहताभवत् ॥ १८ ॥ ग्रहीतुमथतंवैश्यंयतमानोऽब्रवीदिदम् ॥ अथवैश्यःस्वयंतत्रनिश्चित्यद्रव्यशोधनम् ॥१९॥ लौकिकेकृतवाँल्लोकेव्यव
हारपदश्चताम् ॥ एतेनपापयोगेनगणोघण्टामुखोऽभवत् ॥ २२० ॥ रामउवाच ॥ द्रव्यशुद्धोर्विशुद्धासाकथंपापस्यकारणम् ॥ सम्यगुक्तंद्रव्यशुद्धचै
कथंनद्रव्यशोधिनी ॥ २१ ॥ शम्भुरुवाच ॥ नलौकिकव्यवहृतौतवाभक्तोभविष्यति ॥ सयातिचशिवस्थानंवक्ताचापितथाभवेत् ॥ २२ ॥
॥ सूतउवाच ॥ यश्चवक्तिकथामेतांसतेनसदृशोभुवि ॥ गुह्याद्गुह्यतमंविप्राःशिवज्ञानप्रदंभवेत् ॥ २३ ॥ एतद्वःकथितंविप्राःपुण्यायुष्यतमंमहत् ॥
यइदंशृणुयाद्भक्त्याशिवलोकेमहीयते ॥ २४ ॥ पुराणवक्त्रेदातव्यंवस्त्रंगोहेमभूषणम् ॥ भूमिसस्यफलोपेतादेयाशक्त्यनुसारतः ॥ २५ ॥
शिवराघवसंवादंसर्वाघौघनिकृन्तनम् ॥ यःपठेच्छृणुयाद्वापिसयातिपरमंपदम् ॥ २२६ ॥ इतिश्रीपाद्मेमहापुराणेपातालखण्डेशिवराघवसंवादेसप्त
दशाधिकशततमोऽध्यायः ॥ ११७ ॥ समाप्तंपञ्चमंपातालखण्डम् ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ श्रीपाद्मे महापुराणे षष्ठमुत्तरखण्डं प्रारभ्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

उत्तरखंडाचीं चित्रें

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ॐश्रीविष्णवेनमः ॥ॐश्रीवेदव्यासायनमः॥ॐनारायणंनमस्कृत्यनरंचैवनरोत्तमम् ॥ देवींसरस्वतींव्यासंततोजयमुदीरयेत्॥१॥अज्ञानतिमिरान्धस्य
ज्ञानाञ्जनशलाकया ॥ चक्षुरुन्मीलितंयेनतस्मैश्रीगुरवेनमः॥२॥ऋषयऊचुः ॥ श्रुतंपातालखण्डंचत्वयाख्यातंविदांवर ॥ नानाख्यानसमायुक्तंपरमा
नन्ददायकम्॥ ३ ॥अधुनाश्रोतुमिच्छामोभगवद्भक्तिवर्धनम् ॥ पाद्मेयच्छेषमस्तीहतद्ब्रूहिकृपयागुरो ॥ ४ ॥ सूतउवाच ॥ शृणुध्वंमुनयःसर्वेयदुक्तं
शङ्करेणहि ॥ पृच्छतेनारदायैवविज्ञानंपापनाशनम् ॥५॥ एकदानारदोलोकान्पर्यटन्भगवत्प्रियः ॥ गतोऽद्रिंमन्दरंशम्भुंप्रष्टुंकिञ्चिन्मनोगतम् ॥६॥
तत्रासीनमुमानाथंप्रणिपत्यशिवाज्ञया ॥ उपविष्टःसमादिष्टआसनेऽभिमुखोविभोः ॥ पप्रच्छचेदमेवेशंयन्मांपृच्छथसत्तमाः ॥ ७ ॥ नारदउवाच ॥
भगवन्देवदेवेशपार्वतीशजगद्गुरो ॥ भगवत्तत्त्वविज्ञानंयेनस्यात्तन्ममादिश ॥ ८ ॥ शिवउवाच ॥ शृणुनारदवक्ष्यामिपुराणंवेदसंमितम् ॥
यच्छ्रुत्वासर्वपापेभ्योमुच्यतेनात्रसंशयः॥९॥प्रथमोत्तरकीर्तिःस्यात्पर्वताख्यानमेवच ॥ जालन्धरंतथाख्यानं श्रीशैलाख्यंततःपरम्॥१०॥हरिद्वारस्य
व्याख्यानंविष्णुपादोद्भवांतथा ॥ प्रयागतीर्थंतेवक्ष्येदशाश्वमेधिकंचतत्॥११॥तुलसीमहिमाचैवशङ्खचक्रगदादिकम्॥द्वारकायास्तथाख्यानंमहोत्सव
विधिस्ततः ॥१२॥ तडाकजंतथापुण्यंवापीकूपप्रपादिजम् ॥ गाणपत्यंततोवक्ष्येवैष्णवागममेवच ॥१३ ॥ जीर्णोद्धारस्यमाहात्म्यंमन्दाकिनीसमाग
मम् ॥ साभ्रमत्यास्तुमाहात्म्यंमाहात्म्यंतीरजंतथा ॥ १४ ॥ स्त्रीशूद्राणांतथाधर्मंतथात्याज्यैश्चधारणम् ॥ उमामहेशसंवादेप्रोक्तंनामसहस्रकम्
॥१५॥कैलासात्तत्समानीतंनारदेनाग्रजन्मना ॥ लोकानांब्राह्मणानांचक्षत्रियाणांविशेषतः ॥१६॥ स्त्रीशूद्राणांविशेषेणपठितव्यंसमाहितैः ॥ इदंपवित्रं
परमंपुण्यमायुष्यवर्धनम्॥१७॥पठितव्यंविशेषेणविष्णोःसायुज्यमाप्नुयात् ॥ विष्णोर्नामसहस्रंतत्पावनंभुविविश्रुतम्॥१८॥चतुर्विंशतिमूर्तीनांस्थान
कानीहसंवदे ॥ तेषांचमातापितरावन्तरंचब्रवीम्यहम् ॥१९॥ गोत्रंवेदांश्चतेषांवैकर्माणीहतथैवच ॥ स्त्रियस्तेषांप्रवक्ष्यामियथाविज्ञानदर्शनात् ॥२०॥
चतुर्विंशत्येकादशीनांद्वादशीनांप्रभावताम् ॥ गोदावर्याश्चमाहात्म्यंशङ्खचक्रादिधारणम् ॥२१॥ ब्राह्मणानांविशेषेणधारणंविधिपूर्वकम् ॥ यमुना
याश्चमाहात्म्यंगण्डिकायास्तथामुने॥२२॥ वेत्रवत्यास्तुमाहात्म्यंवच्म्यहंतेनसंशयः॥ गिह्लितीर्थोद्भवंपुण्यंशिलाक्षेत्रंमहच्चयत् ॥ २३ ॥ तत्सर्वंसम्प्र
वक्ष्यामिखण्डेह्युत्तरसंज्ञके ॥ अर्बुदेश्वरमाहात्म्यंतत्रतीर्थादिकंचयत् ॥ २४ ॥ सरस्वत्याश्चमाहात्म्यंसिद्धक्षेत्रादिकंचयत् ॥ पद्मनाभसमुत्पत्तिंतुल
स्याश्चैवधारणम् ॥ २५ ॥ गोपीचन्दनमाहात्म्यंपट्टपूजांतथैवच ॥ निरञ्जनस्यमाहात्म्यंतथाविज्ञानदर्शनम् ॥ २६ ॥ तत्रदीपप्रदानंचधूपदानं

१'प्रथमं नरकीर्तिः' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विशेषतः ॥ कार्तिकस्याथमाहात्म्यंमाहात्म्यंमाघजंतथा ॥ २७॥ सर्वेषांचव्रतानांचमाहात्म्यंविधिपूर्वकम् ॥ शृणुनारदवक्ष्यामिजगन्नाथा
ख्यमुत्तमम्॥२८॥ यंदृष्ट्वामुच्यतेलोकोब्रह्महत्यादिपातकात् ॥ यत्रसिद्धंतथाभुक्तंपारलौकिकदायकम्॥२९॥ब्राह्मणायत्रभुञ्जन्तिवेदशास्त्रविशारदाः॥
अन्येषांचैवलोकानांकाकथाचैवसुव्रत ॥ ३० ॥ पञ्चविंशत्यत्रनागानर्तक्योविविधास्तथा ॥ ब्रह्महत्याबालहत्यागवांहत्यातथैवच ॥ ३१ ॥ ताः
सर्वाविलयंयान्तिजगन्नाथस्यदर्शनात् ॥ जगन्नाथेत्युच्चरञ्जन्तुर्महापापैःप्रमुच्यते ॥ ३२ ॥ विष्णोःपूजनकंपुष्पैस्तन्माहात्म्यमपिब्रुवे ॥
पर्वतानांवर्णनंचदेशानांवर्णनंतथा ॥ ३३ ॥ गोपूजनादिमाहात्म्यंसिद्धानांचैवपूजनम् ॥ सिक्थेदत्तेतुयत्पुण्यंतत्सर्वंप्रवदाम्यहम् ॥ ३४ ॥ कदली
गर्भदानंचवृक्षदानंततःपरम् ॥ अश्वदानंहस्तिदानंजपमाहात्म्यमुत्तमम् ॥ ३५ ॥ मन्त्रदीक्षागमंचैवगुरोर्लक्षणमेवच ॥ शिष्यस्यलक्षणं
प्रोक्तंयथापौराणिकाविदुः ॥ ३६ ॥ चरणोदकमाहात्म्यंपितृश्राद्धादिकंचयत् ॥ पितृक्षयाहदानंचनीलोत्सर्गविधिस्ततः ॥ ३७ ॥ ग्रहणं
चन्द्रपूष्णोश्चतत्रदानंचयद्भवेत् ॥ शा[1]लग्रामस्यदानस्यमाहात्म्यंमाल्यगन्धयोः ॥ ३८ ॥ दशम्यैकादशीवेधंद्वादशीहरिवासरम् ॥ तेषांचैवतु
माहात्म्यंरुद्रनामादिकंचयत् ॥ ३९ ॥ मथुरायाश्चमाहात्म्यंकुरुक्षेत्रादिकंतथा ॥ सेतुबन्धस्यचाख्यानंश्रीरामेश्वरजंतथा ॥ ४० ॥ त्र्यम्बकस्य
चमाहात्म्यंपञ्चवट्याश्चयत्फलम् ॥ दण्डकारण्यमाहात्म्यंशृणुवाडवसत्तम ॥ ४१ ॥ दण्डकारण्यमाहात्म्यंनृसिंहोत्पत्तिकारणम् ॥ गीता
याश्चैवमाहात्म्यंतथाभागवतस्यच ॥ ४२ ॥ कालिन्द्याश्चैवमाहात्म्यमिन्द्रप्रस्थस्यवर्णनम् ॥ रुक्माङ्गदचरित्रंतुमहिमावैष्णवस्यच ॥ ४३ ॥
वैष्णवेह्येकभुक्तेतुशृणुवाडवसत्तम ॥ ससागरांचपृथिवींदत्त्वाचैवतुयत्फलम् ॥ ४४ ॥ तत्फलंसमवाप्नोतिभुक्तेह्येकेतुवैष्णवे ॥ सात्त्विकाः
सत्त्वसम्पन्नाराजसाःकामुकाःस्मृताः ॥ ४५ ॥ तामसाअधमाःप्रोक्तावैष्णवानांतुलक्षणम् ॥ ब्राह्मणावैष्णवायेतुवेदधर्मपरायणाः ॥ ४६ ॥
तेषांमाहात्म्यंवक्ष्यामियथोक्तंचैवनारद ॥ विष्णुनिन्दारतायेवैद्रव्यलोभेनसत्तम॥४७॥ तेषांपापंतुवक्ष्याभिसाम्प्रतंचर्षिसत्तम ॥ ज्वालामुख्यास्तथा
ख्यानंहिमशैलेक्षणंतथा॥४८॥ब्रह्मोत्पत्तिस्तुवैयत्रतंप्रदेशंवदाम्यहम् ॥ कायस्थानांसमुत्पत्तिर्गयाव्याख्यानमेवच ॥४९॥ गदाधरस्वरूपंचफल्गुवर्णन
मेवच ॥ एतेषांचैवमाहात्म्यंपाद्मेदृष्टंतथाश्रुतम् ॥ ५० ॥ महाबोधस्वरूपंचसकल्केर्यशएवच ॥ रामगयायामाहात्म्यंतथाप्रेतशिलाभवम्
॥ ५१ ॥ ब्रह्मणश्चतथाख्यानंशिलाख्यानंवदाम्यहम् ॥ ब्रह्मयोनेस्तथाख्यानमक्षयाख्यवटस्यच ॥ ५२ ॥ श्राद्धेतत्रमहत्पुण्यंयत्तत्सर्वंवदाम्यहम् ॥

१ 'शालग्रामस्य माहात्म्यं माहात्म्यं माल्यगन्धयोः' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महेश्वरकृतांभक्तिविष्णुनाचमहात्मना ॥५३॥ अद्यापिकाश्यांजपतिमहारुद्रोह्यनामयम् ॥ माहात्म्यंचततोवक्ष्येसागरस्यहिनारद ॥५४॥ तिलतर्पणंजपुण्यंयवजंपुण्यमेवच ॥ तुलसीदलसंयुक्तंतर्पणंदेवजंतथा ॥ ५५ ॥ तन्माहात्म्यंप्रवक्ष्यामियथोक्तंब्रह्मणामम ॥ शङ्खनादस्यमाहात्म्यंपुण्यंचासङ्कचसंज्ञकम् ॥ ५६ ॥ रवेर्वारस्यमाहात्म्यंयोगस्यविष्णुसंज्ञिनः ॥ वैधृतस्यचमाहात्म्यंव्यतीपातस्यवैतथा ॥ ५७ ॥ एतत्सर्वंप्रवक्ष्यामियथोक्तंचैवनारद ॥ अन्नदानंवस्त्रदानंभूमिदानंतथैवच ॥ ५८ ॥ शय्यादानंचगोदानंतथावृषभमेवच ॥ जन्माष्टम्याश्चमाहात्म्यंमतस्यमाहात्म्यमेवच ॥ ॥ ५९ ॥ कूर्ममाहात्म्यंतत्प्रोक्तंवाराहस्यतथैवच ॥ माहात्म्यंचगवादीनांदानानांप्रवदाम्यहम् ॥ ६० ॥ प्रह्लादमुखभक्तायेयेकेचिद्भुविविश्रुताः ॥ तन्माहात्म्यंततोवक्ष्येशृणुदेवर्षिसत्तम ॥ ६१ ॥ जागरेमहिमाचैवदीपदानेकृतेचयत् ॥ प्रहरेषुपृथक्पूजाफलंदेवर्षिसत्तम ॥ ६२ ॥ पर्शुरामस्यचाख्यानंरेणुकायावधस्तथा ॥ ब्राह्मणानांभूमिदानंरामेणैवचयत्कृतम् ॥ ६३ ॥ रामस्याश्रमजंपुण्यंवदाम्यहमशेषतः ॥ नर्मदायास्तथाख्यानंपुण्यंपूजानयोस्तथा ॥ ६४ ॥ दानंवेदपुराणानामाश्रमाणांनिरूपणम् ॥ हिरण्यदानपुण्यंचब्रह्माण्डदानमेवच ॥ ६५ ॥ पद्मपुराणदानंचखण्डानांव्यक्तयस्तथा ॥ प्रथमंसृष्टिखण्डंचद्वितीयंभूमिखण्डकम् ॥६६॥ स्वर्गखण्डंतृतीयंतुचतुर्थंब्रह्मखण्डकम् ॥ पातालंपञ्चमंखण्डंपरिशिष्टस्वरूपकम् ॥ ॥ ६७ ॥ षष्ठंक्रियायोगसारमुत्तरंतूत्तरंक्रमात् ॥ एतत्पद्मपुराणंतुव्यासेनतुमहात्मना ॥ ६८ ॥ कृतंलोकहितार्थायब्राह्मणश्रेयसेतथा ॥ ॥ शूद्राणांपुण्यजननंतीव्रदारिद्र्यनाशनम् ॥ ६९ ॥ मोक्षदंसुखदंचाशुकल्याणप्रदमव्ययम् ॥ श्रुत्वादानंतथाकुर्याद्विधिनातत्रनारद ॥ ७० ॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चाशत्साहस्र्यांसंहितायामुत्तरखण्डेमहेशनारदसंवादेबीजसमुच्चयोनामप्रथमोऽध्यायः ॥ १ ॥ महेशउवाच ॥ एकलक्षंपञ्चविंशत्सहस्राःपर्वतास्तथा ॥ तेषांमध्येमहत्पुण्यंबदर्याश्रममुत्तमम् ॥ १ ॥ नरनारायणोदेवोयत्रतिष्ठतिनारद ॥ तस्यस्वरूपंतेजश्चवक्ष्यामीहचसाम्प्रतम् ॥ २ ॥ हिमपर्वतशृङ्गेचकृष्णाकारतयाद्विज ॥ पुरुषौतत्रवर्तेतेनरनारायणावुभौ ॥ ३ ॥ श्वेतएकस्तुपुरुषःकृष्णोह्येकतमःपुनः ॥ पिङ्गलश्वेतवर्णश्चजटाधारीमहाप्रभुः ॥४॥ कृष्णोनारायणोह्येषजगदादिर्महाप्रभुः ॥ चतुर्बाहुर्महाञ्छ्रीमान्व्यक्तोऽव्यक्तःसनातनः ॥ ५ ॥ उत्तरायणेमहापूजाजायतेतत्रसुव्रत ॥ षण्मासादिकपर्यन्तंपूजानैवचजायते ॥ ६॥ हिमव्याप्तंतदाजातंयावद्वैदक्षिणंभवेत् ॥ अतएतादृशोदेवोनभूतोनभविष्यति ॥ ७ ॥ तत्रदेवावसन्तीहऋषीणांचाश्रमास्तथा ॥ अग्निहोत्राणिवेदानांध्वनिःप्रश्रूयतेसदा ॥ ८॥ तस्यवैदर्शनंकार्यंकोटिहत्या

१ 'पातालं च तृतीयं स्याच्चतुर्थं पुष्करं तथा' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विनाशनम् ॥ अलकनन्दायत्रगङ्गातत्रस्नानंसमाचरेत् ॥ ९ ॥ कृत्वास्नानंतुवैतत्रमहापापात्प्रमुच्यते ॥ यत्रविश्वेश्वरोदेवस्तिष्ठत्येव
नसंशयः ॥१०॥ एकस्मिन्समयेतत्रसुतपस्तप्तवानहम् ॥ तदानारायणोदेवोभक्तानांहिकृपाकरः ॥ ११॥ अव्ययःपुरुषःसाक्षादीश्वरोगरुडध्वजः ॥
सुप्रसन्नोऽब्रवीन्मांवैवरंवरयसुव्रत ॥ १२ ॥ श्रीनारायणउवाच ॥ यंयमीप्ससिदेवत्वंतंतंकामंददाम्यहम् ॥ त्वंकैलासविभुःसाक्षाद्रुद्रोवैविश्वपालकः॥
॥ १३ ॥ रुद्रउवाच ॥ अलंगृह्णामिभोदेवसुप्रसन्नोजनार्दन ॥ द्वौवरौममदीयेतांयदिदातुंत्वमिच्छसि ॥ १४ ॥ तवभक्तिःसदैवास्तुभक्त
राजोभवाम्यहम् ॥ सर्वेलोकाब्रुवन्त्वेवमयंभक्तःसदैवहि ॥ १५ ॥ तवप्रसादाद्देवेशमुक्तिदाताभवाम्यहम् ॥ येलोकामांभजिष्यन्तितेषांदातान
संशयः ॥ १६ ॥ विष्णुभक्तइतिख्यातोलोकेचैवभवाम्यहम् ॥ यस्याहंवरदातातुतस्यमुक्तिर्भवेत्प्रभो ॥ १७ ॥ जटिलोभस्मलिप्तोहह्यहंवै
तवसन्निधौ ॥ तवदेवप्रसादेनलोकेख्यातोभवाम्यहम् ॥ १८॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०नारदोमापतिसंवादेबदरीनारायणमाहात्म्येरुद्रप्रसादोना
मद्वितीयोऽध्यायः ॥ २ ॥ सूतउवाच ॥ एकदानारदोद्रष्टुंपाण्डवान्दुःखकर्शितान् ॥ ययौकाम्यवनंविप्रःसत्कृतस्तैर्यथाविधि ॥ अथनत्वा
मुनिश्रेष्ठंयुधिष्ठिरउवाचह॥१॥युधिष्ठिरउवाच ॥ भगवन्कर्मणाकेनदुःखाब्धौपतितावयम्॥२॥सूतउवाच ॥ तमुवाचऋषिर्दुःखंत्यजत्वंपाण्डुनन्दन॥
सुखदुःखसमाहारेसंसारेकःसुखीनरः॥३॥ईश्वरोऽपिहिनस्थायीपीडयतेदेहसञ्चयैः ॥ नदुःखरहितःकश्चिद्देहीदुःखसहोयतः॥४॥शरीरंसवितुर्यस्माद्राहु
स्तद्ग्रसतेबली ॥ राहोरपिशिरश्छिन्नंशौरिणामृतभोजने ॥ ५ ॥ सोऽपिशार्ङ्गधरोदेःवक्षितःसागरगह्वरे ॥ जालन्धरेणवीरेणनिहतःसोऽपिशम्भुना ॥
॥ ६ ॥ युधिष्ठिरउवाच ॥ कोऽसौजालन्धरोवीरःकस्यपुत्रःकुतोबली ॥ कथंजालन्धरंसङ्ख्येहतवान्वृषभध्वजः ॥ ७ ॥ एतत्सर्वंसमाचक्ष्वविस्त
रेणतपोधन ॥ सूतउवाच ॥८॥ राज्ञासएवमुक्तस्तुकथयामासनारदः ॥९॥ नारदउवाच ॥ शृणुभूपकथांदिव्यामशेषाघौघनाशिनीम् ॥ ईशानसिन्धु
सून्वोश्चसङ्ग्रामंपरमाद्भुतम्॥१०॥एकदागिरिशंस्तोतुंप्रययौपाकशासनः ॥ अप्सरोगणसङ्कीर्णोदेवैर्बहुभिरावृतः॥११॥गन्धर्वैरावृतोदेवस्तन्त्रीशिक्षा
सुकोविदैः॥रम्भातिलोत्तमारामाकर्पूराकदलीतथा॥१२॥मदनाभारतीकामासर्वाभरणभूषिताः ॥ नर्तक्यश्चतथाचान्याःसमाजग्मुःसुरान्तिकम्॥१३॥
गन्धर्वयक्षसिद्धास्तुनारदस्तुम्बुरुस्तथा॥किन्नरामुहुराजग्मुस्तथाकिन्नरयोषितः ॥ १४ ॥वायुश्चवरुणश्चैवकुबेरोधनदस्तथा ॥ यमश्चाग्निर्निर्ऋतिश्चये
चान्येदेवतागणाः ॥ १५ ॥ विमानसंस्थोमघवाविमानस्थाःसुराङ्गनाः ॥ स्ववाहनगतादेवाःकैलासंप्रययुर्जवात् ॥ १६ ॥ ददृशुस्तेततोदेवाः
कैलासंपर्वतोत्तमम् ॥ महीधराणांसर्वेषांपृथिव्याइवमण्डनम् ॥ १७ ॥ सर्वतःसुखदंशुद्धंसिद्धिराशिमिवस्थितम् ॥ यत्रवृक्षाःकल्पवृक्षाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पाषाणाश्चिन्तितप्रदाः ॥ १८ ॥ पुन्नागैर्नागचम्पैश्चतिलकैर्देवदारुभिः ॥ अशोकैःपाटलैश्चूतैर्मन्दारैःशोभितोगिरिः ॥ १९ ॥ पर्यन्त
कवनामोदवाहकायत्रवायवः ॥ पङ्गुत्वंबहुचारेणयान्तितेमलयानिलाः ॥ २० ॥ वाप्यःस्फटिकसोपानाह्यगाधविमलोदकाः ॥ वैडूर्य
नालसंसक्तसौवर्णनिभपङ्कजाः ॥ २१ ॥ कुमुदानांद्युतिर्यत्रराजतेसर्वतोदिशम् ॥ कह्लारैःशोभितावाप्यःपिनद्धाःपद्मरागवत् ॥ २२ ॥
हरिन्मणिनिबद्धाश्चगोमेदैःसर्वतोवृताः ॥ पद्मरागशिलाबद्धानानाधातुविचित्रिताः ॥ २३ ॥ ददृशुःसुन्दरतरंनाकाधिकविनिर्मितम् ॥
कैलासंपर्वतश्रेष्ठंदृष्ट्वातेविस्मयंगताः ॥ २४ ॥ विमानादवतीर्णाश्चमघवादेवताश्चताः ॥ द्वारपालमथागम्यनन्दिनंवाक्यमब्रुवन् ॥ २५ ॥
इन्द्रउवाच ॥ भोभोगणवरश्रेष्ठशृणुमेवाक्यमुत्तमम् ॥ समाज्ञापयशीघ्रंत्वंनृत्यार्थमिहमागतम् ॥ ईश्वरंप्रतिदेवेशंसर्वदेवैःसमावृतम् ॥ २६ ॥ नारद
उवाच ॥ इन्द्रस्यवचनंश्रुत्वागिरिशंनन्दिरब्रवीत् ॥ प्रभोऽयमागतःसर्वैर्देवराजःपुरन्दरः ॥ २७ ॥ नृत्यार्थमथतंप्राहानयशीघ्रंशचीपतिम् ॥
प्रवेशयामासतदानन्दीतैःसहवासवम् ॥ २८ ॥ सदृष्ट्वागिरिशंदेवंतुष्टाववृषभध्वजम् ॥ रम्भाद्यास्तास्तदासर्वानर्त्तक्योहरसन्निधौ ॥ २९ ॥
मृदङ्गवीणावादित्रैर्मुदानाट्यंप्रचक्रिरे ॥ कांस्यवाद्यान्प्रगृह्यान्यावंशतालान्सकाहलान् ॥ ३० ॥ चक्रुस्तानृत्यसंरम्भंस्वयंदेवःपुरन्दरः ॥ अतीव
नर्तनंचक्रेसुन्दरंदेवदुर्लभम् ॥ ३१ ॥ ईश्वरस्तोषमापन्नोवासवंवाक्यमब्रवीत् ॥ प्रसन्नोऽहंसुरश्रेष्ठजातस्तेव्रियतांवरः ॥ ३२ ॥ इत्युक्तवतिदेवेशे
स्वबाहुबलगर्वितः ॥ प्रत्युवाचहरंवाक्यंसङ्ग्रामःसंवृतोमया ॥ ३३ ॥ यत्रत्वत्सदृशोयोद्धातद्युद्धंदेहिमेप्रभो ॥ इत्युक्त्वानिर्गतोजिष्णुर्लब्ध्वा
शम्भोर्वरंप्रभोः ॥ तस्मिन्गतेतदाशक्रेगिरिशोवाक्यमब्रवीत् ॥ ३४ ॥ शङ्करउवाच ॥ गणामेश्रूयतांवाक्यंदेवराजोऽतिगर्वितः ॥ ३५ ॥ नारद
उवाच ॥ इत्युक्त्वाक्रोधसंयुक्तोबभूवचततोहरः ॥ आविरासीत्ततःक्रोधोमूर्त्तिमान्पुरतःस्थितः ॥ ३६ ॥ घनान्धकारसदृशोमृडंक्रोधस्ततो
ऽब्रवीत् ॥ देहिमेत्वंहिसन्देशंकिंकरोमितवप्रभो ॥ ३७॥ उमापतिस्तदोवाचगच्छत्वंवासवंजय ॥ स्वर्गसिन्धुंसमासाद्यसागरस्यचवीर्यवान् ॥३८॥
इत्युक्तोऽन्तर्दधेक्रोधोगणास्तेविस्मयंययुः ॥ ईशानकल्पेजातेतुकामेनार्णवसङ्गमे ॥ ३९ ॥ नाकसिन्धुस्तदामत्तास्वयौवनभरोष्मणा ॥ तांदृष्ट्वा
सिन्धुराजश्चजलकल्लोलवानभूत् ॥ ४० ॥ तदाबभूवराजेन्द्रगङ्गासागरसङ्गमः ॥ महानदीतदाप्राप्यरेमेचात्मबलेनच ॥ ४१ ॥ अत्रान्तरेसमुद्रस्य
बभूवसुभटस्ततः ॥ सूनुस्तस्यांमहानद्यांसमुद्रादभवद्बली ॥ ४२ ॥ महार्णवतनूजेनजातमात्रेणपार्थिव ॥ रुदतोत्कम्पितापृथ्वीत्रिलोकीनादिता
भवत् ॥ ४३ ॥समाधिबद्धमुद्रांचसन्तत्याजचतुर्मुखः ॥ अत्रान्तरेपरित्रस्तांतांसंवीक्ष्यजगत्त्रयीम् ॥४४॥ धातासुरेन्द्रवाक्येनप्रजगाममहार्णवम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आश्चर्यमितिसञ्चिन्त्यहंसारूढोजवाद्ययौ ॥ ४५ ॥ ब्रह्माणमागतंवीक्ष्यसपर्य्याविदधेऽर्णवः ॥ तमुवाचततोब्रह्माकिंगर्जसिवृथाम्बुधे ॥
॥ ४६ ॥ समुद्रउवाच ॥ नाहंगर्जामिदेवेशमत्सुतोबलवान्प्रभो ॥ शिशोर्वैकुरुरक्षांचदुर्लभंतवदर्शनम् ॥ ४७ ॥ सन्दर्श्यतांचतनयोभार्य्या
प्राहातिशोभनाम् ॥ ययौसाभर्तुरादेशात्सपुत्राब्रह्मणोऽन्तिके ॥ ४८ ॥ उत्सङ्गदेशेचतुराननस्यविधायपुत्रंचरणौननाम ॥ तदासमुद्रात्मज
मद्भुतंतंदृष्ट्वाविधातुःकिलविस्मयोऽभूत् ॥ ४९ ॥ गृहीतकूर्चस्यशिशोःकरंचयदाविरिञ्चिर्नशशाकमोचितुम् ॥ तदासमुद्रःप्रहसन्प्रयातःकूर्चंप्रगृ
ह्यार्भकरंविमोचयन् ॥ ५० ॥ तादृशंतस्यबालस्यदृष्ट्वाविक्रममात्मभूः ॥ प्रीत्याजालन्धरेत्याहनाम्नाजालन्धरोऽभवत् ॥ ५१ ॥ वरंददा
वथोतस्यप्रणयेनप्रजापतिः ॥ अयंजालन्धरोदेवैरजेयश्चभविष्यति ॥ ५२ ॥ पातालसहितंनाकंमत्प्रसादेनभोक्ष्यति ॥ इत्युक्त्वान्तर्दधे
ब्रह्माहंसमारुह्यसत्वरः ॥ ५३ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०युधिष्ठिरनारदसंवादेउत्तरखण्डेजालन्धरोत्पत्तिर्ब्रह्मागमोनामतृतीयोऽध्यायः ॥ ३ ॥
नारदउवाच ॥ क्रमेणवर्द्धमानोऽसौबाल्यभावेसबालकः ॥ निपत्यमातुरुत्सङ्गेसागरंप्रतिधावति ॥ १ ॥ आनीयचक्रेसचपञ्जरस्थान्क्रीडापरः
केसरिणांकिशोरान् ॥ सिंहादिनेभादिभिर्युद्धमेवंयुद्धोपयोगीवतदीयवीर्यम् ॥ २ ॥ तस्मादाकाशमुत्पत्यखेचरान्पातयेद्भुवि ॥ गर्जितैर्भीष
यामाससरिद्भिस्सहसागरम् ॥ ३ ॥ समुद्रान्तर्गतंसर्वंसत्त्वजातंतुपार्थिव ॥ ग्रस्तंसिन्धुसुतेनेतितद्भयाच्छन्नतांगतम् ॥ ४ ॥ दृष्ट्वानिःस
त्त्वकंतोयंतद्भयाद्वडवानलः ॥ निजदेशंपरित्यज्यप्रविवेशहिमालयम् ॥ ५ ॥ सबालत्वंपरित्यज्यक्रमेणार्णवनन्दनः ॥ ततोनवंवयःप्राप्य
विक्रमेणाक्रमद्दिवम् ॥ ६ ॥ एकदापितरंप्राहसमुद्रंसिन्धुनन्दनः ॥ मन्निवासोचितंस्थानंदेहिताताविस्तृतम् ॥ ७ ॥ सम्बुध्यवचनं
सूनोःसजगादमहार्णवः ॥ पुत्रदास्याम्यहंराज्यंतववैभुविदुर्लभम् ॥ ८ ॥ अनन्तरंदैत्यगुरुःसमुद्रंभार्गवोगतः ॥ तमागतंविलोक्याब्धि
र्विधिनासमपूजयत् ॥ ९ ॥ अथनदिपतिदत्तप्रातसौन्दर्यनिर्यन्मणिमहसिसतस्मिन्नासनेसन्निविष्टः ॥ रुचिररुचिसुमेरोःसुन्दरेशृङ्गभागेकमलज
इवकान्तिंकिञ्चिदुच्चैर्जहार ॥ १० ॥ कृताञ्जलिपुटोभूत्वाव्याजहारार्णवःकविम् ॥ दिष्ट्यातवात्रागमनंवदकिंकरवाण्यहम् ॥ ११ ॥ तदा
दैत्यकुलाचार्यःप्राहतंसागरंकविः ॥ किंतनजातुजातेनमातुर्यौवनहारिणा ॥ १२ ॥ प्ररोहतिनयःस्वस्यवंशस्याग्रेध्वजोयथा ॥ तवात्मजोविक्र
मेणत्रैलोक्यंभोक्ष्यतिध्रुवम् ॥ १३ ॥ जम्बूद्वीपेमहापीठंयोगिनीगणसेवितम् ॥ आप्लावितंत्वयेदानींमुञ्चजालन्धरालयम् ॥ १४ ॥ तत्रराज्यंप्रयच्छा
स्मैतनयायमहार्णव ॥ अजयश्चाप्यवध्यश्चतत्रस्थोऽयंभविष्यति ॥ १५ ॥ एवमुक्तोऽर्णवःप्रीत्याभार्गवेणाथलीलया ॥ अपासर्पत्सुतप्रीत्यैजलेस्थलमद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्शयत ॥ १६ ॥ शतयोजनविस्तीर्णमायतंचशतत्रयम् ॥ देशंजालन्धरंपुण्यंतस्यनाम्नैवविश्रुतम् ॥ १७ ॥ दैत्यवर्यंसमाहूयमयंप्रोवाचसागरः ॥
पुरंजालन्धरेपीठेकुरुजालन्धरायवै ॥ १८॥ अम्भोधिनैवमुक्तस्तुचक्रेरत्नमयंपुरम् ॥ प्राकारगोपुरद्वारसोपानगृहभूमिकम् ॥ १९॥ यत्रेन्द्रनीलसम्बद्ध
प्रासादतलसंस्थिताः ॥ मेनिरेजलदोद्योगंताण्डवस्थाःशिखण्डिनः ॥२०॥ यत्रप्रवालमाणिक्यभवनोत्थामरीचयः ॥ सेव्यन्तेशकुनैश्चूतरुचिराङ्कुर
शङ्कया ॥ २१ ॥ यत्रकाञ्चनहर्म्येषुत्विषोवह्निषुकातराः ॥ विलोक्यप्रपलायन्तेदावशङ्काःशिखण्डिनः ॥२२॥ यत्रस्फटिकशालोत्थप्रभासंमिश्रिता
दिशः ॥ विभान्तिमन्दरोद्भ्रान्ताःसफेनार्णवसन्निभाः ॥ २३ ॥ यत्रमोहंस्वहर्म्येषुविभातालोकसंस्थिताः ॥ चक्रिरेललनाःपूर्णसान्ध्यच
न्द्रोपमाननाः ॥ २४ ॥ यत्रेन्द्रनीपकादम्बपवनोद्यानमोदिताः ॥ चित्तंविशन्त्योनारीणांचक्रिरेमोहनज्वरम् ॥ २५ ॥ यत्रलेख्यगतंनृणांविलोक्य
सुरतंजनः ॥ संयातिद्विगुणंनूनंनिजकान्तारतोद्यमम् ॥ २६ ॥ यत्रवातायनोद्भूतधूपधूमस्यलेखया ॥ नभोबभूवतद्गङ्गाकालिन्दीसङ्गमोपमम् ॥
॥ २७ ॥ यत्रानेकगृहोद्भूतप्रभयासकलंनभः ॥ विभातीन्द्रायुधाकीर्णःशरन्मेघइवोन्नतः ॥ २८ ॥ यत्रानिशंश्रमश्रान्ताःसूर्यवाहाःप्रपीडिताः॥
विश्रामंयान्तिमध्याह्नेप्रासादशिरसिस्थिताः ॥ २९ ॥ यत्रकुत्रचहर्म्येषुबिभ्रत्योमालतीस्रजः ॥ रात्रौसम्भूतनक्षत्राइवरेजुर्वराङ्गनाः ॥ ३० ॥ यत्र
हाटकहिन्दोलशृङ्खलाघर्षणोद्भवः ॥ चकारसुन्दरीशब्दःस्फुटंमेरुभुवोभुवम् ॥ ३१ ॥ साकंसरिद्भिःपुत्रस्योशनसासहसागरः ॥ तत्राभिषेक
मकरोद्वादित्रैर्निजगर्जितैः ॥ ३२ ॥ याःस्कन्दस्यजगादतारकजयेदेवःस्वयम्भूःस्वयंस्वःसाम्राज्यमहोत्सवेऽपिचशचीकान्तस्यवाचस्पतिः ॥
ताभिश्चित्रविरिञ्चिवक्त्रसरसीहंसीभिराशास्महेवाणीभिर्वसुधाविवाहसमयेमन्त्रोत्सवैर्मङ्गलम् ॥ ३३ ॥ महापद्मसहस्रंतुसैन्यमात्मोदरोद्भवम् ॥
जालन्धरायपुत्रायददौभीमंमहोदधिः ॥३४॥ जालन्धरायशुक्रोऽपिप्रीत्याविद्यांनिजांददौ ॥ मृतसञ्जीवनींनाम्नामायांरुद्रविमोहिनीम् ॥ ३५ ॥
शस्त्रास्त्रविद्याअन्याश्चविधिनाअब्धिसूनवे ॥ यदन्यत्सकलंतस्मैव्याख्यातंकविनातदा ॥ ३६ ॥ ततोजालन्धरंपुत्रमभिषिच्यार्णवोययौ ॥
स्वस्थानंदिव्यदेहेननदीभिःपरिवारितः ॥ ३७ ॥ दृष्ट्वाजालन्धरोदिव्यपुरंगोपुरमण्डितम् ॥ व्यचरत्सहशुक्रेणद्विजसङ्घैःसुपूजितः ॥ ३८ ॥
एतस्मिन्नन्तरेदैत्याःपातालस्थामहाबलाः ॥ प्राप्ताजालन्धरंसर्वेकालनेमिपुरोगमाः ॥ ३९ ॥ ततोमहाबलावीराबलंक्षीरोदसन्निभम् ॥ तस्यशुम्भा
सुरंदैत्यंसेनापतिमकल्पयन् ॥ ४० ॥ बलंस्ववशगंकृत्वाकृत्वाभुविस्थिरंजलम् ॥ जालन्धरस्तदाराज्यंपितृदत्तंचकारसः ॥ ४१ ॥ अत्रान्तरेऽप्सराः
काचित्स्वर्णेत्यासीत्पुरादिवि ॥ तस्याःक्रौञ्चप्रसादेनवृन्दानामसुताभवत् ॥ ४२ ॥ धात्राविभवसंयुक्तंसौन्दर्यंयत्कृतंपृथक् ॥ तत्तदेकगतंद्रष्टुंवृन्दा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गात्रंविनिर्मितम् ॥ ४३ ॥ तांवृन्दामतिचावङ्गींप्रमदांजनमोहिनीम् ॥ स्वर्णाजालन्धरस्यार्थेददौशुक्रायययाचते ॥ ४४ ॥ शुक्रउवाच ॥ कन्दर्पस्य
जगन्नेत्रशस्त्रेणाश्चर्यकारिणा ॥ रूपेणानेनरम्भोरुदीर्घायुःसुखिनीभव ॥ ४५ ॥ निर्मायस्वयमेवविस्मितमनाःसौन्दर्यसारेणयंस्वव्यापारपरिश्रमस्य
कलशंवेधाःसमारोपयत् ॥ कन्दर्पंपुरुषंस्त्रियोविदधतेयस्मिन्नदृष्टेसतिद्रष्टव्यावधिरूपमाप्नुहिपतिंतंदीर्घनेत्रंभटम् ॥ ४६ ॥ नारदउवाच ॥ उपयेमे
विवाहेनगान्धर्वेणार्णवात्मजः ॥ वृन्दांतौदम्पतीजातौजनानन्दकरौनप ॥ ४७ ॥ चञ्चलत्वंपरित्यक्तंतयाजालन्धरोऽपिहि ॥ वृत्तेनवृद्धकार्येणचक
मेनपरस्त्रियम् ॥ ४८ ॥ कदाचित्ससभासीनोदृष्ट्वाराहुशिरोहृतम् ॥ कस्मात्कायार्द्धशेषोऽयमितिपप्रच्छभार्गवम् ॥ ४९ ॥ सतस्यकथयामास
पूर्ववृत्तान्तमादितः ॥ यथानिर्मथितोदेवैःक्षीरोदोऽमृतकारणात् ॥ ५० ॥ तच्छ्रुत्वाविस्मितोवाक्यंप्राहजालन्धरोऽसुरः ॥ प्रसादसुमुखोराहुंकाम
रूपोभवाधुना ॥ ५१ ॥ इतिशुक्रस्यमन्त्रेणसिन्धुसूनुःप्रतापवान् ॥ पितृव्यंसंस्मरन्वीरविग्रहंत्वकरोत्सुरैः ॥ ५२ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०
उत्तरखण्डेनारदयुधिष्ठिरसंवादेजालन्धरोपाख्यानेवृन्दाविवाहोजालन्धराभिषेकोनामचतुर्थोऽध्यायः ॥ ४ ॥ युधिष्ठिरउवाच ॥ कःपितृव्यः
सिन्धुसूनोःकिंवृत्तंतस्यविग्रहे ॥ युयुधेसकथंदैत्यस्तन्मेकथयनारद ॥ १ ॥ नारदउवाच ॥ शृणुत्वंनृपशार्दूलपितृव्यःक्षीरसागरः ॥ जाल
न्धरस्यतंदेवैःप्रमथ्यधनमाहृतम् ॥ २ ॥ श्रीचन्द्रामृतनागाश्वपूर्वंतस्यसुरासुरैः ॥ तच्छ्रुत्वाविग्रहंचक्रेदेवैर्जालन्धरोऽसुरः ॥ ३ ॥ कदाचि
त्प्रेषयामासदूतंदुर्वारणंबली ॥ शिक्षयित्वातुवक्तव्यंदेवेन्द्रभवनंप्रति ॥ ४ ॥ अथस्यन्दनमारुह्यययौदुर्वारणोदिवि ॥ प्रवेष्टुकामोभवनंद्वाःस्थैर्द्वारि
निवारितः ॥ ५ ॥ दूतउवाच ॥ जालन्धरस्यदूतोऽहमागतःशक्रसन्निधौ ॥ गत्वातत्रभवन्तोमांविज्ञापयितुमर्हथ ॥ ६ ॥ नारदउवाच ॥ इति
तस्यवचःश्रुत्वातदैवतुशचीपतिम् ॥ गत्वाचप्रणिपत्याहदूतोदेवागतोभुवः ॥ ७ ॥ दौवारिकोमहेन्द्रेणप्रत्युक्तोदूतमानय ॥ हस्तेगृहीत्वातंदूतंवासवा
न्तिकमानयत् ॥ ८ ॥ दुर्वारणोदेवसभांप्रविष्टःप्रव्यलोकयत् ॥ हरिंदेवैस्त्रयस्त्रिंशत्कोटिभिःपरिवेष्टितम् ॥ ९ ॥ स्वर्णसिंहासनेदिव्यचामरानिल
सेवितम् ॥ शचीप्रेमरसोत्फुल्लनयनाब्जसहस्रकम् ॥ १० ॥ दुर्वारणोऽथदेवेशंविलोक्यगुरुणासह ॥ प्रणनामात्मगर्वेणप्रहसन्नयनश्रियम् ॥ ११ ॥
निर्दिष्टमानसंभेजेदूतोजालन्धरस्यसः ॥ कस्यत्वंकेनकार्येणप्राप्तःप्राहेतितंहरिः ॥ १२ ॥ दूतोजालन्धरस्याहंसजगादपुरन्दरम् ॥ सराजासर्व
लोकानांतस्याज्ञांशृणुमन्मुखात् ॥१३॥ पितृव्योममदुग्धाब्धिस्त्वयाकस्माद्विलोडितः ॥ मन्दराद्रिविधानेनहृतंकोशोमहाधनः ॥ १४ ॥ श्रीचन्द्रा
मृतनागांश्चतन्मणिंविद्रुमादिकम् ॥ देहिसर्वंतथास्वर्गंशीघ्रंत्यजपुरन्दर ॥ १५ ॥ किंकेकीवशिखण्डमण्डिततनुःसारीवकिंसुस्वरःकिंवाहन्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शकुन्तबालकपितुःकर्णामृतस्यन्दनः ॥ किंवाहंसइवाङ्गनागतिगुरुःकिंकीरवत्पाठकःकाकःकेनगुणेनकाञ्चनमयेऽलङ्कारितःपञ्जरे ॥ १६ ॥ सत्वंम
द्वचनात्तूर्णंकुरुसर्वंयथोचितम् ॥ तंक्षमापयभूपालंयदिजीवितुमिच्छसि ॥ १७ ॥ नारदउवाच ॥ अथप्रहस्यमघवाप्राहदुर्वारणंप्रति ॥ १८ ॥ इन्द्र
उवाच ॥ शृणुदूतसमासेनसिन्धोर्मथनकारणम् ॥ पुराहिमवतःसूनुर्मैनाकोनाममेरिपुः ॥१९॥ सकुक्षौविधृतस्तेनसागरेणजडेनच ॥ दग्धंचराचरंयेन
वह्निनाहयरूपिणा ॥२० ॥सचापिविधृतस्तेनसागरेणदुरात्मना ॥ धर्मद्विषांदानवानामसौवाआश्रयःप्रभुः ॥२१॥ नित्यंदधिघृतंक्षीरंदानवेभ्यःप्रय
च्छति॥अतएवायमस्माभिर्दुर्वारणविलोडितः २२॥ दण्डितश्चगतश्रीकोदेवैरथपुरातनैः ॥ शृणुदूतसबन्धेनममविप्रेणशोषितः ॥ २३ ॥ कुम्भोद्भवेन
किञ्चैषदुःसङ्गेनैवबाध्यते ॥ सोऽपियुद्धार्थमस्माभिःसर्वसैन्येनसंवृतः ॥ आगमिष्यतिवैनाशंगमिष्यतितदैवहि ॥२४॥ नारदउवाच॥इतीरयित्वाविर
रामवृत्रहासरित्पतेरात्मजदूतमुच्चकैः ॥ शशंसचागत्यसमुद्रसूनोर्देवेश्वरेणोक्तमशेषमादितः ॥ २५ ॥ इतिश्रीपाद्मेमहापुराणेउत्तरखण्डेनारदयुधिष्ठिर
संवादेजालन्धरोपाख्यानेपञ्चमोऽध्यायः ॥५॥नारदउवाच ॥महेन्द्रवचनंश्रुत्वानिजदूतमुखेनच ॥ समुद्रसूनुःसङ्क्रुद्धःसर्वसैन्यंसमाह्वयत् ॥ १ ॥
रसातलस्थितादैत्यायेचभूतलवासिनः ॥ आययुःसबलास्तत्रजालन्धरमथाज्ञया ॥ २ ॥ प्रयाणप्रक्रमेसिन्धुसूनोःसैन्यस्यगर्जितैः ॥ स्फुटन्ति
नभसोराजन्पातालमखिलादिशः ॥ ३ ॥ हयनागोष्ट्रवदनाबिडालमुखभीषणाः ॥ व्याघ्रसिंहाखुवदनाविद्युत्सदृशलोचनाः ॥ ४ ॥ सर्पकेशामहा
देहाःकेचित्खड्गतनूरुहाः ॥ अन्येचपरिधावन्तिगर्जन्तिजलदस्वनैः ॥ ५ ॥ रथगजहयपत्तिसङ्कुलंसमरविनोदकदम्बभासुरम्॥ अब्जशतसहस्रकोटि
नायकंबलमखिलंचतदाररराजराजन् ॥ ६ ॥ शतयोजनविस्तीर्णविमानंहंसकोटिभिः ॥ युक्तंभूतिसहस्रौघंसर्ववस्तुप्रपूरितम् ॥ ७ ॥ तद्विमानंसमा
रुह्यसद्योजालन्धरोययौ॥मध्याह्नेमन्दरंप्राप्तःप्रथमेऽह्निबलैःसह ॥८॥ खण्डितंशिबिकावाहैर्दलितंभूरिकुञ्जरैः॥ द्वितीयेदिवसेमेरुंसम्प्राप्तोबलसंयुतः ॥
॥ ९ ॥ इलावृतेतुशिखरेतस्थौतत्कटकंमहत् ॥ अथदैत्याधिपैर्भग्नंखाण्डवंनन्दनंवनम् ॥ १० ॥ शिखराणिविशीर्णानिमेरोर्दानवपुङ्गवैः ॥ सन्ता
नकेषुवृक्षेषुबद्धाहिन्दोलमञ्चकान् ॥ ११ ॥ सिद्धाङ्गनाभिःसहितारेमिरेदैत्यपुङ्गवाः ॥ कुचकुङ्कुमताम्बूलचन्दनागरुभूषणैः ॥१२ ॥ केशपाशच्युतैः
पुष्पैर्मेरोःसम्पूरितानदी ॥ सुमेरोःपूर्वदिग्भागोगजैस्तस्यविघट्टितः ॥ १३ ॥ दक्षिणंचरथैश्चैरुरुत्तरंपश्चिमंभटैः ॥ अथप्रस्थापयामासदैत्यान्जाल
न्धरोऽसुरः ॥ १४ ॥ महेन्द्रशिखरंचान्येययुर्दुन्दुभिनिःस्वनैः ॥ राजराजपुरींभङ्क्त्वायमस्यवरुणस्यच ॥१५ ॥ अन्येषांलोकपालानामाययुस्ते
ऽमरावतीम् ॥ अथोत्पातोऽभवन्नाकेदिव्यभौमान्तरिक्षगः॥ १६॥ रजःपपातबहुलंतमस्तोमोविजृम्भते ॥तदापपातकुलिशंकरादिन्द्रस्यनिष्प्रभम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १७ ॥ दृष्ट्वानिमित्तानिभयावहानिनाकेमहेन्द्रोगुरुमित्युवाच ॥ किंकुर्महेकंशरणंचयामस्तंपश्ययुद्धंसमुपस्थितंच ॥ १८ ॥ ततोवाचस्पतिर्वाक्य
मुवाचत्रिदशाधिपम् ॥ चरणौयाहिशरणंविष्णोर्वैकुण्ठवासिनः ॥ १९ ॥ इत्युक्तोगुरुणादेवैःसाकंवैकुण्ठमन्दिरम् ॥ जगामाखण्डलःशीघ्रंशरणंकैटभ
द्विषः ॥ २० ॥ शशंसवासुदेवायविजयोद्वारपालकः ॥ जालन्धरभयत्रस्ताःसर्वेदेवाःसमागताः ॥ २१ ॥ श्रीरुवाच ॥ नवध्योऽसौममभ्रातादेवार्थेयु
ध्यतात्वया ॥ शापितोदेवमत्प्रीत्यावधार्होनभविष्यति ॥ २२ ॥ नारदउवाच॥इतिश्रीवचनंश्रुत्वाविष्णुस्त्रैलोक्यपालकः ॥ अथारुरोहगरुडंपक्षक्षेपा
वृताम्बरम् ॥२३ ॥ वैकुण्ठभवनात्तूर्णंनिर्गतस्त्रिदशान्हरिः ॥ जालन्धरभयत्रस्तान्गतकान्तीनथैक्षत ॥२४ ॥ ददृशुस्तेसुराःसर्वेहरिंसान्द्रघनोपमम्॥
शार्ङ्गशङ्खगदापद्मविभूषितचतुर्भुजम् ॥ २५ ॥ स्तोत्रंपठित्वापुरतःप्राहेन्द्रःसरितांपतेः ॥ जालन्धरेणात्मजेनभग्नंदेवत्रिविष्टपम् ॥ २६ ॥
तदिन्द्रवचनंश्रुत्वाऽभयंदत्त्वादिवौकसाम् ॥ विजेतुमसुरंदेवैःसहरेजेऽसुरान्तकृत् ॥ २७ ॥ अथानीतंमातलिनारथमारुह्यवासवः ॥ वासुदेवस्य
पुरतःप्रययौविधृताशनिः ॥ २८ ॥ वामतस्त्रिदशाःसर्वेसव्यतश्चसमाययौ ॥ स्वाहाप्रियोदक्षिणतःसचमेषंसमास्थितः ॥ २९ ॥ आरुह्यैरावतं
नागंजयन्तःशक्रनन्दनः ॥ उच्चैःश्रवसमिन्द्रश्चउभौभगवतःपुरः ॥ ३० ॥ धातार्यमाचमित्रश्चवरुणोंऽशोभगस्तथा ॥ इन्द्रोविवस्वान्पूषाचपर्जन्यो
दशमःस्मृतः ॥ ३१ ॥ ततस्त्वष्टाततोविष्णूरेजेधन्योजघन्यजः ॥ इत्येतेद्वादशादित्याइन्द्रस्यपुरतःस्थिताः ॥ ३२ ॥ वीरभद्रश्चशम्भु
श्चगिरिशश्चमहायशाः ॥ अजैकपादहिर्बुध्न्यःपिनाकीचापराजितः ॥ ३३ ॥ भुवनाधीश्वरश्चैवकपालीचविशांपते ॥ स्थाणुर्भगश्चभगवान्रुद्रा
एकादशस्मृताः ॥ ३४ ॥ श्वसनःस्पर्शनोवायुरनिलोमारुतस्तथा ॥ प्राणापानौसजीवौचमरुतोऽष्टौतदग्रतः ॥ ३५ ॥ विवस्वानपितन्मध्येययौ
द्वादशमूर्तिभिः ॥ धनदःशिबिकारूढःकिन्नरेशोययौतदा ॥ ३६ ॥ रुद्राश्ववृषभारूढामारुतोमृगवाहनः ॥ ययुःसैन्यस्यपुरतस्त्रिशूलपरिघायुधाः ॥
॥ ३७ ॥ गन्धर्वाश्चारणायक्षाःपिशाचोरगगुह्यकाः ॥ सर्वसैन्यस्यपुरतःसर्वशास्त्रभृतोययुः ॥ ३८ ॥ पूर्वापरौतोयराशीसमाक्रान्तौचसैनिकैः ॥
तस्मिन्ससारभूमिराड्वराहवपुषाहरिः ॥ ३९ ॥ स्वर्गादागत्यवेगेनदैत्यसैन्यजिघांसया ॥ सुमेरोरुत्तरोभागःसुरसैन्येनसंवृतः ॥ ४० ॥
सेनाभारोऽद्भुतकरस्तस्थौजालन्धरस्यच ॥ आश्रित्यदक्षिणंभागंतूर्णंकनकशृङ्गतः ॥ ४१ ॥ अहोरात्रेणविहितावर्षेतस्मिन्निलावृते ॥ मेरु ॥ ५ ॥
मन्दरयोर्मध्येयुद्धभूमिःप्रतिष्ठिता ॥ ४२ ॥ तत्रात्मजयदांभूमिंकविप्रोक्तांमुदायुताः ॥ जग्मुस्तेदानवास्तूर्णंगुरुप्रोक्तांययुःसुराः ॥ ४३ ॥
रथप्रवीरैःपरितश्चसम्प्लुवैर्गजैर्घनाकारमदप्रवाहिभिः ॥अश्वैरनन्तैर्गरुडाग्रगामिभिःपदातिभिःसारणभूर्भृताबभौ ॥४४॥ ततोवादित्रनिर्घोषःसेनयोरुभ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योरभूत् ॥ कोलाहलश्चवीराणामन्योन्यमभिगर्जताम् ॥ ४५ ॥ अथदानवदेवानांसङ्ग्रामोऽभूद्भयावहः ॥ सर्वसैन्यस्यसंमर्दोयथात्रिभुवनक्षयः
॥४६॥भयक्रान्तामहाश्रान्ताश्रुतिर्विलपतींमुहुः ॥ रोमाञ्चिताबभौद्यौश्चरजोवस्त्रंविधुन्वती ॥४७॥ रौद्रैर्विहङ्गमारावैस्त्रासादाक्रन्दतीवहि ॥ देवेन्द्रेण
तदाज्ञप्तामेघाःसंवर्तकादयः ॥ ४८ ॥ गजानुच्चैःसमारुह्यतेऽसुरान्युयुधुर्मृधे ॥ देवानामश्वारोहाश्चजातागन्धर्वकिन्नराः ॥ ४९ ॥ रथिनः
साध्यसिद्धाश्चगजिनोयक्षचारणाः ॥ पदातिनःकिम्पुरुषाःपन्नगाःपवनाशनाः ॥५० ॥ रोगाणामधिपोराजयक्ष्माचयमनायकः ॥ तदादानवरोगाणां
सङ्ग्रामोऽभूत्सुदारुणः ॥ ५१ ॥ पतितालुलुठुर्भूमौदैत्याःशूलज्वरामयैः ॥ दानवैर्निहतारोगाःपेतुःसमरमूर्द्धनि ॥ ५२ ॥ पलायांचक्रिरेकेचि
द्व्याधयोभूधरान्प्रति ॥ ओषध्यस्तत्रसहजावैशल्यकरणीमुखाः ॥ ५३ ॥ ताभिर्विशल्याःसैन्येषुयुयुधुर्यमकिङ्कराः ॥ दानवैर्निहताःसर्वेशरमुद्गर
पट्टिशैः ॥ ५४ ॥ पदातयःपत्तिगणैःखड्गैस्तीक्ष्णैःपरश्वधैः ॥ कोटिशोजघ्नुरन्योन्यारुधिरारुणविग्रहाः ॥ ५५ ॥ अश्वचाराहयैस्तूर्णैश्चिक्षिपुर्गगने
तदा ॥ संश्लिष्यजघ्नुरन्योन्यंरुधिरारुणविग्रहाः ॥ ५६ ॥ समूहोरथिनांभीमोरथौघैश्छाद्यमेदिनीम् ॥ विव्याधनिशितैर्बाणैर्धनुर्मुक्तैर्महारथान् ॥
॥ ५७ ॥ मदक्षीणकपोलाङ्गाःकरैर्बद्धाकरान्दृढम् ॥ गजान्प्रतिगजाःक्रुद्धाःपातयन्तिमहीतले ॥ ५८ ॥ कोऽपिदैत्योरथंदोर्भ्यामुत्क्षिप्योत्थायखं
ययौ ॥ अश्वचारान्हयान्नागान्पातयामासभूतले ॥ ५९ ॥ स्कन्धेगृहीत्वातरसाययौजालन्धरंप्रति ॥ कक्षयोर्वैगजौगृह्यतृतीयंजठरोपरि ॥ ६० ॥
चतुर्थंमस्तकेगृह्यरणेधावतिकश्चन ॥ उत्पाट्यकोशतःखड्गंविधूयविमलाम्बरम् ॥ ६१ ॥ ययौसहस्रशोदेवान्पातयित्वारणेऽसुरः ॥ काचित्पीनस्तनी
तन्वीखेचरीरतिलम्पटा ॥ ६२ ॥ आगत्यगगनात्तूर्णंनिन्येदैत्यंरणाङ्गणात् ॥ चुचुम्बसातद्वदनंतीक्ष्णनाराचकीलितम् ॥ ६३ ॥ देवसैन्यंततोबद्धा
कालनेमिर्ननर्त्तह ॥ ततोजनार्दनःक्रुद्धोनिर्ययौकालनेमिनम् ॥६४॥ यमोदुर्वारणंवीरंस्वर्भानुश्चन्द्रभास्करौ ॥ केतुंवैश्वानरोदेवोययौशुक्रंबृहस्पतिः॥
॥ ६५ ॥ अश्विनौसंयतौतत्रदैत्यमङ्गारपर्णकम् ॥ संह्रादंशक्रपुत्रश्चनिर्ह्रादंधनदोययौ ॥ ६६ ॥ निशुम्भश्चावृतोरुद्रैःशुम्भोवसुभिराहवे ॥
मेघाकारंस्थितंजम्भंविश्वेदेवाःसमाययुः ॥ ६७ ॥ वायवोवज्ररोमाणमथमृत्युर्मयंययौ ॥ नमुचिंवासवोव्यग्रंशक्तिहस्तोऽभ्यधावत ॥ अन्यैरपिसुरै
र्दैत्याःस्वस्ववीर्यसमैर्वृताः ॥ ६८ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तरखण्डेयुधिष्ठिरनारदसंवादेदेवदानवयुद्धंनामषष्ठोऽध्यायः ॥ ६ ॥
नारदउवाच ॥ एवंद्वन्द्वेषुयुद्धेषुसम्प्रवृत्तेष्वनेकशः ॥ जघानाथहरिःक्रुद्धोगदयाकालनेमिनम् ॥ १ ॥ विहायमूर्च्छांसञ्चिन्त्यविष्णुंबाणैर्जघानसः ॥
ततःक्रुद्धेनहरिणासक्षितौपातितोव्यसुः ॥ २ ॥ राजञ्जघानसञ्चिन्त्यराहुंखड्गेनचन्द्रमाः ॥ राहुस्तुतंपरित्यज्यतदासूर्यमधावत ॥ ३ ॥ सहस्रांशंरणे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जित्वाराहुश्चन्द्रमधावत ॥ जघानतंचखड्गेनसमरेरजनीपतिः ॥ ४ ॥ सैंहिकेयाङ्गकाठिन्यात्खड्गंचूर्णमभूत्तदा ॥ जघानमुष्टिनागाढंकठिनेनविधु
न्तुदः ॥ ५ ॥ चन्द्रंमूर्छापरिक्लिष्टंधृत्वावेगान्महामृधे ॥ गिलित्वाराहुणाचन्द्रोऽप्युद्गीर्णश्चततःपुनः ॥ ६ ॥ मृगंस्वचिह्नमुरसिनिधायविससर्जह ॥
सउच्चैःश्रवसंगृह्यहयरत्नंविधुन्तुदः ॥७॥ जालन्धरान्तिकंनीत्वाभक्त्यातस्मैन्यवेदयत् ॥ दुर्वारणोरणेक्रुद्धस्तंयमंगदयावधीत् ॥८॥ निशितैर्मार्गणै
र्भिन्नःशक्रपुत्रेणचाहवे ॥ धृत्वाजयन्तंसंह्रादःपरिघाघातमूर्च्छितम् ॥ ९ ॥ ऐरावतंसमारुह्ययौजालन्धरंप्रति ॥ हतवांश्चैवगदयानिह्रादंधनदोरणे॥
॥ १० ॥ रुद्रास्त्रिशूलनिर्घातैर्निशुम्भंजघ्नुरोजसा ॥ निशुम्भोबाणजालैश्चपीडयामासतानति ॥ ११ ॥ शुम्भासुरोदेवगणान्पूरयामासमार्गणैः ॥
मृत्युंमायामयमयोबद्ध्वापाशैर्निनायतम् ॥ १२ ॥ ददौजालन्धरायासौपौलोम्नेसोऽपिसिन्धवे ॥ अब्धिनाचमुखेक्षिप्तोलोकोजीवतुनिर्भयः ॥ १३ ॥
बद्ध्वाचनमुचिंपाशैर्वासवोऽपिरसातलम् ॥ निन्येविश्वस्यहन्तारमथजालन्धरोययौ ॥१४॥ अथेन्द्रबलयोर्युद्धमभूद्राजन्सुदारुणम् ॥ बलाङ्गरोचिषो
भान्तिदिशोदशरवेरिव ॥ १५ ॥ सर्वाण्यस्त्राणिशक्रस्यशीर्णान्यङ्गेबलस्यच ॥ बलीयसाबलेनेन्द्रोमुद्गरेणहतोहृदि ॥ १६ ॥ ननादेन्द्रस्ततोभीमं
तच्छ्रुत्वासबलोऽहसत् ॥ हसतस्तस्यनिश्चेरुर्मुखतोमौक्तिकानिच ॥ १७ ॥ तस्याङ्गस्याभिलाषेणनयुद्धमकरोत्तदा ॥ तुष्टाववासवोऽत्यर्थंतंबलंबल
सागरम् ॥ १८ ॥ वरंवृणुसुरश्रेष्ठेत्युक्तःप्राहबलंप्रति ॥ यदितुष्टोऽसिदैत्येशस्वंवपुर्दातुमर्हसि ॥ १९ ॥ तदिन्द्रवचनंश्रुत्वाभित्त्वाशस्त्रैर्गृहाणमाम् ॥
इत्युवाचबलंसोऽपिकिमदेयंमहात्मनाम् ॥ २० ॥ गीरिवश्रोत्रहीनस्यलोलाक्षीवविचक्षुषः ॥ परासोःपुष्पमालेवश्रीःकदर्यस्यनिष्फला ॥ २१ ॥
महात्मानोनगृह्णन्तिहिंसमानाञ्रिपूनपि ॥ सपत्नीःप्रापयन्त्यब्धिंसिन्धवोनगनिम्नगाः ॥ २२ ॥ सुजनोनयातिविकृतिंपरहितनिरतोविनाशकाले
ऽपि ॥ छिन्नोऽपिचन्दनतरुःसुरभयतिमुखंकुठारस्य ॥ २३ ॥ दैवंपरंविनश्यतितनुरपिनश्रीर्निवेदितासत्सु ॥ अवशिष्यतेहिमांशोःसैवकलाशिर
सियाशम्भोः ॥ २४ ॥ तेसाधवोभुवनमण्डलमौलिभूतायेसाधुतामनुपकारिषुदर्शयन्ति ॥ आत्मप्रयोजनवशात्कृतछिन्नदेहाःपूर्वापकारिषुखलोऽपि
हितानुरक्तः ॥ २५ ॥ तथेत्युक्त्वासहस्राक्षोमुद्गरेणाहनद्बलम् ॥ नभिद्यतेयदादेहःशक्रश्चिन्तामवापह ॥ २६ ॥ सस्मारितोमातलिनावज्रेणाङ्गंजघान
तत् ॥ तेनवज्रप्रहारेणबलाङ्गंतद्व्यशीर्यत ॥ २७ ॥ बलाङ्गस्यैकभागस्तुपपातकनकाचले ॥ तुहिनाद्रौद्वितीयस्तुतृतीयोगोनगेऽपतत् ॥ २८ ॥
चतुर्थोदेवनद्यांचपञ्चमोमन्दरेतथा ॥ वज्राकरेपपातांशःषष्ठश्चविजयाङ्गजः ॥ २९ ॥ तस्यजातिविशुद्धस्यपरिशुद्धेनकर्मणा ॥ कायस्यावयवाःसर्वे
रत्नबीजत्वमागताः ॥ ३० ॥ वज्रादस्थिकणाःकीर्णाःषट्कोणामणयोऽभवन् ॥ अक्षिभ्यामिन्द्रनीलावैमाणिक्यश्रुतिसम्भवम् ॥ ३१ ॥ क्षतजात्पद्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रागाःस्युर्मेदसोमरकतास्तथा ॥ प्रवालानिचजिह्वातोदन्तामुक्तास्तथाभवन् ॥ ३२ ॥ मज्जोद्भवंमरकतंगारुत्मतमभून्नसा ॥ कांस्यंपुरीषंरजतंवीर्यं
ताम्रंचमूत्रजम् ॥ ३३ ॥ अङ्गस्योद्वर्तनाज्जातंपित्तलंब्रह्मवीतिकाः ॥ नादाद्वैदूर्यमुत्पन्नंरत्नंचारुतरंतथा ॥ ३४ ॥ नखेभ्यःकनकोत्पत्तीरुधिराच्चरसो
द्भवः ॥ मेदसःस्फटिकंजातंप्रवालंमांससम्भवम् ॥ ३५ ॥ बलदेहोद्भवान्यासन्रत्नानिपृथिवीतले ॥ पुण्योपचयसम्पत्त्याभोक्ष्यन्तेविमलै
र्जनैः ॥ ३६ ॥ अत्रान्तरेहतंश्रुत्वाबलंमघवतामृधे ॥ प्रभावतीनामराज्ञीययौतच्चरणान्तिकम् ॥ ३७ ॥ विललापपतिंदृष्ट्वाविकीर्णावयवं
रणे ॥ प्रभावत्यश्रुपूर्णाक्षीमुक्तकेशीघनस्तनी ॥ ३८ ॥ हानाथबलविक्रान्तकान्तदेहजगत्प्रिय ॥ मांत्वंविहायकिंचात्रकैवल्यंगत
वानसि ॥ ३९ ॥ जराकुष्ठादिभिर्व्याप्तंवृद्धादेहंत्यजन्तिन ॥ देहिनोऽन्येपरंकान्तंत्वयादेहोवृथोज्झितः ॥ ४० ॥ तवदेहेनदिव्येन
हारकंभूष्यतेप्रिय ॥ रणोत्सुकेनभवतायावेणीग्रथितामम ॥ ४१ ॥ तामुद्ग्रथयवैधव्यदुःखार्त्तायाःस्वयंप्रिय ॥ एवंविलपतींवीक्ष्य
बलराज्ञींसमुद्रजः ॥ दुःखितःशुक्रमित्याहबलंजीवयभार्गव ॥ ४२ ॥ शुक्रउवाच ॥ इच्छयामरणंप्राप्तंतंकथंजीवयाम्यहम् ॥ तथा
पिमन्त्रसामर्थ्याद्वाचमुच्चारयिष्यति ॥४३॥ जालन्धरउवाच ॥ बलस्यरूपवचनंश्रोतुमिच्छामिभार्गव ॥ जालन्धरेणैवमुक्तःक्षणंध्यानपरोऽभवत्॥
॥ ४४ ॥ अथोदतिष्ठद्वदनात्स्वनःश्रोत्रमनोरमः ॥ प्रभावतींप्रतिव्यक्तंवाद्यभाण्डादिवोत्थितः ॥ ४५ ॥ प्रभावतिस्वदेहंत्वंममाङ्गेषुलयंनय ॥
इतितस्यवचःश्रुत्वानदीजाताप्रभावती ॥ ४६ ॥ बलाङ्गेष्वेवलीनासासुमेरोःपूर्ववाहिनी ॥ यस्यास्तोयेनसञ्जातारत्नानांकान्तिरुत्तमा ॥ ४७ ॥
इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तरखण्डेजालन्धरोपाख्यानेबलदैत्यस्वर्गारोहणंनामसप्तमोऽध्यायः ॥ ७ ॥ नारदउवाच ॥ ततोजालन्धरःक्रुद्धः
प्राहतंदैत्यसूदनम् ॥ कपटेनबलंहत्वाक्कयास्यसिबलाधम ॥ १ ॥ इत्युक्त्वातंशतमखंसिन्धुसूनुःप्रतापवान् ॥ ससूताश्वध्वजरथंछादयामाससमार्गणैः
॥ २ ॥ पपातमूर्च्छितःशक्रोरथोपरिशरैःक्षतः ॥ दृष्ट्वातंपतितंशक्रंजगर्जार्णवनन्दनः ॥ ३ ॥ मूर्च्छांत्यक्त्वामुमोचेन्द्रोवज्रंजालन्धरंप्रति ॥
तदाद्रिदलनंहस्तेगृहीत्वासिन्धुसम्भवः ॥ ४ ॥ वज्रंकक्षापुटेधृत्वारथादुत्तीर्यसत्वरम् ॥ अभ्यधावतदैत्येन्द्रोदेवेन्द्रंधर्तुमाहवे ॥ ५ ॥ ततोदुद्राव
मघवारथंत्यक्त्वाहरिंस्मरन् ॥ रथमिन्द्रस्यमदवानारुह्यार्णवनन्दनः ॥ ६ ॥ यन्तारंमातलिंकृत्वाययौप्राप्तमनोरथः ॥ रथमिन्द्रस्यतरसायत्रयत्र
ययौबले ॥ ७ ॥ जालन्धरोमहाबाहुःस्वयंचाम्बुधरोयथा ॥ ८ ॥ ततःसकोपात्पुरुषोत्तमःस्वयंखड्गंसमुद्यम्यचनन्दकंरणे ॥ सम्प्रेरयित्वागरुडं
मनोजवंजघानकोपेनचदैत्यवाहिनीम् ॥ ९ ॥ रथान्हयान्कुञ्जरपत्तिसङ्घान्सपातयामासबलात्सहस्रशः ॥ जनार्दनःकश्यपसूनुसंवृतश्चकारसङ्ख्येचरितं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भयावहम् ॥ १० ॥ केशास्थिमज्जारुधिरौघवाहिनीं पिशाचवेतालविहङ्गसेविताम् ॥ करोरुजङ्घायुधशस्त्रपूरितां सुदुस्तरां व्याघ्रगजेन्द्रसेविताम् ॥
॥ ११ ॥ रक्तान्त्रहाराङ्गदभूषितान्तां विघूर्णनेत्रोत्सवकान्तिवाससम् ॥ १२ ॥ विष्णुना निहतं सैन्यं दृष्ट्वा दानवपुङ्गवाः ॥ जालन्धराज्ञया सर्वे रुरुधुः
परिता हरिम् ॥१३॥ दैत्यास्ते तत्र बाणौघान्वर्षमाणा यथाम्बुदाः ॥ यथा द्विरेफाः कमलं पर्वतं जलदा इव ॥ १४ ॥ चूतं यथा पक्षिगणा गगनं धूमसञ्चयः ॥
न दृश्योऽभूत्तदा विष्णुर्न तार्क्ष्यो रणसङ्कटे ॥ १५ ॥ सर्वे ते रथमारूढाः सर्वशस्त्रैर्महासुराः ॥ वैकुण्ठाधिपतिं जघ्नुर्गर्जन्तो भीमनिस्वनैः ॥ १६ ॥
तान्सर्वान्भीमरूपेण दैत्यारिः कुपितस्तदा ॥ रणे निपातयामास वायुः पर्णचयं यथा ॥ १७ ॥ शैलरोमा ततो विष्णुं दैत्यः कोपादधावत ॥ हरेरपि शिरा
स्तस्य शरीरे शीर्णतां गताः ॥१८॥ शैलरोमा च दैत्यारिशरीरं चावधीच्छरैः ॥ हरिः खड्गं विनिर्धूय शिरस्तस्य जहार ह ॥१९॥ छिन्ने शिरसि दैत्यस्य कबन्धो
विक्रमन्रणे ॥ शैलरोमा भुजाभ्यां च तार्क्ष्यं जग्राह पक्षयोः॥२०॥ शिरश्चोत्पत्य तरसा विलग्नं स्कन्धयोर्दृढम्॥ ततस्तत्रास्य युद्धेन हृषीकेशोऽपि विस्मितः ॥
॥ २१ ॥ शिरः संलग्नमालोक्य गरुडोन्यपतद्भुवि ॥ पुनश्चोत्पत्य वेगेन शिरः स्थानं समाश्रयत् ॥ २२ ॥ शैलरोमा ततो विष्णुं जहार गरुडाद्बली ॥ हरि
र्जघ्ने तलेनाशु गतायुश्चापतद्भुवि ॥ २३ ॥ ततो जालन्धरः सूतं खड्गरोमाणमब्रवीत् ॥ सम्प्रेषय रथं तत्र यत्र देवो जनार्दनः ॥ २४ ॥ जालन्धरस्य वचना
त्खड्गरोमानयद्रथम् ॥ दृष्ट्वा तं पुरतो विष्णुमुवाचार्णवनन्दनः ॥ २५ ॥ निःशङ्कं जहि मां विष्णो नाहं त्वा हन्मि माधव ॥ तस्य तद्वचनं श्रुत्वा क्रोधसंरक्त
लोचनः ॥ २६ ॥ नारायणः प्राणहरैः शरैरेनमपूरयत् ॥ विष्णुना च विभिन्नान्तोऽर्णवसूनुः प्रतापवान् ॥ २७ ॥ हरिं सम्पूरयामास मार्गणौघैर्निरन्तरम्॥
अस्य बाणशतैर्भिन्नो गरुडो मूर्च्छितोऽपतत् ॥ २८ ॥ गरुडं पतितं दृष्ट्वा सिन्धुसूनोः शरैर्भुवि ॥ रथं संस्मारयामास वैकुण्ठस्थं जनार्दनः ॥ २९ ॥ स
रथस्तस्य सम्प्राप्तः सूतहीनो हयैर्वृतः ॥ अश्वैर्युतं रथं दृष्ट्वा विस्मितो भगवान्रणे ॥ ३० ॥ सम्बोधयित्वा गरुडं सारथ्ये समयोजयत् ॥ स धृत्वा मुकुटं मूर्ध्नि
कौस्तुभं हृदये मणिम् ॥ ३१ ॥ पुरुषार्थान्हयान्कृत्वा ययौ जालन्धरं हरिः ॥ मेदिनीं रथचक्रेण दारयंश्च सुरैः सह ॥ ३२ ॥ जघान तरसा बाणैर्दानवानां
च वाहिनीम् ॥ देवराजेन सन्दिष्टो वीतिहोत्रो रणाङ्गणे ॥ ३३ ॥ ददाह दानवानीकं समीरणसमन्वितम् ॥ तदा हतं भगवता दैत्यसैन्यं सुरैः सह ॥ ३४ ॥
जालन्धरः स्वल्पशेषं दध्यौ दृष्ट्वा बलं स्वकम् ॥ अथाह भार्गवं राजा मत्सैन्यं निहतं सुरैः ॥ ३५ ॥ त्वयि तिष्ठति मन्त्रज्ञे विख्यातो विद्यया भवान् ॥ किं तया
विद्यया ब्रह्मन्क्षत्रेणाथ बलेन च ॥ ३६ ॥ यान रक्षति रोगार्तान्यद्बलं शरणागतान् ॥ जालन्धरवचः श्रुत्वा भार्गवस्तमभाषत ॥ ३७ ॥ पश्य राजन्मम बलं
ब्राह्मणस्य रणाङ्गणे॥ इत्युक्त्वा वारिणा स्पृष्टा हुङ्कारेण प्रबोधिताः॥३८॥ उत्थापितास्ते कविना शरौघैः प्राणहारकैः॥ देवा हता रणे पेतुः समन्तात्सिन्धुसूनुना॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ३९ ॥ बाणैर्जर्जरदेहास्तेधृतप्राणानराधिप ॥ नमृतास्त्वमरत्वाच्चबाणैर्भिन्नाश्वसत्तम ॥ ४० ॥ ततोनारायणोदेवोबृहस्पतिमभाषत ॥ धिग्बलं दैवतगुरोयोनजीवयसेसुरान् ॥ ४१ ॥ धिषणस्तुजगन्नाथमुवाचत्वरितंतदा ॥ ओषधीभिरहंस्वामिञ्जीवयिष्यामिनिर्जरान् ॥ ४२ ॥ इत्युक्त्वाधिषणःसोऽपिययौक्षीरार्णवस्थितम् ॥ द्रोणमद्रिंतदागत्वासुखंगृह्यौषधीःस्वयम् ॥४३॥ गुरुस्तासांचयोगेनजीवयामासनिर्जरान् ॥ उत्थितास्तेततोदेवा जघ्नुर्दानववाहिनीम् ॥४४॥ देवान्समुत्थितान्दृष्ट्वाबभाषेसिन्धुजःकविम्॥विनात्वद्विद्ययाकाव्यकथमेतेसमुत्थिताः॥ ४५॥इतिदैत्योक्तमाकर्ण्यशुक्रः प्राहार्णवात्मजम् ॥ क्षीरसागरमध्यस्थोद्रोणोनाममहागिरिः॥ ४६॥ओषध्यस्तत्रतिष्ठन्तिजीवयन्तिचयामृतान् ॥ तत्रगत्वासुराचार्योगृहीत्वौषधिसञ्चयम् ॥ ४७ ॥ रणेविनिहतान्देवानुत्थापयतिमन्त्रतः ॥ भार्गवोक्तमथाकर्ण्यसैन्यभारंमहाबलः ॥ ४८ ॥ शुम्भेनिक्षिप्यतरसाययौजालन्धरोऽर्णवम् ॥ अथप्रविष्टःक्षीराब्धौवेश्मदिव्यंमहाप्रभम् ॥ ४९ ॥ प्रविश्यतत्रक्षीराब्धेःक्रीडास्थानंददर्शसः ॥ नोष्णोनशीतलोवायुर्नतमोयत्रदृश्यते ॥ ५० ॥ यत्रगायन्तिनृत्यन्तिक्रीडन्तिचवरस्त्रियः ॥ सुपीनस्तनभाराढ्याःकृशोदर्यःसुदन्तिकाः॥५१॥नेत्रविभ्रमविक्षेपैर्नितम्बपरिवर्त्तनैः ॥ अङ्गैःसंमोहनैरम्यैर्बाहुवल्लीविचालनैः ॥ ५२ ॥ पादविन्यासरणितैर्मधुरैर्वचनस्तवैः ॥ सौगन्ध्यसौख्यदैर्वासैर्नेत्रभ्रमरझांकृतैः ॥ ५३ ॥ चामरान्दोललीलाभिः स्रग्भिःस्मितविलोकितैः ॥ सेवांचक्रुर्विलासिन्यस्तत्रगत्वोदधेःसुतः ॥ ५४ ॥ क्रीडन्तंतत्रदुग्धाब्धिसंवीक्ष्यसमरोत्सुकः ॥ अथाहप्रणिपत्यासौ क्षीराब्धितातहंसिमाम् ॥ द्रोणाचलौषधीर्व्याजादम्बुभिःप्लावयस्वतः ॥ ५५ ॥ क्षीरसागरउवाच ॥ तंप्राप्तंशरणंपुत्रप्लावयाम्यूर्मिभिःकथम् ॥ मुनीन्द्रास्तंनशंसन्तियस्त्यजेच्छरणागतम् ॥ ५६ ॥ पितृव्यवचनंश्रुत्वासङ्क्रोधात्सन्ततंगिरिम् ॥ तलप्रहरणैर्नैवताडयामासदैत्यराट् ॥ ५७ ॥ ततो द्रोणगिरीराजन्भीतोजालन्धराद्भृशम् ॥ अथाजगामरूपेणप्राहजालन्धरंप्रति ॥ ५८ ॥ तवाहमभवंदासोरक्षमांशरणागतम् ॥ रसातलंमहाबाहो यास्यामितवशासनात् ॥ ५९ ॥ यावत्त्वंकुरुषेराज्यंतावत्स्थास्याम्यहंप्रभो ॥ ओषधीनांविरावेणसिद्धानांरोदनेनच ॥ ६० ॥ रसातलंजगामाद्रिः सिन्धुसूनोःप्रपश्यतः ॥ ततोजालन्धरोवीरआजगाममहारणम् ॥ ६१ ॥ पूर्वकल्पितमारुह्यरथस्थंकेशवंययौ ॥ रथस्थंमाधवंदृष्ट्वाजहासोच्चैर्नदीसुतः ॥ ६२ ॥ तावत्त्वंतिष्ठशकटेयावद्धन्यामरीनहम् ॥ एवमुक्त्वाजघानाशुशरैस्तांदेववाहिनीम् ॥ ६३ ॥ बाणैर्विदारितादेवास्त्राहीत्यूचुर्बृहस्पतिम् ॥ ततोवृहस्पतिःशीघ्रमगमत्क्षीरसागरम् ॥ ६४ ॥ अदृष्ट्वातंततोद्रोणमभूच्चिन्तापरोनृप ॥ अथागत्यरणंतूर्णममरान्प्राहगीष्पतिः ॥ ॥ ६५॥ पलायध्वंसुराःसर्वेद्रोणाद्रिःक्षयमागतः ॥ एवमुक्तवतस्तस्यगुरोश्छिच्छेदसिन्धुजः ॥६६ ॥ यज्ञोपवीतंकेशांश्चबाणैस्तीक्ष्णैर्हसन्सुरान् ॥ ततो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुद्राववेगेनगुरुःप्राणभयार्दितः ॥ ६७ ॥ देवाःसर्वेरणंहित्वापलायाञ्चक्रिरेनृप ॥ एवंविद्राव्यदेवान्वैजनार्दनमधावत ॥ ६८ ॥ हृषीकेशोऽपि

 दुद्रावंवेगेनगुरुःप्राणभयार्दितः

दैत्येशमन्वधावद्रणोत्सुकः ॥ ततोयुद्धमभूद्घोरंविष्णोर्जालन्धरस्यच ॥ ६९ ॥ दुर्द्धर्षणोबाणजालैःप्लावयामासकेशवम् ॥ तान्बाणान्खण्डशःकृत्वा

 पूरयित्वाशरैर्महान् ॥ ७० ॥ वासुदेवोऽसुरंबाणैर्जालन्धरमपीडयत् ॥ जालन्धरोरथंत्यक्त्वाशरपीडितविग्रहः ॥ ७१ ॥ विष्णुंविजेतुंदुद्राव

संयतिस्थमथद्रुतम् ॥ तमायान्तंरणेदृष्ट्वाहरिर्विव्याधसायकैः ॥ ७२ ॥ बाणानङ्गेऽसहद्विष्णोःप्राप्तोऽसौरथसन्निधौ ॥ हस्तेनैकेनगरुडंद्वितीयेनरथं

हरेः ॥ ७३ ॥ भ्रामयित्वाम्बरेशश्वच्छ्वेतद्वीपेन्यपातयत् ॥ जालन्धरकरक्षिप्तोगरुडोऽपिपपातह ॥ ७४ ॥ क्रौञ्चद्वीपेसतत्रैवविश्राममकरो

च्चिरम् ॥ अच्युतःप्रच्युतस्तस्माद्भ्रमतोरथमण्डलात् ॥ ७५ ॥ रणमागत्यदैत्येशंतिष्ठतिष्ठेत्यभाषत ॥ दृष्ट्वातमागतंभूयःकेशवंसमरप्रियः ॥

पूरयन्मार्गणैर्भूमिंजगर्जार्णवनन्दनः ॥ ७६ ॥ विव्याधदैत्यंहरिराशुशक्त्याहृदिस्फुरन्त्यासततःपपात ॥ सूतोऽनयत्तंसमरान्निवासंतंप्राहरेकेन

कृतोऽस्म्यलज्जः ॥ ७७ ॥ दैत्यारिजालन्धरयोर्महत्तदाबभूवयुद्धंधरणीतलस्थयोः ॥ प्रेम्णाश्रियस्तंनजघानदानवंस्वयंहरिस्तस्यशरैःपपात ॥

॥ ७८ ॥ ततोनिरीक्ष्यगोविन्दंपतितंधरणीतले ॥ प्रगृह्यार्णवजोदैत्यआरुरोहनिजंरथम् ॥ ७९ ॥ ततस्तमिन्दिराप्राप्तारुदन्तीविष्णुवल्लभा ॥

संस्थिताकमलातत्रपतिंकमललोचनम् ॥ ८० ॥ पतितंतुपतिंवीक्ष्यलक्ष्मीःप्राहार्णवात्मजम् ॥ शृणुष्ववचनंभ्रातर्जितोविष्णुर्धृतस्त्वया ॥ ८१ ॥

भगिन्यानचवैधव्यंदातुंयुक्तंमहाबल ॥ श्रुत्वातुवचनंतस्यामुमोचजगतःपतिम् ॥ ८२ ॥ जालन्धरोमहाबाहुःस्वस्रेभक्त्याननामच ॥ ववन्दे

चरणौविष्णोःस्वसुःस्नेहात्तदाञ्जसा ॥ ८३ ॥ विष्णुर्जालन्धरंप्राहतुष्टोऽस्मितवकर्मणा ॥ वरंवरयदैत्येशकिंप्रयच्छामितेवरम् ॥ ८४ ॥ जाल

न्धरउवाच ॥ यदित्वंममतुष्टोऽसिशौर्येणानेनकेशव ॥ स्थातव्यंमत्पितुःस्थानेत्वयाकमलयासह ॥ ८५ ॥ तथेत्युक्त्वाचसंस्मृत्यगरुडंधरणी

धरः ॥ आरुह्यचजगन्नाथःक्षीराब्धिंप्रिययासह ॥ ८६ ॥ तदाप्रभृतिकृष्णस्यवासःश्वशुरमन्दिरे ॥ अब्धौवसतिदेवेशोलक्ष्म्याःप्रियचिकीर्षया

॥ ८७ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०युधिष्ठिरनारदसंवादेऽष्टमोऽध्यायः ॥ ८ ॥ युधिष्ठिरउवाच ॥ देवान्विद्राव्यसमरेविष्णुंस्थाप्यात्म

मन्दिरे ॥ जालन्धरेणाब्धिजेनयत्कृतंब्रूहिनारद ॥ १ ॥ नारदउवाच ॥ शुम्भादीनांतुवीराणांदत्त्वादानंप्रसादजम् ॥ जालन्धरोजगामाथ

स्वर्गंप्राप्यावलोकयत् ॥ २ ॥ हिरण्यवर्षेणजनान्भूषयन्तिंदिनेदिने ॥ फलन्तितरवोऽजस्रंवाजिमेधक्रतोःफलम् ॥ ३ ॥ गजवस्त्रसुवर्णानि

धेनुकन्यातिलानिच ॥ पुष्पकर्पूरताम्बूलकस्तूरीकुङ्कुमानिच ॥ ४ ॥ येयच्छन्तिमहात्मानस्तेपश्यन्त्यमरावतीम् ॥ वर्षासुगृहदानेनशिशिरे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽग्निप्रदानतः ॥ ५ ॥ वादित्राणिचसर्वाणिवादयन्तिशिवालये ॥ प्रपांकुर्वन्तियेचैत्रेदध्योदनसमन्विताम् ॥ ६ ॥ यत्रहिन्दोलपर्यङ्कंस्वय
मान्दोलयन्तिच ॥ सारिकाशुकहंसाश्चभ्रमद्भ्रमरकोकिलाः ॥७॥ कुर्वन्तोदूतकार्याणियच्छन्तेप्रियसङ्गमम् ॥ रम्भायत्रपुरेरामामेनकाचतिलोत्तमा॥
॥ ८ ॥ सुषमासुन्दरीयत्रघृताचीपुञ्जिकस्थली ॥ सुकेशीसुमुखीरामामञ्जुघोषाचमालिनी ॥ ९ ॥ मृगोद्भवाचसुखदाधनदंष्ट्रातिलप्रभा ॥ वाजि
मेधफलग्राहाराजसूयंफलन्तियाः ॥१०॥ कोटिशोयत्रनिष्पापाःक्रीडन्त्यप्सरसोनृप ॥ एवंभूरिसुखेस्वर्गेस्थापयामाससिन्धुजः ॥ ११ ॥ शुम्भंप्राण
समंदैत्यंनिशुम्भंयवराजके ॥ स्वयंजालन्धरेपीठेस्वर्गादागत्यसिन्धुराट् ॥ वर्षार्बुदद्वयंराज्यंचकारात्मबलेनच ॥ १२ ॥ युधिष्ठिरउवाच ॥ युयुधे
सुरसङ्ग्रामेससुरैरपराजितः ॥ ततःकिमकरोद्राजासिन्धुसूनुःप्रतापवान् ॥ १३ ॥ तन्ममाचक्ष्वदेवर्षेश्रोतुकामस्यविस्तरात् ॥ १४॥ नारदउवाच ॥
शृणुराजन्यथातथ्यंकृतंसागरसूनुना ॥ सदेवान्समरेजित्वाराज्यंचक्रेह्यकण्टकम् ॥ १५ ॥ गन्धर्वाश्चित्रसेनाद्याःसेवन्तेचासुरेश्वरम् ॥ यज्ञभागां
श्चयोभुङ्क्तेसर्वेषामसुरेश्वरः ॥ १६ ॥ क्षीरसागरतोदेवैर्हृतंरत्नादिकंचयत् ॥ तत्सर्वंचतथान्यच्चनिर्जित्यहृतवान्बली ॥ १७ ॥ समुद्रतनये
राज्यंभुवोराजन्प्रशासति ॥ नकश्चिन्म्रियतेमर्त्योनरकंकोऽपिनव्रजेत् ॥ १८ ॥ नकलिःप्रणयादन्योनभोगादपरःक्षयः ॥ नवन्ध्यादुर्भगानारी
नालङ्कारैर्विवर्जिता ॥ १९ ॥ कुरूपादुर्गतादुष्टाऽयशस्यानचदृश्यते ॥ नतत्रविधवानारीनकश्चिन्निर्द्धनोजनः ॥ २० ॥ दातारःसन्तिस
र्वत्रनप्रतिग्राहिणःक्वचित् ॥ पुण्याजनाःप्रयच्छन्तिद्विजेभ्योह्यात्मनोधनम् ॥ २१ ॥ रूपयौवनशालिन्यःसीमन्तिन्योगृहेगृहे ॥ गोक्षीरंदधि
सर्पिश्चयत्रनिर्जरसोजनाः ॥ २२ ॥ मङ्गलंतत्रसर्वेषांनक्वचिद्वधबन्धनम् ॥ मरणंनचहिंसास्तिनकश्चित्केनबाध्यते ॥ २३ ॥ ऋणंनदृश्यते
राजन्धनिनःसन्तिसर्वतः ॥ सन्तुष्टाःसर्वसस्याढ्याःप्रजाःसर्वत्रपार्थिव ॥ २४ ॥ केलीक्षुदण्डप्रभवश्चदुग्धरसोऽतिसुस्वादुतरोगृहेनृणाम् ॥
शुश्रावनारीनरयोर्हितंवचोनचापहर्ताध्वनिगच्छतांसदा ॥ २५ ॥ पतन्त्यखण्डानभसोयतस्ततोधाराश्चकर्मारविमिश्रसर्पिषः ॥ संमिश्रिताःशर्करया
परिश्रुताःसमुद्रसूनोःस्मरणान्मुखेनृणाम् ॥ २६ ॥ इतिश्रीपाद्मेमहापुराणेउत्तरखण्डेपञ्चप०युधिष्ठिरनारद०जालन्धरसौराज्यवर्णनंनामनवमो
ऽध्यायः ॥ ९ ॥ युधिष्ठिरउवाच ॥ इन्द्रादिभिस्तदादेवैःकिंकृतंद्विजसत्तम ॥ जालन्धरेणविजितैःस्वर्गराज्येहृतेसति ॥ १ ॥ नारद
उवाच ॥ अथत्यक्त्वादिवंदेवाःप्रापुस्तेदुर्दशांचिरम् ॥ नपीयूषंनैवयज्ञांशयुःस्थानंस्वयम्भुवः ॥ २ ॥ ददृशुर्ब्राह्मभुवनेब्रह्माणंपरमेष्ठिनम् ॥
प्राणायामेनयुञ्जानंमनःस्वंपरमात्मनि ॥ ३ ॥ तेतुष्टुवुःसुराःसर्वेवाग्भिस्तथ्याभिरादृताः ॥ ततःप्रसन्नोभगवान्किंकरोमीतिचाब्रवीत ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततोनिवेदयाञ्चक्रुर्ब्रह्मणेविबुधाःपुनः ॥ जालन्धरस्यसकलंतथानिजपराभवम् ॥ ५ ॥ क्षणंध्यात्वाययौब्रह्माकैलासंत्रिदशैःसह ॥ तस्यशैलस्य
पार्श्वेतेवैचित्र्येणसमाकुलाः ॥ ६॥ स्थिताःसन्तुष्टुवुर्देवाब्रह्मशक्रपुरोगमाः ॥ नमोभवायशर्वायनीलग्रीवायतेनमः ॥ ७ ॥ नमःस्थूलायसूक्ष्मायबहु
रूपायतेनमः ॥ इतिसर्वमुखोभूत्वावाणीमाकर्ण्यशङ्करः ॥ ८ ॥ प्रोवाचनन्दिनंदेवानानयस्वेतिसत्वरम् ॥ श्रुत्वाशम्भोर्वचोदेवाआहूतानन्दिना
द्रुतम् ॥ ९॥ प्रविश्यान्तःपुरेदेवाददृशुर्विस्मितेक्षणाः ॥ तत्रासनेसमासीनंशङ्करंलोकशङ्करम् ॥ १० ॥ गणैःकोटिसहस्रैस्तुसेवितंभक्तिशालिभिः ॥
नग्नैर्विरूपैःकुटिलैर्जटिलैर्धूलिधूसरैः ॥ ११ ॥ प्रणिपत्याग्रतःप्राहसहदेवैःपितामहः ॥ सुखरागोयथास्यासीच्छक्रःसोऽयंवृथागतः ॥ १२ ॥ कृपां
कुरुमहादेवशरणागतवत्सल ॥ ततउच्चैर्विभोर्हास्यंश्रुत्वाब्रह्मापिनाकिनः ॥ १३ ॥ उवाचदेवदेवेशंपश्यावस्थांदिवौकसाम् ॥ ततःसर्वेश्वरोज्ञात्वा
ब्रह्मणोमनसेप्सितम् ॥ १४ ॥ शक्रस्यमानभङ्गंचदेवार्थेपरमेश्वरः ॥ प्रेम्णाभवान्याविज्ञप्तोनृपप्राहवचोहरः ॥ १५ ॥ विष्णुनानहतोयोऽरिःसकथं
हन्यतेमया ॥ पूर्वसृष्टान्यायुधानिवज्रादीनिपितामह ॥ १६ ॥ तैःशस्त्रैर्नैववध्योऽसौबलीजालन्धरोऽसुरः ॥ हेतिभिःपूर्वसंसृष्टैःसमयापिन
हन्यते ॥ १७ ॥ देवाःकुर्वन्तुशस्त्रंहिममप्राणसहंदृढम् ॥ शम्भोरित्युत्तरंश्रुत्वाब्रह्मोवाचाथशङ्करम् ॥१८॥ स्त्वयंकुरुमहाशस्त्रंत्वंवेत्थस्वात्मनोबलम् ॥
इतितस्यवचःश्रुत्वाप्रत्युवाचमहेश्वरः ॥ १९ ॥ ब्रह्मन्विमुञ्चतेजस्त्वंक्रोधयुक्तंसुरैःसह ॥ ततस्तेजोमुमोचाथब्रह्माब्रह्मास्त्रसूचकः ॥ २० ॥
रुद्रस्त्रिनेत्रजंतेजस्ततोनिर्मुक्तवान्स्वयम् ॥ देवाश्चमुमुचुःसर्वेसक्रोधंतेजसांचयम् ॥ २१ ॥ अत्रान्तरेस्मृतःप्राप्तोहरेणमधुसूदनः ॥ किंकरोमीति
तेनोक्तःशिवःप्राहजनार्दनम् ॥ २२ ॥ विष्णोजालन्धरःकस्मान्नहतःसङ्गरेत्वया ॥ कथंसुरान्परित्यज्यक्षीराब्धिशयितुंगतः ॥ २३ ॥
श्रीविष्णुरुवाच ॥ यदितंहन्मिदेवेशश्रीःकथंममवल्लभा ॥ तस्मात्त्वंपार्वतीकान्तजहिजालन्धरंरणे ॥ २४ ॥ तेजस्त्वंक्रोधजंमुञ्चेत्युक्तःशर्वेण
केशवः ॥ मुमोचवैष्णवंतेजस्तत्सर्वंसमवर्द्धत ॥ तेजःप्रवृद्धंतद्दृष्ट्वाव्यापकंप्राहकेशवम् ॥ २५ ॥ शङ्करउवाच ॥ एतेनतेजसाशीघ्रंममास्त्रंकर्तु
मर्हथ ॥ विश्वकर्मादयस्तच्चश्रुत्वाशङ्करभाषितम् ॥ २६ ॥ निरीक्ष्यचतदान्योन्यंकिंकुर्मइतिशङ्किताः ॥ दृष्ट्वातूष्णींस्थितांस्तांश्चज्ञात्वा
तन्मनसिस्थितम् ॥ २७ ॥ तदाहभगवान्ब्रह्माअनालोक्यंहिदैवतैः ॥ सोढुंनशक्तास्तेतेजोधर्तुंकेनचशक्यते ॥ २८ ॥ ततःप्रहस्यभगवा ॥ ९ ॥
नुत्पत्योपरितेजसः ॥ वामाङ्घ्रिपार्ष्णिनाशम्भुर्ननर्तभ्रमरीचयम् ॥ २९ ॥ ततोदेवामहेन्द्राद्यास्तेजसोपरिशङ्करम् ॥ नृत्यमानंतदादृष्ट्वामुदा
वाद्यान्यवादयन् ॥ ३० ॥ तदाप्रभृतिनृत्येषुभ्राम्यतेभ्रमरीचयम् ॥ अथचक्रंसमुत्पन्नंशम्भोर्नर्तनमर्दनात् ॥ ३१ ॥ आरलक्षत्रयोपेतमस्थिकोटि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाकुलम् ॥ शर्वाङ्घ्रिकषणात्तस्यतेजसोनिसृताःकणाः ॥ ३२ ॥ विश्वकर्माचतेनास्त्रंविमानानिचनिर्ममे ॥ ततस्तेनिर्जराभीत्यादृष्ट्वाचक्रं
सुदर्शनम् ॥ ३३ ॥ त्राहित्राहीतिदेवेशंप्रत्यूचुस्तेसुरानृप ॥ पृथ्वीकाठिन्यमादायलोहानामपितेजसाम् ॥ ३४ ॥ यद्विश्वकर्मणाकोशंकृतंभस्मीकृतं
चतत् ॥ सृष्टेनतेनचक्रेणदग्धःकालोऽपतत्क्षितौ ॥ ३५ ॥ ततस्तद्ब्रह्मणोहस्तेददौचक्रंसधूर्जटिः ॥ चक्रार्चिर्निचयैःकूर्चंदृष्ट्वादग्धमुमापतिः ॥
॥ ३६ ॥ हसित्वाब्रह्मणोहस्ताद्गृहीत्वासत्वरंशिवः ॥ दधौकक्षापुटेचक्रंनिधानंनिर्धनोयथा ॥ ३७ ॥ ततोनदृश्यतेचक्रंशिवकक्षापुटेस्थितम् ॥
महामूर्खस्ययद्दत्तंदानंतस्यफलंयथा ॥ ३८ ॥ इतिश्रीपाद्मेमहापुराणेउत्तरखण्डेपञ्चप०युधिष्ठिरनारद०जालन्धरोपाख्यानेसर्वदेवतेजोमय
चक्रोत्पत्तिर्नामदशमोऽध्यायः ॥ १० ॥ नारदउवाच ॥ अत्रान्तरेमयागत्वाकथितंसिन्धुसूनवे ॥ त्वांहन्तुंसर्ववीरेशप्रतिज्ञाशम्भुनाकृता ॥
श्रुत्वेत्थंमद्वचोराजंस्ततःपप्रच्छसोऽसुरः ॥ १ ॥ जालन्धरउवाच ॥ किमस्तिशूलिनोगेहेरत्नजातंमहामुने ॥ तन्ममाचक्ष्वसकलंनास्तियुद्धं
निरामिषम् ॥ २ ॥ नारदउवाच ॥ भूतिर्गात्रेवृषोजीर्णःफणिनोऽङ्गेगलेविषम् ॥ भिक्षापात्रंकरेपुत्रोगजाननषडाननौ ॥ ३ ॥ इत्यादिविभव
स्तस्ययदन्यत्तन्निबोधमे ॥ तनयागिरिराजस्यविशालाह्युन्नतस्तनी ॥४॥ दग्धस्मरोऽपिभगवान्यस्यारूपेणमोहितः ॥ महेशोयद्विनोदायकुरुतेनित्य
कौतुकम् ॥ ५ ॥ नृत्यन्गायंश्चतांशम्भुःस्वयंभवतिहासकः ॥ सापार्वतीतिविख्यातासौन्दर्यावधिदैवतम् ॥ ६ ॥ वृन्दावराङ्गनाराजन्निमाश्चाप्सरसः
शुभाः ॥ नचाप्नुवन्तिपार्वत्याःषोडशीमपितांकलाम् ॥७ ॥ इत्युक्त्वाहंमहीपालजालन्धरममर्षणम् ॥ पश्यतांसर्वदैत्यानामन्तर्धानंगतःक्षणात् ॥८॥
अथसंप्रेषयद्दूतंसिन्धुजःसिंहिकासुतम् ॥ क्षणेनासाद्यकैलासंदेवावासमपश्यत ॥ ९ ॥ अत्रान्तरेहरिर्भीममापृच्छ्यतुतदाहरम् ॥ जगामालक्षित
स्तूर्णंक्षीराब्धिभेदशङ्कया ॥ १० ॥ ददर्शराहुर्भवनंशङ्करस्यातिदीप्तिमत् ॥ आत्मानमात्मनावीक्ष्यकिमित्याहसुविस्मितः ॥ ११ ॥ प्रवेष्टु
कामोबलिभिर्द्वारिद्वाःस्थैर्निरोधितः ॥ यत्नवान्सनिषिद्धोऽपितदातप्रोद्यतायुधाः॥ १२ ॥ तान्निवार्यगणान्नन्दीव्याजहारविधुन्तुदम् ॥ कस्त्वंकस्मा
दिहायातःकिंकार्यंतवबर्बर ॥ ब्रूहिकार्यंगणायावत्त्वांनहन्युर्भयावहाः ॥१३॥ राहुरुवाच ॥ दूतोजालन्धरस्याहंत्वंमांशर्वान्तिकेनय ॥ नवाच्यमन्तरे
द्वास्थमहाराजप्रयोजनम् ॥ १४ ॥ नन्दीदूतोक्तमाकर्ण्यनीललोहितमाययौ ॥ दण्डवत्प्रणिपत्याग्रेस्थित्वाशङ्करमब्रवीत् ॥ १५ ॥सैंहिकेयोमहाराज
द्वारेतिष्ठतिकार्यतः ॥ सप्रयात्वथवायातुभवानाज्ञप्तुमर्हति ॥ १६ ॥ नन्दिनोक्तमथाकर्ण्यत्वरन्निवमहेश्वरः ॥ सुप्तामन्तःपुराद्देवींप्रस्थाप्यचसखी
वृताम् ॥ १७ ॥ पश्चाद्वाःस्थंजगादाथनन्दिन्दूतंप्रवेशय ॥ ततोहस्तेप्रगृह्यामुंदूतंनन्दीमहाबलः ॥ १८ ॥ आनयामासदेवानांमध्येशम्भुमदर्शयत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तंददर्शतदाराहुर्जटिलंनीलमात्मनि ॥१९॥ पञ्चवक्त्रंदशभुजंनागयज्ञोपवीतिनम् ॥ देवीविरहितंमूर्ध्नि चन्द्रलेखाविभूषितम्॥२०॥ उच्छ्वासोच्छ्वासनिर्मु
क्तपृदाकुगणसेवितम् ॥ सर्वदेवगणोपेतंसेवितंगणकोटिभिः ॥ २१ ॥ प्राप्तंज्ञात्वाततोदूतंशम्भुरालोक्यचाग्रतः ॥ प्राहब्रूहितदाराहुर्वक्तुंसमुपचक्रमे ॥
॥२२॥ राहुरुवाच ॥ देवजालन्धरेणाहंप्रेषितस्तवसन्निधौ ॥ तस्यशिष्टंवचःश्रुत्वामन्मुखेनद्रुतंकुरु ॥२३॥ गिरिशत्वंतपोनिष्ठोनिर्गुणोधर्मवर्जितः ॥
तवनास्तिपितामातावसुगोत्रादिवर्जितः ॥ २४ ॥ जालन्धरोमहाबाहुर्भुङ्क्तेऽसौभुवनत्रयम् ॥ तस्यैववश्यस्त्वमपिततश्चोक्तंसमाचर ॥ २५ ॥ पुराण
पुरुषःकामीवृषारूढःकथंभवान् ॥ एवंवदतिसम्प्राप्तौसुतौस्कन्दविनायकौ ॥ २६ ॥ तस्मिन्कालेदेवदेवोयतवागङ्गमर्दनम् ॥ चकारचकरैर्व्यस्तै
र्वासुकिर्भूतलेऽपतत् ॥२७॥ हेरम्बवाहनस्याखोःपुच्छेग्रस्तमथाहिना॥ स्वपत्रंग्रस्तमालोक्यमुखमुखेत्युवाचह॥२८॥ अत्रान्तरेस्कन्दवाहंक्षुब्धंवीक्ष्य
महास्वरम् ॥ तद्भयाद्वासुकिर्ग्रस्तमाखुपुच्छमथोद्गिरत् ॥ २९ ॥ अथारुह्यहरस्याङ्गंगलमावेष्ट्यसंस्थितः ॥ तस्यनिश्वासपवनैरथजातोहुताशनः ॥
॥ ३० ॥ तस्योष्मणाचन्द्रलेखाजटाजूटाटवीस्थिता ॥ सार्द्रतांतुतदासायात्प्लावितंतद्वपुर्यथा ॥ ३१ ॥ तस्याह्यमृतधाराभिर्ब्रह्ममस्तकमालिका ॥
हरमौलिकपालानामभूत्सञ्जीवितातदा॥३२॥पपाठपूर्वमभ्यस्तंसर्वयोगश्रुतिक्रमम् ॥ श्रुत्वापरस्पराधीतंविवदन्तिशिरांस्यथ ॥३३॥ अहमादिरहंपूर्व
महमेवपरात्परः ॥ अहंस्रष्टाअहंपातेत्युत्सुकानिपरस्परम्॥३४॥शोचन्त्येतानिनोदत्तंनोभुक्तंनहुतंमया॥लोभग्रस्तेनमनसानोवित्तंब्रह्मणेऽर्पितम्॥३५॥
अथेश्वरजटाजूटादाविरासीद्गणोमहान् ॥ त्र्याननस्त्रिचरणस्त्रिपुच्छःसप्तहस्तवान् ॥३६॥ सचकीर्तिमुखोनामपिङ्गलोजटिलोमहान्॥तंदृष्ट्वासाकपाला
लीभयात्तस्थौमृतेवसा ॥ ३७ ॥ पुरतःप्राहसगणस्ततःकीर्तिमुखःप्रभुम् ॥ प्रणिपत्यशिवंदेवमत्यर्थंक्षुधितःप्रभो ॥ ३८ ॥ तदोक्तःशङ्करेणाहोभक्षय
त्वंरणेहतान् ॥ क्षणंविचार्यसगणःक्वाप्यदृष्ट्वारणंतदा ॥३९॥ ब्राह्मणंभक्षितुंप्राप्तःशङ्करेणनिवारितः ॥ ततःकीर्तिमुखेनाथस्वाङ्गंसर्वंचभक्षितम्॥४०॥
बुभुक्षितेनचात्यन्तंनिषिद्धेनचसर्वतः ॥ तत्साहसंतदादृष्ट्वाभक्तिंकीर्तिमुखस्यच ॥ ४१ ॥ तमुवाचेश्वरःप्रीतःप्रासादेतिष्ठमेसदा ॥ त्वच्चित्तरहितो
यश्चभविष्यतिममालये ॥ ४२ ॥ सपतिष्यतिशीघ्रंहीत्युक्तःसोऽन्तर्हितोऽभवत् ॥ शम्भोर्मूर्ध्नितदादेववधूः पुष्पवृष्टिभिः ॥ ४३॥ एवमत्यद्भुतंदृष्ट्वा
सभायांतुत्रिशूलिनः ॥ स्वर्भानुरपिदेवेशंपुनःप्रोवाचविस्मितः ॥४४॥ स्पृशन्तित्वांकथंभावाःस्वाधीनंयोगिनंबलात् ॥ इन्द्रियैःपूज्यसेत्वंहिप्राप्यो
ऽयंविषयैःकथम् ॥ ४५ ॥ ब्रह्मादिलोकपालानांपूजांगृह्णासिसर्वतः ॥ नत्वंपश्यसिकंदेवंत्वंपूजयसिकंचन ॥ ४६ ॥ ईश्वरोऽसिकथंलोकेभिक्षाभोजी
प्रतिष्ठितः ॥ सङ्गोपयसियोगीन्द्रगौरींरम्यांप्रयच्छमे ॥४७॥ स्कन्दलम्बोदराभ्यांत्वंपुत्राभ्यांसहितोऽधुना ॥ भिक्षापात्रंगृहीत्वातुभ्रमनित्यंगृहेगृहे ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥४८॥एवंबहुविधंतत्रराहुराहेश्वरंप्रति ॥ भगवानपितच्छ्रुत्वानोत्तरंकिंचिदब्रवीत्॥४९॥अथेशंमौनिनंत्यक्त्वाराहुर्नन्दिनमब्रवीत् ॥ त्वंमन्त्रीह्यसिसेना
नीर्विकटाननबिम्बधृत् ॥५०॥ एवमाचरितभ्रष्टंत्वंशिक्षयितुमर्हसि ॥ नोचेद्दोषेणेन्द्रइवपतिष्यतिरणेहतः ॥५१॥ इत्याकर्ण्यवचस्तस्यनन्दीविज्ञाप्य
चेश्वरम् ॥ भ्रूसंज्ञयैवसतदामतमाज्ञायशूलिनः॥५२॥ सम्पूज्यप्रेषयामासराहुंनन्दीगणाग्रणीः ॥ अथजालन्धरंगत्वाकथयामासविस्तरात् ॥ स्वर्भानु
स्तस्यवृत्तान्तंगौरीरूपंमनोहरम्॥५३॥इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तरखण्डेनार०जाल०कैलासाद्राहुप्रत्यागमनंनामैकादशोऽध्यायः ॥११॥नारद
उवाच ॥ अथजालन्धरोदूतवचःश्रुत्वाप्रतापवान् ॥ सर्वसैन्यंसमाहूयप्रयाणमकरोत्तदा ॥ ततस्ततःसमेतानांसैन्यानांश्रूयतेध्वनिः॥१॥सस्त्रीन्मन्द
रकन्दरेषुशयितानुत्थापयन्किन्नरान्मेरोर्मन्दरकन्दरेप्रतिरवानुत्थापयन्वारणान् ॥ सिंहानांचततीव्यमुञ्चतपुरःपन्थानमेवंविधस्त्रैलोक्यंबधिरीचकारम
हतःसैन्यस्यकोलाहलः॥२॥ततोदुन्दुभिनादोऽभूत्पीठेजालन्धरेनृप ॥ तन्निनादेनशूराणांप्रियेणमहतातदा ॥३॥ कम्पन्तेगिरयस्तुङ्गाःप्रासादाविचल
न्तिच ॥सप्तसागरगर्भेभ्योनिःसृतादैत्यदानवाः॥४॥सन्नद्धाश्चातिगर्जन्तिनानावाहनसंयुताः ॥ हेषारवोमहानासीद्वाजिनांबाह्यतःपुरः॥५॥रथाङ्गनाथ
सङ्घृष्टाधरासंचलतेऽथवा ॥ चालितैर्गजयूथैश्चपृथ्वीरुद्धासकानना ॥६॥ जालन्धरेरितैर्भीमैरयुतैःस्यन्दनस्थितैः ॥ अश्वार्बुदसहस्रेद्वेअर्बुदंदन्तिना
मपि ॥ ७ ॥ रराजसैन्यलक्षैकंरथिनांसपताकिनाम् ॥ परार्द्धनवतिःकोटचोदृश्यन्तेमुख्यनायकाः ॥ निर्जगाममहासैन्यंछत्रैःसंछाद्यभास्करम् ॥
॥ ८ ॥ आसीतिपिञ्जरपाण्डुपङ्कजवनंश्वेतातपत्रैःक्वचिन्मायूरातपवारणैःक्वचिदभूदुन्नीलनीलोत्पलम् ॥ उन्मेघंक्वचिदूर्ध्वधूलिपटलैर्यस्यप्रयाणे
ऽभवत्सद्वीचिक्वचिदम्बरंसरइवोत्सर्पत्पताकापटैः ॥ ९॥ गजवाजिमयीभूमिर्ध्वजच्छत्रमयंनभः ॥दिक्चक्रंचामरमयंदैत्यसैन्येप्रसर्पति ॥ १० ॥ ततो
जालन्धरोदैत्यःप्रयाणायसमुत्सुकः ॥ स्कन्धेचारोपयञ्छक्तिंनानारत्नविभूषिताम् ॥ ११ ॥ आजगाममहाविष्णुंप्रष्टुंसागरवासिनम् ॥ अभिवाद्य
जगादाथहरिंजालन्धरस्त्विदम् ॥ १२ ॥ भोगार्थंकिंप्रयच्छामितुभ्यंभावुककथ्यताम् ॥ श्रुत्वानारायणोवाक्यमब्धिजस्यमुदान्वितः ॥ १३ ॥
उवाचाकिंकरोमीतिप्रियंसिन्धुसुतेप्सितम् ॥ इत्युक्तःसम्प्रहृष्टोऽथहरिंप्रोवाचसत्वरः ॥ १४ ॥ यामियोद्धुंरणेऽहंत्वंसुखीतिष्ठेहसागरे ॥ लक्ष्म्यादत्ता
क्षतस्तत्रकेशवेनाथपूजितः ॥ १५ ॥ सनिर्गत्यहरेःस्थानात्समुद्रंप्रष्टुमागतः ॥ सोऽर्णवंप्रणिपत्याहताततयास्यामिदूरतः ॥ १६ ॥ नीलकण्ठंरणे
जेतुमनुज्ञांदातुमर्हसि ॥ पुत्रस्यवचनंश्रुत्वायियासोःशङ्करंप्रति ॥ १७ ॥ सिन्धुराजेनसोऽप्युक्तःपुत्रतंतापसंत्यज ॥ भुङ्क्ष्वराज्यंमयादत्तंतापसंत्यज
दूरतः ॥ १८ ॥ अत्यद्भुतःप्रतापस्तेत्वत्तुल्योनास्तिभूमिपः ॥ स्वर्गादधिकतांनीतंत्वयावत्सधरातलम् ॥ ३९ ॥ तवराज्येवसुमतीवैकुण्ठइवराजते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योदेवोदुर्जयोदैत्यैरानीतःसहसश्रिया ॥ २० ॥ ममान्तिकेवत्सवसशङ्करंभिक्षुकंत्यज ॥ एवमुक्तोह्यर्णवेनगिरिजांप्रतिरागवान् ॥ २१ ॥ पितृवाक्य
मवज्ञायचागतस्सुभटान्स्वकान् ॥ सज्जीभूतंतुयुद्धायवृन्दाजालन्धरंजगौ ॥ २२ ॥ वृन्दोवाच ॥ नाथयुद्धंनकर्तव्यंराजेन्द्रकुत्सयोगिना ॥ मनो
निवर्त्यतांपश्यप्रवृत्तंपार्वतींप्रति ॥ २३ ॥ गौरींत्वंवाञ्छसिकस्मात्पार्वतीकिंममाधिका ॥ तपस्विनीनिरालम्बासंसक्तास्थाणवेसदा ॥ २४ ॥ सुता
नुरागिणीवन्ध्याततःकृत्रिमपुत्रिका ॥ वृथास्तुतानारदेनतांत्यजस्वभजस्वमाम् ॥ २५ ॥ इतिवृन्दावचःश्रुत्वाप्रत्युवाचार्णवात्मजः ॥ अदृष्ट्वापार्वती
रूपंमच्चेतोननिवर्तते ॥ २६ ॥ वृन्देत्वयाजनपदोराजधानीप्रपाल्यताम् ॥ स्मतव्योऽहंसदाचण्डियदिमांहन्तिशङ्करः ॥ २७ ॥ इतिभर्तृवचःश्रुत्वा
वृन्दाहाससमन्विता ॥ जगामशिबिकारूढापीठंजालन्धरंतदा ॥ २८ ॥ अथप्रतस्थेकैलासंसिन्धुसूनुर्महाबलः ॥ महापद्मसहस्राणांषष्ट्यासैन्येन
संवृतः ॥ २९ ॥ अत्रान्तरेपरित्यज्यकैलासंशङ्करोगतः ॥ गणपुत्रप्रियायुक्तःकैलासंमानसोत्तरम् ॥ ३० ॥ जालन्धरस्ततःप्राप्तःकैलासंप्रथमेऽहनि॥
सेनाःसंस्थाप्यकैलासआलोकनकुतूहली ॥ ३१॥ दिव्यकेसरमन्दाररजःपुञ्जपरिश्रिताः ॥ शीताम्बुशीकरासारैःप्रभुग्नावान्तिवायवः ॥ ३२ ॥ यत्र
सिद्धाङ्गनापीनस्तनोत्तुङ्गतरङ्गिणः ॥ मन्दारमकरन्दाढ्याःसुन्दरावान्तिवायवः ॥ ३३ ॥ यत्रशोकरुचिस्निग्धपादन्यासंचयोषिताम् ॥ विलोक्य
दानवेन्द्रोऽभून्मनोरथसमाकुलः ॥ ३४ ॥ प्राप्नुवन्तिसुराःप्रीतिंस्वबिम्बालोकहर्षिताः ॥ यत्रकिन्नरकान्तानांसुरतव्यञ्जितप्रभाः ॥ ३५ ॥ विभान्ति
सर्वतस्तत्रमन्दाराशोकपल्लवाः ॥ यत्रशम्भुगणाक्रान्तानानावेलाकुलद्रुमाः ॥ ३६ ॥ भान्तिमन्मथभूपालयशसासुधृताइव ॥ यत्रचन्दनकस्तूरी
गन्धोन्मत्तालिसञ्चयाः ॥ विभान्तिदग्धकन्दर्पनिर्वाणाङ्गारसन्निभाः ॥ ३७ ॥ यत्राङ्गनानांसकलंविलोक्यसौरभ्यमत्युत्तमकान्तिमित्रम् ॥ मन्ये
परिष्वक्तमनोविनोदाकस्तूरिकागाहतिकालिमानम् ॥ ३८ ॥ क्वचित्प्रवरगैरिकासमसमुल्लसत्पङ्कजंलवङ्गदलसन्निभासनचलच्चकोरंक्वचित् ॥
क्वचिद्गिरिसरित्तटीतरणिवत्स्फुरत्कुण्डलंचलन्निचुलमञ्जरीविनयनप्रभृङ्गंक्वचित् ॥ ३९ ॥ क्वचिद्दलितकोकिलाकुलितनूत्नचूताङ्कुरंकुरङ्गकुलसेवितं
प्रबलशालिमूलंक्वचित् ॥ क्वचित्प्रवरसुन्दरैःसुरवधूपदैःपावनंवनंनयतिविक्रियामिहमनोमुनीनामपि ॥ ४० ॥ एवंगुणसमायुक्तंविलोक्यहर
मन्दिरम् ॥ विचित्रंचापिकैलासंसर्वरत्नसमाश्रयम् ॥ ४१ ॥ अत्यन्तविस्मितोदैत्यःप्रोवाचभृगुनन्दनम् ॥ कस्मात्त्वंतापसंतातप्रवदन्तिभवादृशाः ॥
॥ ४२ ॥ तादृशीयस्यसाभार्यागृहमीदृङ्मनोहरम् ॥ तत्रादृष्ट्वावदच्छम्भुंहरःकुत्रगतःकवे ॥ ४३ ॥ कथंममभयाच्चेतिपृष्टःप्रोवाचभार्गवः ॥ देव
शम्भुर्महाशैलमगम्यंमानसोत्तरम् ॥ ४४ ॥ ययौतत्रमहादेवोगन्तुंचान्यैर्नशक्यते ॥ इतिकाव्यवचःश्रुत्वाप्राहदैत्योमहाबलः ॥ ४५ ॥ अहंयास्यामि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवेशंत्वंपुरागच्छभार्गव ॥ इत्युक्त्वाप्रययौतत्रयत्रास्तेशङ्करःस्वयम् ॥४६॥ अपश्यत्तंगिरिवरंसिन्धुजोमानसोत्तरम् ॥ तस्यषष्टिसहस्राणियोजनानां
समुच्छ्रयः ॥ ४७ ॥ सशैलोमानसोराजन्दैत्यसैन्यैःसमावृतः ॥ बहवोदैत्यराजानःशैलमारुरुहुर्द्रुतम् ॥४८॥ छत्रान्धकारंपर्यासीद्वाद्यनादेनवेपथुः ॥
सैन्यकोलाहलस्तेषांपूरयामासरोदसी ॥४९ ॥ अथैवमागतंदृष्ट्वादैत्यसैन्यंमहत्तदा ॥ अत्युच्चेसगिरेःशृङ्गेस्थाप्यगौरींसखीवृताम् ॥५०॥ भगवांश्चगणैः
सर्वैःसन्नद्धैर्युद्धदुर्मदैः ॥ त्रिंशन्महाब्जसाहस्रैःप्रमथानांवृतःशिवः ॥५१॥ उवाचनन्दिनंशम्भुर्गणानामधिपंत्वया ॥ प्रहर्तव्योमहादैत्योवीरोजालन्धरो
रणे ॥५२॥ महाकालादिभिःशूरैर्याहित्वंपरिवारितः ॥ तावदाजौत्वयातस्माद्योद्धव्यमतिपौरुषात् ॥५३॥ यावद्युद्धेनारिजयोममवीरभविष्यति ॥ इति
शम्भोर्वचःश्रुत्वासचसारथिमब्रवीत् ॥५४॥ काकतुण्डरथंमेऽद्यसमानयमहामते ॥ नन्दिनोवचनंश्रुत्वासोऽपिस्यन्दनमाहरत ॥५५॥ द्वात्रिंशदश्वसंयुक्तं
चक्रषोडशसंयुतम् ॥ षष्टिध्वजसमोपेतंद्वात्रिंशद्योजनायुतम् ॥५६॥ सर्वशस्त्रैश्चसम्पूर्णंप्राप्तंसाङ्ग्रामिकंरथम् ॥ नन्दिनश्चक्ररक्षार्थंपुत्रौस्कन्दविनायकौ
॥५७॥ समादिष्टौशङ्करेणसन्नद्धौतौस्ववाहनौ ॥ गणैःपरिवृतोनन्दीवाग्भिःसम्पूज्यचेश्वरम् ॥५८॥ नन्दीरथंसमारुह्यनिर्ययौदानवान्प्रति ॥ विराजते
तस्यमूर्ध्निछत्रंद्वादशयोजनम् ॥ ५९ ॥ यावत्सनिर्ययौनन्दीतावत्तेदानवाःपुरः ॥ शैलोपरिसमारूढादानवाघोरदर्शनाः ॥ ६० ॥ गणानामायुधै
स्तीक्ष्णैर्निहताःपतिताभुवि ॥ हन्यमानागणैर्दैत्यास्तत्यजुर्दूरतोगिरिम् ॥ ६१ ॥ ततोभूमिगतांस्तस्मादवरुह्यशिलोच्चयात ॥ जघ्नुर्दैत्याञ्छितैःशस्त्रै
र्गणाराजन्महाबलान् ॥ ६२ ॥ अमरैराचितंदृष्ट्वारुरुधुर्दैत्यसैनिकाः ॥ ततःसमभवद्युद्धंगणानांदानवैःसह ॥ ६३ ॥ शरवर्षमथात्युग्रंदानवानां
दिवौकसाम् ॥ ततःसमस्तान्मातङ्गाञ्जघ्नुःशिखिमुखारणे ॥ ६४ ॥ रथान्हयान्पदातींश्चकाकतुण्डामहाबलाः ॥ हतानांदैत्यसङ्घानांसङ्गरे
भृशमायिनाम् ॥६५॥ शिरोभिर्गगनंव्याप्तंप्रहसद्भिर्भयावहैः ॥ मुक्तकेशारुणमुखैर्भीमदंष्ट्राविलोचनैः॥६६॥सिंहैःकबन्धजङ्घोरुकटिपृष्ठनिकृन्तनैः॥
चितासर्वत्रवसुधाकबन्धैरुधिरारुणैः ॥ ६७ ॥ ततेविरावःसुमहान्बभूवदैत्येश्वराणांध्वजिनीषुधावताम् ॥ शम्भोर्गणैःपातितसैनिकानांयथार्ण
वानांनदतांयुगक्षये ॥ ६८ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चपं०उत्तरखण्डेनार०जाल०दैत्यसैन्यपराजयोनामद्वादशोऽध्यायः ॥ १२ ॥ नारदउवाच ॥
दैत्यसैन्यंहतंदृष्ट्वागणैर्नन्दिपुरोगमैः ॥ क्रुद्धाःशुम्भादयोदैत्याःसमाजग्मुर्गणान्प्रति ॥ १ ॥ ततःशुम्भोमहादैत्योनन्दिनंप्रत्ययुध्यत ॥
महाकालंनिशुम्भोऽथकालोलोकेश्वरंरणे ॥ २ ॥ पुष्पदन्तंशैलरोमामाल्यवन्तंमहाबलः ॥ कोलाहलोरणेराजन्प्राप्तोमायाबलेनच ॥ ३ ॥
चण्डंभयानकोनामराहुःस्कन्दमधावत ॥ कूष्माण्डंसर्परोमाचघर्घरोमदनंतथा ॥ ४ ॥ शुभ्रंकेतुमुखोहन्तुंययौजम्भोविनायकम् ॥ हासंपाता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लकेतुश्च भृङ्गी शंरोमकण्टकः ॥ ५ ॥ युयुधुः कोटिशो रुद्रगणा दैत्याः परस्परम् ॥ पश्यतोरुभयोस्तत्र स्वामिनोरिति ते युधि ॥ ६ ॥ दृढप्रहारिणो
जघ्नुर्गणा दैत्याः शरैरथ ॥ नन्दी मुमोच तान्बाणान्महासारो यथा नगे ॥७॥ ततः सम्पूरयामास समुखं शुम्भस्य पत्रिभिः ॥ यथा पर्णचयैर्वातो मन्दरस्येव
कन्दरम् ॥ ८ ॥ शुम्भोऽथ कार्मुकं त्यक्त्वा रथात्तं प्रत्यधावत ॥ उत्पाट्य च गिरिं तेन जघान हृदि नन्दिनः ॥ ९ ॥ नन्दिनो हृदयं भित्त्वा चूर्णयित्वा
रथं रणे ॥ पपात भूमौ स गिरिर्वज्रं प्राप्य गिरिं यथा ॥१०॥ मूर्च्छां प्राप्य क्षणात्संज्ञां वेगवान्स पलायितः ॥ महाकालो निशुम्भेन मुद्गरेण हतो हृदि ॥ ११॥
आगत्य दैत्यं गदया जघान मुकुटोपरि॥ तत्प्रहारमचिन्त्याथ निशुम्भोऽपि महाबलः ॥१२॥ तं गृहीत्वा च रणयोर्महाकालं महाबल॥ भ्रामयित्वा करतलाच्चिक्षेप
चननाद च ॥१३॥ स तद्वक्त्रानिलं पीत्वा ननाद रुधिरारुणः ॥ पुष्पदन्तः शैलरोम्णा चाहतो मुष्टिना मुखे ॥१४ ॥ गदया शैलरोमाणं हत्वा भूमौ न्यपातयत्॥
तं दृष्ट्वा पतितं भूमौ गिरिकेतुर्महाबलः ॥ १५ ॥ पुष्पदन्तं महाभीमं मुद्गरेण व्यपोथयत् ॥ पुष्पदन्तोऽथ खड्गेन गिरिकेतोः शिरोऽच्छिनत् ॥१६ ॥ गृहीत्वा
चर्म खड्गं च गिरिकेतोरधावत ॥ शिरस्तं प्राह किं यासि मां त्यक्त्वा समरार्थिनम् ॥ १७ ॥ शिरोहीने च कायेऽस्मिन्किं तु धावन्न लज्जसे ॥ इत्युक्ते शिरसा
तेन कबन्धेन तु पादयोः ॥ १८ ॥ विधृतः पुष्पदन्तश्च कुक्षौ तीक्ष्णासिनाच्छिनत् ॥ निश्चक्रामासुरः कुक्षेः शतशीर्षो महाबलः ॥ १९ ॥ द्विशताक्षि
समायुक्तः शतद्वयभुजाकुलः ॥ भ्रमत्तस्य शिरो राजन्कबन्धोपान्तमागमत् ॥२०॥ तच्छिरः प्राप्तमालोक्य पुष्पदन्तोऽसिनाच्छिनत् ॥ ततो भूकम्पनो
नाम ज्वरो दैत्यो भयावहः ॥ २१ ॥ पुष्पदन्तस्तदा तत्र द्वाभ्यां राजन्विमर्दितः ॥ ज्वरेण तेन च क्लिष्टो दुःसहेनातिवेगिना ॥ २२ ॥ त्यक्त्वा शिवगणः
सङ्ख्यं कम्पमानो गिरिं ययौ ॥ कोलाहलो महाधन्वी माल्यवन्तं शरैस्त्रिभिः ॥ २३ ॥ विव्याध स्कन्धयोर्भाले माल्यवांश्च ततोऽसुरम् ॥ बाणाहतो
माल्यवता शस्त्रैर्नानाविधैः शितैः ॥ २४ ॥ कोलाहलः प्रहृतवान्दर्शयन्नात्मलाघवम् ॥ सोऽपि हेतिं व्यर्थां त्यक्त्वा माल्यवांश्च गणाग्रणीः ॥
॥ २५ ॥ गिरिं गृहीत्वा तेनाजौ कोलाहलमथाहनत् ॥ निश्चक्राम ज्वरस्तस्माज्ज्वलनो नाम भीषणः ॥२६॥ त्रिशीर्षो नवहस्तश्च नवपादोऽतिपिङ्गलः ॥
स ज्वरो मोहयामास माल्यवन्तं स्वतेजसा ॥ २७ ॥ माल्यवान्समरं त्यक्त्वा पराक्रान्तो गिरिं ययौ ॥ चण्डिर्भयानकेनाजौ पाशेन हृदये हतः ॥
॥ २८ ॥ हयो विनिर्गतस्तस्मात्क्षितः सोऽपि च सागरे ॥ कार्त्तिकेयो रणे राहुं शितैर्बाणैः समाहनत् ॥ २९ ॥ आच्छाद्य शरजालैश्च शीघ्रं शक्तिं मुमोच ह
॥ आपतन्तीं महाशक्तिं ज्वलन्तीमिव तेजसा ॥ ३० ॥ दृष्ट्वा राहुः खमुत्पत्य कराभ्यां जगृहे द्रुतम् ॥ स तां शक्तिं गृहीत्वा तु विननादोच्चैः पुनः पुनः ॥ ३१ ॥
स्वर्भानुः शिरसो नोऽपि तस्य शक्त्या जघान तम् ॥ वक्षस्यभिहते शक्त्या तद्देहान्निर्गता सरित् ॥ ३२ ॥ तया सम्प्लावितः पुत्रो महादेवस्य संयुगे ॥ कथ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्चित्सानदीरुद्धासमंपूरोगिरिंययौ ॥ ३३ ॥ श्रुत्वार्णवजोज्वरतःकटककदम्बस्यकर्कशंविरुतम् ॥ सुस्वरवचनविदग्धमपिकोकिलापतिंनसस्मार
॥ ३४ ॥ शरैःकिरन्तंदहनमसिनाव्वर्बरोऽवधीत् ॥ कूष्माण्डोनिहतोमूर्ध्निसर्परोम्णाथमुष्टिना ॥ ३५ ॥ पातालकेतुनाहासोमुद्गरेणसमाहतः ॥
तस्यदेहाद्विनिष्क्रम्यहस्तीमुद्गरमाभुनक् ॥ ३६ ॥ शुण्डायांमुष्टिघातेनहतःपातालकेतुना ॥ आयुधैर्जर्जरंचक्रेभृङ्गीशंरोमकण्टकः ॥ ३७ ॥
भृङ्गीशोऽपिरणाद्भीतस्त्वरन्नेवगिरिंययौ ॥ सहसाधूम्रवर्णश्चशुभ्रःकेतुमुखेऽपतत् ॥ ३८ ॥ गणंगिलितवान्दैत्योमहाकायोमहाननः ॥ हाहाकारो
महानासीद्गिलितेकेतुनारणे ॥ ३९ ॥ जृम्भस्यनिशितैर्बाणैश्छिन्नाङ्गोऽथविनायकः ॥ शुण्डादण्डंपरशुनातस्यचिच्छेददन्तिनः ॥ ४० ॥ जृम्भा
सुरोजघानाथशक्त्यालम्बोदरोदरम् ॥ मूषकोऽपिशरैर्भिन्नःप्रविवेशगुहामुखम् ॥४१॥ विनायकःप्रहारार्त्तोविललापाकुलोरणे ॥ हामातस्तातमहाभ्रात
र्हामूषकममप्रिय ॥ ४२ ॥ गणेशक्रन्दितंश्रुत्वाभगवत्यातयातदा ॥ समेत्यकूटादन्यस्मात्पार्वत्योक्तःशिवस्तदा ॥ ४३ ॥ हेरम्बोवध्यतेदैत्यैः
स्कन्दोऽपिविनिपातितः ॥ शिवकिंक्रीडसेशैलेरक्षपुत्रौगणानपि ॥४४॥ सदाशूलादिशस्त्राणांधृतानामद्यवैक्षणः ॥ अथगौर्यावचःश्रुत्वावीरभद्रंशिवो
ऽब्रवीत् ॥४५॥ वृषःसज्जीयतांशीघ्रमित्युक्तस्सतदाकरोत् ॥ बबन्धमुकुटंतस्यशृङ्गयोर्भास्करप्रभम् ॥४६ ॥कण्ठेघण्टाशतंबद्धाकर्णयोर्दर्पणौधृतौ ॥
स्कन्धेचकिङ्किणीजालंचरणेनूपुरंमहत् ॥ ४७ ॥ पुच्छेचामरसाहस्रंतस्यपाशाष्टकंमुखे ॥ कल्याणीचतदादेवीशर्वपार्श्वेव्यवस्थिता ॥ ४८ ॥
पाशाष्टकेनसंयुक्तातत्रखड्गधराम्बिका ॥ न्यस्तानिसर्वशस्त्राणिसवृषःसज्जितोबभौ ॥ ४९ ॥ पार्वत्याभूषितःसोऽथनिजयाघण्टमालया ॥ कृतंच
तिलकंदेव्याप्रोक्तःसत्कृतिपूर्वकम् ॥५०॥ हरस्त्वयानमोक्तव्योवृषेन्द्ररणसङ्कटे ॥ आगन्तव्यमरीञ्जित्वाशम्भुनासहसङ्गरे ॥ ५१ ॥ इतिश्रुत्वावचो
देव्याहरोवृषमथारुहत् ॥ धृत्वायुधसहस्रंतुनिजालङ्कारभूषितः ॥ ५२ ॥ रणंगच्छामितांप्राहपार्वतींप्रतिसादरम् ॥ त्वंतिष्ठसिस्वरूपेणएकाकिन्यपि
सस्पृहा ॥ ५३ ॥ भामिनीदुरभिप्रायादानवाहिसमागताः ॥ तस्मात्त्वयात्मनैवात्मारक्षणीयोवरानने ॥ ५४ ॥ इत्युक्त्वावृषभारूढोययौरुद्रोरणा
ङ्गणम् ॥ त्रिंशन्महाब्जसाहस्रैःप्रमथानांवृतःशिवः ॥ ५५ ॥ वीरभद्रोरथेनाशुसिंहयुक्तेनसत्वरः ॥ वामपार्श्वंमहेशस्यशूरोरक्षतिपार्थिव ॥ ५६ ॥
मणिभद्रोऽश्वयुक्तेनरथेनपरवीरहा ॥ दक्षिणंधूर्जटेःपार्श्वंसंरक्षतिधनुर्द्धरः ॥५७ ॥ तुङ्गादुत्तीर्यशैलेन्द्राद्रणंप्राप्तोगणैःसह ॥ दृष्ट्वाजगर्जुस्तेदैत्यामहेशानं
वृषस्थितम् ॥ ५८ ॥ ततोमहान्निनादोऽभूद्दैत्यप्रमथसेनयोः ॥ तयोरभून्मिथोराजन्सप्रमर्दोऽथदारुणः ॥ ५९ ॥ ततोनन्दीमहाकालःकालस्कन्दौ
महाबलः ॥ माल्यवान्पुष्पदन्तश्चवृषलीस्वर्णदन्तिकः ॥६० ॥ चण्डीशोमदनश्चण्डःकूष्माण्डोगुप्तलोमकः ॥ येयेपूर्वंरणेभग्नाःप्राप्तास्तेरणसङ्कटम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ६१ ॥ शिवस्यपुरतोदैत्यायुयुधुस्तेमहाबलाः ॥ गणदानवयोधानांसङ्ग्रामोऽभूद्भयावहः ॥ ६२ ॥ ततोगणानांविद्राव्यसैन्यंतेचमहाबलाः ॥
रणेसंवेष्टयामासुःशरौघैःसर्वतःशिवम् ॥ ६३ ॥ शूलैःकुन्तैर्गदाभिश्चमुद्गरैःपरिघैरपि ॥ इन्द्रियाणियथात्मानंविषयैःपञ्चपञ्चभिः ॥ ६४ ॥ जघा
नाथरणेदैत्याञ्छम्भुर्बाणैःसुदारुणैः ॥ यथाश्वमेधःपापानिहन्तिस्नानेनतत्क्षणात् ॥६५॥ इतिश्रीपाद्मेमहापुराणेपञ्चपं०उत्तर० ना०युधि०जाल०श्री
महादेवरणसमागमनंनामत्रयोदशोऽध्यायः॥ १३ ॥ नारदउवाच ॥ ततोजालन्धरःश्रुत्वादैत्यकोलाहलंरणे ॥ आजागमरथारूढोयत्रदेवःसदाशिवः
॥ १ ॥ सारथिंखड्गरोमाणंकोपात्सत्वरमब्रवीत् ॥ सम्प्रेषयरथंशीघ्रंसहस्रहययोजितम् ॥ २ ॥ हन्मितंतापसंशौर्याञ्जटाभस्मास्थिभूषितम् ॥
वृषारूढस्यकाशक्तिःपङ्गोर्युद्धेमयासह ॥ ३ ॥ इत्युक्त्वाखड्गरोमाणमाभाष्यचतथोद्धतः ॥ गृहीत्वाकार्मुकंघोरंरथेनाधावतद्भुतम् ॥ ४ ॥ तंरुरोधतदा
यान्तंवीरभद्रःशितैःशरैः ॥निरुच्छ्वासीकृतेनापिसकायेनशरैर्वृतः ॥ ५ ॥ देवैर्यद्यपितुल्योऽभूद्भूतेशस्यपरिग्रहः ॥ तथापिकिंकपालानितुलांयान्ति
कलानिधेः ॥ ६ ॥ विव्याधमणिभद्रोऽपिशरैःसागरनन्दनम् ॥ पाशेनमणिभद्रंतुहत्वोवाचेश्वरंवचः ॥ ७ ॥ एहियोद्धुंमहादेवशस्त्राभ्यासोऽस्तिते
यदि ॥ त्वंमांप्रहरनत्वाहमादौहन्मिजटाधरम् ॥८॥ इतिब्रुवन्तंतंगवाद्वीरभद्रोऽथसायकैः ॥ पूरयामाससङ्क्रुद्धोयथापञ्जरंविःकरैः ॥९॥ मणिभद्रो
ऽथगदयासैन्यंतस्यसमाहनत् ॥ रथोपरिरथंवीरतुरगंतुरगोपरि ॥ १० ॥ गजोपरिगजंहत्वापातयामासभूतले ॥ रक्तपङ्कारुणाभूमिःसञ्जातादुर्गमा
क्षणात् ॥ ११ ॥ शैलाच्चगणमुख्याश्चदानवाञ्जघ्नुराहवे ॥ पतन्तिदानवाःशूरागतप्राणामहीतले ॥ १२ ॥ रुण्डदोर्दण्डमुण्डैश्चकरिपृष्ठकरोरुभिः ॥
पतन्तिदानवाःशूराःपूरितावसुधानृप ॥ १३ ॥ एवंविधंरणेदृष्ट्वाहरमत्यन्तदुर्नयम् ॥ भुवनेचतथान्यानिदृष्ट्वाँल्लक्षणानिसः ॥ १४ ॥ तेजोऽन्यदेव
नक्षत्रशशाङ्कसकलादिषु ॥ उद्घाटितजगत्कोशमन्यदेववर्वेर्महः ॥ १५ ॥ भग्नःपुनश्चिन्तितवांस्ततोजालन्धरोनृप ॥ नदृष्टासामयागौरीयांमामाहाति
नारदः ॥ १६ ॥ साम्प्रतंशाश्वतेस्थानेकथंद्रक्ष्याम्युमांस्थिताम् ॥ तांहिद्रष्टुंव्रजाम्यादौपश्चाद्योत्स्यामिशम्भुना ॥ १७॥ चिन्तयित्वेतिमनसादैत्यं
प्राहार्णवात्मजः ॥ शुम्भंचण्डजयेवीरममतुल्यपराक्रम ॥ १८ ॥ धृत्वामत्सदृशंरूपंसङ्ग्रामंकर्तुमर्हसि ॥ तवयुद्धस्यभारोऽयंशिबिरस्यबलस्य
च ॥ १९ ॥ अहंयास्यामितांद्रष्टुंगौरींमच्चित्तहारिणीम् ॥ इत्युक्त्वाथददौतस्मैस्वाङ्गादुत्तार्यमण्डनम् ॥ २०॥ वर्मशस्त्रादिकंदत्त्वारथंसारथिसंयुतम् ॥
दुर्वारणेनसहितःसैन्यंमुक्त्वोदधेःसुतः ॥ २१ ॥ अलक्षितस्ततोगत्वागुहांगुप्तांतुपार्थिव ॥ मानसोत्तरशैलस्यहररूपंदधारसः ॥ २२ ॥ धृत्वादुर्वारणो
रूपंनन्दिनःसदृशंतथा ॥ अथारुरुहतुःशैलंछद्मशङ्करनन्दिनौ ॥२३ ॥ यत्रास्तिशिखरेगौरीसखीभिःसहितानृप ॥ तमायान्तंशरैर्भिन्नंस्कन्धमालम्ब्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्दिनः ॥ २४ ॥ रक्ताक्तमम्बरंदृष्ट्वाभवानीविस्मिताभवत् ॥ सख्यस्तस्याजयाद्यास्ताजग्मुस्तंसम्भ्रमान्विताः ॥ २५ ॥ शङ्करस्यान्तिकंगत्वा
पप्रच्छुस्तांसुदुःखिताः ॥ किंजातंतवदेवेशकेनत्वंसङ्गरेजितः ॥ २६ ॥ सशल्यस्त्वंकथंनाथसंसारीवप्ररोदिषि ॥ इत्युक्तःप्रददौताभ्योभूषणानिपृथक्पृ
थक् ॥ २७ ॥ उत्तार्यशनकैरङ्गाद्वासुकिप्रभृतीनिच ॥ गणेशस्कन्दशिरसीच्छिन्नेकुक्षौविलोक्यच ॥२८॥ हास्कन्दहागणेशेतिहारुद्रेत्यम्बिकारुदत् ॥
तस्याःसख्यस्ततःसर्वारुरुदुःशोककर्शिताः ॥२९॥ अत्राब्रवीज्जयांनन्दीत्वमेनंपरिपालय ॥ मणिभद्रोवीरभद्रःपुष्पदन्तश्चवीर्यवान् ॥३०॥ दम्भनो
धूम्रतिमिरःकूष्माण्डाद्यारणेहताः ॥ चण्डीभृगीकिरीटिश्चमहाकालश्चशृङ्खली ॥३१॥ चण्डीशोगुप्तनेत्रश्चकालाद्याश्चहतारणे ॥ विनायकस्यस्कन्दस्य
शिरसीभ्रमतामया ॥३२॥ दृष्टेमहारणेदेविइत्युक्त्वाथपुरोऽक्षिपत् ॥ तच्छ्रुत्वानन्दिनेवाक्यंशिरसीगृह्यपुत्रयोः ॥३३ ॥ पार्वतीविललापोच्चैःपुत्रपुत्रेति
जल्पती ॥ तारकारेकथंयुद्धेहतस्त्वंसिन्धुसूनुना ॥ ३४ ॥ त्वंहित्रिवासरोदेवैःसैनापत्येऽभिषेचितः ॥ तदात्वयाकथंवीरतारकाख्योनिपातितः
॥ ३५ ॥ नीलकण्ठेनकिंत्यक्तोयतस्त्वंपतितोभुवि ॥ स्नुषामुखंनदृष्टंचमयापुत्रावभाग्यया ॥ ३६ ॥ नभोगावत्सतेभुक्ताःसंसारस्यापियेऽभवन् ॥
तातहेरम्बविघ्नेशलम्बोदरगजानन ॥ ३७ ॥ रणाङ्गणेकेनपुत्रसिद्धैःपूज्योनिपातितः ॥ वाहनोऽसौकुतोवत्ससमूषकःकेनहिंसितः ॥ ३८ ॥ एवं
विलपतीगौरीशिवंप्राहसुदुःखितम् ॥ साक्षाद्रुद्रोऽसिदेवेशहरस्त्वंमाभयंकुरु ॥ ३९ ॥ वृषभःक्वगतोदेवहतोजालन्धरेणवै ॥ शरजर्जरदेहस्यकिंकरोमि
प्रियंतव ॥ ४० ॥ ततःश्रुत्वावचोदेव्यानिःश्वस्योवाचशङ्करः ॥ दीर्घंविनिहतौपुत्रौवृथाशोचसिकिंप्रिये ॥ ४१ ॥ अधुनातेऽङ्गसङ्गेनदेवि
मांत्रातुमर्हसि ॥ शङ्करस्यवचःश्रुत्वासमयोचितमातुरम् ॥ प्रत्युवाचाम्बिकादेवंबभाषेनोचितंवचः ॥ ४२ ॥ महाविषादेपतितेभयेचक्रुतेसमाधौव
मनेमहाज्वरे ॥ श्राद्धेप्रयाणेगुरुवृद्धसन्निधौरतिंबुधाःशङ्करवर्जयन्ति ॥ ४३ ॥ कथंमांदुःखदुःखार्तांपुत्रशोकेनपीडिताम् ॥ म्लानांबाष्पपरिम्लानां
सम्प्रार्थयसिचातुराम् ॥ ४४ ॥ भवान्याइतिवाक्यानिश्रुत्वामायामहेश्वरः ॥ उवाचस्वार्थमुद्दिश्यगौर्यारूपेणमोहितः ॥ ४५ ॥ पुरुषस्यार्तियुक्त
स्यनयच्छन्तिरतिंस्त्रियः ॥ तथैवरौरवेघोरेपतिष्यन्तिनसंशयः ॥ ४६ ॥ गणशून्यःपुत्रशून्योधीशून्योऽहंवरानने ॥ साम्प्रतंगृह्यशून्योऽहंसर्वशून्यो
ऽस्मिभामिनि ॥ ४७ ॥ सजीवितविहीनोऽहंत्वांप्रष्टुमिहचागतः ॥ स्वंगृहंतुप्रविश्याशुत्यजामिप्रकृतिंस्वकाम् ॥ ४८ ॥ उत्तिष्ठनन्दिन्संयावस्तीर्थे
भवपुरःसरः ॥ त्वंयाहिस्वेच्छयाकान्तेप्रकृतिंस्वांपरित्यज ॥ ४९ ॥ इतिमायामहेशस्यवचःश्रुत्वाम्बिकाततः ॥ दीर्घंदध्यौमहाश्वासंशोकेनच
जडीकृता ॥ ५० ॥ तस्यैवंपरमेक्षोभेकिञ्चिन्नोवाचसाक्षणम् ॥ ययासंमोहितंसर्वजगत्स्थावरजङ्गमम् ॥ सैवसंमोहितातेननजानेदुःखमात्मनः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ५१ ॥ इतिश्रीपाद्ममहापुराणेपञ्चप०उत्त०नार०जाल०मायामहेशयुधि०गमनंनामचतुर्दशोऽध्यायः ॥१४॥ युधिष्ठिरउवाच ॥ इतिमायामहेशेन
मोहितागिरिजायदा ॥ अतःकिंसमभूद्ब्रह्मंस्तन्माख्यातुमर्हसि ॥ १ ॥ नारदउवाच ॥ क्षीराब्धौतुशयानस्यचुक्षोभहृदयंहरेः॥ अकस्मादेवराजेन्द्रन
यनेऽश्रुपरिप्लुते ॥ २ ॥ दृष्ट्वातन्महदुत्पातलक्षणंभगवांस्ततः ॥ उत्थायशेषपर्यङ्कान्मांचवायुंविलोक्यच ॥ ३ ॥ किंकार्यमितिगोविन्दस्तत्रागा
रिमथास्मरत् ॥ सचाग्रेस्मृतिमात्रेणतस्थौबद्धाञ्जलिःप्रभोः ॥ ४ ॥ विनतानंदनंदृष्ट्वापुरतःप्राहकेशवः ॥ सुपर्णतत्रगच्छत्वंयत्रयुद्धंप्रवर्तते॥ ५ ॥ हतो
जालन्धरोवीरोहरोवातेनमोहितः ॥ दृष्ट्वातंशीघ्रमागत्यकथयस्वममाखिलम्॥६॥जालन्धरेशयोर्युद्धंद्रष्टुंशक्तस्त्वमेवहि॥कोऽन्योमहाहवेतस्मिञ्ज्ञात्वा
यातिशरीरवान् ॥ ७॥ कदाचिद्दुर्गमंतत्रयुद्धंशस्त्रास्त्रवृष्टिभिः ॥ अथत्वंबाणसञ्चारंगत्वापिहितविग्रहः ॥ ८ ॥ सन्दृश्यपार्वतीवृत्तिंशीघ्रमायातुमर्हसि
दैत्यमायानिरासार्थंविचिन्त्यभगवांस्त्वरन् ॥ ९ ॥ गुटिकांसर्वसिद्धांचगरुडायददौहरिः ॥ अनयानश्रमोवीरतथेत्युक्त्वामुखेऽक्षिपत् ॥ १० ॥ एवं
सम्प्रेरितःपत्रीहरिंकृत्वाप्रदक्षिणम् ॥ निश्चक्रामखमाविश्यजगामाद्भुतवेगवान् ॥११॥ तत्रगत्वारणंघोरंदैत्यसङ्घैःमुहुःसहम् ॥ दृष्टवानखिलेनासौन
किञ्चिज्ज्ञातवान्किल ॥ १२ ॥ तस्मादुत्पत्यवेगेनगतोऽसौमानसोत्तरम् ॥ शैलंतुङ्गतरंदुर्गमगम्यंमरुतामपि ॥ १३ ॥ विलोकयन्नददृशेगौरीस्थानं
पतङ्गराट् ॥ तत्रागत्यभुजङ्गारिर्ध्वनिंसंश्रुतवान्किल॥१४॥गत्वासमीपेददृशेमायापशुपतिंततः ॥ गरुडोगुटिकांक्षिप्यमुखेनश्रममापसः॥१५॥ज्ञात्वा
बुद्ध्वाथदैत्योऽयमितिनायंवृषध्वजः ॥ हाकष्टमितिचोक्त्वाचरुदन्नागत्यचार्णवम् ॥ १६ ॥ कथयामासवृत्तान्तंपुरतःकैटभद्विषः ॥ देवजाल
न्धरेणायंहरोदेवोविडम्बितः ॥ १७ ॥ उमाप्रतारितातेनपापेनच्छद्मरूपिणा ॥ सुरस्त्वंयदिगोविन्दसमरंप्रतियाह्यतः ॥१८॥ मायायुद्धंतुदेवेशकुरु
जालन्धरंप्रति ॥ तस्यराज्ञीमयादृष्टापीठेजालन्धरेशुभे॥१९॥प्रासादभूम्यांक्रीडन्तीवाद्यगीतादिवर्त्तनैः ॥ सासुन्दरतरागौर्यारम्भोर्वश्योःशतादपि॥
॥ २० ॥ नेदानींमानुषेलोकेनपातालेषुतत्समा ॥ भार्यातेनसमावेश्यानारीणांकाकथाहरे ॥ २१ ॥ यस्तांस्पृशतिदेहेनसकृतार्थःपुमान्भवेत् ॥ तव
श्यालकपत्नीचहरत्वंतांरमप्रियाम् ॥ शङ्करस्योपकारंचकुरुचैवात्मनःसुखम् ॥ २२ ॥ नारदउवाच ॥ श्रुत्वाताक्ष्यस्यवचनंतंनिर्भर्त्स्यरमाप्रियः ॥
सम्यग्व्यवस्यचोपायंविससर्जद्रुतंद्विजम् ॥ २३ ॥ श्रियंप्रतार्यसञ्छाद्यमञ्चकेपीतवाससा ॥ निर्गतोऽन्येनरूपेणयोगमायाबलेचन ॥ २४ ॥ वृन्दारि
कानुरागेणमोहितोमधुसूदनः ॥ दृष्ट्वाहरिंतुगच्छन्तंप्रतिच्छन्नंयुधिष्ठिर॥२५॥शेषोऽप्यन्यतमेनासौरूपेणागत्यकेशवम् ॥ जगादभक्त्यात्वंतिष्ठमामनु

१ स्वन्धिरत्नार्षः इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञातुमर्हसि॥२६॥किंकरोमिक्कगच्छामिब्रूहिकार्यंजनार्दन ॥ सदातवमुखंदृष्ट्वाभोक्ष्यामीतिभवेत्सुखम्॥२७॥श्रीभगवानुवाच ॥ जालन्धरस्त्रियंरम्यां हरिष्येहरकारणात् ॥ पार्वत्याश्चोपकारायसञ्छाद्यस्वात्मनस्तनुम् ॥२८॥ एहियामोवयंबन्धोकान्तरंदुरतिक्रमम् ॥ वृन्दाकर्षणसिद्ध्यर्थमित्युक्त्वातौ वनंगतौ॥२९॥ततोविष्णुश्चशेषश्चजटावल्कलधारिणौ ॥ आश्रमंचक्रतुःपुण्यंसर्वकामफलप्रदम्॥३०॥तयोःशिष्याःप्रशिष्याश्चबभूवुःकामरूपिणः॥ सिंहव्याघ्रवराहाश्चऋक्षवानरमर्कटाः ॥ ३१ ॥ अथतस्मिन्वनेवृन्दांमन्त्रेणाकर्षयद्धरिः ॥ तस्याहृदयसन्तापंचकारमधुसूदनः ॥ ३२ ॥ एतस्मिन्नन्तरेराज्ञीतापमुग्रमुपागता ॥ चामराश्चालयामासदिव्यस्त्रीकरचालितान् ॥३३॥ प्रियस्यागमनंतन्वीचिन्तयन्तीमुहुर्मुहुः ॥ चन्दनागुरुलिप्ताङ्गीमूर्छांयातिहिमसत्वरम् ॥ ३४ ॥ तुर्ययामेविभावर्याश्चतुर्दश्यांनृपाङ्गना ॥ स्वप्नंददर्शभयदंवैधव्यभयसूचकम् ॥ ३५ ॥ जालन्धरशिरःशुष्कंमर्दितंपाण्डुभस्मना ॥ गृध्रेणकृष्टनयनंछिन्नकर्णाग्रनासिकम् ॥ ३६ ॥ मुक्तकेशीकरालास्याकृष्णवर्णारुणाम्बरा ॥ चखादकालीरक्तास्याहस्तेविधृतखर्परा ॥ ३७ ॥ ईदृशंददृशेस्वप्नंतथात्मानंविडम्बितम् ॥ दैत्यक्षयगुणोपेतंसाददर्शनृपाङ्गना ॥ ३८ ॥ ततःप्रबुद्धाऽसुरराजपत्नीगीतेनवाद्येनचमागधानाम् ॥ गेयप्रबन्धैःस्तवनैर्वचोभिर्वंशस्तवैःकिम्पुरुषप्रपाठितैः ॥ ३९ ॥ ततस्तान्सकलाञ्छ्रान्तान्धनंदत्त्वाप्रसादजम् ॥ निवार्यविप्रानाहूयस्वप्नंदृष्टंन्यवेदयत् ॥ तंस्वप्नंब्राह्मणाःश्रुत्वातामूचुःशास्त्रपारगाः ॥ ४० ॥ द्विजाऊचुः ॥ देविदुःस्वप्नमत्युग्रमचिन्त्यंभयदायकम् ॥ देहिदानंद्विजातिभ्योह्यचिन्त्यभयनाशकम् ॥ ४१ ॥ धेनूर्वासांसिरत्नानिगजांश्चाभरणानिच ॥ ब्राह्मणाःपरिसन्तुष्टाःसिषिचुस्तांनृपस्त्रियम् ॥ ४२ ॥ अभिषिक्तापिसावृन्दाज्वरेणपरितप्यते ॥ विसृज्यविप्रप्रवरान्प्रासादमगमत्तदा ॥ ४३ ॥ तत्रस्थितापिस्वपुरंददृशेदीप्तमङ्गला ॥ ततःस्वकर्मणाराजन्नाकृष्टाहरिणातुसा ॥ ४४ ॥ नशशाकगृहेस्थातुंततोराज्ञीवनंययौ ॥ रथमश्वतरीयुक्तंस्मरदूतीसखीवहम् ॥ ४५ ॥ समारुह्यक्षणात्तन्वीप्राप्तासौभाग्यकाननम् ॥ नानावृक्षसमायुक्तंनानापक्षिगणान्वितम् ॥ ४६ ॥ पुष्पप्रस्रवणोपेतंस्वर्गनारीविभूषितम् ॥ मन्दानिलप्रवेशोऽस्तियत्रनान्यस्यकस्यचित् ॥४७॥ वनंवृन्दारिकादृष्ट्वासस्मारपतिमात्मनः ॥ कथंजालन्धरंवीरंद्रक्ष्यामिप्राप्तमग्रतः ॥ ४८ ॥ सातत्रनसुखंलेभेविवेशान्यतमंवनम् ॥ सखीरथसमायुक्ताविष्णुमायाविमोहिता ॥ ४९ ॥ ततोविलोकयामासविपिनंतरुसङ्कुलम् ॥ उरुपाषाणसंरुद्धंकुरङ्गाक्षीभयावहम् ॥ ५० ॥ सिंहव्याघ्रभयाकीर्णंशृगालव्यालसेवितम् ॥ द्रुमैःस्पृशच्छिखाकारैर्गुहासुध्वान्तपूरितम् ॥ ५१ ॥ वनंविलोक्यसाभीमंचकिताचपलेक्षणा ॥ स्मरदूतींसखींवृन्दाजगादरथवाहिनीम् ॥ रथंप्रेषयमेशीघ्रं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्मरदूतिगृहंप्रति ॥ ५२ ॥ स्मरदूतिरुवाच ॥ नाहंजानामिदिग्भागंनयामिक्वरथंसखि ॥ श्रान्ताअश्व्यःप्रवर्तन्तेमार्गश्चात्रनविद्यते ॥ ५३ ॥
प्रेरितोदैवकेनापिस्यन्दनोयातुयत्रच ॥ अत्रकोऽपिचमांसादोभक्षयिष्यतिनान्यथा ॥ ५४ ॥ इत्युक्तासाद्रुततरारथंशीघ्रमवाहयत् ॥ सरथो
वेगतःप्राप्तोयत्रसिद्धामुदान्विताः ॥ ५५ ॥ तत्रसिद्धाश्चदृश्यन्तेकाननंचभयावहम् ॥ नयत्रप्रबलोवायुर्नशब्दःपक्षिणामपि ॥ ५६ ॥ नच
तेजःप्रकाशोऽस्तिनजलंप्रदिशोदिशः ॥ तत्रप्राप्तरथस्यापिलक्षणेऽभूद्विपर्ययः ॥५७॥ अश्वतर्योनहेषन्तेनचशब्दश्चनेमिजः ॥ नचलन्तिपताकास्ता
घण्टिकानक्वणन्तिच ॥५८ ॥ नस्वनन्तिमहावण्टाध्वजस्तम्भेनिवेशिताः ॥ विलोक्यैवंविधंप्राहतत्रवृन्दासखींप्रति ॥ ५९ ॥ स्मरदूतिक्वयास्यामो
व्याघ्रसिंहभयंवनम् ॥ नगृहेनसुखंराज्येममजातंवनेसखि ॥ ६० ॥ स्मरदूतिरुवाच ॥ शृणुष्वदेविपश्यत्वंपुरःशैलोऽतिदारुणः ॥ दृष्ट्वा
यतोनगच्छन्तितुरङ्ग्योभयविह्वलाः ॥ ६१ ॥ तस्यास्तद्वचनंश्रुत्वासन्त्रस्तासानृपाङ्गना ॥ दृष्ट्वाहारंस्वकण्ठस्थंस्यन्दनाच्छीघ्रमुत्थिता ॥ ६२ ॥
एतस्मिन्नन्तरेप्राप्तोराक्षसोभीषणाकृतिः ॥ त्रिपादःपञ्चहस्तश्चसप्तनेत्रोऽतिदारुणः॥६३॥ पिङ्गलोव्याघ्रकर्णश्चसिंहस्कन्धस्तथाननः ॥ विहङ्गेशसमाः
केशालम्बन्तेरुधिरारुणाः ॥ ६४ ॥ तंदृष्ट्वापद्मकोशाङ्गीसहसासभयाभवत् ॥ नेत्रेकराभ्यामाच्छाद्यचकम्पेकदलीवसा ॥ ६५ ॥ प्रतिहारीप्रतोदं
तुत्यक्त्वाराज्ञीमभाषत ॥ भीतांमांत्राहिदेवित्वमयंधावतिभक्षितुम् ॥ ६६ ॥ एतस्मिन्नन्तरेप्राप्तोराक्षसोरथसन्निधौ ॥ रथमुत्क्षिप्यहस्तेनभ्रामयं
श्चाश्विनीयुतम् ॥ ६७ ॥ साराज्ञीपतिताभूमौमृगीव्याघ्रभयादिव ॥ स्मरदूतीतरोर्मूलेच्छिन्नाऽशोकलतायथा ॥ ६८ ॥ ततस्ताश्चाश्विनीःसर्वाभक्ष
यामासराक्षसः ॥ तेनराज्ञीधृताहस्तेसिंहेनैणवधूरिव ॥ ६९ ॥ तामुवाचततोरक्षःप्राणैस्तेकारणंयदि ॥ तवभर्ताहतःसङ्ख्येहरेणेतिश्रुतंमया ॥७० ॥
मामासाद्याद्यभर्तारंचिरंजीवाकुतोभया ॥ पिबाथवारुणींस्वाद्वींमहामांससमन्विताम् ॥ शृण्वन्तीतिवचोराज्ञीगतसत्त्वेवचाभवत् ॥ ७१ ॥ इति
श्रीपाद्मेमहापुराणेपञ्चप०उत्तरखण्डेजाल०श्रीमन्माधवमायाकथनंनामपञ्चदशोऽध्यायः ॥ १५ ॥ नारदउवाच ॥ नारायणस्तदादेवोजटावल्कल
धार्यथ ॥ द्वितीयोऽनुचरस्तस्यह्यायायौफलहस्तवान् ॥१॥ तौदृष्ट्वास्मरदूतीसाविललापमृगेक्षणा ॥ तच्छ्रुत्वावचनंतस्याःप्रोचतुस्तांचताबुभौ ॥ २ ॥
भयंमागच्छकल्याणित्वामावांत्रातुमागतौ ॥ वनंघोरंप्रविष्टासिकथंदुष्टनिषेवितम् ॥ ३ ॥ एवमाश्वास्यतांतन्वींराक्षसंप्राहमाधवः ॥ मुञ्चेमामधमा
चारमृद्वङ्गींचारुहासिनीम् ॥ ४ ॥ रेरेमूर्खदुराचाराकिंकर्तुंत्वंव्यवस्थितः ॥ सर्वस्वंलोकनेत्राणामाहारंकर्तुमुद्यतः ॥ ५ ॥ भवपुण्यप्रभावेयंहंस्यतां
मण्डनंभुवः॥ अद्यलोकंनिरालोकंकन्दर्पदर्पवर्जितम् ॥६॥ करिष्यस्यधुनात्वंचहत्वावृन्दारिकांवने ॥ तस्मादिमांविमुञ्चाशुसुखप्रासाददेवताम् ॥७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिश्रुत्वाहरेर्वाक्यंराक्षसःकुपितोऽब्रवीत् ॥ समर्थस्त्वंयदितदामोचयाद्यैवमत्करात् ॥ ८ ॥ इत्युक्तमात्रेवचनेमाधवेनक्रुधेक्षितः ॥ पपातभस्मसाद्भू
तस्त्यक्त्वावृन्दांसुदूरतः ॥ ९ ॥ अथोवाचप्रमुग्धासामाययाजगदीशितुः ॥ कस्त्वंकारुण्यजलधिर्येनाहमिहरक्षिता ॥ १० ॥ शारीरंमानसंदुःखं
सन्तापंतपसांनिधे ॥ त्वयामधुरयावाचाहृतंराक्षसनाशनात् ॥११॥ तवाश्रमेतपःसौम्यकरिष्यामितपोधन ॥१२॥ तापसउवाच ॥ भरद्वाजात्मज
श्चाहंदेवशर्मेतिविश्रुतः ॥ विहायभोगानखिलान्वनंघोरमुपागतः॥१३॥अनेनबटुनासार्धममशिष्येणकामगाः ॥ बहुशःसन्तिचान्येऽपिमच्छिष्याः
कामरूपिणः ॥ १४ ॥ त्वंचेन्ममाश्रमेस्थित्वाचिकीर्षसितपःशुभे ॥ एहिराइयपरंयामोवनंदूरस्थितंयतः ॥ १५ ॥ इत्युक्त्वाराजपत्नीं
तांययौप्राचींदिशंहरिः ॥ वनंप्रेतपिशाचाढ्यंमन्दगत्यानराधिप ॥ १६ ॥ वृन्दारिकाश्रुपूर्णाक्षीतस्यपृष्ठानुगाययौ ॥ स्मरदूतीचतत्पृष्ठेमांप्रतीक्षे
तिवादिनी ॥ १७ ॥ अत्रान्तरेदुराचारःकोऽपिपापाकृतिर्वने ॥ जालंप्रसारयामासतद्यदाजीवपूरितम् ॥ १८ ॥ ततःसंकोचयामासतज्जालं
पापनायकः ॥ जालस्थांस्तुतदाजीवानुपाहृत्यमुमोचह ॥ १९ ॥ सचव्याधःस्त्रियौदृष्ट्वास्मरदूतीजगादताम् ॥ देविमामत्तुमायातिकरेगृह्णातुमांसखी
॥ २० ॥ वृन्दातयोक्तंश्रुत्वैनंविकृतास्यंव्यलोकयत् ॥ वीक्ष्यतंभयवातेननिर्धूतासिन्धुजप्रिया ॥ २१ ॥ दुद्रावविकलंश्वश्रंस्मरदूत्यासमंवने ॥
विद्रवन्तीसमंसख्यातापसाश्रममागता ॥२२॥ सातापसवनेतस्मिन्ददर्शात्यन्तमद्भुतम् ॥ पक्षिणःकाञ्चनप्रख्यान्नानाशब्दसमाकुलान्॥२३॥सापश्य
द्धेमपद्माढ्यांवापींतुस्वर्णभूमिकाम् ॥ क्षीरंवहन्तिसरितःस्रवन्तिमधुभूरुहः ॥ २४ ॥ शर्कराराशयस्तत्रमोदकानांचसंचयाः ॥ भक्ष्याणिस्वादुसर्वाणि
बहून्याभरणानिच ॥ २५ ॥ बहुशस्त्राणिदिव्यानिनभसःसंपतन्तिच ॥ क्रीडन्तिहरयस्तृप्ताउत्पतन्तिपतन्तिच ॥२६॥ मठेऽतिसुन्दरंवृन्दातंददर्श
तपस्विनम् ॥ व्याघ्रचर्मासनगतंभासयन्तंजगत्त्रयम्॥२७॥तमुवाचविभोपाहिपाहिपापार्द्धिकादथ ॥ तपसाकिंचधर्मेणमौनेनचजपेनच ॥२८॥ भीत
त्राणात्परंनान्यत्पुण्यमस्तितपोधन ॥ एवमुक्तवतीभीतासालसाङ्गीतपस्विनम्॥२९॥तावत्प्राप्तःसदुष्टात्मासर्वजीवप्रबन्धकः ॥ वृन्दादेवीभयत्रस्ता
हरिकण्ठेसमाश्लिषत् ॥३०॥ सुखस्पर्शभुजाभ्यांसाऽशोकवल्लीवलिङ्गिता ॥ तवालिङ्गनभावेनपुनरेवभविष्यति॥३१॥ शिरःसर्वाङ्गसंपन्नंत्वद्भर्तुरधिकं
गुणैः ॥ अथत्वंप्रमदेगच्छपत्यर्थेचित्रशालिकाम् ॥ ३२ ॥ साचित्रशालामित्युक्ताविवेशमुनिनातदा ॥ दिव्यपर्यङ्कमारूढागृह्यकान्तस्यतच्छिरः॥
॥३३॥चकाराधरपानंसामिलिताक्ष्यतिलोलुपा॥ यावत्तावदभूद्राजन्नूपंजालन्धराकृति॥३४॥तत्कान्तसदृशाकारस्तद्वक्षास्तद्वदुन्नतिः ॥ तद्वाक्यस्तन्म
नोभावस्तदासीज्जगदीश्वरः ॥ ३५ ॥ अथसंपूर्णकायंतंप्रियंवीक्ष्यजगादसा ॥ तवकुर्वेप्रियंस्वामिन्ब्रूहित्वंस्वरणंचमे ॥ ३६ ॥ वृन्दावचनमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 कर्ण्यप्राहमायासमुद्भजः ॥ शृणुदेवियथायुद्धंवृत्तंशम्भोर्मयासह ॥ ३७ ॥ प्रियेरुद्रेणरौद्रेणछिन्नंचक्रेणमेशिरः ॥ तावत्त्वत्तिसिद्धियोगाचत्वद्दूतेन
महारणात् ॥ ३८ ॥ छिन्नंतदत्रचानीतंजीवितंतेऽङ्गसङ्गतः ॥ प्रियेत्वंमद्वियोगेनबालेजातासिदुःखिता ॥ ३९ ॥ क्षन्तव्यंविप्रियंमह्यंयत्त्वांत्यक्त्वा
 रणंगतः ॥ इत्यादिवचनैस्तेनवृन्दासंस्मारितातदा ॥ ४० ॥ ताम्बूलैश्चविनोदैश्चवस्त्रालङ्करणैःशुभैः ॥ अथवृन्दारिकादेवीसर्वभोगसमन्विता ॥
॥ ४१ ॥ प्रियंगाढंसमालिङ्ग्यचुचुम्बरतिलोलुपा ॥ मोक्षादप्यधिकंसौख्यंवृन्दामोहनसंभवम् ॥ ४२ ॥ मेनेनारायणोदेवोलक्ष्मीप्रेमरसा
धिकम् ॥ वृन्दावियोगजंदुःखंविनोदयतिमाधवे ॥ ४३ ॥ तत्क्रीडाचारुविलसद्वापिकाराजहंसके ॥ तद्रूपभावात्कृष्णोऽसौपद्मायांविगतस्पृहः॥
॥ ४४ ॥ अभूद्वृन्दावनेतस्मिंस्तुलसीरूपधारिणी ॥ वृन्दाङ्गस्वेदतोभूम्यांप्रादुर्भूतातिपावनी ॥४५॥ वृन्दासङ्गजंचेदमनुभूयसुखंहरिः ॥ दिनानि
कतिचिन्मेनेशिवकार्यंजगत्पतिः ॥ ४६ ॥ एकदासुरतस्यान्तेसास्वकण्ठेतपस्विनम् ॥ वृन्दाददर्शसँल्लग्नंद्विभुजंपुरुषोत्तमम् ॥४७॥ तंदृष्ट्वा
प्राहसाकण्ठाद्विमुच्यभुजबन्धनम् ॥ कथंतापसरूपेणत्वंमांमोहितुमागतः ॥ ४८ ॥ निशम्यवचनंतस्याःसान्त्वयन्प्राहतांहरिः ॥ शृणुवृन्दारिके
त्वंमांविद्धिलक्ष्मीमनोहरम् ॥ ४९ ॥ तवभर्ताहरंजेतुंगौरीमानयितुंगतः ॥ अहंशिवःशिवश्चाहंपृथक्केनव्यवस्थितौ ॥ जालन्धरोहतःसङ्ख्ये
भजमामधुनानघे ॥ ५० ॥ नारदउवाच ॥ इतिविष्णोर्वचःश्रुत्वाविषण्णवदनाभवत् ॥ ततोवृन्दारिकाराजन्कुपिताप्रत्युवाचह ॥ ५१ ॥ रणेबद्धो
ऽसियेनत्वंजीवन्मुक्तःपितुर्गिरा ॥ विविधैःसत्कृतोरत्नैर्युक्तंतस्यहृतावधूः ॥ ५२ ॥ पतिधर्मस्ययोनित्यंपरदाररतःकथम् ॥ ईश्वरोऽपिकृतंभुङ्क्ते
कर्मेत्याहुर्मनीषिणः ॥ ५३॥ अहंमोहंयथानीतात्वयामायातपस्विना ॥ तथातववधूंमायातपस्वीकोऽपिनेष्यति ॥ ५४ ॥ इतिशप्तस्तथाविष्णुर्जगा
माद्दृश्यतांक्षणात् ॥ साचित्रशालापर्यङ्कःसचतेऽथप्लवङ्गमाः ॥ ५५ ॥ नष्टंसर्वंहरौयातेवनंशून्यंविलोक्यसा ॥ वृन्दाप्राहसखींपश्यजिह्मंतद्विष्णुना
कृतम् ॥ ५६ ॥ त्यक्तंपुरंगतंराज्यंकान्तःसंदेहतांगतः ॥ अहंवनेविदित्वैतत्क्वयामिविधिनिर्मिता ॥ ५७ ॥ मनोरथानांविषयमभून्मेप्रियदर्शनम् ॥
प्राहनिःश्वस्यचैवोष्णंराज्ञीवृन्दातिदुःखिता॥५८॥ममप्राप्तंहिमरणंत्वयाहिस्मरदूतिके ॥ इत्युक्त्वासातयाप्राहममत्वंप्राणरूपिणी ॥५९॥तस्यास्तथोक्त
माकर्ण्यइतिकर्त्तव्यतांततः ॥ वनेनिश्चित्यसावृन्दागत्वातत्रमहत्सरः॥६०॥ विहायदुःखमकरोद्गात्रक्षालनमम्बुना ॥ तीरेपद्मासनंबद्ध्वाकृत्वानिर्विषयं
मनः ॥ ६१ ॥ शोषयामासदेहंस्वंविष्णुसङ्गेनदूषितम् ॥ तपश्चचारसात्युग्रंनिराहारासखीसमम् ॥६२॥ गन्धर्वलोकतोवृन्दामथागत्याप्सरोगणः ॥
प्राहयाहीतिकल्याणिस्वर्गमात्यजविग्रहम्॥६३॥गान्धर्वंशस्त्रमेतत्त्रिभुवनविजयिश्रीपतिस्तोषमग्र्यंनीतोयेनेहवृन्देत्यजसिकथमिदंतद्वपुःप्राप्तकामम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कान्तंतेविद्धिशूलिप्रवरशरहतंपुण्यलभ्यस्यभूपास्वर्गस्यत्वंभवाद्यद्भुतममरवनंचण्डिभद्रेभजत्वम् ॥६४॥ श्रुत्वाशास्त्रंवधूनांजलधिजदयितावाक्यमाह
प्रहस्यस्वर्गादाहृत्यमुक्तात्रिदशपतिवधूश्चातिवीरेणपत्या ॥ आदौपात्रंमुखानामहममरजिताप्रेयसीतद्धियुक्तानिर्दुष्टातद्धतिष्येप्रियममृतगतंप्राप्नुयांयेन
चैव ॥ ६५ ॥ इत्युक्त्वाससखीवृन्दाविससर्जाप्सरोगणान् ॥ तत्प्रीतिपाशबद्धास्तानित्यमायान्तियान्तिच॥६६ ॥ योगाभ्यासेनवृन्दाथदग्ध्वाज्ञाना
ग्निनागुणान् ॥ विषयेभ्यःसमाहृत्यमनःप्रापततःपरम् ॥६७॥दृष्ट्वावृन्दारिकांतत्रमहान्तश्चाप्सरोगणाः ॥तुष्टुवुर्नभसस्तुष्टाववृषुःपुष्पवृष्टिभिः ॥६८॥
शुष्ककाष्ठचयंकृत्वातत्रवृन्दाकलेवरम् ॥ निधायाग्निंचप्रज्वाल्यस्मरदूतीविवेशतम् ॥ ६९ ॥ दग्धवृन्दाङ्गरजसाबिम्बतद्गोलकात्मकम् ॥ कृत्वातद्भ
स्मनःशेषंमन्दाकिन्यांविचिक्षिपुः ॥ ७० ॥ यत्रवृन्दापरित्यज्यदेहंब्रह्मपथंगता ॥ आसीद्वृन्दावनंतत्रगोवर्धनसमीपतः ॥ ७१ ॥ देव्योऽथस्वर्गमेत्य
त्रिदशपतिवधूसत्त्वसंपत्तिमाहुर्देवीभ्यस्तन्निशम्यप्रमुदितमनसोनिर्जराद्याश्चसर्वे ॥शत्रोर्दैत्यस्यहित्वाप्रबलतरभयंभीमभेरीनिजघ्नुःश्रुत्वातत्रासनस्थः
परिजननिवहोऽवापशोभांशुभस्य ॥ ७२ ॥ इतिश्रीपाद्मेमहापुराणेउत्त०पञ्चपञ्चा०जालन्धरोपा०वृन्दायाब्रह्मपदप्राप्तिर्नामषोडशोऽध्यायः ॥१६ ॥
युधिष्ठिरउवाच ॥कथंजालन्धरोगौरींहररूपधरोमुने॥दृष्ट्वाचकारकिंतत्रतन्मेकथयविस्तरात् ॥१ ॥ नारदउवाच ॥ यदामायाशिवस्तत्रप्रार्थयद्गिरिजां
प्रति ॥ ततःसाचुक्षुभेराजन्किञ्चिन्नोवाचतंप्रति ॥ २ ॥ अनातुरस्यदेवस्यप्राप्तस्यतपसामया ॥ नयुक्तमितिनिश्चित्यपार्वतीनाहतंनृप ॥३॥ सानतत्र
प्रतीकारंदृष्ट्वातस्यप्रपश्यतः ॥ निर्गताततउत्थायददर्शाकाशवाहिनीम् ॥ ४ ॥ गङ्गांवासोचितांमत्वाभवानीतपसेययौ ॥ पुरापितपसालब्धो
मयेशःसाम्प्रतंतथा ॥ ५ ॥ इत्यव्रजच्चिन्तयन्तीसखीभिःसहिताततः ॥ पुरःक्षीरनिभांराजन्पार्वतीगगनात्परम् ॥ ६ ॥ मन्दाकिनींददर्शा
थपतन्तींमानसोत्तरे ॥ हारमालामिवायान्तींविविक्तांगगनस्रजः ॥ ७ ॥ मन्दाकिन्याःपयःपूरोह्याकृष्टःस्वर्गतोयथा ॥ श्रुतीनांपूरधारेवब्रह्मणो
वदनच्युता ॥ ८ ॥ दृष्ट्वामुमोदतांगङ्गांस्नात्वाचालिसमन्विता ॥ संपूज्यस्वतनुंपश्चान्निविष्टास्वर्णदीतटे ॥ ९ ॥ परस्परमथालोक्यगौरीप्राह
सखींजयाम् ॥ त्वंगच्छमद्वपुःकृत्वातत्समीपंसखित्वर ॥ १० ॥ जानीहितत्त्वंकिंशम्भुर्यदिवान्योभविष्यति ॥ यद्यसौत्वांसमालिङ्ग्यकुरुते
चुम्बनादिकम् ॥ ११ ॥ तदामायांसमास्थायजानीह्यसुरमागतम् ॥ यदिचेत्त्वांप्रतिब्रूयान्मन्निमित्तंशुभाशुभम् ॥ १२ ॥ असंशयंपिनाकी
स्यादत्रागत्याभिधेहिमाम् ॥ इत्यादिष्टाजयादेव्यागतागङ्गाधरान्तिकम् ॥ १३ ॥ तामायान्तींसदृष्ट्वाचभृशंमन्मथपीडितः ॥ चकारालिङ्गनं
तस्यागौरीरूपेणभावयन् ॥ १४ ॥ ततोजालन्धरःसद्योवीर्यंस्वंप्रमुमोचह ॥ अल्पेन्द्रियश्चसंजातोवेगतःकुरुनन्दन ॥ १५ ॥ तयासम्प्रोदितो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दैत्यनत्वंरुद्रोभविष्यसि ॥ अल्पवीर्योऽधमाचारोनाहंगौरीहितत्सखी ॥ १६ ॥ इत्युक्त्वानिजमास्थायरूपंसाप्राहतंपुनः ॥ अनेनबतपापेन
हतस्त्वंहिपिनाकिना ॥ १७ ॥ इतिज्ञात्वाचसाप्राप्तातत्रगत्वाब्रवीदुमाम् ॥ देविजालन्धरोह्येषनशम्भुस्तववल्लभ ॥ १८ ॥ ततोभयार्ताहर
वल्लभाभूदद्भुतंविवेशाथसरोजमध्ये ॥ सख्योभ्रमर्यःकमलेषुजाताभयेनजालन्धरजेनराजन् ॥ १९ ॥ अत्रान्तरेवनगतामदृष्ट्वातांनृपाङ्गनाम् ॥
भीतास्तुरक्षकास्तस्याःसत्वरंरणमाययुः ॥ २० ॥ ततःशुम्भेनतेपृष्टास्तंनत्वोचुःससाध्वसाः ॥ आत्मनःपरिहारार्थेविष्णुमित्यसुरेश्वरम् ॥ २१ ॥
श्रुत्वावृन्दांहृतांत्रस्तोरुद्रात्त्यक्त्वाथसङ्गरम् ॥ शुम्भेनप्रेषितौचण्डमुण्डौजालन्धरंप्रति ॥ २२ ॥ मानसोत्तरमागत्यदानवौवेगवत्तरौ ॥ हररूपधरं
दैत्यसूचतुर्विटपान्तरे ॥ २३ ॥ किंतयानृपशार्दूलविदेशगतयाश्रिया ॥ अरयोयांनपश्यन्तिबन्धुभिर्यानभुज्यते ॥ २४ ॥ जितःशुम्भो
हतंसैन्यंदेवरुद्रेणतरणे ॥ एह्येहिकुरुसङ्ग्रामंनत्वंप्राप्नोषिपार्वतीम् ॥२५॥ पञ्चाननस्यमहिषींकथंप्राप्नोतिजम्बुकः ॥ अन्धकारःकथंराजन्प्राप्नोति
सवितुःप्रभाम् ॥ २६ ॥ तवजालन्धरात्पीठाद्धताराज्ञीमुरारिणा ॥ इतिसंश्रूयतेवार्तातस्मात्त्वंकुरुसङ्गरम् ॥ २७ ॥ रणेशर्वंविजित्याशु
भवसर्वेश्वरेश्वरः ॥ अथवाशिवनाराचैःखण्डितोयासिततपदम् ॥ २८ ॥ इतिजालन्धरःश्रुत्वाभाषितंचण्डमुण्डयोः ॥ निःससारगिरेस्तस्मा
त्सक्रोधंरक्तलोचनः ॥ २९ ॥ चण्डमुण्डौसमाश्वास्यत्यक्त्वारूपंहरस्यच ॥ गच्छञ्जालन्धरोमार्गेदुर्वारणमुवाचह ॥ ३० ॥ पश्यदुर्वारणे
दानींतत्रयद्विष्णुनाकृतम् ॥ मायामाश्रित्यसाराज्ञीवृन्दानीतात्मनःपदम् ॥ ३१ ॥ गृहेस्थितस्यजामातुर्विश्वसेन्नैवबुद्धिमान् ॥ नूनंतस्मैप्रद
त्वाचकन्यकांविसृजेद्बुधः ॥ ३२ ॥जामातरंगृहेनैवस्थापयेत्सर्वथानरः ॥ धनदारादिकंसर्वंसगृह्णातिशनैःशनैः ॥ ३३ ॥ दुर्वारणउवाच ॥ राजन्य
त्क्रियतेकर्मतत्तथैवतुभुज्यते ॥ त्वंहर्तुमागतोगौरींहरिणातेहृतावधूः ॥ तस्यस्पष्टंवचःश्रुत्वाक्षणंमौनीव्यचिन्तयत् ॥ ३४ ॥ जालन्धरउवाच ॥
किंप्रयामिहरंजेतुमथवाहरिमुल्बणम् ॥ कार्यद्वयेसमुत्पन्नेयत्परंतत्प्रकथ्यताम् ॥ ३५ ॥ दुर्वारणउवाच ॥ यदियासिहरिंजेतुंहरःपृष्ठेहनिष्यति ॥
हनिष्यन्तिरणेशूरायातुंरुद्रोनदास्यति ॥ ३६ ॥ तस्मात्पशुपतिंजित्वाकृत्वात्वंवश्यमात्मनः ॥ पश्चात्प्रयाहिगोविन्दयदिजानासितत्पदम् ॥
॥ ३७ ॥ अधुनासत्वरंवीरयाहिदैत्यान्महाबलान् ॥ रणंकुरुमहाघोरंयथासम्पूज्यसेबुधैः ॥ ३८ ॥ देशकालोचितंश्रुत्वादुर्वारणवचस्तदा ॥ ॥ १७॥
ययौजालन्धरोयोद्धुंसहरुद्रेणयोगिना ॥ ३९ ॥ इतिश्रीपाद्मेमहापुराणेउत्तर०पञ्चप०जाल०जालन्धरस्यमायारूपपरित्यागोनामसप्तदशोऽध्यायः
॥ १७ ॥ नारदउवाच ॥ अथजालन्धरोऽपश्यत्कबन्धचयभीषणम् ॥ रणंरुधिरमांसौघमज्जामेदोऽस्थिदुर्गमम् ॥ १ ॥ तत्रजालन्धरो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दैत्यः प्रियाहरणदुःखितः ॥ रणेविलोकयामासवृषस्थंपार्वतीपतिम् ॥ २ ॥ घोराहिभोगेनविभूषिताङ्गंजटाकलापेशशिभूषणाङ्कितम् ॥ नेत्रा
ग्निकीलोपरिशोभिताङ्गंविनारणंसंप्रददर्शसिन्धुजः ॥ ३ ॥ शीघ्रंस्वरथमारुह्यसमुद्रतनयस्तदा ॥ संहृष्टःप्राहतंशुम्भंतापसोनहतस्त्वया ॥ ४ ॥
प्राहजालन्धरंशुम्भस्तपस्तेनमहत्कृतम् ॥ हन्तुंनशक्यतेऽस्माभिर्हरःसङ्ग्रामदुर्जयः ॥५॥ इतिशुम्भोक्तमाकर्ण्यसिन्धुजःक्रोधमूर्च्छितः ॥ हरंपद्म
सहस्रेणदैत्यसैन्येनसंवृतम् ॥ ६ ॥ गृहीत्वाकालकेदारंधनुर्जालन्धरोययौ ॥ बाणांस्तीक्ष्णानतिस्थूलाँल्लोहस्तम्भांस्तथाबहून् ॥ ७ ॥ मुमोच
युधिदुर्धर्षोवर्षन्मेघइवागमे ॥ आयान्तंरुरुधुःसिन्धुसूनुंशम्भुगणायुधि ॥ ८ ॥ ततोरुद्रेणरौद्रैश्चशरौघैस्ताडितोरुषा ॥ रुद्रबाणैस्तदातस्यकवचं
भुविपातितम्॥९॥विवर्मापिबभौसोऽथमेघमुक्तोयथाचलः ॥ पुनर्जालन्धरस्याङ्गंशम्भुनाकीलितंशरैः॥१०॥रुधिरंबहुसुस्रावजालन्धरशरीरतः ॥तेना
शुरुधिरौघेणप्लावितासकलामही ॥११॥ ततोदेवाभयंजग्मुर्दानवाश्चचकम्पिरे ॥त्यक्त्वातेप्रमथावीरारणभूमिंप्रदुद्रुवुः ॥१२॥ नद्याइवपरामूर्त्तिःप्रसृ
तासर्वतोऽपिच॥अथाहार्णवजोरुद्रंधनुर्धरवरोह्यसि ॥१३॥ इदानींतत्करिष्यामियेनगच्छसिसंक्षयम् ॥ इत्युक्त्वाकालकेदारंसशरंप्रतिगृह्यतत ॥१४॥
शीघ्रंसंपूरयामासशरैर्नानाविधैःशिवम् ॥ शिवःसहस्रकोटीभिःपूरिताङ्गोरणेबभौ ॥१५॥ विहङ्गमैर्यथाकाशंवृक्षैरिवमहागिरिः ॥ दैत्यमुक्तैस्तुतेबाणैर्दृ
ष्ट्वाव्याप्तंमहेश्वरम्॥१६॥वीरभद्रस्तथाकोपाज्जालन्धरमधावत ॥अर्पीडयदमेयात्मासमुद्रतनयंबली॥१७॥जालन्धरोहथसंक्रुद्धोविध्यन्बाणैःसहस्रशः॥
धनुःशरान्रथंछत्रंसारथिंतिलशःशरैः ॥१८॥ चकारवीरभद्रस्यसिन्धुसूनुःप्रतापवान् ॥ वीरभद्रोऽथविरथोहतवान्गदयाब्धिजम् ॥१९॥ तथैवगदया
सोऽपितंहत्वापातयद्भुवि ॥ गदाप्रहारपतितमालोक्यातिविमूर्छितम् ॥ २० ॥ मणिभद्रोऽथसमरेजालन्धरमधावत ॥ अतिक्रुद्धंतमायान्तंदृष्ट्वा
दैत्योमहारणे ॥ २१ ॥ शरैर्व्यस्तोपकरणंसचकारनदीसुतः ॥ अथमूर्छांपरित्यज्यउत्तस्थौसिंहवन्नदन् ॥ २२ ॥ वीरभद्रस्ततःकोपान्मणिभद्रःप्रताप
वान् ॥ जघ्नतुःपर्वताभ्यांतौव्योमस्थंतटिनीसुतम् ॥२३॥तदङ्गेपतितौदृष्ट्वापर्वतौविनिनद्यच ॥जघानमुष्टिपातेनवीरभद्रोनदीसुतम्॥२४॥मणिभद्रश्चर
णयोर्धृत्वासागरनन्दनम् ॥ स्यन्दनाद्भ्रामयामासतदद्भुतमिवाभवत् ॥२५॥ मणिभद्रगृहीतोऽपिदैत्यराट्समहाबलः ॥ हत्वाचरणघातेनमणिभद्रमपा
तयत्॥ २६ ॥ जालन्धरोमहाबाहुर्वीरभद्रंचमुष्टिना ॥ अथागतःपरिवृतोगणैर्दैनन्दिकेश्वरः ॥२७॥ शुम्भस्तमागतंदृष्ट्वारुरोधसहसैनिकैः ॥ द्वन्द्वयुद्धै
रथाजग्मुर्गणादैत्यैःपरस्परम् ॥२८॥ शुम्भःशिलादजंराहुर्महाकालंरणेययौ ॥ कोलाहालंनिशुम्भोऽथकेतुःकालमधावत ॥२९॥ शैलोदरोगुहंजम्भो
माल्यवन्तंमहाबलः ॥ महापार्श्वोययौचण्डंचण्डीशोरोमकण्टकम् ॥ ३० ॥ विकटास्योऽथवैभृङ्गिमुरुनेत्रोविनायकम् ॥ एवंदैत्येश्वरैःसार्द्धंगणाना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुम्भस्तेनार्दितः शक्त्या शिलादं च
मधिपाययुः ॥ ३१ ॥ अथशुम्भायुधैर्बाणैः प्रहतश्च शिलादजः ॥ चूर्णीचकाराद्रिशृङ्गः कपितुण्डो महत्तरैः ॥ ३२ ॥ शुम्भस्तेनार्दितः शक्त्याशिलादंच
जघानतम् ॥ महाकालोजघानाथतंराहुंरणमूर्द्धनि ॥ ३३ ॥ शक्त्याथतस्यहतवान्स्यन्दनंसमहाद्रिणा ॥ कोलाहलोहतः शक्त्यानिशुम्भेनप्रतापवान् ॥ ३४ ॥
शक्तिंगृहीत्वाह्यहनद्रथंसारथिनासह ॥ विरथेनाथदैत्येनभृशंक्रुद्धेनसंयुगे ॥ ३५ ॥ कोलाहलोऽसुरेन्द्रेणसहस्रफणिनाहतः ॥ तंहत्वाचातिवेगेनरथंचा
न्यमुपागतः ॥ ३६ ॥ फणिचक्रहतः सङ्ख्येक्षणान्मूर्छांविहायच ॥ स्वरथाच्छीघ्रमुत्तीर्यगृहीत्वाखड्गचर्मणी ॥ ३७ ॥ सर्वंचक्रेनिशुम्भस्यसरथाद्यसिना
पृथक् ॥ पुनः स्वरथमारुह्यदैत्यंबाणैरताडयत् ॥ ३८ ॥ निशुम्भोऽप्यतिरोषाच्चतत्पराक्रमविस्मितः ॥ शक्त्यामहाबलस्तस्यरथंसाश्वंन्यपूदयत् ॥ ३९ ॥
कोलाहलोरणेऽधावन्निशुम्भंविरथोबली ॥ गतः ससरथंचक्रेविरथंभुजबन्धनात् ॥ ४० ॥ केतुपुच्छंगृहीत्वाचभ्रामयामासचाम्बरे ॥ कालश्चिक्षेपसोऽप्य
द्रिंसचिच्छेदगिरिंजवात् ॥ ४१ ॥ तंनगंचूर्णितंदृष्ट्वाताडयामासमुष्टिना ॥ कालश्चूर्णितसर्वाङ्गः केतुनाप्राद्रवद्भयात् ॥ ४२ ॥ शैलोदरस्तथास्कन्दंजघान
गदयोरसि ॥ षडाननोऽपितंशक्त्याहत्वाभूमावपातयत् ॥ ४३ ॥ शक्तिप्रहारेणमृतंदानवंवीक्ष्यषण्मुखः ॥ जगर्जतत्रवैचित्र्यंयथाक्रौञ्चेविदारिते ॥ ४४ ॥ माल्य
वानथबाणौघैर्जम्भमभ्यर्दयद्रणे ॥ जम्भोऽपिसायकैस्तीक्ष्णैर्भित्त्वातंमूर्छितंजहौ ॥ ४५ ॥ महापार्श्वोरथंधृत्वाबाणौघैर्वाजिवर्जितम् ॥ लीलयैवचखेनीत्वा
व्यश्वंचण्डमपातयत् ॥ ४६ ॥ व्यश्वंरथंविलोक्याथततश्चण्डोऽग्रहीद्गजम् ॥ आपतन्तंमहापार्श्वंचण्डस्तंगदयाहनत् ॥ ४७ ॥ अचिन्त्यैवगदापातंसो
ऽसुरोभृशदारुणः ॥ प्रहत्यमुष्टिनाचण्डंपातयामासभूतले ॥ ४८ ॥ चण्डीशशस्त्राभिहतोरोमकण्ठोमहासुरः ॥ चण्डीशंपादयोर्धृत्वारथमूर्ध्निन्यपातयत् ॥
॥ ४९ ॥ पपातसहसाभूमौययौतंभीषणेक्षणः ॥ उरुनेत्रेणसमरेहतोलम्बोदरः शरैः ॥ ५० ॥ दन्तेनोरसितंहत्वापातयामासभूतले ॥ उरुनेत्रः क्षणाच्छा
न्तिमागत्याशुरथंक्षणात् ॥ ५१ ॥ जघानमुद्गरेणासौमूर्ध्निसिन्दूरमण्डिते ॥ गणेश्वरः पट्टिशेनजघानोरसिदानवम् ॥ ५२ ॥ तन्मुखादथनिष्क्रान्तोनव
शीर्षोऽसुरोमहान् ॥ अष्टादशभुजोराजन्सोऽप्यधावतशाङ्करिम् ॥ ५३ ॥ नवशीर्षोरुनेत्राभ्यांरणेरुद्धोविनायकः ॥ जर्जरीकृतदेहोऽपिजग्राहपरशुं
रुषा ॥ ५४ ॥ तेनचिच्छेदशस्त्राणितयोराजौगणेश्वरः ॥ रुद्धंगणेश्वरंदृष्ट्वाताभ्यांसङ्ख्येऽथषण्मुखः ॥ ५५ ॥ शीघ्रमागत्यसेनानीर्जघाननव
शीर्षकम् ॥ नवशीर्षंरणेहत्वाचोरुनेत्रमधावत ॥ ५६ ॥ स्कन्दः स्वशक्तिघातेनपातयामासतंनृप ॥ पश्यञ्जालन्धरः स्कन्दंययौसैन्येनसंवृतः ॥ ५७ ॥ ॥ १८ ॥
पुत्रप्रीत्याऽसुरान्हन्तुंसगणः शङ्करोऽपिच ॥ ततोघोरतरंयुद्धमभूदद्भुतसैन्ययोः ॥ ५८ ॥ हरसिन्धुजयोर्युद्धेगतप्राणेवरोदसी ॥ अथजालन्धरः क्रुद्धोबाणं
संधायदारुणम् ॥ ५९ ॥ सहस्रशतसङ्ख्याकैः पत्रैः सर्वत्रभूषितम् ॥ दैत्येन्द्रस्तेनबाणेनललाटेऽताडयच्छिवम् ॥ ६० ॥ ममज्जापुङ्खमर्यादंल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लाटेशङ्करस्यच॥भालेशशाङ्कवच्छम्भोः सरराजमहाप्रभः॥६१॥यथादित्योहिघर्मान्तेसन्ध्याकालेऽम्बुदागमे॥अथरुद्रोमहाबाणंजग्राहज्वलनोपमम्॥
॥६२॥यस्यवेगेतुपवनः फलेयस्याग्निभास्करौ॥कालोग्रन्थिषुसर्वेषुशरेदेवीधरास्थिता॥६३॥ हरस्तेनशरेणाशुविव्याधहृदिसिन्धुजम्॥तेनबाणप्रहारेण
रुधिरौघपरिप्लुतः ॥६४॥ पपातशरभिन्नाङ्गोवज्राहतइवाचलः ॥ तदादैत्याः समाक्रन्दञ्जगर्जुःप्रमथास्तथा ॥६५॥ सिन्धुजंमूर्छितंदृष्ट्वारुरुधुर्दानवाः
शिवम् ॥ रक्षार्थमुद्यताःकेचित्केचित्तंपरितःस्थिताः॥ ६६ ॥यावज्जालन्धरोमूर्छांप्राप्तोवारिधिनन्दनः ॥ तावद्रुद्रेणनाराचैर्हताजालन्धरीचमूः ॥६७॥
चिराज्जालन्धरस्त्यक्त्वामूर्छांसैन्यंहतंनृप ॥ दृष्ट्वाभयान्वितःसेनांविकीर्णांचतथारणे ॥ ६८ ॥ ततःकाव्यंससस्मारमनसापरमंगुरुम् ॥ स्मृतस्तेनत्वर
न्प्राप्तःकविर्जालन्धरंप्रति ॥ ६९ ॥ स्वस्तिकृत्वाजगादाथभार्गवःसिन्धुनन्दनम् ॥ किंकरोमिमहाराजतवकार्यंमहाबल ॥ ७० ॥ नारदउवाच ॥
इतिकाव्यवचःश्रुत्वाभार्गवंबहुमानयन् ॥ नत्वागुरुमुवाचाथराजाजालन्धरस्तथा ॥ ७१ ॥ राजोवाच ॥ जीवयैतान्मृताञ्छुक्रदैत्यान्सर्वान्सम
न्ततः ॥ इत्युक्तःसिन्धुजेनाजौसैन्यंतत्रव्यलोकयत् ॥ ७२ ॥ पञ्चविंशत्सहस्राणियोजनानांप्रमाणतः ॥ दैत्याङ्गरथसंकीर्णमुपर्युपरिपार्थिव ॥७३॥
उच्छ्रयेपञ्चनवतियोजनानांमहींचिताम् ॥ योधवाहनदेहाद्यैरिवपूर्णांधरांततः ॥ ७४ ॥ मन्त्रोदकेनचाभ्युक्ष्यदैत्यानुत्थापयत्कविः ॥ यावद्रुद्रोजटा
जूटंबबन्धभुजगैर्दृढम् ॥ ७५ ॥ तावत्काव्येनतत्सैन्यंमन्त्रेणोत्थापितंनृप ॥ व्याघ्रान्यथाकेसरिणोगजेन्द्राःशूकरान्यथा ॥ ७६ ॥ आगतान्दानवा
न्दृष्ट्वाचिन्तयामासशङ्करः ॥ किमेतदिहसंजातंमृतान्मृजतिकुत्रचित् ॥७७॥ ददर्शचिन्तयन्काव्यमितितस्मिन्रणेभवः ॥ जीवयन्तंरणेदैत्यान्धावन्तं
वेगवत्तरम् ॥ ७८ ॥ ततःक्रुद्धोमहादेवःशुक्रंहन्तुंमनोदधे ॥ त्रिशूलिनमनुज्ञायरहश्चोवाचतंकविः ॥ ७९ ॥ ब्राह्मणोऽहंकथंहंसिसर्वविद्याविशारदम् ॥
ब्रह्महत्यामयिहतेतवरुद्रभविष्यति ॥ ८० ॥ इतिश्रुत्वाकवेर्वाक्यंशूलंतत्याजशङ्करः ॥ स्मृत्वातत्पूर्ववृत्तान्तंयच्छिन्नंब्रह्मणःशिरः ॥ ८१ ॥ ब्राह्मणोनहि
हन्तव्योहरन्प्राणानपिप्रियान् ॥ अयंतुजीवयन्दैत्यान्निग्राह्यःसर्वथामया ॥ ८२ ॥ तस्मादेनंक्षिपाम्याशुस्त्रीयोनौदैत्यजीवनम् ॥ एवमुक्तवतः
शम्भोस्तृतीयनयनाद्भुतम् ॥ ८३ ॥ कृत्याविवासाश्चात्युग्रामुक्तकेशीमहोदरा ॥ स्थूललम्बस्तनीयोनिदंष्ट्रालोचनभीषणा ॥ ८४ ॥ आज्ञापयेतिस
तयाप्रोक्तस्तामब्रवीच्छिवः ॥ कृत्येत्वंदानवाचार्यंस्वयोनौक्षिपदुर्मतिम् ॥ ८५ ॥ यावज्जालन्धरंहन्मितावदेनंभगेवह ॥ हतेजालन्धरेदैत्येपश्चान्नि
स्तीर्यमोचय ॥ ८६ ॥ हरेणोक्तेतिसाकृत्याभार्गवंसमधावत ॥ पपातभूमौतांदृष्ट्वाकविर्दैत्याःप्रदुद्रुवुः ॥ ८७ ॥ केशेष्वाकृष्यधुन्वानानग्नमालिङ्ग्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भार्गवम् ॥ योनौदधारसाकृत्याहसन्तीजयनन्दन ॥ ८८ ॥ भगेक्षिप्तंगुरुंदृष्ट्वायावज्जालन्धरोऽसुरः ॥ संदधेमार्गणांस्तावत्साकृत्यादृश्यतांगता ॥
॥ ८९ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०युधिष्ठिरनारदसं०जाल०शुक्रयोनिप्रवेशोनामाष्टदशोऽध्यायः ॥ १८ ॥ श्रीनारदउवाच ॥ अथजालन्धरः
प्राहरक्षात्मानमितःशिवम् ॥ शिवाद्यत्वांक्षिपाम्याशुयत्रास्तेमधुसूदनः ॥ १ ॥ पश्चाद्ब्रह्माणमाकृष्यपातयिष्यामिसागरे ॥ धृतेषुयुष्मासुयदातदा
सर्वेश्वरोह्यहम् ॥ २ ॥ इत्युक्त्वासैन्यसंभारंन्यस्यशुम्भासुरादिषु ॥ भटैर्गुप्तंनिशुम्भाद्यैश्चतुरङ्गमनन्तकम् ॥ ३ ॥ शुम्भोनिशुम्भःफेङ्कारोफेरुण्डो[1]
धूम्रलोचनः ॥ केतुर्बिडालजङ्घश्चराहुर्दुर्वारणोयमः ॥ ४ ॥ कालासुरोऽथलवणोभूमिरेतोऽन्धकासुरः ॥ रक्तवीर्यादयश्चण्डीचामुण्डीदैत्यपुङ्गवाः ॥
॥ ५ ॥ सर्वानेवोद्यतान्दृष्ट्वासङ्ख्येदानवपुङ्गवान् ॥ रुरुधुःसमरेराजन्वीरभद्रादयोगणाः ॥ ६ ॥ ततोयुद्धमभूद्घोरंतुमुलंलोमहर्षणम् ॥ पतन्ति
प्रमथायत्रदैत्याश्चापिक्षतातुराः ॥ ७ ॥ अथशुम्भादिभिर्दैत्यैःसर्वशस्त्रैर्महामृधे ॥ हताःपेतुर्गणाश्चान्येपलायांचक्रिरेनृप ॥ ८ ॥ गणान्विजित्यसमरे
रुरुधुर्दानवाःशिवम् ॥ वर्षन्तःशरधाराभिर्घनामेरुगिरिंयथा ॥ ९ ॥ ततःपिनाकमाकृष्यवृषभोपरिभैरवः ॥ जघानबाणनिवहैर्दानवान्समराङ्गणे ॥
॥ १० ॥ तीक्ष्णाग्रैस्तुक्षुरप्रौघैर्दानवानहनद्बली ॥ केचिन्नन्दिप्रहारेणपेतुःसङ्ग्राममूर्धनि ॥ ११ ॥ बाणैश्चजर्जरान्कृत्वाशुम्भादीन्वृषभध्वजः ॥
शेषंसैन्यंजघानाशुशस्त्रास्त्रैःसमराङ्गणे ॥ १२ ॥ गजैर्नरैर्हयैर्व्याप्तंपतितैःसमराङ्गणम् ॥ बभूववज्रनिर्भिन्नैःपर्वतैरिवभूतलम् ॥ १३ ॥ अथमायामयीं
गौरींविदधेसिन्धुनन्दनः ॥ सौन्दर्यगुणसंपन्नांसर्वालङ्कारभूषिताम् ॥ १४ ॥ जयांमायामयींकृत्वासमुवाचाब्धिनन्दनः ॥ गच्छत्वंपुरतोरुद्रंविमोहय
रणेद्रुतम् ॥ १५ ॥ इत्युक्तादैत्यपतिनाययौमायामयीजया ॥ रणेगत्वाशिवस्याग्रेमुक्तकेशीरुरोदह ॥ १६ ॥ पृष्ठाहरेणसाप्राहमानसोत्तरपर्वतात् ॥
हृतातवप्रियादेवपार्वतीसिन्धुसूनुना ॥ १७ ॥ श्रुत्वेतिवचनंतस्यास्तामुवाचवृषभध्वजः ॥ जयेत्वमेहिवृषभंत्वांहरिष्यन्तिदानवाः ॥ १८ ॥ ततो
वृषभमारुह्यजयाचालिङ्ग्यशङ्करम् ॥ प्राहप्रयामिपार्वत्यानजीवामिविनाहर ॥ १९ ॥ चन्द्रशम्भुजटाविष्टंगृहीत्वावृषभाद्द्रुतम् ॥ अवारोहतसामाया
मायास्वक्तोरणंययौ ॥ २० ॥ ततोगौरींहृतांश्रुत्वाचिन्तयामासशङ्करः ॥ दैत्यमायापरिष्वक्तोनात्मानंबुबुधेनृप ॥ २१ ॥ एतस्मिन्नन्तरेप्राप्तःसैन्येन
महतावृतः ॥ मायामृडानींस्वरथेनिधायार्णवजःशिवम् ॥ २२ ॥ जालन्धरजयेतद्वदासीद्वादित्रनिस्वनः ॥ चचालवसुधायेनप्रतिनेदुर्महीधराः ॥
॥ २३ ॥ हरस्यदर्शयामासपार्वतींसिन्धुनन्दनः ॥ रुद्रोऽप्यरिरथस्थांतांददर्शनिजवल्लभाम् ॥ २४ ॥ वियोगविधुरांदीनांतन्वीमातुरलोचनाम् ॥

[1] 'भेरुण्डो' इ० पा० ।

॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हानाथप्रियरुद्रेतिप्रजलपन्तींपुनःपुनः ॥ २५ ॥ प्रौढवैरिरथेदृष्ट्वापाखण्डिस्थांयथाश्रुतिम् ॥ गौरींदध्यौतथास्थाणुःकथंप्राप्याप्रियामया ॥ २६ ॥
विललापततःशम्भुर्दैत्यमायाविमोहितः ॥ मोहोमेदानवैःकान्तेहृतासित्वंकथंप्रिये ॥ २७ ॥ शोकमोहप्लुतंदृष्ट्वाशङ्करंसागरात्मजः ॥ जगादप्रहस
न्वाक्यंकश्चित्कारुण्यवान्यथा ॥ २८ ॥ सर्वप्रमाणशून्योऽसिस्मरशृङ्गारवर्जितः ॥ ईश्वरोऽपिवराकस्त्वंसंजातोऽम्बिकयाविना ॥ २९ ॥ मारो
दीर्हिविरूपाक्षददामितववल्लभाम् ॥ रक्षितोऽसिमयारुद्रगृहीत्वापार्वतींरणात् ॥ ३० ॥ इत्युक्त्वागिरिशंतूर्णमुत्तार्यस्वरथादुमाम् ॥ सैन्यंसंप्रेषया
मासशङ्कराभिमुखंकिल ॥ ३१ ॥ हरोऽपिवृषभेणाशुतत्सैन्यंसमधावत ॥ ग्रहीतुंपार्वतींपाहित्राहित्राहीतिजलपतीम् ॥ ३२ ॥ यावद्गृह्णातितांगौरीं
करेणवृषभध्वजः ॥ तावच्छुम्भासुरःशीघ्रंगृहीत्वाचाम्बरेस्थितः ॥ ३३ ॥ शूलंमुमोचबलवान्हन्तुंशुम्भासुरंहरः ॥ शुम्भेनसापरित्यक्ताशूलोपरि
पपातह ॥ ३४ ॥ रुदन्तीचारुसर्वाङ्गीत्यक्ताशूलेनसंयुता ॥ पतिताशङ्करस्याग्रेतथेत्युक्त्वाममारच ॥ ३५ ॥ मायागौरींमृतांदृष्ट्वाशोकमोहपरिप्लुतः॥
हाप्रियेतिरुदन्रुद्रःपपातभुविमूर्च्छितः ॥ ३६ ॥ क्षणंसंज्ञामवाप्याथरणभूमावुमापतिः ॥ शशापशुम्भप्रमुखान्गौरीयुष्मान्हनिष्यति ॥ ३७ ॥
नारदउवाच ॥ अथशुम्भादयोदैत्यारणेदेव्यानिपातिताः ॥ महेश्वरस्यशापेनगतेमन्वन्तरेनृप ॥ ३८ ॥ शपित्वाताञ्रुरोदाथजलपन्निर्गत्य
शङ्करः॥ क्वगतासिप्रियेत्यक्त्वादुःखितंमांरणाङ्गणे॥३९॥रतिंत्यक्त्वावियोगार्तःश्रीकण्ठोऽहंत्वयाकृतः ॥ वासुदेवोऽपिमांत्यक्तंनजानातित्वयाप्रिये॥
॥ ४० ॥ यज्ञेदक्षस्याग्निकुण्डेशिरोदेविहुतंत्वया ॥ भूयोहिभवतीलब्धाकथंत्यजसिमांपुनः ॥ ४१ ॥ उत्तिष्ठोत्तिष्ठचार्वङ्गिगिरिजेमांप्रबोधय ॥ अत्रा
न्तरेशिवंज्ञात्वादैत्यमायाविमोहितम् ॥ ४२ ॥ देवतागणमध्यस्थोह्यन्तरिक्षादुपागमत् ॥ विलपन्तमुवाचेदमदृश्यःकमलासनः ॥ ४३ ॥ ब्रह्मोवाच॥
त्वंशोकमोहपितृमातृविवर्जितोऽसिदुःखंसुखंसुतकलत्ररिपुर्नचास्ति ॥ जातोऽसिनैवजनकेनजनिष्यमाणस्त्वंमन्यसेऋषिगणैश्चकुतोविमोहः ॥
॥ ४४ ॥ एकोऽसिनाथबहुधाकृतविग्रहोऽसिसूर्योयथाजलधिवीचिषुदृश्यमानः ॥ ध्यानेनयान्तियमिनस्तवपादमूलंरूपंपरंदुरवबोधमवाच्यमेव ॥
॥ ४५ ॥ नैषाप्रियातवसमानतयाविपन्नाजालन्धरेणरचितांजहिदेवमायाम् ॥ सापार्वतीकमलकोशगताहिशम्भोयुध्यस्ववैरिनिवहंजहिपाहिचा
स्मान् ॥ ४६ ॥ श्रुत्वेतिब्रह्मणोवाक्यमवबुद्धोमहेश्वरः ॥ ज्ञात्वातांदानवींमायांमुमोचमहतींशिलाम् ॥ ४७ ॥ तयाजघानसमरेदैत्यकोटिशत
त्रयम् ॥ ततोवृषभमारुह्यक्रोधेनमहतानृप ॥ ४८ ॥ धनुःपिनाकंसन्धायधूर्जटिर्जगृहेशरान् ॥ अथमायापरित्यक्तंशर्वमालोक्यसिन्धुजः ॥ ४९ ॥
सुरेशमोहनंमायाजालमत्यद्भुतंनृप ॥ अन्यदाविश्वकाराशुभृशंमायामहाबलम् ॥ ५० ॥ जालन्धरःकोटिभुजोबभूववृक्षास्त्रशस्त्रैर्युयुधेवृषाङ्कम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथान्तरालेपृथिवींचकारसमुद्रसूनुर्गिरिधातुमण्डिताम् ॥ ५१ ॥ देवतायतनैरम्यैर्नानापुष्पसमाकुलैः ॥ मण्डितांनृपभूमिंचचकारोदधि
नन्दनः ॥ नृत्यन्तियत्राप्सरसोमेनकाद्यामनोहराः ॥ ५२ ॥ विस्मृत्यशम्भुस्तदपास्यकार्मुकंसद्यःप्रतस्थेवृषभोपरिस्थितः ॥ वादित्रगीतैर्भुवि
मोहितोभृशंदैत्येन्द्रमायामयताण्डवेनसः ॥५३॥ विमोहितंवीक्ष्यवृषस्थितंहरंनित्यंसमुद्रःसहताण्डवेन॥ गीतेनवाद्येनचनृत्यलीलयाननादरूपीतरसा
विमोहितुम् ॥ ५४ ॥ जन्तून्क्षिप्त्वोदधौतांश्चसहस्रंसततोत्सवः ॥ क्वचतादेवताःसर्वाःक्वनन्दिप्रमुखागणाः ॥ ५५ ॥ अपित्वंमाननीयो
ऽसिमोहितोदैत्यमायया ॥ किमद्यशम्भोभगवन्नुपेक्ष्यतेउदीर्यचक्रंजठरस्थितंच ॥ ५६ ॥ वधायचास्यैवकृतंमहेशजालन्धरंसंहरतेनचाजौ॥
इतिकृष्णस्यवचनात्तत्स्मृत्वात्मानमीश्वरम् ॥ ५७ ॥ आरुह्यवृषभंशीघ्रमाजगाममहारणम् ॥ तमागतंशिवंदृष्ट्वासर्वसैन्यसमावृतः ॥
॥ ५८ ॥रुरोधसमरेराजन्क्रुद्धोजालन्धरोऽसुरः ॥ हरस्यकुपितस्यासीत्सृष्टिसंहारकारकम् ॥ ५९ ॥ रूपंतृतीयनेत्राग्नौदानवाःशलभायथा ॥
रूपंदृष्ट्वाभगवतोरौद्रज्वालामयंनृप ॥ ६० ॥ शुम्भादयस्तदादैत्याराहुप्रभृतयश्चये ॥ रुद्रंनिरीक्ष्यसंत्रस्ताःपातालंविविशुर्भयात् ॥ ६१ ॥
सेनाभटाननेकांश्चहतान्दृष्ट्वामहामृधे ॥ शुम्भादीन्हतशेषांस्तान्दृष्ट्वात्मानंपलायितान् ॥ ६२ ॥ तदाजालन्धरःसङ्ख्यएकोगिरिरिवस्थितः ॥
परमार्थंरुद्ररूपंदृष्टःसाक्षाद्विलोकयन् ॥ ६३ ॥ ततोजालन्धरःप्राहमहादेवंप्रहस्यच ॥ रूपंसंहरयेनत्वंदहसेसचराचरम् ॥ ६४ शस्त्रेणकुरु
सङ्ग्रामंत्यक्त्वायोगबलंनिजम् ॥ इतिजालन्धरवचःश्रुत्वोवाचततःशिवः ॥ ६५ ॥ वरंवरयदैत्येशप्रीतोऽस्मितवकर्मणा ॥ ईदृक्षमपिमद्रूपं
दृष्ट्वायन्निर्भयोऽधुना ॥ ६६ ॥ अपिब्रह्माण्डमखिलंमद्रूपस्यास्यदानव ॥ तेजसोवीक्षणेनालंतत्रत्वमसिनिर्भयः ॥ ६७ ॥ नारदउवाच ॥ इति
शम्भोःप्रसादंचमत्वासंसारनिःस्पृहः ॥ जालन्धरोहराद्वव्रेमुक्तिसायुज्यतांपराम् ॥ ६८ ॥ श्रीमहादेवउवाच ॥ दिव्यंदेहमिदंदैत्यभोगसिद्धि
युतंतव ॥ वृन्दामनोहरंरम्यमिहस्थंकालमश्नुते ॥ ६९ ॥ मुहूर्तंपरमात्मानंतमेकाकिनमव्ययम् ॥ अबुद्ध्वात्यजसेमूर्खकथंत्वंमुक्तिमिच्छसि
॥ ७० ॥ वृन्दातवप्रियाराज्ञीहृतासायोगमायया ॥ ब्रह्मस्वरूपंविज्ञायप्राप्तातत्परमंपदम् ॥ ७१ ॥ इदानींदुर्लभासाचतत्पदंचैवदुर्लभम् ॥
स्वर्गापवर्गयोर्मध्येसंसारेवरमाप्नुहि ॥ ७२ ॥ जालन्धरउवाच ॥ देवमुक्तिपदंलभ्यंकृतकृत्येनकेनचित् ॥ इदानींकृतकृत्योऽस्मियत्त्वांपश्ये
त्वयाहतः ॥ ७३ ॥ शिवउवाच ॥ मत्स्थानंपरमंक्षेत्रंयदित्वंगन्तुमुत्सुकः ॥ तर्हिमांकोपयस्वाशुदैत्यंहत्वादृढैःशरैः ॥ ७४ ॥ ततोऽहंत्वां
हनिष्यामिमत्स्थानंयास्यसेऽनघ ॥ महेश्वरवचःश्रुत्वाप्राहजालन्धरःशिवम् ॥ त्वयिसर्वजगत्पूज्येपूर्वंनप्रहराम्यहम् ॥ ७५ ॥ नारदउवाच ॥ एव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुक्तोजवानाशुसिन्धुजंविशिखैःशिवः ॥ तेशराःसिन्धुपुत्रस्यदेहलग्नाविभान्तिच ॥ ७६ ॥ यथालोहगिरिभ्रान्तेवेणवोवह्निदीपिताः ॥ जाल
न्धरोहरस्याङ्गंपूरयामासमार्गणैः ॥ ७७ ॥ तैःशरैःशुशुभेरुद्रोयथाखंखेचराकुलम् ॥ जालन्धरेशयोर्युद्धंतथाद्वन्द्वमभून्नृप ॥ ७८ ॥ हरादन्योन
हन्तास्तिनसोढान्योऽर्णवात्मजात् ॥ गिरिकोटिसहस्रैस्तुतदापृथ्वीपुटोद्धृतैः ॥ ७९ ॥ पूरयामाससमरेसिन्धुजःपार्वतीपतिम् ॥ ततःशूलेन
निहतोरुद्रेणोरसिदानवः ॥ ८० ॥ निःससारमुखात्तस्यज्वरोजम्भोभयङ्करः ॥ सचवीरज्वरोनामसिंहवक्त्रोनराकृतिः ॥ ८१ ॥ दैत्य
देहाद्विनिष्क्रान्तंदृष्ट्वासिंहमुखंज्वरम् ॥ हुङ्कारमकरोद्घोरंशरभस्तत्रनिर्ययौ ॥ ८२ ॥ शिवस्यनिःसृतेनासौशरभेणनिपातितः ॥ अजेयं
शङ्करंदृष्ट्वावृषभेन्द्रेणसंयुतम् ॥ ८३ ॥ आययौवृषभाभ्याशेतरसासागरात्मजः ॥ वृषंपुच्छेगृहीत्वाचभ्रामयामासचाम्बरे ॥ ८४ ॥ जालन्धरो
महाबाहुश्चिक्षेपहिमवद्गिरौ ॥ ततस्त्रिशूलमत्युग्रंमुमोचगिरिजापतिः ॥ ८५ ॥ तद्धस्तेनगृहीत्वाचदैत्येशःशिवसन्निधौ ॥ रथारूढोधनुर्गृह्यकालकेदार
मध्विजः ॥ ८६ ॥ पूरयामासविशिखैःशिवमुर्वीतलेस्थितम् ॥ उग्रःशस्त्राञ्छराञ्छित्त्वाबाणैरथमचूर्णयत् ॥ ८७ ॥ दशयोजनविस्तीर्णं
सारथ्यश्वसमन्वितम् ॥ जालन्धरोऽपिविरथोह्यभ्यधावन्मृधेशिवम् ॥ ८८ ॥ तयोर्युद्धमभूद्घोरमद्भुतंलोमहर्षणम् ॥ तद्दृष्ट्वाऽकाण्डकल्पान्तशङ्कया
तत्रसुःसुराः ॥८९॥ सर्वास्त्रैस्तावदन्योन्यंजघ्नतुर्भीमविक्रमौ ॥ पद्भिःपृथ्वींचालयन्तौकम्पयन्तौनभःस्वनैः ॥ ९० ॥ अथोत्कटंबलंदृष्ट्वादानवेन्द्रस्य
शङ्करः ॥ शस्त्रजालजहाराशुयोगमायाबलेनसः ॥ ९१ ॥ ततःकोटिभुजोदैत्योदंष्ट्राभीषणलोचनः ॥ शस्त्रहीनोऽपितरसाधावमानोहरंययौ ॥ ९२ ॥
विशालकरबन्धेनबबन्धसमरेशिवम् ॥ ततस्तस्यकृपाणेनचिच्छेदकरकाननम्॥९३॥ सिन्धुजेनभुजाक्रान्तोरुद्रोऽभून्नीललोहितः ॥ लीलयायोधया
मासरणेऽसौसिन्धुनन्दनः ॥९४॥ छिन्नहस्तोऽपियुयुधेस्वर्भानुःशिरसायथा ॥ नियुद्धेननदीसूनुस्तोषयामासशङ्करम् ॥ ९५ ॥ परितुष्टोऽब्रवीच्छम्भु
र्वरंवरयदुर्लभम् ॥ जालन्धरेणसोऽप्युक्तस्त्वंमेदेह्यात्मनःपदम् ॥ ९६ ॥ ममदोःशस्त्रहीनस्यनावज्ञांकर्तुमर्हसि ॥ शीघ्रंप्रयच्छमेसिद्धिंनोचेत्त्वांसंहरा
म्यहम् ॥ ९७ ॥ इत्युक्त्वासभुजोभूत्वाजघ्नेतंमुष्टिनोरसि ॥ ततःसुदर्शनंचक्रंपुरायन्निर्मितंस्वयम् ॥ ९८ ॥ मुखादुद्गीर्यतद्धस्तेगृहीत्वाऽतोलयद्रुषा ॥
सूर्यकोटिसहस्राभंग्रसन्तंसचराचरम् ॥ ९९ ॥ तेनचक्रेणचिच्छेदशिरोजालन्धरस्यच ॥ ततस्तच्छीर्षमुत्प्लुत्यगगनेशतयोजनम् ॥ १०० ॥ दंष्ट्रा
शतकरालास्यंस्वर्भूमिनयनंचयत् ॥ व्याघ्रगत्याततोयातंसदनंब्रह्मणोनृप ॥ १ ॥ भूयःस्वर्गेंततोदृष्ट्वामृडःशीर्षमधावत ॥ स्रवत्तद्रुधिरंभूरिप्रकुर्वद्भैरव
स्वनम् ॥२॥ ततोदिशःप्रनष्टास्तागगनंविलयंगतम् ॥ नतेजसांप्रकाशोऽस्तिचचालवसुधाभयात् ॥ ३ ॥ आपतन्निजघानाशुरुद्रश्चक्रेणतच्छिरः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विधाभूत्वाथराजेन्द्रपपातहिमवद्गिरौ ॥ ४ ॥ ततोजालन्धरस्याशुशिरसःशकलेकिल ॥ विशतःसर्वभूतानांपश्यतांस्मवृषाकपौ ॥ ५ ॥ तस्य
कण्ठात्समुद्भूतादैत्याःशतसहस्रशः ॥ तेहतास्तेनचक्रेणकपर्दिकरशालिना॥६॥जालन्धरकबन्धंतन्ननर्तरुधिरारुणम् ॥ पुनःपुनःसमुद्भूतास्तस्यकण्ठा
त्तुदानवाः ॥ ७ ॥ पुनःपुनर्बलवताछिन्नाश्चक्रेणशम्भुना ॥ मेदसासिन्धुपुत्रस्यपूरितासकलामही ॥ ८ ॥ मेदिनीमेदसैवैषाख्यातिंप्राप्तातुपार्थिव ॥
यत्रदैत्यवरस्यास्यशोणितंशैलतांगतम् ॥ ९ ॥ कैलासस्योत्तरेभागेतत्राभूच्छोणितंपुरम् ॥ अथमांसचयान्दृष्ट्वासर्वतोव्याप्यतिष्ठतः ॥ ११० ॥
तदासस्मारदेवेशश्चतुःषष्टिगणंरणे ॥ विज्ञांनस्मरणादेव्यःसंप्राप्ताःशङ्करान्तिकम् ॥ ११ ॥ कृताञ्जलिपुटाःप्रोचुःशिवकिंकरवामहे ॥ १२ ॥ महा
देवउवाच ॥ यएतेदैत्यमांसस्यराशयोगिरिसन्निभाः॥भक्षयध्वंयुताःशीघ्रंदत्तानुज्ञामयातुवः॥१३॥ब्राह्मीमाहेश्वरीचैवकौमारीवैष्णवीतथा ॥ वाराही
चैवमाहेन्द्रीसर्वाःस्वगणशोभिताः ॥ १४ ॥ एवंशङ्करनिर्दिष्टादेव्यस्तामांससंचयान् ॥ क्रूरेणचक्षुषालोक्यनिन्युश्चादर्शनंक्षणात् ॥ १५ ॥
अथजालन्धरवपुःक्षीणंकान्तंतुशक्तिभिः ॥ ताभिर्ग्रस्तेशरीरेतुतस्यदेहाद्विनिःसृता ॥ १६ ॥ प्रभासाशङ्करंप्राप्ताजगामादर्शनंक्षणात् ॥ तत्तेजःसूर्य
सङ्काशंलयंप्राप्तंमहेश्वरे ॥ १७ ॥ एवंसविलयंप्राप्तस्त्रिदशारिस्त्रिलोचनात् ॥ वृणुध्वंचवरंसर्वाःप्रीतःप्राहमहेश्वरः ॥१८॥ तदाताःसर्वयोगिन्यःपप्रच्छु
र्जगदीश्वरम् ॥ मर्त्यलोकेषुयेलोकाभोगमोक्षवरेप्सवः ॥ १९ ॥ पूजयिष्यन्तितेनित्यंस्वगृहेयोगिनीगणम् ॥ तत्तेषांवाञ्छितंसर्वंसिध्यतांत्वत्प्रसा
दतः ॥ १२० ॥ महादेवउवाच ॥ यःकश्चित्पूजयेन्नित्यंभक्तिभावसमन्वितः ॥ युष्मद्गणंचतस्याहंवरदोऽस्मिधरातले ॥ २१ ॥ मद्भक्तःकेशव
स्यापिद्वेष्टियोयोगिनीगणम् ॥ भैरवोऽहंतदातस्यहरिष्येसुकृतंकृतम् ॥ २२ ॥ इतिदत्तवराहृष्टायोगिन्योविभुनामृधे ॥ अत्रान्तरेभवानींतांसस्मार
वृषभंहरः ॥ २३ ॥ स्मृतमात्रापार्वतीसावृषभश्चागमत्क्षणात् ॥ सखीगणसमायुक्तासंप्राप्ताहरवल्लभा ॥ २४ ॥ संत्यक्त्वाभ्रामरींमूर्तिंहरस्यार्द्धं
समारुहत् ॥ गिरिजासहितोराजन्महेशोमुमुदेततः ॥ २५ ॥ योगिनीःप्रत्युवाचेदंपिबध्वंरुधिरंनृपु ॥ जालन्धरकबन्धस्थंताःश्रुत्वाजहृषुर्भृशम् ॥
॥ २६ ॥ मांसमेदोह्यसृक्पीत्वायोगिन्योननृतुर्मुदा ॥ ततोहरःप्रसन्नोऽभूत्तासांक्रीडनवीक्षणात् ॥ २७ ॥ स्वयंचभैरवंरूपंकृत्वातन्मध्यगः
पपौ ॥ तीक्ष्णदंष्ट्रामहाकाकास्तदासन्योगिनीगणाः ॥ २८ ॥ ग्रसन्तोऽद्यापिमांसानिकालेचापिपिबन्त्यसृक् ॥ तेनजालन्धरोदैत्योनोत्ति
ष्ठतिरणेहतः ॥ २९ ॥ ततस्तत्रसमाजग्मुर्ब्रह्माद्यादेवतागणाः ॥ ऋषयोमरुतोदेवाःस्तुवन्तिस्ममहेश्वरम् ॥ १३० ॥ दिशःप्रसेदुःसुरभिर्ववौमरु

१ 'ईशान' इति 'ज्ञानखं' इ० च पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिवः प्रपेतुर्भुवि पुष्पवृष्टयः ॥ कृताभिषेकस्य च तस्य निःस्वनान्संनादिता दुन्दुभयोऽपि चक्रिरे ॥ ३१ ॥ उपरिपरिमलान्धैः सुस्वरं संपतद्भिर्म
धुकरनिकुरम्बैरुह्यमानाभरेण ॥ अविरलमधुधारासारसंसिक्तभूमिः सदसि सुरविमुक्ता प्रापतत्पुष्पवृष्टिः ॥ ३२ ॥ हते तदा सिन्धुसुते हरेण ना
राचघातैस्त्रिजगत्तदा बभौ ॥ प्रसूनवृष्टिर्ननृतुस्तदाङ्गना जगुश्च यक्षाः सुरकिन्नराद्याः ॥ ३३ ॥ शम्भुर्वैरिजयोत्थितेन यशसा स्फाराङ्ककीर्तिर्गिरि
स्वं भेजे सुरसिद्धचारणगणैः संस्तूयमानः सदा ॥ गौरी चापि जगाम चाशु गिरितः श्वेतं सखीसंवृता संचक्रुस्त्वभिसेवनं सुमनसां वर्षेण देवाङ्गनाः ॥ ३४ ॥
देवोऽसौ करुणामयः सुरगणान्स्वे स्वे पदे स्थापयन्प्रादादन्यदपि स्वकं वसु ततो ज्ञात्वा पतिः शङ्करः ॥ किं वक्तव्यमतः परं यदिभवे दीशानुकम्पापराको
ऽयं वा त्रिदिवो धरातलमिदं स्यादात्मसात्सर्वतः ॥ ३५ ॥ देवाः स्वराज्यमासाद्य यथापूर्वं चकाशिरे ॥ बुभुजुर्यज्ञभागांस्ते लोकपालत्वमाश्रिताः ॥
॥३६॥ नारद उवाच ॥ इति जालन्धरस्योक्तं यथावदनुपूर्वशः ॥ चरितं लोकवीरस्य राजन्नत्यद्भुतं तव ॥ ३७ ॥ विष्णुस्त्यजति नाद्यापि क्षीराब्धिं यद्वशो
नृप ॥ सर्वोऽपि भुङ्क्ते स्वं कर्म कर्मतद्विद्धि च संशयम् ॥ ३८ ॥ तुभ्यं दुःखनिरासाय प्रोक्तमाख्यानमुत्तमम् ॥ यावद्देहोऽस्ति कर्माणि सुखदुःखानि कर्मतः
॥ ३९ ॥ देही भुङ्क्ते वशो राजंस्त्राणं न ज्ञानतः परम् ॥ कृष्णादीनां देहबन्धे सुखदुःखादि वर्तते ॥ १४० ॥ तत्रेतरेषां किं वाच्यं ये वैराग्यपराङ्मुखाः ॥ ज्ञात्वे
दृशीं कर्मगतिं सर्वेभ्यो बलवत्तमाम् ॥ ४१ ॥ धीरो भव प्रतीक्षस्व शुभकर्मागमं पुनः ॥ शत्रूञ्जित्वा तु समये स्वराज्यं पुनराप्स्यसि ॥ ४२ ॥ इतिहास
मिमं श्रुत्वा न दुःखैः परिभूयते ॥ धर्मार्थकाममोक्षाश्च यथावच्चात्र कीर्तिताः ॥ ४३ ॥ स्वर्ग्यं पापहरं पुण्यं शोकमोहविनाशनम् ॥ ब्राह्मणो ज्ञानमाप्नोति राज्यं
प्राप्नोति क्षत्रियः ॥ ४४ ॥ वैश्यश्च बह्वीं संपत्तिं श्रुत्वा शूद्रः सुखं लभेत् ॥ यो राजा भ्रष्टराज्योऽपि रतः सन्नेव सत्पथि ॥ ४५ ॥ स राज्यं पुनराप्नोति श्रव
णान्नित्यमस्य तु ॥ आकर्ण्यैतत्सतां राजञ्छ्राव्यमन्यन्न रोचते ॥ ४६ ॥ कलं च कोकिलालापं रूक्षं ध्वाङ्क्षरुतं यथा ॥ आख्यानमेतदनघं श्रुत्वा सज्जनहृ
त्प्रियः ॥ ४७ ॥ हिरण्यतिलवस्त्राद्यैर्धेनुभूमिप्रदानतः ॥ संतोषयेद्वाचकं तु तस्मिंस्तुष्टे फलं लभेत् ॥ ४८ ॥ देवताश्च प्रसीदेयुरर्चिते वाचके गुरौ ॥ अन्न
दानानि दद्याच्च ब्राह्मणेभ्यः प्रपूजयेत् ॥ ४९ ॥ जायते विजयी नित्यं पुत्रपौत्रसमृद्धिमान् ॥ जायते विष्णुलोके यः शृणोत्याख्यानमुत्तमम् ॥ १५० ॥
इति व्याजेन भो भूप तुलस्युत्पत्तिकारणम् ॥ ये शृण्वन्ति नरश्रेष्ठा न तेषां पातकं क्वचित् ॥ ५१ ॥ तुलसीमाहात्म्यमिदं पवित्रं पापनाशनम् ॥ श्रुत्वा
तु लभते मोक्षमुक्त्वा चैव न संशयः ॥ ५२ ॥ स्वगृहे रोपिता चैव तुलसी पापनाशिनी ॥ दर्शनाद्ब्रह्महत्यापि नश्यते नात्र संशयः ॥ ५३ ॥
कार्त्तिके चैव माघे तु तुलस्या पूजयेद्धरिम् ॥ वैशाखे तु विशेषेण पूजनं च हरेः स्मृतम् ॥ ५४ ॥ एकेनैव प्रदक्षिणेन सकलं पापं गतं वै सदा येशूद्राभुवि सन्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दाननिरताःकालेनशुद्धिंगताः ॥ तेऽपिस्युःसुरपूजनार्हतनवःपापाच्चदूरंगतायेवैविष्णुजनाश्चदुर्लभतराह्यस्मिन्कलौसाम्प्रतम् ॥ १५५ ॥ इतिश्री
पाद्ममहापुराणेपञ्चप०उत्तर०जाल०श्रीजालंधरवधनामैकोनाविंशोऽध्यायः ॥ १९ ॥ युधिष्ठिरउवाच ॥ श्रीशैलःपर्वतोरम्यःकुत्रतिष्ठतिनारद ॥
किंतत्रवर्त्ततेतीर्थंकस्यदेवस्यपूजनम् ॥ कस्यांदिशिसमाख्यातोलोकेषुचवदाधुना ॥ १ ॥ नारदउवाच ॥ शृणुराजन्प्रवक्ष्यामिश्रीशैलंपर्वतो
त्तमम् ॥ यंश्रुत्वामुच्यतेलोकोबालहत्यादिपातकात् ॥ २ ॥ तत्पर्वतवरंरम्यंमुनिभिश्चोपसेवितम् ॥ नानाद्रुमलताकीर्णंनानापुष्पोपशोभितम् ॥
॥ ३ ॥ हंसकोकिलषट्पादमयूरध्वनिनादितम् ॥ श्रीवृक्षैश्चकपित्थैश्चशिरीषैराजवृक्षकैः ॥४॥ पारिजातकपुष्पैश्चकदम्बोदुम्बरैस्तथा ॥ नानापुष्पैः
सुगन्धाढ्यैर्वासितंतद्वनंगिरौ ॥ ५ ॥ सर्वाभिर्ऋषिपत्नीभिःसशिष्याभिःसुसेवितम् ॥ केचिदभ्यासयुक्ताश्चकेचिद्व्याख्यानतत्पराः ॥ ६ ॥
केचिदूर्ध्वभुजास्तत्रचाङ्गुष्ठाग्रैःस्थिताःपरे ॥ शिवध्यानरताःकेचित्केचिद्विष्णुपरायणाः ॥ ७ ॥ निराहाराश्चकेऽप्यत्रकेचित्पर्णाशनेरताः ॥
कन्दमूलफलाहाराःकेचिन्मौनव्रताःस्थिताः ॥ ८ ॥ एकपादाःस्थिताःकेचित्केचित्पद्मासनेस्थिताः ॥ केचिच्चैवनिराहारास्तपस्तेपुःसुदुष्करम् ॥
॥ ९ ॥ आश्रमाणिचपुण्यानिनद्यश्चविविधाःशुभाः ॥ देवखातान्यनेकानितडागानिबहूनिच ॥ १० ॥ पर्वतोऽयंमहाराजदृश्यतेकिलसर्वतः॥
मल्लिकार्जुनकोराजन्यत्रतिष्ठतिनित्यशः ॥ ११ ॥ तत्रैवशिखरंरम्यंपर्वतोपरिशोभितम् ॥ शृङ्गदर्शनमात्रेणमुक्तिरेवनसंशयः ॥ १२ ॥ दक्षिणां
दिशमाश्रित्यवर्त्ततेपर्वतोत्तमः ॥ अत्रगङ्गामहारम्यापातालाख्यासमन्विता ॥ १३ ॥ तत्रचस्नानमात्रेणमहापापैःप्रमुच्यते ॥ श्रीशैलशिखरं
दृष्ट्वावाराणस्यांमृतोध्रुवम् ॥ १४ ॥ केदारेह्युदकंपीत्वापुनर्जन्मनविद्यते ॥ तापसानांमहत्स्थानंयोगिनांचतथैवच ॥ १५ ॥ तस्मात्सर्वं
प्रयत्नेनदर्शनंतस्यकारयेत् ॥ अयंविज्ञानदेवोऽसौमहापातकनाशनः ॥ १६ ॥ सिद्धंपुरंचनगरंरम्यंस्वर्गसुखावहम् ॥ नित्यमप्सरसोयत्र
यन्तिचरमन्तिच ॥ १७ ॥ अतःपर्वतराजोऽयंदर्शनेसौख्यकारकः ॥ तस्यतैर्दर्शनंकार्यंमुक्तिमिच्छन्तियेनराः ॥ १८ ॥ इतिश्रीपाद्ममहा
पुराणेपञ्चप०उत्तरखण्डेश्रीशैलोपाख्यानेविंशोऽध्यायः ॥ २० ॥ श्रीमहादेवउवाच ॥ हरिद्वारंमहापुण्यंशृणुदेवर्षिसत्तम ॥ यत्रगङ्गावहत्येव
तत्रोक्तंतीर्थमुत्तमम् ॥ १ ॥ यत्रदेवावसन्तीहऋषयोमनवस्तथा ॥ यत्रदेवःस्वयंसाक्षात्केशवोनित्यमाश्रितः ॥ २ ॥ पुरातुतत्रभोवत्सतीर्थं
जातंमहत्तदा ॥ यस्यदर्शनमात्रेणदूरतोयातिपातकम् ॥ ३ ॥ यत्रगङ्गामहारम्याजातापुण्यविशेषतः ॥ विष्णुपादोदकीजाताचरणस्पर्शनात्ततः ॥
॥ ४ ॥ भगीरथेनभोविद्वन्नानीतातत्रमार्गतः ॥ उद्धारःपूर्वजानांतुकृतस्तेनमहात्मना ॥ ५ ॥ नारदउवाच ॥ कोऽयंदेवसमाख्यातोभगीरथो

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महातपाः ॥ येनतीर्थंसमानीतंलोकानांहितकारणात् ॥ ६ ॥ गङ्गातीर्थंमहत्पुण्यंसर्वपापप्रणाशनम् ॥ लोकाःसर्वेवदन्त्येवमेतत्तीर्थोत्तमो
त्तमम् ॥ ७ ॥ गङ्गागङ्गेतियोब्रूयाद्योजनानांशतैरपि ॥ मुच्यतेसर्वपापेभ्योविष्णुलोकंसगच्छति ॥ ८ ॥ कथंतेनसमानीताकिंकार्यंवदसुव्रत ॥
॥ ९ ॥ महादेवउवाच ॥ येनगङ्गायथानीतागङ्गाद्वारेऽतिशोभने ॥ तत्सर्वंसंप्रवक्ष्यामिक्रमानुक्रमयोगतः ॥ १० ॥ पूर्वमासीद्धरिश्चन्द्रस्त्रै
लोक्येसत्यपालकः ॥ रोहितस्तस्यपुत्रोऽभूदेकोविष्णुपरायणः ॥ ११ ॥ तस्यापिचवृकःपुत्रोधार्मिष्ठःसत्पथेस्थितः ॥ तस्यपुत्रःसुबाहुश्च
जातोऽस्मिन्वैकुलेतदा ॥ १२ ॥ तस्यपुत्रोगरोनामनात्यन्तंधार्मिकोऽभवत् ॥ कदाचित्कालयोगेनदुःखीजातोऽत्रकारणात् ॥ १३ ॥ राजा
प्रच्यावितोराज्याद्धोकैश्चाधर्मकारणात ॥ स्वकुटुम्बंगृहीत्वातुगतोऽसौभार्गवाश्रमे ॥ १४ ॥ रक्षितोभार्गवेणाथकृपयातत्रवैतदा ॥ तत्रपुत्रो
ह्यभूत्तस्यसगरोनामवैद्विज ॥ १५ ॥ ववृधेचाश्रमेपुण्येभार्गवेणाभिरक्षितः ॥ उपवीतादिकंसर्वंक्षत्रियस्यतदाकृतम् ॥ १६ ॥ शस्त्राणांचतथा
भ्यासोवेदानांतुतथैवच ॥ आग्नेयास्त्रंततोलब्ध्वाभार्गवात्सगरोनृपः ॥ १७ ॥ जघानपृथिवींगत्वानालजङ्घान्सहैहयान् ॥ सशकान्पारदांश्चैव
जघानसमहातपाः ॥ १८ ॥ नारदउवाच ॥ माहात्म्यंसगरस्याथवदशङ्करविस्तरात् ॥ सूर्यवंशीमहाराजोविख्यातःसमहाबली ॥ १९ ॥ महादेव
उवाच ॥ गरस्यव्यसनेतातहृतंराज्यमभूत्किल॥हैहयैस्तालजङ्घाद्यैःशकैःसार्द्धचनारद॥२०॥यवनाःपारदाश्चैवकाम्बोजाःपह्लवास्तथा ॥ एतेपञ्चगणा
ब्रह्मन्हैहयार्थेपराक्रमन् ॥२१॥ हृतराज्यस्ततोराजासगरोऽथवनंययौ ॥ पत्न्याचानुगतोदुःखीसवैप्राणानवासृजत् ॥ २२ ॥ तस्यपत्नीतुकल्याणी
सगर्भाचव्रतान्विता ॥ सपत्न्याभार्गवस्तस्यवृतःपूर्वंसुतेप्सया ॥ २३ ॥ सातुभर्तृचितांकृत्वावनेतंप्ररुरोदह ॥ और्वस्तांवारयित्वाचगरपत्नींतुनारद॥
॥ २४ ॥ न्यवेदयततत्पुत्रंधर्मिष्ठंसात्त्विकंप्रियम् ॥ निवेदितेततोबालेमरणात्सान्यवर्त्तत ॥२५॥ ततोमासद्वयेजातेववृधेतस्यचाश्रमे॥जातकर्मादियो
गश्चऔर्वेणचतथाकृतः ॥ २६ ॥ उपवीतादिकंसर्वंजातंतत्रमहामुने ॥ तत्रवेदादिकंसर्वंपठितंचौर्वयोगतः ॥ २७ ॥ अध्याप्यवेदशास्त्राणिततोऽस्त्रंप्रत्य
पादयत् ॥ आग्नेयंतंमहाभागअमरैरपिदुःसहम् ॥ २८ ॥ सतेनास्त्रबलेनाजौबलेनचसमन्वितः ॥ हैहयान्वैजघानाशुसंक्रुद्धःस्वबलेनच॥२९॥आज
हारचलोकेषुसचकीर्तिमवापसः ॥ ततःशकाःसयवनाःकम्बोजाःपह्लवास्तथा ॥३०॥ हन्यमानास्तदातेतुवसिष्ठंशरणंययुः ॥ वसिष्ठोऽपिचतान्कृत्वा
समयेसमहाद्युतिः ॥ ३१ ॥ सगरंवारयामासतेषांदत्त्वाऽभयंनृपः ॥ सगरःस्वांप्रतिज्ञांतुगुरोर्वाक्यंनिशम्यच ॥ ३२ ॥ धर्मभ्रष्टांश्चविकृतां
स्तान्कृत्वापूरयत्सतु ॥ अर्द्धंशकानांशिरसोमुण्डंकृत्वाव्यसर्जयत् ॥ ३३ ॥ यवनानांशिरःसर्वंकाम्बोजानांतथैवच ॥ पारदामुण्डकेशाश्चपह्लवाःश्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रुरक्षकाः ॥ ३४ ॥ एवंविजित्यसर्वान्वैकृतवान्धर्मसङ्ग्रहम् ॥ सर्वधर्मजयीराजाविजित्येमांवसुन्धराम् ॥ ३५ ॥ अश्वंसंस्कारयामासवाजिमेधा
यपार्थिवः॥ तस्यचारयतःसोऽश्वःसमुद्रेपूर्वदक्षिणे॥ ३६ ॥वेलासमीपेऽपहृतोभूमिंचैवप्रवेशितः॥सतंदेशंतदापुत्रैःखानयामाससर्वतः ॥ ३७ ॥नाश्वंप्रा
पुस्तदातेवैखन्यमानेमहार्णवे ॥ तत्रैकमादिपुरुषंददृशुस्तेत्वरान्विताः ॥ ३८ ॥ कपिलंजगतांनाथंचौरोऽयमितिचाब्रुवन् ॥ तस्यचक्षुःसमुत्पन्नवह्नि
नाप्रतिबुध्यतः ॥ ३९ ॥ दग्धाःषष्टिसहस्राणिचत्वारस्तेऽवशेषिताः ॥ हर्षीकेतुःसुकेतुश्चतथाधर्मरथोऽपरः ॥ ४० ॥ शूरःपञ्चजनश्चैवतस्यवंशकरा
द्विज ॥ प्रादाचतस्मैभगवान्हरिःपञ्चवरान्स्वयम् ॥ ४१ ॥ वशंमोक्षंसुकीर्तिंचसमुद्रंतनयंविभुः ॥ सागरत्वंचलेभेऽथकर्मणातेनतस्यवै॥ ४२ ॥ तमा
श्वमेधिकंसोऽश्वंसमुद्रादुपलब्धवान् ॥ आजहाराश्वमेधानांशतंसचमहायशाः ॥ ४३ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०उत्त०एकविंशोऽध्यायः
॥२१॥ नारदउवाच ॥ सगरस्यात्मजावीराःकथंजातामहाबलाः ॥ विक्रान्ताःषष्टिसाहस्राविज्ञानेश्वरतद्वद ॥ १ ॥ श्रीपार्वतीपतिरुवाच ॥ द्वेपत्न्यौ
सगरस्यास्तांतपसादग्धकिल्बिषे ॥ और्वस्ताभ्यांवरंप्रादात्तोषितोमुनिसत्तमः ॥ २ ॥ षष्टिंपुत्रसहस्राणिएकावत्रेतरस्विनाम् ॥ एकावंशधरंत्वेकंयथे
ष्टंवरशालिनी॥३॥तत्रैकासुषुवेतुम्ब्यांपुत्राञ्शून्यस्यबहूनथ ॥ तेतुसर्वेऽपिधात्रीभिर्वार्द्धितास्तुयथाक्रमम् ॥४॥ घृतपूर्णेषुकुम्भेषुकुमाराःप्रीतिवर्द्धनाः॥
कपिलानांतुदुग्धानिधात्र्यस्तानप्यपाययन्॥५॥तेनैवदुग्धयोगेनववृधुस्तेमहाबलाः ॥ एकःपञ्चजनोनामपुत्रोराजाबभूवह॥६॥ततःपञ्चजनस्यासीदं
शुमान्नामवीर्यवान् ॥ दिलीपस्तनयस्तस्यपुत्रोयस्यभगीरथः ॥७॥यस्तुगङ्गांसरिच्छ्रेष्ठामानिनायचसुव्रतः ॥ अब्धिमेनांसमानीयदुहितृत्वमकल्प
यत्॥८॥नारदउवाच ॥ कथंगङ्गासमानीताकिंतपस्तेनवैकृतम् ॥ तत्सर्वंमेसमाचक्ष्वसुव्रतोऽसिदयानिधे ॥ ९ ॥ महादेवउवाच ॥ पूर्वजानांहिता
र्थायगतोऽसौहैमकेगिरौ ॥ तत्रगत्वातपस्तप्तंवर्षाणामयुतंतदा ॥ १० ॥ आदिदेवःप्रसन्नोऽभूद्योऽसौदेवोनिरञ्जनः ॥ तेनदत्ताइयंगङ्गाआकाशात्समु
पस्थिता ॥ ११ ॥ तत्रविश्वेश्वरोदेवोयत्रतिष्ठतिनित्यशः ॥ गङ्गांदृष्ट्वाऽऽगतांतेनगृहीताजाह्नवीतदा ॥ १२ ॥ जटाजूटेचसंधार्यवर्षाणामयुतंस्थितम् ॥
ननिःसृतातदागङ्गाईशस्यैवप्रभावतः ॥१३॥ विचारितंतदातेनक्वगताममसातृका ॥ सध्यानेनविचार्यैवंगृहीताचेश्वरेणतु ॥ १४ ॥ ॥ ततःकैलासम
गमत्सतुभगीरथोनृपः ॥ तत्रगत्वामुनिश्रेष्ठह्यकरोदुल्बणंतपः ॥ १५ ॥ आराधितस्तदातेनदत्तवानहमापगाम् ॥ एकंकेशंपरित्यज्यदत्ता ॥ २३ ॥
त्रिपथगातदा ॥ १६ ॥ सगृहीत्वागतोगङ्गांपातालेयत्रपूर्वजाः ॥ अलकनन्दातदानामगङ्गायाःप्रथमंस्मृतम् ॥ १७ ॥ हरिद्वारेयदायातातिविष्णुपादो
दकीतदा ॥ तदेवतीर्थंप्रवरंदेवानामपिदुर्लभम् ॥ १८ ॥ तत्तीर्थेचनरःस्नात्वाहरिंदृष्ट्वाविशेषतः ॥ प्रदक्षिणंयेकुर्वन्तिनचैतेदुःखभागिनः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १९ ॥ ब्रह्महत्यादिपापानांराशयःसन्त्यनेकशः ॥ विलयंयान्तितेसर्वेहरेर्दर्शनतःसदा ॥ २० ॥ एकदाकेशवस्थानेहरिद्वारेह्यहंगतः ॥ तस्मा
त्तीर्थप्रभावाच्चजातोऽहविष्णुरूपवान् ॥ २१ ॥ येगच्छन्तिनरश्रेष्ठास्तेवैयान्तिह्यनामयम् ॥ चतुर्भुजास्तुतेलोकानरानार्यश्चसर्वशः ॥ २२ ॥
वैकुण्ठंयान्तितेसर्वेहरेर्दर्शनमात्रतः ॥ ममाप्यधिकतीर्थंतुहरिद्वारंसुशोभनम् ॥ २३ ॥तीर्थानांप्रवरंतीर्थंचतुर्वर्गप्रदायकम् ॥ कलौधर्मकरंपुंसांमोक्ष
दंचार्थदंतथा ॥ २४ ॥ यत्रगङ्गामहारम्यानित्यंवहतिनिर्मला ॥ एतत्कथानकंपुण्यंहरिद्वाराख्यमुत्तमम् ॥ २५ ॥ उक्तंचशृण्वतांपुंसांफलंभवति
शाश्वतम् ॥ अश्वमेधेकृतेयागेगोसहस्रेतथैवच ॥ २६ ॥ तत्पुण्यंलभतेविद्वान्हरेर्दर्शनमात्रतः ॥ गोहन्ताब्रह्महाचैवयेचान्येपितृघातकाः ॥ २७ ॥
एवंविधानिपापानिब्रह्मन्यपिचवैद्विज ॥ विलयंयान्तिसर्वाणिहरेर्दर्शनमात्रतः ॥ २८ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०उ०उमापतिनारद
दसंवादेहरिद्वारमाहात्म्येगङ्गोत्पत्तिपूर्वकंहरिद्वारमाहात्म्यंनामद्वाविंशोध्यायः ॥२२ ॥ महादेवउवाच ॥ गाङ्गंवक्ष्यामिमाहात्म्यंयथोक्तंमुनिसत्तम ॥
यस्यश्रवणमात्रेणअघंनश्यतितत्क्षणात् ॥१॥ गङ्गागङ्गेतियोब्रूयाद्योजनानांशतैपि ॥ मुच्यतेसर्वपापेभ्योविष्णुलोकंसगच्छति ॥२॥ चरणाब्जसमु
द्भूतागङ्गानामेतिविश्रुता॥पापानांस्थूलराशीनांनाशिनीचेतिनारद ॥३॥नर्मदासरयूश्चैवतथावेत्रवतीनदी॥तापीपयोष्णीचन्द्राचविपाशाकर्मनाशिनी॥
॥ ४ ॥ पुष्यापूर्णातथादीपाविदीपासूर्यनन्दना ॥ सहस्रवृषदानात्तुयत्फलंलभतेध्रुवम् ॥ ५ ॥ तत्फलंसमवाप्नोतिगङ्गादर्शनतःक्षणात् ॥
इयंगङ्गमहापुण्याब्रह्मघ्नानांविशेषतः ॥ ६॥ तेषांनिरययुक्तानांगङ्गापापापहारिणी ॥ चन्द्रसूर्योपरागेचयत्फलंविद्यतेऽनघ ॥७ ॥ तत्फलंसमवाप्नोति
गङ्गादर्शनमात्रतः ॥ यथासूर्योदयेतातततमोगच्छतिदूरतः ॥८ ॥ तथागङ्गाप्रभावेणविलयंयातिपातकम् ॥ मान्येयंसर्वदालोकेपवित्रापापनाशिनी ॥
॥९॥ कल्याणरूपासततंविष्णुनानिर्मितापुरा ॥ दिव्यरूपातुजननीदीनानांपावनीस्मृता॥१०॥देवानांचयथाविष्णुस्तथागङ्गोत्तमानदी ॥ येकुर्वन्ति
नराःस्नानंमाघमासेनिरन्तरम् ॥११॥ नतेषांविद्यतेदुःखंकल्पानांचशतत्रयम् ॥ यत्रगङ्गाचयमुनायत्रैचैवसरस्वती ॥ तत्रस्नात्वाचपीत्वाचमुक्तिभागी
नसंशयः ॥ १२ ॥ त्वद्वार्तांप्रियतोब्रवीमियदहंसास्तुस्तुतिस्तेप्रभोयद्भुञ्जेतवतन्निवेदनमथोयद्यामिसाप्रेष्यता ॥ यच्छन्तःस्वपिमित्वदङ्घ्रि
युगलेदण्डप्रणामोऽस्तुनःस्वामिन्यच्चकरोमितेनसभवान्विश्वेश्वरःप्रीयताम् ॥ १३॥ दृष्टेनवन्दितेनापिस्पृष्टेनचधृतेनके ॥ नरायेनविमुच्यन्तेतदेतद्या
मुनंजलम्॥१४॥तावद्भ्रमन्तिभुवनेमनुजाभवोत्थदारिद्र्यरोगमरणव्यसनाभिभूताः ॥ यावज्जलंतवमहानदिनीलनीलंपश्यन्तिनोदधतिमूर्धसुसूर्यपुत्रि॥
॥ १५ ॥ यत्संस्मृतिःसपदिकृन्ततिदुष्कृतौघंपापावलींजयतियोजनलक्षतोऽपि ॥ यन्नामनामजगदुच्चरितंपुनातिदिष्ट्याहिसापथिदृशोभविताद्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गङ्गा॥१६॥आलोकोत्कान्तितेनप्रमुदितमनसावर्त्मयस्याःप्रयातंसत्यस्मिन्कृत्यमेतामथप्रथमकृतीजह्निवान्स्वर्गसिन्धुम् ॥स्नानंसन्ध्यानिवापःसुरय
जनमपिश्राद्धविप्राशनाद्यंसर्वसंपूर्णमेतद्भवतिभगवतःप्रीतिदंनातिचित्रम् ॥ १७ ॥ देवित्वंतुपरब्रह्मपरमानन्ददायिनी ॥ अर्घ्यंगृहाणमेगङ्गेपापंहरनमो
ऽस्तुते ॥ १८ ॥ साक्षाद्धर्मद्रवौघंमुररिपुचरणाम्भोजपीयूषसारंदुःखस्याब्धेस्तरित्रंसुरमनुजनुतंस्वर्गसोपानमार्गम् ॥ सर्वांहोहारिवारिप्रवरगुणगणं
भासियासंवहन्तीतस्यैभागीरथिश्रीमतिमुदितमनादेविकुर्वेनमस्ते ॥ १९ ॥ स्वःसिन्धोदुरिताब्धिमग्नजनतासन्तारणिप्रोल्लसत्कल्लोलामलकान्ति
नाशिततमःस्तोमेजगत्पावनि ॥ गङ्गेदेविपुनीहिदुष्कृतभयक्रान्तंकृपाभाजनंमातर्मांशरणागतंशरणदेरक्षाथभोभीषितम् ॥२०॥हंहोमानसकम्पसेकि
मुसखेत्रस्तंभयान्नारकात्किंतेभीतिरितिश्रुतिर्दुरितकृत्संजायतेनारकी ॥ माभैषीःशृणुमेगतिंयदिमयापापाचलस्पार्द्धिनीप्राप्तातेनिरयःकथंकिमपरंकिंमे
नधर्मंधनम् ॥२१॥ सर्वेशादिप्रशंसासुदमनुभवितुंमज्जनंयत्रचोक्तंस्वर्नार्योवीक्ष्यहृष्टाविबुधसुरपतिप्राप्तिसंभावनेन ॥ नीरेश्रीजह्नुकन्येयमनियमरताः
स्नान्तियेतावकीनेदेवत्वंतेलभन्तेस्फुटमशुभकृतोऽप्यत्रवेदाःप्रमाणम् ॥२२॥ बुद्धेसद्बुद्धिरेवंभवतुतवसखेमानसस्वस्तितेऽस्तुआस्तांपादौपदस्थौसतत
मिह्युवांसाधुदृष्टीचदृष्टी ॥ वाणिप्राणप्रियेऽधिप्रकटगुणवपुःप्राप्नुहिप्राणपुष्टिंयस्मात्सर्वैर्भवद्भिःसुखमतुलमहंप्राप्नुयांतीर्थपुण्यम् ॥ २३ ॥ श्रीजा
ह्नवीरविसुतापरमेष्ठिपुत्रीसिन्धुत्रयाभरणतीर्थवरप्रयाग ॥ सर्वेशमामनुगृहाणनयस्वचोर्ध्वमन्तस्तमोदशविधंदलयस्वधाम्ना ॥ २४ ॥ वागीशविष्णवी
शपुरन्दराद्याःपापप्रणाशायविदांविदोऽपि ॥ भजन्तियत्तीमरनीलनीरंसतीर्थराजोजयतिप्रयागः ॥ २५ ॥ कलिन्दजासङ्गमवाप्ययत्रप्रत्यग्गता
स्वर्गधुनीधुनोति ॥ अध्यात्मतापत्रितयंजनस्यसतीर्थराजोजयतिप्रयागः ॥ २६ ॥ श्यामोजटःश्यामगुणोवृणोतिस्वच्छाययाश्यामलयाजनानाम् ॥
श्यामःश्रमंकृन्ततियत्रदृष्टःसतीर्थराजोजयतिप्रयागः ॥२७ ॥ ब्रह्मादयोऽप्यात्मकृतिंविहायभजन्तिपुण्यात्मकभागधेयम् ॥ यत्रोज्झितादण्डधरःस्व
दण्डंसतीर्थराजोजयतिप्रयागः ॥ २८ ॥ यत्सेवयादेवनृदेवतादिदेवर्षयःप्रत्यहमामनन्ति ॥ स्वर्गंचसर्वोत्तमभूमिराज्यंसतीर्थराजोजयतिप्रयागः
॥२९॥एनांसिहन्तीतिप्रसिद्धवार्तानामप्रतापेनदिशोद्रवन्ति ॥ यस्यत्रिलोकीप्रततायशोभिःसतीर्थराजोजयतिप्रयागः ॥३० ॥ धत्तेऽभितश्चामरचारु
कान्तिसितासितंयत्रसरिद्वरेण्ये॥आद्योवटश्छत्रमिवातिभातिसतीर्थराजोजयतिप्रयागः॥ ३१ ॥ब्राह्मीनपुत्रीत्रिपथास्त्रिवेणीसमागमेसाक्षतयागमात्रात् ॥
यत्राप्लुतान्ब्रह्मपदंनयन्तिसतीर्थराजोजयतिप्रयागः ॥ ३२ ॥ केषांचिज्जन्मकोटिर्व्रजतिसुवचसायामियामीतियस्मिन्केषांचित्प्रोषितानांनियत
मतिपतेद्वर्षवृन्दंवरिष्ठम् ॥ यत्प्राप्तंभाग्यलक्ष्मैर्भवतिभवतिनोवासवाचामवाच्योदिष्ट्यावेणीविशिष्टोभवतिदृगतिथिःकम्प्रयागप्रयागः ॥ ३३ ॥ लोका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नामक्षमाणांसखकृतिषुकलौस्वर्गकामैर्जयस्तुत्यादिस्तोत्रैर्वचोभिःकथममरपदप्राप्तिचिन्तातुराणाम् ॥ अग्निष्टोमाश्वमेधप्रमुखमखफलंसम्यगालोच्य
साङ्गंब्रह्माद्यैस्तीर्थराजोऽभिमतदउपदिष्टोऽयमेवप्रयागः ॥ ३४ ॥ मयाप्रमादातुरतादिदोषतःसन्ध्याविधिर्नोसमुपासितोऽभूत् ॥ चेदत्रसन्ध्यांचरतो
ऽप्रमादतःसन्ध्यास्तुपूर्णाखिलजन्मनोऽपिमे॥३५॥ अन्यत्रापिप्रगर्जन्महिमनितपसिप्रेमभिर्विप्रकृष्टैर्ध्यातःसंकीर्तितोयोऽभिमतपदविधातानिशंनिर्व्य
पेक्षम् ॥श्रीमत्पांसुंत्रिवेणीपरिवृढमतुलंतीर्थराजंप्रयागंगोलङ्कारप्रकाशंस्वयममरवरैश्चार्चिततंनमामि ॥३६॥ अस्माभिःसुतपोऽन्वतप्तकिमहोऐज्यन्त
किंवाध्वराःपात्रेदानमदायिकिंबहुविधंकिंवासुराश्चार्चिताः ॥ किंसत्तीर्थमसेविकिंद्विजकुलंपूजादिभिःसत्कृतंयेनप्रापिसदाशिवस्यशिवदासाराजधानी
स्वयम् ॥ ३७ ॥ भाग्यैर्मेऽधिगताह्यनेकजनुषांसर्वाघविध्वंसिनीसर्वाश्चर्यमयीमयाशिवपुरीसंसारसिन्धोस्तरी ॥ लब्धंसज्जनुषःफलंकुलमलञ्चक्रे
पवित्रीकृतःस्वात्माचाप्यखिलंकृतंकिमपरंसर्वोपरिष्टात्स्थितम् ॥ ३८ ॥ जीवन्नरःपश्यतिभद्रलक्षमेवंवदन्तीतिमृषानयस्मात् ॥ तस्मान्मयावैवपुषेदृश
नप्राप्तापिकाशीक्षणभङ्गुरेण ॥ ३९ ॥ काश्यांविधातुममरैरपिदिव्यभूमौसत्तीर्थलिङ्गगणनार्चनतोनशक्या ॥ यानीहगुप्तविवृतानिपुरातनानिसिद्धानि
योजितकरःप्रणमामितेभ्यः ॥४० ॥किंभीत्यादुरितव्रजात्किमुमुदापुण्यैरगण्यैःकृतैःकिंविद्याभ्यसनान्मदेनजडतादोषाद्विषादेनकिम् ॥ किंगर्वेणधनोद
याद्धनतातापेनकिंभोजनाःस्नात्वाश्रीमणिकर्णिकापयसिचेद्विश्वेश्वरोदृश्यते ॥४१॥अल्पस्फीतिनिरामयापितनुताप्रव्यक्तशक्यात्मताप्रोत्साहाढ्यबले
नकेवलमनोरागद्वितीयेनयत्॥ अप्राप्यापिमनोरथैरविषयास्वप्नप्रवृत्तेरपिप्राप्तासापिगदाधरस्यनगरीसद्योऽपवर्गप्रदा ॥४२॥मन्येनात्मकृतिर्नपूर्वपुरुष
प्राप्तेर्बलंचात्रयन्नापीदंस्वजनप्रमाणमचलंकिंस्वापतापादिकम् ॥ यादुष्प्रापगयाप्रयागयमुनाकाशीसुपर्वागमात्प्राप्तिस्तत्रमहाफलोविजयतेश्रीशारदा
नुग्रहः ॥ ४३ ॥ यःश्राद्धसमयेदूरात्स्मृतोऽपिपितृमुक्तिदः ॥ तंगयायांस्थितंसाक्षान्नमामिश्रीगदाधरम् ॥ ४४ ॥ पन्थानंसमतीत्यदुस्तरमिमदूंरा
द्वीयस्तरंक्षुद्रव्याघ्रतरक्षुकण्टकफणिप्रत्यर्थिभिःसङ्कुलम् ॥ आगत्यप्रथमव्ययंकृपणवाग्याचेज्जनःकंपरंश्रीमद्वारिगदाधरप्रतिदिनंत्वांद्रष्टुमुत्कण्ठते ॥
॥ ४५ ॥ सर्वात्मन्निजदर्शनेनचगयाश्राद्धेनवैदेवताःप्रीणन्विश्वमनीहवत्कथमिहौदासीन्यमालम्बसे ॥ किंतेसर्वदनिर्दयत्वमधुनाकिंवाप्रभुत्वंकलेः
किंवासत्त्वनिरीक्षणंनृषुचिरंकिंवास्यसेवारुचिः ॥ ४६ ॥ गदाधरमयाश्राद्धंसंचीर्णंत्वत्प्रसादतः ॥ अनुजानीहिमांदेवगमनायगृहंप्रति ॥ ४७ ॥
चतुर्णांदेवतानांचस्तोत्रंस्वर्गार्थदायकम् ॥ श्राद्धकालेपठेन्नित्यंस्नानकालेतुयःपठेत् ॥ ४८ ॥ सर्वतीर्थसमंस्नानंश्रवणात्पठनाज्जपात् ॥ प्रयागस्यच
गङ्गायायमुनायाःस्तुतेर्द्विज ॥ श्रवणेनविनश्यन्तिदोषाश्चैवतुकर्मजाः ॥४९ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०उत्त०उमापतिनारदसंवादेगङ्गाप्रयाग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यमुनास्तुतिर्नामत्रयोविंशोऽध्यायः ॥ २३ ॥ महादेवउवाच ॥ प्रयागतीर्थमाहात्म्यंप्रवक्ष्यामियथाश्रुतम्॥ महादानपराःपुण्यकर्माणोयत्रसन्तिहि
॥१॥ यत्रगङ्गाचयमुनायत्रचैवसरस्वती ॥ तदेवतीर्थप्रवरंदेवानामपिदुर्लभम् ॥२॥ ईदृशंत्रिषुलोकेषुभूतंनचभविष्यति ॥ ग्रहाणांचयथासूर्योनक्षत्राणां
यथाशशी ॥ ३ ॥ तीर्थानामुत्तमंतीर्थंप्रयागाख्यमनुत्तमम् ॥ प्रातःकालेतुभोविद्वन्प्रयागेस्नानमाचरेत् ॥ ४ ॥ महापापाद्विनिर्मुक्तःसयातिपरमं
पदम् ॥ देयंकिंचिद्यथाशक्तिदारिद्र्याभावमिच्छता ॥ ५ ॥ योनरस्तत्रगत्वावैप्रयागेस्नानमाचरेत् ॥ धनिकोदीर्घजीवीचजायतेनात्रसंशयः ॥ ६ ॥
यत्रवटस्याक्षयस्यदर्शनंकुरुतेनरः ॥ तेनदर्शनमात्रेणब्रह्महत्याविनश्यति ॥७॥ सचाक्षयवटःख्यातःकल्पान्तेऽपिचदृश्यते ॥ शेतेविष्णुर्यस्यपत्रेअतो
ऽयमव्ययःस्मृतः ॥ ८ ॥ तत्रपूजांप्रकुर्वन्तिमानवाविष्णुवल्लभाः ॥ सूत्रेणाच्छादितंकृत्वापूजांचैवतुकारयेत् ॥९॥ माधवाख्यस्तत्रदेवःसुखंतिष्ठति
नित्यशः ॥ तस्यवैदर्शनंकार्यंमहापापैःप्रमुच्यते ॥ १० ॥ यत्रदेवाश्चऋषयोमनुष्याश्चापिसर्वशः ॥ स्वस्वस्थानंसमाश्रित्यतत्रतिष्ठन्तिनित्यशः ॥
॥ ११ ॥ गोघ्नोवापिचचाण्डालोदुष्टोवादुष्टचेतनः ॥ बालघातीतथाऽविद्वान्म्रियतेतत्रवैयदा ॥ १२ ॥ सवैचतुर्भुजोभूत्वावैकुण्ठेवसतेचिरम् ॥
प्रयागेतुनरोयस्तुमाघस्नानंकरोतिच ॥ १३ ॥ नतस्यफलसङ्ख्यास्तिशृणुदेवर्षिसत्तम ॥ आपोनाराइतिप्रोक्ताःसर्वलोकेषुशुश्रुम ॥ १४ ॥ तेन
नारायणःप्रोक्तःस्नातानांभुक्तिमुक्तिदः ॥ ग्रहाणांचयथासूर्योनक्षत्राणांयथाशशी ॥ १५ ॥ मासानांहितथामाघःश्रेष्ठःसर्वेषुकर्मसु ॥ मक
रस्थेरवौमाघेप्रातःकालेतथामले ॥ १६ ॥ गोःपदेऽपिजलेस्नानंस्वर्गदंपापिनामपि ॥ योगोऽयंदुर्लभोविद्वंस्त्रैलोक्येसचराचरे ॥ १७ ॥ अस्मिन्यो
गेसमापन्नःस्नायादपिदिनत्रयम् ॥ पञ्चवासप्तवाप्यत्रस्नानंकुर्वन्प्रयागजम् ॥१८॥ चन्द्रवद्वर्धतेसोऽपिकुलेवाडवसत्तम ॥ चराचराश्चयेजीवास्तथैव
मनुजादयः ॥ १९ ॥ प्रयागंतीर्थमाश्रित्यवैकुण्ठंयान्तितेऽचिरात् ॥ येवसिष्ठादयस्तत्रऋषयःसनकादयः ॥ २० ॥ तेऽपिप्रयागजंतीर्थंसेवन्तेचपुनः
पुनः ॥ यत्रविष्णुश्चरुद्रश्चयत्रेन्द्रश्चतथापुनः ॥ २१ ॥ तेऽपिसर्वेवसन्तीहप्रयागेतीर्थसत्तमे ॥ दानंतत्रप्रशंसन्तिनियमांश्चतथैवच ॥ २२ ॥
तत्रस्नात्वाचपीत्वाचपुनर्जन्मनविद्यते ॥ २३॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०उत्तर०उमापतिनारदसंवादेप्रयागमाहात्म्येचतुर्विंशोऽध्यायः ॥२४॥
महादेवउवाच ॥ शृणुनारदवक्ष्यामिमाहात्म्यंतुलसीभवम् ॥ यच्छ्रुत्वामुच्यतेपापादाजन्ममरणान्तिकात् ॥ १ ॥ पत्रंपुष्पंफलंमूलंशाखात्वक्स्कन्ध
संज्ञितम् ॥ तुलसीसंभवंसर्वंपावनंमृत्तिकादिकम् ॥ २ ॥ शरीरंदह्यतेयेषांतुलसीकाष्ठवह्निना ॥ दत्त्वाचतुलसीकाष्ठंसर्वाङ्गेषुमृतस्यवै ॥ ३ ॥
पश्चाद्यःकुरुतेदाहंसोऽपिपापात्प्रमुच्यते ॥ मरणेयस्यसंप्राप्तंकीर्तनंस्मरणंहरेः ॥४॥ तुलसीदारुणादाहोनतस्यपुनरावृत्तिः ॥ यद्येकंतुलसीकाष्ठंमध्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काष्ठशतस्यहि ॥ ५ ॥ दाहकालेभवेन्मुक्तिःकोटिपापयुतस्यच ॥ गङ्गाम्भसाभिषेकेणयान्तिपुण्यानिपुण्यताम् ॥ ६ ॥ तुलसीकाष्ठमिश्राणियान्ति
दारूणिपुण्यताम् ॥ तुलसीकाष्ठसंमिश्रायावत्प्रज्वलतेचिता ॥ ७ ॥ दह्यन्तितस्यपापानिकल्पकोटिकृतानिवै ॥ दह्यमानंनरंदृष्ट्वातुलसीकाष्ठवह्निना ॥
॥ ८ ॥ नयन्तितंविष्णुदूतानचवैयमकिङ्कराः ॥ जन्मकोटिसहस्रैस्तुमुक्तोयातिजनार्दनम् ॥ ९ ॥ दह्यन्तेयेनरालोकेतुलसीकाष्ठवह्निना ॥ तान्वि
मानस्थितान्देवाःक्षिपन्तिकुसुमाञ्जलिम् ॥ १० ॥ नृत्यन्त्यप्सरसःसर्वागीतंगायन्तिगायकाः ॥ जायन्तेवीक्ष्यतंविष्णुःसंतुष्टःशम्भुनासह ॥
॥ ११ ॥ गृहीत्वातंकरेशौरिर्गृहंनीत्वास्यचाङ्गतः ॥ मार्जयेत्सर्वपापानिपश्यतांत्रिदिवौकसाम् ॥ १२ ॥ महोत्सवंकारयित्वाजयशब्दपुरःसरम् ॥
ज्वलतेयत्रचाज्येनतुलसीकाष्ठपावकः ॥ १३ ॥ अग्न्यगारेश्मशानेवादह्यतेपातकंनृणाम् ॥ होमंकुर्वन्तियेविप्रास्तुलसीकाष्ठवह्निना ॥ १४ ॥ सिक्थे
सिक्थेतिलेवापिअग्निष्टोमफलंलभेत् ॥ योददातिहरेर्धूपंतुलसीकाष्ठसंभवम् ॥ १५ ॥ शतक्रतुसमंपुण्यंलभतेगोशतंफलम् ॥ नैवेद्यंपचतेयस्तुतुलसी
काष्ठवह्निना ॥ १६ ॥ मेरुतुल्यंभवेद्दत्तंतदन्नंकेशवस्यहि ॥ तुलसीपावकेनाथयोदीपंकुरुतेहरेः ॥ १७ ॥ दीपलक्षसहस्राणांपुण्यंसलभतेफलम् ॥
नतेनसदृशोलोकेवैष्णवोभुविदृश्यते ॥ १८ ॥ यःप्रयच्छतिकृष्णस्यतुलसीकाष्ठचन्दनम् ॥ सजायतेकृपापात्रंविष्णोर्वाडवसत्तम ॥ १९ ॥
तुलसीदारुजातेनचन्दनेनकलौहरिम् ॥ विलिप्यभक्तितोनित्यंरमतेहरिसन्निधौ ॥ २० ॥ तुलसीपङ्कलिप्ताङ्गःकुरुतेविष्णुपूजनम् ॥ पूजाशतदिनै
र्काह्नालभ्यतेगोशतंफलम् ॥ २१ ॥ विलेपार्थेतुकृष्णस्यतुलसीकाष्ठचन्दनम् ॥ मन्दिरेतिष्ठतेयावत्तावत्पुण्यफलंशृणु ॥ २२ ॥ तिलप्रस्थाष्टकंदत्त्वा
यत्पुण्यंप्राप्नुयान्नरः ॥ तत्फलंजायतेपुंसांप्रसादाच्चक्रपाणिनः ॥२३॥ योददातिपितॄणांतुपिण्डेतुलसिसंभवम् ॥ दलंसंजायतेतृप्तिःपत्रेपत्रेशताब्दिका ॥
॥ २४ ॥ तुलसीमूलमृद्भिश्चस्नानंकुर्याद्विशेषतः ॥ तेनतीर्थेकृतंस्नानंयावच्चाङ्गेचमृत्तिका ॥ २५ ॥ तदीययातुमञ्जर्यापूजनंचकरोतियः ॥ नाना
पुष्पैःकृतापूजायावच्चन्द्रदिवाकरौ ॥ २६ ॥ यस्मिन्गृहेऽवतिष्ठततुलसीवृक्षवाटिका ॥ दर्शनात्स्पर्शनाच्चैवब्रह्महत्यादिपातकम् ॥ तत्सर्वंविलयंयाति
दर्शनेनैवनारद ॥ २७ ॥ महादेवउवाच ॥ अथान्यत्तेप्रवक्ष्यामिशृणुष्वैकाग्रमानसः ॥ नकस्यापिचकथितंशृणुदेवर्षिसत्तम ॥ २८ ॥ यत्रयत्रगृहेग्रामे
वनेवातुलसीभवेत् ॥ तत्रतत्रजगत्स्वामीप्रीतात्माचवसेद्धरिः ॥ २९ ॥ गृहेतस्मिन्नदारिद्र्यंनायोगोबन्धुसम्भवः ॥ नदुःखंनभयंरोगस्तुलसीयत्र
तिष्ठति ॥ ३० ॥ सर्वत्रतुलसीपुण्यापुण्यक्षेत्रेविशेषतः ॥ संनिधौतस्यदेवस्यरोपणात्पृथिवीतले ॥ ३१ ॥ तेषांविष्णुपदंनित्यंतुलस्यारोपणेकृते ॥
उत्पातान्दारुणान्रोगान्दुर्निमित्तान्यनेकशः ॥ ३२ ॥ तुलस्याभ्यर्चितोभक्त्याहन्तशान्तिकरोहरिः ॥ तुलसीगन्धमाघ्रायत्रगच्छतिमारुतः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वदातत्रतिष्ठन्तिदेवताश्चशिवोहरिः ॥ तुलसी
॥ ३३ ॥ दिशोदशचताःपूताभूतग्रामश्चतुर्विधः ॥ यस्मिन्गृहेमुनिश्रेष्ठतुलसीमूलमृत्तिका ॥३४॥
मञ्जर्यांवसतेरुद्रस्तुलसी
वनजाच्छायायत्रयत्रभवेद्विज ॥३५॥ तर्पणंकुरुतेतत्रपितॄणांदत्तमक्षयम् ॥ तस्यमूलेस्थितोब्रह्मामध्येदेवोजनार्दनः ॥३६॥
तेनपावनी ॥ विनायस्तुलसींकुर्यात्सन्ध्याकालेतुमार्जनम् ॥ ३७ ॥ तत्सर्वंराक्षसहृतंनरकंचप्रयच्छति ॥ तुलसीपत्रगलितंतोयंयःशिरसावहेत् ॥
॥ ३८ ॥ गङ्गाफलमवाप्नोतिशतधेनुफलंलभेत् ॥ शिवालयेविशेषेणरोपयेत्तुलसींयदि ॥ ३९ ॥ बीजसङ्ख्यावसेत्स्वर्गेप्रत्येकंयुगसङ्ख्यया ॥ उम
यातुपुरादेविशङ्करार्थंहिमालये ॥ ४० ॥ रोपिताःशतवृक्षास्तुतुलस्याःप्रणतोऽस्म्यहम् ॥ पर्वण्यवसरेयस्तुश्रावणेचाथरोपयेत् ॥ ४१ ॥ संक्रान्ति
दिवसेचैवतुलसीचातिपुण्यदा ॥ तुलसींपूजयेन्नित्यंदरिद्रईश्वरोभवेत् ॥ ४२ ॥ सर्वसिद्धिकरामूर्तिःकृष्णःकीर्तिंददातिच ॥ शालग्रामशिलायत्रतत्र
संनिहितोहरिः ॥ ४३ ॥ तत्रस्नानंचदानंचवाराणस्याःशताधिकम् ॥ कुरुक्षेत्रंप्रयागंचनैमिषारण्यमेवच ॥४४॥ तस्यकोटिगुणंपुण्यंशालग्रामशिला
र्चनात् ॥ शालग्राममयीमुद्रासंस्थितायत्रहिकचित् ॥ ४५ ॥ वाराणस्यांचयत्पुण्यंसर्वंतत्रैवतद्भवेत् ॥ ब्रह्महत्यादिकंपापंयत्किंचित्कुरुतेनरः ॥
तत्सर्वंनाशयेदाशुशालग्रामशिलार्चनात् ॥ ४६ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०उत्तर०उमापतिनारदसंवादेतुलसीशालग्राममाहात्म्यंनामपञ्च
विंशोऽध्यायः ॥ २५ ॥ नारदउवाच ॥ एवंतुलस्यामाहात्म्यंत्वत्प्रसादाच्छ्रुतंमया ॥ साम्प्रतंतुसमाचक्ष्वत्रिरात्रंतुलसीव्रतम् ॥ १ ॥ सदाशिव
उवाच ॥ शृणुविप्रमहाबुद्धेव्रतमेतत्पुरातनम् ॥ यच्छ्रुत्वासर्वपापेभ्योमुच्यतेनात्रसंशयः ॥ २ ॥ पुरारथन्तरेकल्पेराजाह्यासीत्प्रजापतिः ॥ तस्य
भार्याचविख्याताचन्द्ररूपामहासती ॥ ३ ॥ सावैव्रतमिदंचक्रेसर्वकामफलप्रदम् ॥ त्रिरात्रंतुव्रतंतस्याधर्मकामार्थमोक्षदम् ॥ ४ ॥ सफलंजीवितं
तेषांयैःश्रुतंतुलसीव्रतम् ॥ कार्त्तिकेशुक्लपक्षेतुनवम्यांचैवनारद ॥ ५ ॥ नियमस्थोव्रतीतिष्ठेद्भूमिशायीजितेन्द्रियः ॥ व्रतंत्रिरात्रमुद्दिश्यशुचिःसंयत
मानसः ॥६॥ स्वपेन्नियमपूर्वंतुतुलसीवनसंनिधौ ॥ ततोमध्याह्नसमयेनद्यादौविमलेजले ॥७॥ स्नानंकृत्वापितॄन्देवांस्तर्पयेद्विधिपूर्वकम् ॥ सौवर्णं
कारयेदेवंलक्ष्म्यासहजनार्दनम् ॥ ८ ॥ वित्तशाठ्यंनकर्तव्यमात्मनःश्रेयइच्छता ॥ वस्त्रयुग्मंततःकार्यंपीतेशुक्लेचवाससी ॥ ९ ॥ नवग्रहाणामारम्भं
शान्तिकंविधिपूर्वकम् ॥ श्रपयित्वाचरुंतत्रवैष्णवंहोममाचरेत् ॥ १० ॥ द्वादश्यांदेवदेवेशंपूजयित्वाप्रयत्नतः ॥ अव्रणंशुद्धकलशंस्थापयेद्विधि
पूर्वकम् ॥ ११ ॥ पञ्चरत्नसमोपेतंपल्लवैश्चौषधीयुतम् ॥ तस्योपरिन्यसेत्पात्रेलक्ष्म्यासहजनार्दनम् ॥१२॥ स्थापयेत्तुलसीमूलेमन्त्रैर्वेदपुराणकैः ॥
पयसाकेवलेनैवसिञ्चयेत्तुलसीवनम् ॥ पञ्चामृतेनसंस्नाप्यदेवदेवंजगद्गुरुम् ॥ १३ ॥ योऽनन्तरूपोऽखिलविश्वरूपोगर्भोदकेलोकविधिंबिभर्त्ति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रसीदतामेषसदेवदेवोयोमाययाविश्वकृदेषदेवः ॥ १४ ॥ प्रार्थनामन्त्रः ॥ आगच्छाच्युतदेवेशतेजोराशेजगत्पते ॥ सदैवतिमिरध्वंसीपाहिमां भवसागरात्॥१५॥आवाहनमन्त्रः ॥ पञ्चामृतेनसुस्नानंतथागन्धोदकेनच॥गङ्गादीनांचतोयेनस्नातोऽनन्तःप्रसीदतु॥१६॥स्नानमन्त्रः ॥ श्रीखण्डा गुरुकर्पूरंकुङ्कुमादिविलेपनम् ॥ भक्त्यादत्तंमयादेवलक्ष्म्यासहगृहाणवै ॥ १७ ॥ विलेपनमन्त्रः ॥ नारायणनमस्तेऽस्तुनरकार्णवतारण ॥ त्रैलोक्या धिपतेतुभ्यंददामिवसनेशुभे ॥१८॥ वस्त्रमन्त्रः॥ दामोदरनमस्तेऽस्तुत्राहिमांभवसागरात् ॥ ब्रह्मसूत्रंमयादत्तंगृहाणपुरुषोत्तम ॥१९॥ उपवीतमन्त्रः॥ पुष्पाणिचसुगन्धीनिमालत्यादीनिवैप्रभो ॥ मयादत्तानिदेवेशप्रीतितःप्रतिगृह्यताम् ॥२०॥पुष्पमन्त्रः॥ नैवेद्यंगृह्यतांनाथभक्ष्यभोज्यैःसमन्वितम् ॥ सर्वैरसैःसुसंपन्नंगृहाणपरमेश्वर॥२१॥ नैवेद्यमन्त्रः॥पूगानिनागपत्राणिकर्पूरसहितानिच॥मयादत्तानिदेवेशताम्बूलंप्रतिगृह्यताम्॥२२॥ताम्बूलमन्त्रः॥ धूपंदत्त्वागुरुंभक्त्यागुग्गुलंघृतमिश्रितम् ॥ एवंपूजाप्रकर्त्तव्याघृतेनदीपमाचरेत् ॥ २३ ॥ विविधंसुनिशार्दूलदीपंकृत्वासमाहितः ॥ लक्ष्मी नारायणस्याग्रेतुलसीवनसन्निधौ ॥ २४ ॥ अर्घंतत्रप्रदातव्यंदेवदेवायचक्रिणे ॥ नवम्यांनालिकेरेणपुत्रार्थमर्घमुत्तमम् ॥ २५ ॥ दशम्यां बीजपूरंतुधर्मकामार्थसिद्धये ॥ एकादश्यांदाडिमेनदारिद्र्यंनाशयेत्सदा ॥ २६ ॥ सप्तधान्येनसंयुक्तंवंशपात्रेणनारद ॥ फलसप्तकसंयुक्तं पत्रपूगसमन्वितम् ॥ २७ ॥ वस्त्रेणाच्छादितंकृत्वादेवस्याग्रेनिवेदयेत् ॥ मन्त्रेणानेनविप्रेन्द्रशृणुष्वैकाग्रमानसः ॥ २८ ॥ तुलसीसहितो देवसदाशङ्खेनसंयुतम् ॥ गृहाणार्घंमयादत्तंदेवदेवनमोऽस्तुते ॥ २९ ॥ अर्घमन्त्रः ॥ एवंसंपूज्यदेवेशंलक्ष्म्यासहजनार्दनम् ॥ प्रार्थयेद्देव देवेशंव्रतसंपूर्तिसिद्धये ॥ ३० ॥ उपोषितोऽहंदेवेशकामक्रोधविवर्जितः ॥ व्रतेनानेनदेवेशत्वमेवशरणंमम ॥ ३१ ॥ गृहीतेऽस्मिन्व्रतेदेव यदपूर्णंकृतंमया ॥ सर्वंतदस्तुसंपूर्णंत्वत्प्रसादाज्जनार्दन ॥ ३२ ॥ नमःकमलपत्राक्षनमस्तेजलशायिने ॥ इदंव्रतंमयाचीर्णंप्रसादात्तवकेशव ॥ ॥ ३३ ॥ अज्ञानतिमिरध्वंसिन्व्रतेनानेनकेशव ॥ प्रसादसुमुखोभूत्वाज्ञानदृष्टिप्रदोभव ॥ ३४ ॥ ततोजागरणंरात्रौगीतपुस्तकवाचनम् ॥ नादनृत्यकलाभिज्ञैःपुण्याख्यानैःसुशोभनैः ॥ ३५ ॥ विभातायांतुशर्वर्यामुदितेविमलेरवौ ॥ निमन्त्र्यब्राह्मणान्भक्त्याश्राद्धंकुर्याच्चवैष्ण वम् ॥ ३६ ॥ भोजयित्वायथाकामंपायसेनघृतेनच ॥ ताम्बूलपुष्पगन्धादिदक्षिणाभिःसमन्वितम् ॥ ३७ ॥ उपवीतानिवासांसिदत्त्वा मालांचचन्दनम् ॥ दाम्पत्यत्रितयंभोज्यंवस्त्रभूषणकुङ्कुमैः ॥ ३८ ॥ वंशपात्राणिशक्त्याचविरूढैःपरिपूरयेत् ॥ नालिकेरैश्चपक्वान्नैर्वस्त्रैश्चविविधैः फलैः ॥ ३९ ॥ सपत्नीकंगुरुंतत्रवस्त्राणिपरिधापयेत् ॥ विभूषणानिदिव्यानिगन्धमाल्यैःप्रपूजयेत् ॥ ४० ॥ सर्वोपस्करसंयुक्तांगांदद्याच्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पयस्विनीम् ॥ सदक्षिणांसवस्त्रांचतन्मेनिगदतःशृणु ॥ ४१ ॥ सर्वतीर्थेषुयत्पुण्यंस्नातानांजायतेनृणाम् ॥ तत्फलंसलभेत्सर्वंदेवदेवप्रसादतः ॥४२॥
भुक्त्वाचविपुलान्भोगान्सर्वकामान्मनोरमान् ॥ वैष्णवंपदमाप्नोतिअन्तेविष्णोःप्रसादतः ॥ ४३ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०उत्त०उमापति
नारदसंवादेतुलसीत्रिरात्रव्रतवर्णनंनामषड्विंशोऽध्यायः ॥ २६ ॥ नारदउवाच ॥ गुणाधिकेभ्योविप्रेभ्योदातुकामोऽपिमानवः ॥ कानिकानिच
लोकेऽस्मिन्दद्यात्सर्वंतथावद ॥ १ ॥ महादेवउवाच ॥ लोकेतत्त्वंहिसंज्ञायशृणुदेवर्षिसत्तम ॥ अन्नमेवप्रशंसन्तिसर्वमन्नेप्रतिष्ठितम् ॥ २ ॥
तस्मादन्नंविशेषेणदातुमिच्छन्तिमानवाः ॥ अन्नेनसदृशंदानंनभूतंनभविष्यति॥३॥अन्नेनधार्यतेविश्वंजगत्स्थावरजङ्गमम् ॥ अन्नमूर्जस्करंलोकेप्राणा
ह्यन्नेप्रतिष्ठिताः ॥ ४ ॥ दातव्यंभिक्षतेचान्नंब्राह्मणायमहात्मने ॥ कुटुम्बंपीडयित्वापिआत्मनोभूतिमिच्छता ॥ ५ ॥ नारदासौविदांश्रेष्ठोयो
दद्यादन्नमर्थिने ॥ ब्राह्मणायार्तरूपायपारलौकिकमात्मनः ॥ ६ ॥ आत्मीयभूतिमन्विच्छन्कालेद्विजमुपस्थितम् ॥ श्रान्तमध्वनिवर्तन्तंगृहस्थं
गृहमागतम् ॥ ७ ॥अन्नदःप्राप्नुतेविद्वन्सुशीलोवीतमत्सरः ॥ क्रोधमुत्पतितंहित्वादिविचेहचयत्सुखम् ॥ ८ ॥ नचाभिनिन्देदतिथिंनद्रुह्याच्चकथं
चन ॥ ब्रह्मविदेऽर्पयेदन्नंतच्चदानंविशिष्यते ॥ ९ ॥ श्रान्तायादृष्टपूर्वायअन्नमध्वनिवर्तिने ॥ योदद्यादपरिक्लिष्टस्सर्वधर्ममवाप्नुयात् ॥ १० ॥
पितृदेवांस्तथाविप्रानतिथींश्चमहामुने ॥ योनरःप्रीणयेतान्नैस्तस्यपुण्यमनन्तकम् ॥ ११ ॥ कृत्वापिसुमहत्पापंयोदद्यादन्नमर्थिने ॥ ब्राह्मणाय
विशेषेणसतुपापैःप्रमुच्यते ॥ १२ ॥ ब्राह्मणेष्वक्षयंदानमन्नंशूद्रेमहत्फलम् ॥ अन्नदानंचशूद्रेचब्राह्मणेचविशिष्यते ॥ १३ ॥ नपृच्छेद्गोत्र
चरणंनचस्वाध्यायमेवच ॥ भिक्षुकोब्राह्मणोह्यत्रदद्यादन्नंप्रयातिच ॥ १४ ॥ अन्नदस्यशुभावृक्षाःसर्वकामफलान्विताः ॥ संभवन्तीहलोकेच
हर्षयुक्तास्त्रिविष्टपे ॥ १५ ॥ अन्नदानेनयेलोकास्ताञ्छृणुष्वमहामुने ॥ विमानानिप्रकाशन्तेदिवितेषांमहात्मनाम् ॥ १६ ॥ नानासंस्थान
रूपाणिनानाकामान्वितानिच ॥ सर्वकामफलाश्चापिवृक्षाभुवनसंस्थिताः ॥ १७ ॥ हेमवाप्यःशुभाःसर्वादीर्घिकाश्चैवसर्वशः ॥ घोषवन्तिच
यानानिमुक्तान्यथसहस्रशः ॥१८॥ भक्ष्यभोज्यमयाःशैलावासांस्याभरणानिच ॥ क्षीरंस्रवन्त्यःसरितस्तथैवाज्यस्यवापिकाः ॥ १९ ॥ प्रासादाः
शुभ्रवर्णाभाःशय्याश्चकनकोज्ज्वलाः ॥ तदन्नंदातुमिच्छन्तितस्मादन्नप्रदोभवेत् ॥२०॥ एतेलोकाःपुण्यकृतामन्नदानंमहाफलम् ॥ तस्मादन्नंविशेषेण
दातव्यंमानवैर्भुवि ॥ २१ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०उत्त०उमापतिनारदसंवादेऽन्नदानप्रशंसानामसप्तविंशोऽध्यायः ॥ २७ ॥ महा
देवउवाच ॥ पानीयदानंपरमंदानानामुत्तमंसदा ॥ तस्माद्वापीश्चकूपांश्चतडागानिचकारयेत् ॥ १ ॥ अर्धपापंसंहरन्तिपुरुषस्यविकर्मणः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कूपाःप्रवृत्तपानीयाःसुप्रवृत्तस्यनित्यशः ॥२॥ सचतारयतेवंशंयस्यखातजलाशये ॥ गावःपिबन्तिविप्राश्चसाधवश्चनराःसदा ॥ ३ ॥ निदाघकाले पानीयंयस्यतिष्ठतिनारद ॥ दुर्गेविषमकृच्छ्रंचनकदाचिदवाप्यते ॥ ४ ॥ तडागानांचवक्ष्यामिकृतानांयेगुणाःस्मृताः ॥ त्रिषुलोकेषुसर्वत्रपूजितो यस्तडागवान् ॥ ५ ॥ अथवामित्रसदनंमित्रमैत्रीविवर्धनम् ॥ कीर्तिसंजननंश्रेष्ठंतडागानांनिवेशनम् ॥ ६ ॥ धर्मस्यार्थस्यकामस्यफल माहुर्मनीषिणः ॥ तडागंसुकृतंदेशेक्षेत्रमध्येमहाश्रयम् ॥ ७ ॥ चतुर्विधानांभूतानांतडागस्योपलक्षयेत् ॥ तडागानिचसर्वाणिदिशन्तिश्रेयउत्तमम् ॥ ॥ ८ ॥ देवामनुष्यागन्धर्वाःपितरोनागराक्षसाः ॥ स्थावराणिचभूतानिसंश्रयन्तिजलाशयम् ॥ ९ ॥ वर्षाऋतौतडागेतुसलिलंयत्रतिष्ठति ॥ अग्निहोत्रफलंतस्यजायतेनात्रसंशयः ॥ १० ॥ हेमन्तेशिशिरेचैवसलिलंयस्यतिष्ठति ॥ गोसहस्रफलंतस्यलभतेनात्रसंशयः ॥ ११ ॥ वसन्तेऽपितथाग्रीष्मेसलिलंतिष्ठतेयदि ॥ अतिरात्राश्वमेधाभ्यांफलमाहुर्मनीषिणः ॥ १२ ॥ अथैतेषांतुवृक्षाणांरोपणेचगुणाञ्छृणु ॥ अती तानागतौचोभौपितृवंशौमहामुने ॥ १३ ॥ तारयेद्वृक्षरोपीचतस्माद्वृक्षांस्तुरोपयेत् ॥ पुत्रपौत्राभवन्त्येतेपादपानात्रसंशयः ॥ १४ ॥ परलोकं गतःसोऽपिलोकानाप्नोतिचाक्षयान् ॥ पुष्पैःसुरगणान्सर्वान्पत्रैश्चापितथापितॄन् ॥ १५ ॥ छाययाचातिथीन्सर्वान्पूजयन्तिमहीरुहाः ॥ किन्न रोरगरक्षांसिदेवगन्धर्वमानवाः ॥ १६ ॥ तथाऋषिगणाश्चैवसंश्रयन्तिमहीरुहान् ॥ पुष्पिताःफलवन्तश्चतर्पयन्तीहमानवान् ॥ १७ ॥ इहलोके परेचैवपुत्रास्तेधर्मतःस्मृताः ॥ तडागवृक्षरोपाश्चइष्टयज्ञाश्चयेद्विजाः ॥ १८ ॥ एतेस्वर्गान्नहीयन्तेयेचान्येसत्यवादिनः ॥ सत्यमेवपरंब्रह्मसत्यमेव परंतपः ॥ १९ ॥ सत्यमेवपरोयज्ञःसत्यमेवपरंश्रुतम् ॥ सत्यंदेवेषुजागर्तिसत्यंचपरमंपदम् ॥ २० ॥ तपोयज्ञाश्चपुण्यंचतथादेवर्षिपूजनम् ॥ आद्योविधिश्चविद्याचसर्वंसत्येप्रतिष्ठितम् ॥२१॥ सत्यंयज्ञस्तथादानंमन्त्रादेवीसरस्वती ॥ व्रतचर्यातथासत्यमोङ्कारःसत्यमेवच ॥ २२ ॥ सत्येन वायुरभ्येतिसत्येनतपतेरविः ॥ सत्येनचाग्निर्दहतिस्वर्गःसत्येनतिष्ठति ॥ २३ ॥ पूजनंसर्वदेवानांसर्वतीर्थावगाहनम् ॥ सत्यंचवदतेलोके सर्वमाप्नोत्यसंशयः ॥ २४ ॥ अश्वमेधसहस्रंचसत्यंचतुलयाधृतम् ॥ सर्वेषांसर्वयज्ञानांसत्यमेवविशिष्यते ॥ २५ ॥ सत्येनदेवाःप्रीयन्तेपितरो ऽप्यृषयस्तथा ॥ सत्यमाहुःपरंधर्मंसत्यमाहुःपरंपदम् ॥२६ ॥ सत्यमाहुःपरंब्रह्मतस्मात्सत्यंवदामिते ॥ मुनयःसत्यनिरतास्तपस्तप्त्वासुदुष्करम् ॥ ॥ २७ ॥ सत्यधर्मरताःसिद्धास्ततःस्वर्गमितोगताः ॥ अप्सरोगणसङ्घुष्टैर्विमानैःपरितोवृताः ॥ २८ ॥ वक्तव्यंचसदासत्यंनसत्याद्विद्यतेपरम् ॥ अगाधेविपुलेसिद्धेसत्यतीर्थेशुचिह्रदे ॥ २९ ॥ स्नातव्यंमनसायुक्तैःस्नानंतत्परमंस्मृतम् ॥ आत्मार्थेवापरार्थेवापुत्रार्थेवापिमानवाः ॥३०॥ अनृतं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

येनभाषन्तेतेनराःस्वर्गगामिनः ॥ वेदायज्ञास्तथामन्त्राःसन्तिविप्रेषुनित्यशः ॥ नभान्त्युज्झितसत्येषुतस्मात्सत्यंसमाचरेत् ॥ ३१ ॥ नारद
उवाच ॥ तपसांमेफलंब्रूहिपुनरेवविशेषतः ॥ सर्वेषांचैववर्णानांब्राह्मणानांतपोबलम् ॥३२॥ महादेवउवाच ॥ प्रवक्ष्यामितपोऽध्यायंसर्वकामार्थसाध
कम् ॥ सुदुश्चरंद्विजातीनांतन्मेनिगदतःशृणु ॥ ३३ ॥ तपोहिपरमंप्रोक्तंतपसाविन्दतेफलम् ॥ तपोरतोहियोनित्यंमोदतेसहदैवतैः ॥ ३४ ॥ तपसा
प्राप्यतेस्वर्गस्तपसाप्राप्यतेयशः ॥ तपसामोक्षमाप्नोतितपसाविन्दतेमहत् ॥ ३५ ॥ ज्ञानविज्ञानसंपत्तिःसौभाग्यंरूपमेवच ॥ तपसालभतेसर्वं
मनसायद्यदिच्छति ॥ ३६ ॥ नातप्ततपसोयान्तिब्रह्मलोकंकदाचन ॥ यत्कार्यंकिंचिदास्थायपुरुषस्तप्यतेतपः ॥ ३७ ॥ तत्सर्वंसमवाप्नोति
परत्रेहचमानवः ॥ सुरापःपरदारीचब्रह्महागुरुतल्पगः ॥ ३८ ॥ तपसातरतेसर्वंसर्वतश्चविमुच्यते ॥ अपिसर्वेश्वरःस्थाणुर्विष्णुश्चैवसनातनः ॥ ३९ ॥
ब्रह्माहुताशनःशक्रोयेचान्येतपसान्विताः ॥ षडशीतिसहस्राणिमुनीनामूर्ध्वरेतसाम् ॥ ४० ॥ तपसादिविमोदन्तेसमेतादैवतैःसह ॥ तपसाप्राप्तवा
न्राज्यंशक्रःसर्वसुरेश्वरः ॥ ४१ ॥ तपसापालयन्सर्वेस्वंस्वंलोकंचलोकपाः ॥ सूर्याचन्द्रमसौदेवौसर्वलोकहितेरतौ ॥ ४२ ॥ तपसैवप्रकाशन्तेनक्ष
त्राणिग्रहास्तथा ॥ सर्वंचतपसाभ्येतिसर्वंचसुखमश्नुते ॥ ४३ ॥ तपस्तपतियोऽरण्येवनमूलफलाशनः ॥ योऽधीतेश्रुतिमेवादौसमंस्यात्तपसामुने॥
॥ ४४ ॥ श्रुतेरध्यापनात्पुण्यंयदाप्नोतिद्विजोत्तमः ॥ तदध्यायस्यजप्याच्चद्विगुणंफलमश्नुत ॥ ४५ ॥ जगद्यथानिरालोकंजायतेशशिभास्करौ ॥
विनातथापुराणंहिध्येयमस्मान्महामुने ॥ ४६ ॥ तप्यमानस्तपोज्ञानयोधारयतिशास्त्रतः ॥ संबोधयतिलोकंचतस्मात्पूज्यतमोगुरुः ॥ ४७ ॥
सर्वेषांचैवपात्राणांश्रेष्ठंपात्रंपुराणवित् ॥ पतनात्त्रायतेयस्मात्तस्मात्पात्रमुदाहृतम् ॥ ४८ ॥ धनंधान्यंहिरण्यंवावासांसिविविधानिच ॥ येयच्छन्ति
सुपात्रायतेयान्तिचपरांगतिम् ॥ ४९ ॥ गाश्चैवमहिषीर्वापिगजानश्वांश्चशोभनान् ॥ यःप्रयच्छतिमुख्यायतत्पुण्यस्यफलंशृणु ॥ ५० ॥ अक्षयंसर्व
लोकानांसोऽश्वमेधफलंलभेत् ॥ महींददातियस्तस्मैकृष्टांफलवतींशुभाम् ॥५१ ॥ सतारयतिवैवंशान्दशपूर्वान्दशापरान् ॥ विमानेनचदिव्येनविष्णु
लोकंसगच्छति ॥ ५२ ॥ नयज्ञैस्तुष्टिमायान्तिदेवाःप्रोक्षणकैरपि ॥ बलिभिःपुष्पपूजाभिर्यथापुस्तकवाचनैः ॥ ५३ ॥ विष्णोरायतनेयस्तुकार
येद्धर्मपुस्तकम् ॥ देव्याःशम्भोर्गणेशस्यअर्कस्यचतथापुनः ॥ ५४ ॥ राजसूयाश्वमेधाभ्यांफलंप्राप्नोतिमानवः ॥ इतिहासपुराणाभ्यांपुण्यंपुस्तक
वाचनम् ॥ ५५ ॥ सर्वान्कामानवाप्नोतिसूर्यलोकंभिनत्तिसः ॥ सूर्यलोकंचभित्त्वासौब्रह्मलोकंसगच्छति ॥ ५६ ॥ स्थित्वाकल्पशतान्यत्रराजा
भवतिभूतले ॥ अश्वमेधसहस्रस्ययत्फलंसमुदाहृतम् ॥ ५७ ॥ तत्फलंसमवाप्नोतिदेवाग्रेयोजयंपठेत् ॥ तस्मात्सर्वप्रयत्नेनकार्यंपुस्तकवाचनम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ५८ ॥ इतिहासपुराणाभ्यांविष्णोरायतनेशुभम् ॥ नान्यत्प्रीतिकरंविष्णोस्तथान्येषांदिवौकसाम् ॥ ५९ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०
उत्त०उमापतिनारदसंवादेवृक्षप्रपासरोवरतपोऽध्ययनधर्मव्याख्यानमाहात्म्यंनामाष्टाविंशोऽध्यायः ॥ २८ ॥ महादेवउवाच ॥ अत्राप्युदाहरन्तीम
मितिहासंपुरातनम् ॥ पुराणंपरमंपुण्यंसर्वपापहरंशुभम् ॥ १ ॥ कुमारेणचलोकानांनमस्कृत्यपितामहम् ॥प्रोक्तंचेदंसमाख्यानंदेवर्षेब्रह्मसूनुना ॥२॥
सनत्कुमारउवाच ॥ गतोऽहंधर्मराजानंद्रष्टुंसंपूजितोमुदा ॥ श्रुतिभिःपरयाभक्त्यातेनोक्तोऽस्मिसुखासने ॥ ३ ॥ मयातत्रोपविष्टेनदृष्टंकिंचिन्महाद्भु
तम्॥ काञ्चनेनविमानेनवैडूर्यकृतवेदिना॥४॥ मणिमुक्ताविचित्रेणकिङ्किणीजालशोभिना ॥ आगतंपुरुषंतत्रआसनादेवसत्तम ॥५॥ससंभ्रमंसमुत्थाय
दृष्ट्वाधर्मःस्वयंविभुः॥गृहीत्वादक्षिणेपाणौपूजितोऽर्घेणवैततः ॥६॥ शिरस्याघ्रायदेवेशःपुरःस्थाप्यततःपरम्॥पूजयित्वातुतंधर्मइदंवाक्यमुवाचह॥७॥
सुस्वागतंधर्मदर्शिन्प्रीतोऽस्मिदर्शनात्तव ॥ समीपेममतिष्ठस्वकिंचिज्ज्ञानंवदस्वमे ॥ ८॥ पुनर्यास्यसितत्स्थानंयत्रब्रह्माव्यवस्थितः ॥ इत्युक्ते
चततश्चान्योविमानवरमास्थितः ॥ ९ ॥ आगतःपुरुषोदेवोयत्रतिष्ठतिधर्मराट् ॥ सपूजितोविमानस्थःप्रश्रयावनतेनच ॥ १० ॥ सामपूर्वं
तथोक्त्वातुयथापूर्वंनरःस्वयम् ॥ किमनेनकृतंकर्मयस्यतुष्टोभवान्भृशम् ॥ ११ ॥ अत्रमेकौतुकंजातंकृताहिस्वयमेवतु ॥ यदस्यभवतापूजा
सविस्मयमनन्तरम् ॥१२॥ तथैवास्यकृतापूजाद्वितीयस्यनरस्यतु ॥ मेनेऽहंशुभकर्माणौविमानवरसत्तमौ ॥ १३ ॥ यस्त्वमाभ्यांस्वयंपूजांकुरुषेधर्म
कारणात् ॥ ब्रह्मविष्णुशिवाद्यैस्तुपूज्यसेत्वंसदानिशम् ॥१४॥ यस्येदृक्परमंपुण्यंकिमेतौकर्मचक्रतुः ॥ कथ्यतांममसर्वज्ञफलंदिव्यमवापतुः ॥१५॥
तच्छ्रुत्वासतुमांप्राहशृणुकर्मानयोःकृतम् ॥ यत्कृत्वाचार्हतांयातौतच्छृणुष्वमहामते ॥ १६ ॥ धर्मउवाच ॥ वैदिशंनामनगरंपृथिव्यामस्तिविश्रुतम्॥
तत्राभूत्पृथिवीपालोधरापालइतिश्रुतः ॥१७॥ कस्मिन्कालेपुरादेवीशशापस्वगणंक्रुधा ॥ मद्दत्तेऽत्रपरानारीभर्त्तुर्यन्मेनिवेशिता ॥१८॥ तस्माद्द्वादश
वर्षाणिजम्बुकस्त्वंभविष्यसि ॥ इत्युक्तःसचबभ्रामजम्बुकोमेदिनीतलम् ॥ १९ ॥ वेत्रवतीवेत्रवत्योस्तुसङ्गमेलोकविश्रुते ॥ शापान्तोभवितापुत्र
इत्युक्तंगिरिकन्यया ॥ २० ॥ तत्रचानशनंकृत्वाक्षेत्रेप्राणांस्ततोऽत्यजत् ॥ दिव्यरूपवपुर्भूत्वाजगामविष्णुसन्निधौ ॥ २१ ॥ तत्राश्चर्यंमहद्दृष्ट्वाधरा
पालोमहीपतिः ॥ विष्णोरायतनंकृत्वाक्षेत्रेप्राणांस्ततोऽत्यजत् ॥ २२ ॥ दिव्यरूपवपुर्भूत्वास्थापयामासतंप्रभुम् ॥ तस्मिन्पुरेनरान्सर्वान्सन्नियो
ज्यास्यवीक्षणे ॥ २३ ॥ शुभमायतनंविष्णोस्तस्मिन्ग्रामेसदाजनैः ॥ पूर्णंतुब्राह्मणादीनांपूजयित्वाकदम्बकम् ॥ २४ ॥ इतिहासपुराणज्ञंवाचकं
तुविशेषतः ॥ पूजयित्वाद्विजश्रेष्ठंविद्याश्रेष्ठंमहामतिः ॥२५॥ पुस्तकंचापिसंपूज्यगन्धपुष्पादिभिःक्रमात् ॥ ततस्तमाहराजासौवाचकंविनयान्वितः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 ॥ २६ ॥ एतदायतनंविष्णोःकारितंचतवाग्रतः ॥ चातुर्वर्ण्यमिदंचापिश्रोतुकामकदंम्बकम् ॥ २७ ॥ तिष्ठतीहद्विजश्रेष्ठकुरुपुस्तकवाचनम् ॥ याव
 त्संवत्सरंविप्रगृह्यवृत्तिंत्वनुत्तमाम् ॥ २८ ॥ स्वर्णनिष्कशतंचात्रततोदास्येतथापरम् ॥ पूर्णेवर्षेद्विजश्रेष्ठश्रेयोऽर्थमहमात्मनः ॥ २९ ॥ एवंप्रव
र्तितंतत्रपुण्यंपुस्तकवाचनम् ॥ वर्षसङ्गतमात्रेतुतथाचमुनिसत्तम ॥ ३० ॥ अथायुषःक्षयाच्चायंकालधर्ममुपेयिवान् ॥ मयाचास्यविमानंहि
विष्णुनाप्रेरितंदिवः ॥ ३१ ॥ इत्येषाकर्मणांव्युष्टिःपुण्यमाख्यानसंज्ञकम् ॥ श्रुतंपाद्मंमहत्पुण्यंपवित्रंपापनाशनम् ॥ ३२ ॥ गन्धपुष्पोपहारै
स्तुनतुष्टिर्जायतेतथा ॥ देवानामिहसर्वेषांपुराणश्रवणाद्यथा ॥ ३३ ॥ स्वर्णरत्नादिवस्तूनांवस्त्राणांचापिकृत्स्नशः ॥ ग्रामाणांनगराणांचदाना
त्तुष्टिर्भवेन्नहि ॥ ३४ ॥ यथास्याद्धर्मश्रवणात्प्रीतिःसर्वदिवौकसाम् ॥ इतिहासपुराणानांश्रवणेमुनिसत्तम ॥ ३५ ॥ तथास्यान्मेमहाप्रीतिः
साध्येसर्वार्थकामिके ॥ कन्यादानेमहाप्रीतिर्मिमस्यान्मुनिसत्तम ॥३६ ॥ नतथारोचतेसाचयथापुस्तकवाचनात् ॥ अथाकिंबहुनोक्तेननान्यत्प्रीतिकरं
मम ॥ ३७ ॥ पुण्याख्यानमृतेविप्रगुह्यमेतत्प्रकीर्तितम् ॥ यश्चायमपरोविप्रइहायातोनरोत्तमः ॥ ३८ ॥ संगत्यानुगतश्चायंधर्मश्रवणमुत्त
मम् ॥ श्रुत्वाभक्तिरभूदस्यश्रद्धयापरमात्मनः ॥ ३९ ॥ कृत्वाप्रदक्षिणंतस्यवाचकस्यमहात्मनः ॥ एषविप्रोमुनिश्रेष्ठददौस्वर्णस्यमाषकम् ॥
॥ ४० ॥ नान्यद्दानंकदाचक्रेलोभाविष्टेनचेतसा ॥ पात्रदानात्फलप्राप्तिस्तस्यजातानसंशयः ॥ ४१ ॥ इत्येतत्कथितंकर्मआभ्यांचैवमहामुने ॥
॥ ४२ ॥ महादेवउवाच ॥ एतत्पुण्यस्यमाहात्म्यंयेशृण्वन्तिमनीषिणः ॥ नतेषांदुर्गतिःकश्चिज्जन्मजन्मनिजायते ॥ ४३ ॥ इतिश्रीपाद्मे
महापुराणेपञ्चपञ्चा० उत्त० उमापतिनारदसंवादेशास्त्रव्याख्यामहिमानामैकोनत्रिंशोऽध्यायः ॥ २९ ॥ महादेवउवाच ॥ अथान्यत्संप्रव
क्ष्यामिशृणुदेवर्षिसत्तम ॥ गोपीचन्दनमाहात्म्यंयथादृष्टंश्रुतंमया ॥ १ ॥ ब्राह्मणोवाथवैश्योवाशूद्रोवाप्यथबाहुजः ॥ गोपीचन्दनलिप्ताङ्गो
मुच्यतेब्रह्महत्यया ॥ २ ॥ तिलकंकुरुतेयस्तुगोपीचन्दनसंभवम् ॥ मद्यपानादिदोषैस्तुमुच्यतेनात्रसंशयः ॥ ३ ॥ गोपीचन्दन
लिप्ताङ्गोवैष्णवोविष्णुतत्परः ॥ सर्वदोषैःप्रमुच्येतयथागङ्गाम्भसापुनः ॥ ४ ॥ ब्रह्महामद्यपानीचस्वर्णस्तेयीतथैवच ॥ गुरुतल्पगमोवाथशूद्रो
वाप्यथवैद्विजः ॥ ५ ॥ ससद्योमुच्यतेपापादाजन्मशतकारणात् ॥ द्वादशतिलकंप्रोक्तंसर्वेषांवैविशेषतः ॥ ६ ॥ वैष्णवानांब्राह्मणानांकर्तव्यंभूति
मिच्छताम् ॥ दण्डाकारंललाटेस्यात्पद्माकारंतुवक्षसि ॥ ७ ॥ वेणुपत्रनिभंबाहुमूलेऽन्यद्दीपकाकृति ॥ उच्चैश्चक्राणिचत्वारिबाहुमूलेतुदक्षिणे ॥ ८ ॥
नाममुद्राद्वयंनीचैःशङ्खमेकंतयोरपि ॥ मध्येततःपार्श्वयोस्तुद्वेद्वेपद्मेचधारयेत् ॥९॥ वामेऽपिचतुरःशङ्खान्नाममुद्रेचपूर्ववत् ॥ चक्रमेकंगदेद्वेतयोरिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विभेदतः ॥ १० ॥ ललाटेचगदामेकांनामसुद्रांतथाहृदि ॥ त्रीणित्रीणिचचक्राणिमध्येशङ्खावुभावुभौ ॥ ११ ॥ हृदिपार्श्वेस्तनादूर्ध्वंगदापद्मानि
बाहुवत् ॥ त्रीणिचत्वारिचक्राणिकर्णमूलेद्वयोरधः ॥ १२ ॥ एकमेकंतदन्येषुतिलकेषुचधारयेत् ॥ सम्प्रदायजमुद्रातुधार्याशिष्टानुसारतः ॥ १३ ॥
यथारुच्यथवाधार्यानतत्रनियमोयतः ॥ आचाण्डालाद्विशुद्ध्यन्तितिलकस्यैवधारणात् ॥ १४ ॥ चाण्डालादधिकंमन्येवैष्णवानांहिनिन्दकम् ॥
सचविष्णुसमोज्ञेयोनात्रकार्याविचारणा ॥ १५ ॥ वैष्णवोब्राह्मणोयस्तुविष्णुध्यानेष्वतत्परः ॥ नान्तरंतस्यवैज्ञेयंसवैविष्णुर्भवेदिह ॥ १६ ॥
शङ्खचक्रधरोविप्रोवेदाध्ययनतत्परः ॥ सवैनारायणइतिवेदेचैवतुपठ्यते ॥ १७ ॥ तप्तचक्रधरोविप्रःपङ्क्तिपावनपावनः ॥ तस्यभक्तियुतोब्रह्मन्महा
पापैःप्रमुच्यते ॥ १८ ॥ तुलसीपत्रमालांवातुलसीकाष्ठसंभवाम् ॥ धृत्वावैब्राह्मणोभूयान्मुक्तिभागीनसंशयः ॥ १९ ॥ विष्णुरूपोयतो
विप्रोवैष्णवःसइहस्मृतः ॥ पञ्चत्वेयस्यतिलकंगोपीचन्दनसंभवम् ॥ २० ॥ विमानंससमारुह्ययातिविष्णोःपरंपदम् ॥ कलौनारदवक्ष्यामितिलकं
गोपिचन्दनम् ॥२१॥ येकुर्वन्तिनरश्रेष्ठानतेषांदुर्गतिःक्वचित् ॥ शङ्खंचैवतथाचक्रंदक्षिणेचापिसव्यके ॥२२॥ हस्तेधृत्वाविशेषेणमहापापैःप्रमुच्यते ॥
मद्यपानरतायेचयेचस्त्रीबलघातकाः ॥२३॥ अगम्यगमकायेवैदृश्यन्तेभुविवाडव ॥ भक्तानांदर्शनादेवमुक्तिस्तेषांनसंशयः ॥ २४ ॥ संसारेतुच्छसारे
ऽस्मिन्कुतोवैवैष्णवाजनाः ॥अहंहिवैष्णवोजातोविष्णोर्भक्तिप्रसादतः ॥ २५ ॥ काश्यांनिवसतांह्यत्ररामरामेतिसंजपन् ॥ तेनपुण्यादियोगेनशिवोवै
नात्रसंशयः ॥२६॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्त०उमापतिनारदसंवादेगोपीचन्दनमाहात्म्यंनामात्रिंशोऽध्यायः॥३०॥ नारदउवाच ॥ ब्रह्मन्सर्वं
त्सराख्यस्यदीपस्यविधिमुत्तमम् ॥ सर्वव्रतप्रधानस्यमाहात्म्यंप्रवदस्वमे ॥ १ ॥ येनव्रतानिसर्वाणिकृतान्येवनसंशयः ॥ सर्वकामसमृद्धिश्चसर्व
पापक्षयोभवेत् ॥२॥ महादेवउवाच ॥ वदामितवदेवर्षेरहस्यंपापनाशनम् ॥ यच्छ्रुत्वाब्रह्महागोघ्नोमित्रघ्नोगुरुतल्पगः ॥३॥ विश्वासघातीक्रूरात्मासुक्ति
माप्नोतिशाश्वतीम् ॥ शतंकुलानामुद्धृत्यविष्णोर्लोकंसगच्छति ॥४॥ तदहंकथयिष्यामिदीपव्रतमनुत्तमम् ॥ संवत्सरप्रमाणस्यविधिंमाहात्म्यमेवच ॥५॥
हेमन्तेप्रथमेमासिप्राप्यह्येकादशींशुभाम् ॥ब्राह्मेमुहूर्तेचोत्थायकामक्रोधविवर्जितः ॥६ ॥ नदीसंगमतीर्थेषुतडागेषुसरित्सुच ॥स्नानंसमाचरेत्तत्रगृहेवा
नियतात्मवान् ॥७॥ स्नातोऽहंसर्वतीर्थेषुतत्स्नानंदेहिमेसदा ॥८॥ स्नानमन्त्रः ॥ देवान्पितॄंश्चसंतर्प्यकृतजप्योजितेन्द्रियः ॥ ततःसंपूजयेद्देवंलक्ष्मीनारा
यणंप्रभुम् ॥ ९ ॥ पञ्चामृतेनसंस्नाप्यततोगन्धोदकेनच ॥ स्नातोऽसिलक्ष्म्यासहितोदेवदेवजगत्पते ॥१० ॥ मांसमुद्धरदेवेशघोरात्संसारबन्धनात् ॥
ततःसंपूजयेद्देवंलक्ष्म्यासहजनार्दनम् ॥११॥मन्त्रैस्तुवैदिकैर्भक्त्यातथापौराणिकैरपि ॥अतोदेवेतिसूक्तेनपौरुषेणापिवापुनः॥१२॥ नमोमत्स्यायदेवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

यकूर्मदेवायवैनमः ॥ नमोवाराहदेवायनरसिंहायवैनमः ॥१३॥ वामनायनमस्तुभ्यंपर्शुरामायतेनमः॥नमोस्तुरामदेवायविष्णुदेवायतेनमः ॥ १४ ॥
नमोऽस्तुबुद्धदेवायकल्किनेचनमोनमः ॥नमःसर्वात्मनेतुभ्यंशिरइत्यभिपूजयेत् ॥केशवादीनिनामानितैर्वासंपूजयेद्धरिम्॥१५॥ वनस्पतिरसोदिव्यः
सुरभिर्गन्धवाञ्छुचिः॥ धूपोऽयंदेवदेवशनमस्तेप्रतिगृह्यताम्॥१६॥धूपमन्त्रः॥दीपस्तमोनाशयतिदीपःकान्तिंप्रयच्छति ॥तस्माद्दीपप्रदानेनप्रीयतांमे
जनार्दनः ॥१७॥ दीपमन्त्रः॥नैवद्यमिदमन्नाद्यंदेवदेवजगत्पते ॥लक्ष्म्यासहगृहाणत्वंपरमामृतमुत्तमम् ॥१८॥ नैवेद्यमन्त्रः॥अर्घ्यंदद्यात्ततोभक्त्याएवं
ध्यात्वाजानार्दनम्॥फलेनचैवहस्तेनशङ्खेनादायचोदकम्॥१९॥जन्मान्तरसहस्रेणयन्मयापातकंकृतम् ॥तत्सर्वंनाशमायातुप्रसादात्तवकेशव॥२०॥
अर्घमन्त्रः ॥ततःकुम्भंनवंशुभ्रंघृतपूर्णंसमानयेत् ॥ लक्ष्मीनारायणस्याग्रेतैलपूर्णमथापिवा ॥२१॥ तस्योपरिन्यसेत्पात्रंताम्रंमृण्मयमेवच ॥ नवतन्तु
समांवर्तितस्मिन्पात्रेतुनिर्वपेत् ॥२२ ॥ ततःप्रबोधयेद्दीपंस्थाप्यकुम्भंसुनिश्चलम् ॥ पुष्पगन्धादिभिःपूज्यततःसंकल्पयेच्छुचिः ॥२३ ॥ मन्त्रेणानेन
देवर्षेअसमीरेषुधामसु ॥ कामोभूतस्यभव्यस्यसम्राडेकोविराजते ॥ २४ ॥ दीपःसंवत्सरंयावन्मयायंपरिकल्पितः ॥ अग्निहोत्रमविच्छिन्नंप्रीयतां
ममकेशवः ॥२५॥ ततोजितेन्द्रियोभूत्वाश्रुतिज्ञानपरायणः ॥ नालपेत्पतितान्पापांस्तथापाखण्डिनोनरान् ॥२६ ॥ रात्रौजागरणंगीतंनृत्यवाद्यादिकै
स्तथा ॥ पुण्यपाठैश्चविविधैर्धर्माख्यानैरुपोषणैः ॥२७॥ ततःप्रभातसमयेकृतपूर्वाह्णिकक्रियः ॥ ब्राह्मणान्भोजयेद्भक्त्यायथाशक्त्याप्रपूजयेत् ॥२८॥
स्वयंचपारणंकृत्वाप्रणिपत्यविसर्जयेत् ॥ एवंसंवत्सरंयावदहोरात्रंदृढव्रतः ॥ २९ ॥ दीपंपलसुवर्णेनतदर्द्धार्द्धेनवापुनः ॥ वर्तिस्तुराजतीप्रोक्ताद्विपला
र्द्धार्द्धिकापिवा ॥ ३० ॥ घृतपूर्णंतथाकुम्भंताम्रपात्रसमन्वितम् ॥ लक्ष्मीनारायणोदेवोयथाशक्त्याहिरण्मयः ॥ ३१ ॥ कार्योभक्तिमतापुंसामुक्तिद्वार
मभीप्सता ॥ ततोनिमन्त्रयेद्विद्वान्ब्राह्मणान्साधुसत्तमान् ॥३२॥ द्वादशोत्तमपक्षेतुविप्रान्षण्मध्यमेतथा ॥ अन्यथाकारयेत्त्रीन्वाएकंकर्मकरंद्विजम् ॥
॥ ३३ ॥ सपत्नीकंद्विजंशान्तंक्रियावन्तंविशेषतः ॥ इतिहासपुराणज्ञंधर्मज्ञंमृदुमेवच ॥ ३४ ॥ पितृभक्तंगुरुपरंदेवब्राह्मणपूजकम् ॥ पाद्यार्घदान
विधिनावस्त्रालङ्कारभूषणैः ॥ ३५ ॥ संपूज्यपत्न्यासहितमेकंभक्त्याचपूर्ववत् ॥ लक्ष्मीनारायणंदेवंदीपवर्तियुतंतथा ॥ ३६ ॥ ताम्रपात्रोपरिस्थाप्य
घृतकुम्भेनसंयुतम् ॥ ब्राह्मणायततोदद्याद्ध्यात्वानारायणंपरम् ॥ मन्त्रेणानेनदेवर्षेतमहंकथयामिते ॥३७॥ अविद्यातमसाव्याप्तेसंसारेपापनाशनः ॥
ज्ञानप्रदोमोक्षदश्चतस्माद्दत्तोमयानघ ॥३८॥ इतिदीपमन्त्रः॥ दक्षिणांचयथाशक्त्यादत्त्वाविप्रायभक्तितः ॥ भोजयेद्ब्राह्मणान्पश्चाद्घृतपायसमोदकैः ॥
॥३९॥ वस्त्रैराच्छादयेत्पश्चात्सपत्नीकंतथाद्विजम् ॥ शय्यांसोपस्करांदद्याद्धेनुंचैवसवत्सिकाम् ॥ ४० ॥ तेभ्यस्तुदक्षिणांदद्याद्यथावित्तानुसारतः ॥

CC-0. In Public Domain. Digitization by eGangotri

सुहृत्स्वजनबन्धूंश्चभोजयेत्पूजयेत्तथा ॥ ४१ ॥ एवंमहोत्सवंकुर्याद्दीपव्रतसमापने ॥ ततोविसर्जयेत्पश्चात्प्रणिपत्यक्षमापयेत् ॥ ४२ ॥ एवंकृतेतु
यत्पुण्यंतथासांक्रान्तिकैश्चयत् ॥ संवत्सराख्यदीपस्यतत्फलंप्राप्यतेनरैः ॥ ४३ ॥ मासव्रतैश्चयत्पुण्यंतत्पुण्यंप्राप्यतेनरैः ॥ संवत्सरस्यदीपस्य
व्रतेनचरितेनच ॥ ४४ ॥ दानव्रतैर्यथासङ्ख्यैर्यैश्चयोगव्रतैस्तथा ॥ तत्फलंसमवाप्नोतिदीपेसांवत्सरेकृते ॥ ४५ ॥ गोभूहिरण्यदानानिगृहादीनां
विशेषतः ॥ यत्फलंलभतेविद्वांस्तत्फलंदीपदोभवेत् ॥ ४६ ॥ दीपदःकान्तिमाप्नोतिदीपदोधनमक्षयम् ॥ दीपदोज्ञानमाप्नोतिदीपदःपरमंसुखम् ॥
॥ ४७ ॥ दीपदानाच्चसौभाग्यंविद्यामत्यन्तनिर्मलाम् ॥ आरोग्यंपरमामृद्धिंलभतेनात्रसंशयः ॥ ४८ ॥ दीपदःसुभगांभार्यांसर्वलक्षणसंयुताम् ॥
पुत्रान्पौत्रान्प्रपौत्रांश्चसन्ततिंचाक्षयांलभेत ॥ ४९ ॥ ब्राह्मणःपरमंज्ञानंक्षत्रियोराज्यमुत्तमम् ॥ वैश्योधनपशून्सर्वाञ्छूद्रःसुखमवाप्नुयात् ॥ ५० ॥
कुमारीचापिभर्तारंसर्वलक्षणसंयुतम् ॥ प्राप्नोतिपरमायुश्चपुत्रान्पौत्रांश्चपुष्कलान् ॥ ५१ ॥ वैधव्यंनैवयुवतीकदाचिदपिपश्यति ॥ नवियोग
मवाप्नोतिदीपदानप्रभावतः ॥ ५२ ॥ नाधयोव्याधयश्चैवजायन्तेदीपदानतः ॥ भयात्प्रमुच्यतेभीतोबद्धोमुच्येतबन्धनात् ॥ ५३ ॥
ब्रह्महत्यादिभिःपापैर्दीपव्रतपरायणः ॥ मुच्यतेनात्रसंदेहोब्रह्मणोवचनंयथा ॥ ५४ ॥ चान्द्रायणानिकृच्छ्राणिचरितानिनसंशयः ॥ येनसांवत्सरो
दीपोबोधितःशाश्वतोहरेः ॥ ५५ ॥ तेधन्यास्तेमहात्मानस्तैःप्राप्तंजन्मनःफलम् ॥ यैःसंपूज्यहरिंभक्त्यादीपःसांवत्सरःकृतः ॥ ५६ ॥ येऽपिसंवर्त्तय
न्तीहदीपवर्तिंशलाकया॥तेयान्तिपरमंस्थानंयत्सुरैरपिदुर्लभम्॥५७॥ येचतैलंचवर्तिंचयथाशक्त्याप्रदीपके॥ प्रक्षेपयन्तिसततंतेयान्तिपरमांगतिम्॥
॥ ५८ ॥ गच्छन्तंदीपकंशांतिंनशक्नोतिप्रबोधितुम् ॥ कथयत्यन्यलोकानांतेऽपितत्फलभागिनः ॥५९॥ स्तोकंस्तोकंचभिक्षित्वातैलंदीपार्थमेवच॥
करोतिदीपकंविष्णोःपुण्यंतेनापिलभ्यते ॥ ६० ॥ दीपंप्रज्वाल्यमानंतुयःपश्यत्यधमोनरः ॥ कृताञ्जलिपुटोविष्णोर्विष्णुलोकमवाप्नुयात् ॥ ६१ ॥
दीपप्रज्वालनेबुद्धिंयोदद्यात्कुरुतेस्वयम्॥सर्वपापविनिर्मुक्तोविष्णुलोकमवाप्नुयात्॥६२॥अत्राप्युदाहरन्तीममितिहासंपुरातनम् ॥ यस्यश्रवणमात्रेण
मुच्यतेसर्वकिल्विषैः ॥ ६३ ॥ सरस्वत्यास्तटेरम्येसिद्धाश्रमइतिश्रुतः ॥ तत्रोवासद्विजःपूर्वंकपिलोनामवेदवित् ॥ ६४ ॥ व्रतोपवासनिरतोदरिद्रः
श्रोत्रियस्तथा ॥ भिक्षावृत्त्याचकुरुतेकुटुम्बपरिपालनम् ॥ ६५ ॥ व्रतोपवासनियमैर्विष्णुमाराधयत्यसौ ॥ विष्णुंसंपूज्यविधिवद्दीपंबोधयतेसदा
॥६६॥ समादायचतत्तैलंस्वगृहेपूज्यकेशवम् ॥ दीपंभक्त्याचपरयाबोधयेद्धरितुष्टये ॥६७॥ एवंप्रवर्त्तमानस्यकपिलस्यमहात्मनः ॥ मार्जारस्तीक्ष्ण
दंष्ट्रस्तुमूषकान्भक्षयेत्सदा ॥ ६८ ॥ तत्रागच्छतिभक्ष्यार्थंमूषकानामहर्निशम् ॥ कृत्वाध्यानंसभक्ष्यार्थंनित्यंनारायणाग्रतः ॥ ६९ ॥ भक्षिता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बहवस्तेनमूषकाद्विजवेश्मनि ॥ येयेतैलार्थमायान्तिवर्त्यपाहरणायच ॥७०॥ तांस्तांस्तुभक्षयत्येवमूषकान्ध्यानतत्परः ॥ एवंप्रवर्तमानस्यकदाचि
त्कालपर्ययात् ॥ ७१ ॥ एकादश्यांसकपिलोब्राह्मणःस्वगृहेशुचिः ॥ सोपवासःसपत्नीकःपूजयामासचाच्युतम् ॥ ७२ ॥ ततोजागरणंचक्रेस्तुतिनृत्य
परायणः ॥ अर्धरात्रेतुसंप्राप्तेनिद्रयामोहितोद्विजः ॥७३॥ मार्जारश्चागतस्तत्रतीक्ष्णदंष्ट्रोलघुक्रमः ॥ भक्षयामासनैवेद्यंगृहकोणेस्थितःसदा ॥ ७४ ॥
अद्राक्षीन्मूषिकांक्षुद्रांतैलपानार्थमागताम् ॥ मन्दतेजसिदीपेतुवर्त्यपाहरणोचिताम् ॥७५॥समुत्पत्यपदाक्रम्यतदासाबिलमाविशत ॥ तस्याःपादेन
वैवर्त्यादीपःसंबोधितोभृशम् ॥ ७६ ॥ तैलपात्रंचनमितंसुप्रकाशोऽभवत्तदा ॥ ब्राह्मणोऽपिजजागारत्यक्त्वानिद्रांविमोहिनीम् ॥ ७७ ॥ मार्जारो
ऽपिचतांरात्रीमजाग्रच्चाखुभक्षकः ॥ ततःप्रभातेविमलेकृत्वानित्यक्रियांद्विजः ॥ ७८ ॥ ततश्चपारणंचक्रेविप्रोबन्धुजनैःसह ॥ एवंप्रवर्त्तमानस्य
कपिलस्यमहात्मनः ॥ ७९ ॥ बभूवुःपुत्रपौत्राश्चधनधान्यमनुत्तमम् ॥ आरोग्यंपरमामृद्धिमवापमहतींश्रियम् ॥ ८० ॥ दीपव्रतप्रभा
वेणकपिलोमोक्षमागतः ॥ संभेद्यमण्डलंपुण्यंसवितुःशशिनस्तथा ॥ ८१ ॥ दीपज्योतिःस्वरूपेणपरमात्मनियुक्तवान् ॥ मूषिकापिचकालेनम
मारबिलमध्यतः ॥ ८२ ॥ विमानवरमासाद्यविष्णुलोकंजगामसा ॥ मार्जारोऽपिचकालान्तेमृतःस्वर्गंजगामसः ॥ ८३ ॥ विमानवर
मारुह्यदेवगन्धर्वसेवितम् ॥ अप्सरोभिःपरिवृतोविद्याधरगणैर्युतः ॥ ८४ ॥ स्तूयमानोमहातेजाजयशब्दादिमङ्गलैः ॥ स्तूयमानःसर्वैनागै
र्विष्णुलोकंजगामसः ॥ ८५ ॥ कल्पकोटिसहस्राणिकल्पकोटिशतानिच ॥ भुक्त्वाचविपुलान्भोगांस्ततोराजाभवद्भुवि ॥ ८६ ॥ सुधर्मा
नामधर्मात्मादेवब्राह्मणपूजकः ॥ रूपवान्सुभगश्चैवमहाबलपराक्रमः ॥ ८७ ॥ तस्यप्रियतमाभार्यासर्वलक्षणसंयुता ॥ भर्तृभक्तातथाशीला
नाम्नासारूपसुन्दरी ॥ ८८ ॥ सर्वासांचैवनारीणांमध्येसासुभगाभवत् ॥ पुत्राश्चबहवोजातास्तथादुहितरोघनाः ॥ ८९ ॥ एवंविहरतोस्तद्द
म्पत्योःप्रीतिपूर्वकम् ॥ आगतःकार्त्तिकोमासोहरिनेत्रावबोधकृत् ॥९०॥ तस्मिन्दीपाःप्रबोध्यन्तेनारायणपरायणैः ॥ कृच्छ्रचान्द्रायणादीनिव्रतानि
नियमास्तथा ॥ ९१॥ क्रियन्तेविष्णुभक्तैश्चसंसारभयभीरुभिः ॥ अथप्रबोधिनींप्राप्यराजाराज्ञीमथाब्रवीत् ॥९२॥ भद्रेप्रबोधिनीपुण्याविष्णोर्नाभि
सरोरुहे ॥ करिष्याम्यद्यपूजांचसोपवासोजितेन्द्रियः॥९३॥स्नात्वाचपुष्करेतीर्थेपुण्डरीकाक्षमच्युतम्॥पूजयिष्यामिदेवेशंलक्ष्म्यासहजनार्दनम्॥९४॥
इतिसावाञ्छितंश्रुत्वाभर्तुःप्रियहितेरता ॥ उवाचवचनंशुद्धंभर्त्तारंचारुहासिनी ॥ ९५ ॥ रूपसुन्दर्युवाच ॥ ममापिहृदयेकामःसमुत्पन्नोनराधिप ॥
रूपसौन्दर्यवाञ्छाचहृदयेममवर्त्तते ॥९६॥पुष्करंप्रथमंतीर्थंगन्तुमिच्छेत्वयासह॥ततोराजातयासार्द्धमागतःपुष्करंतदा॥९७॥हस्त्यश्वरथवृन्दैश्चसमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गत्यपुरोहितैः ॥ ततःस्नात्वातथाध्यायंस्तर्पयन्पितृदेवताः ॥९८॥ पूजयामासदेवेशंपुण्डरीकाक्षमच्युतम् ॥ दीपमालाकुलेतत्रसर्वतःसुमनोहरे॥९९॥
ददर्शलिखितंतत्रमार्जारंदेवतालये ॥ तंदृष्ट्वाप्राक्तनंकर्मजन्मस्मृत्वानृपस्तदा ॥ मुखपङ्कजमालोक्यप्रियायाःप्रजहासच ॥ १०० ॥ रूपसुन्दर्युवाच ॥
ममसन्मुखमालोक्यभर्तःकिंस्मितकारणम् ॥ कथयामासहृष्टात्माप्राक्तनंकर्मणःफलम् ॥ १ ॥ राजोवाच ॥ अहमासंपुरादेविमार्जारोब्राह्मणालये ॥
भक्षितामूषकास्तत्रमयाशतसहस्रशः ॥२॥ ततोनारायणस्याग्रेदीपःसंरक्षितोयतः ॥ व्याजेनापिमयादेविप्राप्तंतत्कर्मणःफलम् ॥ विष्णुलोकमनुप्राप्य
राज्यंप्राप्तंमयाधुना ॥ ३ ॥ रूपसुन्दर्युवाच ॥ ममापिस्मरणंजातंप्राक्तनस्यचजन्मनः ॥ मूषिकाचाहमप्यासंक्षुद्राब्राह्मणवेश्मनि ॥ ४ ॥ का
र्त्तिकेचप्रबोधिन्यांमन्दीभूतेचदीपके ॥ वर्त्यग्राहरणार्थायनिर्गताहंतदाबिलात् ॥५॥ दृष्ट्वानारायणंदेवंपूजितंकुसुमैस्तथा ॥ निद्राभिभूतंविप्रंचवर्त्तिः
कृष्टामयातदा ॥ ६ ॥ उत्थितस्त्वंयदातत्रमांग्रहीतुंकृतक्षणः ॥ दृष्ट्वात्वांचप्रनष्टाहंप्रविष्टाबिलमध्यतः ॥७॥ विशन्त्याममपादेनदीपवर्त्तिर्विजृम्भिता॥
तैलपात्रंचनमितंतेनाहंसुखभागिनी॥८॥तन्मयाराजराजेन्द्रदीपंचैवप्रकाशितम् ॥ इदानींचमयाप्राप्तंरूपलावण्यमुत्तमम्॥९॥त्वंचभर्त्तातथाराज्यंपुत्रा
श्चैवंविधंसुखम् ॥ दीपप्रबोधनाज्जातंज्ञानमत्यन्तदुर्लभम्॥११०॥तस्मात्सर्वप्रयत्नेनदीपव्रतमनुत्तमम् ॥आवांहिपरयाभक्त्याकुर्वश्चैवविशेषतः॥११॥त
देतत्कर्मणःप्राप्तंफलंराज्यादिसम्पदः ॥ पूर्वजन्मस्मृतंचापिसर्वपापक्षयस्तथा ॥ १२ ॥ तस्मात्सर्वप्रयत्नेनविधिमन्त्रादिपूर्वकम् ॥ दीपव्रतंकृतं
पुम्भिःपुण्यमाचन्द्रतारकम् ॥ १३ ॥ इतिश्रुत्वावचोराजाचक्रेदीपव्रतंतदा ॥ प्रिययासहदेवर्षेसम्यक्छ्रद्धासमन्वितः ॥ १४ ॥ तस्मिंस्तुपुष्करे
तीर्थेकृत्वादीपव्रतंतुतौ ॥ अवापतुःपरांमुक्तिंदेवदानवदुर्लभाम् ॥ १५ ॥ एतद्दीपस्यमाहात्म्यंयेशृण्वन्तिनराभुवि ॥ सर्वपापविनिर्मुक्ताःप्रयान्ति
हरिमन्दिरम् ॥ १६ ॥ येचकुर्वन्तिपुरुषाःस्त्रियोवाभक्तितत्पराः ॥ तेसर्वेपापनिर्मुक्तायान्तिब्रह्मसनातनम् ॥ १७ ॥ दीपव्रतमिदंविद्धन्कथितं
तेविमुक्तिदम् ॥ सर्वसौख्यप्रदंधन्यंमहाव्रतमिदंतव ॥ १८ ॥ नेत्ररोगाविनश्यन्तियथापापप्रभावजाः ॥ आधयोव्याधयःसर्वेनश्यन्तेहिकृते
क्षणात् ॥ १९ ॥ नदारिद्र्यंनशोकंचनमोहोनचविभ्रमः ॥ गृहेलक्ष्मीःसमायातिजन्मजन्मनिवाडव ॥ १२० ॥ इतिश्रीपाद्मेमहापुराणेपञ्च
पञ्चा० उत्त० उमापतिनारदसंवादेदीपव्रतमाहात्म्यंनामैकत्रिंशोऽध्यायः ॥ ३१ ॥ नारदउवाच ॥ देवदेवजगन्नाथभक्तानामभयप्रद ॥ व्रतंब्रूहि
महादेवकृपांकृत्वाममोपरि ॥ १ ॥ श्रीमहादेवउवाच ॥ सार्वभौमःपुराह्यासीद्धरिश्चन्द्रोमहीपतिः ॥ तस्यतुष्टोऽददाद्ब्रह्मापुरींकामदुघांशुभाम्
॥ २ ॥ सर्वरत्नमयींदिव्यांबालार्कसदृशप्रभाम् ॥ तत्रस्थितोमहीपालोसप्तद्वीपांवसुन्धराम् ॥ ३ ॥ पालयामासधर्मेणपितापुत्रमिवौरसम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभूतधनधान्यस्तुपुत्रदौहित्रवान्नृपः ॥ ४ ॥ सपालयन्छुभंराज्यंपरंविस्मयमागतः ॥ नताद्दशमभूत्पूर्वंराज्यंकस्यहिकर्हिचित् ॥ ५ ॥ नचे
द्दशंनरैरन्यैर्विमानमधिरोहितम् ॥ कस्येहकर्मणोव्युष्टिर्येनाहंसुरराडिव ॥ ६ ॥ इतिचिन्तापरोभूत्वाविमानवरमास्थितः ॥ ददर्शपार्थिववरोमेरु
शिखरिणांवरम् ॥ ७ ॥ तत्रास्तेचमहात्मासौद्वितीयइवभास्करः ॥ आसीनंपर्वतवरेशैलपट्टेहिरण्मये ॥ ८ ॥ सनत्कुमारंब्रह्मर्षिंज्ञानयोगपरा
यणम् ॥ द्दष्ट्वाद्यवातरद्राजाप्रष्टुकामोऽथविस्मयम् ॥ ९ ॥ ववन्देचरणौहृष्टस्तेनापिसचनन्दितः ॥ सुखोपविष्टस्तुनृपःपप्रच्छमुनिपुङ्गवम् ॥
॥ १० ॥ भगवन्दुर्लभालोकेसम्पच्चेयंयथामम ॥ कर्मणाकेनलभ्येतकश्चाहंपूर्वजन्मनि ॥ तत्त्वंकथयमेसर्वमनुग्राह्योऽस्मितेयदि ॥ ११ ॥
सनत्कुमारउवाच ॥ शृणुराजन्प्रवक्ष्यामिपूर्ववृत्तस्यकारणम् ॥ येनकृत्वाविशेषेणतवचानुग्रहोऽभवत् ॥ १२ ॥ त्वमासीःपूर्वजनुषिसुवैश्यःस
त्यवाक्छुचिः ॥ स्वंकर्मतेपरित्यक्तंततस्त्यक्तस्तुबान्धवैः ॥ १३ ॥ सत्वंवृत्तिपरिक्षीणोभार्ययानुगतस्तथा ॥ निर्गतःस्वजनांस्त्यक्त्वापरप्रेष
णलित्सया ॥ १४ ॥ नचप्रेषणदोह्यासीत्कालेदुर्भिक्षपीडितः ॥ ततःकदाचिद्ददृशेसरश्चोत्फुल्लपङ्कजम् ॥ १५ ॥ दृष्ट्वातत्रकृतोभावोगृह्णीवःपङ्क
जानिवै ॥ एतावदुक्त्वापुष्पाणितान्यादायपदेपदे ॥ १६ ॥ आस्थितौनगरींपुण्यांनाम्नावाराणसींशुभाम् ॥ ततोविक्रीणतःकश्चिन्नैवगृह्णाति
पङ्कजम् ॥१७॥ तन्मठान्निर्गतःकश्चित्तत्रैवप्राङ्गणेस्थितः ॥ तत्रस्थानेप्रविशताश्रुतोवादित्रनिस्वनः॥१८॥कस्मिंश्चश्रूयतेह्येषवादित्रस्यचनिस्वनः ॥
इतिपृष्टेतदातूर्येतेनोक्तेप्रस्थितोऽन्तरम् ॥ १९॥ काशिराजस्तुविख्यातइन्द्रद्युम्नस्तुपार्थिवः ॥ तस्यास्तिदुहिताख्यातानाम्नाचन्द्रावतीसती ॥ २० ॥
उपोषितामहाभागाजयन्तीमष्टमींशुभाम् ॥ तत्रागतोऽसौवैश्यस्तुयत्रतिष्ठतिसाशुभा ॥ २१ ॥ संतुष्टचित्तःसतदाहर्षस्तत्रागतोमहान् ॥ तत्रस्थाने
त्वयादृष्टोदेववैतानिकोविधिः ॥ २२॥ आदित्यसहितोयत्रपूज्यतेभगवान्हरिः ॥ तद्भक्त्याचत्वयापत्न्यासहपुष्पार्चनंकृतम् ॥ २३ ॥ शेषैस्तु
प्रकरस्तत्रकृतःपुष्पमयस्तथा ॥ तंदृष्ट्वाविस्मितासाहकेनेहाभ्यर्चनंकृतम् ॥ २४ ॥ ज्ञात्वातत्कर्मतत्सर्वंकृतंसंरक्षणंतथा ॥ ततस्तुष्टातुसातुभ्यंददौवि
त्तंबहुस्वयम् ॥ २५ ॥ त्वयावित्तंनोगृहीतंभोजनायानुमन्त्रितः ॥ नगृहीतंभोजनंचनचवित्तंत्वयातदा ॥ २६ ॥ आदित्योविष्णुसंयुक्तःपूजितोऽसौ
यथाविधि ॥ ततःप्रभातसमयेरक्षमाणस्तयासदा ॥ २७ ॥ विश्रम्भयित्वातान्सर्वान्निर्गतोऽसियथेच्छया ॥ तदेतदन्यजनुषिसुकृतंचार्जितंत्वया ॥
॥ २८ ॥ पश्चात्त्वंचत्वयाप्राप्तंस्वीयकर्मानुयोगतः ॥ तेनपुण्येनमहताविमानमागमत्तदा ॥ २९ ॥ तत्फलंभुज्यतेभूपपूर्वजन्मकृतंचयत् ॥ ३० ॥
हरिश्चन्द्रउवाच ॥ केनैवचविधानेनकस्मिन्मासेचसातिथिः ॥ कर्त्तव्यातन्ममाचक्ष्वअनुग्राह्योऽस्मितेयदि ॥ ३१ ॥ सनत्कुमारउवाच ॥ शृणुष्वाव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हितोराजन्कथ्यमानंमयातव ॥ श्रावणस्यतुमासस्यकृष्णाष्टम्यांनराधिप ॥ ३२ ॥ रोहिणीयदिलभ्येतजयन्तीनामसातिथिः ॥ भूयोभूयोमहाराज
भवेज्जन्मनिकारणम् ॥३३॥ विधानमस्यावक्ष्यामियथोक्तंब्रह्मणामम ॥ यत्कृत्वामुक्तपापस्तुविष्णुलोकंप्रगच्छति ॥ ३४ ॥ उपोषितस्ततःकृत्वा
स्नानंकृष्णतिलैःसह॥स्थापयेदव्रणंकुम्भंपञ्चरत्नसमन्वितम् ॥३५॥ वज्रमौक्तिकवैडूर्यपुष्परागेन्द्रनीलकम्॥पञ्चरत्नंप्रशस्तंतुइतिकात्यायनोऽब्रवीत्॥
॥ ३६ ॥ तस्योपरिन्यसेत्पात्रंसौवर्णलक्षणान्वितम् ॥ सौवर्णांविन्यसेत्तत्रयशोदांनन्दगेहिनीम् ॥ ३७ ॥ प्रददानांतुपुत्रस्यस्तनंवैविस्मिताननाम् ॥
पिबमानंस्तनंमातुरपरंपाणिनास्पृशत् ॥ ३८ ॥ आलोक्यमातरंप्रेम्णासुखयन्तंमुहुर्मुहुः ॥ सौवर्णंकारयेद्देवंयावच्छक्तिश्चविद्यते ॥ ३९ ॥ द्विनिष्क
मात्रंकर्तव्यंयदिशक्तिश्चविद्यते ॥ त्रिलोहेनैवकर्तव्यंसौवर्णेनाथवापुनः ॥४०॥ तद्वच्चरोहिणींकुर्यात्सौवर्णिंराजतःशशी ॥ अङ्गुष्ठमात्रस्तुशशीरोहिणी
चतुरङ्गुला ॥ ४१ ॥ कर्णयोःकुण्डलेदद्यात्कण्ठाभरणकंगले ॥ एवंकृत्वातुगोविन्दंमात्रासार्धजगत्पतिम् ॥ ४२ ॥ क्षीरादिस्नपनंकृत्वाचन्दनेनानु
लेपयेत्त ॥ श्वेतवस्त्रयुगच्छन्नंपुष्पमालोपशोभितम् ॥ ४३ ॥ नैवेद्यैर्विविधैर्भक्ष्यैःफलैर्नानाविधैरपि ॥ दीपंचकारयेत्तत्रपुष्पमण्डपशोभितम् ॥ ४४ ॥
गीतंनृत्यंचवाद्यंचकारयेद्भक्तिमान्बुधैः ॥ एवंकृत्वाविधानंतुयथाविभवसारतः ॥ गुरुंसंपूजयेत्पश्चात्पूजांतत्रसमापयेत् ॥४५॥ इतिश्रीपाद्मेमहापुराणे
पञ्चप०उत्त०उमापतिनारदसंवादेजन्माष्टमीव्रतंनामद्वात्रिंशोऽध्यायः ॥३२॥ महादेवउवाच ॥ दृष्ट्वाशतक्रतुंसिद्धंसमाप्तवरदक्षिणम् ॥ मघवाजातसं
कल्पःपर्यपृच्छद्बृहस्पतिम् ॥ १ ॥ भगवन्केनदानेनसर्वतःसुखमेधते ॥ यदक्षयंमहार्घंचतन्मेब्रूहिमहातपः ॥ २॥ एवमिन्द्रेणचोऽक्तोऽसौदेवदेवःपुरो
हितः ॥ प्रहस्यतंमहाप्राज्ञोबृहस्पतिमुवाचह ॥ ३ ॥ हिरण्यदानंगोदानंभूमिदानंचवासव ॥ एतत्प्रयच्छमानस्तुसर्वपापैःप्रमुच्यते ॥४ ॥ सुवर्णंरज
तंवस्त्रंमणिरत्नंचवासव ॥ सर्वमेवभवेद्दत्तंवसुधांयःप्रयच्छति ॥ ५॥ फालकृष्टांमहींदत्त्वासबीजांसस्यमालिनीम् ॥ यावत्सूर्यःकृतालोकस्तावत्स्वर्गे
महीयते ॥ ६ ॥ यत्किंचित्कुरुतेपापंपुरुषोवृत्तिकर्शितः ॥ अपिगोचर्ममात्रेणभूमिदानेनशुध्यति ॥ ७ ॥ दशहस्तेनदण्डोऽत्रत्रिंशद्दण्डानिवर्तनम् ॥
दशतान्येवगोचर्मब्रह्मगोचर्मलक्षणम् ॥ ८ ॥ सवृषंगोसहस्रंतुयत्रतिष्ठत्ययन्त्रितम् ॥ बालवत्सप्रसूतानांतद्गोचर्मइतिस्मृतम् ॥ ९ ॥ विप्रायदद्या
च्चगुणान्वितायतपोयुतायप्रजितेन्द्रियाय ॥ यावन्महीतिष्ठतिसागरान्तातावत्फलंतस्यभवेदनन्तम् ॥ १० ॥ यथाप्सुपतितःशक्रतैलबिन्दुःप्रस
र्पति ॥ एवंकृतंभूमिदानंसस्येसस्येप्रसर्पति ॥ ११ ॥ यथाबीजानिरोहन्तिप्रचीर्णानिमहीतले ॥ एवंकामान्प्ररोहन्तिभूमिदानसमन्विताः ॥१२॥
अन्नदाःसुखिनोनित्यंवस्त्रदोरूपवान्भवेत् ॥ सनरःसर्वदोभूयोयोददातिवसुन्धराम् ॥ १३ ॥ यथागौर्भरतेवत्संक्षीरमुत्सृज्यक्षीरिणी ॥ एवंदत्ता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सहस्राक्षभूमिर्भरतिभूमिदम् ॥ १४ ॥ शङ्खोभद्रासनंछत्रंवराश्ववरवारणाः ॥ भूमिदानस्यपुण्यस्यफलंस्वर्गःपुरन्दर ॥ १५ ॥ आदित्योवरुणोवह्नि
र्ब्रह्मासोमोहुताशनः ॥ शूलपाणिश्चभगवानभिनन्दन्तिभूमिदम् ॥ १६ ॥ आस्फोटयन्तिपितरोवर्णयन्तिपितामहाः ॥ भूमिदाताकुलेजातः
सनस्त्राताभविष्यति ॥ १७ ॥ त्रीण्याहुरतिदानानिगावःपृथ्वीसरस्वती ॥ नरकादुद्धरन्त्येतेजपवापनदोहनात् ॥ १८ ॥ दुर्गतिंतारयन्त्येत
विद्वद्भिर्विप्रधारणैः ॥ प्रावृतावस्त्रदायान्तिनग्नायान्तित्ववस्त्रदाः ॥ १९ ॥ तृप्तायान्त्यन्नदातारःक्षुधितायान्त्यनन्नदाः ॥ काङ्क्षन्तिपितरः
सर्वेनरकाद्भयभीरवः ॥ २० ॥ गयांयास्यतियःपुत्रःसनस्त्राताभविष्यति ॥ एष्टव्याबहवःपुत्रायद्येकोऽपिगयांव्रजेत् ॥ २१ ॥ यजेतवाश्व
मेधेननीलंवावृषमुत्सृजेत् ॥ लोहितोयस्तुवर्णेनपुच्छाग्रेयस्तुपाण्डुरः ॥ २२ ॥ श्वेतःखुरविषाणाभ्यांसनीलोवृषउच्यते ॥ नीलपाण्डुरलाङ्गू
लस्तोयमुद्धरतेतुयः ॥ २३ ॥ षष्टिंवर्षसहस्राणिपितरस्तेनतर्पिताः ॥ यच्चशृङ्गगतंपङ्कंकुलेतिष्ठतिचोद्धृतम् ॥ २४ ॥ पितरस्तस्यचाश्नन्तिसो
मलोकंमहाद्युतिम् ॥ आसीद्राज्ञोदिलीपस्यनृगस्यनहुषस्यच ॥ २५ ॥ अन्येषांतुनरेन्द्राणांपुनरन्योनगच्छति ॥ बहुभिर्वसुधादत्ताराजभिः
सगरादिभिः ॥ २६ ॥ यस्ययस्ययदाभूमिस्तस्यतस्यतदाफलम् ॥ ब्रह्मघ्नोवाथस्त्रीहन्ताबालघ्नःपतितोऽथवा ॥ २७ ॥ गवांशतसहस्राणिहन्तात
त्तस्यदुष्कृतम् ॥ स्वदत्तांपरदत्तांवायोहरेत्तुवसुन्धराम् ॥२८॥ सचविष्ठाकृमिर्भूत्वपितृभिःसहपच्यते ॥ षष्टिवर्षसहस्राणिस्वर्गेतिष्ठतिभूमिदः॥२९॥
प्रहर्ताचानुमन्ताचतावद्वैनरकंव्रजेत् ॥ भूमिदाद्भूमिहर्तुश्चनापरःपुण्यपापवान् ॥ ३० ॥ ऊर्ध्वाधस्तौचतिष्ठेतेयावदाभूतसंप्लवम् ॥ ३१ ॥ अग्ने
रपत्यंप्रथमंसुवर्णंभूर्वैष्णवीसूर्यसुतास्तुगावः ॥ तेषामनन्तंफलमश्नुवीतयःकाञ्चनंगांचमहींचदद्यात् ॥३२॥ भूमिंयःप्रतिगृह्णातियश्चभूमिंप्रयच्छति ॥
उभौतौपुण्यकर्माणौनियतौस्वर्गगामिनौ ॥ ३३ ॥ अन्यायेनहृताभूमिर्यैर्नरैरपहारिता ॥ हरन्तोहारयन्तश्चहन्युस्तेसप्तमंकुलम् ॥ ३४ ॥ हरे
द्धारयतेयस्तुमन्दबुद्धिस्तमोवृतः ॥ सबद्धोवारुणैःपाशैस्तिर्यग्योनिषुजायते ॥ ३५ ॥ अश्रुभिःपतितैस्तेषांदानानामवकीर्तनम् ॥ ब्राह्मणस्यहृतेक्षेत्रे
हृतंत्रिपुरुषंकुलम् ॥ ३६ ॥ वापीकूपसहस्रेणअश्वमेधशतेनच ॥ गवांकोटिप्रदानेनभूमिहर्तानशुध्यति ॥ ३७ ॥ कृतंदत्तंतपोऽधीतंय
त्किंचिद्धर्मसंस्थितम् ॥ अर्धाङ्गुलस्यसीमायाहरणेनप्रणश्यति॥३८॥गोतीर्थग्रामरथ्यांचश्मशानग्राममेवच ॥ संपीडयनरकंयातियावदाभूतसंप्लवम्॥ ॥ २३ ॥
॥ ३९ ॥ पञ्चकन्यानृतेहन्तिदशहन्तिगवानृते ॥ शतमश्वानृतेहन्तिसहस्रंपुरुषानृते ॥ ४० ॥ हन्तिजातानजातांश्चहिरण्यार्थेऽनृतंवदन् ॥
सर्वंभूम्यनृतेहन्तिमास्मभूम्यनृतंवद ॥ ४१ ॥ ब्रह्मस्वेनोरतिंकुर्यात्प्राणैःकण्ठगतैरपि ॥ अग्निदग्धाःप्ररोहन्तिब्रह्मदग्धोनरोहति ॥ ४२ ॥ अग्निद

CC-0. In Public Domain. Digitization by eGangotri

ग्धाःप्ररोहन्तिसूर्यदग्धास्तथैवच ॥ राजदण्डहताश्चैवब्रह्मशापहताहताः ॥४३॥ ब्रह्मस्वेनचपुष्टानिअङ्गानिचमुहुर्मुहुः ॥ कार्यकालेविशीर्यन्तेसिकता
भित्तयोयथा ॥ ४४ ॥ ब्रह्मस्वहरणंकुर्वन्नरोयातिहरौरवम् ॥ नविषंविषमित्याहुर्ब्रह्मस्वंविषमुच्यते ॥ ४५ ॥ विषमेकाकिनंहन्तिब्रह्मस्वंपुत्रपौत्रकम्॥
लोहचूर्णंचाश्मचूर्णंविषंसंजरयेन्नरः ॥४६॥ ब्रह्मस्वंत्रिषुलोकेषुकःपुमाञ्जरयिष्यति ॥ ब्रह्मस्वेनतुयत्सौख्यंदेवस्वेनतुयारतिः ॥४७॥ तद्धनंकुलनाशाय
भवत्यात्मविनाशनम् ॥ ब्रह्मस्वब्रह्महत्याचदरिद्रस्यतुयद्धनम्॥४८॥गुरुमित्रहिरण्यंचस्वर्गस्थमपिपीडयेत् ॥ श्रोत्रियायकुलीनायदरिद्रायचवासव ॥
॥ ४९ ॥ संतुष्टायविनीतायसर्वस्वसहितायच ॥ वेदाभ्यासतपोज्ञानेन्द्रियसंयमशालिने ॥ ५० ॥ ईदृशायसुरश्रेष्ठयद्दत्तंहितदक्षयम् ॥ आमपात्रे
यथान्यस्तंक्षीरंदधिघृतंमधु ॥ ५१ ॥ भिनत्तिपात्रंदौर्बल्यान्नचपात्रंविनश्यति ॥ एवंगांचहिरण्यंचवस्त्रमन्नंमहींतिलान् ॥ ५२ ॥अविद्वान्प्रतिगृह्णाति
भस्मीभवतिकाष्ठवत् ॥ यस्तडागंनवंकुर्यात्पुराणंवापिखानयेत्॥५३॥सर्वंकुलंसमुद्धृत्यस्वर्गलोकेमहीयते ॥ वापिकूपतडागानिउद्यानप्रभवाणिच ॥
॥५४॥ पुनर्नीतानिसंस्कारंददतेमौक्तिकंफलम् ॥ निदाघकालेपानीयंयस्यतिष्ठतिवासव ॥५५॥सदुर्गंविषमंकृच्छ्रंनकदाचिदवाप्नुयात् ॥ एकाहंतुस्थि
तंतोयंपृथिव्यांदेवसत्तम॥५६॥कुलानितारयेत्तस्यसप्तपूर्वापराण्यपि॥दीपालोकप्रदानेनवपुष्मान्सभवेन्नरः ॥ ५७ ॥ दक्षिणायाःप्रदानेनस्मृतिंमेधांच
विन्दति॥कृत्वापिपातकंकर्मयोदद्यादनुसन्धिने॥५८॥ब्राह्मणायविशेषेणनसपापैर्हिलिप्यते॥भूमिर्गावस्तथादासःप्रसह्यप्रहृतायदा॥५९॥ननिवेदयतेय
स्तुतमाहुर्ब्रह्मघातकम्॥उपस्थितेविवाहेचयज्ञेदानेचवासव ॥६०॥मोहाच्चरतिविघ्नंयःसमृतोजायतेकृमिः॥धनंफलतिदानेनजीवितंजीवरक्षणात् ॥६१॥
रूपमैश्वर्यमारोग्यमहिंसाफलमश्नुते ॥ फलमूलाशनात्पूजांस्वर्गःसत्येनलभ्यते ॥६२॥ प्रायोपवेशनाद्राज्यंसर्वत्रसुखमश्नुते ॥ सुखाढ्यःशक्रदीक्षायां
सुगामीचतृणाशनः ॥ ६३ ॥ रूपीत्रिषवणस्नायीवायुंपीत्वाक्रतुंलभेत् ॥ नित्यस्नायीभवेद्दक्षःसन्ध्यावेदजपान्वितः ॥ ६४ ॥ अहिंस्रोयातिवै
राज्यंनाकपृष्ठमनाशकम् ॥ अग्निप्रवेशीनियतंब्रह्मलोकेमहीयते ॥ ६५ ॥ रसानांप्रतिसंहारेपशून्पुत्रांश्चविन्दति ॥ नाकेचिरंसवसतिउपवासी
चयोभवेत् ॥ ६६ ॥ सततंभूमिशायीयःसलभेदीप्सितांगतिम् ॥ वीरासनंवीरशय्यंवीरस्थानमुपासतः ॥ ६७ ॥ अक्षयास्तस्यलोकाःस्युः
सर्वकामगमास्तथा ॥ उपवासंचदीक्षांचअभिषेकंचवासव ॥ ६८ ॥ कृत्वाद्वादशवर्षाणिवीरस्थानाद्विशिष्यते ॥ पावनंचरतेधर्मंस्वर्गलोकेमही
यते ॥ ६९ ॥ बृहस्पतिमतंपुण्यंयेपठन्तिद्विजोत्तमाः ॥ तेषांचत्वारिवर्धन्तेआयुर्विद्यायशोबलम् ॥ ७० ॥ नारदउवाच ॥ इतीन्द्रायबृहस्पति
प्रणीतंधर्मशास्त्रकम् ॥ मह्यंभक्तायसंप्रोक्तंमहेशेनाखिलंनृप ॥ ७१ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०उत्त०उमापतिनारदसंवादेधर्मकथने

CC-0. In Public Domain. Digitization by eGangotri

त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ नारदउवाच ॥ शनिपीडाकथंयातितन्मेवदसुरोत्तम ॥त्वन्मुखाच्छ्रूयतेयद्वैतेनजन्तुःप्रमुच्यते ॥ १ ॥ महादेवउवाच ॥
देवर्षेशृणुवृत्तान्तंयेनमुच्येतबन्धनात् ॥ ग्रहाणांग्रहराजोऽयंसौरिःसर्वमहेश्वरः ॥ २ ॥ अयंतुदेवोविख्यातःकालरूपीमहाग्रहः ॥ जटिलोवज्ररोमाच
दानवानांभयङ्करः ॥ ३ ॥ तस्याख्यानंचलोकेऽस्मिन्प्रथितंनास्तिवैप्रभो ॥ मयागुप्तंविशेषेणनोक्तंहिकस्यचित्कदा ॥ ४ ॥ रघुवंशेऽतिविख्यातो
राजादशरथःपुरा ॥ चक्रवर्तीमहावीरःसप्तद्वीपाधिपोऽभवत् ॥ ५ ॥ कृत्तिकान्तेशनिंज्ञात्वादैवज्ञैर्ज्ञापितोहिसः ॥ रोहिणींभेदयित्वाचशनिर्यास्यति
साम्प्रतम् ॥ ६ ॥ शाकटंभेदमत्युग्रंसुरासुरभयङ्करम् ॥ द्वादशाब्दंतुदुर्भिक्षंभविष्यतिसुदारुणम् ॥ ७ ॥ एतच्छ्रुत्वाततोवाक्यंमन्त्रिभिःसह
पार्थिवः ॥ मन्त्रयामासकिमिदंभयङ्करमुपस्थितम् ॥ ८ ॥ आकुलंचजगद्दृष्ट्वापौरजानपदादिकम् ॥ ब्रुवन्तिसर्वतोलोकाःक्षयएषसमागतः ॥ ९ ॥
देशाःसनगराग्रामाभयभीताःसमन्ततः ॥ पप्रच्छप्रयतोराजावसिष्ठप्रमुखान्द्विजान् ॥ १० ॥ संविधानंकिमत्रास्तिब्रूतमांहिद्विजोत्तमाः ॥ ११ ॥
वसिष्ठउवाच ॥ प्राजापत्यमृक्षमिदंतस्मिन्भिन्नेकुतःप्रजाः ॥ अयंयोगोह्यसाध्यस्तुब्रह्मशक्रादिभिस्तथा ॥ १२ ॥ इतिसंचिन्त्यमनसासाहसंपरमं
महत् ॥ समादायधनुर्दिव्यंदिव्यायुधसमन्वितम् ॥ १३ ॥ रथमारुह्यवेगेनगतोनक्षत्रमण्डलम् ॥ सपादंयोजनंलक्षंसूर्यस्योपरिसंस्थितम् ॥ १४ ॥
रोहिणीपृष्ठमास्थायराजादशरथःपुरा ॥ रथेतुकाञ्चनेदिव्येमणिरत्नविभूषिते ॥ १५ ॥ हंसवर्णहयैर्युक्तेमहाकेतुसमुच्छ्रये ॥ दीप्यमानोमहारत्नैः
किरीटमुकुटोज्ज्वलः ॥ १६ ॥ बभ्राजसतदाकाशेद्वितीयइवभास्करः ॥ आकर्णपूर्णचापेतुसंहारास्त्रंन्ययोजयत् ॥ १७ ॥ संहारास्त्रंशनिर्दृष्ट्वासुरा
सुरभयङ्करम् ॥ हसित्वातद्भयात्सौरिरिदंवचनमब्रवीत् ॥ १८ ॥ शनिरुवाच ॥ पौरुषंतवराजेन्द्रपरंरिपुभयङ्करम् ॥ देवासुरमनुष्याश्चसिद्धविद्या
धरोरगाः ॥ १९ ॥ मयाविलोकिताराजन्भस्मसाद्भवन्तिते ॥ तुष्टोऽहंतवराजेन्द्रतपसापौरुषेणच ॥ वरंब्रूहिप्रदास्यामिमनसायत्किमिच्छसि ॥
॥ २० ॥ दशरथउवाच ॥ रोहिणींभेदयित्वातुनगन्तव्यंकदाचन ॥ सरितःसागरायावद्यावच्चन्द्रार्कमेदिनी ॥ २१ ॥ याचितंतुमयासौरेनान्य
मिच्छामितेवरम् ॥ एवमस्तुशनिःप्राहवरंदत्त्वातुशाश्वतम् ॥ २२ ॥ पुनरेवाब्रवीत्तुष्टोवरंवरयसुव्रत ॥ प्रार्थयामासहृष्टात्मावरमन्यंशनेस्तदा ॥२३ ॥
नभेत्तव्यंहिशकटंत्वयाभास्करनन्दन ॥ द्वादशाब्दंतुदुर्भिक्षंनकर्तव्यंकदाचन ॥२४ ॥ शनिरुवाच ॥ द्वादशाब्दंतुदुर्भिक्षंनकदाचिद्भविष्यति ॥ कीर्ति
रेषात्वदीयाचत्रैलोक्येविचरिष्यति ॥ २५ ॥ वरद्वयंतुसंप्राप्यहृष्टरोमाचपार्थिवः ॥ रथोपरिधनुर्मुक्त्वाभूत्वाचैवकृताञ्जलिः ॥ २६ ॥ ध्यात्वासर
स्वतींदेवींगणनाथंविनायकम् ॥ राजादशरथःस्तोत्रंसौरेरिदमथाब्रवीत् ॥ २७ ॥ दशरथउवाच ॥ नमःकृष्णायनीलायशितिकण्ठनिभायच ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नमःकालाग्निरूपायकृतान्तायचवैनमः ॥ २८ ॥ नमोनिर्मांसदेहायदीर्घश्मश्रुजटायच ॥ नमोविशालनेत्रायशुष्कोदरभयाकृते ॥ २९ ॥ नमः
पुष्कलगात्रायस्थूलरोम्णेऽथवैनमः ॥ नमोदीर्घायशुष्कायकालदंष्ट्रनमोऽस्तुते ॥ ३० ॥ नमस्तेकोटराक्षायदुर्निरीक्ष्यायवैनमः ॥ नमोघोरायरौद्राय
भीषणायकपालिने ॥ ३१ ॥ नमस्तेसर्वभक्षायवलीमुखनमोऽस्तुते ॥ सूर्यपुत्रनमस्तेऽस्तुभास्करेभयदायच ॥ ३२ ॥ अधोदृष्टेनमस्तेऽस्तुसंवर्तक
नमोऽस्तुते ॥ नमोमन्दगतेतुभ्यंनिस्त्रिंशायनमोऽस्तुते ॥ ३३ ॥ तपसादग्धदेहायनित्यंयोगरतायच ॥ नमोनित्यंक्षुधार्तायअतृप्तायचवैनमः॥३४॥
ज्ञानचक्षुर्नमस्तेऽस्तुकश्यपात्मजसूनवे ॥ तुष्टोददासिवैराज्यंरुष्टोहरसितत्क्षणात् ॥३५॥ देवासुरमनुष्याश्चसिद्धविद्याधरोरगाः ॥ त्वयाविलोकिताः
सर्वेनाशंयान्तिसमूलतः ॥३६॥ प्रसादंकुरुमेदेववराहोऽहमुपागतः ॥ एवंस्तुतस्तदासौरिर्ग्रहराजोमहाबलः ॥ ३७ ॥ अब्रवीच्चपुनर्वाक्यंहृष्टरोमातु
भास्करिः ॥ तुष्टोऽहंतवराजेन्द्रस्तवेनानेनसुव्रत ॥ वरंब्रूहिप्रदास्यामिस्वेच्छयारघुनन्दन ॥ ३८ ॥ दशरथउवाच ॥ अद्यप्रभृतितेसौरेपीडाकार्यान
कस्यचित् ॥ देवासुरमनुष्याणांपशुपक्षिसरीसृपाम् ॥ ३९ ॥ शनिरुवाच ॥ गृह्णन्तीतिग्रहाःसर्वेग्रहाःपीडाकराःस्मृताः ॥ अदेयंयाचितंराज
न्किंचिद्युक्तंवदाम्यहम् ॥ ४० ॥ त्वयाप्रोक्तमिदंस्तोत्रंयःपठिष्यतिमानवः ॥ एककालंद्विकालंवापीडामुक्तोभवेत्क्षणात् ॥ ४१ ॥ देवासुरमनु
ष्याणांसिद्धविद्याधरक्षसाम् ॥ मृत्युंमृत्युगतोदद्यांजन्मन्यन्तेचतुर्थके ॥ ४२ ॥ यःपुनःश्रद्धयायुक्तःशुचिर्भूत्वासमाहितः ॥ शमीपत्रैःसमभ्यर्च्य
प्रतिमांलोहजांमम ॥ ४३ ॥ माषौदनतिलैर्मिश्रंदद्याल्लोहंचदक्षिणाम् ॥ कृष्णांगांवृषभंवापियोवैदद्याद्द्विजातये ॥ ४४ ॥ मद्दिनेतुविशेषेणस्तोत्रेणाने
नपूजयेत् ॥ पूजयित्वाजपेत्स्तोत्रंभूत्वाचैवकृताञ्जलिः ॥ ४५ ॥ तस्यपीडांनचैवाहंकरिष्यामिकदाचन ॥ गोचरेजन्मलग्नेवादशास्वन्तर्दशासुच ॥
॥ ४६ ॥ रक्षामिसततंतस्यपीडांचापिग्रहस्यच ॥ अनेनैवविधानेनपीडामुक्तंजगद्भवेत् ॥ ४७ ॥ एवंयुक्त्यामयादत्तोवरस्तेरघुनन्दन ॥ वरत्रयंतु
संप्राप्यराजादशरथस्तदा ॥ ४८ ॥ मेनेकृतार्थमात्मानंनमस्कृत्यशनैश्चरम् ॥ शनिनाचाभ्यनुज्ञातोरथमारुह्यवेगवान् ॥ ४९ ॥ स्वस्थानंगतवान्राजा
प्राप्तश्रेयोऽभवत्तदा ॥ यइदंप्रातरुत्थायशनिवारेस्तवंपठेत् ॥ ५० ॥ पठ्यमानमिदंस्तोत्रंश्रद्धयायःशृणोतिच ॥ नरःसमुच्यतेपापात्स्वर्गलोके
महीयते ॥ ५१ ॥ राज्ञादशरथेनोक्तंशनेःस्तोत्रंचशारदम् ॥ परमायुष्करंबल्यंसर्वपीडाविनाशनम् ॥ ५२ ॥ कान्तिदंपुत्रदंचैवग्रहशान्तिकरंपरम् ॥
ईदृशंनास्तिलोकेऽस्मिन्पावनंभुविदुर्लभम् ॥ ५३ ॥ वृद्धाख्येनगरेरम्येतत्रतीर्थंह्यनुत्तमम् ॥ श्रावणेमासिगन्तव्यंतस्मिंस्तीर्थेह्यनुत्तमे ॥ ५४ ॥
वसन्तिब्राह्मणायत्रवृद्धाख्यंचपुरंमहत् ॥ शनेःसरोवरंपुण्यंपवित्रंपापनाशनम् ॥ ५५ ॥ तत्रगत्वानरश्रेष्ठस्नानंचैवसमाचरेत् ॥ ग्रहपीडाविनश्यन्ति

CC-0. In Public Domain. Digitization by eGangotri

इत्येवंब्रह्मणोवचः ॥ ५६ ॥ चतुरशीतिसहस्राणितीर्थानितत्रवाऋषे ॥ नगरंवृद्धसंज्ञंतुकथितंब्रह्मसूनवे ॥ ५७॥ महेशेनैवरचितंतत्रतीर्थंतुवर्तते ॥५८॥
इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०उत्त०उमापतिनारदसंवादेदशरथकृतशनिस्तोत्रंनामचतुस्त्रिंशोऽध्यायः ॥ ३४ ॥ नारदउवाच ॥ त्रिस्पृशाख्यंव्रतं
ब्रूहिसर्वेश्वरविशेषतः ॥ यच्छ्रुत्वामुच्यतेलोकःकर्मबन्धनतःक्षणात् ॥ १ ॥ महादेवउवाच ॥ सर्वपापौघशमनंमहादुःखविनाशनम् ॥ शृणुकृष्णा
वतारंत्वंत्रिस्पृशाख्यंमहाव्रतम् ॥ २ ॥ कामदंसस्पृहाणांतुनिस्पृहाणांतुमोक्षदम् ॥ त्रिस्पृशाख्यंव्रतंविप्रशृणुष्वगदतोमम ॥ ३ ॥ प्रत्यक्षमर्चितस्तेन
कलिकालेचकेशवः ॥ त्रिस्पृशाकीर्तनंनित्यंयःकरोतिमहामुने ॥ ४ ॥ नपुरश्चरणचीर्णेसर्वपापक्षयोभवेत् ॥ त्रिस्पृशानाममात्रेणक्षीयतेनात्रसंशयः ॥
॥ ५ ॥ नागमैर्नपुराणाद्यैर्नमखैस्तीर्थकोटिभिः ॥ बहुभिर्व्रतसङ्घैश्चपूजितैस्त्रिदशैरपि ॥ ६ ॥ मोक्षोभवतिविप्रेन्द्रत्रिस्पृशानकृतायदि ॥ मोक्षार्थे
देवदेवेनदृष्टावैवैष्णवीतिथिः ॥ ७ ॥ द्विजानांदुर्विदंसाङ्ख्यंकलिकालेविशेषतः ॥ अनिग्रहश्चेन्द्रियाणांस्थिरत्वंमनसोनहि ॥ ८ ॥ विषयैर्विप्र
युक्तानांध्यानधारणवर्जिनाम् ॥ कामभोगप्रसक्तानांत्रिस्पृशामोक्षदायिनी ॥९ ॥ मह्यंचैवपुराप्रोक्ताचतुर्वक्रस्यसागरे ॥ क्षीरोदेप्रणतानांतुमथ्यमानेतु
चक्रिणा ॥ १० ॥ त्रिस्पृशांयेकरिष्यन्तिविषयैरपिसंयुताः ॥ तेषामपिमयादत्तोमोक्षःसाङ्ख्यविवर्जिनाम् ॥ ११ ॥ कामभोगप्रसक्तानांत्रिस्पृशा
मोक्षदायिनी ॥ बहुभिर्मुनिसङ्घैश्चकृतेयंचमहामुने ॥ १२ ॥ कार्त्तिकेशुक्लपक्षेतुत्रिस्पृशाजायतेयदि ॥ सोमेनसोमजेनापिपापकोटिविनाशिनी ॥
॥ १३ ॥ यस्याउपोषणकृतोहत्यायुक्तमहेशितुः ॥ हस्ताद्ब्रह्मकपालंतुतत्क्षणात्पतितंभुवि ॥ १४ ॥ कलिकल्मषकोट्योघैर्मुक्तादेवीत्रिमार्गगा ॥ उप
देशान्माधवस्यत्रिस्पृशासमुपोषणात् ॥ १५ ॥ हत्याष्टौत्राहुवीर्यस्यपूर्वजातामहामुने ॥ गताभृगूपदेशेनत्रिस्पृशासमुपोषणात् ॥ १६ ॥ शता
युधेनविप्रेन्द्रनिहतोब्राह्मणोवने ॥ ब्रह्महत्याविनिर्मुक्तस्त्रिस्पृशासमुपोषणात् ॥ १७ ॥ जीवोपदेशाच्छक्रस्यहत्यानमुचि संभवा ॥ विनष्टामुनि
मुख्येन्द्रत्रिस्पृशासमुपोषणात् ॥ १८ ॥ ब्रह्महत्यादिपापानित्रिस्पृशासमुपोषणात् ॥ विलयंयान्तिविप्रेन्द्रपापेष्वन्येषुकाकथा ॥ १९ ॥ नप्रयागे
नकाश्यांतुगोमत्यांकृष्णसन्निधौ ॥ मोक्षोभवतिविप्रेन्द्रत्रिस्पृशायदिनोकृता ॥२०॥ मरणाच्चप्रयागेतुगोमत्यांकृष्णसन्निधौ ॥ स्नानमात्रेणगोमत्यां ॥ ३५ ॥
मुक्तिर्भवतिशाश्वती ॥ २१ ॥ गृहेऽपिजायतेमुक्तिस्त्रिस्पृशासमुपोषणात् ॥ विषयेवर्त्तमानस्यकामभोगान्वितस्यच ॥ २२ ॥ निवृत्तविषयस्यापि
मुक्तिःसाङ्ख्येनदुर्लभा ॥ तस्मात्कुरुष्वविप्रेन्द्रत्रिस्पृशांमोक्षदायिनीम् ॥ २३ ॥ नारदउवाच ॥ कीदृशंतत्सुरश्रेष्ठत्रिस्पृशाख्यंमहाव्रतम् ॥
मुक्तिदंयद्विजातीनांत्वयाप्रोक्तंममाधुना ॥२४॥ महादेवउवाच ॥ जाह्नव्यैसापुराविप्रत्रिस्पृशामाधवेनतु ॥ प्राचींसरस्वतीतीरेकथितात्वनुकम्पया ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २५ ॥ जाह्नव्युवाच ॥ कलिकल्मषकोटयोघैर्ब्रह्महत्यादिकैर्युताः ॥ कलिकालेहृषीकेशस्नानंकुर्वन्तिमज्जले ॥ २६ ॥ तेषांपापशतैर्दोषैर्देहोमे कलुषीकृतः ॥ कथंयास्यतिमेदेवपातकंगरुडध्वज ॥ २७ ॥ प्राचीमाधवउवाच ॥ कथयामिनसंदेहःपुत्रिमारोदनंकुरु ॥ श्यामोवटस्तुमेस्थानंप्राची देवीममाग्रतः ॥ २८ ॥ वहतेब्रह्मतनयादृष्ट्वाग्रेचसुरेश्वरीम् ॥ स्नानंकुरुष्वनित्यंत्वंत्वत्रपूताभविष्यसि ॥ २९ ॥ यत्रब्रह्मसुताप्राचीतत्राहंनात्रसंशयः ॥ तीर्थकोटिशतैर्युक्तःसुरैःसहवसाम्यहम् ॥३०॥ पवित्रंमत्प्रियंस्थानंहत्याकोटिविनाशनम् ॥ संतुष्टेनमयादत्तंयस्मात्प्राणाधिकासिमे ॥३१॥ तीर्थकोटि सहस्राणिनित्यंतिष्ठन्तिजाह्नवि ॥ प्राचीसरस्वतीतोयेसर्वदैवममाज्ञया ॥३२॥ ब्रह्मवधात्सुरापानाद्गोवधाद्वृषलीवधात् ॥ ब्रह्मदेवस्वहरणान्मातापित्रो स्त्वपूजनात् ॥३३॥ चक्रियानाद्गुरुद्रोहादभक्ष्यस्यचभक्षणात ॥ सर्वपापस्यकरणात्प्राचीब्रह्मसुतासुते ॥ ३४ ॥ व्यपोहयतिपापानिसकृत्स्नानेनमे ऽग्रतः॥कुरुस्नानंसरिच्छ्रेष्ठेविपापात्वंभविष्यसि ॥३५॥जाह्नव्युवाच॥ नाहंशक्नोमिदेवेशआगन्तुंनित्यमेवहि ॥ अतिदूरेचतत्तीर्थंतत्रगन्तुंनपार्यते॥कथं नश्यन्तिपापानिकथयस्वेहमाधव ॥३६॥ प्राचीमाधवउवाच॥ नशक्नोषियदागन्तुंनित्यमेवहिजाह्नवि॥ तदान्यत्संप्रवक्ष्यामियस्मान्मत्पादसंभवा॥ ॥ ३७ ॥ सरस्वत्यधिकायाचतीर्थकोटिशताधिका ॥ मखकोट्यधिकावापिव्रतदानाधिकाचया ॥ ३८ ॥ जपहोमाधिकायाचचतुर्वर्गफलप्रदा ॥ साङ्ख्ययोगाधिकायाचत्रिस्पृशाक्रियतांशुभा ॥३९॥ यस्मिन्मासेसमायातिसिताचयदिवासिता ॥ कर्तव्यासासरिच्छ्रेष्ठेकृतेपापात्प्रमुच्यते ॥४० ॥ जाह्नव्युवाच ॥ कीदृशीत्रिस्पृशादेवममाख्याहिसुमाधव ॥ ईदृशोमहिमायस्यास्त्वयाप्रोक्तोममाधुना ॥ ४१ ॥ दशम्येकादशीभद्रादिनैकस्मिन्यदा भवेत ॥ त्रिस्पृशासाभवेद्देववान्यथावदमेप्रभो ॥४२॥ कृष्णउवाच ॥ आसुरीत्रिस्पृशादेवीयात्वयापरिकीर्तिता ॥ वर्जनीयाप्रयत्नेनवृत्तिहीनोयथा पतिः ॥४३॥ असुराणांतुसाप्रोक्ताआयुर्बलविनाशिनी ॥वर्जनीयाप्रयत्नेनयथानारीरजस्वला ॥४४॥ स्वजातिंचपरित्यज्यागताधमजातिषु॥सेवत्या ज्यंविशेषेणदशमीयुक्तंहिमद्दिनम् ॥४५॥ यथारजस्वलासङ्गाद्दूष्यन्तेज्ञानवर्जिताः ॥ तथैवदशमीयुक्तंमद्दिनंदूषितंनृणाम् ॥४६॥ हत्यायुतशतंहन्ति त्रिस्पृशासमुपोषिता ॥ एकादशीद्वादशीचरात्रिशेषेत्रयोदशी ॥४७॥ त्रिस्पृशासातुविज्ञेयादशमीसहितानहि॥कृत्वापराधंमुच्येतप्रायश्चित्तेकृतेनरः॥ ॥ ४८ ॥ दशमीवेधजंदोषंनक्षमामिसुरापगे ॥ भुक्तंहालाहलंतेनविषस्यभक्षणंकृतम् ॥ ४९ ॥ दशमीमिश्रितंयेनकृतमेकादशीव्रतम् ॥ इतिमत्वा नकर्त्तव्यंमद्दिनंदशमीयुतम् ॥५० ॥ जन्मकोटिकृतंपुण्यसन्तानंयातिसंक्षयम् ॥ पातयेत्स्वकुलंस्वर्गान्नयतेरौरवादिकम् ॥ ५१ ॥ स्वदेहंशोधयित्वा तुकर्त्तव्योममवासरः ॥ वृद्धौत्याज्याविनावेधाच्छ्रवणादिषुसंयुता ॥ ५२ ॥ जन्मपुण्यंक्षयंयातिएकादश्युपवासिनाम् ॥ संवृद्धौतुविशेषेणसंदेहेसमु

CC-0. In Public Domain. Digitization by eGangotri

पस्थिते ॥ ५३ ॥ ममाज्ञयाचकर्त्तव्याद्वादशीवल्लभामम ॥ ५४ ॥ जाह्नव्युवाच ॥ करिष्येऽहंजगन्नाथत्रिस्पृशांवचनात्तव ॥ सर्वपापविनिर्मुक्ताभवि
ष्यामितवाज्ञया ॥ ५५ ॥ श्रीकृष्णउवाच ॥ स्वस्थानंगच्छभद्रंतेनभीःकार्याकदाचन ॥ तवदेविसरिच्छ्रेष्ठेनपापंसंक्रमिष्यति ॥ ५६ ॥ स्नात्वा
सरस्वतीतोयेयेऽर्चयित्वाचमाधवम् ॥ प्रणमन्तिजगन्नाथंतेयान्तिपरमांगतिम् ॥ ५७ ॥ जाह्नव्युवाच ॥ विधानंब्रूहिमेब्रह्मन्सर्वस्वेनकरोम्यहम् ॥
प्रसादयामिदेवेशंदामोदरमनामयम् ॥ ५८ ॥ प्राचीमाधवउवाच ॥ शृणुदेविप्रवक्ष्यामित्रिस्पृशायाविधानकम् ॥ यंश्रुत्वापिसरिच्छ्रेष्ठेमुच्यते
पातकैर्नरः ॥ ५९ ॥ पलेनचपलार्धेनतदर्द्धेनापिवापगे ॥ प्रतिमाममसौवर्णाकार्याविभवसारतः ॥ ६० ॥ पात्रंताम्रमयंकार्यंतिलैस्तुपरिपूरि
तम् ॥ सजलंतुघटंशुभ्रंपञ्चरत्नसमन्वितम् ॥ ६१ ॥ वेष्टितंपुष्पमालाभिःकर्पूरागुरुवासितम् ॥ न्यसेद्दामोदरंपश्चात्स्नापयित्वाविलिप्यच ॥ ६२ ॥
परिधानंततःकार्यंवस्त्रयुग्मेनचान्वितम् ॥ मन्त्रैस्तुपूजनंकार्यंपुराणैःसमुदीरितैः ॥ ६३ ॥ पुष्पैःकालोद्भवैःशुभ्रैःकोमलैस्तुलसीदलैः ॥ छत्रंतुविष्णवे
दद्यात्पादुकाभ्यांसुसंयुतम् ॥६४॥निवेद्यानिमनोज्ञानिफलानिसुबहून्यापि॥उपवीतंतुदातव्यंसोत्तरीयंनवंदृढम् ॥६५॥वैणवंदापयेद्दण्डंसुरूपंसोन्नतंदृ
ढम्॥ दामोदरायवैपादौजानुनीमाधवायच॥६६॥गुह्यंकामप्रदायेतिकटिंवामनमूर्तये ॥ पद्मनाभायनाभिंतुजठरंविश्वयोनये॥६७॥हृदयंज्ञानगम्याय
कण्ठंवैकुण्ठवासिने ॥ सहस्रबाहवेबाहूचक्षुषीयोगरूपिणे ॥ सहस्रशीर्षाशिरसिसर्वाङ्गंमाधवायच ॥६८॥ संपूज्यविधिवद्भक्त्यादद्यादर्घंविधानतः ॥
॥ ६९ ॥ शुभ्रेणनालिकेरेणशङ्खोपरिस्थितेनहि ॥ सूत्रैरावेष्टितेनैवहस्तयोरुभयोरपि ॥ ७० ॥ स्मृतौहरसिपापानियदिनित्यंजनार्दन ॥
दुःस्वप्नंदुर्निमित्तानिमनसादुर्विचिन्तितम् ॥ ७१ ॥ नारकंतुभयंदेवभयंदुर्गतिसम्भवम् ॥ यन्ममस्यान्महादेवऐहिकंपारलौकिकम् ॥ ७२ ॥ तेन
देवेशमांरक्षगृहाणार्घंनमोऽस्तुते ॥ कृपादृष्टिःसदैवास्तुदामोदरममोपरि ॥ ७३ ॥ धूपंदीपंचनैवेद्यंकुर्यान्नीराजनंततः ॥ शीर्षोपरिसरिच्छ्रेष्ठेभ्रामये
द्वारिजंहरेः ॥७४॥ कृत्वाविधानमेतद्धिपूजयेत्स्वगुरुंततः ॥दद्यात्सुवर्णवस्त्राणिसोष्णीषंचैवकञ्चुकम् ॥७५॥ उपानहौतुछत्रंचमुद्रिकांचकमण्डलुम्॥
भोजनंचैवताम्बूलंसप्तधान्यंचदक्षिणाम् ॥ ७६ ॥ गुरुंसंपूज्यदेवेशंकुर्याज्जागरणंहरेः ॥ गीतनृत्यसमायुक्तमुपचारसमन्वितम् ॥ ७७ ॥
निशान्तेचैवदेवायदत्त्वाचार्घंविधानतः ॥ स्नानादिकांक्रियांकृत्वाभुञ्जीयाद्बान्धवैःसह ॥७८॥शिवउवाच ॥ द्विजैतत्रिस्पृशाख्यानमद्भुतंरोमहर्षणम् ॥
श्रुत्वातुलभतेपुण्यंगङ्गास्नानसमुद्भवम् ॥ ७९॥ अश्वमेधसहस्राणिवाजपेयशतानिच ॥ तत्फलंसमवाप्नोतित्रिस्पृशासमुपोषणात् ॥८०॥ पितृपक्षो
मातृपक्षस्तथाचैवात्मपक्षकः ॥ तैःसर्वैःसहसंयुक्तोविष्णुलोकेमहीयते ॥ ८१ ॥ तीर्थकोटिषुयत्पुण्यंक्षेत्रकोटिषुयत्फलम् ॥ तत्फलंसमवाप्नोति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रिस्पृशासमुपोषणात् ॥ ८२ ॥ ब्राह्मणायेऽपिकुर्वन्तिक्षत्रियाःकृष्णमानसाः ॥ वैश्यावाशूद्रजन्मानोयेतथाचान्यजातयः ॥ ८३ ॥ तेसर्वेमुक्ति
मायान्तिभुवंत्यक्त्वाद्विजोत्तम ॥ मन्त्राणांमन्त्रराजोऽथयथास्याद्द्वादशाक्षरः ॥ ८४ ॥ व्रतानांचतथाचैषायेनवैत्रिस्पृशाकृता ॥ ब्रह्मणा
चकृतापूर्वंपश्चाद्राजर्षिभिःकृता ॥ ८५ ॥ अन्येषांकाकथावत्सत्रिस्पृशामुक्तिदायिनी ॥ अनेनविधिनाब्रह्मंस्त्रिस्पृशासंभवंव्रतम् ॥ ८६ ॥
यःकरोतिनरोभक्त्याशृणुवक्ष्यामितत्फलम् ॥ गङ्गावगाहनेब्रह्मन्वाराणस्यांतुयत्फलम् ॥ ८७ ॥ मन्वन्तरसहस्रैस्तुत्रिस्पृशाकारकोहितत् ॥
प्राच्यांचयमुनास्नानेवर्षैर्यत्कोटिभिःफलम् ॥ ८८ ॥ तत्फलंसमवाप्नोतित्रिस्पृशाव्रतकृन्नरः ॥ यत्फलंतुकुरुक्षेत्रेसूर्यग्रहणकोटिभिः ॥ ८९ ॥
हेमभारशतैर्दानैस्त्रिस्पृशाकरणेनतत् ॥ पापकोटिसहस्राणिहत्याकोटिशतानिच ॥ ९० ॥ एकेनैवोपवासेनक्रियतेभस्मसाद्ध्रुतम् ॥ त्रिस्पृशाया
व्रतंयत्तुअगतिनांगतीप्रदम् ॥ ९१ ॥ गतिमिच्छन्तिविप्रर्षेमहापापशतानिच ॥ स्वयंकृष्णेनकथितंपाराशर्यस्यचाग्रतः ॥ ९२ ॥ प्रकाशयति
यश्चेदंलिखित्वावैष्णवंद्विजे ॥ पापौघैर्ग्रथितस्यापितस्यमुक्तिर्भविष्यति ॥ ९३ ॥ पुण्यैरवाप्यतेविद्वन्मन्वन्तरशतैरपि ॥ त्रिस्पृशादुर्लभालोके
प्राप्यतेनैवमानवैः ॥९४॥ कलौयेत्रिस्पृशांलब्ध्वानकुर्वन्तिनराधमाः ॥ तेषांजन्मफलंचैवजीवितंविफलंभवेत् ॥९५॥ प्रेतत्वंतैःसमुत्तीर्णंविनाश्राद्धै
र्विनासुतैः ॥कृतायैस्त्रिस्पृशाविद्वन्सकृत्प्राप्यकलौयुगे ॥९६॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०उमापतिनारदसंवादेत्रिस्पृशाख्यानंनामपञ्चत्रिंशो
ऽध्यायः ॥ ३५ ॥ महादेवउवाच ॥ अतस्त्वांसंप्रवक्ष्यामिउन्मीलनीमनुत्तमाम् ॥ यस्याःश्रवणमात्रेणजन्मसंसारबन्धनात् ॥१॥ पापात्मामुच्यते
पापैःस्वर्गलोकेमहीयते॥देवताःपितरश्चैवतस्यागतिमवाप्नुयुः॥२॥ विद्यार्थीलभतेविद्यांसर्वकामानवाप्नुयात् ॥ तस्याव्रतान्नसंदेहःस्वर्गलोकेमहीयते ॥
॥ ३ ॥स्वस्थानंतत्रवैप्राप्तःशिवलोकेमहीयते ॥ अतस्त्वंकुरुभोराजन्वैष्णवानांतुपूजनम् ॥४॥ वैष्णवानांतुयेराजन्सेवांकुर्वन्तिनित्यशः ॥ तेषांदण्डं
चकुरुषेनोवातेषांनराधिप ॥५॥ भोजनानन्तरंतेषांभोजनंकुरुतेनृप ॥ तैरेवपूजितोविष्णुर्यैर्भक्त्यातुप्रपूजितः ॥ ६ ॥ शालग्रामशिलाभूतांदत्त्वामूर्द्ध
निप्रत्यहम् ॥ त्वंधारयसिभूपालकण्ठेनित्यंसुभक्तितः ॥ ७ ॥ धूपशेषंतुवैविष्णोर्भक्त्याभजसिभूपते ॥ आरार्तिकंसदाकृत्वाभक्तानांवेदयेर्नृप ॥८॥
शङ्खोदकंहरेर्मूर्ध्निभ्रामयित्वातुभक्तितः ॥ नित्यंबिभर्षिशिरसिशेषंयच्छसिवैष्णवान् ॥ ९ ॥ नैवेद्यंप्रत्यहंकृत्वासर्वोपस्करसंयुतम् ॥ विष्वक्सेनाय
दत्त्वावैस्वयंभुनक्षिवाडव ॥१०॥ विष्णोर्निवेदितंचान्नंवैष्णवैःसहभुज्यते ॥ नित्यंनामसहस्रेणभक्त्यास्तौषिजनार्दनम् ॥११॥ दीपार्घदानंवैविष्णोः
कुरुषेगीतनर्तनम् ॥ श्यामाङ्कुरैःपूजयसेपूज्यन्तेनृपसत्तम ॥ १२ ॥ श्यामाङ्कुरैःसदावत्सपूजनंचातिदुर्लभम् ॥ पृथ्वीदानसमंपुण्यंदूर्वयापूजने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृते ॥ १३ ॥ अतोवैनास्तिलोकेऽस्मिन्दूर्वायाःसदृशंभुवि ॥ तयावैपूजनंकार्यंविष्णुसायुज्यमिच्छता ॥ १४ ॥ अतस्त्वंकुरुषेनित्यंपूजनंदूर्वया
सह ॥ यवाक्षतैर्विशेषणपूजनंकुरुषेनवा ॥ १५ ॥ पक्षेपक्षेनृपश्रेष्ठविधिवद्द्वादशीव्रतम् ॥ यत्कृतंतुमहाराजमहापापप्रणाशनम् ॥ १६ ॥ मोक्षदंसुखदं
चैवतथायुष्यप्रदंसदा ॥ एतद्विष्णुव्रतंप्रोक्तंवैष्णवानांतुमोक्षदम् ॥ १७ ॥ गृहस्थानांतुसुखदंयतीनांमुक्तिदायकम् ॥ सर्वरोगादिशमनंपवित्रंकाय
शोधनम् ॥१८॥ व्रतमेतच्चकुरुषेनोवाचैवनराधिप ॥ दशमीवेधरहितंकुरुषेजागरान्वितम् ॥१९॥ तुलसीपत्रनिकरैर्नित्यंपूजयसेहरिम् ॥ गोपीचन्द
नजंपुण्ड्रंभालेवानृपसत्तम ॥ २० ॥ धारितंसर्वलोकानांपवित्रीकरणंनृप ॥ अतस्त्वंचधारयसेगोपीचन्दनसंभवम् ॥ २१ ॥ ब्रह्महाहेमहारीचमद्य
पानीतथैवच ॥ अगम्यगोमहापापीतथाह्यनृतभाषितः ॥ २२ ॥ तेसर्वेमुक्तिमायान्तितिलकधारणादृताः ॥ बिभर्षिकण्ठेनित्यंत्वंधात्रीफलसमुद्भ
वाम् ॥ २३ ॥ मालांमुख्यायुतसमांतुलसीपत्रसंभवाम् ॥ शालग्रामशिलायुक्तांद्वारकायांसमुद्भवाम् ॥२४॥ नित्यंपूजयसेभूपभुक्तिमुक्तिफलप्रदाम् ॥
पद्मसंज्ञंपुराणंवैपठसेपुरतोहरेः ॥ २५ ॥ चरितंदैत्यराज्यस्यप्रह्लादस्यचभूपतेः ॥ वासरंवासुदेवस्यसवेधंकुर्वतोनरान् ॥ २६ ॥ निवारयसिभूपाल
शास्त्रंदृष्ट्वाप्रयत्नतः ॥ सवेधंवासरंविष्णोर्यस्मिन्राष्ट्रेप्रवर्तते ॥ २७ ॥ लिप्यतेतेनपापेनराजाभवतिनारकी ॥ वेधंचतुर्विधंत्यक्त्वासमुपोष्यहरे
र्दिनम् ॥ कुलकोटिंसमुद्धृत्यविष्णुलोकेमहीयते ॥ २८ ॥ भूमिपालेनसम्पृष्टोवसुनाथेनगौतमः ॥ यथोवाचतुमाहात्म्यंतन्मेनिगदतःशृणु ॥ २९ ॥
गौतमउवाच ॥ शृणुभूपालवक्ष्यामिवैष्णवाख्यंमहाव्रतम् ॥ यंश्रुत्वापापिनःसर्वेमुक्तिमायान्तितत्क्षणात् ॥ ३० ॥ द्वादशीसंभवंपुण्यंमयाख्यातं
नकस्यचित् ॥ वैष्णवोऽसिमहाराजभक्तोभागवतोनृणाम् ॥ ३१ ॥ वैष्णवंतुमहागुह्यंतद्व्रतंत्वंनिशामय ॥ उन्मीलनीनामपुराभक्त्यामेमाधवेनतु ॥
॥ ३२ ॥ कथितासुप्रसन्नेनतांतेभूपवदाम्यहम् ॥ एकादशीअहोरात्रंप्रभातेघटिकाभवेत् ॥ ३३ ॥ उन्मीलनीतुसाज्ञेयाविशेषणहरिप्रिया ॥ त्रैलोक्ये
यानितीर्थानिपुण्यान्यायतनानिच ॥ ३४ ॥ कोटयंशेनैवतुल्यानिमखावेदास्तपांसिच ॥ उन्मीलनीसमंकिंचिन्नभूतंनभविष्यति ॥ ३५ ॥ प्रयागोन
कुरुक्षेत्रंनकाशीनचपुष्करः ॥ शैलोहिमाचलोनैवनमेरुर्गन्धमादनः ॥३६॥ शलोननीलनिषधोनविन्ध्योनैवनैमिषम् ॥गोदावरीनकावेरीचन्द्रभागान
वेदिका॥ ३७॥ नतापीनपयोष्णीचनक्षिप्रानैवचन्दना ॥ चर्मण्वतीचसरयूश्चन्द्रभागानगण्डिका ॥३८ ॥ गोमतीचविपाशाचशोणाख्यश्चमहानदः ॥
किमत्रबहुनोक्तेनभूयोभूयोनराधिप ॥ ३९ ॥ उन्मीलनीसमंकिंचिन्नदेवःकेशवात्परः ॥ उन्मीलनीमनुप्राप्ययैःकृतंकेशवार्चनम् ॥ ४० ॥ पापचक्र
समूहस्यराशयःपतिताःक्षणात् ॥ यस्मिन्मासेमहीपालतिथिरुन्मीलनीभवेत् ॥४१॥ तन्मासनाम्नागोविन्दःपूजनीयःप्रयत्नतः ॥जातरूपमयःकार्यो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मासनाम्नातुमाधवः ॥ ४२ ॥ स्वशक्त्याविश्वरूपस्तुश्रद्धाभक्तिसमन्वितः ॥ पवित्रोदकसंयुक्तंपञ्चरत्नसमन्वितम् ॥ ४३ ॥ गन्धपुष्पाक्षतैर्युक्तंकुम्भं
स्रग्दामभूषितम् ॥ पात्रंचसोदकंकार्यंगोधूमैश्चापिपूरितम्॥४४॥नानारत्नैश्चसंयुक्तंनानागन्धैःप्रपूजितम् ॥ मल्लिकामोदसंयुक्तंजातीपुष्पैःप्रपूजितम् ॥
॥ ४५ ॥ श्वेताख्यैस्तण्डुलैश्चैवपूरणीयःप्रयत्नतः ॥ प्रदद्याद्वस्त्रयुग्मंतुउपवीतंतुसोत्तरम् ॥ ४६ ॥ उपानहौतुराजर्षेश्वेतंछत्रंचसुन्दरम् ॥ भोजनं
जलपात्रंचसप्तधान्यंतिलैःसह ॥ ४७ ॥ रूप्यंचैवतुकार्पासंपायसंमुद्रिकाहरेः ॥ धेनुर्वात्रतुदातव्यावत्सालङ्कारसंयुता ॥ ४८ ॥ सुवर्णशृङ्गीं
रौप्यखुरींताम्रपृष्ठींतथैवच ॥ कांस्यदोहांरत्नपुच्छींदद्याद्वैगुरवेतदा ॥ ४९ ॥ शय्यांसोपस्करांदद्यात्साधवेभक्तिपूर्वकम् ॥ धूपंदीपंतुनैवेद्यं
फलपत्रंनिवेदयेत् ॥ ५० ॥ पूजनीयोमहाभक्तैर्मन्त्रैरेभिस्तुकेशवः ॥ तुलसीपत्रसंयुक्तैःपुष्पैःकालोद्भवैस्तथा ॥ ५१ ॥ मासनाम्नैवचरणौ
जानुनीविष्णुरूपिणे ॥ गुह्यंतुगुह्यपतयेकटौवैपीतवाससे ॥ ५२ ॥ ब्रह्ममूर्तिभृतेनाभावुदरेविश्वयोनये ॥ हृदयेज्ञानगम्यायकण्ठेवैकुण्ठमूर्तये ॥
॥ ५३ ॥ ऊर्ध्वगायललाटेतुबाहौदक्षान्तकारिणे ॥ उत्तमाङ्गेसुरेशायसर्वाङ्गेसर्वमूर्तये ॥ ५४ ॥ स्वनाम्नाचायुधादीनिपूजनीयानिभक्तितः॥
अर्घदानंप्रकर्तव्यंनालिकेरादिभिःसमम् ॥ ५५ ॥ शङ्खोपरिजलंकृत्वागन्धपुष्पाक्षतान्वितम् ॥ सूत्रेणावेष्टितंकृत्वादद्यादर्घविधानतः ॥ ५६ ॥
देवदेवमहादेवश्रीकेशवजनार्दन ॥ सुब्रह्मण्यनमस्तेऽस्तुपुण्यराशिविवर्धन ॥५७॥ शोकमोहमहापापान्मामुद्धरभवार्णवात् ॥ सुकृतंनकृतंकिंचिज्जन्म
कोटिशतैरपि ॥ ५८ ॥ तथापिमांमहास्वामिन्समुद्धरभवार्णवात् ॥ व्रतेनानेनदेवेशयेचान्येममपूर्वजाः ॥ ५९ ॥ वियोनिंचगताश्चान्येपापमृत्यु
वशंगताः ॥ येभविष्यन्तियेऽतीताःप्रेतलोकात्समुद्धर॥६०॥आर्तस्यममदीनस्यभक्तिरव्यभिचारिणी॥दत्तमर्घंमयातुभ्यंभक्त्यागृह्णीष्वमाधव॥६१॥
दत्त्वार्घंधूपदीपाद्यैर्नैवेद्यैर्विष्णुसंभवैः॥ स्तोत्रैर्नीराजनैर्गीतैर्भृत्यैःसंतोषयेद्धरिम् ॥ ६२॥ वस्त्रैर्दानैश्चगोदानैर्भोजनैस्तोषयेद्गुरुम् ॥ तथातथाविधातव्यं
गुरुर्वैप्रीतिमाप्नुयात् ॥ ६३ ॥ लोकानांतारणार्थायधात्रासृष्टोगुरुर्यतः ॥ अतोवैगुरुपूजाचकर्त्तव्यावैप्रयत्नतः ॥ ६४ ॥ अहितंयोनाशयतिस्वहितं
दर्शयेत्सदा ॥ सगुरुःसचविज्ञेयःसर्वधर्मार्थकोविदः ॥६५॥ अकुर्वन्वित्तशाठ्यंतुगुरवेतंनिवेदयेत्॥ गुरोर्निवेदितेभूपरिपूर्णंभवेद्व्रतम् ॥६६॥ कृत्वाद्वि
वातनंकर्मभोजनंब्राह्मणैःसह ॥ कर्त्तव्यंनृपशार्दूलदिनंनेयंकथानकैः ॥६७॥ अनेनविधिनायस्तुकुर्यादुन्मीलनीव्रतम् ॥ कल्पकोटिसहस्राणिवसतेवि
ष्णुसन्निधौ ॥ ६८ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०उमापतिनारदसंवादेउन्मीलनीव्रतंनामषट्त्रिंशोऽध्यायः ॥ ३६ ॥ नारदउवाच ॥
कीदृशीस्यान्महादेवपक्षवर्धिनिसंज्ञिका ॥ ययावैकृतयाजन्तुर्महापापात्प्रमुच्यते ॥ १ ॥ श्रीमहादेवउवाच ॥ अमावायदिवापूर्णासंपूर्णाजायते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदा ॥ भूत्वावैनाडिकापष्टिर्वर्तंतप्रतिपद्दिने ॥ अश्वमेधायुतैस्तुल्यासाभवेत्पक्षवर्द्धिनी ॥ २ ॥ नारदउवाच ॥ पूजाविधिंतुपृच्छामिसाम्प्रतंदेव
सत्तम ॥ यत्कृतेतुमहादेवमहाफलमवाप्नुयात् ॥ ३ ॥ महादेवउवाच ॥ पूजाविधिंप्रवक्ष्यामिसाम्प्रतंद्विजनन्दन ॥ पूजितेचार्चितेविष्णौफलं
प्राप्नोत्यसंशयम् ॥ ४ ॥ येनपूजाविधानेनतुष्टिंप्राप्नोतिमाधवः ॥ अव्रणंजलपूर्णंचकुम्भंचन्दनचर्चितम् ॥ ५ ॥ पञ्चरत्नसमायुक्तंपुष्पमालाभिवे
ष्टितम् ॥ स्थाप्यंताम्रमयंपात्रंसगोधूमंघटोपरि ॥ ६ ॥ सौवर्णंकारयेद्देवंमाससंज्ञाभिनामकम् ॥ पञ्चामृतेनविधिनास्नपनंसुमनोरमम् ॥ ७ ॥
कारयेद्देवदेवेशंजगन्नाथंजगत्पतिम् ॥ विलेपनंतुकर्त्तव्यंकुङ्कुमागरुचन्दनैः॥८ ॥वस्त्रयुग्मंचदातव्यंछत्रोपानहसंयुतम् ॥ पूजयेद्देवताधीशंकुम्भपात्रो
परिस्थितम् ॥ ९ ॥ पद्मनाभायवैपादौजानुनीविश्वमूर्त्तये ॥ ऊरूवैज्ञानगम्यायकटीज्ञानप्रदायच ॥ १० ॥ उदरंविश्वनाथायहृदयंश्रीधरायच ॥
कण्ठंकौस्तुभकण्ठायबाहूक्षत्रान्तकारिणे ॥ ११ ॥ ललाटंव्योममूर्ध्नेतुशिरोवैसर्वरूपिणे ॥ स्वनाम्नाचैवकमलांसर्वाङ्गींदिव्यरूपिणीम् ॥ १२ ॥
एवंविधिवत्संपूज्यततोऽर्घंदापयेत्सुधीः ॥ नालिकेरेणशुभ्रेणदेवदेवस्यचक्रिणः ॥ १३ ॥ अनेनैवार्घदानेनसंपूर्णंजायतेव्रतम्॥संसारार्णवमग्नंमांसमुद्धर
जगत्पते ॥ १४ ॥ त्वमीशःसर्वलोकानांत्वंसाक्षाच्चजगत्पतिः ॥ गृहाणार्घंमयादत्तंपद्मनाभनमोऽस्तुते ॥ १५ ॥ नैवेद्यानिसुहृद्यानिषड्रसानिविशे
षतः ॥ देयानितुविशेषेणकेशवायसुभक्तितः ॥ १६ ॥ नागपत्रंसकर्पूरंदद्याद्देवस्यभक्तितः ॥ घृतेनदीपकंकुर्यात्तिलतैलेनवापुनः ॥१७॥ कृत्वासम्य
ग्विधानेनगुरोःपूजांप्रकारयेत् ॥ वस्त्राणिचैवचोष्णीषंकञ्चुकंचप्रदापयेत् ॥ १८ ॥ दक्षिणांचयथाशक्त्यागुरवेसंप्रदापयेत् ॥ भोजनंचैवताम्बूलं
दत्त्वाचार्घंप्रदापयेत् ॥ १९ ॥ स्ववित्तस्यानुसारेणयथाशक्त्यातुनिर्द्धनैः ॥ कार्यासम्यक्प्रयत्नेनद्वादशीपक्षवर्द्धिनी ॥२०॥ ततोजागरणंकुर्याद्गीत
नृत्यसमन्वितम् ॥ पुराणपाठसहितंहास्याह्लादसमन्वितम् ॥ २१ ॥ स्तुवन्तिचप्रशंसन्तिजागरंचक्रधारिणः ॥ नित्योत्सवोभवेत्तेषांगृहेवैदशजन्मसु
॥ २२ ॥ अतोधन्यतमाचेयंकर्त्तव्यापक्षवर्धिनी ॥ कृत्वातुसकलंपुण्यंफलंप्राप्नोत्यसंशयम् ॥२३॥ पक्षवर्धिनीमाहात्म्यंयेशृण्वन्तिमनीषिणः ॥
तैःकृतंसत्कृतंसर्वंयावदाभूतसंप्लवम् ॥ २४ ॥ पञ्चाग्निसाधनेपुण्यंयच्चस्यात्तीर्थसाधने ॥ तत्पुण्यंसमवाप्नोतिविष्णोर्जागरकारणात् ॥ २५ ॥
पक्षवर्धिनिकापुण्यापवित्रापापनाशिनी ॥ उपवासकृतांविप्रहत्याकोटिविनाशिनी ॥ २६ ॥ वसिष्ठनकृतापूर्वंभारद्वाजेनवैमुने ॥ ध्रुवेणचाम्बरीषेण
कृतेयंविष्णुवल्लभा ॥ २७ ॥ इयंकाशीसमापुण्याइयंवैद्वारकासमा ॥ उपोषिताचभक्तेनवाञ्छितंचददात्यसौ ॥ २८ ॥ इयंधन्याधन्यतमाहत्या
युतविनाशिनी ॥ कर्त्तव्यातुविशेषेणवैष्णवैर्ज्ञानतत्परैः ॥ २९ ॥ अहोसर्वेश्वरोदेवःसंसेव्योव्रततत्परैः ॥ किमन्यद्बहुनोक्तेनकर्तव्यंव्रतमुत्तमम्॥३०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथाचवर्धतेचन्द्रः सितेपक्षेविशेषतः ॥ तथावैवर्धतेभक्तकारणात्पक्षवार्धिनी ॥२१॥ सूर्योदयेयथाध्वान्तंनश्यतेतत्क्षणादपि ॥ पक्षवार्धिन्यनुष्ठानात्तथाघंना
शमाप्नुयात् ॥२२॥ इतिश्रीपाद्मेमहापुराणेपञ्चप० उत्तर० उमापतिनारदसंवादेपक्षवार्धिन्येकादशीमाहात्म्यंनामसप्तत्रिंशोऽध्यायः ॥३७॥ महादेवउवाच ॥
शृणुनारदवक्ष्यामिमाहात्म्यंजागरस्यच ॥ यच्छ्रुत्वामुक्तिमाप्नोतिमहापापीनसंशयः ॥ १ ॥ नारदउवाच ॥ अहोविश्वेश्वरोविष्णुः
पवित्रीकरणःसदा ॥ तस्योपवासमाहात्म्यंश्रुतंहित्वन्मुखाच्छिव ॥ २ ॥ तथापिश्रोतुमिच्छामिमाहात्म्यंजागरस्यतु ॥ कीदृग्जागरमाहात्म्यंरात्रौ
भक्तिस्तुकीदृशी ॥३॥ प्रहरेषुचयापूजावदविश्वेश्वरप्रभो ॥ त्वंलोकेषुसदापूज्यस्त्वंहिदेवोजनार्दनः ॥ ४ ॥ त्वंहिविश्वेश्वरोदेवोयतोभक्तिर्जनार्दने ॥
सर्वेषांचैवभक्तानांत्वंचश्रेष्ठउमापतिः ॥ ५ ॥ लोकेऽस्मिन्सर्वदाभक्त्यातत्राख्यावर्त्ततेसदा ॥ अतोयेनप्रकारेणलोकानांमुक्तिरेवच ॥
विश्वेश्वरवदत्वंतुमाहात्म्यंजागरस्यतु ॥ ६ ॥ महादेवउवाच ॥ एकादश्यांजनोविष्णुंरात्रौसंपूज्यभक्तितः ॥ कुर्याज्जागरणंविष्णोः
पुरतोवैष्णवैःसह ॥ ७ ॥ गीतंवाद्यंतथानृत्यंपुराणपठनंतथा ॥ धूपंदीपंचनैवेद्यंपुष्पंगन्धानुलेपनम् ॥ ८ ॥ फलमर्घंतथाश्रद्धादानमिन्द्रियसंयमम् ॥
सत्यान्वितंचविप्रेन्द्रवचोयुक्तंक्रियान्वितम् ॥ ९ ॥ विनिद्रंचमुदायुक्तोयःकरोतिनरःसदा ॥ सर्वपापविनिर्मुक्तोजायतेविष्णुवल्लभः
॥१०॥ रात्रौजागरणेप्राप्तेनिद्रांकुर्वन्तिवैष्णवाः ॥ हारितंचोपवासंतैर्व्रतंवैविष्णुसंज्ञकम् ॥ ११ ॥ येकुर्वन्तिनराःप्राज्ञजागरेविष्णुसंज्ञके ॥ जागरंकृष्ण
भावेननस्वपन्तिकदाचन ॥१२॥ कृष्णस्यनाममनसावदन्तिचपुनःपुनः ॥ तेतुधन्यतमाज्ञेयाअस्यांरात्रौविशेषतः ॥१३॥ क्षणेक्षणेतुगोदानंघट्यांचैव
चतुर्गुणम् ॥ प्रहरेकोटिगुणितंचतुर्यामेष्वसङ्ख्यकम् ॥१४॥ जागरेनिमिषार्धेतुकेशवाग्रेविशेषतः ॥ तत्फलंकोटिगुणितंतस्यसङ्ख्यानविद्यते ॥१५॥
नर्तनंकुरुतेयस्तुकेशवाग्रेनरोत्तमः ॥ नफलंहीयतेतस्यआजन्ममरणान्तिकम् ॥१६॥ साश्चर्यंचैवसोत्साहंपापालापादिवर्जितम् ॥ प्रदक्षिणसमायुक्तंनम
स्कारपुरःसरम् ॥१७॥ नीराजनसमायुक्तमनिर्विण्णेनचेतसा ॥ यामेयामेमहाभागकुर्यादारार्तिकंहरेः ॥१८॥ षड्विंशगुणसंयुक्तमेकादश्यांचजागरम् ॥ यःक
रोतिनरोभक्त्यानपुनर्जायतेभुवि ॥१९॥ यएवंकुरुतेभक्त्यावित्तशाठ्यविवर्जितः ॥ जागरंवासरेविष्णोर्लीयतेपरमात्मनि ॥२०॥ धनवान्वित्तशाठ्येनयः
करोतिप्रजागरम् ॥ तेनात्माहारितोनूनंकितवेनदुरात्मना ॥२१॥ विष्णुजागरणेप्राप्तउपहासंकरोतियः ॥ षष्टिवर्षसहस्राणिविष्ठायांजायतेकृमिः ॥ २२ ॥
वेदविद्ब्राह्मणोयस्तुनर्त्तनेनविशेषतः ॥ उपहासपरःप्राप्तःसवैचाण्डालउच्यते ॥२३॥ निमिषंनिमिषार्धवायःकरोतिप्रजागरम् ॥ धर्मार्थकाममोक्षाणां
प्राप्नोतिपदमव्ययम् ॥ २४ ॥ वेदशास्त्ररतोनित्यंनित्यंवैयज्ञयाजकः ॥ रात्रौजागरणेप्राप्तेनिन्दांकुर्वन्व्रजत्यधः ॥ २५ ॥ ममपूजांप्रकुर्वाणोविष्णु

CC-0. In Public Domain. Digitization by eGangotri

निन्दासुतत्परः ॥ एकविंशत्कुलेनैवनरकंप्रतिपद्यते ॥ २६ ॥ विष्णुःशिवःशिवोविष्णुरेकमूर्तिर्द्विधास्थितः ॥ तस्मात्सर्वप्रकारेणनैवनिन्दां
प्रकारयेत् ॥ २७ ॥ दष्टाःकलिभुजङ्गेनस्वपन्तिमधुहाहनि ॥ कुर्वन्तिजागरंनैवमाययातेचमोहिताः ॥ २८ ॥ प्राप्ताह्येकादशीयेषांकलौजाग
रणंविना ॥ तेविनष्टानसंदेहोयस्माज्जीवितमध्रुवम् ॥ २९ ॥ उद्धृतंनेत्रयुग्मंतुदत्त्वावैवैष्णवंपदम् ॥ कृतंयेनैवपश्यन्तिपापिनोहरिजागरम् ॥ ३० ॥
अभावेवाचकस्याथगीतंनृत्यंतुकारयेत् ॥ वाचकेसतिदेवर्षेपुराणंप्रथमंपठेत् ॥ ३१ ॥ अश्वमेधसहस्रस्यवाजपेयायुतस्यच ॥ पुण्यंकोटि
गुणंवत्सविष्णोर्जागरणेकृते ॥ ३२ ॥ पितृपक्षेमातृपक्षेभार्यापक्षेतुवाडव ॥ कुलान्युद्धरतेचैतान्कृत्वाजागरणंहरेः ॥ ३३ ॥ उपोषणदिने
विद्धेजागरंपूजनंहरेः ॥ वृथादानादिकंसर्वंकृतघ्नेषुकृतंयथा ॥ ३४ ॥ उपोषणदिनेविद्धेप्रारब्धेजागरेस्थितिम् ॥ विहायस्थानंतद्विष्णुःशापं
दत्त्वाप्रगच्छति ॥ ३५ ॥ अविद्धेवासरेविष्णोर्येकुर्वन्तिप्रजागरम् ॥ तेषांमध्येतुतुष्टःसन्नृत्यंतुकुरुतेहरिः ॥ ३६ ॥ यावद्दिनानिकुरुतेजागरं
केशवाग्रतः ॥ युगानितानितावन्तिविष्णुलोकेमहीयते ॥ ३७ ॥ यावद्दिनानिवसतेविनाजागरणंहरेः ॥ तावद्वर्षसहस्राणिरौरवान्ननिवर्तते
॥ ३८ ॥ एकादश्यांशयानस्तुविनाजागरणंहरेः ॥ मूकवत्तिष्ठतेयोवैगानंपाठंनवाचरेत् ॥ ३९ ॥ सप्तजन्मनिमूकत्वंजायतेजागरेहरेः ॥
योननृत्यतिमूढात्मापुरतोजागरेहरेः ॥ ४० ॥ पङ्गुत्वंतस्यजानीयात्सप्तजन्मनिवाडव ॥ यःपुनःकुरुतेगीतंनृत्यंजागरणंहरेः ॥ ४१ ॥ ब्राह्मं
पदंमदीयंचसत्यंवैतस्यवैष्णवम् ॥ यःप्रबोधयतेलोकान्विष्णोर्जागरणेरतः ॥ ४२ ॥ वसेच्चिरंतुवैकुण्ठेपितृभिःसहवैष्णवः ॥ मतिंप्रयच्छतेयस्तुहरे
र्जागरणंप्रति ॥ ४३ ॥ षष्टिवर्षसहस्राणिश्वेतद्वीपेवसेन्नरः ॥ यत्किंचित्क्रियतेपापंकोटिजन्मनिमानवैः ॥ ४४ ॥ श्रीकृष्णजागरेसर्वंरात्रौ
नश्यतिवाडव ॥ शालग्रामशिलाग्रेयेप्रकुर्वन्तिप्रजागरम् ॥ ४५ ॥ यामेयामेफलंप्रोक्तंकोटयैन्दवसमुद्भवम् ॥ संप्राप्तेवासरेविष्णोर्येनकुर्वन्ति
जागरम् ॥ ४६ ॥ वृथास्यात्तत्कृतंतेषांवैष्णवानांचनिन्दया ॥ कामार्थौसंपदःपुत्राःकीर्तिर्लोकाश्चशाश्वताः ॥ ४७ ॥ यज्ञायुतैर्नलभ्यन्ते
द्वादशीजागरंविना ॥ मतिर्नजायतेयस्यद्वादश्यांजागरंप्रति ॥ ४८ ॥ नहितस्याधिकारोऽस्तिपूजनेकेशवस्यहि ॥ यावत्पदानिचलतिकेशवा
यतनंप्रति ॥ ४९ ॥ अश्वमेधसमानिस्युर्जागरार्थंप्रगच्छतः ॥ पादयोःपतितंयावद्धरण्यांपांसुगच्छताम् ॥ ५० ॥ तावद्वर्षसहस्राणि
जागरीवसतेदिवि ॥ तस्माद्गृहात्प्रगन्तव्यंजागरेकेशवालये ॥ ५१ ॥ कलौमलविनाशायद्वादशीद्वादशीषुच ॥ परापवादसंयुक्तंमनः
प्रासादवर्जितम् ॥ ५२ ॥ शास्त्रहीनमगान्धर्वंतथादीपविवर्जितम् ॥ शक्त्योपचाररहितमुदासीनंसनिन्दनम् ॥ ५३ ॥ कलियुक्तंविशेषेण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जागरंनवधामतम् ॥ सशास्त्रंजागरंयच्चनृत्यगान्धर्वसंयुतम् ॥ ५४ ॥ सवाद्यंतालसंयुक्तंसदीपमधुभिर्युतम् ॥ उच्चारैस्तुसमायुक्तंयथोक्तैर्भक्ति
भावितैः ॥ ५५ ॥ प्रसन्नंतुष्टिजननंसंमूढलोकरञ्जनम् ॥ गुणैर्द्वादशभिर्युक्तंजागरंमाधवप्रियम् ॥ ५६ ॥ कर्त्तव्यंतत्प्रयत्नेनपक्षयोःशुक्लकृष्णयोः
किंव्रतैर्बहुभिश्चीर्णैस्तीर्थवासेनतस्यकिम् ॥ ५७ ॥ द्वादशीवासरेप्राप्तेनकुर्याज्जागरंहरेः ॥ प्रवासेनत्यजेद्यस्तुपथिस्विन्नोऽपिवाऽव ॥५८॥ जागरंवासु
देवस्यद्वादश्यांतुसमेप्रियः ॥ मद्भक्तोनहरेःकुर्याज्जागरंपापमोहितः ॥ ५९ ॥ व्यर्थंमत्पूजनंतस्यमत्पूज्यंयोनपूजयेत् ॥ नशैवोनचसौरो
ऽसौनशाक्तोगणसेवकः ॥६०॥ योभुङ्क्तेवासरेविष्णोर्ज्ञेयःपश्वधिकोहिसः ॥ विप्रियंचकृतंतेनदुष्टेनैवचपापिना ॥ ६१ ॥ मद्भक्तिबलमाश्रित्ययोभुङ्क्ते
वैहरेर्दिने ॥ सबाह्याभ्यन्तरंदेहंवेष्टितंपापकोटिभिः ॥ ६२ ॥ मुच्यन्तेवासरेविष्णोर्येकुर्वन्तिप्रजागरम् ॥ कूर्परंयमदूतानांदत्तंतेनयमस्यच ॥
॥ ६३ ॥ कृत्वाजागरणंविष्णोरविद्धंद्वादशीव्रतम् ॥ स्वर्गापेक्षामुनिश्रेष्ठमुक्तातेनैवसंशयः ॥ ६४ ॥ वाञ्छितंनारकंसौख्यंविद्धंकृत्वाहरेर्दिनम् ॥
निहताःपितरस्तेनदेवानांवैवधःकृतः ॥ ६५ ॥ दत्तंराज्यंतुदैत्यानांकृत्वाविद्धंहरेर्दिनम् ॥ योनृत्यतिप्रहृष्टात्माकृत्वावैकरताडनम् ॥ ६६ ॥ गीतं
कुर्वन्मुखेनापिदर्शयन्कौतुकान्बहून् ॥ पुरतोवासुदेवस्यरात्रौजागरणेस्थितः ॥ ६७ ॥ पठन्कृष्णचरित्राणिरञ्जयन्वैष्णवान्गणान् ॥ मुखेनकुरुते
वाद्यंसंप्रहृष्टतनूरुहः ॥ ६८ ॥ दर्शयन्विविधान्भृत्यान्स्वेच्छालापान्प्रकारयन् ॥ भावैरेतैर्नरोयस्तुकुरुतेजागरंहरेः ॥ ६९ ॥ निमिषेनिमिषेपुण्यं
तीर्थकोटिफलंस्मृतम् ॥ अनुद्विग्नमनायस्तुधूपंनीराजनंहरेः ॥ ७० ॥ कुरुतेजागरेरात्रौसप्तद्वीपाधिपोभवेत् ॥ यानिकानिचपापानिब्रह्महत्या
समानिच ॥ ७१ ॥ कृष्णाहजागरात्तानिविलयंयान्तिखण्डशः ॥ एकतःक्रतवःसर्वेसमाप्तवरदक्षिणाः ॥ ७२ ॥ एकतोदेवदेवस्यजागरःकृष्ण
वल्लभः ॥ तत्रकाशीपुष्करंचप्रयागंनैमिषंगया ॥ ७३ ॥ शालग्राममहाक्षेत्रमर्बुदारण्यमेवच ॥ पौष्करंमथुरातत्रसर्वतीर्थानिचैवहि ॥ ७४ ॥
यज्ञावेदाश्चचत्वारोव्रजन्तिहरिजागरम् ॥ गङ्गासरस्वतीतापीयमुनाचशतद्रुका ॥ ७५ ॥ चन्द्रभागावितस्ताचनद्यःसर्वास्तुतत्रवै ॥ सरांसिच
ह्रदाःसर्वेसमुद्राःसर्वएवहि ॥ ७६ ॥ एकादश्यांद्विजश्रेष्ठगच्छन्तिकृष्णजागरम् ॥ स्पृहणीयाहिदेवानांयेनराःकृष्णजागरे ॥ ७७ ॥ नृत्यन्तिगीतं
कुर्वन्तिवीणावाद्यप्रहर्षिताः ॥ एवंजागरणंकृत्वासंपूज्यचमहाहरिम् ॥ ७८ ॥ द्वादश्यांपारणंकार्यंस्वशक्त्यावैष्णवैःसह ॥ शृणुब्रह्मन्प्रवक्ष्यामि
द्वादशीमाहात्म्यमुत्तमम् ॥ ७९ ॥ द्वादशीतुसदाज्ञेयापुत्रदामोक्षदायिनी ॥ प्रातःस्नात्वाहरिंपूज्यउपवासंसमर्पयेत् ॥ ८० ॥ अज्ञानतिमि
रान्धस्यव्रतेनानेनकेशव ॥ प्रसीदसुमुखोभूत्वाज्ञानदृष्टिप्रदोभव ॥ ८१ ॥ पारणंचततःकुर्याद्यथासंभवमग्रतः ॥ अतऊर्ध्वंयथेष्टंतुकारयेच्चयथा

CC-0. In Public Domain. Digitization by eGangotri

विधि ॥ ८२ ॥ यदातुद्वादशीस्वल्पापारणेनभवेद्द्विज ॥ तदारात्रौतुकर्त्तव्यंपारणंमुक्तिमिच्छता ॥ ८३ ॥ तदानरात्रिदोषःस्यात्नि
षिद्धंनभवेत्क्कचित्॥ यदुक्तंनिशिनस्नायान्महानिशिनभोजयेत् ॥८४॥ तत्पूर्वपरयामाभ्यांदिनवत्कर्मकारयेत् ॥ यदाभवतिस्वल्पातुद्वादशीपारणे
दिने ॥ ८५ ॥ उषःकालेद्वयंकुर्यात्प्रातर्माध्याह्निकंतथा ॥ द्वादशीसाधितायेननरेणभुविसर्वदा ॥ ८६ ॥ तस्यपुण्यमहंवक्तुंनसमर्थोविशेषतः ॥
साधयित्वाखिलान्कामान्प्राप्नुयुश्चमहाजनाः ॥८७॥अम्बरीषादयःसर्वेयेभक्ताभुविविश्रुताः ॥ द्वादशींसाधयित्वातुतेगताविष्णुसद्मनि ॥८८॥ सत्यं
सत्यंपुनःसत्यंयदुक्तंतुमयातव ॥ नास्तिविष्णुसमोदेवोनतिथिर्द्वादशीसमा ॥८९॥ अत्रदत्तंचभुक्तंचतथापूजादिकंचयत् ॥ तत्सर्वपूर्णतांयातिपूजिते
माधवेसति ॥ ९० ॥ किंपुनर्बहुनोक्तेनभक्तानांवल्लभोहरिः ॥ प्रददात्यखिलान्कामान्यावदाभूतसंप्लवम् ॥ ९१ ॥ द्वादश्यांचैवयद्दत्तंतत्सर्वंसफलं
भवेत् ॥ कुरुक्षेत्रेषुयद्दत्तंनिष्फलंनैवजायते ॥ तद्वच्चद्वादशीदत्तंभवेद्देवर्षिसत्तम ॥ ९२ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप॰उत्तर॰उमापतिनारदसंवादे
द्वादश्येकादशीजागरणमहिमानामाष्टात्रिंशोध्यायः ॥ ३८ ॥ महादेवउवाच ॥ एकस्मिन्समयेपुत्रगतोऽहंविष्णुसन्निधौ ॥ तत्रपृष्टंमयापूर्वं
माहात्म्यंद्वादशीभवम् ॥ यच्छ्रुत्वामुनयःसर्वेभुक्त्वाभोगान्दिवंययुः ॥१॥ नारदउवाच ॥ कीदृशीस्यान्महादेवमहाद्वादशिकापरा ॥ तस्याव्रतेफलं
कीदृग्वदसर्वेश्वरप्रभो ॥ २ ॥ शिवउवाच ॥ इयमेकादशीब्रह्मन्महापुण्यफलप्रदा ॥ ऋक्षयोगश्चसंयुक्ताकर्त्तव्यामुनिसत्तमैः ॥ ३ ॥ जयाच
विजयाचैवजयन्तीपापनाशिनी ॥ सर्वपापहराश्चैताःकर्त्तव्याःफलकाङ्क्षिभिः ॥ ४ ॥ एकादश्यांयदाऋक्षंशुक्लपक्षेपुनर्वसुः ॥ नाम्नासाचजया
ख्यातातिथीनामुत्तमातिथिः ॥ ५ ॥ तामुपोष्यनरःपापान्मुच्यतेनात्रसंशयः ॥ यदाचशुक्लद्वादश्यांनक्षत्रश्रवणंभवेत् ॥ ६ ॥ विजयासासमा
ख्यातातिथीनामुत्तमातिथिः ॥ सहस्रगुणितंदानंयस्यांवैविप्रभोजनम् ॥ ७ ॥ होमस्तथोपवासश्चसहस्राधिफलप्रदः ॥ यदाचशुक्लद्वादश्यां
प्राजापत्यंहिजायते ॥८॥ जयन्तीनामसाप्रोक्तासर्वपापहरातिथिः ॥ सप्तजन्मकृतंपापंस्वल्पंवायदिवाबहु ॥ ९ ॥ प्रक्षालयतिगोविन्दस्तस्यामभ्य
र्चितोध्रुवम् ॥ यदावैशुक्लद्वादश्यांपुष्यंभवतिकर्हिचित् ॥ १० ॥ तदातुसामहापुण्याभवितापापनाशिनी ॥ योददातितिलप्रस्थंनित्यसंवत्सरंप्रति॥ ॥ ४० ॥
॥११॥ उपवासंचयस्तस्यांकरोत्येतत्समंस्मृतम् ॥ तस्यांजगत्पतिर्देवस्तुष्टःसर्वेश्वरोहरिः॥१२॥प्रत्यक्षतांप्रयात्येवतत्रानन्तफलंस्मृतम् ॥ सगरेणक
कुत्स्थेननहुषेणचसाधितः ॥१३ ॥ तस्यामाराधितःकृष्णोदत्तवानखिलंभुवि ॥ वाचिकान्मानसाद्वापिकायजाच्चविशेषतः ॥ १४ ॥ सप्तजन्मकृता
त्पापान्मुच्यतेनात्रसंशयः ॥ तामेकांसमुपोष्याथपुण्यनक्षत्रसंयुताम्॥१५॥एकादशीसहस्रस्यफलंप्राप्नोतिमानवः ॥ स्नानंदानंजपोहोमःस्वाध्यायो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवतार्चनम् ॥ १६ ॥ यत्तस्यांक्रियतेकिंचित्तदक्षयफलंस्मृतम् ॥ तस्मादेषाप्रकर्तव्यायत्नेनफलकाङ्क्षिभिः ॥ १७ ॥ पञ्चमेनाश्वमेधेनयदास्नातोयुधि
ष्ठिरः ॥ पर्यपृच्छतधर्मात्माकृष्णंयदुकुलोद्वहम् ॥ १८ ॥ युधिष्ठिरउवाच ॥ उपवासस्यनक्तस्यत्वेकभुक्तस्यमेप्रभो ॥ किंपुण्यंकिंफलंतस्यब्रूहि
सर्वंजनार्दन ॥ १९ ॥ श्रीभगवानुवाच ॥ हेमन्तेचैवसंप्राप्तेमासेमार्गेचशोभने ॥ कृष्णपक्षेचयापार्थद्वादशीतामुपोषयेत् ॥ २० ॥ दशम्यांचैकभक्त
श्चशुद्धचित्तोदृढव्रतः ॥ नक्तंचैवतथाज्ञात्वादशम्यांनियतःसदा ॥ २१ ॥ दिवसस्याष्टमेभागेमन्दीभूतेदिवाकरे ॥ नक्तंचतद्विजानीयान्ननक्तंनिशिभो
जनम् ॥ २२ ॥ नक्षत्रदर्शनान्नक्तंगृहस्थस्यविधीयते ॥ यतेर्दिनाष्टमेभागेरात्रौतस्यनिषेधनम् ॥२३॥ ततःप्रभातसमयेकृत्वाचनियमंव्रती ॥ मध्याह्ने
चतथापार्थस्नानंशुचिःसमाचरेत् ॥ २४ ॥ अधमंकूपकेस्नानंवाप्यांस्नानंचमध्यमम् ॥ तडागेचोत्तमंस्नानंनद्यांस्नानंततःपरम् ॥ २५ ॥ पीडयन्ते
जन्तवोयत्रजलमध्येव्यवस्थिते ॥ तत्रस्नानेकृतेपार्थपापंपुण्यंसमंभवेत् ॥ २६ ॥ गृहेचैवोत्तमंस्नानंजलंचैवविशोधयेत् ॥ तस्मात्तुपाण्डवश्रे
ष्ठगृहेस्नानंसमाचरेत् ॥२७॥ अश्वक्रान्तेरथक्रान्तेविष्णुक्रान्तेवसुन्धरे ॥ मृत्तिकेहरमेपापंयन्मयापूर्वसंचितम् ॥२८॥ क्रोधलोभौपरित्यज्यचैकचित्तो
दृढव्रतः ॥ नालपेतान्त्यजंचैवतथापाखण्डिनोनरान् ॥ २९ ॥ मिथ्यावादरतांश्चैवतथाब्राह्मणनिन्दकान् ॥ अन्यांश्चैवदुराचारानगम्यागमने
रतान् ॥ ३० ॥ परद्रव्यापहारांश्चपरदाराभिगामिनः ॥ केशवंपूजयित्वातुनैवेद्यंतत्रकारयेत् ॥ ३१ ॥ दीपंदद्याद्गृहेतत्रभक्तियुक्तेनचेतसा
तद्दिनेवर्जयेत्पार्थनिद्रांचैवतुमैथुनम् ॥३२॥ धर्मशास्त्रविनोदेनदिनंसर्वंनिवारयेत् ॥ रात्रौजागरणंकृत्वाभक्तियुक्तोनृपोत्तम ॥३३॥ विप्रेभ्योदक्षिणां
दद्यात्प्रणिपत्यक्षमापयेत् ॥ यथाकृष्णातथाशुक्लाविधिनैवंप्रकारयेत् ॥ ३४ ॥ एकादशींद्विजःपार्थविभेदंनैवकारयेत् ॥ एवंहिकुरुतेयस्तु
शृणुतस्यहियत्फलम् ॥३५॥ शङ्खोद्धारेनरःस्नात्वादृष्ट्वादेवंगदाधरम् ॥एकादश्युपवासस्यकलांनार्हतिषोडशीम् ॥३६॥ संक्रान्तिषुचतुर्लक्षंयोददाति
नृपोत्तम ॥ एकादश्युपवासस्यकलांनार्हतिषोडशीम् ॥ ३७ ॥ प्रभासक्षेत्रेयत्पुण्यंग्रहणेचन्द्रसूर्ययोः ॥ तत्फलंजायतेनूनमेकादश्युपवासिनः ॥३८॥
केदारेचोदकंपीत्वापुनर्जन्मनविद्यते ॥ तथाचैकादशीपार्थगर्भवासक्षयङ्करी ॥ ३९ ॥ अश्वमेधस्ययज्ञस्यपृथिव्यांयत्फलंलभेत् ॥ तस्माच्छतगुणं
पुण्यमेकादश्युपवासिनः ॥ ४० ॥ तपस्विनोगृहेयस्यभुञ्जतेचद्विजोत्तमाः ॥ तत्फलंजायतेनूनमेकादश्युपवासिनः ॥ ४१ ॥ गोसहस्रेणयत्पुण्यं
दत्त्वावेदान्तपारगे ॥ तस्माच्छतगुणंपुण्यमेकादश्युपवासिनः ॥४२॥ येषांदेहेत्रयोदेवाब्रह्मविष्णुमहेश्वराः ॥ वसन्तितेषांतेतुल्याएकादश्युपवासिनः
॥ ४३ ॥ तेनराःपुण्यकर्माणोयेभक्ताहरिपूजकाः ॥ एकादशीव्रतस्यापिपुण्यसङ्ख्यानविद्यते ॥ ४४ ॥ एतत्पुण्यंभवेत्तस्ययत्सुरैरपिदुर्लभम् ॥

CC-0. In Public Domain. Digitization by eGangotri

एतस्मादर्धपुण्यंतुप्राप्यतेनक्तभोजनात् ॥ ४५ ॥ नक्तस्यार्धंभवेत्पुण्यमेकभक्तेनदेहिनाम् ॥ तावद्गर्जन्तितीर्थानिदानानिनियमानिच ॥ ४६ ॥
यावन्नोपोषयेज्जन्तुर्वासरंविष्णुवल्लभम् ॥ तस्मात्त्वंपाण्डवश्रेष्ठव्रतमेतत्समाचर ॥ ४७ ॥ पुण्यसङ्ख्यांनजानामियत्त्वंपृच्छसिपाण्डव ॥ एतद्धि
कथितंपार्थयद्व्रोप्यंव्रतमुत्तमम् ॥ एकादशीसमंनास्तिकृतंयज्ञसहस्रकम् ॥ ४८ ॥ युधिष्ठिरउवाच ॥ उत्पन्नासाकथंदेवपुण्याचैकादशीतिथिः ॥
कथंपवित्राविश्वेऽस्मिन्कथंवैदेवताप्रिया ॥ ४९ ॥ श्रीभगवानुवाच ॥ पुराकृतयुगेपार्थमुरनामातुदानवः ॥ अत्यद्भुतोमहारौद्रःसर्वदेवभयङ्करः ॥
॥ ५० ॥ इन्द्रोऽपिनिर्जितस्तेनसर्वदेवास्तथानृप ॥ महासुरेणतेनैवमृत्युनाचदुरात्मना ॥ ५१ ॥ स्वर्गान्निराकृतास्तेनविचरन्तिमहीतले ॥
सशङ्काभयभीताश्चसर्वेंगत्वामहेश्वरम् ॥ ५२ ॥ इन्द्रेणकथितंसर्वमीश्वरस्यापिचाग्रतः ॥ स्वर्गलोकपरिभ्रष्टाविचरन्तिमहीतले ॥ ५३ ॥
मर्त्येषुसंस्थितादेवानशोभन्तेमहेश्वर ॥ उपायंब्रूहिमेदेवह्यमरायान्तिकांगतिम् ॥ ५४ ॥ महादेवउवाच ॥ देवराजसुरश्रेष्ठयत्रास्तेगरुडध्वजः ॥
शरण्यश्चजगन्नाथःपरित्रातापरायणः ॥ ५५ ॥ तत्रगच्छसुरश्रेष्ठसवोरक्षांविधास्यति ॥ ईश्वरस्यवचःश्रुत्वादेवराजोमहामतिः ॥ ५६ ॥
त्रिदशैःसहितोयत्रगतस्तत्रयुधिष्ठिर ॥ जलमध्येप्रसुप्तंतंदृष्ट्वादेवंगदाधरम् ॥ कृताञ्जलिपुटोभूत्वाइन्द्रःस्तोत्रमुदैरयत् ॥ ५७ ॥ इन्द्रउवाच ॥
ॐनमोदेवदेवेशदेवदानववन्दित ॥ दैत्यारेपुण्डरीकाक्षत्राहिनोमधुसूदन ॥ ५८ ॥ सुराःसर्वेसमायाताभयभीताश्चदानवात् ॥ शरणंत्वांजग
न्नाथत्राहिमांभक्तवत्सल ॥ ५९ ॥ त्राहिनोदेवदेवेशत्राहित्राहिजनार्दन ॥ त्राहिवैपुण्डरीकाक्षदानवानांविनाशक ॥ ६० ॥ त्वत्समीपंगताः
सर्वेत्वमेवशरणंप्रभो ॥ शरणागतानांदेवानांसहायंकुरुवैप्रभो ॥ ६१ ॥ त्वंपतिस्त्वंमतिर्देवत्वंकर्तात्वंचकारणम् ॥ त्वंमातासर्वलोकानांत्वमेव
जगतःपिता ॥ ६२ ॥ भगवन्देवदेवेशशरणागतवत्सल ॥ शरणंतवचायाताभयभीताश्चदेवताः ॥ ६३ ॥ देवतानिर्जिताःसर्वाःस्वर्गभ्रष्टाः
कृताःप्रभो ॥ अत्युग्रेणहिदैत्येनमुरनाम्नामहौजसा ॥ ६४ ॥ महादेवउवाच ॥ इन्द्रस्यवचनंश्रुत्वाविष्णुर्वचनमब्रवीत् ॥ ६५ ॥ श्रीभग
वानुवाच ॥ कीदृशोदानवःशक्रकिंरूपंकीदृशंबलम् ॥ क्वस्थानंतस्यदुष्टस्यकिंवीर्यंकःपराक्रमः ॥ किंवरंतस्यदुष्टस्यममाख्याहिमहामते ॥
॥ ६६ ॥ इन्द्रउवाच ॥ पूर्वंबभूवदेवेशब्रह्मवंशसमुद्भवः ॥ तालजङ्घस्तुनाम्नाचअत्युग्रोऽपिमहासुरः ॥ ६७ ॥ तस्यपुत्रोहिविख्यातोमुरनामेति
दानवः ॥ अत्युत्कटोमहावीर्योदेवतानांभयङ्करः ॥ ६८ ॥ पुरीचन्द्रावतीनाम्नातत्रस्थानेवसत्यसौ ॥ निर्जितादेवताःसर्वाःस्वर्गात्तेन
विवासिताः ॥ ६९ ॥ इन्द्रोऽन्योरोपितस्तेनवातश्चैवहुताशनः ॥ चन्द्रसूर्यौकृतौचान्यौवायुर्वरुणएवच ॥ ७० ॥ सर्वमात्मकृतंतेनसत्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्यंजनार्दन ॥ देवलोकःकृतस्तेनसर्वस्थानविवर्जितः ॥ ७१ ॥ तस्यतद्वचनंश्रुत्वाकोपमाप्तोजनार्दनः ॥ हनिष्येदानवंदुष्टंदेवतानांभयङ्करम् ॥
॥ ७२ ॥ त्रिदशैःसहितोदेवोगतश्चन्द्रावतींपुरीम् ॥ दृष्टोदेवैस्तुदैत्येन्द्रोगर्जमानःपुनःपुनः ॥ ७३ ॥ तेनसर्वेजितादेवागताश्चैवदिशोदश ॥
हरिंनिरीक्ष्यप्रोवाचतिष्ठतिष्ठेतिदानवः ॥ भगवानब्रवीत्तंचक्रोधसंरक्तलोचनः ॥ ७४ ॥ श्रीभगवानुवाच ॥ रेदानवदुराचारममबाहुंनिरीक्षय ॥
ततस्तेसम्मुखाःसर्वेविष्णुनादुष्टदानवाः ॥ ७५ ॥ हताबाणैःपुनर्दिव्यैर्जाताश्चभयविह्वलाः ॥ चक्रंमुक्तंचकृष्णेनदैत्यसैन्येषुपाण्डव ॥ ७६ ॥
तेनच्छिन्नास्तुशतशोबहवोनिधनंगताः ॥ एकोऽपिदानवस्तत्रयुध्यमानोमुहुर्मुहुः ॥ ७७ ॥ नष्टाःसर्वेसुरास्तेननिर्जितोमधुसूदनः ॥ निर्जितं
तेनदैत्येनबाहुयुद्धमजायत ॥ ७८ ॥ बाहुयुद्धंकृतंतेनदिव्यंवर्षसहस्रकम् ॥ विष्णुश्चिन्तांप्रपन्नश्चनष्टाःसर्वाश्चदेवताः ॥ ७९ ॥ विष्णुश्च
निर्जितस्तेनगतोबदरिकाश्रमम् ॥ गुहासिंहावतीनामतत्रसुप्तोजनार्दनः ॥ ८० ॥ योजनद्वादशवतीएकद्वाराचपाण्डव ॥ तस्यांविष्णुंप्रसुप्तं
चदानवोहन्तुमुद्यतः ॥ ८१ ॥ महायुद्धेनतेनैवश्रान्तोऽसौयोगमायया ॥ दानवःपृष्ठतोलग्नःप्रविष्टःसतदागुहाम् ॥ ८२ ॥ प्रसुप्तंतत्रतंदृष्ट्वा
दानवोहर्षमागतः ॥ इत्थंमांनिर्जितंमत्वाप्रविष्टंशङ्क्याहरिम् ॥ ८३ ॥ निःसंदेहंहनिष्यामिदानवानांभयङ्करम् ॥ निर्गताकन्यकातत्रविष्णु
देहाद्युधिष्ठिर ॥ ८४ ॥ रूपवतीसुसौभाग्यादिव्यप्रहरणायुधा ॥ तस्यतेजोंऽशसंभूतामहाबलपराक्रमा ॥ ८५ ॥ दृष्टासादानवेन्द्रेणमुरनाम्नाधन
ञ्जय ॥ युद्धंसमाहितंतेनस्त्रियाचैवप्रयाचितम् ॥ ८६ ॥ कन्यकायुध्यतेतत्रसर्वयुद्धविशारदा ॥ हुङ्कारैर्भस्मसाज्जातोमुरनामामहासुरः ॥
॥ ८७ ॥ निहतेदानवेतस्मिंस्तत्रदेवस्त्वबुध्यत ॥ पतितंदानवंदृष्ट्वाततोविस्मयमागतः ॥ ८८ ॥ विष्णुरुवाच ॥ केनायंचहतोरौद्रोह्यत्युग्रो
ममशात्रवः ॥ अत्युग्रंचकृतंकर्ममकारुण्यतःकृतम् ॥ ८९ ॥ कन्योवाच ॥ तेनदेवाश्चगन्धर्वास्सयक्षोरगराक्षसाः ॥ इन्द्राद्याःसकलाजित्वा
स्वर्गाच्चैवनिराकृताः ॥ ९० ॥ हरिःसुप्तोमयादृष्टोमुरःपृष्ठेसमागतः ॥ संहरिष्यतित्रैलोक्यंसुप्तेचैवजनार्दने ॥ ९१ ॥ तस्यास्तद्वचनंश्रुत्वाविष्णु
र्वचनमब्रवीत् ॥ अहंचनिर्जितोयेनकथंसोऽपित्वयाजितः ॥ ९२ ॥ एकादश्युवाच ॥ त्वत्प्रसादाच्चभोःस्वामिन्महादैत्योमयाहतः ॥ ९३ ॥
श्रीभगवानुवाच ॥ आनन्दंत्रिषुलोकेषुमुनयोदेवतागताः ॥ ब्रूहिभद्रेऽद्यमह्यंत्वंयत्तेमनसिरोचते ॥ ददामिचनसंदेहोयत्सुरैरपिदुर्लभम् ॥९४ ॥
एकादश्युवाच ॥ यदितुष्टोऽसिमेदेवसत्यमुक्तंजनार्दन ॥ वरमेकंतुवाञ्छामिहृदयेचजगत्पते ॥ ९५ ॥ प्रार्थयामिचदेवेशईप्सितंचमया
प्रभो ॥ यदिसत्यंजगन्नाथतिस्रोवाचोददासिमे ॥ ९६ ॥ श्रीभगवानुवाच ॥ सत्यंसत्यंमयाप्रोक्तंअवश्यंतवसुव्रते ॥ तिस्रोवाचोमयादत्ता

CC-0. In Public Domain. Digitization by eGangotri

नचावाक्यंभवेदिह ॥ ९७ ॥ एकादश्युवाच ॥ त्रिभुवनेषुचदेवेशचतुर्युगेषु साम्प्रतम् ॥ त्रिषुलोकेषुसर्वत्रतादृशंकुरुमेप्रभो ॥ ९८ ॥
सर्वतीर्थप्रधानाहिसर्वविघ्नविनाशिनी ॥ सर्वसिद्धिकरीदेवीत्वत्प्रसादाद्भवाम्यहम् ॥ ९९ ॥ मामुपोष्यन्तियेभक्त्यातवभक्त्याजनार्दन ॥
सर्वसिद्धिर्भवेत्तेषांयदितुष्टोऽसिमेप्रभो ॥ १०० ॥ उपवासंचनक्तंचएकभक्तंकरोतिच ॥ तस्यवित्तंचधर्मंचमोक्षंवेदेहिमाधव ॥ १ ॥
विष्णुरुवाच ॥ यत्त्वंवदसिकल्याणितत्सर्वंचभविष्यति ॥ सर्वान्मनोरथान्भद्रेदास्यसित्वंचनान्यथा ॥ २ ॥ ममभक्ताश्चयेलोकेयेचभक्तास्तु
कार्तिके ॥ चतुर्युगेषुविख्यातास्त्रिषुलोकेषुवैतथा ॥ ३ ॥ त्वांचशक्तिमहंमन्यएकादशीव्रतस्थिताः ॥ ममपूजांकरिष्यन्तिमोक्षगास्तेनसंशयः
॥ ४ ॥ तृतीयाचाष्टमीचैवनवमीचचतुर्दशी ॥ एकादशीविशेषेणतिथिरेषाहरिप्रिया ॥ सर्वतीर्थाधिकंपुण्यंसत्यंसत्यंनसंशयः ॥ ५ ॥ महादेव
उवाच ॥ इदंदत्त्वावरंतस्यैतिरोवाचोनसंशयः ॥ हृष्टापुष्टाचसंजाताएकादशीमहाव्रता ॥ ६ ॥ शत्रुंहंसिपरांतस्यददासिपरमांगतिम् ॥ त्वंहंसिसर्वं
विघ्नानिसर्वसिद्धिवरप्रदा ॥ ७ ॥ उभयोःपक्षयोःपार्थतुल्यैवैकादशीशुभा ॥ नशुक्लानैवकृष्णाचविभेदंनैवकारयेत् ॥ ८ ॥ विभेदोनैवकर्त्तव्यः
समस्तव्रतकारिभिः ॥ दिवावायदिवारात्रौश्रृणोतिभक्तितत्परः ॥ ९ ॥ तिथिरेकाभवेत्सर्वापक्षयोरुभयोरपि ॥ उदयैकादशीस्वल्पाह्यन्तेचैवत्रयो
दशी ॥ ११० ॥ मध्येतुद्वादशीपूर्णात्रिस्पृशासाहरिप्रिया ॥ एकामुपोषयेत्तांवैसहस्रैकादशीफलम् ॥ ११ ॥ सहस्रगुणितंह्येवंद्वादश्यांपारणेकृते ॥
अष्टम्येकादशीषष्ठीतृतीयाचचतुर्दशी ॥ १२ ॥ पूर्वविद्धानकर्त्तव्यापरविद्धामुपोषयेत् ॥ एकादशीह्यहोरात्रंप्रभातेघटिकाभवेत् ॥ १३ ॥ साति
थिःपरिहर्तव्याउपोष्याद्वादशीयुता ॥ एवंविधामयाप्रोक्तापक्षयोरुभयोरपि ॥१४॥एकादश्यांप्रकुर्वीतह्युपवासंनरास्तुये ॥ तेयान्तिवैष्णवंस्थानंयत्रा
स्तेगरुडध्वजः ॥ १५ ॥ धन्यास्तेमानवालोकेविष्णुभक्तिपरायणाः ॥ एकादश्याश्चमाहात्म्यंसर्वकालेषुयःपठेत् ॥ १६ ॥ गोसहस्रफलंसोऽपिपुण्यं
प्राप्नोतिमानवः ॥ दिवावायदिवारात्रौयेवैश्रृण्वन्तिभक्तितः ॥ १७ ॥ ब्रह्महत्यादिपापेभ्योमुच्यन्तेनात्रसंशयः ॥ विष्णुधर्मसमंनास्तिगीतार्थं
चनृपोत्तम ॥ एकादशीसमंनास्तिव्रतंपापप्रणाशनम् ॥११८॥ इतिश्रीपाद्मेमहापुराणेपञ्चप० उत्तर० उमामहेश्वरसंवादेएकादश्युत्पत्तिसुरवधोनामैकोन
चत्वारिंशोऽध्यायः॥३९॥युधिष्ठिरउवाच ॥ वन्देविष्णुंविभुंसाक्षाल्लोकत्रयसुखावहम्॥विश्वेशंविश्वकर्तारंपुराणंपुरुषोत्तमम्॥१॥ पृच्छामिदेवदेवेशसंश
योऽस्तिमहान्मम ॥ लोकानांचहितार्थायपापानांक्षयहेतवे ॥ २ ॥ मार्गशीर्षेऽसितपक्षेभवेदेकादशीतुया ॥ किंनामकोविधिस्तस्याःकोदेवस्तत्र
पूज्यते ॥ एतदाचक्ष्वमेस्वामिन्विस्तरेणयथातथम् ॥ ३ ॥ श्रीकृष्णउवाच ॥ साधुपृष्टंत्वयाराजन्साधुतेविमलंयशः ॥ कथयिष्यामिराजें

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्द्रहरिवासरमुत्तमम् ॥ ४ ॥ उत्पन्नाचासितेपक्षेद्वादशीममवल्लभा ॥ मार्गशीर्षोत्पत्तिरितिममदेहसमुद्भवा ॥ ५ ॥ सुरासुरवधार्थायह्युत्पन्नाभरत
र्षभ ॥ कथिताचमयासावैतवाग्रेराजसत्तम ॥ ६ ॥ पूर्वाचैकादशीराजंस्त्रैलोक्येसचराचरे ॥ मार्गशीर्षेऽसितपक्षेह्युत्पत्तिरितिनामतः ॥ ७ ॥ अतः
परंप्रवक्ष्यामिमार्गशीर्षेसितातुया ॥ यस्याःश्रवणमात्रेणवाजपेयफलंलभेत् ॥८॥ मोक्षानामेतिसाप्रोक्तासर्वपापहरापरा ॥ देवंदामोदरंराजन्पूजयेच्च
प्रयत्नतः ॥ ९ ॥ तुलस्यामञ्जरीभिश्चधूपैर्दीपैःप्रयत्नतः ॥ पूर्वेणविधिनाचैवदशम्येकादशीतथा ॥१०॥ मोक्षाचैकादशीनाम्नामहापातकनाशिनी ॥
रात्रौजागरणंकार्यंनृत्यगीतस्तवैर्मम ॥ ११ ॥ शृणुराजन्प्रवक्ष्यामिदिव्यांपौरणिकींकथाम् ॥ यस्याःश्रवणमात्रेणसर्वपापक्षयोभवेत् ॥ १२ ॥
अधोयोनिगताश्चैवपितरोयस्यपापतः ॥ अस्याश्चपुण्यदानेनमोक्षंयान्तिनसंशयः ॥ १३ ॥ चम्पकेनगरेरम्येवैष्णवैश्चविभूषिते ॥ वैखानसो
नामनृपःपुत्रवत्पालयेत्प्रजाः ॥ १४ ॥ वसन्तिबहवोविप्रावेदवेदाङ्गपारगाः ॥ ऋद्धिमत्यःप्रजास्तस्यराज्ञोवैखानसस्यहि ॥ १५ ॥ एवंराज्यं
प्रकुर्वाणोरात्रौस्वप्नस्यमध्यतः ॥ पितॄन्स्वकीयान्सोऽपश्यदधोयोनिगतानृप ॥ १६ ॥ एवंदृष्ट्वाचतान्सर्वान्विस्मयाविष्टमानसः ॥ १७ ॥
॥ राजोवाच ॥ मयास्वपितरोदृष्टानरकोपगताद्विजाः ॥ तारयेतितनूजत्वमस्मान्निरयसागरात् ॥ १८ ॥ एवंब्रुवाणास्तेनूनंरोदमानामुहुर्मुहुः ॥
मयादृष्टाद्विजश्रेष्ठाएतस्माच्चनमेसुखम्॥१९॥एतद्राज्यंममममहत्सुखदायिनविद्यते॥अश्वागजास्तथासर्वेरोचन्तेमेनभोद्विजाः॥२०॥नदारानसुतामह्यंरो
चन्तेद्विजसत्तमाः ॥ किंकरोमिक्वगच्छामिहृदयंमेऽवरुध्यते ॥२१॥ तद्व्रतंतंतपोयोगंयनैवममपूर्वजाः ॥ मोक्षंप्रयान्तिसद्योवैकथ्यतांचद्विजोत्तमाः ॥
॥ २२ ॥ पुत्रेतुजीवितप्रायेबलीयसिमहात्मनि ॥ पितास्तिनरकेघोरेतस्यपुत्रस्यकिंफलम् ॥ २३ ॥ ब्राह्मणाउचुः ॥ पर्वतस्यमुनेराजन्निकटेचा
श्रमोमहान् ॥ गम्यतांराजशार्दूलभूतंभव्यंविजानतः ॥ २४ ॥ तेषांश्रुत्वाततोवाक्यंराजावैखानसोमहान् ॥ जगामचाशुतत्रैवचाश्रमंपर्वतस्य
च ॥ २५ ॥ ब्राह्मणैर्वेष्टितोराजाराजभिश्चसमन्वितः ॥ आश्रमंविपुलंतस्यसंप्राप्तोराजसत्तमः ॥२६॥ तत्रर्ग्वेदयजुर्वेदसामाध्ययनकोविदैः ॥ वेष्टितं
मुनिभिश्चैवद्वितीयमिववेधसम् ॥ २७ ॥ दृष्ट्वातंमुनिशार्दूलंराजावैखानसस्तथा ॥ दण्डवत्प्रणतिंकृत्वापस्पर्शचरणौमुनेः ॥ २८ ॥ पप्रच्छकुशलं
तस्यसप्तस्वङ्गेष्वसौमुनिः ॥ राज्येनिष्कण्टकत्वंचराज्ञःसौख्यसमन्वितम् ॥ २९ ॥ राजोवाच ॥ तवप्रसादाद्ब्रह्मन्स्वामिन्कुशलंमेऽङ्गसप्तके ॥
भक्तायेविष्णुविप्रेषुकथंतेषांसविघ्नता ॥ ३० ॥ मयास्वपितरोदृष्टाःस्वप्नेचनरकेस्थिताः ॥ कस्यपुण्यस्यसामर्थ्यान्मोक्षंयान्तिद्विजोत्तम
॥ ३१ ॥ अयंमेसंशयःस्वामिन्प्रष्टुंतंत्वामुपागतः ॥ उपायःकश्चिदेवात्रकर्तव्योमुनिसत्तम ॥ ३२ ॥ एतद्वाक्यंततःश्रुत्वापर्वतोमुनि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्तमः ॥ ध्यानस्तिमितनेत्रोऽभूत्तपस्वीब्रह्मसंनिभः ॥ ३३ ॥ मुहूर्तमेकंध्यानस्थोभूपतिंप्रत्युवाचह ॥ ज्ञातंहितवराजेन्द्रपितॄणांपूर्वचेष्टितम् ॥
॥ ३४ ॥ पूर्वजन्मनितातस्तेक्षत्रियोराज्यगर्वितः ॥ सपत्न्याऋतुकालेतुराजधर्मप्रवर्तितः ॥ ३५ ॥ गतोग्रामेतुतांत्यक्त्वाकार्यार्थी
निजयोषितम् ॥ तवपित्रातुतस्याश्चनदत्तमृतुदानकम् ॥ ३६ ॥ तेनपापप्रभावेणनरकेपितृभिःसह ॥ पतितोराजशार्दूलतवतातःसुदारुणे ॥ ३७ ॥
ततःपुनरुवाचेदंराजावैखानसोमुनिम् ॥ केनव्रतप्रभावेणमोक्षस्तेषांभवेन्मुने ॥ ३८ ॥ मुनिरुवाच ॥ मार्गशीर्षेऽसितेपक्षेमोक्षानामेति
नामतः ॥ सर्वैश्चैतद्व्रतंकार्यंपित्रेपुण्यंप्रदीयताम् ॥ ३९ ॥ तेनपुण्यप्रभावेणमोक्षस्तेषांभविष्यति ॥ सत्यमेतन्महाभागब्रह्मणोवचनंयथा ॥ ४० ॥
मुनेर्वाक्यंततःश्रुत्वास्वगृहंपुनरागतः ॥ मार्गशीर्षस्तथामासःप्राप्तःकष्टेनतेनवै ॥ ४१ ॥ मुनेर्वाक्येनतत्कृत्वाव्रतंवैखानसोनृपः ॥ अददात्पुण्य
मखिलैःसार्धंपित्रेसभूमिपः ॥ ४२ ॥ दत्तेपुण्येक्षणेनैवपुष्पवृष्टिरभूद्दिवः ॥ वैखानसस्यतातोवैपितृभिर्मोक्षमाविशत् ॥ ४३ ॥ राजानंचा
न्तरिक्षेसगिरंपुण्यामुवाचह ॥ स्वस्तिस्वस्तीतितेपुत्रप्रोच्यचैवंदिवंगतः ॥ ४४ ॥ एवंयःकुरुतेराजन्मोक्षामेकादशींशुभाम् ॥ तस्यपापानि
नश्यन्तिमृतोमोक्षमवाप्नुयात् ॥ ४५ ॥ नातःपरतराकाचिन्मोक्षदैकादशीभवेत् ॥ पुण्यसङ्ख्यांनजानामिराजन्मेप्रियकृद्व्रतम् ॥ ४६ ॥ चिन्ता
मणिसमाह्येषानृणांमोक्षप्रदायिनी ॥ पठनाच्छ्रवणादस्यावाजपेयफलंलभेत् ॥ ४७ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्त०उमापतिनारद
संवादेमार्गशीर्षशुक्लमोक्षदैकादशीनामचत्वारिंशोऽध्यायः ॥ ४० ॥ युधिष्ठिरउवाच ॥ पौषस्यकृष्णपक्षेतुकिंनामैकादशीभवेत् ॥ किंनाम
कोविधिस्तस्याएतद्विस्तरतोवद ॥ एतदाख्याहिभोस्वामिन्कोदेवस्तत्रपूज्यते ॥ १ ॥ श्रीकृष्णउवाच ॥ कथयिष्यामिराजेन्द्रभवतःस्नेहबन्ध
नात् ॥ तुष्टिर्मेनतथाराजन्यज्ञैर्बहुलदक्षिणैः ॥ २ ॥ यथामेतुष्टिरायातिह्येकादशीव्रतेनवै ॥ तस्मात्सर्वप्रयत्नेनकर्त्तव्योहरिवासरः ॥ ३ ॥ सत्यमेत
न्नवैमिथ्याधर्मिष्ठानांविशारद ॥ पौषस्यकृष्णपक्षेयासफलानामनामतः ॥ ४ ॥ तस्यांनारायणंदेवंपूजयेच्चयथाविधि ॥ पूर्वेणैवविधानेनकर्त्त
व्यैकादशीशुभा ॥ ५ ॥ नागानांचयथाशेषःपक्षिणांपन्नगाशनः ॥ देवानांचयथाविष्णुर्द्विपदानांयथाद्विजः ॥ ६ ॥ व्रतानांचतथाराजञ्छ्रेष्ठा
चैकादशीतिथिः ॥ तेजनाश्चैवभोराजन्पूज्यावैसर्वदामम ॥ ७ ॥ हरिवासरसंलीनाःकुर्वन्त्येकादशीव्रतम् ॥ इहैवधनसंयुक्तामृतामोक्षंलभन्ति
ते ॥ ८ ॥ सफलायांफलैराजन्पूजयेन्नामतोहरिम् ॥ नारिकेलफलैश्चैवक्रमुकैर्बीजपूरकैः ॥ ९ ॥ जम्बीरैर्दाडिमैश्चैवतथाधात्रीफलैःशुभैः ॥ लवङ्गै
र्बदरीभिश्चतथाम्रैश्चविशेषतः ॥ १० ॥ पूजयेद्देवदेवेशंधूपदीपैस्तथैवच ॥ सफलायांविशेषेणदीपदानंतुकारयेत् ॥ ११ ॥ रात्रौजागरणंचैवकर्त्तव्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सहवैष्णवैः ॥ यावन्निमेषोनेत्रस्यतावज्जागर्तियोनिशि ॥ १२ ॥ एकाग्रमनसोराजंस्तस्यपुण्यंशृणुष्वहि ॥ तत्समोनास्तियज्ञोवैतीर्थंवातत्समंनहि ॥
॥ १३ ॥ सर्वव्रतानिराजेन्द्रकलांनार्हन्तिषोडशीम् ॥ एवंवर्षसहस्राणितपसानैवयत्फलम् ॥१४॥ तत्फलंसमवाप्नोतियःकरोतिहिजागरम् ॥ श्रूयतां
राजशार्दूलसफलायाःकथाशुभा ॥ १५ ॥ चम्पावतीतिविख्यातापुरीमाहिष्मतस्यच ॥ बभूवुस्तस्यराजर्षेःपुत्राःपञ्चकुमारकाः ॥ १६ ॥ तेषांमध्ये
तुज्येष्ठोवैमहापापरतःसदा ॥ परदाराभिचारीचवेश्यासक्तश्चमद्यपः ॥ १७ ॥ पितुर्द्रव्यंतुतेनैवगमितंपापकर्मणा ॥ असद्वृत्तिरतोनित्यंभूसुराणांतु
निन्दकः ॥१८॥ वैष्णवानाञ्चदेवानांनित्यंनिन्दांकरोतिसः ॥ ईदृशंतुततोदृष्ट्वापुत्रंमाहिष्मतोनृपः ॥ १९ ॥ नाम्नातुलुम्पकइतिराजपुत्रेषुचापठत् ॥
राज्यान्निष्कासितस्तेनपित्राचैवतुबन्धुभिः ॥ २० ॥ सचैवंपरिवारैस्तुत्यक्तश्चपरिपन्थिवत् ॥ लुम्पकोऽपितथात्यक्तश्चिन्तयामासवैतदा ॥ २१ ॥
त्यक्तोऽहंबान्धवैःपित्राराज्यान्निष्कासितःकिल॥ इतिचिन्तयमानोऽसौमतिंपापेतदाकरोत् ॥२२॥ मयागन्तव्यमेवास्तुदारुणेगहनेवने ॥ तस्माच्चैव
पुरंसर्वंलुम्पयिष्याभिवैपितुः ॥ २३ ॥ इत्येवंसमतिक्रुत्वालुम्पकोदैवयोगतः ॥ निर्जगामपुरात्तस्माद्गतोऽसौगहनेवने ॥ २४ ॥ जीवघातरतोनित्यं
स्तेयद्यूतकलानिधिः ॥ सर्वंचनगरंतेनमुषितंपापकर्मणा ॥२५॥ स्तेयाभिगामीनगरेगृहीतःसनिशाचरैः ॥ उवाचतान्सुतोऽहंवैराज्ञोमाहिष्मतस्यच॥
॥ २६ ॥ सतैर्मुक्तःपापकर्माचागतोविपिनंपुनः ॥ आमिषाभिरतोनित्यंतरोर्वैफलभक्षणे ॥ २७ ॥ आश्रमस्तस्यदुष्टस्ययत्राभूद्विपिनेघने ॥ अश्वत्थो
वर्त्ततेतत्रजीर्णश्चबहुवार्षिकः ॥ २८ ॥ देवत्वंतस्यवृक्षस्यविपिनेवर्ततेमहत् ॥ तत्रैवनिवसंश्चैवलुम्पकःपापबुद्धिमान् ॥ २९ ॥ गतेबहुतिथेकालेकदा
चित्पुण्यसंचयात् ॥ पौषस्यकृष्णपक्षेतुदशम्यांदिवसेतथा ॥ ३० ॥ फलानिभुक्त्वावृक्षाणांरात्रौशीतेनपीडितः ॥ लुम्पकोनामपापिष्ठोवस्त्रहीनो
गतेक्षणः ॥ ३१ ॥ पीड्यमानोऽतिशीतेनहरिवृक्षसमीपतः ॥ ननिद्रानसुखंतस्यगतप्राणइवाभवत् ॥ ३२ ॥ आच्छाद्यदशनैरास्यमेवंनीतानिशा
खिला ॥ भानूदयेऽपिपापिष्ठोनलेभेचेतनांतदा ॥ ३३ ॥ लुम्पकोगतसंज्ञस्तुसफलायादिनेतथा ॥ रवौमध्यंगतेचैवसंज्ञांलेभेसलुम्पकः ॥ ३४ ॥
इतस्ततोविलोक्याथव्यथितश्चतदासनात् ॥ स्खलन्पद्भ्यांप्रचलितःखञ्जन्निवमुहुर्मुहुः ॥ ३५ ॥ वनमध्येगतस्तत्रक्षुत्क्षामःपीडितोऽभवत् ॥
नशक्तिर्जीवघातेतुलुम्पकस्यदुरात्मनः ॥ ३६ ॥ फलानिचतदाराजन्नाजहारसलुम्पकः ॥ यावत्समागतस्तत्रतावदस्तंगतोरविः ॥ ३७ ॥ किंभवि
ष्यतिताततेतिसविलापंचकारह ॥ फलानितत्रभूरीणिवृक्षमूलेन्यवेशयत् ॥ ३८ ॥ इत्युवाचफलैरेभिःश्रीपतिस्तुष्यतांहरिः ॥ इत्युक्त्वालुम्पकश्चैव
निद्रांलेभेनवैनिशि ॥ ३९ ॥ रात्रौजागरणंमेनेविष्णुस्तस्यदुरात्मनः ॥ फलैस्तुपूजनंमेनेसफलायास्तथानघ ॥ ४० ॥ अकस्माद्व्रतमेवैतत्कृतवान्वै

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

दिवितत्कालमुत्पन्नावागुवाचाशरीरिणी॥४२॥
सलुम्पकः ॥ तेनपुण्यप्रभावेणप्राप्तंराज्यमकण्टकम् ॥ ४१ ॥ सूर्यस्योदयनंयावत्तावद्विष्णुर्जगामह ॥ दिवितत्कालमुत्पन्नावागुवाचाशरीरिणी॥४२॥
राज्यंप्राप्स्यसिपुत्रत्वंसफलायाःप्रसादतः ॥ तथेत्युक्तेतुवचसिदिव्यरूपधरोऽभवत ॥ ४३ ॥ मतिरासीत्ततस्तस्यपरमावैष्णवीनृप ॥ दिव्याभरण
शोभाढ्योलेभेराज्यमकण्टकम् ॥ ४४ ॥ कृतंराज्यंतुतेनैवंवर्षाणिदशपञ्चच ॥ मनोज्ञास्तस्यपुत्रास्तुदाराःकृष्णप्रसादतः ॥ ४५ ॥
आशुराज्यंपरित्यज्यपुत्रेचैवसमर्प्यच ॥ गतःकृष्णस्यसांनिध्यंयत्रगत्वानशोचति ॥ ४६ ॥ एवंयःकुरुतेराजन्सफलाव्रतमुत्तमम् ॥ इहलोके
सुखंप्राप्यमृतोमोक्षमवाप्नुयात् ॥ ४७ ॥ धन्यास्तेमानवालोकेसफलायांचयेरताः ॥ तेषांचसफलंजन्मनात्रकार्याविचारणा ॥ ४८ ॥ पठना
च्छ्रवणाच्चैवकरणाच्चविशांपते ॥ राजसूयस्ययज्ञस्यफलमाप्नोतिमानवः ॥ ४९ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०उमापतिनारदसंवादेपौष
कृष्णासफलैकादशीनामैकचत्वारिंशोऽध्यायः ॥ ४१ ॥ युधिष्ठिरउवाच ॥ कथितावैत्वयाकृष्णसफलैकादशीशुभा ॥ कथयस्वप्रसादेन
शुक्लपक्षस्ययाभवेत् ॥ १ ॥ किन्नामकोविधिस्तस्याःकोदेवस्तत्रपूज्यते ॥ कस्मैतुष्टोहृषीकेशस्त्वमेवपुरुषोत्तमः ॥ २ ॥ श्रीकृष्णउवाच ॥
शृणुराजन्प्रवक्ष्यामिशुक्लापौषस्ययाभवेत् ॥ कथयामिमहाराजलोकानांहितकाम्यया ॥ ३ ॥ पूर्वेणविधिनाराजन्कर्त्तव्यैषाप्रयत्नतः ॥ पुत्रदा
नामनाम्नासासर्वपापहरापरा ॥ ४ ॥ नारायणोऽधिदेवोऽस्याःकामदःसिद्धिदायकः ॥ नातःपरतराकाचित्त्रैलोक्येसचराचरे ॥ ५ ॥ विद्या
वन्तंयशस्वन्तंकरोतिचनरंहरिः ॥ शृणुराजन्प्रवक्ष्यामिकथांपापहरांपराम् ॥ ६ ॥ भद्रावत्यांपुराह्यासीत्पुर्यांराजासुकेतुमान् ॥ तस्यराज्ञ
स्तथाराज्ञीचम्पकानामवर्त्तते ॥ ७ ॥ पुत्रहीनेनराज्ञाचकालोनीतोमनोरथैः ॥ नैवात्मजंनृपोलेभेवंशकर्त्तारमेवच ॥ ८ ॥ तेनैवराज्ञ
धर्मेणचिन्तितंबहुकालतः ॥ किंकरोमिक्वगच्छामिसुतप्राप्तिःकथंभवेत् ॥ ९ ॥ नराष्ट्रेनपुरेसौख्यंलेभेराजासुकेतुमान् ॥ साध्व्यास्वकान्तया
सार्धंप्रत्यहंदुःखितोऽभवत ॥ १० ॥ तावुभौदम्पतीनित्यंचिन्ताशोकपरायणौ ॥ पितरोऽस्यजलंदत्तंकवोष्णमुपभुञ्जते ॥ ११ ॥ राज्ञः
पश्चान्नपश्यामोयोऽस्मान्संतर्पयिष्यति ॥ इत्येवंसंस्मरन्तोऽस्यदुःखिताःपितरोऽभवन् ॥ १२ ॥ नबान्धवानमित्राणिनामात्याःसुहृद
स्तथा ॥ रोचयन्त्यस्यभूपस्यनगजाश्वाःपदातयः ॥ १३ ॥ नैराश्यंभूपतेस्तस्यनित्यंमनसिवर्त्तते ॥ नरस्यपुत्रहीनस्यनास्तिवैजन्मनःफलम्
॥ १४ ॥ अपुत्रस्यगृहंशून्यंहृदयंदुःखितंसदा ॥ पितृदेवमनुष्याणांनानृणत्वंसुतंविना ॥ १५ ॥ तस्मात्सर्वप्रयत्नेनसुतमुत्पादयेन्नरः ॥
इहलोकेयशस्तेषांपरलोकेशुभागतिः ॥ १६ ॥ येषांतुपुण्यकर्तृणांपुत्रजन्मगृहेभवेत् ॥ आयुरारोग्यसंपत्तिस्तेषांगेहेप्रवर्तते ॥ १७ ॥ पुत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जन्मगृहेयेषांलोकानांपुण्यकारिणाम् ॥ पुण्यंविनानचप्राप्तिर्विष्णुभक्तिंविनानृप ॥ १८ ॥ पुत्राश्चसंपदोवापिनिश्चयादितिमेमतिः ॥ एवं
चिन्तयमानोऽसौनशर्मलभतेनृपः ॥ १९ ॥ प्रत्यूषेऽचिन्तयद्राजानिशीथेऽचिन्तयत्ततः ॥ स्वयमात्मविनाशंचचिन्तयामासकेतुमान् ॥
॥ २० ॥ आत्मघातेदुर्गतिंचचिन्तयित्वातदानृपः ॥ दृष्ट्वात्मदेहंपतितमपुत्रत्वंतथवच ॥ २१ ॥ पुनर्विचार्यात्मबुद्ध्याआत्मनोहित
कारणम् ॥ अश्वारूढस्ततोराजाजगामगहनंवनम् ॥ २२ ॥ पुरोहितादयःसर्वेनजानन्तिगतंनृपम् ॥ गम्भीरेविपिनेराजामृगपक्षि
निषविते ॥ २३ ॥ विचचारतदाराजावनवृक्षान्विलोकयन् ॥ वटानश्वत्थबिल्वांश्चखर्जूरान्पनसांस्तथा ॥ २४ ॥ बकुलान्सप्तपर्णांश्चतिन्दुकां
स्तिलकानपि ॥ शालांस्तालांस्तमालांश्चददर्शसरलान्नृपः ॥ २५ ॥ इङ्गुदीककुभांश्चैवश्लेष्मातकनगांस्तथा ॥ शल्लकान्करमर्दांश्चपाट
लान्बदरानपि ॥ २६ ॥ अशोकांश्चपलाशांश्चशृगालाञ्शशकानपि ॥ वनमार्जारमहिषाञ्छल्लकांश्चमरानपि ॥ २७ ॥ ददर्शभुजगान्राजा
वल्मीकादर्धनिःसृतान् ॥ तथावनगजान्मत्तान्कलभैःसहसंगतान् ॥ २८ ॥ यूथपांश्चचतुर्दन्तान्करिणीयूथमध्यगान् ॥ तान्दृष्ट्वाचिन्त
यामासआत्मनःसगजान्नृपः ॥ २९ ॥ तेषांसविचरन्मध्येराजाशोभामवापह ॥ महदाश्चर्यसंयुक्तंददृशेविपिनंनृपः ॥ ३० ॥ मार्गेशिवा
रुताञ्छण्वन्नुलूकविरुतंतथा ॥ तांस्तानृक्षमृगान्पश्यन्बभ्रामवनमध्यतः ॥ ३१ ॥ एवंददर्शगहनंनृपोमध्यगतेरवौ ॥ क्षुत्तृड्भ्यांपीडितो
राजाइतश्चेतश्चधावति ॥ ३२ ॥ नपतिश्चिन्तयामाससंशुष्कगलकन्धरः ॥ मयातुकिंकृतंकर्मप्राप्तंदुःखंयदीदृशम् ॥ ३३ ॥ मयावैतोषिता
देवायज्ञैःपूजाभिरेवच ॥ तथवब्राह्मणादानस्तोषितामिष्टभोजनैः ॥ ३४ ॥ प्रजाश्चैवसदाकालंपुत्रवत्पालिताभृशम् ॥ कस्माद्दुःखंमयाप्राप्त
मीदृशंदारुणंमहत् ॥ ३५ ॥ इतिचिन्तापरोराजाजगामैवाग्रतोवनम् ॥ सुकृतस्यप्रभावेणसरोदृष्टमनुत्तमम् ॥ ३६ ॥ मीनसंस्पृश्यमानंच
पद्मैश्चपरिशोभितम् ॥ कारण्डैश्चक्रवाकैश्चराजहंसैश्चशोभितम् ॥ ३७ ॥ मकरैर्बहुभिर्मत्स्यैरन्यैर्जलचरैर्युतम् ॥ समीपेसरसस्तस्यमुनीनामा
श्रमान्बहून् ॥ ३८ ॥ ददर्शराजालक्ष्मीवाञ्छकुनैःशुभशंसिभिः ॥ दक्षिणंप्रास्फुरन्नेत्रमथसव्येतरःकरः ॥ ३९ ॥ प्रास्फुरन्नृपतेस्तस्य
कथयञ्शोभनंफलम् ॥ तस्यतीरेमुनीन्दृष्ट्वाकुर्वाणान्नैगमंजपम् ॥ ४० ॥ हर्षेणमहताविष्टोबभूवनृपसत्तमः ॥ अवतीर्यहयात्तस्मान्मुनीना
मग्रतःस्थितः ॥ ४१ ॥ पृथक्पृथग्ववन्देऽसौमुनींस्ताञ्शंसितव्रतान् ॥ कृताञ्जलिपुटोभूत्वादण्डवच्चपुनःपुनः ॥ प्रत्यूचुस्तेऽपिमुनयः
प्रसन्नानृपतेवयम् ॥ ४२ ॥ राजोवाच ॥ केभवन्तोऽत्रकथ्यन्तांकाचाख्याभवतामपि ॥ किमर्थंसंगतायूयंसत्यंवदतमेऽग्रतः ॥ ४३ ॥ मुनय

CC-0. In Public Domain. Digitization by eGangotri

 ऊचुः ॥ विश्वेदेवावयंराजन्स्नानार्थमिहचागताः ॥ माघोनिकटमायातएतस्मात्पञ्चमेऽहनि ॥ ४४ ॥ अद्यचैकादशीराजन्पुत्रदानामनामतः ॥
 पुत्रंददात्यसौतस्मात्पुत्रदाकारिणांनृणाम् ॥ ४५ ॥ राजोवाच ॥ एषवैसंशयोमह्यंपुत्रस्योत्पादनेमहान् ॥ यदितुष्टाभवन्तोवैपुत्रो
मेदीयतांतदा ॥ ४६ ॥ मुनयऊचुः ॥ अद्यैवदिवसेराजन्पुत्रदानामवर्तते ॥ एकादशीतिविख्यातंक्रियतांव्रतमुत्तमम् ॥ ४७ ॥ अभिषेका
त्ततोऽस्माकंकेशवस्यप्रसादतः ॥ अवश्यंतवराजेन्द्रपुत्रप्राप्तिर्भविष्यति ॥ ४८ ॥ इत्येवंवचनात्तेषांकृतंराज्ञाव्रतोत्तमम् ॥ मुनीनामुपदेशेन
पुत्रदायाविधानतः ॥ ४९ ॥ द्वादश्यांपारणंकृत्वामुनीन्नत्वापुनःपुनः ॥ आजगामगृहंराजाराज्ञीगर्भमथादधौ ॥ ५० ॥ पुत्रोजातःसूतिकाले
तेजस्वीपुण्यकर्मणा ॥ पितरंतोषयामासप्रजापालोबभूवसः ॥ ५१ ॥ तस्माद्राजन्प्रकर्त्तव्यंपुत्रदाव्रतमुत्तमम् ॥ लोकानांतुहितार्थायतवाग्रे
कथितंमया ॥ ५२ ॥ एकचित्तास्तुयेमर्त्याःकुर्वन्तिपुत्रदाव्रतम् ॥ पुत्रान्प्राप्येहलोकेतुमृतास्तेस्वर्गगामिनः ॥ पठनाच्छ्रवणाद्राजन्नग्निष्टोमफलं
लभेत् ॥ ५३ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर० उमापतिनारदसंवादेपौषशुक्लपुत्रदैकादशीनामद्विचत्वारिंशोऽध्यायः ॥ ४२ ॥ युधिष्ठिर
उवाच ॥ साधुकृष्णजगन्नाथआदिदेवजगत्पते ॥ कथयस्वप्रसादेनकृपांकुरुममोपरि ॥ १ ॥ माघस्यकृष्णपक्षेतुकावाचैकादशीभवेत् ॥ किं
नामकोविधिस्तस्याएतद्विस्तरतोवद ॥ २ ॥ श्रीभगवानुवाच ॥ शृणुत्वंनृपशार्दूलकृष्णामाघस्ययाभवेत् ॥ षट्तिलानामविख्यातासर्वपाप
प्रणाशिनी ॥ ३ ॥ षट्तिलायाःशृणुष्वत्वंकथांपापहरांशुभाम् ॥ यांपुलस्त्योमुनिश्रेष्ठोदाल्भ्यंप्रतिसमुक्तवान् ॥ ४ ॥ दाल्भ्यउवाच ॥
मर्त्यलोकमनुप्राप्ताःपापंकुर्वन्तिजन्तवः ॥ ब्रह्महत्यादिपापैश्चयुक्तायेगोवधादिभिः ॥ ५ ॥ परद्रव्यापहाराश्चपरव्यसनमोहिताः ॥ कथंनयान्ति
नरकंब्रह्मंस्तद्ब्रूहितत्त्वतः ॥ ६ ॥ अनायासेनभगवन्दानेनाल्पेनकेनचित् ॥ पापंप्रशमनंयातिएतन्मेवक्तुमर्हसि ॥ ७ ॥ पुलस्त्यउवाच ॥
साधुसाधुमहाभागगुह्यमेतत्सुदुर्लभम् ॥ यन्नकस्यचिदाख्यातंविष्णुब्रह्मेन्द्रदैवतैः ॥ ८ ॥ तदहंकथयिष्यामित्वयापृष्टोद्विजोत्तम ॥ माघमासे
तुसंप्राप्तेशुचिस्नातोजितेन्द्रियः ॥ ९ ॥ कामक्रोधाभिमानेर्ष्यालोभपैशुन्यवर्जितः ॥ देवदेवंचसंस्मृत्यपादौप्रक्षाल्यवारिभिः ॥ १० ॥ भूमा
वपतितंगृह्यगोमयंतत्रमानवः ॥ तिलान्प्रक्षिप्यकार्पासंपिण्डिकाश्चैवकारयेत् ॥ ११ ॥ अष्टोत्तरशतंचैवनात्रकार्याविचारणा ॥ ततोमाघेचसं
प्राप्तेह्यांषाढर्क्षंभवेद्यदि ॥ १२ ॥ मूलंवाकृष्णपक्षस्यैकादशीनियमांस्ततः ॥ गृह्णीयात्पुण्यकालेचविधानंतत्रमेशृणु ॥ १३ ॥ देवदेवंसमभ्यर्च्य

१ 'आदौ चैव' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुस्नातःप्रयतःशुचिः ॥ कृष्णनामानिसंकीर्त्यपुनःप्रस्खलितादिषु ॥ १४ ॥ रात्रौजागरणंकुर्यादादौहोमंचकारयेत् ॥ अर्चयेद्देवदेवेशं
द्वितीयेऽह्निपुनर्हरिम् ॥ १५ ॥ चन्दनागुरुकर्पूरैर्नैवेद्यंकृसरंतथा ॥ संस्मृत्यनाम्नाचततःकृष्णाख्येनपुनःपुनः ॥ १६ ॥ कूष्माण्डैर्नारिकेलैश्च
ह्यथवाबीजपूरकैः ॥ सर्वाभावेऽपिविप्रेन्द्रशस्तपूगफलैर्वृतम् ॥ अर्घंदद्याद्विधानेनपूजयित्वाजनार्दनम् ॥ १७ ॥ कृष्णकृष्णकृपालुस्त्व
मगतीनांगतिर्भव ॥ संसारार्णवमग्नानांप्रसीदपुरुषोत्तम ॥ १८ ॥ नमस्तेपुण्डरीकाक्षनमस्तेविश्वभावन ॥ सुब्रह्मण्यनमस्तेऽस्तुमहा
पुरुषपूर्वज ॥ गृहाणार्घ्यंमयादत्तंलक्ष्म्यासहजगत्पते ॥ १९ ॥ इत्यर्घमन्त्रः ॥ ततस्तुपूजयेद्विप्रमुदकुम्भंप्रदापयेत् ॥ छत्रोपानहवस्त्रैश्चकृष्णो
मेप्रीयतामिति ॥ २० ॥ कृष्णाधेनुःप्रदातव्यायथाशक्तिद्विजोत्तमे ॥ तिलपात्रंद्विजश्रेष्ठदद्यात्पात्रविचक्षणः ॥ २१ ॥ स्नानेप्राशनकेशस्ता
स्तथाकृष्णतिलामुने ॥ तान्प्रदद्यात्प्रयत्नेनयथाशक्तिद्विजोत्तमे ॥ २२ ॥ तिलप्ररोहजाःक्षेत्रेयावत्सङ्ख्यास्तिलाद्विज ॥ तावद्वर्षसहस्राणि
स्वर्गलोकेमहीयते ॥ २३ ॥ तिलस्नायीतिलोद्वर्तीतिलहोमीतिलोदकी ॥ तिलदाताचभोक्ताचषट्तिलाःपापनाशनाः ॥ २४ ॥ युधिष्ठिरउवाच॥
कृष्णकृष्णमहाबाहोनमस्तेविश्वभावन ॥ षट्तिलैकादशीभूतंकीदृशंफलमस्तिवै ॥ सोपाख्यानंममब्रूहियदितुष्टोऽसियादव ॥२५॥ श्रीकृष्णउवाच॥
शृणुराजन्यथावृत्तंदृष्टंतत्कथयामिते ॥ मर्त्यलोकेपुराह्यासीद्ब्राह्मण्येकाचनारद ॥ २६ ॥ व्रतचर्यारतानित्यंदेवपूजारतासदा ॥ मासोपवास
निरताममभक्ताचसर्वदा ॥ २७ ॥ कृष्णोपवाससंयुक्तामामपूजापरायणा ॥ शरीरंक्लेशितंचैवउपवासैर्द्विजोत्तम ॥ २८ ॥ देवानांब्राह्मणानांचकुमारीणां
चभक्तितः ॥ गृहादिकंप्रयच्छन्तीसर्वकालंमहासती ॥ २९ ॥ अतिकृच्छ्ररतासातुसर्वकालंतुवद्विज ॥ नदत्ताभिक्षुकेभिक्षाब्राह्मणानचतर्पिताः ॥३०॥
ततःकालेनमहतामयावैचिन्तितंद्विज ॥ शुद्धमस्याःशरीरंहिव्रतैःकृच्छ्रैर्नसंशयः ॥ ३१ ॥ अर्चितोवैष्णवोलोकःकायक्लेशेनवैतया ॥ नदत्तमन्नदानंहि
येनतृप्तिःपराभवेत् ॥ ३२ ॥ एवंज्ञात्वाअहंपार्थमर्त्यलोकमुपागतः ॥ कापालंरूपमास्थायभिक्षापात्रेचयाचिता ॥ ३३ ॥ कस्मात्त्वमागतोब्रह्म
न्कयासिवदमेऽग्रतः ॥ पुनरेवमयाप्रोक्तंदेहिभिक्षांचसुन्दरि ॥ ३४ ॥ तयाकोपेनमहतामृत्पिण्डस्ताम्रभाजने ॥ क्षिप्तोयावदहंब्रह्मन्पुनःस्वर्गंगत
स्ततः ॥ ३५ ॥ ततःकालेनमहतातापसीसुमहाव्रता ॥ सदेहास्वर्गमायाताव्रतचर्याप्रभावतः ॥ ३६ ॥ मृत्पिण्डिकाप्रदानेनगृहंप्राप्तंमनोरमम् ॥
संजातंचैवराजर्षेधान्यराशिविवर्जितम् ॥ ३७ ॥ गृहंयावन्निरीक्षेतनकिंचित्तत्रपश्यति ॥ तावद्गृहाद्विनिष्क्रान्तामामान्तेचागतानृप ॥ ३८ ॥ क्रोधेन

१ 'एकादश्यामुपोषितः' इ० पा०।

CC-0. In Public Domain. Digitization by eGangotri

महताविष्टमिदंवचनमब्रवीत् ॥ मयात्रतैश्चकृच्छ्रैश्चउपवासैरनेकशः ॥ ३९ ॥ पूजयाराधितोदेवःसर्वलोकस्यपालकः ॥ नतत्रदृश्यतेकिंचिद्गृहेमम
जनार्दन ॥४०॥ ततश्चोक्तंमयातस्यैगृहंगच्छमहाव्रते ॥ आगमिष्यन्तिसुतरांकौतूहलसमन्विताः ॥४१॥ देवपत्न्योहिद्रष्टुंत्वांविस्मयाभिसमन्विताः॥
द्वारंनोद्घाटयविनाषट्तिलापुण्यवाचनात् ॥ ४२ ॥एवमुक्तामयासातुगतावैमानुषीतदा ॥अत्रान्तरेसमायातादेवपत्न्यश्चपाण्डव॥४३॥ताभिश्चकथितं
तत्रत्वांद्रष्टुंहिसमागताः ॥ द्वारमुद्घाटयस्वाद्यत्वांप्रपश्यामशोभने ॥ ४४ ॥ मानुष्युवाच ॥ यदिमद्दर्शनंकार्यंसत्यंवाच्यंविशेषतः ॥ दत्तमे
षट्तिलापुण्यंद्वारोद्घाटनकारणात् ॥ ४५ ॥ श्रीकृष्णउवाच ॥ एकापिनावदत्तत्रषट्तिलैकादशीव्रतम् ॥ अन्ययाकथितंतत्रद्रष्टव्यामानुषी
मया ॥ ४६ ॥ ततोद्वारंसमुद्घाटचदृष्टाताभिश्चमानुषी ॥ नदेवीनचगन्धर्वीनासुरीनचपन्नगी ॥ ४७॥ दृष्टापूर्वंतथानारीयादृशीयंनृपर्षभ ॥
देवीनामुपदेशेनषट्तिलायाव्रतंकृतम् ॥ ४८ ॥ मानुष्यासत्यव्रतयाभुक्तिमुक्तिफलप्रदम् ॥ रूपकान्तिसमायुक्ताक्षणेनसमवापसा ॥ ४९ ॥
धनंधान्यंचवस्त्रादिसुवर्णरौप्यमेवच ॥ भवनंसर्वसंपन्नंषट्तिलायाःप्रभावतः ॥ ५० ॥ रूपकान्तिसमायुक्ताक्षणेनसमपद्यत ॥ अतितृष्णानकर्त्तव्या
वित्तशाठ्यंविवर्जयेत् ॥ ५१ ॥ आत्मवित्तानुसारेणतिलान्वस्त्राणिदापयेत् ॥ लभतेचैवमारोग्यंनरोजन्मनिजन्मनि ॥ ५२ ॥ नदारिद्र्यं
नकष्टत्वंनचदौर्भाग्यंमेवच ॥ संभवेद्वैनृपश्रेष्ठषट्तिलासमुपोषणात् ॥ ५३ ॥ अनेनविधिनाभूपतिलदातानसंशयः ॥ मुच्यतेपातकैःसर्वैरनायासेनमानवः ॥ ५४ ॥ दानंचविधिवत्पात्रेसर्वपातकनाशनम् ॥ नानर्थःकश्चिन्नायासःशरीरेनृपसत्तम ॥ ५५ ॥ इतिश्रीपाद्मेमहापुराणे
पञ्चप० उत्तर० उमापतिनारदसंवादेमाघकृष्णाषट्तिलैकादशीनामत्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥ युधिष्ठिरउवाच ॥ साधुकृष्णत्वयाप्रोक्तमादि
देवोभवान्प्रभो ॥ स्वेदजाअण्डजाश्चैवउद्भिज्जाश्चजरायुजाः॥१॥तेषांकर्त्ताविकर्तात्वंपालकःक्षयकारकः ॥ माघस्यकृष्णपक्षेतुषट्तिलाकथितात्वया॥
॥ २ ॥ शुक्लेचकाभवेद्देवकथयस्वप्रसादतः ॥ किंनामकोविधिस्तस्याःकोदेवस्तत्रपूज्यते ॥ ३ ॥ श्रीकृष्णउवाच ॥ कथयिष्यामिराजेन्द्रशुक्ले
माघस्ययाभवेत् ॥ जयानामेतिविख्यातासर्वपापहरापरा ॥ ४ ॥ पवित्रापापहन्त्रीचकामदामोक्षदानृणाम् ॥ ब्रह्महत्यापहन्त्रीचपिशाचत्व
विनाशिनी ॥ ५ ॥ नैवतस्याव्रतेचीर्णेप्रेतत्वंजायतेनृणाम् ॥ नातःपरतराकाचित्पापघ्नीमोक्षदायिनी ॥ ६ ॥ एतस्मात्कारणाद्राजन्कर्त्तव्यासा
प्रयत्नतः ॥ श्रूयतांराजशार्दूलकथापौराणिकीशुभा ॥ ७ ॥ पङ्कजेचपुराणेऽस्यामहिमाकथितोमया ॥ एकदानाकलोकेवाइन्द्रोराज्यंचकारह
॥ ८ ॥ देवास्तत्रसुखेनैवनिवसन्तिमनोरमे ॥ पीयूषपाननिरताअप्सरोगणसेविताः ॥ ९ ॥ नन्दनंतुवनंतत्रपारिजातोपसेवितम् ॥ रमयन्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रमन्तेऽत्रअप्सरोभिर्दिवौकसः ॥ १० ॥ एकदारममाणोऽसौदेवेन्द्रःस्वेच्छयानृप ॥ नर्त्तयामासवैहर्षात्पञ्चाशत्कोटिनायकः ॥ ११ ॥ गन्ध
र्वास्तत्रगायन्तिगन्धर्वःपुष्पदन्तकः॥ चित्रसेनस्तुतत्रैवचित्रसेनसुतातथा ॥१२॥ मालिनीतिचनाम्नातुचित्रसेनस्ययोषिता ॥ मालिन्यास्तुसमुत्पन्ना
पुष्पवन्तीचनामतः ॥ १३ ॥ पुष्पदन्तस्यपुत्रोऽसौमाल्यवान्नामनामतः ॥ पुष्पवन्त्याश्चरूपेणमाल्यवानतिमोहितः ॥ १४ ॥ तयाह्येवंकटा
क्षैश्चमाल्यवांश्चवशीकृतः ॥ लावण्यरूपसंपन्नंतस्यारूपंनिशामय ॥ १५ ॥ बाहूतस्याश्चकामेनकण्ठपाशौकृताविव ॥ कर्णायतेतुनयनेरक्तान्ते
घूर्णितेतथा ॥ १६ ॥ कर्णौतुशोभनौतस्याःकुण्डलाभ्यांनृपोत्तम ॥ कम्बुग्रीवायुतासैवदिव्याभरणभूषिता ॥ १७ ॥ पीनोन्नतौकुचौतस्यास्तौ
हेमकलशाविव ॥ मध्यंक्षामंचचार्वङ्ग्यामुष्टिग्राह्यमनुत्तमम् ॥ १८ ॥ नितम्बौविस्तृतौचास्याविस्तीर्णाजघनस्थली ॥ चरणौशोभमानौचरक्तो
त्पलसमद्युती ॥ १९ ॥ ईदृश्यापुष्पवन्त्यासमाल्यवानतिमोहितः ॥ शक्रस्यपरितोषायनृत्यार्थंतौसमागतौ ॥ २० ॥ गायमानौतुतौतत्र
अप्सरोगणसेवितौ ॥ मदनाधिपरीताङ्गौपुष्पवन्तीचमाल्यवान् ॥ २१ ॥ परस्परानुरागेणव्यामोहवशमागतौ ॥ नशुद्धगानंगायेतांचित्तभ्रमसम
न्वितौ ॥ २२ ॥ बद्धदृष्टीतथान्योन्यंकामबाणवशंगतौ ॥ ज्ञात्वालेखर्षभस्तत्रसंगतंमानसंतयोः ॥ २३ ॥ तालक्रियामानलोपात्तथागीत
विसर्जनात्॥ चिन्तयित्वातुमघवाह्यवमानंतथात्मनः ॥२४॥कुपितश्चतयोरर्थेशापंदास्यन्निदंजगौ॥ धिग्धिग्वांपतितौमूढावाज्ञाभङ्गकृतौमम ॥२५॥
युवांपिशाचौभवतांदम्पतीभावधारिणौ ॥ मर्त्यलोकमनुप्राप्तौभुञ्जानौकर्मणःफलम् ॥ २६ ॥ एवंमघवताशप्तावुभौदुःखितमानसौ ॥ हिमवन्तंगिरिं
प्राप्ताविन्द्रशापाद्विमोहितौ ॥ २७ ॥ उभौपिशाचतांप्राप्तौदारुणंदुःखमेवच ॥ संतप्तमानसौतत्रहिमकृच्छ्रगतावुभौ ॥ २८ ॥ गन्धर्वत्वमप्सरस्त्वं
नजानीतोविमोहितौ ॥ पीडयमानोनिदाघेनदेहपातकजेनच ॥ २९ ॥ ननिशायांसुखंशान्तिंलभेतेकर्मपीडितौ ॥ परस्परंवदमानौचरेतुर्गिरिगह्वरे॥
॥ ३० ॥ पीडयमानौतुशीतेनतुषारप्रभवेणतौ ॥ दन्तघर्षंप्रकुर्वाणौरोमाञ्चितवपुर्धरौ ॥ ३१ ॥ ऊचेपिशाचःसतदातांपत्नींस्वांपिशाचिकाम् ॥
किमनल्पंकृतंपापंदारुणंरोमहर्षणम्॥३२॥ येनप्राप्तंपिशाचत्वंस्वेनदुष्कृतकर्मणा ॥ नरकंदारुणंमत्वापिशाचत्वंचदुःखदम् ॥३३॥तस्मात्सर्वप्रयत्नेन
नपातकंनसमाचरेत् ॥ इतिचिन्तापरौतत्रतावास्तांदुःखकर्शितौ ॥ ३४ ॥ दैवयोगात्तयोःप्राप्तामाघस्यैकादशीतिथिः ॥ जयानामेतिविख्याता
तिथीनामुत्तमातिथिः ॥ ३५ ॥ तस्मिन्दिनेतुसंप्राप्तेतावाहारविवर्जितौ ॥ आसातेतत्रनृपतेजलपानविवर्जितौ ॥ ३६ ॥ नकृतोजीवघातश्चन
पत्रफलभक्षणम् ॥ अश्वत्थस्यसमीपेतौसर्वदादुःखसंयुतौ ॥ ३७ ॥ रविरस्तंगतोराजंस्तथैवस्थितयोस्तयोः ॥ प्राप्ताचैवनिशाघोरादारुणा

Nepal Sanskrit ... Campus

CC-0. In Public Domain. Digitization by eGangotri

प्राणहारिणी ॥ ३८ ॥ वेपमानौततस्तौतुततःसुषुपतुःक्षितौ ॥ परस्परेणसंलग्नौगात्रयोर्भुजयोरपि ॥ ३९ ॥ ननिद्रांनरतंतत्रनतौसौख्यमविंद
ताम् ॥ एवंतौराजशार्दूलशापेनेन्द्रस्यपीडितौ ॥ ४० ॥ इत्थंतयोर्दुःखितयोर्निर्जगामनिशीथिनी ॥ मार्तण्डउदयंप्राप्तोद्वादशीदिवसागमे ॥
॥ ४१ ॥ मयातुराजशार्दूलतयोर्मुक्तिर्धृताहृदि ॥ जयायाःसुव्रतंचीर्णंरात्रौजागरणंकृतम् ॥ ४२ ॥ तस्माद्व्रतप्रभावाच्चयथाजातंतथाशृणु ॥ द्वादशी
दिवसेप्राप्तेतथाचीर्णेजयाव्रते ॥४३॥ विष्णोःप्रभावान्नृपतेपिशाचत्वंतयोर्गतम्॥पुष्पवन्तीमाल्यवन्तौपूवरूपौबभूवतुः॥४४॥पुरातनस्नेहयुतौपूर्वाल
ङ्कारधारिणौ॥विमानमधिरूढौतौगतौनाकेमनोरमे ॥४५॥देवेन्द्रस्याग्रतोगत्वाप्रणामंचक्रतुर्मुदा॥ तथाविधौतुतौदृष्ट्वामघवाविस्मितोऽब्रवीत्॥४६॥
इन्द्रउवाच ॥ वदतंकेनपुण्येनपिशाचत्वंहिवांगतम् ॥ ममशापंचसंप्राप्तौकेनदेवेनमोचितौ ॥ ४७ ॥ माल्यवानुवाच ॥ वासुदेवप्रसादेन
जयायास्तुव्रतेनच ॥ पिशाचत्वंगतंस्वामिंस्तवभक्तिप्रभावतः ॥ ४८ ॥ इतिश्रुत्वातुमघवाप्रत्युवाचपुनस्तथा ॥ पवित्रौपावनौजातौवन्द
नीयौममापिच ॥ ४९ ॥ हरिवासरकर्तारौविष्णुभक्तिपरायणौ ॥ हरिवासरसँल्लीनायेचकृष्णपरायणाः ॥ ५० ॥ अस्माकमपिमर्त्यास्ते
पूज्याश्चैवनसंशयः ॥ विहरस्वयथासौख्यंपुष्पवन्त्यासुरालये ॥ ५१ ॥ कृष्णउवाच ॥ एतस्मात्कारणाद्राजन्कर्त्तव्योहरिवासरः ॥ जया
तुराजशार्दूलब्रह्महत्यापहारिणी ॥ ५२ ॥ सर्वदानानितेनैवसर्वयज्ञाअशेषतः ॥ दत्तानिकारिताश्चैवजयायास्तुव्रतंकृतम् ॥ ५३ ॥
कल्पकोटिर्भवेत्तावद्वैकुण्ठेमोदतेध्रुवम् ॥ पठनाच्छ्रवणाद्राजन्नग्निष्टोमफलंलभेत् ॥ ५४ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०उमापति
नारदसंवादेमाघशुक्लजयैकादशीमाहात्म्यंनामचतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥ युधिष्ठिरउवाच ॥ फाल्गुनस्यासितेपक्षेकिंनामैकादशीभवेत् ॥
कथयस्वप्रसादेनवासुदेवममाग्रतः ॥ १ ॥ श्रीकृष्णउवाच ॥ नारदःपरिपप्रच्छब्रह्माणंकमलासनम् ॥ फाल्गुनस्यासितेपक्षेविजयानामनामतः ॥
तस्याःपुण्यंद्विजश्रेष्ठकथयस्वप्रसादतः ॥ २ ॥ ब्रह्मोवाच ॥ शृणुनारदवक्ष्यामिकथांपापहरांपराम् ॥ यन्नकस्यचिदाख्यातंमयैतद्विजयाव्रतम् ॥
॥ ३ ॥ पुरातनंव्रतंह्येतत्पवित्रंपापनाशनम् ॥ जयंददातिविजयानृपाणांवैनसंशयः ॥ ४ ॥ पुरारामोवनंयातोवर्षाण्येवचतुर्दश ॥ न्यव
सत्पञ्चवट्यांतुसहसीतःसलक्ष्मणः ॥ ५ ॥ तत्रैववसतस्तस्यरामस्यविजयात्मनः ॥ रावणेनहृतालौल्याद्भार्यासीतायशस्विनी ॥ ६ ॥ तेनदुःखेन ॥ ४७ ॥
नरामोऽपिमोहमभ्यागतस्तदा ॥ अग्रमञ्जटायुषमथोददर्शविगतायुषम् ॥ ७ ॥ कबन्धोनिहतःपश्चाद्भ्रमतारण्यमध्यतः ॥ सुग्रीवेणसमंतस्यसखि
त्वंसमपद्यत ॥ ८ ॥ वानराणामनीकानिरामार्थंसंगतानिच ॥ ततोहनुमताद्दृष्टालङ्कोद्यानेतुजानकी ॥ ९ ॥ रामसंज्ञापनंतस्यैदत्तंकर्ममहत्कृ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तम् ॥ पुनःसमेत्यरामेणसर्वंतत्रनिवेदितम् ॥ १० ॥ अथश्रुत्वारामचन्द्रोवाक्यंचैवहनूमतः ॥ सुग्रीवानुमतेनैवप्रस्थानंसमरोचयत् ॥ ११ ॥
सौमित्रेकेनपुण्येनतीर्यतेवरुणालयः ॥ अगाधोनितरामेषयादोभिश्वसमाकुलः ॥ उपायंनैवपश्यामियेनासौसुतरोभवेत् ॥ १२ ॥ लक्ष्मण
उवाच ॥ आदिदेवस्त्वमेवासिपुराणपुरुषोत्तमः ॥ बकदाल्भ्योमुनिश्चात्रवर्ततेद्वीपमध्यतः ॥ १३ ॥ अस्मात्स्थानाद्योजनार्धमाश्रमस्तस्य
राघव ॥ अन्येचब्राह्मणास्तत्रबहवोरघुनन्दन ॥ १४ ॥ तंपृच्छगत्वाराजेन्द्रपुराणमृषिपुंगवम् ॥ इतिवाक्यंततःश्रुत्वालक्ष्मणस्यातिशोभनम् ॥
॥१५॥ जगामराघवोद्रष्टुंबकदाल्भ्यंमहामुनिम् ॥ प्रणनाममुनिंमूर्ध्नारामोविष्णुमिवामरः ॥ १६ ॥ ज्ञात्वामुनिस्ततोरामंपुराणंपुरुषोत्तमम् ॥ केनापि
कारणेनैवप्रविष्टोमानुषींतनुम् ॥ १७ ॥ उवाचसऋषिस्तुष्टःकुतोरामतवागमः ॥ १८ ॥ रामउवाच ॥ त्वत्प्रसादादहंविप्रतीरंनदनदीपतेः ॥
आगतोऽस्मिससैन्योऽत्रलङ्कांजेतुंसराक्षसाम् ॥ १९ ॥ भवतश्चानुकूलत्वात्तीर्यतेऽब्धिर्यथामया ॥ तमुपायंवदमुनेप्रसादंकुरुसाम्प्रतम् ॥ २० ॥
एतस्मात्कारणादेवद्रष्टुंत्वाहमिहागतः ॥ रामस्यवचनंश्रुत्वाबकदाल्भ्योमहामुनिः ॥ २१ ॥ उवाचसुप्रसन्नात्मारामंराजीवलोचनम् ॥ कर्तव्यमद्यते
रामव्रतानांव्रतमुत्तमम् ॥ २२ ॥ कृतेनयेनसहसाविजयस्तेभविष्यति ॥ लङ्कांजित्वाराक्षसांश्चस्वच्छांकीर्तिमवाप्स्यसि ॥ २३ ॥ एकाग्रमानसो
भूत्वाव्रतमेतत्समाचर ॥ फाल्गुनस्यासितेपक्षेविजयैकादशीभवेत् ॥ २४ ॥ तस्याव्रतेनहेरामविजयस्तेभविष्यति ॥ निःसंशयंसमुद्रंत्वंतरिष्यसि
सवानरः ॥ २५ ॥ विधिस्तुश्रूयतांराजन्व्रतस्यास्यफलप्रदः ॥ दशम्यान्दिवसेप्राप्तेकुम्भमेकंतुकारयेत् ॥ २६ ॥ हैमंवाराजतंवापिताम्रंवाप्यथ
मृण्मयम् ॥ स्थापयेच्छोभितंचवजलपूर्णंसपल्लवम् ॥ २७ ॥ सप्तधान्यान्यधस्तस्ययवानुपरिविन्यसेत ॥ तस्योपरिन्यसेदेवंहैमंनारायणं
प्रभुम् ॥ २८ ॥ एकादशीदिनेप्राप्तेप्रातःस्नानंसमाचरेत् ॥ निश्चलंस्थापयेत्कुम्भंकण्ठमाल्यानुलेपनैः ॥ २९ ॥ पूगीफलैर्नालिकेरैःपूजयेच्च
विशेषतः ॥ गन्धैर्धूपैश्चदीपैश्चनैवेद्यैर्विविधैरपि ॥ ३० ॥ कुंभाग्रेतद्दिनंरामनीयतेसत्कथादिभिः ॥ रात्रौजागरणंचैवतस्याग्रेकारयेद्बुधः ॥ ३१ ॥
प्रकाशयेद्घृतदीपमखण्डव्रतहेतवे ॥ द्वादशीदिवसेप्राप्तेमार्तण्डस्योदयेसति ॥ ३२ ॥ नीत्वाकुम्भंजलोद्देशेनद्याःप्रस्रवणेतथा ॥ तडागेस्थापयित्वातं
पूजयित्वायथाविधि ॥ ३३ ॥ दद्यात्सदेवंतंकुम्भंब्राह्मणेवेदपारगे ॥ कुम्भेनसहराजेन्द्रमहादानानिदापयेत् ॥ ३४ ॥ अनेनविधिनारामयूथ
पैःसहसंगतः ॥ कुरुव्रतंप्रयत्नेनविजयस्तेभविष्यति ॥ ३५ ॥ ब्रह्मोवाच ॥ इतिश्रुत्वाततोरामोयथोक्तमकरोत्तदा ॥ कृतेव्रतेसविजयीबभूव
रघुनन्दनः ॥ ३६ ॥ प्राप्तासीताजितालङ्कापौलस्त्योनिहतोरणे ॥ अनेनविधिनापुत्रयेकुर्वन्तिनराव्रतम् ॥ ३७ ॥ इहलोकेजयप्राप्तिःपरलोकस्त

CC-0. In Public Domain. Digitization by eGangotri

थाक्षमः ॥ एतस्मात्कारणात्पुत्रकर्तव्यंविजयाव्रतम् ॥ ३८ ॥ विजयायाश्चमाहात्म्यंसर्वकिल्बिषनाशनम् ॥ पठनाच्छ्रवणाच्चैववाजपेयफलंलभेत्॥
॥ ३९ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०फाल्गुनकृष्णविजयामाहात्म्यंनामपञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥ युधिष्ठिरउवाच ॥ माहा
त्म्यंविजयायाश्चश्रुतंकृष्णमहाफलम् ॥ फाल्गुनस्यार्जुनेपक्षेयन्नाम्नीतांवदाधुना ॥ १ ॥ श्रीकृष्णउवाच ॥ धर्मपुत्रमहाभागशृणुवक्ष्यामिते
ऽधुना ॥ योक्तापृष्टेनमान्धात्रावसिष्ठेनमहात्मना ॥ २ ॥ फाल्गुनस्यविशेषेणविशेषःकथितोनृप ॥ आमलकीव्रतंपुण्यंविष्णुलोकफलप्रदम् ॥ ३ ॥
आमलक्यास्तलेगत्वाजागरंतत्रकारयेत् ॥ कृत्वाजागरणंरात्रौगोसहस्रफलंलभेत् ॥ ४ ॥ मान्धातोवाच ॥ आमलकीकदाह्येषाउत्पन्नाद्विज
सत्तम ॥ एतत्सर्वंममाचक्ष्वपरंकौतूहलंहिमे ॥५॥ कस्मादियंपवित्राचकस्मात्पापप्रणाशिनी ॥ कस्माज्जागरणंकृत्वागोसहस्रफलंलभेत् ॥६॥ वसिष्ठ
उवाच॥कथयामिमहाभागयथेयमभवत्क्षितौ ॥ आमलकीमहावृक्षःसर्वपापप्रणाशनः ॥७॥ एकार्णवेपुराजातेनष्टेस्थावरजङ्गमे ॥ नष्टेदेवासुरगणेप्रन
ष्टोरगराक्षसे ॥ ८ ॥ तत्रदेवादिदेवेशःपरमात्मासनातनः ॥ जगामब्रह्मपरममात्मनःपदमव्ययम् ॥ ९ ॥ ततोऽस्यजाग्रतोब्रह्ममुखाच्छशिसमप्रभः ॥
ष्ठीवनाद्बिन्दुरुत्पन्नःसभूमौनिपपातह ॥ १० ॥ तस्माद्बिन्दोःसमुत्पन्नःस्वयंधात्रीनगोमहान् ॥ शाखाप्रशाखाबहुलःफलभारेणनामितः ॥ ११ ॥
सर्वेषांचैववृक्षाणामादिरोहःप्रकीर्तितः ॥ ब्रह्मणाथततःपश्चात्संसृष्टाश्चइमाःप्रजाः ॥१२॥ देवदानवगन्धर्वयक्षराक्षसपन्नगान् ॥ असृजद्भगवान्देवोमह
र्षींश्चतथामलान् ॥ १३ ॥ आजग्मुस्तत्रदेवास्तेयत्रधात्रीहरिप्रिया ॥ तांदृष्ट्वातेमहाभागपरंविस्मयमागताः ॥ १४ ॥ नजानीमइमंवृक्षंचिन्तयन्तोऽ
भिसंस्थिताः ॥ एवंचिन्तयतांतेषांवागुवाचाशरीरिणी ॥१५॥ आमलकीनगोह्येषप्रवरोवैष्णवोमतः ॥ अस्यसंस्मरणादेवलभेद्गोदानजंफलम्॥१६॥
स्पर्शनाद्द्विगुणंपुण्यंत्रिगुणंभक्षणात्तथा ॥ तस्मात्सर्वप्रयत्नेनसेव्याआमलकीसदा ॥१७॥ सर्वपापहराप्रोक्तावैष्णवीपापनाशिनी ॥ तस्यामूलेस्थितो
विष्णुस्तदूर्ध्वेचपितामहः ॥ १८ ॥ स्कन्धेचभगवान्रुद्रःसंस्थितःपरमेश्वरः ॥ शाखासुमुनयःसर्वेप्रशाखासुचदेवताः ॥ १९ ॥ पर्णेषुचासतेदेवाः
पुष्पेषुमरुतस्तथा ॥ प्रजानांपतयःसर्वेफलेष्वेवव्यवस्थिताः ॥ २० ॥ सर्वदेवमयीह्येषाधात्रीचकथितामया ॥ तस्मात्पूज्यतमाह्येषाविष्णुभक्तिपरा
यणैः ॥ २१ ॥ ऋषयऊचुः ॥ कोभवान्नहिजानीमःकस्मात्कारणतांगतः ॥ देवोवायदिवाचान्यःकथयस्वयथातथम् ॥ २२ ॥ वागुवाच ॥ यःकर्ता
सर्वभूतानांभुवनानांचसर्वशः ॥ विदुषामपिदुष्प्रेक्षस्सोऽहंविष्णुःसनातनः॥२३॥तच्छ्रुत्वादेवदेवस्यभाषितंब्रह्मणःसुताः ॥ अनादिनिधनंदेवंस्तोतुंतत्र
प्रचक्रमुः ॥ २४॥ नमोभूतात्मभूतायआत्मनेपरमात्मने ॥ अच्युतायनमोनित्यमनन्तायनमोनमः ॥ २५ ॥ दामोदरायकवयेयज्ञेशायनमोनमः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंस्तुतस्तुऋषिभिस्तुतोषभगवान्हरिः ॥ प्रत्युवाचमहर्षींस्तानभीष्टंकिंददामिवः ॥ २६ ॥ ऋषयऊचुः ॥ यदितुष्टोसिभगवन्नस्माकंहितकाम्यया ॥
व्रतंकिंचित्समाख्याहिस्वर्गमोक्षफलप्रदम् ॥२७॥ धनधान्यप्रदंपुण्यमात्मनस्तुष्टिकारकम् ॥ अल्पायासंबहुफलंव्रतानामुत्तमंव्रतम् ॥ २८ ॥ कृतेन
येनदेवेशविष्णुलोकेमहीयते ॥२९॥ विष्णुरुवाच ॥ फाल्गुनेशुक्लपक्षेतुपुष्येणद्वादशीयदि ॥ भवेत्साचमहापुण्यामहापातकनाशिनी ॥३०॥ विशेष
स्तत्रकर्त्तव्यः शृणुध्वंद्विजसत्तमाः ॥ आमलकींचसंप्राप्यजागरंतत्रकारयेत् ॥३१॥ सर्वपापविनिर्मुक्तोगोसहस्रफलंलभेत् ॥ एतद्वःकथितंविप्राव्रतानां
व्रतमुत्तमम् ॥ अर्चयित्वाच्युतंतस्यांविष्णुलोकान्नमुच्यते॥३२॥ऋषयऊचुः॥व्रतस्यास्यविधिंब्रूहिपरिपूर्णंकथंभवेत् ॥ केमन्त्राःकेनमस्कारादेवताका
प्रकीर्तिता॥३३॥कथंदानंकथंस्नानंकश्चपूजाविधिःस्मृतः॥अर्घार्चनस्यमन्त्रंतुकथयस्वयथातथम्॥३४॥विष्णुरुवाच ॥ श्रूयतांयोविधिःसम्यग्व्रतस्या
स्यद्विजर्षभाः ॥ एकादश्यांनिराहारःस्थित्वाचैवपरेऽहनि॥३५॥भोक्ष्येऽहंपुण्डरीकाक्षशरणंमेभवाच्युत॥इतिकृत्वातुनियमंदन्तधावनपूर्वकम्॥३६॥
नालपेत्पतितांश्चौरांस्तथापाषण्डिनोनरान् ॥ दुर्वृत्तान्भिन्नमर्यादान्गुरुदारप्रधर्षकान् ॥ ३७ ॥ अपराह्णेततःस्नानंविधिनाकारयेद्बुधः ॥ नद्यांतडागे
कूपेवागृहेवानियतात्मवान् ॥ ३८ ॥ मृत्तिकालम्भनंपूर्वंततःस्नानंचकारयेत् ॥ अश्वक्रान्तेरथक्रान्तेविष्णुक्रान्तेवसुन्धरे ॥ ३९॥ मृत्तिकेहरमेपापं
यन्मयादुष्कृतंकृतम् ॥ ४० ॥ इतिमृत्तिकामन्त्रः ॥ त्वमम्बुसर्वभूतानांजीवनंतनुरक्षकम् ॥ स्वेदजोद्भिज्जजातीनांरसानांपतयेनमः ॥ ४१ ॥ स्नातो
ऽहंसर्वतीर्थेषुह्रदप्रस्रवणेषुच ॥ नदीषुदेवखातेषुइदंस्नानंतुमेभवेत् ॥ ४२ ॥ इतिस्नानमन्त्रः ॥ जामदग्न्यंमुनिंचैवकारयित्वाहिरण्मयम् ॥ माष
कस्यसुवर्णस्यतदर्धार्धेनवापुनः ॥ ४३ ॥ गृहमागत्यपूजायाःपूजाहोमंतुकारयेत् ॥ ततश्चामलकींगच्छेत्सर्वोपस्करसंयुतः ॥ ४४ ॥ आमलकींततो
गत्वापरिशोध्यसमन्ततः ॥ स्थापयेत्सततंकुम्भमव्रणंमन्त्रपूर्वकम् ॥ ४५ ॥ पञ्चरत्नसमोपेतंदिव्यगन्धाधिवासितम् ॥ छत्रोपानद्युगोपेतंसितचन्दन
चर्चितम्॥४६॥स्रग्दामलम्बितग्रीवंसर्वधूपविधूपितम् ॥ दीपमालाकुलंकुर्यात्सर्वतःसुमनोहरम्॥४७॥तस्योपरिन्यसेत्पात्रंदिव्यलाजैःप्रपूरितम् ॥ पा
त्रोपरिन्यसेद्देवंजामदग्न्यंमहाप्रभम् ॥ ४८ ॥ विशोकायनमःपादौजानुनीविश्वरूपिणे ॥ उग्रायचततोऽप्यूरूकटीदामोदरायच॥४९॥उदरंपद्मनाभाय
उरःश्रीवत्सधारिणे ॥ चक्रिणेवामबाहुंचदक्षिणंगदिनेनमः॥५०॥वैकुण्ठायनमःकण्ठमास्यंयज्ञमुखायवै ॥ नासांविशोकनिधयेवासुदेवायचाक्षिणी ॥
॥ ५१ ॥ ललाटंवामनायेतिरामायेतिभ्रुवौनमः ॥ सर्वात्मनेतुतच्छीर्षंनमइत्यभिपूजयेत् ॥ ५२ ॥ इतिपूजामन्त्रः ॥ ततोदेवाधिदेवायअर्घंचैवप्रदा
पयेत् ॥ फलेनचैवशुभ्रेणभक्तियुक्तेनचेतसा ॥ ५३ ॥ नमस्तेदेवदेवेशजामदग्न्यनमोऽस्तुते ॥ गृहाणार्घ्यमिमंदत्तमामलक्यायुतोहरे ॥ ५४ ॥ अर्घ्य

CC-0. In Public Domain. Digitization by eGangotri

मन्त्रः॥ततोजागरणंकुर्याद्भक्तियुक्तेनचेतसा ॥नृत्यैर्गीतैश्चवादित्रैर्धर्माख्यानैःस्तवैरपि ॥५५॥वैष्णवैश्चतथाख्यानैःक्षपयेत्सर्वशर्वरीम् ॥ प्रदक्षिणांततः
कुर्याद्धात्र्यावैविष्णुनामभिः ॥ ५६ ॥ अष्टाधिकंशतंचैवअष्टाविंशतिरेववा ॥ ततःप्रभातेसमयेकृत्वानीराजनंहरेः ॥ ५७ ॥ ब्राह्मणंपूजयित्वातुसर्वं
तस्मैनिवेदयेत् ॥ जामदग्न्यघटेतत्रवस्त्रयुग्ममुपानहौ ॥५८॥ जामदग्न्यस्वरूपेणप्रीयतांममकेशवः ॥ ततश्चामलकींस्पृष्ट्वाकृत्वाचैवप्रदक्षिणाम्॥५९॥
स्नानंकृत्वाविधानेनब्राह्मणान्भोजयेत्ततः ॥ ततश्चस्वयमश्नीयात्कुटुम्बेनसमावृतः॥ ६० ॥ एवंकृतेनयत्पुण्यंतत्सर्वंकथयामिते ॥ सर्वतीर्थेषुयत्पुण्यं
सर्वदानेषुयत्फलम् ॥ ६१ ॥ सर्वयज्ञाधिकंचैवलभतेनात्रसंशयः ॥ एतद्वःसर्वमाख्यातंव्रतानामुत्तमंव्रतम् ॥ ६२ ॥ एतावदुक्त्वादेवेशस्तत्रैवान्तर
धीयत ॥ तेचापिऋषयःसर्वेचक्रुःसर्वमशेषतः ॥ ६३ ॥ तथात्वमपिराजेन्द्रकर्तुमर्हसिसत्तम ॥ व्रतमेतद्दुराधर्षंसर्वपापप्रमोचनम् ॥ ६४ ॥ इति
श्रीपाद्मेमहापुराणेपञ्चप०उत्तर०उमापतिनारदसंवादेफाल्गुनशुक्लामलक्येकादशीनामषट्चत्वारिंशोऽध्यायः ॥ ४६ ॥ युधिष्ठिरउवाच ॥ फाल्गुनस्य
सितेपक्षेश्रुताचामलकीतथा ॥ चैत्रस्यकृष्णपक्षेतुकिंनामैकादशीभवेत् ॥ १ ॥ श्रीकृष्णउवाच ॥ शृणुराजेन्द्रवक्ष्यामिआख्यानंपापनाशनम् ॥
यल्लोमशोऽब्रवीत्पृष्टोमान्धात्राचक्रवर्तिना ॥ २ ॥ मान्धातोवाच ॥ भगवञ्छ्रोतुमिच्छामिलोकानांहितकाम्यया ॥ चैत्रस्यप्रथमेपक्षेकानामैकादशी
भवेत् ॥ कोविधिःकिंफलंतस्याःकथयस्वप्रसादतः ॥३॥ लोमशउवाच ॥ चैत्रमास्यसितेपक्षेनाम्नावैपापमोचिनी ॥ एकादशीसमाख्यातापिशाचत्व
विनाशिनी ॥ ४ ॥ शृणुतस्याःप्रवक्ष्यामिकामदांसिद्धिदांनृप ॥ कथांविचित्रांशुभदांपापघ्नींधर्मदायिनीम् ॥ ५ ॥ पुराचैत्ररथोद्देशेह्यप्सरोगण
सेविते ॥ वसन्तसमयेप्राप्तेषट्पदाकुलितेवने ॥६॥ गन्धर्वकन्यावादित्रैरमन्तेसहकिन्नरैः ॥ पाकशासनमुख्याश्चक्रीडन्तित्रिदिवौकसः ॥ ७ ॥ नापरं
सुखदंकिंचिद्विनाचैत्ररथाद्वनम् ॥ तस्मिन्वनेतुमुनयस्तपन्तिबहुलंतपः ॥ ८ ॥ मेधाविनामानमृषिंतत्रस्थंब्रह्मचारिणम् ॥ अप्सरास्तंमुनिवरंमोहना
योपचक्रमे ॥ ९ ॥ मञ्जुघोषेतिविख्याताभावंतस्यवितन्वती ॥ क्रोशमात्रंस्थितातस्यभयादाश्रमसन्निधौ ॥ १० ॥ गायन्तीमधुरंसाधुपीडयन्ती
विपञ्चिकाम् ॥ गायन्तींतामथालोक्यपुष्पचन्दनसेविताम् ॥११॥ कामोऽपिविजयाकाङ्क्षीशिवभक्तान्मुनीश्वरान् ॥ तस्याःशरीरेसंवासमकरोन्मनसः
सुतः ॥ १२ ॥ कृत्वाभ्रुवौधनुष्कोटिंगुणंकृत्वाकटाक्षकम् ॥ मार्गणौनयनेकृत्वापक्ष्मयुक्तेयथाक्रमम् ॥१३॥ कुचौकृत्वापटकुटींविजयायोपचक्रमे ॥
मञ्जुघोषाभवत्तस्यकामस्यैववरूथिनी ॥ १४ ॥ मेधाविनंमुनिंदृष्ट्वासापिकामेनपीडिता ॥ यौवनोद्भिन्नदेहोऽसौमेधाव्यपिविराजते ॥ १५ ॥ सितो
पवीतसहितोदृष्टःस्मरइवापरः ॥ मेधावीवसतेचासौच्यवनस्याश्रमेशुभे ॥ १६ ॥ मञ्जुघोषास्थितंतत्रदृष्ट्वासामुनिपुङ्गवम् ॥ मदनस्यवशंप्राप्तामन्द

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म्मन्दमगायत ॥ १७ ॥ रणद्वलयसंयुक्तांशिञ्जन्नूपुरमेखलाम् ॥ गायन्तींतांतथाभूतांविलोक्यमुनिपुङ्गवः ॥ १८ ॥ मदनेनससैन्येननीतोमोहवशं
बलात् ॥ मञ्जुघोषासमागम्यमुनिंदृष्ट्वातथाविधम् ॥ १९ ॥ हावभावकटाक्षैस्तंमोहयामासचाङ्गना ॥ अधःसंस्थाप्यवीणांसासस्वजेतंमुनीश्वरम् ॥
॥ २० ॥ वल्लितेवलतावृक्षंवातवेगेनकम्पितम् ॥ सोऽपिरेमेतयासार्धंमेधावीमुनिपुङ्गवः ॥ २१ ॥ तस्मिन्नेवततोदृष्ट्वातस्यास्तंदेहमुत्तमम् ॥ शिवतत्त्वं
गतंतस्यकामतत्त्ववशंगतः ॥ २२ ॥ ननिशांनदिनंसोऽपिरमञ्ज्ञानातिकामुकः ॥ बहुवर्षोगतःकालोमुनेराचारलोपतः ॥ २३ ॥ मञ्जुघोषादेवलोक
गमनायोपचक्रमे ॥ गच्छन्तींतंप्रत्युवाचरमन्तंमुनिसत्तमम् ॥ आदेशोदीयतांब्रह्मन्स्वदेशगमनायमे ॥ २४ ॥ मेधाव्युवाच ॥ अद्यैवत्वंसमायाता
प्रदोषादौवरानने ॥ यावत्प्रभातसन्ध्यास्यात्तावत्तिष्ठममान्तिके ॥ २५ ॥ इतिश्रुत्वामुनेर्वाक्यंभयभीताबभूवसा ॥ पुनर्वैरमयामासतमृषिंनृपसत्तम॥
॥ २६ ॥ मुनेःशापभयाद्भीताबहुलान्परिवत्सरान् ॥ वर्षाणांपञ्चपञ्चाशन्नवमासान्दिनत्रयम् ॥ २७ ॥ सारेमेमुनिनातस्यनिशार्धमिवचाभवत् ॥
सातंपुनरुवाचाथतस्मिन्कालेगतेमुनिम् ॥ आदेशोदीयतांब्रह्मन्गन्तव्यंस्वगृहेमया ॥ २८ ॥ मेधाव्युवाच ॥ प्रभातमधुनाचास्तेश्रूयतांवचनंमम ॥
सन्ध्यांयावच्चकुर्वेऽहंतावत्त्वंवैस्थिराभव ॥ २९ ॥ इतिवाक्यंमुनेःश्रुत्वाजातानन्दसमाकुला ॥ स्मितंकृत्वातुसाकिंचित्प्रत्युवाचशुचिस्मिता ॥
॥ ३० ॥ अप्सराउवाच ॥ कियत्प्रमाणाविप्रेन्द्रतवसन्ध्यागतानघ ॥ मयिप्रसादंकृत्वातुगतःकालोविचार्यताम् ॥३१॥ इतितस्यावचःश्रुत्वाविस्मयो
त्फुल्ललोचनः ॥ गतकालस्यविप्रेन्द्रःप्रमाणमकरोत्तदा ॥ ३२ ॥ समाश्चसप्तपञ्चाशद्गतास्तस्यतयासह ॥ चुक्रोधसततस्तस्यैज्वालामालीबभूवह ॥
॥ ३३ ॥ नेत्राभ्यांविस्फुलिङ्गान्समुञ्चमानोऽतिकोपनः ॥ कालरूपांतुतांदृष्ट्वातपसःक्षयकारिणीम् ॥ ३४ ॥ दुःखार्जितंक्षयंनीतंतपोदृष्ट्वातयासह ॥
सकम्पोष्ठोमुनिस्तत्रप्रत्युवाचाकुलेन्द्रियः ॥ ३५ ॥ तांशशापाथमेधावीत्वंपिशाचीभवेतिच ॥ धिक्त्वांपापेदुराचारेकुलटेपातकप्रिये ॥ ३६ ॥
तस्यशापेनसादग्धाविनयावनतास्थिता ॥ उवाचवचनंसुभ्रूःप्रसादंवाञ्छतीमुनिम् ॥३७॥ प्रसादंकुरुविप्रेन्द्रशापस्यानुग्रहंकुरु ॥ सतांसंगोहिभवति
वचोभिःसप्तभिःपदैः ॥ ३८ ॥ त्वयासहममब्रह्मन्नीतावैबहुवत्सराः ॥ एतस्मात्कारणात्स्वामिन्प्रसादंकुरुसुव्रत ॥ ३९ ॥ मुनिरुवाच ॥ शृणुमेवचनं
भद्रेशापानुग्रहकारकम् ॥ किंकरोमित्वयापापेक्षयंनीतंमहत्तपः ॥ ४० ॥ चैत्रस्यकृष्णपक्षेतुभवेदेकादशीशुभा ॥ पापमोचिनिकानामसर्वपापक्षय
ङ्करी ॥ ४१ ॥ तस्याव्रतेकृतेशुभ्रेपिशाचत्वंप्रयास्यति ॥ इत्युक्त्वासोऽपिमेधावीजगामपितुराश्रमम् ॥ ४२ ॥ तमागतंसमालोक्यच्यवनःप्रत्युवाच
तम्॥ किमेतद्विहितंपुत्रत्वयापुण्यक्षयःकृतः ॥४३॥ मेधाव्युवाच॥पातकंवैकृतंतातरमिताचाप्सरामया ॥प्रायश्चित्तंब्रूहितातयेनपापक्षयोभवेत् ॥४४॥

CC-0. In Public Domain. Digitization by eGangotri

च्यवनउवाच ॥ चैत्रस्यचासितेपक्षेनाम्नावैपापमोचिनी ॥ अस्याव्रतेकृतेपुत्रपापराशिःक्षयंव्रजेत् ॥ ४५ ॥ इतिश्रुत्वापितुर्वाक्यंकृतंतेन
व्रतोत्तमम् ॥ गतंपापंक्षयंतस्यतपोयुक्तोबभूवसः ॥ ४६ ॥ साप्येवंमञ्जुघोषाचकृत्वैतद्व्रतमुत्तमम् ॥ पिशाचत्वाद्विनिर्मुक्तापाप
मोचिनिकाव्रतात् ॥ दिव्यरूपधरासावैगतानाकेवराप्सराः ॥ ४७ ॥ कृष्णउवाच ॥ पापमोचिनिकांराजन्येकुर्वन्तिनरोत्तमाः ॥
तेषांपापंचयत्किंचित्तत्सर्वंचक्षयंव्रजेत् ॥ ४८ ॥ पठनाच्छ्रवणाद्राजन्गोसहस्रफलंलभेत् ॥ ब्रह्महाहेमहारीचसुरापोगुरुतल्पगः ॥ ४९ ॥
व्रतस्यचास्यकरणात्पापमुक्ताभवन्तिते ॥ बहुपुण्यप्रदंह्येतत्करणाद्व्रतमुत्तमम् ॥ ५० ॥ इतिश्रीपाद्ममहापुराणेपञ्चप०उत्तर०उमापतिनारदसंवादेचैत्र
कृष्णैकादशीपापमोचिनीनामसप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥ युधिष्ठिरउवाच ॥ वासुदेवनमस्तुभ्यंकथयस्वममाग्रतः ॥ चैत्रस्यशुक्लपक्षेतुकिं
नामैकादशीभवेत् ॥ १ ॥ श्रीकृष्णउवाच ॥ शृणुष्वैकमनाराजन्कथांपुण्यांपुरातनीम् ॥ वसिष्ठोयामकथयत्प्राग्दिलीपायपृच्छते ॥ २ ॥ दिलीप
उवाच ॥ भगवञ्छ्रोतुमिच्छामिकथयस्वप्रसादतः ॥ चैत्रमासिसितेपक्षेकिंनामैकादशीभवेत् ॥ ३ ॥ वसिष्ठउवाच ॥ साधुपृष्टंत्वयाराजन्कथ
यामितवाग्रतः ॥ चैत्रस्यशुक्लपक्षेतुकामदानामनामतः ॥ ४ ॥ एकादशीपुण्यतमापापेन्धनदवानलः ॥ शृणुराजन्कथामेतांपापघ्नींपुण्य
दायिनीम् ॥ ५ ॥ पुरानागपुरेरम्येहेमरत्नविभूषते ॥ पुण्डरीकमुखानागानिवसन्तिमहोत्कटाः ॥ ६ ॥ तस्मिन्पुरेपुण्डरीकोराजाराज्यंचकारसः ॥
गन्धर्वैःकिन्नरैश्चैवअप्सरोभिश्चसेव्यते ॥ ७ ॥ वराप्सरास्तुललितागन्धर्वोललितस्तथा ॥ उभौरागेणसंरक्तौदम्पतीकामपीडितौ ॥ ८ ॥ रेमाते
स्वगृहेरम्येधनधान्ययुतेतदा ॥ ललितायाश्चहृदयेपतिर्वसतिसर्वदा ॥ ९ ॥ हृदयेतस्यललितानित्यंवसतिभामिनी ॥ एकदापुण्डरीकोऽथक्रीडते
सदसिस्थितः ॥ १० ॥ गीतंगानंप्रकुरुतेललितोदयितांविना ॥ पदबन्धस्खलज्जिह्वोबभूवललितांस्मरन् ॥ ११ ॥ मनोभावंविदित्वास्यकर्कटो
नागसत्तमः ॥ पदबन्धच्युतिंतस्यपुण्डरीकेन्यवेदयत् ॥ १२ ॥ श्रुत्वाकर्कोटकवचःपुण्डरीकेभुजङ्गराट् ॥ क्रोधसंरक्तनयनोबभूवातिभयङ्करः ॥ १३ ॥
शशापललितंतत्रगायन्तंमदनातुरम् ॥ राक्षसोभवदुर्बुद्धेक्रव्यादःपुरुषादकः ॥ १४ ॥ यतःपत्नीवशोपेतोगायमानोममाग्रतः ॥ वचनात्तस्यराजेन्द्र
रक्षोरूपोबभूवसः ॥ १५ ॥ रौद्राननोविरूपाक्षोदृष्टमात्रोभयङ्करः ॥ बाहूयोजनविस्तीर्णौमुखंकन्दरसन्निभम् ॥ १६ ॥ चन्द्रसूर्यनिभेनेत्रेग्रीवा
पर्वतसन्निभा ॥ नासारन्ध्रेतुविवरेअधरौयोजनायतौ ॥ १७ ॥ शरीरंतस्यराजेन्द्रउत्थितंयोजनाष्टकम् ॥ ईदृशोराक्षसोभूत्वाभुङ्क्तेनःकर्मणःफलम् ॥ १८ ॥
ललितातुतथालोक्यस्वपतिंविकृताकृतिम् ॥ चिन्तयामासमनसादुःखेनमहतार्दिता ॥ १९ ॥ किंकरोमिक्वगच्छामिपतिःशापेनपीडितः ॥ इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संस्मृत्यसंस्मृत्यमनसाशर्मनालभत् ॥ २० ॥ चचारपतिनासार्धंललितागहनेवने ॥ बभ्रामविपिनेदुर्गेकामरूपीसराक्षसः ॥ २१ ॥ निर्घृणःपाप
निरतोविरूपःपुरुषादकः ॥ नसुखंलभतेरात्रौनदिवापापपीडितः ॥२२॥ललितादुःखितातीवपतिंदृष्ट्वातथाविधम् ॥ बभ्रामतेनसार्धंसारुदतीगहनेवने
॥ २३ ॥ दृष्ट्वाश्रमपदंरम्यंमुनिंसंशान्तविग्रहम् ॥ शीघ्रंजगामललितानमस्कृत्याग्रतःस्थिता ॥ २४ ॥ तांदृष्ट्वासमुनिःप्राहदुःखितांहिदयापरः ॥
कात्वंकस्मादिहायातासत्यंवदममाग्रतः ॥ २५ ॥ ललितोवाच ॥ वीरधन्वेतिगन्धर्वःसुतातस्यमहात्मनः ॥ ललितांनाममांविद्धिपत्यर्थमिहचा
गताम् ॥ २६ ॥ भर्तामेपापदोषेणराक्षसोऽभून्महामुने ॥ रौद्ररूपोदुराचारस्तंदृष्ट्वानास्तिमेसुखम् ॥ २७ ॥ साम्प्रतंशाधिमांब्रह्मन्यत्कृत्यंतद्वद
प्रभो ॥ येनपुण्येनविप्रेन्द्रराक्षसत्वाद्विमुच्यते ॥ २८ ॥ ऋषिरुवाच ॥ चैत्रमासस्यरम्भोरुशुक्लपक्षोऽस्तिसाम्प्रतम् ॥ कामदैकादशीनामपापघ्नी
ललितेपरा ॥ २९ ॥ कुरुष्वतद्व्रतंभद्रेविधिपूर्वंमयोदितम् ॥ अस्यव्रतस्ययत्पुण्यंतत्स्वभर्त्रेप्रदीयताम् ॥ ३० ॥ दत्तेपुण्येक्षणात्तस्यशापदोषःप्रया
स्यति ॥ इतिश्रुत्वामुनेर्वाक्यंललिताहर्षिताभवत् ॥ ३१ ॥ उपोष्यैकादशींराजन्द्वादशीदिवसेतथा ॥ विप्रस्यैवसमीपेतद्वासुदेवस्यचाग्रतः ॥ ३२ ॥
वाक्यमुवाचललितास्वपत्युस्तारणायवै ॥ मयातुतद्व्रतंचीर्णंकामदायाउपोषणम् ॥ ३३ ॥ तस्यपुण्यप्रभावेणगच्छत्वस्यपिशाचता ॥ ललितावच
नादेववर्त्तमानोऽपितत्क्षणे ॥३४॥ गतपापःसललितोदिव्यदेहोबभूवह ॥ राक्षसत्वंगतंतस्यप्राप्तागन्धर्वतापुनः ॥३५॥ हेमरत्नसमाकीर्णोरेमेललितया
सह ॥ विमानवरमारूढौपूर्वरूपाधिकौचतौ ॥ ३६ ॥ दम्पतीअत्यशोभेतांकामदायाःप्रभावतः ॥ इतिज्ञात्वानृपश्रेष्ठकर्तव्यैषाप्रयत्नतः ॥ ३७ ॥
लोकानांतुहितार्थायतवाग्रेकथितामया ॥ ३८ ॥ कृष्णउवाच ॥ ब्रह्महत्यादिपापघ्नीपिशाचत्वविनाशिनी ॥ नातःपरतराकाचित्त्रैलोक्येसचराचरे ॥
पठनाच्छ्रवणाद्राजन्वाजपेयफलंलभेत् ॥३९॥ इतिश्रीपाद्मेमहापुराणेपञ्चप० उत्तर० उमापतिनारदसंवादेचैत्रशुक्लकामदानामाष्टाचत्वारिंशोऽध्यायः
॥ ४८ ॥ युधिष्ठिरउवाच ॥ वैशाखस्यासितेपक्षेकिंनामकादशीभवेत् ॥ महिमानंकथयमेवासुदेवनमोऽस्तुते ॥ १ ॥ श्रीकृष्णउवाच ॥ सौभाग्य
दायिनीराजन्निहलोकेपरत्रच ॥ वैशाखकृष्णपक्षेतुनाम्नाचैववरूथिनी ॥ २ ॥ वरूथिन्याव्रतेनैवसौख्यंभवतिसर्वदा ॥ पापहानिश्चभवतिसौभाग्य
प्राप्तिरेवच॥३॥दुर्भगायाकरोत्येनांसास्त्रीसौभाग्यमाप्नुयात् ॥ लोकानांचैवसर्वेषांभुक्तिमुक्तिप्रदायिनी ॥४॥ सर्वपापहरानृणांगर्भवासनिकृन्तनी ॥
वरूथिन्याव्रतेनैवमान्धातास्वर्गतिंगतः ॥ ५ ॥ धुन्धुमारादयश्चान्येराजानोबहवस्तथा ॥ ब्रह्मकपालनिर्मुक्तोबभूवभगवान्भवः॥६॥दशवर्षसहस्राणि
तपस्तप्यतियोनरः ॥ रविग्रहेकुरुक्षेत्रेस्वर्णभारंददातियः ॥ ७ ॥ तत्तुल्यंफलमाप्नोतिवरूथिन्याव्रतंचरन् ॥ श्रद्धावान्यस्तुकुरुतेवरूथिन्याव्रतंनरः ॥

CC-0. In Public Domain. Digitization by eGangotri

॥ ८ ॥ वाञ्छितंलभतेसोऽपिइहलोकेपरत्रच ॥ पवित्रापावनीह्येषामहापातकनाशिनी ॥ ९ ॥ भुक्तिमुक्तिप्रदाचैवकर्तॄणांनृपसत्तम ॥ अश्वदानान्नृप
श्रेष्ठगजदानंविशिष्यते ॥ १० ॥ गजदानाद्भूमिदानंतिलदानंततोऽधिकम् ॥ तस्माच्चस्वर्णदानंवाअन्नदानंततोऽधिकम् ॥ ११ ॥ अन्नदानात्परंदानं
नभूतंनभविष्यति ॥ पितृदेवमनुष्याणांतृप्तिरन्नेनजायते ॥ १२ ॥ तत्समंकविभिःप्रोक्तंकन्यादानंनृपोत्तम ॥ धेनुदानंचतत्तुल्यमित्याहभगवा
न्स्वयम् ॥ १३॥ प्रोक्तेभ्यःसर्वदानेभ्योविद्यादानंविशिष्यते ॥ तत्फलंसमवाप्नोतिनरःकृत्वावरूथिनीम् ॥ १४ ॥ कन्यावित्तेनजीवन्तियेनराःपाप
मोहिताः ॥ पुण्यक्षयात्तेगच्छन्तिनिरयंयातनामयम् ॥१५॥ तस्मात्सर्वप्रयत्नेननग्राह्यंकन्यकाधनम् ॥ यश्चगृह्णातिलोभेनकन्यांक्रीत्वाचतद्धनम् ॥
॥ १६॥ सोऽन्यजन्मनिराजेन्द्रओतुर्भवतिनिश्चितम् ॥ कन्यांपुण्येनयोदद्याद्यथाशक्तिस्वलङ्कृताम् ॥ १७ ॥ तत्पुण्यसङ्ख्यांगदितुंचित्रगुप्तोनशक्नु
यात् ॥ तत्तुल्यंफलमाप्नोतिनरःकृत्वावरूथिनीम् ॥ १८ ॥ कांस्यंमांसंमसूरांश्चचणकान्कोद्रवांस्तथा ॥ शाकंमधुपरान्नंचपुनर्भोजनमैथुने ॥ १९ ॥
वैष्णवोव्रतकर्ताचदशम्यांदशवर्जयेत् ॥ द्यूतंक्रीडांचनिद्रांचताम्बूलंदन्तधावनम् ॥२०॥ परापवादंपैशुन्यंस्तेयंहिंसांतथारतिम् ॥ क्रोधंचैवानृतंवाक्य
मेकादश्यांविवर्जयेत् ॥ २१ ॥ कांस्यंमांसंसुरांक्षौद्रंतैलंपतितभाषणम् ॥ व्यायामंचप्रवासंचपुनर्भोजनमैथुनम् ॥ २२ ॥ वृषपृष्ठंमसूरान्नंद्वादश्यां
परिवर्जयेत् ॥ अनेनविधिनाराजन्विहितायैर्वरूथिनी ॥ २३ ॥ सर्वपापक्षयंकृत्वादद्यात्प्रान्तेऽक्षयांगतिम् ॥ रात्रौजागरणंकृत्वापूजितोमधु
सूदनः ॥ २४ ॥ सर्वपापविनिर्मुक्तास्तेयान्तिपरमांगतिम् ॥ तस्मात्सर्वप्रयत्नेनकर्तव्यापापभीरुभिः ॥ २५ ॥ क्षपारितनयाद्भीतोनरःकुर्याद्वरूथि
नीम् ॥ पठनाच्छ्रवणाद्राजन्गोसहस्रफलंलभेत् ॥ सर्वपापविनिर्मुक्तोविष्णुलोकेमहीयते ॥२६॥ इतिश्रीपाद्ममहापुराणेपञ्चप०उत्तर०उमापतिनारद
संवादेवैशाखकृष्णवरूथिनीएकादशीनामैकोनपञ्चाशत्तमोऽध्यायः ॥ ४९ ॥ युधिष्ठिरउवाच ॥ वैशाखशुक्लपक्षेतुकिन्नामैकादशीभवेत् ॥ किंफलं
कोविधिस्तत्रकथयस्वजनार्दन ॥ १ ॥ श्रीकृष्णउवाच ॥ इदमेवपुरापृष्टंरामचन्द्रेणधीमता ॥ वसिष्ठंप्रतिराजेन्द्रयत्त्वंमामनुपृच्छसि ॥ २ ॥ राम
उवाच ॥ भगवञ्छ्रोतुमिच्छामिव्रतानामुत्तमंव्रतम् ॥ सर्वपापक्षयकरंसर्वदुःखनिकृन्तनम् ॥३॥ मयादुःखानिभुक्तानिसीताविरहजानितु ॥ ततोऽहं
भयभीतोऽस्मिपृच्छामित्वांमहामुने ॥४॥ वसिष्ठउवाच ॥ साधुपृष्टंत्वयारामतवैषानैष्ठिकीमतिः ॥ त्वन्नामग्रहणेनैवपूतोभवतिमानवः ॥५॥ तथापि
कथयिष्यामिलोकानांहितकाम्यया ॥ पवित्रंपावनानांचव्रतानामुत्तमंव्रतम् ॥ ६ ॥ वैशाखस्यसितेपक्षेरामचैकादशीभवेत् ॥ मोहिनीनामसा
प्रोक्तासर्वपापहरापरा ॥७ ॥ मोहजालात्प्रमुच्यन्तेपातकानांसमूहतः ॥ अस्याव्रतप्रभावेणसत्यंसत्यंवदाम्यहम् ॥८॥ अतःकारणतोरामकर्तव्यैषा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवाहशैः ॥ पातकानांक्षयकरीमहादुःखविनाशिनी ॥ ९ ॥ शृणुष्वैकमनारामकथांपापहरांपराम् ॥ यस्याःश्रवणमात्रेणमहापापंप्रणश्यति ॥१० ॥
सरस्वत्यास्तटेरम्येपुरीभद्रावतीशुभा ॥ द्युतिमान्नामनृपतिस्तत्रराज्यंकरोतिवै ॥ ११ ॥ चन्द्रवंशोद्भवोनाम्नाधृतिमान्सत्यसङ्गरः ॥ तत्रवैश्योनिव
सतिधनधान्यसमृद्धिमान् ॥ १२ ॥ धनपालइतिख्यातःपुण्यकर्मप्रवर्त्तकः ॥ प्रपाकूपमठारामतडागगृहकारकः ॥ १३ ॥ विष्णुभक्तिरतःशान्त
स्तस्यासन्पञ्चपुत्रकाः ॥ सुमनाद्युतिमांश्चैवमेधावीसुकृतस्तथा ॥ १४ ॥ पञ्चमोधृष्टबुद्धिश्चमहापापरतःसदा ॥ परस्त्रीसङ्गनिरतोविटगोष्ठी
विशारदः ॥ १५ ॥ द्यूतादिव्यसनासक्तःपरस्त्रीरतिलालसः ॥ नचदेवार्चनेबुद्धिर्नपितॄन्नद्विजान्प्रति ॥ १६ ॥ अन्यायवर्तीदुष्टात्मापितु
र्द्रव्यक्षयङ्करः ॥ अभक्ष्यभक्षकःपापीसुरापानेरतःसदा ॥ १७ ॥ वेश्याकण्ठेक्षिप्तबाहुर्भ्रमन्दुष्टश्चतुष्पथे ॥ पित्रानिष्कासितोगेहात्परित्यक्तश्च
बान्धवैः ॥ १८ ॥ स्वदेहभूषणान्येवक्षयंनीतानितेनवै ॥ गणिकाभिःपरित्यक्तोनिन्दितश्चधनक्षयात् ॥ १९ ॥ ततश्चिन्तापरोजातोवस्त्रहीनः
क्षुधार्दितः ॥ किंकरोमिक्वगच्छामिकेनोपायेनजीव्यते ॥ २० ॥ तस्करत्वंसमारब्धंतत्रैवनगरेपितुः ॥ गृहीतोराजपुरुषैर्मुक्तश्चपितृगौरवात् ॥
॥ २१ ॥ पुनर्बद्धःपुनस्त्यक्तःपुनर्बद्धःसवैभटैः ॥ धृष्टबुद्धिर्दुराचारोनिबध्यनिगडैर्दृढैः ॥ २२ ॥ कशाघातैस्ताडितश्चपीडितश्चपुनःपुनः ॥
नस्थातव्यंहिमन्दात्मंस्त्वयामद्देशगोचरे ॥ २३ ॥ एवमुक्त्वाततोराज्ञामोचितोदृढबन्धनात् ॥ निर्जगामभयात्तस्यगतोऽसौगहनंवनम्॥२४॥
क्षुत्तृषापीडितश्चायमितश्चेतश्चधावति ॥ सिंहवन्निजघानासौमृगशूकरचित्रलान् ॥ २५ ॥ आमिषाहारनिरतोवनेतिष्ठतिसर्वदा ॥ करेशरासनं
कृत्वानिषङ्गंपृष्ठसंगतम् ॥ २६ ॥ अरण्यचारिणोहन्तिपक्षिणश्चचतुष्पदान् ॥ चकोरांश्चमयूरांश्चकङ्कतित्तिरिमूषकान् ॥ २७ ॥ एतान
न्यान्हिनस्त्यन्धोधृष्टबुद्धिस्तुनिर्घृणः ॥ पूर्वजन्मकृतैःपापैर्निमग्नःपापकर्दमे ॥ २८ ॥ दुःखशोकसमाविष्टःपीड्यमानोदिवानिशम् ॥ कौण्डि
न्यस्याश्रमपदंप्राप्तःपुण्यागमात्क्वचित् ॥ २९ ॥ माधवेमासिजाह्नव्यांकृतस्नानंतपोधनम् ॥ आससादधृष्टबुद्धिःशोकभारेणपीडितः ॥ ३० ॥
तद्वस्त्रबिन्दुस्पर्शेनगतपापोहताशुभः ॥ कौण्डिन्यस्याग्रतःस्थित्वाप्रत्युवाचकृताञ्जलिः ॥ ३१ ॥ धृष्टबुद्धिरुवाच ॥ भोभोब्रह्मन्द्विजश्रेष्ठ
दयांकृत्वाममोपरि ॥ येनपुण्यप्रभावेणमुक्तिर्भवतितद्वद ॥ ३२ ॥ कौण्डिन्यउवाच ॥ शृणुष्वैकमनाभूत्वायेनपापक्षयस्तव ॥ वैशाखस्य
सितेपक्षेमोहिनीनामविश्रुता ॥ ३३ ॥ एकादशीव्रतंतस्याःकुरुमद्वाक्यनोदितः ॥ मेरुतुल्यानिपापानिक्षयंनयतिदेहिनाम् ॥ ३४ ॥ बहुजन्मा
र्जितान्येषामोहिनीसमुपोषिता ॥ इतिवाक्यंमुनेःश्रुत्वाधृष्टबुद्धिःप्रसन्नधीः ॥ ३५ ॥ व्रतंचकारविधिवत्कौण्डिन्यस्योपदेशतः ॥ कृतेव्रतेनृप

CC-0. In Public Domain. Digitization by eGangotri

श्रेष्ठगतपापोवभूवसः ॥ ३६ ॥ दिव्यदेहस्ततोभूत्वागरुडोपरिसंस्थितः ॥ जगामवैष्णवंलोकंसर्वोपद्रववर्जितम् ॥ ३७ ॥ इतीदृशंरामचन्द्रउत्तमं
मोहिनीव्रतम् ॥ नातःपरतरंकिंचित्त्रैलोक्येचसराचरे ॥ ३८ ॥ श्रीकृष्णउवाच ॥ यज्ञादितीर्थदानानिकलांनार्हन्तिषोडशीम् ॥ पठनाच्छ्रवणाद्रा
जन्गोसहस्रफलंलभेत् ॥ ३९ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उमापतिनारदसंवादेवैशाखशुक्लेमोहिन्येकादशीनामपञ्चाशत्तमोऽध्यायः ॥
॥ ५० ॥ युधिष्ठिरउवाच ॥ ज्येष्ठस्यकृष्णपक्षेतुकिंनामैकादशीभवेत् ॥ श्रोतुमिच्छामिमाहात्म्यंतद्वदस्वजनार्दन ॥ १ श्रीकृष्णउवाच ॥
साधुपृष्टंत्वयाराजन्लोकानांहितकाम्यया ॥ बहुपुण्यप्रदाह्येषामहापातकनाशिनी ॥ २ ॥ अपरानामराजेन्द्रअपरापुत्रदायिनी[1] ॥ लोकेप्रसिद्धतां
यातिअपरांयस्तुसेवते ॥ ३ ॥ ब्रह्महत्याभिभूतोऽपिगोत्रहाभ्रूणहातथा ॥ परापवादवादीचपरस्त्रीरसिकोऽपिच ॥ ४ ॥ अपरासेवनाद्राज
न्विपाप्माभवतिध्रुवम् ॥ कूटसाक्ष्यंकूटमानंतुलाकूटंकरोतियः ॥ ५ ॥ कूटवेदंपठेद्यस्तुकूटशास्त्रंतथैववच ॥ ज्योतिषांगणकःकूटःकूटायुर्वेदि
कोभिषक् ॥ ६ ॥ कूटसाक्ष्यसमायुक्तोविज्ञेयानरकौकसः ॥ अपरासेवनाद्राजन्पापैर्मुक्ताभवन्तिते ॥ ७ ॥ क्षत्रियःक्षात्रधर्मंयस्त्यक्त्वा
युद्धात्पलायते ॥ सयातिनरकंघोरंस्वीयधर्मबहिष्कृतः ॥ ८ ॥ अपरासेवनात्सोऽपिपापंत्यक्त्वादिवंव्रजेत् ॥ विद्यावान्यःस्वयंशिष्योगुरु
निन्दांकरोतिच ॥ ९ ॥ समहापातकैर्युक्तोनिरयंयातिदारुणम् ॥ अपरासेवनात्सोऽपिसद्गतिंप्राप्नुयान्नरः ॥ १० ॥ महिमानमपरायाःशृणु
राजन्वदाम्यहम् ॥ मकरस्थेरवौमाघेप्रयागेयत्फलंनृणाम् ॥ ११ ॥ काश्यांयत्प्राप्यतेपुण्यमुपरागेनिमज्जनात् ॥ गयायांपिण्डदानेन
पितॄणांतृप्तिदोयथा ॥ १२ ॥ सिंहस्थितेदेवगुरौगौतम्यांस्नातकोनरः ॥ कन्यागतेगुरौराजन्कृष्णवेणीनिमज्जनात् ॥ १३ ॥ यत्फलंसम
वाप्नोतिकुम्भकेदारदर्शनात् ॥ बदर्याश्रमयात्रायांतत्तीर्थसेवनादपि ॥ १४ ॥ यत्फलंसमवाप्नोतिकुरुक्षेत्रेरविग्रहे ॥ गजाश्वहेमदानेनयज्ञंकृत्वा
सदक्षिणम् ॥ १५ ॥ तादृशंफलमाप्नोतिअपराव्रतसेवनात् ॥ प्रसद्यःसूतांगांदत्त्वासुवर्णंवसुधांतथा ॥ १६ ॥ नरोयत्फलमाप्नोतिअपरा
याव्रतेनतत् ॥ पापद्रुमकुठारीयंपापेन्धनदवानलः ॥ १७ ॥ पापान्धकारतरणिःपापसारङ्गकेसरी ॥ बुद्बुदाइवतोयेषुपुत्तिकाइवजन्तुषु ॥
॥ १८ ॥ जायन्तेमरणायैवएकादश्याव्रतंविना ॥ अपरांसमुपोष्यैवपूजयित्वात्रिविक्रमम् ॥ १९ ॥ सर्वपापविनिर्मुक्तोविष्णुलोकेमहीयते ॥
लोकानांचहितार्थायतवाग्रेकथितंमया ॥ पठनाच्छ्रवणाद्राजन्गोसहस्रफलंलभेत् ॥ २० ॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०उत्तर०उमापतिनारद

१ 'अपारफलदायिनी' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संवादेज्येष्ठकृष्णापरैकादशीनामैकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥ युधिष्ठिरउवाच ॥ अपरायाश्चमाहात्म्यंश्रुतंसर्वंजनार्दन ॥ ज्येष्ठस्यशुक्ल
पक्षेतुस्याद्यातांवदमानद ॥ १ ॥ श्रीकृष्णउवाच ॥ एनांवक्ष्यतिधर्मात्माव्यासःसत्यवतीसुतः ॥ सर्वशास्त्रार्थतत्त्वज्ञोवेदवदाङ्गपारगः ॥
॥ २ ॥ युधिष्ठिरउवाच ॥ श्रुतामेमानवाधर्मावासिष्ठाश्चश्रुतामया ॥ द्वैपायनयथावत्त्वंवैष्णवान्वक्तुमर्हसि ॥ ३ ॥ श्रीवेदव्यासउवाच ॥
श्रुतास्तुमानवाधर्मावैदिकाश्चश्रुतास्त्वया ॥ कलौयुगेनशक्यन्तेतेवैकर्तुंनराधिप ॥ ४ ॥ सुखोपायमल्पधनमल्पक्लेशंमहाफलम् ॥ पुराणानांच
सर्वेषांसारभूतंमहामते ॥ ५ ॥ एकादश्यांनभुञ्जीतपक्षयोरुभयोरपि ॥ द्वादश्यांतुशुचिर्भूत्वापुष्पैःसंपूज्यकेशवम् ॥ ६ ॥ अन्नंभुञ्जीतसत्कृत्यपश्चा
द्विप्रपुरःसरम् ॥ सूतकेऽपिनभोक्तव्यंनाशौचेचजनाधिप ॥ ७ ॥ यावज्जीवंव्रतमिदंकर्तव्यंपुरुषर्षभ ॥ स्वर्गतिंप्राप्तुमिच्छद्भिरत्रनैवास्ति
संशयः ॥ ८ ॥ अपिपापादुराचाराःपापिष्ठाधर्मवर्जिताः ॥ एकादश्यांनभुञ्जानानतेयान्तियमान्तिकम् ॥ ९ ॥ इतितद्वचनंश्रुत्वा
कम्पितोऽश्वत्थपत्रवत् ॥ भीमसेनोमहाबाहुर्नत्वोवाचगुरुंप्रति ॥ १० ॥ भीमसेनउवाच ॥ पितामहमहाबुद्धेशृणुमेपरमंवचः ॥ युधिष्ठिरश्च
कुन्तीचतथाद्रुपदनन्दिनी ॥ ११ ॥ अर्जुनोनकुलश्चैवसहदेवस्तथैवच ॥ एकादश्यांनभुञ्जन्तिकदाचिदपिसुव्रताः ॥ १२ ॥ तेमांब्रुवन्तिवैनित्यं
माभुङ्क्ष्वत्वंवृकोदर ॥ अहंतानब्रवंताततबुभुक्षादुःसहाममम ॥ १३ ॥ दानंदास्यामिविधिवत्पूजयिष्यामिकेशवम् ॥ भीमसेनवचःश्रुत्वाव्यासोवचन
मब्रवीत् ॥ १४ ॥ व्यासउवाच ॥ यदिस्वर्गमभीष्टंतेनरकंदुष्टमेवच ॥ एकादश्यांनभोक्तव्यंपक्षयोरुभयोरपि ॥ १५ ॥ भीमसेनउवाच ॥ पितामह
महाबुद्धेकथयामितवाग्रतः ॥ एकभक्तेनशक्नोमिउपवासेकुतःप्रभो ॥ १६ ॥ वृकोहिनामयोवह्निःससदाजठरेमम ॥ अतिवेलंयदाश्नामितदासमुपशा
म्यति ॥ १७ ॥ नैकंशक्नोम्यहंकर्तुमुपवासंमहामुने ॥ येनैवप्राप्यतेस्वर्गस्तत्कर्तास्मियथातथम् ॥ तदेकंवदनिश्चित्ययेनश्रेयोऽहमाप्नुयाम् ॥ १८ ॥
व्यासउवाच ॥ वृषस्थेमिथुनस्थेवायदाचैकादशीभवेत् ॥ ज्येष्ठमासेप्रयत्नेनसोपोष्योदकवर्जिता ॥ १९ ॥ गण्डूषाचमनंवारिविवर्जयित्वोदकंबुधः ॥
उपभुञ्जीतनैवेहव्रतभङ्गोऽन्यथाभवेत् ॥ २० ॥ उदयादुदयंयावद्वर्जयित्वोदकंनरः ॥ श्रूयतांसमवाप्नोतिद्वादशद्वादशीफलम् ॥ २१ ॥ ततःप्रभाते
विमलेद्वादश्यांस्नानमाचरेत् ॥ जलंसुवर्णंदत्त्वाचद्विजातिभ्योयथाविधि ॥ २२ ॥ भुञ्जीतकृतकृत्यस्तुब्राह्मणैःसहितोवशी ॥ एवंकृतेचयत्पुण्यंभीम
सेनशृणुष्वतत् ॥ २३ ॥ संवत्सरेतुयाश्चैवएकादश्योभवन्तिहि ॥ तासांफलमवाप्नोतिह्यत्रमेनास्तिसंशयः ॥ २४ ॥ इतिमांकेशवःप्राहशङ्खचक्रगदा
धरः ॥ सर्वान्परित्यज्यपुमान्मामेकंशरणंव्रजेत् ॥ २५ ॥ एकादश्यांनिराहारस्ततःपापात्प्रमुच्यते ॥ द्रव्यशुद्धिःकलौनास्तिसंस्कारःस्मार्त्तएवच ॥ २६ ॥

CC-0. In Public Domain. Digitization by eGangotri

वैदिकस्तुकुतश्चापिप्राप्तेदुष्टेकलौयुगे ॥ किंनुतेबहुनोक्तेनवायुपुत्रपुनःपुनः ॥२७॥ एकादश्यांनभुञ्जीतपक्षयोरुभयोरपि ॥ एकादश्यांसितेपक्षेज्येष्ठेमा
स्युदकंविना ॥ २८ ॥ पुण्यंफलमवाप्नोतितच्छृणुष्ववृकोदर ॥ संवत्सरेतुयाप्रोक्ताःशुक्लाःकृष्णावृकोदर ॥ २९ ॥ उपोषिताहिसर्वाःस्युरेकादश्यो
नसंशयः ॥ धनधान्यप्रदापुण्यापुत्रारोग्यशुभप्रदा ॥ ३० ॥ उपोषितानरव्याघ्रइतिसत्यंब्रवीमिते ॥ यमदूतामहाकायाःकरालाःकृष्णरूपिणः॥
॥ ३१ ॥ दण्डपाशधरारौद्रानोपसर्पन्तितंनरम् ॥ पीताम्बरधराःसौम्याश्चक्रहस्तामनोजवाः ॥ ३२ ॥ अन्तकालेनयन्त्येतेवैष्णवान्वैष्णवीं
पुरीम् ॥ तस्मात्सर्वप्रयत्नेनउपोष्योदकवर्जिता ॥ ३३ ॥ जलधेनुंतदादत्त्वासर्वपापैःप्रमुच्यते ॥ ततस्त्वमस्यांकौन्तेयसोपवासोऽर्चनंहरेः ॥
॥ ३४ ॥ कुरुसर्वप्रयत्नेनसर्वपापप्रशान्तये ॥ स्वप्नेनमेऽपराधोऽस्तिदन्तरागतयापिवा ॥ ३५ ॥ भोक्ष्येऽपरेऽह्निदेवेशह्यशनंवासराद्धरेः ॥ इत्यु
च्चार्यततोमन्त्रमुपवासपरोभवेत् ॥ ३६ ॥ सर्वपापविनाशायश्रद्धादमसमन्वितः ॥ मेरुमन्दरमात्राघंस्त्रियापुंसाचयत्कृतम् ॥ ३७ ॥ सर्वंतद्भस्मतां
यातिएकादश्याःप्रभावतः ॥ नशक्नुवन्तियेदातुंजलधेनुंनराधिप ॥ ३८ ॥ सकाञ्चनःप्रदातव्योघटकोवस्त्रसंयुतः ॥ तोयस्यनियमंयोऽस्यांकुरुते
वैसपुण्यभाक् ॥ ३९ ॥ फलंकोटिसुवर्णस्ययामेयामेश्रुतंफलम् ॥ स्नानंदानंजपंहोमंयदस्यांकुरुतेनरः ॥ ४० ॥ तत्सर्वंचाक्षयंप्राप्तमेतत्कृष्ण
प्रभाषितम् ॥ किंवापरेणधर्मेणनिजलैकादशींविना ॥ ४१ ॥ उपोष्यसम्यग्विधिवद्वैष्णवंपदमाप्नुयात् ॥ सुवर्णमन्नंवासोवायदस्यांसंप्रदीयते
॥ ४२ ॥ तदस्यकुरुशार्दूलसर्वंचाप्यक्षयंभवेत् ॥ एकादश्यांदिनेयोऽन्नंभुङ्क्तेपापंभुनक्तिसः ॥ ४३ ॥ इहलोकेसचाण्डालोमृतःप्राप्नोतिदुर्गतिम् ॥
येचदास्यन्तिदानानिद्वादश्यांसमुपोषिताः ॥ ४४ ॥ ज्येष्ठमासेसितेपक्षेप्राप्स्यन्तिपरमंपदम् ॥ ब्रह्महामद्यपःस्तेनोगुरुद्वेषीसदानृती ॥ ४५ ॥
मुच्यन्तेपातकैःसर्वैर्निर्जलायैरुपोषिता ॥ विशेषंशृणुकौन्तेयनिर्जलैकादशीदिने ॥ ४६ ॥ यत्कर्त्तव्यंनरैःस्त्रीभिर्दानंश्रद्धासमन्वितैः ॥ जलशायी
चसंपूज्योदेयाधेनुस्तथाम्मयी ॥ ४७ ॥ प्रत्यक्षावानृपश्रेष्ठघृतधेनुरथापिवा ॥ दक्षिणाभिःसुपुष्टाभिर्मिष्टान्नैश्चपृथग्विधैः ॥ ४८ ॥ तोषणीयाः
प्रयत्नेनद्विजाधर्मभृतांवर ॥ तुष्टाभवन्तिवैविप्रास्तैस्तुष्टैर्मोक्षदोहरिः ॥ ४९ ॥ आत्मद्रोहःकृतस्तैर्हियैरेषानह्युपोषिता ॥ पापात्मानोदुरा
चारादुष्टास्तेनात्रसंशयः ॥ ५० ॥ कुलानांशतमागामिअतीतानांतथाशतम् ॥ आत्मनासहतैर्नीतंवासुदेवस्यमन्दिरम् ॥ ५१ ॥ शान्तैर्दान्तैर्दान ॥ ६३ ॥
परैरर्चयद्भिस्तथाहरिम् ॥ कुर्वद्भिर्जागरंरात्रौयैरेषासमुपोषिता ॥ ५२ ॥ अन्नंवस्त्रंतथागावोजलंशय्यासनंशुभम् ॥ कमण्डलुस्तथाछत्रंदातव्यं
निजलादिने ॥५३॥ उपानहौयोददातिपात्रभूतेद्विजोत्तमे ॥ ससौवर्णेनयानेनस्वर्गलोकेमहीयते ॥५४ ॥ यश्चेमांशृणुयाद्भक्त्यायश्चापिपरिकीर्तयेत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तावुभावाप्नुतःस्वर्गंनात्रकार्याविचारणा ॥ ५५ ॥ यत्फलंसंनिहत्यायांराहुग्रस्तेदिवाकरे ॥ कृत्वाश्राद्धंलभेन्मर्त्यस्तदस्याःश्रवणादपि ॥ ५६ ॥
नियमश्चप्रकर्त्तव्योदन्तधावनपूर्वकम् ॥ एकादश्यांनिराहारोवर्जयिष्यामिवैजलम् ॥ ५७ ॥ केशवप्रीणनार्थायअन्यदाचमनादृते ॥ द्वादश्यांदेव
देवेशःपूजनीयस्त्रिविक्रमः ॥ ५८ ॥ गन्धैर्धूपैस्तथापुष्पैर्वासोभिःप्रियदर्शनैः ॥ पूजयित्वाविधानेनमन्त्रमेतमुदीरयेत् ॥ ५९ ॥ देवदेवहृषीकेश
संसारार्णवतारक ॥ उदकुम्भप्रदानेननयमांपरमांगतिम् ॥ ६० ॥ ज्येष्ठेमासितुवैभीमयाशुक्लैकादशीशुभा ॥ निर्जलासमुपोष्यात्रजलकुम्भा
न्सशर्करान् ॥ ६१ ॥ प्रदायविप्रमुख्येभ्योमोदतेविष्णुसन्निधौ ॥ ततःकुम्भाःप्रदातव्याब्राह्मणानांचभक्तितः ॥ ६२ ॥ भोजयित्वाततोविप्रान्स्वयं
भुञ्जीततत्परः ॥ एवंयःकुरुतेपूर्णांद्वादशींपापनाशिनीम् ॥ ६३ ॥ सर्वपापविनिर्मुक्तःपदंगच्छत्यनामयम् ॥ ततःप्रभृतिभीमेनकृताह्येकादशी
शुभा ॥ पाण्डवद्वादशीनाम्नालोकेख्याताबभूवह ॥ ६४ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०उत्तर०उमापतिनारदसंवादेज्येष्ठशुक्लनिर्जलैका
दशीनामद्विपञ्चाशत्तमोऽध्यायः ॥ ५२ ॥ युधिष्ठिरउवाच ॥ आषाढकृष्णपक्षेतुकिंनामैकादशीभवेत् ॥ कथयस्वप्रसादेनवासुदेवममाग्रतः ॥ १ ॥
श्रीकृष्णउवाच ॥ व्रतानामुत्तमंराजन्कथयामितवाग्रतः ॥ सर्वपापक्षयकरंसर्वमुक्तिप्रदायकम् ॥ २ ॥ आषाढस्यासितेपक्षेयोगिनीनामना
मतः ॥ एकादशीनृपश्रेष्ठमहापातकनाशिनी ॥ ३ ॥ संसारार्णवमग्नानांपोतभूतासनातनी ॥ जगत्त्रयेसारभूतायोगिनीव्रतकारिणाम् ॥ ४ ॥
कथयामितवाग्रेऽहंकथांपौराणिकींशुभाम् ॥ अलकायांराजराजःशिवभक्तिपरायणः ॥ ५ ॥ तस्यासीत्पुष्पबटुकोहेममालीतिनामतः ॥ तस्य
पत्नीसुरूपाचविशालाक्षीतिनामतः ॥ ६ ॥ सतस्यांचासक्तमनाःकामपाशवशंगतः ॥ मानसात्पुष्पनिचयमानीयस्वगृहेस्थितः ॥ ७ ॥ पत्नी
प्रेमरसासक्तोनकुबेरालयंगतः ॥ कुबेरोदेवसदनेकरोतिशिवपूजनम् ॥८॥ मध्याह्नसमयेराजन्पुष्पागमसमीक्षकः ॥ हेममालीस्वभवनेरमतेकान्तया
सह ॥ ९ ॥ यक्षराट्प्रत्युवाचाथकालातिक्रमकोपितः ॥ कस्मान्नायातिभोयक्षाहेममालीदुरात्मवान् ॥ निश्चयःक्रियतामस्यइत्युवाचपुनःपुनः ॥
॥ १० ॥ यक्षाऊचुः ॥ वनिताकामुकोगेहेरमतेस्वेच्छयानृप ॥ तेषांवाक्यंसमाकर्ण्यकुबेरःकोपपूरितः ॥ ११ ॥ आह्वयामासतंतूर्णंबटुकं
हेममालिनम् ॥ ज्ञात्वाकालात्ययंसोऽपिभयव्याकुललोचनः ॥ १२ ॥ अस्नातएवआगत्यकुबेरस्याग्रतःस्थितः ॥ तंदृष्ट्वाधनदःक्रुद्धःक्रोधसंरक्त
लोचनः ॥ प्रत्युवाचरुषाविष्टःकोपप्रस्फुरिताधरः ॥ १३ ॥ धनदउवाच ॥ आःपापदुष्टदुर्वृत्तकृतवान्देवहेलनम् ॥ अष्टादशकुष्ठचितो

१ 'सन्निहत्यायां कुरुक्षेत्रे' इ० पा०। २ 'आजगाम नमस्कृत्य' इ० पा०। ३ 'अतो भवा श्वित्रयुक्तो' इ० पा०।

CC-0. In Public Domain. Digitization by eGangotri

वियुक्तःकान्तयातया ॥१४॥ अस्मात्स्थानादपध्वस्तोगच्छस्वंप्रमथाधम ॥ इत्युक्तेवचनेतस्यतस्मात्स्थानात्पपातसः ॥ १५ ॥ महादुःखाभिभूतश्च
कुष्ठैःपीडितविग्रहः ॥ नसुखंदिवसेतस्यननिद्रांलभतेनिशि ॥ १६ ॥ छायायांपीडिततनुर्निदाघेऽत्यन्तपीडितः ॥ शिवपूजाप्रभावेणस्मृतिस्तस्य
नलुप्यते ॥ १७ ॥ पातकेनाभिभूतोऽपिपूर्वंकर्मस्मरत्यसौ ॥ भ्रममाणस्ततोगच्छन्हिमाद्रिंपर्वतोत्तमम् ॥ १८ ॥ तत्रापश्यन्मुनिवरंमार्कण्डेयतपो
निधिम् ॥ यस्यायुर्विद्यतेराजन्ब्रह्मणोवयसासमम् ॥ १९ ॥ ववन्देचरणौतस्यदूरतःपापकर्मकृत् ॥ मार्कण्डेयोमुनिवरोदृष्ट्वातंकम्पितंतथा ॥ २० ॥
परोपकरणार्थायसमाहूयेदमब्रवीत् ॥२१॥ मार्कण्डेयउवाच॥कस्मात्कुष्ठाभिभूतस्त्वंकुतोनिन्द्यतरोह्यसि ॥ इत्युक्तःसप्रत्युवाचमार्कण्डेयंमहामुनिम्॥
॥ २२ ॥ हेममाल्युवाच ॥ राजराजस्यानुचरोहेममालीतिनामतः ॥ मानसात्पद्मनिचयमानीयप्रत्यहंमुने ॥ २३ ॥ शिवपूजनवेलायांकुबेराय
समर्पये ॥ एकस्मिन्दिवसेचैवकालश्चाविदितोमया ॥ २४ ॥ पत्नीसौख्यप्रसक्तेनशोकव्याकुलचेतसा ॥ ततःक्रुद्धेनशप्तोऽस्मिराजराजेनवैमुने ॥
॥ २५ ॥ कुष्ठाभिभूतःसंजातोवियुक्तःकान्तयातया ॥ अधुनातवसान्निध्यंप्राप्तोऽस्मिशुभकर्मणा ॥ २६ ॥ सतांस्वभावतश्चित्तंपरोपकरणे
क्षमम् ॥ इतिज्ञात्वामुनिश्रेष्ठमांप्रशाधिकृतागसम् ॥ २७ ॥ मार्कण्डेयउवाच ॥ त्वयासत्यमिहप्रोक्तंनासत्यंभाषितंयतः ॥ अतोव्र
तोपदेशंतेकथयामिशुभप्रदम् ॥ २८ ॥ आषाढेकृष्णपक्षेतुयोगिनीव्रतमाचर ॥ अस्यव्रतस्यपुण्येनकुष्ठंयास्यतिवैध्रुवम् ॥ २९ ॥ इति
वाक्यमृषेःश्रुत्वादण्डवत्पतितोभुवि ॥ उत्थापितःसमुनिनाबभूवातीवहर्षितः ॥ ३० ॥ मार्कण्डेयोपदेशेनव्रतंतेनकृतंयथा ॥ अष्टादशैवकुष्ठा
निगतानितस्यसर्वशः ॥ ३१ ॥ मुनेर्वाचाततःसम्यग्व्रतेचीर्णेऽभवत्सुखी ॥ ईदृग्विधंनृपश्रेष्ठकथितंयोगिनीव्रतम् ॥ ३२ ॥ अष्टाशीति
सहस्राणिद्विजान्भोजयतेतुयः ॥ तत्समंफलमाप्नोतियोगिनीव्रतकृन्नरः ॥ ३३ ॥ महापापप्रशमनंमहापुण्यफलप्रदम् ॥ पठनाच्छ्रवणान्मर्त्यःसर्वं
पापैःप्रमुच्यते ॥ ३४ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०उमापतिनारदसंवादआषाढकृष्णयोगिन्येकादशीमाहात्म्यंनामत्रिपञ्चाशत्तमो
ऽध्यायः ॥ ५३ ॥ युधिष्ठिरउवाच ॥ आषाढस्यसितेपक्षेकाचैवैकादशीभवेत् ॥ किंनामकोविधिस्तस्याएतद्विस्तरतोवद ॥ १ ॥
श्रीकृष्णउवाच ॥ कथयामिमहापुण्यांस्वर्गमोक्षप्रदायिनीम् ॥ शयनींनामनामेतिसर्वपापहरांपराम् ॥ २ ॥ यस्याःश्रवणमात्रेणवाजपेयफलं
लभेत् ॥ सत्यंसत्यंमयाप्रोक्तंनातःपरतरंनृणाम् ॥३॥ पापिनांपापनाशायसृष्टाधात्रामहोत्तमा ॥ अतःपरानराजेन्द्रवर्त्ततेमोक्षदायिनी॥ ४ ॥ एतस्मा
त्कारणाद्राजञ्छ्रूयतांगतिरुत्तमा ॥ भवेन्नराणांश्रोतृणांकथायाःश्रवणादपि ॥ ५ ॥ तेसदावैष्णवाराजन्ममभक्तिपरायणाः ॥ आषाढेवामनश्चैव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूज्यतेपरमेश्वरः ॥६॥ वामनःपूजितोयेनकमलैःकमलेक्षणः ॥ आषाढस्यसितेपक्षेशयन्याश्वदिनेतथा ॥७॥ तेनार्चितंजगत्सर्वंत्रयोदेवाःसनातनाः॥
कृताचैकादशीयेनहरिवासरमुत्तमम् ॥ ८ ॥ युधिष्ठिरउवाच॥संशयोऽस्तिमहान्मेऽत्रश्रूयतांपुरुषोत्तम ॥ कथंसुप्तोऽसिदेवेशकथंचबलिमाश्रितः॥९ ॥
कथंचभूमौसंवेशःकिंकुर्वन्तिजनाःपरे ॥ एतद्वदमहाप्राज्ञसंशयोऽस्तिमहान्मम ॥ १० ॥ श्रीकृष्णउवाच ॥ श्रूयतांराजशार्दूलकथापापहरा
परा ॥ यस्याःश्रवणमात्रेणसर्वपापक्षयोभवेत् ॥ ११ ॥ बलिनामापूर्वमासीद्दैत्यस्त्रेतायुगेनृप ॥ पूजयंश्चैवमांनित्यंमद्भक्तोमत्परायणः ॥१२॥यज्ञैस्तु
विधिवद्दैत्योयजतेमांसनातनम् ॥ भक्त्याचपरयाराजन्यज्ञकृद्व्रतकृत्तथा ॥ १३ ॥ परंविचार्यबहुधामघोनाचैवसूक्तिभिः ॥ गुरुणादैवतैःसार्धंबहुधा
पूजितोऽप्यहम् ॥१४॥ततोवामनरूपेणअवतारेचपञ्चमे ॥अत्युग्ररूपेणतदासर्वब्रह्माण्डरूपिणा॥१५॥ वाक्छलेनजितादैत्याःसत्यमाश्रित्यसंस्थितः॥
शुक्रस्तंवारयामासयन्नारायणइत्ययम् ॥ १६ ॥ याचितावसुधाराजन्सार्धत्रयपदीमया ॥ संकल्पोदकमात्रेतुकरेतेनैवचार्पिते ॥ १७ ॥ रूपमी
दृग्विधंराजंस्तदाशृणुमयाकृतम् ॥ भूलोकेचरणौन्यस्यभुवर्लोकेतुजानुनी ॥ १८ ॥ स्वर्लोकेचकटिंन्यस्यमहर्लोकेतथोदरम् ॥ जनलोकेचहृदयं
तपोलोकेतुकण्ठकम् ॥ १९ ॥ सत्यलोकेमुखंस्थाप्यमस्तकंचतदूर्ध्वकम् ॥ चन्द्रसूर्यग्रहाश्चैवनक्षत्राणितथैवच ॥ २० ॥ देवाःसेन्द्राश्चनागाश्चयक्ष
गन्धर्वकिन्नराः ॥ स्तुवन्तोवेदसंभूतैःसूक्तैश्वविविधैस्तथा ॥२१ ॥ करेगृहीत्वाचबलिंत्रिपदैःपूरितामही ॥ अर्धंचतस्यपृष्ठेचपदंन्यस्तंमयातदा॥२२॥
गतोरसातलंराजन्दानवोममपूजकः ॥ क्षिप्तोऽधोदानवश्चैवकिमकुर्वंततःपरम् ॥ २३ ॥ विनयेनानतोऽसौवैसुप्रसन्नोजनार्दनः ॥ आषाढ
शुक्लपक्षेतुशयनीहरिवासरः ॥ २४ ॥ तस्यामेकाचमूर्तिर्मेबलिमाश्रित्यतिष्ठति ॥ द्वितीयाशेषपृष्ठेवैक्षीरसागरमध्यतः ॥ २५ ॥ स्वपित्येवमहा
राजयावदागामिकार्तिकीम् ॥ तावद्भवेत्सुधर्मात्मासर्वधर्मोत्तमोत्तमः ॥२६ ॥ व्रतंचकुरुतेमर्त्यःसयातिपरमांगतिम् ॥ एतस्मात्कारणाद्राजन्कर्तव्या
चप्रयत्नतः॥२७॥नातःपरतराकाचित्पवित्रापापनाशिनी ॥ यस्यांस्वपितिदेवेशःशङ्खचक्रगदाधरः॥२८॥तस्यांचपूजयेद्देवंशङ्खचक्रगदाधरम् ॥
रात्रौजागरणंकृत्वाभक्त्याचैवविशेषतः ॥ २९ ॥ नास्याःपुण्यस्यसङ्ख्यानंकर्तुंशक्तश्चतुर्मुखः ॥ एवंयःकुरुतेराजन्नेकादश्याव्रतोत्तमम् ॥ ३० ॥ स
र्वपापहरंचैवभुक्तिमुक्तिप्रदायकम् ॥ सचलोकेममसदाश्वपचोऽपिप्रियङ्करः ॥ ३१ ॥ दीपदानेनपालाशपत्रेभुक्त्याव्रतेनच ॥ चातुर्मास्यंनयन्तीह
तेनरामयवल्लभाः ॥ ३२ ॥ चातुर्मास्येहरौसुप्तेभूमिशायीभवेन्नरः ॥ श्रावणेवर्जयेच्छाकंदधिभाद्रपदेतथा ॥ ३३ ॥ दुग्धमाश्वयुजित्याज्यं
कार्त्तिकेद्विदलंत्यजेत् ॥ अथवाब्रह्मचर्यस्थःसयातिपरमांगतिम् ॥ ३४ ॥ एकादश्याव्रतेनैवपुमान्पापैर्विमुच्यते ॥ कर्तव्यासर्वदाराजन्वि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्मर्तव्यानकर्हिचित् ॥ ३५ ॥ शयनीबोधिनीमध्येयाकृष्णैकादशीभवेत् ॥ सैवोपोष्यागृहस्थस्यनान्याकृष्णाकदाचन ॥ ३६ ॥ शृणुयाच्चैव
योराजन्कथांपापहरांपराम् ॥ अश्वमेधस्ययज्ञस्यफलंप्राप्नोतिमानवः॥ ३७ ॥इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०उमामहेश्वरसंवादेदेवशयन्येकादशी
नामचतुष्पञ्चाशत्तमोऽध्यायः॥५४॥युधिष्ठिरउवाच ॥ श्रावणस्यासितेपक्षेकिंनामैकादशीभवेत्॥तन्नःकथयगोविन्दवासुदेवनमोऽस्तुते॥१॥श्रीकृष्ण
उवाच ॥ शृणुराजन्प्रवक्ष्यामिआख्यानंपापनाशनम् ॥ यत्प्रोक्तंब्रह्मणापूर्वंपृच्छतेनारदायवै ॥ २ ॥ नारदउवाच ॥ भगवञ्छ्रोतुमिच्छामित्वत्तोऽहं
कमलासन ॥ श्रावणस्यासितेपक्षेकिंनामैकादशीभवेत् ॥ ३ ॥ कोदेवःकोविधिस्तस्याःकिंपुण्यंकथयप्रभो ॥ इतितस्यवचःश्रुत्वाब्रह्मावचनमब्रवीत् ॥
॥ ४ ॥ ब्रह्मोवाच ॥ शृणुनारदतेवच्मिलोकानांहितकाम्यया ॥ श्रावणैकादशीकृष्णाकामिकानामनामतः ॥ ५ ॥ अस्याःश्रवणमात्रेणवाजपेयफलं
लभेत् ॥ अस्यांयजतिदेवेशंशङ्खचक्रगदाधरम् ॥ ६ ॥ श्रीधराख्यंहरिंविष्णुंमाधवंमधुसूदनम् ॥ पूजयेद्ध्यायतेयोवैतस्यपुण्यफलंशृणु ॥ ७ ॥
नगङ्गायांनकाश्यांचनैमिषेनचपुष्करे ॥ तत्फलंसमवाप्नोतियत्फलंकृष्णपूजनात् ॥८॥ गोदावर्यांगुरौसिंहेव्यतीपातेचदण्डके ॥ यत्फलंसमवाप्नोति
तत्फलंकृष्णपूजनात् ॥ ९ ॥ ससागरवनोपेतांयोददातिवसुन्धराम् ॥ कामिकाव्रतकारीचह्युभौसमफलौस्मृतौ ॥ १० ॥ प्रसूयमानांयोधेनुंदद्यात्सोप
स्करांनरः ॥ तत्फलंसमवाप्नोतिकामिकाव्रतकारकः ॥ ११ ॥ श्रावणेश्रीधरंदेवंपूजयेद्योनरोत्तमः ॥ तेनैवपूजितादेवागन्धर्वोरगपन्नगाः ॥ १२ ॥
तस्मात्सर्वप्रयत्नेनकामिकादिवसेहरिः ॥ पूजनीयोयथाशक्तिमानुषैःपापभीरुभिः ॥ १३ ॥ येसंसारार्णवेमग्नाःपापपङ्कसमाकुले ॥ तेषामुद्धरणार्था
यकामिकाव्रतमुत्तमम् ॥ १४ ॥ नातःपरतराकाचित्पवित्रापापहारिणी ॥ एवंनारदजानीहिस्वयमाहपरोहरिः ॥ १५ ॥ अध्यात्मविद्यानिरतैर्यत्फलं
प्राप्यतेनरैः ॥ ततोबहुतरंविद्धिकामिकाव्रतसेविनाम् ॥ १६ ॥ रात्रौजागरणंकृत्वाकामिकाव्रतकृन्नरः ॥ नपश्यतियमंरौद्रंनैवगच्छतिदुर्गतिम् ॥
॥ १७ ॥ नपश्यतिकुयोनिंचकामिकाव्रतसेवनात् ॥ कामिकायाव्रतेचीर्णेकैवल्यंयोगिनोगताः ॥१८॥ तस्मात्सर्वप्रयत्नेनकर्तव्यानियतात्मभिः ॥
तुलसीप्रभवैःपत्रैर्योनरःपूजयेद्धरिम् ॥ १९ ॥ नलिप्यतेसपापेनपद्मपत्रमिवाम्भसा ॥ सुवर्णभारमेकंतुरजतंचचतुर्गुणम् ॥ २० ॥ तत्फलंसमवा
प्नोतितुलसीदलपूजनात् ॥ रत्नमौक्तिकवैडूर्यप्रवालादिभिरर्चितः ॥ २१ ॥ नतुष्यतितथाविष्णुस्तुलसीदलतोयथा ॥ तुलसीमञ्जरीभिश्च ॥ ५५ ॥
पूजितोयेनकेशवः ॥ आजन्मपातकंतस्यनिश्चयंयातिसंक्षयम् ॥ २२ ॥ यादृष्टानिखिलाघसङ्घशमनीस्पृष्टावपुःपावनीरोगाणामभिवन्दितानिर
सिनीसिक्तान्तकत्रासिनी ॥ प्रत्यासत्तिविधायिनीभगवतःकृष्णस्यसंरोपितान्यस्तातच्चरणेविमुक्तिफलदातस्यैतुलस्यैनमः ॥ २३ ॥ दीपंददाति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योमर्त्योदिवारात्रंहरेर्दिने ॥ तस्यपुण्यस्यसङ्ख्यातुंचित्रगुप्तोनवेत्त्यलम् ॥ २४ ॥ कृष्णाग्रेदीपकोयस्यज्वलत्येकादशीदिने ॥ पितरस्तस्य
तृप्यन्तिअमृतेनदिविस्थिताः ॥ २५ ॥ घृतेनदीपंप्रज्वाल्यतिलतैलेनवापुनः ॥ प्रयातिसूर्यलोकंचदीपकोटिशतार्चितः ॥ २६ ॥ अयंत
वाग्रेकथितःकामिकामहिमामया ॥ अतोनरैःप्रकर्त्तव्यासर्वपातकहारिणी ॥ २७ ॥ ब्रह्महत्यापहरणीभ्रूणहत्याविनाशिनी ॥ वैष्णवस्थान
दात्रीचमहापुण्यफलप्रदा ॥ २८ ॥ श्रुत्वामाहात्म्यमेतस्यानरःश्रद्धासमन्वितः ॥ विष्णुलोकमवाप्नोतिसर्वपापैःप्रमुच्यते ॥ २९ ॥ इतिश्रीपाद्मे
महापुराणेपञ्चप०उत्तर०उमापतिनारदसंवादेश्रावणकृष्णैकादशीनामपञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥ युधिष्ठिरउवाच ॥ श्रावणस्यसितेपक्षेकिं
नामैकादशीभवेत् ॥ कथयस्वप्रसादेनममाग्रेमधुसूदन ॥ १ ॥ श्रीकृष्णउवाच ॥ शृणुष्वावहितोराजन्कथांपापहरांपराम् ॥ यस्याःश्रवणमात्रेण
वाजपेयफलंभवेत् ॥ २ ॥ द्वापरस्ययुगस्यादौपुरामाहिष्मतीपुरे ॥ राजामहीजिदाख्यातोराज्यंपालयतिस्वकम् ॥ ३ ॥ पुत्रहीनस्यतस्यैवन
तद्राज्यंसुखप्रदम् ॥ अपुत्रस्यसुखंनास्तिइहलोकेपरत्रच ॥ ४ ॥ चिन्तमानस्यतस्यैवंकालोबहुतरोगतः ॥ नप्राप्तश्चसुतोराज्ञासर्वसौख्यप्रदोनृणाम्॥
॥ ५ ॥ दृष्ट्वात्मानंप्रवयसंराजाचिन्तापरोऽभवत् ॥ सदोगतःप्रजामध्यइदंवचनमब्रवीत् ॥६॥ इहजन्मनिभोलोकानमयापातकंकृतम् ॥ अन्यायो
पार्जितंवित्तंक्षिप्तंकोशेमयानहि ॥ ७ ॥ ब्रह्मस्वंदेवद्रविणंनगृहीतंमयाक्वचित् ॥ न्यासापहारोनकृतःपरस्यबहुपापदः ॥ ८ ॥ पुत्रवत्पालितोलोको
धर्मेणविजितामही ॥ दुष्टेषुपातितोदण्डोबन्धुपुत्रोपमेष्वपि ॥ ९ ॥ शिष्टास्तुपूजितानित्यंनद्वेष्याश्चमयाजनाः ॥ इत्येवंब्रुवतोमार्गंधर्मयुक्तंद्विजो
त्तमाः ॥ १० ॥ कस्मान्ममगृहेपुत्रोनजातस्तद्विमृश्यताम् ॥ इतिवाक्यंद्विजाःश्रुत्वासप्रजाःसपुरोहिताः ॥ ११ ॥ मन्त्रयित्वानृपहितंजग्मुस्तेगहनं
वनम् ॥ इतस्ततश्चपश्यन्तआश्रमानृषिसेवितान् ॥ १२ ॥ नृपतेर्हितमिच्छन्तोददृशुर्मुनिसत्तमम् ॥ तप्यमानंतपोघोरंनिरालम्बंनिरामयम् ॥ १३॥
निराहारंजितात्मानंजितक्रोधंसनातनम् ॥ लोमशंधर्मतत्त्वज्ञंसर्वशास्त्रविशारदम् ॥ १४ ॥ दीर्घायुषंमहात्मानंसकेशंब्रह्मसंमितम् ॥ कल्पेकल्पेगते
तस्यएकंलोमविशीर्यते ॥ १५ ॥ अतोलोमशनामायंत्रिकालज्ञोमहामुनिः ॥ तंदृष्ट्वाहर्षिताःसर्वआजग्मुस्तस्यसन्निधिम् ॥ १६ ॥ यथान्यायंयथा
र्हंतेनमश्चक्रुर्यथोदितम् ॥ विनयावनताःसर्वऊचुस्तेचपरस्परम्॥ १७ ॥ अस्मद्भाग्यवशादेवप्राप्तोऽयंमुनिसत्तमः ॥ तांस्तथासप्रजान्वीक्ष्यउवाचऋषि
सत्तमः ॥ १८ ॥ लोमशउवाच ॥ किमर्थमिहसंप्राप्ताःकथयध्वंसकारणम् ॥ दर्शनाद्धृष्टमनसःस्तुवन्तश्चैवमांकिमु ॥ १९ ॥ असंशयंकरिष्यामि
भवतांयद्धितंभवेत् ॥ परोपकृतयेजन्ममादृशानांनसंशयः ॥ २० ॥ जनाऊचुः ॥ श्रूयतामभिधास्यामोवयंस्वागमकारणम् ॥ संशयच्छेदनार्थाय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तवसान्निध्यमागताः ॥ २१ ॥ पद्मयोनेःपरतरस्त्वत्तःश्रेष्ठोनविद्यते ॥ अतःकार्यवंशात्प्राप्ताःसमीपभवतोवयम् ॥ २२ ॥ महीजिन्नामराजासौपुत्र
हीनोऽस्तिसांप्रतम् ॥ वयंतस्यप्रजाब्रह्मन्पुत्रवत्तेनपालिताः ॥ २३ ॥ तंपुत्ररहितंदृष्ट्वातस्यदुःखेनदुःखिताः ॥ तपःकर्तुमिहायातामतिंकृत्वातुनै
ष्ठिकीम् ॥ २४ ॥ तस्यभाग्येनदृष्टोऽसिह्यस्माभिस्त्वंद्विजोत्तम ॥ महतांदर्शनेनैवकार्यसिद्धिर्भवेन्नृणाम् ॥ २५ ॥ उपदेशंवदमुनेराज्ञःपुत्रोयथाभवेत्
इतितेषांवचःश्रुत्वामुहूर्तंध्यानमास्थितः ॥ प्रत्युवाचमुनिर्ज्ञात्वातस्यजन्मपुरातनम् ॥ २६ ॥ लोमशउवाच ॥ पुराजन्मनिवैश्योऽयंधनहीनो
नृशोपकृत् ॥ वाणिज्यकर्मनिरतोग्रामाद्ग्रामान्तरंभ्रमन् ॥२७॥ ज्येष्ठेमासिसितेपक्षेदशमीदिवसेतथा ॥ मध्यगेद्युमणौप्राप्तेग्रामसीम्नितृषाकुलः ॥२८॥
रम्यंजलाशयंदृष्ट्वाजलपानेमनोदधे॥ सद्यस्ततःसवत्साचधेनुस्तत्रसमागता॥२९॥ तृष्णातुरानिदाघार्तातस्यामम्बुपपौतुसा ॥पिबन्तींवारयित्वाताम
सौतोयंपपौस्वयम् ॥३०॥कर्मणातेनपापेनपुत्रहीनोनृपोऽभवत् ॥ कस्यापिजन्मनःपुण्यात्प्राप्तंराज्यमकण्टकम् ॥३१॥ लोकाऊचुः॥ पुण्यात्पापंक्षयं
यातिपुराणेश्रूयतेमुने ॥ पुण्योपदेशंकथययेनपापक्षयोभवेत् ॥ यथाभवत्प्रसादेनपुत्रोभवतिभूपतेः ॥ ३२ ॥ लोमशउवाच ॥ श्रावणेशुक्लपक्षेतु
पुत्रदानामविश्रुता ॥ एकादशीवाञ्छितदाकुरुध्वंतद्व्रतंजनाः ॥ ३३ ॥ इतिश्रुत्वानमस्कृत्यमुनिमेत्यपुरंव्रतम् ॥ यथाविधियथान्यायंकृतंतैर्जागरा
न्वितम् ॥ ३४ ॥ तस्यपुण्यंसुविमलंदत्तंनृपतयेजनैः ॥ दत्तेपुण्येऽथसाराज्ञीगर्भमाधत्तशोभनम् ॥ ३५ ॥ प्राप्तेप्रसवकालेसासुषुवेपुत्रमूर्जितम् ॥
श्रावणस्यसितेपक्षेकर्कटस्थेदिवाकरे ॥ ३६ ॥ द्वादश्यांवासुदेवायपवित्रारोपणंस्मृतम् ॥ हेमरौप्यताम्रक्षौमैःसूत्रैःकौशेयपद्मजैः ॥ ३७ ॥ कुशैःकाशै
श्चकार्पासैर्ब्राह्मण्याकर्तितैःशुभैः ॥स्नात्वात्रिगुणितंसूत्रंत्रिगुणीकृत्यशोधयेत् ॥३८॥ गोदोहान्तरितेकालेपूर्वेद्युरधिवासनम् ॥ब्राह्मणेभ्योनमस्कृत्यगुरु
पादौप्रणम्यच ॥ ३९ ॥ गीतमङ्गलनिर्घोषैःकुर्याज्जागरणंततः ॥ ब्राह्मणाःक्षत्रियावैश्याभिह्वाःशूद्रास्तथैवच ॥ ४० ॥ स्वधर्मावस्थिताःसर्वेभक्त्या
कुर्युःपवित्रकम् ॥ ततःपवित्रंगुरवेदद्याद्वैविधिपूर्वकम् ॥४१॥ब्राह्मणान्वैष्णवांश्चैवगन्धपुष्पादिनार्चयेत् ॥ अतोदेवेतिमन्त्रेणद्विजोविष्णौनिवेदयेत् ॥
॥ ४२ ॥ शूद्रस्तुमूलमन्त्रेणयथाविष्णौतथाशिवे ॥ वर्षेवर्षेप्रकर्त्तव्यंपवित्रारोपणंनरैः ॥४३ ॥ भुक्तिमुक्तिचवाञ्छद्भिःसंसारेशोकसागरे ॥ नकरोति
विधानेनपवित्रारोपणंतुयः ॥ ४४ ॥ तस्यसांवत्सरीपूजानिष्फलावैष्णवस्यतु ॥ श्रुत्वामाहात्म्यमेतस्यानरःपापात्प्रमुच्यत ॥ इहपुत्रसुखंप्राप्य
परत्रस्वर्गतिंलभेत् ॥ ४५ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०उत्तर०उमापतिनारदसंवादेश्रावणशुक्लपवित्रारोपणीपुत्रदैकादशीनामषट्पञ्चाशत्तमो
ऽध्यायः ॥ ५६ ॥ युधिष्ठिरउवाच ॥ भाद्रस्यकृष्णपक्षेतुकिंनामैकादशीभवेत् ॥ एतदिच्छाम्यहंश्रोतुंकथयस्वजनार्दन ॥ १ ॥ श्रीकृष्णउवाच ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शृणुष्वैकमनाराजन्कथयिष्यामिविस्तरात् ॥ अजेतिनामतःप्रोक्तासर्वपापप्रणाशिनी ॥ २ ॥ पूजयित्वाहृषीकेशंव्रतमस्यांकरोतियः ॥
पापानितस्यनश्यन्तिव्रतस्यश्रवणादपि ॥ ३ ॥ नातःपरतराराजल्लोँकद्वयहितायवै ॥ सत्यमुक्तंमयाह्येतन्नासत्यंममभाषितम् ॥ ४ ॥ हरिश्चन्द्र
इतिख्यातोबभूवनृपतिःपुरा ॥ चक्रवर्तीसत्यसन्धःसमस्तायाभुवःपतिः ॥ ५ ॥ कस्यापिकर्मणःप्राप्तौराज्यभ्रष्टोबभूवसः ॥ विक्रीतौवनितापुत्रौस
चकारात्मविक्रयम् ॥ ६ ॥ पुल्कसस्यचदासत्वंगतोराजासपुण्यकृत् ॥ सत्यमालम्ब्यराजेन्द्रमृतचैलापहारकः ॥ ७ ॥ सोऽभवन्नृपतिश्रेष्ठोनसत्या
च्चलितस्तथा ॥ एवंचतस्यनृपतेर्बहवोवत्सरागताः ॥ ८ ॥ ततश्चिन्तापरोराजासबभूवातिदुःखितः ॥ किंकरोमिक्वगच्छामिनिष्कृतिर्मेकथंभवेत्
॥ ९ ॥ इतिचिन्तयतस्तस्यमग्नस्यवृजिनार्णवे ॥ आजगाममुनिःकश्चिज्ज्ञात्वाराजानमातुरम् ॥ १० ॥ परोपकरणार्थायनिर्मिताब्रह्मणा
द्विजाः ॥ सतंदृष्ट्वाद्विजवरंननामनृपसत्तमः ॥ ११ ॥ कृताञ्जलिपुटोभूत्वागौतमस्याग्रतःस्थितः ॥ कथयामासवृत्तान्तमात्मनोदुःखसंयुतम्
॥ १२ ॥ श्रुत्वानृपतिवाक्यानिगौतमोविस्मयान्वितः ॥ उपदेशंनृपतयेव्रतस्यास्यददौमुनिः ॥ १३॥ मासिभाद्रपदेराजन्कृष्णपक्षेऽतिशोभना ॥
एकादशीसमायाताअजानामेतिपुण्यदा॥ १४ ॥ अस्याःकुरुव्रतंराजन्पापस्यान्तोभविष्यति ॥ तवभाग्यवशादेषासप्तमेऽह्निसमागता ॥ १५ ॥ उप
वासपरोभूत्वारात्रौजागरणंकुरु ॥ एवमस्याव्रतेचीर्णेतवपापक्षयोध्रुवम् ॥ १६ ॥ तवपुण्यप्रभावेणचागतोऽहंनृपोत्तम ॥ इत्येवंकथयित्वाचमुनिरन्तर
धीयत॥ १७॥मुनिवाक्यंनृपःश्रुत्वाचकारव्रतमुत्तमम् ॥कृतेतस्मिन्व्रतेराज्ञापापस्यान्तोऽभवत्क्षणात् ॥१८॥ श्रूयतांराजशार्दूलप्रभावोऽस्यव्रतस्यच ॥
यद्दुःखबहुभिर्वर्षैर्भोक्तव्यंतत्क्षयोभवेत् ॥ १९ ॥ निस्तीर्णदुःखोराजासीद्व्रतस्यास्यप्रभावतः ॥ पत्न्यासहसमायोगंपुत्रजीवनमापसः ॥ २०॥ दिवि
दुन्दुभयोनेदुःपुष्पवर्षमभूद्दिवः ॥ एकादश्याःप्रभावेणप्राप्यराज्यमकण्टकम् ॥ २१ ॥ स्वर्गंलेभेहरिश्चन्द्रःसपौरःसपरिच्छदः ॥ ईदृग्विधंव्रतंराजन्ये
कुर्वन्तिचमानवाः ॥ २२ ॥ सर्वपापविनिर्मुक्तास्त्रिदिवंयान्तितेनृप ॥ पठनाच्छ्रवणाद्वापिअश्वमेधफलंलभेत् ॥ २३ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०
उत्तर०उमापतिनारदसंवादेभाद्रपदकृष्णाजैकादशीनामसप्तपञ्चाशत्तमोध्यायः ॥५७॥ युधिष्ठिरउवाच ॥ नभस्यस्यसितेपक्षेकिंनामैकादशीभवेत् ॥
कोदेवःकोविधिस्तस्यएतदाख्याहिकेशव ॥ १ ॥ श्रीकृष्णउवाच ॥ कथयाम्रिमहीपालकथामाश्चर्यकारिणीम् ॥ कथयामासयांब्रह्मानारदायमहा
त्मने ॥२॥ नारदउवाच ॥ कथयस्वप्रसादेनचतुर्मुखनमोऽस्तुते ॥ नभस्यशुक्लपक्षेतुकिंनामैकादशीभवेत् ॥ एतदिच्छाम्यहंश्रोतुंविष्णोराराधना
यवै ॥ ३ ॥ ब्रह्मोवाच ॥ वैष्णवोऽसिमुनिश्रेष्ठसाधुपृष्टंकिलत्वया ॥ नातःपरतरालोकेपवित्राहरिवासरात् ॥ ४ ॥ पद्मानामेतिविख्यातानभस्यै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कादशीसिता ॥ हृषीकेशःपूज्यतेऽस्यांकर्त्तव्यंव्रतमुत्तमम् ॥ ५ ॥ कथयामितवाग्रेऽहंकथांपौराणिकींशुभाम् ॥ यस्याःश्रवणमात्रेणमहापापंप्रणश्य
ति ॥ ६ ॥ मान्धातानामराजर्षिर्विवस्वद्वंशसंभवः ॥ बभूवचक्रवर्तीससत्यसन्धःप्रतापवान् ॥ ७ ॥ धर्मतःपालयामासप्रजाःपुत्रानिवौरसान् ॥
तस्यराज्येदुर्भिक्षंनाधयोव्याधयस्तथा ॥ ८ ॥ निरातङ्काःप्रजास्तस्यधनधान्यसमेधिताः ॥ न्यायेनोपार्जितंवित्तंतस्यकोशेमहीपतेः ॥ ९ ॥ स्व
स्वधर्मेप्रवर्त्तन्तेसर्वेवर्णाश्रमास्तथा ॥ कामधेनुसमाभूमिस्तस्यराज्येमहीपतेः ॥ १० ॥ तस्यैवंकुर्वतोराज्यंबहुवर्षगणागताः ॥ अथैकस्मिंश्चसंप्राप्ते
विपाकःकर्मणःखलु ॥ ११ ॥ वर्षत्रयंतद्विषयेनववर्षबलाहकः ॥ तेनभग्नाःप्रजास्तस्यबभूवुःक्षुधयार्दिताः ॥ १२ ॥ स्वाहास्वधावषट्कारवेदाध्ययन
वर्जिताः ॥ बभूवविषयस्तस्याभाग्येनदैवपीडितः ॥ अथप्रजाःसमागम्यराजानमिदमब्रुवन् ॥ १३ ॥ प्रजाऊचुः ॥ श्रोतव्यंनृपशार्दूलप्रजानांवचनं
त्वया ॥ आपोनाराइतिप्रोक्ताःपुराणेषुमनीषिभिः ॥ १४ ॥ अयनंताभगवतस्तस्मान्नारायणःस्मृतः ॥ पर्जन्यरूपोभगवान्विष्णुःसर्वगतःस्थितः ॥
॥ १५ ॥ सएवंकुरुतेवृष्टिंवृष्टेरन्नंततःप्रजाः ॥ तदभावेनृपश्रेष्ठक्षयंगच्छन्तिवैप्रजाः ॥ तथाकुरुनृपश्रेष्ठयोगःक्षेमोयथाभवेत् ॥ १६ ॥ राजोवाच ॥
सत्यमुक्तंभवद्भिश्चनमिथ्याभिहितंक्कचित् ॥ अन्नंब्रह्मयतःप्रोक्तमन्नेसर्वंप्रतिष्ठितम् ॥ १७ ॥ अन्नाद्भवन्तिभूतानिजगदन्नेनवर्तते ॥ इत्येवंश्रूयतेलोके
पुराणेबहुविस्तरे ॥ १८ ॥ नृपाणामपचारेणप्रजानांपीडनंभवेत् ॥ नाहंपश्याम्यात्मकृतमेवंबुद्ध्याविचारयन् ॥ १९ ॥ तथापिप्रयतिष्येऽहंप्रजानां
हितकाम्यया ॥ इतिकृत्वामतिंराजापरिमेयपरिच्छदः॥२०॥नमस्कृत्यविधातारंजगामगहनंवनम् ॥ चचारमुनिमुख्यैश्चाप्याश्रमांस्तापसैःश्रितान् ॥
॥ २१ ॥ ददर्शाथब्रह्मसुतमृषिमाङ्गिरसंनृपः ॥ तेजसाद्योतितदिशंद्वितीयमिवपद्मजम् ॥२२॥ तंदृष्ट्वाहर्षितोराजाअवतीर्यस्ववाहनात् ॥ नमश्चक्रेऽस्य
चरणौकृताञ्जलिपुटोवशी ॥ २३ ॥ मुनिस्तमभिनन्द्याथस्वस्तिवाचनपूर्वकम् ॥ पप्रच्छकुशलंराज्येसप्तस्वङ्गेषुभूपतेः ॥ २४ ॥ निवेदयित्वाकुश
लंपप्रच्छानामयंनृपः ॥ दत्तासनोगृहीतार्घ्यउपविष्टोऽस्यसंनिधौ ॥ २५ ॥ प्रत्युवाचमुनिंराजापृष्टोह्यागमकारणम् ॥ २६ ॥ राजोवाच ॥ भगव
न्धर्मविधिनाममपालयतोमहीम् ॥ अनावृष्टिश्चसंवृत्तानाहंवेद्मयत्रकारणम् ॥ २७ ॥ संशयच्छेदनायात्रआगतोऽहंतवान्तिके ॥ योगक्षेमविधानेन
प्रजानांकुरुनिर्वृतिम् ॥ २८ ॥ ऋषिरुवाच ॥ एतत्कृतयुगंराजन्युगानामुत्तमंमतम् ॥ अत्रब्रह्मपरालोकाधर्मश्चात्रचतुष्पदः ॥ २९ ॥ अस्मिन्युगे
तपोयुक्ताब्राह्मणानेतरेजनाः ॥ विषयेतवराजेन्द्रवृषलोऽयंतपस्यति ॥ ३० ॥ एतस्मात्कारणाच्चैवनवर्षतिबलाहकः ॥ कुरुतस्यवधेयत्नंयेनदोषः
प्रशाम्यति ॥ ३१ ॥ राजोवाच ॥ नाहमेनंहनिष्यामितपस्यन्तमनागसम् ॥ धर्मोपदेशंकथयउपसर्गविनाशनम् ॥ ३२ ॥ ऋषिरुवाच॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्येवंतर्हिनृपतेकुरुष्वैकादशीव्रतम् ॥ नभस्यस्यसितेपक्षेपद्मानामेतिविश्रुता ॥ ३३ ॥ तस्याव्रतप्रभावेणसुवृष्टिर्भविताध्रुवम् ॥ सर्वसिद्धिप्रदा
ह्येषासर्वोपद्रवनाशिनी ॥ ३४ ॥ अस्याव्रतंकुरुनृपसप्रजःसपरिच्छदः ॥ इतिवाक्यमृषेःश्रुत्वाराजास्वगृहमागतः ॥ ३५ ॥ भाद्रमासेसि
तेपक्षेपद्माव्रतमथाकरोत् ॥ प्रजाभिःसहसर्वाभिश्चातुर्वर्ण्यसमन्वितः ॥ ३६ ॥ एवंव्रतेकृतेराजन्प्रववर्षबलाहकः ॥ जलेनप्लाविताभूमिरभव
त्सस्यशालिनी ॥ ३७ ॥ ऋषीश्वरप्रभावेणलोकाःसौख्यंप्रपेदिरे ॥ एतस्मात्कारणादेवंकर्त्तव्यंव्रतमुत्तमम् ॥ ३८ ॥ दध्योदनयुतंतस्यां
जलपूर्णंघटंद्विजे ॥ वस्त्रसंवेष्टितंदत्त्वाछत्रोपानहमेवच ॥ ३९ ॥ नमोनमस्तेगोविन्दबुधश्रवणसंज्ञक ॥ अघौघसंक्षयंकृत्वासर्वसौख्यप्रदोभव ॥
॥ ४० ॥ भुक्तिमुक्तिप्रदश्चैवलोकानांसुखदायकः ॥ पठनाच्छ्रवणाद्राजन्सर्वपापैःप्रमुच्यते ॥ ४१ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०
उत्तर०उमापतिनारदसंवादेभाद्रपदशुक्लपद्मैकादशीनामाष्टापञ्चाशत्तमोऽध्यायः ॥ ५८ ॥ युधिष्ठिरउवाच ॥ कथयस्वप्रसादेनममाग्रेमधुसू
दन ॥ इषस्यकृष्णपक्षेतुकिंनामैकादशीभवेत् ॥ १ ॥ श्रीकृष्णउवाच ॥ आश्विनेकृष्णपक्षेतुइन्दिरानामनामतः ॥ तस्याव्रतप्रभावेण
महापापंप्रणश्यति ॥ २ ॥ अधोयोनिगतानांचपितॄणांगतिदायिनी ॥ शृणुष्वावहितोराजन्कथांपापहरांपराम् ॥ ३ ॥ यस्याःश्रवण
मात्रेणवाजपेयफलंलभेत् ॥ पुराकृतयुगेराजन्बभूवनृपनन्दनः ॥ ४ ॥ इन्द्रसेनइतिख्यातःपुरामाहिष्मतीपतिः ॥ सराजापालयामासधर्मेण
यशसान्वितः ॥ ५ ॥ पुत्रपौत्रसमायुक्तोधनधान्यसमन्वितः ॥ माहिष्मत्यधिपोराजाविष्णुभक्तिपरायणः ॥ ६ ॥ जपन्गोविन्दनामानि
मुक्तिदानिनराधिपः ॥ कालंनयतिविधिवदध्यात्मध्यानचिन्तकः ॥ ७ ॥ एकस्मिन्दिवसेराज्ञिसुखासीनेसदोगते ॥ अवतीर्यागमत्तत्रव्यो
म्बरान्नारदोमुनिः ॥ ८ ॥ तमागतमभिप्रेक्ष्यप्रत्युत्थायकृताञ्जलिः ॥ पूजयित्वाथविधिनाचासनेसंन्यवेशयत् ॥ सुखोपविष्टःसमुनिः
प्रत्युवाचनृपोत्तमम् ॥ ९ ॥ मुनिरुवाच ॥ कुशलंतवराजेन्द्रसप्तस्वङ्गेषुवर्तते ॥ धर्मेमतिर्वर्ततेतेविष्णुभक्तिरतिस्तथा ॥ इतिवाक्यंतुदेवर्षेः
श्रुत्वाराजातमब्रवीत् ॥ १० ॥ राजोवाच ॥ त्वत्प्रसादान्मुनिश्रेष्ठसर्वंचकुशलंमम ॥ अद्यक्रतुक्रियाःसर्वाःसफलास्तवदर्शनात् ॥ प्रसादं
कुरुदेवर्षेब्रूह्यागमनकारणम् ॥ ११ ॥ नारदउवाच ॥ श्रूयतांनृपशार्दूलमद्वचोविस्मयप्रदम् ॥ ब्रह्मलोकादहंप्राप्तोयमलोकंनृपोत्तम ॥ १२ ॥
शमनेनार्चितोभक्त्याउपविष्टोवरासने ॥ धर्मशीलाःसत्यवन्तोभास्करिंसमुपासते ॥ १३ ॥ बहुपुण्यप्रकर्त्ताचव्रतवैकल्यदोषतः ॥
सभायांश्राद्धदेवस्यमयादृष्टःपितातव ॥ १४ ॥ कथितस्तेनसंदेशस्तंनिबोधजनेश्वर ॥ इन्द्रसेनइतिख्यातोराजामाहिष्मतीपतिः ॥ १५ ॥

तस्याग्रेकथयब्रह्मन्स्थितंमांयमसंनिधौ ॥ केनापिचान्तरायेणपूर्वजन्मोद्भवेनच ॥ १६ ॥ स्वर्गंप्रेषयमांपुत्रइन्दिरापुण्यदानतः ॥ इत्यु
क्तोऽहंसमायातःसमीपंतवपार्थिव ॥ १७ ॥ पितुःस्वर्गकृतेराजन्निन्दिराव्रतमाचर ॥ तेनव्रतप्रभावेणस्वर्गंयास्यतितेपिता ॥ १८ ॥ राजो
वाच ॥ कथयस्वप्रसादेनभगवन्निन्दिराव्रतम् ॥ विधिनाकेनकर्त्तव्यंकस्मिन्पक्षेतिथौतथा ॥ १९ ॥ नारदउवाच ॥ शृणुराजेन्द्रतेवच्मिव्रतस्या
स्यविधिंशुभम् ॥ आश्विनस्यासितेपक्षेदशमीदिवसेशुभे ॥ २० ॥ प्रातःस्नानंप्रकुर्वीतश्रद्धायुक्तेनचेतसा ॥ ततोमध्याह्नसमयेस्नानंकृत्वासमाहि
तः ॥ २१ ॥ पितॄणांप्रीतयेश्राद्धंकुर्याच्छ्रद्धासमन्वितः ॥ एकभक्तंततःकृत्वारात्रौभूमौशयीतच ॥ २२ ॥ प्रभातेविमलेजातेप्राप्तेचैकादशी
दिने ॥ मुखप्रक्षालनंकुर्याद्दन्तधावनवर्जितम् ॥ २३ ॥ उपवासस्यनियमंगृह्णीयाद्भक्तिभावतः ॥ अद्यस्थित्वानिराहारःसर्वभोगविवर्जितः ॥
॥ २४ ॥ श्वोभोक्ष्येपुण्डरीकाक्षशरणंमेभवाच्युत ॥ इत्येवंनियमंकृत्वामध्याह्नसमयेतथा ॥ २५ ॥ शालग्रामशिलाग्रेतुस्नानंकुर्याद्यथाविधि
पूजयित्वाहृषीकेशंधूपगन्धादिभिस्तथा ॥ २६ ॥ रात्रौजागरणंकुर्यात्केशवस्यसमीपतः ॥ ततःप्रभातसमयेप्राप्तेवैद्वादशीदिने ॥ २७ ॥
अर्चयित्वाहरिंभक्त्याश्राद्धंकुर्याद्यथाविधि ॥ पितॄणांप्रीतयेश्राद्धंकुर्याच्छ्रद्धासमन्वितः ॥ २८ ॥ गोधूमचूर्णैर्यच्छ्राद्धंकृतंमेध्यंकृतंभवेत् ॥ यवैर्व्रीहि
तिलैर्माषैर्गोधूमैश्चणकैस्तथा ॥ २९ ॥ ब्राह्मणान्भोजयेद्राजन्दक्षिणाभिःप्रपूजितान् ॥ बन्धुदौहित्रपुत्राद्यैःस्वयंभुञ्जीतवाग्यतः ॥ ३० ॥
अनेनविधिनाराजन्कुरुव्रतमतन्द्रितः ॥ विष्णुलोकंप्रयास्यन्तिपितरस्तवभूपते ॥ ३१ ॥ इत्युक्त्वानृपतिंराजन्मुनिरन्तरधीयत ॥ यथोक्त
विधिनाराजाचकारव्रतमुत्तमम् ॥ ३२ ॥ अन्तःपुरेणसहितःपुत्रभृत्यसमन्वितः ॥ कृतेव्रतेतुकौन्तेयपुष्पवृष्टिरभूद्दिवः ॥ ३३ ॥ तत्पितागरुडा
रूढोजगामहरिमन्दिरम् ॥ इन्द्रसेनोऽपिराजर्षिःकृत्वाराज्यमकण्टकम् ॥ ३४ ॥ राज्येनिवेश्यतनयंजगामत्रिदिवंस्वयम् ॥ इन्दिराव्रत
माहात्म्यंतवाग्रेकथितंमया ॥ ३५ ॥ पठनाच्छ्रवणाद्राजन्सर्वपापैःप्रमुच्यते ॥ भुक्त्वेहनिखिलान्भोगान्विष्णुलोकेवसेच्चिरम् ॥ ३६ ॥ इतिश्री
पाद्मेमहापुराणेपञ्चपञ्चा॰उत्तर॰उमापतिनारदसंवादआश्विनकृष्णेन्दिरैकादशीनामैकोनषष्टितमोऽध्यायः ॥ ५९ ॥ युधिष्ठिरउवाच ॥ कथय ॥ ५८ ॥
स्वप्रसादेनममाग्रेमधुसूदन ॥ इषस्यशुक्लपक्षेतुकिंनामैकादशीभवेत ॥ १ ॥ श्रीकृष्णउवाच ॥ शृणुराजेन्द्र वक्ष्यामिमाहात्म्यंपापनाशनम् ॥
शुक्लपक्षेचाश्विनस्यभवेदेकादशीतुया ॥ २ ॥ पाशाङ्कुशेतिविख्यातासर्वपापहरापरा ॥ पद्मनाभाभिधानंमांपूजयेत्तत्रमानवः ॥ ३ ॥ सर्वा
भीष्टफलप्राप्त्यैस्वर्गमोक्षप्रदंनृणाम् ॥ तपस्तप्त्वापुनस्तीव्रंचिरंसुनियतेन्द्रियः ॥ ४ ॥ यत्फलंसमवाप्नोतितन्नत्वागरुडध्वजम् ॥ कृत्वापिबहुशः

CC-0. In Public Domain. Digitization by eGangotri

पापंनरोमोहसमन्वितः ॥ ५ ॥ नयातिनरकंनत्वासर्वपापहरंहरिम् ॥ पृथिव्यांयानितीर्थानिपुण्यान्यायतनानिच ॥ ६ ॥
तानिसर्वाण्यवाप्नोतिविष्णोर्नामानुकीर्त्तनात् ॥ देवंशार्ङ्गधरंविष्णुंयेप्रपन्नाजनार्दनम् ॥ ७ ॥ नतेषांयमलोकस्ययातनाजायतेक्वचित् ॥ उपो
ष्यैकादशीमेकांप्रसङ्गेनापिमानवः ॥ ८ ॥ नयातियातनांयामींपापंकृत्वापिदारुणम् ॥ वैष्णवःपुरुषोभूत्वाशिवनिन्दांकरोतियः ॥ ९ ॥ न
विन्देद्वैष्णवंलोकंसयातिनरकंध्रुवम् ॥ शैवःपाशुपतोभूत्वाविष्णुनिन्दांकरोतिचेत् ॥ १० ॥ रौरवेपच्यतेघोरेयावदिन्द्राश्चतुर्दश ॥ नेदृशंपावनंकिंचि
त्रिषुलोकेषुविद्यते ॥११ ॥ यादृशंपद्मनाभस्यव्रतंपातकनाशनम् ॥ तावत्पापानिदेहेऽस्मिंस्तिष्ठन्तिमनुजाधिप ॥१२॥ यावन्नोपवसेज्जन्तुःपद्मनाभ
दिनंशुभम् ॥ अश्वमेधसहस्राणिराजसूयशतानिच ॥ १३॥ एकादश्युपवासस्यकलांनार्हन्तिषोडशीम् ॥ एकादशीसमंकिंचिद्व्रतंलोकेनविद्यते॥१४॥
व्याजेनापिकृतायैश्चनतेयान्तिहिभास्करिम् ॥ स्वर्गमोक्षप्रदाह्येषाशरीरारोग्यदायिनी ॥ १५ ॥ कलत्रसुतदाह्येषाधनमित्रप्रदायिनी ॥ नगङ्गान
गयाराजन्नचकाशीचपुष्करम् ॥ १६ ॥ नचापिकौरवंक्षेत्रंपुण्यंभूपहरेर्दिनात् ॥ रात्रौजागरणंकृत्वासमुपोष्यहरेर्दिनम् ॥ १७ ॥ अनायासेनभूपाल
प्राप्यतेवैष्णवंपदम् ॥ दशैवमातृकेपक्षेराजेन्द्रदशपैतृके ॥१८॥ प्रियायादशपक्षेतुपुरुषानुद्धरेन्नरः ॥ चतुर्भुजादिव्यरूपानागारिकृतकेतनाः ॥१९ ॥
स्रग्विणःपीतवस्त्राश्चप्रयान्तिहरिमन्दिरम् ॥ बालत्वेयौवनेचैववृद्धत्वेचनृपोत्तम ॥ २० ॥ उपोष्यैकादशींनूनंनैवप्राप्नोतिदुर्गतिम् ॥ पाशाङ्कुशा
मुपोष्यैवआश्विनस्यसितेनरः ॥ २१ ॥ सर्वपापविनिर्मुक्तोहरिलोकंसगच्छति ॥ दत्त्वाहेमतिलान्भूमिंगामन्नमुदकंतथा ॥ २२ ॥ उपानच्छत्रवस्त्रा
दीन्नपश्यतियमंनरः ॥ यस्यपुण्यविहीनानिदिनान्यायान्तियान्तिच ॥ २३ ॥ सलोहकारभस्त्रेवश्वसन्नपिनजीवति ॥ अवन्ध्यंदिवसंकुर्याद्दरिद्रो
ऽपिनृपोत्तम ॥ २४ ॥ सदाचरन्यथाशक्तिस्नानदानादिकाःक्रियाः ॥ होमस्नानजपध्यानसत्रादिपुण्यकर्मणाम् ॥ २५ ॥ कर्त्तारोनैवपश्यन्ति
घोरांतांयमयातनाम् ॥ दीर्घायुषोधनाढ्यश्चकुलीनारोगवर्जिताः ॥ २६ ॥ दृश्यन्तेमानवालोकेपुण्यकर्त्तारईदृशाः ॥ किमत्रबहुनोक्तेनयान्त्यधर्मे
णदुर्गतिम् ॥ २७ ॥ आरोहन्तिदिवंधर्मैर्नात्रकार्याविचारणा ॥ इतितेकथितंराजन्यत्पृष्टोऽहंत्वयानघ ॥ पाशाङ्कुशायामाहात्म्यंकिमन्यच्छ्रोतु
मिच्छसि ॥ २८ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०उत्तर०उमापतिनारदसंवादेआश्विनशुक्लपाशाङ्कुशैकादशीमाहात्म्यंनामषष्टितमोऽध्यायः ॥
॥ ६० ॥ युधिष्ठिरउवाच ॥ कथयस्वप्रसादेनमयिस्नेहाज्जनार्दन ॥ कार्तिकस्यासितेपक्षेकिंनामैकादशीभवेत् ॥ १ ॥ श्रीकृष्णउवाच
श्रूयतांराजशार्दूलकथयामितवाग्रतः ॥ कार्त्तिकेकृष्णपक्षेतुरमानामसुशोभना ॥ २ ॥ एकादशीसमाख्यातामहापापहरापरा ॥ अस्याःप्रस ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ङ्गतोराजन्माहात्म्यंप्रवदामिते ॥ ३ ॥ मुचुकुन्दइतिख्यातोबभूवनृपतिःपुरा ॥ देवेन्द्रेणसमंतस्यमित्रत्वमभवन्नृप ॥ ४ ॥ यमेनवरुणे
नैवकुबेरेणापिसर्वथा ॥ विभीषणेनयस्यैवसखित्वमभवन्नृप ॥ ५ ॥ विष्णुभक्तःसत्यसन्धोबभूवनृपतिःपरः ॥ तस्यैवंशासतोराजन्राज्यंनिहतकण्ट
कम् ॥ ६ ॥ बभूवदुहितागेहेचन्द्रभागासरिद्वरा ॥ शोभनायचसादत्ताचन्द्रसेनसुतायवै ॥ ७ ॥ सकदाचित्समायातःश्वशुरस्यगृहेनृप ॥ एकादशी
व्रतदिनंसमायातंसुपुण्यदम् ॥ ८ ॥ समागतेव्रतदिनेचन्द्रभागात्वचिन्तयत् ॥ किंभविष्यतिदेवेशममभर्त्तातिदुर्बलः ॥ ९ ॥ क्षुधांनक्षमतेसोढुंपिता
चैवोग्रशासनः ॥ पटहस्ताड्यतेयस्यसंप्राप्तेदशमीदिने ॥१०॥ नभोक्तव्यंनभोक्तव्यंनभोक्तव्यंहरेर्दिने ॥ श्रुत्वापटहनिर्घोषंशोभनस्त्वब्रवीत्प्रियाम् ॥
॥ ११ ॥ किंकर्त्तव्यंमयाकान्तेब्रूह्युपायंसुशोभने ॥ कृतेनयेनमेसम्यग्जीवितंनविनश्यति ॥ १२ ॥ चन्द्रभागोवाच ॥ मत्पितुर्वेश्मनिप्रभोभोक्तव्यं
नाद्यकेनचित् ॥ गजैरश्वैश्चकलभैरन्यैःपशुभिरेवच ॥ १३ ॥ तृणमन्नंतथावारिनभोक्तव्यंहरेर्दिने ॥ मानवैश्चकुतःकान्तभुज्यतेहरिवासरे ॥ १४ ॥
यदित्वंभोक्ष्यसेकान्ततत्तोगर्हांप्रयास्यसि ॥ एवंविचार्यमनसासुदृढंमानसंकुरु ॥ १५ ॥ शोभनउवाच ॥ सत्यमेतत्प्रियेवाक्यंकरिष्येऽहमुपो
षणम् ॥ दैवेनविहितंयद्धितत्तथैवभविष्यति ॥ १६ ॥ इतिदृढांमतिंकृत्वाचकारनियमंव्रते ॥ क्षुधयापीडिततनुःसबभूवातिदुःखितः ॥ १७ ॥ इति
चिन्तयतस्तस्यआदित्योऽस्तमगाद्गिरिम् ॥ वैष्णवानांनराणांसानिशाहर्षविवर्धनी ॥१८॥ हरिपूजारतानांचजागरासक्तचेतसाम् ॥ बभूवनृपशार्दूल
शोभनस्यातिदुःखदा ॥ १९ ॥ रवेरुदयवेलायांशोभनःपञ्चतांगतः ॥ दाहयामासराजातंराजयोग्यैश्चदारुभिः ॥ २० ॥ चन्द्रभागानात्मदेहंददाह
पतिनासह ॥ कृत्वौर्ध्वदेहिकंतस्यतस्थौजनकवेश्मनि ॥ २१ ॥ शोभनश्चनृपश्रेष्ठरमाव्रतप्रभावतः ॥ प्राप्तोदेवपुरंरम्यंमन्दराचलसानुनि ॥ २२ ॥
अनुत्तममनाधृष्यमसङ्ख्येयगुणान्वितम् ॥ हेमस्तम्भमयैःसौधैरत्नवैडूर्यमण्डितैः ॥ २३ ॥ स्फाटिकैर्विविधाकारैर्विचित्रैरुपशोभितैः ॥ सिंहासन
समारूढःसुश्वेतच्छत्रचामरः ॥ २४ ॥ किरीटकुण्डलयुतोहारकेयूरभूषितः ॥ स्तूयमानश्चगन्धर्वैरप्सरोगणसेवितः ॥ २५ ॥ शोभनःशोभतेयत्रराज
राजोऽपरोयथा ॥ सोमशर्मेतिविख्यातोमुचुकुन्दपुरेऽभवत्॥२६॥ तीर्थयात्राप्रसङ्गेनभ्रमन्विप्रोददर्शतम् ॥ नृपजामातरंज्ञात्वातत्समीपंजगामसः ॥
॥ २७ ॥ शोभनोऽपितदाज्ञात्वासोमशर्माणमागतम् ॥ आसनादुत्थितःशीघ्रंनमश्चक्रेद्विजोत्तमम् ॥ २८ ॥ चकारकुशलप्रश्नंश्वशुरस्यनृपस्यच ॥
कान्तायाश्चन्द्रभागायास्तथैवनगरस्यच ॥ २९ ॥ सोमशर्मोवाच ॥ कुशलंवर्त्ततेराजञ्छ्वशुरस्यगृहेतव ॥ चन्द्रभागाकुशलिनीसर्वतःकुशलंपुरे ॥
॥ ३० ॥ स्ववृत्तंकथ्यतांराजन्नाश्चर्यंविद्यतेऽद्भुतम् ॥ पुरंविचित्रंरुचिरंनदृष्टंकेनचित्क्वचित् ॥ एतदाचक्ष्वनृपतेकुतःप्राप्तमिदंत्वया ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शोभनउवाच ॥ कार्त्तिकस्यासितेपक्षेयानामैकादशीरमा ॥ तामुपोष्यमयाप्राप्तंद्विजेन्द्रपुरमध्रुवम् ॥ ध्रुवंभवतियेनैवतत्कुरुष्वद्विजोत्तम ॥
॥ ३२ ॥ द्विजउवाच ॥ कथमध्रुवमेतद्धिकथंहिभवतिध्रुवम् ॥ तत्त्वंकथयराजेन्द्रतत्करिष्यामिनान्यथा ॥ ३३ ॥ शोभनउवाच ॥ मयैत
द्धिहितंविप्रश्रद्धाहीनंव्रतोत्तमम् ॥ तेनाहमध्रुवंमन्येध्रुवंभवतितच्छृणु ॥ ३४ ॥ मुचुकुन्दस्यदुहिताचन्द्रभागासुशोभना ॥ तस्यैकथयवृत्तान्तंध्रुवमेत
द्भविष्यति ॥ ३५ ॥ कृष्णउवाच ॥ सश्रुत्वावचनंतस्यमुचुकुन्दपुरंगतः ॥ उवाचसर्ववृत्तान्तंचन्द्रभागाग्रतोद्विजः ॥ ३६ ॥ सोमशर्मोवाच ॥
प्रत्यक्षंदयितःकान्तस्तवदृष्टोमयाशुभे ॥ स्वर्गतुल्यमनाधृष्यंदृष्टंतस्यपुरंमया ॥ अध्रुवंतेनतत्प्रोक्तंध्रुवंभवतितत्कुरु ॥ ३७ ॥ चन्द्रभागोवाच ॥ तत्र
मांनयविप्रर्षेपतिदर्शनलालसाम् ॥ आत्मनोव्रतपुण्येनकरिष्यामिपुरंध्रुवम् ॥ ३८ ॥ आवयोर्द्विजसंयोगोयथाभवतितत्कुरु ॥ प्राप्यतेहिमहत्पुण्यं
कृत्वायोगंवियुक्तयोः ॥ ३९॥ इतिश्रुत्वासहतयासोमशर्माजगामह ॥ आश्रमंवामदेवस्यमन्दराचलसन्निधौ॥४०॥वामदेवोऽशृणोत्सर्ववृत्तान्तंकथितं
तयोः ॥ अभ्यषिञ्चच्चन्द्रभागांवेदमन्त्रैरथोज्ज्वलाम् ॥ ४१ ॥ ऋषिमन्त्रप्रभावेणविष्णुवासरसेवनात् ॥ दिव्यदेहाबभूवासौदिव्यांगतिमवापह ॥
॥ ४२ ॥ पत्युःसमीपमगमत्प्रहर्षोत्फुल्ललोचना ॥ जहर्षशोभनोऽतीवदृष्ट्वाकान्तांसमागताम् ॥ ४३ ॥ समाहूयस्वकेवामेपार्श्वेतांसंन्यवेशयत् ॥
अथोवाचप्रियंहर्षाच्चन्द्रभागाप्रियंवचः ॥ ४४ ॥ शृणुकान्तहितंवाक्यंयत्पुण्यंविद्यतेमयि ॥ अष्टवर्षाधिकाजातायदाहंपितृवेश्मनि ॥ ४५ ॥ ततः
प्रभृतियच्चीर्णंमयाचैकादशीव्रतम् ॥ यथोक्तविधिसंयुक्तंश्रद्धायुक्तेनचेतसा ॥ ४६ ॥ तेनपुण्यप्रभावेणभविष्यतिपुरंध्रुवम् ॥ सर्वकामसमृद्धंचयावदा
भूतसंप्लवम् ॥ ४७ ॥ एवंसानृपशार्दूलरमतेपतिनासह ॥ दिव्यभोगादिव्यरूपादिव्याभरणभूषिता ॥ ४८ ॥ शोभनोऽपितयासार्द्धंरमते
दिव्यविग्रहः ॥ रमाव्रतप्रभावेणमन्दराचलसानुनि ॥ ४९ ॥ चिन्तामणिसमाह्येषाकामधेनुसमाथवा ॥ रमाभिधानानृपतेतवाग्रेकथिता
मया ॥ ५० ॥ तस्यामाहात्म्यमनघश्रुतंसर्वंत्वयानृप ॥ मयातवाग्रेकथितंमाहात्म्यंपापनाशनम् ॥ ५१ ॥ एकादशीव्रतानांचपक्षयोरुभयो
रपि ॥ यथाकृष्णातथाशुक्लाविभेदंनैवकारयेत् ॥ ५२ ॥ सेवितैकादशीनृणांभुक्तिमुक्तिप्रदायिनी ॥ धेनुःश्वेतायथाकृष्णाउभयोःसदृशंपयः ॥
॥ ५३ ॥ तथैवतुल्यफलदंस्मृतमेकादशीद्वयम् ॥ एकादशीव्रतानांयोमाहात्म्यंशृणुतेनरः ॥ सर्वपापविनिर्मुक्तोविष्णुलोकेमहीयते ॥ ५४ ॥
इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०उमापतिनारदसंवादेकार्त्तिककृष्णरमैकादशीनामैकषष्टितमोऽध्यायः ॥ ६१ ॥ युधिष्ठिरउवाच ॥
श्रुतंरमायामाहात्म्यंत्वत्तःकृष्णयथातथम् ॥ कार्त्तिकेशुक्लपक्षेयातांमेकथयमानद ॥ १ ॥ श्रीकृष्णउवाच ॥ शृणुराजन्प्रव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

क्ष्यामिशुक्लेचोर्जदलेतुया ॥ सायथानारदायोक्ताब्रह्मणालोककारिणा ॥ २ ॥ नारदउवाच ॥ प्रबोधिन्याश्चमाहात्म्यंवदविस्तरतोमम ॥
यस्यांजागर्तिगोविन्दोधर्मकर्मप्रवर्त्तकः ॥ ३ ॥ ब्रह्मोवाच ॥ प्रबोधिन्याश्चमाहात्म्यंपापघ्नंपुण्यवर्धनम् ॥ मुक्तिप्रदंसुबुद्धीनांशृणुष्वमुनिसत्तम ॥
॥ ४ ॥ तावद्गर्जन्तितीर्थानिआसमुद्रसरांसिच ॥ यावत्प्रबोधिनीविष्णोस्तिथिर्नायातिकार्तिके ॥ ५ ॥ तावद्गर्जन्तिविप्रेन्द्रगङ्गाभागीरथीक्षितौ ॥
यावन्नायातिपापघ्नीकार्त्तिकेहरिबोधिनी ॥६॥ अश्वमेधसहस्राणिराजसूयशतानिच ॥ एकेनैवोपवासेनप्रबोधिन्यालभेन्नरः ॥ ७ ॥ यद्दुर्लभंयदप्राप्यं
त्रैलोक्यस्यनगोचरम् ॥ तदप्यप्रार्थितंपुत्रददातिहरिबोधिनी ॥८॥ ऐश्वर्यंसंपदंप्रज्ञांराज्यंचसुखसंपदः ॥ ददात्युपोषिताभक्त्याजनेभ्योहरिबोधिनी ॥
॥ ९॥ मेरुमन्दरमात्राणिपापान्युक्तानियानिच ॥ एकेनैवोपवासेनदहतेपापनाशिनी ॥१०॥ पूर्वजन्मसहस्रेषुयत्पापंसमुपार्जितम् ॥ निशिजागरणं
चास्यादहतेतूलराशिवत् ॥ ११ ॥ उपवासंप्रबोधिन्यांयःकरोतिस्वभावतः ॥ विधिवन्मुनिशार्दूलयथोक्तंलभतेफलम् ॥ १२ ॥ यथोक्तंकुरुते
यस्तुविधिवत्सुकृतंनरः ॥ स्वल्पंमुनिवरश्रेष्ठमेरुतुल्यंभवेत्फलम् ॥ १३ ॥ विधिहीनंतुयःकुर्यात्सुकृतंमेरुमात्रकम् ॥ अणुमात्रंतदाप्नोतिफलंधर्मस्य
नारद ॥ १४ ॥ येध्यायन्तिमनोवृत्त्यायेकरिष्यन्तिबोधिनीम् ॥ वसन्तिपितरोहृष्टाविष्णुलोकेचतस्यवै ॥ १५ ॥ विमुक्तानारकैर्दुःखैर्यान्ति
विष्णोःपरंपदम् ॥ कृत्वातुपातकंघोरंब्रह्महत्यादिकंनरः ॥ १६ ॥ कृत्वातुजागरंविष्णोर्द्धौतपापोभवेन्नरः ॥ दुष्प्राप्यंयत्फलंविप्रअश्वमेधादिकै
र्मखैः ॥ १७ ॥ प्राप्यतेतत्सुखेनैवप्रबोधिन्यास्तुजागरे ॥ आप्लुत्यसर्वतीर्थेषुप्रदायकाञ्चनंमहीम् ॥१८॥ यत्फलंसमवाप्नोतितत्कृत्वाजागरंहरेः ॥
जातःसएवसुकृतीकुलंतेनैवपावितम् ॥ १९ ॥ कार्त्तिकेमुनिशार्दूलकृतायेनप्रबोधिनी ॥ यथाध्रुवंनृणांमृत्युर्धनंगात्रंतथाध्रुवम् ॥ २० ॥ इतिज्ञात्वा
मुनिश्रेष्ठकर्त्तव्यंवैष्णवंदिनम् ॥ यानिकानिचतीर्थानित्रैलोक्येसंभवन्तिच ॥ २१ ॥ तानितस्यगृहेसम्यग्यःकरोतिप्रबोधिनीम् ॥ किंतस्यबहुभिः
पुण्यैःकृतायेनप्रबोधिनी ॥ २२ ॥ पुत्रपौत्रप्रदाह्येषाकार्त्तिकेहरिबोधिनी ॥ सज्ञानीचसयोगीचसतपस्वीजितेन्द्रियः ॥ २३ ॥ भोगोमोक्षश्चतस्यास्ति
यउपास्तेप्रबोधिनीम् ॥ विष्णोःप्रियतराह्येषाधर्मसारसहायिनी ॥ २४ ॥ यःकरोतिनरोभक्त्यामुक्तिभाक्सभवेन्नरः ॥ प्रबोधिनीमुपोषित्वागर्भेन
विशतेनरः ॥२५॥ सर्वधर्मान्परित्यज्यतस्मात्कुर्वीतनारद ॥ कर्मणामनसावाचापापंयत्समुपार्जितम् ॥ २६ ॥ तत्क्षालयतिगोविन्दःप्रबोधिन्यांतु
जागरे॥ स्नानंदानंजपंपूजांसमुद्दिश्यजनार्दनम्॥२७॥नरोयत्कुरुतेवत्सप्रबोधिन्यांतदक्षयम्॥येऽर्चयन्तिनरास्तस्यांभक्त्यादेवंचमाधवम् ॥२८॥समु
पोष्यप्रमुच्यन्तेपापैस्तैःशतजन्मजैः॥ महाव्रतमिदंपुत्रमहापापौघनाशनम् ॥२९॥प्रबोधवासरंविष्णोर्विधिवत्समुपोषयेत् ॥ व्रतेनानेनदेवेशंपरितोष्य

CC-0. In Public Domain. Digitization by eGangotri

जनार्दनम् ॥३०॥ विराजयन्दिशः सर्वाः प्रयाति हरिमन्दिरम्॥कर्त्तव्यैषाप्रयत्नेननरैःकान्तिधनार्थिभिः॥३१॥बाल्येयत्संचितंपापंयौवनेवार्द्धकेतथा॥
शतजन्मकृतंपापंस्वल्पंवायदिवाबहु॥३२॥तत्क्षालयतिगोविन्दश्चास्यामभ्यर्चितोनृणाम् ॥ धनधान्यवहापुण्यासर्वपापहरापरा ॥३३॥ तामुपोष्य
हरेर्भक्त्यादुर्लभंनभवेत्क्वचित् ॥ चन्द्रसूर्योपरागेचयत्फलंपरिकीर्तितम् ॥ ३४ ॥ तत्सहस्रगुणंप्रोक्तंप्रबोधिन्यांप्रजागरे ॥ स्नानंदानंजपोहोमः
स्वाध्यायोऽभ्यर्चनंहरेः ॥ ३५ ॥ तत्सर्वकोटिगुणितंप्रबोधिन्यांकृतंतुयत् ॥ जन्मप्रभृतियत्पुण्यंनरेणोपार्जितंभवेत् ॥ ३६ ॥ वृथाभवति
तत्सर्वमकृत्वाकार्तिकेव्रतम् ॥ अकृत्वानियमंविष्णोःकार्तिकंयःक्षिपेन्नरः ॥ ३७ ॥ नजन्मार्जितपुण्यस्यफलंप्राप्नोतिनारद ॥ तस्मा
त्सर्वप्रयत्नेनदेवदेवंजनार्दनम् ॥ ३८ ॥ उपसेवेतविप्रेन्द्रसर्वकामफलप्रदम् ॥ परान्नंवर्जयेद्यस्तुकार्तिकेविष्णुतत्परः ॥ ३९ ॥ परान्नवर्जना
द्वत्सचान्द्रायणफलंलभेत् ॥ नित्यंशास्त्रविनोदेनकार्त्तिकंयःक्षिपेन्नरः ॥ ४० ॥ सदहेत्सर्वपापानियज्ञायुतफलंलभेत् ॥ नतथातुष्यतेयज्ञैर्नदानै
र्वाजपादिभिः ॥ ४१ ॥ यथाशास्त्रकथालापैःकार्त्तिकेमधुसूदनः ॥ येकुर्वन्तिकथांविष्णोर्येशृण्वन्तिशुभान्विताः ॥ ४२ ॥ श्लोकार्धश्लोकपादंवा
कार्त्तिकेगोशतंफलम् ॥ सर्वधर्मान्परित्यज्यकार्त्तिकेकेशवाग्रतः ॥ ४३॥ शास्त्रावधारणंकार्यंश्रोतव्यंचमहामुने ॥ श्रेयसालोभबुद्ध्याचयःकरोतिहरेः
कथाम्॥४४॥कार्त्तिकेमुनिशार्दूलकुलानांतारयेच्छतम् ॥ नियमेननरोयस्तुशृणुतेवैष्णवींकथाम्॥४५॥कार्त्तिकेतुविशेषेणगोसहस्रफलंलभेत् ॥ प्रबोध
धवासरेविष्णोःशृणुतेयोहरेःकथाम्॥४६॥सप्तद्वीपवतीदानेयत्फलंतल्लभेन्मुने ॥ श्रुत्वाविष्णुकथांदिव्यांयेऽर्चयन्तिकथाविदम्॥४७॥स्वशक्त्यामुनि
शार्दूलतेषांलोकोऽक्षयःस्मृतः ॥ गीतशास्त्रविनोदेनकार्त्तिकंयोनयेन्नरः ॥४८॥ नतस्यपुनरावृत्तिर्मयादृष्टाकलिप्रिय ॥ गीतंनृत्यंचवाद्यंचभव्यांविष्णु
कथांमुने ॥ ४९ ॥ यःकरोतिसपुण्यात्मात्रैलोक्योपरिसंस्थितः ॥ बहुपुष्पैर्बहुफलैःकर्पूरागुरुकुङ्कुमैः॥५०॥हरेःपूजाविधातव्याकार्त्तिकेबोधवासरे ॥
यस्मात्पुण्यमसङ्ख्यातप्राप्यतेमुनिसत्तम ॥ ५१ ॥ फलैर्नानाविधैर्द्रव्यैःप्रबोधिन्यांतुजागरे ॥ शङ्खतोयंसमादायअर्घोदेयोजनार्दने ॥५२॥ यत्फलं
सर्वतीर्थेषुसर्वदानेषुयत्फलम् ॥ तत्फलंकोटिगुणितंदत्त्वार्घंबोधवासरे ॥ ५३ ॥ गुरुपूजाततःकार्याभोजनाच्छदनादिभिः ॥ दक्षिणाभिश्च
देवर्षेतुष्ट्यर्थंचक्रपाणिनः ॥५४॥ भागवतंशृणुतेयस्तुपुराणंचपठेन्नरः ॥ प्रत्यक्षरंभवेत्तस्यकपिलादानजंफलम् ॥५५॥ कार्त्तिकेमुनिशार्दूलस्वशक्त्या
वैष्णवंव्रतम् ॥ यःकरोतियथोक्तंतुमुक्तिस्तस्यसुनिश्चला ॥५६॥ केतक्याएकपत्रेणपूजितोगरुडध्वजः ॥समाःसहस्रंसुप्रीतोभवतिमधुसूदनः ॥५७॥
अगस्तिकुसुमैर्देवंपूजयेद्योजनार्दनम् ॥ दर्शनात्तस्यदेवर्षेनरकाग्निःप्रणश्यति ॥ ५८ ॥ मुनिपुष्पार्चितोविष्णुःकार्त्तिकेपुरुषोत्तमः ॥ ददात्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भिमतान्कामाञ्छशिसूर्यग्रहेयथा ॥ ५९ ॥ विहायसर्वपुष्पाणिमुनिपुष्पेणकेशवम् ॥ कार्तिकेयोऽर्चयेद्भक्त्यावाजिमेधफलंलभेत् ॥ ६० ॥ तुलसी
दलानिपुष्पाणियेयच्छन्तिजनार्दने ॥ कार्त्तिकेसकलंपापंवत्सजन्मायुतंदहेत्॥६१ ॥दृष्टास्पृष्टाथवाध्यातार्कीर्तितानामतःस्तुता॥रोपितासेचितानित्यं
पूजितातुलसीशुभा ॥६२॥ नवधातुलसीभक्तिंयेकुर्वन्तिदिनेदिने ॥ युगकोटिसहस्राणितन्वन्तिसुकृतंमुने ॥६३ ॥ यावच्छाखाप्रशाखाभिर्बीजपुष्प
दलैर्मुने ॥ रोपितातुलसीपुम्भिर्वर्धतेवसुधातले ॥ ६४ ॥ तेषांवंशेतुयेजातायेभविष्यन्तियेगताः ॥ आकल्पवर्षसाहस्रंतेषांवासोहरेर्गृहे ॥ ६५ ॥
यत्फलंसर्वपुष्पेषुसर्वपत्रेषुनारद ॥ तुलसीदलेनचैकेनकार्त्तिकेप्राप्यतेतुतत् ॥ ६६ ॥ सम्प्राप्तंकार्त्तिकंदृष्ट्वा नियमेनजनार्दनः ॥ पूजनीयोमहाविष्णुः
कोमलैस्तुलसीदलैः ॥६७॥ इष्टाक्रतुशतैर्देवान्दत्त्वादानान्यनेकशः ॥ तुलसीदलैस्तुतत्पुण्यंकार्त्तिकेकेशवार्चने ॥ ६८ ॥ इतिश्रीपाद्मेमहापुराणेपञ्च
प०उत्तर०उमापतिनारदसंवादेकार्त्तिकेशुक्लैकादशीमाहात्म्यंनामद्विषष्टितमोऽध्यायः ॥६२ ॥ युधिष्ठिरउवाच ॥ भगवञ्छ्रोतुमिच्छामिव्रतानामुत्तमं
व्रतम् ॥ सर्वपापहरंविष्णोःफलदंव्रतिनांचयत् ॥ १ ॥ पुरुषोत्तममासस्यकथांब्रूहिजनार्दन ॥ कोविधिःकिंफलंतस्यकोदेवस्तत्रपूज्यते ॥ २ ॥
अधिमासेचसंप्राप्तेव्रतंब्रूहिजनार्दन ॥ कस्यदानस्यकिंपुण्यंकिंकर्त्तव्यंनृभिःप्रभो ॥ ३ ॥ कथंस्नानंचकिंजाप्यंकथंपूजा विधिःस्मृतः ॥ किंभोज्यमुत्तमं
चान्नंमासेऽस्मिन्पुरुषोत्तमे ॥ ४ ॥ श्रीकृष्णउवाच ॥ कथयिष्यामिराजेन्द्रभवतःस्नेहकारणात् ॥ पुरुषोत्तममासस्यमाहात्म्यंपापनाशनम् ॥
॥ ५ ॥ अधिमासेतुसंप्राप्तेभवेदेकादशीतुया ॥ कमलानामसानाम्नातिथीनामुत्तमातिथिः ॥ ६ ॥ तस्याव्रतप्रभावेणकमलाभिमुखीभवेत् ॥
ब्राह्ममुहूर्तेचोत्थायसंस्मृत्यपुरुषोत्तमम् ॥ ७ ॥ स्नात्वाचैवविधानेननियमंकारयेद्व्रती ॥ गृहेत्वेकगुणंजाप्यंनाद्यांतुद्विगुणंस्मृतम् ॥ ८ ॥
गवांगोष्ठेसहस्रोर्ध्वमग्न्यगारेशतान्वितम् ॥ शिवक्षेत्रेषुतीर्थेषुदेवतानांचसन्निधौ ॥९॥ लक्षंतुलस्याःसांनिध्येह्यनन्तंविष्णुसन्निधौ ॥ अवन्त्यामभवत्क
श्चिच्छिवशर्माद्विजोत्तमः ॥ १० ॥ तस्यात्मजास्तुपञ्चासन्कनिष्ठोदोषवानभूत् ॥ तदापित्रापरित्यक्तस्त्यक्तःस्वजनबान्धवैः ॥ ११ ॥
कुकर्मणःप्रभावेणगतोदूरतरंवनम् ॥ एकदादैवयोगेनतीर्थराजंसमागतः ॥ १२ ॥ क्षुत्क्षामोदीनवदनस्त्रिवेण्यांस्नानमाचरत् ॥ मुनीनामाश्रमांस्तत्र
विचिन्वन्क्षुधयार्दितः॥१३॥ हरिमित्रमुनेस्तत्रददर्शाश्रममुत्तमम्॥पुरुषोत्तममासेवैजनानांचसमागमे॥१४॥ तत्राश्रमेकथयतांकथांकल्मषनाशिनीम्॥
ब्राह्मणानांमुखात्तेनश्रद्धयाकमलाश्रुता ॥ १५ ॥ एकादशीपुण्यतमाभुक्तिमुक्तिप्रदायिनी ॥ जयशर्माविधानेनश्रुत्वेमांकमलातिथिम् ॥ १६ ॥
एकादशीपुण्यतमाभुक्तिमुक्तिप्रदायिनी॥ व्रतंकृतंचतैःसार्द्धंस्थित्वाशून्यालयेतदा ॥१७॥ निशीथेसमनुप्राप्तेलक्ष्मीस्तत्रसमागता ॥ वरंददामिभोविप्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कमलायाःप्रभावतः ॥ १८ ॥ जयशर्मोवाच ॥ कात्वंकस्यासिरम्भोरुप्रसन्नाचकथंमम ॥ इन्द्राणीसुरनाथस्यभवानीशङ्करस्यवा ॥ १९ ॥ गन्धर्वी
किन्नरीवाथवधूर्वाचन्द्रसूर्ययोः ॥ त्वत्सदृक्षानदृष्टाचनश्रुताचशुभानने ॥ २० ॥ लक्ष्मीरुवाच ॥ प्रसन्नासाम्प्रतंजातावैकुण्ठादहमागता ॥ प्रेरितादेव
देवेनकमलायाःप्रभावतः ॥ २१ ॥ पुरुषोत्तममासस्ययापक्षेप्रथमेभवेत् ॥ तस्याव्रतंत्वयाचीर्णंप्रयागेमुनिसंनिधौ ॥ २२ ॥ व्रतस्यास्यप्रभा
वेणवशगाहंनसंशयः ॥ तववंशेभविष्यन्तिमानवाद्विजसत्तम ॥ मत्प्रसादादवाप्स्यन्तिसत्यंतेव्याहृतंमया ॥ २३ ॥ ब्राह्मणउवाच ॥
प्रसन्नायदिमेपद्मेव्रतंविस्तरतोवद ॥ यत्कथासुप्रवर्तन्तेसाधवोयेजनाद्विजाः ॥ २४ ॥ लक्ष्मीरुवाच ॥ श्रोतॄणांपरमंश्राव्यंपवित्राणामनुत्तमम् ॥
दुःस्वप्ननाशनंपुण्यंश्रोतव्यंयत्नतस्ततः ॥ २५ ॥ उत्तमःश्रद्धयायुक्तःश्लोकंश्लोकार्धमेववा ॥ पठित्वामुच्यतेसद्योमहापातककोटिभिः ॥
॥ २६ ॥ मासानांपरमोमासःपक्षिणांगरुडोयथा ॥ नदीनांचयथागङ्गातिथीनांद्वादशीतिथिः ॥ २७ ॥ अद्यापिनिर्जराःसर्वेभारतेजन्म
लिप्सवः ॥ तमर्चयन्तिविविधानारायणमनामयम् ॥ २८ ॥ येयजन्तिसदाभक्त्यादेवंनारायणंप्रभुम् ॥ तानर्चयन्तिसततंब्रह्माद्यादेवतागणाः ॥
॥ २९ ॥ येऽपिनामपरायेचहरिकीर्तनतत्पराः ॥ हरिपूजापरायेचतेकृतार्थाःकलौयुगे ॥ ३० ॥ शुक्लेवायदिवाकृष्णेभवेदेकादशीद्वयम् ॥ गृह
स्थानांभवेत्पूर्वायतीनामुत्तरास्मृता ॥ ३१ ॥ एकादशीद्वादशीचरात्रिशेषेत्रयोदशी ॥ तत्रक्रतुशतंपुण्यंत्रयोदश्यांतुपारणे ॥ ३२ ॥ एका
दश्यांनिराहारःस्थित्वाहमपरेऽहनि ॥ भोक्ष्यामिपुण्डरीकाक्षशरणंमेभवाच्युत ॥३३॥ अमुंमन्त्रंसमुच्चार्यदेवदेवस्यचक्रिणः ॥ भक्तिभावेनतुष्टात्मा
उपवासंसमाचरेत् ॥३४॥ कुर्याद्देवस्यपुरतोजागरंनियतोव्रती ॥ गीतैर्वाद्यैश्चनृत्यैश्चपुराणपठनादिभिः॥३५॥ततःप्रातःसमुत्थायद्वादशीदिवसेव्रती ॥
स्नात्वाविष्णुंसमभ्यर्च्यविधिवत्प्रयतेन्द्रियः॥३६॥पञ्चामृतेनसंस्नाप्यएकादश्यांजनार्दनम् ॥ द्वादश्यांचपयःस्नानाद्धरेःसारूप्यमश्नुते॥३७॥अज्ञान
तिमिरान्धस्यव्रतेनानेनकेशव ॥ प्रसीदसुमुखोभूत्वाज्ञानदृष्टिप्रदोभव॥३८॥एवंविज्ञाप्यदेवेशंदेवदेवंगदाधरम् ॥ ब्राह्मणान्भोजयेद्भक्त्यातेभ्योदद्याच्च
दक्षिणाम् ॥ ३९ ॥ ततःस्वबन्धुभिःसार्धंनारायणपरायणः ॥ कृत्वापञ्चमहायज्ञान्स्वयंभुञ्जीतवाग्यतः ॥ ४० ॥ एवंयःप्रयतःकुर्यात्पुण्यमेकादशी
व्रतम् ॥ सयातिविष्णुभवनंपुनरावृत्तिदुर्लभम् ॥ ४१ ॥ इत्युक्त्वाकमलातस्मैवरंदत्त्वातिरोदधे ॥ सोऽपिविप्रोधनीभूत्वापितुर्गेहंसमागतः ॥
॥ ४२ ॥ श्रीकृष्णउवाच ॥ एवंयःकुरुतेराजन्कमलाव्रतमुत्तमम् ॥ शृणुयाद्वासरेविष्णोःसर्वपापैःप्रमुच्यते ॥ ४३ ॥ इतिश्रीपाद्मेमहा
पुराणेपञ्चप०उत्तर०उमापतिनारदसंवादेपुरुषोत्तममासस्यकृष्णाकमलानामैकादशीनामत्रिषष्टितमोऽध्यायः ॥ ६३ ॥ युधिष्ठिरउवाच ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रुतानिबहुधर्माणिव्रतानिचजगत्प्रभो ॥ एकादशीसमंकिंचिच्छ्रुतंनैवजनार्दन ॥ १ ॥ पुनस्त्वेकादशींब्रूहिपापघ्नींपुण्यदायिनीम् ॥ यांकृत्वा
मनुजोलोकेप्राप्नुयात्परमंपदम् ॥ २ ॥ श्रीकृष्णउवाच ॥ शुक्लेवायदिवाकृष्णेयदाचैकादशीभवेत् ॥ नत्याज्याजगतीपालमोक्षसौख्य
विवर्धनी ॥ ३ ॥ एकादशीकलौराजन्भवबन्धविमोचिनी ॥ कामदासर्वकामानांपापानांपापहाभुवि ॥ ४ ॥ रविवारेऽथमाङ्गल्येसंक्रमेवा
नृपोत्तम ॥ एकादशीसदोपोष्यापुत्रपौत्रविवर्धनी ॥ ५ ॥ एकादशीव्रतंक्वापिनत्याज्यंविष्णुवल्लभैः ॥ आयुःकीर्तिप्रदंनित्यंसन्तानारोग्यवित्त
दम् ॥ ६ ॥ मोक्षदंरूपदंराजन्नित्यमेकादशीव्रतम् ॥ येकुर्वन्तिमहीपालश्रद्धयापरयायुताः ॥ ७ ॥ यथोक्तविधिनालोकेतेनराविष्णु
रूपिणः ॥ जीवन्मुक्तास्तुभूपालदृश्यन्तेनात्रसंशयः ॥ ८ ॥ युधिष्ठिरउवाच ॥ जीवन्मुक्ताःकथंकृष्णविष्णुरूपाःकथंपुनः ॥ पापरूपाश्चदृश्यन्ते
परंकौतूहलंहिमे ॥ ९ ॥ श्रीकृष्णउवाच ॥ येचराजन्कलौभक्त्यानिर्जलंव्रतमुत्तमम् ॥ एकादश्याःप्रकुर्वन्तिविधिदृष्टेनकर्मणा ॥ १० ॥
नकथंविष्णुरूपास्तेजीवन्मुक्ताःकथंनहि ॥ सर्वपापहरंपुण्यंव्रतमेकादशीसमम् ॥ ११ ॥ नकिंचिद्विद्यतेराजन्सर्वकामप्रदंनृणाम् ॥ एकाशनं
दशम्यांचनन्दायांनिर्जलंव्रतम् ॥ १२ ॥ पारणंचैवभद्रायांकृत्वाविष्णुसमानराः ॥ श्रद्धावान्यस्तुकुरुतेकामदायाव्रतंशुभम् ॥ १३ ॥ वाञ्छितं
लभतेसोऽपिइहलोकेपरत्रच ॥ पवित्रापावनीह्येषामहापातकनाशिनी ॥ १४ ॥ भुक्तिमुक्तिप्रदाचैवकर्तृणांनृपसत्तम ॥ कामदायांविधानेनपूजयेत्पुरु
षोत्तमम् ॥ १५ ॥ पुष्पधूपादिभिश्चैवनैवेद्यैर्विविधैस्तथा ॥ कांस्यमांसमसूरांश्चचणकान्कोद्रवांस्तथा ॥ १६ ॥ शाकंमधुपरान्नंचपुनर्भोजनमैथु
नम् ॥ वैष्णवोव्रतकर्त्ताचदशम्यांदशवर्जयेत् ॥ १७ ॥ द्यूतंक्रीडांतथानिद्रांताम्बूलंदन्तधावनम् ॥ परापवादंपैशुन्यंस्तेयंहिंसांतथारतिम् ॥ १८ ॥
क्रोधंचवितथंवाक्यमेकादश्यांविवर्जयेत् ॥ कांस्यंमांसंमसूरांश्चतैलंवितथभाषणम् ॥ १९ ॥ व्यायामंचप्रवासंचपुनर्भोजनमैथुनम् ॥ वृषपृष्ठंपरान्नंच
शाकंचद्वादशीदिने ॥ २० ॥ अनेनविधिनाराजन्विहितायैश्चकामदा ॥ रात्रौजागरणंकृत्वापूजितःपुरुषोत्तमः ॥ २१ ॥ सर्वपापविनिर्मुक्ता
स्तेयान्तिपरमांगतिम् ॥ पठनाच्छ्रवणाद्राजन्गोसहस्रफलंलभेत् ॥ २२ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०उमाप०ना०संवादेपुरुषोत्तम
मासस्यशुक्लाकामदानामैकादशीनामचतुःषष्टितमोऽध्यायः ॥ ६४ ॥ नारदउवाच ॥ चातुर्मास्येतुनियमायेकेचिद्भुविविश्रुताः ॥ ता
नहंश्रोतुमिच्छामिकथयस्वमहेश्वर ॥ १ ॥ चातुर्मास्येहरौसुप्तेकर्त्तव्यंकिंजनार्दने ॥ षड्रसानांपरित्यागेनखकेशविधारणे ॥ अन्यैश्चनियमैः
स्वामिन्यत्फलंतद्वदाधुना ॥ २ ॥ सूतउवाच ॥ एतच्छ्रुत्वात्वसौदेवःप्रहस्योत्फुल्ललोचनः ॥ प्रोवाचतंद्विजवरंनारदंतपसांनिधिम् ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महादेवउवाच ॥ शृणुत्वमिहदेवर्षेकथयामिसविस्तरम् ॥ आषाढस्यसितेपक्षेएकादश्यामुपोषितः ॥ ४ ॥ चातुर्मास्यव्रतानीहगृह्णीयाद्भक्ति
पूर्वकम् ॥ भूमिशय्यासमारूढोयोगनिद्रांगतेहरौ ॥ ५ ॥ नयेतचतुरोमासान्यावद्भवतिकार्त्तिकी ॥ प्रतिष्ठानप्रवर्त्तन्तेतथायज्ञादिकाःक्रियाः
॥ ६ ॥ विवाहव्रतसम्बन्धाअन्यन्माङ्गल्यकर्मच ॥ भूपयानंतथायात्राअन्याश्चविविधाःक्रियाः ॥ ७ ॥ प्रसुप्तेचजगन्नाथेत्वच्युतेगरुडध्वजे॥
व्रतक्रियांचरेद्यस्तुतस्यव्रतफलंशृणु ॥ ८ ॥ अश्वमेधसहस्रैस्तुयत्फलंप्राप्नुयान्नरः॥ चातुर्मास्यव्रतैश्चीर्णैस्तत्फलंसमवाप्नुयात ॥ ९ ॥ मिथु
नस्थेसहस्रांशौस्वापयेन्मधुसूदनम् ॥ तुलाराशौगतेसूर्येपुनरुत्थापयेद्धरिम् ॥ १० ॥ अधिमासेतुपतितेतदाचैषविधिक्रमः॥ स्थापयेत्प्रतिमां
विष्णोःशङ्खचक्रगदाधराम् ॥ ११ ॥ पीताम्बरधरांसौम्यांपर्यङ्केस्थापयेच्छुचौ ॥ श्वेतवस्त्रसमाच्छन्नेसोपधानेतुनारद ॥ १२ ॥ इतिहासपुरा
णज्ञोविष्णुभक्तोऽथवापुनः ॥ स्नापयित्वादधिक्षीरमधुलाजघृतैस्तथा ॥१३॥ समालभ्यशुभैर्गंधैर्धूपैःपुष्पैर्मनोरमैः ॥ पूजितांकुसुमैःशुभ्रैर्मन्त्रेणानेन
नववाडव ॥ १४ ॥ सुप्तेत्वयिजगन्नाथेजगत्सुप्तंभवेदिदम् ॥ विबुद्धेत्वयिबुध्येतजगत्सर्वंचराचरम् ॥१५॥ एवंतांप्रतिमांविष्णोःस्थापयित्वातुनारद ॥
तस्यैवाग्रेस्वयंवाचागृह्णीयान्नियमंततः ॥ १६ ॥ स्त्रीवानरोवातद्भक्तोधर्माधर्मविभागतः ॥ चतुरोवार्षिकान्मासान्देवस्योत्थापनावधि ॥ १७ ॥
गृह्णीयान्नियमानेतान्दन्तधावनपूर्वकम् ॥ उपवासंततःकृत्वाप्रभातेविमलेसति ॥ १८ ॥ नित्यंकर्मचरित्वातुविष्णोरग्रेजितात्मवान् ॥ तेषां
फलानिवक्ष्यामितत्कर्तॄणांपृथक्पृथक् ॥ १९ ॥ मधुरत्वंलभेद्विद्वान्पुरुषोगुडवर्जनात् ॥ तथैवसन्ततिंदीर्घांतैलस्यवर्जनाद्यतः ॥ २० ॥ घृतस्य
वर्जनाद्विप्रसुन्दराङ्गःप्रजायते ॥ कटुतैलपरित्यागीशत्रुनाशमवाप्नुयात् ॥ २१ ॥ सुगन्धतैलत्यागेनसौभाग्यमतुलंलभेत् ॥ पुष्पभोगपरि
त्यागीस्वर्गेविद्याधरोभवेत् ॥ २२ ॥ योगाभ्यासीनरोयस्तुसब्रह्मपदमाप्नुयात् ॥ कट्वम्लमधुरक्षारतीक्ष्णकाषायषड्रसान् ॥ २३ ॥ वर्जये
द्यस्तुवैरूप्यंदौर्गन्ध्यंनाप्नुयान्नरः ॥ ताम्बूलवर्जनाद्भोगीरक्तकण्ठस्तुजायते ॥ २४ ॥ घृतत्यागाच्चलावण्यंसदास्निग्धतनुर्भवेत् ॥ फलत्यागा
च्चविप्रेन्द्रबहुपुत्रश्चजायते ॥ २५॥ पलाशपत्राशनकृद्रूपवान्भोगवान्भवेत् ॥ दीप्तिमान्दीप्तिकरणःसाक्षाद्द्रव्यपतिर्भवेत् ॥ २६ ॥ दधिदुग्धपरित्यागी
गोलोकंलभतेनरः ॥ मौनव्रतीभवेद्यस्तुतस्याज्ञाऽस्खलिताभवेत् ॥ २७॥ इन्द्रासनमवाप्नोतिस्थालीपाकस्यवर्जनात ॥ एवमादिपरित्यागाद्धर्मस्थो
धर्मनन्दनः ॥ २८ ॥ नमोनारायणायेतिजप्त्वाशतगुणंफलम् ॥ एकएवसवैस्वर्गेविद्याधरपतिर्भवेत् ॥ २९ ॥ पुष्करस्नानमात्रेणगङ्गायाःस्नानजं
फलम् ॥ भूमौभुङ्क्तेसदायस्तुसपृथिव्यधिपोभवेत्॥३०॥ विष्णोश्चैवगृहेकुर्यादुपलेपनमार्जनम् ॥ कल्पस्थायीभवेद्विद्वन्वैकुण्ठेनात्रसंशयः ॥३१॥ प्रद

CC-0. In Public Domain. Digitization by eGangotri

क्षिणंचयःकुर्याच्छतमष्टोत्तरंनरः ॥ हंसयुक्तविमानेनदिव्येनसङ्गच्छति ॥ ३२ ॥ गीतवाद्यकरोविष्णोर्गान्धर्वंलोकमाप्नुयात् ॥ पञ्चगव्याशनोविद्वं
श्चान्द्रायणफलंलभेत् ॥३३॥ नित्यंशास्त्रविनोदेनलोकान्यस्तुप्रबोधयेत् ॥ सव्यासरूपीविष्णवग्रेततोविष्णुपदंलभेत् ॥३४॥ तुलसीदलपूजांतुकृत्वा
विष्णुपुरंव्रजेत् ॥ कृत्वाप्रोक्षणकंदिव्यंस्थानमप्सरसांलभेत् ॥ ३५॥ शीताम्बुनागृहेस्नानान्निर्मलंदेहमाप्नुयात् ॥ उष्णोदकंपरित्यज्यस्नानंवैपौष्करं
लभेत् ॥ ३६ ॥ पत्रेषुयोनरोभुङ्क्तेकुरुक्षेत्रफलंलभेत् ॥ भुङ्क्तेशिलायांयोनित्यंतस्यपुण्यंप्रयागजम् ॥ ३७ ॥ दिनत्रयजलत्यागीनरोगैःपरिभूयते॥
ताम्रपात्रेषुभुञ्जानोनैमिषंफलमाप्नुयात् ॥ ३८ ॥ कांस्यपात्रंपरित्यज्यशेषपात्रमुपाचरेत् ॥ अलाभेसर्वपात्राणांमृण्मयंपात्रमुत्तमम् ॥ ३९ ॥ स्व
गृहीतैःकृतैर्वापिपात्रैःपालाशसंभवैः ॥ यस्तुसंवत्सरंपूर्णमग्निहोत्रंकरोतिवै ॥ ४० ॥ पात्रैर्वाभोजनंविद्वान्सेवतेतत्समंस्मृतम् ॥ चान्द्रायण
समंप्रोक्तंब्रह्मपात्रेषुभोजने ॥ ४१ ॥ एकैकंभोजनंविद्वन्ब्रह्मपत्रेषुभुञ्जतः ॥ त्रिरात्रेणसमंप्रोक्तंमहापातकनाशनम् ॥ ४२ ॥ एकादश्युपवासेनयत्पुण्यं
परिकीर्तितम् ॥ सर्वदानफलंचैवसर्वतीर्थफलंलभेत् ॥ ४३ ॥ नचापिनरकंपश्येत्पद्मपत्रेषुभोजनात् ॥ ब्राह्मणोयातिवैकुण्ठेऽन्योजनःस्वर्गमाप्नु
यात् ॥ ४४ ॥ एषब्रह्ममहावृक्षःपापहासर्वकामदः ॥ मध्यमंवर्जितंपत्रंशूद्रजातेर्नृपोत्तम ॥ ४५ ॥ भुञ्जन्नरकमाप्नोतियावदिन्द्राश्चतुर्दश ॥ वर्ज
येन्मध्यमंपत्रंशेषपत्रेषुभोजनम् ॥ ४६ ॥ मध्यपत्रेचयःशूद्रोभोजनंकुरुतेद्विज ॥ कपिलांब्राह्मणेदत्त्वाशुद्धिर्भवतिनान्यथा ॥ ४७ ॥ कपिलांदोह
येद्यस्तुशूद्रोभुङ्क्तेनिजेगृहे ॥ दशवर्षसहस्राणिविष्ठायांजायतेकृमिः ॥ ४८ ॥ कृमियोनिविनिर्मुक्तःपशुयोनिमवाप्नुयात् ॥ कपिलंयोह्यनड्वाहं
शूद्रोभूत्वात्रवाहयेत् ॥ ४९ ॥ यावन्तितस्यरोमाणितावद्वर्षाणिनारद ॥ कुम्भीपाकेषुपच्येतसनरोनात्रसंशयः ॥ ५० ॥ अजाचैवगृहेतस्य
शूद्रस्यचविशेषतः ॥ तस्यावैदुग्धपानेनशूद्रोयातीहरौरवम् ॥ ५१ ॥ ब्राह्मणैःसहव्यापारोयस्यशूद्रस्यदृश्यते ॥ सविप्रोवेदबाह्यःस्याच्छूद्रः
कौलिकउच्यते ॥ ५२ ॥ व्यापारेप्रेरितोविप्रःशूद्राज्ञांचकरोतियः ॥ यावत्पदानिचलतेतावद्भवतिनारकी ॥ ५३ ॥ उदकार्थंतुयोविप्रःशूद्रेण
प्रेषितोगृहे ॥ तदुदकंमद्यतुल्यंपीत्वावैनरकंव्रजेत् ॥ ५४ ॥ शूद्रेणसर्वदानित्यंदानंदेयंद्विजन्मने ॥ तेषांचैवतुवैभक्तिःकर्त्तव्याचविशेषतः ॥ ५५ ॥
इहलोकेसुखंभुक्त्वापरलोकंचगच्छति ॥ पाञ्चभौतिकमेतद्धिअनर्थकमुदाहृतम् ॥ ५६ ॥ अतोदेयंहिगुरवेयतोऽनन्तफलंलभेत् ॥ अस्मिन्कलि
युगेघोरेपापाचारेदुरात्मनः ॥ ५७ ॥ निन्दांकुर्वन्तिविप्रेन्द्रजनानांपुण्यकर्मणाम् ॥ निन्दयालभतेदुःखंयावदाभूतसंप्लवम् ॥ ५८ ॥ नाना
धर्माःप्रवर्त्तन्तेकलौचैवमहामते ॥ धर्मोऽयंदुर्लभोलोकेधर्मकामार्थमोक्षदः ॥ ५९ ॥ भूमिशायीभवेद्यस्तुनरःकोऽपिमहीतले ॥ दशवर्षसहस्राणि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नरोगैःपरिपीड्यते ॥ ६० ॥ बहुपुत्रोधनैर्युक्तोह्यकुष्ठीजायतेनरः ॥ नक्तभोजीनरोयस्तुतीर्थयात्राफलंलभेत् ॥ ६१ ॥ अयाचितेनचाप्नोतिवापी
कूपक्रियाफलम् ॥ वर्जयेद्यस्तुवैद्रोहंप्राणहिंसापराङ्मुखः ॥ ६२ ॥ अहिंसापरमोधर्मइतिवेदेषुगीयते ॥ दानंदयादमइतिसर्वत्रहिश्रुतंमया ॥ ६३ ॥
तस्मात्सर्वप्रयत्नेनकार्यंवैमहतामपि ॥ गुरवेयेप्रयच्छन्तिशरीरंपुत्रपौत्रकम् ॥ ६४ ॥ तत्रदानप्रभावेणविष्णोर्वल्लभतामियात् ॥ शूद्रेणदीक्षितोयस्तु
शूद्रःशूद्रेणदीक्षितः ॥ ६५ ॥ उभौतौपापिनौप्रोक्तौयावदाभूतसंप्लवम् ॥ हिंसामतिंयदादत्तेशूद्रोवैपापसत्तमः ॥ ६६ ॥ एकविंशतिकुलंतेन
नरकंप्रतिपात्यते ॥ कलौपाखण्डिनःशूद्रादृश्यन्तेबहवोभुवि ॥ ६७ ॥ तेषांसंभाषणादेवनरकोभवतिद्विज ॥ ब्रह्मज्ञानरतायेचगायत्रीजापिनोद्विज ॥
॥ ६८ ॥ तेषांदर्शनमात्रेणब्रह्महत्यादिनेदिने ॥ शङ्खचक्रधराविप्राविष्णुधर्मेषुसंमताः ॥ ६९ ॥ वेदधर्मरतानित्यंपङ्क्तिपावनपावनाः ॥ चातुर्मा
स्यमिदंकर्मकर्त्तव्यंतैःसदानरैः ॥ ७० ॥ किमन्यद्बहुनोक्तेनभूयोभूयश्चवाडव ॥ तेधन्याःपृथिवीमध्येनरायेवैष्णवाभुवि ॥ ७१ ॥ तेषांकुलंधन्य
तमंजातिर्धन्यतमास्मृता ॥ मधुभक्षयतेयस्तुसुप्तेदेवेजनार्दने ॥ ७२ ॥ महत्पापंभवेत्तस्यवर्जनेयच्छृणुष्वतत् ॥ सर्वयज्ञैश्चविविधैर्यत्फलंतदवाप्नुयात् ॥
॥ ७३ ॥ दाडिमंमातुलिङ्गंचनालिकेरंचवर्जयेत् ॥ देवोवमानिकोभूत्वाह्यन्तेविष्णुपदंव्रजेत् ॥ ७४ ॥ वित्तवान्सुभगश्चैवकुलेश्रीमतिजायते ॥
यःक्षिपेदेकभक्तेननरोमासचतुष्टयम् ॥ ७५ ॥ यावन्तिचमुहूर्तानिउदितोदितभास्करे ॥ तावद्वर्षसहस्राणिविष्णुलोकेमहीयते ॥ ७६ ॥ व्रीहींश्च
यवगोधूमान्वर्जयेद्यस्तुमानवः ॥ अश्वमेधादिकेक्रतेविधिवद्बहुदक्षिणे ॥ ७७ ॥ यत्फलंमुनिभिःप्रोक्तंतत्फलंलभतेनरः ॥ धनधान्यसमायुक्तो
बहुपुत्रश्चजायते ॥ ७८ ॥ तुलसीतिलदर्भैश्चयेकुर्वन्तिचतर्पणम् ॥ तत्फलंकोटिगुणितंचातुर्मास्येविशेषतः ॥ ७९ ॥ यदासुप्तेहृषीकेशेकुर्या
च्चैतत्रयान्वितम् ॥ तेऽपियुगसहस्राणिमोदन्तेविष्णुसंनिधौ ॥ ८० ॥ पदंवापदमर्धंवाऋचांचार्धऋचांतथा ॥ विष्णवग्रेयेप्रगायन्तिमुक्तास्ते
वैनसंशयः ॥ ८१ ॥ मैथुनंवर्जयेद्यस्तुसुप्तेदेवेजनार्दने ॥ एकमन्वन्तरंसोऽपिविष्णुलोकेमहीयते ॥ ८२ ॥ दधिदुग्धंतथातक्रंगुडंशाकंतथै
वच ॥ वर्जनादेवभोविप्रमुक्तिभागीनसंशयः ॥ ८३ ॥ स्नानमामलकैर्नैवयेकुर्वन्तिचमानवाः ॥ दिनेदिनेमहत्पुण्यंप्राप्नुवन्तिचतेमुने ॥ ८४ ॥
धात्रीफलंपापहरंप्रवदन्तिमनीषिणः ॥ त्रैलोक्यतारणार्थायनिर्मिताब्रह्मणापुरा ॥ ८५ ॥ सन्ध्यामौनंचरेद्यस्तुभुङ्क्तेमासचतुष्टयम् ॥ मन्वन्तराणि
चत्वारिवैकुण्ठेमोदतेपुनः ॥ ८६ ॥ स्वयंपाकीनरोयस्तुभुङ्क्तेमासचतुष्टयम् ॥ दशवर्षसहस्राणिइन्द्रलोकेमहीयते ॥ ८७ ॥ चतुरोवा
र्षिकान्मासान्मौनंचैवसमाचरेत् ॥ सचविष्णुपुरंगच्छेद्ब्राह्मंचतदनन्तरम् ॥ ८८ ॥ मौनभोजीनरोयस्तुकदाचिन्नावसीदति ॥ मौनेनभुञ्जमानो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तुराक्षसास्त्रिदिवंगताः ॥ ८९ ॥ कृमिकीटसमायुक्तंपक्वान्नमशुचीभवेत् ॥ गवांमांससमंज्ञेयमन्नंचापिद्विजोत्तम ॥ ९० ॥ तदन्नमशुचिज्ञेयं
ग्रसतेमानुषोयदि ॥ एतद्वैभोजनंप्रोक्तंराक्षसानांप्रियंसदा ॥ ९१ ॥ तोषितोहिपुराब्रह्मातेनदत्तंमहात्मना ॥ मौनेनभोजयित्वातुस्वर्गंप्राप्तानसंशयः॥
॥ ९२ ॥ संजल्पन्भुञ्जतेयस्तुतेनान्नमशुचीभवेत् ॥ पापंसकेवलंभुङ्क्तेतस्मान्मौनंसमाचरेत् ॥ ९३ ॥ उपवाससमंभोज्यंज्ञेयंमौनेननारद ॥ पञ्चप्राणा
हुतीर्यस्तुमौनभोजीनरोत्तमः ॥ ९४ ॥ पञ्चवैपातकान्यस्यनश्यन्तिनात्रसंशयः ॥ नकुर्यात्संहितंवस्त्रंपितृकर्मणिवाडव ॥ ९५ ॥ अशुच्यङ्गेस्थितं
चैववस्त्रंतदशुचीभवेत् ॥ कटिपृष्ठस्थितेवस्त्रेपुरीषंकुरुतेतुयः ॥ ९६ ॥ मूत्रंवामैथुनंवापितद्वस्त्रंपरिवर्जयेत् ॥ पितृकर्मविशेषेणवर्जनीयंचवाडव ॥
॥ ९७ ॥ सर्वदाचमुनेप्राज्ञैर्देवार्चाचक्रपाणिनः ॥ कर्त्तव्याचविशेषेणशुचिभिर्विजितेन्द्रियैः ॥ ९८ ॥ संप्रसुप्तेहृषीकेशेतृणशाककुसुम्भिकाः ॥ संहि
तानिचवस्त्राणिवर्जितानिप्रयत्नतः ॥ ९९ ॥ चातुर्मास्येहरौसुतेयस्तुएतानिवर्जयेत् ॥ नरकंनतुसंगच्छेद्यावदाभूतसंप्लवम् ॥ १०० ॥ मद्यंमांसंन
भक्षेतशाशकंसौकरंतथा ॥ चातुर्मास्येविशेषेणसुप्तेदेवेजनार्दने ॥ १ ॥ सोऽपिदेवत्वमाप्नोतिअहिंसानिरतोनरः ॥ मिथ्याक्रोधंतथारौक्ष्यंतथापर्वसु
मैथुनम्॥२॥वर्जितंयेनविप्रेन्द्रसोऽश्वमेधफलंलभेत् ॥ ब्रह्मचर्येप्रजावृद्धिरायुर्वृद्धिस्तथैवच॥३॥पुष्पंपत्रंफलंशय्याअभ्यङ्गंचविलेपनम् ॥ वृथादुग्धानि
मांसंचमद्यंचपरिवर्जयेत् ॥ ४ ॥ चातुर्मास्येहरौसुप्तेनियतंयद्विवर्जितम् ॥ प्रथमंतत्तुदातव्यंब्राह्मणायनसंशयः ॥ ५ ॥ तद्धनंचाक्षयंविद्धन्प्रदत्तं
यद्द्विजातये ॥ कोटिकोटिगुणंविप्रलभतेनात्रसंशयः ॥ ६ ॥ येनकेनापिविप्रेन्द्रनियमेनार्चितोहरिः ॥ ददातिविष्णुभवनंनात्रकार्याविचारणा ॥
॥ ७ ॥ चातुर्मास्येहरौसुप्तेनियमंयोनकारयेत् ॥ सोऽपिनरकमाप्नोतितस्यजन्मवृथागतम् ॥ ८ ॥ यःपुमान्कारयेन्नित्यंद्विजोक्तंविधिमुत्तमम्॥
तथोक्तान्नियमांश्चैवसयातिपरमंपदम् ॥ ९ ॥ त्रिवर्गरहितंदानंदत्तंभवतिनिष्फलम् ॥ तस्मात्सर्वप्रयत्नेनदेवदेवंजनार्दनम् ॥ ११० ॥ तोषयेन्नियमै
र्दानैर्यथाशक्त्यानरोत्तमः ॥ अकृतस्नानदानंचब्राह्मणानांचपूजनम् ॥ ११ ॥ वृथागतंतुतत्सर्वंयावदिन्द्राश्चतुर्दश ॥ १२ ॥ नारदउवाच ॥ कीदृशं
ब्रह्मचर्यंचवदविश्वेश्वरप्रभो ॥ येनचीर्णेनगोविन्दःपरितुष्टोभवेन्नृणाम् ॥ १३ ॥ महादेवउवाच ॥ स्वदारनिरतश्चैवब्रह्मचारीस्मृतोबुधैः ॥ चाण्डाला
दधिकोविद्धन्यःस्वभार्यापरित्यजेत् ॥ १४ ॥ ऋतावभिगमंकृत्वाब्रह्मचर्यंविधीयते ॥ परित्यजतियोभार्यांभक्तांदोषविवर्जिताम् ॥ १५ ॥ पाप
कर्मानरोलोकेभ्रूणहत्यामवाप्नुयात् ॥ स्नानंदानंजपोहोमःस्वाध्यायंदेवतार्चनम् ॥ १६ ॥ चातुर्मास्यकृतंयच्चसर्वंहिचाक्षयंभवेत् ॥ एककालंद्विकालं
वापुराणंशृणुतेतुयः ॥ १७ ॥ सर्वपापविनिर्मुक्तोविष्णुलोकंसगच्छति ॥ हरौसुप्तेविशेषेणहरेर्नामपठञ्जपन् ॥ १८ ॥ तत्फलंकोटिगुणितंलभतेद्विज

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सत्तम ॥ वैष्णवोब्राह्मणोयस्तुविष्णुपूजांकरोतिहि ॥ ११९ ॥ सएवसर्वधर्मात्मापूज्यएवनसंशयः ॥ चातुर्मास्यमिदंपुण्यंपवित्रंपापनाशनम् ॥
श्रुत्वातुलभतेपुण्यंगङ्गास्नानभवंमुने ॥ १२० ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०उमापतिनारदसंवादेचातुर्मास्यमहिमानामपञ्चषष्टितमोऽध्यायः
॥ ६५ ॥ नारदउवाच ॥ चातुर्मास्यव्रतानांचप्रब्रूह्युद्यापनंविभो ॥ उद्यापनेकृतेसर्वंसंपूर्णंभवतिध्रुवम् ॥ १ ॥ महादेवउवाच ॥ व्रतंकृत्वामहाभाग
यदिनोद्यापनंचरेत् ॥ यस्तुकर्त्ताकर्मणांसनसम्यक्फलभाग्भवेत् ॥ २ ॥ व्रतवैकल्यमासाद्यकुष्ठीचान्धःप्रजायते ॥ एतस्मात्कारणाच्चैवकुर्यादुद्यापनं
द्विज ॥ ३ ॥ गृहीत्वानियमान्नेतान्पालयित्वायथाविधि ॥ सुतोत्थितेजगन्नाथेगत्वाब्राह्मणसंनिधौ ॥ ४ ॥ क्षमापयेद्देवदेवंयथाविधिचविस्तरात्॥
तैलत्यागेघृतंदद्याद्घृतत्यागेपयःस्मृतम् ॥ ५ ॥ मौनेपिण्डास्तिलादेयाःसहिरण्याद्विजातये ॥ भोजनेभोजनंदद्याद्दध्योदनसमन्वितम् ॥ ६ ॥
अन्नंदद्याद्विशेषेणहिरण्येनसमन्वितम् ॥ अन्नदानान्मुनिश्रेष्ठविष्णुलोकेमहीयते ॥ ७ ॥ पालाशपत्रेयोभुङ्क्तेनरोमासचतुष्टयम् ॥ भाजनंघृतपूर्णं
तुदद्यादुद्यापनेद्विज ॥ ८ ॥ षड्रसंभोजनंदद्याद्ब्राह्मणेनक्तभोजने ॥ अयाचितेत्वनड्वाहंसहिरण्यंप्रदापयेत् ॥ ९ ॥ माषंत्यजन्मुनिश्रेष्ठगांचदद्या
त्सवत्सिकाम् ॥ धात्रीस्नानेनरोदद्यात्स्वर्णमाषिकमेवच ॥ १० ॥ फलानांनियमेचैवफलानिचप्रदापयेत् ॥ धान्यानांनियमेधान्यमथवा
शालयःस्मृताः ॥ ११ ॥ तद्वद्भूशयनेशय्यांसतूलांगेन्दुकान्विताम् ॥ ब्रह्मचर्यंकृतंयेनचातुर्मास्येद्विजोत्तम ॥ १२ ॥ दम्पत्योर्भोजनं
देयमुभयोर्भक्तिपूर्वकम् ॥ सभोगंदक्षिणोपेतंसशाकंलवणंतथा ॥ १३ ॥ नित्यस्नानेनरोदद्यान्निस्नेहेसर्पिसक्तवः ॥ नखकेशव्रतेचैवह्यादर्शं
परिकल्पयेत् ॥ १४ ॥ उपानहौप्रदातव्यावुपानहविवर्जनात् ॥ आमिषस्यपरित्यागात्सवत्साकपिलास्मृता ॥ १५ ॥ नित्यंदीपप्रदोयस्तु
सौवर्णंदीपमावहेत् ॥ तंदीपंघृतसंयुक्तंदद्याच्चैवद्विजन्मने ॥ १६ ॥ विष्णुभक्तायविप्रायपरिपूर्णव्रतेप्सया ॥ शाकस्यनियमेशाकंमाषे
सौवर्णमाषकम् ॥ १७ ॥ मैथुनानांतुनियमेरौप्यंदद्याद्द्विजातये ॥ नागवल्ल्यास्तुनियमेकर्पूरंसहिरण्यकम् ॥ १८ ॥ कालेकालेद्विज
श्रेष्ठयत्कृतंनियमेनतु ॥ तत्तद्देयंविशेषेणपरलोकगतीप्सया ॥ १९ ॥ आदौस्नानादिकंकृत्वाविष्णोरग्रेप्रकारयेत् ॥ अनादिनिधनोदेवःश
ङ्खचक्रगदाधरः ॥ तस्याग्रेकेनकुर्वन्तियतोविष्णुस्तुपापहा ॥ २० ॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०उत्तर०उमापतिनारदसंवादेचातुर्मास्यो
द्यापनंनामषट्षष्टितमोऽध्यायः ॥ ६६ ॥ नारदउवाच ॥ यमस्याराधनंब्रूहिमद्धितार्थंसुरोत्तम ॥ कथंनगम्यतेदेवनरेणनरकान्तरम् ॥ १ ॥

१ 'भोजनं घृतपूर्णं च' इति पाठः प्रायो दाक्षिणात्यपुस्तकेषु ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रूयतेयमलोकेतुसदावैतरणीनदी ॥ १ ॥ अनाधृष्यात्वपाराचदुस्तराबहुशोणिता ॥ २ ॥ दुस्तरासर्वभूतानांसाकथंसुतराभवेत् ॥ भयमेतन्महादेव
यमलोकंप्रतिप्रभो ॥ ३ ॥ तस्यनिर्मोचनार्थायब्रूहिकृत्यमशेषतः ॥ भगवन्देवदेवेशकृपांकृत्वाममोपरि ॥ ४ ॥ महादेवउवाच ॥ द्वार
वत्यांपुराविप्रस्नातोऽहंलवणाम्भसि ॥ ददर्शेमुनिमायान्तंमुद्गलंनामवाडव ॥ ५ ॥ ज्वलन्तमिवचादित्यंतपसाद्योतिताङ्गकम् ॥ मांप्रणम्य
मुनिःप्राहमुद्गलोविस्मयान्वितः ॥ ६ ॥ मुद्गलउवाच ॥ अकस्मान्मूर्च्छितोदेवपतितोऽस्मिधरातले ॥ प्रज्वलन्तिममाङ्गानिगृहीतोयमकि
ङ्करैः ॥ ७ ॥ बलादाकृष्यमाणोऽहंपुरुषोङ्गुष्ठमात्रकः ॥ बद्धोयमभटैर्गाढंनीतोऽस्मिशमनान्तिकम् ॥ ८ ॥ क्षणात्सभायांपश्यामियमं
पिङ्गललोचनम् ॥ कृष्णमुखंमहारौद्रंमृत्युव्याधिशतान्वितम् ॥ ९ ॥ वातपित्तश्लेष्मदोषैर्मूर्तिमद्भिस्तुसेवितम् ॥ कासशोषज्वरातङ्कस्फोटिका
लूतकादिभिः ॥ १० ॥ ज्वालाङ्गमर्दशीर्षार्तिभगन्दरबलक्षयैः ॥ कण्ठमालाक्षिरोगैश्चमूत्रकृच्छ्रज्वरव्रणैः ॥ ११ ॥ विमूर्च्छिकागलग्राहद्द
द्रोगैर्भूततस्करैः ॥ इत्थंबहुविधैरौद्रैर्नानारूपैर्भयङ्करैः ॥ १२ ॥ कपालशिरोहस्तैश्चसङ्ग्रामेनरकेतथा॥ राक्षसैर्दानवैर्घोरैरुपविष्टैःपुरःस्थितैः॥
॥ १३ ॥ धर्माधिकारिभिश्चात्रचित्रगुप्तादिलेखकैः ॥ व्याघ्रसिंहवराहैश्चशिवासर्पैःसुदुर्धरैः ॥ १४ ॥ वृश्चिकैर्दष्ट्रिभिर्भूतैःकीटकैर्मत्कुणादिभिः ॥
वृकचित्रादिशुनकैःकङ्कैर्गृध्रैश्चजम्बुकैः ॥ १५ ॥ तस्करैर्भूतदारिद्रैर्मारिभिर्डाकिनीग्रहैः ॥ मुक्तकेशैःश्वासकासैर्भ्रुकुटीकुटिलाननैः ॥ १६ ॥
बृहत्प्रतापैर्नोभीतैःशासकैःपापकर्मणाम् ॥ यमःसभायांशुशुभेसेव्यमानःपरिग्रहैः ॥ १७ ॥ भीमाटविकजीवैश्चयथाव्यालाञ्जनोगिरिः ॥
ततोविश्वेश्वरःप्राहसयमःकिङ्करान्प्रति ॥ १८ ॥ नामभ्रान्तैर्भवद्भिश्चसमानीतःकथंमुनिः ॥ भीमकस्यात्मजोग्रामेकौण्डिन्येमुद्गलाभिधः ॥
॥ १९ ॥ क्षीणायुःक्षत्रियःसोऽस्तिआनेयोमुच्यतामसौ ॥ श्रुत्वैतत्तेगतास्तस्मादायाताःपुनरेवते ॥ २० ॥ धर्मराजंपुनःप्राहुःसर्वेतेयम
किङ्कराः ॥ तत्रास्माभिर्गतैर्देहीक्षीणायुर्नोपलक्षितः ॥ भानुसूनोनजानीमःकथंचिद्भ्रान्तचेतसः ॥ २१ ॥ यमउवाच ॥ किङ्कराणामदृश्यास्ते
प्रायेणभवतांनराः ॥ सुकृताद्द्वादशीयैस्तुख्यातावैतरणीतिया ॥ २२ ॥ उज्जयिन्यांप्रयागेवायमुनायांचयेमृताः ॥ तिलहस्तिहिरण्यादिदत्तं
यैस्तुगवादिकम् ॥ २३ ॥ दूताऊचुः ॥ तद्व्रतंकीदृशंस्वामिन्ब्रूहिसर्वमशेषतः ॥ किंतत्रदेवकर्त्तव्यंपुरुषैस्तवतोषदम् ॥ २४ ॥ येनकृतानर
श्रेष्ठद्वादशीकृष्णपक्षजा ॥ उपवासेचतेनैवकथंपापात्प्रमुच्यते ॥ २५ ॥ तद्व्रतंकेनविधिनाकर्त्तव्यंचयथावद ॥ सुप्रसन्नेनवक्तव्यंदयांकृत्वा
दयानिधे ॥ २६ ॥ श्रीमुद्गलउवाच ॥ दूतानांवचनंश्रुत्वाउवाचमधुरंतदा ॥ सर्ववदामिभोदूतायथादृष्टंयथाश्रुतम् ॥ २७ ॥ यमउवाच ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मार्गशीर्षादिमासेतुयाइमाःकृष्णपक्षजाः ॥ तासुसर्वासुविधिवद्दूतावैतरणीव्रतम् ॥ २८ ॥ प्रतिमासंचकर्त्तव्यंयावद्वर्षंभवेद्ध्रुवम् ॥ यत्तुकृत्वा
तुभोदूतामुच्यतेनात्रसंशयः ॥ २९ ॥ उपवासस्यनियमःकर्त्तव्योविष्णुतुष्टिदः ॥ अद्यमेदेवदेवेशउपवासोभविष्यति ॥ ३० ॥ द्वादश्यां
पूज्यगोविन्दंभक्तिभावसमन्वितम् ॥ स्वप्नइन्द्रियवैकल्याद्भोजनंयच्चमैथुनम् ॥ ३१ ॥ तत्सर्वंक्षममेदेवकृपांकृत्वाममोपरि ॥ एवंवैनियमं
कृत्वामध्याह्नेतीर्थमाव्रजेत् ॥ ३२ ॥ मृद्गोमयतिलान्नीत्वागन्तव्यंविधिपूर्वकम् ॥ स्नानंतत्रप्रकर्तव्यंव्रतसंपूर्त्तिहेतवे ॥ ३३ ॥ अश्वक्रान्तेति
मात्रेणस्नानंकुर्याद्विशेषतः ॥ अश्वक्रान्तेरथक्रान्तेविष्णुक्रान्तेवसुन्धरे ॥ ३४ ॥ मृत्तिकेहरमेपापंयन्मयापूर्वसंचितम् ॥ तयाहतेनपापेनसर्व
पापैःप्रमुच्यते ॥ ३५ ॥ काश्यांचैवतुसंभूतास्तिलावैविष्णुरूपिणः ॥ तिलस्नानेनगोविन्दःसर्वपापंव्यपोहति ॥ ३६ ॥ विष्णुदेहोद्भवे
देविमहापापापहारिणि ॥ सर्वपापंहरत्वंवैसर्वौषधिनमोऽस्तुते ॥ ३७ ॥ तुलसीपत्रकंधृत्वानामोच्चारणपूर्वकम् ॥ स्नानंसुकृतिभिः
प्रोक्तंकर्तव्यंविधिपूर्वकम् ॥ ३८ ॥ एवंस्नात्वासमुत्तीर्यपरिधायसुवाससी ॥ तर्पयित्वापितॄन्देवांस्ततोविष्णोस्तुपूजनम् ॥ ३९ ॥ संस्थाप्य
चाव्रणंकुम्भंपञ्चपल्लवसंयुतम् ॥ पञ्चरत्नसमोपेतंदिव्यस्रग्गन्धवासितम् ॥ ४० ॥ सद्द्रव्यंजलपूर्णंचताम्रपत्रसमन्वितम् ॥ तत्रस्थंश्रीधरं
देवंदेवदेवंतपोनिधिम् ॥ ४१ ॥ पूर्णेनविधिनाराजन्कुर्यात्पूजांगरीयसीम् ॥ मृद्गोमयादिरचितंमण्डलंकारयेच्छुभम् ॥ ४२ ॥ तण्डुलैः
शुक्लधौतैश्चाप्यम्बुपिष्टैश्चकारयेत् ॥ धर्मराजःप्रकर्त्तव्योहस्ताद्यवयवान्वितः ॥ ४३ ॥ नदींवैतरणींताम्रांस्थापयित्वातदग्रतः ॥ पूज
येच्चपृथक्सम्यक्समावाहनपूर्वकम् ॥ ४४ ॥ आवाहयामिदेवेशंयमंवैविश्वरूपिणम् ॥ इहाभ्येहिमहाभागसान्निध्यंकुरुकेशव ॥ ४५ ॥
इदंपाद्यंश्रियःकान्तसोपविष्टंहरेप्रभो ॥ विश्वोद्यानरतोनित्यंकृपांकुरुममोपरि ॥ ४६ ॥ भूतिदायनमःपादावशोकायचजानुनी ॥ ऊरूनमः
शिवायेतिविश्वमूर्तेनमःकटिम् ॥ ४७ ॥ कन्दर्पायनमोमेढ्रमादित्यायफलंतथा ॥ दामोदरायजठरंवासुदेवायवैस्तनौ ॥ ४८ ॥ श्रीधरायमुखं
केशान्केशवायेतिवैनमः ॥ पृष्ठंशार्ङ्गधरायेतिचरणौवरदायच ॥ ४९ ॥ स्वनाम्नाशङ्खचक्रासिगदापरशुपाणये ॥ सर्वात्मनेनमस्तुभ्यंशिर
इत्यभिधीयते॥५०॥मत्स्यंकूर्मंचवाराहंनारसिंहंचवामनम् ॥ रामंरामंचकृष्णंचबुद्धंकल्किनमोऽस्तुते॥५१॥सर्वपापौघनाशार्थंपूजयामिनमोनमः॥
एभिश्चसर्वशोमन्त्रैर्विष्णुंध्यात्वाप्रपूजयेत्॥५२॥धर्मराजनमस्तेऽस्तुधर्मराजनमोऽस्तुते ॥ दक्षिणाशापतेतुभ्यंनमोमहिषवाहन ॥ ५३ ॥ चित्रगुप्त
नमस्तुभ्यंविचित्रायनमोनमः ॥ नरकार्तिप्रशान्त्यर्थंकामान्यच्छममेप्सितान् ॥ ५४ ॥ यमायधर्मराजायमृत्यवेचान्तकायच ॥ वैवस्वताय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कालायसर्वभूतक्षयायच ॥ ५५ ॥ वृकोदरायचित्रायचित्रगुप्तायवैनमः ॥ नीलायचैवदध्नायनित्यंकुर्यान्नमोनमः ॥ ५६ ॥ एवंद्वादशभिःपूज्यो
नामभिर्धर्मराट्प्रभुः ॥ वैतरणिसुदुष्पारेपापघ्निसर्वकामदे ॥ ५७ ॥ इहाभ्येहिमहाभागेगृहाणार्घंमयाकृतम् ॥ यमद्वारपथेघोरेख्यातावैतरणी
नदी ॥५८॥तस्याउद्धरणार्थायजन्ममृत्युजरातिगा ॥ यादुस्तरादुष्कृतिभिःसर्वप्राणिभयापहा ॥५९॥यस्यांभयात्प्रमज्जन्तिप्राणिनोयातनापराः ॥
तर्तुकामस्तुतांघोरांजयादेविनमोनमः ॥ ६० ॥ तस्यांदेवहितिष्ठन्तियासावैतरणीनदी ॥ साचापिपूजिताभक्त्याप्रीत्यर्थंकेशवस्यच ॥ ६१ ॥
यस्यास्तटेप्रतिष्ठन्तिऋषयःपितरस्तथा ॥ साचापिसिन्धुरूपेणपूजितापापहारिका ॥६२॥ तरीतुंतांप्रदास्यामिसर्वपापविमुक्तये॥ पुण्यार्थंसंप्रवक्ष्या
मितुभ्यंवैतरणीनदीम् ॥ ६३ ॥ मयासिपूजिताभक्त्याप्रीत्यर्थंकेशवस्यच ॥ कृष्णकृष्णजगन्नाथसंसारादुद्धरस्वमाम् ॥ ६४ ॥ नामग्रहणमात्रेणसर्वं
पापंहरस्वमे ॥ यज्ञोपवीतंपरमंकारितंनवतन्तुभिः ॥६५॥ प्रतिगृह्णीष्वदेवेशप्रीतोयच्छममेप्सितम् ॥ इदंतवचताम्बूलंयथाशक्त्यासुशोभनम्॥६६॥
प्रतिगृह्णीष्वदेवेशमामुद्धरभवार्णवात् ॥ पञ्चवर्तीप्रदीपोऽयंदेवेशारार्तिकंतव॥६७॥मोहान्धकारद्युमणेभक्तियुक्तोभवार्तिहृत् ॥ परमान्नंसुपक्वान्नंसमस्त
रससंयुतम् ॥ ६८ ॥ निवेदितंमयाभक्त्याभगवन्प्रतिगृह्यताम् ॥ द्वादशाक्षरमन्त्रेणयथासङ्ख्यजपेनच ॥ ६९ ॥ प्रीयतांमेश्रियःकान्तःप्रीतोयच्छतु
वाञ्छितम् ॥ पञ्चगावःसमुत्पन्नामथ्यमानेमहोदधौ॥७०॥तासांमध्येतुयानन्दातस्यैधेन्वैनमोनमः ॥ गांसंपूज्यविधानेनअर्घ्यंदद्यात्समाहितः॥७१॥
सर्वकामदुघेदेविसर्वान्तकनिवारिणि ॥ आरोग्यंसन्ततिंदीर्घांदेहिनन्दिनिमेसदा ॥ ७२ ॥ पूजिताचवसिष्ठेनविश्वामित्रेणधीमता ॥ कपिलेहरमेपापं
यन्मयापूर्वसंचितम्॥७३॥गावोममाग्रतःसन्तुगावोमेसन्तुपृष्ठतः ॥ नाकेमामुपतिष्ठन्तुहेमशृङ्ग्यःपयोमुचः॥७४॥सुरभ्यःसौरभेयाश्चसरितःसागरा
यथा ॥ सर्वदेवमयेदेविसुभद्रेभक्तवत्सले ॥७५॥ एवंसंपूज्यविधिवद्दद्याद्गोषुगवाह्निकम् ॥ सौरभेय्यःसर्वहिताःपवित्राःपापनाशनाः ॥७६ ॥ प्रतिगृ
ह्णन्तुमेग्रासंगावस्त्रैलोक्यमातरः ॥ गंगदायैनमोभूत्यैसर्वपापप्रहाणये॥७७॥अनेनैवतुमन्त्रेणगदांवैधारयेद्बुधः ॥ पंनमःपद्मनाभायपद्मंवैधारयेत्सुधीः
॥ ७८॥ चंचक्ररूपिणेविष्णोधारणंचक्रजंस्मृतम्॥ शंशङ्खरूपिणेतुभ्यंनमोऽस्तुसुखकारिणे ॥७९॥ मन्त्रेणानेनवैदूताधारणंशङ्खजंस्मृतम्॥चतुर्णा
मायुधानांतुधारणंमुनिभिःस्मृतम् ॥८० ॥ अग्निहोत्रंयथानित्यंवेदस्याध्ययनंतथा ॥ ब्राह्मणस्यतथैवेदंतप्तमुद्रादिधारणम् ॥८१॥ चन्दनेनसुगन्धेन
गोपिकाचन्दनेनतु ॥ धारणंचविशेषेणब्राह्मणैर्वेदपारगैः॥८२॥चाण्डालोऽपिभवेच्छुद्धोधारणाच्चनसंशयः ॥ ऊर्ध्वपुण्ड्रमृजुंसौम्यंसचिह्नंधारयेद्यदि॥
॥८३॥ सचाण्डालोऽपिशुद्धात्मापूज्यएवसदाद्विजैः ॥ चाण्डालानांगृहेदूतास्तुलसीयत्रदृश्यते ॥८४॥ तत्रत्यातुलसीग्राह्याभक्तिभावेनचेतसा॥८५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महेश्वरउवाच ॥ इतिश्रुतंधर्ममुखान्मुद्गलोद्विजसत्तमः ॥ कथयित्वाममाग्रेवैगतोयादृच्छिकोमुने ॥ ८६ ॥ गोपिकाचन्दनंयत्रतिष्ठतेवैद्विजोत्तम ॥
तद्गृहंतीर्थरूपंचविष्णुनाभाषितंकिल ॥ ८७ ॥ शोकमोहौनतत्रस्तोनभवत्यशुभंक्वचित् ॥ गोपिकाचन्दनंयस्यतिष्ठतिद्विजसद्मनि ॥ ८८ ॥
सुखिनःपूर्वजास्तेषांसन्ततिर्वर्धतेसदा ॥ गोपिकाचन्दनंयस्यवर्ततेऽहर्निशंगृहे ॥ ८९ ॥ गोपीपुष्करजामृत्स्नापवित्राकायशोधिनी ॥ उद्वर्तनाद्विन
श्यन्तिव्याधयोह्याधयश्चये ॥९०॥ अतोदेहेधृतंपुम्भिर्मुक्तिदंसर्वकामिकम् ॥ तावद्गर्जन्तितीर्थानितावत्क्षेत्राणिसर्वदा ॥ ९१ ॥ गोपिकाचन्दनंयाव
न्नदृष्टंनश्रुतंद्विज ॥ इदंध्येयमिदंपूज्यंमलदोषविनाशनम् ॥९२॥ यस्यसंस्पर्शनादेवपूतोभवतिमानवः॥अन्तकालेतुमर्त्यानांमुक्तिदंपावनंपरम्॥९३॥
किंवदामिद्विजश्रेष्ठमुक्तिदंगोपिचन्दनम् ॥ विष्णोस्तुतुलसीकाष्ठंतथावैमूलमृत्तिका ॥ ९४ ॥ गोपिकाचन्दनंचैवतथावैहरिचन्दनम् ॥ चत्वार्येता
निसमेल्यअङ्गमुद्वर्तयेत्सुधीः ॥ ९५ ॥ तेनतीर्थंकृतंसर्वंजम्बूद्वीपेषुसर्वदा ॥ तिलकंकुरुतेयस्तुगोपिकाचन्दनद्रवैः ॥ ९६ ॥ सर्वपापविनिर्मुक्तोयाति
विष्णोःपरंपदम् ॥ पितुःश्राद्धादिकंतेनगयांगत्वातुवैकृतम् ॥ ९७ ॥ येनवापुरुषेणापिविधृतंगोपिचन्दनम् ॥ मद्यपोब्रह्महाचैवगोघ्नोवाबालहातथा ॥
मुच्यतेतत्क्षणादेवगोपीचन्दनधारणात् ॥९८॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उमापतिनारदसंवादेगोपीचन्दनमाहात्म्येसप्तषष्टितमोऽध्यायः ॥६७॥
महेश्वरउवाच ॥ शृणुनारदवक्ष्यामिवैष्णवानांचलक्षणम् ॥ यच्छ्रुत्वामुच्यतेलोकोब्रह्महत्यादिपातकात् ॥ १ ॥ तेषांवैलक्षणंयादृक्स्वरूपंयादृशं
भवेत् ॥ तादृशंमुनिशार्दूलशृणुत्वंवच्मिसांप्रतम् ॥ २ ॥ विष्णोरयंयतोह्यासीत्तस्माद्वैष्णवउच्यत ॥ सर्वेषांचैववर्णानांवैष्णवःश्रेष्ठउच्यते
॥ ३ ॥ येषांपुण्यतमाहारास्तेषांवंशेतुवैष्णवः ॥ क्षमादयातपःसत्यंयेषांवैतिष्ठतिद्विज ॥ ४ ॥ तेषांदर्शनमात्रेणपापंनश्यतितूलवत् ॥ हिंसा
धर्माद्विनिर्मुक्तायस्यविष्णौस्थितामतिः ॥ ५ ॥ शङ्खचक्रगदापद्मंनित्यंवैधारयेत्तुयः ॥ तुलसीकाष्ठजांमालांकण्ठेवैधारयेद्यतः ॥ ६ ॥ तिलकानि
द्वादशधानित्यंवैधारयेद्बुधः ॥ धर्माधर्मंतुजानातियःसवैष्णवउच्यते ॥ ७ ॥ वेदशास्त्ररतोनित्यंनित्यंवैयज्ञयाजकः ॥ उत्सवाश्चचतुर्विंशत्कुर्वन्तिच
पुनःपुनः ॥ ८ ॥ तेषांकुलंधन्यतमंतेषांवैयशउच्यते ॥ तेवैलोकेधन्यतमाजाताभागवतानराः ॥ ९ ॥ एकएवकुलेयस्यजातोभागवतोनरः
तत्कुलंतारितंतेनभूयोभूयश्चवाडव ॥ १० ॥ उद्भिज्जाअण्डजाश्चैवयेजरायुजयोनयः ॥ तेतुसर्वेऽपिविज्ञेयाःशङ्खचक्रगदाधराः ॥ ११ ॥
येषांदर्शनमात्रेणब्रह्महाशुध्यतेसदा ॥ किंतुवक्ष्यामिदेवर्षेतेभ्योधन्यतमाभुवि ॥ १२ ॥ वैष्णवायेतुदृश्यन्तेभुवनेऽस्मिन्महामुने ॥ तेवैविष्णुसमा
श्चैवज्ञातव्यास्तत्त्वकोविदैः ॥ १३ ॥ कलौधन्यतमालोकेश्रुतामेनात्रसंशयः ॥ विष्णोःपूजाकृतातेनसर्वेषांपूजनंकृतम् ॥ १४ ॥ महादानंकृतं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेनपूजितायेनवैष्णवाः ॥ फलंपत्रंतथाशाकमन्नंवावस्त्रमेवच ॥ १५ ॥ वैष्णवेभ्यःप्रयच्छन्तितेधन्याभुविसर्वदा ॥ अर्चितोवैष्णवोयैस्तुसर्वेषां
चैवपूजनम् ॥ १६ ॥ कृतंयैरार्चितोविष्णुस्तेवैधन्यतमामताः ॥ तेषांदर्शनमात्रेणशुध्यतेपातकान्नरः ॥ १७ ॥ किमन्यद्बहुनोक्तेनभूयोभूयश्चवाडव
अतोवैदर्शनंतेषांस्पर्शनेसुखदायकम् ॥ १८ ॥ यथाविष्णुस्तथाचायंनान्तरंवर्ततेक्वचित् ॥ इतिज्ञात्वातुभोवत्ससर्वदापूजयेद्बुधः ॥ १९ ॥ एकएव
तुयैर्विप्रोवैष्णवोभुविभोज्यते ॥ सहस्रंभोजितंतेनद्विजानांनात्रसंशयः ॥ २० ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०उमापतिनारसंवादेवैष्णवमाहा
त्म्यंनामाष्टषष्टितमोऽध्यायः ॥ ६८ ॥ नारदउवाच ॥ उपवाससमर्थानांसदैवामरसत्तम ॥ एकायाद्वादशीपुण्यातांवदस्वममानघ ॥ १ ॥
शिवउवाच ॥ मासिभाद्रपदेशुक्लेद्वादशीश्रवणान्विता ॥ सावैसर्वप्रदापुण्याह्युपवासेमहाफला ॥ २ ॥ संगमेसरितांस्नात्वाद्वादशींतामुपोषितः ॥
अयत्नात्समवाप्नोतिद्वादशद्वादशीफलम् ॥ ३ ॥ बुधश्रवणसंयुक्तायाचवैद्वादशीभवेत् ॥ अतीवमहतीतस्यांकृतंसर्वमथाक्षयम् ॥ ४ ॥ द्वादशी
श्रवणोपेतायदाभवतिनारद ॥ संगमेसरितांस्नात्वालभेद्गोदानजंफलम् ॥ ५ ॥ जलपूर्णंतदाकुम्भंस्थापयित्वाविचक्षणः ॥ तस्योपरिन्यसे
त्पात्रंस्थापयित्वाजनार्दनम् ॥ ६ ॥ ततस्तस्याग्रतोदेयंनैवेद्यंघृतपाचितम् ॥ नवकुम्भान्सोदकांश्चदद्याच्छक्त्याविचक्षणः ॥ ७ ॥ एवंसं
पूज्यगोविन्दंजागरंतत्रकारयेत् ॥ प्रभातेविमलेस्नात्वासंपूज्यगरुडध्वजम् ॥ ८ ॥ पुष्पधूपादिनैवेद्यैःफलैर्वस्त्रैःसुशोभनैः ॥ पुष्पाञ्जलिंततोद
द्यान्मन्त्रमेतमुदीरयेत् ॥ ९ ॥ नमोनमस्तेगोविन्दबुधश्रवणसंयुत ॥ अघौघसंक्षयंकृत्वासर्वसौख्यप्रदोभव ॥ १० ॥ अन्नंतुब्राह्मणेपूतंवेदवेदा
ङ्गपारगे ॥ पुराणज्ञेविशेषेणविधिवत्संप्रदापयेत् ॥ ११ ॥ अनेनविधिनाचैवनद्यास्तीरेनरोत्तमः ॥ सर्वंनिवर्त्तयेत्सम्यगेकचित्तरतो
ऽपिसन् ॥ १२ ॥ अत्राप्युदाहरन्तीममितिहासंपुरातनम् ॥ महत्यरण्येयद्वृत्तंभूमिदेवशृणुष्वतत् ॥ १३ ॥ यंश्रुत्वामानवोलोकेमहादुः
खात्प्रमुच्यते ॥ देशोदासरकोनामतस्यभागेचपश्चिमे ॥ १४ ॥ तत्रविद्धन्मरुर्देशःसर्वसत्त्वभयङ्करः ॥ सुतप्तसिकताभूमिर्यत्रदुष्टामहोरगाः॥१५॥
अल्पच्छायाद्रुमाकीर्णामृतप्राणिसमाकुला ॥ शमीखदिरपालाशकरीरैःपीलुभिःसह ॥ १६ ॥ तत्रभीमाद्रुमगणाःकण्टकैराचितादृढैः ॥
दग्धप्राणजनाकीर्णायत्रभूर्दृश्यतेक्वचित् ॥ १७ ॥ तथापिजीवाजीवन्तिसर्वेकर्मनिबन्धनात् ॥ नोदकंनोदकाधाराविद्यंस्तत्रबलाहकाः ॥
॥ १८ ॥ पक्षान्तरगतैःकैश्चिच्छिशुभिस्तृषितैःसमम् ॥ उत्क्रान्तजीवनाविप्रदृश्यन्तेनुखगोत्तमाः ॥ १९ ॥ तस्मिंस्तथाविधेदेशेकश्चिद्दैव
वशाद्वणिक् ॥ निजसार्थपरिभ्रष्टःप्रविष्टोमरुजाङ्गले ॥ २० ॥ बभ्रामोद्भ्रान्तहृदयःक्षुत्तृड्भ्यांश्रमपीडितः ॥ क्वग्रामःक्वजलंक्वाहंयास्यामिन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बुबोधह ॥ २१ ॥ अथप्रेतान्ददर्शासौक्षुत्तृषाव्याकुलेन्द्रियान् ॥ उत्कटान्खलिनोभीमान्निर्मांसान्रौद्रदर्शनान् ॥ २२ ॥ प्रेतस्कन्ध समारूढमेकंविकृतदर्शनम् ॥ ददर्शबहुभिःप्रेतैःसमन्तात्परिवारितम् ॥ २३ ॥ आगच्छमानमत्युग्रंप्रेतशब्दपुरःसरम् ॥ प्रेतोऽपिदृष्ट्वातांघोरा मटवीमागतंनरम् ॥ २४ ॥ प्रेतस्कन्धान्महींगत्वातस्यान्तिकमुपागमत् ॥ प्रणिपत्यवणिक्छ्रेष्ठमिदंवचनमब्रवीत् ॥ २५ ॥ अस्मिन्घोरतरे देशेप्रवेशोभवतःकथम् ॥ तमुवाचवणिग्धीमान्सार्थभ्रष्टस्यमेवने ॥ २६ ॥ प्रवेशोदैवयोगेनपूर्वकर्मकृतेनच ॥ तृषामेबाधतेऽत्यर्थंक्षुधाचैवभृशं तथा ॥ २७ ॥ प्राणान्तिकमनुप्राप्तंशरीरंभ्रमतीवमे ॥ अत्रोपायंनपश्यामिजीवेयंयेनकेनचित् ॥ २८ ॥ इत्येवमुक्तेप्रेतस्तंवणिजंवाक्यमब्रवीत् ॥ फुल्लांशमींसमाश्रित्यप्रतीक्षस्वमुहूर्त्तकम् ॥ २९ ॥कृतातिथ्योमयापश्चाद्गमिष्यसियथासुखम् ॥ एवमुक्तस्तथाचक्रेसवणिक्तृष्णयार्दितः ॥ ३० ॥ मध्याह्नसमयेप्राप्तेप्रेतस्तंदेशमागतः ॥ फुल्लांसवृक्षांशीतोदांवारिधानींमनोरमाम् ॥ ३१ ॥ दध्योदनसमायुक्तांवर्धमानेनसंयुताम् ॥ अवतार्यततः स्वन्नंप्रादादतिथयेतदा ॥ ३२ ॥ सतत्राशनमात्रेणपरांतृप्तिमुपागतः ॥ वितृष्णोविज्वरश्चैवक्षणेनसमपद्यत ॥ ३३ ॥ ततःप्रेताश्चसंप्राप्ताःसोऽस्मा द्वागंक्रमाद्ददौ ॥ दध्योदनात्सपानीयात्प्रेतास्तृप्तिंपरांगताः ॥ ३४ ॥ अतिथिंतर्पयित्वातुप्रेतलोकंचसर्वतः ॥ ततःस्वयंसबुभुजेभुक्तशेषंयथासुखम् ॥ ॥ ३५ ॥ तस्यभुक्तवतःस्वन्नंपानीयंचक्षयंययौ ॥ प्रेताधिपंततस्तंवैवणिग्वचनमब्रवीत् ॥३६॥ आश्चर्यमेतत्परमंवनेऽस्मिन्प्रतिभातिमे ॥ अन्नंपानंच परमंसंप्राप्तंचकुतस्तव ॥३७॥ स्वल्पेनैवतथान्नेनत्वमेतांस्तुबहूनपि ॥अतर्पयःकथंत्वेतेनिर्मांसाभिन्नकुक्षयः ॥३८॥ कथमस्यांसुघोरायामटव्यांचकृता लयाः ॥ तदेतत्संशयंछिन्धिपरंकौतूहलंमम ॥ ३९ ॥ एवमुक्तःसवणिजाप्रेतोवचनमब्रवीत् ॥ वाणिज्यसक्तस्यपुराजन्मातीतंममानघ ॥ ४० ॥ सकलेनगरेनास्तिममान्योहिदुरात्मकः॥धनलोभान्नकस्यापिदत्ताभिक्षामयातदा ॥४१ ॥ सखाचैवततश्चासीद्ब्राह्मणोगुणवान्मम ॥ श्रवणद्वादशीयोगे मासिभाद्रपदेततः ॥ ४२ ॥ सकदाचिन्मयासार्धंतापींनामनदींययौ ॥ तस्याश्चसंगमःपुण्योयत्रासीच्चन्द्रभागया ॥ ४३ ॥ चन्द्रभागाचन्द्रसुतातापी चैवार्कनन्दिनी ॥ तयोःशीतोष्णसलिलेप्रविवेशसहद्विजः ॥ ४४ ॥ श्रवणद्वादशीयोगेनराश्चसमुपोषिताः ॥ चन्द्रभागासुतोयेनवारिधानींददुर्द्विजे ॥४५॥दध्योदनयुतांसार्धंसंपूर्णैर्वर्धमानकैः॥छत्रोपानद्युगंवस्त्रंप्रतिमांचतथाहरेः ॥४६॥ प्रददौविप्रमुख्येभ्योहरस्याग्रेमहामते॥वित्तसंरक्षणार्थायतस्या स्तीरेव्रतंमया ॥ ४७ ॥ सोपवासेनदत्तैकावारिधानीमनोरमा ॥ तत्कृत्वाहंगृहंप्राप्तःततःकालेनकेनचित् ॥४८॥ पञ्चत्वमहमासाद्यनास्तिक्यात्प्रेततां गतः ॥ अस्यामटव्यांघोरायांयथाह्यहिकुलंतथा ॥ ४९ ॥ श्रवणद्वादशीयोगेवारिधान्यर्पितामया ॥ सेयंमध्याह्नसमयेलभ्यतेचदिनेदिने ॥ ५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मस्वहारिणःसर्वेपापाःप्रेतत्वमागताः ॥ परदारगताःकेचित्स्वामिद्रोहरताश्चये॥५१॥भूतप्रेतजरूपेणतेनाताह्यत्रमानवाः ॥ देशेमरुस्थलेस्वस्मिन्म
मैतेमित्रतांगताः ॥ ५२ ॥ अक्षयोभगवान्विष्णुःपरमात्मासनातनः ॥ दीयतेयत्समुद्दिश्यह्यक्षयंतत्प्रकीर्तितम् ॥ ५३ ॥ अक्षयेनापिचान्नेनतृप्ताएते
पुनःपुनः ॥ प्रेतस्वभावंदौर्बल्यंनविमुञ्चन्तिकर्हिचित् ॥ ५४ ॥ पूजयित्वाहमन्नैस्त्वामतिथिंसमुपस्थितम् ॥ प्रेतभावाद्विनिर्मुक्तोयास्यामिपरमांग
तिम् ॥५५॥ मयाविहीनाःकिंत्वेतेवनेऽस्मिन्भृशदारुणे ॥ पीडामनुभविष्यन्तिदारुणांकर्मयोनिजाम् ॥५६॥ एतेषांतुमहाभागममानुग्रहकाम्यया ॥
प्रत्येकंनामगोत्राणिगृह्णीष्वलिखितानिच ॥५७॥ अस्तिकक्षागताचैवतवसम्पुटिकाशुभा ॥ हिमवन्तमथासाद्यतत्रत्वंलप्स्यसेनिधिम् ॥५८॥ गयाशी
र्षंततोगत्वाश्राद्धंकुरुमहामते ॥ इत्याज्ञाप्यसवैप्रेतोवणिजंचयथासुखम् ॥ ५९॥ विसर्जयामासतदासवैप्रायात्समुत्सुकः ॥ समासाद्यगृहंतत्रपश्चात्प्रा
याद्धिमालयम् ॥ ६० ॥ ततोदृष्टंनिधिंतत्रगृहीत्वाससमागतः ॥ षष्ठांशंप्रतिगृह्याथगयाशीर्षंततोऽभ्यगात् ॥ ६१ ॥ तत्रगत्वागयायांसश्राद्धंकृत्वा
महामतिः ॥ प्रेतानांतुयथोद्दिष्टंश्राद्धंसम्यग्विधानतः ॥ ६२ ॥ प्रत्येकंनामगोत्राणिगृहीत्वापिण्डमत्यजत् ॥ यस्ययस्यभवेच्छ्राद्धंसकरोतिदिनेव
णिक् ॥ ६३ ॥ ससतस्यतदास्वप्नेदर्शयत्यात्मनस्तनुम् ॥ ब्रवीतिचमहाभागप्रसादाद्भवतोऽनघ ॥ ६४ ॥ प्रेतभावंमयात्यक्तंप्राप्तोऽस्मिपरमांग
तिम् ॥ एवंकृत्वाविधानेनगयाशीर्षंमहामनाः ॥ ६५ ॥ पश्चाज्जगामस्वगृहंविष्णुंध्यायन्पुनःपुनः ॥ मासिभाद्रपदेप्राप्तेशुक्लपक्षेतथासुधीः ॥ ६६ ॥
श्रवणद्वादशीयोगेसंगमेसरितांपुनः ॥ जगामसमहाबुद्धिःसर्वोपस्करसंयुतः ॥ ६७॥ संगमेसरितांस्नात्वाद्वादशींतामुपोषितः ॥ तत्रस्नात्वापिदत्त्वातु
पूजयित्वाजनार्दनम् ॥ ६८ ॥अनन्तरंब्राह्मणस्यह्युपहारांस्तदाददौ ॥ शास्त्रोक्तेनापिविधिनाह्येकचित्तरतोऽपिसः ॥६९ ॥ निवर्त्तयामासतदावणिजो
बुद्धिमान्सवै ॥ वर्षेवर्षेतुसंप्राप्तेमासिभाद्रपदेतथा ॥७०॥ श्रवणद्वादशीयोगेसंगमेसरितांपुनः ॥ एवंवैकृतवान्सर्वंविष्णुमुद्दिश्यसत्वरम् ॥७१॥ कालेन
चातिमहतापञ्चत्वंसमुपागतः ॥ अवापपरमंस्थानंदुर्लभंसर्वमानवैः॥७२॥क्रीडतेऽद्यापिवैकुण्ठेविष्णुदूतैःससेवितः ॥ एवंकुरुत्वंभोब्रह्मञ्छ्रवणद्वादशी
व्रतम् ॥ ७३ ॥ सर्वसौभाग्यदंचैवइहलोकेपरत्रच ॥ सुबुद्धिजननंचैवसर्वपापहरंपरम् ॥७४॥ श्रवणद्वादशीयोगेयःकुर्याद्व्रतमीदृशम् ॥ व्रतस्यास्य
प्रभावेणविष्णुलोकंचगच्छति ॥ ७५॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०उमापतिनारदसंवादेश्रवणद्वादशीव्रतंनामैकोनसप्ततितमोऽध्यायः॥६९॥
नारदउवाच ॥ देवदेवजगन्नाथभुक्तिमुक्तिप्रदायक ॥ कथयस्वसुरश्रेष्ठयेनदुःखंनपश्यति॥१॥महेशउवाच ॥ शृणुवाडववक्ष्यामित्रिरात्रंसरितःशुभम्॥
येनचीर्णेननरकोमानवानांनजायते ॥ २ ॥ आयुरारोग्यमतुलंसौभाग्यंसुखसंपदम् ॥ सन्तानंचाक्षयंप्राप्यस्वर्गलोकेमहीयते ॥ ३ ॥ आषाढ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मासिसंप्राप्तेनदीपूरेणसंयुता ॥ सततंतोयसंस्थानेपुराणेसाचविश्रुता ॥ ४ ॥ वर्षतौघनसंपूर्णेकर्तव्यासाव्रतेनवा ॥ तोयौघैःपरिपूर्णासासकलैःस्यान्नदी यदा ॥ ५ ॥ व्रतंत्रिरात्रमुद्दिश्यतदाकार्यंप्रयत्नतः ॥ कृतंप्रतिपदाच्छन्दोदर्शनंतुदिनत्रयम् ॥ ६ ॥ यथाप्राप्तंनदीपूरंस्त्रीभिस्तीरजलस्यतु ॥ अथवात ज्जलंकुम्भेकृष्णेकृत्वागृहंनयेत् ॥ ७ ॥ प्रातःस्नायीतथानद्यांगत्वाह्यभ्यर्चयेत्सुधीः ॥ त्रिरात्रस्योपवासस्ययथाशक्तोभवेद्द्विज ॥ ८ ॥ अशक्तश्चैकभ क्तेनकुर्याच्चैवाप्युपोषणम् ॥ दीपंदद्यादविच्छिन्नंप्रातःसायंचपूजनम् ॥ ९ ॥ महानदींसमुच्चार्यनाम्नाचवरुणंतथा ॥ जलमूलेतुसंस्थाप्यकेशवंजलशा यिनम् ॥ १० ॥ नमोदेव्यैचगङ्गेतिगौतमीतिनदीतिच ॥ सिन्धोचैवचकावेरिसरस्वतिनमोऽस्तुते ॥ ११ ॥ तापीपयोष्णीपूर्णेतिमहेन्द्रसुखदेतिच॥ काश्यपीगण्डकीचैवसिन्धुनद्यैनमोनमः ॥ १२ ॥ वरुणायनमस्तेऽस्तुजलवासहरिप्रिय ॥ यादोनाथरसेशानकल्याणंदेहिमेसदा ॥ १३ ॥ गृहाणार्घं मयादत्तंदेहिमेवाञ्छितंफलम् ॥ कूष्माण्डैर्नालिकेरैश्चफलैःकालोद्भवैःशुभैः ॥ १४ ॥ नैवेद्यंघृतपक्वंतुसरितःसंप्रकल्पयेत् ॥ नमस्तेकेशवानन्तजलशा यिन्नमोऽस्तुते ॥ १५ ॥ परिपालयमामीशगोविन्दवरदोभव ॥ एवंपूजाप्रकर्तव्यायथाकालंक्रमेणतु ॥ १६ ॥ प्रार्थनाचोपचारैस्तुत्रिरात्रनियमः शुचिः ॥ पारणेनतुसंपूज्यजलपात्रंसमाचरेत् ॥ १७ ॥ फलपुष्पस्तथाविद्वन्स्त्रीभिर्बालैर्नरैरपि ॥ गीतवादित्रसहितैर्नदीकुम्भपरिप्लुतैः ॥ ॥ १८ ॥ जलेजलेसमास्थाप्यफलपुष्पैःप्रपूजयेत् ॥ धान्यैर्नानाविधैश्चैवजलप्रक्षेपणैरपि ॥ १९ ॥ हास्यैर्गीतैश्चनृत्यैश्चगृहमागत्ययत्नतः ॥ सप्तधान्यैःपूरितानिवंशपात्राणिपूजयेत् ॥ २० ॥ सप्तवापञ्चवात्रीणियथाशक्त्याप्रपूरयेत् ॥ त्रिरात्रंचनदीतोयंनपिबेद्धितमुद्धसन् ॥ २१ ॥ पारणेतुहविष्यान्नंहुतंवाह्यन्यथाभवेत् ॥ कृतेस्नानार्चनेचैवनोपयोज्यंनदीजलम् ॥ २२ ॥ शुच्यन्नानिचभोज्यानिदापयेत्त्रितयंतथा ॥ सप्तैव वंशपात्राणिसप्तैवमणिकास्तथा ॥ २३ ॥ हविष्यान्नंचभुञ्जीतकट्वम्लमधुवर्जितम् ॥ माषान्नंचशिलापिष्टंयत्नेनपरिवर्जयेत् ॥ २४ ॥ एवंवर्षत्रयं कुर्याद्व्रतमेतद्द्विजोत्तम ॥ वर्षत्रयेसमाप्यैवंतस्योद्यापनमाचरेत् ॥ २५ ॥ कृष्णांगांकृष्णवस्त्रांचतिलान्दद्याच्चनारद ॥ दम्पतीपरिदाप्यैवंसुवर्णंचापि शक्तितः ॥ २६ ॥ हैमंचवरुणंकुर्यान्नदीरूपेणनारद ॥ मण्डलंवारुणचवसर्वतोभद्रमेवच ॥ २७ ॥ कुम्भंतत्रप्रतिष्ठाप्यसोपहारंप्रतिष्ठितम् ॥ संपूज्य विधिवद्भक्त्याततोविप्रायदापयेत् ॥ २८ ॥ ब्राह्मणान्भोजयेच्छक्त्यायथावित्तानुसारतः ॥ गुरवेऽर्चितशीलायसर्वशास्त्ररतायच ॥ २९ ॥ एवं कृतेतदाविद्वन्परिपूर्णंव्रतंभवेत् ॥ सौभाग्यसुखसंपत्तिःसन्ततिश्चयाभवेत्॥३०॥ नदुर्गतिमवाप्नोतिचिरंस्वर्गेमहीयते ॥ देवपत्नीभिराचीर्णमृषिपत्नी

---

१ 'प्रति यद्रा'-इ० पा०। २'पूतम्' इ० पा०। ३'स्तीरे' इ० पा०। ४'स्नानम्' इ० पा०। ५'कृत्वा'इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भिरेवच ॥ ३१ ॥ नागसिद्धाङ्गनाभिश्चव्रतमेतत्पुराकृतम् ॥ नदीत्रिरात्रमतुलंकिमन्यच्छ्रोतुमिच्छसि ॥ सौभाग्यंसन्ततिंचैवनिश्चयंप्राप्नुते
सदा ॥ ३२ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०उत्तर०उमापतिनारदसंवादेनदीत्रिरात्रव्रतंनामसप्ततितमोऽध्यायः ॥ ७० ॥ ऋषयऊचुः ॥ सूतंजीव
चिरंसाधोत्वयातिकरुणात्मना ॥ संवादोह्यद्भुतःप्रोक्तोयश्चासीन्नारदेशयोः ॥ १ ॥ भगवन्नाममहिमानारदेनमहात्मना ॥ कीदृक्छ्रुतःसमा
ख्याहिश्रद्धयाशृण्वतांगुरो ॥ २ ॥ सूतउवाच ॥ शृणुध्वंमुनयःसर्वेंपुरावृत्तंवदाम्यहम् ॥ यस्मिञ्छ्रुतेद्विजश्रेष्ठाःकृष्णेभक्तिर्विवर्धते ॥ ३ ॥
एकदानारदोद्रष्टुंपितरंसुसमाहितः ॥ जगाममेरुशिखरंसिद्धचारणसेवितम् ॥ ४ ॥ तत्रदेवंसमासीनंब्रह्माणंजगतांपतिम् ॥ नमस्कृत्याब्रवीद्विप्रा
नारदोमुनिसत्तमः ॥ ५ ॥ नारदउवाच ॥ नाम्नोऽस्ययावतीशक्तिर्वद विश्वेश्वरप्रभो ॥ कीदृक्तुनाममहिमाअव्ययस्यमहात्मनः ॥
॥ ६ ॥ योऽयंविश्वेश्वरःसाक्षादयंनारायणोहरिः ॥ परमात्माहृषीकेशःसर्वजीवेषुसंगतः ॥ ७ ॥ मायाविमोहिताःसर्वेभगवन्तमधोक्षजम्
॥ नैवजानन्त्यसारेऽस्मिन्नरामूढाःकलौयुगे ॥ ८ ॥ ब्रह्मोवाच ॥ अस्मिन्कलौविशेषेणनामोच्चारणपूर्वकम् ॥ भक्तिःकार्यायथावत्ससतथात्वं
श्रोतुमर्हसि ॥ ९ ॥ दृष्टंपरेषांपापानामनुक्तानांविशोधनम् ॥ विष्णोर्जिष्णोःप्रयत्नेनस्मरणंपापनाशनम् ॥ १० ॥ मिथ्याज्ञात्वाततः
सर्वंहरेर्नामपठञ्जपन् ॥ सर्वपापविनिर्मुक्तोयातिविष्णोःपरंपदम् ॥ ११ ॥ येवदन्तिनरानित्यंहरिरित्यक्षरद्वयम् ॥ तस्योच्चारणमात्रेणविमुक्ता
स्तेनसंशयः ॥ १२ ॥ प्रायश्चित्तानिसर्वाणितपःकर्म्मात्मकानिवै ॥ यानितेषामशेषाणांकृष्णानुस्मरणंपरम् ॥ १३ ॥ प्रातर्निशितथासायंमध्याह्ना
दिषुसंस्मरन् ॥ नारायणमवाप्नोतिसद्यःपापक्षयंनरः ॥ १४ ॥ विष्णुसंस्मरणादेवसमस्तक्लेशसंक्षये ॥ मुक्तिंप्रयातिस्वर्गाप्तिस्तस्यविष्णोस्तुकीर्त्त
नात् ॥ १५ ॥ वासुदेवेमनोयस्यजपहोमार्चनादिषु ॥ तदक्षयंविजानीयाद्यावदिन्द्राश्चतुर्दश ॥ १६ ॥ क्वनाकपृष्ठगमनंपुनरावृत्तिलक्षणम् ॥
क्वजपोवासुदेवस्यमुक्तिबीजमनुत्तमम् ॥ १७ ॥ तन्मुखंपरमतीर्थंयत्रावर्त्तंवितन्वती ॥ नमोनारायणायेतिभातिप्राचीसरस्वती ॥ १८ ॥
तस्मादहर्निशंविष्णुस्मरणात्पुरुषोत्तमः ॥ नयातिनरकंपुत्रसंक्षीणकलिकल्मषः ॥ १९ ॥ सत्यंसत्यंपुनःसत्यंभाषितंममसुव्रत ॥ नामोच्चा
रणमात्रेणमहापापात्प्रमुच्यते ॥ २० ॥ रामरामेतिरामेतिरामेतिचपुनर्जपन् ॥ सचाण्डालोऽपिपूतात्माजायतेनात्रसंशयः ॥ २१ ॥ कुरु
क्षेत्रंतथाकाशीगयावैद्वारिकातथा ॥ सवतीर्थंकृतंतेननामोच्चारणमात्रतः ॥ २२ ॥ कृष्णकृष्णेतिकृष्णेतिइतिवायोजपन्पठन् ॥ इहलोकंपरि
त्यज्यमोदतेविष्णुसंनिधौ ॥ २३ ॥ नृसिंहेतिमुदाविप्रसततंप्रजपन्पठन् ॥ महापापात्प्रमुच्येतकलौभागवतोनरः ॥ २४ ॥ ध्यायन्कृते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यजन्यज्ञैस्त्रेतायांद्वापरेऽर्चयन् ॥ यदाप्नोतितदाप्नोतिकलौसंकीर्त्यकेशवम् ॥ २५ ॥ एतज्ज्ञात्वानिमग्नाश्चजगदात्मनिकेशवे ॥
सर्वपापपरिक्षीणायान्तिविष्णोःपरंपदम् ॥ २६ ॥ मत्स्यःकूर्मोवराहश्चनृसिंहोवामनस्तथा ॥ रामोरामश्चकृष्णश्चबुद्धःकल्कीततःस्मृतः ॥ २७ ॥
एतेदशावताराश्चपृथिव्यांपरिकीर्तिताः ॥ एतेषांनाममात्रेणब्रह्महाशुध्यतेसदा ॥ २८ ॥ प्रातःपठञ्जपन्ध्यायन्विष्णोर्नामयथातथा ॥ मुच्यते
नात्रसंदेहःसवैनारायणोभवेत् ॥ २९ ॥ सूतउवाच ॥ श्रुत्वावैनारदोह्येतद्विस्मयंपरमंगतः ॥ उवाचपितरंतत्रकिमुक्तंदेवसत्तम ॥ ३० ॥
देवाःसहस्रशःसन्तिरुद्राःसन्तिसहस्रशः ॥ पितरःसन्तिशतशोयक्षाश्चकिन्नरास्तथा ॥ ३१ ॥ भूताःप्रेताःपिशाचाश्चयेकेचिद्देवयोनयः ॥ तेषां
नाम्नांचमाहात्म्यंश्रुतंदृष्टंतथानच ॥ ३२ ॥ श्रीविष्णोर्नाममाहात्म्यंयादृशंचश्रुतंमया ॥ यस्यवैनाममात्रेणमुच्यतेनात्रसंशयः ॥ ३३ ॥ किंवै
तीर्थकृतेदेवपृथिव्यामटनेकृते ॥ यस्यवैनाममहिमाश्रुत्वामोक्षमवाप्नुयात् ॥ ३४ ॥ तन्मुखंतुमहत्तीर्थंतन्मुखंक्षेत्रमेवच ॥ यन्मुखेरामरामेति
तन्मुखंसर्वकामिकम् ॥ ३५ ॥ कानिवैतस्यनामानिकीर्तनीयानिसुव्रत ॥ तत्सर्वंचविशेषेणममब्रूहिपितामह ॥ ३६ ॥ ब्रह्मोवाच ॥
व्यापकोऽयंसदाविष्णुःपरमात्मासनातनः ॥ अनादिनिधनःश्रीमान्भूतात्माभूतभावनः ॥ ३७ ॥ यस्मादहंहिसंजाताःसोऽयंविष्णुःसदावतु ॥
सोऽयंकालस्यकालोवैसोऽयंममतुपूर्वजः ॥ ३८ ॥ अक्षयःपुण्डरीकाक्षोमतिमानव्ययःपुमान् ॥ शेषशायीसदाविष्णुःसहस्रशीर्षामहाप्रभुः ॥
॥ ३९ ॥ सर्वभूतमयःसाक्षाद्विश्वरूपोजनार्दनः ॥ कैटभारिरयंविष्णुर्धातादेवोजगत्पतिः ॥ ४० ॥ तस्याहंनामगोत्रंचनवेद्मिपुरुषर्षभ ॥
वेदवाप्यहंतातनाहंज्ञाताकदाचन ॥ ४१ ॥ अतस्त्वंगच्छदेवर्षेयत्रास्तिकिलविश्वराट् ॥ सचतत्त्वंमुनिश्रेष्ठसर्वंतेकथयिष्यति ॥ ४२ ॥ सएवपुरुषः
श्रीमान्कैलासाधिपतिःसदा ॥ सर्वेषांविष्णुभक्तानामयंश्रेष्ठःपरात्परः ॥ ४३ ॥ पञ्चवक्त्रोह्युमाकान्तःसर्वदुःखनिबर्हणः ॥ विश्वेश्वरोविश्वनाथः
सर्वदाभक्तवत्सलः ॥ ४४ ॥ तत्रगच्छसुरश्रेष्ठतत्सर्वंकथयिष्यति ॥पितुर्वचनमाकर्ण्यतत्रगन्तुंप्रचक्रमे ॥ ४५ ॥ विज्ञातुंनाममाहात्म्यंकैलासभवनं
प्रति ॥ यत्रविश्वेश्वरोदेवोनित्यंतिष्ठतिभूतिदः ॥ ४६ ॥ ददर्शनारदस्तत्रदेवंतंसुरपूजितम् ॥ कैलासशिखरासीनंदेवदेवंजगद्गुरुम् ॥ ४७ ॥ पञ्च
वक्त्रंदशभुजंत्रिनेत्रंशूलपाणिनम् ॥ कपालिनंसखट्वाङ्गंतीक्ष्णशूलासिधारिणम् ॥ ४८ ॥ पिनाकधारिणंभीमंवरदंवृषवाहनम् ॥ भस्माङ्गंव्याल
शोभाढ्यंशशाङ्ककृतशेखरम् ॥ ४९ ॥ नीलजीमूतसङ्काशंसूर्यकोटिसमप्रभम् ॥ क्रीडन्तंतत्रदेवेशंगणैश्चपरिवारितम् ॥ ५० ॥ तंददर्शसुर
श्रेष्ठंनारदश्चर्षिसत्तमः ॥ नमश्चक्रेतदातत्रसाष्टाङ्गंदण्डवत्पुनः ॥ ५१ ॥ तंदृष्ट्वातुमहादेवोविस्मयोत्फुल्ललोचनः ॥ वैष्णवानांपरःश्रेष्ठःप्राहवाडव

CC-0. In Public Domain. Digitization by eGangotri

सत्तमम् ॥ कस्मादिहसमायातोवदद्देवर्षिसत्तम ॥ ५२ ॥ नारदउवाच ॥ एकस्मिन्नेवकालेतुगतोऽहंब्रह्मणोऽन्तिकम् ॥ श्रुतंतत्रमयादेवविष्णो
र्माहात्म्यमुत्तमम् ॥ ५३ ॥ ब्रह्मणाकथितंतत्रममाग्रेदेवसत्तम ॥ नाम्नोऽस्ययावतीशक्तिःसाश्रुताब्रह्मणोमुखात् ॥ ५४ ॥ तत्रपृष्टंमयापूर्वंविष्णो
र्नामसहस्रकम् ॥ तदाहंब्रह्मणाचोक्तोनाहंजानामिनारद ॥ ५५ ॥ जानात्ययंमहारुद्रस्तत्सर्वंकथयिष्यति ॥ महाश्चर्यंतुसंप्राप्यह्यागतस्तव
सन्निधौ ॥ ५६ ॥ अस्मिन्कलियुगेघोरेऽल्पायुषश्चैवमानवाः ॥ विधर्मेषुरतानित्यंनामनिष्ठानवैपुनः ॥ ५७ ॥ पाखण्डिनस्तथाविप्राधर्मेषु
विरताःसदा ॥ सन्ध्याहीनाव्रतभ्रष्टादुष्टामलिनरूपिणः ॥ ५८ ॥ यथाविप्रास्तथाक्षत्रावैश्याश्चैवपुनःपुनः ॥ एवंशूद्रास्तथान्येचनवैभागवता
नराः ॥ ५९ ॥ शूद्राद्द्विजातिबाह्याश्चकलौविश्वेश्वरप्रभो ॥ धर्माधर्मौनजानन्तिहितंवाऽहितमेववा ॥ ६० ॥ एवंज्ञात्वाह्यहंस्वामिन्नागतःसंनिधौ
तव ॥ पुनश्चनाममाहात्म्यंश्रुतंब्रह्मणोमुखात् ॥ ६१ ॥ त्वंदेवःसर्वदेवानांत्वंनाथोममसर्वदा ॥ त्रिपुरारिश्चविश्वात्माधातात्वंचपुनःपुनः
॥ ६२ ॥ कथयस्वप्रसादेनविष्णोर्नामसहस्रकम् ॥ सौभाग्यजननंपुंसांपरंभक्तिकरंसदा ॥ ६३ ॥ ब्राह्मणानांब्रह्मदंचक्षत्रियाणांजयप्रदम् ॥
वैश्यानांधनदंनित्यंशूद्राणांसुखदायकम् ॥ ६४ ॥ तदहंश्रोतुमिच्छामित्वत्सकाशान्महेश्वर ॥ त्वंसमर्थोऽसिभक्तानांसर्वदाकेशवंप्रति ॥ ६५ ॥
कथयस्वप्रसादेनयदिगोप्यंनसुव्रत ॥ इदंपवित्रंपरमंसर्वतीर्थमयंसदा ॥ ६६ ॥ अतोवैश्रोतुमिच्छामिवदविश्वेश्वरप्रभो ॥ श्रुत्वानारदवाक्यानिवि
स्मयोत्फुल्ललोचनः ॥ रोमाञ्चितस्ततोजातोविष्णोर्नामानिसंस्मरन् ॥ ६७ ॥ ईश्वरउवाच ॥ एतद्गोप्यंपरंब्रह्मन्विष्णोर्नामसहस्रकम् ॥ एतच्छ्रुत्वा
नरोवत्सनलभेद्दुर्गतिंक्वचित् ॥ कदाचिच्चगतकालेपार्वतीमामुवाचह ॥ ६८ ॥ पार्वत्युवाच ॥ कैलासाधिपतेमह्यंकथयस्वयथातथम् ॥ त्वंकिं
जपसिदेवेशपरैश्वर्यसमन्वितः ॥ ६९ ॥ तदात्वंभस्मलिप्ताङ्गःकृत्तिवासाःसदाकथम् ॥ जटाधरःकथंजातोवदविश्वेश्वरप्रभो ॥ ७० ॥ त्वंदेवःसर्व
देवानांत्वंगुरुःसर्वकर्मणाम् ॥ त्वंपतिर्ममविश्वेशविश्वनाथजगत्प्रभो ॥ ७१ ॥ महादेवउवाच ॥ इतिपृष्टंममब्रह्मन्पार्वत्याचपुनःपुनः ॥ तदा
सर्वंमयाख्यातंतस्याश्चाग्रेविशेषतः ॥ ७२ ॥ शृणुनारदवक्ष्यामियदुक्तंपार्वतींप्रति ॥ येनप्रसन्नोभगवान्मुक्तिदातानसंशयः ॥ ७३ ॥ ममा
यंतुपितासाक्षाद्बन्धुश्चैवतुसर्वदा ॥ तस्याहंसर्वदाभक्तोह्ययंममपतिःसदा ॥ तदहंसंप्रवक्ष्यामिशृणुष्वगदतोमम ॥ ७४ ॥ सूतउवाच ॥ एवमुक्त्वा
नारदायकथयामासवैद्विजाः ॥ उमायैयत्पुराप्रोक्तंविष्णोर्नामसहस्रकम् ॥ ७५ ॥ महेशाच्चैवतत्प्राप्तंकैलासेनारदेनवै ॥ कदाचिद्दैवयोगेन
कैलासात्ससमागतः ॥ ७६ ॥ नैमिषारण्यसंज्ञंतुतीर्थंवैपरमाद्भुतम् ॥ तत्रस्थाऋषयःसर्वेदृष्ट्वातंऋषिसत्तमम् ॥ ७७ ॥ पूजांचक्रुर्विशेषेण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नारदायमहात्मने ॥ आगतंनारदंज्ञात्वाविस्मयोत्फुल्ललोचनाः ॥ ७८ ॥ पुष्पवृष्टिंप्रचक्रुस्तेवैष्णवाद्विजसत्तमाः ॥ पाद्यमर्घ्यंततःकृत्वा
कृत्वाचारार्तिकंततः ॥ ७९ ॥ निवेद्यफलमूलानिदण्डवत्पतिताभुवि ॥ ऊचुश्चकृतकृत्याःस्मदेशेऽस्मिन्महामुने ॥ ८० ॥ भवतोदर्शनं
जातंपवित्रंपापनाशनम् ॥ त्वत्प्रसादाच्चदेवर्षेपुराणानिश्रुतानिच ॥ ८१ ॥ ब्रह्मन्केनप्रकारेणसर्वपापक्षयोभवेत् ॥ विनादानेनतपसाविना
तीर्थतपोमखैः ॥ ८२ ॥ विनादानैर्विनाध्यानैर्विनाचेन्द्रियनिग्रहैः ॥ विनाशास्त्रसमूहैश्चकथंमुक्तिरवाप्यते ॥ ८३ ॥ नारदउवाच ॥ कैलास
शिखरासीनंदेवदेवंजगद्गुरुम् ॥ प्रणिपत्यमहादेवंपर्यपृच्छदुमाप्रियम् ॥ ८४ ॥ पार्वत्युवाच ॥ भगवंस्त्वंपरोदेवःसर्वज्ञःसर्वपूजितः ॥
सत्वमभ्यर्च्यतेदेवैरिन्द्रसूर्यादिकैरपि ॥ ८५ ॥ लभन्तेऽभिमतांसिद्धिंसर्वेऽभ्यर्च्यवरप्रदम् ॥ त्वंजन्ममृत्युरहितःस्वयम्भूःसर्वशक्तिमान् ॥८६ ॥
सदाध्यायसिकिंस्वामिन्दिग्वासामदनान्तकः ॥ तपश्चरसिकस्मात्त्वंजटिलोभस्मधूसरः ॥ ८७॥ किंवाजपसिदेवेशपरंकौतूहलंहिमे ॥ अनुग्राह्या
यदातेऽस्मितत्त्वंकथयसुव्रतम् ॥ ८८ ॥ महादेवउवाच ॥ नेदंकस्यापिकथितंगोपनीयमिदंमम ॥ किंतुवक्ष्यामितेभद्रेत्वंभक्तासिप्रियासिमे ॥
॥ ८९ ॥ पुरासत्ययुगेदेविविशुद्धमतयोऽखिलाः ॥ यजन्तिविष्णुमेवैकंज्ञात्वासर्वेश्वरेश्वरम् ॥ ९० ॥ प्रयान्तिपरमामृद्धिमैहिकामुष्मिकीं
प्रिये ॥ यांनप्राताःसुराःसर्वऋषयःक्लेशसंयुताः ॥ ९१ ॥ तेतांगतिंप्रपद्यन्तेयेनामकृतनिश्चयाः ॥ मन्मुखादपिसंश्रुत्यदेवाविष्णुबहिर्मुखाः॥९२॥
वेदैःपुराणैःसिद्धान्तैर्भिन्नैर्विभ्रान्तचेतसः॥ निश्चयंनाधिगच्छन्तिकिंतत्त्वंकिंपरंपदम्॥९३॥ तुलापुरुषदानाद्यैरश्वमेधादिभिर्मखैः॥वाराणसीप्रयागादि
तीर्थस्नानादिभिःप्रिये ॥ ९४ ॥ गयाश्राद्धादिभिःपित्र्यैर्वेदपाठादिभिर्जपैः ॥ तपोभिरुग्रैर्नियमैर्यमैर्भूतदयादिभिः ॥ ९५ ॥ गुरुशुश्रूषणैःसेव्यैर्धर्मैं
र्वर्णाश्रमान्वितैः ॥ ज्ञानध्यानादिभिःसम्यक्चरितैर्जन्मकोटिभिः ॥ ९६ ॥ नयान्तितत्परंश्रेयोविष्णुंसर्वेश्वरेश्वरम् ॥ सर्वभावैःसमाश्रित्यपुराण
पुरुषोत्तमम् ॥ ९७ ॥ अनन्यगतयोमर्त्याभोगिनोऽपिपरन्तपे ॥ ज्ञानवैराग्यरहिताब्रह्मचर्यादिवर्जिताः ॥ ९८ ॥ सर्वधर्मोज्झिताविष्णोर्नाममात्रै
कजल्पिनः ॥ सुखेनयांगतिंयान्तिनतांसर्वेऽपिधार्मिकाः ॥ ९९ ॥ स्मर्त्तव्यःसततंविष्णुर्विस्मर्तव्योनजातुचित् ॥ सर्वेविधिनिषेधाःस्युरेतस्यैव
विधिङ्कराः ॥ १०० ॥ किंतुब्रह्मादयोदेवाऋषयश्चनिरंहसः ॥ निर्भयंविष्णुनाम्नैवयथेष्टंपदमागताः ॥ १ ॥ अलब्ध्वाचात्मनःपूजांसम्यगारा
धितोहरिः ॥ मयास्मादपिचश्रेष्ठंवाञ्छिताहंकृतात्मना ॥ २ ॥ ततःसाक्षाज्जगन्नाथःप्रसन्नोभक्तवत्सलः ॥ अंशांशेनात्मनैवैतान्पूजयामासकेशवः
॥ ३ ॥ देवान्पितृन्द्विजान्हव्यकव्याद्यैःकरुणामयः ॥ ततःप्रभृतिपूज्यन्तेत्रैलोक्येसचराचरे ॥ ४ ॥ ब्रह्मादयःसुराःसर्वेप्रसादाच्छार्ङ्गधन्वनः ॥ मांचो

CC-0. In Public Domain. Digitization by eGangotri

वाचयथामत्तःपूज्यःश्रेष्ठोभविष्यसि ॥ ५ ॥ त्वामाराध्यतथाशम्भोग्रहीष्यामिवरंसदा ॥ द्वापरादौयुगेभूत्वाकलयामानुषादिषु ॥ ६ ॥ स्वागमैः
कल्पितैस्त्वंचजनान्मद्विमुखान्कुरु ॥ मांचगोपययेनस्यात्सृष्टिरेषोत्तरोत्तरा ॥ ७ ॥ एषमोहंसृजाम्याशुयोजनान्मोहयिष्यति ॥ त्वंचरुद्रम
हाबाहोमोहशास्त्राणिकारय ॥ ८ ॥ अतथ्यानिवितथ्यानिदर्शयस्वमहाभुज ॥ प्रकाशंकुरुचात्मानमप्रकाशंचमांकुरु ॥ ९ ॥ ततस्तंप्रणिपत्याह
मवोचंपरमेश्वरम् ॥ ब्रह्महत्यासहस्रस्यपापंशाम्येत्कथंचन ॥११० ॥ नपुनस्त्वदविज्ञानंकल्पकोटिशतैरपि ॥ तस्मान्मयाकृतास्पर्धापवित्रःस्यांकथं
हरे ॥ ११ ॥ तन्मेकथयगोविन्दप्रायश्चित्तंयदिच्छसि ॥ ततःप्रसन्नोभगवानवोचत्तत्त्वमात्मनः ॥ १२ ॥ येनाहमधिकस्तस्मादभवंनगनन्दिनि ॥
तमेवतपसानित्यंभजामिस्तौमिचिन्तये ॥ १३ ॥ परमोविष्णुरेवैकस्तज्ज्ञानंमुक्तिसाधनम् ॥ शास्त्राणांनिर्णयस्त्वेषतदन्यन्मोहनायच ॥ १४ ॥
ज्ञानंविनाचयामुक्तिःसाम्यंचममविष्णुना ॥ तीर्थादिमात्रतोज्ञानंममाधिक्यंचविष्णुतः ॥ १५ ॥ अभेदश्चास्मदादीनांमुक्तानांहरिणातथा ॥
इत्यादिसर्वंमोहायकथ्यतेसततिनान्यथा ॥ तेनाद्वितीयमहिमोजगत्पूज्योऽस्मिपार्वति ॥ १६ ॥ पार्वत्युवाच ॥ तन्मेकथयदेवेशयथाहमपिशङ्कर ॥
सर्वेश्वरीनिरुपमातवस्यांसदृशीप्रभो ॥१७॥ महादेवउवाच ॥ साधुसाधुत्वयापृष्टंविष्णोर्भगवतःप्रिये ॥ नाम्नांसहस्रंवक्ष्यामिमुख्यंत्रैलोक्यमुक्तिदम्
॥ १८ ॥ अस्यश्रीविष्णोर्नामसहस्रस्तोत्रस्यश्रीमहादेवऋषिरनुष्टुप्छन्दःपरमात्मादेवता ॥ ह्रींबीजंश्रींशक्तिःक्लींकीलकंचतुर्वर्गधर्मकामार्थमोक्षार्थे
जपेविनियोगः ॥ ॐवासुदेवायविद्महेमहाहंसायधीमहि ॥ तन्नोविष्णुःप्रचोदयात् ॥ अङ्गन्यासकरन्यासौविधिपूर्वंयदापठेत् ॥ तत्फलंकोटिगुणितं
भवत्येवनसंशयः ॥१९॥श्रीवासुदेवःपरंब्रह्मइतिहृदये ॥ मूलप्रकृतिरितिशिरसि॥महावराहइतिशिखायाम् ॥ सूर्यवंशध्वजइतिकवचम्॥ब्रह्मादिकाम्य
ललितजगदाश्चर्यशैशवइतिनेत्रयोः ॥ यथार्थखण्डिताशेषइत्यस्त्रम् ॥ नमोनारायणायेतिन्यासंसर्वत्रकारयेत् ॥ ओंनमोनारायणायपुरुषायमहात्मने ॥
विशुद्धसत्त्वधिष्ण्यायमहाहंसायधीमहि ॥ तन्नोदेवःप्रचोदयात् ॥ ॐह्रांह्रींह्रूंह्रैंह्रौंह्रः ॥ क्लींकृष्णायविद्महेह्रींरामायधीमहितन्नोदेवःप्रचोदयात् ॥
क्ष्रौंनृसिंहायविद्महेश्रींश्रीकण्ठायधीमहि ॥ तन्नोविष्णुःप्रचोदयात् ॥ ओंवासुदेवायविद्महेदेवकीसुतायधीमहि ॥ तन्नःकृष्णःप्रचोदयात् ॥ ॐह्रां
ह्रींह्रूंह्रैंह्रौंह्रः ॥ क्लींकृष्णायगोविन्दायगोपीजनवल्लभायनमःस्वाहा ॥ इतिमन्त्रंसमुच्चार्यजपेद्वाविष्णुमव्ययम् ॥ श्रीनिवासंजगन्नाथंतस्यस्तोत्रंपठे
त्सुधीः ॥ १२० ॥ ॐवासुदेवःपरंब्रह्मपरमात्मापरात्परः ॥ परंधामपरंज्योतिःपरंतत्त्वंपरंपदम् ॥ २१ ॥ परःशिवःपरोध्येयःपरंज्ञानंपरागतिः ॥
परमार्थःपरंश्रेयःपरानन्दःपरोदयः ॥ २२ ॥ परोव्यक्तात्परंव्योमपरमर्द्धिःपरेश्वरः ॥ निरामयोनिर्विकारोनिर्विकल्पोनिराश्रयः ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निरञ्जनोनिरांतङ्कोनिर्लेपोनिरवग्रहः ॥ निर्गुणोनिष्कलोऽनन्तोऽभयोचिन्त्योऽचलोऽश्चितः ॥२४॥ अतीन्द्रियोऽमितोऽपारोऽनीशोऽनीहोऽव्ययोऽ
क्षयः ॥ सर्वज्ञःसवगःसर्वःसर्वदःसर्वभावनः ॥ २५ ॥ सर्वशास्तासर्वसाक्षीपूज्यःसर्वस्यसर्वदृक् ॥ सर्वशक्तिःसर्वसारःसर्वात्मासर्वतोमुखः ॥ २६ ॥
सर्वावासःसर्वरूपःसर्वादिःसर्वदुःखहा ॥ सर्वार्थःसर्वतोभद्रःसर्वकारणकारणम् ॥ २७ ॥ सर्वातिशयितःसर्वाध्यक्षःसर्वसुरेश्वरः ॥ षड्विंशकोमहा
विष्णुर्महागुह्योमहाविभुः ॥ २८ ॥ नित्योदितोनित्ययुक्तोनित्यानन्दःसनातनः ॥ मायापतिर्योगपतिःकैवल्यपतिरात्मभूः ॥ २९ ॥ जन्ममृत्यु
जरातीतःकालातीतोभवातिगः ॥ पूर्णःसत्यःशुद्धबुद्धस्वरूपोनित्यचिन्मयः ॥ १३० ॥ योगप्रियोयोगगम्योभवबन्धैकमोचकः ॥ पुराणपुरुषः
प्रत्यक्चैतन्यःपुरुषात्तमः ॥ ३१ ॥ वेदान्तवेद्योदुर्ज्ञेयस्तापत्रयविवार्जितः ॥ ब्रह्मविद्याश्रयोनाद्यःस्वप्रकाशःस्वयंप्रभुः ॥ ३२ ॥ सर्वोपेयउदा
सीनःप्रणवःसर्वतःसमः ॥ सर्वानवद्योदुष्प्राप्यस्तुरीयस्तमसःपरः ॥ ३३ ॥ कूटस्थःसर्वसंश्लिष्टोवाङ्मनोगोचरातिगः ॥ सङ्कर्षणःसर्वहरःकालः
सर्वभयङ्करः ॥ ३४ ॥ अनुल्लङ्घ्यश्चित्रगतिर्महारुद्रोदुरासदः ॥ मूलप्रकृतिरानन्दःप्रद्युम्नोविश्वमोहनः ॥ ३५ ॥ महामायोविश्वबीजंपरशक्तिः
सुखैकभूः ॥ सर्वकाम्योऽनन्तलीलःसर्वभूतवशङ्करः ॥ ३६ ॥ अनिरुद्धःसर्वजीवोहृषीकेशोमेनःपतिः ॥ निरुपाधिप्रियोहंसोऽक्षरःसर्वनियोजकः॥
॥ ३७ ॥ ब्रह्मप्राणेश्वरःसर्वभूतभृद्देहनायकः ॥ क्षेत्रज्ञःप्रकृतिःस्वामीपुरुषोविश्वसूत्रधृत् ॥ ३८ ॥ अन्तर्यामीत्रिधामान्तःसाक्षीत्रिगुणईश्वरः॥
योगिगम्यःपद्मनाभःशेषशायीश्रियःपतिः ॥ ३९ ॥ श्रीसदोपास्यपादाब्जोनित्यश्रीःश्रीनिकेतनः ॥ नित्यंवक्षस्थलस्थश्रीःश्रीनिधिःश्रीधरो
हरिः ॥ १४० ॥ वश्यश्रीर्निश्चलःश्रीदोविष्णुक्षीराब्धिमन्दिरः ॥ कौस्तुभोद्भासितोरस्कोमाधवोजगदार्तिहा ॥ ४१ ॥ श्रीवत्सवक्षानिः
सीमकल्याणगुणभाजनम् ॥ पीताम्बरोजगन्नाथोजगत्त्राताजगत्पिता ॥ ४२ ॥ जगद्बन्धुर्जगत्स्रष्टाजगद्धाताजगन्निधिः ॥ जगदेक
स्फुरद्वीर्योऽनहंवादीजगन्मयः ॥ ४३ ॥ सर्वाश्चर्यमयःसर्वसिद्धार्थःसर्वरञ्जितः ॥ सवामोघोद्यमोब्रह्मरुद्राद्युत्कृष्टचेतनः ॥ ४४ ॥ शम्भोःपितामहो
ब्रह्मपिताशक्राद्यधीश्वरः ॥ सर्वदेवप्रियःसर्वदेवमूर्तिरनुत्तमः ॥ ४५ ॥ सर्वदेवैकशरणंसर्वदेवैकदैवतम् ॥ यज्ञभुग्यज्ञफलदोयज्ञेशोयज्ञभावनः ॥४६॥
यज्ञत्रातायज्ञपुमान्वनमालीद्विजप्रियः ॥ द्विजैकमानदोविप्रकुलदेवोऽसुरान्तकः ॥ ४७ ॥ सर्वदुष्टान्तकृत्सर्वसज्जनानन्यपालकः ॥ सप्तलोकैक
जठरःसप्तलोकैकमण्डनः ॥ ४८ ॥ सृष्टिस्थित्यन्तकृच्चक्रीशार्ङ्गधन्वागदाधरः ॥ शङ्खभृन्नन्दकीपद्मपाणिर्गरुडवाहनः ॥ ४९ ॥ अनिर्देश्यवपुःसर्व

१ निरालम्ब इ० पा० २ 'सर्वेश्वरेश्वरः' इ० पा० । ३ 'चैतन्यम्' इ० पा० । ४ 'ऽमृतः पतिः' इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

पूज्यस्त्रैलोक्यपावनः ॥ अनन्तकीर्तिर्निःसीमपौरुषःसर्वमङ्गलः ॥ १५० ॥ सूर्यकोटिप्रतीकाशोयमकोटिदुरासदः ॥ मयकोटिजगत्स्रष्टावायुकोटि
महाबलः ॥ ५१ ॥ कोटीन्दुजगदानन्दीशम्भुकोटिमहेश्वरः ॥ कन्दर्पकोटिलावण्योदुर्गाकोट्यरिमर्दनः ॥ ५२ ॥ समुद्रकोटिगम्भीरस्तीर्थकोटि
समाह्वयः ॥ कुवेरकोटिलक्ष्मीवाञ्छक्रकोटिविलासवान् ॥५३॥हिमवत्कोटिनिष्कम्पःकोटिब्रह्माण्डविग्रहः ॥ कोटचश्वमेधपापघ्नोयज्ञकोटिसमार्चनः
॥५४॥सुधाकोटिस्वास्थ्यहेतुःकामधुक्कोटिकामदः ॥ ब्रह्मविद्याकोटिरूपःशिपिविष्टःशुचिश्रवाः ॥ ५५ ॥विश्वम्भरस्तीर्थपादःपुण्यश्रवणकीर्तनः ॥
आदिदेवोजगज्जैत्रोमुकुन्दःकालनेमिहा ॥ ५६ ॥ वैकुण्ठोऽनन्तमाहात्म्योमहायोगेश्वरोत्सवः ॥ नित्यतृप्तोलसद्भावोनिःशङ्कोनरकान्तकः ॥ ५७ ॥
दीनानाथैकशरणंविश्वैकव्यसनापहः ॥ जगत्कृपाक्षमोनित्यंकृपालुःसज्जनाश्रयः ॥ ५८ ॥ योगेश्वरःसदोदीर्णोवृद्धिक्षयविवर्जितः ॥
अधोक्षजोविश्वरेताःप्रजापतिशताधिपः ॥ ५९ ॥ शक्रब्रह्मार्चितपदःशम्भुब्रह्मोर्ध्वधामगः ॥ सूर्यसोमेक्षणोविश्वभोक्तासर्वस्यपारगः ॥ १६० ॥
जगत्सेतुर्धर्मसेतुधरोविश्वधुरन्धरः ॥ निर्ममोऽखिललोकेशोनिःसङ्गोऽद्भुतभोगवान् ॥६१॥ वश्यमायोवश्यविश्वोविष्वक्सेनःसुरोत्तमः ॥ सर्वश्रेयः
पतिर्दिव्यानर्घ्यभूषणभूषितः ॥ ६२ ॥ सर्वलक्षणलक्षण्यःसर्वदैत्येन्द्रदर्पहा ॥ समस्तदेवसर्वस्वंसर्वदैवतनायकः ॥ ६३ ॥ समस्तदेवकवचंसर्व
देवशिरोमणिः ॥ समस्तदेवतादुर्गःप्रपन्नाशनिपञ्जरः ॥ ६४ ॥ समस्तभयहृन्नामाभगवान्विष्टरश्रवाः ॥ विभुःसर्वहितोदर्कोहतारिःस्वर्गतिप्रदः ॥
॥ ६५ ॥ सर्वदैवतजीवेशोब्राह्मणादिनियोजकः ॥ ब्रह्मशम्भुपरार्धायुर्ब्रह्मज्येष्ठःशिशुःस्वराट् ॥ ६६ ॥ विराड्भक्तपराधीनःस्तुत्यःस्तोत्रार्थ
साधकः ॥ परार्थकर्त्ताकृत्यज्ञःस्वार्थकृत्यसदोज्झितः ॥ ६७ ॥ सदानन्दःसदाभद्रःसदाक्षान्तःसदाशिवः ॥ सदाप्रियःसदातुष्टःसदापुष्टःसदा
र्चितः ॥ ६८ ॥ सदापूतःपावनाग्र्योवेदगुह्योवृषाकपिः ॥ सहस्रनामात्रियुगश्चतुर्मूर्तिश्चतुर्भुजः ॥ ६९ ॥ भूतभव्यभवन्नाथोमहापुरुषपूर्वजः ॥ नारा
यणोमुञ्जकेशःसर्वयोगविनिःसृतः ॥ १७० ॥ वेदसारोयज्ञसारःसामसारस्तपोनिधिः ॥ साध्यःश्रेष्ठःपुराणर्षिर्निष्ठाशान्तिःपरायणम् ॥ ७१ ॥
शिवत्रिशूलविध्वंसीश्रीकण्ठैकवरप्रदः ॥ नरःकृष्णोहरिर्धर्मनन्दनोधर्मजीवनः ॥ ७२ ॥ आदिकर्त्तासर्वसत्यःसर्वस्त्रीरत्नदर्पहा ॥ त्रिकालजित
कन्दर्पउर्वशीसृण्मुनीश्वरः ॥ ७३ ॥ आद्यःकविर्हयग्रीवःसर्ववागीश्वरेश्वरः ॥ सर्वदेवमयोब्रह्मागुरुर्वागीश्वरीपतिः ॥ ७४ ॥ अनन्तविद्याप्रभवो
मूलाविद्याविनाशकः ॥ सर्वज्ञदोजगज्जाडयनाशकोमधुसूदनः ॥ ७५ ॥ अनेकमन्त्रकोटीशःशब्दब्रह्मैकपारगः ॥ आदिविद्वान्वेदकर्त्ता

१ 'शङ्करः' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वेदात्माश्रुतिसागरः ॥ ७६ ॥ ब्रह्मार्थवेदहरणःसर्वविज्ञानजन्मभूः ॥ विद्याराजोज्ञानमूर्त्तिर्ज्ञानसिन्धुरखण्डधीः ॥ ७७ ॥ मत्स्यदेवोमहा
शृङ्गोजगद्बीजवहित्रदृक् ॥ लीलाव्याप्ताखिलाम्भोधिश्चतुर्वेदप्रवर्त्तकः ॥ ७८ ॥ आदिकूर्मोऽखिलाधारस्तृणीकृतजगद्भरः ॥ अमरीकृतदेवौघः
पीयूषोत्पत्तिकारणम् ॥ ७९ ॥ आत्माधारोधराधारोयज्ञाङ्गोधरणीधरः ॥ हिरण्याक्षहरःपृथ्वीपतिःश्राद्धादिकल्पकः ॥ १८० ॥ समस्त
पितृभीतिघ्नःसमस्तपितृजीवनम् ॥ हव्यकव्यैकभुग्हव्यकव्यैकफलदायकः ॥ ८१ ॥ रोमान्तर्लीनजलधिःक्षोभिताशेषसागरः ॥ महावरा
होयज्ञघ्नध्वंसकोयाज्ञिकाश्रयः ॥ ८२ ॥ श्रीनृसिंहोदिव्यसिंहःसर्वानिष्टार्थदुःखहा ॥ एकवीरोऽद्भुतबलोयन्त्रमन्त्रैकभञ्जनः ॥ ८३ ॥ ब्रह्मा
दिदुःसहज्योतिर्युगान्ताग्न्यतिभीषणः ॥ कोटिवज्राधिकनखोजगद्दुष्प्रेक्ष्यमूर्तिधृत् ॥ ८४ ॥ मातृचक्रप्रमथनोमहामातृगणेश्वरः ॥ अचिन्त्या
मोघवीर्याढ्यःसमस्तासुरघस्मरः ॥ ८५ ॥ हिरण्यकशिपुच्छेदीकालःसङ्कर्षणीपतिः ॥ कृतान्तवाहनस्सद्यस्समस्तभयनाशनः ॥ ८६ ॥
सर्वविघ्नान्तकःसर्वसिद्धिदःसर्वपूरकः ॥ समस्तपातकध्वंसीसिद्धमन्त्राधिकाह्वयः॥८७॥ भैरवेशोहरार्तिघ्नःकालकोटिदुरासदः ॥ दैत्यगर्भस्रविनामा
स्फुटद्ब्रह्माण्डगर्जितः ॥८८॥ स्मृतमात्राखिलत्राताऽद्भुतरूपोमहाहरिः ॥ ब्रह्मचर्यशिरःपिण्डीदिक्पालोऽर्धाङ्गभूषणः ॥८९ ॥ द्वादशार्कशिरोदामारुद्र
शीर्षैकनूपुरः ॥ योगिनीग्रस्तगिरिजात्राताभैरवतर्जकः ॥ १९० ॥ वीरचक्रेश्वरोऽत्युग्रोयमारिःकालशम्बरः ॥ क्रोधेश्वरोरुद्रचण्डीपरिवारादिदुष्टभुक्
॥९१॥ सर्वाक्षोभ्योमृत्युमृत्युःकालमृत्युनिवर्त्तकः ॥ असाध्यसर्वरोगघ्नःसर्वदुर्ग्रहसौम्यकृत् ॥९२॥ गणेशकोटिदर्पघ्नोदुःसहाशेषगोत्रहा ॥ देवदानवदु
र्दर्शोजगद्भयदभीषणः ॥९३॥ समस्तदुर्गतित्राताजगद्भक्षकभक्षकः ॥ उग्रेशोऽम्बरमार्जारःकालमूषकभक्षकः॥९४॥अनन्तायुधदोर्दण्डीनृसिंहोवीरभद्र
जित्॥ योगिनीचक्रगुह्येशःशक्रारिपशुमांसभुक् ॥९५॥रुद्रोनारायणोमेषरूपशङ्करवाहनः ॥मेषरूपशिवत्राताdुष्टशक्तिसहस्रभुक् ॥९६॥तुलसीवल्लभो
वीरोवामाचारोऽखिलेष्टदः ॥ महाशिवःशिवारूढोभैरवैककपालधृत् ॥९७॥ किल्लीचक्रेश्वरःशक्रदिव्यमोहनरूपदः ॥ गौरीसौभाग्यदोमायानिधिर्मा
याभयापहः॥ ९८ ॥ब्रह्मतेजोमयोब्रह्मश्रीमयश्चत्रयीमयः ॥ सुब्रह्मण्योबलिध्वंसीवामनोदितिदुःखहा ॥ ९९ ॥ उपेन्द्रोनृपतिर्विष्णुःकश्यपान्वयमण्ड
नः ॥ बलिस्वराज्यदःसर्वदेवविप्रान्नदोऽच्युतः ॥ २०० ॥ उरुक्रमस्तीर्थपादस्त्रिपदस्थस्त्रिविक्रमः ॥ व्योमपादःस्वपादाम्भःपवित्रितजग
त्त्रयः ॥ १॥ ब्रह्मेशाद्यभिवन्द्याङ्घ्रिर्द्रुतधर्माङ्घ्रिधावनः ॥ अचिन्त्याद्भुतविस्तारोविश्ववृक्षोमहाबलः ॥२॥ राहुमूर्धापराङ्गच्छिद्भृगुपत्नीशिरोहरः ॥

१ 'हिल्ली चक्रेश्वरः' इ० पा०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पापत्रस्तःसदापुण्योदैत्याशानित्यखण्डनः ॥ ३ ॥ पूरिताखिलदेवाशोविश्वार्थैकावतारकृत् ॥ स्वमायानित्यगुप्तात्माभक्तचिन्तामणिःसदा ॥ ४ ॥
वरदःकार्त्तवीर्यादिराजराज्यप्रदोऽनघः ॥ विश्वश्लाघ्यामिताचारोदत्तात्रेयोमुनीश्वरः ॥५ ॥ पराशक्तिसदाश्लिष्टोयोगानन्दःसदोन्मदः ॥ समस्तेन्द्रा
रितेजोहृत्परमामृतपद्मपः ॥ ६ ॥ अनसूयागर्भरत्नंभोगमोक्षसुखप्रदः ॥ जमदग्निकुलादित्योरेणुकाद्भुतशक्तिकृत् ॥ ७ ॥ मातृहत्यादिनिर्लेपःस्कन्द
जिद्विप्रराज्यदः ॥ सर्वक्षत्रान्तकृद्वीरदर्पहाकार्त्तवीर्यजित् ॥ ८ ॥ सप्तद्वीपवतीदाताशिवार्चकयशःप्रदः ॥ भीमःपरशुरामश्चशिवाचार्यैकवि
श्वभुक् ॥ ९ ॥ शिवाखिलज्ञानकोशोभीष्माचार्योऽग्निदैवतः ॥ द्रोणाचार्यगुरुर्विश्वजैत्रधन्वाकृतान्तजित् ॥ २१० ॥ अद्वितीयतपोमूर्त्तिर्ब्रह्मचर्यैक
दक्षिणः ॥ मनुःश्रेष्ठःसतांसेतुर्महीयान्वृषभोविराट् ॥ ११ ॥ आदिराजःक्षितिपितासर्वरत्नैकदोहकृत् ॥ पृथुर्जन्माद्येकदक्षोगीःश्रीकीर्तिस्वयं
वृतः ॥ १२ ॥ जगद्वृत्तिप्रदश्चक्रवर्त्तिश्रेष्ठोऽद्वयास्त्रधृत् ॥ सनकादिमुनिप्राप्यभगवद्भक्तिवर्धनः ॥ १३ ॥ वर्णाश्रमादिधर्माणांकर्त्तावक्ताप्रवर्त्तकः ॥
सूर्यवंशध्वजोरामोराघवःसद्गुणार्णवः ॥ १४ ॥ काकुत्स्थोवीरराड्राजाराजधर्मधुरन्धरः ॥ नित्यस्वस्थाश्रयःसर्वभद्रग्राहीशुभैकदृक् ॥ १५ ॥ नररत्नं
रत्नगर्भोधर्माध्यक्षोमहानिधिः ॥ सर्वश्रेष्ठाश्रयःसर्वशास्त्रार्थग्रामवीर्यवान् ॥ १६ ॥ जगद्वशोदाशरथिःसर्वरत्नाश्रयोनृपः ॥ समस्तधर्मसूःसर्व
धर्मद्रष्टाऽखिलाघहा ॥१७॥ अतीन्द्रोज्ञानविज्ञानपारदश्चक्षमाम्बुधिः ॥ सर्वप्रकृष्टशिष्टेष्टोहर्षशोकाद्यनाकुलः ॥१८ ॥ पित्राज्ञात्यक्तसाम्राज्यःसम्प
न्नोदयनिर्भयः ॥ गुहादेशार्पितैश्वर्यःशिवस्पर्धाजटाधरः ॥ १९ ॥ चित्रकूटाप्तरत्नाद्रिर्जगदीशोवनेचरः ॥ यथेष्टामोघसर्वास्त्रोदेवेन्द्रतनयाक्षिहा ॥
॥ २२० ॥ ब्रह्मेन्द्रादिनतैषीकोमारीचघ्नोविराधहा ॥ ब्रह्मशापहताशेषदण्डकारण्यपावनः ॥ २१ ॥ चतुर्दशसहस्रोग्ररक्षोघ्नैकशरैकधृत् ॥ खरारिस्त्रि
शिरोहन्तादूषणघ्नोजनार्दनः ॥ २२ ॥ जटायुषोऽग्निगतिदोऽगस्त्यसर्वस्वमन्त्रराट् ॥ लीलाधनुःकोट्यपास्तदुन्दुभ्यस्थिमहाचयः ॥ २३ ॥सप्त
तालव्यधाकृष्टध्वस्तपातालदानवः ॥ सुग्रीवराज्यदोहीनमनसैवाऽभयप्रदः ॥ २४ ॥ हनुमद्रुद्रमुख्येशसमस्तकपिदेहभृत् ॥ सनागदैत्यबाणैक
व्याकुलीकृतसागरः ॥ २५ ॥ सम्लेच्छकोटिबाणैकशुष्कनिर्दग्धसागरः ॥ समुद्राद्भुतपूर्वैकबद्धसेतुर्यशोनिधिः ॥ २६ ॥ असाध्यसाधकोलङ्का
समूलोत्कर्षदक्षिणः ॥ वरदृप्तजगच्छल्यपौलस्त्यकुलकृन्तनः ॥ २७ ॥ रावणिघ्नःप्रहस्तच्छित्कुम्भकर्णभिदुग्रहा ॥ रावणैकशिरश्छेत्तानिःशङ्केन्द्रै
कराज्यदः ॥ २८ ॥ स्वर्गास्वर्गत्वविच्छेदीदेवेन्द्रानिन्द्रताहरः ॥ रक्षोदेवत्वहृद्धर्माधर्मत्वघ्नःपुरुष्टुतः ॥ २९ ॥ नतिमात्रदशास्यारिर्दत्तराज्यविभी

१ 'वीरराडार्यराजा' इ० पा० । २ 'खिलार्तिहा' इ० पा० । ३ 'पारद्रष्टा' इति पाठोऽन्येषु पुस्तकेषु ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षणः ॥ सुधावृष्टिमृताशेषस्वसैन्योज्जीवनैककृत् ॥ २३० ॥ देवब्राह्मणनामैकधातासर्वामरार्चितः ॥ ब्रह्मसूर्येन्द्ररुद्रादिवृन्दार्पितसतीप्रियः ॥ ३१ ॥
अयोध्याखिलराजाग्र्यःसर्वभूतमनोहरः ॥ स्वामितुल्यकृपादण्डोहीनोत्कृष्टैकसत्प्रियः ॥ ३२ ॥ स्वपक्षादिन्यायदर्शीहीनार्थाधिकसाधकः ॥
व्याधव्याजानुचितकृत्तारकोऽखिलतुल्यकृत् ॥ ३३ ॥ पार्वत्याधिक्यमुक्तात्माप्रियात्यक्तःस्मरारिजित् ॥ साक्षात्कुशलवच्छद्मेन्द्रादितातोऽपरा
जितः ॥ ३४ ॥ कोसलेन्द्रोवीरबाहुःसत्यार्थत्यक्तसोदरः ॥ शरसंधाननिर्धूतधरणीमण्डलोदयः ॥ ३५ ॥ ब्रह्मादिकाम्यसांनिध्यसनाथीकृतदैवतः ॥
ब्रह्मलोकाप्तचाण्डालाद्यशेषप्राणिसार्थकः ॥ ३६ ॥ स्वनीतगर्दभाश्वादिश्चिरायोध्यावनैककृत् ॥ रामद्वितीयःसौमित्रिर्लक्ष्मणःप्रहतेन्द्रजित् ॥ ३७ ॥
विष्णुभक्ताप्तरामाङ्घ्रिपादुकाराज्यनिर्वृतः ॥ भरतोऽसह्यगन्धर्वकोटिघ्नोलवणान्तकः ॥ ३८ ॥ शत्रुघ्नोवैद्यराजायुर्वेदगर्भौषधीपतिः ॥ नित्यामृतक
रोधन्वन्तरिर्यज्ञोजगद्धरः ॥३९॥ सूर्यारिघ्नःसुराजीवोदक्षिणेशोद्विजप्रियः ॥ छिन्नमूर्धापदेशार्कःशेषाङ्गस्थापितामरः ॥ २४० ॥ विश्वार्थाशेषकृद्राहु
शिरश्छेत्ताक्षताकृतिः ॥ वाजपेयादिनामाग्निर्वेदधर्मपरायणः ॥ ४१ ॥ श्वेतद्वीपपतिःसाङ्ख्यप्रणेतासर्वसिद्धिराट् ॥ विश्वप्रकाशितज्ञानयोगमोहतमि
स्रहा ॥४२॥ देवहूत्यात्मजःसिद्धःकपिलःकर्दमात्मजः ॥ योगस्वामीध्यानभङ्गसगरात्मजभस्मकृत्॥४३॥धर्मोवृषेन्द्रःसुरभीपतिःशुद्धात्मभावितः॥
शम्भुस्त्रिपुरदाहैकस्थैर्यविश्वरथोद्वहः ॥ ४४ ॥ भक्तशम्भुजितोदैत्यामृतवापीसमस्तपः ॥ महाप्रलयविश्वैकद्वितीयाखिलनागराट् ॥ ४५ ॥
शेषदेवःसहस्राक्षःसहस्रास्यशिरोभुजः ॥ फणामणिकणाकारयोजिताब्ध्यम्बुदक्षितिः ॥४६॥ कालाग्निरुद्रजनकोमुसलास्त्रोहलायुधः॥नीलाम्बरोवारु
णीशोमनोवाक्कायदोषहा ॥ ४७ ॥ असन्तोषोदृष्टिमात्रपातितैकदशाननः ॥ बलिसंयमनोघोरोरौहिणेयःप्रलम्बहा ॥ ४७ ॥ मुष्टिकघ्नोद्विविदहा
कालिन्दीकर्षणोबलः॥रेवतीरमणःपूर्वभक्तिखेदाच्युताग्रजः ॥४९॥ देवकीवसुदेवाह्वकश्यपादितिनन्दनः ॥ वार्ष्णेयःसात्वतांश्रेष्ठःशौरिर्यदुकुलोद्वहः
॥ २५० ॥ नराकृतिःपरंब्रह्मसव्यसाचीवरप्रदः ॥ ब्रह्मादिकाम्यलालित्यजगदाश्चर्यशैशवः ॥ ५१ ॥ पूतनाघ्नःशकटभिद्यमलार्जुनभञ्जनः ॥ वातासु
रारिःकेशिघ्नोधेनुकारिर्गवीश्वरः ॥५२॥ दामोदरोगोपदेवोयशोदानन्ददायकः ॥ कालीयमर्दनःसर्वगोपगोपीजनप्रियः ॥५३॥ लीलागोवर्धनधरोगो
विन्दोगोकुलोत्सवः ॥ अरिष्टमथनःकामोन्मत्तगोपीविमुक्तिदः ॥ ५४ ॥ सद्यःकुवलयापीडघातीचाणूरमर्दनः ॥ कंसारिरुग्रसेनादिराज्यव्यापारिता
परः ॥ ५५ ॥ सुधर्माङ्कितभूलोकोजरासन्धबलान्तकः ॥ त्यक्तभग्नजरासन्धोभीमसेनयशःप्रदः ॥ ५६ ॥ सान्दीपनमृतापत्यदाताकालान्तकादि

१'वध' इ० पा० । २'पार्वत्यधिक' इ० पा० । ३'च्छाम्बुद' इ० पा० । ४ 'ऽमरः' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जित् ॥ समस्तनारकित्राता सर्वभूपतिकोटिजित् ॥ ५७ ॥ रुक्मिणीरमणोरुक्मिशासनोनरकान्तकः ॥ समस्तसुन्दरीकान्तोमुरारिर्गरुडध्वजः ॥
॥ ५८ ॥ एकाकीजितरुद्रार्कमरुदाद्यखिलेश्वरः ॥ देवेन्द्रदर्पहाकल्पद्रुमालङ्कृतभूतलः ॥ ५९ ॥ बाणबाहुसहस्रच्छिन्नद्याद्यादिगणकोटिजित् ॥ लीला
जितमहादेवोमहादेवैकपूजितः ॥ २६० ॥ इन्द्रार्थार्जुननिर्भङ्गजयदःपाण्डवैकधृत् ॥ काशिराजशिरश्छेत्तारुद्रशक्त्यैकमर्दनः ॥ ६१ ॥ विश्वेश्वर
प्रसादाक्षःकाशीराजसुतार्दनः ॥ शम्भुप्रतिज्ञाविध्वंसीकाशीनिर्दग्धनायकः ॥ ६२ ॥ काशीशगणकोटिघ्नोलोकशिक्षाद्विजार्चकः ॥ शिवतीव्रतपो
वश्यःपुराशिववरप्रदः ॥ ६३ ॥ शङ्करैकप्रतिष्ठाधृत्स्वांशशङ्करपूजकः ॥ शिवकन्याव्रतपतिःकृष्णरूपशिवारिहा ॥ ६४ ॥ महालक्ष्मीवपुर्गौरीत्राता
वैदलवृत्रहा ॥ स्वधाममुचुकुन्दैकनिष्कालयवनेष्टकृत् ॥ ६५ ॥ यमुनापतिरानीतपरिलीनद्विजात्मजः ॥ श्रीदामरङ्कभक्तार्थभूम्यानीतेन्द्रवैभवः ॥
॥ ६६ ॥ दुर्वृत्तशिशुपालैकमुक्तिदोद्वारकेश्वरः ॥ आचाण्डालादिकप्राप्यद्वारकानिधिकोटिकृत् ॥ ६७ ॥ अक्रूरोद्धवमुख्यैकभक्तस्वच्छन्दमुक्तिदः॥
सबालस्त्रीजलक्रीडामृतवापीकृतार्णवः ॥ ६८ ॥ ब्रह्मास्त्रदग्धगर्भस्थपरीक्षिज्जीवनैककृत् ॥ परिलीनद्विजसुतानेताऽर्जुनमदापहः ॥ ६९ ॥ गूढमुद्रा
कृतिग्रस्तभीष्माद्यखिलकौरवः ॥ यथार्थखण्डिताशेषदिव्यास्त्रपार्थमोहहृत् ॥ २७० ॥ गर्भशापच्छलध्वस्तयादवोर्वीभयापहः ॥ जराव्याधारि
गतिदःस्मृतिमात्राखिलेष्टदः ॥ ७१ ॥ कामदेवोरतिपतिर्मन्मथःशम्बरान्तकः ॥ अनङ्गोजितगौरीशोरतिकान्तःसदेप्सतः ॥ ७२ ॥ पुष्पेषुर्विश्व
विजयीस्मरःकामेश्वरीप्रियः ॥ उषापतिर्विश्वकेतुर्विश्वहृत्तोऽधिपूरुषः ॥ ७३ ॥ चतुरात्माचतुर्व्यूहश्चतुर्युगविधायकः ॥ चतुर्वेदैकविश्वात्मासर्वोत्कृष्टां
शकोटिसूः ॥ ७४ ॥ आश्रमात्मापुराणर्षिर्व्यासःशाखासहस्रकृत् ॥ महाभारतनिर्माताकवीन्द्रोबादरायणः ॥ ७५ ॥ कृष्णद्वैपायनःसर्वपुरुषार्थैक
बोधकः ॥ वेदान्तकर्ताब्रह्मैकव्यञ्जकःपुरुवंशकृत् ॥ ७६ ॥ बुद्धोध्यानजिताशेषदेवदेवोजगत्प्रियः ॥ निरायुधोजगज्जैत्रःश्रीधरोदुष्टमोहनः ॥ ७७ ॥
दैत्यवेदबहिष्कर्त्तावेदार्थश्रुतिगोपकः ॥ शौद्धोदनिर्दृष्टदिष्टःसुखदःसदसस्पतिः ॥ ७८ ॥ यथायोग्याखिलकृपःसर्वशून्योऽखिलेष्टदः ॥ चतुष्कोटि
पृथक्तत्त्वंप्रज्ञापारमितेश्वरः ॥ ७९ ॥ पाखण्डवेदमार्गेशःपाखण्डश्रुतिगोपकः ॥ कल्कीविष्णुयशःपुत्रःकलिकालविलोपकः ॥२८० ॥ समस्तम्लेच्छ
दुष्टघ्नःसर्वशिष्टद्विजातिकृत् ॥ सत्यप्रवर्त्तकोदेवद्विजदीर्घक्षुधापहः ॥ ८१ ॥ अश्ववारादिरेवन्तःपृथ्वीदुर्गतिनाशनः ॥ सद्यःक्ष्माऽनन्तलक्ष्मीकृन्नष्टनिः
शेषधर्मधृत् ॥८२ ॥ अनन्तस्वर्णयोगैकहेमपूर्णाखिलद्विजः ॥ असाध्यैकजगच्छास्ताविश्वबन्द्योजयध्वजः ॥८३॥ आत्मतत्त्वाधिपःकर्तृश्रेष्ठोविधि

१ 'दृष्टदिष्ट इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रुमापतिः ॥ भर्तृश्रेष्ठःप्रजेशाग्र्योमरीचिर्जनकाग्रणीः ॥८४॥ कश्यपोदेवराजेन्द्रःप्रह्लादोदैत्यराट्छशी ॥ नक्षत्रेशोरविस्तेजःश्रेष्ठःशुक्रःकवीश्वरः॥८५॥
महर्षिराड्भृगुर्विष्णुरादित्येशोबलिःस्वराट् ॥ वायुर्वह्निःशुचिःश्रेष्ठःशङ्करोरुद्रराड्गुरुः ॥ ८६ ॥ विद्वत्तमश्चित्ररथोगन्धर्वाग्र्योऽक्षरोत्तमः ॥ वर्णा
दिरग्र्यस्त्रीगौरीशक्त्यग्र्याश्रीश्चनारदः ॥ ८७ ॥ देवर्षिराट्पाण्डवाग्र्योऽर्जुनोवादःप्रवादराट् ॥ पवनःपवनेशानोवरुणोयादसांपतिः ॥८८॥ गङ्गाती
र्थोत्तमोद्यूतंछलकाग्र्यंवरौषधम् ॥ अन्नंसुदर्शनोऽस्त्राग्र्यंवज्रंप्रहरणोत्तमम् ॥ ८९ ॥ उच्चैःश्रवावाजिराजऐरावतइभेश्वरः ॥ अरुन्धत्येकपत्नीशोह्य
श्वत्थोऽशेषवृक्षराट् ॥२९०॥ अध्यात्मविद्याविद्याग्र्यःप्रणवश्छन्दसांवरः ॥ मेरुर्गिरिपतिर्मार्गोमासाग्र्यःकालसत्तमः ॥९१॥ दिनाद्यात्मापूर्वसिद्धः
कपिलःसामवेदराट् ॥ तार्क्ष्यःखगेन्द्रऋत्वग्र्योवसन्तःकल्पपादपः ॥ ९२ ॥ दातृश्रेष्ठःकामधेनुरार्तिघ्नाग्र्यःसुहृत्तमः ॥ चिन्तामणिर्गुरुश्रेष्ठोमाता
हिततमःपिता ॥९३॥ सिंहोमृगेन्द्रोनागेन्द्रोवासुकिर्नृवरोनृपः॥वर्णेशोब्राह्मणश्चेतःकरणाग्र्यंनमोनमः ॥९४॥ इत्येतद्वासुदेवस्यविष्णोर्नामसहस्रकम्॥
सर्वापराधशमनंपरंभक्तिविवर्धनम् ॥ ९५ ॥ अक्षयंब्रह्मलोकादिसर्वस्वर्गैकसाधनम् ॥ विष्णुलोकैकसोपानंसर्वदुःखविनाशनम् ॥ ९६ ॥ समस्त
सुखदंसद्यःपरनिर्वाणदायकम् ॥ कामक्रोधादिनिःशेषमनोमलविशोधनम् ॥ ९७ ॥ शान्तिदंपावनंनृणांमहापातकिनामपि ॥ सर्वेषांप्राणिना
माशुसर्वाभीष्टफलप्रदम् ॥ ९८ ॥ समस्तविघ्नशमनंसर्वारिष्टविनाशनम् ॥ घोरदुःखप्रशमनंतीव्रदारिद्र्यनाशनम् ॥ ९९ ॥ ऋणत्रयापहं
गुह्यंधनधान्ययशस्करम् ॥ सर्वैश्वर्यप्रदंसर्वसिद्धिदंसर्वधर्मदम् ॥ ३०० ॥ तीर्थयज्ञतपोदानव्रतकोटिफलप्रदम् ॥ जगज्जाड्यप्रशमनं
सर्वविद्याप्रवर्त्तकम् ॥ १ ॥ राज्यदंभ्रष्टराज्यानांरोगिणांसर्वरोगहृत् ॥ वन्ध्यानांसुतदंचायुःक्षीणानांजीवितप्रदम् ॥ २ ॥ भूतग्रहविषध्वंसि
ग्रहपीडाविनाशनम् ॥ माङ्गल्यंपुण्यमायुष्यंश्रवणात्पठनाज्जपात् ॥ ३ ॥ सकृदस्याखिलावेदाःसाङ्गामन्त्राश्चकोटिशः ॥ पुराणशास्त्रस्मृतयःश्रुताः
स्युःपठितास्तथा ॥ ४ ॥ जप्त्वाचैकाक्षरंश्लोकंपादंवापठतिप्रिये ॥ नित्यंसिध्यतिसर्वेष्टमचिरात्किमुताखिलम् ॥ ५ ॥ नानेनसदृशंसद्यःप्रत्ययंसर्व
कर्मसु ॥ इदंभद्रेत्वयागोप्यंपाठ्यंस्वार्थैकसिद्धये ॥ ६ ॥ नावैष्णवायदातव्यंविकल्पोपहतात्मने ॥ भक्तिश्रद्धाविहीनायविष्णुसामा
न्यदर्शिने ॥ ७ ॥ देयंपुत्रायशिष्यायसुहृदेहितकाम्यया ॥ मत्प्रसादाद्दतेनेदंग्रहीष्यन्त्यल्पमेधसः ॥ ८ ॥ कलौसद्यःफलंकल्पग्रामंनेष्यति
नारदः ॥ लोकानांभाग्यहीनानांयेनदुःखंविनश्यति ॥ ९ ॥ द्वित्रेषुवैष्णवेष्वेतदार्यावर्तेभविष्यति ॥ नास्तिविष्णोःपरंधामनास्तिविष्णोःपरंतपः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ३१० ॥ नास्तिविष्णोःपरोधर्मोनास्तिमन्त्रोह्यवैष्णवः ॥ नास्तिविष्णोःपरंसत्यंनास्तिविष्णोःपरोमखः ॥ ११ ॥ नास्तिविष्णोःपरंध्यानं
नास्तिविष्णोःपरागतिः ॥ किंतस्यबहुभिर्मन्त्रैःशास्त्रैर्वाबहुविस्तरैः ॥ १२ ॥ वाजपेयसहस्रैर्वाभक्तिर्यस्यजनार्दने ॥ सर्वतीर्थमयोविष्णुः
सर्वशास्त्रमयःप्रभुः ॥ १३ ॥ सर्वक्रतुमयोविष्णुःसत्यंसत्यंवदाम्यहम् ॥ आब्रह्मसारसर्वस्वंसर्वमेतन्मयोदितम् ॥१४॥ पार्वत्युवाच ॥ धन्या
स्म्यनुगृहीतास्मिकृतार्थास्मिजगत्पते ॥ यन्मयेदंश्रुतंस्तोत्रंत्वद्रहस्यंसुदुर्लभम् ॥ १५ ॥ अहोबतमहत्कष्टंसमस्तदुःखहेहरौ ॥ विद्यमानेऽपि
देवेशेमूढाःक्लिश्यन्तिसंसृतौ ॥ १६ ॥ यमुद्दिश्यसदानाथमहेशोऽपिदिगम्बरः ॥ जटिलोभस्मलिप्ताङ्गोतपस्वीवीक्ष्यतेजनैः ॥ १७ ॥
ततोऽधिकोऽस्तिदेवःकोलक्ष्मीकान्तान्मधुद्विषः ॥ यत्तत्त्वंचिन्त्यतेनित्यंत्वयायोगेश्वरेणहि ॥ १८ ॥ ततःपरंकिमधिकंपदंश्रीपुरुषोत्तमात्॥
तमविज्ञायकंमूढायजन्तेज्ञानिमानिनः ॥ १९ ॥ मुषितास्मित्वयानाथचिरंयदयमीश्वरः ॥ प्रकाशितोनमेयस्मात्त्वदाद्यादिव्यशक्तयः ॥
॥ २० ॥ अहोसर्वेश्वरोविष्णुःसर्वदेवोत्तमोत्तमः ॥ भवदादिगुरुर्मूढैःसामान्यइववीक्ष्यते ॥ २१ ॥ महीयसांहिमाहात्म्यंभजमानान्भजन्तिते॥
द्विषतोऽपिवृथापापानुपेक्षन्तेक्षमान्विताः ॥ २२ ॥ मयापिबाल्येस्वपितुःप्रजादृष्टाबुभुक्षिताः ॥ दुःखादशक्तयापोष्टुंश्रियमाराध्य
वैभृताः ॥ २३ ॥ तयासंनिहिताभ्यश्चप्रजाभ्योभवदादयः ॥ विलसन्तिसशक्राद्याःससुहृन्मित्रबान्धवाः ॥ २४ ॥ तयाविनाकदेवत्वंकै
श्वर्यंकपरिग्रहः ॥ सर्वेभवन्तिजीवन्तोयातनास्वेवसंस्थिताः ॥ २५॥ तामृतेनैवधर्मोऽर्थःकामोमोक्षोऽपिदूरतः ॥ क्षुधितानांदुर्गतानांकुतो
योगसमाधयः ॥ २६ ॥ सचसंसारसारैकःसर्वलोकैकनायकः ॥ वशगाकमलायस्यत्यक्त्वात्वामपिशङ्कर ॥ २७ ॥ अनौद्धत्येनशौचे
नरूपेणार्जवसंपदा ॥ सर्वातिशयवीर्येणसंपूर्णस्यमहात्मनः ॥ २८॥ कस्तेनतुल्यतामेतिदेवदेवेनविष्णुना ॥ यस्यांशांशावतारेणविनासर्वं
विलीयते ॥ २९ ॥ जगदेतत्तथाप्याहुर्दोषायैतद्विमोहिताः ॥ नास्यजन्मनवामृत्युर्नाप्राप्यंस्वार्थमेवच ॥ ३० ॥ कामाद्यासक्तचित्तत्वा
त्किंतुसर्वेश्वरप्रभो ॥ त्वन्मयत्वात्प्रमादाद्वाशक्नोमिपठितुंनचेत् ॥ ३१ ॥ विष्णोःसहस्रनामैतत्प्रत्यहंवृषभध्वज ॥ नाम्नैकेनतुयेनस्यात्त
त्फलंब्रूहिमेप्रभो ॥ ३२ ॥ महादेवउवाच ॥ रामरामेतिरामेतिरमेराममनोरमे ॥ सहस्रनामतत्तुल्यंरामनामवरानने ॥ ३३ ॥ इतिश्री
पाद्मेमहापुराणेपञ्चपञ्चा०उत्तर० उमापतिनारदसंवादेविष्णोर्नामसहस्रनामैकसततितमोऽध्यायः ॥ ७१ ॥ श्रीमहादेवउवाच ॥ ब्राह्मणावाक्षत्रियावा

१ 'परो जपः' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वैश्यावागिरिकन्यके ॥ शूद्रावाथविशेषेणपठन्त्यनुदिनंयदि ॥ १ ॥ धनधान्यसमायुक्तायान्तिविष्णोःपरंपदम् ॥ श्लोकंवाश्लोकमर्धंवापादं
पादार्धमेववा ॥ २ ॥ पठनान्मोक्षमाप्नोतियावदाभूतसंप्लवम् ॥ विन्यासेनयुतंदेविविष्णोर्नामसहस्रकम् ॥ ३ ॥ येपठन्तिनरश्रेष्ठास्ते
यान्तिपदमव्ययम् ॥ एककालंद्विकालंवात्रिकालंवाथयःपठेत् ॥ ४ ॥ धनायुर्वर्धतेतस्ययावदिन्द्राश्चतुर्दश ॥ पुत्रपौत्रांस्तथालक्ष्मींसंपदंविपुलां
लभेत् ॥ ५ ॥ किमन्यद्बहुनोक्तेनभूयोभूयोवरानने ॥ विष्णोर्नामसहस्रंतुपरंनिर्वाणदायकम् ॥ ६ ॥ पूजनंप्रथमंतस्यकृतंयेननरेणतु ॥
संपूर्णंपूजितेविष्णौतस्यपूजाचवार्षिकी ॥ ७ ॥ व्यग्रत्वंचनकर्तव्यंपठनेतुविशेषतः ॥ यदिचेत्क्रियतेपाठेह्यायुर्वित्तंचनश्यति ॥ ८ ॥ यावन्ति
भुवितीर्थानिजम्बूद्वीपेषुसर्वदा ॥ तानितीर्थानितत्रैवविष्णोर्नामसहस्रकम् ॥ ९ ॥ तत्रैवगङ्गायमुनाचवेणीगोदावरीतत्रसरस्वतीच ॥ सर्वाणि
तीर्थानिवसन्तितत्रयत्रस्थितंनामसहस्रकंतत ॥ १० ॥ इदंपवित्रंपरमंभक्तानांवल्लभंसदा ॥ ध्येयंहिदासभावेनभक्तिभावेनचेतसा ॥ ११ ॥
परंसहस्रनामाख्यंयेपठन्तिमनीषणः ॥ सर्वपापविनिर्मुक्तास्तेयान्तिहरिसंनिधौ ॥ १२ ॥ अरुणोदयकालेतुयेपठन्तिजपन्तिच ॥ आयुर्बलं
चतेषांश्रीर्वर्धतेचदिनेदिने ॥ १३ ॥ रात्रौजागरणेप्राप्तेकलौभागवतोनरः ॥ पठनान्मुक्तिमाप्नोतियावदिन्द्राश्चतुर्दश ॥ १४ ॥ एकैकेनतु
नाम्नावैहरौतुलसिकारणात् ॥ पूजासाचैवविज्ञेयाकोटियज्ञफलाधिका ॥ १५ ॥ मार्गेचगच्छमानास्तुयेपठन्तिद्विजातयः ॥ नदोषामार्गजास्तेषां
भवन्तिकिलपार्वति ॥ १६ ॥ शृणुदेविप्रवक्ष्यामिमाहात्म्यंकेशवस्यतु ॥ येशृण्वन्तिनरश्रेष्ठास्तेपुण्याःपुण्यरूपिणः ॥ १७ ॥ इतिश्रीपाद्मे
महापुराणेपञ्चपञ्चा॰उत्तर॰उमापतिनारदसंवादेसहस्रनाममहिमानामद्विसप्ततितमोऽध्यायः ॥ ७२ ॥ महादेवउवाच ॥ ॐरामरक्षास्तोत्रस्य
श्रीमहर्षिर्विश्वामित्रऋषिः ॥ श्रीरामोदेवता ॥ अनुष्टुप्छन्दः ॥ विष्णुप्रीत्यर्थेजपेविनियोगः ॥ अतसीपुष्पसङ्काशंपीतवाससमच्युतम् ॥
ध्यात्वावैपुण्डरीकाक्षंश्रीरामंविष्णुमव्ययम् ॥ १ ॥ पातुमेहृदयंरामःश्रीकण्ठःकण्ठमेवच ॥ नाभिंपातुमखत्राताकटिंमेविश्वरक्षकः ॥ २ ॥
करौपातुदाशरथिःपादौमेविश्वरूपधृत् ॥ चक्षुषीपातुवैदेवस्सीतापतिरनुत्तमः ॥ ३ ॥ शिखांमेपातुविश्वात्माकर्णौमेपातुकामदः ॥ पार्श्वयो
स्तुसुरत्राताकालकोटिदुरासदः ॥ ४ ॥ अनन्तःसर्वदापातुशरीरंविश्वनायकः ॥ जिह्वांमेपातुपापघ्नोलोकशिक्षाप्रवर्त्तकः॥५॥राघवःपातुमेदन्तान्के
शात्रक्षतुकेशवः ॥ सक्थिनीपातुमेदत्तविजयोनामविश्वसृक्॥६॥एतांरामबलोपेतांरक्षांयोवैपुमान्पठेत्॥सचिरायुःसुखीविद्वान्लभतेदिव्यसंपदम् ॥७॥
रक्षांकरोतिभूतेभ्यःसदारक्षातुवैष्णवी ॥ रामेतिरामभद्रेतिरामचन्द्रेतियःस्मरेत् ॥८॥ विमुक्तःसनरःपापान्मुक्तिंप्राप्नोतिशाश्वतीम् ॥ वसिष्ठेनत्विदं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रोक्तंगुरवेविष्णुरूपिणे ॥ ९ ॥ ततोमेब्रह्मणःप्राप्तंमयोक्तंनारदंप्रति ॥ नारदेनतुभूलोकेप्रापितंसुजनेष्विह ॥ १० ॥ सुप्त्वावाथगृहेवापिमार्गेगच्छन्त
एववा ॥ येपठन्तिनरश्रेष्ठास्तेनराःपुण्यभागिनः ॥११ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०उमापतिनारदसंवादेरामरक्षास्तोत्रंनामत्रिसप्ततितमोऽ
ध्यायः ॥ ७३ ॥ महादेवउवाच ॥ शृणुदेविप्रवक्ष्यामिधर्ममाहात्म्यमुत्तमम् ॥ यच्छ्रुत्वानपुनर्जन्मजायतेभुविकर्हिचित् ॥ १ ॥ धर्मादर्थंचकामंच
मोक्षंचैवत्रयंलभेत् ॥ तस्माद्धर्मंसमीहेतविद्वान्यःसबुधःस्मृतः ॥ २ ॥ तपसाचैवदानेनव्रतेननियमेनच ॥ तपसाप्राप्यतेस्वर्गःसात्त्विकेनतथैवच ॥
॥ ३ ॥ इहायातोलभेद्राज्यंक्रोधलोभविवार्जितः ॥ जन्मान्तरेणमुक्तिःस्यात्पदंविन्दतिवैष्णवम् ॥ ४ ॥ तपसाराजसेनेहराजसश्चैवजायते ॥ तथा
तामसभावेनक्रूरकर्माहिनिष्ठुरः ॥५ ॥ तपस्तद्रक्षसांचोक्तंभुक्तिदंतामसात्मनाम् ॥ यत्तप्तंसात्त्विकंचैवतत्तपोभवतिध्रुवम् ॥ ६ ॥ रजस्तमोभ्यांनियतं
तपस्यतांवनेसतांवायुभुजांसुनिर्जने ॥ तपस्विनांचैवधनादिवाञ्छतांवनेऽपिदोषाःप्रभवन्तिरागिणाम् ॥ ७ ॥ गृहेऽपिपञ्चेन्द्रियनिग्रहस्तपस्त्वकुत्सिते
कर्मणियःप्रवर्त्तते ॥ निवृत्तरागस्यतपोवनंगृहंगृहाश्रमोऽतोगदितःस्वधर्मः ॥ ८ ॥ सुदुस्तरःसत्त्वजितेन्द्रियाणांसंहन्यतेश्रेष्ठतमःशुभाश्रमः ॥ गृहस्तु
धर्मःप्रवरोमनीषिणाब्रह्मादिभिश्चाभिहितोनगात्मजे ॥ ९ ॥ तथातपस्वीविपिनेक्षुधार्तोगृहंसमायातिसदान्नदातुः ॥ भक्त्यासचान्नंप्रददातितस्मैतपो
विभागंभजतेहितस्य ॥ १० ॥ गृहाश्रमंज्येष्ठमिहाश्रमाणांसम्यक्चयःपालयतेमनुष्यः ॥ इहैवभुञ्जन्समनुष्यभोगान्स्वर्गंप्रयातीतिनसंशयोऽत्र ॥ गृहं
सदापालयतांनराणांपापंसमायातिकथंहिदेवि ॥११॥ गृहाश्रमःपुण्यतमःसर्वदातीर्थवद्गृहम् ॥ अस्मिन्गृहाश्रमेपुण्येदानंदेयंविशेषतः॥ १२॥ देवानां
पूजनंयत्रअतिथीनांचभोजनम् ॥ पथिकानांचशरणमतोधन्यतमोमतः ॥ १३ ॥ तद्गृहंतुसमाश्रित्ययेऽर्चयन्तिद्विजान्नराः ॥ आयुर्लक्ष्मीस्तथापुत्रा
नहीयन्तेकदाचन ॥ १४ ॥ शृणुसुन्दरिवक्ष्यामिमहापापविशोधनम् ॥ सर्वसंपत्करंदानमिहामुत्रफलप्रदम् ॥ १५ ॥ शुभेकालेसमायातेसमभ्यर्च्य
स्वदैवतम् ॥ नित्यंनैमित्तिकंकृत्वादद्याद्दानंस्वशक्तितः ॥१६॥ गृहीत्वापरद्रव्यंचद्विजदेवेभ्यएवहि ॥ दद्यात्सनिरयंदृष्ट्वापश्चाद्यातिपरांगतिम्॥ १७॥
शतानीकोयथादानात्सपुत्रश्चैवतारितः ॥ दत्त्वान्येचद्विजेभ्यश्चसगन्ताधर्मतोदिवम् ॥ १८ ॥ धर्मस्थानेषुयैर्दत्तंतेषांधर्मसमुदाहृतम् ॥ शृणुदेविप्रव ॥ ७६ ॥
क्ष्यामिवित्तदानंसमासतः ॥ १९ ॥ देहशुद्धिकरंदानंनभूतंनभविष्यति ॥ पापहीनोयेनपुमाञ्जायतेनात्रसंशयः ॥ २० ॥ भोगान्भुक्त्वाततश्चायं
यातिविष्णुंसनातनम् ॥ पुरावैब्रह्मणाप्रोक्तंभार्गवायमहात्मने ॥२१॥ पापयुक्तायरामायतुलावृषभमेवच ॥ पापकर्मरतश्चैववधबन्धक्रियोनृपः ॥२२॥

१'पर्णाशिनाम्' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभक्ष्यभक्षणरतोभ्रूणहागुरुतल्पगः ॥ एतेऽप्यनृतवादीचप्रसूयन्तेवियोनिषु ॥ २३ ॥ अयाज्ययाजनंकृत्वायाजयित्वातुनिन्दितान् ॥ सदाकोप
समायुक्ताःसाधूनांपीडनेरताः ॥२४॥ विश्वासोपहताश्चैषामसुभिर्धर्मनिन्दकाः ॥ पापैरेभिःसमायुक्ताज्ञात्वात्मानंगतायुषम्॥२५॥इतिज्ञात्वातुतैर्देवि
दानंदेयंविशेषतः ॥ बहवोधर्मकर्त्तारोवैष्णवाभुविविश्रुताः ॥ २६ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०उमापतिनारदसंवादेदानधर्मोनामचतुःस
प्ततितमोऽध्यायः ॥ ७४ ॥ महादेवउवाच ॥ गण्डिकायास्तुमाहात्म्यंवक्ष्येदेवविधानतः ॥ यथागङ्गातथासाचकथितानगनन्दिनि ॥ १ ॥
शालग्रामशिलायत्रजायतेबहुधातथा ॥ माहात्म्यंचैवतस्याश्चकथितंमुनिसत्तमैः ॥ २ ॥ उद्भिज्जाअण्डजायत्रस्वेदजाश्चजरायुजाः ॥ यस्या
दर्शनमात्रेणपुण्यरूपास्तुपार्वति ॥ ३ ॥ उत्तरेसातुसंभूतागण्डिकातुमहानदी ॥ संस्मृतासंस्मृतानूनंपापंहन्त्यगनन्दिनि ॥ ४ ॥ यत्र
नारायणोदेवोनित्यंतिष्ठतिभूतिदः ॥ शङ्खचक्रधरास्तस्यसमीपेनिवसन्तिये ॥५॥ तेमृत्युंसमनुप्राप्यदिव्यरूपाश्चतुर्भुजाः ॥ ऋषयस्तत्रतिष्ठन्तिदेवा
श्चैवंविशेषतः ॥ ६ ॥ रुद्रानागास्तथायक्षानात्रकार्याविचारणा ॥ तस्याःसमीपेह्येकोऽयंस्थलोवैविष्णुरूपधृत् ॥ ७ ॥ स्थलेऽस्मिन्वर्ततेमूर्तिर्बहुरू
पाचमुक्तिदा ॥ चतुर्विंशतिभूतानांजातयःसन्तितत्रवै ॥ ८ ॥ एकावैमत्स्यरूपाचकूर्मरूपातथैवच ॥ वाराहीनारसिंहीचवामनीचशुभप्रदा ॥ ९ ॥
रामाख्यापरशुरामाचकृष्णरूपातिमुक्तिदा ॥अन्याचयाबुधैःप्रोक्तास्थलेवैविष्णुसंज्ञके॥१०॥कल्किनाम्नीतथापुण्याकपिलायामयोदिता ॥अन्यास्तु
विविधाकाराहश्यन्तेबहुधाअपि ॥ ११ ॥ तिष्ठन्तिमूर्त्तयःसर्वानानारूपाह्यनेकशः ॥ सागङ्गामहतीपुण्याधर्मकामार्थमुक्तिदा ॥ १२ ॥ यस्यां
भूमौहृषीकेशोनियमेनसमन्वितः ॥ वर्त्ततेऽद्यापितत्रैवमयासहनसंशयः ॥ १३ ॥ भ्रूणहत्याबालहत्यागोहत्याचविशेषतः ॥ यस्याःस्पर्शनमात्रेण
मुच्यतेसर्वकिल्बिषात् ॥ १४ ॥ ब्राह्मणाःक्षत्रियावैश्याःशूद्राश्चैवान्यजातयः ॥ सर्वेतेवैविमुच्यन्तेदर्शनाद्गण्डिकाम्बुना ॥ १५ ॥ इयंवेणीसमा
पुण्यापापिनांतुविशेषतः ॥ मुच्यतेब्रह्महायत्रइतरेषांतुकाकथा ॥ १६ ॥ सर्वदासर्वकालेतुअहंगच्छामिपार्वति ॥ तीर्थानांतीर्थराजोऽयंब्रह्मणाभाषितः
किल ॥१७॥ तत्रस्नानंचदानंचमुनिभिःपरिकल्पितम् ॥ आषाढेपुण्यकालेतुतत्रगच्छामिसुन्दरि ॥१८॥ मासैकंविधिनाचैवस्नानंतत्रकरोम्यहम्॥तारकं
तत्रविशदंजपामितुनिरन्तरम् ॥ १९ ॥ अतोऽहंवैष्णवोजातोविष्णुक्षेत्रेयतोगतः ॥ विष्णुनानिर्मितंपूर्वंक्षेत्रंतत्तुमहत्तरम् ॥ २० ॥ वैष्णवानां
चगतिदंपावनंपरमंस्मृतम् ॥ भवेऽस्मिन्मानुषेजन्मदुर्लभंदेविसर्वदा ॥ २१ ॥ दुर्लभंगण्डिकातीर्थंविष्णुक्षेत्रंतुदुर्लभम् ॥ अतोह्याषाढमासेतु
गन्तव्यंद्विजसत्तमैः ॥ २२ ॥ तत्रगत्वाविशेषेणशङ्खचक्रादिधारणम्॥ कर्त्तव्यंतुद्विजश्रेष्ठैःपवित्रंपरमंस्मृतम् ॥२३ ॥ शङ्खतीर्थंतुवामेवैदक्षिणेचक्रचि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्हितम् ॥ द्विजानांमुक्तिदंप्रोक्तंधारितव्यंप्रयत्नतः ॥ २४ ॥ ब्राह्मणैश्चविशेषेणशङ्खचक्रादिधारणे॥कृतेसतिमहादेविवैष्णवास्तेहिमानवाः ॥२५॥
नगण्डिकासमंतीर्थंनव्रतंद्वादशीसमम् ॥ नदेवःकेशवादन्योभूयोभूयोवरानने ॥ २६ ॥ गण्डिकायास्तुमाहात्म्यंयेशृण्वन्तिनरोत्तमाः ॥ इहलोकेसु
खंभुक्त्वाविष्णुलोकंहियान्तिते ॥२७॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०उमापतिनारदसंवादेगण्डिकातीर्थमाहात्म्यंनामपञ्चसप्ततितमोऽध्यायः
॥ ७५ ॥ महादेवउवाच ॥ शृणुसुन्दरिवक्ष्यामिस्तोत्रंचाभ्युदयंततः ॥ यच्छ्रुत्वामुच्यतेपापीब्रह्महानात्रसंशयः ॥ १ ॥ धातावैनारदंप्रा
हतदहंतुब्रवीमिते ॥ तमुवाचततोदेवःस्वयम्भूरमितद्युतिः ॥ २ ॥ प्रगृह्यरुचिरंबाहुंस्मारयेच्चौर्ध्वदेहिकम् ॥ भवान्नारायणःश्रीमान्देवश्चक्रायुधोहरिः
॥ ३ ॥ शार्ङ्गधारीहृषीकेशःपुराणपुरुषोत्तमः ॥ अजितःखड्गभृज्जिष्णुःकृष्णश्चैवसनातनः ॥ ४ ॥ एकशृङ्गोवराहस्त्वंभूतभव्यभवात्मकः॥
अक्षरंब्रह्मसत्यंतुआदौचान्तेचराघव ॥ ५ ॥ लोकानांतुपरोधर्मोविष्वक्सेनश्चतुर्भुजः ॥ सेनानीरक्षणस्त्वंचवैकुण्ठस्त्वंजगत्प्रभुः ॥ ६ ॥
प्रभवश्चाव्ययस्त्वंचउपेन्द्रोमधुसूदनः ॥ पृश्निगर्भोधृतार्चिस्त्वंपद्मनाभोरणान्तकृत् ॥ ७ ॥ शरण्यंशरणंचत्वामाहुःसेन्द्रमहर्षयः ॥ ऋक्साम
श्रेष्ठोवेदात्माशतजिह्वोमहर्षयः ॥ ८ ॥ त्वंयज्ञस्त्वंवषट्कारस्त्वमोङ्कारःपरन्तपः ॥ शतधन्वावसुःपूर्वंवसूनांत्वंप्रजापतिः ॥ ९ ॥ त्रयाणामपिलो
कानामादिकर्तास्वयंप्रभुः ॥ रुद्राणामष्टमोरुद्रःसाध्यानामपिपञ्चमः ॥ १०॥ आश्विनौचापिकर्णौतेसूर्यचन्द्रौचचक्षुषी ॥ अन्तेचादौचमध्येचदृश्य
सेत्वंपरन्तपः ॥ ११ ॥ प्रभवोनिधनंचास्यनविदुःकोभवानिति ॥ दृश्यसेसर्वलोकेषुगोषुचब्राह्मणेषुच ॥ १२ ॥ दिक्षुसर्वासुगगनेपर्वतेषुगुहासु
च ॥ सहस्रनयनःश्रीमाञ्छतशीर्षःसहस्रपात् ॥ १३ ॥ त्वंधारयसिभूतानिवसुधांचसपर्वताम् ॥ अन्तःपृथिव्यांसलिलेसर्वसंत्त्वमहोरगः[1] ॥ १४ ॥
त्रीँल्लोकान्धारयन्नासेदेवगन्धर्वदानवान् ॥ अहंतेहृदयंरामजिह्वादेवीसरस्वती ॥ १५ ॥ देवारोमाणिगात्रेषुनिर्मितास्तेस्वमायया ॥ निमिषस्तेस्मृ
तारात्रिरुन्मेषोदिवसस्तथा ॥ १६ ॥ संस्कारस्ते[2]भवेद्देहोनतदस्तिविनात्वया ॥ जगत्सर्वंशरीरंतत्स्थैर्यंचवसुधातलम् ॥ १७ ॥ अग्निःकोपः
प्रसादस्तेशेषःश्रीमांश्चलक्ष्मणः ॥ त्वयालोकास्त्रयःक्रान्ताःपुराणैर्विक्रमैस्त्रिभिः ॥ १८ ॥ त्वयेन्द्रश्चकृतोराजाबलिर्बद्धोमहासुरः ॥ लोकान्संहृत्य
कालस्त्वंनिवेश्यात्मनिकेवलम् ॥ १९ ॥ करोष्येकार्णवंघोरंदृश्यादृश्येचनान्यथा ॥ त्वयासिंहवपुःकृत्वापरमंदिव्यमुत्तमम् ॥ २० ॥ भयदःस ॥ ७७ ॥
र्वभूतानांहिरण्यकशिपुर्हतः ॥ त्वमश्ववदनोभूत्वापातलतलमाश्रितः ॥ २१ ॥ संहृतंपरमंहव्यंरहस्यंवैपुनःपुनः ॥ यत्परंश्रूयतेज्योतिर्यत्परंश्रू

१'सेवसे त्वं महोरगः' इ० पा० । २ 'संस्कारास्ते' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यतेपरः ॥ २२ ॥ यत्परंपरतश्चैवपरमात्मेतिकथ्यते ॥ परोमन्त्रःपरंतेजस्त्वमेवहिनिगद्यसे ॥ २३ ॥ हव्यंकव्यंपवित्रंचप्राप्तिःस्वर्गापवर्गयोः ॥
स्थित्युत्पत्तिविनाशांस्तेत्वामाहुःप्रकृतेःपरम् ॥ २४ ॥ यज्ञश्चयजमानश्चहोताचाध्वर्युरेवच ॥ भोक्तायज्ञफलानांचत्वंवैवेदैश्चगीयसे ॥ २५ ॥ सी
तालक्ष्मीर्भवान्विष्णुर्देवःकृष्णःप्रजापतिः ॥ वधार्थंरावणस्यत्वंप्रविष्टोमानुषींतनुम् ॥ २६ ॥ तदिदंचत्वयाकार्यंकृतंधर्मभृतांवर ॥ निहतोरावणो
रामप्रहृष्टादेवताःकृताः ॥ २७ ॥ अमोघंदेववीर्यंतेनतेमोघःपराक्रमः ॥ अमोघदर्शनंरामनचमोघस्तवस्तवः ॥ २८ ॥ अमोघास्तेभविष्यन्तिभ
क्तिमन्तोनराभुवि ॥ येचत्वांदेवसंभक्त्याःपुराणंपुरुषोत्तमम् ॥ २९ ॥ इममार्षस्तवंपुण्यमितिहासंपुरातनम् ॥ येनराःकीर्तयिष्यन्तिनास्तितेषांपराभ
वः ॥ ३० ॥ कथमिहहिपराभवंव्रजेयुःपुरुषवराःपुरुषोत्तमेहिभक्ताः ॥ नहिजगतिचतुर्भुजप्रियाणांत्रिदशइहास्तिवरप्रदोविशिष्टः ॥ ३१ ॥
स्तोत्राणांप्रवरंस्तोत्रंराघवस्यमहात्मनः ॥ त्रिकालेतुपठन्मुक्तोमहापातकवानपि ॥ ३२ ॥ सन्ध्याकालेद्विजश्रेष्ठःश्राद्धकालेविशेषतः ॥ पठ
नीयंप्रयत्नेनभक्तिभावेनचेतसा ॥ ३३ ॥ इदंगोप्यंहिपरमंनाख्येयंकर्हिचित्क्वचित् ॥ पठनान्मुक्तिमाप्नोतिसास्वतःसभवेद्ध्रुवम् ॥ ३४ ॥
प्रथमंपिण्डपूजातेब्राह्मणैर्द्विजसत्तमैः ॥ पठितव्यमिदंस्तोत्रंश्राद्धमक्षयमाप्नुयात् ॥ ३५ ॥ इदंपवित्रंपरमंजनानांमुक्तिदायकम् ॥ लिखित्वावैगृहेयस्तु
धारयेत्सुसमाधिना ॥३६॥ आयुःश्रीश्चबलंतस्यवृद्धिंयातिदिनेदिने ॥ लिखित्वाब्राह्मणेदद्याद्धीमान्योवैकदाचन ॥३७॥ विमुक्ताःपूर्वजास्तस्ययान्ति
विष्णोःपरंपदम्॥ चतुर्णांचैववेदानांपाठेचैवतुयत्फलम् ॥३८॥ समवाप्नोतिजापेननरःस्तोत्रंपठञ्जपन् ॥धृत्वावैशङ्खचक्रादिब्राह्मणैर्वेदतत्परैः ॥३९ ॥
श्राद्धकालेमहादेविअक्षयंतद्भवेद्ध्रुवम् ॥ कण्ठेपद्माक्षमालांचशङ्खचक्रादिधारणम्॥४०॥ततःश्राद्धंप्रकुर्वीतइदंस्तोत्रंपठञ्जपन् ॥ विधिनाभक्तिभावेनपूर्णं
भवतिनान्यथा ॥ ४१ ॥ अतोभक्तिमतापुंसापठनीयंप्रयत्नतः ॥ पठनात्सर्वमाप्नोतिसनरःसुखमेधते ॥ ४२ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०
उत्तर०उमामहेश्वरसंवादआभ्युदयिकमौर्ध्वदैहिकस्तोत्रंनामषट्सप्ततितमोऽध्यायः ॥ ७६ ॥ महादेवउवाच ॥ पप्रच्छाहंजगन्नाथव्रतानामुत्तमंव्र
तम् ॥ पुत्रपौत्रविवृद्ध्यर्थंसुखसौभाग्यदायकम् ॥ १ ॥ तवाग्रेसंप्रवक्ष्यामिशृणुसुन्दरिसाम्प्रतम् ॥ इदंकथानकंदिव्यमृषीणांव्रतमुत्तमम् ॥ २ ॥
रजस्वलातुयानारीसहसापापरूपिणी ॥ कृतेनचव्रतेनैवमहापापैःप्रमुच्यते ॥ पितणामक्षयंदेयंधर्मकामार्थसाधनम् ॥ ३ ॥ श्रीविष्णुरुवाच ॥
पूर्वमासीन्महाबाहुर्ब्राह्मणोवेदपारगः ॥ सदाध्ययनशीलस्तुदेवशर्माइतिद्विजः ॥४॥ अग्निहोत्रक्रियायुक्तःषट्कर्मनिरतःसदा ॥ सर्ववर्णेषुसंपूज्यःसपु
त्रपशुबान्धवः ॥ ५॥ तस्यब्राह्मणमुख्यस्यभग्राचगृहवाहिनी ॥ प्राप्तेभाद्रपदेमासेशुक्लपक्षेतुपञ्चमी ॥ ६॥ पितुःक्षयाहंकुरुतेयतात्माचजितेन्द्रियः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रात्रौनिमन्त्रयेद्विप्रान्सुखसौभाग्यदायकान् ॥ ७ ॥ प्रभातेविमलेप्राप्तेभाण्डान्यन्यानिकारयेत् ॥ पाकंसर्वेषुपात्रेषुसकारयतिजायया ॥
॥ ८ ॥ अष्टादशरसोपेतंपितॄणांप्रीतिदायकम् ॥ आकारणंततोदत्त्वाविप्राणांचपृथक्पृथक् ॥ ९ ॥ सर्वेविप्रास्तुसंप्राप्तामध्याह्नेवेदपाठकाः ॥ अर्घ
पाद्यादिविधिवत्कृतवान्द्विजसत्तमः ॥ १० ॥ रजसादूषिताःश्राद्धेप्रक्षाल्यविधिवत्तदा ॥ गृहमध्येगताःसर्वेआसनेतेनिरूपिताः ॥ ११ ॥ प्रदत्तं
भोजनंतेनमिष्टान्नेनविशेषतः ॥ विधिनाचकृतंश्राद्धंपिण्डदानप्रपूर्वकम् ॥ १२ ॥ ताम्बूलंदक्षिणांचैववस्त्राणिविविधानिच ॥ सर्वंददौद्विजेभ्योवैपितृध्या
नपरायणः ॥ १३ ॥ विप्राविसर्जिताःसर्वेआशीर्वादपरायणाः ॥ गोत्रिणांबान्धवानांचअन्येषांचबुभुक्षताम् ॥ १४ ॥ दत्तमन्नंतदातेनभोजनेविधिपूर्व
कम् ॥ निशायांतुकुटीद्वारउपविष्टोयदातदा ॥ १५ ॥ ब्राह्मण्यावारिसंगृह्यपादप्रक्षालनंकृतम् ॥ तदाशुनीबलीवर्दौपरस्परमभाषताम् ॥ १६ ॥ शृणु
कान्तवचोमह्यंयादृक्कृतवतीवधूः ॥ तादृशंसंप्रवक्ष्यामिनान्यथाप्रब्रवीम्यहम् ॥ १७ ॥ कदाचिद्दैवयोगेनगताहंपुत्रसद्मनि ॥ तत्रस्थितंपयःपीतंवध्वादृष्टं
नतत्पुनः ॥ १८ ॥ पीतंपयस्तुसर्पेणतद्दृष्टंतुययापुनः ॥ पश्चात्पीतंमयासम्यक्दृष्टंवध्वातदापुनः ॥ १९ ॥ तेनसंपर्कदोषेणकटिर्भग्नाचमेसदा ॥ तेनदुःखेन
भोस्वामिन्जाताहंदुःखभागिनी ॥ भग्नाकटिश्चसंजाताह्याहारोनैवरोचते ॥ २० ॥ बलीवर्दउवाच ॥ शृणुत्वंशुनिवक्ष्यामिममदुःखस्यकारणम् ॥
अस्मिन्वैदिवसेप्राप्तेब्राह्मणानांतुभोजनम् ॥ २१ ॥ कारितंममपुत्रेणममचिन्तातुनोकृता ॥ नोदकंनतृणंचैवनदत्तंकेनचित्क्वचित् ॥ २२ ॥ अनाहारो
ह्यहंपापीबद्धोऽस्मिन्पापभावितः ॥ पूर्वशापविशेषेणजातंशुनिनसंशयः ॥ २३ ॥ तद्वाक्यंतुतदादेविश्रुतंपुत्रेणधीमता ॥ ममायंतुपितासाक्षाज्जातोमम
गृहेपशुः ॥ २४ ॥ इयंतुजननीसाक्षान्ममचैवनसंशयः ॥ दैवयोगाच्छुनीजाताकिंकरोमिसुनिश्चयम् ॥ २५ ॥ एवंविचार्यासौविप्रोनैवनिद्रामवाप
सः ॥ रात्रौचिन्तापरोभूत्वास्मरन्विश्वेश्वरंपरम् ॥ २६ ॥ नानाधर्मपरोऽहंचममैवंचकथंशुभम् ॥ विचारयित्वाचततोरात्रौसुप्तस्तदापुनः ॥ २७ ॥ प्रभाते
विमलेप्राप्तऋषीणांपुरतोगतः ॥ तेषांमध्येवसिष्ठेनतस्यसुस्वागतंकृतम् ॥ २८ ॥ ब्रूहित्वंब्राह्मणश्रेष्ठतवागमनकारणम् ॥ इतिपृष्टस्तदाविप्रःप्रणाममकरो
त्तदा ॥ २९ ॥ अद्यमेसफलंजन्मअद्यमेसफलाक्रिया ॥ अद्यमेपितरस्तृप्तादुर्लभात्तवदर्शनात् ॥ ३० ॥ यथोक्तंचकृतंश्राद्धंद्विजाश्चैवसुभोजिताः ॥ कुटुम्बि
नांतुसर्वेषांभोजनंकारितंतथा ॥ ३१ ॥ भोजनानन्तरंप्राप्ताशुनीतत्रउवाचह ॥ अस्माकंतुगृहेह्येकोबलीवर्दस्तुवर्त्तते ॥ ३२ ॥ तंप्रतिंप्रतिवाक्यंयद्विजमत्तः
शृणुष्वतत् ॥ गृहेस्थितंदुग्धभाण्डमहिनादूषितंमया ॥ ३३ ॥ दृष्टंमेमहतीचिन्तातदाजातानसंशयः ॥ ३४ ॥ तदात्रसर्वेविप्राश्चम्रियन्तेभोजनात्ततः ॥
एवंविचार्यतत्स्वामिन्दुग्धंपीतंतदामया ॥ ३५ ॥ तदादृष्टंतुवध्वावैतयामेताडनंकृतम् ॥ चरामितेनसंभग्नाकिंकरोमिसुदुःखिता ॥ ३६ ॥ तस्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुःखंतुसंस्मृत्यवृषःप्राहशुनींप्रति ॥ शृणुशुनिप्रवक्ष्यामिममदुःखस्यकारणम् ॥३७॥ अस्याहंतुपितासाक्षात्पूर्वजन्मनिवैशुनि ॥ अद्यवैभोजिताविप्रा
दत्तमन्नंतुभूरिशः ॥ ३८ ॥ नतृणंनोदकंचैवममाग्रेसंनिवेदितम् ॥ तेनदुःखेनमेदुःखंजातंबहुतरंतदा ॥ ३९ ॥ एतत्कथानकंश्रुत्वारात्रौनिद्रामवापन ॥
ममचिन्तातुतत्रैवजातावाऋषिसत्तम ॥४०॥ वेदाध्ययनशीलोऽहंकुशलोवेदकर्मणि ॥ अनयोश्चमहद्दुःखंकिंकरोमीतिचिन्तयन् ॥ आगतस्त्वत्समीपे
तुममकष्टंनिवारय ॥ ४१ ॥ ऋषिरुवाच ॥ उग्रजन्मञ्छृणुष्वत्वंपूर्वजन्मनियत्कृतम् ॥ अयंवैतुद्विजश्रेष्ठःकुण्डिनेनगरेशुभे ॥ ४२ ॥ मासेभाद्रपदेचैव
पञ्चमीयासमागता ॥ तद्व्रतंतेननाज्ञातंपितुःश्राद्धादिकारणात् ॥४३॥ स्त्रीधर्मेणतुसंप्राप्ताक्षयाहेतुतदानघ ॥ तयाचैवकृतंसर्वंब्राह्मणानांचभोजनम् ॥
॥ ४४ ॥ नज्ञातंचकृतंतेनपापिष्ठेनदुरात्मना ॥ प्रथमेऽहनिचाण्डालीद्वितीयेब्रह्मघातिनी ॥४५॥ तृतीयेरजकीप्रोक्ताचतुर्थेऽहनिशुध्यति ॥ तेनपापेन
साजाताशुनीस्वगृहचारिणी ॥ बलीवर्दस्त्वयंजातःकर्मणानेनसुव्रत ॥ ४६ ॥ उग्रजन्मोवाच ॥ व्रतंदानंतथायज्ञंतीर्थंवाममसुव्रत ॥ ब्रूहियेनविशेषेण
मुक्तिःपित्रोर्भवेन्मम ॥ ४७ ॥ ऋषिरुवाच ॥ मासेभाद्रपदेशुक्लेजायतेऋषिपञ्चमी ॥ रजसाविकृतंपापंनश्यतेकरणाद्यतः ॥ ४८ ॥ पुत्रपौत्रप्रदात्री
चपितृणांमुक्तिदायिनी ॥ नद्यांकूपेतडागेवाब्राह्मणस्यगृहेतथा ॥ ४९ ॥ गोमयंमण्डलंकुर्यात्कुम्भंतत्रैवविन्यसेत् ॥ तस्योपरिन्यसेत्पात्रमृषिधान्ये
नपूरितम् ॥५०॥ यज्ञोपवीतसूत्रंचसहिरण्यंफलंतथा ॥ स्थाप्याश्चऋषयःसप्तसुखसौभाग्यदायकाः ॥५१॥ आवाहयित्वातेसर्वेपूजनीयाव्रतस्थितैः॥
नैवेद्यमृषिधान्यंचऋषिधान्यंतुभोजनम् ॥ ५२ ॥ एकभक्तेनकर्त्तव्यमृषीणामर्चनंतदा ॥ पूजयेत्परयाभक्त्यामन्त्रेणविधिपूर्वकम् ॥ ५३ ॥
निर्वापंसघृतंदेयंदक्षिणासंयुतंतदा॥ देयंविप्रायविधिवदृषीणांप्रीयतामिति॥५४॥ कथांश्रुत्वाविधानेनकृत्वाचैवप्रदक्षिणाम्॥धूपंदीपंचनैवेद्यमर्घ्यंदद्या
त्पृथक्पृथक्॥५५॥ऋषयःसन्तुमेनित्यंव्रतसंपूर्तिकारिणः ॥ पूजांगृह्णन्तुमद्दत्तामृषिभ्योऽस्तुनमोनमः ॥५६॥ पुलस्त्यःपुलहश्चैवक्रतुःप्राचेतसस्तथा॥
वसिष्ठमारिचात्रेयाअर्घंगृह्णन्तुवोनमः ॥५७॥ एवंपूजाप्रकर्त्तव्याधूपैर्दीपैर्मनोरमैः ॥ पितृणांजायतेमुक्तिःकृतस्यास्यप्रभावतः ॥५८॥ पूर्वकर्मविपाकेन
रजसादोषभावतः ॥ कृतंह्येवंतुभोवत्समुक्तिस्तस्यनसंशयः ॥५९॥ तद्व्रतंचकृतंतेनमुक्त्यर्थंपितृहेतवे ॥ तेगतामुक्तिमार्गेणआशीर्वादपरायणाः॥६०॥
ऋषिपञ्चमीव्रतंपुण्यंविप्रायपरिकीर्तितम् ॥ येकुर्वन्तिनरःश्रेष्ठास्तेज्ञेयाःपुण्यभागिनः ॥ ६१ ॥ येकुर्वन्तिनरश्रेष्ठाऋषिव्रतमनुत्तमम्॥भुक्त्वात्रभोगा
न्विपुलान्यान्तिविष्णोःपदंतुते ॥ ६२ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०उमापतिनारदसंवादेऋषिपञ्चमीव्रतंनामसप्तसप्ततितमोऽध्यायः ॥७७॥
महादेवउवाच ॥ अथातःसंप्रवक्ष्यामिअपामार्जनमुत्तमम् ॥ पुलस्त्येनयथोक्तंतुदालभ्यायमहात्मने ॥ १ ॥ सर्वेषांरोगदोषाणांनाशनंमङ्गलप्रदम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्तेऽहंतुप्रवक्ष्यामिशृणुत्वंनगनन्दिनि ॥ २ ॥ श्रीदालभ्यउवाच ॥ भगवन्प्राणिनःसर्वेविषरोगाद्युपद्रवैः ॥ कुष्ठग्रहाभिभूताश्चसर्वकालेह्युपद्रुताः ॥
॥ ३ ॥ आभिचारिककृत्याद्याबहुरोगाश्चदारुणाः ॥ नभवन्तिमुनिश्रेष्ठतन्मेत्वंवक्तुमर्हसि ॥ ४ ॥ पुलस्त्यउवाच ॥ व्रतोपवासनियमैर्विष्णु
र्वैतोषितस्तुयैः ॥ तेनरानैवरोगार्त्ताजायन्तेमुनिसत्तम ॥ ५ ॥ यैर्नकृतंव्रतंपुण्यंनदानंनतपस्तदा ॥ नतीर्थंदेवपूजाचनान्नंदत्तंतुभूरिशः ॥ ६ ॥
तेवैलोकास्तथाज्ञेयारोगदोषैःप्रपीडिताः ॥ आरोग्यंपरमामृद्धिंमनसायद्यदिच्छति ॥ ७ ॥ तत्तदाप्नोत्यसन्दिग्धंविष्णोःसेवीविशेषतः ॥ नाधिं
प्राप्नोतिनव्याधिंनविषग्रहबन्धनम् ॥ ८ ॥ कृत्यास्पर्शभयंनापितोषितेमधुसूदने ॥ समस्तदोषनाशश्चसर्वदाचशुभाग्रहाः ॥ ९ ॥ देवानामप्य
धृष्योऽसौतोषितेचजनार्दने ॥ यःसर्वेषुचभूतेषुयथात्मनितथापरे ॥ १० ॥ उपवासादिनातेनतोषितोमधुसूदनः ॥ तोषितेतत्रजायन्तेनराःपूर्णमनो
रथाः ॥ ११ ॥ अरोगाःसुखिनोभोगभोक्तारोमुनिसत्तम ॥ तेषांचशत्रवोनैवनचरोगाभिचारिकम् ॥ १२ ॥ ग्रहरोगादिकंचैवपापकार्यंनजायते ॥
अव्याहतानिकृष्णस्यचक्रादीन्यायुधानिवै ॥ रक्षन्तिसकलापद्भ्योयेनविष्णुरुपासितः ॥ १३ ॥ श्रीदालभ्यउवाच ॥ अनाराधितगोविन्दायेनरादुःख
भागिनः ॥ तेषांदुःखाभिभूतानांयत्कर्त्तव्यंदयालुभिः ॥ १४ ॥ पश्यद्भिःसर्वभूतस्थंवासुदेवंसनातनम् ॥ समदृष्टिभिरप्यत्रतन्मेब्रूहिविशेषतः ॥ १५ ॥
श्रीपुलस्त्यउवाच ॥ तद्वक्ष्यामिमुनिश्रेष्ठसमाहितमनाःशृणु ॥ रोगदोषाशुभहरंविज्वरादिविनाशनम् ॥ १६ ॥ शिखायांश्रीधरंन्यस्यशिखाधः
श्रीकरंतथा ॥ हृषीकेशंतुकेशेषुमूर्ध्निनारायणंपरम् ॥ १७ ॥ ऊर्ध्वश्रोत्रेन्यसेद्विष्णुंललाटेजलशायिनम् ॥ विष्णुंवैभ्रूयुगेन्यस्यभ्रूमध्येहरिमेवच ॥
॥ १८ ॥ नरसिंहंनासिकाग्रेकर्णयोरर्णवेशयम् ॥ चक्षुषोःपुण्डरीकाक्षंतदधोभूधरंन्यसेत् ॥ १९ ॥ कपोलयोःकल्किनाथंवामनंकर्णमूलयोः ॥ शङ्खिनं
शङ्खयोर्न्यस्यगोविन्दंवदनेतथा ॥ २० ॥ मुकुन्दंदन्तपङ्क्तौतुजिह्वायांवाक्पतिंतथा ॥ रामंहनौतुविन्यस्यकण्ठेवैकुण्ठमेवच ॥ २१ ॥ बलघ्नंबाहु
मूलाधश्चांसयोःकंसघातिनम् ॥ अजंभुजद्वयेन्यस्यशार्ङ्गपाणिंकरद्वये ॥ २२ ॥ सङ्कर्षणंकराङ्गुष्ठेगोपमङ्गुलिपङ्क्तिषु ॥ वक्षस्यधोक्षजंन्यस्यश्रीवत्सं
तस्यमध्यतः ॥ २३ ॥ स्तनयोस्त्वनिरुद्धंचदामोदरमथोदरे ॥ पद्मनाभंतथानाभौनाभ्यधश्चापिकेशवम् ॥ २४ ॥ मेढ्रेधराधरंदेवंगुदेचैवगदाग्रजम् ॥
पीताम्बरधरंकट्यामूरुयुग्मेमधोर्द्विषम् ॥ २५ ॥ मुरद्विषंपिण्डकयोर्जानुयुग्मेजनार्दनम् ॥ फणीशंगुल्फयोर्न्यस्यक्रमयोश्चत्रिविक्रमम् ॥ २६ ॥ पादा
ङ्गुष्ठेश्रीपतिंचपादाधोधरणीधरम् ॥ रोमकूपेषुसर्वेषुविष्वक्सेनंन्यसेद्बुधः ॥ २७ ॥ मत्स्यंमांसेतुविन्यस्यकूर्मंमेदसिविन्यसेत् ॥ वाराहंतुवसामध्येसर्वा
स्थिषुतथाच्युतम् ॥ २८ ॥ द्विजप्रियंतुमज्जायांशुक्रेश्वेतपतिंतथा ॥ सर्वाङ्गेयज्ञपुरुषंपरमात्मानमात्मनि ॥ २९ ॥ एवंन्यासविधिंकृत्वासाक्षान्नारायणो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवेत् ॥ यावन्नव्याहरेत्किंचित्तावद्विष्णुमयःस्थितः ॥ ३० ॥ गृहीत्वातुसमूलाग्रान्कुशाञ्छुद्धान्समाहितः ॥ मार्जयेत्सर्वगात्राणिकुशाग्रैरिहशान्ति
कृत् ॥ ३१ ॥ विष्णुभक्तोविशेषेणरोगग्रहविषार्दिते ॥ विषार्त्तानांरोगिणांचकुर्याच्छान्तिमिमांशुभाम् ॥३२॥ जायतेतेनभोविप्रसर्वरोगप्रणाशनम् ॥
ॐनमःश्रीपरमार्थायपुरुषायमहात्मने ॥ ३३ ॥ अरूपबहुरूपायव्यापिनेपरमात्मने ॥ वाराहंनारसिंहंचवामनंचसुखप्रदम् ॥३४॥ ध्यात्वाकृत्वानमो
विष्णोर्नामान्यङ्गेषुविन्यसेत् ॥ निष्कल्मषायशुद्धायव्याधिपापहरायवै ॥ ३५ ॥ गोविन्दपद्मनाभायवासुदेवायभूभृते ॥ नमस्कृत्यप्रवक्ष्यामियत्त
त्सिध्यतुमेवचः ॥३६॥ त्रिविक्रमायरामायवैकुण्ठायनरायच ॥ श्रीवाराहनृसिंहायवामनायमहात्मने ॥३७॥ हयग्रीवायशुभ्रायहृषीकेशहराशुभम् ॥
परोपतापमहितंप्रयुक्तंचाभिचारिकम् ॥३८॥ गरस्पर्शमहारोगप्रयोगंजरयाजर ॥ नमोऽस्तुवासुदेवायनमःकृष्णायखड्गिने ॥३९ ॥ नमःपुष्करनेत्राय
केशवायादिचक्रिणे ॥ नमःकिंजल्कवर्णाग्र्यपीतनिर्मलवाससे ॥४०॥ महादेववपुःस्कन्धधृतचक्रायचक्रिणे ॥ दंष्ट्रोद्धृतक्षितितलत्रिमूर्तिपतयेनमः॥
॥४१॥ महायज्ञवराहायश्रीवल्लभनमोऽस्तुते ॥ तप्तहाटककेशान्तज्वलत्पावकलोचन ॥४२॥ वज्राधिकनखस्पर्शदिव्यसिंहनमोऽस्तुते ॥ कश्यपायाति
ह्रस्वायऋग्यजुःसामलक्षण ॥४३॥ तुभ्यंवामनरूपायक्रमतेगांनमोनमः ॥ वाराहाशेषदुःखानिसर्वपापफलानिच ॥४४॥ मर्दमर्दमहादंष्ट्रमर्दमर्दच
तत्फलम् ॥ नरसिंहकरालास्यदन्तप्रान्तनखोज्ज्वल॥४५॥भञ्क्ष्वभञ्क्ष्वनिनादेनदुःखान्यस्यार्त्तिनाशन॥ऋग्यजुःसामभिर्वाग्भिःकामरूपधरादि
धृत्॥४६॥ प्रशमंसर्वदुःखानिनयत्वस्यजनार्दन ॥ ऐकाहिकंद्व्याहिकंचतथात्रिदिवसज्वरम् ॥४७॥ चातुर्थिकंतथात्युग्रंतथावैसततज्वरम् ॥ दोषोत्थं
सन्निपातोत्थंतथैवागन्तुकज्वरम् ॥४८॥ शमंनयतुगोविन्दोभित्त्वाच्छित्त्वास्यवेदनाम् ॥ नेत्रदुःखंशिरोदुःखंदुःखंतूदरसंभवम् ॥४९॥ अनुच्छ्वासं
महाश्वासंपरितापंसवेपथुम् ॥ गुदघ्राणाङ्घ्रिरोगांश्चकुष्ठरोगंतथाक्षयम् ॥५०॥ कामलादींस्तथारोगान्प्रमेहादींश्चदारुणान् ॥ येवातप्रभवारोगालूता
विस्फोटकादयः ॥ ५१ ॥ तेसर्वेविलयंयान्तुवासुदेवापमार्जिताः ॥ विलयंयान्तुतेसर्वेविष्णोरुच्चारणेनवा ॥ ५२ ॥ क्षयंगच्छन्तुचाशेषास्ते
चक्राभिहताहरेः ॥ अच्युतानन्तगोविन्दनामोच्चारणभेषजात् ॥ ५३ ॥ नश्यन्तिसकलारोगाःसत्यंसत्यंवदाम्यहम् ॥ स्थावरंजङ्गमंयच्चकृत्रिमं
चापियद्विषम् ॥ ५४ ॥ दन्तोद्भवंनखोद्भूतमाकाशप्रभवंचयत् ॥ भूतादिप्रभवंयच्चविषमत्यन्तदुःसहम् ॥ ५५ ॥ शमंनयतुतत्सर्वंकीर्तितोऽस्य
जनार्दनः ॥ ग्रहान्प्रेतग्रहांश्चैवतथान्याञ्छाकिनीग्रहान् ॥ ५६ ॥ मुखमण्डलिकान्क्रूरान्रेवतींवृद्धिरेवतीम् ॥ वृद्धिकाख्यान्ग्रहांश्चोग्रांस्तथामातृ
ग्रहानपि ॥ ५७ ॥ बालस्यविष्णोश्चरितंहन्तुबालग्रहानपि ॥ वृद्धानांयेग्रहाःकेचिद्बालानांचापियेग्रहाः ॥ ५८ ॥ नृसिंहदर्शनादेवनश्यन्ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्क्षणादपि ॥ दंष्ट्राकरालवदनोनृसिंहोदैत्यभीषणः॥५९॥ तंदृष्ट्वातेग्रहाःसर्वेदूरंयान्तिविशेषतः ॥ श्रीनृसिंहमहासिंहज्वालामालोज्ज्वलानन ॥६०॥
ग्रहानशेषान्सर्वेशनुदस्वास्यविलोचन ॥ येरोगायेमहोत्पातायेद्विषोयेमहाग्रहाः ॥ ६१ ॥ यानिचक्रूरभूतानिग्रहपीडाश्चदारुणाः ॥ शस्त्रक्षतेषुये
रोगाज्वालगर्दभिकादयः ॥ ६२ ॥ विस्फोटकादयोयेचग्रहागात्रेषुसंस्थिताः ॥ त्रैलोक्यरक्षाकर्त्तस्त्वंदुष्टदानववारण ॥ ६३ ॥ सुदर्शनमहा
तेजश्छिन्धिछिन्धिमहाज्वरम् ॥ छिन्धिवातंचलूतांचच्छिन्धिघोरंमहाविषम् ॥ ६४ ॥ उद्दण्डामरशूलंचविषज्वालासगर्दभम् ॥ ॐह्रांह्रांहूं
हूंप्रधारेणकुठारेणजहिद्विषः ॥ ६५ ॥ ॐनमोभगवतेसुदर्शनायदुःखदारणविग्रह ॥ यानिचान्यानिदुष्टानिप्राणिपीडाकराणिवै ॥ ६६ ॥ तानि
सर्वाणिसर्वात्मापरमात्माजनार्दनः ॥ किंचिद्रूपंसमास्थायवासुदेवनमोऽस्तुते ॥ ६७ ॥ क्षिप्त्वासुदर्शनंचक्रंज्वालामालाविभीषणम् ॥
सर्वदुष्टोपशमनंकुरुदेववराच्युत ॥ ६८ ॥ सुदर्शनमहाचक्रगोविन्दस्यवरायुध ॥ तीक्ष्णधारमहावेगसूर्यकोटिसमद्युते ॥ ६९ ॥ सुदर्शन
महाज्वालच्छिन्धिच्छिन्धिमहारव ॥ सर्वदुःखानिरक्षांसिपापानिचविभीषण ॥ ७० ॥ दुरितंजहिचारोग्यंकुरुत्वंभोसुदर्शन ॥ प्राच्यांचैव
प्रतीच्यांचदक्षिणोत्तरतस्तथा ॥ ७१ ॥ रक्षांकरोतुविश्वात्मानरसिंहःस्वगर्जितैः ॥ भुव्यन्तरिक्षेचतथापृष्ठतःपार्श्वतोऽग्रतः ॥ ७२ ॥ रक्षांकरो
तुभगवान्बहुरूपीजनार्दनः ॥ यथाविष्णुमयंसर्वंसदेवासुरमानुषम् ॥ ७३ ॥ तेनसत्येनसकलंदुःखमस्यप्रणश्यतु ॥ यथायोगेश्वरोविष्णुःसर्व
देवेषुगीयते ॥ ७४ ॥ तेनसत्येनसकलंदुःखमस्यप्रणश्यतु ॥ परमात्मायथाविष्णुर्वेदाङ्गेषुचगीयते ॥ ७५ ॥ तेनसत्येनविश्वात्मासुखदो
ऽस्त्वस्यकेशवः ॥ शान्तिरस्तुशिवंचास्तुप्रणाशंयातुचासुखम् ॥७६॥ वासुदेवशरीरोत्थैःकुशैःसंमार्जितंमया ॥ अपामार्जितगोविन्दनेमोनारायस्तु
स्तथा ॥ ७७ ॥ तथापिसर्वदुःखानांप्रशमोवचनाद्धरेः ॥ शान्ताःसमस्तदोषास्तेग्रहाःसर्वेविषाणिच ॥ भूतानिचप्रशाम्यन्तिसंस्मृतेमधुसू
दने ॥ ७८ ॥ एतेकुशाविष्णुशरीरसंभवाजनार्दनोऽहंस्वयमेवचाग्रतः ॥ हतंमयादुःखमशेषमस्यवैस्वस्थोभवत्वेषवचोयथाहरेः ॥ ७९ ॥ शान्ति
रस्तुशिवंचास्तुप्रणश्यत्वसुखंचयत् ॥ यदस्यदुरितंकिंचित्क्षिप्तंतल्लवणाम्भसि ॥ ८० ॥ स्वास्थ्यमस्यसदैवास्तुहृषीकेशस्यकीर्तनात् ॥ यद्य
तोऽत्रागतंपापंतत्तुतत्रप्रगच्छतु ॥ ८१ ॥ एतद्रोगेषुपीडासुजन्तूनांहितमिच्छुभिः ॥ विष्णुभक्तैश्चकर्त्तव्यमपामार्जनकंपरम् ॥ ८२ ॥ अनेनसर्व
दुःखानिविलयंयान्त्यशेषतः ॥ सर्वपापविशुद्ध्यर्थंविष्णोश्चैवापमार्जनम् ॥ ८३ ॥ आर्द्रंशुष्कंलघुस्थूलंब्रह्महत्यादिकंतुयत् ॥ तत्सर्वंनश्यते
तूर्णंतमोवद्रविदर्शनात ॥ ८४ ॥ नश्यन्तिरोगादोषाश्चसिंहात्क्षुद्रमृगायथा ॥ ग्रहभूतपिशाचादिश्रवणादेवनश्यति ॥ ८५ ॥ द्रव्यार्थंलोभ

१' नर' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परस्मैनर्कर्त्तव्यंकदाचन ॥ कृतेऽपामार्जनेकिंचिन्नग्राह्यंहितकाम्यया ॥ ८६ ॥ निरपेक्षैःप्रकर्तव्यमादिमध्यान्तबोधकैः ॥ विष्णुभक्तैःसदाशान्तै
रन्यथाऽसिद्धिदंभवेत् ॥८७॥ अतुलेयंनृणांसिद्धिरियंरक्षापरानृणाम् ॥ भेषजंपरमंह्येतद्विष्णोर्यदपमार्जनम् ॥ ८८ ॥ महादेवउवाच ॥ उक्तंहिब्रह्मणा
पूर्वंपुलस्त्यायसुतायवै ॥ एतत्पुलस्त्यमुनिनादालभ्यायोदितंस्वयम् ॥ ८९ ॥ सर्वभूतहितार्थायदालभ्येनप्रकाशितम् ॥ त्रैलोक्येतदिदंविष्णोः
समाप्तंचापमार्जनम् ॥ ९० ॥ तवाग्रेकथितंदेवियतोभक्तासिमेसदा ॥ श्रुत्वातुसर्वंभक्त्याचरोगान्दोषान्व्यपोहति ॥ ९१ ॥ इतिश्रीपाद्मेमहापुराणे
पञ्चपञ्चा०उत्तर०उमापतिनारदसंवादेऽपामार्जनस्तोत्रंनामाष्टसप्ततितमोऽध्यायः ॥ ७८ ॥ महादेवउवाच ॥ अपामार्जनकंदिव्यंपरमाद्भुतमेवच ॥
पठितव्यंविशेषेणपुत्रकामार्थसिद्धये ॥१॥ एतत्स्तोत्रंपठेत्प्राज्ञःसर्वकामार्थसिद्धये ॥ एककालंद्विकालंवायेपठन्तिद्विजातयः ॥२॥ आयुश्चश्रीर्बलंतेषां
वृद्धिंयान्तिदिनेदिने ॥ ब्राह्मणोलभतेविद्यांक्षत्रियोराज्यमेववा ॥ ३ ॥ वैश्योधनसमृद्धिंचशूद्रोभक्तिंचविन्दति ॥ अन्यश्चलभतेभक्तिंपठनाच्छ्रवणा
ज्जपात् ॥ ४ ॥ सामवेदफलंतस्यजायतेनगनन्दिनि ॥ अखिलंपापसङ्घातंतत्क्षणादेवनश्यति ॥५॥ इतिज्ञात्वातुभोदेविपठितव्यंसमाहितैः ॥ पुत्रा
श्चैवतथालक्ष्मीःसंपूर्णाभवतिध्रुवम् ॥ ६ ॥ लिखित्वाभूर्जपत्रेतुयोधारयतिवैष्णवः ॥ इहलोकेसुखंभुक्त्वायातिविष्णोःपरंपदम् ॥ ७ ॥ पठित्वाश्लोक
मेकंतुतुलसीयःसमर्पयेत् ॥ सर्वतीर्थकृतंतेनतुलस्याःपूजनेकृते ॥ ८ ॥ एतत्स्तोत्रंतुपरमंवैष्णवंमुक्तिदायकम् ॥ पृथ्वीदानसमंपाठाद्विष्णुलोकंतु
गच्छति ॥ ९ ॥ जपेत्स्तोत्रंविशेषेणविष्णुलोकस्यवाञ्छया ॥ बालानांजीवनार्थायपठितव्यंसमाहितैः ॥ १० ॥ रोगग्रहाभिभूतानांबालानांशान्ति
कारकम् ॥ भूतग्रहविषंचैवपठनादेवनश्यति ॥ ११ ॥ कण्ठेतुलसिजांमालांधृत्वाविप्रोहियःपठेत् ॥ सचवैवैष्णवोज्ञेयोविष्णुलोकंसगच्छति ॥ १२ ॥
कण्ठेमालाधृतायेनशङ्खचक्रादिचिह्नितः ॥ वैष्णवःप्रोच्यतेविप्रःस्तोत्रंचैतत्पठन्सदा ॥ १३ ॥ इहलोकंपरित्यज्यविष्णुलोकंसगच्छति ॥ मोहमायाप
रित्यक्तोदम्भतृष्णाविवर्जितः ॥ १४ ॥ एतत्स्तोत्रंपठेद्दिव्यंपरंनिर्वाणमाप्नुयात् ॥ तेधन्याःसन्तिभूलोकेयेविप्रावैष्णवाःस्मृताः ॥ १५ ॥ स्वात्मावै
तारितस्तैस्तुसकुलंनात्रसंशयः ॥ तेवैधन्यतमालोकेनारायणपरायणाः ॥ तैर्भक्तिश्चसदाकार्यातेवैभागवतानराः ॥ १६ ॥ इतिश्रीपाद्मेमहापुराणेपञ्च
प०उत्तर०उमापतिनारदसंवादेऽपामार्जनमहिमानामैकोनाशीतितमोऽध्यायः ॥७९॥ श्रीपार्वत्युवाच ॥ अहोविष्णोश्चमाहात्म्यंवदविश्वेश्वरप्रभो॥
यन्माहात्म्यंपुनःश्रुत्वानभवेजायतेक्वचित् ॥ १ ॥ महादेवउवाच ॥ शृणुसुन्दरिवक्ष्यामिविष्णोर्माहात्म्यमुत्तमम् ॥ श्रुत्वातुलभतेपुण्यंह्यन्ते
मोक्षमवाप्नुयात् ॥ २ ॥ देवव्रतंमहाप्राज्ञंध्यानयोगपरायणम् ॥ आश्रयंसर्वशास्त्राणांयतेन्द्रियमकल्मषम् ॥ ३ ॥ अप्रधृष्यंमहाभागं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवैरपिसवासवैः ॥ सत्यसन्धंजितक्रोधंसमत्वेपरिनिष्ठितम् ॥४॥ नारायणैजगन्नाथेशरण्येभक्तवत्सले ॥ परांनिष्ठामनुप्राप्तंवाङ्मनःकायकर्मभिः ॥ ५ ॥ गुणानामाश्रयंशान्तंभीष्मंकुरुपितामहम् ॥ प्रणम्यशिरसाभूमौपप्रच्छेदंयुधिष्ठिरः ॥ ६ ॥ युधिष्ठिरउवाच ॥ केचिदाहुःपरंधर्मंकेचिदाहुः परंधनम् ॥ केचिद्दानंप्रशंसन्तिसमुदायंतथापरे ॥ ७ ॥ साङ्ख्यंकेचित्प्रशंसन्तियोगमन्येतथापरम् ॥ केचिज्ज्ञानंप्रशंसन्तिकेचिदाहुःपरंश्रुतम्॥ ॥ ८ ॥ सम्यग्ध्यानंपरंकेचित्केचिद्वैराग्यमुत्तमम् ॥ अग्निष्टोमादिकंकर्मतथाकेचित्परंविदुः ॥ ९ ॥ आत्मज्ञानंपरंकेचित्समलोष्टाश्मकाञ्चनाः ॥ यमांश्चनियमांश्चैवकेचित्प्रोचुर्मनीषिणः ॥१०॥ कारुण्यंचपरेकेचिदहिंसांचतपस्विनः ॥ शौचंकेचित्परंप्राहुःकेचिद्देवार्चनंनराः ॥११॥व्यामोहंचात्र गच्छन्तिव्यामुग्धाःपापकर्मभिः ॥ यदेतेषुपरंकृत्यमनुष्ठेयंमहात्मभिः ॥ वक्तुमर्हसिधर्मज्ञसर्वशास्त्रभृतांवर॥१२॥महादेवउवाच॥भूलोकेयाकथाजाता भैष्मीयौधिष्ठिरीसति॥तामहंसंप्रवक्ष्यामिलोकानांचहितायवै ॥ एतान्प्रश्नांस्तदाश्रुत्वाप्राहभीष्मोयुधिष्ठिरम्॥१३॥भीष्मउवाच॥श्रूयतामिदमत्यन्तं गूढंसंसारमोचनम्॥श्रोतव्यंयत्त्वयासम्यग्ज्ञातव्यंधर्मनन्दन ॥१४॥ अत्रैवोदाहरन्तीमंपुण्यंचैवपुरातनम्॥ पुण्डरीकस्यसंवादंमहर्षेर्नारदस्यच॥१५॥ ब्राह्मणःश्रुतिसंपन्नःपुण्डरीकोमहामतिः ॥ आश्रमेप्रथमेतिष्ठन्गुरूणांवशगःसदा॥१६॥जितेन्द्रियोजितक्रोधःसन्ध्योपासनतत्परः ॥ वेदवेदाङ्गनिपुणः शास्त्रेषुचविचक्षणः॥१७॥समिद्भिःसाधुहव्येनसायंप्रातर्हुतानलः ॥ ध्यात्वाजगत्पतिंविष्णुंसम्यगाराधयद्विभुम्॥१८॥तपःस्वाध्यायनिरतःसाक्षाद्ब्रह्म सुतोयथा ॥ उदकेन्धनपुष्पाद्यैरसकृत्पूजयन्गुरुम् ॥१९॥ मातापित्रोश्चशुश्रूषुर्भिक्षाहारीविमत्सरः ॥ ब्रह्मविद्यामधीयानःप्राणायामपरायणः ॥२०॥ तस्यसर्वात्मभूतस्यसंसारेनिःस्पृहस्यच ॥ महात्मनोबुद्धिरासीत्संसारार्णवतारिणी ॥ २१॥ मातरंपितरंचैवाभ्रातॄनथसुहृज्जनान् ॥ मित्राणिमातुलां श्चैवसखीन्सम्बन्धिबान्धवान् ॥२२॥धनधान्यसमृद्धंचग्रहंवंशक्रमागतम् ॥ क्षेत्राणिसुमहार्हाणिसर्वसस्योद्भवानिच॥२३॥परित्यज्यमहासत्त्वस्तृणा नीवमहासुखी ॥ विचचारमहींरम्यांशाकमूलफलाशनः ॥ २४ ॥ गङ्गांचयमुनांचैवगोमतीमथगण्डिकाम् ॥ शतद्रुंचपयोष्णींचसरयूंचसरस्व तीम् ॥२५॥ प्रयागंनर्मदांचैवशोणंचैवमहानदम् ॥ प्रभासंविन्ध्यतीर्थानिहिमवत्प्रभवाणिच ॥२६॥ आश्रमेषुचयानिस्युर्नैमिषपुष्करादिषु ॥ कुरु क्षेत्रेचयानिस्युस्तथागोवर्धनादिषु ॥ २७ ॥ अन्यानिसुमहातेजास्तीर्थानिसुसमाहितः ॥ विचचारमहायोगीयथाकालेयथाविधि ॥ २८ ॥ कदाचिदात्मवान्धीरःशालग्रामंतपोधनः ॥ पुण्डरीकोमहाभागःपूर्वकर्मवशानुगः ॥ २९ ॥ संसेव्यमानंमुनिभिस्तत्त्वविद्भिस्तपोधनैः ॥ मुनीनामा स्पदंरम्यंपुराणेष्वपिविश्रुतम् ॥ ३० ॥ भूषितंचैवचक्राद्यैश्चक्राङ्कितशिलातलम् ॥ रम्यंविविक्तंविस्तीर्णंसदाविष्णुप्रसादकम् ॥ ३१ ॥ किंचचक्राङ्कि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तास्तत्रप्राणिनःपुण्यदर्शनाः ॥ विचरन्तियथाकामंपुण्यतीर्थप्रदर्शिनः ॥ ३२ ॥ तस्मिन्क्षेत्रेमहापुण्येशालग्रामेमहामतिः ॥ स्नात्वादेवह्रदेतीर्थेसर
स्वत्यांचसुव्रतः ॥ ३३ ॥ जातिस्मर्यांचक्रकुण्डेचक्रनद्याश्रितेषुच ॥ तथान्यान्यपितीर्थानितस्मिन्नेवचचारसः ॥ ३४ ॥ ततःक्षेत्रप्रभावेणतीर्थानां
चैवतेजसा॥ मनःप्रसादमभजत्तस्मिन्नेवमहामनाः ॥३५॥ सोऽपितीर्थविशुद्धात्मापुण्डरीकस्तपोधनः ॥ तत्रैववसतिंचक्रेध्यानयोगपरायणः ॥३६॥
तत्रैवसिद्धिमाकाङ्क्षन्नाराध्यगरुडध्वजम् ॥ शास्त्रोक्तेनविधानेनभक्त्यापरमयापुनः॥३७॥ उवासचिरमेकाकीनिर्द्वन्द्वःसजितेन्द्रियः ॥ शाकमूलफल
हारःसंतुष्टःसमदर्शनः ॥३८॥ यमैश्चनियमैश्चैवतथैवासनबन्धनैः ॥ प्राणायामैश्चतीर्थैश्चप्रत्याहारैश्चसन्ततैः ॥३९॥ धारणाभिस्तथाध्यानैःसमाधि
भिरतन्द्रितः ॥ योगाभ्यासंसदासम्यक्चक्रेविगतकिल्बिषः ॥ ४० ॥ वैदिकैश्चाङ्गिकैश्चैवतथापौराणिकैरपि ॥ आराधयतिसर्वेशंततःशुद्धिमवापसः॥
॥ ४१ ॥ रागद्वेषविनिर्मुक्तःस्वधर्मइवरूपवान् ॥ आराधयामासदेवंतद्गतेनान्तरात्मना ॥ ४२ ॥ तुतोषभगवान्विष्णुःपुण्डरीकायतेक्षणः ॥
ततःकदाचित्तंदेशंनारदःपरमार्थवित ॥ ४३ ॥ जगामसुमहातेजाःसाक्षादादित्यसन्निभः ॥ तंद्रष्टुकामोभगवान्पुण्डरीकंतपोनिधिम् ॥ ४४ ॥
विष्णुभक्तिपरीतात्मावैष्णवानांहितेरतः ॥ सदृष्ट्वानारदंप्राप्तंतेजोमण्डलमण्डितम् ॥ ४५ ॥ महामतिर्महोदारःसर्ववेदैकभाजनम् ॥
प्राञ्जलिःप्रणतोभूत्वाप्रहृष्टेनान्तरात्मना ॥ ४६ ॥ अर्घंदत्त्वाविधानेनप्रणाममकरोत्पुनः ॥ कोऽयमत्यद्भुताकारस्तेजस्वीहृद्यवेषधृत् ॥ ४७ ॥
आतोद्यहस्तःसुमुखोजयमण्डलमण्डितः ॥ विवस्वानथवावह्निरिन्द्रोवरुणएववा ॥ ४८ ॥ इतिसंचिन्तयन्स्थित्वाजगादपरमद्युतिम् ॥
॥ ४९ ॥ पुण्डरीकउवाच ॥ कोभवानिहसंप्राप्तःकुतोवापरमद्युतिः ॥ त्वद्दर्शनंहिभगवन्प्रायेणभुविदुर्लभम् ॥ ५० ॥ नैवदृष्टः
पुमान्कोऽपिमयातवसमःप्रभो ॥ वक्तुमर्हस्यशेषेणयत्प्रदिष्टंमयानघ ॥ ५१ ॥ नारदउवाच ॥ नारदोऽहमनुप्राप्तस्त्वद्दर्शनकुतूहलात् ॥ दुर्दर्शोभगव
द्भक्तस्त्वादृशःसततंद्विज ॥५२॥ स्मृतःसंतोषितोवापिपूजितोवाद्विजोत्तम ॥ पुनातिभगवद्भक्तश्चाण्डालोऽपियदृच्छया ॥५३॥ दासोऽहंवासुदेवस्य
देवदेवस्यशार्ङ्गिणः॥ शङ्खचक्रगदापाणेस्त्रैलोक्यस्यैकचक्षुषः॥५४॥इत्युक्तोनारदेनासौभक्तिपर्याकुलात्मना ॥ प्रोवाचमधुरंविप्रंतद्दर्शनसुविस्मितः ॥
॥५५॥ पुण्डरीकउवाच ॥ धन्योऽहंदेहिनांमध्येसुपूज्योऽहंसुरैरपि ॥ कृतार्थाःपितरोमेऽद्यसम्प्राप्तंजन्मनःफलम् ॥ ५६ ॥ अनुगृह्णीष्वदेवर्षेत्वद्भक्तस्य
विशेषतः ॥ तंकरिष्याम्यहंविद्वन्भ्राम्यमाणःस्वकर्मभिः ॥५७॥ कर्तव्यंपरमंगुह्यमुपदेष्टुंत्वमर्हसि ॥ त्वंगतिःसर्वभूतानांवैष्णवानांविशेषतः ॥ ५८ ॥
नारदउवाच ॥ अनेकानीहशास्त्राणिकर्माणिचतथाद्विज ॥ धर्मवृन्दंबहुविधंतथैवभुविमानव ॥ ५९ ॥ वैलक्षण्यंचजगतस्तस्मादेवद्विजोत्तम ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 अन्यथासर्वसत्त्वानांसुखंवादुःखमेवच ॥ ६० ॥ विज्ञानमात्रंक्षणिकंनिरात्मकमिदंजगत् ॥ इतिकैश्चित्परिज्ञातंबाह्यार्थनिरपेक्षकम् ॥६१॥ अव्यक्ता
जायतेनित्यंनित्यान्नित्यमिदंजगत् ॥ इत्येवंप्राहुरपरेतत्रैवलयमेतिच ॥ ६२ ॥ आत्मानोबहवःप्रोक्तानित्याःसर्वगतास्तथा ॥ अन्यमतिमतांश्रेष्ठा
 स्तत्त्वालोकनतत्पराः ॥ ६३ ॥ यावच्छरीरमात्मानंप्रतिपन्नास्तथापरे ॥ हस्तिकीटादिदेहेऽपिमहान्तमण्डमेवच ॥ ६४ ॥ यथाऽद्यजगतोवृत्तिस्तथा
कालान्तरेष्वपि ॥ प्रवाहोनित्यमेवैषकःकर्त्तेतिचकेचन ॥ ६५ ॥ यद्यत्प्रत्यक्षविषयंतस्मादन्यन्नविद्यते ॥ कुतःस्वर्गादयःसन्तीत्यन्येवि
जितमानसाः ॥ ६६ ॥ निरीश्वरमिदंप्राहुःसेश्वरंचतथापरे ॥ अत्यन्तभिन्नमतयःपरमार्थपराङ्मुखाः ॥ ६७ ॥ एवमन्येऽपिकुहकायथा
मतियथाश्रुतम् ॥ वदन्तिविविधैर्भेदैःस्वयुक्तिस्थितिकारकाः ॥ ६८ ॥ तर्केष्ववहितोभूत्वाकथयामितपोधन ॥ परमार्थमिमंपुण्यंघोरं
संसारनाशनम् ॥ ६९ ॥ तन्मूलमनुजानन्तिततोदेवादयोनराः ॥ प्रमाणेनोपलभ्यन्तेनप्रमाणंविमोहितैः ॥ ७० ॥ अनागतमतीतंचविप्र
कृष्टमतीवयत् ॥ नगृहीतंयथाशक्त्यावर्त्तमानार्थनिष्ठितम् ॥ ७१ ॥ आगमोमुनिभिःप्रोक्तःपूर्वरूपक्रमागतः ॥ प्रमाणंसतुविज्ञेयःपरमार्थ
प्रसाधकः ॥ ७२ ॥ यदभ्यासबलाज्ज्ञानंरागद्वेषमलापहम् ॥ उत्पद्यतेद्विजश्रेष्ठसोऽयमागमसंज्ञकः ॥ ७३ ॥ फलंकर्मचयत्तत्त्वंविज्ञानंदर्शनं
विभुम् ॥ जात्यादिकल्पनाहीनंद्वितीयागमलक्षणम् ॥ ७४ ॥ आत्मसंवेदनंनित्यंसनातनमतीन्द्रियम् ॥ चिन्मात्रममृतंज्ञेयमनन्तमजमव्य
यम् ॥ ७५ ॥ व्यक्ताव्यक्तस्वरूपेणव्यक्तस्थितमनञ्जनम् ॥ व्याताविष्णुरितिख्यातंख्यातभिन्नमवस्थितम् ॥ ७६ ॥ योगिध्येयमवि
ज्ञेयेपरमार्थपराङ्मुखैः ॥ लक्ष्यतेबुद्धिभिर्भिन्नमपिभिन्नंनचात्मनि ॥ ७७ ॥ शृणुष्वावहितस्तातकथयामितवानघ ॥ यत्प्रोक्तंब्रह्मणापूर्वं
पृच्छतोममसुव्रत ॥ ७८ ॥ कदाचिद्ब्रह्मलोकस्थंब्रह्माणंचपितामहम् ॥ प्रणिपत्ययथान्यायमपृच्छमजमव्ययम् ॥ ७९ ॥ किमुज्ञानंपरं
प्रोक्तंकश्चयोगःपरोमतः ॥ एतन्मेतत्त्वतोब्रह्मन्समाचक्ष्वपितामह ॥ ८० ॥ ब्रह्मोवाच ॥ शृणुष्वावहितस्तातज्ञानयोगमनुत्तमम् ॥ अल्प
ग्रन्थंप्रभूतार्थमदुःखोपासनक्रियम् ॥ ८१ ॥ यःपरस्परयाप्रोक्तःपुरुषःपञ्चविंशकः ॥ सएवसर्वभूतात्मातेनइत्यभिधीयत ॥ ८२ ॥ नारायणो
जगद्धामपरमात्मासनातनः ॥ जगतःसृष्टिसंहारपरिपालनतत्परः ॥ ८३ ॥ त्रयाणामात्मनांचैकोदेवदेवःसनातनः ॥ आराध्यःसर्वदाब्रह्मन्पुरुषेण
हितैषिणा ॥ ८४ ॥ निस्स्पृहानित्यसन्तुष्टाज्ञानिनस्तेजितेन्द्रियाः ॥ निर्ममानिरहङ्काराराग्द्वेषविवर्जिताः ॥ ८५ ॥ अक्षयंयान्तितेशान्तास्स
र्वसङ्गविवर्जिताः ॥ ध्यानयोगपराब्रह्मंस्तेपश्यन्तिजगत्पतिम् ॥ ८६ ॥ यथाजगदवस्थानंयथाकालान्तरेपुनः ॥ भूतंभव्यंभविष्यंचविप्रकृष्टं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथैवच ॥ ८७ ॥ स्थूलंसूक्ष्मंतथाचान्यत्पश्यन्तिज्ञानचक्षुषा ॥ तच्चित्तास्तद्गतप्राणानारायणपरायणाः ॥८८॥ अन्यथामन्दबुद्धीनांप्रतिभातिदुरा
त्मनाम् ॥ कुतर्कज्ञानदुष्टानांविभक्तेन्द्रियवादिनाम् ॥ ८९ ॥ नारदउवाच ॥ श्रूयतामन्यदपिवैकथ्यमानंमयानघ ॥ ब्रह्मणैवपुराप्रोक्तंजगतः
कारणात्मना ॥ ९० ॥ देवानामिन्द्रमुख्यानामृषीणांचैवसुव्रत ॥ हितानिकथयामासपृच्छतांकमलासनः ॥ ९१ ॥ ब्रह्मोवाच ॥ नारायण
परोधर्मस्तथालोकाश्चशाश्वताः ॥ नारायणपरायज्ञाःशास्त्राणिविविधानिच ॥ ९२ ॥ वेदाःसाङ्गास्तथाचान्येविष्णुर्विश्वेश्वरोहरिः ॥ पृथि
व्यादीनिविबुधाःपञ्चभूतानिसोऽव्ययः ॥ ९३ ॥ सर्वंविष्णुमयंज्ञेयंविबुधैःसकलंजगत् ॥ तथापिमानुषाःपापानजानन्तिविमोहिताः ॥ ९४ ॥
तस्यैवमाययाव्याप्तंचराचरमिदंजगत् ॥ तन्मनास्तद्गतप्राणोजानातिपरमार्थवित् ॥ ९५ ॥ ईश्वरःसर्वभूतानांविष्णुस्त्रैलोक्यपालकः ॥
तस्मिन्नेतज्जगत्सर्वंतिष्ठतिप्रभवत्यपि ॥९६॥ जगत्संहरतेरुद्रःपालनेविष्णुरुच्यते ॥ उत्पत्तौचाहमेवात्रतथान्येलोकपालकाः ॥ ९७ ॥
सर्वाधारोनिराधारःसकलोनिष्कलस्तथा ॥ अणुर्महांस्तथाप्यन्यत्तस्माच्चपरतःपरः ॥ ९८ ॥ तमेवशरणंयातसर्वसंहारकारकम् ॥ सपिता
जनितास्माकंकीर्तितोमधुसूदनः ॥ ९९ ॥ एवमुक्ताःसुराःसर्वेब्रह्मणापद्मयोनिना ॥ प्रणेमुःसर्वलोकेशंदेवंविष्णुंजनार्दनम् ॥ १०० ॥ तस्मा
त्त्वमपिविप्रर्षेनारायणपरोभव ॥ तदन्यःकोमहोदारःप्रार्थितंदातुमर्हति ॥ १ ॥ पितरंमातरंचैवतमेवपुरुषोत्तमम् ॥ परिगृह्णीष्वलोकेशंदेवदेवंजग
त्पतिम् ॥ २ ॥ अग्निकार्येणभैक्षेणतपसाध्ययनेनवै ॥ तोषयेद्देवदेवेशंगुरुंनित्यमतन्द्रितः ॥ ३ ॥ स्वर्गेऽक्षयंतथाभोगमनुष्ठेयंतथैवच ॥ परिगृह्णीष्व
विप्रर्षेतमेवपुरुषोत्तमम् ॥४॥ किंतैस्तुमन्त्रैर्बहुभिःकिंतैस्तुबहुभिर्व्रतैः ॥ ॐनमोनारायणायेतिमन्त्रःसर्वार्थसाधकः ॥ ५ ॥ चीरवासाजटीविप्रदण्डीमु
ण्डितएववा ॥ विभूषितोवाविप्रेन्द्रनलिङ्गंधर्मकारणम् ॥६॥ येनृशंसादुरात्मानःपापाचारपराःसदा ॥ तेऽपियान्तिपरंस्थानंनारायणपरायणाः ॥७॥
लिप्यन्तेनचपापौघैर्वैष्णवावीतकिल्बिषाः ॥ पुनन्तिसकलंलोकमहिंसाजितमानसाः ॥ ८ ॥ क्षत्रबन्धुरितिख्यातोराजाप्राणिविहिंसकः ॥
प्राप्तवान्परमंधामवैष्णवंकेशवाश्रयात् ॥ ९ ॥ अम्बरीषोमहासत्त्वोराजापरमतत्त्ववित् ॥ हृषीकेशंसमाराध्यवैष्णवंपदमाप्तवान् ॥
॥ ११० ॥ अन्येब्रह्मर्षयःशान्ताबहवःसंशितव्रताः ॥ ध्यात्वाचपरमात्मानंसंसिद्धिंपरमांगताः ॥ ११ ॥ प्रह्लादःपरमाह्लादःपुरानारायणं
हरिम् ॥ सेविताऽभ्यर्चिताध्यातातेनैवपरिरक्षितः ॥ १२ ॥ भरतोनामतेजस्वीराजापरमधार्मिकः ॥ उपास्यैनंचिरंकालंपरांमुक्तिमवा
प्तवान् ॥ १३ ॥ ब्रह्मचारीगृहस्थोवावानप्रस्थोऽथभिक्षुकः ॥ केशवाराधनंहित्वानैवयातिपरांगतिम् ॥ १४ ॥ जन्मान्तरसहस्रेषुयस्यस्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्मतिरीदृशी ॥ दासोऽहंविष्णुभक्तानामितिसर्वार्थसाधकः ॥ १५ ॥ सयातिविष्णुसालोक्यंपुरुषोनात्रसंशयः ॥ किंपुनस्तद्गतप्राणाःपुरुषाःसंशित
व्रताः ॥ १६ ॥ अनन्यमानसैर्नित्यंध्यातव्यस्तत्त्वचिन्तकैः ॥ नारायणोजगद्व्यापीपरमात्मासनातनः ॥ १७ ॥ भीष्मउवाच ॥ इत्येवमुक्त्वा
देवर्षिस्तत्रैवान्तरधीयत ॥ परोपकारनिरतोनारदःपरमार्थवित् ॥ १८ ॥ पुण्डरीकोऽपिधर्मात्मानारायणपरायणः ॥ ॐनमोनारायणायेति
मन्त्रमष्टाक्षरंजपन् ॥ १९ ॥ प्रसीदममविश्वात्मन्नितिवाचंवदन्सदा ॥ हृत्पुण्डरीकेगोविन्दंप्रतिष्ठाप्यामृतात्मकम् ॥ १२० ॥ तपस्वीविमले
सौम्येशालग्रामेतपोधनः ॥ उवासचिरमेकाकीनिर्द्वन्द्वोनिष्परिग्रहः ॥ २१ ॥ स्वप्नेऽपिकेशवान्नान्यत्पश्यतीतिमहामतिः ॥ निद्रापिनैव
तस्यासीत्पुरुषार्थविरोधिनी ॥ २२ ॥ तपसाब्रह्मचर्येणशौचेनचविशेषतः ॥ जन्मजन्मान्तरारूढसंस्कारेचयथातथा ॥ २३ ॥
प्रसादाद्देवदेवस्यसर्वलोकस्यसाक्षिणः ॥ अवापपरमांसिद्धिंवैष्णवींवीतकिल्बिषः ॥ २४ ॥ शङ्खचक्रगदापाणिंपीतवाससमच्युतम् ॥
श्यामलंपुण्डरीकाक्षंसददर्शसदाकृतिम् ॥ २५ ॥ सिंहाव्याघ्रास्तथाचान्येमृगाःप्राणिविहिंसकाः ॥ विरोधंसहजंहित्वासमेतास्तस्यसंनिधौ ॥
॥ २६ ॥ विचरन्तियथाकामंप्रसन्नेन्द्रियवृत्तयः ॥ परस्परहितंरम्यंसंप्राप्तंपाण्डुनन्दन ॥ २७ ॥ तथाप्रसन्नंसलिलंसरसांसरितामपि ॥
ऋतवःसुप्रसन्नाश्चविमलेन्द्रियसंयुताः ॥ २८ ॥ मारुताश्चसुखस्पर्शावृक्षाःपुष्पफलान्विताः ॥ आनुकूल्यंययुःसर्वेपदार्थास्तस्यधीमतः ॥ २९ ॥
प्रसन्नमभवत्तस्मैप्रसन्नंसचराचरम् ॥ प्रसन्नेदेवदेवेशेगोविन्देभक्तवत्सले ॥ १३० ॥ ततःकदाचिद्भगवान्पुण्डरीकस्यधीमतः ॥ आवि
रासीज्जगन्नाथःपुण्डरीकायतेक्षणः ॥ ३१ ॥ शङ्खचक्रगदापाणिःपीतवासाःसमुज्ज्वलः ॥ पुण्डरीकविशालाक्षश्चन्द्रबिम्बनिभाननः ॥३२॥
कङ्कणीकुण्डलीहारीकेयूरीकटिसूत्रवान् ॥ श्रीवत्साङ्कःपीतवासाःकौस्तुभेनविभूषितः ॥ ३३ ॥ वनमालापरीताङ्गःस्फुरन्मुकुटकुण्डलः ॥
स्फुरताब्रह्मसूत्रेणमुक्तादामविलम्बिना॥३४॥विराजमानोदेवेशश्चामरव्यजनादिभिः ॥ देवैःसिद्धैःसदेवेन्द्रैर्गन्धर्वैर्मुनिभिर्वरैः ॥३५॥ यक्षैर्नागवरैश्चैव
सेव्यमानोऽप्सरोगणैः ॥ तंदृष्ट्वादेवदेवेशंपुण्डरीकोऽनघःस्वयम् ॥ ३६ ॥ ततोबुद्ध्वामहात्मानंतुष्टावचजनार्दनम् ॥ प्राञ्जलिःप्रणतोभूत्वाप्रहृष्टेना
न्तरात्मना ॥ ३७ ॥ पुण्डरीकउवाच ॥ नमोऽस्तुविष्णवेतुभ्यंसर्वलोकैकचक्षुषे ॥ निरञ्जनायनित्यायनिर्गुणायमहात्मने ॥ ३८ ॥ त्वमीशः
सर्वभूतानांतथैवचनिरीश्वरः ॥ तथाभयार्तिनाशायगोविन्दगरुडध्वज ॥ ३९ ॥ अनुग्रहेणभूतानामनेकाकारधारिणे ॥ त्वयिसर्वमिदं
प्रादुस्त्वन्मयंचैवकेवलम् ॥ १४० ॥ त्वमस्माज्जगतोऽभिन्नोनिर्मितंचजगत्त्वया ॥ नमोऽस्तुनाभिप्रसवनलिनायनमोनमः ॥४१ ॥ नमःसमस्तवेदा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्तविश्रुतात्मविभूतये ॥ त्वमेवसर्वदेवेशकारणंकैटभार्दन ॥४२॥ प्रसीदहृदयावासशङ्खचक्रगदाधर ॥ नमःसमस्तभूतानामादिभूतायभूभृते ॥४३॥
अनेकरूपरूपायविष्णवेप्रभविष्णवे ॥ यस्यब्रह्मादयोदेवानविदन्तिसुरेश्वराः ॥४४॥ महिमानंतपोमेयंतस्मैतुभ्यंनमाम्यहम् ॥ वाचामगोचरोयस्य
महिमातवनाप्यते ॥ ४५ ॥ जात्यादिभिरसंस्पृष्टःसदाध्येयोऽसितत्त्वतः ॥ तथाविभेदरूपेणभक्तानामनुकम्पया ॥ मत्स्यकूर्मादिरूपेणदृश्यसे
पुरुषोत्तम ॥ ४६ ॥ भीष्मउवाच ॥ पुण्डरीकोजगन्नाथंस्तुत्वैवंपुरुषोत्तमम् ॥ तमेवालोकयद्धीरचिरप्रार्थितदर्शनम् ॥ ४७ ॥ तमाहभगवान्विष्णुः
पद्मनाभस्त्रिविक्रमः ॥ पुण्डरीकंमहाभागंतथागम्भीरयागिरा ॥ ४८ ॥ श्रीभगवानुवाच ॥ प्रीतोऽस्मिवत्सभद्रंतेपुण्डरीकमहामते ॥ वरंवृणीष्व
दास्यामियत्तेमनसिवर्त्तते ॥ ४९ ॥ एतच्छ्रुत्वातुवचनंदेवदेवस्यभाषितम् ॥ एवंविज्ञापयामासपुण्डरीकोमहामतिः ॥ १५० ॥ पुण्डरीकउवाच ॥
क्वाहमत्यन्तदुर्बुद्धिःक्वभवन्तोहितैषिणः ॥ यद्धितंममदेवेशतदाज्ञापयमाधव ॥५१॥ एवमुक्तःसभगवान्सुप्रीतश्चततोऽब्रवीत् ॥ पुण्डरीकंमहाभागंकृता
ञ्जलिमुपस्थितम् ॥ ५२ ॥ आगच्छकुशलंतेऽस्तुमयैवसहसुव्रत ॥ उपकारीचनित्यात्मामयात्वंसर्वदासह ॥ ५३ ॥ भीष्मउवाच ॥ एवमुक्तव
तिप्रीत्याश्रीधरेभक्तवत्सले ॥ दिविदुन्दुभयोनेदुःपुष्पवर्षंपपातह ॥५४॥ ब्रह्मादयस्तथादेवाःसाधुसाध्वितिचाब्रुवन् ॥ जगुःसिद्धाश्चगन्धर्वाःकिन्नराश्च
विशेषतः ॥ ५५ ॥ तत्रैवतमुपादायदेवदेवोजगत्पतिः ॥ जगामगरुडारूढःसर्वलोकनमस्कृतः ॥५६॥ तस्मात्त्वमपिराजेन्द्रविष्णुभक्तिसमन्वितः ॥
तच्चित्तस्तद्गतप्राणस्तद्भक्तानांहितेरतः ॥ ५७ ॥ अर्चयित्वायथायोग्यंभजस्वपुरुषोत्तमम् ॥ शृणुष्वतत्कथांपुण्यांसर्वपापप्रणाशिनीम् ॥
॥ ५८ ॥ येनोपायेनराजेन्द्रविष्णुभक्तिसमन्वितः ॥ प्रीतोभवतिविश्वात्मातत्कुरुष्वसुविस्तरम् ॥ ५९ ॥ अश्वमेधशतैरिष्ट्वावाजपेयशतैरपि ॥ प्राप्नुव
न्तिनरानैवनारायणपराङ्मुखाः ॥१६०॥ सकृदुच्चरितंयेनहरिरित्यक्षरद्वयम् ॥ बद्धःपरिकरस्तेनमोक्षायगमनंप्रति ॥६१॥ लाभस्तेषांजयस्तेषांकुतस्तेषां
पराजयः ॥ येषामिन्दीवरश्यामोहृदयस्थोजनार्दनः ॥६२॥ यइदंशृणुयान्नित्यंपठेद्वापिसमाहितः ॥ सर्वपापविनिर्मुक्तोविष्णुलोकंसगच्छति ॥६३॥
ईश्वरउवाच ॥ एतद्वैनाममाहात्म्यंश्रुत्वावैनगनन्दिनि ॥ धर्मार्थकाममोक्षास्तुभवन्तिचनसंशयः ॥ ६४ ॥ शुक्लेकुलेऽवतीर्णोयोब्राह्मणोवेदत
त्परः ॥ वैष्णवोविष्णुरूपोऽसौनान्योविप्रस्तुकर्हिचित् ॥६५॥ मुखेनामोच्चरन्विष्णोर्हृदयेध्यानतत्परः ॥ शङ्खचक्रधरोविद्वान्मालांतुलसिजांदधत् ॥६६॥
जीवन्मुक्तःसविज्ञेयोभुक्त्वाभोगांस्त्वनेकशः ॥ एकविंशतिकुलैःसार्धंविष्णुलोकेसमोदते ॥ ६७ ॥ पुण्डरीकोयथाशक्त्यामुक्तोह्यत्रनसंशयः ॥ भक्ति
भावेनगोविन्दस्तुष्टिंप्राप्नोतिशाश्वतीम् ॥६८॥ कलौवैहरिगीतंतुस्वगृहेवाविशेषतः ॥ सामगानसमंप्रोक्तंदेवार्चनसमाधिषु ॥१६९॥ इतिश्रीपाद्मेमहा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुराणेपद्मपञ्चा०उत्तर ० उमामहेश्वरसंवादेविष्णुमहिमानामाशीतितमोऽध्यायः ॥ ८० ॥ पार्वत्युवाच ॥ गङ्गायाश्चैवमाहात्म्यंपुनर्वदमहामते ॥
यच्छ्रुत्वामुनयःसर्वेवीतरागाःपुनःपुनः ॥ १ ॥ माहात्म्यंकीदृशंचैवतस्याःसर्वेश्वरप्रभो ॥ उत्पत्तिश्चश्रुतापूर्वंमहिमानश्रुतोमया ॥ त्वमाद्यःसर्व
भूतानांत्वंदेवश्चसनातनः ॥ २ ॥ महादेवउवाच ॥ बृहस्पतिसमंबुद्ध्याशक्रतुल्यपराक्रमम् ॥ शरतल्पगतंभीष्ममृषयोद्रष्टुमाययुः ॥ ३ ॥ अत्रिर्व
सिष्ठश्चभृगुःपुलस्त्यःपुलहःक्रतुः ॥ अङ्गिरागोतमोऽगस्त्यःसुमतिस्त्वायुरात्मवान् ॥ ४ ॥ विश्वामित्रःस्थूलशिराःसर्वज्ञःप्रमथाधिपः ॥ रैभ्योबृहस्प
तिर्व्यासःपावनःकश्यपोध्रुवः ॥ ५ ॥ दुर्वासाजमदग्निश्चमार्कण्डेयोऽथगालवः ॥ उशनाश्चभरद्वाजःक्रतुरास्तीकएवच ॥ ६ ॥ स्थूलाक्षःसर्व
लोकाक्षःकण्वोमेधातिथिःकुशः ॥ नारदःपर्वतश्चैवसुधन्वाच्यवनोद्विजः ॥ ७ ॥ मतिभूर्भुवनोधौम्यःशतानन्दोऽकृतव्रणः ॥ जामदग्न्योऽथरामश्च
ऋचीकश्चैवमादयः ॥ ८ ॥ तान्प्रणम्ययथान्यायंधर्मपुत्रःसहानुजः ॥ पूजयामासविधिवज्जगत्पूज्यान्सुतेजसः ॥ ९ ॥ तेपूजितामहात्मानःसुखासीना
स्तपोधनाः ॥ भीष्माश्रिताःकथाश्चक्रुर्दिव्यधर्माश्रितास्तथा ॥ १० ॥ कथान्तेतुततस्तेषामृषीणांभावितात्मनाम् ॥ प्रणम्यशिरसाभीष्मंपप्रच्छेदं
युधिष्ठिरः ॥ ११ ॥ युधिष्ठिरउवाच ॥ केदेशास्तुमहापुण्याःकेशैलाःकेऽपिचाश्रमाः ॥ सेव्याधर्मार्थिभिर्नित्यंतन्मेब्रूहिपितामह ॥ १२ ॥ भीष्मउवाच ॥
अत्रैवोदाहरन्तीममितिहासंनरोत्तम ॥ शिलोञ्छवृत्तेःसंवादंसिद्धस्यचयुधिष्ठिर ॥ १३ ॥ कश्चित्सिद्धःपरिक्रम्यसमस्तांपृथिवीमिमाम् ॥ उञ्छवृत्तेःशिबेराज
न्गृहंप्राप्तोमहात्मनः ॥ १४ ॥ आत्मविद्यासुतत्त्वज्ञःसर्वदासजितेन्द्रियः ॥ रागद्वेषपरित्यक्तःकुशलोज्ञानकर्मसु ॥ १५ ॥ वैष्णवेषुसदाश्रेष्ठोविष्णुधर्म
परायणः ॥ अनिन्दकोवैष्णवानांसदाधर्मपरायणः ॥ १६ ॥ योगाभ्यासरतोनित्यंशङ्खचक्रविधारकः ॥ त्रिकालपूजातत्त्वज्ञःश्रीकण्ठेऽनुरतः
सदा ॥ १७ ॥ वेदविद्यासुनिपुणोधर्माधर्मविचारकः ॥ वेदपाठव्रतोनित्यंनित्यंचातिथिपूजकः ॥ १८ ॥ सतीर्थमतियुक्तस्तुशिलोञ्छेषुस्थितःसदा ॥ चतु
र्वेदेषुयद्ध्यानंगीतंयद्यत्स्वयम्भुवा ॥ १९ ॥ तत्सर्वंसचजानातिद्विजोविष्णुस्वरूपधृत् ॥ नानाधर्मार्थविशदोह्यव्ययेष्टमतिःसदा ॥ २० ॥ एकस्मिन्नेव
कालेतुगतोऽसौवैशिबेर्गृहम् ॥ तंदृष्ट्वाविधिवच्चैवकृत्वातिथ्यंमहामनाः ॥ २१ ॥ शिबिःपप्रच्छतंसिद्धंदेशानांहितकारणम् ॥ २२ ॥ उञ्छवृत्तिरुवाच ॥
केदेशाःकेजनपदाःकेशैलाःकेऽपिचाश्रमाः ॥ पुण्याद्विजवरप्रीत्यामह्यंनिर्देष्टुमर्हसि ॥ २३ ॥ सिद्धउवाच ॥ तेदेशास्तेजनपदास्तेशैलास्तेऽपि
चाश्रमाः ॥ पुण्यास्त्रिपथगायेषांमध्येनित्यंसरिद्वरा ॥ २४ ॥ तपसाब्रह्मचर्येणयज्ञैस्त्यागेनवापुनः ॥ गतिंतांनलभेज्जन्तुर्गङ्गांसंसेव्ययांलभेत् ॥
॥ २५ ॥ स्नातानांतत्रपयसिगाङ्गेयेनियतात्मनाम् ॥ तुष्टिर्भवतियापुंसांनसाक्रतुशतैरपि ॥ २६ ॥ अपहत्यतमस्तीव्रंयथाभात्युदयेरविः ॥ तथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पहृत्यपाप्मानंभातिगङ्गाजलाप्लुतः ॥ २७ ॥ अग्निंप्राप्ययथाविप्रतूलराशिर्विनश्यति ॥ तथागङ्गावगाहश्चसर्वंपापंव्यपोहति ॥ २८॥
यस्तुसूर्यांशुसंतप्तंगाङ्गेयंसलिलंपिबेत् ॥ सद्योनीहारनिर्मुक्तःपावकाद्धिविशिष्यते ॥ २९ ॥ चान्द्रायणसहस्रंतुचरेद्योनियतःपुमान् ॥ संप्लुत
श्चापिगङ्गायांयोनरःसविशिष्यते ॥ ३० ॥ लम्बेताधःशिरायस्तुवर्षाणामयुतंनरः ॥ मासमेकंतुगङ्गाम्भःसेवतेयोनरोत्तमः ॥ ३१ ॥ ब्रह्महत्या
विनिर्मुक्तोयातिविष्णोरनामयम् ॥ इयंवेणीसमापुण्यापवित्रापापनाशिनी ॥ ३२ ॥ यस्याःस्मरणमात्रेणबालहामुच्यतेक्षणात् ॥ सप्रयागस्तीर्थ
राजोवैष्णवानांहिदुर्लभः ॥ ३३ ॥ स्नात्वायत्रनरश्रेष्ठवैकुण्ठंसत्वरंव्रजेत् ॥ प्रियाप्रियेनजानातिधर्माधर्मौनविन्दति ॥ ३४ ॥ स्नात्वाचैवतुगङ्गायां
महापापात्प्रमुच्यते ॥ ३५ ॥ गङ्गागङ्गेतियोब्रूयाद्योजनानांशतैरपि ॥ मुच्यतेसर्वपापेभ्योविष्णुलोकंसगच्छति ॥ ३६ ॥ ब्रह्महाचैवगोघ्नोवासुरापी
बालघातकः ॥ मुच्यतेसर्वपापेभ्योदिव्यंयातिचसत्वरम्॥३७॥दर्शनंमाधवस्याथवटस्यदर्शनंतथा ॥ वेण्यांस्नानंप्रकुर्वाणोवैकुण्ठंप्रतिगच्छति ॥३८॥
उदितेचयथासूर्येविलयंयातिवैतमः ॥ तथैवतस्यांपापानिनश्यन्तिस्नानमात्रतः ॥३९॥ गङ्गाद्वारेकुशावर्तेगंह्लिकेनीलपर्वते ॥ स्नात्वाकनखलेतीर्थे
पुनर्जन्मनविद्यते ॥ ४० ॥ एवंज्ञात्वानरश्रेष्ठोगङ्गास्नायीपुनःपुनः ॥ स्नानमात्रेणभोराजन्मुच्यतेकिल्बिषादतः ॥ ४१ ॥ देवानांप्रवरोविष्णुर्यज्ञानां
चाश्वमेधकः ॥ अश्वत्थःसर्ववृक्षाणांनदीभागीरथीसदा ॥ ४२ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०उमापतिनारदसंवादेगङ्गामाहात्म्यंनामै
काशीतितमोऽध्यायः ॥ ८१ ॥ पार्वत्युवाच ॥ वैष्णवानांलक्षणंचकीदृशंप्रतिपादितम् ॥ महिमाकीदृशश्चैववदविश्वेश्वरप्रभो ॥ १ ॥ महादेव
उवाच ॥ विष्णोरयंयतःप्रोक्तोह्यतोवैवैष्णवोमतः ॥ सर्वस्यादिस्तुविज्ञेयोब्रह्मरूपधरस्ततः ॥ २ ॥ यतःसकाशात्संजाताब्राह्मणावेदपारगाः ॥
तेवैष्णवास्तुविज्ञेयानैवान्येतुकदाचन ॥३॥ शौचसत्यक्षान्तियुक्तोरागद्वेषविवार्जितः ॥ वेदविद्याविचारज्ञोयःसवैष्णवउच्यते ॥ ४ ॥ अग्निहोत्ररतो
नित्यंनित्यंचातिथिपूजकः ॥ पितृभक्तोमातृभक्तःसवैवैष्णवउच्यते॥५॥दयाधर्मेणसंयुक्तस्तथापापपराङ्मुखः ॥ शङ्खचक्राङ्कितोयोवैसवैवैष्णव
उच्यते॥६॥कण्ठेमालाधरोयस्तुमुखेरामंसदोच्चरेत्॥गानंकुर्यात्सदाभक्त्यासनरोवैष्णवःस्मृतः॥७॥पुराणेषुरतानित्यंयज्ञेषुचरताःसदा ॥तेनरावैष्णवा
ज्ञेयाःसर्वधर्मेषुसंमताः ॥८॥ तेषांनिन्दांप्रकुर्वन्तियेनराःपापकारिणः ॥तेमृतास्तुकुयोर्निवैगच्छन्तिचपुनःपुनः ॥९॥ गोपालनाम्नींमूर्तिंचयेऽर्चयन्ति
द्विजाःसदा ॥ धातुमात्रमयींकृत्वाचतुर्हस्तांसुशोभिताम् ॥१०॥ पूजांकुर्वन्तियेविप्रास्तेज्ञेयाःपुण्यभागिनः ॥ कृत्वापाषाणजांमूर्तिंकृष्णाख्यांरूप

१ 'बिल्वके' इ० पा०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुन्दरीम्॥ ११॥ पूजांकुर्वन्तियेविप्रास्तेज्ञेयाःपुण्यमूर्त्तयः ॥ शालग्रामशिलायत्रयत्रद्वारवतीशिला ॥१२॥ उभयोःसंगमोयत्रमुक्तिस्तत्रनसंशयः ॥
मूर्तिमन्त्रेणसंस्थाप्यपूजनंक्रियतेयदि ॥१३॥ तदर्चनंकोटिगुणंधर्मकामार्थमोक्षदम् ॥ नवधातत्रवैभक्तिःकर्तव्याचजनार्दने ॥ १४ ॥ अतःपाषाणजा
मूर्तिस्तथाधातुमयीत्वया ॥ तस्यांभक्तैःप्रकर्त्तव्यंध्यानंपूजनमेवच ॥ १५॥ राजोपचारिकींपूजांमूर्तौतत्रप्रकल्पयेत् ॥ सर्वात्मानंस्मरेन्नित्यंभगवन्त
मधोक्षजम् ॥ १६ ॥ दीनानाथैकशरणंलोकानांवृत्तिकारणम् ॥ मूर्त्तौतत्रस्मरेन्नित्यंमहापातकनाशनम् ॥ १७॥ गोपालोऽयंतथाकृष्णोरामोऽयमिति
चब्रुवन् ॥ पूजांकरोतियःसम्यक्सवैभागवतोनरः ॥ १८ ॥ गोकुलेतुयथारूपंधृतंवैकेशवेनतु ॥ तादृग्रूपंप्रकर्त्तव्यंवैष्णवैर्नरसत्तमैः ॥ १९ ॥ आत्म
सतोषणार्थायस्वरूपंकारयेद्बुधः ॥ यतोभक्तिस्तुबहुलाजायतेनात्रसंशयः ॥२०॥ शङ्खचक्रगदादीनिविष्णोश्चैवायुधानिच ॥ तस्यांमूर्तौविशेषेण
कर्त्तव्यानिप्रमाणतः ॥ २१ ॥ चतुर्भुजांद्विनेत्रांचशङ्खचक्रगदाधराम् ॥ पीतवासःपरीधानांशोभमानांगरीयसीम् ॥ २२ ॥ वनमालांदधानां
तांलसद्वैडूर्यकुण्डलाम् ॥ मुकुटेनसमायुक्तांकौस्तुभोद्भासितांसदा ॥ २३ ॥ सौवर्णींचाथरौप्यांवाताम्रजांचाथपैत्तलीम् ॥ कारयेत्परयाभक्त्यावैष्णवै
र्द्विजसत्तमैः ॥२४॥ आगमोक्तैर्वेदमन्त्रैःप्रतिष्ठाप्यविशेषतः ॥पश्चाद्वाअर्चनंकार्यंयथाशास्त्रानुसारतः ॥२५॥ षोडशोपचारैर्मन्त्रैःपूजनंविधिपूर्वकम्॥
विजितेतुजगन्नाथेसर्वेदेवाश्चपूजिताः ॥ २६ ॥ अतोऽनेनप्रकारेणपूजनीयोमहाप्रभुः ॥ अनादिनिधनोदेवःशङ्खचक्रगदाधरः ॥ सर्वं
ददातिसर्वेशोवैष्णवान्पुण्यरूपिणः ॥ २७ ॥ पार्वत्युवाच ॥ केदासावैष्णवाःकेतुकेभक्ताभुविकीर्तिताः ॥ तेषांवैलक्षणंब्रूहियथार्थंवैमहेश्वर ॥ २८ ॥
महादेवउवाच ॥ शूद्राभवन्तिवैदासावैष्णवानारदादयः ॥ प्रह्लादश्चाम्बरीषाद्याभक्तास्तेनगनन्दिनि ॥२९॥ ब्रह्मक्रियारतोनित्यंवेदवेदाङ्गपाठकः ॥
शङ्खचक्राङ्कितोयस्तुसवैवैष्णवउच्यते ॥ ३० ॥ द्विजसेवारतोनित्यंनित्यंविष्णुप्रपूजकः ॥ शृणोतिबहुधाचैवपुराणंवेदसम्मितम् ॥३१॥ सशूद्रोहरि
दासस्तुइत्युक्तोनगनन्दिनि ॥ पञ्चवर्षत्वमाश्रित्यकृताभक्तिरनेकधा ॥३२ ॥ सवैभक्तइतिप्रोक्तःसर्वसाधुषुसंमतः ॥ ध्रुवादयस्तेविज्ञेयाअम्बरीषादय
श्चये ॥ ३३ ॥ भक्ताश्चमुनिभिःप्रोक्ताःसर्वकालेषुभामिनि ॥ कलौधन्यतमाःशूद्राविष्णुध्यानपरायणाः ॥ ३४ ॥ इहलोकेसुखंभुक्त्वायान्तिविष्णुं
सनातनम् ॥ शङ्खचक्राङ्कितोयस्तुविष्णुभक्तिप्रकारकः ॥३५॥ चतुर्विधमहोत्साहकर्ताचैवविशेषतः ॥ सशूद्रोविष्णुदासस्तुयथादृष्टंयथाश्रुतम् ॥
॥ ३६ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०उमामहेश्वरसंवादेदासवैष्णवानांमहिमानामद्व्यशीतितमोऽध्यायः ॥ ८२ ॥ पार्वत्युवाच ॥ सर्वेषांचैव
मासानांविधिंब्रूहिमहेश्वर ॥ महोत्सवःप्रकर्त्तव्यःकोविधिस्तत्रसंमतः ॥ १ ॥ कोदेवःपूजनंकस्यमहिमाकीदृशोभवेत् ॥ कस्यांतिथौप्रकर्त्तव्यंतन्मेवद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुरेश्वर ॥ २ ॥ मासंप्रतिकिमुक्तंचवैष्णवान्पुण्यकर्मणः ॥ धन्याहंकृतकृत्याहंसुभगाहंधरातले ॥ विष्णोःकथांशृणोमीतिदर्शनात्स्पर्शनात्तव ॥ ३ ॥
शिवउवाच ॥ उत्सवानांविधिंब्रूमोमासंप्रतितवानघे ॥ यानाकर्ण्यपुनर्देविगीतवादित्रहर्षिता ॥४॥ तत्रादौचसितपक्षेचैत्रमासेसुशोभने ॥ एकादश्यां
विशेषेणदोलारूढंप्रपूजयेत्॥५॥कुर्याद्भक्त्यासदादेविचोत्सवंविधिपूर्वकम् ॥ दोलारुढंप्रपश्यन्तिकृष्णंकलिमलापहम्॥ ६॥अपराधसहस्रैस्तुमुक्तास्ते
नगनन्दिनि ॥ तावत्तिष्ठन्तिपापानिकोटिजन्मकृतान्यपि ॥७॥ यावन्नान्दोलयेदेवंविश्वेशंविश्वनायकम् ॥ कलौवैयेप्रपश्यन्तिदोलारूढंजनार्दनम्॥
॥८॥ गोघ्नादिकाःप्रमुच्यन्तेकाकथात्वितरेष्वपि ॥ दोलोत्सवेप्रहृष्टास्तुरुद्रेणसहिताःसुराः ॥९॥ कुर्वन्तिप्राङ्गणेनृत्यंगीतवाद्यंचहर्षिताः ॥ ऋषयो
गणगन्धर्वारम्भाद्यप्सरसांगणाः ॥ १० ॥ वासुकिप्रमुखानागास्तथादेवाःसुरेश्वराः ॥ दोलायांचसमायान्तिविष्णुदर्शनलालसाः ॥
॥ ११ ॥ दोलायात्रानिमित्तंतुदोलाह्नेमधुमाधवे ॥ भूतानिसन्तिभूपृष्ठेयेकेचिद्देवयोनयः ॥ १२ ॥ समायान्तिमहादेविकृष्णेदोलास्थिते
ध्रुवम् ॥ विष्णुंदोलास्थितंदृष्ट्वात्रैलोक्यस्योत्सवोभवेत् ॥ १३ ॥ तस्मात्कार्यशतंत्यक्त्वादोलाहेचोत्सवंकुरु ॥ प्रह्लादस्तुसमायातिविष्णुंदो
लाधिरोहणम् ॥ १४ ॥ कुरुतेचमहादेविवरदंतमनुस्मरन् ॥ दोलास्थितस्यकृष्णस्ययेकुर्वन्तिप्रजागरम् ॥ १५ ॥ सर्वपुण्य
फलप्राप्तिर्निमेषैकेनजायते ॥ दोलायांसंस्थितंविष्णुंपश्यन्तिमधुमाधवे ॥ १६ ॥ क्रीडन्तिविष्णुनासार्धंदेवदेवेनवन्दिताः ॥ दक्षि
णाभिमुखंदेवंदोलारूढंसुरेश्वरि ॥ सकृद्दृष्ट्वातुगोविन्दंमुच्यतेब्रह्महत्यया ॥ १७ ॥ ॐदोलारूढायविद्महेमाधवायचधीमहि ॥ तन्नोदेवः
प्रचोदयात् ॥ १८ ॥ इदंगायत्र्यापूजनम् ॥ माधवायगोविन्दायश्रीकण्ठायनमोनमः ॥ पूजनंमन्त्रपूर्वंचकर्तव्यंविधिपूर्वकम् ॥ १९ ॥ गुरवे
दक्षिणांदद्याद्यथाशक्त्यासमाहितः ॥ गायन्विष्णोःसदाभक्त्यापरिपूर्णंततोभवेत् ॥ २० ॥ किमन्यद्बहुनोक्तेनभूयोभूयोवरानने ॥ दोलायां
संस्थितोविष्णुःसर्वपापापहारकः ॥ २१ ॥ पूजितोयैर्नरैःसम्यक्सदासर्वंददातिच ॥ यत्रदेवाःसगन्धर्वाःकिन्नराऋषयस्तथा ॥ २२ ॥ आयान्ति
बहुधातत्रदोलारूढेनसंशयः ॥ २३ ॥ ॐनमोभगवतेवासुदेवायेतिमन्त्रेणपूजनंतत्रकारयेत् ॥ षोडशोपचारैःपूजाकर्तव्याविधिपूर्वकम् ॥ धर्मार्थसु
ख्यायेकामास्तान्सर्वान्प्राप्नुयुर्ध्रुवम् ॥ २४ ॥ अङ्गन्यासंकरन्यासंन्यासंशारीरकंचयत् ॥ तत्सर्वंतुप्रकर्त्तव्यंमन्त्रेणानेनसुव्रत ॥ २५ ॥ आगमो
क्तेनमन्त्रेणकर्त्तव्योहिमहोत्सवः ॥ श्रीलक्ष्म्यासहितंदेवंदोलायांचप्रकल्पयेत् ॥२६॥ देवाग्रेवैष्णवाःस्थाप्यानारदाद्याःसुरर्षयः ॥ विष्वक्सेनादिका
भक्ताःस्थाप्यास्तेह्यग्रतःसदा ॥ २७ ॥ पञ्चवादित्रनिर्घोषैःकुर्यादारार्तिकंबुधः ॥ यामेयामेतथादेविपूजनीयःप्रयत्नतः ॥ २८ ॥ नालिकेरैस्तथा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शुभ्रैःकदलैर्वातथापुनः ॥ अर्घंदद्यात्ततोदेविपूजनीयःप्रयत्नतः ॥ २९ ॥ देवदेवजगन्नाथशङ्खचक्रगदाधर ॥ अर्घंगृहाणमेदेवकृपांकुरुममोपरि ॥
॥ ३० ॥ तच्छेषंवैष्णवानांतुदद्यात्प्रासादिकंपुनः ॥ वादनंनर्त्तनंतत्रकर्त्तव्यंवैष्णवैर्नरैः ॥३१॥ आन्दोलनंततःसर्वैःकर्त्तव्यंचविशेषतः ॥ पृथिव्यां
यानितीर्थानिक्षेत्राणिचसुरेश्वरि ॥ ३२ ॥ सर्वाण्येतानिवैतत्रद्रष्टुमायान्तितद्दिने ॥ एवंज्ञात्वासदादेविकर्त्तव्यःसोत्सवोमहान् ॥ ३३ ॥ ब्राह्मणाः
क्षत्रियावैश्याःशूद्रायाश्चान्यजातयः ॥ शङ्खचक्रगदाधाराज्ञातव्यानगनन्दिनि ॥ ३४ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उमामहेश्वरसंवादेदोला
महोत्सवोनामत्र्यशीतितमोऽध्यायः ॥ ८३ ॥ महादेवउवाच ॥ अस्मिन्वैचैत्रमासेतुकार्योदमनकोत्सवः ॥ द्वादश्यांतुतथासम्यग्विधिःकार्यो
विशेषतः ॥ १ ॥ वैष्णवैःश्रद्धयापुण्योजनतानन्दवर्धनः ॥ देवानन्दसमुद्भूतादिव्यादमनमञ्जरी ॥ २ ॥ निवेद्यावैष्णवैर्भक्तैःसर्वपूजाफलेप्सुभिः॥
चैत्रेतुशुक्लपक्षेतुद्वादश्यांनगनन्दिनि ॥३॥ कारयेत्परयाभक्त्यामहोत्सवमनास्तथा ॥ तत्रादौचस्वयंगत्वाआरामंप्रतिचानघे॥४॥कर्तव्यंरतियुक्तस्य
कामदेवस्यपूजनम् ॥ कामदेवनमस्तेऽस्तुविश्वमोहनकारक ॥ ५ ॥ विष्णोरर्थेविचेष्यामिकृपांकुरुममोपरि ॥ गीतवादित्रनिर्घोषैरानेतव्यो
गृहंप्रति ॥ ६ ॥ एकादश्यांसुरश्रेष्ठह्यधिवासनपूर्वकम् ॥ कर्तव्यंपूजनंतत्ररात्रौभक्त्यातुवैष्णवैः ॥ ७ ॥ कर्त्तव्यमग्रतस्तस्यसर्वतोभद्रमण्डलम् ॥
स्थापयित्वातुदेवेशंरत्यायुक्तंचतत्रवै ॥ ८ ॥ आच्छाद्यश्वेतवस्त्रेणदमनंस्थापयद्बुधः ॥ तत्रवैपूजनंकार्यंवैष्णवैर्द्विजसत्तमैः ॥ ९ ॥ क्लींकामदेवाय
नमोह्रींरत्यैचतथानमः ॥ ऐन्द्यादिदिशिसंस्थाप्यकन्दर्पपूजयेद्बुधः ॥ १० ॥ गन्धंपुष्पंतथाधूपंदीपमारार्तिकंतथा ॥ रात्रौभक्त्याप्रकर्त्तव्यंविधि
नात्रसुरेश्वरि ॥ ११ ॥ मदनायनमइतिप्राच्याम् ॥ मन्मथायनमइतिआग्नेय्याम् ॥ कन्दर्पायनमइतियाम्ये ॥ अनङ्गायनमइतिरक्षोदिशि ॥
भस्मशरीरायनमइतिवारुण्याम् ॥ स्मरायनमइतिवायव्याम् ॥ ईश्वरायनमइतिकौबेर्याम् ॥ पुष्पबाणायनमइतीशान्याम् ॥ चतुर्दिक्षुच
सर्वासुपूजनंतत्रकारयेत् ॥ पूजितेकेशवेचात्रसर्वेदेवाःसुपूजिताः ॥ १२ ॥ अक्षतगन्धधूपदीपैर्नैवेद्यैस्ताम्बूलैश्चदमनकंपूजयित्वातु ॥ "तत्पुरुषा
यविद्महेकामदेवायधीमहि ॥ तन्नोऽनङ्गःप्रचोदयात्" ॥ १३ ॥ इतिवैकामगायत्र्याअष्टोत्तरशतवारंतंदमनकमभिमन्त्र्यनमस्कुर्यात् ॥ नमोऽस्तु
पुष्पबाणायजगदाह्लादकारिणे ॥ मन्मथायजगन्नेत्रेरतिप्रीतिकरायच ॥ १४ ॥ देवदेवनमस्तेऽस्तुश्रीविश्वेशनमोऽस्तुते ॥ रतिपतेनमस्तेऽस्तुनम
स्तेविश्वमण्डन ॥ १५ ॥ नमस्तेऽस्तुजगन्नाथसर्वबीजनमोऽस्तुते ॥ एतैर्नानाविधैर्मन्त्रैरागमोक्तैर्विशेषतः ॥ १६ ॥ पूजनीयःप्रयत्नेनरत्यासह
जनार्दनः ॥ ततोनिवेद्यतत्कर्मजागरंकारयेद्बुधः ॥१७॥ देवदेवजगन्नाथवाञ्छितार्थप्रदायक ॥ हृत्स्थान्पूरयमेविष्णोकामान्कामेश्वरीप्रिय ॥१८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्येतैर्बहुभिर्मन्त्रैः पूजनीयःप्रयत्नतः ॥ श्रीनिवासोजगन्नाथोभक्तानांशुभकामुकः ॥१९॥ ततोदमनकमुष्टिंगृहीत्वातत्रमूलमन्त्रेण ॥ श्रीश्रीविष्ण्वादि
देवेभ्योदमनकंनिवेदयेत ॥ ततोगन्धादिभिर्महतीपूजागीतवाद्यनृत्यैश्चमहोत्सवःकार्यः ॥ देवाग्रेस्थापितकलशोदकंदेवस्यपादयोर्निक्षिप्यजल
क्रीडातस्मिन्दिनेकर्त्तव्या ॥ ततःस्वगुरुंवस्त्रालङ्कारद्रविणैःश्रद्धयाप्रपूजयेत ॥ ततःस्वयंवैष्णवैर्बन्धुभिःसहाश्नीयात् ॥ ततोदमनमञ्जर्यायो
वैविष्णुंप्रपूजयेत ॥ पूजितेवैजगन्नाथेह्यहंवैपूजितःसदा ॥ २० ॥ ब्रह्महाहेमहारीचमद्यपोमांसभक्षकः ॥ मुच्यतेपातकाद्देविदद्वाद्दमन
कोत्सवम् ॥ २१ ॥ एवंदमनकोदेविपूजितोयैःसुवैष्णवैः ॥ सर्वतीर्थंकृतंतैस्तुमञ्जर्यापूजनंकृतम् ॥ २२ ॥ वेदाध्यायःकृतस्तेनशास्त्रा
ध्ययनमेवच ॥ अग्निहोत्रंकृतंतेनमञ्जर्यापूजितोहरिः ॥ २३ ॥ तत्कुलंतुमहज्ज्ञेयंब्राह्मंवाचाथक्षात्रियम् ॥ शौद्रंवैश्यंचयच्चान्यद्धन्यंधन्यतरंस्मृतम् ॥
॥ २४ ॥ यस्मिन्कुलेऽवतीर्याथोत्सवोदमनकःकृतः ॥ सचधन्यस्तुधन्योवैयेनविष्णुःप्रपूजितः ॥ २५ ॥ दमनकेनतुतथासंप्राप्तेमधुमाधवे ॥
संपूज्यगोसहस्रस्यदेविसंलभतेफलम् ॥ २६ ॥ मल्लिकाकुसुमैर्देवंवसन्तेगरुडध्वजम् ॥ योऽर्चयेत्परयाभक्त्यामुक्तिभागीभवेत्तुसः ॥ २७ ॥ मरुको
दमनश्चैवसद्यस्तुष्टिकरोहरेः ॥ अतःपूजाप्रकर्त्तव्यावैष्णवैर्नरसत्तमैः ॥ २८ ॥ गोसहस्रंकृतंतेनकन्यादानंतथैवच ॥ पृथ्वीदानंकृतंतेनविष्णोर्वै
पूजनेकृते ॥ २९ ॥ एकामेकांगृहीत्वातुमञ्जरींदमनस्यतु ॥ यःपूजयतिदेवेशंसंप्राप्तेमधुमाधवे ॥ ३० ॥ पुण्यसङ्ख्यांनजानेवैतस्याहंनग
नन्दिनि ॥ सवैचतुर्भुजोभूत्वाइहलोकेपरत्रच ॥ धर्मानर्थांश्चकामांश्चप्रभुङ्क्तेवैष्णवंपदम् ॥ ३१ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप० उत्तर० दमनक
महोत्सवोनामचतुरशीतितमोऽध्यायः ॥ ८४ ॥ महादेवउवाच ॥ वैशाख्यांपौर्णमास्यांवैजलस्थंजगदीश्वरम् ॥ पूजयेद्वैष्णवोभक्त्याकृतो
त्साहोमुदान्वितः ॥ १ ॥ गीतंवाद्यंतथानृत्यंकृत्वापुण्यंमहोत्सवम् ॥ एकादश्यांसुरश्रेष्ठंपश्येद्धाथप्रहर्षितः ॥ २ ॥ गीतंगायन्हरेर्भक्त्याकर्त्तव्य
श्चोत्सवःशुभः ॥ शयनंकुरुदेवेशजलेऽस्मिन्वैसुरेश्वर ॥ ३ ॥ त्वयिसुप्तेजगत्सुप्तंभवत्येवनसंशयः ॥ घनागमेप्रकुर्वन्तिजलस्थंवैजनार्दनम् ॥
॥ ४ ॥ येनरास्तुसुरश्रेष्ठेनदाहोनरकेभवेत् ॥ स्वर्णपात्रेतथारौप्येताम्रेवाचसुरेश्वरि ॥ ५ ॥ मृण्मयेवाथकर्त्तव्यंशयनंविष्णुसंज्ञकम् ॥ तत्रतोयंच
संस्थाप्यशीतलंगन्धवासितम् ॥ ६ ॥ तस्मिंस्तोयेततोविष्णोःस्थापनंकारयेद्बुधः ॥ गोपालनाम्नीमूर्त्तिश्चरामनाम्नीतथापिवा ॥ ७ ॥ शाल
ग्रामशिलावापिस्थापनीयाविशेषतः ॥ प्रतिमांवामहाभागेतस्यपुण्यमनन्तकम् ॥ ८ ॥ यावद्धराधरालोकायावच्चन्द्रदिवाकरौ ॥ तावत्तस्य
कुलेकश्चिन्नभवेद्देविनारकी ॥ ९ ॥ तस्माज्ज्येष्ठेमहादेवितोयस्थंपूजयेद्धरिम् ॥ वीततापोनरस्तिष्ठेद्यावदाभूतसंप्लवम् ॥ १० ॥ सुशीतलेतथातोये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुलसीदलवासितम् ॥ शुचिशुक्रगतेकालेपूजयेद्धरणीधरम् ॥ ११ ॥ शुचिशुक्रगतेकालेयेऽर्चयिष्यन्तिकेशवम् ॥ जलस्थंविविधैःपुष्पैर्मुच्यन्ते
यमपीडनात् ॥ १२ ॥ जलप्रेष्ठोयतोविष्णुर्जलशायीजलप्रियः ॥ तस्माद्ग्रीष्मेविशेषेणजलस्थंपूजयेद्धरिम् ॥ १३ ॥ नीरमध्येस्थितंकृत्वा
शालग्रामसमुद्भवम् ॥ येनार्चितोमहाभक्त्यासभवेत्कुलपावनः ॥ १४ ॥ कर्कराशिगतेसूर्येमिथुनस्थेविशेषतः ॥ येनार्चितोहरिर्भक्त्याजलमध्ये
तुसुन्दरि ॥ १५ ॥ द्वादश्यांतुविशेषेणजलस्थजलशायिनः ॥ येनार्चनंकृतंतेनकोटियज्ञशतंकृतम् ॥ १६ ॥ निक्षिप्यजलपात्रेतुमासेमाधवसंज्ञके ॥
माधवंयेऽर्चयिष्यन्तिदेवास्तेतुनराभुवि ॥ १७ ॥ पात्रेगन्धोदकंकृत्वायःक्षिपेद्गरुडध्वजम् ॥ द्वादश्यांपूजयेद्रात्रौमुक्तिभागीभवेत्तुसः ॥ १८ ॥ अश्रद्द
धानःपापात्मानास्तिकोऽच्छिन्नसंशयः ॥ हेतुनिष्ठश्चपञ्चैतेनपूजाफलभागिनः ॥ १९ ॥ तथामहादेविप्रभुंजलस्थंजगदीश्वरम् ॥ पूजयेद्योनरोनित्यं
महापापैःप्रमुच्यते ॥ २० ॥ 'ॐह्रांह्रींरामायनमः' इतिमन्त्रेणदेवेशिपूजनंतत्रवैस्मृतम् ॥ 'ॐक्लींकृष्णायगोविन्दायगोपीजनवल्लभायनमः' ॥ इति
मन्त्रेणगिरिजउदकंचाभिमन्त्रयेत् ॥ २१ ॥ देवदेवमहाभागश्रीवत्सकृतलाञ्छन ॥ महादेवनमस्तेऽस्तुनमस्तेविश्वभावन ॥ अर्घंगृहाणभोदेवमुक्तिं
मेदेहिसर्वदा ॥ २२ ॥ नानाविधैःसुपुष्पैश्चपूजयेद्गरुडासनम् ॥ सर्वबाधाविनिर्मुक्तोविष्णोःसायुज्यमाप्नुयात् ॥ २३ ॥ रात्रौजागरणंतत्रद्वादश्यां
सुसमाहितः ॥ भक्तिपूर्वंभजेदेवंविष्णुमव्ययमक्षयम् ॥ २४ ॥ एवंवैशाखसंबन्धीभक्तिभावेनतत्परैः ॥ उत्सवोविष्णुसंज्ञस्तुकर्त्तव्योभक्तिमिच्छुभिः ॥
॥ २५ ॥ आगमोक्तेनमन्त्रेणविधिंतत्रप्रकारयेत् ॥ कृतेसतिमहादेविकोटियज्ञसमंफलम् ॥ २६ ॥ रागद्वेषविनिर्मुक्तोमहामोहनिवर्त्तकः ॥ इहलोके
सुखंभुक्त्वायातिविष्णोःसनातनम् ॥ २७ ॥ ब्राह्मणोभक्तिभावेनयःकरोत्युत्सवंभुवि ॥ सर्वपापविनिर्मुक्तोवैकुण्ठंगच्छतिध्रुवम् ॥ २८ ॥ वेदाध्ययन
हीनोऽपिशास्त्राध्ययनवर्जितः ॥ हरिभक्तिंतुसंप्राप्यलभतेवैष्णवंपदम् ॥ २९ ॥ आत्मारामःसदामुक्तोविजितात्माभवेत्तुसः ॥ सवैविष्णुपदंयातियाव
च्चन्द्रदिवाकरौ ॥ ३० ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०उमामहेश्वरसंवादेशयनमहोत्सवोनामपञ्चाशीतितमोऽध्यायः ॥ ८५ ॥ महादेवउवाच ॥
श्रावणेमासिसंप्राप्तेपवित्रारोपणोविधिः ॥ यस्मिन्कृतेतुदेवेशिदिव्यभक्तिःप्रजायते ॥ १ ॥ पवित्रारोपणंविष्णोःकर्तव्यंश्रद्धयाबुधैः ॥ संपूर्णाजायते
तस्यपूजापार्वतिवार्षिकी ॥ २ ॥ पवित्रारोपणेविष्णोर्जायतेसुखमात्मनः ॥ संपूजितेसदाविष्णौनानासुखमवाप्नुयात् ॥ ३ ॥ सूत्रग्रामंसमानीयब्राह्मण्या ॥ ८७ ॥
कर्तितंतथा ॥ स्वेनैवकर्तितंसूत्रंतेनैवचप्रकारयेत् ॥ ४ ॥ सच्छूद्राकर्तितंसूत्रंतद्ग्राह्यंवातथैवच ॥ अन्यथाविक्रयेणापिग्राह्यंचापियथातथम् ॥ ५ ॥
क्षौमेनैवप्रकर्तव्यःपवित्रारोपणोविधिः ॥ रौप्येणवातथाकार्यंपवित्रंविष्णुदैवतम् ॥ ६ ॥ सौवर्णेनापिदेवेशिकर्तव्यंविधिपूर्वकम् ॥ अभावेसर्वधातूनां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्राह्यंसूत्रंतथाबुधैः ॥ ७ ॥ कृत्वातुत्रिवृतंसूत्रंप्रक्षाल्यमुदकेनतु ॥ लिङ्गलिङ्गप्रमाणंचप्रतिमायांयथाविधि ॥ ८ ॥ पादौवैजानुपर्यन्तंतथानाभिसमं
स्मृतम् ॥ ज्येष्ठंमध्यंकनिष्ठंचपवित्रंकारयेद्बुधः ॥ ९ ॥ संवत्सरदिनैस्तद्वत्तदर्धार्धेनसङ्ख्यया ॥ सूत्रेणैवप्रकर्त्तव्यंग्रन्थिनाष्टोत्तरंशतम् ॥ १० ॥ तदर्ध
सङ्ख्यकेनापियुक्तंवातत्रपार्वति ॥ लिङ्गेवैलिङ्गसंज्ञंतुगङ्गानागैश्चसंयुतम् ॥ ११ ॥ प्रतिमायांतथादेविपवित्रंवनमालकम् ॥ यथाशोभातथाकार्यंयेन
विष्णुःप्रसीदति ॥१२॥ एकंवैसुपवित्रंतुगन्धाख्यंकारयेत्सदा ॥ तन्तुनायच्चसंयुक्तंकर्त्तव्यंवैष्णवैर्नरैः ॥१३॥ देवानांचतथाप्रोक्तंपवित्रंविष्णुदैवतम् ॥
अम्बरीषाद्याभक्ताश्चअन्येऽपिचध्रुवादयः ॥१४॥ पवित्राणिततःपश्चाद्दातव्यानीहपार्वति ॥ प्रतिपद्धनदस्योक्तापवित्रारोपणेतिथिः ॥१५ ॥ लक्ष्म्या
देव्याद्वितीयातुतिथीनामुत्तमातिथिः ॥ तृतीयातुतवप्रोक्ताचतुर्थीगणपस्यच ॥ १६ ॥ पञ्चमीचन्द्रमसश्चैवषष्ठीवैकार्त्तिकस्यच ॥ सप्तमीचरवेःप्रोक्ता
दुर्गायाश्चाष्टमीस्मृता॥१७॥ नवमीचैवमातृणांयमस्यदशमीतथा ॥ एकादशीतुसर्वेषांद्वादशीमाधवस्यच ॥१८ ॥ त्रयोदशीतुकामस्यशर्वस्योक्ताचतु
र्दशी ॥ तद्वत्पञ्चदशीख्याताधातुर्वैह्यर्चनेपुनः ॥१९॥ एतावैतिथयःप्रोक्ताःपवित्रारोपणोचिताः ॥ कनिष्ठेद्वादशप्रोक्तामध्यमेद्विगुणाःस्मृताः॥२० ॥
त्रिगुणाश्चोत्तमेचैवग्रन्थयश्चपवित्रके ॥ कर्पूरकेसराभ्यांवाचन्दनेनहरिद्रया ॥ २१ ॥ रञ्जयित्वातुतत्सर्वंस्थाप्यंनवकरण्डके ॥ देवस्ययजनंयत्र
स्थाप्यानिदेववत्तदा ॥ २२ ॥ आदौदेवार्चनंकृत्वावासनंसपवित्रकम् ॥ अधिवासितपवित्रेतुततोवैपूजनंस्मृतम् ॥ २३ ॥ पवित्रेषुचयद्देवास्तेषां
निकटमाचरेत् ॥ ब्रह्माविष्णुस्तथारुद्रस्त्रयोवैसूत्रदेवताः ॥ २४ ॥ क्रियाचपौरुषीवीराचतुर्थीचापराजिता ॥ जयाचविजयाचैवमुक्तिदाचसदाशिव
॥ २५ ॥ मनोन्मनीतुनवमीदशमीसर्वतोमुखी ॥ ग्रन्थीनांदेवताश्चैवसूत्रेषुविनिवेशयेत् ॥ २६ ॥ आवाहनमुद्रयावैशास्त्रोक्तविधिनाततः ॥ आवाह्य
तत्रताःसम्यक्संनिधीकरणंस्मृतम् ॥ २७ ॥ संनिधीकरणमुद्रयासंनिधीकरणम् ॥ रक्षामुद्रयासंरक्ष्यधेनुमुद्रयाअमृतीकृत्यआनीयदेवस्याग्रेकलशो
दकंगृहीत्वाआगमोक्तेनमन्त्रेणप्रोक्षणंविधायक्लींकृष्णायइतिमन्त्रेणप्रोक्षणंगन्धधूपदीपनैवेद्यादिकंदत्त्वाताम्बूलादिकंदत्त्वाषोडशोपचारादिनापवित्रदे
वताअभ्यर्च्यगन्धपवित्रंधूपितंकृत्वादेवाभिमुखःसन्नमस्कारमुद्रयादेवमभिमन्त्रयीत ॥आमन्त्रितोमहादेवसार्धंदेव्यागणादिभिः ॥ मन्त्रैर्वालोकपालै
श्चसहितःपरिवारकैः ॥२८॥ आगच्छभगवन्विष्णोविधिसंपूर्णहेतवे ॥ प्रातस्त्वत्पूजनंकुर्मःसान्निध्यंनियतंकुरु ॥२९॥ तद्गन्धंचपवित्रंचदेवस्यराघव
स्यचश्रीविष्णोश्चरणेतन्निक्षिप्यप्रातःस्वक्रियांविधायपुण्याहस्वस्तिवाचनजयजयशब्दैर्घण्टादिवादित्रनिर्घोषतूर्यादिशब्दैःपवित्रैःपूजांकुर्यात् ॥ ततः
प्रथमंज्येष्ठंततोमध्यमंकनिष्ठंच ॥ एभिःसर्वैर्यथाक्रमेणपूजांकुर्यात् ॥ ॐवासुदेवायविद्महेविष्णुदेवायधीमहि ॥ तन्नोदेवःप्रचोदयात् ॥ ३० ॥ इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पवित्रदानस्थवास्वमन्त्रैः ॥ ततोवैमहतींपूजांविष्णोःकुर्यात्प्रसादिनीम् ॥ययावैकृतयादेविविष्णुरात्माप्रसीदति॥३१॥समन्ताद्दीपमालाचकर्त्तव्याच विधानतः ॥ चतुर्विधंतथाचान्नंनैवेद्यंकारयेद्बुधः ॥ ३२ ॥ पवित्राणिततोदद्यात्पूजितानितुशोभने ॥ भक्त्याचैवविशेषेणश्रीगुरुंपूजयेत्ततः ॥ ३३ ॥ वस्त्रालङ्कारविधिनापूजनीयोगुरुर्महान् ॥ पूजयित्वागुरुंतत्रपवित्रंधारयेत्ततः ॥ ३४ ॥ अथयेवैष्णवाःसन्तितेभ्यस्ताम्बूलादिकंदत्त्वा पूर्णाहुतिमथ्रयेदत्त्वाश्रीनिवासायश्रीकृष्णायकर्मनिवेदयेत् ॥ मन्त्रहीनंक्रियाहीनंभक्तिहीनंतुकेशव ॥ यत्पूजितोमयासम्यक्सम्पूर्णंयातुमेध्रुवम् ॥ ॥ ३५ ॥ ततउद्वास्यइष्टबन्धुभिस्तथावैष्णवैर्विप्रैर्वासहितःसन्मृष्टमन्नंस्वयंभुञ्जीत ॥ एतत्पूजनकंदिव्यंयेशृण्वन्तिद्विजोत्तमाः ॥ सर्वपापविनि र्मुक्तायान्तिविष्णोःपरंपदम् ॥ ३६ ॥ यावत्तपतिवैचन्द्रोयावत्तपतिवैरविः ॥ पवित्रारोपकस्तद्वत्तप्यतेनात्रसंशयः॥३७॥पृथिव्यांयानिदानानिनिय माश्चतथापुनः ॥ सर्वेवैपूर्णतांयान्तिपवित्रारोपणेकृते ॥ ३८ ॥ उत्सवानांचराजायंपवित्रारोपणोविधिः ॥ ब्रह्महाशुध्यतेतत्रनात्रकार्याविचारणा ॥ ॥ ३९ ॥ सत्यंसत्यंपुनःसत्यंयदुक्तंनगनन्दिनि ॥ पवित्रारोपणेपुण्यंदर्शनेतुतथास्मृतम् ॥ ४० ॥ शूद्रैर्वाथमहाभागेपवित्रारोपणोविधिः ॥ कृतोयैर्भक्तिभावेनतेवैधन्यतमाःस्मृताः ॥ ४१ ॥ धन्योऽहंकृतकृत्योऽहंसौभाग्योधरणीतले ॥ मयातुयाकृताभक्तिर्वैष्णवीमुक्तिदायिनी ॥ ४२ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०उमामहेश्वरसंवादेपवित्रारोपणंनामषडशीतितमोऽध्यायः॥८६॥पार्वत्युवाच ॥ कानिकानिचपुष्पाणिकस्मिन्मासे प्रकल्पयेत ॥ तन्मेवदसुरेशत्वंविस्तराज्जगतःप्रभो ॥ १ ॥ महेश्वरउवाच ॥ चैत्रेतुचम्पकेनैवजातीपुष्पेणवापुनः ॥ पूजनीयःप्रयत्नेनकेशवः क्लेशनाशनः ॥ २ ॥ दमनकैर्मरुकैश्चैवबिल्वपुष्पैरथापिवा ॥ पूजयेज्जगतामीशंविष्णुंसर्वेश्वरेश्वरम् ॥ ३ ॥ शतपत्रैस्तथादिव्यैरक्तैर्वासुसमाहिताः॥ पूजयन्तिनराविष्णुंचैत्रमासेसुरेश्वरि ॥ ४ ॥ वैशाखेतुसदादेविह्यर्चनीयोमहाप्रभुः ॥ केतकीपत्रमादायवृषस्थेचदिवाकरे ॥ ५ ॥ येनार्चितोहरि र्भक्त्याप्रीतोमन्वन्तरंशतम् ॥ ज्येष्ठेमासेतुसंप्राप्तेनानापुष्पैःप्रपूजयेत्॥६॥पूजितेदेवदेवेशेसर्वेदेवाःसुपूजिताः ॥ कृत्वापापसहस्राणिमहापापशतानिच ॥ ७ ॥ तेऽपियास्यन्तिभोदेवियत्रविष्णुःश्रियासह ॥ आषाढेमासिसंप्राप्तेपूजांकुर्याद्विशेषतः॥८॥ करवीरैरक्तपुष्पैस्तथाब्जैर्वासदानराः ॥ पूजांकुर्व न्तियेविष्णोस्तेज्ञेयाःपुण्यभागिनः ॥ ९ ॥ जातरूपनिभैर्विष्णुंकदम्बकुसुमैस्तथा ॥ येऽर्चयिष्यन्तिगोविन्दंनतेषांसौरिजंभयम् ॥ १० ॥ घना गमेघनश्यामःकदम्बकुसुमार्चितः ॥ ददातिवाञ्छितान्कामान्यावदिन्द्रादिश्चतुर्दश ॥११ ॥ यथापद्मालयांप्राप्यप्रीतोभवतिमाधवः ॥ कदम्बकुसुमं लब्ध्वाप्रीतोभवतिलोककृत् ॥ १२ ॥ तुलसीकृष्णतुलसीवञ्जुलैर्वासुरेश्वरि ॥ सर्वदापूजितोविष्णुःकष्टंहरतिनित्यशः ॥ १३ ॥ श्रावणेमासि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संप्राप्तेयेऽर्चयन्तिजनार्दनम् ॥ अतसीपुष्पमादायतथादूर्वादलेनतु ॥१४॥ नानापुष्पैर्विशेषेणपूजनीयःप्रयत्नतः ॥ ददातिविपुलान्कामान्यावदाभूत
संप्लवम् ॥ १५ ॥ भाद्रमासेतुसंप्राप्तेशृणुत्वंनगनन्दिनि ॥ चम्पकैर्वाश्वेतपुष्पैरक्तसिन्दूरकैस्तथा ॥ १६ ॥ कह्लारैर्वामहादेविसर्वकामफलंलभेत् ॥
आश्विनेवैशुभेमासेकर्त्तव्यंविष्णुपूजनम् ॥ १७॥ यूथिकानवजार्ताभिस्तथानानाविधैःशुभैः ॥ पूजनीयःप्रयत्नेनभक्तिपूर्वंसदाजनैः ॥ १८॥ पद्मा
न्येवसमानीययेऽर्चयन्तिजनार्दनम् ॥धर्मार्थकाममोक्षांस्तेलभन्तेमानवाभुवि ॥१९॥कार्त्तिकेमासिसंप्राप्तेपूजनीयोमहेश्वरः ॥ यावन्तिऋतुपुष्पाणिदे
यानिमाधवस्यच॥२०॥तिलानितिलपुष्पाणितैर्वाह्यर्चनकंचरेत् ॥पूजितेसतिदेवेशिअनन्तफलमश्नुते ॥२१॥बकुलपुष्पैःपुन्नागैश्चम्पकैर्वाजनार्दनम्॥
कार्त्तिकेपूजयिष्यन्तितेदेवानहिमानवाः॥२२॥मार्गशीर्षेप्रयत्नेनपूजनीयःसदाप्रभुः ॥नानापुष्पैःसनैवेद्यैर्धूपैर्नीराजनैस्तथा ॥२३॥मार्गशीर्षेविशेषेण
दिव्यैःपुष्पैःप्रपूजयेत् ॥ पौषमासेमहादेविस्वर्चनंशुभदंस्मृतम् ॥ २४ ॥ नानातुलसिपत्रैश्चमृगनाभिजलैस्तथा ॥ माघमासेतुसंप्राप्तेनानापुष्पैः
प्रपूजयेत् ॥२५॥पूजितेदेवदेवेशेवाञ्छितंलभतेध्रुवम्॥कर्पूरंजातथापूजानानानैवेद्यमोदकैः॥२६॥फाल्गुनेचैवसंप्राप्तेह्यर्चनंमाधवस्यच॥कृत्वावासन्ति
कींपूजांपुष्पाण्यादायसर्वशः ॥ २७ ॥ नवीनैर्वाथदेवेशिसर्वैर्वापूजयेत्ततः ॥ पूजितेतुजगन्नाथेवैकुण्ठपदमव्ययम् ॥ प्राप्नोतिपुरुषोनित्यंश्रीविष्णोश्च
प्रसादतः ॥ २८ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०उमामहेश्वरसंवादेमासिकपुष्पोनामसप्ताशीतितमोऽध्यायः ॥ ८७ ॥ सूतउवाच ॥
एकदाद्वारकामागादृषिःकृष्णदिदृक्षया ॥ पुष्पाण्यादायदिव्यानिकल्पवृक्षोत्थितानिच ॥१॥ नारदंस्वागतेनासौकृष्णःसत्कारमाचरत् ॥ इदमर्घ्य
मिदंपाद्यमित्युवाचासनंददत् ॥ २ ॥ नारदस्तानिपुष्पाणिकृष्णायोपाजहारच ॥ कृष्णःषोडशसाहस्रस्त्रीभ्यस्तानिव्यबीभजत् ॥ ३ ॥ विस्मृ
त्यसत्यभामांतुसर्वाभ्यस्तान्यदात्प्रभुः ॥ सत्यभामाततःक्रुद्धाक्रोधागारंसमाविशत् ॥ ४ ॥ समाज्ञायततःकृष्णस्तत्रगत्वासमाहितः ॥ सत्यभामां
मानयित्वागरुडंमनसाऽस्मरत् ॥५ ॥ स्मृतमात्रस्तुगरुडस्तदागत्याग्रतःस्थितः ॥ आरुह्यवेगात्पत्रंतमित्युवाचप्रियांप्रभुः ॥६ ॥ सत्येत्वंमाकृथाः
क्रोधंत्वत्कृतेदैवतैःसह ॥ विरुध्यदेवराजंचरोपयिष्येतवाङ्गणे ॥ ७ ॥ कल्पद्रुमंमहाभागेऽपराधंमेक्षमांकुरु ॥ इतिकृत्वाप्रतिज्ञांतुकृष्णःससत्य
भामया ॥ ८॥ देवलोकमगात्तूर्णंयत्रदेवःसवृत्रहा ॥ याचितःकल्पवृक्षार्थमुत्तरंदत्तवान्प्रभुम् ॥ ९ ॥ नायंदेवद्रुमोभूम्यांनेतुंयोग्यस्त्वयाप्रभो ॥ तदा
क्रुद्धोमहाबाहुर्वृक्षमुत्पाट्यमूलतः ॥ १० ॥ वाहमारोपयामासवेगेनबलवत्तरः ॥ तदावज्रधरोवेगाद्वज्रमुद्यम्यवीर्यवान् ॥ ११ ॥ गरुडंताडयामासकल्प
वृक्षंत्यजेरिति ॥ तदापत्ररथःपत्रंकुलिशस्यापिगौरवात् ॥ १२ ॥ एकंविसर्जयामासत्वरयाप्रजगामच ॥ तेनवज्रप्रहारेणत्रयोऽभूवन्पतत्रिणः ॥१३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मयूरोनकुलश्चापः कृष्णोद्वारावतीमगात् ॥ आगत्यसत्यभामायागृहेचैनमरोपयत् ॥ तदैवनारदोऽभ्यागात्सत्यययामानितोबहु ॥ १४ ॥ सत्यभामो
वाच ॥ ईदृशःकल्पवृक्षोऽयंपतिरेतादृशःप्रभुः ॥ भवेभवेकथंप्राप्यस्तदाख्यातुभवान्मम ॥ १५ ॥ इतिपृष्टस्तदाप्राहनारदोमुनिसत्तमः ॥
प्राप्यतेसत्यभामेयंतुलापुरुषदानतः ॥ १६ ॥ सत्यभामातदाकृष्णंकल्पवृक्षसमन्वितम् ॥ नारदायैवसाप्रादात्तोलयित्वाविधानतः ॥ सर्वोपस्करमा
कृष्यनारदस्त्रिदिवंययौ ॥ १७ ॥ सूतउवाच ॥ श्रियःपतिमथामन्त्र्यगतेदेवर्षिसत्तमे ॥ हर्षोत्फुल्लाननासत्यावासुदेवमथाब्रवीत् ॥ १८ ॥
सत्यभामोवाच ॥ धन्यास्मिकृतकृत्यास्मिसफलंजीवितंचमे ॥ मज्जन्मनिनिदानेचधन्यौतौपितरौमम ॥ १९ ॥ यौमांत्रैलोक्यसुभगांजनयामासतु
र्ध्रुवम् ॥ षोडशस्त्रीसहस्राणांवल्लभाहंयतस्तव ॥ २० ॥ यस्मान्मयादिपुरुषःकल्पवृक्षसमन्वितः ॥ यथोक्तविधिनासम्यङ्नारदायसमर्पितः
॥ २१ ॥ यद्वार्तामपिजानन्तिभूमिसंस्थानजन्तवः ॥ सोऽयंकल्पद्रुमोगेहेममतिष्ठतिसाम्प्रतम् ॥ २२ ॥ त्रैलोक्याधिपतेश्चाहंश्रीपतेरति
वल्लभा ॥अतोऽहंप्रष्टुमिच्छामिकिंचित्त्वांमधुसूदन ॥२३॥ यदित्वंमत्प्रियकरःकथयस्वात्रविस्तरात् ॥ श्रुत्वातच्चपुनश्चाहंकरोमिहितमात्मनः॥२४॥
यथाकल्पंत्वयादेववियुक्तास्यांनकर्हिचित ॥ २५ ॥ सूतउवाच ॥ इतिप्रियावचःश्रुत्वास्मेरास्योऽयंगदाग्रजः ॥ सत्याकरेकरंकृत्वागमत्कल्पत
रोस्तलम् ॥ २६ ॥ निषिध्यानुचरंलोकंसविलासंप्रियान्वितः ॥ प्रहस्यसत्यामामन्त्र्यप्रोवाचजगतांपतिः ॥ तत्प्रीतिपरितोषार्थंलसत्पुलकिता
ङ्गजः ॥ २७ ॥ कृष्णउवाच ॥ नमेत्वत्तःप्रियतमाकाचिदन्यानितम्बिनी ॥ षोडशस्त्रीसहस्राणांप्रियेप्राणसमाह्यसि ॥ २८ ॥ त्वदर्थंदेवराजेन
विरोधोदैवतैःसह ॥ त्वयायत्प्रार्थितंकान्तेशृणुयच्चमहाद्भुतम् ॥ २९ ॥ अदेयमथवाकार्यमकथ्यमपियत्पुनः ॥ त्वत्कृतंतुकथंप्रश्नंकथयामिनतु
प्रिये ॥ पृच्छस्वसर्वंकथयेयत्तेमनसिवर्तते ॥ ३० ॥ सत्योवाच ॥ दानंव्रतंतपोवापिकिंतुपूर्वंमयाकृतम् ॥ येनाहंमर्त्यजामर्त्यभावातीताऽभवंकिल
॥ ३१ ॥ तवाङ्गार्धहरानित्यंगरुडोपरिगामिनी ॥ इन्द्रादिदेवतावासमगमंचत्वयासह ॥ ३२ ॥ अतस्त्वांप्रष्टुमिच्छामिकिंकृतंतुमयाशुभम् ॥
जन्मान्तरेचकिंशीलाकाचाहंकस्यकन्यका ॥ ३३ ॥ श्रीकृष्णउवाच ॥ शृणुष्वैकमनाःकान्तेयत्त्वंवैपूर्वजन्मनि ॥ पुण्यंव्रतंकृतवतीतत्सर्वंकथ
यामिते ॥ ३४ ॥ आसीत्कृतयुगस्यान्तेमायापुर्यांद्विजोत्तमः ॥ आत्रेयोदेवशर्मेतिवेदवेदाङ्गपारगः ॥ ३५ ॥ आतिथेयोऽग्निशुश्रूषुःसौरव्रत ॥ ८९ ॥
परायणः ॥ सूर्यमाराधयन्नित्यंसाक्षात्सूर्यइवापरः ॥ ३६ ॥ तस्यातिवयसश्चासीन्नाम्नागुणवतीसुता ॥ अपुत्रःसस्वशिष्यायचन्द्रनाम्नेददौ
सुताम् ॥ ३७ ॥ तमेवपुत्रवन्मेनेसचतंपितृवद्वशी ॥ तौकदाचिद्वनंयातौकुशेध्महरणार्थिनौ ॥ ३८ ॥ हिमाद्रिपादजवनेचेरतुस्तौयतस्ततः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तौततोराक्षसंघोरमायान्तंसमपश्यताम् ॥ ३९ ॥ भयविह्वलसर्वाङ्गावसमर्थौपलायितुम् ॥ निहतौरक्षसातेनकृतान्तसमरूपिणा ॥ ४० ॥
तौतुक्षेत्रप्रभावेणधर्मशीलतयापुनः ॥ वैकुण्ठभवनंनीतौमद्गणैर्मत्समीपगैः ॥ ४१ ॥ यावज्जीवंतुयत्ताभ्यांसूर्यपूजादिकंकृतम् ॥ तेनवैकर्मणा
ताभ्यांसुप्रीतोऽहंकिलाभवम् ॥ ४२ ॥ शवाःसौराश्चगाणेशावैष्णवाःशक्तिपूजकाः ॥ मामेवप्राप्नुवन्तीहवर्षापःसागरंयथा ॥ ४३ ॥
एकोऽहंपञ्चधाजातःक्रीडयन्नामभिःकिल ॥ देवदत्तोयथाकश्चित्पुत्राद्याह्वाननामभिः ॥४४॥ ततश्चतौमद्भवनाधिवासिनौविमानयानौरविवर्चसावुभौ
॥ मत्तुल्यरूपौममसन्निधानगौदिव्याङ्गनाचन्दनभोगभोगिनौ ॥ ४५ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०श्रीकृष्णसत्यभामासंवादेऽष्टाशीति
तमोऽध्यायः ॥ ८८ ॥ श्रीकृष्णउवाच ॥ ततोगुणवतीश्रुत्वारक्षसानिहतावुभौ ॥ पितृभर्तृजदुःखार्ताकरुणंपर्यदेवयत् ॥ १ ॥ गुणवत्युवाच ॥
हानाथहापितस्त्यक्त्वागच्छतंक्कमयाविना ॥ बालाहंकिंकरोम्यद्यह्यनाथाभवताविना ॥ २ ॥ कोनुमामास्थितांगेहेभोजनाच्छादनादिभिः ॥अकिंचि
त्कुशलांस्नेहात्पालयिष्यतिदुःखिताम् ॥ ३ ॥ हतभाग्याहतसुखाहतेशाहतजीविता ॥ शरणंकंव्रजाम्यद्यत्वन्नाथाबतबालिशा ॥४॥ श्रीकृष्णउवाच॥
एवंबहुविलप्याथकुररीवभृशातुरा ॥ पपातभूमौविकलारम्भावातहतायथा ॥ ५ ॥ चिरादाश्वस्यसाभूमौविलप्यकरुणंबहु ॥ निमग्नादुःखजलधौ
शोकार्तासमवर्तत ॥ ६ ॥ साग्रहोपस्करान्सर्वान्विक्रीयशुभकर्मकृत् ॥ तयोश्चक्रेयथाशक्तिपारलौकिकसत्क्रियाम् ॥७॥ तस्मिन्नेवपुरेवासंचक्रेप्रभृति
जीविनी ॥ विष्णुभक्तिपराशान्तासत्यशौचाजितेन्द्रिया॥८॥ व्रतद्वयंतयासम्यगाजन्ममरणात्कृतम् ॥ एकादशीव्रतंसम्यक्सेवनंकार्त्तिकस्यच ॥९॥
एतद्व्रतद्वयंकान्तेममातीवप्रियङ्करम् ॥ भुक्तिमुक्तिकरंसम्यक्पुत्रसंपत्तिकारकम् ॥ १० ॥ कार्तिकेमासियेनित्यंतुलासंस्थेदिवाकरे ॥ प्रातःस्नास्यन्ति
तेमुक्तामहापातकिनोऽपिच ॥ ११ ॥संमार्जनंगृहेविष्णोःस्वस्तिकादिनिवेदनम् ॥ विष्णुपूजांप्रकुर्वन्तिजीवन्मुक्ताश्चतेनराः ॥ १२ ॥ स्नानंजागरणं
दीपंतुलसीवनसेवनम् ॥ कार्त्तिकेयेप्रकुर्वन्तितेनराविष्णुमूर्तयः ॥१३॥इत्थंदिनत्रयमपिकार्त्तिकेयेप्रकुर्वते ॥ देवानामपितेवन्द्याःकिंयैराजन्मतःकृतम्
॥१४॥इत्थंगुणवतीसम्यक्प्रत्यब्दंप्रतिनीयते॥नित्यंविष्णोःपरिकरेभक्तातत्परमानसा ॥१५॥ कदाचिज्जरसासाथकृशाङ्गीज्वरपीडिता ॥ स्नातुंगङ्गा
गताकान्तेकथंचिच्छनकैस्तथा ॥१६॥ यावज्जलान्तरगताकम्पिताशीतपीडिता ॥ तावत्साविह्वलापश्यद्विमानंप्राप्तमम्बरात् ॥ १७ ॥ शङ्खचक्रगदा
पद्महस्तैरासन्नमम्बरात् ॥ विष्णुरूपधरैःसम्यग्वैनतेयध्वजाङ्कितैः ॥ १८ ॥ आरोहयन्विमानंतमप्सरोगणसेवितम् ॥ चामरैर्वीज्यमानांतांवैकुण्ठ
मनयन्गणाः ॥ १९ ॥ अथसातद्विमानस्थाज्वलदग्निशिखोपमा ॥ कार्त्तिकव्रतपुण्येनमत्सान्निध्यगताभवत् ॥ २० ॥ अथब्रह्मादिदेवानां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथाप्रार्थनयाभुवम् ॥ आगच्छतागणाःसर्वेयातास्तेऽपिमयासह॥ २१॥ एतेऽपियादवाःसर्वेमद्गणाएवभामिनि ॥ पितातेदेवशर्माभूत्सत्राजिदधिपो
ह्ययम् ॥ २२ ॥ यश्चन्द्रशर्मासोऽक्रूरस्त्वंसागुणवतीशुभे ॥ कार्त्तिकव्रतपुण्येनबहुमत्प्रीतिवर्धनी ॥ २३ ॥ ममद्वारेत्वयापूर्वंतुलसीवाटिकाकृता ॥
तस्मादयंकल्पवृक्षस्तवाङ्गणगतःशुभे ॥२४॥ कार्त्तिकेदीपदानंचयत्त्वयातुकृतंपुरा ॥ त्वद्देहगेहसंस्थेयंतस्माल्लक्ष्मीःस्थिराभवत् ॥ २५॥ यच्चव्रतादि
कंसर्वंविष्णवेभर्तृरूपिणे ॥ निवेदितवतीतस्मान्ममभार्यात्वमागता ॥ २६ ॥ आजन्ममरणात्पूर्वंकार्त्तिकेयद्व्रतंकृतम् ॥ कदाचिदपितेनैवमद्वि
योगंनपश्यसि ॥ २७॥ एवंयेकार्त्तिकेमासिनराव्रतपरायणाः ॥ मत्सान्निध्यंगतास्तेऽपिप्रीतिदात्वंयथामम ॥२८॥ यज्ञदानव्रततपःकारिणोमानवाः
खलु ॥ कार्त्तिकव्रतपुण्यस्यनाप्नुवन्तिकलामपि ॥ २९ ॥ इत्थंनिशम्यभुवनाधिपतेस्तदानींप्राक्पुण्यजन्मभववैभवजातहर्षा ॥ विश्वेश्वरंत्रिभु
वनैकनिदानभूतंकृष्णंप्रणम्यवचनंनिजगादसत्या ॥ ३० ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०कार्त्तिकमाहात्म्यश्रीकृष्णसत्यभामासंवादेसत्यापूर्व
जन्मवर्णनंनामैकोननवतितमोऽध्यायः ॥ ८९ ॥ सत्योवाच ॥ सर्वेऽपिकालावयवास्तवकालस्वरूपिणः ॥ समानास्तुकथंनाथमासानांकार्त्तिकोवरः
॥ १ ॥ एकादशीतिथीनांचमासानांकार्त्तिकःप्रियः ॥ कथंतंदेवदेवेशकारणंकिंचकथ्यताम् ॥ २ ॥ श्रीकृष्णउवाच ॥ साधुपृष्टंत्वयासत्येशृणुष्वै
काग्रमानसा ॥ पृथोर्वैन्यस्यसंवादंदेवर्षेर्नारदस्यच ॥ ३ ॥ एवमेवपुरापृष्टोनारदःपृथुनाप्रिये ॥ उवाचकार्त्तिकाधिक्येकारणंसर्वविन्मुनिः ॥ ४ ॥
नारदउवाच ॥ शङ्खनामाभवत्पूर्वमसुरःसागरात्मजः ॥ त्रिलोकीमथनेशक्तोमहाबलपराक्रमः ॥ ५ ॥ जित्वादेवान्निराकृत्यस्वर्गलोकान्महा
सुरः ॥ इन्द्रादिलोकपालानामधिकारांस्तथाहरत् ॥ ६ ॥ तद्भयादथतेदेवाःसुवर्णाद्रिगुहांगताः ॥ न्यवसन्बहुवर्षाणिसावरोधाःसवासवाः ॥७॥
सुवर्णाद्रिगुहादुर्गसंस्थितास्त्रिदशायदा ॥ तद्वश्यानबभूवुस्तेतदादैत्योव्यचारयत् ॥ ८ ॥ हृताधिकारास्त्रिदशामयायद्यपिनिर्जिताः ॥ भवन्तिबल
युक्तास्तेकरणीयंममात्रकिम् ॥ ९ ॥ अद्यज्ञातंमयादेवावेदमन्त्रबलान्विताः ॥ तान्हरिष्येततःसर्वेबलहीनाभवन्तिहि ॥ १० ॥ इतिमत्वाततोदैत्यो
विष्णुमालक्ष्यनिद्रितम् ॥ सत्यलोकाज्जहाराशुवेदानांचगणंप्रभुः ॥ ११ ॥ नीतास्तुतेनतेवेदास्तद्भयात्तेनिराक्रमन् ॥ तोयेनिविविशुस्तेऽत्र ॥ ९० ॥
यज्ञमन्त्रसमन्विताः ॥ १२ ॥ तान्मार्गमाणःशङ्खोऽपिसमुद्रान्तर्गतोभ्रमन् ॥ नददर्शततोदैत्यःक्वचिदेकत्रसंस्थितान् ॥ १३ ॥ अथब्रह्मासुरैः
सार्धंविष्णुंशरणमन्वयात् ॥ पूजोपकरणंगृह्यवैकुण्ठभवनंगतः ॥ १४ ॥ तत्रतस्यप्रबोधायगीतवाद्यादिकाःक्रियाः ॥ चक्रुर्देवागन्धपुष्पधूप
दीपान्मुहुर्मुहुः ॥ १५ ॥ अथप्रबुद्धोभगवांस्तद्भक्तिपरितोषितः ॥ ददृशेतैःसुरैस्तत्रसहस्रार्कसमद्युतिः ॥ १६ ॥ उपचारैःषोडशभिःसंपूज्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रिदशास्तदा ॥ दण्डवत्पतिताभूमौतानुवाचाथकेशवः ॥ १७ ॥ विष्णुरुवाच ॥ वरदोऽहंसुरगणागीतवाद्यादिमङ्गलैः ॥ मनोऽभिलषितान्कामा
न्सर्वानेवददामिवः ॥ १८ ॥ इषस्यशुक्लैकादश्यायावदुद्बोधिनीभवेत् ॥ निशातुर्यांशशेषेणगीतवाद्यादिमङ्गलैः ॥ १९ ॥ कुर्वन्ति
मनुजानित्यंभवद्भिर्यद्यथाकृतम् ॥ तेमत्प्रियकरानित्यंमत्सांनिध्यंव्रजन्तिहि ॥ २० ॥ पाद्यार्घाचमनीयाद्यैर्भवद्भिर्यद्यथाकृतम् ॥
तदद्भुतगुणंयस्माज्जातंवःसुखकारजम् ॥ २१ ॥ वेदाःशङ्खहृताःसर्वेतिष्ठन्त्युदकसंस्थिताः ॥ तानानयाम्यहंदेवाहत्वासागरनन्द
नम् ॥ २२ ॥ अद्यप्रभृतिवेदास्तुमन्त्रबीजमखान्विताः ॥ प्रत्यब्दंकार्तिकेमासिविश्राम्यंत्वप्सुसर्वदा ॥ २३ ॥ अद्यप्रभृत्यहमपिभवामि
जलमध्यगः ॥ भवन्तोऽपिमयासार्द्धमायान्तुसमुनीश्वराः ॥ २४ ॥ कालेऽस्मिन्नेवकुर्वन्तिप्रातःस्नानंद्विजोत्तमाः ॥ तेसर्वयज्ञावभृथैःसुस्ना
ताःस्युर्नसंशयः ॥ २५ ॥ येकार्तिकेव्रतंसम्यङ्नित्यंकुर्वन्तिमानवाः ॥ तेदेहान्तेत्वयाशक्रप्राप्यामद्भवनंसदा ॥ २६ ॥ विघ्नेभ्योरक्षणंतेषां
त्वयाकार्यममाज्ञया ॥ देयात्वयाचवरुणपुत्रपौत्रादिसंततिः ॥ २७ ॥ धनवृद्धिर्धनाध्यक्षत्वयाकार्याममाज्ञया ॥ ममरूपधराःसाक्षाज्जीव
न्मुक्ताश्चतेनराः ॥ २८ ॥ आजन्ममरणाद्यैश्चकृतमेतद्व्रतोत्तमम् ॥ यथोक्तविधिनासम्यक्तेमान्याभवतामपि ॥ २९ ॥ एकादश्यांयतश्चा
हंभवद्भिःप्रतिबोधितः ॥ अतश्चैषातिथिर्मान्यासदैवप्रीतिदामम ॥ ३० ॥ व्रतद्वयंसम्यगिदंनरैःकृतंकृष्णस्यसान्निध्यदमस्तिनान्यत् ॥ दाना
नितीर्थानितपांसियज्ञाःस्वर्लोकदानेनसदासुरोत्तमाः ॥ ३१ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चाशत्सहस्रसंहितायांकार्तिकमाहात्म्येश्रीकृष्णस
त्यभामासंवादेशङ्खासुरवधोद्यमोनामनवतितमोऽध्यायः ॥ ९० ॥ नारदउवाच ॥ इत्युक्त्वाभगवान्विष्णुःशफरीतुल्यरूपधृत् ॥ सपपाता
ञ्जलौविन्ध्येनिवासेकश्यपस्यच ॥ १ ॥ सतंकमण्डलौक्षिप्रंकृपयाक्षिप्तवान्मुनिः ॥ तावत्सनममौतत्रततःकूपेन्यवेशयत् ॥ २ ॥ तत्रा
पिनममौतावत्कासारेप्राक्षिपत्ससताम् ॥ एवंससागरेक्षिप्तस्तत्रसोऽप्यन्ववर्द्धत ॥ ३ ॥ ततोऽवधीत्सतंशङ्खंविष्णुर्वैमत्स्यरूपधृत् ॥ अथतंस्वक
रेधृत्वाबदरीवनमागतः ॥ ४ ॥ तत्राहूयऋषीन्सर्वानिदमाज्ञापयद्विभुः ॥ ५ ॥ श्रीकृष्णउवाच ॥ जलान्तरेविशीर्णांस्तुयूयंवेदान्प्रमा
र्जथ ॥ आनयध्वंचत्वरिताःसरहस्यंजलान्तरात् ॥ तावत्प्रयागेतिष्ठामिदेवतागणसंयुतः ॥ ६ ॥ नारदउवाच ॥ ॥ ततस्तैःसर्वमुनिभि
स्तपोबलसमन्वितैः ॥ उद्धारिताःषडङ्गास्तेवेदायज्ञसमन्विताः ॥ ७ ॥ तेषुयावन्मितंयेनलब्धंतावन्मितस्यहि ॥ ससएवऋषिर्जातस्तदाप्र
भृतिपार्थिव ॥ ८ ॥ अथसर्वेऽपिसंगम्यप्रयागंमुनयोययुः ॥ विष्णवेसविधात्रेतेलब्धान्वेदान्न्यवेदयन् ॥ ९ ॥ लब्ध्वावेदान्सयज्ञांस्तुब्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह्लाहर्षसमन्वितः ॥ अयजच्चाश्वमेधेनदेवार्षिगणसंवृतः ॥ १० ॥ यज्ञातेदेवदेवेशसिद्धपन्नगगुह्यकाः ॥ निपत्यदण्डवद्भूमौविज्ञप्तिंतत्रचक्रिरे ॥
॥ ११ ॥ देवाऊचुः ॥ देवदेवजगन्नाथविज्ञप्तिंशृणुनःप्रभो ॥ हर्षकालोऽयमस्माकंतस्मात्त्वंवरदोभव ॥ १२ ॥ स्थानेऽस्मिन्नृषयोवेदान्नष्टान्प्रा
पुःपुनःस्वयम् ॥ यज्ञभागान्वयंप्राप्तास्त्वत्प्रसादाद्रमापते ॥ १३ ॥ स्थानमेतदपिश्रेष्ठंपृथिव्यांपुण्यवर्द्धनम् ॥ भुक्तिमुक्तिप्रदंचास्तुप्रसादा
द्भवतःसदा ॥ १४ ॥ कालोऽप्ययंमहापुण्योब्रह्मघ्नादिविशुद्धिकृत् ॥ दत्ताक्षयकरश्चास्तुवरमेतद्ददस्वनः ॥ १५ ॥ श्रीविष्णुरुवाच ॥ ममाप्येतन्मतं
देवायद्भवद्भिरुदाहृतम् ॥ तत्तथास्तुलभत्वेतद्ब्रह्मक्षेत्रमितिप्रथाम् ॥ १६ ॥ सूर्यवंशोद्भवोराजागङ्गामत्रानयिष्यति ॥ सासूर्यकन्ययाचात्रकालिन्द्या
सङ्गमिष्यते ॥ १७ ॥ यूयंचसर्वेब्रह्माद्यानिवसध्वंमयासह ॥ तीर्थराजेतिविख्यातंतीर्थमेतद्भविष्यति ॥ १८ ॥ दानंतपोव्रतंहोमोजपपूजादिकाः
क्रियाः ॥ अनन्तफलदाःसन्तुमत्सान्निध्यप्रदाःसदा ॥ १९ ॥ ब्रह्महत्यादिपापानिबहुजन्मकृतान्यपि ॥ दर्शनादस्यतीर्थस्यविनाशंयान्तुतत्क्ष
णात् ॥ २० ॥ देहत्यागंतथाधीराःकुर्वन्तिममसन्निधौ ॥ मत्तनुंप्रविशन्त्येवपुनर्जन्मनिनोनराः ॥२१॥ पितॄन्निर्दिश्ययेश्राद्धंकुर्वन्त्यत्रसमागताः ॥
तेषांपितृगणाःसर्वेयान्तुतेमत्सलोकताम् ॥ २२ ॥ कालोऽप्येषमहापुण्यफलदोऽस्तुसदानृणाम् ॥ सूर्येमकरगेप्रातःस्नायिनांपापनाशनम् ॥ २३ ॥
मकरस्थरवौमाघेप्रातःस्नानंप्रकुर्वताम् ॥ दर्शनादेवपापानियान्तिसूर्याद्यथातमः ॥ २४ ॥ सलोकत्वंसरूपत्वंसमीपत्वंत्रयंक्रमात् ॥ नृणांददाम्यहं
स्नानान्माघेमकरगेरवौ ॥ २५ ॥ यूयंमुनीश्वराःसर्वेशृणुध्वंवरदोऽस्मिवः ॥ बदरीवनमध्येऽहंसदातिष्ठामिसर्वगः ॥ २६ ॥ अन्यत्रदशभिर्वर्षै
स्तपसावाप्यतेफलम् ॥ तदत्रदिवसैकेनभवद्भिःप्राप्यतेसदा ॥ २७ ॥ स्थानस्यदर्शनंतस्ययेकुर्वन्तिनरोत्तमाः ॥ जीवन्मुक्तास्तदातेषु
पापंनैवावतिष्ठते ॥ २८ ॥ सूतउवाच ॥ एवंदेवान्देवदेवस्तदुक्त्वातत्रैवान्तर्धानमागात्सवेधाः ॥ देवाःसर्वेऽप्यंशकैस्तत्रतस्थुश्चान्तर्धानं
प्रापुरिन्द्रादयस्ते ॥ २९ ॥ इमांचगाथांशृणुयान्नरोत्तमोयःश्रावयेद्वापिविशुद्धचित्तः ॥ सतीर्थराजंबदरीवनंयत्कृत्वाफलंमांसमवाप्नुयाच्च ॥
॥ ३० ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०कार्तिकमाहात्म्येश्रीकृष्णसत्यभामासंवादेशङ्खासुरवधोवेदागमेप्रयागमाहात्म्यंनामैकनवति
तमोऽध्यायः ॥ ९१ ॥ पृथुरुवाच ॥ महाफलंत्वयाप्रोक्तंमुनेकार्तिकमाघयोः ॥ तयोःस्नानविधिंसम्यङ्नियमानपिनारद ॥ उद्यापनविधिंचैव ॥९१॥
यथावद्वक्तुमर्हसि ॥१॥ नारदउवाच ॥त्वंविष्णोरंशसंजातोनाज्ञातंविद्यतेतव ॥ तथापिवदतःसम्यङ्माहात्म्यंशृणुवेनज ॥२॥ आश्विनस्यतुमासस्य

१ 'प्रापुःपुनः पुनः' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

याशुक्लैकादशीभवेत् ॥ कार्त्तिकव्रतनियमंतस्यांकुर्यादतन्द्रितः ॥ ३ ॥ रात्र्यांतुयाँशशेषायांमुदोत्तिष्ठेत्सदाव्रती ॥ नैर्ऋत्यांसंव्रजेद्ग्रामाद्बहिःसोदक भाजनः॥४॥दिवासन्ध्यासुकर्णस्थब्रह्मसूत्रउदङ्मुखः ॥ अन्तर्धायतृणंभूमौशिरःप्रावृत्यवाससा॥५॥वक्त्रंनियम्ययत्नेनष्ठीवनश्वासवर्जितः॥कुर्यान्मूत्र पुरीषेचरात्रौचेद्दक्षिणामुखः॥६॥गृहीतशिश्नश्चोत्थायगृहीत्वाशुचिमृत्तिकाम् ॥ गन्धलेपक्षयकरंशौचंकुर्यादतन्द्रितः॥७॥एकालिङ्गेगुदेपञ्चतथावामकरे दश॥उभयोःसप्तदातव्यास्तथातिस्रस्तुपादयोः॥८॥एतद्द्वित्रिगुणंप्रोक्तंब्रह्मचारिवनस्थयोः॥यतेश्चतुर्गणंरात्रौतदर्धंशौचमाचरेत्॥९॥ तदर्धमपिमार्गस्थ स्त्रीशूद्राणांतदर्धकम्॥शौचकर्मविहीनस्यसकलानिष्फलाःक्रियाः ॥ १० ॥ मुखशुद्धिविहीनस्यनोमन्त्राःफलदाःस्मृताः॥दन्तजिह्वाविशुद्धिंचततः कुर्यात्प्रयत्नतः॥११॥ आयुर्बलंयशोवर्चःप्रजाःपशुवसूनिच ॥ ब्रह्मप्रज्ञांचमेधांचत्वन्नोदेहिवनस्पते ॥ १२ ॥ इतिमन्त्रंसमुच्चार्यद्वादशाङ्गुलकंसदा ॥ समिधाक्षीरवृक्षस्यक्षयाहोपोषणंविना॥१३॥प्रतिपद्दर्शनवमीषष्ठीश्चार्कदिनंविना ॥ चन्द्रसूर्योपरागेचनकुर्याद्दन्तधावनम् ॥१४॥ कण्टकीवृक्षकार्पास निर्गुण्डीब्रह्मवृक्षजम् ॥ बिल्वैरण्डविगन्धाढ्यंवर्जयेद्दन्तधावनम् ॥१५॥ ततोविष्णोःशिवस्यापिगृहंगच्छेत्प्रसन्नधीः ॥ गन्धपुष्पसुताम्बूलान्गृहीत्वा भक्तितत्परः ॥ १६ ॥ तत्रदेवस्यपाद्यार्घाद्युपचारान्पृथक्पृथक् ॥ कृत्वास्तुत्वापुनर्नत्वाकुर्याद्गीतादिमङ्गलम् ॥ १७ ॥ तालवेणुमृदङ्गादिध्वनियुक्ता न्सनृत्तकान् ॥ पुष्पैर्गन्धैःसताम्बूलैर्गायनानपिचार्चयेत् ॥ १८ ॥ देवालयेगानपरायतस्तेविष्णुमूर्त्तयः ॥ तपांसियज्ञदानानिकृतानिचजगद्गुरोः॥ ॥ १९ ॥ तुष्टिदानिकलौनित्यंभक्त्यादेवस्यसत्पतेः ॥ क्वत्वंवससिदेवेशमयापृष्टस्तुपार्थिव ॥ २० ॥ विष्णुरेवंतदाप्राहमद्भक्तिपरितोषितः ॥२१॥ विष्णुरुवाच ॥ नाहंवसामिवैकुण्ठेयोगिनांहृदयेनच ॥ मद्भक्तायत्रगायन्तितत्रतिष्ठामिनारद ॥ २२ ॥ सत्पुराणकथांश्रुत्वामद्भक्तानांचगायनम् ॥ ने च्छन्तियेनरामूढामद्द्वेष्यास्तेभवन्तिहि ॥ २३ ॥ तेषांपूजादिकंगन्धपुष्पादिक्रियतेनरैः ॥ तेनप्रीतिंतथायामिनतथामत्प्रपूजनात् ॥ २४ ॥ नारद उवाच ॥ शिरीषोन्मत्तगिरिजामल्लिकाशाल्मलीभवैः ॥ अर्कजैःकर्णिकारैश्चविष्णुर्नार्च्यस्तथाक्षतैः॥२५॥जपाकुन्दशिरीषैश्चयूथिकामालतीभवैः ॥ केतकीभवपुष्पैश्चनैवार्च्यःशङ्करस्तथा ॥२६॥ गणेशंतुलसीपत्रैर्दुर्गांनैवचदूर्वया ॥ मुनिपुष्पैस्तथासूर्यंलक्ष्मीकामोनचार्चयेत् ॥ २७ ॥ सुगन्धीनि प्रशस्तानिपूजायांसर्वदैवतु ॥ एवंपूजाविधिंकृत्वादेवदेवंक्षमापयेत् ॥ २८ ॥ मन्त्रहीनंक्रियाहीनंभक्तिहीनंसुरेश्वर ॥ यत्पूजितंमयादेवपरिपूर्णं तदस्तुमे ॥ २९ ॥ ततःप्रदक्षिणंकृत्वादण्डवत्प्रणिपत्यच ॥ पुनःक्षमापयेद्देवंगायनाद्यंक्षमापयेत् ॥ ३० ॥ विष्णोःशिवस्यापिचपूजनादिकंकुर्वन्ति

१ 'नैर्ऋत्याशां व्रजेद्ग्रामात्' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सम्यङ्निशिकार्तिकेये ॥ निर्धूतपापाःसहपूर्वजैस्तेप्रयान्तिविष्णोर्भवनंमनुष्याः ॥ ३१ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०कार्त्तिकमाहात्म्येश्री
कृष्णसत्यभामासंवादेनियमवर्णनंनामद्विनवतितमोऽध्यायः ॥ ९२ ॥ नारदउवाच॥ नाडीद्वयावशिष्टायांरात्रौगच्छेज्जलाशयम् ॥ तिलगन्धाक्षतैः
पुष्पैर्दीपाद्यैःसहितःशुचिः ॥१॥ मानुषेदेवखातेचनद्यांनद्योश्चसंगमे ॥ क्रमाद्दशगुणंस्नानंतीर्थेऽनन्तफलंस्मृतत् ॥२॥ विष्णुंस्मृत्वाततःकुर्यात्सङ्कल्पं
सं[1]वनस्यतु ॥ तीर्थादिदेवतादिभ्यःक्रमादर्घादिदापयेत् ॥ ३ ॥ ॐनमःकमलनाभायनमस्तेजलशायिने ॥ नमस्तेऽस्तुहृषीकेशगृहाणार्घंनमोऽस्तुते
॥ ४ ॥ वैकुण्ठेचप्रयागेचतथाबदरिकाश्रमे ॥ यतोविष्णुर्विचक्रमेत्रेधासनिदधेपदम् ॥ ५ ॥ अतोदेवामामवन्तुयतोविष्णुर्विचक्रमे ॥ तैरेवसहितैः
सर्वैर्मुनिदेवसमन्वितैः॥६॥कार्त्तिकेऽहंकरिष्यामिप्रातःस्नानंसुरोत्तम ॥ प्रीत्यर्थंदेवदेवेशदामोदरमयासह ॥७॥ ध्यात्वाहंत्वांचदेवेशजलेऽस्मिन्स्नातु
मुद्यतः ॥ तवप्रसादात्पापंमेदामोदरविनश्यतु ॥ ८ ॥ अर्घ्यमन्त्रौ ॥ नित्यैनैमित्तिकेकृष्णेकार्तिकेपापनाशने ॥ गृहाणार्घ्यंमयादत्तंराधया
सहितोहरे ॥ ९ ॥ व्रतिनःकार्त्तिकेमासिस्नातस्यविधिवन्मम ॥ गृहाणार्घ्यंमयादत्तंराधयासहितोहरे ॥ १० ॥ स्मृत्वाभागीरथींविष्णुंशिवं
सूर्यंजलेविशेत ॥ नाभिमात्रेजलेतिष्ठन्व्रतीस्नायाद्यथाविधि ॥ ११ ॥ तिलामलकचूर्णेनगृहीस्नानंसमाचरेत् ॥ वनस्थानांयतीनांचतुलसीमूल
मृत्तिका ॥१२॥ सप्तमीदर्शनवमीद्वितीयादशमीषुच ॥ त्रयोदश्यांचनस्नायाद्धात्रीफलतिलैःसह ॥१३॥ आदौकुर्यान्मलस्नानंमन्त्रस्नानंततःपरम् ॥
स्त्रीशूद्राणांनवेदोक्तैर्मन्त्रैस्तेषांपुराणजैः ॥१४॥ स्नानमन्त्राः ॥ त्रिधाभूदेवकार्यार्थयःपुराभक्तिभा[2]वतः ॥ सविष्णुःसर्वपापघ्नःपुनातुकृपयात्रमाम्॥
॥ १५ ॥ विष्णोराज्ञामनुप्राप्यकार्त्तिकव्रतकारणात् ॥ रक्षन्तुदेवास्तेसर्वेमांपुनन्तुसदैवते ॥ १६ ॥ वेदमन्त्राःसबीजास्तुसरहस्याःसवीर्यकाः॥
कश्यपाद्याश्चमुनयोमांपुनन्तुसदैवते ॥ १७ ॥ गङ्गाद्याःसरितःसर्वास्तीर्थानिजलदानदाः ॥ ससप्तसागराःसर्वेमांपुनन्तुजलाशयाः ॥
॥ १८ ॥ पतिव्रतास्त्वदित्याद्यायक्षाःसिद्धाःसपन्नगाः ॥ ओषध्यःपर्वताश्चाशुमांपुनन्तुत्रिलोकजाः ॥ १९ ॥ एभिःस्नात्वाव्रतीमन्त्रै
र्हस्तन्यस्तपवित्रकः ॥ देवर्षीन्मानवान्पितॄंस्तर्पयेच्चयथाविधि ॥ २० ॥ यावन्तःकार्त्तिकेमासिवर्तन्तेपितृतर्पणे ॥ तिलास्तत्सङ्ख्यकाब्दानिपितरः
स्वर्गवासिनः ॥ २१ ॥ ततोजलाद्विनिष्क्रम्यशुचिवस्त्रावृतोव्रती ॥ प्रातःकालोदितंकर्मसमाप्यार्चेद्धरिंपुनः ॥ २२ ॥ तीर्थादिदेवान्संस्मृत्यपुन
रर्चांप्रदापयेत् ॥ गन्धपुष्पफलैर्युक्तोभक्तितत्परमानसः॥२३॥अर्घमन्त्रः ॥ व्रतिनःकार्त्तिकेमासिस्नातस्यविधिवन्मम ॥ गृहाणार्घ्यंमयादत्तंदनुजेन्द्र

१ 'स्नपनस्य'इ०, 'स्तवनस्य' इ० च पा०। २ 'भावनः 'इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निषूदन ॥२४॥ ततश्चब्राह्मणान्भक्त्याभोजयेद्वेदपारगान् ॥ गन्धपुष्पैःसताम्बूलैःप्रणमेच्चपुनःपुनः ॥२५॥तीर्थानिदक्षिणेपादेवेदाश्चमुखमाश्रिताः ॥ सर्वाङ्गेसंस्थितादेवाःपूजिताःस्युर्द्विजार्चनात ॥ २६ ॥ अव्यक्तरूपिणोविष्णोःस्वरूपंब्राह्मणाभुवि ॥ नावमान्यानोविरोध्याःकदाचिच्छुभमिच्छता ॥ २७ ॥ तांवैहरिप्रियांदेवितुलसीमर्चयेद्व्रती ॥ प्रयागस्नानयुक्तानांकाश्यांप्राणविमोक्षणे॥२८॥यत्फलंविहितंवेदैस्तुलसीपूजनेनतत् ॥ युक्तोयदिस दापापैःसुकृतंनार्जितंक्वचित् ॥२९॥ तथापिगीयतेमोक्षस्तुलसीपूजितायदि ॥ प्रदक्षिणनमस्कारान्कुर्यादेकाग्रमानसः॥३०॥देवैस्त्वंनिर्मिता"र्वमर्चिता सिमुनीश्वरैः॥नमोनमस्तेतुलसिपापंहरहरिप्रिये॥३१॥ततोविष्णुकथांश्रुत्वापौराणींस्निग्धमानसः ॥ तंब्राह्मणंमुनिंविप्रंपूजयेद्भक्तिमान्व्रती ॥३२॥ एवंपूर्णविधिंसम्यक्पूर्वोक्तंभक्तिमान्नरः ॥ करोतियःसलभतेनारायणसलोकताम्॥३३॥ रोगापहंपापविनाशकृत्परंसद्बुद्धिदंपुत्रधनादिसाधनम् ॥ मुक्तेर्निदानंनहिकार्तिकव्रताद्विष्णुप्रियादन्यदिहास्तिभूतले ॥३४॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०कार्त्तिकमाहात्म्येश्रीकृष्णसत्यभामासंवादेस्नानविधिवर्णनंनामत्रिनवतितमोऽध्यायः ॥ ९३ ॥ नारदउवाच ॥ कार्त्तिकव्रतिनांपुंसांनियमायेप्रकीर्तिताः ॥ ताञ्छृणुष्वमयाराजन्कथ्यमानान्समन्ततः ॥१॥ अन्नदानंगवांग्रासोवैष्णवैःसहसंकथा ॥ बोधनात्परदीपस्यधर्ममाहुर्मनीषिणः ॥ २ ॥ परान्नंपरशय्यांचपरवादंपराङ्गनाम् ॥ सदाचवर्जयेत्प्राज्ञोविशेषेणतुकार्त्तिके ॥ ३ ॥ सर्वामिषाणिमांसानिक्षौद्रंसौवीरकंतथा ॥ राजमाषादिकंचापिनैवाद्यात्कार्त्तिकव्रती ॥ ४ ॥ द्विदलंतिलतैलंचतथान्नमशुद्धूषितम् ॥ भावदुष्टंशब्ददुष्टंवर्जयेत्कार्त्तिकव्रती॥५॥परान्नंचपरद्रोहंपरदारागमंतथा॥तीर्थेप्रतिग्रहंनापिगृह्णीयात्कार्त्तिकव्रती॥६॥ देवदेवद्विजानांचगुरोश्चव्रतिनस्तथा ॥ स्त्रीराजमहतांनिन्दांवर्जयेत्कार्त्तिकव्रती ॥ ७ ॥ प्राण्यङ्गमामिषंचूर्णंफलेजम्बीरमामिषम् ॥ धान्येमसूरिकाप्रोक्ताचान्नंपर्युषितंतथा ॥ ८ ॥अजागोमहिषीक्षीरादन्यदुग्धादिचामिषम् ॥ द्विजक्रीतारसाःसर्वेलवणंभूमिजंतथा ॥९॥ ताम्रपात्रस्थितंगव्यंजलंपल्वलसंस्थितम् ॥ आत्मार्थंपाचितंचान्नमामिषंतत्स्मृतंबुधैः ॥ १० ॥ ब्रह्मचर्यमधःसुप्तिःपत्रावल्यांचभोजनम् ॥ चतुर्थकालेभञ्जीतकुर्यादेवंसदाव्रती ॥ ॥११॥नरकस्यचतुर्दश्यांतैलाभ्यङ्गंचकारयेत् ॥ अन्यत्रकार्त्तिकस्नायीतैलाभ्यङ्गंनकारयेत् ॥१२॥पलाण्डुंलशुनंशिग्रुंछत्राकंगृञ्जनंतथा ॥ नालिकांमूलकंहिङ्गुंवर्जयेत्कार्त्तिकव्रती॥१३॥अलाबुंचापिवृन्ताकंकूष्माण्डंबृहतीफलम् ॥श्लेष्मातकंकपित्थंचवर्जयेत्कार्तिकव्रती॥१४॥रजस्वलान्त्यजम्लेच्छपतितव्रात्यकैःसह॥द्विजातिवेदबाह्यैश्चनवदेत्कार्त्तिकव्रती ॥१५ ॥ श्वभिर्दृष्टंचकाकैश्चसूतकान्नंचवर्जयेत्॥ द्विष्पाचितंचदग्धान्नंवर्जयेत्कार्त्तिकव्रती

१ 'पुनस्तं ब्राह्मण चैव पजयत्' इ० पा० । २ 'द्विजद्विड्वेदवाह्यैश्च' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥१६॥तैलाभ्यङ्गंतथाशय्यांपरान्नंकांस्यभोजनम् ॥ कार्तिकेवर्जयेद्यस्तुपरिपूर्णव्रतीभवेत् ॥१७॥ एतानिवर्जयेन्नित्यंव्रतीसर्वव्रतेष्वपि॥कृच्छ्राद्यंचापि
कुर्वीतस्वशक्त्याविष्णुतुष्टये॥१८॥क्रमात्कूष्माण्डवृन्ताकबृहतीमूलकंतथा॥श्रीफलंचकलिङ्गंचफलंधात्रीभवंतथा॥१९॥ नारिकेरंमहालाबुंपटोलंबदरी
फलम् ॥ चर्मवैकतकंचापिबिसंवैकट्फलंतथा ॥ २० ॥ शाकान्येतानिवर्ज्यानिक्रमात्प्रतिपदादिषु॥धात्रीफलंरवौतद्वद्वर्जयेत्सर्वदागृही॥२१॥एभ्यो
ऽपिवर्जयेत्किंचिद्यद्विष्णुप्रीतयेनरः ॥ तत्पुनर्ब्राह्मणेदत्त्वाभक्षयेत्सर्वदैवहि॥२२॥ एवमेवहिमाघेऽपिकुर्याद्वैनियमान्व्रती ॥ हरिजागरणंतत्रविधिप्रोक्तं
चकारयेत् ॥२३॥ यथोक्तकारिणंदृष्ट्वाकार्त्तिकव्रतिनंनरम् ॥ यमदूताःपलायन्तेगजाःसिंहार्दितायथा ॥२४॥ वरंविष्णुव्रतंह्येतदथयज्ञशताधिकम् ॥
यज्ञकृत्प्राप्नुयात्स्वर्गंवैकुण्ठंकार्त्तिकव्रती ॥२५॥ भुक्तिमुक्तिप्रदानीहयानिक्षेत्राणिभूतले ॥ वसन्तितानितद्देहेकार्त्तिकव्रतकारिणः॥२६॥दुःस्वप्नंदुष्कृतं
किंचिन्मनोवाक्कायकर्मजम् ॥ कार्त्तिकव्रतिनंदृष्ट्वाविलयंयान्तितत्क्षणात् ॥२७॥ कार्त्तिकव्रतिनःपुंसोविष्णुवाक्यप्रणोदिताः ॥ रक्षांकुर्वन्तिशक्राद्या
राज्ञोवैकिङ्करायथा ॥ २८ ॥ विष्णुव्रतकरानित्यंयत्रतिष्ठन्तिपूजिताः ॥ ग्रहभूतपिशाचाद्यानैवतिष्ठन्तितत्रवै ॥ २९ ॥ कार्त्तिकव्रतिनःपुण्यंयथोक्तव्रत
कारिणः ॥ नसमर्थोभवेद्वक्तुंब्रह्मापीहचतुर्मुखः॥३०॥विष्णुप्रियंसकलकल्मषनाशनंचसर्वत्रपुत्रधनधान्यसमृद्धिकारि॥ ऊर्जेव्रतंसनियमंकुरुतेमनुष्यः
किंतस्यतीर्थपरिशीलनसेवयाच ॥ ३१ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०कार्त्तिकमाहात्म्येश्रीकृष्णसत्यभामासंवादेनियमवर्णनंनामचतुर्नवति
तमोऽध्यायः ॥९४॥ नारदउवाच ॥ अथोर्जव्रतिनःसम्यगुद्यापनविधिंनृप ॥ तच्छृणुष्वमयाख्यातंकिंविधानंसमासतः ॥ १ ॥ ऊर्जशुक्लचतुर्दश्यां
कुर्यादुद्यापनंव्रती ॥ व्रतसंपूर्णताथायविष्णुप्रीत्यर्थमेवच ॥ २ ॥ तुलस्याउपरिष्टात्तुकुर्यान्मण्डपिकांशुभाम् ॥ सुतोरणांचतुर्द्वारांपुष्पचामर
शोभिताम् ॥३ ॥ द्वारेषुद्वारपालांश्चपूजयेन्मृन्मयान्पृथक् ॥ पुण्यशीलंसुशीलंचजयंविजयमेवच ॥ ४ ॥ तुलसीमूलदेशेचसर्वतोभद्रमालिखेत् ॥
चतुर्भिर्वर्णकैःसम्यक्छोभाढ्यंसमलङ्कृतम् ॥५॥ तस्योपरिष्टात्सपिधानंपञ्चरत्नसमन्वितम् ॥ महाफलेनसंयुक्तंकुम्भंतत्रनिधायच ॥ ६ ॥ पूजयेत्तत्र
देवेशंशङ्खचक्रगदाधरम् ॥ कौशेयपीतवसनंयुक्तंजलधिकन्यया॥७॥इन्द्रादिलोकपालांश्चपूजयेन्मण्डलेव्रती ॥ द्वादश्यांप्रतिबुद्धःसत्रयोदश्यांयतः
सुरैः॥८॥दृष्टोऽर्चितश्चतुर्दश्यांतस्मात्पूज्यस्तेथाधिकम् ॥ तस्यामुपवसेद्भक्त्याशान्तःप्रयतमानसः॥९॥पूजयेद्देवदेवेशंसौवर्णंगुर्वनुज्ञया ॥ उपचारैः
षोडशभिर्नानाभक्ष्यसमन्वितैः ॥१० ॥ रात्रौजागरणंकुर्याद्गीतवाद्यादिमङ्गलैः ॥ गीतकुर्वन्तियेभक्त्याजागरेचक्रपाणिनः ॥११॥ जन्मान्तरशतो

१'चर्मवृन्ताकरुचकीशाकं तुलखिजं तथा'। इ०,चर्मवृन्ताकचवलीशाकं तुलसिजं तथा' ॥ इ० च पा०। २ 'स्तिथाविह' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्भूतैस्तैर्मुक्ताः पापसंचयः ॥ जागरे वासरे विष्णोर्गीतंनृत्यंचकुर्वताम् ॥१२॥ गोसहस्रं चददतां तत्फलंसमुदाहृतम् ॥ गीतनृत्यादिकंकुर्वन्दर्शयेत्कौतुकानि
च ॥ १३ ॥ पुरतोवासुदेवस्यरात्रौयोहरिजागरे ॥ पठन्विष्णुचरित्राणियोरञ्जयतिवैष्णवान् ॥ १४ ॥ मुखेनकुरुतेवाद्यंस्वेच्छालापांश्चदर्शयन् ॥
भावैरेतैर्नरोयस्तुकुरुतेहरिजागरम् ॥१५॥ दिनेदिनेतस्यपुण्यंतीर्थकोटिसमंस्मृतम् ॥ ततस्तुपौर्णमास्यांवैसपत्नीकान्द्विजोत्तमान् ॥१६॥ त्रिंशन्मिता
ननेकान्वास्वशक्त्यावानिमन्त्रयेत् ॥ वरान्दत्त्वायतोविष्णुर्मत्स्यरूप्यभवत्तदा ॥ १७ ॥ तस्यांदत्तंहुतंजप्तंतदक्षयफलंस्मृतम् ॥ अतस्तान्भोजय
द्विप्रान्पायसान्नादिनाव्रती ॥ १८ ॥ अतोदेवाइतिद्वाभ्यांजुहुयात्तिलपायसम् ॥ प्रीत्यर्थंदेवदेवस्यदेवानांचपृथक्पृथक् ॥ १९ ॥ दक्षिणांचयथाशक्ति
प्रदद्यात्प्रणमेच्चतान् ॥ पुनर्देवंसमभ्यर्च्यदेवांश्चतुलसींतथा ॥२०॥ ततोगांकपिलांतत्रपूजयद्विधिवद्व्रती ॥ गुरुंव्रतोपदेष्टारंवस्त्रालङ्कारणादिभिः ॥२१॥
सपत्नीकंसमभ्यर्च्यगांचतस्मैप्रदापयेत् ॥ युष्मत्प्रसादाद्देवेशः प्रसन्नोमेभवेत्तदा ॥२२॥ व्रतादस्माच्चयत्पापंसप्तजन्मकृतंमया ॥ तत्सवनाशमायातु
स्थिरामेचास्तुसन्ततिः ॥ २३ ॥ मनोरथाश्चसफलाः सन्तुनित्यंममार्चनात् ॥ देहान्तेवैष्णवंस्थानंप्राप्नुयामतिदुर्लभम् ॥ २४ ॥ इतिक्षमाप्यतां
न्विप्रान्प्रसाद्यचविसर्जयेत् ॥ तामर्चांगुरवेदद्याद्रत्नयुक्तांतदाव्रती ॥ २५ ॥ तदासुहृद्गुरुयुतः स्वयंभुञ्जीतभक्तिमान् ॥ कार्तिकेवाथतपसिविधिरेवं
विधः स्मृतः ॥ २६ ॥ एवंयः कुरुतेसम्यक्कार्तिकस्यव्रतंनरः ॥ विपाप्मासविनिर्मुक्तोविष्णुसान्निध्यगोभवेत् ॥ २७ ॥ सर्वव्रतैः सर्वतीर्थैः सर्वदानैश्च
यत्फलम् ॥ तत्कोटिगुणितंज्ञेयंसम्यगस्यविधानतः ॥ २८ ॥ तधन्यास्तेमहापुण्यास्तेषांसर्वफलोदयः ॥ विष्णुभक्तिरतायेस्युः कार्तिकेव्रतकारिणः ॥
॥२९॥ देहस्थितानिपापानिवितर्कयान्तितद्भयात् ॥ क्वयास्यामोवदन्त्येवंयद्ययंव्रतकृन्नरः ॥३०॥ इत्यूर्जव्रतनियमाञ्छृणोतिभक्त्यायोवैतत्कथयति
वैष्णवाग्रतोयः ॥ तौसम्यग्व्रतकरणात्फलंलभेतांदृष्ट्वातौकलुषविनाशनंलभन्ते ॥३१॥ इतिश्रीपाद्मेमहापुराणेपञ्चप० उत्तर० कार्तिकमाहात्म्येश्रीकृष्ण
सत्यभामासंवादेउद्यापनवर्णनंनामपञ्चनवतितमोऽध्यायः ॥९५॥ पृथुरुवाच ॥ यत्त्वयाकथितंब्रह्मन्व्रतमूर्जस्यविस्तरात् ॥ तत्रयातुलसीमूलेविष्णोः
पूजात्वयोदिता ॥१॥ तेनाहंप्रष्टुमिच्छामिमाहात्म्यंतुलसीभवम् ॥ कथंसातिप्रियाविष्णोर्देवदेवस्यशार्ङ्गिणः ॥२॥ कथमेषासमुत्पन्नाकस्मिन्स्थाने
चनारद ॥ एतद्ब्रूहिसमासेनसर्वज्ञोऽसिमतोहिमे ॥ ३ ॥ नारदउवाच ॥ शृणुराजन्प्रवक्ष्यामिमाहात्म्यंतुलसीभवम् ॥ सेतिहासंपुरावृत्तंतत्सर्वं
कथयामिते ॥ ४ ॥ पुराशक्रः शिवंद्रष्टुमगात्कैलासपर्वतम् ॥ सर्वदेवैः परिवृतस्त्वप्सरोगणसेवितः ॥ ५ ॥ यावद्गतः शिवगृहंतावत्तत्राशुदृष्टवान् ॥

१ 'राधादामोदरप्रीत्यै' इ० पा०। २ 'द्रवा' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुरुषंभीमकर्माणंदंष्ट्रानयनभीषणम् ॥ ६ ॥ सपृष्टस्तेनकस्त्वंभोःक्वगतोजगदीश्वरः ॥ एवंपुनःपुनःपृष्टःसयदानोचिवान्नृप ॥ ७ ॥ ततः
क्रुद्धोवज्रपाणिस्तंनिर्भर्त्स्यवचोऽब्रवीत् ॥ ८ ॥ शक्रउवाच ॥ रेमयापृच्छ्यमानोऽपिनोत्तरंदत्तवानसि ॥ अतस्त्वांहन्मिवज्रेणकस्तेत्रातास्ति
दुर्मते ॥ ९ ॥ इत्युदीर्यततोवज्रीवज्रेणाहंश्चतंदृढम् ॥ तेनास्यकण्ठोनीलत्वमगाद्वज्रंचभस्मताम् ॥ १० ॥ ततोरुद्रःप्रजज्वालतेजसाप्रदहन्निव ॥
दृष्ट्वाबृहस्पतिस्तूर्णंकृताञ्जलिपुटोऽभवत् ॥ इन्द्रश्चदण्डवद्भूमौकृत्वास्तोतुंप्रचक्रमे ॥ ११ ॥ बृहस्पतिरुवाच ॥ नमोदेवाधिदेवायत्र्यम्बकायकपर्दिने
त्रिपुरघ्नायशर्वायनमोऽन्धकनिषूदिने ॥ १२ ॥ विरूपायातिरूपायबहुरूपायशम्भवे ॥ यज्ञविध्वंसकर्त्रेचयज्ञानांफलदायिने ॥१३ ॥ कालान्तकाय
कालायकालभोगधरायच ॥ नमोब्रह्मशिरोहन्त्रेब्राह्मणायनमोनमः ॥१४॥ नारदउवाच ॥ एवंस्तुतस्तदाशम्भुर्द्विजर्षभंजगादह ॥ संहरन्नयनज्वालां
त्रिलोकीदहनक्षमाम् ॥ १५ ॥ ईश्वरउवाच ॥ वरंवरयभोब्रह्मन्प्रीतःस्तुत्यानयातव ॥ इन्द्रस्यजीवदानेनजीवेतित्वंप्रथांव्रज ॥ १६ ॥ बृहस्पति
रुवाच ॥ यदितुष्टोऽसिदेवत्वंपाहीन्द्रंशरणागतम् ॥ अग्निरेषशमंयातुभालनेत्रसमुद्भवः ॥ १७ ॥ ईश्वरउवाच ॥ पुनःप्रवेशमायातिभालनेत्रे
कथंत्वयम् ॥ एनंत्यक्ष्याम्यहंदूरेयथेन्द्रंनैवपीडयेत् ॥ १८ ॥ नारदउवाच ॥ इत्युक्त्वातंकरेधृत्वाप्राक्षिपल्लवणाम्भसि ॥ सोऽपतत्सिन्धुगङ्गायाः
सागरस्यचसंगमे ॥ १९ ॥ तदासबालरूपत्वमगात्तत्ररुरोदच ॥ रुदतस्तस्यशब्देनप्राकम्पतमहीमुहुः ॥ २० ॥ स्वर्गश्चसत्यलोकश्च
तत्स्वनाद्बधिरीकृतौ ॥ श्रु वाब्रह्मायथौतत्रकिमेतदितिविस्मितः ॥ २१ ॥ तावत्समुद्रस्योत्सङ्गेतंबालंसददर्शह ॥ दृष्ट्वाब्राह्मणमायान्तंसमुद्रोऽपि
कृताञ्जलिः ॥ २२ ॥ प्रणम्यशिरसाबालंतस्योत्सङ्गेन्यवेशयत् ॥ ततोब्रह्माब्रवीद्वाक्यंकस्यायंशिशुरद्भुतः ॥ २३ ॥ सरित्पतेकुतोलब्धो
बालोह्येषमहाबलः ॥ यस्यनादेनसंत्रस्तादेवासुरमहोरगाः ॥२४॥नारदउवाच ॥ निशम्येतिवचोधातुर्वाक्यंतुसागरोऽब्रवीत् ॥ २५ ॥ समुद्रउवाच॥
भोब्रह्मन्सिधुगङ्गायांजातोऽयंममपुत्रकः ॥ जातकर्मादिसंस्कारान्कुरुष्वास्यजगद्गुरो ॥ २६ ॥ नारदउवाच ॥ इत्थंवदतिपाथोधौसबालः
सागरात्मजः ॥ ब्रह्माणमग्रहीत्कूर्चेविधुन्वंस्तंमुहुर्मुहुः ॥ २७ ॥ धुन्वतस्तस्यकूर्चंतुनेत्राभ्यामागमज्जलम् ॥ कथंचिन्मुक्तकूर्चोऽथब्रह्माप्रोवाच
सागरम् ॥ २८ ॥ ब्रह्मोवाच ॥ नेत्राभ्यांविधृतंयस्मादनेनैतज्जलंमम ॥ तस्माज्जलन्धरइतिख्यातोनाम्नाभवत्वसौ ॥ २९ ॥ अधुनैवैषतरुणः
सर्वशस्त्रास्त्रपारगः ॥ अवध्यःसर्वभूतानांविनारुद्रंभविष्यति ॥ यातियत्रसमुद्भूतस्तत्रेदानींगमिष्यति ॥ ३० ॥ नारदउवाच ॥ इत्युक्त्वा
शुक्रमाहूयराज्येतंचाभ्यषेचयत् ॥ आमन्त्र्यसरितांनाथंब्रह्मान्तर्धानमन्वगात् ॥ ३१ ॥ अथतद्दर्शनोत्फुल्लनयनःसागरस्तदा ॥ कालनेमिसुतां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृन्दांतद्भार्यार्थमयाचत ॥ ३२ ॥ तेकालनेमिप्रमुखास्ततोऽसुरास्तस्मैसुतांतांप्रददुःप्रहर्षिताः ॥ सचापितान्प्राप्यसुहृद्वरान्वशीशशासगांशुक्रसहा
यवान्बली ॥३३॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०कार्तिकमाहात्म्येश्रीकृष्णसत्यभामासंवादेजालन्धरोत्पत्तिवर्णननामषण्णवतितमोऽध्यायः॥
॥ ९६ ॥ नारदउवाच ॥ येदेवैर्निर्जिताःपूर्वंदैत्याःपातालसंस्थिताः ॥ तेहिभूमण्डलेजाताःनिर्भयास्तमुपासितुम् ॥ १ ॥ कदाचिच्छिन्नशिर
संराहुंदृष्ट्वासदैत्यराट् ॥ पप्रच्छभार्गवंविप्रंकेनेदंविहितंप्रभो ॥ २ ॥ भार्गवस्तस्यशिरसश्छेदंराहोःशशंसह ॥ अमृतार्थंसमुद्रस्यमथनं
देवकारितम् ॥ ३ ॥ रत्नापहरणंचैवदैत्यानांचपराभवम् ॥ तच्छ्रुत्वाक्रोधरक्ताक्षःस्वपितुर्मथनंतदा ॥ ४ ॥ सदूतंप्रेषयामासघ
स्मरंशक्रसंनिधौ ॥ दूतस्त्रिविष्टपंगत्वासुधर्मांप्राप्यसत्वरम् ॥ गर्वादखर्वमौलिस्तुदेवेन्द्रंवाक्यमब्रवीत् ॥ ५ ॥ दूतउवाच ॥ जलन्धरो
ऽब्धितनयःसर्वदैत्यजनेश्वरः ॥ दूतोऽहंप्रेषितस्तेनसयदाहशृणुष्वतत् ॥ ६ ॥ कस्मात्त्वयाममपितामथितःसागरोऽद्रिणा ॥ नीतानिसर्व
रत्नानितानिशीघ्रंप्रयच्छमे ॥७॥ नारदउवाच ॥ इतिदूतवचःश्रुत्वाविस्मितस्त्रिदशाधिपः ॥ उवाचघस्मरंघोरंभयरोषसमन्वितः ॥८॥ इन्द्रउवाच ॥
शृणुदूतमयापूर्वंमथितःसागरोयथा ॥ अद्रयोमद्भयाद्भीताःस्वकुक्षिस्थास्तथाकृताः ॥९ ॥ अन्येऽपिमद्द्विषस्तेनरक्षितादितिजास्तथा ॥ तस्मात्तद्रत्न
जातंतुमयाप्यपहृतंकिल ॥ १० ॥ शङ्खोऽप्येवंपुरादेवानद्विषत्सागरात्मजः ॥ ममानुजेननिहतःप्रविष्टःसागरोदरम् ॥ ११ ॥ तद्गच्छकथय
स्वास्यसर्वंमथनकारणम् ॥ १२ ॥ नारदउवाच ॥ इत्थंविसर्जितोदूतस्तदेन्द्रेणागमद्द्रुतम् ॥ तदिन्द्रवचनंदैत्यराजायाकथयत्तदा ॥ १३ ॥
तन्निशम्यतदादैत्यीरोषात्प्रस्फुरिताधरः ॥ उद्योगमकरोत्तूर्णंसर्वदेवजिगीषया ॥१४॥ तदोद्योगेसुरेन्द्रस्यदिग्भ्यःपातालतस्तथा ॥ दितिजाःप्रत्यप
द्यन्तशतशःकोटिशस्तथा॥१५॥अथशुम्भनिशुम्भाद्यैर्बलाधिपतिकोटिभिः॥गत्वात्रिविष्टपंदैत्योयुद्धायाधिष्ठितोऽभवत् ॥१६॥ निर्ययुस्त्वमरावत्या
देवायुद्धायदंशिताः ॥ पुरमावृत्यतिष्ठन्तिदृष्ट्वादैत्यबलंमहत् ॥ १७ ॥ ततःसमभवद्युद्धंदेवदानवसेनयोः ॥ मुसलैःपरिघैर्बाणैर्गदापरशुशक्तिभिः ॥
॥ १८ ॥ अन्योन्यंसमधावेतांजघ्नतुश्चपरस्परम् ॥ क्षणेनाभवतांसेनेरुधिरौघपरिप्लुते ॥१९॥ पतितैःपात्यमानैश्चगजाश्वरथपत्तिभिः ॥ व्यराजत
रणेभूमिःसन्ध्याभ्रपटलैरिव ॥ २० ॥ तत्रयुद्धेहतान्दैत्यान्भार्गवस्तूदतिष्ठिपत् ॥ विद्ययामृतजीविन्यामन्त्रितैस्तोयबिन्दुभिः ॥ २१ ॥ देवांस्तत्र
तथायुद्धेजीवयेदङ्गिरस्सुतः ॥ दिव्यौषधीःसमानीयद्रोणंदेश्याःपुनःपुनः ॥ २२ ॥ दृष्ट्वादेवांस्तथायुद्धेपुनरेवसमुत्थितान् ॥ जलन्धरःक्रोधवशो

१'स्तमुपाश्रिताः' इ० पा०। २ 'देवानपि तथा युद्धे तत्राजीवयदङ्गिराः' इ० पा०। ३ 'द्रोणाद्रेः' ख' इ० पा०।

CC-0. In Public Domain. Digitization by eGangotri

भार्गववाक्यमब्रवीत् ॥२३॥ जलन्धरउवाच ॥ मयादेवाहतायुद्धेउत्तिष्ठन्तिकथंपुनः ॥ तवसंजीवनीविद्यानैवान्यत्रेतिविश्रुतम् ॥२४॥ भृगुरुवाच ॥
दिव्यौषधीःसमानीयद्रोणाद्रेरङ्गिराःसुरान् ॥ जीवयत्येषवैशीघ्रंद्रोणाद्रिंसमपाहर ॥२५॥ नारदउवाच ॥ इत्युक्तःसतुदैत्येन्द्रोनीत्वाद्रोणाचलंतदा ॥
प्राक्षिपत्सागरेतूर्णंपुनरागान्महाहवम् ॥ २६ ॥ अथदेवान्हतान्दृष्ट्वाद्रोणाद्रिमगमद्गुरुः ॥ तावत्तत्रगिरीन्द्रंतंनददर्शसुरार्चितः ॥ २७ ॥ ज्ञात्वादैत्य
हृतंद्रोणंविषण्णोभयविह्वलः ॥ आगत्यदूराद्व्याजह्रेश्वासाकुलितविग्रहः ॥२८॥ पलायध्वंपलायध्वंनायंजेतुंहिशक्यते॥रुद्रांशसंभवोह्येषस्मरध्वंशक्र
चेष्टितम् ॥ २९ ॥ नारदउवाच ॥ श्रुत्वातद्वचनंदेवाभयविह्वलितास्तदा ॥ दैत्यैस्तैर्वध्यमानास्तेऽपलायन्तदिशोदश ॥ ३० ॥ देवान्विदारितान्दृष्ट्वा
दैत्यःसागरनन्दनः ॥ शङ्खभेरीजयरवैःप्रविवेशामरावतीम् ॥३१॥ प्रविष्टेनगरंदैत्येदेवाःशक्रपुरोगमाः ॥ सुवर्णाद्रिगुहांप्राप्यन्यवसन्दैत्यतापिताः
॥३२॥ ततश्चसर्वेष्वसुरोऽधिकारेष्विन्द्रादिकानांविनिवेशयंस्तदा ॥ शुम्भादिकान्दैत्यवरान्पृथक्पृथक्स्वयंसुवर्णाद्रिगुहामगात्पुनः ॥३३॥ इतिश्री
पाद्मेमहापुराणेपञ्चप०उत्तर०कार्त्तिकमाहात्म्येऽमरावतीविजयोनामसप्तनवतितमोऽध्यायः ॥ ९७ ॥ नारदउवाच ॥ पुनर्दैत्यंसमायान्तंदृष्ट्वा
देवाःसवासवाः ॥ भयप्रकम्पिताःसर्वेविष्णुंस्तोतुंप्रचक्रमुः ॥ १ ॥ देवाऊचुः ॥ नमोमत्स्यकूर्मादिनानास्वरूपैःसदाभक्तकार्योद्यतायार्तिहन्त्रे ॥
विधात्रादिसर्गस्थितिध्वंसकर्त्रेगदाशङ्खपद्मारिहस्तायतेऽस्तु ॥ २ ॥ रमावल्लभायासुराणांनिहन्त्रेभुजङ्गारियानायपीताम्बराय ॥ मखादिक्रिया
पाककर्त्रेविकर्त्रेशरण्यायतस्मैनताःस्मोनताःस्मः ॥ ३ ॥ नमोदैत्यसंतापितामर्त्यदुःखाचलध्वंसदम्भोलयेविष्णवेते ॥ भुजङ्गेशतल्पेशयायार्क
चन्द्रद्विनेत्रायतस्मैनताःस्मोनताःस्मः ॥४॥ नारदउवाच ॥ सङ्कष्टनाशनंस्तोत्रंनित्यंयस्तुपठेन्नरः ॥ सकदाचिन्नसङ्कष्टैःपीड्यतेकृपयाहरेः ॥५॥ इति
देवाःस्तुतिंयावत्कुर्वन्तिदनुजद्विषः ॥ तावत्सुराणामापत्तिर्विज्ञाताविष्णुनातदा ॥६॥ सहसोत्थायदैत्यारिःकृपयाखिन्नमानसः ॥ आरुह्यगरुडंवेगा
ल्लक्ष्मींवचनमब्रवीत् ॥७॥ विष्णुरुवाच ॥ जलन्धरेणतेभ्रात्रादेवानांकदनंकृतम् ॥ तैराहूतोगमिष्यामियुद्धायाद्यत्वरान्वितः ॥ ८ ॥ लक्ष्मीरुवाच ॥
अहंतेवल्लभानाथभक्ताचयदिसर्वदा ॥ तत्कथंतेममभ्रातायुद्धेवध्यःकृपानिधे ॥ ९ ॥ श्रीभगवानुवाच ॥ रुद्रांशसंभवत्वाच्चब्रह्मणोवच
नादपि ॥ प्रीत्याचतवनैवायंममवध्योजलन्धरः ॥ १० ॥ नारदउवाच ॥ इत्युक्त्वागरुडारूढःशङ्खचक्रगदासिभृत् ॥ विष्णुर्वेगाद्ययौयोद्धुंयत्रदेवाः
स्तुवन्तिते ॥ ११ ॥ अथारुणानुजात्युग्रपक्षवातप्रपीडिताः ॥ वात्याविवर्तितादैत्याबभ्रमुःखेयथाघनाः ॥ १२ ॥ ततोजलन्धरोदृष्ट्वादैत्यान्वा
त्याप्रपीडितान् ॥ नोवाचवचनंक्रोधात्ततोविष्णुंसमभ्ययात् ॥ १३ ॥ ततःसमभवद्युद्धंविष्णुदैत्येन्द्रयोर्महत् ॥ आकाशंकुर्वतोर्बाणैरन्तेनिरवकाश

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वत् ॥ १४ ॥ विष्णुर्दैत्यस्यबाणौघैर्ध्वजंछत्रंधनुर्हयान् ॥ चिच्छेदतंचहृदयेबाणेनैकेनताडयन् ॥१५॥ ततोदैत्यःसमुत्पत्यगदापाणिस्त्वरान्वितः ॥ आहत्यगरुडंमूर्ध्निपातयामासभूतले ॥ १६ ॥ विष्णुर्गदांचखड्गेनचिच्छेदप्रहसन्निव ॥ तावत्सहृदयेविष्णुंजघानदृढमुष्टिना ॥ १७ ॥ ततस्तौबाहुयुद्धेनयुयुधातेमहाबलौ ॥ बाहुभिर्मुष्टिभिश्चैवजानुभिर्नादयन्महीम् ॥१८॥ एवंसुरुचिरंयुद्धंकृत्वाविष्णुःप्रतापवान् ॥ उवाचदैत्यराजंतंमेघगम्भीरयागिरा ॥ १९ ॥ विष्णुरुवाच ॥ वरंवरयदैत्येन्द्रप्रीतोऽस्मितवविक्रमात् ॥ अदेयमपितेदास्येयत्तेमनसिवर्तते ॥ २० ॥ जलन्धरउवाच ॥ यदिभावुकतुष्टोऽसिवरमेतंददस्वमे ॥ मद्भगिन्यासहतयामद्गृहेसगणोवस ॥ २१ ॥ नारदउवाच ॥ तथेत्युक्त्वासभगवान्सर्वदेवगणैःसह ॥ जलन्धरंनामपुरमगमद्रमयासह[1] ॥ २२ ॥ जलन्धरश्चदेवानामधिकारेषुदानवान् ॥ स्थापयित्वासहर्षःसन्पुनरागान्महीतले ॥ २३ ॥ देवगन्धर्वसिद्धेषुयत्किंचिद्रत्नसंज्ञितम् ॥ तदात्मवशगंकृत्वातिष्ठत्सागरनन्दनः ॥ २४ ॥ पातालभवनेदैत्यंनिशुम्भंचमहाबलम् ॥ स्थापयित्वासशेषादीननयद्भूतलंबली॥२५॥ देवगन्धर्वसिद्धौघान्यक्षराक्षसमानुषान् ॥ स्वपुरेनागरान्कृत्वाशशासभुवनत्रयम् ॥२६॥ एवंजलन्धरःकृत्वादेवाश्चवशवर्त्तिनः ॥ धर्मेणपालयामासप्रजाःपुत्रानिवौरसान्॥२७॥नकश्चिद्व्याधितोनैवदुःखितोनकृशस्तथा ॥ नदीनोदृश्यतेतस्मिन्धर्माद्राज्यंप्रशासति ॥२८॥ एवंमहींशासतिदानवेन्द्रेधर्मेणसम्यक्चयदृच्छयाहम् ॥ कदाचिदागामथतस्यलक्ष्मींविलोकितुंश्रीरमणंचसेवितुम् ॥ २९ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप० उत्तर०कार्त्तिकमाहात्म्येश्रीकृष्णसत्यभामासंवादेजलन्धरप्रवेशोनामाष्टनवतितमोऽध्यायः ॥ ९८ ॥ नारदउवाच॥समांसंपूज्यविधिवद्दानवेन्द्रोऽतिभक्तितः॥ संप्रहस्यतदावाक्यंजगादनृपसत्तम ॥१॥ जलन्धरउवाच ॥ कुतस्त्वागम्यतेब्रह्मन्किंचदृष्टंत्वयाक्वचित् ॥ यदर्थमिहचायातस्तदाज्ञापयमांमुने ॥२॥ नारदउवाच ॥ गतःकैलासशिखरंदैत्येन्द्राहंयदृच्छया ॥ तत्रोमयासहासीनंदृष्टवानस्मिशङ्करम् ॥ ३ ॥ योजनायुतविस्तीर्णेकल्पद्रुममहावने ॥ कामधेनुशताकीर्णेचिन्तामणिसुदीपिते ॥४॥ तंदृष्ट्वामहदाश्चर्यंवितर्कोमेऽभवत्तदा ॥ क्वापीदृशीभवेदृद्धिस्त्रिलोक्यांवानवेतिच॥ ५ ॥ तावत्तवापिदैत्येन्द्रसमृद्धिःसम्भृतामया ॥ तद्विलोकनकामोऽहंत्वत्सान्निध्यमिहागतः ॥६॥ त्वत्समृद्धिमिमांपश्यन्स्त्रीरत्नरहिताध्रुवम् ॥ तर्कयामिशिवादन्यस्त्रिलोक्यांनसमृद्धिमान् ॥ ७ ॥ अप्सरोनागकन्याश्चयद्यपित्वद्वशेस्थिताः ॥ तथापितानपार्वत्यारूपेणसदृशाध्रुवम् ॥ ८ ॥ यस्यालावण्यजलधौनिमग्नश्चतुराननः ॥ स्वधैर्यममुचत्पूर्वंतयाकान्योपमीयते ॥ ९ ॥ वीतरागोऽपिहिययामदनारिःस्वलीलया ॥ विश्वतन्त्रोऽपितपसासचात्मवशगः

---

१ 'तदा जलन्धरपुरम्' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृतः ॥१०॥सौन्दर्यगहनेभ्राम्यञ्छबरीरूपयापुरा ॥ निष्कामःकामयुक्तोऽपिस्ववशोऽपिवशःकृतः ॥११॥ यस्याःपुनःपुनःपश्यन्रूपधाताविसर्जने ॥
ससर्जाप्सरसस्तास्तास्तत्समैकापिनाभवत् ॥ १२ ॥ अतःस्त्रीरत्नसंभोक्तुःसमृद्धिस्तस्यसावरा ॥ तथानतवदैत्येन्द्रसर्वरत्नाधिपस्यच ॥ १३ ॥
एवमुक्त्वातमामन्त्र्यगतेमयिसदैत्यराट् ॥ तद्रूपश्रवणादासीदनङ्गज्वरपीडितः ॥१४ ॥ अथसंप्रेषयामासदूतंचसिंहिकासुतम् ॥ त्र्यम्बकायतदाकिंचि
द्विष्णुमायाविमोहितः ॥ १५ ॥ कैलासमगमद्राहुःसर्वशुक्लेन्दुवर्चसम् ॥ कात्स्न्र्येनकृष्णपक्षेन्दुवर्चसंस्वाङ्गजेनतु ॥ १६ ॥ निवेदितस्तदादेशा
न्नन्दिनाचप्रवेशितः ॥ त्र्यम्बकभ्रूलतासंज्ञाप्रेरितोवाक्यमब्रवीत् ॥ १७ ॥ राहुरुवाच ॥ देवपन्नगसेव्यस्यत्रैलोक्याधिपतेःप्रभोः ॥ सर्वरत्नेश्वरस्य
त्वमाज्ञांशृणुवृषध्वज ॥ १८ ॥ श्मशानवासिनोनित्यंमुण्डमालाधरस्यच ॥ दिगम्बरस्यतेभार्याकथंहैमवतीशुभा ॥ १९ ॥ अहंरत्नाधिनाथोऽस्मि
साचस्त्रीरत्नसंज्ञिका ॥ तस्मान्ममैवसायोग्यानैवभिक्षाशिनस्तव ॥ २० ॥ नारदउवाच ॥ वदत्येवंतदाराहौभ्रूमध्याच्छूलपाणिनः ॥ अभवत्पुरुषो
रौद्रस्तीव्राशनिसमस्वनः ॥ २१ ॥ सिंहास्यःप्रचलज्जिह्वःसज्वलन्नयनोमहान् ॥ ऊर्ध्वकेशःशुष्कतनुर्नृसिंहइवचापरः ॥ २२ ॥ सतंखादितुमारेभेदृष्ट्वा
राहुर्भयातुरः ॥ अधावदतिवेगेनबहिःसचदधारतम् ॥ २३ ॥ सचराहुर्महाबाहुर्मेघगम्भीरयागिरा ॥ उवाचदेवदेवेशंपाहिमांशरणागतम् ॥२४॥
ब्राह्मणंमांमहादेवखादितुंसमुपागतः ॥ एतस्माद्रक्षदेवेशशरणागतवत्सल ॥ २५ ॥ रक्षरक्षमहादेवत्वामहंशरणंगतः ॥ महादेवोवचःश्रुत्वाब्राह्मणस्य
तदाब्रवीत् ॥ २६ ॥ नैवासौवध्यतामेतिदूतोऽयंपरवान्यतः ॥ मुञ्चेतिपुरुषःश्रुत्वाराहुंतत्याजसोऽम्बरे ॥ राहुंत्यक्त्वासपुरुषोमहादेवंव्यजिज्ञपत् ॥
॥ २७ ॥ पुरुषउवाच ॥ क्षुधामांबाधतेस्वामिन्क्षुत्क्षामश्चास्मिसर्वथा ॥ किंभक्ष्यंममदेवेशतदाज्ञापयमांप्रभो ॥ २८ ॥ ईश्वरउवाच ॥
संभक्षयात्मनःशीघ्रंमांसंत्वंहस्तपादयोः ॥ २९ ॥ नारदउवाच ॥ सशिवेनैवमाज्ञप्तश्चखादपुरुषःस्वयम् ॥ हस्तपादोद्भवंमांसंशिरःशेषोयदा
भवत् ॥ ३० ॥ दृष्ट्वाशिरोऽवशेषंतुसुप्रसन्नःसदाशिवः ॥ पुरुषंभीमकर्माणंतमुवाचसविस्मयः ॥ ३१ ॥ ईश्वरउवाच ॥ त्वंकीर्तिमुखं
संज्ञोहिभवमद्द्वारगःसदा ॥ त्वदर्चायेनकुर्वन्तिनैवतेमत्प्रियङ्कराः ॥ ३२ ॥ नारदउवाच ॥ तदाप्रभृतिदेवस्यद्वारेकीर्तिमुखःस्थितः ॥
नार्चयन्तीहयेपूर्वंतेषामर्चावृथाभवेत् ॥ ३३ ॥ राहुर्विमुक्तोयस्तेनसोऽपतद्बर्बरस्थले ॥ अतःसबर्बरोद्भूतइतिभूमौप्रथांगतः ॥ ३४ ॥ ततश्च
राहुःपुनरेवजातमात्मानमस्मिन्नितिमन्यमानः ॥ समेत्यसर्वंकथयांबभूवजलन्धरायेशविचेष्टितंतत् ॥ ३५ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०

१ 'बाहो मेघ' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कार्त्तिकमाहात्म्ये श्रीकृष्णसत्यभामासवादे दूतसंवादो नामैकोनशततमोऽध्यायः ॥ ९९ ॥ नारदउवाच ॥ जलंधरस्तुतच्छ्रुत्वाकोपाकुलितविग्रहः ॥
निर्जगामाशुदैत्यानांकोटिभिःपरिवारितः ॥ १ ॥ गतस्तस्याग्रतःशुक्रोराहुर्दृष्टिस्थितोऽभवत् ॥ मुकुटश्चापतद्भूमौवेगात्प्रस्खलितस्तदा ॥
॥ २ ॥ दैत्यसैन्यावृतैस्तत्रविमानानांशतैस्तदा ॥ व्यराजतनभःपूर्णंप्रावृषीवबलाहकैः ॥ ३ ॥ तस्योद्योगंतदादृष्ट्वादेवाःशक्रपुरोगमाः ॥
अलक्षिततत्वराजग्मुःशूलिनंतेव्यजिज्ञपन् ॥ ४ ॥ देवाऊचुः ॥ नजानासिकथंस्वामिन्देवाविज्ञापयन्तिभोः ॥ तदस्मद्रक्षणार्थायजहिसागरनन्द
नम् ॥ ५ ॥ नारदउवाच ॥ इतिदेववचःश्रुत्वाप्रहस्यवृषभध्वजः ॥ महाविष्णुंसमाहूयवचनंचेदमब्रवीत् ॥ ६ ॥ ईश्वरउवाच ॥ जलन्धरःकथंविष्णो
नहतःसङ्गरेत्वया ॥ तद्भयाच्चापयातोऽसित्यक्त्वावैकुण्ठमात्मनः ॥ ७ ॥ भगवानुवाच ॥ तवांशसंभवत्वाच्चभ्रातृत्वाच्चतथाश्रियः ॥ नम
यानिहतःसङ्ख्येत्वमेनंजहिदानवम् ॥ ८ ॥ ईश्वरउवाच ॥ नायमेभिर्महातेजाःशस्त्रास्त्रैर्वध्यतेमया ॥ देवैःसर्वैःस्वतजोंऽशःशस्त्रार्थेदीयतांमम ॥ ९ ॥
॥ नारदउवाच ॥ अथविष्णुमुखादेवाःस्वतेजांसिददुस्तदा ॥ तान्येकत्वंगतानीशोदृष्ट्वातेजोमहत्तदा ॥ १० ॥ तेनाकरोन्महादेवोमहसाशस्त्रमु
त्तमम् ॥ चक्रंसुदर्शनंनामज्वालामालातिभीषणम् ॥ ११ ॥ तेजःशेषेणचतदावज्रंचकृतवान्हरः ॥ तावज्जलन्धरोदृष्टःकैलासतलभूमिषु ॥ १२ ॥
हस्त्यश्वरथपत्तीनांकोटीभिःपरिवारितः ॥ तंदृष्ट्वाहर्षिताःसर्वेदेवाजग्मुर्यथागतम् ॥ १३ ॥ गणाश्चसमनह्यन्तयुद्धायातित्वरान्विताः ॥ नन्दीभवक्रसेनानी
मुखाःसर्वेशिवाज्ञया ॥ १४ ॥ अवतेरुर्गणाःसर्वेकैलासाद्युद्धदुर्मदाः ॥ ततःसमभवद्युद्धंकैलासोपत्यकाभुवि ॥ १५ ॥ प्रमथाधिपदैत्यानांघोरं
शस्त्रास्त्रसङ्कुलम् ॥ भेरीमृदङ्गशङ्खौघनिःस्वनैर्वीरहर्षणैः ॥ १६ ॥ गजाश्वरथशब्दैश्चनादिताभूर्व्यकम्पत ॥ शक्तितोमरबाणौघैर्मुशलप्रासपट्टिशैः ॥ १७ ॥
व्यराजतनभःपूर्णमुल्काभिरिवसंवृतम् ॥ निहतैरथनागाश्वैःसर्वाभूमि१र्व्यराजत ॥ १८ ॥ वज्राहताचलशिरःशकलैरिवसंवृता ॥ प्रमथाहतदैत्यौघैर्दैत्या
हतगणैस्तथा ॥ १९ ॥ वसासृङ्मांसपङ्काढ्यैर्भूरगम्याभवत्तदा ॥ प्रमथाहतदैत्यौघान्भार्गवःसमजीवयत् ॥ २० ॥ युद्धेपुनःपुनश्चैवमृतसंजीवनीबलात् ॥
तंदृष्ट्वाव्याकुलीभूत्वागणाःसर्वेभयार्दिताः ॥ २१ ॥ शशंसुर्देवदेवेशंतत्सर्वंशुक्रचेष्टितम् ॥ अथरुद्रमुखात्कृत्याबभूवातीवभीषणा ॥ २२ ॥ तालजङ्घा
दरीवक्त्रास्तनापीडितभूरुहा ॥ सायुद्धभूमिमासाद्यभक्षयन्तीमहासुरान् ॥ २३ ॥ भार्गवंस्वे२भगेकृत्वाजगामान्तर्हितानभः ॥ विधृतंभार्गवंदृष्ट्वादैत्यसैन्यंग
णास्तदा ॥ २४ ॥ अम्लानवदनादर्पान्निजघ्नुर्युद्धदुर्मदाः ॥ अथाभज्यतदैत्यानांसेनागणभयार्दिता ॥ २५ ॥ वायुवेगहतायद्वत्प्रकीर्णातृणसंहतिः ॥

१'पत्तिभिर्भूर्व्यराजत' इति पाठः। २'स्वकरे' इति पाठान्तरम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

भग्नांगणभयात्सेनांदृष्ट्वाहर्षंगणाययुः ॥२६॥ निशुम्भशुम्भसेनान्यौकालनेमिश्चवीर्यवान् ॥ त्रयस्तेवारयामासुर्गणसेनांमहाबलाः ॥२७॥ मुञ्चन्तः
शरवर्षाणिप्रावृषीवबलाहकाः ॥ ततोदैत्यशरौघास्तेशलभानामिवव्रजाः ॥२८॥ रुरुधुःखंदिशःसर्वागणसेनामकम्पयन् ॥ गणाःशरशतैर्भिन्नारुधि
राऽसारवर्षिणः ॥ २९ ॥ वसन्तेकिंशुकाभासानप्राज्ञायतकिंचन ॥ पतिताःपात्यमानाश्चछिन्नाभिन्नास्तदागणाः ॥३०॥ त्यक्त्वासङ्ग्रामभूमिंतेसर्वे
ऽपिविमुखाभवन्॥३१॥ततःप्रभंग्नस्वबलंविलोक्यगजास्यनन्दीश्वरकार्त्तिकेयाः ॥ चिरान्विताद‍ैत्यवरान्प्रसह्यनिवारयामासुरमर्षणास्ते॥३२॥इतिश्री
पाद्मेमहापुराणेपञ्चप०उत्तर०कार्तिकमाहात्म्येश्रीकृष्णसत्यभामासंवादेदैत्यसेनावधोनामशततमोऽध्यायः ॥ १०० ॥ नारदउवाच ॥ तेगणाधि
पतीन्दृष्ट्वानन्दीभमुखषण्मुखान् ॥ अमर्षादभ्यधावन्तद्वन्द्वयुद्धायदानवाः॥१॥नन्दिनंकालनेमिश्चशुम्भोलम्बोदरंतथा ॥ निशुम्भःषण्मुखंवेगादभ्य
धावतदंशितः ॥२॥ निशुम्भःकार्त्तिकेयस्यमयूरंपञ्चभिःशरैः ॥ हृदिविव्याधवेगेनमूर्छितःसपपातच॥३॥ ततःशक्तिधरःशक्तिंयावज्जग्राहरोषितः ॥
तावन्निशुम्भोवेगेनस्वशक्त्यातमपातयत् ॥ ४ ॥ ततोनन्दीश्वरोबाणैःकालनेमिमविध्यत ॥ सप्तभिश्चहयान्केतूंस्त्रिभिःसारथिमच्छिनत् ॥ ५ ॥
कालनेमिस्तुसंक्रुद्धोधनुश्चिच्छेदनन्दिनः ॥ तदपास्यसशूलेनतंवक्षस्यहनद्दृढम् ॥ ६ ॥ सशूलभिन्नहृदयोहताश्वोहतसारथिः ॥ अद्रेःशिखर
मामुच्यशैलादिंसोऽप्यपातयत् ॥ ७ ॥ अथशुम्भोगणेशश्चरथमूषकवाहनौ ॥ युध्यमानौशरव्रातैःपरस्परमविध्यताम् ॥ ८ ॥ अथशुम्भंगणाध्यक्षो
हृदिविव्याधपत्रिणा ॥ सारथिंपञ्चभिर्बाणैःपातयामासभूतले ॥९॥ ततःशुम्भोऽतिक्रुद्धोऽपिबाणषष्ट्यागणाधिपम् ॥ मूषकंचत्रिभिर्विद्धाननादजल
दस्वनः ॥ १० ॥ मूषकःशरभिन्नाङ्गश्चचालकृतवेदनः ॥ लम्बोदरःसमुत्तीर्यपदातिरभवन्नृप ॥११॥ ततोलम्बोदरःशुम्भंहत्वापरशुनाहृदि ॥ अपात
तयत्तदाभूमौमूषकंचारुहत्पुनः ॥ १२ ॥ कालनेमिर्निशुम्भश्चउभौलम्बोदरंशरैः ॥ युगपज्जघ्नतुःकोपात्तोत्रेणेवमहाद्विपम् ॥ १३ ॥ तंपीड्यमानमा
लोक्यवीरभद्रोमहाबलः ॥ अभ्यधावतवेगेनभूतकोट्यियुतस्तदा ॥ १४ ॥ कूष्माण्डाभैरवाश्चापिवेतालायोगिनीगणाः ॥ पिशाचायोगिनी
सङ्घागणाश्चापितमन्वयुः ॥ १५ ॥ ततःकिलकिलाशब्दैःसिंहनादैःसघुर्घुरैः ॥ विनांदिताडमरुकैःपृथिवीसमकम्पत ॥ १६ ॥ ततोभूतान्य
धावन्तभक्षयन्तिस्मदानवान् ॥ उत्पतन्तिपतन्तिस्मननृतुश्चरणाङ्गणे ॥ १७ ॥ नन्दीचकार्तिकेयश्चसमाँयातौत्वरान्वितौ ॥ निजघ्नतू
रणेदैत्यान्निरन्तरशर[3]व्रजैः ॥ १८ ॥ छिन्नभिन्नाहतैर्दैत्यैःपातितैर्भर्त्सितैस्तथा ॥ व्याकुलासाभवत्सेनाविषण्णवदनातदा ॥ १९ ॥ प्रविध्वस्तां

१'भेरीतालमृदङ्गैश्च' इ० पा० । २'समाश्वास्य' इ० पा० । ३'शरावृते' इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

ततःसेनांदृष्ट्वासागरनन्दनः ॥ रथेनातिपताकेनगणानभिययौबली ॥ २० ॥ हस्त्यश्वरथसंह्रादःशङ्खभेरीरवस्तदा ॥ अभवत्सिंहनादश्चसेनयो
रुभयोस्तदा ॥ २१ ॥ जलन्धरशरव्रातैर्नीहारपटलैरिव ॥ द्यावापृथिव्योराच्छन्नमन्तरंसमपद्यत ॥ २२ ॥ गणेशंपञ्चभिर्विद्ध्वाशैलांद्रिदमपि
पञ्चभिः ॥ वीरभद्रंचविंशत्याननादजलदस्वनः ॥ २३ ॥ कार्तिकेयस्ततोदैत्यंशक्त्याविव्याधसत्वरः ॥ व्याघूर्णःशक्तिनिर्भिन्नःकिंचिद्व्याकुल
मानसः ॥ २४ ॥ ततःक्रोधपरीताक्षःकार्त्तिकेयंजलन्धरः ॥ गदयाताडयामाससचभूमितलेऽपतत् ॥ २५ ॥ तथैवनन्दिनंवेगादपातयतभूतले ॥
ततोगणेश्वरःक्रुद्धोगदांपरशुनाच्छिनत् ॥ २६ ॥ वीरभद्रस्त्रिभिबाणैर्हृदिविव्याधदानवम् ॥ सप्तभिश्चहयान्केतून्धनुश्छत्रंचचिच्छिदे ॥ २७ ॥
ततोऽतिक्रुद्धोदैत्येन्द्रःशक्तिमुद्यम्यदारुणाम् ॥ गणेशंपातयामासरथमन्यंसमारुहत् ॥ २८ ॥ अभ्ययादथवेगेनवीरभद्रंरुषान्वितः ॥ ततस्तौ
सूर्यसङ्काशौयुयुधातेपरस्परम् ॥ २९ ॥ वीरभद्रस्तस्यहयांस्तथाबाणैरपातयत् ॥ धनुश्चिच्छेददैत्येन्द्रोयुयुधेपरिघायुधः ॥ ३० ॥ सवीरभद्रं
त्वरयाभिगम्यजघानदैत्यःपरिघेणमूर्ध्नि ॥ सचापिदैत्यःप्रविभिन्नमूर्द्धापपातभूमौरुधिरंसमुद्गिरन् ॥ ३१ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०
उत्तर० कार्तिकमाहात्म्येश्रीकृष्णसत्यभामासंवादेदैत्यसेनापराभवोनामैकाधिकशततमोऽध्यायः ॥ १०१ ॥ नारदउवाच ॥ पतितंवीरभद्रं
तुदृष्ट्वारुद्रगणाभयात् ॥ आगतास्तेरणंहित्वाक्रोशमानामहेश्वरम् ॥ १ ॥ अथकोलाहलंश्रुत्वागणानांचन्द्रशेखरः ॥ अभ्ययाद्वृषभारूढः
सङ्ग्रामंप्रहसन्निव ॥ २ ॥ रुद्रमायान्तमालोक्यसिंहनादैर्गणाःपुनः ॥ निवृत्ताःसङ्गरेदैत्यान्निजघ्नुःशरवृष्टिभिः ॥ ३ ॥ दैत्याश्चभीषणंरुद्रं
दृष्ट्वासर्वेविदुद्रुवुः ॥ कार्त्तिकव्रतिनंदृष्ट्वापातकानीवतद्भयात् ॥ ४ ॥ अथजालन्धरोदैत्यान्विद्रुतान्प्रेक्ष्यसङ्गरे ॥ रोषादधावच्चण्डीशंमुञ्चन्बाणा
न्सहस्रशः ॥ ५ ॥ शुम्भोनिशुम्भोऽश्वमुखःकालनेमिर्बलाहकः ॥ खड्गरोमाप्रचण्डश्चघस्मरश्चशिवंययुः ॥ ६ ॥ बाणान्धकारसंछन्नंदृष्ट्वागणबलंशिवः ॥
तद्बाणजालंविच्छिद्यस्वबाणैरावृणोन्नभः ॥ ७ ॥ दैत्यांश्चबाणवात्याभिःपीडितानकरोत्तदा ॥ प्रचण्डजौलबाणौघैरपातयतभूतले ॥ ८ ॥ खड्गरोम्णः
शिरःकोपात्तथापरशुनाच्छिनत् ॥ बलाहकस्यचशिरःखट्वाङ्गेनाकरोद्द्विधा ॥ ९ ॥ बद्ध्वाचघस्मरंदैत्यंपाशेनाभ्याहनद्भुवि ॥ वृषभेणहताःकेचि
त्केचिद्बाणैर्निराकृताः ॥ १० ॥ नशेकुरसुराःस्थातुंगजाःसिंहार्दितायथा ॥ ततःकोपपरीतात्मावेगाद्रुद्रंजलन्धरः ॥ ११ ॥ आह्वयामाससमरेतीव्रा
शनिसमस्वनः ॥ १२ ॥ जलन्धरउवाच ॥ युध्यस्वाद्यमयासार्धंकिमेभिर्निहतैस्तव ॥ यच्चकिंचिद्बलंतेऽस्तितद्दर्शयजटाधर ॥ १३ ॥ नारदउवाच ॥

१ 'शैलादिं नवभिः शरैः' इ० पा० । २ 'बाणजालौघैः' इ० पा० । ३ 'कायात्' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्युक्त्वाबाणसप्तत्याजघानवृषभध्वजम् ॥ तानप्राप्तान्छितैर्बाणैश्चिच्छेदप्रहसन्निव ॥ १४ ॥ ततोहयान्ध्वजंछत्रंधनुश्चिच्छेदसप्तभिः ॥ सच्छिन्नधन्वा
विरथोगदामादायवीर्यवान् ॥ १५ ॥ अभ्यधावच्छिवस्तावद्गदाबाणैर्द्विधाकरोत् ॥ तथापिमुष्टिमुद्यम्ययययौरुद्रजिघांसया ॥ १६ ॥ ताव
च्छिवेनबाणौघैःक्रोशमात्रमपाकृतः ॥ ततोजलन्धरोदैत्योमत्वारुद्रंबलाधिकम् ॥ १७ ॥ ससर्जमायांगान्धर्वींमद्भुतांरुद्रमोहिनीम् ॥ ततोजगुश्चन
नृतुर्गन्धर्वाप्सरसांगणाः ॥ १८॥ तालवेणुमृदङ्गांश्चवादयन्तःपरस्परम् ॥ तद्दृष्ट्वामहदाश्चर्यंरुद्रोनादविमोहितः ॥१९॥ पतितान्यपिशस्त्राणिकरेभ्यो
नविवेदसः ॥ एकाग्रभूतमालोक्यरुद्रंदैत्योजलन्धरः ॥ २० ॥ कामार्त्तःसञ्जगामाशुयत्रगौरीस्थिताभवत् ॥ युद्धेशुम्भनिशुम्भाख्यौस्थापयित्वा
महाबलौ ॥ २१ ॥ दशदोर्दण्डपञ्चास्यस्त्रिनेत्रश्चजटाधरः ॥ महावृषभमारूढःसबभूवजलन्धरः ॥ २२ ॥ अथरुद्रंसमायान्तमालो
क्यभववल्लभा ॥ अभ्याययौसखीमध्यात्तद्दर्शनपथेऽभवत् ॥ २३ ॥ यावद्ददर्शचार्वङ्गींपार्वतींदनुजेश्वरः ॥ तावत्सवीर्यंमुमुचेजडाङ्गश्चाभव
त्तदा ॥ २४ ॥ अथज्ञात्वातदागौरीदानवंभयविह्वला ॥ जगामान्तर्हितातावत्सातदोत्तरमानसम् ॥२५॥ तामदृष्ट्वातदादैत्यःक्षणाद्विद्युल्लतामिव॥
जवेनायात्पुनर्युद्धंयत्रदेवोवृषध्वजः ॥ २६ ॥ पार्वत्यपिमहाविष्णुंसस्मारमनसातदा ॥ तावद्ददर्शतंदेवीसोपविष्टंसमीपगम् ॥ २७ ॥
पार्वत्युवाच ॥ विष्णोजलन्धरोदैत्यःकृतवान्परमाद्भुतम् ॥ तत्किंनविदितंतेऽस्तिचेष्टितंतस्यदुर्मतेः ॥ २८ ॥ श्रीभगवानुवाच ॥ तेनैव
दर्शितःपन्थावयमप्यन्वयामहे ॥ नान्यथासभवेद्वध्यःपातिव्रत्यात्सुरक्षितः ॥ २९ ॥ नारदउवाच ॥ जगामविष्णुरित्युक्त्वापुनर्जालन्धरंपुरम् ॥
अथरुद्रश्चगान्धर्वाद्विमुक्तःसङ्गरेस्थितः ॥ ३० ॥ अन्तर्धानगतांमायांदृष्ट्वातुबुबुधेतदा ॥ ३१ ॥ ततःशिवोविस्मितमानसःपुनर्जगामयुद्धायजल
न्धरंरुषा॥ सचापिदैत्यःपुनरागतंशिवंदृष्ट्वाशरौघैःसमवाकिरद्रणे ॥३२॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०उत्तर०कार्त्तिकमाहात्म्येश्रीकृष्णसत्यभामा
संवादेदैत्यकपटवर्णनंनामद्व्यधिकशततमोऽध्यायः ॥ १०२ ॥ नारदउवाच ॥ विष्णुर्जालन्धरंगत्वातदैत्यपुटभेदनम् ॥ पातिव्रत्यस्यभङ्गाय
वृन्दायाश्चाकरोन्मतिम् ॥ १ ॥ अथवृन्दारकादेवीस्वप्नमध्येददर्शह ॥ भर्त्तारंमहिषारूढंतैलाभ्यक्तंदिगम्बरम् ॥ २ ॥ कृष्णप्रसूनभूषाढ्यं
क्रव्यादगणसेवितम् ॥ दक्षिणाशांगतंमुण्डंतमसाव्यावृतंतदा ॥ ३ ॥ स्वपुरंसागरेमग्नंसहसैवात्मनासह ॥ ततःप्रबुद्धासाबालास्वंस्वप्नंप्र
विचिन्वती ॥ ४ ॥ ददर्शोदितमादित्यंसच्छिद्रंनिश्चलंमुहुः ॥ तदनिष्टमितिज्ञात्वारुदतीभयविह्वला ॥ ५ ॥ कुत्रचिन्नालभच्छर्मगोपुराट्टा

१'स बुबुध' इ० पा० । २'तं स्वप्नं प्रविचिन्वती' इ०, स्वस्वप्नं स विचिन्वती' इ० च पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लभूमिषु ॥ ततःसखीद्वययुतानगरोद्यानमागमत् ॥ ६ ॥ तत्रापिसागताबालानालभत्कुत्रचित्सुखम् ॥ वनाद्वनान्तरंयातानैववेदात्मनस्तदा ॥
॥ ७ ॥ ततोभ्रमन्तीसाबालाददर्शातिविभीषणौ ॥ राक्षसौसिंहवदनौदंष्ट्रानयनभीषणौ ॥ ८ ॥ तौदृष्ट्वाविह्वलातीवपलायनपरातदा ॥
ददर्शतापसंशान्तंसशिष्यंमौनमास्थितम् ॥ ९ ॥ ततस्तत्कण्ठआसज्यनिजांबाहुलतांभयात् ॥ मुनेमांरक्षशरणमागतामित्यभाषत ॥ १० ॥
मुनिस्तांविह्वलांदृष्ट्वाराक्षसानुगतांतदा ॥ हुङ्कारेणैवतौघोरौचकारविमुखौरुषा ॥ ११ ॥ तद्धुङ्कारभयत्रस्तौदृष्ट्वातौगगनंगतौ ॥ प्रणम्यदण्डवद्भूमौ
वृन्दावचनमब्रवीत् ॥ १२ ॥ वृन्दोवाच ॥ रक्षिताहंत्वयाघोराद्भयात्तस्मात्कृपानिधे ॥ किंचिद्विज्ञप्तुमिच्छामिकृपयातन्निशामय ॥ १३ ॥
जलन्धरोहिमेभर्त्तारुद्रंयोद्धुंगतःप्रभो ॥ सतत्रास्तिकथंयुद्धेतन्मेकथयसुव्रत ॥ १४ ॥ नारदउवाच ॥ मुनिस्तद्वाक्यमाकर्ण्यकृपयोर्ध्वमवै
क्षत ॥ तावत्कपीशावायातौतंप्रणम्याग्रतःस्थितौ ॥ १५ ॥ ततस्तद्भ्रूलतासंज्ञानियुक्तौगगनंगतौ ॥ गत्वाक्षणार्धादागत्यवानरावग्रतः
स्थितौ ॥ १६ ॥ शिरःकबन्धहस्तौतौदृष्ट्वाब्धितनयस्यसा ॥ पपातमूर्छिताभूमौभर्तृव्यसनदुःखिता ॥ १७ ॥ कमण्डलुजलैःसिक्ता
मुनिनाश्वासितातदा ॥ स्वभर्तृभालेसाभालंकृत्वाखिन्नारुरोदह ॥ १८ ॥ वृन्दोवाच ॥ यःपुरासुखसंवादैर्विनोदयसिमांविभो ॥ सकथंनवदस्यद्य
वल्लभांमामनागसम् ॥ १९ ॥ येनदेवाःसगन्धर्वानिर्जिताहरिणासह ॥ सकथंतापसेनत्वंत्रैलोक्यविजयीहतः ॥ २० ॥ नारदउवाच ॥ रुदित्वेति
तदावृन्दातंमुनिंवाक्यमब्रवीत् ॥२१॥ वृन्दोवाच ॥ कृपानिधेमुनिश्रेष्ठजीवनंमेऽस्यसुप्रियम् ॥ त्वमेवास्यपुनःशक्तोजीवनायमतोमम ॥२२॥ अथत
द्वाक्यमाकर्ण्यप्रहस्यमुनिरब्रवीत् ॥ २३ ॥ मुनिरुवाच ॥ नायंजीवयितुंशक्योरुद्रेणनिहतोयुधि ॥ तथापित्वत्कृपाविष्टएनंसंजीवयाम्यहम् ॥ २४ ॥
नारदउवाच ॥ इत्युक्त्वान्तर्दधेयावत्तावत्सागरनन्दनः॥वृन्दामालिङ्ग्यतद्वक्त्रंचुचुम्बेप्रीतिमानसः ॥२५॥ अथवृन्दापिभर्त्तारंदृष्ट्वाहर्षितमानसा ॥
रेमेतद्वनमध्यस्थातद्युक्ताबहुवासरम् ॥२६॥कदाचित्सुरतस्यान्तेदृष्ट्वाविष्णुंतमेवहि ॥ निर्भर्त्स्यक्रोधसंयुक्तावृन्दावचनमब्रवीत् ॥२७॥ वृन्दोवाच ॥
धिक्तवेदंहरेशीलंपरदाराभिगामिनः ॥ज्ञातोऽसित्वंमयासम्यङ्मायाप्रत्यक्षतापसः॥२८॥यौत्वयामाययाद्वाःस्थौस्वकीयौदर्शितौमम॥तावेवराक्षसौ
भूत्वाभार्यांतवहरिष्यतः ॥ २९ ॥ त्वंचापिभार्यादुःखार्तोवनेकपिसहायवान् ॥ भ्रमसर्पेश्वरेणायंयस्तेशिष्यत्वमागतः ॥ ३० ॥ इत्युक्त्वासातदा
वृन्दाप्राविशद्धव्यवाहनम् ॥ विष्णुनावार्यमाणापितस्मिन्नासक्तमानसा ॥ ३१ ॥ ततोहरिस्तामनुसंस्मरन्मुहुर्वृन्दाचिताभस्मरजोऽवगुण्ठितः ॥

१हरिणा इन्द्रेण । २ 'न्तर्दधे.विप्र' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रैवतस्थौमुनिसिद्धसङ्घैःप्रबोध्यमानोऽपियथौनशान्तिम् ॥ ३२ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०कार्त्तिकमाहात्म्येश्रीकृष्णसत्यभामा
संवादेवृन्दाचिताग्निप्रवेशोनामत्र्यधिकशततमोऽध्यायः॥ १०३ ॥ नारदउवाच ॥ ततोजलन्धरोदृष्ट्वारुद्रमद्भुतविक्रमम् ॥ चकारमाययागौरीं
त्र्यम्बकंमोहयंस्तदा ॥ १ ॥ रथोपरिगतांदृष्ट्वारुदतींचतदाशिवः ॥ शुम्भनिशुम्भदैत्यैश्चवध्यमानांददर्शसः ॥ २ ॥ गौरींतथाविधांदृष्ट्वाशिवोऽप्यु
द्विग्नमानसः ॥ अवाङ्मुखःस्थितस्तूष्णींविस्मृत्यस्वपराक्रमम् ॥३॥ ततोजलन्धरोवेगात्त्रिभिर्विव्याधसायकैः ॥ आपुङ्खमग्नैस्तंरुद्रंशिरस्युरसि
चोदरे ॥ ४ ॥ ततोजज्ञेसतांमायांविष्णुनासंप्रबोधितः ॥ रौद्ररूपधरोजातोज्वालामालातिभीषणः ॥ ५ ॥ तस्यातीवमहारौद्रंरूपंदृष्ट्वामहासुराः ॥
नशेकुःप्रमुखेस्थातुंभेजिरेचदिशोदश ॥ ६ ॥ ततःशापंददौदेवस्तयोःशुम्भनिशुम्भयोः ॥ ममयुद्धादपक्रान्तौगौर्यावध्यौभविष्यथः ॥ ७ ॥ पुनर्जल
न्धरोवेगाद्ववर्षनिशितैःशरैः ॥ बाणान्धकारसंछन्नंयथाभूमितलंमहत् ॥८॥ यावद्रुद्रःप्रचिच्छेदतस्यबाणांस्त्वरान्वितः ॥ तावत्सपरिघेणाशुजघान
वृषभंबली ॥ ९ ॥ वृषस्तेनप्रहारेणपरावृत्तोरणाङ्गणात् ॥ रुद्रेणाकृष्यमाणोऽपिनतस्थौरणभूमिषु ॥ १० ॥ ततःपरमसंक्रुद्धोरुद्रोरौद्रवपुर्धरः ॥ चक्रं
सुदर्शनंवेगाच्चिक्षेपादित्यवर्चसम् ॥ ११ ॥ प्रदहद्रोदसीवेगात्तदासाद्यजलन्धरम् ॥ जहारतच्छिरःकायान्महदायतलोचनम् ॥ १२ ॥ रथात्कायः
पपातोर्व्यांनादयन्वसुधातलम् ॥ तेजश्चनिर्गतंदेहात्तद्रुद्रेलयमागमत् ॥१३॥ दृष्ट्वादेहोद्भवंतेजस्तद्गौरीशेलयंगतम् ॥ अथचन्द्रादयोदेवाहर्षादुत्फुल्ल
लोचनाः॥प्रणम्यशिरसारुद्रंशशंसुर्विष्णुचेष्टितम्॥१४॥ देवाऊचुः ॥ महादेवत्वयादेवारक्षिताःशत्रुजाद्भयात् ॥ किंचिदन्यत्समुद्भूतंतत्रकिंकरवामहे॥
॥ १५ ॥ वृन्दालावण्यसंभ्रान्तोविष्णुस्तिष्ठतिमोहितः ॥ १६ ॥ ईश्वरउवाच ॥ गच्छध्वंशरणंदेवाविष्णोर्मोहापनुत्तये ॥ शरण्यांमोहिनींमायां
सावःकार्यंकरिष्यति ॥ १७ ॥ नारदउवाच॥ इत्युक्त्वान्तर्दधेदेवःसहभूतगणैस्तथा ॥ देवाश्चतुष्टुवुर्मूलप्रकृतिंभक्तवत्सलाम् ॥ १८ ॥
देवाऊचुः ॥ यदुद्भवाःसत्त्वरजस्तमोगुणाःसर्गस्थितिध्वंसनिदानकारणम् ॥ यदिच्छयाविश्वमिदंभवाभवौतनोतिशुद्धांप्रकृतिंनताःस्मताम् ॥
॥ १९ ॥ याहित्रयोविंशतिभेदसंज्ञिताजगत्यशेषेसमधिष्ठितापुरा ॥ यद्रूपकर्माणिजडास्त्रयोऽपितेदेवाविदुर्नप्रकृतिंनताःस्मताम् ॥ २० ॥ यद्भक्ति
युक्ताःपुरुषास्तुनित्यंदारिद्र्यव्यामोहपराभवादिकम् ॥ नप्राप्नुवन्त्येवहिभक्तवत्सलांसदैवविष्णोःप्रकृतिंनताःस्मताम् ॥ २१ ॥ नारदउवाच ॥
स्तोत्रमेतत्त्रिसन्ध्यंयःपठेदेकाग्रमानसः ॥ दारिद्र्यमोहदुःखानिनकदाचित्स्पृशन्तितम् ॥ २२ ॥ इतिस्तुवन्तस्तेदेवास्तेजोमण्डलमास्थिताम् ॥

१ 'बाणगणं जवात्' इ०पा०। २'पपात वसुधातले'। ३ 'सिंधुजाद्भयात्' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ददृशुर्गगनेतत्रज्वालाव्याप्तदिगन्तराम् ॥ २३ ॥ तन्मध्याद्भारतींसर्वेददृशुर्व्योमचारिणीम् ॥ अहमेवत्रिधाभिन्नातिष्ठामित्रिविधैर्गुणैः ॥ २४ ॥ गौरी लक्ष्मीःस्वरांचतिरजःसत्त्वतमोगुणैः ॥ तत्रगच्छततत्कार्यंविधास्यन्तिचवःसुराः ॥ २५ ॥ नारदउवाच ॥ शृण्वतामितिदेवानामन्तर्धानमगान्महः ॥ देवानांविस्मयोत्फुल्लनेत्राणांतत्तदानृप ॥ २६ ॥ ततःसर्वेऽपितेदेवागत्वातद्वाक्यनोदिताः ॥ गौरींलक्ष्मींस्वरांचैवप्रणेमुर्भक्तितत्पराः ॥ २७ ॥ ततस्तास्तान्सुरान्दृष्ट्वाप्रणतान्भक्तवत्सलाः ॥ बीजानिप्रददुस्तेभ्योवाक्यान्यूचुश्चभूमिप॥२८॥देव्यऊचुः ॥ इमानिक्षेत्रबीजानिविष्णुर्यत्रावतिष्ठते ॥ निर्वपध्वंततःकार्यंभवतांसिद्धिमेष्यति ॥२९॥ ततस्तुहृष्टाःसुरसिद्धसङ्घाःप्रगृह्यबीजानिविनिक्षिपुस्ते[1] ॥ वृन्दान्वितोभूमितलेसयत्रविष्णुःसदातिष्ठति सौख्यहीनः ॥ ३० ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०कार्त्तिकमाहात्म्येश्रीकृष्णसत्यभामासंवादेजालन्धरवधोनामचतुरधिकशततमोऽध्यायः ॥१०४॥नारदउवाच ॥ क्षितेभ्यस्तत्रबीजेभ्योवनस्पत्यस्त्रयोऽभवन् ॥ धात्रीचमालतीचैवतुलसीचनृपोत्तम॥ १ ॥धात्र्युद्भवास्मृताधात्रीमाभवामालती स्मृता ॥ गौरीभवाचतुलसीतमःसत्त्वरजोगुणाः ॥२॥ स्त्रीरूपिण्यौवनस्पत्यौदृष्ट्वाविष्णुस्तदानृप ॥ उत्तस्थौसंभ्रमाद्वृन्दारूपातिशयमोहितः ॥ ३ ॥ ददर्शतास्तदामोहात्कामासक्तेनचेतसा ॥ तंचापितुलसीधात्रीरागेणैवव्यलोकयत् ॥ ४ ॥ यच्चलक्ष्म्यापुराबीजंमाययैवसमर्पितम् ॥ तस्मात्तदुद्भवा नारीतस्मिन्नीर्ष्यायुताभवत्॥५॥अतःसाबर्बरीत्याख्यामाधवस्यातिगर्हिता ॥ धात्रीतुलस्यैतद्रागात्तस्यप्रीतिप्रदेसदा॥६॥ततोविस्मृतदुःखोऽसौविष्णु स्ताभ्यांसहैवतु ॥ वैकुण्ठमगमद्धृष्टःसर्वदेवनमस्कृतः ॥ ७॥ कार्त्तिकोद्यापनेविष्णोस्तस्मात्पूजाविधीयते॥तुलसीमूलदेशेतुप्रीतिदासायतःस्मृता॥८॥ तुलसीकाननंराजन्गृहेयस्यावतिष्ठते ॥ तद्गृहंतीर्थरूपंतुनायान्तियमकिङ्कराः ॥ ९ ॥ सर्वपापहरंपुण्यंकामदंतुलसीवनम् ॥ रोपयन्तिनरश्रेष्ठा नतेपश्यन्तिभास्करिम् ॥ १० ॥ दर्शनंनर्मदायास्तुगङ्गास्नानंतथैवच ॥ तुलसीवनसंसर्गःसममेतत्त्रयंस्मृतम् ॥ ११ ॥ रोपणात्पालनात्सेका द्दर्शनात्स्पर्शनान्नृणाम् ॥ तुलसीदहतेपापंवाङ्मनःकायसंचितम् ॥ १२ ॥ तुलसीमञ्जरीभिर्यःकुर्याद्धरिहरार्चनम् ॥ नसगर्भगृहंयाति मुक्तिभागीनसंशयः ॥ १३ ॥ पुष्करादीनितीर्थानिगङ्गाद्याःसरितस्तथा ॥ वासुदेवादयोदेवास्तिष्ठन्तितुलसीदले ॥ १४ ॥ तुलसीमञ्जरीयुक्तो यदिप्राणान्विमुञ्चति ॥ विष्णोःसायुज्यमाप्नोतिसत्यंसत्यंनृपोत्तम ॥ १५ ॥ तुलसीमृत्तिकालिप्तोयस्तुप्राणान्विमुञ्चति ॥ यमोऽपिनेक्षितुंशक्तो युक्तंपापशतैरपि ॥ १६ ॥ तुलसीकाष्ठजंयस्तुचन्दनंधारयेन्नरः ॥ तद्देहंनस्पृशेत्पापंक्रियमाणमपीहयत् ॥ १७ ॥ तुलसीविपिनच्छायायत्रयत्र

१ 'सुरा च'इ०पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवेन्नृप ॥ तत्रश्राद्धंप्रकर्त्तव्यंपितॄणांदत्तमक्षयम् ॥ १८ ॥ धात्रीछायासुयःकुर्यात्पिण्डदानंनृपोत्तम ॥ तृप्तिंचयान्तिपितरस्तस्ययेनरकेस्थिताः ॥
॥ १९ ॥ मूर्ध्निपाणौमुखेचैवदेहेचनृपसत्तम ॥ धत्तेधात्रीफलंयस्तुसविज्ञेयोहरिःस्वयम् ॥ २० ॥ धात्रीफलंचतुलसीमृत्तिकाद्वारकोद्भवा ॥
यस्यदेहेस्थितानित्यंसजीवन्मुक्तउच्यते ॥ २१ ॥ धात्रीफलविमिश्रैस्तुतुलसीदलमिश्रितैः ॥ जलैःस्नातिनरस्तस्यगङ्गास्नानफलंस्मृतम् ॥
॥ २२ ॥ देवार्चनंनरःकुर्याद्धात्रीपत्रैःफलैरपि ॥ सुवर्णपुष्पैर्विविधैरर्चनस्याप्नुयात्फलम् ॥ २३ ॥ तीर्थानिमुनयोदेवायज्ञाःसर्वेऽपिकार्त्तिके॥
नित्यंधात्रींसमाश्रित्यतिष्ठन्त्यर्केतुलाश्रिते ॥ २४ ॥ द्वादश्यांतुलसीपत्रंधात्रीपत्रंतुकार्त्तिके ॥ लुनातिसनरोगच्छेन्निरयानतिगर्हितान् ॥
॥ २५ ॥ धात्रीच्छायांसमाश्रित्यकार्त्तिकेऽन्नंभुनक्तियः ॥ अन्नसंसर्गजंपापमावर्षंतस्यनश्यति ॥ २६ ॥ धात्रीमूलेतुयोविष्णुंकार्त्तिकेऽर्चयते
नरः ॥ विष्णुक्षेत्रेषुसर्वेषुपूजितस्तेनसर्वदा ॥ २७ ॥ धात्रीतुलस्योर्माहात्म्यमपिदेवश्चतुर्मुखः ॥ नसमर्थोभवेद्वक्तुंयथादेवस्यशार्ङ्गिणः ॥२८॥
धात्रीतुलस्युद्भवकारणंयःशृणोतियःश्रावयतेचभक्त्या ॥ विधूतपाप्मासहपूर्वजैश्चस्वर्गंव्रजत्यग्र्यविमानसंस्थः ॥ २९ ॥ इतिश्रीपाद्मेमहापुराणे
पञ्चपञ्चा०उत्तर०कार्तिकमाहात्म्येश्रीकृष्णसत्यभामासंवादेधात्रीतुलस्योर्माहात्म्यंनामपञ्चाधिकशततमोऽध्यायः ॥ १०५ ॥ पृथुरुवाच ॥ सेति
हासमिदंब्रह्मन्माहात्म्यंकथितंत्वया ॥ अत्याश्चर्यकरंसम्यक्तुलस्यास्तुश्रुतंमहत ॥ १ ॥ यदूर्जव्रतिनःपुंसःफलंमहदुदाहृतम् ॥ तत्पुनर्ब्रूहि
माहात्म्यंकेनचीर्णमिदंकथम् ॥ २ ॥ नारदउवाच ॥ आसीत्सह्याद्रिविषयेकरवीरपुरेपुरा ॥ ब्राह्मणोधर्मवित्कश्चिद्धर्मदत्तेतिविश्रुतः ॥ ३॥
विष्णुव्रतकरःशश्वद्विष्णुपूजारतःसदा ॥ द्वादशाक्षरविद्यायांजपनिष्ठोऽतिथिप्रियः ॥ ४ ॥ कदाचित्कार्तिकेमासिहरिजागरणायसः ॥ रात्र्यां
तुर्यांशशेषायांजगामहरिमन्दिरम् ॥ ५ ॥ हरिपूजोपकरणान्प्रगृह्यव्रजतातदा ॥ तेनदृष्टासमायाताराक्षसीभीमनिःस्वना ॥ ६ ॥ वक्रदंष्ट्राललज्जिह्वा
निमग्नारक्तलोचना ॥ दिगम्बराशुष्कमांसालम्बोष्ठीघर्घरस्वना ॥ ७ ॥ तांदृष्ट्वाभयवित्रस्तःकम्पितावयवस्तदा ॥ पूजोपकरणैर्वेगात्पयो
भिश्चाहनद्भयात् ॥ ८ ॥ संस्मृत्यचहरेर्नामतुलसीयुतवारिणा ॥ साहतापातकंतस्मात्तस्याःसर्वमगात्क्षयम् ॥ ९ ॥ अथसंस्मृत्यसापूर्वजन्म
कर्मविपाकजाम् ॥ स्वांदशामब्रवीत्सर्वांदण्डवत्तंप्रणम्यसा ॥ १० ॥ कलहोवाच ॥ पूर्वकर्मविपाकेनदशामेतांगताह्यहम् ॥ तत्कथं
तुपुनर्विप्रयाम्युत्तमगतिंशुभाम् ॥ ११ ॥ नारदउवाच ॥ तांदृष्ट्वाप्रणतामग्रेवदमानांस्वकर्मतत् ॥ अतीवविस्मितोविप्रस्तदावचनमब्रवीत् ॥
॥ १२ ॥ धर्मदत्तउवाच ॥ केनकर्मविपाकेनत्वंदशामीदृशींगता ॥ कुतस्त्वंकाचकिंशीलातत्सर्वंकथयस्वमे ॥ १३ ॥ कलहोवाच ॥

॥ १०० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सौराष्ट्रनगरेब्रह्मन्भिक्षुनामाभवद्द्विजः ॥ तस्याहंगृहिणीपूर्वंकलहाख्यातिनिष्ठुरा ॥ १४ ॥ नकदाचिन्मयाभर्तुर्वचसापिशुभंकृतम् ॥ नार्पितं तस्यमिष्टान्नंभर्तुर्वचनभङ्ग्या ॥ १५ ॥ कलहप्रिययानित्यंभयोद्विग्नस्तदाद्विजः ॥ परिणेतुंतदान्यांसमतिंचक्रेपतिर्मम ॥ १६ ॥ ततोगरं समादायप्राणास्त्यक्तामयाद्विज ॥ अथबद्ध्वाबध्यमानांमांविनिन्युर्यमानुगाः ॥ यमश्चमांतदादृष्ट्वाचित्रगुप्तमपृच्छत ॥ १७ ॥ यमउवाच ॥ अनयाकिंकृतंकर्मचित्रगुप्तविलोकय ॥ प्राप्नोत्वेषाकर्मफलंशुभंवाशुभमेवच॥१८॥कलहोवाच॥चित्रगुप्तस्ततोवाक्यंभर्त्सयन्मामुवाचह ॥१९॥ चित्रगुप्तउवाच ॥ अनयातुशुभंकर्मकृतंकिंचिन्नविद्यते ॥ मिष्टान्नंभुक्तमनयानभर्तरितदर्पितम् ॥ २० ॥ अतश्चवल्गुलीयोन्यांस्वविष्ठादावतिष्ठताम्॥ भर्तुर्द्वेषकरीत्वेषानित्यंकलहकारिणी ॥ २१ ॥ विष्ठादाशूकरीयोन्यांततस्तिष्ठत्वियंहरे ॥ पाकभाण्डेसदाभुक्तंनित्यंचैवानयायतः ॥२२॥ तस्माद्दोषाद्बिडालीतुस्वजातापत्यभक्षिणी ॥ भर्तारमनयोद्दिश्यह्यात्मघातःकृतोयतः ॥ २३ ॥ तस्मात्प्रेतपिशाचेषुतिष्ठत्वेषातिनिन्दिता ॥ ततश्चैवमरुंदेशंप्रापितव्याभटैःसह ॥ २४ ॥ तत्रप्रेतशरीरस्थाचिरंतिष्ठत्वियंततः ॥ इत्थंयोनित्रयंत्वेषाभुनक्त्वशुभकारिणी ॥ २५ ॥ कलहोवाच ॥ साहंपञ्चशताब्दानिप्रेतदेहेस्थिताकिल ॥ क्षुत्तृड्भ्यांपीडितानित्यंदुःखितास्वेनकर्मणा ॥ २६ ॥ ततःक्षुत्पीडिताविश्यशरीरंवणिजस्त्वहम् ॥ आयातादक्षिणंदेशंकृष्णावेण्यास्तुसंगमे ॥ २७ ॥ तत्तीरसंश्रितायावत्तावत्तस्यशरीरतः ॥ शिवविष्णुगणैर्दूरमपाकृष्टाबलादहम् ॥ २८ ॥ ततःक्षुत्क्षामयादृष्टोभ्रमन्त्यात्वंमयाद्विज ॥ प्रक्षिप्ततुलसीवारिसंसर्गगतपापया ॥ २९ ॥ तत्कृपांकुरुविप्रेन्द्रकथंमुक्तिमवाप्नुयाम् ॥ योनित्रयादतिभयादस्माच्चप्रेतदेहतः ॥ ३० ॥ नारदउवाच ॥ इत्थंनिशम्यकलहावचनंद्विजश्चतत्कर्मपाकभवविस्मयदुःखयुक्तः ॥ तद्ग्लानिदर्शनकृपाचलचित्तवृत्तिर्ध्यात्वाचिरंसवचनंनिजगाददुःखात् ॥ ३१ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०उत्तर०कार्तिकमाहात्म्येकलहोपाख्याननामषडधिकशततमोऽध्यायः ॥ १०६ ॥ धर्मदत्तउवाच ॥ विलयंयान्तिपापानितीर्थदानव्रतादिभिः ॥ प्रेतदेहस्थितायास्तेतेषुनैवाधिकारिता॥ १ ॥ त्वद्ग्लानिदर्शनादस्मात्खिन्नंचममममानसम् ॥ नैवनिर्वृतिमायातित्वामनुद्धृत्यदुःखिताम् ॥ २ ॥ पातकंचतवात्युग्रंयोनित्रयविपाकदम् ॥ नैवान्यैःक्षीयतेपुण्यैःप्रेतत्वंचातिगर्हितम् ॥ ३ ॥ तस्मादाजन्मजनितंयन्मयाकार्त्तिकव्रतम् ॥ तत्पुण्यस्यार्धभागेनसद्गतिंत्वमवाप्नुहि ॥ ४ ॥ कार्त्तिकव्रतपुण्येननसाम्यंयान्तिसर्वथा ॥ यज्ञदानानितीर्थानिव्रतान्यपियतोध्रुवम् ॥५॥नारदउवाच॥ इत्युक्त्वाधर्मदत्तोऽसौयावत्तामभ्यषेचयत् ॥ तुलसीमिश्रतोयेनश्रावयन्द्वादशाक्षरम् ॥ ६ ॥ तावत्प्रेतत्वनिर्मुक्ताज्वलदग्निशिखोपमा ॥ दिव्यवपुर्धराजातालावण्याद्भासितादिशः ॥ ७ ॥ ततः

CC-0. In Public Domain. Digitization by eGangotri

सादण्डवद्भूमौप्रणनामाथतंद्विजम् ॥ उवाचचतदावाक्यंहर्षगद्गदभाषिणी ॥ ८ ॥ कलहोवाच ॥ त्वत्प्रसादाद्द्विजश्रेष्ठविमुक्तानिरयादहम् ॥ पापा
ब्धौमज्जमानायास्त्वंनोभूतोऽसिमेध्रुवम् ॥९॥ नारदउवाच ॥ इत्थंसावदतीविप्रंददर्शायातमम्बरात् ॥ विमानंभास्वरंयुक्तंविष्णुरूपधरैर्गणैः ॥१०॥
अथसातद्विमानाग्र्यंद्वाःस्थाभ्यामधिरोहिता ॥ पुण्यशीलसुशीलाभ्यामप्सरोगणसेवितम् ॥ ११ ॥ तद्विमानंतदापश्यद्धर्मदत्तःसविस्मयः ॥
पपातदण्डवद्भूमौदृष्ट्वातौपुण्यरूपिणौ ॥ १२ ॥ पुण्यशीलसुशीलौतमुत्थाप्यप्रणतंद्विजम् ॥ अभ्यनन्दयतांवाक्यमूचतुर्धर्मशीलिनौ ॥ १३ ॥ गणा
वूचतुः ॥ साधुसाधुद्विजश्रेष्ठयस्त्वंविष्णुरतःसदा ॥ दीनानुकम्पीधर्मज्ञोविष्णुव्रतपरायणः ॥ १४ ॥ आजन्मसच्छुभंह्येतद्यत्त्वयाकार्तिकव्रतम् ॥
कृतंतस्यार्धदानेनयदस्याःपूर्वसंचितम् ॥ १५ ॥ जन्मान्तरशतोद्भूतंपापंतद्विलयंगतम् ॥ हरिजागरणाद्यैश्चविमानमिदमास्थिता ॥ १६ ॥ वैकुण्ठं
नीयतेसाधोनानाभोगयुतास्त्वियम् ॥ दीपदानभवैःपुण्यैस्तैजसंरूपमास्थिता ॥ १७ ॥ तुलसीपूजनाद्यैस्तुकार्तिकव्रतकैःशुभैः ॥ विष्णुसान्निध्यगा
जातात्वयादत्तैःकृपालुना ॥ १८ ॥ त्वमप्यस्यभवस्यान्तेभार्याभ्यांसहयास्यसि ॥ वैकुण्ठभवनंविष्णोःसान्निध्यंचस्वरूपता ॥ १९ ॥ तेधन्याः
कृतकृत्यास्तेतेषांचसफलोभवः ॥ यैर्भक्त्याराधितोविष्णुर्धर्मदत्तत्वयायथा ॥२०॥ सम्यगाराधितोविष्णुःकिंनयच्छतिदेहिनाम् ॥ २१ ॥ औत्तान
चरणिर्येनध्रुवत्वेस्थापितःपुरा ॥ यन्नामस्मरणादेवदेहिनोयान्तिसद्गतिम् ॥ २२ ॥ ग्राहगृहीतोनागेन्द्रोयन्नामस्मरणात्पुरा ॥ विमुक्तःसन्निधिंप्राप्तो
जातोयोजयसंज्ञकः ॥ २३ ॥ अतस्त्वयार्चितोविष्णुःस्वसांनिध्यंप्रदास्यति ॥ बहून्यब्दसहस्राणिभार्याद्वययुतस्यते ॥ २४ ॥ ततःपुण्यक्षये
जातेयदायास्यसिभूतले ॥ सूर्यवंशोद्भवोराजाविख्यातस्त्वंभविष्यसि ॥२५॥ नाम्नादशरथस्तत्रभार्याद्वययुतःपुनः ॥ तृतीययानयाचापियातेपुण्या
र्धभागिनी ॥ २६ ॥ तत्रापितवसान्निध्यंविष्णुर्यास्यतिभूतले ॥ आत्मानंतवपुत्रत्वेप्रकल्प्यामरकार्यकृत् ॥ २७ ॥ तवाजन्मव्रतादस्माद्विष्णुसंतुष्टि
कारकात् ॥ नयज्ञानचदानानिनतीर्थान्यधिकानिते॥२८॥ धन्योऽसिविप्रप्रयतस्त्वयैतद्व्रतंकृतंतुष्टिकरंजगद्गुरोः॥यदर्धभागाच्चफलान्मुरारेःप्रणीयते
ऽस्माभिरियंसलोकताम् ॥ २९ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप० उत्तर०कार्त्तिकमाहात्म्येश्रीकृष्णसत्यभामासंवादेकलहोपाख्यानंनामसप्ताधिकशत
तमोऽध्यायः ॥ १०७ ॥ नारदउवाच ॥ इत्थंतद्वचनंश्रुत्वाधर्मदत्तःसविस्मयः ॥ प्रणम्यदण्डवद्भूमौवाक्यमेतदुवाचह ॥ १ ॥ धर्मदत्तउवाच ॥
आराधयन्तिसर्वेऽपिविष्णुंभक्तार्त्तिनाशिनम् ॥ यज्ञैर्दानैर्व्रतैस्तीर्थैस्तपोभिश्चयथाविधि ॥ २ ॥ विष्णुप्रीतिकरंतेषांविष्णुसान्निध्यकारकम् ॥
यत्कृत्वातानिचीर्णानिसर्वाण्यपिभवन्तिहि ॥ ३ ॥ गणावूचतुः ॥ साधुपृष्टंत्वयाविप्रशृणुष्वैकाग्रमानसः ॥ सेतिहासांकथांविप्रकथ्यमानांपुरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवाम् ॥ ४ ॥ कान्तिपुर्यांपुराचोलश्चक्रवर्त्तीनृपोऽभवत् ॥ यस्यनाम्नाचतेदेशाश्चोलाख्याअभवन्किल ॥ ५ ॥ यस्मिञ्छासतिभूचक्रंदरिद्रोनैव
दुःखितः ॥ पापबुद्धिःसरुग्वापिनैवकश्चिदभून्नरः ॥ ६ ॥ यस्याप्यत्यन्तंयज्ञस्यताम्रपर्णीतटावुभौ ॥ सुवर्णयूपैःशोभाढ्यावास्तांचैत्ररथोपमौ ॥
॥ ७ ॥ सकदाचिदगाद्राजाह्यनन्तशयनंद्विज ॥ यत्रासौजगतांनाथोयोगनिद्रामुपाश्रितः ॥८॥ तत्रश्रीरमणंदेवंसंपूज्यविधिवन्नृपः ॥ मणिमुक्ताफलै
र्दिव्यैःस्वर्णपुष्पैश्चशोभनैः ॥ ९ ॥ प्रणम्यदण्डवद्यावदुपविष्टःसतत्रवै ॥ तावद्ब्राह्मणमायान्तमपश्यद्देवसन्निधौ ॥ १० ॥ देवार्चनार्थमायान्तंतुल
स्युदकपाणिकम् ॥ स्वपुरीवासिनंतत्रविष्णुदासाह्वयंद्विजम् ॥११॥ तत्राभ्येत्यसविप्रर्षिर्देवदेवमपूजयत् ॥ विष्णुसूक्तेनसंस्नाप्यतुलसीमञ्जरीदलैः॥
॥ १२ ॥ तुलसीपूजयातस्यरत्नपूजांतथाकृताम् ॥ आच्छादितांसमालोक्यराजाक्रुद्धोऽब्रवीद्वचः ॥ १३ ॥ राजोवाच ॥ माणिक्यस्वर्णपूजात्रशो
भाढ्यायामयाकृता ॥ विष्णुदासकथंसेयमाच्छन्नातुलसीदलैः ॥ १४ ॥ विष्णुभक्तिनजानासिवराकोऽसिमतोमम ॥ यस्त्विमामतिशोभाढ्यांपूजा
माच्छादयस्यहो ॥ १५ ॥ गणावूचतुः ॥ इतितद्वचनंश्रुत्वासक्रोधःसद्विजोत्तमः ॥ राज्ञोगौरवमुल्लङ्घ्यजगादवचनंतदा ॥ १६ ॥ विष्णुदास
उवाच ॥ राजन्मुक्तिनजानासिगर्वितोऽसिनृपश्रिया ॥ किंस्विद्विष्णुव्रतंपूर्वंत्वयाचीर्णंवदस्वतत् ॥ १७ ॥ गणावूचतुः ॥ तद्ब्राह्मणवचःश्रुत्वाप्रहस्य
सनृपोत्तमः॥विष्णुदासंतदागर्वादुवाचवचनंद्विज॥१८॥ राजोवाच॥ इत्थंब्रवीषिचेद्विप्रविष्णुभक्त्यातिगर्वितः॥भक्तिस्तेकियतीविष्णोर्दरिद्रस्याधन
स्यच॥१९॥यज्ञदानादिकंनैवविष्णुतुष्टिकरंकृतम् ॥ नापिदेवालयंपूर्वंत्वयाविप्रक्वचित्कृतम्॥२०॥ईदृशस्यापितेगर्वएषतिष्ठतिभक्तितः ॥ तच्छृण्वन्तु
वचोमेऽद्यसर्वेऽप्येतेद्विजोत्तमाः ॥२१॥ साक्षात्कारमहंविष्णोरेषवादोगमिष्यति ॥ यथातुसर्वेऽपिततोभाक्तिंज्ञास्यथचावयोः ॥ २२ ॥ गणावूचतुः॥
इत्युक्त्वासनृपोऽगच्छन्निजंराजगृहंद्विजः ॥ आरेभेवैष्णवंसत्रंकृत्वाचार्यंतुमुद्गलम् ॥ २३ ॥ ऋषिसङ्घसमाजुष्टंबभूवबहुदक्षिणम् ॥ यद्वद्ब्रह्मकृतंपूर्वं
गयाक्षेत्रेसमृद्धिमत्॥२४॥विष्णुदासोऽपितत्रैवतस्थौदेवालयेव्रती ॥ पञ्चैतान्नियमान्कृत्वाविष्णुतुष्टिकरान्सदा॥२५॥माघोर्जयोर्व्रतंसम्यक्तुलसीवन
पालनम् ॥ एकादशीव्रतंजाप्यंद्वादशाक्षरविद्यया ॥ २६ ॥ उपचारैःषोडशभिर्गीतनृत्यादिमङ्गलैः ॥ नित्यंविष्णोस्तथापूजांव्रतान्येतानिसो
ऽकरोत्॥२७॥नित्यंसंस्मरणंविष्णोर्गच्छन्भुञ्जन्स्वपन्नपि ॥ सर्वभूतस्थितंविष्णुमपश्यत्समदर्शनः ॥२८॥ माघकार्तिकयोर्नित्यंविशेषनियमानपि॥
अकरोद्विष्णुतुष्ट्यर्थंसोद्यापनविधिंतथा ॥२९॥ एवंसमाराधयतोःश्रियःपतिंतयोस्तुचोलेश्वरविष्णुदासयोः ॥ अगादनेहाबहुतद्व्रतस्थयोस्तन्निष्ठसर्वे
न्द्रियकर्मणोस्तयोः ॥३०॥ इतिश्रीपाद्मेमहापुराणेपञ्चप० उत्तर० कार्तिकमाहात्म्येश्रीकृष्णसत्यभामासंवादेकलहोपाख्यानेअष्टाधिकशततमोऽध्यायः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥१०८॥गणावूचतुः॥ कदाचिद्विष्णुदासोऽथकृत्वानित्यविधिंद्विजः ॥ पाककर्माकरोद्यावदहरत्कोऽप्यलक्षितः ॥ १ ॥तमदृष्ट्वाप्यसौपाकंपुनर्नैवाकरो
त्तदा ॥ सायंकालार्चनस्यासौव्रतभङ्गभयाद्विजः॥२॥द्वितीयेऽह्नितत:पाकंकृत्वायावत्सविष्णवे ॥ उपहारार्पणंकर्तुंगतःकोऽप्यहरत्पुनः ॥३॥ एवंसप्त
दिनंतस्यपाकंकोऽप्यहरद्द्विज ॥ जातःसविस्मयःसोऽथमनस्येवंव्यचारयत् ॥ ४ ॥ अहोनित्यंसमभ्येत्यकःपाकंहरतेमम ॥ क्षेत्रसंन्यासिनांस्थान
मत्याज्यंसर्वथामया॥५॥ पुनःपाकंविधायात्रभुज्यतेयदिचेन्मया॥ सायंकालार्चनंचैतत्परित्याज्यंकथंमया॥६॥ किंचित्पाकंविधायैतद्भोक्तव्यंतुमया
नहि ॥ अनिवेद्यहरौसर्वंवैष्णवैर्नैवभुज्यते ॥ ७ ॥ उपोषितोऽहंचकथंतिष्ठाम्यत्रव्रतस्थितः ॥ अद्यसंरक्षणंसम्यक्पाकस्यात्रकरोम्यहम्॥८॥इतिपाकं
विधायासौतत्रैवालक्षितःस्थितः ॥ तावद्ददर्शचाण्डालंपाकान्नहरणेस्थितम्॥९॥क्षुत्क्षामंदीनवदनमस्थिचर्मावशेषितम् ॥ तमालोक्यद्विजाग्र्योऽभूत्कृ
पाखिन्नमानसः॥१०॥विलोक्यान्नहरंविप्रस्तिष्ठतिष्ठेत्यभाषत ॥ कथमत्तिभवान्रूक्षंघृतमेतद्गृहाणभोः॥११॥इत्थंब्रुवन्तंविप्राग्र्यमायान्तंचविलोक्य
सः॥वेगादधावत्तद्भीत्यामूर्च्छितश्चपपातह ॥१२॥ भीतंतंमूर्च्छितंदृष्ट्वाचाण्डालंसद्विजोत्तमः॥वेगादभ्येत्यकृपयास्ववस्त्रान्तैरवीजयत्॥१३॥अथोत्थि
तंतमेवासौविष्णुदासोऽव्यलोकयत् ॥ साक्षान्नारायणंदेवंशङ्खचक्रगदाधरम्॥॥१४॥पीताम्बरंचतुर्बाहुंश्रीवत्साङ्ककिरीटिनम् ॥ अतसीपुष्पसङ्काशंकौ
स्तुभोरःस्थलंविभुम्॥॥१५॥तंदृष्ट्वासात्त्विकैर्भावैरावृतोद्विजसत्तमः ॥ स्तोतुंचापिनमस्कर्तुंतदानालंबभूवसः ॥१६॥ अथशक्रादयोदेवास्तत्रैवाभ्याय
युस्तदा ॥ गन्धर्वाप्सरसश्चापिजगुश्चननृतुर्मुदा॥१७॥विमानशतसंकीर्णंदेवर्षिगणसङ्कुलम् ॥ गीतवादित्रनिर्घोषंस्थानंतदभवत्तदा॥१८॥ततोविष्णुः
समालिङ्ग्यस्वभक्तंसात्त्विकंतथा॥सायुज्यमात्मनोदत्त्वाऽनयद्वैकुण्ठमन्दिरम् ॥ १९ ॥ विमानवरसंस्थानमास्थितंविष्णुसन्निधौ॥दीक्षितश्चोलनृपति
र्विष्णुदासंददर्शह॥२०॥वैकुण्ठभवनंयान्तंविष्णुदासंविलोक्यसः॥स्वगुरुंमुद्गलंवेगादाहूयेत्थंवचोऽब्रवीत्॥२१॥चोलउवाच ॥यत्स्पर्धयामयाचैतद्यज्ञ
दानादिकंकृतम् ॥ सविष्णुरूपधृग्विप्रोयातिवैकुण्ठमन्दिरम्॥२२॥दीक्षितेनमयासम्यक्सत्रेऽस्मिन्विष्णवेत्वया ॥ हुतमग्नौकृताविप्रादानाद्यैःपूर्णमान
साः॥२३॥नवाद्यापिसमेदेवःप्रसन्नोजायतेध्रुवम् ॥भक्त्यैवतस्यविप्रस्यसाक्षात्कारंददौहरिः॥२४॥ तस्माद्दानैश्चयज्ञैश्चनैवविष्णुःप्रसीदति ॥ भक्तिरेव
परंतस्यनिदानंदर्शनेविभोः ॥ २५ ॥ गणावूचतुः ॥ इत्युक्त्वाभागिनेयंस्वमभिषिच्यनृपासने ॥ आबाल्याद्दीक्षितोयज्ञेसोऽपुत्रत्वमगाद्यतः ॥ २६ ॥
तस्माद्द्यापितद्देशेसदाराज्यांशभागिनः ॥ स्वस्रेयाएवजायन्तेतत्कृताचारवर्तिनः ॥ २७ ॥ यज्ञवाटंततोऽभ्येत्यवह्निकुण्डाग्रतःस्थितः ॥

१ 'कृपयान्वितमानसः' इ०पा० । २ 'सारूप्यम्' इ०पा० ।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रिरुच्चैर्व्याजहाराशुविष्णुंसंबोधयंस्तदा ॥ २८ ॥ विष्णोभक्तिस्थिरांदेहिमनोवाक्कायकर्मभिः ॥ इत्युक्त्वासोऽपतद्दण्डौसर्वेषामेवपश्यताम् ॥
॥२९॥मुद्गलस्तुतदाक्रोधात्स्वशिखामुदपाटयत् ॥ ततस्त्वद्यापितद्गोत्रेमुद्गलाविशिखाभवन् ॥३०॥ तावदाविरभूद्विष्णुःकुण्डाग्नौभक्तवत्सलः ॥ तमा
लिङ्ग्यविमानाग्र्यंसमारोहयदच्युतः ॥ ३१ ॥ तमालिङ्ग्यात्मसारूप्यंदत्त्वावैकुण्ठमन्दिरम् ॥ तेनैवसहदेवेशोजगामत्रिदशैर्वृतः ॥ ३२ ॥
नारदउवाच ॥ योविष्णुदासःसतुपुण्यशीलोयश्चोलभूपःससुशीलनामा ॥ एतावुभौतत्समरूपभाजौद्वाःस्थौकृतौतेनरमाप्रियेण ॥३३॥ इतिश्रीपाद्मे
महापुराणेपञ्चप०उत्तर०कार्त्तिकमाहात्म्येश्रीकृष्णसत्यभामासंवादेकलहोपाख्यानंनामनवाधिकशततमोऽध्यायः ॥ १०९ ॥ धर्मदत्तउवाच ॥
जयश्चविजयश्चैवविष्णोर्द्वाःस्थौमयाश्रुतौ॥ किंतुताभ्यांपुराचीर्णंयस्मात्तद्रूपधारिणौ ॥१॥ गणावूचतुः ॥ तृणबिन्दोस्तुकन्यायांदेवहूत्यांपुराद्विज॥
कर्दमस्यतुदृष्ट्यैवपुत्रौद्वौसंबभूवतुः ॥२॥ ज्येष्ठोजयःकनिष्ठोऽभूद्विजयश्चेतिनामतः ॥अन्यस्यामभवत्पश्चात्कपिलोयोगधर्मवित् ॥३॥ जयश्चविजय
श्चैवविष्णुभक्तिरतौसदा ॥ संनियम्येन्द्रियग्रामंधर्मशीलौबभूवतुः ॥ ४ ॥ नित्यमष्टाक्षरीजाप्यौविष्णुव्रतकरावुभौ ॥ साक्षात्कारंददौ
विष्णुस्तयोर्नित्यार्चनेसदा ॥ ५ ॥ मरुत्तेनकदाचित्तावाहूतौयज्ञकर्मणि ॥ जग्मतुर्यज्ञकुशलौदेवर्षिगणसेवितौ ॥ ६ ॥ जयस्तत्राभवद्ब्रह्मायाजको
विजयोऽभवत् ॥ ततोयज्ञविधिंकृत्स्नंपरिपूर्णंचचक्रतुः ॥ ७ ॥ मरुत्तोऽवभृतस्नातस्ताभ्यांवित्तंददौबहु ॥ तत्समादायतौवित्तंजग्मतुःस्वाश्रमंप्रति ॥
॥८॥ यजनायतदाविष्णोस्तुष्ट्यर्थंतौतदामुने॥तद्धनविभजन्तौवैपस्पर्धातेपरस्परम् ॥९॥ जयोऽब्रवीत्समोभागःक्रियतामितितत्रसः ॥विजयश्चाब्रवी
त्त्रयल्लब्धंयेनतस्यतत् ॥ १० ॥ ततोजयोऽशपत्क्रोधाद्विजयंक्षुब्धमानसः ॥ गृहीत्वानददास्येतत्तस्माद्ग्राहोभवेतितम् ॥ ११ ॥ विजयस्तस्यतं
शापंश्रुत्वासोऽप्यशपच्चतम् ॥ मदभ्रान्तोऽशपोयस्मात्तस्मान्मातङ्गतांव्रज ॥ १२ ॥ तौतैथाचरुयतुर्विष्णुंदृष्ट्वानित्यार्चनेविभुम् ॥ शापयोस्तु
निवृत्तिंतौययाचातेरमापतिम् ॥ १३ ॥ भक्तावावांकथंदेवग्राहमातङ्गयोनिगौ ॥ भविष्यावःकृपासिन्धोतच्छापोविनिवर्त्यताम् ॥
॥ १४ ॥ श्रीभगवानुवाच ॥ मद्भक्तयोर्वचोऽसत्यंनकदाचिद्भविष्यति ॥ मयापिनान्यथाकर्तुंशक्यतेतत्कदाचन ॥ १५ ॥ प्रह्लादवच
नात्स्तम्भेऽप्याविर्भूतोह्यहंपुरा ॥ तथाम्बरीषवाक्येनजातोमार्गेस्वयंकिल ॥ १६ ॥ तस्माद्भुवमिमौशापावनुभूयस्वयंकृतौ ॥ लभेथांमत्पदंनित्य
मित्युक्त्वान्तर्दधेहरिः ॥ १७ ॥ गणावूचतुः ॥ ततस्तौग्राहमातङ्गावभूतांगण्डकीतटे ॥ जातिस्मरौचतद्योन्यामपिविष्णुव्रतेस्थितौ ॥ १८ ॥

१'अस्यामेवा 'इ०पा०। २ 'तत्तदा' इ० पा०। ३ 'गर्भे' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कदाचित्सगजःस्नातुंकार्त्तिकेगण्डकींगतः ॥ तावज्जग्राहचग्राहःसस्मरञ्छापकारणम् ॥ १९ ॥ ग्राहगृहीतोऽसौनागःसस्मारश्रीपतिंतदा ॥ ताव
दाविरभूद्विष्णुःशङ्खचक्रगदाधरः ॥ २० ॥ ततस्तौग्राहमातङ्गौचक्रंक्षिस्वासमुद्धृतौ ॥ दत्त्वाचनिजसारूप्यंवैकुण्ठमनयद्विभुः ॥ २१ ॥
तदाप्रभृतितत्स्थानंहरिक्षेत्रमितिश्रुतम् ॥ चक्रसङ्घर्षणाद्यस्मिन्पाषाणोऽपिहिलाञ्छितः ॥ २२ ॥ ताविमौविश्रुतौलोकेजयश्चविजयश्चह ॥
नित्यंविष्णुप्रियौद्वाःस्थौपृष्टौयौहित्वयाद्विज ॥ २३ ॥ अतस्त्वमपिधर्मज्ञनित्यंविष्णुव्रतेस्थितः ॥ त्यक्तमात्सर्यदम्भोहिभवस्वसमदर्शनः
॥ २४ ॥ तुलामकरमेषेषुप्रातःस्नायीसदाभव ॥ एकादशीव्रतेतिष्ठतुलसीवनपालकः ॥ २५ ॥ ब्राह्मणानपिगाश्चापिवैष्णवांश्चसदाभज ॥
मसूराश्चारनालाश्चवृन्ताकानपिखादमा ॥ २६ ॥ एवंत्वमपिदेहान्तेतद्विष्णोःपरमंपदम् ॥ प्राप्नोषिधर्मदत्तत्वंतद्भक्त्यैवयथावयम् ॥ २७ ॥
तवाजन्मव्रतात्तस्माद्विष्णुसंतुष्टिकारकात् ॥ नयज्ञानचदानानिनतीर्थान्यधिकानिवै ॥ २८ ॥ धन्योऽसिविप्राग्र्ययतस्त्वयैतद्व्रतंकृतंतुष्टिकरंजग
द्गुरोः ॥ यत्पुण्यभागात्तफलंमुरारेःप्रणीयतेऽस्माभिरियंसलोकताम् ॥ २९ ॥ नारदउवाच ॥ इत्थंतौधर्मदत्तंतमुपदिश्यविमानगौ ॥ तयाकल
हयासार्धंवैकुण्ठभवनंगतौ ॥ ३० ॥ धर्मदत्तोऽप्यसौजातप्रत्ययस्तद्व्रतेस्थितः ॥ देहान्तेतद्विभोःस्थानंभार्याभ्यामन्वितोऽभ्यगात् ॥ ३१ ॥
इतिहासमिमंपुराभवंशृणुतेयश्चपुमान्यथाविधि ॥ हरिसंनिधिकारिणींमतिंलभतेऽसौकृपयाजगद्गुरोः ॥ ३२ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०
कार्तिकमहात्म्येश्रीकृष्णसत्यभामासंवादेकलहोपाख्यानेगणपूर्वपुण्यवर्णनंनामदशाधिकशततमोऽध्यायः ॥ ११० ॥ पृथुरुवाच ॥ कृष्णा
वेण्यातटाद्यस्माच्छिवविष्णुगणैःपुरा ॥ वणिक्छरीरात्कलहानिर्गताकथितात्वया ॥ १ ॥ प्रभावोऽयंतयोर्नद्योःकिंवाक्षेत्रस्यतस्यवा ॥ तन्मे
कथयधर्मज्ञविस्मयोऽत्रमहान्मम ॥ २ ॥ नारदउवाच ॥ कृष्णाकृष्णतनुःसाक्षाद्वेण्यादेवोमहेश्वरः ॥ तत्संगमप्रभावंतुनालंवक्तुंचतुर्मुखः ॥ ३ ॥
तथापितत्समुत्पत्तिंकीर्तयिष्यामितच्छृणु ॥ चाक्षुषस्यान्तरेपूर्वंमनोर्देवःपितामहः ॥ ४ ॥ सह्याद्रिशिखरेरम्येयजनायोद्यतोऽभवत् ॥ सकृत्वा
यज्ञसंभारान्सर्वदेवगणैर्वृतः ॥ ५ ॥ युक्तोहरिहराभ्यांचतद्गिरेःशिखरं ययौ ॥ भृग्वादयोमुनिगणामुहूर्तेब्रह्मदैवते ॥ ६ ॥ तस्यदीक्षाविधानाय
समाजंतत्रचक्रिरे ॥ अथज्येष्ठांस्वरांपत्नींविष्णुराह्वयतद्विजैः ॥ साशनैराययौतावद्भृगुर्विष्णुमुवाचह ॥ ७ ॥ भृगुरुवाच ॥ विष्णोस्वरात्वयाहूता
आयातिनहिसत्वरा ॥ मुहूर्तातिक्रमश्चायंकार्योदीक्षाविधिःकथम् ॥ ८ ॥ विष्णुरुवाच ॥ नायातिचेत्स्वराशीघ्रंगायत्र्यत्रविधीयताम् ॥

१ 'यदर्धभागात्त' इ० पा० । २ 'श्रावय तेच यः पुमान्' इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

एषापिनभवत्यस्यभार्याकिंपुण्यकर्मणि ॥ ९ ॥ नारदउवाच ॥ एवमेवहिरुद्रोऽपिविष्णोर्वाक्यममोदत ॥ तच्छ्रुत्वासभृगुर्वाक्यंगायत्रींब्रह्मणस्तदा ॥ १० ॥ निवेश्यदक्षिणेभागेदीक्षाविधिमथाकरोत ॥ यावद्दीक्षाविधिंतस्यविधेश्चक्रुर्विधानतः ॥ ११ ॥ तावदभ्याययौतत्रस्वरायज्ञस्थले नृप ॥ ततस्तांदीक्षितांदृष्ट्वागायत्रींब्रह्मणासह ॥ १२ ॥ सपत्नीर्षापराक्रोधात्स्वरावचनमब्रवीत् ॥ १३ ॥ स्वरोवाच ॥ अपूज्यायत्रपूज्यन्ते पूज्यानांचव्यतिक्रमः ॥ त्रीणितत्रभविष्यन्तिदुर्भिक्षंमरणंभयम् ॥ १४ ॥ ममासनेकनिष्ठेयंभवद्भिःसन्निवेशिता ॥ तस्मात्सर्वेजडीभूतानानारूपा भविष्यथ ॥ १५ ॥ इयंचदक्षिणेभागेह्युपविष्टामदासने ॥ तस्माल्लोकैःसदाऽदृश्यातनुर्वहतुनिम्नगा ॥ १६ ॥ नारदउवाच ॥ ततस्तच्छापमाकर्ण्य गायत्रीकम्पितातदा ॥ समुत्थायाशपद्देवैर्वार्यमाणापितांस्वराम् ॥ १७ ॥ तवभर्तायथाब्रह्माममाप्येषतथाखलु ॥ वृथाशपस्त्वंयस्मान्मांभवत्व मपिनिम्नगा ॥ १८ ॥ नारदउवाच ॥ ततोहाहाकृताःसर्वेशिवविष्णुमुखाःसुराः ॥ प्रणम्यदण्डवद्भूमौस्वरांतत्रव्यजिज्ञपन् ॥ १९ ॥ देवाऊचुः ॥ देविसर्वेवयंशप्ताब्रह्माद्यायत्त्वयाधुना ॥ यदिसर्वेजडीभूताभविष्यामोऽत्रनिम्नगाः ॥ २० ॥ तदालोकत्रयंह्येतद्विनाशंयास्यतिध्रुवम् ॥ अविवेकःकृत स्तस्माच्छापोऽयंविनिवर्त्यताम् ॥२१ ॥ स्वरोवाच ॥ नार्चितोहिगणाध्यक्षोयज्ञादौयत्सुरोत्तमाः ॥ तस्माद्विघ्नंसमुत्पन्नंमत्क्रोधजमिदंखलु ॥२२ ॥ नापिमद्वचनंह्येतदसत्यंजायतेखलु ॥ तस्मात्स्वांशैर्जडीभूतायूयंभवतनिम्नगाः ॥ २३ ॥ आवामपिसपत्न्यौचस्वांशाभ्यामपिनिम्नगे ॥ भविष्यावो ऽत्रवैदेवाःपश्चिमाभिमुखावहे ॥ २४ ॥ नारदउवाच ॥ इतितद्वचनंश्रुत्वाब्रह्मविष्णुमहेश्वराः ॥ जडीभूताभवन्नद्यःस्वांशैरेवतदानृप ॥ २५ ॥ तत्रविष्णु रभूत्कृष्णावेण्यादेवोमहेश्वरः ॥ ब्रह्माककुद्मतीगङ्गापृथगेवाभवत्तदा ॥ २६ ॥ देवाःस्वानपितानंशाञ्जडीकृत्यविचिक्षिपुः ॥ सह्याद्रिशिखरेभ्यस्ताः पृथगासन्सुनिम्नगाः ॥ २७ ॥ देवांशैःपूर्ववाहिन्योबभूवुःपश्चिमावहाः ॥ तत्पत्न्यंशैःपृथक्तत्रशतशोऽथसहस्रशः ॥ २८ ॥ गायत्रीचस्वराचैवपश्चि माभिमुखेतदा ॥ योगेनाभवतांनद्यौसावित्रीतिप्रथांगते ॥ २९ ॥ ब्रह्मणास्थापितौतत्रयज्ञेहरिहरावुभौ ॥ महाबलातिबलिनौनाम्ना देवौबभूवतुः ॥ ३० ॥ तयोर्नद्योस्तुमाहात्म्यंनाहंवक्तुंक्षमोनृप ॥ ययुर्ब्रह्मादयोदेवाःस्वांशैस्तिष्ठन्तिचापगाः ॥ ३१ ॥ कृष्णोद्भवंपापहरंपरंयः शृणोतियःश्रावयतेचभक्त्या ॥ स्यात्तस्यपुंसःसकलंफलंयत्तद्दर्शनस्नानसमुद्भवंफलम् ॥ ३२ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप० उत्तर० कार्तिकमाहात्म्येश्रीकृष्णसत्यभामासंवादेकृष्णावेण्यामाहात्म्यवर्णनंनामैकादशाधिकशततमोऽध्यायः ॥ १११ ॥ श्रीकृष्णउवाच ॥ इतितद्वचनं

१ 'नदीरूपा' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रुत्वापृथुर्विस्मितमानसः ॥ संपूज्यनारदंभक्त्याविससर्जतदाप्रिये ॥ १ ॥ तस्माद्व्रतत्रयंह्येतन्ममातीवप्रियङ्करम् ॥ माघकार्त्तिकयोर्यद्वत्तथै
वैकादशीव्रतम् ॥ २ ॥ वनस्पतीनांतुलसीमासानांकार्तिकःप्रियः ॥ एकादशीतिथीनांचक्षेत्राणांद्वारकामम ॥ ३ ॥ एतेषांसेवनंयस्तु
करोतिचजितेन्द्रियः ॥ समेवल्लभतांयातिनतथायजनादिभिः ॥ ४ ॥ पापेभ्योनभयंतेनकर्तव्यंनियमादपि ॥ एतेषांसेवनंकान्तेकुर्वता
मत्प्रसादतः ॥ ५ ॥ सत्यभामोवाच ॥ विस्मापनीयंतन्नाथयत्त्वयाकथितंमम ॥ परदत्तेनपुण्येनकलहामुक्तिमागता ॥ ६ ॥ इत्थंप्रभावो
मासोऽयंकार्तिकस्तेप्रियङ्करः ॥ स्वामिद्रोहादिपापानिस्नानदानैर्गतानियत ॥ ७ ॥ दत्तंचलभतेपुण्यंयत्परेणकृतंविभो ॥ अदत्तंकेन
मार्गेणलभतेचापिमानवः ॥ ८ ॥ श्रीकृष्णउवाच ॥ अदत्तान्यपिपुण्यानिपापानिचयथानरैः ॥ प्राप्यन्तेकर्मणायेनतद्यथावन्निशामय ॥ ९ ॥
देशग्रामकुलानिस्युर्भागभाञ्जिकृतादिषु ॥ कलौतुकेवलंकर्ताफलभुक्पुण्यपापयोः ॥ १० ॥ अकृतेऽपिहिसंसर्गैर्व्यवस्थेयमुदाहृता ॥ संसर्गात्पुण्य
पापानियथायान्तिनिबोधतत् ॥ ११ ॥ एकत्रमैथुनाद्यानादेकपात्रस्थभोजनात ॥ फलार्धप्राप्नुयान्मर्त्योयथावत्पुण्यपापयोः ॥१२॥ अध्यापनाद्या
जनाद्वाप्येकपङ्क्त्यशनादपि ॥ तुर्यांशंपुण्यपापानांनित्यंप्राप्नोतिमानवः ॥ १३ ॥ एकासनादेकयानान्निःश्वासस्याङ्गसंगतः ॥ षडंशफलभागीस्यान्नि
यतंपुण्यपापयोः ॥ १४ ॥ स्पर्शनाद्भाषणाद्वापिपरस्यस्तवनादपि ॥ दशांशंपुण्यपापानांनित्यंप्राप्नोतिमानवः ॥ १५ ॥ दर्शनश्रवणाभ्यांचमनोध्या
नात्तथैवच ॥ परस्यपुण्यपापानांशतांशंप्राप्नुयान्नरः ॥१६॥ परस्यनिन्दांपैशुन्यंधिक्कारंचकरोतियः ॥ तत्कृतंपातकंप्राप्यस्वपुण्यंप्रददातिसः ॥१७॥
कुर्वतःपुण्यकर्माणिसेवांयःकुरुतेनरः ॥पत्नीभृतकशिष्येभ्योयदन्यःकोऽपिमानवः ॥१८॥ तस्यसेवानुरूपेणद्रव्यंकिंचिन्नदीयते ॥सोऽपिसेवानुरूपेण
तत्पुण्यफलभाग्भवेत् ॥१९॥ एकपङ्क्त्यश्नतांयस्तुलङ्घयेत्परिवेषणम् ॥ तस्यपापषडंशंतुलभेद्वैपरिवेषकः ॥२०॥स्नानसन्ध्यादिकंकुर्वन्यःस्पृशेद्वाप्रभा
पते ॥ सपुण्यकर्मषष्ठांशंदद्यात्तस्मैसुनिश्चितम् ॥ २१ ॥ धर्मोद्देशेनयोद्रव्यमपरंयाचतेनरः ॥ तत्पुण्यकर्मजंतस्यधनदस्त्वाप्नुयात्फलम् ॥ २२ ॥
अपहृत्यपरद्रव्यंपुण्यकर्मकरोतियः ॥ कर्मकृत्पापभाक्तत्रधनिनस्तद्भवंफलम् ॥ २३ ॥ नापनुद्यऋणंयस्तुपरस्यम्रियतेनरः ॥ धनीतत्पुण्यमाधत्तेस्व ॥ १०४ ॥
धनस्यानुरूपतः ॥२४॥बुद्धिदस्त्वनुमन्ताचयश्चोपकरणप्रदः ॥बलकृच्चापिषष्ठांशंप्राप्नुयात्पुण्यपापयोः ॥ २५ ॥ प्रजाभ्यःपुण्यपापानांराजाषष्ठांश
मुद्धरेत् ॥ शिष्याद्गुरुःस्त्रियोभर्तापितापुत्रात्तथैवच ॥ २६ ॥ स्वपतेरपिपुण्यस्ययोषिदर्धमवाप्नुयात् ॥ चित्तस्यानुव्रताशश्वद्वर्ततेतुष्टिकारिणी ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २७ ॥ परहस्तेनदानादिकुर्वतःपुण्यकर्मणि ॥ विनाभृतकपुत्राभ्यांकर्त्ताषष्ठांशमुद्धरेत् ॥ २८ ॥ वृत्तिदोवृत्तिसंभोक्तुःपुण्यमर्द्धांशमुद्धरेत् ॥ आत्म
नोवापरस्यापियदिसेवांनकारयेत् ॥ २९ ॥ श्रीकृष्णउवाच ॥ इत्थंह्यदत्तान्यपिपुण्यपापान्यायान्तिनित्यंपरसंचितानि ॥ कलौत्वयंवैनियमोन
कार्यःकर्तैवभोक्ताखलुपुण्यपापयोः ॥ शृणुष्वचेमंइतिहासमग्र्यंपुराभवंपुण्यमतिप्रदंच ॥३०॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०कार्त्तिकमाहात्म्ये
श्रीकृष्णसत्यभामासंवादेपुण्यपापांशकथनंनामद्वादशाधिकशततमोऽध्यायः ॥ ११२ ॥ श्रीकृष्णउवाच ॥ पुरावन्तीपुरेवासीविप्रआसीद्धने
श्वरः ॥ ब्रह्मकर्मपरिभ्रष्टःपापनिष्ठःसुदुर्मतिः ॥ १ ॥ रसकम्बलचर्मादिविक्रयानृतवर्त्तनः ॥ स्तेयवेश्यासुरापानद्यूतसंसक्तमानसः ॥ २ ॥ देशाद्देशा
न्तरंगच्छन्क्रयविक्रयकारणात् ॥ माहिष्मतींपुरींयातःकदाचित्सधनेश्वरः ॥ ३ ॥ महिषेणकृतापूर्वंतस्मान्माहिष्मतीस्मृता ॥ यस्यांवप्रतटा
भातिनर्मदापापनाशिनी ॥ ४ ॥ कार्त्तिकव्रतिनस्तत्रनानाग्रामागतान्नरान् ॥ सदृष्ट्वाविक्रयंकुर्वन्मासमेकमुवासह ॥ ५ ॥ सनित्यंनर्मदातीरे
भ्रमन्विक्रयकारणात् ॥ ददर्शब्राह्मणान्स्नाताञ्जपदेवार्चनेरतान् ॥ ६ ॥ कांश्चित्पुराणंपठतःकांश्चित्तच्छ्रवणेरतान् ॥ नृत्यगायनवादित्र
विष्णुस्तवनतत्परान् ॥ ॥ ७ ॥ विष्णुमुद्राङ्कितान्कांश्चिन्मालातुलसिधारिणः ॥ ददर्शकौतुकाविष्टस्तत्रतत्रधनेश्वरः ॥ ८ ॥ नित्यंपरिभ्रमं
स्तत्रदर्शनस्पर्शभाषणात् ॥ वैष्णवानांतथाविष्णोर्नामसंश्राावितोऽभवत् ॥ ९ ॥ एवंमासंस्थितःसोऽथकार्त्तिकोद्यापनेविधौ ॥ क्रियमाणेददर्शा
सौभक्तैर्जागरणंहरेः ॥ १० ॥ पौर्णमास्यांततोऽपश्यद्द्विबिधंपूजनादिकम् ॥ दक्षिणाभोजनाद्यंचदीपदानंव्रतस्थितैः ॥ ११ ॥ ततोऽ
र्कास्तमयेचैवंदीपोत्सवविधिंतदा ॥ क्रियमाणंददर्शासौप्रीत्यर्थंत्रिपुरद्विषः ॥ १२ ॥ त्रिपुराणांकृतोदाहोयतस्तस्यांशिवेनतु ॥ अतस्तुक्रियते
तस्यांतिथौभक्तैर्महोत्सवः ॥ १३ ॥ ममरुद्रस्ययःकश्चिदन्तरंपरिकल्पयेत् ॥ तस्यपुण्यक्रियाःसर्वानिष्फलाःस्युर्नसंशयः ॥ १४ ॥ तत्रनृत्या
दिकंपश्यन्बभ्रामसधनेश्वरः ॥ तावत्कृष्णाहिनादष्टोविकलःसपपातह ॥ १५ ॥ जनास्तंपतितंवीक्ष्यपरिवव्रुःकृपान्विताः ॥ तुलसीमिश्रितैस्तो
यैस्तन्मुखंसिषिचुस्तदा ॥ १६ ॥ अथदेहेपरित्यक्तेतंबद्ध्वायमकिङ्कराः ॥ बाध्यमानंकशाघातैर्निन्युःसंयमिनींरुषा ॥ १७ ॥ चित्रगुप्त
स्तुतंदृष्ट्वानिर्भर्त्स्याविदयत्तदा ॥ यमायतेनबाल्यात्तुकर्मयद्दुष्कृतंकृतम् ॥ १८ ॥ चित्रगुप्तउवाच ॥ नैवास्यदृश्यतेकिंचिदाबाल्यात्सुकृतं
क्वचित् ॥ दुष्कृतंशक्यतेवक्तुंशतवर्षैर्नभास्करे ॥ १९ ॥ पापमूर्तिरयंदुष्टःकेवलंदृश्यतेविभो ॥ तस्मादाकल्पमर्यादंनिरयेपरिपच्यताम्॥

१'पापं समुद्धरेत्' इ०पा० । २ 'द्विप्रगोपूजनादिकम्' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २० ॥ श्रीकृष्णउवाच ॥ निशम्येत्थंवचःक्रोधाद्यमःप्राहस्वकिङ्करान् ॥ दर्शयन्नात्मनोरूपंकालाग्निसदृशप्रभम् ॥ २१ ॥
यमउवाच ॥ भोःप्रेतपनयस्वैनंविध्यमानंस्वमुद्गरैः ॥ कुम्भीपाकेक्षिपस्वाशुदुष्टंकल्मषदर्शनम् ॥ २२ ॥ श्रीकृष्णउवाच ॥ ततोमुद्गरनिर्भिन्न
मूर्धानंप्रेतपोऽनयत् ॥ कुम्भीपाकेऽक्षिपच्चाशुतैलक्[1]थनशब्दिते ॥ २३ ॥ यावत्क्षिप्तस्तुतत्रासौतावच्छीतलतांययौ ॥ कुम्भीपाकेयथावह्निःप्रह्लाद
क्षेपणात्पुरा ॥२४॥ तद्दृष्ट्वामहदाश्चर्यंप्रेतपोविस्मयान्वितः ॥ वेगादागत्यतत्सर्वंयमायाकथयत्तदा ॥ २५ ॥ यमस्तुकौतुकंश्रुत्वाप्रेतपेननिवेदि
तम् ॥ आःकिमेतदितिप्रोच्यसम्यगेतद्व्यचारयत् ॥ २६ ॥ तावदभ्यागतस्तत्रनारदःप्रहसंस्त्वरन् ॥ यमेनपूजितःसम्यक्तंदृष्ट्वावाक्यमब्रवीत्॥
॥ २७ ॥ नारदउवाच ॥ नैवायंनिरयान्भोक्तुंक्षमःसवितृनन्दन ॥ यस्मादेतस्यसंजातंकर्मयन्निरयापहम् ॥ २८ ॥ यःपुण्यकर्मणांकुर्याद्दर्शन
स्पर्शभाषणम् ॥ तत्षडंशमवाप्नोतिपुण्यस्यनियतंनरः ॥ २९ ॥ असङ्ख्यातैस्तुसंसर्गैःकृतवानेषयद्धरेः ॥ कार्त्तिकव्रतिभिर्मासंतस्मात्पुण्यांशभा
गयम् ॥ ३० ॥ परिचर्याकरस्तेषांसंपूर्णव्रतपुण्यभाक् ॥ अतोऽस्योर्जव्रतोद्भूतपुण्यसङ्ख्यानविद्यते ॥ ३१ ॥ कार्त्तिकव्रतिनांपुंसांपातकानिमहान्त्य
पि ॥ नाशयत्येवसर्वाणिविष्णुःसद्भक्तवत्सलः ॥ ३२ ॥ अन्तेचनामदैस्तोयैस्तुलसीमिश्रितैस्त्वयम् ॥ वैष्णवैःस्नापितोविष्णोर्नामसंश्रावितो
ऽपिच ॥ ३३ ॥ तस्मान्निहतपापोऽयंसद्गतिंप्राप्तुमर्हति ॥ वैष्णवानुग्रहीयस्मान्नरकेनैवपच्यते ॥ ३४ ॥ आर्द्रैःशुष्कैर्यथापापैर्निरयेभोगसंनिधिः॥
॥ ३५ ॥ प्राप्यतेसुकृतैस्तद्वत्स्वर्गभोगस्यसंनिधिः ॥ तस्मादकामपुण्योहियक्षयोनिस्थितस्त्वसौ ॥ विलोक्यनरकान्सर्वान्पापभोगमवाप्नुयात् ॥
॥ ३६ ॥ श्रीकृष्णउवाच ॥ इत्युक्त्वागतवतिनारदेऽथसौरिस्तद्वाक्यश्रवणविबुद्धतत्सुकर्मा ॥ विप्रंतंपुनरनयत्स्वकिङ्करेणतान्सर्वान्निरयगणान्प्र
दर्शयिष्यन् ॥ ३७ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०उत्तर०कार्त्तिकमाहात्म्येश्रीकृष्णसत्यभामासंवादेधनेश्वरोपाख्यानेत्रयोदशाधिकशत
तमोऽध्यायः ॥ ११३ ॥ श्रीकृष्णउवाच ॥ ततोधनेश्वरंनीत्वानिरयान्प्रेतपोऽब्रवीत् ॥ प्रदर्शयिष्यंस्तान्सर्वान्यमस्यानुचरस्तदा ॥ १ ॥
प्रेतपउवाच ॥ पश्येमान्निरयान्घोरान्धनेश्वरमहाभयान् ॥ येषुपापकरानित्यंपच्यन्तेयमकिङ्करैः ॥ २ ॥ तप्तवालुकनामायंनिरयोघोर
दर्शनः ॥ यस्मिन्नेतेदग्धदेहाःक्रन्दन्तेपापकारिणः ॥ ३ ॥ अतिथीन्वैश्वदेवान्तेक्षुत्क्षामानागतान्गृहे ॥ येनार्चन्तिनरास्तेहिपच्यन्तेस्वेनकर्मणा ॥ ॥ १०९ ॥
॥ ४ ॥ गुर्वग्निब्राह्मणान्देवांस्तथामूर्धाभिषिक्तकान् ॥ ताडयन्तिपदायेवैतेनिर्दग्धाङ्घ्रयस्त्विमे ॥ ५ ॥ षड्भेदस्त्वेषनिरयोनानापापैःप्रप

१ 'क्राथेन शब्दिते' इ० पा०। २ 'पूजयन्ति न ये ते हि' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्यते ॥ तथैवचान्धतामिस्रोद्वितीयोनिरयोमहान् ॥ ६ ॥ पश्यसूचीमुखैर्देहोभिद्यतेपापकर्मणा ॥ क्रिमिभिर्घोरवक्त्रैश्चतत्संपर्कागमौद्विज
॥ ७ ॥ असावपिस्थितःषोढाश्वकाकमृगपक्षिभिः ॥ परमर्मभिदोमर्त्याःपच्यन्तेतेषुपापिनः ॥ ८ ॥ तृतीयःक्रकचोह्येषनिरयोघोरदर्शनः ॥
यत्रेमेक्रकचैर्मर्त्याःपाट्यन्तेपापकारिणः ॥ ९ ॥ असिपत्रवनाद्यैस्तुषट्प्रकारोऽव्यवस्थितः ॥ पत्नीपुत्रादिभिर्यैर्वैवियोगंकारयन्तिहि ॥ १० ॥
इष्टैरन्यैरपिपरान्पच्यन्तेतइमेनराः ॥ असिपत्रैश्छिद्यमानाश्छेदभीत्यापलायिताः ॥ ११ ॥ पच्यन्तेपापिनःपश्यक्रन्दमानाइतस्ततः ॥ अर्ग
लाख्योमहाघोरश्चतुर्थोनिरयोह्ययम् ॥ १२ ॥ पश्यनानाविधैःपाशैराबध्ययमकिङ्करैः ॥ मुद्गराद्यैर्वध्यमानाःक्रन्दन्तेतेचपापिनः ॥ १३ ॥ सज्जना
न्ब्राह्मणाद्यांश्चविरुन्धन्तीहयेनराः ॥ कण्ठग्रहाद्यैस्तेपापाःपच्यन्तेयमकिङ्करैः ॥ १४ ॥ असावपिहिषड्भेदोवधभेदादिभिःस्थितः ॥ कूटशाल्मलि
नामानंनिरयंपश्यपञ्चमम् ॥ १५ ॥ यत्राङ्गारनिभाएतेशाल्मल्याद्याःस्थिताद्विज ॥ यत्रषोढाविपच्यन्तेयातनाभिरिमेनराः ॥ १६ ॥ परदारपरद्रव्य
परद्रोहरताःसदा ॥ रक्तपूयमिमंपश्यषष्ठंनिरयमद्भुतम् ॥ १७ ॥ अधोमुखाविपच्यन्तेयत्रपापकृतोनराः ॥ अभक्ष्यभक्षकानिन्दापैशुन्यादिरता
इमे ॥ १८ ॥ भज्यमानावध्यमानाःक्रन्दन्तेभैरवान्स्वरान् ॥ षट्प्रकारैर्विगन्धाढ्यैरसावपिचसंस्थितः ॥ १९ ॥ कुम्भीपाकःसप्तमोऽयंनिरयो
घोरदर्शनः ॥ षोढातैलादिभिर्द्रव्यैर्धनेश्वरविलोकय ॥ २० ॥ महापातकिनोयत्रक्वथ्यन्तेयमकिङ्करैः ॥ बहून्यब्दसहस्राणिसोन्मज्जननिमज्जनैः ॥
॥ २१ ॥ चत्वारिंशन्मितानेतान्द्व्यधिकान्पश्यरौरवान् ॥ अकामात्पातकंशुष्कंकामादार्द्रमुदाहृतम् ॥ २२ ॥ आर्द्रशुष्कादिभिःपापैर्द्विप्रकारानव
स्थितान् ॥ चतुरशीतिसङ्ख्याकैःपृथग्भेदैरवस्थितान् ॥ २३ ॥ यत्प्रकीर्णमपाङ्क्तेयंमलिनीकरणंतथा ॥ ज्ञातिभ्रंशकरंतद्वदुपपातकसंज्ञकम् ॥ २४ ॥
अतिपापंमहापापंसप्तधापातकंस्मृतम् ॥ एभिःसप्तसुपच्यन्तेनिरयेषुयथाक्रमम् ॥ २५ ॥ कार्त्तिकव्रतिभिर्यस्मात्संसर्गोह्यभवत्तव ॥ तत्पुण्योपचया
देतेनिर्हृतानिरयाःखलु ॥ २६ ॥ श्रीकृष्णउवाच ॥ दर्शयित्वेतिनिरयान्प्रेतपस्तमथाहरत् ॥ धनेश्वरंयक्षलोकंपश्चादासीत्सतत्रहि ॥ २७ ॥ धन
दस्यानुगःसोऽयंधनयक्षेतिसस्मृतः ॥ यदाख्ययाकरोत्तीर्थमयोध्यायांतुगाधिजः ॥ २८ ॥ एवंप्रभावःखलुकार्त्तिकोऽयंमुक्तिप्रदोमुक्तिकरश्च
यस्मात् ॥ प्रयात्यनेकार्जितपातकोऽपिव्रतस्थसंदर्शनतोऽपिमुक्तिम् ॥ २९ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०उत्तर०कार्त्तिकमाहात्म्येधनेश्व
रोपाख्यानेचतुर्दशाधिकशततमोऽध्यायः ॥ ११४ ॥ सूतउवाच ॥ इत्युक्त्वावासुदेवोऽसौसत्यभामामतिप्रियाम् ॥ सायंसन्ध्यादिकंकर्तुं

१ 'वद्धवध्यादि' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जगामजननीगृहम् ॥ १ ॥ एवंप्रभावःप्रोक्तोऽयंकार्त्तिकःपापनाशनः ॥ विष्णुप्रियकरोनित्यंभुक्तिमुक्तिप्रदःसदा ॥ २ ॥ हरिजागरणंप्रातः
स्नानंतुलसिसेवनम् ॥ उद्यापनंदीपदानंव्रतान्येतानिकार्त्तिके॥३॥पञ्चकैर्व्रतकैरेभिःसंपूर्णकार्त्तिकव्रतम्॥फलंप्राप्नोतितत्प्रोक्तंभुक्तिमुक्तिफलप्रदम्॥४॥
ऋषयऊचुः ॥ विष्णोःप्रियोऽतिफलदःप्रोक्तोऽयंरोमहर्षणे ॥ कार्त्तिकस्यविधिःसम्यक्पावनःपापनाशनः ॥ ५ ॥ अवश्यमेवकर्त्तव्यःप्राप्यदुः
खनिवारणः ॥ मोक्षार्थिभिर्नरैःसम्यग्भोगकामैरथापिवा ॥ ६ ॥ एवंस्थितेयथाकश्चिद्व्रतस्थःसङ्कटेस्थितः ॥ दुर्गारण्यस्थितोवापिव्याधिभिःपरिपी
डितः ॥ कथंतेनप्रकर्तव्यंकार्तिकव्रतकंशुभम् ॥७॥ सूतउवाच ॥ यस्मादत्यन्तफलदंकर्तव्यंतुयथानरैः ॥ तत्सर्वंकथयिष्येऽहंशृणुध्वंमुनिपुङ्गवाः ॥
॥ ८ ॥ विष्णोःशिवस्यवाकुर्यादालयेहरिजागरम् ॥ शिवविष्णुग्रहाभावेसर्वदेवालयेष्वपि ॥ ९ ॥ दुर्गारण्यस्थितोयश्चयदिवापद्गतोभवेत ॥ कुर्या
त्तदाश्वत्थमूलेतुलसीनांवनेष्वपि ॥ १० ॥ विष्णुनामप्रधानानांगायनाद्विष्णुसन्निधौ ॥ गोसहस्रप्रदानस्यफलंप्राप्नोतिमानवः ॥ ११ ॥ वाद्यकृत्पुरु
षश्चापिवाजपेयफलंलभेत् ॥ सर्वतीर्थावगाहोत्थंनर्तकःफलमाप्नुयात्॥१२॥सर्वमेतल्लभेत्पुण्यंतेषांतुद्रव्यदःपुमान् ॥ प्रशंसादर्शनाभ्यांहितत्षडंशमवा
प्नुयात्॥१३॥आपद्गतोयदाप्यम्भोनलभेत्स्नपनायसः ॥ व्याधितोवापुनःकुर्याद्विष्णोर्नामापमार्जनम्॥१४॥उद्यापनविधिंकर्तुंनशक्तोयोव्रतेस्थितः ॥
ब्राह्मणान्भोजयेच्छक्त्याव्रतसंपूर्तिहेतवे ॥ १५ ॥ यस्मादत्यन्तफलदोनत्याज्यःसर्वदानरैः ॥ अव्यक्तरूपिणोविष्णोःस्वरूपंब्राह्मणाभुवि ॥ १६ ॥
तत्संतुष्टयासुसंतुष्टःसर्वदास्यांनसंशयः ॥ अशक्तोदीपदानेतुपरदीपंप्रबोधयेत् ॥ १७ ॥ तथांवारक्षणंकुर्याद्वातादिभ्यःप्रयत्नतः ॥ अभावेतुलसीनांतु
पूजयेद्वैष्णवंद्विजम् ॥ १८ ॥ यस्मात्संनिहितोविष्णुःस्वभक्तेष्वेवसर्वदा ॥ सर्वाभावेव्रतीकुर्याद्ब्राह्मणानांगवामपि ॥१९॥ सेवांवाश्वत्थवटयोर्व्रतसंपू
र्तिहेतवे ॥ २० ॥ ऋषयऊचुः ॥ कथंत्वयाश्वत्थवटौगोब्राह्मणसमौकृतौ ॥ सर्वेभ्योऽपितरुभ्यस्तौकस्मात्पूज्यतरौकृतौ ॥ २१ ॥ सूत
उवाच ॥ अश्वत्थरूपीभगवान्विष्णुरेवनसंशयः ॥ रुद्ररूपीवटस्तद्वत्पालाशोब्रह्मरूपधृत् ॥ २२ ॥ दर्शनंपूजनंसेवातेषांपापहरास्मृता ॥ दुःखापद्व्या
धिदुष्टानांविनाशेकरणंध्रुवम् ॥ २३ ॥ ऋषयऊचुः ॥ कथंवृक्षत्वमापन्नाब्रह्मविष्णुमहेश्वराः ॥ एतत्कथयसर्वज्ञसंशयोऽत्रमहान्हिनः ॥ २४ ॥ सूत
उवाच ॥ पार्वतीशिवयोर्देवैःसुरतंकुर्वतोःकिल ॥ अग्निर्ब्राह्मणरूपेणप्रेषितोविघ्नकृत्पुरा ॥ २५ ॥ ततःसापार्वतीक्रुद्धाशशापत्रिदिवौकसः ॥
रतोत्सवसुखभ्रंशात्कम्पमानारुषातदा ॥ २६ ॥ पार्वत्युवाच ॥ कृमिकीटादयोऽप्येतेजानन्तिसुरतंसुखम् ॥ तद्विघ्नकरणाद्देवाह्युद्विग्नत्वमवा

१'प्रबन्धानाम्' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्स्यथ ॥ २७ ॥ सूतउवाच ॥ एवंसापार्वतीदेवानशपत्क्रुद्धमानसा ॥ तस्माद्वृक्षत्वमापन्नाः सर्वेदेवगणाःकिल ॥ २८ ॥ तस्मादिमौविष्णु महेश्वरावुभौबभूवतुर्बोधिवटौमुनीश्वराः ॥ बोधिस्त्वगादार्किदिनेऽस्पृशत्वमस्पृश्यतामर्कजविट्टियोगात् ॥ २९ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप० उत्तर० कार्त्तिकमाहात्म्येऽश्वत्थवटप्रशंसनंनामपञ्चदशाधिकशततमोऽध्यायः ॥ ११५ ॥ ऋषयऊचुः ॥ अस्पृश्यत्वंकथंयातःसूतबोधितरुस्त्व यम् ॥ स्पृश्यत्वंचकथंप्राप्तस्तथाचशनिवासरे ॥ एतद्विस्तरतःसर्ववक्तुमर्हतिनोभवान् ॥ १ ॥ सूतउवाच ॥ समुद्रमथनाद्यानिरत्नान्यापुः सुरेश्वराः ॥ श्रियंचकौस्तुभंतेषांविष्णवेप्रददुःसुराः ॥ २ ॥ यावदङ्गीचकारासौलक्ष्मींभार्यार्थमात्मनः ॥ तावद्विज्ञापयामासलक्ष्मीस्तं चक्रपाणिकम् ॥ ३ ॥ लक्ष्मीरुवाच ॥ असंस्कृत्यकथंज्येष्ठांत्वंकनिष्ठांप्रणीयसे ॥ तस्मान्ममाग्रजामेतामलक्ष्मींमधुसूदन ॥ ४ ॥ विवाह्य नयमांपश्चादेषधर्मःसनातनः ॥ ५ ॥ सूतउवाच ॥ इतितद्वचनंश्रुत्वासविष्णुर्लोकभावनः ॥ उद्दालकायमुनयेसुदीर्घतपसेतदा ॥ ६ ॥ आत्मवाक्यानुरोधेनतामलक्ष्मींददौकिल ॥ स्थूलास्यांशुभ्रदशनांराजतींबिभ्रतींतनुम् ॥ ७ ॥ विततांरक्तनयनांरूक्षपिङ्गशिरोरुहाम् ॥ समु निर्विष्णुवाक्यात्तामङ्गीकृत्यस्वमाश्रमम् ॥ ८ ॥ वेदध्वनिसमायुक्तमानिनायचधर्मवित् ॥ होमधूमसुगन्धाढ्यंविद्याघोषविनादितम् ॥ आश्रमं तंसमालोक्यव्यथितासाब्रवीदिदम् ॥ ९ ॥ ज्येष्ठोवाच ॥ नहिवासोऽनुरूपोऽयंवेदध्वनियुतोमम ॥ नात्रागमिष्येभोब्रह्मन्नयस्वान्यत्रमा चिरम् ॥ १० ॥ उद्दालकउवाच ॥ कथंनायासिकिंवात्रवर्त्ततेऽसंमतंतव ॥ तवयोग्याचवसतिःकाभवेच्चवदस्वतत् ॥ ११ ॥ ज्येष्ठोवाच ॥ वेदध्वनिर्भवेद्यस्मिन्नतिथीनांचपूजनम् ॥ यज्ञदानादिकंवापिनैवंतत्रवसाम्यहम् ॥ १२ ॥ परस्परानुरागेणादाम्पत्यंयत्रवर्तते ॥ पितृदेवार्चनं यत्रनैवतत्रवसाम्यहम् ॥ १३ ॥ दुरोदररतायत्रपरद्रव्यापहारिणः ॥ परदाररताश्चापितत्रस्थानेरतिर्मम ॥ १४ ॥ गोवधोमद्यपानंचयत्रसंजा यतेऽनिशम् ॥ ब्रह्महत्यादिपापानितस्मिन्स्थानेरतिर्मम ॥ १५ ॥ वृद्धसज्जनविप्राणांयत्रस्यादपमाननम् ॥ निष्ठुरंभाषणंयत्रतत्रनित्यंवसाम्य हम् ॥ १६ ॥ सूतउवाच ॥ इतितद्वचनंश्रुत्वाविषण्णवदनोऽभवत् ॥ उद्दालकमुनिर्विष्णोर्वाक्यंस्मृत्वानचोचिवान् ॥ १७ ॥ सोऽगच्छद्यत्रतत्रास्य पूजामालोक्यसाब्रवीत् ॥ नायामीतिततःसोऽपिभ्रमादत्यातुरोऽभवत् ॥ उद्दालकस्ततोवाक्यंतामलक्ष्मीमुवाचह ॥ १८ ॥ उद्दालकउवाच ॥ अश्वत्थ वृक्षमूलेऽस्मिन्नलक्ष्मीःस्थीयतांक्षणम् ॥ आवासस्थानमालोक्ययावदायाम्यहंपुनः ॥ १९ ॥ सूतउवाच ॥ इतितांतत्रसंस्थाप्यजगामोद्दालकस्तदा ॥

१ 'विष्णुयोगात्' इ० पा० । २ 'वेदघोषनिनादितम्' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतीक्षन्तीचिरंतत्रयदातंनददर्शसा ॥२०॥ तदारुरोदकरुणंभर्तृत्यागेनदुःखिता ॥ तत्रस्थांरुदतींलक्ष्मीर्वैकुण्ठेभुवनेऽश्रृणोत् ॥ २१ ॥ तदाविज्ञापया
मासविष्णुमुद्विग्नमानसा ॥ २२ ॥ लक्ष्मीरुवाच ॥ स्वामिन्मद्भगिनीज्येष्ठाभर्तृत्यागेनदुःखिता ॥ तामाश्वासयितुंयाहिकृपालोयद्यहंप्रिया ॥ २३ ॥
सूतउवाच ॥ लक्ष्म्यासहततोविष्णुस्तत्रागच्छत्कृपान्वितः ॥ आश्वासयदलक्ष्मींतामिदंवचनमब्रवीत् ॥ २४ ॥ श्रीविष्णुरुवाच ॥ अश्व
त्थवृक्षमासाद्यसदाऽलक्ष्मीःस्थिराभव ॥ ममांशसंभवोह्येषआवासस्तेशनिर्विना ॥ २५ ॥ शनौतेभगिनीज्येष्ठेलक्ष्मीरत्रागमिष्यति ॥ तस्मा
दश्वत्थवृक्षोऽसौशनौपूज्योविशेषतः ॥ २६ ॥ प्रत्यहंयेऽर्चयिष्यन्तित्वांज्येष्ठांगृहधर्मिणः ॥ तेष्वियंश्रीःकनिष्ठातेभगिनीनिश्चलास्तुवै ॥
॥ २७ ॥ सूतउवाच ॥ इत्यूर्जस्यचमाहात्म्यंयेशृण्वन्तिपठन्तिच ॥ तेषांविष्णुपुरेवासोभवेदाभूतसंप्लवम् ॥ २८ ॥ रोगापहंपातक
नाशकृत्परंसुबुद्धिदंपुत्रधनादिसाधनम् ॥ मुक्तेर्निदानंनहिकार्त्तिकव्रताद्विष्णुप्रियादन्यदिहास्तिभूतले ॥ २९ ॥ विष्णुप्रियंसकलकल्मषनाशनंचस
त्पुत्रपौत्रधनधान्यसमृद्धिकारि ॥ ऊर्जव्रतंसनियमंकुरुतेमनुष्यःकिंतस्यतीर्थपरिशीलनसेवयाच ॥३०॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०कार्त्ति
कमाहात्म्येश्रीकृष्णसत्यभामासंवादेऽलक्ष्म्युपाख्याननामषोडशाधिकशततमोऽध्यायः ॥ ११६ ॥ सूतउवाच ॥ इतिसर्वंसमाकर्ण्यसत्राजितसुता
तदा ॥ हरेर्वाक्यंमहाभागासत्यावचनमब्रवीत् ॥ १ ॥ सत्योवाच ॥ कार्त्तिकस्यचमाहात्म्यंनश्रुतंविस्तरात्प्रभो ॥ सर्वेषामेवमासानांकार्त्तिक
प्रवरःकथम् ॥ २ ॥ श्रीकृष्णउवाच ॥ साधुपृष्टंत्वयासत्येकार्त्तिकव्रतमादरात् ॥ शौनकायपुराप्रोक्तंसूतेनसुमहात्मना ॥ ३ ॥ सूतउवाच ॥
श्रूयतांतत्प्रवक्ष्यामिएतत्प्रश्नोत्तरंशुभम् ॥ ईश्वरेणपुराप्रोक्तंपृच्छतेषण्मुखायवै॥४॥ कार्त्तिकेयउवाच ॥ बहूनिपद्मनाभस्यरहस्यानिश्रुतानिच ॥ यथा
हिप्रोच्यमानानिवैष्णवेनत्वयाप्रभो ॥ ५ ॥ संसारसागरेघोरेदुःखोरुलहरीवृते ॥ तेषामुत्तारणार्थायकथयस्वप्रयत्नतः ॥६॥ कार्त्तिकस्यविधिश्चैव
स्नानस्यवदतांवर ॥ येनदुःखाम्बुधिंतातसंतरिष्यन्तिमानवाः॥७॥फलंवैष्णवधर्मस्यकथयस्वसुविस्तरम् ॥ येनधर्मप्रभावेणपदंगच्छन्तिवैष्णवम् ॥
॥ ८ ॥ दीपदानस्यमाहात्म्यंमुनिपुष्पस्यसुव्रत ॥ गोपीचन्दनमाहात्म्यंतुलस्यास्तुतथाविभो ॥ ९ ॥ मालतीपुष्पमाहात्म्यंवारिजानांतथावद ॥
धात्रीफलानांमाहात्म्यंतथादमनकस्यच ॥१०॥ केतकीपुष्पमाहात्म्यंनैवेद्यस्यपरन्तप ॥ तीर्थोदकस्यमाहात्म्यंमाघस्नानफलंविभो ॥ ११ ॥ फलंब्रू

१अयंश्लोकः प्रायः पुस्तकेषु न। परन्तु मुद्रितकार्त्तिकमाहात्म्य एकस्मिन्महाराष्ट्रीयपुस्तके च। तदभावे कार्त्तिकस्येति प्रश्नस्तु ऋषीणां साध्वितिवाक्यं सूतस्य। शौनकायेत्यर्धमपि तत्र न।
२'लहरीं च ये' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हिसुरश्रेष्ठब्रह्मपत्रेषुभोजनात् ॥ नीराजनफलंस्थाणोपरदीपप्रबोधनात्॥१२॥पुष्करक्षेत्रमाहात्म्यंशूकरस्यतथाविभो ॥ शालग्रामस्यमाहात्म्यंस्वस्ति
कस्यविधानकम् ॥ १३ ॥ दानानांचफलंब्रूहिपरान्नस्यचवर्जनात् ॥ मासोपवासस्यफलंखट्वायामोक्षणाद्विभो[1] ॥१४॥ दीपावल्याश्चमाहात्म्यंप्रबो
धिन्याश्चसुव्रत ॥ पञ्चभीष्मस्यमाहात्म्यंकथयस्वसुविस्तरात्॥१५॥ईश्वरउवाच ॥ साधुपृष्टंत्वयावत्सलोकोद्धरणहेतवे ॥ कथयामिनसंदेहस्त्वत्समो
नास्तिवैष्णवः॥१६॥सत्पुत्रेणत्वयावत्सतारितोऽहंनसंशयः ॥ निश्चलाकेशवेभक्तिस्त्वयितिष्ठतिसर्वदा॥१७॥नरेभ्योवैष्णवंधर्मंयोददातिद्विजोत्तमः॥
ससागरमहीदानेतत्पुण्यंलभतेहिसः ॥ १८॥ कार्त्तिकस्यचमासस्यकोट्यंशेनापिनार्हति ॥ एकतःसर्वतीर्थानिसर्वदानानिचैकतः ॥१९ ॥ एकतोगो
प्रदानानिसर्वेयज्ञाःसदक्षिणाः ॥ एकतःपुष्करेवासःकुरुक्षेत्रहिमालये ॥२०॥ एकतोमथुरातीर्थेवाराणस्यांचशूकरे ॥ एकतःकार्त्तिकोवत्ससर्वदाकेशव
प्रियः ॥ २१ ॥ सूतउवाच[2] ॥ इत्युक्त्वामुनिशार्दूलपुनर्वाक्यंजगौहरः ॥ कार्त्तिकस्नानमाहात्म्यंकथयिष्येसुविस्तरात् ॥ २२ ॥ ईश्वरउवाच ॥ ब्रा
ह्मंकृतयुगंप्रोक्तंत्रेतातुक्षात्रियंयुगम् ॥ द्वापरंवैश्यमित्याहुःशूद्रंकलियुगंस्मृतम् ॥ २३ ॥ कलौवत्समनुष्याणांशैथिल्यंस्नानकर्मणि ॥ तथापिकथयि
ष्यामिस्नानंकार्त्तिकमाघयोः ॥२४॥ यस्यहस्तौचपादौचवाङ्मनश्चसुसंयतम् ॥ विद्यातपश्चकीर्त्तिश्चसतीर्थफलभाङ्नरः ॥ २५ ॥ अश्रद्दधानः
पापात्मानास्तिकश्छिन्नमानसः ॥ हेतुवादीचपञ्चैतेनतीर्थफलभागिनः ॥ २६ ॥ प्रातरुत्थाययोविप्रस्तीर्थस्नायीसदाभवेत् ॥ सर्वपापविनिर्मुक्तःपरं
ब्रह्माधिगच्छति ॥२७॥ स्नानंचतुर्विधंप्रोक्तंस्नानविद्भिःषडानन ॥ वायव्यंवारुणंदिव्यंब्राह्मंचेतितथास्मृतम् ॥ २८ ॥ वायव्यंगोरजःस्नानंवारुणंसा[3]
गरादिषु ॥ ब्राह्मंब्राह्मणमन्त्रोक्तंदिव्यंमेघाम्बुभास्करम् ॥ २९ ॥ स्नानानांचवसर्वेषांविशिष्टंतत्रवारुणम् ॥ ब्राह्मणःक्षत्रियोवैश्योमन्त्रवत्स्नानमाच
रेत् ॥ ३० ॥ तूष्णीमेवहिशूद्रस्यस्त्रीणांचैवषडानन ॥ बालाचतरुणीवृद्धानरनारीनपुंसकाः ॥ ३१॥ पापैःसर्वैःप्रमुच्यन्तेस्नानात्कार्त्तिकमाघयोः॥
स्नातावैकार्त्तिकेलोकाःप्राप्नुवन्तीप्सितंफलम् ॥ ३२ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०कार्त्तिकमाहात्म्येश्रीशिवषडाननसंवादेसप्तदशाधिक
शततमोऽध्यायः ॥ ११७ ॥ सूतउवाच ॥ पुनःप्रोवाचभगवान्महादेवोवृषध्वजः ॥ श्रोतारमुपसंगम्यभक्तियुक्तंषडाननम् ॥ १ ॥ ईश्वरउवाच ॥
कार्त्तिकोवैष्णवोमासःसर्वमासेषुचोत्तमः ॥ अस्मिन्मासेत्रयस्त्रिंशद्देवाःसंनिहिताःकलौ ॥ २ ॥ ऊर्जेमासिमहाभागभोजनानिद्विजातये ॥

१ 'मोक्षणं विभो' इ० पा० । २ सूत उवाचेत्यारभ्य ईश्वर उवाचेत्यन्तमेकः श्लोक उवाचान्तद्वयं च न केषुचित्पुस्तकेषु । ३ अत्रेदमाधिक्यम् (सत्योवाच । स्नानानां तु चतुर्णां तु लक्षणं वद मे प्रभो॥ येषां विज्ञानमात्रेण स्वस्था स्थास्यामि ते गृहे ॥ कृष्णउवाच॥)इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिलधेनुंहिरण्यंचरजतंभूमिवाससी ॥ ३ ॥ गोप्रदानानिदास्यन्तिसर्वभावेनसुव्रत ॥ सर्वेषामेवदानानांकन्यादानंविशिष्यते ॥ ४ ॥ ब्राह्मणायात्रये
कन्यांदास्यन्तिविधिवन्नराः ॥ वैकुण्ठेवसतिस्तेषांयावदिन्द्राश्चतुर्दश ॥ ५ ॥ रोमकालेतुसंप्राप्तेसोमोभुङ्क्तेतुकन्यकाम् ॥ ऋतुकालेतुगन्धर्वावह्निस्तु
कुचदर्शने ॥६ ॥ तावद्विवाहयेत्कन्यांयावन्नर्तुमतीभवेत् ॥ विवाहस्त्वष्टवर्षायाःकन्यायाःशस्यतेबुधैः ॥ ७ ॥ दातव्याश्रोत्रियायैवब्राह्मणायतपस्वि
ने ॥ साक्षदधीतवेदायविधिनाब्रह्मचारिणे ॥ ८ ॥ कन्यावरप्रदानस्यएषएवविधिःस्मृतः ॥ यावन्तिचैवरोमाणिकन्यायाश्चतनौसुत ॥ ९ ॥
तावद्वर्षसहस्राणिरुद्रलोकेमहीयते ॥ सहस्रमेवधेनूनांशतंचानुडुहांसमम् ॥ १० ॥ दशानुडुत्समंयानंदशयानसमोहयः ॥ हयदानसहस्रेभ्योगजदानं
विशिष्यते ॥ ११ ॥ गजदानसहस्राणांस्वर्णदानंचतत्समम् ॥ स्वर्णभारसहस्राणांविद्यादानंचतत्समम् ॥१२ ॥ विद्यादानात्कोटिगुणंभूमिदानंविशि
ष्यते ॥ भूमिदानसहस्रेभ्योगोप्रदानंविशिष्यते ॥ १३ ॥ गोप्रदानसहस्रेभ्योह्यन्नदानंविशिष्यते ॥ अन्नाधारमिदंसर्वंजगत्स्थावरजङ्गमम् ॥ १४ ॥
तस्माद्देयंप्रयत्नेनकार्त्तिकेशिखिवाहन ॥ त्रीणितुल्यप्रदानानित्रीणितुल्यफलानिच ॥ सर्वकामदुघाधेनुःपृथ्वीचैवसरस्वती ॥१५॥ कार्त्तिकेयउवाच॥
अन्यानपिमहादेवधर्मान्मेवक्तुमर्हसि ॥ यान्कृत्वासर्वपापानिप्रक्षाल्यत्रिदशोभवेत् ॥१६॥ सूतउवाच॥ इतिपृष्टस्तदाशंभुःपुनर्वक्तुंप्रचक्रमे ॥ पावकिं
बहुधास्तुत्वातच्छृणुध्वंतपोधनाः ॥ १७ ॥ ईश्वरउवाच ॥ परान्नंवर्जयेद्यस्तुकार्त्तिकेनियमेकृते ॥ परान्नवर्जनादेवलभेच्चान्द्रायणंफलम् ॥
॥ १८ ॥ तंप्राप्तंकार्त्तिकंदृष्ट्वापरान्नंयस्तुवर्जयेत् ॥ दिनेदिनेतुकृच्छ्रस्यफलंप्राप्नोतिमानवः ॥ १९ ॥ कार्तिकेवर्जयेत्तैलंकार्त्तिकेवर्जयेन्मधु ॥
कार्तिकेवर्जयेत्कांस्यंसङ्घान्नंचविशेषतः ॥२०॥ राक्षसींयोनिमाप्नोतिसकृन्मांसस्यभक्षणात् ॥ षष्टिवर्षसहस्राणिविष्ठायांपरिपच्यते ॥२१॥ तन्मुक्तो
जायतेपापोविष्ठाशीग्रामसूकरः ॥ प्रवृत्तानांतुभक्षाणांकार्तिकेनियमेकृते ॥ २२ ॥ अवश्यंविष्णुरूपत्वंप्राप्यतेमोक्षदंपदम् ॥ नकार्तिकसमो
मासोनदैवंकेशवात्परम् ॥२३॥ नवेदसदृशंशास्त्रंनतीर्थंगङ्गयासमम् ॥ नसत्येनसमंवृत्तंनकृतेनसमंयुगम् ॥२४॥ नतृप्तीरसनातुल्यानदानसदृशंसुखम् ॥
नधर्मसदृशंमित्रंनज्योतिश्चक्षुषासमम् ॥ २५ ॥ अव्रतेनक्षिपेद्यस्तुमासंदामोदरप्रियम् ॥ कर्मभ्रष्टःसविज्ञेयोहीनयोनिषुजायते ॥ २६ ॥
कार्तिकःप्रवरोमासोवैष्णवानांसदाप्रियः ॥ समुद्रगानदीपुण्यादुर्लभास्नानशालिना ॥२७॥ कुलशीलवतीकन्यादुर्लभादम्पतीनृणाम् ॥ दुर्लभाजननी
लोकेपिताचैवविशेषतः ॥ २८ ॥ दुर्लभंसाधुसम्मानंदुर्लभोधार्मिकःसुतः ॥ दुर्लभोद्वारिकावासोदुर्लभंकृष्णदर्शनम् ॥ २९ ॥ दुर्लभंगोमतीस्नानं
दुर्लभंकार्तिकव्रतम् ॥ ब्राह्मणेभ्योमहींदत्त्वाग्रहणेचन्द्रसूर्ययोः ॥ ३० ॥ यत्फलंलभतेवत्सतत्फलंभूमिशायिनः ॥ भोजनंद्विजदम्पत्योःपूजये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चविलेपनैः ॥३१॥ कम्बलानिचरत्नानिवासांसिविविधानिच ॥ तूलकाश्चप्रदातव्याःप्रच्छादनपटैःसह ॥३२॥ उपानद्वावातपत्रंकार्त्तिकेदेहिपावके॥
यःकरोतिनरोनित्यंकार्त्तिकेपत्रभोजनम् ॥ ३३ ॥ नदुर्गतिमवाप्नोतियावदिन्द्राश्चतुर्दश ॥ सर्वकामफलंतस्यसर्वतीर्थफलंलभेत् ॥ ३४ ॥ नचापि
नरकंपश्येद्ब्रह्मपत्रेषुभोजनात्॥ब्रह्माएषस्मृतःसाक्षात्पालाशःसर्वकामदः ॥३५॥मध्यमंवर्जयेत्पत्रंकार्तिकेशिखिवाहन॥ब्रह्माविष्णुश्चरुद्रश्चत्रयोदेवास्त्रि
पत्रके ॥ ३६ ॥ ऐश्वरंवर्जयेत्पत्रंब्रह्मविष्ण्वोरनुत्तमम् ॥ सर्वपुण्यमवाप्नोतिशेषपत्रेषुभोजनात् ॥ ३७ ॥ भोजनान्मध्यपत्रेतुकपिलापयसस्तथा ॥
प्राशनान्मुनिशार्दूलनरोनरकमाप्नुयात् ॥ ३८ ॥ अज्ञानाद्भुजेयस्तुशूद्रोवाकपिलापयः ॥ कपिलांब्राह्मणेदत्त्वाशुद्धोभवतिकार्त्तिक ॥ ३९ ॥
तिलदानंनदीस्नानंसर्वदासाधुदर्शनम् ॥ भोजनंब्रह्मपत्रेषुकार्त्तिकेमुक्तिदायकम् ॥ ४० ॥ मौनीपालाशभोजीचजलस्नायीसदाक्षमी ॥ कार्त्तिकेक्षिति
शायीचहन्यात्पापंयुगार्जितम् ॥४१॥ जागरंकार्तिकेमासियःकरोत्यरुणोदये ॥ दामोदराग्रेसेनानीर्गोसहस्रफलंलभेत् ॥४२॥पितृपक्षेऽन्नदानेनज्येष्ठा
षाढेचवारिणा ॥ कार्त्तिकेतत्फलंपुंसांपरदीपप्रबोधनात् ॥४३॥ बोधनात्परदीपस्यवैष्णवानांचसेवनात् ॥ कार्त्तिकेफलमाप्नोतिराजसूयाश्वमेधयोः
॥ ४४ ॥ नदीस्नानंकथाविष्णोर्वैष्णवानांचदर्शनम् ॥ नभवेत्कार्त्तिकेयस्यहरेत्पुण्यंदशाब्दिकम् ॥ ४५ ॥ पुष्करंयःस्मरेत्प्राज्ञःकर्मणामनसा
गिरा ॥ कार्त्तिकेमुनिशार्दूललक्षकोटिगुणंभवेत् ॥४६॥ प्रयागोमाघमासेतुपुष्करंकार्तिकेतथा ॥ अवन्तीमाधवेमासिहन्यात्पापंयुगार्जितम् ॥४७ ॥
धन्यास्तेमानवालोकेकलिकालेविशेषतः ॥ कुर्वन्तिस्कन्दनित्यंयेसर्वथाहरिसेवनम् ॥ ४८ ॥ किंदत्तैर्बहुभिःपिण्डैर्गयाश्राद्धादिभिःसुत ॥
तारितास्तेनपितरोनरकाच्चनसंशयः ॥ ४९ ॥ क्षीरादिस्नपनंविष्णोःक्रियतेपितृकारणात् ॥ कल्पकोटिंदिवंप्राप्यवसन्तित्रिदशःसह ॥ ५० ॥
कार्त्तिकेनार्चितोयैस्तुकृष्णस्तुकमलेक्षणः ॥ जन्मकोटिषुविप्रेन्द्रनतेषांकमलागृहे ॥ ५१ ॥ दृष्टांमुष्टाविनष्टास्तेपतिताःकलिकन्दरे ॥ यैर्नार्चितोहरि
र्भक्त्याकमलैरसितैःसितैः॥ ॥ ५२ ॥ पद्मेनैकेनदेवेशंयोऽर्चयेत्कमलापतिम् ॥ वर्षायुतसहस्रस्यपापस्यकुरुतेक्षयम् ॥ ५३ ॥ अपराधसहस्राणि
तथासप्तशतानिच ॥ पद्मेनैकेनदेवेशःक्षमेतप्रणतोर्चितः ॥ ५४ ॥ तुलसीपत्रलक्षेणकार्तिकेयोऽर्चयेद्धरिम् ॥ पत्रेपत्रेमुनिश्रेष्ठमौक्तिकंलभतेफलम् ॥
॥ ५५ ॥ तुससीगन्धमिश्रंतुयत्किंचित्क्रियतेसुत ॥ कल्पकोटिसहस्राणिप्रीतोभवतिकेशवः ॥ ५६ ॥ मुखेशिरसिदेहेतुकृष्णोत्तीर्णांतुयो
वहेत् ॥ तुलसींषण्मुखप्रीत्यानतस्यस्पृशतेकलिः ॥५७॥ कृष्णोत्तीर्णैस्तुनिर्माल्यैर्योगात्रंपरिमार्जयेत् ॥ सर्वरोगैस्तथापापैर्मुक्तोभवतिषण्मुख॥५८॥

१'अहो मुष्टा विनष्टास्ते' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विष्णोरङ्गारशेषेणयस्याङ्गंस्पृशतेसुत ॥ दुरितानिविनश्यन्तिव्याधयोयान्तिसंक्षयम् ॥ ५९ ॥ शङ्खोदकंहरेर्भक्तिर्निर्माल्यंपादयोर्जलम् ॥
चन्दनंधूपशेषंतुब्रह्महत्यापहारकम् ॥ ६० ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०कार्त्तिकमाहात्म्येश्रीशिवकार्तिकेयसंवादेप्रश्नोत्तरोनामाष्टा
दशाधिकशततमोऽध्यायः ॥ ११८ ॥ ईश्वरउवाच ॥ माघस्नानस्यमाहात्म्यंशृणुभागवतोत्तम ॥ त्वत्समोनास्तिलोकेऽस्मिन्विष्णुभक्तोमहा
मते ॥ १ ॥ चक्रतीर्थेहरिंदृष्ट्वामथुरायांचकेशवम् ॥ यत्फलंलभतेमर्त्योमाघस्नानेनतत्फलम् ॥ २ ॥ जितेन्द्रियःशान्तमनाःसदाचारेण
संयुतः ॥ स्नानंकरोतियोमाघेसंसारीनभवेत्पुनः ॥ ३ ॥ श्रीकृष्णउवाच ॥ शूकरस्यचमाहात्म्यंकथयिष्येतवाग्रतः ॥ यस्यविज्ञानमात्रेण
सान्निध्यंममसर्वदा ॥ ४ ॥ सूतउवाच ॥ इत्युक्त्वाभगवान्कृष्णःसत्यायैबहुधाजगौ ॥ तदहंसंप्रवक्ष्यामितच्छृणुध्वंतपोधनाः ॥ ५ ॥
श्रीकृष्णउवाच ॥ पञ्चयोजनविस्तीर्णेशूकरेहरिमन्दिरे ॥ यस्मिन्वसतियोजीवोगर्दभोऽपिचतुर्भुजः ॥ ६ ॥ त्रीणिहस्तसहस्राणि
त्रीणिहस्तशतानिच ॥ त्रयोहस्ताःशूकरस्यपरिमाणंविधीयते ॥ ७ ॥ षष्टिवर्षसहस्राणियोऽन्यत्रकुरुतेतपः ॥ तत्फलंलभतेदेविप्रहरार्धेनशूकरे ॥
॥ ८ ॥ सन्निहत्यांकुरुक्षेत्रेराहुग्रस्तेदिवाकरे ॥ तुलापुरुषदानेनतत्फलंपरिकीर्तितम् ॥ ९ ॥ काश्यांदशगुणंप्रोक्तंवेण्यांशतगुणंभवेत् ॥ सहस्र
गुणितंप्रोक्तंगङ्गासागरसंगमे ॥ १० ॥ अनन्तंचवविज्ञेयंशूकरेहरिमन्दिरे ॥ अन्यत्रददतेलक्षंसंविधानेनभामिनि ॥ ११ ॥ इहैवैकेनदत्तेन
शूकरेतत्समंभवेत् ॥ शूकरेचतथावेण्यांगङ्गासागरसंगमे ॥ १२ ॥ सकृदेवनरःस्नात्वाब्रह्महत्यांव्यपोहति ॥ अलर्केणपुराप्राप्तासप्तद्वीपावसुन्धरा ॥
शूकरक्षेत्रमाहात्म्यंश्रुत्वाचगजगामिनि॥१३॥कार्त्तिकेयउवाच ॥ भगवञ्श्रोतुमिच्छामिव्रतानामुत्तमंव्रतम् ॥ विधिंमासोपवासस्यफलंचास्ययथो
चितम् ॥ १४ ॥ यथाविधिनरैःकार्याव्रतचर्यायथाभवेत् ॥ आरभ्यतेयथापूर्वंसमाप्यंहियथाविधि ॥ १५ ॥ यावत्सङ्ख्यंतुकर्त्तव्यंतत्प्र
ब्रूहिमहेश्वर ॥ व्रतमेतत्सुखश्रीदंविस्तरेणममानघ ॥ १६ ॥ श्रीरुद्रउवाच ॥ पावकेसाधुसर्वंतेयत्पृष्टंप्रब्रुवेऽनघ ॥ भक्त्यामतिमतांश्रेष्ठशृणुष्वगदतो
मम ॥ १७ ॥ सुराणांचयथाविष्णुस्तपतांचयथारविः ॥ मेरुःशिखरिणांयद्वद्वैनतेयश्चपक्षिणाम् ॥ १८ ॥ तीर्थानांतुयथागङ्गाप्रजानांतु
यथावणिक् ॥ श्रेष्ठंसर्वव्रतानांतुतद्वन्मासोपवासनम् ॥ १९ ॥ सर्वव्रतेषुयत्पुण्यंसवतीर्थेषुचैवहि ॥ सर्वादानोद्भवंचैवलभेन्मासोपवासकृत
॥ २० ॥ अग्निष्टोमादिभिर्यज्ञैर्विविधैर्भूरिदक्षिणैः ॥ नतत्पुण्यमवाप्नोतियन्मासपरिलङ्घनात् ॥ २१ ॥ तेनजप्तंहुतंदत्तंतपस्तप्तंकृतं
स्वधा ॥ यःकरोतिविधानेननरोमासमुपोषणम् ॥ २२ ॥ उद्दिश्यवैष्णवंयज्ञंसमभ्यर्च्यजनार्दनम् ॥ गुरोराज्ञांततोलब्ध्वाकुर्यान्मासोपवास

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नम् ॥ २३ ॥ वैष्णवानियथोक्तानिकृत्वासर्वव्रतानितु ॥ द्वादश्यादीनिपुण्यानिततोमासमुपावसेत् ॥ २४ ॥ अतिकृच्छ्रंचपाराकंकृत्वाचान्द्रा
यणंततः ॥ मासोपवासंकुर्वीतगुरोर्विप्राज्ञयाततः ॥ २५ ॥ आश्विनस्यामलेपक्षएकादश्यामुपोषितः ॥ व्रतमेतत्तुगृह्णीयाद्यावत्त्रिंशद्दिनानितु ॥२६॥
वासुदेवंसमभ्यर्च्यकार्तिकंसकलंनरः ॥ मासंचोपवसेद्यस्तुसमुक्तिफलभाग्भवेत् ॥ २७ ॥ अच्युतस्यालयेभक्त्यात्रिकालंकुसुमैःशुभैः ॥ मालती
न्दीवरैर्बुध्नैः¹कमलैश्चसुगन्धिभिः ॥ २८ ॥ कुसुमोशीरकर्पूरैर्विलिप्यवरचन्दनैः ॥ नैवेद्यापूपदीपाद्यैरर्चयेच्चजनार्दनम् ॥ २९ ॥ मनसा
कर्मणावाचापूजयेद्गरुडध्वजम् ॥ कुर्वन्नरःस्त्रीविधवावृहद्भक्तिर्जितेन्द्रियः ॥ ३० ॥ नाम्नामेवतथालापंविष्णोःकुर्यादहर्निशम् ॥ भक्त्या
विष्णोःस्तुतिर्वाच्यामिथ्यालापविवर्जिता ॥ ३१ ॥ सर्वसत्त्वदयायुक्तःशान्तवृत्तिरहिंसकः ॥ सुप्तोबाह्यासनस्थोवावासुदेवंप्रकीर्तयेत् ॥ ३२ ॥
स्मृत्यालोकनगन्धादिस्वादनंपरिकीर्त्तनम् ॥ अन्नस्यवर्जयेद्ग्रासंग्रासानांसंप्रमोक्षणम् ॥ ३३ ॥ गात्राभ्यङ्गंशिरोऽभ्यङ्गंताम्बूलंचविलेपनम् ॥
व्रतस्थोवर्जयेत्सर्वंयच्चान्यच्चनिराकृतम् ॥ ३४ ॥ नव्रतस्थःस्पृशेत्किंचिद्विकर्मस्थंनचालपेत् ॥ देवतायतनेतिष्ठन्नगृहस्थश्चरेद्व्रतम् ॥ ३५ ॥
कृत्वामासोपवासंतुयथोक्तविधिनानरः ॥ नारीवाविधवासाध्वीवासुदेवंसमर्चयेत् ॥ ३६ ॥ अन्यूनाधिकमेवंतुव्रतंत्रिंशद्दिनैरिदम् ॥ कृत्वा
मासोपवासंतुसंयतात्माजितेन्द्रियः ॥ ३७ ॥ ततोऽर्चयेदेवपुण्यंद्वादश्यांगरुडध्वजम् ॥ पूजयेत्पुष्पमालाभिर्गन्धधूपविलेपनैः ॥ ३८ ॥
वस्त्रालङ्कारवाद्यैश्चतोषयेदच्युतंनरः ॥ संस्नापयेद्धरिंभक्त्यातीर्थचन्दनवारिभिः ॥ ३९ ॥ चन्दनेनानुलिप्ताङ्गंगन्धपुष्पैरलंकृतम् ॥ वस्त्र
दानादिभिश्चैवभोजयित्वाद्विजोत्तमान् ॥ ४० ॥ दद्याच्चदक्षिणांतेभ्यःप्रणिपत्यक्षमापयेत् ॥ एवंमासोपवासाद्धिकृत्वाऽभ्यर्च्यजनार्दनम् ॥ ४१ ॥
भोजयित्वाद्विजांश्चैवविष्णुलोकेमहीयते ॥ एवंमासोपवासान्तेकृत्वाविप्रांस्त्रयोदश ॥ ४२ ॥ निर्यापयेत्ततस्तान्वैविधिनायेनतच्छृणु ॥ कार
येद्वैष्णवंयज्ञमेकादश्यामुपोषितः ॥ ४३ ॥ पूजयित्वातुदेवेशमाचार्यानुज्ञयाहरिम् ॥ अर्चयित्वायथाशक्त्याह्यभिवाद्यगुरुंतथा ॥ ४४ ॥
ततोऽनुभोजयेद्विप्रान्नमस्कारपुरःसरम ॥ विशुद्धकुलचारित्रान्विष्णुपूजनतत्परान्॥४५॥पूजयित्वातथासर्वान्भोजयित्वात्रयोदश॥ताम्बूलवस्त्रयुग्मा
निभोजनाच्छादनानिच॥४६॥योगपट्टानिसूत्राणिब्रह्मसूत्राणिचैवहि॥दद्याच्चैवद्विजाग्र्येभ्यःपूजयित्वाप्रणम्यच॥४७॥ततोऽनुपूजयेच्छक्त्याशय्यांस्त
रणसंस्कृताम्॥साच्छादनांशुभांश्रेष्ठांसोपधानामलङ्कृताम् ॥४८॥ कारयित्वात्मनोमूर्तिंकाञ्चनींतुस्वशक्तितः ॥ न्यस्येत्तस्यांतुशय्यायामर्चयित्वा

१ 'व्रध्नैः' इति पाठे स एवार्थः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्रगादिभिः ॥४९॥ आसनंपादुकांछत्रंवस्त्रयुग्ममुपानहौ॥ पवित्राणिचपुष्पाणिशय्यायामुपकल्पयेत् ॥५० ॥एवंशय्यांतुसंकल्प्यप्रणिपत्यचतान्द्वि
जान् ॥ प्रार्थयेच्चानुमोदार्थंविष्णुलोकंव्रजाम्यहम् ॥ ५१ ॥ ततोव्रजेन्नरश्रेष्ठोविष्णोःस्थानमनामयम् ॥ मण्डपस्थांस्तुतान्विप्रानितिवाच्यंमुहुर्मु
हुः ॥ ५२ ॥ मन्त्रहीनंक्रियाहीनंसर्वहीनंद्विजोत्तमाः ॥ सर्वंसंपूर्णतांयातुभवद्वाक्यप्रसादतः ॥ विधिर्मासोपवासस्ययथावत्परिकीर्त्तितः ॥ ५३ ॥
इतिश्रीपाद्मेमहापुराणेपञ्चप० उत्तर० कार्त्तिकमाहात्म्येश्रीकृष्णसत्यभामासंवादेमासोपवासकथनंनामैकोनविंशत्यधिकशततमोऽध्यायः ॥ ११९ ॥
सूतउवाच ॥ इतिवाक्यंसमाकर्ण्यपुनःपप्रच्छपावकिः ॥ शालग्रामार्चनंभूयस्तच्छृणुध्वंतपोधनाः ॥१ ॥ कार्त्तिकेयउवाच ॥ भगवन्योगिनांश्रेष्ठसर्वे
धर्माःश्रुतामया॥ शालग्रामार्चनंब्रूहिविस्तरेणममप्रभो॥२॥ईश्वरउवाच ॥साधुसाधुमहाप्राज्ञयन्मांहिपरिपृच्छसि॥ तदहंसंप्रवक्ष्यामिश्रूयतांममवत्सल
॥ ३ ॥ शालग्रामशिलायांतुत्रैलोक्यंसचराचरम् ॥ महाशयमहासेननित्यंतिष्ठतिसंहितम् ॥ ४ ॥ दृष्टंप्रणमितंयेनस्नापितंपूजितंतथा ॥
यज्ञकोटिगुणंपुण्यंगवांकोटिफलंलभेत् ॥५॥ छिन्नस्तेनतथावत्सगर्भवासःसुदारुणः ॥ पीतंयेनसदाविष्णोःशालग्रामशिलाजलम् ॥६ ॥ कामासक्तो
ऽपियोनित्यंभक्तिभावविवर्जितः ॥ शालग्रामशिलांपुत्रपूजयित्वाच्युतोभवेत् ॥ ७ ॥ शालग्रामशिलाबिम्बंहत्वाकोटिविनाशनम् ॥ स्मृतं
संकीर्तितंध्यातंपूजितंचनमस्कृतम् ॥ ८ ॥ शालग्रामशिलांदृष्ट्वायान्तिपापान्यनेकशः ॥ सिंहंदृष्ट्वायथायान्तिवनेमृगगणाभयात् ॥ ९ ॥ नमस्कारं
तुमनुजःशालग्रामशिलार्चने ॥ भक्त्यावायदिवाऽभक्त्याकृत्वामुक्तिमवाप्नुयात् ॥१०॥ वैवस्वतभयंनास्तितथामरणजन्मनोः ॥यःकरोतिनरोनित्यं
शालग्रामशिलार्चनम् ॥ ११ ॥ गन्धपाद्यार्थनैवेद्यैर्दीपैर्धूपैर्विलेपनैः ॥ गीतैर्वाद्यैस्तथास्तोत्रैःशालग्रामशिलार्चनम् ॥१२ ॥ कुरुतेमानवोयस्तुकलौ
भक्तिपरायणः ॥ कल्पकोटिसहस्राणिरमतेविष्णुसद्मनि ॥ १३ ॥ शालग्रामनमस्कारोभावेनापिनरैःकृतः ॥ मानुषत्वंकथंतेषांमद्भक्तायेनराभुवि॥
॥ १४॥ मद्भक्तास्तीव्रपापिष्ठामत्प्रभुंननमन्तिये ॥ वासुदेवंनतेज्ञेयामद्भक्ताःपापमोहिताः ॥१५ ॥ मद्भक्तोऽपिचयोभूत्वाभुङ्क्तेत्वेकादशीदिने ॥ सयाति
ह्यन्धतामिस्रंनिरयंममघातकः ॥ १६ ॥ मच्छिङ्गस्पर्शनंकार्यंनान्याशुद्धिर्विधीयते ॥ यातिथिर्दयिताविष्णोःसातिथिर्ममवल्लभा ॥ १७ ॥ यस्तांनो
पवसेन्मर्त्यःसपापीश्वपचाधिकः ॥ शालग्रामशिलायांतुसदापुत्रवसाम्यहम् ॥१८॥ दत्तंदेवेनतुष्टेनस्वस्थानंममभक्तितः ॥ पद्मकोटिसहस्रैस्तुपूजिते
मयियत्फलम्॥१९॥तत्फलंकोटिगुणितंशालग्रामशिलार्चनात् ॥पूजितोऽहंनतैर्मर्त्यैर्नमितोऽहंनतैर्नरैः॥२०॥नकृतंमर्त्यलोकेयैःशालग्रामशिलार्चनम्॥
शालग्रामशिलाग्रेतुयःकरोतिममार्चनम् ॥ २१ ॥ तेनार्चितोऽहंसेनानीर्युगानामेकविंशतिम् ॥ किमर्चितैर्लिङ्गशतैर्विष्णुभक्तिविवर्जितैः ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शालग्रामशिलाबिम्बंनार्चितंयदिपुत्रक ॥ अनर्हंममनैवेद्यंपत्रंपुष्पंफलंजलम् ॥ २३ ॥ शालग्रामशिलाग्रेतुसर्वंयातिपवित्रताम् ॥ भुक्त्वान्यदेव
नैवेद्यंद्विजश्चान्द्रायणंचरेत् ॥ २४ ॥ भुक्त्वाकेशवनैवेद्यंयज्ञकोटिफलंलभेत् ॥ पादोदकेनदेवस्यहत्याकोटिसमन्विताः ॥ २५ ॥ शुध्यन्ति
नात्रसंदेहस्तथाशङ्खोदकेनहि ॥ योहिमाहेश्वरोभूत्वावैष्णवंचनपूजयेत् ॥ २६ ॥ द्वेष्टाचयातिनरकंयावदिन्द्राश्चतुर्दश ॥ ज्येष्ठाश्रमीगृहेयस्य
मुहूर्त्तमपिविश्रमेत् ॥ २७ ॥ पितामहायुगान्यष्टौभवन्त्यमृतभोजिनः ॥ संसारेदुःखकान्तारेनिमज्जन्तिनराधमाः ॥ २८ ॥ वर्षकोटिसहस्रा
णिकृष्णाराधनवर्जिताः ॥ [1]स्नेहादभ्यर्चितैर्लिङ्गैःशालग्रामसमुद्भवैः ॥ २९ ॥ मुक्तिंप्रयान्तिमनुजायोगसाङ्ख्येनवर्जिताः ॥ मल्लिङ्गकोटिभिर्दृष्टै
र्यत्फलंपूजितैस्तुतैः ॥ ३० ॥ शालग्रामशिलायांतुएकस्यामिहतद्भवेत् ॥ द्वादशैवशिलायोवैशालग्रामसमुद्भवाः ॥ ३१ ॥ अर्चयेद्वैष्णवोनि
त्यंतस्यपुण्यंनिबोधमे ॥ कोटिलिङ्गसहस्रैस्तुपूजितैर्जाह्नवीतटे ॥ ३२ ॥ काशीवासेयुगान्यष्टौदिनेनैकेनतद्भवेत् ॥ किंपुनर्बहुनायस्तुपूजयेद्वैष्ण
वोनरः ॥ ३३ ॥ नाहंब्रह्मादयोदेवाःसङ्ख्यांकर्तुंसमीशते ॥ तस्माद्भक्त्याचमद्भक्तैःप्रीत्यर्थंममपुत्रक ॥ ३४ ॥ कर्त्तव्यंममतद्भक्त्याशालग्रामशिला
र्चनम् ॥ शालग्रामशिलारूपीयत्रतिष्ठतिकेशवः ॥ ३५ ॥ तत्रदेवासुरायक्षाभुवनानिचतुर्दश ॥ सुराणांकीर्तनैःसर्वैःकोटिभिश्चफलंलभेत् ॥
॥ ३६ ॥ तत्फलंकीर्त्तनादेवकेशवेसुकृतंकलौ ॥ शालग्रामशिलाग्रेतुसकृत्पिण्डेनतर्पिताः ॥ ३७ ॥ वसन्तिपितरस्तस्यनसङ्ख्यातत्रविद्यते ॥
येपिबन्तिनराभक्त्याशालग्रामशिलाजलम् ॥ ३८ ॥ पञ्चगव्यसहस्रैस्तुप्राशितैःकिंप्रयोजनम् ॥ प्रायश्चित्तेसमुत्पन्नेकिंदानैःकिमुपोषणैः ॥ ३९ ॥
चान्द्रायणैःसुचीर्णैश्चपीत्वापादोदकंहरेः ॥ यःकरोतितडागेतुप्रतिमांजलशायिनीम् ॥ ४० ॥ कोटिभिश्चापिकिंकार्यमन्यदेवैश्चपूजितैः ॥ विष्णु
मुख्यास्तुवैदेवास्तत्रजल्पन्तिवैगुह ॥४१॥ प्रमाणमस्तिसर्वस्यसुकृतस्यहिपुत्रक ॥ फलप्रमाणंनैवास्तिशालग्रामशिलार्चने ॥ ४२ ॥ योददातिशि
लांविष्णोःशालग्रामसमुद्भवाम् ॥ विप्रायविष्णुभक्तायतेनेष्टंक्रतुभिःशतैः ॥४३॥ गृहेऽपिवसतस्तस्यगङ्गास्नानंदिनेदिने ॥ सस्नातःसर्वतीर्थेषुसर्वयज्ञे
षुदीक्षितः ॥ ४४ ॥ शालग्रामशिलातोयैरभिषेकंयआचरेत् ॥ स्वर्गेमर्त्येचपातालेपाषाणाःसन्तिवैगुह ॥ ४५ ॥ शालग्रामशिलाग्राव्णानास्तिना
स्तिसमापुनः ॥ मानुषेदुर्लभेलोकेसफलंतस्यजीवितम् ॥४६॥ तिलप्रस्थशतंभक्त्यायोददातिदिनेदिने ॥ तत्फलंसमवाप्नोतिशालग्रामशिलार्चनात ॥
॥ ४७ ॥ पत्रंपुष्पंफलंतोयंमूलंदूर्वादलंतथा ॥ जायतेमेरुणातुल्यंशालग्रामेसमर्पितम् ॥ ४८ ॥ विधिहीनोऽपियःकश्चित्क्रियामन्त्रविवर्जितः ॥

१'सकृदभ्यर्चितैर्लिङ्गैः' इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चक्राङ्कभुजआप्नोतिसम्यक्छास्त्रोदितंफलम् ॥४९ ॥ यत्तुपूर्वंमयादृष्टंकेशवेक्लेशनाशनम् ॥ तत्सर्वंकथयिष्यामितवस्नेहेनपुत्रक ॥ ५० ॥ क्वत्वंवस
सिहेविष्णोकिमाधारःकिमाश्रयः ॥ कथंवाप्रीयसेदेवतत्सर्वंकथयस्वमे ॥ ५१ ॥ श्रीकृष्णउवाच ॥ निवसामिसदाशम्भोशालग्रामोद्भवेऽश्मनि ॥
तत्रैवरथचक्राङ्क्यानिनामानिमेशृणु ॥ ५२ ॥ द्वारदेशेसमेचक्रेदृश्येतेनान्तरंयदि ॥ वासुदेवःसविज्ञेयःशुक्लश्चैवातिशोभनः ॥ ५३ ॥ प्रद्युम्नःसूर्यवक्र
स्तुनीलदीप्तिस्तथैवच ॥ सुषिरंछिद्रबहुलंदीर्घाकारंतुतद्भवेत् ॥ ५४ ॥ अनिरुद्धस्तुपीताभोवर्त्तुलश्चातिशोभनः ॥ रेखात्रयाङ्कितोद्वारि[१]पृष्ठेपद्मेन
चिह्नवत् ॥५५॥ श्यामोनारायणोदेवोनाभिचक्रेतथोन्नते ॥ दीर्घरेखासमोपेतोदक्षिणेसुषिरान्वितः ॥५६॥ ऊर्ध्वमुखंचजानीयात्सुन्दरंहरिरूपिणम् ॥
कामदंमोक्षदंचैवअर्थदंचविशेषतः ॥५७॥ परमेष्ठीचशुक्लाभःपद्मचक्रसमन्वितः ॥ बिम्बाकृतिस्तथापृष्ठेसुषिरंचातिपुष्कलम् ॥५८॥ कृष्णवर्णस्तथा
विष्णुर्मूलेचक्रेसुशोभने ॥ द्वारोपरितथारेखालक्ष्यतेमध्यदेशतः ॥ ५९॥ कपिलोनरसिंहश्चपृथुचक्रःसुशोभितः ॥ ब्रह्मचर्येणपूज्योऽसावन्यथाविघ्नदो
भवेत् ॥६०॥ वाराहःशक्तिलिङ्गस्तुचक्रेचविषमेस्मृते ॥ इन्द्रनीलनिभःस्थूलस्त्रिरेखोनाभितःशुभः ॥६१॥ दीर्घाकाञ्चनवर्णायाबिन्दुत्रयविभूषिता ॥
मत्स्याख्यासाशिलाज्ञेयाभुक्तिमुक्तिफलप्रदा ॥६२॥ कूर्मस्तथोन्नतःपृष्ठेवर्तुलश्चक्रपूरितः ॥ हरितंवर्णमाधत्तेकौस्तुभेनतुचिह्नितः ॥६३॥हयग्रीवोहया
कारोरेखापञ्चकभूषितः ॥ बहुबिन्दुसमाकीर्णःपृष्ठेनीलंचरूपकम् ॥ ६४ ॥ वैकुण्ठमविभिन्नाङ्गंचक्रमेकंतथाध्वजम् ॥ द्वारोपरितथारेखागुञ्जाकारासु
शोभना ॥ ६५ ॥ श्रीधरस्तुतथादेवश्चिह्नितोवनमालया ॥ कदम्बकुसुमाकारोरेखापञ्चकभूषितः ॥ ६६ ॥ वर्तुलश्चापिह्रस्वश्चवामनःपरिकीर्तितः ॥
अतसीकुसुमप्रख्योबिन्दुनापरिशोभितः ॥ ६७ ॥ सुदर्शनस्ततोदेवःश्यामवर्णोमहाद्युतिः ॥ वामपार्श्वेगदाचक्रेरेखाचैवतुदक्षिणे ॥ ६८ ॥ दामो
दरस्तथास्थूलोमध्येचक्रंप्रतिष्ठितम् ॥ दूर्वाभंद्वारसंकीर्णंपीतरेखंतथैवच ॥ ६९ ॥ नानावर्णोह्यनन्तस्तुनानाभोगेनचिह्नितः ॥ अनेक[२]मूर्तिकोभिन्नः
सर्वकामफलप्रदः ॥ ७० ॥ विदिक्षुदिक्षुसर्वासुयस्योर्ध्वंदृश्यतेमुखम् ॥ पुरुषोत्तमःसविज्ञेयोभुक्तिमुक्तिफलप्रदः ॥ ७१ ॥ दृश्यतेशिखरेलिङ्गंशाल
ग्रामशिलोद्भवम् ॥ यस्ययोगेश्वरोदेवोब्रह्महत्यांव्यपोहति ॥ ७२ ॥ आरक्तःपद्मनाभस्तुपङ्कजंवक्त्रसंयुतम् ॥ तस्याभ्यर्चनतोनित्यंद्दरिद्रस्त्वीश्वरो
भवेत् ॥ ७३ ॥ चक्राङ्कितंहिरण्याङ्गंरश्मिजालंविनिर्दिशेत् ॥ सुवर्णरेखाबहुलंस्फटिकद्युतिशोभितम् ॥ ७४ ॥ अतिस्निग्धासिद्धिकरीकृष्णा
कीर्तिंददातिच ॥ पाण्डुरापापदहनीपीतापुत्रफलप्रदा॥७५॥नीलाप्रयच्छतीलक्ष्मींरक्तारोगप्रदायिनी ॥ रूक्षाउद्वेगजननीवक्रादारिद्र्यभागिनी॥७६॥

१ 'चिन्हितः' इ० पा० । २'मूर्तिसन्निभः' इ०पा० ।

CC-0. In Public Domain. Digitization by eGangotri

एकंसुदर्शनंज्ञेयंलक्ष्मीनारायणंद्वयम् ॥ तृतीयंचाच्युतंविद्याच्चतुर्थंतुजनार्दनम् ॥ ७७ ॥ पञ्चमंवासुदेवंचषष्ठंप्रद्युम्नमेवच ॥ सङ्कर्षणंसप्तमंचअष्टमंपुरु
षोत्तमम्॥७८॥नवमंचनवव्यूहंदशमंतुतदात्मकम् ॥ एकादशंचानिरुद्धंद्वादशंद्वादशात्मकम्॥७९॥अतऊर्ध्वंतुचक्राणिदृश्यन्तेऽनन्तसंज्ञके॥खण्डिते
त्रुटितेभग्नेशालग्रामेनदोषभाक् ॥ ८० ॥ इष्टाचयस्ययामूर्तिःसतांयत्नेनपूजयेत् ॥ स्कन्धेकृत्वातुयोऽध्वानंवहतेशैलनायकम् ॥ ८१ ॥ तस्यवश्यं
भवेत्सर्वंत्रैलोक्यंसचराचरम् ॥ शालग्रामशिलायत्रतत्रसंनिहितोहरिः॥८२॥तत्रदानंजपःस्नानंवाराणस्याःशताधिकम् ॥ कुरुक्षेत्रेप्रयागेचनैमिषेपुष्करे
तथा ॥८३॥ तत्रकोटिगुणंपुण्यंवाराणस्यांमहाफलम् ॥ ब्रह्महत्यादिकंपापंयत्किंचित्कुरुतेनरः ॥ ८४ ॥ तत्सर्वंनिर्दहत्याशुशालग्रामशिलार्चनम् ॥
शालग्रामोद्भवोदेवोयत्रद्वारावतीभवः ॥ ८५ ॥ उभयोःसंगमोयत्रमुक्तिस्तत्रनसंशयः ॥ ब्रह्मचारिगृहस्थैश्चवानप्रस्थैश्चभिक्षुभिः॥८६॥भोक्तव्यंविष्णु
नैवेद्यंनात्रकार्याविचारणा॥तत्पूजनेनमन्त्राश्चनजपोनचभावना॥८७॥नस्तुतिर्नापिचाचारःशालग्रामशिलार्चने ॥ शालग्रामशिलाग्रेतुकृत्वास्वस्तिक
मादरात् ॥८८॥ कार्त्तिकेतुविशेषेणपुनात्यासप्तमंकुलम् ॥ अणुमात्रंतुयःकुर्यान्मण्डलंकेशवाग्रतः ॥८९ ॥ मृदाधातुविकारैश्चकल्पकोटिंवसेद्दिवि ॥
येतुसंवत्सरंपूर्णमग्निहोत्रमुपासते ॥ ९० ॥ कार्त्तिकेस्वस्तिकंकृत्वासममेतन्नसंशयः ॥ अगम्यागमनेचैवह्यभक्ष्यस्यतुभक्षणे ॥ ९१ ॥ तत्पापं
नाशमायातिमण्डयित्वाहरेर्गृहम् ॥ मण्डलंकुरुतेनित्यंयानारीकेशवाग्रतः ॥ सप्तजन्मानिवैधव्यंनप्राप्नोतिकदाचन॥९२॥ इतिश्रीपाद्मेमहापुराणेपञ्च
प०उत्तर०कार्त्तिकमाहात्म्येश्रीकृष्णसत्यभामासंवादेशालग्राममाहात्म्यंनामविंशत्यधिकशततमोऽध्यायः ॥ १२० ॥ ईश्वरउवाच ॥ धात्रीच्छायां
समाश्रित्यकुर्यात्पिण्डंतुयोगुह ॥ मुक्तिंप्रयान्तिपितरःप्रसादान्माधवस्यतु ॥१॥ मूर्ध्निपाणौमुखेचैवदेहेचैवतुयोनरः ॥ धत्तेधात्रीफलंवत्सधात्रीफल
विभूषितः ॥ २ ॥ धात्रीफलकृताहारोनरोनारायणोभवेत् ॥ यःकश्चिद्वैष्णवोलोकेधत्तेधात्रीफलंगुह ॥३॥ प्रियोभवतिदेवानांमनुष्याणांचकाकथा ॥
नजह्यात्तुलसीमालांधात्रीमालांविशेषतः ॥ ४ ॥ यावत्तिष्ठतिकण्ठस्थाधात्रीमालानरस्यहि ॥ तावत्तस्यशरीरेतुप्रतिष्ठतिचकेशवः ॥ ५ ॥
धात्रीफलंतुतुलसीमृत्तिकाद्वारकोद्भवा ॥ सफलंजीवितंतस्यत्रितयंयस्यवेश्मनि॥६॥यावद्दिनानिवहतेधात्रीमालांकलौनरः॥तावद्युगसहस्राणिवैकुण्ठे
वसतिर्भवेत् ॥७॥ मालायुग्मंवहेद्यस्तुधात्रीतुलसिसंभवम् ॥ वहतेकण्ठदेशेतुकल्पकोटिंवसेद्दिवि ॥८॥ संनियम्येन्द्रियग्रामंशालग्रामशिलार्चनम् ॥
यःकुर्यान्मानवोभक्त्यापुण्येपुण्येऽश्वमेधजम् ॥९॥सुराणांत्रयथाविष्णुःपुष्पाणांतुलसीतथा ॥तुलस्यातुदिनंदेवंयोऽर्चयेद्गरुडध्वजम्॥१०॥जन्मदुःख

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

जरारोगैर्मुक्तोऽसौमुक्तिमाप्नुयात् ॥ तुलसीमालयाविष्णुःपूजितोयेनकार्तिके ॥ ११ ॥ यमाक्षरकृतांमालांस्फुटंशौरिःप्रमार्ष्टिहि ॥ श्रीचन्दनंसकर्पूरं
मगुरुंचसकुङ्कुमम् ॥१२॥ केतकीदीपदानंचसर्वदाकेशवप्रियम् ॥कार्तिकेकेतकीपुष्पंदत्तंयेनकलौयुगे ॥१३॥ दीपदानंमहासेनकुलानांतारयेच्छतम् ॥
सरोरुहाणितुलसीकेतकीमुनिपुष्पकम् ॥ १४ ॥ कार्त्तिकेचदिनान्येवदीपदानंतुपञ्चमम् ॥ केतकीमालयायेनकार्त्तिकेपुष्पमण्डपम् ॥१५॥ केशवस्य
कृतंवत्सवसतिर्दिवितस्यच ॥ केतकीपुष्पकेनैवपूजितोगरुडध्वजः ॥ १६ ॥ समाःसहस्रंसुप्रीतोजायतेमधुसूदनः ॥ अर्चयित्वाहृषीकेशंकुसुमैः
केतकीभवैः ॥ १७ ॥ पुण्यंतद्भवनंयातिकेशवस्यशिवंगुह ॥ दमनकेनापिदेवेशंसंप्राप्तेमधुमाधवे ॥ १८ ॥ गोशतस्यमुनिश्रेष्ठह्यर्चनाल्लभतेफलम् ॥
अगस्तिकुसुमैर्देवंयोऽर्चयेतजनार्दनम् ॥१९॥ दर्शनात्तस्यभोविप्रनरकाग्निःप्रणश्यति ॥ नतत्करोतिविप्रर्षेतपसातोषितोहरिः ॥ २० ॥ यत्करोति
महासेनमुनिपुष्पैरलङ्कृतः ॥ विहायसर्वपुष्पाणिमुनिपुष्पेणकेशवम् ॥ २१ ॥ कार्त्तिकेयोऽर्चयेद्भक्त्यावाजिमेधफलंलभेत् ॥ मुनिपुष्पकृतांमालां
योददातिजनार्दने ॥ २२ ॥ देवेन्द्रोऽपिमुनिश्रेष्ठकुरुतेतस्यसत्कथाम् ॥ गवामयुतदानेनयत्फलंप्राप्यतेगुह ॥ २३ ॥ मुनिपुष्पेणचैकेनकार्त्तिके
लभतेफलम् ॥ कौस्तुभेनयथाप्रीतोयथाचवनमालया ॥ तुलसीदलेनसंप्रीतःकार्त्तिकेचतथाहरिः ॥ २४ ॥ (सूतउवाच ॥ प्रश्रयावनतंदृष्ट्वाकुमारं
भक्तितत्परम् ॥ पुनःप्रोवाचभगवान्महादेवोवृषध्वजः ॥ २५ ॥ ईश्वरउवाच ॥) शृणुदीपस्यमाहात्म्यंकार्त्तिकेशिखिवाहन ॥ पितरश्चैववाञ्छन्ति
सदापितृगणैर्वृताः ॥ २६ ॥ भविष्यतिकुलेऽस्माकंपितृभक्तःसुपुत्रकः ॥ कार्त्तिकेदीपदानेनयस्तोषयतिकेशवम् ॥ २७ ॥ घृतेनदीपकोयस्य
तिलतैलेनवापुनः ॥ ज्वलतेयस्यसेनानीरश्वमेधेनतस्यकिम् ॥ २८ ॥ तेनेष्टंक्रतुभिःसर्वैःकृतंतीर्थावगाहनम् ॥ दीपदानंकृतंयेनकार्त्तिकेकेशवाग्रतः ॥
॥ २९ ॥ कृष्णपक्षेविशेषेणपुत्रपञ्चदिनानिच ॥ पुण्यानितेषुयोदत्तेदीपंसोऽक्षयमाप्नुयात् ॥ ३० ॥ एकादश्यांपरैर्दत्तंदीपंप्रज्वाल्यमूषिका ॥
मानुष्यंदुर्लभंप्राप्यपरांगतिमवापसा ॥ ३१ ॥ लुब्धकोऽपिचतुर्दश्यांपूजयित्वामहेश्वरम् ॥ निर्भक्षःपरमंप्राप्यविष्णुलोकंजगामसः ॥ ३२ ॥
श्वपाकीस्वाश्रयाद्वेश्यादीपंकृत्वापरैःकृतम् ॥ शुद्धालीलावतीभूत्वाजगामस्वगमक्षयम् ॥ ३३ ॥ गोपःकश्चिदमायांतुपूजांदृष्ट्वातुशार्ङ्गिणः ॥ मुहुर्मुहु
र्जयेत्युक्त्वाराजराजेश्वरोऽभवत् ॥ ३४ ॥ तस्माद्दीपाःप्रदातव्याराात्रावस्तमितेरवौ ॥ गृहेषुसर्वगोष्ठेषुसर्वेष्वायतनेषुच ॥३५ ॥ देवालयेषुदेवानां
श्मशानेषुसरस्सुच ॥ घृतादिनाशुभार्थाययावत्पञ्चदिनानिच ॥३६ ॥ पापिनःपितरोयेचलुप्तपिण्डोदकक्रियाः ॥ तेऽपियान्तिपरांमुक्तिंदीपदानस्य

१ 'पापाक्षर' इ० पा० । २'कार्त्तिके यदि तान्येव' इ०, 'कार्त्तिके यदिनान्येव' इ० च पा० । ३ ( ) इति चिन्हस्थं भोरपुस्तके मुद्रितमाहात्म्ये च ।

CC-0. In Public Domain. Digitization by eGangotri

पुण्यतः ॥ ३७ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०कार्त्तिकमाहात्म्येदीपगन्धधात्रीमाहात्म्यवर्णनंनामैकविंशत्यधिकशततमोऽध्यायः ॥१२१ ॥
कार्त्तिकेयउवाच ॥ दीपावलिफलंनाथविशेषाद्ब्रूहिसाम्प्रतम् ॥ किमर्थंक्रियतेसातुतस्याःकादेवताभवेत् ॥ १ ॥ किंचतत्रभवेद्देयंकिंनदेयंवदप्रभो ॥
प्रहर्षःकोऽत्रनिर्दिष्टःक्रीडाकात्रप्रकीर्तिता ॥ २ ॥ सूतउवाच ॥ इतिस्कन्दवचःश्रुत्वाभगवान्कामशोषणः ॥ साधूक्ताकार्त्तिकंविप्राःप्रहसन्निदमब्र
वीत् ॥ ३ ॥ श्रीशिवउवाच ॥ कार्त्तिकस्यासितेपक्षेत्रयोदश्यांतुपावके ॥ यमदीपंबहिर्दद्यादपमृत्युर्विनश्यति ॥ ४ ॥ मृत्युनापाशहस्तेनकाले
नभार्ययासह ॥ त्रयोदश्यांदीपदानात्सूर्यजःप्रीयतामिति ॥ ५ ॥ कार्त्तिकेकृष्णपक्षेचचतुर्दश्यांविधूदये ॥ अवश्यमेवकर्त्तव्यंस्नानंचपापभीरुभिः
॥ ६ ॥ पूर्वविद्धाचतुर्दश्याःकार्त्तिकस्यसितेतरे ॥ पक्षेप्रत्यूषसमयेस्नानंकुर्यादतन्द्रितः ॥ ७ ॥ तैलेलक्ष्मीर्जलेगङ्गादीपावल्यांचतुर्दशीम् ॥ प्रा
तःस्नानंहियःकुर्याद्यमलोकंनपश्यति ॥ ८ ॥ अपामार्गस्तथातुम्बीप्रपुन्नाटंचवाह्वलम्[1] ॥ भ्रामयेत्स्नानमध्येतुनरकस्यक्षयायवै ॥ ९ ॥ सीता
लोष्टसमायुक्तसकण्टकदलान्वित ॥ हरपापमपामार्गभ्राम्यमाणःपुनःपुनः ॥ १० ॥ अपामार्गंप्रपुन्नाटंभ्रामयेच्छिरसोपरि ॥ ततश्चतर्पणंकार्यंयम
राजस्यनामभिः ॥ ११ ॥ यमायधर्मराजायमृत्यवेचान्तकायच ॥ वैवस्वतायकालायसर्वभूतक्षयायच ॥ १२ ॥ औदुम्बरायदध्नायनीलाय
परमेष्ठिने ॥ वृकोदरायचित्रायचित्रगुप्तायवैनमः ॥ १३ ॥ नरकायप्रदातव्योदीपःसंपूज्यदेवताः ॥ ततःप्रदोषसमयेदीपान्दद्यान्मनोहरान् ॥ १४ ॥
ब्रह्मविष्णुशिवादीनांभवनेषुविशेषतः ॥ कूटागारेषुचैत्येषुसभासुचनदीषुच ॥ १५ ॥ प्राकारोद्यानवापीषुप्रतोलीनिष्कुटेषुच ॥ मन्दुरासुविविक्तासु
हस्तिशालासुचवह्नि ॥ १६ ॥ एवंप्रभातसमयेह्यमावास्यांतुपावके ॥ स्नात्वादेवान्पितन्भक्त्यासंपूज्याथप्रणम्यच ॥ १७ ॥ कृत्वातु
पार्वणंश्राद्धंदधिक्षीरघृतादिभिः ॥ भोज्यैर्नानाविधैर्विप्रान्भोजयित्वाक्षमापयेत् ॥ १८ ॥ ततोऽपराह्णसमये[2]पोषयेन्नागरान्प्रिय ॥ तेषांगोष्ठींच
मानंचकृत्वासंभाषणंनृपः ॥ १९ ॥ व[3]क्तॄणांवत्सरंयावत्प्रीतिरुत्पद्यतेगुह ॥ अप्रबुद्धेहरौपूर्वंस्त्रीभिर्लक्ष्मीःप्रबोधयेत् ॥ २० ॥ प्रबोधसमये
लक्ष्मींबोधयित्वातुसुस्त्रिया ॥ पुमान्वैवत्सरंयावल्लक्ष्मीस्तंनैवमुञ्चति ॥ २१ ॥ अभयंप्राप्यविप्रेभ्योविष्णुभीताःसुरद्विषः ॥ सुप्तंक्षीरोदधौ
ज्ञात्वालक्ष्मींपद्माश्रितांतथा ॥२२॥ त्वंज्योतिःश्रीरविश्चन्द्रोविद्युत्सौवर्णतारकः ॥सर्वेषांज्योतिषांज्योतिर्दीपज्योतिःस्थितातुया ॥२३ ॥ यालक्ष्मी
र्दिवसेपुण्येदीपावल्यांचभूतले ॥ गवांगोष्ठेतुकार्त्तिक्यांसालक्ष्मीर्वरदामम ॥ २४ ॥ शङ्करश्चभवानीचक्रीडयाद्यूतमास्थितौ ॥ भवान्याभ्यर्चिता

१ 'प्रपुन्नाटं च कट्फलम्' इ०, प्रपुन्नाटस्तथा पुरा'इ० च पा० । २'तोषयेन्नागरान्प्रियैः' इ० पा० । ३ 'वातानाम्' इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

लक्ष्मीर्धेनुरूपेणसंस्थिता ॥ २५ ॥ गौर्याजित्वापुराशम्भुर्नग्नोद्यूतेविसर्जितः ॥ अतोऽयंश ोदुःखीगौरीनित्यंसुखेस्थिता ॥ २६ ॥ प्रथमंविजयो
यस्यास्तस्यसंवत्सरंसुखम् ॥ एवंगतेनिशीथेतुजनेनिद्राधलोचने ॥२७॥ तावन्नगरनारीभिस्तूर्यडिण्डिमवादनैः॥निष्कास्यतेप्रहृष्टाभिरलक्ष्मीश्चगृहा
ङ्गणात् ॥ २८ ॥ पराजयेविरुद्धंस्यात्प्रतिपद्युदितेरवौ ॥ प्रातर्गोवर्धनःपूज्योद्यूतंरात्रौसमाचरेत् ॥ २९ ॥ भूषणीयास्तथागावोवर्ज्यावहन
दोहनात् ॥ गोवधनधराधारगोकुलत्राणकारक ॥ ३० ॥ विष्णुबाहुकृतोच्छ्रायगवांकोटिप्रदोभव ॥ यालक्ष्मीर्लोकपालानांधेनुरूपेणसंस्थिता ॥३१॥
घृतंवहतियज्ञार्थेममपापंव्यपोहतु ॥ अग्रतःसन्तुमेगावोगावोमेसन्तुपृष्ठतः ॥ गावोमेहृदयेसन्तुगवांमध्येवसाम्यहम् ॥ ३२ ॥ इतिगोवर्धनपूजा ॥
सद्भावेनैवसंतोष्यदेवान्सत्पुरुषान्नरान् ॥ इतरेषामन्नपानैर्वाक्यदानेनपण्डितान् ॥३३॥ वस्त्रैस्ताम्बूलदीपैश्चपुष्पकर्पूरकुङ्कुमैः ॥ भक्ष्यरुच्चावचैर्भोज्यै
रन्तःपुरनिवासिनः॥ ३४ ॥वृषभान्ग्रासदानैश्चसामन्तान्नृपतिर्धनैः॥ पदातिजनसङ्घांश्चग्रैवेयःकटकैःशुभैः ॥ ३५ ॥ स्वानमात्यांश्चतान्राजा
तोषयेत्स्वजनान्पृथक् ॥ यथाथतोषयित्वातुततोमल्लान्नटांस्तथा ॥ ३६ ॥ वृषभांश्चमहोक्षांश्चयुध्यमानान्परैःसह ॥ राजन्यांश्चापियोधांश्चपदाती
न्समलङ्कृतान् ॥ ३७ ॥ मञ्चारूढःस्वयंपश्येन्नटनर्तकचारणान् ॥ योधयेद्वासयेच्चैवगोमहिष्यादिकंचयत् ॥ ३८ ॥ वत्सानाकर्षयेद्गोभि
रुक्तिप्रत्युक्तिवादनात् ॥ ततोऽपराह्णसमयेपूर्वस्यांदिशिपावके ॥ ३९ ॥ मार्गपालींप्रबध्नीयाद्दुर्गस्तम्भेऽथपादपे ॥ कुशकाशमयींदिव्यांलम्बकै
र्बहुभिर्गुह ॥ ४० ॥ वीक्षयित्वागजानश्वान्मार्गपाल्यास्तलेनयेत् ॥ गावैर्वृषांश्चमहिषान्महिषीर्घण्टिकोत्कटाः ॥ ४१ ॥ कृतहोमार्द्विजेन्द्रै
स्तुबध्नीयान्मार्गपालिकाम् ॥ नमस्कारंततःकुर्यान्मन्त्रेणानेनसुव्रतः ॥ ४२ ॥ मार्गपालिनमस्तुभ्यंसर्वलोकसुखप्रदे ॥ मार्गपालीतलेस्कन्दयान्ति
गावोमहावृषाः ॥४३॥ राजानोराजपुत्राश्चब्राह्मणाश्चविशेषतः ॥ मार्गपालींसमुल्लङ्घ्यनीरुजःसुखिनोहिते॥४४॥ कृत्वैतत्सर्वमेवहरात्रौदैत्यपतेर्बलेः ॥
पूजांकुर्यात्ततःसाक्षाद्भूमौमण्डलकेकृते ॥ ४५ ॥ बलिमालिख्यदैत्येन्द्रंवर्णकैःपञ्चरङ्गकैः॥ सर्वाभरणसंपूर्णंविन्ध्यावलिसमन्वितम् ॥४६॥ कूष्माण्ड
मयजम्भोरुमधुदानवसंवृतम् ॥ संपूर्णंहृष्टवदनंकिरीटोत्कटकुण्डलम्॥४७॥द्विभुजंदैत्यराजंचकारयित्वास्वकेपुनः ॥ गृहस्यमध्येशालायांविशालायां
ततोऽर्चयेत् ॥ ४८ ॥ मातृभ्रातृजनैःसार्धंसन्तुष्टोबन्धुभिःसह ॥ कमलैःकुमुदैःपुष्पैःकह्लारैरक्तकोत्पलैः ॥ ४९ ॥ गन्धपुष्पान्ननैवेद्यैःसक्षीरैर्गुड ॥ ११३ ॥
पायसैः ॥ मद्यमांससुरालेह्यचोष्यभक्ष्योपहारकैः॥५०॥मन्त्रेणानेनराजेन्द्रःसमन्त्रीसपुरोहितः॥पूजांकरिष्यतेयोवैसौख्यंस्यात्तस्यवत्सरम् ॥ ५१ ॥

१ 'वृषभान्महिषांश्चैव' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बलिराजनमस्तुभ्यंविरोचनसुतप्रभो ॥ भविष्येन्द्रसुरारातेपूजेयंप्रतिगृह्यताम् ॥ ५२ ॥ एवंपूजाविधिंकृत्वारात्रौजागरणंततः ॥ कारयेद्वैक्षणंरात्रौनट
नर्तकगायकैः ॥५३॥ ॥लोकैश्चापिगृहस्यान्तेसपर्याशुक्लतण्डुलैः ॥ संस्थाप्यबलिराजंतुफलैःपुष्पैश्चपूजयेत् ॥५४॥ बलिमुद्दिश्यवैतत्रकार्यंसर्वंचपावके॥
यानियान्यक्षयाण्याहुर्मुनयस्तत्त्वदर्शिनः ॥ ५५ ॥ यदत्रदीयतेदानंस्वल्पंवायदिवाबहु ॥ तदक्षयंभवेत्सर्वंविष्णोःप्रीतिकरंशुभम् ॥ ५६ ॥ रात्रौयेन
करिष्यन्तितवपूजांबलेनराः ॥ तेषामश्रोत्रियंधर्मंसर्वंत्वामुपतिष्ठतु॥५७॥विष्णुनाचस्वयंवत्सतुष्टेनबलयेपुनः ॥ उपकारकरंदत्तमसुराणांमहोत्सवम्
॥५८॥ तदाप्रभृतिसेनानीःप्रवृत्ताकौमुदीसदा ॥ सर्वोपद्रवविद्रावासर्वविघ्नविनाशिनी ॥५९॥ लोकशोकहराकाम्याधनपुष्टिसुखावहा ॥ कुशब्देनमही
ज्ञेयामुदहर्षेततोद्वयम् ॥ ६० ॥ धातुत्वेनिगमैश्चैवतेनैषाकौमुदीस्मृता ॥ कौमोदन्तेजनायस्मान्नानाभावैःपरस्परम् ॥ ६१ ॥ हृष्टतुष्टाःसुखापन्ना
स्तेनैषाकौमुदीस्मृता ॥ कुमुदानिबलेर्यस्यांदीयन्तेतेनषण्मुख ॥ ६२ ॥ अर्घार्थंपार्थिवैःपुत्रतेनैषाकौमुदीस्मृता ॥ एकमेवमहोरात्रंवर्षेवर्षेचका
र्तिके ॥ ६३ ॥ दत्तंदानवराजस्यआदर्शमिवभूतल ॥ यःकरोतिनृपोराज्येतस्यव्याधिभयंकुतः ॥ ६४ ॥ सुभिक्षंक्षेममारोग्यंतस्यसंपदनु
त्तमा ॥ नीरुजश्चजनाःसर्वेसर्वोपद्रववर्जिताः ॥ ६५ ॥ कौमुदीक्रियतेतस्माद्भावंकर्तुमहीतले ॥ योयादृशेनभावेनतिष्ठत्यस्यांचषण्मुख ॥
॥ ६६ ॥ हर्षदुःखादिभावेनतस्यवर्षंप्रयातिहि ॥ रुदितेरोदतेवर्षंहृष्टेवर्षंप्रहर्षितम् ॥ ६७ ॥ भुक्तेभोक्ताभवेद्वर्षंस्वस्थेस्वस्थंभविष्यति ॥
तस्मात्प्रहृष्टैःकर्त्तव्याकौमुदीचशुभैर्नरैः ॥ ६८ ॥ वैष्णवीदानवीचेयंतिथिःप्रोक्ताचकार्तिके ॥ ६९ ॥ दीपोत्सवंजनितसर्वजनप्रसादंकुर्व
न्तियेशुभतयाबलिराजपूजाम् ॥ दानोपभोगसुखवुद्धिमतांकुलानांहर्षंप्रयातिसकलंप्रमुदंचवर्षम् ॥ ७० ॥ स्कन्दैतास्तिथयोनूनंद्वितीयाद्याश्च
विश्रुताः ॥ मासैश्चतुर्भिश्चततःप्रावृट्कालेशुभावहाः ॥ ७१ ॥ प्रथमाश्रावणेमासितथाभाद्रपदेपरा ॥ तृतीयाश्वयुजेमासिचतुर्थीकार्तिकेभवेत्॥ ७२ ॥
कलुषाश्रावणेमासितथाभाद्रपदेऽमला ॥ आश्विनेप्रेतसंचाराकार्तिकेयाम्यकामता ॥ ७३ ॥ गुहउवाच ॥ कस्मात्साकलुषाप्रोक्ताकस्मा
त्सानिर्मलामता ॥ कस्मात्साप्रेतसंचाराकस्माद्याम्याप्रकीर्तिता ॥ ७४ ॥ सूतउवाच ॥ इतिस्कन्दवचःश्रुत्वाभगवान्भूतभावनः ॥ उवाच
वचनंश्लक्ष्णंप्रहसन्वृषभध्वजः ॥ ७५ ॥ महेशउवाच ॥ पुरावृत्रवधेवृत्तेप्राप्तेराज्यंपुरन्दरे ॥ ब्रह्महत्यापनोदार्थमश्वमेधःप्रवर्तितः ॥ ७६ ॥
क्रोधादिन्द्रेणवज्रेणब्रह्महत्यानिषूदिता ॥ षड्विधासाक्षितौक्षिप्तावृक्षतोयमहीतले ॥ ७७ ॥ नार्यांवह्नौ[1]भ्रूणहनिसंविभज्ययथाक्रमम् ॥ तत्पापश्रवणा

१ 'भ्रूणहरे' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्पूर्वंद्वितीयायादिनेनच ॥ ७८ ॥ नारीवृक्षनदीभूमिवह्निभ्रूणहनस्तथा ॥ कलुषीभवनंजातोह्यतोऽथकलुषास्मृता ॥ ७९ ॥ मधुकैटभयोरक्तेपुरामग्ना
 नुमेदिनी ॥ अष्टाङ्गुलापवित्रासानारीणांतुरजोमलम् ॥८०॥नद्यःप्रावृण्मलाःसर्वावह्नेरूर्ध्वंमषीमलः ॥ निर्यासमलिनावृक्षाःसङ्गाद्भ्रूणहनोमलाः॥८१॥
 कलुषाविचरन्त्यस्यांतेनैषाकलुषामता ॥ देवर्षिपितृधर्माणांनिन्दकानास्तिकाःशठाः ॥ ८२ ॥ तेषांसावाङ्मलात्पूताद्वितीयातेननिर्मला ॥ अन
ध्यायेषुशास्त्राणिपाठयन्तिपठन्तिच ॥ ८३ ॥ साङ्ख्यकास्तार्किकाःश्रौतास्तेषांशब्दापशब्दजात् ॥ मलात्पूताद्वितीयायांततोऽर्थेनिर्मलाचसा॥
॥८४॥ कृष्णस्यजन्मनावत्सत्रैलोक्यंपावितंभवेत् ॥ नभस्येतेविनिर्दिष्टानिर्मलासातिथिर्बुधैः ॥८५॥ अग्निष्वात्ताबर्हिषदआज्यपाःसोमपास्तथा ॥
पितॄन्पितामहान्प्रेतसंचारात्प्रेतसंचरा ॥ ८६ ॥ प्रतास्तुपितरःप्रोक्तास्तेषांतस्यांतुसंचरः ॥ पुत्रपौत्रैस्तुदौहित्रैःस्वधामन्त्रैस्तुपूजिताः ॥ ८७ ॥
श्राद्धदानमखैस्तृप्तायान्त्यतःप्रेतसंचरा ॥ महालयेतुप्रेतानांसंचारोभुविदृश्यते॥८८॥तेनैषाप्रेतसंचाराकीर्तिताशिखिवाहन ॥ यमस्यक्रियतेपूजायतो
ऽस्यांपावकेनरैः ॥ ८९ ॥ तेनैषायाम्यकाप्रोक्तासत्यंसत्यंमयोदितम् ॥ एतत्कार्त्तिकमाहात्म्यंयेशृण्वन्तिनरोत्तमाः ॥ ९० ॥ कार्त्तिकस्नानजंपुण्यं
तेषांभवतिनिश्चितम् ॥ कार्त्तिकेचद्वितीयायांपूर्वाह्णेयममर्चयेत् ॥९१॥ भानुजायांनरःस्नात्वायमलोकंनपश्यति ॥ कार्त्तिकेशुक्लपक्षेतुद्वितीयायांतु
शौनक ॥ ९२ ॥ यमोयमुनयापूर्वंभोजितःस्वगृहेऽर्चिता ॥ द्वितीयायांमहोत्सर्गोनारकीयाश्चतर्पिताः ॥ ९३ ॥ पापेभ्योविप्रयुक्तास्तेमुक्ताःसर्व
निबन्धनात् ॥ आशंसिताश्चसंतुष्टाःस्थिताःसर्वेयदृच्छया॥९४॥तेषांमहोत्सवोवृत्तोयमराष्ट्रसुखावहः ॥ अतोयमद्वितीयेयंत्रिषुलोकेषुविश्रुता॥९५॥
तस्मान्निजगृहेविप्रनभोक्तव्यंततोबुधैः ॥ स्नेहेनभगिनीहस्ताद्भोक्तव्यंपुष्टिवर्द्धनम्॥९६॥दानानिचप्रदेयानिभगिनीभ्योविधानतः॥स्वर्णालङ्कारवस्त्राणि
पूजासत्कारसंयुतम् ॥ ९७ ॥ भोक्तव्यंसहजायाश्चभगिन्याहस्ततःपरम् ॥ सर्वासुभगिनीहस्ताद्भोक्तव्यंबलवर्धनम्॥९८॥ऊर्जेशुक्लद्वितीयायांपूजित
स्तर्पितोयमः ॥ महिषासनमारूढोदण्डमुद्गरभृत्प्रभुः ॥९९॥ वेष्टितःकिङ्करैर्हृष्टैस्तस्मैयाम्यात्मनेनमः ॥ यैर्भगिन्यःसुवासिन्योवस्त्रदानादितोषिताः॥
॥ १०० ॥ नतेषांवत्सरंयावत्कलहोनरिपोर्भयम् ॥ धन्यंयशस्यमायुष्यंधर्मकामार्थसाधनम् ॥ १ ॥ व्याख्यातंसकलंपुत्रसरहस्यंमयानघ ॥
॥ २ ॥ यस्यांतिथौयमुनयायमराजदेवःसंभोजितःप्रतितिथौस्वसृसौहृदेन ॥ तस्मात्स्वसुःकरतलादिहयोहिभुङ्क्तेप्राप्नोतिवित्तशुभसंपद
मुत्तमांसः ॥ १०३ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०कार्त्तिकमाहात्म्येद्वाविंशत्यधिकशततमोऽध्यायः ॥ १२२ ॥ ईश्वरउवाच ॥
प्रबोधिन्याश्चमाहात्म्यंपापघ्नंपुण्यवर्धनम् ॥ मुक्तिदंतत्त्वबुद्धीनांशृणुष्वसुरसत्तम ॥ १ ॥ तावद्गर्जतिसेनानीर्गङ्गाभागीरथीक्षितौ ॥ यावन्ना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यातिपापघ्नीकार्त्तिकेहरिबोधिनी ॥ २ ॥ तावद्गच्छन्तितीर्थानिआसमुद्रसरांसिच ॥ यावत्प्रबोधिनीविष्णोस्तिथिर्नायातिकार्त्तिके ॥ ३ ॥
अश्वमेधसहस्राणिराजसूयशतानिच ॥ एकेनैवोपवासेनप्रबोधिन्यांयथाभवत् ॥ ४ ॥ दुर्लभंचैवदुष्प्राप्यंत्रैलोक्येसचराचरे ॥ तदपिप्रार्थितंविप्र
ददातिप्रतिबोधिनी ॥ ५ ॥ ऐश्वर्यंसंसृतिंज्ञानंराज्यंचसुखसंपदम् ॥ ददात्युपोषिताविप्रहेलयाहरिबोधिनी ॥ ६ ॥ मेरुमन्दरतुल्यानिपापान्युपा
र्जितानिच ॥ एकेनैवोपवासेनदहतेहरिबोधिनी ॥ ७ ॥ उपवासंप्रबोधिन्यांयःकरोतिस्वभावतः ॥ विधिनानरशार्दूलयथोक्तंलभतेफलम् ॥ ८ ॥
पूर्वजन्मसहस्रेषुपापंयत्समुपार्जितम् ॥ जागरेणप्रबोधिन्यांदह्यतेतूलराशिवत् ॥ ९ ॥ शृणुषण्मुखवक्ष्यामिजागरस्यचलक्षणम् ॥ यस्यविज्ञान
मात्रेणदुर्लभोनजनार्दनः ॥ १० ॥ गीतंवाद्यंचनृत्यंचपुराणपठनंतथा ॥ धूपंदीपंचनैवेद्यंपुष्पंगन्धानुलेपनम् ॥ ११ ॥ फलमर्घ्यंचश्रद्धाचदान
मिन्द्रियसंयमः ॥ सत्यान्वितंविनिद्रंचमुदायुक्तंक्रियान्वितम् ॥ १२ ॥ साश्चर्यंचैवसोत्साहमालस्यादिविवर्जितम् ॥ प्रदक्षिणादिसंयुक्तंनमस्कार
पुरःसरम् ॥ १३ ॥ नीराजनसमायुक्तमनिर्विण्णेनचेतसा ॥ यामेयामेमहाभागकुर्वन्नीराजनंहरेः ॥ १४ ॥ एतैर्गुणैःसमायुक्तंकुर्याज्जागरणं
विभोः ॥ एकाग्रमानसोयस्तुनपुनर्जायतेभुवि ॥ १५ ॥ यएवंकुरुतेभक्त्यावित्तशाठ्यविवर्जितः ॥ जागरंवासरेविष्णोर्नीयतेपरमांगतिम् ॥
॥ १६ ॥ पुरुषसूक्तेनयोनित्यंकार्त्तिकेत्वर्चयेद्धरिम् ॥ वर्षकोटिसहस्राणिपूजितस्तेनकेशवः ॥ १७ ॥ यथोक्तेनविधानेनपञ्चरात्रोदितेनवै ॥
कार्त्तिकेत्वर्चयेन्नित्यंमुक्तिभागीभवेन्नरः ॥ १८ ॥ नमोनारायणायेतिकार्त्तिकेयोऽर्चयेद्धरिम् ॥ समुक्तोनारकैर्दुःखैःपदंगच्छत्यनामयम् ॥ १९ ॥
हरेर्नामसहस्रंचगजराजस्यमोक्षणम् ॥ कार्तिकेपठतेयस्तुपुनर्जन्मनविन्दति ॥ २० ॥ युगकोटिसहस्राणिमन्वन्तरशतानिच ॥ द्वादश्यांकार्त्तिके
मासिजागरीवसतेदिवि ॥ २१ ॥ कुलेतस्यचसंजाताःशतशोऽथसहस्रशः ॥ प्राप्नुवन्तिपदंविष्णोस्तस्मात्कुर्वीतजागरम् ॥ २२ ॥ कार्त्तिके
पश्चिमेयामेस्तवंगानंकरोतियः ॥ श्वेतद्वीपेतुवसतेपितृभिःसहभामिनि ॥ २३ ॥ नैवेद्यदानंहरयेकार्त्तिकेदिनसंक्षये ॥ युगानिवसतेस्वर्गे
तावन्तिमुनिसत्तमाः ॥ २४ ॥ अक्षयंमुनिशार्दूलमालतीकमलार्चनम् ॥ अर्चयेद्देवदेवेशंसयातिपरमंपदम् ॥ २५ ॥ कार्त्तिकेशुक्लपक्षेतुकृत्वा
ह्येकादशींनरः ॥ प्रातर्दत्त्वाशुभान्कुम्भान्सयातिममम्न्दिरम् ॥ २६ ॥ कार्त्तिकेयउवाच ॥ भगवन्नुच्यतांपुण्यंव्रतानांपरमंव्रतम् ॥ कर्तव्यं
कार्त्तिकेमासिभवताभीष्मपञ्चकम् ॥ २७ ॥ विधानंतस्यचफलंतथैवसुरसत्तम ॥ कथयस्वप्रसादान्मेमुनीनांचपितामह ॥ २८ ॥ ईश्वर
उवाच ॥ प्रवक्ष्यामिमहापुण्यंव्रतंविधिमतांवर ॥ भीष्मेणैतद्यतःप्राप्तंव्रतंपञ्चदिनात्मकम् ॥ २९ ॥ सकाशाद्वासुदेवस्यतेनोक्तंभीष्मपञ्चकम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्रतस्यास्यगुणान्वक्तुंकः शक्तः केशवादृते ॥ ३० ॥ कार्त्तिकेशुक्लपक्षेतुश्रृणुधर्मंपुरातनम् ॥ वसिष्ठभृगुगर्गाद्यैश्चीर्णंकृतयुगादिषु ॥ ३१ ॥ अम्ब
रीषेणभोगाद्यैश्चीर्णंत्रेतायुगादिषु ॥ ब्राह्मणैर्ब्रह्मचर्येणजपहोमक्रियादिभिः ॥ ३२ ॥ क्षत्रियैश्चतथावैश्यैः सत्यशौचपरायणैः ॥ दुष्करंसत्य
हीनानामशक्यंबालचेतसाम् ॥ ३३ ॥ दुष्करंभीष्ममित्याहुर्नशक्यंप्राकृतैर्नरैः ॥ यस्तत्करोतिविप्रेन्द्रतेनसर्वंकृतंभवेत् ॥ ३४ ॥ व्रतं
चैतन्महापुण्यंमहापातकनाशनम् ॥ अतोनरैः प्रयत्नेनकर्त्तव्यंभीष्मपञ्चकम् ॥ ३५ ॥ कार्त्तिकस्यामलेपक्षेस्नात्वासम्यग्विधानतः ॥ एका
दश्यांतुगृह्णीयाद्व्रतंपञ्चदिनात्मकम् ॥ ३६ ॥ प्रातः स्नात्वाविशेषेणमध्याह्नेचतथाव्रती ॥ नद्यांनिर्झरगर्तेवासमालभ्यचगोमयम् ॥ ३७ ॥ यव
व्रीहितिलैः सम्यक्पितॄन्संतर्पयेत्क्रमात् ॥ स्नात्वामौनंनरः कृत्वाधौतवासादृढव्रतः ॥ ३८ ॥ भीष्मायोदकदानंचअर्घ्यंचैवप्रयत्नतः ॥ पूजा
भीष्मस्यकर्त्तव्यादानंदद्यात्प्रयत्नतः ॥ ३९ ॥ पञ्चरत्नंविशेषेणदत्त्वाविप्राययत्नतः ॥ वासुदेवोऽपिसंपूज्योलक्ष्मीयुक्तः सदाप्रभुः ॥ ४० ॥ पञ्चकेपूजयित्वा
तुकोटिकल्पानितुष्यति ॥ यत्किंचित्क्रियतेसर्वंपञ्चधातुप्रकल्पयेत् ॥ ४१ ॥ संवत्सरव्रतानांचलभतेसकलंफलम् ॥ कृत्वातूदकदानंतुतथार्घ्यस्यच
दापनम् ॥ ४२ ॥ मन्त्रेणानेनयः कुर्यान्मुक्तिभागीभवेन्नरः ॥ ४३ ॥ वैयाघ्रपादगोत्रायसाङ्कृतेप्रवरायच ॥ अपुत्रायददाम्येतदुदकंभीष्मवर्मणे ॥ ४४ ॥
वसूनामवतारायशन्तनोरात्मजायच ॥ अर्घ्यंददामिभीष्मायह्याजन्मब्रह्मचारिणे ॥ ४५ ॥ इत्यर्घ्यमन्त्रः ॥ अनेनविधिनायस्तुपञ्चकंतुसमापयेत् ॥ अश्व
मेधसमंपुण्यंप्राप्नोत्यत्रनसंशयः ॥ ४६ ॥ पञ्चाहमपिकर्तव्यंनियमंचप्रयत्नतः ॥ नियमेनविनापुत्रनभाव्यंव्रतकर्मणा ॥ ४७ ॥ उत्तरायणहीनायभीष्मा
यप्रददौहरिः ॥ उत्तरायणहीनोऽपिशुद्धिलग्नंविनाशुभाः ॥ ४८ ॥ ततः संपूजयेद्देवंसर्वपापहरंहरिम् ॥ अनन्तरंप्रयत्नेनकर्तव्यंभीष्मपञ्चकम् ॥ ४९ ॥
स्नापयेतजलैर्भक्त्यामधुक्षीरघृतेनच ॥ तथैवपञ्चगव्येनगन्धचन्दनवारिणा ॥ ५० ॥ चन्दनेनसुगन्धेनकुङ्कुमेनाथकेशवम् ॥ कर्पूरोशी
रमिश्रेणलेपयेद्गरुडध्वजम् ॥ ५१ ॥ अर्चयेद्रुचिरैः पुष्पैर्गन्धधूपसमन्वितैः ॥ गुग्गुलुंघृतसंयुक्तंदहेत्कृष्णायभक्तिमान् ॥ ५२ ॥ दीपकंतु
दिवारात्रौदद्यात्पञ्चदिनादिषु ॥ नैवेद्यंदेवदेवस्यपरमान्नंनिवेदयेत् ॥ ५३ ॥ एवमभ्यर्चयेद्देवंसंस्मृत्यचप्रणम्यच ॥ ॐनमोवासुदेवायजपे
दष्टोत्तरंशतम् ॥ ५४ ॥ जुहुयाच्चघृताभ्यक्तैस्तिलव्रीहियवादिभिः ॥ षडक्षरेणमन्त्रेणस्वाहाकारान्वितेनच ॥ ५५ ॥ उपास्यपश्चिमांसन्ध्यांप्रणम्यगरुड
ध्वजम् ॥ जपित्वापूर्ववन्मन्त्रंक्षितिशायीभवेद्व्रती ॥ ५६ ॥ सर्वमेतद्विधानंतुकार्यंपञ्चदिनानितु ॥ विशेषोऽत्रव्रतेह्यस्मिन्यदन्यूनंश्रृणुष्व
तत् ॥ ५७ ॥ प्रथमेऽह्निहरेः पादौपूजयेत्कमलैर्व्रती ॥ द्वितीयेबिल्वपत्रेणजानुदेशंसमर्चयेत् ॥ ५८ ॥ ततोऽनुपूजयेच्छीर्षंमालतीकुसुमैर्हरेः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कार्त्तिक्यांदेवदेवस्यभक्त्यातद्गतमानसः ॥ ५९ ॥ अर्चित्वातंहृषीकेशमेकादश्यांसमासतः ॥ निष्प्राश्यगोमयंसम्यगेकादश्यामुपावसेत्॥६०॥
गोमूत्रंमन्त्रवद्भूमौद्वादश्यांप्राशयेद्व्रती ॥ क्षीरंचैवत्रयोदश्यांचतुर्दश्यांतथादधि ॥ ६१ ॥ संप्राश्यकायशुध्यर्थंलङ्घःस्थित्वाचतुर्दिनम् ॥ पञ्चमेदिवसे
स्नात्वाविधिवत्पूज्यकेशवम् ॥ ६२ ॥ भोजयेद्ब्राह्मणान्भक्त्यातेभ्योदद्याच्चदक्षिणाम् ॥ पापबुद्धिंपरित्यज्यब्रह्मचर्येणधीमता ॥ ६३ ॥
मद्यंमांसंपरित्यज्यमैथुनंपापकारिणः ॥ शाकाहारेणमुन्यन्नैःकृष्णार्चनपरोनरः ॥ ६४ ॥ ततोनक्तंसमश्नीयात्पञ्चगव्यपुरःसरम् ॥ एवंसम्य
क्समाप्तस्ययथोक्तंफलमाप्नुयात् ॥ ६५ ॥ मद्यपोयत्पिबेन्मद्यंजन्मनोमरणान्तिकम् ॥ एतद्भीष्मव्रतंकृत्वाप्राप्नोतिपरमंपदम् ॥ ६६ ॥ स्त्रीभि
र्ब्राह्मणवाक्येनकर्तव्यंधर्मवर्धनम् ॥ विधवाभिश्चकर्तव्यंमोक्षसौख्याभिवृद्धये ॥ ६७ ॥ सर्वकामसमृद्ध्यर्थंपुण्यार्थमपिपावके ॥ नित्यस्नाने
तथादानेयेकार्त्तिकमुपासते ॥ ६८ ॥ वैश्वदेवश्चकर्तव्योविष्णुध्यानपरायणैः ॥ आरोग्यपुत्रदोवत्समहापातकनाशनः ॥ ६९ ॥ तीर्थेषु
कार्त्तिकंकुर्यात्सर्वयत्नेनषण्मुख ॥ संवत्सरव्रतानांतुसमाप्तिःकार्त्तिकेमता ॥ ७० ॥ पापस्यप्रतिमाकार्यारौद्रवस्त्रातिभीषणा ॥ खड्गहस्ता
विनिष्क्रान्तालोहदंष्ट्राकरालिनी ॥ ७१ ॥ तिलप्रस्थोपरिस्थाप्याकृष्णवस्त्राभिवेष्टिता ॥ रक्तपुष्पकृतापीडाज्वलत्काञ्चनकुण्डला ॥ ७२ ॥
संपूज्यपरयाभक्त्याधर्मराजस्यनामभिः ॥ इममुच्चारयेन्मन्त्रंगृहीतकुसुमाञ्जलिः ॥ ७३ ॥ यदन्यजन्मनिकृतमिहजन्मनिवापुनः ॥ पापं
प्रशममायातुतवपादप्रसादतः ॥ ७४ ॥ एवंसंपूज्यविधिवत्प्रतिमांतांचकाञ्चनीम् ॥ कृत्वापूजांयथाशक्तिविप्राणांवेदवादिनाम् ॥ ७५ ॥
प्रीतयेदेवदेवस्यकृष्णस्याक्लिष्टकर्मणः ॥ ब्राह्मणायप्रदातव्यंधर्मोमेप्रीयतामिति ॥ ७६ ॥ वाचकायप्रदातव्यायथाशक्तिचदक्षिणा ॥ दद्या
द्धिरण्यंगाश्चैवकृष्णोमेप्रीयतामिति ॥ ७७ ॥ कृतकृत्यःस्थितोभूत्वाविरक्तःसंयतोभवेत् ॥ अन्येषामपिदातव्यंस्वशक्त्यादानमुत्तमम् ॥ ७८ ॥
शान्तचित्तोनिराबाधःपरंपदमवाप्नुयात् ॥ नीलोत्पलदलश्यामश्चतुर्दंष्ट्रश्चतुर्भुजः ॥ ७९ ॥ अष्टपादैकनयनःशङ्कुकर्णःखरस्वनः ॥ जटी
द्विजिह्वस्ताम्राक्षोमृगराजतनुच्छदः ॥ ८० ॥ चिन्तनीयोमहादेवोयस्यरूपंनविद्यते ॥ इदंभीष्मेणकथितंशरतल्पगतेनमे ॥ ८१ ॥ तदेतत्ते
मयाख्यातंदुष्करंभीष्मपञ्चकम् ॥ धन्यंपुण्यंपापहरंयुधिष्ठिरमहाव्रतम् ॥ यत्कृत्वाब्रह्महागोघ्नःसर्वपापैःप्रमुच्यते ॥ ८२ ॥ यद्भीष्मपञ्च
कमितिप्रथितंपृथिव्यामेकादशीप्रभृतिपञ्चदशीनिरुद्धम् ॥ उक्तंनभोजनपरस्यतदानिषेधस्तस्मिन्व्रतेशुभफलंप्रददातिविष्णुः ॥ ८३ ॥ सूतउवाच॥

१'स्त्रीभिर्वा भर्तृवाक्येन'इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतत्सर्वाधिकंपुण्यंदुर्लभंभुवनेकृतम् ॥ इदंगुह्यंमयाख्यातंशास्त्रसारसमुच्चयम् ॥ ८४ ॥ सुराणांगोपितंसर्वमतिगुह्यंचमोक्षदम् ॥ श्रुत्वा
चैकपदेदेविअगम्यागमनेरताः ॥ ८५ ॥ कन्याविक्रीःस्वसाविक्रीह्युभयंतुविमोचयेत ॥ मोक्षदंचइदंशास्त्रंप्रकाश्यंनेतरेजने ॥ ८६ ॥ श्रुत्वाचैक
पदेयस्तुमोक्षंगच्छतिमानवः ॥ गोपनीयंप्रयत्नेनयेचापित्यागिनोनराः ॥ ८७ ॥ नतेषांकथ्यतेपुण्यंसत्यंसत्यंचषण्मुख ॥ इत्येतत्सर्वमा
ख्यातंकार्त्तिकस्यतुयत्फलम् ॥ ८८ ॥ श्रीविष्णुरुवाच ॥ कथितंदेवदेवेनपुत्रायहितकाम्यया ॥ पितुस्तद्वाक्यमाकर्ण्यषण्मुखोहर्षनिर्भरः ॥
॥ ८९ ॥ ऊचुःप्राञ्जलयःसर्वेतंदेवंजगदायुषम् ॥ कृतकृत्यावयंजाताःश्रुत्वाकार्त्तिकजंफलम् ॥ ९० ॥ अपरंनास्तिश्रोतव्यंनःप्राप्तंजन्मनः
फलम् ॥ माहात्म्यमेतदाकर्ण्यपूजयेद्यस्तुपाठकम् ॥ ९१ ॥ गोभूहिरण्यवस्त्रैश्चविष्णुतुल्योयतोहिसः ॥ वाचकेपूजितेयस्माद्विष्णु
र्भवतिपूजितः ॥ ९२ ॥ तथातंपूजयेन्नित्यंयदीच्छेत्सफलंशुभम् ॥ धर्मशास्त्रंपुराणंचवेदविद्यादिकंचयत् ॥ ९३ ॥ पुस्तकंवाच
कायैवदातव्यंधर्ममिच्छता ॥ पुराणविद्यादातारोह्यनन्तफलभोजिनः ॥ ९४ ॥ यःपठेतइदंभक्त्याश्रुत्वाचैवावधारयेत् ॥ मुच्यतेसर्व
पापेभ्योविष्णुलोकंसगच्छति ॥ ९५ ॥ धनंधान्यंयशःपुत्रानायुरारोग्यमेवच ॥ माहात्म्यश्रवणादेवलभ्यतेचनसंशयः ॥ ९६ ॥
इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०उत्तर०कार्त्तिकमाहात्म्येश्रीकृष्णसत्यभामासंवादेत्रयोविंशत्यधिकशततमोऽध्यायः ॥ १२३ ॥ ऋषयऊचुः ॥
सूतसूतमहाभागत्वयालोकहितैषिणा ॥ कथितंकार्त्तिकाख्यानंभुक्तिमुक्तिप्रदायकम् ॥ १ ॥ अधुनामाघमाहात्म्यंवदनोलोमहर्षणे ॥ श्रुतेनयेन
लोकानांसंशयःक्षीयतेमहान् ॥ २ ॥ पुराकेनमहाभागलोकेऽस्मिन्संप्रकाशितम् ॥ माघस्नानस्यमाहात्म्यंसेतिहासंतदादिश ॥ ३ ॥
सूतउवाच ॥ साधुसाधुमुनिश्रेष्ठायूयंकृष्णपरायणाः ॥ यत्पृच्छथमुदायुक्ताभक्त्याकृष्णकथामुहुः ॥ ४ ॥ कथयिष्यामिमाघस्यमाहात्म्यंपुण्यवर्ध
नम् ॥ पापघ्नंशृण्वतांपुंसांस्नातानांचारुणोदये ॥ ५ ॥ एकदापार्वतीविप्राःशङ्करंलोकशङ्करम् ॥ पप्रच्छविनयोपेतास्पृष्ट्वातच्चरणाम्बुजम् ॥ ६ ॥
पार्वत्युवाच ॥ देवदेवमहादेवभक्तानामभयप्रद ॥ प्रसीदनाथविश्वेशयत्पृच्छेतद्वदाधुना ॥ ७ ॥ श्रुतानानाविधाधर्मास्त्वत्तःपूर्वंमयाविभो ॥ ॥ ११६ ॥
अधुनाश्रोतुमिच्छामिमाहात्म्यंमाघजंवद ॥ ८ ॥ तत्तुकेनपुराचीर्णंकोविधिःकाचदेवता ॥ तत्सर्वंविस्तराद्ब्रूहियतस्त्वंभक्तवत्सलः ॥ ९ ॥ महेश
उवाच ॥ अध्वराऽवभृथस्नातऋषिभिःकृतमङ्गलः ॥ पूजितोनागरैःसर्वैःस्वपुरान्निर्गतोबहिः ॥ १० ॥ दिलीपोभूभृतांश्रेष्ठोमृगयारसिकोनृपः ॥
कौतूहलसमाविष्टआखेटव्यूहसंवृतः ॥११॥ उपानद्गूढपादस्तुनीलोष्णीषउरच्छदी ॥ बद्धगोधाङ्गुलित्राणोधनुष्पाणिःसरीसृपः ॥१२॥ बद्धक्षुद्रासि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धानुष्कैस्तथाभूतैश्चपत्तिभिः ॥ गां[1]न्धारेषुसुरम्येषुवनेषुविपुलेषुच ॥१३॥ उल्लङ्घितमहास्रोतायुवापश्चास्यविक्रमः ॥ मुदाक्रीडतितैःसार्धंकुञ्जेषुमृगय
न्मृगान् ॥१४॥ हन्यतांहन्यतामेषमृगोवैषपलायते ॥ इतिजल्पन्स्वभृत्येषुस्वयमुत्पत्यहन्तिच ॥१५॥ इतस्ततःपुनर्यातिक्वचित्पश्यन्वनस्थलीम् ॥
विटपोड्डीनसंत्रस्तलीनकेकिकुलाकुलाम् ॥ १६ ॥ हरिणीगणवित्रस्तां[2]धावच्छावकदिङ्मुखाम् ॥ क्वचित्फेरवफेत्कारताराराववि‌भीषणाम् ॥ १७ ॥
खड्गयूथैःक्वचिल्लक्ष्मींदधानामिवदन्तिनाम् ॥ क्वचित्कोटर[3]संदष्टोलूकनादविनादिनीम् ॥१८॥मृगारीपदमुद्राभिर्मुद्रितांचक्वचित्क्वचित् ॥ शार्दूलनख
निर्भिन्नरोहिद्रक्तारुणांक्वचित् ॥१९॥पीवरस्तनभारार्तसुस्निग्धमहिषीगणैः ॥ अवरोधाजिरक्षोणींसूचयन्तींमनःक्वचित् ॥२०॥क्वचिद्वृक्षघनच्छन्नांव
न्यपुष्पसुगन्धिनीम् ॥क्व[4]चिल्लतागृहद्वारांभृङ्गशब्दसुशोभनाम् ॥२१॥ अर्धनिःसृतनिर्मोकनागभीमबृहद्बिलाम् ॥बिलेषुलीनाजगरैर्भीमांनिर्मोकसर्पिणी
म् ॥२२॥क्वचिद्दावानलज्वालांशिलाज्योतिःसुशोभनाम् ॥ फूत्कारशब्दसंपूर्णमृगव्याघ्रसमाकुलाम् ॥२३॥प्रविमुञ्चञ्छुनांयूथंशशकेषुक्वचित्क्वचित् ॥
पल्वलेषुचविश्रम्यपुनर्योतिवनान्तरम् ॥२४॥ एवंव्रजतिराजेन्द्रेव्याधवर्गेचवल्गति ॥ कुर्वन्कोलाहलंतत्रसारङ्गोनिर्गतोवनात् ॥२५॥ स्फा[5]लवेगक्रमा
क्रान्तदुर्गमार्गमहीतलः ॥ कदाचिद्गगनारूढःकदाचिद्भूमिगोचरः ॥२६॥वक्रस्रोतोऽतिगम्भीरंकण्टकद्रुमसङ्कुलम् ॥ प्रविष्टोविषमारण्यंराजासौतत्पदा
नुगः ॥२७॥ दूराद्दूरंतरंगत्वादेशाद्देशंचनिर्जनम् ॥ मृगादर्शनसंरम्भसंशुष्कगलकन्धरः ॥२८॥ताम्रतालुमुखःस्विन्नःश्रान्तपत्तिःस्खलद्ध्वनिः ॥अती
त्यदीर्घमार्गान्सतृषार्तोमध्यगेरवौ ॥२९॥ददर्शाग्रेतुकासारंस्पर्धयन्तमपांपतिम् ॥घनपादपतीरस्थंसुतीर्थंविमलंशुभम् ॥३०॥ विशालंविकचाम्भोजंमधु
मत्तमधुव्रतम् ॥ पद्मिनीपत्रपालाशच्छन्नंमरकतैरिव ॥३१॥ स्वच्छन्दमुच्चलन्मत्स्यंस्वच्छंसाधुमनोयथा ॥ चलज्जलचरैर्मिश्रवीचिराजिविराजितम् ॥
॥३२॥अन्तर्ग्राहगणक्रूरंखलानामिवमानसम् ॥ क्वचिच्छैवालदुर्गम्यंकृपणस्येवमन्दिरम् ॥३३॥नानाविहङ्गसर्वार्तिंशमयन्तंदिवानिशम् ॥दातारमिव
सर्वस्वैरापन्नार्तिप्रणाशनम् ॥३४॥ तर्पयन्तंनिजाम्भोभिःश्वापदान्स्वपितॄनिव ॥ हरन्तंसर्वसंतापंहिमांशुमिवचाह्निकम् ॥ ३५ ॥ तंदृष्ट्वाभूद्गतग्लानि
श्चातकोजलदंयथा ॥ तत्रपीतजलोराजाकृतमाध्याह्निकक्रियः ॥ ३६ ॥ भुक्त्वाखे[6]टकमांसानिसहायैःसहितोनृपः ॥ उवाससरसस्तीरेसुरम्यांकथय
न्कथाम् ॥३७॥ ततःशरासनेबाणंकृत्वारात्रौस्थि[7]तस्तरौ ॥ व्याधाःसंधानमास्थायरुरुधुःककुभांपथः ॥३८॥एवंस्थितेषुवीरेषुवनेविस्तार्यवागुराम् ॥

१ 'कान्तारेषु' इ०पा० । २ 'धावच्छ्वापददिङ्मुखाम्' इ०पा० ।३ 'संलीनोलूकीनाद' इ० पा० । ४ 'क्वचिल्लतागृहद्वारं भृङ्गघोरणतोरणम्' इ०पा० । ५ 'फालवेग' इ०पा० । ६ 'खेटकसंपन्नम्' इ०पा० ।
७ 'स्थितस्तटे' इ० पा० ।

निशार्धेनिर्गतंयूथंसूकराणांतटेतटे ॥ ३९ ॥ चरित्वासरसीकन्दान्पपातव्याधसङ्कुले ॥ राज्ञाविद्धाश्वतेक्रोडाव्याधैश्चबहवोहताः ॥ ४० ॥ क्षणे
नैववराहास्तेविद्धाःपेतुर्महीतले ॥ तान्दृष्ट्वातुमुलंनादंव्याधाश्चक्रुःसुदर्पिताः ॥ ४१ ॥ धावन्तःप्रमुदायुक्तामिलितायत्रभूपतिः ॥ तानादाय
भटैर्भूयोनिःसृतःसरसीतटात् ॥ ४२ ॥ स्वपुरंगन्तुकामोऽसौदृष्टवान्पथितापसम् ॥ ब्राह्मणंवृद्धहारीतंशङ्ख[1]चक्रसुशोभितम् ॥४३ ॥ नियमैर्दुष्करैरुग्रैः
परिक्षीणकलेवरम् ॥ अ[2]स्थिशेषंमहादान्तंविस्फुरत्कर्कशत्वचम्॥४४॥दधानंहारिणंचर्मवसानंमृदुवल्कलम् ॥ कुर्वाणंनैगमंजाप्यंनखलोमजटाधरम्॥
॥ ४५ ॥ तंवनाश्रमिणंदृष्ट्वामार्गंदत्त्वाससंभ्रमः ॥ प्रणम्यशिरसाराजाकृतपञ्चाञ्जलिःस्थितः ॥ ४६ ॥ अथचैनमलङ्कारैर्द्विजोनिश्चित्यभूमिपम् ॥
उवाचश्रेयसेहेतोःपरोपकृतिवाञ्छया ॥४७॥ किमर्थंगम्यतेराजन्कालेपुण्यतमेशुभे ॥ माघमा[3]सेविहायैवप्रातःस्नानंसरोवरे॥४८॥ प्रत्युवाचततोराजा
नाहंजानेद्विजोत्तम ॥ माघस्नानफलंकीदृक्तन्मेकथयविस्तरात् ॥ ४९ ॥ इतिभूपवचःश्रुत्वाप्राहवैखानसोमुनिः ॥ भगवान्द्युमणिःशीघ्रमभ्यु
देतितमोऽपहा ॥ ५० ॥ स्नानकालोऽयमस्माकंनकथावसरोनृप ॥ स्नात्वागच्छवसिष्ठंतंपृच्छस्वस्वकुलप्रभुम् ॥ ५१ ॥ इत्युक्त्वातापसोमौनीप्रातः
स्नानायनिर्गतः ॥ प्रत्यावृत्यदिलीपोऽपितत्रस्नात्वाययथाविधि ॥ ५२ ॥ पुनःस्वनगरींवीरोगतोऽसौहर्षपूरितः ॥ अन्तःपुरेनिवेद्याथ
वानप्रस्थकथांपुनः ॥ ५३ ॥ श्वेताश्वरथमारुह्यसुश्वेतच्छत्रचामरः ॥ सालङ्कारःसुवासाश्चसंवृतोमन्त्रिभिःसह ॥ ५४ ॥ जयशब्दान्पुनःशृण्व
न्स्तुतोमागधबन्दिभिः ॥ वसिष्ठस्याश्रमंयातऋषिवाक्यमनुस्मरन् ॥ ५५ ॥ तत्रैवनत्वाब्रह्मर्षिंविनयाचारपूर्वकम् ॥ दत्तासनोगृहीतार्घ्यआशीर्भिः
समलङ्कृतः ॥ ५६ ॥ सानन्दंमुनिनापृष्टःकुशलंभूपतिर्यदा ॥ तदाब्रवीद्वचोराजाहर्षयन्मुनिमानसम् ॥ सोऽपिवैखानसेनोक्तंपप्रच्छमधुराकृतिः॥५७॥
दिलीपउवाच ॥ भगवंस्त्वत्प्रसादेनश्रुताविस्तरतोमया ॥ आचारोदण्डनीतिश्चराजधर्माश्चयेपरे ॥ ५८ ॥ चतुर्णामपिवर्णानामाश्रमाणांच
याःक्रियाः ॥ दानानितद्विधानानियज्ञाश्चविधयस्तथा ॥ ५९ ॥ व्र[4]तानितत्प्रदिष्टानिविष्णोराराधनंतथा ॥ अधुनाश्रोतुमिच्छामिमाघस्नानेच
यत्फलम् ॥ विधेयंयद्विधानेनतन्मेब्रह्मन्मुनेवद ॥ ६० ॥ वसिष्ठउवाच ॥ सम्यगुक्तंपरंश्रेयोलोकत्रयहितावहम् ॥ नि[5]र्मलीकरणं
तेनमुनिनावनवासिना ॥ ६१ ॥ कटाक्षैःकामिनीनांतेप्रत्यासन्नमखण्डिताः ॥ कामयन्तेमृगाक्षेंतेस्रोतसिस्नातुमेवच ॥ ६२ ॥ विनावह्निं

१ 'वैखानसमतेस्थितम्'इ०पा०। २ 'तपसा कृशदेहं तं विस्फुटत्' इ० पा०। ३ ' विधायैव' । ४ 'व्रतानि तत्प्रतिष्ठाश्च' इ० पा०। ५'निर्मलीकरण लोकेमुनीनां वनवासिनाम्' इ० पा०।

CC-0. In Public Domain. Digitization by eGangotri

विनायज्ञमिष्टापूर्तंविनाप्रिये ॥ वाञ्छन्तिसद्व्रतिंस्नातुंप्रातर्माघेबहिर्जले ॥ ६३ ॥ गोभूहिरण्यमाणिक्यस्वर्णधेन्वादिकानिये ॥ अदत्त्वेच्छन्ति
चैकार्णेमाघेस्नातानराधिप ॥ ६४ ॥ त्रिःसप्ताहव्रतैःकृच्छ्रैःपराकैश्चनिजांतनुम् ॥ अशोष्येच्छन्तियेस्वर्गंतपसिस्नान्तुतेसदा ॥ ६५ ॥ हरेःपूजा
चवैशाखेतपःपूजाचकार्त्तिके ॥ तपोहोमस्तथादानंत्रयंमाघेविशिष्यते ॥ ६६ ॥ सानुबन्धोऽतिपर्यासोधराधीशोभवेद्ध्रुवम् ॥ कैवल्योत्पादका
बुद्धिर्ययावानभवेत्पुनः ॥ ६७ ॥ पदद्वयावरिवस्यासाविहितादिव्यलोचनैः ॥ तदनन्तंतपोदानंमाघेमासिनृपोत्तम ॥ ६८ ॥ सकामोवाप्रजायेवाहरये
तद्विनापिवा ॥ कायशुद्धिव्रतीभूत्वाचतुर्धास्नानजंफलम् ॥ ६९ ॥ निरन्नाअदितिःसस्नौमाघेद्वादशवत्सरे ॥ पुत्रांश्चद्वादशादित्यॉंल्लेभेत्रैलोक्य
दीपकान् ॥ ७० ॥ सुभगारोहिणीमाघादानशीलात्वरुन्धती ॥ शचीचरूपसंपन्नाप्रासादेसप्तभूमिके ॥७१॥ विमलीकृतशोभाढ्येनर्तकीललिताजिरे
द्वीपवर्णसमुच्छिन्नेरूपवत्स्त्रीजनाकुले ॥७२ ॥ गीतवादित्रनिर्घोषेमङ्गलाचारशोभिते ॥ वेदध्वनिपवित्रेचविद्वद्भिरलङ्कृते ॥ ७३ ॥ सुरार्चनरतेरम्ये
सदातिथिनिषेविते ॥ मुदितास्तेवसन्तीहयैःस्नातंमकरेरवौ ॥ ७४ ॥ यैर्दत्तंबहुमाघेचमुरारिश्चार्चितःस्तुतः ॥ इष्टवस्तुपरित्यागान्नियमस्यतुपाल
नात् ॥७५॥ धर्मसूतिःसदामाघःपापमूलंनिकृन्तति ॥ काममूलःफलद्वारानिष्कामोज्ञानदःसदा ॥७६ ॥ येलोकाज्ञानशीलानांयेलोकाविपिनौकसा
म् ॥ येलोकाविष्णुभक्तानांतेमाघस्नायिनांसदा ॥ ७७ ॥ देवलोकान्निवर्तन्तेपुण्यैरन्यैःपरन्तप ॥ कदाचिन्ननिवर्तन्तेमाघस्नानरतानराः ॥ ७८ ॥
माघेस्नात्वातुयोधेनुंदद्यान्मर्त्यःपयस्विनीम् ॥ तस्यायावन्तिरोमाणिसर्वाङ्गेचनृपोत्तम ॥ ७९ ॥ तावद्वर्षसहस्राणिस्वर्गलोकेमहीयते ॥ माघ
स्नानंप्रकुर्वाणोयोदद्यात्सगुडांस्तिलान् ॥८०॥ पातकंतस्यप्रक्षाल्यनिर्मलोभातिवैनरः ॥ सर्वेषांधान्यराशीनांतिलाःपापप्रणाशनाः ॥ ८१ ॥ तस्मा
न्माघेप्रयत्नेनतिलादेयानृपोत्तम ॥ माघस्नानंप्रकुर्वाणोदद्याद्ब्राह्मणभोजनम् ॥८२ ॥ पितॄन्संतर्प्यशुद्धात्मायातिविष्णोःपरंपदम् ॥ तस्मात्सर्वप्रय
त्नेनमाघोदानेननीयते ॥८३॥ अदानंनक्षिपेन्माघंसर्वदानृपसत्तम ॥ वित्तानुसारंज्ञात्वावैमाघेदानंसदाददेत् ॥८४॥ माघस्नानंतुयःकुर्यादुपानत्ककम
ण्डलून् ॥ ददातिब्राह्मणेभ्यश्चसस्वर्गेतिष्ठतिध्रुवम् ॥ ८५ ॥ माघस्नानमयंराजन्कुर्वाणस्तपउत्तमम् ॥दानंविनाक्षिपेन्नैवदानात्स्वर्गमवाप्यते ॥८६॥
दानेनप्राप्यतेस्वर्गोदानेनप्राप्यतेसुखम् ॥ दानेनहीयतेपापंमहापातकजंनृप ॥८७॥ अदानंनतपोभातिह्यसूर्यंगगनंयथा ॥ असन्ततिकुलंयद्वदाचारेण
विनागृहम् ॥ ८८ ॥ नातःपरतरंकिंचित्पवित्रंपापनाशनम् ॥ विद्याधरायसगीतंभृगुणामणिपर्वते ॥ ८९ ॥ राजोवाच ॥ ब्रह्मन्कदाभृगु

१ 'गोभूमितिलवासांसि स्वर्णधान्यानि कानि च ॥ अदत्त्वेच्छन्ति ये नाकं ते माघे स्नातुमुद्यताः ॥' इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

विंप्रोनिजगादमहीधरे ॥ तस्मैधर्मोपदेशंचकथ्यतांमेकुतूहलात् ॥ ९० ॥ वसिष्ठउवाच ॥ द्वादशाब्दंपुराराजन्नववर्षबलाहकः ॥ तेनोद्विग्नाःप्रजाः
क्षीणागताःसर्वादिशोदश ॥ ९१ ॥ खिलीभूतेतदामध्येहिमवद्विन्ध्ययोर्नृप ॥ स्वाहास्वधावषट्कारवेदाध्ययनवर्जिते ॥ ९२ ॥ सोपप्लवेतदालोके
लुप्तधर्मेचनिष्प्रभे ॥ फलमूलान्नपानीयशून्येवैभूमिमण्डले ॥ ९३ ॥ विन्ध्यपादतरुच्छन्नरम्यरेवातटाश्रमात् ॥ सहशिष्यैश्चनिर्गम्यहिमाद्रिंसगतो
भृगुः ॥९४॥ तत्रतिष्ठतिकैलासगिरेःपश्चिमतोगिरिः ॥ मणिकूटइतिख्यातोहेमरत्नशिलोच्चयः ॥९५॥ अधोधःस्फटिकश्वेतोमध्येनीलशिलोगिरिः ॥
भूतिभिःसर्वतःशुक्लोनीलकण्ठइवाबभौ ॥ ९६ ॥ सर्वत्रासौनीलशिलोहेमरेखान्तरान्तरः ॥ स्फुरद्विद्युल्लतःकृष्णोजीमूतइवराजते ॥९७॥ मूर्ध्निनील
शिलःशैलस्त्वधःकाञ्चनमेखलः ॥ नारायणइवाभातिपरिवीतइवाम्बरः॥९८॥अमेखलासुनीलाभोमध्येमध्येसितोपलः ॥ सतारकमिवव्योमशुशुभेस
महीधरः ॥९९॥लब्ध्वात्मनस्तनुंशुभ्रांदीप्तदिव्यौषधींधरः॥बहु[2]द्योतकरोभातिद्वितीयइवचन्द्रमाः ॥१००॥अधित्यकासुसंगीतैःकिन्नरीणांसकीचकैः॥
रम्भापत्रपताकाभिःशोभतेससदाऽचलः॥१॥हरितोपलवैदूर्यपद्मरागशिताश्मनाम् ॥ रुग्रश्मिमण्डलैःसोऽगइन्द्रचापैरिवावृतः ॥२॥सर्वधातुमयैर्हैमैर्ना
नारत्नैःप्रशोभितः॥[3]सोऽग्निज्वालैरिवात्युच्चैःशृङ्गःसर्वत्रवेष्टितः ॥३॥तस्यागत्यनितम्बेषुसतृणासुशिलासुच॥विद्या[4]धर्यःप्रसेवन्तेस्वपतीन्कामविक्लवाः
॥४॥निरुद्धान्तर्मरुन्मागाजितक्लेशाविरागिणः॥ध्यायन्त्यहर्निशंब्रह्मरम्यसानुगहासुच ॥५॥साक्षसूत्रकराःसिद्धाअर्धोन्मीलितलोचनः॥आराधयन्ति
भूतेशंसुन्दरीषुदरीषुच ॥६॥ मन्दारकुसुमामोदसुरभीकृतदिङ्मुखः॥एषनिर्झरिणीवारिझंकारमुखरःसदा॥७॥उपत्यकासुखेलद्भिर्वनस्थैःकलभैर्गजैः॥
कस्तूरीमृगयूथैश्चचारुचित्रमृगस्तथा ॥८॥ विलसच्चमरीवृन्दैर्विचित्रैःश्वापदैस्तथा ॥ नदत्पारावतैश्चैवचकोरैश्चापिकोकिलैः ॥९॥ राजहंसैर्मयूरैश्चस
दारम्यःसपर्वतः ॥ सेव्यमानःसदादेवैर्गुह्यकैरप्सरोगणैः॥११०॥राजोवाच॥बह्वाश्चर्यमयःशैलःसर्वसिद्धिसमाश्रयः॥भगवन्कियदुच्छ्रायःकियदायाम
विस्तरः ॥ ११ ॥ ऋषिरुवाच ॥ षट्त्रिंशद्योजनोच्छ्रायोमस्तकेदशयोजनः॥आयामविस्तराभ्यांसमूलेषोडशयोजनः ॥१२॥ हरिचन्दनमन्दारचूत
राजिविराजितः ॥ देवदारुद्रुमाकीर्णःसरलार्जुनशोभितः ॥१३॥ कालागरुलवङ्गैश्चनिकुञ्जैश्चलतागृहैः ॥ विराजतेगिरिश्रेष्ठःसदापुष्पफलप्रदः॥१४॥
तंदृष्ट्वापर्वतंरम्यंतदादुर्भिक्षपीडितः ॥ भृगुश्चकारतत्रैववसतिंहृष्टमानसः ॥ १५ ॥ (तस्मिन्मनोहरेशैलेकन्दरेषुवनेषुच) ॥ चिरकालंतपस्तेपेतपःसुनि
रतोभृगुः॥एवंतिष्ठतिराजेन्द्रद्विजेस्वाश्रमवासिनि ॥१६॥ अवतीर्यागतौशैलाद्द्वौविद्याधरदम्पती ॥ समागम्यमुनिंनत्वास्थितौतावतिदुःखितौ॥१७॥

१'सर्वनीलशिलाढ्यश्च' इ० पा०। २'बहुदीप्तिवृतोद्द्योतविवस्वानिव भाति सः' इ० पा०। ३ 'साग्निज्वालैरिवोच्चैः स' इ० पा० । ४ 'विद्याधरा हि सेवन्ते स्वपत्नीः कामविह्वलाः॥' इ० पा०।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तथाविधौचतौदृष्ट्वामञ्जुवाक्यंद्विजोऽब्रवीत् ॥वदविधाधरप्रीत्यायुवांकिमतिदुःखितौ॥१८॥श्रुत्वातस्यमुनेर्वाक्यंप्राहविद्याधरोद्विजम् ॥श्रूयतांतापस श्रेष्ठममदुःखस्यकारणम्॥ १९॥सुकृतस्यफलंप्राप्यप्राप्तोऽस्मित्रिदशालयम् ॥लब्ध्वाऽपिदेवतादेहंमुखंव्याघ्रस्यमेऽभवत्॥ १२० ॥नजानेकर्मणःकस्य विपाकोऽयमुपस्थितः ॥ इतिसंस्मृत्यसंस्मृत्यनलेभेशर्ममेमनः ॥ २१ ॥ अन्यच्चश्रूयतांविप्रयेनमेह्याकुलंमनः ॥ जायेयंममकल्याणीमधुवाणी सुरूपिणी ॥२२॥ नृत्यगीतकलाभिज्ञासर्वसद्गुणशालिनी ॥ यस्मिन्कालेकुमारीयंतदाचाऽमलयानया ॥ २३ ॥ विपञ्चीपरिवादिन्यातन्त्रीभिःसप्त भिर्भृशम् ॥ वीणावादरसाभिज्ञस्तोषितोनारदोमुनिः ॥२४॥ मुग्धभावेऽपिगायन्त्यात्वनयारक्तकण्ठया ॥ विचित्रस्वरनादज्ञोदेवराजोऽपितोषितः॥ ॥२५॥ अस्याःकौतुकभिन्नाङ्ग्यावादयन्त्याविपञ्चिकाम् ॥ नानावक्रगतिस्निग्धंश्रुत्वातंपञ्चमध्वनिम् ॥ २६ ॥ तुतोषोद्भिन्नरोमाञ्चोधुन्वन्मौलिं महेश्वरः ॥ शीलौदार्यगुणंग्रामरूपयौवनसंपदा ॥२७॥ नानयासदृशीनाकेकाचिदस्तिनितम्बिनी ॥ केयंदेवमुखीरामाकाहंव्याघ्रमुखःपुमान् ॥२८॥ इतिब्रह्मन्सदाचिन्त्यदह्यामिहृदिसर्वदा ॥ इतिविद्याधरप्रोक्तंश्रुत्वाचेक्ष्वाकुनन्दन ॥ २९ ॥ त्रिकालज्ञोभृगुःप्राहप्रहसन्दिव्यलोचनः ॥ शृणुविद्याधर श्रेष्ठविचित्रंकर्मणांफलम् ॥१३०॥प्राप्यप्राज्ञानमुह्यन्तिमुह्यन्त्यज्ञानचेतसः ॥ मक्षिकापदमात्रंतुयथाहिविषमंविषम् ॥३१ ॥क्रियात्वविहितालपापिवि पाकेदारुणातथा ॥ उपोष्यैकादशींमाघेतैलाभ्यङ्गःकृतस्त्वया ॥ ३२ ॥ द्वादश्यांप्राग्भवेदेहेतेनव्याघ्रमुखोभवान् ॥ उपोष्यैकादशींपुण्यांद्वादश्यां तैलसेवनात् ॥ ३३ ॥ कुरूपंप्राप्तवान्देहंपुराह्येवंपुरूरवाः ॥ दृष्ट्वात्मनःकुकायंसतेनदुःखेनदुःखितः ॥ ३४ ॥ गिरिराजंसमागम्यदेवतासरसस्तटे ॥ स्थित्वाचपरमप्रीत्याशुचिःस्नातःकुशासने ॥ ३५ ॥ नवनीलघनश्यामंनलिनायतलोचनम् ॥ शङ्खचक्रगदापद्मधरंपीताम्बरावृतम् ॥ ३६ ॥ कौस्तुभेनविराजन्तंवनमालाधरंहरिम् ॥ चिन्तयन्हृदयेराजानिगृहीताखिलेन्द्रियः ॥ ३७ ॥ मासत्रयंनिराहारस्तपस्तेपेसुदारुणम् ॥ अल्पेन तपसातुष्टःसतजन्मकृतार्चनः ॥ ३८ ॥ संस्मरंस्तस्यभूपस्यतदाप्रादुरभूत्स्वयम् ॥ माघस्यशुक्लपक्षेतुद्वादश्यांमकरेरवौ ॥ ३९ ॥ शङ्खा द्भिरभिषिच्याशुमुदातंचक्रवर्तिनम् ॥ वासुदेवोददौतस्मैस्मारयंस्तैलचेष्टितम् ॥ १४० ॥ अतीवसुन्दरंरूपंकमनीयंमनोहरम् ॥ येनतंचकमेदेवी उर्वशीदेवनायिका ॥ ४१ ॥ इत्थंलब्धवरोराजाकृतकृत्यःपुरंगतः ॥ इतिकर्मगतिंज्ञात्वाकिंविद्याधरखिद्यते ॥ ४२ ॥ भवान्परिजिहीर्षुश्चेदानवस्यविरूपताम् ॥ शीघ्रंमद्वचनादेवप्राचीनाघविनाशनम् ॥ ४३ ॥ माघमासेकुरुस्नानंमणिकूटनदीजले ॥ मुनिसिद्धसुरैर्जुष्ट

१ 'गुणारामा' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथयिष्यामितद्विधिम् ॥ ४४ ॥ तवभाग्यवशान्माघोनिकटःपञ्चमेऽहनि ॥ पौषस्यैकादशींशुक्लामारभ्यस्थण्डिलेशयः ॥ ४५ ॥ मासमेकं निराहारस्त्रिकालंस्नानमाचर ॥ त्रिकालमर्चयन्विष्णुंत्यक्तभोगोजितेन्द्रियः ॥ ४६ ॥ माघस्यैकादशीशुक्लायावद्विद्याधरोत्तम ॥ ततोनिर्दग्ध पापंत्वांद्वादश्यांपुण्यवासरे ॥ ४७ ॥ अभिषिच्यशिवैस्तोयैर्मन्त्रपूतैरहंसुर ॥ कामवक्त्रोपमंवक्त्रंकरिष्यामितवानघ ॥ ४८ ॥ देवता वदनोभूत्वात्वंविद्याधरसत्तम ॥ अनयावरवर्णिन्यासाधक्रीडयथासुखम् ॥ ४९ ॥ ज्ञातमाघप्रभावस्त्वंमाघस्नानंसदाकुरु ॥ यथामनोरथा वाप्तिर्जायतेतवसर्वदा ॥ १५० ॥ इत्युक्तंभृगुणातस्मैसर्वज्ञेनमहात्मना ॥ विद्याधरायराजेन्द्रपुनर्गाथाउदाहृता ॥ ५१ ॥ माघस्नानैर्विपन्नाशो माघस्नानैरघक्षयः ॥ सर्वयज्ञाधिकोमाघःसर्वदानफलप्रदः ॥ ५२ ॥ माघोगर्जतियज्ञेभ्योमाघोयोगाच्चगर्जति ॥ तीव्राच्चतपसोमाघोभोविद्याधर गर्जति ॥५३॥ पुष्करेचकुरुक्षेत्रेब्रह्मावर्तेपृथूदके ॥ अविमुक्तेप्रयागेचगङ्गासागरसंगमे ॥५४॥ यत्फलंदशभिर्वर्षैःप्राप्यतेनियमैर्नरैः ॥ तत्फलंप्राप्यते माघेत्र्यहस्नानान्नसंशयः ॥ ५५ ॥ स्वर्गलोकेचिरंरागोयेषांमनसिवर्तते ॥ यत्रक्वापिजलेतैस्तुस्नातव्यंमकरेरवौ ॥ ५६ ॥ आयुरारोग्यसंपत्तिरूप सौभाग्यतागुणाः ॥ येषांमनोरथास्तैस्तुनत्याज्यंमाघमज्जनम् ॥ ५७ ॥ येचबिभ्यतिनरकाद्येदारिद्र्याच्चसंचितात् ॥ सर्वथातैःप्रयत्नेनमाघेकार्यंनिम ज्जनम् ॥ ५८ ॥ दारिद्र्यपापदौर्भाग्यपङ्कप्रक्षालनायच ॥ माघस्नानान्नचान्योऽस्तिउपायोराजसत्तम ॥ ५९ ॥ श्रद्धाहीनानिकर्माणितथात्यल्प फलानिवै ॥ फलंददातिसंपूर्णंमाघस्नानंयथातथा ॥ १६० ॥ अकामोवासकामोवायत्रक्वापिबहिर्जले ॥ इहामुत्रचदुःखानिमाघस्नायीनविन्दति ॥ ६१ ॥ पक्षद्वयेयथाचन्द्रोवर्धतेक्षीयतेतथा ॥ पातकंक्षीयतेमाघेपुण्यराशिश्चवर्धते ॥ ६२ ॥ यथाचखन्याजायन्तेरत्नानिविविधानिच ॥ स्नानात्पुण्यानिजायन्तेनराणांमाघतस्तथा ॥६३॥ आयुर्वित्तंकलत्रादिसंपदःप्रभवन्तिच ॥ कामधेनुर्यथाकामंचिन्तामणिस्तुचिन्तितम् ॥६४॥ माघस्नानंददातीहतद्वत्सर्वान्मनोरथान् ॥ कृतेतपःपरंज्ञानंत्रेतायांयजनंतथा ॥ ६५ ॥ द्वापरेतुकलौज्ञानंमाघःसर्वयुगेषुच ॥ सर्वेषामेववर्णानामाश्र माणांचभूपते ॥ माघस्नानंतुधर्मस्यधाराभिरभिवर्षति ॥६६॥ वसिष्ठउवाच ॥ इतिवाक्यंभृगोःश्रुत्वातस्मिन्नेवाश्रमेसुरः ॥ सहैवभृगुणामाघेगिरौ निर्झरिणीतटे ॥ ६७ ॥ यथोक्तविधिनास्नानमकरोद्भार्ययासह ॥ भृगोरनुग्रहात्सोऽथसंप्राप्यमनसेप्सितम् ॥ ६८ ॥ देवतावदनोभूत्वासुमुदेमणि पर्वते ॥ अजगामभृगुर्विन्ध्यंतमनुग्राह्यहर्षितः॥६९॥मणिमयगिरिराजेस्नानमात्रेणमाघेमदनवदनरूपस्तत्रविद्याधरोऽभूत् ॥ क्षपितनियमदेहोविन्ध्य पादावतीर्णोभृगुरपिसहशिष्यैराजगामाथरेवाम् ॥१७०॥ अखिलभुवनसारंमाघमाहात्म्यमेतद्द्विजवरभृगुणोक्तंभूपविद्याधराय ॥ विविधफलविचित्रं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यःशृणोतीहनित्यंरुचिरसकलकामान्देववत्प्राप्नुयात्सः ॥ १७१ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०माघमाहात्म्येवसिष्ठदिलीपसंवादेचतुर्विंश त्यधिकशततमोऽध्यायः ॥२४॥ वसिष्ठउवाच ॥ अधुनामाघमाहात्म्यंप्रवक्ष्यामिनृपोत्तम ॥ पच्छतेकार्तवीर्यायदत्तात्रेयेणभाषितम् ॥१॥ दत्तात्रेयं हरिंसाक्षाद्वसन्तंसह्यपर्वते ॥ पप्रच्छतंद्विजंगत्वाराजामाहिष्मतीपतिः ॥२॥सहस्रार्जुनउवाच॥ भगवन्योगिनांश्रेष्ठसर्वेधर्माःश्रुतामया ॥ माघस्नान फलंब्रूहिकृपयाममसुव्रत ॥३॥ दत्तात्रेयउवाच ॥ श्रूयतांनपशार्दूलएतत्प्रश्नोत्तरंशुभम् ॥ ब्रह्मणोक्तंपुराह्येतन्नारदायमहात्मने ॥४॥ तत्सर्वंकथयिष्यामि माघस्नानफलंमहत् ॥ याथादेशंयथातीर्थंयथाविधियथाक्रियम् ॥ ५ ॥ अस्मिन्वैभारतेवर्षेकर्मभूमौविशेषतः ॥ अमाघस्नायिनांनृणांनिष्फलं जन्मकीर्तितम् ॥६॥ असूर्यंगगनंयद्वद्चन्द्रमुडुमण्डलम् ॥ तद्वन्नाभातिसत्कर्ममाघस्नानंविनानृप ॥७॥ व्रतैर्दानैस्तपोभिश्चनतथाप्रीयतेहरिः ॥ माघ मज्जनमात्रेणयथाप्रीणातिकेशवः ॥८॥ नसमंविद्यतेकिंचित्तेजःसौरेणतेजसा ॥ तद्वत्स्नानेनमाघस्यनसमाःक्रतुजाःक्रियाः॥९॥प्रीतयेवासुदेवस्यसर्व पापानुत्तये॥माघस्नानंप्रकुर्वीतस्वर्गलाभायमानवः॥१०॥किंरक्षितेनदेहेनसुपुष्टेनबलीयसा ॥अध्रुवेणाप्यशुचिनामाघस्नानंविनाभवेत्॥११॥अस्थि स्तम्भंस्नायुबद्धंमांसक्षतजलेपनम् ॥चर्मावनद्धंदुर्गन्धंपात्रंमूत्रपुरीषयोः॥१२॥जराशोकविपद्व्याप्तंरोगमन्दिरमातुरम्॥रजस्वलमनित्यंचसर्वदोषसमा श्रयम् ॥ १३ ॥ परोपतापितापार्तंपरद्रोहिपरंविषम् ॥ लोलुपंपिशुनंक्रूरंकृतघ्नंक्षणिकंतथा ॥ १४ ॥ दुष्पूरंदुर्धरंदुष्टंदोषत्रयसमन्वितम् ॥ अशुचि स्राविसच्छिद्रंतापत्रयविमोहितम् ॥१५॥ निसर्गतोऽधर्मरतंतृष्णाशतसमाकुलम् ॥ कामक्रोधमहालोभनरकद्वारसंस्थितम् ॥१६॥ क्रिमिविड्भस्म भवतिपरिणामेशुनांहविः ॥ ईदृक्छरीरंव्यर्थंहिमाघस्नानविवर्जितम्॥१७॥ बुद्बुदाइवतोयेषुपूतिकाइवजन्तुषु ॥ जायन्तेमरणायैवमाघस्नानविवर्जिताः ॥ १८ ॥ अवैष्णवोहतोविप्रोहतंश्राद्धमयोगिच ॥ अब्रह्मण्यंहतंक्षेत्रमनाचारंहतंकुलम् ॥१९॥ सदम्भश्चहतोधर्मःक्रोधेनैवहतंतपः ॥ अदृढंचहतंज्ञानं प्रमादेनहतंश्रुतम् ॥ २० ॥ गुर्वभक्ताहतानारीब्रह्मचारीतयाहतः ॥ अदीप्तेऽग्नौहतोहोमोहताभुक्तिरसाक्षिका ॥ २१ ॥ उपजीव्याहताकन्यास्वा र्थेपाकक्रियाहता ॥ शूद्रभिक्षोहतोयागःकृपणस्यहतंधनम् ॥ २२ ॥ अनभ्यासाहताविद्याहतोराजाविरोधकृत् ॥ जीवनार्थंहतंतीर्थंजीवनार्थंहतं व्रतम् ॥ २३ ॥ असत्याचहतावाणीतथापैशुन्यवादिनी ॥ संदिग्धश्चहतोमन्त्रोव्यग्रचित्तोहतोजपः ॥ २४ ॥ हतमश्रोत्रियेदानंहतोलोकश्चना स्तिकः ॥ अश्रद्धयाहतंसर्वंकृतंयत्पारलौकिकम् ॥ २५ ॥ इहलोकोहतोनृणांदरिद्राणांयथानृप ॥ मनुष्याणांतथाजन्ममाघस्नानंविनाहतम्॥

१ 'कृमिवर्चस्कभस्मास्थिपरिपाके समाकुलम् ॥ इ० पा०। २ 'दुर्भगा च' इ० पा०। ३ 'हताशक्तिरसात्त्विकी' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २६ ॥ मकरस्थेरवौयोहिनस्नात्यनुदितेरवौ ॥॰ कथंपापैःप्रमुच्येतकथंसत्रिदिवंव्रजेत् ॥ २७ ॥ ब्रह्महाहेमहारीचसुरापोगुरुतल्पगः ॥ माघ
स्नायीविपापःस्यात्तत्संसर्गीचपञ्चमः ॥ २८ ॥ माघमासेरटन्त्यापःकिंचिदभ्युदितेरवौ ॥ ब्रह्मघ्नंवासुरापंवाकंपतन्तंपुनीमहे ॥ २९ ॥ उपपा
पानिसर्वाणिपातकानिमहान्त्यपि ॥ भस्मीभवन्तिसर्वाणिमाघस्नायिनिमानवे ॥ ३० ॥ कम्पन्तेसर्वपापानिमाघस्नानसमागमे ॥ नाशकालोऽ
यमस्माकंयदिस्नास्यतिवारिणि ॥३१॥ एवंक्रोशन्तिपापानिदृष्ट्वास्नानोद्यतंनरम् ॥ पावकाइवदीप्यन्तेमाघस्नानैर्नरोत्तमाः ॥ ३२ ॥ विमुक्ताः
सर्वपापेभ्योमेघेभ्यइवचन्द्रमाः ॥ आर्द्रशुष्कंलघुस्थूलंवाङ्मनःकर्मभिःकृतम् ॥३३॥ माघस्नानंदहेत्पापंपावकःसमिधोयथा ॥ प्रामादिकंचयत्पापं
ज्ञानाज्ञानकृतंचयत् ॥ ३४॥ स्नानमात्रेणतन्नश्येन्मकरस्थेदिवाकरे ॥ निष्पापास्त्रिदिवंयान्तिपापिष्ठायान्तिशुद्धताम् ॥ ३५ ॥ संदेहोनात्रकर्तव्यो
माघस्नानेनराधिप ॥सर्वेऽधिकारिणोमाघेविष्णुभक्तौयथानृप ॥३६॥ सर्वेषांस्वर्गदोमाघःसर्वेषांपापनाशनः ॥एषएवपरोमन्त्रोह्येतदेवपरंतपः॥३७॥
प्रायश्चित्तंपरंचैतन्माघस्नानमनुत्तमम् ॥ नृणांजन्मान्तराभ्यासान्माघस्नानेमतिर्भवेत् ॥ ३८ ॥ अध्यात्मज्ञानकौशल्यंजन्माभ्यासाद्यथानृप ॥
संसारकर्दमालेपप्रक्षालनविशारदम् ॥३९॥ पावनंपावनानांचमाघस्नानंपरंनृप ॥ स्नान्तिमाघेनयेराजन्सर्वकामफलप्रदे ॥४०॥ कथंतेभुञ्जतेभोगां
श्चन्द्रसूर्यग्रहोपमान् ॥ शृणुराजन्महाश्चर्यंमाघस्नानप्रभावजम् ॥४१॥ कुब्जिकानामकल्याणीब्राह्मणीभृगुवंशजा ॥बालवैधव्यदुःखार्तातपस्तेपेसुदु
स्तरम् ॥ ४२ ॥ विन्ध्यपादेमहाक्षेत्रेरेवाकपिलसंगमे ॥ तत्रसाव्रतिनीभूत्वानारायणपरायणा ॥ ४३ ॥ सदाचारवतीनित्यंनित्यंसङ्गविवर्जिता ॥
जितेन्द्रियाजितक्रोधासत्यवागल्पभाषिणी ॥ ४४ ॥ सुशीलादानशीलाचदेहशोषणशालिनी ॥ पितृदेवद्विजेभ्यश्चदत्त्वाहुत्वातथानले ॥ ४५ ॥
षष्ठेकालेचसाभुङ्क्तेह्युञ्छवृत्तिःसदानृप ॥ कृच्छ्रातिकृच्छ्रपाराकतप्तकृच्छ्रादिभिर्व्रतैः ॥ ४६ ॥ पुण्यान्नयतिसामासान्नर्मदायाश्चरोधसि ॥ एवं
तयातपस्विन्यावल्कलिन्यासुशीलया ॥ ४७ ॥ सुमहासत्त्वशालिन्याधृतिसंतोषयुक्तया ॥ षष्टिर्माघास्तयास्नातारेवाकपिलसंगमे ॥ ४८ ॥
ततःसातपसाक्षीणातस्मिंस्तीर्थेमृतानृप ॥ माघस्नानजपुण्येनतेनसावैष्णवेपुरे ॥ ४९ ॥ उवासप्रमुदायुक्ताचतुर्युगसहस्रकम् ॥ सुन्दोपसुन्द
नाशायपश्चात्पद्मभवात्पुनः ॥ ५० ॥ तिलोत्तमेतिनाम्नासाब्रह्मलोकेऽवतारिता ॥ तेनपुण्यस्यशेषेणरूपस्यैकायनंययौ ॥ ५१ ॥ अयो
निजाबलारत्नंदेवानामपिमोहिनी ॥ लावण्यह्रदिनीतन्वीसाभूदप्सरसांवरा ॥ ५२ ॥ निपुणस्यविधेःस्रष्टुर्नूनमाश्चर्यकारिणी ॥ तामुत्पाद्य

१'कुक्षौ' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विधातावैतुष्टोऽनुज्ञांतदाददौ ॥ ९३ ॥ एणशावाक्षिगच्छत्वंदैत्यनाशायसत्वरम् ॥ ततःसाब्रह्मणोलोकाद्धीणामादायभामिनी ॥ ९४ ॥ गता पुष्करमार्गेणयत्रतौदेववैरिणौ ॥ तत्रस्नात्वातुरेवायाःपवित्रेनिर्मलेजले ॥ ९५ ॥ परिधायाम्बरंरक्तंबन्धूककुसुमप्रभम् ॥ रणद्वलयिनीचारु शिञ्जन्मेखलनूपुरा ॥ ९६ ॥ लोलमुक्तावलीकण्ठीचलत्कुण्डलशोभना ॥ माधवी[1]कुसुमापीडाकंकेली[2]विटपेस्थिता ॥ ९७ ॥ गायन्ती सुस्वरंसापिपीडयन्तीतुवल्लकीम् ॥ स्वरषड्जंमूर्च्छयन्तीसुस्निग्धंकोमलंकलम् ॥ ९८ ॥ इत्थंतिलोत्तमाबालातिष्ठन्त्यशोककानने ॥ दृष्टादैत्य भटैरिन्दोःकलेवसुखदाहृदि ॥ ९९ ॥ तांदृष्ट्वाविस्मितैराजन्सानन्दैःसैनिकैर्भृशम् ॥ त्वरमाणैरदृष्टैवगत्वासुन्दोपसुन्दयोः ॥ ६० ॥ कथिता संभ्रमेणैववर्णयित्वापुनःपुनः ॥ हेदैत्यौनविजानीमोदेवीवादानवीनुकिम् ॥ ६१ ॥ नागाङ्गनाथवायक्षीस्त्रीरत्नंसर्वथातुसा ॥ युवांरत्नभुजौ लोकेरत्नभूताहिसाऽबला ॥ ६२ ॥ वर्ततेनातिदूरेऽग्रेह्यशोकेशोकहारिणी ॥ गत्वातांपश्यतंशीघ्रंमन्मथस्यापिमोहिनीम् ॥ ६३ ॥ इतिसेनापतीनां तौश्रुत्वावाचंमनोहराम् ॥ चषकंसीधु[3]नस्त्यक्त्वाविहायजलसेचनम् ॥ ६४ ॥ उत्तमस्त्रीसहस्राणित्यक्त्वातस्माज्जलाशयात् ॥ शतभारायसीं क्रूरांकालदण्डोपमांगदाम् ॥ ६५ ॥ भिन्नाभिन्नांगृहीत्वातुजवेनाभिप्लुतंगतौ ॥ यत्रशृङ्गारसज्जासाहन्तुंचण्डीवसंस्थिता ॥ ६६ ॥ राजन्संधुक्षयन्ती वदैत्ययोर्मन्मथानलम् ॥ स्थि[4]त्वातस्याःपुरोजाल्मौतद्रूपेणविमोहितौ ॥ ६७ ॥ विशेषान्मधुनामत्तावूचतुस्तौपरस्परम् ॥ भ्रातर्विरमभार्येयं ममास्तुवरवर्णिनी ॥ ६८ ॥ त्वमेवार्यत्यजैतांमेभार्यांतुमदिरेक्षणाम् ॥ इत्याग्रहेणसंरब्धौमातङ्गाविवसोन्मदौ ॥ ६९ ॥ अन्योन्यंकाल निर्दिष्टौगदयाजघ्नतुस्तदा ॥ परस्परप्रहारेणगतासूपतितौभुवि ॥ ७० ॥ तौमृतौसैनिकैर्दृष्ट्वाकृतःकोलाहलोमहान् ॥ कालरात्रिसमाकेयंहाकि मेतदुपस्थितम् ॥ ७१ ॥ एवंवदत्सुसैन्येषुदैत्यौसुन्दोपसुन्दकौ ॥ पातयित्वागिरेःशृङ्गेह्लादिनीवतिलोत्तमा ॥ ७२ ॥ प्रस्थितागगनंशीघ्रं द्योतयन्तीदिशोदश ॥ देवकार्यंततःकृत्वाआगताब्रह्मणःपुरः ॥ ७३ ॥ ततस्तुष्टेनदेवेनविधिनासानुमोदिता ॥ स्थानंसूर्यरथेदत्तंतवचन्द्राननेमया ॥ ७४ ॥ भुङ्क्ष्वभोगाननेकांस्त्वंयावत्सूर्योऽम्बरेस्थितः ॥ इत्थंसाब्राह्मणीराजन्भूत्वाचाप्सरसांवरा ॥ ७५ ॥ भुङ्क्तेऽद्यापिरवेर्लोकेमाघ स्नानफलंमहत् ॥ तस्मात्प्रयत्नतोराजञ्छ्रद्दधानैःसदानरैः ॥ ७६ ॥ स्नातव्यंमकरादित्येवाञ्छद्भिःपरमांगतिम् ॥ ना[5]नवाप्तोऽत्रतस्यास्ति पुरुषार्थोहिकश्चन ॥ ७७ ॥ नाक्षीणंपातकंकिंचिन्माघेमज्जतियोनरः ॥ तुलयन्तिनतेनात्रयज्ञाःसर्वेसदक्षिणाः ॥ ७८ ॥ माघस्नानेनराजेन्द्र

१ 'मालती' इति पा० । २ कङ्केली अशोकवृक्षः । ३ 'शीघ्रत' इ० पा० । ४ 'स्थित्वा दैत्यौ पुरस्तस्या' इ० पा० । ५ 'स्नातांवाङ्मात्रतश्चास्ति' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तीर्थेचैवविशेषतः ॥ नचान्यत्स्वर्गदंकर्मनचान्यत्पापनाशनम् ॥ ७९ ॥ नचान्यन्मोक्षदंयस्मान्माघस्नानसमंभुवि ॥ ८० ॥ इतिश्री पाद्मेमहापुराणेपञ्चपञ्चा० उत्तर० माघमाहात्म्येवसिष्ठदिलीपसंवादेमाघस्नानप्रशंसायांसुन्दोपसुन्ददैत्यवधोनामपञ्चविंशत्यधिकशततमोऽध्यायः ॥ ॥ १२५ ॥ कार्तवीर्यउवाच ॥ हेतुनाकेनविप्रर्षेमाघस्नानेमहाद्भुतः ॥ प्रभावोवर्ण्यतेनूनंतन्मेकथयसुव्रत ॥ १ ॥ गतपापोयदेकेनद्वितीये नदिवंगतः ॥ वैश्योऽसौमाघपुण्येनब्रूहिमेतत्कुतूहलम् ॥ २ ॥ दत्तात्रेयउवाच ॥ निसर्गात्सलिलंमेध्यंनिर्मलंशुचिपाण्डुरम् ॥ मलहं पुरुषव्याघ्रद्रावकंदाहनाशनम् ॥ ३ ॥ तारकंसर्वभूतानांपोषणंजीवनंचयत् ॥ आपोनारायणोदेवःसर्ववेदेषुपठ्यते ॥ ४ ॥ ग्रहाणांचयथा सूर्योनक्षत्राणांयथाशशी ॥ मासानांचतथामाघःश्रेष्ठःसर्वेषुकर्मसु ॥ ५ ॥ मकरस्थेरवौमाघेप्रातःकालेतथाऽमले ॥ गोष्पदेऽपिजलेस्नानं स्वर्गदंपापिनामपि ॥ ६ ॥ योगोऽयंदुर्लभोराजंस्त्रैलोक्येसचराचरे ॥ अस्मिन्योगेत्वशक्तोऽपिस्नायाद्यदिदिनत्रयम् ॥ ७ ॥ दद्यात्किंचिदशक्तो ऽपिदारिद्र्याभाववाञ्छया ॥ त्रिस्नानेनापिमाघस्यधनिनोदीर्घजीविनः ॥ ८ ॥ पञ्चवासत्तवाहानिचन्द्रवद्वर्धतेफलम् ॥ संप्राप्तेमकरादित्ये पुण्येपुण्यप्रदेनृणाम् ॥ ९ ॥ सत्कार्यास्तिथयःसर्वाःस्नानदानादिकर्मसु ॥ कर्तारंयापयन्तीह्यक्षयंशाश्वतंपदम् ॥ १० ॥ तस्मान्माघे बहिःस्नायादात्मनोहितकाम्यया ॥ अथातःसंप्रवक्ष्यामिमाघस्नानविधिंपरम् ॥ ११ ॥ कर्तव्योनियमःकश्चिद्व्रतरूपीनरोत्तमैः ॥ फलाति शयहेतोर्वैकिंचिद्भोज्यंत्यजेद्बुधः ॥ १२ ॥ भूमौशयीतहोतव्यमाज्यंतिलविमिश्रितम् ॥ त्रिकालंचार्चयेद्विष्णुंवासुदेवंसनातनम् ॥ १३ ॥ दातव्यो दीपकोऽखण्डोदेवमुद्दिश्यमाधवम् ॥ इन्धनंकम्बलंवस्त्रमुपानत्कुङ्कुमंघृतम् ॥१४॥ तैलंकार्पासकोष्ठंचतूलींतूलवटींपटीम्॥अन्नंचैवयथाशक्तिदेयंमाघे नराधिप ॥ १५ ॥ सुवर्णरत्तिकामात्रंदद्याद्द्वेदविदेतथा ॥ तद्दानमक्षयंराजन्समुद्रइवसर्वदा ॥ १६ ॥ परस्याग्निंनसेवेतत्यजेच्चैवप्रतिग्रहम् ॥ माघान्तेभोजयेद्विप्रान्यथाशक्तिनराधिप ॥ १७ ॥ देयाचदक्षिणातेभ्यआत्मनःश्रेयइच्छता ॥ एकादशीविधानेनमाघस्योद्यापनंतथा ॥१८॥ कर्तव्यंश्रद्दधानेनह्यक्षय्यस्वर्गवाञ्छया ॥ अनन्तपुण्यावाप्त्यर्थंविष्णुसंप्रीतिहेतवे ॥ १९ ॥ मकरस्थेरवौमाघेगोविन्दाच्युतमाधव ॥ स्नानेनानेन भोदेवयथोक्तफलदोभव ॥ २० ॥ इतिमन्त्रंसमुच्चार्यस्नायान्मौनीसमाहितः ॥ वासुदेवंहरिंकृष्णंमाधवंचस्मरेत्पुनः ॥ २१ ॥ गृहेऽपिसजलं कुम्भंवायुनानिशिपीडितम् ॥ तत्स्नानंतीर्थसदृशंसर्वकामफलप्रदम् ॥ २२ ॥ तत्रव्रतेनदातव्यंसान्नंचोपस्करान्वितम् ॥ तत्स्नानस्यप्रभावेणनरो

१ 'परान्नानि न सेवेत' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननिरयंव्रजेत् ॥ २३ ॥ तत्तेनवारिणास्नानंयद्गृहेक्रियतेनरैः ॥ षडब्दफलदंतद्धिमकरस्थेदिवाकरे ॥ २४ ॥ बहिःस्नानंतुवाप्यादौद्वादशाब्द
फलंस्मृतम् ॥ तडागेद्विगुणंराजन्नद्यांचैवचतुर्गुणम् ॥ २५ ॥ शतधादेवखातेषुशतधातुमहानदे ॥ शतंचतुर्गुणंराजन्महानद्योश्चसंगमे ॥२६॥ सहस्र
गुणितंसर्वंतत्फलंमकरेरवौ ॥ गङ्गायांस्नानमात्रेणलभतेमानवोनृप ॥ २७ ॥ गङ्गायांयेऽवगाहन्तेमाघमासेनृपोत्तम ॥ चतुर्युगसहस्रंतुनपतन्ति
सुरालयात् ॥ २८ ॥ दिनेदिनेसहस्रंतुसुवर्णानांविशांपते ॥ तेनदत्तंतुगङ्गायांयोमाघेस्नातिमानवः ॥ २९ ॥ शतेनगुणितंमाघेसहस्रंराजसत्तम ॥
निर्दिष्टमृषिभिःस्नानंगङ्गायामुनसंगमे ॥ ३० ॥ पापौघभूरिभारस्यदाहार्थेचप्रजापतिः ॥ प्रयागंविदधेभूपप्रजानांचहितेस्थितः ॥३१॥ शृणुस्थान
मिदंसम्यक्सितासितजलंकिल ॥ पापरूपपशूनांचब्रह्मणाविहितंपुरा ॥ ३२ ॥ सितासितजलेमज्जेदपिपापशतान्वितः ॥ मकरस्थेरवौमाघेनैवगर्भेषु
मज्जति ॥ ३३ ॥ सूनारतोऽपियोमर्त्यःप्रयागेस्नानमाचरेत् ॥ माघेमासिनरव्याघ्रसयातिपरमंपदम् ॥ ३४ ॥ सितासितातुयाधारासरस्वत्याविग
र्भिता ॥ तन्मार्गंविष्णुलोकस्यसृष्टिकर्तासर्सजवै ॥ ३५ ॥ दुस्तरावैष्णवीमायादेवैरपिसुदुर्जया ॥ प्रयागेदह्यतेसातुमाघेमासिनराधिप ॥ ३६ ॥
तेजोमयेषुलोकेषुभुक्त्वाभोगाननेकशः ॥ पश्चाच्चक्रिणिलीयन्तेप्रयागेमाघमज्जनात् ॥ ३७ ॥ उपस्पृशतियोमाघेमकरार्केसितासिते ॥ नतंत्पुण्यंच
सङ्ख्यातुंचित्रगुप्तोऽपिवेत्यलम् ॥ ३८ ॥ सन्निमज्जतियोमाघेमकरस्थे¹सितासिते ॥ तस्यपुण्यस्यमाहात्म्यंवक्तुंब्रह्मापिनक्षमः ॥ ३९ ॥ संवत्सरशतं
साग्रंनिराहारस्ययत्फलम् ॥ प्रयागेमाघमासेतुत्र्यहस्नानस्यतत्फलम् ॥४०॥ स्वर्णभारसहस्रेणकुरुक्षेत्रेरविग्रहे ॥ यत्फलंलभतेमाघेवेण्याःस्नानादिने
दिने ॥ ४१ ॥ राजसूयसहस्रस्यराजन्नविकलंफलम् ॥ सितासितेतुमाघेचस्नानानांभवतिध्रुवम् ॥४२॥ पृथिव्यांयानितीर्थानिपुर्यःसप्तचयाःपुनः ॥
वेण्यांस्नातुंसमायान्तिमाघेमासिनृपोत्तम ॥ ४३ ॥ सर्वतीर्थानिकृष्णानिपापिनांसङ्गदोषतः ॥ भवन्तिशुक्लवर्णानिप्रयागेमाघमज्जनात् ॥ ४४ ॥
आकल्पसंचितंपापंजन्मभिर्यन्नरैर्नृप ॥ तद्भवेद्भस्मसान्माघेस्नातानांचसितासिते ॥ ४५ ॥ वाङ्मनःकायजंपापंनरस्यविलयंव्रजेत् ॥ प्रयागेमाघ
मासेतुत्र्यहस्नातस्यनिश्चितम् ॥ ४६ ॥ प्रयागेमाघमासेयस्त्र्यहंस्नातिचमानवः ॥ पापंत्यक्त्वादिवंयातिजीर्णांत्वचमिवोरग ॥ ४७ ॥ कुरुक्षेत्रसमा
गङ्गायत्रकुत्रावगाहिता ॥ तस्माद्दशगुणापुण्यायत्रविन्ध्येनसङ्गता ॥४८॥ तस्माच्छतगुणागङ्गाकाश्यामुत्तरवाहिनी ॥ काश्याःशतगुणाप्रोक्तागङ्गा
यामुनसंगमे ॥ ४९ ॥ सासहस्रगुणातासांभवेत्पश्चिमवाहिनी ॥ याराजन्दर्शनादेवब्रह्महत्यापहारिणी ॥ ५० ॥ यापश्चाद्वाहिनीगङ्गाकालिन्द्यासह

१ 'तस्य पुण्यमसङ्ख्यातं चित्रगुप्तो लिखेत्फलम्' इ०पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संगता ॥ हन्तिकोटिकृतंपापंसामाघेनृपदुर्लभा ॥ ५१ ॥ यत्कथ्यतेऽमृतंराजन्सावेणीभुविकीर्तिता ॥ तस्यांमाघेमुहूर्तंतुदेवानामपिदुर्लभम् ॥५२॥
ब्रह्माविष्णुर्महादेवोरुद्रादित्यमरुद्गणाः ॥ गन्धर्वालोकपालाश्चयक्षकिन्नरपन्नगाः ॥ ५३ ॥ अणिमादिगुणैःसिद्धायेचान्येतत्त्ववादिनः ॥ब्रह्माणीपार्व
तीलक्ष्मीःशचीमेनादितिर्दितिः ॥ ५४ ॥ सर्वास्तादेवपत्न्यश्चतथानागाङ्गनानृप ॥ घृताचीमेनकारम्भाउर्वशीचतिलोत्तमा ॥५५ ॥ गणाह्यप्सरसां
सर्वेपितृणांचगणास्तथा ॥ स्नातुमायान्तितेसर्वेमाघेवेण्यांनराधिप ॥ ५६ ॥ कृतेयुगेस्वरूपेणकलौप्रच्छन्नरूपिणः ॥ प्रयागेमाघमासेतुत्र्यह
स्नानस्ययत्फलम् ॥ ५७ ॥ नाश्वमेधसहस्रेणतत्फलंलभतेभुवि ॥ त्र्यहस्नानफलंमाघेपुराकाञ्चनमालिनी ॥ राक्षसायददौभूपतेनमुक्तःसपाप
कृत् ॥ ५८ ॥ कार्तवीर्यउवाच ॥ भगवन्राक्षसःकोऽसौसाकाकाञ्चनमालिनी ॥ कथंदत्तवतीधर्मंकथंवातस्यसद्गतिः ॥ ५९ ॥ एतत्कथय
योगीन्द्रअत्रिसन्तानभास्कर ॥ यदित्वंमन्यसेश्राव्यंपरंकौतूहलंहिमे ॥ ६० ॥ दत्तात्रेयउवाच ॥ शृणुराजन्विचित्रंत्वमितिहासंपुरातनम् ॥
यस्यस्मरणमात्रेणवाजपेयफलंलभेत् ॥ ६१ ॥ अप्सरारूपसंपन्नानाम्नाकाञ्चनमालिनी ॥ प्रयागेमाघमासेसास्नात्वायातिहरालयम् ॥ ६२ ॥
निकुञ्जेगिरिराजस्यतिष्ठतागिरिरूपिणा ॥ दृष्टागगनमारूढातेनवृद्धेनरक्षसा ॥ ६३ ॥ तेजस्विनीसुहेमाभासुश्रोणीदीर्घलोचना ॥ चन्द्राननासुकेशी
चपीनोन्नतपयोधरा ॥ ६४ ॥ तांदृष्ट्वारूपसंपन्नामुवाचराक्षसस्तदा ॥ कात्वंकमलपत्राक्षिकुतआगम्यतेत्वया ॥ ६५ ॥ [1]आर्द्रंचवसनंकस्मात्सा
र्द्रातिकबरीकुतः ॥ कुतआगम्यतेभीरुकुतस्तेखेचरीगतिः ॥ ६६ ॥ केनपुण्येनवाभद्रेतवतेजोमयंवपुः ॥ अतीवरूपसंपन्नंसंभूतंचमनोहरम् ॥ ६७ ॥
त्वद्वस्त्रबिन्दुपातेनममसूर्ध्निसुलोचने ॥ क्षणेनह्यगमच्छान्तिंक्रूरंमेमानसंसदा ॥ ६८ ॥ नीरस्यमहिमाकोऽयमेतद्व्याख्यातुमर्हसि ॥ त्वंमेशीलवती
भासिनाकृतिर्निर्गुणाभवेत् ॥ ६९ ॥ अप्सराउवाच ॥ श्रूयतामप्सराश्चाहंभोरक्षःकामरूपिणी ॥ प्रयागतश्चागताहंनाम्नाकाञ्चनमालिनी ॥
॥ ७० ॥ आर्द्रःपरिकरोमेऽतःसुस्नाताहंसितासिते ॥ गन्तव्यंतुमयारक्षःकैलासेतुनगोत्तमे ॥७१॥ तत्रास्तेपार्वतीनाथःसुरासुरसुपूजितः ॥ वेणीवारिप्र
भावेणरक्षस्तेक्रूरतागता ॥ ७२ ॥ जाताहंयेनपुण्येनगन्धर्वस्यसुमेधसः ॥ कन्यकादिव्यरूपातुतत्सर्वंकथयामिते ॥ ७३ ॥ कलिङ्गाधि
पतेराज्ञस्त्वहमासंचवेश्यका ॥ रूपलावण्यसंपन्नासौभाग्यमदगर्विता ॥ ७४ ॥ अन्यासांयुवतीनांचतत्पुरेऽहंशिरोमणिः ॥ तज्जन्मनिमया
रक्षोभुक्ताभोगांन्यथेच्छया ॥ ७५ ॥ मोहितंतत्पुरंसर्वंमयायौवनसंपदा ॥ रत्नानिचविचित्राणिभूषणानिधनानिच ॥ ७६ ॥ वासांसिचित्र

१ 'तथा रतिः' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रूपाणिकर्पूरागुरुचन्दनम् ॥ एतच्चोपार्जितंसर्वंमयामोहनरूपया ॥ ७७ ॥ नाहंजानामिहेब्रह्मोऽन्तंस्वनिवासेनिशाचर ॥ संसेवन्तेयुवानोमे
चरणौकामपीडिताः ॥ ७८॥ मयातेवञ्चिताःसर्वेसर्वस्वेनतुमायया ॥ अन्योन्यस्पर्धाभावेनमृताःकेचित्तुकामिनः ॥ ७९ ॥ इत्थंतन्नगरे
रम्येसकलेमेगतिस्तदा ॥ प्राप्तेतुवार्द्धकेकालेशुशोचहृदयंमम ॥ नदत्तंनहुतंजप्तंनव्रतंचरितंमया ॥ ८० ॥ नाराधितोमयादेवश्चतुर्वर्गफलप्रदः ॥
नमयापूजितादेवीदुर्गादुर्गतिनाशिनी ॥ ८१ ॥ सर्वपापहरोविष्णुर्नस्मृतोभोगलुब्धया ॥ नचसंतर्पिताविप्रानकृतंप्राणिनांहितम् ॥ अणुमात्र
मिदंपुण्यंनकृतंचप्रमादतः ॥ ८२ ॥ पातकंतुकृतंभद्रतेनमेदह्यतेमनः ॥ बहुधैवंविलप्याहंब्राह्मणंशरणंगता ॥ ८३ ॥ ब्रह्मण्यंवेदविद्वांसं
तस्यराज्ञःपुरोहितम् ॥ सहिपृष्टोमयारक्षःकथंमेनिष्कृतिर्भवेत् ॥ ८४ ॥ पापस्यास्यद्विजश्रेष्ठकथंयास्यामिसद्गतिम् ॥ स्वेनैवकर्मणातप्तांवरा
कींदीनमानसाम् ॥ ८५ ॥ पापपङ्कनिमग्नांत्वंमामुद्धरकचग्रहैः ॥ मयिकारुण्यजंवारिवर्षहर्षदशाद्विज ॥ ८६ ॥ सज्जनेसाधवःसर्वेसाधुः
साधुरसज्जने ॥ इत्यसौमद्वचःश्रुत्वाचकारानुग्रहंमयि ॥ ऊचेप्रीतिकरंवाक्यंसर्वधर्ममयंद्विजः ॥ ८७ ॥ द्विजउवाच ॥ निषिद्धाचरणंजाने
सर्वंतेऽहंवरानने ॥ कुरुमेसत्वरंवाक्यंयाहिक्षेत्रंप्रजापतेः ॥ ८८ ॥ तत्रगत्वाकुरुस्नानंतेनपापक्षयस्तव ॥ सर्वंमनोगतंभद्रेत्वदीयंशोचितं
मया ॥ ८९ ॥ नाहमन्यत्प्रपश्यामियत्तेपापप्रणाशनम् ॥ प्रायश्चित्तंपरंतीर्थेस्नानंचऋषिभिःस्मृतम् ॥ ९० ॥ किंतुतीर्थेत्यजेद्धीरुमनसा
प्यशुभंकृतम् ॥ प्रयागस्नानशुद्धात्वंस्वर्गंयास्यसिनिश्चितम् ॥ ९१ ॥ प्रयागस्नानमात्रेणनृणांस्वर्गोनसंशयः ॥ अन्यदेशकृतंपापंतत्क्षणा
देवभामिनि ॥ ९२ ॥ प्रयागेविलयंयातिपापंतीर्थकृतंविना ॥ शृणुभीरुपुराशक्रोगौतमस्यमुनेर्वधूम् ॥ ९३ ॥ दृष्ट्वाकामवशंप्राप्तस्तांगतो
गुप्तकामुकः ॥ उग्रेणतेनपापेनतदैवजनितंफलम् ॥ ९४॥ ऋषिस्त्रीगन्तुरिन्द्रस्यतस्याश्चपुरतस्तदा ॥ कुत्सितंगर्हितंजातमितिलज्जाकरंवपुः ॥
॥ ९५ ॥ तद्भर्तुःशापमाहात्म्यात्सहस्रभगचिह्नितम् ॥ अधोमुखस्ततोभूत्वादेवराजोविनिर्गतः ॥ ९६ ॥ निनिन्दस्वकृतंकर्मसोऽभिभूतःसलज्जितः ॥
मेरोःशिरसितोयाढ्येशतयोजनविस्तृते ॥ ९७ ॥ तत्रगत्वाप्रविष्टस्तुहेमाम्भोरुहकोरके ॥ तत्रस्थोगर्हयन्नित्यमात्मानंमन्मथंतथा ॥९८॥ धिक्तांका
मात्मतांलोकेसद्यःपातकदायिनीम् ॥ययाहिनरकंयातिसर्वलोकविगर्हितः ॥ ९९ ॥ आयुःकीर्तियशोधर्मधैर्यध्वंसकरीतथा ॥ धिङ्मन्मथंदुराचार

१ 'धर्मे वै स्वनिवासे स्थिता सती' इ० पा० । २ 'पापपंकेनिमग्नां च मां समुद्धर कोविद' इ० पा० । ३ 'कुरु कारुण्यजं वारिदग्धाहं किं निरीक्षसे' इ० पा० । ४ 'कोटरे' इ० पा० । ५ 'दुराचारंनिर्लज्जपा
पदायिनम्' इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मापदांनियतंपदम् ॥ १०० ॥ देहस्थंदुर्दमंशत्रुमसंतुष्टंसदावशम् ॥ इत्थंवादिनिप्रच्छन्नेवासवेपद्मसद्मनि ॥ १ ॥ आखण्डलंविना
भीरुदेवलोकोनशोभते ॥ ततोदेवाःसगन्धर्वालोकपालाःसकिन्नराः ॥ २ ॥ शच्यासहसमागम्यपप्रच्छुस्तेबृहस्पतिम् ॥ भगवन्बल
भिद्देवंनैवजानीमहेवयम् ॥ ३ ॥ क्वतिष्ठतिगतःकुत्रकुत्रवामृगयामहे ॥ ननाकःशोभतेतेनविनादेवगणैःसह ॥ ४ ॥ सुपुत्रेणविनायद्वत्कु
लंश्रीमद्गुणान्वितम् ॥ उपायश्चिन्त्यतांसद्यःस्वर्लोकोयेनशोभते ॥ ५ ॥ सनाथःसुश्रियायुक्तोनविलम्बोऽत्रयुज्यते ॥ इतितेषांवचःश्रुत्वागुरु
र्वचनमब्रवीत् ॥ ६ ॥ जानेऽहंस्वापराधेनलज्जयायत्रतिष्ठति ॥ रभसालब्धकार्यस्यभुङ्क्तेसमघवाफलम् ॥ ७ ॥ नृणांनीतिपरित्यागाद्विपाकाः
स्युर्भयङ्कराः ॥ अहोराज्यमदैर्मत्तःकृत्याकृत्यमचिन्तयन् ॥ ८ ॥ कृतवान्निन्द्यमानंहिदृष्टादृष्टक्षयङ्करम् ॥ कुर्वन्तिबालिशायत्रदै
वोपहतबुद्धयः ॥ ९ ॥ ॥ अपराधाद्यथाजन्मस्यादिहामुत्रनिष्फलम् ॥ अधुनातत्रगच्छामोयत्रशक्रःसतिष्ठति ॥ ११० ॥ इत्युक्त्वा
निर्गताःसर्वेबृहस्पतिपुरोगमाः ॥ दृष्ट्वासरसिविस्तीर्णेस्वर्णपङ्कजकाननम् ॥ ११ ॥ तुष्टुवुर्देवराजंतेप्रबोधोयेनजायते ॥ ततोगुरोः
प्रबोधेननिर्गतःपद्मकुड्मलात् ॥ १२ ॥ दीनाननोविरूपस्तुव्रीडाकुञ्चितलोचनः ॥ जग्राहचरणाविन्द्रोगुरोस्तस्याग्रजन्मनः ॥
॥ १३ ॥ त्राहिमांनिष्कृतिंब्रूहिपापस्यास्यबृहस्पते ॥ देवराजवचःश्रुत्वाजगौविप्रोबृहस्पतिः ॥ १४ ॥ शृणुदेवेन्द्रवक्ष्येऽहमुपायंपाप
नाशनम् ॥ प्रयागस्नानमात्रेणतत्क्षणादेवपातकात् ॥ १५ ॥ मुच्यसेदेवराजत्वंतत्रयामःसहैवते ॥ अथपुरोधसासार्धमागत्यबलमर्दनः ॥
॥ १६ ॥ सस्नौसितासितेतीर्थेसद्योमुक्तोऽघौघैस्ततः ॥ अथदेवगुरुस्तस्मैप्रसन्नस्तुवरंददौ ॥ १७ ॥ प्रयागस्नानमात्रेणक्षीणंपापंतवानघ ॥
क्षीणपापस्यतेशक्रमत्प्रसादेनसत्वरम् ॥ १८ ॥ सहस्रमेतद्योनीनांसहस्रंस्याद्दृशांतव ॥ तदैवद्विजवाक्येनशुशुभेचशचीपतिः ॥ १९ ॥ लोचना
नांसहस्रेणपङ्कजैरिवमानसम् ॥ अथवृन्दारकैःसर्वैर्ऋषिभिश्चाभिपूजितः ॥ १२० ॥ गन्धर्वैःस्तूयमानस्तुगतःशक्रोऽमरावतीम् ॥ इत्थंसद्योविपापोऽ
भूत्प्रयागेपाकशासनः ॥ २१ ॥ याहित्वमपिकल्याणिप्रयागंदेवसेवितम् ॥ सद्यःपापविनाशायतथास्वर्गतयेदृढम् ॥ २२ ॥ इतितस्यवचः ॥१२३॥
श्रुत्वासेतिहासंसमङ्गलम्॥तदैवसंभ्रमापन्नानत्वापादौद्विजस्यतु ॥२३॥ त्यक्त्वाबन्धुजनंसर्वंदासदासीगृहंतथा ॥ सकलान्विषयान्त्रक्षोविषग्रासानिव
स्फुटम् ॥२४॥ वपुश्चक्षणविध्वंसिपश्यन्तीनिर्गताह्यहम् ॥ नरकार्णवसंपातदारुणान्तरवह्निना॥२५॥हृदयेकुणपव्याघ्रतदातत्तप्यमानया॥मयागत्वा

१ 'लक्ष्म्या विना गुणा इ० पा०। २ 'युक्ता भवामो ह्यधुना वयम्' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृतंस्नानंमाघेमासिसितासिते ॥ २६ ॥ तस्यस्नानस्यमाहात्म्यंशृणुवृद्धनिशाचर ॥ त्र्यहात्पापक्षयोजातःसप्तविंशतिभिर्दिनैः ॥ २७ ॥ शेषैर्मेयदभू
त्पुण्यंतेनदेवत्वमागता ॥ रममाणातुकैलासेगिरिजायाःप्रियासखी ॥ २८ ॥ जातिस्मरातथाजाताप्रयागस्यप्रभावतः ॥ स्मृत्वाप्रयागमाहात्म्यं
माघेमाघेव्रजाम्यहम् ॥ २९ ॥ इतिराक्षसयत्पृष्टंत्वयाविस्मितचेतसा ॥ तन्मयाकथितंसर्वंचरित्रंप्रीतयेतव ॥ ३० ॥ मत्प्रीतयेचरितंस्वंत्वंब्रूहिमम
राक्षस ॥ कर्मणाकेनजातोऽसिविरूपोऽतिभयङ्करः ॥ ३१ ॥ श्मश्रुलोदीर्घदंष्ट्रश्चक्रव्यादोगिरिगह्वरे ॥ ३२ ॥ राक्षसउवाच ॥ इष्टंददातिगृह्णातिगुह्यं
वदतिपृच्छति ॥ प्रीत्याहिसज्जनोभद्रेतच्चसर्वंत्वयिस्थितम् ॥ ३३ ॥ त्वयासंभावितोनूनंमन्येऽहंवामलोचने ॥ भाविनीनिष्कृतिःसद्यस्त्वयास्यक्रूर
कर्मणः ॥ ३४ ॥ अतोवक्ष्यामितेभद्रेदुष्कृतंयत्स्वयंकृतम् ॥ निवेद्यसज्जनेदुःखंततःसर्वसुखीभवेत् ॥ ३५ ॥ शृणुसुश्रोण्यहंकाश्यांबह्वृचोवेदपारगः
जातःपुराद्विजःश्रेष्ठःकुलेमहतिनिर्मले ॥३६॥राज्ञांदुष्कृतिनांभीरुशूद्राणांचतथाविशाम्॥वाराणस्यांकृतोघोरोमयादुष्टप्रतिग्रहः ॥३७॥ बहुधाबहुधा
वारंनिषिद्धःकुत्सितोबहु ॥ चाण्डालस्यापिनत्यक्तोमयादुष्टप्रतिग्रहः ॥ ३८ ॥ अन्यच्चपातकंतत्रममाभून्मूढचेतसः ॥ तन्नास्तिदुष्कृतंकर्ममयायत्रन
यत्कृतम् ॥ ३९ ॥ अन्यच्चश्रूयतांदोषःक्षेत्रस्यवरवर्णिनि ॥ अविमुक्तेऽणुमात्रंयत्तदघंमेरुतांव्रजेत् ॥१४०॥ नधर्मस्तुमयाकश्चित्संचितस्तत्रजन्मनि॥
॥ ४१ ॥ ततोबहुतिथेकालेमृतस्तत्रैवशोभने ॥ अविमुक्तप्रभावेणनचाहंनरकंगतः ॥ ४२ ॥ अविमुक्तेमृतःकश्चिन्नरकंनेतिकिल्बिषी ॥ अविमुक्ते
कृतंकिंचित्पापंवज्रीभवेद्दृढम् ॥४३ ॥ वज्रलेपेनपापेनतेनमेजन्मराक्षसम् ॥ रौद्रंक्रूरतरंपापंसंभूतंहिमपर्वते ॥४४॥ द्विर्जातोगृध्रयोनौप्राक्त्रिर्व्याघ्रोद्विः
सरीसृपः ॥ एकवारमुलूकस्तुविड्वराहस्ततःपरम् ॥ ४५ ॥ इदंतुदशमंजन्मराक्षसंममभामिनि ॥ अतीतानिसहस्राणिवर्षाणिममजन्मनः[1] ॥ ४६ ॥
नास्तिमेनिष्कृतिर्भद्रेएतस्माद्दुःखसागरात् ॥ अत्रत्रियोजनंसुभ्रूर्निर्जन्तुहिमयाकृतम् ॥ ४७ ॥ अनागसांचभूतानांबहूनांचकृतःक्षयः ॥ कर्मणातेन
मेसुभ्रूर्दह्यतेसततंमनः ॥ ४८ ॥ त्वद्दर्शनसुधासिक्तंगतंशैत्यंमनोमम ॥ तीर्थंफलतिकालेनसद्यःसाधुसमागमः ॥४९॥ अतःसत्संगतिंसुभ्रूःप्रशंसन्ति
मनीषिणः ॥ एतत्तेकथितंसर्वंस्वदुःखंहृद्गतंमया ॥१५०॥ विरलःसज्जनःसुभ्रूःस्वात्मायस्यनखिद्यते ॥ जानास्यत्रोचितंत्वंहिकिंचिन्नोवच्म्यतःपरम्॥
॥ ५१ ॥ अस्यदुःखोदधेःपारंकथंयामीतिचिन्तयन्[2] ॥ सज्जनानांसमाभूतिःसर्वेषामुपजीवनम् ॥ ५२ ॥ क्षीरार्णवःपयोदत्तेहंसायनबकायकिम् ॥
॥ ५३ ॥ दत्तात्रेयउवाच ॥ इतितस्यवचःश्रुत्वादयार्द्रीकृतमानसा ॥ धर्मदानेमतिंकृत्वाजगौकाञ्चनमालिनी ॥ ५४ ॥ करिष्येनिष्कृतिंरक्ष

१ 'वर्षाणां पञ्चसप्ततिः' इ० पा०। २ 'यामि सुलोचने' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानींखलुमाशुचः ॥ प्रतिज्ञांतुदृढांकृत्वायतिष्येतवमुक्तये॥५५॥बहवोहिकृतामाघावर्षेवर्षेयथाविधि ॥ श्रद्धापूर्वंमयाभद्रब्रह्मक्षेत्रेसितासित ॥५६॥
तांवदामितुसङ्ख्यातिंतस्यधर्मस्यराक्षस ॥ गूढोधर्मोहिकर्तव्यइत्यूचुर्विबुधाजनाः ॥ ५७ ॥ आर्तेदानंप्रशंसन्तिमुनयोवेदवादिनः ॥ सागरेवर्ष
तोभद्रांकिंमेघस्यफलंभवेत् ॥ ५८ ॥ अनुभूतंमयारक्षःस्वयंतत्पुण्यजंफलम् ॥ तत्तुदास्यामितेमित्रसद्यःपापविनाशनम् ॥ ५९ ॥ निष्पीड्याथततो
वस्त्रंजलंकृत्वाकराम्बुजे ॥ ददौसामाघजंपुण्यंतस्मैवृद्धायरक्षसे ॥१६०॥ शृणुराजन्विचित्रंहिप्रभावंमाघधर्मजम् ॥ तदैवंप्राप्यतत्पुण्यंविमुक्ताराक्षसी
तनुः ॥ ६१ ॥ संभूतोदेवताकारस्तेजोभास्करविग्रहः ॥ देवयानंसमारूढःसहर्षोत्फुल्ललोचनः ॥ ६२ ॥ द्योतमानस्तदाव्योम्निभासयन्प्रभया
दिशः ॥ दिव्यरूपधरोरेजेद्वितीयइवभास्करः ॥ ६३ ॥ ततोऽभिनन्दयामाससतांकाञ्चनमालिनीम् ॥ भद्रेवेत्तीश्वरोदेवःकर्मणांयःफलप्रदः ॥६४॥
तत्त्वयोपकृतंसर्वंयत्रमेनास्तिनिष्कृतिः ॥ इदानीमपिकारुण्यात्प्रसीदानुग्रहंकुरु ॥ ६५ ॥ शिक्षांविधेहिमेदेविसर्वनीतिमयींशुभाम् ॥ सर्वधर्म
करींनूनंनकुर्वेपातकंयथा॥६६॥तांश्रुत्वात्वदनुज्ञातःपश्चाद्यामिसुरालयम्॥६७॥दत्तात्रेयउवाच ॥ एतन्निशम्यतेनोक्तंप्रियंधर्ममयंवचः ॥ अतिप्रीत्या
ब्रवीद्धर्मंराजन्काञ्चनमालिनी॥६८॥धर्मंभजस्वसततंत्यजभूतहिंसांसेवस्वसाधुपुरुषाञ्जहिकामशत्रुम् ॥ अन्यस्यदोषगुणकीर्तनमाशुहित्वासत्यंवदार्च
यहरिंव्रजदेवलोकम्॥६९॥देहेऽस्थिमांसरुधिरेस्वमतिंत्यजत्वंजायासुतादिषुसदाममतांविमुञ्च॥पश्यानिशंजगदिदंक्षणभङ्गुरंहिवैराग्यभावरसिकोभव
योगनिष्ठः॥१७०॥प्रीत्यामयानिगदितंतवधर्ममार्गंचित्तेनिधेहिसकलंभवशीलयुक्तः ॥ संत्यज्यराक्षसतनुंधृतदेवदेहोज्योतिर्मयोव्रजयथासुखमाशुना
कम् ॥ ७१ ॥ श्रुत्वाधर्मंततोहृष्टःसंतुष्टोराक्षसोऽब्रवीत् ॥ भवप्रमुदितानित्यंसर्वदाशिवमस्तुते ॥७२॥ आचन्द्रार्कंरमस्वत्वंकैलासेशिवसन्निधौ ॥
उमयाऽखण्डितंप्रेमतवास्तुवरवर्णिनि॥७३॥धर्मनिष्ठातपोनिष्ठामातस्त्वंभवसर्वदा ॥ मास्तुलोभःशरीरेतआपन्नार्तिंसदाहर॥७४॥इत्युक्तातुप्रणम्याथ
सतांकाञ्चनमालिनीम् ॥ जगामराक्षसःस्वर्गंगन्धर्वैर्बहुभिःस्तुतः ॥ ७५ ॥ देवकन्यास्तदागत्यववर्षुःपुष्पवृष्टिभिः ॥ तस्याःकाञ्चनमालिन्यामूर्ध्नि
हर्षसमाकुलाः ॥ ७६ ॥ तामालिङ्ग्यततःप्रोचुःकन्यकास्तुप्रियंवचः ॥ कृतंभद्रेत्वयाचित्रंराक्षसस्यविमोक्षणम् ॥ ७७॥ दुष्टस्यास्यभयात्कश्चिद्विश
त्यस्मिन्नकानने ॥ अधुनानिर्भयाह्यत्रविचरामोयथासुखम् ॥ ७८ ॥ श्रुत्वातद्वचनंराजंस्तासांकाञ्चनमालिनी ॥ हृष्टातेनैवदानेनकृतकृत्यातदा
सती ॥ ७९ ॥ तंराक्षसंकाञ्चनमालिनीवरागन्धर्वकन्यापरिमोच्यसत्वरम् ॥ क्रीडन्त्यमूभिःप्रययौहरालयंप्रीत्यासपूर्णाचपरोपकारया ॥ १८० ॥

१ 'नानुवक्तुं समर्थाहं संख्यां' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संवादमेनंवरकन्यकेरितंभक्त्यापरंयःशृणुयाच्चमानवः ॥ नबाध्यतेजातुसदासराक्षसैर्धर्मेमतिस्तस्यभृशंहिजायते ॥ १८१ ॥ इतिश्रीपाद्मेमहापुराणे पञ्चप०उत्तर०माघमासमाहात्म्येदिलीपवसिष्ठसंवादेराक्षसमोक्षोनामषड्विंशत्यधिकशततमोऽध्यायः ॥ १२६ ॥ वसिष्ठउवाच ॥ कथितंमाघ माहात्म्यंदत्तात्रेयेणभाषितम् ॥ आधुनाहंप्रवक्ष्यामिमाघस्नानस्ययत्फलम्॥१॥सर्वक्रतुवरिष्ठंतुसर्वदानफलप्रदम् ॥ सर्वव्रततपस्तुल्यंमाघस्नानंपर न्तप ॥ २ ॥ स्नानेनमाघस्यविशुद्धमानसाःपितॄन्दिविस्थाप्यकुलद्वयस्यवै ॥ स्वर्गंप्रयान्तिस्वयमुज्ज्वलाननावरैर्विमानैरुचिरैश्चकामगैः ॥ ३ ॥ येमानवाःपापकृतोऽपिसर्वदासदादुराचाररताविमार्गगाः ॥ स्नात्वाहिमाघेहरिमर्चयन्तियेमुञ्चन्तितेऽपीहमहाघसंचयम् ॥ ४ ॥ सत्येनहीनाः पितृमादुःखदाह्यनाश्रमस्थाःकुलधर्मवर्जिताः ॥ येदाम्भिकास्तेऽपिनराःसतांगतिंस्नानैःप्रयान्त्यत्रहिमाघसंभवैः ॥ ५ ॥ पुण्येषुतीर्थेषुचमाघ मासेस्नानंनराणामतिदुर्लभंभुवि ॥ तस्माद्यतोब्रह्मविदांपदंनरैःसंप्राप्यतेनात्रविचारणामम ॥ ६ ॥ माघेतपोदानजपप्रसेवनंस्थानंहरेःपूजन मक्षयंनृप ॥ तस्माद्यथाशक्तिनरैःप्रयत्नतःस्नात्वाप्रदेयंवसनोन्नकाञ्चनम् ॥ ७ ॥ माघेऽन्नदाताऽमृतपःसुरालयेहेम्नश्चदाताबलभित्समी पगः ॥ दीपाग्निवासांसिददन्नरःसदासूर्यस्यलोकेवसतिप्रभामयः ॥ ८ ॥ यज्ञैःसुदानैःसुतपोभिरुज्ज्वलैःसुब्रह्मचर्यार्चनयोगसेवया ॥ शुद्धाभवन्तीहतथानपापिनःस्नानैर्यथापुण्यभवैस्तुमाघजैः ॥ ९ ॥ दुःखौघसंततिमसह्ययातनांयाम्यांनतेयान्त्यपिपापकारिणः ॥ येमाघ मासेवरतीर्थमज्जनंकुर्वन्तिचार्धोदितसूर्यमण्डले ॥ १० ॥ स्नात्वाचमाघेहरिमर्चयन्तियेस्वश्च्युताभूपतयोभवन्ति ॥ भव्याःसुरूपाःसुभगाः प्रियंवदाधर्मान्विताभूरिधनाःशतायुषः ॥ ११ ॥ दीप्तानलेकाष्ठचयोयथाहुतोभस्मावशेषोभवतीहतत्क्षणात् ॥ स्नानेनमाघस्यतथाविली यतेक्षुद्रोऽपिपापौघमहाघसंचयः ॥ १२ ॥ कायेनवाचामनसापिपातकंज्ञातंयदज्ञातमलङ्कृतंनरैः ॥ स्नानंचमाघेवरतीर्थसंभवंसर्वंदहेद्विष्णुरिवा शुद्धवृतः ॥ १३ ॥ संभुज्यमानाघफलंहिपार्थिवप्रमादतोऽपीहनृणांकदाचन ॥ स्नानंहिमाघस्ययतःप्रसज्यतेतदैवतत्संक्षयमेतिनिश्चितम् ॥ १४ ॥ गन्धर्वकन्यापृथिवीशशापजंसंभुज्यमानाघफलंदुरत्ययम् ॥ स्नानाद्विमुक्ताःखलुमाघमासजाद्वाक्यात्पुरालोमशजातमद्भुतम् ॥ १५ ॥ सूतउवाच ॥ श्रुत्वैतत्पार्थिवःप्रीत्यानत्वातत्पादपङ्कजम् ॥ श्रद्धयापरयानम्रस्तंपप्रच्छपुरोधसम् ॥ १६ ॥ भगवन्ब्रूहिकन्याभिःशापोह्यभिगतः कुतः ॥ कस्यापत्यानितास्तासांनामकिंकीदृशंवयः ॥ १७ ॥ कथंलोमशवाक्येनविपाकाच्छापसंभवात् ॥ विमुक्ताःकुत्रताःसस्नुर्मासंताः

१ 'दिनानि सप्तापि च पञ्चमानवाः' इ० पा० । २ 'वस्त्राग्निकाञ्चनम्' इ० पा० । ३ 'तीर्थमवैश्च माघजैः' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कतिसङ्ख्यया ॥१८॥ वसिष्ठउवाच ॥ श्रूयतांराजशार्दूलधर्मगर्भाकथापरा ॥ यथारणिर्वह्निगर्भाधर्मसूर्वह्निसूरिव ॥ १९ ॥ गन्धर्वःसुखसंगीतिस्त
स्यकन्याप्रमोदिनी ॥ सुशीलस्यसुशीलाचसुस्वरास्वरवेदिनः ॥ २० ॥ सुताराचन्द्रकान्तस्यचन्द्रिकासुप्रभस्यच ॥ इमानिवरनामानितासामप्स
रसांनृप ॥ २१ ॥ कुमार्यःपञ्चसर्वास्तावयसासुसमाःपुनः ॥ चन्द्रादिवविनिष्क्रान्ताश्चन्द्रिकेवसमुज्ज्वलाः ॥ २२ ॥ चन्द्राननाःसुकेशिन्यश्चन्द्रा
मृतरसाधराः ॥ नेत्रेष्वानन्दकारिण्यःकौमुदीकुमुदेष्विव ॥ २३ ॥ लावण्यपिण्डसंभूताश्चारुरूपामनोहराः ॥ उद्भिन्नकुचकुम्भिन्यःपद्मिन्यइवमाधवे
॥ २४ ॥ उन्मील्ययौवनंकान्तंवल्लीवनवपल्लवैः ॥ हेमगौराश्चहेमाभाहेमालङ्कारभूषिताः ॥ २५ ॥ हेमचम्पकमालिन्योहेमच्छविसुवाससः ॥
स्वरग्रामावलीहासुविविधामूर्छनासुच ॥ २६ ॥ तालदानविनोदेषुवेणुवीणाप्रवादने ॥ मृदङ्गनादसंभिन्नंलास्यमार्गलयेषुच ॥ २७ ॥ चित्रादिषुविनो
देषुकलासुचविशारदाः ॥ एवंभूतास्तुताःकन्यामुमुहुःक्रीडनेवने ॥२८॥ पितृभिर्लालिताःसत्यश्चेरुश्चधनदालये ॥ कौतुकादेकदापञ्चमिलित्वामासि
माधवे ॥ कन्यामन्दारपुष्पाणिविचिन्वन्त्योवनाद्वनम् ॥ २९॥ गौरींसमाराधयितुंवराङ्गनाःकदाचिदच्छोदसरोवरंययुः ॥ हेमाम्बुजान्प्रिवराणिताः
पुनस्तस्मादुपादायवरोत्पलैःसह ॥ ३० ॥ वैडूर्यशुद्धस्फटिकाच्छविद्रुमेस्नात्वातडागेपरिधायचाम्बरम् ॥ मौनेनचस्थण्डिलपिण्डिकामयींस्वर्णस्य
सिक्ताभिरुमांविनिर्ममुः ॥ ३१ ॥ समार्चेतांचन्दनचन्द्रकुङ्कुमैरभ्यर्च्यगौरींवरपङ्कजादिभिः ॥ नानोपचरैश्चसुभक्तिभावितास्तालप्रयोगैर्ननृतुः
कुमारिकाः ॥ ३२ ॥ गान्धारमाश्रित्यवरंस्वरंततोगेयंसुताराध्वनिभिःसुमूर्छितम् ॥ एणीदृशस्ताःप्रजगुःकलाक्षरंचारुप्रबन्धंगतिभिस्तुसुस्वरम्
॥ ३३ ॥ तस्मिन्सुनादेरसवर्षहर्षदेकन्यास्वलंनिर्भरनृत्यवृत्तिषु ॥ अच्छोदतीर्थप्रवरेतदागतःस्नातुंमुनेर्वेदनिधेःसुताग्निपः ॥ ३४ ॥ रूपेणनिःसीम
तरोवराननःसरोजपत्रायतलोचनोयुवा ॥ विशालवक्षाःसुभुजोऽतिसुन्दरःश्यामच्छविःकामइवापरोहिसः ॥ ३५ ॥ सब्रह्मचारीसशिखोविराज
तेदण्डेनयुक्तोधनुषेवमन्मथः ॥ एणाजिनप्रावरणःसुसूत्रधृद्धमाभमौञ्जीकटिसूत्रमेखलः ॥ ३६ ॥ तंदृष्ट्वाब्राह्मणंबालास्तास्तत्रसरसस्तटे ॥
जहषुःकौतुकाविष्टाःकोऽयंनोनयनातिथिः ॥ ३७ ॥ सन्त्यक्तनृत्यगीतास्तास्तस्यालोकनतत्पराः ॥ हरिण्योलुब्धकेनेवविद्धाःकामेनसाय
कैः ॥ ३८ ॥ पश्यपश्येतिजल्पन्त्योमुग्धाःपञ्चससंभ्रमम् ॥ तस्मिन्विप्रवरेयूनिकामदेवभ्रमंययुः ॥ ३९ ॥ पुनःपुनस्तमभ्यर्च्य
नयनैःपङ्कजैरिव ॥ पश्चाद्विचारयामासुस्ताश्चकन्याःपरस्परम् ॥ ४० ॥ यद्ययंकामदेवोहिरतिहीनःकथंव्रजेत् ॥ अथायमश्विनौदेवौतौ
नूनंयुग्मचारिणौ ॥ ४१ ॥ गन्धर्वःकिन्नरोवाथसिद्धोवाकामरूपधृत् ॥ ऋषिपुत्रोऽथवाकश्चित्कश्चिद्वामानुषोत्तमः ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अस्तुवाकश्चिदेवायंधात्रासृष्टोहिनःकृते ॥ यथाभाग्यवतामर्थेनिधानंपूर्वकर्मभिः ॥४३॥ तथास्माकंकुमारीणांगौर्यानीतोवरोत्तमः ॥ करुणाजलकल्लो
लप्लुवार्द्रीकृतचित्तया ॥ ४४ ॥ मयावृतस्त्वयाचायंत्वयावृतस्तथामया ॥ एवंपञ्चसुकन्यासुवदन्तीषुनृपोत्तम ॥ ४५ ॥ श्रुत्वातद्वचनंतत्र
कृत्वामाध्याह्निकीःक्रियाः॥आलोच्यहृदयेसोऽपिविघ्नमेतदुपस्थितम्॥४६॥ब्रह्मविष्णुगिरिशादयःसुरायेचसिद्धमुनयःपुरातनाः॥ तेऽपियोगबलिनो
विमोहितालीलयातदबलाभिरद्भुतम्॥४७॥योषितांनयनतीक्ष्णसायकैर्भ्रूलतासुदृढचापनिर्गतैः॥धन्विनामकरकेतुनाहतःकस्यनोपततिहामनोमृगः ॥
॥४८॥तावदेवनयधीर्विराजतेतावदेवजनताभयंभजेत्॥तावदेवदृढचित्ततानृशंतावदेवगणनाकुलस्यच ॥४९॥ तावदेवतपसःप्रगल्भतातावदेवयमधार
णंनृणाम् ॥ यावदेववनितेक्षणबाणैर्मोहयन्त्युरुमदैर्नमानुषाः॥५०॥मोहयन्तुमदयन्तुरागिणोयोषितःसुललितैर्मनोहरैः ॥ मोहयन्तिमदयन्तिमामिमं
धर्मरक्षणपरंहिकैर्गुणैः॥ ५१ ॥ मांसशुक्रमलमूत्रनिर्मितेयोषितांवपुषिनिर्घृणेशुचौ ॥ कामिनश्चपरिकल्प्यचारुतांमारमन्तुसुविमूढचेतसः ॥ ५२ ॥
दारुणोहिपरिकीर्तितोऽङ्गनासन्निधिर्विमलबुद्धिभिर्बुधैः ॥ यावदत्रनसमीपगाइमास्तावदेवहिगृहंव्रजाम्यहम् ॥५३॥ समीपंतस्ययावद्धिनागच्छन्ति
वराङ्गनाः ॥ वैष्णवेनप्रभावेणतावदन्तर्दधेद्विजः ॥ ५४ ॥ तस्ययोगबलाद्भूपगतस्यादर्शनंतदा ॥ दृष्ट्वातदद्भुतंकर्मऋषिपुत्रस्यधीमतः ॥ ५५ ॥
वित्रस्तनयनाबालाःकुरङ्ग्यइवकातराः ॥ संभ्रान्तनयनाःशून्यादद्दृशुस्तादिशोदश॥५६॥इन्द्रजालंस्फुटंवेत्तिमायांजानातिवापुनः॥दृष्टोऽप्यदृष्टरूपो
ऽभूदित्यूचुश्चपरस्परम्॥५७॥व्याप्तंतुहृदयंतासांसद्यैवविरहाग्निना ॥ ज्वलद्दावानलेनेवसुस्निग्धंसान्द्रकाननम् ॥५८॥ त्यक्त्वैन्द्रजालिकींविद्यांकान्त
दर्शयसत्वरम् ॥ स्वात्मानंनोमनोयुक्तंप्राग्ग्रासेमक्षिकोपमम् ॥ ५९ ॥ हाकष्टंदर्शितःकस्माद्धात्रात्वंघटितःपुनः ॥ ज्ञातंमहानुसंतापहेतोर्नस्त्वंविनि
र्मितः॥६०॥कच्चित्तेनिर्दयंचेतःकच्चिदस्मासुनोमनः॥कच्चिद्धूर्तोऽसिहेकान्तकच्चिन्मुष्णासिनोमनः ॥६१॥ कच्चिन्नप्रत्ययोऽस्मासुकच्चिदस्मान्परीक्षसे॥
कच्चिन्नर्मकलाशीलःकच्चिन्मायाविशारदः॥६२॥कच्चिच्चित्तेप्रवेष्टुंचवेत्सिविज्ञानलाघवम्॥कच्चिन्निष्क्रमणोपायंनजानासिकुतःपुनः ॥६३॥ कच्चिद्विना
पराधंतुत्वमस्मासुप्रकुप्यसे॥कच्चिद्दुःखंविजानासिपरेषांविप्रलम्भजम् ॥६४॥त्वद्दर्शनंविनानूनंहृदयेश्वरसाम्प्रतम्॥नजीवामोऽथजीवामःपुनस्त्वद्दर्श
नाशया॥६५॥अस्मांश्चनयतत्रत्वंयत्रशीघ्रंगतोभवान्॥त्वद्दर्शनहरोधाताव्यदधादङ्कुरच्छिदम्॥६६॥सर्वथादर्शनंदेहिकारुण्यंभजसर्वथा॥ पर्यंतंनप्रप
श्यन्तिसर्वथासज्जनाजनाः॥६७॥इत्थंविलप्यताःकन्याःप्रतीक्ष्यचबहुक्षणम्॥पितुर्भियागृहंगन्तुशीघ्रमारेभिरेगतिम् ॥६८॥ तत्प्रेमनिगडैर्बद्धाभृशंवि
रहविक्लवाः ॥ कथंचिद्धैर्यमालम्ब्यताःस्वंस्वंगृहमागताः ॥६९॥ आगत्यपतिताःसर्वाजलयन्त्रसमीपतः ॥ किमेतन्मातृभिःपृष्टाःकुतःकालात्ययोऽ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवत् ॥ ७० ॥ कन्याऊचुः ॥ क्रीडन्त्यःकिन्नरीभिस्तुसार्धंसङ्गीतकंमुदा ॥ संस्थितास्तेननज्ञातंदिवसादिसरोवरे ॥ ७१ ॥ पथिश्रान्तावयंमातः
संतापस्तेननस्तनौ ॥ मोहेनमहतावक्तुंनकेनाप्युत्सहामहे ॥ ७२ ॥ इत्युक्त्वालुलुठुस्तत्रमणिभूमौकुमारिकाः ॥ आकारंगोपयन्त्यस्तामुग्धाजल्पन्ति
मातृभिः ॥ ७३॥ काचिन्नर्तयतिक्रीडामयूरंनमुदातदा ॥ नपाठयतितंकीरंपञ्जरेऽन्याकुतूहलात् ॥७४ ॥ लालयेन्नकुलंनान्यानोल्लासयतिसारिकाम् ॥
अपरातीवसंमुग्धानैवक्रीडतिसारसैः ॥ ७५ ॥ भेजिरेनविनोदांस्तारेमिरेनैवमन्दिरे ॥ ऊचिरेबान्धवैर्नालंवीणावाद्यंनचक्रिरे ॥ ७६ ॥ कल्प
द्रुमप्रसूनंयद्रसवत्तुसुधोपमम् ॥ मन्दारकुसुमामोदिनपपुर्मधुरंमधु ॥ ७७ ॥ योगिन्यइवताःकन्यानासाग्रन्यस्तलोचनाः ॥ अलक्ष्यध्यान
सन्तानाःपुरुषोत्तममानसाः ॥ ७८ ॥ चन्द्रकान्तमणिच्छन्नेस्रवद्वारिकणद्रवे ॥ क्षणंवातायनेस्थित्वाजलयन्त्रेक्षणंक्षणात ॥ ७९ ॥ रचयन्ति
क्षणंशय्यांदीर्घिकाम्भोजिनीदलैः ॥ वीज्यमानाःसखीभिस्ताःशीतलैःकदलीदलैः ॥ ८० ॥ इत्थंयुगसमांरात्रिमन्वानास्तावरस्त्रियः ॥ कथंचि
द्धीरतांकृत्वाविह्वलाःसज्वराइव ॥ ८१ ॥ प्रातर्व्योममणिंदृष्ट्वामन्यमानाःस्वजीवितम् ॥ विज्ञाप्यमातरंस्वांस्वांगौरींपूजयितुंगताः ॥ ८२ ॥
स्नात्वातेनविधानेनपुष्पैर्धूपैर्यथातथा ॥ विधायपूजनंदेव्यागायन्त्यस्तत्रताःस्थिताः ॥ ८३ ॥ एतस्मिन्नन्तरेविप्रःस्नातुंसोऽपिसमागतः ॥
पित्राश्रमपदात्तस्मादच्छोदेचसरोवरे ॥ ८४ ॥ मित्रंदृष्ट्वेवरात्र्यन्तेनलिन्यइवकन्यकाः ॥ उत्फुल्लनयनाजातास्तंदृष्ट्वाब्रह्मचारिणम् ॥ ८५ ॥
गत्वातदैवताःकन्याःसमीपंब्रह्मचारिणः ॥ सव्यापसव्यबन्धेनभुजपाशंचचक्रिरे ॥ ८६ ॥ गतोऽसिधूर्तपूर्वेद्युर्गन्तुमद्यनशक्यते ॥ वृतस्त्वं
नूनमस्माभिर्नात्रतेऽस्तुविचारणा ॥ ८७ ॥ इत्युक्तोब्राह्मणःप्राहप्रहसन्बाहुपाशगः ॥ युष्माभिरुच्यतेभद्रमनुकूलंप्रियंवचः ॥ ८८ ॥
प्रथमाश्रमनिष्ठस्यकिंतुनाद्यापिमेव्रतम् ॥ वेदाभ्यसनशीलस्यपारंयातिगुरोःकुले ॥ ८९॥ आश्रमेषत्रयोधर्मोरक्षणीयःसपण्डितैः ॥ विवाहो
ऽयमतोमन्येनधर्मइतिकन्यकाः ॥ ९० ॥ आकर्ण्यतस्यवाक्यानितमूचुस्तावचस्ततः ॥ सकलध्वनिसोत्कण्ठाःकोकिलाइवमाधवे ॥ ९१ ॥
धर्मादर्थोऽर्थतःकामःकामाद्धर्मफलोदयः ॥ इत्येवंनिश्चितंशास्त्रंवर्णयन्तिविपश्चितः ॥ ९२ ॥ सकामोधर्मबाहुल्यात्पुरस्तेसमुपागतः ॥ सेव्यतां
विविधैर्भोगैःस्वर्गभूमिरियंततः ॥ ९३ ॥ श्रुत्वातद्वचनंतासांप्राहगम्भीरयागिरा ॥ तथ्यंवोवचनंकिंतुसमाप्येहस्वकंव्रतम् ॥ ९४ ॥
प्राप्यानुज्ञांगुरोःसर्वंवैवाहंकर्मनान्यथा ॥ इत्युक्ताःपुनरूचुस्ताःस्फुटंमूढोऽसिसुन्दर ॥ ९५ ॥ दिव्यौषधंब्रह्मरसायनंचसिद्धिर्निधेःसाधुकला
वराङ्गनाः ॥ मन्त्रस्तथासिद्धिरसश्चधर्मतोनेमानिषेध्याःसुधियासमागताः ॥ ९६ ॥ कार्यंहिदैवाद्यदिसिद्धमागतंतस्मिन्नुपेक्षांनचयातिनीतिगः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यस्मादुपेक्षानपुनःफलप्रदातस्मान्नदीर्घीकरणंप्रशस्यते ॥ ९७ ॥ सान्द्रानुरागाःकुलजन्मनिर्मलाःस्नेहार्द्रचित्ताःसुगिरःस्वयंवराः ॥ कन्याः
सुरूपाःखलुचारुयौवनाधन्यालभन्तेऽत्रनरास्तुनेतरे ॥ ९८ ॥ क्वयंवरसुन्दर्यःक्वचायंतापसोबटुः ॥ दुर्घटस्यविधानेहिमन्येधातातिपण्डितः॥९९॥
तस्मादस्मानिदानींतुस्वीकुर्यान्मङ्गलंभवान् ॥ गान्धर्वेणविवाहेनह्यन्यथानोनजीवितम् ॥ १०० ॥ श्रुतवाक्यस्ततःप्राहब्राह्मणोधर्मवित्तमः॥
भोमृगाक्ष्यःकथंत्याज्योधर्मोधर्मधनैर्नरैः ॥ १ ॥ धर्मश्चार्थश्चकामश्चमोक्षश्चैतच्चतुष्टयम् ॥ यथोक्तंसफलंज्ञेयंविपरीतंतुनिष्फलम् ॥ २ ॥
नाकालेऽहंव्रतीकुर्यामतोदारपरिग्रहम् ॥ नक्रियाफलमाप्नोतिक्रियाकालंनवेत्तियः ॥ ३ ॥ यतोधर्मविचारेऽस्मिन्प्रसक्तंममानसम् ॥ तस्मा
च्छृणुतहेकन्यानसमीहेस्वयंवरम् ॥ ४ ॥ एवंज्ञात्वाशयंतस्यसमीक्ष्यैताःपरस्परम् ॥ करात्करंविमुच्याथजग्राहाङ्घ्रीप्रमोदिनी ॥ ५ ॥
भुजौजगृहतुस्तस्यसुशीलासुस्वरातथा ॥ आलिलिङ्गसुताराचचुचुम्बेचन्द्रिकामुखम् ॥ ६ ॥ तथापिनिर्विकारोऽसौप्रलयानलसन्निभः ॥
शशापब्रह्मचारीताःक्रोधेनात्यन्तमूर्छितः ॥ ७ ॥ पिशाच्यइवमांलग्नास्तत्पिशाच्योभविष्यथ ॥ एवंतेनाशुशप्तास्तास्तंसंत्यज्यपुरःस्थिताः ॥ ८ ॥
किमेतच्चेष्टितंपापह्यनागसिजनेत्वया ॥ प्रियेकृत्येऽप्रियंकृत्वाधिक्त्वांधर्मज्ञतांतव ॥९॥ अनुरक्तेषुभक्तेषुमित्रेषुद्रोहकारिणः ॥ पुंसोलोकद्वयेसौख्यंनाशं
यातीतिनःश्रुतम् ॥ ११० ॥ तस्मात्त्वमपिनःशापात्पिशाचोभवसत्वरम् ॥ इत्युक्त्वोपरताबालानिःश्वसन्त्यःक्षुधाकुलाः ॥ ११ ॥ तदाचान्योन्य
संरम्भात्तस्मिन्सरसिपार्थिव ॥ ताःकन्याब्रह्मचारीससर्वेपैशाचमागताः ॥ १२ ॥ पिशाच्यःसपिशाचश्चक्रन्दमानाःसुदारुणम् ॥ क्षपयन्ति
विपाकंतंपूर्वोपात्तस्यकर्मणः ॥ १३ ॥ स्वकालेतुफलत्येवपूर्वोपात्तंशुभाशुभम् ॥ स्वच्छायावच्चदुर्वारंदेवानामपिपार्थिव ॥ १४ ॥ क्रन्दन्ति
पितरस्तासांमातरस्तत्रतस्यच ॥ अप्रमादश्चबालानांदवहिदुरतिक्रमम् ॥ १५ ॥ ततऊर्ध्वपिशाचास्तेआहारार्थेसुदुःखिताः ॥ इतस्ततश्चधावन्तो
वसन्तिसरसस्तटे ॥ १६ ॥ एवंबहुतिथेकालेलोमशोमुनिसत्तमः ॥ पौषेमासिचतुर्दश्यामच्छोदेस्नातुमागतः ॥ १७ ॥ दृष्ट्वातंब्राह्मणंसर्वे
पिशाचाःक्षुत्समाकुलाः ॥ धावन्तोहन्तुकामास्तेमिलित्वायूथवर्तिनः ॥ १८ ॥ दह्यमानाःसुतीव्रेणतेजसालोमशस्यच ॥ असमर्थाःपुरः
स्थातुंसर्वेतेदूरतःस्थिताः ॥ १९ ॥ तत्रवेदनिधिर्विप्रस्तदैवहिसमागतः ॥ समीक्ष्यलोमशंराजन्साष्टाङ्गंप्रणिपत्यसः ॥ १२० ॥ उवाचसूनृतां
वाचंबद्ध्वाशिरसिचाञ्जलिम् ॥ महाभाग्योदयेविप्रसाधूनांसंगतिर्भवेत् ॥ २१ ॥ गङ्गादिसवतीर्थेषुयोनरःस्नातिसर्वदा ॥ यःकरोतिसतांसङ्गं
तयोःसत्संगतिर्वरा ॥ २२ ॥ गुरूणांसंगमोविप्रदृष्टादृष्टफलोभुवि ॥ स्वर्गदोरोगहारीचकिंतुसोपद्रवोमतः ॥ २३ ॥ इत्युक्त्वाकथयामास

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पूर्ववृत्तान्तमद्भुतम् ॥ इमागन्धर्वकन्यास्ताबटुःसोऽयंममात्मजः ॥ २४ ॥ सर्वेपिशाचरूपेणमिथःशापविमोहिताः ॥ दीनाननास्तुतिष्ठन्तित
वाग्रेमुनिसत्तम ॥ २५ ॥ त्वद्दर्शनेनबालानांनिस्तारोऽद्यभविष्यति ॥ सूर्योदयेतमःस्तोमःकिंनलीयेतगह्वरे ॥ २६ ॥ श्रुत्वातल्लोमशोराज
न्कृपार्द्रीकृतमानसः ॥ प्रत्युवाचमहातेजास्तंमुनिपुत्रदुःखितम् ॥ २७ ॥ मत्प्रसादाच्चबालानांस्मृतिःसपदिजायताम् ॥ धर्मंचवच्मितंयेनमिथः
शापोलयंव्रजेत् ॥२८॥ वेदनिधिरुवाच ॥ महर्षेकथ्यतांधर्मोमुच्यन्तेयेनबालकाः॥नायंकालोविलम्बस्यशापाग्निर्दारुणोयतः ॥२९॥ लोमशउवाच॥
मयासार्धंप्रकुर्वन्तुमाघस्नानंविधानतः ॥ शापान्मुञ्चन्तिमाघान्तेनान्यथानिष्कृतिर्भवेत् ॥ १३० ॥ शापःपापफलंविप्रपापनाशोभवेन्नृणाम् ॥ माघ
स्नानेनतीर्थेचइतिमेनिश्चितामतिः ॥ ३१ ॥ सप्तजन्मकृतंपापंवर्तमानंचपातकम् ॥ माघस्नानंदहेत्सर्वंपुण्यतीर्थेविशेषतः॥३२॥प्रायश्चित्तंनपश्यन्ति
यस्मिन्पापेमुनीश्वराः ॥ पातकंपुण्यतीर्थेषुनश्येत्तदपिमाघतः ॥ ३३ ॥ ज्ञानकृन्मानसेमाघस्तस्मान्मोक्षफलप्रदः ॥ हिमवत्पृष्ठतीर्थेषुसर्वपापप्रणा
शनः ॥ ३४ ॥ इन्द्रलोकप्रदोऽच्छोदेनिर्दिष्टोवेदवादिभिः ॥ सर्वपापहरोमाघोमोक्षदोबदरीवने ॥ ३५ ॥ पापहादुःखहारीचसर्वकामफलप्रदः ॥ रुद्र
लोकप्रदोमाघोनार्मदेपापनाशनः ॥ ३६ ॥ यामुनःसूर्यलोकायभवेत्कल्मषनाशनः ॥ सारस्वतोऽघविध्वंसीब्रह्मलोकफलप्रदः ॥३७॥ विशालफलदो
माघोविशालायांद्विजोत्तम ॥ पातकेन्धनदावाग्निर्गर्भहेतुक्रियापहः ॥ ३८ ॥ विष्णुलोकायमोक्षायजाह्नवःपरिकीर्तितः ॥ सरयूगण्डकीसिन्धुश्चन्द्र
भागाचकौशिकी ॥ ३९ ॥ तापीगोदावरीभीमापयोष्णीकृष्णवेणिका ॥ कावेरीतुङ्गभद्राचअन्यायाश्चसमुद्रगाः ॥१४०॥आसुमाघीनरोयातिस्वर्ग
लोकंविकल्मषः ॥ नैमिषेविष्णुसायुज्यंपुष्करेब्रह्मणोऽन्तिकम् ॥ ४१ ॥ आखण्डलस्यलोकोहिकुरुक्षेत्रेतुमाघतः ॥ माघोदेवह्रदेविप्रयोगसिद्धिफल
प्रदः ॥ ४२ ॥ प्रभासेमकरादित्येस्नानाद्रुद्रगणोभवेत् ॥ देवक्यांदेवतादेहोनरोभवतिमाघतः ॥ ४३ ॥ माघस्नानेनभोविप्रगोमत्यांनपुनर्भवः ॥ हेम
कूटेमहाकालओङ्कारेचामरेश्वरे ॥ ४४ ॥ नीलकण्ठेऽर्बुदेमाघाद्रुद्रलोकेमहीयते ॥ सर्वासांसरितांविप्रसंगमेमकरेरवौ ॥ ४५ ॥ स्नानेनसर्वकामाना
मवाप्तिर्जायतेनृणाम् ॥ माघस्तुप्राप्यतेधन्यैःप्रयागेद्विजसत्तम ॥ अपुनर्भवदंतत्रसितासितजलंयतः ॥ ४६ ॥गायन्तिदेवाःसततंदिविष्ठामाघःप्रयागे
किलनोभविष्यति ॥ स्नानान्नरायत्रनगर्भवेदनांपश्यन्तितिष्ठन्तिचविष्णुसन्निधौ॥ ४७ ॥मज्जन्तियेऽपित्र्यहमत्रमानवास्तीर्थेप्रयागेबहुपापकञ्चुकाः॥
व्रजन्तितेनोनिरयेषुधर्मिणःस्वर्गेशुभेचारुचरन्तिदेववत् ॥ ४८ ॥ तीर्थैर्व्रतैर्दानतपोभिरध्वरैःसार्धंविधात्रातुलयाधृतंपुरः ॥ माघेप्रयागस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तयोर्द्वयोरभून्माघोगरीयानतएवसोऽधिकः ॥ ४९ ॥ वाताम्बुपर्णाशनदेहशोषणैस्तपोभिरुग्रैश्चिरकालसंचितैः ॥ योगैश्चसंयान्तिनरानतांगतिंस्नानेन
माघस्यहियान्तियांगतिम् ॥१५०॥ स्नातांश्चयेमकरभास्करोदयेतीर्थेप्रयागेसुरसिन्धुसंगमे ॥ तेषांगृहद्वारमलङ्करोतिकिंभृङ्गावलिःकुञ्जरकर्णताडिता
॥५१॥योराजसूयाद्धयमेधयज्ञतःस्नानात्फलंसंप्रददातिचाधिकम् ॥ पापानिसर्वाणिविलोप्यलीलयानूनंप्रयागःसकथंनसेव्यते॥५२॥अवन्तिविषये
राजावीरसेनोऽभवत्पुरा ॥ नर्मदातीरमागत्यराजसूयंचकारसः ॥ ५३ ॥ षोडशैरश्वमेधैश्चस्वर्णवाटविराजितैः ॥ स्वर्णभूषणयूपाढ्यैरीजेसोऽपियथा
विधि ॥ ५४ ॥ प्रददौधान्यराशींश्चद्विजेभ्यःपर्वतोपमान् ॥ वदान्योदेवताभक्तोगोप्रदःससुवर्णदः ॥ ५५ ॥ ब्राह्मणोभद्रकोनाममूर्खोहिनकुलस्तथा
॥ कृषीवलोदुराचारःसर्वधर्मबहिष्कृतः ॥ ५६ ॥ कृषिकर्मसमुद्विग्नोबन्धुभिश्चार्प्यसंस्कृतः ॥ इतस्ततःपरिभ्रम्यनिर्गतःक्षुत्प्रपीडितः ॥ ५७ ॥
दैवतःसार्थमाविश्यप्रयागंससमागतः ॥ महामाघींपुरस्कृत्यसस्नौतत्रदिनत्रयम् ॥ ५८ ॥ अनघःस्नानमात्रेणभूत्वेहसद्विजोत्तमः ॥ प्रयागाच्चलित
स्तत्रपुनर्यस्मात्समागतः ॥ ५९ ॥ सराजासोऽपिविप्रश्चविपन्नावेकदातदा ॥ तयोर्गतिःसमादृष्टामयाशक्रस्यसन्निधौ ॥ ६० ॥ तेजोरूपंबलंद्रैणंदे
वयानंविभूषणम् ॥ पारिजातमयीमालानृत्यंगीतंतयोःसमम् ॥ ६१ ॥ इतिदृष्टंहिमाहात्म्यंक्षेत्रस्यकथमुच्यते ॥ माघःसितासितविप्रराजसूयैःसमो
मतः ॥ ६२॥ धनुस्त्रिशतविस्तीर्णेसितनीलाम्बुसंगमे ॥ अपुनरावृत्तिर्माघोराजसूयीपुनर्भवेत् ॥ ६३ ॥ माघमासिकवातोऽपिसितासितजलंस्पृशेत्॥
अधमर्यंनस्पृशेन्नूनंमहापातकहाहिसः ॥ ६४ ॥ किमत्रबहुनोक्तेनश्रूयतांनिश्चितंद्विज ॥ समुद्धृतफलंपापंतीर्थेमाघःप्रणाशयेत् ॥ ६५ ॥ अत्रते
कथयिष्यामिसावधानमतिःशृणु ॥ (पिशाचमोचनंनामइतिहासंपुरातनम् ॥शृण्वन्त्वप्सरसोबालाःशृणोतुत्वत्सुतस्तथा ॥ मत्प्रसादात्स्मृतिंलब्ध्वा
पैशाच्यान्मुक्तिकामिनः ॥ १ ॥) पुरादेवद्युतिर्विप्रोवैष्णवोवेदपारगः ॥६६ ॥ पिशाचान्मोचयामासकरुणाप्लुतमानसः ॥ ६७ ॥ दिलीपउवाच॥
कुत्रस्थितःकस्यपुत्रोनियमःकोऽस्यवाजपः ॥ केनवावैष्णवोवृत्तःकेपिशाचाश्चमोचिताः ॥ ६८ ॥ एतद्विस्तरतःसर्वंकीर्तयस्वमहामुने ॥ कौतूहलं
महापुण्यंशृणुमस्त्वत्प्रसादतः ॥ ६९ ॥ वसिष्ठउवाच ॥ प्लक्षप्रस्रवणेपुण्येसरस्वत्यास्तटेशुभे ॥ तत्राश्रमपदंतस्यशैलमाश्रित्यशोभनम् ॥
॥ १७० ॥ शालैस्तालैस्तमालैश्चबिल्वैर्बकुलपाटलैः ॥ तिन्तिडीचिरिबिल्वैश्चचूतचम्पककाञ्चनैः ॥ ७१ ॥ करञ्जैःकोविदारैश्चकेसरैःकुञ्जराशनैः ॥
नतिलकैःकर्णिकारैश्चकुम्भैःखादिरतिन्दुकैः ॥ ७२ ॥ वासीरैःसाल्वजम्बीरैःपीलूदुम्बरवेतसैः ॥ शाकोटैरटरूषैश्चकरहाटैर्वटद्रुमैः ॥ ७३ ॥घोण्टाकुट

१ 'स्नानात्प्रयागस्य हि यान्ति यां गतिम्' इ० पा० । २ 'स्नाता नरा ये मृगभास्करोदये' इ० पा० । ३ 'स्वराडिव विराजते' इ० पा० । ४ 'समुद्विग्न' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जपालाशैरशोकैःशोकहारिभिः ॥ जम्बूनिम्बकदम्बैश्चक्षीरिकाकरमर्दकैः ॥७४॥ बीजपूरैःसनारिङ्गैरम्भाराजिविराजितैः॥ पनसैरसवद्भिश्चनारिकेलैः
सदाफलैः ॥ ७५ ॥ सप्तच्छदैस्त्रिपत्रैश्चशिरीषामलकैःशुभैः ॥ कर्कन्धूलकुचैरक्षैःपारिभद्रैर्वचादिभिः ॥७६॥ केतकैःसिन्दुवारैश्चतगरैःकुन्दमल्लिकैः ॥
पद्मेन्दीवरकह्लारमालतीयूथिकादिभिः ॥ ७७ ॥ मालतीमोगरैश्चैवजातीफलविराजितैः ॥ पुन्नागैःकिंशुकैश्चैवबर्बरीतुलसीद्रुमैः ॥ ७८ ॥
आश्रमोरमणीयःसद्रुमैर्नानाविधैर्नृप ॥ वनमध्येनदीयातिपुण्यतोयासरस्वती ॥७९॥ कूजन्तिसारसास्तत्रमदस्निग्धकलंसदा ॥ नदन्तिकोकिलाः
शब्दंगुञ्जन्तिचमधुव्रताः ॥ १८० ॥ बहुकोलाहलंभूपतद्वनंशुकसारिभिः ॥ चरन्तिश्वापदास्तत्रविविधाःकाननोत्तमे ॥८१॥ सदाफलंसदापुष्पंपराग
कणधूसरम् ॥ आच्छन्नंकाननंसर्वंमधुवृक्षैःसमन्ततः ॥ ८२ ॥ नवपल्लवसंजातमञ्जरीभरवल्लिभिः ॥ आश्लिष्टमभितोरम्यंप्रियाभिरिववल्लभः ॥
॥ ८३ ॥ तस्यशापभयात्त्रस्तोवातोवातिसमन्ततः ॥ नवर्षन्त्यश्मभिर्मेघानशोषयतिभास्करः ॥ ८४ ॥ वनंनोपद्रवंतद्धिसदासिद्धनिषेवितम् ॥
आह्लादजनकंनित्यंवनंचैत्ररथंयथा ॥ ८५ ॥ तस्मिन्वसतिधर्मात्मादेवद्युतिर्द्विजोत्तमः ॥ पुत्रःसुमित्रोविप्रस्यलब्धोलक्ष्मीपतेर्वरात् ॥८६॥ नियमः
श्रूयतांतस्यसर्वदानियतात्मनः ॥ ग्रीष्मेपञ्चतपानित्यंसूर्यन्यस्तविलोचनः ॥८७॥ वर्षत्कादम्बिनीयावद्वर्षास्वभ्रावकाशगः ॥ वातेप्रवातेनिष्कम्पो
दुःसहोहिमवानिव ॥ ८८ ॥ वसत्यप्सुसहेमन्तेह्रदेसारस्वतेद्विज ॥ उपस्पृशतिकालेसत्रिवारंवारिनिर्मलम् ॥ ८९ ॥ पितॄन्देवानृषीन्नित्यंसं
तर्पयतिश्रद्धया ॥ ब्रह्मयज्ञपरोनित्यंसत्यवादीजितेन्द्रियः ॥ १९० ॥ भूमौविश्रम्यविश्रान्तःप्रदध्यौप्रार्थयन्हरिम् ॥ वन्यैर्जुहोत्यग्निहोत्रंश्रद्धया
तिथिपूजकः ॥ ९१ ॥ चान्द्रायणविधानेनकालंनयतिसर्वदा ॥ स्वयंविगलितैःपत्रैःफलैर्वृत्तिंसमीहते ॥ ९२ ॥ अनुद्विग्नस्तपोनिष्ठोवेद
वेदाङ्गपारगः ॥ धमनीविकरालोऽसावस्थिमात्रकलेवरः ॥ ९३ ॥ इत्थंजगामवर्षाणांसहस्रंतस्यकानने ॥ तदाजज्वालशैलोऽसौतपसस्तस्य
तेजसा ॥९४॥ सोढुंनशक्यतेभूतैस्तेजस्तस्यमहात्मनः ॥ वैश्वानरइवाभातिप्रज्वलंस्तपसाद्विज ॥ ९५ ॥ गतवैराणिभूतानिसमजायन्त
तद्वने ॥ मृगव्याघ्राखुमार्जारामिथःक्रीडन्तिनिर्भयाः ॥ ९६ ॥ अन्योऽपिनियमस्तस्यश्रूयतामतिदुर्लभः ॥ नारायणंत्रिकालंसंपू
जयतिनित्यशः ॥ ९७ ॥ पुष्पाणांतुसहस्रेणविकचेनसुगन्धिना ॥ वेदसूक्तविधानेनविष्णुध्यानपरायणः ॥ ९८ ॥ विष्णोतःसप्री
येविप्रःकुरुतेकर्मचाखिलम् ॥ दधीचेर्वरदानात्ससंजातोवरवैष्णवः ॥ ९९ ॥ एकदामासिवैशाखएकादश्यांमहामुनिः ॥ पूजांकृत्वाहरेरम्यां

१ 'त्रस्ता गङ्गावाताः प्रवान्ति न' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विचित्रामकरोत्स्तुतिम् ॥ २०० ॥ तदैवखगमारुह्यदेवदेवोहरिःस्वयम् ॥ आजगामपुरस्तस्यतयास्तुत्यातिहर्षितः ॥ १ ॥ तंदृष्ट्वागरुडारूढंप्रत्यक्षंजलदच्छविम् ॥ चतुर्बाहुंविशालाक्षंसर्वालङ्कारभूषितम् ॥ २ ॥ उद्भूतपुलकोविप्रःसानन्दजललोचनः ॥ जगामशिरसाभूमौकृतकृत्यमनास्तदा ॥ ३ ॥ नममौतेनहर्षेणसब्रह्माण्डोदरेऽपिहि ॥ नसस्मारनिजंदेहंब्रह्मभूतइवाभवत् ॥ ४ ॥ ततःसंभाषितःप्रीत्याहरिणावैष्णवोमुनिः ॥ देवद्युतेविजानामिमद्भक्तस्त्वंमदाश्रयः ॥५॥ संन्यस्ताखिलकर्मासिमद्भावोमन्मनाःसदा ॥ वरंब्रूहिप्रसन्नोऽस्मिस्तोत्रेणानेनचानघ ॥६॥ इतिश्रुत्वाहरेर्वाक्यंप्रत्युवाचसतापसः ॥ देवदेवारविन्दाक्षस्वमायाधृतविग्रह॥७॥त्वद्दर्शनात्सदादेवदुर्लभोनापरोवरः ॥ब्रह्मादयःसुराःसर्वेयोगिनःसनकादयः॥॥ ८॥ त्वांसाक्षात्कर्तुमिच्छन्तिसिद्धाश्चकपिलादयः ॥ अहंममेतिपाशायेमोहलोभाःशुभाशुभाः[1]॥९॥सहेतुकाश्चदह्यन्तेदृष्टेत्वयिपरावरे ॥ जन्मनःकर्मणोबुद्धेराविर्भूतंफलंमम ॥ २१० ॥ यद्दृष्टोऽसिजगन्नाथप्रार्थयेकिमतःपरम् ॥ नवरार्थंहिदेवेशत्वत्पादपङ्कजंहृदि ॥ ११ ॥ चिन्तयामिसदाभक्त्यात्वद्गतेनान्तरात्मना ॥ इममेववरंयाचेत्वद्भक्तिरचलामम ॥१२॥ अस्तुवैकमलानाथप्रार्थयेनापरंवरम् ॥ इतिश्रुत्वावचस्तस्यप्रसन्नवदनोहरिः ॥१३ ॥ प्रत्युवाचप्रसन्नात्माएवमस्तुद्विजोत्तम ॥ अन्यस्तेतपसःकश्चित्प्रत्यूहोनभविष्यति ॥ १४॥ एतच्चत्वत्कृतंस्तोत्रंयेपठिष्यन्तिमानवाः॥ तेषांमद्विषयाभक्तिर्निश्चलाचभविष्यति ॥ १५ ॥ धर्मकार्यंचयत्किंचित्साङ्गंसर्वंभविष्यति ॥ ज्ञानेचपरमानिष्ठातेषांस्थास्यतिनिश्चला ॥ १६ ॥ इत्युक्त्वान्तर्हितस्तत्रदेवदेवोजनार्दनः ॥ देवद्युतिस्तदारभ्यनारायणपरोऽभवत् ॥ १७ ॥ दिलीपउवाच ॥ महर्षेऽनुगृहीतोऽस्मिकथयापावनीकृतः ॥ अनयाविष्णुसंगत्यागङ्गयेवाहमद्यवै॥१८॥किंतुस्तोत्रंसमाख्याहिप्रसन्नोयेनमाधवः ॥ तस्यानघस्यविप्रस्यमहत्कौतूहलंमम॥॥ १९॥त्वत्प्रसादादहंविप्रमन्येप्राप्तंमनोरथम् ॥ महतांसंगतिःकस्यमहत्त्वायनकल्पते॥२२०॥कथयस्वप्रसादेनविष्णोःस्तोत्रमनुत्तमम् ॥ येनतुष्टःसभगवान्ददौतस्यचदर्शनम् ॥ २१ ॥ वसिष्ठउवाच ॥ कथयामिरहस्यंतेयज्जप्तंस्तोत्रमुत्तमम् ॥ प्राग्गृहीतंसुपर्णेनगरुडान्मयिचागतम् ॥ २२ ॥ अध्यात्मगर्भसारंतन्महोदयकरंशुभम् ॥ सर्वपापहरंभूपस्वात्मज्ञानकरंपरम् ॥ २३ ॥ ओंनमोवासुदेवायनमोविश्वायचक्रिणे ॥ भक्तप्रियायकृष्णायजगन्नाथायशार्ङ्गिणे ॥ २४ ॥ स्तोतास्तुत्यःस्तुतिःसर्वंजगद्विष्णुमयंयदा ॥ तदासंस्तूयतेकेनभक्तिर्मोदकरीनृणाम् ॥ २५ ॥ यस्यदेवस्यनिःश्वासोवेदाःसाङ्गाःससूत्रकाः ॥ कास्तुतिःप्रमुदेतस्यभक्त्याहंमुखरोऽभवम् ॥ २६ ॥ चक्रवद्भ्रमतेसर्वंत्रैलोक्यंसचराचरम् ॥ अतस्त्वं

१ 'देहस्य मोहमूलाः शुभाशुभाः' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गीयतेदेवचक्रपाणिवराशुच ॥ २७॥ वेदोनवक्तियंसाक्षान्नचवाग्वेत्तिनोमनः ॥ मद्विधस्तंकथंस्तौतिभक्तिमान्वाकथंभवेत् ॥ २८॥ ब्रह्मादिब्रह्मविष्णु
स्त्वंत्वमेवसकलाश्रयः ॥ ब्रह्माण्डानिदानंचशुद्धंब्रह्मत्वमेवच ॥२९॥ (कोऽयंकायस्तवविभोभित्त्वास्पृशतिकायिनम् ॥ कायदोषैर्नचाघ्रातोनमस्तस्मै
तुयोगिने ॥ १ ॥) देवमावनजागर्तिननिद्रातिनिजात्मनि ॥ सुखसंदोहबुद्धिर्यासात्वंविष्णोनसंशयः ॥ २३० ॥ [1]महदादयोमहाभावास्तथा
वैकारिकागुणाः ॥ त्वमेवनाथतत्सर्वंनानात्वंमूढकल्पना ॥२३१॥ केशकेशवरूपाभिःकल्पनातिसृभिस्तथा ॥ त्वमेवकल्पसेब्रह्मपुमानिवसुतादिभिः॥
॥ ३२ ॥ विदोषंविगुणंचैकंचिन्मूर्तिरखिलंजगत् ॥ कवीनांभातियत्तत्त्वंतंविष्णुंनौमिनिर्मलम् ॥ ३३ ॥ यस्यज्ञानेनकुर्वन्तिकर्मापिश्रुतिभाषितम् ॥
निरी[2]षणाजगन्मित्राःशुद्धंब्रह्मनमामितत् ॥ ३४ ॥ ध्वं[3]स्तेतरञ्चसन्मात्रंयत्प्रबोधादुपासते ॥ योगिनःसर्वभूतेषुसद्रूपंनौमितंहरिम् ॥ ३५ ॥
ब्रह्माहमितिगायन्तियंज्ञात्वैकंवराद्विजाः ॥ पश्यन्तोहित्वयातुल्यंदेवंतंनौमिमाधवम् ॥ ३६ ॥ माययामोहवैचित्र्यंतथाहंममतांनृणाम् ॥ योनाश
यतिपापौघान्नमस्तस्मैचिदात्मने ॥ ३७ ॥ प्रयाणेवाप्रयाणेचयन्नामस्मरतांनृणाम् ॥ सद्योनश्यन्तिपापौघानमस्तस्मैचिदात्मने ॥ ३८ ॥ मोहानल
लसज्ज्वालाज्वलल्लोकेषुसर्वदा ॥ यत्पादाम्भोरुहच्छायांप्रविष्टश्चनदह्यते॥३९॥यस्यस्मरणमात्रेणनमोहोनैवदुर्गतिः॥नरोगानैवदुःखानितमनन्तंनमा
म्यहम् ॥ २४० ॥ कामयन्तेप्रजानैवधिषणाभ्यःसमुत्थिताः ॥ लोकमात्मैवपश्यन्तियंबुद्धैकचराजनाः ॥ ४१ ॥ शब्दार्थःसंविदर्थश्चविष्णो
र्नामपरोयदि ॥ सत्येनतेनसंसारोमासंस्पृशतुमाधव ॥ ४२ ॥ नारायणोजगद्व्यापीयदिवेदादिसंमतः ॥ सत्येनतेननिर्विघ्ना विष्णुभक्तिर्ममास्तुवै॥
॥ ४३ ॥ योनबीजंविनाबीजंबीजेयोबीजभावितः ॥ सविष्णुर्भवबीजंमेसितविद्यासिनार्यतु ॥ ४४ ॥ त्रितनुर्नटवद्यस्तुसृष्टिस्थितिलयेषुच ॥
गुणैर्भवतिकार्येषुसप्रसीदतुमेहरिः ॥ ४५ ॥ दशधेहावतीर्णोयोनमत्राणायकेवलम् ॥ अभ्यर्थितःसुरैःसर्वैःसप्रसीदतुमेहरिः ॥ ४६ ॥ ब्रह्मादिस्तम्ब
पर्यन्तंप्राणिहृन्मन्दिरेऽमलः ॥ एकोवसतियोदेवःसप्रसीदतुमेहरिः ॥ ४७ ॥ इच्छांचक्रेसदेवाग्रएकश्चैवबहुस्तथा ॥ प्रविष्टोदेवताःस्रष्टासप्रसीदतुमे
हरिः ॥ ४८ ॥ हृत्खगःखसमःखादिःखातीतःखक्रियःखगः ॥ खंब्रह्माखादिमुक्चान्तेखमूर्तिस्त्वंमखाशनः ॥ ४९ ॥ यद्वासायन्मुदायस्य[4]मायया
सृज्यतेजगत् ॥ जाड्यंदुःखमसत्यंचसभवानेवतन्मयः ॥२५०॥ त्वत्तस्पृष्टमोदतेविश्वंत्वत्त्यक्तमशुचिर्भवेत ॥ तत्सङ्गतोऽप्यसङ्गस्त्वंविकारस्तेनतेनहि
॥५१॥भूतयोगजचैतन्यंचार्वाकायमुपासते ॥ सौगताध्रुवतेतर्कैस्त्वांबुद्धिंक्षणभङ्गुराम् ॥५२॥ शरीरपरिमाणंत्वांमन्यन्तेजिनदेवताः॥ध्यायन्तिपुरुषं

१ 'महदादिर्द्विधा भावाः' इ०पा०। २ 'निरीक्षणे जगन्मित्रम्' इ०पा०। ३ 'सं (खं) खेचरन्त' इ०पा०। ४ 'दो अखण्डनं' लोकप्रभुं नाम । हेतवे नमः। ५ 'जनया सन्ततंजगत्' इ०पा०।

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साङ्ख्यास्त्वामेवप्रकृतेःपरम् ॥ ५३ ॥ जन्मादिरहितः[1]पूर्वंयःस्यादानन्दलक्षणम् ॥ त्वामेवोपनिषद्ब्रह्मचिन्तयन्तिपरस्परम् ॥५४॥ खादिभूतानिदेह
श्चमनोबुद्धीन्द्रियाणिच ॥ विद्याविद्येत्वमेवात्रनान्यत्त्वत्तोऽस्तिकिंचन ॥ ५५ ॥ त्वंधातासर्वभूतानांत्वमेवशरणंमम ॥ त्वमग्निस्त्वंहविःशक्रोहोता
मन्त्रःक्रियाफलम् ॥५६॥ त्वमस्तिनास्तिवैकुण्ठत्वामहंशरणंगतः॥ त्वंकर्मफलदाताचदीक्षितानांक्रियाफलम् ॥ ५७॥ त्वंहेतुःसर्वभूतानांत्वमेवशरणं
मम॥युवतीनांयथायूनियूनांचयुवतौयथा॥५८॥मनोऽभिरमतेतद्वत्प्रीतिर्मेरमतांत्वयि ॥ अपिपापंदुराचारंनरंत्वत्प्रणतंहरे॥५९॥नेक्षन्तेकिङ्करायाम्या
उलूकास्तपनंयथा ॥ तापत्रयमघौघश्चतावत्पीडयतेजनम् ॥ २६० ॥ यावत्स्मरतिनोनाथभक्त्यात्वत्पादपङ्कजम् ॥६१॥ यंनस्पृशन्तिगुणजातिश
रीरधर्मायंनस्पृशन्तिगतयस्त्वखिलेन्द्रियाणाम् ॥ यंचस्पृशन्तिमुनयोगतसङ्गमोहास्तस्मैनमोभगवतेहरयेकरोमि ॥ ६२ ॥ स्थूलंविलाप्यक
रणेकरणंनिदानेतत्कारणंकरणकारणवर्जितेच ॥ इत्थंविलाप्यमुनयःप्रविशन्तितत्रतस्मैनमोऽस्तुहरयेमुनिसेविताय ॥ ६३ ॥ यद्ध्यानसंवहनघूर्णवशी
कृतान्तामैश्वर्यचारुगुणिनींसुखमोक्षलक्ष्मीम् ॥ आलिङ्ग्यशेरतइहात्मसुखैकभाजस्तस्मैनमोऽस्तुहरयेमुनिसेविताय ॥ ६४ ॥ जन्मादिभावविकृ
तेर्विरहस्वभावेयस्मिन्नयंपरिधुनोतिषडूर्मिवर्गः॥ यंतापयन्तिनसदामदनादिदोषास्तंवासुदेवममलंप्रणतोऽस्मिहार्दम्॥६५॥यद्ध्यानसङ्गतमलंविजहा
त्यविद्यांयद्ध्यानवह्निपतितंजगदेतिनाशम् ॥ यज्ज्ञानमुल्लसदसिद्यतिसंशयारिंतंत्वांहरिंविशदबोधघनंनमामि ॥ ६६ ॥ चराचराणिभूतानिसर्वा
णिचहरेर्वश ॥ यथात्रतेनसत्येनपुरस्तिष्ठतुमेहरिः ॥ ६७ ॥ यथानारायणःसर्वंजगत्स्थावरजङ्गमम् ॥ तेनसत्येनमेरूपंप्रदर्शयतुकेशवः॥६८॥
भक्तिर्यथाहरौमेऽस्तितद्वरिष्ठागुरौयदि ॥ ममास्तितेनसत्येनस्वंदर्शयतुकेशवः ॥ ६९ ॥ तस्यैवंशपथैःसत्यैर्भक्तितस्यानुचिन्तयन् ॥ दर्शया
मासचात्मानंसप्रीतःपुरुषोत्तमः ॥ २७० ॥ ततोदत्त्वावरंतस्यपूरयित्वामनोरथम् ॥ जगामकमलाकान्तःस्तुत्याविप्रेणतोषितः ॥ ७१ ॥ कृत
कृत्योद्विजःसोऽपिवासुदेवपरायणः ॥ शिष्यैःसार्धंजपन्स्तोत्रंतस्मिन्नास्तेतपोवने ॥ ७२ ॥ कीर्तयेद्यइदंस्तोत्रंशृणुयाद्योऽपिमानवः ॥ अश्वमे
धस्ययज्ञस्यप्राप्नोतिविपुलंफलम् ॥ ७३ ॥ आत्मविद्याप्रबोधंचलभतेब्राह्मणःसदा ॥ नपापेजायतेबुद्धिर्नैवपश्यत्यमङ्गलम् ॥ ७४ ॥ बुद्धिस्वा
स्थ्यंमनःस्वास्थ्यंस्वास्थ्यमैन्द्रियकंतथा ॥ नृणांभवतिसर्वेषामस्यस्तोत्रस्यकीर्तनात् ॥ ७५ ॥ विचार्यार्थंजपेद्यस्तुश्रद्धयातत्परोनरः ॥ स
विधूयेहपापानिलभतेवैष्णवंपदम् ॥ ७६ ॥ लभतेवाञ्छितान्कामान्पुत्रपौत्रान्पशूंस्तथा ॥ दीर्घमायुर्बलंवीर्यंलभतेससदापठन् ॥ ७७ ॥

१ 'पूर्णं चित्सदानन्दलक्षणम्' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ १३० ॥ तिलपात्रसहस्रेणगोसहस्रेणयत्फलम् ॥ तत्फलंसमवाप्नोतियइमांकीर्तयेत्स्तुतिम् ॥ ७८ ॥ धर्मार्थकाममोक्षणांयंयंकामयतेसदा ॥ अचिरा उ.खं.स-
प० पु० त्तमवाप्नोतिस्तोत्रेणानेनमानवः ॥ ७९ ॥ आचारेविनयेधर्मेज्ञानेतपसिसन्नये ॥ नृणांभवतिनित्यंधीरिमांसंशृण्वतांस्तुतिम् ॥ २८० ॥ महा अ० १२८
पातकयुक्तोवायुक्तोवाह्युपपातकैः ॥ सद्योभवतिशुद्धात्मास्तोत्रस्यपठनात्सकृत् ॥ ८१ ॥ प्रज्ञालक्ष्मीयशःकीर्तिज्ञानधर्मविवर्धनम् ॥ दुष्ट
ग्रहोपशमनंसर्वाशुभविनाशनम् ॥ ८२ ॥ सर्वव्याधिहरंपथ्यंसर्वारिष्टनिषूदनम् ॥ दुर्गतेस्तरणंस्तोत्रंपठितव्यंद्विजातिभिः ॥ ८३ ॥ नक्ष
त्रग्रहपीडासुराजचोरभयेषुच ॥ अग्निचोरनिपातेषुसद्यःसंकीर्तयेदिदम् ॥ ८४ ॥ सिंहव्याघ्रभयंनास्तिनाभिचारभयंतथा ॥ भूत
प्रेतपिशाचेभ्योराक्षसेभ्यस्तथैवच ॥ ८५ ॥ पूतनाजृम्भकेभ्यश्चविघ्नेभ्यश्चैवसर्वदा ॥ नृणांक्वचिद्भयंनास्तिस्तवेह्यस्मिन्प्रकीर्तिते ॥ ८६ ॥
वासुदेवस्यपूजांयःकृत्वास्तोत्रमुदीरयेत् ॥ लिप्यतेपातकैर्नासौपद्मपत्रमिवाम्भसा ॥ ८७ ॥ गङ्गादिपुण्यतीर्थेषुयास्नानैर्नाप्यतेगतिः ॥
तांगतिंसमवाप्नोतिपठन्पुण्यामिमांस्तुतिम् ॥ ८८ ॥ एककालंद्विकालंवात्रिकालंवापियःपठेत् ॥ सर्वदासर्वकालेषुसोऽक्षयंसुखमश्नुते ॥
॥ ८९ ॥ चतुर्णामपिवेदानांत्रिरावृत्त्याचयत्फलम् ॥ तत्फलंलभतेस्तोत्रमधीयानःसकृन्नरः ॥ २९० ॥ अक्षय्यंधनमाप्नोतिस्त्रीणांभव
तिवल्लभः ॥ पूजांविन्दतिलोकेऽस्मिञ्छ्रद्धयासंस्मरन्हरिम् ॥ ९१ ॥ सर्वदासंपदायुक्तोविपदंनैवगच्छति ॥ गोभिर्नह्रियतेस्तोत्रंनित्यंयःकीर्तये
द्धियत् ॥ ९२ ॥ अलक्ष्मीःकालकर्णीचदुःस्वप्नंदुर्विचिन्तितम् ॥ सद्योनश्यन्तिभक्तानामेतंसंशृण्वतांस्तवम् ॥ ९३ ॥ प्रातरुत्थाययोऽधीते
शुचिर्विष्णुपरायणः ॥ अक्षय्यंलभतेसौख्यमिहलोकेपरत्रच ॥ ९४ ॥ देवद्युतिप्रणीतंवैविष्णुप्रीतिकरंशुभम् ॥ विष्णुप्रसादजननं
विष्णुदर्शनकारकम् ॥ ९५ ॥ योगसारमिदंनामस्तोत्रंपरमपावनम् ॥ यःपठेत्सततंभक्त्याविष्णुलोकंसगच्छति ॥ ९६ ॥ इतितेकथितं
स्तोत्रंगुह्यंपापप्रणाशनम् ॥ अतऊर्ध्वंप्रवक्ष्यामिपिशाचस्यविमोचनम् ॥ २९७ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०उत्तर०माघमाहात्म्ये
वसिष्ठदिलीपसंवादेयोगसारस्तोत्रकथनंनामसप्तविंशत्यधिकशततमोऽध्यायः ॥ १२७ ॥ वसिष्ठउवाच ॥ श्रूयतांयेपिशाचाश्चमोचितास्तेन ॥ १३० ॥
तद्वने ॥ आसीद्राजाचित्रनामाद्राविडविषयेपुरा ॥ १ ॥ सोमान्वयेमहावीरःशूरःशस्त्रास्त्रपारगः ॥ गजवाजिरथौघैश्चसंपन्नोविक्रमीस
दा ॥ २ ॥ स्वर्णैर्नानाविधैरत्नैःपूर्णकोशोमहाधनः ॥ मध्येनारीसहस्रस्यसदाक्रीडतितत्परः ॥ ३ ॥ स्त्रैणःकामीसदालुब्धश्चण्डकोपः
सपार्थिवः ॥ नकरोतिवचोधर्म्यंसचिवैःसमुदीरितम् ॥ ४ ॥ विष्णुंनिन्दतिसोऽत्यर्थंवैष्णवान्द्वेष्टिसर्वदा ॥ कोऽसौविष्णुःक्वदृष्टोऽसौक्वचास्ते

CC-0. In Public Domain. Digitization by eGangotri

केनकीर्त्यते ॥ ५ ॥ इत्थंनसहतेविष्णुंसराजादैवमोहितः ॥ नारायणंभजन्तेयेतान्पीडयतिकोपितः ॥ ६ ॥ नब्राह्मणान्नवेदांश्चवैदिकंकर्मनत्र
तम् ॥ नदानंमन्यतेदातुंपाखण्डस्थितिसंस्थितः ॥ ७ ॥ अनीत्याचण्डदण्डैश्चप्रजापीडांकरोतिसः ॥ निष्ठुरोनिर्दयःक्रूरःपुण्यकार्यपराङ्मु
खः ॥ ८ ॥ च्युताचारोऽच्युतद्वेष्टाच्युताग्निश्चच्युतक्रियः ॥ सोऽनुशास्तिजनंभूपःकालरूपइवापरः ॥ ९ ॥ ततोबहुतिथेकालेसराजापञ्चतां
गतः ॥ वैदिकेनविधानेनलेभेनैवौर्ध्वदैहिकम् ॥ १० ॥ अथकिङ्करयूथेनपीड्यमानोभृशंतदा ॥ अयःकीलमयेमार्गेतप्तसिक्ताप्रपूरिते ॥११॥ चण्डा
करश्मिसंतप्तेवृक्षच्छायाविवर्जिते ॥ तप्ताङ्गारप्रकीर्णेचवह्निज्वालासमाकुले ॥ १२ ॥ लोहतुण्डैश्चकाकोलैर्हन्यमानःसुदारुणैः ॥ वृकैर्दंष्ट्राकरालैश्चश्व
भिर्घोरैश्चभक्षितः ॥ १३ ॥ शृण्वन्क्रन्दितमन्येषांनृणांकिल्बिषकारिणाम् ॥ जगामपार्थिवोलोकमन्तकस्यभयावहम् ॥१४॥ शृणुभूपगतिंतस्यतस्मिँ
ल्लोकेसुदुःसहाम् ॥ निरयान्निरयंयातःपर्यायेणसभूपतिः ॥१५॥ आदौप्रयातस्तामिस्रेदारुणेभूरिदुःखदे ॥ पुनश्चैवान्धतामिस्रेयत्रदुःखंनिरन्तरम् ॥
॥ १६॥ गतोऽनन्तरमत्युग्रंमहारौरवरौरवम् ॥ नरकंकालसूत्रंचमहानरकमेवच ॥ १७ ॥ पश्चान्मग्नःसभूपालोदुस्तरेदुःखमूर्छितः॥ संजीवनेमहावीचौ
तापनेसंप्रतापने ॥ १८ ॥ प्रतापनरकंराजादुःखाग्निप्लुष्टमानसः ॥ संपातंचसकाकोलंकुड्मलंपूतिमृत्तिकम् ॥ १९ ॥ लोहशङ्कुमृगीयन्त्रंपन्थानं
शाल्मलिंनदीम् ॥ प्रविष्टोऽथमहाभीमंदुर्दर्शंदुर्गमंपुनः ॥ २० ॥ असिपत्रवनंचैवलोहचारकमेवच ॥ एवमेतेषुसर्वेषुपतित्वापापकृन्नृपः ॥ २१ ॥
अविन्दन्नरकेघोरेसंतापंयातनामयम् ॥ विष्णुप्रद्वेषघोषेणयुगानामेकविंशतिः ॥२२॥ भुक्त्वाचयातनांयाम्यांनिस्तीर्णनरकोनृपः ॥ समयाद्गिरिराजे
तुपिशाचोऽभूत्तदामहान् ॥ २३ ॥ सभ्राम्यतिदिशःसर्वावनेतस्मिन्बुभुक्षितः ॥ नपश्यत्यशनंतोयंमेरावपिसदागिरौ ॥२४ ॥ कदाचित्पर्यटन्सोऽथ
पिशाचःशोकपीडितः ॥ प्लक्षप्रस्रवणारण्यंप्रविष्टोभाविसत्फलम् ॥२५॥ बिभीतकतरुच्छायांसमाश्रित्यसुदुःखितः ॥हाहतोऽस्मीतिचाक्रन्दद्घोरमुच्चैः
पुनःपुनः ॥ २६ ॥ क्षुत्तृड्भ्यांमुह्यमानस्यसर्वभूतद्रुहोमम॥ जन्मनोऽस्यदुरन्तस्यकथमन्तोभविष्यति ॥ २७ ॥ आदौपापसमुद्रेऽस्मिन्दुःखकल्लोल
मालिनि ॥ करावलम्बनंकोऽद्यनिमग्नस्यप्रदास्यति ॥२८॥ इत्थंतस्यपिशाचस्यरोदनंदीनचेतसः ॥ देवद्युतिरधीयानःशुश्रावकरुणामयम् ॥ २९ ॥
समागम्यततस्तत्रतंपिशाचंददर्शसः ॥ विकरालमुखंभीमंपिशङ्गनयनंकृशम् ॥ ३० ॥ ऊर्ध्वमूर्धजकृष्णाङ्गंयमदूतमिवापरम् ॥ ललज्जिह्वंचलम्बोष्ठं
दीर्घजङ्घंशिराकुलम् ॥३१॥ दीर्घाङ्घ्रिंशुष्कतुण्डंचगर्ताक्षंशुष्कपञ्जरम् ॥ अथामुंकौतुकाविष्टःपप्रच्छमुनिपुङ्गवः ॥३२॥ देवद्युतिरुवाच ॥ कोऽसि
त्वंभीषणाकारःकुतोरोदिषिदारुणम्॥ अवस्थेयंकुतोब्रूहिकिंचाहंकरवाणिते ॥३३॥ ममाश्रमप्रविष्टाहिदुःखभाजोनजन्तवः॥ मोदन्तेकेवलंसर्वेवैष्णवे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवनेयथा ॥३४॥ वदत्वंसत्वरंभद्रदुःखस्यैतस्यकारणम् ॥ कालक्षेपंनकुर्वन्तिप्राप्तेऽर्थेहिमनीषिणः ॥३५॥ वसिष्ठउवाच ॥श्रुत्वैतद्वचनंप्रीतःपिशाच
स्त्यक्तरोदनः ॥ उवाचदीनयावाचाप्रश्रयावनतस्तदा ॥३६॥ पिशाचउवाच ॥ सर्वाङ्गव्यापिसंतापंजहारत्वद्वचोमयि ॥ ग्रीष्मेदावानलोद्भूतंवर्षन्मेघ
इवाचले ॥३७॥ यन्मेऽस्तिसुकृतंकिंचित्तेनदृष्टोऽसिमेद्विज ॥नह्यसंचितपुण्यानांसद्भिरेकत्रसंगमः ॥३८॥इत्युक्त्वाकथयामासपूर्ववृत्तान्तमात्मनः ॥
विष्णुद्वेषप्रदोषेणदशामेतामहंगतः ॥ ३९ ॥ यन्नामप्राणान्मुक्तोहिस्मृत्वाविष्णुपदंव्रजेत् ॥ पापिष्ठोहिहरौतस्मिन्ममद्वेषोऽभवद्द्विज ॥ ४० ॥
यःपालयतिभूतानिधर्मंयातिजगत्त्रये ॥ योऽन्तरात्माचभूतानांतस्मिन्द्वेषोममाभवत् ॥४१॥कर्मणांफलदोयोऽत्रसर्ववेदेषुगीयते ॥तपोभिरिज्यतेविप्रैः
समद्वेषवशंगतः ॥ ४२ ॥ त्यक्तक्रियैःप्रियारण्यैर्निःसङ्गैकचरैश्वयः ॥ वेदान्तेयतिभिश्चिन्त्यःसमेद्वेषीहरिर्द्विज ॥ ४३ ॥ ब्रह्मादयःसुराःसर्वेयोगिनः
सनकादयः ॥ मुक्त्यर्थमर्चयन्तीहसविष्णुर्द्वेषितोमया ॥४४॥ आदौमध्यऽवसानेयोविश्वधातासनातनः ॥ यस्यनैवादिमध्यान्ताःसमेद्वेषपदंययौ ॥
॥ ४५ ॥ यन्मयासुकृतंकर्मकृतंप्राक्तनजन्मनि ॥ विष्णुद्वेषाग्निनादग्धंतत्सर्वंभस्मसादभूत् ॥ ४६ ॥ कथंचिदस्यपापस्यसीमांद्रक्ष्यामिचेदहम् ॥
मुक्त्वानारायणंनान्यमर्चयिष्यामिदेवताम् ॥ ४७ ॥ विष्णुद्वेषाच्चिरंभुक्तामयानरकयातना ॥ निरयान्निसृतःसोऽहंपैशाचींयोनिमागतः ॥ ४८ ॥
अधुनाकर्ममन्त्रैःकैरथानीतस्त्वदाश्रमम्॥यत्रत्वद्दर्शनार्कान्मेनष्टंदुःखमयंतमः॥४९॥प्राप्यतेमरणंयत्रबन्धनंश्रीःसुखंवधूः॥सतत्रनीयतेस्वेनकर्मणागलं
हस्तिना ॥५०॥ इदानीमुचितंकर्मब्रूहिपैशाच्यनाशनम् ॥ परोपकारकार्येहिनधन्यामन्दगामिनः ॥५१॥देवद्युतिरुवाच ॥ अहोमुष्णातिमायेयंदेवा
सुरनृणांस्मृतिम् ॥ ययादेवेष्वपिद्वेषोजायतेधर्मनाशनः ॥ ५२ ॥ स्रष्टापालयिताहन्ताजगतांयोमहेश्वरः ॥ आत्माचसर्वभूतानांतंमूढोद्वेष्टि
कःकथम् ॥ ५३ ॥ भवन्तिसर्वकर्माणिसफलानियदर्पणात् ॥ तद्भक्तिविमुखोमर्त्यःकोनयातीहदुर्गतिम् ॥ ५४ ॥ श्रुतिस्मृतिसदाचारविहितं
कर्मकेवलम् ॥ सेवितव्यंचतुर्वर्णैर्भजेन्नारायणंसदा ॥५५॥ अन्यथानिरयंयान्तिविनाह्यागमसेवनात्॥अतोवेदविरुद्धार्थशास्त्रोक्तंकर्मसंत्यजेत्॥५६॥
स्वबुद्धिरचितैःशास्त्रैःप्रतार्येहतुबालिशान्॥विघ्नन्तिश्रेयसोमार्गंलोकनाशायकेवलम्॥५७॥विष्णुंनिन्दन्तिवेदांश्चतपोनिन्दन्तिसद्द्विजान् ॥तेनतेनरकं
यान्तिह्यसच्छास्त्रनिषेवणात् ॥ ५८ ॥ अयमेवयथाराजाद्रविडोनिरयंगतः ॥ द्विषन्नारायणंदेवंदेवदेवंजगत्प्रभुम् ॥ ५९ ॥ तस्माद्द्वेषंहिदेवेषुब्राह्मणेषु
विशेषतः ॥ संत्यजेत्पुण्यकामोऽत्रवेदबाह्यांक्रियांत्यजेत् ॥ ६० ॥ इत्युक्त्वाकथयामासपिशाचायहितंमुनिः ॥ प्रयागंगच्छभोभद्रमाघमासंविचारय
॥६१॥ यत्रतेनिश्चितामुक्तिःपैशाच्यान्नात्रसंशयः ॥ तत्राप्लुतादिवंयान्तिश्रुतिरेषासनातनी ॥ ६२ ॥ विजहातिनरस्तत्रप्राक्तनंकर्मदुष्कृतम्॥ प्रयाग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्नानतोनास्तिक्काप्यन्यदधिकंपरम् ॥ ६३ ॥ प्रायश्चित्तंतपोरूपंदानरूपंक्रियात्मकम् ॥ यागयोगाधिकंविद्धिप्रयागंपापिनामपि ॥६४॥ स्वर्गापव
र्गयोर्द्वारंतत्पृथिव्यामपावृतम् ॥ सितासितोदवेणीयातांहित्वाभुविनापरा ॥६५॥ पापनैगडबद्धस्यच्छेदनैककुठारिका ॥ क्वविष्णुःसूर्यतेजोऽग्निर्गङ्गा
यामुनसंगमः ॥ ६६ ॥ क्ववराकीनृणांतुच्छापापराशितृणाहुतिः ॥ मलीमसघनध्वंसेयथाशरदिचन्द्रमाः ॥ ६७ ॥ भातिपापक्षयादूर्ध्वंनरोवेणीजल
प्लुतः ॥ सितासितस्यमाहात्म्यमहंवक्तुंनतेक्षमः ॥६८॥ यत्तोयकणसंस्पृष्टोमुक्तःकेरलकोद्विजः ॥ इतिवाक्यमृषेःश्रुत्वापिशाचस्तुष्टमानसः॥६९ ॥
मुक्तदुःखइवप्रीतःपप्रच्छप्रणयान्मुनिम् ॥ कथंकेरलदेशीयोद्विजोमुक्तोमहामुने ॥७०॥ एतंकथयवृत्तान्तंसंश्रित्यकरुणामयि ॥७१॥ देवद्युतिरुवाच॥
पिशाचशृणुपुण्यांमेकथांकथयतःशुभाम् ॥ केरलेवसुनामात्रब्राह्मणोवेदपारगः ॥७२॥ दायादैर्हृतवित्तस्तुनिर्धनोबन्धुवर्जितः॥जन्मभूमिंपरित्यज्य
महादुःखेनदुःखितः ॥७३॥ देशाद्देशंपरिभ्रम्यकालेनमहतापुनः ॥ प्रविश्यसमहारण्यमीषद्व्याधिप्रपीडितः ॥७४॥ गच्छंस्तीर्थान्तरंश्रान्तःक्षुत्क्षामो
विन्ध्यपर्वते ॥ दुर्भिक्षेणमृतिंलेभेनदाहंचौर्ध्वदेहिकम्॥७५॥तेनकर्मविपाकेनतत्रैवगिरिगह्वरे॥प्रेतीभूतश्चिरंकालमुवासनिर्जनेवने ॥७६॥ शीतातपपरि
क्लिष्टोनिराहारोनिरूदकः॥दिगम्बरोव्युपानत्कोगिराहाहेतिनिःश्वसन्॥७७॥इतस्ततःपरिभ्रम्यवायुभूतःसकेरलः॥द्विजोनशरणंलेभेनसुखंकुत्रचित्तदा॥
॥७८॥संशोचतिस्मदुःखार्तोनवपश्यतिसद्गतिम् ॥ सर्वदादत्तदानंसभुङ्क्तेस्वंकर्मणःफलम् ॥७९॥ हविर्जुह्वतिनाग्नौयेगोविन्दंनार्चयन्तिये ॥ भजन्ते
नात्मविद्यांयेसुतीर्थविमुखाश्चये ॥ ८० ॥ सुवर्णवस्त्रताम्बूलंमणिमन्नंफलंजलम् ॥ आर्तेभ्योनप्रयच्छन्तिसर्वेतेकृतहीनकाः ॥ ८१ ॥ ब्रह्मस्वंचपर
स्वंचस्त्रीधनानिहरन्तिये ॥ बलेनच्छद्मनावापिधूर्ताश्चपरवञ्चकाः ॥ ८२ ॥ दाम्भिकाःकुहकाश्चौरायेचपातकवृत्तयः ॥ बालवृद्धातुरस्त्रीषुनिर्दयाः
सत्यवर्जिताः ॥८३॥ अग्निदागरदायेचयेचान्येकूटसाक्षिणः ॥ अगम्यागामिनःसर्वेयचान्यग्रामयाजिनः ॥८४॥ पितृमातृस्नुषापत्यस्वदारत्यागि
नश्चये ॥ येकदर्याश्चलुब्धाश्चनास्तिकाधर्मदूषकाः॥८५॥त्यजन्तिस्वामिनंयुद्धेत्यजन्तिशरणागतम् ॥ गवांभूमेश्चहन्तारोयेचान्येरत्नदूषकाः॥८६॥
परापवादिनःपापादेवतागुरुनिन्दकाः ॥ महाक्षेत्रेषुसर्वेषुप्रतिग्रहरताश्चये ॥८७॥ परद्रोहरतायेचतथाचप्राणिहिंसकाः ॥ कुप्रतिग्राहिणःसर्वेतेभवन्ति
पुनःपुनः ॥ ८८ ॥ प्रेतराक्षसपैशाचतिर्यग्वृक्षकुयोनिषु ॥ नतेषांसुखलेशोऽस्तिइहलोकेपरत्रच ॥ ८९ ॥ तस्मात्त्यक्त्वानिषिद्धार्थंविहितंकर्म
चाचरेत् ॥ यज्ञंदानंतपस्तीर्थंमन्त्रंदेवंगुरुंभजेत् ॥ ९० ॥ विपाकंकर्मणांदृष्ट्वायोनिकोटिषुदुस्तरम् ॥ चतुर्भिरपिवर्णैश्चसेव्योधर्मोनिरन्तरम् ॥९१॥
इतिप्रेतगतिंदृष्ट्वापापबीजोर्थितांहिसः ॥ कृत्वाधर्मोपदेशंचपुनस्तस्मैद्विजोऽब्रवीत ॥ ९२ ॥ इत्थंसकेरलःप्रेतोवर्तमानोगिरौतदा ॥ अतिवाह्यचिरं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कालमपश्यत्पथिकंपथि ॥९३॥ वहन्तंद्वौकरण्डौचवेणीजलयुतौतथा ॥ गायन्तंप्रमुखादेवंपुण्यश्लोकजनार्दनम् ॥ ९४ ॥ तंदृष्ट्वासहसाप्रेतोमार्गरोधं
चकारसः ॥ दर्शयामासचात्मानंमाभैषीरित्युवाचसः ॥ ९५ ॥ पानीयंपातुमिच्छामित्वत्तःकार्पटिकोत्तम ॥ नदास्यसिजलंचेन्मेप्राणायास्यन्ति
मेदृढम् ॥ ९६ ॥ इतिप्रेतवचःश्रुत्वापान्थःप्रत्याहकौतुकात् ॥९७॥ कार्पटिकउवाच ॥ कस्त्वंदुःखाभिभूतस्तुकृशोम्लानोदिगम्बरः ॥ जीवशेषोमु
मूर्षुश्चविकृतोभयवर्धनः॥९८॥नवधूममयाकारश्चण्डश्चञ्चललोचनः॥पद्भ्यामस्पृष्टभूमिस्त्वंनिर्मांसोदरबाहुकः॥इतितद्वचनंश्रुत्वाप्रेतोवाक्यमथाब्रवीत
॥९९॥प्रेतउवाच ॥ शृणुधार्मिष्ठतेवच्मियेनाहमीदृशोऽभवम् ॥ ब्राह्मणोऽदत्तदानोऽहंलोभीचमलिनक्रियः ॥ १०० ॥ परान्नंचसदाभुक्तमेकाकीमिष्ट
भोजनः ॥ मयादत्तानभिक्षापिहन्तकारोनपुष्कलः ॥ १ ॥ नकृतोवैश्वदेवस्तुप्रक्षिप्तोनबहिर्बलिः ॥ भूतानांतुतृषार्तानांनहतापयसाचतृट् ॥ २ ॥
कदाचित्पितरोनैवतर्पिताअटतामहीम् ॥ नचश्राद्धंकृतंक्वापिपूजितानैवदेवताः ॥ ३ ॥ वर्षातपपरित्राणंनदत्तंपादरक्षणम् ॥ जलपात्रमदत्तंच
ताम्बूलंनौषधंमया ॥ ४ ॥ नगृहेवसतिर्दत्तानातिथ्यंकस्यचित्कृतम् ॥ अन्धवृद्धाधनानाथदीनाःपानान्नतोषिताः ॥ ५ ॥ गवांग्रासोनदत्तो
वैनरोगीपरिमोचितः ॥ नदत्तानहुताविप्रपवित्राश्चतिलामया ॥ ६ ॥ पृथिव्यांतिलदातारोनभवन्तिदुमद्विधाः ॥ व्यतीपातेनदत्तंहि
किंचित्स्वर्णंमहाफलम् ॥ ७ ॥ संक्रान्तावुपरागेचनदत्तंसूर्यचन्द्रयोः ॥ पर्वाण्यन्यानिसर्वाणिजग्मुःशून्यानिमेद्विज ॥ ८ ॥ तिथयः
कार्तिकेमुख्याजातावन्ध्याःसदामम ॥ पितृभ्योनैवदत्तंवाह्यष्टकासुमघासुच ॥ ९ ॥ द्विजानांनकृताप्रीतिर्मन्वादिषुयुगादिषु ॥ नदत्त
स्तिलतैलेनप्रदीपःकार्तिकेमया ॥ ११० ॥ नस्नातोमाघमासेऽहंरूपसौभाग्यकामदे ॥ द्विजायवेदविदुषेगौतम्यांसिंहगेगुरौ ॥ ११ ॥
मयासंकल्पितंद्रव्यंनदत्तंपूर्वजन्मनि॥ नस्नातोऽहंकृष्णवेण्यांतथाकन्यागतेगुरौ ॥ १२ ॥ अग्निंप्रज्वाल्यकाष्ठौघैःस्नातानांपौषमाघयोः ॥ शीतार्ता
नांचविप्रणांनकृतोजाड्यनिग्रहः ॥ १३ ॥ माधवादिषुमासेषुनदत्तंशीतलंजलम् ॥ मयानारोपितोऽश्वत्थोन्यग्रोधोनैववर्धितः ॥ १४ ॥
बन्दीगेहान्मयामुक्तिर्नकृताप्राणिनांक्वचित् ॥ नप्राणिभयसंत्रस्तोरक्षितःशरणागतः ॥ १५ ॥ नोपोष्यात्रत्रिरात्राणितोषितोमधुसूदनः ॥
कृच्छ्रातिकृच्छ्रपाराकंतथाचान्द्रायणंद्विज ॥ १६ ॥ अथान्यत्तप्तकृच्छ्रंचतथासांतपनानिच ॥ व्रतान्येतानिपुण्यानिजुष्टानीन्द्रादिभिः ॥ १३२ ॥
सुरैः ॥ १७ ॥ चरित्वानमयातानिदेहःसंशोषितःपुरा ॥ इत्थंपूर्वभवोवन्ध्योममजातोद्विजोत्तम ॥ १८ ॥ पश्यद्विजमहाक्रूरा
मद्गतामत्रजन्मनि ॥ गतिंदूरप्रबोधांतुममपूर्वस्यकर्मणः ॥ १९ ॥ सन्तिमांसानिमार्गेषुवृकव्याघ्रहतानिवै ॥ फलान्यन्यानिशैलेऽस्मि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ञ्छुकैस्त्यक्तानिसर्वतः ॥ १२० ॥ पुण्यानिचसुगन्धीनिफलानिरसवन्तिच ॥ मूलानितुसुभक्ष्याणिमृदूनिमधुराणिच ॥ २१ ॥ नानाविधानि
तिष्ठन्तिमधूनिसुबहून्यपि ॥ स्रोतसांनिर्झराणांचसन्तिवारीणिसर्वशः ॥ २२ ॥ सुलभेषुपदार्थेषुसर्वेष्वतेषुपर्वते ॥ नेक्षेऽहमशनंकापिदैवेनापिहतं
सदा ॥ २३ ॥ वाताहारेणजीवामियथाजीवन्तिपन्नगाः ॥ पुनर्जीवामिभोविप्रदेवयोनिप्रभावतः ॥ २४ ॥ बलेनप्रज्ञयानित्यंमन्त्रपौरुषविक्रमैः
सहायैश्चैवमित्रैश्चनालभ्यंलभतेनरः ॥ २५ ॥ लाभालाभेसुखेदुःखेविवाहेमृत्युजीवने ॥ भोगेरोगेवियोगेचदैवमेवहिकारणम् ॥ २६ ॥ कुरूपाः
कुकुलामूर्खाःकुत्सिताचारनिन्दिताः ॥ शौर्यविक्रमहीनाश्चदैवाद्राज्यानिभुञ्जते ॥ २७ ॥ काणाःखञ्जाअभव्याश्चनीतिहीनाश्चदुर्गुणाः ॥ नपुंसका
श्चदृश्यन्तेदैवाद्राज्येप्रतिष्ठिताः ॥ २८ ॥ यैर्दत्ताश्चतिलागावोहिरण्यंवसनानिच ॥ गौरीकन्याचयैर्दत्तायैर्दत्ताचवसुन्धरा ॥ २९ ॥ शय्यासनानि
ताम्बूलंमन्दिराणिधनानिच ॥ भक्ष्यभोज्यानिदत्तानिचन्दनान्यगरूणिच॥१३०॥अटव्यांपर्वताग्रेचग्रामेवानगरेऽपिवा ॥ पुरःपुरश्चतिष्ठन्तितेषांभो
गाःप्रयत्नतः ॥ ३१ ॥ सन्त्यत्रपर्वतेऽन्येऽपिराक्षसाबलवत्तराः ॥ राक्षसाश्चपिशाचाश्चपिशाच्यश्चातिदारुणाः ॥ ३२ ॥ कदाचिच्चकथंचिच्चकापि
यत्रस्वकर्मणा ॥ लभन्तेचान्नपानानिपर्यटन्तोवनेवने ॥ ३३ ॥ इतिश्रुत्वात्रतेभ्यश्चमाभयंभवतांभवेत् ॥ शुचिंगोविन्दभक्तंत्वांनतेद्रष्टुमपिक्षमाः
॥ ३४ ॥ विष्णुभक्तितनुत्राणंनारायणपरायणम् ॥ नस्पृशन्तिनपश्यन्तिराक्षसाःप्रेतपूतनाः ॥ ३५ ॥ भूतवेतालगन्धर्वाःशाकिन्यश्चार्यकाग्रहाः ॥
रेवत्योवृद्धरेवत्योमुखमण्डचस्तथाग्रहाः ॥ ३६ ॥ यक्षाबालग्रहाःक्रूरादुष्टावृद्धग्रहाश्चये ॥ तथामातृग्रहाभीमाग्रहाश्चान्येविनायकाः ॥ ३७ ॥
कृत्याःसर्पाश्चकूष्माण्डायेचान्येदुष्टजन्तवः ॥ नपश्यन्तिपरंविप्रवैष्णवंब्राह्मणंशुचिम् ॥ ३८ ॥ शुचिंरक्षन्तिभूतानिधर्मिष्ठंपीडयन्तिन ॥
रक्षन्तिचशुचिंनित्यंग्रहनक्षत्रदेवताः ॥ ३९ ॥ गोविन्दनामाजिह्वाग्रेहृदिवेदस्तुसंस्थितः ॥ शुचिश्चदानशीलश्चत्वंसर्वत्राकुतोभयः ॥ १४० ॥
एवंब्राह्मणतिष्ठामिभुञ्जानःकर्मणःफलम् ॥ नशोचामीतिमत्वाहंविमृश्यचपुनःपुनः ॥ ४१ ॥ नदुनोमितथातावद्यावज्जम्बालिनीतटे ॥ सारसोदीरितं
वाक्यंश्रुतंपर्यटतामया ॥ ४२ ॥ ब्राह्मणउवाच ॥ सारसोदीरितंवाक्यंकीदृशंहिश्रुतंत्वया ॥ तदहंश्रोतुमिच्छामिब्रूहित्वंप्रेतसत्वरम् ॥ ४३ ॥
प्रेतउवाच ॥ ब्रवीमिसारसंवाक्यंशृणुकार्पाटिकोत्तम ॥ धूसरानामकक्षेऽस्मिन्नदीगिरिससुद्भवा ॥ ४४ ॥ सदाजलाशयोत्तालामत्तदन्तिकुलाकुला ॥
महाककुभशोभाढ्यास्निग्धजम्बूमनोहरा ॥४५॥ तस्यास्तीरमहंप्राप्तोगाहमानोवनंघनम् ॥ मयितिष्ठतिवैतत्रफलभोजनकाम्यया ॥ ४६ ॥ वनान्त
रात्समुड्डीयसारसोलक्ष्मणायुतः ॥ आगत्यपुलिनंनद्याःसेवितुंबहुपक्षिभिः ॥ ४७ ॥ पीत्वातत्रैवपानीयंरमित्वाभार्ययासह ॥ सुप्तःपक्षपुटेवामे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रवेश्यचशिरोमुखम् ॥ ४८ ॥ एतस्मिन्नन्तरेदृष्टःपादपादवतीर्यच ॥ रक्ताननःसुरक्ताक्षोदण्डीदृढनखावलिः ॥ ४९ ॥ लोमशोदीर्घलाङ्गूलश्चल
चेष्टोहिवानरः ॥ यत्रासौसारसःसुप्तस्तत्रवेगेनचागतः ॥१५०॥ समागत्यचजग्राहसारसंचरणेदृढम् ॥ कराभ्यांक्रूरयाबुद्ध्यापश्यतांबहुपक्षिणाम् ॥
॥ ५१ ॥ उड्डीयोड्डीयतेसर्वेगताश्चान्यत्रखेचराः ॥ सारसीभीतभीताचविरावान्कुर्वतीस्थिता ॥५२ ॥ सारसोभग्ननिद्रस्तुत्रासाच्चलितलोचनः ॥
अवलोकितवाञ्छीघ्रंतदोत्ताम्यशिरोधराम् ॥ ५३ ॥ विलोक्यवानरंदुष्टंहन्तुकामंसुदारुणम् ॥ तदासंभाषयामासगिरामधुरयाखगः ॥ ५४ ॥
अपराधंविनामांत्वंकिंशाखामृगबाधसे ॥ सापराधाजनालोकेवध्यन्तेभूमिपैरपि ॥ ५५ ॥ नपीडयितुमर्हन्तेत्वादृशाउत्तमाजनाः ॥ अस्मानहिंस
कान्साधून्परवृत्तिपराङ्मुखान् ॥ ५६ ॥ जलशैवालभक्षांश्चखेचरान्वनवासिनः ॥ स्वदाररतिशीलांश्चपरदाराभिवर्जितान् ॥ ५७ ॥ नपीडयितु
मर्हन्तित्वद्विधावानरोत्तम ॥ परापवादपैशुन्यान्द्विजान्परमसेवकान् ॥ ५८ ॥ शाखामृगविमुञ्चाशुसर्वथामामनागसम् ॥ जानामितवजन्माहंनत्वं
वेत्सितुमामकम् ॥ ५९ ॥ इत्याकर्ण्यवचस्तस्यमुमोचसारसंतदा ॥ चपलोवानरःशीघ्रमाहदूरेव्यवस्थितः ॥ १६० ॥ वानरउवाच ॥ ब्रूहिरेत्वंकथ
वेत्सिममजन्मपुरातनम् ॥ त्वंपक्षीज्ञानहीनश्चतिर्यक्चाहंवनेचरः ॥ ६१ ॥ सारसउवाच ॥ जानेऽहंतावकंजन्मजातिस्मरमितिस्फुटम् ॥ त्वंहिविन्ध्या
धिपोराजाप्राग्भवेपर्वतेश्वरः ॥ ६२ ॥ अहंपूज्यतमोविप्रस्तववंशेपुरोहितः ॥ तेनप्रत्यभिजानामित्वांसम्यग्वानरोत्तम ॥ ६३ ॥ इमांपालयताभूमिं
प्रजाःसर्वाःप्रपीडिताः ॥ त्वयाविवेकहीनेनभृशंसंचिन्वताधनम् ॥ ६४ ॥ प्रजापीडनतापोत्थवह्निज्वालैस्तुवानर ॥ प्राक्त्वंदग्धःपुनःकुम्भीपाके
ऽतिदारुणे॥ ६५ ॥पुनःपुनश्चदग्धेनजातेनचपुनःपुनः ॥ नारकेणशरीरेणसमास्त्रिशद्गतंत्वया ॥ ६६ ॥ कुर्वतादारुणाञ्छब्दान्रुदताचपुनःपुनः ॥
कुम्भिपाकानलेतीव्राह्यनुभूताश्चयातनाः ॥ ६७ ॥ निस्तीर्णनरकोभूयःपापशेषेणसाम्प्रतम् ॥ प्राप्तोऽसिवानरंजन्मयेनमांहन्तुमिच्छसि ॥ ६८ ॥ विप्र
स्योपवनात्पूर्वंकरम्भापलानिवै॥अननुज्ञाप्यभुक्तानित्वयापहृत्यपौरुषात् ॥६९॥ विपाकःकर्मणस्तस्यफलतेपश्यदारुणः॥वानरस्त्वंवनेवासोह्यधुना
तेनवर्तसे॥१७०॥अशुभस्यशुभस्यापिपुराविहितकर्मणः ॥ भोगःक्रीडतिभूतेषुनोल्लङ्घ्यस्त्रिदशैरपि ॥७१॥ इत्थंत्वज्जन्मजानामियथावत्तुसहेतुकम् ॥
प्राप्तःसारसदेहोऽपिज्ञानेनापरिमोहितः ॥ ७२ ॥ प्रेतउवाच ॥ इतिश्रुत्वाकथांविप्रवानरोऽप्याहसारसम् ॥ सम्यग्वेत्तिभवान्नूनंकथंत्वंपक्षितांगतः ॥
॥७३॥सारसउवाच ॥ कथयिष्यामितत्कर्मयेनाहंदुर्गतिंगतः ॥ पक्षियोनिंगतोयेनतत्सर्वंश्रोतुमर्हसि ॥ ७४ ॥ धान्यंखारिशतंसाग्रमुत्सृष्टंहित्वया
पुरा ॥ बहुभ्योब्राह्मणेभ्यश्चनर्मदायांरविग्रहे ॥ ७५ ॥ पौरोहित्यमदाल्लोभाद्वञ्चयित्वाद्विजांस्तथा ॥ किंचिद्दत्त्वातुतेभ्यश्चगृहीतमखिलंमया ॥ ७६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विप्रसाधारणद्रव्यग्रहणोत्पन्नपातकात् ॥ पतितःकालसूत्रेऽहंनरकेरक्तकर्दमे ॥ ७७ ॥ चलत्क्रिमिसुसंपूर्णेदुर्गन्धेपूयफेनिले ॥ आनाभेस्तत्रमग्नोऽस्मि लिहन्पूयमधोमुखः ॥ ७८ ॥ तथोपरिमहागृध्रैर्भक्ष्यमाणस्तुवायसैः ॥ क्रिमिभिस्तुद्यमानस्तुममदेहोनिरन्तरम् ॥ ७९ ॥ तस्मिञ्छोणितपङ्केऽहं निरुच्छ्वासोऽभवंतदा ॥ मुहूर्तोऽपिमहाकल्पसमोजातोममात्रवै ॥ १८० ॥ यातनाश्चानुभूताश्चसमास्त्रियुतंमया[1] ॥ वक्तुंचतन्नशक्नोमिदुःखंवानर नारकम् ॥ ८१ ॥ पौरोहित्यंमहाघोरंपापदंचस्वभावतः ॥ देवोपजीवनंयत्रब्राह्मणस्योपजीवनम् ॥ ८२ ॥ राज्ञःप्रतिग्रहोघोरस्तेनदग्धाद्विजा तयः ॥ तेषामपिहरेद्द्रव्यंपुरोधास्तेननारकी ॥ ८३ ॥ राजायत्कुरुतेपापंपुरादेहेनधीयते ॥ तस्यतेनपुरोधाश्चगीयतेतत्त्वदर्शिभिः ॥ ८४ ॥ दैवात्कथमपिप्राप्तउत्तारोनरकाम्बुधेः ॥ मयादौर्दैवयोगेनशकुनित्वमुपस्थितम् ॥ ८५ ॥ अपहृत्यपुराकांस्यभाजनंभगिनीगृहात् ॥ आक्षिकायमया दत्तंतेनमेसारसीगतिः ॥ ८६ ॥ इयंचब्राह्मणीपूर्वंकांस्यचोरीसुदारुणा ॥ तेनेयंसारसीजाताममभार्यासधर्मिणी ॥ ८७ ॥ इत्थंवानरते सर्वंकथितंकर्मणःफलम् ॥ वृत्तंचवर्तमानंचभविष्यंशृणुसाम्प्रतम् ॥ ८८ ॥ अहंहंसोभविष्यामित्वंचहंसोभविष्यसि ॥ हंसीयमपिमद्भार्यासारसीच भविष्यति ॥ ८९ ॥ देशेचकामरूपेवैस्थास्यामोवैयथासुखम् ॥ योगिनींभाविकल्याणींयास्यामस्तदनन्तरम् ॥ १९० ॥ ततश्चमानुषंजन्म प्राप्स्यामोदुर्लभंपुनः ॥ श्रेयस्तद्विपरीतंचप्राणिभिर्यत्रसाध्यते ॥ ९१ ॥ एवंसर्वाञ्छिवोजन्तून्मोहयित्वास्वमायया ॥ सुखैर्भुनक्तिदुःखैश्च नास्मानेवतुकेवलम् ॥ ९२ ॥ अयंलोकेप्रवृत्तश्चमार्गोविविधनिर्मितः ॥ धर्माधर्ममयोऽत्यर्थंसुखदुःखफलात्मकः ॥ ९३ ॥ सेवितःप्राणिभिःसर्वैः सर्वदावापुनःपुनः ॥ देवासुरनरव्याघ्रक्रिमिकीटजलेचरैः ॥९४॥ नातिक्रान्तोहिकेनापिपन्थाऽयंदुःखकण्टकः ॥ विरक्तान्योगिनोध्यायंविनावेदान्त पारगान् ॥ ९५ ॥ अणोर्वापिगुरोर्वापिपुण्यापुण्यस्यकर्मणः ॥ ददातीहफलंज्ञात्वादेशंकालंमहेश्वरः ॥९६॥ इत्थंविधिविधानज्ञांमायांज्ञात्वेश्वरस्य च ॥ नशोचन्तिनतप्यन्तिनव्यथन्तिमहाधियः ॥ ९७ ॥ नान्यथाशक्यतेकर्तुंविपाकःपूर्वकर्मणाम् ॥ उपायैःप्रज्ञयावापिशाखामृगसुरैरपि ॥ ॥ ९८ ॥ पुरात्वंभूपतिर्जातःपश्चाज्जातोऽसिनारकी ॥ अधुनावानरोभूयोजन्मप्राप्स्यसिताद्दशम् ॥ ९९ ॥ इतिमत्वाविशोकस्त्वंशाखामृगयथासु खम् ॥ प्रतीक्षांकुरुकालस्यरममाणोऽत्रकानने ॥ २०० ॥ अहमप्येवमीशानमायाबद्धोवनेवने ॥ क्षपयिष्यामिवैजन्मधैर्यमास्थायसारसम् ॥ १ ॥ वानरउवाच ॥ मयात्वंपूजितःपूर्वंनौमित्वामधुनाप्यहम् ॥ जातिस्मरोऽसिजानामिसर्वंमत्पौर्वदैहिकम् ॥ २ ॥ तिष्ठसारससारस्याशिवमस्तुसदा

१'कलेवरैः' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तव ॥ त्वद्वाक्याद्गतमोहोऽहंविचरिष्यामिसर्वदा ॥ ३ ॥ प्रेतउवाच ॥ इमंरम्यंविचित्रंचपावनंपरमंद्विज ॥ पक्षिवानरसंवादंश्रुतंयावन्नदी
तटे ॥ ४ ॥ तावन्ममापिबोधोऽभूत्तेनशोकःक्षयंगतः ॥ इदानींजाह्नवीतोयमाहात्म्यंपरमाद्भुतम् ॥ ५ ॥ दृष्ट्वात्रब्राह्मणश्रेष्ठत्वांयाचेजाह्नवी
जलम् ॥ प्रेतत्वात्तर्तुकामोऽहंतीव्रतृष्णाप्रपीडितः ॥ ६ ॥ अस्मिन्नेवाचलेदृष्टंमयाश्चर्यंचवैद्विज ॥ गङ्गातोयस्यतावद्धिपातुमिच्छामितज्जलम् ॥७॥
पारियात्रोद्भवःकोऽपिब्राह्मणोग्रामयाजकः ॥ अयाज्ययाजनाद्विन्ध्येसंभूतोब्रह्मराक्षसः ॥८॥ अस्मत्सङ्गस्यलोभेनस्थितोऽसौहायनाष्टकम् ॥ तस्या
स्थीनिसुपुत्रेणसंचितानिद्विजोत्तम ॥ ९ ॥ क्षिप्तान्यानीयगङ्गायांतीर्थेकनखलेऽमले ॥ तत्क्षणादेवमुक्तोऽसौराक्षसत्वात्सुदारुणात् ॥२१०॥ इतिगङ्गा
जलस्नानमहिमामहदद्भुतम् ॥ साक्षाद्दृष्टोमयातेनगाङ्गंयंप्रार्थितंजलम् ॥ ११ ॥ पुरस्ताद्यत्कृतस्तीर्थेमयाभूरिपरिग्रहः ॥ नकृतस्तुप्रतीकारस्तस्य
जाप्यादिलक्षणः ॥१२॥ तेनमेप्रेतरूपस्यदुर्लभोदकभोजनम् ॥ सहस्रंयत्रवर्षाणामतीतंविन्ध्यपर्वते ॥१३॥ इतितेकथितंसर्वंहित्वालज्जांगरीयसीम् ॥
इदानींधार्मिकश्रेष्ठजलदानेनसत्वरम् ॥१४॥ संतर्पयममप्राणान्कण्ठमात्रावलम्बितान् ॥ दुर्लभंप्रेतभावेऽपिजीवितंप्राणिनामिह ॥१५॥ शरीरंरक्षणीयंहि
सर्वथासर्वदानरैः ॥ नहीच्छन्तितनुत्यागमपिकुष्ठादिरोगिणः ॥ १६ ॥ देवद्युतिरुवाच ॥ इतितद्वचनंश्रुत्वाविस्मयंपरमंगतः ॥ पथिकश्चिन्तयामास
कृपांप्रेतेसमुद्वहन् ॥१७॥ पापपुण्यफलंलोकेप्रत्यक्षंदृश्यतेखलु ॥ देवदानवमानुष्यंतिर्यक्त्वंक्रिमिकीटकम् ॥१८॥ नानायोनिषुजन्मानिनानाव्याधि
प्रपीडनम् ॥ मरणंबालवृद्धानामन्धत्वंकुब्जतातथा ॥१९॥ ऐश्वर्यंचदरिद्रत्वंपाण्डित्यंमूर्खतातथा ॥ एताश्चरचनालोकेभवन्तिकथमन्यथा ॥२२०॥
तेधन्याःकर्मभूमौयेन्यायमार्गार्जितंधनम् ॥ सत्पात्रेभ्यःप्रयच्छन्तिकुर्वन्तिचात्मनोहितम् ॥ २१ ॥ भूमिरत्नहिरण्यानिगावोधान्यंगृहंगजाः ॥ रथा
श्ववसनग्रामाःसिद्धमन्त्रफलंजलम् ॥ २२ ॥ कन्यादिव्यौषधान्नानिच्छत्रोपानद्वरासनम् ॥ शय्याताम्बूलमाल्यानितालवृन्तंमरासनम् ॥ २३ ॥ सर्वमे
तत्प्रदातव्यंलोकत्रयजिगीषुभिः ॥ दत्तंहिप्राप्यतेस्वर्गेदत्तमेवहिभुज्यते ॥ २४ ॥ छत्रचामरयानानिवराश्ववरवारणाः ॥ हर्म्याणिवरशय्याश्चगोमहि
ष्योवरस्त्रियः ॥ २५ ॥ रत्नभूषणमुक्ताश्चपुत्रादास्योमहाकुलम् ॥ आयुरारोग्यमैश्वर्यंकलाविद्यासुकौशलम् ॥ २६ ॥ दानस्यैवफलंसर्वंप्राप्यतेभुवि
मानवैः ॥ तस्माद्देयंप्रयत्नेननादत्तमुपतिष्ठति ॥ २७ ॥ धर्मिष्ठेनतुपान्थेनगाथेयंसमगायत ॥ इतिश्रुत्वापुनःप्रेतःप्रोवाचह्यार्तमानसः ॥ २८ ॥ मन्ये
धर्मज्ञकल्पोऽसिपान्थत्वंनात्रसंशयः ॥ देहिमेजीवनंवारिचातकायघनोयथा ॥२९॥ एतस्मिन्प्राणदानेहिमाविलम्बंकृथाबहु ॥ ततःप्रत्याहपान्थस्तु
वचनंन्यायगर्भितम् ॥२३०॥ भृगुक्षेत्रेशृणुप्रेतपितरौममतिष्ठतः ॥ तदर्थंतीर्थराजस्यमयावारिसमाहृतम् ॥ ३१ ॥ तत्सितासितपानीयंमध्येचप्रार्थितं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वया ॥ नजानेधर्मसंदेहःकिमत्रममयुज्यते ॥ ३२ ॥ बलाबलंविचारार्थंकरिष्येप्रबलंविधिम् ॥ वेदेभ्योधर्मशास्त्रेभ्योनाहंमानेनकेवलम् ॥ ३३ ॥
हयमेधादियज्ञेभ्यःसर्वेभ्योऽप्यधिकंमतम् ॥ ऋषिभिर्देवताभिश्चप्राणिनांप्राणरक्षणम् ॥३४॥ इतिदत्त्वावरंवारिक्त्वाप्रेतस्यरक्षणम् ॥ पित्रर्थंपुनरा
दायजलंनेष्यामिपावनम् ॥ ३५ ॥ एषमेप्रबलोभातिशुद्धधर्मप्रदोविधिः ॥ परोपकरणादन्यत्सर्वमल्पंस्मृतंबुधैः ॥ ३६ ॥ परोपकारिभिर्दत्ताअपि
प्राणानृभिर्मुदा ॥ अद्भिःपरोपकारःस्यात्किंनलब्धंमयापुनः ॥ ३७ ॥ दधीचिनापुरागीतःश्लोकोऽयंश्रूयतेभुवि ॥ सर्वधर्ममयःसारःसर्वधर्मज्ञसंमतः
॥ ३८॥ परोपकारःकर्तव्यःप्राणैरपिधनैरपि ॥ परोपकारजंपुण्यंतुल्यंक्रतुशतैरपि॥३९॥इत्युक्त्वाप्रददौतोयंगङ्गायामुनसंभवम् ॥ प्रेतायप्राणरक्षार्थं
सधर्मिष्ठोवरोद्विजः ॥ २४० ॥ प्रेतःप्रीतोजलंपीत्वाह्यभिषिच्यशिरस्तथा ॥ प्रजहौप्रेतदेहंतंदिव्यदेहोऽभवत्क्षणात् ॥ ४१ ॥ तदाश्चर्यमहद्दृष्ट्वानिज
गादसकेरलः ॥ अहोविमुक्तःप्रेतत्वाद्वेणीपानीयबिन्दुभिः ॥ ४२ ॥ ब्रह्मापिनैवशक्नोतिमन्येवक्तुमपांगुणम् ॥ गङ्गातोयंमहादेवोधत्तेकेकथमन्य
था ॥ ४३ ॥ अचिन्त्यशक्तिगङ्गाम्भस्तिलमात्रंतुयःपिबेत् ॥ देवोभवेत्ससिद्धोवागर्भेनैवचसंविशेत् ॥ ४४ ॥ नगङ्गासदृशीसिद्धिर्नगङ्गा
सदृशीमतिः ॥ नगङ्गासदृशीमुक्तिर्गङ्गासर्वाधिकायतः ॥ ४५ ॥ तस्मात्सर्वप्रयत्नेनमहाभक्त्याचधार्मिक ॥ करस्थंतस्यकैवल्यंयोगङ्गां
सेवतेसदा ॥ ४६ ॥ आयुष्मान्भवपान्थत्वंमाधर्मविरतोभव ॥ त्वयाहंतारितःसद्योगङ्गाम्बुकणदानतः ॥४७॥ इत्युक्त्वाप्रस्थितोनाकंपिशाचस्तु
सकेरलः ॥ आशीर्भिरभिनन्द्याथपान्थंबन्धुवरंनरम् ॥४८॥ प्रेतंविमोक्ष्यपान्थोऽपिपुनरादायतज्जलम् ॥ गतस्तेनैवमार्गेणस्मरंस्तीर्थोदकौतुकम् ॥
॥ ४९ ॥ वसिष्ठउवाच ॥ इत्थंप्रयागमाहात्म्यंश्रुत्वानत्वाचतंमुनिम् ॥ प्रयागंसहसामाघेपिशाचःसत्वरंगतः ॥ २५० ॥ स्नात्वासितासितेसोऽपि
माघमासेद्विजोत्तम ॥ पिशाचःक्षीणपापस्तुपैशाचींविजहौतनुम् ॥ ५१ ॥ दिव्यदेहस्ततोभूत्वाद्राविडोभूपतिस्तदा ॥ स्तुवन्नारायणंदेवंभक्त्यादोष
विवर्जितः ॥ ५२ ॥ गन्धर्वैःस्तूयमानस्तुनाकनारीसुपूजितः ॥ उत्तमेनविमानेनपुरन्दरपुरंययौ ॥ ५३ ॥ इतितेकथितंविप्रपूर्ववृत्तंसकौतुकम् ॥
इतिहासंद्विजश्रेष्ठसद्यःपातकनाशनम् ॥ ५४ ॥ ज्ञानदंमोक्षदंविप्रश्रुतंदुर्गतिनाशनम् ॥ इतितेकथितंसर्वंपुरावृत्तंसकौतुकम् ॥ ५५ ॥ इतिहासं
द्विजश्रेष्ठश्रुतंदुर्गतिनाशनम् ॥ अधुनातुमयासार्धमिमाःकन्याःसुतश्वेते ॥५६॥ त्वंचायाहिप्रयागंवैसर्वेसद्गतिमीप्सवः ॥ माघस्नानंप्रकुर्मोऽत्रदेवाना
मपिदुर्लभम् ॥ ५७ ॥ तत्रमोक्ष्यन्तिपैशाच्यंसद्यःपापसमुद्भवम् ॥ ५८ ॥ महेशउवाच ॥ एवंवसिष्ठवक्त्राब्जकथामधुरसंमुदा ॥ पीत्वा
प्रमुदिताःसर्वेनिस्तीर्णानरकार्णवात् ॥ ५९ ॥ प्रस्थितास्तेनसार्धंतेसत्वरंव्योम्निहर्षिताः ॥ दिलीपशृणुतत्सर्वंतत्तीर्थंतुसितासितम् ॥२६०॥ सत्वरं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

व्योममार्गेणकाममासाद्यदुःसहाः ॥ समागम्यतदातत्रसंहृष्टहृदयाश्वते ॥ ६१ ॥ अथोचेलोमशस्तत्रसदयंगगनाङ्गणे ॥ पश्यन्तुश्रद्धयासर्वेतीर्थ
राजमिमंभुवि ॥ ६२ ॥ विनाज्ञानंप्रयागेऽस्मिन्मुच्यन्तेसर्वजन्तवः ॥ इष्ट्वात्रैवमहायज्ञंस्रष्टुकामःप्रजापतिः ॥ ६३ ॥ अवापसृष्टिसामर्थ्यंततः
सृष्टिंचकारसः ॥ अत्रनारायणःसस्नौपत्नीकामःसितासिते ॥ ६४ ॥ अतःसलब्धवाँल्लक्ष्मींभार्याममृतमन्थने ॥ उषित्वाचात्रषण्मासंस्नात्वावेण्यां
यथेच्छया ॥ ६५ ॥ त्रिपुरंघातयामासत्रिबाणेनत्रिशूलभृत् ॥ इमानित्रीणिकुण्डानिदीप्तान्यजस्रवह्निभिः ॥ ६६ ॥ एषतृतिंगतोवह्निर्यः
केनापिचपुष्यति ॥ अत्रदेवास्त्रयस्त्रिंशत्तृतामुमुदिरेभृशम् ॥ ६७ ॥ आविर्भूतोमहेशोऽत्रनीलकण्ठःकपालभृत् ॥ अनिशंससुरैःसेव्यआयातो
ऽञ्जलयेबटुः ॥ ६८ ॥ मृकण्डसूनुनाकल्पेप्रविश्ययन्मुखेस्थितम् ॥ लोकेज्वालाकुलेसोऽयंयोगरूपीजनार्दनः ॥ ६९ ॥ सेयंभागीरथी
शम्भोःसर्वदुःखापहारिणी ॥ सिद्ध्यर्थंसेव्यतेसिद्धैर्भुक्तिमुक्तिफलप्रदा ॥ २७० ॥ अनिशंभूतिदायाचस्वर्गमार्गेह्यनुत्तमा ॥ स्वर्गहेतुश्चयादेवी
सेयंभागीरथीनदी ॥ ७१ ॥ यदम्भःस्नानमात्रेणविकर्तनसलोकताम् ॥ लभन्तेप्राणिनःसर्वेनदीसायमुनास्वयम् ॥ ७२ ॥ अनयोःपुण्यनद्योश्च
संगमःसुखदोमुने ॥ अत्रस्नातानपच्यन्तेनरकेज्ञानभाविताः ॥ ७३ ॥ विनाज्ञानंप्रयागेऽस्मिन्मुच्यन्तेसर्वजन्तवः ॥ अन्यच्चश्रूयतांविप्रइति
हासंपुरातनम् ॥ ७४ ॥ शृण्वतांसर्वपापघ्नंसर्वरोगविनाशनम् ॥ ऋचीकेनपुराशप्तोगन्धर्वोवायसोऽभवत् ॥ ७५ ॥ शापंमुमोचसोऽत्रैवस्नातःसद्यः
सितासिते ॥ वासवस्यतुशापेनस्वर्गाद्भ्रष्टाप्सरोर्वशी ॥ ७६ ॥ स्वर्गकामाचसासस्नौलेभेस्वर्गंततोऽचिरात् ॥ पुत्रंचशङ्करंलेभेययातिर्नाहुषोमुने ॥
॥ ७७ ॥ पुत्रकामःप्रयागेहिस्नात्वापुण्येसितासिते ॥ धनकामःपुराशक्रःसुस्नातोऽत्रद्विजोत्तम ॥ ७८ ॥ धनदस्यनिधीन्सर्वाञ्जहारसच
मायया ॥ कश्यपोऽत्रतपस्तेपेशिवाराधनतत्परः ॥ ७९ ॥ अस्मिंस्तीर्थेभरद्वाजोयोगसिद्धिमवाप्तवान् ॥ अस्मिंस्तीर्थेपुराविप्रयोगेशाःशान्त
मानसाः ॥ २८० ॥ योगस्यफलभूमिंतुलेभिरेसनकादयः ॥ अस्मिन्माघेतुयेस्नातागङ्गायामुनसंगमे ॥ ८१ ॥ ताराऋपाश्चतेसर्वेतैर्व्याप्तं
सकलंजगत् ॥ विन्दन्तिकामिनःकामान्मुक्तिंयान्तिमुमुक्षवः ॥ ८२ ॥ विन्दन्तिसाधकाःसिद्धिंप्रयागेहिद्विजोत्तम ॥ साम्प्रतंमुक्तिकामास्तु
कन्याश्चापिसुतश्चते ॥ ८३ ॥ मद्वाक्यादत्रमज्जन्तुसर्वेत्वंचसितासिते ॥ प्राक्कालिकाघविध्वंसिवेणीजलबलेनतु ॥ ८४ ॥ लभन्तामखिलां ॥ १२६ ॥
लक्ष्मींप्राप्तशापमहाफलाम् ॥ एवमार्षवचःसत्यमतीन्द्रियमलङ्घनम् ॥ ८५ ॥ श्रुत्वाचोत्कण्ठचित्तास्तेसर्वेस्नानायचोद्यताः ॥ प्रयागं
प्राप्यदुष्प्राप्यंपैशाच्यंविजहुःक्षणात् ॥ ८६ ॥ विमुक्ताःशापदुःखेनतनुंस्वांस्वांचलेभिरे ॥ दृष्ट्वावेदनिधिःपुत्रंताःकन्यादिव्यरूपिणीः ॥ तुष्टाव

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लोमशंप्रीत्याप्रसन्नेनान्तरात्मना ॥ ८७ ॥ त्वदनुग्रहमात्रेणोत्तीर्णःपापमहार्णवः ॥ इदानीमुचितंब्रूहिबालानामृषिसत्तम ॥ ८८ ॥ लोमशउवाच ॥
कुमारोऽधीतवेदोऽयंसमाप्तनियमोध्रुवा ॥ आसांतुसानुरागाणांगृह्णातुकरपङ्कजम् ॥ ८९ ॥ ततोलोमशवाक्येनस्वपितुर्वचनात्तदा ॥ विवाहविधिना
चाशुब्रह्मचारीसधार्मिकः ॥ २९० ॥ शुभद्रव्यैश्चमन्त्रैश्चमुनिभिःकृतमङ्गलः ॥ पञ्चानामपिकन्यानांपाणिजग्राहधर्मतः ॥ ९१ ॥ आनन्दिन्य
स्तदासर्वाःकन्याःपूर्णमनोरथाः ॥ बभूवुःसकुमारश्चसंतुष्टश्चबभूवह ॥ ९२ ॥ दत्त्वानुज्ञांमुनिःसोऽथलोमशस्तैर्नमस्कृतः ॥ जगामस्वाश्रमंमेरुंपर्वतं
सुरसेवितम् ॥ ९३ ॥ ततोवेदनिधीराजन्स्नुषाःपञ्चसुतंतथा ॥ पुरस्कृत्यमुदायुक्तोधनदस्यपुरंययौ ॥ ९४ ॥ इतिनृपवरमाघेस्नानसंजात
पुण्यामुनिवरवचसाद्राक्तीर्थराजेप्रयागे ॥ सकलकलुषमुक्ताःपञ्चगन्धर्वकन्याअलमभिमतलाभात्प्राप्यहर्षंचजग्मुः ॥ ९५ ॥ परमिममितिहासं
पावनंतीर्थभूतंवृजिनविलयहेतुंयःशृणोतीहनित्यम् ॥ सभवतिखलुपूर्णःसर्वकामैरभीष्टैर्व्रजतिचसुरलोकंदुर्लभंधर्मयुक्तः ॥ ९६ ॥ इतिहास
मिमंश्रुत्वापूजयेद्यस्तुपाठकम् ॥ गोभिर्हिरण्यवस्त्रैश्चब्रह्मतुल्योयतोहिसः ॥ ९७ ॥ वाचकेपूजितेयस्माद्विष्णुर्भवतिपूजितः ॥ तस्मात्प्रपूजयेन्नित्यं
यदीच्छेत्सफलंभवम् ॥ २९८ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०उत्तर०माघमाहात्म्येवसिष्ठदिलीपसंवादेगन्धर्वकन्यापरिणयोनामाष्टावि
शत्यधिकशततमोऽध्यायः ॥ १२८ ॥ पार्वत्युवाच ॥ श्रुतंकार्तिकमाहात्म्यंमाघस्यचमयाविभो ॥ अधुनाश्रोतुमिच्छा
मिमुक्तिदंकर्मचोत्तमम् ॥ १ ॥ श्रेष्ठाभक्तिस्तुकाप्रोक्तावदविश्वेश्वरप्रभो ॥ येनविज्ञानमात्रेणनरासुखमवाप्नुयुः ॥ २ ॥ महादेवउवाच
॥ तल्लीनचित्तःसपुमान्साभक्तिःपरमामता ॥ दयाधर्मपरोनित्यंविष्णुधर्मेषुतत्परः ॥ ३ ॥ फलमूलजलाहारीशङ्खचक्रप्रधारकः ॥ त्रिकालं
पूजयेद्विष्णुंसाभक्तिःसात्त्विकीमता ॥ ४ ॥ उत्तमासात्त्विकीप्रोक्ताराजसीचैवमध्यमा ॥ कनिष्ठातामसीचैवत्रिविधाभक्तिरुच्यते ॥ ५ ॥ श्रीधरे
तुप्रकर्त्तव्यामुक्तिकामफलेप्सुभिः ॥ अहङ्कारेणरूपेणदम्भमात्सर्यमायया ॥६ ॥ येकुर्वन्तिजनाभक्तिंतामसीसाउदाहृता ॥ परस्योत्सादनार्थंवादम्भ
मुद्दिश्यवाथवा ॥७॥ याभक्तिःक्रियतेदेवेतामसीसाप्रकीर्तिता ॥ विषयान्प्रतिसंधाययशऐश्वर्यमेववा ॥८॥ अर्चादावर्चयेद्योमांपृथग्भावःसराजसः॥
कर्मक्षयार्थेकर्त्तव्याब्राह्मणैर्ज्ञानतत्परैः ॥ ९ ॥ विष्णौह्यात्मार्पणींबुद्धिंसाभक्तिःसत्त्विकीमता ॥ अतोवैसर्वथादेविसंसेव्यःसर्वदाहरिः ॥ १०॥ तामसेन
तुभावेनतामसत्वंहिलभ्यते ॥ राजसोराजसेनैवसात्त्विकेनतुसात्त्विकः ॥११॥ वेदाध्यायरतःश्रीमान्रागद्वेषविवर्जितः ॥ शङ्खचक्रधरोविप्रःसर्वदाशु
चिरुच्यते ॥ १२ ॥ कर्मकाण्डेप्रवृत्तोयःसर्वदाविष्णुनिन्दकः ॥ निन्दकस्तज्जनानांचमहाचाण्डालउच्यते ॥ १३ ॥ वेदाध्यायरतानित्यंनित्यंवैयज्ञ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

याजकाः ॥ अग्निहोत्ररतानित्यंविष्णुधर्मपराङ्मुखाः ॥ निन्दन्तिविष्णुधर्मांश्चवेदबाह्याःसुरेश्वरि॥१४॥कुर्वन्तिशान्तिंविबुधाःग्रहद्याःक्षेमंप्रकुर्वन्ति
पितामहाद्याः ॥ स्वस्तिप्रयच्छन्तिमुनीन्द्रमुख्यागोविन्दभक्तिंवहतांनराणाम् ॥१५॥ शुभाग्रहाभूतपिशाचयुक्ताब्रह्मादयोदेवागणाःप्रसन्नाः ॥ लक्ष्मी
स्थिरातिष्ठतिमन्दिरेचगोविन्दभक्तिंवहतांनराणाम्॥१६॥गङ्गागयानैमिषपुष्कराणिकाशीप्रयागःकुरुजाङ्गलानि ॥ तिष्ठन्तिदेहेकृतभक्तिपूर्वंगोविन्द
भक्तिंवहतांनराणाम् ॥ १७ ॥ एवमाराधयेद्विद्वान्भगवन्तंश्रियासह ॥ कृतकृत्योभवेन्नित्यंसविप्रोनात्रसंशयः ॥१८ ॥ क्षत्रियोवाथवैश्योवाशूद्रोवा
सुरसत्तमे ॥ भक्तिंकुर्वन्विशेषेणमुक्तियातिसवैनरः ॥१९॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०विष्णुमहिमवर्णनंनामैकोनत्रिंशदधिकशततमोऽध्यायः
॥१२९ ॥ पार्वत्युवाच॥शालग्रामशिलाशुद्धामूर्तयस्सन्तिभूतले ॥ तासांचैवतुमूर्तीनांपूजनंकतिधास्मृतम् ॥ १ ॥ ब्राह्मणैःकतिपूज्यास्ताःक्षत्रियैर्वा
सुरेश्वर ॥ वैश्यैर्वापिकथंशूद्रैःस्त्रीभिर्वापिसमादिश ॥ २ ॥ महादेवउवाच ॥ शालग्रामशिलापुण्यापवित्राधर्मकारिणी ॥ यस्यादर्शनमात्रेण
ब्रह्महाशुध्यतेनरः ॥ ३ ॥ तद्गृहंसर्वतीर्थानांप्रवरंश्रुतिनोदितम् ॥ यत्रेयंसर्वदामूर्तिःशालग्रामशिलाशुभा ॥ ४ ॥ ब्राह्मणैःपञ्चपूज्याःस्यु
श्चतस्रःक्षत्रियैस्तथा ॥ वैश्यैस्तिस्रस्तथापूज्याएकापूज्याप्रयत्नतः ॥ ५ ॥ तस्यादर्शनमात्रेणशूद्रोमुक्तिमवाप्नुयात् ॥ अनेनविधिनादेवियेनराःपूजय
न्तिवै ॥ ६ ॥ भोगान्सर्वांस्तत्रभुक्त्वायान्तिविष्णोःपरंपदम् ॥ इयंसामहतीमूर्तिः[१]सर्वदापापहारिणी ॥ ७ ॥ कैलासाद्यंफलंदेविजायतेपूजनाद्यतः ॥
तत्रगङ्गाचयमुनागोदावरीसरस्वती ॥ ८ ॥ तिष्ठतेचशिलायत्रसर्वंतत्रनसंशयः ॥ किमत्रबहुनोक्तेनभूयोभूयोवरानने ॥ ९ ॥ पूजनंमनुजैःसम्य
क्कर्त्तव्यंमुक्तिमिच्छुभिः ॥ भक्तिभावेनदेवेशियेऽर्चयन्तिजनार्दनम् ॥ १० ॥ तेषांदर्शनमात्रेणब्रह्महाशुध्यतेजनः ॥ दासभावेनयेशूद्राःस्वर्चनंकुर्वते
सदा ॥ ११ ॥ तेषांपुण्यंनजानन्तिब्रह्माद्याश्चसुरेश्वरि ॥ भक्तिभावेनयेविप्राहरिमभ्यर्चयन्तिवै ॥ १२ ॥ एकविंशतिकुलंतैस्तुतारितंतेषुजन्मसु ॥
शङ्खचक्राङ्कितोयस्तुविप्रःपूजनमाचरेत् ॥ १३ ॥ पूजितंतुजगत्सर्वंतेनविष्णुप्रपूजनात् ॥ पितरःसंवदन्त्यस्मत्कुलेजाताश्चवैष्णवाः ॥१४॥ तत्कुलं
तारितंतैस्तुयावदाभूतसंप्लवम् ॥ तेतुचास्मान्समुद्धृत्यनयन्तेविष्णुमन्दिरम् ॥१५॥ सएवदिवसोधन्योधन्यामाताथबान्धवाः॥पितातस्यचवैधन्यो
धन्यावैसुहृदस्तथा ॥ १६ ॥ सर्वेधन्यतमाज्ञेयाविष्णुभक्तिपरायणाः ॥ तेषांदर्शनमात्रेणमहापापात्प्रमुच्यते ॥१७॥ उपपातकानिसर्वाणिमहान्तिं
पातकानिच ॥ तानिसर्वाणिनश्यन्तिवैष्णवानांचदर्शनात् ॥१८॥ पावकाइवदीप्यन्तेयेनरावैष्णवाभुवि ॥ विमुक्ताःसर्वपापेभ्योमेघेभ्यइवचन्द्रमाः

१'इत्थं सा महती पुण्या' इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

॥१९॥आर्द्रंशुष्कंलघुस्थूलंवाङ्मनःकर्मभिःकृतम् ॥ तत्सर्वंनाशमायातिवैष्णवानांचदर्शनात्॥२०॥हिंसादिकंचयत्पापञ्ज्ञानाज्ञानकृतंचयत्॥तत्सर्वं नाशमायातिदर्शनाद्वैष्णवस्यच॥२१॥निष्पापास्त्रिदिवंयान्तिपापिष्ठायान्तिशुद्धताम्॥दर्शनादेवसाधूनांसत्यंतुभ्यंमयोदितम्॥२२॥संसारकर्दमालेप प्रक्षालनविशारदः ॥ पावनःपावनानांचविष्णुभक्तोनसंशयः॥२३॥प्रत्यहंविष्णुभक्तायेस्मरन्तिमधुसूदनम् ॥ तेतुविष्णुमयाज्ञेयाविष्णुस्तत्रनसंशयः ॥ २४ ॥ नवनीलघनश्यामंनलिनायतलोचनम् ॥ शङ्खचक्रगदापद्मधरंपीताम्बरावृतम् ॥ २५ ॥ कौस्तुभेनविराजन्तंवनमालाधरंहरिम् ॥ उल्लस त्कुण्डलज्योतिःकपोलवदनश्रिया ॥ २६ ॥ विराजितंकिरीटेनवलयाङ्गदनूपुरैः॥प्रसन्नवदनाम्भोजंचतुर्बाहुंश्रियान्वितम् ॥ २७ ॥ एवंध्यायन्तिये विप्राविष्णुंचैवतुपार्वति ॥ तेविप्राविष्णुरूपाश्चवैष्णवास्तेनसंशयः॥२८॥तेषांदर्शनमात्रेणभक्त्यावाभोजनेनवा ॥ पूजनेनचदेवेशिवैकुण्ठंलभतेध्रुवम् ॥२९॥इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०शालग्रामशिलापूजनमाहात्म्यंनामत्रिंशदधिकशततमोऽध्यायः॥१३०॥पार्वत्युवाच ॥ अनन्तंवासुदेवस्य कीदृशंस्मरणंस्मृतम् ॥ यच्छ्रुत्वानपुनर्मोहोमानुषाणांप्रजायते ॥ १ ॥ महादेवउवाच ॥ दृष्टातत्त्वेनदेवेशिस्मराम्येनंतुनित्यशः ॥ तृषातुरो यथावारितद्वद्विष्णुंस्मराम्यहम् ॥ २ ॥ हिमेनाकुलितंविश्वंस्मरत्यग्निंयथातथा ॥ तद्वद्देवतुवैविष्णुंस्मरन्तिविबुधादयः ॥३॥ पतिव्रतायथानारीपतिं स्मरतिनित्यशः ॥ तथास्मरामिलोकेशंविष्णुंविश्वेश्वरेश्वरम् ॥ ४ ॥ भयार्त्तःशरणंयद्वद्यथलोभीयथाधनम् ॥ पुत्रकामोयथापुत्रंतथाविष्णुं स्मराम्यहम् ॥ ५ ॥ दूरस्थोऽपियथागेहंचातकोमाधवंयथा ॥ ब्रह्मविद्यांब्रह्मविदस्तथाविष्णुंस्मराम्यहम् ॥ ६ ॥ हंसामानसमिच्छन्तिमुनयःस्मरणं हरेः ॥ भक्ताश्चभक्तिमिच्छन्तितथाविष्णुंस्मराम्यहम् ॥ ७ ॥ प्राणिनांवल्लभोदेहोयत्रआत्मावतिष्ठते ॥ आयुर्वाञ्छन्तियेजीवास्तथाविष्णुंस्मरा म्यहम् ॥ ८ ॥ भ्रमराश्चयथापुष्पंचक्रवाकादिवाकरम् ॥ यथात्मवल्लभाभक्तितथाविष्णुंस्मराम्यहम् ॥९ ॥ अन्धेनाकुलितालोकादीपंवाञ्छन्तिवै यथा ॥ तथावैपुरुषालोकेस्मरणंकेशवस्यच ॥ १० ॥ यथाश्रमार्त्ताविश्रामंनिद्रांव्यसनिनोयथा ॥ गतालस्यायथाविद्यांतथाविष्णुंस्मराम्यहम् ॥ ॥ ११ ॥ मातङ्गाःपार्वतींभूमिंसिंहावनगजादिकम् ॥ तथैवस्मरणंविष्णोःकर्तव्यंपापभीरुभिः ॥ १२ ॥ सूर्यकान्तेरवेर्योगाद्वह्निस्तत्रप्रजायते ॥ एवंवैसाधुसंयोगाद्धरौभक्तिःप्रजायते ॥ १३ ॥ शीतरश्मेर्यथाकान्तश्चन्द्रयोगादपःश्रयेत ॥ एवंवैष्णवसंयोगान्मुक्तिर्भवतिशाश्वती ॥ १४ ॥ कुमु द्वतीयथासोमंदृष्ट्वापुष्पंविकासते ॥ तद्वद्देवेकृताभक्तिर्मुक्तिदासर्वदानृणाम् ॥१५॥ यथानलायासंत्रस्ताभ्रमरीस्मरणंचरेत् ॥ तेनस्मरणयोगेननलासा

१ 'शमादिकं च यत्पापम्' इ० पा० । २ 'वैष्णवैः सह भाषणात्' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 रूप्यतामियात् ॥१६॥ गोपीभिर्जारबुद्ध्याच विष्णोश्चस्मरणंकृतम् ॥ ताश्चसायुज्यतांनीतास्तथाविष्णुंस्मराम्यहम् ॥१७॥ केऽपिवैदुष्टभावेनच्छद्म
भावेनकेचन ॥ केचापिलोभभावेननिःस्पृहाश्चैवकेचन ॥ १८ ॥ भक्त्यावास्नेहभावेनद्वेषभावेनवापुनः ॥ केऽपिस्वामित्वभावेनबुद्ध्यावाबुद्धिपूर्व
 कम् ॥ १९ ॥ येनकेनापिभावेनचिन्तयन्तिजनार्दनम् ॥ इहलोकसुखंभुक्त्वायान्तिविष्णोःपरंपदम् ॥ २० ॥ अहोविष्णोश्चमाहात्म्यमद्भुतंलोम
हर्षणम् ॥ यदृच्छयापिस्मरणंत्रिधामुक्तिप्रदायकम् ॥ २१ ॥ नधनेनसमृद्धेनविपुलाविद्ययातथा ॥ एकेनभक्तियोगेनसमीपेदृश्यतेक्षणात् ॥२२॥
सांनिध्येऽपिस्थितोदूरेनेत्रयोरञ्जनंयथा ॥ भक्तियोगेनदृश्येतभक्तैश्चैवसनातनः ॥ २३ ॥ इदंतत्त्वमिदंतत्त्वंमोहितोदेवमायया ॥ भक्तितत्त्वंयदाप्राप्तं
तदाविष्णुमयंजगत् ॥ २४ ॥ इन्द्राद्यैरमृतंप्राप्तंसुखार्थेशृणुसुन्दरि ॥ तथापिदुःखितास्तेवैभक्त्याविष्णोर्यथाविना ॥ २५ ॥ भक्तिमेवामृतंप्राप्य
पुनर्दुःखंनजायते ॥ वैकुण्ठाख्यंपदंप्राप्यमोदतेविष्णुसन्निधौ ॥२६॥ वारित्यक्त्वायथाहंसःपयःपिबतिनित्यशः ॥ एवंधर्मान्परित्यज्यविष्णोर्भक्तिं
समाश्रयेत् ॥ २७ ॥ अन्यभक्तिंपरित्यज्यविष्णुभक्तिंसमाश्रयेत् ॥ तोयंबद्धातुवस्त्रेणकृतंकार्यंकथंभवेत् ॥ २८ ॥ प्राप्यदेहंविनाभक्तिंक्रियतेसवृथा
श्रमः ॥ विष्णुभक्तिंविनाधर्मान्उपदिशन्तियेजनाः ॥ तेपतन्तिसदाघोरेनरकेनात्रसंशयः ॥ २९ ॥ बाहुभ्यांसागरंतर्तुंयद्वन्मूर्खोऽभिवाञ्छति ॥
संसारसागरंतद्वद्विष्णुभक्तिंविनानरः ॥ ३० ॥ विष्णुभक्तिंचरक्षन्तिकर्मणापात्यतेयदि ॥ अकिंचनःस्पृहायुक्तोमेरौधत्तेयथास्पृहाम् ॥ ३१ ॥
तवभक्तौतथादवमयाहिक्रियतेस्पृहा ॥ जन्मान्तरेहिसाभक्तिर्मामकीयत्करोतिहि ॥ ३२ ॥ वह्निर्यथेहस्वल्पोऽपिदहतेविविधंवनम् ॥ तद्वद्देवतुसा
भक्तिरणुमात्राकृतामया ॥ ३३ ॥ शतैश्चश्रूयतेभक्तिःसहस्रैरपिबुध्यत ॥ तेषांमध्येतुदेवेशिभक्तोह्येकःप्रजायते ॥ ३४ ॥ बुद्धिंपरेषांदास्यन्तिलोके
बहुविधाजनाः ॥ स्वयमाचरतेसोऽपिनरःकोटिषुदृश्यते ॥ ३५ ॥ पूजयाहस्यतेभक्तिर्जपेनपरिहस्यते ॥ एवंभावोहिदेवेशेभक्तिस्तेनैवगृह्यते ॥३६॥
सागरेचयथापोतःकूपेद्रोणोपवेशनम् ॥ यस्यभावोहितद्वच्चभक्तिःसातेनगृह्यते ॥ ३७ ॥ मूलेसिक्तस्यवृक्षस्यपत्रंशाखासुदृश्यते ॥ भजनादेवभोदेवि
फलमग्रेप्रतिष्ठितम् ॥ ३८ ॥ पानीयहारिणायद्वद्घटेचित्तंप्रधीयते ॥ तद्वद्देवेहरौचित्तंधृत्वामोक्षमवाप्नुयात् ॥ ३९ ॥ शैशवेचयथामातागुडंस्तोकं
ददातिवै ॥ पुनर्याचतिवैबालोगुडंवैलोभकारणात् ॥ ४० ॥ नीरेनीरंयथाक्षिप्तंदुग्धेदुग्धंघृतेघृतम् ॥ तद्वद्भेदंनपश्यन्तिविष्णुभक्तिप्रसादतः ॥ ४१ ॥
भानुःसर्वगतोयद्वद्वह्निःसर्वगतोयथा ॥ भक्तिःस्थितस्तथाभक्तःकर्मभिर्नैवबाध्यते ॥ ४२ ॥ अजामिलःस्वधर्मंचत्यक्त्वापापंसमाचरन् ॥ पुत्रंनारा
यणंस्मृत्वामुक्तिंवैप्राप्तवान्ध्रुवम् ॥ ४३ ॥ दिवारात्रौचयेभक्तानाममात्रोपजीविनः ॥ वैकुण्ठवासिनस्तेवैतत्रवेदाहिसाक्षिणः ॥ ४४ ॥ अश्वमेधादि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यज्ञानांफलंस्वर्गेऽपिदृश्यते ॥ तत्फलंतुसमग्रंवैभुक्त्वावैसंपतन्तिच ॥ ४५ ॥विष्णुभक्तास्तथादेविभुक्त्वाभोगाननेकशः ॥ वैकुण्ठंप्राप्यवातेषांपुन
रागमनंकदा ॥ ४६ ॥ विष्णुभक्तिःकृतायेनविष्णुलोकेवसत्यसौ ॥ दृष्टान्तंपश्यदेवेशिविष्णुभक्तिप्रसादतः ॥ ४७ ॥ ग्रावाणोजलमध्यस्थाःशतश
स्तेनतारिताः ॥ विनाजलंसोमकान्तोविष्णुभक्तस्यमानसम् ॥ ४८ ॥ दर्दुरोवसतेनीरेषट्पदोहिवनान्तरे ॥ गन्धंवेत्तिकुमुद्वत्याभक्तोभक्तौतथाहरेः ॥
॥ ४९ ॥ गङ्गातटेवसन्त्येकएकेवैशतयोजनम् ॥ कश्चिद्गङ्गाफलंवेत्तिविष्णुभक्तिपरस्तथा ॥ ५० ॥ कर्पूरागुरुभारंहिउष्ट्रोवहतिनित्यशः ॥ मध्यगन्धं
नजानातितथाविष्णुंबहिर्मुखाः ॥५१॥ मृगाःशालंहिजिघ्रन्तिकस्तूरीगन्धमिच्छवः ॥ स्वनाभिस्थंनजानन्तितथाविष्णुंबहिर्मुखाः ॥५२॥ उपदेशो
हिमूर्खाणांवृथावैनगनन्दिनि ॥ तथैवविष्णुभक्तेर्हिउपदेशोबहिर्मुखे ॥५३॥ अहिनाचपयःपीतंतत्पयोहिविषायते ॥ तथावैचान्यभक्तानांविष्णुभक्ति
र्विषायते ॥५४॥ चक्षुर्विनायथादीपंदृष्ट्वादर्पणमेवच ॥ समीपस्थानपश्यन्तितथाविष्णुंबहिर्मुखाः ॥ ५५ ॥ पावकोहियथाधूमैरादर्शोऽपिमलेनच ॥
यथोल्बेनावृतोगर्भोदेहेकृष्णस्तथावृतः ॥५६॥ दुग्धेसार्पिःस्थितंयद्वत्तिलेतैलंतुसर्वदा ॥ चराचरेतथाविष्णुर्दृश्यतेनगनन्दिनि॥५७॥एकसूत्रेमणिगणा
धार्यन्तेबहवोयथा॥एवंब्रह्मादिभिर्विश्वंसंप्रोतंब्रह्मचिन्मये॥५८॥ यथाकाष्ठेस्थितोवह्निर्मथनादेवदृश्यते ॥ एवंसर्वगतोविष्णुर्ध्यानादेवप्रदृश्यते ॥५९॥
आदिरेकोभवेद्दीपस्तस्माज्जाताःसहस्रशः ॥एवमेकःस्थितोविष्णःसर्वंव्याप्यप्रतिष्ठते ॥६०॥ यथासूर्योदयेज्योतिःपुष्करेतिष्ठतेसदा॥दृश्यतेबहुधानीरे
लोकेविष्णुस्तथाहिसः॥६१॥मारुतःप्रकृतिस्थोऽपिनानागन्धवहःसदा ॥ ईश्वरःसवजीवस्थोभुङ्क्तेप्रकृतिजान्गुणान् ॥६२॥ शर्करांविषसंयोगान्नीरंभव
तियादृशम् ॥ सभूत्वातादृशोह्यात्माकर्मणःफलमश्नुते ॥ ६३ ॥ उर्वीचनीरसंयोगान्नानावृक्षाप्रजायते ॥ प्रकृतेर्गुणसंयोगान्नानायोनिषु
जायते ॥ ६४ ॥ गजेवैमशकेचैवदेवेवामानुषेऽपिवा ॥ नाधिकोनचन्यूनोवैनिष्ठोदेहेसनिश्चलः ॥ ६५ ॥ ब्रह्मादिस्तम्बपर्यन्तायेचात्रभुविमा
नवाः ॥ देवायक्षास्तथानागागन्धर्वाःकिन्नरादयः ॥ ६६ ॥ तेषुसर्वेषुदृश्यन्तेजलेचन्द्रमसोयथा ॥ ससच्चिदानन्दशिवःसमहेशोहिदृश्यते॥
॥ ६७ ॥ सर्वेविष्णुस्तथाप्रोक्तःसोऽयंसर्वगतोहरिः ॥ वेदान्तवेद्यःसर्वेशःकालातीतोह्यनामयः ॥ ६८ ॥ एवंतंवेत्तियोदेविसभक्तोनात्रसंशयः॥
एकोहिबहुधाज्ञेयोबहुधाप्येकएवसः ॥ ६९ ॥ नामरूपविभेदेनजल्प्यतेबहुधाभुवि ॥ चक्षुषानरवेज्योतिर्भानुनाचक्षुरेधते ॥ ७० ॥ परमात्मा
तथाचात्माप्रतिदेहेतुसर्वदा ॥ घटेघटेयथाकाशस्तस्मिन्भग्नेयथास्थितः ॥७१॥ रूपेरूपेतथात्वंहिभग्नेतस्मिन्सुनिश्चलः ॥ यथाकाष्ठमयंरूपंपततेप्रभु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

णाविना ॥ ७२ ॥ क्रिमिमेदोमयोदेहः पततेचात्मनाविना ॥ हेम्नोभवन्तिवर्णाश्चवह्निनायान्तिपूर्ववत् ॥ ७३ ॥ तद्वज्जीवाःप्रपद्यन्तेभक्त्यावैपूर्व रूपताम् ॥ स्वघनेनावृतंसूर्यंमूढाःपश्यन्तिनिष्प्रभम् ॥ ७४ ॥ तथाऽज्ञानधियोमूढानजानन्तितमीश्वरम् ॥ निर्विकल्पंनिराकारंवेदान्तैःपरि पठ्यते ॥ ७५ ॥ निराकाराच्चसाकारःस्वेच्छयाचप्रकाशते ॥ तस्मात्संजातमाकाशंनिःशब्दंगुणवर्जितम् ॥ ७६ ॥ आकाशान्मारुतोजातः सशब्दंचतदाभवत् ॥ वातादजायतज्योतिर्ज्योतिषश्चाभवज्जलम् ॥ ७७ ॥ तज्जलेरुक्मगर्भश्चविराड्वैविश्वरूपधृत् ॥ तस्यनाभिसरोजेचब्रह्माण्डानां चकोटयः ॥ ७८ ॥ प्रकृतिःपुरुषस्तस्मान्निर्मितंतुत्रिधाजगत् ॥ तयोर्द्वयोश्चसंयोगात्तत्त्वयोगोऽभ्यजायत ॥ ७९ ॥ सात्त्विकीविष्णुसंभूति र्ब्रह्मावैराजसःस्मृतः ॥ शिवस्तुतामसःप्रोक्तएभिःसर्वंप्रवर्त्तितम् ॥ ८० ॥ एकाब्राह्मीस्थितिर्लोकेकर्मबीजानुसारतः ॥ तयासंहरतेविष्णुःसर्वंलोका नुशेषतः ॥ ८१ ॥ तिष्ठत्यसौतदातत्रभगवान्विष्णुरव्ययः ॥ एवंसर्वगतोविष्णुरादिमध्यान्तएवच ॥ ८२ ॥ अविद्ययानजानन्तिलोकावैकर्म निश्चिताः ॥ वर्णोचितानिकर्माणियःकालेषुप्रकारयेत् ॥ ८३ ॥ यत्कर्मविष्णुदैवत्यंनहिगर्भस्यकारणम् ॥ वेदान्तशास्त्रेमुनिभिःसर्वदैवविचार्यते॥ ॥ ८४ ॥ ब्रह्मज्ञानमिदंदेहेतदहंपरिकीर्त्तये ॥ शुभाशुभस्यकार्यंचकारणंमनएवहि ॥ ८५ ॥ मनसाशुध्यतेसर्वंतदाब्रह्मसनातनम् ॥ मनएवसदाबन्धु र्मनएवसदारिपुः ॥ ८६ ॥ मनसातारिताःकेचिन्मनसापातिताश्चके ॥ मध्येसर्वपरित्यागोबाह्येकर्मतथाचरन् ॥ ८७ ॥ एवमेवकृतंकर्मकुर्वन्नपिन लिप्यते ॥ पद्मपत्रंयथानीरलेशैरपिनलिप्यते ॥ ८८॥ अग्निरग्नौयथाक्षिप्तोभक्त्याचकिंप्रयोजनम् ॥ यदाभक्तिरसोज्ञातोनमुक्तीरोचतेतदा ॥ ८९॥ योगैरष्टविधैर्विष्णुर्नप्राप्यश्चेहजन्मनि ॥ भक्त्यावाप्राप्यतेविष्णुःसर्वदासुलभोभवेत् ॥९०॥ वेदान्तैःप्राप्यतेज्ञानंज्ञानेनज्ञेयमेवच ॥ तत्तुज्ञेयंयदाप्राप्तं तदाशून्यमिदंजगत् ॥ ९१ ॥ब लेनप्राप्यतेविष्णुर्योगैरष्टविधैश्चकिम् ॥ सर्वेषामेवभावानांभावशुद्धिःप्रशस्यते ॥ ९२ ॥ आलिङ्ग्यतेयथाकान्ता यथाभावस्तथाफलम् ॥ उपानद्युक्तपादोहिवेत्तिचर्ममयींमहीम् ॥ ९३ ॥ बुद्धिर्यथाविधायस्यतद्वत्समन्यतेजगत् ॥ दुग्धेनसिक्तोनिम्बोऽपिकटु भावंनतुत्यजेत् ॥ ९४ ॥ प्रकृतिंयान्तिभूतानिउपदेशोनिरर्थकः ॥ छित्त्वावैसहकारंचफलंपत्रंकथंलभेत् ॥ ९५ ॥ इन्द्रियाणांसुखार्थेनवृथाजन्म कथंनयेत् ॥ स्थाल्यांवैडूर्यमय्यांहिपच्यतेचौषधंयथा ॥ ९६ ॥दह्यतेचागदस्तद्वद्वृथाजन्मकथंभवेत् ॥ निधानंचगृहेक्षिप्त्वाशुभःसेवांकथंचरेत्॥ ॥ ९७ ॥ त्यक्त्वावैकुण्ठनाथंतमन्यमार्गेकथंरमेत् ॥ भक्तिहीनैश्चतुर्वेदैःपठितैःकिंप्रयोजनम् ॥ ९८ ॥ श्वपचोभक्तियुक्तस्तुत्रिदशैरपिपूज्यते ॥ स्वकरेकङ्कणंबद्ध्वादर्पणैःकिंप्रयोजनम् ॥ ९९ ॥ ब्रह्मरुद्रादिभिर्देवैर्दत्तैश्वर्याश्चसेवकाः ॥ अर्पितंनैवगृह्णन्तिप्रभोश्चैवतुकिंचन ॥ १०० ॥ अकिं

१ 'भ्रश्यते च त्वया विना' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चनायभक्तायदातुंनालंगतोवरम् ॥ निःशरीरस्यकृष्णस्यतत्रध्यानंकथंभवेत् ॥ १ ॥ साकारंबहवोदृष्ट्वागताभक्त्याचतत्पदम् ॥ पूजाभक्तिः
कथंशून्येसाकारेकथ्यतेबुधैः ॥ २ ॥ शून्यमार्गेकथंयातिआधारेणविनानरः ॥ साकारोयःस्वयंस्वामीनिराकारःसवैप्रभुः ॥ ३ ॥ साकारोहिसुखेनैव
निराकारोनदृश्यते ॥ सेवारसश्चसाकारेनिराकारेणवैरसः ॥ ४ ॥ साकारेणनिराकारोज्ञायतेस्वयमेवहि ॥ हरिस्मृतिप्रसादेनरोमाञ्चिततनुर्यदा ॥
॥ ५ ॥ नयनानन्दसलिलंमुक्तिर्दासीभवेत्तदा ॥ बाल्येचयत्कृतंपापंतत्कथंनविनश्यति ॥ ६ ॥ पूजादानव्रतैस्तीर्थैर्जपहोमैस्त्वदर्पितैः ॥ निजधर्मं
परित्यज्यतपोघोरंकथंचरेत् ॥ ७ ॥ स्वधर्मेनिधनंश्रेयःपरधर्मोभयावहः ॥ विधिंसंत्यज्यशास्त्रीयंतपोघोरंकथंचरेत् ॥ ८ ॥ आश्रमेणविनामूढोनैव
सिद्धिमवाप्नुयात् ॥ ब्रह्मणानिर्मितावर्णाःस्वेस्वेधर्मेनियोजिताः ॥९॥ स्वधर्मेणागतंद्रव्यंशुक्लद्रव्यंतदुच्यते॥ शुक्लद्रव्येणयद्दानंदीयतेश्रद्धयान्वितम्॥
॥ ११० ॥ स्वल्पेनापिमहापुण्यंतस्यसङ्ख्यानविद्यते ॥ नीचसङ्गेनयद्द्रव्यमानीतंगृहकर्मसु ॥ ११ ॥ तेनद्रव्येणयद्दानंकृतंवैमनुजादिभिः ॥ तत्फ
लंनभवेत्तेवैनैवतत्फलभागिनः ॥ १२॥ यादृशंकुरुतेकर्मइन्द्रियाणांसुखेच्छया ॥ तादृशींयोनिमाप्नोतिमूढोहिज्ञानदुर्बलः ॥ १३ ॥ इहयत्कुरुतेकर्म
तत्परत्रोपभुज्यते ॥ पुण्यमाचरतःपुंसोयदिदुःखंप्रजायते ॥ १४ ॥ तदातापोनकर्त्तव्यस्तत्कर्मपूर्वदेहजम् ॥ पापमाचरतःपुंसोजायतेसुख
मेवच ॥ १५ ॥ नकर्त्तव्यस्तदाहर्षःसुखेतत्रसुरेश्वरि ॥ रज्जुबद्धाश्चपशवःप्रभुणास्वेच्छयायथा ॥ १६ ॥ नीयन्तेकर्मबन्धेनमनुजाअपिभूतले ॥
शाखामृगोवनचरोनृत्यतेचगृहेगृहे ॥ १७ ॥ एवंचकर्मणाजीवानीयन्तेसर्वयोनिषु ॥ क्रीडताकन्दुकोयद्वत्प्रेर्यतेप्रभुणेच्छया ॥ १८ ॥ कर्मणा
वातथाजन्तुर्नीयतेसुखदुःखयोः ॥ प्राणीस्वकर्मभिर्बद्धोनशक्तोबन्धनिग्रहे ॥ १९ ॥ देवावैकर्मभिर्बद्धाऋषयश्चतथापरे ॥ कैलासेरुद्रदेहस्था
भुजगाविषभोजिनः ॥ १२० ॥ असमर्थाःसुधांभोक्तुंकर्मयोनिर्बलीयसी ॥ नीरोगदेहदातायोबुधःसूर्योहिकथ्यते ॥ २१ ॥ तद्रथेसारथिः
पङ्गुःकर्मयोनिर्बलीयसी ॥ इन्द्रद्युम्नोहिराजर्षिर्गजत्वंकर्मणागतः ॥ २२ ॥ समर्थस्वामिनातस्मिन्कर्मयोनिर्वृथाकृता ॥ रुद्रब्रह्मादयोदेवामा
नवाश्चासुराश्चये ॥ २३ ॥ तेसर्वेकर्मबद्धाश्चविचरन्तिमहीतले ॥ कमाधीनंजगत्सर्वंविष्णुनानिर्मितंपुरा ॥ २४ ॥ तत्कर्मकेशवाधीनंरा
मनाम्नाविनश्यति ॥ सर्वत्रापिस्थितंतोयंमुक्तिदंतुसितासिते ॥ २५ ॥ एवमाचरतांकर्मसुक्तिदंकेशवार्चनम् ॥ इन्द्रियाणांसुखार्थाययःकर्म
मनसाचरेत् ॥ २६ ॥ अहंकृतेनमन्येतकेवलंदेहमेवहि ॥ मनसासंस्मरञ्जन्तुःप्रायश्चित्तंसमाचरेत् ॥ २७ ॥ सपूर्वकमभोक्ताचअग्रेक

१ 'वाण्या' इ० पा० । २ 'मवाप्स्यति' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

र्मनवर्धते ॥ प्रशंसन्तिग्रहान्केचित्केचित्प्रेतपिशाचकान् ॥ २८ ॥ केचिद्देवान्प्रशंसन्तिह्योषधीःकेचिदूचिरे ॥ केचिन्मन्त्रंचसिद्धिंचकेचि
द्बुद्धिंपराक्रमम् ॥ २९ ॥ उद्यमंसाहसंधैर्यंकेचिन्नीतिंबलंतथा ॥ अहंकर्मप्रशंसामिसर्वेकर्मानुवर्तिनः ॥ १३० ॥ इतिमेनिश्चिताबुद्धिःकथ्य
तेपूर्वसूरिभिः ॥ यदापुण्यमयोजन्तुःपापंकिंचिन्नविद्यते ॥ ३१ ॥ ज्ञानंहिद्विविधंचैवतदापुण्यंसुखंभवेत् ॥ पापंपुण्यंसमंयस्यतदाकर्मसु
विद्यते ॥ ३२ ॥ समंयोगंयदाद्वंद्वंतदानन्दपदंव्रजेत् ॥ बाह्येसर्वपरित्यागीमनसासंस्पृहीभवेत् ॥ ३३ ॥ तद्वृथाचरितंतस्यतेनतत्पापभो
गिनः ॥ बाह्येकरोतिकर्माणिमनसानिःस्पृहोभवेत् ॥ ३४ ॥ त्यागोऽसौमध्यमोज्ञेयोनतुपूर्णफलंलभेत् ॥ बाह्यमध्येपरित्यज्यबुद्ध्याशून्यावलम्ब
नम् ॥ ३५ ॥ त्यागःसउत्तमोज्ञेयोयोगिनामपिदुर्लभः ॥ क्रोधात्सवत्यजन्त्येकेकेचिद्वादप्रभावतः ॥ ३६ ॥ कष्टात्सर्वंत्यजन्त्येकेत्यागाःसर्वेतुमध्य
माः ॥ सुबुद्ध्याश्रद्धयायुक्तोनक्रोधादिवशंगतः ॥ ३७ ॥ कर्मणाह्यवलिप्तोऽपिसुगतिंयातिमानवः ॥ शुचीनांश्रीमतांगेहेधीमतांयोगिनामपि
॥ ३८ ॥ योगाद्भ्रष्टस्तुजायेतकुलेवैद्विजपूर्वके ॥ स्वल्पेनैवतुकालेनपूणयोगंचविन्दति ॥ ३९ ॥ चिदानन्दपदंगच्छेद्योगभक्तिप्रसादतः ॥
पङ्कनैवयथापङ्कंरुधिरंरुधिरेणवै ॥ १४० ॥ हिंसयाकर्मणाकर्मकथंक्षालयितुंक्षमः ॥ हिंसाकर्ममयोयज्ञःकथंकर्मक्षयेक्षमः ॥ ४१ ॥ स्वर्ग
कामकृतायज्ञाःस्वर्गेतेचाल्पसौख्यदाः ॥ अनित्यानित[illegible]ख्यानिभवन्तिचबहून्यपि ॥ ४२ ॥ नित्यंसौख्यंनतेष्वस्तिविनाभक्त्याहरेःक्वचित्॥
सार्वभौमसुखंराज्यंस्वर्गेचापितथासुखम् ॥ ४३ ॥ अन्यत्किंचिन्नवाञ्छामिगर्भवासाद्बिभेम्यहम् ॥ ग्रावावैभिद्यतेलोहैर्माणिक्यंनैवभिद्यते
॥ ४४ ॥ नानाकाममयीबुद्ध्याविष्णुभक्तिर्नभिद्यत ॥ बकोजलचरान्भुङ्क्तेमण्डूकादींश्चवर्जयेत् ॥ ४५ ॥ तथायमःसर्वहन्तावर्जयेत्कृष्णसेव
कान् ॥ योरक्षतिसहर्ताचसवैपालकउच्यते ॥ ४६ ॥ अपराधशतैर्युक्तंस्वस्थानेनयमामितः ॥ यथाकृतापराधस्यकृष्णस्तस्यकृपाकरः ॥
॥ ४७ ॥ फलंचलभतेवाद्यरक्षकःकिंकरोतिचेत् ॥ एवमात्माचदेहेऽस्मिन्परवश्यकृपाकरः ॥ ४८ ॥ प्राप्तोनपारःशनकैर्मह्वैर्युक्तानवापिता ॥
व्याधस्यमुक्तिदाताचकुब्जकातारितास्वयम् ॥ ४९ ॥ ब्रह्माद्यैर्दुर्लभःस्वप्नेसुलभोगोपमन्दिरे ॥ गोपोच्छिष्टंयदाभुक्तंतदातेतारितास्वयम् ॥
॥ १५० ॥ योगिभिर्गीयतनित्यंपरमात्माजनार्दनः ॥ अव्ययःपुरुषःश्रीमान्दृष्टांतैर्देविविस्मये ॥ ५१ ॥ एतत्स्मरणकंदिव्यंयेपठन्ति

१ 'खंतिश्रिता' इ० पा०। २ 'प्राप्तं' इ० पा०। ३ 'स्वर्गवासम्' इ० पा०। ४ 'नानाकाममयो भिद्याद्धि' इ०, 'नाताकामनया बुद्ध्या विष्णुभक्तिर्न विद्यते' इ० च पा०। ५ 'बाह्य' इ० पा०।
६ 'दृष्टान्तैः' इ०पा०।

CC-0. In Public Domain. Digitization by eGangotri

दिनेदिने ॥ सर्वपापविनिर्मुक्तायान्तिविष्णोःपरंपदम् ॥ ९२ ॥ अनयाभावबुद्ध्याचपठनंविष्णुसन्निधौ ॥ इहलोकेसुखंभुक्त्वापरंपदमवा
प्नुयात् ॥ १९३ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०उत्तर०विष्णुस्मरणंनामैकत्रिंशदधिकशततमोऽध्यायः ॥ १३१ ॥ पार्वत्युवाच ॥
द्वीपेऽस्मिन्यानितीर्थानितानिमेवदसुव्रत ॥ द्वीपानांद्वीपराजोऽयंसर्वदाप्रभुविनिर्मितः ॥ सङ्ख्ययात्वंवदस्वामिन्कृपांकृत्वाममोपरि ॥ १ ॥
महादेवउवाच ॥ सर्वगःसर्वभूतेषुद्रष्टव्यःसर्वतोभुवि ॥ सप्तलोकेषुयत्किंचिद्दृश्यतेसचराचरम् ॥२॥ तत्त्वंतेनविनादेविनदृष्टंनश्रुतंमया ॥ अतोवि
ष्णुर्महादेवःकेशवःक्लेशनाशनः ॥ ३ ॥ तीर्थरूपेणवर्ततेद्वीपेह्यस्मिन्सुरेश्वरि ॥ तानितीर्थानिवक्ष्यामिसाम्प्रतंनात्रसंशयः ॥ ४ ॥ प्रथमं
पुष्करंक्षेत्रंतीर्थानांप्रवरंशुभम् ॥ वाराणसीद्वितीयंतुक्षेत्रंमुक्तिप्रदायकम् ॥ ५ ॥ तृतीयंनैमिषंक्षेत्रमृषीणांपावनंस्मृतम् ॥ प्रयागंवैचतुर्थंतुतीर्थानामु
त्तमंस्मृतम् ॥६॥ कार्मुकंपञ्चमंप्रोक्तमुत्पन्नंगन्धमादने॥ षष्ठंवैमानसंतीर्थंदेवानांरम्यमेवच ॥७॥ सप्तमंविश्वकायंतुह्यवरेपर्वतेशुभे ॥अष्टमंगौतमाख्यंच
मन्दरेनिर्मितंपुरा ॥ ८ ॥ मदोत्कटंतुनवमंदशमंरथचैत्रकम् ॥ एकादशंकान्यकुब्जंयत्रतिष्ठतिवामनः ॥ ९ ॥ द्वादशंमलयंचैवकुब्जा
म्रकमतःपरम् ॥ विश्वेश्वरंगिरिकर्णंकेदारंगतिदायकम् ॥ १० ॥ बाह्यंहिमवतःपृष्ठेगोकर्णेगोपकंतथा ॥ स्थानेश्वरंहिमाद्रौचबिल्वके
बिल्वपत्रिकम् ॥ ११ ॥ श्रीशैलेमाधवंतीर्थंभद्रंभद्रेश्वरेतथा ॥ वाराहेविजयंप्रोक्तंवैष्णवंवैष्णवेगिरौ ॥ १२ ॥ रौद्रंतुरुद्रकोटेतुपैत्र्यंकाल
ञ्जरेगिरौ ॥ कम्पिलेकाम्पिलंतीर्थंमुकुटेकर्कोटकंतथा ॥ १३ ॥ शालग्रामोद्भवंतीर्थं[1]गंछिकायांसुरेश्वरि ॥ नर्मदायांशिवाख्यंतुमायायां
विश्वरूपकम् ॥ १४ ॥ उत्पलाक्षसहस्राक्षंजातंवैरैवतेगिरौ ॥ गङ्गायांपितृतीर्थंचविष्णुपादोद्भवंतथा ॥ १५ ॥ विपाशायांविपा
पाचपाटलेपुण्ड्रवर्धनम् ॥ नारायणंसुपार्श्वेतुत्रिकूटेविष्णुमन्दिरम् ॥ १६ ॥ विपुलेविपुलंनामकल्याणंमलयाचले ॥ कौरवंकोटिती
र्थेचसुगन्धंगन्धमादने ॥ १७ ॥ कुब्जाम्रकेत्रिसन्ध्यंतुगङ्गाद्वारेहरिप्रियम् ॥ शैलंविन्ध्यप्रदेशेतुबदर्यांसारस्वतंस्मृतम् ॥ १८ ॥ कालिन्द्यां
कालरूपंचसह्येवैसायकंस्मृतम् ॥ चान्द्रंचन्द्रप्रदेशेतुरमणंतीर्थनायकम् ॥ १९ ॥ यमुनायांमृगाख्यंतुकरवीरेकुरूद्भवम् ॥ विनायकेपर्वतेवैह्यु
माख्यंतीर्थमेवच ॥ २० ॥ आरोग्यंभास्करेदेशेमहाकालेमहेश्वरम् ॥ तीर्थमभयदंनामामृताख्यंविन्ध्यकन्धरे ॥ २१ ॥ मण्डपेविश्वरूपंच
स्वाहाख्यंचेश्वरेपुरे ॥ वैंगलेयंप्रचण्डायांचाण्डिकंमरकण्टके ॥ २२ ॥ सोमेश्वरंतथातीर्थेप्रभासेपुष्करंतथा ॥ देवमात्रंसरस्वत्यांपारावततटे

१ 'गण्डिकायाम्' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थितम् ॥ २३ ॥ महालयंमहापद्मेपयोष्ण्यांपिङ्गलेश्वरम् ॥ सिंहिकायांतथातीर्थंसौरवेरविसंज्ञकम् ॥ २४ ॥ कार्त्तिकंकृत्तिकाक्षेत्रेशाङ्करंशङ्करे
गिरौ ॥ उत्पलाख्यंततोदिव्यंसुभद्रासिन्धुसंगमे ॥ २५ ॥ गाणपत्यंततश्चैवपर्वतेविष्णुसंज्ञके ॥ जालन्धरेततःप्रोक्तंतीर्थंविष्णुमुखंचयत् ॥
॥ २६ ॥ तारेचैवतारकंप्रोक्तंपर्वतेविष्णुसंज्ञके ॥ देवदारुवनेपौण्ड्रंपौष्कंकाश्मीरमण्डले ॥ २७ ॥ भौमंहिमंहिमाद्रौचतुष्टिकंपौष्टिकंपुनः ॥ कपा
लमोचनंतीर्थंजातंमायापुरेतथा ॥ २८ ॥ शङ्खोद्धारंततश्चैवदेवंवैशङ्खधारकम् ॥ पिण्डेचैवपिण्डनंनामसिद्धेवैखानसंभवेत् ॥ २९ ॥ अच्छोदेवि
ष्णुकामंतुधर्मकामार्थमोक्षदम् ॥ औषध्यंचोत्तरेकूलेकुशद्वीपेकुशोदकम् ॥३०॥ मन्मथंहेमकूटेतुकुमुदेसत्यवादनम् ॥ वन्दन्त्यामाश्वकंतीर्थंविन्ध्ये
वैमातृकंस्मृतम् ॥ ३१ ॥ चित्तेब्रह्ममयंतीर्थंतीर्थानांपावनंस्मृतम् ॥ एतेषांसर्वतीर्थानामुत्तमंशृणुसुन्दरि ॥ ३२ ॥ विष्णोर्नामसमंतीर्थंनभूतंनभवि
ष्यति ॥ ब्रह्महाहेमहारीवाबालहागोघ्नएवच ॥ ३३ ॥ मुच्यतेनाममात्रेणप्रसादात्केशवस्यतु ॥ कलौद्वारवतीरम्याधन्योदेवोजनार्दनः ॥ ३४ ॥ ये
पश्यन्तिनरादेवंमुक्तिस्तेषांसुनिश्चला ॥ एवंधन्यतमंदेवंविष्णुंसर्वेश्वरंप्रभुम् ॥ ३५ ॥ चिन्तयामिमहादेविविद्वत्संस्थोजनार्दनम् ॥ अष्टोत्तरंतुतीर्थानां
शतमेतदुदाहृतम् ॥ ३६ ॥ योजपेच्छृणुयाद्वापिसर्वपापैःप्रमुच्यते ॥ एषुतीर्थेषुयःस्नात्वापश्येन्नारायणंहरिम् ॥ ३७ ॥ सर्वपापविनिर्मुक्तोयाति
विष्णोःपरंपदम् ॥ जगन्नाथंमहातीर्थंलोकानांपावनंस्मृतम् ॥ ३८ ॥ येगच्छन्तिनरश्रेष्ठास्तेऽपियान्तिपरांगतिम् ॥ अष्टोत्तरशतंपुण्यंश्रावयेत्पितृ
कर्मणि ॥ ३९ ॥ इहलोकेसुखंभुक्त्वायातिविष्णोःपरंपदम् ॥ गोदानेश्राद्धदानेवाअहन्यहनिवापुनः ॥ देवार्चनविधौविद्वान्परंब्रह्माधिगच्छति ॥
॥ ४० ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०जम्बूद्वीपतीर्थवर्णनंनामद्वात्रिंशदधिकशततमोऽध्यायः ॥ १२२ ॥ महादेवउवाच ॥
वेत्रवत्यास्तुमाहात्म्यंवक्ष्यामिशृणुसुन्दरि ॥ यत्रस्नात्वाविमुच्यन्तेयावदाभूतसंप्लवम् ॥ १ ॥ वृत्रेणचकृतःकूपोमहागम्भीरसंज्ञकः ॥ कूपात्सा
निःसृतादेवीमहापापौघनाशिनी ॥ २ ॥ यथागङ्गातथेयंचसरिच्छ्रेष्ठासुरोत्तमे ॥ अस्यादर्शनमात्रेणपापौघायान्तिचक्षयम् ॥ ३ ॥ शृणुदेवि
प्रवक्ष्यामिइतिहासंपुरातनम् ॥ यच्छ्रुत्वापापिनोदोषैर्विमुक्ताःकर्मबन्धनात् ॥४॥ चम्पकेनगरेचैवराजाराज्यंकरोतिसः ॥ सदादुष्टोदुष्टरूपोजनानांस
प्रपीडकः ॥ ५ ॥ अधमोऽधर्मरूपश्चविष्णुनिन्दापरायणः ॥ देवद्विजनिहन्ताचआश्रमाणांविदूषकः ॥ ६ ॥ वेदनिन्दापरःश्रीमान्मूर्खोवानिर्घृणः
शठः ॥ असच्छास्त्रेषुनिरतःपरदाराभिमर्शकः ॥ ७ ॥ विदारुणेतिनामाचसंजातोमूर्खएवच ॥ कदाचिद्दैवयोगेनआगतस्तांनदींप्रति ॥ ८ ॥आखे
टकसमायुक्तःस्वयंकुष्ठीसुरेश्वरि ॥ महापापादयंजातोब्राह्मणानांचनिन्दनात् ॥ ९ ॥ वृथावादीदुरात्माचशठोवैनिर्घृणःपशुः ॥ वेदनिन्दारतोनित्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गोशास्त्राणांप्रदूषकः ॥ १० ॥ एवंविधोवनेभ्राम्यंस्तृषार्तःससुहृद्वृतः ॥ अश्वादुत्तीर्यराजासौजलंपीत्वागृहंगतः ॥ ११ ॥ तेनैवोदकपानेनगतंकुष्ठं नसंशयः ॥ बुद्धिस्तुनिर्मलाजातातस्यराज्ञोविशेषतः ॥ १२ ॥ विष्णौभक्तिःसमुत्पन्नातदातस्यसुरेश्वरि ॥ ततःप्रभृतिकालेनस्नानंवैकृतवा न्सदा ॥ १३ ॥ निर्मलोबहुरूपाढ्योजातस्तत्रसुरेश्वरि ॥ इहलोकेसुखंभुक्त्वाकृत्वायज्ञाननेकशः ॥ १४ ॥ विप्रेभ्योदक्षिणांदत्त्वासगतोवैष्णवं पदम् ॥ इतिज्ञात्वातुभोदेविवेत्रवत्यांविशेषतः ॥ १५ ॥ स्नानंकुर्वन्तियेविप्रास्तेमुक्तानगनन्दिनि ॥ राजन्योवाथवैश्योवाशूद्रोवासुरसत्तमे ॥ ॥ १६ ॥ येऽत्रस्नानंप्रकुर्वन्तितेमुक्ताःपापबन्धनात् ॥ कार्त्तिकेवाथमाघेवाबाह्योवावेदनिन्दकः ॥ १७ ॥ सरितांसंगमेस्नात्वामुच्यतेदेविकिल्बि षात् ॥ साभ्रमत्याःसमंयत्रतस्याःसङ्गःप्रदृश्यते ॥१८॥ तत्रस्नात्वाविशेषेणमुच्यतेब्रह्महासदा ॥ खेटकंनगरंदिव्यंस्वर्गरूपंतुवानघे ॥ १९ ॥ ब्रह्मणा तत्रैवदेवियोगाश्चबहवःकृताः ॥ तत्रस्नात्वाचभुक्त्वाचपुनर्जन्मनविद्यते ॥ २० ॥ साद्वितीयास्मृतागङ्गाकलौदेविविशेषतः ॥ येनराःसुखमिच्छन्ति धनमिच्छन्तियेनराः ॥ २१ ॥ स्वर्गमिच्छन्तियेलोकास्तेवैस्नात्वापुनःपुनः ॥ इहलोकेसुखंभुक्त्वायान्तिविष्णोःपरंपदम् ॥ २२ ॥ सूर्यवंशेचये जाताःसोमवंशेतथैवच ॥ आगतावेत्रवत्यांतुस्नात्वानिर्वृतिमागताः ॥ २३ ॥ दर्शनाद्धरतेदुःखंस्पर्शनान्मानसंह्यघम् ॥ स्नात्वाभुक्त्वातथादेविमुक्ति भागीनसंशयः ॥ २४ ॥ स्नानाज्जपात्तथाहोमादनन्तंफलमश्नुते ॥ गत्वावाराणसीतीर्थंभक्त्याचान्द्रायणंचरेत् ॥ २५ ॥ तत्रगत्वामहत्पुण्यं तत्पुण्यंसुरसत्तमे ॥ वेत्रवत्यांविशेषेणपश्चत्वंयदिगच्छति॥२६॥ सर्वेचतुर्भुजोभूत्वायातिविष्णोःपरंपदम् ॥ पृथिव्यांयानितीर्थानियेदेवाःपितरस्तथा ॥ २७ ॥ तेसर्वेचवसन्तीहवेत्रवत्यांसुरेश्वरि ॥ किमन्यद्बहुनोक्तेनभूयोभूयोवरानने ॥ २८ ॥ वेत्रवत्याःसमंतीर्थंपृथिव्यांनसनातनि ॥ अहंविष्णु स्तथाब्रह्मादेवाश्चपरमर्षयः ॥ २९ ॥ तिष्ठन्तिदेवताःसर्वावेत्रवत्यांमहेश्वरि ॥ एककालंद्विकालंवात्रिकालंचविशेषतः ॥ ३० ॥ स्नानंकुर्वन्ति येतत्रतेवैमुक्तानसंशयः ॥ ३१ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०वेत्रवतीमाहात्म्येत्रयस्त्रिंशदधिकशततमोऽध्यायः ॥ १३३ ॥

श्रीमहादेवउवाच ॥ साभ्रमत्यास्तुमाहात्म्यंवक्ष्येदेवियथातथम् ॥ कश्यपोवैमुनिश्रेष्ठस्तपोवैतप्तवान्महत् ॥ १ ॥ अनेकवर्षपर्यन्तंतेनतप्तं महत्तपः ॥ अर्बुदेपर्वतेरम्येनानाद्रुमसमाकुले ॥ २ ॥ तत्रगत्वातपस्तप्तमृषिणाकश्यपेनवै ॥ सरस्वतीयत्ररम्यापवित्रापापनाशिनी ॥ ३ ॥ एकस्मिन्दिवसेदेविगतोऽसौनैमिषंप्रति ॥ तदातऋषयःसर्वेकथांचक्रुरनेकशः ॥ ४ ॥ तदातैस्तुद्विजैःसम्यक्पृष्टोऽसौकश्यपोमुनिः ॥ अहोकश्यपनः प्रीत्यैगङ्गेहानीयतांप्रभो ॥ ५ ॥ भवन्नाम्नातुसागङ्गाभविष्यतिसरिद्वरा ॥ तेषांवाक्यमुपाकर्ण्यनमस्कृत्यद्विजांश्चतान् ॥ ६ ॥ आगतोह्यर्बु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

दारण्येसरस्वत्याश्चसंनिधौ ॥ तत्रतप्तंतदातेनतपःपरमदुष्करम् ॥ ७ ॥ आराधितोह्यहंतेनकश्यपेनद्विजेनवै ॥ प्रत्यक्षोऽहंतदाजातस्तस्यद्विजवर
स्यच ॥ ८ ॥ वरंवरयभद्रंतेयत्तेमनसिवर्तते ॥ ९ ॥ कश्यपउवाच ॥ वरंदातुंसमर्थोऽसिदेवदेवजगत्पते ॥ शिरस्थितायागङ्गेयंपवित्रापापहारिणी
॥ १० ॥ ममदेयाविशेषेणमहादेवनमोऽस्तुते ॥ तदादेविमयोक्तंचगृह्णीष्वत्वंद्विजोत्तम ॥ ११ ॥ जटामेकांपरित्यज्यदत्तागङ्गातदामया ॥
तांगृहीत्वाद्विजश्रेष्ठःस्वस्थानंहर्षतोययौ ॥ १२ ॥ केशरन्ध्रंनामतीर्थंवासोवैकश्यपस्यच ॥ गतस्तत्रतुदेवेशिमुनिभिःपरिवारितः ॥ १३ ॥
कश्यपेनसमानीताकाश्यपीसासरिद्वरा ॥ यस्यादर्शनमात्रेणब्रह्महामुच्यतेकिल ॥ १४ ॥ पार्वत्युवाच ॥ स्नानमात्रेणकिंपुण्यंतत्रतीर्थेवदस्वमे ॥
विश्वनाथकृपालुस्त्वंदयांकुरुममोपरि ॥ १५ ॥ दर्शनेकिंभवेत्पुण्यंस्नानेकिंवददेवराट् ॥ महिमाकीदृशोब्रह्मन्सर्वंत्वंवक्तुमर्हसि ॥ १६ ॥ महादेवउ
वाच ॥मयाश्रुतान्यनेकानितीर्थान्यायतनानिच ॥ श्रीविष्णोश्चप्रसादाच्चनद्यःसागरगाःप्रभोः ॥१७॥ गङ्गाचयमुनारेवातापीचैवमहानदी ॥ गोदाव
रीतुङ्गभद्राकौशिकीगं[1]ण्डिकातथा ॥ १८ ॥ कावेरीवैदिकाभद्रासरयूःपापहारिणी ॥ अन्याश्चविविधानद्यः[2]सर्वपापहराभुवि॥१९॥प्रयागस्तीर्थराजश्च
काशीपुष्करएवच॥नैमिषारण्यसंज्ञंतुतीर्थंचामरकण्टकम्॥२०॥उत्तमंद्वारकाक्षेत्रमर्बुदारण्यमुत्तमम्॥एवंविधानिदिव्यानिक्षेत्राणिविविधानिच ॥२१॥
श्रुतानितत्रदेवेशिमयाविष्णोःप्रसादतः ॥ पूर्वंभगीरथेनैवयाचितोऽहंतुपार्वति ॥२२॥ तदादत्ताइयंगङ्गाविष्णोर्लोकमभीप्सुना ॥ कश्यपायपुनर्दत्ता
ऋषीणांवचनान्मया ॥ २३ ॥ इयंवैकाश्यपीगङ्गारोगदोषहरासदा ॥ इयंयाकथ्यतेलोकेयुगेवैनामपूर्वकम् ॥ २४ ॥ तदहंकथयिष्यामिशृणुसुन्दरि
तत्त्वतः ॥ कृतेकृतवतीनामत्रेतायांगिरिकाणका ॥२५॥ द्वापरेचन्दनानामकलौसाभ्रमतीस्मृता ॥ दिनेदिनेविशेषेणस्नान्तितस्यांनराश्चये ॥ २६ ॥
सर्वपापविनिर्मुक्तायान्तिविष्णोःपरंपदम् ॥ प्लक्षावतरणेतीर्थेसरस्वत्यांतथेश्वरि ॥२७॥ केदारेचकुरुक्षेत्रेयत्फलंस्नानतोभवेत्॥तत्फलंतुनृणांनूनंसा
भ्रमत्यादिनेदिने ॥२८॥ भवतीतिनसंदेहोव्यासस्यवचनंयथा ॥ नभस्येऽपरपक्षेतुप्रत्यहंवासुरेश्वरि ॥२९ ॥ अमवास्यादिनेसम्यक्छ्राद्धदानेचयत्फ
लम् ॥ नरस्तत्फलमाप्नोतिसाभ्रमत्यवगाहनात् ॥३०॥ कार्तिक्यांकृत्तिकायोगेश्रीस्थलेमाधवाग्रतः ॥ तत्फलंलभतेमर्त्योसाभ्रमत्यवगाहनात् ॥३१॥
एषाश्रेष्ठतमादेविसर्वलोकेषुपावनी ॥ इयंधन्यतमादेविपवित्राह्यघनाशिनी ॥३२॥ यस्यांवैसाभ्रमत्यांचएतेतिष्ठन्तिनित्यशः ॥ पूर्वसम्बन्धिनोयेच
उत्तरेयेतथापुनः ॥३३॥ पाश्चात्यादाक्षिणात्याश्चसर्वेयान्तिचनित्यशः ॥ तीर्थयात्रामिषेणवखेटकेब्रह्मसन्निधौ ॥ ३४ ॥ आयान्तिसर्वदादेविकार्त्ति

१ 'गण्डिका तथा'इ०पा० । २ 'कृष्णावेण्यादयो भुवि' इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

क्यांचनसंशयः ॥ तत्रश्राद्धंप्रकुर्वन्तितथावैविप्रभोजनम् ॥३५॥ नानाधर्मान्प्रकुर्वन्तिनानायज्ञांश्चनित्यशः ॥ विविधानिचदानानिप्रकुर्वन्ति जनाः सदा ॥ ३६ ॥ चतुर्युगेषुसर्वेषुनात्रकार्याविचारणा ॥ यवक्रीतोऽथरैभ्यश्चकक्षीवानुशिजस्तथा ॥ ३७ ॥ भृग्वङ्गिरास्तथाकण्वोमेधावीचपुनर्वसुः ॥ बन्दीचगुणसंपन्नःप्राच्यांदिशिउपश्रिताः ॥ ३८ ॥ उदीच्यांयेमहाभागामधुमत्प्रमुखास्तथा ॥ सुबन्धुश्चमहाभागोदत्तात्रेयश्चवीर्यवान् ॥ ३९ ॥ शिखिदीर्घतमाश्चैवगौतमःकश्यपस्तथा ॥श्वेतकेतुःकहोडश्चपुलहोदेवलस्तथा ॥ ४० ॥ विश्वामित्रभरद्वाजौजमदग्निश्चवीर्यवान् ॥ ऋचीकपुत्रोगर्गश्च ऋषिरुद्दालकस्तथा ॥४१॥ देवशर्माथधौम्यश्चआस्तीकःकश्यपस्तथा ॥ लोमशोनाभिकेतुश्चलोमहर्षणएवच ॥४२ ॥ ऋषिरुग्रश्रवाश्चैवभार्गवश्च्यव नस्तथा ॥वालखिल्यादयोयेचसर्वेगच्छन्तितत्रवै ॥४३॥ कृतस्नानानिराहाराःसदाविष्णुपरायणाः ॥शङ्खचक्रधरास्सर्वेतटेतिष्ठन्तिनित्यशः ॥४४॥ पितृतीर्थंगयानामसर्वतीर्थवरंशुभम् ॥यत्रास्तेदेवदेवेशःस्वयमेवपितामहः॥४५॥गीतायापितृभिर्गाथाश्राद्धभागमभीप्सुभिः ॥ एष्टव्याबहवःपुत्रायद्ये कोऽपिगयांव्रजेत् ॥ ४६ ॥ यजेतवाश्वमेधेननीलंवावृषमुत्सृजेत् ॥ तथावाराणसीपुण्यापितृणांवल्लभासदा ॥ ४७ ॥ याचैवममसांनिध्याद्भुक्तिमुक्ति फलप्रदा ॥ ममाज्ञयातुदेवेशोबिन्दुमाधवसंज्ञकः ॥ ४८ ॥ नित्यंतिष्ठतिदेवेशिवाराणस्यांविशेषतः ॥ अतोधन्यतमाश्रेष्ठापुरीयंममसर्वदा ॥ ४९ ॥ पितृणांवल्लभंतीर्थंपुण्यंवैविमलेश्वरम् ॥ पितृतीर्थंप्रयागंचसर्वतीर्थसमन्वितम् ॥ ५० ॥ साभ्रमत्युदकेदेविआयान्तिवचनान्मम ॥ वटेश्वरश्चभग वान्माधवेनसमन्वितः ॥ ५१ ॥ दशाश्वमेधकंपुण्यंगङ्गाद्वारंतथैवच ॥ मन्नियोगाच्चदेवेशिसाभ्रमत्यांवसन्तिहि ॥ ५२ ॥ नदाथललितादेवीतीर्थंय त्सप्तधारकम् ॥ तथामित्रपदंनामकेदारंशङ्करालयम् ॥५३ ॥ गङ्गासागरमित्याहुःसर्वतीर्थमयंशुभम् ॥ तीर्थंब्रह्मसरस्तद्वच्छतद्रुसलिलेह्रदे ॥ ५४ ॥ तीर्थंतुनैमिषंनामआज्ञयाममसर्वदा ॥ साभ्रमत्युदकेदेविनिवसन्तिनसंशयः ॥५५॥ श्वेतावल्कलिनीपुण्याततःश्वेताहिरण्मयी ॥ हस्तिमत्यथवार्त्तघ्नी नदीसागरगामिनी ॥५६॥पितृणांवल्लभाह्येताःश्राद्धकोटिफलप्रदः॥ तत्रश्राद्धानिदेयानिपुत्रैःपितृहितायवै॥५७॥पाटलंवाडवाख्यंचनगरंतत्रसुन्दरि ॥ साभ्रमत्यांसदाएताःप्राप्तानद्योविशेषतः ॥ ५८ ॥ तत्रस्नानंचदानंचयेकुर्वन्तिनराभुवि ॥ इहलोकेसुखंभुक्त्वायान्तिविष्णोःपरंपदम् ॥ ५९ ॥ जम्बूद्वीपंमहापुण्यंयत्रपुण्यंविवर्धते ॥ तत्रार्याख्यंमहापुण्यंसर्वकामफलप्रदम् ॥ ६० ॥ नीलकण्ठमितिख्यातंतीर्थंनन्दह्रदस्तथा ॥ तथा रुद्रह्रदस्तीथपुण्यंरुद्रमहालयम् ॥६१॥ मन्दाकिनीमहापुण्यातथाच्छोदामहानदी ॥ साभ्रमत्यांवहन्त्येताःस्वात्मनादर्शनंगताः ॥ ६२ ॥ धूम्रामि त्रपदंतद्वद्वैजनाथंदपद्वरम् ॥ क्षिप्रानदीमहाकालंतथाकालञ्जरोगिरिः ॥ ६३ ॥ गङ्गोद्भूतंहरोद्भेदंनर्मदोंकारमेवच ॥ गङ्गापिण्डप्रदानेनस

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मान्याहुर्मनीषिणः ॥ ६४ ॥ एतानिब्रह्मतीर्थानिसाभ्रमत्युत्तरेतटे ॥ गुप्तीकृतानिदेवेशिदेवैर्ब्रह्मपुरोगमैः ॥ ६५ ॥ स्मरणादपिलोकानांपापघ्नानिमहेश्व
रि ॥ किंपुनःश्राद्धदातॄणांमानवानांसुरेश्वरि ॥ ६६ ॥ ॐकारंपितृतीर्थंचकावेरीकपिलोदकम् ॥ संभेदश्चण्डवेगायास्तथैवामरकण्टकम् ॥ ६७ ॥ कुरु
क्षेत्राच्छतगुणमस्मिन्स्नानादिकंभवेत् ॥ वार्तघ्नीसंगमेदेविगणेश्वरपुरःसरैः ॥६८॥ साभ्रमत्यांपुरानीतंगणैस्तीर्थकदम्बकम् ॥ एषतूद्देशतःप्रोक्तस्तीर्था
नांसंगमोमया॥६९॥वागीशोऽपिनशक्नोतितीर्थानांतत्त्वविस्तरम् ॥ सत्यंतीर्थंदयातीर्थंतीर्थमिन्द्रियनिग्रहः ॥७०॥ तस्मात्तीर्थेप्रयत्नेनस्नानंकुर्यान्न
संशयः॥प्रातःकालोमुहूर्तांस्त्रीन्सङ्गवस्तावदेवतु॥७१॥तदास्नानादिकंतीर्थेदेवानांप्रीतिदायकम्॥मध्याह्नस्त्रिमुहूर्तःस्यादपराह्णस्ततःपरम् ॥७२॥ पितॄ
णांप्रीतिजननंस्नानपिण्डादितर्पणम्॥सायाह्नस्त्रिमुहूर्तःस्याच्छ्राद्धंतत्रनकारयेत्॥७३॥राक्षसीनामसावेलागर्हितासर्वकर्मसु॥ अह्नोमुहूर्ताविख्यतादश
पञ्चचसर्वदा ॥७४॥ तत्राष्टमोमुहूर्तोयःसकालःकुतुपःस्मृतः ॥ मध्याह्नेसर्वदायस्मान्मन्दीभवतिभास्करः ॥ ७५ ॥ तस्मादनन्तफलदःपितॄणांपिण्ड
दानतः ॥ मध्याह्नःखङ्गपात्रंचतथानेपालकम्बलः ॥ ७६ ॥ रूप्यंदर्भास्तथागावोदौहित्रंकुतुपास्तिलाः ॥ पापंकुत्सितमित्याहुस्तस्यसंतापकारकाः॥
॥७७॥अष्टावेतेयतस्तस्मात्कुतपाइतिविश्रुताः ॥ ऊर्ध्वंमुहूर्तात्कुतुपाद्यन्मुहूर्तचतुष्टयम्॥७८॥मुहूर्तपञ्चकंचैतत्च्छ्राद्धकालेसमिष्यते॥विष्णोर्देहात्समु
द्भूताःकुशाःकृष्णतिलाःस्मृताः ॥७९॥ श्राद्धस्यरक्षणार्थायएवमाहुर्दिवौकसः ॥ तिलोदकाञ्जलिर्देयोजलस्थैस्तीर्थवासिभिः ॥८०॥ सदर्भहस्तैरेकेन
श्राद्धमेवंनहिंस्यते ॥ साभ्रमत्यांनामधेयैरितितीर्थप्रवेशनम् ॥८१॥ कारयित्वामयादेविदत्तावैकश्यपायच ॥ ममभक्तःकश्यपोऽसौवल्लभोममसर्वदा
॥ ८२ ॥ दत्तातस्मादियंगङ्गापवित्रापापनाशिनी ॥ साभ्रमत्यांमहाभागेतीर्थेवैब्रह्मचारिके ॥ ८३ ॥ आत्मानंचप्रतिष्ठाप्यतन्नाम्नाशङ्करोह्यहम् ॥
स्थितोलोकहितार्थायब्रह्मचारीशसंज्ञकः ॥ ८४ ॥ साभ्रमत्याउपकण्ठेब्रह्मचारीशसंज्ञके ॥ कलौभक्तोविशेषेणपूजनंकुरुतेयदा ॥ ८५ ॥ इहलोके
सुखंभुक्त्वायातिशैवंपदंमहत् ॥ महद्भिर्व्याधिभिश्चैवपीडितोयदिगच्छति ॥ ८६ ॥ यस्याशुनश्यतिव्याधिर्दर्शनाच्चमहेश्वरि ॥ गत्वावैतस्यसं
स्थानउपवासीजितेन्द्रियः ॥ ८७ ॥ पूजनंकुरुतेभक्त्यारात्रौतिष्ठन्सुनिश्चलः ॥ तदाहंयोगिरूपेणदर्शनंतस्ययामिहि ॥ ८८ ॥ ददामिवाञ्छितान्का
मान्सत्यंसत्यंवरानने ॥ ममस्थानेविशेषेणसमायान्तिचयेजनाः ॥ ८९ ॥ तेषांव्याधिप्रशमनंकरोमिसुचिरादहम् ॥ चतुरशीतिसंज्ञेयोव्याधिःसं
कथितोमया ॥ ९० ॥ ससव्याधिर्विनश्येतदर्शनादेवसुन्दरि ॥ नलिङ्गंवर्ततेतत्रमामकंनगनन्दिनि ॥ ९१ ॥ स्थानमात्रंतुतत्रैवमामकंनात्रसंश
यः ॥ एकस्मिन्नेवकालेतुअस्यांभूमौमहातपाः ॥ ९२ ॥ राजावैसूर्यवंशीयोब्रह्मदत्तस्तुवीर्यवान् ॥ तेनराज्ञातपस्तप्तंबहुकालंसुरेश्वरि ॥ ९३ ॥

CC-0. In Public Domain. Digitization by eGangotri

पञ्चाग्निसाधनंतेनकृतंचबहुधाततः ॥ मासोपवासकादीनितपस्तत्तान्यनेकशः ॥ ९४ ॥ एवंबहुतरंकालंराज्ञातप्तंतपोमहत् ॥ प्रत्यक्षोऽहंतदाजातो
वरार्थंवरवर्णिनि ॥ ९५ ॥ ब्रह्मदत्तश्शृणुष्वत्वंमहद्वाक्यंनरेश्वर ॥ यंयंवाञ्छयसेनित्यंतंददामिनसंशयः ॥ ९६ ॥ तेनोक्तंममदेदेवेशवाञ्छितंयदिदी
यते ॥ एकएववरोदेवदीयतांममसर्वदा ॥ ९७॥ ममनाम्नाहिदेवेशईश्वरोभुविजायताम् ॥ तेनवाक्येनसंतुष्टोवरोदत्तोमयानघे ॥ ९८ ॥तदाहंतेनवैसार्धं
निवसामिसुरेश्वरि ॥ अत्रस्थित्वानिराहारोभक्तिंकुर्यादशेषतः ॥९९ ॥ ददामिवाञ्छितान्कामान्यावदिन्द्राश्चतुर्दश ॥ अत्रागत्यतुयेविप्रारुद्रजाप्या
दिकंचयत् ॥ १००॥ प्रकुर्वन्तिविशेषेणतेषांदद्मिशृणुष्वतत् ॥ स्त्रीसौख्यंपुत्रसौख्यंचलक्ष्मीवृद्धिकरंपुनः ॥ १ ॥ यशऐश्वर्यमेवापितथारोगादिनाशन
म् ॥ तत्सर्वंप्राप्यतेक्षिप्रंवाञ्छितंवैकलौयुगे ॥ २॥ अस्मिन्कलौयुगेघोरेमद्भक्ताभुविपार्वति ॥ अत्रागत्यप्रकुर्वन्तिस्नानदानादिकाःक्रियाः ॥ ३॥ददा
मिवाञ्छितानर्थान्सत्यंसत्यंसुरेश्वरि ॥ ब्रह्मदत्तंतुतन्नाम्नाद्वितीयंब्रह्मचारिणम् ॥ ४ ॥ गङ्गाधरंप्रतिष्ठाप्यउषित्वादिनपञ्चकम् ॥ सराजागतवांस्त
त्रस्वकेराज्येततःपुनः ॥ ५॥ ब्रह्मदत्तस्तुविख्यातोलोकेवैपरमोमहान् ॥ राज्यंचकारधर्मज्ञोह्ययुतंवर्षसंज्ञकम् ॥ ६ ॥ ततःकतिपयेकालेराज्यंभुक्त्वास
वैनृपः ॥ गतवाञ्शिवलोकंतंब्रह्माख्यंपदमुत्तमम् ॥ ७ ॥ देवौद्वौतत्रवर्त्तेतेममनामाभिधायकौ ॥ एकोवैब्रह्मचारीशोह्यन्योगङ्गाधरःस्मृतः ॥ ८ ॥
ममस्थानेविशेषेणपूजांकुर्वन्तियेजनाः ॥ तेषांसर्वंददामीहवाञ्छितंनात्रसंशयः ॥९ ॥ स्थानमेवसदालिङ्गंगन्तव्यंचनृभिःसदा ॥ तत्रपुष्पंचधूपंचनैवे
द्यंविविधंतथा ॥ ११० ॥ यःकरोतिनरःप्राज्ञःसंसर्वंलभतेध्रुवम् ॥ बिल्वपत्रैश्चपुष्पैश्चतथावाचन्दनादिभिः ॥ ११ ॥ पूजांकुर्वन्तिमत्स्थानेतेषांसर्वं
ददाम्यहम् ॥ यइदंशृणुयान्नित्यंब्रह्मचारिकथानकम् ॥ १२॥ इहलोकेसुखंप्राप्यव्रजतेशिवसंनिधौ ॥ यत्रगङ्गाधरोदेवोनित्यंतिष्ठतिभूतिदः ॥ १३ ॥
ब्रह्मचारीशसंज्ञस्तुद्वितीयोवर्त्ततेसदा॥ ताभ्यांध्यानसमायोगाच्छिवत्वमश्नुतेध्रुवम् ॥१४॥दर्शनान्नश्यतेरोगःपूजनादायुराप्नुयात् ॥स्नानात्तत्रतुदेवेशि
मुक्तिभागीनसंशयः ॥१५॥ शृणुसुन्दरिवक्ष्यामितीर्थंपरममद्भुतम् ॥ राजखड्गइतिख्यातंसाभ्रमत्यांविशेषतः ॥ १६ ॥ सूर्यवंशसमुत्पन्नोराजावैकर्त्त
नस्तथा ॥ दुराचारीतुपापात्माब्राह्मणानांचनिन्दकः ॥ १७ ॥ गुरुद्रोहीसदारुष्टोनिन्दकःसर्वकर्मणाम् ॥ परदाररतोनित्यंनित्यंविष्णुप्रदूषकः॥१८॥
प्रजापीडनकंनित्यंकरोतिबहुधाततः ॥ एवंविधःसदुष्टात्मापृथिव्यांवर्त्ततेसदा ॥ १९ ॥ कियत्स्येवंगतेकालेशृणुसुन्दरितत्त्वतः ॥ पापेनदैवयोगाच्चकु
ष्ठित्वंसमजायत ॥ १२० ॥ निरीक्ष्यस्वंशरीरंतुविचार्यचपुनःपुनः ॥ किंकर्त्तव्यमितिध्यायन्निितिचिन्तापरोऽभवत् ॥ २१ ॥ कदाचिद्दैवयोगाच्च
क्रीडार्थंगतवान्वने ॥ तत्रसाभ्रमतीतीरंसमासाद्यसतिष्ठति ॥ २२ ॥ तत्रस्नानंकृतंतेनपीतंपानीयमुत्तमम् ॥ तत्रस्नानेनसपदिशरीरंदिव्यसंज्ञकम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २३ ॥ यथास्वर्णमयीमूर्त्तिर्दृश्यतेनगनन्दिनि ॥ तद्वद्देवतुसंजातःसराजानात्रसंशयः ॥ २४ ॥ दिव्यरूपमनुप्राप्यकियत्कालंततोनृपः ॥
राज्यंभुक्त्वातुदेवेशिगतोवैपरमंपदम् ॥ २५ ॥ तदातीर्थमिदंजातंराजखड्गेतिसंज्ञकम् ॥ अत्रस्नानंप्रकुरुतेदानंयोवैददातिच ॥ २६ ॥ इह
लोकेसुखंभुक्त्वायातिविष्णोःपरंपदम् ॥ नरोगोवर्त्ततेतेषांनशोकश्चकदाचन ॥ २७ ॥ प्रत्यहंकुरुतेस्नानंखड्गेऽस्मिन्राजसंज्ञके ॥ योनरः
प्राप्नुयात्स्वर्गंब्रह्माद्यैःसचपूज्यते ॥ २८ ॥ कृतेसत्येश्वरोनामत्रेतायांभुवनेश्वरः ॥ राजेश्वरसमाख्यातोद्वापरेनगनन्दिनि ॥ २९ ॥ अस्मिन्कलि
युगेघोरेगुप्तीभूतोऽथविश्वराट् ॥ अतोवैतीर्थसंभूतंराजखड्गेतिसंज्ञकम् ॥ १३० ॥ पितॄणांतर्पणंचात्रश्रद्धयायेप्रकुर्वते ॥ तेनराःपुण्यकर्माणः
पृथिव्यांपरिकीर्तिताः ॥ ३१ ॥ ब्रह्मघ्नाबालहन्तारःस्नानंयेऽत्रप्रकुर्वते ॥ तैर्दोषैरहितास्तेचगच्छन्तिशिवसन्निधौ ॥ ३२ ॥ नीलोत्सर्गंकरि
ष्यन्तिसाभ्रमत्यांनराश्चये ॥ तेषांवैपितरस्तृप्तायावदाभूतसंप्लवम् ॥ ३३ ॥ इदमाख्यानकंदिव्यंराजखड्गेतिसंज्ञकम् ॥ येशृण्वन्तिनरादेविन
तेषांविद्यतेभयम् ॥ ३४ ॥ रोगादोषाविनश्यन्तिश्रवणात्पठनात्ततः ॥ १३५ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०उमामहेश्वरसंवादे
साभ्रमतीमाहात्म्यंनामचतुस्त्रिंशदधिकशततमोऽध्यायः ॥ १३४ ॥ पार्वत्युवाच ॥ साभ्रमत्यपियान्देशान्नन्दिकुण्डाद्विनिःसृता ॥ गच्छन्ती
पावयामासकान्कान्देशान्वदस्वमे ॥ चकारकानितीर्थानिविलङ्घ्यार्बुदपर्वतम् ॥ १ ॥ सूतउवाच ॥ इतितत्रोदितेदेव्यामहादेवःसविश्वराट् ॥
उवाचवचनंतांवैपार्वतींविश्वमोहिनीम् ॥ २ ॥ महादेवउवाच ॥ नन्दिकुण्डात्प्रथमतस्तीर्थात्परमपावनात् ॥ कपालमोचनंतीर्थंमुनिभिः
संप्रकारितम् ॥ ३ ॥ सर्वतेजोऽधिकंतीर्थंपावनात्पावनंपरम् ॥ अत्रमयापरित्यक्तंकपालंब्रह्मसंज्ञकम् ॥ ४ ॥ कपालमोचनंतीर्थमतोजातंहि
पार्वति ॥ पावनंसर्वभूतानांप्रकटंलोकविश्रुतम् ॥ ५ ॥ कपालकुण्डमाख्यातंतत्तीर्थंतीर्थराजकम् ॥ यत्रदेवास्तथानागागन्धर्वाःकिन्नरादयः॥
॥ ६ ॥ निवसन्तिमहात्मानस्तीर्थेवैनिर्मलेशुभे ॥ त्रैलोक्येविश्रुतंतीर्थंज्ञानदंमुक्तिदायकम् ॥ ७ ॥ तत्रस्नात्वाशुचिर्भूत्वाकपालेशंप्रपूज
येत् ॥ उपोष्यरजनीमेकांकृत्वाब्राह्मणभोजनम् ॥ ८ ॥ तत्रापिवस्त्रदानेनअग्निहोत्रफलंलभेत् ॥ तस्मिंस्तीर्थेतुयःकश्चिद्दर्शनव्रतमास्थितः ॥
॥ ९ ॥ संत्यज्यदेहमात्मानंशिवलोकंव्रजेद्ध्रुवम् ॥ अस्मिंस्तीर्थेपुरास्नानात्सौदासोब्रह्महत्यया ॥ १० ॥ मोचितोविमलंज्ञानंप्राप्तवान्वै
सुरेश्वरि ॥ भगीरथान्वयेजातःसुदासाख्योमहाबली ॥ ११ ॥ तस्यपुत्रोऽमित्रसहःसौदासेतिचविश्रुतः ॥ वसिष्ठशापतःप्राप्तःसौदासो
राक्षसींतनुम् ॥ १२ ॥ साभ्रमत्यांकृतस्नानोविमुक्तःशापजादघात् ॥ अत्रगङ्गाचयमुनागोदावरीसरस्वती ॥ १३ ॥ नन्दितीर्थेवसन्त्येताःपवित्राः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुण्यदाःसदा ॥ गोदानंभूमिदानंचशय्यादानंतथैवच ॥ १४ ॥ कन्यादानंविशेषेणकर्तव्यंज्ञानिभिर्नरैः ॥ एतद्दानसमंप्रोक्तंसाभ्रमत्यवगाह
नम् ॥ १५ ॥ यत्रवैसकलान्येवपतितानीहभूतले ॥ वारिणास्पर्शमात्रेणशुद्धत्वंयान्तितान्यपि ॥ १६ ॥ अत्रश्राद्धंप्रकुर्वाणोनरोवैभक्ति
तत्परः ॥ पितरस्तस्यसंतुष्टागच्छन्तिपरमंपदम् ॥ १७ ॥ एतदाख्यानकंदिव्यंयेशृण्वन्तिनराःसदा ॥ सर्वपापविनिर्मुक्ताविष्णोःसायुज्यमाप्नुयुः ॥
॥ १८ ॥ कर्मणामनसावाचायेस्तुवन्तिमहेश्वरम् ॥ नतेषांविद्यतेदुःखंयावदाभूतसंप्लवम् ॥ १९ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०
उमामहेश्वरसंवादेनन्दितीर्थमहिमानामपञ्चत्रिंशदधिकशततमोऽध्यायः ॥ १३५ ॥ महादेवउवाच ॥ अथनन्दिप्रदेशात्तुयथासाभ्रमतीनदी ॥
समायाताविकीर्णंचवनंविप्रर्षिसेवितम् ॥ १ ॥ बहुधाजलवेगेनपर्वतानांचरोधसः ॥ सप्तधाप्रविभक्ताचदक्षिणोदधिगामिनी ॥ २ ॥
आद्यासाभ्रमतीपुण्याद्वितीयासेटिकातथा ॥ तृतीयावल्किनीपुण्याचतुर्थीचहिरण्मयी ॥ ३ ॥ सर्वपापहराप्रोक्ताहस्तिमत्यथपञ्चमी ॥
वेत्रवतीसाचषष्ठीवृत्रेणनिर्मितापुरा ॥ ४ ॥ इयंसापरमादेवीवृत्रकूपाद्विनिःसृता ॥ वेत्रवतीततोजातामहापापप्रणाशिनी ॥ ५ ॥ भद्रामुखी
शुभप्रायासप्तमीलोकपावनी ॥ एतैस्तुसप्तभिर्देवितांस्ताञ्जनपदांस्तथा ॥ ६ ॥ पवित्रीकृत्यचैकेनसप्तस्रोताःप्रतिष्ठिता ॥ विकीर्णतीर्थेयःश्राद्धं
पितॄनुद्दिश्यदास्यति ॥ ७ ॥ गयापिण्डप्रदानस्यफलंयत्तद्भविष्यति ॥ अवकीर्णाच्युतायेचलुप्तपिण्डोदकक्रियाः ॥ ८ ॥ तेविकीर्णेप्रमुच्यन्ते
दत्तपिण्डोदकक्रियाः ॥ तत्रश्राद्धंतुयःकुर्याद्व्राणपत्यंभवेद्ध्रुवम् ॥ ९ ॥ तस्मात्त्रयीविधानेनश्रद्धयाश्राद्धमाचरेत् ॥ अस्मिंस्तीर्थेविशेषेणसप्त
नद्युदयेद्विजाः ॥ १० ॥ स्नानंकुरुतविप्रेन्द्राऋषिलोकमभीप्सवः ॥ इत्युक्तंकश्यपेनाथद्विजान्प्रतिविशेषतः ॥ ११ ॥ यदिचेत्क्रियते
स्नानंसर्वदुःखापहंसदा ॥ तीर्थानांप्रवरंतीर्थंक्षेत्राणामुत्तमोत्तमम् ॥ १२ ॥ तीर्थमेतद्विकीर्णंचशुभदंरोगदोषहृत् ॥ कुर्वन्त्यत्रविशेषेणयेस्नानं
सर्वदाकलौ ॥ १३ ॥ तेनराःपुण्यभाजोहिजायन्तेनात्रसंशयः ॥ गयातीर्थसमंतीर्थंविकीर्णंपावनंपरम् ॥ पितॄणांपुण्यदंनित्यंलोकानांदुःख
नाशनम् ॥ १४ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०उमामहेश्वरसंवादेविकीर्णतीर्थमहिमानामषट्त्रिंशदधिकशततमोऽध्यायः ॥ १३६ ॥
तीर्थादस्मात्परंतीर्थंश्वेतोद्भवमनुत्तमम् ॥ यत्रश्वेतानदीजातामत्पृष्ठोदरभस्मना ॥ १ ॥ विश्रुतात्रिषुलोकेषुसर्वपापप्रणाशिनी ॥ हराङ्गभस्म
संयोगाज्जातादेवैस्तुमानिता ॥ २ ॥ तस्यांस्नातःशुचिर्दान्तस्त्रिरात्रमुषितःपुमान् ॥ महाकालेश्वरंदृष्ट्वारुद्रलोकेमहीयते ॥ ३ ॥ पिण्डं
पितृभ्योयोदद्यात्तस्यास्तीरेकुशैस्तिलैः ॥ सुतृप्ताःपितरस्तस्यभवन्तीतिनसंशयः ॥ ४ ॥ श्वेतगङ्गामहापुण्यादुःखदारिद्र्यमोचनी ॥ यत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्नानेनभोदेविपरंसुखमवाप्यते ॥ ५ ॥ तस्यावैसंगमेपुण्येनित्यंतिष्ठामिपार्वति ॥ येऽत्रदानंप्रकुर्वन्तिस्नानंचतत्रसुन्दरि ॥ ६ ॥ तदनन्तफलंतस्यभवे
द्वैनात्रसंशयः ॥ तत्रभूतेश्वरोदेवःसंगमेवसतेध्रुवम् ॥ ७ ॥ तत्रधूपंचदीपंचपुष्पमारार्तिकंतथा ॥ येकुर्वन्तिनरश्रेष्ठास्तेनराःपुण्यरूपिणः ॥८ ॥ बिल्व
दलंसमादाययोददातिशिवोपरि ॥वाञ्छितंलभतेनित्यंश्वेतायांशिवसंनिधौ ॥९॥ इतिश्रीपाद्मेमहापुराणेपश्चप०उत्तर०उमामहेश्वरसंवादेश्वेतातीर्थनाम
सप्तत्रिंशदधिकशततमोऽध्यायः ॥ १३७ ॥ महादेवउवाच ॥ गणतीर्थंततोगच्छेत्तीर्थयात्रापरायणः ॥ त्रिविष्टपमितिप्रोक्तंगणैस्तुचन्दनातटे
॥ १ ॥ त्रिविष्टपेनरःस्नात्वापौर्णमास्यांसमाहितः ॥ संशयोनात्रकर्त्तव्योमुच्यतेब्रह्महत्यया ॥ २ ॥ चतुरोवार्षिकान्मासान्स्थितोयस्तुत्रिविष्टपे ॥
सोऽपिपुण्योमहाभागेरुद्रलोकेमहीयते ॥ ३ ॥ गणतीर्थेनरःस्नात्वाकृष्णाष्टम्यामुपोषितः ॥ बकुलासंगमेस्नात्वास्वर्गंगच्छतिमानवः ॥ ४ ॥ तस्मिं
स्तीर्थेनरःस्नात्वाबकुलेशंविलोक्यच ॥ गणेश्वरप्रसादेनगाणपत्यमवाप्नुयात् ॥ ५ ॥ इदंपवित्रंपरमंपुण्यायुष्यविवर्धनम् ॥ श्रुत्वातुलभतेपुण्यं
गङ्गास्नानसमंनरः ॥ ६ ॥ अत्रस्थित्वानिराहारोजितेन्द्रियःसमाहितः ॥ जपत्येवंपरंदेवंगणेश्वरंमनोरमम् ॥ ७ ॥ संप्राप्नोत्यखिलान्भोगान्सत्यंसत्यं
वरानने ॥ अत्रराजासोमवंश्योविश्वदत्तःसवीर्यवान् ॥ ८ ॥ तेनतपोमहत्तप्तंबहुकालंसुरेश्वरि ॥ गाणपत्यंतदाप्राप्तंश्रीगणेशप्रसादतः ॥ ९ ॥
वसिष्ठोवामदेवश्चकहोडःकौशीतकोमुनिः ॥ भरद्वाजोऽङ्गिराश्चैवविश्वामित्रोऽथवामनः ॥ १० ॥ एतेवैमुनयःसर्वेपुण्यरूपामहेश्वरि ॥ नित्यंसेवांप्र
कुर्वन्तिश्रीगणेशप्रसादतः ॥ ११ ॥ अपुत्रोलभतेपुत्रान्निर्धनोलभतेधनम् ॥ अविद्योलभतेविद्यांमोक्षार्थीमोक्षमाप्नुयात् ॥ १२ ॥ किमन्यद्बहुनोक्तेन
भूयोभूयोवरानने ॥ योऽत्रस्नानंप्रकुर्वीतपूजनंवाकरोतिच ॥ १३ ॥ सर्वपापविनिर्मुक्तोयातिविष्णोःपरंपदम् ॥ शिवायविष्णुरूपायविष्णवे
शिवरूपिणे ॥ १४ ॥ नान्तरंदेविपश्यामिश्रीविष्णोश्चप्रसादतः ॥ १५ ॥ इतिश्रीपाद्मेमहापुराणेपश्चप०उत्तर०उमामहेश्वरसंवादेगणती
र्थनामाष्टत्रिंशदधिकशततमोऽध्यायः ॥१३८॥ महादेवउवाच ॥ साभ्रमत्युत्तरेकूलेत्वग्नितीर्थमितिश्रुतम् ॥ तस्याश्चोत्तरपूर्वेणनातिदूरेकृतास्पदम् ॥
॥ १॥ तीर्थपालेश्वरंनामचण्डीयत्रप्रतिष्ठिता ॥ पीठंतद्योगमातॄणांसर्वसिद्धिविधायकम् ॥२ ॥ यत्रताःसर्वदेवानांकार्यार्थेमातरःस्थिताः ॥ परमंयत्नमा
स्थायलोकानुग्रहाकरणात् ॥ ३ ॥ त्रिरात्रमुषितोभूत्वातस्मिंस्तीर्थेदृढव्रतः ॥ अभिगच्छेत्तमीशानंदेवेशंचण्डिकेश्वरम् ॥ ४ ॥ साभ्रमत्यांकृतस्नानो
मातृतीर्थस्यसंनिधौ ॥समाधिविधिनायुक्तोगच्छेद्वैमातृमण्डलम् ॥५॥ गोसहस्रप्रदानस्यफलंप्राप्नोतिमानवः ॥ अग्नितीर्थेनरःस्नात्वाचामुण्डादर्शने
कृते ॥ ६ ॥ नभयंजायतेतस्यरक्षोभूतपिशाचजम् ॥ गोखुराचनदीयत्रसाभ्रमत्यांतुसंगता ॥ ७ ॥ तत्रतीर्थसहस्राणितिष्ठन्तीतिसुरेश्वरि ॥ श्राद्धंतत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकर्तव्यं तिलचूर्णेनपार्वति ॥८॥ पिण्डान्दत्त्वाद्विजान्भोज्यअक्षयंपदमाप्नुयात् ॥ यत्रकुकर्दमोराजापापिष्ठोदुर्धरःखलः ॥ ९ ॥ मूढोऽहङ्कारसंयुक्तो द्विजानांपरिनिन्दकः ॥ गोघ्नोऽपिबालहाचैवपापिष्ठोदुर्दमःसदा ॥ १० ॥ राज्यंचकुर्वतस्तस्यपुरेपिण्डारसंज्ञके ॥ तदामृतिःसमापन्नाधर्मेयोगेसुरेश्वरि ॥ ११ ॥ मृतोऽसौतत्रसंजातःप्रेतरूपोमहेश्वरि ॥ पीतास्यःशुष्कतुण्डश्चपीतरोमाथकर्कशः ॥ १२ ॥ उच्चैस्तरोबहुरोमाक्षुत्पिपासाप्रपीडितः॥ वायुभक्षंप्रकुर्वाणःप्रगच्छतिइतस्ततः ॥ १३ ॥ बहुप्रेतैःसमायुक्तोहाहेतिकरुणंरुदन् ॥ किंकर्तव्यमितिप्राहुःप्रेतास्तेवैसमीपगाः ॥ १४ ॥ तेऽपितदा रोदमानाःक्षुत्पिपासादिपीडिताः ॥ अन्येप्रेतादुरात्मानोराज्ञःसंगतिमाययुः ॥ १५ ॥ राज्ञासार्द्धंचगच्छन्तिलोकान्विजनकान्बहून् ॥ नोदकमथवा चान्ननमार्गेदृश्यतेकदा ॥ १६ ॥ तेप्रेतादुष्टरूपाश्चविचरन्तिमहीतले ॥ भक्षन्तिशवमांसानिपिबन्तिरुधिरंसदा ॥ १७ ॥ एवंकुकर्दमोराजासदातैःपरिवारितः ॥ कदाचिद्दैवयोगेनगुरोराश्रममन्वगात् ॥ १८ ॥ पूर्वजन्मकृतंपुण्यंतेनयोगेनसंगतः ॥ १९ ॥ पार्वत्युवाच ॥ किंकृतंतेनवैपुण्यंवदविश्वेश्वर प्रभो ॥ अयंपापीदुरात्माचब्राह्मणानांचदुःखदः ॥ सत्संगतिःकथंजातातन्मेदुस्तरतोवद ॥ २० ॥ महादेवउवाच ॥ एतेननरदेवेनपूर्वजन्मनि यत्कृतम् ॥ तत्सर्वंकथयिष्यामिशृणुत्वंनगनन्दिनि ॥ २१ ॥ पूर्वजन्मन्ययंदेविब्राह्मणोवेदपाठकः ॥ संपूज्यचमहादेवंकृत्वाचातिथिपूजनम् ॥ ॥ २२ ॥ भोजनंकुरुतेनित्यमसौवाडवसत्तमः ॥ तेनपुण्यप्रभावेणपुरेपिण्डारसंज्ञके ॥ २३॥ राजावैतत्रसंजातःकुकर्दमइतिश्रुतः ॥ कर्मणामनसाचैव नकृतंपुण्यमेवच ॥ २४ ॥ तेनदैवाभियोगेनमृतोवैप्रेतराडभूत् ॥ पूर्वजन्मकृतंपुण्यंननश्यतिसुरेश्वरि ॥ २५ ॥ तेनपुण्याभियोगेनसंगतोगुरुणाश्रमे कहोडोवर्ततेतत्रतेनदृष्टोऽथप्रेतराट् ॥ २६ ॥ शुष्कास्यःशुष्करूपश्चपीतवर्णःकरालकः ॥ गम्भीराक्षोमहापापीदुष्टैःप्रेतैश्चसंयुतः ॥ २७ ॥ ऊर्ध्वरोमाजटायुक्तःकालरूपोभयङ्करः ॥ एवंदृष्ट्वातदादेविविह्वलोवाडवोऽभवत् ॥ २८ ॥ कहोडउवाच ॥ अस्मिन्मनोरमेचाहंस्थानेवैपरमाद्भुते ॥ अग्निपालेश्वरेतीर्थेनित्यंतिष्ठामिभूमिप ॥ २९ ॥ यजमानस्त्वमस्माकंकथंजातोऽसिप्रेतराट् ॥ दुरात्मादुष्टरूपश्चकालरूपोभयङ्करः ॥ ३० ॥ केनकर्मविपाकेनजातोवैभूतलेशुभे ॥ ३१ ॥ प्रेतउवाच ॥ शृणुवाडवमेपापंपूर्वजन्मनियत्कृतम् ॥ अहंकुकर्दमोराजापुरेपिण्डारसंज्ञके ॥ ३२ ॥ तत्रस्थेनमयादेवयत्कृतंतच्छृणुष्वहि ॥ ब्रह्मणांहिंसनंचैवपुराऽसत्यादिभाषणम् ॥ ३३ ॥ प्रजानांपीडनंचैवजीवानांहिंसनंसदा ॥ गवांवैदुःखकर्ताहंब्राह्मणव्रतलोपनः ॥ ३४ ॥ अस्नातःसर्वदाविप्रसज्जनानांविदूषकः ॥ विष्णुनिन्दापरोनित्यंवैष्णवानांचनिन्दकः ॥ ३५ ॥ दुराचारोदुरात्माचवृषलीसंयुतःसदा ॥ तत्रतत्रप्रभुञ्जानोनाहंशौचपरायणः ॥ ३६ ॥ तेनकर्माभियोगेनमृतोवैद्विजराट्ततः ॥ प्रेतयोनिंप्रपन्नोऽस्मिदुःखीजातोह्यने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथा ॥ ३७ ॥ यस्यमातापितानास्तियस्यस्वजनबान्धवाः ॥ तस्यबन्धुर्गुरुर्मातापितापिगुरुरेवच ॥ ३८ ॥ इतिज्ञात्वातुभोब्रह्मन्मुक्तिं
दातुंत्वमर्हसि ॥ ३९ ॥ कहोडउवाच ॥ शृणुत्वंनृपतिश्रेष्ठकरिष्येवचनंतव ॥ मुक्तिंयास्यतिवैसद्योभवांस्त्विहनसंशयः ॥ ४० ॥ एकाद
शपुरोगाश्चप्रेतायेतवसंगताः ॥ तेचापिमुक्तिमायान्तिसुतीर्थेऽस्मिन्विशेषतः ॥ ४१ ॥ तदावैतेनविप्रेणतीर्थेगत्वासुरेश्वरि ॥ सर्वैश्चकारयामा
सतिलपिण्डोदकक्रियाः ॥ ४२ ॥ नमासोनतिथिर्देवीतीर्थेगत्वापुनःपुनः ॥ कर्तव्यंश्राद्धकर्मादिब्रह्मणोक्तंपुरामम ॥ ४३ ॥ कृतेकर्मणि
देवेशिमुक्तास्तेतीर्थराजके ॥ विमानवरमारूढास्तेगतामामकींपुरीम् ॥ ४४ ॥ संगतागोखुरायत्रसाभ्रमत्यासुरेश्वरि ॥ तत्रस्नानंचदानंचकोटि
यज्ञफलंलभेत् ॥ ४५ ॥ यत्राग्नितीर्थंवर्ततेकपालेश्वरसंज्ञकम् ॥ तत्रमुक्तिस्तुसंप्रोक्तासत्यंसत्यंभवेद्ध्रुवम् ॥ ४६ ॥ इतिश्रीपाद्मेमहापुराणे
पञ्चपञ्चा०उत्तर०उमामहेश्वरसंवादेऽग्निपालेश्वरमहिमानामैकोनचत्वारिंशदधिकशततमोऽध्यायः ॥ १३९ ॥ श्रीमहादेवउवाच ॥ भोदेव्यन्य
त्प्रवक्ष्यामिहिरण्यासंगमंमहत् ॥ यदासाभ्रमतीगङ्गासप्तस्रोताःपुराभवत् ॥ १ ॥ तदासाब्रह्मतनयासप्तस्रोताःप्रकीर्तिता ॥ सप्तमंतद्धिरण्याख्यं
स्रोतइत्यभिधीयते ॥ २ ॥ तस्मिंस्तीर्थेनरःस्नात्वापापीसद्गतिमाप्नुयात् ॥ ऋक्षुमञ्जुमयोर्मध्येसत्यवान्नामपर्वतः ॥ ३ ॥ तस्यप्राक्सुमहत्तीर्थं
हिरण्यासंगमंशुभम् ॥ तत्रस्नात्वाचपीत्वाचशुभांगतिमवाप्नुयात् ॥ ४ ॥ वनस्थल्यांततोगच्छेद्दृष्ट्वानारायणंहरिम् ॥ तीर्थमप्सरसांपुण्यंहिर
ण्यासंगमेश्वरम् ॥ ५ ॥ यत्रोर्वशीपुराजातासमस्ताप्सरसांशुभा ॥ नरनारायणौतत्रतपस्तेपतुरुत्तमम् ॥ ६ ॥ हिरण्यासंगमेरम्येमहापापहरे
शुभे ॥ यत्रवैऋषयःसर्वेमज्जन्तिवीतकल्मषाः ॥ ७ ॥ वसिष्ठाद्याश्चयेविप्रावालखिल्यादयश्चये ॥ यत्रमज्जन्तिदेवेशिहिरण्यासहसंगमे ॥
॥ ८ ॥ यत्रहिरण्मयंरूपंस्नानाद्वैभवतिध्रुवम् ॥ कपिलागोसहस्रस्यदानेनैवतुयत्फलम् ॥ ९ ॥ तत्फलंसमवाप्नोतिहिरण्यासंगमेसदा ॥ दशाश्व
मेधेयत्पुण्यंग्रहणेचन्द्रसूर्ययोः ॥ १० ॥ तदनन्तगुणंप्रोक्तंहिरण्यासंगमेपुनः ॥ तुलापुरुषदानेचयत्फलंसमवाप्नुयात् ॥ ११ ॥ तत्फलं
लभतेमर्त्योहिरण्यासंगमेसदा ॥ हिरण्याक्षोमहादैत्यस्तेनतप्तंमहत्तपः ॥ १२ ॥ हिरण्यसदृशंतत्रशरीरमभवत्पुरा ॥ जनमेजयेतथाराज्ञियत्र
स्नानंप्रकुर्वति ॥ १३ ॥ ब्रह्महत्यागतादेविहिरण्यासंगमेतदा ॥ विश्वामित्रोऽथराजर्षिःस्नानार्थंवैसमागतः ॥ १४ ॥ स्नानंकृत्वाविशेषेणगतोऽसौ
मामकींपुरीम् ॥ १५ ॥ ब्राह्मणाःक्षत्रियावैश्याःशूद्राश्चाथसुरेश्वरि ॥ स्नानंयेऽत्रप्रकुर्वन्तितेगच्छन्तिशिवालयम् ॥ १६ ॥ इतिश्रीपाद्मेमहापुराणे
पञ्चपञ्चा०उत्तर०उमामहेश्वरसंवादेहिरण्यासंगमतीर्थनामचत्वारिंशदधिकशततमोऽध्यायः ॥१४०॥महादेवउवाच ॥ ततोदेविप्रवक्ष्यामिहिण्यासंग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मादतु ॥ धर्मावतीनदीयत्रसंगतासहगङ्गया ॥ १ ॥ तत्रस्नात्वानरोधन्यस्त्रिदिवंयात्यसंशयम् ॥ यत्रधर्मकृतंतीर्थंयःपश्यतिसपुण्यभाक् ॥ २ ॥
श्राद्धंतत्रैवयेकुर्युर्मुच्यन्तेपितृजादृणात् ॥ ततश्चमधुरातीर्थंसर्वपापप्रणाशनम् ॥ ३ ॥ स्नातव्यंमधुरातीर्थेद्रष्टव्योमधुहाहरिः ॥ यत्र
विश्रान्तवान्कृष्णोजरासन्धभयाकुलः ॥ ४ ॥ कंसासुरवधेवृत्तेगन्तुकामःकुशस्थलीम् ॥ उषित्वासप्तरात्रंतुसदेवश्चन्दनातटे ॥ ५ ॥ भोज
वृष्ण्यन्धकवृतोवीरैर्यादवपुङ्गवैः ॥ मधुरातीर्थमासाद्यस्नानंकृत्वाविधानतः ॥ ६ ॥ मधुरादित्यनामानंयत्रस्थापितवान्हरिः ॥ अष्टादश
सहस्राणिविप्राणांयज्ञशालिनाम् ॥ ७ ॥ स्थापयित्वाययौदत्त्वादानानिविविधानिच ॥ तत्रतीर्थसहस्राणितिष्ठन्तिचसुरेश्वरि ॥ ८ ॥ श्राद्धं
तत्रप्रकर्तव्यंपितॄणांहितकाम्यया ॥ नभेतव्यंजरासन्धान्मत्तीर्थेवसतांसदा ॥ ९ ॥ इत्युक्त्वाताान्द्विजान्कृष्णःप्रययौद्वारकांप्रति ॥ तस्मिंस्तीर्थे
नरःस्नात्वामधुरार्कंप्रपूजयेत ॥ १० ॥ माघस्यशुक्लसप्तम्यांकपिलागोप्रदानतः ॥ चिरंसौख्यानिभुक्त्वेहपदमादित्यमाव्रजेत् ॥ ११ ॥ शृणु
सुन्दरिवक्ष्यामिइतिहासंपुरातनम् ॥ यंश्रुत्वामुच्यतेलोकोब्रह्महत्यादिपातकात् ॥ १२ ॥ एकस्मिन्समयेदेविमाण्डव्यऋषिसत्तमः ॥ गङ्गाद्वारे
महापुण्यंतप्तवांस्तुमहत्तपः ॥ १३ ॥ पत्राशीचफलाशीचवायुभक्षकरःसदा ॥ अहोरात्रंसदादेविविष्णुध्यानपरायणः ॥ १४ ॥ योगाभ्यास
रतोनित्यंनित्यंधर्मपरायणः ॥ तस्मिन्देशेतुवैदेविराजावैविश्वमोहनः ॥ १५ ॥ गजाश्वरथपत्तीनांसंपदोबहुलाभुवि ॥ सोमचन्द्रेतिविख्यातः
पुत्रस्तस्यसुलक्षणः ॥ १६ ॥ एकदातुतदादेविगतोह्याखेटकेवने ॥ तत्रगत्वातदातेनकृत्वाह्याखेटकक्रियाः ॥ १७ ॥ स्वात्मानंरम
यामासस्वलोकैःपरिवारितः ॥ क्रीडागतेतदाराज्ञिरात्रिर्जातासुरेश्वरि ॥ १८ ॥ तस्यांरात्रौतदाराजाह्युवासाखेटकेवने ॥ तस्यांरात्र्यां
व्यतीतायांमुहूर्तेब्रह्मसंज्ञके ॥ १९ ॥ हृतोऽश्वोऽथविशेषेणचौरेणात्रदुरात्मना ॥ तदाहाहेतिशब्दोऽभूत्क्वगतःक्वगतोहरिः ॥ २० ॥ तदा
राज्ञोभयात्सर्वेगन्तुकामाःसमुत्सुकाः ॥ चौरेणापहृतश्चाश्वइत्येवंसंवदन्तिहि ॥ २१ ॥ निरीक्षमाणास्तेसर्वेहरिद्वारंसमागताः ॥ ऋषिस्तत्र
तुमाण्डव्यस्तपस्तपतिनित्यशः ॥ २२ ॥ ध्यानेनचसमायुक्तोदृष्टोऽसौतैर्भटैस्तदा ॥ अयंचौरःसदापापीध्यानंकृत्वाप्रतिष्ठते ॥ २३ ॥
बद्धाश्वंतुसमायातोज्ञात्वाराजभटैस्तदा ॥ एवंविचार्यतेसर्वेगृहीत्वातंमहामुनिम् ॥ २४ ॥ राज्ञेनिवेदयामासुस्तंचौरंमुनिसत्तमम् ॥ अश्वा
पहारीह्यानीतश्चौरोऽयंनृपसर्वदा ॥ २५ ॥ आज्ञादत्तातदातेनशूलिकारोपणेपुनः ॥ तदातैस्तुभटैःसर्वैर्मिलित्वाबन्धनंकृतम् ॥ २६ ॥ पश्चाद्वैशूलि
काप्रोतस्तत्क्षणात्तुकृतस्तदा ॥ नज्ञातंतेनतत्कर्मशूलिकायाःप्रतोदनम् ॥ २७ ॥ यतोयोगसमारूढोविष्णुध्यानपरायणः ॥ शूलिकाप्रोतनंज्ञातंकति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चित्कालयोगतः ॥ २८ ॥ माण्डव्योऽहमृषिश्रेष्ठेः केनकर्मत्विदंकृतम् ॥ त्रिकालज्ञानीसर्वज्ञोभगवांस्तद्व्यचिन्तयत् ॥ २९ ॥ धर्मस्यचइदंकर्मन
चान्यस्यकदाचन ॥ योगारूढःसधर्मात्मागतोऽसौधर्मसंनिधौ ॥ ३० ॥ तत्रगत्वाह्युवाचेदंशृणुत्वंधर्मसाम्प्रतम् ॥ त्वंवैधर्मइतिख्यातोलोकेवेदे
चसर्वदा ॥ ३१ ॥ शूलिकाप्रोतनंकर्मकथंचैवत्वयाकृतम् ॥ तत्सर्वंश्रोतुमिच्छामित्वत्तोदेवनसंशयः ॥ ३२ ॥ धर्मउवाच ॥ शृणुष्वत्वंद्विजश्रे
ष्ठपूर्वजन्मनिपातकम् ॥ तदहंकथयिष्यामिकृपांकुरुममोपरि ॥ ३३ ॥ बालत्वेतुइदंकर्मपूर्वजन्मजपातकम् ॥ तच्छृणुष्वमहाप्राज्ञभवेऽस्मिन्पातकं
कृतम् ॥ ३४ ॥ एकस्मिन्समयेविप्रत्वंगतोविजनेवने ॥ तत्रगत्वात्वयाविप्रजीवःशलभसंज्ञकः ॥ ३५ ॥ आरोपितःसवैशूल्यांकर्मणातेनदुःखितः ॥
राज्ञाशूलेऽर्पितस्त्वंवैकर्मणानेनसुव्रत ॥ ३६ ॥ सर्वथैवप्रभोक्तव्यंकृतंकर्मशुभाशुभम् ॥ अल्पमात्रमिदंकर्मत्वयाभुक्तंनसंशयः ॥ ३७ ॥
सुखीभवतुविप्रेन्द्रगच्छत्वंहियथेच्छया ॥ एतद्वाक्यंततःश्रुत्वामाण्डव्योद्विजसत्तमः ॥ ३८ ॥ उवाचवचनंतत्रसकोपादरुणेक्षणः ॥३९॥ माण्डव्य
उवाच ॥ रेपापिष्ठदुराचारकिंकृतंबहुपातकम् ॥ येनकृत्वाइदंकर्मशूलिकायाःप्रतोदनम् ॥ ४० ॥ ममवाक्यप्रकोपेणशूद्रस्त्वंभवसर्वथा ॥ कि
यताकालयोगेनवंशेवैचन्द्रसंज्ञके ॥ ४१ ॥ जातोविदुरनामाख्योविष्णुभक्तिपरायणः ॥ तीर्थयात्रामिषेणैवगतःसाभ्रमतींनदीम् ॥ ४२ ॥ यत्रधर्मा
वतीसङ्गोवर्त्ततेचसुरेश्वरि ॥ तत्रवैकृतवान्स्नानंविदुरोधर्मरूपवान् ॥ ४३ ॥ त्यक्तंतत्रहिशूद्रत्वंधर्मावत्यांनसंशयः ॥ एतस्मात्कारणाद्देवियेऽत्र
स्नानंप्रकुर्वते ॥ ४४ ॥ तेनराःपुण्यकर्माणोगच्छन्तिपरमंपदम् ॥ अत्रश्राद्धंचदानंचयेकुर्वन्तिनराभुवि ॥ इहलोकेपरामृद्धिंप्राप्यतैर्दिविमुद्यते॥४५॥
इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०उमामहेश्वरसंवादेसाभ्रमतीमाहात्म्येमधुरादितीर्थमाहात्म्यंनामैकचत्वारिंशदधिकशततमोऽध्यायः ॥ १४१ ॥
श्रीमहादेवउवाच ॥ कम्बुतीर्थेनरःस्नात्वाकृत्वावापितृतर्पणम् ॥ अर्चयेद्देवदेवेशंनारायणमनामयम् ॥ १ ॥ दत्त्वादानानिविधिवद्ब्राह्मणेभ्यो
विधानतः ॥ विष्णुलोकमवाप्नोतितीर्थस्यास्यप्रभावतः ॥ २ ॥ अत्रराजर्षिणापूर्वंविश्वामित्रेणधीमता ॥ तपस्तप्तंविशेषेणप्रजाकामेनसुन्दरि ॥ ३ ॥
वायुभक्षोनिराहारोयत्रासीदनिलाशनः ॥ विष्णुपूजापरोनित्यंविष्णुध्यानपरायणः ॥ ४ ॥ तापसोनेनसंजातःप्रजाकाममवाप्तवान् ॥ प्रजा
कामोनरोयश्चकम्बुतीर्थंहिगच्छति ॥ ५ ॥ सप्रजांलभतेनित्यंसत्यंसत्यंवरानने ॥ ६ ॥ इतिकम्बुतीर्थमाहात्म्यम् ॥ ततोगच्छेत्सुरश्रेष्ठे
तीर्थंनामकपीश्वरम् ॥ संनिधौरक्तसिंहस्यमहापातकनाशनम् ॥७॥ बध्यमानेपुरासेतौरामरावणविग्रहे ॥ गृहीत्वापर्वतश्रेष्ठंविशेषात्कपिभिःकृतम् ॥
॥ ८ ॥ नाम्नाकपीश्वरादित्यंचक्रुस्तीर्थमनुत्तमम् ॥ यत्रतीर्थेनरःस्नात्वाकृत्वावापितृतर्पणम् ॥ ९ ॥ दृष्ट्वाकपीश्वरादित्यंमुच्यतेब्रह्महत्यया ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रस्नानंप्रकर्तव्यंचैत्राष्टम्यांविशेषतः ॥ १० ॥ हनुमत्प्रमुखैस्तत्रस्नातंयत्रदिनत्रयम् ॥ कपितीर्थप्रभावोऽयंभवत्यैसमुदीरितः ॥ ११ ॥ अस्मिंस्तीर्थे नरःस्नात्वापूजयित्वाकपीश्वरम् ॥ रूपवान्बहुभोगश्चजायतेनात्रसंशयः ॥१२॥ बलंवाञ्छतियोलोकोधर्मंवापुत्रमेवच ॥ सर्वंसतुलभेन्नित्यंकपितीर्थ प्रभावतः ॥ १३ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०उमामहेश्वरसंवादेकपितीर्थमाहात्म्यंनामद्विचत्वारिंशदधिकशततमोऽध्यायः ॥ १४२ ॥ एकधारंततोगच्छेत्तीर्थंपरमपावनम् ॥ एकधारेनरःस्नात्वाएकरात्रमुपोषितः ॥ १ ॥ अर्चयन्स्वामिदेवेशंकुलानांतारयेच्छतम् ॥ स्वामि तीर्थसमंज्ञेयंयत्रतीर्थेऽवगाहनम्॥२॥ रुद्रलोकंनरोगच्छेत्तीर्थस्यास्यप्रभावतः ॥ यत्रस्नात्वाचपीत्वाचब्रह्मलोकंचगच्छति ॥३॥ तेलोकाःपुण्यकर्माण स्तटेऽस्मिन्संवसन्तिये ॥ नभयंविद्यतेतेषांखड्गधारादिकंचयत् ॥४॥ तत्सर्वमाशुनश्येततीर्थेह्येकप्रधारके ॥५॥ इत्येकधारतीर्थवर्णनम्॥ सप्तधारंत तोगच्छेत्तीर्थानांतीर्थमुत्तमम्॥सप्तसारस्वतंनामयत्कृतंमुनिभिःकृतम्॥६॥ त्रेतायुगेमङ्कितीर्थंकृतंमङ्किमहर्षिणा॥द्वापरेपाण्डुपुत्रैस्तुसप्तधारंप्रवर्तितम् ॥ ७ ॥ सप्तधारकतांप्राप्तंतीर्थंहरजटाच्युतम् ॥ सप्तरूपाणिगङ्गायायानिलोकेषुसप्तसु ॥ ८ ॥ वहन्तितानिपुण्यानितीर्थेऽस्मिन्सप्तधारके ॥ सप्त धारेकृतंश्राद्धंपितॄणांतृप्तिदायकम् ॥ ९ ॥ शृणुदेविप्रवक्ष्यामिइतिहासंपुरातनम् ॥ यच्छ्रुत्वादेवदेवेशिब्रह्मलोकंव्रजेद्ध्रुवम् ॥ १० ॥ कौषीतकस्य पुत्रोवैमङ्किनामातिविश्रुतः ॥ विष्णुध्यानरतोनित्यंविष्णुलोकप्रपूजकः ॥ ११ ॥ वेदाध्ययनकर्ताचअग्निहोत्रपरायणः ॥ सुरूपाविश्वरूपेतिस्त्रियौद्वे स्तस्तुतद्गृहे ॥ १२ ॥ ताभ्यांपुत्रविहीनाभ्यांदृष्ट्वादेविविशङ्कितः ॥किंकर्तव्यमितिध्यायन्नतिचिन्तापरोऽभवत् ॥ १३ ॥ स्थिरोवंशस्तुपुत्रेणह्यन्यथा नरकंव्रजेत् ॥ एवंचिन्तांप्रकुर्वाणोनसुखंलभतेक्वचित् ॥ १४ ॥ तदास्वगृहमुत्सृज्यगतोवैगुरुसन्निधौ ॥ नमोवैगुरवेतुभ्यंदेवानामुपकारिणे ॥ १५ ॥ त्वंनाथःसर्वलोकानांब्राह्मणानांचरक्षकः ॥ यज्ञानांत्वंप्रकर्ताचद्विजराजनमोऽस्तुते॥१६॥अपुत्रोऽहंतुविप्रर्षेकिंकर्त्तव्यंमयाप्रभो॥ वदत्वंतुयथासर्वंपुत्रो भवतिनिश्चितम् ॥ १७॥ अपुत्रस्यगतिर्नास्तिस्वर्गोनैवचनैवच ॥ येनकेनाप्युपायेनपुत्रस्यजननंचरेत् ॥ १८ ॥ इतिवाक्यंतुसंस्मृत्यह्यागतस्तव सन्निधौ ॥ १९ ॥ गुरुरुवाच ॥ गच्छत्वंमुनिशार्दूलयत्रसाभ्रमतीनदी ॥ तत्रगत्वामुनिश्रेष्ठपुत्रान्वैप्राप्स्यसेध्रुवम् ॥ २० ॥ तद्वाक्यंतुसमाकर्ण्यनम स्कृत्यतुदण्डवत् ॥ सगतोविप्रराजस्तुनदींसाभ्रमतींप्रति ॥ २१ ॥ मङ्किनामातुविप्रर्षिस्तत्रगत्वातपोमहत् ॥ अतप्यततदादेवियावद्वर्षचतुष्ट यम् ॥ २२ ॥ तत्रतीर्थंकृतंतेनमङ्किनाब्रह्मवादिना ॥ त्रेतायुगेतदादेवितदातीर्थंमहाद्भुतम् ॥ २३ ॥ जातंतत्रनसंदेहःपुत्रदंसार्वकामिकम् ॥ अद्यापि मङ्कितीर्थाभंनभूतंनभविष्यति ॥ २४ ॥ सवैद्विजवरोमङ्किःपुत्रान्प्राप्ययथासुखम् ॥ भोगान्नानाविधान्भुक्त्वासगतोमन्दिरंमम ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एतदाख्यानकंदिव्यंपवित्रंपरमंमहत् ॥ पुत्रसौख्यादिकंसर्वंलभतेश्रवणादतः ॥ २६ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०उमामहेश्वरसंवादे
सप्तधरतीर्थमहिमानामत्रिचत्वारिंशदधिकशततमोऽध्यायः ॥ १४३ ॥ महादेवउवाच ॥ ब्रह्मवल्लीमहत्तीर्थंततोगच्छेत्सुरश्वरि ॥
तस्यतीर्थस्यस्वरूपंसाक्षाच्छृणुसुरोत्तमे ॥ १ ॥ यत्रसाभ्रमतीतोयंब्रह्मवल्ल्यम्भसासह ॥ युज्यतेब्रह्मतीर्थंतत्प्रयागेनसमंस्मृतम् ॥ २ ॥ तत्र
पिण्डप्रदानेनतृप्तिर्द्वादशवार्षिकी ॥ पितृणांजायतेनूनंब्रह्मणोवचनंयथा ॥ ३ ॥ गयाश्राद्धसमंपुण्यंब्रह्मवल्ल्यांविशेषतः ॥ यत्रज्ञात्वाप्रकुर्वन्ति
पितरस्तृप्तिमाप्नुयुः ॥ ४ ॥ गोदानंभूमिदानंचअन्नदानंतथैवच ॥ एतद्दानसमंपुण्यंब्रह्मवल्ल्यांविशेषतः ॥ ५ ॥ अत्रैवसनकाद्यास्तुस्नात्वाच
विधिपूर्वकम् ॥ परंब्रह्मपदध्यानाद्विष्णुलोकमवाप्नुयुः ॥ ६ ॥ पुष्करेचैवगङ्गायांक्षेत्रेचामरकण्टके ॥ तत्रगत्वातुदेवेशियत्फलंलभतेनरः ॥ ७ ॥
तत्फलंसमवाप्नोतिब्रह्मवल्ल्यांविशेषतः ॥ चन्द्रसूर्योपरागेचदानंयेददतेनराः ॥ ८ ॥ तत्फलंसमवाप्नोतिब्रह्मवल्ल्यांसुरेश्वरि ॥ भूताःप्रेताः
पिशाचाश्चयेकेचिद्दुष्टयोनयः ॥ ९ ॥ दिव्यरूपधरास्तेचशङ्खचक्रगदाधराः ॥ तेऽपिस्वर्गेहिगच्छन्तिस्नानंकृत्वासुरेश्वरि ॥ १० ॥ धृत्वा
तुलसिजांमालांनारायणमनुस्मरन् ॥ वैकुण्ठंदिव्यमानन्दंयातिवैपदमव्ययम् ॥ ११ ॥ इतिब्रह्मवल्लीतीर्थमाहात्म्यम् ॥ वृषतीर्थंततोगच्छेत्खण्ड
तीर्थेतिविश्रुतम् ॥ तत्रस्नात्वादिवंगावोगोलोकंचपुराश्रिताः ॥ १२ ॥ खण्डरूपेणधर्मेणयागावोलोकमातरः ॥ शापात्प्रच्यावितास्तेनखण्ड
तीर्थमथोच्यते ॥ १३ ॥ पार्वत्युवाच ॥ शापोहिलोकमातॄणांगवांकस्यपुराभवत् ॥ कथंलोकात्परिभ्रष्टाःकथंधर्मेणरक्षिताः ॥ १४ ॥ महा
देवउवाच ॥ पुरावृषेणगोलोकेक्रीडतासहमातृभिः ॥ मुक्तंतथाशकृन्मूत्रंपतितंहरमूर्धनि ॥ १५ ॥ ततस्तासांददौशापंतेनदोषेणवैहरः ॥ नष्ट
संज्ञाःस्वलोकाच्चगावोयास्यथमेदिनीम् ॥ १६ ॥ गावःशप्ताभगवतासंप्रसाद्यपुनर्हरम् ॥ प्राप्स्यामहेपुनर्लोकमितिदेवंययाचिरे ॥ १७ ॥ हर
उवाच ॥ यदासाभ्रमतीतीर्थेब्रह्मवल्लीसमीपतः ॥ खण्डसंज्ञह्रदेस्नात्वास्वर्गंवैप्राप्स्यथध्रुवम् ॥ १८ ॥ ततस्तस्मिन्ह्रदेस्नात्वागावोगोपतिनासह ॥
स्वर्गंगताःशुद्धतमामहादेवसमीपतः ॥ १९ ॥ गोह्रदेतुनरःस्नात्वाकृत्वावैपितृतर्पणम् ॥ गवांलोकमवाप्नोतिदाहप्रलयवर्जितम् ॥ २० ॥
तत्रस्थित्वानिराहारोगोपिण्डंचददातिवै ॥ सनरःसुखमेधेतयावदिन्द्राश्चतुर्दश ॥ २१ ॥ गवांकोटिप्रदानेनयत्फलंप्राप्यतेध्रुवम् ॥ तत्फलंसम
वाप्नोतिखण्डतीर्थेनसंशयः ॥ २२ ॥ गृहीत्वावृषमूत्रंचतीर्थेयःपिबतेनरः ॥ तत्क्षणादेवशुद्धिःस्यात्खण्डतीर्थेनसंशयः ॥ २३ ॥ खण्डतीर्थात्परं
तीर्थंनभूतंनभविष्यति ॥ येगच्छन्तिसुरश्रेष्ठेतेनराःपुण्यभागिनः ॥ २४ ॥ तत्रगत्वासुरश्रेष्ठेगवांपूजनमाचरेत् ॥ वृषभंचततःपूज्यस्नानंकृत्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाहितः ॥ २५ ॥ पूजनाद्वैनसंदेहोगोलोकेतुवसेच्चिरम् ॥ तत्रगत्वाविशेषेणस्वर्णगांवितरन्तिये ॥ २६ ॥ तेनराभुञ्जतेसौख्यंयावदिन्द्रा
श्चतुर्दश ॥ दशधेनुंततःकृत्वायोददातिद्विजातये ॥ २७ ॥ खण्डतीर्थेसुरश्रेष्ठेतदनन्तफलंस्मृतम् ॥ तत्रगत्वातुकर्त्तव्यंपिप्पलारोपणंबुधैः ॥ २८॥
तत्कृतेसतिदेवेशिपितृलोकंसगच्छति ॥ पञ्चवामलकीर्दिव्यायेकुर्वन्तिप्ररोपणम् ॥ २९ ॥ इहलोकेसुखंभुक्त्वाहरिलोकंव्रजन्तिते ॥ ३० ॥ इति
श्रीपाद्मेमहापुराणेपञ्चपञ्चा०उत्तर०उमामहेश्वरसंवादेखण्डतीर्थनामचतुश्चत्वारिंशदधिकशततमोऽध्यायः ॥ १४४ ॥ श्रीमहादेवउवाच ॥ ततो
गच्छेन्महत्तीर्थंसंगमेश्वरमुत्तमम् ॥ यत्रहस्तिमतीपुण्यासाश्रमत्याहिसंगता ॥ १ ॥ शापंकौडिन्यमुनितःप्राप्यशुष्काभवन्नदी ॥ बहिश्चर्येति
नाम्नावैलोकेख्यातिमुपागता ॥ २ ॥ तत्तीर्थंसंप्रवक्ष्यामिपुण्यंत्रैलोक्यविश्रुतम् ॥ सर्वपापहरंपुण्यंत्रैलोक्येचापिविश्रुतम् ॥ ३ ॥ यत्रतीर्थेनरः
स्नात्वादृष्ट्वादेवंमहेश्वरम् ॥ मुच्यतेसर्वपापेभ्योरुद्रलोकंप्रगच्छति ॥ ४ ॥शृणुदेविप्रवक्ष्यामिएतच्छापस्यकारणम् ॥ यथेहशुष्करूपाहिजाताशापस्य
कारणात् ॥ ५ ॥ यत्रसाश्रमतीपुण्यागङ्गानाममहानदी ॥ तत्रहस्तिमतीनामगङ्गयासहसंगता ॥ ६ ॥ तत्रारब्धंचमुनिनातपोवैपरमंमहत् ॥
एवंबहुगतेकालऋषिणापरमात्मना ॥ ७ ॥ आराधितोहृषीकेशोनारायणनिरञ्जनः ॥ तस्यास्तटेतुदेवेशिवर्षाणिचबहून्यपि ॥ ८ ॥ गतानि
चविशेषेणमुनेस्तस्यतुपार्वति ॥ कदाचिद्दैवयोगाच्चवर्षाकालःसमागतः ॥ ९ ॥ नदीतत्रतुसंपूर्णाकालयोगेनसुव्रते ॥ तत्कौण्डिन्येनऋषिणा
स्थानंत्यक्तंतदानिशि ॥ १० ॥ रात्रौदुःखंमहज्जातंहाहेतिकरुणंरुदन् ॥ किंकर्तव्यमितिध्यायन्नतिचिन्तापरोऽभवत् ॥ ११ ॥ आश्रमोहिमहा
दिव्यऋषिणैवसमायुतः ॥ सगतोवारियोगेनहस्तिमत्यांसुरोत्तमे ॥ १२ ॥ फलानिचैवमूलानिपुस्तकानिबहून्यपि ॥ तानितस्यांगतान्येव
वारियोगेनसुन्दरि ॥ १३ ॥ सकौण्डिन्यऋषिश्रेष्ठःशशापतांनदींकिल ॥ उदकेनविनात्वंचभविष्यसिकलौयुगे ॥ १४ ॥ एवंस
दत्त्वावैशापंहस्तिमत्यैमहेश्वरि ॥ गतोऽसौविप्रप्रवरोविष्णुलोकंसनातनम् ॥ १५ ॥ अद्यापिवर्ततेतीर्थंसंगमेश्वरसंज्ञकम् ॥ यद्दृष्ट्वा
मुच्यतेपापीब्रह्महत्यादिपातकात् ॥ १६ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०उत्तर०उमामहेश्वरसंवादेसोमेश्वरतीर्थमहिमानामपञ्चचत्वारिंशद
धिकशततमोऽध्यायः ॥ १४५ ॥ महादेवउवाच ॥ ततोगच्छेतदेवेशितीर्थंरुद्रमहालयम् ॥ केदारानुपमंसाक्षाद्रुद्रेणपरिनिर्मितम् ॥ १ ॥
श्राद्धंतत्रैवकर्तव्यंपितृणांतृप्तिकारणम् ॥ तत्रश्राद्धप्रदानेनपितरःसपितामहाः ॥ २ ॥ तृप्ताःसमभिगच्छन्तिरुद्रस्यपरमंपदम् ॥ वृषमुत्सृ
जतेयस्तुतत्ररुद्रमहालये ॥ ३ ॥ कार्त्तिक्यामथवैशाख्यांरुद्रेणसहमोदते ॥ केदारउदकंपीत्वापुनर्जन्मनविद्यते ॥ ४ ॥ अत्रतुस्नानमात्रे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

णमुक्तिभागीनसंशयः ॥ एकस्मिन्समयेदेवित्यक्त्वाकैलासमागतः ॥ ५ ॥ साभ्रमतींमहागङ्गांज्ञात्वालोकहितायवै ॥ तत्रस्नात्वाचपीत्वा
चकृत्वातीर्थमनुत्तमम् ॥ ६ ॥ ततोऽहंचस्वकंस्थानंकैलासंप्रतिभामिनि ॥ तदन्तरंमहापुण्यंतीर्थंजातंमहालयम् ॥ ७॥ रुद्रमहालय
मितिलोकेख्यातिंगमिष्यति ॥ कार्त्तिक्यामथवैशाख्यांयेगच्छन्तिसुरोत्तमे ॥ नतेषांविद्यतेदुःखंसर्वसंसारजंपुनः ॥ ८ ॥ इतिश्रीपाद्मे
महापुराणेपञ्चपञ्चा०उत्तर०उमामहेश्वरसंवादेरुद्रमहातीर्थंनामषट्चत्वारिंशदधिकशततमोऽध्यायः ॥ १४६ ॥ महादेवउवाच ॥ देविवै
श्रूयतांतीर्थंदेवानामपिदुर्लभम् ॥ खड्गतीर्थमितिख्यातंसर्वपापप्रणाशनम् ॥ १ ॥ खड्गतीर्थेनरःस्नात्वादृष्ट्वाखड्गेश्वरंशिवम् ॥ ननरो
दुर्गतिंगच्छेत्स्वर्गलोकंप्रगच्छति ॥ २ ॥ खड्गधारेश्वरंदेवंयःपश्यतिसुरोत्तमे ॥ कार्त्तिक्यांतुविशेषेणपूजनंतत्रकारयेत् ॥ ३ ॥
अयंविश्वेश्वरोदेवःसर्वदाशुविवल्लभे ॥ सर्वंददातिसर्वेशोवाञ्छितार्थप्रदायकः ॥ ४ ॥ वैशाखेराज्यकामार्थीयःपश्यतितमीश्वरम् ॥ तमर्थंलभतेक्षिप्रं
विश्वनाथप्रसादतः ॥ ५ ॥ पुष्पैर्धूपैश्चनैवेद्यैर्दीपैर्वानगनन्दिनि ॥ फलप्रदानैर्बिल्वैश्चविश्वेशंपूजयेत्ततः ॥६॥ धनधान्यप्रदंचाशुपुत्रपौत्रादिसंपदः॥
प्राप्यन्तेनात्रसंदेहःश्रीविश्वेश्वरपूजनात् ॥ ७ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०उमामहेश्वरसंवादेखड्गतीर्थंनामसप्तचत्वारिंशदधिकशततमो
ऽध्यायः ॥ १४७ ॥ महादेवउवाच ॥ साभ्रमत्यास्तटेतीर्थंगयातीर्थादनुत्तमम् ॥ चित्राङ्गवदनंनाममालार्काधिष्ठितंशुभम् ॥ १ ॥ कल्पपादपसन्ता
नैर्मन्दारैश्चोपशोभितम् ॥ चूतनिम्बकदम्बैश्चकाश्मर्यश्वत्थतिन्दुकैः ॥ २ ॥ तस्मादपहरेत्कुष्ठंयोजनस्मृतिविभ्रमात् ॥ यस्यसंजायतेकुष्ठंतस्यमाला
र्ककोहरेत् ॥ ३॥ यातुवेदोक्तविधिनानारीतत्राभिषिञ्चति ॥मृतवत्साथवावन्ध्यापुत्रंप्राप्नोतिसाऽचिरात ॥४ ॥ सन्ध्यास्नानंजपोहोमःस्वाध्यायोदेव
तार्चनम् ॥ कृतंभास्करभक्तेनमालार्केह्यक्षयंभवेत् ॥ ५ ॥ अत्रगत्वातुदेवेशिश्रीरवेर्व्रतमाचरेत् ॥ इहलोकेसुखंभुक्त्वारवेर्लोकंहियातिवै ॥ ६ ॥ मृत
वत्सोहिराजर्षिस्तत्रगत्वाकरोत्तपः ॥ सराजाप्राप्तवान्पुत्रंश्रीमालार्कप्रसादतः ॥ ७ ॥ अत्रगत्वाविशेषेणउपवासीजितेन्द्रियः ॥ मालार्कंपूजयेद्योवै
मुक्तिभागीभवेद्ध्रुवम् ॥ ८ ॥ वसिष्ठप्रमुखाविप्रादेवाइन्द्रादयःसदा ॥ निवसन्तिसुरश्रेष्ठेमालार्केरविसन्निधौ ॥ ९ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०
उत्तर०उमामहेश्वरसंवादेमालार्कतीर्थंनामाष्टचत्वारिंशदधिकशततमोऽध्यायः ॥ १४८ ॥ महादेवउवाच ॥ तीर्थादस्मात्परंतीर्थंमालार्कान्तरतः ॥ १४८ ॥
स्थितम् ॥ चन्दनेश्वरमागच्छेदामोदस्थानमुत्तमम् ॥ १ ॥ दुःशासनस्यरुधिरंपीत्वाभीमोमहाबलः ॥ प्रतिज्ञामात्मनःसर्वांपूरयित्वासुदारुणाम् ॥
॥ २ ॥ कराभ्यांरुधिराक्ताभ्यांद्रौपद्याःकेशबन्धनम् ॥ कृत्वादत्त्वाद्विजातिभ्यस्तीर्थयात्रांततोऽगमत् ॥३॥ साभ्रमत्यास्तटेरम्येगतोवैभ्रातृभिःसह ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आनीतःसाभ्रमत्यांयःस्वर्गाच्चन्दनपादपः ॥ ४ ॥ सतुलिङ्गतयाजातःपुण्यतीर्थप्रभावतः ॥ तत्रस्नात्वाचपीत्वाचकृत्वावैपितृतर्पणम् ॥ ५ ॥ ननरो
निरयंगच्छेद्रुद्रलोकमवाप्नुयात् ॥ चन्दनेशंततोदृष्ट्वाविश्वेशंलोकशङ्करम् ॥६॥ पूजयेच्चयथाशक्त्यायत्रगत्वानशोचति ॥ यत्रकैवर्तकोराजापूजांकृत्वा
ह्यनेकशः ॥ ७ ॥ सगतःशिवलोकंतंयत्रगत्वानशोचति ॥ मज्जन्तिऋषयोयत्रयत्रदेवःसनातनः ॥ ८ ॥ साक्षाद्विष्णुःपरमात्मानित्यंतिष्ठतिभूतिदः ॥
इयंसाभ्रमतीधन्याधन्योविश्वेश्वरःप्रभुः ॥ ९ ॥ यत्रतीर्थान्यनेकानिजातानिभुविपार्वति ॥ अत्रचामर्दकीपुण्यैःफलैर्नानाविधैःशुभैः ॥ १० ॥
कर्त्तव्यमर्घदानंचविधिनातत्रसुन्दरि ॥ ११ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०उमामहेश्वरसंवादेचन्दनेश्वरमाहात्म्यंनामैकोनपञ्चाशदधिकशत
तमोऽध्यायः ॥ १४९ ॥ महादेवउवाच ॥ जम्बूतीर्थंततोगच्छेत्स्नानार्थंपापनाशनम् ॥ कलिकालेचयत्पुंसांस्वर्गसोपानवत्स्थितम् ॥ १ ॥ यत्र
जाम्बवतापूर्वंदशाङ्गेपर्वतोत्तमे ॥ स्थापितंचर्क्षराजेनलिङ्गंसुरगणार्चितम् ॥ २ ॥ रामेणहियदापूर्वंहतोवैरावणोऽसुरः ॥ तदाजाम्बवतादिक्षुभेरीघोषैः
प्रघोषितम् ॥ ३ ॥ जितंवैरामचन्द्रेणरावणोनिहतोरणे ॥ लब्ध्वासीतेतिसंघुष्यस्नातंतीर्थवरेशुभे ॥ ४ ॥ स्थापितंतत्रलिङ्गंतुस्वनाम्नातुसुरेश्वरि ॥
तत्रस्नात्वानरःसद्यःस्मृत्वारामंसहानुजम् ॥ ५ ॥ जाम्बवन्तेश्वरंस्नात्वारुद्रलोकेमहीयते ॥ यत्रयत्रहिभोदेविश्रीरामस्मरणंकृतम् ॥ ६ ॥ भवबन्ध
विमोक्षोहिदृश्यतेसचराचरे ॥ अहंरामस्तुविज्ञेयोरामोवैरुद्रएवच ॥ ७ ॥ एवंज्ञात्वातुतेदेविनभेदोवर्ततेक्वचित् ॥ रामरामेतिरामेतिमनसायेजपन्तिच
॥ ८ ॥ तेषांसर्वार्थसिद्धिश्चभविष्यतियुगेयुगे ॥ अहंहिसर्वदादेविश्रीरामस्मरणंचरे ॥ ९ ॥ यंश्रुत्वातुपुनर्देविनभवोजायतेक्वचित् ॥ काश्यांहिनिव
सन्नित्यश्रीरामंकमलेक्षणम् ॥ १० ॥ स्मरामिसततंदेविभक्त्याचविधिपूर्वकम् ॥ जाम्बवतातदापूर्वंस्मृत्वारामंसुशोभनम् ॥ ११ ॥ जाम्बवन्तमिति
ख्यातंप्रस्थाप्यजगतांगुरुम् ॥ तत्रस्नात्वाचभुक्त्वाचकृत्वादेवस्यपूजनम् ॥ १२ ॥ शिवलोकमवाप्नोतियावदिन्द्राश्चतुर्दश ॥ अत्रहिस्नानमात्रेण
यथाजाम्बवतोबलम् ॥ १३ ॥ तथावैबलमाप्नोतिश्रीविश्वेशप्रसादतः ॥ अत्रगत्वातुभूदानंपुमान्यश्चकरोतिवै ॥ फलंसहस्रगुणितंजाम्बवन्तेशदर्श
नात् ॥ १४ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०उमामहेश्वरसंवादेजाम्बवन्ततीर्थमाहात्म्यंनामपञ्चाशदधिकशततमोऽध्यायः ॥ १५० ॥ महादेव
उवाच ॥ अस्मात्तीर्थात्परंतीर्थमिन्द्रग्राममितिस्मृतम् ॥ यत्रस्नात्वापुराशक्रोविमुक्तोघोरकिल्बिषात् ॥ १ ॥ पार्वत्युवाच ॥ केनेहकर्मणाशक्रःप्राप्त
वान्घोरकिल्बिषम् ॥ विपाप्माचकथंसोऽभूदितिविस्तरतोवद ॥२॥ महादेवउवाच ॥ इन्द्रःसुरेश्वरःपूर्वंनमुचिश्चासुरेश्वरः ॥ अशस्त्रवधमन्योन्यंसमयं
तौप्रचक्रतुः ॥ ३ ॥ अथेन्द्रस्तुनभोवाणीनिर्देशान्नमुचिंतदा ॥ जघानफेनमादायब्रह्महत्यातदाभवत् ॥४॥ पप्रच्छचगुरुंशक्रःपापनिर्णाशकारणम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बृहस्पतेरथादेशात्साभ्रमत्युत्तरेतटे ॥ ५ ॥ अस्मिन्स्थानेसमागत्यस्थानंचक्रेसुरेश्वरः ॥ तस्येहस्नानमात्रेणगतपापस्यतत्क्षणात् ॥६॥ पूर्णेन्दुधवला
कान्तिःशरीरेसमजायत ॥ धवलेश्वरमीशानंस्थापयामासवृत्रहा ॥ ७ ॥ इन्द्रनाम्नाचतल्लिङ्गंविश्रुतंपृथिवीतले ॥ पूर्णिमायांतथादर्शेसंक्रान्तौग्रहणे
तथा ॥ ८ ॥ श्राद्धेकृतेपितणांतुतृप्तिर्द्वादशवार्षिकी ॥ धवलेश्वरमासाद्ययःकुर्याद्विप्रभोजनम् ॥ ९ ॥ एकस्मिन्भोजितेविप्रेसहस्रंभोजितंभवेत् ॥
हिरण्यभूमिवासांसिदातव्यानिस्वशक्तितः ॥१०॥ शुक्लागौर्ब्रह्मणेदेयासवत्साचपयस्विनी ॥ अत्रागत्यतुयोविप्रोरुद्रजाप्यादिकंचरेत् ॥११॥ तत्कृतं
कोटिगुणितंश्रीमहेशप्रसादतः ॥ अत्रतीर्थेनरोयस्तुउपवासादिकंचरेत् ॥ १२ ॥ सएवसर्वकामाढ्योभवत्येवनसंशयः ॥ बिल्वपत्रंसमानीययःपूजयति
तंप्रभुम् ॥ १३ ॥ धर्ममर्थंचकामंचलभतेमानवोभुवि ॥ सोमवारेविशेषेणयेगच्छन्तिनरोत्तमाः ॥१४॥ तेषांरोगंतथादोषंशमयेद्धवलेश्वरः ॥ रवौवाथ
विशेषेणह्यर्चनंकुरुतेयदा ॥ १५ ॥ तेषांमहिमातुभोदेविनज्ञातःकर्हिचिन्मया ॥ दूर्वयाचार्कपुष्पैर्वाकह्लारैःकमलैर्दलैः ॥१६॥ पूजनंकुर्वतेयेऽत्रतेनराः
पुण्यभागिनः ॥ श्वेतार्कपुष्पमानीयधवलेशंप्रपूज्यतु ॥ १७॥ वाञ्छितंलभतेनित्यंधवलेशप्रसादतः ॥ कृतेवैनीलकण्ठस्तुसर्वेषांशङ्करःसदा॥१८॥
त्रेतायुगेसविख्यातोहरोवैभगवान्प्रभुः ॥ द्वापरेशर्वसंज्ञस्तुकलौवैधवलेश्वरः ॥ १९ ॥ अत्रार्थेयत्पुरावृत्तंतच्छृणुष्वसुरेश्वरि ॥ नन्दिनामापुरावैश्य
इन्द्रग्रामेसमावसत् ॥ २० ॥ शिवध्यानपरोभूत्वाशिवपूजांचकारसः ॥ नित्यंतपोवनस्थंहिलिङ्गंधवलसंज्ञकम् ॥ २१ ॥ उषस्युषसिचोत्थायप्रत्यहं
शिववल्लभः ॥ नन्दीलिङ्गार्चनरतोबभूवातिशयेनहि ॥ २२ ॥ यथाशास्त्रेणाविधिनापुष्पार्चनपरोऽभवत् ॥ एकदामृगयालुब्धःकिरातोभूतहिंसकः॥
॥ २३ ॥ पापीपापसमाचारश्चरन्साभ्रमतीतटे ॥ अनेकश्वापदाकीर्णेहन्यमानोमृगान्शरैः ॥२४॥ एवंविचरमाणोऽसौकिरातोभूतहिंसकः ॥ यदृच्छ
यागतस्तत्रयत्रलिङ्गंसुपूजितम् ॥२५॥ धवलेश्वरविख्यातमनेकाश्चर्यमण्डितम् ॥ दृष्टंसुपूजितंलिङ्गंनानापुष्पैःफलैस्तथा॥२६॥एवंलिङ्गंसमालिङ्गय
गतःसाभ्रमतीतटे ॥ तत्रपीत्वापयःसोऽथमुखंगण्डूषपूरितम् ॥ २७ ॥ कृत्वाचैकेनहस्तेनमृगमांसंसमुद्वहन् ॥ करेणैकेनपूजार्थंबिल्वपत्राणिवैदधत् ॥
॥२८॥शीघ्रमागत्यलिङ्गान्तेतदापूजांसमाहरत् ॥ पुष्पाणितानिसर्वाणिविधूतानिइतस्ततः॥२९॥स्नापनंतस्यलिंगस्यकृतंगण्डूषवारिणा॥करेणैकेन
पूजार्थंबिल्वपत्राणिसोऽर्पयत् ॥३०॥ द्वितीयेनकरेणैवमृगमांसंसमार्पयत् ॥ दण्डप्रणामसंयुक्तःसंकल्पंमनसाकरोत् ॥३१॥ अद्यप्रभृतिपूजांवैकरिष्या
मिप्रयत्नतः॥त्वंमेस्वामीचभक्तोऽहमद्यप्रभृतिशङ्कर॥३२॥एवंनियमवान्भूत्वाकिरातोगृहमागमत्॥ तथाप्रभातसमयेदेवायतनमागतः॥३३॥नन्दीददर्श
तत्सर्वंकिरातेनचयत्कृतम् ॥अव्यवस्थंचतद्दृष्ट्वाअमेध्यंशिवसन्निधौ॥३४॥विधूतानिचसर्वाणिहिंसकेनदुरात्मना॥ चिन्तायुक्तोऽभवन्नन्दीजातंकिंचित्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मद्यमे ॥ ३५ ॥ कथितानिचविघ्नानिशिवपूजारतस्यहि ॥उपस्थितानितान्येवममभाग्यविपर्ययात्॥३६॥ एवंविमृश्यसुचिरंप्रक्षाल्यशिवमन्दिरम्॥
यथागतेनमार्गेणनन्दीस्वगृहमागमत् ॥ ३७ ॥ ततोनन्दिनमालक्ष्यपुरोधागतमानसम् ॥ अब्रवीद्वचनंतंतुकस्मात्त्वंगतमानसः ॥३८॥ पुरोहितंप्रति
तदानन्दीवचनमब्रवीत् ॥ अद्यदृष्टंमयाविप्रअमेध्यंशिवसन्निधौ ॥ ३९ ॥ केनेदंकारितंत्रनजानामीहकिंचन ॥ ततःपुरोधावचनंनन्दिनंचाब्रवी
त्तथा ॥ ४० ॥ येनविस्खलितंतत्रपुष्पादीनांप्रपूजनम् ॥ सोऽपिमूढोनसंदेहःकार्याकार्येषुमन्दधीः॥४१॥ तस्माच्चिन्तानकर्तव्यात्वयापुनरपिप्रभो॥
प्रभातेचमयासार्धंगम्यतांतच्छिवालयम् ॥४२॥ निरीक्षणार्थंदुष्टस्यतस्यदण्डंकरोम्यहम् ॥ एतच्छ्रुत्वातुवचनंनन्दीतस्यपुरोधसः॥४३॥आस्थितः
स्वगृहेनक्तंदूयमानेनचेतसा ॥ तस्यांरात्र्यांव्यतीतायामाहूयचपुरोधसम् ॥४४॥ गतःशिवालयंनन्दीसमंतेनमहात्मना ॥ प्रक्षाल्यपूजनंकृत्वानाना
रत्नपरिच्छदम् ॥ ४५ ॥ पञ्चोपचारसंयुक्तंकृत्वावैब्राह्मणैःसह ॥ एवंयामद्वयंजातंस्तुवानस्यतुनन्दिनः॥४६॥ आयातोऽसौमहाकालस्तथारूपोमहा
बलः ॥ कालरूपोमहारौद्रोधनुष्पाणिःप्रतापवान् ॥ ४७ ॥ तंदृष्ट्वाभयसंत्रस्तोनन्दीतत्रन्यलीयत ॥ पुरोधाश्चैवसहसाभयभीतस्तदाभवत् ॥ ४८ ॥
किरातेनकृतंतत्रयथापूर्वमपिस्खलन् ॥ तांपूजांसपदाहृत्यबिल्वपत्रंसमार्पयत् ॥ ४९ ॥ नैवेद्येनपलेनैवकिरातःशिवमार्चयत् ॥ दण्डवत्पतितोभूमा
वुत्थायस्वगृहंगतः ॥ ५० ॥ तंदृष्ट्वामहदाश्चर्यंचिन्तयामासवैचिरम् ॥ पुरोधसातदानन्दीसहव्याकुलचेतसा ॥५१॥ तेनाहूतास्तदाविप्रावहवोवेदवा
दिनः ॥ निवेदितंचतत्सर्वंकिरातेनचयत्कृतम् ॥ ५२ ॥ किंकार्यमद्यभोविप्राःकथ्यतांचयथातथम् ॥ संप्रधार्यततःसर्वेमिलित्वाधर्मशास्त्रतः ॥५३॥
ऊचुःसर्वेतदाविप्रानन्दिनंजातशङ्कितम् ॥ ईशविघ्नंसमुत्पन्नंदुर्निवार्यंसुरैरपि ॥५४॥ तस्मादानयलिङ्गंत्वंस्वगृहेवैश्यसत्तम॥ तथेतिमत्वासौनन्दीशिव
स्योत्पाटनंमहत्॥५५॥कृत्वास्वगृहमानीयप्रतिष्ठाप्ययथाविधि॥ सुवर्णपीठिकांकृत्वानवरम्भासुशोभिताम्॥५६॥उपाहारैरनेकैश्चपूजयामासवैतदा॥
अथापरेद्युरायातःकिरातःशिवमन्दिरम्॥५७॥यावद्विलोकयामासलिङ्गमैशंनदृष्टवान्॥ मौनंविहायसहसासक्रोशमिदमब्रवीत्॥५८॥हेशम्भोक्वगतोऽ
सित्वंदर्शयात्मानमद्यवै॥यदिनोदर्शनंहेयंत्यक्ष्याम्यद्यकलेवरम्॥५९॥हेशम्भोहेजगन्नाथत्रिपुरान्तकशङ्कर॥हेरुद्रहेमहादेवदर्शयात्मानमात्मना॥६०॥
एवंसाक्षेपमधुरैर्वाक्यैःक्षिप्त्वासदाशिवम् ॥ किरातोऽसौक्षुरिकयाधीरोवैजठरंस्वकम् ॥ ६१ ॥ विभिद्याशुततोबाहुमासाद्योच्चैरुषाब्रवीत् ॥ हेशम्भो
दर्शयात्मानंकुतोमांत्यज्ययास्यसि ॥६२॥ इतिक्षिप्त्वाततोऽन्त्राणिमांसमुद्धृत्यसर्वतः ॥ तस्मिन्गर्तेकरेणैवकिरातःसहसाक्षिपत् ॥ ६३ ॥ स्वच्छंच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हृदयंकृत्वासाश्रमत्यांनिमज्जतु ॥ तथैवजलमानीयबिल्वपत्रंत्वरान्वितः ॥ ६४ ॥ पूजयित्वायथान्यायंदण्डवत्पतितोभुवि ॥ यदाध्यानस्थितस्तत्र किरातःशिवसन्निधौ ॥ ६५ ॥ प्रादुर्भूतस्तदारुद्रःप्रमथैःपरिवारितः ॥ कर्पूरगौरोद्युतिमान्कपर्दीचन्द्रशेखरः ॥ ६६ ॥ तंगृहीत्वाकरेरुद्रउवाचपरिसान्त्वयन् ॥ भोभोवीरमहाप्राज्ञमद्भक्तोऽसिमहामते ॥ ६७ ॥ वरंवृणीष्वभोभक्तयत्तेमनसिवर्त्तते ॥ एवमुक्तःसरुद्रेणमहाकालोमुदान्वितः॥६८॥ पपातदण्डवद्भूमौभक्त्यापरमयायुतः ॥ ततोरुद्रमुवाचेदंनवरंप्रार्थयाम्यहम् ॥ ६९ ॥ अहंदासोऽस्मितेरुद्रत्वंमेस्वामीनसंशयः ॥ एतच्छ्लाघ्यतमं लोकेदेहिजन्मनिजन्मनि ॥७०॥ त्वंमातापिताचत्वंचत्वंबन्धुश्चसखाचमे ॥ त्वंगुरुस्त्वंमहामन्त्रोमन्त्रैर्वेद्योऽसिसर्वदा॥७१॥ निष्कामंवाक्यमाकर्ण्य किरातस्यतदाभवः ॥ ददौपार्षदमुख्यत्वंद्वारपालत्वमेवच ॥ ७२॥ तदाडमरुनादेननादितंभुवनत्रयम् ॥ भेरीझङ्कारशब्देनशङ्खानांनिनदेनच ॥७३॥ तदादुन्दुभयोनेदुःपटहाश्चसहस्रशः ॥ नन्दीतंनादमाकर्ण्यविस्मयात्त्वरितोययौ ॥७४॥ तपोवनंयत्रशिवःस्थितःप्रमथसंवृतः ॥ किरातोहितथादृष्टोनन्दिनाचतदाभृशम् ॥७५॥ उवाचप्रसृतोवाक्यंसनन्दीविस्मयान्वितः ॥ किरातंस्तोतुकामोऽसौपरमेणसमाधिना॥७६ ॥ इहानीतस्त्वयाशम्भुस्त्वं भक्तोऽसिपरन्तप ॥ त्वद्भक्तोऽहमिहप्राप्तोमांनिवेदयशङ्करे ॥७७॥ तच्छ्रुत्वावचनंतस्यकिरातस्त्वरयान्वितः ॥ नन्दिनंचकरेगृह्यशङ्करंसमुपागतः ॥ ॥७८॥प्रहस्यभगवान्रुद्रःकिरातंवाक्यमब्रवीत्॥ब्रूहिकोऽसौत्वयानीतोगणानामिहसन्निधौ॥७९॥किरातउवाच ॥ त्वद्भक्तोऽसौतद्रादेवतवपूजारतोह्यसौ प्रत्यहंरत्नमाणिक्यपुष्पैश्चोच्चावचैरिह ॥ ८० ॥ जीवितेनधनेनापिपूजितोऽसिनसंशयः ॥ तस्माज्जानीहिभोस्वामिन्नन्दिनंभक्तवत्सल ॥ ८१ ॥ महादेवउवाच ॥ जानाम्यहंमहाभागनन्दिनंवैश्यवर्तनम् ॥ त्वंमेभक्तःसखाचेतिमहाकालमहामते ॥ ८२ ॥ उपाधिरहितायेचयेनिष्कपटमानसाः ॥ तेप्रियास्तेचमेभक्तास्तेविशिष्टानरोत्तमाः ॥ तावुभौस्वीकृतौतेनपार्षदत्वेनशम्भुना ॥ ८३ ॥ ततोविमानानिबहूनितत्रसमागतान्येवमहाप्रभाणि ॥ किरातवर्येणसवैश्यवर्यउद्धारितस्तेनमहाप्रभेण ॥ ८४ ॥ कैलासलोकमापन्नौविमानैर्वेगवत्तरैः ॥ सारूप्यमेवसंप्राप्तावीश्वरस्यमहात्मनः ॥ ८५ ॥ नीराजितौगिरिजयापुत्रवत्तौगणावुभौ ॥ उवाचेदंततोदेवीप्रहस्यगजगामिनी ॥ ८६ ॥ यथात्वंहिमहादेवतथाचैतौनसंशयः ॥ सारूप्येणचगत्याचहास्यभावैःसुपूजितैः॥८७॥देव्यास्तद्वचनंश्रुत्वाकिरातोवैश्यएवच॥सद्यःपराङ्मुखौभूत्वाशंकरस्यचपश्यतः॥८८॥ऊचतुस्त्वरयायुक्तौगणौरुद्रस्यपश्यतः ॥ उभावप्यनुकम्प्यौचभवताहित्रिलोचन ॥ ८९ ॥ तवद्वारिस्थितौनित्यंभवावस्तेनमोनमः ॥ तयोर्भावंसभगवान्विदित्वाप्रहसन्भवः॥९०॥ उवाचपरयाभक्त्याभवतोरस्तुवाञ्छितम् ॥ ततःप्रभृतिद्वावेतौद्वारपालौबभूवतुः ॥ ९१ ॥ शिवद्वारिस्थितौदेविमध्याह्नेशिवदर्शिनौ ॥ एकोनन्दी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महाकालोद्द्रावेतौशिववल्लभौ॥९२॥येपापिनोऽप्यधार्मिष्ठाअन्धामूकाश्चपङ्गवः ॥ कुलहीनादुरात्मानःश्वपचाद्याहिमानवाः ॥९३॥यादृशास्तादृशाश्चा
न्यआराध्यधवलेश्वरम् ॥ गतास्तेऽपिगमिष्यन्तिनात्रकार्याविचारणा ॥ ९४॥ अत्रस्नानंचदानंचसांनिध्यंशंकरस्यच ॥साभ्रमत्यांकृतस्नानाधवले
श्वरपूजकाः॥९५॥तेरुद्रलोकंगच्छन्तिनात्रकार्याविचारणा॥अत्रस्नानंचदानंचयेकुर्वन्तिनरोत्तमाः॥९६॥धर्मार्थकामभोगांश्चभुक्त्वायान्तिहरालयम्॥
चन्द्रसूर्योपरागेचपितुःसांवत्सरेदिने ॥ ९७॥ यत्फलंलभतेमर्त्यस्तत्फलंप्राप्नुयाद्ध्रुवम् ॥ स्वर्गात्कामदुघादेविनित्यमायातिसर्वथा ॥९८॥ आगत्य
तंशिवंदेवंसमभ्यर्च्ययथातथा ॥ सागच्छतिसुरश्रेष्ठेस्वर्गंप्रतिनसंशयः ॥ ९९ ॥ तेनदुग्धाभियोगेननलिङ्गंतद्धवलीकृतम् ॥ धवलेश्वरंनामततः
संजातंभुविसर्वदा ॥१००॥ जन्तवोऽत्रसदादेविम्रियन्तेकालनोदिताः॥ तेतेशिवपदंयान्तियावच्चन्द्रदिवाकरौ ॥१०१॥ इतिश्रीपाद्मेमहापुराणेपञ्चप
ञ्चा०उत्तर०उमामहेश्वरसंवादेधवलेश्वरमाहात्म्यंनामैकपञ्चाशदधिकशततमोऽध्यायः ॥ १५१ ॥ महादेवउवाच ॥ तीर्थानांप्रवरंतीर्थं
साभ्रमत्यास्तटेस्थितम् ॥ बालापइतिविख्यातंभुक्तिमुक्तिप्रदायकम् ॥ १ ॥ तपस्विधारितंतीर्थंविबुधानांसमाश्रयम् ॥ तत्रकन्यातपस्तेपेपरमंसुदृढ
व्रता ॥ २ ॥ कन्याकण्वमुनेःसाध्वीरूपेणाप्रतिमाभुवि ॥ बालाबालावतीनामकुमारीब्रह्मचारिणी ॥ ३ ॥ व्रतंचचारसावित्र्यानियमैर्बहुभिर्युता ॥
भर्तामेभास्करोभूयादितिनिश्चित्यभामिनि ॥ ४ ॥ समास्तस्याःसमाक्रान्तादशसाभ्रमतीतटे ॥ चरन्त्यानियमांस्तांस्तान्भक्त्यापरमदुश्चरान् ॥५॥
तस्यास्तुतेनवृत्तेनतपसाव्रतचर्यया ॥ भक्त्याचभगवान्प्रीतःपरयाभक्तिसंपदा ॥ ६ ॥ आजगामाश्रमपदंदेवदेवोदिवाकरः ॥ आस्थायरूपंविप्रर्षेः
प्रविष्टस्तुमहामनाः॥ ७ ॥ सातंदृष्ट्वोग्रतपसावरिष्ठंब्रह्मवित्तमम् ॥ वानप्रस्थविधानेनपूजयामासतंद्विजम् ॥८॥ उवाचरविभक्तासाकल्याणीतंतपोध
नम् ॥ भगवन्मुनिशार्दूलकिमाज्ञापयसिप्रभो ॥ ९ ॥ सर्वंतुभ्यंयथाशक्तिदास्यामिस्वतनुंविना ॥ सूर्यभक्तास्मितेपाणिंदास्यामिनकथंचन ॥१० ॥
व्रतैश्चनियमैश्चापितपोभिश्चतपोधन ॥ सूर्यस्तोषयितव्योमेदेवस्त्रिभुवनेश्वरः ॥ ११ ॥ इत्युक्तवत्यांतस्यांतुस्मयन्निवनिरीक्ष्यताम् ॥ उवाचनियम
स्थांतांसान्त्वयन्निवभास्करः ॥१२॥ उग्रंचरसिकल्याणितपःपरमदुष्करम् ॥ यदर्थंचसमारम्भस्तवबालेतथैवतत् ॥१३॥ तपसालभ्यतेसर्वंसर्वंतपसि
तिष्ठति ॥ देवत्वंप्राप्यतेभद्रेतपसामोक्षएवच ॥ १४ ॥ इमानिपञ्चसुभगेबदराणिप्रतीच्छमे ॥ दत्त्वासबदराण्यस्यैपञ्चेत्युक्त्वारविर्ययौ॥१५॥अपृष्ट्वा
तांतुकल्याणींब्रह्मरूपीविहायताम् ॥ स्थितोऽसौनातिदूरेणइन्द्रग्रामेमहायशाः ॥ १६ ॥ स्थित्वाजिज्ञासयाभावंतस्याश्चब्राह्मणोरविः ॥ बदराणा
मुपवनंकारयामासभास्करः॥१७॥ततःसाप्रयताबालाप्राञ्जलिर्विगतश्रमा ॥ पाकायबदराणांसापावकंसमशिश्रयत्॥१८॥ अपचत्परमादेविबदराणि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महाप्रभा ॥तस्याःपचन्त्याःसुमहान्कालोऽगाच्चसुरेश्वरि ॥१९॥ भस्मपुञ्जोमहाञ्जातोदिनंचक्षयमन्वगात् ॥ हुताशनेनदग्धस्तुमहान्वैकाष्ठसंचयः॥ ॥ २०॥ पादौप्रक्षाल्यसापश्चात्पावकेचारुदर्शने ॥ ददाहबदरार्थंचब्राह्मणप्रियकाम्यया ॥ २१ ॥ दग्ध्वादग्ध्वापुनःपादावुपर्याधार्यतेऽनघे ॥ अथा स्याःकर्मतद्दृष्ट्वाप्रीतोदेवोदिवाकरः ॥ २२ ॥ ततःसंदर्शयामासकन्यायैरूपमात्मनः ॥ उवाचपरमप्रीतस्तांकन्यांसुदृढव्रताम् ॥ २३ ॥ सूर्यउवाच ॥ प्रीतोऽस्मिबालेभक्त्यातेतपसाव्रतचर्यया ॥ यस्मादभिमतःकामोबालेसंपद्यतांतव ॥ २४ ॥ अस्मिंस्तीर्थेतपोयुक्तामद्देहेत्वंनिवत्स्यसि ॥ इदंच तीर्थप्रवरंतवनाम्नाचलक्षितम् ॥२५॥ बालापइतिविख्यातंसाश्रमत्यास्तटेस्थितम् ॥ विख्यातंत्रिषुलोकेषुब्रह्मर्षिभिस्स्तुतंपुरा ॥२६॥ बालातीर्थेनरः स्नात्वात्रिरात्रमुषितःशुचिः ॥ रक्तादित्यमुखंदृष्ट्वासूर्यस्योदयनंप्रति ॥२७॥ सूर्यलोकमवाप्नोतिनात्रकार्याविचारणा ॥ सूर्यवारेऽथसंक्रान्तौसप्तम्यां तुविशेषतः ॥ २८ ॥ विषुवत्ययनेचापिचन्द्रसूर्यग्रहेऽपिच ॥ स्नात्वासंतर्पयेद्देवान्पितॄनथपितामहान् ॥२९ ॥ गुडधेनुंततोदद्याद्ब्राह्मणेभ्योगुडौदन म् ॥ करवीरैर्जपापुष्पैरक्तादित्यप्रपूजनम् ॥ ३० ॥ येकुर्वन्तिनरास्तेवैसूर्यलोकेवसन्तिवै ॥ रक्तांधेनुंनरोदद्यादेकंचैवधुरन्धरम् ॥ ३१ ॥ सयज्ञफल माप्नोतिननरोनिरयंव्रजेत् ॥ व्याधितोमुच्यतेरोगाद्बद्धोमुच्येतबन्धनात् ॥ तीर्थेऽस्मिन्पिण्डदानेनतृप्तिंयान्तिपितामहाः ॥३२॥ महादेवउवाच ॥ तथान्यदपिमाहात्म्यंतीर्थस्यास्यतपोधने ॥ श्रूयतांयत्पुरावृत्तंव्यासेनकथितंमहत् ॥ ३३ ॥ पुरात्रमहिषोवृद्धोजरयाजर्जरीकृतः ॥ अशक्तो भारमुद्वोढुंसार्थवाहस्तमत्यजत् ॥३४॥ सनिदाघेजलंपातुंजगामचमहानदीम् ॥ दैवात्पङ्केनिमग्नोऽसौततोमृत्युवशंगतः॥३५॥प्लावितास्थिर्जलेपुण्ये तीर्थस्यास्यप्रभावतः ॥ कान्यकुब्जेश्वरसुतोराजाजातिस्मरोऽभवत् ॥ ३६ ॥ संस्मृत्यचस्ववृत्तान्तंप्रभावंतीर्थजंमहत् ॥ आगत्यतज्जले स्नात्वाददौदानान्यनेकशः ॥ ३७ ॥ सतत्रस्थापयामासदेवदेवंमहेश्वरम् ॥ अत्रतीर्थेनरःस्नात्वासंपूज्यमहिषेश्वरम् ॥ ३८ ॥ रक्तादित्यमुखंदृष्ट्वा सर्वपापैःप्रमुच्यते ॥ साभ्रमत्युदकंयत्रपूर्वतःपश्चिमंव्रजेत् ॥ ३९ ॥ प्रयागादपितत्पुण्यंसर्वकामप्रदंमहत् ॥ ४० ॥ दत्तंद्विजेन्द्रेषुहुतंयदग्नौश्राद्धंकृतं जाप्यमिहाक्षयंस्यात् ॥ गोभूतिलाःकाञ्चनवस्त्रधान्यंशय्यासनंवाहनछत्रदानम् ॥४१॥ यंयंवाञ्छयतेकामंतंतंप्राप्नोतिमानवः ॥ श्रीमहेशप्रसादाच्च तीर्थस्यास्यप्रभावतः ॥ ४२ ॥ बालापेन्द्रमिदंतीर्थंपुण्यंपापहरंसदा ॥ यंदृष्ट्वामुनयःसर्वेवीतरागाःसदैवतु ॥ ४३ ॥ यत्रमाहिषनामेतिश्वेताख्यं पुण्यदंमहत् ॥ यत्रस्नात्वातुदेवेशिपुनर्जन्मनविद्यते ॥ ४४ ॥ गोदावर्यांकृतेस्नानेयत्फलंलभतेनरः ॥ तत्फलंलभतेदेविअत्रतीर्थेनसंशयः ॥ ॥ ४५ ॥ इतिश्रीपाद्मेमहापुराणेपद्मप०उत्तर०बालापेन्द्रतीर्थनामद्विपञ्चाशदधिकशततमोऽध्यायः ॥१५२॥ महादेवउवाच ॥ अन्यत्तीर्थंप्रवक्ष्यामि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुर्धर्षेश्वरमुत्तमम् ॥ यस्यस्मरणमात्रेणपापोऽपिपुण्यवान्भवेत् ॥ १ ॥ वृत्तेदैवासुरेयुद्धेदैत्येचनिधनंगते ॥ दुर्धर्षंचव्रतंकृत्वायत्रभार्गवनन्दनः॥
॥ २ ॥ समाराध्यमहादेवंदुर्धर्षंलोककारणम् ॥ मृतसंजीवनीमापयत्रविद्यांहित्र्यम्बकात् ॥ ३ ॥ दैत्यार्थमुशनस्तीर्थंविख्यातंजगतीतले ॥
काव्यतीर्थेकृतस्नानःपूज्यदेवंमहेश्वरम् ॥ ४ ॥ दुर्धर्षेश्वरसंज्ञंवैसर्वपापैःप्रमुच्यते ॥ अत्रवृत्तंतुश्रोतव्यंत्वयाचनगनन्दिनि ॥ ५ ॥ पुरायदा
भवद्युद्धंवृत्रवासवयोरिह ॥ तदासुरैर्जितादेवामघवान्वैसुरेश्वरः ॥ किंकर्त्तव्यमितिध्यात्वागतोऽसौतंगुरुंप्रति ॥ ६ ॥ इन्द्रउवाच ॥ अस्माकं
त्वंगुरुःसाक्षाद्देवानांपालकःसदा ॥ ऋषीणांत्वंवरःश्रीमान्कृपांकुरुदयानिधे ॥ ७ ॥ वृत्रेणनिर्जितोऽहंचक्कगच्छामिचसुव्रत ॥ ८ ॥ बृहस्पति
रुवाच ॥ शृणुदेवेन्द्रवक्ष्यामियेनत्वंहिसदासुखी ॥ ममवाक्यंकुरुष्वैवयदीच्छस्यात्मनःशुभम् ॥ ९ ॥ साभ्रमत्यांतदागच्छतत्रगत्वासुखीभव ॥
दुर्धराख्योयत्रदेवोनित्यंतिष्ठतिभूतिदः ॥ १० ॥ ददातिवाञ्छितान्कामान्सत्यंसत्यंसुरेश्वर ॥ गुरोर्वचनमाकर्ण्यसगतस्तांनदींप्रति ॥ ११ ॥
तत्रस्नात्वातुदेवेशोमहेशंतमपूजयत् ॥ स्नानाच्चपूजनादेवसंतुष्टःश्रीमहेश्वरः ॥ १२ ॥ महादेवउवाच ॥ यंयंप्रार्थयसेनित्यंतत्सर्वंहिददाम्यहम् ॥
श्रुत्वावाक्यंतुदेवेशोह्युवाचपरमंवचः ॥ १३ ॥ इन्द्रउवाच ॥ त्वंनाथःसर्वलोकानांत्वमेवकारणंपरम् ॥ त्वंहिविश्वेश्वरोदेवःसर्वदालक्ष्यसेमया ॥
॥१४॥ यदित्वंमेप्रसन्नोऽसिविश्वेश्वरसुरेश्वर ॥ वृत्रंजहिमहादेवएषकामोमहान्मम ॥१५॥ महादेवउवाच ॥ तववाक्यात्तुदेवेशवृत्रोऽसौनिहतोमया॥
मयायदीयतेशस्त्रंतद्गृह्णीष्वसुरेश्वर ॥ १६ ॥ तेनैवचास्त्रयोगेणहनिष्यसिनसंशयः ॥ १७ ॥ इन्द्रउवाच ॥ किमस्त्रंवदविश्वेशयेनवृत्रंहिहन्म्य
हम् ॥ वज्रादप्यधिकंकिंतन्निर्मितंतुत्वयाकदा ॥१८॥ महादेवउवाच ॥ इदंपाशुपतंह्यस्त्रंनिर्मितंतुमयापुरा ॥ नदत्तंकस्यचिच्छक्रतवार्थेरक्षितंमया ॥
॥ १९ ॥ अत्रस्नातंत्वयादेवपूजनंवैत्वयाकृतम् ॥ अतोगृह्णीष्वमेशस्त्रंयेनवृत्रंहनिष्यसि ॥२०॥ श्रीमहेशप्रसादाच्चप्राप्तंमघवताततः ॥ तेनपाशुपता
स्त्रेणहतोवृत्रोमहाबलः ॥२१॥ तत्सर्वमत्रसंजातंदुर्धर्षेशप्रसादतः ॥ स्नानमात्रात्तुदेवेशिपूजनादेवसाम्प्रतम् ॥२२॥ तीर्थप्रभावात्संप्राप्तंसत्यंसत्यंवरा
नने ॥ एवंज्ञात्वातुदेवेशितत्रैवस्नानमाचरेत् ॥ दर्शनंतुमहेशस्यसर्वपापप्रणाशनम् ॥ २३ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०दुर्धर्षेश्वरमाहात्म्यं
नामत्रिपञ्चाशदधिकशततमोऽध्यायः ॥१५३॥ साभ्रमत्यास्तटेगुप्तंतीर्थंपरमपावनम् ॥ खड्गधारमितिख्यातंकलौगुप्तंभविष्यति ॥ १ ॥ यत्रप्रसङ्गतः
स्नात्वापीत्वावापोयदृच्छया ॥ सर्वपापविनिर्मुक्तोरुद्रलोकेमहीयते ॥ २ ॥ यत्रसाभ्रमतीपुण्याकश्यपानुगतासती ॥ रुद्रेणहिजटाजूटेधृतापाताल
गामिनी ॥ ३ ॥ खड्गधारेतिवैनाम्नारुद्रस्तत्रैवसंस्थितः ॥ यत्रस्नात्वादिवंयाताःपापिनोऽपिसुरेश्वरि ॥४॥ अत्रैवोदाहरन्तीममितिहासंपुरातनम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किरातेनकृतंयच्चव्रतंपरमदुष्करम् ॥ ५ ॥ पार्वत्युवाच ॥ किंनामावैकिरातोऽभूत्किंतेनव्रतमाहितम् ॥ तत्सर्वंश्रोतुमिच्छामियाथातथ्येनकथ्य
ताम् ॥ ६ ॥ नह्यन्योविद्यतेलोकेत्वांविनावदतांवरः ॥ तस्मात्कथयभोदेवसर्वंशुश्रूषवेहितम् ॥ ७ ॥ महादेवउवाच ॥ आसीत्पुरामहारौद्रश्चण्डो
नामदुरात्मवान् ॥ क्रूरःशठोनैष्कृतिकोभूतानांचभयावहः ॥ ८ ॥ जालेनमत्स्यान्दुष्टात्माघातयत्यनिशंततः ॥ भल्लैर्मृगाञ्छ्वापदांश्चकृष्णसारान्स
शल्लकान् ॥ ९ ॥ खगान्नानाविधांश्चैवविद्धाकांश्चित्प्रपातयेत् ॥ पक्षिणोघातयन्क्रुद्धोबर्हिणश्चविशेषतः ॥ १० ॥ लुब्धकोहिमहापापोदुष्टो
दुष्टजनप्रियः ॥ भार्यातथाविधातस्यपुंश्चलीचमहाभया ॥ ११ ॥ एवंविहरतस्तस्यबहुकालोव्यवर्त्तत ॥ एकदानिशिपापीयाञ्छ्रीवृक्षोपरि
संस्थितः ॥ १२ ॥ कोलंहन्तुंधनुष्पाणिःशरंसंयोज्यकार्मुके ॥ एवंनिशागतातस्यजाग्रतोनिमिषस्यहि ॥ माघमासेसितायांवैचतुर्दश्यांनगा
त्मजे ॥१३॥ श्रीवृक्षपत्राणिबहूनितत्रसंछेदयामासरुषान्वितोऽपि ॥ श्रीवृक्षमूलेपरिवर्त्तमानंलिङ्गंचतस्योपरितानिपेतुः ॥ १४ ॥ श्रीवृक्षपर्णानिचदैव
योगाज्जातंचसर्वंशिवपूजनंतत् ॥ १५ ॥ गण्डूपकारिणातेनस्नापनंचमहत्कृतम् ॥ अज्ञानिनाचतेनैवपुष्कसेनदुरात्मना ॥ १६ ॥ माघमासे
ऽसितेपक्षेचतुर्दश्यांविधूदये ॥ पुष्कसोहिदुराचारोनिष्पन्नोगतकल्मषः ॥ १७ ॥ तस्यभार्याप्रचण्डाचआगतातस्यसन्निधौ ॥ निराशाच
निराहारायत्रासौपुष्कसःस्थितः ॥ १८ ॥ नप्राप्तःशूकरस्तेनमृगोऽपिमहिषोऽपिवा ॥ अशनार्थंचतस्यैवअन्नमादायभामिनी ॥ १९ ॥ तेन
दृष्टाप्रचण्डासाआयान्तीक्रूरलोचना ॥ सातस्यभार्यानद्यांवैजलमध्येपपातह ॥ २० ॥ तावत्तयोक्तश्चण्डात्माएहिशीघ्रंचभक्षय ॥ समानीतं
त्वदर्थंचमत्स्यमांसंमयाधुना ॥ २१ ॥ कृतंकिंमूढपूर्वेद्युर्मांसंपार्श्वेनदृश्यते ॥ नाशितंचत्वयामूढकुटुम्बंलङ्घतेतव ॥ २२ ॥ एतच्छ्रुत्वातुवचनंचण्डा
याश्चण्डरूपवान् ॥ शिवरात्र्युपवासेनरात्रौजागरणेनच ॥ २३ ॥ शुद्धान्तःकरणोजातःस्नातुंनद्यांशुचिव्रतः ॥ यावत्स्नातिसदुष्टात्माताव
च्छ्वातत्रचागतः ॥ २४ ॥ शुनातदाभक्षितंचसर्वंमांसंसुरेश्वरि ॥ चण्डाप्रकुपितातंचश्वानंहन्तुमुपस्थिता ॥ ५ ॥ निवारिताहिचण्डेनंचण्डा
प्रकुपितातदा ॥ नहन्तव्यस्त्वयाचैषकिमनेनाशुभंकृतम् ॥ २६ ॥ तयोक्तंभक्षितंचान्नमनेनैवदुरात्मना ॥ किंत्वंभक्षयितामूढभवितायद्बुभु
क्षितः ॥ २७ ॥ पुष्कसउवाच ॥ यच्छुनाभक्षितंचान्नंतेनाहंपरितोषितः ॥ किमनेनशरीरेणनश्वरेणगतायुषा ॥ २८ ॥ येपुष्यन्ति
शरीरंवैसर्वभावेनभामिनि ॥ मूढास्तेपापिनोज्ञयालोकद्वयबहिष्कृताः ॥ २९ ॥ तस्मान्मानंपरित्यज्यकामंचापिदुरात्मताम् ॥ स्वस्थाभाव
विमर्शेनतत्त्वबुद्ध्यास्थिराभव ॥ ३० ॥ अहमेतच्छरीरंवैखड्गधारव्रतेनच ॥ त्यक्ष्याम्यद्यवरारोहेकिंचिरंजीवनेनमे ॥ ३१ ॥ महादेवउवाच ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इत्युक्त्वाखड्गमाकृष्ययावद्धिनत्तिकंस्वकम् ॥ आगताश्चगणास्तावद्बहवःशिवनोदिताः ॥ ३२ ॥ विमानानिबहून्यत्रआगतानितदन्तिके ॥ दृष्ट्वा
सचैवतान्येवंविमानानिगणांस्तथा ॥ उवाचपरयाभक्त्यापुष्कसोऽपिचतान्प्रति ॥ ३३ ॥ पुष्कसउवाच ॥ कस्मात्समागतायूयंसर्वेरुद्राक्ष
धारिणः ॥ सर्वेस्फटिकसङ्काशाःसर्वेचन्द्रार्धशेखराः ॥ ३४ ॥ कपर्दिनश्चर्मपरीतवाससोभुजङ्गभोगैःकृतहारभूषणाः ॥ श्रियान्वितारुद्र
समानवीर्यायथातथंभोवदतोचितंमम ॥३५॥ पुष्कसेनतदापृष्टाऊचुस्तेरुद्रपार्षदाः ॥ ३६ ॥ गणाऊचुः ॥ प्रेषिताःस्मोवयंचण्डशिवेनपरमेष्ठिना ॥
आगच्छत्वरितोभूत्वासस्त्रीकोयानमारुह ॥३७॥ लिङ्गार्चनंकृतंयच्चत्वयारात्रौशिवस्यच ॥ तेनकर्मविपाकेनप्राप्तोऽसिपरमांगतिम् ॥३८॥ तथोक्तो
वीरभद्रेणउवाचप्रहसन्निव ॥ किंमयासुकृतंचीर्णपापिनापुष्कसेनहि ॥ ३९ ॥ मृगयारसिकेनैवमूढेनचदुरात्मना ॥ पापाचारोह्यहंनित्यं
कथंस्वर्गेवसाम्यहम् ॥ ४० ॥ कथंलिङ्गार्चनंचाद्यकृतमस्तितदुच्यताम् ॥ परंकौतुकमापन्नःपृच्छामिकृपयावद ॥ ४१ ॥ वीरभद्रउवाच ॥
देवदेवोमहादेवोयोगङ्गाधरसंज्ञकः ॥ परितुष्टोऽद्यतेचण्डसभार्यस्यउमापतिः ॥ ४२ ॥ प्रासङ्गिकंत्वयाचाद्यकृतमर्चनमेवच ॥ कोलंनिरीक्ष
माणेनबिल्वपत्राणिचैवहि ॥ ४३ ॥ छेदितानित्वयाचण्डपतितानितदैवहि ॥ लिङ्गस्यमस्तकेतानितेनत्वंसुकृतीप्रभो ॥ ४४ ॥ तवैवं
जागरोजातोमहावृक्षोपरिध्रुवम् ॥ तेनैवजागरेणैवतुतोषजगदीश्वरः ॥ ४५ ॥ छलेनैवमहाभागकोलसंदर्शनेनहि ॥ शिवरात्रिदिनंव्याधप्रसङ्गे
नाप्युपोषितम् ॥ ४६ ॥ तेनोपवासेनचजागरेणतुष्टोह्यसौदेववरोमहात्मा ॥ तवप्रसादायमहानुभावोददातिसर्वान्वरदोवरांश्च ॥ ४७ ॥ एव
मुक्तस्तदातेनवीरभद्रेणधीमता ॥ पुष्कसोऽपिविमानाग्र्यमारुरोहचपश्यताम् ॥ ४८ ॥ गणानांदेवतानांचसर्वेषांप्रणिनामपि ॥ तदादुन्दु
भयोनेदुर्भेरीतूर्याण्यनेकशः ॥ ४९ ॥ वीणावेणुमृदङ्गानिलास्यनाट्ययुतानिच ॥ जगुर्गन्धर्वपतयोननृतुश्चाप्सरोगणाः ॥ ५० ॥ चामरैर्वीज्य
मानोहिच्छत्रैश्चविविधैरपि ॥ महोत्सवेनमहताह्यानीतःशिवसन्निधौ ॥ ५१ ॥ पुष्कसोऽपितदाप्राप्तस्तीर्थस्नानशिवार्चनात् ॥ किंपुनःश्रद्धया
भक्त्याशिवायपरमात्मने ॥ ५२ ॥ पुष्पादिकंफलंगन्धंताम्बूलाक्षतमेवच ॥ येप्रयच्छन्तिलोकेऽस्मिंस्तेरुद्रानात्रसंशयः ॥ ५३ ॥ महादेव
उवाच ॥ तदाप्रभृतितत्तीर्थंखड्गधारेतिविश्रुतम् ॥ एतत्तीर्थंकलौगुप्तंभविष्यतिसुरेश्वरि ॥ ५४ ॥ माघमासेऽथवैशाखेकार्त्तिक्यांचविशेषतः ॥
स्नानंयेचप्रकुर्वन्तिमुक्तास्तेनगनन्दिनि ॥ ५५ ॥ वसिष्ठोवामदेवश्चभरद्वाजोऽथगौतमः ॥ स्नानार्थेवैसमायान्तिदेवंद्रष्टुंपिनाकिनम् ॥ ५६ ॥
त्रियुगेवर्त्ततेलिङ्गंकलौनैवतुपार्वति ॥ विश्वामित्रेणऋषिणादत्तशापोह्यहंतदा ॥ ५७ ॥ पार्वत्युवाच ॥ कथंशापस्तुऋषिणादत्तश्चैवसुरेश्वर ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तदहंश्रोतुमिच्छामित्वत्तोदेवनसंशयः ॥ ५८ ॥ महादेवउवाच ॥ एकस्मिन्समयेदेविविश्वामित्रोमहातपाः ॥ आगतःखड्गधारेऽस्मिंस्तीर्थेवै
परमाद्भुते ॥ ५९ ॥ साभ्रमत्यांकृतस्नानोदर्शनंकृतवान्मम ॥ तत्रतिष्ठतिनित्यंवैपूजांकुर्वन्ननेकधा ॥ ६० ॥ तत्रकोऽपिमहादुष्टःकौलिकःपापरूप
धृत् ॥ मांसंदत्तंतदातेनशिवस्योपरिभामिनि ॥ ६१ ॥ दृष्ट्वातदपिमांसंचविश्वामित्रोऽथवैपुनः ॥ अब्रवीच्चतदातत्रदुष्कृतंपापिनाकृतम्॥ ६२ ॥
नदत्तस्तस्यदण्डोहिशर्वेणपरमात्मना ॥ तस्मादहंहिनिश्चित्यशापंदास्येनसंशयः ॥ ६३ ॥ विचार्यैवंतदातेनशप्तोऽहंदेविवैतदा ॥ अस्मिन्कलि
युगेघोरेगुप्तस्त्वंभवसर्वथा ॥ ६४ ॥ इतिदत्त्वाथवैशापंगतवान्मुनिसत्तमः ॥ तदाप्रभृतिभोदेविगुप्तोऽहमृषिशापतः ॥ ६५ ॥ मम
स्थानेविशेषेणपूजनंकुरुतेयदि ॥ तेषांहिदुरितंयच्चनश्यतेतत्क्षणादपि ॥ ६६ ॥ मृन्मयींमामकींमूर्तिंकृत्वायेपूजयन्तिवै ॥ अत्रस्थाने
विशेषेणमामकेतुवसन्तिहि ॥ ६७ ॥ खड्गधारेश्वरइतिनाम्नाख्यातःकलौयुगे ॥ कृतेवैमन्दिरंनामत्रेतायांगौरवःस्मृतः ॥ ६८ ॥ द्वापरेविश्व
विख्यातःकलौखड्गेश्वरःस्मृतः ॥ ॥ दक्षिणंभागमाश्रित्यममस्थानंसुरेश्वरि ॥ ६९ ॥ इतिज्ञात्वातुतत्रैवकृत्वामूर्तिंसदाबुधः ॥ पूजनंकुरुतेनित्यं
वाञ्छितंफलमाप्नुयात्॥७०॥धर्मार्थकाममोक्षांश्चलभतेमानवोभुवि॥धूपंदीपंचनैवेद्यंतथावैचन्दनादिकम् ॥ ७१ ॥ येऽर्पयन्तिहिदेवेशिलोकनाथेमहे
श्वरि ॥ नदुःखंतुभवेत्तेषांसत्यंसत्यंवरानने ॥७२॥इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०खड्गधारेश्वरमाहात्म्यंनामचतुष्पञ्चाशदधिकशततमोऽध्यायः॥
॥ १५४ ॥ महादेवउवाच ॥ खड्गधाराद्दक्षिणतस्तीर्थंपरमपावनम् ॥ दुग्धेश्वरमितिप्रोक्तंसर्वपापप्रणाशनम् ॥ १ ॥ यस्मिंस्तीर्थेनरःस्नात्वा
दृष्ट्वादुग्धेश्वरंहरम्॥पुमान्सद्योविमुच्येतदुःखात्पापसमुद्भवात्॥२॥दधीचिनातपस्तप्तंसाभ्रमत्यास्तटेशुभे ॥ चन्द्रभागामहापुण्यागङ्गयासंगतायतः॥
॥ ३ ॥ तत्रस्नानंचदानंचजपःपूजातपस्तथा ॥ सर्वमक्षयतांयातिदुग्धतीर्थप्रभावतः ॥ ४ ॥ पार्वत्युवाच ॥ दुग्धेश्वरसमुत्पत्तिंश्रोतु
मिच्छामिवैप्रभो ॥ महिमादुग्धतीर्थस्यकथ्यतांचसुरेश्वर ॥ ५ ॥ महादेवउवाच ॥ पुरादैवासुरेयुद्धेदैत्यैर्देवाःपराजिताः ॥ पलायनपराभूत्वा
दधीचाश्रममागताः ॥ ६ ॥ मुक्त्वातत्रायुधान्येवगतादेवादिशोदश ॥ पश्चात्कोलाहलश्रुत्वादधीचोदैत्यसंभवम् ॥ ७ ॥ पीतवांस्तानि
शस्त्राणिजलेनाप्लाव्यभार्गवः ॥ कालेनतेसुराःसर्वअस्त्राण्यादातुमुत्सुकाः ॥८॥ गुरुणासहिताःसर्वेपरस्परमुदान्विताः ॥ नकुलैःसहसर्पाश्चक्रीडन्तेते
परस्परम् ॥ ९ ॥ एवंविधान्यनेकानिसाश्चर्याणितदाश्रमे ॥ पश्यन्तोविबुधाःसर्वेविस्मयंपरमंगताः ॥ १० ॥ ददृशुस्तेमुनिवरमासनोपरि
संस्थितम् ॥ यत्रसाभ्रमतीपुण्यामिलिताचन्द्रभागया ॥ ११ ॥ वर्चसापरमेणैवभ्राजमानंयथारविम् ॥ विभावसुद्वितीयंचसुवर्चोभार्ययासह ॥

CC-0. In Public Domain. Digitization by eGangotri

॥ १२ ॥ यथाब्रह्माहिसावित्र्यातथासौमुनिसत्तमः ॥ दृष्टःसुरवरैःसर्वैःप्रणिपातपुरःसरम् ॥ १३ ॥ ऊचिरेतंतदादेवाबृहस्पतिपुरोगमाः ॥
त्वंदातात्रिषुलोकेषुविदितःपूर्वमेवच ॥ १४ ॥ याच्ञार्थंचवयंसर्वेत्वत्सकाशंसमागताः ॥ भयभीतावयंसर्वेऽस्त्राणिनोदातुमर्हसि ॥ १५ ॥
इत्युक्तोमुनिवर्योऽसौदेवानाहमहामतिः ॥ पीतानितानिभोदेवाजलेनाप्लाव्यमन्त्रतः ॥ १६ ॥ ततोदेवाब्रुवन्विप्रंदैत्यानांनिधनायच ॥ देह्यस्थीनि
त्वराविप्रदत्तानीतिद्विजोऽवदत्॥१७॥इत्युक्त्वातान्स्वपत्नींसंप्रेषयामासचाश्रमम्॥तदोवाचद्विजोहृष्टोदेवान्स्मित्वामहामतिः॥१८॥पीतानितानिभो
देवागृह्णीध्वंचयथातथम् ॥ इत्युक्त्वाचद्विजोदेवियोगमास्थाययोगवित्॥१९॥ततोऽब्रुवन्सुराविप्रंस्मयन्तंछलयागिरा ॥ त्वयिजीवतिभोब्रह्मन्कुतो
ऽस्थीनिलभामहे ॥ २० ॥ प्रहस्योवाचविप्रर्षिस्तिष्ठध्वंक्षणमेकतः ॥ स्वयमेवचभोदेवास्त्यक्ष्याम्यद्यकलेवरम् ॥ २१ ॥ इत्युक्त्वासद्विजोदेवियोग
मास्थाययोगवित् ॥ ब्रह्मलोकंगतःसद्योयतोनावर्त्ततेपुनः ॥ २२॥ ततःसर्वेसुरास्तत्रदृष्ट्वातंविलयंगतम्॥चिन्तयन्तःसुरगणाःकथंचविशसामहे॥२३॥
सुरभिंचाह्वयामासतामुवाचशचीपतिः ॥ कलेवरंद्विजन्द्रस्यलीढ्वत्वंवचसामम ॥ २४ ॥ तथेतिचवचोमत्वातत्क्षणादेवलिह्यतत् ॥ निर्मांसंचकृतं
सद्यस्तयाधेन्वाकलेवरम् ॥ २५ ॥ जगृहुस्तानिचास्थीनिचक्रुःशस्त्राणिवैसुराः ॥ तस्यवंशोद्भवंत्वस्त्रमासीद्ब्रह्मशिरस्तथा ॥ २६ ॥ शस्त्राण्यस्त्राणि
कृत्वातेमहाबलपराक्रमाः ॥ययुर्देवास्त्वरायुक्तावृत्रघातनतत्पराः ॥ २७ ॥ ततःसुवर्चास्तुदधीचपत्नीसंप्रेषितायासुरकार्यसिद्धये ॥ विलोकयामास
समेत्यतत्रमृतंपतिंदेहमथोविशस्तम् ॥ २८ ॥ ज्ञात्वातुतत्सर्वमथोसुराणांकृत्यंतदानींचचुकोपसाध्वी ॥ ददौतदाशापमतीवरुष्टातदासुवर्चाऋषि
वर्यपत्नी ॥ २९ ॥ अहोसुरादुष्टतराश्चसर्वेह्यनेकशताश्चतथैवलुब्धाः ॥ तस्मात्तुसर्वेह्यप्रजाभवन्तुसेन्द्राःसुराद्यप्रभृतीत्युवाच॥३०॥ एवंशापंददौतेषां
सुराणांसातपस्विनी ॥ उपविश्याश्वत्थमूलेसाश्रमत्यास्तटेस्थिता ॥ ३१ ॥ सगर्भासासतीसाध्वीस्वोदरंविददारह ॥ निर्गतोजठराद्गर्भोदधीचस्य
महात्मनः ॥३२॥ साक्षाद्रुद्रावतारोऽसौपिप्पलादोमहाप्रभुः ॥ प्रहस्यजननीगर्भमुवाचवचनंमहत् ॥३३॥ सुवर्चास्तंपिप्पलादंचिरंतिष्ठास्यसन्निधौ॥
अश्वत्थस्यमहाभागसर्वेषांशुभदोभव ॥ ३४ ॥ तथैवभाषमाणासासुवर्चास्तनयंप्रति ॥ पतिंप्रत्यागमत्साध्वीपरमेणसमाधिना ॥ ३५ ॥ एवंदधीच
पत्नीसापतिनास्वर्गमास्थिता ॥ तेदेवाःकृतशस्त्रास्त्रादैत्यान्प्रतिसमुत्सुकाः ॥ ३६ ॥ आजग्मुश्चेन्द्रमुख्याश्चमहाबलपराक्रमाः ॥ कामधेनुःप्रसुस्राव
ययौयत्रद्विजक्षयः॥३७॥मुनेःप्रभावतोदुग्धंलिङ्गरूपंव्यजायत ॥ दुग्धेश्वरमितिख्यातंदेविसाभ्रमतीतटे ॥३८॥ तदाप्रभृतितीर्थंहितन्नाम्नाप्रथितंभुवि
अतुलंयस्यमाहात्म्यंश्रवणात्पातकापहम् ॥ ३९ ॥ येशृण्वन्तिनराभक्त्यादुग्धेश्वरसमुद्भवम् ॥ तेऽपिपापविनिर्मुक्तायान्तिरुद्रपदंमहत् ॥ ४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०दुग्धेश्वरमाहात्म्यंनामपञ्चपञ्चाशदधिकशततमोऽध्यायः॥१५५॥ महादेवउवाच ॥ दुग्धेश्वरस्यपूर्वेतुतीर्थंपरम
पावनम् ॥ चन्द्रभागेतिवैनाम्नानदीयत्रतुसंगता ॥ १ ॥ तत्रचन्द्रेश्वरोदेवोनित्यंतिष्ठतिपुण्यदः ॥ योहरःसर्वदाव्यापीलोकानांसुखदो
महान् ॥ २ ॥ अत्रस्नानंप्रकुर्वन्तिध्यानंकुर्वन्तिनित्यशः ॥ तत्फलंप्राप्नुयुस्तेवैसाश्रमत्यांशिवार्चनात् ॥ ३ ॥ सामेनात्रतपस्तप्तंकालंबहुतरंकिल ॥
तस्माच्चन्द्रेश्वरोनामस्थापितोवैमहेश्वरः ॥ ४ ॥ शुक्रेणापितपस्तप्तंचन्द्रभागासमीपतः ॥ अतस्तीर्थाधिकंतीर्थंपावनंसर्वदाभुवि ॥ ५ ॥ कलौ
गुप्तंतुऋषिणाकारितंवैसुरेश्वरि ॥ यत्रहेममयंलिङ्गंदृश्यतेनात्रसंशयः ॥ ६ ॥ अत्रस्नात्वाचपीत्वाचकृत्वावैशिवपूजनम् ॥ येनराःसंगमिष्यन्तिधर्मा
र्थंल्लँभन्तिते ॥७॥ वृषोत्सर्गादिकंकर्मयेकुर्वन्तिविशेषतः ॥ भुक्त्वास्वर्गपदंतेवैपश्चाद्यान्तिहरालयम् ॥ ८ ॥ स्नानार्थेप्रत्यहंदेविचन्द्रभाग
समीपतः ॥ आगमिष्यन्तियेलोकास्तेज्ञेयाःपुण्यभागिनः ॥ ९ ॥ गत्वापरतटेयेवैह्यर्चयन्तिचतंशिवम् ॥ चन्द्रेश्वरेतिनामानंश्रीहरंपापकृन्तनम् ॥
॥ १० ॥ अत्रगत्वाविशेषेणरुद्रजाप्यादिकंतथा ॥ येकुर्वन्तिनरश्रेष्ठास्तेज्ञेयाःशिवरूपिणः ॥ ११ ॥ सर्वदातुसुरश्रेष्ठेयेऽत्रस्नानंप्रकुर्वते ॥ ते
नराविष्णुरूपाहिविज्ञेयानात्रसंशयः ॥ १२ ॥ येऽत्रश्राद्धंप्रकुर्वन्तितिलपिण्डेनवापुनः ॥ तेऽपिविष्णुपदंयान्तिपिण्डदानप्रभावतः ॥१३॥ अत्रदानं
प्रकर्त्तव्यंस्नानंवैविधिपूर्वकम् ॥ यत्रस्नात्वातुमुच्यन्तेब्रह्महत्यादिकिल्बिषात ॥ १४ ॥ तटेऽस्मिन्येविशेषेणवटंचारोपयन्तिते ॥ मृताःशिवपदं
यान्तियावच्चन्द्रदिवाकरौ ॥ १५ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०उमा०चन्द्रेश्वरचन्द्रभागामहिमानामषट्पञ्चाशदधिकशततमोऽध्यायः
॥ १५६ ॥ महादेवउवाच ॥ दुग्धेश्वरसमीपेतुतीर्थंचातीवपावनम् ॥ रम्यंततिपिप्पलादस्यनाम्नावैप्रथितंभुवि ॥ १ ॥ यत्रकृत्वातपःपूर्वंमातुर्वचनतो
मुनिः ॥ उत्पादयामासकृत्यांवडवानलसम्मिताम् ॥ २ ॥ पितुरानृण्यमन्विच्छन्दधीचस्यमहात्मनः ॥ तत्रस्नात्वाचपीत्वाचब्रह्महत्यांव्यपोहति
॥३॥साभ्रमत्यास्तटेगुप्तंपिप्पलादंसुरेश्वरम् ॥ तत्रस्नात्वातुभोदेविमुक्तिभागीभवेन्नरः ॥४॥ आरोपणंपिप्पलानांकर्त्तव्यंविधिपूर्वकम् ॥ कृतेसतिमहा
देविमुच्यतेकर्मबन्धनात् ॥ ५ ॥ पार्वत्युवाच ॥ किमर्थंसातुकृत्यावैचोत्पन्नातांनिबोधय ॥ तयावैकृत्ययापूर्वंकिंकृतंवदमेप्रभो ॥ ६ ॥ येनपुत्रेण
सानीतापितुरानृण्यकारणात् ॥ ७ ॥ महादेवउवाच ॥ दधीचऋषिवर्योऽसौह्यागतस्तपःकारणात् ॥ अत्रतेनमहत्तप्तमृषिणापरमात्मना ॥ ८ ॥ तत्र
कोलासुरोनामविघ्नार्थंवैसमागतः ॥ तेनविघ्नंबहुतरंकृतंवैनात्रसंशयः ॥९॥ तद्दृष्टंतुसुपुत्रेणकहोडेनचधीमता ॥ कृत्याह्युत्पादितातत्रहननार्थंसुरेश्वरि ॥
॥ १० ॥ तयावैनिहतोदैत्यःकोलोनाममहासुरः ॥ तस्मात्तीर्थंमहज्जातंकलौगुप्तंतुपार्वति ॥ ११ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०उमा०पिप्प

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लादतीर्थनामसप्तपञ्चाशदधिकशततमोऽध्यायः ॥ १५७॥ महादेवउवाच ॥ पिप्पलादात्ततस्तीर्थात्पिचुमन्दार्कमुत्तमम् ॥ तीर्थंसाभ्रमतीतीरेव्याधि
दौर्गन्ध्यनाशनम् ॥ १ ॥ पुराकोलाहलेयुद्धेदानवैर्निर्जिताःसुराः ॥ वृक्षेषुविविशुस्तत्रसूक्ष्माःप्राणपरीप्सया ॥ २ ॥ तत्रबिल्वेस्थितःशम्भुरश्वत्थे
हरिरव्ययः ॥ शिरीषेऽभूत्सहस्राक्षोनिम्बेदेवःप्रभाकरः ॥ ३ ॥ एवमादियथायोग्यंवृक्षेषुविबुधास्तथा ॥ यावत्कोलाहलोदैत्योविष्णुनाप्रभविष्णुना॥
॥ ४ ॥ हतोमहाहवेतावत्स्थितास्तेवृक्षमाश्रिताः ॥ येनयेनहियोवृक्षोविबुधेनसमाश्रितः ॥ ५ ॥ सतुतन्मयतांयातस्तस्मात्तंनविनाशयेत् ॥ इति
सूर्यस्यविश्रामात्पिचुमन्दार्कमुत्तमम् ॥ ६ ॥ तीर्थंरोगहरंस्नानात्साभ्रमत्यास्तटेऽभवत् ॥ अत्रगत्वाविशेषेणतंरविंयदिपूजयेत् ॥७॥ पूजयित्वासुर
श्रेष्ठेलभतेवाञ्छितंफलम् ॥ अत्रद्वादशनामानिगत्वायेवैपठन्तिच ॥८॥ तेनराःपुण्यकर्माणोयावज्जीवंनसंशयः ॥ आदित्यंभास्करंभानुंरविंविश्वप्रका
शकम् ॥ ९ ॥ तीक्ष्णांशुंचैवमार्तण्डंसूर्यंचैवप्रभाकरम् ॥ विभावसुंसहस्राक्षंतथापूषणमेवच ॥ १० ॥ एवंद्वादशनामानियःपठेत्प्रयतःसुधीः ॥ धनं
वैपुत्रपौत्रांश्चलभतेनगनन्दिनि ॥ ११ ॥ एकैकंनामआश्रित्ययोऽर्चयेतनरोभुवि ॥ सप्तजन्मभवेद्विप्रोधनाढ्योवेदपारगः ॥ १२॥ क्षत्रियोलभतेराज्यं
वैश्योधनमवाप्नुयात् ॥ शूद्रोवैलभतेभक्तिंतस्मात्सूक्तंपरंजपेत् ॥ १३ ॥ निम्बार्कतःपरंतीर्थंनभूतंनभविष्यति ॥ अत्रस्नात्वाचपीत्वाचमुक्तिभागी
भवेद्ध्रुवम् ॥ १४ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०उमा०निम्बार्कदेवतीर्थनामाष्टपञ्चाशदधिकशततमोऽध्यायः ॥ १५८ ॥ महादेवउवाच ॥
तस्माद्दूरतरेदेविसिद्धक्षेत्रमनुत्तमम् ॥ अनिरुद्धोवृतःपूर्वमुषार्थेचित्रलेखया ॥ १ ॥ नीतोबाणासुरपुरंतिष्ठतिस्मगृहेपुरा ॥ पाशैर्बाणैश्चसंरुद्धःकोट
राक्षीमथास्मरत् ॥ २ ॥ साक्षाद्यावैष्णवीशक्तिःसदारक्षणतत्परा ॥ सेयंदेवीनदीतीरेकृष्णेनात्रप्रतिष्ठिता ॥ ३ ॥ जित्वाबाणासुरंसङ्ख्येद्वारकांप्रति
गच्छता ॥ अनिरुद्धस्यस्तोत्रेणसाक्षात्सांनिध्यमागता ॥ ४ ॥ तत्रतीर्थेनरःस्नात्वावर्षमेकंप्रयत्नतः ॥ कोटराक्षीमुखंदृष्ट्वालक्ष्मीमाप्नोतिपुष्कलाम्॥
॥ ५ ॥ सिद्धतीर्थेनरःस्नात्वादृष्ट्वाकोटरवासिनीम् ॥ सिंहयुक्तेनयानेनरुद्रलोकेमहीयते ॥ ६ ॥ यस्यांवैस्मरणादेवमुक्तःसोऽपिवरानने ॥ अतोयेऽत्र
प्रगच्छन्तितेनरामुक्तिभागिनः ॥ ७ ॥ तत्रगत्वाविशेषेणस्नानंकृत्वातुपार्वति ॥ कोटराक्ष्यास्ततःस्तोत्रंपठेद्वैबुद्धिपूर्वकम् ॥ ८ ॥ कोटराक्षीविश्वरूपा
महामायाबलाधिका ॥ त्रिपुरात्रिपुरघ्नीचशिवावैशिवरूपिणी ॥ ९ ॥ कन्यासारस्वतीप्रोक्तादुर्गादुर्गतिहारिणी ॥ भैरवीभैरवाक्षीचलक्ष्मीदेवीजन
प्रिया ॥ १० ॥ एतानिबहुधोक्तानिनामानिचसुरेश्वरि ॥ येपठन्तिनरश्रेष्ठास्तेयान्तिशिवसन्निधौ ॥११॥ अनिरुद्धकृतंस्तोत्रंयेजपन्तिमनीषिणः ॥
मुच्यन्तेकष्टबन्धात्तेसत्यंसत्यंवरानने ॥१२॥ तीर्थानांपरमंतीर्थंकोटरानिर्मितंभुवि ॥ दर्शनादेवनश्यन्तिपापानांराशयस्तथा॥१३॥इतिश्रीपाद्मेमहा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुराणेपद्मप०उत्तर०कोटरातीर्थनामैकोनषष्ट्यधिकशततमोऽध्यायः ॥ १५९॥ महादेवउवाच ॥ अस्मात्तीर्थात्परंतीर्थंतीर्थराजेतिविश्रुतम् ॥ सततनद्यो
वहन्त्यत्रचन्दनोदकमिश्रिताः ॥१॥ अन्यतीर्थाच्छतगुणंस्नानंचात्रविशिष्यते ॥ देवानांप्रवरोदेवोयत्रास्तेवामनःस्वयम् ॥२॥ द्वादश्यांमाघमासस्य
दद्याद्यस्तिलधेनुकाम् ॥ विमुक्तःसर्वपापेभ्यःकुलानांतारयेच्छतम् ॥३॥ पानीयमप्यत्रतिलैर्विमिश्रंदद्यात्पितृभ्यःप्रयतोमनुष्यः ॥ श्राद्धंकृतंतेनसमाः
सहस्रंरहस्यमेतत्पितरोवदन्ति॥४॥ तीर्थेऽस्मिन्भोजयेद्योवैब्राह्मणान्गुडपायसैः ॥एकस्मिन्भोजितेविप्रेसहस्रंभोजितंभवेत्॥५॥ इतिश्रीपाद्मेमहापुराणे
पद्मप०उत्तर०वामनतीर्थनामषष्ट्यधिकशततमोऽध्यायः ॥१६०॥महादेवउवाच॥सोमतीर्थंततोगच्छेद्गुप्तंसाभ्रमतीतटे॥ पातालात्तत्रनिर्गत्यकालाग्निर
भवद्भवः॥१॥सोमतीर्थेनरःस्नात्वादृष्ट्वासोमेश्वरंशिवम् ॥सोमपानफलंसाक्षाद्भवतीतिनसंशयः ॥२॥रूपवान्सुभगोभोगीसर्वशास्त्रविशारदः॥नरोभवति
लोकेऽस्मिन्परत्रचशिवंव्रजेत् ॥३॥अत्रेतिहासंवक्ष्यामिशृणुसुन्दरितत्त्वतः ॥यंश्रुत्वामुच्यतेचात्रब्रह्महत्यादिपातकात्॥४॥कौषीतकेनऋषिणातपस्तप्तं
विशेषतः ॥ निराहारःसर्वैजातःपर्णाशनरतःपरम् ॥ ५ ॥ वायुभक्षस्तपःकुर्वन्नात्मध्यानपरायणः ॥ एवंबहुयुगंतत्रतप्तंतेनमहत्तपः ॥ ६ ॥
कदाचिद्दैवयोगेनसुप्रसन्नोमहेश्वरः ॥ यद्यत्प्रार्थयसेविप्रतत्सर्वंप्रददाम्यहम् ॥ ७ ॥ कौषीतकउवाच ॥ तवप्रसादाद्देवेशअत्रलिङ्गंप्रजायताम् ॥
अत्रसोमेश्वरइतिख्यातोदेवोभवेद्ध्रुवम् ॥ ८ ॥ यत्रस्नात्वाचभुक्त्वाचवाञ्छितंफलमाप्नुयात् ॥ अत्रस्थानेविशेषेणरुद्रजाप्यादिकंयदि ॥ ९ ॥
कुर्वन्तियेनरश्रेष्ठाधर्मानर्थाँश्चलभन्तिते ॥ अपुत्रोलभतेपुत्रंनिधनोलभतेधनम् ॥ १० ॥ राज्यकामीतुतद्राज्यंलभतेनात्रसंशयः ॥ यदिचेत्त्वंप्रस
न्नोऽसितत्सर्वंदेहिमेप्रभो ॥ ११ ॥ महादेवउवाच ॥ तदाचैवसुरेशेनसर्वंदत्तंद्विजन्मने ॥ तदाप्रभृतितत्तीर्थंसोमलिङ्गेतिविश्रुतम् ॥ १२ ॥ चन्दनै
र्वाबिल्वपत्रैर्येऽर्चयन्तिसदाशिवम् ॥ लभन्तेमानुषेदेहेसौख्यंपुत्रादिसंभवम् ॥ १३ ॥ सोमवारेतथाप्राप्तेयोगच्छतिहरालयम् ॥ वाञ्छितंलभते
नित्यंसोमलिङ्गप्रसादतः ॥ १४ ॥ अत्रगत्वातुयोदेवियद्ददातिफलादिकम् ॥ यस्यकामनयाचैवसतंप्राप्नोतिनिश्चितम् ॥ १५ ॥ श्वेतैर्वाकर
वीरैश्चपारिजातैस्तथापुनः ॥ येऽर्चयन्तिचतंदेवंश्रीमहेशंपिनाकिनम् ॥ १६ ॥ तेलभन्तेसुरश्रेष्ठेशैवंपदमनुत्तमम् ॥ १७ ॥ इतिश्रीपाद्मेमहा
पुराणेपद्मपञ्चा०उत्तर०सोमतीर्थवर्णनंनामैकषष्ट्यधिकशततमोऽध्यायः ॥ १६१ ॥ महादेवउवाच ॥ ततोगच्छेत्तथादेवितीर्थंकापोतिकंपुनः ॥ ॥ १५९ ॥
यत्रसाभ्रमतीतोयंप्राचीनंसंप्रवर्त्तते ॥ १ ॥ पिण्डंददातियस्तत्रपितृतर्पणपूर्वकम् ॥ वन्यैःफलैस्तथापुष्पैःसदापर्वणिपर्वणि ॥ २ ॥ काका
दिभ्यश्चश्वादिभ्योबलिंसन्ददतेतुयः ॥ यमस्यपन्थानंसोऽपिससुखंनिस्तरेन्नरः ॥ ३ ॥ तत्रतीर्थेनरःस्नात्वावैशाख्यांगौरसर्षपैः ॥ पूजयेद्देवमीशानं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राचीनेश्वरमुत्तमम् ॥ ४ ॥ आत्मानंतारयेत्सोऽथपितॄनथपितामहान् ॥ कपोतोयत्रचात्मानंदत्त्वाचातिथयेमुदा ॥ ५ ॥ स्तुतोदेवगणैः
सर्वैर्विमानेनदिवंगतः ॥ तदाप्रभृतितत्तीर्थंकापोतमितिविश्रुतम् ॥ तत्रस्नात्वानरःपीत्वाब्रह्महत्यांव्यपोहति ॥ ६ ॥ पार्वत्युवाच ॥ कपोतेन
कथंदत्तंशरीरंचवदप्रभो ॥ निमित्तंकिंतथादेवनाहंवेद्मिसुरेश्वर ॥ ७ ॥ महादेवउवाच ॥ अत्रतीर्थेऽतिदेवेशिवटोवैपरमोमहान् ॥ तस्य
शाखाह्यनन्ताश्चदृश्यन्तेविपुलाभुवि ॥ ८ ॥ तत्रजीवावसन्तीहपक्षिणोबहवस्तथा ॥ कपोतेनगृहंतत्रकारितंतुसुरेश्वरि ॥ ९ ॥ तत्रतिष्ठतिपक्षीशो
नित्यंविष्णुपरायणः ॥ कुटुम्बेनसमायुक्तोशाखायांवसतिध्रुवम् ॥ १० ॥ एकस्मिन्वासरेदेविद्वादश्यांविष्णुवासरे ॥ श्येनस्तत्रसमायातो
ह्यतिथित्वेनभामिनि ॥ ११ ॥ कपोतभोदेहिमांसंतवशारीरकंमम ॥ नोचेच्छापंप्रदास्यामिइत्युक्तंनगनन्दिनि ॥ १२ ॥ अद्यवैवासरे
विष्णोःक्षुधार्तोऽहंसमागतः ॥ तस्माद्देयंहिमांसंमेक्षुधार्तायत्वयाप्रभो ॥ १३ ॥ श्येनोक्तंतत्तुवैश्रुत्वाकपोतोवैष्णवोमहान् ॥ तेनदत्तंतदादेविश
रीरंनात्रसंशयः ॥ १४ ॥ तेनदानप्रभावेणतीर्थंजातंसुरोत्तमे ॥ कापोतकंमहत्तीर्थंपावनानांचपावनम् ॥ १५ ॥ अत्रतीर्थेनरःस्नात्वाकृत्वावैशिवपूज
नम् ॥ ददातिचातिथिभ्यश्चमिष्टमन्नंसुरोत्तमे ॥ १६ ॥ इहलोकेसुखंभुक्त्वायातिविष्णोःपरंपदम् ॥ दत्त्वावैस्वशरीरंतुकपोतोऽथमहात्मने ॥
॥ १७ ॥ सगतोवैष्णवंतत्रयावच्चन्द्रदिवाकरौ ॥ अतोगत्वातुभोदेविअतिथिंपूजयेत्सदा ॥ पूजितेचातिथौतत्रसर्वंचलभतेध्रुवम् ॥ १८ ॥
इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०उत्तर०कापोततीर्थंनामद्विषष्ट्यधिकशततमोऽध्यायः ॥ १६२ ॥ महादेवउवाच ॥ तीर्थानांप्रवरंतीर्थंमहा
पातकनाशनम् ॥ गोतीर्थमितिविख्यातंकाश्यपह्रदसमीपतः ॥ १ ॥ यानिकानिचपापानिब्रह्महत्यासमानिच ॥ गोतीर्थेतुततःस्नात्वाप्रश्यन्ते
नात्रसंशयः ॥ २ ॥ गावःकृष्णांततुंप्राप्यपूर्वपातकयोगतः ॥ यत्रतीर्थेततःस्नात्वाशुक्लत्वंपुनरागताः ॥ ३ ॥ तत्रतीर्थेनरःस्नात्वा
दत्त्वागोभ्योगवाह्निकम् ॥ गोमातॄणांप्रसादेनमातणामनृणीभवेत् ॥ ४ ॥ गोतीर्थेतुनरोगत्वास्नात्वागांतुपयस्विनीम् ॥ ददातिविप्रमुख्येभ्यः
सयातिब्रह्मणःपदम् ॥ ५ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०उत्तर०साभ्रमतीमाहात्म्येगोतीर्थंनामत्रिषष्ट्यधिकशततमोऽध्यायः ॥ १६३ ॥
महादेवउवाच ॥ अत्रतीर्थंमहच्चान्यत्कश्यपाख्यंसुरेश्वरि ॥ यत्रह्रदोमहानासीन्नगदेवविनिर्मितः ॥ १ ॥ तत्रकुशेश्वरोनामदेवोयत्रविरा
जते ॥ यत्रकुण्डंतथारम्यंकश्यपेनविनिर्मितम् ॥ २ ॥ तत्रस्नात्वातुभोदेविननरोनिरयंव्रजेत् ॥ अग्निहोत्रकराविप्रानित्यंवेदपरायणाः ॥
॥ ३ ॥ निवसन्तिमहादेविकाश्यपायांवहुश्रुताः ॥ यथाकाशीतथाचेयंनगरीऋपिनिर्मिता ॥ ४ ॥ काश्यपेनयतश्चात्रततंबहुतरं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तपः ॥ गङ्गावैतपसायेनआनीतेशजटोद्भवा ॥ ५ ॥ सागङ्गाकाश्यपीदेविमहापातकनाशिनी ॥ यस्यादर्शनमात्रेणमुच्यन्तेदुष्ट
किल्बिषात् ॥ ६ ॥ गोदानंचप्रशंसन्तिरथदानंतथैवच ॥ श्राद्धंकृत्वातुतत्रैवदानंदेयंप्रयत्नतः ॥ ७ ॥ कलौयुगेतथाघोरेमहापातकना
शनम् ॥ कश्यपाख्यंसमंतीर्थंनभूतंनभविष्यति ॥ ८ ॥ यत्रवैदेवताःसर्वाऋषयोवीतकल्मषाः ॥ नित्यंतिष्ठन्तिदेवेशितीर्थराजप्रसादतः ॥
॥ ९ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०उत्तर०साभ्रमतीमाहात्म्येह्रदमाहात्म्यंनामचतुःषष्ट्यधिकशततमोऽध्यायः ॥ १६४ ॥ महादेव
उवाच ॥ भूतालयंततोगच्छेत्तीर्थंपापहरंपरम् ॥ भूतालयोवटोयत्रयत्रप्राचीतुचन्दना ॥ १ ॥ भूतालयेनरःस्नात्वाकृष्णाष्टम्यामुपोषितः ॥
यस्तुकृष्णतिलान्दद्यान्नसप्रेतोऽभिजायते ॥ २ ॥ पितॄनुद्दिश्ययोदद्यादुदकुम्भंतिलैःसह ॥ पूर्वजान्प्रेतभावात्समोचयेन्नात्रसंशयः ॥
॥ ३ ॥ यस्यनाम्नानरःस्नातिक्षेतत्वात्सविमुच्यते ॥ चतुर्दश्यामथाष्टम्यांप्रभातेविमलोदके ॥ ४ ॥ तीर्थेभूतालयेस्नात्वादृष्ट्वाभूतालयं
वटम् ॥ भूतेश्वरप्रसादेनभूतेभ्योनलभेद्भयम् ॥ ५ ॥ इतिश्रीभूतेश्वरतीर्थम् ॥ अतस्तीर्थात्परंतीर्थंघटेश्वरमितिस्मृतम् ॥ यत्रस्नात्वातु
तंदृष्ट्वामुक्तिभागीभवेद्ध्रुवम् ॥ ६ ॥ यत्रसाभ्रमतीतीर्थंघटोवैपरमोमहान् ॥ दृष्ट्वाचैवमहादेवंमुच्यतेनात्रसंशयः ॥ ७ ॥ तत्रगत्वा
विशेषेणपुष्पपूजांकरोतियः ॥ मनसाभीप्सितान्कामाँल्लभतेमानवोभुवि ॥ ८ ॥ इतिघटेश्वरतीर्थम् ॥ ततोगच्छेन्नरोभक्त्यावैद्यनाथेतिविश्रुतम् ॥
तत्रस्नात्वानरस्तीर्थेशिवपूजनतत्परः॥९॥पितॄन्संतर्प्यविधिनासर्वयज्ञफलंलभेत् ॥ विजयोदेवसंभूतःसर्वपापक्षयङ्करः ॥ यंदृष्ट्वाविविधान्कामान्प्राप्नु
युस्तेनराःसदा ॥१०॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०उत्तर०वैद्यनाथतीर्थमाहात्म्यंनामपञ्चषष्ट्यधिकशततमोऽध्यायः ॥१६५॥ महादेवउवाच ॥
वैद्यनाथात्परंतीर्थंसर्वसिद्धिप्रदायकम् ॥ तीर्थानामुत्तमंतीर्थंदेवतीर्थमनुश्रुतम् ॥ १ ॥ विभीषणाद्राक्षसेन्द्राद्गृहीत्वाकरमोजसा ॥ प्रारब्धो
धर्मपुत्रेणराजसूयोमहाक्रतुः ॥ २ ॥ दिग्जयेदक्षिणेजातेनकुलेनहिपाण्डुना ॥ साभ्रमत्यास्तटेदेविपाण्डुरार्येतिविश्रुता ॥ ३ ॥ स्थापिता
परयाभक्त्याभुक्तिमुक्तिप्रदायिनी ॥ स्नातःसाभ्रमतीतोयेपाण्डुरार्यांनमस्यच॥४॥अणिमाद्याःसिद्धयोऽष्टौतथामेधांमहीयसीम् ॥ नरःप्राप्नोतिवैनूनं
नात्रकार्याविचारणा ॥५॥ पाण्डुरार्यांनमस्कृत्यशुद्धभावेनमानवः ॥ संवत्सरकृतापूजाज्ञातव्यातत्त्वबुद्धिभिः ॥६॥ तत्रतीर्थेतनुंत्यक्त्वापाण्डुरार्या
समीपतः ॥ कैलासशिखरंप्राप्यचण्डेश्वरगणोभवेत्॥७॥पुराहनूमतातत्रतपस्तप्तंसुदुष्करम् ॥ समुद्रप्लवनेशक्तिर्जातातीर्थप्रभावतः ॥८॥ इतिश्रीपाद्मे
महापुराणेपञ्चपञ्चा०उत्तर०पाण्डुरार्यातीर्थंनामषट्षष्ट्यधिकशततमोऽध्यायः ॥१६६॥ अत्रतीर्थात्परंतीर्थंचण्डेशइतिविश्रुतम् ॥ यत्रचण्डेश्वरोदेवो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नित्यंतिष्ठतिभूतिदः॥१॥यंदृष्ट्वामुच्यतेपापादज्ञानादथवाकृतात्॥ सर्वाभिर्देवताभिश्च मिलित्वानगरंकृतम् ॥चण्डेशइतिविख्यातंनाम्नाचैवमहेश्वरि ॥
॥ २ ॥ इतिचण्डेशतीर्थम् ॥ अत्रतीर्थात्परंतीर्थंगाणपत्यंततोभुवि ॥ साभ्रमत्यांसमीपेतुविख्यातंदेविनिर्मितम् ॥ ३ ॥ तत्रस्नात्वानरोदेविमुच्यते
नात्रसंशयः ॥ मन्येसाभ्रमतीतीरेजनानांहितकाम्यया ॥४॥ पृथिव्यांयानितीर्थानिसागरान्तानियानिच ॥ तानिसर्वाणिसंत्यज्यतीर्थेवैपरमाद्भुते ॥
॥५॥ श्राद्धंकरोतियस्तत्ररुद्रभक्त्याजितेन्द्रियः ॥ फलंप्राप्नोतिशुद्धात्मासर्वयज्ञसमुद्भवम्॥६॥पितॄनुद्दिश्ययत्किंचिद्दणतीर्थेप्रदीयते ॥ तत्सर्वंजायते
क्षिप्रंगणनाथप्रसादतः ॥ ७ ॥ तस्मिंस्तीर्थेनरःस्नात्वावृषंविप्रायदापयेत् ॥ सर्वलोकानतिक्रम्यसगच्छेत्परमांगतिम् ॥ ८ ॥ इतिश्रीपाद्मेमहापुराणे
पञ्चपञ्चा०उत्तर०गणतीर्थनामसप्तषष्ट्यधिकशततमोऽध्यायः॥१६७॥श्रीमहादेवउवाच ॥ ततोगच्छेन्महादेविवार्त्रघ्न्यागिरिकन्यया॥शक्रश्चैवतयासा
ध्व्यासंगमंयत्रलब्धवान् ॥१॥ तत्रस्नानंप्रकुर्वन्तिनरानियतमानसाः ॥ दशानामश्वमेधानांयत्फलंस्नानकृल्लभेत् ॥२॥ तत्रयःकुरुतेश्राद्धंपिण्डान्वै
तिलचूर्णजान् ॥ पुनातिपुरुषोवंशान्सप्तसप्तपरावरान् ॥३॥ संपूज्यविधिवत्स्नात्वासंगमेगणनायकम् ॥ नविघ्नैरभिभूयेतलक्ष्म्यानैवविहीयते ॥४॥
पार्वत्युवाच ॥ कस्मिन्कार्यसमारम्भेसमायातःपुरन्दरः ॥ स्वर्गलोकादिमंलोकमेतदाख्यातुमर्हसि ॥ ५ ॥ वार्त्रघ्नीचनदीकेननिरुक्तेननिग
द्यते ॥ पुरन्दरपुरंदेवब्रह्मघोषनिनादितम् ॥ संभावयतियोऽजस्रंममतत्संगमंवद ॥ ६ ॥ महादेवउवाच ॥ अस्मिंश्चैवतुभूलोकेप्रश्नोऽयं
समभूत्पुरा ॥ युधिष्ठिरेतिविख्यातोराजावैधार्मिकोमहान् ॥७॥ पृष्टवान्सतुभीष्मायधर्मिणेज्ञानरूपिणे ॥ तेनोक्तंयच्चतद्देविप्रवक्ष्यामितवाग्रतः॥८॥
दशवर्षसहस्राणिदशवर्षशतानिच॥वृत्रवासवयोर्युद्धमभवल्लोमहर्षणम् ॥९॥ ततःपराजितःशक्रःकृत्वावृत्रेणसंविधम् ॥ अद्रोहेसरणंत्यक्त्वाजगाम
शरणंमम ॥१०॥ वार्त्रघ्न्यासंगमेपुण्येतोषयामासशङ्करम् ॥ अथान्तरिक्षेऽहंदेविदर्शनंदत्तवांस्तदा ॥११॥ ममगात्रात्तुयद्भस्मपतितंकाश्यपीतटे ॥
भस्मगात्रेतितत्पुण्यंलिङ्गंदेविविनिर्मितम् ॥ १२ ॥ भूतेश्वरंभस्मगात्रंब्रह्मणासंप्रतिष्ठितम् ॥ तस्यवैदर्शनादेवब्रह्महत्यालयंव्रजेत् ॥ १३ ॥
योमुच्यतेसर्वपापेभ्यःश्राद्धंकृत्वायुगादिषु ॥ तदहंसुप्रसन्नोऽभूदिन्द्रायसुमहात्मने ॥ १४ ॥ यद्यत्त्वंवाञ्छसेदेवतत्सर्वंहिददामिते ॥ अनेनवज्र
योगेनशीघ्रंवृत्रंहनिष्यसि ॥ १५ ॥ शक्रउवाच ॥ भगवंस्त्वत्प्रसादेनदितिजंचदुरासदम् ॥ वज्रेणनिहनिष्यामिपश्यतस्तेसुरोत्तम ॥ १६ ॥
महादेवउवाच ॥ एवमुक्त्वातदाइन्द्रोगतवांश्चासुरंप्रति ॥ तदादुन्दुभयोनेदुर्देवसैन्येविशेषतः ॥ १७ ॥ मृदङ्गडिण्डिमाश्चैवभेरीतूर्याण्य
नेकशः॥ असुराणांचसर्वेषांवृत्तिलोभोमहानभूत् ॥ १८ ॥ बलवान्मघवाचैवक्षणेनसमजायत ॥ तमाविष्टंततोज्ञात्वाऋषयःपन्नगास्तथा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १९ ॥ स्तुवन्तिशक्रमीशानंस्तुत्वाजयजयेतिच ॥ गच्छतस्तस्यशक्रस्ययुद्धकामस्यसन्निधौ ॥ २० ॥ ऋषिभिःस्तूयमानस्यरूपमासी
त्सुदुर्भरम् ॥ वृत्रस्यसहसादेवितदासङ्ग्राममूर्धनि ॥ २१ ॥ अभवन्यानिलिङ्गानिशरीरेतानिमेशृणु ॥ ज्वलदास्योऽभवद्घोरोवैवर्ण्यसमभव
त्परम् ॥ २२ ॥ गात्रकम्पश्चसुमहाञ्छ्वासःसोष्माव्यजायत ॥ रोमहर्षश्चतीव्रोऽभूच्छ्वासश्चैवमहानभूत् ॥ २३ ॥ निष्पपातमहा
घोराउल्काःपार्श्वंप्रपेदिरे ॥ गृध्रावटाश्येनकङ्कावाचोमुश्चन्सुदारुणाः ॥ २४ ॥ वृत्रस्योपरितेसर्वेचक्रवत्परिबभ्रमुः ॥ ततःसगजमास्था
यइन्द्रस्तत्रसमागतः ॥ २५ ॥ वज्रोद्योतकरस्तत्रशक्रस्तंदैत्यमासदत् ॥ अमानुषमथोनादंसमुमोचसुरेश्वरः ॥ २६ ॥ वृत्रासुरस्ययततःशक्रो
वज्रमपातयत् ॥ सवज्रःसुमहातेजाःकालाग्निसदृशोमहान् ॥ समुद्रस्यतटेवृत्रंशक्रोदैत्यमपातयत् ॥ २७ ॥ ततोनादःसमभवत्पुनरेवसमन्ततः
॥ २८ ॥ वृत्रंविनिहतंदृष्ट्वासर्वदेवभयङ्करम् ॥ पुष्पवृष्टिस्तुमहतीइन्द्रमूर्ध्निपपातह ॥ २९ ॥ वृत्रंहत्वासमववान्दानवेशंभयङ्करम् ॥ स्तूयमानोऽ
मरैःसार्द्धंदेवदानींतमाविशत् ॥३०॥ अथवृत्रशरीरात्तुनिर्गतंतेजउत्तमम् ॥ ब्रह्महत्यामहाघोरारौद्रालोकभयङ्करी ॥ ३१ ॥ करालवदनासाचविकृता
कृष्णपिङ्गला ॥ कपालमालिनीचैवसुकृशानगनन्दिनि॥३२॥रुधिराक्ताचपापिष्ठामीनगन्धातिभीषणा ॥ सानिष्क्रम्यमहादेवितादृग्रूपाभयावहा॥
॥ ३३ ॥ इन्द्रमन्वेषयामासतदावैसुरसत्तमे ॥ निर्धावतीततःसातुदृष्ट्वाशक्रंमहौजसम् ॥३४॥ कण्ठेजग्राहदेवेन्द्रंसुलग्नासाभवत्तदा ॥ सचतस्मि
न्समुद्भ्रान्तोब्रह्महत्याकृतेभये॥३५॥ निलीयबिसमध्येऽसौस्थितोवर्षगणान्बहून् ॥ तयागृहीतोभोदेविनिश्चेष्टःसमपद्यत॥३६॥तस्याव्यपोहनेशक्रःप्र
यत्नंचचकारह ॥ नशक्तोऽभून्महादेविब्रह्महत्यांव्यपोहितुम् ॥ ३७ ॥ तयागृहीतमात्रस्तुदेवेन्द्रोमेषरूपधृत् ॥ पितामहमुपागम्यशिरसा
प्रत्यपूजयत् ॥३८॥ ज्ञात्वागृहीतंशक्रंतुद्विजप्रवरहत्यया ॥ ब्रह्मासंचिन्तयामासतदावैसुरसत्तमे ॥३९॥ साचिन्त्यमानाब्रह्माणमुपगम्याब्रवीद्वचः ॥
प्राप्तास्मिभगवन्देवत्वत्सकाशंहिमानद ॥ ४० ॥ यत्कर्त्तव्यंमयादेवतद्भवान्वक्तुमर्हति ॥ तामुवाचमहाभागेब्रह्महत्यांपितामहः ॥ ४१ ॥ स्वरेणमधुरे
णाथसंक्षेपेणयथातथम् ॥ मुच्यतांदेवराजोऽयंमत्प्रियंकुरुभामिनि ॥ ब्रूहिकिंतेकरोम्यद्यकामंत्वंकिमिहेच्छसि ॥ ४२ ॥ हत्योवाच ॥ शक्रादपग
मिष्यामिवचनात्तेसुरोत्तम ॥ देवदेवनमस्तेऽस्तुनिवासंचददस्वमे ॥ त्वयाकृतेयंमर्यादालोकसंरक्षणार्थिना ॥ ४३ ॥ महादेवउवाच ॥ तथेति ॥ १६७ ॥
तांप्रतिज्ञायहत्यांचापिपितामहः ॥ उपायमथशक्रस्यब्रह्महत्यापनोदने ॥ ४४ ॥ ततोवह्निंसमाहूयब्रह्मावचनमब्रवीत् ॥ शक्रहत्याचतुर्थांशं
जातवेदोगृहाणभोः ॥ ४५ ॥ अग्निरुवाच ॥ ममभोक्षस्यकोहेतुर्ब्रह्महत्याकृतेप्रभो ॥ एतदिच्छामिविज्ञातुंतत्त्वतोलोकपूजित ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मोवाच ॥ यस्त्वांज्वलन्तमासाद्यनहोष्यतिनरःक्वचित् ॥ बीजौषधितिलांनग्रफलमूलसमित्कुशान् ॥४७॥ तद्दैवत्यक्ष्यतित्वांचतत्रैवचनिवत्स्यति
ब्रह्महत्याहव्यवाहव्येतुतेमनसोज्वरः ॥ ४८ ॥ ततःसपरिजग्राहतद्वचोहव्यकव्यभुक् ॥ पितामहश्चभगवांस्तथातदलभत्प्रियम् ॥ ४९ ॥
ततोवृक्षौषधितृणान्याहूयसपितामहः ॥ इममर्थंमहाभागेवक्तुंसमुपचक्रमे ॥ ५० ॥ ततोवृक्षौषधितृणैस्तथैवोक्तंयथातथम् ॥ व्यथितान्यग्निव
देविब्रह्माणंवाक्यमब्रुवन् ॥५१॥अस्माकंब्रह्महत्यायाःकथयान्तंपितामह ॥स्वभावनिहितातस्मान्नपुनर्हन्तुमर्हसि ॥५२॥ वयमग्नितथाशीतंवर्षंचपवने
रितम् ॥ सहामःसततंदेवतथाच्छेदनभेदनम् ॥५३ ॥ ब्रह्मोवाच ॥ अकारणंनरोयस्तुयुष्मच्छेदनभेदनम् ॥ करिष्यतिमहामोहात्तमेषानुप्रयास्यति ॥
॥ ५४ ॥ महादेवउवाच ॥ ततोमहौषधितृणैरोमित्युक्तंमहात्मभिः ॥ ब्रह्माणमपिसंपूज्यजग्मुश्चाथयथागतम् ॥ ५५ ॥ आहूयाप्सरसोदेवस्ततो
लोकपितामहः ॥ वाचामधुरयाप्राहसान्त्वयन्निवसत्तमे ॥ ५६ ॥ इयंवृत्रादनुप्राप्ताब्रह्महत्यावराङ्गनाः ॥ चतुर्थमस्याभागंचमयोक्तंसंप्रती
च्छथ ॥ ५७ ॥ अप्सरसऊचुः ॥ ग्रहणेकृतबुद्धीनांदेवेशतवशासनात ॥ संमोक्षसमयोऽस्माकंचिन्तनीयःपितामह ॥ ५८ ॥ पितामह
उवाच ॥ रजस्वलासुनारीषुयोवैमैथुनमाचरेत ॥ तमेषायास्यतिक्षिप्रंव्येतुवोमनसोज्वरः ॥ ५९ ॥ महादेवउवाच ॥ तथेतिहृष्टमनसःप्रत्युक्त्वा
ह्यप्सरोगणाः ॥ स्वानिस्थानानिसंप्राप्यरेमिरेशैलजेतदा ॥ ६० ॥ ततश्चलोककृद्देवःपुनरेवपितामहः ॥ अपःसंचिन्तयामासततस्ताश्चसमागमन्॥
॥ ६१ ॥ ताश्चसर्वाःसमागम्यब्रह्माणममितौजसम् ॥ इदमूचुर्वचोदेविप्रणिपत्यपितामहम् ॥ ६२ ॥ इमाःस्मदेवसंप्राप्तास्त्वत्सकाशमरिन्दम ॥
शासनात्तवदेवेशसमाज्ञापयतत्प्रभो ॥६३॥ ब्रह्मोवाच ॥ इयंवृत्रादनुप्राप्तापुरुहूतंभयानका ॥ ब्रह्महत्याचतुर्थांशंयूयमस्याःप्रतीच्छथ ॥६४ ॥ आप
ऊचुः ॥ एवंभवतुलोकेशयत्त्वंवदसिनःप्रभो ॥ मोक्षस्यसमयंनस्त्वंसंचिन्तयितुमर्हसि ॥ ६५ ॥ त्वंहिदेवेन्द्रसर्वस्यजगतःपरमागतिः ॥
कोऽन्येभ्योहिप्रसादोऽपियःकृच्छ्रान्नःसमुद्धरेत् ॥ ६६ ॥ ब्रह्मोवाच ॥ अल्पामेवमतिंकृत्वायोनरोबुद्धिमोहितः ॥ श्लेष्ममूत्रपुरीषाणियुष्मासु
प्रतिमोक्षति ॥ ६७ ॥ तमेवयास्यतिक्षिप्रंतत्रैवचनिवत्स्यति ॥ ततोवैभवितामोक्षइतिसत्यंब्रवीमिवः ॥ ६८ ॥ महादेवउवाच ॥ ततो
विमुच्यदेवेन्द्रंब्रह्महत्यासुरेश्वरि ॥ गतातिहृष्टोदेवेशोह्यभवद्देवशासनात ॥ ६९ ॥ एवंशक्रेणसंप्राप्ताब्रह्महत्यापुरायुगे ॥ अस्मिंस्तीर्थेतपस्तप्त्वा
शुद्धात्मात्रिदिवंययौ ॥ ७० ॥ अश्वमेधंततःकृत्वाविपाप्मासमपद्यत ॥ इतिसाभ्रमतीतीर्थेवार्त्रघ्नीयंनगात्मजे ॥ ७१ ॥ इतिश्रीपाद्मे
महापुराणेपञ्चप०उत्तर०वार्त्रघ्नीमाहात्म्यंनामाष्टषष्ट्यधिकशततमोऽध्यायः ॥ १६८ ॥ महेशउवाच ॥ ततःपरंदेवनदीवार्त्रघ्नीसंगमात्किल ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रविष्टाभद्रयासार्धंसागरंवरुणालयम् ॥ १ ॥ समुद्रोऽपितयातावदागम्यप्रियकाम्यया ॥ साभ्रमत्यानुरागेणकृतवान्प्रियमेलनम् ॥ २ ॥
भद्रावापिसुभद्रायावयस्यासानदीपुरा ॥ सहायमकरोन्मार्गेसाक्षाच्छ्रीरूपधारिणी ॥ ३ ॥ तयोस्तुसंगमःपुण्यःसागरस्योत्तरेतटे ॥ तत्रतीर्थे
नरःस्नात्वामृष्टंवारिददातियः ॥ ४ ॥ नमस्कृत्यवराहायवारुणंस्थानमाप्नुयात् ॥ प्रविश्यभगवान्विष्णुस्तेनमार्गेणसागरम् ॥ ५ ॥
जित्वावैदानवान्सर्वान्देवानांपरिपन्थिनः ॥ देवोयज्ञवराहश्चसंक्षोभ्यमकरालयम् ॥ क्रीडित्वासुचिरंकालंकर्दमालेननिर्ययौ ॥ ६ ॥ पार्वत्युवाच ॥
देवयज्ञवराहस्यसाभ्रमत्यांप्रवेशनम् ॥ निर्गमंकर्दमालेनब्रूहित्वंममविस्तरात ॥ ७ ॥ महादेवउवाच ॥ अन्तर्भूक्रीडितमिदंवराहस्यहरेःपुरा ॥
तत्सर्वंकथयिष्यामिशृणुत्वंनगनन्दिनि ॥ ८ ॥ योऽयंवैभगवान्साक्षाद्धृतवान्सौकरंवपुः ॥ देवानांकार्यसिद्ध्यर्थंरूपंधृत्वासुरेश्वरः ॥ ९ ॥ धृत्वावै
पृथिवींदेवींनिर्गतःकर्दमालयम् ॥ तत्रतीर्थंमहज्जातंवराहाख्यंतुसुन्दरि ॥ १० ॥ तत्रस्नातिनरोयस्तुमुक्तिभाक्सनसंशयः ॥ अत्रश्राद्धंप्रकुर्वीतपितॄणां
मुक्तिहेतवे ॥ विमुक्तस्तैःसमंलोकंप्रयातिसुखदंमहत् ॥ ११ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप० उत्तर० वाराहतीर्थंनामैकोनसप्तत्यधिकशततमोऽध्यायः ॥
॥ १६९ ॥ महादेवउवाच ॥ अत्रतीर्थात्परंतीर्थंसङ्गमाख्यमितिश्रुतम् ॥ यत्रसाभ्रमतीगङ्गामिलितासागरेणतु ॥ १ ॥ तत्रस्नानंचदानंचकर्तव्यंविधि
पूर्वकम् ॥ यत्रस्नात्वातुमुच्यन्तेमहापातकिनोऽपिये ॥ २ ॥ तत्रश्राद्धंप्रकर्तव्यंस्वानांचहितमिच्छता ॥ यत्रैवंतुकृतेश्राद्धेपितृलोकेवसेद्ध्रुवम् ॥ ३ ॥
यत्रवैसागरोदेवोनित्यंमिलतिगङ्गया ॥ ब्रह्महातत्रमुच्येतकिमन्यैरितरैरघैः ॥ ४ ॥ यत्रतीर्थंनजानन्तिलोकावैमन्दबुद्धयः ॥ तदावैममनाम्नाचकर्तव्यंतीर्थमु
त्तमम् ॥ ५ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा० उत्तर० सङ्गमतीर्थंनामसप्तत्यधिकशततमोऽध्यायः ॥ १७० ॥ महादेवउवाच ॥ संगमस्यसमीपेतु
सत्तीर्थंलोकविश्रुतम् ॥ आदित्याख्यंपरंतस्मान्नभूतंनभविष्यति ॥ १ ॥ यस्यवैदर्शनंकार्यंस्नानंवैपुष्करेणतु ॥ पूजनंचार्कपुष्पेणकरवीरैस्तथा
पुनः ॥ २ ॥ तत्रश्राद्धंचदानंचकुर्युर्वैमानवाःसदा ॥ इदमादित्यकंतीर्थंपवित्रंपापनाशनम् ॥ ३ ॥ दर्शनात्पुण्यदंतीर्थंमहापातकिनामपि ॥ ४ ॥
इतिश्रीपाद्मेमहापुराणेपञ्चप० उत्तर० आदित्यतीर्थमाहात्म्यंनामैकसप्तत्यधिकशततमोऽध्यायः ॥ १७१ ॥ महादेवउवाच ॥ तस्मात्तीर्थात्परंतीर्थं
नीलकण्ठेतिविश्रुतम् ॥ तस्यवैदर्शनंकार्यंमुक्तिंचैवेच्छतासदा ॥ १ ॥ बिल्वपत्रैस्तथाधूपैर्दीपैर्वाथसुरेश्वरि ॥ वाञ्छितंलभतेमर्त्योनीलकण्ठस्य
दर्शनात् ॥ २ ॥ उपवासपरोदेविनिर्जनेऽसौस्थितःसदा ॥ यद्यद्वाञ्छन्तियेलोकास्तेषांतत्तद्ददातिच ॥ ३ ॥ कलौसातुमहादेविविख्याता
काश्यपीतिवै ॥ ४ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा० उत्तर० नीलकण्ठमाहात्म्यंनामद्विसप्तत्यधिकशततमोऽध्यायः ॥ १७२ ॥ महादेवउवाच ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुर्गयासंगतायत्रदेविसाभ्रमतीनदी ॥ संगमःसागरेणाथस्नानंतत्रसमाचरेत् ॥ १ ॥ वीतदोषाभविष्यन्तिकलौवैनात्रसंशयः ॥ तत्रश्राद्धंप्रकर्त्तव्यं दुर्गयासंगमेतथा ॥ २ ॥ तत्रगत्वाविशेषेणब्राह्मणानांचभोजनम् ॥ दानंगोमहिषीणांचकर्तव्यंविधिपूर्वकम् ॥ ३ ॥ इयंधन्याधन्यतमा पवित्रापापनाशिनी ॥ यांदृष्ट्वाचापिभोदेविमुच्यतेपातकैर्नरः ॥ ४ ॥ यथागङ्गातथाचेयंज्ञेयासाभ्रमतीनदी ॥ कलौदेविविशेषेणबहुकालफल प्रदा ॥ ५ ॥ यदिचेच्छतशोजिह्वामुखेवैमामकेसति ॥ तस्याअपिनशक्नोमिगुणान्वक्तुंकदाचन ॥ ६ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०उत्तर० उमामहेश्वरसंवादेसाभ्रमतीमाहात्म्यंनामत्रिसप्तत्यधिकशततमोऽध्यायः ॥ १७३ ॥ महादेवउवाच ॥ शृणुदेविप्रवक्ष्यामिव्रतंत्रैलोक्यदुर्लभम् ॥ यच्छ्रुत्वामुच्यतेलोकोब्रह्महत्यादिपातकात् ॥ १ ॥ उत्पत्तिःस्वप्रकाशस्यभक्तानांसुखहेतवे ॥ तिथिर्वापिसमासोवैसंजातःपुण्यकारकः ॥२ ॥ यस्यनामगृणन्देविमुक्तिमाप्नोतिशाश्वतीम् ॥ सएवपरमात्माचकारणानांचकारणम् ॥ ३ ॥ विश्वात्माविश्वरूपीचसर्वेषांभगवान्प्रभुः ॥ द्वादशार्कांधृतायेननृसिंहेनमहात्मना ॥ सएवप्रकटीजातोभक्तानांशमभीप्सया ॥ ४ ॥ पार्वत्युवाच ॥ अवताराह्यसङ्ख्याताःकथिताःसुरसत्तम॥ नृसिंहाख्यंपरंधामवदविश्वेश्वरप्रभो ॥ येनविज्ञानमात्रेणसुखलोकमवाप्नुयात् ॥ ५ ॥ महादेवउवाच ॥ हिरण्यकशिपुंहत्वादेवदेवंजगद्गुरुम् ॥ सुखासीनंतदुत्सङ्गेस्थितोवचनमब्रवीत् ॥ ६ ॥ प्रह्लादोज्ञानिनांश्रेष्ठोहन्तृहन्तारमुत्तमम् ॥ ७ ॥ प्रह्लादउवाच ॥ नमस्तेभगवन्विष्णोनृसिंहाद्भुत रूपिणे ॥ त्वद्भक्तोऽहंसुरश्रेष्ठत्वांपृच्छामिचतत्त्वतः॥८॥स्वामिंस्त्वयिममाभिन्नाभक्तिर्जाताह्यनेकधा ॥ कथंतेऽहंप्रियोजातःकारणंवदमेप्रभो ॥ ९ ॥ नृसिंहउवाच ॥ कथयामिमहाप्राज्ञशृणुष्वैकाग्रमानसः ॥ भक्तेर्यत्कारणंवत्सप्रियत्वस्यचयत्पुनः ॥ १० ॥ पुराकस्यद्विजस्यापिजातस्त्वंनाप्यधीत वान् ॥ नाम्नातुवसुदेवोहिवेश्यायामतिलम्पटः ॥ ११ ॥ तस्मिञ्जन्मनिनैवंचचकारसुकृतंकियत् ॥ भुक्त्वामधुघृतंचैववेश्यासंगमलालसः ॥ १२ ॥ मद्व्रतस्यप्रभावेणभक्तिर्जातातवानघ ॥१३॥ प्रह्लादउवाच ॥ विस्तराद्वददेवेशकस्यपुत्रस्यकिंव्रतम् ॥ वेश्यायांवर्तमानेनकथंचिद्विकृतंमया ॥ ममो परिकृपांकृत्वासर्वंकथयसाम्प्रतम्॥१४॥नृसिंहउवाच ॥ सृष्ट्यर्थंतुपुराब्रह्माचक्रेह्येतदनुत्तमम् ॥ तद्व्रतस्यप्रभावेणनिर्मितंसचराचरम् ॥१५॥ ईश्वरेण व्रतंचीर्णंवधार्थंत्रिपुरस्यच ॥ व्रतस्यास्यप्रभावेणत्रिपुरस्तुनिपातितः ॥१६ ॥ अन्यैश्चबहुभिर्देवैर्ऋषिभिश्चपुरातनैः ॥ राजभिश्चमहाप्राज्ञैर्विहितंव्रतमु त्तमम् ॥ १७ ॥ व्रतस्यास्यप्रभावेणसर्वेसिद्धिमवाप्नुयुः ॥ ममतेवैप्रियाजातादिविभोगाननेकशः ॥ १८ ॥ भुक्त्वामयिविलीनास्तुप्रह्लादत्वंविशस्व माम् ॥ कार्यार्थमवतारस्तेमच्छरीरात्पृथग्गतः ॥१९॥ नतेषांपुनरावृत्तिर्महाकल्पशतैरपि ॥ दरिद्रोलभतेलक्ष्मींधनदस्यचयादृशी ॥२०॥ ततःकामी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

लभेत्कामंराज्यार्थीराज्यमुत्तमम् ॥ आयुष्कामोलभेदायुर्यादृशंचशिवस्यहि ॥२१ ॥ अवैधव्यकरंस्त्रीणांपुत्रदंभाग्यदंतथा ॥ धनधान्यकरंचैवतथा
शोकविनाशनम् ॥२२ ॥ स्त्रियोवापुरुषावापिकुर्वन्तिव्रतमुत्तमम् ॥ तेभ्योददाम्यहंसौख्यंभुक्तिमुक्तिफलंतथा ॥ २३॥ बहुनोक्तेनकिंवत्सव्रतस्यास्य
फलस्यहि ॥मद्व्रतस्यफलंवक्तुंनाहंशक्तोनशङ्करः ॥२४॥ प्रह्लादउवाच ॥ भगवंस्त्वत्प्रसादेनश्रुतंव्रतमनुत्तमम् ॥ व्रतस्यास्यफलंश्रोतुंत्वयिमेभक्तिकार
णम् ॥२५ ॥ अधुनाश्रोतुमिच्छामिव्रतस्यास्यविधिंपरम् ॥ कस्मिन्मासेभवेद्देवकस्मिंश्चिद्वासरेप्रभो ॥ २६ ॥ एतद्विस्तरतोदेववक्तुमर्हसिसाम्प्रतम् ॥
विधिनायेनवैस्वामिन्समग्रफलभाग्भवेत्॥२७॥ नृसिंहउवाच॥ प्रह्लादवत्सभद्रंतेशृणुष्वैकमनाव्रतम् ॥ वैशाखेऽसितपक्षेतुचतुर्दश्यांसमाचरेत्॥ २८॥
ममाविर्भावसंयुक्तंममसंतुष्टिकारणम् ॥ शृणुपुत्रममोत्पत्तिंभक्तानांसुखहेतवे ॥२९॥ पश्चिमायांदिशायांचसंजातं[1]कारणान्तरात् ॥ मौलिंस्तान[2]मिदंक्षेत्रं
पवित्रंपापनाशनम् ॥ ३०॥ तस्मिन्क्षेत्रेतुविख्यातोब्राह्मणोवेदपारगः ॥ हारीतइतिनाम्नाचज्ञानध्यानपरायणः ॥३१ ॥ तस्यस्त्रीतुमहापुण्यासतीरूपा
सदाप्रभो ॥ लीलावतीतुनाम्नाचभर्तुर्वशपरासदा॥ ३२ ॥ ताभ्यांतपोमहत्तप्तंकालंबहुतरंसुत ॥ एकविंशयुगाश्चैवयातास्तत्रनसंशयः ॥ तस्मिन्क्षेत्रेतुवै
ताभ्यांप्रत्यक्षोवाभवत्तदा ॥३३॥ नृसिंहउवाच॥ यंयंवाञ्छयसेब्रह्मंस्तंददामिनसंशयः ॥ ताभ्यामुक्तंतदातस्मैदीयतेचेद्वरोमम ॥३४॥ त्वादृशोममपु
त्रस्तुह्यधुनैवभवत्विति॥ मयोक्तंतुतदावत्सपुत्रोऽहंतेनसंशयः ॥३५ ॥ विश्वकर्माह्यहंसाक्षात्परमात्मापरात्परः॥ उदरेऽहंनवत्स्यामियतोऽहंवैसनातनः
॥ ३६॥ हारीतेनतदाचोक्तंभवत्वेवंनसंशयः ॥ तदाप्रभृतिवैक्षेत्रेस्थितोऽहंभक्तकारणात् ॥३७॥ अत्रागत्यप्रकुर्वीतदर्शनंभक्तसत्तमः ॥ तस्याहंसकलां
बाधांनाशयामिनिरन्तरम् ॥३८ ॥ एतस्मात्कारणाच्चैवव्रतंवैविधिपूर्वकम् ॥ येकुर्वन्तिनरश्रेष्ठानतेषांविद्यतेभयम् ॥३९॥ बालरूपमयंध्यात्वाताभ्यां
सहविशेषतः ॥ पूजनंकुरुतेरात्रौसवैनारायणोभवेत् ॥ ४० ॥ चतुर्भुजंमहादंष्ट्रंकालरूपंदुरासदम् ॥ सूर्यकोटिप्रतीकाशंयमकोटिदुरासदम् ॥
॥ ४१ ॥ सिंहवक्त्रमुखंयस्यनरवच्चाङ्गसंयुतम् ॥ श्रीनृसिंहंदिव्यसिंहंकालरूपंभजेत्सदा ॥ ४२ ॥ एवंज्ञात्वाविशेषेणयःस्थानंमामकंव्रजेत्॥
॥ व्रतंपवित्रंपरमंश्रीकदम्बप्रदंमहत् ॥ ४३ ॥ अन्तेमुक्तिप्रदंचैवभक्तानांचनसंशयः ॥ येनवैक्रियमाणेनसहस्रद्वादशीफलम् ॥ ४४ ॥
स्वातीनक्षत्रसंयोगेशनिवारेतुमद्व्रतम् ॥ सिद्धियोगस्यसंयोगेवणिजेकरणेतथा ॥ ४५ ॥ योगैःसर्वैश्चसंयोगंहत्याकोटिविनाशनम् ॥ एतदन्य ॥ १६१ ॥
तरेयोगेमद्दिनंपापनाशनम् ॥ ४६ ॥ विज्ञायमद्दिनंयस्तुलङ्घयेत्सतुपापकृत् ॥ अकर्त्तानरकंयातियावच्चन्द्रदिवाकरौ ॥ ४७ ॥ प्रातेमम

१ 'संजातो भक्तकारणात्' इ०पा०। २ मुलतान इति प्रसिद्धंभाषायाम्।

CC-0. In Public Domain. Digitization by eGangotri

दिनेवत्सदन्तधावनपूर्वकम् ॥ ममाग्रेव्रतसंकल्पंमद्भक्तोविजितेन्द्रियः ॥ ४८ ॥ अद्याहंतेविधास्यामिव्रतंनिर्विघ्नतांनय ॥ व्रतस्थेननकर्त्तव्यं दुष्टसंभाषणादिकम् ॥ ४९ ॥ ततोमध्याह्नसमयेनद्यादौविमलेजले ॥ गृहेवादेवखातेवातडागेवाथशोभने ॥ ५० ॥ वैदिकेनतुमन्त्रेणस्नानं कुर्याद्विचक्षणः ॥ मृत्तिकागोमयेनैवतथाधात्रीफलेनच ॥ ५१ ॥ तिलैश्चविधिवत्स्नायात्सर्वपापौघशान्तये ॥ परिधायशुभेवस्त्रेनित्यकर्म समारभेत् ॥ ५२ ॥ ततोगृहंविलिप्याथकुर्यादष्टदलंशुभम् ॥ कलशंतत्रसंस्थाप्यताम्रंरत्नसमन्वितम् ॥ ५३ ॥ तस्योपरिन्यसेत्पात्रंतण्डुलैः परिपूरितम् ॥ हैमींचतत्रमन्मूर्तिंस्थाप्यलक्ष्म्यासमन्विताम् ॥ ५४ ॥ निर्मायशक्त्यास्वर्णेनस्नाप्यपञ्चामृतैस्ततः ॥ ततोब्राह्मणमाहूय आचार्यंनातिलोलुपम् ॥ ५५ ॥ शास्त्रज्ञमग्रतःकृत्वाततोदेवंसमर्चयेत् ॥ मण्डपंकारयेत्तत्रपुष्पस्तबकशोभितम् ॥ ५६ ॥ ऋतुकालोद्भवैःपुष्पैः पूज्योऽहंचयथाविधि ॥ उपचारैःषोडशभिर्मन्मन्त्रैर्नियमैश्चयः ॥ ५७ ॥ ततःपौराणिकैर्मन्त्रैःपूजनीयोविशेषतः ॥ चन्दनंचसकर्पूरंघनकुङ्कुम मिश्रितम् ॥ ५८ ॥ कालोद्भवानिपुष्पाणितथातुलसीदलानिच ॥ श्रीनृसिंहाययोदद्यात्समुक्तोनात्रसंशयः ॥ ५९ ॥ कृष्णागुरुमयंधूपंसर्वदा हरिवल्लभम् ॥ हरयेगुरवेदद्यात्सर्वकामार्थसिद्धये ॥ ६० ॥ महादीपःप्रकर्त्तव्योह्यज्ञानध्वान्तनाशनः ॥ महानीराजनंकुर्याद्घण्टानादपुरः सरम् ॥ ६१ ॥ नैवेद्यंशर्करांचापिभक्ष्यभोज्यसमन्वितम् ॥ ददामितेरमाकान्तसर्वपापक्षयंकुरु ॥ ६२ ॥ इतिनैवेद्यमन्त्रः ॥ नृसिंहाच्युत देवेशतवजन्मदिनेशुभे ॥ उपवासंकरिष्यामिसर्वभोगविवर्जितः ॥ ६३ ॥ तेनप्रीतोभवस्वामिन्पापंजन्मनिराकुरु ॥ रात्रौजागरणंकार्यंगीत वादित्रनिःस्वनैः ॥ ६४ ॥ पुराणपठनंनित्यंश्रीनृसिंहकथाश्रयम् ॥ ततःप्रभातसमयेस्नानंकृत्वाह्यनन्तरम् ॥ ६५ ॥ पूर्वोक्तेनविधानेन पूजयेन्मांप्रतर्पयन् ॥ वैष्णवंकारयेच्छ्राद्धंमदग्रेस्वस्थमानसः ॥ ६६ ॥ ततोदानानिदेयानिवक्ष्यमाणानियान्युत ॥ पात्रेभ्यःसद्द्विजेभ्योहि लोकद्वयजिगीषया ॥ ६७ ॥ सहस्वर्णमयोदेवोममसंतोषकारकः ॥ गोभूतिलहिरण्यादिप्रददातिद्विजातये ॥ ६८ ॥ शय्यासतूलिकादेया सप्तधान्यसमन्विता ॥ अन्यानिचयथाशक्त्यादेयानिनिजशक्तितः ॥ ६९ ॥ वित्तशाठ्यंनकुर्वीतयथोक्तफलकाङ्क्षया ॥ ब्राह्मणान्भोजयेत्पश्चा त्तेभ्योदद्यात्सुदक्षिणाम् ॥ ७० ॥ निर्धनैरपिकर्त्तव्यंदेयंशक्त्यनुसारतः ॥ सर्वेषामेववर्णानामधिकारोऽस्तिमद्व्रते ॥ मद्भक्तैस्तुविशेषेणकर्त्तव्यं मत्परायणैः ॥ ७१ ॥ ततःप्रार्थनामन्त्रः ॥ मद्वंशेयेनराजातायेभविष्यन्तिमानवाः ॥ तानुद्धरस्वदेवेशदुःखदाद्भवसागरात् ॥ ७२ ॥ पात कार्णवमग्नस्यव्याधिभिश्चाम्बुचारिभिः ॥ जीवैस्तुपरिभूतस्यमहादुःखगतस्यमे ॥ ७३ ॥ करावलम्बनंदेहिशेषशायिजगत्पते ॥ व्रतेनानेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 देवेशभुक्तिमुक्तिप्रदोभव ॥ ७४ ॥ एवंप्रार्थ्यततोदेवंविसृज्यचयथाविधि ॥ उपहारादिकंसर्वमाचार्यायनिवेदयेत् ॥ ७५ ॥ दक्षिणाभिश्चसंतोष्या
ब्राह्मणांश्चविसर्जयेत् ॥ ममध्यानसमायुक्तोभुञ्जीतसहबन्धुभिः ॥ ७६ ॥ अकिंचनेननियतमुपोष्याचचतुर्दशी ॥ सप्तजन्मकृतात्पापान्मुच्यते
नात्रसंशयः ॥ ७७ ॥ यइदंशृणुयाद्भक्त्याव्रतंपापप्रणाशनम् ॥ तस्यश्रवणमात्रेणब्रह्महत्यांव्यपोहति ॥ ७८ ॥ पवित्रपरमंगुह्यंकीर्तयेद्यस्तु
मानवः ॥ सर्वकामानवाप्नोतिव्रतस्यास्यफलंसदा ॥ ७९ ॥ यइदंकुरुतेशक्त्याकालेमध्याह्नसंज्ञके ॥ लीलावत्यासहऋषिंश्रीनृसिंहंतथैवच॥
॥ ८० ॥ पूजयेत्परयाभक्त्यामुक्तिंप्राप्नोतिशाश्वतीम् ॥ तस्मिन्क्षेत्रेतुयोगत्वाश्रीनृसिंहंप्रपूजयेत् ॥ ८१ ॥ वाञ्छितंलभतेनित्यंश्रीनृसिंहप्रसा
दतः ॥ श्रीनृसिंहमहद्रूपकालकोटिदुरासद ॥ ८२ ॥ भैरवेशहरार्तिघ्नबालरूपनमोऽस्तुते ॥श्रीनृसिंहायरूपायबालायबालरूपिणे ॥ ८३ ॥ व्याप
कायसुनन्दायस्वात्मप्रकटरूपिणे ॥ सर्वजीवात्मकायैवविश्वेशायस्वरात्मने ॥ ८४ ॥ मार्तण्डमण्डलस्थायदयासिन्धोनमोऽस्तुते ॥ चतुर्विंश
स्वरूपायकालरुद्राग्निरूपिणे ॥ ८५ ॥ जगदेकस्वरूपायनृसिंहायनमोऽस्तुते ॥ भालेदधारयोदेवोनृसिंहोवीरभद्रजित ॥ ८६ ॥ द्वादशादित्य
बिम्बानिसुतप्तानिप्रमाणतः ॥ तत्रसिन्धुर्महापुण्यानदीरम्याविशेषतः ॥८७॥ तस्याःसमीपेनगरंवर्त्ततेऽद्यापिसुन्दरि ॥ मौलिस्तानेतिविख्यातंसर्वदा
देवनिर्मितम् ॥ ८८ ॥ वसतिर्वर्त्ततेतत्रहारीतस्यमहात्मनः ॥ लीलावतीतुतत्रैवतिष्ठतेनात्रसंशयः ॥ ८९ ॥ प्रतिशब्दोभवेत्तत्रसिन्धुनद्याःसमीपतः ॥
कलौयुगेतुसंप्राप्तेम्लेच्छावैपापचारिणः ॥ ९० ॥ निवसन्तितुतत्रैवबहवोनात्रसंशयः ॥ नृसिंहजन्मनियथाशब्दोऽभूदद्भुतःपरः ॥ ९१ ॥ नृसिंहेति
नृसिंहेतियउच्चैर्नदतेनरः ॥ तादृशःप्रतिशब्दोवैजायतेनगनन्दिनि ॥ ९२ ॥ ब्रह्महाहेमहारीवासुरापोगुरुतल्पगः ॥ सिन्धौगत्वाविशेषेणस्नानं
कुर्वीतयोजनः ॥९३॥ मुच्यतेनात्रसंदेहःश्रीनृसिंहप्रसादतः ॥ दशरात्रिप्रमाणेनमानवायेवसन्तिहि ॥९४॥ तेज्ञेयाःपुण्यकर्माणोनासत्यंमामकंवचः॥
निवसन्तिकलौतत्रवर्णायेद्विजपूर्वकाः ॥९५॥ म्लेच्छवत्तेऽपिविज्ञेयावेदबाह्याःसुरोत्तमे ॥ मांसंखादन्तितेतत्रमद्यपानंपपुःसदा॥९६॥अतोह्यधर्मरू
पास्तेपापिष्ठानात्रसंशयः ॥ सन्ध्याहीनायथाविप्रावेदबाह्यास्तथैवच ॥९७॥ निवसन्तिपुरेतस्मिन्पश्चिमायांसुरेश्वरि ॥ एकमेवपरंतीर्थंनृसिंहाख्यं
सुविस्तरम् ॥ यच्छ्रुत्वामुच्यतेपापान्नरःसद्योनसंशयः ॥ ९८ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०नृसिंहोत्पत्तिर्नामचतुःसप्तत्यधिकशततमो
ऽध्यायः ॥१७४॥ पार्वत्युवाच ॥ भगवन्सर्वतत्त्वज्ञश्रीविष्णोस्त्वत्प्रसादतः ॥ श्रुतानानाविधाधर्मालोकनिस्तारहेतवः ॥ १ ॥ अधुनाश्रोतु
मिच्छामिगीतामाहात्म्यमप्यहम् ॥ श्रुतेनयेनदेवेशहरौभक्तिर्विवर्धते ॥ तद्वदस्वाधुनादेवयद्यहंतववल्लभा ॥ २ ॥ ईश्वरउवाच ॥ अतसीपुष्प

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सङ्काशंखगेन्द्रासनमच्युतम् ॥ शयानंशेषशय्यायांमहाविष्णुमुपास्महे ॥ ३ ॥ कदाचिदासनेरम्येसुखासीनंमुरद्विषम् ॥ आनन्दयित्री
लोकानांलक्ष्मीःपप्रच्छसादरात् ॥४॥श्रीरुवाच॥ शयालुरसिदुग्धाब्धौभगवन्केनहेतुना ॥ उदासीनइवैश्वर्यंजगन्तिस्थापयन्निव ॥५॥ ईश्वरउवाच॥
इतिदेव्यावचःश्रुत्वामुरभिज्ज्ञानगर्भितम् ॥ उवाचश्लक्ष्णयावाचाविस्मयस्मेरलोचनः ॥ ६ ॥ श्रीभगवानुवाच ॥ नाहंसुमुखिनिद्रालुर्निजंमाहे
श्वरंवपुः ॥ दृशातत्त्वानुवर्तिन्यापश्याम्यन्तर्निमग्नया ॥ ७ ॥ कुशाग्रयाधियादेवियदन्तर्योगिनोहृदि ॥ पश्यन्तियच्चवेदानांसारंमीमांसतेभृशम्॥
॥ ८ ॥ तदेवमक्षरंज्योतिरात्मरूपमनामयम् ॥ अखण्डानन्दसंदोहनिस्पन्दिद्वैतवार्जितम् ॥ ९ ॥ यदाश्रयाजगद्वृत्तिर्यन्मयाचानुभूयते ॥ नयेन
रहितंकिंचिज्जगत्तत्त्वंचराचरम् ॥ १० ॥ निर्मथ्यबहुधालोक्यवेदशास्त्राम्बुधिंसुधीः ॥ द्वैपायनोयदासाद्यगीताशास्त्रंनिसृष्टवान् ॥ ११ ॥
यदास्थायमहानन्दमानन्दीकृतमानसः ॥निद्रालुरिवदेवेशिदुग्धाब्धौप्रतिभामिवै ॥१२॥इतितस्यमुरारातेर्मितमानन्दवद्वचः ॥साहर्षोत्फुल्ललोलाक्षी
लक्ष्मीःश्रुत्वाविसिस्मिये ॥ १३ ॥ श्रीरुवाच ॥ भवानेवहृषीकेशध्येयोऽस्तियमिनांसदा ॥ तस्मात्त्वत्तःपरंयत्तच्छ्रोतुंकौतूहलंहिमे ॥ १४ ॥
चराचराणांलोकानांकर्त्ताहर्त्तास्वयंप्रभुः ॥ यथास्थितस्ततोऽन्यस्त्वंयदिमांबोधयाच्युत ॥ १५ ॥ श्रीभगवानुवाच ॥ मायामयमिदंदेवि
वपुर्मेनतुतात्त्विकम् ॥ सृष्टिस्थित्युपसंहारक्रियाजालोपबृंहितम्॥१६॥अतोऽन्यदात्मनोरूपंद्वैताद्वैतविवर्जितम् ॥ भावाभावविनिर्मुक्तमाद्यन्तरहितं
प्रिये ॥ १७ ॥ शुद्धसंवित्प्रभालाभंपरानन्दैकसुन्दरम् ॥ रूपमैश्वरमात्मैक्यगम्यंगीतासुकीर्तितम् ॥ १८ ॥ इत्याकर्ण्यवचोदेविदेवस्यामित
तेजसः ॥ शङ्कमानाहवाक्येषुपरस्परविरोधिषु ॥१९॥ स्वयंचेत्परमानन्दमवाङ्मनसगोचरम् ॥ कथंगीताबोधयतिइतिमेच्छिन्धिसंशयम् ॥२०॥
ईश्वरउवाच ॥ श्रियःश्रुत्वावचोयुक्तमितिहासपुरःसरम् ॥ आत्मानुगामिनींदृष्टिंगीतांबोधितवान्प्रभुः ॥ २१ ॥ अहमात्मापरेशानिपरापरविभे
दतः ॥ द्विधाततःपरःसाक्षीनिर्गुणोनिष्कलःशिवः ॥ २२ ॥ अपरःपञ्चवक्रोऽहंद्विधातस्यापिसंस्थितिः ॥ शब्दार्थभेदतोवाच्योयथात्माहंमहेश्वरः॥
॥ २३ ॥ गीतानांवाक्यरूपेणयन्निरुच्छिद्यतेदृढः ॥ मदीयपाशबन्धोऽयंसंसारविषयात्मकः ॥ २४ ॥ यदाभ्यासपराधीनौपञ्चवक्रमहेश्वरौ ॥
इतितस्यवचःश्रुत्वागीतासारमहोदधेः॥ २५ ॥ इदंपरविभेदेनबुध्यतेभवभीरुभिः ॥ तमपृच्छदिदंलक्ष्मीरङ्गप्रत्यङ्गसंस्थितम् ॥ माहात्म्यंसेतिहासंच
सर्वंतस्यैन्यवेदयत् ॥ २६॥ श्रीभगवानुवाच॥शृणुसुश्रोणिवक्ष्यामिगीतासुस्थितिमात्मनः ॥ वक्त्राणिपञ्चजानीहिपञ्चाध्यायानुक्रमात्॥२७॥ दशा
ध्यायाभुजाश्चैकउदरंद्वौपदाम्बुजे ॥ एवमष्टादशाध्यायावाङ्मयीमूर्तिरैश्वरी ॥२८॥ विज्ञेयाज्ञानमात्रेणमहापातकनाशिनी ॥ अतोऽध्यायंतदर्धंवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्लोकमर्धंतदर्धकम् ॥ अभ्यस्यतिसुमेधायःसुशर्मैवसमुच्यते ॥ २९ ॥ श्रीरुवाच ॥ सुशर्मानामकोदेवकिंजातीयःकिमात्मकः ॥ कुत्रत्यस्तस्यवै
मुक्तिःकेनाजायतहेतुना ॥ ३० ॥ श्रीभगवानुवाच ॥ सुशर्मानामदुर्मेधाःसीमापापात्मनामभूत् ॥ जातोऽनात्मविदांवंशेविप्राणांक्रूरकर्मणाम् ॥३१॥
नध्यानंनजपोहोमोनचैवातिथिपूजनम् ॥ केवलंविषयेष्वेवबलाद्येनाभिवर्त्तते ॥ ३२ ॥ कृषिकर्मरतोनित्यंपर्णजीवीसुराप्रियः ॥ मांसो
पहारीसुचिरंकालमेवंनिनायसः ॥ ३३ ॥ आनेतुकामःपर्णानिपर्यटन्नृषिवाटिकाम् ॥ ततःसतत्रदष्टोऽभूत्कालसर्पेणमूढधीः ॥ ३४ ॥ काल
धर्मंसमासाद्यगत्वाचनिरयान्बहून् ॥ पुनरागत्यमर्त्येषुबलीवर्दत्वमीयिवान् ॥ ३५ ॥ पङ्गुनाकेनविक्रीतःसस्वजीवनहेतवे ॥ नयन्पृष्ठेन
शरदःसप्ताष्टौकष्टतोऽनयत् ॥ ३६ ॥ कदाचित्पङ्गुनासोऽपिचिरमावर्तितोजवात् ॥ पपाततरसाभूमौमूर्च्छांचप्रतिपेदिवान् ॥ ३७ ॥ विक
लाङ्गोविवृत्ताक्षःफेनसन्ततिमुद्गिरन् ॥ नजीवतिनमृत्युंवाप्रतिपेदेस्वकर्मणा ॥ ३८ ॥ कौतुकाकृष्टलोकेऽस्मिंस्तस्मिञ्जनसमागमे ॥ श्रेयसे
तस्यसुकृतीकश्चित्पुण्यंवितीर्णवान् ॥ ३९ ॥ कर्माणिस्वान्यनुस्मृत्यददुरन्येचकेचन ॥ गणिकाकापितत्रस्थालोकयात्रानुवर्तिनी ॥ ४० ॥
अज्ञातनिजपुण्यासाकिंचिदुत्सृष्टवत्यभूत् ॥ परेतनगरीमादौसनीतःकालकिङ्करैः ॥ ४१ ॥ गणिकादत्तपुण्येनपुण्यवानितिमोचितः ॥ पुनरागत्य
भूलोकंकुलशीलवतांगृहे ॥ ४२ ॥ द्विजन्मनामसौजज्ञेजातिंस्वामनुसंस्मरन् ॥ कालेमहतिजिज्ञासुःश्रेयःस्वाज्ञाननोदनम् ॥ ४३ ॥ उपेत्यगणि
कांदत्तंख्यापयित्वासपृष्टवान् ॥ आचष्टमांशुकोनित्यंपञ्जरस्थःपठत्यसौ ॥ ४४ ॥ तेनपूतान्तरात्माहंतत्पुण्यंपर्यकल्पयम् ॥ ताभ्यांशुक
स्तुपृष्टोऽसौव्याख्यातुमुपचक्रमे॥४५॥आख्यायिकांपुरावृत्तांस्मृत्वाजातिंनिजामपि ॥४६॥ शुकउवाच ॥ पुराविद्वानहंभूत्वावैदुष्यस्मयमोहितः ॥
रागद्वेषेणविद्वत्सुगुणवत्स्वपिमत्सरी ॥ ४७ ॥ कालेनाहंततःप्रेत्यप्राप्यलोकाञ्जुगुप्सितान्॥ सोऽहंकरिकुलेऽभूवंसद्गुरावतिनिन्दकः॥४८॥कालेधर्म
णिदुष्कर्मापितृभ्यांचवियोजितः ॥ निदाघेऽध्वनिसंतप्तेह्यानीतोमुनिपुङ्गवैः ॥ ४९ ॥ पालितःपञ्जरस्थोऽहमाश्रमेमहदाश्रये ॥ आवर्तयद्भ्योगीताना
माद्यमध्यायमादरात् ॥ ५० ॥ श्रुत्वाऋषिकुमारेभ्यःपाठंचाकरवंमुहुः ॥ एतस्मिन्नन्तरेकश्चिद्व्याधगुरिश्चौरकर्मकृत् ॥ मामाहृत्यतदाक्रीणादिति
वृत्तमुदाहृतम् ॥ ५१ ॥ श्रीभगवानुवाच ॥ अध्यायोऽयंपुराम्नातोयेनपापमनोदयम् ॥ पूतान्तरात्मायेनासौमोचितश्चद्विजोत्तमः ॥५२॥ एवमन्यो
न्यमाभाष्यतन्माहात्म्यंप्रशस्यच ॥ तेजपन्तोऽनिशंधीरामुक्तिंगेहेप्रपेदिरे ॥ ५३ ॥ तस्मादध्यायमाद्यंयःपठतेशृणुतेस्मरेत् ॥ अभ्यसेत्तस्यनभवे ॥ १६१ ॥
द्भवाम्भोधिर्दुरुत्तरः ॥ ५४ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०सतीश्वरसंवादेगीतामाहात्म्येपञ्चसप्तत्यधिकशततमोऽध्यायः ॥ १७५ ॥ श्रीभग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वानुवाच ॥ आदिमस्यैवमाख्यानमुदीरितमनुत्तमम् ॥ शृणुमाहात्म्यमन्येषामध्यायानामपीन्दिरे ॥ १ ॥ दक्षिणस्यांदिशिश्रीमानासीदाम्नायवादि
नाम् ॥ पुरेपुरन्दराह्वानेदेवशर्मेतिविश्रुतः ॥२॥ अर्चितातिथिराम्नातोवेदशास्त्रविशारदः ॥ आहर्ताक्रतुसङ्घानांतापसानांप्रियःसदा ॥३॥ देवान्संत
र्पयामासहव्यैर्हुतवहंचिरम् ॥ नचोपलेभेधर्मात्माशान्तिमैकान्तिकींततः ॥ ४ ॥ निःश्रेयसंसजिज्ञासुस्तापसाननुवासरम् ॥ [illegible]स्यसंकल्पान
नल्पैरेवकल्पकैः ॥ ५ ॥ एवमाचरतस्तस्यकालेमहतिगच्छति ॥ मुक्तकर्माततःकश्चित्प्रादुरासीत्पुराभुवि ॥ ६ ॥ अनुभूतनिराकाङ्क्षीनासाग्रन्यस्त
लोचनः ॥ शान्तचेताःपरंब्रह्मध्यायन्नानन्दनिर्भरः ॥ ७ ॥ पादौतस्योपसंगृह्यप्रणतेनान्तरात्मना ॥ चकारविधिवत्तस्मैविद्वानतिथिसत्क्रियाम् ॥८॥
तंचशुद्धेनभावेनपरितुष्टंतपस्विनम् ॥ प्रणतःपरिपप्रच्छनिर्वाणस्थितिमात्मनः ॥९॥ सतस्मैकथयामासपुरेऽसौपुरनामनि ॥ मित्रवन्तमजापालमुपदे
ष्टारमात्मवित् ॥ १० ॥ सचाभिवन्द्यतत्पादावेत्यसौपुरमूर्जितम् ॥ तस्योत्तरदिशोभागेददर्शविपुलंवनम् ॥ ११ ॥ मारुतान्दोलितानेककुसुमामोद
सुन्दरम् ॥ उन्मत्तभ्रमरोद्गीतनादापूरितदिङ्मुखम् ॥१२॥ तस्मिन्वनेसरित्तीरेनिषीदन्तंशिलातले ॥ मित्रवन्तंददर्शाथसानन्दस्तिमितेक्षणम् ॥१३॥
अपिस्वाभाविकंवैरंहित्वान्योन्यंविरोधिभिः ॥ सत्वैरावृतमुद्यानेमन्दस्यन्दनभास्वति ॥ १४ ॥ शान्तेषुमृगयूथेषुदशानन्दमनोज्ञया ॥ कृपानु
विद्धयाभूमिंनिषिञ्चन्तमिवामृतम् ॥ १५ ॥ उपेत्यविनयेनामुमुन्मनाःप्रीतमानसः ॥ किंचिदानम्रशिरसातेनापिसतुसत्कृतः ॥ १६ ॥ उपतस्थेततो
विद्वान्मित्रवन्तमनन्यधीः ॥ समाप्तध्यानकालंसपर्यपृच्छत्समाहितः ॥ १७ ॥ देवशर्मोवाच ॥ आत्मानंवेत्तुमिच्छामितदमुष्मिन्मनोरथे ॥
लब्धसिद्धिमुपायंमामुपदेष्टुंत्वमर्हसि ॥ १८ ॥ श्रीभगवानुवाच ॥ परामृश्यक्षणंसोऽपिमित्रवानिदमब्रवीत् ॥ १९ ॥ मित्रवानुवाच ॥ विद्वन्विद्धि
पुरावृत्तमुच्यमानमिदंमया ॥ अस्तिगोदावरीतीरेप्रतिष्ठानाभिधंपुरम् ॥ तत्रदुर्दमनामासीदन्वयेचमनीषिणाम् ॥ २० ॥ तत्रास्तिविक्रमोनाम
सेव्यमानोमहीपतिः ॥ दानानिप्रत्यहंगृह्णन्वर्त्ततेउदरम्भरिः ॥ २१ ॥ कालेनकालपाशेनबद्धानीतोयमालयम् ॥ निरयेषुसमग्रेषुयातनाअनुभूयच ॥
॥ २२ ॥ कस्मिंश्चित्सकुलेजातोदुर्वृत्तानांद्विजन्मनाम् ॥ भवान्तरानुवर्तिन्याविद्ययासपुरस्कृतः ॥२३॥ उपयेमेदुराधर्षांकन्यकामधमेकुले ॥ काले
नसावयोहित्वाशैशवंयौवनंययौ ॥२४॥पीनस्तनीचसुश्रोणीमदविह्वललोचना ॥ पतिंनसेहेदुर्वृत्तंचकमेस्वपतीन्परान् ॥ २५ ॥ वृं[illegible]कामेऽस्मिं
न्निर्गतासापुराद्बहिः ॥ संगताकामुकेनासौचिरंचाण्डालजन्मना ॥ २६ ॥ दधेगर्भमसौतस्मात्साचकन्योपपद्यते ॥ सैवभार्यापितस्यासीत्पूर्वपाप

१ 'नित्यम्' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रसङ्गतः ॥ २७ ॥ सैववृद्धाततःकालेडाकिनीसमजायत ॥ कुसङ्गात्कुमतिर्जातादुष्टनारीप्रसङ्गतः ॥ २८ ॥ चखादव्याधितंव्याधमसृगास्वाद
लालसा॥ भ्रमन्तीविपिनेघोरेजनैर्दृष्ट्वाबहिष्कृता ॥ २९ ॥ परेतलोकमासाद्यव्याधौव्याघ्रोऽभ्यवर्त्तत ॥ नरकान्दारुणान्भुक्त्वाजीवहिंसाप्रभावतः ॥
॥ ३०॥ सापिकालेनदुष्टात्मामृत्युवेगमुपागता ॥ निरयानेत्यदुर्धर्षानजाऽजायतमद्गृहे ॥ ३१ ॥ तामन्याअप्यहंविद्वन्पालयन्काननान्तरे ॥ अपश्य
न्द्वीपिनंघोरंजिघांसन्तमिवाखिलम् ॥ ३२ ॥ समालोक्यतमायान्तंभयेनप्रपलायितम् ॥ अजायूथंपरित्यज्यमयामरणभीरुणा ॥ ३३ ॥ उपदुद्राव
सद्वीपीपूर्ववैरमनुस्मरन् ॥ अजातुतत्समीपेऽगात्सत्वरंसीरदन्तिके ॥ ३४ ॥ तत्रसाभयमुत्सृज्यहित्वावैरमनर्गला ॥ अवतस्थेसचद्वीपीतूष्णीमासीद
मत्सरः ॥ ३५ ॥ तंतथाविधमालोक्यसावक्तुमुपचक्रमे ॥ द्वीपिन्नभीप्सितंभुङ्क्ष्वमांसमुद्धृत्यसादरः ॥ ३६ ॥ नेयंभवतितेबुद्धिःकथंवैरमतित्यजः ॥
इत्याकर्ण्यतदावाक्यंप्राहद्वीपीविमत्सरः॥३७॥ स्थानेऽस्मिन्मेगतोद्वेषःक्षुत्पिपासाचनिर्ययौ ॥ नप्रार्थयामितेनत्वांसमीपेसमुपस्थिताम् ॥३८॥ सैव
मुक्तापुनःप्राहजाताहंनिर्भयाकथम् ॥किमत्रकारणंवेत्सियदिमेवक्तुमर्हसि ॥३९॥एवमुक्तःपुनर्द्वीपीतामाहाजांनवेद्म्यहम् ॥पुरोगतमिमंप्रष्टुंमहान्तमिति
निर्गतौ॥४०॥ ताभ्यामुभाभ्यामागत्यपृष्टोऽहंबहुविस्मयः ॥ अहंचसहितस्ताभ्यामपृच्छंवानरेश्वरम्॥४१॥ मयापृष्टःसविप्रेन्द्रमब्रवीत्सादरंकपिः ॥
शृणुवक्ष्याम्यजापालवृत्तमत्रपुरातनम् ॥४२॥ इदमायतनंपश्यपुरोवनगतंमहत ॥ अत्रत्र्यम्बकलिङ्गंहिद्रुहिणेनप्रतिष्ठितम् ॥४३॥ सुकर्मानाममेधावी
पर्युपास्तेतपश्चरन् ॥ वनपुष्पाण्यपाहृत्यसुरपूज्यंपुरोभवम् ॥४४॥ संस्नाप्यसरिदम्भोभिःकेवलंकर्मणावसन् ॥ कालेमहतितस्यागादतिथिःकश्चिद
न्तिकम् ॥ ४५ ॥ उपाहृत्यफलाहारंसतस्मैपर्यकल्पयत् ॥ तेनातिथ्येनसंप्रीतःसुकर्माणमभाषत ॥ ४६ ॥ किमिदंकर्मणोमूलंफलंभुक्त्वातुतिष्ठसि ॥
गतानुगतयावृत्त्याकिंवाकेवलमीहसे ॥ ४७ ॥ सएवमुक्तःप्रायेणप्रीतेनात्मविदातदा ॥ प्रत्युवाचवचःस्पष्टमात्मनोहितमुत्तमम् ॥ ४८ ॥ विद्वन्न
वेद्मितत्त्वेनफलमेतस्यकर्मणः ॥ बुभुत्सयापरःशम्भुःसेव्यतेकेवलंयया ॥ ४९ ॥ फलमेतस्यसेवायाःपरिपाकंकपर्दिनः ॥ यन्मांसमनुगृह्णासि
संस्पृश्यात्ममनोरथम् ॥ ५० ॥ तस्यैवंसूनृतंवाक्यंश्रुत्वाप्रीतस्तपोधनः ॥ द्वितीयमालिलेखासौगीताध्यायंशिलातले ॥ ५१ ॥ आदि
देशाशुतंविप्रंपठनाभ्यसनायच ॥ फलिष्यत्यात्मनःस्वैरंपरितस्तेमनोरथः ॥ ५२ ॥ इत्युक्त्वान्तर्दधेधीमान्पुरतस्तस्यपश्यतः ॥ विस्मि
तस्तस्यचादेशात्सोऽन्वतिष्ठदनारतम् ॥ ५३ ॥ ततःकालेनमहताभावितात्माप्रसन्नधीः ॥ यत्रयत्रचचारासौशान्तंतत्तत्तपोवनम् ॥ ५४ ॥
नद्वन्द्वबाधानैवक्षुत्पिपासानचवाभयम् ॥ तपसातस्यजानीहिद्वितीयाध्यायजापिनः ॥ ५५ ॥ मित्रवानुवाच ॥ एवमुक्तश्चतेनाहंख्यापयित्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परांकथाम् ॥ अनुज्ञातःप्रसन्नेनच्छागीव्याघ्रयुतोऽगमम् ॥ ५६ ॥ गत्वाशिलातलेऽपश्यमध्यायंलिखितंपठेत् ॥ तस्यैवावर्त्तनादाप्तंतपसः
पारमुत्तमम् ॥ ५७ ॥ तेनत्वमपिकल्याणनित्यमाहर्तुमर्हसि ॥ अध्यायंतेनतेमुक्तिरदूरस्थाभविष्यति ॥ ५८ ॥ देवशर्मासमादिष्टस्तेनमित्र
वतास्वयम् ॥ अभ्यर्च्यप्रणतोभूत्वापुरन्दरपुरंययौ ॥ ५९ ॥ तत्रात्मविदमासाद्यदेवतायतनेक्वचित् ॥ वृत्तमेतन्निवेद्यादावध्यायमपठत्ततः ॥
॥ ६० ॥ शिक्षितस्तेनपूतात्मापठन्नध्यायमादरात् ॥ द्वितीयमाससादोच्चैर्निरवद्यंपरंपदम् ॥ ६१ ॥ द्वितीयस्येदमाख्यानंकथितंशृणुसाम्प्र
तम् ॥ तृतीयस्याथवक्ष्यामिमाहात्म्यमपिचेन्दिरे ॥ ६२ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०उत्तर०गीतामाहात्म्येसतीश्वरसंवादेषट्सप्तत्यधिक
शततमोऽध्यायः ॥ १७६ ॥ श्रीभगवानुवाच ॥ जनस्थानेजडोनामद्विजन्माकौशिकान्वयी ॥ हित्वाजात्युचितंधर्मंवणिग्वृत्त्यांमनोदधे ॥
॥ १ ॥ व्यसनीपरदारेषुदीव्यन्नक्षैःपिबन्मधु ॥ मृगयानिरतोनित्यंकालमेवंनिनायसः ॥ २ ॥ क्षीणवित्तेततोरात्रौचौर्यमारब्धवांस्ततः ॥
प्रतिपेदेधनंतेनयज्वनांयष्टुमर्थिनाम् ॥ ३ ॥ सदूरमगमत्तेनवाणिज्यायोत्तरांदिशम् ॥ कस्तूरिमगुरुंकृष्णंचामरांश्चन्द्रिकोज्ज्वलान् ॥ ४ ॥
गृहीत्वावृत्यचानिन्येपञ्चपादध्वयोजनात् ॥ अथापरस्मिन्नहनिप्रियादर्शनदोहनि ॥ ५ ॥ दूरमध्वानमुल्लङ्घ्यरवावस्तमितेसति ॥ ध्वान्ते
प्रसर्पतिस्वैरंदिशोदशतरोस्तले ॥ ६ ॥ गतोवशंसदस्यूनांनिजघ्नेतैश्चसत्वरम् ॥ धर्मलोपादसौजज्ञेघोरश्चोग्रतरोग्रहः ॥ ७ ॥ पिपासितो
बुभुक्षार्तोलेलिहानश्चसृक्किणी ॥ ऊर्ध्वकेशोऽतिजङ्घालःपृष्ठलग्नोदरोमहत् ॥ ८ ॥ अस्थिमात्रशरीरोऽभूद्वृत्तनयनोभृशम् ॥ अत्रान्तरेसुतस्तस्य
धर्मात्मावेदकोविदः ॥ ९ ॥ पर्यपालयदत्यर्थंदिदृक्षुस्तंतदागमत् ॥ नित्यमन्वेषयन्वार्त्तांपान्थेभ्योनोपलब्धवान् ॥ १० ॥ ततःकदाचि
दायातेसहायिनिचमानवे ॥ तस्माद्विदितवृत्तान्तःशुशोचपितरंबहु ॥ ११ ॥ ततोविमृश्यमेधावीचिकीर्षुःपारलौकिकम् ॥ वाराणसींससंभारः
सगन्तुमुपचक्रमे ॥ १२ ॥ मार्गेनिवासान्सप्ताष्टौनीत्वातस्यतरोस्तले ॥ संन्ध्यांप्रचक्रमेकर्तुंयत्रास्यनिहतःपिता ॥ १३ ॥ तत्राध्यायंसगीतानां
तृतीयंसंजजापह ॥ ततोघोरस्वरस्तत्रव्योममध्येपरामृशत् ॥ १४ ॥ ददर्शघोरमाकाशात्पतन्तंपितरंततः ॥ विस्मयेनभयेनापिविकलीकृत
चेतनः ॥ १५ ॥ तेजसाभूयसाव्याप्तमालुलोकेपुरोऽम्बरे ॥ किङ्किणीकोटिसंकीर्णंतेजसाव्याप्तदिङ्मुखम् ॥ १६ ॥ विमानमग्रतोऽपश्यद्दिव्य
मव्यग्रचेतनः ॥ तत्रापश्यत्समारूढंदिव्याभिःस्त्रीभिरावृतम् ॥ १७ ॥ संस्तूयमानंमुनिभिःपितरंपीतवाससम् ॥ प्रणतस्तंसमालोक्ययुयुजे
तेनचाशिषा ॥ १८ ॥ ततोऽपृच्छदिदंवृत्तंसचतस्मैन्यवेदयत् ॥ दुस्त्यजात्कर्मणोवत्सवपुषोऽपुण्यकारणात् ॥ १९ ॥ मोचितोऽस्मित्वया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दैवादध्यायंजपतान्तिके ॥ तन्निवर्तस्वजपतःसाम्प्रतंत्वामुपस्थितम् ॥ २० ॥ वाराणसींयदर्थंयत्तदनुष्ठितमात्मनः ॥ २१ ॥ श्रीभगवानुवा
च ॥ एवमुक्तःसचप्राहपितरंदीप्ततेजसम् ॥ २२ ॥ सुतउवाच ॥ हितंममानुशाधित्वंकार्यमन्यन्मयानुकिम् ॥ २३ ॥ श्रीभगवानुवाच ॥
ततःप्राहपितापुत्रंकार्यमेतत्त्वयानघ ॥ २४ ॥ यन्मयाचरितंकर्मअत्राममतुतत्कृतम् ॥ सयातोनरकंघोरंतंमोचयितुमर्हसि ॥ २५ ॥ अन्येमद
न्वयेयेवैनिरयंप्रतिपेदिरे ॥ तेचमोचयितव्यास्तेइतिमेऽस्तिमनोरथः ॥ २६ ॥ इत्येवमुक्तःपुत्रस्तंपुनःप्राहकृताञ्जलिः ॥ कर्मणाकेनतान्सर्वान्मोच
यामितदादिश ॥ एवंनिवेदितोवाक्यंपितासुतमुवाचह ॥ २७ ॥ पितोवाच ॥ येनाहंमोचितोवत्सतदनुष्ठातुमर्हसि ॥ २८ ॥ अनुष्ठायतदुत्पन्नं
तेभ्यःपुण्यंसमुत्सृज ॥ ततोऽहमिवतेसर्वेपूर्वेसंत्यज्ययातनाम् ॥ २९ ॥ गमिष्यन्त्यचिरेणैवतद्विष्णोःपरमंपदम् ॥ ससंदिष्टोऽवदत्पुत्रोयद्येवं
तातनारकान् ॥ ३० ॥ सर्वानपिविमोक्ष्यामियदितेरोचतेवचः ॥ एवमस्तुशिवंभूयादुपपन्नंमहत्प्रियम् ॥ ३१ ॥ ॥ इत्यादिश्यपितापुत्रंययौ
विष्णोःपरंपदम् ॥ सोऽपितस्मात्परावृत्यजनस्थानंप्रपद्यच ॥ ३२ ॥ सुन्दरस्यपुरःशौरेश्चालयेकालमभ्यगात् ॥ सकुर्वाणःसमादीनिपित्राच
यदुदीरितम् ॥ ३३ ॥ उत्ससर्जकृतंपुण्यंमोचयिष्यन्सनारकान् ॥ अत्रान्तरेपदेविष्णोर्यातनापदमीयुषः ॥ ३४ ॥ नारकान्मोचयिष्यन्तः
किङ्करायममभ्ययुः ॥ तेनतेपूजिताःसर्वेसत्क्रियाभिरनेकधा ॥ ३५ ॥ कुशलंपरिपृष्टास्तेसर्वतःसुखमूचिरे ॥ यमंसत्कृत्यमेधावीपितृलोकमहे
श्वरः ॥ ३६ ॥ हेतुमागमनेऽपृच्छत्तेचतस्मैन्यवेदयन् ॥ विद्धिकीनाशनाथत्वंशेषपर्यङ्कशायिना ॥ ३७ ॥ शौरिणाप्रहितानस्मान्समादेष्टुंत्वदन्तिके ॥
अस्मन्मुखेनदेवस्त्वांकुशलंपरिपृच्छति ॥ ३८ ॥ नारकान्प्राणिनःसर्वान्विमोक्तुंचनियच्छति ॥ इत्याकर्ण्यसमादिष्टंविष्णोरमिततेजसः ॥ ३९ ॥
नतेनमूर्ध्नासंभाव्यदध्यौकिंचनचेतसा ॥ विमुक्तान्निरयात्सर्वांस्तान्विलोक्यमदोत्कटा ॥ ४० ॥ सतैरनुगतःसर्वैर्विष्णोरायतनंततः ॥ ययौसवर
यानेनयत्रास्तेदुग्धवारिधिः ॥ ४१ ॥ तदन्तरुदितानेकसूर्यकोटिसमप्रभम् ॥ इन्दीवरदलश्याममालुलोकेजगद्गुरुम् ॥ ४२ ॥ शय्याफणिफणारत्न
मरीच्यामिश्रतेजसम् ॥ विलोक्यमानमानन्दनिर्भरंप्रीतमानसम् ॥ ४३ ॥ भावानुगैर्दृगालोकैःश्रियाप्रेम्णेक्षितंमुहुः ॥ योगिभिःपरितोजुष्टंध्याननिष्पन्द
तारकैः ॥ ४४ ॥ स्तूयमानंमहेन्द्रेणपराजेतुंविरोधिनः ॥ आम्नायवचसामन्तेब्रह्मणोनिःसृतैर्मुखात् ॥ ४५ ॥ मूर्तिमद्भिर्वचोभिश्चगीयमानंगुणोत्करम् ॥
संप्रीतंचाप्युदासीनमपिसर्वासुयोनिषु ॥ ४६ ॥ योगसञ्चितपुण्यानांयौगपद्येनजन्तुषु ॥ विलोकमानमात्मानमखिलंसचराचरम् ॥ ४७ ॥ आमो

१ 'दानवान्' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दयन्तमालोकैरात्मानंदीतिपूरितैः ॥ आविभ्राणंवपुर्व्यापिद्योतितंभोगिनस्त्विषा ॥ ४८ ॥ इन्दीवरदलश्यामंज्योत्स्नयेवनभस्तलम् ॥ विलोक्यतंस
तुष्टावधियाबहुलयानतः ॥ ४९ ॥ यमउवाच ॥ नमःसमस्तनिर्माणनिर्मलीभूतचेतसे ॥ वदनोद्गीर्णवेदायविश्वरूपायवेधसे ॥ ५० ॥ बलवेगसुदुर्द्ध
र्षदानवेन्द्रमदद्रुहे ॥ नमःस्थितौचसत्त्वायविश्वाधारायविष्णवे ॥ ५१ ॥ नमःपातकसङ्घातजिष्णवेऽखिलदेहिनाम् ॥ ईषदुन्मीलद्भलाटनेत्राग्नि
प्रभवार्चिषे ॥ ५२ ॥ त्वंहिसर्वस्यलोकस्यगुरुरात्मामहेश्वरः ॥ विसृज्यवैष्णवान्सर्वानतस्त्वमनुकम्पसे ॥ ५३ ॥ व्यापयन्नखिलंलोकंमाययापरि
बृंहितम् ॥ नतयापरिभूतोऽसिनचतत्प्रभवैर्गुणैः ॥५४॥ अन्तरावर्तमानोऽपिनताभ्यामभिभूयसे ॥ दृशाविषयवर्तिन्यानिगृहीतमनाअपि ॥ ५५ ॥
तयाफलाभिगामिन्याआत्मन्येवाऽभिलीयसे ॥ नतवास्तिमहिम्नोऽन्तोयथानिरवधिःस्वयम् ॥ ५६ ॥ मौनमेवात्रयुक्तंमेविषयोऽसिकथंगिराम् ॥
इतिस्तुत्वाततोवाक्यमिदमाहकृताञ्जलिः ॥ ५७ ॥ विनियोगादमीयुक्तादेहिनोनिर्गुणामया ॥ समादिशयदन्यन्मेकार्यमस्तिजगद्गुरो ॥ ५८ ॥
इतिविज्ञापितस्तेनतमाहमधुसूदनः ॥ मेघगम्भीरयावाचासिञ्चन्निवसुधारसैः ॥ ५९ ॥ पापादुद्धार्यतंलोकोमयासमयवर्तिना ॥ त्वयि
विन्यस्तभारोऽहंनानुशोचामिदेहिनः ॥६०॥ तदाचरनिजंकर्मप्रयाहिस्वंनिकेतनम् ॥६१॥ श्रीभगवानुवाच ॥ इत्युक्त्वान्तर्दधेदेवःसोऽपिस्वपुरमा
ययौ ॥ ६२ ॥ सोऽपिस्वजातिजान्सर्वान्निरयस्थाननेकशः ॥ उद्धृत्यवरयानेनविष्णुलोकंययौस्वयम् ॥६३॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०
गीतामाहात्म्येसप्तसप्तत्यधिकशततमोध्यायः ॥ १७७ ॥ श्रीभगवानुवाच ॥ चतुर्थस्यापिमाहात्म्यमाख्यास्याम्यधुनाशृणु ॥ बदरीत्वंसमुत्सृज्य
येनकन्येदिवंगते ॥१॥ श्रीरुवाच ॥ कथंकन्येदिवंयातेबदरीत्वंविसृज्यवै ॥ तेकेचास्तांपुरादेवकथंप्राप्तेतुमुख्यताम् ॥ २ ॥ एतद्वेदितुमिच्छामिनाथ
वक्तुंत्वमर्हसि ॥ नतुतृप्यामिशृण्वन्तीपरमांचकथामिमाम् ॥३॥ श्रीभगवानुवाच ॥ अस्तिभागीरथीतीरेनाम्नावाराणसीपुरी ॥ भरतोनामयुक्तात्मा
तत्रविश्वेश्वरालये ॥ ४ ॥ नित्यमात्मरतस्तुर्यंजपत्यध्यायमादरात् ॥ तदभ्यासाददुष्टात्मानद्वन्द्वैरभिभूयते ॥ ५ ॥ कालेकदाचनक्रीडन्ययौसनगरा
द्बहिः ॥ उपान्त्यवर्तिनोदेशान्दिदृक्षुःसतपोधनः॥६॥ विशश्रामतयोर्मूलेबदर्योर्न्यपतत्फले ॥ उपधायतयोरेकामन्यामालम्ब्यचाङ्घ्रिणा ॥ ७ ॥
तपस्विनिततोयातेबदर्योश्चतयोर्द्वयम् ॥शुष्कंनिष्पत्रशाखंचदिवसैःपञ्चषैरभूत् ॥८॥ गृहेकचनविप्राणांजज्ञातेकन्यकेततः ॥वर्धमानंतयोर्युग्मंसप्तभिः
परिवत्सरैः ॥ ९ ॥ विहृत्यदूरदेशेभ्योयतिमायान्तमैक्षत ॥ गृहीत्वाचरणौतस्यवचःसूनृतमब्रवीत ॥ १० ॥ त्वत्प्रसादादेवमुनेमोचितंद्वन्द्व
मावयोः ॥ उत्सृज्यबदरीभावंमानुष्यंप्रतिपद्यते ॥ ११ ॥ एवमुक्तोमुनिस्ताभ्यांविस्मृतःप्रत्युवाचसः ॥ कदावत्सेयुवांकेनहेतुनामोचिते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मया ॥ १२ ॥ युवयोर्बदरीत्वेचहेतुंब्रूतंनवेद्म्यहम् ॥ ऊचतुःकन्यकेतस्मैबादर्येहेतुमात्मनः ॥ १३ ॥ आदौविमोचनेतस्माद्दुस्त्यजादपि
कारणम् ॥ अस्तिगोदावरीतीरेतीर्थंपुण्यप्रदंनृणाम् ॥ १४ ॥ छिन्नपापमितिख्यातंपरांकोटिमवापयत् ॥ तत्रसत्यतपानामतपस्तेपेसु
दारुणम् ॥ १५ ॥ ग्रीष्मेमहतिदीप्तानांमध्यगोजातवेदसाम् ॥ वर्षासुजलधाराभिर्नित्यमासिक्तमूर्द्धजः ॥ १६ ॥ शिशिरेचवसन्नप्सु
बिभ्रत्कण्टकितांतनुम् ॥ विशुद्धःसततंकालेतपस्तप्त्वाससंयमी ॥ १७ ॥ आत्मन्येवमतिंचक्रेपरांप्राप्यसुनिर्वृतिम् ॥ सदाफलानिबिभ्रत्सु
सान्द्रच्छायेषुशाखिषु ॥ १८ ॥ निर्मत्सरेषुसत्त्वेषुबद्धाप्रीतिंपरामपि ॥ तपःफलानुसंधानेवैदुष्येनोपपादितम् ॥ १९ ॥ ब्रह्माप्येनंस्वयंपृच्छन्नुप
तस्थेतमन्वहम् ॥ तेनसंकोचहीनत्वाद्ब्रह्मण्यनुगतेऽन्वहम्[1] ॥ २० ॥ तद्ध्यानानुगतव्यक्तिर्ववृधेतस्यतत्तपः ॥ विमुक्तकल्पंमन्वानःसमृद्धा
दात्मनःपदात् ॥ २१ ॥ अन्तरायशतंचक्रेततोभीतःपुरन्दरः ॥ आहूयाप्सरसांमध्यादावांतुल्यंसमादिशत् ॥ २२ ॥ कुरुतंतत्तपोविघ्नमनेनाच
रितंयुवाम् ॥ योमांपदादवष्टभ्यस्वराज्यंभोक्तुमिच्छति ॥ २३ ॥ इतिसंदेशमापन्नपुरस्ताच्चबिडौजसः ॥ गोदावरीमगच्छावसमुनिर्यत्रवर्तते ॥
॥ २४ ॥ मृदङ्गैर्मन्दगम्भीरैर्वेणुभिःकलवादिभिः ॥ कलंगीतंसमारब्धंतन्वङ्गीभिःसमन्वितम् ॥ २५ ॥ उद्वहन्त्यौपृथुश्रोणींघनपीनपयोधरे ॥
स्मयस्मेरमुखाम्भोजेकिंचिदाकुञ्चितालके ॥ २६ ॥ मणिकुण्डलघृष्टांसेपुण्डरीकोज्ज्वलेक्षणे ॥ तनुमध्येसुवृत्तोरुवहन्त्यौचसमेपदे॥२७॥आनर्तांयो[2]
वनस्यार्थेस्वरताललयानुगाम् ॥ दर्शयन्त्यौस्वतःकृत्स्नांगतिभावानुगामिनीम् ॥२८॥ मृदूपक्रममुत्पन्नंमन्दम्मन्दंविवर्द्धनम् ॥ गर्जयामासदिक्चक्रं
ततयोर्नृत्यमानयोः ॥ २९ ॥ ततोऽङ्गहारवेगेनवायुर्वासःसुशीतलः ॥ ईषदुच्छ्वसितेचैलेदर्शयन्त्यौपयोधरौ ॥ ३० ॥ उद्धर्षयन्तीकन्दर्पमुल्बणा
गतिरावयोः ॥ कोपमुत्पादयामासमुनेरविकृतात्मनः ॥ ३१ ॥ ततःशापंददौकोपाज्जलमुत्सृज्यपाणिना ॥ बदरीत्वंप्रपद्येथांजाह्नवीरोधसीतिनौ
॥ ३२ ॥ आवाभ्यांपारतन्त्र्येणयद्दुश्चरितमास्थितम् ॥ तत्क्षमस्वविनम्राभ्यांमुनिःपश्चात्प्रसादितः ॥ ३३ ॥ ततःशापविमोक्षंनौकल्पयामास
पुण्यधीः ॥ भरतागमनान्तोऽयमितिसत्यतयामुनिः ॥ ३४ ॥ मर्त्येषुजन्मलाभश्चस्मृतिश्चातीतजन्मनाम् ॥ आवयोरन्तिकंगत्वाबदरीभूतयोस्त
तः ॥ ३५ ॥ स्मरतातुर्यमध्यायंभवतानिष्कृतिःकृता ॥ तत्तावत्प्रणमावस्त्वांशापादेवनकेवलात् ॥ ३६ ॥ घोरादेवतुसंसारात्त्वयैतेनविमोचिते ॥
श्रीभगवानुवाच ॥ एवमुक्तोमुनिस्ताभ्यामतिप्रीतमनास्ततः ॥ ३७ ॥ पूजितस्तेसमामन्त्र्ययथागतमसौययौ ॥ कन्येचतुर्थमध्यायंजपेतांनित्यम।

१'ब्रह्मण्युपगते'इ०पा० । २'आना।र्तां' इ०'आनृत्य' इ० च पा० ।

CC-0. In Public Domain. Digitization by eGangotri

दरात ॥ ३८ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०गीतामाहात्म्येऽष्टसप्तत्यधिकशततमोऽध्यायः ॥ १७८ ॥ श्रीभगवानुवाच ॥ पञ्चमस्याधुना
देविमाहात्म्यंलोकपूजितम्॥ कथयामिसमासेनसावधानाशृणुप्रिये ॥ १ ॥ पिङ्गलोनामभद्रेषुपुरुकुत्सपुरेद्विजः ॥ अवदातेकुलेजातोविश्रुतेवेदवादि
नाम् ॥ २ ॥ कुलोचितानिशास्त्राणितथावेदान्विसृज्यसः ॥ तौर्यत्रिकेमतिंचक्रेवादयन्मुरजादिकम् ॥ ३ ॥ कृतश्रमस्ततस्तत्रगीतेनृत्येचवादने ॥
परांप्रसिद्धिमासाद्यनृपसद्मविवेशसः ॥ ४ ॥ समातस्थेसतेनासौपुराभूमिभुजासह ॥ परदारानुपाहृत्यबुभुजेताननन्यधीः ॥ ५ ॥ ततउत्सिक्तगर्वो
ऽयंसूचमानोनिरङ्कुशः ॥ परच्छिद्राणिचामुष्मैविविक्तेसनिरन्तरम् ॥ ६ ॥ तस्यासीदरुणानामभार्याहीनकुलोद्भवा ॥ भ्रमत्यन्वेषयन्तीसा
कामुकेनविहारिणी ॥७॥ तमन्तरायंमन्वानानिशीथिन्यांनिजालये ॥ निजघानशिरश्छित्त्वानिचखानमहीतले ॥८॥ वियोजितस्ततःप्राणैरुपेत्ययम
सादनम् ॥ दुर्जयान्नरकान्भुक्त्वागृध्रोऽभूद्विजनेवने ॥ ९ ॥ भगन्दरेणरोगेणसापिहित्वावरांतनुम् ॥ उपेत्यनरकान्घोराञ्जज्ञेतत्रवनेशुकी ॥ १० ॥
कणानादातुकामांतांसंचरन्तीमितस्ततः ॥ विददारनखैस्तीक्ष्णैर्गृध्रोवैरमनुस्मरन् ॥ ११ ॥ नृकपालेपयःपूर्णेनिपतन्तींततःशुकीम् ॥ अभिदुद्राव
गृध्रोऽपिनिजघ्नेसचजालिकैः ॥ १२ ॥ पत्नीवियोजिताप्राणैर्नृकपालंजलेततः ॥ तत्रैवनिममज्जासावेत्यक्रूरतरःखगः ॥ १३ ॥ पितृलोकंप्रपेदाते
नीतौतौयमकिङ्करैः ॥प्राक्कृतंदुष्कृतंकर्मस्मरन्तौभयभागिनौ ॥ १४ ॥ ततोयमःसमालोक्यतयोःकर्मजुगुप्सितम् ॥अकस्मादेवतत्स्नानान्मरणेसुकृतं
महत् ॥१५ ॥ अनुजज्ञेततोलोकमीप्सितंगन्तुमेतयोः ॥ महापातकसङ्घातैरपिदुर्धर्षमानसौ ॥ १६ ॥ ततोविस्मयमापन्नौस्मृत्वातौदुष्कृतंनिजम् ॥
उपेत्यप्रणतौभूत्वावैवस्वतमपृच्छताम् ॥१७॥ गृध्रशुक्यावूचतुः ॥ संचितंदुष्कृतंपूर्वमावाभ्यामपिगर्हितम् ॥ लोकानामीप्सतानांतुकोहेतुस्तद्वदस्व
नौ ॥ १८ ॥ एवमुक्तस्ततस्ताभ्यामाहवैवस्वतोवचः ॥१९ ॥ यमउवाच ॥ आसीद्गङ्गातटेनाम्नाबटुर्ब्रह्मविदुत्तमः ॥ एकाकीनिर्ममःशान्तोवीतरागो
विमत्सरः ॥ २० ॥ गीतानांपञ्चमाध्यायमावर्त्तयतिसर्वदा ॥ तेनपुण्येनपूतात्माबुद्धाब्रह्मसनातनम् ॥ २१ ॥ पापीयानपियंश्रुत्वातनुमुत्सृष्टवान
सौ ॥ निर्मलीकृतदेहस्यगीताभिर्भावितात्मनः ॥ २२ ॥ तत्कपालजलंप्राप्ययुवांयातौपवित्रताम् ॥ तद्गच्छतंयुवांलोकान्मनोरथपथिस्थितान् ॥
गीतानांपञ्चमाध्यायमाहात्म्येनपवित्रितौ ॥२३॥ श्रीभगवानुवाच ॥ एवंतौबोधितौतेनमुदितौसमवर्तिना ॥ व्योमयानंसमारुह्यजग्मतुर्वैष्णवंपदम्॥
॥२४॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०गीतामाहात्म्यएकोनाशीत्यधिकशततमोऽध्यायः ॥१७९॥ श्रीभगवानुवाच ॥ षष्ठाध्यायस्यमाहात्म्यं

१ 'दुष्कृतं गतम्' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रवक्ष्यामिवरानने ॥ यदाकर्णयतांनृणांमुक्तिःकरतलेस्थिता ॥ १ ॥ अस्तिगोदावरीतीरेप्रतिष्ठानंपुरंमहत् ॥ पिप्पलेशाभिधानोऽहंयत्रास्मिस्मेर
लोचने ॥२॥ यत्रगोदावरीवारिशीकरैरेवशीतलैः ॥ हंसाः[1]पक्षपुटैःकीर्णैर्हरन्तियमिनांश्रमम् ॥ ३ ॥ स्फुरत्पद्मावलीकोशपरागसुरभीकृतम् ॥ श्लाघ्यं
गोदावरीतोयंयेनतेनिर्जरानराः ॥ ४ ॥ धिक्सुधामौषधीशस्यविकृतक्षयविधायिनीम् ॥ महाराष्ट्रवधूकानांमज्जन्तीनांमुनीश्वराः ॥ ५ ॥ स्पृशन्ति
यत्रवक्त्राणिफुल्लपङ्कजशङ्कया ॥ यत्रखेलन्महाराष्ट्राःक्वणत्कङ्कणसुन्दराः ॥ ६ ॥ हरन्तिध्वनयोऽलीनांमनांस्यपितपस्विनाम् ॥ अत्युच्चसौधशिखर
विहारिवनितासुखम् ॥ ७ ॥ पश्यन्ननुदिनंयत्रक्षीयतेमृगलाञ्छनः ॥ अत्युच्चसौधवलभीमहामणिमरीचिभिः ॥८॥ चुम्ब्यन्तेमुनिगन्धर्वैर्दूर्वाचन्दन
चञ्चलैः ॥ यस्मिन्नाधूयमानानांपताकानांसमीरणैः ॥ ९ ॥ गतश्रमारवेर्यानेभवन्तिरथवाजिनः ॥ राशीकृतैर्मलयजैरसङ्ख्यातैर्वणिग्गणैः ॥ १० ॥
यस्मिन्नुपलशेषोऽसौलक्ष्यतेमलयाचलः ॥ पुञ्जीकृतानिदृश्यन्तेयत्रमुक्ताफलान्यपि ॥ ११ ॥ नगरीदेवताहास्यस्तवकाइवसर्वतः ॥ तत्रज्ञान
श्रुतिर्नाम्नामेदिनीवल्लभोऽभवत् ॥ १२ ॥ यस्मिन्नुद्धरतिक्षोणींशेषोऽयंमणिसंनिभाम् ॥ अपिप्रतापमार्तण्डमण्डलीतीव्रतेजसि ॥१३ ॥ नित्यमध्वर
धूमेनश्यामलाःकल्पशाखिनः ॥ असाधारणदातृत्वंपश्यन्तइवलज्जया ॥ १४ ॥ यदध्वरपुरोडाशचर्वणास्वादलम्पटाः ॥ नतत्यजुःसुपर्वाणःप्रतिष्ठा
नपुरंमनाक् ॥ १५ ॥ यस्यदानाम्बुधाराभिःप्रतापज्योत्स्नयानिशम् ॥ मखधूमैश्चसंपुष्टाववृषुःसमयेघनाः ॥ १६ ॥ स्वल्पमात्रमपिक्वापिनपदंप्रापु
रीतयः ॥ नीतयःप्रसरन्तिस्मयस्मिञ्छासतिमेदिनीम् ॥ १७ ॥ वापीकूपतडागानांछद्मनायोऽनुवासरम् ॥ हृदयस्थानिमेदिन्यानिधानान्यलोक
यत्॥१८॥पाण्डुराभिःपताकाभिःप्रासादोयस्यराजते ॥ वियद्गङ्गातरङ्गौघैर्हिमाद्रिरिवसानुमान्॥१९॥दानैस्तपोभिर्यज्ञैश्चप्रजानांपालनेनच ॥ तुष्टाः
स्वर्गौकसस्तस्मैवरंदातुंसमागमन् ॥ २० ॥ ततोऽन्तरिक्षमार्गेणधुन्वानाःपक्षसंहतीः ॥ मृणालधवलादेविदेवहंसाविनिर्गताः ॥२१॥ त्वरयागच्छतां
तेषामन्योन्यंतत्रभाषिणाम् ॥ भद्राश्वप्रमुखाद्वित्राःपुरस्तान्निर्ययुर्जवात् ॥ २२ ॥ पाश्चात्यहंसाऊचुस्तान्पुरस्ताद्गच्छतोजवात् ॥ २३ ॥ पाश्चात्य
हंसाऊचुः॥कथंवेगेननिर्याताभवन्तःपुरतःस्थिताः॥सर्वैर्मिलित्वागन्तव्यमस्मिन्नध्वनिदुर्गमे ॥ २४ ॥ प्रकाशमानंपुरतस्तेजःपुञ्जंनपश्यथ ॥ ज्ञान
श्रुतेर्महीभर्तुःपुण्यमूर्तेरतिस्फुटम्॥२५॥श्रीशिवउवाच॥निशम्येतिवचःसम्यक्पाश्चात्यानांपुरःस्थिताः ॥ हंसाहसित्वासावज्ञमूचुर्वचनमुच्चकैः॥२६॥ ॥ १६६ ॥
पुरःस्थितहंसाऊचुः ॥ रैक्याभिधस्यदुर्धर्षतेजसोब्रह्मवादिनः ॥ किंनुज्ञानश्रुतेरस्यराज्ञस्तीव्रतरंमहः ॥२७॥ श्रीशिवउवाच॥ इतिशुश्रावहंसानांगिरो

[1]'हंसपक्षपुटोद्गीर्णैः' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञानश्रुतिर्नृपः ॥ अत्युच्चसौधभवनमारुह्यचसुखंस्थितः ॥ २८ ॥ ततःसारथिमाहूयभूपालोविस्मयान्वितः ॥ संदिदेशमहात्मासौरैक्यआनीयता
मिति ॥ २९ ॥ ततोऽवधार्यभूपालवचःपीयूषगर्भितम् ॥ निर्जगाममहोनाम्नासारथिःप्रथयन्मुदम् ॥ ३० ॥ यत्रवाराणसीनामनगरीमुक्तिदायिनी ॥
यत्रविश्वेश्वरोनामह्युपदेष्टाजगत्पतिः ॥ ३१ ॥ ततोगयाभिधेक्षेत्रेयत्रदेवोगदाधरः ॥ उद्धर्तुमखिलाँल्लोकान्वसत्युत्फुल्ललोचनः ॥ ३२ ॥ ततोगौ
रीगुरोःपार्श्वेसर्वैस्तीर्थैरनेकधा ॥ पर्यटन्गतवान्यत्रकेदारःपापदारणः ॥ ३३ ॥ यमालोक्यसकृन्मर्त्यामुक्ताःस्युर्नात्रसंशयः ॥ महापापविनिर्मुक्ता
भुक्त्वाभोगान्यथेप्सितान् ॥ ३४ ॥ ततोगौडेषुनिर्यातोयत्रास्तेपुरुषोत्तमः ॥ यस्यावलोकनादेवनराःस्वर्लोकगामिनः ॥ ३५ ॥ ततोद्वारावतींप्रागा
न्नगरींमुक्तिदायिनीम् ॥ यत्रास्तेगोमतीतीरेरुक्मिणीवल्लभोहरिः ॥ ३६ ॥ स्नात्वाचगोमतीतीर्थेपञ्चकृष्णान्विलोक्यच ॥ मर्त्योमुक्तिमवाप्नोति
भुक्त्वाभोगान्यथेप्सितान् ॥ ३७ ॥ ततःसमुद्रमासाद्यसोमनाथंविलोक्यच ॥ भुक्तिमुक्तिप्रदंदेवंततोनिरगमत्सुधीः ॥ ३८ ॥ अवन्तिकांपुरींप्राप्तो
भुक्तिमुक्तिप्रदायिनीम् ॥ यत्रोमयासुखंक्रीडन्महाकालोऽस्तिशङ्करः ॥ ३९ ॥ अथोङ्कारंसमासाद्यशर्मदंनर्मदातटे ॥ भुक्तिमुक्तिप्रदातारंत्वरयानिर्ग
तस्ततः ॥ ४० ॥ अश्वमेधकरंनाम्नानगरंपर्यटंस्ततः ॥ यत्रशार्ङ्गधरःसाक्षादास्तेलक्ष्मीपतिःस्वयम् ॥ ४१ ॥ ततोविष्णुगयाप्राप्तःकुण्डलोणार
संज्ञितम् ॥ यत्रस्नात्वाचपीत्वाचमुच्यतेबन्धनान्नरः ॥ ४२ ॥ ततःकोल्हापुरंनामगतोरुद्रगयांप्रति ॥ आस्तेभगवतीयत्रलक्ष्मीर्भक्तिप्रदायिनी
॥ ४३ ॥ पञ्चनद्यांनरःस्नात्वामहालक्ष्मींविलोक्यच ॥ भुक्त्वाभोगान्यथाकामंभक्तिंचप्रतिपद्यते ॥ ४४ ॥ ततोऽमलगिरिंनामनगरींप्रति
पद्यच ॥ नन्दिकेश्वरमारुह्यसोमनाथोऽस्तियत्रतु ॥ ४५ ॥ दृष्ट्वाचतुर्भुजंदेवंवरदानोद्यतंशिवम् ॥ सोमनाथंनृणांमुक्तिर्भवत्येवनसंशयः
॥ ४६ ॥ तुङ्गभद्रानदीतीरेदृष्ट्वाहरिहरंततः ॥ युगेयुगेभुजायस्यपतन्त्यवनिमण्डले ॥ ४७ ॥ यद्विलोक्यनराःसर्वेरम्यंहरिहरंवपुः ॥ भुक्त्वाभो
गान्यथाकामंमुच्यन्तेबन्धनान्नराः ॥ ४८ ॥ स्वर्गेकल्पशतंस्थित्वामुक्तसंसारबन्धनाः ॥ ततःस्वामिनमालोक्यलोकानांस्वामिनंविभुम् ॥ ४९ ॥
यमालोक्यनपश्यन्तिनिरयंजातुचिन्नराः ॥ स्वर्गेकल्पशतंस्थित्वामुक्तसंसारवासनाः ॥५०॥ मुक्तिंचप्रतिपद्यन्तेनात्रकार्याविचारणा ॥ततःश्रीशैलमा
साद्यसिद्धगन्धर्वसेवितम् ॥ ५१ ॥ गिरिजावल्लभोयत्रमल्लिनाथोऽभिधानतः ॥ उद्धर्तुमखिलाँल्लोकान्संसाराम्भोधिमध्यतः ॥ ५२ ॥ स्वर्गेकल्पशतं
स्थित्वामुक्तसंसारबन्धनाः ॥मुक्तिंचप्रतिपद्यन्तेनात्रकार्याविचारणा ॥५३॥ ततःश्रीशैलमासाद्यसिद्धगन्धर्वसेवितम्॥ गिरिजावल्लभोयत्रमल्लिनाथोऽ
भिधानतः ॥ ५४ ॥ उद्धर्तुमखिलाँल्लोकान्संसाराम्बुधिमध्यतः ॥ कालेकालेपरंज्योतिर्यःसंदर्शयतेस्वयम् ॥ ५५ ॥ अवलोकयतांनृणांयम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नुस्मरतामपि ॥ दूरेतिष्ठन्तिसंत्रस्तादूरंनिरययातनाः ॥ ५६ ॥ स्वर्गेलोकेसुखंभुक्त्वामुक्तसंसारबन्धनाः ॥ मुक्तिंचप्रतिपद्यन्तेमानवानात्रसंशयः ॥
॥ ५७ ॥ रामोऽस्तिसानुजःसार्धंजानक्यापिततोगतः ॥ तत्रस्नात्वाचपीत्वाचमुच्यतेनरकाद्ध्रुवम् ॥५८॥ कल्पकोटिशतंभुक्त्वास्वर्गलोकसुखंनराः॥
मुक्तसंसारवर्त्मानोमुक्तिंयान्तिनसंशयः ॥ ५९ ॥ ततोनिवृत्यआयातःपश्यन्भीमरथीतटे ॥ द्विभुजंविट्ठलंदेवंभुक्तिमुक्तिप्रदायकम् ॥ ६० ॥ यत्र
गोदावरीजन्मस्थानंब्रह्मगिरिर्महान् ॥ गौतमालयमासाद्ययत्रास्तेत्र्यम्बकोहरः॥६१॥अरुणावरुणयोर्मध्येयत्रगोदावरीनदी॥तत्रस्नात्वाचपीत्वाचब्रह्म
हत्याविलीयते॥६२॥असङ्ख्यतीर्थसंपन्नंदृष्ट्वाब्रह्मगिरिंनराः॥ मुक्तिमेवप्रपद्यन्तेमुक्ताःसंसारदुःखतः ॥६३॥ गौतम्युभयतीरस्थतीर्थान्वेषणकौतुकी॥
ततोजगामस्नूतस्तुमथुरांपापनाशिनीम्॥६४॥यत्रस्वायम्भुवंदेवंभजन्तिसुरमानवाः ॥ आद्यंभगवतःस्थानंमहन्मुक्तिप्रदायकम्॥६५॥त्रैलोक्येशजनि
स्थानंविख्यातंवेदशास्त्रयोः ॥ नानादेवगणैर्जुष्टंद्विजर्षिगणसेवितम् ॥६६॥ कालिन्दीकूलसंशोभिह्यर्धचन्द्रप्रभाकृति ॥ सर्वतीर्थनिवासैकपूर्णमानन्द
सुन्दरम् ॥ ६७ ॥ गोवर्धनगिरिप्रख्यंपुण्यद्रुमलतावृतम् ॥ द्विषड्वनंमहापुण्यंविश्रान्तिश्रुतिसारभृत् ॥ ६८ ॥ ततःकाश्मीरनगरमपश्यत्प्रत्ययुत्तरम् ॥
दृष्ट्वाधर्मधुरंक्षेत्रंकुरुक्षेत्रंसमन्ततः॥६९॥यत्राभ्रंलिहगेहानांपङ्क्तयःशङ्खपाण्डुराः ॥ ताजाताधूर्जटेःस्पष्टअट्टहाससदशाइव॥७०॥ भक्तिप्रसादमालानां
सुवर्णकलशैर्वृतम् ॥ स्वःसिन्धःपतितानीवहेमपद्मानिमारुतैः ॥ ७१ ॥ यत्रप्रासादशिखरेनीलपट्टपताकिकाः ॥ शैवालवलयाभान्तिस्वःसिन्धो
र्लतिकाइव ॥ ७२ ॥ यत्रकाश्मीरमाश्रित्यनित्यंवसतिभारती ॥ नोचेद्युगपदेवेदंकथंलिखतिवाङ्मयम् ॥ ७३ ॥ विश्रामन्त्याःसरस्वत्याश्चिरंयत्र
मदालसाः ॥ मृणालचञ्चवोहंसावाहनानिचरन्त्यमी ॥७४ ॥ कलाविशेषंग्रहितायत्रबोद्धुंविरिञ्चिना ॥ ताराइवविराजन्तेहंसायाताःसमन्ततः ॥७५॥
स्थलपद्मानिदृश्यन्तेकरस्पर्शसुखानिच ॥ शयनायनितम्बिन्यायस्मिन्दानववैरिणा ॥ ७६ ॥ उपन्यासैर्द्विजातीनांयत्रनश्रूयतेस्फुटम् ॥ मूकोऽपि
निर्जरोवाचापदकल्लोलडम्बरः ॥७७॥ यस्मिन्नध्वरधूमेनव्याप्तंगगनमण्डलम्॥अपिचक्षालितंमेघैःकालिमानंनमुञ्चति ॥७८॥गलितायाःसुधायास्तुय
त्राध्वरमहार्चिषा ॥ लाञ्छितंछद्मनास्थानंदृश्यतेतुहिनत्विषि ॥ ७९ ॥ जन्माभ्यासवशादेवपठन्तिबटवःस्वयम् ॥ यत्रोपाध्यायसान्निध्यमाश्रित्य
सकलाःकलाः॥८०॥यत्रब्राह्मणपत्नीनांकङ्कणध्वनिहुङ्कृतिः ॥ लुंपत्यनुदिनंभ्राम्यद्भ्रमराणांचगर्जितम् ॥८१॥ यत्रब्राह्मणपत्नीनांकपोलफलकंमुहुः ॥
स्पृशन्समीरणोमन्दंवातिशापभयादिव ॥ ८२ ॥ माणिक्येश्वरनामासौयत्रशीतांशुशेखरः ॥ वसत्यनुदिनंदेवोवरदानायदेहिनाम् ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ८३ ॥ अर्चितोभूपतीञ्जित्वाम[१]णिकेशेनचाहृतः ॥ माणिक्येश्वरइत्याख्यांतदाप्रभृतियोदधौ ॥ ८४ ॥ राज्ञाकाश्मीरदेवेशदिग्जयोत्स
वकारिणा ॥ असौसुपूजितोयस्मान्माणिक्यैर्भूरिभूतिभिः ॥ ८५ ॥ संसेवमानंतद्वारिच्छायांशकटिकोपरि ॥ कण्डूयमानमङ्गानियन्तारैक्य
मपश्यत ॥ ८६ ॥ राज्ञापिकथितैस्तैस्तैश्चिह्नैःपरिचितंजवात् ॥ प्रणतःसारथीरैक्यंप्रणम्यतमभाषत ॥ ८७ ॥ सारथिरुवाच ॥ कस्मि
न्ब्रह्मन्किन्नामासिस्वच्छन्दोऽसिनिरन्तरम् ॥ किमर्थमत्रविश्रान्तःकिंचकर्तुंचिकीर्षसि ॥ ८८ ॥ श्रीशिवउवाच ॥ इत्याकर्ण्यचतद्वाक्यंपरमा
नन्दनिर्भरः ॥ स्मृत्वासारथिमित्यूचेवयंपूर्णमनोरथाः ॥ ८९ ॥ परंकेनापिबहुनापरिचर्याविधायिना ॥ भवितव्यंमनोवृत्तिजानतास्माकमे
वहि ॥ ९० ॥ हृदयस्थितमादायरैक्याभिप्रायमादरात् ॥ शनैर्निरगमद्यन्तायत्रास्तेवसुधाधिपः ॥ ९१ ॥ ततःप्रणम्यभूपालंयथावृत्तंन्यवेदयत् ॥
बद्धाञ्जलिपुटोहृष्टःसारथिःस्वामिदर्शनात् ॥ ९२ ॥ ततोनिशम्यतद्वाक्यंविस्मयस्मेरलोचनः ॥ श्रद्धालुरभवद्भूपोरैक्यसंभावनाविधौ ॥ ९३ ॥
आदायाश्वतरीयुग्मयुक्तांशकटिकामगात् ॥ मुक्ताहारदुकूलानिसहस्रंचगवांनृपः ॥ ९४ ॥ गतोऽसौतत्रयत्रास्तेयोगीकाश्मीरमण्डले ॥ तन्निवेद्यपुरो
राजादण्डवत्पतितोभुवि ॥ ९५ ॥ आनम्यपरयाभक्त्यारैक्योराज्ञेचुकोपह ॥ रेशूद्रमामकंवृत्तंनजानासिदुरीश्वर ॥ ९६ ॥ गृहाणशकटीमेतामुत्था
प्याश्वतरीयुताम् ॥ वस्त्राणिमुक्ताहारांश्चगाश्चदोग्ध्रीरपिस्वयम् ॥९७ ॥ इत्थमाज्ञतवान्भूपोरैक्यस्यभयमादधे ॥ ततःशापभयाद्राजातत्पदाम्भोरुह
द्वयम् ॥ ९८ ॥ गृह्णन्भक्त्याप्रसीदेतिब्रह्मन्नित्यूचिवान्स्वयम् ॥ ९९ ॥ राजोवाच ॥ भगवंस्तवमाहात्म्यमेतदत्यद्भुतंकुतः ॥ प्रसन्नीभूयभगवन्ना
ख्याहिममतत्त्वतः ॥ १०० ॥ रैक्यउवाच ॥ गीतानांषष्ठमध्यायंजपामिप्रत्यहंनृप ॥ तेनैवतेजोराशिर्मेसुराणामपिदुःसहः ॥ १ ॥ श्रीशिवउवाच ॥
गीतानांषष्ठमध्यायंरैक्यादभ्यस्ययत्नतः ॥ ज्ञानश्रुतिर्महीपालोमुक्तिमापततःसुधीः ॥ २ ॥ रैक्योऽपिसुखमालेभेमाणिक्येश्वरसन्निधौ ॥ गीतानांषष्ठ
मध्यायंजपन्मोक्षप्रदायकम् ॥ ३ ॥ मरालवेषमास्थायवरदानार्थमागताः ॥ दिवौकसोऽपिनिर्जग्मुःस्वैरंविस्मयकारिताः ॥ ४ ॥ इममध्यायमभ्येकं
योजपेत्सततंनरः ॥ सोऽपितत्पदवीमेतिविष्णोरेवनसंशयः ॥ १०५ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०उत्तर०गीतामाहात्म्येऽशीत्यधिकशततमो
ऽध्यायः ॥ १८० ॥ श्रीभगवानुवाच ॥ अथतेवर्णयिष्यामिसप्तमाध्यायगौरवम् ॥ यदाकर्ण्यसुधापूरपूर्तिर्भवतिकर्णयोः ॥ १ ॥ अस्तिपाटलि
पुत्राख्यंदुर्गमुत्तुङ्गगोपुरम्॥ तत्राभूद्ब्राह्मणोनामशङ्कुकर्णोदयार्णवः ॥२॥ वैश्यवृत्तिसमासाद्यधनमर्जितवान्बहु ॥पितॄन्नतर्पयामासपूजयामासनोसुरान्

१'मणिकेश उदाहृतः'इ०पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 ॥३॥ पार्थिवान्पूजयांचक्रेधनार्जनपरायणः॥ तुरीयपाणिग्रहणमङ्गलार्थंगृहान्तरे ॥४॥ तनुजैर्बन्धुभिःसार्धंसंप्रतस्थेकदाचन ॥ रजन्यांधर्मकल्पायां
 निद्रालोस्तस्यदोस्तले ॥ ५ ॥ दशतिस्मसमागत्यदन्दशूकःकुतश्चन ॥ सदष्टमात्रोऽसाध्यात्ममणिमन्त्रौषधादिभिः ॥ ६॥ क्षणैःकतिपयैरेवगतासु
रभवत्ततः ॥ पिचुमन्ददलैर्नालैरवकुण्ठितविग्रहम् ॥ ७ ॥ तमारोप्यतरुस्कन्धेसूनवोगृहमाययुः ॥ ततःकालेनबहुनाततोजातःसरीसृपः ॥ ८ ॥
तद्वासनानिबद्धात्माजन्मपूर्वमनुस्मरन् ॥ वञ्चयित्वासुतानेतान्पूरयामिगृहाद्बहिः ॥ ९ ॥ आत्मनःकोटिसङ्ख्याकंयत्रास्तेस्थापितंवसु ॥ ततो
नारायणबलिंश्रद्धयापरयान्विताः ॥ १० ॥ कृतवन्तःपरेतस्यसूनवोहिद्विजन्मनः ॥ एकदास्वप्नमागत्यपीडितःसर्पजन्मना ॥ ११ ॥ अभाष
यन्मनोवृत्तंपुत्राणामग्रतःपिता ॥ ततस्तेप्रातरुत्थायपरंविस्मयमोहिताः ॥ १२ ॥ इतरेतरमाख्यायपश्यन्तस्तेनिरङ्कुशाः ॥ एकस्तत्रपितृस्नेहादुद्धर्तु
मपिवाञ्छति ॥ १३ ॥ अन्योद्रविणलोभेननिहन्तुंसर्पमीहते ॥ इतरस्तुपितृस्नेहरसमोहितमानसः ॥ १४ ॥ किंवाअहिमयोनस्याच्छोचन्रोदिति
केवलम् ॥ मध्यमस्तुततःपुत्रोवञ्चयित्वासहोदरौ ॥ १५ ॥ केनापिच्छद्मनोत्थायजगामनिजमालयम् ॥ ततःशनैःसमाहूयगृहिणींगुणशालिनीम् ॥
॥ १६ ॥ कुद्दालहस्तोनिरगाद्यत्रास्तेपन्नगःपिता ॥ तेनाविदितवित्तेनचिह्नैर्निश्चित्यतत्त्वतः ॥ १७ ॥ स्थानमागत्यतंहन्तुंवल्मीकंलोभबुद्धितः ॥
भार्ययोत्सार्यतंमृत्स्नास्वयंतेनचखन्यते ॥ १८ ॥ निखन्यमानादत्युग्रोवल्मीकादहिरुत्थितः ॥ ततोगरलगण्डूषैर्निर्गतैरतिदुःसहैः ॥ १९ ॥ गिरः
सकथयांचक्रेफणीफूत्कारमारुतैः ॥ २० ॥ अहिरुवाच ॥ कस्त्वंकिमर्थमायातःकथंवाखन्यतेबिलम् ॥ केनवाप्रहितोमूढतदाख्याहिममाग्रतः ॥२१॥
पुत्रउवाच ॥ पुत्रस्तेऽहंशिवोनामहेमग्रहणकौतुकी ॥ आगतोरात्रिलब्धस्यस्वप्नस्यतुसुविस्मितः ॥२२॥ शिवउवाच ॥ इत्थमाकर्ण्यपुत्रस्यगिरंलोक
विगर्हिताम् ॥ वक्तुमारभतस्पष्टंहसन्नुच्चैःफणीतदा ॥ २३ ॥ सर्पउवाच ॥ यदिपुत्रोऽसिमेतूर्णंमामुन्मोचयबन्धनात् ॥ निक्षेपार्थायसंजातंपन्नगं
पूर्वजन्मनः ॥ २४ ॥ पुत्रउवाच ॥ पितःकथंतंमुक्तिःस्यादित्याचक्ष्वममाग्रतः ॥ परित्यज्याखिलंलोकमागतोऽस्मियथानिशि ॥ २५ ॥ पितो
वाच ॥ नतीर्थानिनदानानिनतपांसिनचाध्वराः ॥ मामुन्मोचयितुंपुत्रप्रभवन्तिचसर्वथा ॥ २६ ॥ गीतानांसप्तमाध्यायमन्तरेणसुधामयम् ॥ जन्तो
र्जरामृत्युदुःखनिराकरणकारणम् ॥ २७ ॥ सप्तमाध्यायिनंविप्रंमदीयेश्राद्धवासरे ॥ भोजयश्रद्धयापुत्रतेनमुक्तिर्नसंशयः ॥ २८ ॥ अन्यानपिद्विजा
न्वत्सवेदविद्याविशारदान् ॥ संभोजययथाशक्तिपरमश्रद्धयान्वितः ॥ २९ ॥ इत्याकर्ण्यपितुर्वाक्यमुरगत्वमुपेयुषः ॥ तेसर्वेसूनवोऽकुर्वन्यथादिष्टं
ततोऽधिकम् ॥ ३० ॥ शङ्कुकर्णस्ततःश्रीमानुत्सृज्यतनुमौरगीम् ॥ कृत्वाविभागंपुत्राणांदिव्यंदेहमुपाददे ॥ ३१ ॥ विभज्यदत्तंपित्रायद्द्रव्यंतत्कोटि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सङ्कचया ॥ तेनतेसूनवःसर्वेंमुमुदुःसाधुवृत्तयः ॥ ३२ ॥ वापीकूपसरोयज्ञदेवप्रासादहेतवे ॥ अन्नशालांततोऽकुर्वन्पुत्रास्तेधर्मबुद्धयः ॥ ३३ ॥ सप्तमा
ध्यायजपतोमुक्तिभाजोऽभवंस्ततः ॥ षष्ठमिष्टतमंज्ञात्वानिर्वाणार्पितदृष्टयः ॥ ३४ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०उत्तर०गीतामाहात्म्यएकाशी
त्यधिकशततमोऽध्यायः ॥ १८१ ॥ शिवउवाच ॥ अष्टमाध्यायमाहात्म्यंशृणुवक्ष्यामिपार्वति ॥ यस्यश्रवणमात्रेणपरांमुदमवाप्स्यसि ॥ १ ॥
आमर्दकंपुरंनाम्नाविश्रुतंदक्षिणापथि ॥ द्विजन्माभावशर्मेतितत्रासीद्गणिकापतिः ॥ २ ॥ खादन्मांसंपिबन्मद्यंचोरयन्साधुसंपदः ॥ रममाणःपरस्त्री
भिराखेटककुतूहली॥ ३॥ अत्यवाहयदत्युग्रोगरीयांसंमनोरथम् ॥ सुहृदांविटगोष्ठ्यांचतालीफलसुधारसम् ॥ ४ ॥ निपीयकण्ठपर्यन्तमजीर्णेनाति
पीडितः ॥ मृतःकालेनपापात्माजातस्तालीतरुर्महान् ॥ ५ ॥ तस्यच्छायामुपाश्रित्यनिबिडामतिशीतलाम् ॥ अभूतांदम्पतीकौचिद्ब्रह्मराक्ष
सतांगतौ ॥ ६ ॥ देव्युवाच ॥ किंजातीयौकिमात्मानौकिंवृत्तावित्युदीरय ॥ कर्मणाकेनवादेवब्रह्मराक्षसतातयोः ॥ ७ ॥ शिवउवाच ॥ वेद
वेदाङ्गतत्त्वज्ञःसर्वशास्त्रार्थकोविदः ॥ सदाचारोऽभवत्कश्चिद्द्विजोनामकुशीवलः ॥८॥ जायाचतस्यकुमतिनामधेयादुराशया ॥ ससभार्योमहादाना
न्याददानोऽतिलोभवान् ॥ ९ ॥ महिषींकालपुरुषंहयादीननुवासरम् ॥ अप्रयच्छन्द्विजातिभ्योदानलब्धांवराटिकाम् ॥ १० ॥ कालेन
दम्पतीप्रेतौब्रह्मराक्षसरूपिणौ ॥ पर्यटन्तौमहीमेतांक्षुत्तृषाकुलविग्रहौ ॥ ११ ॥ विशश्रमतुरागत्यमूलंतालीतरोस्ततः ॥ कथमेतन्महादुःखमावयोरप
गच्छति ॥ १२ ॥ कथंवाजायतेमुक्तिर्ब्रह्मराक्षसयोनितः ॥ इतिपृष्टोगृहिण्यासौब्राह्मणःसमभाषत ॥१३॥ ब्रह्मविद्योपदेशेनविनाध्यात्मविचारणात् ॥
विनाकर्मविधिज्ञानात्कथंमुच्येतसङ्कटात् ॥ १४ ॥ भार्योवाच ॥ किंतद्ब्रह्मकिमध्यात्मंकिंकर्मपुरुषोत्तम ॥ एतावदुक्तेतत्पत्न्यायदाश्चर्यमभूच्छृणु ॥
॥ १५ ॥ [1]अष्टमाध्यायश्लोकार्धश्रवणात्सतरुस्तदा ॥ विहायतालीरूपंतद्बभूवद्विजसत्तमः ॥ १६ ॥ सद्योज्ञानविधूतात्माविमुक्तःपापकञ्चुकात् ॥
तन्माहात्म्याद्विनिर्मुक्तौदम्पतीतौबभूवतुः ॥ १७ ॥ एतावदेवमुक्तंचदैवान्निर्गत्यतन्मुखात् ॥ ततोऽन्तरिक्षादायातंकणत्किंकिणिकंशुभम् ॥ १८ ॥
दिविदिव्याङ्गनावक्रचन्द्रमण्डलमण्डितम् ॥ अप्सरोवदनाम्भोजभ्राम्यद्भ्रमरसंकुलम् ॥ १९ ॥निर्मथ्यमानदुग्धाब्धिवेलाडिण्डिरपाण्डुरैः ॥ गङ्गा
तरङ्गसुभगैश्चामरैरुपशोभितम् ॥ २० ॥ गायद्गन्धर्वसुभगंनृत्यत्सुरवधूशतम् ॥ दिव्यंविमानमारूढौदम्पतीजग्मतुर्दिवम् ॥ २१ ॥ अत्रत्यंवृत्तम
खिलमेतद्विस्मयकारकम् ॥ ततोलिलेखमेधावीश्लोकार्धमिदमादरात् ॥ २२ ॥ ययौवाराणसींनामनगरींमुक्तिदायिनीम् ॥ आराधयितुमन्विच्छ

१ 'अष्टमिष्टतमं ' इ०'नष्टमष्टतमं' च इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्देवदेवंजनार्दनम् ॥ २३ ॥ सतत्रकर्तुमारेभेतपःपरमुदारधीः ॥ अत्रान्तरेजगन्नाथोदेवदेवोजनार्दनः ॥ २४ ॥ पृष्टोदुग्धाब्धिसुतयासयोज्यकर
सम्पुटम् ॥ निद्रापथंविहायैवस्थीयतेकथ्यतामिति ॥ २५॥ श्रीभगवानुवाच ॥ काश्यांभागीरथीतीरेतपस्यतितरांद्विजः ॥ भावशर्मातिमेधावीमद्भ
क्तिरसपूरितः ॥ २६ ॥ जपन्गीताष्टमाध्यायश्लोकार्धंनियतेन्द्रियः ॥ संतुष्टवानहंदेवितदीयतपसाभृशम् ॥ २७ ॥ चिरंविचारयन्नेवतत्तपःसदृशं
फलम् ॥ दातुमुत्कण्ठितमनावर्तेयंसाम्प्रतंप्रिये ॥ २८ ॥ पार्वत्युवाच ॥ हरिःप्रसन्नभूतोऽपिचिन्तांप्रापयदिप्रभो ॥ भावशर्माहरेर्भक्तःप्राप्तःकिंतत्फलं
पुनः ॥ २९ ॥ श्रीमहादेवउवाच ॥ ततःप्रसादमासाद्यप्रसन्नस्यमुरद्विषः ॥ सुखमात्यान्तिकंप्रापभावशर्माद्विजोत्तमः ॥ ३० ॥ लेभिरेपदवींसर्वे
तदीयाअपिवंशजाः ॥ तत्कर्मवशतोयेवैसंप्राप्तायातनांपुरा ॥ ३१ ॥ एतदेवाष्टमाध्यायमाहात्म्यंकिंचिदेवते ॥ कथितंमृगशावाक्षिद्रष्टव्यंतु
सदैवच ॥ ३२ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०उत्तर०गीतामाहात्म्येद्व्यशीत्यधिकशततमोऽध्यायः ॥ १८२ ॥ श्रीमहादेवउवाच ॥ अतःपरंप्रव
क्ष्यामिनवमाध्यायमादरात् ॥ संशृणुष्वस्थिरीभूयतुहिनाचलकन्यके ॥ १ ॥ अस्तिमाहिष्मतीनामनगरीनर्मदातटे ॥ तत्रासीन्माधवोनामद्विजन्मा
सशिवोद्विजः ॥२॥ वेदवेदाङ्गतत्त्वज्ञःकालेकालेऽतिथिप्रियः ॥ अर्जयित्वाबहुधनंविद्ययैवविशुद्धधीः ॥ ३ ॥ महान्तमध्वरंकर्तुंसमारेभेकदाचन ॥
आलम्भनार्थमानीतश्छागःपूजितविग्रहः ॥ ४ ॥ वाचमूचेहसन्नुच्चैर्जगद्विस्मयकारकः ॥ किमेतैर्बहुभिर्यागैर्विधिवद्विहितैरपि ॥ ५ ॥ विन
श्वरफलैर्जन्मजरामरणहेतुभिः ॥ एतावत्यपिमेविप्रदशेयंदृश्यतामिति ॥ ६ ॥ छागस्यैवंवचोऽतीवकुतूहलपरंजनाः ॥ निशम्यविस्मयंयाताःकृत
मण्डपवासिनः ॥ ७ ॥ ततोबद्धाञ्जलिपुटोद्विजातिस्तिमितेक्षणः ॥ प्रणम्यश्रद्दधानस्तमपृच्छच्छागमादरात् ॥ ८ ॥ द्विजउवाच ॥ किंजातीयःकि
मात्मात्वांकिंवृत्तमितिमेवद ॥ केनवाकर्मणावाप्तंछागत्वमितिकारणम् ॥ ९ ॥ छागउवाच ॥ आसंपुराद्विजातीनामन्वयेचातिनिर्मले ॥ आहृ
तांक्रतुसंघानांवेदविद्याविशारदः ॥ १० ॥ एकदाममगेहिन्यापुत्ररोगप्रशान्तये ॥ छागःप्रयाचितोमत्तश्चण्डिकाभक्तिनम्रया ॥ ११ ॥ ततोनिहृ
न्यमानस्यचण्डिकामण्डपस्थले ॥ छागस्यजननीमांतुशशापब्रह्मवादिनी ॥ १२ ॥ अशास्त्रीयाध्वनापापमत्सुतंयज्जिघांससि ॥ द्विजात्यधमतेन
त्वमजायोनिमवाप्स्यसि ॥ १३ ॥ ततोऽहंप्रेत्यकालेनछागोऽभूवंद्विजोत्तम ॥ निस्तीर्यचानेकविधायोनिसंतापयातनाः ॥ जातिस्मरत्वमप्यस्ति ॥ १६८ ॥
पशुयोनिमुपेयुषः ॥ १४ ॥ विप्रउवाच ॥ त्वदीयजन्मशुश्रूषाकुतूहलरसोन्मुखम् ॥ मनःसर्वान्द्विजानेतानपितत्कथयाखिलम् ॥ १५ ॥
छागउवाच ॥ कदाचिन्मर्कटोऽभूवमाहितुण्डिकशिक्षया ॥ १६ ॥ क्रीडद्भिर्वीक्षितोडिम्भैर्नृत्यन्प्रतिगृहांगणे ॥ उदारानात्मनोदारान्विलोक्यतन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यानपि ॥ १७ ॥ क्रियापराङ्मुखोजातस्त्यक्तनर्तनसंभ्रमः ॥ ततोवर्तुलदण्डैश्चदुःसहैराहितुण्डिकः ॥ १८ ॥ मामुच्चैस्ताडयाश्चक्रे रुषालोहितलोचनः ॥ ततोऽहंमूर्च्छितोऽभूवंक्षरत्क्षतजसंततिः ॥ १९ ॥ आजिघ्रन्नन्नमुदकमगमंकालधर्मताम् ॥ ततोऽहमासीच्छुनकः परिभ्राम्यन्गृहेगृहे ॥ २० ॥ कुक्षिंभरिरहंमार्गेत्यक्तोच्छिष्टान्नभक्षकः ॥ कदाचिदाविशंश्वासन्नात्मवेश्ममहानसम् ॥ २१ ॥ बुभुक्षितो भक्षयितुंस्थालींस्थापितमोदनम् ॥ जिघ्रन्भूमितलंपश्यन्दिशोदशशनैर्भयात् ॥ २२ ॥ शंकमानोजनरवात्पार्श्वेचविलिहन्निव ॥ ततःकदा चिदागत्यवीक्षितस्तनुजैर्निजैः ॥ २३ ॥ जाययाचजरत्याहंताडितोलगुडादिभिः ॥ ततोभग्नकटिर्यातोबहुशोणितमुद्वहन् ॥ २४ ॥ निर्जगामबहिर्गेहात्कथंचिन्मूर्च्छयाकुलः ॥ अङ्गेषुपूतिगन्धेषुकृमिगर्भेषुकालतः ॥ २५ ॥ ततःकदश्वतांप्राप्तःशौण्डिकस्यचवेश्मनि ॥अश्वोऽभवम हंविद्वन्मृतःकालक्रमादिह ॥ २६ ॥ कदाचिच्चत्वरेतेनसमानीतोजनाकुले ॥ विक्रयायजरालीढपतयालुरदावलिः ॥ २७ ॥ जाययाद्वारकायात्रां कर्तुमुद्यतयासकृत् ॥ मौल्येनाल्पीयसाक्रेतुंतुरङ्गंचेष्टमानया॥२८॥जगृहेऽहंतयादाम्नाह्यल्पेनवसुनाजरन् ॥ गन्तुंचारभ्यतद्वित्रैःपुत्रैरारुह्यमांसमम् ॥ ॥ २९ ॥ शनैःशनैःसरस्तीरेमग्नोऽहंगाढकर्दमे ॥ तत्राहंकुटिलग्रीवश्चापातंकर्दमान्तरे ॥ ३० ॥ ताड्यमानोमुहुःपुत्रैर्लगुडोपलपाणिभिः ॥ उत्थाप्य मानोबहुधाप्राणान्मोचितवानहम् ॥ ३१ ॥ ततोनिश्चित्यमांतत्रमृतंभग्नोद्यमाःसुताः ॥ आक्रुश्यमातरंदीनांप्रावृत्यनिर्ययुर्गृहम् ॥ ३२ ॥ ततःसंप्रेत्य बहुनाकालेनच्छागतांगतः ॥ निस्तीर्णानेकहीनोच्चयोनिसंतापयातनः ॥ ३३ ॥ द्विजउवाच ॥ किमनेनमहाछागदुःखजातेननित्यशः ॥ यथावद ञसामह्यंसुखमात्यन्तिकंभवेत् ॥ ३४ ॥ छागउवाच ॥आश्चर्यंकथयिष्यामिपुनरन्यदपिद्विज ॥ स्वस्थमापृच्छमानस्यतवास्तियदिकौतुकम्॥३५॥ अस्तिनाम्नाकुरुक्षेत्रंनगरंमोक्षदायकम् ॥ सूर्यवंशोऽभवत्तत्रचन्द्रशर्मामहीपतिः ॥ ३६ ॥ सूर्योपरागसमयेश्रद्धयापरयान्वितः ॥ दानंसकालपुरुषं दातुंसमुपचक्रमे॥३७॥ समाहूयद्विजन्मानंवेदवेदाङ्गपारगम् ॥स्नातुंपुण्योदकैःपुण्यैर्ययौसार्द्धंपुरोधसा ॥अथोच्चैःकालपुरुषोवाचमूचेहसन्निव ॥३८॥ कालपुरुषउवाच ॥ अन्येनैवप्रगृह्णन्तिक्षेत्रेचाण्वपिकिंचन ॥ सूर्योपरागसमयेकुरुक्षेत्राभिधेस्थले ॥ ३९ ॥ दानंचकालपुरुषंजिघृक्षसिकथंद्विज ॥ ज्ञात्वापिनिश्चितंसर्वमेतत्पातककारकम् ॥४०॥प्रवर्तसेकथंकर्तुंधनलोभान्धयाधिया ॥४१॥छागउवाच ॥ इत्थमाकर्ण्यतद्वाक्यंजगद्विस्मयकारकम्॥ किमनेनमहादानभयेनेत्यवदद्विजः ॥ ४२ ॥ एवंविधमहादानपातकागाधवारिधिम् ॥ जानामितरितुंसम्यगुपायमहमेवहि ॥ ४३ ॥ ततःस्नात्वामहीपालःपरिधायचवाससी ॥ शुचिःप्रसन्नहृदयःसितमाल्यानुलेपनः ॥ ४४ ॥ अवलम्ब्यकरांभोजंपार्श्ववर्तिपुरोधसः ॥ समाय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यौसेव्यमानःसतत्कालोचितैर्जनैः ॥ ४५ ॥ समागत्यचभूपालःसम्प्रादात्कालपूरुषम् ॥ यथोचितेनविधिनातस्मैभक्त्याद्विजन्मने ॥ ४६ ॥
निर्भिद्यकालपुरुषहृदयंनिर्दयोदयः ॥ पापात्मानिर्ययौकश्चिच्चाण्डालोरक्तलोचनः ॥ ४७ ॥ किंचप्रापितकालस्यपरनिन्दारसोत्सवे ॥ निन्दा
चाण्डालिकादेहपार्श्वमागाद्विजन्मनः ॥ ४८ ॥ एतच्चाण्डालयुगलंनिर्गत्यारुणलोचनम् ॥ ततःसंचरितुंचक्रेप्रसह्याङ्गेद्विजन्मनः ॥ ४९ ॥
गीतानांनवमाध्यायंजपन्नेवहृदिस्थितः ॥ कम्पमानंद्विजंकिंचित्तूष्णींपश्यतिभूपतौ ॥ ५० ॥ अन्तर्निद्राणगोविन्दंकम्पमानमिवाम्बुधिम् ॥ मरुदा
न्दोलनैर्विद्वान्द्विजन्मापापसंश्रयम् ॥५१॥ ततोगीताक्षरोद्भूतैर्वैष्णवैःपरिपीडितम् ॥ पलायमानंचाण्डालयुगलंनिष्फलोद्यमम् ॥५२ ॥ तंनिश्चक्राम
वेगेनद्विजातेःपार्श्ववर्तियत ॥ शरीरेवर्त्तमानंचपरनिन्दारसोत्सवे ॥५३ ॥ इत्थंकलितवृत्तान्तःप्रत्यक्षंक्षितिवल्लभः ॥ पर्यपृच्छद्द्विजन्मानंविस्मयस्मेर
लोचनः ॥ ५४ ॥ राजोवाच ॥ कथमापदियंघोरानिस्तीर्णामहतीत्वया ॥ कंमंत्रंजपताविप्रकंवासंस्मरतासुरम् ॥ ५५ ॥ कःपुमान्काचसायो
षित्कथमेतावुपस्थितौ ॥ कथंचशान्तिमापन्नावित्युदीरयमेद्विज ॥ ५६॥ द्विजउवाच ॥ चाण्डालमूर्तिमासाद्यमूर्तकिल्बिषमुल्बणम् ॥ योषिन्मूर्त्ति
मयीनिन्दाद्वयमेतदवैम्यहम् ॥ ५७ ॥ गीतायानवमाध्यायमन्त्रमालामयास्मृता ॥ तन्माहात्म्यमिदंसर्वंत्वमेवहिमहीपते ॥ ५८ ॥ छागउवाच ॥
गीतायानवमाध्यायंजपामिप्रत्यहंनृप ॥ निस्तीर्णाश्चापदस्तेनकुप्रतिग्रहसंभवाः ॥ ५९ ॥ अभ्यस्यनवमाध्यायंराजातस्माद्विजन्मनः ॥ तावु
भावपिलेभातेपरांनिर्वृतिमुत्तमाम् ॥ ६० ॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०उत्तर०गीतामाहात्म्येत्र्यशीत्यधिकशततमोऽध्यायः ॥ १८३ ॥
देव्युवाच ॥ सर्वज्ञसर्वचैतन्यसर्वेश्वरगिरांगुरो ॥ धन्यास्मिशिवमान्येनदृश्यमानेनयत्त्वया ॥ १ ॥ निरूपितमिदंपुण्यंनवमाध्यायवैभवम् ॥
अनेकविस्मयस्वादुकथानकमयंमधु ॥ २ ॥ शृण्वन्त्याममदेवशनतृप्तिर्जातुजायते ॥ अकुण्ठाश्रवणोत्कण्ठावर्द्धतेवृषभध्वज ॥ ३ ॥ असीमा
महिमाम्भोधेर्गीतानांश्रुतिजीवितम् ॥ तत्रापिदशमाध्यायंप्रधानंमुनयोजगुः ॥ तमुद्दिश्यमहाध्यायमभिधेहिकथानकम् ॥४॥ शिवउवाच ॥ शृणुसु
श्रोणिनिश्रेणींस्वर्गदुर्गस्यदुर्ल्लभाम् ॥ ५ ॥ सीमामिवप्रभावाणांपावनींपरमांकथाम् ॥ असीत्काशीपुरेविप्रःपुण्यकीर्त्तिपरायणः ॥ ६ ॥ प्रशान्तचेता
निर्मुक्तहिंसाकार्कश्यसाहसः ॥ निवृत्तिनिरतोनित्यंजितेन्द्रियतयातथा ॥ ७ ॥ धीरधीरितिविख्यातोनन्दीवमय्यिभक्तिमान् ॥ निस्तीर्णनिग
माम्भोधिःसर्वशास्त्रार्थकोविदः ॥ ८॥ तस्यध्यानपराधीनचेतसःप्रतिगच्छतः ॥ अन्तारत्मनिनिर्मग्नमनसस्तत्त्वचक्षुषः ॥ ९ ॥ करावलम्बनंतस्यधा
वन्प्रीत्याददाम्यहम् ॥ कदाचनचमत्कारकारकंविमनामुनिः ॥ १० ॥ आचान्तःकिंचिन्नासाग्रेपरमानन्दमेदुराम् ॥ दृशमासाद्यनिद्राणकरणोऽयमि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वास्थितः ॥ ११ ॥ उपधायविशालाक्षिविशालांद्वारदेहलीम् ॥ अशेतनिशिनिःशङ्कंतावच्छम्बेक्षणःक्षणम् ॥ १२ ॥ मामपृच्छद्भृङ्गिरिटिःप्रणम्यपा
दपङ्कजम् ॥ अनेनविधिनाकेनविहितंतवदर्शनम् ॥ १३ ॥ तपस्तप्तंहुतंजप्तंकिमनेनमहात्मना ॥ दत्तप्रतिपदंदेवोयस्यहस्तावलम्बनम्॥ १४ ॥ अयंन
लभतेगन्तुंकस्मादस्मात्पुराद्बहिः ॥ यदृच्छयायदाकाशीसीमामुल्लंघ्यगच्छति ॥ १५ ॥ नपश्यतितदासर्वान्पार्श्वस्थानपिदेहिनः ॥ अत्रहेतुमहंज्ञातु
मिच्छामिस्वामिभाषितम् ॥१६॥ अनुग्राह्योऽस्मिचेद्वक्तुंयुक्तंचेत्तदुदीरय ॥ इमंभृङ्गिरिटेप्रश्नंसमाकर्ण्याहमूचिवान् ॥ १७ ॥ कदाचिदासंकैलासेपार्श्वे
पुन्नागकानने ॥ रणत्खेचरसुश्रोणिपूर्णस्तबककानने ॥ १८ ॥ कलकण्ठकुलालापकल्लोलितदिगन्तरे ॥ गरुत्मदादिदात्यूहसमूहस्वरसंकुले ॥ १९ ॥
भ्रमद्दारुघटीयन्त्रप्रोल्लसद्विदुदन्तुरे ॥ प्रबुद्धसारणिप्रान्तकदलीकन्दलालये ॥२० ॥ कस्तूरीहरिणोपेतकिंनरस्वरमोहिते ॥ रोमन्थमन्थरापाङ्गैर्मृगैः
क्वापिनिषेविते ॥ २१ ॥ हंसैःकीरेषुपाण्डित्यकुर्वाणैःसंकुलेशुकैः ॥ निर्ह्रादिकिणिनीरन्ध्रसमीरणविलोडिते ॥ २२ ॥ माधवीपुष्पनिर्यासशीधुक्षी
बमधुव्रते ॥ उन्मीलन्निवलीपुष्पगुच्छसौरभनिर्भरे ॥ २३ ॥ प्रोत्फुल्लबकुलामोदमदमन्थरषट्पदे ॥ सोमादुद्धूतपीयूषक्षालितक्षितिमण्डले ॥ २४ ॥
अध्यास्यवेदिकामेकामहंक्षणमवस्थितः॥उद्दण्डशाखिसङ्घट्टस्फुटन्मन्थामुखोत्करैः॥२५॥प्रकम्पिताचलच्छायोववौचण्डसमीरणः ॥ पश्चादभून्महा
घोषोनिर्घोषितदरीतटः ॥ २६ ॥ अवातरत्ततःकश्चित्पक्षीगगनगह्वरात् ॥ शारदानीरदच्छायःकज्जलानामिवोच्चयः ॥ २७ ॥ तमसामिवसङ्घातः
पक्षच्छेदीवपर्वतः ॥ अवष्टभ्यक्षितिंपद्भ्यांपक्षीमांप्रणनामसः ॥ २८ ॥ आनीयपद्ममम्लानमसौमत्पादयोर्व्यधात् ॥ अथासौस्पष्टयावाचापक्षी
स्तोत्रमुदीरयत् ॥२९॥ पक्ष्युवाच ॥ जयदेवचिदानन्दसुधासिंधोजगत्पते ॥ सदासद्भावनासङ्गकल्लोलानन्तविग्रह॥३०॥अद्वैतवासनामत्यामलत्रय
विवर्जित ॥ जितेन्द्रियपराधीनसमाधिप्राप्यविग्रह ॥ ३१ ॥ निरुपाधेविनिर्मुक्तनिराकारनिरामय ॥ निःसीमनिरहंकारनिरावरणनिर्गुण ॥
॥ ३२ ॥ शरणागतसन्त्राणप्रवीणचरणाम्बुज ॥ भीममालमहाव्यालज्वालादग्धमनोभव ॥ ३३ ॥ कुठारभिन्नदैत्येन्द्रगण्डूषितमहाविभो ॥
त्रिपुरप्रमदाभालसिन्दूरोद्धूलिमार्जन ॥ ३४ ॥ कात्यायनीकुचाम्भोजवरकुङ्कुमचर्चित ॥ नमःप्रमाणदूरायनमःप्रमतिरूपिणे ॥ ३५ ॥
नमश्चैतन्यनाथायनमस्त्रैलोक्यरूपिणे ॥ वन्देतवपदाम्भोजंयोगिप्रवरचुम्बितम् ॥ ३६ ॥ अपारभवपाथोधिपारावतरणाद्भुतम् ॥ वाचस्पतिरपि
स्तोत्रेभवतोनप्रगल्भते॥३७॥सहस्रवदनस्यापिफणीन्द्रस्यनचातुरी॥त्वद्वर्णनेमहादेवकोऽहमल्पमतिःखगः॥३८॥श्रीशिवउवाच॥स्तोत्रमेतत्समाकर्ण्य
कृतंतेनपतत्रिणा ॥ तमवोचमहंकोऽसिकुतस्त्योऽसिविहङ्गम ॥३९॥ हंसेनसदृशःकायोवर्णःकाकेनसन्निभः ॥ प्रयोजनंकमुद्दिश्यप्राप्तोऽसीहतदुच्य

ताम् ॥ ४० ॥ इतिपक्षीमयापृष्टःप्रश्रयानतकन्धरः ॥ जगादश्लक्ष्णयावाचापक्षीवाक्यविदांवरः ॥ ४१ ॥ देवेशधूर्जटेविद्धिमांमरालंस्वयंभुवः ॥
कर्मणायेनमेकार्ष्ण्यंजातमाधुनिकंविभो ॥ ४२ ॥ तदाकर्णयसर्वज्ञपृष्टंयदितदुच्यते ॥ मानसात्सरसःपृथ्वींयातःप्राप्तोऽस्मिसङ्कटम् ॥ ४३ ॥
सौराष्ट्रनगरादारात्सरसिस्फुटदम्बुजे ॥ बालेन्दुं[1]ःखंडधवलान्मृणालकवलानहम् ॥ ४४ ॥ आदायबलमाश्रित्यनिरगांगगनंद्रुतम् ॥ विहाय
सस्ततस्तस्मादकस्मादपतंभुवि ॥ ४५ ॥ अथमोहपरीतात्मासर्वथाविकलेन्द्रियः ॥ वेपमानवपुर्मोहात्स्पृष्टःशीतैःसमीरणैः ॥ ४६ ॥
प्रबुद्धःपतनेहेतुमपश्यन्नात्मनस्तदा ॥ अहोकिमेतदापन्नमद्यपातःकथंमम ॥ ४७ ॥ कालिमायेनकायेऽस्मिन्पक्ककर्पूरपाण्डुरे ॥ इत्यहं
त्रिस्मयाविष्टोयावत्कुर्वेविचारणम् ॥ ४८ ॥ तावदम्बुरुहाद्वाणीमश्रौषमहमीदृशीम् ॥ उत्तिष्ठहंसवक्ष्यामिकारणंपातकार्ष्ण्ययोः ॥ ४९ ॥
अथोत्थायसमागत्यमयामध्येसरोवरे ॥ दृष्टाराजीविनीरम्याराजीवैःपञ्चभिर्युता ॥ ५० ॥ कारणंप्रष्टुमारेभेकार्ष्ण्यस्यपतनस्यच ॥ अथतत्र
घनश्यामान्स्वर्णवर्णाम्बरावृतान् ॥ ५१ ॥ चतुर्भुजान्गदाशङ्खचक्रपङ्केरुहायुधान् ॥ किरीटहारकेयूरकुण्डलद्युतिचित्रितान् ॥ ५२ ॥ अद्राक्षम
न्तरिक्षस्थान्पुरुषानयुतानिषट् ॥ नत्वाप्रदक्षिणीकृत्यपञ्चपद्मांसरोजिनीम् ॥ ५३ ॥ आत्मीयंपातमारभ्यपृष्टंतदखिलंमया ॥ पद्मिन्युवाच ॥ कलहं
सगतोऽसित्वंमांविलंघ्यविहायसा ॥ ५४ ॥ तेनपातकयोगेनपतितोऽसिमहीतले ॥ तेनैवकालिमाकायेपक्षिसत्तमलक्ष्यते ॥५५॥ भवन्तंपतितंवीक्ष्य
कृपापूर्णेनचेतसा ॥ मध्यमेनामुनाब्जेनवदताजातसौरभम् ॥ ५६ ॥ आघ्रायषट्पदाःषष्टिसहस्राणिदिवंययुः ॥ एतेयेभवतादृष्टानीलोत्पलसम
त्विषः ॥ ५७ ॥ सर्वेतेसप्तमेऽतीतेजन्मन्यासन्मुनेःसुताः ॥ अस्यैवसरसस्तीरेतेपुस्तेपरमंतपः ॥ ५८ ॥ कदाचित्कामिनीकाचिच्चम्पकस्तबकस्तनी॥
चलापाङ्गकलाकान्ततरङ्गितरसा[2]लिनी ॥ ५९ ॥ नासामुक्ताफलज्योत्स्नाचुम्बितस्मितदीधितिः ॥ वीणांविन्यस्यकुचयोर्वनेऽस्मिन्मधुरंजगौ ॥
॥ ६० ॥ गायन्त्यास्वरमाकर्ण्यब्राह्मणाहरिणाइव ॥ तांसमागत्यतेसर्वेसममेवव्यलोकयन् ॥ ६१ ॥ मयादृष्टाममैवेयमित्यूचुस्तेपरस्परम् ॥ मुष्टा
मुष्टिततस्तेषांभ्रातॄणामभवद्रणः ॥ ६२ ॥ अन्योन्यमुष्टिनिष्पिष्टवक्षसस्त्यक्तजीविताः ॥ तेभुक्त्वानिरयान्घोरान्बभूवुःसारसाभुवि ॥ ६३ ॥ तदा
तेश्वापदाञ्छ्नुर्दग्धावन्येनवह्निना ॥ ततोमातङ्गतामेत्यपथिपान्थानघातयन् ॥ ६४ ॥ वनेविषोदकंपीत्वातेययुर्यममन्दिरम् ॥ खरोष्ट्रकपिमार्जार
जन्मान्यासाद्यचक्रमात् ॥ ६५ ॥ ततोमधुव्रताजातावर्तन्तेऽत्रसरोवरे ॥ अद्यमेगन्धमाघ्रायप्रापुस्तेवैष्णवंपदम् ॥ ६६ ॥ शृणुपक्षीन्द्रवक्ष्याभियेन

[1] 'बालेन्दुशङ्खधवलान्' इत्यपि पा० । [2] 'रसालसा' इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

मय्यस्तिवैभवम् ॥ एतस्माज्जन्मनःपूर्वेतृतीयेजन्मनिक्षितौ ॥ ६७ ॥ सरोजवदनानामद्विजातेःकन्यकाभवम् ॥ पातिव्रत्यैकनिरतागुरुशुश्रूषणेरता॥
॥ ६८ ॥ कदाचित्सारिकामेकांपाठयन्त्यविलम्बितम् ॥ सारिकाभवपापेत्वंपत्याशप्तास्मिकुप्यता ॥ ६९ ॥ प्रेत्यसारित्वमासाद्यपातिव्रत्यप्रसा
दतः ॥ मुनीनामेवसदनेकन्याकाचित्पुपोषमाम् ॥ ७० ॥ गीतानांदशमाध्यायंविभूतिरितिविश्रुतम् ॥ प्रातःपठतिविप्रोऽसावश्रौषंतमघा
पहम् ॥ ७१ ॥ कालेनसारिकादेहमहंहित्वाविहंगम ॥ दशमाध्यायमाहात्म्यादप्सराश्चाभवन्दिवि ॥ ७२ ॥ पद्मावतीतिविख्यातापद्मा
यादयितासखी ॥ कदाचनमयायान्त्याविमानेनविहायसा ॥ ७३ ॥ एतत्सरोवरंरम्यंविलोक्यविमलाम्बुजम् ॥ अवतीर्यजलक्रीडायावदार
भ्यतेमया ॥ ७४ ॥ दुर्वासास्तावदायातोविवस्त्रातेनवीक्षिता ॥ तद्भयात्पद्मिनीरूपंधृतमेतन्मयास्वयम् ॥ ७५ ॥ पद्भ्यांपद्मद्वयंचैवद्वयं
हस्तद्वयेनच ॥ मुखेनपञ्चमाम्भोजमितिपञ्चाम्बुजास्म्यहम् ॥ ७६ ॥ दृष्टातेनमुनीन्द्रेणकोपज्वलितचक्षुषा ॥ अनेनैवस्वरूपेणतिष्ठ
पापेशतंसमाः ॥ ७७ ॥ इतिशापंसमुत्सृज्यसचैवान्तर्दधेक्षणात् ॥ विभूत्यध्यायमाहात्म्याद्वाणीमेनविलीयते ॥ ७८ ॥ मद्विलङ्घन
मात्रेणपतितोऽसिमहीतले ॥ अद्यशापनिवृत्तिर्मेतिष्ठतस्तेखगोत्तम ॥ ७९ ॥ निशामयमयागीयमानमध्यायमुत्तमम् ॥ यस्याकर्णनमात्रेण
त्वमद्यैवविमोक्ष्यसे ॥८०॥ पक्ष्युवाच ॥ इत्यसौदशमाध्यायंपपाठश्लक्ष्णयागिरा ॥ तमाकर्ण्यतयादत्तमादायचसरोरुहम् ॥८१॥ मयासमर्पितंतुभ्यं
पद्मिन्यापद्ममुत्तमम् ॥ इत्युक्त्वासजहौदेहंतदद्भुतमिवाभवत् ॥ ८२ ॥ भृङ्गिरिटिरुवाच ॥ पुरातनेभवेकोऽयंब्रह्महंसोऽभवत्कथम् ॥ तवाग्रतःकुतोहे
तोरुत्ससर्जकलेवरम् ॥ ८३ ॥ श्रीशिवउवाच ॥ इतिभृङ्गिरिटेर्वाक्यमाकर्ण्याहतदाब्रवम् ॥ द्विजवेश्मनिपूर्वस्मिञ्जन्मन्ययमजायत ॥ ८४ ॥ सुतपा
इतिविख्यातोब्रह्मचारीजितेन्द्रियः ॥ वसन्गुरुकुलेकुर्वन्वेदाध्ययनमन्वहम् ॥ ८५ ॥ गुरुशुश्रूषणंसम्यग्विदधातिचभक्तितः ॥ शयानस्यगुरोः
शय्यांनिद्रितःसपदास्पृशत् ॥ ८६ ॥ तेनपापेनतिर्यक्त्वमयंस्वर्गेऽपिलब्धवान् ॥ पद्मयोनिमरालानांमध्येजातस्ततोद्विजः ॥८७॥ अस्मिञ्जन्मन्यमु
ष्येहपुरास्मल्लोकनावधि ॥ गीतानांदशमाध्यायंनलिन्याकथितंततः ॥ ८८ ॥ आकर्ण्यविहगोलेभेब्रह्मज्ञानमनुत्तमम् ॥ सोऽयंविप्रकुलेजातोदशमा
ध्यायवैभवात् ॥ ८९ ॥ जन्माभ्यासवशादस्यशिशोरपिमुखाम्बुजात् ॥ गीतानांदशमाध्यायःसमुल्लसतिसर्वदा ॥ ९० ॥ तदर्थपरिणामेनसर्वभूते
ष्ववस्थितम् ॥ शङ्खचक्रधरंदेवमयंपश्यतिसर्वदा ॥ ९१ ॥ यस्मिन्यस्मिन्यदैवास्यदृष्टिःस्निग्धाशरीरिणि ॥ ससमुक्तोभवेत्सर्वःसुरापोब्रह्महापिवा॥
॥ ९२ ॥ तद्विज्ञायमयाविप्रःपरमात्मस्वरूपिणा ॥ इदंनगरमानीतोमुक्तिक्षेत्रंस्वभावतः ॥ ९३ ॥ अत्रत्यानांमनुष्याणांमुक्तिःकरतलेस्थिता ॥ ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नास्यदृष्टिपातेनविशेषोऽन्योनजायते ॥९४॥नददामिबहिर्गन्तुमहमस्यपुराकृतम् ॥ दशमाध्यायमाहात्म्यात्तत्वज्ञानंसुदुर्लभम् ॥९५ ॥ लब्धमेतेन
मुनिनाजीवन्मुक्तिरियंतथा ॥ तेनास्यचलतोहस्तंददामिपथिगच्छतः ॥९६॥ दशमाध्यायमहिमाभृङ्गिरिटेमहानयम् ॥ इतिभृङ्गिरिटेरग्रेकथितंयत्क
कथानकम्॥९७॥तवेदमत्रकथितंसर्वपापप्रणाशनम् ॥ नरोवाप्यथवानारीयोऽपिकोऽपिचवापुनः ॥९८॥अस्यश्रवणमात्रेणसर्वाश्रमफलंलभेत्॥९९॥
इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०उत्तर०गीतामाहात्म्येचतुरशीत्यधिकशततमोध्यायः ॥ १८४ ॥ देव्युवाच ॥ इतिहासोऽयमीशानेश्रेयसांसाधनं
परम् ॥ आकर्ण्यकरुणापूर्णममकाङ्क्षाप्रवर्त्तते ॥ १ ॥ एकादशस्यमाहात्म्यमध्यायस्यकथाश्रयम् ॥ व्यावर्णयविरूपाक्षवक्तृणांप्रथमंप्रभो ॥२॥ ईश्वर
उवाच ॥ आकर्णयकथांकान्तेगीतावर्णनसंश्रयाम् ॥ विश्वरूपाभिधानस्यमाहात्म्यमपिपावनम् ॥ ३॥ अध्यायस्यविशालाक्षिवक्तुंतावन्नशक्यते ॥
सहस्राणिकथाःसन्तितत्रैकाकथ्यतेमया ॥ ४ ॥ प्रणीतायास्तटेनद्यामेघंकरमितिश्रुतम् ॥ नगरंगरिमाधारंतुङ्गप्राकारगोपुरम् ॥ ५ ॥ विशालाश्रम
शालासुस्वर्णस्तम्भविभूषितम् ॥ श्रीमद्भिःसुखिभिःशान्तैःसदाचारैर्जितेन्द्रियैः॥६॥अधिष्ठितंजवैश्चारुशृङ्गाटकमनोहरम् ॥ मणिस्तम्भस्फुरत्स्वर्णा
पर्णचत्वरशोभितम्॥७॥पताकाकिङ्किणीक्वाणकदम्बककलस्वरम् ॥ वेदाध्ययननिर्घोषवाचालितदिगन्तरम् ॥८॥ तूर्यसङ्घोषणाकीर्णविशालव्योम
मण्डलम् ॥ पताकापल्लवोद्भूतवातनिर्जितविग्रहम् ॥९॥ राजमार्गवरद्वारनारीमञ्जीरशिञ्जितैः ॥ वल्लकीवेणुकैर्गीतैर्भातिवाजीन्द्रहेषितैः ॥ १० ॥ प्रेक्ष
माणमिवाभीक्ष्णंदिक्पालानांपुरैःसमम् ॥ आस्तेजगत्पतिर्यत्रशार्ङ्गपाणिर्विराजितः॥११॥मूर्तिमत्परमंब्रह्मजगल्लोचनजीवितम् ॥ लक्ष्मीनयनराजी
वपूजिताकारगौरवः ॥ १२ ॥ त्रिविक्रमवपुर्मेघश्यामलःकोमलद्युतिः ॥ श्रीवत्सवक्षाराजीववनमालाविभूषितः ॥ १३ ॥ अनेकभूषणोपेतःसरत्न
इववारिधिः ॥ चलत्सौदामिनीदामसान्द्रमेघसमद्युतिः ॥१४॥ तस्यास्तेमुकुटेसाक्षाच्छार्ङ्गपाणिःपरःपुमान् ॥ तंदृष्ट्वामुच्यतेजन्तुर्जन्मसंसारबन्ध
नात् ॥ १५ ॥ यस्मिन्पुरेमहातीर्थंविद्यतेमेखलाभिधम् ॥ यत्रस्नात्वानरैर्नित्यंप्राप्यतेवैष्णवंपदम् ॥१६॥ तत्रवीक्ष्यजगन्नाथंनरसिंहंकृपार्णवम् ॥
सप्तजन्मार्जिताद्घोरान्मुच्यतेदुष्कृतान्नरः ॥ १७ ॥ मेखलायांगणाधीशंविलोकयतियोनरः ॥ सनिस्तरतिविघ्नानिदुस्तराण्यपिसर्वदा ॥ ब्रह्म
चर्यपरोदान्तोनिर्ममोनिरहङ्कृतिः ॥ १८ ॥ तस्मिन्मेघंकरेकश्चिदभूद्ब्राह्मणसत्तमः ॥ सुनन्दइतिविख्यातोवेदशास्त्रविशारदः ॥ १९ ॥ वशीकृते
न्द्रियग्रामोवासुदेवपरायणः ॥ देवस्यशार्ङ्गिणःपार्श्वेगीताध्यायमिमंप्रिये॥२०॥एकादशंपठत्येषविश्वरूपप्रदर्शनम् ॥ अध्यायस्यप्रभावेणब्रह्मज्ञान
मवापसः ॥ २१ ॥ परमानंदसंदोहश्लाघ्यसंवित्समाधिना ॥ प्रत्यङ्मुन्द्रियतयानिश्चलांस्थितिमीयुषा ॥ २२ ॥ सततंस्थीयतेतेनजीवन्मुक्तेनयो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गिना ॥ एकदासमहायोगीसिंहराशिस्थितेगुरौ ॥ २३ ॥ गोदावरीतीर्थयात्रांविधातुमुपचक्रमे ॥ प्रथमेऽह्निसमागत्यविरजंतीर्थमुत्तमम् ॥ २४ ॥
नाभिमारभ्यतीर्थेषुससमभ्यर्च्यदेवताम् ॥ मज्जन्मज्जज्जगद्धात्रींकमलांसव्यलोकयत् ॥ २५ ॥ तांसंपूज्यमहामायांसर्वकामफलप्रदाम् ॥ तारातीर्थेततःस्नात्वाकपिलासंगमेततः ॥ २६ ॥ अष्टतीर्थमसौचक्रेविधायपितृतर्पणम् ॥ कुमारीशंशिवंनत्वाकपिलाद्वारमाययौ ॥ २७ ॥ तत्रनिमज्ज्यनिर्धूतप्राग्जन्मान्तरदुष्कृतः ॥ संपूज्यनत्वाश्रुत्वाचदेवंवैमधुसूदनम् ॥ २८ ॥ उषित्वातत्रतांरात्रिंप्रागात्प्रातःसहद्विजैः ॥ नरसिंहवने तत्रतीर्थेरामस्यदीर्घिका ॥ प्रह्लादपूजितःसाक्षादास्तेयत्रनृकेसरी ॥ २९ ॥ तंदृष्ट्वादेवदेवेशंपूजयित्वातुभक्तितः ॥ तत्रतंदिवसंनीत्वासययावम्बिकापुरम् ॥ ३० ॥ अनुग्रहेणभक्तानामम्बिकातत्रतिष्ठति ॥ पूरयन्तिमनुष्याणांवाञ्छितान्यखिलान्यपि ॥ ३१ ॥ पूजयित्वाम्बिकांभक्त्यापुष्पगन्धानुलेपनैः ॥ उपहारैश्चविविधैःस्तोत्रैःप्रणमनैरपि ॥ ३२ ॥ विप्रस्तस्मात्पुराप्रातःकण्ठस्थानाभिधंपुरम् ॥ यत्रास्तेपरमाशक्तिर्महालक्ष्मीर्महाद्युतिः ॥ ३३ ॥ तामवेक्ष्यसुधाभानुभास्करद्युतिमण्डलाम् ॥ संसारतापविच्छेदपद्मपीयूषवाहिनीम् ॥ ३४ ॥ योगिराजहृदम्भोजराजहंसनिषेविताम् ॥ अनाहतमहानादमयीमद्वयरूपिणीम् ॥ ३५ ॥ महालक्ष्मींभगवतींवाञ्छितार्थप्रदायिनीम् ॥ आराध्यभक्तिभावेनचेतसासमुनीश्वरः ॥ ३६ ॥ विवाहमण्डपंप्रापपुरंविप्रैःसमन्वितः ॥ पुरेतत्रप्रतिगृहंवासस्थानमयाचत ॥ ३७ ॥ नलेभेवसतिंस्थातुंगेहेकस्मिन्नपिद्विजः ॥ दर्शितंग्रामपालेनविशालंवासमन्दिरम् ॥ ३८ ॥ प्रविश्यवसतिंचक्रेब्राह्मणःसङ्गिभिःसह ॥ ततःप्रभातेविमलेसुनन्दोऽसौद्विजोत्तमः ॥ ३९ ॥ बहिरालोकयाञ्चक्रेवासगेहान्निजंवपुः ॥ अध्वन्यानखिलान्यत्रजातान्क्वापियदृच्छया ॥ ४० ॥ गम्यमानःसमायान्तंग्रामपालोददर्शसः ॥ तंबभाषेग्रामपालआयुष्मानसिसर्वशः ॥ ४१ ॥ भागधेयवतांपुंसांपुण्यःपुण्यवतामसि ॥ प्रभावोविद्यतेवत्सकोऽपिलोकोत्तरस्त्वयि ॥ ४२ ॥ क्वप्रयाताःसहायास्तेकथंतत्सदनाद्बहिः ॥ तत्पश्यमुनिशार्दूलकथयामितवाग्रतः ॥ ४३ ॥ किंतुनान्यंत्वयातुल्यंपश्यामीहतपस्विनम् ॥ किंजानासिमहामन्त्रकांविद्यामवलम्बसे ॥ ४४ ॥ कस्यदेवस्यकारुण्याच्छक्तिर्लोकोत्तरात्वयि ॥ तत्कारुण्यवशात्तिष्ठग्रामेऽस्मिन्ब्राह्मणोत्तम ॥ ४५ ॥ शुश्रूषामखिलामेवभगवंस्तेकरोम्यहम् ॥ इतिसंवासयामासतस्मिन्ग्रामेमुनीश्वरम् ॥ ४६ ॥ परिचर्यांचतस्यासौभक्त्याचक्रेदिवानिशम् ॥ दिवसेषुप्रयातेषुसत्ताष्टसुसमेयिवान् ॥ ४७ ॥ प्रातरागत्यतस्याग्रेरुरोदभृशदुःखितः ॥ अद्यमेभाग्यहीनस्यगुणवान्भक्तिमान्सुतः ॥ ४८ ॥ जाज्वल्यमानदंष्ट्रेणभक्षितोनिशिरक्षसा ॥ इत्येवंरक्षकेणोक्तंतंपप्रच्छससंयमी ॥ क्वास्तेसराक्षसःपुत्रोभक्षितस्तेकथंवद ॥ ४९ ॥ ग्रामपालउवाच ॥ वर्तते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नगरेघोरःपुरुषादोनिशाचरः ॥ ५० ॥ सखादतिनरानेत्यनित्यंनगरगोचरान् ॥ ससर्वैर्नागरैरत्रप्रार्थितःपुरुषैःपुरा ॥ रक्षराक्षसनःसर्वान्ग्रास
तेकल्पयामहे ॥५१॥ पथिकानिशिनिद्रन्तियेचतान्भुङ्क्ष्वराक्षस ॥ एतस्मिन्संदनेपान्थान्ग्रामपालप्रवेशितान् ॥५२॥ आहारंकल्पयन्नक्रुरात्मीय
प्राणगुप्तये ॥ भवान्सुतोगृहेऽमुष्मिन्नधन्यैःसंयुतःपरैः ॥ ५३ ॥ तेग्रस्ताःकिलचानेनत्वंमुक्तोऽसिद्विजोत्तम ॥ प्रभावंभवतोवेत्तिभवाने
वद्विजोत्तम ॥५४॥ मदीयतनयस्याद्यमित्रमेकमुपागतम् ॥ अजानतामयासोऽपितनयस्यप्रियःसखा ॥ ५५ ॥ अन्यैःपान्थजनैःसार्द्धंतस्मिन्गेहेप्रवे
शितः ॥ श्रुत्वातत्रप्रविष्टंतं[1]निशीथेतनयोमम ॥ ५६ ॥ तमानेतुंगतःसोऽपिभक्षितस्तेनरक्षसा ॥ दुःखितेनमयाप्रोक्तःप्रातःसपिशिताशनः ॥ ५७ ॥
ममापिपुत्रोदुष्टात्मन्भवतानिशिभक्षितः ॥ भवज्जठरनिर्मग्नःसुतोऽसौयेनजीवति ॥ ५८ ॥ अस्तिचैवमुपायस्तेब्रूहिमेत्वंनिशाचर ॥ ५९ ॥
राक्षसउवाच ॥ अन्तःप्रविष्टंत्वत्पुत्रमज्ञात्वाहमभक्षयम् ॥ अजानन्भक्षितःपान्थैःसहितोऽसौसुतस्तव ॥ ६० ॥ यथाजीवतिमेकुक्षौयथाभवति
रक्षितः ॥ तथाविहितमप्यस्तिदैवेनपरमेष्ठिना ॥ ६१ ॥ गीतैकादशमध्यायंयःपठत्यनिशंद्विजः ॥ तत्प्रभावेणमेमुक्तिर्मृतानांपुनरुद्भवः ॥ ६२ ॥
ग्रामपालउवाच ॥ कथमेकादशाध्यायसामर्थ्यमिदमद्भुतम् ॥ इतिपृष्टोमयाविप्रसब्भाषेनिशाचरः ॥ ६३ ॥ राक्षसउवाच ॥ पुरागृध्रेणकेनापिनभो
मार्गेणगच्छता ॥ अस्थिखण्डंस्वतुण्डाग्रात्पातितंक्वापिवारिणि ॥ ६४ ॥ तंजलाशयमागत्यकोऽपिज्ञानीश्वरस्तदा ॥ महातीर्थमितिज्ञात्वाविदधेपितृ
तर्पणम् ॥ ६५ ॥ तमूचिरेजनाःसर्वेतीर्थमेतत्कथंवद ॥ ६६ ॥ मुनिरुवाच ॥ जपत्येकादशाध्यायंत्रिसन्ध्यंनियतेन्द्रियः॥कृतमौनस्तुविप्रोऽसौचौरै
र्व्यापादितःपथि ॥ तस्यास्थिशकलंगृध्रवदनात्पतितंजले ॥ ६७ ॥ तेनतीर्थमिदंदिव्यंजातंपातकनाशनम् ॥ ६८॥ राक्षसउवाच ॥ ततस्तेमानवाः
सर्वेसस्नुस्तत्रजलाशये ॥ निष्कल्मषतयाचैवंप्रापुस्तेपरमंपदम् ॥ ६९॥ एकादशस्यसामर्थ्यादध्यायस्यभविष्यति ॥ ममापिमुक्तिःपान्थानांपुनरु
त्थानमेवच ॥७०॥ योमयाकश्चिदुद्गीर्णोब्राह्मणोऽत्रैवतिष्ठति ॥ सचएकादशाध्यायंजपतिस्मनिरन्तरम्॥ ७१ ॥ सतेनाध्यायमन्त्रेणसप्तवाराभिमन्त्रि
तम् ॥ विधायवारिविप्रेन्द्रःक्षिपेद्यदिममोपरि ॥ ७२ ॥ ततोमेशापनिर्मुक्तिर्भविष्यतिनसंशयः ॥ ७३ ॥ ग्रामपालउवाच ॥ इतितेनास्मिसंदिष्टः
समायातस्त्वदन्तिकम् ॥ ७४ ॥ विप्रउवाच ॥ राक्षसःकेनपापेनजातोऽसौवदरक्षक ॥ यत्क्षपायांगृहेतस्मिन्नरान्खादतिनिद्रितान् ॥ ७५ ॥
ग्रामपालउवाच ॥ अस्मिन्ग्रामेपुराकश्चिदासीद्विप्रःकृषीवलः ॥ एकदाशालिकेदाररक्षणेव्याकुलोद्विजः ॥ ७६ ॥ नातिदूरेमहागृध्रःपान्थमे

१ 'वित्तषा नति' इ० पा० ।

CC-0. In Public Domain. Digitization by eGangotri

कमभक्षयत् ॥ तंविमोचयितुंदूराद्दयाञ्चक्रेऽपितापसः ॥ ७७ ॥ मुक्त्वापान्थंखगस्तावन्निरगादम्बराध्वना ॥ ततःसतापसःकोपात्तंबभाषेकृ
पीवलम् ॥ ७८ ॥ तापसउवाच ॥ धिक्त्वांहालिकदुर्बुद्धेकठोरमतिनिर्घृण ॥ कुक्षिम्भरंपरत्राणविमुखंहतजीवितम् ॥ ७९ ॥ चोरैश्चदं
ष्ट्रिभिःसर्प्पैररिवह्निविषाम्बुभिः ॥ गृध्रराक्षसभूतैश्चवेतालादिभिराहतान् ॥ ८० ॥ जनानुपेक्षतेशक्तःसतद्वधफलंलभेत् ॥ नमोचयतियोविप्रं
प्रभुश्चोरादिभिर्धृतम् ॥ ८१ ॥ सयातिनरकंघोरंसपुनर्जायतेवृकः ॥ निहन्यमानंविपिनेगृध्रव्याघ्रेणपीडितम् ॥ ८२ ॥ मुञ्चमुञ्चेतियोवक्ति
सयातिपरमांगतिम् ॥ गवामर्थेहताव्याघ्रैर्व्याधैर्दुष्टैश्चराजभिः ॥ ८३ ॥ तेऽपियान्तिपदंविष्णोर्दुष्प्राप्यंयोगिनामपि ॥ अश्वमेधसहस्राणि
वाजपेयशतानिच ॥ ८४ ॥ शरणागतसंत्राणकलांनार्हन्तिषोडशीम् ॥ दीनस्योपेक्षणंकृत्वाभीतस्यचशरीरिणः ॥ ८५ ॥ पुण्यवानपिकाले
नकुम्भीपाकेसपच्यते ॥ पश्यन्नपिभवान्पान्थंदुष्टगृध्रेणभक्षितम् ॥ ८६ ॥ निवारणसमर्थोऽपिनचक्रेयन्निवारणम् ॥ निष्कृपोऽसियतस्तस्मा
द्भविष्यसिनिशाचरः ॥ ८७ ॥ ग्रामपालउवाच ॥ इमंशापंमुनेःश्रुत्वाकम्पमानकलेवरः ॥ प्रणम्यहालिकोविप्रंबभाषेकरुणंवचः ॥ ८८ ॥
हालिकउवाच ॥ अत्राहंक्षेत्ररक्षायांचिरंक्षिप्तेनचक्षुषा ॥ नवेद्मिनिकटंगृध्रहन्यमानमिमंनरम् ॥ ८९ ॥ तेनमेऽनुग्रहंकर्तुंकृपणस्यत्वमर्हसि ॥ ९० ॥
विप्रउवाच ॥ योवेत्त्येकादशाध्यायंजपत्यनुदिनंचयः ॥ तेनाभिमन्त्रितंवारियदाशिरसितावके ॥ ९१ ॥ पतिष्यतितदाशापात्तवमुक्तिर्भवि
ष्यति ॥ ९२ ॥ ग्रामपालउवाच ॥ इत्युक्त्वातापसोयातोहालिकोराक्षसोऽभवत् ॥ इतितद्राक्षसवचोनिशम्याशुप्रधावतः ॥ ९३ ॥ उभयं
कार्यमेवाद्यसंसिद्धंकुरुतापस ॥ तदागच्छद्विजश्रेष्ठतेनाध्यायेनमन्त्रय ॥ तीर्थोदकंस्वहस्तेनतस्यमूर्द्धनिनिक्षिप ॥ ९४ ॥ महादेवउवाच ॥
इतितत्प्रार्थितंतस्यश्रुत्वाचकरुणाप्लुतः ॥ तथेतिसहपालेनमुनीरक्षाऽन्तिकंययौ ॥ ९५ ॥ एकादशेनतेनाम्बुविश्वरूपेणमन्त्रितम् ॥ निक्षिप्तं
तस्यशिरसितेनविप्रेणयोगिना ॥ ९६ ॥ गीताध्यायप्रभावेणशापमोक्षमवापसः ॥ विहायराक्षसंदेहंचतुर्बाहुस्ततोऽभवत् ॥ ९७ ॥ निगी
र्णायेजनास्तेनपान्थाआसन्सहस्रशः ॥ चतुर्भुजाबभूवुस्तेशङ्खचक्रगदाधराः ॥ ९८ ॥ तेविमानान्यारुरुहुस्तावदूचेसराक्षसम् ॥ ग्रामपाल
उवाच ॥ मदीयस्तनयःकस्तंदर्शयस्वनिशाचर ॥९९॥ महादेवउवाच॥इत्युक्तेग्रामपालेनदिव्यधीराहराक्षसः॥१००॥राक्षसउवाच ॥ एवंचतुर्भुजंविद्धि
तमालश्यामलद्युतिम् ॥ १ ॥ माणिक्यमुकुटंदिव्यमणिकुण्डलमण्डितम् ॥ हारहारिमहास्कन्धंस्वर्णकेयूरभूषितम् ॥२ ॥ राजीवलोचनंस्निग्धंहस्ते

१ 'चारुचक्रवरोरुदम्' इ० पा०।

CC-0. In Public Domain. Digitization by eGangotri

कृतसरोरुहम् ॥ दिव्यंविमानमारूढंदेवत्वंप्राप्तमात्मजम् ॥ ३ ॥ महादेवउवाच ॥ इतितस्यवचःश्रुत्वासुतंदृष्ट्वाचतादृशम् ॥ स्वगेहंनेतुमारेभे
तंजहाससुतस्ततः ॥ ४ ॥ सुतउवाच ॥ कतिवाराणिजातोऽसित्वंपुत्रोममरक्षक ॥ पूर्वंपुत्रस्त्वदीयोऽस्मिह्यधुनाविबुधोऽस्म्यहम् ॥ ५ ॥ यास्या
मिवैष्णवंधामब्राह्मणस्यप्रसादतः ॥ निशाचरोऽपिप्राप्तोऽयंपश्यदेहंचतुर्भजम् ॥ ६ ॥ एकादशस्यमाहात्म्याद्यातिस्वर्गंसमंजनैः ॥ विप्राद
स्मात्तमध्यायमधीष्वत्वंजपानिशम् ॥ ७ ॥ भविष्यतिनसंदेहस्तवापिगतिरीदृशी ॥ तातत्स्मात्सतांसङ्गोदुर्लभःसर्वथाजनैः ॥ ८ ॥ सोऽप्यद्य
तेसमुत्पन्नोह्यात्मनःसाधयेप्सितम् ॥ किंधनैर्भोगदानैर्वाकिंयज्ञैस्तपसानुकिम् ॥ ९ ॥ किंपूर्तैर्वापरंश्रेयोविश्वरूपस्यपाठतः ॥ तद्विष्णोःपरमंरूपं
तत्त्वंध्यायस्वविश्रुतम् ॥ ११० ॥ यत्पूर्णानन्दसंदोहकृष्णब्रह्मास्यनिर्गतम् ॥ कुरुक्षेत्रेऽर्जुनेमित्रेतत्कैवल्यरसायनम् ॥ ११ ॥ नृणांचभवभीतानामा
धिव्याधिभयापहम् ॥ अनेकजन्मदुःखघ्नंनान्यत्पश्यामितत्स्मर ॥ १२ ॥ शिवउवाच ॥ इत्युक्त्वासहतैःसर्वैर्ययौविष्णोःपरंपदम् ॥ तम
ध्यायंततोविप्राद्ग्रामपालःस्पपाठसः ॥१३॥ तावुभौतस्यमाहात्म्याज्जग्मतुर्वैष्णवंपदम् ॥ इत्येकादशमाहात्म्यकथातुभ्यंनिरूपिता ॥ १४ ॥ यस्याः
श्रवणमात्रेणमहापातकसंक्षयः ॥ ११५ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०उत्तर०गीतामाहात्म्येसतीश्वरसंवादेपञ्चाशीत्यधिकशततमोऽध्यायः ॥
॥१८५॥महादेवउवाच ॥ अस्तिकोल्हापुरंनामनगरंदक्षिणापथे ॥ सुखानांसदनंसाध्विसाधूनांसिद्धिसंभवम्॥१॥परशक्तेःपरंपीठंसर्वदेवनिषेवितम् ॥
पुराणेषुप्रसिद्धंयद्भुक्तिमुक्तिफलप्रदम् ॥२॥ कोटिशस्तत्रतीर्थानिशिवलिङ्गानिकोटिशः ॥ आस्तेरुद्रगयायत्रविशालंलोकविश्रुतम् ॥ ३ ॥ तुङ्गाचल
महावप्रगोपुरोल्लासितोरणम् ॥ प्रासादशिखरेयत्रतुङ्गंचकनकध्वजम् ॥ ४ ॥ सोमकान्तिमहासौधवलभीपङ्क्तिशोभितम् ॥ जालरन्ध्रोद्गिरद्धूप
धूमाऽमोदितदिक्तटम् ॥ ५ ॥ चलत्पताकविस्तीर्णच्छायंदेवालयान्वितम् ॥ चतुरैःसुन्दरैःस्निग्धैःश्रीमद्भिःशुचिमानसैः ॥ ६ ॥ अधिष्ठितं
सदाचारैःपुरुषैर्भूरिभूषणैः ॥ कुरङ्गनयनाश्चन्द्रवदनाःकुटिलालकाः ॥७ ॥ उत्फुल्लचम्पकच्छायाःपीनतुङ्गपयोधराः ॥ कृशमध्यानिम्ननाभिवलित्रय
विराजिताः ॥ ८ ॥ विशालजघनाश्चारुजङ्घायुग्मावराङ्घ्रयः ॥ वाचालमेखलादामनिक्कणन्मणिनूपुराः ॥ ९ ॥ रणत्कङ्कणहस्ताब्ज
स्फुरत्करजरश्मयः ॥ वसन्तिप्रमदायत्रमादयन्त्योमुनीनपि ॥ १० ॥ समस्तवस्तुसंयुक्तंसर्वभोगसमन्वितम् ॥ मङ्गलैःसकलैर्युक्तंमहा
लक्ष्मीसमन्वितम् ॥ ११ ॥ तत्रागच्छत्पुमान्कश्चिद्युवागौरःसुलोचनः ॥ कम्बुकण्ठःपृथुस्कन्धोमहावक्षामहाभुजः ॥ १२ ॥ समस्तलक्षणो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पेतोगोचरासक्तमानसः ॥ प्रविश्यनगरंपश्यशोभांसौधेषुसर्वतः ॥ १३ ॥ उत्कण्ठितमनाद्रष्टुंमहालक्ष्मींसुरेश्वरीम् ॥ मणिकुण्डेकृतस्नानःसंपन्न पितृतर्पणः ॥ महालक्ष्मींमहामायांनत्वातुष्टावभक्तितः ॥ १४ ॥ राजपुत्रउवाच ॥ जयत्यपारकरुणाशरण्याजगदम्बिका ॥ कुर्वाणाजगतो जन्मपालनंक्षपणंदृशा ॥ १५॥ ययाशक्त्याकृतादिष्टःपरमेष्ठीसृजत्यसौ ॥ अवष्टभ्यचतांशक्तिंपालयत्यच्युतोजगत् ॥ १६ ॥ ययाशक्त्याकृतावेशः संहरत्यखिलंहरः ॥ तांभजेपरमांशक्तिंसर्गस्थितिलयोर्जिताम् ॥ १७ ॥ योगिध्येयाङ्घ्रिकमलेकमलेकमलालय ॥ स्वभावानखिलान्नस्त्वंगृह्णा सीन्द्रियगोचरान् ॥ १८ ॥ त्वमेवकल्पनाजालंतत्कल्पंकुरुषेमनः ॥ इच्छाज्ञानक्रियारूपापरसंवित्स्वरूपिणी ॥ १९ ॥ निष्फलानिर्मलानित्यानिरा कारानिरञ्जना ॥ निरन्तरानिरातङ्कानिरालम्बानिरालया ॥ २० ॥ तवैवंमहिमानंहिकेवर्णयितुमीशते ॥ वन्देनिर्भिन्नषट्चक्रद्वादशान्तर्विहारिणीम् ॥ २१ ॥ अनाहतध्वनिमयींबिन्दुनादकलात्मिकाम् ॥ मातस्त्वंपूर्णशीतांशुगलत्पीयूषवाहिनी ॥ २२ ॥ पुष्णासिवत्सलेबालान्सनकादीन्दिगम्ब रान् ॥ अनुस्यूताशिवासंविज्जाग्रत्स्वप्नसुषुप्तिषु ॥ २३ ॥ तुरीयायांवर्त्तमानादयासूनृतसन्धिषु ॥ ददासिप्राणिनांसर्वाःसततंब्रह्मसंपदः ॥ २४ ॥ संहृत्यतत्त्वसंघातंतुरीयातीतयात्वया ॥ योगिनांबिम्बतादात्म्यंदीयतेनिर्विकल्पया ॥ २५ ॥ परांनमामिपश्यन्तींमध्यमांवैखरीमपि ॥ रूपाणिदेवि गृह्णासिजगत्संत्राणहेतवे ॥ २६ ॥ त्वंब्राह्मीवैष्णवीचत्वंमाहेशीचत्वमम्बिके ॥ वाराहित्वंमहालक्ष्मीर्नारसिंहीत्वमैन्द्रिका ॥ २७ ॥ त्वंकौमारीचण्डि कात्वंलक्ष्मीस्त्वंविश्वपावनी ॥ सावित्रीत्वंजगन्माताशशिनीत्वंचरोहिणी ॥ २८ ॥ त्वंस्वाहात्वंस्वधात्वंहित्वंसुधापरमेश्वरी ॥ चण्डमुण्डभुजादण्ड खण्डदोर्दण्डमण्डिते ॥ २९ ॥ रक्तबीजगलद्रक्तपानघूर्णितलोचने ॥ उन्मत्तमहिषग्रीवोन्मूलनप्रौढदोर्युगे ॥ ३० ॥ शुम्भासुरमहादैत्यदारणायात्त विक्रमे ॥ अनंतचरितेतुभ्यंनमस्त्रैलोक्यमातृके ॥ ३१ ॥ भक्तकल्पलतेमह्यंप्रसीदपरमेश्वरि ॥ ३२॥ शिवउवाच ॥ इतितेनस्तुतादेवीमहालक्ष्मीस्ततः स्त्वयम् ॥ निजरूपंसमास्थायपुरुषंप्रत्युवाचतम् ॥३३॥ श्रीलक्ष्मीरुवाच ॥ राजपुत्रप्रसन्नाहंवृणीष्ववरमुत्तमम् ॥३४॥ राजपुत्रउवाच ॥ पितामेधरणी पालोवाजिमेधंमहाक्रतुम् ॥ कुर्वाणोदैवयोगेनरोगाक्रान्तोदिवंययौ ॥ तद्वपुस्तत्रतैलेनशोषयित्वामयाततः ॥ ३५ ॥ स्थापितस्तत्रयागेऽसौयथा पूर्वमवर्तत ॥३६॥अथक्रान्तमहीचक्रोयूपेयागतुरङ्गमः॥ निशीथेबन्धनंछित्त्वानीतःकेनापिकुत्रचित्॥ ३७ ॥ अदृष्ट्वातद्व्रतंक्वापिनिवृत्तेषुजनेष्वहम् ॥ आमन्त्र्यऋत्विजःसर्वाञ्छरणंत्वामुपागतः ॥ ३८ ॥ प्रसन्नायदिदेवित्वंतन्मेयागतुरंगमः ॥ दृष्टोभवतुयागोऽसौसंपूर्णोजायतेयथा ॥ ३९ ॥

१'गौरः सर्वाङ्गसुन्दरः'इ०पा०

CC-0. In Public Domain. Digitization by eGangotri

आनृण्यंममतातस्यतेनराज्ञीभविष्यति ॥ तथाकुरुजगद्धात्रिशरणागतवत्सले ॥ ४० ॥ देव्युवाच ॥ ममद्वारेद्विजःसिद्धसमाधिरितिविश्रुतः ॥
ममाज्ञयासतेसर्वंकार्यंनिष्पादयिष्यति ॥ ४१ ॥ शिवउवाच ॥ इत्युक्तःश्रीमहालक्ष्म्याततोराजकुमारकः ॥ आजगाममुनिःसिद्धसमाधिर्यत्र
तिष्ठति ॥ ४२ ॥ प्रणम्यतस्यपादाब्जंकृताञ्जलिरवस्थितः ॥ तमुवाचततोविप्रःप्रहितोऽसित्वमम्बया ॥ त्वदीप्सितमिदंसर्वंसाधयामिविलो
कय ॥ ४३ ॥ शिवउवाच ॥ इत्युक्त्वात्रिदशान्सर्वानाचकर्षसमान्त्रिकः ॥ ऐक्षतक्षितिपालस्यतनयोऽसौतदासुरान् ॥ ४४ ॥ कृताञ्जलिपुटान्देवा
न्वेपमानकलेवरान् ॥ अथतानमरान्सर्वान्सम्बभाषेद्विजोत्तमः ॥ ४५ ॥ सिद्धसमाधिरुवाच ॥ अमुष्यराजपुत्रस्यवाजीयज्ञायकल्पितः ॥
नीतोऽस्तिदेवराजेनक्षपायामपहृत्यसः ॥ ४६ ॥ गीर्वाणाअश्वमेवास्यसमानयतमाचिरम् ॥ अथतस्यमुनेर्वाक्याद्देवैर्यज्ञतुरंगमः ॥ ४७ ॥
समर्पितस्ततस्तेनतेऽनुज्ञातादिवौकसः ॥ आकृष्टानमरान्दृष्ट्वागतंलब्ध्वातुरंगमम् ॥ ४८ ॥ महीपतिसुतोनत्वातंमुनिंवाक्यमब्रवीत् ॥ ४९ ॥ राज
पुत्रउवाच ॥ आश्चर्यमिदमेतत्तेसामर्थ्यमृषिसत्तम ॥ कृतमेतत्त्वयाविप्रत्रिदशाकर्षणंक्षणात् ॥ ५० ॥ हस्तादाकृष्यदत्तोमेयज्ञीयोऽयंतुरंगमः ॥
नकिंचिदपरंयावद्दुष्करंयत्सुरैरपि ॥ प्रभविष्यतितत्कर्तुंभवानेवनचापरः ॥ ५१ ॥ शृणुविप्रमहीपालःपिताऽसीन्मेबृहद्रथः ॥ प्रारब्धहयमेधोऽसौदै
वेननिधनंगतः ॥ ५२ ॥ अद्यापितस्यदेहोऽस्तिततत्तैलेनशोषितः ॥ तस्यसंजीवनंभूयःकर्त्तुमसिसत्तम ॥ ५३ ॥ श्रीशिवउवाच ॥ इत्याकर्ण्य
स्मितंकृत्वासजगादमहामुनिः ॥ यामस्तत्रपितायत्रतावकोयागमण्डपः ॥ ५४ ॥ अथागत्यसमंतेनतत्रसिद्धसमाधिना ॥ पयोऽभिमन्त्र्यविदधेतस्य
प्रेतस्यमूर्द्धनि ॥ ५५ ॥ ततःप्रापनृपःसंज्ञामुत्तस्थेवैददर्शच ॥ सतंपप्रच्छविप्रेन्द्रंकोऽसिधर्मेतिभूपतिः ॥५६॥ततोराजसुतःसर्वंभूपालायन्यवेदयत् ॥
सनत्वाब्राह्मणंराजातंपुनर्दत्तजीवितम् ॥ ५७ ॥ बभाषेकेनपुण्येनत्वयिशक्तिरलौकिकी ॥ यथामेजीवितंदत्तमाकृष्टाश्चदिवौकसः ॥ यागश्चोद्धरितो
विप्रयेनमेतन्निरूपय ॥५८॥ श्रीशिवउवाच ॥ इत्युक्तस्तेनविप्रोऽसौजगादश्लक्ष्णयागिरा॥५९॥सिद्धसमाधिरुवाच ॥ गीतानांद्वादशाध्यायंजपाम्य
हमतन्द्रितः॥तेनशक्तिरियंराजन्ययाप्राप्तोऽसिजीवितम्॥६०॥श्रीशिवउवाच ॥ एतदाकर्ण्यराजासौद्वादशाध्यायमुत्तमम् ॥ पपाठतस्माद्विप्रर्षेःसका
शाद्ब्राह्मणान्वितः॥६१॥तस्याध्यायस्यमाहात्म्यात्तेसर्वेसद्गतिंययुः॥अन्येपठित्वाजीवाश्चमुक्तिमापुरहोपराम्॥६२॥इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्त
र०गीतामाहात्म्येषडशीत्यधिकशततमोऽध्यायः॥१८६॥छ॥देव्युवाच॥द्वादशाध्यायमाहात्म्यंभवताकथितंम ॥ब्रूहित्रयोदशाध्यायमाहात्म्यमतिसु
न्दरम्॥१॥ईश्वरउवाच॥शृणुत्रयोदशाध्यायमहिमाम्भोनिधिंशिवे॥यदाकर्णनमात्रेणपरांमुदमवाप्स्यसि॥२॥अस्तिदक्षिणदिग्भागेतुङ्गभद्रामहानदी॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्तटेनगरंरम्यंनाम्नाहरिहरंपुरम्॥३॥यत्रास्तेभगवान्देविदेवोहरिहरःस्वयम्॥यस्यदर्शनमात्रेणपरंकल्याणमाप्यते ॥४॥ तस्मिन्पुरेद्विजन्मासीद्धरिदी
क्षितसंज्ञिकः॥तपःस्वाध्यायनिरतोश्रोत्रियोवेदपारगः॥५॥दुराचारेतितस्यासीद्भार्यानाम्नाचकर्मणा ॥ नसुष्वापसमंपत्याद्दुरालापाकदाचन ॥ ६ ॥
क्षणमप्यात्मसदनेनचास्तेस्वैरचारिणी ॥ कण्ठदघ्नंद्विजद्वारेधयन्तीवारुणीरसम् ॥ ७ ॥ पतिसम्बन्धिनःसर्वांस्तर्जयन्तीपुनःपुनः ॥ विटैः
सहसदोन्मत्तारममाणानिरन्तरम् ॥ ८ ॥ कदाचिद्व्याकुलंदृष्ट्वापुरंपौरैरितस्ततः ॥ सङ्केतगेहमकरोत्कान्तारेनिर्जनेस्वयम् ॥ ९ ॥
अथतत्रैवसाधूर्तारममाणाविटैःसह ॥ निनायसाबहून्कालान्निजयौवनगर्विता ॥ १० ॥ अथतस्मिन्पुरेरम्येनिवसन्त्यानिरङ्कुशम् ॥ वसन्त
कालःसमभूत्परश्चित्तभुवःसखा ॥ ११ ॥ आमूलपल्लवाकीर्णःसहकारविकारिणा ॥ पिकानांपञ्चमालापैःपुनःसंजीवितःस्मरः ॥ १२ ॥ स्फुर
च्चम्पकसौरभ्यहारकैर्मलयानिलैः ॥ मन्दंमन्दंप्रसर्पद्भिरान्दोलितवनद्रुमः ॥१३॥ उत्फुल्लमल्लिकमोदंमदिरापारणावताम्[1] ॥ अलीनांकलटङ्कारैःसम
न्ताद्भावशोभितः ॥ १४ ॥ प्रसन्नचारुभिःस्मेरःसरोवरसुगन्धिभिः ॥ मीलन्मरालनिवहैःसरोभिःप्रकटीकृतः॥१५॥घनच्छायासुखासीनहरिणार्भक
धारिभिः ॥ नीरन्ध्रपल्लवैर्नानाशाखिभिःशोभितावनिः ॥ १६ ॥ तस्मिन्वसन्तसमयेमुदितासाभिसारिका ॥ अपश्यज्जगदानन्ददायिनींचन्द्रिकां
निशि ॥१७॥ चञ्चच्चकोरचञ्च्वग्रगलत्पीयूषसीकराम् ॥ द्रवदिन्दुशिलानिर्यत्सुधानिझरनिर्भराम्॥१८॥विकासिकुसुमक्रोडसान्द्रीभूतकरोत्कराम् ॥
उल्लासितपयोराशिकल्लोलालिङ्गिताम्बराम् ॥१९॥ मनोभवमहासिंहकुलटाकण्ठकर्तरीम्[2] ॥ घनान्धकारसंदोहविदारणपटीयसीम्॥ २० ॥ श्वेतीकृत
सतीकारपरार्थहिमगर्भिणीम् ॥ म्लानपङ्कजसंकोचायूनामानन्ददायिनीम् ॥ २१ ॥ चक्रवाकवधूवक्रकरुणाक्रोशसाक्षिणीम् ॥ मुक्ताश्रेणीविशुद्धांशु
प्रभासितदिगन्तराम्॥२२॥अथतस्यांप्रभूतायांपूरयन्त्यांदिशोदश॥कामान्धाःकामिनोजाताःपथिसौधविहारिणीः ॥२३॥ अपश्यन्तीविटान्रात्रौनि
र्भिद्यभवनार्गलम् ॥ ययौसंकेतभवनंनिर्गत्यनगराद्बहिः॥२४॥तत्रप्रियतमंकश्चित्काममोहितमानसा॥अन्वेषयन्तीनाद्राक्षीत्कुञ्जेकुञ्जेतरौतरौ ॥२५॥
आकर्णयन्तीकान्तस्यमन्दालापान्पदेपदे ॥ अभियातितितःक्रीडन्यत्रसंहारिनिस्वनः॥२६॥चक्रवाकरवाञ्छ्रुत्वाकन्तालापभ्रमादसौ ॥ सरोवराणि
सर्वाणिपर्यटन्तीमुहुर्मुहुः ॥ २७ ॥ कान्तभ्रान्त्यातरुतलेप्रसुप्तान्हरिणोत्करान् ॥ प्रबोधयन्तीसोच्छ्वासमागतास्मीतिभाषिणी ॥ २८ ॥ आलि
ङ्गन्तीवनस्थाणुंजीवनेश्वरशङ्कया ॥ तदाननभ्रमाद्भूयश्चुम्बन्तीविकचाम्बुजम् ॥ २९ ॥ तत्रतत्रकृतव्यर्थश्रमाऽदृष्टप्रियास्वयम् ॥ विललापवनेत

१'मोदमादिनां चरणावताम्' इ० पा०। २ 'कुलटाकुलकर्तरीम्' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्मिन्मूर्च्छंतीविविधोक्तिभिः॥हाकान्तहागुणाक्रांतमच्चैतन्यस्यनायक॥३०॥हेमनोहरसौभाग्यभाग्यलावण्यशेवधे॥हापूर्णचन्द्रवदनहासरोजायतेक्षण
॥३१॥हाकान्ततत्त्वसाहित्यविश्रामार्यसुरद्रुम॥अहोकान्तनवाकीर्णकर्णकुण्डलदीधितिः॥३२॥नयनानन्दनिष्यन्दीकुत्रतेमुखचन्द्रमाः ॥ यदिकोपेन
कुत्रापिगुह्यवेषोऽत्रतिष्ठसि॥३३॥प्रसादयामित्वांकान्तदत्त्वाप्राणान्प्रियानपि॥इत्युच्चैःसर्वतोदिक्षुविलपन्त्यावियोगतः ॥३४॥ तस्याःश्रुत्वावचःकोऽ
पिसुप्तोव्याघ्रःप्रबुद्धवान्॥कुर्वन्घुरघुरध्वानंपश्यन्प्रतिदिशंरुषा॥३५॥आस्फालयन्नखैर्भूमिंगर्जन्नाकाशगह्वरम्॥पृष्ठनिर्भग्नलाङ्गूलंद्रुतमुत्थायचाकरोत
॥३६॥गतोव्याघ्रःसमुत्पत्ययत्रास्तेसाभिसारिका॥अथसापितमायान्तमालोक्यपतिशङ्कया॥३७॥ निर्जगामपुरःस्थातुंप्रेमनिर्भरमानसा॥ततस्तस्यन
खक्रीडाक्रूरतान्धीकृतासती॥३८॥जहौप्रियवपुःशङ्कांश्रुत्वागर्जितमूर्जितम्॥व्याघ्रोऽपिपातयामासततोनखशिलीमुखैः॥३९॥तमुवाचाथक्रोशन्तीवीत
सौहृदयागिरा॥तथाविधापिसानारीभ्रान्तिमुत्सृज्यसत्वरम्॥४०॥व्याघ्रत्वंतुकुतोहेतोर्मांनिहन्तुमिहागतः ॥ इदंसर्वंसमाख्याहियतस्त्वंहन्तुमिच्छसि
॥ ४१ ॥ इतितस्यावचःश्रुत्वाशार्दूलश्चण्डविक्रमः ॥ क्षणंविहायतद्ग्रासमुवाचप्रहसन्निव ॥ ४२ ॥ मलापहानदीनाम्नादेशेतिष्ठतिदक्षिणे ॥ नगरी
मुनिपर्णेतितस्यारोधसिवर्तते ॥ ४३ ॥ तत्रास्तेभगवान्साक्षात्पञ्चलिङ्गोमहेश्वरः ॥ तस्यांपुर्यामहंविप्रपुत्रोभूत्वास्थितस्ततः ॥ ४४ ॥ अयाज्यान्या
जयन्नश्नन्नेकोद्दिष्टेनदीतटे ॥ वेदपाठफलंशश्वद्विक्रीणन्धनकाङ्क्षया ॥ ४५ ॥ भिक्षुकानपराँल्लोभात्तिरस्कुर्वन्दुरुक्तिभिः ॥ अदेयद्रविणंगृह्णन्नदत्तमनि
शंदिनम् ॥ ४६ ॥ छलयन्सकलाँल्लोकान्क्षणग्रहणकौतुकात् ॥ ततःकतिपयेकालेजरठत्वमुपागतः॥४७॥वलीपलितवानन्धःप्रपतन्प्रस्खलद्गतिः ॥
पतद्दन्तोऽभवंभूयःप्रतिग्रहपरायणः ॥ ४८ ॥ हस्तेगृहीतदर्भोऽहमगमंतीर्थसन्निधिम् ॥ धनग्रहणलोभेनभ्रमन्पर्वसुपर्वसु ॥ ४९ ॥ ततोऽहंशिथिलाङ्गः
सन्कंचिद्गूनिर्जरालयम् ॥ गतवान्याचितंभोक्तुंदष्टोमध्येपदेशुना ॥५०॥ अपतंमूर्छितोभूत्वाततःक्षितितलेक्षणात् ॥ ततोऽहंगलितप्राणोव्याघ्रयोनि
मुपागतः ॥ ५१ ॥ अत्रतिष्ठामिकान्तारेपूर्वपापमनुस्मरन् ॥ नभक्षयामिधर्मिष्ठान्मुनीन्साधुजनान्सतीः ॥५२ ॥ किंतुपापान्दुराचारानसतीर्भक्षया
म्यहम् ॥ अतोऽसतित्वंतत्त्वेनममैवकवलायसे ॥ ५३ ॥ इत्युक्त्वास्वैर्नखैःक्रूरैस्तांविभज्याङ्गखण्डशः ॥ अथतांभक्षितांतेनपापदेहमुपाश्रिताम् ॥
॥ ५४ ॥ यमस्यकिङ्करानिन्युःसद्यःसंयमनींपुरीम् ॥ यमादेशेनतत्रापिपातयामासुराशुताम् ॥ ५५ ॥ विण्मूत्ररक्तपूर्णेषुघोरकुण्डेष्वनेकधा ॥ कल्प
कोटिषुजातासुतस्मादादायतांमुहुः ॥५६॥ रौरवेस्थापयामासुर्मन्वन्तरशतावधि ॥ ततोऽप्याकृष्यतांदीनांरुदतींसर्वतोमुखीम् ॥५७॥ मुक्तकेशांभग्न
गात्रांचिक्षिपुर्दहनानने ॥ एवंपापपराघोराभुक्त्वानरकयातनाम् ॥ ५८ ॥ इहजातामहापापात्पुनःश्वपचयोनिषु ॥ ततःश्वपचगेहेऽपिवर्द्धमानादिने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिने ॥ ५९ ॥ पूर्वजन्मवशेनैवतथैवासीद्यथापुरा ॥ ततःकतिपयेकालेपुनःस्वंभवनंययौ ॥ ६० ॥ यत्रास्तेजृम्भकादेवीशिवस्यान्तःपुरेश्वरी ॥ तत्रा
पश्यद्विजन्मानंवासुदेवाभिधंशुचिम् ॥ ६१ ॥ गीतात्रयोदशाध्यायमुद्गिरन्तमनारतम् ॥ ततस्तच्छ्रवणादेवमुक्ताश्वपचविग्रहात् ॥ ६२ ॥ दिव्यंदेहं
समासाद्यजगामत्रिदशालयम् ॥ ६३ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप॰उत्तर॰गीतामाहात्म्येसप्ताशीत्यधिकशततमोऽध्यायः ॥१८७॥ ईश्वरउवाच ॥
अतःपरंप्रवक्ष्यामिभवानिभवमुक्तये ॥ गीताचतुर्दशाध्यायमवधारयसुस्मिते ॥ १ ॥ मेदिन्यांयत्किलस्थूलमस्तिकाश्मीरमण्डलम् ॥ राज
धानीसरस्वत्याआस्तेचैवमनोहरा ॥ २ ॥ यामधिष्ठायवाग्देवीब्रह्मलोकंप्रयच्छति ॥ हंसैस्समुह्यमानापिसावित्रीप्रहतैरपि ॥३॥ सरस्वतीपदाम्भोज
सेवामाश्रित्यकुङ्कुमैः ॥ यत्रगौरवयन्त्याशाहंसाःपक्षपुटोद्भवैः ॥४॥ निरन्तरंतयाचैवनृणांसंस्कृतभाषिणाम् ॥ सुपर्वाणमयीभाषानिमेषेणोपलभ्यते
॥ ५ ॥ प्रातर्गृहाङ्गणोद्धूतैर्यत्रकुङ्कुमपांसुलैः ॥ सर्वतोऽरुणितच्छायंशशाङ्करविमण्डलम् ॥ ६ ॥ तत्रासीत्तेजसांराशिःशौर्यवर्मानरेश्वरः ॥ उद्यदुज्ज्व
लत्राणौघखण्डितारातिमण्डलः ॥ ७ ॥ अभूच्चसिंहलद्वीपेराजासिंहपराक्रमः ॥ नाम्नाविक्रमवेतालःकलानामपिशेवधिः ॥ ८ ॥ उभौपरस्परंमै
त्रींवर्द्धयांचक्रतुःक्रमात् ॥ तत्तद्देशसमुत्पन्नैरपूर्वैःप्रचुरोत्करैः ॥९॥ एकदाप्रहितंप्रेम्णाप्रभूतंशौर्यवर्मणा ॥ राजाविक्रमवेतालोविलोक्यशुनकीद्वयम्॥
॥ १० ॥ मत्तमातङ्गतुरगमणिभूषणचामरम् ॥ प्रेषयामासमित्रायप्रभूतंशौर्यवर्मणे ॥ ११ ॥ एकदाशिबिकारूढश्चारुचामरवीजितः ॥ सुवर्णशृङ्ग
लारूढंवाद्यडिण्डिमडम्बरम् ॥ १२ ॥ शुनीयुगलमादायमृगयाकौतुकोत्सुकः ॥ राजाजगामवाह्यालींसमंराजकुमारकैः ॥ १३ ॥ पणबन्धविधानेन
समुपेतंशशामिषम् ॥ तत्रराजकुमाराणांमहान्कोलाहलोऽभवत् ॥ १४ ॥ ततःसमानवयसाकेनचिद्राजसूनुना ॥ बहुमूल्यंपणंकृत्वाराजाचिक्रीडकौ
तुकी ॥ १५ ॥ ततोऽवतार्यदोलायाविरुदावलिगर्विताम् ॥ धावतःशशकस्योच्चैःपृष्ठेमुञ्चन्नृपःशुनीम् ॥१६॥ मुमोचराजपुत्रोऽपिप्रेमपात्रंमहाभुजः ॥
विरराममशुनीमुच्चैःसंकीर्त्यविरुदावलीम् ॥ १७ ॥ अलक्ष्यमाणवेगेऽस्मिञ्छुनीयुगलकेभृशम् ॥ धावत्युत्थितमेवासीत्पश्यतांसर्वभूभृताम् ॥ १८ ॥
पपातगर्तेमहतिशशकोऽतिश्रमादसौ ॥ पतितोऽपिशुनीवश्योनाभवच्छशशावकः ॥ १९ ॥ ततःशनैःसमुत्थायधावन्नाक्रम्यरोषतः ॥ जगृहे
राजशुन्यासौशशकःफेनमुद्वमन् ॥ २० ॥ ततःकथंचिदुत्प्लुत्यगच्छन्विस्खलयञ्छशः ॥ राजपुत्रशुनक्यासौगृहीतःकन्धरातटे ॥ २१ ॥
जितमस्माभिरत्यर्थमितिसंजल्पतांनृणाम् ॥ कोलाहलेशङ्किताया:शुन्यानिर्गतवान्मुखात् ॥ २२ ॥ ततोदंष्ट्राव्रणश्रेणीक्षरद्रुधिरधारकः ॥ क्वापि
मर्मरभूभागेनिलीयस्थितवाञ्छशः ॥ २३ ॥ जिघ्रन्त्याराजशुन्यासौभूभागंघनरोषया ॥ दृष्टमात्रःपरित्रस्तोहस्तमात्रंततोऽगमत् ॥ २४ ॥

Nagari Sanskrit University, Varanasi Collection

यत्रकर्पूरकदलीक्रोडव्याघ्रदरीतलः ॥ चोलीकपोलफलकांश्चुम्बन्वातिसमीरणः ॥ २५ ॥ उद्भिन्नकेतकीकोशरजोमुकुलितेक्षणः ॥ विस्रब्धा
हरिणायत्रच्छायांतांपरितन्वतः ॥ २६ ॥ नारिकेलफलैर्यत्रस्वयंनिपतितैरधः ॥ अपिचूतफलैस्तृप्ताःपक्वैःशाखामृगाअपि ॥२७॥ अपिकेसरिणोयत्र
खेलन्तिकलभैःसमम् ॥ फणिनःकेकिबर्हेषुनिर्विशङ्कंविशन्तिच ॥२८ ॥ यत्राश्रमान्तरेविप्रोवत्सनामाजितेन्द्रियः ॥ शान्तश्चतुर्दशाध्यायंजपन्नास्ते
निरन्तरम् ॥ २९ ॥ तत्रतच्छिष्यपादाब्जप्रक्षालनजलैःकृते ॥ कर्दमेन्यपतद्धृत्वाजीवशेषोमुहुःश्वसन् ॥ ३० ॥ ततःकर्दमसंस्पर्शमात्रनिस्तीर्ण
संसृतिः ॥ दिव्यंविमानमारुह्यनिर्ययौशशकोदिवम् ॥ ३१ ॥ ततःशुन्यपिलिप्ताङ्गीस्तोकैःकर्दमबिन्दुभिः ॥ क्षुत्पिपासार्तिरहिताशुनीरूपंविहाय
सा ॥ ३२ ॥ ततोदिव्याङ्गनारम्यंगन्धर्वैरुपशोभितम् ॥ दिव्यंविमानमारुह्यशुन्यपित्रिदिवंययौ ॥ ३३ ॥ ततोजहासमेधावीशिष्योनाम्नास्वक
न्धरः ॥ विचार्यविस्मितःपूर्वजन्मवैरस्यकारणम् ॥३४॥ राजापिपर्यपृच्छत्तंविस्मयस्मेरलोचनः ॥ प्रणम्यपरयाभक्त्याविनयैकपयोनिधिः॥३५ ॥
कथांकथयमेविप्रहीनयोनिनिषेवितौ ॥ अज्ञौयौजग्मतुःस्वर्गंशुनीशशकशावकौ ॥ ३६ ॥ शिष्यउवाच ॥ वत्सनामाद्विजन्मास्तेवनेऽमुष्मिञ्जिते
न्द्रियः ॥ चतुर्दशंतुह्यध्यायंगीतानांसर्वदाजपन् ॥ ३७ ॥ शिष्योऽहंतस्यभूपालब्रह्मविद्याविशारदः ॥ गीताचतुर्दशाध्यायंजपामिप्रत्यहंनृप ॥३८॥
मदीयचरणाम्भोजप्रक्षालनजलेलुठन् ॥ शशस्त्रिदिवमापन्नःशुनक्यासहभूपते ॥ ३९ ॥ राजोवाच ॥ हेतुनाकेनकथयहसितंचद्विजोत्तम ॥ अतः
किमपिसाकूतंमन्यमानेनसादरम् ॥ ४० ॥ शिष्यउवाच ॥ महाराष्ट्रेतिनगरंनाम्नाप्रत्युदकंमहत् ॥ तत्रासीद्ब्राह्मणोनाम्नाकेशवःकितवाग्रणीः ॥
॥ ४१ ॥ विलोभनाभवत्तस्यजायास्वैरविहारिणी ॥ तेनसाहन्यतेक्रोधाद्वैरंसंचिन्त्यजन्मनः ॥ ४२ ॥ ततःस्त्रीवधपापेनशशकोजायतेद्विजः ॥
किल्बिषाच्छुनकीसापिजातावञ्चनजन्मनः ॥ ४३ ॥ पूर्वेणजन्मनाभ्यस्तंवैरंविस्मरतोनहि ॥ आसेदिवद्ध्यांबहुधायोन्यन्तरमपिकचित् ॥ ४४ ॥
इत्याकलय्यसकलंभूपालःश्रद्धयान्वितः ॥ गीतामभ्यस्यसकलामवापपरमांगतिम् ॥ ४५ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप ०उत्तर० गीतामाहात्म्ये
ऽष्टाशीत्यधिकशततमोऽध्यायः ॥ १८८ ॥ ईश्वरउवाच ॥ प्रवक्ष्यामिविशालाक्षितुहिनाचलकन्यके ॥ गीतापञ्चदशाध्यायमाहात्म्यमवधारय ॥
॥ १ ॥ कृपालुर्नरसिंहोऽभून्नाम्नागौडेषुभूपतिः ॥ यस्यासिधारयासङ्ख्येदेवसङ्घाश्चधिक्कृताः ॥२ ॥ यदीयमत्तमातङ्गदानधाराजलैरिला ॥ निदाघ

'१ चोलीकपालफलकाच्चुचुम्बातिसमीरणः'इ० पा०।

CC-0. In Public Domain. Digitization by eGangotri

ऽपिचसेहेतांरविसंतापवेदनाम् ॥ ३ ॥ संक्रन्दनपरित्रस्तायदीयशरणंगताः ॥ रेजिरेकरिणोमत्ताश्चलन्तःपर्वताइव ॥ ४ ॥ मत्तमातङ्गचीत्कारप्रति
स्वनमिवादरात् ॥ यस्यगोपायतःशैलाव्याहरन्तिक्ष्मापावतः ॥ ५ ॥ यदीयधावत्तुरगक्षुरसङ्घातजर्जरम् ॥ नाभूच्चित्रंकथंकारंगतखण्डंधरातलम् ॥
॥ ६ ॥ यस्मिन्वृत्रहणोमित्रेसमुद्धरतिमेदिनीम् ॥ पुनरुज्ज्वलयांचक्रेमहाभाष्यंफणीश्वरः ॥ ७ ॥ तस्यासीत्सैनिकोधीमाञ्छस्त्रशास्त्रकलानिधिः ॥
नाम्नासरभभेरुण्डःप्रचण्डभुजमण्डलः ॥ ८ ॥ भाण्डारेणतुरङ्गैश्चभटैर्वीररसोद्भवैः ॥ समानएवभूपालदुर्गैरत्यन्तदुर्गमैः ॥ ९ ॥ सकदाचित्स्वयं
राज्यंकर्तुंपापोदधेमनः ॥ निहत्यवसुधापालंबलात्साकंकुमारकैः ॥ १० ॥ कतुव्यवस्यदिवसैःस्वल्पैरित्थंचिकीर्षया ॥ विषूचिकामयादाशुपरासुः
समजायत ॥ ११ ॥ कालेनाल्पीयसाप्रेत्यपापात्मातेनकर्मणा ॥ तेजस्वीतुरगोजातःसिन्धुदेशेकृशोदरि ॥ १२ ॥ मूलेनबहुनाक्रीत्वाहयतत्त्वविदा
ततः ॥ बहुयत्नवतानीतःकेनचिद्वैश्यसूनुना ॥ १३ ॥ राजापिपौत्रनत्त्राद्यैस्तस्यैवमरणात्पदम् ॥ कालेनवृद्धतांप्राप्तःस्वराज्यंचापिपालयन् ॥१४॥
सवैश्यसूनुस्तंचाश्वंराज्ञेदातुंसमागतः ॥ राज्ञोद्वारिस्थितस्तत्रप्रतीक्षंस्तत्समागमम् ॥ १५ ॥ ज्ञातपूर्वोऽपिवैश्योऽसौप्रतीहारेणदर्शितः ॥ किमर्थंब्रूहि
राज्ञेतिपृष्टःस्पष्टमभाषत ॥ १६ ॥ देवत्रिजगतीरत्नमितिमत्वातुरङ्गमः ॥ मयानीयतमूल्येनक्रीतोऽसौसाधुलक्षणः ॥ १७ ॥ ततोऽवलोक्यवक्त्राणि
भूपालःपार्श्ववर्तिनाम् ॥ समादिदेशवणिजमश्वोऽत्रानीयतामिति ॥ १८ ॥ शिरांसिधूनयन्नृणामश्वलक्षणवेदिनाम् ॥ शूराणामपिचेतांसिमुहुरुत्साह
यन्महान् ॥ १९ ॥ अखण्डमेदिनीवेगबहुसंक्रमणार्जितम् ॥ लालाफेनच्छलेनासौवमन्नुभ्रतरंयशः ॥ २० ॥ उच्चैःश्रवस्तुलांभेजेगुणसाम्येन
तत्त्वतः ॥ विवृण्वन्नतितेजस्वीह्रियेवनतकन्धरः ॥ २१ ॥ चामरैरिन्दुधवलैर्वीज्यमानोनिरन्तरम् ॥ दुग्धाम्भोनिधिलोलैस्तैःश्वासैरुच्चैःश्रवाइव ॥
॥ २२ ॥ नीलातपत्रयुगलंघनच्छायतुलश्रिया ॥ बिभ्राणोवारिदालीढहिमाद्रिशिखरश्रियम् ॥ २३ ॥ मेदिनीमण्डलस्पर्शसंक्रान्तमिवपावकम् ॥
मुहुरुद्धारयन्धुन्वन्बन्धुरंकन्धरातटम् ॥२४॥ दारयन्वैरिणःसर्वान्व्याहरंश्चजयश्रियम् ॥ हेषारवेणगुरुणादिक्षुप्रख्यापयन्यशः ॥२५॥सत्त्वस्यराशि
रत्युच्चैर्गतीनामिवशेवधिः ॥ रूपस्यनिलयंसाक्षाल्लक्षणानांपयोनिधिः ॥ २६ ॥ आनीतोवणिजावाजीराज्ञाचसमदृश्यत ॥ बहुधावर्णितोऽमात्यैरश्व
लक्षणवेदिभिः ॥ २७ ॥ यथेच्छंवणिजोदीर्णंस्वर्णंदत्त्वामहीपतिः ॥ जग्राहतुरगंवेगादसीमानन्दनिर्भरः ॥२८॥ ततोऽश्वपालमाहूययत्नतस्तंनिरूप्य
च ॥ विसर्जितसभालोकोगृहान्तरमगान्नृपः ॥ २९ ॥ अनेकधासमापृष्टोमहीपालंरणाङ्गणे ॥ शस्त्रव्रणकिणश्रेणीभूषणंसत्त्वसन्निभम् ॥
॥ ३० ॥ एकदामृगयांखेलन्कुतूहलरसात्मना ॥ तमारुह्यमहीपालोवनंप्रतिविवेशह ॥ ३१ ॥ विसृज्यसैनिकान्पृष्ठेधावतःपरितोऽखिलान् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आकृष्यमाणोहरिणैः पिपासाकुलितोऽभवत् ॥ ३२ ॥ ततउत्तीर्यतुरगाज्जलमन्वेषयन्नृपः ॥ बद्ध्वाश्वंतरुशाखायामारुरोहशिलांनृपः ॥ ३३ ॥
गीतापञ्चदशाध्यायश्लोकार्द्धंलिखितंततः ॥ पातितंमरुतातत्रयत्रखण्डेऽव्यलोकयत् ॥ ३४ ॥ पत्रंवाचयतोराज्ञःश्रुत्वागीताक्षरावलीम् ॥ ततो
मुक्तिपदंलेभेतुरगस्त्वरयाऽपतत् ॥ ३५ ॥ ततोग्रन्थिसमाच्छिद्यपल्याणमवतार्यच ॥ उत्थाप्यमानस्तुरगोराज्ञानोत्थितवान्मृतः ॥ ३६ ॥
ततःसरभभेरुण्डोनृपमाभाष्यसुस्वरम् ॥ दिव्यंविमानमारुह्यजगामत्रिदशालयम् ॥ ३७ ॥ ततोगिरिंसमारुह्यददर्शाश्रममुत्तमम् ॥
पुन्नागकदलीचूतनालिकेरसमन्वितम् ॥ ३८ ॥ द्राक्षेक्षुवाटिकापूगनागकेसरचम्पकम् ॥ खेलत्करभसारङ्गंनृत्यत्केकिकुलंनृपः ॥ ३९ ॥ प्रणिपत्य
द्विजन्मानमुटजाभ्यन्तरस्थितम् ॥ पप्रच्छपरयाभक्त्यामुक्तसंसारवासनात् ॥ ४० ॥ तुरगोनिरगात्स्वर्गंहेतुनाकेनमेवद ॥ इत्याकर्ण्यवचोराज्ञो
द्विजन्मावाचमूचिवान् ॥ ४१ ॥ त्रिकालदर्शीमन्त्रज्ञोविष्णुशर्मामहत्तरः ॥ ४२ ॥ द्विजन्मोवाच ॥ आसीत्सेनापतिःपूर्वंभेरुण्डस्तवभूपते ॥
त्वांनिहत्यसमंपुत्रैःकर्तुंराज्यंसमुद्यतः ॥ ४३ ॥ तावद्विषूचिकारोगात्कालधर्ममवाप्तवान् ॥ कालेनबहुनाप्रेत्यतत्वात्तुपारगोऽभवत् ॥ ४४ ॥ अथ
पञ्चदशाध्यायश्लोकार्द्धंलिखितंक्वचित् ॥ ततोवाचयतःश्रुत्वानिरगात्तुरगोदिवम् ॥ ४५ ॥ ततःसमागतैस्तत्रपरिवारजनैर्वृतः ॥ प्रणिपत्यद्विजन्मानं
हृष्टरोमाविनिर्गतः ॥४६॥पत्रंतदेवलिखितंगीतापञ्चदशाक्षरम्॥वाचयन्समहीपालोहर्षसंफुल्ललोचनः॥४७॥ अभिषिच्यनिजंपुत्रंमन्त्रविन्मन्त्रिभिःस
मम्॥सिंहासनेसिंहबलंमुक्तिमापविशुद्धधीः ॥४८॥इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०उत्तर०गीतामाहात्म्यएकोननवत्यधिकशततमोऽध्यायः॥१८९॥
ईश्वरउवाच ॥ अतःपरंप्रवक्ष्यामिषोडशाध्यायगौरवम् ॥ आकर्णयकुरङ्गाक्षिहर्षोत्कण्ठप्रवर्धिणि ॥१॥ अस्तिसौराष्ट्रिकंनाम्नापुरंगुर्जरमण्डले ॥ तत्रा
सीत्खड्गबाहुश्चराजाचन्द्रइवापरः ॥ २ ॥ यदीयकुसुमामोदमालासुरभितोदरे ॥ वारांनिधौहरिःस्वास्थ्यादशेतसहपद्मया ॥ ३ ॥ यदीयकीर्तिकर्पूर
कणाभान्तिनभोऽङ्गणे ॥ कीर्णावैरिकृतश्वासमारुतैस्तारकाछलात् ॥ ४॥ यस्यासिधारातीर्थेषुस्नातावैरिभूभुजः ॥ व्यावर्त्तन्तेदिवोऽद्यापिस्वर्गस्त्री
वाग्विमोहिताः ॥ ५ ॥ तस्यारिमर्दनोनाममदहस्तीमदोद्धुरः ॥ मदाम्बुधारासलिलेगुञ्जद्भ्रमरमण्डलः ॥६॥ कपोलफलकोत्तीर्णमदधाराजलाविलः ॥
बभौयोनिर्झरोद्गारैरञ्जनाद्रिरिवोच्चकैः ॥ ७ ॥ यस्याङ्गेषुव्यराजन्तचामराश्चन्द्रिकोज्ज्वलाः ॥ किरणाइवशीतांशोःपतिताःकाननोदरे ॥ ८ ॥
सिन्दूरपांसुपटलीराजत्कुम्भस्थलोबभौ ॥ यःसन्ध्यावारिदव्याप्तंवियत्खण्डमिवस्थितम् ॥ ९ ॥ सकदाचिन्मोचयित्वाशृङ्खलान्निगडानपि ॥
भङ्क्त्वालौहंदृढंस्तंभंप्रसह्यनिशिनिर्गतः ॥ १० ॥ आधोरणगणान्सर्वान्पार्ष्णिविस्फूर्जदङ्कुशान् ॥ क्रोधादवगणय्यैवनिजशालांबभञ्जसः॥११॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तीक्ष्णाङ्कुशमुखैर्विष्वग्घन्यमानोऽपिवैणवैः ॥ दण्डैस्तुत्रासयामासुःसादिनोनमनागपि ॥ १२ ॥ ततोराजासमागत्यनिशम्येदंकुतूहलम् ॥ तत्रहस्ति
कलाभिज्ञैःसमंराजकुमारकैः ॥१३॥ अदृश्यतसमागत्यराज्ञादन्तावलोबली ॥ मोहयन्नुद्भटाटोपोद्धताट्टालिकमालिकः ॥ १४ ॥ ददृशुस्तंमहाभीमं
पौरादूरतरंस्थिताः ॥ गोपायन्तःशिशून्भीत्यानिवृत्तान्यकुतूहलाः ॥ १५ ॥ रुद्धेषुतत्रमार्गेषुपलायनपरैर्जनैः ॥ वासितेषुतदीयोग्रदानधाराम्बु
सीकरैः॥१६॥स्नात्वातेनाध्वनायातःसरसःकश्चनद्विजः ॥ गीतानांषोडशाध्यायश्लोकान्कतिपयाञ्जपन्॥१७॥निषिद्ध्यमानोबहुधापौरैराधोरणैरपि॥
अमन्यमानःकरिणोभीतांश्चलितवांस्ततः ॥ १८ ॥ फूत्कारेणसआवृण्वञ्जनान्विपरिमर्दयन् ॥ स्पृशन्दानाम्बुजंतस्यस्वस्तिमान्निर्गतोद्विजः ॥१९॥
ततोमहानभूत्तत्रविस्मयोवागगोचरः ॥ मानसेभूमिपालस्यपौराणामपिपश्यताम् ॥ २० ॥ समाहूयततोराजाफुल्लराजीवलोचनः ॥ तमपृच्छद्द्विजं
वाहादवतीर्यप्रणम्यच ॥२१॥ राजोवाच॥अलौकिकमिदंविप्रत्वयाद्याचरितंमहत् ॥ कृतान्तकल्पादेतस्मात्कथंनिर्यातवान्गजात् ॥२२॥ कमर्चयसि
गीर्वाणंकंमन्त्रंजपसिप्रभो ॥ काचसिद्धिस्तवास्तीतिद्विजन्मन्समुदीरय ॥ २३ ॥ द्विजउवाच ॥ गीतायाःषोडशाध्यायश्लोकान्कतिपयानहम् ॥
जपामिप्रत्यहंभूपतेनैताःसर्वसिद्धयः ॥ २४ ॥ ततोविहायद्विरदंकौतूहलरसंनृपः ॥ आजगामद्विजन्मानमादायनिजमन्दिरम् ॥ २५ ॥ शुभंमुहूर्त
मन्वीक्ष्यतोषयित्वाद्विजोत्तमम् ॥ सुवर्णैर्लक्षसङ्ख्याकैर्गीतामन्त्रमुपाददे ॥ २६ ॥ गीतायाःषोडशाध्यायश्लोकान्कतिपयानपि ॥ समभ्यस्यततो
राजासत्कारेणसकौतुकः ॥ २७ ॥ अथैकदाविनिर्गत्यबाह्यालींसहसैनिकैः ॥ तमेवामोचयद्राजामत्तमाधोरणाद्गजम् ॥२८॥ विस्पष्टमितिवाक्यानि
राज्यसौख्यममानयन् ॥ तृणवज्जीवितंराजागजस्याग्रेऽविशत्ततः ॥ २९ ॥ आदायगण्डफलकंमदपङ्क्तिनिरङ्कुशम् ॥ आययौमन्त्रिविश्वासान्नृपः
साहसिकाग्रणीः ॥३०॥ राहोरिवमुखादिन्दुःकालास्यादिवधार्मिकः ॥ साधुःखलस्यवदनान्नृपोनिरगमद्गजात्॥३१॥आगत्यनगरंराजात्वभिषिच्य
कुमारकम्॥गीतायाःषोडशाध्यायादवापपरमांगतिम्॥३२॥इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०गीतामाहात्म्येनवत्यधिकशततमोऽध्यायः॥१९०॥
ईश्वरउवाच ॥ षोडशाध्यायसामर्थ्यंकथितंशृणुसाम्प्रतम् ॥ स्पष्टंसप्तदशाध्यायमहिमाम्भोनिधिंशिवे ॥ १ ॥ खड्गबाहोःसुतस्यैवभृत्योदुःशासनोऽभ
वत् ॥ तंगजंधर्तुमागत्यगजात्प्राप्तोयमक्षयम् ॥ २ ॥ तद्वासनानिबद्धात्मागजयोनिमवाप्यच ॥ गीतासप्तदशाध्यायंश्रुत्वाप्राप्तःपरंपदम् ॥ ३ ॥
देव्युवाच ॥ दुःशासनोगजत्वंचप्राप्यमुक्तइतिश्रुतम् ॥ तदेववदकल्याणविस्तरेणममप्रभो ॥ ४ ॥ ईश्वरउवाच॥ स्थितःकश्चनदुर्मेधामण्ड
लीककुमारकैः ॥ बहुमूल्यंपणंकृत्वागजमारूढवांस्ततः ॥५॥ गत्वाकतिपयान्येवपदानिजनवारितः ॥ नाम्नादुःशासनोमूढःप्रौढवाक्यमुदीरयन् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ६ ॥ ततोनिशम्यतद्वाक्यंक्रोधान्धःसिन्धुरोऽभवत् ॥ न्यपतच्चस्खलत्पादःकम्पमानकुमारकैः ॥ ७ ॥ ततोनिपतितंकिंचिदुच्छ्वसन्तंगजोरुषा ॥
ऊर्द्ध्वमुन्मूलयांचक्रेकृतान्तकनिरङ्कुशः ॥ ८ ॥ गतासोरपिरोषेणतस्यास्थ्नांचगणंगजः ॥ विकीर्णवान्पृथक्कृत्वामत्तोदन्तावलस्ततः ॥९॥ ततःकाले
नसंप्रेत्य गजयोनिमवापसः ॥ महान्तंकालमनयत्सिंहलद्वीपभूपतेः ॥१०॥ मैत्रीगरीयसीसार्द्धंखड्गबाहुमहीभुजा ॥ ततोऽयंजलमार्गेणप्रापितोवारुणो
मतः ॥ ११ ॥ जयदेवेनखड्गबाहोःप्रीत्यानीतोमहीभुजा ॥ जातिंस्मरन्स्वकीयांसपश्यन्बन्धून्सहोदरान् ॥ १२ ॥ दुःखेनमहतास्तोकान्दिवसानत्य
वाहयत् ॥ उवासखड्गबाहोश्चगृहेतूष्णीमनिर्दिशन् ॥ १३ ॥ सकदाचित्तुसंतुष्टःसमस्याश्लोकपूरणे ॥ कस्मैचित्कवयेप्रादात्तमुपायनहस्तिनम् ॥१४॥
तेनतेनकविनारोगोपद्रवभीरुणा ॥ मालवक्षोणिपालस्यविक्रीतश्चैत्यकुञ्जरः ॥ १५ ॥ कियत्यपिगतेकालेपाल्यमानोऽपियत्नतः ॥ मुमूर्षुर
भवत्तत्रकुञ्जरोदुर्जरज्वरः ॥ १६ ॥ नजिघ्रतिपयःशीतंनादत्तेकवलंगजः ॥ स्वपित्यपिनसौख्येनमुञ्चत्यश्रूणिकेवलम् ॥ १७ ॥ ततोहस्ति
पकाख्यातंवृत्तान्तमवनीपतिः॥आकर्ण्यससमायातोयत्रास्तेज्वरितोगजः ॥ १८ ॥ सचावलोक्यभूपालंजगद्विस्मयकारिणीम् ॥ वाचमूचेगजःसम्य
ग्विसृष्टज्वरवेदनः ॥ १९ ॥ राजन्नशेषशास्त्रज्ञराजनीतिपयोनिधे ॥ निर्जितारातिसङ्घातमुरारिचरणप्रिय ॥ २० ॥ किमौषधैरलंवैद्यैःकिंधानैःकिंतु
जापकैः ॥ गीतासप्तदशाध्यायजापकंद्विजमानय ॥ २१ ॥ तेनायंमामकोरोगःशाम्यत्यत्रनसंशयः ॥ यथादिष्टंगजेनासौतथाचक्रेनराधिपः
॥ २२ ॥ ततोगजत्वमुत्सृज्यमुक्तोदुःशासनोऽभवत् ॥ तेनविप्रेणाभिमन्त्र्यजलेक्षिततदुत्तमे ॥ २३ ॥ अथदिव्यंसमारूढंविमानमवनीपतिः ॥
तंदुःशासनमद्राक्षीत्पाकशासनतेजसम् ॥ २४ ॥ राजोवाच ॥ किंजातीयःकिमात्मात्वंकिंवृत्तइतिमेवद ॥ केनवाकर्मणाजातोगजःकथमिहागतः
॥ २५ ॥ पृष्टोराज्ञाविमुक्तोऽसौविमानस्थःस्थिराक्षरम् ॥ वृत्तंयथायदाचख्यौनिजंदुःशासनःक्रमात् ॥२६॥ गीतासप्तदशाध्यायंजपन्मालवभूपतिः॥
नरवर्माभवन्मुक्तःकालेनाल्पीयसाततः ॥ २७ ॥ इतिश्रीपाद्मेमहापुराणेपद्मप०उत्तर०गीतामाहात्म्यएकनवत्यधिकशततमोऽध्यायः ॥ १९१ ॥
पार्वत्युवाच ॥ उक्तसप्तादशाध्यायगौरवंभवताशिव ॥ सत्वमष्टादशाध्यायमहिमानमुदीरय ॥ १ ॥ ईश्वरउवाच ॥ आकर्णयचिदानन्दनिष्पादिनि
गमोत्तरम् ॥ पुण्यमष्टादशाध्यायमाहात्म्यंगिरिनन्दिनि ॥२॥ समस्तशास्त्रसर्वस्वंश्रोत्रप्रातंरसायनम् ॥ संसारयातनाजालविदारणपरायणम् ॥३॥
परंरहस्यंसिद्धानामविद्योन्मूलनक्षमम् ॥ चैतन्यंकैटभारातेरग्रगण्यंपरंपदम्॥४॥विवेकवल्लरीमूलंकामक्रोधमलापहम्॥ पुरन्दरादिगीर्वाणचित्तविश्राम
कारकम् ॥५॥ सनकादिमहायोगिमनोरञ्जनकारणम् ॥ पाठमात्रपराभूतकालकिङ्करगर्जितम् ॥६॥ अष्टोत्तरशतव्याधिमूलोन्मूलनकारकम् ॥ नातः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परतरंकिंचिद्रहस्यंहंसगामिनि ॥ ७ ॥ उपतापत्रयहरंमहापातकनाशनम् ॥ यथाकालेष्वहंनित्योयथापशुषुकामधुक् ॥ ८ ॥ यथाव्यासोमुनीन्द्रेषु
व्यासेषुब्रह्मवित्तमः ॥ यथादिवौकसांशक्रोगुरुःशक्राद्यथावरः ॥ ९ ॥ यथारसानांपीयूषमुत्तमंविश्वविश्रुतम् ॥ यथागिरीणांकैलासोयथाचेन्द्रोदिवौक
साम् ॥ १० ॥ तीर्थानांपुष्करंतीर्थंयथापुष्पेषुपङ्कजम् ॥ पतिव्रतासुनारीषुयथालोकेष्वरुन्धती ॥ ११ ॥ यथामखेष्वश्वमेधोयथोद्यानेषुनन्दनम् ॥
यथारुद्रेषुसर्वेषुवीरभद्रोममानुगः ॥ १२ ॥ यथादानेषुभूदानंयथासिन्धुषुगौतमी ॥ यथालोकेहरिक्षेत्रंप्रशस्तंधर्मकर्मसु ॥ १३ ॥ तथैवाष्टादशा
ध्यायमाहात्म्यंभुवनोत्तरम ॥ तत्राख्यानमिदंपुण्यंभक्त्याकर्णयपार्वति ॥ १४ ॥ यदाकर्णनमात्रेणजन्तुःपापैःप्रमुच्यते ॥ अस्तिमेरुगिरेः
शृङ्गेपुरीरम्यामरावती ॥ १५ ॥ पुराममविनोदायनिर्मिताविश्वकर्मणा ॥ निरन्तरंगुणयुताकोटिगीर्वाणसेविता ॥ १६ ॥ तेजःपुंञ्जवतीसाक्षाद्ब्रह्म
विद्येवविश्रुता ॥ चिन्तामणिशिलाबद्धाःप्रासादायत्रकामदाः ॥ १७ ॥ जयन्तिमेरुशिखरेचतुर्मुखपुरावधि ॥ यत्रकल्पद्रुमच्छायासुखासीना
पुलोमजा ॥ १८ ॥ शृणोतिश्यामलागीर्भिर्गीतंगन्धर्वयोषिताम् ॥ यत्रास्तेसबलारातिर्देवैश्चदलितायुषाम् ॥ १९ ॥ दैत्यानांरक्तकल्लोलैःस्वर्धु
नीशोणतांगता ॥ पुरातनसुधास्वादुस्मारंस्मारंदिवौकसः ॥ २० ॥ धयन्तियत्रक्षुत्क्षामाःकलांप्रत्यहमैन्दवीम् ॥ तस्यांकैवल्यकल्पायामासीत्पूर्वं
शतक्रतुः ॥ २१ ॥ शचीसमन्वितःश्रीमान्सर्वगीर्वाणसेवितः ॥ सकदाचित्सुखासीनोविष्णुदूतैरधिश्रितम् ॥ २२ ॥ सहस्रनेत्रमायान्तमपश्यत्पुरुषं
परम् ॥ ततस्तदीयतेजोभिरभिभूतःपुरन्दरः ॥ २३ ॥ मणिसिंहासनात्तूर्णंपतितःस्थानमण्डपे ॥ सिंहासनात्प्रयातस्यततस्तस्यहरेर्भटाः ॥ २४ ॥
गीर्वाणगणसाम्राज्यपट्टबन्धंवितेनिरे ॥ अथतस्याभिषिक्तस्यमहेन्द्रस्यपुलोमजा ॥ २५ ॥ वामाङ्कमारुरोहाशुदिव्यदुन्दुभिनिःस्वनैः ॥ अथत्रिदिव
संगीतगीर्वाणाःप्रमदान्विताः ॥ २६ ॥ सुरानीराजयामासुर्दिव्यरत्नैःसुरस्त्रियः ॥ ततोवैऋषयोवेदैराशीर्वादांस्तदाददुः ॥ २७ ॥ रम्भाद्याननृतुस्तस्य
पुरस्तादप्सरोगणाः ॥ गन्धर्वाललितालापाञ्जगुर्मङ्गलकौतुकम् ॥ २८ ॥ एवंनूतनमिन्द्रंतुजुष्टंबहुभिरुत्सवैः ॥ विनाशतक्रतुंदृष्ट्वाशक्रोविस्मयमा
ययौ ॥ २९ ॥ नमयाविहितामार्गेतडागानविनिर्मिताः ॥ नरोपितामहावृक्षाःपान्थविश्रान्तिकारकाः ॥ ३० ॥ नकदाचिदहोदृष्टोदेवस्त्रिपुर
भैरवः ॥ निधिवासेस्थितादेवीपूजितानमदालसा ॥ ३१ ॥ मेघंकरस्थितःशार्ङ्गधरोनैवनिरीक्षितः ॥ नकृतंविरजेस्नानंनैवकाशींपुरींगतः ॥ ३२ ॥
नदेववाटिकावासीदृष्टोनरहरिःस्वयम् ॥ एरण्डविष्णुर्हेरम्बोनजातुपरिशीलितः ॥ ३३ ॥ रेणुकानेक्षिताजातुमातापुरनिवासिनी ॥ नभक्त्या
पूजितादेवीदानापुरनिवासिनी ॥ ३४ ॥ नभक्त्यात्रिपुरेदृष्टस्त्रिलिङ्गस्त्र्यम्बकःस्वयम् ॥ नशार्दूलतडागस्थोर्वीक्षितःसोमनाथकः ॥ ३५ ॥

CC-0. In Public Domain. Digitization by eGangotri

रेवापुरस्थितोदेवोघुसृणेशोनवीक्षितः ॥ नागदन्तपुरेख्यातोनागनाथोनवीक्षितः ॥ ३६ ॥ पर्णग्रामस्थितोदृष्टोनमहानमृतेश्वरः ॥ नतुङ्गभद्र
तीरस्थोदृष्टोहरिहरःस्वयम् ॥ ३७ ॥ नवेङ्कटाद्रिनिलयःश्रीनिवासःसुलक्षितः ॥ कावेरीकर्णिकातीरेश्रीरङ्गोनैववीक्षितः ॥ ३८ ॥ दीनास्त्व
नाथाःक्रोशन्तःकारागारान्नमोचिताः ॥ अन्नदानेनदौर्भिक्षेप्राणिनोनैवपूजिताः ॥ ३९ ॥ रात्रौरात्रौकृताक्वापिनिर्जलेनोदकप्रपा ॥ नगौ
तम्यांकृतस्नानंनदृष्टोहरिणेश्वरः ॥ ४० ॥ कृष्णवेण्यांचनकृतंस्नानंकन्यागतेगुरौ ॥ दत्तंनोभूखण्डमपिकवयोनैवपूजिताः ॥ ४१ ॥
नतीर्थेषुकृतंसत्रंनग्रामेषुकृतामखाः ॥ ४२ ॥ पुष्करिण्योनविहितामध्येमार्गंबहूदकाः ॥ नप्रासादाःकृताःक्वापिब्रह्मविष्णुपिनाकिनाम् ॥४३ ॥
नजातुचिद्भयाक्रान्तारक्षिताःशरणागताः ॥ कथमेकेनपुण्येनदेवदत्तमिहार्जितम् ॥ ४४ ॥ इतिचिन्ताकुलोभूत्वाहरिंप्रष्टुंपुरन्दरः ॥ ययौसर
भसंखिन्नःक्षीराकूपारगह्वरम् ॥ ४५ ॥ तत्रप्रविश्यगोविन्दंकृतनिद्रंनवैःस्तवैः ॥ अकस्मान्निजसाम्राज्यभ्रंशदुःखमुवाचह ॥ ४६ ॥ इन्द्रउवाच ॥
रमाकान्तभवत्प्रीत्यैकृतंक्रतुशतंपुरा ॥ तेनपुण्येनसंप्रातंमयापौरन्दरंपदम् ॥ ४७ ॥ इदानींनूतनःकोऽपिजातोदिविपुरन्दरः ॥ नतेनधर्मो
विहितोनतेनक्रतवःकृताः ॥ ४८ ॥ ममसिंहासनंदिव्यंकथमाक्रान्तमच्युत ॥ ४९ ॥ महादेवउवाच ॥ इत्येवंवदतस्तस्यश्रुत्वावाचंरमापतिः॥
उन्मीलितस्मिताक्षोऽसावुवाचमधुरंवचः ॥ ५० ॥ श्रीभगवानुवाच ॥ किंदानैरल्पफलदैःकिंतपोभिःकिमध्वरैः ॥ वर्त्तमानःक्षितितलेसमाप्रीणित
वान्पुरा ॥ ५१ ॥ इन्द्रउवाच ॥ भगवन्कर्मणाकेनसत्वांप्रीणितवान्द्विजः ॥ यत्प्रीत्याभगवान्प्रादात्तस्मैपौरन्दरंपदम् ॥ ५२ ॥ श्रीभगवानु
वाच ॥ जपत्यष्टादशाध्यायेगीतानांश्लोकपञ्चकम् ॥ यत्पुण्येनचसंप्राप्तंतवसाम्राज्यमुत्तमम् ॥ ५३ ॥ सर्वपुण्यशिरोरत्नभूतेनत्वंस्थिरोभव ॥
इतिविष्णोर्वचःश्रुत्वाज्ञात्वोपायंपुरन्दरः ॥ ५४ ॥ विप्रवेषधरोभूत्वागतोगोदावरीतटम् ॥ तत्रापश्यत्पुरंपुण्यंकालिकाग्राममुत्तमम् ॥ ५५ ॥
यत्रकालेश्वरोदेवोवर्त्ततेकालमर्दनः ॥ तत्रगोदावरीतीरेस्थितंपरमधार्मिकम् ॥ ५६ ॥ अपश्यत्करुणावन्तंब्राह्मणंवेदपारगम् ॥ नित्यमष्टादशा
ध्यायंजपन्तंदान्तचेतसम् ॥ ५७ ॥ ततस्तच्चरणद्वन्द्वेलुठित्वापरयामुदा ॥ सत्वमष्टादशाध्यायमपठत्तेनशिक्षितम् ॥ ५८ ॥ अथपुण्येन
तेनासौविष्णोःसायुज्यमाययौ ॥ हित्वापुरन्दरादीनांदेवानांपदमल्पकम् ॥ ५९ ॥ ज्ञात्वातीवमुदायुक्तोवैकुण्ठमगमत्पुरम् ॥ अतएवपरंतत्त्वं
मुनीनामिदमुत्तमम् ॥ ६० ॥ दिव्यमष्टादशाध्यायमाहात्म्यंकथितंमया ॥ यस्यश्रवणमात्रेणसर्वपापैःप्रमुच्यते ॥ ६१ ॥ इत्येवंगीता
माहात्म्यंकथितंपापनाशनम् ॥ पुण्यंपवित्रमायुष्यंस्वर्ग्यंस्वस्त्ययनंमहत् ॥ ६२ ॥ यःशृणोतिमहाभागेश्रद्धयासंयुतःपुमान् ॥ सर्वयज्ञफलं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राप्यविष्णोःसायुज्यमाप्नुयात ॥ ६३ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०उत्तर०सतीश्वरसंवादेगीतामाहात्म्येद्विनवत्यधिकशततमोध्याऽयः
॥ १९२ ॥ पार्वत्युवाच ॥ देवदेवमहादेवसर्वज्ञसकलार्थद ॥ कृपांमयिपरांकृत्वायत्पृच्छेतद्वदस्वमे ॥ १ ॥ श्रुतंचगीतामाहात्म्यंबह्वाश्चर्य
कथायुतम् ॥ तेनमेभक्तिरुत्पन्नाश्रोतुंकृष्णकथांपराम् ॥ २ ॥ पुराणेषुतुसर्वेषुश्रीमद्भागवतंपरम् ॥ यत्रप्रतिपदंकृष्णोगीयतेबहुधर्षिभिः ॥
॥ ३ ॥ तन्माहात्म्यंयथातत्त्वंसेतिहासंवदाधुना ॥ ४॥ ईश्वरउवाच ॥ नैमिषेसूतमासीनमभिवाद्यमहामतिम् ॥ कथामृतरसास्वादकुशलः
शौनकोऽब्रवीत् ॥ ५ ॥ शौनकउवाच ॥ अज्ञानध्वान्तविध्वंसिकोटिजन्माघनाशनम् ॥ श्रीमद्भागवताख्यानंसूताख्याहिरसायनम् ॥ ६ ॥
भक्तिज्ञानविरागाढ्योविवेकोवर्द्धतेकथम् ॥ मायामोहनिरासश्चवैष्णवैःक्रियतेकथम् ॥ ७ ॥ इहघोरेकलौप्रायोजीवश्चासुरतांगतः ॥ क्लेशा
क्रान्तस्यतस्याथशोधनेकिंरसायनम् ॥ ८॥ श्रेयसांयद्भवेच्छ्रेयःपावनानांचपावनम् ॥ कृष्णं[1]प्रीतिकरंयच्चसाधनंतद्वदाधुना ॥ ९ ॥ चिन्तामे[2]
णिंलोकसुखंसुरेन्द्रास्पदसंपदम् ॥ प्रयच्छतिगुरुःप्रीतोवैकुण्ठंचातिदुर्लभम् ॥ १० ॥ सूतउवाच ॥ प्रीतोऽहंतेद्विजश्रेष्ठकथयिष्येयथाश्रुतम्॥
सारात्सारतरंयच्चसंसारभयनाशनम् ॥ ११ ॥ भक्तिप्रवर्द्धकंयच्चकृष्णसंतुष्टिहेतुकम् ॥ तन्मेकथयतःसाधोसावधानतयाशृणु ॥ १२ ॥
कालव्यालमुखालीढजगत्त्राणविधायकम् ॥ श्रीमद्भागवतंशास्त्रंकलौकृष्णेने[3]भाषितम् ॥ १३ ॥ एतस्मादपरंकिंचिन्मनःशुद्धिकरंनहि ॥ जन्मा
न्तरकृतैःपुण्यैर्लभ्यतेसाधुभिस्तुतत् ॥ १४ ॥ राज्ञःपरीक्षितोमोक्षंज्ञात्वाकमलसंभवः ॥ तोलयामासशास्त्राणिपुराणानिमहान्तिच ॥ १५ ॥
श्रीमद्भागवतंतत्रगरीयोभुविसंगतम् ॥ श्रीमद्भागवतीवार्तासुराणामपिदुर्लभा ॥ १६ ॥ इतिसंचिन्त्यबहुशोमुनयःसाधवोऽमलाः ॥ मेनिरे
भगवद्रूपंश्रीमद्भागवतंक्षितौ ॥ १७ ॥ पठनाच्छ्रवणाद्यस्यनरोयातिहरेःपदम् ॥ वर्षेणश्रवणंतस्यबहुसौख्यप्रदायकम् ॥ १८ ॥ मासेनभक्ति
राभास्यंलभतेद्विजसत्तम ॥ सप्ताहेनश्रुतंचतत्सर्वथामुक्तिदायकम् ॥ १९ ॥ किंबहूक्तेनवैसाधोश्रीमद्भागवतामृतम् ॥ नित्यंसद्भिःप्रपातव्यं
कृष्णलीलाप्रकाशकम् ॥ २० ॥ सनकाद्यैःपुराप्रोक्तंनारदायदयापरैः ॥ ब्रह्मणःश्रुतपूर्वायसप्ताहश्रवणेविधिः ॥ २१ ॥ शौनकउवाच ॥ पितुर्लब्ध्वा
वरंज्ञानंश्रीमद्भागवताभिधम् ॥ नारदोलोकतत्त्वज्ञःसर्वदाह्यटतेमहीम् ॥ २२ ॥ कुत्रतैःसंगमोजातोनारदस्यमहात्मभिः ॥ श्रुतोदेवर्षिणा
यत्रसप्ताहश्रवणेविधिः ॥ २३ ॥ सूतउवाच ॥ अत्रतेवर्णयिष्यामिभक्तियुक्तंकथानकम् ॥ यत्पुराब्रह्मरातेनमह्यंप्रोक्तंदयालुना ॥ २४ ॥

१ 'कृष्णप्राप्तिकरम्' इ०पा० । २ 'चिन्तामणिर्लोकसुखं सुरद्रुः । स्वर्गसंपदम्' इ०पा० । ३ 'कीरेण भाषितम्' इ०पा० ।

CC-0. In Public Domain. Digitization by eGangotri

एकदातुविशालायामुपविष्टमधोमुखम् ॥ नारदंसनकाद्यास्तेददृशुर्दीनमानसम् ॥ २५ ॥ तंदृष्ट्वाचिन्तयानंतुदेवर्षिर्भ्रातरंस्वकम् ॥ पप्रच्छु
र्विस्मयाविष्टामुनयस्तत्त्वचिन्तकाः ॥ २६ ॥ कुमाराऊचुः ॥ किंत्वंचिन्तयसेब्रह्मन्नतिदीनइवातुरः ॥ तवेत्थंमुक्तसंगस्यनोचितंवदकारणम् ॥
॥ २७ ॥ नारदउवाच ॥ अहंपृथ्व्यांसमायातोज्ञात्वासर्वोत्तमोत्तमाम् ॥ तीर्थैर्नानाविधैर्युक्तांपुण्यदैःपुण्यरूपिणीम् ॥ २८ ॥ पुष्करेचप्रयागे
चकाश्यांगोदावरीतटे ॥ हरिक्षेत्रेकुरुक्षेत्रेश्रीरङ्गेसेतुबन्धने ॥ २९ ॥ एतेष्वन्येषुतीर्थेषुभ्रममाणइतस्ततः ॥ नापश्यंकुत्रचिच्छर्ममनःसंतोषकारकम्
॥३०॥ कलिनाधर्ममित्रेणधरेयंबाधिताधुना ॥ सत्यंशौचंदयादानंनास्तिकुत्रापिभूतले ॥३१ ॥ उदरम्भरयोलोकावराकाःकूटसाक्षिणः ॥ मन्दाःसुम
न्दमतयोमहापाखण्डसंश्रयाः ॥ ३२ ॥ स्त्रीप्रधानागृहस्थाश्चवर्णिनोव्रतवर्जिताः ॥ वानप्रस्थाःपुरावासान्यासिनोभोगतत्पराः ॥ ३३ ॥ कन्यावि
क्रयिणोलोभात्कृषिकर्मपरायणाः ॥ भ्रष्टाचारदम्भिनश्चस्वेच्छाचारनिदर्शिनः ॥ ३४ ॥ आश्रमायवनैरुद्धास्तीर्थानिसरितोह्रदाः ॥ देवतायतनान्य
त्रदुष्टैरुच्छेदितानिच ॥३५॥ योगीसिद्धोऽथवाज्ञानीसत्क्रियोऽत्रनदृश्यते ॥ कलिदावानलेनाद्यसाधनंभस्मतांगतम् ॥३६ ॥ अट्टशूलाजनपदाःशिव
शूलाद्विजातयः ॥ कामिन्यःकेशशूलिन्योदृश्यन्तेभुविसर्वतः ॥३७ ॥एकदाहमनुप्रातोयमुनायास्तटंशुभम्॥दृष्टंवृन्दावनंतत्रयत्रलीलाहरेरभूत्॥३८॥
तत्रयच्चाद्भुतंदृष्टंश्रूयतांतन्मुनीश्वराः ॥ एकातुतरुणीतत्रनिषण्णाखिन्नमानसा ॥ ३९ ॥ द्वौवृद्धौपतितौपार्श्वेनिश्वसन्तावचेतनौ ॥ शुश्रूषन्तीप्रबोधन्ती
रुदतीचतयोःपुरः ॥ ४० ॥ दशदिक्षुनिरीक्षन्तीरक्षितारमिवात्मनः ॥ वीज्यमानाबहुस्त्रीभिर्बोध्यमानामुहुर्मुहुः ॥ ४१ ॥ दृष्ट्वादूराद्गतश्चाहंकौतु
केनतदन्तिकम् ॥ मांदृष्ट्वोत्थायसाबालावचनंचेदमब्रवीत् ॥ ४२ ॥ बालोवाच ॥ भोःसाधोऽत्रक्षणंतिष्ठममचिन्तामपाकुरु ॥ पुंसांचदर्शनं
भद्रसर्वाघौघनिवारणम् ॥४३॥पुण्येनप्राक्तनेनैवदर्शनंतवजायते॥ अतोमेमानसंदुःखंछेत्तुमर्हसिमानद॥४४॥नारदउवाच ॥ एवमुक्तस्तयाचाहंकृपया
स्निग्धमानसः ॥ अपृच्छंतांवरारोहांकौतुकेनसमाकुलः ॥ ४५ ॥ कात्वमेतौचकौभद्रेकाश्चेमाःपद्मलोचनाः ॥ आख्याहिमत्पुरःसर्वंतवदुःख
स्यकारणम् ॥ ४६ ॥ इतिपृष्टामयासातुबालादुखितमानसा ॥ प्रोवाचनिखिलंदुःखतमनोदुःमाखकारणम् ॥ ४७ ॥ बालोवाच ॥ अहंभक्ति
रितिख्याताएतौमेतनयौवरौ ॥ ज्ञानवैराग्यनामानौकालयोगेनजर्जरौ ॥ ४८ ॥ गङ्गाद्याःसरितश्चेमाममसेवार्थमागताः ॥ एताभिःसेवितानित्यंस
त्कारेणापिनारद ॥ ४९ ॥ नचश्रेयोलभेत्किंचित्क्षीणाहंसर्वतोमुने ॥ ममपूर्वंतुवृत्तान्तंशृणुब्राह्मणसत्तम ॥ ५० ॥ येनाहंदुःखिताजातानलभेश
र्मकुत्रचित् ॥ उत्पन्नाद्रविडेचाहंकर्णाटेवृद्धिमागता ॥ ५१ ॥ स्थिताकिंचिन्महाराष्ट्रेगुर्जरेजीर्णतांगता ॥ तत्रघोरकलेर्योगात्पाखण्डैःखण्डिताङ्गका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥५२॥दुर्बलाहंचिरंजातापुत्राभ्यांसहसङ्गता॥वृन्दावनमिदंप्राप्तादैवयोगेननारद ॥५३॥ जाताहंतुपुनर्बालानवीनेवसुरूपिणी ॥ इमौतुशयितावत्रसुतौ
मेक्लिष्टमानसौ ॥ ५४ ॥ अतिवृद्धौपरित्यज्यगन्तुंनाहंक्षमाधुना ॥ अहंबालाकथंजातासुतौमेजरठौकुतः ॥ ५५ ॥ त्रयाणामेकभावानांवैपरीत्यंकुतो
ऽभवत् ॥ घटतेजरठामाताबालकौतनयाविति ॥ ५६ ॥ अतःशोचामिचात्मानंविस्मयाविष्टमानसा ॥ यदित्वंवेत्सिधर्मज्ञकृपालोदीनपालक॥ ५७ ॥
वदसर्वंयथातत्त्वंकारणंचात्रयद्भवेत् ॥ एवंपृष्टस्तयाचाहंक्षणंचैवविमृश्यतु ॥ ५८ ॥ अवोचंभक्तिमाभाष्यक्लिष्टांकालेनभूयसा ॥ ज्ञानेनाहंप्रपश्यामि
वृत्तांसर्वंतवानघे॥५९॥माविषादंकुरुप्राज्ञेहरिःशंतेकरिष्यति॥ सर्वसत्त्वहरोबालेयुगोऽयंदारुणःकलिः ॥६०॥लुप्तोऽनेनसदाचारोयोगमार्गस्तपांसिच ॥
जनाश्चाघासुरायन्तेशाठ्यदुष्कृतकारिणः ॥६१॥सन्तोह्यस्मिन्सुदुःखार्ताअसन्तोहृष्टमानसाः ॥ दृश्यतेधीरचित्तस्तुपण्डितोऽपिनकोऽपिच ॥६२ ॥
अस्पृश्यानवलोक्येयंदुष्टभाराकुलाधरा ॥ अन्वब्दंक्रमतोजातोमङ्गलंहीयतेऽन्वहम् ॥ ६३ ॥ नत्वांतवसुतौचेमौकोऽपिपश्यतिभामिनि ॥
यूयंतुरागबहुलैस्त्यक्ताजर्जरतांगताः ॥ ६४ ॥ वृन्दावनस्यसंयोगाद्बालात्वमभवःपुनः ॥ धन्यंवृन्दावनंचेदंभक्तिर्यत्राभवन्नवा ॥ ६५ ॥ अत्रेमौ
ग्राहकाभावान्नवीनत्वंनचागतौ ॥ किंचिदात्मसुखेनेहप्रसुप्तावितिलक्ष्यते ॥ ६६ ॥ भक्तिरुवाच ॥ कथंपरीक्षितााराज्ञास्थापितोऽह्यशुचिःकलिः ॥
दयापरेणहरिणःह्यधर्मःकिमुपेक्षिता ॥ ६७ ॥ एनंमेसशयंछिन्धित्वद्वाचासुखितास्म्यहम् ॥ तस्यावचःसमाकर्ण्यभूयोऽहमवदंद्विजाः ॥ ६८ ॥
यदिपृष्टंत्वयाबालेप्रेमतःश्रवणंकुरु ॥ यदामुकुन्दोभगवान्क्ष्मांत्यक्त्वास्वपदंगतः ॥ ६९ ॥ कलिस्तद्दिनमारभ्यप्रवृत्तःसत्यबाधकः ॥ दृष्टोदिग्वि
जयेराज्ञादीनवच्छरणंगतः ॥ ७० ॥ नहतोऽस्यगुणद्रष्टासर्वसाधारणंत्विदम् ॥ यत्फलंतपसानैतिनयोगेनसमाधिना ॥ ७१ ॥ तत्फलंलभते
धीमान्कलौकेशवकीर्तनात् ॥ एतादृशंकलिंदृष्ट्वासारात्सारफलप्रदम् ॥ ७२ ॥ विष्णुरातःस्थापितवान्कालिजानांहितायच ॥ कुकर्माचरणा
त्सारःसर्वतोनिर्गतोऽधुना ॥ ७३ ॥ पदार्थाःसंस्थिताभूमौबीजहीनास्तुषायथा ॥ विप्रैर्भागवतीवार्त्तागेहेगेहेजनेजने ॥ ७४ ॥ कारिताधनलोभे
नकथासारस्ततोगतः ॥ अत्युग्रभूरिकर्माणोनास्तिकादाम्भिकाजनाः ॥ ७५ ॥ तिष्ठन्तिसर्वतीर्थेषुतीर्थसारस्ततोगतः ॥ कामक्रोधमहालोभतृष्णा
व्याकुलचेतसः ॥ ७६ ॥ समारभन्तेकर्माणिकर्मसारस्ततोगतः ॥ मनसश्चाजयाल्लोभाद्दम्भात्पाखण्डसंश्रायत् ॥ ७७ ॥ शास्त्रानभ्यसनाच्चैव
ध्यानयोगफलंगतम् ॥ पण्डितास्तेकलत्रेषुरमन्तेमहिषाइव ॥ ७८ ॥ पुत्रोत्पादनदक्षाश्चनदक्षामुक्तिसाधने ॥ नहिवैष्णवताकुत्रसंप्रदायपुरःसरा
॥ ७९ ॥ देवनिन्दापराःसर्वेसाधुनिन्दापरायणाः ॥अयंतुयुगधर्मोऽस्तिदीयतेकस्यदूषणम् ॥८०॥ अतस्त्वंपुण्डरीकाक्षंस्मृत्वासौख्यमवाप्स्यसि ॥

CC-0. In Public Domain. Digitization by eGangotri

एवंमयोक्तंवचनंश्रुत्वासाविस्मयंगता ॥ उवाचवचनंभूयोमांप्रशस्यद्विजोत्तमाः ॥ ८१ ॥ भक्तिरुवाच ॥ देवर्षेत्वंतुधन्योऽसिमद्भाग्येनसमागतः ॥
साधूनांदर्शनंलोकेसर्वसिद्धिप्रदायकम् ॥ ८२ ॥ सुखोपायोयथामेस्यात्तथादिशमुनेऽधुना ॥ सर्वज्ञस्यतवब्रह्मन्नासाध्यंकिमपीहवै ॥ ८३ ॥ अज
यदजितमायांयस्यमायाधवस्तेवचनरचनमेकंकेवलंचाकलय्य ॥ ध्रुवपदमुपयातोयत्कृपातोध्रुवोवैतमहमरणभूतंब्रह्मपुत्रंनतास्मि ॥ ८४ ॥ इतिश्री
पाद्मेमहापुराणेपञ्चप०उत्तर०भागवतमाहात्म्येत्रिनवत्यधिकशततमोऽध्यायः ॥१९३॥ सूतउवाच॥एवंसंप्रार्थितोविप्रास्तयाभक्त्यातिदीनया ॥ पुन
श्चाकथयद्यद्वैतच्छृणुध्वंदयालवः ॥ १ ॥ नारदउवाच ॥ माखिदस्त्वंवृथाबालेसमाधायमनोहृदि ॥ श्रीकृष्णचरणाम्भोजंस्मरसौख्यंल
भिष्यसे ॥ २ ॥ द्रौपदीचपरित्रातायेनकौरवकश्मलात् ॥ पालितागोपसुन्दर्यःसकृष्णःक्वापिनोगतः ॥ ३ ॥ त्वंतुभक्तिःप्रियातस्यसत
तंप्राणतोऽधिका ॥ त्वयाहूतस्तुभगवान्यातिनीचगृहेष्वपि ॥ ४ ॥ सत्यादित्रियुगेबोधोविरागोमुक्तिसाधकौ ॥ कलौतुकेवलाभक्तिर्ब्रह्मसायुज्यका
रिणी ॥ ५ ॥ इतिनिश्चित्यचिद्रूपीस्वकाङ्गात्त्वांससर्जह ॥ परमानन्दचिन्मूर्तिःस्वप्रियांप्रीतमानसः ॥६॥ बध्वाञ्जलिंत्वयापृष्टःकिंकरोमीतिवैहरिः ॥
त्वांतदाज्ञापयत्कृष्णोमद्भक्तान्पोषयेतिच ॥ ७ ॥ अङ्गीकृतंत्वयातद्वैप्रसन्नोऽभूद्धरिस्तदा ॥ मुक्तिंदासींददौतुभ्यंज्ञानवैराग्यकौसुतौ ॥ ८ ॥ भक्तानां
पोषणंनित्यंवैकुण्ठस्थाकरोषिच ॥ भूमौचभक्तपोषायच्छायारूपंसमाश्रिता ॥ ९ ॥ विमुक्तिज्ञानवैराग्यैःसहचैवागतात्रहि ॥ कृतादिद्वापरान्तेहिका
लेमुक्तिर्मुदास्थिता॥१०॥कलौतुसंक्षयंप्राप्तापाषण्डामयपीडिता ॥ त्वदाज्ञयागताशीघ्रंवैकुण्ठेपुनरेवसा ॥ ११ ॥ स्मृतमात्रात्वयाद्यापिमुक्तिरायाति
सत्वरम्॥ पुत्रीकृत्यत्वयेमौचस्वपार्श्वेपरिरक्षितौ॥१२॥उपेक्षातःकलौमन्दवृद्धौजातौसुतौतव॥ तथापिचिन्तांमुञ्चत्वमुपायंचिन्तयाम्यहम्॥१३॥कलि
नासदृशःकोऽपियुगोनास्तिवरानने॥तस्मिंस्त्वांख्यापयिष्यामिगेहेगेहेजनेजने ॥१४॥अन्यधर्मांस्तिरस्कृत्यपुरस्कृत्यमहोत्सवान्॥यदिप्रवर्त्तयेनत्वां
तदादासोहरेर्नहि॥१५॥ त्वदन्विताश्चयेजीवाभविष्यन्तिकलाविह॥पापिनोऽपिगमिष्यन्तिनिर्भयाहरिमन्दिरम्॥१६॥येषांचित्तेभवेद्भक्तिःसर्वदाप्रेम
रूपिणी ॥ नतेपश्यन्तिकीनाशंस्वप्नेऽप्यमलमूर्त्तयः॥ १७॥ नप्रेतोनपिशाचोवाराक्षसोवासुरोऽपिच ॥ भक्तियुक्तमनस्कानांस्पर्शनेदर्शनेप्रभुः॥१८॥
नतपोभिर्नवेदैश्चनज्ञानेनापिकर्मणा ॥ हरिर्हिसाध्यतेभक्त्याप्रमाणंतत्रगोपिकाः ॥ १९ ॥ नृणांजन्मसहस्रेणभक्तिःसुकृतिनांभवेत् ॥ कलौभक्तिःक
लौभक्तिर्भक्त्याकृष्णःपुरःस्थितः ॥ २० ॥ भक्तिद्रोहकरायेचतेसीदन्तिजगत्त्रये ॥ दुर्वासादुःखमापन्नःपुराभक्तिविनिन्दकः ॥ २१ ॥ अलंवृत्तैरलं
तीर्थैरलंयोगैरलंमखैः ॥ अलंज्ञानकथालापैर्भक्तिरेकैवमुक्तिदा ॥२२॥ एवंमुक्तंमयासातुस्वमाहात्म्यंनिशम्यवै ॥ सर्वाङ्गहर्षसंयुक्तामांपुनर्वाक्यमब्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वीत् ॥ २३ ॥ अहोनारदधन्योऽसिप्रीतिस्तेमयिनिश्चला ॥ नकदाचिद्विमुञ्चामिचित्तंतेमयिसंगतम ॥ २४ ॥ कृपालुनात्वयासाधोमद्वाधाध्वंसि
ताक्षणात् ॥ पुत्रयोश्चेतनानास्तिममेमौप्रतिबोधय ॥ २५ ॥ तस्यास्तद्वचनंश्रुत्वाकारुण्येनान्वितोह्यहम् ॥ तयोःप्रबोधनंकर्तुंप्रवृत्तःपाणिनास्पृशन्॥
॥२६॥मुखंसंसृज्यकर्णान्तेशब्दमुच्चैःसमुच्चरन् ॥ ज्ञानप्रबुध्यतांशीघ्रंवैराग्यप्रतिबुध्यताम् ॥ २७ ॥ वेदवेदान्तघोषैश्चगीतापाठैर्मुहुर्मुहुः ॥ बोध्य
मानौतदातेनकथंचिद्बोधमागतौ ॥ २८ ॥ नेत्रैरनवलोकन्तौजृम्भन्तौसालसावुभौ ॥ बकवत्पलितौप्रायःशुष्ककाष्ठःसमाङ्गकौ ॥ २९ ॥ क्षुत्क्षामौ
तौनिरीक्ष्यैवपुनःस्वापमुपागतौ ॥ तदाचिन्तापरोऽभूवंकिंविधेयंमयेतिच ॥ ३० ॥ अहोनिद्राकथंयातिवृद्धत्वंचानयोःपरम् ॥ चिन्तयन्निति
गोविन्दंस्मरन्नासंद्विजोत्तमाः ॥ ३१ ॥ व्योमवाणीतदैवाभून्माऋषेखिद्यतामिति ॥ उद्यमःसफलस्तेतुभविष्यतिनसंशयः ॥ ३२ ॥ एतदर्थंतुसत्कर्मसु
रर्षेत्वंसमाचार ॥ तत्कर्मतेऽभिधास्यन्तिसाधवःसाधुभूषणाः ॥ ३३ ॥ सत्कर्मणिकृतेतस्मिन्स्वपनंवृद्धतानयोः ॥ गमिष्यतिक्षणाद्भक्तिःसर्वतःप्रस
रिष्यति॥३४॥इत्याकाशवचःस्पष्टंनिशम्यापिमयाद्विजाः ॥ नज्ञातंयन्नभोवाण्यागोप्यत्वेननिरूपितम्॥३५॥ किंतत्कर्मचयेनैतौभवतोज्ञानसंयुतौ॥
क्वभविष्यन्तितेसन्तःकथंवक्ष्यन्तिकर्मसत्॥ ३६ ॥मयात्रकिंप्रकर्त्तव्यंयदुक्तंव्योमभाषया ॥ अथतौतत्रसंस्थाप्यनिर्गतोऽहंबहिर्द्विजाः ॥ ३७ ॥ वृन्दा
रण्यादपृच्छंचयत्रतत्रद्विजोत्तमान् ॥ वृत्तान्तंसर्वएवाथश्रुत्वाविस्मितमानसाः ॥ ३८ ॥ नवोत्तरंप्रयच्छन्तिह्यनभिज्ञानभोगिरः ॥ असाध्यंकेचन
प्रोचुरविज्ञेयमथापरे ॥ ३९ ॥ मूकीबभूवुरन्येतुचिन्तमानाःपुनःपुनः ॥ वेदवेदान्तघोषैश्चगीतापाठैर्मुहुर्मुहुः ॥ ४० ॥ बोध्यमानंत्रिकंतन्नुनोदतिष्ठ
दहोविधिः ॥ योगिनानारदेनापिस्वयंनज्ञायतेतुयत् ॥ ४१ ॥ तत्कथंशक्यतेकर्तुमितरैरिहमानुषैः ॥ ततश्चिन्तातुरश्चाहंबदरीवनमागतः॥ ४२ ॥
तपश्चरामिचात्रैवतदर्थंकृतनिश्चयः ॥ तावद्ददर्शपुरतःसनकाद्यान्मुनीश्वरान् ॥ ४३ ॥ कोटिसूर्यसमाभासानुवाचमुनिसत्तमान् ॥ इदानींभूरिभाग्ये
णभवतांदर्शनंह्यभूत ॥ ४४ ॥ तदुपायंमहाभागावदन्तुप्रीतमानसाः ॥ भवन्तोयोगिनांश्रेष्ठाबुद्धिमन्तोबहुश्रुताः ॥ ४५॥ कुमाराएवपञ्चाब्दाःपूर्वेषा
मपिपूर्वजाः ॥ सदावैकुण्ठनिलयाहरिकीर्त्तनतत्पराः ॥४६॥ लीलामृतकथोन्मत्ताहरिस्मरणतत्पराः॥ अतःकालसमादिष्टाजरायुष्मान्नबाधते ॥४७॥
येषांभ्रूभङ्गमात्रेणद्वारपालौहरेःपुरा ॥ दैत्यौभूत्वात्रिजन्मानिपुनस्तत्स्थानमास्थितौ॥४८॥अशरीरगिरोक्तंयत्किंतत्साधनमुच्यताम् ॥ अनुष्ठेयंयथा
यत्रप्रब्रुवन्तुकृपालवः ॥ ४९ ॥ भक्तिज्ञानविरागाणांसुखमुत्पद्यतेयथा ॥ ख्यातिर्वःसर्वलोकेषुतथासाधूच्यतांबुधाः ॥ ५० ॥ कुमाराऊचुः ॥
माचिन्तांकुरुदेवर्षेस्वचित्तेहर्षमावह ॥ उपायःसुखसाध्योऽत्रविद्यतेविश्वसौख्यदः ॥ ५१ ॥ अहोनारदधन्योऽसिविरक्तानांशिरोमणिः ॥ श्रीकृष्ण

CC-0. In Public Domain. Digitization by eGangotri

प्रेमपात्राणामग्रणीर्वदतांवरः ॥ ९२ ॥ त्वयिचित्रंनदेवर्षेभक्तिसाधनतत्परे ॥ उचितंकृष्णदासानांभक्तेःसंचारणंभुवि ॥ ९३ ॥ ऋषिभिर्बहुधालोक
उपायाःसिद्धयेकृताः ॥ श्रमसाध्याश्चतेसर्वेप्रायःस्वर्गफलप्रदाः ॥ ९४ ॥ वैकुण्ठसाधकःपन्थागुप्तोलोकेषुवर्त्तते ॥ तस्योपदेशकःसाधुःप्रायो
भाग्येनलभ्यते ॥ ९९ ॥ यत्तेसत्कर्मनिर्दिष्टंव्योमवाचामुनीश्वर ॥ तज्ज्ञेयमिहसर्वज्ञैर्ज्ञानयज्ञःपुरातनैः ॥ ९६ ॥ श्रीमद्भागवतालापोज्ञानयज्ञः
शुकोदितः ॥ भक्तिज्ञानविरागाणांसुखदःप्रतिभातिनः ॥ ९७ ॥ कलिदोषाइमेसर्वेश्रीमद्भागवतध्वनेः ॥ प्रभीताःप्रपलायन्तेसिंहशब्दाद्वृकाइव
॥ ९८ ॥ ज्ञानवैराग्यसंयुक्ताभक्तिःप्रेमरसापहा ॥ प्रतिगेहंप्रतिजनंसुखक्रीडांकरिष्यति ॥ ९९ ॥ सूतउवाच ॥ कुमारोक्तंसमाकर्ण्यनारदःप्रीत
मानसः ॥ पुनःप्रोवाचभगवांस्तदुत्कर्षविभावयन् ॥ ६० ॥ नारदउवाच ॥ वेदवेदान्तघोषैश्चगीतापाठैःप्रबोधितम् ॥ नोदतिष्ठत्त्रिकंतत्तुकलिदोष
तिरस्कृतम् ॥ ६१ ॥ कथंभागवतालापात्तद्विबोधमिहैष्यति ॥ छिन्दन्तुसंशयंह्येनंभवन्तोऽमोघदर्शनाः ॥ ६२ ॥ विलम्बोनात्रकर्त्तव्यःशरणागतव
त्सलाः ॥ ततस्तेसनकाद्यास्तुविरक्ताह्यूर्द्धरेतसः ॥ सिद्धाःसनातनाविप्रानारदंप्रोचुरादरात् ॥ ६३ ॥ कुमाराऊचुः ॥ वेदोपनिषदांसाराज्जाताभाग
वतीकथा ॥ अत्युत्तमाततोभातिपृग्भूताफलोन्नतिः ॥ ६४ ॥ आमूलाग्रंरसोऽस्त्येवरसालस्ययथाफले ॥ पृथग्भूतस्तुपानेनयथाविश्वमनोहरः ॥
॥ ६९ ॥ यथादुग्धेस्थितंसर्पिर्नचस्वादूपकल्प्यते ॥ पृथग्भूतंतुतद्दिव्यंदेवानांप्रीतिवर्द्धनम् ॥ ६६ ॥ इक्षुष्ववादिमध्यान्तंशर्कराव्याप्यतिष्ठति ॥
पृथग्भूतातुसामिष्टातथाभागवतीकथा ॥ ६७ ॥ श्रीमद्भागवतंनामपुराणंरसमेवहि ॥ भक्तिज्ञानविरागाणांसौख्यायैवप्रकाशितम् ॥ .६८ ॥ कृष्णेन
ब्रह्मणेनाभिकञ्जस्थायद्दैवहि ॥ तच्चतुःश्लोकमखिलंब्रह्मैवप्रतिभासते ॥ ६९ ॥ तुभ्यंचब्रह्मणाप्रोक्तंतच्चरित्रनिदर्शनम् ॥ त्वयापिव्यासदेवायप्रोक्तंत
त्तापहानये ॥ ७० ॥ यदीयस्मरणात्सद्योनिर्विण्णोबादरायणः ॥ चकारमहदाख्यातुमात्मारामममनोहरम् ॥ ७१ ॥ अत्रेतविस्मयःकेनयेनपृच्छेःपुनः
पुनः ॥ श्रीमद्भागवतंशास्त्रंक्षमंकृष्णानुकर्षणे ॥ ७२ ॥ सूतउवाच ॥ एतन्निशम्यवचनंसमुदाहृतंतुयोगीश्वरैःसनकमुख्यतमैरभीष्टम् ॥ भक्त्याविधृत्य
चरणंचप्रणम्यमूर्ध्नाहृष्टोजगादजगदाधिनिवर्त्तकांस्तान् ॥ ७३ ॥ नारदउवाच ॥ संदर्शनंचभवतांविनिहन्त्यघौघंश्रेयस्तनोतिभवदुःखदवार्दिता
नाम् ॥ निःशेषशेषमुखगीतकथैकपानात्प्रेमप्रकाशनकृतेशरणंगतोवः ॥ ७४ ॥ पुण्योदयेनबहुजन्मसमर्जितेनसत्संगमोयदिभवेत्कृतिनोजनस्य ॥
अज्ञानहेतुकृतमोहमहान्धकारोनश्येत्तदाह्युदयमेतिमहान्विवेकः ॥७९ ॥ इतिश्रीपाद्ममहापुराणेपञ्चप०उत्तर०श्रीभागवतमाहात्म्येचतुर्नवत्यधिकशत
तमोऽध्यायः ॥ १९४ ॥ सूतउवाच ॥ अथदेवऋषिस्तत्रकुमाराननुमान्यच ॥ उवाचप्रणतोवाक्यंज्ञानयज्ञकृतादरः ॥ १ ॥ नारदउवाच ॥ ज्ञानयज्ञं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

करिष्यामिशुकशास्त्रकथोज्ज्वलम् ॥ भक्तिज्ञानविरागाणांस्थापनार्थंप्रयत्नतः ॥ २ ॥ यत्रकार्योमयायज्ञःस्थानंतत्कथ्यतांद्विजाः ॥ चत्वारोयज्ञ
वाहाश्चयूयमेववृतामया ॥३ ॥ कियद्भिर्दिवसैःश्राव्याश्रीमद्भागवतीकथा ॥ कोविधिस्तत्रकर्तव्योज्ञानयज्ञविशारदाः ॥४॥ कुमाराऊचुः ॥ शृणुनारद
वक्ष्यामस्तुभ्यंयत्रकथानृणाम् ॥ शृण्वतांपापराशिघ्नीभवेत्पुण्यविवर्द्धिनी ॥ ५ ॥ गङ्गाद्वारसमीपेतुकामदाख्यंपुरंमहत् ॥ स्वर्णद्याश्चोत्तरेपुण्येतट
मानन्दनामकम् ॥ ६ ॥ नानाऋषिगणैर्जुष्टंदेवसिद्धनिषेवितम् ॥ नानातरुलताकीर्णंस्वच्छकोमलवालुकम् ॥ ७ ॥ रम्यमेकान्तदेशस्थंस्वर्णपङ्कज
शोभितम् ॥ यत्समीपस्थजीवानांक्षेत्रस्यैवप्रभावतः ॥ ८ ॥ मिथःसंस्निग्धचित्तानांवैरंचेतसिनस्थितम् ॥ ज्ञानयज्ञस्त्वयातत्रकर्तव्योहिप्रय
त्नतः ॥ ९ ॥ अपूर्वरसदात्रीचकथातत्रभविष्यति ॥ वृन्दावनप्रतोलिस्थंजराजीर्णकलेवरम् ॥ १० ॥ सुतद्वयंपुरस्कृत्यभक्तिस्तत्रागमिष्यति ॥ यत्र
भागवतीवार्ताभक्तिस्तत्रसहात्मजा ॥ ११ ॥ कृष्णकीर्तिसुधांपीत्वातरुणीवभविष्यति ॥१२॥ सूतउवाच ॥ एवमुक्त्वाकुमारास्तेनारदेनसमन्ततः॥
गङ्गाद्वारेसमाजग्मुर्ज्ञानयज्ञायसत्वराः ॥ १३ ॥ यदाप्राप्तास्तटंतेतुगङ्गायाभार्गवर्षभ ॥ तदाकोलाहलश्चासीद्भूर्लोकादिकसत्सु ॥ १४ ॥ श्रीमद्भागव
तास्वादलम्पटास्सात्तलौकिकाः ॥ धावंधावंसमाजग्मुःप्राचीनावैष्णवाश्रये ॥ १५ ॥ भृगुर्वसिष्ठश्च्यवनश्चगौतमोमेधातिथिर्देवलदेवरातौ ॥ राम
स्तथागाधिजशाकलौचमृकण्डपुत्रात्रिजपिप्पलादाः ॥ १६ ॥ योगेश्वरौव्यासपराशरौचशुकादयोभागवतप्रधानाः ॥ शिष्यैरुपेताबहुशास्त्रविज्ञाः
कृष्णामृतास्वादकृतैकतानाः ॥ सर्वेऽप्यमीमुनिगणास्सहपुत्रमित्रस्वस्त्रीभिराययुरतिप्रणयेनयुक्ताः ॥ १७॥ वेदान्तानिचवेदाश्चमन्त्रास्तन्त्राणि
संहिताः ॥ दशसप्तपुराणानिषट्छास्त्राणितथाययुः ॥ १८ ॥ गङ्गाद्याःसरितस्तत्रपुष्करादिसरांसिच ॥ क्षेत्राणिचदिशःसर्वादण्डकादिवनानिच
॥ १९ ॥ हिमादयोनगास्तत्रदेवगन्धर्वकिन्नराः ॥ द्वीपाःसमुद्रादिक्पालाःपातालस्थास्तथाययुः ॥ २० ॥ दीक्षायांनारदेनाथदत्तमासनमुत्तमम् ॥
कुमारावन्दिताःसर्वेनिषेदुःकृष्णतत्पराः ॥ २१ ॥ वैष्णवाःसुविरक्ताश्चन्यासिनोब्रह्मचारिणः ॥ मुख्याह्यग्रेस्थितास्तेषांपुरतोनारदःस्थितः ॥ २२ ॥
वामभागेमुनिगणादक्षिणेचदिवौकसः ॥ वेदोपनिषदोऽन्यत्रतीर्थानिचभृगूद्वह ॥ २३ ॥ जयशब्दोनमःशब्दःशङ्खशब्दस्तथैवच ॥ बभूवाकाश
संस्पर्शीघोषयन्विदिशोदश ॥ २४ ॥ विमानानिसमारुह्यप्रहृष्टानाकवासिनः ॥ कल्पवृक्षप्रसूनैश्चतांसभांसमवाकिरन् ॥२५॥ सूतउवाच ॥ एवंतेषुनि
विष्टेषुभृग्वादिषुयथार्हतः ॥ श्रीभागवतमाहात्म्यमूचिरेनारदायते ॥ २६ ॥ कुमाराऊचुः ॥ शृणुनारदवक्ष्यामिमहिमानंमहाद्भुतम् ॥ श्रीमद्भागवता
ख्यस्यशास्त्रस्यविधिपूर्वकम् ॥ २७ ॥ सदानरैःसुकृतिभिःसेव्याभागवतीकथा ॥ यस्याःश्रवणमात्रेणकृतार्थत्वंप्रयान्तिते ॥२८॥ ग्रन्थोऽष्टादशसाह

सोद्वादशस्कन्धसंयुतः ॥परीक्षिच्छुकसंवादःश्रीमद्भागवताभिधः॥२९॥तावत्संसारचक्रेऽस्मिन्भ्रमत्यज्ञानमोहितः ॥ यावत्कर्णगतंनोस्याच्छुकशास्त्रं
जनस्यच ॥ ३० ॥ किंश्रुतैर्बहुभिःशास्त्रैःपुराणैःसंहितागमैः ॥ यदिभागवतंपुम्भिर्नश्रुतंभक्तिभावनैः ॥ ३१॥ कथाभागवतस्यापिनित्यंभवतियद्गृहे॥
तद्गृहंतीर्थरूपंहिनृणांपापविनाशनम् ॥ ३२ ॥ अश्वमेधसहस्राणिराजसूयशतानिच ॥ भागवत्याःकथायाश्चकलांनार्हन्तिषोडशीम् ॥ ३३ ॥ तावत्पा
पानितिष्ठन्तिदेहेऽस्मिन्मुनिपुङ्गव ॥ यावन्नश्रूयतेसम्यक्छ्रीमद्भागवतंनरैः ॥ ३४ ॥ नगङ्गानगयाकाशीप्रतिष्ठानंनपुष्करः ॥ कथायाभागवत्याश्च
समापुण्यफलेनच ॥३५ ॥ श्लोकार्द्धंश्लोकपादंवानित्यंभागवतोद्भवम् ॥ पठस्वस्वमुखेनापियदीच्छसिभवक्षयम् ॥३६॥ वेदादिर्वेदमाताचपौरुषंसूक्त
मेवच ॥ त्रयीभागवतंचैवद्वादशाष्टाक्षरौमनू ॥ ३७ ॥ द्वादशात्माप्रयागश्चकालःसंवत्सरात्मकः ॥ ब्राह्मणाश्चाग्निहोत्रंचसुरभिर्द्वादशीतिथिः ॥ ३८ ॥
तुलसीचवसन्तर्तुःपुरुषोत्तमएवच ॥ एतेषांवस्तुतोनास्तिपृथग्भावोमुनीश्वर ॥ ३९ ॥ यश्चभागवतंशास्त्रंव्याकुर्यादन्वहंद्विज ॥ जन्मकोटिकृतंपापं
तस्यनश्यतिनारद ॥४०॥ श्रुतंचपठितंध्यातंश्रीमद्भागवतंनृभिः ॥ ददातिमुक्तिंभक्तिंवातुलस्यश्योश्चसेवनम् ॥४१॥ अन्तकालेतुसंप्राप्तेभयंत्यक्त्वा
सुदूरतः ॥ श्रीमद्भागतंभक्त्याशृणुयाद्यःसमुक्तिभाक् ॥ ४२ ॥ प्रौष्ठपद्यांचराकायांहेमसिंहसमन्वितम् ॥ अलंकृत्यद्विजाग्र्यायश्रीमद्भागवतंददेत् ॥
॥ ४३ ॥ भक्तियुक्तोविमानश्चमिताशीचजितेन्द्रियः ॥ श्रुत्वादितःसकृष्णस्यसायुज्यंलोकमाप्नुयात् ॥ ४४ ॥ आजन्ममात्रमपियेनशठेनचित्तंसम्य
ङ्नियम्यभुविकृष्णकथानपीता ॥ चाण्डालवच्चपशुवद्वततेननीतंमिथ्यास्वजन्मजननीभृशमार्दिताच ॥ ४५ ॥ यैर्नश्रुतंभागवतंपुराणमाराधितोनो
पुरुषःपुराणः ॥ मुखेहुतंनैवधरामराणांतेषांवृथाजन्मगतंनराणाम् ॥ ४६ ॥ चित्तंनयस्यतुनरस्यहरेःकथायांसंप्रीयतेदुरितदुष्टमसत्प्रसङ्गात् ॥ धिक्तं
नरंपशुसमंभुविभारभूतमेवंवदन्तिमुनयःकिलपूर्वसिद्धाः ॥ ४७ ॥ दुर्लभैवकथालोकेश्रीमद्भागवतोद्भवा ॥ कोटिजन्मसमुत्थेनपुण्येनैवतुलभ्यते ॥
॥ ४८ ॥ तेनयोगनिधेसाधोश्रोतव्यासात्त्वतीकथा ॥ प्रत्यहंनियमोनास्तिदिनानांवस्तुतोद्विज ॥४९॥ सत्येनब्रह्मचर्येणयतोऽस्यश्रवणंमतम् ॥ ततः
कलौविशेषोहिविधिःसप्तदिनात्मकः ॥ ५० ॥ मनसश्चाजयाद्रोगात्पुंसांचैवायुषःक्षयात् ॥ कलेर्दोषबहुत्वाच्चसप्ताहश्रवणंमतम् ॥ ५१ ॥
मनसोनिग्रहश्चैवनियमाचरणंतथा ॥ कर्तुंसप्तदिनंशक्यंततोनियमकल्पना ॥ ५२ ॥ श्रद्धयाश्रवणेनित्यमाद्यन्तावधियत्फलम् ॥ तत्फलंशुक
देवेनसप्ताहश्रवणेकृतम् ॥ ५३ ॥ यत्फलंनास्तितपसानयोगेनसमाधिना ॥ अनायासेनतत्सर्वंसप्ताहश्रवणाल्लभेत् ॥५४ ॥ यज्ञाद्व्रताच्चतपसोध्याना
ज्ज्ञानाच्चतीर्थतः ॥ श्रीभागवतसप्ताहनियमोह्युत्तमोमतः ॥ ५५ ॥ यदाकृष्णोभुवंत्यक्त्वास्वपदंगन्तुमुद्यतः ॥ तदाज्ञायोद्धवोधीमान्गोविन्दंवाक्य

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मब्रवीत् ॥ ५६ ॥ उद्धवउवाच ॥ भगवन्भवतासर्वंदेवकार्यंप्रसाधितम् ॥ अधुनागन्तुमिछुस्त्वंस्वंपदंतमसःपरम् ॥ ५७ ॥ अतश्चिन्ताममोत्पन्ना
त्वद्वियोगभियाविभो ॥ तामपाकुरुदेवेशत्वामहंशरणंगतः ॥ ५८ ॥ आगतोऽयंकलिर्घोरस्सर्वेऽप्यत्रजनाःखलाः ॥ भविष्यन्तिततोनाथकिंविधेयं
तदादिश ॥ ५९ ॥ इयंभारवतीभूमिःशरणंकंप्रयास्यति ॥ त्वदन्योदृश्यतेनात्रत्रातास्यायदुनन्दन ॥ ६० ॥ अतोऽस्मासुदयांकृत्वातिष्ठात्रैवदया
निधे ॥ साधूनांरक्षणायैवत्वमाविरभवःप्रभो ॥ ६१ ॥ निर्गुणोऽपिनिराकारःसच्चिदानन्दविग्रहः ॥ त्वद्वियोगेनतेभक्ताःकथंस्थास्यन्तिभूतले ॥
निर्गुणोपासनेकष्टमतोऽस्मद्धितमाचर ॥ ६२ ॥ सूतउवाच ॥ इत्युद्धववचःश्रुत्वाचिन्तयित्वाक्षणंहरिः ॥ ददौभागवतंतस्मैकृपयापरयायुतः ॥
॥ ६३ ॥ निजंतेजःसमाधायश्रीमद्भागवतेद्विज ॥ दत्त्वोद्धवायभगवान्स्वकीयंपदमाविशत् ॥ ६४ ॥ तेनेयंवाङ्मयीमूर्त्तिर्वर्त्ततेश्रीहरेरिह ॥ सेव
नात्सततंचास्याःपापंनश्येन्नृणांक्षणात् ॥ ६५ ॥ सप्ताहश्रवणंतेनकथितंसर्वतोऽधिकम् ॥ श्रोतावक्ताप्रच्छकश्चयान्तितन्मयतांद्विज ॥ ६६ ॥ दुःख
दारिद्र्यदौर्भाग्यपापप्रक्षालनायच ॥ कामक्रोधजयार्थंचकलौभागवतंक्षमम् ॥ ६७ ॥ अन्यथावैष्णवीमायादेवानामपिदुर्जया ॥ कथंनिवर्ततेपुंसां
श्रीमद्भागवतंविना ॥ ६८ ॥ सूतउवाच ॥ इत्येवमुक्त्वामाहात्म्यंश्रीमद्भागवतस्यते ॥ कथांभागवतींदिव्यांप्रवक्तुमुपचक्रमुः ॥ ६९ ॥ वेदोपनिषदां
सारेश्रीमद्भागवतेद्विजैः ॥ आरभ्यमाणेतत्रैवभक्तिराविरभूत्क्षणात् ॥ ७० ॥ प्रेमान्विताचारुतनुर्मुदान्वितौसुतौगृहीत्वातरुणौस्वदोर्भ्याम् ॥ श्रीकृष्ण
गोविन्दहरेमुरारेनाथेतिनामानिमुहुर्वदन्ती ॥ ७१ ॥ तामागतांभागवतार्थभूषांसुचारुवेषांददृशुःसदस्याः ॥ व्यतर्कयंश्चापिकथंकुतोऽसौकास्तीति
सर्वेऽपिसुविस्मिताक्षाः ॥ ७२ ॥ ततःकुमाराजगदुःकृतार्थाकथार्थतोनिष्पतिताधुनेयम् ॥ एवंगिरःसाससुतानिशम्यजगादनम्राब्जभुवःकुमारान् ॥
॥ ७३ ॥ भक्तिरुवाच ॥ भवद्भिरद्यैवकृतास्मिपुष्टाकलौप्रनष्टापिकथारसेन ॥ तिष्ठामिकुत्राहमभीष्टमाभ्यांसहास्पदंमह्यमुपादिशध्वम् ॥ ७४ ॥
सूतउवाच ॥ तद्वाक्यमाकर्ण्यविधेःकुमाराविचार्यसम्यक्प्रणिधायचित्ते ॥ ऊचुश्चभक्तिंभवरोगहर्त्रींप्रेमैकदात्रींहरिभक्तिभाजाम् ॥ ७५ ॥ कुमारा
ऊचुः ॥ भक्तेषुगोविन्दपरायणेषुसाधुष्वथोदीनदयापरेषु ॥ मनोनियम्योत्पथसंप्रवृत्तंकृत्वैकतानंहरिपादपद्मे ॥ ७६ ॥ ततोहिदोषाःकलिजाइमेत्वां
द्रष्टुंनशक्ताःप्रभवोऽपिलोके ॥ कलौत्वमेकैवजगद्धितायभविष्यसेनारदसंप्रणीता ॥ ७७ ॥ सकलभुवनमध्येनिर्धनाश्चातिधन्यानिवसतिहृदियेषांश्री
हरेर्भक्तिरेका ॥ हरिरपिनिजलोकंसत्वरंसंविहायप्रविशतिहृदियेषांप्रेमसूत्रापिनद्धः ॥ ७८ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप० उत्तर० श्रीभागवतमाहात्म्ये
पञ्चनवत्यधिकशततमोऽध्यायः ॥ १९५ ॥ सूतउवाच ॥ अथवैष्णवचित्तेषुदृष्ट्वाभक्तिमलौकिकीम् ॥ निजलोकंपरित्यज्यभुवमभ्यगमद्धरिः ॥ १ ॥

CC-0. In Public Domain. Digitization by eGangotri

वनमालीघनश्यामःपीतवासाःकिरीटधृत् ॥ काञ्चीकलापपर्यस्तोलसन्मकरकुण्डलः ॥ २ ॥ त्रिभङ्गललितश्चारुकौस्तुभेनविराजितः ॥ कोटिमन्मथ
लावण्योहरिचन्दनचर्चितः ॥ ३ ॥ परमानन्दचिन्मूर्तिर्मधुरोमुरलीधरः ॥ आविवेशस्वभक्तानांहृदयान्यमलानिच ॥ ४ ॥ वैकुण्ठवासिनोयेच
वैष्णवाःशान्तमानसाः ॥ गूढरूपाःसमायाताःश्रोतुकामाहरेःकथाः ॥ ५ ॥ तदाजयजयेत्युच्चैःशब्दोऽभूत्कम्बुशब्दयुक् ॥ येनामङ्गलमत्युग्रंकलिजं
प्रलयंगतम् ॥ ६ ॥ तत्रस्थानांजनानांचदृष्ट्वागेहात्मविस्मृतिम् ॥ नारदोऽध्यात्मतत्त्वज्ञःकुमारान्प्रत्युवाचह ॥ ७ ॥ नारदउवाच ॥ अलौकिकोऽयं
महिमामुनीश्वराःसप्ताहजन्योऽद्यविलोकितोमया ॥८॥ मूढाःशठायेपशुपक्षिणोऽपितेऽपिप्रयान्त्येवगतिंपराख्याम् ॥ अतोनृलोकेनतुशास्त्रमन्यच्चित्त
स्यशुध्यैविहितंपवित्रम् ॥९ ॥ अघौघविध्वंसिकृतार्थतावहंकलौयुगेदोषनिधौकुमाराः ॥ केकेनशुध्यन्तिवदन्तुमह्यंसप्ताहयज्ञेनकथामयेन ॥ १० ॥
कृपालुभिर्लोकहितोभवद्भिःप्रकाशितःकोऽपिनवीनमार्गः ॥ ११ ॥ कुमाराऊचुः ॥ येमानवाःपापकृतःसुदुष्टाःसदादुराचाररताःसमत्सराः ॥ क्रो
धाग्निदग्धाःकुटिलाश्चकामिनःसप्ताहयज्ञेनहरिंव्रजन्तिते ॥ १२ ॥ सत्येनहीनाःपितृमातृदूषकास्तृष्णाकुलाश्चाश्रमवर्णबाह्याः ॥ येदाम्भिकाजीव
विहिंसकाश्चसप्ताहयज्ञेनहरिंव्रजन्तिते ॥ १३ ॥ पञ्चोग्रपापाश्छलकारिणश्चक्रूराःपिशाचाइवनिर्दयाश्च ॥ ब्रह्मस्वपुष्टाव्यभिचारिणश्चसप्ताहयज्ञेनह
रिंव्रजन्तिते ॥ १४ ॥ कायेनवाचामनसापिपातकंनित्यंप्रकुर्वन्तिशठाहठेनये ॥ नीचाःकृतघ्नामलिनादुराशयाःसप्ताहयज्ञेनहरिंव्रजन्तिते ॥ १५ ॥
सूतउवाच ॥ अथैवंतुष्टचित्तेऽथनारदेदेवपूजिते ॥ प्रसन्नास्तेकुमाराश्चपुनरूचुश्चनारदम् ॥ १६ ॥ कुमाराऊचुः ॥ अत्रतेकीर्तयिष्यामइतिहासंपुरात
नम् ॥ यस्यश्रवणमात्रेणपापहानिःप्रजायते ॥ १७ ॥ तुङ्गभद्रातटेपूर्वंपत्तनेकोहलाभिधे ॥ वर्णाश्रमाचारयुतेधनधान्यसमाकुले ॥ १८ ॥ आत्मदे
वइतिख्यातस्तत्रासीद्द्विजसत्तमः ॥ वेदविद्याविधिप्राज्ञोनित्यकर्मपरायणः ॥ १९ ॥ तत्प्रियाधुन्धुलीनाम्नीनित्यंस्वीयहितेरता ॥ स्ववाक्यस्थापना
चापिसुन्दरीसुकुलोद्भवा ॥ २० ॥ पूर्वकर्मविपाकेनप्रायशोबहुजल्पिनी ॥ शूराचगृहकृत्येषुक्रूराचकलहप्रिया ॥२१ ॥ एवंनिवसतोस्तत्रदम्पत्यो
र्निरपत्ययोः ॥ व्यतिक्रान्तंवयश्चापिपञ्चाशद्वर्षसंमितम् ॥ २२ ॥ अथतौदुःखितौजातौनिरपत्यौगृहेस्थितौ ॥ सन्तानोत्पत्तयेताभ्यांदत्तंचापिधना
दिकम् ॥ २३ ॥ गोभूहिरण्यवासांसिदत्तान्यपिबहूनिच ॥ नपुत्रोनापिदुहिताजायतेपूर्वकर्मणा॥ २४ ॥ सचैकदातुनिर्विण्णआत्मदेवोद्विजोत्तमः ॥
गृहंत्यक्त्वागतोऽरण्यमानपत्येनदुःखितः ॥ २५ ॥ यत्रतत्रभ्रमन्भ्रान्तोदुःखाकुलितमानसः ॥ क्षुत्क्षामस्तृट्परीतश्चदैवात्प्राप्तोजलाशयम् ॥ २६ ॥
जलंपीत्वाततस्तस्मिंस्तडागेसद्द्विजोत्तमः ॥ वृक्षच्छायांसमाश्रित्यनिषण्णस्तत्रनारद ॥ २७ ॥ अथतत्रतदैवागात्कश्चित्सिद्धोभ्रमन्महीम् ॥ जलंपी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वातडागेतुसोऽपितत्रैवचागतः ॥ २८ ॥ तंदृष्ट्वान्यासिनंशान्तमात्मदेवउदारधीः ॥ सत्कृत्योत्थायतत्पादौजग्राहस्वगुरोरिव ॥ २९ ॥ उपविष्टौत
तस्तौद्वौकृतप्रश्नौपरस्परम् ॥ सुस्निग्धमानसौभूत्वागुरुशिष्याविवाश्रमे ॥ ३० ॥ अथतंसयतिर्दृष्ट्वाश्वसन्तंदुःखितान्तरम् ॥ पप्रच्छकरुणासिन्धुरा
त्मदेवंपुरःस्थितम् ॥३१॥ सिद्धउवाच ॥ कातेचिन्ताद्विजश्रेष्ठदुःखायत्त्वदिवर्तते ॥ तांसमाचक्ष्वधर्मज्ञपरितापप्रदायिनीम् ॥ ३२ ॥ तच्छ्रुत्वावचनं
तस्यसिद्धस्यसुमहात्मनः ॥ आत्मदेवउवाचाथस्वस्यदुःखस्यकारणम् ॥ ३३ ॥ आत्मदेवउवाच ॥ किंब्रवीमिमुनेदुःखंसंचितंपूर्वकर्मणा ॥ मदी
याःपूर्वजास्तोयंकवोष्णमुपभुञ्जते ॥ ३४ ॥ मद्दत्तंनैवगृह्णन्तिपितरोदेवताबलिम् ॥ तेनदुःखेननिर्विण्णःप्राणांस्त्यक्तुमिहागतः ॥ ३५ ॥ धिग्जीवितं
प्रजाहीनंगृहंचैवधनंकुलम् ॥ पाल्यतेयामयाधेनुःसावन्ध्यात्वमेतिह ॥ ३६ ॥ योमयारोपितोवृक्षःसोऽपिवन्ध्यत्वमागतः ॥ निर्भाग्यस्यानपत्यस्य
किमतोजीवितेनमे ॥ ३७ ॥ कुमाराऊचुः ॥ इत्युक्त्वासरुरोदोच्चैस्तत्पुरोदुःखपीडितः ॥ यदातदायतेश्चित्तेकरुणाभूद्गरीयसी ॥ ३८ ॥ ललाटाक्षरमा
लांचदृष्ट्वाज्ञात्वासयोगवान् ॥ आत्मदेवंद्विजंप्राज्ञःपुनरूचेसविस्तरम् ॥ ३९ ॥ सिद्धउवाच ॥ शृणुविप्रमयातेऽद्यप्रारब्धमवलोकितम् ॥ सप्तजन्मा
वधिप्राप्तिःपुत्रस्यनचदृश्यते ॥ ४० ॥ मुञ्चाग्रहंप्रजाहेतोर्बलिष्ठाकर्मणोगतिः ॥ विवेकंतुसमासाद्यसुखीभवमहामते ॥ ४१ ॥ एवमुक्तंसमाकर्ण्यसिद्ध
स्यद्विजसत्तमः ॥ प्रजाशाबद्धचित्तस्तुसिद्धंप्राहातिदुःखितः ॥ ४२ ॥ विप्रउवाच ॥ विवेकेनभवेत्किंमेपुत्रंदेहिबलादपि ॥ नोचेत्त्यजाम्यहंप्राणांस्त्व
दग्रेशोकमूर्च्छितः ॥ ४३ ॥ इतिविप्राग्रहंदृष्ट्वाप्राब्रवीत्सतपोधनः ॥ सन्ततेःसगरोदुःखमवापाङ्गःप्रजापतिः ॥ ४४ ॥ चित्रकेतुर्गतःकष्टंविधिलेख
विमार्जनात् ॥ अतस्त्वमपिधर्मज्ञयदिपुत्रंलभेरपि ॥ ४५ ॥ सुतेननसुखीभूयादैवंहिबलवत्तरम् ॥ इत्युक्त्वाद्विजवर्यायससिद्धःसाधुसंमतः ॥ ४६ ॥
ददावेकंफलंतस्मैप्राग्रहेणसुतार्थिने ॥ इदंफलंमयातुभ्यंदत्तंपुत्राप्तयेद्विज ॥ ४७ ॥ भार्यायैदेहिपुत्रस्तेभविष्यतिनसंशयः ॥ सत्यंशौचंदयादानमेकभ
क्तंतुभोजनम् ॥ ४८ ॥ वर्षावधिस्त्रियाकार्यंतेनशुद्धोभवेत्सुतः ॥ एवमुक्त्वाययौयोगीविप्रःस्वगृहमागतः ॥ ४९ ॥ दत्त्वापत्न्यैफलंतत्तुसिद्धोक्तम
वदच्चह ॥ अथसाधुन्धुलीक्रूरास्ववाक्यस्थापनोत्सुका ॥ ५० ॥ स्वसख्यैप्राहतत्सर्वंपत्योक्तंसिद्धभाषितम् ॥ यद्यहंभक्षयेचेदंफलंसिद्धेनचार्पितम्
॥ ५१ ॥ गर्भोममभवेत्तर्हिकथंचाहंसहाम्यहम् ॥ स्वल्पंभक्ष्यमशक्तिश्चगमनेगृहकर्मणि ॥ ५२ ॥ तिर्यक्चेदागतोगर्भोतदामेमरणंभवेत् ॥ प्रसूतौदा
रुणंदुःखंसुकुमारीकथंसहे ॥ ५३ ॥ मन्दायांमयिसर्वस्वंननान्दासंहरेत्सदा ॥ चिन्तामेसमनुप्राप्ताकिंकरोमिशुचिस्मिते ॥ ५४ ॥ सातद्वचनमाकर्ण्य
स्नेहभङ्गभयाद्द्विज ॥ एवमेवेतितांप्राहप्रीत्याप्रहसितानना ॥५५॥ एवंकुतर्कयोगेनतत्फलंनैवभक्षितम् ॥ पत्यापृष्टेफलंभुक्तंभुक्तंचेतितयेरितम् ॥५६॥

CC-0. In Public Domain. Digitization by eGangotri

एकदाभगिनीतस्याःस्वेच्छयातद्गृहंगता ॥ तदग्रकथितंसर्वंचिन्तेयंमहतीहिमे ॥ ५७ ॥ दुर्बलातेनदुःखेनह्यनुजेकरवाणिकिम् ॥ साब्रवी
न्ममगर्भोऽस्तितुभ्यंदास्येप्रसूतितः ॥ ५८ ॥ तावत्कालंसगर्भेवगुप्तातिष्ठगृहेसुखम् ॥ तंबालंपोषयिष्यामित्वद्गृहेचैवनित्यशः ॥ ५९ ॥ फ
लंधेनोःप्रयच्छाद्यपरीक्षार्थंशुभानने ॥ इत्युक्त्वासाययौगेहमात्मनोहृष्टमानसा ॥ ६० ॥ धुन्धुल्यापियथोद्दिष्टंतद्भगिन्यातथाकृतम् ॥ अथ
प्रसूयसाबालंधुन्धुल्यैचार्पयद्द्रुतम् ॥ ६१ ॥ तयाचकथितंभर्त्रेप्रसूतःसुखमर्भकः ॥ लोकस्यसुखमुत्पन्नमात्मदेवप्रजोदयात् ॥ ६२ ॥ दत्त्वादा
नंद्विजाग्रेभ्योजातकर्मचकारच ॥ गीतवादित्रनिर्घोषोगृहेतस्यातिमङ्गलम् ॥ ६३ ॥ बभूवहर्षमापन्नआत्मदेवोमहामतिः ॥ अथसाप्राहभर्त्तारं
दुग्धंमेस्तनयोर्नहि ॥ ६४ ॥ पालयिष्येकथंबालंसद्यःसूतंप्रभोऽधुना ॥ मत्स्वसुश्चप्रसूतायामृतोबालःपुराभवत् ॥ ६५ ॥ तामा
नीयगृहेरक्षसार्भकंपोषयिष्यति ॥ इतिश्रुत्वावचस्तस्याधुन्धुल्याद्विजसत्तमः ॥ ६६ ॥ तथैवकृतवान्भ्रान्तस्त्वात्मदेवोमुदान्वितः ॥
धुन्धुकारीतिनामास्यकृतंमात्रायथार्थतः ॥ ६७ ॥ स्तन्येनपोषमाप्नोतिनित्यंमातृष्वसुःसुतः ॥ त्रिमासेनिर्गतेचाथसाधेनुःसुषुवेऽर्भकम् ॥ ६८ ॥
सर्वाङ्गसुन्दरंदिव्यंनिर्मलंकनकप्रभम् ॥ दृष्ट्वाप्रसन्नस्तंविप्रःसंस्कारान्स्वयमादधे ॥ ६९ ॥ तंदिदृक्षवआयाताजनाःसर्वेऽतिविस्मिताः ॥ आत्म
देवस्यविप्रस्यमहाभाग्योदयेनच ॥ ७० ॥ धेन्वाबालःप्रसूतश्चदेवरूपोऽतिकौतुकम् ॥ नज्ञातंतद्रहस्यंतुकेनापिविधियोगतः ॥ ७१ ॥
गोकर्णंतंसुतंदृष्ट्वागोकर्णेत्येवचाभ्यधात् ॥ कियत्कालेनसंप्राप्तौतारुण्यंतावुभावपि ॥ ७२ ॥ गोकर्णःपण्डितोज्ञानीधुन्धुकारीमहाखलः ॥ स्नान
शौचक्रियाहीनोऽभक्ष्यभक्षीक्रुधाप्लुतः ॥ ७३ ॥ चौरःसर्वजनद्वेषीदुष्टचाण्डालसंगतः ॥ क्रीडतोह्यर्भकान्धृत्वाबलात्कूपेनिपातयेत् ॥ ७४ ॥
एवंवेश्याप्रसङ्गेनानयद्द्रव्यंक्षयंपितुः ॥ पिताकृपणवत्तस्यशुचानिःस्वोरुरोदह ॥ ७५ ॥ अनपत्यसुखीनित्यंकुपुत्रोदुःखदायकः ॥ सिद्धे
नोक्तंवचःसत्यमनुभूतंमयाधुना ॥ ७६ ॥ क्वगच्छामिक्वतिष्ठामिकोमेदुःखंनिवारयेत् ॥ प्राणांस्त्यक्ष्येजलेवह्नौभृगोर्वापिपतेह्यहम् ॥ ७७ ॥
इत्येवंचिन्तयानंतमधोमुखमुपागतः ॥ गोकर्णोजनकंज्ञानीबोधयामासतत्त्वतः ॥ ७८ ॥ गोकर्णउवाच ॥ असारस्तातसंसारोदुःखमोहप्रदोनृणाम् ॥
कःसुतःकिंधनंकस्यकाजायाकःपतिःपितः ॥ ७९ ॥ मोहेनबद्धोदीनात्मालोकःक्लिश्यतिनान्यथा ॥ नचेन्द्रस्यसुखंकिंचिन्नसुखंचक्रवर्तिनः ॥
॥ ८० ॥ विरक्तस्यसुखंतातमुनेरेकान्तशीलिनः ॥ मुञ्चाज्ञानंप्रजारूपंमोहंनरककारणम् ॥ ८१ ॥ निर्द्वन्द्वोनिरभीमानोव्रजत्यक्त्वाखिलंवनम् ॥
ततस्तद्वाक्यमाकर्ण्यगोकर्णंसद्विजोऽब्रवीत् ॥ ८२ ॥ द्विजउवाच ॥ यत्कर्त्तव्यंवनेसाधोतन्ममाचक्ष्वविस्तरात् ॥ मोहपाशनिबद्धंहिशठंकृपणमान

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सम् ॥ ८३ ॥ संसारगर्तेपतितंमामुद्धरदयानिधे ॥ पितुरित्थंवचःश्रुत्वागोकर्णोज्ञानपण्डितः ॥ उवाचदीनंनिर्विण्णंपितरंहृष्टमानसः ॥ ८४ ॥
गोकर्णउवाच ॥ मांसास्थिरक्तनिकरेस्वशरीरकेऽस्मिन्स्वत्वंत्यजाशुममतांवनितासुतादौ ॥ पश्यानिशंजगदिदंक्षणभङ्गनिष्ठंज्ञानीविरागरसिकोभ
वभक्तिनिष्ठः ॥ ८५ ॥ धर्मंभजस्वसततंत्यजलोकधर्मान्संसेव्यसाधुपुरुषाञ्जहिकामतृष्णाम् ॥ अन्यस्यदोषगुणचिन्तनमाशुमुक्त्वाविष्णोःक
थारसमथोनितरांपिबत्वम् ॥ ८६ ॥ कुमाराऊचुः ॥ एवंसुतोक्तविदितानुभवोनिरीहस्त्यक्त्वागृहंस्थिरमतिर्गतषष्टिवर्षः ॥ नित्यंहरिप्रियजनानुग
तोमहात्मादुष्प्रापमापचपदंसहरेर्वनस्थः ॥ ८७ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०उत्तर०श्रीभागवतमाहात्म्येषण्णवत्यधिकशततमोऽध्यायः ॥
॥ १९६ ॥कुमाराऊचुः ॥ पितर्येवंवनंप्राप्तेपश्चादागत्यनारद ॥ जननींतर्जयामासधुन्धुकारीमहाखलः ॥ १ ॥ क्ववित्ततिष्ठतिब्रूहिमातरंप्रतिनारद॥
सर्वथात्वांहनिष्यामिनचेद्ब्रूयानिधानकम् ॥ २ ॥ सातस्यवचनात्त्रस्तारात्रौदुःखितमानसा ॥ निपत्यकूपेतुमृतालोकैर्ज्ञात्वाबहिष्कृता ॥ ३ ॥
गोकर्णस्तांतुनिर्हृत्यद्विजैस्तज्ज्ञातिबान्धवैः ॥ तीर्थयात्रांययौप्राज्ञःसमदुःखसुखोमुने ॥ ४ ॥ धुन्धुकारीगृहेतिष्ठन्स्वकेपण्यवधूवृतः ॥ अत्युग्रकर्मा
चारेणतत्पोषणविमूढधीः ॥ ५ ॥ भूषणान्यभिलिप्सन्त्यस्तमूचुर्वारयोषितः ॥ भोभोःप्रियवयंसर्वास्त्वयानाथेनसंगताः ॥ ६ ॥ स्थितानैवात्रकोऽ
प्यन्योधनदोऽभ्येतिमानद ॥ तस्मात्सूक्ष्माणिवस्त्राणिभूषणानिद्युमन्तिच ॥ ७ ॥ देहिनोचेद्व्रजिष्यामस्त्वत्सकाशान्नरान्तरम् ॥ इतिश्रुत्वाव
चस्तासांचिन्तयित्वाक्षणंसच ॥ ८ ॥ निर्गतःस्वगृहाद्रात्रौकामान्धोमृत्युमस्मरन् ॥ मुषित्वाकस्यचिद्गेहाद्वस्त्राण्याभरणानिच ॥ ९ ॥ ददौता
भ्योमुदायुक्तःप्रीत्यैतासांसनारद ॥ तानिदृष्ट्वाह्यमूल्यानिवस्त्राण्याभरणानिच ॥ १० ॥ ताःस्त्रियश्चिन्तयामासुश्चौर्येणैतानिचामुना ॥ आहृता
नीतिनिश्चित्यपरस्परममन्त्रयन् ॥ ११ ॥ चौर्यंकरोत्यसौनित्यमेनंराजाग्रहीष्यति ॥ वित्तंहृत्वापुनश्चैवमारयिष्यतिनिश्चितम् ॥ १२ ॥ अतो
रहसिचास्माभिर्हत्वामंचौर्यकारिणम् ॥ वित्तंचबहुसंगृह्यकिमन्यत्रनगम्यते ॥ १३ ॥ इतिताःक्रूरहृदयाःसुप्तंकण्ठग्रहंतदा ॥ पाशैःसुतीक्ष्णैर्बद्ध्वा
चव्यापादयितुमुद्यताः ॥ १४ ॥ यदाचनमृतश्चासौभृशंकण्ठग्रहेणवै ॥ तदाङ्गाराणिबहुशोमुखेचास्यविचिक्षिपुः ॥ १५ ॥ अग्निज्वालातिदुःखे
नव्याकुलोनिधनंगतः ॥ तद्देहंचिक्षिपुर्गर्तेप्रायःसाहसिकाःस्त्रियः ॥ १६ ॥ नज्ञातंतच्चरित्रंतुकेनापिमुनिसत्तम ॥ लोकैःपृष्टावदन्तिस्मदूरेयातः
पतिर्हिनः ॥ १७ ॥ आगमिष्यतिदीर्घेणकालेनधनकर्षितः ॥ अतःस्त्रीणांनविश्वासःकर्त्तव्योविदुषांवरैः ॥ १८ ॥ विश्वस्तंसर्वथाघ्नन्तिप्रार्थ
यन्त्योनवंनवम् ॥ सुधामयंवचोयासांकामिनांरसवर्द्धनम् ॥ १९ ॥ हृदयंक्षुरधाराभंप्रियःकोनामयोषिताम् ॥ अथताबहुलंवित्तंगृहीत्वावारयो

CC-0. In Public Domain. Digitization by eGangotri

षितः ॥ २० ॥ ग्रामान्तरंययुःशीघ्रंभयाद्राज्ञोऽतिविह्वलाः ॥ धुन्धुकारीबभूवाथमहाप्रेतःकुकर्मकृत् ॥ २१ ॥ वात्यारूपधरोनित्यंधावन्दु
र्मृत्युतोदिशः ॥ शीतातपपरिक्लिष्टोनिराहारःपिपासितः ॥२२॥ नचलेभेसुखंक्कापिहाहेतिप्रवदन्मुहुः ॥ कियत्कालान्तरेत्वेनंमृतंचैवावबुध्यच॥२३॥
गोकर्णस्तीर्थयात्रायांगयाश्राद्धमथाकरोत् ॥ समाप्यतीर्थयात्रांतुस्वंपुरंसमुपेयिवान् ॥ २४ ॥ सभाजितःसपौरैस्तुप्रीत्यास्वजनबान्धवैः ॥ उवा
सस्वगृहेचैवदिनानिकतिचिद्द्विजः ॥ २५ ॥ रात्रौप्रसुप्तंगोकर्णंज्ञात्वावेश्माङ्गणेसतु ॥ धुन्धुकारीमहादुष्टोरौद्रंरूपंव्यदर्शयत् ॥ २६ ॥ क्षणंनागःक्षणं
चोष्ट्रःक्षणंसमहिषोऽभवत् ॥ क्षणमग्निःक्षणंसर्पःक्षणेनपुरुषोऽभवत् ॥ २७ ॥ वैपरीत्यमिदंदृष्ट्वागोकर्णोधैर्यसंयुतः ॥ चिन्तयामासमेधावीकिमेतदिति
विस्मितः ॥ २८ ॥ अयंदुर्गतिमापन्नःकोऽप्यस्तिपुरुषाधमः ॥ इतिनिश्चित्यमनसातमुवाचदयान्वितः ॥ २९ ॥ गोकर्णउवाच ॥ कस्त्वमुग्रतरोरा
त्रौभीषयन्मामुपागतः ॥ प्रेतोवाथपिशाचोवाकुतःप्राप्तोदशामिमाम् ॥ ३० ॥ तद्ब्रूहित्वंमहाभागकिंकार्यंतेमयाधुना ॥ घोररूपोयतोरात्रौमत्समी
पमुपागतः ॥ ३१ ॥ इतिश्रुत्वावचोभ्रातुर्धुन्धुकारीमहाखलः ॥ प्रेतभावमनुप्राप्तोरुरोदभृशमातुरः ॥ ३२ ॥ वक्तुंनैवक्षमोवाचंप्रेतत्वेनविमोहितः ॥
संज्ञयानिर्दिदेशाथजलंपातुंपिपासितः ॥ ३३ ॥ अथासौसुमहाभागोगोकर्णःसाधुसंमतः ॥ स्वकाञ्जलौजलंकृत्वाप्राक्षिपत्तमुदीरयन् ॥ ३४ ॥
तत्क्षिप्तंतज्जलंभ्रात्रागोकर्णेनमहात्मना ॥ उपस्थितंचतृप्त्यर्थंप्रेतस्यधुन्धुकारिणः ॥३५॥ अथोवाचागतज्ञानःप्रदत्तेनाम्बुनामुना ॥ पुण्यात्मनात्मनो
भ्रात्रागोकर्णेनचनारद॥३६॥प्रेतउवाच॥अहंभ्रातात्वदीयोऽस्मिधुन्धुकारीतिनामतः ॥आत्मनःकर्मदोषेणप्रेतत्वंसमुपागतः॥३७॥ममंमातामृतादुःखा
द्बहुशस्तार्जितामया ॥ द्रव्यहेतोस्ततःपश्चाद्दारस्त्रीपोषणोत्सुकः ॥३८ ॥ निषिद्धंकृतवान्कर्मचौर्यादिधनलोभतः॥एकदाप्रार्थितस्ताभिर्भूषणान्यम्बरा
ण्यहम् ॥ ३९॥ धनिकस्यगृहाद्रात्रौमुषित्वातान्युपानयम् ॥ ततस्ताधनलोभेनपाशैर्बद्ध्वागलेबलात् ॥४०॥ मांतुव्यापादयामासुर्वह्निक्षेपेणमानद॥
गृहीत्वामद्धनंभूरिताःसर्वाभूपतेर्भयात् ॥ ४१ ॥पलायिताःपुरादस्मात्स्वार्थोन्मूलितसौहृदाः ॥ अतःप्रेतत्वमापन्नोभ्रातरद्यत्वयाम्बुना ॥ ४२॥ सिक्तः
संज्ञामहंप्राप्तःपुण्येनातिकृपालुना ॥ वाताहारेणजीवामिदैवादिष्टफलोदयः ॥४३॥अपश्यंत्वामहंसुप्तंभ्रातरंस्वगृहाङ्गणे ॥ ततस्तेह्यनभिज्ञस्यधर्षणा
यकृतोद्यमः॥४४॥अभवंसहसासाधोज्ञातश्चाहंत्वयाधुना॥ दीनबन्धोदयासिन्धोभ्रातर्मामाशुमोचय॥४५॥प्रेतभावादमुष्मात्त्वंकृतार्थोऽसिनसंशयः॥
इतिश्रुत्वावचोभ्रातुर्गोकर्णोज्ञानवान्सुधीः ॥४६ ॥ भ्रातरंप्राहखिन्नात्मादुःखितंधुन्धुकारिणम् ॥४७॥ गोकर्णउवाच॥तुभ्यंदत्तोमयापिण्डोगयायांत्वा
महंमृतम्॥श्रुत्वालोकमुखाद्भ्रातस्त्वंकथंप्रेततांगतः ॥४८॥ गयापिण्डप्रदानेनदुर्गतोऽपिशुभांगतिम् ॥ प्राप्नोतिनात्रसंदेहस्त्वंकथंनदिवंगतः ॥ ४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भ्रातुरित्थंवचःश्रुत्वागोकर्णस्यमहात्मनः॥धुन्धुकारीदुःखितात्माप्रोवाचपुरतःस्थितः ॥५०॥ गयाश्राद्धशतेनापिनमेमुक्तिर्भविष्यति ॥ उपायोऽन्य
श्चिन्तनीयोममोद्धारायवैत्वया ॥५१॥ इतितद्वाक्यमाकर्ण्यगोकर्णोविस्मयंगतः॥प्राहश्राद्धैर्नमुक्तिश्चेत्तर्ह्यसाध्यागतिस्तव॥ ५२॥इदानींत्वंनिजस्थान
मातिष्ठप्रेतनिर्भयः ॥ विचार्याहंकरिष्यामिमुक्त्युपायंपरंतव॥५३॥इतिवाक्यंसमाकर्ण्यधुन्धुकारीततोगतः॥निजंस्थानंश्मशानस्थंकलिद्रुममतःपरम्
॥५४ ॥ शेषांरात्रिंसगोकर्णश्चिन्तयन्नेवनारद ॥ तस्यमुक्तिस्थितस्तत्रतदुपायंनचाध्यगात् ॥ ५५ ॥ प्रातस्ततःसगोकर्णःस्वज्ञातिकुलबान्धवान् ॥
धर्मशास्त्रविदोविप्रान्रात्रिवृत्तंन्यवेदयत् ॥ ५६ ॥ तेविचार्यचतद्वृत्तंशास्त्रेषुबहुशोद्विजाः ॥ यदानज्ञातवन्तस्तद्वृत्तंसूर्यंतदास्तुवन् ॥ ५७ ॥
द्विजाऊचुः ॥नमस्तेभास्करादित्यतमोहन्तर्गभस्तिमन् ॥ लोकसाक्षिञ्जगद्धामसुरासुरनमस्कृत ॥ ५८ ॥ द्वादशात्मन्हरिहयभास्वँल्लोकप्रबोधक॥
त्वंगतिःसर्वलोकानांसततंधर्मशीलिनाम् ॥ ५९ ॥ त्वंब्रह्मात्वंहरिःशूलीसृष्टिस्थितिविनाशकृत ॥ त्वामृतेनास्तिलोकेऽस्मिञ्छरणंप्राणिनांविभो ॥
॥ ६० ॥ शर्वस्त्वंक्षितिरूपोऽसिभवोऽसिजलरूपधृत ॥ त्वमग्निरूपोरुद्रोऽसिवायुरस्युग्ररूपधृत् ॥ ६१ ॥ भीमोऽस्याकाशदेहस्त्वंयज्वापशुपतिः
स्वयम् ॥ महादेवःसोममूर्तिरीशानःसूर्यएवहि ॥ ६२ ॥ तवाष्टौमूर्त्तयोदिव्याइज्यन्तेवेदवादिभिः ॥ सर्वकामसमृद्ध्यर्थंव्याप्तलोकत्रयस्यच ॥६३॥
मत्स्यस्त्वंवेदधृक्चासिकूर्मश्चाद्रिधरोवरः ॥ धराधरोवराहोऽसिलोकधृत्त्वंत्रिविक्रमः ॥ ६४ ॥ ब्रह्मध्रुग्घ्नोभार्गवस्त्वंलोकध्रुग्घ्नोऽसिराघवः ॥ भूभार
हन्ताकृष्णोऽसिबुद्धोऽस्यसुरमोहकृत् ॥ ६५ ॥ कल्क्यसिम्लेच्छहन्तात्वंधर्मग्लानौयुगेयुगे ॥ देवासुरमनुष्याणांपशुपक्ष्यम्बुचारिणाम् ॥ ६६ ॥
नानाविधानांजीवानांत्वंस्रष्टाब्रह्मरूपधृत् ॥ इन्द्रोऽसिधर्मराजोऽसिवरुणस्त्वंधनेश्वरः ॥ ६७ ॥ लोकपालस्वरूपेणवर्त्तसेगोगणेश्वर ॥ त्रयीमूर्त्तिस्त्रि
कालेज्यस्त्रिधामात्रिगुणात्मकः ॥ ६८ ॥ त्वमेवपूज्यसेलोकैस्त्रिधाभिन्नोदिवाकरः ॥ पद्मप्रबोधनकरस्त्वमेवासिजगत्पते ॥ ६९ ॥ इत्युदीर्यद्विजश्रे
ष्ठायावत्तस्थुर्मुनीश्वर ॥ तावदाकाशगःप्राहस्फुटंतेषांतुशृण्वताम् ॥ ७० ॥ श्रीसूर्यउवाच ॥ श्रूयतांभोद्विजश्रेष्ठायदर्थंवर्णितोऽस्म्यहम् ॥ भवद्भिर्धु
न्धुलीसूनोर्महापातकशान्तये ॥ ७१ ॥ आत्मदेवस्यपुण्येनगोकर्णोरौहिणोह्ययम् ॥ श्रीभागवतसप्ताहंकृत्वोद्धर्ताभविष्यति ॥ ७२ ॥ यद्भवद्भिः
कृतंस्तोत्रंममवैभववर्णनम् ॥ तेनस्तुत्वानरोविप्रादेवयानंलभिष्यते ॥ ७३ ॥ पुत्रार्थीचधनार्थीचधर्मार्थीमोक्षकामुकः ॥ वाञ्छाचि
न्तामणिस्तोत्रंपठित्वात्यन्तमाप्नुयाम् ॥ ७४ ॥ इत्युक्त्वाभास्करोदेवोविररामदिविस्थितः ॥ तेद्विजाःसाध्वितिप्रोचुर्गोकर्णंहृष्टमानसाः ॥७५ ॥
ततःसमाजेविप्राणांतुङ्गभद्रातटेशुभे ॥ कौतुकंसुमहद्द्रष्टुंतत्रागान्नागरीप्रजा ॥ ७६ ॥ गोकर्णोज्ञाततत्त्वार्थोवक्ताध्यासनमास्थितः ॥ नारायणादिका

CC-0. In Public Domain. Digitization by eGangotri

न्नत्वासप्ताहंसमवर्त्तयत् ॥ ७७ ॥ श्रीहरेस्तुवचःशास्त्रंतीर्थंपादाब्जसंभवम् ॥ यदिसत्यंतदाप्नोतुधुन्धुलीतनयोगतिम् ॥ ७८ ॥ इतिसंकल्प्यमनसाश्री
मद्भागवताभिधम् ॥ जन्माद्यस्ययतश्चेतिधीमद्यन्तमुपावदत् ॥ ७९ ॥ ॥ तत्रप्रेतःसमागत्यस्थानंपश्यन्नितस्ततः ॥ सप्तग्रन्थियुतंवंशंप्रविष्टोवातरूप
धृत् ॥८०॥ शृण्वत्सुवैष्णवाग्र्येषुब्राह्मणेष्वथनारद ॥ शुश्रावधुन्धुलीपुत्रोग्रन्थिच्छिद्रस्थितोऽन्वहम् ॥८१ ॥यदाकथाविरामोऽभूत्प्रथमेऽहनिनार॥
तदैकाकीचकग्रन्थिःपुस्फोटात्यद्भुतंह्यभूत्॥८२॥द्वितीयादिष्वहःस्वेवमेकैकग्रन्थिभेदनम् ॥ बभूवसप्तमेभिन्नेससद्यःप्रेततांजहौ ॥ ८३ ॥ दिव्यरूपधरो
भूत्वातुलसीदाममण्डितः॥पीतवासाघनश्यामःप्रबभौभूषणान्वितः ॥८४॥ गोकर्णंभ्रातरंनत्वाप्रोवाचाखिलतत्त्वदृक्॥ त्वयाहंमोचितोबन्धोकृपयाप्रेत
कश्मलात् ॥८५॥ धन्याभागवतीवार्ताप्रेतत्वोन्मूलिनीश्रुता ॥ सप्ताहोऽपितथाधन्योविष्णुलोकगतिप्रदः ॥८६॥यत्प्रभावाद्विमुक्तोऽहंप्रेतभावाद्भृशा
तुरः ॥ आर्द्रंशुष्कंलघुस्थूलंवाङ्मनःकर्मभिःकृतम् ॥८७॥पातकंभस्मसात्कुर्यात्सप्ताहोऽग्निरिवेन्धनम्॥ अस्मिन्वैभारतेवर्षेदेवानामप्यभीप्सिते ॥८८॥
शृण्वतांभगवच्छास्त्रंगतिरत्युत्तमाभवेत् ॥ स्नाय्वस्थिमज्जामांसासृक्सङ्घातंदेहमुच्यते ॥ ८९ ॥ शुचिभागवतास्वादादशुचित्वन्यथामतम् ॥ कर्मक
श्मलसंदुष्टोदेहोनरकभाजनम् ॥ ९० ॥ अतोदोषनिवृत्त्यर्थमेतदेवहिसाधनम् ॥ बुद्बुदाइवतोयेषुमशकाइवजन्तुषु ॥ ९१ ॥ जायन्तेमरणायैव
भगवच्छास्त्रवर्जिताः ॥ भिद्यतेहृदयग्रन्थिश्छिद्यन्तेसर्वसंशयाः ॥ ९२ ॥ क्षीयन्तेचास्यकर्माणिश्रुतेभागवतेद्विजाः ॥ एवंब्रुवतिवैतस्मिन्विमान
वरमागतम् ॥ ९३ ॥ वैकुण्ठात्तदधिष्ठायगतोऽसौविष्णुमन्दिरम् ॥ विष्णुलोकंगतेतस्मिन्सर्वेविस्मितमानसाः ॥ बभूवुश्चापिपप्रच्छुर्गोकर्णंतेद्विजो
त्तमाः ॥ ९४ ॥ द्विजाऊचुः ॥ श्रुतंभागवतंसर्वैरस्माभिरिहसंगतैः ॥ किंकारणंमहाभागत्वद्भ्रातैकोगतोहरिम् ॥ ९५ ॥ गोकर्णउवाच ॥
श्रूयताममिधास्यामिकारणंभ्रातृसद्गतौ ॥ यच्छ्रुत्वायूयमेवापिगोलोकंचगमिष्यथ ॥ ९६ ॥ सप्ताहश्रावणंकार्यमुपवासपरायणैः ॥ कृष्णैकतानमति
भिर्गोलोकगतिदायकम् ॥ ९७ ॥ पुनःशृणुध्वंसप्ताहश्रीमद्भागवतंद्विजाः ॥ एकाग्रचित्ताःसततंकृष्णप्रेमामृतप्रदम् ॥ ९८ ॥ इतिश्रुत्वावचस्तस्य
गोकर्णस्यद्विजोत्तमाः ॥ पुनःश्रोतुंभागवतंसप्ताहंसमुपावसन् ॥९९॥ कृष्णैकतानमतयोनियमेनचनारद ॥ पुनस्तेशुश्रुवुःसर्वेश्रीमद्भागवतंद्विजाः ॥
॥ १०० ॥कथावसानेभगवान्कृष्णःकमललोचनः ॥ आविरासीन्मुनिश्रेष्ठशङ्खचक्रगदाब्जधृत् ॥ १ ॥ किरीटकुण्डलधरोवनमालाविभूषितः ॥ पीत
वासाघनश्यामःकटकाङ्गदभूषितः ॥ २ ॥ तंदृष्ट्वातेद्विजाःसर्वेविष्वक्सेनादिभिर्युतम् ॥ पार्षदप्रवरैर्हृष्टाःप्रणेमुर्भुविसंगताः ॥३ ॥ जयशब्दोनमःशब्द
स्तदासीत्सर्वतोमुने ॥ अथशङ्खध्वनिंचक्रेहरिःसंहर्षयन्द्विजान् ॥४ ॥ तदानेकेविमानास्तुवैकुण्ठात्समुपागताः ॥ द्विजानांपश्यतांतत्रपार्षदप्रवरैर्युताः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ५ ॥ गोकर्णंतुसमालिङ्ग्यददौसारूप्यमात्मनः ॥ श्रोतॄनन्यान्घनश्यामान्पीतकौशेयवाससः ॥ ६ ॥ किरीटिनःकुण्डलिनोहारिणोवनमालिनः॥
चकारतत्क्षणात्तत्रमहदाश्चर्यमप्यभूत् ॥ ७ ॥ तस्मिन्ग्रामेस्थितायेतुआचाण्डालजनामुने ॥ समारुह्यविमानांस्तान्ययुःकृष्णाज्ञयादिवम् ॥ ८ ॥
गोकर्णसहितःकृष्णोगोपगोपीजनप्रियः ॥ गोलोकंसमनुप्राप्तःसर्वलोकोपरिस्थितम् ॥ यत्रवृन्दावनंरम्यंशतशृङ्गसमावृतम् ॥ ९॥ तद्वाह्येपरितोवृतं
विजययाह्यत्यद्भुतंराजतेरऽण्यंयत्रतुमण्डपानिसुबहून्यच्छोदवाप्योह्रदाः ॥ गावःकामदुघाःसुरद्रुमतलिच्छायाश्रितागोपकैःक्रीडातत्परमानसैःपरि
वृतोनन्दात्मजःक्रीडति॥ ११० ॥ मध्येत्वस्यसुकाननस्यरचितोवृन्दावनेशेच्छयारम्यंरत्नसमूहभर्मखचितंप्राकारमुद्भासयन् ॥ न्यग्रोधःसुमहांस्ततः
प्रतिदिशंगोपीजनाध्यासितंवत्सालंकृतमद्भुताकृतिमहच्छ्रीगोकुलंराजते॥११॥ तन्मध्येभवनंहरेरधिकृतंप्रोद्भासतेभास्वरंयस्मिन्नन्दगृहेश्वरीसमुदिता
स्तेराधयाराधिताः ॥ यद्भाग्यंमहदप्युमापतिमुखैश्चिन्त्यंसदाभ्यन्तरैस्तत्सूनोर्मधुराकृतेरधिचकास्त्यण्डौघभास्यांशुभिः ॥१२ ॥ वाताम्बुपर्णाशन
देहशोषणैस्तपोभिरुग्रैर्जपयज्ञकर्मभिः ॥ योगैश्चसंयान्तिनरानतांगतिंसप्ताहगाथाश्रवणेनयान्तियाम्॥१३॥ इतिहासमिमंपुण्यंयःपठेच्छृणुयादपि ॥
सोऽपिगोलोकमभ्येतिकिंश्रीभागवतंपुनः॥१४॥इतिहासमिमंपुण्यंशाण्डिल्योऽपिमुनीश्वरः ॥ पठतेचित्रकूटस्थोब्रह्मानन्दपरिप्लुतः॥१५॥ आख्यान
मेतत्परमंपवित्रंश्रुतंसकृद्वैविदहेदघौघम्॥श्राद्धेप्रयुक्तंपितृतृप्तिमावहेन्नित्यंसुपाठादपुनर्भवंच॥११६॥ इतिश्रीपाद्मेमहा॰पञ्चप॰उत्तर॰भागवतमाहात्म्ये
सप्तनवत्यधिकशततमोऽध्यायः ॥ १९७ ॥ कुमाराऊचुः ॥अथतेसंप्रवक्ष्यामःसप्ताहश्रवणेविधिम्॥येनभागवतंसिद्ध्येत्पुंसांकृष्णार्पितात्मनाम्॥१॥
दैवज्ञंशास्त्रकुशलंसमाहूयधनांशुकैः ॥ समभ्यर्च्यमुहूर्तंतुप्राक्पृच्छेद्भक्तिमान्नरः ॥२॥सवदेद्यंमुहूर्तंतुतत्रारम्भःप्रशस्यते॥नभोनभस्येषोर्जाश्चसहःशुचि
समन्विताः ॥ ३ ॥ मासाःश्रेष्ठाःकथारम्भेपूर्णाचापितिथिःशुभा ॥ भौमार्कित्रर्जितावाराभानिध्रुवमृदूनिच ॥ ४ ॥शुभेयोगेशुभेलग्नेप्रारम्भःशस्यते
सदा ॥ नित्यायांचकथायांतुपुराणानांमुनीश्वर ॥ ५ ॥ द्वादशींवर्जयेत्प्राज्ञःसूतसूतकसंभवात् ॥ श्रीमद्भागवतस्यापिसप्ताहेनैत्यकेऽपिच ॥ ६ ॥ न
निषधोऽस्तिदेवर्षेप्राहुरेवंपुराविदः ॥ श्रीभागवतसप्ताहोमहायज्ञःस्मृतोबुधैः॥७॥ अतोनिमन्त्रणंकार्यंवैष्णवानांसमन्ततः॥सतांसमाजोभवितासप्ताहं
वैष्णवोत्तमाः ॥८॥ आगन्तव्यमतश्चात्रवैष्णवैःश्रवणार्थिभिः ॥ समागतानांतेषांतुनिवासंपरिकल्पयेत्॥९॥ तीर्थेवापिवनेवापिग्रामेवापिप्रयत्नतः॥
संशोधितायांभूम्यांतुमण्डपंपरिकल्पयेत् ॥ १० ॥ कदलीस्तम्भसंयुक्तंचतुर्दिक्षुध्वजान्वितम् ॥ उच्चमासनप्युक्तंवक्तुस्तस्याग्रतोमुने ॥ ११ ॥
आपार्श्वद्वयमुक्तानिश्रोतॄणामासनानिच ॥ उदङ्मुखोभवेद्वक्तासमाजेऽस्मिन्विदांवरः ॥ १२ ॥ वेदशास्त्रार्थतत्त्वज्ञोवैष्णवोब्राह्मणोत्तमः ॥

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

दृष्टान्तकुशलोधीरोवक्ताकार्योऽतिनिस्पृहः ॥ १३ ॥ सर्वसंदेहहर्त्तापिकार्योवक्तासदैवहि ॥ वक्तःपार्श्वेसहायार्थंस्थाप्योऽन्यःपण्डितःसुधीः
॥ १४ ॥ श्रोतॄणांसंशयच्छेत्तालोकबोधविधायकः ॥ कथाविघ्नविघातार्थंगणेशंप्राक्प्रपूजयेत् ॥ १५ ॥ ततोदुर्गांहरंविष्णुंब्रह्माणंभास्करंद्वि
जान् ॥ संपूज्यविधिवद्भक्त्यातर्पयेद्देवताःपितॄन् ॥१६ ॥ मुख्यःश्रोताततःपश्चात्पूजयेत्पुस्तकेहरिम् ॥ ततःप्रदक्षिणीकृत्यद्रव्यवस्त्रफलानिच॥१७॥
धृत्वाञ्जलौपुस्तकस्थंहरिंसंप्रार्थयेन्मुने ॥ त्वंभागवतलोकेऽस्मिन्स्वयंकृष्णोव्यवस्थितः ॥१८॥ समाश्रितोमयानाथमुक्त्यर्थंभवसागरे ॥ मनोरथो
मदीयोऽयंसर्वथासफलस्त्वया ॥ १९ ॥ निर्विघ्नेनप्रकर्तव्योदासोऽहंतवकेशव॥इत्युच्चार्यमुनेद्रव्यंपुस्तकाग्रेसमर्प्यतु ॥ २० ॥ वक्तारंप्रार्थयेच्चापिनम
स्कुर्वन्कृताञ्जलिः ॥ शुकरूपद्विजश्रेष्ठसर्वशास्त्रविशारद ॥ २१ ॥ श्रीभागवतव्याख्यानादज्ञानंमेविनाशय ॥ इतिसंप्रार्थ्यवक्तारंवरयेत्पञ्चवाडवान्
॥ २२ ॥ द्वादशाक्षरमन्त्रस्यजपार्थंमुनिसत्तम ॥ गीतवाद्यविधिज्ञांश्चसंपूज्यार्थांशुकादिभिः ॥ २३ ॥ स्थापयेत्कीर्तनार्थंतुकथान्तेविधिवन्मुने ॥
यस्तुजायाधनागारपुत्रचिन्तांव्युदस्यच ॥ २४ ॥ शृणुयादेकचित्तस्तुससमग्रंफलंलभेत् ॥ सूर्योदयंसमारभ्यसार्द्धत्रिप्रहरान्तकम् ॥ २५ ॥ पठि
त्वार्थःप्रकर्त्तव्योवाक्यमध्यायमेववा ॥ मध्याह्नेघटिकायुग्मंविरमेदपिनारद ॥ २६ ॥ कथावसानेकर्त्तव्यंकीर्तनंकेशवस्यच ॥ उपवासः
प्रकर्त्तव्यःश्रोतृभिस्तत्फलेप्सुभिः ॥ २७ ॥ तदशक्तोहविष्यान्नंसकृत्स्वल्पंसमाहरेत् ॥ जलेनापिफलेनापिदुग्धेनचघृतेनवा ॥ २८ ॥
केवलेनैवकर्त्तव्यंनिर्विघ्नंधारणंतनोः ॥ सप्ताहव्रतिनांपुंसांनियमाञ्छृणुनारद ॥ २९ ॥ विष्णुदीक्षाविहीनानांनाधिकारोऽत्रकीर्तितः ॥ ३० ॥ ब्रह्मचर्य
मधःसुप्तिःपत्रावल्यांचभोजनम् ॥ समाचरेन्नित्यमेवसप्ताहेमुनिसत्तम ॥ ३१ ॥ द्विदलंमधुतैलंचपरान्नंचेक्षुजंरसम् ॥ भावदुष्टंक्रियादुष्टंजह्यात्पर्युषितं
व्रती ॥ ३२ ॥ पलाण्डुंलशुनंहिङ्गुंमूलकंगृञ्जनंतथा ॥ नालिकांचैवकूष्माण्डंनरोनाद्यात्कथाव्रती ॥ ३३ ॥ कामंक्रोधंमदंलोभंदम्भंमात्सर्यमेवच॥
मोहंद्वेषंतथाहिंसांनैवकुर्यात्कथाव्रती ॥ ३४ ॥ वेदवैष्णवविप्राणांगुरुगोव्रतिनांतथा ॥ स्त्रीराजमहतांचापिनिन्दांजह्यात्कथाव्रती ॥ ३५ ॥ सत्यं
शौचंदयांमौनमार्जवंविनयंतथा ॥ मनःप्रसन्नतांचापिबुधःकुर्यात्कथाव्रती ॥ ३६ ॥ श्रीकामस्तनयार्थीचजयकामश्चमोक्षधीः ॥ शृणुयाद्वैभागवतं
निष्कामःश्रीहरिंलभेत् ॥ ३७ ॥ सप्तमेदिवसेकुर्याल्लङ्घनंतत्समाप्तिके ॥ वक्तुश्चपूजाकर्त्तव्यागोभूस्वर्णाम्बरादिभिः ॥ ३८ ॥ प्रसादतुलसींमालां
श्रोतृभ्यःप्रतिदापयेत् ॥ उत्सवश्चतथाकार्योगीतवाद्यविशारदैः ॥ ३९ ॥ गीतार्थंशृणुयाच्चापिपरेऽहनिविचक्षणः ॥ प्रतिश्लोकंचजुहुयाद्गायत्र्यावा
यथाविधि ॥ ४० ॥ पायसंमधुसर्पिश्चतिलांस्तण्डुलकान्यवान् ॥ शर्करांचप्रियालंचद्राक्षांवातामखर्जुरौ ॥ ४१॥ अम्भोजानिचकर्पूरंचन्दनागुरुणी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुरम् ॥ लवङ्गंबिल्वपत्राणिसहस्रंचपृथक्पृथक् ॥ ४२ ॥ विघ्नस्यचविघातार्थंन्यूनाधिक्यनिवृत्तये ॥ आत्मनःपूततार्थंचपठेन्नामसहस्रकम् ॥ ४३ ॥
द्वादशाष्टादशाथापिश्रद्धयाह्यधिकांस्तथा ॥ पायसेनाशयेद्विप्रान्स्वर्णधेनुश्चदक्षिणा ॥ ४४ ॥ व्रतसिद्ध्यर्थमप्यत्रप्रौष्ठपद्यामथापिवा ॥ स्वर्णसिंहंवि
निर्मायतस्यपृष्ठेनिधायच ॥ ४५ ॥ श्रीमद्भागवतंवक्रेलेखयित्वासमर्पयेत् ॥ एवंकृतेविधानेतुसर्वपापनिवारणम् ॥४६॥ भवेच्छ्रोतुःसुफलदंश्रीमद्भा
गवतंश्रुतम् ॥ धर्मकामार्थमोक्षाणांसाधनंभक्तिदायकम् ॥ ४७ ॥ नकार्यंविद्यतेलोकेयदनेननसिध्यति ॥ ततोभागवतंलोकेपुराणेभ्योऽधिकंमतम् ॥
॥ ४८ ॥ दोषाष्टादशनिर्मुक्तोवाचकःपरिकीर्तितः ॥ द्वात्रिंशदपराधैर्हिमुक्तःश्रोतामतोबुधैः ॥ ४९ ॥ श्रीमद्भागवतंनामपुराणंकामदंनृणाम् ॥ तथापि
श्रवणंचास्यनिष्कामस्यैवभक्तिदम् ॥५० ॥ श्रीमद्भागवताभिधःसुरतरुस्ताराङ्कुरःसज्जनिःस्कन्धैर्द्वादशभिस्ततःप्रविलसद्भक्त्यालवालोदयः ॥ द्वात्रिं
शत्त्रिशतंचयस्यविलसच्छाखाःसहस्राण्यलंपर्णान्यष्टदशेष्टदोऽतिसुलभोवर्वर्तिसर्वोपरि ॥ ५१ ॥ इतितेकथितंसर्वंकृतंचापितवेप्सितम् ॥ ज्ञानवैराग्य
भक्तीनांतारुण्यंलोकमोक्षदम् ॥ ५२ ॥ सूतउवाच ॥ इत्युक्त्वातेकुमारास्तुकृष्णाङ्घ्रिसुधयाप्लुताः ॥ विरेमुर्भगवद्भक्तादीनोद्धरणतत्पराः ॥ ५३ ॥
तद्वाक्यंतुसमाकर्ण्यनारदोभगवत्प्रियः ॥ प्रेमगद्गदयावाचातानुवाचकृताञ्जलिः ॥५४॥नारदउवाच ॥ धन्योऽस्म्यनुगृहीतोऽस्मिभवद्भिःकरुणापरैः॥
यद्भागवतसप्ताहान्निकटेदार्शितोहरिः ॥ ५५ ॥ श्रवणंसर्वधर्मेभ्योवरंमन्येतपोधनाः ॥ वैकुण्ठस्थोयतःकृष्णःश्रवणाद्यस्यलभ्यते ॥ ५६ ॥ सूत
उवाच॥ एवंब्रुवतिवैतस्मिन्नारदेवैष्णवोत्तमे॥ पर्यटंस्तंसमायातस्तत्रयोगेश्वरःशुकः॥ ५७॥द्विरष्टवर्षाकृतिरम्बुजाक्षोव्यासात्मजोज्ञानपयोधिचन्द्रः ॥
कथावसानेनिजलाभतुष्टोहृदानिशंभागवतंपठंश्च ॥ ५८ ॥ दृष्ट्वासदस्यास्तमथोरुतेजसंसद्यःसमुत्थायवरासनंददुः ॥ सचोपविष्टःसुखमासनेयदा
तदाविरासीद्धरिरब्जलोचनः ॥ ५९ ॥ भवोभवान्याकमलासनःसुतैस्तत्रागतःकीर्तनदर्शनायच ॥ सुरेशमुख्यास्त्रिदशाविमानकैःसमागतास्तैरभव
द्वृतंनभः ॥ ६० ॥ प्रह्लादस्तालधारीतरलगतितयाह्युद्धवःकांस्यधारीवीणाधारीसुरर्षिःस्वरकुशलतयारागकर्तार्जुनोऽभूत् ॥ इन्द्रोमार्दङ्गिकोऽभूज्जय
जयसुवचःप्रावदंस्तेकुमाराःसद्भावस्यप्रवक्तानिरतिशयगुणोव्यासपुत्रोबभूव॥६१ ॥ ननर्त्तमध्येत्रिकमेवतत्रज्ञानादिकानांनवरूपयुक्तम् ॥ अलौकिकं
कीर्त्तनकंसमीक्ष्यप्रसन्नचेताहरिरित्युवाच ॥ ६२ ॥ मत्तोवरंभागवतावृणीध्वंप्रीतात्कथाकीर्तनतोभृशंवः ॥ श्रुत्वाथतद्वाक्यमतिप्रसन्नाःप्रेमार्द्रचित्ता
हरिमूचिरेते ॥ ६३ ॥ कुमाराऊचुः ॥ सप्ताहयज्ञेनभक्त्याकृतेनसद्यःप्रसन्नोभवितामुरारे ॥ कलौयुगेघोरतरेनराणांस्वल्पायुषांविघ्नशताकुलानाम् ॥
॥ ६४ ॥ एवंवरंविश्वविधानपालनप्रणाशहेतोर्भवतोऽखिलात्मनः ॥ वृणीमहेऽन्योनमनोरथोविभोभवत्पदाम्भोजनिषेविणांहिनः ॥ ६५ ॥ एव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मस्त्विवतिचैवोक्त्वातत्रैवान्तर्दधेहरिः ॥ नारदःसुप्रसन्नात्माकुमारानभ्यवादयत् ॥६६॥ ततस्तेसनकाद्याश्चभृग्वाद्याश्चशुकादयः ॥ प्रययुःस्वाश्रमा
न्हृष्टाःपीत्वातत्त्वकथामृतम् ॥ ६७ ॥ भक्तिःसुताभ्यांसहितानारदेनप्रवार्तिता ॥ भूमण्डलेसमस्तेऽस्मिंस्तदाप्रभृतिशौनक ॥ ६८ ॥ शिवउवाच ॥
आख्यानंमहदाकर्ण्यप्रीतात्माशौनकःप्रिये॥पर्यपृच्छत्पुनःसूतंसर्वसंदेहभञ्जनम्॥६९॥ शौनकउवाच ॥ शुकेनोक्तंकदाराज्ञेगोकर्णेनकदापुनः॥ सुरर्षये
कदाब्राह्मैरेतदाख्याहिमानद ॥ ७० ॥ सूतउवाच ॥ श्रीकृष्णनिर्गमात्त्रिंशद्वर्षाधिगतेकलौ ॥ भाद्रशुक्लनवम्यांवैकथारम्भंशुकोऽकरोत् ॥७१॥
परीक्षिच्छ्रवणान्तेतुगतेवर्षशतद्वये ॥ शुचिशुक्लनवम्यांतुगोकर्णोऽकथयत्कथाम् ॥ ७२ ॥ तस्मादपिकलौयातेत्रिशतेसषडब्दके ॥ ऊचुरूर्जेसिते
पक्षेनवम्यांब्रह्मणस्सुताः ॥ ७३ ॥ कलौसहस्रमब्दानामधुनाप्रगतंद्विज ॥ परीक्षितोजन्मकालात्समाप्तिंनीयतांमखः ॥ ७४ ॥ ईश्वरउवाच ॥ इति
श्रुत्वावचस्तस्यशौनकोमुनिसत्तमः ॥ पूर्णंचकारतंयज्ञंसहस्रपरिवत्सरम् ॥ ७५ ॥ ब्राह्मंपाद्मंवैष्णवंचकौर्म्मंमात्स्यंचवामनम् ॥ वाराहंब्रह्मवै
वर्त्तंनारदीयंभविष्यकम् ॥ ७६ ॥ आग्नेयमर्द्धंवैसूताच्छुश्रुवुर्लोमहर्षणात् ॥ एतानितुपुराणानिद्वापरान्तेश्रुतानिहि ॥ ७७ ॥ शौनकाद्यैर्मुनिवरैर्य
ज्ञारम्भात्पुरैवहि ॥ यदातुतीर्थयात्रायांबलदेवःसमागतः ॥ ७८ ॥ नैमिषंमिश्रिकंनामसमाहूतोमुनीश्वरैः ॥ तत्रसूतंसमासीनंदृष्ट्वात्वध्यासनो
परि ॥ ७९ ॥ चुक्षुभेभगवान्रामःपर्वणीवमहोदधिः ॥ आषाढशुक्लद्वादश्यांपारणाहनिपार्वति ॥ ८० ॥ पूर्वार्द्धयामवेलायांभावित्वात्कृष्णमा
यया ॥ मुग्धोदर्भकरोरामःप्राहरल्लोमहर्षणम् ॥ ८१ ॥ ततोमुनिगणाःसर्वेहाहाकारपरायणाः ॥ बभूवुर्नगजेऽत्यर्थंशोकदुःखाकुलान्तराः ॥ ऊचुश्च
रामंलोकेशंविनयेनक्षमापराः ॥ ८२ ॥ ऋषयऊचुः ॥ रामरासमहाबाहोभवतालोककारिणा ॥ अजानतेवाचरिताहिंसाब्रह्मवधाधिका ॥ ८३ ॥
व्यासशिष्योह्ययंसाक्षात्पुराणर्षिर्महातपाः ॥ अस्मैह्यध्यासनंदत्तमस्माभिर्यज्ञकर्मणि ॥ ८४ ॥ अष्टादशपुराणानांवाचकायकृतक्षणैः ॥ कथायांजग

१ 'इत आरभ्याध्ययासमाप्तिपर्यन्तं श्लोकाः पुण्यपत्तनपुस्तके न सन्ति । एतत्स्थानेऽधोलिखिताः श्लोकास्सन्ति ।
(इत्येतत्ते समाख्यातं यत्पृष्टोऽहं त्वयानघे ॥ कलौ भागवती वार्ता भवरोगविनाशिनी ॥ १ ॥ कृष्णप्रियं सकलकल्मषनाशनं च मुक्त्येकहेतुमिह भक्तिविलासकारि ॥ सन्तः कथानकमिदं पिबतादरेण लोके हितार्थपरिशीलनसेवया किम् ॥ २ ॥ स्वपुरुषमभिवीक्ष्य पाशहस्तं वदति यमः किल तस्य कर्णमूले ॥ परिहर भगवत्कथासुमत्तान्प्रभुरहमन्यनृणां न वैष्णवानाम् ॥ ३ ॥ असारे संसारे विषयविषसंगाकुलधियः क्षणार्धं मोक्षार्थं पिबत शुकगाथातुलसुधाम् ॥ किमर्थं व्यर्थं भो व्रजत कुपथे कुत्सितपथे परीक्षित्साक्षी यच्छ्रवणगतमुक्त्युक्तिकथने ॥ ४ ॥ रसप्रवाहसंस्थेन श्रीशुकेनेरिता कथा ॥ कण्ठे सम्बध्यते येन स वैकुण्ठप्रभुर्भवेत् ॥ ५ ॥ इति च परमगुह्यं सर्वसिद्धान्तसिद्धं सपदि निगदितं ते शास्त्रपुञ्जं विलोड्य ॥ जगति शुककथातो निर्मलं नास्ति किंचित्पिब परसुखहेतोर्द्वादशस्कन्धसारम् ॥ ६ ॥ एनां यो नियततया शृणोति भक्त्या यश्चैनां कथयति शुद्धवैष्णवाग्रे ॥ तौ सम्यग्विधकरणात्फलं लभेते याथार्थ्यान्नहि भुवने किमप्यसाध्यम् ॥७॥

CC-0. In Public Domain. Digitization by eGangotri

दीशस्यदीर्घमायुश्चमानद ॥ ८५ ॥ तद्भवाँल्लोकरक्षार्थंधर्मसेतुप्रवर्तकः ॥ आविर्भूतोजगन्नाथोनिग्रहानुग्रहक्षमः ॥ ८६ ॥ इत्युक्त्वामुनयस्तेतुबल
देवाग्रतःप्रिये ॥ तूष्णींबभूवुःसहसास्मरन्तोनियतेर्बलम् ॥ ८७॥ ततःप्रोवाचभगवान्रामःशत्रुनिषूदनः ॥ विप्रान्संप्रीणयंस्तांस्तुलोकवेदपथानुगः॥
॥ ८८ ॥ श्रीरामउवाच ॥ विप्राःशृणुतभद्रंवःकोपंत्यक्त्वासुदूरतः ॥ यदहंवेद्मिभवतामभीष्टंकार्यसिद्धिदम् ॥ ८९ ॥ अस्यपुत्रोमहाज्ञानीभविष्यति
वरान्मम ॥ भवतामीप्सितंसर्वंशास्त्रंवैकथयिष्यति ॥ यदर्थमहमाहूतस्तच्चकार्यंसमुच्यताम् ॥ ९० ॥ ईश्वरउवाच ॥ इतिश्रुत्वावचस्तेतुरामस्यसुम
हात्मनः ॥ बल्वलस्यवधार्थायप्रेरयामासुरीश्वरम् ॥ ९१ ॥ ततःसबल्वलंहत्वाप्रसाद्यमुनिपुङ्गवान् ॥ प्रणिपत्याभ्यनुज्ञातस्तीर्थयात्रामुपागमत् ॥
॥ ९२ ॥ तीर्थयात्रांगतेरामेशौनकाद्यामुनीश्वराः ॥ लौमहर्षणिमाहूयसत्कृत्यनगनन्दिनि ॥ ९३ ॥ तत्पदेस्थापयामासुःशेषसंकीर्तनायवै ॥ आग्ने
योत्तरमाहात्म्यंश्रीमद्भागवतान्तकम् ॥९४॥ पुराणंसततंकंसार्द्धंशुश्रुवुर्हृष्टमानसाः॥ दशसप्तपुराणानिकृत्वासत्यवतीसुतः ॥९५॥ नाप्तवान्मनसस्तोषं
भारतेनापिभामिनि ॥ ज्ञात्वास्यहृदयंखिन्नंनारदोदेवदर्शनः ॥ ९६ ॥ समाजगामभगवान्व्यासस्याश्रममुत्तमम् ॥ तंदृष्ट्वावासवीसूनुःसत्कृत्यासन
पूर्वकम् ॥ ९७ ॥ नारदंपूजयामासविधिदृष्टेनकर्मणा ॥ अथतंनारदःप्राहकिंभवान्क्लिष्टमानसः ॥ ९८ ॥ ध्यायतेतत्समाचक्ष्वसर्वंसंदेहकारणम् ॥
इतिपृष्टःसमुनिनापराशरसुतोऽब्रवीत् ॥ ९९ ॥ ब्रह्मन्किंकारणंचेतोमोहेजानेनतत्त्वहम् ॥ भवान्विज्ञानकुशलोज्ञात्वातत्प्रब्रवीतुमे ॥१००॥ एवंविज्ञा
पितस्तेननारदोऽध्यात्मकोविदः ॥ उवाचपरमंतत्त्वंयदुक्तंविधिनात्मने ॥ १ ॥ नारदउवाच ॥ शृणुपाराशरेमत्तःकारणंयेनवैतव ॥ असंपन्नं
मनोभातिशास्त्रयोनेरपिप्रभोः ॥ २ ॥ त्वयावतीर्यलोकेऽस्मिन्वेदाव्यस्ताविभागशः ॥ कृतानिचपुराणानिसेतिहासानिचानघ ॥ ३ ॥ यत्रसर्वस्त्रयी
धर्मोवर्णाश्रमनिवासिनाम् ॥ निर्दिष्टोवीक्ष्यकालेननृणामल्पायुषांकलौ ॥४ ॥ यत्राधिकारःसर्वेषांदृश्यतेश्रवणादिषु ॥ स्त्रीशूद्रद्विजबन्धूनांसाधुसंगम
शालिना ॥ ५ ॥ धर्मादयोयथाशश्वद्वर्णितास्तेषुवैत्वया ॥ प्राधान्येनतथानैववर्णितोमहिमाहरेः ॥ ६ ॥ सर्वधर्मक्रियाशून्येकलौदोषनिधौमुने ॥
नगतिःपापकर्तॄणांविनाकृष्णकथामृतम् ॥ ७ ॥ एषएवगुणोह्यस्मिन्घोरेकलियुगेनराः ॥ यत्कृष्णकीर्तनेनैवमुच्यन्तेकर्मबन्धनात् ॥ ८ ॥ यज्ञो
दानंतपःकर्मज्ञानंध्यानंकृतादिषु ॥ सिद्धिदंचतथाब्रह्मन्नामकीर्त्तनकंकलौ ॥ ९ ॥ अतोवैकलिजातानामुद्धारार्थंनृणांभवान् ॥ श्रीमद्भागवतंनाम
पुराणंवर्णयत्वलम् ॥ ११० ॥ येनप्रवर्तितेनाङ्गभवतोमानसंध्रुवम् ॥ तोषमेष्यतिलोकाश्चप्राप्स्यन्तिकृतकृत्यताम् ॥ ११ ॥ ईश्वरउवाच ॥ एवम
दिश्यसमुनिर्व्यासायामिततेजसे ॥ ययौयादृच्छिकःशश्वद्गायन्हरिगुणान्प्रिये ॥ १२ ॥ नारदेतुगतेपश्चाद्व्यासःसर्वार्थदर्शनः ॥ चकारसंहितामेत

CC-0. In Public Domain. Digitization by eGangotri

श्रीमद्भागवतींपराम् ॥ १३ ॥ पैलादींश्चतुरोवेदानध्याप्यविधिपूर्वकम् ॥ पुराणसंहिताःसर्वाःसूतायप्रत्यपादयत् ॥१४॥ श्रीमद्भागवतंनामपुराणंब्रह्म
संमितम् ॥ शुकमध्यापयामासविरतंलोकवेदतः ॥ १५ ॥ सासंहिताभागवतीलोमहर्षणसूनुना ॥ श्रुताकथयतोराज्ञेऔत्तरेयायवैशुकात् ॥ १६ ॥
शौनकादिऋषिभ्यस्तुतेनप्रोक्तायथार्थतः ॥ वरीवर्त्तिपुराणानामुपरीयंनगात्मजे ॥ १७ ॥ अस्यांसंलग्नचित्तानांनृणामन्यत्रनोरतिः ॥ जायतेमानसे
कृष्णोनन्दसूनुश्चकास्तिच ॥ १८ ॥ यत्तुपृष्टंत्वयाभद्रेलोकनिस्तारहेतवे ॥ श्रीभागवतमाहात्म्यंमह्यंसंकीर्त्तयेतिह ॥ १९ ॥ तत्सर्वंचमयातुभ्यं
निर्दिष्टंगणपाम्बिके ॥ नानेतिहाससहितंभक्तिमुक्तिप्रदायकम् ॥ २० ॥ यःशृणोतिनरोभक्त्यामाहात्म्यंपठतेऽपिच ॥ अनुमोदनेनवासोऽपिलभते
परमांगतिम् ॥ २१ ॥ द्विजोऽधीत्याप्नुयाद्वेदान्क्षत्रियस्तुलभेज्जयम् ॥ धनंवैश्यस्तथाशूद्रःश्रुत्वैवलभतेगतिम् ॥ १२२ ॥ इतिश्रीपाद्मेमहापुराणे
पञ्चप०उत्तर०उमामहेश्वरसंवादेश्रीमद्भागवतमाहात्म्येऽष्टनवत्यधिकशततमोऽध्यायः ॥ १९८ ॥ ऋषयऊचुः ॥ कालिन्द्याश्चैवमाहात्म्यंवदसूतस
विस्तरम् ॥ यस्मैप्रकाशितंयेनतदाख्यानसमन्वितम् ॥ १ ॥ सूतउवाच ॥ एकदापाण्डुतनयःशुश्रूषुःसौभरेःशुभम् ॥ ज्ञानंतत्स्थानमभ्ये
त्यनत्वातमितिपृष्टवान् ॥ २ ॥ युधिष्ठिरउवाच ॥ ब्रह्मन्मार्तण्डतनयातीरतीर्थेषुयच्छुभम् ॥ तीर्थंतद्वदवैकुण्ठजन्मभूमिपुरात्परम् ॥ ३ ॥
सौभरिरुवाच ॥ एकदातुमुनिश्रेष्ठौदिविनारदपर्वतौ ॥ गच्छन्तौखाण्डववनंपश्यतःसुमनोहरम् ॥ ४ ॥ तत्रावतीर्णौनभसउपविष्टौतटेशुभे ॥
कालिन्द्याःक्षणविश्रान्तौस्नातुंविविशतुर्जले ॥ ५ ॥ शिबिरौशीनरोराजामृगयांतौचरन्वने ॥ दृष्ट्वातन्निर्गमापेक्षीनिषसादसरित्तटे ॥ ६ ॥ तौमुनीवि
धिवत्स्नात्वापरिधायाम्बराणिच ॥ वन्दितौशिरसाराज्ञातेनोपविशतांतटे॥७॥तत्रालोक्यसुवर्णस्यशिबिर्यूपान्सहस्रशः ॥ नारदंगर्वरहितःपर्वतंचज
गादसः ॥ ८ ॥ शिबिरुवाच ॥ कथ्यतांमुनिशार्दूलौकस्येमायागयष्टयः ॥ केनात्रविहितोयज्ञःसुरेणाथनरेणवा ॥ ९ ॥ मुक्ताकाश्या
दितीर्थानियज्ञैरीजेऽत्रकःपुमान् ॥ कोविशेषोऽत्रतीर्थेभ्यस्तेभ्योविज्ञानसन्निधिः ॥ १० ॥ नारदउवाच ॥ पुराहिरण्यकशिपुर्जित्वाशक्रादिदेवताः ॥
त्रैलोक्यराज्यमासाद्यसोऽखर्वंगर्वमाददे ॥ ११ ॥ प्रह्लादस्तस्यतनयोनारायणपरायणः ॥ तस्मैसोऽद्रुह्यताभीक्ष्णंपापात्मानष्टमङ्गलः
॥ १२ ॥ तद्द्रोहाद्विष्णुनासद्योनृसिंहतनुधारिणा ॥ हत्वादैत्यपतिंस्वर्गराज्यंस्वःपतयेऽर्पितम् ॥ १३ ॥ स्वपदंप्राप्यदेवेशोबृहस्पतिम
थावदत् ॥ मूर्ध्नाभिवन्द्यतत्पादौनारायणगुणान्स्मरन् ॥ १४ ॥ इन्द्रउवाच ॥ गुरोनृसिंहरूपेणहरिणालोकधारिणा ॥ दत्तंमेदेवताराज्यंयष्टु
मिच्छामितंमखैः ॥ १५ ॥ स्थानंपवित्रंकथयब्राह्मणांश्चैवमेगुरो ॥ नविधेयोविलम्बोऽत्रत्वयानोहितकारिणा ॥ १६ ॥ बृहस्पतिरुवाच ॥ अस्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेखाण्डववनंरम्यंपरमपावनम् ॥ केतक्यशोकबकुलमधुमत्तमधुव्रतम् ॥ १७ ॥ तत्रास्तियमुनापुण्याधन्यात्रैलोक्यपावनी ॥ ददातिस्मरणेस्वर्गंमर
णेब्रह्मणःपदम् ॥ १८ ॥ तत्तीरेयजदेवेशंकेशवंबहुभिर्मखैः ॥ यदीच्छसिस्वकीयानांकल्याणंत्वंनिरन्तरम् ॥ १९ ॥ नारदउवाच ॥ गुरोर्वचन
माकर्ण्यतूर्णमारुह्यवाहनम् ॥ शिवप्रदमिमंशक्रःस्वकीयवनमागतम् ॥ २० ॥ गुरुणासहदेवैश्चयज्ञोपकरणैस्तथा ॥ अत्रागत्यविलोक्यैतद्वनंलेभेमुदं
पराम् ॥ २१ ॥ गुरुणानोदितःशक्रोसप्तर्षीन्ब्रह्मणःसुतान् ॥ वसिष्ठादीन्द्विजान्वृत्वायजतिस्मजगत्पतिम् ॥२२॥ तस्यप्रसन्नोभगवान्ब्रह्मेशाभ्यांसहा
गतः ॥ क्रतौशतक्रतोर्यत्रमहानभवदुत्सवः ॥ २३ ॥ देवत्रयींसतांवीक्ष्यशक्रोवक्रमतिस्तदा ॥ उत्थायासनतस्तूर्णंववन्देसमुनिभिःसह ॥ २४ ॥ वाह
नेभ्योऽवरुह्याशुतदन्तेषूपविश्यते ॥ आसनेषुसुहैमेषुबभुर्वेदीष्विवाग्नयः ॥ २५ ॥ सितरक्ताङ्गयोःशम्भुब्रह्मणोर्हरिराबभौ ॥ नीलच्छविःपीतवासास्त
डित्वानिवशृङ्गयोः ॥ २६ ॥ शक्रःप्रक्षाल्यतत्पादान्मूर्ध्नातज्जलमादधे ॥ अब्रवीच्चमुदायुक्तोवचनंमधुराक्षरम् ॥ २७ ॥ इन्द्रउवाच ॥ विहितोऽयं
मयादेवयज्ञोऽद्यसफलोऽभवत् ॥ यदिमेदर्शनंप्राप्तादुर्लक्ष्याअपियोगिभिः ॥ २८ ॥ एकेनैवत्वयाविष्णोकृतामूर्तिस्त्रयीमयी ॥ गुणैस्तथापिनानात्वं
स्फटिकस्येवतेमृषा॥२९॥ यथादारुषुगूढोऽग्निर्घर्षणेनविनाविभो॥नाविर्भवतिभूतानांहृत्सुभक्त्यातथाभवान् ॥३०॥एकस्यत्वयिभक्तिःस्यात्सर्वभूतो
पकारिणी ॥ बभूवुःसुखिनोदेवाःप्रह्लादकृतयातया ॥ ३१ ॥ वयंविषयिणोदेवत्वन्मायावृतचेतसः ॥ नजानीमःस्वरूपंतेयथावत्पादसेवकाः ॥३२ ॥
भोब्रह्मन्भोमहादेवयुवामपिजगद्गुरू ॥ एतस्यैवगुरुत्वेनयतोनातःपृथग्युवाम् ॥ ३३ ॥ यत्किंचिदुच्यतेवाचामनसाचविचिन्त्यते ॥ अस्यैवमाया
तत्सर्वंतद्वयीदूरवर्त्तिनः ॥ ३४ ॥ प्रपञ्चजातंयदिदंविलोक्यतेनसत्यमित्येवविचिन्तयन्येनराः ॥ भजन्तिविष्णोश्चरणंतरन्तितेयदम्बुमूर्ध्नाहरधार्यते
त्वया ॥३५॥ विधेऽस्यभूयादनुजन्मपादयोरतिर्मदीयाकमलाभयोर्भृशम्॥ यदीक्षणक्षोभितयातयाजगत्समस्तमेतन्महदादिजायते॥ ३६॥ भवादृशो
नास्तिकृपापरोऽपरोविपक्षपक्षेवितनोषियत्सुखम् ॥ स्वलोकशोकापनयेकृपालुतायदुच्यतेतेंनृहरेतदज्ञता ॥ ३७ ॥ नारदउवाच ॥ इत्यभिष्टूय
देवेशंकेशवंप्रणतोऽग्रतः ॥ तस्थौतद्वाक्यशुश्रूषादत्तचित्तोमहीपते ॥ ३८ ॥ एवमाकर्ण्यमुनयस्तुतिंतस्यरमापतेः ॥ कृतामिन्द्रेणसदसिसाधुसाध्विति
चाब्रुवन् ॥ ३९ ॥ शतमन्योवर्षशतंयेकुर्वन्तिमहत्तपः ॥ नतेषामीदृशीभक्तिर्यादृशीतवमाधवे ॥४० ॥ नयोगःसुलभोऽष्टाङ्गःख्यातिर्येनाधिगम्यते॥
समत्वेनचतत्त्यागस्तद्भक्तिःशरणंनृणाम् ॥ ४१ ॥ स्वधर्मार्जितवित्तैर्यद्यथाविधिविधीयते ॥ कर्मतस्यार्पणंविष्णौभक्तिरेषाशिवप्रदा ॥ ४२ ॥
ननिन्देद्देवतामन्यांविष्णुबुद्ध्याचयोनमेत् ॥ नत्यजेद्वेदवाक्यानिसभक्तोऽस्यहरेःप्रियः ॥ ४३ ॥ येशृण्वन्तिहरेर्गुणानहरहःकुर्वन्तियेकीर्तनंयेचास्य

CC-0. In Public Domain. Digitization by eGangotri

स्मरणंपदोश्चभजनयऽमुंयजन्ततथा ॥ यदास्यननमन्तिचैनममुनाकुर्वन्तियेमित्रतांयेचस्वचनिर्वदयन्तिनहितेवाञ्छन्तिमुक्त्यादिकम् ॥४४ ॥ इन्द्र
भक्त्यात्वमप्येनमाराधयजगद्गुरुम् ॥ नकामयकिमप्यस्मत्कृतकृत्योभविष्यसि ॥ ४५॥ नारदउवाच ॥ इतिमुनिभिरुदीरितांतुवाचंत्रिभुवनपारपद
प्रदांनिशम्य ॥ हरिरखिलगुरुःकृतस्वभक्तिमधुरमुवाचवचोहरिंसमाजे ॥४६॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०कालिन्दीमाहात्म्यइन्द्रयागविधि
र्नामैकोनद्विशततमोऽध्यायः ॥१९९॥ श्रीभगवानुवाच ॥ नतच्चित्रंसुराधीशमुनयोज्ञानवत्तराः ॥ मदीयांयदिवैभक्तिंगुर्वींकुर्वन्तिसत्कृताम् ॥१॥ एते
ज्ञानोपदेष्टारस्त्रिलोकतलवासिनाम् ॥ प्रवर्तयन्त्यमीनष्टंवेदमार्गंयतःसदा ॥२॥ भक्त्याभवानपिस्वर्गभोगासक्तोऽपिमांयतः ॥ प्रपन्नोऽसिकिमाश्चर्यं
यतस्तवगुरुर्गुरुः ॥ ३॥ यजस्वसुरशार्दूलमखैर्मांबहुदक्षिणः ॥ निष्कामस्त्वंसमीपस्थंतूर्णंप्राप्स्यसिमत्पदम् ॥४॥ प्रतियागंप्रयच्छत्वंरत्नप्रस्थान्य
नेकशः ॥ आख्ययास्थानमेतत्तेइन्द्रप्रस्थंभविष्यति ॥ ५ ॥ विधेत्वमत्ररचयप्रयागंतीर्थपुङ्गवम् ॥ सरस्वतींसमानीयगङ्गांचजनपाविनीम् ॥ ६ ॥
काशींचशिवकाञ्चींचत्वमत्रस्थापयश्वर ॥ गोकणचसमंगौर्यानिवासंकुरुसर्वदा ॥ ७ ॥ भोभोब्रह्मसुतायूयज्ञानविज्ञानकोविदाः ॥ निजयोगबलेनात्र
कुरुध्वंतीथसप्तकम् ॥ ८ ॥ निगमोब्दोधकंतीर्थंत्वगुरोप्रतिपादय ॥ विनाध्ययनमप्यत्रस्नानाद्बोधोऽस्तुछन्दसाम् ॥ ९ ॥ स्मृतिश्चजायतांपूर्वजन्म
नस्तुपरात्मनः ॥ अहमारोपयाम्यत्रद्वारकांसुमनोहराम्॥१०॥ समुद्रेणसमंयत्रगोमत्यासंगमोऽभवत् ॥ कोशलंचकरोम्यत्रमध्वरण्यंचवासव ॥११॥
ययोरवतरिष्यामिवपुभ्यांरामकृष्णयोः ॥ बदर्याश्रममप्यत्रनरनारायणास्पदम् ॥ १२ ॥ विदधामिसदायत्रवसामिसुरनायक ॥ हरिद्वारंपुष्करंच
तीर्थद्वयमनुत्तमम् ॥ १३ ॥ तदपिस्थापयाम्यत्रतवैवहितकाम्यया ॥ नमिषेयानितीर्थानियानिकालञ्जरेगिरौ ॥ १४ ॥ सरस्वतीतटेयानिस्थाप
याम्यहमत्रवै ॥१५॥ नारदउवाच ॥ शिवशिवतरंवाक्यंहरेःश्रुत्वाकृतंचतत् ॥ दृष्ट्वातदुक्तमपितेचक्रुर्ब्रह्मशिवादयः ॥ १६ ॥ सर्वतीर्थमयेऽमुष्मिन्स्थाने
सत्रिदशाधिपः ॥ स्वर्णयूपैर्बहुमखैरीजेभूयोरमापतिम् ॥ १७ ॥ रत्नप्रस्थानिविप्रेभ्यःकृष्णस्यपुरतोददौ ॥ १७ ॥ नारायणःसमस्तात्मा
ममायमितितुष्यतु ॥१८॥ इन्द्रप्रस्थमिदंतीर्थंततःप्रभृतिकथ्यते ॥ सवतीर्थमयेयत्रमृतोभूयोनजायते ॥ १९ ॥ इन्द्रदत्तानितेलब्ध्वारत्नप्रस्थानि
भूसुराः ॥ तस्मैददुरवितथामाशिषंतत्रसंसदि ॥ २० ॥ इन्द्रायतवगोविन्दोदानेनानेनतुष्यतु ॥ तावकीभक्तिरप्यस्मिन्भूयादव्यभिचारिणी ॥ २१ ॥ ॥ १९१ ॥
कर्मभूमाविहविभोपुरायज्ञशतंकृतम् ॥ तनपुण्येनलब्धंतेसकामेनसुरास्पदम् ॥ २२ ॥ अधुनापूजितोविष्णुर्निष्कामेनत्वयामखैः ॥ स्वपदाद्वि
च्युतोभूमौभविष्यतिद्विजाग्रणीः ॥ २३ ॥ तत्रापिनिजधर्मेणविष्णुमाराधयन्भवान् ॥ स्मरिष्यतिनिजंकर्मकृतमत्रमखादिकम् ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्स्मृतेर्गृहमुत्सृज्य भवांस्तीर्थानि पर्यटन् ॥ जनकेन समं शक्रतीर्थेऽस्मिन्संप्रपत्स्यते ॥ २५ ॥ चतुर्थाश्रममादाय त्यक्ष्यत्यत्र कलेवरम् ॥ ततो विमा
नमारुह्य गणानीतं रविप्रभम् ॥ भवान्दिव्याङ्गवान्भूत्वा प्राप्स्यति श्रीहरेः पदम् ॥ २६ ॥ नारद उवाच ॥ एवमाकर्ण्य विप्राणामाशिषं त्रिदशाधिपः
॥ भविष्यपिशुनां चोक्तिं शिबे मुदमगात्तराम् ॥ २७ ॥ समाप्य विधिवद्यज्ञानत्र सौवर्णयष्टिकान् ॥ माधवप्रमुखान्देवान्पूजितान्सव्यसर्ज
यत् ॥ २८ ॥ ऋत्विजो ब्रह्मणः पुत्रानभ्यर्च्य च धनादिभिः ॥ बृहस्पतिं पुरस्कृत्य ययौ शक्रस्त्रिविष्टपम् ॥ २९ ॥ तत्र राज्यं विधायेन्द्रो हरिभक्तियु
तः शिबे ॥ अवातरद्भुवि क्षीणे पुण्ये हास्तिनपत्तने ॥ ३० ॥ शिवशर्मा द्विजः कश्चिद्वेदवेदाङ्गपारगः ॥ तस्य भार्या गुणवती नाम्नान्वर्थवती भृशम्
॥ ३१ ॥ तस्यां जातः सुवेलायामिन्द्रः श्रीपतिसेवकः ॥ ज्योतिर्विदः समाहूता लग्नं दृष्ट्वा बभाषिरे ॥ ३२ ॥ ज्योतिर्विद ऊचुः ॥ शिवशर्मन्नयं बाल
स्तव भावी हरिप्रियः ॥ उद्धरिष्यति ते वंशं ब्रूमः सत्यं न वै मृषा ॥ ३३ ॥ त्रयोदशाब्ददेहोयः साङ्गं वेदचतुष्टयम् ॥ अधीत्य ज्ञानसंपन्नो विवाहं तु करिष्यति ॥
॥ ३४ ॥ पुनरुत्पाद्य सत्पुत्रं वानप्रस्थो भविष्यति ॥ तीर्थेषु पर्यटन्धीरः संन्यासं धारयिष्यति ॥ ३५ ॥ इन्द्रस्य खाण्डववने यमुनास्ति सरिद्वरा ॥
तत्तीरेऽस्ति हरिप्रस्थं मरणं तत्र यास्यति ॥ ३६ ॥ नारद उवाच ॥ गणकोदितमाकर्ण्य शिवशर्मा शिवं वचः ॥ चकार विष्णुशर्माणं नाम्ना निजसुतं तदा
॥ ३७ ॥ तान्विसृज्य च वित्तेन चिन्तयामास बुद्धिमान् ॥ धन्योऽहं यस्य मे पुत्रो विष्णुभक्तो भविष्यति ॥ ३८ ॥ साधयिष्यति पुत्रोऽयमाश्रमांश्च
तुरो मम ॥ मरिष्यति च सत्तीर्थे मदन्यः कोऽस्ति भाग्यवान् ॥ ३९ ॥ एवं विचिन्त्य मनसा जातकर्माद्यकारयत् ॥ शिशोर्द्विजातिप्रवरैः शिवशर्मा शु
भेऽहनि ॥ ४० ॥ अथ सप्तस्वतीतेषु वर्षेषु द्विजसत्तमः ॥ सुतोपनयनं चक्रे चैत्रमास्यष्टमेऽब्दके ॥ ४१ ॥ आद्वादशाब्दादध्याप्य वेदानन्वगतः सु
तम् ॥ शिवशर्मा शिबे राजन्युयोज सह भार्यया ॥ ४२ ॥ विष्णुशर्मा स्वभार्यायां पुत्रमुत्पाद्य बुद्धिमान् ॥ चकार तीर्थयात्रायां मनो निर्विषयं स्वकम्
॥ ४३ ॥ अभ्येत्य पितरं प्राह नत्वा तच्चरणद्वयम् ॥ विष्णुशर्मा महाप्राज्ञो मुनिवाक्यमनुस्मरन् ॥ ४४ ॥ विष्णुशर्मोवाच ॥ अनुजानीहि मां तात
विष्णुमाराधयाम्यम् ॥ तृतीयाश्रममासाद्य सत्संगतिविधायकम् ॥ ४५ ॥ दारागारधनापत्यसुहृदः क्षणभङ्गुराः ॥ बुद्बुदा इव तोयेषु सुधी
स्तेषु न सज्जते ॥ ४६ ॥ स्वाध्यायेन च सन्तत्या मया तीर्णमृणद्वयम् ॥ तीर्थेषु कामरहितो यष्टुमिच्छामि केशवम् ॥ ४७ ॥ संन्यस्तगुणरागोऽहं प
श्चात्तीर्थोत्तमे क्वचित् ॥ स्थातुमिच्छाम्यहं तावद्यावत्प्रारब्धमस्ति मे ॥ ४८ ॥ इत्युक्तस्तेन पुत्रेण स पिता बुद्धिमत्तरः ॥ स्मृत्वा ज्योतिर्विदां वाक्यमाह सं
सारनिस्पृहः ॥ ४९ ॥ शिवशर्मोवाच ॥ चतुर्थाश्रमकालोऽयं ममापि निरहङ्कृतेः ॥ विषयान्विषवत्त्यक्त्वा सेविष्ये केशवामृतम् ॥ ५० ॥ गृहेम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ममनःपुत्ररमतेनाद्यवार्द्धके ॥ आनीतस्यवनाद्बद्धागजस्येवनृपालये ॥ ५१ ॥ तवानुजःसुशर्मायंकुटुम्बंधारयिष्यति ॥ आवाभ्यामुज्झितंवि
द्याश्रीकुलाभ्यांयथानरम् ॥ ५२ ॥ प्रव्रजन्तंतुमामेवतवमातापतिव्रता ॥ अनुयास्यतिमार्तण्डंयथाकान्तिर्दिनात्यये ॥ ५३ ॥ तस्मादावामवि
ज्ञातौतयातातत्वाम्बया ॥ गच्छावश्चिन्तयन्तौश्रीहरेःपादसरोरुहम् ॥ ५४ ॥ नारदउवाच ॥ इत्यालोच्यमुमुक्षूतौनिशीथेतमसावृते ॥ सुतंकुटुम्ब
मुत्सृज्यगृहान्निर्यायजग्मतुः ॥ ५५ ॥ सहैवपर्यटन्तौतौसुतीर्थैर्निरहङ्कृती ॥ शिबेऽत्रशिवदेतीर्थेशक्रप्रस्थेसमीयतुः ॥ ५६ ॥ अत्रागतःस्ववि
हितान्पूर्वजन्मनियूपकान् ॥ विष्णुशर्मासमालोक्यसस्मारहरिसंगमम् ॥ ५७ ॥ ऊचेचपितरंधीमाञ्छक्रआसमहंपुरा ॥ मयात्रविहितायज्ञा
माधवप्रीणनेच्छया ॥ ५८ ॥ अत्रैवमेप्रसन्नोऽभूत्केशवोभक्तवत्सलः ॥ संतोषितामणिप्रस्थैर्द्विजाःसतर्पयश्रमे ॥ ५९ ॥ तैरेववैष्णवीभक्ति
र्दत्तामोक्षोभवेऽत्रच ॥ विष्ण्वादिभिःसमस्तैस्तुतीर्थान्यत्रकृतानिवै ॥ ६० ॥ सर्वतीर्थमयंतीर्थमिन्द्रप्रस्थमिदंकृतम् ॥ अत्रैवमेमृतिश्चोक्तातैरेव
मुनिपुङ्गवैः ॥ ६१ ॥ ततोहरिपदप्राप्तिरेतत्सर्वंस्मराम्यहम् ॥ इमेगङ्गासरस्वत्यौनिजलोकाद्विरिञ्चिना ॥ ६२ ॥ समानीतेययोर्योगेप्रयागो
ऽयंनिगद्यते ॥ एषाकाशीशिवपुरीप्रयागात्पूर्वदेशके ॥ ६३॥ द्विपञ्चाशद्धनुर्मात्रेमृतोयस्यांनजायते ॥ काश्याःपश्चिमकेभागेधनुषामेकविंशतिः ॥
॥ ६४ ॥ शिवकाञ्चीशिवेनैषास्थापितामृतमुक्तिदा ॥ गोकर्णाख्यमिदंक्षेत्रंशम्भोःपरमवल्लभम् ॥ ६५ ॥ धनुर्द्वयप्रमाणेतुभूमिभागेऽव्यवस्थित
म् ॥ इयंद्वारवतीपुण्यातीर्थराजस्यपश्चिमे ॥ ६६ ॥ धनुषांसप्ततिर्यत्रमृतोभावीचतुर्भुजः ॥ अतोऽसौपूर्वदिग्भागेकोशलाजनवत्सला ॥ ६७॥
अष्टादशधनुर्मात्रेदृश्यतेपुण्यदर्शना ॥ एतन्मधुवनंतातस्थापितंविष्णुनास्वयम् ॥ ६८ ॥ कोशलापश्चिमेभागेदशचापप्रमाणतः ॥ अतउत्तरत
स्तातनरनारायणास्पदम् ॥ ६९ ॥ एतदेकादशधनुर्भूमिदेशेचतिष्ठति ॥ एतत्तीर्थंहरिद्वारमतोदक्षिणतःस्थितम् ॥ ७० ॥ त्रिंशद्धनुर्महीदे
शेदृश्यतेदेवदुर्लभम् ॥ एतत्तुपुष्करंनामतीर्थतीर्थशिरोमणिः ॥ ७१ ॥ द्वादशेष्वासमात्रेभूभागेभोस्ताततिष्ठति ॥ प्रयागादिकगव्यूतिःसप्त
र्षीणांमहात्मनाम् ॥ ७२ ॥ पूर्वस्यांदिशितीर्थानिसप्ततत्तीर्थसप्तकम् ॥ तीर्थसप्तककाश्योऽस्तुसन्तितीर्थान्यनेकशः ॥ ७३ ॥ पदेपदेयेषुमृ
तोजायतेसचतुर्भुजः ॥ प्रयागादेकगव्यूतिमात्रेपश्चिमभूतले ॥ ७४ ॥ निगमोद्बोधकंनामतीर्थगुरुकृतंपुरा ॥ तीर्थसप्तकनिगमोद्बोधयोरन्तरंमहत
॥ ७५ ॥ इन्द्रप्रस्थमिदंक्षेत्रंस्थापितंदैवतैःपुरा ॥ पूर्वपश्चिमयोस्तातएकयोजनविस्तृतम् ॥ ७६ ॥ कालिन्द्यादक्षिणेयावद्योजनानांचतुष्टयम् ॥ इन्द्र
प्रस्थस्यमर्यादाकथितेषामहर्षिभिः ॥ ७७॥ देवत्रय्यांचयोह्यत्रत्यजत्यङ्गंभवत्यजः ॥७८॥ नारदउवाच ॥ पुत्रस्यैतद्वचःश्रुत्वाशिवशर्माशिबेद्विजः॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रत्याहसंदिहानस्तंस्वपुत्रंसत्यवादिनम् ॥ ७९ ॥ शिवशर्मोवाच ॥ कथमेतद्द्विजानीयांत्वंपुरासीःसुरेश्वरः ॥ त्वमत्रकृतवान्यज्ञान्मणिभिस्तो
षिताद्द्विजाः ॥ ८० ॥ त्वदुक्तज्ञानवान्पुत्रयथाहंस्यांतथाकुरु ॥ इन्द्रप्रस्थस्यमर्यादाकुतएषात्वयाश्रुता ॥ ८१ ॥ यतःप्रभृतितेजातामतिस्त्वं
नात्यजोगृहम् ॥ मत्तएवत्वयाधीतंसाङ्गंवेदचतुष्टयम् ॥ पूर्वजन्मकृतेकृत्येज्ञानमासीत्कुतस्तव ॥ ८२ ॥ विष्णुशर्मोवाच ॥ ऋषिभिर्मेवरो
दत्तःपूर्वजन्मस्मृतिप्रदः ॥ तेभ्यएवास्यतीर्थस्यश्रुताह्येषास्मृतिर्मया ॥ ८३ ॥ निगमोद्बोधकेतीर्थेस्नानमत्रपितःकुरु ॥ दुर्लभंप्राप्स्यसेज्ञानं
पूर्वजन्मस्मृतिप्रदम् ॥ ८४ ॥ ममापिपूर्वजनुषःप्रवृत्तिंत्वंस्मरिष्यसि ॥ एतत्तीर्थजलस्पर्शात्तातसत्यंवदामिते ॥ ८५ ॥ नारदउवाच ॥ शिवशर्म
णिविप्रेन्द्रेश्रुत्वैतत्स्नातुमुद्यते ॥ निगमोद्बोधकेतीर्थेस्मृतयेपूर्वजन्मनः ॥८६ ॥ सिंहेनानुगतःकश्चिद्भिल्लोधावन्समागतः ॥ अतित्रासपरीताङ्गोनिःश्व
सन्छ्रमविह्वलः ॥ ८७ ॥ हिंसात्मकोवर्त्मघातीवणिजांलुण्ठतःसदा ॥ कृष्णाङ्गःपिङ्गकेशश्चखर्वोमार्जारलोचनः ॥ ८८ ॥ कुन्तहस्तोभीममूर्ति
र्देहीपाप्मेवभूपते ॥ ततःपश्चात्कियद्दूरेसिंहमालोक्यतावुभौ ॥ ८९ ॥ पितापुत्रौसमीपस्थंद्रुममारुह्यतस्थतुः ॥ वदन्तावितिहाकृष्णमोचयातोऽप
मृत्युतः ॥ ९० ॥ सकिरातस्तुराजेन्द्रग्रहीतुंवेगवत्तरम् ॥ वीक्ष्यसिंहंद्रुमंभीतःसमारोढुंप्रचक्रमे ॥ ९१ ॥ आरोहणंप्रकुर्वन्तंसिंहोजग्राहवेगवान् ॥
पादयोरथभूपृष्ठेपातयित्वारुरोहतम् ॥ ९२ ॥ अधःस्थितकिरातोऽपिकुन्तनोदरमस्यवै ॥ ददाररुधिरौघाक्तनिसृतान्त्रकदम्बकम् ॥ ९३ ॥ जात
व्यथोविधायाथनादंपरमदारुणम् ॥ सिंहःपिपेषभिल्लस्यशिरःसद्योममारच ॥९४॥ तयोःपञ्चत्वमापन्नेभूतसङ्घेऽत्रभूपते ॥ विमानद्वयमुत्तीर्णंगणाभ्यां
सहसत्पदात् ॥ ९५ ॥ नवीनघनवर्णाभ्यांस्फटिकोपलनिर्मितम् ॥ चारुकुण्डलकर्णाभ्यांमणिप्रकरमण्डितम् ॥ ९६ ॥ शङ्खचक्रगदापद्म
हस्ताभ्यांचारुचित्रभृत् ॥ दधद्भ्यांपीतवस्त्राणिहेमभित्तिविभूषितम् ॥ ९७ ॥ प्रफुल्लाम्बुजनेत्राभ्यांपद्मरागगवाक्षभृत् ॥ धीरनिर्ह्रादमञ्जीरप
द्भ्यांरणितकिङ्किणि ॥ ९८ ॥ प्रकोष्ठवलयश्रेणींबिभ्रद्भ्यांचारुवेदिकम् ॥ मुक्ताहारैर्मनोहारिवक्षोभ्यांसवितानवत् ॥ ९९ ॥ कुटिलालकवक्त्राभ्या
मुन्नतध्वजराजितम् ॥ भ्रूयुगाक्षितपञ्चेषुधनुर्भ्यामुच्चतोरणम् ॥ १०० ॥ नासालज्जितकीराभ्यांनिर्व्यूहशतशोभितम् ॥ नवविद्रुमसच्छायतलाभ्यां
दर्पणामलम् ॥ १ ॥ दिव्याङ्गौभिल्लपञ्चास्यौत्यक्त्वाङ्गंप्राकृतंस्थितौ ॥ पुरैवप्राणनिर्याणेतीर्थस्यास्यप्रभावतः ॥ २ ॥ तयोःसमीपमानीयविमा
नेतौहरेर्गणौ ॥ ऊचतुस्तौवयोरूपवेषाकृतिधरौततः ॥ ३ ॥ भोःकिरातनरश्रेष्ठभोःपञ्चास्यमृगाधिप ॥ आवांजानीतमायातौवैकुण्ठाच्छ्रीहरेर्गणौ॥
॥ ४ ॥ नेष्यामस्तत्पदंसत्यंयुवांतत्रनचोर्मयः ॥ स्वंस्वंविमानमारुह्यगम्यतामाशुमाचिरम् ॥ ५ ॥ स्वंस्वंविमानमारूढौतौकिरातमृगाधिपौ ॥ ऊच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुर्विस्मयाविष्टौलक्ष्मीपतिगणौप्रति ॥ ६ ॥ भोभोस्त्रिदशशार्दूलौश्रूयतांवाक्यमावयोः ॥ युवयोर्दर्शनाज्जातंज्ञानंनौपारमार्थिकम् ॥ ७ ॥ अत्रज
न्मनिनावाभ्यांकृतंसुकृतमल्पकम् ॥ स्मृतिर्नोजायतेपूर्वकर्मणांवांप्रसादतः ॥ ८ ॥ मांसाहारौप्राणिहिंसारतौक्रूरान्तरेन्द्रियौ ॥ पापाचारकुलेजातौद
र्शनेनभयप्रदौ ॥ ९ ॥ आवामेतादृशेलोकेह्यभूताभितिपापिनौ ॥ केनपुण्येनयुवयोर्जातंदर्शनमावयोः ॥ सारूप्यंचकुतःपुण्याद्यायायावःश्रीहरेः
पदम् ॥११०॥ गणावूचतुः ॥ तीर्थेऽत्रमरणान्नूनंसुराचार्यकृतेपुरा ॥ युवयोर्दर्शनंजातंनौचसारूप्यमद्भुतम् ॥ ११ ॥ लक्ष्मीपतिपदप्राप्तिर्भविष्यति
चवांचिरम्॥तावत्पापानिगर्जन्तिब्रह्महत्यादिकानिवै॥१२॥ जातंनदर्शनंयावत्तीर्थस्यास्यबृहस्पतेः॥यथातमांसिनश्यन्तिभास्करस्योदयादिह॥१३॥
तथापापानिनिगमोद्बोधकस्यविलोकनात्॥इन्द्रप्रस्थाख्यमेतद्वैक्षेत्रमिन्द्रस्यपावनम् ॥१४॥ तेनात्रपूजितोविष्णुःक्रतुभिर्बहुदक्षिणैः ॥ तुष्टेनविष्णुना
तस्मैवरोदत्तोनिशम्यताम् ॥ १५॥ भोशक्रतावकेक्षेत्रेसर्वतीर्थमयेजनाः ॥ तनुंत्यक्ष्यन्तियेतेवैमत्तुल्याहिंसकाअपि॥१६॥नारदउवाच ॥ इत्युक्त्वातौ
गणश्रेष्ठौनीत्वातौजग्मतुःपदम् ॥ हरेर्यत्रगतोभूयोविश्वाब्धौननिमज्जति ॥११७॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०उत्तर०कालिन्दीमाहात्म्येभिल्लसिं
हवैकुण्ठारोहणंनामद्विशततमोऽध्यायः ॥२००॥ नारदउवाच ॥ अथावरुह्यतौवृक्षात्पितापुत्रौसुविस्मितौ ॥ दृष्ट्वाहरिपदप्राप्तिमभूतांपापिनोरपि॥१॥
शिवशर्माथविप्रेन्द्रःश्रुत्वातीर्थस्तुतिंतदा ॥ गणोक्तांविष्णुशर्माणमुवाचसुतमात्मनः ॥ २ ॥ शिवशर्मोवाच॥यत्पदंनसुलभंद्विजन्मनांसाधितेनतपसा
पिलीलया ॥ प्रापतुःशबरदंष्ट्रिणौचतत्तीर्थराजमहिमाविलोक्यताम् ॥ ३ ॥ जन्मनःप्रभृतितावदामृतेःपापिनावपिचयत्प्रभावतः ॥ जग्मतुःसुतहरेः
सरूपतामस्यतीर्थवृषभस्यकास्तुतिः ॥ ४ ॥ शुद्धसत्त्वमपिरूपमैश्वरंकाम्बुजन्मजनिदेवदुर्लभम् ॥ तामसौक्रमृगनाथभिल्लकौकिंतुतीर्थमिदमद्भुत
क्रियम् ॥ ५ ॥ तातभोःपततिवेधसःपदाज्जन्तुरन्तमधिगम्यकर्मणाम् ॥ अत्रदेवगुरुनिर्मितेमृतिंप्राप्यमाधवपदान्नविच्युतिः ॥ ६ ॥ नारदउवाच ॥
एवंप्रत्यक्षमालोक्यमाहात्म्यंसद्विजोत्तमः ॥ तीर्थस्यास्यगुरोराजन्स्नातुंतत्रप्रचक्रमे ॥ ७ ॥ मुखदन्तपदानांसकृत्वाशुद्धिंचचेतसः ॥ पञ्चक
च्छःशिखाबन्धोपग्रहीमाधवंस्मरन् ॥ ८ ॥ अश्वक्रान्तेतिश्लोकस्यपाठेनतटमृत्तिकाम् ॥ स्पृशंस्तयैवविदधत्तिलकंजलमाविशत् ॥ ९ ॥ तत्रप्रवा
हाभिमुखोनिमज्जन्पुनरुत्थितः ॥ पुनर्मग्नोहरिंस्मृत्वागङ्गांचजनपावनीम् ॥ १० ॥ अयोध्याद्याःपुरीःसप्तपुनरुत्थायसंस्मरन् ॥ पुनर्ममज्जसलिले
गोविन्दार्पितमानसः ॥ ११ ॥ कृत्वायथाविधिस्नानंधौतवस्त्रेचपर्यधात् ॥ बहिरागत्यतिलकंचक्रेचद्विजसत्तमः ॥ १२ ॥ करपादशिखासूत्रैर्दर्भां
श्चविदधद्वशी ॥ सन्ध्यांचकारविधिवत्तर्पणंत्रिविधंतथा ॥१३॥ सूर्यायकुसुमैर्दत्त्वासजलैरर्घमादृतः ॥शिरोबद्धाञ्जलिपुटोनमश्चक्रेद्विजोत्तमः ॥१४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आवाहनादिनैवेद्यपर्यन्तमथविप्रराट् ॥ जगत्पूज्यपदाब्जस्यविष्णोः पूजामचीकरत् ॥ १५ ॥ कृतक्रियःसूपविष्टस्तादृशंसुतमात्मनः ॥ जगादसस्म
रन्पूर्वजन्मकर्माणिकृत्स्नशः ॥ १६ ॥ शिवशर्मोवाच ॥ विष्णुशर्मन्नतेमिथ्यावाक्यंतातयतःस्मृतिः ॥ अत्रस्नानेनमेजातापूर्वेषांजन्मकर्मणाम् ॥ १७ ॥
आकर्णयमहाभागकथयामितवाग्रतः ॥ पुराहमन्वयेजातोविशांधनिकधर्मिणाम् ॥ १८ ॥ पितामेशरभोनाम्नाकान्यकुब्जेपुरेवसन् ॥ वाणिज्येनार्जयन्वित्तं
भूरिधर्मधनाश्रितः ॥ १९ ॥ व्यतीतस्तुमहान्कालस्तस्यनाभवदात्मजः ॥ जरागृहीतदेहस्यतच्चिन्तातुरचेतसः ॥ २० ॥ अचिन्तयदहोरात्रमितिवैश्य
वरस्तदा ॥ विनासुतेनमेव्यर्थंधनंभूर्यपिसंचितम् ॥ २१ ॥ ऋतेसुतमृणीलोकेपितॄणांधनवानपि ॥ सजलोऽपिविनावर्षंचातकानांयथाघनः ॥ २२ ॥ पुमा
ञ्जयतिसन्तत्याविश्वंधर्मधुरीणया ॥ शक्त्यात्रिविधयाराजाविपक्षमिवदुर्जयम् ॥ २३ ॥ प्रीणातिसन्ततिःशुद्धासुमनःपितृमानवान् ॥ मित्रप्रत्यर्थ्युदासी
नान्सूनृतावाग्यथेरिता ॥ २४ ॥ उदयस्थेनपुत्रेणवर्द्धतेस्वयशःपितुः ॥ निर्मलंद्विजराजेननीरंनीरनिधेरिव ॥ २५ ॥ तस्माद्यतेत्सुतोत्पत्त्यैशरीरेणधनेनवा ॥
तमृतेहिद्वयंव्यर्थंजनानांतडिदायुषाम् ॥ २६ ॥ एवंचिन्तयतस्तस्यगृहेमुनिवरस्तदा ॥ देवलोऽतीन्द्रियज्ञानोवरंदातुंसमाययौ ॥ २७ ॥ आगतंतं
समालोक्यप्रत्युत्थायासनात्पिता ॥ दत्त्वार्घमथपाद्यंचववन्देशिरसामुनिम् ॥ २८ ॥ उपवेश्यासनेदत्तेस्वहस्तेनपितामम ॥ पप्रच्छचमुनिश्रेष्ठंदेवलं
देवदर्शनम् ॥ २९ ॥ स्वागतंतमुनिश्रेष्ठशमस्तिभवतांकुले ॥ तपःस्वाध्यायनियमानिष्प्रत्यूहाभवन्तिच ॥ ३० ॥ कालेचातिथयःकच्चिदायान्ति
भवदाश्रमे ॥ कच्चिदाश्रमवृक्षावःफलन्तिमनसेप्सितम् ॥ ३१ ॥ व्याघ्रादयोनकुर्वन्तिकच्चिद्वैरंमृगादिभिः ॥ त्वदीयाश्रममभ्येत्यभ्रातरोभ्रातृभि
र्यथा ॥ ३२ ॥ तवाटनंभुविमुदेगृहिणामन्यथाकथम् ॥ तेषांगृहाधिमग्नानांदर्शनंक्वभवादृशः ॥ ३३ ॥ हरिपादरजोबुद्धेःकामंकामोनकुत्रचित् ॥ मुनेत
वतथाप्याशुहेतुमागमनेवद ॥ ३४ ॥ शिवशर्मोवाच ॥ इत्युक्तस्तेनसमुनिर्देवलोदेवपूजितः ॥ अब्रवीत्तन्मनोभावंज्ञातुकामोविशांपतिम् ॥ ३५ ॥
देवलउवाच ॥ वैश्यवर्यत्वयाभूरिधनंधर्मेणसंचितम् ॥ करोषियेनधर्मज्ञनित्यनैमित्तिकीःक्रियाः ॥ ३६ ॥ आदरंराजसदसिधनेनलभतेनरः ॥ सुभ
टःशत्रुसंग्रामेविक्रमेणयथाजयम् ॥ ३७ ॥ गृहस्थस्तुधनंप्राप्यपरांपुष्टिंव्रजत्यलम् ॥ शरत्परिणतंसस्यमनड्वानिवविट्पते ॥ ३८ ॥ धनिनंनविमु
ञ्चन्तिबन्धवोऽन्येचयेजनाः ॥ मधुमत्सुमनोयुक्तंपादपंमधुपाइव ॥ ३९ ॥ धनाभावेनगृहिणांकृशत्वमुपजायते ॥ सर्वतोग्रीष्मसमयेत्वम्भसांसरसा
मिव ॥ ४० ॥ तद्धनंवर्ततेभूरिगृहेतवविशांपते ॥ कुतःकृशत्वमङ्गानांगोप्यंचेन्नवदाद्यमे ॥ ४१ ॥ वैश्यउवाच ॥ हितोपदेशानिरताभवन्तःपितरो
यथा ॥ गोपनीयंभवद्भ्यःकिमादृशैःपुत्रतांगतैः ॥ ४२ ॥ त्वत्प्रसादान्मुनिश्रेष्ठसर्वतोऽस्तिशिवंमम ॥ वार्द्धकेऽपिसुताभावोदुःखमेकमिदंमम ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ४३ ॥ तस्मात्कृशत्वमङ्गानांविद्धिमेमुनिपुङ्गव ॥ बिभेम्यहंपितृऋणाद्यतोऽधःपतनंनृणाम् ॥ ४४ ॥ तमुपायंकुरुमुनेयेनस्यांसुतवानहम्
॥ किंचित्कर्तुमशक्यंनभूतलेऽत्रभवादृशैः ॥ ४५ ॥ शिवशर्मोवाच ॥ इत्याकर्ण्यवचस्तस्यवैश्यवर्यस्यदेवलः ॥ मनःक्षणंस्थिरंकृत्वादध्यौ
मीलितलोचनः ॥ ४६ ॥ सन्ततेर्मत्पितुर्दृष्ट्वाप्रतिबन्धस्यकारणम् ॥ देवलोऽतीन्द्रियज्ञानीत्वभाषेकारयन्स्मृतिम् ॥ ४७ ॥ देवलउवाच ॥
एकादातुपुरावैश्यतवेयंधर्मचारिणी ॥ यंचकारस्वचित्तेतंकथयामिमनोरथम् ॥ ४८ ॥ गुर्विणीयद्यहंगौरिभवेयंशम्भुवल्लभे ॥ तदात्वांतोषयि
ष्यामिषड्रसान्वितभोजनैः ॥ ४९ ॥ धूपदीपकमालाभिस्ताम्बूलैर्नृत्यवाद्यकैः ॥ तन्त्रीमुखोद्गतैर्गीतैर्नानाविधविलेपनैः ॥ ५० ॥ एवंप्र
तिश्रुत्यपुरःसखीनांदयितातव ॥ प्रतीक्षमाणातंकालंतस्थौतद्भक्तिसंयुता ॥ ५१ ॥ तस्मिन्नेवाभवद्गर्भोमासेऽस्यायोषितस्तव ॥ ऊचुरेनांततः
सख्यःसर्वाःसस्नेहचेतसः ॥ ५२॥ यस्त्वयावाञ्छितोगर्भोगौर्यासम्प्रतिपादितः ॥ अतःप्रतिश्रुतंदेव्याःपूजनंसुभगेकुरु ॥ ५३ ॥ नोचेद्विकाराद्भवति
विघ्नंतुतदनुष्ठिताद ॥ तोषितारोषिताश्चात्रदेव्योहिवरशापदाः ॥ ५४ ॥ सखीभिरितितेभार्याकथितेयंमुदान्विता ॥ त्वामुवाचमहाभागाविन
येनपतिव्रता ॥५५॥ नाथपूजयितुंगौरींवाञ्छाम्यखिलकामदाम् ॥ यत्प्रसादादहंजातावाञ्छितार्थव्रतीप्रभो ॥५६ ॥ वैश्यवर्यत्वमेवैतच्छ्रुत्वास्याव
चनंशुभम् ॥ अमन्यथगर्भवतीमेनांनिजगृहेश्वरीम् ॥५७॥ मोदमानश्चनितरांतेनसद्योभवानपि॥ भृत्यानाज्ञापयामासपूजावस्तूपपादने ॥५८॥ तैरा
नाय्यसमस्तानिवस्तूनिभवतातततः ॥ अस्यैदत्तानिमध्वन्नद्राक्षागन्धादिकान्यपि ॥५९ ॥ ततोनिजसखीःसर्वाआहूयेयमिदंजगौ ॥ सख्यःसमस्ता
सामग्रीसमानीताम्बिकार्चने ॥ ६० ॥ नीत्वापूजोपकरणंयूयंयाताम्बिकालयम् ॥ संतोषयततांदेवींपूजयाविधिदृष्टया ॥६१॥ गुर्विणीतिकुलेऽस्माकं
ननिर्यातिगृहाद्बहिः ॥ अतोऽहंनागमिष्यामियूयंयाततदर्चने ॥ ६२ ॥ इत्याज्ञप्तास्तुताःसख्योनीत्वोपकरणंययुः ॥ अम्बिकालयमुन्मत्तभ्रमद्भ्रमरके
तनम् ॥ ६३ ॥ कोकिलाकुलसंकेलिसहकारकुलाकुलम् ॥ हंससारसचक्राह्वमण्डितस्वच्छसारसम् ॥ ६४ ॥ महादेवगुणालापिशुकसारि
समावृतम् ॥ हारयोग्यलतासेकेतत्परोमासखीधरम् ॥ ६५ ॥ उमापतेरुमापादन्यासपूतमहीतलम् ॥ स्फटिकोपलसंबद्धजलाधार
सुरद्रुमम् ॥ ६६ ॥ पार्वतीपतिसंनाद्यगायद्गन्धर्वनादितम् ॥ मन्दानिलमनाग्धूतचूतचम्पककोरकम् ॥ ६७ ॥ नृत्यन्मयूरनिर्ह्रा
दप्रतिनादितलतागृहम् ॥ तल्लीलाचलविद्योतमानंरत्नलसत्प्रभम् ॥ ६८ ॥ तत्रगत्वागिरिसुतांप्रणेमुस्ताःसभर्तृकाम् ॥ प्रदक्षिणीकृत्यत
तोभक्त्यातांचव्रभाषिरे ॥ ६९ ॥ जगदम्बनमस्तुभ्यंशन्नोदेहिशिवप्रिये ॥ त्वत्पूजार्थंसमानीतोबलिरेषप्रगृह्यताम् ॥ ७० ॥ वैश्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तुशरभोनाम्नातस्यास्तिललिताङ्गना ॥ तयाभिलषितोगर्भस्तत्प्राप्तौतवपूजनम् ॥ ७१ ॥ त्वत्प्रसादादभूत्तस्याःसगर्भःशम्भुवल्लभे ॥
त्वत्पूजनायप्रहितोबलिरस्माभिरेषकः ॥ ७२ ॥ तस्याःकुलेगर्भवतीननिरेतिबहिर्गृहात् ॥ अतःसानागतादेविप्रसीदैनंगृहाणवै ॥ ७३ ॥
इत्युक्त्वातांतदावैश्यत्वत्स्त्रीसख्यस्तुतंबलिम् ॥ समर्पयित्वाविधिवदानर्चुश्चन्दनादिभिः ॥ ७४ ॥ प्रतिवाक्यमलब्ध्वातागौर्याःप्रत्याययु
र्गृहम् ॥ निजसख्यैसमाचख्युर्विषण्णांतांशिवप्रियाम् ॥ ७५ ॥ तासामाकर्ण्यवचनमितिवैश्यतवाबला ॥ उन्मनाश्चिन्तयामासकुतोगौरीनपि
प्रिये ॥ ७६ ॥ साजानातियथाभक्तिस्तत्पूजायाकृतामया ॥ तादृशीनांकिमज्ञातंबाह्यंचाभ्यन्तरंनृणाम् ॥ ७७ ॥ नगताहंयतस्तत्रतज्जानात्यपिकार
णम् ॥ मयादत्तेनबलिनाकुतःसानतुतोषवै ॥ ७८ ॥ नाहमन्यत्प्रजानामितदतोषेहिकारणम् ॥ ऋतेमदगतेस्तत्रनूनंरम्येतदालये ॥ ७९ ॥ यदतो
तंनतच्छक्यमन्यथाकर्तुमद्यवै ॥ गर्भान्मुक्तागमिष्यामितत्पूजायैतदालये ॥ ८० ॥ नमस्तस्यैमहादेवभार्यायैसाकरोतुशम् ॥ इत्युक्त्वादधतीगर्भं
तस्थौवैश्यतवाङ्गना॥८१॥शिवशर्मोवाच ॥ विष्णुशर्मन्निदंपूर्ववृत्तमाज्ञायमत्पिता॥पप्रच्छमुनिशार्दूलंदेवलंज्ञानवत्तरम्॥८२॥ वैश्यउवाच॥मुनेयथा
प्रतिश्रुतापूजातेस्नुषयातया ॥ तथैवाकारिपार्वत्याविषादेकारणंवद ॥ ८३ ॥ यतोऽसौनगतातत्रतज्जानातिशिवास्वतः ॥ सखीभ्यश्चोक्तमस्या
स्तद्विषण्णासाकुतोऽभवत् ॥ ८४॥ देवलउवाच ॥ वैश्यवर्यशृणुष्वेदंकारणंकथयामिते ॥ यतस्तस्याविषादोऽभूत्पार्वत्यागर्भनाशकः ॥ ८५ ॥ निवृ
त्तासुसखीष्वस्याःसंपूज्यस्कन्दमातरम् ॥ विजयापार्वतींप्राहकौतूहलसमन्विता ॥ ८६ ॥ विजयोवाच ॥ गिरिजेश्रद्धयातुभ्यंदत्तोऽमूभिरयंबलिः॥
मानुषीभिःकुतःप्रीतानाभवस्त्वंवरानने॥८७॥ धूपदीपकनैवेद्यैःपूजितातोषहेतवे॥प्रत्युताकारणंदेवित्वंविषादंकुतोगता॥८८॥ देवलउवाच ॥इत्याकर्ण्य
वचःसख्यादेवीदेववरार्चिता ॥ अब्रवीद्विजयांवैश्यविषादेकारणंसखीम् ॥८९॥ पार्वत्युवाच॥विजयेसखिजानामिवैश्यभार्यागृहाद्बहिः॥निर्गन्तुमक्षमां
गर्भधारणास्वविवेकतः ॥ ९० ॥ समागतास्तुतत्सख्योमत्पूजायैतदीरिताः ॥ मादृशोनचगृह्णन्तिपरहस्तकृतंबलिम् ॥ ९१ ॥ तत्पतिश्चेत्समायास्य
दभविष्यत्तदाशिवम् ॥ तस्यास्तुमदवज्ञातोगर्भपातोभविष्यति॥९२॥यद्व्रतंपूजनंयच्चकर्तुंनक्षमतेऽङ्गना ॥ तत्कारयतिनाथेननभङ्गःस्यात्तयोःसखि
॥ ९३ ॥ अथवाविप्रमुख्येनपृष्ट्वापतिमनन्यधीः ॥ यतःस्वयमनागत्यतत्कृतंमेतयार्चनम् ॥ ९४ ॥ नकारितंचभर्त्रातोभवितादोहदोऽ
फलः ॥ यद्युभौतौसमागत्यदम्पतीश्रद्धयापुनः ॥ मांपूजयिष्यतःपुत्रोभविष्यतितदातयोः ॥ ९५ ॥ देवलउवाच ॥ सशापोनत्वयावैश्यन
चैवतवभार्यया ॥ अतःसखीभिरस्यानोप्रसादश्चतयार्पितः ॥ ९६ ॥ तयोरज्ञानतोवैश्ययुवयोर्नाभवत्सुतः ॥ अजानतोःप्रतिविधिंपरत्रात्रसुख

प्रदम् ॥ ९७ ॥ एतत्तेकथितंवैश्यसन्तानाभावकारणम् ॥ वसिष्ठेनयथापूर्वंदिलीपस्यमहीपतेः ॥ ९८ ॥ तच्छुत्वासयथाराजानन्दिनींसमतोषयत्॥
सस्त्रीकस्त्वंतथावैश्यगौरींतोषयकामदाम् ॥ ९९ ॥ सायथाराधिताराज्ञेदिलीपायददौसुतम् ॥ आराधयतथागौरींत्वंसातुभ्यंचदास्यति ॥ १०० ॥
वैश्यउवाच ॥ दिलीपइतिभूपःकःकाचसानन्दिनीमुने ॥ यामाराध्यसुतंलेभेसभूयोभूपसत्तमः ॥ १ ॥ महेशादिसुरान्मुक्त्वात्रिवर्गफलदायिनः ॥
आराधिताकुतःसैवसुतार्थंतेनभूभुजा ॥ २ ॥एतत्सर्वंसमाख्याहिमुनेयत्पृष्टवानहम् ॥ श्रुत्वाततोगिरिसुतांसेविष्येसहभार्यया ॥३॥ शिवशर्मोवाच॥
गदितमितिनिशम्यविष्णुशर्मन्विनययुतेनविशामदीयपित्रा ॥ मुनिरितिगदितुंदिलीपवृत्तंजगतिपवित्रतरंविचक्रमेसः ॥ १०४ ॥ इतिश्रीपाद्मेमहा
पुराणेपञ्चप०उत्तर०कालिन्दीमाहात्म्यएकाधिकद्विशततमोऽध्यायः ॥ २०१ ॥ देवलउवाच ॥ शृणुष्वभोमहाप्राज्ञदिलीपस्यमहीपतेः ॥ कथां
दिव्यांविचित्रांचशृण्वतांपापनाशिनीम् ॥ १ ॥ वैवस्वतमनोर्वंशेदिलीपोभूभुजांवरः ॥ आसीत्प्राचीनबर्हिस्तुस्वायम्भुवमनोरिव ॥ २ ॥ सतुधर्म
भृतांश्रेष्ठोधर्मेणप्रतिपालयन् ॥ महींमहीपतिर्लोकान्गुणैराढ्यैररञ्जयत् ॥३॥ मगधाधिपतेःपुत्रीमहिषीतस्यभूपतेः ॥ सुदक्षिणाख्ययाख्याताशचीवासी
द्दिवस्पतेः ॥ ४ ॥ गतेमहतिकालेतुमहिष्यांनाभवत्सुतः ॥ दध्यावितिनिजस्वान्तेससम्राट्कोशलाधिपः ॥ ५ ॥ रत्नाकरसुमेर्वादिनगरत्नैर्विराजि
तम् ॥ धृतंभूवलयंदोर्षोर्भूषायैनाप्रजस्यमे ॥ ६ ॥ वर्गत्रयीयथाकालंसेवितानविरोधिता ॥ तथापिमेऽनपत्यस्यनसौख्यंविद्यतेहृदि ॥ ७ ॥
यज्ञैराराधितोविष्णुरिन्द्राद्याश्चसुरोत्तमाः ॥ दीर्घिकारामकूपाश्चकारिताःसर्वतोभुवि ॥ ८ ॥ गोभूहिरण्यवासोभिःषड्रसान्वितभोजनैः ॥ विप्रा
अतिथयश्चैवभक्त्यासंतोषितामया ॥ ९ ॥ वृत्यर्थंपृथिवीपालानुद्धृत्ययुधिधर्मतः ॥ धनेनमहताकोशोमयाहिबहुलीकृतः ॥ १० ॥ उन्मार्ग
गामिनोमत्तानिजधर्मविलङ्घिनः ॥ विमुखाःपितृदेवेभ्योदण्डयास्तदण्डितामया ॥ ११ ॥ पञ्चपर्वसुवैष्णव्यांरवौपित्र्येचकर्मणि ॥ दशम्ये
कादशीतिथ्योर्नस्त्रीसेवाकृतामया ॥ १२ ॥ ऋतुकालावधौस्नातांस्वस्त्रियंनाहमत्यजम् ॥ अनृतावपितद्योग्येकालेचेत्प्रार्थितस्तया ॥ १३ ॥
तदातस्यांसकामिन्यांसकामंरमितंमया ॥ एवंधर्मार्थकामामेयथाकालंनिषेविताः ॥ १४ ॥ महिष्यांकेनदोषेणजायतेमेनसंततिः ॥ अतीता
नागतज्ञानोवसिष्ठोगुरुरेवनः ॥ कथयिष्यतितंदोषंयन्मेपुत्रोनजायते ॥ १५ ॥ देवलउवाच ॥ इत्यालोच्यसभूपालोगमिष्यन्नाश्रमंगुरोः ॥
मन्त्रिष्वारोपयामासकोशलाम्‌द्धिकोशलाम् ॥ १६ ॥ अथप्रजासृजंदेवंपूजयित्वाश्रमंगुरोः ॥ प्रतस्थातेपुत्रकामौदम्पतीतौशुभेऽहनि ॥
॥ १७ ॥ कतिचिद्वासरैर्मार्गमुल्लङ्घ्यैकरथेस्थितौ ॥ तौदम्पतीगुरोःसायमाश्रमंप्रापतुःशुभम् ॥ १८ ॥ वैश्वदेवान्तसंप्राप्तातिथिस

CC-0. In Public Domain. Digitization by eGangotri

त्कारकृन्मुनिम् ॥ हुताशनहुतद्रव्यप्रसरद्धूममालया ॥१९॥ पवित्रयन्तमात्मस्थान्मुनीनागन्तुकानपि ॥ मृगैर्दूर्वाप्रतानौघप्रदपूर्णोरमन्थरम्॥२० ॥
अभ्यागच्छद्भिरभितोमण्डपंसमृगीगणैः ॥ वासवृक्षमिलत्पक्षिकुलकोलाहलाकुलम् ॥ २१ ॥ परस्परविनिर्मुक्तवैरव्याघ्रमृगादिकम् ॥ जपध्यानपर
र्षीणांक्षणश्रान्तश्रुतिध्वनिम् ॥ २२ ॥ अनध्ययनकालोत्थक्रीडासक्तकुमारकम् ॥ तस्मिन्वसिष्ठमद्राक्षीद्दम्पतीतौकृतक्रियम् ॥ २३ ॥ बृस्यांनिषण्ण
मव्यग्रमरुन्धत्योपसेवितम् ॥ सववन्देगुरोःपादौमहिषीसाचतत्स्त्रियः ॥२४॥ आशिषागुरुरप्येनंयुयोजारुन्धतीचताम् ॥ अतिथिंतमथाभ्यर्च्यमधु
पर्कादिभिर्गुरुः ॥ अर्हणैरर्हतांश्रेष्ठोवसिष्ठइतिपृष्टवान् ॥ २५ ॥ वसिष्ठउवाच ॥ भोभोभूमिभृतांश्रेष्ठराज्येकुशलमस्तिते ॥ कुलेचकच्चिल्लोकेचनिज
धर्मानुवर्तिनि ॥ २६ ॥ धर्मेणपालिताकच्चित्त्वयावीरवसुन्धरा ॥ संवर्द्धयतितेकोशंधर्मधीरिवसात्त्विकी ॥ २७ ॥ तवजानपदाराजन्पौराश्चस्थिति
मात्मनः ॥ सारवन्तोविमुञ्चन्तिकच्चिन्नाम्बुधयोयथा॥ २८ ॥ स्नेहेनसाहचर्येणसहवासतयाप्रभो ॥ लक्ष्मीनारायणायेतेकच्चित्तेपुरदम्पती ॥ २९ ॥
काम्यव्रतानिराजेन्द्रप्रजानांनगरेतव ॥ फलन्तिवाञ्छितंकच्चिद्धरिचन्दनवद्दिवि ॥ ३० ॥ देवलउवाच ॥ पृष्ट्वैवंसमुनिश्रेष्ठोवसिष्ठोमुनिपुङ्गवः ॥
योगप्रभावोपनतैर्नृपंभोज्यैरभोजयत् ॥ ३१ ॥ अरुन्धतीचतांराज्ञींबह्वादरसमन्विता ॥ नानाव्यञ्जनपक्वान्नैरभोजयदुदारधीः ॥ ३२ ॥ कृतभोजन
मासीनंस्वस्थःस्वस्थंमुनिर्नृपम् ॥ पुनःपप्रच्छसंगृह्यपाणिनापाणिमानतम् ॥ ३३॥ वसिष्ठउवाच ॥ सप्ताङ्गसंयुतंराज्यंनिजधर्मरतप्रजम् ॥ प्रीतबन्धु
जनामात्यंशस्त्रास्त्रविधिवर्द्धितम् ॥३४॥ वश्यमित्रंहृतामित्रंकृष्णार्चापरमानसम् ॥ यस्यास्तिनृपतेराज्यंस्वर्गराज्येनतस्यकिम् ॥ ३५ ॥ इक्ष्वाकुवंश
राजानःपुत्रानुत्पाद्यधार्मिकाः ॥ राज्यंचतेषुविन्यस्यप्रपन्नास्तपसिप्रभो ॥ ३६ ॥ त्वंयवाहृष्टपुत्रास्योनाधिकारीतपोविधौ ॥किमर्थमागतोह्यत्रराज्यं
त्यक्त्वातथाविधम् ॥३७॥राजोवाच ॥ ब्रह्मन्नाहंतपःकर्तुमागतस्तावकाश्रमे ॥ स्वर्गकामनयात्यक्त्वाराज्यमत्रतथाविधम् ॥ ३८ ॥ ब्रह्मन्सत्यमिदं
चोक्तंभवतायत्तपोवनम्॥राज्यमारोप्यपुत्रेषुप्राप्ताइक्ष्वाकुवंशजाः ॥३९॥नतैस्त्यक्तंमहीराज्यमिदंस्वर्गगतैरपि॥ तन्मूर्तिरस्यांविमनास्तिष्ठतिह्येवसन्त
तिः॥॥४०॥ यथाबाल्यंगतंतातयौवनंचसमागतम् ॥ यास्यत्यदोऽपिचतथाजराप्येष्यतिनिश्चितम् ॥ ४१॥ जरसोऽनन्तरंमृत्युःपुरुषस्यनसंशयः ॥
मृत्युंगतेमयिब्रह्मन्विनातनयसंभवम् ॥४२ ॥ कस्येदंजगतीराज्यंभविष्यतिगुरोवद ॥ तस्मादपत्यहीनस्यराज्येऽपिममतिष्ठतः ॥ ४३॥ ममत्वंविद्यते
नात्रपुरस्तात्तद्भावतः ॥ वर्गत्रयस्यवैसम्यक्संवेत्तात्वंगुरोमम ॥ ४४ ॥केनदोषेणमेपुत्रोजायतेनतपोनिधे ॥ ध्यानेनदोषमालोक्यतंगुरोकथयाशुमे ॥
तस्यप्रतिक्रियांकुर्यांश्रुत्वासन्तानलब्धये॥४५॥देवलउवाच॥इत्याकर्ण्यवसिष्ठस्तुवचस्तस्यमहीपतेः॥उवाचसन्ततिस्तम्भहेतुंवीक्ष्यसमाधिना॥४६॥

CC-0. In Public Domain. Digitization by eGangotri

वसिष्ठउवाच ॥ त्वंपुराराजशार्दूलसंसेव्यसुरनायकम् ॥ स्नातामिमांवधूंस्मृत्वाचलितोनिजमन्दिरम् ॥ ४७ ॥ गच्छतस्त्वरयातातसन्तानोत्कण्ठि
तस्यते ॥ आसीत्सुरतरोर्मूलेकामधेनुःस्थितापथि ॥ ४८ ॥ उत्पादितात्वयातस्याःपूज्याङ्घ्रिरजसोऽतिरुट् ॥ प्रदक्षिणनमस्कारसदाचारमकुर्वता॥
॥ ४९ ॥ साशपत्त्वामतिक्रोधात्पुत्रोनोत्पत्स्यतेतव ॥ ममसन्तानशुश्रूषांयावत्त्वंनकरिष्यसि ॥ ५० ॥ गच्छंस्त्वमृतुदानायत्वरयासुतकामुकः ॥
उन्मनानाशृणोःशापंनयन्ताक्षनिनादतः ॥ ५१ ॥ तस्याःसुतासुतांधेनुंनन्दिनींससुतांमम ॥ आराधयानयावध्वासार्द्धंसादास्यतेसुतम् ॥ ५२ ॥
देवलउवाच ॥ इत्युक्तवतितत्रर्षौवसिष्ठेसातुनन्दिनी ॥ तपोवनात्समायातावत्सस्नेहस्नुतस्तनी ॥ ५३ ॥ तांदृष्ट्वाहृष्टहृदयोवसिष्ठोमुनिपुङ्गवः॥उवाच
भूपतिंभूयोदर्शयित्वाचनन्दिनीम् ॥ ५४ ॥ वसिष्ठउवाच ॥ राजन्समागताह्येषास्मृतमात्रशुभाह्वया ॥ अतोविद्धिसमीपस्थांकार्यसिद्धिमिहात्मनः
॥५५ ॥आराधितानुगत्येयंत्वयारण्येतथाश्रमे ॥ वध्वाप्रसादात्तेपुत्रंदास्यतेनात्रसंशयः ॥ ५६ ॥ यथानाभिभवेदेनांजन्तुःकश्चिद्वनोद्भवः ॥ तथा
चारयराजेन्द्रवनेहिंस्रोधनुर्द्धरः ॥ ५७ ॥ देवलउवाच ॥ तथेतिलघुवादिनेनृपतयेस्नुषायैचसक्षपाशयनहेतवेसदुटजंददौतापसः ॥ सतत्रसहभार्यया
समधिशय्यदर्भास्तृतांमहीमगमयन्निशांनियतमानसोविट्पते॥५८॥ इतिश्रीपाद्मेमहापु०पञ्चप०उत्तर०कालिन्दीमाहात्म्येद्व्यधिकद्विशततमोध्यायः
॥ २०२ ॥देवलउवाच ॥ अथोषसिनराधीशःपूजितांकुसुमादिभिः ॥ महिष्यानन्दिनींवत्सुं नोत्त्वाऽरण्यंजगामसः ॥ १ ॥ गच्छन्तीमनुतांदेवींछायेव
नृपतिर्ययौ ॥ खादन्तीमनुशष्पादिसोऽपिमूलाद्यभक्षयत् ॥२॥ तरुच्छायामुपासीनामनुसोऽप्युपविष्टवान् ॥ पिबन्तीमनुपानीयंराजापिसलिलंपपौ
॥ ३ ॥ सचराजामृदुग्रासैर्दंशापनयनेनच ॥ कण्डूयनैःकामधेनुंगुरोरेवमसेवत ॥ ४ ॥ अथप्रत्याश्रमंसायंन्यवर्त्ततमहीपतेः ॥ अङ्कंपवित्रयन्तीसा
खुरोद्धूतैरजःकणैः ॥ ५ ॥ ऊधोभारेणगुरुणागच्छन्तीमन्थरंबभौ ॥ महीपालमहाकार्यभाराक्रान्तेवनन्दिनी ॥ ६ ॥ तांमुनेराश्रमाभ्याशेराज्ञीप्रत्यु
ज्जगामह ॥ चन्दनाक्षतनैवेद्यधूपादीनुपनीयच ॥ ७ ॥ तांपूजयित्वाविधिवत्प्रणम्यचपुनःपुनः ॥ कृत्वाप्रदक्षिणंराज्ञीतस्थौप्राञ्जलिरग्रतः ॥ ८ ॥
सागृहीत्वाचतांपूजांविहितांश्रद्धयातया ॥ राज्ञानिश्चलमास्थायययौताभ्यांसहाश्रमम् ॥ ९ ॥ आराधयतितामेवंदिलीपेतुदृढव्रते ॥ एकाधिका
व्यतीयायदिनानांवैश्यविंशतिः ॥ १० ॥ अथभूमिपतेस्तस्यभावजिज्ञासयातुसा ॥ निवेशनिर्भयस्वान्तासशष्पांहिमवद्गुहाम् ॥ ११॥ पश्यताहिम
वत्सानुशोभामथमहीभृता॥ अलक्षितागमःसिंहोबलाज्जग्राहनन्दिनीम् ॥१२॥ साचक्रन्दभृशंधेनुर्दुःखितेवदयास्वना॥ चित्तेधनुर्भृतस्तस्यजनयन्ती
दयोदयम् ॥१३ ॥ तदाक्रन्दितमाकर्ण्यतस्याःसजगतीपतिः ॥ हिमवत्सानुसंलग्नांनिजदृष्टिंन्यवर्त्तयत् ॥१४ ॥ उपर्युपरितांधेनुंस्रवदश्रुमुखींनृपः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तीक्ष्णदंष्ट्रनखंसिंहंदृष्ट्वासव्यथितोऽभवत् ॥ १५ ॥ गृहीतांतेनसिंहेनतामालक्ष्यधनुर्द्धरः ॥ निषङ्गाद्बाणमुद्धर्तुंप्राहिणोद्दक्षिणंभुजम् ॥ १६ ॥ बाणमु
द्धृत्यतूणीरान्निहन्तुंतंमृगाधिपम् ॥ गुणेनापूर्णमायोज्यचकर्षवसुधाधिपः ॥ १७ ॥ जडीभूतसमस्ताङ्गस्तत्सिंहालोकनेनसः ॥ नाशकद्बाणमुत्स्र
ष्टुंराजासीद्विस्मितस्ततः ॥ १८ ॥ तादृशंनृपमालक्ष्यजगादसमृगाधिपः ॥ नरवाचाभृशंभूयोविस्मयंप्रापयन्निदम् ॥ १९ ॥ सिंहउवाच ॥
दिलीपंत्वामहंराजञ्जानामिरविवंशजम् ॥ त्वंचजानीहिमांशम्भोर्गणंकुम्भोदराभिधम् ॥ २० ॥ देवदारुरयंयस्तेवर्त्ततेदृष्टिगोचरे ॥ पार्वत्यापुत्रवद्वीर
पालितःस्निग्धचित्तया ॥२१ ॥ एकदामुष्यवन्येनगजेनाघर्षताकटम् ॥ उदपाटिमहाराजवल्कलंमृदुलंभृशम् ॥ २२ ॥ एनंतादृशमालक्ष्यमृडानीक
रुषान्विता ॥ मामत्रस्थापयामाससिंहंकृत्वास्यरक्षणे ॥ २३ ॥ मामाहचेतिसादेवीकुम्भोदरनिशम्यताम् ॥ योऽत्रजन्तुःसमागच्छेत्तंखादेस्त्वंवस
न्निह ॥२४ ॥ ततःप्रभृतिराजेन्द्रतदाज्ञांपालयन्नहम् ॥ पालितांत्रिदशैःसर्वैःकन्दरेऽत्रवसाम्यहम् ॥२५॥ जडीभावेस्वदेहस्यत्वयाकार्योनविस्मयः ॥
महतीशाम्भवीमायावर्त्ततेऽत्रहिमाचले ॥२६॥ अन्यस्मिन्निवसिंहेत्वंप्रहर्तुंनमयिक्षमः ॥ यतोमत्पृष्ठमारुह्यवृषमारोहतिप्रभुः ॥ २७ ॥ निवर्त्तस्वनिजं
देहंरक्षसर्वार्थसाधनम् ॥ दैवेनासादितावीरगौरियंभक्षणायमे ॥ २८ ॥ देवलउवाच ॥ इत्याकर्ण्यवचस्तस्यवीरसंबोधनान्वितम् ॥ प्रत्युवाच
दिलीपस्तंसजडीभूतविग्रहः ॥ २९ ॥ राजोवाच ॥ सर्गस्थितिविसर्गाणांकारणंजगतःशिवम् ॥ अम्बिकांजगदम्बांचनमामिमृगराजतौ ॥३०॥ त्वंच
तत्सेवकत्वेनमान्योममृगाधिप ॥ ब्रवीमियदहंवाक्यंश्रुत्वाशाधिकरोमिकिम् ॥ ३१ ॥ वसिष्ठोब्रह्मणःपुत्रोगुरुर्नोविदितस्तव ॥ तस्येयंनन्दिनीनाम
धेनुःसर्वार्थसाधिका ॥ ३२ ॥ सन्तानोत्पत्तयेतेनदत्ताराधयितुंमम ॥ येयमाराधितासम्यग्दिनानिकतिचिन्मया ॥ ३३ ॥ लघुतर्णकमातेयंधृताते
गिरिकन्दरे ॥ शम्भुभृत्याद्बलात्त्वत्तोशक्तामोचयितुंमया ॥ ३४ ॥ अहंतस्यमुनेरग्रेगच्छाम्येनामृतेकथम् ॥ कामधेनोस्तुदौहित्रिजगत्सेव्यायश
स्विनी ॥ ३५ ॥ अनयासदृशीनान्यागौर्ययातोषयामितम् ॥ तस्माद्विमुच्यगामेनाम्मयाकुरुनिजाशनम् ॥ ३६ ॥ ददामिदेहमात्मीयमपकी
र्तिमलीमसम् ॥ एवंनधर्महानिःस्यादृपेस्तवतुभोजनम् ॥ गवार्थेत्यजतःप्राणान्ममापिगतिरुत्तमा ॥ ३७ ॥ देवलउवाच ॥ एवमा
कर्ण्यसिंहेनकृतेमौनेविशांपते ॥ तदग्रेऽवाङ्मुखोराजान्यपतद्धर्मकोविदः ॥ ३८ ॥ तस्यप्रतीक्षमाणस्यसिंहपातंसुदुःसहम् ॥ पपातोपरिपुष्पाणांवृष्टि
र्मुक्तासुरेश्वरैः ॥ ३९ ॥ पुत्रोत्तिष्ठेतिवचनंश्रुत्वाराजासउत्थितः ॥ जननीमिवतांधेनुंददर्शनमृगाधिपम् ॥ ४० ॥ तंविस्मितमुवाचेदंनन्दिनीनृप
सत्तमम् ॥ ४१ ॥ नन्दिन्युवाच ॥ माययासिंहरूपिण्यात्वंमयासिपरीक्षितः ॥ मुनिप्रभावान्मांराजन्ग्रहीतुंनक्षमोऽन्तकः ॥ ४२ ॥ मनसापिकुतोऽ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

न्येषांमद्द्रहेशक्तिरङ्गिनाम् ॥ स्वशरीरस्यदानेनत्वंमांरक्षितुमुद्यतः ॥ अतस्तेऽहंप्रसन्नास्मिवृणीष्ववरमीप्सितम् ॥ ४३ ॥ राजोवाच ॥
नगुप्तंदेहिनामन्तर्वार्तैवृत्तंभवादृशाम् ॥ अतोजननिजानासिवाञ्छितंममदेहितत् ॥ ४४ ॥ मगधेशसुतायांमेवंशकर्तारमात्मजम् ॥ ग्रय च्छ
किंचित्स्वच्छानांनासाध्यंहिभवादृशाम् ॥ ४५ ॥ इत्युक्त्वाञ्जलिमाधायतत्पुरस्तस्थिवान्नृपः ॥ तूष्णींतदुत्तरापेक्षीतत्पुरोबद्धलोचनः ॥ ४६ ॥
देवलउवाच ॥ निशम्येतिवचस्तस्यभूपतेरिदमब्रवीत् ॥ नन्दिनीपितृदेवार्षिनरभूतार्थसाधिका ॥ ४७ ॥ नन्दिन्युवाच ॥ पुत्रपत्रपुटे
दुग्ध्वापयोममपिबेप्सितम् ॥ आश्रमेगुरुणाज्ञप्तःपुनःपास्यसिशेषितम् ॥ भवितावंशकर्तातसुतःशस्त्रास्त्रतत्त्ववित् ॥ ४८ ॥ देवलउवाच॥
इत्युक्तःसौरभेय्यातामुवाचविनयेनसः ॥ ४९ ॥ दिलीपउवाच ॥ मातस्तवैवपास्यामिशेषंसर्वक्रियाविधेः ॥ तृप्तोऽहंमातरासाद्यमिष्टं
तेवचनामृतम् ॥ ५० ॥ नान्यदिच्छामिसारङ्गःकादम्बिन्यायथाजलम् ॥ तवशुश्रूषणान्मातरभवंसकलोद्भवः ॥ ५१ ॥ समस्तजनपूज्या
याविद्यायाइवमूढधीः ॥ तवमातामहीदत्तःशापोऽप्यासीद्वरोमम ॥ ५२ ॥ तन्मृतेपुत्रलाभोमेकुतस्तवचदर्शनम् ॥ वरायैवतथाप्यम्बसमाराध्या
भवादृशः ॥ नहिकश्चिद्द्विषाकाङ्क्षीमहादेवात्रिवर्गदात् ॥ ५३ ॥ देवलउवाच ॥ श्रुत्वेतितद्वचःसागौःप्रसन्नासाधुसाध्विति ॥ आभाष्यहिमवद्गर्भा
द्ययौतेनसहाश्रमम् ॥ ५४ ॥ पूर्वेद्युरिवतत्रापिपूजिताराजभार्यया ॥ प्रसन्नासाबभौधेनुःकार्यसिद्धिरिवाङ्गभाक् ॥ ५५ ॥ मुखंप्रसन्नमालक्ष्यमृगा
क्षीसाक्षितीशितुः॥अज्ञासीत्तंनिजंकार्यसिद्धंयत्नस्तुयत्कृते ॥५६॥अथतौदम्पतीधेन्वाविधिवद्विहितार्चया ॥ तयासहगुरोरग्रेकृतकृत्यस्यजग्मतुः ॥
॥ ५७ ॥ निरीक्ष्यतौमुनिवरःप्रसन्नमुखपङ्कजौ ॥ अतीन्द्रियज्ञाननिधिःप्रोवाचेदंप्रहर्षयन् ॥ ५८ ॥ वसिष्ठउवाच ॥ राजञ्ज्ञानामिगौरेषाप्रस
न्नावामभूत्किल॥ अपूर्वायुवयोरद्यमुखकान्तिर्हिलक्ष्यते ॥५९॥ सुरभिःसुरशाखीचविश्रुतौकामपूरिणौ॥ तदपत्यंसमाराध्यसिद्धोऽर्थःस्यात्किमद्भुतम्
॥६०॥ योददातिनिखिलंमनोरथंकीर्तितेयमनघापिदूरतः ॥श्रद्धयानिकटएवसेविताकिंपुनःसुरतरङ्गिणीवसा ॥६१॥ ज्ञानतोविदितमद्भुतंमयात्वत्कृ
तंयदनयापरीक्षणम् ॥ भूपतेत्वमपिधर्ममात्मनोरक्षसिस्मचयथातथाचतत् ॥६२॥ त्वय्यसौममनोऽनुकूलताभावमात्मनिविबुध्यतेतथा ॥ तुष्यति
स्मकमलायथाहरेःपार्वतीवगिरिशस्यसज्जने ॥ ६३ ॥ रात्रिरत्रसहभार्ययानयाधेनुपूजनपरेणनीयताम् ॥ भूपभव्यभवतागमिष्यतेश्वःसमाप्तविधिना ॥ १९७ ॥
निजांपुरीम् ॥ ६४ ॥ देवलउवाच ॥ वैश्यैवंधेनुमाराध्यसभार्यःप्राप्तवाञ्छितः ॥ प्रातर्युक्तरथःप्राप्यगुरोराज्ञामगाद्गृहम् ॥ ६५ ॥ कतिचिद्वासरैस्त
स्यदिलीपस्याभवद्रघुः ॥ यस्यनाम्नारवेर्वंशःपृथिव्यांविश्रुतोऽभवत् ॥ ६६ ॥ यःपठिष्यतिभूपस्यदिलीपस्यकथामिमाम् ॥ धनंधान्यंसुतंवैश्य

CC-0. In Public Domain. Digitization by eGangotri

लप्स्यतेसपुमानिह ॥ ६७ ॥ शरभवरसुतात्तयेस्वबुद्ध्यासममनयापरितोषयाशुगौरीम् ॥ त्वमपिकुलधरंगुणान्वितंसासुतमनघंखलुदास्यतेचतुभ्यम्
॥ ६८॥ शिवशर्मोवाच॥ मुनिरितिचरितंदिलीपराज्ञोललिततरंशरभायपुण्यमुक्त्वा ॥ अभिमतगतिमात्मनःप्रपेदेविधिमुपदिश्यचपूजनेऽम्बिकायाः
॥ ६९ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०उत्तर०कालिन्दीमाहात्म्येत्र्यधिकद्विशततमोऽध्यायः ॥ २०३ ॥ शिवशर्मोवाच ॥ विष्णुशर्मंस्ततोवैश्यः
शरभःसहभार्यया ॥ नीत्वापूजोपकरणंययौश्रीचण्डिकालयम् ॥ १ ॥ तत्रतौविधिवत्स्नात्वासुमनोधूपदीपकैः ॥ आनर्चतुर्भक्तियुक्तौच
ण्डिकांपुत्रकाम्यया ॥ २ ॥ श्रद्धयापूजिताताभ्यांदिनैःसप्तभिरम्बिका ॥ उवाचवाचाप्रत्यक्षंभूत्वाविशदमानसा ॥ ३ ॥ पार्वत्युवाच ॥
भोभोवैश्यप्रसन्नास्मिभक्त्यासुदृढयातव ॥ ददामिपुत्रंतेसाधोयदर्थेयत्नवानसि ॥ ४ ॥ गच्छत्वंमाविलम्बस्ववनमैन्द्रंचखाण्डवम् ॥ तत्रतीर्थं
महापुण्यमिन्द्रप्रस्थाख्यमुत्तमम् ॥ ५॥ निगमोद्बोधकंतत्रतीर्थंनिखिलकामदम्॥ बृहस्पतिकृतंतत्रस्नाहित्वंसुतवाञ्छया ॥ ६ ॥ भविष्यतिसुतस्ता
ततवस्नानेनतत्रहि ॥ तत्रस्नात्वामयाप्यङ्गलब्धःस्कन्दःसुरारिहा ॥ ७ ॥ शिवशर्मोवाच ॥ इत्याकर्ण्यवचोदेव्याःपितामससहस्त्रिया ॥ अत्राजगाम
सत्तीर्थेसस्नौचसुतवाञ्छया ॥ ८ ॥ उपस्करवतीर्धेनूर्द्विजेभ्यःप्रददौशतम् ॥ देवान्पितॄंश्चसंतर्प्ययथाविध्यत्रबुद्धिमान् ॥ ९ ॥ सप्तरात्रमुषित्वातुद
म्पतीयतमानसौ ॥ जग्मतुःस्वगृहानिष्टलाभोत्फुल्लमुखाम्बुजौ ॥ १० ॥ तस्मिन्नेवाभवद्गर्भोमासिमातुर्ममान्वहम् ॥ व्यतीतेनवमेमासिजातोऽहं
दशमेशुभे ॥ ११ ॥ विष्णुशर्मन्यदुक्तंतेपुरावृत्तमिदंमया ॥ दशाब्दद्वयमेवैतच्छ्रुतंसर्वंपितुर्मुखात् ॥१२ ॥ एकदाक्षममालोक्यगृहकर्मणिमांपिता ॥
गृहंसमर्पयामासविश्वाद्वैराग्यमाप्नुवन्॥१३॥मांचोवाचसधर्मात्मागोविन्दासक्तमानसः ॥विनिन्दन्विषयासक्तिंविष्णुभक्तिंस्तुवन्मुहुः॥ १४ ॥ पितो
वाच॥सुमतेवार्द्धकंप्राप्तंपलिताश्चिकुराशमम॥गोविन्दचरणाम्भोजंसेविष्येसाधुसेवितम् ॥१५॥तत्सेवयाभवेत्स्वच्छंमनोयस्यचसुस्थिरम्॥सपुमानात्म
संतुष्टोनकिंचिदभिवाञ्छति ॥१६॥निष्कामःसुखदुःखाभ्यांमुञ्जन्सुकृतदुष्कृते ॥प्राकृतेतत्समाप्तौचत्यजन्देहंभवत्यजः ॥१७॥ तावद्द्रव्यगुणसुखंया
वत्प्राप्तंनचित्सुखम् ॥ तत्प्राप्तौतद्भवेत्तुच्छंसुधायाइवतक्रकम् ॥ १८ ॥ हरेर्मायाबलवतीयामोहयतिदेहिनम् ॥ हिताहितंनजानातिसयथामदिरामदः
॥ १९॥ प्रवृत्तिंचनिवृत्तिंचविद्ययाविद्ययाचसः ॥ करोतिस्वेच्छयाकालेबाललीलोहिसप्रभुः॥२०॥वेदोदितंयदाकर्मक्रियतेफलमिच्छता ॥ प्रवृत्तिःसा
परातातेतषामर्पणमीश्वरे ॥ २१ ॥ यथानिर्दग्धबीजानिनप्ररोहन्तियत्नतः ॥ तथाकर्माणिविश्वेशेनिष्कामेनार्पितानितु ॥ २२ ॥ कर्मणांचलयोमो
क्षःसुखदुःखप्रदायिनाम् ॥ तदुत्पत्तिस्तुबन्धःस्यादित्यसौशास्त्रनिर्णयः ॥ २३ ॥ अतोऽहंकर्मवेदोक्तंकुर्वन्नाभिलषन्फलम् ॥ पर्यटिष्यामितीर्थेषु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह्रदिभक्तिंदधद्धरेः ॥ २४॥ एवंप्रारब्धकर्माणिभुञ्जन्नन्यान्यनजयन्॥हनिष्यामिजगद्रोगंपीत्वासत्सङ्गमौषधम् ॥२५॥ शिवशर्मोवाच ॥ एवमाकर्ण्य
वचनंतस्याहंपितुरात्मनः॥अवदंविष्णुशर्मंस्त्वंतन्निशामयतत्त्वतः ॥२६ ॥अयंजनोदुराराध्यःकथयिष्यतिनोयशः ॥ दुष्टःकुटुम्बादुद्विज्यनिःसृत्य
गतइत्ययम् ॥२७॥ इयंविष्णुपदीतातभुवनत्रयपावनी ॥ स्मृताहरत्यघंदूरात्कस्मादेनांविमुञ्चसि ॥ २८ ॥ पापकारीजनस्तातम्रियतेमगधेतुयः ॥
सोऽप्यस्थिपाताद्गङ्गायांस्वर्यातित्यजमाशुभम् ॥ २९ ॥ पुत्राःषष्टिसहस्राणिसगरस्यमहात्मनः ॥ कपिलक्रोधनिर्दग्धागतायत्स्पर्शनादिवम्॥३० ॥
तामिमांत्रिदिवश्रेणींमुक्तेरपिविधायिनीम् ॥ मुमुक्षुसेवितांतातमुक्त्वामान्यत्रगम्यताम् ॥ ३१ ॥ मावजानीहिसामीप्येगङ्गांत्रिदशमानिताम् ॥
यदिच्छसिमहाभागसेवितैषाप्रदास्यति ॥ ३२ ॥ तिर्यञ्चोऽपिविनाज्ञानाज्जलेचेत्स्युर्गतासवः ॥ भवेयुस्तर्हितेब्रह्मसाकथंत्यज्यतेत्वया ॥ ३३ ॥शि
वशर्मोवाच ॥ निशम्यैतद्वचस्तातस्ततोममकृतप्रियः ॥ उवाससदनेसर्वविषयेभ्यःपराङ्मुखः ॥ ३४ ॥ त्रिषुकालेषुगङ्गायांप्रत्यहंस्नानमाचरन् ॥
पुराणंस्याद्गृहेयत्रतत्रयातिसनित्यशः ॥३५॥ एकदाकर्णयन्धीरोयमुनातीर्थगौरवम् ॥ तत्रशुश्रावमाहात्म्यमस्यतीर्थस्यपुत्रसः॥ ३६ ॥ अविमुक्तह
रिद्वारप्रयागेभ्यश्चपुष्करात् ॥ अयोध्याद्वारिकाकाञ्चीमथुराभ्यस्तथान्यतः ॥ ३७ ॥ सर्वतीर्थमयस्यास्यपुण्यंशतगुणाधिकम् ॥ कथितंतेनविदु
षासुतेनाकर्ण्यमतिपिता ॥ ३८॥ त्यक्त्वागृहमगादत्रतीर्थेसर्वैरलक्षितः ॥ आवामिवमहाभागोगोविन्दपदसेवकः ॥ ३९ ॥ अत्रागत्यमहाभागोमत्पि
तामोक्षवाञ्छया ॥ निगमोद्बोधकेतीर्थेत्रिकालंस्नानमाचरन् ॥ ४० ॥ उवासकतिचिन्मासानत्रतीर्थोत्तमेहिसः ॥ कुर्वन्निजक्रियांधी
मान्निःस्पृहोऽप्यजवेश्मनि ॥४१॥ एकादासहसातस्यज्वरोऽभूदतिदारुणः ॥ महत्यापीडयातस्यमुमोहगतचेतनः ॥ ४२ ॥ मुहूर्तंसपिता
मुह्यस्तदवस्थोव्यतिष्ठत ॥ पश्चात्समागतप्राणोव्यचिन्तयदिदंतदा ॥ ४३ ॥ अहोमेकष्टमापन्नंदूरेपुत्रःसधार्मिकः ॥ योमांज्वरवितप्ताङ्गमाश्वास
यतिबुद्धिमान् ॥ ४४ ॥ अगम्यागमनंपापंकृतंयन्मेसुदारुणम् ॥ प्रायश्चित्तंनतस्यापिकृतंकामेगतिर्भवेत् ॥ ४५ ॥ आगमिष्यतिपुत्रोमेतस्मै
दास्यामिवस्विति ॥ यन्मयागोपितंगेहेनदृष्टंचमयापितत् ॥ ४६ ॥ शिवशर्मोवाच ॥ इतिचिन्तयतस्तस्यपान्थोवर्षेणपीडितः ॥ शीतार्तःक
म्पितवपुरुटजंप्राविशत्तदा ॥ ४७ ॥ सतंसंविष्टमालोक्यभूयोगत्वातदन्तिके ॥ मुनिरेषइतिज्ञात्वाववन्देशिरसाध्वगः ॥ ४८ ॥ ऊचेचकस्मा
त्सुतोऽसिमुनेसन्ध्यासमागता ॥ रविरस्तंप्रयात्येषनसुतेःकालएषते ॥ ४९ ॥ इत्युक्तमात्रेवचसिपथिकेनपितामम ॥ शरभोज्वरतप्ताङ्गस्तमा
हकथमप्यहो ॥ ५० ॥ शरभउवाच ॥ श्रूयतांवचनंपान्थयद्ददामिपुरस्तव ॥ श्रुत्वामद्वाग्ययातेनत्वयासाधोविधीयताम् ॥ ५१ ॥ वैश्योऽ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हंशरभोनाम्नाकान्यकुब्जेगृहंमम ॥ अत्रागतोनिषिद्धोऽपिजायामित्रसुतैरहम् ॥ ५२ ॥ अस्यतीर्थस्यमाहात्म्यंश्रुत्वासूनुमुखेरितम् ॥ मासास्तुक
तिचित्साधोव्यतीतामयिचागते ॥ ५३ ॥ दिनत्रयमतिक्रान्तंज्वरितस्यममाधुना ॥ प्राणामेविगताआसन्नद्यभूयःसमागताः ॥ ५४ ॥ कियान
प्यायुषःशेषःसाधोमेखलुतिष्ठति ॥ शमनस्यगृहंदृष्ट्वायदहंपुनरागतः ॥ ५५ ॥ भाग्योदयेनकेनापिममात्रत्वंसमागतः ॥ नयमांमद्गृहंमित्रद्रव्यं
बहुददामिते ॥ ५६ ॥ दास्याम्यपिगृहंगत्वाकृपांकुरुकृपानिधे ॥ इहभूभागउत्खायगृह्यतांमामकंधनम् ॥ ५७ शिवशर्मोवाच ॥ इत्याक
र्ण्यसदुर्बुद्धिर्ग्राम्योविषयलम्पटः ॥ उवाचधनलुब्धस्तंत्वदुक्तंसाधयाम्यहम् ॥ ५८ ॥ इत्युक्त्वाधनमुत्खायतस्माद्भूभागतस्तदा ॥ अग्रतःस्था
पयामासशरभस्याहचाध्वगः ॥ ५९ ॥ अध्वगउवाच ॥ धनमेतद्विशांनाथतवभूभागतोमया ॥ निष्कासितंप्रयच्छाशुशिबिकानयनायमे ॥
॥ ६० ॥ यामारोप्यज्वरार्तंत्वांनयामितवकेतनम् ॥ ६१ ॥ शिवशर्मोवाच ॥ इत्युक्तस्तेनसतदाददौस्वर्णपलत्रयम् ॥ सोऽपिनीत्वापितुर्द्र
व्यंययौलवणपत्तनम् ॥ ६२ ॥ उषित्वारात्रिमेकांतुशिबिकांसपरिच्छदाम् ॥ सवाहामानयत्पुत्रदत्त्वास्वर्णपलद्वयम् ॥ ६३ ॥ पलद्वयंगृहीतं
तत्तेनैवाधर्मबुद्धिना ॥ आरोप्यशिबिकांततुशरभंवैश्यसत्तमम् ॥ ६४ ॥ पान्थःसचलितोवाहांस्त्वरयन्कान्यकुब्जकम् ॥ अस्यतीर्थवरस्याथ
कमण्डलुजलंधृतम् ॥ ६५ ॥ पाययन्नल्पमल्पंतंतृषार्तंसोऽध्वगोययौ ॥ अथतेसरसस्तीरउत्तीर्णाभोक्तुमध्वनि ॥ ६६ ॥ स्नात्वाभुक्त्वापुनस्त
स्मात्स्थानाच्चेलुस्त्वरान्विताः ॥ कियन्तींभूमिमुल्लङ्घ्यतृषार्तास्तेकमण्डलोः ॥ ६७ ॥ जलंपीत्वातृषार्तंतंशरभंचाप्यपाययत् ॥ अथकश्चिन्म
हाभीमोविकटोनामराक्षसः ॥ ६८ ॥ विचरन्निर्जनेऽरण्येगच्छतस्तानवैक्षत ॥ तान्दृष्ट्वासक्षुधाक्रान्तोवेगेनान्विवृताननः ॥ ६९ ॥ अभिदुद्राव
चरणाघातेनाकम्पयन्महीम् ॥ आगत्यतरसापार्श्वेतान्वाहान्पथिकंचतम् ॥७०॥ सकेशेषुसमादायभ्रामयामासखेचरः ॥ गतासून्भ्रामणेनैवभूतलेतान
पोथयत् ॥ ७१ ॥ चखादपिशितंतेषांपपौकोशाच्चशोणितम् ॥ कुत्रयास्यतिरोगार्तोनरोऽयंपुरतोमम ॥ ७२ ॥ एनंतुभक्षयिष्यामिपश्चादम्बुपि
बाम्यहम् ॥ इतिकृत्वामतिंवारितीर्थस्यास्यकमण्डलोः ॥ ७३ ॥ मुखेचिक्षेपसतदारजनीचरपुङ्गवः ॥ क्षिप्तमात्रेजलेतस्यपूर्वजन्मभवास्मृतिः ॥
॥ ७४ ॥ जातासतुवधात्तस्यशरभस्यन्यवर्तत ॥ पूर्वजन्मकृतंपापंतदपिस्मृतिमागमत् ॥ ७५ ॥ येनराक्षसभावस्तुभूतोविप्रोद्भवादपि ॥ स्मृ
त्वापादमुपेत्याशुसमीपेशरभस्यतु ॥ उवाचज्ञानमापन्नोराक्षसःपितरंमम ॥ ७६ ॥ राक्षसउवाच ॥ भोभोमनुष्यशार्दूलकस्त्वंकेचजनाअमी ॥
भक्षितायेमयाघोररूपेणाधमरक्षसा ॥ ७७ ॥ कस्यतीर्थवरस्येदंजलंयस्यप्रभावतः ॥ पापिनोऽपिस्मृतिर्जातापूर्वजन्मभवाऽमम ॥ ७८ ॥ वैश्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उवाच ॥ वैश्योऽहंराक्षसश्रेष्ठकान्यकुब्जेगृहंमम ॥ तीर्थानिपर्यटन्निन्द्रप्रस्थेऽहंसमुपागतः ॥ ७९ ॥ तत्राहमभवंदुःखीज्वरेणविधियोगतः ॥
ततोमेबुद्धिरुत्पन्नागन्तुंगृहमसत्पथ ॥ ८० ॥ तत्रकश्चित्समायातःपान्थोवर्षेणपीडितः ॥ प्रार्थितःसमयानीयशिबिकांमांगृहंनय ॥ ८१ ॥ स
चायंशिबिकांपन्थःसमुपानीयसत्वरः ॥ मामारोप्यचतांधीरश्चलितोमद्गृहंप्रति ॥ ८२ ॥ सपान्थस्तेचशिबिकावाहाःसम्प्रतिभक्षिताः ॥ त्व
याजलमिदंयस्यतीर्थस्यापिचतच्छृणु ॥ ८३ ॥ इन्द्रस्यखाण्डववनेयमुनास्तिसरिद्वरा ॥ तत्तीरेऽस्तिहरिप्रस्थंतीर्थंतीर्थोत्तमोत्तमम् ॥ ८४ ॥
सुराचार्यस्यतत्रास्तितीर्थंसर्वार्थसाधकम् ॥ निगमोद्बोधकंजातास्मृतिस्तेयज्जलाशनात् ॥ ८५ ॥ एतत्तेसर्वमाख्यातंयत्पृष्टोऽहमिहत्वया ॥
पृच्छामित्वामहंकिंचित्तद्वदाशुनिशाचर ॥ ८६ ॥ पूर्वजन्मकृतंकर्मस्मरसित्वमिहाधुना ॥ वदकिंतेकृतंपापंयेनजातोऽसिराक्षसः ॥ ८७ ॥
राक्षसउवाच ॥ पुराहमभवंविप्रःपुण्येवेदविदांकुले ॥ दुराचारोह्यधर्मात्माशृणुसर्वंवदामिते ॥ ८८ ॥ क्रीडताहिमयानित्यंद्यूतेनसहतद्विदैः॥ हा
रितंद्रविणंभूरिस्वकीयंपितुरेवच ॥ ८९ ॥ पित्रानिवेद्यभूपायमामकंकर्मतज्जनैः ॥ पुरान्निःसारितोनिःस्वोगतोऽहंग्राममन्तिके ॥९०॥तत्रासीन्मेसखा
नामदेवकोब्राह्मणोत्तमः॥तेनाहंरक्षितोगेहेकुर्वताचिरमादरम् ॥९१॥ वस्तुंतत्रसुखेनाहंतद्भार्यांरूपशालिनीम् ॥ कामातुरोऽहमभजंबलान्मित्रेगतेक्वचित्
॥९२॥सामृतातत्क्षणात्साध्वीभक्षयित्वामहाविषम्॥तांदृष्ट्वातमसायुक्तेनिशीथेऽहंपलायितः॥९३॥पलायमानस्तरसाधृतोऽहंराजकिङ्करैः ॥चौरोऽयमि
तिखड्गेनचिच्छिदुस्तेशिरोमम॥९४॥मृतंमांयातनादेहमावेश्ययमकिङ्कराः॥रौरवेनिरयेघोरेचिक्षिपुर्यमशासनात्॥९५ ॥षष्टिवर्षसहस्राणितत्राहंतीव्रया
तनाम्॥भुक्त्वातेनैवपापेनराक्षसत्वमुपागतः॥९६॥शतवर्षाण्यतीतानिराक्षसत्वेविशांपते॥वदामितमुपायंमेयेनास्मान्मुक्तिमाप्नुयाम्॥९७ ॥पुण्यंतदा
र्पितेसाधोवदामिशृणुसादरम् ॥ येनतीर्थवरस्येदंजलंममसुखेगतम् ॥ ९८ ॥ तत्रैवजन्मनिमयाकृत्वाहरिदिनेव्रतम् ॥ संसर्गान्नेच्छयावैश्यरात्रौजा
गरणंकृतम् ॥ ९९ ॥ द्वादश्यामथसंस्नात्वाभोक्तुंमयिसमुद्यते ॥ मद्गृहेकश्चिदायातोवैष्णवोविष्णुरूपधृत् ॥ १०० ॥ कुपितोऽहंतमालो
क्यदुर्वचोऽवदमग्रतः ॥ क्वगच्छसिदुराचारदाम्भिकस्त्रीजनान्तरे ॥ १ ॥ इत्युक्तःसमयाधीरस्तुल्योमानापमानयोः ॥ तूष्णीमेवनिकेतान्मे
निर्गत्यचलितोयदा ॥ २ ॥ तदाभिमुखमायान्तीपत्नीममपतिव्रता ॥ पतित्वापादयोस्तस्यतंसाधुंगृहमानयत् ॥ ३ ॥ मयापमानितस्या
पिनक्रोधोऽभून्महात्मनः ॥ तयाहृतस्याप्यानन्दोयतःसोऽरिसुहृत्समः ॥ ४ ॥ तमर्चयित्वाविधिवद्विष्टरेचोपवेश्यसा ॥ भोज्यंभोजयजीवेशजय
ताद्भुवनत्रयम् ॥ ५ ॥ इत्युक्तोऽहंतयासाध्व्यान्यगदंतंमहाशयम् ॥ म्लानवक्त्रःप्रसन्नास्यमुत्तिष्ठशमयक्षुधाम् ॥ ६ ॥ इत्युक्त्वातस्यचरणौनो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दितस्तनुमध्यया ॥ प्राक्षालयंपुनस्तंतुनिवेश्यासनउत्तमे ॥ ७ ॥ अददांपात्रमन्नेनपूर्णंतस्मैविवेकिने ॥ जलंचतत्करेसाध्व्याप्रेरितोऽहंतयामुहुः
॥ ८ ॥ उपभुज्यसधर्मात्मास्वैरंविगतविक्रियः ॥ हरेरामहरेकृष्णजपन्निति जगामह ॥ ९ ॥ कृतंपुण्यमिदंवैश्यनोदितेनमयास्त्रिया ॥ पूर्व
जन्मनियेनेदंप्रापितंतीर्थवारिमे ॥ ११० ॥ शिवशर्मोवाच ॥ विष्णुशर्मन्निदंवाक्यमुक्त्वातिष्ठतिराक्षसे ॥ पथिकःसचतेवाहाःप्राहुःखेदिव्यदे
हिनः ॥ ११ ॥ पथिकवाहाऊचुः ॥ भोभोविशांपतेसाधोप्राप्ताअप्यपमृत्युताम् ॥ त्वत्प्रसादादिदंवारिपीत्वादेवत्वमागताः ॥ १२ ॥ त्वत्सङ्गेधन
लोभेनविट्पतेचलितायतः ॥ विगतानधनाकाङ्क्षामरणावसरेऽप्यतः ॥ १३ ॥ तीर्थराजजलस्यास्यतिष्ठतोजठरेहिनः ॥ मरणेह्यनुभावात्तुमैत्रीप्राप्ताध
नेशितुः ॥ १४ ॥ नमामस्त्वांवयंयामोधनेशनगरींप्रभो ॥ विमानैस्तद्गणानीतैर्नानामणिविभूषितैः ॥१५ ॥ प्रयाहिमाविलम्बस्वतीर्थेनिगमबोधके ॥
त्वमनेनसमंसाधोतारयैनमपिद्रुतम् ॥ १६ ॥ शिवशर्मोवाच ॥ इत्युक्त्वातेगतास्तातदिश्युदीच्यांसमंततः ॥ विमानकिङ्कणीनादैर्नादयन्तोऽथरो
दसी ॥ १७॥अथवैश्योममपितातमाहरजनीचरम् ॥१८॥ शरभउवाच॥ उत्तिष्ठनयमामाशुतीर्थेनिगमबोधके ॥ ज्वरार्त्तेनमयापद्भ्यांतत्रगन्तुंनशक्य
ते ॥ योमांनयतितत्तीर्थत्वदन्योनास्तिकश्चन ॥ १९ ॥ शिवशर्मोवाच ॥ तथेतितमथाश्वास्यवैश्यंसरजनीचरः ॥ स्कन्धमारोप्यवेगेनतत्तीर्थंपावनं
ययौ ॥ १२० ॥ ऊषतुस्तावुभौतत्रविट्पतिःसचराक्षसः ॥ कुर्वन्तौस्नानमात्रंतुसर्वतीर्थोत्तमोत्तमे ॥ २१ ॥ अथाहंपितुराकर्ण्यमहतींगुरुवेदनाम् ॥
तंप्रतिप्रेरितोमात्राचलितोनिजसद्मतः ॥२२॥ अत्रागत्यमयादृष्टःसमहाज्वरपीडितः ॥ मूर्ध्नाचवन्दितस्तेनदत्ताशीरभ्यभाषिच ॥ २३ ॥ शरभउवाच
किमर्थमिहभोस्तातदूरमार्गेसमागतः ॥ दिनानिकतिचित्तिष्ठन्कुर्वन्नत्रनिजक्रियाम् ॥ २४ ॥ विकटोनाममेमित्रंराक्षसःसमुपैतिवै ॥ उत्तिष्ठवपुषा
मुष्यदण्डवत्पतपादयोः ॥ २५ ॥ नभेतव्यंत्वयामुष्मात्त्यक्तहिंसादिकर्मणः ॥ अधुनातीर्थमासाद्यसन्निधौममतिष्ठति ॥२६॥ शिवशर्मोवाच ॥ इत्यु
क्तोऽहंतदापित्राशरभेणमहात्मना ॥ उत्थायपतितस्तस्यपादयोर्दण्डवद्भुवि ॥ २७ ॥ दोर्भ्यामुत्थाप्यमांसोऽथगाढमालिङ्ग्यराक्षसः ॥ स्वाग
तंमित्रपुत्रेतिजगादाशिषमीरयन् ॥ २८ ॥ राक्षसउवाच ॥ भाग्यवानसिभोस्तातयत्त्वमत्रसमागतः ॥ पितुर्धर्मात्मनःश्रुत्वाज्वरपीडांसुदारु
णाम् ॥ २९ ॥ पितुरानृण्यमाप्नोषितीर्थेकृत्वातिलोदकम् ॥ स्नात्वाकुरुक्रियाःस्वीयाःपूर्वजन्मस्मरिष्यसि ॥ १३० ॥ शिवशर्मोवाच ॥ एव
मुक्तस्तदातेनस्नातुंतीर्थेवराम्भसि ॥ प्रविष्टोऽहंस्मरंस्तातपूर्वजन्मशुभाशुभम् ॥ ३१ ॥ स्नात्वाविधिवदत्रैवपितुरन्तिकमागतः ॥ अपृच्छंरक्षसो
वृत्तंकुतोऽयंधर्मधीरिति ॥ ३२ ॥ पित्रोक्तंरक्षसोवृत्तंवाहानांपथिकस्यच ॥ श्रुत्वाहंतीर्थराजस्यस्तुतिमस्यचकारवै ॥ ३३ ॥ पितामेरोगनिर्मु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्तोभविष्यतियदातदा ॥ यास्यामिगृहमित्यत्रदशोषितमहानिमे ॥ ३४ ॥ दशाहाभ्यन्तरेतातततातस्यमरणंमम ॥ अभूदर्धजलेह्यस्यतीर्थराजस्यपश्य
तः ॥ ३५ ॥ अथोगरुडमारुह्यवक्षसाधारयञ्छ्रियम् ॥ आजगामस्वयंविष्णुर्नवीनघनविग्रहः ॥ ३६ ॥ पीतवासाश्चतुर्बाहुःपङ्कजारुणलोचनः ॥
ब्रह्मेन्द्रादिभिरादित्यैःसनाथैरन्धकारिणा ॥ ३७ ॥ सेव्यमानोगुणग्रामान्गायद्भिःकिन्नरैःसह ॥ हाहाहूहूप्रभृतिभिःस्तूयमानश्चसर्वतः ॥३८ ॥ दत्त्वा
स्वकीयसारूप्यमारोप्यगरुडंतदा ॥ पितरंममब्रह्माद्यैर्वृतोवैकुण्ठमारुहत् ॥ ३९ ॥ पितुःसारूप्यमालोक्यविष्णोरहमचिन्तयम् ॥ इतिचित्तेतदालो
क्यजाततत्त्वोदयेतदा ॥ १४० ॥ नहिवर्णयितुंशक्योह्यस्यतीर्थशिरोमणेः ॥ महिमायज्जलार्द्रेस्यान्मृतोजन्तुश्चतुर्भुजः ॥ ४१ ॥ नमयासर्वथात्याज्यं
तीर्थराजमिदंननु ॥ अञ्जसाहृढमाहात्म्यंधनरोगादितृष्णया ॥ ४२ ॥ पितुरत्रोटजेतावत्स्थातव्यंहिमयामम ॥ यावत्तुकर्मणांभुक्तिःप्रारब्धानांमही
तले ॥ ४३ ॥ एवंतुचिन्तयित्वाचपितुःकृत्वातुसत्क्रियाम् ॥ रक्षसातेनसहितःस्थितोऽहंमोक्षवाञ्छया ॥ १४४ ॥ इतिश्रीपाद्मेमहापुराणे
पञ्चप०उत्तर०कालिन्दीमाहात्म्येचतुरधिकद्विशततमोऽध्यायः ॥ २०४ ॥ शिवशर्मोवाच ॥ एकदात्रमहातीर्थेपङ्केमग्नांपयस्विनीम् ॥ दृष्ट्वासराक्ष
श्रेष्ठस्तामुद्धर्तुंविवेशह ॥ १ ॥ गोरक्षणेमहान्धर्मोरक्षितुःस्वर्गतिर्भवेत् ॥ चिन्तयन्नितिमध्येतुसगृहीतोऽम्बुहस्तिना ॥२ ॥ नीतस्तुवारिणोऽधस्ताज्जल
पूर्णोदरस्तदा ॥ तत्याजजीवितंसद्यस्तेनपीडितविग्रहः ॥ ३ ॥ दिव्यरूपंसमास्थायविमानमपिढौकितम् ॥ गणेनप्रहितेनाथदेवैरिन्द्रपुरोगमैः ॥ ४ ॥
गच्छन्नितिमयापृष्टःसनिशाचरपुङ्गवः ॥ मुक्तिदेऽत्रमहातीर्थेमृत्युंप्राप्यसुदुर्लभे ॥ ५ ॥ कथंदेवपदप्राप्तिर्जातातवमहामते ॥ इत्युक्तोमामुवाचेदंवाञ्छा
प्रोदत्रमेऽनघ ॥ ६ ॥ तस्मिन्गतेपुण्यजनेस्वर्गंपुण्यवतांपदम् ॥ एकाकिनामयाविष्णुःसद्गतिःप्रार्थितस्तदा ॥ ७ ॥ गच्छंस्तिष्ठन्स्वपञ्जाग्रत्स्ना
नंकुर्वंश्चनित्यशः ॥ तमेवपुण्डरीकाक्षमहंदध्यावनन्यधीः ॥ ८ ॥ हरेतवपदाम्भोजमहंशरणमागतः ॥ ब्रह्मत्वेचमहेशत्वेनेन्द्रत्वेममानसम् ॥ ९ ॥
प्रार्थयन्नित्यहंतातमेवपुरुषोत्तमम् ॥ उषितोऽत्रमहातीर्थेकृत्वानिर्विषयंमनः ॥ १० ॥ विष्णुशर्मोवाच ॥ वसतोऽत्रमहातीर्थेमरणंचेत्तवाभवत ॥
कथंजन्मपुनःप्राप्तंत्वयेतिममसंशयः ॥११ ॥ मर्यादांयस्यतीर्थस्यत्यक्त्वापिधनलोभतः ॥ राक्षसान्मरणंप्राप्ताःपथिकस्तेचवाहकाः ॥ १२ ॥ यस्य
तीर्थवरस्यास्यजलपानाद्दिवंगताः ॥ तथैवराक्षसोऽप्यस्मिन्नपमृत्युमवाप्यसः ॥१३ ॥ नक्रतःस्वेच्छयास्वर्गंजगामतवपश्यतः ॥ ननूनंतत्रमरणंजातं
यज्जन्मदृश्यते ॥ १४ ॥ नारदउवाच ॥ शिवेनिशम्यपुत्रस्यशिवशर्माशुभंवचः ॥ उवाचपूर्ववृत्तान्तंकारणंनिजजन्मनः ॥ १५ ॥ शिवशर्मोवाच ॥
विष्णुशर्मञ्छृणुष्वेदंकारणंममजन्मनः ॥ कथयामितवाग्रेऽहंश्रुत्वानिःसंशयोभव ॥ १६ ॥ एकदाविष्णुपूजायांमयिध्यानंसमास्थिते ॥ दुर्वासाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकृतिक्रोधीममाश्रमसुपागतः ॥ १७ ॥ तमागतमविज्ञायविष्णुध्यानपरायणः ॥ तस्थिवांस्तदवस्थोऽहंचिरंतन्नामसंस्मरन् ॥ १८ ॥ समुहूर्तंमुनिः
स्थित्वाममाग्रेक्रोधमूर्छितः ॥ आत्मनात्मानमाहेदमुच्चैरारक्तलोचनः ॥ १९ ॥ दुर्वासाउवाच ॥ अहोअत्रेरहंपुत्रोऽनसूयागर्भसंभवः ॥ शिवांशो
मानुषेणालमवज्ञातोऽमुनाभवम् ॥२०॥ त्रिलोकीराज्यतःशक्रोमयायेनप्रपातितः ॥ तंमामपिमनुष्योऽयमवजानातिदुर्मतिः॥२१॥ योबिभेतिनकः
सोऽस्तिमत्तःकालानलादिव ॥ मुक्त्वादेवत्रयींलोकेयतःसार्हत्तमामम ॥ २२ ॥ यामसौध्यायतेमूढोदेवतांध्यानमास्थितः ॥ नकथंबोधयत्येनंसेति
मूर्ध्निस्थितोमम ॥ २३ ॥ नूनंनारायणंदेवंध्यायत्येषजगद्गुरुम् ॥ यद्ध्यानामृततृप्तोहिनबाह्यज्ञानवानयम् ॥ २४ ॥ हरिंवाब्रह्मवाशम्भुमन्यंवाध्याय
तामयम् ॥ मयायंसर्वथादण्ड्योमदवज्ञाकरोह्ययम् ॥ २५ ॥ शिवशर्मोवाच ॥ एवंविचिन्त्यसमुनिःसुमतिंमामबोधयत् ॥ शशापचविबुद्धंमामिति
क्रोधारुणेक्षणः ॥ २६ ॥ मामवज्ञाययश्चित्तेध्यानकालेमनोरथः ॥ कुतस्तेनभवेद्ध्यस्मिन्भविष्यतिहिसर्वथा ॥ २७ ॥ इत्युक्त्वासयदातातचलितो
मुनिरत्रिजः॥तदामयाचरणयोर्गृहीतोभयभीरुणा॥२८॥ इत्युक्तश्चमुनिश्रेष्ठक्षम्यतांरुङ्विमुच्यताम् ॥ मादृशानविजानन्तिसम्यक्कर्मभवादृशाम्॥२९॥
शापंत्वंदत्तवान्घोरंसाम्प्रतंमेनिरेनसः ॥ प्रसीदममनम्रस्यशापान्तेकुर्वनुग्रहम् ॥३०॥ इत्युक्तःकोपमुत्सृज्यदुर्वासाःशीतलोऽभवत् ॥ किमेतन्नोचितं
तातसयतश्चन्द्रशेखरः ॥ ३१ ॥ उवाचेतिसमांधीमांस्तंभूत्वाब्राह्मणोत्तमः ॥ अत्रैवमरणंप्राप्यनभूयोजन्मलप्स्यसे ॥३२॥ इतिमामनुगृह्याथसजगाम
दिगम्बरः ॥ उषित्वातद्दिनंतातमयासत्कारपूजितः ॥ ३३ ॥ नमुनेर्भाषितंमिथ्याचिन्तयित्वाहमित्यपि ॥ जगामस्वगृहंचित्तेपश्चात्तापंवहन्निति ॥
॥ ३४ ॥ अहोमेध्यायतोनित्यंसतीर्थाश्रमिणस्तथा ॥ दर्शनंदुर्लभंजातंश्रीपतेरिहजन्मनि ॥ ३५ ॥ चातकस्येवमेघस्यशुचौसंतापकारिणि ॥ कुतो
ऽयमागतोमह्यंवैकुण्ठगतिरोधकः ॥ ३६ ॥ जनस्यप्रस्थितस्येवजलदोऽकालवारिमुक् ॥ नदोषोऽस्तिमुनेर्नूनंतस्यैवेच्छाहरेःखलु ॥ ३७ ॥ सुदर्शनं
हिदत्त्वापिममजन्मान्तरंकृतम् ॥ मयासंसारभीतेनग्राह्यंपादाम्बुजंहरेः ॥ ३८ ॥ निदाघातपतप्तेनपथिकेनेवपादपः ॥ किंधनापत्ययोषिद्भिरनित्यै
श्चान्यबन्धुभिः ॥ ३९ ॥ गोविन्दपरमानन्दरामेतिममजल्पतः ॥ उदासीनवदासीनःकुटुम्बेषुहरिंभजन् ॥ ४० ॥ प्रारब्धमेवभोक्ष्यामिकर्माण्यन्या
न्यतर्जयन् ॥ चिन्तयन्नित्यहंतातकियद्भिर्वासरैरहम् ॥ ४१ ॥ प्राप्तवान्स्वगृहंस्नात्वाहरिपादोदकान्तरे ॥ पितुर्मरणमाख्यातंमात्रेबन्धुभ्यएवच ॥
॥ ४२ ॥ श्रुत्वातेऽपिशुचंचक्रुर्नाविन्दन्निममस्थिरम् ॥ सत्यलोकादिलोकेषुनिःस्पृहोऽहंगृहेवसन् ॥ ४३ ॥ मरणंप्राप्तवान्कूलेगङ्गायामुनिसेविते ॥
मुनेर्दुर्वाससःशापाज्जातोऽहंवैष्णवेकुले ॥ ४४ ॥ मरणंचात्रसत्तीर्थेलब्ध्वाप्राप्स्येहरेःपदम् ॥ ४५ ॥ नारदउवाच ॥ एवंसुराचार्यविनिर्मितेतदातीर्थे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महाभागपुराकृतानितौ ॥ द्विजोत्तमौप्रोच्यमिथःसुतस्थतुर्विंचिन्तयन्तौहरिपादपल्लवम् ॥ ४६ ॥ विचिन्तयन्तौहरिमब्जलोचनंचतुर्भुजंनीरदनील
विग्रहम् ॥ निजायुधालङ्करणावभासितंस्मृत्वात्रसारूप्यमवापतुर्हरेः ॥ ४७ ॥ यस्यक्षेत्रमिदंपुण्यमिन्द्रप्रस्थाख्यमुत्तमम् ॥ तस्योपाख्यानमाख्यातं
फलमस्यशिवेशृणु ॥ ४८ ॥ गङ्गास्नानेनयत्पुण्यंकन्यादानोद्भवंचयत ॥ श्रवणादस्यतत्पुण्यंश्रद्धयालभतेनरः ॥ ४९ ॥ पुत्रेजातेंतुगोदानार्तिसहगे
चबृहस्पतौ ॥ गोदावरीजलेस्नानाद्यत्फलंभुविजायते ॥ ५० ॥ तत्फलंश्रवणादस्यजायतेनात्रसंशयः ॥ अतस्तीर्थोत्तमादन्यत्तीर्थंनास्त्यखिला
र्थदम् ॥ यस्मिन्मरणतोनूनंतिर्यञ्चोऽपिचतुर्भुजाः ॥ ५१ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०कालिन्दीमाहात्म्येनिगमबोधोपाख्यानंनाम
पञ्चाधिकद्विशततमोऽध्यायः ॥ २०५ ॥ सौभरिरुवाच ॥ धर्मराजशिबिःश्रीमानाकर्ण्यतद्वचोमुनेः ॥ नारदस्याब्रवीत्प्रीतमनाइतितमुत्तमम् ॥
॥ १ ॥ शिबिरुवाच ॥ मुनेतीर्थवरस्यास्यनिगमोद्बोधकस्यते ॥ माहात्म्यंवर्णितंसम्यक्छ्रुतंपापहरंमया ॥ २ ॥ इन्द्रप्रस्थेऽत्रशतशःसन्तितीर्था
निवैमुने ॥ अन्यस्यापिसमाचक्ष्वमाहात्म्यंयदिविद्यते ॥ ३ ॥ नारदउवाच ॥ इन्द्रप्रस्थान्तरावर्तिन्येषायाद्वारकानृप ॥ अस्यांपुराहियद्वृत्तंतत्ते
वच्मिशृणुष्वमे॥४॥ काम्पिल्येऽथद्विजःकश्चित्पुष्पेषुर्मूर्तिमानिव॥सर्वासांयोषितांचित्तहारीहास्यादिविभ्रमैः ॥५॥सङ्गीतविद्याकुशलःकोकिलामधुर
ध्वनिः ॥ एकदासकरेवीणांधारयन्वादयन्मुहुः ॥ ६ ॥ कण्ठेनकोकिलालापमधुरेणनराधिप ॥ गायन्बभ्रामनगरेप्रतिरथ्यंमहामतिः ॥७॥ तस्यगीत
ध्वनिंश्रुत्वामूर्छनातानसंयुतम् ॥ त्यक्त्वास्वगृहकार्याणितमीयुःपौरयोषितः ॥८॥मोहितास्तस्यरूपेणकामवेगंनसेहिरे ॥ जातास्खलितवीर्यास्तागीतं
श्रुत्वासमक्षतः ॥९॥ ब्रह्मणोमानसंयेनलोभितंभारतींप्रति ॥ शिवस्यार्द्धशरीरंचपार्वत्यैयेनदापितम् ॥१० ॥ ताभ्यामन्योजनोलोकेवशीवाज्ञानवान
पि ॥ यःस्मरंतंक्षमोजेतुंस्त्रियःप्रकृतिचञ्चलाः ॥११॥ ताःस्मरावेशमासोढुंनसाध्व्योऽपिविषेहिरे ॥वक्तव्यमितिकिंराजँल्लोकेकामोहिदुर्जयः ॥ १२ ॥
अथतास्तत्रतत्रेयुर्यत्रयत्रव्रजत्यसौ ॥ प्रगायन्कण्ठवीणाभ्यांप्रगायन्स्वरमोहितः ॥ १३ ॥ तासांपतिसुतभ्रातृपितरोऽथनराधिप ॥ आगत्यभर्त्स
यित्वातानिन्युःस्वान्स्वान्गृहान्प्रति ॥ १४ ॥ तमन्विष्यपुनस्तास्तुजग्मुःसर्वास्तदन्तिके ॥ यदातदापौरजनावृत्तंतत्प्राहुरीश्वरे ॥ १५ ॥ राजा
पितंसमाहूयपप्रच्छरहसिद्विजम् ॥ केनमन्त्रेणभोविप्रमोहितास्ताःपुरस्त्रियः ॥ १६ ॥ तन्ममाचक्ष्वविप्रेन्द्रदास्यामिबहुतेधनम् ॥ नोचेन्निष्का
सयामित्वांनिजराज्यान्नसंशयः ॥ १७ ॥ नारदउवाच ॥ श्रुत्वेतिनृपतेर्वाक्यंनृपतिंसद्विजोत्तमः ॥ उवाचसत्यंतस्याग्रेवचोरूपगुणार्णवः ॥
॥ १८ ॥ द्विजउवाच ॥ नमन्त्रोनौषधंराजन्विद्यतेमयिभिक्षुके ॥ किंतुतेनगरेसर्वायोषितोह्यजितेन्द्रियाः ॥ १९ ॥ रूपंममसमालोक्यश्रुत्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गीतध्वनिंतथा ॥ स्मरवेगंसहन्तेनराजंस्तवपुरेस्त्रियः ॥ २० ॥ किंकरोमिमहाराजकोऽपराधोऽस्तिमेविभो ॥ पुराकृतमिवोल्लङ्घ्यशासनंनमहीपते ॥ २१ ॥ नारदउवाच ॥ उशीनरशिवेराजन्नेवंकथयतिद्विजे ॥ सर्वेपौराःसमेत्याथप्रावदन्निति भूपतिम् ॥ २२ ॥ पौराऊचुः ॥ राजन्ननेन विप्रेणमोहिताःपौरयोषितः ॥ गृहेषुनहितिष्ठन्तिह्यस्माभिरपवारिताः ॥ २३ ॥ यद्ययंमोहनःस्त्रीणांनगरेवत्स्यतिप्रभो ॥ तदादेशान्तराण्येव यास्यामोवयमद्यवै ॥ गतोऽस्माकंवृषोदेवोहव्यकव्यक्रियात्मकः ॥ २४ ॥ तमनुप्रस्थितात्क्षेत्राल्लक्ष्मीरियंपापिनामिव ॥ विनातंशरणंयातंत्यक्त श्रीभिर्नरेश्वर ॥ २५ ॥ अथैनमनुयास्यन्तिवासिताभिर्वृषंयथा ॥ शून्यालयेकथंलक्ष्मीर्यत्रनोऽप्यवतिष्ठति ॥ २६ ॥ धर्मोऽर्थश्चगृहंचैतत्त्रयं स्त्रीवशगंयतः ॥ कान्ताधर्मधनाधीनातयोर्नाशेनतिष्ठति ॥२७॥ नारदउवाच ॥ एवंवदत्सुपौरेषुस्त्रियस्तेषांसमागताः ॥ राजान्तिकउपाविष्टाइत्यू चुस्ताःपरस्परम् ॥ २८ ॥ पौरस्त्रियऊचुः ॥ कामंवामाकृतिंविप्रमेनंप्राप्यमनांसिनः ॥ उल्लसन्तिदिवाधीशंकमलानीववारिणि ॥ २९ ॥ सकुचन्तिविनातेनकुमुदानियथेन्दुना ॥ आगच्छन्तमिलित्वैनंधारयामोनृपाग्रतः ॥ अवध्योऽयंवयंचास्यकिंकरिष्यतिभूपतिः ॥ ३० ॥ नारद उवाच ॥ इत्युक्त्वातास्त्वरावत्योजगृहुस्तंद्विजोत्तमम् ॥ पश्यतांनिजभर्तॄणांराज्ञश्चैवपुरस्तदा ॥ ३१ ॥ ऊचुश्चैनंमनोनाथगृहानागच्छहृच्छ यम् ॥ शमयाशुविनाह्यत्वांस्थातुंनैवचशक्नुमः ॥ ३२ ॥ इत्याकर्ण्यवचस्तासांसविप्रःप्रत्युवाचह ॥ ३३ ॥ विप्रउवाच ॥ भवतीनामहंपुत्रोभव त्योमातरोमम ॥ गृहान्किमर्थमुत्सृज्यभवत्यःपर्यटन्तिहि ॥ ३४ ॥ आराधयतनाथान्स्वान्यतोलोकद्वयंध्रुवम् ॥ आराधितेषुपतिषुवि ष्णुःसर्वसुरेश्वरः ॥ ३५ ॥ प्रसन्नोभवतित्वत्रप्रसन्नेकिमुदुर्लभम् ॥ यास्त्रीस्वपतिमुत्सृज्यसेवतेऽन्यंसुखेच्छया ॥ ३६ ॥ सापवादमवाप्नोतियाति घोरांचदुर्गतिम् ॥ उषित्वातत्रकल्पान्तेयावत्सापतिवञ्चना ॥ ३७ ॥ पुनस्तस्माद्विनिर्गत्यस्थावरत्वंप्रपद्यते ॥ तस्मादपिपशुत्वंसालभतेबहु जन्मसु ॥ ३८ ॥ ततोमुक्तामनुष्यत्वेव्यङ्गाभवतितत्रसा ॥ एवंपापगतिंज्ञात्वानिवर्तध्वमतोजनात् ॥३९॥ नोवायास्यथदेहान्तेनरकंभृशदारुणम् ॥ यदिच्छन्तिभवन्त्योमेसुखंतन्नेहलप्स्यथ ॥ पापमेवहियुष्माकंयतोऽधःपतनंनृणाम् ॥ ४० ॥ नारदउवाच ॥ श्रुत्वैवंवचनंतस्यदृष्ट्वाभर्तृसुखा निच ॥ लज्जयानम्रमुख्यस्तालतावातहताइव ॥ ४१ ॥ तासांतुपुरनारीणांस्मराग्निर्भृशदारुणः ॥ शशामतस्यशीतेनबटोर्वचनवारिणा ॥ ॥ ४२ ॥ उत्थायचेलुःसर्वास्ताविनिन्दन्त्यइतिस्मरम् ॥ ब्रह्मशक्रादिदेवानामपिमोहकरंनृप ॥ ४३ ॥ स्त्रियऊचुः ॥ धिगिमंपापकर्माणं शीलदारुकुठारकम् ॥ कामंवामदृशांप्रीत्यैधन्योयेनहतःस्मरः ॥ ४४ ॥ किंवदेमजगत्पूज्यांरुक्मिणींजठरेयया ॥ धृतःप्रद्युम्ननाम्नासौराहुःस्त्री

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शीलचन्द्रभुक् ॥ ४५ ॥ सदेवाधमआयातियदिनोदृष्टिगोचरम् ॥ भूयोध्यानकृतेशानदृगग्नौतंक्षिपामहे ॥ ४६ ॥ येनायंजनितःपापात्स्मारामेणविष्णुना ॥ कृतःषोडशसाहस्रस्त्रीप्रियःकाहिनःकथा ॥ ४७ ॥ एवंविनिन्द्यतंकामंतुष्टुवुस्तंद्विजोत्तमम् ॥ शीलंस्वस्यचतासांचरक्षितंयेनभूपते ॥ ४८ ॥ धन्यासामुष्यजननीययायंब्राह्मणोत्तमः ॥ स्मरजिन्निर्मितोलोकेपरधर्मस्यरक्षकः ॥ ४९ ॥ धिगस्तुनोराजलोकैर्हसिताःस्मरनिर्जिताः ॥ याभिर्वाक्यमनोभ्यांचजनितंपापमुल्बणम् ॥ ५० ॥ नारदउवाच ॥ एवंविचिन्तयन्त्यस्ताऐकमत्ययुताःस्त्रियः ॥ जग्मुःस्वंस्वंगृहंसर्वाद्विजवाक्येनबोधिताः ॥ ५१ ॥ अथराजापिकाम्पिल्यस्तंद्विजंवस्त्रभूषणैः ॥ संपूज्यप्रेषयामाससद्गृहेसंयतेन्द्रियम् ॥ ॥५२॥अथागच्छतिकालेतुकारूषाधिपतिर्बली ॥ काम्पिल्याधिपतिंसैन्यैर्नगरंरुरुधेतदा ॥ ५३ ॥ तयोर्युद्धमभूद्घोरंतेनयुद्धेसघातितः ॥ नगरंलुठितंसर्वंहताःशूराश्चसर्वशः ॥ ५४ ॥ ताःस्त्रियःकालकूटंतुखादित्वामरणंगताः ॥ प्रायश्चित्तंतुनकृतंताभिःपापस्यतस्यतु ॥ ५५ ॥ येनपापेनताःसर्वाभीषणाख्यस्यरक्षसः ॥ राक्षस्योनगरेजातामहाकायाभयानकाः ॥ ५६ ॥ तत्रतानिहिताःसर्वाःपुरनार्योहनूमता ॥ यज्ञांश्वरिष्यतोजिष्णोस्तिष्ठतारथकेतने ॥ ५७ ॥ पुनस्ताएवराक्षस्योबभूवुर्मारवेऽध्वनि ॥ क्षुधार्ताश्चतृषार्ताश्चदर्शनेनभयप्रदाः ॥ ५८ ॥ एवंतेनतुपापेनवाङ्मनोविहितेनतु ॥ ताभिर्जन्मद्वयंप्राप्तंराक्षसीयोनिमिश्रितम् ॥ ५९ ॥ पापेननाशितंतासांसनृपंनगरद्वयम् ॥ अतएवनकर्त्तव्यंपरकान्तनिषेवणम् ॥ ६० ॥ नारीभिःपापभीताभिर्वाङ्मनोभ्यामपिप्रभो ॥ रोगीजडोदरिद्रोवामित्राभ्यांवर्जितोऽपिवा ॥ नत्याज्यःस्वपतिःस्त्रीभिरिच्छन्तीभिस्तुसद्गतिम् ॥ ६१ ॥ कथितमिदंमयामनोवचोभ्यांजनितमघंचयदन्यकान्तभक्त्या ॥ फलमपिचयदेवलब्धमाभिस्तदपिशिबेबहुविस्तरेणतुभ्यम् ॥ ६२ ॥ इन्द्रप्रस्थगताहिचेयमनघायाद्वारकादृश्यतेतास्तस्याजलबिन्दुदेहपतनात्पौरस्त्रियोरेमिरे ॥ स्वर्गेचित्तवचोऽन्यकान्तभजनाज्जातंविमुच्योल्बणंक्रव्यादत्वमवाप्यदेववनिताभावंसुराह्लाददम् ॥ ६३ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०कालिन्दीमाहात्म्येद्वारकावर्णनंनामषडधिकद्विशततमोऽध्यायः ॥ २०६ ॥ सौभरिरुवाच ॥ धर्मात्मजनिशम्यैतद्वचस्तस्यमहात्मनः ॥ नारदस्यशिबीराजाप्रोवाचेदंविनीतवत् ॥ १ ॥ शिबिरुवाच ॥ तिष्ठन्त्योमरुमार्गेताराक्षस्योमुनिपुङ्गव ॥ एतस्याद्वारिकायास्तुलेभिरेसलिलंकुतः ॥ २ ॥ नारदउवाच ॥शृणुराजन्कथांदिव्यांपूतांपापप्रणाशिनीम् ॥ विमलाख्यस्यविप्रस्यहिमवद्द्रोणिवासिनः ॥३॥ एकस्तुहिमवद्द्रोण्यांविमलोनामभूसुरः॥ देवर्षिपितृवह्नीनांपूजकोऽतिथिपूजकः ॥ ४ ॥ हरिपादार्चनरतोवेदवेदाङ्गधर्मवित् ॥ वासुदेवगुणग्रामपुराणश्रुतिमानसः ॥ ५ ॥ वार्द्धकेतस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुत्रोऽभूत्प्रसादाच्चक्रपाणिनः ॥ चकारहरिदत्तेतिनाम्नातंजनकस्तदा ॥६॥ विधिवद्विदधेचास्यक्षौरकर्मादिकंचतत् ॥ गुरोःसकाशाज्जग्राहच्छन्दांसि हरिदत्तकः ॥ ७ ॥ अधीत्यविधिवद्वेदान्दत्त्वाचगुरुदक्षिणाम् ॥ प्रवव्राजविरक्तःसन्समूलंचाश्रमद्वयम् ॥ ८ ॥ ज्ञात्वातत्कर्मतन्माताव्यलपत्पुत्र वत्सला ॥ स्नापयन्तीकुचद्वन्द्वंपुत्रविश्लेषजाश्रुभिः ॥९॥ मातोवाच ॥ मामनाथांपरित्यज्यतातयातोऽसिकुत्रवै ॥ पितरंचजराग्रस्तंषट्पदोबल्वजा विव ॥ १० ॥ वार्द्धकेत्वंमयाप्राप्तःश्रीपतेःपादसेवया ॥ मांविहायाभजस्त्वंवैचरणंतस्यमुक्तये ॥ ११ ॥ अहंमूढाध्रुवंतातध्रुवमाराध्ययद्धरिम् ॥ अध्रुवंवाञ्छितवतीभवन्तंसुखलब्धये ॥ १२ ॥ त्वंसुधीर्वत्ससर्वार्थंयद्विष्णुंभजसेस्वयम् ॥ अध्रुवंजगदेतद्वैमत्वासीस्त्वमपिध्रुवम् ॥१३॥ किंकरोमि क्वगच्छामिमायाज्ञानंछिनत्तिमे ॥ सुफलोत्पादकंशस्त्रीरम्भामूलमिवोल्बणा ॥ १४ ॥ धन्योदशरथोराजायोमृतोरामशोकतः ॥ धिङ्मांपुत्रस्य विश्लेषाद्धारयन्तींस्वजीवितम् ॥१५॥ आगच्छदर्शनंदेहितातमांपरितारय ॥ वदवेदमयींवाणींपितुरग्रेगुणार्णव ॥१६॥ नारदउवाच ॥ एवंविलप्य तन्माताराजन्सापतिताभुवि ॥ दलनाद्राहुदन्तानांलेखाचान्द्रमसीयथा ॥ १७ ॥ अथाजगामविप्रर्षिर्विमलोनृपसत्तमः ॥ दृष्ट्वातांपतितांभूमौकिंकि मित्यभ्यभाषत ॥ १८ ॥ कस्मादियंकीर्णकेशाव्यस्तवस्त्रविभूषणा ॥ पतिताभुविकल्याणंहरिदत्तस्यविद्यते ॥ तस्यावयस्यास्ताःसर्वाःप्रोचु स्तंविमलंनृप ॥ १९ ॥ वयस्याऊचुः ॥ अधीत्यवेदांस्तेपुत्रोदत्त्वाचगुरुदक्षिणाम् ॥ नारायणपरोभूत्वाप्राव्रजद्धरिदत्तकः ॥२०॥ तस्यविश्लेषशोकेन पतितेयंधरातले ॥ २१ ॥ नारदउवाच ॥ इत्याकर्ण्यवचस्तासांविमलोबुद्धिमत्तरः ॥ प्राबोधयन्निजांभार्यामितिवागमृतेनसः ॥ २२ ॥ विमल उवाच ॥ उत्तिष्ठजायेशृणुवाक्यमीरितंमयाकिमर्थंपतिताविषीदसि ॥ धन्यःसुतस्तेयइमंविनश्वरंविज्ञायभेजेहरिपादपल्लवम् ॥ २३ ॥ धन्यात्वम प्यस्यजनिप्रदायिनीयस्याःसुतस्तेहरिपादभागभूत् ॥ संतारयिष्यत्यपिमामसंशयंकुलंकुलोत्थानपिपूरुषाञ्छुभे ॥ २४ ॥ क्वविश्वमेतच्चपत च्चचञ्चलंक्वसेवनंशाश्वतलोकदंहरेः ॥ मत्वेतिभेजुर्भरतादयोनृपायथाहरिंसाध्वितथैवतेसुतः ॥२५॥ दाराधनागारशरीरबान्धवाएतेभवन्तिप्रतिजन्म दुःखदाः ॥ तावन्नयावद्धरिपादपल्लवंभजेतधीरोऽखिलकामवर्जितः ॥२६॥नारदउवाच ॥ एवंप्रबोधितातेनधीरेणधरणीतलात् ॥ उत्थायनिजभर्तार मब्रवीद्दीनयागिरा ॥ २७ ॥ भार्योवाच ॥ सर्वंजानाम्यहंकान्तयत्त्वयासाधुभाषितम् ॥ कुलधुर्यंनपश्यामियतस्तप्यामिवैभृशम् ॥ २८ ॥ पुत्रेसतिमहत्तीर्थेकिंवाकेशवसेवया ॥ गृहएवावयोर्मृत्युश्चेत्स्याच्छोकद्वयंतदा ॥ २९ ॥ सत्पुत्रोत्पादनेयत्नःकर्त्तव्यःखलुमानवैः ॥ तारयन्तिपितॄन्पुत्रा यतःसंसारवारिधेः ॥३०॥ स्रष्टारंसर्वजन्तूनांधातारंपुत्रकाम्यया ॥ भजवाञ्छसिचेत्पुत्रंकुलधुर्यंमहामते ॥ ३१ ॥ नारदउवाच ॥ इत्याकर्ण्यवच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तस्याःप्रत्याहविमलोद्विजः ॥ ब्रह्मक्षेत्रंप्रयागंहियाम्यहंपुत्रकाम्यया ॥३२॥ इत्युक्त्वाचलितःसोऽथहरिद्वारमगाद्विजः ॥ स्नात्वातत्रापिविधिवदिन्द्र
प्रस्थमथागमत् ॥ ३३ ॥ कतिभिर्वासरैर्वीरसायंकालेऽखिलार्थदे ॥ स्नात्वाभुक्त्वानिशायांससुष्वापयमुनातटे ॥ ३४ ॥ निशीथेस्वपतस्तस्यवि
मलस्यान्तिकेविधिः ॥ हंसमारुह्यदेवेशस्तीर्थैःसर्वैरनुद्रुतः ॥ ३५॥ आगत्योत्थापयामासविमलंपुत्रवाञ्छकम् ॥ उवाचचसुरश्रेष्ठोवचनंमधुराक्षरम्
॥ ३६ ॥ब्रह्मोवाच ॥ जानेसमीहितंविप्रत्वदीयेमनसिस्थितम् ॥ नतत्पूरयितुंकल्पोयतस्तत्कारणंशृणु ॥३७॥ एकदामेरुशिखरेमिलिताःसर्वदेवताः॥
तुष्टुवुर्मद्भवमुखामाधवंकार्यसिद्धये ॥ ३८ ॥ स्तुतोऽस्मदादिविबुधैःकृपयाभगवान्हरिः ॥ प्रसन्नोऽभूत्तदाविष्णुर्वृणुध्वमितिचाब्रवीत् ॥ ३९ ॥
इत्युक्तास्तेनतेदेवायथाभिलषितंवरम् ॥ श्रीपतेःप्राप्यतेजग्मुःसर्वेस्वंस्वंनिकेतनम् ॥ ४० ॥ मयोक्तस्तितिदेवेशदेहिमेवरमुत्तमम् ॥
प्रयागंनाममेक्षेत्रंभवत्वखिलकामदम् ॥ ४१ ॥ ततःशतगुणंभूयाद्वितीयंक्षेत्रकंमम ॥ इन्द्रप्रस्थगतंसम्यग्वृत्तंत्वत्तोमयानघ ॥ ४२ ॥ इत्याकर्ण्यवचो
मह्यंभगवानाहमांतदा ॥ तथास्त्वितिपुनर्वाचमुवाचश्रूयतांवचः ॥ ४३ ॥ श्रीभगवानुवाच ॥ इन्द्रस्यखाण्डवारण्यइन्द्रप्रस्थाभिधंशुभम् ॥ क्षेत्रं
कलिन्दजातीरेमत्तुल्यास्तत्रयेमृताः ॥ ४४ ॥ विरिञ्चेरचितातत्रस्वकीयाद्वारकापुरी ॥ मयाशतगुणाम्भोधिनीरस्थायाःपुरागुणैः ॥४५॥ तामुल्लङ्घ्य
नरोयस्तुतीर्थमन्यन्निषेवते ॥ नतीर्थफलमाप्नोतिसपुमान्नमृषोदितम् ॥ ४६ ॥ सर्वतीर्थोदितंपुण्यंशक्रतीर्थेलभेन्नरः ॥ द्वारकाचपुरीमायातीर्थमन्यच्च
रक्षति ॥ ४७ ॥ योनिमज्ज्यान्यतीर्थेषुकृत्वाचविविधांक्रियाम् ॥ अत्रैष्यतिफलंतेभ्यःफलंप्राप्स्यतिसध्रुवम् ॥ ४८ ॥ इत्युक्त्वान्तर्दधेविष्णुरहम
प्यगमंस्वकम्॥लोकंद्विजेन्द्रवैकुण्ठादधोभागेव्यवस्थितम् ॥ ४९ ॥ प्रयागान्मामकात्क्षेत्रात्काशीशतगुणास्मृता ॥ काश्याःशतगुणेतीर्थंनिगमोद्बोध
कंतथा ॥ ५० ॥ तीर्थसप्तकमेतत्तुत्रयंतुल्यफलंस्मृतम् ॥ एतत्त्रयमनुल्लङ्घ्ययोगच्छतिसितासितम् ॥ ५१ ॥ तस्याहंवाञ्छितंविप्रददामिखलु
नान्यथा ॥ केचिदाहुःसप्तपुरीसमपुण्यामहर्षयः ॥ ५२ ॥ अयोध्याद्याःशतंताभ्यइन्द्रप्रस्थंप्रचक्षते ॥ त्वमत्रागत्यविप्रेन्द्रसर्वकामफलप्रदे ॥५३ ॥
तीर्थेश्रीद्वारकाख्येहिकुरुस्नानंसुतेच्छया ॥ यावन्तिसर्वतीर्थानिब्रह्माण्डकलशोदरे ॥ ५४ ॥ तेभ्योऽपरिमितंपुण्यंशतनामनिकीर्तिते ॥ सुतंतेकुलधौ
रेयंतीर्थमेतत्प्रदास्यति ॥ स्नानाच्चतवगोविन्दःप्रसन्नात्माभविष्यति ॥५५॥ नारदउवाच ॥ इत्युक्त्वादेवदेवेशोब्रह्मातत्रतिरोदधे ॥ विमलोऽपितदा
स्नात्वादेवादीनप्यतर्पयत् ॥ ५६ ॥ इत्युवाचसधर्मात्माद्वारकेकृष्णवल्लभे ॥ सुतंवंशकरंदेहिमह्यंभक्तायतेनमः ॥ ५७ ॥ इत्युक्तेतेनविप्रेणदेववागभ
वत्तदा ॥ ५८ ॥ देववागुवाच ॥ पुत्रस्तेधर्मतत्त्वज्ञोवंशकर्ताभविष्यति ॥ प्रसादादस्यतीथस्यसर्वतीर्थशिरोमणेः ॥ यःहिगेहंविलम्बोमासुकृतंतेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मज्जनम् ॥ ५९ ॥ नारदउवाच ॥ इत्याकर्ण्यसतांवाणींविश्वस्तःपुत्रजन्मनि ॥ चचालजलमादायद्वारकायाःकमण्डलौ ॥ ६० ॥ मार्गेतस्यसखा
विप्रोमलयाचलकेतनः ॥ मिलितश्चलितोगेहंकृत्वातीर्थानिसर्वतः ॥ ६१ ॥ तस्मैस्ववृत्तमाख्यातंब्रह्मसंवादकात्मकम् ॥ यद्भूतंद्वारकातीर्थेश्रुत्वासो
ऽपिविसिष्मये ॥ ६२॥ उवाचसचधर्मात्मासखेममवचःशृणु ॥ यावन्तिभारतेक्षेत्रेतीर्थानिविहितानिमे ॥६३ ॥ तावन्तिकर्तुमिच्छामित्वदुक्तंतीर्थ
मुत्तमम् ॥ नीत्वामांदर्शयसखेतत्तीर्थंसर्वकामदम् ॥ ६४ ॥ सखायस्तेवराभूमावुपकुर्वन्तियेसखीन् ॥ नतैर्ननुसमोलोकेपितामाताथवासुतः ॥ ६५ ॥
निर्द्धनंपुरुषंलोकेसर्वेमुञ्चन्तिबान्धवाः ॥नमुञ्चन्तिसखायस्तुतस्यदुःखेनदुःखिताः ॥६६॥ संसारार्णवनिर्मग्नान्सखीनुद्धरतेसखा ॥ उपदिश्यहरेर्भक्ति
मार्गंजन्मेन्धनानलम् ॥ ६७ ॥ अतस्त्वंमेसखाश्रेष्ठउपकारंविधेहिमे ॥ दर्शयैतद्वरश्रेष्ठंतीर्थाख्यंद्वारकांद्विज ॥ ६८ ॥ इतिश्रीपाद्मेमहापुराणे
पञ्चप०उत्तर०कालिन्दीमाहात्म्येसप्ताधिकद्विशततमोऽध्यायः ॥ २०७ ॥ नारदउवाच ॥ विमलस्तंद्विजंनीत्वाद्वारकायामिहागतः ॥ पुनस्तौ
सस्नतुर्धीरौश्रीपतेर्भक्तिकाम्यया ॥ भूयःखेमेघगम्भीरावागासीदितिभूपते ॥१॥ आकाशवागुवाच ॥ शृणुतंद्विजशार्दूलौहरेस्तीर्थमिदंशुभम् ॥ एत
त्तीर्थप्रसादाद्वांविष्णुभक्तिर्भविष्यति ॥ ययाजहातिलोकोऽयमविद्यामोहमुल्बणम् ॥२ ॥ नारदउवाच ॥ निशम्येतिद्विजश्रेष्ठौतांवाचमशरीरिणीम्॥
प्रसादोऽयंहरेरासीदित्यूचातेपरस्परम् ॥ ३ ॥ स्नात्वातौविधिवत्तत्रलब्ध्वाभक्तिंहरेःपराम् ॥ चेलतुःप्रणिपत्येदंभाषमाणौमिथस्तदा ॥ ४ ॥
द्विजावूचतुः ॥ यथावयोर्हिसंयोगःपथिजातोऽविचारितः ॥ यथागृहकलत्रादिसंयोगोभुविजायते ॥ ५॥ साम्प्रतंविरहोभावीयथानौमार्गवर्तिनोः ॥
तथादारसुतादीनांकालव्यालास्यवर्तिनाम् ॥ ६ ॥ धन्यःसपुरुषोलोकेयोदारसुतसंगमम् ॥ विज्ञायक्षणिकंनित्यंसंश्रयेच्छ्रीपतिंभजेत् ॥ ७ ॥ नारद
उवाच ॥ स्मरणंकरणीयंमेदासोऽहंत्वत्पदाश्रयः ॥ संदेशःप्रेषणीयोमामित्युक्त्वास्वगृहंगतौ ॥ ८ ॥ शृणुराजन्यथातेनमित्रेणविमलस्यतु ॥ मोक्ष
णंराक्षसीनांतुविहितंपथिगच्छता ॥९॥ व्रजन्सब्राह्मणःप्रातस्तंदेशंजलवर्जितम् ॥ यत्रताःपापविप्लुष्टाराक्षस्यःक्षुत्तृषाकुलाः ॥ १० ॥ अथताःपथि
गच्छन्तंदूराद्दृष्ट्वाद्विजोत्तमम् ॥ सुजलामत्रहस्तंतंमिथस्त्वितिबभाषिरे ॥ ११ ॥ राक्षस्यऊचुः ॥ आयातिपथिकःकश्चिज्जलपात्रंकरेदधत् ॥ अस्मा
कंक्षुत्तृषोःशान्तिर्मनागपिभविष्यति ॥ १२ ॥ एनसंभक्षयिष्यामःपास्यामोऽस्यकरेस्थितम् ॥ पात्रंजलंवयंतृष्णाक्षुधार्ताःशतवर्षतः ॥१३ ॥ नारद
उवाच ॥ काचिदाहेत्यहंपूर्वमस्योष्णंकालखण्डकम् ॥ भक्षयित्वाततोरक्तंपीत्वायास्यामिजीवितम् ॥ १४ ॥ अन्याप्राहकियद्द्रव्यंविद्यतेऽस्यगजा
नने ॥ ममव्याघ्राननायास्तुपानायापिनदृश्यते ॥ १५ ॥ अन्यावैरथचक्राख्याश्रूयतांवचनंमम ॥ करिष्येकुण्डलमहंकेनान्त्रैरस्यमेखलाम् ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्यावददहंदन्तैरेकतः श्यामलीकृतैः ॥ रमेषोडशभिर्घूतशालायांतद्विशारद ॥ १७ ॥ इत्युक्त्वाताामिथःसर्वास्तंद्विजंप्रतिदुद्रुवुः ॥ विवृतास्यालल
जिह्वाःप्रद्योतैकमहाभुजाः ॥१८॥ आयान्तीस्ताःसमालोक्यब्राह्मणोभयविह्वलः ॥ आत्मानमभितश्चक्रेरक्षांवेदोदितांनृप ॥१९॥ ताआगत्यस्थिता
दूरंराक्षस्योभीमविक्रमाः ॥ तेजसातस्यमन्त्रैश्चप्रत्यादिष्टानराधिप ॥ २० ॥ ऊचुश्चकोभवानत्रकुतःप्राप्तोऽसितद्वद ॥ त्वद्दर्शनान्मनोऽस्माकंप्रसाद
मधिगच्छति॥२१॥त्वत्पादस्पर्शनात्किंनोनविप्रभविताफलम् ॥ अतोमूर्द्धसुनोदेहिस्वकीयंपादपङ्कजम्॥२२॥नारदउवाच ॥ इत्याकर्ण्यवचस्तासांज
गादहरिदत्तजः॥२३॥द्विजउवाच ॥ कृत्वापवित्रतीर्थानिब्राह्मणोऽहंसमागतः॥साम्प्रतंपुष्करंयामिभवतीभिःकिमिष्यते ॥ यतस्तत्प्रार्थ्यतांदातुंशक्तो
दास्यामिचेत्तदा॥२४॥राक्षस्यऊचुः॥येषुतीर्थेषुविप्रेन्द्रत्वयास्नातंवदस्वनः॥तानिसर्वाणिपुण्यानिमोचयातःकुजन्मनः ॥अस्मानतितरांतृष्णाक्षुद्भ्यां
दारुणदुःखितान्॥२५॥ब्राह्मणउवाच॥ अवन्तीमाश्रमात्पूर्वमहंहरिपुरीमितः॥गतोऽहंद्वारकांतस्मात्स्नात्वासोमोद्भवाजले॥२६॥ ततःप्राप्तःप्रभासाख्यं
तीर्थंनीरधितीरगम्॥तस्मात्सेतुनिबन्धेऽहंस्नातःपरमपावने ॥२७॥ तस्मादहंमहापुण्यांकिष्किन्धांसमुपागतः॥हतोयत्रतुरामेणवालीकपिगणेश्वरः ॥
॥२८॥ तस्मान्मठंसरस्वत्यानर्मदातीरसंस्थितम् ॥ समागतोऽहंयत्रास्तिभारतीसर्वसेविता ॥ २९ ॥ ततोऽहमविशंवेणींतांनत्वादक्षिणापथे ॥ शिव
काञ्चीविष्णुकाञ्च्यौदृष्टेतत्रमयापुरौ ॥ ३० ॥ ययोर्मरणतोजन्तुःशिवोविष्णुश्चजायते ॥ ततोऽहमुत्कलंप्राप्तोयत्रास्तिहरिरीश्वरः ॥३१॥ चतुर्वर्गप्रदः
साक्षाद्भक्तानामपिकाङ्क्षितम् ॥ तमर्चयित्वाविधिवद्भक्षयित्वानिवेदितम् ॥ ३२ ॥ प्रसादभूतंतस्यैवगङ्गासागरसंगमम् ॥ तत्रदेवानृषीन्पितॄंस्तर्प
यित्वायथाविधि ॥ ३३ ॥ यत्रगङ्गाशतमुखीजातातत्राहमागमम् ॥ ततोगयामुपागत्यपिण्डान्दत्त्वायथाविधि ॥ ३४ ॥ पितृभ्यस्तुलसीपुष्पच
न्दनोदकपूजितान् ॥ कोशलांशरयूंवारिकिर्णघारनभस्वता ॥ ३५ ॥ पवित्रिताखिलजनांस्पर्शनेनाहमागमम् ॥ तत्रास्तिगोप्रताराख्यंतीर्थं
त्रिदशदुर्लभम् ॥ ३६ ॥ तत्रस्नानादिकंकर्मनिशाचर्यंकृतंमया ॥ ततःकाशीमहंप्रातोराजधानीमुमापतेः ॥ ३७ ॥ नत्वाविश्वेश्वरंदेवंबिन्दुमाधव
मेवच ॥ स्नातंमणिकर्णिकायांज्ञानवाप्यांचभक्तितः ॥ ३८ ॥ त्रिरात्रमुषितस्तत्रप्रयागंपुनरागमम् ॥ पौषशुक्लचतुर्दश्यांसाक्षाद्यत्रप्रजापतिः ॥३९ ॥
एकस्मिन्माघमासेतुस्नानंकृत्वारुणोदये ॥ पुनस्तस्मात्समायातोनैमिषंगोमतीतटे ॥ ४० ॥ यत्रतीर्थानिसर्वाणिवसन्तिचस्वमायया ॥ ततोऽहंमथु
रांप्रातोयत्रविश्रान्तिसंज्ञकम् ॥ ४१ ॥ तीर्थंतत्सन्निधौपुण्यमसिकुण्डाख्यमुत्तमम् ॥ कृष्णगङ्गाध्रुवाक्रूरकेशिकालीयतीर्थभृत् ॥ ४२ ॥ यमुनास्ति
महापुण्यायत्रसर्वार्थदायिनी ॥ उभयोःकूलयोस्तस्यावनानिद्वादशश्रिया ॥ ४३ ॥ राजमानानिखेचर्यंसमस्तार्थकराणिच ॥ सन्तितेषुनरःस्नात्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पीत्वाभूयोनजायते ॥४४॥ ततोऽहमागमंपुण्यंहस्तिनापुरमुत्तमम् ॥ यत्रश्रीपतिपादाब्जजातागङ्गासरिद्वरा ॥४५ ॥ ततोनारायणस्थानंहिमवद्भूमि
सस्थितम् ॥ आगत्यमाधवंदृष्ट्वाकेदारमहमागमम् ॥ ४६ ॥ तत्रसंपूज्यविश्वेशंपीत्वाहंसोदकंपुनः ॥ हरिद्वारंमहापुण्यमागमंजाह्नवीतटे ॥ ४७ ॥
त्रंतस्नात्वापितॄन्देवानृषीन्संतर्प्यचाप्यहम् ॥ समागतःकुरुक्षेत्रेयत्रप्राचीसरस्वती ॥ ४८ ॥ तत्राप्यहंक्रियाःसर्वाःकृतवान्नियतेन्द्रियः ॥ अर्चयित्वाच
पादाब्जंश्रीपतेःपुष्करंप्रति ॥४९॥ चलितोमार्गमध्येतुविमलोनाममेसखा ॥ मिलितोमांव्रजन्गेहमिन्द्रप्रस्थात्सुतीर्थतः ॥५० ॥ नीतोऽहंतेनराक्षस्यः
पुनस्तत्रद्विजन्मना ॥ तीर्थोत्तमेपरावृत्यशक्रप्रस्थेऽखिलार्थदे ॥ ५१ ॥ तत्रास्तिद्वारकापुण्यानिर्मिताविष्णुनास्वयम् ॥ तत्रावलोकितःसाक्षाद्वि
ष्णुर्वार्क्स्यान्नरूपतः ॥ ५२ ॥ तत्राहंसचसंस्नातौविष्णुभक्तिप्रलब्धये ॥ दत्तासाविष्णुनामह्यंतस्मैचकृष्णमूर्तिना ॥५३ ॥ श्रुत्वातत्रहरेर्वाणीनरूपंवै
विलोकितम् ॥ भक्तिर्लब्धाततःस्थानाद्यमहंपुष्करंप्रति ॥ ५४ ॥ तस्यतीर्थाधिपस्येदंद्वारकाख्यस्यवैजलम् ॥ कमण्डलुगतंपुण्यंनिशाचर्योवदाम्य
हम् ॥ ५५ ॥ भवतीभिरहंपृष्टोयत्तदाख्यातमेवमे ॥ दृष्ट्वावोदुर्दशामेतांकृपामेजायतेहृदि ॥ ५६ ॥ उच्यतांकिंकरोम्यद्यभवतीनांवशोह्यहम् ॥ ज्ञानं
भवतुयुष्माकमितिताःसिषिचेऽम्भसा ॥५७ ॥ तास्तज्जलाभिमर्शात्तुसर्वेषांजन्मकर्मणाम् ॥ संस्मृत्यतत्यजुश्चैवराक्षसंदेहमुल्बणम् ॥ ५८ ॥ आसाद्य
देवतादेहंविमानशतमागतम् ॥ आरुह्याप्सरसोभूत्वाताःप्रणेमुर्द्विजन्मने ॥ ५९ ॥ ऊचुश्चभोद्विजश्रेष्ठद्वारकाजलसंगमात् ॥ राक्षसत्वाद्वयंमुक्ता
गच्छामस्त्रिदशालयम् ॥ ६० ॥ इन्द्रप्रस्थान्तरावर्तिन्येषायाद्वारकाद्विज ॥ नातःपरतरंलोकेऽन्यत्तीर्थमखिलार्थदम् ॥६१॥ नारदउवाच ॥ इत्युक्त्वा
ताःसमारूढाविमानेषुमहीपते ॥ जग्मुःप्राचींदिशंतनदत्ताज्ञावैद्विजन्मना ॥ ६२ ॥ यमुनातीरवर्तिन्याद्वारकायामहीपते ॥ शृण्वन्माहात्म्यमेतस्या
नरःपापैःप्रमुच्यते ॥ ६३ ॥ वेदज्ञानांब्राह्मणानांशतस्येच्छासुभोजनात् ॥ यत्फलंश्रवणादेतन्महिम्नस्तत्प्रजायते ॥ ६४ ॥ गोविन्दाराधनेसम्यग्यथा
वैसौख्यमिन्द्रिये ॥ माहात्म्यश्रवणादस्याद्वारकायास्तथानृप ॥६५॥ सूर्येन्दुग्रहणेदानात्सुवर्णपलविंशतेः ॥ यत्फलंशृण्वतैतस्यमाहात्म्यंतदवाप्यते
॥ ६६ ॥ विमलस्यसुतप्राप्तिंश्रुत्वासुतइहाप्यते ॥ तत्सख्युर्भक्तिलाभंचलभ्यतेभक्तिरुत्तमा ॥ ६७ ॥ राक्षसीनांविमोक्षंयःशृणोतिश्रद्धयान्वितः ॥
सयातिताइवश्रेष्ठंविमानेनसुरालयम् ॥ ६८ ॥ नृपवरमहिमातेवर्णितोद्वारकायास्त्रिभुवनजनसेव्येशक्रतीर्थेस्थितायाः ॥ किमपरमतिपुण्यंवर्णयामि
त्वदग्रेकथयनहिविधेयःश्रेयसिस्वेविलम्बः ॥६९॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०उत्तर०कालिन्दीमाहात्म्येद्वारकाख्यानंनामाष्टाधिकद्विशततमोऽ
ध्यायः ॥ २०८ ॥ युधिष्ठिरउवाच ॥ सौभरेकस्यतीर्थस्यमाहात्म्यंनारदोमुनिः ॥ वर्णयामासशिबयेशक्रतीर्थगतस्यच ॥ १ ॥ अतस्तुममशुश्रूषा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जायतेमुनिपुङ्गव ॥ शिबिनारदसंवादंब्रूहिपुण्यंनतायमे ॥ २ ॥ सौभरिरुवाच ॥ धर्मराजशिबीराजाश्रुत्वानारदवर्णितम् ॥ द्वारकायास्तुमाहात्म्यं
तमेवापृच्छदादरात् ॥ ३ ॥ शिबिरुवाच ॥ ब्रह्माङ्गजसुरश्रेष्ठश्रुतंमाहात्म्यमुत्तमम् ॥ इन्द्रप्रस्थतटस्थायाद्वारकायामयाद्भुतम् ॥ ४ ॥ अयो
ध्यायांयदिमुनेकिंचिदस्तिपवित्रकम् ॥ चरितंममतद्ब्रूहिपिपासोस्त्वद्वचोऽमृतम् ॥ ५ ॥ नारदउवाच ॥ अस्त्यत्रचरितंपुण्यंमहापातकनाशनम् ॥
नापितस्याघयुक्तस्यमुकुन्दस्यद्विजस्यच ॥ ६ ॥ ब्रह्महानापितोराजन्नपमृत्युंगतोद्विजः ॥ प्रसादात्कोशलायास्तुद्वावपिस्वर्गतिंगतौ ॥ ७ ॥ चन्द्र
भागानदीतीरेपुरीसाचनिवेशिता ॥ तत्रास्तिनापितःपापश्चण्डकोनामगर्हितः ॥ ८ ॥ चौर्येणपरवित्तानामपहर्तासपापकृत् ॥ घातकःशस्त्रपाशाद्यैः
पान्थानामवलुण्ठकः ॥ ९॥ द्यूतमद्यरतोनित्यंपरस्त्रीलम्पटेन्द्रियः ॥ भित्त्वादेवालयेभित्तिमिष्टिकाग्रावविक्रयी ॥१०॥ सतस्योद्वसिताभ्यासेब्राह्मणो
वसतिश्रिया ॥ संयुक्तोब्रह्मकर्मज्ञोमुकुन्दोनामतोनृप ॥ ११ ॥ सएकदासमालिङ्ग्यतरुणीमात्मयोषितम् ॥सुष्वापसुरतायासश्लथाङ्गोनिशिनिर्भयम्॥
॥ १२ ॥ सचण्डकोनिशीथेऽथप्रविवेशतदालयम् ॥ मुकुन्दस्यसमाहर्तुंहर्म्येभूषादिवस्तुयत् ॥ १३ ॥ उपकार्याबहिःस्थंयत्तद्गृहीत्वागमद्गृहम् ॥
स्वकीयंचपुनस्तस्यब्राह्मणस्याविशद्गृहम् ॥ १४ ॥ कपाटोत्पाटनार्थीतुयत्नेनमहताभवत् ॥ लोहयन्त्रावरुद्धश्चसनोद्घाटयितुंक्षमः ॥१५॥ आरुरोहत
दातस्यब्राह्मणस्याविशद्गृहम् ॥ प्रविश्यतद्गृहंक्रूरःकृपाणंपाणिनादधत् ॥१६॥अट्टालिकांसपापिष्ठोनापितस्तस्करक्रियः ॥ तत्रापश्यत्प्रसुप्तौतौदम्पती
रतिविह्वलौ ॥ १७ ॥ जगामचतयोःपार्श्वेहेमभूषाजिघृक्षया ॥ शय्यायाएकदेशस्थंगृहीत्वाभूषणंबहु ॥ १८ ॥ हर्तुंतदङ्गतोहस्तंप्रससारसनापि
तः ॥ तस्करस्पर्शतोविप्रोजजागारभयातुरः ॥ १९ ॥ नाकिंचिदूचेसंमील्यनेत्रेतत्रैवसंस्थितः ॥ यदासतस्करःपापोगृहीत्वादेहभूषणम् ॥ २० ॥
चलितःसतदातेनदोर्भ्यामात्तोद्विजेनहि ॥ पश्चादागत्यवित्तस्यसहमानेनसंक्षयम् ॥ २१ ॥ तेनापिनृपचौरेणकृपाणेनहतोद्विजः ॥ विदीर्णोदरमध्य
स्तुतातमातरितीरयन् ॥ २२ ॥ वदन्तःकिंकिमित्येतत्पार्श्वेतस्याययुर्जनाः ॥ ददृशुस्तंनिःसृतान्त्रंरुधिरालिप्तविग्रहम् ॥ २३ ॥ पप्रच्छुश्चमुकुन्दे
दंकर्मकेनेदृशंकृतम् ॥ सोऽपिकृच्छ्रेणमहताप्रोवाचेदंस्वबान्धवान् ॥ २४ ॥ मुकुन्दउवाच ॥ ममैवपरिपाकोऽयंपूर्वोपार्जितकर्मणाम् ॥ नकश्चित्सुख
दुःखस्यदाताकस्यापिदेहिनः ॥ धर्मोऽधर्मश्चतावेवतेषांमूलंपुराकृतौ॥२५॥नारदउवाच ॥ इत्युक्त्वासतुभूयस्यापीडयागाढपीडितः ॥ तत्याजभूपते
प्राणान्पश्यतांसुहृदांतदा॥२६॥विललापतदातस्यमाताद्विजसतीनृप॥ निधायतच्छिरःस्वाङ्केकुण्डलाभ्यामलङ्कृतम् ॥२७॥ मातोवाच॥हाहतास्मि
त्वयावत्सदशामन्त्र्यांचगच्छता॥दिनश्रीरिवसूर्येणपश्चिमाचललम्बिना ॥ २८ ॥ यदङ्गंचन्दनालेपयोग्यंतवमहामते॥ मांमज्जयार्तिशोकाब्धौतदिदं

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धूलिधूसरम् ॥ २९ ॥ ताम्बूलचर्वणेऽभ्यासोयस्त्वयाविहितस्त्वसौ ॥ सएवरुधिरोद्गारमिश्रेणक्रियतेध्रुवम् ॥ ३० ॥ तवयेलोचनेपूर्वंजिग्यतुः
कमलश्रियम् ॥ तेएवसांप्रतंजातेतिमिरौघावृतेइव॥३१॥ उत्तिष्ठोत्तिष्ठवत्सत्वंशिष्यानध्यपयात्मनः ॥ यथावद्वैश्वदेवान्तेपूजयातिथिमागतम् ॥३२॥
द्वारिस्थितावयस्यास्तेत्वाह्वयन्तिप्रयाहितान् ॥ दातव्यंयद्ददस्वैभ्योग्रहीतव्यंगृहाणतत् ॥ ३३ ॥ हाहादेहिप्रतिवचःपतामितवपादयोः॥नोचेदहंवि
मोक्ष्यामिप्राणांस्तवसमीपतः ॥ ३४ ॥ नारदउवाच ॥ इत्युक्त्वामूर्छितातस्यमुकुन्दस्यप्रसूस्तदा ॥ भार्यातस्यशिरःस्वाङ्केविधायव्यलपच्च
सा ॥ ३५ ॥ भार्योवाच ॥ नाथभोगुणपाथोधेमदीयंवचनंशृणु ॥ रुष्टोऽसिचेत्समंमात्राकुतोवदममाग्रतः ॥ ३६ ॥ नकदाचित्त्वयासाधोमौन
मीदृक्कृतंपुरा ॥ केनापिलघुनाप्रात्राह्यपमानःकृतस्तव॥३७॥शुकोऽयंपञ्जरस्थस्तेनान्नमत्तित्वयाविना ॥ भोजयैनंसुसिद्धान्नंकलवाचंचसारिकाम् ॥
॥ ३८॥ रामरामहरेकृष्णविष्णोनामावलीमिति ॥ पाठयोत्तिष्ठनिपुणौद्वावेतौसारिकाशुकौ ॥३९॥ अपराद्धंमयाकिंतेयत्त्वंमांनाभिभाषसे ॥ यत्त्वया
मेधनंदत्तंतन्मयासाधुरक्षितम् ॥ ४० ॥ अर्पितंयत्त्वयानाथनिजतेजोममोदरे ॥ सूतिकालमहंतस्यनापेक्षेत्वामनुव्रजे ॥ ४१ ॥ नारदउवाच ॥ एवं
विलप्यसातस्यमुकुन्दस्यप्रियातदा ॥ नरुरोदस्वभर्तारमनुगन्तुमनाःसती॥४२॥ अथतस्यमुकुन्दस्यगुरुर्वेदायनाभिधः॥ संन्यासीपर्यटन्पृथ्वींतस्य
वेश्मययौनृप ॥४३॥ मुकुन्दःक्वगतोमाताभार्यातस्यचधीमतः॥ नदृश्यतेतदातेनपृष्टेत्याचष्टचेटिका॥४४॥चेटिकोवाच॥मस्वामिन्केनापिचौरेणमम
स्वामीहतोनिशि ॥ स्नुषायाभूषणंनीतंदुकूलानिचसर्वशः ॥ ४५ ॥ समृतःपतितोभूमौहर्म्यस्योपरितिष्ठति ॥ तस्यमातावधूश्चैवभ्रातरश्चतदन्तिके ॥
विलपन्तिमहाशोकसागरेपतितागुरो ॥ ४६ ॥ नारदउवाच ॥ इत्याकर्ण्यपरिव्राट्सवचनंचेटिकोदितम् ॥ आरुह्यहर्म्यमद्राक्षीदात्मान्तेवासिनंमृतम्
॥ ४७ ॥ तदन्तिकेसमालोक्यबन्धूनाक्रन्दतोभृशम् ॥ उद्धरिष्यन्निदंधीरःशोकाब्धेस्तानुवाचह ॥४८॥ वेदायनउवाच ॥ देहमुद्दिश्यवात्मानंशोको
ऽयंक्रियतेत्वया ॥ मातःकथयसत्यंमेनोभयोर्युज्यतेहिसः ॥ ४९ ॥ देहोऽयंभूतसंघातःप्रारब्धैःसमुपार्जितः ॥ तेषुक्षीणेषुभूतानांपृथक्त्वमुपजायते
॥ ५० ॥ यदेकीभवनंतेषांकर्मभिर्जन्मतन्नृणाम् ॥ तन्नाशेतत्पृथक्त्वंचतदेवमरणंस्मृतम् ॥५१॥ ऐक्यंपृथक्त्वंभूतानांकर्माधीनेयतोबुधैः ॥ अतोदेहेन
कर्तव्यःशोकःपरवशेजडे ॥ ५२ ॥ अनाद्यविद्ययाजीवेदृष्टेमरणजन्मनी ॥ देहस्यात्मन्यहंबुद्ध्यामन्यतेनहितत्रते ॥ ५३ ॥ तन्निवृत्तौसतद्ब्रह्मयच्छुद्धं
रूपवर्जितम् ॥ स्वप्रकाशंजगद्धेतुहेत्वतीतंगुणोर्जितम् ॥५४॥ नित्यंविज्ञानमानन्दस्वभासाभासयज्जगत् ॥ नजिह्वालेढितच्चक्षुर्नपश्यतिशृणोतिन ॥
॥ ५५ ॥ श्रुतिर्जिघ्रतिनघ्राणंनत्वक्स्पृशतिकर्हिचित् ॥ अतीतमिन्द्रियेभ्यस्तत्स्वप्रकाशकमात्मदृक् ॥ ५६ ॥ अविषयंमनोदूरंबुद्धेरपिन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गोचरम् ॥ तस्यावताररूपाणिशुद्धसत्त्वानिदेवताः ॥ ९७ ॥ सेवन्तेतन्नजानन्तिरूपंयत्सदसत्परम् ॥ एवंस्वरूपमात्मायस्तंसमुद्दिश्यकःकुधीः॥
॥ ९८ ॥ क्रोधंकुर्याद्यतस्तस्यनोत्पत्तिर्नैवसंक्षयः ॥ ९९ ॥ इतिश्रीपाद्ममहापुराणेपञ्चप०उत्तर०कालिन्दीमाहात्म्येनवाधिकद्विशततमो
ऽध्यायः ॥ २०९ ॥ नारदउवाच ॥ एवंप्रबोध्यतान्सर्वान्वचोभिःपारमार्थिकैः ॥ सहंसःकारयामासक्रियास्तस्यात्मसंभवाः ॥ १ ॥
अन्तर्वत्नीमुकुन्दस्यनिर्बन्धंकुर्वतीवधूः ॥ अनुगन्तुंस्वभर्तारंविदुषातेनवारिता ॥ २ ॥ तस्यास्थीनिसमादायतेनसंन्यासिनासमम् ॥ तद्भ्राता
प्रययौगङ्गाजलेपातयितुंनृप ॥ ३ ॥ विप्रसंन्यासिनौतौहिकतिभिर्वासरैर्नृप ॥ सार्थलोकवशात्प्राप्ताविन्द्रप्रस्थेऽत्रसत्पदे ॥ ४ ॥ इन्द्रप्रस्था
न्तरावर्तिन्येषायाकोशलानृप ॥ अत्रसुप्तौनिशायांतौयमुनातीरभूतले ॥ ५ ॥ आत्मनोरुभयोर्मध्येन्यस्यास्थिपटसम्पुटम् ॥ मार्गखेदपरिक्रान्तौ
दशांसौषुप्तिकींगतौ ॥ ६ ॥ निशीथेऽथप्रसुतेषुसार्थलोकेषुकश्चन ॥ एकःश्वातत्रसंप्राप्तःपक्वान्नादिजिहीर्षया ॥ ७ ॥ बभ्रामसर्वशिबिरेजिघ्रन्पाक
स्थलींमुहुः ॥ भाजनानिलिहन्मूर्ध्निक्वचदण्डाहतिंसहन्॥८॥ केनचित्ताडितोमूर्ध्निनिःशब्दंविद्रुतस्ततः ॥ प्रतिकर्तुमशक्तस्तुस्त्रीजितःस्वस्त्रियायथा ॥
॥ ९ ॥ यत्रावकण्डितःसश्वादण्डग्रावेष्टकादिभिः ॥ पुनर्विवेशतत्रैवसोऽन्नपात्रलिलिप्सया ॥१०॥ भोगेच्छयाययावेश्याःस्नेहवान्निर्द्धनोजनः॥ भ्रम
न्नेवंसचात्रापियत्रसुप्तौहितावुभौ ॥ ११ ॥ सारमेयस्तयोर्मध्याज्जह्रेसपटसम्पुटम् ॥ नीत्वासकियतींभूमिंदन्तैस्तत्पटसम्पुटम् ॥ १२॥ विदार्यास्थीनि
तत्स्थानिनिर्मांसान्यवलोक्यसः ॥ एतस्याःकोशलायास्तुजलमध्येसमाक्षिपत् ॥१३॥क्षिप्तमात्रेषुतेनास्थिषुत्वेतदम्बुनिभूपते ॥दिव्यंविमानमास्थाय
मुकुन्दोऽत्रसमागतः ॥ १४ ॥ दृष्ट्वागुर्वनुजौसुप्तौशनैःप्राबोधयत्तदा ॥ उवाचचनमस्कृत्यगुरुंदिव्याकृतिर्नृप ॥ १५ ॥ मुकुन्दउवाच ॥ वेदाय
नगुरोतुभ्यंनमआशीस्तवानुज ॥ प्रसादाद्वांममास्थीनितीर्थेऽत्रपतितानिवै ॥ १६ ॥ अपमृत्युमहंगत्वानिरयंप्राप्यतत्फलम् ॥ एतत्तीर्थप्रसादेन
दैवीलब्धामयागतिः ॥ १७ ॥ त्वांगुरुंतीर्थभूतंतुनमस्कर्तुमिहागतः ॥ अहंगच्छन्विमानेनदिव्येनत्रिदशालयम् ॥ १८ ॥ नमस्कृतोभवानेत
त्तीर्थंचायंसहोदरः ॥ दृष्टोमामनुजानीहियामिस्वर्गसुखोदयम् ॥१९॥ नारदउवाच ॥ श्रुत्वैवंवचनंतस्यमुकुन्दस्यगुरुस्तदा ॥ वेदायनोविमानस्थं
तमूचेगतविस्मयः ॥ २० ॥ वेदायनउवाच ॥ मुकुन्दाख्याहिमेसत्यंलब्ध्वायन्मरणंभवान् ॥ कस्मिँल्लोकेगतस्तातयतोयात्यधुनादिवम् ॥ २१ ॥
किंवृत्तंतत्रतेतातत्तस्यलोकस्यकोऽधिपः ॥ कीदृशीचप्रजाकीदृग्धर्मस्तत्राखिलंवद ॥ २२ ॥ मुकुन्दउवाच ॥ कथयामिगुरोतुभ्यंयद्वृत्तंमरणादनु ॥
तीर्थस्यास्यप्रसादेनस्मृतिर्मेजायतेऽधुना ॥ २३ ॥ यदाहंतेननिहतश्चण्डकेनदुरात्मना ॥ नापितेनतदाजग्मुर्यमभृत्याःसुदारुणाः ॥२४॥ पिङ्गाक्षा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रक्तकेशाश्चश्यामदेहनखाधराः ॥ वामनादीर्वचरणाह्रस्वनासाश्चदन्तुराः ॥ २५ ॥ नीयतांनीयतामेषधर्मराजस्यशासनात् ॥ पुरींसंयमनीमेव
मूचिरेतेपरस्परम् ॥ २६ ॥ इत्युक्त्वायातनादेहेमांनिवेश्यमहारुषा ॥ निबध्यदारुणैःपाशैर्जघ्नुर्लोहस्यमुद्गरैः ॥ २७ ॥ तैरहंनीयमानस्तुमार्गेह्यु
त्तप्तवालुके ॥ अरुदंभृशदुःखार्तस्ताडितोऽहंपुनश्चतैः ॥ प्रोचुश्चतेध्रुवंकृत्वानिर्भर्त्स्येतिचमांबहु ॥ २८ ॥ यमदूताऊचुः ॥ त्वयाल्पतोगुरुर्यस्मा
द्ददताब्रह्मनिश्चलम् ॥ किंकरोषियमस्याग्रेद्रष्टव्यंदारुणंमुखम् ॥ २९ ॥ तस्यपापस्यभोक्तव्यंदारुणस्यफलंत्वया ॥ तेनैवपाप्मनापापिन्नपमृत्युंगतो
भवान् ॥ ३० ॥ इत्युक्त्वामांमुहूर्तेनबहुयोजनसंस्थिताम् ॥ पुरींसंयमनींनिन्युर्यत्रराजास्वयंयमः ॥ ३१ ॥ प्रणम्यधर्मराजंतेस्थापयित्वातुमांपुरः ॥
आनीतोऽयंद्विजःपापइतिमांतन्यवेदयन् ॥ ३२ ॥ दृष्ट्वामांधर्मराजोऽथप्रोवाचस्वसभासदः ॥ ३३ ॥ यमउवाच ॥ भोःसभ्यामामकीं
वाचंशृण्वन्तुसुसमाहिताः ॥ यदाहंब्रह्मणाह्यस्मिन्नधिकारेनिवेशितः ॥ तदामामित्युवाचासौब्रह्मालोकपितामहः ॥ ३४ ॥ ब्रह्मोवाच ॥ अधर्मिणां
नराणांत्वंशास्तासंयमनीपतिः ॥ यथापराधमाधत्स्वदण्डंचण्डकरात्मज ॥ ३५ ॥ पित्रोरपोषकोयस्तुसमर्थोगुरुध्रुक्तुयः ॥ एतौमहापातकिनौ
निपात्यौनिरयेषुते ॥ ३६ ॥ सर्वेषुयावद्वर्षाणांप्रत्येकमयुतंभवेत् ॥ एतयोर्नत्वयाकार्यादयाजातुककुप्पते ॥ ३७ ॥ यमउवाच ॥ इत्यहंब्रह्मणो
वाक्यात्स्वगुरुद्रुहिमानवे ॥ नकरोमिक्रियांसभ्यास्तथापित्रोरपोषके ॥ ३८ ॥ ब्राह्मणोऽयंगुरुद्रोहीतद्द्रोहादपमृत्युताम् ॥ प्राप्तोमच्छासना
द्भृत्यैरानीतोदर्शनाक्षमः ॥ ३९ ॥ भोभृत्याःप्रथमंघोरेरौरवेवत्सरायुते ॥ पात्यतांचपुनस्तस्मान्निःसार्यान्यत्रपात्यताम् ॥ ४० ॥ तावन्तमेव
कालंवैपापोऽयंगुरुलोपकः ॥ नरकेष्वितिसर्वेषुयथाकालंस्थितंद्रुतम् ॥ ४१ ॥ मुकुन्दउवाच ॥ वेदायनगुरोस्वामिन्भृत्यास्तेयमशासनात् ॥
नीत्वामांरौरवेघोरेपाशैर्बद्धान्यपातयन् ॥ ४२ ॥ तत्राहंतांव्यथांगुर्वींलब्धवानतिदारुणाम् ॥ यथैकोऽपिक्षणस्तातनीतोमेयुगवत्तदा ॥ ४३ ॥
त्रिंशद्दिनानितत्रीतंदुःखंमेतत्रतिष्ठता ॥ एकत्रिंशत्तमेह्यस्मिन्दिनेऽहंनिर्गतस्तदा ॥४४॥ पतितेष्वस्थिखण्डेषुतीर्थेऽस्मिन्नुत्तमोत्तमे॥ गुरुलोपोद्भवंपापं
सद्योनष्टंममाभवत ॥ ४५ ॥ तीर्थस्यास्यप्रसादेनलब्धाचस्वर्गतिर्मया ॥ सुखंस्वर्गेनिवत्स्यामियावदिन्द्राश्चतुर्दश ॥ ४६ ॥ यमस्यनगरेतस्मिन्याः
प्रजानिवसन्तिवै ॥ पापिनांभयदायिन्योधर्मिणांतामनोहराः ॥ ४७ ॥ सिंहास्यागजकोलास्यामहादंष्ट्रोन्नतोदरीः ॥ बिडालास्याःपिङ्गकेश्यो
भामिन्योदीर्घपत्कराः ॥ ४८ ॥ तीर्थस्यास्यप्रसादेननिष्पापोऽहंयदाभवम् ॥ तदामयाप्रजाहृष्टादिव्यरूपायमालये ॥ ४९ ॥ सर्वास्ताःसत्यवा
दिन्योविनयाचारसंचिताः ॥ दिव्याभरणधारिण्योदिव्याम्बरविभूषिताः ॥५०॥ इत्येतत्कथितंतातयत्पृष्टोऽहंत्वयानघ ॥ अनुजानीहिमांगन्तुमम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रेशपुरींप्रति ॥ ५१ ॥ नारदउवाच ॥ इत्याकर्ण्यससंन्यासीस्वशिष्योक्तंवचस्तदा ॥ भूयःपप्रच्छधर्मात्मामुकुन्दंतंद्विजंनृप ॥५२॥ वेदायनउवाच॥
बाल्यावधिगुरुस्तेहंमत्तोऽधीतंत्वयाखिलम् ॥ शब्दशास्त्रसमेतश्चवेदस्तुसपदक्रमः ॥ ५३ ॥ विहितामममशुश्रूषाभावेनभवतोत्तमा ॥ त्वयिसन्तिसतां
साधोगुणाःशमदमादयः ॥ ५४ ॥ गुरुलोपकृतंपापंकथंतेसमजायत ॥ एतदाख्याहिमेतातयथाजानामितत्त्वतः ॥ ५५ ॥ मुकुन्दउवाच ॥ जन्मो
पवीतकन्यानांदातारोनिगमस्यच ॥ यज्ञोपवीतदातुश्चनाज्ञाभङ्गःकृतोमया ॥ ५६ ॥ श्वश्रूश्वशुरयोःसेवाभृत्येनेवकृतामया ॥ तवापिशास्त्रदातुश्च
नाज्ञाभङ्गःकृतोमया ॥ ५७ ॥ पुरोधायःकुलाचार्योवेदवेदाङ्गपारगः ॥ तस्यापराद्धंकिञ्चिन्मेतत्रत्वंश्रोतुमर्हसि ॥ ५८ ॥ यद्यस्माकंकुलेपुत्रोजायते
धर्मकोविद ॥ तदापुरोधसेधेनुमेकांवातस्यदक्षिणाम् ॥ ५९ ॥ दत्त्वासंछिद्यतेनालमितिवंशस्यनःस्थितिः ॥ पुराममैवपुत्रेतुजातमात्रेशुभे
ऽहनि ॥ ६० ॥ कुलक्रियामयातातनकृतामूढबुद्धिना ॥ तस्याश्चाकरणेनैवगुरुलोपकरोऽभवम् ॥६१ ॥ निवेदितमिदंसर्वंगुरुलोपाद्यथामम ॥ पाप
मासीदनुज्ञांमेदेहियामिसुरालयम्॥६२॥वेदायनउवाच ॥ इन्द्रप्रस्थान्तरावर्तिन्येषायाकोशलाशुभा॥स्मृतिरस्याःप्रसादेनदृश्यतेपूर्वजन्मनः॥ ६३॥
केनपुण्येनतीर्थेऽस्मिन्नस्थीनिपतितानिते॥ मुकुन्दाख्याहिचैतस्यस्मृतिरस्तितवानघ ॥ ६४ ॥ मुकुन्दउवाच ॥ एकस्तुब्राह्मणःकश्चित्सायंमद्गृह
मागतः ॥ तस्मैस्थानंमयादत्तंभोजनंचयथाविधि॥६५॥सोऽपिभुक्त्वायथाकामंसुष्वापशयनेशुभे ॥निशीथेतस्यसर्वाङ्गेज्वरोऽभूदतिदारुणः ॥६६॥
तेनपीडितसर्वाङ्गोनिद्रांलेभेनसद्द्विजः ॥ प्रभातएवतत्याजप्राणान्मृत्यावुपस्थिते ॥ ६७ ॥ तस्यदाहादिकर्माणिविहितानिमयागुरो ॥ तदस्थीनिच
गङ्गायांपातितानिविधानतः ॥ ६८ ॥ तेनपुण्येनमेऽस्थीनिपतितानिशिवप्रदे ॥ तीर्थेऽस्मिन्कोशलेनाम्निब्रह्मदेवविनिर्मिते ॥ ६९ ॥ नारदउवाच ॥
स्वचरितमितिराजन्सद्द्विजःप्रोच्यसद्यःसुरसुभगशरीरोद्यांययौयानगत्या ॥ इदमकथिमयातेतस्करात्प्राप्यमृत्युंव्यलभतदिवमेतत्तीर्थराजप्रसादात् ॥
॥ ७० ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप० उत्तर० कालिन्दीमाहात्म्येमुकुन्दोपाख्यानेदशाधिकद्विशततमोऽध्यायः ॥ २१० ॥ नारदउवाच ॥ शिवेतव
पुरःसर्वंमुकुन्दाख्यानमुत्तमम् ॥ कथितंचण्डकस्यापिनापितस्यशृणुष्वमे ॥ १ ॥ यस्मिन्दिनेमुकुन्दस्तुब्राह्मणस्तेनघातितः ॥ चण्डकेनतदाराजंस्तं
द्वृत्तंनागरैःश्रुतम् ॥ २ ॥ श्रुत्वातैस्तन्नृपस्याग्रेनिवेदितमितिस्फुटम् ॥ ३ ॥ नागराऊचुः ॥ चण्डकेनहतोराजन्मुकुन्दोब्राह्मणोत्तमः ॥ नीतंचतद्धनं
भूरियद्युक्तंतद्विधीयताम् ॥ त्वमस्माकंप्रजानांहिरक्षकःशासकोऽसताम् ॥ ४ ॥ नारदउवाच ॥ इत्याकर्ण्यसभूपालोमन्त्रिणंपार्श्ववर्तिनम् ॥ उवाच
कोपरक्ताक्षःकिमेभिःकथ्यतेशृणु ॥ ५ ॥ शीघ्रमानयतंपापंनोचेत्त्वांघातयाम्यहम् ॥ उत्तिष्ठोत्तिष्ठपापिष्ठसाधूनांशंविधीयताम् ॥ ६ ॥ पीडयन्तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विपर्ययेयस्यप्रजादस्युभिरुल्बणैः ॥ सनृपोनरकंयातितेभ्यस्ताश्चेन्नरक्षति ॥ ७ ॥ नारदउवाच ॥ निशम्येतिवचोराज्ञःसचिवःसशिबेनृप ॥ वेगेनहय
मारुह्यपदातिशतसंयुतः ॥ ८ ॥ ययौगृहेमुकुन्दस्यतस्यबन्धूनपृच्छत ॥ मुकुन्दःकेननिहतःसत्यंब्रूतममाग्रतः ॥ तंपापंनिहनिष्यामिशासनाद्भूपते
रहम् ॥ ९ ॥ नारदउवाच ॥ श्रुत्वेतिमन्त्रिणोवाक्यंप्रत्यूचुर्विप्रबान्धवाः ॥१०॥ विप्रबान्धवाऊचुः ॥ चण्डकेनहतोमन्त्रिन्मुकुन्दोनापितेनहि ॥ इदं
पलायमानस्यतस्योष्णीषंपपातवै ॥ ११ ॥ दृष्टःस्वचक्षुषावध्वामुकुन्दस्यैवसोऽघकृत् ॥ किंकुर्मस्तेनपापेनमज्जिताःशोकसागरे ॥ १२ ॥ नारद
उवाच ॥ इत्याकर्ण्यवचस्तेषांबन्धूनांब्राह्मणस्यहि ॥ समन्त्रीतस्यपापस्यनापितस्यगृहंययौ ॥ १३ ॥ अश्वादुत्तीर्यतरसातद्गृहंस्वयमाविशत् ॥
कतिभिःपत्तिभिःसार्द्धंशयानंचददर्शह ॥ १४ ॥ पत्तयस्तुतदाज्ञताःकेशेष्वाकृष्यतत्क्षणात् ॥ तल्पादुत्थापयामासुस्तंपापंनापिताधमम् ॥ १५ ॥
किंकिमित्येवमंजलपन्नेत्रेउन्मीलयत्यसौ ॥ यावत्सनापितःपापस्तावत्तंददृशेपुरः ॥ १६ ॥ संस्मरन्तंनिजंकर्मरात्रौयत्कृतवानघम् ॥ अधोमुखःक्षणं
तस्थौपश्यन्मूर्ध्निस्थितंयमम् ॥ १७ ॥ ग्राहयित्वाचसचिवस्तंपापंचस्वपत्तिभिः ॥ निनायनृपतेःपार्श्वमितिचोवाचभूपतिम् ॥१८॥ आनीतोब्रह्महा
राजन्नयंचण्डकनापितः ॥ यदाज्ञापयसिस्वामिंस्तरसातत्करोम्यहम् ॥ १९ ॥ राजोवाच ॥ धर्मज्ञसचिवश्रेष्ठशृणुत्वंवचनंमम ॥ इयंसरिद्वरायुष्मं
श्चन्द्रभागात्रनिर्मला ॥ २० ॥ त्यजन्तियेऽत्रवैप्राणाँल्लभन्तेतेसुरास्पदम् ॥ अतएषनहन्तव्यःपापात्माह्यत्रनापितः ॥ २१ ॥ पञ्चकोशान्तरेह्यस्या
मर्यादायाबहिर्जहि ॥ नरकान्दारुणान्ह्येषब्रह्महायातुमाचिरम् ॥ २२ ॥ नारदउवाच ॥ इत्युक्तस्तेनवैराज्ञासराजन्मन्त्रिसत्तमः ॥ श्वपचान्प्रेरया
मासहन्तुंतंभूपशासनात् ॥ २३ ॥ श्वपचास्तेतमुन्नीयचन्द्रभागापरेतटे ॥ योजनद्वयभूभागंचिच्छिदुस्तस्यमस्तकम् ॥ २४ ॥ सपापोमारवेदेशेसर्पो
ऽभूत्कालविग्रहः ॥ धवकोटरमध्यस्थोविषज्वालाकराननः ॥२५॥ सशुष्कोधववृक्षस्तुतस्यफूत्कारवह्निना ॥ तथातपनतापेनसरसोऽपियथाह्रदः॥
॥ २६ ॥ गमनात्तस्यपापस्यसर्वतोवृक्षमूषरम् ॥ उच्छिद्यतृणजातादिजातंपश्वहितंतदा ॥ २७ ॥ तत्रजातुसमायातःसार्थोदक्षिणदेशतः ॥ नारा
यणाश्रमंगच्छन्बदर्याख्यंशिबेनृप ॥ २८ ॥ तत्रैकोब्राह्मणःकश्चित्सार्थेसंमीलितःपथि ॥ निश्छिद्रांकाष्ठमञ्जूषांपितृमात्रस्थिसंयुताम् ॥ २९ ॥
स्कन्धेनधारयन्यातितानिपातयितुंनृप ॥ गङ्गाम्भसिमहाभागपापिनामपिकामदे ॥३०॥ सोऽप्यागतस्तत्रवनेयत्रास्तिसभुजङ्गमः ॥ विविक्तेक्षिप्य
मञ्जूषांशलाकालोहनिर्मिताम् ॥३१॥ अथागत्यभुजङ्गोऽसौशलाकांफणयाघट्टत्॥ किंचिदुद्घाटितायांसमञ्जूषायांसमाविशत् ॥३२॥ पुनःशलाका
स्वंस्थानमागताथसकुण्डली ॥ तत्रैवतस्थौनिश्चेष्टोमञ्जूषायांविषोल्बणः ॥ ३३ ॥ अथप्रभातेसर्वेतेचेलुःस्थानात्ततोनृप ॥ ब्राह्मणःसोऽपिमञ्जूषां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कम्बलेनसमावृताम् ॥ ३४ ॥ कृत्वाशिरसिराजेन्द्रचचालप्रतिजाह्नवीम् ॥ कतिभिर्वासरैःसार्थःसंप्राप्तस्तीर्थगामिनाम् ॥ ३५ ॥ इहैवकोशलायांवै
पुनीतायांमहीपते ॥ अथशीतातुरोविप्रःकम्बलंचोदघाटयत् ॥ ३६ ॥ मञ्जूषावरणंराजंस्तत्रायोध्यातटेशुभे ॥ सोऽपिसर्पोनिराहारोलब्ध्वामारुत
भोजनम् ॥ ३७ ॥ निश्चक्रामबहिस्तस्मादुत्क्षेप्यसुशलाकिकाम् ॥ तंनिःसृतंसमालोक्यसर्पःसर्पइतिक्रुधा ॥ ३८ ॥ व्याहरन्तोजनाःसर्वेलोष्टहस्ताः
समभ्ययुः ॥ यावत्पलायतेसर्पस्तावदेकेनघातितः ॥ ३९ ॥ तत्याजसतदाप्राणान्पश्यतांतीर्थगामिनाम् ॥ त्यक्त्वाभुजगदेहंसदेवत्वंप्रापदुर्लभम् ॥
दिव्यंविमानमारुह्यप्रोवाचेदंजनानिह ॥ ४० ॥ सर्पउवाच ॥ भोदाक्षिणात्याःशृणुतब्राह्मणावचनंमम ॥ पुराचण्डकनामाहंनापितोब्रह्महाधमः ॥
॥ ४१ ॥ ब्रह्महत्याप्रदोषेणसर्पआसंमरुस्थले ॥ भुक्त्वानरकदुःखानिवर्षाणांलक्षपञ्चकम् ॥ ४२ ॥ अतीतंसर्पयोनौमेवर्षाणामयुतद्वयम् ॥
तीर्थस्यास्यप्रसादेनप्राप्तंदेवत्वमुत्तमम् ॥ ४३ ॥ तस्मादिदंनवैत्याज्यंतीर्थंवैकोशलाभिधम् ॥ सर्वार्थदंयतोनाकःप्राप्तःपापीयसामया ॥ ४४ ॥
नारदउवाच ॥ एवंसनापितःपापोयोनिंप्राप्यविनिन्दिताम् ॥ जगामद्यांविमानस्थस्तीर्थस्यास्यप्रसादतः ॥ ४५ ॥ तेदाक्षिणात्यायतयोभूत्वातत्रैव
तीर्थके ॥ ऊषुर्गोविन्दपादाब्जमानसाहृष्टवैभवे ॥ ४६ ॥ माहात्म्यमस्यतीर्थस्यदृष्ट्वासब्राह्मणोत्तमः ॥ तीर्थेऽत्रजातविश्रब्धःपित्रोरस्थीनिसो
ऽक्षिपत् ॥ ४७ ॥ पतितेष्वस्थिखण्डेषुपितरौतस्यतत्क्षणात् ॥ विमानवरमारूढौदिव्यौतत्रसमागतौ ॥ ४८ ॥ ऊचतुश्चस्वतनयंशृण्वानेषुजनेषुवै॥
वत्सजीवचिरंलोकेधनधान्यसुखीभव ॥ ४९ ॥ आवयोर्मुक्तिदानाच्चमुक्तियास्यसिनोमृषा ॥ गङ्गायांपिण्डदानेनयत्फलंस्यात्सुतस्यवै ॥ पितॄणां
यागतिश्चात्रद्वयंस्याद्स्थिपाततः ॥ ५० ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप० उत्तर० कालिन्दीमाहात्म्येमुकुन्दोपाख्यानंनामैकादशाधिकद्विशत
तमोऽध्यायः॥ २११ ॥ नारदउवाच ॥ इत्युक्त्वातस्यविप्रस्यपितरौदिव्यरूपिणौ ॥ विमानवरमारुह्यगतौहरिपुरंप्रति ॥ १ ॥ तयोःपु
त्रस्तुतत्रैवकोशलायांदिनत्रयम् ॥ उषित्वास्वगृहंप्रायाच्चिन्तयंस्तीर्थवैभवम् ॥ २ ॥ विबुधैःकोशलाराजन्नियमेवतुकथ्यते ॥ कथयिष्यामितत्ते
ऽहंश्रवणोत्सुकचेतसे ॥ ३ ॥ तेदाक्षिणात्याबटवस्तस्यामूषुर्मुमूर्षवः ॥ समर्थार्थप्रदायिन्यांकोशलायांविपद्यताम् ॥ ४ ॥ कश्चिदेकस्तदातेषु
तामनादृत्यकोशलाम् ॥ गच्छन्नारायणस्थानंविष्णुनावारितःपथि ॥ वृद्धब्राह्मणरूपेणप्रोक्तंचेतिद्विजंप्रति ॥ ५ ॥ वृद्धब्राह्मणउवाच ॥ क्वयासि
ब्राह्मणश्रेष्ठत्यक्त्वेमांकोशलांशुभाम् ॥ इन्द्रप्रस्थमिदंतीर्थंसर्वतीर्थोत्तमंद्विज ॥ ६ ॥ कोशलाह्यत्रपुत्रेयंमुक्तिदाविष्णुवल्लभा ॥ यत्रयासिविहायै
नांनिष्कामपददायिनीम् ॥ ७ ॥ नसिद्धिर्भवितातत्रविष्णुस्तेचपराङ्मुखः ॥ मुक्तिंचेदिच्छसेविप्रतीर्थेन्यासंप्रगृह्यच ॥ ८ ॥ यस्ययस्ये

CC-0. In Public Domain. Digitization by eGangotri

च्छयास्नासितंतंवर्गंप्रदास्यति ॥ तवदृष्टिपथेविप्रसर्पोऽपिसुरतामगात् ॥ ९ ॥ अस्याःप्रसादतोमुक्तौस्वगस्थौविप्रदम्पती ॥ संजातप्रत्ययोऽपित्वमेत
न्माहात्म्यदर्शनात् ॥ १० ॥ लब्ध्वाभाग्योदयेनापिकथमेनांविमुञ्चसि ॥ यथाकश्चित्तृषार्तोऽपिलब्ध्वाप्यमृतवारिधिम् ॥ ११ ॥ तंत्यक्त्वा
यातिपङ्काम्भस्तद्वत्त्वंमूढदृश्यसे ॥ यथाचिन्तामणिंकश्चित्कूपेक्षिपतिमोहितः ॥ १२ ॥ हस्तस्थंयागतिस्तस्यदृश्यतेसागतिस्तव ॥ आराध्य
विष्णुंविश्वेशंयथाकश्चित्पुमान्कुधीः ॥ १३ ॥ सुखमैन्द्रियकंतुच्छंयाचतेसागतिस्तव ॥ नयाहिकोशलामेनांत्यक्त्वासर्वार्थदायिनीम् ॥ १४ ॥
स्नातस्यात्रदिवःप्राप्तिर्मृतस्यामृतसंस्थितिः ॥ १५ ॥ नारदउवाच ॥ राजन्नाकर्ण्यविप्रोऽसौद्विजरूपभृतोहरेः ॥ वाक्यंप्रोवाचविप्राग्र्यश्रेष्ठंबदरिका
श्रमम् ॥ १६ ॥ विप्रउवाच ॥ भोभोविप्रवरश्रद्धातववाक्येनजायते ॥ ममश्रुतवतःपूर्वमल्पग्रामस्यवैभवम् ॥ १७ ॥ इन्द्रप्रस्थमिदंतीर्थं
नकदाचिन्मयाश्रुतम् ॥ कुतस्तुकोशलावृद्धएतदन्तरवार्तिनी ॥ १८ ॥ यत्रनारायणःसाक्षान्मुक्तायत्रचयोगिनः ॥ मुक्त्वातमाश्रमंपुण्यं
तिष्ठाम्यत्रकथंद्विज ॥ १९ ॥ यथागत्यस्वयंविष्णुरित्युक्त्वामांनिवारयेत् ॥ बदर्याश्चाधिकंक्षेत्रमिन्द्रप्रस्थमिदंद्विज ॥ २० ॥ तदाहंनप्रति
ष्ठामिचालितोऽपितमाश्रयम् ॥ मुक्तिकामःस्वसदनान्नान्यथास्थितिरत्रमे ॥ २१ ॥ नारदउवाच ॥ इत्युक्तेतेनविप्रेणप्रादुरासीच्चतुर्भुजः ॥
विहायप्राकृतंरूपंदिव्यरूपधरोहरिः॥ उवाचचमहाभागंतंद्विजंमोक्षकामुकम् ॥२२॥ विष्णुरुवाच ॥ इन्द्रप्रस्थमिदंविप्रसर्वतीर्थोत्तमोत्तमम् ॥ ब्रह्मज्ञे
ष्विवसर्वेषुशम्भुर्गङ्गानदीष्विव ॥ २३ ॥ हिमवानिवशैलेषुपक्षिराडिवपक्षिषु ॥ त्रिदशेषुयथाशक्रोवैष्णवेष्विवनारदः ॥ २४ ॥ तेजस्विषुयथा
सूर्यःक्षीराब्धिरिवचाब्धिषु ॥ यथावर्णेषुभूदेवःसृष्टिष्विवपितामहः ॥ २५ ॥ विष्णोर्यथावतारेषुकौशल्याजनितोवरः ॥ तथासमस्ततीर्थेषु
शक्रप्रस्थमिदंवरम् ॥ २६ ॥ निष्कामोवासकामोवायातितीर्थेक्वचिन्नरः ॥ तत्रतत्रसमस्तात्माफलदाताहमेववै ॥ २७ ॥ इन्द्रप्रस्था
न्तरगतांत्यक्त्वायोयातिकोशलाम् ॥ सनोफलमवाप्नोतिभक्तोवरदवृन्दपात् ॥ २८ ॥ नारदउवाच ॥ एवंनिशम्यतद्वाक्यंदृष्ट्वातद्रूपमुत्तमम् ॥
प्रणिपत्यरमाकान्तंतस्यामेवागमद्द्विजः ॥ २९ ॥ भगवानपिविश्वात्मासपद्यन्तर्दधेविभुः ॥ तत्त्वमुद्दिश्यतंविप्रंतेनभावेनपूजितः ॥ ३० ॥
तत्रागत्यसविप्रोऽसौकोशलायांनराधिप ॥ कथयामासतद्वृत्तंसर्वंसर्वान्स्वसङ्गिनः ॥ ३१ ॥ तेऽपिश्रुत्वामहाभागादाक्षिणात्याद्विजातयः ॥ तस्या
मनशनंकृत्वातत्यजुःप्राकृतंवपुः ॥ ३२ ॥ तदैवगरुडारूढःश्रीविष्णुःसमुपागतः ॥ विमानैःस्वगणैःसार्द्धंतावद्भिर्दीप्तिभास्वरैः ॥ ३३ ॥ तेतं
दृष्ट्वासमायान्तंविमानगणसंयुतम् ॥ वपुषादिव्यरूपेणदण्डवत्पतिताभुवि ॥ ३४ ॥ तुष्टवुश्चद्विजाःसर्वेदिव्यज्ञानवपुर्द्धराः ॥ तंदिव्यरूपिणंदेवं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

देववन्द्यपदाम्बुजम् ॥३५॥ब्राह्मणा ऊचुः ॥नमस्तेऽतसीपुष्पसङ्काशभासंतनुंबिभ्रतेपीतवासोवृताय ॥ लसत्कुण्डलप्रोतनानोपलायश्रुतौचञ्चलाव्यापि
नीलाम्बुदाय ॥ ३६ ॥ भक्तिस्त्वदीयाकिलकल्पवल्लीसमाश्रितायच्छतिचित्तवाञ्छितम् ॥ यथातथैषातवकोशलाविभोजनैरुभेतेकृपयातवाप्यते॥
॥ ३७ ॥ वन्दामहेतेचरणारविन्दंवृन्दारकैर्वन्दितमीश्वराद्यैः ॥ विचिन्त्यमानंहृदियोगिवृन्दैःकन्दंपरानन्दभुवोविमुक्तेः ॥ ३८ ॥ प्राप्ताःकामंश्रीप
तेत्वत्स्वरूपंश्रीवत्साद्यैर्लक्षितंचारुचिह्नैः ॥ वाञ्छामस्तदासभावंतथापिप्राप्तंसर्वैराहतंनारदाद्यैः ॥ ३९ ॥ यत्सौख्यंतेदासभावंगतानांतन्नोलक्ष्म्या
वक्षसोऽन्तर्वसन्त्याः ॥ तज्जानातिश्रीपतेश्रीमहेशोनान्योलोकेयेनतच्चानुभूतम् ॥ ४० ॥ मध्येऽस्माकंश्रीपतेसेवकानांनीरागाणामप्यसौमाननीयः ॥
अस्मात्तंतेनारदाद्यामुनीशास्त्वद्भक्तास्तैलोकनाथंभजन्ते ॥४१॥ कामंब्रह्मानन्दमाप्तोऽन्तरात्मात्वद्दास्येनोतृप्तिमायातिशम्भुः ॥वारंवारंत्वद्गुणानाग्रही
तुंनृत्यत्युच्चैस्त्वत्परोभावयुक्तः ॥ ४२ ॥ हेतोरस्माद्देहिनःस्वस्यदास्यंयत्प्राप्तानांनोर्मयःसंभवन्ति ॥ त्वच्चिह्नाङ्गौद्वारपालौतदीयौमोहाद्धामप्राप्यतौ
तत्स्वकीयम् ॥ ४३ ॥ लोकादस्मादन्तरेणत्वदिच्छांत्वल्लोकानांनोद्यतेचाशुपातः ॥ कोजानीयात्तावकीमत्रमायांदुर्विज्ञेयांब्रह्मशर्वादिदेवैः ॥ ४४ ॥
नारदउवाच॥एवंतैःस्तूयमानःसप्रभुर्निजपदोन्मुखः ॥उवाचतान्दाक्षिणात्यान्मेघगम्भीरयागिरा ॥४५॥श्रीभगवानुवाच॥भोभोद्विजाभवन्तोऽस्याः
कोशलायाःप्रसादतः ॥सारूप्यमपिमेप्राप्तादासभावंचयास्यथ ॥४६॥अद्यप्रभृतिमेविप्रास्तीर्थमेतदनुत्तमम् ॥दक्षिणकोशलेत्युच्चैर्नाम्नाख्यातंभविष्य
ति॥४७॥ यत्रदाशरथीभूत्वानिहनिष्यामिरावणम् ॥साकथ्यतेमुनिवरैःसर्वैरुत्तरकोशला ॥४८॥ विपन्नोज्ञानवान्यस्यांवैकुण्ठमधिरोहति ॥ विनापित
द्वसेद्योऽस्यांसोऽपिस्वर्गंचगच्छति ॥ ४९ ॥ इमांततोदशगुणामाहुर्दक्षिणकोशलाम् ॥ एकादशगुणामेकेसम्यगाहुर्मुनीश्वराः ॥ ५० ॥इयानेवविशेषो
ऽस्तितस्याअस्यामतिर्मम॥ तस्यांमृतंनयन्त्येतेवैकुण्ठंमामकागणाः ॥५१॥ अस्यांमृतंस्वयमहमनन्यपदमानसम् ॥आरोप्यगरुडंदत्त्वासारूप्यंप्राप
यामितत् ॥ ५२ ॥ नारदउवाच ॥ इत्युक्त्वातान्द्विजान्विष्णुर्नीत्वावैकुण्ठमभ्यगात् ॥ महिमानंस्तुवन्नस्यस्वयंतीर्थस्यभूपते ॥ ५३ ॥ एतत्ते
सर्वमाख्यातंकारणंजगतीपते ॥ येनेयंकथ्यतेविज्ञैरिहदक्षिणकोशला ॥५४॥ कलिमलकुलहन्ताशृण्वतांमानवानांकमलनयनपादप्रातयेवाञ्छितश्च ॥
नृपवरमहिमातेवर्णितःकोशलायामधुवनभववृत्तंशृण्वतस्तेवदामि ॥ ५५ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर० कालिन्दीमाहात्म्येकोशलामहिम ॥ २०९ ॥
वर्णनंनामद्वादशाधिकद्विशततमोऽध्यायः ॥ २१२ ॥ नारदउवाच ॥ एतन्मधुवनंतातशिवेपरमपावनम् ॥ देवराजायतुष्टेनस्थापिताविष्णुनापुरी॥१॥
अत्रविश्रान्तिनामेदंतीर्थंत्रिभुवनोत्तमम् ॥ विविदांमुक्तिदंपुंसांपावनंसाधुसेवितम् ॥ २ ॥ नित्यंवसतिविश्वात्माविष्णुःश्रीकोलरूपधृक् ॥ अत्रतीर्थो

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्तमेपुण्येनृपविश्रान्तिसंज्ञके ॥ ३ ॥ बहुभिर्जन्मभिर्येनविष्णुराराधितःसदा ॥ मरणंतस्यतीर्थेऽस्मिञ्जायतेकिलभूपते ॥ ४ ॥ कालिन्द्याएवकूलेतु
द्वितीयंहरिणाकृतम् ॥ तीर्थंविश्रान्तिसंज्ञंतुयत्रकंसोनिपातितः ॥ ५ ॥ एतद्वयंसमंराजन्मुणैर्वैकुण्ठदातृभिः ॥ भाग्योदयेनकेनापिलभ्यतेसकलार्थ
दम् ॥ ६ ॥ अथतीर्थस्यमाहात्म्यंकथयामितवाग्रतः ॥ यच्छ्रुत्वासर्वतीर्थेषुमज्जनाछ्प्स्यसेफलम् ॥ ७ ॥ हिमाचलोपत्यकायांकिरातनगरेशुभे ॥
ब्राह्मणोनामकुशलोराजन्नासीद्दरिद्रकः ॥ ८ ॥ तस्यपत्नीदुराचारादुराचारनरेरता ॥ कर्मणामोहयामासपतिंसाबन्धकीवरा ॥९॥ पतिस्तयामोहित
स्तुननिवारयितुंक्षमः ॥ तदाज्ञातत्परोदीनःक्रयक्रीतइवाभवत ॥ १० ॥ लोकाउपहसन्तिस्मतंद्विजंकुलटापतिम् ॥ उपहासभयात्सोऽपिनिर्ययौन
गृहात्कुधीः ॥ ११ ॥ महार्हाणिदुकूलानिभूषणानिचसादधौ ॥ जारैर्दत्तानिदुष्टात्माहसितापिनलज्जते ॥१२॥ वस्त्रंपुरातनंजीर्णमुत्तीर्णयच्छरीरतः ॥
अवज्ञापूर्वकंदुष्टास्वभर्त्रेसंप्रयच्छति ॥ १३ ॥ एवंतयाकुलटयासोऽवज्ञातःस्वकःपतिः ॥ नितान्तंदुःखमापन्नोविषंजग्ध्वामृतोनिशि ॥ १४ ॥
साभीताराजतःपापाह्यनयात्स्वैरिणीतदा ॥ अनुयास्यामिभर्तारमित्युवाचमृषावचः ॥ १५ ॥ तयैवशिक्षिताःसख्यःस्वकीयास्तांसमीपगाः ॥ निवा
रयामासुरितिकथयित्वामहीपतेः ॥ १६ ॥ सख्यऊचुः ॥ भोमृगाक्षिकिमर्थंतेक्रियतेऽनर्थईदृशः ॥ यत्सुवर्णनिभंकायंत्वंनाशयितुमुद्यता ॥ १७ ॥
भवत्याकिंसुखंदृष्टममुष्याव्यवसायिनः ॥ दरिद्रस्यासमर्थस्यसखिस्वोदरपूरिणः ॥ १८ ॥ पालयैनंसुतंबालंत्वदृतेकोऽस्यपालकः॥ मरिष्यामोवयंस
र्वामृतायांत्वयिसुन्दरि ॥ १९॥ गृहमेतदवेक्षस्वसमुत्तिष्ठवरानने ॥ जीयादयंतवसुतोयस्तेभाविसुखप्रदः ॥२० ॥ वाञ्छन्तिबान्धवाःसर्वेत्वदीयास्तव
जीवितम् ॥ उत्तिष्ठनिजबन्धूनांकुरुचित्तसमीहितम् ॥ २१ ॥ रुदन्तितवरागेणवयस्याःसकलाःसति ॥ निजवाक्यप्रदानेनवारयैताःसुदुःखिताः
॥ २२ ॥ नारदउवाच ॥ इत्याकर्ण्यवचस्तासांदुष्टासाधर्मविश्रुतम् ॥ उन्नमय्यमुखंप्राहश्रावयन्तीस्वबान्धवान् ॥ २३ ॥ सख्युवाच ॥ युष्माभि
र्यद्वचोधर्म्यंप्रोक्तंजानेऋतंननु ॥ तथापिस्वपतिःस्त्रीभिर्मान्योलोकद्वयप्रदः ॥ २४ ॥ यदुच्यतेमयावाक्यंधर्मशास्त्रसमन्वितम् ॥ तद्वचःश्रूयतां
सख्योयुक्तंचेदनुमोदत ॥ २५ ॥ यास्त्रीनिधनमापन्नंपतिमन्वेतितत्परा ॥ पापापिसहतेनैवस्वर्गेवसतिसाचिरम् ॥ २६ ॥ स्त्रीभिःपतिर्नहातव्यो
निर्धनोरोगवानपि ॥ जीवन्मृतोऽनुगन्तव्यःश्रुतिरेषासनातनी ॥ २७ ॥ विचिन्त्येतिस्वमनसिसख्योऽन्वेमिस्वकंपतिम् ॥ वर्तिष्यतेस्वभाग्येनकरि
ष्येऽहंकिमस्यवै ॥ २८ ॥ नारदउवाच ॥ इत्युक्तास्तास्तयासख्योदुष्टादुष्टमतिप्रदाः ॥ ऊचुस्तांधर्मवाक्येनसमस्तजनमोहिनीम् ॥ २९ ॥ सख्य
ऊचुः ॥ जहिपूर्वंहिनःसुभ्रूःपश्चादन्वेहिवल्लभे ॥ समस्तास्त्वद्वियोगंनवयंसोढुंक्षमामहे ॥ ३० ॥ अस्मांस्तवविनिघ्नन्त्याअनुयान्त्याःस्वकं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पतिम् ॥ धर्मोऽल्पः पापबाहुल्यंस्वर्गप्राप्तिस्तुकीदृशी ॥ ३१ ॥ जीवन्नयंपतिःस्वीयःसाध्वयंप्रतिपालितः ॥ यदुक्तंपतिपत्नीभ्यांतत्त्वयाविहितंसखि
॥ ३२ ॥ यावत्स्वजीवनोपायंविधातुमयमक्षमः ॥ तावत्त्वदीयभाग्येनजीविष्यतिसुतस्तव ॥ ३३ ॥ नारदउवाच ॥ इत्युक्तासानिववृतेस्वभर्त्तुरनु
यानतः ॥ सुतेनकारयामासतदातद्विरतिक्रियाम् ॥ ३४ ॥ अथकालेनकियतासुतोपनयनेमतिम् ॥ कारयामाससाविप्रैर्दत्त्वाजारार्पितंधनम्
॥ ३५ ॥ कृतोपनयनःकुण्डःसतत्त्वज्ञानवाञ्छिशुः ॥ गृहान्निर्गम्यसपदिनारायणपरोऽभवत् ॥ ३६ ॥ सतांसंगतिमासाद्यत्यक्त्वास्वंप्राकृतं
वपुः ॥ आरुरोहनिजंलोकमप्राप्यंयोगिभिश्चतत् ॥ ३७ ॥ अथसानिर्गतेपुत्रेमनोदुःखंचकारवै ॥ तस्मिन्नेवदिनेराजन्भूयोजारैःसहारमत् ॥ ३८ ॥
इतितैरममाणायांतस्यांजारैःसमंनृप ॥ समागताजराकालेलावण्यमदनाशिनी ॥ ३९ ॥ त्यक्तोपपतिभिर्दृष्ट्वासाजराग्रस्तविग्रहा ॥ बभूवदूति
कान्यासांकुलशीलविनाशिनी ॥ ४० ॥ तदाह्येकस्यविप्रस्यसवत्सांगामपाहरत् ॥ विक्रीताकियताराजन्द्रव्येणननुसातया ॥ ४१ ॥
तयेतिगमितःकालोदूतित्वेनकियान्नृप ॥ पश्चाच्छुष्कशरीरोऽस्याविगुणःसमजायत ॥ ४२ ॥ तस्याःकुष्ठेसमुत्पन्नेगलितंह्यङ्गपञ्चकम् ॥
हस्तौपादौचनृपतेपञ्चमीनासिकातदा ॥ ४३ ॥ एवंभूतायदाहारंनलभेतकुतश्चन ॥ तदातुतत्रोदितयादास्यासानीयतापणम् ॥ ४४ ॥
तत्रसापतितापापालोकान्संप्रार्थ्यदीनया ॥ गिराधिगितिकुर्वाणाचक्रेस्वोदरपूरणम् ॥ ४५ ॥ तदिहाभ्यासवर्त्त्येकोद्विजःसर्वागमार्थवित् ॥
तांविलोक्यमहावाग्मीप्रोवाचेदंवचोनृप ॥ ४६ ॥ जनानांदुःखदंपापमिहलोकेपरत्रच ॥ तस्मात्पापंनकर्त्तव्यंमानवैर्दुःखभीरुभिः
॥ ४७ ॥ पापंकृत्वाजनोयस्तुप्रायश्चित्तंकरोतिवै ॥ नतदाचरितेभूयोनतत्फलमवाप्नुयात् ॥ ४८ ॥ यःकृत्वामुहुरेनांसिप्रायश्चित्तंकरोतिन ॥
तस्यास्याइवपापायागतिरत्रपरत्रच ॥ ४९ ॥ अनयापापसङ्घातोलोकेऽत्रसमुपार्जितः ॥ इहैवतत्फलंभुङ्क्ते भोक्ष्यतेनरकेऽप्यसौ ॥ ५० ॥
सर्वशास्त्रेषुदृष्टंवैसर्वेषांपापकर्मणाम् ॥ प्रायश्चित्तंनचस्त्रीणांविमुखानांस्वकर्मणः ॥५१॥ नारदउवाच ॥ इत्युक्त्वासद्विजश्रेष्ठोनमस्कृत्यरविंययौ॥
विष्णुंसंस्मृत्यसंस्मृत्यभीतस्तदवलोकनात्॥५२॥ एवंसादुःखमापन्नाभुञ्जानाकर्मणःफलम् ॥ अर्जितस्यस्वयंराजन्मृताकतिपयैर्दिनैः॥५३॥नतस्या
अग्निसंस्कारःसंजातःपापकर्मणः ॥ आकृष्यकेशेसानीताश्वपचैर्नगराद्बहिः ॥ ५४ ॥ मरणावसरेतस्यायमभृत्याःसमागताः ॥ प्रापय्ययातनादेहंतां
निन्युर्भास्करेःपुरीम् ॥ ५५ ॥ सौम्यःसधर्मिणांदेवःसाक्षाद्बह्यस्तुपापिनाम् ॥ तस्याविलोकानाद्भूयःसोऽप्यभूद्वैपराङ्मुखः ॥ ५६ ॥ भृत्यानाज्ञाप
यामासयमएवपराङ्मुखः ॥ रौरवेनरकेघोरेपात्यतांसामयेरिता ॥ ५७ ॥ इत्युक्तास्तेतदाभृत्यानीत्वातांघोररौरवे ॥ न्यपातयन्नधोवक्त्रांस्मरन्तीं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्मयत्त्कृतम् ॥९८॥ एकमन्वन्तरंयावत्सास्थित्वातत्ररौरवे ॥ पश्चाद्गोधासमुत्पन्नाश्मशानेमृतमांसभुक्॥९९॥तत्रापिसावर्षशतंलेभेदुःखंस्वकर्मणः॥
फलंमृतकमांसेनकुर्वत्याहारमुत्कटम् ॥ ६० ॥ एकदासमुनेःपुत्रोयोऽस्याःकुक्षौव्यजायत ॥ विप्रयोनौसमायातःश्मशानेतत्रपर्यटन् ॥ ६१ ॥ मुनि
पुत्रस्तुतांवीक्ष्यमृतानांक्रव्यमश्नतीम् ॥ ध्यात्वाक्षणंस्वमनसिबुबुधेतांस्वमातरम् ॥ ६२ ॥ सउवाचात्मनात्मानंबुद्ध्वातांनिजमातरम् ॥ ६३ ॥ मुनि
पुत्रउवाच ॥ एतांतुतारयाम्यद्यदुस्तराद्दुःखवारिधेः ॥ अहोनमुच्यतेजन्तुर्ज्ञातपापेनकर्मणा ॥ ६४ ॥ आत्मनोपार्जितेनैवभोगकालावधिंविना ॥
अस्याःकालोव्यतीयायनिरयेमानवाभिधः ॥ ६५ ॥ साम्प्रतंचजनैस्त्वत्रवत्सराणांशतंगतम् ॥ कियदग्रेचभोक्तव्यमेतयापापमुल्बणम्॥६६॥नारद
उवाच ॥ इत्यालोच्यपुनर्दध्यौज्ञानेनामीलयचक्षुषी ॥ दृष्ट्वातस्यागतिंघोरांपापायादिव्यचक्षुषा ॥ पुनरात्मानमाहेदंसद्विजप्रवरोनृप ॥ ६७ ॥ मुनि
पुत्रउवाच ॥ अहोकल्पशतेनापिनिस्तारोऽस्यानदृश्यते ॥ विनासत्तीर्थमरणंशरणंवारमापतेः ॥ ६८ ॥ अथवापिण्डदानेनगयायांमत्कृतेन
च ॥ विनास्याःसद्गतिंनैवकल्पकोटिशतैरपि ॥ ६९ ॥ नघटेतद्द्वयंचास्याअस्यांयोनौकदाचन ॥ सत्तीर्थविषयेमृत्युः सेवायांश्रीपतेरतिः ॥ ७० ॥
अस्याउद्धारहेतुर्वैमग्नायाःपापसागरे ॥ भवितामत्कृतंश्राद्धंगयायांचवह्नित्रकम् ॥ ७१ ॥ नारदउवाच ॥ इत्यालोच्यसधर्मात्माययौस्वपितुराश्र
मम् ॥ आचख्यौपितरंसर्वंस्वमातुर्दुःखकारणम् ॥ ७२ ॥ निशम्यपुत्रवचनंमातृदुःखनिवेदकम् ॥ उवाचसमुनिश्रेष्ठःपुत्रंप्रणतकन्धरम् ॥
॥ ७३ ॥ मुनिरुवाच ॥ हेतातमातरंस्वीयांशीघ्रमुद्धरदुर्गतेः ॥ नयविद्रूपतिःशत्रोर्न्यलक्ष्मीमिवाहवे ॥ ७४ ॥ नतारयतियःपुत्रोमातरंपितरं
स्वकम्॥ दुःखात्सयातिनरकंयदितारयितुंक्षमः॥७५॥स्वपुत्रात्प्राप्यपानीयंपिण्डाश्चवरतीर्थके॥पितरोनरकात्स्वर्गस्वर्गाद्यान्तिहरेःपदम्॥७६॥तस्मा
दाशुसमुत्तिष्ठगच्छखाण्डवकानने ॥ तत्रास्तियमुनापुण्यामुनिवर्यनिषेविता ॥ ७७ ॥ तत्तीरेऽस्तिहरिप्रस्थंसर्वतीर्थमयंततः ॥ पुण्यंमधुवनंतत्रवि
ष्णुनास्थापितंस्वयम् ॥ ७८ ॥ तत्रस्नात्वातुविधिवत्कृत्वानित्यक्रियांनिजाम् ॥ तामुद्दिश्यकुरुश्राद्धंस्वप्रसोश्चकुरुक्रियाम् ॥ ७९ ॥ त्वयातत्र
कृतेश्राद्धेतस्याःसद्गतिमिच्छता ॥ साप्राप्स्यतिहरेर्लोकंहित्वागोधाङ्गमुल्बणम् ॥ ८० ॥ गयायांपिण्डदानेनयत्फलंताततजायते ॥ ततःशतगुणं
पुण्यंसद्भिर्मधुवनेस्मृतम् ॥ ८१ ॥ इदानींवर्ततेतातकन्याराशिगतोरविः ॥ पुत्रगत्वाकुरुश्राद्धंपूर्वानुद्दिश्यबान्धवान् ॥ ८२ ॥ इतिश्रीपाद्मेमहा
पुराणेपञ्चप०उत्तर०कालिन्दीमाहात्म्येत्रयोदशाधिकद्विशततमोऽध्यायः ॥ २१३ ॥ नारदउवाच ॥ इत्याकर्ण्यपितुर्वाक्यंसजगामत्वरान्वितः
॥ पुण्यंमधुवनंराजन्गयाशतगुणाधिकम् ॥ १ ॥ तत्तीर्थवासिनोविप्रान्सायमामन्त्र्यमन्त्रवित् ॥ कालेपुनःसमाहूयबभाषेस्वागतंवचः ॥ २ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततःप्रक्षाल्यतत्पादौगन्धाद्यैरभिपूज्यच ॥ पादार्घ्यमददात्प्रीत्याशेषेणस्वयमाचमत् ॥ ३ ॥ ततस्तान्ब्राह्मणान्नीत्वाश्राद्धदेशेन्यवेशयत् ॥
कुशाम्बुतुलसीपुष्पगन्धाक्षततिलैःसह ॥ ४ ॥ पूरयित्वाकर्मपात्रंपुण्डरीकाक्षमस्मरत् ॥ देवताभ्यइतिश्लोकंत्रिःकृत्वासोऽपठद्द्विजः ॥ ५ ॥
सतिलंशोधितकुशौर्वेदंधेबन्धनंततः ॥ अग्निष्वात्तेतिमन्त्रेणपूर्वादीनांदिशांक्रमात् ॥ ६ ॥ रक्षोभूतेतिमन्त्रेणनीवीबन्धंव्यधाच्चसः ॥ ततःप्रति
ज्ञामाधायददौद्विजकुशासनम् ॥ ७॥ पितॄन्समाह्वयामाससतदाब्राह्मणोत्तमः ॥ दत्त्वाततस्तुहस्तार्घ्यंपात्रंन्युब्जीचकारवै ॥ ८ ॥ कृत्वागन्धा
दिदानंचपुनःसव्येनचाचमत् ॥ सव्यापसव्येनतदादत्त्वापात्राणिसद्विजः ॥ ९ ॥ तैर्ब्राह्मणैरनुज्ञातश्चक्रेग्नौऽकरणंततः ॥ आज्यादिहविषाराजंस्ता
न्यमत्राण्यपूरयत् ॥ १० ॥ अनुत्तानोत्तानपाणिःकुर्वन्पात्रावलम्बनम् ॥ पपाठपाठितोविप्रैःपृथ्वीत्वेतिद्विजन्मनाम् ॥ ११ ॥ असंस्कृतप्रणी
तानामितिमन्त्रेणसद्विजः ॥ दर्भेषुदक्षिणाग्रेषुददौचविकिरासनम् ॥ १२ ॥ अग्निदग्धेतिमन्त्रेणघृतमिश्रान्नमक्षिपत् ॥ जलेनसहराजेन्द्रविष्टरे
कुशकल्पिते ॥ १३ ॥ सव्येनपुनराचम्यददौचुलकजीवनम् ॥ तृप्ताःस्थेतिचसंपृच्छ्यतृप्ताःस्मइतिभाषितः ॥ १४ ॥ शेषान्नभोजनेतेषांजग्राहा
ज्ञांद्विजन्मनाम् ॥ पिण्डार्थंवेदिकांकृत्वावितस्तिप्रमितांद्विजः ॥ १५ ॥ रेखांचकारदर्भेणदक्षिणाभिमुखींनृप॥ येरूपाणीतिमन्त्रेणदधेऽग्निदिशिचो
ल्मुकम् ॥ १६ ॥ पूर्वजन्मनियामातापितायश्चमहीपते ॥ तयोश्चपितरौयौहियौचराजन्पितामहौ ॥ १७ ॥ यःप्रमातामहश्चापिपितरौराजसत्तम ॥
पित्रादीन्षट्सपत्नीकांस्तानुद्दिश्ययथाविधि ॥१८॥ कुशासनानिदत्त्वावैददौपिण्डान्षडेवहि ॥ गन्धादिभिश्चसंपूज्यमध्यपिण्डविसर्जनम्॥ १९ ॥
कृत्वाघ्रायचवामांसेपिण्डपात्रंन्यवेशयत् ॥ जलपात्रंतदादायवाजेवाजेपठन्निति॥२०॥पाद्यार्घंचपुनर्दत्त्वादक्षिणाद्यैरतूतुषत्॥आद्वारंताननुव्रज्यतेभ्यो
लब्ध्वानुशासनम् ॥ २१॥ बुभुजेचस्वयंराजन्बान्धवैःसहसद्विजः॥ एवंसमाप्यराजेन्द्रश्राद्धंसद्विजसत्तमः॥२२॥ पूर्वसंबन्धिनांतत्रतीर्थेमधुवनेशुभे ॥
यदाचचालशान्तात्मापितुराश्रमंप्रति ॥ २३ ॥ तदासंमिलितामार्गेसर्वेतेश्राद्धभोजिनः ॥ विमानषट्कमारूढादिव्याभरणभूषिताः ॥ दिव्याम्बर
धराराजन्नित्यूचुस्तद्विजोत्तमम् ॥२४॥ पितरऊचुः ॥ भोवत्सविप्रशार्दूलवृणीष्ववरमुत्तमम् ॥ तीर्थेऽत्रकुर्वताश्राद्धंभवतातारितावयम्॥२५॥ वयंगण
त्वमापन्नाःश्रीपतेस्त्वत्प्रसादतः ॥ प्रार्थयस्वमहाबुद्धेयदिष्टंतवचेतसि ॥२६॥ मुनिपुत्रउवाच॥ केयूयंकुतआयातागणत्वंहिकुतोगताः ॥उपकारंविना ॥ २११ ॥
कस्माद्वरंयन्मेप्रयच्छथ ॥ २७ ॥ नारदउवाच ॥ इत्याकर्ण्यवचस्तस्यपूर्वजन्मसुतस्यवै ॥ पिताप्रोवाचयोदुःखाद्भक्षयित्वाविषंमृतः ॥ २८ ॥
पितोवाच ॥ अहंतवपिताविप्रपूर्वजन्मनिभूसुरः॥भार्ययाव्यभिचारिण्यामात्रातेपीडितोभृशम् ॥२९॥ अतीवदुःखमापन्नोभक्षयित्वाविषंनिशि॥अप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मृत्युंगतस्तस्माद भवंरजनीचरः ॥३०॥ एवंमन्वन्तरंतातशतंपञ्चदशाधिकम् ॥ वर्षाणांचव्यतीतंतद्राक्षसत्वंगतेमयि ॥३१॥ इदानींषोडशाब्देतुत्वया
श्राद्धेकृतेऽत्रैव ॥ पुण्येमधुवनेतीर्थेदैवत्वंप्राप्तवानहम् ॥३२॥ एतद्विमानमायातंस्वर्गादिन्द्रप्रणोदितम् ॥ सगणंसाप्सरोवृन्दंममारोहणहेतवे ॥३३॥
अत्रतुभ्यंवरंदातुंसगणःसाप्सरोगणः ॥ विमानवरमारुह्यगच्छन्स्वर्गेऽहमागमम् ॥३४॥ वरंवरयभद्रंतेनविलम्बसहावयम् ॥ ऐरावतगजारूढःसुरेशोमा
मवेक्षते ॥ ३५ ॥ नारदउवाच ॥ इत्युक्त्वानिजवृत्तान्तंदत्त्वाचनिजसूनवे ॥ तत्प्रार्थितांहरेर्भक्तिंजगामसदिवंनृप ॥ ३६ ॥ अथप्रोवाचतन्माता
पूर्वजन्मसुतंचतम् ॥ ३७ ॥ मातोवाच ॥ त्वत्प्रसादादहंजातादेवीमुक्ताचपापतः ॥ प्राप्तंशच्याःसखीत्वंमेपापयापिद्विजोत्तम ॥ ३८ ॥ त्वयात्र
विहितेश्राद्धेतीर्थेविश्रान्तिसंज्ञके ॥ प्रार्थयस्वमहाभागनिजचित्तसमीहितम् ॥३९॥ददामितेयतोऽस्माकंदेवीनांनवचोमृषा ॥ येनपापेनजाताहंगोधा
चपितृकानने ॥ ४० ॥ नरकेचिरमास्थायतत्त्वंवेत्सिद्विजोत्तम ॥ अनुजानीहिमांपुत्रपुलोमतनयांदिवि ॥ मामपेक्षतआकाशेवृतादेवाङ्गनागणैः ॥
॥ ४१ ॥ नारदउवाच ॥ इत्युक्त्वासापितन्मातानिष्कामायस्वसूनवे ॥ ययौत्रिविष्टपंराजञ्छिरसातेनवन्दिता ॥ ४२ ॥ ततःपितामह
स्तस्यस्वपौत्रंतंद्विजोत्तमम् ॥ उवाचवचनंभूपहरेर्बिभ्रतसरूपताम् ॥ ४३ ॥ पितामहउवाच ॥ वत्सवत्सचिरंजीवलभस्वनिजवाञ्छितम् ॥
त्वत्प्रसादाद्वयंतीर्णादुस्तराद्भवसागरात् ॥४४॥ पितामहोऽहंतेवत्सतवेयंचपितामही ॥ मृतंमानुगतासाध्वीसालोक्यमचिरंगता ॥ ४५॥ अद्यत्वया
त्रविश्रान्तोविहितेश्राद्धकर्मणि ॥ आवयोस्तुहरेर्लोकेलब्धातस्यसरूपता ॥ ४६ ॥ नारदउवाच ॥ एवमुक्त्वातयासार्द्धंस्वस्त्रियाभूपसत्तम ॥
ब्रह्मलोकमतिक्रम्यवैकुण्ठंसययौद्विजः ॥ ४७ ॥ अथप्रोवाचराजेन्द्रवचस्तत्प्रपितामहः ॥ यत्तेतत्कथयाम्यद्यशृणुष्वैकमनाद्विज ॥ ४८ ॥
प्रपितामहउवाच ॥ भोभोवत्समहाभागतवाहंप्रपितामहः ॥ भ्रूणहत्याफलेनाहंशौकरींयोनिमाप्तवान् ॥ ४९ ॥ ततोविनिर्गतस्तातश्वाभवंपाप
पीडितः ॥ ततःस्थावरतांप्राप्तोविन्ध्येपर्वतसत्तमे ॥ ५० ॥ तत्रापिचिरकालेनस्थितःस्थावरतांदधत् ॥ हस्तिनाकेनचित्तातमूलादुत्पाटितो
बलात् ॥ ५१ ॥ तस्मिन्नेवततःकालेत्वयाश्राद्धमकारिवै ॥ अस्मिंस्तीर्थोत्तमेतातमुक्तोऽहंस्थावरात्ततः ॥ ५२ ॥ प्राप्तोऽयंयक्षराजस्यनगर्यांवास
उत्तमः ॥ देह्यनुज्ञांद्विजश्रेष्ठयामितांत्वत्प्रसादतः ॥ ५३ ॥ त्वांदिदृक्षुरिहायातोदृष्टस्त्वंपुण्यदर्शनः ॥ तीर्थंचसर्वतीर्थेषुश्रेष्ठंमधुवनंमया ॥ ५४ ॥
नारदउवाच ॥ इत्युक्तस्तेनराजेन्द्रमुनिपुत्रःसधर्मवित् ॥ पप्रच्छशिरसानम्यतंनिजंप्रपितामहम् ॥ ५५ ॥ ऋषिरुवाच ॥ ब्राह्मणानांकुले
तातजातोऽसित्वंगरीयसि ॥ कथंविहितवान्पापंभ्रूणहत्याभिधंगुरो ॥ ५६ ॥ येननिन्द्यांसमापन्नोभवान्योनिपरम्पराम् ॥ समाचक्ष्वमहाभाग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदितत्स्मृतिरस्तिते ॥ ५७ ॥ प्रपितामहउवाच ॥ पुराहंद्विजशार्दूलब्राह्मणस्यैवजन्मनि ॥ मन्त्रयन्त्रविधानेनकृतवान्वृत्तिमात्मनः ॥ ५८ ॥
धनलोभेननारीणांगर्भार्थमहमौषधम् ॥ दत्तवांश्चैवनाशायदैवोपहतचेतनः ॥ ५९ ॥ लोभोहिधनहीनानांजनानांज्ञानमाहरेत् ॥ शुचिकाले
दिनाधीशःकुल्यानामिवजीवनम् ॥ ६० ॥ ज्ञानेनष्टेजनस्तातपापमाचरतेध्रुवम् ॥ पापान्नरकमाप्नोतिततोयातिकुयोनिताम् ॥ ६१ ॥ काचि
देकातदानारीगुर्विर्णीमाममपृच्छत ॥ किंजनिष्याम्यहंविप्रपुत्रंवेत्यथवास्त्रियम् ॥ ६२ ॥ तदाहमुक्तवांस्तांवैतवकन्याभविष्यति ॥ पुत्रोत्पत्ति
कृतेतुभ्यंप्रदास्यामिमहौषधम् ॥ ६३ ॥ इत्युक्ताचमयानारीदुर्बुद्धिस्त्रीशिरोमणिः ॥ जग्राहममपादौतुदत्तंहेमपलंचमे ॥ ६४ ॥ इत्युवाचच
सामह्यंषट्कन्याजनितामया ॥ सप्तमीयंत्वयाचोक्ताजीविष्येऽस्यानजन्मनि ॥ ६५ ॥ तथाकुरुमहाबुद्धेयथाहंवैनकन्यकाम् ॥ जनयिष्या
मिविप्रान्यांनिजप्राणविनाशिनीम् ॥ ६६ ॥ इत्याकर्ण्यवचस्तस्यास्तामहंपुनरुक्तवान् ॥ प्रसूतिकालेदास्यामिपुत्रोत्पाद्यहमौषधम् ॥ ६७ ॥
तथेतिसावचोमह्यंप्रतिश्रुत्यगतागृहम् ॥ अपेक्षमाणातंकालंतस्थौवाक्यप्रतीतिकृत् ॥ ६८ ॥ तस्यांगतायांभोतातचिन्तयाभवमातुरः ॥ इत्यहं
द्विजशार्दूलतच्छृणुष्ववदामिते ॥ ६९ ॥ पुत्रोत्पत्तिप्रतीत्येयंमह्यंदत्तवतीपलम् ॥ सुवर्णस्यनजानामिकिमस्याःसंभविष्यति ॥ ७० ॥ किमत्र
करणीयंमेकथमेतत्सुवर्णकम् ॥ पलप्रमाणंतिष्ठेद्वैदरिद्रस्यगृहेमम ॥ ७१ ॥ एवंविमृश्यतद्दास्यास्तस्यैहस्तेनदापितम् ॥ गर्भपातकरंतात
मयादारुणमौषधम् ॥ ७२ ॥ तेनौषधेनतस्यास्तुगर्भस्रावोऽभवत्तदा ॥ मासेतृतीयेनज्ञातंचिह्नंपुरुषकन्ययोः ॥ ७३ ॥ तदासामह्यंहंप्राता
विषण्णागर्भस्रावतः ॥ अथार्थयत्सुवर्णंतन्निराशापुत्रजन्मनि ॥ ७४ ॥ तदाहमिष्टकाचूर्णंभस्मनाचसमन्वितम् ॥ हरिद्राचूर्णसंयुक्तंसाम्बुतस्यै
अदर्शयम् ॥ ७५ ॥ एतच्चूर्णकृतंमातस्त्वत्पुत्रोत्पत्तयेमया ॥ त्वद्दानाद्द्विगुणंद्रव्यंलग्नमेतस्यसाधने ॥ ७६ ॥ इत्युक्त्वासामयातातत्यक्त्वा
चूर्णंगृहंययौ ॥ मामुक्त्वेतिग्रहीष्यामिकालेत्वत्तोद्विजोत्तम ॥ ७७ ॥ एवंमयाकृतातातभ्रूणहत्यातिदारुणा ॥ ययातिकुत्सितेयोनित्रितयेभ्रमितं
मया ॥ ७८ ॥ त्वत्प्रसादादहंमुक्तःसाम्प्रतंस्थावरत्वतः ॥ देह्यनुज्ञांमुनिश्रेष्ठयाम्यहंब्रह्मलकांशुभाम् ॥ ७९ ॥ नारदउवाच ॥ एवमुक्त्वातु
राजेन्द्रतस्यतुप्रपितामहः ॥ तेनाभिवन्दितोमूर्ध्नाप्रययौदिशमुत्तराम् ॥ ८० ॥ विमानेनविचित्रेणकिङ्किणीजालमालिना ॥ नृत्यद्गन्धर्वजुष्टेनमणि
प्राकारशोभिना ॥८१॥ अथतस्यमहाराजविप्रस्यप्रपितामही ॥ उवाचस्वप्रपौत्रंतंविमानवरमास्थिता ॥८२॥ प्रपितामह्युवाच॥नान्यत्रकुत्रगन्तासि
पुण्येनानेनसुव्रत ॥ विनापद्मापतेःपादपद्मचिह्नितमन्दिरम् ॥८३॥ अयंममपतिःपापोमुनेत्वत्प्रपितामहः॥ वारितोऽपिमयापापमाचचारसुदुष्टधीः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ८४ ॥ सोऽपित्वयातिपापात्मातारितोदुःखसागरात् ॥ शक्यतेकेनवैकर्तुंतावकंगुणवर्णनम् ॥ ८५ ॥ नारदउवाच ॥ इत्युक्त्वासापिराजेन्द्रपति
लोकंजगामह ॥ अलकायांचिरंपत्यातेनैवमुमुदेसह ॥ ८६ ॥ अथतेमुनिपुत्रस्यसर्वेमातामहादयः ॥ सपत्नीकाःसमारुह्यविमानेषुययुर्दिवम्॥८७॥
सोऽपिद्विजवरस्तस्मात्तीर्थात्स्वपितुराश्रमम् ॥ गत्वातंसर्ववृत्तान्तंस्वपित्रेसमवर्णयत् ॥ ८८ ॥ सोऽपितत्रगतःसार्द्धंकुटुम्बेनवनेमधोः ॥
चकारपर्णशालांवैविश्रान्तेस्तुसमीपतः ॥ ८९ ॥ तत्रविश्रान्तितीर्थेतुत्रिकालंस्नानमाचरन् ॥ नाकरोद्विष्णुलोकोऽपिस्पृहांसमुनिसत्तमः ॥
॥ ९० ॥ एकदाजलमध्येसस्नानंकुर्वन्मुनिर्नृप ॥ आचकाङ्क्षेचभविताकदामेहरिदर्शनम् ॥ ९१ ॥ एवंकामयमानस्यमुनिवर्यस्यभूपते ॥ आजगाम
त्वरायुक्तःपक्षिराजासनोहरिः ॥ ९२ ॥ लक्ष्म्यावक्षःस्थयासार्द्धंचतुर्बाहुधरीहरिः ॥ नवीनघनवर्णाङ्गोविद्युद्वर्णाम्बरावृतः ॥ ९३ ॥ कौस्तुभोद्भा
सिसद्वक्षाःशङ्खचक्रगदाब्जभृत् ॥ वनमालालसत्कण्ठोमकराकृतिकुण्डलः ॥ ९४ ॥ फुल्लाम्बुजपलाशाक्षःस्वलकालङ्कृताननः ॥ विद्रुमाकारकरजो
ऽरुणहस्तोङ्घ्रिसत्तलः ॥ ९५ ॥ उवाचतंद्विजश्रेष्ठदन्तभासाविभासयन् ॥ शरन्निशापतिस्तोमतिरस्कारकृतादिशः ॥ ९६ ॥ श्रीभगवानुवाच ॥ भो
भोद्विजवरैतन्मेतीर्थंमधुवनंशुभम् ॥ विश्रान्तिसंज्ञकंस्नानसर्वकामोपपादकम् ॥९७॥ अत्रत्वयास्नानकालेवाञ्छितंममदर्शनम् ॥ तुभ्यंहितन्मयादत्तं
ब्रह्मादिसुरदुर्लभम् ॥ ९८ ॥ त्यजदेहमिमंविप्रमानुषंदिव्यमाप्नुहि ॥ आयाहिमद्गृहंसार्द्धंमयारुह्यखगेश्वरम् ॥ ९९ ॥ नारदउवाच ॥ इत्याकर्ण्यवच
स्तस्यश्रीपतेःसमुनीश्वरः ॥ तुष्टावप्रणतोभूत्वाजलएवविशांपते ॥ १०० ॥ मुनिरुवाच ॥ श्रीपतेश्रीमदम्भोजसंमर्दितपदाम्बुजम् ॥ भवतोभवता
पघ्नंवन्देत्रिदशवन्दितम् ॥ १ ॥ त्वदीयमाययानाथमोहितायेऽत्रजन्तवः ॥ तेषांकदाचिन्निस्तारोनकृपामन्तरेणते ॥ २ ॥ सत्तीर्थसेवनादीशतथा
सज्जनसंगमात् ॥ पुंसांभक्तिस्तुयेषांवैजायतेकृपयातव ॥३॥साधुभिर्बहुभिरीरितंहरेयोनिशम्यगुणकीर्त्तनंतव ॥ कीर्तयत्यखिलपापनाशनंमातृगर्भकु
हरेसनोपतेत् ॥ ४ ॥ श्रीपतेतवजनस्यमानसंदैवतस्तुपतितंमहारणे ॥ गुण्ठितंचरजसाजहातिनोनिर्मलत्वमिवरत्नमुत्तमम् ॥ ५ ॥ यःपुमान्पततिते
पदाम्बुजेदण्डवत्पुलकमंगकेदधत्॥ सोऽन्वयंनयतितावकंपदंस्वंचवाञ्छितमशेषयोगिभिः॥६॥जीवएवतवमाययाविभोमोहितोभ्रमतिविश्ववर्त्मसु ॥
त्वत्कृपाललितलोचनाचलैस्तत्क्षणंतरतिविश्ववारिधिम् ॥ ७ ॥ नारदउवाच ॥ इतिसंस्तुत्यगोविन्दंदण्डवत्तस्यपादयोः ॥ पपातसमुनिश्रेष्ठोजयेति
मुहुरीरयन् ॥ ८ ॥ श्रीपतिस्तंमुनिश्रेष्ठंदण्डवत्पतितंभुवि ॥ उत्थाप्यबाहुभिस्तूर्णंसुपर्णेसमरोपयत् ॥ ९ ॥ तत्कुटुम्बंचविश्वात्मावैकुण्ठंचजगामह॥
इत्येतत्कथितंराजन्छिबेमधुवनस्यवै ॥ ११० ॥ माहात्म्यंसर्वपापघ्नंकिमन्यच्छ्रोतुमिच्छसि ॥ यइदंशृणुयान्मर्त्यःसर्वपापैःप्रमुच्यते ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ १११ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा० उत्तर० कालिन्दीमाहात्म्येमधुवनमाहात्म्यंनामचतुर्दशाधिकद्विशततमोऽध्यायः ॥ २१४ ॥
सौभरिरुवाच ॥ युधिष्ठिरेदमाकर्ण्यनारदस्यवचःशुभम् ॥ शिबिरौशीनरोराजाविनीतस्तमुवाचह ॥ १ ॥ शिबिरुवाच ॥ मुनेमयातुमाहात्म्यं
श्रुतंमधुवनस्यवै ॥ त्वन्मुखात्किंतुसंदेहोह्येकोऽस्तिममसानसे ॥२ ॥ येनधर्मात्मनासर्वेतारितानिजबान्धवाः ॥ जन्मद्वयकृताह्यासीत्सकथंस्वैरिणी
सुतः ॥३॥ एतदाचक्ष्वभगवन्सर्वस्वंवेत्सितत्त्वतः ॥ अतीतंवर्त्तमानंचभविष्यमपिनारद ॥४॥ नारदउवाच ॥ एकदामुनयःसर्वेहरिद्वारेसमागताः॥
दशम्यांज्येष्ठशुक्लस्ययुक्तायांसर्वपर्वभिः ॥ ५ ॥ तत्रतेविधिवत्स्नात्वाकृत्वाचस्वक्रियांशुभाम् ॥ हिमाचलस्यपृष्ठेतुस्वस्थचित्ताउपाविशन् ॥
॥ ६ ॥ तारात्मजोबुधस्तत्रमुनिसङ्घसमागतः ॥ सौन्दर्यभरसंयुक्तःस्मरोमूर्त्तइवापरः ॥ ७ ॥ तंसमागतमालोक्यसमुत्तस्थुर्मुनीश्वराः ॥ तेनाभिवन्दि
तामूर्ध्नापुनस्तेसमुपाविशन् ॥ ८ ॥ बुधस्यादरमालोक्यविहितंमुनिपुङ्गवैः ॥ मुनिपुत्रःसपप्रच्छपितरंस्वमितिप्रभो ॥ ९ ॥ मुनिपुत्र
उवाच ॥ कोऽयंतातसमायातःसौन्दर्येणापरःस्मरः ॥ व्यासादिभिर्मुनिवरैर्भृशंतस्यादरःकृतः ॥ १० ॥ नारदउवाच ॥ इत्याकर्ण्यसधर्मात्मा
स्वस्यपुत्रस्यभाषितम् ॥ बभाषेमुनिशार्दूलःपुत्रंनिर्बन्धसंयुतम् ॥ ११ ॥ पितोवाच ॥ बृहस्पतेःसुरगुरोःसुतस्तारोदरोद्भवः ॥ बुद्धि
मान्बुधनामायंशशिवंशकरःपरः ॥ १२ ॥ पुत्रउवाच ॥ त्वयाकथितंतातनिःसम्बन्धपरंवचः ॥ बृहस्पतेःसुतोयस्तुसकथंशशिवंशकृत् ॥
॥ १३ ॥ जज्ञेऽनसूययातातविधुरत्रेर्मुनीश्वरात् ॥ तस्यवंशस्यकर्त्तायंकथंसुरगुरोःसुतः ॥ १४ ॥ एषमेमानसेतातसंशयोवर्ततेमहान् ॥
तमपाकुरुविप्रेन्द्रसंदिहानस्यमेशिशोः ॥ १५ ॥ पितोवाच ॥ पुराबृहस्पतेर्भार्यातारानामयशस्विनी ॥ चन्द्रेणापहृतातातबलाद्बलवता
तदा ॥ १६ ॥ अपहृत्यतदानीतास्वगृहंविधिनागुरोः ॥ भार्यासातुतयासार्द्धरमितंतेनवैचिरम् ॥ १७ ॥ तस्यागर्भोऽभवत्तातकालेन
कियतातदा ॥ ततोबृहस्पतिर्भार्यांनिजांतांसमयाचत ॥ १८ ॥ चन्द्रमाश्चमदाविष्टोनददौबलदर्पितः ॥ ततोबृहस्पतिस्तातदेवैःशक्रादिभिः
सह ॥ १९ ॥ सन्नद्धोयोद्धुमारेभेसमंबलवदिन्दुना ॥ सहायार्थंविधोःशुक्रःसमंदितिजदानवैः ॥ २० ॥ समागतस्तदाताततस्मिन्रण
समुद्यमे ॥ ततस्तारानिमित्तंवैयुद्धंप्रावर्त्ततोल्बणम् ॥ २१ ॥ करिष्यतेसर्वजनैःप्रधानंतारकामयम् ॥ तस्मिन्युद्धेमहाभीमेहतादेवाश्च
दानवाः ॥ २२ ॥ नकस्यचिज्जयस्तातबभूवनपराजयः ॥ ततःसमागतोब्रह्मासंनिवार्योल्बणंरणम् ॥ २३ ॥ ददौबृहस्पतेस्तारां
बोधयित्वानिशापतिम् ॥ बृहस्पतिस्तुतांवीक्ष्यतारांगर्भवतींतदा ॥ क्रुद्धोविरिञ्चेःप्रत्यक्षंसमाजेदेवदैत्ययोः ॥ २४ ॥ बृहस्पतिरुवाच ॥

CC-0. In Public Domain. Digitization by eGangotri

शृणुष्वमामकंवाक्यंतारेतरललोचने ॥ कस्यायंध्रियतेगर्भोभवत्येन्दोर्ममाथवा ॥ २५ ॥ पितोवाच ॥ एवंमुहुर्मुहुःपृष्टासाचलज्जावतीशुभा ॥ यदा
नकथयामासकिंचित्तातातदग्रतः ॥ २६ ॥ तदायंपश्यतांतेषांदेवानांचसुरद्विषाम् ॥ उत्पन्नस्तामुवाचेदंजननींचरुषान्वितः ॥ २७ ॥ बुधउवाच ॥
कस्मान्नकथ्यतेदुष्टेमदीयोजनकस्त्वया ॥ लज्जांविहायसंपश्यशापस्यममवैभवम् ॥ २८ ॥ पितोवाच ॥ इत्युक्त्वाजलमादाययदाशप्तुंसमुद्यतः ॥
तदासामन्दमाहेदंपितातवसुधाकरः ॥ २९ ॥ इत्युक्तेचतयासाध्व्याचन्द्रःस्वतनयंबुधम् ॥ असुंगृहीत्वासानन्दंजगामनिजमन्दिरम् ॥ ३० ॥
बृहस्पतिस्तुतांतारांगृहीत्वास्वगृहंययौ ॥ ब्रह्मादेवाश्चदैत्याश्चतेऽपिस्वंस्वंगृहंययुः ॥ ३१ ॥ एतत्तेसर्वमाख्यातंयस्त्वंमांपरिपृष्टवान् ॥ बृहस्प
तिस्त्रियांजातोयथायंचन्द्रवंशकृत् ॥ ३२ ॥ नारदउवाच ॥ इत्याकर्ण्यपितुर्वाक्यंजहासोच्चैर्मुनेःसुतः ॥ उवाचचस्वपितरंकुण्डोऽयंस्वैरिणीसुतः
॥ ३३ ॥ उवाचचपितापुत्रंहापुत्रेदंनभण्यताम् ॥ सर्वसत्त्वान्तरज्ञोऽयंशप्स्यतित्वांत्वदुक्तवित् ॥ ३४ ॥ नारदउवाच ॥ इत्युक्तेतेनमुनिनाचान्द्रि
र्ज्ञात्वातदीरितम् ॥ सर्वेषांशृण्वतांप्राहमुनीनामितिभूपते ॥ ३५ ॥ बुधउवाच ॥ शृण्वन्तुमुनिशार्दूलाभवन्तोममभाषितम् ॥ यदिसाध्वथवासाधु
विचारयतमाचिरम् ॥ ३६ ॥ भवतांतत्त्वबुद्धीनांदर्शनार्थमिहागतः ॥ कृतवान्कस्यचिन्नाहमपराधंमनागपि ॥ ३७ ॥ असूययाकिमर्थमामवजान
न्तिदुर्मदाः ॥ स्वजन्मसफलत्वायभवद्दर्शनलालसः ॥ ३८ ॥ स्वभावएवदुष्टानांसाधूनपिनिरेनसः ॥ उद्वेजयन्तियत्काापिमिष्टवाचःपिकाइव ॥
॥ ३९ ॥ दुःस्वभावंनमुञ्चन्तिदुष्टाःसत्संगमादपि ॥ गङ्गाम्बुसंगमेनापिक्षारतामिवनीरधिः ॥ ४० ॥ अहोव्याधस्यदुष्टत्वंमुनिवृत्तीन्यतोमृगान् ॥
वनेमृगचरान्हन्तिनिजगानविदोऽपिसः ॥ ४१ ॥ मत्स्यैःकिमपराद्धंहिधीवराणांदुरात्मनाम् ॥ यज्जलेचरतस्तीर्थेघ्नन्तितत्प्रकृतिर्हिंसा ॥४२॥ साध
वोऽपिनमुञ्चन्तिस्वभावंदुष्टसंगताः ॥ वृताविषाग्नियुक्सर्पैःश्रीखण्डाइवशीतताम् ॥४३॥परोदयेऽपिनृत्यन्तिकिंस्वपक्षस्यसाधवः ॥ यथोन्मनामुनि
वरावारिवाहस्यबर्हिणः ॥४४ ॥ धारयन्तिपरार्थेहिनिजान्तमपिसाधवः ॥ पितृदेवमनुष्याणामर्थेमत्तिपतृवत्कलाः ॥४५॥ निजोदयस्तुसाधूनांस्व
च्छस्यानन्दहेतवः ॥ यथाकुमुदपुष्पाणांमत्पितुःशीतलत्विषः ॥४६॥नारदउवाच ॥ इत्युदीर्यवचःक्रोधाद्बुधस्तंमुनिबालकम् ॥ शशापेतित्वमप्याशु
कुण्डोभवमहीतले ॥ ४७ ॥ एवमाकर्ण्यतंशापंपिताबुधविसर्जितम् ॥ स्वपुत्रंपातयामासतदङ्घ्र्योःक्षम्यतामिति ॥ ४८ ॥ उवाचचनजानातिबा
लोऽयंतववैभवम्॥नोचितंक्रोधकरणमस्मिन्बालेभवादृशैः॥४९॥कुतश्चित्कारणात्साधोःक्रुद्धस्यप्रकृतिःक्षमा ॥हुताशनप्रतप्तस्यशीतत्वमिवचाम्बुनः
॥ ५० ॥ अतःक्षमांविधायाशुविधेह्यस्मिन्ननुग्रहम् ॥ बालेविवेकरहितेक्षमासाराहिसाधवः ॥ ५१ ॥ नारदउवाच ॥ इत्युक्तस्तेनमुनिनाशीतां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

शुतनयस्तदा ॥ क्रोधंतत्याजशान्तात्माचक्रेतस्मिन्ननुग्रहम् ॥ ९२ ॥ बुधउवाच ॥ अयंतवमुनेबालःकुण्डत्वंप्राप्यभूतले ॥ दत्तयज्ञोपवीतःसल्ँ
प्स्यतेहिनिजास्पदम् ॥ ९३ ॥ एवंसमुनिपुत्रोवैबुधशापान्नृपोत्तम ॥ कुण्डत्वंमाप्तवान्भूमौपितरोयेनतारिताः ॥ ९४ ॥ इदंपवित्रंमाहात्म्यंश्रुत्वा
मधुवनस्यवै ॥ समस्तमश्वमेधस्यफलंप्राप्नोतिमानवः॥९५॥ येनराधारयन्त्यस्यमाहात्म्यस्यार्थमुत्तमम् ॥ हृदयेयत्रतत्तेषांविषयैर्नाभिभूयते॥९६॥
येपठिष्यन्तिमाहात्म्यंश्रोष्यन्तिचमहाधियः ॥ देहान्तेविष्णुसालोक्यंगमिष्यन्तिनसंशयः ॥९७॥ इदमनिशपवित्रंतुभ्यमावर्णितंमेमधुवनसुचरित्रं
श्रीपतेःप्रीतिकारि॥कलिकलुषकलापच्छेदनेदक्षमक्षोत्पथगमननिरासेकारणंपुण्यमूर्तौं ॥९८॥ इतिश्रीपाद्मेमहा०पञ्चप०उर०कालिन्दीमाहात्म्येमधु
वनवर्णनंनामपञ्चदशाधिकद्विशततमोऽध्यायः॥२१५॥नारदउवाच ॥ अतोमधुवनाद्राजन्नयंबदरिकाश्रमः॥एकादशधनुर्मात्रेभूभागेव्यवतिष्ठति॥१॥
अस्यतीर्थवरस्याहंमहिमानंमहाद्भुतम् ॥ वर्णयामिपुरस्तात्तेयंश्रुत्वामुच्यतेभयात् ॥२॥ एकस्तुमगधेराजन्देवदासोहिनामतः॥ब्राह्मणःसत्यवादान्तः
साक्षाद्धर्मइवापरः ॥ ३ ॥ निष्णातःसर्वविद्यासुबृहस्पतिरिवापरः ॥ हरिसन्तोषकोभक्त्याप्रह्लादइवदैत्यराट् ॥ ४ ॥ सस्त्रीकोऽग्निस्मरंजेता
पार्वत्याइववल्लभः ॥ सदाचारपरोनित्यंविश्वामित्रोमुनिर्यथा ॥ ५ ॥ मगधेशगृहेमान्योद्रोणवत्कुरुवेश्मनि ॥ दानशीलःसुपात्रेषुबलिर्दैत्याधिपो
यथा ॥ ६॥ तस्यभार्योत्तमानामलक्ष्मीरिवगुणोत्तमा ॥ पतिशुश्रूषणपरायथाजनकनन्दिनी ॥ ७ ॥ तस्यैकश्चसुतोराजन्नङ्गदोनामबुद्धि
मान् ॥ एकापुत्रीतुवलयानामसल्लक्षणान्विता ॥ ८ ॥ तयोर्ज्यायान्सुतःकन्यातस्माद्रूपकनीयसी ॥ तयोर्यथाक्रमंचक्रेविवाहंसद्द्विजो
त्तमः ॥ ९ ॥ विवाहितातुसाकन्याययौश्वशुरवेश्मनि ॥ शुभलक्षणसंपन्नाकालेनकियतानृप ॥ १० ॥ अङ्गदस्तुमहाबुद्धिर्गृहभारंबभारह ॥ पितृ
वत्सर्वशास्त्रज्ञोयौवनश्रीविभूषितः ॥ ११ ॥ एकदासतुविप्रेन्द्रःपुत्रंतंगृहकर्मणि ॥ क्षमंविज्ञायराजेन्द्रनिजभार्यामुवाचह ॥ १२ ॥ देवदासउवाच ॥
समाकर्णयमेसाध्विकालेऽस्मिन्नुचितंवचः ॥ ततोयदुचितंभद्रेतदह्नायविधीयताम् ॥ १३ ॥ एषजरासमायाताशरीरंपातयिष्यति ॥ अङ्गान्याक
म्पयन्तीववात्यापक्वफलंयथा ॥ १४ ॥ अक्ष्णामपिद्युतिंमन्दांनूनमेषाकरिष्यति ॥ नक्षत्राणांसचन्द्राणांप्रातर्वेलेवसुव्रते ॥ १५ ॥ स्खलतोः
पादयोर्मंदांगतिंप्रतिपदक्रमम्॥करिष्यतिजराह्येषायथानिगडशृङ्खला॥१६॥ तस्मादेषाजरायावन्नप्रौढाजायतेशुभे॥आत्मनस्तावदावाभ्यांकरणीयंहि
तंद्रुतम् ॥ १७ ॥ गृहपुत्रसुहृद्भ्रातृपितरोहिविनश्वराः ॥ द्रव्यादिकंचसुभगेतेषुसज्जतनोबुधः ॥ १८ ॥ अतोऽहंसर्वतीर्थेषुपर्यटन्विजितेन्द्रियः ॥
वानप्रस्थेनविधिनावीक्षिष्येहरिमीश्वरम् ॥ १९ ॥ ततःसंन्यासमादायकचित्तीर्थोत्तमेशुभे ॥ प्रारब्धकर्मणामन्तेत्यक्ष्यामिस्वंकलेवरम् ॥२०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंचेत्प्राणमुक्तःस्यान्मुक्तिःस्यान्नात्रसंशयः ॥ ममश्रीपतिपादाब्जसम्यक्स्थापितचेतसः ॥ २१ ॥ उत्तमोवाच ॥ पुमान्वास्त्रीजनोवापिकोरमे
तविनश्वरे ॥ संसारेमाधवंमुक्त्वानित्याश्रममचतनः ॥ २२ ॥ तस्मान्मामपिजीवेशत्वत्पादाम्बुजसेविनीम् ॥ नीत्वास्वसंगमेतावद्विश्वाब्धे
राशुतारय ॥ २३ ॥ पुत्रोऽयमङ्गदःश्रीमान्गृहभारस्यधारणे ॥ समर्थोऽभूत्स्नुषाचेयंकल्याणीतत्सहायिनी ॥ २४ ॥ पुत्रेसमर्थेयोमूढःपुरुषः
स्त्रीजनोऽथवा ॥ नविरज्येतयोमूढोवञ्चितःश्रेयसाहिसः ॥ २५ ॥ नारदउवाच ॥ एवमन्योन्यमामन्त्र्यदम्पतीतौरहस्तदा ॥ पुत्रमाहूयकथयां
चक्रतुस्त्विदमङ्गदम् ॥ २६ ॥ दम्पतीऊचतुः ॥ जरागमश्चथद्गात्रावावांविद्धित्वमङ्गद ॥ स्वश्रेयसेयतिष्यावःकुत्रचित्पुण्यभूतले ॥ २७ ॥
हरेराराधनंभक्त्याश्रेयःपरममुच्यते ॥ तदर्थमेवनिष्कामायतन्तेसाधवोभुवि ॥ २८ ॥ विषयेषुनसंसक्तिःसमत्वंसर्वजन्तुषु ॥ येषांहर्षविवादौ
चनजातुसुखदुःखयोः ॥ २९ ॥ तएवसाधवोलोकेगोविन्दपदसेविनः ॥ तेषांदर्शनमात्रेणकृतार्थोजायतेनरः ॥ ३० ॥ तीर्थानिपर्यटन्धीरस्त
द्दर्शनसमुत्सुकः ॥ भाग्योदयेनकेनापितद्दर्शनमवाप्नुयात् ॥ ३१ ॥ तस्माद्दारंकुटुम्बस्यभुजयोर्युगदीर्घयोः ॥ आरोप्यनौविसर्जस्वतीर्थयात्रा
र्थमङ्गद ॥ ३२ ॥ तीर्थयात्राप्रसङ्गेनकदाचित्साधुदर्शनम् ॥ भवेद्यदितदापुत्रद्वयोर्नौस्यात्कृतार्थता ॥ ३३ ॥ नारदउवाच ॥ इत्युक्तः
पितृभ्यांपुत्रःसाधुवादमवादयत् ॥ ३४ ॥ अङ्गदउवाच ॥ समस्तकुलनिस्तारोभवद्भ्यामयमीरितः ॥ आशुमामवजानीतंकिंकरोमिभवद्धितम्॥
॥ ३५ ॥ अहमाज्ञाकरोनित्यंयुवयोःपूज्यपादयोः ॥ पुण्यतीर्थेषुदानार्थंगृहीतंधनमुत्तमम् ॥ नयतंमामपिप्रेष्यंसेवायैनिजसंगमम् ॥ ३६ ॥
नारदउवाच ॥ इत्युक्त्वाधनमादायगत्वाक्रोशद्वयंतयोः ॥ सङ्गेगृहमगात्ताभ्यांकथंचित्संनिवर्तितः ॥ ३७ ॥ तौगृहीत्वाधनंकिंचिद्विष्णुर्नौ
प्रीयतामिति ॥ कन्दमूलफलाहारौतत्रोषित्वादिनत्रयम् ॥ ३८ ॥ यदातस्मात्प्रचलितौदम्पतीजगतीपते ॥ तदामार्गेमहान्कश्चित्सिद्धःसंमि
लितस्तयोः ॥ ३९ ॥ ताभ्यामुभाभ्यांशिरसावन्दितःसउपाविशत् ॥ उपविष्टस्तदाताभ्यामितिपृष्टःससिद्धराट् ॥ कोभवान्कुतआयातोकिं
चिकीर्षतितद्वद ॥ ४० ॥ सिद्धउवाच ॥ सिद्धोऽहंतापसश्रेष्ठकल्पग्रामेगृहंमम ॥ इन्द्रप्रस्थात्समायातोद्रष्टुंतत्रमहाद्भुतम् ॥ ४१ ॥ तत्रास्ति
कपिलःसिद्धोनारायणसमोगुणैः ॥ तस्मादहंपठन्सांख्यंनिवसामितदाश्रमे ॥ ४२ ॥ एकदामद्गुरुःश्रीमान्स्वाश्रमात्कपिलोययौ ॥ बदर्याख्यं
महापुण्यंस्नातुंसयमुनाजले ॥ ४३ ॥ तत्रैकोऽरण्यमहिषस्तृषार्तोयमुनाजले ॥ प्रविष्टोजलमापीयपूर्वजन्मस्वमस्मरत् ॥ ४४ ॥ स्मृत्वासपूर्वकर्माणि
महिषोऽरण्यसंभवः ॥ जलान्निःसृत्यतरसाववन्देकपिलंगुरुम् ॥ ४५ ॥ उवाचनरवाचाचमयिशृण्वतितापस ॥ यत्तेकथयाम्यद्यशृणुत्वंपरमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्भुतम् ॥ ४६ ॥ महिषउवाच ॥ भोभोविष्णुकलाभूतसिद्धानांकपिलेश्वर ॥ किंनामेदंमहातीर्थंनतायकथयस्वमे ॥ ४७ ॥ अस्यतीर्थवरस्याम्बु
स्पर्शाद्वैपूर्वजन्मनि ॥ जातास्मृतिर्महाभागपापस्यापिचकर्मणः ॥ ४८ ॥ सिद्धउवाच ॥ एवमाकर्ण्यतद्वाक्यंमहिषस्यमहामुनिः ॥ जानन्नपि
चतद्वृत्तंविहस्येदमुवाचह ॥ ४९ ॥ कपिलउवाच ॥ भवान्महिषशार्दूलकआसीत्पूर्वजन्मनि ॥ तत्रकिंकृतवान्कर्मयोर्नियेनापमाहिषीम् ॥ ५० ॥
महिषउवाच ॥ शृणुष्वमुनिशार्दूलवृत्तंवैपूर्वजन्मनः ॥ अहमासंपुराराजाकलिङ्गाधिपतिर्बली ॥५१॥ स्वांपरांनैवजानामियोषितंकाममोहितः ॥
वणिजांसाधुवृत्तीनांधनहर्तानिरेनसाम् ॥ ५२ ॥ निशीथेनगरेराजन्गतभीःपर्यटाम्यहम् ॥ सुन्दरीभिःपरस्त्रीभिःक्रीडितुंरतिलीलया ॥
॥ ५३ ॥ यद्गृहेसुन्दरींनारींपश्यामिस्मरमोहितः ॥ वसामिनिशितत्राहंक्षेत्रेमध्येगजोयथा ॥ ५४ ॥ क्रीडित्वातत्रनिःशङ्कंधनंहृत्वाचतद्गृहात् ॥
स्वगृहंपुनरायामिकियद्भिर्वासरैरहम् ॥ ५५ ॥ उपविष्टःसभामध्येदिवाद्वौपुरबालकौ ॥ अनार्यबाहुयुद्धेनयोधयामिनिजाग्रतः ॥ ५६ ॥ नियोज
यतियोबालस्तंमत्वाधनिनंबलात् ॥ गृह्णामितत्पितुर्वित्तंस्वल्पंवाभूरिवामुने ॥ ५७ ॥ यःपराजयतेतत्रकातरत्वान्महामुने ॥ नायमर्हःपुरेस्थातुं
ममेतिविनिहन्मितम् ॥ ५८॥ एवम्मय्यधमाचारेवर्त्तमानेमहीपतौ ॥ पौरानगरमुत्सृज्यप्रययुर्विषयान्तरम् ॥५९॥ एकदामुनिशार्दूलोदुर्वासाःपर्यट
न्महीम् ॥ पुरेममसमायातोदुर्वासारुद्रसंभवः ॥ ६० ॥ मिलित्वानागराःसर्वेतदाजग्मुस्तदन्तिके ॥ प्रणिपत्येदमाहुस्तंस्वदुःखज्ञापकंवचः ॥६१॥
पौराऊचुः ॥ आत्रेयमुनिशार्दूलकृपांकुरुकृपानिधे ॥ अधर्मनिरतंभूपमेनंधर्मेणयोजय ॥ ६२ ॥ भाग्योदयेनकेनापिभवानस्माकमागतः ॥ उद्वेला
द्भूपदुःखाब्धेरस्मांस्तारयपोतवत् ॥ ६३ ॥ धनंलोभयतातेनहृतंनोमुनिपुङ्गव ॥ दूषिताश्चस्त्रियःसाध्व्यःसकामेननिरेनसाम् ॥६४ ॥ दशवत्सरदेशी
याबहवःशिशवोहताः ॥ अगण्यवैगुण्यनिधिरेषभूपोमहामुने ॥ ६५ ॥ महिषउवाच ॥ एवमाकर्ण्यपौराणांवचःसमुनिरत्रिजः ॥ दण्डयोऽयमिति
संचिन्त्यसभास्थंमामथाययौ ॥ ६६ ॥ दृष्ट्वाहितंसमायान्तमवधूतंदिगम्बरम् ॥ आवारयमहंभृत्यैर्नैत्ययंदर्शनोचितः ॥ ६७ ॥ रेणुनासर्वलिप्ताङ्गो
महिषाकृतिरेववै ॥ वार्यतामितिपार्श्वस्थान्बहुशोऽहंसमादिशम् ॥ ६८ ॥ ततस्तेतरसाभृत्यास्तंवारयितुमभ्ययुः ॥ हुङ्कारेणैवतान्सर्वान्सचक्रे
भस्मसान्मुनिः ॥ ६९ ॥ यज्ञाश्वंरक्षतःस्वस्यपितुस्त्वमिवसागरान् ॥ सर्वशस्तानहंभृत्यान्भस्मीभूतांस्तुतेजसा॥७०॥ आलक्ष्यसहसोत्थायगृहमा
वेष्टुमुद्यतः ॥ रेरेपापेतिसंबोध्यततोमांमुनिसत्तमः॥७१॥शशापेतिमहारण्येमहिषोभवसाम्प्रतम् ॥तेनाहमितिशप्तोवैमुक्त्वाराजतनुंतदा॥७२॥मरुदेशे
महारण्येजातोऽहंमहिषोमुने॥चिरकालमहंतत्रन्यवसंमुनिपुङ्गव॥७३॥ अत्रागतस्तुकेनाहंपुण्येनश्रूयतांमुने॥वापीकूपसरस्यस्तुबहवःकारितामया७४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सहकारादिवृक्षाणामारोपोविहितःपथि ॥ पुण्येनानेनमेदेवपातोननरकेऽभवत् ॥ ७५ ॥ तीर्थस्यचमयाप्राप्तोह्यमुष्यजलसंगमः ॥ एतत्तेकथित
सर्वंपूर्वजन्मशुभाशुभम् ॥ ७६ ॥ येनतीर्थंमयाप्राप्तमेतद्योनिश्चमाहिषी ॥ अस्यतीर्थवरस्याम्बुस्पर्शाज्जातिस्मरोऽभवम् ॥ कथमस्याअसद्योने
र्मुक्तिःस्यात्तन्मुनेवद ॥ ७७ ॥ कपिलउवाच ॥ एतत्तीर्थंमहापुण्यंबदर्याख्यंरमापतेः ॥ अत्रस्नाहिद्रुतंकामंस्वचित्तस्थंहिलप्स्यसे ॥ ७८ ॥
सिद्धउवाच ॥ एतच्छुत्वावचस्तस्यमहिषस्यमहामुने ॥ तत्रतीर्थेवरेस्नातुंप्राविशत्स्वर्गवाञ्छया ॥ ७९ ॥ स्नात्वास्वर्गेच्छयातस्मिञ्जलात्तट
मुपागते ॥ तत्क्षणंगजमारुह्यशक्रःस्वर्गात्समाययौ ॥ ८० ॥ इन्द्रउवाच ॥ हेकलिंगपतेनैजंदेहंजहिहिमाहिषम् ॥ प्रतिलभ्यवपुर्दिव्यंसममा
याहिमेदिवम् ॥ त्वयास्वर्गेच्छयास्नातंप्राप्तंतत्तेसुरास्पदम् ॥ ८१ ॥ सिद्धउवाच ॥ इत्युक्तःसतदातेनत्यक्त्वादेहंतुमाहिषम् ॥ दिव्यंवपुः
समासाद्यगजराजंसमारुहत् ॥ ८२ ॥ गजराजंसमारुह्यस्थित्वाचगगनेक्षणम् ॥ प्रणम्यशिरसादेवंतुष्टावकपिलंमुनिम् ॥ ८३ ॥ कलिङ्गउवाच ॥
नमस्तेपरमेशानकेवलज्ञानहेतवे ॥ सेतवेवेदविद्यानांरिपवेतद्विरोधिनाम् ॥ ८४ ॥ त्वत्तःप्रवृत्तिःसाङ्ख्यस्यजातातत्त्वावबोधिनी ॥ देहिनांमायया
ग्रस्तचेतसामपितेविभो ॥ ८५ ॥ येवेदविहितंत्यक्त्वावर्तन्तेस्वेच्छयामुने ॥ तान्दण्डयसिदण्डयांस्त्वंमज्जयंस्तियगादिषु ॥ ८६ ॥ इन्द्रादयोलोक
पालाःसर्वेत्वदधिकारिणः ॥ त्वदिच्छामनुवर्तन्तेभीतादण्डकृतोहिते ॥ ८७ ॥ त्रयीधर्मविरोद्धारःपूर्वंदेवायुगेयुगे ॥ अवतीर्यविनाशायकृताः
सर्वात्मनात्वया ॥ ८८ ॥ येयेत्वयाहतानाथचक्रिणात्रिदशारयः ॥ तेतेतमोमयींहित्वातनुंवैकुण्ठमभ्ययुः ॥ ८९ ॥ आज्ञापयजगन्नाथ
गन्तुंमांत्रिदशालयम् ॥ अनुगृह्णीष्वशक्रंचनमन्तंवीक्षणामृतैः ॥ ९० ॥ प्रसादात्तवदेवेशबदर्याख्यस्यचप्रभो ॥ तीर्थस्यस्वतनुंहित्वातामसीं
सात्त्विकींगतः ॥ ९१ ॥ इन्द्रेणसहनागेन्द्रमारुह्यत्रिदशालयम् ॥ गच्छामिस्वेच्छयानाथकृपातस्तेकृपानिधे ॥ ९२ ॥ सिद्धउवाच ॥ इत्य
भिष्टूयदेवेशंकपिलंसकलिङ्गपः ॥ नमस्कृत्यचतत्पादौजगामत्रिदशालयम् ॥ ९३ ॥ एतन्मयाद्भुतंविप्रदृष्टंबदरिकाश्रमे ॥ गुरुंशुश्रूषमाणेन
पापस्यापिविमोक्षणम् ॥ ९४ ॥ नातःपरंत्रिलोक्यांतुतीर्थंसर्वार्थदायकम् ॥ याहितत्रैवसस्त्रीकःपरंश्रेयोयदीच्छसि॥ ९५ ॥ अहंयामिस
मानेतुंबदर्याख्यंगृहान्द्विज ॥ वृद्धंस्वकीयपितरंनिःस्पृहंमोक्षकामुकम् ॥ ९६ ॥ नारदउवाच ॥ इतितीर्थवरस्यास्यबदर्याख्यस्यभूपते ॥
महिमानंसमुत्कीर्त्यससिद्धःस्वगृहंययौ ॥ ९७ ॥ अथकालेनकियतासद्विजःसहभार्यया ॥ तीर्थानिपर्यटन्धीरइन्द्रप्रस्थेऽभ्यगादिह ॥ ९८ ॥
तेनैववपुषाराजन्नीतवांस्तौनिजालयम् ॥ ससिद्धोऽपिस्वपितरंगृहादानीयसत्वरः ॥ ९९ ॥ तत्रैवस्नापयामासतत्तीर्थेमोक्षकामुकम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सोऽपिश्रीवासुदेवेनवृद्धःसिद्धपितातदा ॥ततोनीतोनिजगृहंवृन्दारकविवन्दितः ॥१००॥ इन्द्रप्रस्थान्तरगतमिदंसद्बदर्याख्यमीशःस्नानाद्द्यादखिल
जनितामानसेष्टपदार्थम् ॥ माहात्म्यंतेनृपनतिमतेवर्णितंतस्यपूतंयच्छुत्वावैपततिनजनोमातृगर्भेकदाचित् ॥१०१॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उ
त्तर०कालिन्दीमाहात्म्येबदरिकाश्रमवर्णनंनामषोडशाधिकद्विशततमोऽध्यायः ॥ २१६ ॥ राजोवाच ॥ वर्णितंमेत्वयासाधोमाहात्म्यंबदरीभवम् ॥
यन्निशम्यमनोयातिममनिर्मलतांमुने ॥१॥ एतदद्भुतमाहात्म्यंशक्रप्रस्थाख्यमुत्तमम् ॥ सकलंमुनिशार्दूलचतुर्वर्गप्रदायकम् ॥२॥ भुविनातःपरंतीर्थं
तिरश्चामपिमुक्तिदम् ॥ श्रेष्ठंसकलपापघ्नंदर्शनादेवनारद ॥ ३ ॥ एतदन्तर्गतस्यास्यहरिद्वारस्यनारद ॥ माहात्म्यंश्रोतुमिच्छामित्वत्तःसंतोषकार
कात् ॥ ४ ॥ मामुद्धरमुनेदीनमविद्याकामकर्मभिः ॥ वर्णनेनास्यतीर्थस्यशक्रप्रस्थगतस्यवै ॥ ५ ॥ नारदउवाच ॥ आकर्णयमहाभागवर्णयामि
तवाग्रतः ॥ हरिद्वारस्यमाहात्म्यमश्वमेधफलप्रदम् ॥ ६ ॥ अत्रैकःश्वपचःपापोयथास्वर्गतिमाप्तवान् ॥ तत्तेऽहंकथयाम्यद्यशृणुष्वैकमनाःप्रभो ॥७॥
धर्मक्षेत्रेकुरुक्षेत्रेकालिङ्गइतिविश्रुतः ॥ श्वपचःपापकर्मावैवसतिस्मपुराद्बहिः ॥ ८ ॥ पञ्चषड्वर्षदेशीयान्बालान्नगरवासिनाम् ॥ प्रसह्यवञ्चयित्वाचव
नेनीत्वाजघानसः ॥ ९ ॥ तेषामलङ्कारमयंरजतंहेमवन्नृप ॥ रत्नादिकंचकायस्थंहत्वातान्जगृहेऽधमः ॥ १० ॥ विवेशसाधुनिलयेरात्रौधनजिहीर्षया
॥ पथिकान्धनमालक्ष्यसजघ्नेनिर्जनेवने ॥ ११ ॥ कुरुक्षेत्रेसमायाताएकदारविपर्वणि ॥ नानादिग्भ्योजनाराजन्स्नानादानचिकीर्षया ॥ १२ ॥ तस्मि
न्यथाविधिस्नात्वारविपर्वणिभूपते ॥ दानंदत्त्वायथावच्चलोकाःस्वान्स्वान्गृहान्ययुः ॥ १३ ॥ एकःकश्चिद्द्विशांश्रेष्ठोधनेनमहतायुतः ॥ पश्चात्सर्वजने
भ्यस्तुचचालस्वगृहंप्रति ॥ १४ ॥ अश्वचारःपदातीनांविंशातिंपुरतोदधत् ॥ कालिङ्गःसमहापापस्तमनुप्रस्थितस्तदा ॥ १५ ॥ कतिचिद्वसतीर्गत्वा
सहतेनविशाधमः ॥ सोऽन्त्यजस्तद्धनंहर्तुंनलेभेसमयंनृप ॥ १६ ॥ बलेनापिग्रहीतुंनक्षमोऽभूत्तस्यसश्रियम् ॥ वैश्यस्तुजनाविंशत्यासंयुक्तस्तुस
एककः ॥ १७॥ अत्रागतःसपापात्मावैश्यस्यार्थेनपार्थिव ॥ निशीथेशिबिरंतस्यधनंहर्तुंसमाविशत् ॥ १८॥ एकेनतस्यवैश्यस्यजनेनसतुलक्षितः ॥
प्रविशन्नेवपापात्माददताप्रहरंस्वकम् ॥ १९ ॥ तमालक्ष्यसमीपस्थंसजनःप्रहरप्रदः ॥ उभयोःपादयोराजन्स्वपन्नेवगृहीतवान् ॥ २० ॥ तौगृहीत्वाज
नानन्यान्बोधयन्प्रहरप्रदः ॥ हस्तेनैवतुपापेनचौरेणाघातितोहिसः ॥ २१ ॥ श्रुत्वापलायमानस्तुगृहीतोऽन्यैर्जनैस्तदा ॥ ग्रहीतारंपुनर्हत्वासहसास
पलायितः ॥ २२ ॥ एकेनकेनचिद्राजन्सेवकेनधनुर्भृता ॥ दूरादेवशरेणाशुधावन्सनिहतोऽधमः ॥ २३ ॥ हतमात्रःशरेणाशुतत्याजसचजीवितम्॥
॥ चौरेणनिहतौराजन्वैश्यस्यानुचरावुभौ ॥२४॥ तेत्रयोवरयानानिगणानीतानिभूपते ॥ समारुह्यदिविस्थित्वावैश्यमेतद्बभाषिरे ॥२५॥ कालिङ्गवै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्यानुचराऊचुः॥भोभोवैश्यपतेसाधोतीर्थमेतदनुत्तमम्॥इन्द्रप्रस्थेहरिद्वारंशिवकृत्पापिनामपि ॥२६॥वयंत्रयःसुतीर्थेऽस्मिन्नपमृत्युगताअपि॥गच्छाम
स्त्रिदिवंवैश्यसाम्प्रतंशिवमस्तुते॥२७॥श्रीनारदउवाच॥इत्युक्त्वातेययुःस्वर्गंशिबेशिवकृतांपदम् ॥यत्रेच्छयाहिलभ्यन्तेभोग्यवस्तून्यनेकशः॥२८॥अ
थरात्रौव्यतीतायांप्रातरत्रविशांवरः॥स्वभृत्यदेहयोःकृत्वादाहमस्थीन्यपातयत्॥२९॥तीर्थेऽत्रपात्यमानेषुभृत्यौतावस्थिषुप्रभो॥स्वर्गात्पुनरिहायातौतं
वैश्यमिदमूचतुः॥३०॥भृत्यावूचतुः॥ भोभोवैश्यपतेसाधोतीर्थेऽत्रमरणाद्भुवि॥पापानामपिजन्तूनांस्वर्गप्राप्तिर्नसंशयः ॥३१॥स्थलेमृतस्यजन्तोश्चेत्प
तन्त्यस्थीनिवारिणि ॥ तीर्थस्यास्यतदावैश्यसत्यलोकेस्थितिर्भवेत्॥३२॥स्थलेमृताभ्यामावाभ्यामस्थिपातेनवारिणि ॥ संप्राप्ताब्रह्मणोलोकेस्थिति
राब्रह्मसंस्थितेः॥३३॥स्थलेमृतस्यचौरस्यपेतुरस्थीनिनाम्बुनि॥यतोऽतःसविशांनाथतस्थौवृन्दारकालये ॥३४॥ तस्यापिदेहमन्विष्यतीर्थेऽस्मिन्नाशु
पातय॥यथासोऽपिसुरश्रेष्ठप्राप्नुयान्नौगतिंपराम् ॥३५ ॥ उपकारःसदाकार्यःपरेषामपिसाधुभिः ॥ अपकारोनमन्तव्यःकृतोभृशमसज्जनैः॥३६॥नारद
उवाच॥इत्युक्त्वातौमहाभागौगतौहरिपुरंप्रति॥हरिद्वारस्यतीर्थस्यसशिलेचास्थिपातनात् ॥ ३७ ॥ सवैश्यस्तुमहाभागतस्यचौरस्यविग्रहम् ॥ दग्धु
मन्वेषयामासनलब्धंतत्तुभूपते ॥ ३८ ॥ पुनरावृत्यतत्रैवसर्वतीर्थशिरोमणौ ॥ हरिद्वारेमहाराजससस्नाविति वाञ्छया ॥ ३९ ॥ अहमुत्पाद्यसत्पुत्रा
न्धर्मार्जितधनेनच ॥ संतोष्यविप्रान्बन्धूंश्चविष्णुमाराध्यसेवया ॥ ४० ॥ त्वय्येवमरणंप्राप्यगच्छामिहरिमन्दिरम्॥ तीर्थराजनमस्तुभ्यमेतत्कर्तव्य
मस्तिते ॥ ४१ ॥ इतिकामनयाराजन्सवैश्यस्तत्रकामदे ॥ तीर्थेस्नात्वागतःसर्वैर्भृत्यैःस्वंसमगाद्गृहम् ॥ ४२ ॥ तत्रगत्वासपत्न्यांतुपुत्रानुत्पाद्यबुद्धि
मान् ॥ धर्मोपार्जितवित्तेनतोषयामासबान्धवान् ॥ ४३ ॥ भक्त्यापरमयाराजन्नाराध्यकमलापतिम्॥ तीर्थेऽस्मिन्मरणंप्राप्तोयतोवैकुण्ठमाप्नुयात्॥
॥ ४४ ॥ इतिवैवर्णितोराजंस्तीर्थस्यमहिमातव ॥ हरिद्वारस्यपुण्यस्यश्रवणेऽस्यफलंशृणु ॥ ४५ ॥ तिलद्रोणस्यदानेनमाघेयत्फलमाप्नुयात् ॥ जन
स्तत्फलमाप्नोतिशृण्वन्माहात्म्यमस्यतु ॥ ४६ ॥ गोपीचन्दनदानेनब्रह्मपत्रेषुभोजनात् ॥ यत्फलंतन्महिम्नोऽस्यश्रवणादेवकार्त्तिके ॥ ४७ ॥ जागरे
चप्रबोधिन्यांप्रहरेपश्चिमेनृप ॥ यत्फलंतन्महिम्नोऽस्यतीर्थस्याकर्णनाद्भवेत् ॥ ४८ ॥ हरिद्वारस्यसदृशंशक्रप्रस्थगतस्यवै॥ नतीर्थंपृथिवीलोकेचतु
र्वर्गफलप्रदम्॥४९॥ इतिश्रीपाद्मेमहापु० पद्मप० उत्तर० कालिन्दीमाहात्म्येहरिद्वारवर्णनंनामसप्तदशाधिकद्विशततमोऽध्यायः ॥२१७॥ नारदउवाच ॥
भूयःशृणुमहाभागमाहात्म्यंपरमाद्भुतम् ॥ अत्रस्थितस्यतीर्थस्यपुष्करस्यशिवप्रदम् ॥ १ ॥ प्रसादात्तस्यतीर्थस्यविष्णुःसर्वसुरेश्वरः ॥ प्रसन्नःपुण्डरी
कस्यमासमेकंगृहेऽवसत् ॥ अत्रमुक्तिंतदनुजोलेभेपापरतोऽपिहि ॥ २ ॥ शिबिरुवाच ॥ कःपुण्डरीकोधर्मात्माकृतंतेनचकर्मकिम् ॥ येन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रसन्नोभगवांस्तद्ध्हेमासमावसत् ॥३॥ कथंतदनुजःप्रापपापात्माश्रीहरेःपदम् ॥ तीर्थस्यास्यप्रसादेनसर्वमाख्याहिमेमुने ॥४॥ शृण्वतोऽस्यनसंतोषो
माहात्म्यंममजायते ॥ ५ ॥ नारदउवाच ॥ विदर्भनगरेराजन्मालवाख्योमहायशाः ॥ ब्राह्मणोब्रह्मविच्छान्तोविद्वान्विष्णुपरायणः ॥ ६ ॥
देवर्षिपितृभूतानांमानुषाणांचपोषकः ॥ विषयेषुनसंसक्तोलोभमोहादिवर्जितः ॥ ७ ॥ सएकदामहाभागसिंहंप्राप्तेबृहस्पतौ ॥ गोदावरींमहापुण्यां
स्नातुंप्रतिजगामह ॥ ८ ॥ दातुंतत्रसुवर्णस्यगृहान्निन्येपलायुतम् ॥ गच्छन्पथिसधर्मात्मामनसैतदचिन्तयत् ॥ ९ ॥ मालवउवाच ॥ गृहाद्दाना
र्थमानीतंमयाहेमपलायुतम् ॥ यस्मैकस्मैनदातव्यंदातव्यंपूज्यसाधवे ॥ १० ॥ निष्किंचनायविप्रायपात्रायानुपकारिण ॥ पूज्यायदेशेकालेचदत्त
मक्षयतांव्रजेत्॥११॥ उञ्छवृत्त्यासमानीतंदत्त्वादुर्वाससेमुनिः॥शिलोञ्छवृत्तिर्धर्मात्मास्वंत्यक्त्वागातपरंपदम्॥१२ ॥दानवेन्द्रोबलीराजापात्रंविज्ञाय
वामनम् ॥ विपक्षायाप्यदात्तस्मैत्रिलोकींस्वभुजार्जिताम् ॥ १३ ॥ तस्मात्पात्रायदातव्यंधनंधर्मार्जितंमया ॥ गोविन्दतुष्टयेसम्यग्वाञ्छनीयंनत
त्फलम् ॥ १४ ॥ पुण्डरीकस्तुधर्मात्माभागिनेयोगजाह्वयात् ॥ आयास्यतिमयाहूतःसर्वपात्रशिरोमणिः ॥ १५ ॥ आनीतस्यधनस्यार्द्धंतस्मैपात्राय
सूनवे ॥ स्वसुर्दास्यामिशेषंतुश्रोत्रियेभ्योयथाविधि ॥ १६ ॥ नारदउवाच ॥ एवंविचिन्त्यधर्मात्मामालवःसद्विजोत्तमः ॥ कतिचिद्वासरैःप्राप्तः
पुण्यांगोदावरींनृप ॥ १७ ॥ मिलितस्तस्यधर्मात्मापुण्डरीकःस्वसुःसुतः ॥ तस्यवैपूर्वमायातोमालवस्यमहीपते ॥ १८ ॥ सतत्रविधिनास्नात्वा
सिंहसंक्रमवासरे ॥ पुण्डरीकायवित्तार्धंददौमेप्रीयतांहरिः ॥ १९ ॥ पुण्डरीकोऽपिधर्मात्मास्नात्वागोदावरीजले ॥ स्ववित्तस्यचतुर्थांशं
श्रोत्रियेभ्योददौमुदा ॥ २० ॥ सतत्रविधिवत्स्नात्त्वादत्त्वादानंचशक्तितः ॥ गच्छन्तंस्वगृहान्राजन्नित्युवाचस्वसुःसुतम् ॥ २१ ॥ मालवउवाच ॥
गुरून्प्रतिनमस्कारोवाच्यआशीर्लघून्प्रति ॥ यथावयोर्हिसंयोगःक्षणिकोऽयंबभूवह ॥ २२ ॥ एवंह्निसर्वजन्तूनांपुत्रदारादिभिःसह ॥ तस्मात्क्ष
णिकसंयोगात्संसाराद्यःसुधीर्नरः ॥ २३ ॥ विरज्येतकृपापात्रंसहरेःस्याद्विनिश्चितम् ॥ कृपातःश्रीहरेःप्राणीसत्संगमरतोभवेत् ॥ २४ ॥ ततस्तस्यहरे
र्लीलाश्रवणेच्छाहिजायते ॥श्रुत्वाचकीर्तितास्सद्भिर्हरिलीलाअपिस्वयम् ॥२५॥सस्पृहंकीर्तयत्येवततःस्मरतिकेवलम् ॥ततस्तस्यभवेत्प्रेमगोविन्दपद
सेवने ॥ २६ ॥ नरस्ततस्तरत्याशुपोतेनेवमहार्णवम् ॥ एतदर्थंहिसाधूनांज्ञानिनांकर्मिणांतथा ॥ यत्नोभवतिधर्मात्मन्नपित्वंयत्नवान्भव ॥ २७ ॥
नारदउवाच ॥ एवमुक्त्वासवैदर्भःसुतंकथमपिस्वसुः ॥ विसृज्याश्रुमुखोबाष्पपर्याकुलदृशंययौ ॥ २८ ॥ पुंडरीकोऽपिधर्मात्माचचालस्वगृहं
प्रति ॥ कतिभिर्वासरैराजन्नागतोऽत्रशुभास्पदे ॥२९॥भरताख्यंकनीयांसंभ्रातरंपतितंभुवि॥ श्वसन्तंक्षतनिर्गच्छद्रुधिराक्तमवैक्षत ॥३०॥पप्रच्छचरुदन्नु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चेभ्रातः केनेदृशींदशाम् ॥ गमितोऽसि किमर्थंवागृहादिहसमागतः ॥ ३१ ॥ इतिपृच्छतिराजेन्द्रपुण्डरीकेसपीडया॥महत्याभरतःसद्यःपीडितोऽसुनसु
श्चत ॥ ३२ ॥ अवातरत्तदायानमेकंसगणमद्भुतम् ॥ आकाशात्पश्यतांभूपजनानांतद्धरोरपि ॥ ३३ ॥ तदारुह्यसदिव्याङ्गभरतःपापकार्यपि ॥
उवाचवचनंज्येष्ठंभ्रातरंविनमन्निदम् ॥ ३४॥भरतउवाच॥ पुण्डरीकमहाबुद्धेतीर्थस्यास्यप्रसादतः॥पुष्करस्यमयाप्राप्तापापिनापिदिविस्थितिः॥३५॥
मदीयंदारुणंकर्मभ्रातर्जानासियद्यपि ॥ तथापिकथयाम्यद्यकिंचिदज्ञातमस्तिते ॥ ३६ ॥ यथामयाप्रभावत्यावेश्ययारमितंसह ॥ तद्गृहव्ययितंभूरि
धनंचमदिराकृते ॥ ३७ ॥ द्यूतेनहारितंयच्चचौरकर्मसमार्जितम् ॥ शिवरात्र्यांमयाशम्भुनिर्माल्यंयच्चभक्षितम् ॥ ३८ ॥ यत्कृतेभवताविप्रोजम्बुको
नामदूषितः ॥ एतन्मयाकृतंकर्मविदितंपुण्डरीकते॥३९॥गोदावरींगतेभ्रातस्त्वयियत्कृतवानहम्॥नतत्तेविदितंकर्मकथयामितदप्यहो॥४०॥चलितेत्व
य्यतिक्रान्तोयदापक्षस्तदाह्यहम् ॥ श्रुतवानितिलोकेभ्योवचनंहरिदुःसहम् ॥ ४१ ॥ पुण्डरीकोधनंदातुमाहूतोमातुलेनहि ॥ निजसोदरमाहत्यपुण्ड
रीकंतदाहृतम् ॥ ४२ ॥ ग्रहीष्यामिधनंभूरिमातुलेनसमर्पितम् ॥ महतावसुनातेनतोषयामिप्रभावतीम्॥४३॥ दुरोदरेणक्रीडामिस्वेच्छयातद्विदैःसह
॥ इत्यालोच्यत्वदध्वानंनिरुध्याहमिहस्थितः ॥४४ ॥ हत्वात्वांचधनंभूरिग्रहीतुंचमहामते ॥ अतिक्रान्तेजनेभ्रातःकुतश्चित्सार्थआगतः ॥ ४५ ॥
वणिजामत्रसुप्तोऽहंरात्रौतत्रमहामते॥ अथकश्चिन्निशीथेतुतस्करोवणिजांधनम् ॥४६॥ हृत्वातत्रसमाविष्टःसार्थेजनसमाकुले ॥ नीत्वायदाधनंकिंचित्स
चौरस्तुपलायितः ॥ तमन्वधावन्सहसाक्रोशन्तइवसेवकाः ॥ ४७ ॥ सेवकाऊचुः ॥ गृह्यतांगृह्यतामेषचौरोऽयंयातिसत्वरम् ॥ मध्याद्बहूनामस्माक
मपहृत्यधनंबहु ॥४८॥ भरतउवाच ॥ इत्याकर्ण्यवचस्तेषांपुरतस्तुतमन्वहम् ॥ अधावंसहसाभ्रातस्तद्ग्रहीतुंजिहीर्षया ॥४९॥ ततस्तेवणिजांभृत्या
ज्ञात्वामांतस्यरक्षकम् ॥ प्रजह्रुस्तरसासर्वेसखड्गंखड्गपाणयः ॥ ५० ॥ तेषुकश्चिद्द्विजश्रेष्ठोब्राह्मणोऽहमितिब्रुवन् ॥ खड्गेनशितधारेणमयापापीयसा
हतः ॥ ५१ ॥ वणिजांसेवकैस्तैस्तुखड्गधारैरहंहतः ॥ गतास्तेवणिजःप्रातर्निजगन्तव्यनीवृतम् ॥५२॥ ततोभवानिहप्रातःश्वसन्तंमांददर्शह ॥ चलद्रु
धिरलिप्ताङ्गंपीडामोहविचेतनम् ॥ ५३॥इत्येतत्कथितंभ्रातर्यदर्थमहमागतः ॥ अपमृत्युंयथाप्राप्तस्तच्चापिकथितंमया ॥५४॥ इतिश्रीपाद्मेमहापुराणे
पञ्चप०उत्तर०कालिन्दीमाहात्म्येऽष्टादशाधिकद्विशततमोऽध्यायः ॥ २१८ ॥ नारदउवाच ॥ इत्याकर्ण्यवचस्तस्यपुण्डरीकोमहामनाः॥ उवाचनिज
बन्धुंतंशृण्वतांनिजसंगिनाम् ॥ १ ॥ पुण्डरीकउवाच ॥ केनपुण्येनतीर्थेऽस्मिन्मृत्युर्भरततेऽभवत् ॥ यदिजानासितद्ब्रूहिपापंविख्यातमेवते ॥ २ ॥
भरतउवाच ॥ पुण्डरीकशृणुष्वेदंकथयामितवाग्रतः ॥ एतत्तीर्थप्रदंपुण्यंकृतंयदिहजन्मनि ॥३॥ एकदातुधनंजित्वासमागच्छन्निजंगृहम् ॥ अपश्यंमृत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कंबालंमृतस्यानाथमापणे ॥ ४ ॥ निधायतमहंमूर्ध्निनीत्वागङ्गातटेशुभे ॥ वस्त्रादिभिरलङ्कृत्यचक्रेदाहादिसत्क्रियाम् ॥ ५ ॥ द्यूतेनोपार्जितंद्रव्यं
तत्सर्वंव्ययितंमया ॥ तेनपुण्येनप्राप्तंमेतीर्थमेतच्छुभावहम् ॥ कुरुत्वंममदेहस्यसंस्कारंदाहपूर्वकम् ॥ ६ ॥ श्रीनारदउवाच ॥ संस्कारेविहितेराज
न्भरतःपापवानपि ॥ तीर्थस्यास्यप्रसादेनपुष्करस्यगतोदिवि ॥ ७ ॥ मासमेकंयथाविष्णुःपुण्डरीकगृहेहरिः ॥ उवासास्यप्रसादेनतीर्थस्यशृणुसाम्प्र
तम् ॥ ८ ॥ अत्रतीर्थेसधर्मात्माभरतस्यापिसद्गतिम् ॥ दृष्ट्वेतिहृदयेमेनेतीर्थमेतत्तुकामदम् ॥ ९ ॥ अत्रेतिवाञ्छयासस्नौपुण्डरीकःसपण्डितः ॥ माघ
मासंस्वरूपेणहरिर्वसतुमेगृहे ॥ १० ॥ एवंस्नात्वासकामेनययौनिजगृहंप्रति ॥ तीर्थेऽत्रनृपतिश्रेष्ठपुण्डरीकोऽखिलार्थदे ॥ ११ ॥ बन्धुभ्योमरणंभ्रातु
र्भरतस्यजगादह ॥ तेऽपिश्रुत्वाशुचंचक्रुर्माययावृतबुद्धयः ॥ १२॥ पुण्डरीकस्तदाकुर्वन्गृहेस्वस्मिन्निजक्रियाः ॥ उवासेतिमहानन्दस्तपस्यायास्यते
हरिः ॥ १३ ॥ पूर्णिमायामथोपौष्यांचक्रेसपरमोत्सवम् ॥ मत्वेतिश्वोगृहेमह्यंहरिरायास्यतिध्रुवम् ॥ १४ ॥ श्रीखण्डजलसेकेनगोमयालेपनेनच ॥
मुक्ताचूर्णचतुष्केणसमस्कुरुतकेतनम् ॥ १५ ॥ शतद्वयंब्राह्मणानांनानाभोज्यैरभोजयत् ॥ बह्वीभिर्दक्षिणाभिश्चतानेवसमतोषयत्॥१६॥नानावादित्र
कुशलैःकलकण्ठैश्चगायनैः ॥ रजन्यांस्वजनैर्गायंश्चक्रेजागरणंतथा ॥ १७॥ अथप्रभातेतान्सर्वान्गायनादीन्विसृज्यसः ॥ गोविन्दागमनाकाङ्क्षीगृह
मध्यउपाविशत् ॥ १८ ॥ अथतस्यगृहाभ्यासेनिवर्त्यनिजवाहनम् ॥ प्राविशद्गृहमध्येतुकर्तुंस्वजनवाञ्छितम् ॥१९ ॥ सपुण्डरीकस्तंदृष्ट्वामाधवंस
मुपागतम् ॥ उत्थायासनतस्तूर्णंववन्देशिरसानृप ॥ २० ॥ उवाचचसधर्मात्मागोविन्दालोकनिर्वृतः ॥ संपूज्यार्घादिदानेनविष्टरेतंनिवेशितम्
॥ २१ ॥ पुण्डरीकउवाच ॥ भवताभवतापघ्नंसुस्पष्टंतदनुष्ठितम् ॥ तावदत्रत्वयाविष्णोस्थीयतांस्थितिकारिणा ॥ २२ ॥ यावदस्यपुनर्मा
तस्यसमाप्तिस्तपसोभवेत् ॥ यत्रत्वंसेवकास्तेचवसन्तिपरिचर्यया ॥ २३ ॥ तत्रैवखलुवैकुण्ठःसर्वदोषविवर्जितः ॥ यद्गृहेतवकर्माणिवर्ण्यन्ते
साधुभिर्विभो ॥ २४ ॥ हरिर्निवसतेतत्रसन्मुखादितिनःश्रुतम् ॥ येषांवचसितेनामहृदिरूपंचसुन्दरम् ॥ २५ ॥ कर्णयोश्चगुणारोपस्त
एवखलुसाधवः ॥ भवतोभवतिस्वान्तंयेषांशुश्रूषणेविभो ॥ २६ ॥ उत्तमाङ्गंचनिर्माल्यंतएवखलुसाधवः ॥ येषांतुबुद्धिःशत्रौचमित्रेचकमला
पते ॥ २७ ॥ चयापचययोश्चैवतएवखलुसाधवः ॥ येषांविकुरुतेचेतोनविकारस्यकारणे ॥ २८ ॥ सतिलक्ष्मीपतेनूनंतएवखलुसाधवः ॥ यत्रत्वं
धवस्तत्रसन्तोयत्रततोभवान् ॥ अतोविज्ञापयामित्वांमाघेममगृहेवस ॥ २९ ॥ नारदउवाच ॥ इत्याकर्ण्यवचस्तस्यपुण्डरीकस्यमाधवः ॥ उवा
चवचनंभासादन्तानांभासयन्दिशः ॥ ३० ॥ श्रीभगवानुवाच ॥ साधूनामुत्तमःसाधुस्त्वंपृथिव्यांमहामते ॥ यत्त्वयापुण्यतीर्थेतुस्नातंमत्सङ्ग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाञ्छया ॥ २१ ॥ उत्तिष्ठजाह्नवीतोयेमाघेस्नानंकुरुद्विज ॥ माघान्तेस्नापयामित्वांपूर्णिमायांतुपुष्करे॥३२॥प्रयागेमाघमासेतुपूर्णंयत्स्नानजंफलम्॥
तत्सर्वंपुष्करेतीर्थेदिनैकस्नानतोभवेत् ॥ ३३॥ नारदउवाच ॥ एवमुक्तःसविप्रेन्द्रःपुण्डरीकोमुरारिणा ॥ किंचिदभ्युदितेसूर्येस्नानंगङ्गाजलेऽकरोत् ॥
॥ ३४ ॥ प्रत्यक्षंपुण्डरीकाक्षंपुण्डरीकःसमार्चयत् ॥ तुलसीविकसत्पुष्पयवकुङ्कुमचन्दनैः ॥ ३५॥ धूपैरगरुजैरङ्गवासिताङ्गंरमापतिम् ॥ नीराजयति
कर्पूरदीपकैःपञ्चभिःस्मसः ॥ ३६ ॥ चतुर्विधमयैर्भोज्यैर्भोजयित्वाजगद्गुरुम् ॥ सुतंसमणिपर्यङ्केचामरैस्तमवीजयत् ॥ ३७ ॥ पादसंवाहनंजातु
चक्रेतस्यरमापतेः ॥ जातिकर्पूरसंयुक्तंददौताम्बूलवीटकम् ॥३८॥ उष्णीषंबध्नतस्तस्यश्रीपतेःपुरतस्तदा ॥ तस्थौजातुसविप्रेन्द्रःकरेणानीयदर्पणम् ॥
॥ ३९ ॥ एवंनिजगृहेतस्यवसतःसभवच्छिदः ॥ सपर्यांविदधद्विप्रोमाघंनिन्येसमस्तकम् ॥ ४० ॥ अथमाघावसानेतुपूर्णिमायांरमापतेः ॥ स्मृति
मात्रागतंताक्ष्र्यमपश्यत्पुरतःस्थितम् ॥ तंदृष्ट्वापुण्डरीकाक्षःपुण्डरीकमुवाचह ॥ ४१ ॥ श्रीभगवानुवाच ॥ श्रूयतांभोद्विजश्रेष्ठयद्वचोऽहंवदामिते ॥
इन्द्रप्रस्थगतेतीर्थेपुष्करेतेयदृच्छया ॥ ४२ ॥ स्नानायतेमयादत्तंयन्मासमुषितंमया ॥ अद्यपक्षीन्द्रमारुह्यमयासहमहामते ॥४३॥ व्रजतीर्थशिरोरत्नं
तदेवप्रतिपुष्करे ॥ चतुर्वर्गप्रदेतस्मिन्स्नानंकुर्वन्यदीच्छसि ॥ ४४ ॥ तदहंतेप्रदास्यामियदहंत्वद्वशेद्विज ॥ पापोऽपिभरतस्तेवैभ्रातायत्रमृतोगतः ॥
॥४५॥ स्वर्गंस्वर्गसुखाकाङ्क्षीकिमन्यत्तस्यवर्ण्यते ॥४६॥नारदउवाच ॥ एवमुक्त्वासदेवेन्द्रोब्राह्मणेन्द्रंनरेन्द्रतम् ॥ पतगेन्द्रंसमारोप्यसर्वतीर्थेन्द्रमाग
मत् ॥४७॥ पुण्डरीकस्यदेहात्तुतेनतत्प्राणवायुना ॥ समंज्योतिःसनिर्गत्यगोविन्दपदमाविशत् ॥ ४८ ॥ एवंपुष्करतीर्थेऽस्मिन्निन्द्रप्रस्थगतेनृप ॥
स्नानेनपुण्डरीकस्तुलेभेसायुज्यमीश्वरे ॥ ४९ ॥ एवंतीर्थानुरोधेनगोविन्दोऽपिचतद्गृहे ॥ मासमेकंसुखंराजन्नुवासनिजबन्धुवत् ॥ ५० ॥ केन
वर्णयितुंशक्योमहिमापुष्करस्यवै ॥ शक्रप्रस्थगतस्यास्यकोटयंशोवर्णितोमया ॥ ५१ ॥ माहात्म्यश्रवणादस्यश्रद्धयालभतेनरः ॥ अश्वमेध
क्रतुफलंपठनादपिभूपते ॥ ५२ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०कालिन्दीमाहात्म्येपुष्करमहिमवर्णनंनामैकोनविंशत्याधिकद्विशततमो
ऽध्यायः ॥ २१९ ॥ नारदउवाच ॥ शिवस्यतीर्थराजस्यप्रयागस्यतवाग्रतः ॥ महिमानंमहापुण्यंश्रद्धयावर्णयामिते ॥ १ ॥ विश्वावसुर्महीपाल
गन्धर्वोलोकविश्रुतः ॥ एकदासगतोगातुंसुमेरौब्रह्मणःसभाम् ॥ २ ॥ तत्रसर्वैःसुरश्रेष्ठमुपविष्टंसुविष्टरे ॥ जुष्टंसुरगणैर्भूपविश्वावसुरवैक्षत ॥ ३ ॥
ब्रह्मासनसमीपेतुवरासनगतंनृप ॥ द्वितीयमिवलोकेशमिन्द्रप्रस्थंसऐक्षत ॥ ४ ॥ सुरराजतीर्थराजौब्रह्मेन्द्रप्रस्थयोर्नृप ॥ चामरोद्धूननंमूर्ध्निकुर्व
न्तौसददर्शह ॥ ५ ॥ अन्यानिदेवतीर्थानितयोर्दूरेमहीपते॥स्थितानितनदृष्टानिबद्धाञ्जलिपुटानितु ॥ ६ ॥ तयोरग्रेजगौराजन्गान्धर्वरागमुत्तमम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तीर्थैः सममगात्सत्यलोकं देवान्विसृज्य हि ॥ ७ ॥ अथ विश्वावसुर्धीमान्दृष्ट्वा तीर्थस्य वैभवम् ॥ इन्द्रप्रस्थस्य राजेन्द्र हाहामेतदुवाच ह ॥ ८ ॥
विश्वावसुरुवाच ॥ भोभो गन्धर्वशार्दूल तीर्थमेतन्महाद्भुतम् ॥ इन्द्रप्रस्थाख्यमेतस्मिन्संसारे तीर्थराशिषु ॥ ९ ॥ चराचरगुरुर्ब्रह्मा सुरवन्द्यपदाम्बुजः ॥
तस्यासनसमीपस्थं यदतिष्ठत्समासनम् ॥ १० ॥ तीर्थराजोऽपि पृष्ठस्थश्चामरं यस्य मस्तके ॥ अधुनाभृत्यवज्ज्ञातस्तीर्थेष्वन्येषु का कथा ॥ ११ ॥
पृथिव्यां यानि तीर्थानि त्रिवर्गफलदानि तु ॥ इन्द्रप्रस्थमिदं तीर्थं चतुर्वर्गफलप्रदम् ॥ १२ ॥ अत्र स्थितानि तीर्थानि तादृशानि गुणैर्ध्रुवैः ॥ शेषेनापि न शक्यन्ते
स्तोतुं तेषां महागुणाः ॥ १३ ॥ नारद उवाच ॥ एवं विश्वावसुर्धीमान्दृष्ट्वेन्द्रप्रस्थवैभवम् ॥ गत्वा तस्य गृहं राजन्पावनं सर्वकामदम् ॥ १४ ॥ यथा देवेषु
सर्वेषु शक्रः श्रेष्ठः शचीपतिः ॥ तस्माद्ब्रह्मा च तीर्थेषु प्रयागोऽयं तथा वरः ॥ १५ ॥ तस्मादपि महाराज शक्रप्रस्थमिदं वरम् ॥ अस्यान्तरगतो योऽयं प्रयागो
नृप दृश्यते ॥ १६ ॥ कथयाम्यत्र यद्वृत्तं मोहिन्याः पण्ययोषितः ॥ नर्मदासरितस्तीरे पुरी माहिष्मती नृप ॥ १७ ॥ मोहिनी नाम तत्रासीद्वेश्या बहुधनान्विता ॥
रूपयौवनसंपन्ना निष्णाता नृत्यगीतयोः ॥ १८ ॥ तया बहूनि पापानि कृतानि धनलुब्धया ॥ ब्रह्महत्याः कृताः सप्त दास्यश्च बहवो हताः ॥ १९ ॥
तासां च पातिता गर्भा बहुशः पापया तया ॥ एवं तया सुतारुण्यं गमितं पापकर्मभिः ॥ २० ॥ ततो जरा कियत्काले तद्देहे समपद्यत ॥ जराग्रस्तशरीरा सा
निवृत्तविषयस्पृहा ॥ २१ ॥ न चक्रे मानसं यूनां ते च तां प्रति भूपते ॥ पापार्जितं धनं स्वीयं न विश्वसिति कस्यचित् ॥ २२ ॥ न दत्ते न स्वयं भुङ्क्ते न निक्षिपति वै
क्वचित् ॥ एकदा सा निशीथे तु विबुध्येति व्यचिन्तयत् ॥ २३ ॥ मृतायां मयि कस्येदं धनं पापैरुपार्जितम् ॥ तं न यिष्यति मां घोरं नरकं भृशदारुणम् ॥ २४ ॥
दास्यस्तासां च भर्तारस्तद्भोक्ष्यन्ति धनं मम ॥ मय्येव सद्गतिस्तस्य कथं न क्रियतेऽधुना ॥ २५ ॥ एवं विचिन्त्य सा धर्मे विधाय मतिमुत्तमाम् ॥ चकारारामं
सरसीवापीकूपसुरालयान् ॥ २६ ॥ अमितः पुरमाधत्ते प्रपाः पथिकहेतवे ॥ निदाघे च महाराज तेभ्योऽन्नं प्रददौ च सा ॥ २७ ॥ धर्मशालां गृहाभ्याशे
निवासाय विदेशिनाम् ॥ विदधे सा पुनस्तेभ्यो ददावाहारमुत्तमम् ॥ २८ ॥ एवं प्रवर्त्तमाना हि धर्मे सा भूप मोहिनी ॥ ज्वरातुरा भवत्काले कश्चिच्चेति व्य
चिन्तयत् ॥ २९ ॥ धर्मार्थे हि मया वित्तं व्ययितं भूरि यद्यपि ॥ तथापि स्वर्णरूप्यादि प्रचुरं वर्त्तते परम् ॥ ३० ॥ श्रोत्रियेभ्यो ददाम्येतज्ज्ञानेनेति व्य
चिन्तयत् ॥ विचिन्त्येति समाहूता मोहिन्या नगरद्विजाः ॥ ३१ ॥ नागतास्ते महीपाल ज्ञात्वा घोरं प्रतिग्रहम् ॥ यदा तदा विभागं च चक्रे तत्तु धनं ॥ २१९ ॥
स्वकम् ॥ ३२ ॥ एको भागस्तु दासीनां दत्तोऽन्यश्च विदेशिनाम् ॥ स्वयं तु निर्द्धना राजन्नभवत्सा तु मोहिनी ॥ ३३ ॥ तथा समागतं मृत्युं विज्ञा
यान्तकमन्तिके ॥ मुक्त्वा दास्यो धनं नीत्वा यथेष्टगतयोऽभवन् ॥ ३४ ॥ इति मत्वा यदा ह्येषा ज्वरमुक्ता भविष्यति ॥ तदानीं यद्धनं दत्तं तं नून

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

माद्रास्यतेहितत ॥ ३५ ॥ अथसालङ्घनान्यष्टादशकृत्वामहीपते ॥ निजायुषस्तुशेषेणज्वरमुक्तातदाभवत् ॥ ३६ ॥ एकाजरद्गवानाम
सखीतस्यामहीपते ॥ सातामुपचचाराशुपथ्यादिभिरतन्द्रिता ॥ ३७ ॥ कियद्भिर्वासरैःसातुपूर्णाहाराव्यजायत ॥ तस्याजरद्गवायास्तुगृहे
भुक्तंस्मलज्जया ॥ ३८ ॥ मयास्थितंसुखेनात्रदुःखमद्यसमागतम् ॥ दारिद्र्यान्नमयास्थेयंसाचिन्त्येतिगतान्यतः ॥ ३९ ॥ गच्छन्तीसावने
राजन्मोहिनीपुरतस्करैः ॥ इतिमत्वाविनिहताग्रहीत्वायात्यसौधनम् ॥ ४० ॥ धनमप्राप्यतैस्तस्याःसकाशात्पुरतस्करैः ॥ श्वसन्तीसापरि
त्यक्तातस्मिन्नेववनेनृप ॥ ४१ ॥ अथवैखानसःकश्चित्प्रयागस्यास्यवैजलम् ॥ बिभ्रत्कमण्डलौराजन्नत्रारण्येसमाययौ ॥ ४२ ॥ अथतां
पतितांवीक्ष्यशस्त्रविक्षतविग्रहाम् ॥ याचमानामिदंराजञ्जीवनंहस्तसंज्ञया ॥ ४३ ॥ वैखानसउवाच ॥ कात्वंकेनशितैःशस्त्रैःसक्षतीकृतवि
ग्रहा ॥ एकाकिनीकिमर्थंवानिर्जनारण्यमागता ॥ ४४ ॥ इन्द्रप्रस्थगतस्येदंप्रयागस्यजलेशुभे ॥ भाग्योदयेनकेनापिप्रापितंप्रियकाम्यया॥
॥ ४५ ॥ इत्युक्तातेनसावक्तुमक्षमाव्याददेमुखम् ॥ पातुंतद्वारिमहिषीभवेयमितिवाञ्छया ॥ ४६ ॥ अथैतस्यप्रयागस्यपातितेऽम्बुनितन्मुखे ॥
तत्याजजीवितंसातुमोहिनीगणिकानृप ॥ ४७ ॥ प्राणप्रयाणकालेतुमहिषीत्वमवाञ्छत ॥ अतःसामहिषीजाताद्राविडेवीरवर्मणः ॥ ४८ ॥
संभूयकेरलाधीशगृहेतीर्थाम्बुपानतः ॥ कुलशीलधनैश्वर्यसंयुक्तस्यमहीपतेः ॥ ४९ ॥ हेमगौरंततःसाङ्गंबभारकमलेक्षणा ॥ अतस्तस्यपिता
नामहेमाङ्गीतिचकारह ॥ ५० ॥ एकदासातुहेमाङ्गीहेमाभरणभूषिता ॥ कलायाःस्ववयस्यायामन्त्रिपुत्र्यागृहंययौ ॥ ५१ ॥ तत्रयावक
तैलेनस्नापिताभोजिताचसा ॥ विविधान्नैस्तदाराजन्निविष्टावरविष्टरे ॥ ५२ ॥ पुष्पोद्ग्रथितधम्मिल्लाक्षामक्षौमविभूषिता ॥ कलांप्रोवाचदधती
मुखेताम्बूलवीटिकाम् ॥ ५३ ॥ हेमाङ्ग्युवाच ॥ कलेकलयमेवाक्यंकोकिलाकलभाषिणि ॥ गृहेयदद्भुतंवस्तुतवमामभिदर्शय ॥ ५४ ॥
इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०उत्तर०कालिन्दीमाहात्म्येइन्द्रप्रस्थवर्णनंनामविंशत्यधिकद्विशततमोऽध्यायः ॥ २२० ॥ नारदउवाच ॥ इत्युक्ता
साकलाराजंस्तयानृपतिभार्यया ॥ स्वकोशात्स्वर्णमञ्जूषामानाय्यविदधेपुरः ॥ १ ॥ उवाचचमहाराजभार्येऽस्यांमहदद्भुतम् ॥ पुस्तकं
वर्ततेदेवितत्रचित्राणिसन्तिवै ॥ २ ॥ उद्घाटयद्दृश्यतांकिंचित्किंकिमस्त्यत्रपुस्तके ॥ रंस्यतेतेमनोनूनंतत्रस्थालेख्यदर्शने ॥ ३ ॥ इत्युक्ता
भूपपत्नीसादास्यातामुदघाटयत् ॥ मञ्जूषांतत्रसंस्थंचपुस्तकंपाणिनाग्रहीत् ॥ ४ ॥ तत्रावलोकयामाससावतारान्समासतः ॥ पूर्वंततस्तु
भूगोलंपञ्चाशत्कोटियोजनम् ॥ ५ ॥ तत्रान्धकारसंयुक्ताभूमिर्दृष्टाथकाञ्चनी ॥ एतयोरन्तरेराजँल्लोकालोकश्चपर्वतः ॥ ६ ॥ सप्तद्वीपास्ततो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्दष्टाः सप्तद्वैः सप्तभिर्वृताः ॥ एतेषुनद्यः शैलाश्चखण्डानितुमहामते ॥ ७ ॥ एतद्भारतखण्डंसापश्यन्तीभूपतिप्रिया ॥ यमुनाजाह्नवीमुख्याः
सरितः समवैक्षत ॥ ८ ॥ यमुनातीरगंराजन्निन्द्रप्रस्थमिदंशुभम् ॥ ददर्शसामहाभागातीर्थंव्रजयुतंनृप ॥ ९ ॥ अत्रतीर्थमिदंदृष्ट्वाप्रयागंब्रह्म
निर्मितम् ॥ पूर्वजन्मकृतंकर्मसासस्मारमनस्विनी ॥ १० ॥ ततस्तूष्णींसमुत्थायतूर्णंसास्वगृहंययौ ॥ निश्चित्येतिनभोक्ष्यामिततः प्रस्थाय
तीर्थकम् ॥ ११ ॥ तदैवसातुहेमाङ्गीसहगन्तुमसुप्रियम् ॥ वीरवर्माणमाहेदंतीर्थराजंप्रियासती ॥ १२ ॥ हेमाङ्ग्युवाच ॥ भोभोः प्राणपते
वाक्यंमदीयंशृणुधर्मदम् ॥ विधेहिचमहाभागतूर्णंपूर्णोभविष्यति ॥ १३ ॥ पुराहंमोहिनीनामवेश्याचबहुपापकृत् ॥ यौवनेवार्द्धकेकिंचिद्धर्मे
जातामतिर्मम ॥ १४ ॥ पापेनोपार्जितंवित्तंधर्मेणव्ययितंमया ॥ निर्द्धनाहंयदाराजन्निर्गतानिजपत्तनात् ॥ १५ ॥ तदामांनिर्जनेऽरण्येयान्तीं
जघ्नुस्तुतस्कराः ॥ वृथादारिद्र्यसंतप्तांपापाधनजिघृक्षया ॥ १६ ॥ शितशस्त्रक्षताङ्गींमांश्वसन्तींगतचेतनाम् ॥ विसृज्यतस्करास्तत्रगताहत
मनोरथाः ॥ १७ ॥ ततोवैखानसोह्येकः प्रयागस्यजलंवहन् ॥ इन्द्रप्रस्थगतस्यैववनेतत्रसमागतः ॥ १८ ॥ तत्रमांपतितांदृष्ट्वातदवस्थांस
तापसः ॥ कात्वंकुतः किमर्थंवाहताकेनेतिपृष्टवान् ॥ १९ ॥ तदाकिमपिनोक्तंमेप्रार्थितंचुलुकमम्बुतत् ॥ तेनतन्मेमुखेक्षिप्तंततोऽहंदेहमत्यजम् ॥ २० ॥
प्राणप्रयाणकालेतुवारितत्सर्वकामदम् ॥ श्रुत्वेतिवाञ्छितवतीमहिषीस्यामितिप्रभो ॥ २१ ॥ तस्यतीर्थाम्भसोराजन्प्रसादात्त्वगृहेश्वरी ॥ जाता
हंसत्कुलाचारशीलाशीलपयोनिधेः ॥ २२ ॥ साम्प्रतंद्रष्टुमिच्छामिशक्रप्रस्थगतंनृप ॥ प्रयागंतीर्थराजंतंभवतासहकामदम् ॥ २३ ॥ प्रस्थास्ये
ऽहंयदाराजन्तीर्थराजंप्रतिप्रभो ॥ तदाहमन्नंभोक्ष्यामिमयेतिविहितः पणः ॥ २४ ॥ राजोवाच ॥ कथमेतद्विजानीयांत्वदुक्तंचललोचने ॥ प्रतीतंकुरु
मेभद्रेत्वदुक्तंकरवाण्यहम् ॥ २५ ॥ नारदउवाच ॥ इत्युक्तेतेनभूपेनखेवागित्यभवत्तदा ॥ २६ ॥ आकाशवाग्उवाच ॥ सत्यमुक्तंवचोराजन्ननयातव
भार्यया ॥ इन्द्रप्रस्थेगतेपुण्येप्रयागेतीर्थपुङ्गवे ॥ तत्रगत्वाकुरुस्नानंलप्स्यसेयद्यदिच्छसि ॥ २७ ॥ नारदउवाच ॥ निशम्येतिततोवाणींनृपो
गगनसंभवाम् ॥ दण्डवत्पतितोभूमौतद्दिक्तारंनमाम्यहम् ॥ २८ ॥ अथमन्त्रिणमाहूयराज्यमारोप्यतत्रवै ॥ तयासहसमारुह्यरथंतीर्थवरंययौ ॥ २९ ॥
कतिभिर्वासरैरत्रहेमाङ्ग्यासहचाययौ ॥ उपजह्नेतीर्थराजक्षीरंभार्यायुतोनृपः ॥ ३० ॥ सस्नतुस्तौशिवेतीर्थेदम्पतीतत्रकामदे ॥ प्रयागस्नानपुण्येन
वैकुण्ठप्राप्तिरस्त्विति ॥ ३१ ॥ प्रतीच्छयास्नातमात्रेमिथुनेतत्रभूपते ॥ आगतौसुरशार्दूलौहंसपक्षीन्द्रवाहनौ ॥ ३२ ॥ आगतौतौसमालोक्यवीरव
र्मासभूपतिः ॥ प्रणम्यशिरसादेवौतुष्टावैकाग्रमानसः ॥ ३३ ॥ राजोवाच ॥ नमोवांसुरशार्दूलौबिभ्रद्भ्यामसितारुणे ॥ वपुषीक्षौमवासांसिहेम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सिन्दूरभानिच ॥ ३४ ॥ वन्देयुवांसत्त्वरजःप्रधानौचराचरस्यस्थितिसर्गहेतू ॥ वैकुण्ठसत्याद्भुतलोकनाथौचतुर्द्विबाहूखगराजवाहौ ॥ ३५ ॥
वैराग्यसंरागवतांजनानांसन्मुक्तिभुक्तिप्रतिपादकौच ॥ वृन्दारकैर्वन्दितपादपद्मौसद्भावनम्रेणनमामिमूर्ध्ना ॥ ३६ ॥ गोविन्दवृन्दारकवन्द्यपाद
नकोऽपिजानातितवस्वरूपम् ॥ यतःपरस्त्वंप्रकृतेश्चपुंसोमनोवचोभ्यामपिदूरवर्ती ॥ ३७ ॥ धन्यःसलोकेपुरुषःपरात्मन्योविश्वमेतत्क्षणिकं
विचिन्त्य ॥ अनन्यचेताभजतित्वदीयपादारविन्दंमुनिवृन्दवन्द्यम्॥३८॥त्वत्पादसेवनंनामतीर्थमेतच्चदुर्लभम् ॥ जनानांभजमानानांवाञ्छितार्थफ
लप्रदम् ॥ ३९ ॥ तथाप्येतद्द्वयंसेव्यंमुक्तयेनान्यलब्धये ॥ अन्यकामनयायस्तुसेवतेसतुवञ्चितः ॥ ४० ॥ सन्तोभवन्तमासेव्यतीर्थमेतच्चमुक्ति
दम् ॥ नान्यमिच्छन्त्यतिक्रम्यसर्वलोकाञ्जिगीषवः ॥ ४१ ॥ नारदउवाच ॥ इत्यभिष्टूयदेवेशंलोकेशंसचभूपतिः ॥ तस्थौयदातदाराजन्हेमाङ्गी
साजगादह ॥ ४२ ॥ हेमाङ्ग्युवाच ॥ पद्मापतेपद्मपलाशलोचनब्रह्मन्मरालासनभारतीगुरो ॥ नमोयुवाभ्यांयदिदीनचेतसेप्रसीदतंतारयतं
भवाब्धेः ॥ ४३ ॥ तीर्थस्यास्यप्रसादेनजाताहंमहिषीप्रभो ॥ युवयोर्दर्शनंजातंदेवानामपिदुर्लभम् ॥ ४४ ॥ युवामखिलचित्तज्ञौदत्तंनौमानसेप्सि
तम् ॥ स्नानकालेयदावाभ्यांविहितंपारमार्थिकम् ॥ ४५ ॥ एवंताभ्यामुभाभ्यांतौसंस्तुतौदेवपुङ्गवौ ॥ प्रसन्नवदनौभूत्वाप्रोचतुर्दम्पतीप्रति ॥४६ ॥
हरिब्रह्माणावूचतुः ॥ धन्यात्वमसिहेमाङ्गियतोऽयंतारितःपतिः ॥ त्वयाराज्यसुखासक्तचित्तोऽप्येतत्समागमात् ॥ ४७ ॥ राज्ञांविषयसक्तानां
दुर्लभामुक्तिरीदृशी ॥ त्वद्भर्तुर्याद‍ृशीजातातीर्थस्यास्यप्रसादतः ॥ ४८ ॥ नारदउवाच ॥ इत्युक्त्वातौसमारुह्यगरुडंहंसमेवच ॥ जग्मतुस्तौसुर
श्रेष्ठौसत्यलोकंनरेश्वर ॥ ४९ ॥ तत्रतेब्रह्मणासर्वेपूजितावििधिवन्नृप ॥ तस्यचित्तानुरोधेनतस्थुरेकंमुहूर्तकम् ॥ ५० ॥ अथताभ्यामुभाभ्यांस
दम्पतिभ्यांसमंहरिः ॥ आरुह्यगरुडंश्रीमद्वैकुण्ठमगमन्नृप ॥ ५१ ॥ इत्येतत्कथितंतुभ्यंतीर्थराजस्यवैभवम् ॥ पुण्यंसमस्तपापघ्नंयशस्यंसुतदंनृप
॥ ५२ ॥ यएतच्छृणुयान्नित्यंपठेदपिचमानवः ॥ सगच्छेद्वाञ्छितंस्थानंसत्यमेतन्मयोदितम् ॥ ५३ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०उत्तर०
इन्द्रप्रस्थमाहात्म्येप्रयागवर्णनंनामैकविंशत्यधिकद्विशततमोऽध्यायः ॥ २२१ ॥ नारदउवाच ॥ आकर्णयशिबिराजन्वर्णयामितवाग्रतः ॥ पुण्यं
यशस्यमायुष्यंकाश्यामाहात्म्यमुत्तमम् ॥ १ ॥ इन्द्रप्रस्थतटस्थायांकश्यामेकस्तुपादपः ॥ शिंशपाख्योभवेद्राजन्पुरापुण्ययुगेकृते ॥ २ ॥
तत्रैकोवायसोह्यासीत्कृतनीडोवनस्पतौ ॥ तस्याधस्तान्महासर्पःकोटरेवसतिस्मह ॥ ३ ॥ एकदातस्यकाकस्यभार्याण्डद्वयमालये ॥ प्रतिमुच्य
गताकापिननीडेस्वेसमागता ॥ ४ ॥ स्वयमेवसकाकस्तुपालयन्नण्डकद्वयम् ॥ तामेवशिंशपामुच्चैरध्यतिष्ठन्महीपते ॥ ५ ॥ अथैकदानिशीथेतु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महावात्यासमागता ॥ अभनक्छिंशपांराजन्मूलादपिदृढामपि ॥ ६ ॥ वात्ययापात्यमानायाशिंशपायास्तदातले ॥ चूर्णितौकाकसर्पौतौगतप्राणौ
बभूवतुः ॥ ७॥ दिव्याङ्गास्तेत्रयोभूत्वाशिंशपावायसादयः ॥ विमानत्रयमारूढाजग्मुःश्रीपतिकेतनम् ॥ ८॥ शिबिरुवाच ॥ देवर्षेकेनपुण्येनप्राप्तातै
र्मुक्तिदापुरी ॥ आसंस्तेकेत्रयःपूर्वंसर्वंकथयनारद ॥ ९ ॥ नारदउवाच ॥ कुरुजाङ्गलदेशीयोब्राह्मणःश्रवणाभिधः ॥ तस्यभार्याकुण्डानामभ्राता
भूच्चकुरण्टकः ॥ १० ॥ अस्नातभोक्तानित्यंसकेवलोमिष्टभुग्रहः ॥ श्रवणस्तेनदोषेणबभूवग्रामवायसः ॥ ११ ॥ कुरण्टकस्तुतद्भ्रातानास्तिको
ऽभवदुल्वणः ॥ श्रुतिस्मृतिपथोच्छेत्तादेवतानांचनिन्दकः ॥ १२ ॥ तेनदोषेणसमृतोह्यभवत्कालकुण्डली ॥ साकुण्डाश्रवणस्यस्त्रीबभूवोभयदोष
भाक् ॥ १३ ॥ अतःसास्थावरत्वंहिलब्ध्वासीदुभयाश्रया ॥ एतत्तेकथितंभूपतद्वृत्तंपूर्वजन्मनि ॥ १४ ॥ अतःपरंप्रवक्ष्यामितेषांपुण्यंयतस्त्रयः ॥
प्रापुस्तेनपुरींरम्यांकाशींवैश्वेश्वरींनृप ॥ १५ ॥ ग्रामान्तरादेकदातौप्रत्यायातौनिजालयम् ॥ कस्यचित्पथिकस्याथकूपमग्नांपयस्विनीम् ॥ १६ ॥
अवलोक्यतदुद्धारंचक्रतुस्तेननोदितौ ॥ ताभ्यांगदितमाकर्ण्यकुण्डासाध्वित्यभाषत ॥ १७ ॥ तेत्रयस्तेनपुण्येनमरणंप्राप्यदुर्लभम् ॥ इन्द्रप्रस्थ
तटस्थायांकाश्यांवैकुण्ठमारुहन् ॥ १८ ॥ इयंकाशीमहेशस्यपुरीयद्यपिभूपते ॥ तथाप्यस्यांमृतोजन्तुर्वैकुण्ठेस्यात्सुखीहरेः ॥ १९ ॥ एतत्ते
कथितंराजन्काश्यामाहात्म्यमुत्तमम् ॥ किमन्यच्छ्रोतुमिच्छातेविद्यतेतद्वदस्वमे ॥ २० ॥ शिबिरुवाच ॥ मुनेत्वयामहेशस्यक्षेत्रत्रयमुदीरितम्॥
काशीचशिवकाञ्चीचगोकर्णंचतथापरम् ॥ २१ ॥ एकस्यामहिमाप्रोक्तस्त्वयाकाश्यामहामुने ॥ गोकर्णशिवकाञ्च्योश्चकथ्यतांयदिविद्यते ॥
॥ २२ ॥ नारदउवाच ॥ गोकर्णकेवलंशैवंक्षेत्रंपरमपावनम् ॥ तस्मिन्मृतोनरोराजञ्छिवःस्यान्नात्रसंशयः ॥ २३ ॥ स्थलेजलेऽन्तरिक्षेच
जन्तुस्तत्रम्रियेतचेत् ॥ तदाकैलासशिखरेशिवःसंभूयदीव्यति ॥ २४ ॥ अत्रगोकर्णतीर्थेस्यान्मृतस्यनपुनर्भवः ॥ शिवेनससमंराजन्मुक्तिंया
स्यतिकर्हिचित ॥ २५ ॥ अस्यापितवमाहात्म्यंगोकर्णस्यमहामते ॥ वर्णयामियदाकर्णिमयाब्रह्ममुखात्प्रभो ॥ २६ ॥ प्रयागादेकगव्यूतौ
गुरुतीर्थसमीपगः ॥ मर्यादापर्वतोयोऽयंदृश्यतेपुण्यदर्शनः ॥ २७ ॥ तत्रैकःकर्कटोनामभिल्लआसीत्सुदारुणः ॥ तस्यभार्याजरानामसाजघ्नेपति
पञ्चकम् ॥ २८ ॥ साजराविषसंयुक्तंषष्ठंकर्कटकंतदा ॥ अकरोन्मोदकंहन्तुंतदातेनस्वसुःश्रुतम् ॥ २९ ॥ निजायामुखतोराजन्भिल्लेनचमहा
त्मना ॥ बालांतांहन्तुमारेभेकर्कटोभृशदारुणः ॥३० ॥ खड्गपाणिर्यदायातितद्वधायसभिल्लपः ॥ यावत्तावत्तसापापाज्ञात्वानिजवधोद्यमम् ॥३१ ॥
वनमभ्यद्रवद्भीतानिजप्राणपरीप्सया॥तामनुद्रवतातेनर्कर्कटेनमहीपते ॥३२॥ अत्रगोकर्णतीर्थेतुगृहीताखड्गपाणिना॥शिरश्छित्त्वातुखड्गेनपातयित्वाज

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लेवपुः ॥३३॥ तस्यगोकर्णतीर्थस्यनिजस्थानमगाच्चसः ॥ साजरातत्रगोकर्णेपापापिनिधनंगता ॥३४॥ कैलासशिखरेराजन्पार्वत्याअभवत्सखी ॥ अहंकथितवानेतत्तवगोकर्णवैभवम् ॥३५॥शिवकाञ्च्याश्चमाहात्म्यंपवित्रंवर्णयामिते ॥ इन्द्रप्रस्थतटस्थायांशिवकाञ्च्यामपिप्रभो ॥३६॥ गतिःसा परमापुंसांगोकर्णेयामयोदिता ॥ अत्रश्रीमन्महादेवोविष्णुंसर्वसुरेश्वरम् ॥ ३७ ॥ आराध्यभक्तराजत्वंलेभेज्ञानंचतात्त्विकम् ॥ अतःसर्वेवयंपुत्रा ब्रह्मणस्तंमहेश्वरम् ॥ ३८ ॥ आराधयामःसततंसद्भक्तिज्ञानलिप्सया ॥ अत्रबाणासुरोराजन्नाराराधमहेश्वरम्॥३९॥निराहारोवर्षशतंतद्गणत्वबुभूषया ॥ तस्मैप्रसन्नोभगवान्गणत्वंदत्तवान्निजम् ॥ ४० ॥ स्वयंचसर्वदातस्यपुरपालोबभूवह ॥ इयंपुरीपुराराजन्नासीद्विष्णोर्महात्मनः ॥ ४१ ॥ दत्ता शिवायतुष्टेनतपसातस्यविष्णुना ॥ अस्यामेकंपुरावृत्तंमहदाश्चर्यकारकम् ॥ ४२ ॥ विप्रस्यशिवभक्तस्यवैकुण्ठात्तिर्यथाभवत् ॥ एकस्तुब्राह्मणो राजन्हेरम्बोनामधार्मिकः ॥४३॥ कायेनमनसावाचाशिवपूजारतःसदा ॥ एकदासमहाभागःशिवतीर्थानिपर्यटन् ॥ ४४॥ शिवभक्तःशिबेराजञ्छिव काञ्च्यामिहागतः ॥एनांमनोहरांचैवनतत्याजसबुद्धिमान्॥४५॥ पश्चात्तत्रैवतत्याजप्राणानस्याजलान्तरे ॥ तत्रैवश्रीमहादेवगणास्तंब्राह्मणोत्तमम्॥ ॥ ४६ ॥ नीत्वाकैलासमचलंचेलुस्तदनुशासनात् ॥ अथमध्येसमायातागणावैकुण्ठतोहरेः ॥ ४७ ॥ तेभ्योबलात्समादातुंतंद्विजश्रेष्ठमुद्यताः ॥ आसीत्तेषांमहद्युद्धंगणानांहरिशवयोः ॥ ४८ ॥ तत्रयुद्धेनवैकेषांविजयोनपराजयः॥ तत्रवैकुण्ठतोविष्णुरागतोगरुडासनः ॥४९॥ कैलासाद्वृषभारूढो महेशश्चत्रिलोकधृत् ॥ तावन्योन्यंमुखंदृष्ट्वाविहस्यजगदीश्वरौ ॥ ५० ॥ पश्यतःस्ममहद्युद्धंनभस्येवंगणैःकृतम् ॥ अथस्वीयान्गणान्विष्णुःशैवांश्च दिवियुद्धतः ॥ ५१ ॥ निवार्यतंद्विजंतार्क्ष्यमारोप्यागाच्छिवालयम् ॥ शिवेनतद्गणैश्चापिस्वकीयैरपिमाधवः ॥५२॥ वृतोगच्छन्पथिश्रीमान्स्तुतस्त्रिद शवन्दितः ॥गत्वाविवेशतंचागंमहादेवपुरःसरः ॥ ५३ ॥ तस्मैद्विजायवैतस्यदर्शयन्रमणीयताम् ॥ अथतस्मात्तुकैलासान्महादेवेनवन्दितः॥५४॥ माधवःपरयाभक्त्यावैकुण्ठमगमत्तदा ॥ द्विजःसोऽपिमहाभागस्तीर्थस्यास्यप्रसादतः ॥ ५५ ॥ गोविन्ददर्शनंप्राप्यमुमुदेहरसन्निधौ ॥एतत्तेकथितं राजञ्छिवकाञ्च्यास्तुवैभवम् ॥ ५६ ॥ तीर्थसप्तकनाम्नस्तुशृणुष्वसुसमाहितः ॥ तीर्थमेतन्महाराजचतुर्वर्गफलप्रदम् ॥ ५७॥ दर्शनात्स्पर्शनाद्ध्या नात्स्मरणादपिभूपते ॥ वसिष्ठादिभिरेतस्मिन्महर्षिभिरनुष्ठितम् ॥ ५८ ॥ महत्तपस्तुसृष्ट्यर्थंतत्रासंस्तुक्षमानृप ॥ मरीचिरपिधर्मात्मापुत्रार्थंस्नान माचरन् ॥ ५९ ॥ अत्रलेभेमहाभागःकश्यपंसुतमुत्तमम् ॥ अत्रिरत्रापितपसातोषयद्देवपुङ्गवान् ॥ ६० ॥ सोमंदुर्वाससंदत्तंतेभ्योलेभेसुतत्रयम् ॥ अङ्गिराअपिधर्मात्मातीर्थस्यास्यप्रसादतः ॥ ६१ ॥ लेभेसुतांस्तुतद्वंश्याजाताआङ्गिरसाद्विजाः ॥ पुलहोऽपिसुतंलेभेदम्भोलिंगुणवत्तरम् ॥ ६२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योऽगस्त्योऽभूत्पुराराजंस्तीर्थेऽत्रैव निमज्जनात्॥ पुलस्त्यस्यात्रतीर्थैवैपुत्रोलब्धस्तपस्यतः ॥६३॥ कुबेरोऽभून्महाभागोयःसखासीदुमापतेः ॥ क्रतोर
पिसुताजातावालखिल्याःसहस्रशः ॥ ६४ ॥ तीर्थस्यास्यप्रसादेनतेसर्वेह्यूर्ध्वरेतसः ॥ रजआदीन्सुताँल्लेभेवसिष्ठोऽपिमहातपाः ॥ ६५ ॥ सत्रैवराज
शार्दूलमहिमातस्यवर्णितः ॥ अन्यान्यपिचतीर्थानिसन्त्यनेकानिभूपत ॥ ६६ ॥ कपिलाश्रमकेदारप्रभासादीनिवैप्रभो ॥ नियुतैरपिवर्षाणांतेषांच
महिमानृप ॥ अनन्तेनापिनोवक्तुंशक्यतेकिमुमादृशैः ॥ ६७ ॥ सौभरिरुवाच ॥ एवमुक्त्वामुनिश्रेष्ठोनारदोमुनिपुङ्गवः ॥ शिबिंजगामनभसोनारा
यणगुणान्गृणन् ॥ ६८ ॥ शिबिरौशीनरोराजाशक्रप्रस्थस्यवैभवम् ॥श्रुत्वामुनिमुखाद्राजन्कृतार्थंस्वममन्यत ॥ ६९ ॥तत्रस्नात्वाहिविधिवदिन्द्र
प्रस्थेसभूपतिः ॥ विधायसत्क्रियाःसर्वाजगामनिजपत्तनम् ॥ ७० ॥ इन्द्रप्रस्थस्यमाहात्म्यमेतत्तवमयाविभो ॥ यमुनातीरतीर्थस्यवर्णितंजन
पावनम् ॥ ७१ ॥ नास्यादरंकरिष्यन्तिकलौश्रद्धाविवर्जिताः॥ इन्द्रप्रस्थस्यराजेन्द्रसर्वतीर्थशिरोमणेः॥७२॥अष्टादशपुराणानांश्रवणाद्भारतस्यच ॥
यत्फलंतन्महिम्नोऽस्यशक्रप्रस्थस्यजायते ॥ ७३ ॥ अरुणोदयवेलायांमाघलक्षैकमज्जनात् ॥ यत्फलंतन्महिम्नोऽस्यश्रवणाच्छ्रद्धयाभवेत्॥७४॥
श्रद्धयास्यतुमाहात्म्यंयःशृणोतिमहीपते ॥ तर्पितास्तेनपितरोदेवाश्चमुनयस्तथा ॥७५॥ कृच्छ्रातिकृच्छ्रपाराकचान्द्रायणव्रतादिभिः ॥ यत्फलंतन्म
हिम्नोऽस्यश्रद्धयाश्रवणाद्भवेत ॥ ७६ ॥ अश्वमेधादियज्ञानांसमस्तानांमहीपते ॥ यत्फलंतन्महिम्नोऽस्यश्रद्धयाश्रवणाद्भवेत् ॥ ७७ ॥ सूतउवाच ॥
एवंयुधिष्ठिरोराजाश्रुत्वाशौनकसौभरेः ॥ इन्द्रप्रस्थस्यमाहात्म्यंसययौहस्तिनंपुरम् ॥७८॥ ततोविनीयसद्भ्रातन्दुर्योधनपुरःसरान् ॥ इन्द्रप्रस्थमगा
त्पुण्यंराजसूयचिकीर्षया ॥७९॥द्वारकायाःसमायातंगोविन्दंकुलदैवतम्॥ राजसूयेनयज्ञेनसइयाजमहीपतिः ॥८०॥मुक्तिदंतीर्थमेतत्तुशपतोऽस्याप्य
जायत ॥ इतिमत्वाहरिस्तत्रशिशुपालंजघानह ॥८१॥ शिशुपालोऽपितस्यैवतीर्थस्यमरणाद्भुवि ॥सायुज्यमगमत्कृष्णेनिखिलार्थप्रदायके ॥ ८२ ॥
शिशुपालोहतोयत्रविहितोयत्रचक्रतुः ॥ गदयातत्रभीमेनकृतंकुण्डंसुविस्तरम् ॥ ८३ ॥ भीमकुण्डंतुविज्ञातंजातंतद्भुविपावनम् ॥ कालिन्द्या
दक्षिणेभागेगव्यूत्यर्धमहीतले ॥ ८४॥ इन्द्रप्रस्थगतायायत्कालिन्द्याःस्नानतःफलम् ॥ तत्फलंतत्रकुण्डेतुजायतेनात्रसंशयः ॥ ८५ ॥ सूतउवाच ॥
यस्मिन्क्षेत्रेस्थितोजन्तुस्तंक्षेत्रमनुवत्सरम् ॥ प्रदक्षिणादिभिर्धर्मैःस्वापराधान्क्षमापयेत् ॥८६॥ प्रतिसंवत्सरंचैवपरिक्रामतियोनरः ॥ क्षेत्रापराधदोषै
श्चनसलिप्येत्पातकैः॥८७॥प्रदक्षिणमकुर्वाणःक्षेत्रसिद्धिंनविन्दति॥ तस्मात्प्रदक्षिणातीर्थेदातव्याचफलार्थिभिः॥८८॥ हरेर्नामानिसंजल्पन्प्रकरोतिप्रद
क्षिणाम्॥पदेपदेसलभतेकपिलादानजंफलम्॥८९॥चैत्रकृष्णचतुर्दश्यांशक्रप्रस्थप्रदक्षिणाम् ॥यःकरोतिनरोधन्यःसर्वपापैःप्रमुच्यते॥९०॥इतिश्रीपाद्मे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महापु०पञ्चप०उ०कालिन्दीमाहात्म्यइन्द्रप्रस्थगतकाशीगोकणशिवकाञ्चीतीर्थसप्तकभीमकुण्डवर्णनंनामद्वाविंशत्यधिकद्विशततमोऽध्यायः॥२२२॥
॥शौनकउवाच ॥ सूतसूतमहाभागधन्योऽसित्वंभवाम्बुधौ ॥ यन्नोऽत्यर्थंनिमग्नानांपाययस्यमृतोत्करम् ॥ १ ॥ साधोऽत्रभवनिस्तारंवाञ्छतां
नःसमादिश ॥ मन्त्ररत्नंभावशुद्धंयन्मयंसचराचरम् ॥ २ ॥ सूतउवाच ॥ शृणुशौनकवक्ष्यामिमन्त्ररत्नंमहाद्भुतम् ॥ यद्दिलीपायगदितंवसिष्ठेनमहा
त्मना ॥ ३ ॥ एकदातुदिलीपेनपृष्टमेतद्गुरुंप्रति ॥ वसिष्ठंद्विजशार्दूलंप्रणिपत्ययथात्वया ॥ ४ ॥ दिलीपउवाच ॥ भगवन्भवताप्रोक्तास्सर्वे
धर्माविशेषतः ॥ वर्णाश्रमयुताधर्मानित्यनैमित्तिकाश्रये ॥ ५ ॥ राजधर्माश्चयज्ञाश्चतीर्थदानव्रतादिकम् ॥ श्रुतामयामुनिश्रेष्ठअक्षय्यस्वर्ग
भोगदाः ॥ ६ ॥ अधुनाश्रोतुमिच्छामिमोक्षमार्गंसनातनम् ॥ दिष्ट्याहंयेनगच्छामितद्ब्रह्मन्वक्तुमर्हसि ॥ ७ ॥ कोमन्त्रःसर्वमन्त्राणांभवरोगै
कभेषजम् ॥ सर्वेषामेवदेवानांकोहिमोक्षप्रदःपरः ॥ ८ ॥ तत्समाख्याहितत्त्वेनमयिवात्सल्यगौरवात् ॥ ९ ॥ वसिष्ठउवाच ॥ साधुपृष्टंत्वया
राजन्सर्वलोकहितैषिणा ॥ वक्ष्यामिपरमंगुह्यमेकंसंसारतारकम् ॥ १० ॥ पुरामहर्षयःसर्वेयज्ञदानपराःशुभाः ॥ पप्रच्छुर्ब्रह्मणःपुत्रंनारदंमुनि
सत्तमम् ॥ ११ ॥ महर्षयऊचुः ॥ भगवन्केनमन्त्रेणगच्छामःपरमंपदम् ॥ तन्नोब्रूहिमहाभागप्रसादंकर्तुमर्हसि ॥ १२ ॥ नारदउवाच ॥ पितामहं
पुरासर्वेयोगिनःसनकादयः ॥ पप्रच्छुरेकमेकान्तेमोक्षमार्गंसुदुर्लभम् ॥ १३ ॥ ब्रह्मोवाच ॥ शृणुध्वंयोगिनःसर्वेरहस्यमिदमद्भुतम् ॥ नजानन्ति
सुराःसर्वऋषयश्चतपोधनाः ॥१४॥ सर्गादौप्रोक्तवान्देवोमह्यंनारायणोऽव्ययः ॥ ईश्वर्यासहदेव्याचसम्यक्संपूजितोमया ॥१५॥ ततःप्रसन्नोभगवा
न्ममनारायणोऽव्ययः ॥ प्राजापत्यंददौमह्यंश्रुतिजंसर्ववाङ्मयम् ॥ १६॥ स्वप्रकाशानिमन्त्राणिव्यापकाव्यापकानिच ॥ ततस्तमब्रवंदेवंपुराणपुरुषो
त्तमम् ॥ १७ ॥ भगवन्केनमन्त्रेणसंसारोत्तारणंनृणाम् ॥ तन्ममाचक्ष्वतत्त्वेनसवलोकहितायवै ॥१८॥कोमन्त्रःसर्वमन्त्राणांपुरश्चरणवर्जितः ॥सकृदु
च्चारणान्नृणांददातिपरमंपदम् ॥ १९ ॥ श्रीभगवानुवाच ॥ साधुपृष्टंमहाभागसर्वलोकहितैषिणा ॥ तस्माद्वक्ष्यामितेगुह्यंयेनमामाप्नुयुर्नराः ॥ २० ॥
सर्वेषामेवमन्त्राणांमन्त्ररत्नंशुभावहम् ॥ सकृत्स्मरणमात्रेणददातिपरमंपदम् ॥ २१ ॥ मन्त्ररत्नंद्वयंन्यासंप्रपत्तिःशरणागतिः ॥ लक्ष्मीनारायणमिति
मन्त्रःसर्वफलप्रदः ॥२२॥ नामानिमन्त्ररत्नस्यपर्यायेणनिबोधमे ॥ङ्कृतस्योच्चारणमात्रेणपरितुष्टोऽस्मिनित्यशः ॥२३ ॥ कुलजोवातपस्वीवावेदवेदाङ्ग
पारगः॥यज्ञदानपरोवापिसर्वतीर्थोपसेवकः॥ २४॥ व्रतीवासत्यवादीवायतिर्वाज्ञानवानपि ॥ मन्त्राधिकारीनभवेत्तंप्रयत्नेनवर्जयेत् ॥२५॥ ब्राह्मणाः
क्षत्रियावैश्यास्त्रियःशूद्रास्तथेतरे ॥ तस्याधिकारिणःसर्वेममभक्तास्तुतेयदि ॥ २६ ॥ अनन्यशरणानांचतथैवानन्यसेविनाम् ॥ अनन्यसाधकानांच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वक्तव्योमन्त्रउत्तमः ॥ २७ ॥ आर्तानामाशुफलदस्सकृदेवकृतोह्यसौ ॥ दृप्तानामपिजन्तूनांदेहान्तरनिवारणः ॥ २८ ॥ आर्तोजिज्ञासुरर्थार्थीज्ञानी
वापिप्रजापते ॥ सकृन्मांशरणंयातिततःकामानवाप्नुयात् ॥ २९ ॥ नादीक्षितायवक्तव्यंनाभक्तायचमानिने ॥ नास्तिकायनलुब्धायनश्रद्धा
विमुखायच ॥ ३० ॥ नचाशुश्रूषवेवाच्यंनासंवत्सरवासिने ॥ कामक्रोधविमुक्तस्तुदम्भलोभविवर्जितः ॥ ३१ ॥ मांचयोऽव्यभिचारेण
भक्तियोगेनसेवते ॥ वक्तव्यंतस्यविधिवन्मन्त्ररत्नमनुत्तमम् ॥ ३२ ॥ देशकालादिनियमानारिमित्रादिशोधनम् ॥ न्यासमुद्रादिकंतस्यपुर
श्चरणसंयुतम् ॥ ३३ ॥ मच्चक्राङ्कितदेहत्वंमदीयाराधनंतथा ॥ मयिसंन्यस्तकर्मत्वंमदनन्यशरण्यता ॥ ३४ ॥ मयिसर्वफलन्यासोमहा
विश्वासपूर्वकम् ॥ अनन्यसाधनेत्वंचाप्याकिंचन्यंतथात्मनः ॥ ३५ ॥ अवैष्णवानांसंभाषावन्दनादिविवर्जनम् ॥ अनन्यदेवतानांचवन्दनं
पूजनंतथा ॥ ३६ ॥ एवमाद्याश्चनियमाःप्रपन्नस्यप्रकीर्तिताः ॥ इत्यादिगुणयुक्तायवक्तव्यंमन्त्रमुत्तमम् ॥ ३७ ॥ तस्यनारायणश्चाहमृषि
र्विष्णुःसनातनः ॥ देवताचश्रियासार्द्धमहंवात्सल्यसागरः ॥ ३८ ॥ सर्वलोकेश्वरःश्रीमान्सुशीलःसुलभस्तथा ॥ सर्वज्ञःसर्वशक्तिश्चसदापूर्ण
मनोरथः ॥ ३९ ॥ सर्वगःसर्वबन्धुश्चकृपापीयूषसागरः ॥ श्रीमान्नारायणश्चाहंदेवतासमुदाहृतः ॥ ४० ॥ छन्दस्तुदेवीगायत्रीपञ्चविंशाक्षरा
त्मिका ॥ द्विसप्तत्रित्रित्रिपञ्चद्विषडङ्गानियोजयेत् ॥ ४१ ॥ लक्ष्म्यामदनपायिन्यामांध्यायेद्विश्वरूपिणम् ॥ शङ्खचक्रगदापद्मपाणिकंदिव्यभूषणम्
॥ ४२ ॥ वामाङ्कस्थश्रियासार्द्धंपूजयेत्प्रयतःशुचिः ॥ अनेनमन्त्ररत्नेनगन्धपुष्पनिवेदनैः॥४३॥सकृत्संपूज्यमानोऽपिसंतुष्टोऽस्मिप्रजापते ॥ ४४ ॥
ब्रह्मोवाच ॥ सम्यगुक्तंत्वयानाथरहस्यमिदमुत्तमम् ॥ मन्त्ररत्नप्रभावश्चसर्वसिद्धिप्रदोनृणाम् ॥ ४५ ॥ पितात्वंसर्वलोकानांमातात्वंगुरु
रेवच ॥ त्वंचस्वामीसखाभ्रातागतिस्त्वंशरणंसुहृत् ॥ ४६ ॥ अहंतुतवदेवेशदासश्शिष्यस्तथासुतः ॥ तस्मान्ममदयासिन्धोप्रोक्तवानि
दमुत्तमम् ॥ ४७ ॥ अधुनामन्त्ररत्नस्यदीक्षांसम्यग्विधानतः ॥ ब्रूहिसर्वत्रतत्त्वेनलोकानांहितकाम्यया ॥ ४८ ॥ श्रीभगवानुवाच ॥ शृणुवत्स
प्रवक्ष्यामिमन्त्रदीक्षाविधिपरम् ॥ आचार्यंसंश्रयेत्पूर्वंमदाश्रयणसिद्धये ॥ ४९ ॥ आचार्योवेदसंपन्नोविष्णुभक्तोविमत्सरः ॥ मन्त्रज्ञोमन्त्रभक्तश्चसदा
मन्त्राश्रयःशुचिः ॥ ५० ॥ सत्संप्रदायसंयुक्तोब्रह्मविद्याविशारदः ॥ अनन्यसाधनश्चैवतथानन्यप्रयोजनः ॥ ५१ ॥ ब्राह्मणोवीतरागश्चक्रोधलोभ
विवर्जितः ॥ सद्वृत्तौशासिताचैवमुमुक्षुःपरमार्थवित् ॥५२॥ एवमादिगुणोपेतआचार्यःसर्वदासुहृत् ॥ आचाराञ्छासयेद्यस्तुसआचार्यइतीरितः ॥
॥ ५३ ॥ यस्त्वाचार्यपराधीनस्सद्वृत्तौशास्यतेयदि ॥ शासनेस्थिरवृत्तिश्चशिष्यःसद्भिरुदाहृतः ॥ ५४ ॥ एवंलक्षणसंयुक्तंशिष्यंसर्वगुणान्वितम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अध्यापयेद्विधानेनमन्त्ररत्नमनुत्तमम् ॥ ५५ ॥ द्वादश्यांश्रवणेवापिकर्हिचिद्वैष्णवेदिने ॥ सदाचार्योपसंप्रीतेतत्रदीक्षांसमाचरेत् ॥ ५६ ॥ सुदर्शनं पाञ्चजन्यंसुवर्णेनप्रकारयेत् ॥ रौप्येणवापिताम्रेणकांस्येनापिप्रकारयेत्॥५७॥स्नाप्यपञ्चामृतैःशुद्धैरर्चयेत्पुरतोमम ॥ तुलसीगन्धपुष्पाद्यैस्तन्मन्त्रेण विधानतः ॥ ५८ ॥ तत्रसंस्थापयेदग्निंस्वगृह्योक्तविधानतः ॥ आचार्योजुहुयादाज्यंमन्त्रेणाथद्विजोत्तमः ॥ ५९ ॥ अष्टोत्तरसहस्रंवाशतमष्टोत्तरंतुवा ॥ जुहुयान्मन्त्ररत्नेनतथान्यैर्वैष्णवैःशुभैः ॥ ६० ॥ मन्त्रैःपुरुषसूक्ताद्यैर्जुहुयाद्घृतपायसम् ॥ तस्मिन्नग्नौक्षिपेच्चक्रंशङ्खंचद्विजसत्तमः ॥६१ ॥ षडक्षरेणजुहुयादाज्यंविंशतिसङ्ख्यया॥ प्रतप्तंचक्रमादायमन्त्रेणैवाङ्कयेद्गुरुः ॥६२॥ शङ्खेनचाङ्कनंकुर्याद्बाह्वोर्दक्षिणसव्ययोः॥होमशेषंसमाप्याथपुनःपूजांसमाचरेत् ॥ ६३ ॥ ततःकलशमादायपवित्रोदकपूरितम् ॥ मन्त्रेणैवाभिमन्त्र्याथतस्यमूर्ध्न्यभिषेचयेत् ॥ ६४ ॥ सितवस्त्रधरंसम्यगाचान्तं विनयान्वितम् ॥ ऊर्द्ध्वपुण्ड्रधरंशिष्यंमन्त्रमध्यापयेद्गुरुः ॥ ६५ ॥ मन्त्रार्थश्चप्रवक्तव्योवृत्तिश्चैवविशेषतः ॥ लब्धमन्त्रस्तदाचार्यंपूजयेद्भूषणादिभिः ॥ ६६ ॥ अनेनविधिनामन्त्रंयोऽधीतेवैष्णवाद्गुरोः ॥ ततःसवैष्णवंयातिनान्यथासुरसत्तम ॥६७ ॥ नारदउवच ॥ एवमुक्त्वाविधातारंदेवदेवोहरिःपिता ॥ स्वचक्रेणाङ्कयित्वातुतस्मैमन्त्रंददौस्वयम् ॥६८ ॥ सर्वलोकेश्वरोदेवोब्रह्माममपिताप्रभुः ॥ ममापिविधिवन्मन्त्रंसददौमुनिसत्तमाः ॥ ६९ ॥ तस्माद्यूयंमुनिश्रेष्ठाधारयित्वासुदर्शनम् ॥ नारायणपदद्वन्द्वंगच्छध्वंशरणंद्विजाः ॥ ७० ॥ वसिष्ठउवाच ॥ इत्युक्तामुनयःसर्वेनारदेनसुरर्षिणा ॥ द्वयाधिकारिणःसर्वेयाताविष्णोःपरंपदम् ॥ ७१ ॥ तस्मात्त्वमपिचद्राजन्विष्णुसायुज्यमिच्छसि ॥ दीक्षामार्गविधानेनधारयित्वासुदर्शनम् ॥ ७२॥ नारायणपदद्वन्द्वंतदेकंशरणंव्रज ॥ सर्वलोकेश्वरःसाक्षाद्ब्रह्मात्रिभुवनेश्वरः ॥ ७३ ॥ ममापिनारदस्यापिप्रोक्तवान्मन्त्रमुत्तमम् ॥ शौनकादिमहर्षीणां नैमिषारण्यवासिनाम्॥७४॥नारदःप्रददौमन्त्रंप्रपत्तिशरणागतिम् ॥ एतद्गुह्यतमंराजन्नजानन्तिमहर्षयः ॥ ७५ ॥ देवताश्चनजानन्तिसिद्धाःसाध्याश्चदानवाः ॥ मयापिप्रापितोमन्त्रंशक्तिपुत्रःपराशरः ॥७६ ॥ इदंरहस्यंपरमंलक्ष्मीनारायणंद्वयम् ॥ राजंस्तवापिवक्ष्यामिप्रपत्तिशरणागतिम् ॥ ७७ ॥ द्वयात्परतरंमन्त्रंनास्तिसत्यंब्रवीमिते ॥ अस्मात्परतरंधर्मंनास्तिलोकेषुकिंचन ॥ ७८ ॥ सत्यंसत्यंपुनःसत्यंब्रह्मणाकथितंपुरा ॥ नारायणात्परोदेवोनास्तिमुक्तिप्रदोनृणाम् ॥ ७९ ॥ तत्सेवयाभवेन्मोक्षःसर्वकर्मनिकृन्तनः ॥८० ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप० उत्तर० वसिष्ठदिलीपसंवादेविद्योपदेशोनामत्रयोविंशत्यधिकद्विशततमोऽध्यायः ॥ २२३ ॥ दिलीपउवाच ॥ भगवन्सर्वमाचक्ष्वहरिभक्तिसुधामयम् ॥ शृण्वतोनैवतृप्तिर्मेविष्णुभक्तिसुखावहाम् ॥ १ ॥ तापत्रयमहाज्वालावह्निभिःसततंनृणाम् ॥ संतप्तानांमुनिश्रेष्ठविष्णुभक्तिसुधार्णवम् ॥ २ ॥ विनाकिमन्यच्छरणंभवारण्येभयानके ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आचक्ष्वविस्तरेणाथभक्तिभेदान्महामुने ॥ उपास्यमानान्सततंमुनिभिःपरमात्मनः ॥३॥ वसिष्ठउवच ॥ साधुपृच्छसिराजेन्द्रसंसारोत्तारणंनृणाम्॥
वैकुण्ठस्यपरेशस्यभक्तिंनित्यसुखावहाम् ॥ ४ ॥ इममेवमहाप्रश्नंकैलासशिखरेपुरा ॥ पप्रच्छगिरिजादेवीशङ्करंलोकपूजितम् ॥ ५ ॥
पार्वत्युवाच ॥ देवदेवमहादेवत्रिपुरघ्नसुरेश्वर॥ विष्णुभक्तिंममाचक्ष्वमुक्तिदांसर्वदेहिनाम् ॥ ६ ॥ उपास्यभेदान्मन्त्रांश्चतत्तत्पूजाविधींस्तथा ॥ तस्य
विष्णोःस्वरूपंचतद्विभूतिगुणादिकम् ॥७॥तस्यलोकस्वरूपंचयंप्राप्यननिवर्तते ॥सर्गस्थितिलयंयेनकरोतिभगवान्हरिः ॥ ८ ॥ यद्गत्वाननिवर्तन्ते
तद्धामपरमंहरेः ॥ येनकेनचकृत्येनसाधनेनपरंपदम् ॥ ९ ॥ प्राप्नुवन्तिनराःपापाविषयासक्तचेतसः ॥ विस्तरेणमयिप्रीत्याब्रूहिसर्वमशेषतः ॥
॥ १० ॥ वसिष्ठउवाच ॥ इतिपृष्टोमहादेव्याहरस्त्रिपुरहातदा ॥ उवाचपरमप्रीत्यानमस्कृत्यजनार्दनम् ॥ ११ ॥ रुद्रउवाच ॥ साधुसाधुमहादेविसर्व
लोकहितैषिणि ॥ साधुपृच्छसिमांदेविश्रीशमाहात्म्यमुत्तमम् ॥ १२ ॥ धन्यासिकृतपुण्यासिविष्णुभक्तासिपार्वति ॥ परितुष्टोऽस्मितेभद्रेशीलरू
पगुणैःसदा ॥ १३ ॥ अथवक्ष्यामिगिरिजेभगवद्भक्तिमुत्तमाम् ॥ तन्मन्त्राणांविधानंचस्वरूपंतस्यशार्ङ्गिणः ॥ १४ ॥ तत्त्वंनारायणोविष्णुर्वासुदेव
स्सनातनः ॥ परमात्मापरंब्रह्मपरंज्योतिःपरात्परः ॥ १५ ॥ अच्युतःपुरुषःकृष्णःशाश्वतःशिवईश्वरः ॥ नित्यःसर्वगतःस्थाणूरुद्रस्साक्षीप्रजापतिः ॥
॥ १६ ॥ यज्ञोयज्ञपतिःसाक्षाद्ब्रह्मणःपतिरेवच ॥ हिरण्यगर्भःसवितालोककृल्लोकभृद्विभुः ॥ १७ ॥ अकारवाच्योभगवाञ्छ्रीभूनीलापतिःप्रभुः ॥
उतामृतत्वस्येशानोयदन्नेनातिरोहति ॥ १८ ॥ सहस्रमूर्द्धाविश्वात्मासहस्राक्षःसहस्रपात् ॥ सभूमिंसर्वतःस्पृत्वाह्यत्यतिष्ठद्दशाङ्गुलम् ॥१९॥ अनन्तः
श्रीपतीरामोगुणभृन्निर्गुणोमहान् ॥ सर्वलोकेश्वरःश्रीमान्सर्वज्ञःसर्वतोमुखः ॥ २० ॥ तस्यलोकप्रधानस्यजगन्नाथस्यपार्वति ॥ माहात्म्यंवासुदेवस्य
यच्छक्यंतद्ब्रवीमिते ॥ २१ ॥ अशक्यंतन्मयावक्तुंब्रह्मणासहदैवतैः ॥ सर्वोपनिषदामर्थैर्वेदान्तेपरिनिश्चितम् ॥ २२ ॥ तस्योपासनभेदांश्चशृणुवच्मि
पुनःपृथक् ॥ आद्यंतुवैष्णवंप्रोक्तंशङ्खचक्राङ्कनंहरेः ॥ २३ ॥ धारणंचोर्द्ध्वपुण्ड्राणांतन्मन्त्राणांपरिग्रहः ॥ अर्चनंचजपोध्यानंतन्नामस्मरणंतथा ॥२४॥
कीर्तनंश्रवणंचैववन्दनंपादसेवनम् ॥ तत्पादोदकसेवाचतन्निवेदितभोजनम् ॥ २५ ॥ तदीयानांचसेवाचद्वादशीव्रतनिष्ठता ॥ तुलसीरोपणंविष्णोर्देव
देवस्यशार्ङ्गिणः ॥२६ ॥ भक्तिःषोडशधाप्रोक्ताभवबन्धविमुक्तये॥सर्वेषामेवदेवानांममापिपुरुषोत्तमः ॥२७॥ पूजनीयोहरिर्नित्यंब्राह्मणानांविशेषतः॥
तस्मात्तुब्राह्मणोनित्यंविधिवत्पूजयेद्धरिम् ॥ २८ ॥ तच्चिह्नैरङ्कितःश्रीशपदंप्राप्नोत्यसंशयम् ॥ शङ्खचक्राङ्कनंकुर्याद्ब्राह्मणोबाहुमूलयोः ॥ २९ ॥
हुताग्निनैवसंतप्यसर्वपापापनुत्तये ॥ चक्रंवाशङ्खचक्रेवातथापञ्चयुधानिवा ॥ ३० ॥ धारयित्वैवविधिवद्ब्रह्मकर्मसमारभेत् ॥ अग्नितप्तंपवित्रंचधृत्वावै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भुजमूलयोः ॥३१॥ त्यक्त्वायमपुरंघोरंयातिविष्णोःपरंपदम् ॥ चक्रचिह्नविहीनस्तुयःपूजयतिकेशवम् ॥३२॥ तत्सर्वंविफलंयातिपूजामन्त्रजपादि
कम् ॥ अग्नितप्तेनचक्रेणब्राह्मणोबाहुमूलयोः ॥ ३३ ॥ अङ्कयित्वाजपन्मन्त्रंसंसारान्मोक्षमाप्नुयात् ॥ सुदर्शनंधारयित्वावह्नितप्तंद्विजोत्तमः ॥ ३४ ॥
तपनीयविधानेनपश्चात्कर्मसुयोजयेत् ॥ विष्णुचक्रविहीनंतुयःश्राद्धेभोजयिष्यति ॥ ३५ ॥ व्यर्थंभवतितत्सर्वंनिराशाःपितरोगताः ॥ विष्णु
चक्राङ्कितंविप्रंपूजयेच्छ्राद्धकर्मणि ॥ ३६ ॥ विष्णुचक्रविहीनंतुप्रयत्नेनविवर्जयेत् ॥ दद्याद्गोभूहिरण्यादिचक्राङ्कितभुजायवै ॥ ३७ ॥ यद्दत्तंचक्र
हीनायतत्सर्वमसुरायवै ॥ अग्नितप्तेनचक्रेणबाहुमूलेतुलाञ्छिताः ॥ ३८ ॥ सर्वपापविनिर्मुक्तायान्तिविष्णोःपरंपदम् ॥ हुताग्नितप्तचक्रेणशरीरं
यस्यचिह्नितम् ॥ ३९ ॥ तस्यतीर्थानियज्ञाश्चसंप्राप्तानात्रसंशयः ॥ अधृत्वाविधिनाचक्रंब्राह्मणःप्राकृतोभवेत् ॥ ४० ॥ नतस्यकिंचिदश्नीयादपि
क्रतुसहस्रिणः ॥ अधृत्वाविधिनाचक्रंब्राह्मणोज्ञानदुर्लभः ॥ ४१ ॥ गर्हितस्सर्वलोकेषुब्राह्मण्यात्प्रच्युतोभवेत् ॥ शङ्खचक्रधरोदेवोहरिःपूज्योयथा
त्मभिः ॥ ४२ ॥ तथैवसर्वैस्संपूज्योविप्रश्चक्रादिचिह्नितः ॥ सर्ववेदविदोवापिसर्वशास्त्रविशारदः ॥ ४३ ॥ अधृत्वाविधिनाचक्रंब्राह्मणःपतितो
भवेत् ॥ ऊर्द्ध्वपुण्ड्रविहीनस्तुशङ्खचक्रविवर्जितः ॥ ४४ ॥ तंगर्दभेसमारोप्यबहिःकुर्यात्स्वपत्तनात् ॥ प्रकृतिस्पर्शरहितोवासुदेवोजनार्दनः ॥४५॥
तथैवब्राह्मणोदेविविष्णुचक्रेणचिह्नितः ॥ तस्मात्प्रकृतिसंसर्गपापौघदहनंहरेः ॥ ४६ ॥ प्रतप्तंबिभृयाच्चक्रंशङ्खंचभुजमूलयोः ॥ स्त्रीशूद्राणांसदाधार्यं
चन्दनेनसुगन्धिना ॥ ४७ ॥ बाहुमूलेलिखेच्चक्रंतप्तंतुब्राह्मणस्यवै ॥ तप्तेनैवाङ्कनंकुर्याद्ब्राह्मणस्यविधानतः ॥ ४८ ॥ श्रौतस्मार्त्तादिसिद्ध्यर्थं
मन्त्रसिद्ध्यैतथैवच ॥ हरेःपूजाधिकारार्थंचक्रंधार्यंविधानतः ॥ ४९ ॥ वैष्णवत्वस्यसिद्ध्यर्थंज्ञानसिद्ध्यर्थमेवच॥ प्रतपेच्चक्रशङ्खाभ्यांहुत्वाहोमंविधा
नतः ॥ ५० ॥ अन्यैर्नदाहयेद्गात्रंब्राह्मणोहरिलाञ्छनात् ॥ शङ्खचक्रगदाखड्गशार्ङ्गादन्यैर्हरेरपि ॥ ५१ ॥ लक्षणैर्नदहेद्देहंनान्यदग्धोऽर्हतिक्रियाम् ॥
अचक्रधारिणंविप्रंदूरतःपरिवर्जयेत् ॥ ५२ ॥ श्वपाकमिवनेक्षेतलोकेविप्रमवैष्णवम् ॥ वैष्णवोवर्णबाह्योऽपिपुनातिभुवनत्रयम् ॥ ५३ ॥ तस्मात्तु
विधिनाचक्रंधार्यंविप्रैःशुभानने ॥ ब्राह्मणामन्त्रसिद्ध्यैचज्ञानसिद्ध्यैचमुक्तये ॥५४॥ अप्राकृतामहात्मानोविष्णुचक्रेणलाञ्छिताः ॥ विष्णुचक्रविही
नास्तुब्राह्मणाःप्राकृताःस्मृताः ॥ ५५ ॥ सर्वाश्रमेषुवसतांब्राह्मणानांविशेषतः ॥ विधिनावैष्णवंचक्रंधार्यंहिश्रुतिनोदनात् ॥ ५६ ॥ दक्षिणेतु
भुजेविप्रोबिभृयाद्वैसुदर्शनम् ॥ सव्येतुशङ्खंबिभृयादितिब्रह्मविदोविदुः ॥ ५७ ॥ एवंमहोपनिषदिप्रोक्तंचक्रादिधारणम् ॥ तथैवसाम्नियजुषि
ऋचिप्रोक्तंशुभानने ॥ ५८ ॥ अतप्ततनूर्नतदामोअश्नुतेशृतासइद्वहन्तस्तत्समाशत ॥ इत्यापस्तम्बशाखायाम्प्रोक्तंचक्रस्यधारणम् ॥ ५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतेविष्णोअब्जचक्रेपवित्रेजन्माम्भोधिंततंवेचर्षणीन्द्राः ॥ मूलेबाह्वोर्दधतेऽन्येपुराणालिङ्गान्यङ्गेतावकान्यर्पयन्ति ॥ ६० ॥ चरणंपवित्रं
विततंपुराणंवाङ्मयंशुभम् ॥ तेनचक्रेणसन्तप्तास्तरेयुःपातकाम्बुधिम् ॥ ६१ ॥ पवित्रंब्राह्मणस्पत्यंजगद्व्याप्तंहरेस्सदा ॥ तेनातप्तातनूर्येषांनते
यान्तिपरंपदम् ॥ ६२ ॥ तेनतप्तातनूर्येषांतेप्रयान्तिपरंपदम् ॥ पवित्रंचरणंनेमिःपविश्चक्रंसुदर्शनम् ॥ ६३ ॥ सहस्रारंप्राकृतघ्नंलोकद्वारंमहौज
सम् ॥ नामानिविष्णुचक्रस्यपर्यायेणनिबोधमे ॥ ६४ ॥ शुद्धेनवह्नितप्तेनब्रह्मतेनपुनीहिनः ॥ यत्तेपवित्रमर्चिष्मदग्नेतेनपुनीहिनः ॥६५ ॥ येनदेवाः
पवित्रेणआत्मानंपुनतेसदा ॥ तेनसहस्रधारेणपावमान्यःपुनन्तुमाम् ॥६६॥प्राजापत्यंपवित्रंतुशतोद्यामंहिरण्मयम्॥ वयंब्रह्मविदस्तेनपूतंब्रह्मपुनीमहे
॥ ६७ ॥सनेमिचक्रमजरंचक्षुरस्यमहात्मनः ॥ अस्मिन्हिविधृतेदेहेमहोन्नतपदंययौ ॥ ६८ ॥ तस्माद्वैविधिवद्धार्याःशङ्खचक्रादिहेतयः॥ ब्राह्मणानां
विशेषेणवैष्णवानांविशेषतः ॥ ६९ ॥ धृतोर्द्ध्वपुण्ड्रःकृतचक्रधारीविष्णुंपरंध्यायतियोमहात्मा ॥ स्वरेणमन्त्रेणसदाहृदिस्थंपरात्परंयातिविशुद्धचेताः
॥ ७० ॥ येकण्ठलग्नतुलसीनलिनाक्षमालायेबाहुमूलपरिचिह्नितशङ्खचक्राः ॥ येवाललाटफलकेलसदूर्ध्वपुण्ड्रास्तेवैष्णवाभुवनमाशुपवित्र
यन्ति ॥७१॥ दिवस्पतेःसुविततंपवित्रंयेतुदक्षिणे ॥ नवहन्तिभुजेसम्यङ्नहिशोचन्तिजन्तवः ॥ ७२ ॥ येवहन्तिभुजेचक्रंशङ्खंचविधिनाद्विजाः ॥
परंव्योम्नितुतेस्थानमधितिष्ठन्तितेजसा ॥७३॥ होमाग्निसंतप्तपवित्रलाञ्छितोमूलेतुबाह्वोःपरमात्मनोहरेः ॥ सतारयित्वाभवसागरंमहच्छुद्धंपरंयाति
परेशलोकम् ॥७४॥ अङ्कयेत्तप्तचक्राद्यैरात्मनोबाहुमूलयोः ॥ कलत्रापत्यभृत्येषुपश्वादिषुसमङ्कयेत् ॥७५॥ इत्येवंश्रुतयःसर्वाःकथयन्तिवरानने ॥
तथैवसेतिहासेषुपुराणेष्वपिकथ्यते ॥ ७६ ॥ द्विविधंवैष्णवंप्रोक्तंबाह्यमाभ्यन्तरंतथा ॥ शङ्खचक्रादिभिर्बाह्यमान्तरंवीतरागता ॥ ७७ ॥ बाह्या
भ्यन्तरसाम्यंयत्तद्वैष्णवमुदाहृतम् ॥ तस्माच्चक्रादिचिह्नंतुप्रथमंवैष्णवंस्मृतम् ॥ ७८ ॥ आन्तरंस्मरदोषादिविमुक्तंस्वात्मदर्शनम् ॥ सर्वभूतदयाशा
न्तिरिन्द्रियार्थेष्वलोलता॥ ७९ ॥ पुत्रदाराद्यसङ्गत्वंयोगाभ्यासरतिस्तथा ॥ अनन्यभक्तियोगेनपरेशस्याभिषेवणम् ॥ ८० ॥ तस्माच्चक्रादिहेतीना
मङ्कनंवैष्णवंस्मृतम्॥चक्रादिचिह्नहीनत्वाद्वैष्णवत्वंनलभ्यते ॥ ८१ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०उमामहेश्वरसंवादेसुदर्शनादिमाहात्म्यं
नामचतुर्विंशत्यधिकद्विशततमोऽध्यायः ॥ २२४ ॥ शङ्करउवाच ॥ ऊर्द्ध्वपुण्ड्रस्यमाहात्म्यंवक्ष्यामिशुभदर्शने ॥ धारणादेवमुच्येतभवबन्धाद्द्विजो
त्तमः ॥ १ ॥ ऊर्द्ध्वपुण्डस्यमध्येतुविशालेसुमनोहरे ॥ लक्ष्म्यासार्द्धंसमासीनोदेवदेवोजनार्दनः ॥ २ ॥ तस्माद्यस्यशरीरेतुऊर्द्ध्वपुण्ड्रंधृतंभवेत्॥
तस्यदेहंभगवतोविमलंमन्दिरंशुभम् ॥ ३ ॥ सस्नातःसर्वतीर्थेषुसर्वयज्ञेषुदीक्षितः ॥ धारयेदूर्ध्वपुण्ड्रंयामृदाशुभ्रेणवैष्णवः ॥ ४ ॥ ऊर्ध्वपुण्ड्रधरो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विप्रः सर्वलोकेषुपूजितः ॥ विमानवरमारुह्ययातिविष्णोःपरंपदम् ॥ ५ ॥ धारयेदूर्ध्वपुण्ड्रंतुत्रिसन्ध्यंतुद्विजोत्तमः ॥ सर्व पापविशुद्ध्यर्थमिष्टा पूर्तफलाप्तये ॥ ६ ॥ ऊर्द्ध्वपुण्ड्रधरंदृष्ट्वासर्वपापैःप्रमुच्यते ॥ नमस्कृत्वाथवाभक्त्यासर्वदानफलंलभेत् ॥ ७ ॥ ऊर्द्ध्वपुण्ड्रधरंविप्रंयः श्राद्धेभोजयिष्यति ॥ आकल्पकोटिपितरस्तस्यतृप्तानसंशयः ॥ ८ ॥ ऊर्द्ध्वपुण्ड्रधरोयस्तुकुर्याच्छ्राद्धंशुभानने ॥ कल्पकोटिसहस्राणि गयाश्राद्धफलंलभेत् ॥ ९ ॥ यज्ञदानतपश्चर्याजपहोमादिकंचयत् ॥ ऊर्द्ध्वपुण्ड्रधरःकुर्यात्तस्यपुण्यमनन्तकम् ॥ १० ॥ ऊर्द्ध्वपुण्ड्रविहीनस्तुकिंचित्कर्मकरोतियः ॥ इष्टापूर्तादिकंसर्वंनिष्फलंस्यान्नसंशयः ॥ ११ ॥ यच्छरीरंमनुष्याणामूर्ध्वपुण्ड्रविवर्जितम् ॥ द्रष्टव्यंनैवतत्किंचिच्छ्मशानसदृशं भवेत् ॥१२॥ ऊर्ध्वपुण्ड्रविहीनस्तुसन्ध्याकर्मादिकंचरेत् ॥ तत्सर्वंराक्षसैर्नीतंनरकंचाधिगच्छति ॥ १३ ॥ ऊर्ध्वपुण्ड्रधरोविप्रोमृदाशुभ्रेणवैदिकः ॥ नतिर्यग्धारयेद्विद्वानाप्यापिकदाचन ॥ १४ ॥ विप्राणामूर्ध्वपुण्ड्रंस्यात्तिलकंतुमहीभृतः ॥ पट्टाकारंतुवैश्यानांशूद्राणांवैत्रिपुण्ड्रकम् ॥१५ ॥ ऊर्ध्व पुण्ड्रंमृदाकार्यंकस्तूर्यातिलकंतथा ॥ पट्टाकारंतुगन्धेनभस्मनैवत्रिपुण्ड्रकम् ॥ १६ ॥ ऊर्ध्वपुण्ड्रंतुसर्वेषांननिषिद्धंकदाचन ॥ धारयेत्क्षत्रियाद्योऽपिविष्णुभक्तोभवेद्यदि ॥ १७ ॥ विप्राणांनैवकार्यंस्यात्तिर्यक्पट्टादिधारणम् ॥ नारायणात्परेशानादन्येषामर्चनंनतु ॥ १८ ॥ ब्राह्मणःकुलजोविद्वान्भस्मधारीभवेद्यदि ॥ वर्जयेत्तादृशंदेविमद्योच्छिष्टंघटंयथा ॥ १९ ॥ त्रिपुण्ड्रशूद्रकल्यानांशूद्राणांचविधीयते ॥ त्रिपुण्ड्रधारणाद्विप्रःपतितःस्यान्न संशयः ॥ २० ॥ एकान्तिनोमहाभागाःसर्वभूतहितेरताः ॥ सान्तरालंप्रकुर्वीरन्पुण्ड्रंहरिपदाकृतिम् ॥ २१ ॥ हरेःपादाकृतिंकुर्यादूर्ध्वपुण्ड्रंविधानतः ॥ मध्यच्छिद्रेणसंयुक्तंतद्विवैमन्दिरंहरे ॥ २२ ॥ ऊर्ध्वपुण्ड्रमृजुंसौम्यंसुपार्श्वंसुमनोहरम् ॥ दण्डाकारंसुशोभाढ्यंमध्येच्छिद्रंप्रकल्पयेत् ॥ २३ ॥ तस्माच्छिद्रान्वितंपुण्ड्रंदण्डाकारंसुशोभनम् ॥ विप्राणांसततंकार्यंस्त्रीणांचशुभदर्शने ॥ २४ ॥ ऊर्ध्वपुण्ड्रस्यमध्येतुविशालेसुमनोहरे ॥ सान्तराले समासीनोहरिरस्तिश्रियासह ॥ २५ ॥ निरन्तरालंयःकुर्यादूर्ध्वपुण्ड्रंद्विजाधमः ॥ सहितत्रस्थितंविष्णुंश्रियंचैवव्यपोहति ॥ २६ ॥ अच्छिद्रमूर्ध्वपुण्ड्रंतुयेकुर्वन्तिद्विजाधमाः ॥ तेषांललाटेसततंशुनःपादोनसंशयः ॥ २७ ॥ तस्माच्छिद्रान्वितंपुण्ड्रंसहरिद्रंशुभान्वितम् ॥ धारयेद्ब्राह्मणोनित्यं हरिसालोक्यसिद्धये ॥ २८ ॥ आदायपरयाभक्त्यावेङ्कटाद्रौह्रदेमृदम् ॥ धारयेदूर्ध्वपुण्ड्राणिहरिसायुज्यसिद्धये ॥ २९ ॥ श्रीकृष्णतुलसीमूलेमृदमादायभक्तिमान् ॥ धारयेदूर्ध्वपुण्ड्राणिहरिस्तत्रप्रसीदति ॥ ३० ॥ द्वारवत्यांशुभेरम्येवासुदेवह्रदेतथा॥तत्रोद्भवांमृदंरम्यामादायद्विजसत्तमः ॥३१॥ धारयेदूर्ध्वपुण्ड्राणिसर्वकामफलाप्तये ॥ आदायपरयाभक्त्यागङ्गातीरोद्भवांमृदम् ॥ ३२ ॥ तयाधृत्वोर्द्ध्वपुण्ड्राणिसर्वयज्ञफलंलभेत् ॥ चन्दनंचहरिद्रा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतथाभस्माग्निहोत्रजम् ॥ ३३ ॥ सर्ववश्यकरंप्रोक्तमूर्ध्वपुण्ड्रस्यधारणात् ॥ यत्रपुण्यंहरिक्षेत्रंतत्रवैमृदमाहरेत् ॥ ३४ ॥ सैवश्रेयोऽर्थिभिर्ग्राह्याचोर्ध्वपुण्ड्रस्यधारणे ॥ पर्वताग्रेनदीतीरेबिल्वमूलेजलाशये ॥ ३५ ॥ सिन्धुतीरेचवल्मीकेहरिक्षेत्रेविशेषतः ॥ विष्णोःस्नानोदकंयत्रप्रवाहयतिनित्यशः ॥ ॥ ३६ ॥ पुण्ड्राणांधारणार्थायगृह्णीयात्तत्रमृत्तिकाम् ॥ श्रीरङ्गेवेङ्कटाद्रौचश्रीकूर्मेद्वारकेशुभे ॥ ३७ ॥ प्रयागेनारसिंहाद्रौवाराहेतुलसीवने ॥ गृहीत्वा मृत्तिकांभक्त्याविष्णुपादजलैःसह ॥ ३८ ॥ धृत्वापुण्ड्राणिचाङ्गेषुविष्णुसायुज्यमाप्नुयात् ॥ यस्मिन्कस्मिन्महाभागावैष्णवाधारयन्तिवै ॥ ३९ ॥ तस्मिन्वैमृत्तिकाग्राह्याऊर्ध्वपुण्ड्रस्यधारणे ॥ श्यामंशान्तिकरंप्रोक्तंरक्तंवश्यकरंतथा ॥ ४० ॥ श्रीकरंपीतमित्याहुःश्वेतंमोक्षकरंशुभम् ॥ वर्तुलंतिर्यगछिद्रंह्रस्वंदीर्घंततंतनुम् ॥४१॥ वक्रंविरूपंबद्धाग्रछिन्नमूलंपदच्युतम् ॥ अशुभंरूक्षमासक्तंतथानङ्गुलिकल्पितम् ॥४२॥ विगन्धमपसव्यंचपुण्ड्रमाहुरनर्थकम् ॥ आरभ्यनासिकामूलंललाटान्तंलिखेन्मृदा ॥ ४३ ॥ समारभ्यभ्रुवोर्मध्यमन्तरालंप्रकल्पयेत् ॥ अन्तरालंद्व्यङ्गुलंस्यात्पार्श्वावङ्गुलिमात्रकौ ॥ ॥ ४४ ॥ मृदाशुभ्रेणविलिखेत्पुण्ड्रंत्वृजुतरंशुभम् ॥ ललाटेकेशवंध्यायेन्नारायणमथोदरे ॥ ४५ ॥ वक्षःस्थलेमाधवंचगोविन्दंकण्ठकूबरे ॥ विष्णुंचदक्षिणेकुक्षौबाहौचमधुसूदनम् ॥४६॥ त्रिविक्रमंकन्धरेतुवामनंवामपार्श्वके ॥ श्रीधरंबाहुकेवामेहृषीकेशंतुकन्धरे ॥ ४७ ॥ पृष्ठेवैपद्मनाभंतुत्रिकेदामोदरंन्यसेत् ॥ तत्प्रक्षालनतोयेनवासुदेवंतुमूर्द्धनि ॥ ४८ ॥ ललाटेभुजयुग्मेतुपृष्ठयोःकण्ठकूबरे ॥ धारयेदूर्ध्वपुण्ड्रंतुचतुरङ्गुलमात्रतः ॥४९॥ कुक्षौतत्पार्श्वयोःप्रोक्तमायतंतुदशाङ्गुलम् ॥ बाह्वोर्वक्षःस्थलेपुण्ड्रमष्टाङ्गुलमुदाहृतम् ॥५०॥ एवंद्वादशपुण्ड्राणिब्राह्मणःसततंधरेत् तत्तत्पुण्ड्रेतुतन्मूर्तीर्ध्यात्वामन्त्रेणधारयेत् ॥५१॥ अन्तरालेषुसर्वेषुहरिद्रांधारयेच्छ्रियम् ॥ चत्वारिभूभृतामाहुःपुण्ड्राणिद्वेविशांस्मृते ॥ ५२॥ एकपुण्ड्रंतुनारीणांशूद्राणांचविधीयते ॥ललाटेहृदिबाह्वोश्चचतुष्पुण्ड्राणिधारयेत ॥५३॥ ललाटेहृदयेद्वेतुफालेत्वेकंविधीयते ॥ ऊर्ध्वपुण्ड्रललाटेतुसर्वेषांप्रथमंस्मृतम् ॥५४॥ ललाटादिक्रमेणैवधारणंतुविधीयते ॥ मूर्तीस्तुवासुदेवाद्याश्चतुष्पुण्ड्रेषुधारयेत् ॥ ५५ ॥ द्वयोर्गोविन्दकृष्णौतुएकंनारायणंधरेत् ॥ एवंपुण्ड्रविधिःप्रोक्तःसर्वेषांगिरिजेमया ॥ ५६ ॥ अश्वत्थपत्रसंकाशोवेणुपत्राकृतिस्तथा ॥ पद्मकुड्मलसङ्काशोमोहनंत्रितयंस्मृतम् ॥५७॥ महाभागवतःशुद्धःपुण्ड्रंहरिपदाकृतिम् ॥ दण्डकारंतुवादेविधारयेदूर्ध्वपुण्ड्रकम् ॥५८॥ सुदर्शनेनाङ्कितबाहुमूलास्तथोर्ध्वपुण्ड्राङ्कितसर्वगात्राः ॥ मालारविन्दाक्षधराविशुद्धारक्षन्तिलोकान्दुरितौघसङ्घात् ॥ ५९ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप० उत्तर० उमामहेश्वरसंवादऊर्ध्वपुण्ड्रमाहात्म्यंनामपञ्चविंशत्यधिकद्विशततमोऽध्यायः ॥ २२५ ॥ शङ्करउवाच ॥ न्यासेवाप्यर्चनेवापिमन्त्रमेकान्तिनःश्रयेत् ॥ अवैष्णवोपदिष्टेनमन्त्रेणनपरागतिः ॥ १ ॥ अवैष्णवोपदिष्टंचेत्पूर्वं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मन्त्रवरंद्वयम् ॥ पुनश्चविधिनासम्यग्वैष्णवाद्ग्राहयेद्गुरोः ॥ २ ॥ सहस्रशाखाध्यायीवासर्वयज्ञेषुदीक्षितः ॥ कुलेमहतिजातोऽपिनगुरुः
स्यादवैष्णवः ॥ ३ ॥ यस्तुमन्त्रद्वयंसम्यगध्यापयतिवैष्णवः ॥ सआचार्यस्तुविज्ञेयोभवबन्धविदारकः ॥ ४ ॥ आचार्यसंश्रयित्वा
थवत्सरंसेवयेद्द्विजः ॥ तस्यवृत्तिपरिज्ञात्वामन्त्रमध्यापयेद्गुरुः ॥ ५ ॥ कृत्वातापादिसंस्कारान्पश्चान्मन्त्रमुदीरयेत् ॥ तापंपुण्ड्रं
तथानामकृत्वावैविधिनागुरुः ॥ ६ ॥ पश्चादध्यापयेन्मन्त्रंशिष्यंनिर्मलचेतसम् ॥ चक्रेणविधिनातप्तंतापइत्यभिधीयते ॥ ७ ॥ पुण्ड्रमूर्ध्वंतथा
प्रोक्तंनामवैष्णवमुच्यते ॥ ततोमन्त्रविधानेनशिष्यमध्यापयेद्गुरुः ॥ ८ ॥ न्यासमष्टाक्षरंमन्त्रमन्यंवावैष्णवंमनुम् ॥ न्यासमेवात्रपरमं
वैष्णवानांशुभानने ॥ ९ ॥ तस्मात्तुन्यासमेवैषामतिरिक्तमिहोच्यते ॥ न्यासविद्यापरोयस्तुब्राह्मणःश्रेष्ठउच्यते ॥ १० ॥ न्यासात्पर
तरंनास्तिमन्त्रेसत्यंब्रवीमिते ॥ न्यासंद्वयंप्रपत्तिःस्यात्पर्यायेणनिबोधमे ॥ ११ ॥ द्वयोपदेशपूर्वतुसर्वकर्मसमाचरेत् ॥ द्वयाधिकारी
नभवेत्सर्वकर्मसुनार्हति ॥ १२ ॥ तस्माद्द्वयमधीत्यैवपश्चान्मन्त्रमनुत्तमम् ॥ श्रीमदष्टाक्षरंसम्यगभ्यसेद्द्विजसत्तमः ॥ १३ ॥ मन्त्रमष्टाक्षरं
प्रोक्तंप्रणवस्यैवसंग्रहात् ॥ नैसर्गप्रणवाद्यंतुमन्त्रमित्युच्यतेबुधैः ॥ १४ ॥ नान्यत्रसर्वमन्त्रेषुप्रणवःस्वस्वभावतः ॥ पूर्वंतुसर्वमन्त्राणांयोजयेत्प्र
णवंशुभम्॥१५॥ ॐकारःप्रणवंब्रह्मसर्वमन्त्रेषुनायकः ॥ आदौसर्वत्रयुञ्जीतमन्त्राणांतुशुभानने ॥ १६ ॥ स्वभावात्प्रणवस्तस्मिन्मूलमन्त्रेप्रतिष्ठितः॥
ओमित्येकाक्षरंपूर्वंद्व्यक्षरंनमइत्यथ ॥ १७ ॥ ततोनारायणायेतिपञ्चार्णानियथाक्रमम् ॥ एवमष्टाक्षरोमन्त्रोज्ञेयःसर्वार्थसाधकः ॥ १८ ॥ सर्वदुःखहरः
श्रीमान्सर्वमन्त्रात्मकःशुभः ॥ ऋषिर्नारायणस्तस्यदेवताश्रीशएवच ॥१९॥ छन्दस्तुदेवीगायत्रीप्रणवोबीजमुच्यते ॥ नित्यानपायिनीदेवीशक्तिःश्री
रुच्यतेमनोः ॥ २० ॥ प्रथमंपदमोङ्कारोद्वितीयंनमउच्यते ॥ तृतीयंनारायणायेतिपदत्रयमुदाहृतम् ॥ २१ ॥ अकारश्चाप्युकारश्चमकारश्चततः
परम् ॥ वेदत्रयात्मकंप्रोक्तंप्रणवंब्रह्मणःपदम् ॥ २२ ॥ अकारेणोच्यतेविष्णुःश्रीरुकारेणचोच्यते ॥ मकारस्त्वनयोर्दासःपञ्चविंशःप्रकीर्तितः
॥ २३ ॥ वासुदेवस्वरूपंतदकारेणोच्यतेबुधैः ॥ उकारेणश्रियोदेव्यारूपंमुनिभिरुच्यते ॥ २४ ॥ मकारेणोच्यतेजीवःपञ्चविंशोदितःपुमान् ॥
भूतानिचवर्गेणचवर्गेणेन्द्रियाणिच ॥ २५ ॥ टवर्गेणतवर्गेणज्ञानगन्धादयस्तथा ॥ मनःपकारेणैवोक्तंफकारेणत्वहंकृतिः ॥ २६ ॥ बकारेणभ
कारेणमहान्प्रकृतिरुच्यते ॥ आत्मातुसमकारेणपञ्चविंशःप्रकीर्तितः ॥ २७ ॥ देहेन्द्रियमनःप्राणधीभ्योऽन्योऽनन्यसाधनः ॥ भगवच्छेषभूतो
ऽसौमकाराख्यःसंचेतनः ॥ २८ ॥ अवधारणवच्येवमुकारःकैश्चिदुच्यते ॥ श्रीतत्त्वमपितत्पक्षेवकारेणैवचोच्यते ॥ २९ ॥ भास्करस्यप्रभायद्वत्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्यनित्यानपायिनी ॥ अकारेणोच्यतेविष्णुःकल्याणगुणसागरः ॥ ३० ॥ श्रीशःसर्वात्मनांशेपीजगद्बीजंपरःपुमान् ॥ जगत्कर्त्ताजगद्भर्त्ताईश्वरो
लोकबान्धवः ॥ ३१ ॥ जगतामीश्वरीनित्याविष्णोरनपगामिनी ॥ मातासर्वस्यजगतःपत्नीविष्णोर्मनोरमा ॥ ३२ ॥ जगदाधारभूताश्रीरुकारेणा
त्रचोच्यते ॥ मकारेणतयोर्दासःक्षेत्रज्ञःप्रोच्यतेबुधैः ॥ ३३ ॥ ज्ञानाश्रयोज्ञानगुणश्चेतनःप्रकृतेःपरः ॥ नजडोनिर्विकारश्चएकरूपस्वरूपभाक्
॥ ३४ ॥ अणुर्नित्योव्याप्तिशीलश्चिदानन्दात्मकस्तथा ॥ अहमर्थोऽव्ययःक्षेत्रीभिन्नरूपःसनातनः ॥ ३५ ॥ अदाह्योऽच्छेद्योह्यक्लेद्यस्त्व
शोष्योऽक्षरएवच ॥ एवमादिगुणोपेतश्शेषभूतःपरस्यवै ॥ ३६ ॥ मकारेणोच्यतेजीवःक्षेत्रज्ञःपरवान्सदा ॥ दासभूतोहरेरेवनान्यस्यतुकदाचन
॥ ३७ ॥ एवंदासत्वमेवास्यमध्यमेनावधार्यते ॥ इत्येवंप्रणवस्यार्थोज्ञातव्योक्तोमयानघे ॥ ३८ ॥ विवृतिःप्रणवस्यार्थमन्त्रशेषेणवैशुभे ॥ परस्य
दासभूतस्यस्वातन्त्र्यंनेहविद्यते ॥ ३९ ॥ तस्मान्ममत्वाहङ्कारौनमसाविनिवर्त्तयेत् ॥ स्वोपायबुद्ध्यायत्कृत्यंतदपिप्रतिषिध्यते ॥ ४० ॥अहङ्कृति
र्मकारःस्यान्नकारस्तन्निषेधकः ॥ तस्मात्तुनमसैवास्यअहङ्कारविमोचनम्॥४१॥नमसासर्वसिद्धिःस्यादन्यथानाशमाप्नुयात् ॥ नमसाहितंकिंचित्तदह
ङ्कारउच्यते ॥४२॥ अहङ्कारेणयुक्तस्यसुखंकिंचिन्नविद्यते ॥ अहङ्कारविमूढात्माअन्धेतमसिमज्जति ॥४३॥ तस्मात्तुनमसाचात्रस्वातन्त्र्यंप्रतिषिध्यते॥
भगवत्परतन्त्रोऽसौतदायत्तश्चजीवति ॥ ४४ ॥ तस्मात्साधनकर्तृत्वंचेतनस्यनविद्यते ॥ ईश्वरस्यैवसंकल्पाद्वर्त्ततेसचराचरम् ॥ ४५ ॥ तस्मात्स्व
सामर्थ्यविधिंत्यजेत्सर्वमशेषतः ॥ ईश्वरस्यतुसामर्थ्यान्नालभ्यंतस्यविद्यते ॥४६॥ तस्मिन्न्यस्तभरःश्रीशेतत्कर्मैवसमाचरेत् ॥ परमात्माहरिस्स्वामी
स्वमहंतस्यसर्वदा ॥ ४७ ॥ इच्छयाविनियोक्तव्यस्तस्यैवात्मेश्वरस्यहि ॥ इत्येवंनमसाप्रोक्तश्चार्थस्तुममतोर्जितः ॥ ४८ ॥ देहेष्वहंमतिर्मूलं
संसृतौकर्मबन्धने ॥ तस्मान्ममत्वाहङ्कारौनमसावर्जयेद्बुधः ॥४९॥ अथनारायणपदंवक्ष्यामिगिरिजेशुभे॥ नाराइत्यात्मनांसङ्घास्तेषांगतिरसौपुमान्
॥५०॥ तएवचायनंतस्यतस्मान्नारायणःस्मृतः॥सर्वंहिचिदचिद्वस्तुश्रूयतेदृश्यतेजगत् ॥५१॥ योऽसौव्याप्यस्थितोनित्यंसवैनारायणःस्मृतः॥ नारा
श्चेतिसर्वपुंसांसमूहाःपरिकीर्तिताः ॥५२॥ गतिरालम्बनंतेषांतस्मान्नारायणःस्मृतः ॥ नराज्जातानितत्त्वानिनाराणीतिविदुर्बुधाः॥५३॥ तान्येवचायनं
तस्यतेननारायणस्स्मृतः ॥ कल्पान्तेऽपिजगत्कृत्स्नंग्रसित्वायेनधार्यते॥५४॥ पुनःसंसृज्यतेयेनसवैनारायणःस्मृतः ॥ चराचरंजगत्कृत्स्नंनारइत्यभि
धीयते ॥५५॥ तस्यवासद्गतिर्येनतेननारायणःस्मृतः ॥ नारोनराणांसङ्घातस्तस्यासावयनंगतिः ॥ ५६ ॥ तेनासौमुनिभिर्नित्यंनारायणइतीरितः ॥
प्रभवन्तियतोलोकामहाब्धौपृथुफेनवत् ॥५७॥ पुनर्यस्मिन्प्रलीयन्तेतस्मान्नारायणःस्मृतः ॥ योवैनित्यपदेनित्योनित्यमुक्तैकभोगवान् ॥५८॥ईशः

CC-0. In Public Domain. Digitization by eGangotri

सर्वस्यजगतःस्वैनारायणःस्मृतः॥नारायणःपरंब्रह्मतत्त्वंनारायणःपरम्॥५९॥यच्चाकिंचिज्जगत्यस्मिन्दृश्यतेश्रूयतेऽपिवा ॥ अन्तर्बहिश्चतत्सर्वंव्याप्य
नारायणःस्थितः॥६०॥अपहतपाप्मापुरुषःसर्वभूतान्तरस्थितः॥दिव्यएकस्सदानित्योहरिर्नारायणोऽच्युतः ॥६१॥ यस्तुद्रष्टाचद्रष्टव्यंश्रोताश्रोतव्य
मेवच ॥ स्प्रष्टाचस्पर्शितव्यंचध्याताध्यातव्यमेवच॥६२॥वक्ताचवाच्यंज्ञाताचज्ञातव्यंचिदचिज्जगत् ॥ तच्चसर्वंहरिःश्रीशोनारायणउदाहृतः॥ ६३ ॥
सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात ॥ सलोकान्सर्वतोव्याप्यअत्यतिष्ठद्दशाङ्गुलम् ॥ ६४ ॥ यद्भूतंयच्चभव्यंतत्सर्वंनारायणोहरिः ॥ उतामृतत्वस्ये
शानोयदन्नेनातिरोहति ॥ ६५ ॥ सएवपुरुषोविष्णुर्वासुदेवोऽच्युतोहरिः ॥ हिरण्मयोऽथभगवानमृतःशाश्वतःशिवः ॥ ६६ ॥ पतिर्विश्वस्यजगतः
सर्वलोकेश्वरःप्रभुः ॥ हिरण्यगर्भःसविताअनन्तोऽसौमहेश्वरः ॥ ६७ ॥ भगवानितिशब्दोऽयंतथापुरुषइत्यपि ॥ वर्त्तन्तेनिरुपाधीचवासुदेवेऽखि
लात्मनि ॥ ६८ ॥ ईश्वरोभगवान्विष्णुःपरमात्माजगत्सुहृत् ॥ शास्ताचराचरस्यैकोयतीनांपरमागतिः ॥६९॥ योवेदादौस्वरःप्रोक्तोवेदान्तेचप्रति
ष्ठितः ॥ तस्यप्रकृतिलीनस्ययःपरःसमहेश्वरः ॥ ७० ॥ योऽसावकारोवैविष्णुर्योऽसौनारायणोहरिः ॥ सएषपुरुषोनित्यःपरमात्मामहेश्वरः ॥
॥ ७१ ॥ तस्यांशभूतमैश्वर्यंयस्मिन्कस्मिश्चवर्तते ॥ तस्मिन्नीश्वरशब्दोऽपिप्रोच्यतेमुनिभिस्तथा ॥ ७२ ॥ निरुपाधीश्वरत्वंहिवासुदेवेप्रति
ष्ठितम् ॥ आत्मेश्वरइतिप्रोक्तोवेदवादैःसनातनैः ॥ ७३ ॥ तस्मान्महेश्वरत्वंतुवासुदेवेप्रतिष्ठितम् ॥ असौत्रिपाद्विभूतेस्तुलीलायाअपिचेश्वरः॥
॥ ७४ ॥ विभूतिद्वयमैश्वर्यंतस्यैवसकलात्मनः ॥ श्रीभूनीलापतिर्योऽसावीश्वरस्सउदाहृतः ॥ ७५ ॥ तस्मात्सर्वेश्वरत्वंतुवासुदेवेप्रतिष्ठितम् ॥
असौयज्ञेश्वरोयज्ञोयज्ञभुग्यज्ञकृद्विभुः ॥ यज्ञभृद्यज्ञपुरुषःसएवपरमेश्वरः ॥ ७६ ॥ यज्ञेश्वरोहव्यसमस्तकव्यभोक्ताव्ययात्माहरिरीश्वरोऽत्र ॥
तत्संनिधानादपयान्तिसद्योरक्षांस्यशेषाण्यसुराश्चसर्वे ॥ ७७ ॥ योऽसौविराट्त्वमापन्नोहरिर्भूत्याजनार्दनः ॥ संतर्पयतिलोकांस्त्रीन्सएवपरमेश्वरः ॥
॥ ७८ ॥ यत्पुरुषेणहविषादेवायज्ञमतन्वत ॥ तस्माद्यज्ञात्समुत्पन्नायेकेचोभयादतः ॥ ७९ ॥ तस्माद्यज्ञात्सर्वहुतऋचःसामानिजज्ञिरे ॥
तस्मादश्वाअजायन्तगावश्चपुरुषादयः ॥ ८० ॥ पुरुषस्यतनोरस्यसर्वयज्ञमयस्यवै ॥ हरेःसर्वंसमुद्भूतंजगत्स्थावरजङ्गमम् ॥ ८१ ॥ मुख
बाहूरुपादाःस्युस्तस्यवर्णायथाक्रमम् ॥ पद्भ्यांतुपृथिवीतस्यशिरसोद्यौरजायत ॥ ८२ ॥ मनसश्चन्द्रमाजातश्चक्षुषश्चप्रभाकरः ॥ मुखा
दग्निःसहस्राक्षोवायुःप्राणात्सदागतिः ॥ ८३ ॥ नाभेर्विरिञ्चिर्गगनंजगत्सर्वंचराचरम् ॥ यस्मात्सर्वंसमुद्भूतंजगद्विष्णोःसनातनात् ॥
॥ ८४ ॥ तस्मात्सर्वमयोविष्णुर्नारायणइतीरितः ॥ एवंसृष्ट्वाजगत्सर्वंपुनःसंग्रसतेहरिः ॥ ८५ ॥ निजलीलासमुद्भूतंतान्तवर्चोर्णनाभिवत् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्माणमिन्द्रंरुद्रंचयमंवरुणमेवच ॥ ८६ ॥ निगृह्यहरतेयस्मात्तस्माद्धरिरिहोच्यते ॥ असावेकार्णवीभूतेमायावटतलेपुमान् ॥ ८७ ॥ जगत्स्वज
ठरेकृत्वाशेतेतस्मिन्सनातनः ॥ आसीदेकोहिवैचात्रविष्णुर्नारायणोऽच्युतः ॥ ८८ ॥ नब्रह्मानचरुद्रश्चनदेवानमहर्षयः ॥ नेमेद्यावापृथिव्यौचन
सोमोनचभास्करः ॥ ८९ ॥ ननक्षत्राणिलोकाश्चनचाण्डंमहदावृतम् ॥ यस्माज्जगद्भूतंतेनसकलंहरिणाशुभे ॥ ९० ॥ सृष्टंपुनस्तथासर्गेतस्मा
न्नारायणःस्मृतः ॥ तस्यदास्यंचतुर्थ्यातुमन्त्रेप्रोक्तंतुपार्वति ॥ ९१ ॥ दासभूतमिदंतस्यब्रह्माद्यंसकलंजगत् ॥ एवमर्थंविदित्वावैपश्चान्मन्त्रंप्रयोज
येत् ॥ ९२ ॥ अविदित्वातुमन्त्रार्थंसिद्धिंनैवाधिगच्छति ॥ नतुभुक्तिंचभक्तिंचनचमुक्तिंवरानने ॥ ९३ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०
उत्तर०उमामहेश्वरसंवादेमन्त्रार्थोपदेशोनामषड्विंशत्यधिकद्विशततमोऽध्यायः ॥ २२६ ॥ पार्वत्युवाच ॥ विस्तरेणममाचक्ष्वमन्त्रार्थपदगौर
वम् ॥ ईश्वरस्यस्वरूपंचतद्विभूतिगुणांस्तथा ॥ १ ॥ तद्विष्णोःपरमंधाम०यूहभेदांस्तथाहरेः ॥ सर्वमाख्याहितत्त्वेनममसर्वसुरेश्वर ॥ २ ॥ ईश्वर
उवाच ॥ शृणुदेविप्रवक्ष्यामिस्वरूपंपरमात्मनः ॥ विभूतिगुणसङ्घातंतदवस्थात्मकंहरेः ॥ ३ ॥ यःपरःपुरुषोविष्णुर्नारायणउदाहृतः ॥ सईश्वरश्च
जगतांपरमात्मासनातनः ॥ ४ ॥ विश्वतःपाणिपादश्चचक्षुष्मान्विश्वतःप्रभुः ॥ विश्वानिभुवनान्यस्मिन्धामानिपरमाणिवै ॥ ५ ॥ धारयन्सो
ऽप्यत्यतिष्ठन्मनांसिचमनीषिणाम् ॥ एवंबृहत्स्वरूपोऽयंश्रीपतिःपुरुषोत्तमः ॥ ईश्वर्यासहभोगार्थंदिव्यमङ्गलरूपवान् ॥ ६ ॥ बृहच्छरीरोऽग्निस
मानरूपोयुवाकुमारत्वमुपेयिवान्हरिः ॥ रेमेश्रियासौजगतांजनन्यास्वज्योत्स्नयाचन्द्रइवामृतांशुः ॥ ७ ॥ अयंचजगदीश्वर्याकुमारोनित्ययौवनः ॥
कन्दर्पकोटिलावण्यःसन्तस्थेपरमेपदे ॥ ८ भोगार्थंपरमंव्योमलीलार्थमखिलंजगत् ॥ भोगेनक्रीडयाविष्णोर्विभूतिद्वयसंस्थितिः ॥ ९ ॥ भोगे
नित्यस्थितिस्तस्यलीलांसंहरतेकदा ॥ भोगोलीलाह्युभौतस्यधार्येतेशक्तिमत्तया ॥ १० ॥ त्रिपाद्व्याप्तिःपरेधाम्निपादोऽस्येहाभवत्पुनः ॥ त्रिपा
द्विभूतिर्नित्यास्यादनित्यंपादमैश्वरम् ॥ ११ ॥ नित्यंतद्रूपमीशस्यपरेधाम्निस्थितंशुभम् ॥ अच्युतंशाश्वतंदिव्यंसदायौवनमाश्रितम् ॥ १२ ॥
नित्यंसंभोगमीश्वर्याश्रियाभूम्याचसंवृतम् ॥ नित्यैवैषाजगन्माताविष्णोःश्रीरनपायिनी ॥ १३ ॥ यथासर्वगतोविष्णुस्तथालक्ष्मीश्शुभानने ॥
ईशानासर्वजगतोविष्णुपत्नीसदाशिवा ॥ १४ सर्वतःपाणिपादान्तासर्वतोऽक्षिशिरोमुखी ॥ नारायणीजगन्मातासमस्तजगदाश्रया ॥ १५ ॥
यदपाङ्गाश्रितंसर्वंजगत्स्थावरजङ्गमम् ॥ जगत्स्थितिलयौयस्याउन्मीलननिमीलनात् ॥ १६ ॥ सर्वस्याद्यामहालक्ष्मीस्त्रिगुणापरमेश्वरी ॥
लक्ष्यालक्ष्यस्वरूपासाव्याप्यकृत्स्नंव्यवस्थिता ॥ १७ ॥ शून्यंतदखिलंविश्वंविलोक्यपरमेश्वरी ॥ शून्यंतदखिलंस्वेनपूरयामासतेजसा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १८ ॥ सालक्ष्मीर्धरणीचैवनीलादेवीतिविश्रुता ॥ आधारभूताजगतःपृथिवीरूपमाश्रिता ॥ १९ ॥ तोयादिरसरूपेणसैवनीलावपुर्भवेत् ॥
लक्ष्मीरूपत्वमापन्नाधनवाग्रूपिणीहिसा ॥ २० ॥ एवंदेवीस्वरूपासाजगतःश्रीःश्रिताहरिम् ॥ समस्तविद्याभेदाःस्युर्लक्ष्मीरूपावरानने ॥२१ ॥
श्रीरूपमखिलंसर्वंतस्याहिवपुरुच्यते ॥ सौन्दर्यशीलवृत्तंचसौभाग्यंस्त्रीषुसंस्थितम् ॥ तस्यारूपंचगिरिजेसर्वासांमूर्ध्नियोषिताम् ॥ २२ ॥ य
स्याःकटाक्षायुतभागदृष्ट्याब्रह्माशिवस्स्वर्गपतिर्महेन्द्रः ॥ चन्द्रश्चसूर्योधनदोयमोऽग्निःप्रभूतमैश्वर्यमवाप्नुवन्ति ॥ २३ ॥ लक्ष्मीःश्रीःकमलावि
द्यामाताविष्णुप्रियासती ॥ पद्मालयापद्महस्तापद्माक्षीलोकसुन्दरी ॥ २४ ॥ भूतानामीश्वरीनित्यासत्यासर्वगताशुभा ॥ विष्णुपत्नीमहादे
वीक्षीरोदतनयारमा ॥ २५ ॥ अनन्तालोकमाताभूर्नीलासर्वसुखप्रदा ॥ रुक्मिणीचतथासीतासर्वावेदवतीशुभा ॥ २६ ॥ सतीसरस्वतीगौरी
शान्तिःस्वाहास्वधारतिः ॥ नारायणीवरारोहाविष्णोर्नित्यानपायिनी ॥ २७ ॥ एतानिपुण्यनामानिप्रातरुत्थाययःपठेत् ॥ समहाश्रियमाप्नोति
धनधान्यमकल्मषम् ॥ २८॥ हिरण्यवर्णांहरिणींसुवर्णरजतस्रजाम् ॥ चन्द्रांहिरण्मयींलक्ष्मींविष्णोरनपगामिनीम् ॥२९॥ गन्धद्वारांदुराधर्षांनित्यपु
ष्टांकरीषिणीम्॥ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियम्॥३०॥एवमृक्संहितायांतुस्तूयमानामहेश्वरी॥सर्वैश्वर्यसुखंप्रादाच्छिवादीनांदिवौकसाम्॥ ३१ ॥
अस्येशानाहिजगतोविष्णुपत्नीसनातनी ॥ यदपाङ्गाश्रितंसर्वंजगत्स्थावरजङ्गमम्॥३२॥यस्यवक्षसिसादेवीप्रभाग्राविवतिष्ठति ॥ सर्वेसर्वेश्वरःसाक्षा
दक्षरःपुरुषोऽव्ययः ॥३३॥ सवैनारायणःश्रीमान्वात्सल्यगुणसागरः ॥ स्वामीसुशीलःसुभगःसर्वज्ञःसर्वशक्तिमान् ॥ ३४ ॥ नित्यंसंपूर्णकामश्चनैस
र्गिकसुहृत्सखा ॥ कृपापीयूषजलधिःशरणंसर्वदेहिनाम् ॥ ३५॥ स्वर्गापवर्गसुखदोभक्तानांकरुणाकरः ॥ श्रीमतेविष्णवेतस्मैदास्यंसर्वंकरोम्यहम् ॥
॥ ३६ ॥ देशकालाद्यवस्थासुसर्वासुकमलापतेः ॥ इतिस्वरूपसंसिद्धःसुखंदास्यमवाप्नुयात्॥३७॥एवंविदित्वामन्त्रार्थंतद्भक्तिंसम्यगाचरेत्॥ दासभूत
मिदंतस्यजगत्स्थावरजङ्गमम्॥३८॥श्रीमन्नारायणःस्वामीजगतांप्रभुरीश्वरः ॥ मातापितासुतोबन्धुर्निवासःशरणंगतिः ॥३९॥कल्याणगुणवाञ्छ्रीशः
सर्वकामफलप्रदः ॥ योऽसौनिर्गुणइत्युक्तःशास्त्रेषुजगदीश्वरः ॥४० ॥ प्राकृतैर्हेयसंयुक्तैर्गुणैर्हीनत्वमुच्यते ॥ यत्रमिथ्याप्रपञ्चत्वंवाक्यैर्वेदान्तगोचरैः ॥
॥४१॥ दृश्यमानमिदंसर्वमनित्यमितिचोच्यते ॥ अत्रापिप्राकृतंरूपमण्डस्यैवविनाशनम् ॥४२॥ प्राकृतानांहिरूपाणामनित्यत्वंतथोच्यते॥इदमण्डं
महादेविप्रकृतेरुद्भवंहरेः ॥४३॥ क्रीडार्थंदेवदेवस्यविष्णोर्लीलाधिकारिणः ॥ लोकैश्चतुर्भिर्दशभिःसागरैर्द्वीपसंयुतैः॥४४॥ भूतैश्चतुर्विधैश्चापिभूधरैश्च
महोच्छ्रयैः ॥ परिपूर्णमिदंरम्यमण्डंप्रकृतिसंभवम् ॥४५॥दशोत्तरगुणोपेतसप्तावरणसंवृतम् ॥ कलाकाष्ठादिरूपेणयःकालःपरिवर्त्तते॥४६॥ कालेनैव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जगत्सर्गस्थितिसंहरणंभवेत् ॥ चतुर्युगसहस्रंवैब्रह्मणोदिवसोभवेत् ॥ ४७ ॥ तावन्तिरात्रिवर्षाणिब्रह्मणोऽव्यक्तजन्मनः॥क्षयेतुब्रह्मणःप्राप्तेसर्वसंहरणं भवेत् ॥४८॥ अण्डमण्डगतालोकादह्यन्तेकालवह्निना ॥ सर्वात्मानस्तथाविष्णोःप्रकृतौविनिवेशिताः॥४९॥ अण्डावरणभूतानिप्रकृतौलयमाप्नुयुः॥ सासर्वजगदाधाराप्रकृतिर्हिहरिसंश्रिता ॥ ५० ॥ तयाजगत्सर्गलयौकरोतिभगवान्सदा ॥ क्रीडार्थदेवदेवेनसृष्टामायाजगन्मयी ॥ ५१ ॥ अविद्याप्र कृतिर्मायागुणत्रयमयीसदा ॥ सर्गस्थितिलयानांसाहेतुभूतासनातनी ॥ ५२ ॥ योगनिद्रामहामायाप्रकृतिस्त्रिगुणान्विता ॥ अव्यक्तंचप्रधानंच विष्णोर्लीलाविकारिणः ॥५३ ॥ जगत्सर्गलयौस्यातांप्रकृतेरेवसर्वदा॥असङ्ख्यंप्रकृतेःस्थानंनिबिडध्वान्तमव्ययम्॥५४॥ऊर्ध्वंतुसीम्निविरजानिस्सी माधस्सनातनी ॥ तयावृतंजगत्सर्वंस्थूलसूक्ष्माद्यवस्थया ॥ ५५ ॥ विकाससंकोचावस्थेतस्यांसर्गलयौस्मृतौ॥ एवंसर्वाणिभूतानिप्रकृत्यन्तर्गतानि वै ॥ ५६ ॥ ततःशून्यमिदंसर्वंप्रकृत्यन्तर्गतंमहत् ॥ एवंप्रकृतिरूपायाविभूतेरूपसुत्तमम् ॥ ५७ ॥ त्रिपाद्विभूतिरूपंतुशृणुभूधरनन्दिनि ॥ प्रधान परमव्योम्नोरन्तराविरजानदी ॥ ५८ ॥ देवाङ्गस्वेदजनिततोयैःप्रस्राविताशुभा॥तस्याःपारेपरेव्योम्नित्रिपाद्भूतिस्सनातनी॥५९॥ अमृतंशाश्वतंनित्य मनन्तंपरमंपदम् ॥ शुद्धसत्त्वमयंदिव्यमक्षरंब्रह्मणःपदम्॥६०॥ अनेककोटिसूर्याग्नितुल्यवर्चसमव्ययम् ॥सर्ववेदमयंशुद्धंसर्गप्रलयवर्जितम् ॥ ६१॥ क्षुत्पिपासादिरहितंनित्यतृप्तंनिरञ्जनम् ॥ असङ्ख्यमजरंनित्यंजाग्रत्स्वप्नादिवार्जितम् ॥६२॥ हिरण्मयंमोक्षपदंब्रह्मानन्दसुखावहम् ॥ समानाधिक्य रहितमाद्यन्तरहितंशुभम् ॥६३॥ अमत्सरमनालस्यमक्रोधंभयवर्जितम् ॥ तेजसात्यद्भुतंरम्यंनित्यमानन्दसागरम् ॥६४॥ एवमादिगुणोपेतंतद्विष्णोः परमंपदम् ॥ नतद्भासयतेसूर्योनशशाङ्कोनपावकः॥६५॥यद्गत्वाननिवर्तन्तेतद्धामपरमंहरेः॥तद्विष्णोःपरमंधामशाश्वतंनित्यमच्युतम् ॥ नहिवर्णयितुं शक्यंकल्पकोटिशतैरपि ॥ ६६ ॥ हरेःपदंवर्णयितुंनशक्यंमयाचधात्राचमुनीन्द्रसङ्घैः ॥ यस्मिन्पदेह्यच्युतईश्वरोयःसत्वङ्गवेदयदिवानवेद ॥ ६७ ॥ यदक्षरंवेदगुह्यंयस्मिन्देवाअधिविश्वेनिषेदुः ॥ यस्तन्नवेदकिमृचाकरिष्यतियेतद्विदुस्तइमेसमासते ॥ ६८ ॥ तद्विष्णोःपरमंधामसदापश्यन्ति सूरयः॥अक्षरंशाश्वतंदिव्यंदिविचक्षुरिवाततम् ॥ ६९॥ तत्प्रवेष्टुमशक्यंचब्रह्मरुद्रादिदैवतैः ॥ ज्ञानेनशास्त्रमार्गेणवीक्ष्यतेयोगिपुङ्गवैः ॥७०॥अहंब्रह्मा चदेवाश्चनजानन्तिमहर्षयः ॥ सर्वोपनिषदामर्थंदृष्ट्वावक्ष्यामिसुव्रते॥७१॥विष्णोःपदेहिपरमेमध्वउत्सःशुभाश्रयः॥ यत्रगावोभूरिशृङ्गाआसतेसुसुखाः प्रजाः ॥ ७२ ॥ अत्राहतत्परंधामगायमानस्यशार्ङ्गिणः ॥ तद्भातिपरमंधामगोभिर्गोपैस्सुखाह्वयैः॥७३॥आदित्यवर्णंतमसःपरस्ताज्ज्योतिरच्युतम्॥ अथातोब्रह्मणोलोकश्शुद्धसत्त्वस्सनातनः ॥ ७४ ॥ सामान्याविद्यितेभूमिरतेऽस्मिञ्छाश्वतेपदे ॥ तस्थतुर्जागरूकेऽस्मिन्युवानौश्रीसनातनौ॥७५॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उतस्त्वसारौयुवतीभूनीलेविष्णुवल्लभे ॥ यत्रपूर्वेयेचसाध्याविश्वेदेवास्सनातनाः ॥ ७६ ॥ तेहनाकंमहिमानस्सचन्तेशुभदर्शनाः ॥ तत्रविज्ञानिनो
विप्राजागृवांसस्समिन्धते॥७७॥तत्पदंज्ञानिनोविप्रायान्तिसंवासमिच्छवः ॥ तद्विष्णोःपरमंधाममोक्षइत्यभिधीयते॥ ७८॥तस्मिन्बन्धविनिर्मुक्ताः
प्राप्नुवन्तिसुखंपदम् ॥ तत्प्राप्यननिवर्तन्तेतस्मान्मोक्षउदाहृतः ॥७९॥ मोक्षंपरंपदंदिव्यममृतंविष्णुमन्दिरम् ॥ अक्षरंपरमंधामवैकुण्ठंशाश्वतंपदम्॥
॥ ८० ॥ नित्यंचपरमंव्योमसर्वोत्कृष्टंसनातनम् ॥ पर्यायवाचकान्यस्यपरधाम्नोऽच्युतस्यच ॥ तस्यत्रिपाद्विभूतेस्तुरूपंवक्ष्यामिविस्तरात् ॥
॥ ८१ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०उमामहेश्वरसंवादेत्रिपाद्विभूतिकथनंनामसप्तविंशत्यधिकद्विशततमोऽध्यायः ॥ २२७ ॥ श्रीमहा
देवउवाच ॥ त्रिपाद्विभूतेर्लोकास्तुअसङ्ख्याताःप्रकीर्तिताः ॥ शुद्धसत्त्वमयाःसर्वेब्रह्मानन्दसुखाह्वयाः॥१॥सर्वेनित्यानिर्विकाराहेयरागादिवर्जिताः॥
सर्वेहिरण्मयाश्शुद्धाःकोटिसूर्यसमप्रभाः ॥२॥सर्वेवेदमयादिव्याःकामक्रोधवविर्जिताः ॥ नारायणपदाम्भोजभक्त्येकरससेविताः ॥३॥ निरन्तरंसाम
गानपरिपूर्णसुखाश्रिताः॥सर्वेपञ्चोपनिषदस्वरूपावेदवर्चसः ॥४॥सर्वेवेदमयैर्दिव्यैःपुरुषैःस्त्रीभिरावृताः॥ वेदैकरसतोयाढ्यैस्सरोभिरुपशोभिताः॥५॥
श्रुतिस्मृतिपुराणादिरूपस्थावरसंयुताः ॥ सर्वंवर्णयितुंशक्यंनमयालोकविस्तृतम् ॥६॥ विरजापरमव्योम्नोरन्तराकेवलंस्मृतम् ॥तत्स्थानमुपभोक्तव्य
मव्यक्तब्रह्मसेविनाम् ॥ ७॥ स्वात्मानुभवजानन्दसुखदंकेवलंपदम् ॥ निःश्रेयसंचनिर्वाणंकैवल्यंमोक्षउच्यते ॥ ८ ॥ श्रीशार्ङ्गिभक्तिसेवैकरसभोग
विवर्जिताः ॥ तदिच्छन्त्यल्पमतयोमोक्षंसुखविवर्जितम्॥९॥महात्मानोमहाभागाभगवत्पादसेवकाः॥तद्विष्णोःपरमंधामयान्तिब्रह्मसुखप्रदम्॥१०॥
नानाजनपदाकीर्णंवैकुण्ठंतद्धरेःपदम् ॥ प्राकारैश्चविमानैश्चसौधैरत्नमयैर्वृतम्॥११॥ तन्मध्येनगरीदिव्यासाऽयोध्येतिप्रकीर्तिता ॥ मणिकाञ्चनचित्रा
ढ्यप्राकारैस्तोरणैर्वृता ॥ १२ ॥ चतुर्द्वारसमायुक्तारत्नगोपुरसंवृता ॥ चण्डादिद्वारपालैश्चकुमुदाद्यैश्चरक्षिता ॥ १३ ॥ चण्डप्रचण्डौप्राग्द्वारे
याम्येभद्रसुभद्रकौ ॥ वारुण्यांजयविजयौसौम्येधातृविधातरौ ॥ १४ ॥ कुमुदःकुमुदाक्षश्चपुण्डरीकोऽथवामनः ॥ शङ्कुकर्णःसर्वनेत्रःसुमुखः
सुप्रतिष्ठितः ॥ १५ ॥ एतेदिक्पतयःप्रोक्ताःपुर्यामत्रशुभानने ॥ कोटिवैश्वानरप्रख्यगृहपङ्क्तिभिरावृता ॥ १६ ॥ आरूढयौवनैर्नित्यैर्दिव्यनारी
नरैर्युता ॥ अन्तःपुरंतुदेवस्यमध्येपुर्यामनोहरम् ॥ १७ ॥ मणिप्राकारसंयुक्तंरत्नतोरणशोभितम् ॥ विमानैर्गृहमुख्यैश्चप्रासादैर्बहुभिर्युतम्॥
॥ १८ ॥ दिव्याप्सरागणैःस्त्रीभिस्सर्वतस्समलङ्कृतम् ॥ मध्येतुमण्डपंदिव्यंराजस्थानंमहोच्छ्रयम् ॥१९ ॥ माणिक्यस्तम्भसाहस्रजुष्टंरत्नमयंशुभम् ॥
दिव्यैर्मुक्तैःसमाकीर्णंसामगानोपशोभितम् ॥२०॥ मध्येसिंहासनंरम्यंसर्ववेदमयंशुभम् ॥ धर्मादिदैवतैर्नित्यैर्वृतंपादमयात्मकैः ॥२१ ॥ धर्मज्ञानमहै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्वर्यवैराग्यैःपादविग्रहैः॥ऋग्यजुःसामाथर्वाख्यरूपैर्नित्यवृतंक्रमात् ॥२२॥ शक्तिराधारशक्तिश्चचिच्छक्तिश्चसदाशिवा॥धर्मादिदेवतानांचशक्तयःपरि
कीर्तिताः ॥ २३ ॥ वसन्तिमध्यमेतत्रवह्निसूर्यसुधांशवः॥ कूर्मश्चनागराजश्चवैनतेयस्त्रयीश्वरः॥२४॥छन्दांसिसर्वमन्त्राश्चपीठरूपत्वमास्थिताः॥सर्वा
क्षरमयंदिव्यंयोगपीठमितिस्मृतम् ॥२५॥ तन्मध्येऽष्टदलंपद्ममुदयार्कसमप्रभम् ॥ तन्मध्येकर्णिकायांतुसावित्र्यांशुभदर्शने ॥२६ ॥ ईश्वर्यासहदेवेश
स्तत्रासीनःपरःपुमान् ॥ इन्दीवरदलश्यामःकोटिसूर्यप्रकाशवान् ॥ २७ ॥ युवाकुमारःस्निग्धश्चकोमलावयवैर्वृतः ॥ फुल्लरक्ताम्बुजनिभःकोमला
ङ्घ्रिसरोजवान् ॥ २८ ॥ प्रबुद्धपुण्डरीकाक्षःसुभ्रूलतायुगाङ्कितः ॥ सुनासस्सुकपोलाढ्यस्सुश्रोत्रसुखपङ्कजः ॥२९॥ मुक्ताफलाभदन्ताढ्यःसस्मिता
धरविद्रुमः॥परिपूर्णेन्दुसङ्काशसुस्मिताननपङ्कजः॥३०॥तरुणादित्यवर्णाभ्यांकुण्डलाभ्यांविराजितः॥सुस्निग्धनीलकुटिलकुन्तलैरुपशोभितः॥३१॥
मन्दारपारिजाताढ्यकबरीकृतकेशवान् ॥ प्रातरुद्यत्सहस्रांशुनिभकौस्तुभशोभितः॥३२॥ हारस्वर्णस्रगासक्तकम्बुग्रीवाविराजितः ॥ सिंहस्कन्धनिभैः
प्रोच्चैःपीनैरंसैर्विराजितः ॥ ३३ ॥ पीनवृत्तायतभुजैश्चतुर्भिरुपशोभितः ॥ अङ्गुलीयैश्चकटकैःकेयूरैःपरिमण्डितः ॥३४॥ बालार्ककोटिसङ्काशैःकौस्तु
भाद्यैःसुभूषणैः ॥ विराजितमहावक्षोवनमालाविभूषितः ॥३५॥ विधातृजननस्थाननाभिपङ्कजशोभितः ॥ बालातपनिभश्लक्ष्णपीतवस्त्रसमन्वितः॥
॥३६॥नानारत्नविचित्राङ्घ्रिःकटकाभ्यांविराजितः॥ सज्योत्स्नचन्द्रप्रतिमनखपङ्क्तिसमन्वितः॥३७॥कोटिकन्दर्पलावण्यसौन्दर्यनिधिरच्युतः॥दिव्य
चन्दनलिप्ताङ्गोदिव्यमालाविभूषितः ॥ ३८ ॥ गृहीतशङ्खचक्राभ्यामुद्बाहुभ्यांविराजितः॥ वरदाभयहस्ताभ्यामितराभ्यांतथैवच॥ ३९ ॥वामाङ्के
संस्थितादेवीमहालक्ष्मीर्महेश्वरी ॥ हिरण्यवर्णाहरिणीसुवर्णरजतस्रजा ॥ ४० ॥ सर्वलक्षणसंपन्नायौवनारम्भविग्रहा ॥ रत्नकुण्डलसंयुक्तानीलकुञ्चित
शीर्षजा ॥४१॥ दिव्यचन्दनलिप्ताङ्गीदिव्यपुष्पोपशोभिता॥मन्दारकेतकीजातीपुष्पाञ्चितसुकुन्तला ॥४२॥सुभ्रूस्सुनासासुश्रोणीपीनोन्नतपयोधरा॥
परिपूर्णेन्दुसङ्काशसुस्मिताननपङ्कजा॥ ४३ ॥ तरुणादित्यवर्णाभ्यांकुण्डलाभ्यांविराजिता ॥तप्तकाञ्चनवर्णाभातप्तकाञ्चनभूषणा॥४४॥ हस्तैश्चतुर्भिः
संयुक्ताकनकाम्बुजभूषिता ॥ नानाविचित्ररत्नाढ्याकनकाम्बुजमालया ॥ ४५ ॥ हारकेयूरकटकैरङ्गुलीयैश्चशोभिता ॥ भुजद्वयधृतोदग्रपद्मयुग्मोप
शोभिता॥४६॥गृहीतमातुलुङ्गाख्यजाम्बूनदकराञ्चिता ॥ एवंनित्यानपायिन्यामहालक्ष्म्यामहेश्वरः ॥ ४७ ॥ मोदतेपरमेव्योम्निशाश्वतेसर्वदाप्रभुः ॥
पार्श्वयोर्धरणीनीलेसमासीनेशुभासने ॥४८॥ अष्टदिक्षुदलाग्रेषुविमलाद्याश्चशक्तयः ॥ विमलोत्कर्षिणीज्ञानाक्रियायोगातथैवच ॥ ४९॥ प्रह्वासत्या
तथेशानाशक्तयःपरमात्मनः ॥ गृहीत्वाचामरान्दिव्यान्सुधाकरसमप्रभान् ॥ ५० ॥ सर्वलक्षणसंपन्नाःसेवन्तेपतिमच्युतम् ॥ दिव्याप्सरोगणाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चशतसङ्ख्याश्चयोषितः ॥ ५१ ॥ अन्तःपुरनिवासिन्यःसर्वाभरणभूषिताः ॥ पद्महस्ताश्चताःसर्वाःकोटिवैश्वानरप्रभाः ॥५२ ॥ सर्वलक्षणसंपन्ना
शीतांशुसदृशाननाः ॥ ताभिःपरिवृतोराजाशुशुभेपरमःपुमान् ॥ ५३ ॥ अनन्तविहगाधीशसेनान्याद्यैस्सुरेश्वरैः ॥ अन्यैःपरिजनैर्नित्यै
र्मुक्तैश्चपरिसंवृतः ॥ ५४॥ मोदतेरमयासार्द्धंभोगैश्वर्यरतःपुमान् ॥ एवंवैकुण्ठनाथोऽसौराजतेपरमेपदे ॥ ५५ ॥ तद्व्यूहभेदांल्लोकांश्चवक्ष्यामिगिरिजे
शुभे ॥ प्राच्यांवैकुण्ठलोकस्यवासुदेवस्यमन्दिरम् ॥ ५६ ॥ आग्नेय्यांलक्ष्म्यालोकस्तुयाम्यांसंकर्षणालयः ॥ सारस्वतस्तुनैर्ऋत्यांप्राद्युम्नःपश्चिमे
तथा ॥ ५७ ॥ रतिलोकस्तुवायव्यामुदीच्यामनिरुद्धभूः ॥ ऐशान्यांशान्तिलोकःस्यात्प्रथमावरणंस्मृतम् ॥ ५८ ॥ केशवादिचतुर्विंशत्यमीलो
कास्ततःक्रमात् ॥ द्वितीयावरणंप्रोक्तंवैकुण्ठस्यशुभाह्वयम् ॥ ५९ ॥ मत्स्यकूर्मादिलोकास्तुतृतीयावरणंशुभम् ॥ सत्याच्युतानन्तदुर्गाविष्वक्सेन
गजाननाः ॥६० ॥ शङ्खपद्मनिधीलोकाश्चतुर्थावरणंशुभम् ॥ ऋग्यजुःसामाथर्वाणोलोकादिक्षुमहत्सुच ॥ ६१ ॥ सावित्र्याविहगेशस्यधर्मस्यचम
खस्यच ॥ पञ्चमावरणंप्रोक्तमक्षयंसर्ववाङ्मयम् ॥६२॥ शङ्खचक्रगदापद्मखड्गशार्ङ्गहलंतथा ॥ मौशलंचतथालोकाःसर्वशस्त्रास्त्रसंयुताः ॥ ६३ ॥
षष्ठमावरणंप्रोक्तंमन्त्रास्त्रमयमक्षरम् ॥ ऐन्द्रपावकयाम्यानिनैर्ऋतंवारुणंतथा ॥ ६४ ॥ वायव्यंसौम्यमैशानंसप्तमंमुनिभिःस्मृतम् ॥ साध्या
मरुद्गणाश्चैवविश्वेदेवास्तथैवच ॥ ६५ ॥ नित्याःसर्वेपरेधाम्नियेचान्येचदिवौकसः ॥ तेवैप्राकृतलोकेऽस्मिन्ननित्यास्त्रिदशेश्वराः ॥ ६६ ॥
तेहनाकंमहिमानःसचन्तइतिवैश्रुतिः ॥ एवंपरंपदंनित्यैर्मुक्तैर्भोगपरायणैः ॥ ६७ ॥ दिव्याभिर्महिषीभिश्चराजतेविभुरीश्वरः ॥ नतद्भासयतेसूर्यो
नशशाङ्कोनपावकः ॥६८॥ यद्गत्वाननिवर्त्तन्तेयोगिनःसंशितव्रताः ॥ द्वयैकमन्त्रनिष्ठायेतेवैयान्तितदव्ययम् ॥६९॥ नवेदयज्ञाध्ययनैर्नदानैर्नव्रतैःशुभैः ॥
नतपोभिर्निराहारैर्नचसाधनकर्मभिः ॥७०॥ एकेनद्वयमन्त्रेणतथाभक्त्यात्वनन्यया ॥ तद्रम्यंशाश्वतंस्थानंप्रपत्त्यावैसनातनम् ॥७१॥ पार्वत्युवाच ॥ सा
धूक्तंपरमंस्वर्गस्वरूपंभवताप्रभो ॥ परव्योम्निस्थितोनित्यंकथंप्रकृतिमण्डले ॥ ७२ ॥ स्थितवान्किन्निमित्तेनलीलयाकिंप्रयोजनम् ॥ शुद्धसत्त्वमये
लोकेसंस्थितःपरमेश्वरः ॥ कथंरजस्तमोमिश्रविभूत्यांस्थितवान्प्रभुः ॥ ७३ ॥ रुद्रउवाच ॥ त्रिपाद्विभूतौभगवानीश्वर्यापरमेश्वरः ॥ नित्यमुक्त्यैक
भोग्योऽसौमोदतेसततंविभुः ॥७४॥ तमीश्वरंमहामायाप्रकृतिर्जगदाश्रया ॥ कृताञ्जलिपुटाभूत्वातुष्टावपरमेश्वरम् ॥७५॥ महामायोवाच ॥ नमस्ते
त्रिजगद्धाम्नेनमस्तेविश्वरूपिणे ॥ पुराणायनमस्तुभ्यंजगदुत्पत्तिहेतवे ॥७६॥ श्रीभूलीलाधिपतयेनमोनारायणायच ॥ नमोभगवतेतुभ्यंवासुदेवाय
शार्ङ्गिणे ॥७७॥ सर्वदेवस्यरूपायविष्णवेजिष्णवेनमः ॥ सहस्रमूर्तयेतुभ्यमनन्तायनमोऽस्तुते ॥ ७८ ॥ अच्युतायाविकारायशुद्धसत्त्वस्वरूपिणे ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आदिमध्यान्तरहितस्वरूपायनमोनमः॥७९॥नमोहिरण्यगर्भायज्ञानायपरमात्मने ॥ सर्वभूतात्मनेतुभ्यंसर्वभूताश्रयायच॥८०॥ ब्रह्मणेज्योतिषेतुभ्यं नमस्तेविश्वरूपिणे ॥ नमःशुचिषदेतुभ्यंहंसायपरमायच॥८१॥संकर्षणायरुद्रायसर्वभूतधरायच ॥ हयग्रीवायदीप्तायकालायहरयेनमः॥८२॥नमस्ते यज्ञपुरुषहव्यकव्यस्वरूपिणे ॥ नमःप्रजापतेतुभ्यंसूर्यायशुभवर्चसे ॥८३ ॥ अग्नयेहव्यभोक्त्रेचतस्मैयज्ञात्मनेनमः ॥ सवित्रेप्रसवित्रेचसर्गस्थित्यन्त हेतवे॥८४॥नमोवेदान्तवेद्यायचतुरात्मस्वरूपिणे ॥ ब्रह्मणेविष्णवेतुभ्यंनमस्तेशङ्करायच॥८५ ॥त्रिगुणायनमस्तुभ्यंसर्गस्थित्यन्तहेतवे ॥ निर्गुणाय नमस्तुभ्यंसर्वात्मान्तरवर्तिने ॥ ८६ ॥ अव्यक्तायनमस्तस्मैविष्णवेलोकसाक्षिणे ॥ नारायणायश्रीशायपूर्णषाड्गुण्यमूर्त्तये॥८७ ॥अनन्तगुणपूर्णाय नमःसर्वार्थदायिने ॥ नमस्तेवासुदेवायपञ्चावस्थस्वरूपिणे॥८८॥ नमःपञ्चनवव्यूहभेदरूपायतेनमः ॥ नमोयज्ञवराहायगोविन्दायनमोनमः॥८९॥ अविकारायशुद्धायहेयप्रतिभटायच ॥ नमोरामायकृष्णायनरसिंहायतेनमः ॥ ९० ॥ केशवायनमस्तुभ्यंजगतांक्लेशहारिणे॥त्वमेवसर्वलोकानामा श्रयःपुरुषोत्तमः ॥ ९१ ॥ प्रसीददेवदेवेशसर्वलोकहितायवै ॥ मत्संस्थाश्चेतनास्सर्वेनिराधारानिराश्रयाः ॥ ९२ ॥ हीनदेहानिराकाराःसर्वेन्द्रिय विवर्जिताः ॥ सर्वानुष्ठानरहिताःसततंदुःखभोगिनः ॥ ९३ ॥ तेषांलोकांश्चदेहांश्चदातुमर्हसिकेशव ॥ लीलाविभूतिसर्वज्ञयथापूर्वंप्रकल्पय ॥ ९४ ॥ चेतनाचेतनंकृत्स्नंजगत्स्थावरजङ्गमम् ॥ मयासंमोहितंपश्यलीलार्थंपरमेश्वर ॥ ९५ ॥ प्राकृताण्डंमयासार्धंसृजस्वपुरुषोत्तम ॥ धर्माधर्मौसुखंदुःखं तस्मिन्निक्षिप्यसंसृतौ ॥ मामधिष्ठायलीलांवैकर्तुमर्हसिमाचिरम्॥९६॥श्रीमहादेवउवाच॥एवमुक्तस्तयादेव्यामाययापरमेश्वरः॥तस्यांनिवेश्यमायायां जगत्स्रष्टुंप्रचक्रमे ॥ ९७ ॥ योऽसौप्रकृतिपुरुषःप्रोच्यतेसइहाच्युतः ॥ सएवभगवान्विष्णुःप्रकृत्यांप्रविवेशह ॥ ९८ ॥ असृजत्प्रकृतौब्रह्म भूतादिमहदाह्वयम् ॥ महतःपुरुषादस्मादहङ्कारोऽभ्यजायत ॥ ९९ ॥ अहङ्कारात्तुवैतस्माद्गुणत्रयमजायत ॥ त्रिभ्योगुणेभ्यस्तन्मात्रामसृज द्विश्वभावनः ॥ १०० ॥ तन्मात्रेभ्योऽभ्यजायन्तमहाभूतानितत्क्षणात् ॥ आकाशःप्रथमंजातोब्रह्मणस्त्रिगुणात्मनः ॥ १ ॥ आकाशादभवद्वायुर्वा योरग्निरजायत ॥ अग्नेरापःसमुद्भूताअद्भ्यश्चपृथिवीमता ॥ २ ॥ आकाशादीनिभूतानिसृष्टान्येकोत्तराणिवै ॥ शब्दःस्पर्शश्चरूपंचरसोगन्धश्च तद्गुणाः ॥ ३ ॥ एकोत्तरगुणान्सृष्ट्वातानादायमहाप्रभुः ॥ तेषांविमिश्रणंकृत्वाजगदण्डंमहत्तरम् ॥ ४ ॥ असृजत्तत्रलोकान्वैसङ्ख्ययायेचतुर्दश ॥ ब्रह्मादित्रिदशांस्तस्मिन्नसृजत्पुरुषोत्तमः ॥ ५ ॥ दैवंतिर्यक्तथामर्त्यंस्थावरंचचतुर्विधम् ॥ तथासृष्टोमहासर्गस्तेनवैजलजेक्षणे ॥ ६ ॥ तत्रकर्मानु रूपेणत्रिदशादिषुयोनिषु ॥ संस्थिताःप्रकृतौपूर्वआत्मनःप्रभवन्तिहि ॥ १०७ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०उत्तर०परमव्योमादिवर्णनं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नामाष्टाविंशत्यधिकद्विशततमोऽध्यायः ॥ २२८ ॥ पार्वत्युवाच ॥ विस्तरेणममाख्याहिदेवसर्गमनुत्तमम् ॥ ब्रह्मादित्रिदिवश्रेष्ठाःकथंजाताःसना
तनाः ॥ ईश्वरस्यावतारांश्चविस्तरेणवदस्वमे ॥१॥ रुद्रउवाच ॥ आकाशानिलतेजोम्बुभुवःसृष्टायथाक्रमम् ॥ तासांमध्येऽसृजद्ब्रह्माअगाधजलमर्णवम्
॥ २॥ अस्मिन्नेकार्णवीभूतेजलेमायावटच्छदे ॥ आदायसर्वभूतानियोगनिद्रांययौहरिः ॥३॥ सजगत्स्रष्टुकामस्तुयोगनिद्रामुपेयिवान् ॥तयारेमेचिरं
कालंमाययामधुसूदनः ॥ ४ ॥ तस्यांतुजनयामासकालात्मानमनुत्तमम् ॥ कलाकाष्ठादिभूतायेपक्षमासादिरूपिणः ॥ ५ ॥ तस्मिन्कालेहरेर्नाभि
पङ्कजंमुकुलाकृति ॥ विकसत्सर्वजगतोबीजभूतंसुवर्चसम् ॥ ६॥ उदस्थादुद्भूत्तत्रब्रह्माचसुमहामतिः॥ सजगत्स्रष्टुकामस्तुरजोगुणविचोदितः ॥ तुष्टा
वयोगनिद्रायांशयानंपरमेश्वरम्॥७॥ब्रह्मोवाच ॥ नमोऽस्तुविष्णवेतुभ्यंसर्गस्थित्यन्तहेतवे ॥ जगद्भूषणभूतायश्रीमतेविश्वरूपिणे ॥८॥ नमोब्रह्मण्य
देवायगोब्राह्मणहितायच ॥ जगद्धितायकृष्णायगोविन्दायनमोनमः॥९॥प्रधानकालरूपायपुरुषायेश्वरायच ॥ नमःप्रपञ्चरूपायनिष्प्रपञ्चस्वरूपिणे
॥ १० ॥ नारायणायविश्वायविश्वेशायनमोनमः ॥ श्रीभूनीलाधिपतयेब्रह्मणेपरमात्मने ॥ ११ ॥ नमोऽस्तुवासुदेवायविश्वरूपायशार्ङ्गिणे ॥ त्रयी
नाथायहरयेविश्वनाथस्वरूपिणे ॥१२॥ अनन्तकल्याणगुणपरिपूर्णायतेनमः ॥ जगच्चसर्वंस्वपितित्वयिसुप्तेजगन्मये॥१३॥ वृतंसर्वंजगन्नाथप्रपञ्चेस
चराचरम् ॥ त्वमेवकारणंकर्त्ताकार्यंचत्रिगुणोद्भवम्॥१४॥स्रष्टाध्याताविधाताचत्वमेवपरमेश्वरः ॥ जागर्षिशुद्धसत्त्वस्थस्तवनिद्राकुतःप्रभो॥देवत्वयि
स्थितालोकाःसमाधिष्ठाःसनातनाः ॥ १५ ॥ शिवउवाच ॥ एवमुक्तोहृषीकेशोब्रह्मणापरमेश्वरः ॥ उत्तस्थौशयनात्तस्माद्विमुक्तोयोगनिद्र
या ॥१६ ॥ नियम्ययोगनिद्रांतांजगत्स्रष्टुंप्रचक्रमे ॥ अचिन्त्यस्तत्क्षणाद्देवोजगतांप्रभुरच्युतः ॥ १७ ॥ चिन्तयित्वाजगत्सर्वमसृजत्सपुमांस्ततः ॥
लोकान्सर्वांस्तदाह्यष्टुगतमण्डंहिरण्मयम् ॥ १८ ॥ सप्तद्वीपान्समुद्रान्तान्मेदिनीभूधरैर्युतान् ॥ सहैकाण्डकटाहेननाभिपद्मेऽसृजत्प्रभुः ॥ १९॥ तद
ण्डमध्येचास्थानमीश्वरःकृतवान्हरिः ॥ अथनारायणंकस्तुदध्यावध्यात्मचेतसा ॥ २० ॥ ध्यानान्तेतस्यभालात्तुस्वेदबिन्दुरजायत ॥ सबिन्दुर्बुद्बु
दाकारःपृथिव्यामपतत्क्षणात् ॥ २१ ॥ तस्मात्तुबुद्बुदात्सोऽहमुत्पन्नोऽस्मिवरानने ॥ त्र्यक्षस्त्रिशूलहस्तोऽहंजटामुकुटमण्डितः ॥२२ ॥ किंकरोमीति
देवेशमवोचंविनयान्वितः ॥ ततोनारायणोदेवोमामित्याहमुदान्वितः ॥ २३ ॥ कर्त्तासिजगतोरुद्रसंहारंभीमदर्शनम् ॥ साक्षात्संकर्षणांशेनसंहारार्थे
वरानने ॥ २४ ॥ तस्मान्नारायणाद्देविह्युत्पन्नोऽस्मिभयङ्करः ॥ नियोज्यमांतुसंहारेपुनरेवजनार्दनः ॥ २५ ॥ नेत्राभ्यामसृजच्चन्द्रसूर्यौध्वान्तापहारि
णौ ॥ वायुंदिशश्चश्रोत्राभ्यामिन्द्राग्नीमुखतोऽसृजत् ॥ २६ ॥ नासाभ्यांवरुणंमित्रमसृजत्पङ्कजेक्षणः ॥ बाहुभ्यामखिलान्देवान्ससाध्यान्समरुद्गणा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प० पु० न् ॥ २७ ॥ समस्तरोमकूपेभ्योरत्नान्योषधयस्तथा ॥ त्वचिशैलान्समुद्रांश्चगवाद्याःपशवस्तथा ॥ २८ ॥ मुखतोब्राह्मणःसृष्टोबाहुभ्यांक्षत्रियस्तथा उ.खं.स.
॥२३२॥ ॥ ऊर्वोर्वैश्यस्ततःपद्भ्यांशूद्रश्चैवमजायत ॥ २९ ॥ एवंसृष्ट्वाजगत्सर्वमचेतनमवस्थितम् ॥ विश्वरूपेणदेवेशोयस्यान्तरमधिष्ठितः ॥ ३० ॥ शक्त्या
विनाहरेस्तस्यनोन्मेषोविद्यतेयतः ॥ तस्मात्सर्वजगत्प्राणोविष्णुरेवसनातनः ॥ ३१ ॥ सएवाव्यक्तरूपःसन्परमात्माव्यवस्थितः ॥ सर्गस्थितिलयं अ० २२९
ब्रह्मास्वयमेवप्रवर्त्तते॥ ३२ ॥ षाड्गुण्यपरिपूर्णोऽसौवासुदेवःसनातनः ॥ त्रिगुणादात्मनोरूपंचतुर्द्धाकुरुतेजगत् ॥ ३३ ॥ प्रद्युम्नमूर्तिर्भगवान्सर्वैश्वर्य
समन्वितः ॥ विधेःप्रजापतीनांचकालस्यचजनस्यच ॥ ३४ ॥ अन्तर्यामित्वमापन्नःसर्गसम्यक्करोतिहि ॥ सेतिहासांस्ततोवेदान्ददौतस्मैम
हात्मने ॥ ३५ ॥ प्रद्युम्नस्यांशभागोऽसौब्रह्मालोकपितामहः ॥ जगत्सर्गस्थितिंसर्वंप्रकरोत्यंशसंभवः ॥ ३६ ॥ अनिरुद्धश्चभगवाञ्छक्तितेजः
समन्वितः ॥ मनूनांपार्थिवानांचकालस्यचजनस्यच ॥ ३७ ॥ स्थितिंकरोतिभगवानन्तर्यामित्वमास्थितः ॥ संकर्षणोमहाविष्णुर्विद्याब
लसमन्वितः ॥ ३८ ॥ कालस्यसर्वभूतानांरुद्रस्यचयमस्यच ॥ अन्तर्यामित्वमास्थायजगत्संहरतेप्रभुः ॥ ३९ ॥ इत्यन्तर्याम्यवस्थाया
सन्तर्यामित्वमात्मनः ॥ मत्स्यःकूर्मोवराहश्चनरसिंहोऽथवामनः ॥ ४० ॥ रामोरामश्चरामश्चकृष्णःकल्कीचतेदश ॥ एतेतुविभवावस्था
ब्रह्मणःपरमात्मनः ॥ ४१ ॥ नृसिंहरामकृष्णेषुषाड्गुण्यंपरिकीर्तितम् ॥ परावस्थातुदेवस्यदीपादुत्पन्नदीपवत् ॥ ४२ ॥ व्यूहावस्थांहरेरस्य
शृणुष्वगिरिजेशुभे ॥ वैकुण्ठंपरमंलोकंविष्णुलोकमनुत्तमम् ॥ ४३ ॥ श्वेतदीपंस्वरूपंतुक्षीरसागरमुत्तमम् ॥ एवंचतुर्द्धाव्यूहंतुसम्यगुक्तंमहर्षि
भिः ॥ ४४ ॥ जलावरणमध्येतुवैकुण्ठंकारणंशुभम् ॥ कोटिवैश्वानरप्रख्यंसर्वधर्मवदव्ययम् ॥ ४५ ॥ आमोदसान्तानिकादिलौकैर्बहु
भिरावृतम्॥ नानामणिमयंदिव्यंविमानकोटिभिर्युतम् ॥४६॥ यदुक्तंपरमंधामताद्दग्लक्षणसंस्थितम् ॥ तस्मिन्वैकुण्ठनगरेनानारत्नसमुज्ज्वले॥४७॥
मध्येवेदवतीनामपुरंरम्यमनुत्तमम् ॥ चतुर्द्वारसमायुक्तंहेमप्राकारतोरणम् ॥ ४८ ॥ चण्डादिद्वारपालाद्यैःकुमुदाद्यैश्चरक्षितम् ॥ नानामणिमयैर्दिव्यैर्गृ
हपङ्क्तिभिरावृतम् ॥ ४९॥ विततंपञ्चपञ्चाशद्योजनैश्चसमन्ततः ॥ सहस्रयोजनोत्तुङ्गैःप्रासादैःकोटिभिर्वृतम् ॥५०॥ आरूढयौवनैर्दिव्यैःपुम्भिःस्त्रीभि
श्चशोभितम् ॥ स्त्रियश्चपुरुषाश्चास्मिन्सर्वलक्षणशोभिताः ॥ ५१ ॥ समरूपाश्चश्रीविष्णोःसर्वालङ्कारभूषिताः ॥ दिव्यस्रग्वस्त्रसंछन्नादिव्यचन्दनभू ॥२३२॥
षिताः ॥ ५२ ॥ मोदन्तेतत्रदेवेशभक्त्यात्वात्ममनोरमे ॥ मन्त्राष्टाक्षरसंसिद्धाभक्त्याषोडशरूपया ॥ ५३ ॥ वृतास्तत्पदमाविश्यमोदन्तेमनसीप्सि
तम् ॥ गत्वास्मिन्ननिवर्तन्तेविष्णुनासहसंस्थिताः॥ ५४॥ अविच्छिन्नात्मनातेवैविष्णुनासंगताःशुभाः ॥ तत्समानसुखंनित्यंप्राप्नुवन्तिमनीषिणः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ५५ ॥ यत्रतत्रहरेर्लोकानाविश्यशुभचेतसः ॥ नाप्नुवन्तिपुनःस्वर्गंस्वर्गस्थाइवजन्तवः ॥ ५६ ॥ यथासौमित्रिभरतौयथासंकर्षणादयः ॥
तथातेऽपिचजायन्तेसत्यलोकेयथेच्छया ॥ ५७ ॥ पुनस्तेनैवयास्यन्तितत्पदंशाश्वतंपरम् ॥ नकर्मबन्धनंजन्मवैष्णवानांचविद्यते ॥ ५८ ॥
विष्णोरनुचरत्वंहिमोक्षमाहुर्मनीषिणः ॥ नदास्यमपरेशस्यबन्धनंपरिकीर्तितम् ॥ ५९ ॥ सर्वबन्धननिर्मुक्ताहरिदासानिरामयाः ॥ आब्रह्म
भुवनाल्लोकाःपुनरावृत्तिलक्षणाः ॥ ६० ॥ कर्मबन्धमयाद्दुःखमिश्राअसंख्यभयप्रदाः ॥ बह्वायासफलादेविजननिनाशकहेतवः ॥ ६१ ॥ स्वर्गेऽपि
भोगस्तुनृणांविषमिश्राशनंयथा ॥ स्वर्गसंस्थान्नरान्दृष्ट्वाक्षीणेकर्मणिदेवताः ॥ ६२ ॥ कुपिताःपातयन्त्येवसंसृतौकर्मबन्धने ॥ तस्मात्स्वर्गसुखंदेवि
बहुधायाससाधनम् ॥ ६३ ॥ अनित्यंकुटिलंदुःखमिश्रंयोगीपरित्यजेत् ॥ यज्ञदानतपःकर्मबहुक्लेशमयंत्यजेत ॥ ६४ ॥ सततंसंस्मरेद्विष्णुं
सर्वदुःखौघनाशनम् ॥ नामोच्चारणमात्रेणप्राप्नुवन्तिपरंपदम् ॥ ६५ ॥ तस्मात्तुवैष्णवंलोकंगौरिसंप्रार्थयेत्सुधीः ॥ भक्त्यात्वनन्ययादेवंभजेतकरु
णाम्बुधिम् ॥ ६६ ॥ ससर्वज्ञानगुणवान्रक्षत्येवनसंशयः ॥ तस्मादष्टाक्षरंमन्त्रंजपत्वासुखतरंशुभम् ॥ ६७ ॥ संप्राप्नोतिपरंलोकंवैष्णवंसर्वकामदम् ॥
तस्मिन्मणिमयेतल्पेसहस्रसूर्यरश्मिनि ॥ ६८ ॥ विमानेशुशुभेदिव्येसंस्थितोभगवान्हरिः ॥ तत्रचाधारशक्त्यादिधृतेपीठेहिरण्मये ॥ ६९ ॥ नाना
रत्नमयेदिव्येनानावर्णसमन्विते॥तस्मिन्नष्टदलेपद्मेमन्त्राक्षरपदेशुभे॥७०॥कर्णिकायांसुरम्यायांलक्ष्मीबीजशुभाक्षरे॥तस्मिन्बालार्कसाहस्रकोटितुल्य
प्रभान्वितः ॥ ७१ ॥ दिव्येनारायणःश्रीमानासीनःपङ्कजासने ॥ तस्यदक्षिणकेपार्श्वेजगन्माताहिरण्मयी ॥ ७२ ॥ गृहीत्वाचामरान्दिव्यान्दिव्य
माल्यविभूषणा ॥ सर्वलक्षणसम्पन्नादिव्याकल्पविभूषिता ॥ ७३ ॥ वसुपात्रंमातुलुङ्गंस्वर्णपद्मंधृतंकरैः ॥ वामतःपृथिवीदेवीनीलोत्पलदलद्युतिः ॥
॥ ७४ ॥ नानाभरणसंयुक्ताविचित्राम्बरभूषिता ॥ साधृत्वाचोर्ध्वबाहुभ्यांरम्यंरक्तोत्पलद्वयम् ॥ ७५ ॥ इतराभ्यांधृतंदेव्याधान्यपात्रंशुकं
तथा ॥ गृहीत्वाचामरान्दिव्याञ्छक्तयोविमलादिकाः ॥ ७६ ॥ दलाग्रेषुसमासीनाःसर्वलक्षणशोभिताः ॥ तासांमध्येसमासीनोभगवानच्युतो
हरिः ॥ ७७ ॥ शङ्खचक्रगदापद्मपाणिभिर्दिव्यभूषणैः ॥ केयूराङ्गदहाराद्यैर्भूषणैरुपशोभितः ॥ ७८ ॥ प्रातरुद्यत्सहस्रांशुकुण्डलाभ्यांविरा
जितः ॥ पूर्वोक्तैस्त्रिदशैर्नित्यैःसेवितःपरमेश्वरः ॥ ७९ ॥ आस्तेवैकुण्ठनगरेनित्यसत्येचभोगवान् ॥ श्रीमदष्टाक्षरंमन्त्रंसिद्धानांवैमनीषिणाम्॥
॥ ८० ॥ गम्यंतद्वैष्णवंलोकंनेतरेषांकथंचन ॥ इत्येवंप्रथमंव्यूहंकथितंतेवरानने ॥ ८१ ॥ द्वितीयंवैष्णवंलोकंशृणुवक्ष्यामिसुव्रते ॥ योऽयं
सत्यइतिख्यातोलोकाग्र्योवैष्णवःस्मृतः ॥ ८२ ॥ तंलोकंविपुलंपुण्यंशुद्धंसत्त्वमयंशुभम् ॥ मध्याह्नसूर्यसाहस्रयुगपद्भासितंतदा ॥ ८३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कल्पान्तेऽपिनलीयेततत्त्वलोकंमहत्तरम् ॥ ममब्रह्मादिदेवानांनद्रष्टुमपिशक्यते ॥ ८४ ॥ स्वर्णकल्पद्रुमवनैःपरिपूर्णसमन्ततः ॥ सुधाम्बुपरिपूर्णाभि
र्दीर्घिकाभिःसमन्वितम् ॥ ८५ ॥ स्वर्णरत्नमयैर्दिव्यैःपङ्कजैरुपशोभितम् ॥ ज्वलदग्निनिभैर्दिव्यैर्भूषणैःकोटिभिर्वृतम् ॥ ८६ ॥ निरन्तरं
सामभिश्चकूजितैःकोकिलादिभिः ॥ ऊह्यमानैर्गन्धवृक्षैःपुष्पकैरपिशोभितम् ॥ ८७ ॥ ऊनषोडशवर्षाब्दैर्दिव्यनारीनरैर्वृतम् ॥ सर्वलक्षणशोभाढ्यै
र्दिव्यकल्पविभूषणैः ॥ ८८ ॥ तत्रप्रदेशेरम्येषुदेशेषुकमलापतिम् ॥ मुदितैःपतिभिःसार्द्धमर्चयन्तिस्मयोषितः ॥ ८९ ॥ तत्प्रसादोपलभ्यंवै
सुखमश्नन्तिसर्वदा ॥ गायन्तिपरमानन्दंकृष्णस्यचरितंमहत् ॥ ९० ॥ पद्मेक्षणाःपद्महस्ताःपद्मयासदृशःशुभाः ॥ दिव्यस्रग्वसनोपेताःक्रीडन्ति
स्मसुयोषितः ॥ ९१ ॥ शङ्खचक्रगदापद्मधराभूषणभूषिताः ॥ स्रग्विणःपीतवसनाःपुरुषास्तत्रसंस्थिताः ॥ ९२ ॥ अन्योन्यस्पर्शनात्तत्रस्त्रीपुंसोः
क्रीडमानयोः ॥ भवत्यनुदिनंवृद्धंहरिभक्तिसुधारसम् ॥ ९३ ॥ तन्मध्येऽन्तःपुरंरम्यंवासुदेवस्यशोभितम् ॥ चन्दनागुरुकर्पूरकुङ्कुमोदकसंयुतम् ॥
॥ ९४ ॥ नानापुष्पविमानाद्यैःसर्वतःसमलङ्कृतम् ॥ तन्मध्येकल्पवृक्षस्यच्छायायांकमलासने ॥ ९५ ॥ विचित्रश्लक्ष्णपर्यङ्केशुभास्तरणसंवृते ॥
दिव्यगन्धसुशोभाढ्यैर्नानापुष्पपरिच्छदैः ॥ ९६ ॥ तस्मिन्मनोरमेदिव्येसमासीनःश्रियासह ॥ ईश्वर्यासहदेवेशोवासुदेवःसनातनः ॥ ९७ ॥
सुधांशुकोटिसङ्काशोदिव्याभरणभूषितः ॥ सुवर्णशुभ्रयुगलश्लक्ष्णनासाञ्चिताननः ॥ ९८ ॥ स्निग्धायतसुलावण्यकपोलाभ्यांविराजितः ॥
नीलकुञ्चितकेशाढ्योरक्ताब्जदललोचनः ॥ ९९ ॥ मन्दारकेतकीजातीकबरीकृतशेखरः ॥ स्निग्धबिम्बफलाभौष्ठःसुस्मिताननपङ्कजः ॥ १०० ॥
अनर्घ्यमौक्तिकाभासदन्तावलिविराजितः ॥ हरिचन्दनलिप्ताङ्गःकस्तूरीतिलकाङ्कितः ॥ १ ॥ उन्नतांसभुजैर्दीर्घैश्चतुर्भिरुपशोभितः ॥ जपा
कुसुमसङ्काशकरपल्लवशोभितः ॥ २ ॥ श्रीवत्सकौस्तुभाभ्यांचशोभितःपृथुवक्षसा ॥ मुक्तामयैःसुशोभाढ्यैर्दिव्यस्रग्भिरलङ्कृतः ॥ ३ ॥ स्फुरत्केयूर
कटकैरङ्गुलीयैश्चशोभितः ॥ बालार्कसदृशज्योत्स्नापीतवस्त्रेणवेष्टितः ॥ ४ ॥ माणिक्यनूपुरोपेतपद्मपत्रविराजितः ॥ अकलङ्कित
चन्द्राभनखपङ्क्तिविराजितः ॥ ५ ॥ रक्तोत्पलनिभश्लक्ष्णशुभ्राङ्घ्रिकरपङ्कजः ॥ पाञ्चजन्यरथाङ्गाढ्यबाहुयुग्मविराजितः ॥ ६ ॥ इतराभ्यां
श्रियोगात्रमाश्लिष्यन्निजवक्षसि ॥ श्लिष्यद्विद्युल्लतोद्गीथशिताभ्रइवराजते ॥ ७ ॥ तप्तजाम्बूनदश्लक्ष्णशुभाङ्घ्रियुगपङ्कजः ॥ अत्रक्रीडतिदेवेशो
वासुदेवःसनातनः ॥ ८ ॥ तप्तकाञ्चनसङ्काशासर्वाभरणभूषिता ॥ पद्मेक्षणापद्महस्तापद्ममालाविभूषिता ॥ ९ ॥ दिव्यचन्दनलिप्ताङ्गीस्वर्णा
भरणभूषिता ॥ सुस्निग्धनीलकुटिलकचभारविराजिता ॥ ११० ॥ मन्दारपारिजातादिदिव्यपुष्पविराजिता ॥ मणिरत्नसुसीमन्तकस्तूरीतिलका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ञ्चिता ॥ ११ ॥ कर्णावतंसशोभाढ्याचिकुरान्तालिसन्निभा ॥ पीनोन्नतस्तनाभ्यांचपीडन्तीहरिवक्षसि ॥ १२ ॥ केयूराङ्गदहाराद्यैर्भूषणैरुप
शोभिता ॥ आरूढयौवनानित्यंसर्वलोकेशसुन्दरी ॥ १३ ॥ तत्रक्रीडतिलोकेशीपत्यासहनिरन्तरम् ॥ सएववासुदेवोऽत्रसर्वभूतमनोहरः ॥ १४ ॥
क्रीडतेसर्वलोकेऽस्मिन्सर्वकामप्रदोनृणाम् ॥ अत्राष्टशक्तयोलक्ष्म्यास्तनवःपरितःस्थिताः ॥ १५ ॥ रमाचरुक्मिणीसीतापद्मापद्मालयाशिवा ॥ सुल
क्षणासुशीलाचरतिकामप्रदाश्वताः ॥ १६ ॥ शङ्खचक्रगदापद्मशार्ङ्गाद्यैर्हेतिभिस्तथा ॥ परितःपुष्कराकारैस्तंलोकंपरिरक्षते ॥ १७ ॥ एवंद्वितीयो
व्यूहश्चसम्यक्तेशुभदर्शने ॥ संक्षेपतोमयाप्रोक्तोनशक्यंविस्तरेणहि ॥ १८ ॥ द्वादशाक्षरमन्त्रंवैयेजपन्तिसुखाह्वयम् ॥ तेप्राप्नुवन्तिसततंशाश्वतं
शुभमक्षयम् ॥ १९ ॥ नवेदाध्ययनैर्यज्ञैर्नव्रतैर्नोपवासतः ॥ नप्राप्यंवैष्णवंलोकंविनादास्येनकुत्रचित् ॥ १२० ॥ तस्माद्दास्यंहरेर्भक्तिभजे
तानन्यमानसः ॥ प्राप्नोतिपरमांसिद्धिंकर्मबन्धविमोचनीम् ॥ २१ ॥ एवंसंप्रोच्यतेदेविद्वितीयंव्यूहमव्ययम् ॥ तृतीयंतुपरंव्यूहंशृणुवक्ष्यामिपार्वति
॥ २२ ॥ तोयाब्धेरुत्तरंकूलंश्वेतद्वीपमिहोच्यते ॥ संदर्शनाययोगीन्द्रसनकादिमहात्मनाम् ॥ २३ ॥सनकश्चसनन्दश्चतृतीयश्चसनातनः ॥ सनत्कु
मारोजातश्चवोढुःपञ्चशिखस्तथा ॥ २४ ॥ सप्तैतेब्रह्मणःपुत्रायोगिनःसुमहौजसः ॥ विरक्ताः सर्वभोगेषुशुद्धास्सत्त्वगुणाःसदा ॥ २५ ॥ भगवद्दर्शनो
द्भूतसुखैकरससेविनः ॥ नरनारायणाद्याश्चश्वेतद्वीपेवसन्तिये ॥२६॥ तेषांसंदर्शनार्थायतत्रसंनिहितोहरिः ॥ शुभ्रांशुकोटिसङ्काशेनानारत्नमयोज्ज्वले
॥२७॥ श्वेतद्वीपेमहायोगिसेवितेहेयवर्जिते ॥ तत्रोद्यानानिरम्याणिपारिजातमयानिवै ॥ २८ ॥ सन्तानकलताकीर्णंचन्दनद्रुममण्डितम् ॥ फुल्ल
पद्मोत्पलोपेतंनानातोयालयैर्युतम्॥२९॥तन्मध्येनगरीरम्यानाम्नाश्वेतवतीशुभा ॥ नानारत्नमयाकीर्णाहेमप्राकारतोरणा॥नानारत्नमयैर्दिव्यैर्विमानै
रुपशोभिता॥१३०॥ दिव्यस्त्रीपुम्भिराक्रान्ताबहुप्रासादसङ्कुला ॥ तन्मध्येऽन्तःपुरंरम्यंरत्नद्रुमसमाकुलम् ॥३१॥ बालसूर्यनिभैस्तुङ्गैःप्रासादैर्बहुभि
र्वृतम् ॥ तन्मध्येमण्डपंदिव्यंमणिकाञ्चनशोभितम् ॥ ३२ ॥ चन्दनागुरुकर्पूरकुङ्कुमामोदवासितम् ॥ नानाकुसुममालाढ्यैर्वितानैःसमलङ्कृतम्
॥ ३३ ॥ दिव्याप्सरःसमाकीर्णंसामगानोपशोभितम् ॥ मध्येसिंहासनंतत्रसूर्यवैश्वानरप्रभम् ॥ ३४ ॥ तन्मध्येऽष्टदलंपद्मंचन्द्रबिम्बमिवापरम् ॥
तन्मध्येकर्णिकायांतुसमासीनोजनार्दनः ॥ ३५ ॥ शुद्धजाम्बूनदप्रख्योमुक्ताहारविभूषितः ॥ शङ्खचक्रगदापद्मयुक्तहस्तचतुष्टयः ॥ ३६ ॥
केयूरहारकटकैरङ्गुलीयैश्चशोभितः ॥ सुवर्णपङ्कजप्रख्यपदयुग्मविराजितः ॥ ३७ ॥ सुधाकरनिभश्लक्ष्णनखपङ्क्तिविराजितः ॥ षोडशाब्द
इवारूढयौवनेनविराजितः ॥ ३८ ॥ विशालभालदेशेतुकुङ्कुमेनसुगन्धिना ॥ रचितेनोर्ध्वपुण्ड्रेणसीमन्तेनोपशोभितः ॥ ३९ ॥ मथितामृत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

फेनाभशुक्लवस्त्रसुवेष्टितः ॥ मुक्तामयाभ्यांशुभ्राभ्यांकुण्डलाभ्यांविराजितः ॥१४०॥ माणिक्यमुकुटोपेतनीलकुन्तलशोभितः ॥ दिव्यचन्दनलिप्ताङ्गो दिव्यपुष्पविराजितः ॥ ४१ ॥ श्लक्ष्णोन्नतसुनासाढ्यसुस्मिताधरविद्रुमः ॥ पुण्डरीकदलप्रख्यसितरक्तान्तलोचनः ॥ ४२ ॥ नीलशुक्लौघताम्राभ्यां लोचनाभ्यां विराजितः ॥सुनीलघनवक्राढ्यःसुपक्षाभिविराजितः ॥४३॥ पद्मासनसमासीनोजगन्मोहनविग्रहः॥वामाङ्केसंस्थितादेवीतस्यदिव्यस्वरूपिणी॥ ४४ ॥ तस्यैवसदृशीलक्ष्मीःशीलरूपगुणादिभिः ॥ पद्मकिञ्जल्कसङ्काशायौवनारम्भशोभिता ॥४५ ॥ सर्वलक्षणसंपन्नातप्तकाञ्चनभूषणा ॥ दिव्यस्रग्वसनोपेतानीलकुञ्चितमूर्धजा ॥ ४६ ॥ चतुर्भुजैर्विराजन्तीकेयूराङ्गदभूषिता ॥ मुक्ताहारैर्विराजन्तीमन्दाराञ्चितशीर्षजा ॥ ४७ ॥ श्लक्ष्णनासापुटयुतालसद्दन्तविराजिता ॥ कस्तूरीतिलकोपेतानासाग्राञ्चितमौक्तिका ॥ ४८ ॥ सुवर्णकलशप्रख्यपीनोन्नतपयोधरा ॥ दिव्यकुङ्कुमलिप्ताङ्गीपद्ममालोपशोभिता ॥ ४९ ॥ वसुपात्रंमातुलिङ्गंदर्पणंहेमपङ्कजम् ॥ करपद्मैर्धारयन्तीचेतनाभीष्टदायिनी ॥ १५० ॥ तस्यैताःसदृशास्तत्रशक्तयःपरितोहरेः ॥ ईशावास्यामहादेवीजाह्नवीकमलालया ॥ ५१ ॥ सावित्रीसर्वगापद्माशक्तयःपरिकीर्तिताः ॥ श्रद्धामेधाधृतिःप्रज्ञाधारणाशान्तिरेवच ॥ ५२ ॥ श्रुतिःस्मृतिर्मतिर्वन्यावृद्धिर्बुद्धिर्मनीषिणी ॥ दास्यस्त्वेताःश्रियःप्रोक्ताःसर्वकैङ्कर्यकारिकाः ॥ ५३ ॥ अनन्तवैनतेयादिदेवतानित्यकिङ्कराः ॥ साध्यामरुद्गणाश्चैवसेवन्तेनित्यदेवताः ॥ ५४ ॥ प्रासादेषुविमानेषुवनेषुनगरेषुच ॥ तत्प्रसादोपलब्धेषुभोगेष्वत्रानुरञ्जिताः ॥ ५५ ॥ क्रीडन्तिसततंनित्याहेयनिष्यन्दवर्जिताः ॥ येविष्णुमन्त्रजप्तारःसततंश्रद्धयान्विताः ॥ ५६ ॥ यद्वादशीव्रतेयुक्तास्तत्पदंयान्तितेऽव्ययम् ॥ नवेदैर्नचदानैश्चनयज्ञैर्नव्रतैरपि ॥ ५७ ॥ प्राप्तुंचशक्योगिरिजेविष्णुलोकःसनातनः ॥ भक्त्याचानन्ययाप्राप्तुंशक्यंविष्णुपदंनृणाम् ॥ ५८ ॥ तस्मात्संपूजयेन्नित्यंभक्त्यादेवंजनार्दनम् ॥ कीर्तयेन्नामसाहस्रंध्यायन्मन्त्रंजपेत्सदा ॥ ५९ ॥ जुहुयात्तर्पयेद्भक्त्यासर्वगंसर्वकामदम् ॥ एवमुक्तंतृतीयस्यव्यूहस्यपरमात्मनः ॥ १६० ॥ स्वरूपंतवसुश्रोणियथाप्रोक्तंपुरातनैः ॥ अतःपरंप्रवक्ष्यामिचतुर्थव्यूहमुत्तमम् ॥ ॥६१॥ दिवौकसांदर्शनार्थंदुग्धाब्धौपरमेश्वरः ॥ सुधांशुकोटिसङ्काशेसहस्रफणशोभिते ॥ ६२॥ फणारत्नमयूखैस्तुच्छादितेदुग्धवारिधौ ॥ तस्मिन्ननन्तपर्यङ्केविमलेविस्तृतेशुभे ॥ ६३ ॥ देव्यासहसमासीनःपद्मनाभोऽच्युतोहरिः ॥ नीलजीमूतसङ्काशःपद्मपत्रायतेक्षणः ॥ ६४ ॥ विवस्वत्कोटिसङ्काशकिरीटेनविराजितः ॥ नानारत्नोज्ज्वलद्दिव्यकुण्डलाभ्यांविराजितः ॥६५॥ बालार्कसदृशज्योत्स्नापीतवस्त्रेणवेष्टितः ॥ स्फुरद्रक्तारविन्दाभहस्ताङ्घ्रितलशोभितः ॥६६॥ हारकेयूरकटकैरङ्गुलीयैर्विराजितः ॥ शङ्खचक्रगदाशार्ङ्गखड्गहस्तैर्विभूषितः॥६७॥ सुपुष्पफलशाखाढ्यकल्पशाखीव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राजितः ॥ श्रीवत्सकौस्तुभोपेतवनमालाविराजितः ॥ ६८ ॥ बालार्कसदृशज्योत्स्नापीतवस्त्रेणवेष्टितः ॥ विश्वसृड्जन्मशरणनाभीपङ्कजशोभितः ॥
॥ ६९ ॥ हरिचन्दनलिप्ताङ्गःसर्वाभरणभूषितः ॥ मन्दारपरिजातादिदिव्यपुष्पैर्मनोरमैः ॥ १७० ॥ सुस्निग्धनीलकुटिलकबरीकृतकेशवान् ॥
श्लक्ष्णोन्नतसुनासांसजानुयुग्मविराजितः ॥ ७१ ॥ मणिविद्रुमशाखाढ्यनूपुराङ्घ्रिविराजितः ॥ अकलङ्कितचन्द्राभनखपङ्क्तिविराजितः ॥
॥ ७२ ॥ अशोकपुष्पसङ्काशरक्तोष्ठमुखपङ्कजः ॥ अनर्घ्यमौक्तिकाभासदन्तपङ्क्तिविराजितः ॥ ७३ ॥ संपूर्णचन्द्रप्रतिमस्मितवक्त्रसुशोभितः ॥
आरूढयौवनःश्रीमान्कोमलावयवोज्ज्वलः ॥ ७४ ॥ शरण्यःसर्वलोकानांसर्वकामफलप्रदः ॥ सदृशीतस्यदेवीतुरूपशीलगुणादिभिः ॥ ७५ ॥
तप्तकाञ्चनसङ्काशातप्तकाञ्चनभूषणा ॥ तरुणीरूपलावण्यकान्तिशीलगुणान्विता ॥ ७६ ॥ दुग्धाब्धिफेनसङ्काशशुभवस्त्रेणवेष्टिता ॥ मन्दारकेतकी
जातीपुष्पाञ्चितशिरोरुहा ॥ ७७ ॥ कस्तूरीतिलकोपेतारत्नसीमन्तशोभिता ॥ नानावर्णसुशोभाढ्यकर्णभूषणभूषिता ॥ ७८ ॥ प्रवालसदृश
ज्योत्स्नारक्ताधरशुचिस्मिता ॥ मत्तभृङ्गोपमैःस्निग्धैरलकैःसुविराजिता ॥ ७९ ॥ तनुमध्याविशालाक्षीपीनोन्नतपयोधरा ॥ चतुर्हस्तैर्विराजन्तीसर्वा
र्वाभरणभूषिता ॥ १८० ॥ उद्बाहुभ्यांधारयन्तीहेमपद्मयुगंशुभम् ॥ इतराभ्यांसमाश्लिष्यभर्तारंनिबिडंस्थिता ॥ ८१ ॥ आलोकयन्तीसततंत्रिदशांश्च
कटाक्षकैः ॥ निरीक्षितास्तयादेव्याधन्यास्तेसततंशिवे ॥ ८२ ॥ तत्रदेवाविमानस्थाःसिद्धचारणकिन्नराः ॥ गायन्तिसततंदेवीमानन्दाश्रुपरिप्लुताः
॥ ८३ ॥ दैतेयैर्बाध्यमानैस्तुब्रह्मरुद्रादिभिःसुरैः ॥ संस्तूयमानस्तत्रेशोदेवानामभयंददौ ॥८४॥ देवानामभयंदत्त्वासर्वदेवेश्वरोहरिः ॥ राक्षसान्हन्तु
मारेभेजगत्संरक्षणायवै ॥ ८५ ॥ एवंचतुर्थव्यूहंतुहरेःप्रोक्तंतवानघे ॥ किमन्यच्छ्रोतुकामासितद्ब्रवीमिवरानने ॥ १८६ ॥ इतिश्रीपाद्मेमहापुराणे
पञ्चप०उत्तर०विष्णुव्यूहभेदवर्णनंनामैकोनत्रिंशदधिकद्विशततमोऽध्यायः ॥ २२९ ॥ पार्वत्युवाच ॥ भगवान्यत्रदेवेशोराक्षसान्मधुसूदनः ॥
जघानकेनरूपेणयथावद्वक्तुमर्हसि ॥ १ ॥ वैभवावस्थमीशस्यमत्स्यकूर्मादिरूपकम् ॥ विस्तरेणसमाख्याहिममप्रीत्यामहेश्वर ॥ २ ॥ महादेव
उवाच ॥ शृणुदेविप्रवक्ष्यामिवैभवंस्वस्थमानसा ॥ मत्स्यकूर्मादियद्रूपमवतारात्मकंहरेः ॥३॥ दीपादुत्पादितोदीपोयथातद्वद्भविष्यति ॥ परावस्था
परेशस्यसव्यूहाविभवादयः ॥ ४ ॥ शक्त्यावेशावतारास्तुविष्णोस्तात्कालिकास्स्मृताः ॥ अर्चावतारादेवस्यवैभवाःपरमात्मनः ॥५ ॥ परवद्व्यूह
सामर्थ्यगुणसम्भूतिदर्शनाः ॥ वैभवानांतुसर्वेषाम्मत्स्यःपूर्वमुदाहृतः ॥ ६॥ प्रजापतिःपुराब्रह्मासप्तर्जसुमहात्मवान् ॥ भृगुर्मरीचिरत्रिश्चदक्षःकर्दम
एवच ॥ ७ ॥ पुलस्त्यःपुलहश्चैवअङ्गिराश्चतथाक्रतुः ॥ नवप्रजानांपतयइमेप्रोक्तायथाक्रमम् ॥ ८ ॥ मरीचिर्भगवांस्तत्रजनयामासकश्यपम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कश्यपस्याभवञ्जायाश्चतस्रः शुभदर्शने ॥ ९ ॥ अदितिश्चदितिश्चैवकद्रूश्चविनतातथा ॥ अदितिर्जनयामासदेवांस्तुशुभदर्शनान् ॥ १० ॥
दितिश्चराक्षासान्पुत्रांस्तामसान्सुमहासुरान् ॥ शम्बूकस्तुहयग्रीवोहिरण्याक्षोमहाबलः ॥ ११ ॥ हिरण्यकशिपुर्जम्भोमयाद्याःसुमहातपाः ॥
मकरस्तुमहावीर्योब्रह्मलोकमुपागतः ॥१२॥ ब्रह्माणंमोहयित्वासौवेदाञ्ग्राहवीर्यवान्॥ ग्रसित्वाचश्रुतीःसोऽथप्रविवेशमहार्णवम्॥१३॥ततःसर्वंजग
च्छून्यमभवद्धर्मसंकरः ॥ नाधीतंनवषट्कारंवर्णाश्रमविवर्जितम् ॥ १४ ॥ ततःप्रजापतिर्देवःसर्वदेवगणैर्वृतः ॥ गत्वादुग्धाम्बुधिंदेवंतुष्टावशरणंगतः
॥ १५ ॥ ब्रह्मोवाच ॥ प्रसीददेवमेनाथनागपर्यङ्कसंस्थित ॥ सर्वेशसर्वदेवात्मन्सर्वदेवमयाच्युत ॥ १६ ॥ आद्यंजगत्तरोर्बीजंमध्येत्वं
सर्वतोऽधिकः ॥ अन्तेचपशुनाथस्त्वंस्वेच्छाचारस्त्वमेवच ॥ १७ ॥ त्वमेवचिदचिद्रूपंजगत्सर्वंसनातनम् ॥ त्वमव्यक्तोहिभूतादिःप्रधानपुरुषो
ऽव्ययः ॥ १८ ॥ त्वमादिमध्यान्तवपुर्जगतःपरमेश्वरः ॥ त्वमेवसर्वलोकानामाश्रयःपुरुषोत्तमः ॥ १९ ॥ भूतादिस्त्वंमहद्भूतंभूतसङ्घस्यकार
णम् ॥ त्वमहङ्कारमाश्रित्यगुणत्रैविध्यमाप्तवान् ॥ २० ॥ त्वमादिभूतश्चाकाशंत्वंवायुःसर्वगोमहान् ॥ त्वमादिस्त्वमनादिश्चत्वमग्निस्तेजसां
निधिः ॥ २१ ॥ त्वमापःसर्वजगतांजीवनःपरमेश्वरः ॥ त्वंभूमिर्जगदाधारोभूधरस्त्वंमहामते ॥ २२ ॥ सरितःसागरस्त्वंवैसर्वस्यादिस्त्वमेवच ॥
देवर्षिःसर्वभूतानित्वमेवपुरुषोत्तम ॥ २३ ॥ त्वयैवप्रेरितालोकाश्चेष्टन्तेसाध्वसाधुषु ॥ दैतेयेनाहृतावेदाःप्रविष्टाश्चमहार्णवम् ॥ २४ ॥ वेदा
धारमिदंसर्वंजगत्स्थावरजङ्गमम् ॥ वेदाश्चैवहिसर्वेषांधर्माणांपरितःस्थितिः ॥ २५ ॥ वेदैश्चसर्वदेवानांनित्यंतृप्तिर्भविष्यति ॥ तस्माद्वेदान्स
मानेतुंत्वमेवार्हसिकेशव ॥ २६ ॥ श्रीमहादेवउवाच ॥ एवमुक्तोहृषीकेशोब्रह्मणापरमेश्वरः ॥ मात्स्यरूपंसमास्थायप्रविवेशमहोदधिम् ॥ २७ ॥
तंदैत्यंसुमहाघोरंमाकररूपमास्थितम् ॥ तुण्डाग्रेणविदार्याथजघानामरपूजितः ॥ २८ ॥ तंहत्वासर्ववेदांश्चसाङ्गोपाङ्गसमन्वितान् ॥
गृहीत्वाप्रददौतस्मैब्रह्मणेसमहाद्युतिः ॥ २९ ॥ अन्योन्यमिश्रितावेदाग्रसितास्तेनरक्षसा ॥ व्यस्ताभगवतातेनव्यासरूपेणविष्णुना ॥ ३० ॥
पृथक्कृतास्तथावेदाव्यासेनैवमहात्मना ॥ एवंमत्स्यावतारेणरक्षिताःसर्वदेवताः॥३१॥श्रुतिप्रदानेनजगत्त्रयंतदाकृत्वानिरातङ्कमहोरमाधवः॥ संस्तूय
मानःसुरसिद्धसङ्घैरन्तर्दधेयोगिभिरर्चिताङ्घ्रिः ॥ ३२ ॥ वासुदेवोहिभगवान्सर्वदेवमयोहरिः ॥ ३३ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०उमा
महेश्वरसंवादेमत्स्यावतारवर्णनंनामत्रिंशदधिकद्विशततमोऽध्यायः ॥ २३० ॥ श्रीरुद्रउवाच ॥ यत्कौर्मंवैभवंविष्णोःसर्वलोकनमस्कृतम् ॥ तद्व
क्ष्यामिप्रियेसम्यक्छृणुष्वैकाग्रचेतसा ॥ १ ॥ अत्रिपुत्रोमहातेजादुर्वासाइतिविश्रुतः ॥ प्रचण्डःसर्वलोकानांक्षोभकारीमहातपाः ॥ २ ॥ सययौहिम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वत्पृष्ठंब्रह्मर्षिस्तपसोनिधिः ॥ ममांशभूतोब्रह्मर्षिःसर्वेषांभयदस्सदा ॥ ३ ॥ सकदाचिन्महामेरोःपार्श्वेकिन्नरसेविते ॥ संप्राप्यदेवतास्तत्रपूजयामास नित्यशः ॥ ४ ॥ उषितस्तत्रवर्षंतुकिन्नरीभिःसपूजितः ॥ महेन्द्रंद्रष्टुकामोऽसौस्वर्लोकंप्रययौमुनिः ॥ ५ ॥ तस्मिन्कालेमहातेजागजारूढंमहेश्वरम् ॥ ददर्शसर्वदेवैस्तंपूज्यमानंशचीपतिम् ॥ ६ ॥ तंचदृष्ट्वासहृष्टात्मादुर्वासाःसुमहातपाः ॥ पारिजातस्रजंतस्मैप्रददौविनयान्वितः ॥ ७ ॥ आदायदेवताधीशस्तांस्रजंगजमूर्द्धनि ॥ विन्यस्यतत्रदेवेशःप्रययौनन्दनंप्रति ॥ ८ ॥ करेणादायतांमालांमदोद्रिक्तस्ततोगजः ॥ पीडयित्वाथचिक्षेपसञ्छिन्नां धरणीतले ॥ ९ ॥ ततःक्रुद्धोमहातेजादुर्वासारक्तलोचनः ॥ प्रशप्तवान्महेन्द्रंतंसंततक्रोधवह्निना ॥ १० ॥ दुर्वासाउवाच ॥ त्रैलोक्यैकश्रियायुक्तो यस्मान्मामवमन्यसे ॥तस्मात्त्रैलोक्यश्रीर्नष्टाभवत्वेवनसंशयः ॥११॥ रुद्रउवाच ॥ इतिशप्तस्ततःशक्रोजगामस्वपुरंपुनः ॥ ततःश्रीर्जगतांधात्रीक्षणादन्तर्दधस्वयम् ॥ १२ ॥ अन्तर्द्धानंगतालक्ष्मीस्तदानष्टंजगत्त्रयम् ॥ यदपाङ्गाश्रितंसर्वंजगत्स्थावरजङ्गमम् ॥ १३ ॥ तस्यामन्तर्द्धानवत्यांसर्वंनष्टतरंभवेत् ॥ ब्रह्मादित्रिदशाःसर्वेगन्धर्वायक्षकिन्नराः ॥ १४ ॥ दैत्याश्चदानवानागामनुष्याराक्षसास्तथा ॥ पशवःपक्षिणःकीटाःसर्वेस्थावरजङ्गमाः ॥ १५ ॥ तयालक्ष्म्याजगन्मात्रातेसर्वेनावलोकिताः ॥ दारिद्र्येणैवविहतास्तेसर्वेदुःखभागिनः ॥ १६ ॥ क्षुत्पिपासार्दितास्सर्वेचुक्रुशुर्गतचेतसः ॥ नववृषुर्जलधराःसर्वेशुष्काजलाशयाः ॥ १७ ॥ सर्वेतेपादपाःशुष्काःफलपुष्पविवर्जिताः ॥ एतत्सर्वंजगच्छून्यंलक्ष्मीवीक्षणवर्जितम् ॥ १८ ॥ निस्सत्त्वाश्चाभवन्देवायज्ञभागविवर्जिताः ॥ तदादेवाःसगन्धर्वादैत्यदानवराक्षसाः ॥ १९ ॥क्षुत्पिपासार्दिताजग्मुर्ब्रह्माणममितौजसम् ॥ ऊचुस्तंदेवदेवशमञ्जयोर्निपितामहम् ॥ २० ॥ देवाऊचुः ॥ भगवन्क्षुत्पिपासाभ्यांपीडितंहिजगत्त्रयम् ॥ नहुतंनवषट्कारःसर्वधर्मविर्जितम्॥२१॥क्षुत्पिपासार्दिताःसर्वेदेवदानवमानवाः ॥त्रातारंसर्वलोकेशंभवन्तंशरणंगताः॥२२॥त्रातुमर्हसिदेवेशक्षुत्पिपासार्दिताञ्जनान् ॥२३॥ रुद्रउवाच ॥ इतितेषांवचःश्रुत्वासर्वलोकपितामहः ॥ उवाचपरमप्रीतस्तान्सर्वान्प्रतिमानदः ॥ २४ ॥ ब्रह्मोवाच ॥ शृणुध्वंदेवताःसर्वेदैत्यगन्धर्वमानवाः ॥ महेन्द्रस्यापचारेणसर्वमेतदुपस्थितम् ॥ २५ ॥समुद्भूतमिदंघोरंजगत्संवर्त्तकंमहत् ॥ दुर्वासाःसुमहात्मातुयतःक्रोधमवाप्तवान् ॥ २६ ॥ तस्मात्क्रोधेनतेनेदंनष्टंलोकत्रयंसुराः ॥ असौरोषपरीतात्माक्रोधेनकलुषीकृतः ॥ २७ ॥ जगत्त्रयंचश्रीनष्टंभवत्वित्याहदुर्मतिः ॥ तच्छापाज्जगतांधात्रीलक्ष्मीर्न्नारायणप्रिया ॥२८॥ अन्तर्द्धानंगतादेवीजगन्मातामहेश्वरी ॥ यदपाङ्गेक्षितालोकाभवन्तिसुखितास्सदा ॥ २९ ॥ नालोकिताजगन्मात्रादुःखभागिनएवहि ॥ तस्मात्सर्वेवयंगत्वादुग्धाब्धौस्थितमुत्तमम् ॥ ३० ॥ तत्रनारायणंदेवमर्चयामःसनातनम् ॥ तस्मिन्प्रसन्नेदेवेशेशिवमेतद्भवेज्जगत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥३१॥ महादेवउवाच॥इतिनिश्चित्यमनसाब्रह्मादेवगणैर्युतः ॥ भृग्वादिमुनिभिःसार्द्धंप्रययौक्षीरसागरम् ॥३२॥ क्षीराब्धेरुत्तरतटेब्रह्मरुद्रादिदेवताः ॥
विष्णुंसमर्चयामासुःपौरुषेणविधानतः ॥३३॥ जपन्तोऽष्टाक्षरंमन्त्रंपौरुषंसूक्तमेवच॥ ध्यायन्तोऽनन्यमनसोजुहुवुःपरमेश्वरम् ॥३४॥ तुष्टुवुःस्तवनैर्दि
व्यैर्नमश्चक्रुर्विधानतः ॥ ततःप्रसन्नोभगवान्सर्वेषांचदिवौकसाम् ॥ ३५ ॥ तेषांसंदर्शनेतस्थौस्तूयमानोमहर्षिभिः ॥ वैनतेयंसमारुह्यसर्वदेवमयंविभुम्
॥ ३६ ॥ तंदृष्ट्वाजगतामीशंशङ्खचक्रगदाधरम् ॥ पीतवस्त्रंचतुर्बाहुंपुण्डरीकनिभेक्षणम् ॥ ३७ ॥ श्रीवत्सकौस्तुभोरस्कंवनमालाविभूषितम् ॥
किरीटहारकेयूरनूपुरैरुपशोभितम् ॥ ३८॥ तंदृष्ट्वाजगतामीशमानन्दाश्रुपरिप्लुताः ॥ तुष्टुवुर्जयशब्देननमश्चक्रुर्निरन्तरम् ॥ ३९ ॥ ततःप्रोवाचभगवा
न्कृपयासर्वदेवताः ॥ वरदोऽस्मिवरंदेवावृणीध्वमितिचाब्रवीत् ॥ ४० ॥ इतिश्रुत्वातदासर्वेदेवाब्रह्मपुरोगमाः ॥ ऊचुःप्राञ्जलयोदेवमिदंवचन
मीश्वरम् ॥ ४१ ॥ देवाऊचुः ॥ भगवन्मुनिशापेनसंप्रतीदंजगत्त्रयम् ॥ क्षुत्पिपासार्दितंसर्वंसदेवासुरमानुषम् ॥ ४२ ॥ तस्माद्भवन्तंशरणं
याताःस्मःपुरुषोत्तम ॥ त्राहिसर्वमिमंलोकंनान्यस्त्राताभवेत्क्वचित् ॥ ४३ ॥ रुद्रउवाच ॥ इत्युक्तोदैवतैःसर्वैरच्युतःपरमेश्वरः ॥ विचार्यैतदुवाचैता
न्देवान्ब्रह्मपुरोगमान् ॥ ४४ ॥ श्रीभगवानुवाच ॥ अत्रिसूनोर्मुनेःशापादन्तर्द्धानंगतारमा ॥ कटाक्षदर्शनात्तस्याजगदैश्वर्यसंयुतम् ॥ ४५ ॥
तस्माद्यूयंसुराःसर्वेशिवब्रह्मपुरोगमाः ॥ उत्पाट्यमन्दरंशैलंनिधायक्षीरसागरे ॥ ४६ ॥ मन्दरंघर्घरंकृत्वासर्पराजेनवेष्टितम् ॥ कुरुध्वंमथनंदेवा
दैत्यगन्धर्वदानवैः ॥ ४७ ॥ उत्पद्यतेचसालक्ष्मीर्जगत्संरक्षणायवै ॥ तयादृष्टामहाभागाभविष्यथनसंशयः ॥ ४८ ॥ धारयाम्यहमेवाद्रिंकूर्मरूपेण
संवृतः ॥ ममशक्त्यासुराःसर्वेभवन्तिचबलीयसः ॥ ४९ ॥ रुद्रउवाच ॥ इत्युक्तादेवताःसर्वाहरिणाकमलेक्षणे ॥ साधुसाध्वितिदेवेशमूचुर्ब्रह्म
पुरोगमाः ॥ ५० ॥ संस्तूयमानोभगवानच्युतःसुरसत्तमैः ॥ अन्तर्दधेततःश्रीमान्सर्वलोकनमस्कृतः ॥ सर्वाधारःसर्वदेवःसर्वत्रसमदर्शनः ॥ ५१ ॥
इतिश्रीपाद्मेमहापुराणेपञ्चप० उत्तर० उमामहेश्वरसंवादेदुर्वासःशापकथनंनामैकत्रिंशदधिकद्विशततमोऽध्यायः ॥ २३१ ॥ शङ्करउवाच ॥ ततःसुर
गणाःसर्वेदानवाद्यामहाबलाः ॥ उत्पाट्यमन्दरंशैलंचिक्षिपुःपयसांनिधौ॥ १ ॥ततोनारायणःश्रीमान्भगवान्भूतभावनः ॥ कूर्मरूपेणतंशैलंदधारामित
विक्रमः ॥२॥ अनादिमध्यान्तवपुर्विश्वरूपःसनातनः ॥ अधारयद्गिरिवरंस्वपृष्ठेजगदीश्वरः ॥ ३ ॥तथैकेनभुजेनैवशिखरंसर्वगोऽव्ययः ॥ ततोदेवासुराः
सर्वेममन्थुःक्षीरसागरम् ॥ ४ ॥ सर्पराजेनसंवेष्ट्यघर्घरंमन्दराचलम् ॥ मथ्यमानेऽथदुग्धाब्धौदैवतैःसुमहाबलैः ॥ ५ ॥ उत्पादनार्थंलक्ष्म्याश्चसर्व
एवमहर्षयः ॥ उपोष्यनियमंकृत्वाजेपुःश्रीसूक्तमेवच ॥ ६ ॥ सहस्रनामपठनंचक्रुर्दिव्याद्विजोत्तमाः ॥ एकादश्यांतुशुद्धायांमथ्यमानेमहाम्बुधौ ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपोष्यऋषयःसर्वेजेपुःश्रीमन्त्रमुत्तमम् ॥ काङ्क्षमाणाःश्रियोजन्मलक्ष्मीनारायणंहरिम् ॥८॥ ध्यात्वासमर्चयामासुर्द्विजाग्र्यामुनिसत्तमाः॥ ततस्त
स्मिन्मुहूर्तेतुमथ्यमानेमहाम्बुधौ ॥ ९ ॥ समभूत्तत्रप्रथमंकालकूटंमहाविषम् ॥ महापीडंमहाघोरंसंवर्ताग्निसमप्रभम् ॥ १० ॥ दृष्ट्वाप्रदुद्रुवुःसर्वे
भयार्तादेवदानवाः॥ ततस्तान्विद्रुतान्दृष्ट्वाभयार्त्तान्सुरसत्तमान्॥ ११ ॥ तान्निवार्याब्रवंवाक्यमहंतत्रशुभेक्षणे ॥ भोभोदेवगणाःसर्वेनभेतव्यंविषंप्रति
॥ १२ ॥ अहमाहारयिष्यामिकालकूटंमहाविषम् ॥ इत्युक्तास्तेमयासर्वेदेवाइन्द्रपुरोगमाः॥ १३ ॥ साधुसाध्वितिवाक्यैर्मांतुष्टुवुःप्रणताभृशम् ॥
तद्दृष्ट्वामेघसङ्काशंप्रादुर्भूतंमहाविषम् ॥ १४॥ ध्यात्वानारायणंदेवंहृदयेगरुडध्वजम् ॥उदयादित्यसङ्काशंशङ्खचक्रगदाधरम् ॥ १५॥ श्रीभूमिसहितं
देवंतप्तकाञ्चनकुण्डलम्॥ एकाग्रमनसाध्यात्वासर्वदुःखहरंप्रभुम् ॥ १६ ॥ नामत्रयंमहामन्त्रंजप्त्वाभक्त्यासमन्वितः ॥ तद्विषंपीतवान्घोरमाद्यंसर्व
भयङ्करम् ॥१७॥ नामत्रयप्रभवाच्चविष्णोःसर्वगतस्यवै ॥ विषंतदभवज्जीर्णंलोकसंहारकारकम्॥१८॥ अच्युतानन्तगोविन्दइतिनामत्रयंहरेः॥योजपेत्प्र
यतोभक्त्याप्रणवाद्यंनमोऽन्तकम् ॥ १९॥ तस्यमृत्युभयंनास्तिविषरोगाग्निजंमहत् ॥नामत्रयंमहामन्त्रंजपेद्यःप्रयतात्मवान्॥ २० ॥ कालमृत्युभयं
चापितस्यनास्तिकिमन्यतः॥ इतिनामत्रयेणैवपीतंदेविमयाविषम् ॥२१॥ततःप्रहृष्टास्त्रिदशास्तुष्टुवुर्मांसुविस्मिताः ॥ मांप्रणम्यपुनर्देवाममन्थुः
क्षीरसागरम् ॥ २२ ॥ तस्मिन्प्रमथ्यमानेतुमयादेवैश्चभामिनि ॥ ज्येष्ठादेवीसमुत्पन्नारत्नस्रग्वाससावृता ॥ २३ ॥ उत्पन्नासाब्रवीद्देवान्कि
कर्त्तव्यंमयेतिवै ॥ तामब्रुवंस्तुतेदेवींसर्वदेवगणाभृशम् ॥ २४ ॥ देवाऊचुः ॥येषांगृहान्तरेनित्यंकलहःसंप्रवर्तते ॥ तत्तेस्थानंप्रयच्छामोवसतत्राशु
भान्विता ॥२५॥ परुषंभाषणंनित्यंवदन्त्यनृतवादिनः ॥ सन्ध्याकालेतुयेपापाःस्वपन्तिमलचेतसः ॥ २६ ॥ तेषांवेश्मनिसंतिष्ठदुःखदारिद्र्यदायि
नी ॥ कपालकेशभस्मास्थितुषाङ्गाराणियत्रतु ॥ २७॥ तत्रतेसततंस्थानंभविष्यतिनसंशयः ॥ यस्यवेश्मकपालास्थिभस्मकेशादिचिह्नितम्॥२८॥
तद्भजस्वाशुभेनित्यंकलिनासहनित्यशः ॥ अकृत्वापादयोःशौचंयस्त्वाचामतिदुर्मतिः ॥ २९ ॥ तंभजस्वमहादेविकलुषेणभृशंवृतम् ॥ तुषाङ्गार
कपालाश्मवालुकावस्त्रचर्मभिः॥३०॥ दन्तधावनकर्तारोभविष्यन्तिनराधमाः॥रमस्वकलिनादेवितेषांवेश्मसुनित्यशः॥३१॥तिलपिष्टंकलञ्जंचकलिङ्गं
शिग्रुगृञ्जनम् ॥ छत्राकंविड्वराहंचविल्वंकोशातकीफलम् ॥ ३२ ॥ अलाबुंचपलाण्डुंचयेखादन्तिनराधमाः ॥ तेषांगेहेतवस्थानंदेविदारिद्र्यदेसदा
॥ ३३ ॥ रुद्रउवाच ॥ इत्यादिश्यसुराःसर्वेज्यैष्ठांचकलिवल्लभाम् ॥ पुनश्चमथनंचक्रुःक्षीराब्धेःसुसमाहिताः ॥ ३४ ॥ ततश्चवारुणीदेवीसमु
त्पन्नाशुभानने ॥ अनन्तोनागराजोऽथतांजग्राहसुलोचनाम् ॥ ३५ ॥ ततस्तत्रसमुत्पन्नासर्वाभरणभूषिता ॥ वैनतेयस्यभार्याभूत्सर्वलक्षणशोभिता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ३६ ॥ ततोऽप्सरोगणादिव्यागन्धर्वाश्चमहौजसः ॥ जज्ञिरेरूपसंपन्नामधुगायनतत्पराः ॥३७॥ ऐरावतस्ततोजज्ञेतथैवोच्चैःश्रवाहयः॥धन्वन्तरिः
पारिजातःसुरभिःसर्वकामधुक् ॥ ३८ ॥ एतान्सर्वान्सहस्राक्षोजग्राहप्रीतमानसः ॥ ततःप्रभातसमयेद्वादश्यामुदितेरवौ ॥ ३९ ॥ मथ्यमानेपुनस्त
स्मिन्देवैरिन्द्रपुरोगमैः ॥ ततःप्रहृष्टवदनैःस्तूयमानामहर्षिभिः ॥ ४० ॥ उत्पन्नाश्रीमहालक्ष्मीःसर्वलोकेश्वरीशुभा ॥ बालार्ककोटिसङ्काशाकनकाङ्गद
भूषिता ॥ ४१ ॥ हेमाम्बुजसमासीनासर्वलक्षणशोभिता ॥ पद्मपत्रविशालाक्षीनीलकुञ्चितमूर्द्धजा ॥ ४२ ॥ दिव्यचन्दनलिप्ताङ्गीदिव्यपुष्पैरल
ङ्कृता ॥ नानारत्नमयैर्दिव्यैःसर्वैराभरणैर्युता ॥ ४३ ॥ तनुमध्याजगद्धात्रीपीनोन्नतपयोधरा ॥ चतुर्हस्ताविशालाक्षीपूर्णेन्दुसदृशानना ॥ ४४ ॥
वसुपात्रंमातुलुङ्गंस्वर्णपद्मयुगंशुभम् ॥ बिभ्राणाहस्तकमलैःसर्वाभरणभूषितैः ॥ ४५ ॥ अम्लानपङ्कजांमालांधारयन्तीह्युरःस्थले ॥ ददृशुस्तांमहा
देवींसर्वलोकहितैषिणीम् ॥ ४६ ॥ ईश्वरींसर्वभूतनांमातरंपद्ममालिनीम् ॥ नारायणींजगद्धात्रींनारायणहृदालयाम् ॥ ४७ ॥ तांविलोक्यमहा
लक्ष्मींप्रहृष्टाःसर्वदेवताः ॥ अवादयन्तपटहान्दिविदेवगणाभृशम् ॥ ४८ ॥ ववृषुःपुष्पवर्षाणिवनदेव्योनिरन्तरम् ॥ जगुर्गन्धर्वपतयोननृतुश्चाप्सरो
गणाः ॥ ४९ ॥ ववुःपुण्यास्तथावाताःसुप्रभोऽभूद्दिवाकरः ॥ जज्वलुश्चाग्नयःशान्ताःप्रसन्नाश्चदिशोदश ॥ ५० ॥ रजताद्रिनिभैर्दिव्यैश्चतुर्दन्तैर्महा
गजैः ॥ सुधापूर्णैरत्नकुम्भैस्सिच्यमानांस्वमूर्धनि ॥५१॥ तांदृष्ट्वामुनयस्सर्वेजयशब्दैर्निरन्तरम् ॥ स्तुतिभिःपुष्कलाभिश्चनमश्चक्रुस्समन्ततः॥५२॥
अनन्तरंशीतरश्मिरुद्गात्क्षीरसागरे ॥ सुधामयूखवान्सोमोमातुर्भ्रातासुखावहः ॥५३॥ नक्षत्राधिपतिश्चाभूच्चन्द्रोवैलोकमातुलः ॥ ततःप्रियाहरेः
पुण्यातुलसीलोकपावनी ॥ ५४ ॥ समुत्पन्नाजगद्धात्रीपूजार्थंशार्ङ्गिणोहरेः ॥ ततःप्रहृष्टमनसःसर्वेदेवादिवौकसः ॥ ५५ ॥ तंशलपूर्ववत्स्थाप्य
परिपूर्णमनोरथाः ॥ समेत्यमातरंसर्वेशिवब्रह्मपुरोगमाः ॥ ५६ ॥ स्तुत्वानामसहस्रेणजेपुःश्रीसूक्तसंहिताम् ॥ ततःप्रसन्नासादेवीसर्वान्देवा
नुवाचह ॥ ५७ ॥ श्रीरुवाच ॥ वरंवृणीध्वंभद्रंवोवरदाहंसुरोत्तमाः ॥५८॥ रुद्रउवाच ॥ ततःप्रहृष्टवदनास्सर्वएवदिवौकसः ॥ ऊचुःप्राञ्जलयोदेवाः
श्रियंनम्रात्ममूर्तयः॥५९॥देवाऊचुः॥प्रसीदकमलेदेविसर्वलोकेश्वरप्रिये॥विष्णोर्वक्षःस्थलेदेविभवनित्यानपायनी ॥६०॥ त्रैलोक्यंनत्वयादेवित्याज्यं
हिपरमोवरः ॥ यदपाङ्गाश्रितंसर्वंजगत्स्थावरजङ्गमम् ॥६१॥ त्वयाविलोकिताःसर्वेप्रभवन्तिदिवौकसः ॥ मातारुद्रादिदेवानामैश्वर्यंत्वत्कटाक्षतः ॥
एतदिच्छामहेदेविजगन्मातर्नमोऽस्तुते ॥६२॥रुद्रउवाच ॥ इत्युक्तादैवतैःसर्वैर्लोकमातामहेश्वरी ॥ एवमस्त्वितितान्देवान्प्राहनारायणप्रिया ॥६३ ॥
ततोनारायणःश्रीशःशङ्खचक्रगदाधरः॥ तथैवाविरभूद्ब्रह्मापूर्ववत्क्षीरसागरे ॥६४॥ ततःप्रतुष्टुवुर्देवानमस्कृत्यजनार्दनम् ॥ ऊचुःप्राञ्जलयःसर्वेप्रहृष्ट

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वदनाःशुभाः ॥ ६५॥ देवाऊचुः ॥ गृहाणदेवींसर्वेशमहिषींतववल्लभाम् ॥ जगत्संरक्षणार्थायलक्ष्मीमनपगामिनीम् ॥ ६६ ॥ रुद्रउवाच ॥ इत्युक्त्वामुनयःसर्वेदेवाब्रह्मपुरोगमाः ॥नानारत्नमयेदिव्येपीठेबालार्कसंनिभे ॥६७॥ निवेश्यदेवींदेवंचआनन्दाश्रुपरिप्लुताः ॥ नानारत्नमयैःशुभ्रैः स्वर्णकुम्भैर्मनोरमैः ॥६८॥ सुधामृतजलैःपूर्णैःश्रीमन्मन्त्राभिमन्त्रितैः॥अत्राभिषेचनंचक्रुस्तयोर्मूर्ध्नोःसुधाजलैः॥६९॥वैष्णवैश्चानुवाकैश्चश्रीसूक्तेन महर्षयः॥ दिव्याम्बरैर्दिव्यमाल्यैर्नानारत्नविभूषितैः ॥७० ॥ लक्ष्म्यासहसमासीनमर्चयामासुरच्युतम् ॥ गन्धैर्धूपैश्चदीपैश्चनैवेद्यैश्चसुधामयैः॥७१॥ अप्राकृतैःफलैर्दिव्यैरर्चयामासुरीश्वरम् ॥ अमृतादुत्थितादेवीतुलसीकोमलाशुभा ॥ ७२ ॥ तयाश्रीपादयुगलमर्चयामासुरञ्जसा ॥ प्रदक्षिणमनुव्रज्यनमस्कृत्यमुहुर्मुहुः ॥७३॥ तष्टुवुःस्तुतिभिर्देवाःहर्षपूर्णाश्रुविक्लवाः ॥ ततःप्रसन्नोभगवान्सर्वदेवेश्वरोहरिः ॥ अभीष्टान्प्रददौतेभ्योवरान्देव्यासह प्रभुः ॥ ७४ ॥ ततःसुहृष्टाःसुरमानुषाद्यालक्ष्मीकटाक्षार्पितदृष्टिपूताः ॥ प्रभूतधान्यार्थयुतानिरन्तरंसुखंपरंप्रापुरनामयाभृशम् ॥७५ ॥ इतिश्रीपाद्मे महा०पद्मप०उत्तर०उमामहेश्वरसंवादेलक्ष्म्युत्पत्तिर्नामद्वात्रिंशदधिकद्विशततमोऽध्यायः ॥२३२॥ शङ्करउवाच॥ततःप्रोवाचभगवान्सुरांश्चैवमहामुनीन् ॥देव्यासहप्रहृष्टात्मासर्वलोकहितायवै॥ १॥श्रीभगवानुवाच ॥शृणुध्वंमुनयःसर्वेदेवताश्चमहाबलाः॥एकादशीमहापुण्यासर्वोपद्रवनाशिनी ॥२॥ लक्ष्मीसंदर्शनार्थायभवद्भिःसमुपोषिता ॥ अद्यप्रभृतिलोकानामुपोष्यासाभविष्यति ॥३॥ पूजितोऽस्मिश्रियासार्धंभवद्भिर्मुनिसत्तमाः ॥ द्वादश्यांतुविशेषेणतुलस्याचतथाश्रिया ॥ ४ ॥ यस्मात्तुपूजितोऽस्म्यत्रभवद्भिर्मुनिसत्तमाः ॥ तस्मात्तुसर्वदापुण्याद्वादशीममवल्लभा ॥ ५ ॥ अद्यप्रभृतिये लोकाउषिताःपूर्ववासरे ॥ द्वादश्यामुदितेभानौश्रद्धयापरयायुताः ॥ ६ ॥ येपूजयन्तिमांभक्तास्तुलस्याचश्रियासह ॥ सर्वेतेबन्धनिर्मुक्ताःप्राप्नुवन्तिपदंमम ॥ ७ ॥ नार्चयन्तिचयेवैमांद्वादश्यांपुरुषोत्तमम् ॥ तेनराःपापकर्माणोममायाविमोहिताः ॥ ८ ॥ येनार्चयन्तिपापिष्ठानरानरकगामिनः ॥ तान्पापान्विषयैर्बद्धान्ममपूजापराङ्मुखान् ॥ क्षिपत्यजस्रंसंसारेमायाममदुरत्यया ॥ ९ ॥ रुद्रउवाच ॥ अद्यप्रभृतियेलोकाएकादश्यांसुरोत्तमाः ॥ भुञ्जतेतेऽपिनिरयंप्राप्नुवन्तिनसंशयः ॥ १० ॥ एवमुक्त्वातुभगवान्परमात्मासनातनः ॥ संस्तूयमानोमुनिभिःप्रययौस्वकमालयम् ॥ ११ ॥ क्षीराब्धौशेषपर्यङ्केविमानेसूर्यसन्निभे ॥ देव्यासहविशालाक्ष्यारमयापरमेश्वरः ॥ १२ ॥ दर्शनार्थंसुराणांचतत्रसन्निहितोऽभवत् ॥ ततःसुरगणाःसर्वेकूर्मरूपंसनातनम् ॥ १३ ॥ भक्त्यासंपूजयित्वाथतुष्टुवुर्हृष्टमानसाः ॥ ततःप्रसन्नोभगवान्कूर्मरूपीजनार्दनः ॥ १४ ॥ भगवानुवाच ॥ वरंवृणीध्वंदेवेशायद्वोमनसिवर्तते ॥ १५ ॥ रुद्रउवाच ॥ ततोदेवगणाःसर्वेकूर्मरूपंजनार्दनम् ॥ ऊचुः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राञ्जलयः सर्वेहर्षनिर्भरमानसाः ॥ १६ ॥ देवाऊचुः ॥ शेषस्यदिग्गजानांचसहायार्थंमहाबल ॥ धर्तुमर्हसिदेवेशसप्तद्वीपवतींमहीम् ॥ १७॥ रुद्र
उवाच ॥ एवमस्त्विवतिहृष्टात्माभगवाँल्लोकभावनः ॥ धारयामासधरणींसप्तद्वीपसमावृताम् ॥ १८ ॥ ततोदेवाःसगन्धर्वादैत्यदानवमानुषाः ॥ मह
र्षिभिरनुज्ञाताःस्वलोकान्प्रतिपेदिरे ॥ १९ ॥ तदाप्रभृतितेसर्वेदेवाब्रह्मपुरोगमाः ॥ सिद्धायेमानुषाश्चैवयोगिनोमुनिसत्तमाः ॥२०॥ विष्णोराज्ञांपुर
स्कृत्यभक्त्यापरमयायुताः ॥ एकादश्यामुपोष्याथभक्त्याचैवजनार्दनम् ॥ २१ ॥ द्वादश्यामर्चनंचक्रुर्विधिनावरवर्णिनि ॥ एतत्तुसर्वमाख्यातंदेव्या
जन्मवरानने ॥ कौर्मंचवैभवंविष्णोःकिमन्यच्छ्रोतुमिच्छसि ॥ २२ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०उमामहेश्वरसंवादेएकादश्युपवासकथनं
नामत्रयस्त्रिंशदधिकद्विशततमोऽध्यायः ॥ २३३ ॥ पार्वत्युवाच ॥ भगवञ्छ्रोतुमिच्छामिद्वादश्याश्चविधानकम् ॥ विष्णोःपूजाविधानंचकर्त्तव्यंतत्र
वैप्रभो ॥ १ ॥ एकादश्याःप्रभावंचसर्वपापहरंनृणाम् ॥ आचक्ष्वविस्तरेणैवमयिप्रीत्यामहेश्वर ॥ २॥ महादेवउवाच ॥ शृणुदेविप्रवक्ष्यामिद्वादश्या
श्चविधानकम् ॥ तस्याःस्मरणमात्रेणसंतुष्टःस्याज्जनार्दनः ॥ ३ ॥ एकादश्यांतुप्राप्तायांसमुपोष्येहमानवाः ॥ सर्वपापविनिर्मुक्तायान्तिविष्णोःपरं
पदम् ॥ ४ ॥ सप्तजन्मार्जितंपापंज्ञानतोऽज्ञानतःकृतम् ॥ क्षणादेवलयंयातिद्वादश्यांहरिपूजनात् ॥ ५॥ अश्वमेधसहस्राणिवाजपेयशतानिच ॥ एका
दश्युपवासस्यकलांनार्हन्तिषोडशीम् ॥ ६ ॥ धर्मदाह्यर्थदाचैवकामदामोक्षदाकिल ॥ सर्वकामदुघानॄणांद्वादशीवरवर्णिनि ॥ ७ ॥ एकादशीसमंकिं
चित्पापत्राणंनविद्यते ॥ एकादशीसमंकिंचिद्व्रतंनास्तिशुभेक्षणे ॥ ८ ॥ एकादशींपरित्यज्ययोह्यन्यद्व्रतमाचरेत् ॥ सकरस्थंमहद्राज्यंत्यक्त्वाभैक्ष्यं
तुयाचते ॥ ९ ॥ एकादशेन्द्रियैःपापंयत्कृतंभवतिप्रिये ॥ एकादश्युपवासेनतत्सर्वंविलयंव्रजेत् ॥ १० ॥ रटन्तीहपुराणानिभूयोभूयोवरानने ॥ न
भोक्तव्यंनभोक्तव्यंसंप्राप्तेहरिवासरे ॥११॥ अभक्ष्यंसर्वदाप्रोक्तंकिंपुनःशुक्लकृष्णयोः ॥ सब्रह्महासुरापीचस्तेयीचगुरुतल्पगः ॥१२॥ मोहादश्नातियो
मर्त्यस्सम्प्राप्तेहरिवासरे॥अतिक्रामतियोमोहाद्द्वादशींतुवरानने॥१३॥उपवासेनमूढात्माविष्णुलोकंनपश्याति ॥ भुङ्क्ष्वभुङ्क्ष्वेतियोब्रूयात्सम्प्राप्तेहरि
वासरे॥ १४ ॥ योब्राह्मणंस्त्रियंगांचजहीतिचवदेत्कचित् ॥ मद्यंपिबेतियोब्रूयात्तेषामपितथागतिः ॥१५॥ पुरोडाशोऽपिवामोरुसम्प्राप्तेहरिवासरे ॥
अभक्ष्यस्सर्वदाप्रोक्तःकिंपुनश्चान्नसंस्क्रिया ॥ १६ ॥ वर्णानामाश्रमाणांचसर्वेषांवरवर्णिनि ॥ एकादश्युपवासस्तुकर्त्तव्योनात्रसंशयः ॥ १७ ॥
एकादश्यांचप्राप्तायांमातापित्रोर्मृतेऽहनि॥द्वादश्यांतुप्रदातव्यंनोपवासदिनेकचित्॥१८॥गर्हितान्नंनवाश्नन्तिपितरश्चदिवौकसः॥ एकादश्यांनभोक्तव्यं
सुरांवानपिबेत्कचित् ॥ १९ ॥ ब्राह्मणंनैवहन्याचइत्येषावैदिकीश्रुतिः ॥ तस्मादेकादशींशुद्धामुपवासंसमाचरेत् ॥ २० ॥ दशमीमिश्रितांतांतु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रयत्नेनविवर्जयेत् ॥ अरुणोदयवेलायांदशमीमिश्रिताभवेत् ॥ २१ ॥ तांत्यक्त्वाद्वादशींशुद्धामुपोषेदविचारयन् ॥ कलायांविद्यमानायांसूर्यस्यो
दयनंप्रति ॥ २२ ॥ त्रयोदश्यांतथादेविद्वादशीपरिविद्यते ॥ तथाचद्वादशीशुद्धाह्युपवासेविधीयते ॥ २३ ॥ अरुणोदयवेलायांकृत्यंसर्वंसमाचरेत्
॥ कलायामपिद्वादश्यांपारणंतत्रचोदितम् ॥ २४ ॥शुद्धामेकादशींचापित्यजेदत्रनसंशयः ॥ कलाप्येकादशीयत्रद्वादश्यामुदितेरवौ ॥ २५ ॥ सर्वा
मेकादशींत्यक्त्वातत्रैवोपवसेद्द्विजः ॥ एवंविधिंविनिश्चित्यसमुपोष्यहरेर्दिनम् ॥ २६ ॥ सायमाद्यन्तयोरह्नोःसायंप्रातस्तुमध्यमे ॥ तत्रोपवासंकुर्वी
तत्यक्त्वाभुक्तिचतुष्टयम् ॥ २७ ॥ दशम्यामेकभक्तस्तुनारीसंगमवर्जितः ॥ अवनीतलपशायीचपरेऽहनिवसेच्छुचिः ॥ २८ ॥ धात्रीफलानुलिप्ताङ्गः
स्नानंनद्यांसमाचरेत् ॥ उपवासपरोभूत्वारात्रौसंपूजयेद्धरिम् ॥२९॥पाखण्डिनंविकर्मस्थंपतितंश्वपचंतथा॥नावलोकेन्नसंभाषेन्नस्पृशेत्तत्रवैष्णवः॥३०॥
अवैष्णवस्तुयोविप्रःसपाषण्डःप्रकीर्तितः ॥ शिखोपवीतत्यागीचविकर्मस्थइतीरितः ॥ ३१ ॥ महापापोपपापाभ्यांयुक्तःपतितउच्यते ॥ अन्त्यजः
श्वपचःप्रोक्तोवेदैस्तत्रसुनिर्णयः॥३२॥रात्रौसंपूज्यदेवेशंजागरंचसमाचरेत् ॥ गन्धैःपुष्पैस्तथादीपैर्वस्त्रैराभरणैःशुभैः ॥ ३३ ॥ जपैःस्तोत्रैर्नमस्कारैः
पूजयेन्निशिभक्तितः ॥ ततःप्रभातसमयेतुलसीमिश्रितैर्जलैः ॥ ३४ ॥ स्नात्वासम्यग्विधानेनसंतर्प्यपितृदेवताः ॥ पूजयेज्जगतामीशंलक्ष्म्यासहज
नार्दनम् ॥ ३५ ॥ कोमलैस्तुलसीपत्रैःपुष्पैश्चैवसुगन्धिभिः ॥ दीपान्नीराजयेत्तत्रवारमष्टोत्तरंशतम् ॥ ३६ ॥ शतपत्रकृतांमालांताभ्यांसम्यङ्निवे
दयेत् ॥ धूपंदीपंचनैवेद्यंताम्बूलंचसमर्पयेत् ॥ ३७ ॥ शर्करासहितंदिव्यंपायसान्नंसमर्पयेत् ॥ कर्पूरेणचसंयुक्तंताम्बूलंचनिवेदयेत् ॥ ३८ ॥ प्रदक्षि
णनमस्कारंकृत्वाभक्त्यासमन्वितः ॥ आज्यंनजुहुयाद्वह्नौशतमष्टोत्तरंतथा ॥ ३९ ॥ प्रत्यृचंपुरुषसूक्तेनलक्ष्मीसूक्तेनपायसम् ॥ ब्राह्मणान्भोजयेद्भ
क्त्यास्वयंभुञ्जीतवाग्यतः ॥ ४० ॥ पुराणादिप्रपाठेनक्षपयेत्तद्दिनंमहत् ॥ क्षितिशायीब्रह्मचारीतस्यामेवनिशिस्वपेत् ॥ ४१ ॥ एवंसंपूज्यमानःसद्वा
दश्यांकमलापतिः ॥ क्षणात्प्रसन्नोभगवान्सर्वाभीष्टप्रदोध्रुवम् ॥ ४२ ॥ इत्येतत्कथितंदेविद्वादशीव्रतमुत्तमम् ॥ किमन्यच्छ्रोतुकामा
सितद्वक्तव्यंब्रवीम्यहम् ॥ ४३ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०उमामहेश्वरसंवादेद्वादशीमाहात्म्यंनामचतुस्त्रिंशदधिकद्विशततमोऽध्यायः
॥ २३४ ॥ श्रीपार्वत्युवाच ॥ पाषण्डानांचसंवादंवर्जयेदितियत्त्वया ॥ उक्तंममेहभगवञ्छ्वपचादपिगर्हितम् ॥ १ ॥ तेकीदृशाःसमा
ख्याताःकैर्लिङ्गैश्चिह्निताभुवि ॥ २ ॥ रुद्रउवाच ॥ येऽन्यंदेवंपरत्वेनवदन्त्यज्ञानमोहिताः ॥ नारायणाज्जगन्नाथात्तेवैपाषण्डिनः
स्मृताः ॥ ३ ॥ द्वेष्टारोविष्णुभक्तानांयेचावैष्णवसंश्रयाः ॥ पाषण्डिभिश्चसंयुक्तास्तेवैपाषण्डिनस्स्मृताः ॥ ४ ॥ कपालभस्मास्थिधरायेह्यवै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिकलिङ्गिनः ॥ ऋतेवनस्थाश्रमाच्चजटावल्कलधारिणः ॥ ५ ॥ अवैदिकक्रियोपेतास्तेवैपाषण्डिनस्तथा ॥ शङ्खचक्रोर्ध्वपुण्ड्रादिचिह्नैःप्रियतमैर्हरेः
॥ ६ ॥ रहितायेद्विजादेवितेवैपाषण्डिनःस्मृताः ॥ श्रुतिस्मृत्युदिताचारंयस्तुनाचरतिद्विजः ॥ ७ ॥ सपाषण्डीतिविज्ञेयःसर्वलोकेषुगर्हितः ॥
समस्तयज्ञभोक्तारमविदित्वाच्युतंहरिम् ॥ ८ ॥ उद्दिश्यदेवताएवजुहोतिचददातिच ॥ सपाषण्डीतिविज्ञेयःस्वतन्त्रःसर्वकर्मसु ॥ ९ ॥ स्वातन्त्र्या
त्कुरुतेयस्तुकर्मवेदोदितंमहत् ॥ विनावैभगवत्प्रीतिंसपाषण्डीतिवैस्मृतः ॥ १० ॥ यस्तुनारायणंदेवंब्रह्मरुद्रादिदैवतैः ॥ समत्वेनैववीक्षेतसपाषण्डी
भवेत्सदा ॥ ११ ॥ अवस्थात्रितयेयस्तुमनोवाक्कायकर्मभिः ॥ वासुदेवंनजानातिसपाषण्डीभवेद्द्विजः ॥ १२ ॥ किमत्रबहुनोक्तेनब्राह्मणायेऽप्य
वैष्णवाः ॥ नस्प्रष्टव्यानवक्तव्यानद्रष्टव्याःकदाचन ॥ १३ ॥ वसिष्ठउवाच ॥ एवंश्रुत्वाचसादेवीशङ्करेणाभिभाषितम् ॥ विस्मयंपरमंगत्वापुनः
प्रोवाचभामिनी ॥ १४ ॥ पार्वत्युवाच ॥ भगवन्परमंगुह्यंपृच्छामिसुरसत्तम ॥ मयिप्रीत्यासमाचक्ष्वसंशयोवर्त्ततेभृशम् ॥ १५ ॥ कपालभस्म
चर्मास्थिधारणंश्रुतिगर्हितम् ॥ तत्त्वयाधार्यतेदेवगर्हितंकेनहेतुना ॥ १६ ॥ स्त्रीचापल्येनदेवेशपृच्छामित्वांमहामते ॥ महानुभावकथितंनकर्त्त
व्यंमहेश्वर ॥ १७ ॥ त्वयाचरितमित्येतद्वक्तव्यंनक्वचित्प्रभो ॥ अकर्त्तव्यमपिप्रश्नंक्षन्तुमर्हसिमेप्रभो ॥ १८ ॥ वसिष्ठउवाच ॥ इतिदेव्या
हरःपृष्टोरहस्येजनवर्जिते ॥ उवाचपरमंगुह्यंयद्यदाचरितंस्वकम् ॥ १९ ॥ शिवउवाच ॥ शृणुदेविप्रवक्ष्यामियद्गुह्यंपरमाद्भुतम् ॥ नवक्तव्यंत्वयादे
विजनेषुकथितंमया ॥ २० ॥ अपृथक्त्वाच्छरीरस्यवक्ष्यामितवसुव्रते ॥ नमुच्याद्यामहादैत्याःपुरास्वायंभुवेऽन्तरे ॥ २१ ॥ महाबलामहावीर्याम
हावीरामहौजसः ॥ सर्वेविष्णुरताःशुद्धाःसर्वपापविवर्जिताः ॥ २२ ॥ त्रयीधर्मवृताःसर्वेभगवद्भक्तिसंयुताः ॥ निर्जित्यसकलान्देवान्व्याहतप
राक्रमाः ॥ २३ ॥ पदानितेषांजगृहुर्बलवीर्यसमन्विताः ॥ ततोदेवगणाःसर्वेभग्नाइन्द्रपुरोगमाः ॥ विष्णोःसमीपमागम्यभयार्त्ताःशरणंगताः
॥ २४ ॥ देवाऊचुः॥ देवदेवमहादैत्यैर्जम्भासुरपुरोगमैः ॥ स्वात्स्वात्स्थानाच्च्यावितास्तुभवन्तंशरणंगताः ॥ २५ ॥ अजेयान्सर्वदेवानांतपोनि
र्द्धूतकल्मषान् ॥ त्वमेवैतान्महादैत्याञ्जेतुमर्हसिकेशव ॥ २६ ॥ महादेवउवाच ॥ इत्याकर्ण्यहरिर्वाक्यंदेवानांचभयानकम् ॥ तान्समाश्वास्यदि
व्यपालान्मामाहपुरुषोत्तमः ॥ २७ ॥ श्रीभगवानुवाच ॥ त्वंहिरुद्रमहाबाहोमोहनार्थंसुरद्विषाम् ॥ पाषण्डाचरणंधर्मंकुरुष्वसुरसत्तम ॥ २८ ॥
तामसानिपुराणानिकथयस्वचतान्प्रति ॥ मोहनानिचशास्त्राणिकुरुष्वचमहामते ॥ २९ ॥ मय्यभक्ताश्चविप्राश्चभविष्यन्तिमहर्षयः ॥ त्वच्छ
क्त्यातान्समाविश्यकथयस्वचतामसान् ॥ ३० ॥ काणादंगौतमंशक्तिमुपमन्युंचजैमिनिम् ॥ कपिलंचैवदुर्वासोमृकण्डूचबृहस्पतिम् ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भार्गवंजामदग्न्यंचदशैतांस्तामसान्नृषीन् ॥ तवशक्त्यासमाविश्यकुरुष्वजगतोऽहितम् ॥ ३२ ॥ त्वच्छक्त्याचनिविष्टास्तेतमसोद्रिक्तयाभृशम् ॥
तामसास्तेभविष्यन्तिक्षणादेवनसंशयः ॥ ३३ ॥ कथयिष्यन्तितेविप्रास्तामसानिजगत्रये ॥ पुराणानिचशास्त्राणित्वत्परत्वपराणिच ॥ ३४ ॥
कपालचर्मभस्मास्थिचिह्नान्यमरसर्वशः ॥ त्वमेवधृत्वातांल्लोकान्मोहयस्वजगत्रये ॥ ३५ ॥ तथापाशुपतंशास्त्रंत्वमेवकुरुसत्कृतः ॥ कङ्कालशैव
पाषण्डमहाशैवादिभेदतः ॥ ३६ ॥ अलक्ष्यंचमतंसम्यग्वेदबाह्यनराधमाः ॥ भस्मास्थिधारिणःसर्वेभविष्यन्तिह्यचेतसः ॥ ३७ ॥ त्वांपरत्वेन
वक्ष्यन्तिसर्वशास्त्रेषुतामसाः ॥ तेषांमतमधिष्ठायसर्वेदैत्याःसदानवाः ॥ ३८ ॥ भवेयुस्तेमद्विमुखाःक्षणादेवनसंशयः ॥ अहमप्यवतारेषुत्वांचरुद्रमहा
बल ॥ ३९ ॥ तामसानांमोहनार्थंपूजयामियुगेयुगे ॥ मतमेतदवष्टभ्यपतन्त्येवनसंशयः ॥ ४० ॥ महादेवउवाच ॥ तच्छ्रुत्वाहंयथोक्तंतुवासुदेवेन
भामिनि ॥ समुद्विग्नमनादीनोबभूवात्रवरानने ॥ ४१ ॥ नमस्कृत्याथतंदेवमब्रवंपरमेश्वरम् ॥ त्वयोदितमिदंदेवकरोमियदिभूतले ॥ ४२ ॥
तस्मान्नाशोहिमेनाथभविष्यतिनसंशयः ॥ तत्रशक्यंमयाकर्तुमेतत्कृत्यंहरेऽधुना ॥ ४३ ॥ त्वदाज्ञापिचनोल्लङ्घ्याएतद्दुःखतरंमहत् ॥ एवमुक्तेततो
देविसमाश्वास्यचमांपुनः ॥ ४४ ॥ आत्मनाशायतेनात्रभवत्वित्याहमांहरिः ॥ देवतानांहितार्थायकुरुष्ववचनंमम ॥ ४५ ॥ तवापिजीवनोपायं
कथयामिसुरोत्तम ॥ दत्तवान्कृपयामह्यमात्मनामसहस्रकम् ॥ ४६ ॥ हृदयेमांसमाधायजपमन्त्रंममाव्ययम् ॥ षडक्षरंमहामन्त्रंतारकब्रह्मसंज्ञितम् ॥
॥ ४७ ॥ येभजन्तिहिमांभक्त्यातेषांमुक्तिर्नसंशयः ॥ इन्दीवरदलश्यामंपद्मपत्रविलोचनम् ॥ ४८ ॥ शङ्खारशार्ङ्गेषुधरंसर्वाभरणभूषितम् ॥ पीतवस्त्रंचतु
र्बाहुंजानकीप्रियवल्लभम् ॥ ४९ ॥ श्रीरामायनमइत्येवमुच्चार्यमन्त्रमुत्तमम् ॥ सर्वदुःखहरंचैतत्पापिनामपिमुक्तिदम् ॥ ५० ॥ इमंमन्त्रंजपन्नित्यममलस्त्वं
भविष्यसि ॥ भस्मास्थिधारणाद्यत्तुसंभूतंकिल्बिषंत्वयि ॥ ५१ ॥ मङ्गलंतदभूत्सर्वंमन्मन्त्रोच्चारणाच्छुभात् ॥ तर्पितोनाशयिष्यामिपापंसर्वं
सुरोत्तम ॥ ५२ ॥ मदन्यदेवताभक्तिर्जायतेनतुसुव्रत ॥ मनसैवार्चयन्हृदिमांनाथंपुरुषोत्तमम् ॥ ५३ ॥ मदाज्ञांकुरुमत्प्रीत्यासर्वमेतच्छुभंतव ॥
इतिसंदिश्यमांदेविविससर्जमरुद्गणान् ॥ ५४ ॥ विसृष्टास्तेततोदेवानिवृत्ताःस्वाश्रमंययुः ॥ ततोमांप्रार्थयामासुर्देवाइन्द्रपुरोगमाः ॥ ५५ ॥ इन्द्रादय
ऊचुः ॥ शीघ्रंकुरुहितंदेवयथोक्तंहरिणाधुना ॥ ५६ ॥ महादेवउवाच ॥ देवतानांहितार्थायवृत्तिपाखण्डिनांशुभे ॥ कपालचर्मभस्मास्थिधारणं
तत्कृतंमया ॥ ५७ ॥ तामसानिपुराणानियथोक्तंविष्णुनाशुभे ॥ पाषण्डशैवशास्त्राणियथोक्तंकृतवानहम् ॥ ५८ ॥ मच्छक्त्यापिसमाविश्यगौत
मादिद्विजानपि ॥ वेदबाह्यानिशास्त्राणिसम्यग्युक्तंमयानघे ॥ ५९ ॥ इमंमतमवष्टभ्यदुष्टाःसर्वेचराक्षसाः ॥ भगवद्विमुखाःसर्वेबभूवुस्तमसावृताः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ६० ॥ भस्मादिधारणंकृत्वामहोग्रतमसावृताः ॥ मामेवपूजयांचक्रुर्मांसासृक्चन्दनादिभिः ॥ ६१ ॥ मत्तोवरप्रदानानिलब्ध्वा
मदबलोद्धताः ॥ अत्यन्तविषयासक्ताःकामक्रोधसमन्विताः ॥ ६२ ॥ सत्त्वहीनास्तुनिर्वीर्याजितादेवगणैस्तदा ॥ सर्वधर्मपरिभ्रष्टाः
कालेयान्त्यधमांगतिम् ॥ ६३ ॥ येमेमतमवष्टभ्यचरन्तिपृथिवीतले ॥ सर्वधर्मैश्वरहिताःपश्यन्तिनिरयंसदा ॥ ६४ ॥ एवंदेवहितार्थाय
वृत्तिर्मेदेविगर्हिता ॥ विष्णोराज्ञांपुरस्कृत्यकृतंभस्मास्थिधारणम् ॥ ६५ ॥ बाह्यचिह्नमिदंदेविमोहनार्थायविद्विषाम् ॥ अथान्तर्हृदयेनित्यंध्यात्वा
देवंजनार्दनम् ॥ ६६ ॥ जपन्नेवचतन्मन्त्रंतारकंब्रह्मवाचकम् ॥ सहस्रनामसदृशंविष्णोर्नारायणस्यतु ॥ ६७ ॥ षडक्षरंमहामन्त्रंरघूणां
कुलवर्द्धनम् ॥ जपन्वैसततंदेविसदानन्दसुधाप्लुतम् ॥ सुखमात्यन्तिकंब्राह्ममश्नामिसततंशुभे ॥ ६८ ॥ एतत्तेसर्वमाख्यातंत्वयापृष्टंशुभानने ॥
किमन्यच्छ्रोतुकामासिप्रीत्यातत्परिपृच्छमाम् ॥ ६९ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०पाषण्डोत्पत्तिवर्णनंनामपञ्चत्रिंशदधिकद्विशततमो
ऽध्यायः ॥२३५॥पार्वत्युवाच॥ तामसानिचशास्त्राणिसमाचक्ष्वममानघ ॥ संप्रोक्तानिचयैर्विप्रैर्भगवद्भक्तिवर्जितैः ॥ तेषांनामानिक्रमशःसमाचक्ष्व
सुरेश्वर ॥ १ ॥ रुद्रउवाच ॥ शृणुदेविप्रवक्ष्यामितामसानियथाक्रमम् ॥ येषांस्मरणमात्रेणमोहःस्याज्ज्ञानिनामपि ॥ २ ॥ प्रथमंहिमयैवोक्तं
शैवंपाशुपतादिकम् ॥ मच्छक्त्यावेशितैर्विप्रैःप्रोक्तानिचततःशृणु ॥ ३ ॥ कणादेनतुसंप्रोक्तंशास्त्रंवैशेषिकंमहत् ॥ गौतमेनतथान्यायंसाङ्ख्यं
तुकपिलेनवै ॥ ४ ॥ धिषणेनतथाप्रोक्तंचार्वाकमतिगर्हितम् ॥ दैत्यानांनाशनार्थायविष्णुनाबुद्धरूपिणा ॥ ५ ॥ बौद्धशास्त्रमहत्प्रोक्तंनग्ननीलपटादि
कम् ॥ मायावादमसच्छास्त्रंप्रच्छन्नंबौद्धमुच्यते ॥ ६ ॥ मयैवकथ्यतेदेविकलौब्राह्मणरूपिणा ॥ अपार्थंश्रुतिवाक्यानांदर्शयँल्लोकगर्हितम् ॥ ७ ॥
कर्मस्वरूपंत्याज्यत्वंयत्रवैप्रतिपाद्यते॥सर्वकर्मपरिभ्रष्टोविकर्मस्थःसउच्यते ॥८॥परेशजीवयोरैक्यंमयात्रप्रतिपाद्यते ॥ ब्रह्मणोऽस्यपरंरूपंनिर्गुणंवक्ष्यते
मया ॥ ९ ॥ सर्वस्यजगतोऽप्यत्रमोहनार्थंकलौयुगे ॥ वेदार्थवन्महाशास्त्रंमायावादमवैदिकम् ॥ १० ॥ मयैववक्ष्यतेदेवित्रिजगतांनाशकारणात् ॥
द्विजन्मनाजैमिनिनापूर्ववेदमपार्थकम् ॥ ११ ॥ निरीश्वरेणवादेनकृतंशास्त्रंमहत्तरम् ॥ शास्त्राणिचैवगिरिजेतामसानिनिबोधमे ॥ १२ ॥ पुराणानि
चवक्ष्यामितामसानियथाक्रमात् ॥ ब्राह्मंपाद्मंवैष्णवंचशैवंभागवतंतथा ॥ १३ ॥ तथैवनारदीयंतुमार्कण्डेयंतुसप्तमम् ॥ आग्नेयमष्टमंप्रोक्तंभविष्यं
नवमंतथा ॥ १४ ॥ दशमंब्रह्मवैवर्तंलैङ्गमेकादशंस्मृतम् ॥ द्वादशंचवराहंचवामनंचत्रयोदशम् ॥ १५ ॥ कौर्मंचतुर्दशंप्रोक्तंमात्स्यंपञ्चदशंस्मृतम् ॥
षोडशंगारुडंप्रोक्तंस्कान्दंसप्तदशंस्मृतम् ॥ १६ ॥ अष्टादशंतुब्रह्माण्डंपुराणानियथाक्रमम् ॥ मात्स्यंकौर्मंतथालैङ्गंशैवंस्कान्दंतथैवच ॥१७॥ आग्नेयं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चषडेतानितामसानिनिबोधमे ॥ वैष्णवंनारदीयंचतथाभागवतंशुभम् ॥ १८ ॥ गारुडंचतथापाद्मंवाराहंशुभदर्शने ॥ सात्त्विकानिपुराणानि
विज्ञेयानिशुभानिवै॥१९ ॥ब्रह्माण्डंब्रह्मवैवर्त्तंमार्कण्डेयंतथैवच ॥ भविष्यंवामनंब्राह्मंराजसानिनिबोधमे ॥ २०॥ सात्त्विकामोक्षदाःप्रोक्ताराजसाः
स्वर्गदाःशुभाः ॥ तथैवतामसादेविनिरयप्राप्तिहेतवः ॥ २१ ॥ तथैवस्मृतयःप्रोक्ताऋषिभिस्त्रिगुणान्विताः ॥ सात्त्विकाराजसाश्चैवतामसाः
शुभदर्शने ॥ २२ ॥ वासिष्ठंचैवहारीतंव्यासंपाराशरंतथा ॥ भारद्वाजंकाश्यपंचसात्त्विकामुक्तिदाःशुभाः ॥ २३ ॥ मानवंयाज्ञवल्क्यंचाप्यात्रेयं
दाक्षमेवच ॥ कात्यायनंवैष्णवंचराजसाःस्वर्गदाःशुभाः ॥ २४ ॥ गौतमंबार्हस्पत्यंचसांवर्तंचयमंस्मृतम् ॥ शाङ्खंचौशनसंचेतितामसानिरयप्रदाः॥
॥ २५ ॥ किमत्रबहुनोक्तेनपुराणेषुस्मृतिष्वपि ॥ तामसानरकायैववर्जयेत्तान्विचक्षणः ॥ २६ ॥ एतत्तेसर्वमाख्यातंप्रसङ्गाच्छुभदर्शने ॥
शेषंचवैभवावस्थांहरेर्वक्ष्यामितेशृणु ॥२७॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०तामसशास्त्रकथनंनामषट्त्रिंशदधिकद्विशततमोऽध्यायः॥ २३६ ॥
श्रीरुद्रउवाच ॥ हिरण्यकहिरण्याक्षौकाश्यपेयौमहाबलौ ॥ दितिपुत्रौमहावीर्यौसर्वदैत्यपतीउभौ ॥ १ ॥ वैकुण्ठनगरस्यास्तांपश्चिमद्वारपालकौ ॥
नाम्नातौजयविजयौश्वेतद्वीपेहरिंगतौ ॥ २ ॥ तस्मिन्प्रविष्टान्योगीन्द्रान्सनकादीन्महाबलौ ॥ वारयामासतुर्देवविहरिसंदर्शनोत्सुकान् ॥
तैःप्रशप्तौमहावीर्यौद्वारपालौसुरोत्तमौ ॥ ३ ॥ सनकादयऊचुः॥ उत्पत्स्यतःपृथिव्यांतुद्वाःस्थौदेवस्यकिङ्करौ ॥ ४ ॥ रुद्रउवाच ॥ इतिशापंतयो
र्दत्त्वातत्रतस्थुर्मुनीश्वराः ॥ देवस्तमर्थंज्ञात्वाचतानाहूयचतावपि ॥ तौद्वाःस्थावब्रवीत्तत्रभगवान्भूतभावनः॥५॥ भगवानुवाच ॥ कृतवन्तौमहावीर्या
वपराधंमहात्मनाम् ॥ नातिक्रमणीयमिदंभवद्भ्यांद्वारपालकौ ॥ ६ ॥ दासत्वंसप्तजन्मानियुवांभक्तौममानघौ ॥ अमित्रतांतथात्रीणि
जन्मानिभजतोऽपिवा ॥७॥ रुद्रउवाच ॥ इत्युक्तौतौमहावीर्यावब्रूतांपरमेश्वरम् ॥ ८ ॥ जयविजयावूचतुः ॥ चिरकालंमहींगन्तुंनसमर्थौस्वमानद॥
तस्मात्त्रीण्येवजन्मानिविद्विट्त्वंचभजावहे ॥ देवत्वयैवनिहतौप्राप्स्यावोभवदन्तिकम् ॥ ९ ॥ रुद्रउवाच ॥ इत्युक्त्वाद्वारपालौतौपूर्वंजातौ
महाबलौ ॥ कश्यपस्यमहावीर्यौदितिगर्भेमहासुरौ ॥ १० ॥ हिरण्यकशिपुर्ज्येष्ठोहिरण्याक्षःकनिष्ठकः ॥ उभौतौलोकविख्यातौमहावीर्यबलोद्धतौ ॥
॥ ११ ॥ अप्रमाणशरीरःसहिरण्याक्षोमहोद्धतः ॥ उत्पाट्यबाहुसाहस्रैःपृथिवींसमहीधराम् ॥ १२ ॥ ससागरांद्वीपयुतांसर्वप्राणिसमन्वि
ताम् ॥ उत्पाट्यशिरसाधृत्वाप्रविवेशरसातलम् ॥ १३ ॥ ततोदेवगणाःसर्वेचुक्रुशुर्भयपीडिताः ॥ शरणंप्रययुर्देवंनारायणमनामयम् ॥ १४ ॥
ततस्तदद्भुतंज्ञात्वाशङ्खचक्रगदाधरः॥ वाराहंरूपमास्थायविश्वरूपंजनार्दनः ॥ १५ ॥अनादिमध्यान्तवपुःसर्वदेवमयोविभुः ॥ विश्वतःपाणिपच्चक्षुः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महादंष्ट्रोमहाभुजः ॥१६॥ एकयादंष्ट्रयादैत्यंजघानपरमेश्वरः ॥ संचूर्णितमहागात्रोममारदितिजाधमः ॥१७॥ पतितांधरणींदृष्ट्वादंष्ट्रयोद्धृत्यपूर्ववत् ॥
संस्थाप्यधारयामासशेषेकूर्मवपुस्तदा ॥१८॥तंदृष्ट्वादेवताःसर्वाःक्रोडरूपंमहाहरिम् ॥ तुष्टुवुर्मुनयश्चैवभक्तिनम्रात्ममूर्त्तयः ॥ १९ ॥ देवाऊचुः ॥ नमो
यज्ञवराहायकृष्णायशतबाहवे॥नमस्तेवेदवेदाङ्गतनवेविश्वरूपिणे ॥२०॥ सर्गस्थितिस्वरूपायसर्वयज्ञस्वरूपिणे ॥ कलाकाष्ठानिमेषादिकालरूपायते
नमः ॥२१॥ भूतात्मनेनमस्तुभ्यमृग्वेदवपुषेतथा ॥ सुरात्मनेनमस्तुभ्यंसामवेदायतेनमः ॥ २२ ॥ ॐकारायनमस्तुभ्यंयजुर्वेदस्वरूपिणे ॥ आथर्वण
स्वरूपायचतुर्वेदमयायच ॥२३॥ नमस्तेवेदवेदाङ्गसाङ्गोपाङ्गायतेनमः ॥ नमोभगवतेतुभ्यंवरायवपुषेसदा ॥ २४ ॥ नमोभूर्भुवस्स्वःपतयेमहईशायते
नमः ॥ जनस्तपस्सत्यपतयेसर्वलोकेश्वरायच ॥ २५ ॥ वषट्कारात्मनेतुभ्यंयज्ञरूपायतेनमः ॥ गोविन्दायनमस्तुभ्यमनादिनिधनायच ॥ २६ ॥
नमस्तेचिदचिद्वस्तुविशिष्टैकस्वरूपिणे ॥ श्रीभूनीलाधिपतयेजगत्पित्रेनमोनमः ॥ २७ ॥ रुद्रउवाच ॥ इत्यादिस्तुतिभिःस्तुत्वादेववाराहरूपि
णम् ॥ अर्चयामासुरात्मेशंगन्धपुष्पादिभिर्हरिम् ॥ २८ ॥ समर्च्यमानस्तैर्देवैस्तेषामिष्टंवरंददौ ॥ गन्धर्वैरप्सरोभिश्चगीयमानोमुदाहरिः ॥ २९ ॥
महर्षिभिःस्तूयमानस्तत्रैवान्तरधीयत ॥ एभिःस्तुत्वानरोभक्त्याप्रातरुत्थायभक्तिमान् ॥ ३० ॥ ईप्सितांलभतेभूमिंचिरंसस्यफलान्विताम् ॥
एतत्तेसर्वमाख्यातंवाराहंवैभवंहरेः ॥ नारसिंहंतथावक्ष्येशृणुदेविवरानने॥३१॥इतिश्रीपाद्मेमहापुराणेपञ्चपञ्च०उत्तर०वराहावतारकथनंनामसप्तत्रिंशद
धिकद्विशततमोऽध्यायः॥२३७॥रुद्रउवाच॥भ्रातरंनिहतंज्ञात्वाहिरण्यकशिपुस्ततः॥तपस्तेपेमहादैत्योमेरोःपार्श्वेचमांप्रति॥१॥दिव्यवर्षसहस्राणिवायु
भक्षोमहाबलः॥जपन्पञ्चाक्षरंमन्त्रंपूजयामासमांशुभे ॥२॥ ततःप्रहृष्टमनसातमवोचंमहासुरम् ॥ वरंवृणीष्वदैतेययत्तेमनसिवर्त्तते ॥ ततःप्रोवाचदैतेयो
मांप्रसन्नंशुभानने॥३॥ हिरण्यकशिपुरुवाच ॥ देवासुरमनुष्याणांगन्धर्वोरगरक्षसाम्॥पशुपक्षिमृगाणांचसिद्धानांवैमहात्मनाम्॥४॥यक्षविद्याधराणांच
किन्नराणांतथैवच ॥ सर्वेषामेवरोगाणामायुधानांतथैवच ॥ सर्वेषामृषिमुख्यानामवध्यत्वंप्रयच्छमे ॥ ५ ॥ रुद्रउवाच ॥ एवमस्त्वितितद्दक्षस्त्व
न्वंप्रियदर्शने ॥ मत्तोमहद्वरंप्राप्यसदैतेयोमहाबलः ॥ ६ ॥ जित्वामहेन्द्रंदेवांश्चसत्रैलोक्येश्वरोऽभवत ॥ सर्वांश्चयज्ञभागांश्चस्वयमेवाग्रहीद्बलात् ॥
॥ ७ ॥ त्रातारंनाधिगच्छन्तिदेवतास्तेननिर्जिताः ॥ तस्यैवकिङ्कराःसर्वेगन्धर्वादेवदानवाः ॥ ८ ॥ यक्षाश्चनागाःसिद्धाश्चसाध्याश्चवशवर्तिनः ॥
॥ उत्तानपादस्यसुतांकल्याणींनामकन्यकाम्॥९॥उपयेमेविधानेनदैत्यराजोमहाबलः ॥ तस्यांजातोमहातेजाःप्रह्लादोदैत्यराट्छुभे ॥१०॥ अनुरक्तो

(१) शापानाम्-इति पाठान्तरम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हृषीकेशेगर्भवासेऽपियोहरौ ॥ सर्वावस्थासुकृत्येषुमनोवाक्कायकर्मभिः ॥११॥ नान्यंजानातिदेवेशात्प्रसन्नात्मासनातनात् ॥ सकालेनोपनीतःसन्गुरु
गेहेऽवसत्सुधीः ॥१२॥ अधीत्यसर्ववेदांश्चशास्त्राणिविविधानिच ॥ कस्यचित्त्वथकालस्यगुरुणासहदैत्यजः ॥१३॥ पितुःसमीपमागत्यववन्देविनया
न्वितः॥तंपरिष्वज्यबाहुभ्यांतनयंशुभलक्षणम्॥अङ्केनिधायदैत्येन्द्रःप्रोवाचेदंसुविस्मितम्॥१४॥हिरण्यकशिपुरुवाच॥ प्रह्लादचिरकालंत्वंगुरुगेहेनिव
शितः ॥ यदुक्तागुरुणाविद्यातन्ममाचक्ष्वसुव्रत ॥१५॥ रुद्रउवाच॥इतिपृष्टःस्वपित्रावैप्रह्लादोजन्मवैष्णवः ॥ प्राहदैत्येश्वरंप्रीत्यावचनंकलुषापहम् ॥
॥ १६ ॥ प्रह्लादउवाच ॥ योवैसर्वोपनिषदामर्थःपुरुषईश्वरः ॥ तंवैसर्वगतंविष्णुंनमस्कृत्यब्रवीमिते ॥ १७ ॥ रुद्रउवाच ॥ इतिविष्णुस्तुतिंश्रुत्वा
दैत्यराड्विस्मयान्वितः ॥ उवाचतंगुरुंरोषात्किंत्वयोक्तंममात्मजे ॥ १८ ॥ ममात्मजस्यदुर्बुद्धेहरिसंस्तवमीदृशम् ॥ किमर्थमुक्तवाञ्जाड्यमकार्यं
ब्राह्मणोचितम् ॥ १९ ॥ अश्राव्यंमदमित्रस्यस्तवमेतंममाग्रतः ॥ बालेनापिकृतंत्वेतत्त्वत्प्रसादाद्द्विजाधम ॥ २० ॥ इत्युक्त्वापरितोवीक्ष्यदैत्यराट्
क्रोधमूर्छितः ॥ उवाचदैत्यमेकंतुबन्धयैनंद्विजाधमम् ॥ २१ ॥ इतिराजवचःश्रुत्वासबबन्धभृगोःसुतम् ॥ बध्यमानंगुरुंदृष्ट्वाप्रह्लादोब्राह्मणप्रियः ॥
॥ २२ ॥ उवाचपितरंतातइदंमेनोक्तवान्गुरुः ॥ कृपयादेवदेवस्यशिक्षितोऽस्मिहरेःप्रभो ॥ २३ ॥ नान्योगुरुर्मेभवतिसएवप्रेरकोहरिः ॥ श्रोतामन्ता
तथावक्ताद्रष्टासर्वगईश्वरः ॥ २४ ॥ हरिरेवाक्षयःकर्तानियन्तासर्वदेहिनाम् ॥ तदनागाह्यसौविप्रोमोक्तव्योऽयंगुरुःप्रभो ॥ २५ ॥ रुद्रउवाच ॥
इतिपुत्रवचःश्रुत्वाहिरण्यकशिपुस्ततः ॥ तंब्राह्मणंमोचयित्वास्वसुतंप्राहविस्मयात् ॥२६॥ किंवत्सत्वंभ्रमस्येवंमिथ्यावाक्यैर्द्विजन्मनः॥ कोविष्णुः
किंतुतद्रूपंकुत्रासौसंस्थितोहरिः ॥ २७ ॥ अहमेवेश्वरोलोकेत्रैलोक्याधिपतिर्मतः ॥ मामेवार्चयगोविन्दंत्यजशत्रुंदुरासदम् ॥ २८ ॥ अथवाशङ्करं
देवंरुद्रंलोकगुरुंप्रभुम् ॥ अर्चयस्वसुराध्यक्षंसर्वैश्वर्यप्रदंशिवम् ॥ २९ ॥ त्रिपुण्ड्रधारणंकृत्वाभस्मनादैत्यपूजितम् ॥ पूजयस्वमहादेवंपाशुपत्योक्त
मार्गतः ॥ ३० ॥ रुद्रउवाच ॥ इतिदैत्यपतेर्वाक्यंश्रुत्वोचुस्तत्पुरोहिताः ॥ ३१ ॥ पुरोहिताऊचुः ॥ एवमेवमहाभागकुरुष्ववचनंपितुः ॥ त्यज
शत्रुंकैटभारिंपूजयस्वत्रिलोचनम् ॥ ३२ ॥ रुद्रात्परतरोदेवोनास्तिसर्वप्रदोनृणाम् ॥ पितातवापितस्यैवप्रसादादीश्वरोऽभवत् ॥ ३३ ॥रुद्रउवाच॥
इतितेषांवचःश्रुत्वाप्रह्लादःप्राहवैष्णवः ॥ ३४ ॥ प्रह्लादउवाच ॥ अहोभगवतःश्रैष्ठ्यंयन्मायामोहितंजगत् ॥ अहोवेदान्तविद्वांसःसर्वलोकेषुपूजिताः
॥ ३५ ॥ ब्राह्मणाअपिचापल्याद्वदन्त्येवंमदान्विताः ॥ नारायणःपरंब्रह्मतत्त्वंनारायणःपरम् ॥ ३६ ॥ नारायणःपरोध्याताध्याननारायणःपरम् ॥

१ शौर्यम्-इति पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गतिर्विश्वस्यजगतःशाश्वतंशिवमच्युतः ॥ ३७ ॥ धाताविधाताजगतोवासुदेवःसनातनः ॥ विश्वमेवेदंपुरुषस्तद्विश्वमुपजीवति ॥ ३८ ॥
हिरण्मयवपुर्नित्यःपुण्डरीकनिभेक्षणः ॥ श्रीभूनीलापतिःसौम्योनिर्मलःशुभविग्रहः ॥ ३९ ॥ तेनैवसृष्टौब्रह्मेशौसर्गसंहारकारकौ ॥
तस्यैवाज्ञांपुरस्कृत्यवर्त्तेतेब्रह्मशङ्करौ ॥ ४० ॥ भीषास्माद्वातिपवनोभीषोदेतिदिवाकरः ॥ भीषास्मादग्निश्चेन्द्रोऽथमृत्युर्धावति
पञ्चमः ॥ ४१ ॥ आसीदेकोहरिर्दिव्योदेवोनारायणःपरः ॥ ब्रह्मानेन्द्रोनचेशानोनचचन्द्रदिवाकरौ ॥ ४२ नवा
द्यावापृथिव्यौचनक्षत्राणिदिवौकसः ॥ तस्यविष्णोःपरंधामसदापश्यन्तिसूरयः ॥ ४३ एवंसर्वोपनिषदामर्थंहित्वाद्विजोत्तमाः ॥ रागा
ल्लोभाद्भयाद्वापिकिंवाब्रूथममाग्रतः ॥ ४४ ॥ तंसर्वरक्षकंदेवंत्यक्त्वासर्वेश्वरंहरिम् ॥ कथंपाषण्डमाश्रित्यपूजयामिचशङ्करम् ॥ ४५ ॥ लक्ष्मीपतिंदेव
देवमनन्तंपुरुषोत्तमम् ॥ इन्दीवरदलश्यामंपद्मपत्रायतेक्षणम् ॥ ४६ ॥ श्रीवत्सलक्षितोरस्कंसर्वाभरणभूषितम् ॥ सदाकुमारंसर्वेशंनित्यानन्दसुख
प्रदम् ॥४७॥ कृष्णंदध्युर्महात्मानोयोगिनःसनकादयः ॥ यमर्चयन्तिब्रह्मेशशक्राद्यादेवतागणाः॥४८॥यस्यपत्न्याःकटाक्षार्द्धदृष्ट्याहृष्टादिवौकसः॥
ब्रह्मेन्द्ररुद्रवरुणयमसोमधनाधिपाः ॥४९॥ यन्नामस्मरणादेवपापिनामपिसत्वरम्॥ मुक्तिर्भवतिजन्तूनांब्रह्मादीनांसुदुर्लभा ॥५०॥ सएवरक्षकःश्रीशो
देवानामपिसर्वदा ॥ तमेवपूजयिष्यामिलक्ष्म्यासंयुतमच्युतम् ॥ प्राप्स्यामिसुसुखेनैवतद्विष्णोःपरमंपदम् ॥ ५१ ॥ रुद्रउवाच ॥ इतितस्यवचः
श्रुत्वाहिरण्यकशिपुस्ततः ॥ क्रोधेनमहताविष्टोजज्वालाग्निरिवापरः ॥ परितोवीक्ष्यदैतेयानित्याहक्रोधमूर्छितः ॥ ५२ ॥ हिरण्यकशिपुरुवाच ॥
भीषणैःशस्त्रसङ्घातैःप्रह्लादंपापकारिणम्॥ ममाज्ञयाघातयध्वंशत्रुपूजनतत्परम्॥५३॥रक्षिताहरिरेवेतिप्रोच्यतेतेनवाक्छलात्॥अद्यैवसफलंतस्यपश्येयं
हरिरक्षणम् ॥ ५४ ॥ रुद्रउवाच ॥ तदोद्यतास्त्रादैतेयाहन्तुंदैत्येश्वरात्मजम् ॥ परिवार्यमहात्मानंतस्थुर्दैत्येश्वराज्ञया ॥ ५५ ॥ प्रह्लादोऽपितदा
विष्णुंध्यात्वाहृदयपङ्कजे ॥ जपन्नष्टाक्षरंमन्त्रंतस्थौगिरिरिवापरः ॥ ५६ ॥ तंजघ्नुःपरितोवीराःशूलतोमरशक्तिभिः ॥ प्रह्लादस्यवपुस्तत्रहरिंसंस्मर
णाच्छुभे ॥ ५७ ॥ विष्णोःप्रभावाद्दुर्द्धर्षंवज्रभूतमभूद्दृशम् ॥ ततःसंप्राप्यतद्गात्रंमहास्त्राणिसुरद्विषाम् ॥ ५८ ॥ नीलोत्पलदलानीवपेतुश्छिन्नाःक्षितौ
शुभे ॥ अल्पमप्यस्यतद्गात्रंभेत्तुंदैत्यानचक्षमाः ॥ ५९ ॥ विस्मितावाङ्मुखास्तस्थुर्दैत्यराजान्तिकेभटाः ॥ तादृग्विधंमहात्मानंदृष्ट्वापुत्रंमहाबलम्॥ ॥ २४२ ॥
॥ ६० ॥ विस्मयंपरमंगत्वादैत्यराट्क्रोधमूर्छितः ॥ आदिदेशततःसर्वान्दन्दशूकान्महाविषान् ॥ ६१ ॥ वासुकिप्रभृतीन्भीमान्खादयध्वमिति
क्रुधा ॥ आदिष्टास्तेनराज्ञाथतेनागाःसुमहाबलाः ॥ ६२ ॥ ज्वलितास्यामहाभीमास्तंचखादुर्महाबलम् ॥ गरुडध्वजभक्तंतंविदश्यगरलायुधाः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ६३ ॥ निर्विषाश्छिन्नदशनाबभूवुरनिलाशनाः ॥ वैनतेयसहस्रेणच्छिन्नगात्राःसुविह्वलाः ॥ ६४ ॥ प्रदुद्रुवुर्दिशःसर्वावमन्तोरुधिरंभृशम् ॥ तादृ
ग्विधान्महासर्पान्दृष्ट्वादैत्यपतिस्तदा ॥६५॥ आदिदेशततःक्रुद्धोदिग्गजान्सुमदान्वितान् ॥ निर्दिष्टास्तेनराज्ञाथदिग्गजाश्चमदोद्धताः ॥६६॥ परि
वार्याथतंजघ्नुर्दन्तैःपृथुतरैर्भृशम्॥ अथदिग्गजदन्ताश्चच्छिन्नमूलास्ततोऽपतन् ॥६७॥दन्तैर्विनाकृतानागाभयार्तावैप्रदुद्रुवुः॥ तान्दृष्ट्वाथमहानागान्दै
त्येन्द्रःकुपितोबली ॥ ६८ ॥ प्रज्वाल्यचमहावह्निंचिक्षेपसुतमात्मनः ॥ जलशायिप्रियंदृष्ट्वाप्रह्लादंहव्यवाहनः ॥ ६९ ॥ नददाहचतंधीरंसुशीतःसम
भूच्छिखी ॥ अदह्यमानंतंबालंदृष्ट्वाराजासुविस्मितः ॥ ७० ॥ प्रादात्तस्मैविषंघोरंसर्वभूताहितंतदा ॥ तस्यविष्णोःप्रभावाच्चविषमस्यामृतंभवेत्॥
॥ ७१ ॥ अर्पणात्तस्यदेवस्यविषंचामृतमश्नुते ॥ एवमाद्यैर्वधोपायैर्घोररूपैःसुदारुणैः ॥ ७२ ॥ बाधयित्वात्मजंराजातस्यावध्यत्वमीक्ष्यच ॥ ततः
साम्नासुतंप्राहदैत्यराड्विस्मयाकुलः ॥ ७३॥हिरण्यकशिपुरुवाच ॥ त्वयाविष्णोःपरत्वंचसम्यगुक्तंममाग्रतः ॥ व्यापित्वात्सर्वभूतानांविष्णुरित्यभि
धीयते ॥ ७४ ॥ योऽसौसर्वगतोदेवःसएवपरमेश्वरः ॥ तस्यसर्वगतत्वंवैप्रत्यक्षंदर्शयस्वमे ॥ ७५ ॥ ऐश्वर्यशक्तितेजांसिज्ञानवीर्यबलानिच ॥ पश्येयं
तस्यपरमंरूपंगुणविभूतयः ॥७६॥ सम्यग्दृष्ट्वाप्रयत्नेनविष्णुंमन्येदिवौकसम् ॥ ममप्रतिबलोलोकेनास्तिदेवेषुकश्चन ॥ ७७ ॥ ईशानवरदानेनसर्व
भूतेष्ववध्यताम् ॥ प्राप्तवान्सर्वभूतानांदुर्जयत्वंचमानद ॥ ईश्वरत्वंलभेद्विष्णुर्मांजित्वाबलवीर्यतः ॥७८॥ रुद्रउवाच॥ इतितस्यवचःश्रुत्वाप्रह्लादःप्राह
विस्मितः ॥ हरेःप्रभावंदैत्यस्यकथयामाससुव्रतः ॥ ७९ ॥ प्रह्लादउवाच ॥ योऽसौनारायणःश्रीमान्परमात्मासनातनः ॥ वसनात्सर्वभूतेषुवासुदेवः
सउच्यते ॥ ८० ॥ सर्वव्यापीजगद्धाताविष्णुरित्यभिधीयते ॥ नकिंचिदस्मादन्यत्तुजगत्स्थावरजङ्गमम् ॥ ८१ ॥ सर्वत्रचिदचिद्वस्तुरूपंतस्यैवना
न्यथा॥ त्रिपाद्व्याप्तिःपरंव्योम्निपादव्याप्तिरिहाद्भुता॥८२॥योऽसौचक्रगदापाणिःपीतवासाजनार्दनः॥ योगिभिर्दृश्यतेभक्त्यानाभक्त्यादृश्यतेक्वचित्॥
॥ ८३ ॥ द्रष्टुंनशक्योरोषाच्चमत्सराद्वाजनार्दनः ॥ देवतिर्यङ्मनुष्येषुस्थावरेष्वपिजन्तुषु ॥ व्याप्यतिष्ठतिसर्वेषुक्षुद्रेष्वपिमहत्सुच ॥ ८४ ॥
रुद्रउवाच ॥ इतिप्रह्लादवचनंश्रुत्वादैत्यवरस्तदा ॥ उवाचरोषताम्राक्षोभर्त्सयंश्चसुतंमुहुः ॥ ८५ ॥ हिरण्यकशिपुरुवाच ॥ असौसर्वगतोविष्णुरपि
चेत्परमःपुमान् ॥ प्रत्यक्षंदर्शयस्वाद्यबहुभिःकिंप्रलापितैः ॥८६॥ महादेवउवाच॥ इत्युक्त्वासहसादैत्यःप्रासादस्तम्भमात्मनः॥ ताडयामासहस्तेन
प्रह्लादमिदमब्रवीत् ॥ ८७ ॥ हिरण्यकशिपुरुवाच ॥ अस्मिन्दर्शयतंविष्णुंयदिसर्वगतोभवेत् ॥ अन्यथात्वांहनिष्यामिमिथ्यावाक्यप्रलापिनम् ॥
॥ ८८ ॥ रुद्रउवाच ॥ इत्युक्त्वासहसाखड्गमाकृष्यदितिजेश्वरः ॥ प्रह्लादोरसिचिक्षेपहन्तुंखड्गेनतंरुषा ॥ ८९ ॥ तस्मिन्क्षणेमहाशब्दःस्तम्भे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 संश्रूयतेभृशम् ॥ संवर्ताशनिसंरावैःखमिवस्फुटितान्तरम् ॥ ९० ॥ तेनशब्देनमहतादैत्यश्रोत्रविघातिना ॥ सर्वेनिपातिताभूमौछिन्नमूलाइवद्रुमाः
 ॥ ९१ ॥ बिभ्यतिसंप्लुतंदैत्यामेनिरेवैजगत्त्रयम् ॥ तांस्थूणांतुद्विधाभित्त्वानिष्क्रान्तोवैमहाहरिः ॥ ९२ ॥ चकारसमहाघोरंजगत्क्षयनिभस्वनम् ॥
तेननादेनमहतातारकाःपतिताभुवि ॥ ९३ ॥ नृसिंहवपुरास्थायतत्रैवाविरभूद्धरिः ॥ अनेककोटिसूर्याग्नितेजसासससमावृतः ॥ ९४ ॥ मुखेपञ्चानन
प्रख्यःशरीरेमानुषाकृतिः ॥ दंष्ट्राकरालवदनरुयक्षश्चत्रिसटोद्धतः ॥९५॥ ज्वालावलितकेशान्तस्सस्फुलिंगेक्षणोविभुः ॥ सहस्रबाहुभिर्दीर्घैःसर्वायुध
समन्वितैः ॥९६॥ वृतोमेरुरिवाभातिबहुशाखानगान्वितः ॥ दिव्यमाल्याम्बरधरोदिव्यगन्धानुलेपनः ॥९७॥ श्रीवत्सकौस्तुभोरस्कोदिव्याभरण
भूषितः॥तस्थौनृकेसरीतत्रसंहर्त्तुंसर्वदानवान् ॥९८॥ तंदृष्ट्वाघोरसङ्काशंनरसिंहंमहाबलम् ॥ दग्धाक्षिपक्ष्मादैत्येन्द्रोविह्वलाङ्गःपपातह ॥९९॥ प्रह्लादो
ऽपितदादृष्ट्वानारसिंहोपमंहरिम् ॥ जयशब्देनदेवेशंनमश्चक्रेजनार्दनम् ॥ १०० ॥ ददर्शतस्यगात्रेषुनृसिंहस्यमहात्मनः ॥ लोकान्ससमुद्रान्सद्वीपान्सुर
गन्धर्वमानुषान् ॥ १ ॥ अजाण्डानांसहस्रंतुसटाग्रेतस्यदृश्यते ॥ दृश्यन्तेतस्यनेत्रेषुसोमसूर्यादयस्तथा ॥ २ ॥ कर्णयोरश्विनौदेवौदिशश्चविदिश
स्तथा ॥ ललाटेब्रह्मरुद्रौचनभोवायुश्चनासिके ॥ ३ ॥ इन्द्राग्नीतस्यवक्त्रान्तेजिह्वायांतुसरस्वती ॥ दंष्ट्रासुसिंहशार्दूलाःशरभाश्चमहोरगाः ॥ ४ ॥
कण्ठेचदृश्यतेमेरुःस्कन्धेऽपिचमहाद्रयः ॥ देवतिर्यङ्मनुष्याश्चबाहुष्वपिमहात्मनः ॥ ५ ॥ नाभौचास्यान्तरिक्षंचपादयोःपृथिवीतथा ॥ मेर्वादयः
पर्वतश्चदृश्यन्तेऽङ्गुलिपङ्क्तिषु ॥ ६ ॥ रोमस्वोषधयःसर्वाःपादपानखपङ्क्तिषु ॥ निःश्वासेषुचवेदाश्चसाङ्गोपाङ्गसमन्विताः ॥ ७ ॥ आदित्यावस
वोरुद्राविश्वेदेवामरुद्गणाः ॥ सर्वाङ्गेषुप्रदृश्यन्तेगन्धर्वाप्सरसश्चये ॥ ८ ॥ इत्थंविभूतयस्तस्यदृश्यन्तेपरमात्मनः ॥ श्रीवत्सकौस्तुभोरस्कंवन
मालाविभूषितम् ॥ ९ ॥ शङ्खचक्रगदाखड्गशार्ङ्गाद्यैर्हेतिभिर्युतम् ॥ सर्वोपनिषदामर्थदृष्ट्वादैत्येश्वरात्मजः ॥ ११० ॥ हर्षाश्रुजलसिक्ताङ्गःप्रणनाम
मुहुर्मुहुः ॥ दैत्येन्द्रस्तुहरिंदृष्ट्वाक्रोधान्मृत्युवशेस्थितः ॥ ११ ॥ योद्धुंखड्गंसमुद्यम्यनृसिंहंतमभिद्रवत् ॥ अथदैत्यगणाःसर्वेलब्धसंज्ञामहाबलाः
॥ १२ ॥ स्वान्यायुधानिचादायहरिंजघ्नुस्त्वरान्विताः ॥ पलालकाण्डानियथावह्नौक्षिप्तान्यनेकशः ॥ १३ ॥ तथैवभस्मतांयान्तिमहास्त्राणिहरे
स्तनौ ॥ तान्यनीकानिदैत्यानांदृष्ट्वानरहरिस्तदा ॥ १४ ॥ सटैर्ददाहचज्वालामालाविरचितस्फुटैः ॥ नृकेसरिसटोद्भूतवह्निनादानवाभृशम्
॥ १५ ॥ निहतास्तत्क्षणात्सर्वेनिःशेषंतदभूद्बलम् ॥ प्रह्लादंसानुगंहित्वाभस्मितेवीक्ष्यतद्बले ॥ १६ ॥ क्रोधाद्दैत्यपतिःखड्गमाकृष्याभिप्रपद्यत ॥
खड्गहस्तंतुदैत्येन्द्रंजग्राहैकेनबाहुना ॥ १७ ॥ पातयामासदेवेशोयथाशाखांमहानिलः ॥ गृहीत्वापतितंभूमौमहाकायंनृकेसरी ॥ १८ ॥ स्वोत्सङ्गे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थापायामासददर्शासौमुखंहरेः ॥ विष्णुनिन्दाकृतंपापंद्रोहवैष्णवजंतथा ॥ १९ ॥ नृसिंहस्पर्शनादेवनिर्भस्मितमभूत्तदा ॥ अथदैत्येश्वरस्याथ
महद्गात्रंनृकेसरी ॥ १२० ॥ नखैर्विदारयामासतीक्ष्णैर्वज्रनिभैर्नखैः ॥ सनिर्मलात्मादैत्येन्द्रःपश्यन्साक्षान्मुखंहरेः ॥ २१ ॥ नखनिर्भिन्नहृदयः
कृतार्थोविजहावसून् ॥ तद्गात्रंशतधाभित्त्वानखैस्तीक्ष्णैर्महाहरिः ॥ २२ ॥ आकृष्यान्त्राणिदीर्घाणिकण्ठेसंसक्तवान्प्रियान् ॥ अथदेवगणास्सर्वे
दृष्ट्वातत्रनृकेसरिम् ॥ २३ ॥ प्रदहन्तंजगदीपंकालाग्निमिवमेनिरे ॥ अथदेवगणाःसर्वेमुनयश्चतपोधनाः ॥ २४ ॥ ब्रह्मरुद्रौपुरस्कृत्यशनैःस्तोतुं
समाययुः ॥ तेप्रसादयितुंभीताज्वलन्तंविश्वतोमुखम् ॥ २५ ॥ मातरंजगतांधात्रींचिन्तयामासुरीश्वरीम् ॥ हिरण्यवर्णांहरिणींसर्वोपद्रवनाशिनीम्
॥ २६ ॥ विष्णोर्नित्यानवद्याङ्गींध्यात्वानारायणींशुभाम् ॥ देवीसूक्तजपैर्भक्त्यानमश्चक्रुःसनातनीम् ॥ २७ ॥ तैश्चिन्त्यमानासादेवीतत्रैवावि
रभूत्तदा ॥ चतुर्भुजाविशालाक्षीसर्वाभरणभूषिता ॥ २८ ॥ दुकूलवस्त्रसहितांदिव्यमालानुलेपनाम् ॥ तांदृष्ट्वादेवदेवस्यप्रियांसर्वेदिवौकसः ॥ २९ ॥
ऊचुःप्राञ्जलयोदेवींप्रसन्नंकुरुतेप्रियम् ॥ त्रैलोक्यस्याभयंस्वामीयथादद्यात्तथाकुरु ॥ १३० ॥ रुद्रउवाच ॥ इत्युक्तासहसादेवीप्रियंप्राप्यजना
र्दनम् ॥ प्रणिपत्यनमस्कृत्यसाप्रसीदेत्युवाचतम् ॥ ३१ ॥ तांदृष्ट्वामहिषींस्वस्यप्रियांसर्वेश्वरोहरिः ॥ रक्षःशरीरजंक्रोधंतत्याजप्रीतवत्क्षणात् ॥ ३२ ॥
अङ्कमादायतांदेवींसमाश्लिष्यदयानिधिः ॥ कृपासुधार्द्रदृष्ट्याचावैनिरैक्षतसुरान्हरिः ॥ ३३ ॥ ततोजयजयेत्युच्चैःस्तुवतांनमतांतदा ॥ तद्दयादृष्टि
दृष्टानांसानन्दःसंभ्रमोऽभवत् ॥ ३४ ॥ ततोदेवगणाःसर्वेहर्षनिर्भरमानसाः ॥ ऊचुःप्राञ्जलयोदेवंनमस्कृत्यजगत्पतिम् ॥ ३५ ॥ देवगणाऊचुः ॥
द्रष्टुमत्यद्भुतंतेजोनशक्तास्तेजगत्पते ॥ अत्यद्भुतमिदंरूपंबहुबाहुपदाङ्कितम् ॥ ३६ ॥ जगत्त्रयसमाक्रान्तंतेजस्तीक्ष्णतरंतव ॥ द्रष्टुंस्थातुंनशक्ताःस्मः
सर्वएवदिवौकसः ॥ ३७ ॥ महादेवउवाच ॥ इत्यर्थितस्तुविबुधैस्तेजस्तदतिभीषणम् ॥ उपसंहृत्यदेवेशोबभूवसुखदर्शनः ॥ ३८ ॥ शरत्कोटी
न्दुसङ्काशःपुण्डरीकनिभेक्षणः ॥ सुधामयसटापुञ्जविद्युत्कोटिनिभःशुभः ॥ ३९ ॥ नानारत्नमयैर्दिव्यःकेयूरःकटकान्वितैः ॥ बाहुभिःकल्पवृक्षस्य
शाखौघैरिवसत्फलैः ॥ १४० ॥ चतुर्भिःकोमलैर्दिव्यैरन्वितःपरमेश्वरः ॥ जपाकुसुमसङ्काशैःशोभितःकरपङ्कजैः ॥ ४१ ॥ शङ्खचक्रगृहीता
भ्यामुद्बाहुभ्यांविराजितः ॥ वरदाभयहस्ताभ्यामितराभ्यांनृकेसरी ॥ ४२ ॥ श्रीवत्सकौस्तुभोरस्कोवनमालाविभूषितः ॥ उद्यद्दिनकराभ्यांच
कुण्डलाभ्यांविराजितः ॥ ४३ ॥ हारकेयूरकटकैर्भूषणैःसमलङ्कृतः ॥ सव्याङ्कस्थश्रियायुक्तोराजतेनरकेसरी ॥ ४४ ॥ लक्ष्मीनृसिंहंतंदृष्ट्वादेवताः
समहर्षयः ॥ आनन्दाश्रुजलैःसिक्ताहर्षनिर्भरचेतसः ॥ ४५ ॥ आनन्दसिन्धुमग्नास्तेनमश्चक्रुर्निरन्तरम् ॥ अर्चयामासुरात्मेशंदिव्यपुष्पसमर्पणैः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ४६ ॥ रत्नकुम्भैःसुधापूर्णैरभिषिच्यसनातनम् ॥ वस्त्रैराभरणैर्गन्धैःपुष्पैर्धूपैर्मनोरमैः ॥ ४७ ॥ दिव्यैर्निवेदितैर्दीपैरर्चयित्वानृकेसरिम् ॥ तुष्टुवुः
स्तवनैर्दिव्यैर्नमश्चक्रुर्मुहुर्मुहुः ॥ ४८ ॥ ततःप्रसन्नोलक्ष्मीशस्तेषामिष्टान्वरान्ददौ ॥ ततोदेवगणैःसार्धंसर्वेशोभक्तवत्सलः ॥ ४९ ॥ प्रह्लादंसर्वदैत्यानां
चक्रेराजानमव्ययम् ॥ आश्वास्यभक्तंप्रह्लादमभिषिच्यसुरोत्तमैः ॥ १५० ॥ ददौतस्मैवरानिष्टान्भक्तिंचाव्यभिचारिणीम् ॥ ततोदेवगणैःसर्वैः
स्तूयमानोनृकेसरी ॥ ५१ ॥ विकीर्णपुष्पवर्षैश्चतत्रैवान्तरधीयत ॥ ततःसुरगणाःसर्वेस्वंस्वंस्थानंप्रपेदिरे ॥ ५२ ॥ पुनश्चयज्ञभागान्स्वान्बुभुजुः
प्रीतमानसाः ॥ ततोदेवाःसगन्धर्वानिरातङ्कास्तदाभवन् ॥५३॥ तस्मिन्हतेमहादैत्येसर्वएवप्रहर्षिताः ॥ प्रह्लादस्तुतदाचक्रेराज्यंधर्मेणवैष्णवः ॥ ५४ ॥
हरेःप्रसादाल्लब्धंतुराज्यंवैष्णवसत्तमः ॥ बहुभिर्यज्ञदानाद्यैरर्चयित्वानृकेसरिम् ॥ ५५ ॥ कालेहरिपदंप्रापयोगिगम्यंसनातनम् ॥ एतत्प्रह्लादचरितं
येतुशृण्वन्तिनित्यशः ॥ ५६ ॥ तसर्वेपापनिर्मुक्तायास्यन्तिपरमांगतिम् ॥ एतत्तेकथितंदेविनृसिंहंवैभवंहरेः ॥ शेषांचवैभवावस्थांशृणुदेवि
यथाक्रमम् ॥ १५७ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप० उत्तर० उमामहेश्वरसंवादेनृसिंहप्रादुर्भावोनामाष्टात्रिंदशदधिकद्विशततमोऽध्यायः ॥ २३८ ॥
रुद्रउवाच ॥ प्रह्लादस्यसुतोजज्ञेविरोचनइतीरितः ॥ तस्यपुत्रोमहाबाहुर्बलिर्वैश्वानरःप्रभुः ॥ १ ॥ सतुधर्मविदांश्रेष्ठःसत्यसन्धोजितेन्द्रियः ॥
हरेःप्रियतमोभक्तोनित्यंधर्मरतःशुचिः ॥ २ ॥ सजित्वासकलान्देवान्सेन्द्रांश्चसमरुद्गणान् ॥ त्रींल्लोकान्स्ववशेस्थाप्यराज्यंचक्रेमहाबलः ॥ ३ ॥
अकृष्टपच्यापृथिवीबहुसस्यफलप्रदा ॥ गावःपूर्णदुघाःसर्वाःपादपाःफलपुष्पिताः ॥ ४ ॥ स्वधर्मनिरताःसर्वेनराःपापविवर्जिताः ॥ अर्चयन्ति
हृषीकेशंसततंविगतज्वराः ॥ ५ ॥ एवंचकारधर्मेणराज्यंदैत्यपतिर्बली ॥ इन्द्रादित्रिदशास्तस्यकिङ्कराःसमुपस्थिताः ॥ ६ ॥ ऐश्वर्यंत्रिपुलोकेषु
बुभुजेबलदर्पहृत् ॥ भ्रष्टराज्यंसुतंदृष्ट्वातस्यापिहितकाम्यया ॥७॥ कश्यपोभार्ययासार्द्धंतपस्तेपेहरिंप्रति ॥ अदित्यासहधर्मात्मापयोव्रतसमन्वितः॥
॥ ८ ॥ अर्चयामासदेवेशंपद्मनाभंजनार्दनम् ॥ ततोवर्षसहस्राणितेनसंपूजितोहरिः ॥ ९ ॥ तत्रैवाविरभूत्तस्यदेव्यासहसनातनः ॥ तंदृष्ट्वापुण्डरीकाक्षं
शङ्खचक्रगदाधरम् ॥ १० ॥इन्द्रनीलमणिश्यामंसर्वाभरणभूषितम् ॥ स्फुरत्किरीटकेयूरहारकुण्डलशोभितम् ॥ ११ ॥ कौस्तुभोद्भासितोरस्कंपीत
वस्त्रेणवेष्टितम् ॥ श्रियासहसमासीनंमण्डजेन्द्रेमहात्मनि ॥१२॥ तंदृष्ट्वाजगतामीशंहर्षनिर्भरचेतसा ॥ पत्न्यासहनमस्कृत्यतुष्टावद्विजसत्तमः ॥ १३ ॥
कश्यपउवाच ॥ नमोनमस्तेलक्ष्मीशसर्वज्ञजगदीश्वर ॥ सर्वात्मन्सर्वदेवेशसृष्टिसंहारकारक ॥ १४ ॥ अनादिनिधनानन्तवपुषेविश्वधारिणे ॥ नमस्ते
वेदवेदाङ्गवपुषेसर्वचक्षुषे ॥ १५ ॥ सर्वात्मनेनमस्तुभ्यंनमःसूक्ष्मतरायच ॥ कल्याणगुणपूर्णाययोगिध्येयात्मनेनमः ॥ १६ ॥ नमोनित्यकुमाराय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीभूनीलाधिपायच ॥ नित्यमुक्तैकभोगायपरधाम्निस्थितायच ॥ १७ ॥ चतुरात्मन्नमस्तुभ्यंचतुर्व्यूहनमोऽस्तुते ॥ पञ्चावस्थायवैतुभ्यंनमस्तेपाञ्च
कालिक ॥ १८ ॥ पाञ्चकालिकनिष्ठैस्तुयोगिभिःपूज्यसेसदा ॥ पञ्चार्थतत्त्वविदुषांपञ्चसंस्कारशालिनाम् ॥१९॥ पञ्चावस्थंस्वरूपंतेविज्ञेयंसततंहरे ॥
चतुर्धापरिपूर्णात्मन्नियतंकवयोविदुः ॥ २० ॥ त्वत्प्रसूतिंजगत्सर्वंपुनन्तितवकिङ्कराः ॥ त्रयीमयाःकर्मनिष्ठायेद्विजाभक्तवत्सलाः ॥ २१ ॥ तेषां
दयेक्षणादेवभवबन्धविमुक्तये ॥ नमोऽस्तुत्रिजगद्धात्रेस्वयंधात्रेऽखिलात्मने ॥ २२ ॥ धात्रेविधात्रेविश्वायविश्वरूपायतेनमः ॥ नारायणायकृष्णाय
वासुदेवायशार्ङ्गिणे ॥ विष्णवेजिष्णवेतुभ्यंशुद्धसत्त्वायतेनमः ॥ २३ ॥ महादेवउवाच ॥ इत्यादिस्तुतिभिःसम्यक्स्तूयमानोमहर्षिणा ॥ प्राह
गम्भीरयावाचापरितुष्टोजनार्दनः ॥२४॥ श्रीभगवानुवाच ॥ संतुष्टोऽहंद्विजश्रेष्ठत्वयाभक्त्यासमर्चितः॥वरंवृणीष्वभद्रंतेकरोमितववाञ्छितम् ॥२५॥
महादेवउवाच ॥ ततःप्राहहृषीकेशंभार्ययासहकश्यपः ॥ २६ ॥ कश्यपउवाच ॥ पुत्रत्वंममदेवेशसंप्राप्यस्वर्गिणांहितम् ॥ कुरुष्वबलिनादेवत्रैलो
क्यंनिर्जितंबलात् ॥ २७ ॥ इन्द्रस्यावरजोभूत्वाउपेन्द्रइतिविश्रुतः ॥ येनकेनचमार्गेणबलिंनिर्जित्यमायया ॥ त्रैलोक्यंममपुत्रायदेहिशक्राय
शाश्वतम् ॥२८॥ महादेवउवाच ॥ इत्युक्तस्तेनविप्रेणतथेत्याहजनार्दनः ॥ संस्तूयमानस्त्रिदशैस्तत्रैवान्तरधीयत ॥ २९ ॥ एतस्मिन्नेवकालेतुकश्य
पस्यमहात्मनः ॥ अदित्यागर्भमागच्छद्भगवान्भूतभावनः ॥ ३० ॥ तस्मिन्कालेबलिर्यागंदीर्घसत्रंमहातपाः ॥ यष्टुंमहर्षिभिःसार्द्धमारेभेतद्विधानतः
॥ ३१ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०उमामहेश्वरसंवादेवामनप्रादुर्भावोनामैकोनचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २३९ ॥
श्रीमहादेवउवाच ॥ अथवर्षसहस्रान्तेसर्वलोकमहेश्वरम् ॥ अदितिर्जनयामासवामनंविष्णुमच्युतम् ॥ १ ॥ श्रीवत्सकौस्तुभोरस्कंपूर्णेन्दुसदृश
द्युतिम् ॥ सुन्दरंपुण्डरीकाक्षमतिखर्वतनुंहरिम् ॥ २ ॥ बटुवेषधरंदेवंसर्ववेदाङ्गगोचरम् ॥ मेखलाजिनदण्डादिचिह्नैरङ्कितमीश्वरम् ॥ ३ ॥ तंदृष्ट्वा
देवताःसर्वेशतक्रतुपुरोगमाः ॥ स्तुत्वामहर्षिभिःसार्द्धंनमश्चक्रुर्महौजसम् ॥ ततःप्रसन्नोभगवान्प्रोवाचसुरसत्तमान् ॥ ४ ॥ वामनउवाच ॥
किंकर्तव्यंमयाचाद्यतद्ब्रूतसुरसत्तमाः ॥ ५ ॥ श्रीशङ्करउवाच ॥ ततःप्रहृष्टास्त्रिदशास्तमूचुःपरमेश्वरम् ॥ ६ ॥ देवाऊचुः ॥ अस्मिन्काल
बलेर्यज्ञोवर्त्ततेमधुसूदन ॥ अप्रत्याख्यानकालोऽयंतस्यदैत्यपतेःप्रभो ॥ याचित्वात्रिदिवंलोकंतन्नस्त्वंदातुमर्हसि ॥ ७ ॥ शङ्करउवाच ॥
इत्युक्तस्त्रिदशैस्सर्वैराजगामबलिंहरिः ॥ यागदेशेसमासीनमृषिभिस्सार्द्धमष्टभिः ॥ ८ ॥ अभ्यागतंतुतंदृष्ट्वासहसोत्थायदैत्यराट् ॥ अभ्या

१ 'पञ्चप्रस्थस्वरूपम्' इ० पा०।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गतःस्वयंविष्णुरितिहाससमन्वितः ॥ ९ ॥ पूजयामासविधिनानिवेश्यकुसुमासने ॥ प्रणिपत्यनमस्कृत्यप्राहगद्गदयागिरा ॥ १० ॥
वलिरुवाच ॥ धन्योऽस्मिकृतकृत्योऽस्मिसफलंममजीवितम् ॥ त्वामर्चयित्वाविप्रेन्द्रकिंकरोमितवप्रियम् ॥ ११ ॥ आगतोऽसियदर्थंत्वंमा
मुद्दिश्यद्विजोत्तम ॥ तत्प्रयच्छामितेशीघ्रंब्रूहिवेदविदांवर ॥ १२ ॥ शङ्करउवाच ॥ ततःप्रहृष्टमनसातमुवाचमहीपतिम् ॥ १३ ॥ वामन
उवाच ॥ शृणुराजेन्द्रवक्ष्यामिममागमनकारणम् ॥ अग्निकुण्डस्यपृथिवींदेहिदैत्यपतेमम ॥ १४ ॥ ममत्रिविक्रममितांनान्यदिच्छामिमानद ॥
सर्वेषामेवदानानांभूमिदानमनुत्तमम् ॥ १५ ॥ योददातिमहींराजाविप्रायाकिंचनायवै ॥ अङ्गुष्ठमात्रामपिवासभवेत्पृथिवीपतिः ॥ १६ ॥
नभूमिदानसदृशंपवित्रमिहविद्यते ॥ भूमिंयःप्रतिगृह्णातिभूमिंयश्चप्रयच्छति ॥ १७ ॥ उभौतौपुण्यकर्माणौनिधनेस्वर्गगामिनौ ॥ तस्माद्भूमिं
महाराजप्रयच्छत्रिपदींमम ॥ १८ ॥ एतदल्पांमहींदातुंमाविशङ्कमहीपते ॥ जगत्त्रयप्रदानंतन्नामभूपभविष्यति ॥ १९ ॥ शङ्करउवाच ॥ ततःप्रहृष्ट
वदनस्तथेत्याहमहीपतिः ॥ तस्मैमहीप्रदानंतुकर्तुंमेनेविधानतः ॥ २० ॥ तंदृष्ट्वादैत्यराजंततंदातस्यपुरोहितः ॥ उशनाह्यब्रवीद्वाक्यंमाराजन्दीयतांमही
॥ २१ ॥ शुक्रउवाच ॥ एषविष्णुःपरेशोऽथदेवैःसंप्रार्थितोनृप ॥ वञ्चयित्वामहींसर्वांत्वत्तःप्राप्तुमिहागतः ॥ २२ ॥ तस्मान्महीनदातव्यातस्मैराजन्महा
त्मने ॥ अन्यमर्थंप्रयच्छस्ववचनान्ममभूपते ॥ २३ ॥ श्रीशङ्करउवाच ॥ ततःप्रहस्यराजासौतंगुरुंप्राहधैर्यतः ॥ २४ ॥ बलिरुवाच ॥ प्रीतये
वासुदेवस्यसर्वंपुण्यंकृतंमया ॥ अद्यधन्योऽस्म्यहंविष्णुःस्वयमेवागतोयदि ॥ २५ ॥ तस्यप्रदेयमेवाद्यजीवितंचमहत्सुखम् ॥ तस्मादस्मैप्रयच्छामि
त्रिलोकीमपिमाचिरम् ॥ २६ ॥ श्रीशङ्करउवाच ॥ इत्युक्त्वाभूपतिस्तस्यपादौप्रक्षाल्यभक्तितः ॥ वाञ्छितांप्रददौभूमिंवारिपूर्वंविधानतः ॥ २७ ॥ परिणीय
नमस्कृत्यदत्त्वावैदक्षिणांवसु ॥ प्रोवाचतंवटुंविप्रंप्रहृष्टेनान्तरात्मना ॥ २८ ॥ बालिरुवाच ॥ धन्योऽस्मिकृतकृत्योऽस्मितवदत्त्वामहींद्विज ॥ यत्रेष्टंतव
विप्रेन्द्रतद्गृहाणमहीमिमाम् ॥ २९ ॥ श्रीशङ्करउवाच ॥ तमुवाचनृपंविष्णूराजंस्तवसमीपतः ॥ मापयामिपदेनाद्यपृथिवींतवपश्यतः ॥ ३० ॥ इत्यु
क्त्वाखर्वरूपंतद्विहायपरमेश्वरः ॥ त्रिविक्रमवपुर्भूत्वाजग्राहपृथिवीमिमाम् ॥ ३१ ॥ पञ्चाशत्कोटिविस्तीर्णांससमुद्रमहीधराम् ॥ ससागरांचसद्वी
पांसदेवासुरमानुषाम् ॥ ३२ ॥ पादेनैकेनवपुषोविक्रम्यमधुसूदनः ॥ उवाचदैत्यराजेन्द्रंकिंकरोमीतिशाश्वतः ॥ ३३ ॥ तद्वैत्रैविक्रमंरूपमीश्वरस्यमहौ
जसम् ॥ हितार्थमपिदेवानामृषीणांचमहात्मनाम् ॥ ३४ ॥ नद्रष्टुमपिशक्यंस्याद्ब्रह्मणःशङ्करस्यच ॥ तत्पदंपृथिवींसर्वामाक्रम्यगिरिजेशुभे ॥ ३५ ॥ अति ॥ २४९ ॥

१ 'साम्प्रतम्' इ० पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रिक्तंसमभवच्छतयोजनमायतम् ॥ दिव्यंचक्षुर्ददौतस्मैदैत्यराजेसनातनः॥३६॥तस्मैसंदर्शयामासस्वकंरूपंजनार्दनः॥तद्विश्वरूपंदेवस्यदृष्ट्वादैत्येश्वरो
बलिः॥३७॥प्रहर्षमतुलंलेभेसानन्दाश्रुपरिप्लुतः॥दृष्ट्वादेवंनमस्कृत्यस्तुत्वास्तुतिभिरेवच॥प्राहगद्गदयावाचाप्रहृष्टेनान्तरात्मना ॥३८ ॥बलिरुवाच॥
धन्योऽस्मिकृतकृत्योऽस्मित्वांदृष्ट्वापरमेश्वरम् ॥ लोकत्रयंत्वमेवैतद्गृहाणपरमेश्वर ॥ ३९ ॥ श्रीशङ्करउवाच ॥अथसर्वेश्वरोविष्णुर्द्वितीयंपदमव्ययम् ॥
ऊर्ध्वंप्रसारयामासब्रह्मलोकान्तमच्युतः ॥४०॥ सनक्षत्रग्रहोपेतंसर्वदेवसमावृतम् ॥ पदेनपरिपूर्णोऽभूदच्युतस्यशुभानने ॥ ४१ ॥ ततःपितामहोब्रह्मा
चक्रपद्मादिचिह्नितम् ॥ पादंतद्देवदेवस्यहर्षसङ्कुलचेतसा ॥४२॥ धन्योऽस्मीतिवदन्ब्रह्मागृहीत्वास्वकमण्डलुम् ॥ भक्त्याप्रक्षालयामासतत्रसंस्थित
वारिणा ॥ ४३ ॥ अक्षय्यमभवत्तोयंतस्यविष्णोःप्रभावतः ॥ तत्तीर्थंमेरुशिखरेपपातविमलंजलम् ॥४४ ॥ जगतःपावनार्थंवैचतुर्दिक्षुप्रवाहितम् ॥
सिताचालकनन्दाचचक्षुर्भद्रायथाक्रमम् ॥ ४५ ॥ ततश्चालकनन्दाचमेरोर्दक्षिणतःस्मृता ॥ त्रिधानाम्नात्रिपथगात्रिस्रोतालोकपावनी ॥ ४६ ॥
स्वर्गेमन्दाकिनीप्रोक्तात्वधोभोगवतीतथा ॥ मध्येवेगवतीगङ्गापावनार्थंनृणांशिवा ॥ ४७ ॥ तांदृष्ट्वामेरुमध्येतुप्रस्रवन्तींशुभानने ॥ आत्मनःपाव
नार्थायशिरसाहमधारयम् ॥ ४८ ॥ दिव्यंवर्षसहस्रंतुधृत्वागङ्गाजलंशुभम् ॥ शिवत्वमगमंदेविसर्वलोकेषुपूजितः ॥ ४९ ॥ योवहेच्छिरसागङ्गा
तोयंविष्णुपदोद्भवम् ॥ प्राशयेद्वाजगत्पूज्योभविष्यतिनसंशयः ॥ ५०॥ गङ्गागङ्गेतियोब्रूयाद्योजनानांशतैरपि ॥ मुच्यतेसर्वपापेभ्योविष्णुलोकंस
गच्छति ॥ ५१ ॥ ततोभगीरथोराजागौतमश्चमहातपाः ॥ तपसापूजयित्वामांगङ्गार्थंसमयाचत ॥ ५२ ॥ सर्वलोकहितार्थायतांगङ्गांवैष्णवीं
शिवाम् ॥ तयोरहंतामददांप्रीत्यादेविसरिद्वराम् ॥ ५३ ॥ गौतमेनसमानीतागौतमीतिनकीर्त्तिता ॥ भागीरथीतिविख्यातातेनराज्ञावृतायतः ॥ ५४ ॥
प्रसङ्गात्तेसमाख्यातंगङ्गाजन्मात्यनुत्तमम् ॥ ततोनारायणःश्रीमान्बलेर्दैत्यपतेःप्रभुः ॥५५॥ रसातलंशुभंलोकंप्रददौभक्तवत्सलः ॥ सर्वेषांदानवानां
तुनागानांयादसामपि ॥ ५६ ॥ राजानंतुबलिंचक्रेयावदाभूतसंप्लवम् ॥ प्रतिगृह्यबलेर्लोकान्बटुवेषेणदैत्यहा ॥ ५७ ॥ महेन्द्रायददौप्रीत्याकाश्यपो
विष्णुरव्ययः ॥ ततोदेवाःसगन्धर्वाऋषयश्चमहौजसः ॥ ५८ ॥ तुष्टुवुःस्तवनैर्दिव्यैःपूजयामासुरच्युतम् ॥ संक्षिप्यतन्महद्रूपंतेषांसंदर्शनायवै ॥५९॥
संपूज्यमानस्त्रिदशैरन्तर्द्धानंययौहरिः ॥इत्थंसुरक्षितःशक्रोविष्णुनाप्रभविष्णुना ॥ ६० ॥ त्रैलोक्यंमहदैश्वर्यमवापत्रिदिवेश्वरः ॥ एतत्तेसर्वमाख्यातं
वामनंवैभवंशुभम् ॥ शेषंयद्वैभवंदेवितद्वक्ष्यामियथाक्रमात् ॥ ६१ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०उमामहेश्वरसंवादेवामनप्रादुर्भावोनाम
चत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४० ॥ ईश्वरउवाच ॥ भृगुपुत्रोमहानासीज्जमदग्निर्द्विजोत्तमः ॥ समस्तवेदवेदाङ्गपारगश्चमहातपाः ॥१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तपस्तेपेसधर्मात्मामहेन्द्रंप्रतिभामिनि॥सहस्रवर्षपर्यन्तंगङ्गायाःपुलिनेशुभे॥ततःप्रसन्नःप्राहेदंभगवान्पाकशासनः ॥२॥ इन्द्रउवाच ॥ वरंवृणीष्वविप्रे
न्द्रयत्तेमनसिवर्त्तते॥३॥ईश्वरउवाच॥ततःप्रोवाचविप्रर्षिःपरितुष्टंशतक्रतुम् ॥४॥ जमदग्निरुवाच॥सुरभिंदेहिमेदेवसर्वकामदुघांसदा॥५॥ईश्वरउवाच ॥
ततःप्रसन्नोदेवेशस्तस्मैविप्रायगोत्रभित्॥प्रददौसुरभिंदेवींसर्वकामदुघांतदा ॥६॥ सलब्ध्वासुरभिंदेवींजमदग्निर्महातपाः॥उवासमहदैश्वर्यःशतक्रतुरिवा
परः॥७॥रेणुकस्यसुतांरम्यांरेणुकांनामनामतः॥उपयेमेविधानेनजमदग्निर्महातपाः॥८॥ तयासहसधर्मात्मारेमेवर्षाण्यनेकशः॥पौलोम्याशुभयादेव्या
यथासंक्रन्दनोविभुः ॥९॥ ततःसपुत्रकामत्वादिष्टिंचक्रेसुधार्मिकः ॥ इष्ट्यासंतोषयामासपाकशासनमीश्वरम् ॥१०॥ परितुष्टःशचीभर्त्तादददौपुत्रंमहा
बलम् ॥ महौजसंमहाबाहुंसर्वशत्रुप्रतापनम् ॥ ११ ॥ अथकालेनविप्रेन्द्रोरेणुकायांशुचिस्मिते ॥ पुत्रमुत्पादयामासमहावीर्यंबलान्वितम् ॥ १२ ॥
विष्णोरंशांशभागेनसर्वलक्षणलक्षितम् ॥ तस्मिन्सुतेमहावीर्येभृगुस्तस्यपितामहः ॥ १३ ॥ नामचास्मैददौहर्षाद्विष्णोरंशोपलक्षितम् ॥ चक्रे
ऽथनामधेयंतुरामइत्यस्यशोभनम् ॥ १४ ॥ जमदग्नेःसमुत्पन्नोजामदग्न्यइतीरितः ॥ तद्भार्गवान्वयःसोऽपिववृधेद्विजपुङ्गवः ॥ १५ ॥ उपनीतस्तदा
कालेसर्वविद्याविशारदः ॥ तपस्तप्तुंजगामाथशालिग्रामाचलंप्रति ॥ १६ ॥ ददर्शकश्यपंतत्रब्रह्मर्षिममितौजसम् ॥ दृष्ट्वाप्रणम्यहर्षेणपूजयामास
भार्गवः ॥ १७ ॥ तेनसम्पूजितस्सम्यङ्मरीचितनयोद्विजः ॥ विधिनाप्रददौतस्मैमन्त्रंवैष्णवमव्ययम् ॥ १८ ॥ लब्धमन्त्रस्तदारामः
कश्यपात्तुमहात्मनः ॥ पूजयामासविधिनासतदाकमलापतिम् ॥ १९ ॥ षडक्षरंमहामन्त्रंजपन्नेवदिवानिशम् ॥ ध्यायन्कमलपत्राक्षंविष्णुं
सर्वगतंहरिम् ॥२०॥ तपस्तेपेसधर्मात्माबहुवर्षाणिभार्गवः ॥ जितेन्द्रियस्तुयतवाक्तदातस्थौमहातपाः ॥ २१ ॥ जमदग्निस्तुविप्रर्षिःस्थितोगङ्गातटे
शुभे ॥ चकारविधिवद्धर्मंयज्ञदानादिकंमहत् ॥ २२ ॥ धेन्वाःप्रसादादिंद्रस्यसंपूर्णास्तस्यसम्पदः ॥ कस्यचित्त्वथकालस्यहैहयाधिपतिःप्रभुः
॥ २३ ॥विजित्वासर्वाराप्राणिसर्वसैन्यसमावृतः ॥ भार्गवस्याश्रमंप्राप्यजमदग्नेर्महीपतिः ॥ २४ ॥ समीक्ष्यतंमहाभागंववन्देमुनिसत्तमम् ॥
पृष्ट्वातुकुशलंतस्यमहर्षेर्भावितात्मनः ॥ २५ ॥ प्रददौनृपतिस्तस्मैवस्त्राण्याभरणानिच ॥ सचसंपूजयामासराजानंगृहमागतम् ॥ २६ ॥ मधुपर्केण
विधिनापूजयित्वानृपोत्तमम् ॥ ससैन्यायनृपेन्द्रायभोजनंप्रददौमुनिः ॥२७॥ प्रार्थितासुरभिस्तेनभार्गवेणसुधीमता ॥ संपूर्णमन्नपानादिससर्जशबला
तदा ॥ २८ ॥ अक्षय्यमन्नपानादितयासृष्टंमहातपाः ॥ ससैन्यायनृपेन्द्रायप्रददौमुनिसत्तमः ॥२९॥ तांदृष्ट्वाशबलांराजाकुतूहलसमन्वितः ॥ स्पृहां
चाप्यकरोद्राजातस्यांगविसुदुर्मतिः ॥ अयाचत्सुरभिंतत्रजमदग्निंनृपोत्तमः॥३०॥ कार्त्तवीर्यउवाच ॥ शबलांदेहिमेविप्रकपिलांसर्वकामदाम् ॥ अन्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धेनुसहस्राणिदास्यामितवसुव्रत ॥ ३१ ॥ ईश्वरउवाच ॥इत्युक्तस्तेनराज्ञाहजमदग्निर्महातपाः ॥ ३२ ॥ जमदग्निरुवाच ॥ नदेयाशबलाराजन्मयातव
महीपते ॥ इयंचदेवदेवेनशक्रेणपरिपालिता ॥ देवतानांधनंराजन्दातव्यंस्यात्कथंमया ॥ ३३ ॥ ईश्वरउवाच ॥ इत्युक्तःसतदाराजाक्रोधेन
कलुषीकृतः ॥ बलाज्जग्राहशबलांसर्वसैन्यसमावृतः ॥ ३४ ॥ ततःक्रुद्धामहाभागाशबलावरवर्णिनि ॥ जघानतस्यसैन्यानिशृङ्गैःखुरतलैरपि
॥ ३५ ॥ घातयित्वामुहूर्त्तेनतत्सैन्यंशबलाबलात् ॥ अन्तर्द्धानंगतादेवीययौशक्रान्तिकंक्षणात् ॥ ३६ ॥ स्वसैन्यंनिहतंदृष्ट्वासोऽर्जुनःक्रोध
मूर्छितः ॥ मुष्टिनाताडयामासभार्गवंद्विजसत्तमम् ॥ ३७ ॥ ताडितस्तेनबहुशोविकलाङ्गःप्रकम्पितः ॥ पपातसहसाभूमौममारद्विजसत्तमः
॥ ३८ ॥ हत्वामुनिवरंतत्रपापात्माहैहयाधिपः ॥ महासैन्यपरीवारोविवेशनगरंस्वकम् ॥ ३९ ॥ रामस्तुदेवदेवेशंपूजयामासभार्गवः ॥
तेनसंपूजितोदेवःप्रसन्नःप्राहकेशवः ॥ ४० ॥ श्रीभगवानुवाच ॥ प्रीतोऽस्मितपसावत्सभवतोनियतात्मनः ॥ संप्रदास्यामितेविप्रमच्छक्तिंपरमां
शुभाम् ॥ ४१ ॥ आवेशितोऽथमच्छक्त्याजहिदुष्टान्नृपोत्तमान् ॥ भूभारकविनाशायदेवतानांहितायवै ॥ ४२॥ ईश्वरउवाच ॥ इत्युक्त्वाप्रददौदेवः
परशुंशत्रुधर्षणम् ॥ वैष्णवंचमहच्चापंदिव्याण्यस्त्राण्यनेकशः ॥ दत्त्वाप्रोवाचभगवाञ्जामदग्न्यंजनार्दनः ॥ ४३ ॥ श्रीभगवानुवाच ॥ मदोत्कटा
नृपान्हत्वाबहुशःपरवीरहा ॥ गृहाणपृथिवींसर्वांसागरान्तांद्विजोत्तम ॥ ४४ ॥ पालयस्वचधर्मेणवीर्येणमहतावृतः ॥ कालेनमत्पदंचापिमत्प्रसादा
द्गमिष्यसि ॥ ४५ ॥ ईश्वरउवाच ॥ इत्युक्त्वान्तर्हितोदेवोवरंदत्त्वाद्विजन्मने ॥ रामोऽपिचाथसहसाप्रययौपितुराश्रमम् ॥ ४६ ॥ पितरंनिहतंदृष्ट्वा
भार्गवःक्रोधमूर्च्छितः ॥ निष्क्षत्रांकर्तुमन्विच्छन्महींनृपसमाकुलाम् ॥ ४७ ॥ जगामहैहयपतेर्नगरंनृपसंवृतम् ॥ क्रोधावेशज्ज्वलद्गात्रोद्धार्यतिष्ठदु
दायुधः ॥ ४८ ॥ तंदृष्ट्वातत्पुरजनाजामदग्न्यंमहौजसम् ॥ जाज्वल्यमानंवपुषाकालाग्निमिवमेनिरे ॥ ४९ ॥ भयार्ताविद्रुताःसर्वेराजानंहैहयाधि
पम् ॥ शशंसुस्तंमहासत्त्वंसर्वायुधसमन्वितम् ॥ श्रुत्वासराजातद्वाक्यंप्राहविस्मितचेतसा ॥ ५०॥ हैहयाधिपउवाच॥ कोऽसौममपुरद्वारिसायुधः
संस्थितोबलात् ॥ महेन्द्रोवायमोवापिरुद्रोवाधनदोऽपिवा ॥ ५१ ॥सायुधोमत्पुरद्वारिस्थातुंशक्तोनकर्हिचित् ॥ ५२ ॥ महादेवउवाच ॥इत्यु
क्त्वापार्थिवेन्द्रोऽसौकिङ्करान्सुमहाबलान् ॥ प्रेरयामासतंदुष्टंगृह्णीतेत्याहदुर्मतिः ॥५३॥ तेगत्वाददृशुर्वीरंपुरद्वारिमहाबलम्॥ ज्वलन्तमिवकालाग्निं
दुर्निरीक्ष्यंस्वतेजसा ॥ ५४ ॥ तस्यसंदर्शनेऽप्यत्रनशक्तास्तेमहाबलाः ॥ ग्रहीतुकामास्तंवीरंसमन्तात्प्रययुर्भृशम् ॥ ५५ ॥ तान्दृष्ट्वासायुधा
न्सर्वान्पार्थिवेन्द्रस्यकिंकरान्॥प्रहसन्प्राहविप्रेन्द्रोजामदग्न्योमहाबलः॥५६॥ परशुरामउवाच॥भार्गवस्यसुतोरामःसंप्राप्तोऽहंनराधमाः॥ स्वपितुर्नि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धनात्सर्वान्हनिष्यामिनृपोत्तमान् ॥ ५७ ॥ कार्तवीर्यस्यरुधिरंमतिपित्रेतिलसंयुतम् ॥ दास्यामिपिण्डदानंचतच्छिरःकबलेनवै ॥ ५८ ॥ महादेव
उवाच ॥ इत्युक्तास्तेमहावीर्याःकिङ्कराास्तस्यभूपतेः ॥ शरैस्तंताडयामासुःपलालैरिवपावकम् ॥ ५९ ॥ ततःक्रुद्धोमहावीर्योरामस्सत्य
पराक्रमः ॥ वैष्णवंचापमाकृष्यज्यानिनादमथाकरोत् ॥ ६० ॥ तेननादेनमहतापूरितंभुवनत्रयम् ॥ देवानामपिसंत्रासोबभूवमहदद्भुतम् ॥
॥६१॥ततःपावकसङ्काशैराशुगैःसुमहाबलः ॥ ताडयामासतान्वीरान्किङ्करान्वैमहाबलान् ॥६२॥ हत्वातुकिङ्करांस्तस्यपार्थिवस्यमहात्मनः॥ काला
ग्निरिवसंतस्थौसर्वभूतभयङ्करः॥६३॥ श्रुत्वातुकिङ्करान्स्वस्यहतान्रामेणधीमता॥हैहयाधिपतिर्वीरःक्रोधसंरक्तलोचनः ॥६४॥निर्ययौसहसैन्येनयत्रा
स्तेभार्गवोऽव्ययः ॥ तंदृष्ट्वाघोरसङ्काशंज्वलन्तंस्वेनतेजसा ॥ ६५ ॥ त्रस्ताःसर्वेजनास्तत्रशङ्कमानाजनक्षयम् ॥ ततोयुद्धंमहाघोरंरामस्यनृपते
स्तदा ॥ ६६ ॥ शस्त्रास्त्रपातनैर्भीमैर्मेघयोरिववर्षतोः ॥ ततोरामोमहातेजास्तत्सैन्यंनृपतेस्तदा ॥ ६७ ॥ निर्ददाहक्षणात्सर्वंवैष्णवास्त्रेणलीलया ॥
ततःपरशुनारामस्तीक्ष्णेनामितविक्रमः ॥ ६८ ॥ चिच्छेदबाहुसाहस्रंकार्तवीर्यस्यदुर्मतेः ॥ नशशाकमहावीर्योयोद्धुंरामेणभूपतिः ॥ ६९ ॥ नष्टवीर्यो
बभूवात्रपापेनस्वेनदुर्मतिः ॥ चिच्छेदतच्छिरःक्रुद्धोरेणुकातनयोबली ॥ ७० ॥ महाद्रिशृङ्गंवज्रेणयथादेवपतिर्बली ॥हत्वासहस्रबाहुंतंजामदग्न्यःप्रता
पवान् ॥ ७१ ॥ जघानपार्थिवान्सर्वान्क्रुद्धःपरशुनामृधे ॥ रामंदृष्ट्वामहारौद्रंपार्थिवाःपृथिवीतले ॥ ७२॥ भयार्त्ताविद्रुताःसर्वेनागाःकेसरिणंयथा॥
विद्रुतानपिभूपालान्पितुर्निधनमन्युना ॥७३॥ जघानभार्गवःक्रुद्धोनागानिवखगेश्वरः ॥ निःक्षत्रंकृतवान्सर्वंजामदग्न्यःप्रतापवान् ॥७४॥ ररक्षभग
वानेकमिक्ष्वाकोःसुमहत्कुलम् ॥ मातामहस्यान्वयत्वाद्रेणुकावचनादथ ॥ ७५ ॥ तान्भ्रष्टराज्यान्कृत्वावैमातामहकुलोद्भवान्॥ नहत्वामनुवंशांस्ता
न्रामोनृपकुलान्तकः ॥ ७६ ॥ सर्वंतुभूभृतांवंशंनाशयामासवीर्यवान् ॥ कृत्वाचोर्वींतुनिःक्षत्रांजमदग्निसुतोबली ॥ ७७ ॥ अश्वमेधंमहायज्ञंचकार
विधिवद्द्विजः ॥ प्रददौविप्रमुख्येभ्यःसप्तद्वीपवतींमहीम् ॥ ७८॥ दत्त्वामहींसविप्रेभ्योजामदग्न्यःप्रतापवान् ॥ तपस्तप्तुंययौसोऽथनरनारायणाश्रमम्
॥ ७९ ॥ एतत्तेकथितंदेविजामदग्न्यमहात्मनः ॥ शक्त्यावेशावतारस्यचरितंशार्ङ्गिणःप्रभोः ॥८०॥ नोपास्यंहिभवेत्तस्यशक्त्यावेशान्महात्मनः ॥
उपास्यौभगवद्भक्तैर्विप्रमुख्यैर्महात्मभिः ॥ ८१ ॥ रामकृष्णावतारौतुपरिपूर्णौहिसद्गुणैः ॥ उपास्यमानावृषिभिरपवर्गप्रदौनृणाम् ॥ ८२ ॥ इति
श्रीपाद्मेमहापुराणेपञ्चप०उत्तर०उमामहेश्वरसंवादेपरशुरामचरितंनामैकचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४१ ॥ रुद्रउवाच ॥ स्वाय
म्भुवोमनुःपूर्वंद्वादशार्णमहामनुम् ॥ जजापगोमतीतीरेनैमिषेविमलेशुभे ॥ १ ॥ तेनवर्षसहस्रेणपूजितःकमलापतिः ॥ मत्तोवरंवृणीष्वेतितंप्राह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भगवान्हरिः ॥ ततःप्रोवाचहर्षेणमनुःस्वायम्भुवोहरिम् ॥ २ ॥ मनुरुवाच ॥ पुत्रत्वंभजदेवेशत्रीणिजन्मानिचाच्युत ॥ त्वांपुत्रलालसत्वेनभजामि
पुरुषोत्तमम् ॥ ३ ॥ रुद्रउवाच ॥ इत्युक्तस्तेनलक्ष्मीशःप्रोवाचसुमहागिरा ॥ ४ ॥ विष्णुरुवाच ॥ भविष्यतिनृपश्रेष्ठयत्तेमनसिकाङ्क्षितम् ॥ ममैव
चमहाप्रीतिस्तवपुत्रत्वहेतवे ॥ ५ ॥ स्थितिप्रयोजनेकालेतत्रतत्रनृपोत्तम ॥ त्वयिजातेत्वहमपिजातोऽस्मितवसुव्रत ॥ ६ ॥ परित्राणायसाधूनां
विनाशायचदुष्कृताम् ॥ धर्म्मसंस्थापनार्थायसंभवामितवानघ ॥७॥ रुद्रउवाच॥ एवंदत्त्वावरंतस्मैतत्रैवान्तर्दधेहरिः ॥ अस्याभूत्प्रथमंजन्ममनोः
स्वायम्भुवस्यच ॥ ८ ॥ रघूणामन्वयेपूर्वंराजादशरथोह्यभूत् ॥ द्वितीयोवसुदेवोऽभूद्वृष्णीनामन्वयेविभुः ॥ ९ ॥ कलेर्दिव्यसहस्राब्दप्रमाणस्या
न्त्यपादयोः ॥ शम्भलग्रामकेमुख्येब्राह्मणःसंजनिष्यते ॥ १० ॥ ततोमुक्तिर्भवेत्तस्यमनोर्जन्मत्रयान्तरे ॥ राघवःप्रथमंजज्ञेकृष्णस्तुतदनन्तरम् ॥
॥ ११ ॥ कल्किरूपीहरिःपश्चाद्ब्राह्मणस्यजनिष्यति ॥ तस्यपत्नीमहाभागासुशीलानामभामिनी ॥ १२ ॥ कौसल्यासमभूत्पत्नीराज्ञोदश
रथस्यहि ॥ यदुवंश्यस्यसैवाथदेवकीनामविश्रुता ॥ १३ ॥ हरिव्रतस्यविप्रस्यभार्यादेवप्रभापुनः ॥ एवंमातृत्वमापन्नात्रीणिजन्मानि
शार्ङ्गिणः ॥ १४ ॥ पूर्वंरामस्यचरितंवक्ष्यामितवसुव्रते ॥ यस्यस्मरणमात्रेणविमुक्तिःपापिनामपि ॥ १५ ॥ हिरण्यकहिरण्याक्षौद्वितीयंजन्म
संश्रितौ ॥ कुम्भकर्णदशग्रीवावजायेतांमहाबलौ ॥ १६ ॥ पुलस्त्यस्यसुतोविप्रोविश्रवानामधार्मिकः ॥ तस्यपत्नीविशालाक्षीराक्षसेन्द्रसुतानघे
॥ १७ ॥ सुकेशितनयासास्यात्सुमालेर्दानवस्यच ॥ केकसीनामकन्यासीत्तस्यभार्याहृढव्रता ॥ १८ ॥ कामोद्रिक्तातुसादेवीसन्ध्याकालेमहामु
निम् ॥ रमयामासतन्वङ्गीयथेष्टंशुभदर्शना ॥ १९ ॥ तत्कालसम्भवौगर्भौतस्यांजातौमहाबलौ ॥ रावणःकुम्भकर्णश्चराक्षसौलोकविश्रुतौ ॥ २० ॥
कन्याशूर्पणखानामजातातिविकृतानना ॥ कस्यचित्त्वथकालस्यतस्यांजातोविभीषणः ॥२१॥ सुशीलोभगवद्भक्तःसत्यवाग्धर्मवाञ्शुचिः ॥ रावणः
कुम्भकर्णश्चहिमवत्पर्वतोत्तमे ॥ २२ ॥ महोग्रतपसामांवैपूजयामासतुर्भृशम् ॥ रावणस्त्वथदुष्टात्मास्वशिरःकमलैःशुभैः ॥ २३ ॥ पूजयामासमां
देविदारुणेनैवकर्मणा ॥ ततस्तमब्रवंसुभ्रूःप्रहृष्टेनान्तरात्मना ॥ २४ ॥ वरंवृणीष्वमेवत्सयत्तेमनसिवर्त्तते ॥ ततःप्रोवाचदुष्टात्मादेवदानवरक्षसाम्
॥ २५ ॥ अवध्यत्वंप्रदेहीतिसर्वलोकजिगीषया ॥ ततोऽहंदत्तवांस्तस्मैराक्षसायदुरात्मने ॥ २६ ॥ देवदानवयक्षाणामवध्यत्वंवरानने ॥ राक्षसो
ऽसौमहावीर्योवरदानात्सुगर्वितः ॥ २७ ॥ त्रीँल्लोकान्पीडयामासदेवदानवमानुषान् ॥ तेनसंबाध्यमानाश्चदेवाब्रह्मपुरोगमाः ॥ २८ ॥ भयार्त्ताःशरणं
जग्मुरीश्वरंकमलापतिम् ॥ ज्ञात्वाथवेदनांतेषामभयायसनातनः ॥ उवाचत्रिदशान्सर्वान्ब्रह्मरुद्रपुरोगमान् ॥ २९ ॥ श्रीभगवानुवाच ॥ राज्ञोदशरथ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्याहमुत्पत्स्यामिरघोःकुले ॥ हनिष्यामिदुरात्मानंरावणंसहबान्धवम् ॥३०॥ मानुषंवपुरास्थायहन्मिदैवतकण्टकम् ॥ नन्दिशापाद्भवन्तोऽपिवान
रत्वमुपागताः ॥ कुरुध्वंममसाहाय्यंगन्धर्वाप्सरसोत्तमाः ॥ ३१ ॥ रुद्रउवाच ॥ इत्युक्तादेवतास्सर्वादेवदेवेनविष्णुना ॥ वानरत्वमुपागम्यजज्ञिरेपृथि
वीतले ॥ ३२ ॥ भार्गवेणप्रदत्तातुमहीसागरमेखला ॥ दत्तामहर्षिभिःपूर्वंरघूणांसुमहात्मनाम् ॥ ३३ ॥ वैवस्वतमनोःपुत्रोराज्ञांश्रेष्ठोमहाबलः ॥ इक्ष्वा
कुरितिविख्यातस्सर्वधर्मविदांवरः ॥३४॥ तदन्वयेमहातेजाराजादशरथोबली॥अजस्यनृपतेःपुत्रःसत्यवाञ्छीलवाञ्छुचिः॥३५॥ सराजापृथिवींसर्वां
पालयामासवीर्यतः ॥ राज्येषुस्थापयामाससर्वान्पार्थिवसत्तमान् ॥ ३६ ॥ कोसलस्यनृपस्याथपुत्रीसर्वाङ्गशोभना ॥ कौसल्यानामतांकन्यामुप
येमेसपार्थिवः ॥ ३७ ॥ मागधस्यनृपस्याथतनयाचशुचिस्मिता ॥ सुमित्रानामनाम्नाचद्वितीयातस्यभामिनी ॥ ३८ ॥ तृतीयाकेकयस्याथनृपतेर्दुहि
तातथा ॥ भार्याभूत्पद्मपत्राक्षीकैकेयीनामनामतः ॥३९॥ ताभिःस्मराजाभार्याभिस्तिसृभिर्धर्मसंयुतः ॥ रमयामासकाकुत्स्थःपृथिवींचानुपालयन् ॥
॥ ४० ॥ अयोध्यानामनगरीसरयूतीरसंस्थिता ॥ सर्वरत्नसुसंपूर्णाधनधान्यसमाकुला ॥ ४१ ॥ प्राकारगोपुरैर्जुष्टाहेमप्राकारसङ्कुला ॥ उत्तमैर्गाग
तुरगैर्महेन्द्रस्ययथापुरी ॥ ४२ ॥ तस्यांराजासधर्मात्माउवासमुनिसत्तमैः ॥ पुरोहितेनविप्रेणवसिष्ठेनमहात्मना ॥ ४३ ॥ राज्यंचकारयामाससर्वं
निहतकण्टकम् ॥ यस्मादुत्पत्स्यतेतस्यांभगवान्पुरुषोत्तमः ॥४४॥ तस्मात्तुनगरीपुण्यासाप्ययोध्येतिकीर्तिता ॥ नगरस्यपरंधाम्नोनामतस्याप्य
भूच्छुभे ॥ ४५ ॥ यत्रास्तेभगवान्विष्णुस्तदेवपरमंपदम् ॥ तत्रसद्योभवेन्मोक्षःसर्वकर्मनिकृन्तनः ॥ ४६ ॥ जातेतत्रमहाविष्णौनराःसर्वेमुदंययुः ॥
सराजापृथिवींसर्वांपालयित्वाशुभानने ॥ ४७ ॥ अयजद्वैष्णवेष्ट्याचपुत्रार्थीहरिमच्युतम् ॥ तेनसंपूजितःश्रीशोराज्ञासर्वगतोहरिः ॥ ४८ ॥
वैष्णवेनतुयज्ञेनवरदःप्राहकेशवः ॥ तस्मिन्नाविरभूदग्नौयज्ञरूपोहरिस्तदा ॥ ४९ ॥ शुद्धजाम्बूनदप्रख्यःशङ्खचक्रगदाधरः ॥ शुक्लाम्बरधरःश्रीमान्सर्व
भूषणभूषितः ॥ ५० ॥ श्रीवत्सकौस्तुभोरस्कोवनमालाविभूषितः ॥ पद्मपत्रविशालाक्षश्चतुर्बाहुरुदारधीः ॥५१॥ सख्याङ्कस्थश्रियासार्द्धमाविरासी
द्रमेश्वरः ॥ वरदोऽस्मीतितंप्राहराजानंभक्तवत्सलः ॥ ५२ ॥ तंदृष्ट्वासर्वलोकेशंराजाहर्षसमाकुलः ॥ ववन्देभार्ययासार्द्धंप्रहृष्टेनान्तरात्मना
॥५३॥प्राञ्जलिःप्रणतोभूत्वाहर्षगद्गदयागिरा॥पुत्रत्वंसेममजेत्याहदेवदेवंजनार्दनम्॥ततःप्रसन्नोभगवान्प्राहराजानमच्युतः ॥ ५४ ॥ विष्णुरुवाच॥उत्प
त्स्येऽहंनृपश्रेष्ठदेवलोकहितायवै ॥ परित्राणायसाधूनांराक्षसानांवधायच ॥ मुक्तिप्रदातुंलोकानांधर्मसंस्थापनायच ॥ ५५ ॥ महादेवउवाच ॥ इत्यु
क्त्वापायसंदिव्यंहेमपात्रस्थितंशृतम्॥लक्ष्म्याहस्तस्थितंशुभ्रंपार्थिवायददौहरिः ॥५६॥ विष्णुरुवाच ॥ इदंवैपायसंराजन्पत्नीभ्यस्तवसुव्रत ॥ देहि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेतनयास्तासुउत्पत्स्यन्तेमदंशजाः ॥ ५७ ॥ महादेवउवाच ॥ इत्युक्त्वामुनिभिःसर्वैःस्तूयमानोजनार्दनः ॥ स्वात्मानंदर्शयित्वाथतथैवान्त
रधीयत ॥५८॥ सराजातत्रदृष्ट्वाचपत्नींज्येष्ठांकनीयसीम् ॥ विभज्यपायसंदिव्यंप्रददौसुसमाहितः ॥ ५९ ॥ एतस्मिन्नन्तरेपत्नीसुमित्रातस्यमध्यमा ॥
तत्समीपंप्रयातासापुत्रकामासुलोचना ॥ ६० ॥ तांदृष्ट्वातत्रकौसल्याकैकेयीचसुमध्यमा ॥ अर्द्धमर्द्धंप्रददतुस्तेतस्यैपायसंस्वकम् ॥ ६१ ॥ तत्प्राश्य
पायसंदिव्यंराजपत्न्यःसुमध्यमाः ॥ संपन्नगर्भाःसर्वास्ताविरेजुःशुभ्रवर्चसः ॥ ६२ ॥ तासांस्वप्नेषुदेवेशःपीतवासाजनार्दनः ॥ शङ्खचक्रगदापाणि
राविर्भूतस्तदाहरिः ॥६३ ॥ अथकालेमनोरम्येमधुमासिशुचिस्मिते ॥ शुक्लेनवम्यांविमलेनक्षत्रेऽदितिदैवते ॥ ६४ ॥ मध्याह्नसमयेलग्नेसर्वग्रह
शुभान्विते ॥ कौसल्याजनयामासपुत्रंलोकेश्वरंहरिम् ॥ ६५ ॥ इन्दीवरदलश्यामंकोटिकन्दर्पसन्निभम् ॥ पद्मपत्रविशालाक्षंसर्वाभरणशोभितम् ॥
॥ ६६ ॥ श्रीवत्सकौस्तुभोरस्कंसर्वाभरणभूषितम् ॥ उद्यद्दिनकरप्रख्यकुण्डलाभ्यांविराजितम् ॥ ६७ ॥ अनेकसूर्यसङ्काशंतेजसामहतावृतम् ॥ परे
शस्यतनोरम्यंदीपादुत्पन्नदीपवत् ॥ ६८ ॥ ईशानंसर्वलोकानांयोगिध्येयंसनातनम् ॥ सर्वोपनिषदामर्थमनन्तंपरमेश्वरम् ॥६९॥ जगत्सर्गस्थितिल
येहेतुभूतमनामयम् ॥ शरण्यंसर्वभूतानांसर्वभूतमयंविभुम् ॥ ७० ॥ समुत्पन्नेजगन्नाथेदेवदुन्दुभयोदिवि ॥ विनेदुःपुष्पवर्षाणिववृषुःसुरसत्तमाः ॥
॥ ७१ ॥ प्रजापतिमुखादेवाविमानस्थानभस्तले ॥ तुष्टुवुर्मुनिभिःसार्द्धंहर्षपूर्णाङ्गविह्वलाः ॥ ७२ ॥ जगुर्गन्धर्वपतयोननृतुश्चाप्सरोगणाः ॥ ववुः
पुण्यशिवावाताःसुप्रभोऽभूद्दिवाकरः ॥ ७३ ॥ जज्वलुश्चाग्नयःशान्ताविमलाश्चदिशोदश ॥ ततस्सराजाहर्षेणपुत्रंदृष्ट्वासनातनम् ॥ ७४ ॥ पुरोधसा
वसिष्ठेनजातकर्मतदाकरोत् ॥ नामचास्मैददौरम्यंवसिष्ठोभगवांस्तदा ॥ ७५ ॥ श्रियःकमलवासिन्यारमणोऽयंमहान्प्रभुः ॥ तस्माच्छ्रीरामइत्यस्य
नामसिद्धंपुरातनम् ॥ ७६ ॥ सहस्रनाम्नांश्रीशस्यतुल्यंमुक्तिप्रदंनृणाम् ॥ विष्णुमासेसमुत्पन्नोविष्णुरित्यभिधीयते ॥ ७७ ॥ एवंनामास्यदत्त्वाथ
वसिष्ठोभगवानृषिः ॥ परिणीयनमस्कृत्यस्तुत्वास्तुतिभिरेवच ॥७८॥ संकीर्त्यनामसाहस्रंमङ्गलार्थंमहात्मनः ॥ विनिर्ययौमहातेजास्तस्मात्पुण्य
तमाद्गृहात् ॥ ७९ ॥राजाथविप्रमुख्येभ्योददौबहुधनंमुदा ॥ गवामयुतदानंचकारयामासधर्मतः ॥८०॥ ग्रामाणांशतसाहस्रंददौरघुकुलोत्तमः ॥
वस्त्रैराभरणैर्दिव्यैरसङ्ख्येयैर्धनैरपि ॥ ८१ ॥ विष्णोस्संतुष्टयेतत्रतर्पयामासभूसुरान् ॥ कौसल्याचसुतंदृष्ट्वारामंराजीवलोचनम् ॥ ८२ ॥ फुल्लहस्तार
विन्दाभंपद्महस्ताम्बुजान्वितम् ॥ तस्यश्रीपादकमलेपद्माब्जेचवरानने ॥ ८३ ॥ शङ्खचक्रगदापद्मध्वजवज्रादिचिह्निते ॥ दृष्ट्वावक्षसिश्रीवत्संकौस्तुभं
वनमालया ॥ ८४॥ तस्याङ्गेसाजगत्सर्वंसदेवासुरमानुषम् ॥ स्मितवक्त्रेविशालाक्षीभुवनानिचतुर्दश ॥ ८५ ॥ निःश्वासेतस्यवेदांश्चसेतिहासान्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हात्मनः ॥ द्वीपानब्धीन्गिरींस्तस्यजघनेवरवर्णिनि ॥ ८६ ॥ नाभ्यांब्रह्मशिवौतस्यकर्णयोश्चदिशःशुभाः ॥ नेत्रयोर्वह्निसूर्यौचघ्राणेवायुंमहाजवम्
॥८७॥ सर्वोपनिषदामर्थंदृष्ट्वातस्यविभूतयः ॥ कृत्स्नाभीतावरारोहाप्रणम्यचपुनपुनः ॥ हर्षाश्रुपूर्णनयनाप्राञ्जलिर्वाक्यमब्रवीत् ॥ ८८ ॥ कौसल्यो
वाच ॥ धन्यास्मिदेवदेवेशलब्ध्वात्वांतनयंप्रभो ॥ प्रसीदमेजगन्नाथपुत्रस्नेहंप्रदर्शय ॥ ८९ ॥ ईश्वरउवाच ॥ एवमुक्तोहृषीकेशोमात्रासर्वगतोहरिः ॥
मायामानुषतांप्राप्यशिशुभावाद्रुरोदसः ॥ ९० ॥ अथप्रमुदितादेवीकौसल्याशुभलक्षणम् ॥ पुत्रमालिङ्ग्यहर्षेणस्तन्यंप्रादात्सुमध्यमा ॥ ९१ ॥
तस्याःस्तन्यंपपौदेवोबालभावात्सनातनः ॥ उवासमातुरुत्सङ्गेजगद्भर्तामहाविभुः ॥९२॥तस्मिन्दिनेशुभेरम्येसर्वकामप्रदेनृणाम्॥उत्सवंचक्रिरेपौरा
हृष्टाजानपदानराः ॥९३॥ कैकेय्यांभरतोजज्ञेपाञ्चजन्यांशसम्भवः॥सुमित्राजनयामासलक्ष्मणंशुभलक्षणम् ॥९४॥ शत्रुघ्नंचमहाभागादेवशत्रुप्रताप
नम् ॥ अनन्तांशेनसंभूतोलक्ष्मणःपरवीरहा ॥ ९५ ॥ सुदर्शनांशाच्छत्रुघ्नःसंजज्ञेऽमितविक्रमः ॥ तेसर्वेववृधुस्तत्रवैवस्वतमनोःकुले ॥९६॥ संस्कृ
तास्तेसुताःसम्यग्वसिष्ठेनमहौजसा ॥ अधीतवेदास्तेसर्वेश्रुतवन्तस्तथानृपाः ॥ ९७ ॥ सर्वशास्त्रार्थतत्त्वज्ञाधनुर्वेदेचनिष्ठिताः ॥ बभूवुःपरमो
दारालोकानांहर्षवर्द्धनाः ॥ ९८ ॥ युग्मंबभूवतुस्तत्रराजानौरामलक्ष्मणौ ॥ तथाभरतशत्रुघ्नौपायसांशवशात्स्वतः ॥ ९९ ॥ अथलोकेश्वरीलक्ष्मी
र्जनकस्यनिवेशने ॥ शुभक्षेत्रेहलोत्खातेसुनासासुशुभक्षेणा ॥ १०० ॥ बालार्ककोटिसङ्काशारक्तोत्पलकराम्बुजा ॥ सर्वलक्षणसंपन्नासर्वाभरणभूषिता
॥ १ ॥ धृत्वावक्षसिचार्वङ्गीमालामम्लानपङ्कजाम् ॥ सीतामुखेसमुत्पन्नाबालभावेनसुन्दरी ॥ २ ॥ तांदृष्ट्वाजनकोराजाकन्यांवेदमयींशुभाम् ॥
उद्धृत्यापत्यभावेनपुपोषमिथिलापतिः ॥ ३ ॥जनकस्यगृहेरम्येसर्वलोकेश्वरप्रिया ॥ ववृधेसर्वलोकस्यरक्षणार्थंसुरेश्वरी ॥४ ॥ एतस्मिन्नन्तरेदेविकौ
शिकोलोकविश्रुतः ॥ सिद्धाश्रमेमहापुण्येभागीरथ्यास्तटेशुभे ॥ ५ ॥क्रतुप्रवरमारेभेयष्टुंतत्रमहामुनिः ॥ वर्त्तमानस्यतस्यास्ययज्ञस्याथद्विजन्मनः॥
॥ ६ ॥ क्रतुविध्वंसिनोऽभूवन्रावणस्यनिशाचराः ॥ कौशिकश्चिन्तयित्वाथरघुवंशोद्भवंहरिम् ॥ ७ ॥ आनेतुमैच्छद्धर्मात्मालोकानांहितकाम्यया ॥
सगत्वानगरींरम्यामयोध्यांरघुपालिताम् ॥ ८ ॥ नृपश्रेष्ठंदशरथंददर्शमुनिसत्तमः ॥ राजापिकौशिकंदृष्ट्वाप्रत्युत्थायकृताञ्जलिः ॥ ९ ॥ पुत्रैःसहमहा
तेजाववन्देमुनिसत्तमम् ॥ धन्योऽहमस्मीतिवदन्हर्षेणरघुनन्दनः ॥ ११० ॥ अर्चयामासविधिनानिवेश्यपरमासने ॥ परिणीयनमस्कृत्यकिंकरो
मीत्युवाचतम् ॥ ११ ॥ ततःप्रोवाचहृष्टात्माविश्वामित्रोमहातपाः ॥ १२ ॥ विश्वामित्रउवाच ॥ देहिमेराघवंराजन्रक्षणार्थंक्रतोर्मम ॥ साफल्यमस्तु
मेयज्ञेराघवस्यसमीपतः ॥ तस्माद्रामंरक्षणार्थंदातुमर्हसिभूपते ॥ १३ ॥ ईश्वरउवाच ॥ तच्छ्रुत्वामुनिवर्यस्यवाक्यंसर्वविदांवरः ॥ प्रददौमुनिवर्याय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राघवंसहलक्ष्मणम् ॥ १४ ॥ आदायराघवौतत्रविश्वामित्रोमहातपाः ॥ स्वमाश्रममतिप्रीतःप्रययौद्विजसत्तमः ॥ १५ ॥ ततःप्रहृष्टास्त्रिदशाः
प्रयातेरघुसत्तमे ॥ ववृषुःपुष्पवर्षाणितुष्टुवुश्चमहौजसः ॥ १६ ॥ अथाजगामहृष्टात्मावैनतेयोमहाबलः ॥ अदृश्यस्सर्वभूतानांसंप्राप्यरघुसत्तमौ
॥१७॥ ताभ्यांदिव्येचधनुषीतूणौचाक्षयसायकौ ॥ दिव्यान्यस्त्राणिशस्त्राणिदत्त्वाचप्रययौद्विजः ॥१८॥ तौरामलक्ष्मणौवीरौकौशिकेनसहाध्वनि ॥
गच्छन्तौविपिनेघोरेराक्षसींघोरदर्शनाम् ॥ १९ ॥ नाम्नातुताटकांदेविभार्यांसुन्दस्यरक्षसः ॥ जघ्नतुस्तौमहावीरौबाणैर्दिव्यधनुश्च्युतैः ॥ १२० ॥
निहताराघवेणाथराक्षसीघोरदर्शना ॥ त्यक्त्वातनुंघोररूपांदिव्यरूपाबभूवसा ॥ २१ ॥ जाज्वल्यमानावपुषासर्वाभरणभूषिता ॥ प्रययौवैष्णवं
लोकंप्रणम्यचरघूत्तमौ ॥ २२ ॥ तांहत्वाराघवःश्रीमान्कौशिकस्याश्रमंशुभम् ॥ प्रविवेशमहातेजालक्ष्मणेनमहात्मना ॥ २३ ॥ ततःप्रहृष्टामुन
यःप्रत्युद्गम्यरघूत्तमम् ॥ निवेश्यपूजयामासुरर्घाद्यैःपरमासने ॥ २४ ॥ कौशिकःकृतदीक्षस्तुयष्टुंयज्ञमनुत्तमम् ॥ आरेभेमुनिभिःसार्द्धंविधिनामुनि
सत्तमः ॥ २५ ॥ वर्त्तमानेमहायज्ञेमारीचोनामराक्षसः ॥ भ्रात्रासुबाहुनातत्रविघ्नंकर्तुमवस्थितः ॥ २६॥ दृष्ट्वातौराक्षसौघोरौराघवःपरवीरहा ॥ जघा
नैकेनबाणेनसुबाहुंराक्षसेश्वरम् ॥ २७ ॥ पवनास्त्रेणमहतामारीचंतुनिशाचरम् ॥ सागरेपातयामासशुष्कपर्णमिवानिलः ॥ २८ ॥ सरामस्यमहा
वीर्यंदृष्ट्वाराक्षससत्तमः ॥ न्यस्तशस्त्रस्तपस्तप्तुंप्रययौमहदाश्रमम् ॥ २९ ॥ विश्वामित्रोमहातेजाःसमातेमहतिक्रतौ ॥ प्रहृष्टमनसातत्रपूजयामास
राघवम् ॥ १३०॥ समाश्लिष्यमहात्मानंकाकपक्षधरंहरिम् ॥ नीलोत्पलदलश्यामंपद्मपत्रायतेक्षणम् ॥ ३१ ॥उपाघ्रायतदामूर्ध्नितुष्टावमुनिसत्तमः ॥
एतस्मिन्नन्तरेराजामिथिलायाअधीश्वरः ॥ ३२ ॥ वाजपेयंक्रतुंयष्टुमारेभेमुनिसत्तमैः ॥ तंद्रष्टुंप्रययुस्सर्वेविश्वामित्रपुरोगमाः ॥ ३३ ॥ मुनयो
रघुशार्दूलसहिताःपुण्यचेतसः ॥ गच्छतस्तस्यरामस्यपादाब्जेनमहात्मनः॥ ३४ ॥ अभूत्सुरूपावनितासमाक्रान्तामहाशिला ॥ सापिशप्तापुरा
भर्त्रागौतमेनद्विजन्मना॥३५॥अहल्यारघुनाथस्यपादस्पर्शाच्छुभाभवत्॥अथसंप्राप्यनगरींमिथिलांमुनिसत्तमाः॥ ३६ ॥राघवाभ्यांतुसहिताबभूवुः
प्रीतमानसाः ॥ समागतान्महाभागान्दृष्ट्वाराजामहाबलः ॥ ३७ ॥ प्रत्युद्गम्यप्रणम्याथपूजयामासमैथिलः ॥ रामंपद्मविशालाक्षमिन्दीवरदलप्रभम्
॥ ३८ ॥ पीताम्बरधरंश्लक्ष्णंकोमलावयवोज्ज्वलम् ॥ अवधीरितकन्दर्पकोटिलावण्यमुत्तमम् ॥ ३९ ॥ सर्वलक्षणसम्पन्नंसर्वाभरणभूषितम् ॥ स्वस्य
हृत्पङ्कजेध्येयंपरेशस्यतनोर्हरेः ॥१४० ॥ उत्पन्नंदीपवद्दीपात्सौशील्यगुणसागरम् ॥ तंदृष्ट्वारघुनाथंसजनकोहृष्टमानसः ॥ ४१ ॥ परेशमेवतंमेने
रामंदशरथात्मजम् ॥ पूजयामासकाकुत्स्थंधन्योऽस्मीतिब्रुवन्नृपः ॥४२॥ प्रसादंवासुदेवस्यविष्णोर्मेनेनरेश्वरः ॥ प्रदातुंदुहितांतस्मैमनसाचिन्तय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्प्रभुः ॥ ४३॥ आत्मजौरघुवंशस्यज्ञात्वातत्रनृपोत्तमः॥पूजयामासधर्मेणवस्त्रैराभरणैःशुभैः॥४४॥ ऋषीन्समर्चयामासमधुपर्कादिपूजनैः॥ततोऽवसा
नेयज्ञस्यरामोराजीवलोचनः॥४५॥भङ्क्त्वाशैवंधनुर्दिव्यंजितवाञ्जनकात्मजाम्॥अथासौवीर्यशुल्केनमहतापरितोषितः॥४६॥ मुदाधरणिजांतस्मै
प्रददौमिथिलाधिपः॥केशवायश्रियमिवयथापूर्वंमहार्णवः॥ ४७॥सदूतंप्रेषयामासराघवंमिथिलाधिपः ॥ पुत्राभ्यांसहधर्मात्मामिथिलायांविवेशह
॥४८॥वसिष्ठवामदेवाद्यैःप्रीतैःसहमहीपतिः ॥ उवासनगरेरम्येजनकस्यरघूत्तमः॥४९॥तस्मिन्नेवशुभेकालेरामस्यधरणीसुताम् ॥ विवाहमकरोद्राजा
मैथिलेनसमर्चितः ॥ १५० ॥ लक्ष्मणस्योर्मिलांनामकन्यांजनकसंभवाम् ॥ जनकस्यानुजस्याथतनयेशुभवर्चसौ ॥ ५१ ॥ माण्डवीश्रुतकीर्तिश्च
सर्वलक्षणलक्षिते ॥ भरतस्यचसौमित्रेर्विवाहमकरोन्नृपः ॥५२ ॥ निर्वर्त्यौद्वाहिकंतत्रराजादशरथोबली ॥अयोध्यांप्रस्थितःश्रीमान्पौरैर्जानपदैर्वृतः
॥ ५३ ॥ पारिबर्हंसमादायमैथिलेनचपूजितः ॥ ससुतःसस्नुषःसाश्वःसगजःसबलानुगः ॥ ५४ ॥ तदध्वनिमहावीर्योजामदग्न्यःप्रतापवान् ॥
गृहीत्वापरशुंचापंसंक्रुद्धइवकेसरी ॥ ५५ ॥ अभ्यधावच्चकाकुत्स्थंयोद्धुकामोनृपान्तकः ॥ संप्राप्यराघवंदृष्ट्वावचनंप्राहभार्गवः ॥ ५६ ॥ परशुराम
उवाच ॥ रामराममहाबाहोशृणुष्ववचनंमम ॥ बहुशःपार्थिवान्हत्वासंयुगेभूरिविक्रमान् ॥ ५७ ॥ ब्राह्मणेभ्योमहींदत्त्वातपस्तप्तुमहंगतः ॥ तववीर्यबलं
श्रुत्वात्वयायोद्धुमिहागतः॥५८॥इक्ष्वाकवोनवध्यामेमातामहकुलोद्भवाः॥वीर्यंक्षत्रबलंश्रुत्वानशक्यंसहितुंमम॥५९॥ रौद्रंचापंदुराधर्षंभज्यमानंत्वया
नृप ॥ तस्माद्ददान्ययुद्धंमेदीयतांरघुसत्तम ॥१६०॥ इदंतुवैष्णवंचापंतेनतुल्यमरिन्दम ॥ आरोपयस्ववीर्येणनिर्जितोऽस्मित्वयैवहि ॥६१॥ अथवा
त्यजशस्त्राणिपुरस्ताद्बलिनोमम ॥ शरणंभजकाकुत्स्थकातरोऽस्यपिचेदिह ॥ ६२ ॥ ईश्वरउवाच ॥ एवमुक्तस्तुकाकुत्स्थोभार्गवेणप्रतापवान् ॥
तच्चापंतस्यजग्राहतच्छक्तिंवैष्णवीमपि॥६३॥ शक्त्यावियुक्तस्सतदाजामदग्न्यःप्रतापवान्॥निर्वीर्योनष्टतेजाश्चकर्महीनोयथाद्विजः॥६४॥ विनष्टतेज
संदृष्ट्वाभार्गवंनृपसत्तमाः ॥ साधुसाध्वितिकाकुत्स्थंप्रशशंसुर्मुहुर्मुहुः ॥ ६५ ॥ काकुत्स्थस्तन्महच्चापंगृहीत्वारोप्यलीलया ॥ संधायबाणंतच्चापेभा
र्गवंप्राहविस्मितम् ॥ ६६ ॥ रामउवाच ॥ अनेनशरमुख्येणकिंकर्त्तव्यंमयाद्विज ॥ छेद्मिलोकद्वयंचापिस्वर्गंवाहन्मितेद्विज ॥ ६७ ॥ ईश्वर
उवाच ॥ तंदृष्ट्वाघोरसङ्काशंबाणंरामस्यभार्गवः ॥ ज्ञात्वातंपरमात्मानंप्रहृष्टोराममब्रवीत् ॥ ६८ ॥ परशुरामउवाच ॥ रामराममहा
बाहोनवेद्मित्वांसनातनम् ॥ जानाम्यद्यैवकाकुत्स्थतववीर्यगुणादिभिः ॥ ६९ ॥ त्वमादिपुरुषःसाक्षात्परंब्रह्मपरोऽव्ययः ॥ त्वमनन्तोमहाविष्णु
र्वासुदेवःपरात्परः ॥१७०॥ नारायणस्त्वंश्रीशस्त्वमीश्वरस्त्वंत्रयीमयः ॥ त्वंकालस्त्वंजगत्सर्वमकाराख्यस्त्वमेवच ॥ ७१ ॥ स्रष्टाधाताचसंहर्त्तात्वमेव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परमेश्वरः ॥ त्वमचिन्त्योमहद्भूतंविश्वरूपस्त्वणुर्महान् ॥७२॥ चतुःषट्पञ्चगुणवांस्त्वमेवपुरुषोत्तमः ॥ त्वंयज्ञस्त्वंवषट्कारस्त्वमोङ्कारस्त्रयीमयः
॥ ७३ ॥ व्यक्ताव्यक्तस्वरूपस्त्वंगुणभृन्निर्गुणःपरः ॥ स्तोतुंत्वाहमशक्तश्चवेदानामप्यगोचरम् ॥ ७४ ॥ यच्चापमानंकृतवांस्त्वांयुयुत्सु
तयाप्रभो ॥ तत्क्षन्तव्यंत्वयानाथकृपयाकेवलेनतु ॥ ७५ ॥ तवशक्त्यानृपान्सर्वाञ्जित्वादत्त्वामहींद्विजान् ॥ त्वत्प्रसादवशादेवशान्तिमाप्नोमि
नैष्ठिकीम् ॥ ७६ ॥ ईश्वरउवाच ॥ एवमुक्त्वातुकाकुत्स्थंजामदग्न्योमहातपाः ॥ परिणीयनमस्कृत्याराघवंलोकरक्षकम् ॥ ७७ ॥ शतक्रतु
कृतंस्वर्गंतदस्त्रायन्यवेदयत् ॥ राघवोऽथमहातेजाववन्देतंमहामुनिम् ॥ ७८ ॥ विधिवत्पूजयामासपाद्यार्घ्याचमनादिभिः ॥ तेनसंपूजित
स्तत्रजामदग्न्योमहातपाः ॥ ७९ ॥ तपस्तप्तुंययौरम्यंनरनारायणाश्रमम् ॥ राजादशरथःसोऽथपुत्रैर्दारसमन्वितैः ॥ १८० ॥ स्वांपुरीं
सुमुहूर्त्तेनप्रविवेशमहाबलः ॥ राघवोलक्ष्मणश्चैवशत्रुघ्नोभरतस्तथा ॥ ८१ ॥ स्वान्स्वान्दारानुपागम्यरेमिरेहृष्टमानसाः ॥ तत्रद्वादशवर्षाणि
सीतयासहराघवः ॥८२॥ रमयामासधर्मात्मानारायणइवश्रिया ॥ तस्मिन्नेवतुराजाथकालेदशरथःसुतम् ॥८३॥ ज्येष्ठंराज्येनसंयोक्तुमैच्छत्प्रीत्यामही
पतिः ॥ तस्यभार्याथकैकेयीपुरादत्तवराप्रिया ॥ ८४ ॥ अयाचतनृपश्रेष्ठंभरतस्याभिषेचनम् ॥ विवासनंचरामस्यवत्सराणिचतुर्दश ॥ ८५ ॥
सराजासत्यवचनाद्रामंराज्यादहोसुतम् ॥ विवासयामासतदादुःखेनहतचेतनः ॥८६॥ शक्तोऽपिराघवस्तस्मिन्राज्यंसंत्यज्यधर्मतः ॥ दशग्रीववधार्थाय
पितुर्वचनहेतुना ॥ ८७ ॥ वनंजगामकाकुत्स्थोलक्ष्मणेनचसीतया ॥ राजापुत्रवियोगार्त्तःशोकेनचममारसः ॥ ८८ ॥ नियुज्यमानोभरतस्तस्मिन्रा
ज्येसमन्त्रिभिः ॥ नैच्छद्राज्यंसधर्मात्मासौभ्रात्रमनुदर्शयन् ॥ ८९ ॥ वनमागम्यकाकुत्स्थमयाचद्भ्रातरंततः ॥ रामस्तुपितुरादेशान्नैच्छद्राज्यमरि
न्दमः ॥ १९० ॥ स्वपादुकेददौतस्मैभक्त्यासोऽप्यग्रहीत्तथा ॥ रामस्यपादुकेराज्यमवाप्यभरतःशुभे ॥ ९१ ॥ प्रत्यहंगन्धपुष्पैश्चपूजयन्कैकयीसुतः ॥
तपश्चरणयुक्तेनतस्मिंस्तस्थौनृपोत्तमः ॥ ९२ ॥ यावदागमनंतस्यराघवस्यमहात्मनः ॥ तावद्व्रतपराःसर्वेबभूवुःपुरवासिनः ॥ ९३ ॥ राघवश्चित्रकूटा
द्रौभरद्वाजाश्रमेशुभे ॥ रमयामासवैदेह्यामन्दाकिन्याजलेशुभे ॥ ९४ ॥ कदाचिदङ्केवैदेह्याःशेतेरामोमहामनाः ॥ ऐन्द्रिःकाकस्समागम्यतस्मिन्नेव
चचारह ॥ ९५ ॥ सदृष्ट्वाजानकींतत्रकन्दर्पशरपीडितः ॥ विददारनखैस्तीक्ष्णैःपीनोन्नतपयोधरम् ॥ ९६ ॥ तंदृष्ट्वावायसंरामःकुशंजग्राहपाणिना ॥
ब्रह्मणोऽस्त्रेणसंयोज्यचिक्षेपधरणीधरः ॥ ९७ ॥ तत्तृणंघोरसङ्काशंज्वालारचितविग्रहम् ॥ दृष्ट्वाकाकःप्रदुद्रावविमुञ्चन्कातरंस्वरम् ॥ ९८ ॥ तंकाकं
प्रत्यनुययौरामस्यास्त्रंसुदारुणम् ॥ वायसस्त्रिषुलोकेषुबभ्रामभयपीडितः ॥९९॥ यत्रयत्रययौकाकःशरणार्थीसवायसः ॥ तत्रतत्रतदस्त्रंतुप्रविवेशभयाव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हम् ॥ २०० ॥ ब्रह्माणमिन्द्रंरुद्रंचयमंवरुणमेवच ॥ शरणार्थीजगामाशुवायसःशस्त्रपीडितः ॥ १॥ तंदृष्ट्वावायसंसर्वेरुद्राद्यादेवदानवाः ॥ नशक्ताः स्मोवयंत्रातुमितिप्राहुर्मनीषिणः ॥ अथप्रोवाचभगवान्ब्रह्मात्रिभुवनेश्वरः ॥ २ ॥ ब्रह्मोवाच ॥ भोभोबलिभुजांश्रेष्ठतमेवशरणंव्रज ॥ सएवरक्षकः श्रीमान्सर्वेषांकरुणानिधिः ॥ ३ ॥ रक्षत्येवक्षमासारोवत्सलश्शरणागतान् ॥ ईश्वरःसर्वभूतानांसौशील्यादिगुणान्वितः ॥ ४ ॥ रक्षिताजीवलोकस्य पितामातासखासुहृत् ॥ शरणंव्रजदेवेशंनान्यत्रशरणंद्विज ॥ ५ ॥ महादेवउवाच ॥ इत्युक्तस्तेनबलिभुग्ब्रह्मणारघुनन्दनम् ॥ उपेत्यसहसाभूमौनिप पातभयातुरः ॥ ६ ॥ प्राणसंशयमापन्नंदृष्ट्वासीताथवायसम् ॥ त्राहित्राहीतिभर्तारमुवाचविनयाद्विभुम् ॥ ७ ॥ पुरतःपतितंदेवीधरण्यांवायसंतदा॥ तच्छिरःपादयोस्तस्ययोजयामासजानकी ॥ ८ ॥ समुत्थाप्यकरेणाथकृपापीयूषसागरः ॥ ररक्षरामोगुणवान्वायसंदययार्दितः ॥ ९ ॥ तमा हवायसंरामोमाभैरितिदयानिधिः ॥ अभयंतेप्रदास्यामिगच्छगच्छयथासुखम् ॥ २१० ॥ प्रणम्यराघवायाथसीतायैचमुहुर्मुहुः ॥ स्वर्ल्लोकंप्रययावाशुराघवेणचरक्षितः ॥ ११ ॥ ततोरामस्तुवैदेह्यालक्ष्मणेनचधीमता ॥ उवासचित्रकूटाद्रौस्तूयमानोमहर्षिभिः ॥ १२ ॥ तस्मिन्संपूज्यमानस्तुभर द्वाजेनराघवः ॥ जगमात्रेस्सुविपुलमाश्रमंरघुसत्तमः ॥ १३ ॥ समागतंरघुवरंदृष्ट्वामुनिवरोत्तमः ॥ भार्ययासहधर्मात्माप्रत्युद्गम्यमुदायुतः ॥ १४ ॥ आसनेसुशुभेमुख्येनिवेश्यसहसीतया ॥ अर्घ्यंपाद्यंतथाचामंवस्त्राणिविविधानिच ॥ १५ ॥ मधुपर्कंददौप्रीत्याभूषणंचानुलेपनम् ॥ तस्यपत्न्य नसूयातुदिव्याम्बरमनुत्तमम् ॥ १६ ॥ सीतायैप्रददौप्रीत्याभूषणानिद्युमन्तिच ॥ दिव्यान्नपानभक्ष्याद्यैर्भोजयामासराघवम् ॥ १७ ॥ तेनसंपूजित स्तत्रभक्त्यापरमयानृपः ॥ उवासदिवसंतत्रप्रीत्यारामस्सलक्ष्मणः ॥ १८ ॥ प्रभातेविमलेरामःसमुत्थायमहामुनिम् ॥ परिणीयप्रणम्याथगमना योपचक्रमे ॥ १९ ॥ अनुज्ञातस्ततस्तेनरामोराजीवलोचनः ॥ प्रययौदण्डकारण्यंमहर्षिकुलसङ्कुलम् ॥ २२० ॥ तत्रातिभीषणंघोरंविराधंनाम राक्षसम् ॥ हत्वाथशरभङ्गस्यप्रविवेशाश्रमंशुभम् ॥ २१ ॥ सतुदृष्ट्वाथकाकुत्स्थंसद्यःसंक्षीणकल्मषः ॥ प्रययौब्रह्मलोकंतुगन्धर्वाप्सरसान्वितम् ॥ २२ ॥ सुतीक्ष्णस्याप्यगस्त्यस्यह्यगस्त्यभ्रातुरेवच ॥ क्रमेणप्रययौरामस्तैश्चसंपूजितस्तथा ॥ २३ ॥पञ्चवट्यांततोरामोगोदावर्यास्तटेशुभे ॥उवास सुचिरंकालंसुखेनपरमेणच ॥ २४ ॥ तत्रगत्वामुनिश्रेष्ठास्तापसाधर्मचारिणः ॥ पूजयामासुरात्मेशंरामंराजीवलोचनम् ॥ २५ ॥ भयंविज्ञापया मासुस्तस्यरक्षोगणोत्थितम् ॥ तानाश्वास्यतुकाकुत्स्थोददौचाभयदक्षिणाम् ॥ २६ ॥ तेतुसंपूजितास्तेनस्वाश्रमान्संप्रपेदिरे ॥ तस्मिंस्त्रयोदशाब्दा निरामस्यपरिनिर्ययुः ॥ २७ ॥ गोदावर्यास्तटेरम्येपञ्चवट्यांमनोरमे ॥ कस्यचित्त्वथकालस्यराक्षसीघोररूपिणी ॥ २८॥रावणस्यस्वसातत्रप्रविवेश

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुरासदा ॥ सातुदृष्ट्वारघुवरंकोटिकन्दर्पसन्निभम् ॥ २९ ॥ इन्दीवरदलश्यामंपद्मपत्रायतेक्षणम् ॥ प्रोन्नतांसंमहाबाहुंकम्बुग्रीवंमहाहनुम् ॥ २३० ॥
संपूर्णचन्द्रसदृशसस्मिताननपङ्कजम् ॥ भृङ्गावलिनिभैःस्निग्धैःकुटिलैःशीर्षजैर्वृतम् ॥ ३१ ॥ रक्तारविन्दसदृशपद्महस्ततलाङ्कितम् ॥ निष्कलङ्केन्दु
सदृशनखपङ्क्तिविराजितम् ॥ ३२ ॥ स्निग्धकोमलदूर्वाभंसौकुमार्यनिधिंशुभम् ॥ पीतकौशेयवसनंसर्वाभरणभूषितम् ॥ ३३ ॥ युवाकुमारवयसं
जगन्मोहनविग्रहम्॥दृष्ट्वातंराक्षसीरामंकन्दर्पशरपीडिता ॥ अब्रवीत्समुपेत्याथरामंकमललोचनम् ॥ ३४ ॥ राक्षस्युवाच ॥ कस्त्वंतापसवेषेणवर्त्तसे
दण्डकावने ॥ आगतोऽसिकिमर्थंचराक्षसानांदुरासदे ॥ शीघ्रमाचक्ष्वतत्त्वेननानृतंवक्तुमर्हसि ॥३५॥ महेश्वरउवाच॥ इत्युक्तःसतदारामःसंप्रहस्या
ब्रवीद्वचः ॥ ३६ ॥ रामउवाच ॥ राज्ञोदशरथस्याहंपुत्रोरामइतीरितः ॥ असौममानुजोधन्वीलक्ष्मणोनामचानघः ॥ ३७ ॥ पत्नीचेयंचमेसीता
जनकस्यात्मजाप्रिया ॥ पितुर्वचननिर्देशादहंवनमिहागतः ॥ ३८ ॥ विचरामोमहारण्यमृषीणांहितकाम्यया ॥ आगतासिकिमर्थंत्वमाश्रमंमम
सुन्दरि ॥ कात्वंकस्यकुलेजातासर्वंसत्यंवदस्वमे ॥ ३९ ॥ महेश्वरउवाच ॥ इत्युक्तासातुरामेणप्राहवाक्यमशङ्किता ॥ २४० ॥ राक्षस्युवाच ॥
अहंविश्रवसःपुत्रीरावणस्यस्वसानृप ॥ नाम्नाशूर्पणखानामत्रिषुलोकेषुविश्रुता ॥ ४१ ॥ इदंचदण्डकारण्यंभ्रात्रादत्तंममप्रभो ॥ भक्षयन्त्यृषिसङ्घा
न्वैविचरामिमहावने ॥ ४२ ॥ त्वांतुदृष्ट्वामुनिवरंकन्दर्पशरपीडिता ॥ रन्तुकामात्वयासार्धमागतास्मिसुनिर्भया ॥ ४३ ॥ ममत्वंनृपशार्दूलभर्ता
भवितुमर्हसि ॥ इमांतवसतींसीतांभक्षयिष्यामिपार्थिव॥४४॥वनेषुगिरिमुख्येषुविचारामित्वयासह ॥ ४५॥ महेश्वरउवाच ॥ इत्युक्त्वाराक्षसींसीतां
ग्रसितुंवीक्ष्यचोद्यताम् ॥ श्रीरामःखड्गमुद्यम्यनासाकर्णौप्रचिच्छिदे ॥ ४६ ॥ रुदन्तीसभयंशीघ्रंराक्षसीविकृतानना ॥ खरालयंप्रविश्याहतस्य
रामस्यचेष्टितम् ॥ ४७ ॥ सतुराक्षससाहस्रैर्दूषणत्रिशिरोवृतः ॥ आजगामभृशंयोद्धुंराघवंशत्रुसूदनम् ॥ ४८॥ तान्रामःकाननेघोरेबाणैःकालान्त
कोपमैः ॥ निजघानमहाकायान्राक्षसांस्तत्रलीलया ॥ ४९ ॥ खरंत्रिशिरसंचैवदूषणंतुमहाबलम् ॥ रणेनिपातयामासबाणैराशीविषोपमैः॥
॥ २५० ॥ निहत्यराक्षसान्सर्वान्दण्डकारण्यवासिनः ॥ पूजितःसुरसङ्घैश्चस्तूयमानोमहर्षिभिः॥ ५१ ॥ उवासदण्डकारण्येसीतयालक्ष्मणेनच ॥
राक्षसानांवधंश्रुत्वारावणःक्रोधमूर्च्छितः ॥ ५२ ॥ आजगामजनस्थानंमारीचेनदुरात्मना ॥ संप्राप्यपञ्चवट्यांतुदशग्रीवःसराक्षसः ॥
॥ ५३ ॥ मायाविनामारीचेनमृगरूपेणराक्षसः ॥ अपहृत्याश्रमाद्दूरेतौतुदशरथात्मजौ ॥ ५४ ॥ जहारसीतांरामस्यभार्यांस्ववधका
ङ्क्षया ॥ ह्रियमाणांतुतांदृष्ट्वाजटायुर्गृध्रराड्बली ॥५५॥ रामस्यसौहृदात्तत्रयुयुधेतेनरक्षसा ॥ तंहत्वाबाहुवीर्येणरावणःशत्रुवारणः ॥५६॥ प्रविवेश

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुरींलङ्कांराक्षसैर्बहुभिर्वृताम् ॥ अशोकवनिकामध्येनिक्षिप्यजनकात्मजाम् ॥ ५७ ॥ निधनंरामबाणेनकाङ्क्षन्स्वगृहमाविशत् ॥ रामस्तुराक्षसंहत्वा
मारीचंमृगरूपिणम् ॥५८॥ पुनराविश्यतत्राथभ्रात्रासौमित्रिणाततः ॥ राक्षसापहृतांभार्यांज्ञात्वादशरथात्मजः ॥ ५९ ॥ प्रभूतशोकसंतप्तोविललापमहा
मतिः ॥ मार्गमाणोवनेसीतांपथिगृध्रंमहाबलम् ॥२६०॥ विच्छिन्नपादपक्षंचपतितंधरणीतले ॥ रुधिरापूर्णसर्वाङ्गंदृष्ट्वाविस्मयमागतः ॥६१॥ पप्रच्छ
राघवःश्रीमान्केनकिंत्वंजिघांसितः ॥ गृध्रस्तुराघवंदृष्ट्वामन्दम्मन्दमुवाचह ॥ ६२ ॥ गृध्रउवाच ॥ रावणेनहृतारामतवभार्याबलीयसा ॥ तेनराक्षसमु
ख्येनसङ्ग्रामेनिहतोऽस्म्यहम् ॥६३॥ महेश्वरउवाच ॥ इत्युक्त्वाराघवस्याग्रेसोऽभवत्त्यक्तजीवितः ॥ संस्कारमकरोद्रामस्तस्यब्रह्मविधानतः॥६४॥स्व
पदंचददौतस्मैयोगिगम्यंसनातनम् ॥ राघवस्यप्रसादेनसगृध्रःपरमंपदम् ॥ ६५ ॥ हरेःसामान्यरूपेणमुक्तिंप्रापखगोत्तमः ॥ माल्यवन्तंततोगत्वामत
ङ्गस्याश्रमेशुभे ॥ ६६ ॥ अभ्यगच्छन्महाभागांशबरींधर्मचारिणीम् ॥ सातुभागवतश्रेष्ठादृष्ट्वातौरामलक्ष्मणौ ॥ ६७ ॥ प्रत्युद्गम्यनमस्कृत्यनिवेश्य
कुशविष्टरे ॥ पादप्रक्षालनंकृत्वावन्यैःपुष्पैःसुगन्धिभिः ॥ ६८॥ अर्चयामासभक्त्यावैहर्षनिर्भरमानसा ॥ फलानिचसुगन्धीनिमूलानिमधुराणिच ॥
॥६९॥ निवेदयामासतदाराघवाभ्यांदृढव्रता ॥ फलान्यास्वाद्यकाकुत्स्थस्तस्यैमुक्तिंददौपराम् ॥ २७० ॥ ततःक्रौञ्चवटींगत्वाराघवःशत्रुसूदनः ॥
जघानराक्षसंतत्रकबन्धंघोररूपिणम् ॥ ७१ ॥ तंनिहत्यमहावीर्योददाहस्वर्गतश्चसः ॥ ततोगोदावरींगत्वारामोराजीवलोचनः ॥ ७२ ॥ पप्रच्छसीतां
गङ्गेत्वंकिंतांजानासिमेप्रियाम् ॥ नशशंसतदातस्मैसागङ्गातमसावृता ॥ ७३ ॥ शशापराघवःक्रोधाद्रक्ततोयाभवेतिताम् ॥ ततोभयात्समुद्विग्ना
पुरस्कृत्यमहामुनीन् ॥ ७४ ॥ कृताञ्जलिपुटादीनाराघवंशरणंगता ॥ ततोमहर्षयस्सर्वेरामंप्राहुस्सनातनम् ॥ ७५ ॥ ऋषयऊचुः ॥ त्वत्पादकमलो
द्भूतागङ्गात्रैलोक्यपावनी ॥ त्वमेवहिजगन्नाथतांशापान्मोक्तुमर्हसि ॥ ७६ ॥ महेश्वरउवाच ॥ ततःप्रोवाचधर्मात्मारामःशरणवत्सलः ॥ ७७ ॥
रामउवाच ॥ शबर्याःस्नानमात्रेणसंगताशुभवारिणा ॥ मुक्ताभवतुमच्छापाद्गङ्गेयंपापनाशिनी ॥ ७८ ॥ एवमुक्त्वातुकाकुत्स्थःशबरीतीर्थमुत्त
मम् ॥ गङ्गयासङ्गतंचक्रेशार्ङ्गकोद्यामहाबलः ॥ ७९ ॥ महाभागवतानांचतीर्थंयस्योदरेऽभवत् ॥ तच्छरीरंजगद्वन्द्यंभविष्यतिनसंशयः ॥ २८० ॥
एवमुक्त्वातुकाकुत्स्थऋष्यमूकंगिरिंययौ ॥ ततःपम्पासरस्तीरेवानरेणहनूमता ॥ ८१ ॥ संगतस्तस्यवचनात्सुग्रीवेणसमागतः ॥ सुग्रीववचनाद्ध
त्वावालिनंवानरेश्वरम् ॥ ८२ ॥ सुग्रीवमेवतद्राज्येरामोऽसावभ्यषेचयत् ॥ सतुसंप्रेषयामासदिदृक्षुर्जनकात्मजाम् ॥ ८३ ॥ हनुमत्प्रमुखान्वीरान्वा
नरान्वानराधिपः ॥ सलङ्घयित्वाजलधिंहनूमान्मारुतात्मजः ॥ ८४ ॥ प्रविश्यनगरींलङ्कांदृष्ट्वासीतांदृढव्रताम् ॥ उपवासकृशांदीनांभृशंशोकपरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यणाम् ॥ ८५ ॥ मलपङ्केनदिग्धाङ्गींमलिनाम्बरधारिणीम् ॥ निवेदयित्वाभिज्ञानंप्रवृत्तिंचनिवेद्यताम् ॥ ८६ ॥ सप्तमन्त्रिसुतांस्तत्ररावणस्यसुतं
तथा ॥ तोरणस्तम्भमुत्पाट्यनिजघानस्वयंकपिः ॥ ८७ ॥ समाश्वास्यचवैदेहींबभञ्जोपवनंतदा ॥ वनपालान्किङ्करांश्चपञ्चसेनाग्रनायकान् ॥
॥८८॥ रावणस्यसुतेनाथनिगृहीतोऽयदृच्छया ॥ दृष्ट्वाचराक्षसेन्द्रंतुसंभाष्यतुतथैवच ॥ ८९ ॥ ददाहनगरींलङ्कांस्वलाङ्गूलाग्निनाकपिः ॥ तयादत्तम
भिज्ञानंगृहीत्वापुनरागमत् ॥९०॥ सोऽभिगम्यमहातेजारामंकमललोचनम् ॥ न्यवेदयद्वानरेन्द्रोदृष्टासीतेतितत्त्वतः ॥९१॥ सुग्रीवसहितोरामोवानरै
र्बहुभिर्वृतः ॥ महोदधेस्तटंगत्वातत्रानीकंन्यवेशयत् ॥ ९२ ॥ रावणस्यानुजोभ्राताविभीषणइतीरितः ॥ धर्मात्मासत्यसन्धश्चमहाभागवतोत्तमः ॥
॥ ९३ ॥ ज्ञात्वासमागतंरामंपरित्यज्यस्वपूर्वजम् ॥ राज्यंसुतांश्चदारांश्चराघवंशरणंययौ ॥ ९४ ॥ परिगृह्यचतंरामोमारुतेर्वचनात्प्रभुः ॥ तस्मै
दत्त्वाऽभयंसौम्यंरक्षोराज्येऽभ्यषेचयत् ॥ ९५ ॥ ततस्समुद्रंकाकुत्स्थस्तर्तुकामःप्रपद्यवै ॥ सुप्रसन्नजलंतंतुदृष्ट्वारामोमहाबलः ॥ ९६ ॥ शार्ङ्गमादाय
बाणौघैःशोषयामासवारिधिम् ॥ ततस्तुसरितामीशःकाकुत्स्थंकरुणानिधिम् ॥ ९७ ॥ प्रपद्यशरणंदेवमर्चयामासवारिधिः ॥ पुनरापूर्यजलधिंवरु
णास्त्रेणराघवः ॥ ९८ ॥ उदधेर्वचनात्सेतुंसागरेमकरालये ॥ गिरिभिर्वानरानीतैर्नलंसेतुमकारयत् ॥ ९९ ॥ ततोगत्वापुरींलङ्कांसन्निवेश्यमहाबलम् ॥
सम्यगायोधनंचक्रेवानराणांचरक्षसाम् ॥ ३०० ॥ ततोदशास्यतनयःशक्रजिद्राक्षसोबली ॥ बबन्धनागपाशैश्चतावुभौरामलक्ष्मणौ ॥ १ ॥ वैन
तेयःसमागत्यतान्यस्त्राणिप्रमोचयत् ॥ राक्षसानिहतास्सर्वेवानरैश्चमहाबलैः ॥ २ ॥ रावणस्यानुजंवीरंकुम्भकर्णंमहाबलम् ॥ निजघानरणेरामो
बाणैरग्निशिखोपमैः ॥ ३ ॥ ब्रह्मास्त्रेणेन्द्रजित्क्रुद्धःपातयामासवानरान् ॥ हनूमतासमानीतोमहौषधिमहीधरः ॥ ४ ॥ तस्यानीतस्यचस्पर्शात्सर्वेएव
समुत्थिताः ॥ ततोरामानुजोवीरःशक्रजेतारमाहवे ॥ ५ ॥ निपातयामासशरैर्वृत्रंवज्रधरोयथा ॥ निर्ययावथपौलस्त्योयोद्धुंरामेणसंयुगे ॥ ६ ॥
चतुरङ्गबलैःसार्धंमन्त्रिभिश्चमहाबलः ॥ समन्ततोऽभवद्युद्धंवानराणांचरक्षसाम् ॥ ७॥ रामरावणयोश्चैवतथासौमित्रिणासह ॥ शक्त्यानिपातयामा
सलक्ष्मणंराक्षसेश्वरः ॥ ८ ॥ ततःक्रुद्धोमहातेजाराघवोराक्षसान्तकः ॥ जघानराक्षसान्वीरान्शरैःकालान्तकोपमैः ॥ ९ ॥ प्रदीप्तैर्बाणसाहस्रैःकाल
दण्डोपमैर्भृशम् ॥ छादयामासकाकुत्स्थोदशग्रीवंचराक्षसम् ॥३१०॥ सतुनिर्भिन्नसर्वाङ्गोराघवास्त्रैर्निशाचरः ॥ भयात्प्रदुद्रावरणाल्लङ्कांप्रतिनिशा
चरः ॥ ११ ॥ जगद्राममयंपश्यन्निर्वेदाद्गृहमाविशत् ॥ ततोहनूमतानीतोमहौषधिमहागिरिः ॥ १२ ॥ तेनरामानुजस्तूर्णंलब्धसंज्ञोऽभव
त्तदा ॥ दशग्रीवस्ततोहोममारेभेजयकाङ्क्षया ॥ १३ ॥ ध्वंसितंवानरेन्द्रैस्तदभिचारात्मकंरिपोः ॥ पुनर्युद्धायपौलस्त्योरामेणसह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निर्ययौ ॥ १४ ॥ दिव्यंस्यन्दनमारुह्यराक्षसैर्बहुभिर्युतः ॥ ततःशतमखोदिव्यंरथंहर्यश्वसंयुतम् ॥ १५ ॥ राघवायससूतंहिप्रेषयामासबुद्धिमान् ॥
रथंमातलिनानीतंसमारुह्यरघूत्तमः ॥ १६ ॥ स्तूयमानःसुरगणैर्युयुधेतेनरक्षसा ॥ ततोयुद्धमभूद्घोरंरामरावणयोर्महत् ॥ १७ ॥ सप्ताहिकमहोरात्रं
शस्त्रास्त्रैरतिभीषणम् ॥ विमानस्थाःसुरास्सर्वेददृशुस्तत्रसंयुगम् ॥ १८ ॥ दशग्रीवस्यचिच्छेदशिरांसिरघुसत्तमः ॥ समुत्थितानिबहुशोवरदानात्क
पर्दिनः ॥ १९ ॥ ब्राह्ममस्त्रंमहारौद्रंवधायास्यदुरात्मनः ॥ ससर्जराघवस्तूर्णंकालाग्निसदृशप्रभम् ॥ ३२० ॥ तदस्त्रंराघवोत्सृष्टंरावणस्यस्तनान्तरम् ॥
विदार्यधरणींभित्त्वारसातलतलेगतम् ॥ २१ ॥ संपूज्यमानंभुजगैराघवस्यकरंययौ ॥ सगतासुर्महादैत्यःपपातचममारच ॥ २२ ॥ ततो
देवगणास्सर्वेहर्षनिर्भरमानसाः ॥ ववृषुःपुष्पवर्षाणिमहात्मनिजगद्गुरौ ॥ २३ ॥ जगुर्गन्धर्वपतयोननृतुश्चाप्सरोगणाः ॥ ववुःपुण्यास्तथा
वाताःसुप्रभोऽभूद्दिवाकरः ॥ २४ ॥ तुष्टुवुर्मुनयःसिद्धादेवगन्धर्वकिन्नराः ॥ लङ्कायांराक्षसश्रेष्ठमभिषिच्यविभीषणम् ॥ २५ ॥ कृतकृत्यमि
वात्मानंमेनेरघुकुलोत्तमः ॥ रामस्तत्राब्रवीद्वाक्यमभिषिच्यविभीषणम् ॥ २६ ॥ रामउवाच ॥ यावच्चन्द्रश्चसूर्यश्चयावत्तिष्ठतिमेदिनी ॥ यावन्ममकथालोके
तावद्राज्यंविभीषणे ॥ २७ ॥ गत्वाममपदंदिव्यंयोगिगम्यंसनातनम् ॥ सपुत्रपौत्रःसगणःसंप्राप्नुहिमहाबल ॥ २८ ॥ ईश्वरउवाच ॥ एवंदत्त्वावरं
तस्मैराक्षसायमहाबलः ॥ संप्राप्यमैथिलींतत्रपरुषंजनसंसदि ॥ २९ ॥ उवाचराघवःसीतांगर्हितंवचनंबहु ॥ सातेनगर्हितासाध्वीविवेशचानलंमहत्
॥ ३३० ॥ ततोदेवगणास्सर्वेशिवब्रह्मपुरोगमाः ॥ दृष्ट्वातुमातरंवह्नौप्रविशन्तींभयातुराः ॥ समागम्यरघुश्रेष्ठंसर्वेप्राञ्जलयोऽब्रुवन् ॥ ३१ ॥ देवाऊ
चुः ॥ रामराममहाबाहोशृणुत्वंचातिविक्रम ॥ सीतातिविमलासाध्वीतवनित्यानपायिनी ॥ ३२ ॥ अनन्याहित्वयासातुभास्करेणप्रभायथा ॥ सेयं
लोकहितार्थायसमुत्पन्नामहीतले ॥ ३३ ॥ मातासर्वस्यजगतःसमस्तजगदाश्रया ॥ रावणःकुम्भकर्णश्चभृत्यौपूर्वपरायणौ ॥ ३४ ॥ शापात्तौसनका
दीनांसमुत्पन्नौमहीतले ॥ तयोर्विमुक्त्यैवैदेहीगृहीतादण्डकेवने ॥ ३५ ॥ तावुभौवैवधंप्राप्तौत्वयाराक्षसपुङ्गवौ ॥ तौविमुक्तौदिवंयातौपुत्रपौत्रसहा
नुगौ ॥ ३६ ॥ त्वंविष्णुस्त्वंपरंब्रह्मयोगिध्येयःसनातनः ॥ त्वमेवसर्वदेवानामनादिनिधनोऽव्ययः ॥ ३७ ॥ त्वंहिनारायणःश्रीमान्सीतालक्ष्मीः
सनातनी ॥ मातासासर्वलोकानांपितात्वंपरमेश्वर ॥ ३८ ॥ नित्यैवैषाजगन्मातातवनित्यानपायिनी ॥ यथासर्वगतस्त्वंहितथाचेयंरघूत्तम ॥ ३९ ॥
तस्माच्छुद्धसमाचारांसीतांसाध्वींदृढव्रताम् ॥ गृहाणसौम्यकाकुत्स्थक्षीराब्धेरिवमाचिरम् ॥ ३४० ॥ ईश्वरउवाच ॥ एतस्मिन्नन्तरेतत्रलोकसाक्षीसपा
वकः ॥ आदायसीतांरामायप्रददौसुरसन्निधौ ॥ अब्रवीत्तत्रकाकुत्स्थंवह्निःसर्वशरीरगः ॥ ४१ ॥ वह्निरुवाच ॥ इयंशुद्धसमाचारासीतानिष्कलमषा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विभो ॥ गृहाणमाचिरंरामसत्यंसत्यंतवाब्रवम् ॥ ४२ ॥ ईश्वरउवाच ॥ ततोऽग्निवचनात्सीतांपरिगृह्यरघूद्वहः ॥ बभूवरामःसंहृष्टःपूज्यमानःसुरोत्तमैः
॥४३॥ राक्षसैर्निहतायेतुसङ्ग्रामेवानरोत्तमाः ॥ पितामहवरात्तूर्णंजीवमानाःसमुत्थिताः ॥ ४४ ॥ ततस्तुपुष्पकंनामविमानंसूर्यसन्निभम् ॥ भ्रात्रागृही
तंसङ्ग्रामेकौबेरंराक्षसेश्वरः ॥ ४५ ॥ तद्राघवायप्रददौवस्त्राण्याभरणानिच ॥ तेनसंपूजितःश्रीमान्रामचन्द्रःप्रतापवान् ॥ ४६ ॥ आरुरोहविमाना
ग्र्यंवैदेह्याभार्ययासह ॥ लक्ष्मणेनचशूरेणभ्रात्रादशरथात्मजः ॥ ४७ ॥ ऋक्षवानरसङ्घातैःसुग्रीवेणमहात्मना ॥ विभीषणेनशूरेणराक्षसैश्चमहाबलैः
॥ ४८ ॥ यथाविमानेवैकुण्ठेनित्यमुक्तैर्महात्मभिः ॥ तथासर्वैःसमारुह्यऋक्षवानरराक्षसैः ॥ ४९ ॥ अयोध्यांप्रस्थितोरामःस्तूयमानःसुरोत्तमैः ॥ भर
द्वाजाश्रमंगत्वारामःसत्यपराक्रमः ॥ ३५० ॥ भरतस्यान्तिकेतत्रहनूमन्तंव्यसर्जयत् ॥ सनिषादालयंगत्वागुहंदृष्ट्वाथवैष्णवम् ॥ ५१ ॥ राघवागमनं
तस्मैप्राहवानरपुङ्गवः ॥ नन्दिग्रामंततोगत्वादृष्ट्वातंराघवानुजम् ॥ ५२ ॥ न्यवेदयत्तथातस्मैरामस्यागमनोत्सवम् ॥ भरतश्चागतंश्रुत्वावानरेणरघूत्त
मम् ॥५३॥ प्रहर्षमतुलंलेभेसानुजःससुहृज्जनः ॥ पुनरागत्यकाकुत्स्थंहनूमान्मारुतात्मजः ॥५४॥ सर्वंशशंसरामायभरतस्यचवर्तनम् ॥ राघवस्तु
विमानाग्र्यादवरुह्यसहानुजः ॥ ५५ ॥ ववन्देभार्ययासार्द्धंभरद्वाजंतपोनिधिम् ॥ सतुसंपूजयामासकाकुत्स्थंसानुजंमुनिः ॥ ५६ ॥ पक्वान्नैःफलमूला
द्यैर्वस्त्रैराभरणैरपि ॥ तेनसंपूजितस्तत्रप्रणम्यमुनिसत्तमम् ॥ ५७ ॥ अनुज्ञातःसमारुह्यपुष्पकंसानुगस्तदा ॥ नन्दिग्रामंययौरामःपुष्पकेणसुहृद्वृतः
॥५८॥ मन्त्रिभिःपौरमुख्यैश्चसानुजःकेकयीसुतः ॥ प्रत्युद्ययौनृपवरैःसबलैःपूर्वजंमुदा ॥५९॥ संप्राप्यरघुशार्दूलंववन्देसोऽनुगैर्वृतः ॥ पुष्पकादवरुह्या
थराघवःशत्रुतापनः ॥ ३६० ॥ भरतंचैवशत्रुघ्नमुपसंपरिषस्वजे ॥ पुरोहितंवसिष्ठंचमातृवृद्धांश्चबान्धवान् ॥ ६१ ॥ प्रणनाममहातेजाःसीतया
लक्ष्मणेनच ॥ विभीषणंचसुग्रीवंजाम्बवन्तंतथाङ्गदम् ॥ ६२ ॥ हनुमन्तंसुषेणंचभरतःपरिषस्वजे ॥ भ्रातृभिःसानुगैस्तत्रमङ्गलस्नानपूर्वकम् ॥
॥ ६३ ॥ दिव्यमाल्याम्बरधरोदिव्यगन्धानुलेपनः ॥ आरुरोहरथंदिव्यंसुमन्त्राधिष्ठितंशुभम् ॥६४॥ संस्तूयमानस्त्रिदशैर्वैदेह्यालक्ष्मणेनच ॥ भरत
श्चैवसुग्रीवःशत्रुघ्नश्चविभीषणः ॥ ६५ ॥ अङ्गदश्चसुषेणश्चजाम्बवान्मारुतात्मजः ॥ नीलोनलश्चसुभगःशरभोगन्धमादनः ॥ ६६ ॥
अन्येचकपयःशूरानिषादाधिपतिर्गुहः ॥ राक्षसाश्चमहावीर्याःपार्थिवेन्द्रामहाबलाः ॥ ६७ ॥ गजानश्वान्रथान्सम्यगारुह्यबहुशःशुभान् ॥
नानामङ्गलवादित्रैःस्तुतिभिःपुष्कलैस्तथा ॥ ६८ ॥ ऋक्षवानररक्षोभिर्निषादवरसैनिकैः ॥ प्रविवेशमहातेजाःसाकेतंपुरमव्ययम् ॥
॥ ६९ ॥ आलोक्यराजनगरींपथिराजपुत्रोराजानमेवपितरंपरिचिन्तयानः ॥ सुग्रीवमारुतिविभीषणपुण्यपादसंचारपूतभवनंप्रवि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वेशरामः ॥ ३७० ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप० उत्तर० उमामहेश्वरसंवादेरामस्यायोध्याप्रवेशोनामद्विचत्वारिंशदधिकद्विशततमोऽध्यायः
॥ २४२ ॥ शङ्करउवाच ॥ अथतस्मिन्दिनेपुण्येशुभलग्नेशुभान्विते ॥ राघवस्याभिषेकार्थंमङ्गलंचक्रिरेजनाः ॥ १ ॥ वसिष्ठोवामदेवश्चजाबालिरथ
कश्यपः ॥ मार्कण्डेयश्चमौद्गल्यःपर्वतोनारदस्तथा ॥ २ ॥ एतेमहर्षयस्तत्रजपहोमपुरस्सरम् ॥ अभिषेकंशुभंचक्रुर्मुनयोराजसत्तमम् ॥ ३ ॥ नाना
रत्नमयेदिव्येहेमपीठेशुभान्विते ॥ निवेश्यसीतयासार्द्धंश्रियाइवजनार्दनम् ॥ ४ ॥ सौवर्णकलशैर्दिव्यैर्नानारत्नमयैःशुभैः ॥ सर्वतीर्थोदकैःपुण्यैर्माङ्ग
ल्यद्रव्यसंयुतैः ॥ ५ ॥ दूर्वाग्रतुलसीपत्रपुष्पगन्धसमन्वितैः ॥ मन्त्रपूतजलैःशुद्धैर्मुनयःसंशितव्रताः ॥ ६ ॥ अजपन्वैष्णवान्सूक्तांश्चतुर्वेदमयाञ्छु
भान् ॥ अभिषेकंशुभंचक्रुःकाकुत्स्थंजगतांपतिम् ॥ ७ ॥ तस्मिञ्छुभतमेलग्नेदेवदुन्दुभयोदिवि ॥ विनेदुःपुष्पवर्षाणिववृषुश्चसमन्ततः ॥ ८ ॥
दिव्याम्बरैर्भूषणैश्चदिव्यगन्धानुलेपनैः ॥ पुष्पैर्नानाविधैर्दिव्यैर्देव्यासहरघूद्वहः ॥ ९ ॥ ॥ अलंकृतश्चशुशुभेमुनिभिर्वेदपारगैः ॥ छत्रंचचामरंदिव्यं
धृतवाँल्लक्ष्मणस्तदा ॥ १० ॥ पार्श्वेभरतशत्रुघ्नौतालवृंतौविवीजतुः ॥ दर्पणंप्रददौश्रीमान्राक्षसेन्द्रोविभीषणः ॥ ११ ॥ दधारपूर्णकलशंसुग्रीवो
वानरेश्वरः ॥ जाम्बवांश्चमहातेजाःपुष्पमालांमनोहराम् ॥ १२ ॥ वालिपुत्रस्तुताम्बूलंसकर्पूरंददौहरेः ॥ हनुमान्दीपिकांदिव्यांसुषेणश्चध्वजंशुभम्
॥ १३ ॥ परिवार्यमहात्मानंमन्त्रिणःसमुपासत ॥ सृष्टिर्जयन्तोविजयःसौराष्ट्रोराष्ट्रवर्द्धनः ॥ १४ ॥ अकोपोधर्मपालश्चसुमन्त्रोमन्त्रिणःस्मृताः ॥
राजानश्चनरव्याघ्रानानाजनपदेश्वराः ॥ १५ ॥ पौराश्चनैगमावृद्धाराजानंपर्युपासत ॥ ऋक्षैश्चवानरेन्द्रैश्चमन्त्रिभिःपृथिवीश्वरैः ॥ १६ ॥ राक्षसैर्द्विज
मुख्यैश्चकिङ्करैश्चसमावृतः ॥ परेव्योम्नियथालीनोदैवतैःकमलापतिः ॥ १७ ॥ तथानृपवरःश्रीमान्साकेतेशुशुभेतदा ॥ इन्दीवरदलश्यामंपद्मपत्रनिभे
क्षणम् ॥ १८ ॥ आजानुबाहुंकाकुत्स्थंपीतवस्त्रधरंहरिम् ॥ कम्बुग्रीवंमहोरस्कंविचित्राभरणैर्युतम् ॥ १९ ॥ देव्यासहसमासीनमभिषिक्तंरघूत्तमम् ॥
विमानस्थाःसुरगणाहर्षनिर्भरमानसाः ॥ २० ॥ तुष्टुवुर्जयशब्देनगन्धर्वाप्सरसांगणाः ॥ अभिषिक्तस्ततोरामोवसिष्ठाद्यैर्महर्षिभिः ॥ २१ ॥ शुशुभे
सीतयादेव्यानारायणइवश्रिया ॥ अतिमर्त्यतयारूपमुपमातीतमुल्बणम् ॥ २२ ॥ दृष्ट्वातुष्टावहृष्टात्माशङ्करोहृष्टमानसः ॥ कृताञ्जलिपुटोभूत्वासानन्दो
गद्गदाकुलः ॥ हर्षयन्सकलान्देवान्मुनीनपिचवानरान् ॥ २३ ॥ महादेवउवाच ॥ नमोमूलप्रकृतयेनित्यायपरमात्मने ॥ सच्चिदानन्दरूपायविश्व
रूपायवेधसे ॥ २४ ॥ नमोनिरन्तरानन्दकन्दमूलायविष्णवे ॥ जगत्त्रयकृतानन्दमूर्त्तयेदिव्यमूर्त्तये ॥ २५ ॥ नमोब्रह्मेन्द्रपूज्यायशङ्करा
भयदायच ॥ नमोविष्णुस्वरूपायसर्वरूपनमोनमः ॥ २६ ॥ उत्पत्तिस्थितिसंहारकारिणेत्रिगुणात्मने ॥ नमोऽस्तुनिर्गतोपाधिस्वरूपायमहात्मने

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २७ ॥ अनयाविद्ययादेव्यासीतयोपाधिकारिणे ॥ नमःपुंप्रकृतिभ्यांचयुवाभ्यांजगतांकृते ॥ २८ ॥ जगन्मातापितृभ्यांचजनन्यैराघवायच ॥
नमःप्रपञ्चरूपिण्यैनिष्प्रपञ्चस्वरूपिणे ॥ २९ ॥ नमोध्यानस्वरूपिण्यैयोगिध्येयात्ममूर्त्तये ॥ परिणामापरीणामरिक्ताभ्यांचनमोनमः ॥ ३० ॥
कूटस्थबीजरूपिण्यैसीतायैराघवायच ॥ सीतालक्ष्मीर्भवान्विष्णुःसीतागौरीभवाञ्छिवः ॥ ३१ ॥ सीतास्वयंहिसावित्रीभवान्ब्रह्माचतुर्मुखः ॥
सीताशचीभवाञ्छक्रःसीतास्वाहानलोभवान् ॥ ३२ ॥ सीतासंहारिणीदेवीयमरूपधरोभवान् ॥ सीताहिसर्वसम्पत्तिःकुबेरस्त्वंरघूत्तम ॥ ३३ ॥
सीतादेवीचरुद्राणीभवान्रुद्रोमहाबलः ॥ सीतातुरोहिणीदेवीचन्द्रस्त्वंलोकसौख्यदः ॥ ३४ ॥ सीतासंज्ञाभवान्सूर्यःसीतारात्रिर्दिवाभवान् ॥ सीता
देवीमहाकालीमहाकालोभवान्सदा ॥३५ ॥ स्त्रीलिङ्गंतुत्रिलोकेषुयत्तत्सर्वंहिजानकी ॥ पुन्नामलाञ्छितंयत्तुतत्सर्वंहिभवान्प्रभो ॥ ३६ ॥ सर्वत्र
सर्वदेवेशसीतासर्वत्रधारिणी ॥ तदात्वमपिचत्रातुंतच्छक्तिर्विश्वधारिणी ॥ ३७ ॥ तस्मात्कोटिगुणंपुण्यंयुवाभ्यांपरिचिह्नितम् ॥ चिह्नितंशिवशक्ति
भ्यांचरितंतवशान्तिदम् ॥ ३८ ॥ आवांरामजगत्पूज्यौमसपूज्यौसदायुवाम् ॥ त्वन्नामजापिनीगौरीत्वन्मन्त्रजपवानहम् ॥ ३९ ॥ मुमूर्षोर्मणि
कर्ण्यांतुअर्द्धोदकनिवासिनः ॥ अहंदिशामितेमन्त्रंतारकंब्रह्मदायकम् ॥ ४० ॥ अतस्त्वंजानकीनाथपरंब्रह्मासिनिश्चितम् ॥ त्वन्मायामोहितास्सर्वे
नत्वांजानन्तितत्त्वतः ॥ ४१ ॥ ईश्वरउवाच ॥ इत्युक्तःशम्भुनारामःप्रसादप्रवणोऽभवत् ॥ दिव्यरूपधरःश्रीमानद्भुताद्भुतदर्शनः ॥ ४२ ॥ तंतथारूप
मालोक्यनरवानरदेवताः ॥ नद्रष्टुमपिशक्तास्तेतेजसामहदद्भुतम् ॥ ४३ ॥ भयाद्वैत्रिदशश्रेष्ठाःप्रणेमुश्चातिभक्तितः ॥ भीताविज्ञायरामोऽपिन
रवानरदेवताः ॥ मायामानुषतांप्राप्यसदेवानब्रवीत्पुनः ॥ ४४ ॥ रामचन्द्रउवाच ॥ शृणुध्वंदेवतायोमांप्रत्यहंस्तोष्यतेबुधः ॥ स्तवेन
शम्भुनोक्तेनदेवतुल्योभवेन्नरः ॥ ४५ ॥ विमुक्तःसर्वपापेभ्योमत्स्वरूपंसमश्नुते ॥ रणेजयमवाप्नोतिनक्वचित्प्रतिहन्यते ॥ ४६ ॥
भूतवेतालकृत्याभिर्ग्रहैश्चापिनबाध्यते ॥ अपुत्रोलभतेपुत्रंपतिंविन्दतिकन्यका ॥ ४७ ॥ दरिद्रःश्रियमाप्नोतिसत्त्ववाञ्छीलवान्भवेत् ॥
आत्मतुल्यबलःश्रीमाञ्जायतेनात्रसंशयः ॥ ४८ ॥ निर्विघ्नंसर्वकार्येषुसर्वारम्भेषुवैनृणाम् ॥ यंयंकामयतेमर्त्यःसुदुर्लभमनोरथम्
॥ ४९ ॥ षण्मासात्सिद्धिमाप्नोतिस्तवस्यास्यप्रसादतः ॥ यत्पुण्यंसर्वतीर्थेषुसर्वयज्ञेषुयत्फलम् ॥ तत्फलंकोटिगुणितंस्त
वेनानेनलभ्यते ॥ ५० ॥ ईश्वरउवाच ॥ इत्युक्त्वारामचन्द्रोऽसौविससर्जमहेश्वरम् ॥ ब्रह्मादित्रिदशान्सर्वान्विससर्जसमा
गतान् ॥ ५१ ॥ अर्चितामानवाःसर्वेऋक्षवानरदेवताः ॥ विसृष्टारामचन्द्रेणप्रीत्यापरमयायुताः ॥ ५२ ॥ इत्थंविसृष्टाःखलुतेचसर्वेस्वंस्वंपदंजग्मु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रतीवहृष्टाः ॥ परंपठन्तःस्तवमीश्वरोक्तंरामंस्मरन्तोवरविश्वरूपम् ॥ ९३ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०उमामहेश्वरसंवादेविश्वदर्शनंनामत्रिच
त्वारिंशदधिकद्विशततमोऽध्यायः ॥२४३॥ शङ्करउवाच ॥ अथरामस्तुवैदेह्याराज्यभोगान्मनोरमान् ॥ बुभुजेवर्षसाहस्रंपालयन्सर्वतोदिशः ॥ १ ॥
अन्तःपुरजनास्सर्वेराक्षसस्यगृहेस्थिताम् ॥ गर्हयन्तिस्मवैदेहींतथाजानपदाजनाः ॥ २ ॥ लोकापवादभीत्याचरामःशत्रुनिवारकः ॥ दर्शयन्मानुषं
धर्ममन्तर्वत्नींनृपात्मजाम् ॥ ३ ॥ वाल्मीकेराश्रमेपुण्येगङ्गातीरेमहावने ॥ विससर्जमहातेजागर्भिणींमुनिसंसदि ॥ ४ ॥ साभर्तुःपरतन्त्राहिउवास
मुनिवेश्मनि ॥ अर्चितामुनिपत्नीभिर्वाल्मीकमुनिरक्षिता ॥ ५ ॥ तत्रैवासूतयमलौनाम्नाकुशलवौसुतौ ॥ तौचतत्रैवमुनिनाववृधातेसुसंस्कृतौ ॥ ६ ॥
रामोऽपिभ्रातृभिस्सार्द्धंपालयामासमेदिनीम् ॥ यमादिगुणसम्पन्नस्सर्वभोगविवर्जितः ॥ ७ ॥ अर्चयन्सततंविष्णुमनादिनिधनंहरिम् ॥ ब्रह्म
चर्यपरोनित्यंशशासपृथिवींनृपः ॥ ८ ॥ शत्रुघ्नोलवणंहत्वामथुरांदेवनिर्मिताम् ॥ पालयामासधर्मात्मापुत्राभ्यांसहराघवः ॥ ९ ॥ गन्धर्वान्भरतो
हत्वासिन्धोरुभयपार्श्वतः ॥ स्वात्मजौस्थापयामासतस्मिन्देशेमहाबलौ ॥ १० ॥ पश्चिमेमद्रदेशेतुमद्रान्हत्वाचलक्ष्मणः ॥ स्वसुतौचमहावीर्यावभि
षिच्यमहाबलः ॥ ११ ॥ गत्वापुनरयोध्यांतुरामपादावुपास्पृशत ॥ ब्राह्मणस्यमृतंबालंकालधर्ममुपागतम् ॥ १२ ॥ जीवयामासकाकुत्स्थः
शूद्रंहत्वाचतापसम् ॥ ततस्तुगौतमीतीरेनैमिषेजनसंसदि ॥ १३ ॥ इयाजवाजिमेधेनराघवःपरवीरहा ॥ काञ्चनींजानकींकृत्वातयासार्द्धमहा
बलः ॥ १४ ॥ चकारयज्ञान्बहुशोराघवःपरमार्थवित् ॥ अयुतान्यश्वमेधानिवाजपेयानिचप्रभुः ॥ १५ ॥ अग्निष्टोमंविश्वजितंगोमेधंवैष्णवंक्रतुम् ॥
चकारविविधान्यज्ञान्परिपूर्णान्सदक्षिणान् ॥ १६ ॥ एतस्मिन्नन्तरेतत्रवाल्मीकिःसुमहातपाः ॥ सीतामानीयकाकुत्स्थमिदंवचनमब्रवीत्
॥ १७ ॥ वाल्मीकिरुवाच ॥ अपापांमैथिलींरामत्यक्तुंनार्हसिसुव्रत ॥ इयंतुविरजाःसाध्वीभास्करस्यप्रभायथा ॥ अनन्यातवकाकुत्स्थकस्मात्त्यक्ता
त्वयानघ ॥ १८ ॥ रामउवाच ॥ अपापांमैथिलींब्रह्मञ्जानामिवचनात्तव ॥ रावणेनहृतासाध्वीदण्डकेविजनेपुरा ॥ १९ ॥ तंहत्वासमरेसीतां
शुद्धामग्निमुखागताम् ॥ पुनर्यातोऽस्म्ययोध्यायांसीतामादायधर्मतः ॥ २० ॥ लोकापवादःसुमहानभूत्पौरजनेषुच ॥ त्यक्तामयाशुभाचारा
तद्भयात्तवसन्निधौ ॥ २१ ॥ तस्माल्लोकस्यसंतुष्ट्यैसीताममपरायणा ॥ पार्थिवानांमहर्षीणांप्रत्ययंकर्तुमर्हति ॥ २२ ॥ महेश्वरउवाच ॥ एव
मुक्तातदासीतामुनिपार्थिवसंसदि ॥ चकारप्रत्ययंदेवीलोकाश्चर्यकरंसती ॥ २३ ॥ दर्शयन्त्यस्यलोकस्यरामस्यानन्यतांसती ॥ अब्रवीत्प्राञ्जलिः
सीत.सर्वेषांजनसंसदि ॥ २४ ॥ सीतोवाच ॥ यथाहंराघवादन्यंमनसापिनचिन्तये ॥ तथामेधरणीदेवीविवरंदातुमर्हति ॥ २५ ॥ मनसाकर्मणा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाचायथारामंसमर्चये ॥ तथामेधरणीदेवीविवरंदातुमर्हति ॥ २६ ॥ यथैवसत्यमुक्तंमेवेद्मिरामात्परंनच ॥ तथामेधरणीदेवीविवरंदातुमर्हति ॥ २७ ॥ महेश्वरउवाच ॥ एवंशपन्त्यांवैदेह्यांधरणीसहसाभिनत् ॥ २८ ॥ ततोरत्नमयंपीठंपृष्ठेधृत्वाखगेश्वरः ॥ रसातलादाविरभूद्विस्मयंजनयन्नृणाम् ॥ २९ ॥ ततस्तुधरणीदेवीहस्ताभ्यांगृह्यमैथिलीम् ॥ स्वागतेनाभिनन्द्यैनामासनेसंन्यवेशयत् ॥ ३० ॥ तामासनगतांदृष्ट्वादिविदेवगणाभृशम् ॥ पुष्पवृष्टिमविच्छिन्नांदिव्यांसीतामवाकिरन् ॥ ३१ ॥ सापिदिव्याप्सरोभिस्तुपूज्यमानासनातनी ॥ वैनतेयंसमारुह्यतस्मान्मार्गाद्दिवंययौ ॥ ३२ ॥ दासीगणैःपूर्वभागेसंवृताजगदीश्वरी ॥ संप्रापपरमंधामयोगिगम्यंसनातनम् ॥ ३३ ॥ रसातलप्रविष्टांतुतांदृष्ट्वासर्वमानुषाः ॥ साध्वीसाध्वीतिसीतेयमुच्चैःसर्वेप्रचुक्रुशुः ॥ ३४ ॥ रामःशोकसमाविष्टःसंगृह्यतनयावुभौ ॥ मुनिभिःपार्थिवेन्द्रैश्चसाकेतंप्रविवेशह ॥ ३५ ॥ अथकालेनमहतामातरःसंशितव्रताः ॥ कालधर्मसमापन्नाभर्त्रास्वर्गंप्रपेदिरे ॥ ३६ ॥ दशवर्षसहस्राणिदशवर्षशतानिच ॥ चकारराज्यंधर्मेणराघवःसंशितव्रतः ॥ ३७ ॥ कस्यचित्त्वथकालस्यराघवस्यनिवेशनम् ॥ कालस्तापसरूपेणसंप्राप्तोवाक्यमब्रवीत् ॥ ३८ ॥ कालउवाच ॥ रामराममहाबाहोधात्रासंप्रेषितोऽस्म्यहम् ॥ यद्ब्रवीमिरघुश्रेष्ठतच्छृणुष्वमहामते ॥ ३९ ॥ द्वन्द्वमेवहिकार्यंस्यादावयोःपरिभाषितम् ॥ तदन्तरेप्रविष्टोयस्सवध्योहिभविष्यति ॥ ४० ॥ महेश्वरउवाच ॥ तथेतिचप्रतिश्रुत्यरामोराजीवलोचनः ॥ द्वाःस्थंकृत्वातुसौमित्रिंकालेनसमभाषत ॥ वैवस्वतोऽब्रवीद्वाक्यंरामंदशरथात्मजम् ॥ ४१ ॥ कालउवाच ॥ शृणुरामयथावृत्तंममागमनकारणम् ॥ दशवर्षसहस्राणिदशवर्षशतानिच ॥ ४२ ॥ वसास्मिन्मानुषेलोकेहत्वाराक्षसपुङ्गवान् ॥ एवमुक्तःसुरगणैरवतीर्णोऽसिभूतले ॥ ४३ ॥ तदयंसमयःप्राप्तःस्वर्लोकंगमितुंत्वया ॥ सनाथाहिसुराःसर्वेभवन्त्वद्यत्वयानघ ॥ ४४ ॥ महेश्वरउवाच ॥ एवमस्त्वितिकाकुत्स्थोरामःप्राहमहाभुजः ॥ एतस्मिन्नन्तरेतत्रदुर्वासास्तुमहातपाः ॥ राजद्वारमुपागम्यलक्ष्मणंवाक्यमब्रवीत् ॥ ॥ ४५ ॥ दुर्वासाउवाच ॥ मांनिवेदयकाकुत्स्थंशीघ्रंगत्वानृपात्मज ॥ ४६ ॥ महेश्वरउवाच ॥ तमब्रवील्लक्ष्मणस्तुअसांनिध्यमितिद्विज ॥ ततःक्रोधसमाविष्टःप्राहतंमुनिसत्तमः ॥ ४७ ॥ दुर्वासाउवाच ॥ शापंदास्यामिकाकुत्स्थंराममनयदिदर्शयेः ॥ ४८ ॥ महेश्वरउवाच ॥ तस्माच्छापभयाद्विप्रंराघवायन्यवेदयत् ॥ तत्रैवान्तर्दधेकालःसर्वभूतभयावहः ॥ ४९ ॥ पूजयामासतंप्राप्तमृषिंदुर्वाससंनृपः ॥ अग्रजस्यप्रतिज्ञांतुविज्ञायरघुसत्तमः ॥ ५० ॥ तत्याजमानुषंरूपंलक्ष्मणःसरयूजले ॥ विसृज्यमानुषंरूपंप्रविवेशस्वकांतनुम् ॥ ५१ ॥ फणासहस्रसंयुक्तंकोटीन्दुसमवर्चसम् ॥ दिव्यमाल्याम्बरधरोदिव्यगन्धानुलेपनः ॥ ५२ ॥ नागकन्यासहस्रैस्तुसंवृतःसमलङ्कृतः ॥ विमानंदिव्यमारुह्यप्रययौवैष्णवंपदम् ॥ ५३ ॥ लक्ष्मणस्य

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

गतिंसम्यग्विदित्वारघुसत्तमः ॥ स्वयमप्यथकाकुत्स्थःस्वर्गंगन्तुमभीप्सितः ॥ ५४॥ अभिषिच्याथकाकुत्स्थःस्वात्मजौचकुशीलवौ ॥ विभज्यरथ
नागाश्वसधनंप्रददौतयोः ॥ ५५ ॥ कुशवत्यांकुशंतंचशरवत्यांलवंतथा ॥ स्थापयामासधर्मेणराज्येस्वेरघुसत्तमः ॥ ५६ ॥ अभिप्रायंतुविज्ञाय
रामस्यविदितात्मनः ॥ आजग्मुर्वानराःसर्वेराक्षसाःसुमहाबलाः ॥ ५७॥ विभीषणोऽथसुग्रीवोजाम्बवान्मारुतात्मजः ॥ नीलोनलःसुषेणश्चनिषादा
धिपतिर्गुहः ॥ ५८ ॥ अभिषिच्यसुतौवीरौशत्रुघ्नश्चमहामनाः ॥ सर्वएतेसमाजग्मुरयोध्यांरामपालिताम् ॥ ५९ ॥ तेप्रणम्यमहात्मानमूचुःप्राञ्ज
लयस्तथा ॥ ६० ॥ वानरप्रभृतयऊचुः ॥ स्वर्लोकंगन्तुमुद्युक्तंज्ञात्वात्वांरघुसत्तम ॥ आगताःस्मोवयंसर्वेतवानुगमनंप्रति ॥ ६१॥ नशक्ताःस्मःक्षणं
रामजीवितुंत्वांविनाप्रभो ॥ तस्मात्त्वयाविशालाक्षगच्छामस्त्रिदशालयम् ॥६२॥ महेश्वरउवाच ॥ तैरेवमुक्तःकाकुत्स्थोबाढमित्यब्रवीत्ततः ॥ अथो
वाचमहातेजाराक्षसेन्द्रंविभीषणम् ॥६३॥ रामउवाच॥राज्यंप्रशाधिधर्मेणमाप्रतिज्ञांवृथाकृथाः॥यावच्चन्द्रश्चसूर्यश्चयात्तिष्ठतिमेदिनी॥तावद्रमस्वसुप्री
तःकालेममपदंव्रज ॥६४॥ महेश्वरउवाच ॥ इत्युक्त्वाथसकाकुत्स्थःस्वार्चांविष्णुंसनातनम् ॥ श्रीरङ्गशायिनंसौम्यमिक्ष्वाकुकुलदैवतम् ॥ ६५ ॥ संप्री
त्याप्रददौतस्मैरामोराजीवलोचनः ॥ हनुमन्तमथोवाचराघवःशत्रुसूदनः ॥६६॥ रामउवाच ॥ मत्कथाःप्रचरिष्यन्तियावल्लोकेहरीश्वर ॥ तावद्रमस्व
मेदिन्यांकालेमांव्रजसुव्रत ॥ ६७ ॥ महेश्वरउवाच ॥ तमेवमुक्त्वाकाकुत्स्थोजाम्बवन्तमथाब्रवीत् ॥ ६८ ॥ रामउवाच ॥ द्वापरेसमनुप्राप्तेयदूना
मन्वयेपुनः ॥ ६९ ॥ भूभारस्यविनाशायसमुत्पत्स्येत्वहंभुवि ॥ करिष्येतत्रसंग्रामंत्वयाभल्लूकसत्तम ॥ ७० ॥ महेश्वरउवाच ॥ तमेवमुक्त्वा
काकुत्स्थःसर्वांस्तानृक्षवानरान् ॥ उवाचवाचागच्छध्वमितिरामोमहाबलः ॥ ७१ ॥ मन्त्रिणोनैगमाश्चैवभरतःकैकयीसुतः ॥ राघवस्या
नुगमनेनिश्चितास्तेसमाययुः ॥ ७२ ॥ ततःशुक्लाम्बरधरोब्रह्मचारीययौपरम् ॥ कुशान्गृहीत्वापाणिभ्यामाचम्यप्रययावथ ॥७३॥ रामस्यदक्षिणेपार्श्वे
पद्महस्तारमागता॥तथैवधरणीदेवीदक्षिणेतरगातथा॥७४॥वेदाःसाङ्गाःपुराणानिसेतिहासानिसर्वतः॥ ॐकारोथवषट्कारःसावित्रीलोकपावनी॥७५॥
अस्त्र[1]शस्त्राणिचतदाधनुराद्यानिपार्वति ॥ अनुजग्मुस्तथारामंसर्वेपुरुषविग्रहाः ॥७६॥ भरतश्चैवशत्रुघ्नःसर्वेपुरनिवासिनः ॥ सपुत्रदाराःकाकुत्स्थमनु
जग्मुःसहानुगाः ॥ ७७ ॥ मन्त्रिणोभृत्यवर्गाश्चकिङ्करानैगमास्तथा ॥ वानराश्चैवऋक्षाश्चसुग्रीवसहितास्तदा ॥ ७८ ॥ सपुत्रदाराःकाकुत्स्थमन्वगच्छ
न्महामतिम् ॥ पशवःपक्षिणश्चैवसर्वेस्थावरजङ्गमाः ॥७९॥ अनुजग्मुर्महात्मानंसमीपस्थानरोत्तमाः ॥ येचपश्यन्तिकाकुत्स्थंस्वपथानुगतंप्रभुम् ॥

१ 'इष्टशास्त्राणि' इ०पा० ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ८० ॥ तेतथानुगतारामंनिवर्त्तन्तेनकेचन ॥ अथत्रियोजनंगत्वानदीपश्चान्मुखींस्थिताम् ॥ ८१ ॥ सरयूंपुण्यसलिलांप्रविवेशसहानुगः ॥ ततः
पितामहोब्रह्मासर्वदेवगणावृतः ॥ ८२ ॥ तुष्टावरघुशार्दूलमृषिभिःसार्द्धमक्षरैः ॥ अब्रवीत्तत्रकाकुत्स्थंप्रविष्टंसरयूजले ॥ ८३ ॥ ब्रह्मोवाच ॥ आगच्छ
विष्णोभद्रंतेदिष्ट्याप्राप्तोऽसिमानद ॥ भ्रातृभिस्सहदेवाभैःप्रविशस्वनिजांतनुम् ॥८४॥ वैष्णवींतांमहातेजांदेवाकारांसनातनीम् ॥ त्वंहिलोकगतिर्देव
नत्वांकेचित्तुजानते ॥ ८५ ॥ त्वामचिन्त्यंमहात्मानमक्षरंसर्वसंग्रहम् ॥ यमिच्छसिमहातेजस्तांतनुंप्रविशस्वभोः ॥ ८६ ॥ महेश्वरउवाच ॥ तस्मि
न्सूर्यकराकीर्णेपुष्पवृष्टिनिपातिते ॥ उत्सृज्यमानुषंरूपंस्वांतनुंप्रविवेशह ॥ ८७ ॥ अंशाभ्यांशङ्खचक्राभ्यांशत्रुघ्नभरतावुभौ ॥ प्रपेदातेमहात्मानौ
दिव्यतेजस्समन्वितौ ॥ ८८ ॥ शङ्खचक्रगदाशार्ङ्गपद्महस्तश्चतुर्भुजः ॥ दिव्याभरणसम्पन्नोदिव्यगन्धानुलेपनः ॥ ८९ ॥ दिव्यपीताम्बरधरः
पद्मपत्रनिभेक्षणः॥युवाकुमारःसौम्याङ्गःकोमलावयवोज्ज्वलः॥९०॥सुस्निग्धनीलकुटिलकुन्तलःशुभलक्षणः ॥ नवदूर्वांकुरश्यामःपूर्णचन्द्रनिभाननः
॥९१॥ देवीभ्यांसहितःश्रीमान्विमानमधिरुह्यच ॥ तस्मिन्सिंहासनेदिव्येमूलेकल्पतरोःप्रभुः ॥९२॥ निषसादमहातेजाःसर्वदेवैरभिष्टुतः ॥ राघवानु
गतायेचऋक्षवानरमानुषाः ॥ ९३ ॥ स्पृष्ट्वैवसरयूतोयंसुखेनत्यक्तजीविताः ॥ रामप्रसादात्तेसर्वेदिव्यरूपधराःशुभाः ॥ ९४ ॥ दिव्यमाल्या
म्बरधरादिव्यमङ्गलवर्चसः ॥ आरुरुहुर्विमानंतदसङ्ख्यास्तत्रदेहिनः ॥९५॥ सर्वैःपरिवृतःश्रीमान्रामोराजीवलोचनः ॥ पूजितःसुरसिद्धौघैर्मुनिभि
स्तुमहात्मभिः ॥ ९६ ॥ आययौशाश्वतंदिव्यमक्षरंस्वपदंविभुः ॥ यःपठेद्रामचरितंश्लोकंश्लोकार्धमेववा ॥ ९७ ॥ शृणुयाद्वातथाभक्त्यास्मरेद्वा
शुभदर्शने ॥ कोटिजन्मार्जितात्पापाज्ज्ञानतोऽज्ञानतःकृतात् ॥९८॥ विमुक्तोवैष्णवंलोकंपुत्रदारैश्चबान्धवैः ॥ समाप्नुयाद्योगगम्यमनायासेनवैनरः ॥
॥ ९९ ॥ एतत्तेकथितंदेविरामस्यचरितंमहत् ॥ धन्योऽस्म्यहंत्वयादेविरामचन्द्रस्यकीर्त्तनात् ॥ किमन्यच्छ्रोतुकामासितद्ब्रवीमिवरानने ॥ १०० ॥
इतिश्रीपाद्मेमहापुराणेपद्मप०उत्तर० उमामहेश्वरसंवादेश्रीरामचरितकथनंनामचतुश्चत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४४ ॥ श्रीपार्वत्युवाच ॥
रघुनाथस्यचरितंसाधूक्तंहित्वयाविभो ॥ श्रुत्वाधन्यास्मिदेवेशत्वत्प्रसादान्महेश्वर॥१॥वसुदेवसुतस्यास्यकृष्णस्यचरितंमहत् ॥ श्रोतुमिच्छामिदेवेश
चरितंकल्मषापहम्॥२॥रुद्रउवाच॥शृणुदेविप्रवक्ष्यामिकृष्णस्यास्यमहात्मनः॥चरितंवासुदेवस्यसर्वेषांफलदंनृणाम्॥३॥यदूनामन्वयेदेविवसुदेवइती
रितः ॥ देवमीढस्यपुत्रोऽभूत्सर्वधर्मविदांवरः ॥ ४ ॥ देवकस्यात्मजांदेविदेवकींदेववर्णिनीम् ॥ उपयेमेविधानेनमथुरायांनृपात्मजः ॥ ५ ॥ उग्रसे
नस्यपुत्रोऽभूत्कंसःशूरोमहाबलः ॥ तयोरथवरंतत्रचोदयामाससारथिः॥६॥समागतेषुतेष्वेवंपथिरम्येशुभावहे ॥ अन्तरिक्षेऽशरीरावाक्प्राहगम्भीरया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गिरा॥ ७ ॥ आकाशवाग्युवाच ॥ अस्यास्तवाष्टमोगर्भःकंसप्राणान्हरिष्यति ॥ ८ ॥ रुद्रउवाच ॥ तच्छ्रुत्वाहन्तुमारेभेकंसोऽपिभगिनींतदा ॥
तमब्रवीत्सुसंरब्धंवसुदेवःसुबुद्धिमान् ॥ ९॥ वसुदेवउवाच ॥ नहन्तव्यामहाभागभगिनीधर्मतस्त्वया ॥ गर्भानेवसमुत्पन्नाञ्जहिराजन्महाबल॥१०॥
रुद्रउवाच ॥ तथेत्याहतदाकंसोवसुदेवंचदेवकीम् ॥ निबध्यस्वगृहेरम्येसर्वभोगेन्यवेशयत् ॥ ११ ॥ एतस्मिन्नन्तरेदेविभूमिभारप्रपीडिता ॥ जगाम
धरणीदेवीसहसाब्रह्मणोऽन्तिकम् ॥ १२ ॥ समेत्यजगतामीशंब्रह्माणंपरमेष्ठिनम् ॥ प्राहगम्भीरयावाचाधरणीलोकधारिणी ॥ १३ ॥ धरण्युवाच ॥
प्रजापतेनशक्तास्मिधर्तुंलोकानिमान्प्रभो ॥ राक्षसाःपापकर्माणःसंस्थितामयिसुव्रत ॥ १४ ॥ जगतःसकलान्धर्मान्विध्वंसन्तोमहाबलाः ॥ अधर्म
वर्तिनःसर्वेनराःपापविमोहिताः ॥ १५ ॥ स्वल्पमल्पतरंधर्मंलोकेऽस्मिन्नचदृश्यते ॥ धर्मेणैवधृतादेवसत्यशौचयुतेनच ॥ तस्मादधर्मसंभूतंनलोकं
धर्तुमुत्सहे ॥ १६ ॥ रुद्रउवाच ॥ इत्युक्त्वाधरणीदेवीतत्रैवान्तरधीयत ॥ ततःसुरगणाःसर्वेब्रह्मरुद्रपुरोगमाः ॥ १७ ॥ क्षीराब्धेरुत्तरंकूलमधिगम्य
जगत्पतिम् ॥ तुष्टुवुःस्तुतिभिर्दिव्यैर्मुनयश्चमहौजसः ॥ ततःप्रसन्नःप्राहेशःसर्वांस्तान्मुनिसत्तमान्॥१८॥श्रीभगवानुवाच ॥ भोभोदेवगणास्सर्वेकिन्नि
मित्तमिहागताः ॥ १९ ॥ रुद्रउवाच ॥ ततःपितामहःप्राहदेवदेवंजनार्दनम् ॥२०॥ ब्रह्मोवाच ॥ देवदेवजगन्नाथपृथिवीभारपीडिता ॥ राक्षसाबहवो
लोकेसमुत्पन्नादुरासदाः ॥ २१ ॥ जरासन्धश्चकंसश्चप्रलम्बोधेनुकादयः ॥ दुरात्मानःप्रबाधन्तेसर्वलोकान्सनातनान् ॥ भारावतरणं कर्तुंपृथि
व्यास्त्वमिहार्हसि ॥२२॥ रुद्रउवाच ॥ एवमुक्तोहृषीकेशोब्रह्मणापरमेष्ठिना ॥प्राहगम्भीरयावाचाजगतीपतिरव्ययः ॥२३॥श्रीभगवानुवाच॥अवती
र्याथलोकेऽस्मिन्यदूनामन्वयेसुराः ॥ अवनीभारमव्यग्रमपास्यामिमहाबलाः॥२४॥ रुद्रउवाच ॥ एवमुक्ताःसुरास्सर्वेनमस्कृत्यजनार्दनम्॥स्वान्स्वा
न्लोकान्समासाद्यपरेशंतेऽन्वचिन्तयन् ॥ ततोनारायणींमायांपरमेशःसमब्रवीत्॥२५॥श्रीभगवानुवाच ॥ हिरण्याक्षस्यषट्पुत्रान्समानीयावनीतले ॥
वसुदेवस्यपत्न्यांतुदेवक्यांसन्निवेशय ॥ २६ ॥ अनन्तांशःसप्तमोऽत्रसंप्रविष्टस्तुमाचिरम् ॥ तस्याःसपत्न्यांरोहिण्यांददस्वशुभदर्शने ॥ २७ ॥ ततो
ऽष्टमेममांशस्तुदेवक्यांसंभविष्यति ॥ नन्दगोपस्यपत्न्यांतुयशोदायांसनातनी ॥ २८ ॥ तेंऽशभतामहानिद्राविन्ध्यंगत्वामहाचलम् ॥ तत्रसंपूज्यमा
नाहिदेवैरिन्द्रपुरोगमैः ॥हन्यादैत्यान्महावीर्याञ्शुम्भासुरपुरोगमान्॥२९॥रुद्रउवाच॥तथेत्युक्त्वामहामायाहिरण्याक्षसुतांस्तदा॥पर्यायेण चदेवक्या
षड्गर्भान्संन्यवेशयत् ॥ ३० ॥ ताञ्घानतदाकंसोजातमात्रान्महाबलः ॥ ततस्तुसप्तमोगर्भोह्यनन्तांशेनचोदितः ॥ ३१ ॥ वर्धमानंतुगर्भंतंरोहिण्यां
समुपानयत् ॥ गर्भसंकर्षणात्तस्यांजातःसंकर्षणोऽव्ययः ॥ ३२ ॥ कृष्णाष्टम्यांतुरोहिण्यांप्रोष्ठपद्यांशुभोदये ॥ रोहिणीजनयामासपुत्रंसंकर्षणं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभुम् ॥ ३३ ॥ ततस्तुदेवकीगर्भमापेदेभगवान्हरिः ॥ आपन्नगर्भांतांदृष्ट्वाकंसोभयनिपीडितः॥ ३४ ॥ ततःसुरगणाःसर्वेहर्षनिर्भरमानसाः ॥ तुष्टुवुर्दे
वकींतत्रविमानस्थानभस्तले ॥ ३५ ॥ ततस्तुदशमेमासिकृष्णेनभसिपार्वति ॥ अष्टम्यामर्द्धरात्रेचतस्यांजातोजनार्दनः ॥३६॥ इन्दीवरदलश्यामः
पद्मपत्रायतेक्षणः ॥ चतुर्भुजःसुन्दरांगोदिव्याभरणभूषितः ॥ ३७ ॥ श्रीवत्सकौस्तुभोरस्कोवनमालाविभूषितः ॥ वसुदेवस्यजातोऽसौवासुदेवःसना
तनः॥३८॥तंदृष्ट्वाजगतांनाथंकृष्णमानकदुन्दुभिः ॥ उवाचप्राञ्जलिर्भूत्वानमस्कृत्यजगन्मयम्॥३९॥वसुदेवउवाच ॥ जातोऽसिमेजगन्नाथभक्तकल्प
तरोप्रभो ॥ त्वमेवसर्वदेवानामनादिःपुरुषोत्तमः ॥ ४० ॥ त्वमचिन्त्यंमहद्भूतंयोगिध्येयःसनातनः ॥ ममपुत्रत्वमापन्नोधरण्यांधरणीधर ॥४१॥ दृष्ट्वै
तदद्भुतंरूपमैश्वरंपुरुषोत्तम ॥ दानवाःपापकर्माणोनसहन्तेमहौजसः ॥ ४२ ॥ रुद्रउवाच ॥ इत्यर्थितःस्तुतस्तेनपद्मनाभःसनातनः ॥ उपसंहृतवा
न्रूपंचतुर्भुजसमन्वितम् ॥४३॥ मानुषेणैवभावेनद्विभुजेनव्यरोचत ॥ येचाङ्गरक्षकाःसर्वेदानवास्तत्रसंस्थिताः ॥ ४४ ॥ तेचापिमाययातस्यामोहिता
स्तमसावृताः ॥ एतस्मिन्नन्तरेदेवमादायानकदुन्दुभिः ॥४५ ॥ प्रययौनगरात्तूर्णंसर्वदेवैरभिष्टुतः ॥ पयोधरेवर्षमानेनागराजोमहाबलः ॥ ४६ ॥
फणासहस्रेणाच्छाद्यभक्त्यादेवंसमन्वगात् ॥ तौगोपुरकपाटौतुतत्पादस्पर्शनात्तदा ॥ ४७ ॥ भिद्यमानौसुविवृतौतत्रस्थाश्चविमोहिताः ॥ स्रोतस्विनी
सुपूर्णापियमुनापिमहात्मनः ॥ ४८॥ प्रवेशाज्जानुमात्रंतुजलंसाचाप्युपावहत् ॥ उत्तीर्ययमुनांसोऽथाव्रजत्तत्तीरसंस्थितम् ॥४९॥ संस्तूयमानस्त्रिदशैः
प्रविवेशयदूत्तमः ॥ तत्रनन्दस्यपत्नीसाप्रसूतागोव्रजेशुभे ॥ ५० ॥ विमोहितामाययैववसुसुप्तातमसावृता ॥ तस्यास्तुशयनेदेवंविनिक्षिप्यसयादवः
॥ ५१ ॥ तांकन्यांसमुपादायप्रययौमथुरांपुनः ॥ पत्न्यैदत्त्वाथतांबालामुवाससुसमाहितः ॥५२॥ रुरोदबालभावात्सादेवकीशयनंगता ॥ अथबाल
ध्वनिंश्रुत्वातद्गृहस्याङ्गरक्षकाः ॥ ५३ ॥ कंसायावेदयामासुर्देवकीप्रसवंशुभम् ॥ कंसस्तूर्णमुपेत्यैनांजग्राहबालिकांतदा ॥ ५४ ॥ चिक्षेपचशिलापृष्ठे
सापितूर्णंवियत्स्थिता ॥ तस्योत्तमांगेस्वपदंदत्त्वातूर्णंखमास्थिता॥ उवाचाष्टभुजादेवीतदाराक्षसपुङ्गवम् ॥५५॥देव्युवाच॥किंमयाक्षिप्तयामन्दजातो
यस्त्वांहनिष्यति॥सर्वस्यजगतःस्रष्टाधर्ताहर्ताचयःप्रभुः॥अस्मिँल्लोकेसमुत्पन्नःसतेप्राणान्हरिष्यति॥५६ ॥रुद्रउवाच॥इत्युक्त्वातेजसादेवीसहसापूरयन्न
भः॥जगामदेवगन्धर्वैःस्तूयमानाहिमाचलम्॥५७॥कंसस्तदोद्विग्नमनाःसमाहूयस्वदानवान्॥प्रलम्बचाणूरमुखानुवाचभयपीडितः॥५८॥कंसउवाच ॥
अस्माद्भयात्सुरगणाउपेत्यक्षीरसागरम् ॥ आचचक्षुर्हरेःसर्वंरक्षोविध्वंसनंप्रति ॥ ५९ ॥ तेषांतुवचनंश्रुत्वाधरण्यांधरणीधरः ॥ मानुषेणैवभावेन
समुत्पन्नोहिसोऽव्ययः ॥ ६०॥ तदद्यसर्वेयूयंवैराक्षसाःकामरूपिणः ॥ समुद्रिक्तबलान्बालान्मारयध्वमशङ्किताः॥६१॥ रुद्रउवाच ॥ इत्यादिश्यततः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कंसोवसुदेवंचदेवकीम् ॥ आश्वास्यमोचयित्वाथस्ववेश्मान्तर्विवेशह ॥ ६२ ॥ वसुदेवस्ततोगत्वानन्दव्रजमनुत्तमम् ॥ तेनसंपूजितस्तत्रनिरीक्ष्यतनयं
मुदा ॥ उवाचनन्दपत्नींतांयशोदांयदुनन्दनः ॥ ६३ ॥ वसुदेवउवाच ॥ सुभगेमत्सुतमिमंरोहिणीजठरोद्भवम् ॥ स्वपुत्रमिवरक्षस्वभियाकंसादिहा
गतम् ॥ ६४ ॥ रुद्रउवाच ॥ तथेत्याहतदातन्वीनन्दपत्नीदृढव्रता ॥ लब्ध्वैवपुत्रयुगलमुत्पुपोषमुदान्विता ॥ ६५ ॥ निक्षिप्यतनयौगेहेनन्दगोपस्य
यादवः ॥ विश्रब्धःप्रययौतूर्णंमथुरांकंसपालिताम् ॥ ६६ ॥ ततोगर्गःशुभदिनेवसुदेवेननोदितः ॥ नन्दगोपव्रजंगत्वातत्रस्थैःपूजितोद्विजः ॥ ६७ ॥
विधिनाजातकंकर्मकृत्वादेवस्यगोकुले ॥ नामचात्राकरोद्दिव्यंपुत्रयोर्वासुदेवयोः ॥६८॥ संकर्षणोरौहिणेयोबलभद्रोमहाबलः ॥ रामइत्यादिनामानि
पूर्वजस्याकरोद्द्विजः ॥ ६९ ॥ श्रीधरःश्रीकरःश्रीमान्कृष्णोऽनन्तोजगत्पतिः ॥ वासुदेवोहृषीकेशइत्याद्यवरजस्यच ॥ ७० ॥ रामकृष्णाविति
ख्यातिमस्मिँल्लोकेगमिष्यतः ॥ एवमुक्त्वाद्विजश्रेष्ठःसंपूज्यपितृदेवताः ॥ ७१ ॥ संपूज्यमानोगोपालैराययौमथुरांपुनः ॥ कंसेनप्रेषितारात्रौपूतना
बालघातिनी ॥ ७२ ॥ विषलिप्तंस्तनंप्रादात्कृष्णायामिततेजसे ॥ कृष्णस्तुराक्षसींज्ञात्वापपौगाढंस्तनंभृशम् ॥ ७३ ॥ प्राणैःसहमहातेजाराक्षस्या
यदुपुङ्गवः ॥ साविह्वलाङ्गीसहसाविच्छिन्नस्नायुबन्धना ॥ ७४ ॥ पपातवेपमानासाममारचमहास्वना ॥ तस्याःशब्देनमहतापूरितंचनभस्तलम्
॥ ७५ ॥ त्रस्ताःसर्वेततोगोपादृष्ट्वातांपतितांभुवि ॥ कृष्णंचक्रीडमानंतंराक्षस्यास्तुमहोरसि ॥ ७६ ॥ समुद्विग्नास्ततस्तूर्णमादायतनयंतदा ॥ रक्षोभि
यातदातस्मिन्गोपुरीषेणमूर्द्धनि ॥ ७७ ॥ संमार्जयामासतदागोवालेनतदाननम् ॥ नन्दगोपःसमभ्येत्यसुतमादायभामिनि ॥ ७८ ॥ भगवन्नामभि
स्तस्यसर्वाङ्गेषुप्रमार्जनम् ॥ कृत्वातांतामसींभीमांबहिर्विन्यस्यगोव्रजात् ॥७९॥ ददाहगोपवृन्दैश्चत्रासितैस्तत्रगोव्रजे ॥ कदाचिच्छकटस्याधःशयानो
भगवान्हरिः ॥ ८० ॥ प्रसार्यचरणौतत्ररुरोदमधुसूदनः ॥ तस्यपादप्रहारेणशकटंपरिवर्तितम् ॥ ८१ ॥ विध्वस्तकुम्भभाण्डंतद्विपरीतंपपातवै ॥
ततोगोप्यश्चगोपाश्चदृष्ट्वातच्छकटंमहत् ॥ ८२ ॥ विस्मयंपरमंजग्मुःकिमेतदितिशङ्किताः ॥ यशोदाचतदातूर्णंबालंजग्राहविस्मिता ॥ ८३ ॥
अल्पेनैवहिकालेनबालकौतौयदूत्तमौ ॥ वर्द्धमानौयशोदायाःस्तनपानेनपोषितौ ॥ ८४ ॥ जानुभ्यामथहस्ताभ्यांरिङ्गमाणौविरेजतुः ॥ तृणावर्त
स्तमादायगोविन्दंवियतिस्थितः ॥ ८५ ॥ तंजघानजगन्नाथस्सपपातमहासुरः ॥ हत्वातंराक्षसंघोरंतत्रैवास्तेजगत्पतिः ॥ ८६ ॥ विचचारततः
सर्वंगोव्रजंमधुसूदनः ॥ नवनीतंजहाराशुगोपीनांचगृहेगृहे ॥ ८७ ॥ तदायशोदाकुपितादाम्नामध्येउलूखले ॥ निबध्यकृष्णंप्रययौविक्रेतुंगोरसादिकम्
॥ ८८ ॥ कर्षमाणस्ततःकृष्णोदाम्नाबद्धउलूखले ॥ यमलार्जुनयोर्मध्येजगामधरणीधरः ॥ ८९ ॥ उलूखलेनगोविन्दःपातयामासतौद्रुमौ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भग्नस्कन्धौनिपतितौस्वरेणधरणीतले ॥ ९० ॥ तेनशब्देनमहताजग्मुस्तत्रमहौजसः ॥ गोपवृद्धास्ततोदृष्ट्वाविस्मयंपरमंगताः ॥ ९१ यशोदापि
समुद्विग्नाविमुच्यधरणीधरम् ॥ तंविस्मितंसमादायस्तनंप्रादान्महात्मने ॥ ९२ ॥ यस्मान्निबध्यमानस्तुदाम्नामात्राजगत्पतिः ॥ तस्मा
न्महर्षिभिःसर्वैर्दामोदरइतीरितः ॥ ९३ ॥ तौतुकिंनरतांप्राप्तौविमुक्तौयमलार्जुनौ ॥ गोपवृद्धास्ततःसर्वेनन्दगोपपुरोगमाः ॥ ९४ ॥ महो
त्पातमिमंज्ञात्वास्थानान्तरमुपाययुः ॥ वृन्दावनेमनोरम्येयमुनायास्तटेशुभे ॥ ९५ ॥ निवासंचक्रिरेरम्यंगवांगोपीजनस्यच ॥ तत्रतौराम
कृष्णौतुवर्द्धमानौमहाबलौ ॥ ९६ ॥ वत्सपालयुतौवत्सान्पालयामासतुस्तदा ॥ गोवत्समध्यगंकृष्णंबकोनाममहासुरः ॥ ९७ ॥ बकरूपेण
तंहन्तुमुद्युक्तोऽत्रयदूत्तमम् ॥ तंदृष्ट्वावासुदेवोऽपिलोष्टमुद्यम्यलीलया ॥९८॥ ताडयामासपक्षान्तेपपातोर्व्यांमहासुरः ॥ ततःकतिपयाहस्सुगोवत्सान्पा
लयन्वने ॥९९॥छायायांजम्बुवृक्षस्यप्रसुप्तौपल्लवेमृदौ ॥ एतस्मिन्नन्तरेदेवोब्रह्मादेवगणैर्वृतः ॥१००॥ द्रष्टुंकृष्णंसमागम्यसुप्तौदृष्ट्वायदूत्तमौ ॥वत्सान्गो
पशिशून्हृत्वाजगामत्रिदिवंपुनः ॥ १ ॥ प्रबुद्धौतौसमालोक्यविनष्टाञ्छिशुवत्सकान् ॥ गोवत्सागोपबालाश्चक्वगताइतिविस्मितौ ॥ २ ॥
ज्ञात्वाकृष्णस्तुतत्कर्मप्रजापतिकृतंतदा ॥ तथैवससृजेबालान्गोवत्सांश्चसनातनः ॥ ३ ॥ यथावर्णंयथारूपंतथैवमधुसूदनः ॥ ससर्जवत्सान्गोपा
लानविताजगतांप्रभुः ॥ ४ ॥ दृष्ट्वासायाह्नसमयेगावस्त्वेषांचमातरः ॥ स्वान्स्वान्वत्सानुपागम्ययथापूर्वंप्रवर्तिताः ॥ ५ ॥ एवंसंवत्सरेकालेगतेतत्र
महात्मनः ॥ प्रजापतिःपुनस्तस्मैददौवत्सान्सबालकान् ॥ ६ ॥ कृताञ्जलिपुटोभूत्वापरिणीयप्रणम्यच ॥ भयादुवाचगोविन्दंब्रह्मात्रिभुवनेश्वरः
॥ ७ ॥ ब्रह्मोवाच ॥ नमोनमस्तेसर्वात्मंस्तत्त्वज्ञानस्वरूपिणे ॥ नित्यानन्दस्वरूपायप्रयतात्मन्महात्मने ॥ ८ ॥ अणुबृहत्स्थूलतररूपसर्वगताव्यय॥
अनादिमध्यान्तरूपस्वरूपात्मन्नमोऽस्तुते ॥ ९ ॥ नित्यज्ञानबलैश्वर्यवीर्यतेजोमयायच ॥ महाशक्तेनमस्तुभ्यंपूर्णषाड्गुण्यमूर्तये ॥ ११० ॥ त्वंवेद
पुरुषोब्रह्मन्महापुरुषएवच ॥ शारीरपुरुषस्त्वंचछन्दःपुरुषएवच ॥ ११ ॥ चत्वारःपुरुषास्त्वंचपुराणःपुरुषोत्तमः ॥ विभूतयस्तवब्रह्मन्पृथिव्यग्न्य
निलादयः ॥ १२ ॥ तववाचासमुद्भूतौक्ष्मावह्नीजगदीश्वर ॥ अन्तरिक्षंचवायुश्चसृष्टौप्राणेनतेविभो ॥ १३ ॥ चक्षुषातवसंसृष्टौद्यौ
श्चादित्यस्तथाव्यय ॥ दिशश्चचन्द्रमाःसृष्टाःश्रोत्रेणतवचानघ ॥ १४ ॥ अपांस्रावश्चवरुणोमनसातेमहेश्वर ॥ उक्तेमहतिमीमांसे
एतंब्रह्मप्रचक्षते ॥ १५ ॥ एतमेवाग्निमध्वर्युरेतमेवमहाव्रते ॥ छन्दोगाएतमप्येतंदिव्येतंवायुरेवतत् ॥ १६ ॥ आकाशएतमप्स्वेतमोषधीष्वेतमेवच ॥
तथावनस्पतिष्वेतंचन्द्रमस्येतमेवच ॥ १७ ॥ नक्षत्रेषुचसर्वेषुग्रहेष्वेतंदिवाकरे ॥ सर्वभूतेष्वेतमेवब्रह्मेत्याख्यातिचश्रुतिः ॥ १८ ॥ तदेवपरमंब्रह्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

प्रज्ञातंपरितोऽमृतम्॥हिरण्मयोऽव्ययोयज्ञःशुचिःशुचिपदित्यपि ॥१९॥ वैदिकान्यभिधेयानितवैवान्यस्यनक्वचित् ॥चक्षुर्मयंश्रोत्रमयंछन्दोमयमनो
मयम्॥१२०॥वाङ्मयंपरमात्मानंपरेशंशंसतिश्रुतिः॥इतिसर्वोपनिषदामर्थस्त्वंकमलेक्षण॥२१॥ स्तोतुंनशक्तोऽहंत्वांतुसर्ववेदान्तपारगम्॥महापराध
मेतत्तेवत्सापहरणंमया ॥कृतंतत्क्षम्यतांनाथशरणागतवत्सल॥२२॥महेश्वरउवाच ॥ एवंस्तुत्वाहरिंवेधाःप्रणम्यचपुनःपुनः ॥ वत्सान्दत्त्वापुनस्त
स्मप्रययौस्वयमालयम् ॥ २३ ॥ हृदिकृत्वासदादेविबालरूपंहरिंविधिः ॥ उवासत्रिदशैःसार्द्धंहृष्टपुष्टोमहातपाः ॥ २४ ॥ कृष्णेनसृष्टावत्सावैपूर्व
वत्सास्तथार्भकाः ॥ अवापुरेकतांतत्रपश्यतांत्रिदिवौकसाम् ॥ २५ ॥ कृष्णस्तुवत्सपालैर्वैप्रययौनन्दगोकुलम्॥ ततःकतिपयाहस्सुगोपालै
र्यदुपुङ्गवः ॥ २६ ॥ ह्रदंगत्वाथकालिन्द्यास्तत्रस्थंसुमहाविषम् ॥ सहस्रशीर्षंबलिनंनागराजमथाच्युतः ॥ २७ ॥ निष्पिष्यफण
साहस्रंपादेनैकेनलीलया ॥ प्राणसंशयमापन्नंचकारमधुसूदनः ॥ २८ ॥ सकालियोलब्धसंज्ञस्तमेवशरणंययौ ॥ ररक्षभगवान्कृष्णोनागंत्य
क्तविषंतदा ॥ २९ ॥ वैनतेयभयाद्भीतंस्वपदेनाङ्क्यमूर्द्धसु ॥ ह्रदाद्विवासयामासकालिन्द्यायदुपुङ्गवः ॥ १३० ॥ त्यक्त्वासतंह्रदंतूर्णंपुत्रदार
समन्वितः ॥ नमस्कृत्याथगोविन्दंप्रययौकालियस्तदा ॥ ३१ ॥ विषदग्धास्तुयेपूर्वंतत्तीरस्थाश्चशाखिनः ॥ कृष्णेनवीक्षितास्तूर्णंफलिनःपुष्पि
णोऽभवन् ॥ ३२ ॥ अथकालेनकौमारमवाप्यमधुसूदनः ॥ गोवृन्दंपालयामाससर्वदेवमयःप्रभुः ॥ ३३ ॥ स्वसमानवयोभिस्तुगोपालैस्तुयदू
त्तमः ॥ वृन्दावनेमनोरम्येसरामोविचचारह ॥ ३४ ॥ तत्रहत्वामहाघोरंसर्परूपंमहासुरम्॥ अपहत्यमहाकायंमेरुमन्दरगौरवम् ॥ ३५ ॥ धेनुकस्य
वनंप्राप्यतालहिन्तालगह्वरम् ॥ धेनुकंपर्वताकारंखररूपधरंसदा ॥ ३६ ॥ पादौगृह्यसमुत्क्षिप्यतालेनविजघानह ॥ तत्क्षणादेवतत्पाला
स्तदन्तेरेमिरेतदा ॥ ३७ ॥ निष्क्रम्यतद्वनात्तूर्णंभाण्डीरंवटमागताः ॥ तत्रतेरामकृष्णाभ्यांचिक्रीडुर्बाललीलया ॥ ३८ ॥ गोप
वेषेणतत्रागात्प्रलम्बोनामराक्षसः ॥ रामंस्वपृष्ठमारोप्यययौतूर्णंनभस्तलम् ॥ ३९ ॥ मत्वातंराक्षसंरामोमुष्टिनातस्यमूर्द्धनि ॥ ताडयामास
रोषेणविह्वलाङ्गस्ततोऽपतत् ॥ १४० ॥ राक्षसेनैवरूपेणविनदन्भैरवंस्वनम् ॥ भिन्नशीर्षतनुस्तत्रममाररुधिरोक्षितः ॥ ४१ ॥ ततःप्रदोष
समयेगोव्रजेनन्दनन्दनः ॥ उवासगोपकन्याभिःक्रीडन्कौमोदवर्चसि ॥४२॥अरिष्टनामादैत्येशोगत्वातत्रवृषाकृतिः ॥कृष्णंहन्तुंसमागत्यजगर्जच
महास्वनम् ॥४३॥ तंदृष्ट्वाविद्रुताःसर्वेगोपालाभयपीडिताः॥ कृष्णोऽपिदृष्ट्वातंरौद्रमागतंदनुजाधिपम् ॥४४ ॥ तालवृक्षंसमुत्पाट्यशृङ्गमध्येव्यपीड
यत ॥ सतुभग्नशिरःशृङ्गोवमन्वैरुधिरंबहु ॥ ४५ ॥पपातभीमवेगेननिदर्दंस्त्यक्तजीवितः ॥ इत्थंहत्वामहाकायमरिष्टंदनुजाधिपम् ॥४६ ॥आहूय

CC-0. In Public Domain. Digitization by eGangotri

गोपबालांश्चतत्रैवोवासगोव्रजे॥ततः कतिपयाहस्सुकेशीनाममहासुरः ॥४७॥ हयकायेनगोविन्दंहन्तुंव्रजमुपाययौ ॥ सगत्वागोव्रजंरम्यमुच्चैर्हेषामथाक
रोत् ॥ ४८ ॥ तेनशब्देनमहतापूरितंभुवनत्रयम् ॥ भीताःसर्वेसुरगणाःशंकमानायुगक्षयम् ॥ ४९ ॥ तत्रस्थामोहिताःसर्वेगोपागोप्यश्चविह्वलाः ॥
लब्धसंज्ञास्तुतेसर्वेविद्रुताश्चसमन्ततः ॥ १५० ॥ गोप्यस्तुशरणंजग्मुःकृष्णंत्राहीतिचाब्रुवन् ॥ नभेतव्यंनभेतव्यमित्याहभक्तवत्सलः ॥ ५१ ॥ समा
श्वास्यततस्तूर्णंमुष्टिनावासवानुजः ॥ ताडयामासशिरसितस्यदैत्यस्यलीलया॥५२॥ विभिन्नदन्तनेत्रोऽसौविननादमहास्वनम् ॥ महाशिलांसमुत्क्षि
प्यतस्याङ्गेवैन्यपातयत् ॥ ५३ ॥ सतुचूर्णितसर्वाङ्गोनिनदन्भैरवंस्वनम् ॥ पपातसहसाभूमौममारचमहासुरः ॥ ५४ ॥ केशिनंनिहतंदृष्ट्वादिविदेव
गणाभृशम् ॥ मुमुचुःपुष्पवर्षाणिसाधुसाध्वितिचाब्रुवन् ॥ ५५ ॥ इत्थंशिशुत्वेवैदैत्यान्हरिर्हत्वाबलोत्कटान् ॥ समुमोदसुखेनैवबलरामसमन्वितः
॥ ५६ ॥ इन्दीवरदलश्यामःपद्मपत्रनिभेक्षणः ॥ पीतांबरधरःस्रग्वीवनमालाविभूषितः ॥ ५७ ॥ कौस्तुभोद्भासितोरस्कश्चित्रमाल्यानुले
पनः ॥ विचित्राभरणैर्युक्तःकुण्डलाभ्यांविराजितः ॥ ५८ ॥ आमुक्ततुलसीमालःकस्तूरीतिलकाञ्चितः ॥ सुस्निग्धनीलकुटिलकबरीकृतकेशवान्
॥ ५९ ॥ बद्धैर्नानाविधैःपुष्पैर्बर्हिबर्हावतंसकः ॥ रक्तारविन्दसदृशहस्तपादतलाधरः ॥ १६० ॥ वक्रमध्यगशीतांशुकलङ्कभ्रूलताननः ॥
हारनूपुरकेयूरैःकटकाभ्यांविराजितः ॥ ६१ ॥ वृन्दावनेमहारम्येफलपुष्पविराजिते ॥ रम्यंनिनादयन्वेणुंतत्रास्तेयदुनन्दनः ॥ ६२ ॥ अवधीरित
कन्दर्पकोटिलावण्यमच्युतम् ॥ सर्वागोपस्त्रियोदृष्ट्वामन्मथास्त्रेणपीडिताः ॥ ६३॥ पुरामहर्षयःसर्वेदण्डकारण्यवासिनः ॥ दृष्ट्वारामंहरिंतत्रभोक्तुमैच्छन्सु
विग्रहम् ॥ ६४ ॥ तेसर्वेस्त्रीत्वमापन्नाःसमुद्भूतास्तुगोकुले ॥ हरिंसंप्राप्यकामेनततोमुक्ताभवार्णवात् ॥ ६५ ॥ क्रोधेनैवयथादैत्याःसमेत्य
मधुसूदनम् ॥ निधनंप्राप्यसंग्रामेहतामुक्तिमवाप्नुयुः ॥ ६६ ॥ कामक्रोधौनृणांलोकेनिरयस्यैवकारणम् ॥ हरिंसमेत्यभावेनमुक्तागोप्यःसुरद्विषः॥६७॥
कामाद्भयाद्वाद्वेषाद्वायेभजन्तिजनार्दनम् ॥ तेप्राप्नुवन्तिवैकुण्ठंकिंपुनर्भक्तियोगतः ॥६८॥ तस्यवेणुध्वनिंश्रुत्वारजन्यांबल्लवाङ्गनाः॥ शयनादुत्थिताः
सर्वाविकीर्णाम्बरमूर्द्धजाः ॥ ६९ ॥ त्यक्त्वापतीन्सुतान्बन्धूंस्त्यक्त्वालज्जांकुलंस्वकम् ॥ जगत्पतिंसमाजग्मुःकन्दर्पशरपीडिताः ॥ १७० ॥
समेत्यगोप्यःसर्वास्तुभुजैरालिङ्ग्यकेशवम् ॥ बुभुजुश्चाधरंदेव्यःसुधामृतमिवामराः ॥ ७१ ॥ ताभिःसर्वाभिरात्मेशःक्रीडयामासगोव्रजे ॥ तेनापि
ताःस्त्रियःसर्वारेमिरेनिर्भयाव्रजे ॥ ७२ ॥ इत्येवंरमयामासुरहन्यहनिकेशवम् ॥ वृन्दावनेमनोरम्येकालिन्दीपुलिनेतथा ॥ ७३ ॥ पार्वत्युवाच ॥
धर्मसंरक्षणार्थायजगत्यामवतीर्यसः ॥ परदाराभिगमनंकथंकुर्याज्जनार्दनः ॥ ७४ ॥ रुद्रउवाच ॥ स्वशरीरपरिष्वङ्गाद्रतिर्नास्तिशुभानने ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सर्वंजगच्चतस्याङ्गंपृथगत्रनविद्यते ॥ ७५ ॥ स्त्रीपुम्भेदोनवैतस्यपुरुषस्यमहात्मनः ॥ निसर्गात्सर्वभर्तृत्वादात्मेशत्वाज्जगत्पतेः ॥ ७६ ॥ तथाप
हृतपाप्मत्वसामर्थ्याद्व्यापिनःप्रभोः ॥ दोषोऽत्रनास्तिसुभगेदेवस्यपरमात्मनः ॥ ७७ ॥ वसिष्ठउवाच ॥ एवमुक्त्वातुगिरिजांरुद्रःश्रीत्रिपुरान्तकः॥
कृष्णस्यशेषंचरितमाख्यातुंसंप्रचक्रमे ॥ ७८ ॥ रुद्रउवाच ॥ शरत्कालेतुसंप्राप्तेनन्दगोपपुरोगमाः ॥ गोपामहोत्सवंकर्तुमारब्धास्त्रिदशेशितुः ॥
॥ ७९ ॥ तदुत्सवंतुगोविन्दोनिवार्याथशतक्रतोः ॥ गोवर्द्धनाद्रिराजस्यकारयामासवीर्यवान् ॥ १८० ॥ ततःक्रुद्धःसहस्राक्षोनन्दगोपस्यगोव्रजे ॥
ववर्षचमहावृष्टिंसप्तरात्रंनिरन्तरम् ॥ ८१ ॥ गोवर्द्धनंसमुत्पाट्यमहाशैलंजनार्दनः ॥ तेषांसंरक्षणार्थायधारयामासलीलया ॥ ८२ ॥ तस्यच्छायां
गिरेःप्राप्यगोपागोप्यश्चसुव्रते ॥ अवसंश्चसुखेनैवहर्म्यान्तरगताइव ॥ ८३ ॥ ततःशक्रःसहस्राक्षोभीतःसंभ्रान्तचेतसा ॥ वारयामासतद्वर्षंययौनन्द
स्यतद्व्रजम् ॥ ८४ ॥ कृष्णोऽपितंमहाशैलंयथापूर्वंन्यवेशयत् ॥ गोपवृद्धाश्चतेसर्वेनन्दगोपपुरोगमाः ॥ ८५ ॥ परिपूज्यचगोविन्दंपरंविस्मयमा
ययुः ॥ ततःशतक्रतुर्देवंसमेत्यमधुसूदनम् ॥ तुष्टावप्राञ्जलिर्भूत्वाहर्षगद्गदयागिरा ॥ ८६ ॥ इन्द्रउवाच ॥ नमस्तेपुण्डरीकाक्षसर्वज्ञामितविक्रम ॥
त्रिगुणातीतसर्वेशविश्वस्यात्मन्नमोऽस्तुते ॥ ८७ ॥ त्वंयज्ञस्त्वंवषट्कारस्त्वमोङ्कारःक्रतुर्हविः ॥ त्वमेवसर्वदेवानांपितामाताचकेशव ॥ ८८ ॥ अग्रे
हिरण्यगर्भस्त्वंभूतस्यसमवर्त्तत ॥ त्वमेवैकःपतिरसिपुरुषस्त्वंहिरण्मयः ॥ ८९ ॥ पृथिवींद्यामिमांदेवत्वमेवधृतवानसि ॥ आत्मदःफलदोयश्च
स्यादेवंजगदीश्वर ॥ १९० ॥ अवातंतच्चत्रिदशैःप्रकाशंजगतांपते ॥ अमृतंचैवमृत्युश्चच्छायातवसनातन ॥ ९१ ॥ तस्मैदेवायभवतेविधेम
हविषावयम् ॥ हेमवन्तइमेयस्यसमुद्भूताहिरण्मयाः ॥ ९२ ॥ समुद्रारसनायस्यवाहस्तस्यैवकेशव ॥ इमादिशःप्रतिदिशोवायुर्यस्यतवाव्यय
॥ ९३ ॥ तस्मैदेवायभवतेविधेमहविषावयम् ॥ येनत्वयासमारूढापृथिवीवर्द्धितापुनः ॥ ९४ ॥ स्वर्लोकःस्तम्भितोयेनत्वयाब्रह्मन्महेश्वर ॥
त्वमन्तरिक्षेरजसोवसानःसर्वगोऽव्ययः ॥ ९५ ॥ तस्मैदेवायभवतेविधेमहविषावयम् ॥ यंक्रन्दसीराजमानेतत्प्रभासेगुणान्विते ॥ ९६ ॥ अभ्यैक्षेतां
चमनसाअवश्यंश्रीश्चसर्वदा ॥ यत्रास्तिसूरउदितोविभातिपरमेपदे ॥ ९७ ॥ तस्मैदेवायभवतेविधेमहविषावयम् ॥ यदापोबृहतीर्ब्रह्मविश्वमायं
जनार्दनः ॥ ९८ ॥ गर्भंदधानाःसर्गेऽत्रजनयन्तीरघौघकृत् ॥ समवर्ततदेवानामसुरेकोऽव्ययोविभुः ॥ ९९ ॥ तस्मैदेवायभवतेविधेमहविषा
वयम् ॥ यआपोमहिनादक्षपर्यपश्यत्प्रजापतिम् ॥ २०० ॥ यज्ञंदधानास्तत्रादौजनयन्तीर्हविःपुमान् ॥ योदेवेष्वेकएवासीदधिदेवःपरात्परः
॥ १ ॥ तस्मैदेवायभवतेविधेमहविषावयम् ॥ मानोहिंसीज्जनितायःपृथिव्याअव्ययःपुमान् ॥ २ ॥ योवादिवंसत्यधर्माजजानाव्यय

CC-0. In Public Domain. Digitization by eGangotri

ईश्वरः ॥ यश्चन्द्रोबृहतीरपोजजानसकलंजगत ॥ ३ ॥ तस्मैदेवायंभवतेविधेमहविषावयम् ॥ एतानिविश्वजातानिबभूवपरिताप्रभ ॥ ४ ॥
त्वदुत्पन्नप्रजाध्यक्षभविष्यद्भूतमच्युतः ॥ यजामस्त्वांचयत्कामास्तन्नोअस्तुसमासतः ॥ ५ ॥ रयीणांपतयःस्यामतवकारुण्यवीक्षणात् ॥
हिरण्याख्यःपुरुषोहिरण्यश्मश्रुकेशवान् ॥ ६ ॥ आप्रणखात्सर्वंहिरण्यंसवितातुहिरण्यभाक् ॥ असौसर्वगतोब्रह्मायस्त्वादित्येव्यवस्थितः ॥
॥ ७ ॥ यथाकप्यासंपुण्डरीकमक्षिणीतस्यनान्यतः ॥ तद्देवस्यसवितुर्वरेण्यंभर्गउत्तमम् ॥ सदाधीमहितेरूपंधियोयोनःप्रभातिहि ॥ ८ ॥
नमस्तेपुण्डरीकाक्षश्रीशसर्वेशकेशव ॥ वेदान्तवेद्ययज्ञेशयज्ञरूपनमोऽस्तुते ॥ ९ ॥ नमस्तेवासुदेवायगोपवेषायतेनमः ॥ तत्सर्वंध्वंसनादेवअपराधं
मयाकृतम् ॥ २१० ॥ तत्क्षम्यतांजगन्नाथघृणाब्धेपुरुषोत्तम ॥ अल्पेनैवहिकालेनजहिकंसंदुरासदम् ॥ देवानांहिहितंकृत्वासुखेऽस्थापयमेदिनीम् ॥
॥ ११ ॥ महादेवउवाच ॥ इतिसंस्तुत्यगोविन्दंसर्वदेवेश्वरोहरिः ॥ सुधामृतेनाभ्यषिञ्चद्दिव्याम्बरविभूषणैः ॥ १२ ॥ अर्चयित्वातुदेवेशंजगामत्रिदिवं
पुनः ॥ गोपवृद्धाश्चगोप्यश्चदृष्ट्वातत्रशतक्रतुम् ॥ १३ ॥ तेनतेपूजिताश्चैवप्रहर्षमतुलंययुः ॥ रामकृष्णौमहावीर्यौदिव्याभरणभूषितौ ॥ १४ ॥ नन्दस्य
गोव्रजेरम्येसुसुखेनैवतस्थतुः ॥ एतस्मिन्नन्तरेदेविनारदोमुनिसत्तमः ॥ १५ ॥ सहसामथुरांगत्वाकंसस्यान्तिकमाविशत् ॥ राज्ञासंपूजितस्तत्र
समासीनःशुभासने ॥१६॥ सर्वंविज्ञापयामासचेष्टितंशार्ङ्गिणस्तदा ॥ देवतानांसमुद्योगंजन्मवैकेशवस्यच ॥ १७॥ तथाचवसुदेवेनपुत्रनिक्षेपणंव्रजे ॥
निधनंराक्षसानांचसर्पराजविवासनम् ॥ १८॥ धारणंगिरिवर्यस्यशतक्रतुसमागमम् ॥ निवेदयित्वाकंसस्यसर्वंनिरवशेषतः ॥ १९ ॥ प्रययौब्रह्मभवनं
पूजितस्तेनरक्षसा ॥ कंसःसमुद्विग्नमनामन्त्रिभिःपरिवेष्टितः ॥ २२० ॥ मन्त्रयामासतैःसाकमात्मनोनिधनंप्रति ॥ तत्रबुद्धिमतांश्रेष्ठमक्रूरंधर्मवत्सलम् ॥
उवाचात्महितंकार्यंदानवेन्द्रोमहाबलः॥२१॥कंसउवाच॥मद्भयात्रिदशाःसर्वेशतक्रतुपुरोगमाः॥विष्णोःसमीपमागत्यभयार्त्ताःशरणंगताः॥२२॥सतेषाम
भयंदत्त्वाभगवान्भूतभावनः॥उत्पन्नोदेवकीगर्भेमांहन्तुंमधुसूदनः॥२३॥वसुदेवोऽपिदुष्टात्मावञ्चयित्वातुमांनिशि ॥ पुत्रंनिक्षिप्तवान्गेहेनन्दस्यसुदुरात्म
नः ॥ २४ ॥ बाल्येनैवदुराधर्षोविजघानमहासुरान् ॥ मांहन्तुमपिसन्नद्धोभवेदेवनसंशयः ॥२५ ॥ सतुहन्तुंनवैशक्तःसेन्द्रैरपिसुरासुरैः ॥ उपायेनैव
हन्तव्यःसमानीयमयातदा ॥ २६ ॥ मदोत्कटैस्तुमातङ्गैर्मल्लैश्चवरवाजिभिः ॥ येनकेनाप्युपायेनहन्तुंशक्यमिहैवतु ॥ २७ ॥ तस्मात्त्वंगोव्रजंगत्वा
कृष्णंरामंचयादव ॥ सर्वान्गोपालवृद्धांश्चनन्दगोपपुरोगमान् ॥ उपभोक्तुंधनुर्यागमिहानययदूत्तम ॥ २८ ॥ महादेवउवाच ॥ तथेत्युक्त्वायदुश्रेष्ठो
रथमारुह्यवीर्यवान् ॥ प्रययौगोकुलंरम्यंकृष्णसंदर्शनोत्सुकः ॥२९॥ महाभागवतश्रेष्ठोगवांमध्येव्यवस्थितम्॥ददर्शकृष्णमक्लिष्टमक्रूरोविनयान्वितः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ २३० ॥ नीलनीरदसंकाशंसर्वाभरणभूषितम् ॥ पद्मपत्रविशालाक्षंदीर्घबाहुमनामयम् ॥ ३१ ॥ पीतवस्त्रेणसंवीतंसर्वावयवसुन्दरम् ॥ कौस्तुभो
द्भासितोरस्कंरत्नकुण्डलशोभितम् ॥ ३२ ॥ हरिचन्दनलिप्तांगंकस्तूरीतिलकाञ्चितम् ॥ तुलसीवनमालाढ्यंवन्यपुष्पावतंसकम् ॥ ३३ ॥ गोप

कन्यापरिवृतंदृष्ट्वातत्रजनार्दनम् ॥ पुलकाङ्कितसर्वाङ्गोहर्षाश्रुप्लुतलोचनः ॥३४॥ अवरुह्यरथात्तस्मात्प्रणनामयदूद्वहः ॥ हर्षात्समेत्यगोपालंपरिणीय
प्रणम्यच ॥३५॥ रक्तारविन्दसदृशेवज्रचक्राङ्कचिह्निते ॥ स्वमूर्ध्निधृत्वापादाब्जेप्रणनामपुनःपुनः ॥३६॥कैलासशिखराभासंनीलाम्बरधरंप्रभुम् ॥ शर
त्पूर्णेन्दुसदृशंमुक्तादामविभूषितम्॥३७॥बलरामंततोदृष्ट्वाप्रणनामसयादवः॥हर्षेणोत्थाप्यतौवीरौपरिगृह्ययदूत्तमौ ॥३८॥ गृहमाजग्मतुर्वीरौतेनाक्रूरेण
वृष्णिना ॥ नन्दगोपस्तुतंदृष्ट्वायदुश्रेष्ठंसमागतम् ॥ ३९ ॥ अभिगम्यमहातेजानिवेश्यपरमासने ॥ अर्चयामासविधिवदर्घ्यपाद्यादिभिर्मुदा ॥
॥२४०॥वस्त्रैःसमर्हणैर्दिव्यैरर्चयामासभक्तितः॥ अक्रूरोरामकृष्णाभ्यांवस्त्राण्याभरणानिच॥४१॥प्रददौनन्दगोपाययशोदायैचयादवः ॥ पृष्ट्वाकुशल
मव्यग्रमासीनस्तुकुशासने ॥ राजकार्याणिसर्वाणिसंपृष्टःप्राहबुद्धिमान् ॥ ४२ ॥अक्रूरउवाच ॥ एषकृष्णोमहातेजास्साक्षान्नारायणोऽव्ययः ॥ देव
तानांहितार्थायसाधूनांरक्षणायच ॥ ४३ ॥ भूभारकविनाशायधर्मसंस्थापनायच ॥ कंसादीनांतुदैत्यानांसर्वेषांनिधनायच ॥ ४४ ॥ संप्रार्थितःसुर
गणैर्मुनिभिश्चमहात्मभिः ॥ देवकीजठरेजातःप्रावृट्कालेमहानिशि ॥ ४५ ॥ भयात्कंसस्यदेवेशमानीयानकदुन्दुभिः ॥ तवगेहेतदारात्रौपुत्रंनिक्षिप्त
वान्हरिम् ॥ ४६ ॥ तस्मिन्नेवतुकालेऽपियशोदातुयशस्विनी ॥ कन्यांमायांशसंभूतांप्रासूततशुभाननाम् ॥ ४७ ॥ तयासंमोहितंसर्वमिदंव्रजकुलं
शुभम् ॥ मूर्च्छितायायशोदायाःशयनेयदुपुङ्गवम् ॥ ४८ ॥ कृष्णंनिक्षिप्यतांकन्यामादायस्वगृहंययौ ॥ तांतुनिक्षिप्यदेवक्याःशयनेबहिरागमत्
॥ ४९ ॥ सारुरोदततःक्षिप्रंदेवकीशयनेस्थिता ॥ तच्छ्रुत्वासहसाकंसःकन्यामादायसुव्रत ॥ २५० ॥ भ्रामयित्वाशिलापृष्ठेचिक्षेपो
त्पत्यवीर्यवान् ॥ समुत्थायचसाकन्यासायुधाष्टभुजान्विता ॥ गगनस्थारुषाकंसंप्राहगम्भीरयागिरा ॥ ५१ ॥
कन्योवाच ॥ योऽनन्तःसर्वदेवानामीश्वरःपुरुषोत्तमः ॥ यातस्तववधार्थायगोव्रजेदानवाधम ॥ ५२ ॥ अक्रूरउवाच ॥ इत्युक्त्वासामहा
मायाहिमवन्तंसमाययौ ॥ तदाप्रभृतिदुष्टात्माभयादुद्विग्नमानसः ॥ ५३ ॥ दानवान्प्रेषयामासनिधनायमहात्मनः ॥ बालेनैवहताःसर्वेलील
यानेनधीमता ॥ ५४ ॥ अत्यद्भुतानिकर्माणिकृतवान्परमेश्वरः ॥ गोवर्द्धनाद्रिधरणंनागराजविवासनम् ॥ ५५ ॥ समागमंमहेन्द्रस्यनिधनंसर्वरक्ष
साम् ॥ श्रुत्वादेवर्षिणाख्यातमतीवभयपीडितः ॥ ५६ ॥ इतोर्नीत्वामहाबाहूरामकृष्णौदुरासदौ ॥ मदोत्कटैर्महानागैर्मल्लैर्वाहन्तुमुद्यतः ॥ ५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृष्णस्यानयनार्थायप्रेरयामाससमामिह ॥ वसुदेवस्यदुष्टात्मा निग्रहंकृतवानसौ ॥ ५८ ॥ एतत्सर्वंसमाख्यातंचष्टितंसुदुरात्मनः ॥ उपभोक्तुंधनुर्यागं यूयंसर्वेव्रजौकसः ॥५९॥ दध्याज्यादिगृहीत्वावैश्वोभूतेगन्तुमर्हथ ॥ सहितारामकृष्णाभ्यांगोपाःसर्वेतदन्तिकम् ॥२६० ॥ कृष्णेननिहतःकंसोभवि ष्यतिनसंशयः ॥ परित्यज्यभयंतस्माद्गमिष्यध्वंनृपाज्ञया ॥६१॥ ईश्वरउवाच ॥इत्युक्त्वासतदाक्रूरस्तूष्णीमासीत्सुबुद्धिमान् ॥ तस्यतद्वचनंश्रुत्वा दारुणंरोमहर्षणम् ॥ ६२ ॥ नन्दगोपप्रमुखाःसर्वेगोपवृद्धाभयातुराः ॥ जग्मुस्तेचमहादुःखसागरंशोकमोहिताः ॥ ६३ ॥ तानाश्वास्यहरिस्तत्रहृष्टा कमललोचनः ॥ नभीःकार्येतिसंप्राहराक्षसंप्रतिवीर्यवान् ॥ ६४ ॥ विनाशायप्रयास्यामिकंसस्यास्यदुरात्मनः ॥ मथुरांसहरामेणभवद्भिःसहसं गतः ॥ ६५ ॥ तत्रहत्वादुरात्मानंकंसंदानवपुङ्गवम् ॥ सर्वांश्चराक्षसान्हत्वापालयिष्यामिमेदिनीम् ॥ ६६ ॥ तस्माच्छोकंपरित्यज्यगच्छध्वंमथुरां पुरीम् ॥ एवमुक्तास्तुहरिणागोपानन्दपुरोगमाः ॥ ६७ ॥ मुहुर्मुहुःपरिष्वज्यमूर्ध्न्याघ्राणंप्रचक्रिरे ॥ अप्रमेयानिकर्माणिविचार्यसुमहात्मनः ॥६८॥ अक्रूरवचनाच्चैवगोपाःसर्वेगतव्यथाः ॥ दुग्धदध्याज्ययुक्तानिशुचीनिविविधानिच ॥ ६९॥ पक्वान्नानिसुहृद्यानिस्वादूनिमधुराणिच ॥ अक्रूरायददौ सौम्यंयशोदाभोजनंबहु ॥ २७० ॥ सहितोरामकृष्णाभ्यांनन्दाद्यैर्गोपसत्तमैः ॥ सुहृद्भिर्बालवृद्धैश्चभवनेसमलङ्कृते ॥७१॥ दत्तंयशोदयासौम्यंभोजनं कलुषापहम् ॥ बुभुजेयादवश्रेष्ठोह्यन्नंरोगापहंशुभम् ॥ ७२ ॥ भोजयित्वायथान्यायंदत्त्वाचमनमम्भसा ॥ सकर्पूरंसताम्बूलंददौतस्मैदृढव्रता ॥७३॥ अस्तंयातेदिनकरेसन्ध्यामन्वास्ययादवः ॥ सहितोरामकृष्णाभ्यांभुक्त्वाक्षीरान्नमुत्तमम् ॥ ७४ ॥ ताभ्यामेवतदाक्रूरःशयनंसमुपाविशत् ॥ तस्मिंमस्तुभवनेश्रेष्ठेरम्येदीपविराजिते ॥ ७५ ॥ श्लक्ष्णेविचित्रपर्यङ्केनानापुष्पविराजिते ॥ तस्मिन्शेतेहरिःकृष्णःशेषेनारायणोयथा ॥ ७६ ॥ तंदृष्ट्वासहसाक्रूरोहर्षाश्रुपुलकाङ्कितः ॥ विहायतामसींनिद्रांसुश्रेयःसमुदीक्ष्यवै ॥ ७७ ॥ पादसंवाहनंविष्णोश्चक्रेभागवतो त्तमः ॥ एतावतामेसाफल्यंजीवितंचसुजीवितम् ॥ ७८ ॥ इदंत्रैलोक्यमैश्वर्यमिदंवैसुखमुत्तमम् ॥ इदंराज्यमिदंधर्म्यमिदंमोक्षसुखं परम् ॥ ७९ ॥ नशक्यंमनसास्मर्तुंशिवब्रह्मादिदैवतैः ॥ सनकाद्यैर्मुनीन्द्रैस्तुवसिष्ठाद्यैर्महर्षिभिः ॥ २८० ॥ तच्छ्रीशस्यपदद्वन्द्वंशरदम्बुरुहोज्ज्व लम् ॥ संस्पृष्टमिन्दिराश्लक्ष्णकराभ्यांसुसुखंपरम् ॥ ८१ ॥ दिष्ट्यालब्धंमयाविष्णोःश्रीपादाब्जयुगंशुभम् ॥ इत्येवंवदतस्तस्यहरिपादाब्जस ङ्गिनः ॥ ८२ ॥ व्यतीतासाक्षणाद्रात्रिस्तद्ब्रह्मानन्दगौरवात् ॥ ततःप्रभातेविमलेदिविदेवगणोत्तमैः ॥८३॥ संस्तूयमानोबुबुधेतस्मात्तुशयनाद्धरिः ॥ उपस्पृश्ययथान्यायंसहरामेणधीमता ॥ ८४ ॥ पपातपादयोर्मातुःप्रयाणंचाभ्यरोचयत् ॥ समुत्थाप्ययशोदातुदुःखहर्षसमन्विता ॥ ८५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अश्रुपूर्णमुखीपुत्रौप्रेम्णासंपरिषस्वजे ॥ आशिषंप्रददौदेवीतनयाभ्यांदृढव्रता ॥ ८६ ॥ विससर्जमहावीरौसमालिङ्ग्यमुहुर्मुहुः ॥ अक्रूरोऽपियशोदायै
प्रणम्यप्राहसाञ्जलिः ॥ ८७ ॥ अक्रूरउवाच ॥ प्रयास्यामिमहाभागेप्रसादंकुरुमेऽनघे ॥ एषकृष्णोमहाबाहुःकंसंहत्वामहाबलम् ॥ ८८ ॥ सर्वस्य
जगतोराजाभविष्यतिनसंशयः ॥ तस्माच्छोकंपरित्यज्यसुखीभववरानने ॥ ८९ ॥ ईश्वरउवाच ॥ इत्युक्तयातयाक्रूरोविसृष्टोयदुसत्तमः ॥
सहितोरामकृष्णाभ्यामारुरोहरथोत्तमम् ॥ २९० ॥ प्रययौमथुरांशीघ्रंस्तूयमानोऽप्सरोगणैः ॥ नन्दगोपमुखाःसर्वेगोपवृद्धास्तमन्वयुः ॥ ९१ ॥
पुनर्गृहीत्वादध्याज्यंफलानिविविधानिच ॥ तंप्रयान्तंहरिंदृष्ट्वागोकुलाद्गोपयोषितः ॥ ९२ ॥ अनुजग्मुर्विनिष्क्रान्तंरथस्थंमधुसूदनम् ॥ निवर्त्तया
मासहरिस्ताःसर्वागोपयोषितः ॥ ९३ ॥ शोकसंतप्तहृदयाविलेपुःकमलेक्षणम् ॥ हाकृष्णकृष्णकृष्णेतिगोविन्देत्यरुदन्मुहुः ॥ ९४ ॥ अश्रुपूर्णेक्षणा
दीनारुदन्त्यस्तत्रसंस्थिताः ॥ अथाक्रूरोरथंदिव्यंचोदयामासगोव्रजात् ॥ ९५ ॥ सहितोरामकृष्णाभ्यांमथुरांप्रतियादवः ॥ उत्तीर्ययमुनांशीघ्रंकूले
स्थाप्यरथोत्तमम् ॥ ९६ ॥ अवरुह्यरथात्तस्मात्स्नातुंतत्रोपचक्रमे ॥ तथाचावश्यकंकर्तुंनिमज्ज्याथजलेशुभे ॥ ९७ ॥ तत्राघमर्षणंसम्यग्जपन्भाग
वतोत्तमः ॥ ददर्शतौजलेतत्ररामकृष्णौशुभान्वितौ ॥ ९८ ॥ शरत्कोटीन्दुसङ्काशंनीलाम्बरधरंप्रभुम् ॥ दिव्यचन्दनदिग्धाङ्गमौक्तिकाभरण
च्छविम् ॥ ९९ ॥ रक्तारविन्दनयनंपुण्डरीकावतंसकम् ॥ रामंददर्शकृष्णंचनीलनीरदसन्निभम् ॥ ३०० ॥ दिव्यपीताम्बरधरंपुण्डरीकायतेक्षणम् ॥
हरिचन्दनलिप्ताङ्गंनानारत्नविभूषितम् ॥ १ ॥ दृष्ट्वातत्रयदुश्रेष्ठोविस्मयंपरमंगतः ॥ उत्थायस्यन्दनेतत्रतौददर्शमहाबलौ ॥ २ ॥ पुनर
प्यत्रनिमज्ज्यजपन्मन्त्रद्वयंहरिम् ॥ सुधाब्धौशेषपर्यङ्केरमयासहितंहरिम् ॥ ३ ॥ सनकाद्यैःस्तूयमानंसर्वैर्देवैरुपासितम् ॥ दृष्ट्वातस्मिन्जलेदेवं
विस्मयंपरमंययौ ॥ तुष्टावाथयदुश्रेष्ठोहरिंसर्वगमीश्वरम् ॥ ४ ॥ अक्रूरउवाच ॥ कालात्मनेनमस्तुभ्यमनादिनिधनायच ॥ अव्यक्तायनमस्तुभ्य
मविकारायतेनमः ॥ ५ ॥ भूतभर्त्रेनमस्तुभ्यंभूतव्याप्तायतेनमः ॥ नमस्तेसर्वभूतानांनियन्त्रेपरमात्मने ॥ ६ ॥ विकारायाविकारायप्रत्यक्ष
पुरुषायच ॥ गुणभर्त्रेनमस्तुभ्यंनियमायनमोनमः ॥ ७ ॥ देशकालादिनिर्भेदरहितायपरात्मने ॥ अनन्तायनमस्तुभ्यमच्युतायनमोनमः ॥ ॥२६२॥
॥ ८ ॥ गोविन्दायनमस्तुभ्यंत्रयीनाथायशार्ङ्गिणे ॥ नारायणायविश्वायवासुदेवायतेनमः ॥ ९ ॥ विष्णवेपुरुरूपायशाश्वतायनमोनमः ॥
पद्मनेत्रायनित्यायशङ्खचक्रधरायच ॥ ३१० ॥ उद्यत्कोटिरविप्रख्यभूषणाञ्चितवर्चसे ॥ हरयेसर्वलोकानामीश्वरायनमोनमः ॥ ११ ॥ सवित्रे
सर्वजगतांबीजायपरमात्मने ॥ संकर्षणायकृष्णायप्रद्युम्नायनमोनमः ॥१२ ॥ अनिरुद्धायधात्रेचविधात्रेविश्वयोनये॥सहस्रमूर्त्तयेतुभ्यंबहुमूर्द्धाङ्घ्रि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बाहवे ॥ १३ ॥ सहस्रनाम्नेनित्यायपुरुषायनमोनमः ॥ नमस्तेनागपर्यङ्कशायिनेसौम्यरूपिणे ॥ १४ ॥ केशवायनमस्तुभ्यंपीतवस्त्रधरायच ॥
लक्ष्मीघनकुचाश्लेषविमर्दोज्ज्वलवक्षसे ॥ श्रीधरायनमस्तुभ्यंश्रीशायानन्तरूपिणे ॥ १५ ॥ ईश्वरउवाच॥ स्नानकालेपठेद्यस्तुदेवंध्यायन्सनातनम्॥
इमंस्तवंनरोभक्त्यामहद्भिर्मुच्यतेह्यघैः ॥ १६ ॥ सर्वतीर्थफलंप्राप्यविष्णुसायुज्यमाप्नुयात् ॥ एवमन्तर्जलेदेवंस्तुत्वाभागवतोत्तमः ॥ १७ ॥
अर्चयामाससजलैःकुसुमैश्वसुगन्धिभिः ॥ कृतकृत्यस्तदाऽक्रूरोनिर्गत्ययमुनाजलात् ॥१८॥ समेत्यरामकृष्णौतुप्रणनामशुभान्वितः ॥ तंदृष्ट्वाप्राह
गोविन्दोविनीतंविस्मितंहरिः ॥ १९ ॥ श्रीकृष्णउवाच ॥ किमाश्चर्यंजलेतस्मिन्दृष्टवानसियादव ॥ ३२० ॥ ईश्वरउवाच ॥ अक्रूरस्तुयदुश्रेष्ठं
प्राहकृष्णंसुतेजसम् ॥ २१ ॥ अक्रूरउवाच ॥ तवसर्वगतस्येशमहिम्नोजगतः प्रभो ॥ किमाश्चर्यंहृषीकेशजगत्सर्वंत्वमेवहि ॥२२॥ त्वमापस्त्वंनभो
वह्निस्त्वंभूमिरनिलस्तथा ॥ चतुर्विधमिदंसर्वंजगत्स्थावरजङ्गमम् ॥ २३ ॥ त्वत्तोनान्यद्वासुदेवजीमूतादमृतंयथा ॥ त्वंयज्ञस्त्वंवषट्कारस्त्व
मोंकारोहविस्तथा ॥ २४ ॥ त्वमेवसर्वदेवानामीश्वरःशाश्वतोऽव्ययः ॥ नाकारणात्कारणाद्वाकारणाकारणात्परः ॥ २५ ॥ धर्मत्राणायदेवेशशरीर
ग्रहणंतव ॥ मत्स्यकूर्मवराहादिवैभवत्वमुपागतः ॥ पासिसर्वमिमंलोकंत्वमेवत्वन्मयंविभो ॥ २६ ॥ ईश्वरउवाच ॥ इतिसंस्तुत्यगोविन्दंप्रणम्य
जगतांपतिम् ॥ आरुरोहरथंदिव्यंताभ्यांसहयदूत्तमः ॥ २७ ॥ ततस्तूर्णंसमासाद्यमथुरांदेवनिर्मिताम् ॥ रामकृष्णौपुरद्वारिनिवेश्यान्तःपुरं
ययौ ॥ २८ ॥ तयोरागमनंतस्यनिवेद्यनृपतेस्तदा ॥ राज्ञासंपूजितस्तेनततःस्वगृहमाविशत् ॥ २९ ॥ अथसायाह्नसमयेराम
कृष्णौमहाबलौ ॥ परस्परंकरौगृह्यमथुरायांसमागतौ ॥ ३३० ॥ गच्छन्तौचमहावीर्यौराजमार्गेयदूत्तमौ ॥ ददृशतुर्महात्मानौरजकंवस्त्ररञ्जकम् ॥
॥ ३१ ॥ दिव्यवस्त्रवृतंराजगेहमायान्तमच्युतः ॥ ययाचेतानिवस्त्राणिसहरामेणवीर्यवान् ॥ ३२ ॥ नदत्तवांस्तदातस्मैरुषावैवस्त्ररञ्जकः ॥
बहूनिकटुवाक्यानिप्राहतत्राध्वनिस्थितः ॥ ३३ ॥ ताडयामासतंकृष्णस्तलेनैवमहाबलः ॥ तत्रैवनिहतोमार्गेवमन्वैरुधिरंबहु ॥ ३४ ॥
तानिवस्त्राणिरम्याणिगोपालैःसहबान्धवैः ॥ धारयामासतुर्वीरौयथार्हंरामकेशवौ ॥ ३५ ॥ मालाकारगृहंप्राप्यतेनदृष्टौनमस्कृतौ ॥ सुगन्धि
भिर्दिव्यपुष्पैःपूज्यमानौमुदान्वितौ ॥ ३६ ॥ ददतुस्तौवरंतस्मैवाञ्छितंयदुपुङ्गवौ ॥ समागतौपुनर्वीथ्यामायान्तींचशुभाननाम् ॥ ३७ ॥
कुब्जांस्त्रियंमहाभागौधृतचन्दनभाजनाम् ॥ वक्राङ्गपृष्ठांवनितांदृष्ट्वागन्धमयाचताम्॥३८॥प्रहसन्तीतदाताभ्यांददौचन्दनमुत्तमम् ॥ आदायचन्दनं
दिव्यमुपलिप्ययथेच्छया ॥ ३९ ॥ तस्यैकान्ततरंरूपंदत्त्वाऽध्वनिसमागतौ ॥ निरीक्ष्यमाणौयोषिद्भिःसुकुमारौशुभाननौ ॥ ३४० ॥ विविशतु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महात्मानौयज्ञशालांसहानुगैः ॥ दृष्ट्वासमर्चितंदिव्यंकार्मुकंतत्रकेशवः ॥ ४१ ॥ लीलयैवगृहीत्वाथबभञ्जमधुसूदनः ॥ विभज्यमानंतच्चापं
श्रुत्वाकंसःसुविह्वलः ॥ ४२ ॥ आहूयमल्लान्सूतांस्तुप्रमुखान्दैत्यपुङ्गवान् ॥ विमृश्यमन्त्रिभिःप्राहचाणूरंदैत्यपुङ्गवः ॥ ४३ ॥ कंसउवाच ॥ रामकृष्णौ
समायातौसर्वदैत्यविनाशकौ ॥ प्रभातेमल्लयुद्धेनहन्येतामविशङ्कया ॥ ४४ ॥ येनकेनाप्युपायेनहन्तव्यौबलदर्पितौ ॥ मदोत्कटैर्गजैर्वापिमल्लमुख्यैश्च
यत्नतः ॥४५॥ ईश्वरउवाच ॥ इत्यादिश्यततोराजासानुजःसचिवैःसह ॥ आरुरोहभयात्तूर्णंदिव्यप्रासादमूर्द्धनि ॥४६॥ द्वारेषुसर्वमार्गेषुगजान्मत्तान
योजयत् ॥ मल्लान्मदोत्कटान्नागान्स्थापयामाससर्वतः ॥४७॥ ज्ञात्वाकृष्णोऽपितत्सर्वंसहरामेणधीमता ॥ उवासरजनींतत्रयज्ञगेहेसहानुगैः ॥४८॥
ततोरजन्यांव्युष्टायांप्रभातेविमलेसति ॥ शयनादुत्थितौवीरौरामकृष्णौकृतोदकौ ॥ ४९ ॥ स्वलङ्कृतौचतौभुक्त्वासंग्रामाभिमुखोत्सुकौ ॥ विनि
र्गतौगृहात्तस्मात्सिंहाविवगुहासुखात् ॥ २५० ॥ राजद्वारिस्थितंनागंहिमाद्रिशिखरोपमम् ॥ नाम्नाकुवलयापीडंकंसस्यजयवर्द्धनम् ॥५१॥ देवकु
ञ्जरदर्पघ्नंमहाकायंमदोत्कटम् ॥ दृष्ट्वातंचमहानागंपञ्चास्यइवकेशवः ॥ ५२ ॥ करेणैवकरंगृह्यसम्यगुत्प्लुत्यलीलया ॥ भ्रामयित्वाथचिक्षेपधरण्यां
धरणीधरः ॥ ५३ ॥ सतुचूर्णितसर्वाङ्गोनिनदन्भैरवंस्वनम् ॥ पपातसहसाभूमौममारचमहागजः ॥ ५४ ॥ हत्वादन्तौसमुत्पाट्यगृहीत्वारामकेशवौ
मल्लैरायोधनंकर्तुंरङ्गंविविशतुस्तदा ॥ ५५ ॥ तत्रस्थादानवादृष्ट्वागोविन्दस्यपराक्रमम् ॥ भीताःप्रविद्रुताःसर्वेराज्ञोऽन्तःपुरमाययुः ॥ ५६ ॥
कपाटौसुदृढौबद्ध्वातत्रतस्थुःसहस्रशः ॥ दृढबन्धकपाटांस्तुदृष्ट्वाकृष्णस्तुलीलया ॥ ५७ ॥ ताडयित्वापदेनैवपातयामासवीर्यवान् ॥ तौभग्नौपातितौ
तत्रसेनानीकेव्यवस्थिते ॥५८॥ तत्रस्थानिहताःसर्वेचूर्णिताङ्गशिरोऽधराः ॥ ततः प्रविश्यभवनंकंसस्यास्यमहाबलौ ॥५९॥ भ्रामयन्तौमहानागशृङ्गौ
पीनौरणोत्सुकौ ॥ ददृशातेमहात्मानौमल्लौचाणूरमुष्टिकौ ॥ २६० ॥ कंसोऽपिदृष्ट्वागोविन्दंरामंचसुमहाबलम् ॥ भयमाविश्यचाणूरंप्राहमल्लवरं
तदा ॥ ६१ ॥ कंसउवाच ॥ अस्मिन्नवसरेमल्लजहिगोपालबालकौ ॥ विभज्यतवराज्यार्द्धमहंदास्याम्ययत्नतः ॥ ६२ ॥ ईश्वरउवाच ॥ तस्मिन्न
वसरेकृष्णोमल्लाभ्यांदृश्यतेमहान् ॥ मध्येवनेचसङ्ग्रामेमहामेरुरिवापरः ॥ ६३ ॥ कंसस्यदृष्टिविषयेसंवर्त्ताग्निरिवाच्युतः ॥ स्त्रीणांचसाक्षान्मदनः
पित्रोःशिशुरिवापरः ॥ ६४ ॥ त्रिदशानांहरिरिवगोपालानांसखायथा ॥ बहुरूपेणददृशुस्तत्रसर्वगतंहरिम् ॥ ६५ ॥ वसुदेवस्तथाक्रूरोनन्दगोपोमहा
मतिः ॥ अन्यंप्रासादमारुह्यददृशुःकदनंमहत् ॥ ६६ ॥ स्त्रीभिरन्तःपुरस्थाभिर्देवकीतत्रसंस्थिता ॥ मुखंपुत्रस्यददृशेसाश्रुपूर्णेक्षणाशुभा ॥ ६७ ॥
ताभिराश्वासितादेवीभवनान्तरमाविशत् ॥ ततोदेवगणाःसर्वेविमानस्थानभस्तले ॥ ६८ ॥ तुष्टुवुर्जयशब्देनपुण्डरीकाक्षमच्युतम् ॥ जहिकंसमिति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राहुरुच्चैर्देवामरुद्गणाः ॥ ६९ ॥ एतस्मिन्तरेतत्रतूर्यघोषनिनादिते ॥ आसेदतुर्महामल्लौयदुसिंहौमहाबलौ ॥ ३७० ॥ चाणूरेणतुगोविन्दोमुष्टिकेन
हलायुधः ॥ युयुधातेमहात्मानौनीलश्वेताद्रिसन्निभौ ॥ ७१ ॥ मल्लयुद्धविधानेनमुष्टिभिःपादताडनैः ॥ बभूवकदनंघोरंदेवानांचभयावहम् ॥
॥ ७२ ॥ चाणूरेणचिरंकालंक्रीडित्वाथजनार्दनः ॥ निष्पिष्यगात्रमल्लस्यपातयामासलीलया ॥७३ ॥सपपातमहीपृष्ठेसंवमन्नुधिरंबहु ॥ ममार
चमहामल्लोदेवदानवदुःखदः ॥७४ ॥ मुष्टिकेनतथारामश्चिरकालमयुध्यत ॥ मुष्टिभिस्ताडयामासतस्यवक्षसिवीर्यवान् ॥ ७५ ॥ भिन्नास्थिस्नायुब
न्धोऽसौपपातधरणीतले ॥ ततस्तुदुद्रुवुःसर्वेमल्लाहृष्ट्वापराक्रमम् ॥ ७६॥ कंसोमहद्भयंतीव्रमाविशद्वेदनातुरः॥एतस्मिन्नन्तरेवीरौरामकृष्णौदुरासदौ ॥
॥ ७७ ॥ आरुह्यतुमहात्मानौचैत्यप्रासादमूर्जितम् ॥ ताडयित्वातलेनैवकंसंमूर्ध्निजनार्दनः ॥ ७८ ॥ अपातयद्धरापृष्ठेप्रासादशिखराद्धरिः ॥ सतु
निर्भिन्नसर्वाङ्गोधरण्यांत्यक्तजीवितः ॥ ७९॥ कृष्णेननिहतेकंसेरामोऽपिसुमहाबलः ॥ तस्यानुजंसुनामानंमुष्टिनैवजघानह ॥ ३८० ॥ धरण्यांपात
यामाससानुजंधरणीधरः ॥ हत्वाकंसंदुरात्मानंसानुजंरामकेशवौ ॥८१॥ पित्रोःसमीपमागम्यभक्त्याचैवप्रणेमतुः॥देवकीवसुदेवश्चपरिष्वज्यमुहुर्मुहुः
॥ ८२ ॥ स्नेहेनमूर्ध्न्युपाघ्राणंचक्रतुःपुत्रलालसौ ॥ तयोरुपरिदेवक्याःस्तनौक्षीरंववृषतुः ॥ ८३ ॥ ततआश्वास्यपितरौरामकृष्णौबहिर्गतौ ॥
एतस्मिन्नन्तरेदेविदेवदुन्दुभयोदिवि ॥ ८४ ॥ विनेदुःपुष्पवर्षाणिववृषुस्त्रिदशेश्वराः ॥ स्तुत्वामरुद्गणैर्दिव्यैर्नमस्कृत्यजनार्दनम् ॥ ८५ ॥ परंहर्ष
मनुप्राप्यलोकान्स्वान्स्वान्प्रपेदिरे ॥ नन्दगोपंनमस्कृत्यगोपवृद्धांश्चकेशवः ॥ ८६ ॥ रामेणसहधर्मात्मामुदासंपरिषस्वजे ॥ बहुरत्नधनंतस्मै
ददौप्रीत्याजनार्दनः ॥ ८७ ॥ सर्वांस्तान्गोपवृद्धांश्चवस्त्राभरणादिभिः ॥ बहुभिर्धनधान्यैश्चपूजयामासकेशवः ॥८८॥ विसृष्टास्तेनकृष्णेननन्दगोप
पुरोगमाः॥प्रययुर्गोव्रजंदिव्यंहर्षशोकसमन्विताः॥८९॥मातामहंसमासाद्यरामकृष्णौदुरासदौ॥ बन्धाच्चमोचयित्वाथसमाश्वास्यमुहुर्मुहुः॥३९०॥चक्रे
तस्याभिषेकंतुतद्राज्येमधुसूदनः ॥ अकारयद्द्विजश्रेष्ठैःसकंसस्यौर्ध्वदैहिकम् ॥ ९१ ॥ अक्रूरप्रमुखान्राज्येसंस्थाप्ययदुपुङ्गवान् ॥ राजानमुग्र
सेनंतुकृत्वाधर्मेणमेदिनीम् ॥ पालयामासधर्मात्मावसुदेवसुतोहरिः ॥ ९२ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०उमामहेश्वरसंवादेश्रीकृष्णचरिते
कंसवधोनामपञ्चचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४५ ॥ श्रीमहेश्वरउवाच ॥ अथोपनयनंनामचकारानकदुन्दुभिः ॥ पुत्रयोर्वेदविधिना
तस्मिन्वैरामकृष्णयोः ॥ १ ॥ आचार्येणहिगर्गेणसंस्कृतौरामकेशवौ ॥ पण्डितैर्वैष्णवैर्दिव्यैःस्नापनैर्विमलैःशुभैः ॥ २ ॥ कृतसंस्कार
कर्माणौरामकृष्णौमहाबलौ ॥ सान्दीपनेर्गृहंगत्वानमस्कृत्यमहात्मनः ॥ ३ ॥ अधीत्यवेदशास्त्राणितस्मात्तौद्विजपुङ्गवात ॥ मृतंपुत्रंसमानीय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ददतुस्तस्यदक्षिणाम् ॥ ४ ॥ आशिषोवचनंलब्ध्वागुरोस्तस्मान्महात्मनः ॥ तस्मैप्रणम्यमथुरांजग्मतुर्यदुपुङ्गवौ ॥ ५ ॥ अथकृष्णेननि
हतंश्रुत्वाकंसंदुरासदम् ॥ श्वशुरस्तस्यनृपतेर्जरासन्धोमहाबलः ॥ ६ ॥ अक्षौहिणीसहस्रैस्तुसेनानीकैर्महाबलैः ॥ कृष्णंहन्तुंसमागत्यरुरोधमथुरां
पुरीम् ॥ ७॥ रामकृष्णौमहावीर्यौविनिर्गत्यपुरोत्तमात् ॥ गजवाजिसमाकीर्णंतद्बलौघमपश्यताम्॥८॥सस्मारवासुदेवस्तुपूर्वंरूपंसनातनम् ॥ तस्य
स्मरणमात्रेणदारुकोविष्णुसारथिः ॥ ९ ॥ सुग्रीवपुष्पकंनामससमानीयमहारथम् ॥ वाजिभिर्दिव्यपुष्पाद्यैरुह्यमानंसनातनम् ॥ १० ॥ दिव्यायुधै
रुपेतंतंशङ्खचक्रगदादिभिः ॥ वैनतेयपताकेनशोभितंदेवदुर्जयम् ॥ ११ ॥ अवनींप्राप्यगोविन्दंप्रणम्यहरिसारथिः ॥ प्रददौस्यन्दनंशुभ्रंसायुधा
श्वसमन्वितम् ॥ १२ ॥ दृष्ट्वाहर्षेणकृष्णोऽपिपरिणीयमहारथम् ॥ आरुरोहाग्रजेनैवस्तूयमानोमरुद्गणैः ॥ १३ ॥ चतुर्भुजवपुर्भूत्वाशङ्खचक्र
गदासिभृत् ॥ किरीटीकुण्डलीस्रग्वीसंग्रामाभिमुखंययौ ॥ १४ ॥ बलदेवोऽपिमुशलंलाङ्गलंगृह्यवीर्यवान् ॥ तत्सैन्यंहन्तुमारेभेमहेश्वरइवापरः
॥ १५ ॥ दारुकश्चरथंशीघ्रंनोदयामासतद्रणे ॥ तृणगुल्मलताकान्तेकाननेऽग्निमिवानिलः ॥ १६ ॥ ततोगदाभिःपरिघैःशक्तिभिर्मुद्गरैस्तथा ॥
तद्रथंछादयामासुर्जरासन्धस्यसैनिकाः ॥ १७ ॥ चक्रेणैवहरिस्तूर्णंतानिचिच्छेदलीलया ॥बहूनितृणकाष्ठानिमहावह्निरिवार्चिषा॥१८॥ ततःशार्ङ्गं
समादायसायकैरक्षयैःशितैः॥चिच्छेदतानिसैन्यानिनप्राज्ञायतार्किंचन॥१९॥चक्रच्छिन्नास्यकमलाःकेचित्तत्रमहाबलाः॥ गदयाचूर्णिताःकेचित्केचि
दन्यैर्महारणे ॥ २० ॥ केचिच्चैवासिनाछिन्नास्तथान्येशरताडिताः॥ लाङ्गलाग्रहतग्रीवामुशलाहतमस्तकाः ॥ २१ ॥ क्षणेनतद्बलंसर्वंनिहत्यमधु
सूदनः ॥ शङ्खंदध्मौयदुश्रेष्ठोलयाशनिनिभस्वनम् ॥ २२ ॥ शङ्खरावविनिर्भिन्नहृदयास्तेमहाबलाः ॥ योधाःसाश्वाःसनागाश्चपतितास्त्यक्त
जीविताः ॥२३॥ अक्षौहिणीसहस्रंतुसाश्वंसरथकुञ्जरम् ॥ कृष्णेनैकेननिहतंनिःशेषंतदभूद्बलम् ॥ २४ ॥ निहतंवासुदेवेनप्रहरार्द्धेनशार्ङ्गिणा॥ततोदेव
गणाःसर्वेहर्षनिर्भरचेतसः ॥२५॥ ववृषुःपुष्पवर्षाणिसाधुसाध्वितिचाब्रुवन्॥ सर्वमप्यवनीभारंविमुच्यधरणीधरः ॥ २६॥ संस्तूयमानस्त्रिदशैर्बभौ
संग्राममूर्द्धनि ॥ निहतंस्वबलंदृष्ट्वाजरासन्धोऽतिवीर्यवान्॥२७॥योद्धुमभ्याययौतूर्णंबलदेवेनदुर्मतिः ॥ तयोर्युद्धमभूद्घोरंसंग्रामेष्वनिवर्तिनोः॥२८॥
रामोलाङ्गलमादायरथंतस्यससारथिम् ॥ विनिपात्यरणेशूरोगृहीत्वातंमहाबलम् ॥२९॥ उद्यम्यमुशलंतूर्णंतंहन्तुमुपचक्रमे ॥ प्राणसंशयमापन्नंजरा ॥ २६४ ॥
सन्धंनृपोत्तमम् ॥३०॥ कृतंरामेणबलिनासिंहेनेवमहागजम् ॥ दृष्ट्वाकृष्णोऽग्रजंप्राहनहन्तव्यइतिप्रभुः ॥३१॥ मोचयामासधर्मात्माजरासन्धंमहा
मतिः ॥ विमुच्यकृष्णवाक्येनशत्रुंसंकर्षणोऽव्ययः ॥ ३२ ॥ सानुजोरथमारुह्यमथुरांप्रविवेशह ॥ विनिर्जितोमहावीरोरामेणमगधाधिपः ॥३३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परांक्रीडामुपागम्यपुरंस्वंनविवेशह ॥ सकालयवनंप्राप्यमहावीर्यबलान्वितम् ॥ ३४ ॥ पुत्रयोर्वसुदेवस्यसमाचष्टपराक्रमम् ॥ दानवानांवधं चैवकंसस्यनिधनंतथा ॥ ३५ ॥ अक्षौहिणीनांचवधंतथास्वस्यपराजयम् ॥ सर्वंनिवेदयामासकृष्णस्यचरितंमहत् ॥ ३६ ॥ तच्छ्रुत्वायवनः क्रुद्धोमहाबलपराक्रमैः ॥ म्लेच्छकोटिसहस्रैस्तुसंवृतोमदसंयुतैः ॥ ३७ ॥ मगधाधिपतेस्तस्यसहायार्थंमहाबलः ॥ तेनैवसहितस्तूर्णंजगाममथुरांपुरीम् ॥ ३८ ॥ बलैराच्छाद्यपृथिवींनानाजनपदान्विताम् ॥ संनिवेश्यमहासैन्यंरुरोधमथुरांपुरीम् ॥ ३९ ॥ कृष्णोऽपिचिन्तयित्वाथपौराणांकुशलंतदा ॥ ययाचेसागरंभूमिंनिवासार्थंजलस्यच ॥ ४० ॥ त्रिंशद्योजनविस्तीर्णांददौकृष्णस्यसागरः ॥ असृजत्पयसांमध्येतत्रद्वारवतींपुरीम् ॥ ४१ ॥ बहुप्रासादसंयुक्तांहेमप्राकारतोरणाम् ॥ नानामणिमयैर्दिव्यैर्गृहपङ्क्तिभिरावृताम् ॥ ४२ ॥ उद्यानैश्चतथारम्यैस्तडागैर्बहुभिर्युताम् ॥ असृजत्पुण्डरीकाक्षोयथेन्द्रस्यामरावतीम् ॥४३॥ सुषुप्तान्मथुरायांतुपौरांस्तत्रजनार्दनः ॥ उद्धृत्यसहसारात्रौद्वारवत्यांन्यवेशयत् ॥४४॥ प्रबुद्धास्तेजनाःसर्वेपुत्रदारसमन्विताः ॥ हेमहर्म्यतलेविष्टाविस्मयंपरमंययुः ॥ ४५ ॥ बहुभिर्धनधान्यैश्चदिव्यवस्त्रविभूषणैः ॥ परिपूर्णैर्निरातङ्कैर्गृहमुख्यैःसमावृताः ॥४६॥ तस्मिन्प्रहृष्टाःसन्तस्थुर्दिविदेवगणाइव ॥ यवननतदायोद्धुंरामकृष्णौमहाबलौ ॥ ४७ ॥ विनिर्ययतुरात्मेशौमथुराया बहिस्तदा ॥ रामोलाङ्गलमादायमुशलंचमहारथः ॥ ४८ ॥ जघानसमरेक्रुद्धोयवनानांमहद्बलम् ॥ कृष्णस्तुशार्ङ्गमासज्यबाणैरग्निशिखोपमैः॥ ४९ ॥ निर्ददाहबलंसर्वंम्लेच्छानांदेवकीसुतः ॥ निहतंस्वबलंदृष्ट्वासकालयवनोबली ॥ ५० ॥ युयुधेवासुदेवेनगदयायवनेश्वरः ॥ कृष्णोऽपिकदनंतेनकृत्वाचिरमनामयः ॥५१॥ विमुखःप्राद्रवत्तस्मात्सङ्ग्रामात्कमलेक्षणः ॥ सोऽनुयातोऽतिवेगेनतिष्ठतिष्ठेतिचब्रुवन् ॥ ५२ ॥ वेगात्कृष्णोगिरिगुहांप्रविवेशमहामतिः ॥ तत्रप्रसुप्तोराजासौमुचुकुन्दोमहामुनिः ॥ ५३ ॥ अदृश्यस्तस्यनृपतेःसंस्थितोभगवान्हरिः ॥ यवनोऽपिमहावीरोगदामुद्यम्यपाणिना ॥ ५४ ॥ कृष्णंहन्तुंसमारब्धोगुहांतांप्रविवेशह ॥ दृष्ट्वाशयानंराजानंमत्वाकृष्णंजनार्दनम् ॥ ५४ ॥ पादेनताडयामासमुचुकुन्दंमहामुनिम् ॥ ततःप्रबुद्धोभगवान्मुचुकुन्दोमहामुनिः ॥ ५६ ॥ क्रोधात्संरक्तनयनोहुङ्कारंकृतवानसौ ॥ तस्यहुङ्कारशब्देनतथाक्रोधनिरीक्षणात् ॥ ॥५७॥ निर्दग्धोभस्मतांप्रापयवनस्त्यक्तजीवितः ॥ ततस्तुकृष्णोददृशेराजर्षेःपुरतःप्रभुः ॥ ५८ ॥ नीलोत्पलदलश्यामःपुण्डरीकनिभेक्षणः ॥ शङ्खचक्रगदापाणिःपीतवासाजनार्दनः ॥ ५९ ॥ दृष्ट्वातंसहसोत्थायराजर्षिरमितौजसम् ॥ अहोभाग्यमहोभाग्यमित्युवाचमहामुनिः ॥ ६० ॥ पुलकाङ्कितसर्वाङ्गःसानन्दाश्रुजलाकुलः ॥ स्तुवन्वैजयशब्देनप्रणनाममुहुर्मुहुः ॥ ६१ ॥ मुचुकुन्दउवाच ॥ धन्योऽस्मिकृतकृत्योऽस्मिदर्शनात्परमेश्वर ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अद्यमेसफलंजन्मजीवितंसफलंमम ॥ ६२ ॥ नमस्तेवासुदेवायजगन्नाथायशार्ङ्गिणे ॥ दामोदरायदेवायतेजसांनिधयेनमः ॥ ६३ ॥ अधोक्षजाय हरयेनृसिंहवपुषेनमः ॥ राघवायनमस्तुभ्यंपुण्डरीकेक्षणायच ॥ ६४ ॥ अच्युतायविकारायतथानन्तायतेनमः ॥ गोविन्दायनमस्तुभ्यंविष्णवे जिष्णवेनमः ॥ ६५ ॥ नारायणायश्रीशायकृष्णायपरमात्मने ॥ मुकुन्दायनमस्तुभ्यंचतुर्व्यूहायतेनमः ॥ ६६ ॥ नमःपरमकल्याणनमस्तेपरमा त्मने ॥ वासुदेवायशान्ताययदूनांपतयेनमः ॥ ६७ ॥ महेश्वरउवाच ॥ एवंस्तुत्वातुगोविन्दंप्रणनामपुनःपुनः ॥ संतुष्टोभगवान्प्राहमुचुकुन्दंमहा मुनिम् ॥ ६८ ॥ श्रीभगवानुवाच ॥ वरंवृणीष्वराजर्षेयत्तेमनसिवर्त्तते ॥ ६९ ॥ महेश्वरउवाच ॥ सोऽपिमुक्तिंययाचेऽथपुनरावृत्तिवर्जिताम् ॥ तस्मै ददौतदाकृष्णोदिव्यंलोकंसनातनम् ॥ ७० ॥ राजातुमानुषंरूपंविहायाथमहामतिः ॥ समानंरूपमास्थायदेवस्यपरमात्मनः ॥ वैनतेयंसमारुह्य शाश्वतंपदमाविशत् ॥ ७१ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०उमामहेश्वरसंवादेश्रीकृष्णचरितेमुचुकुन्दमोक्षोनामषट्चत्वारिंशदधिकद्विशत तमोऽध्यायः ॥२४६॥ रुद्रउवाच ॥ हत्वाथयवनंतत्रमुचुकुन्देनधीमता ॥ दत्त्वातस्मैवरंमुक्तिंनिष्क्रान्तोयदुनन्दनः ॥१॥ हतंचयवनंश्रुत्वाजरासन्धः सुदुर्मतिः ॥ युयुधेरामकृष्णाभ्यांस्वबलेनसमावृतः ॥ २ ॥ कृष्णेननिहतंसैन्यंसर्वंतस्यदुरात्मनः ॥ सोऽपिरामेणसङ्ग्रामेद्वन्द्वयुद्धंचकारह ॥ ३ ॥ मुसलेनाहनद्रामोवक्षस्यस्यदुरात्मनः ॥ सपपातमहीपृष्ठेमूर्च्छितोमगधाधिपः ॥ ४ ॥ चिरेणलब्ध्वासंज्ञांतुविह्वलाङ्गोभयातुरः ॥ नशशाकरणेयोद्धुं रामेणमगधेश्वरः ॥ ५ ॥ विमुखःप्राद्रवत्तूर्णंहतशेषबलानुगः ॥ अजेयावितितौमत्वारामकृष्णौमहाबलौ ॥ ६ ॥ तयोर्विरोधंत्यक्त्वाथनगरींस्वां विवेशह ॥ अथतौवसुदेवस्यतनयौसहसेनया ॥ ७ ॥ मथुरांत्यज्यनगरींप्रविष्टौद्वारिकांपुरीम् ॥ इन्द्रेणप्रेषितोवायुःसभांतत्रदिवौकसाम् ॥ ८ ॥ कृष्णायप्रददौप्रीत्यानिर्मितांविश्वकर्मणा ॥ वज्रवैडूर्यरचितांबह्वासनविचित्रिताम् ॥ ९ ॥ नानारत्नमयैर्दिव्यैःस्वर्णच्छत्रैर्विराजिताम् ॥ तांप्राप्य रम्यांतुसभामुग्रसेनादयोनृपाः ॥ १० ॥ मोदन्तेनैगमैःसार्द्धंदिविदेवगणाइव ॥ इक्ष्वाकुवंशसंभूतोरैवतोनामपार्थिवः ॥ ११ ॥ कन्यांदुहितरंस्वस्यसर्व लक्षणसंयुताम् ॥ रामायप्रददौप्रीत्यारेवतींनामनामतः ॥ १२ ॥ उपयेमेविधानेनसरामस्तांचरेवतीम् ॥ रमयामासचतयाशच्येवतुसुरेश्वरः ॥१३॥ विदर्भराजोधर्मात्माभीष्मकोनामधार्मिकः ॥ बभूवुस्तस्यपुत्रास्तुरुक्मप्रभृतयःशुभाः ॥ १४ ॥ तेषामवरजाकन्यारुक्मिणीवरवर्णिनी ॥ कमलांशेन संभूतासर्वलक्षणसंयुता ॥ १५ ॥ राघवत्वेऽभवत्सीतारुक्मिणीकृष्णजन्मनि ॥ अन्येष्वेवावतारेषुविष्णोरेषासहायिनी ॥ १६ ॥ हिरण्यकहिर ण्याक्षौसंभूतौद्वापरेपुनः ॥ शिशुपालोदन्तवक्रइतिनामसमन्वितौ ॥ १७ ॥ चैद्यान्वयेसमुद्भूतौमहाबलपराक्रमौ ॥ रुक्मिणींशिशुपालायदातुमैच्छत्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दात्मजः ॥ १८॥ तंतुनैच्छत्पतिंसातुशिशुपालंशुभानना ॥ बाल्यात्प्रभृतिवैविष्णुमनुरक्तादृढव्रता ॥१९ ॥ उद्दिश्यकृष्णंभर्त्तारंसुराणामर्चनंसदा ॥
चकाररुक्मिणीकन्यादानानिविविधानिच ॥ २० ॥ व्रतचर्यापराभूत्वाध्यायन्तीपुरुषोत्तमम् ॥ आत्मेशंस्वस्यभर्तारमुवासपितृमन्दिरे ॥ २१ ॥
कर्त्तुंतांशिशुपालायविवाहंपार्थिवोत्तमः ॥ चकारयत्नंपुत्रेणरुक्मिणासहधीमता ॥ २२ ॥ पुरोहितसुतंविप्रंप्रेषयामासरुक्मिणी ॥ उद्दिश्यकृष्णंभर्तारं
सतूर्णंद्वारकांययौ ॥ २३ ॥ समेत्यकृष्णंरामंचताभ्यांविधिवदर्चितः ॥ एकान्तेसर्वमाचष्टरुक्मिणीभाषितंतयोः ॥ २४ ॥ तच्छ्रुत्वारामकृष्णौतुस
हविप्रेणधीमता ॥ सर्वशस्त्रास्त्रसंपूर्णंरथमाकाशगंप्रभू ॥ २५ ॥ आरुह्यसूतमुख्येनदारुकेणमहात्मना ॥ विदर्भनगरींतूर्णंजग्मतुःपुरुषोत्तमौ ॥ २६॥
राजानःसर्वराष्ट्रेभ्योविवाहंद्रष्टुमागताः ॥ जरासन्धमुखाःसर्वेशिशुपालस्यधीमतः ॥२७॥ तस्मिन्नुद्वाहसमयेरुक्मिणीरुक्मभूषणा ॥ निःसृतार्चयितुं
दुर्गांसखीभिर्नगराद्बहिः ॥ २८ ॥ एतस्मिन्नेवकालेतुसंप्राप्तोदेवकीसुतः ॥ रथस्थांतांचजग्राहबलवान्मधुसूदनः ॥ २९ ॥ सहसारथमारोप्यययौ
तूर्णंस्वमालयम् ॥ ततःक्रोधसमाविष्टाजरासन्धमुखानृपाः ॥ ३० ॥ रुक्मिणाराजपुत्रेणयुद्धायसमुपस्थिताः ॥ अनुयाताहरिंक्रुद्धाश्चतुरङ्गबला
न्विताः ॥३१॥ बलभद्रोमहाबाहुरवरुह्यरथोत्तमात् ॥ लाङ्गलंमुशलंगृह्यनिजघानक्षणादरीन् ॥३२॥ रथानश्वान्महानागांस्तथापादचरानपि॥लाङ्गल
मुशलाभ्यांवैनिजघानबलाद्रणे॥३३॥तस्यलाङ्गलपातेनचूर्णितारथपङ्क्तयः ॥ नागाश्वपतिताभूमौवज्रेणेवमहीधराः॥३४॥ निर्भिन्नमस्तकाःसर्वेवमन्तो
रुधिरंबहु ॥ क्षणेनैवहतंसैन्यंबलरामेणवैतदा ॥३५॥ साश्वंसनागंसरथंसपदातिमहारणे ॥ समन्तात्समरेतत्रसुस्रुवुःशोणितापगाः ॥३६॥ प्रभग्नाःपा
र्थिवाःसर्वेदुद्रुवुर्भयपीडिताः ॥ कृष्णेनकदनंचक्रेरुक्मीक्रोधवशाद्बली ॥३७॥ धनुरुद्यम्यबाणौघैस्ताडयमासशार्ङ्गिणम् ॥ ततःप्रहस्यगोविन्दःशार्ङ्ग
मादायलीलया ॥ ३८ ॥ जघानैकेनबाणेनरथाश्वांस्तस्यसारथिम् ॥ रथंध्वजंपताकांचचिच्छेदधरणीधरः ॥ ३९ ॥ विरथःखड्गमादायधरण्यांसउप
स्थितः ॥ कृष्णस्तुखड्गंचिच्छेदबाणेनैकेनवीर्यवान् ॥ ४० ॥ ततःसमुष्टिमुद्यम्यकृष्णंवक्षस्यताडयत् ॥ तंजग्राहरणेवीरंनिबध्यनिबिडंहरिः ॥४१॥
तीक्ष्णंक्षुरप्रमादायप्रहसन्मधुसूदनः ॥ शिरसोमुण्डनंकृत्वासुमोचचजनार्दनः॥४२॥सतुशोकसमाविष्टोनिःश्वसन्नुरगोयथा॥आविवेशपुरंस्वीयंसतुतत्रै
वचावसत् ॥ ४३ ॥ इतिश्रीपाद्मे महापुराणे पञ्चप०उत्तर०उमामहेश्वरसंवादे श्रीकृष्णचरिते विदर्भसेनाविध्वंसनं नाम सप्तचत्वारिं
शदधिकद्विशततमोऽध्यायः ॥ २४७ ॥ रुद्रउवाच ॥ अथकृष्णस्तुरामेणरुक्मिण्यादारुकेणच ॥ दिव्यंस्यन्दनमारुह्यययौतूर्णंस्वमालयम् ॥ १ ॥
ततःप्रविश्यनगरींद्वारकांदेवकीसुतः ॥ शुभेऽह्निशुभलग्नेवैवेदोक्तविधिनाहरिः ॥ २ ॥ उपयेमेनृपसुतांरुक्मिणींरुक्मभूषिताम् ॥ तस्मिन्नुद्वाहसमयेदेव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुन्दुभयोदिवि ॥ ३ ॥ विनेदुःपुष्पवर्षाणिववृषुःसुरसत्तमाः ॥ वसुदेवोग्रसेनौचतथाक्रूरोयदूत्तमः ॥ ४ ॥ बलभद्रोमहातेजायेचान्येयदुपुङ्गवाः ॥
चक्रुःकृष्णस्यरुक्मिण्याविवाहंसुसुखंयथा ॥ ५ ॥ नन्दगोपोऽथगोपालैर्गोपवृन्दैःसमागतः ॥ स्वलङ्कृताभिर्योषाभिर्यशोदाचसमागता ॥ ६ ॥ वसु
देवस्त्रियःसर्वादेवकीप्रमुखास्तथा ॥ रेवतीरोहिणीदेवीयाश्चान्याःपुरयोषितः ॥ ७ ॥ सर्वाण्युद्वाहकर्माणिचक्रुर्हर्षसमन्विताः ॥ सुराणामर्चनंप्रीत्या
कर्त्तव्यंतत्रदेवकी ॥ ८ ॥ वृद्धाभिर्नृपयोषिद्भिश्चकारविधिनातदा ॥ सर्वमौद्वाहिकंकर्मउत्सवंहिद्विजोत्तमैः ॥ ९ ॥ ब्राह्मणान्भोजयामासवस्त्रैराभरणैः
शुभैः ॥ उग्रसेनादयस्तत्रराजानश्चसुपूजिताः ॥१० ॥ नन्दगोपादयोगोपायशोदाद्याश्चयोषितः ॥ बहुभिःस्वर्णरत्नाद्यैर्वासोभिःसविभूषणैः ॥ ११ ॥
पूजिताःसंप्रहृष्टास्तेतद्विवाहमहोत्सवे ॥ तौदम्पतीसमाश्लिष्यप्रणतौजातवेदसम् ॥ १२ ॥ वेदविद्भिर्विप्रमुख्यैराशीर्भिरभिनन्दितौ ॥तस्यांविवाहवेद्यांतु
शुशुभातेवधूवरौ ॥ १३ ॥ ब्राह्मणेभ्योऽथवृद्धेभ्योराजन्यःसहभार्यया ॥ ववन्देदेवकीपुत्रोज्येष्ठस्यभ्रातुरेवच ॥ १४ ॥ एवमौद्वाहिकंसर्वंनिर्वर्त्यमधु
सूदनः ॥ व्यसर्जयन्नृपान्सर्वान्येचतत्रसमागताः ॥ १५ ॥ प्रस्थिताहररिणातत्रपूजितानृपपुङ्गवाः ॥ ब्राह्मणाःसुमहात्मानोनिर्ययुःस्वकमालयम्
॥ १६ ॥ रुक्मिण्यासहधर्मात्मादेवकीनन्दनोऽव्ययः ॥ उवाससुसुखेनैवदिव्यहर्म्यतलेशुभे ॥ १७ ॥ तयावैरमयामासनारायणइवश्रिया ॥ संस्तूय
मानोमुनिभिर्दिविदेवगणैरपि ॥ १८ ॥ अहन्यहनिहृष्टात्मासुखेनैवजनार्दनः ॥ अथोवाससुशोभायांद्वारवत्यांसनातनः ॥ १९ ॥ इतिश्रीपाद्मे
महापुराणेपञ्चप०उत्तरखंडेउमामहेश्वरसंवादेश्रीकृष्णचरितेरुक्मिणीविवाहकथनंनामाष्टाचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४८ ॥ श्रीरुद्र
उवाच ॥ सत्राजितस्यतनयानाम्नासत्यायशस्विनी ॥ पृथिव्यंशेनसंभूताभार्याकृष्णस्यचापरा ॥ १ ॥ वैवस्वतीमहाभागाकालिन्दीनाम
नामतः ॥ तृतीयातस्यभार्यासानीलांशेनसमुत्थिता ॥ २ ॥ विन्दानुविन्दस्यसुतांमित्रविन्दांशुचिस्मिताम् ॥ स्वयंवरस्थितांकन्यामुपयेमेजना
र्दनः ॥ ३ ॥ पाशेनैकेनबद्ध्वातान्वृषभान्सप्तदुर्मदान् ॥ तांवीर्यशुल्कांजग्राहपद्मपत्रायतेक्षणः ॥ ४ ॥ सत्राजितोमहारत्नंस्यमन्ताख्यं
महीपतिः ॥ अनुजायददौसोऽयंप्रसेनायमहात्मने ॥ ५ ॥ ययाचेतंमणिवर्यंकदाचिन्मधुसूदनः ॥ उवाचवासुदेवंतंप्रसेनःप्रसभंतदा ॥ ६ ॥ ॥२६६॥
प्रसेनउवाच ॥ भारानष्टसुवर्णानांनित्यंप्रसवतेमणिः ॥ तस्मात्कस्यनदातव्यंस्यमन्ताख्यमिदंमया ॥ ७ ॥ महादेवउवाच ॥ कृष्णस्तुतद
भिप्रायंज्ञात्वातूष्णीमुवासह ॥ कदाचिन्मृगयांकर्तुंकृष्णःसर्वैर्यदूत्तमैः ॥ ८ ॥ प्रविवेशमहारण्यंप्रसेनाद्यैर्महाबलैः ॥ प्रत्येकंवैमृगान्हन्तुमनुया
ताःसहस्रशः ॥ ९ ॥ एकएवमहारण्येप्रसेनोदूरमागतः ॥ तंसिंहोहतमासाद्यहत्वारत्नंजहारसः ॥ १० ॥ तंसिंहंजाम्बवान्हत्वामणिंगृह्यमहाबलः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रविवेशबिलंतूर्णंदिव्यस्त्रीभिर्निषेवितम् ॥ ११ ॥ तस्मिन्नस्तंगतेसूर्येवासुदेवःसहानुगः ॥ चतुर्थ्यांमुदितंचन्द्रंदृष्ट्वास्वंपुरमाविशत् ॥ १२ ॥ ततः
सर्वेपुरजनाःकृष्णंप्रोचुःपरस्परम् ॥ हत्वाप्रसेनंगोविन्दोमृगव्याजेनकानने ॥१३॥ स्यमन्तकंमणिवरमग्रहीदविशङ्कया ॥ तदाकर्ण्यहरिस्तस्मिन्द्वा
रकाजनभाषितम् ॥ १४ ॥ अज्ञलोकभयात्सर्वैर्यदुभिर्गहनंययौ ॥ दर्शयामासतान्सर्वान्सिंहेननिहतंवने ॥ १५ ॥ लब्धात्मशुद्धिस्तत्रैवसंस्थाप्य
महतींचुमूम् ॥ एकःशार्ङ्गगदापाणिर्जगामगहनंवनम् ॥१६॥ तस्मिन्गुहामुखेसिंहंहतंजाम्बवतातदा ॥ दृष्ट्वामहाबिलंकृष्णःप्रविवेशाविशङ्कितः ॥
॥ १७ ॥ तत्रनानामणिवरद्योतितेविमलेगृहे ॥ सुतंजाम्बवतोधात्रीदोलामारोप्यलीलया ॥१८॥ दोलामुखेमणिंधृत्वादोलयन्गायतीमुदा ॥ सिंहः
प्रसेनमवधीत्सिंहोजाम्बवताहतः ॥ १९॥ सुकुमारकमारोदीस्तवह्येषस्यमन्तकः ॥ तच्छ्रुत्वावासुदेवोऽथशङ्खंदध्मौप्रतावान् ॥२०॥ तेननादेनमहता
निर्जगामात्रजाम्बवान् ॥ तयोर्युद्धमभूद्घोरंदशरात्रंनिरन्तरम् ॥ २१ ॥ मुष्टिभिर्वज्रकल्पैश्चसर्वभूतभयावहम् ॥ कृष्णस्यबलवृद्धिंचतथात्मबलसंक्ष
यम् ॥ २२ ॥ अवेक्ष्यपूर्ववचनंबुबुधेपरमात्मनः ॥ सोऽयंरामोऽवतीर्णोऽत्रधर्मत्राणायवैपुनः ॥ २३ ॥ सआगतोममस्वामीदातुंममनोरथम् ॥
एवंज्ञात्वाथऋक्षेशोनिर्वर्त्यरणकर्मतत् ॥ २४ ॥ प्राञ्जलिःप्राहगोविन्दंकोभवानितिविस्मयात् ॥ निवर्त्यकदनंशौरिःप्रोचेगम्भीरयागिरा ॥ २५ ॥
श्रीकृष्णउवाच ॥ पुत्रोऽहंवसुदेवस्यवासुदेवइतीरितः॥ममरत्नंस्यमन्ताख्यंहृतवांस्त्वंसुनिर्भयः॥ तद्दीयतांचशीघ्रंमेअन्यथावधमेष्यसि॥२६॥महादेव
उवाच॥तच्छ्रुत्वाजाम्बवान्हृष्टःप्रणनामाथदण्डवत्॥परिणीयनमस्कृत्यविनयात्प्राहकेशवम् ॥२७ ॥ जाम्बवानुवाच॥धन्योऽस्मिकृतकृत्योऽस्मितव
संदर्शनात्प्रभो॥दासोऽहंपूर्वभावेनतवदेवकिनन्दन॥२८॥दत्तवानसिगोविन्दकदनंपूर्वकाङ्क्षितम् ॥ मयेदंकदनंमोहाद्यत्कृतंस्वामिनात्वया॥तत्क्षम्यतां
जगन्नाथकरुणाकरशाश्वत॥२९॥महादेवउवाच॥इत्युक्त्वाप्रणतोभूत्वानमस्कृत्यपुनःपुनः॥नानारत्नमयेपीठेनिवेश्यविनयात्प्रभुम् ॥३०॥ शारदाब्ज
निभौपादौप्रक्षाल्यशुभवारिणा॥मधुपर्कविधानेनपूजयित्वायदूद्वहम्॥३१॥ वस्त्रैराभरणैर्दिव्यैःपूजयित्वाविधानतः॥पुत्रींजाम्बवतींनामकन्यांलावण्य
संयुताम् ॥ ३२ ॥ कन्यारत्नंददौतस्मैभार्यार्थममितौजसे॥अन्यैश्चमणिमुख्यैश्चस्यमन्ताख्यंददौमणिम्॥३३॥तत्रैवोद्वाह्यतांकन्यांप्रहृष्टःपरवीरहा ॥
ददौतस्मैपरांमुक्तिंप्रीत्याजाम्बवतेहरिः॥३४॥गृहीत्वातनयांतस्यकन्यांजाम्बवतींमुदा॥विनिर्गत्यबिलात्तस्मात्प्रययौद्वारकांपुरीम् ॥ ३५ ॥ सत्राजिते
ददौरत्नंस्यमन्ताख्यंयदूत्तमः ॥ दुहित्रेप्रददौसोऽपिकन्यायैमणिमुत्तमम् ॥ ३६ ॥ मासिभाद्रपदेशुक्लेचतुर्थ्यांचन्द्रदर्शनम् ॥ मिथ्याभिदूषणंप्राहुस्त
स्मात्तत्परिवर्जयेत् ॥३७॥ तत्प्राप्यदर्शनंतत्रचतुर्थ्यांशीतगोर्नरः ॥ स्यमन्तस्यकथांश्रुत्वामिथ्यावादात्प्रमुच्यते ॥ ३८ ॥ सुलक्ष्मणानाग्नजितीसु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शीलाचयशस्विनी ॥ मद्रराजसुतास्तिस्रःकन्यकास्ताःशुभाननाः ॥ ३९ ॥ स्वयंवरस्थास्ताःकृष्णंवरयामासुरुज्ज्वलाः ॥ एकस्मिन्दिवसेतास्तु
उपयेमेयदूद्वहः ॥ ४० ॥ अष्टौमहिष्यस्ताःसर्वारुक्मिण्याद्यामहात्मनः ॥ रुक्मिणीसत्यभामाचकालिन्दीचशुचिस्मिता ॥ ४१ ॥ मित्रविन्दाजा
म्बवतीनाग्नजित्यःसुलक्ष्मणा ॥ सुशीलानामतन्वङ्गीमहिषीचाष्टमीस्मृता ॥ ४२ ॥ भूमिपुत्रोमहावीर्योनरकोनामराक्षसः ॥ जित्वादेवपतिंशक्रंसर्वा
श्चैवसुरात्रणे ॥ ४३ ॥ अदित्यादेवमातुश्चकुण्डलेचसुवर्चसी ॥ बलाज्जग्राहदेवानांरत्नानिविविधानिच ॥ ४४ ॥ ऐरावतंमहेन्द्रस्यतथैवोच्चैः
श्रवोहयम् ॥ माणिक्यादिधनेशस्यशङ्खपद्मनिधिंतथा ॥४५॥ स्त्रियश्चाप्सरसश्चैवहृतवान्क्षितिनन्दनः ॥ वज्रादिहेतीस्तेषांचबलाद्धृत्वादिवौकसाम्
॥ ४६ ॥ तैरेवससुरान्हत्वासभांमयविनिर्मिताम् ॥ उवासव्योमगेदिव्येनगरेविमलेऽम्बरे ॥ ४७ ॥ ततोदेवगणाःसर्वेपुरस्कृत्यशचीपतिम् ॥ भ
यार्ताःशरणंजग्मुःकृष्णमक्लिष्टकारिणम् ॥ ४८ ॥ कृष्णोऽपितदुपश्रुत्यसर्वंनरकचेष्टितम् ॥ देवानामभयंदत्त्वावैनतेयंव्यचिन्तयत् ॥ ४९ ॥ तस्मि
न्क्षणेहरेस्तस्यवैनतेयोमहाबलः ॥ प्राञ्जलिःपुरतस्तस्थौसर्वदेवनमस्कृतः ॥ ५० ॥ तमारुह्यद्विजश्रेष्ठंसत्ययासहकेशवः ॥ संस्तूयमानोमुनिभिःप्रय
यौराक्षसालयम् ॥५१॥ प्रदीप्यमानमाकाशेयथासूर्यस्यमण्डलम् ॥ राक्षसैर्बहुभिर्युक्तंदिव्यैराभरणैर्युतम् ॥५२॥ ददर्शतत्पुरंकृष्णोदुर्भेद्यंत्रिदशैरपि ॥
तदावरणजालानिवीक्ष्यचक्रेणवीर्यवान् ॥ ५३ ॥ चिच्छेदतेजसादीप्यातमांसीवदिवाकरः ॥ ततस्तेराक्षसाःसर्वेशतशोऽथसहस्रशः ॥ ५४ ॥
उद्यम्यशूलानितदायुद्धायाभिमुखंययुः ॥ ततस्तुतोमरैर्दिव्यैर्भिण्डिपालैःसुपट्टिशैः ॥५५॥ केशवंताडयामासुःपलालैरिवपावकम् ॥ ततस्तुशार्ङ्गमा
दायभगवान्गरुडध्वजः ॥५६॥ दिव्यशस्त्राणिचिच्छेदबाणैरग्निशिखोपमैः ॥ तेषांशिरोधरान्नागानश्वांश्चैवतरस्विनः ॥ ५७ ॥ चक्रेणैवप्रचिच्छेदवीर्य
वान्पुरुषोत्तमः ॥ केचिच्चक्रेणसंछिन्नास्तथान्येशरताडिताः ॥ ५८ ॥ गदयानिहताःकेचिद्राक्षसास्तद्रणाजिरे ॥ एवंतेराक्षसाःसर्वेपातिताधरणीतले
॥ ५९ ॥ शक्रोत्सृष्टेनवज्रेणनिर्भिन्नाइवभूधराः ॥ निहत्यदानवान्सर्वान्पुण्डरीकायतेक्षणः ॥६०॥ पाञ्चजन्यंमहाशङ्खंप्रदध्मौपुरुषोत्तमः ॥ ततःसनर
कोदैत्योधनुरादायवीर्यवान् ॥ ६१ ॥ दिव्यंस्यन्दनमारुह्यययौयुद्धायकेशवम् ॥ तयोर्युद्धमभूद्घोरंतुमुलंलोमहर्षणम् ॥ ६२ ॥ बहुभिर्बाणसाहस्रैर्मेघ
योरिववर्षतोः ॥ ततोऽर्द्धचन्द्रबाणेनवासुदेवःसनातनः ॥ ६३ ॥ तस्यराक्षसमुख्यस्यधनुश्चिच्छेदवीर्यवान् ॥ ससर्जास्त्रंमहादिव्यंनरकस्यमहोरसि ॥२६७॥
॥ ६४ ॥ सतेनभिन्नहृदयःपपातोर्व्यांमहासुरः॥ शक्रवज्रेणनिर्भिन्नोमहाचलइवोन्नदन् ॥ ६५ ॥ उपगम्यततःकृष्णःसमीपंतस्यरक्षसः ॥ भूम्यासंप्रार्थि
तःप्राहवरंवृणिवतिराक्षसम् ॥ सचाहराक्षसःकृष्णंगरुडोपरिसंस्थितम् ॥ ६६ ॥ नरकउवाच ॥ नमेकृत्यंवरेणास्तिनरकोऽहंतथापिच ॥ अन्यलोकहि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तार्थायवृणेऽहंवरमुत्तमम् ॥ ६७ ॥ मृताहनितुमेकृष्णसर्वभूतेश्वरेश्वर ॥ येनरामङ्गलस्नानंकुर्वन्तिमधुसूदन ॥ नतेषांनिरयप्राप्तिर्भवत्वेवंभयापह
॥ ६८ ॥ महादेवउवाच ॥ एवमस्त्वितिगोविन्दोददौतस्मैवरंप्रभुः ॥ ततःपश्यन्हरेःसाक्षाच्छरदम्बुजसन्निभौ ॥६९॥ चरणौवज्रवैडूर्यनूपुराभ्यांवि
राजितौ ॥अर्चितौविधिरुद्राद्यैस्त्रिदशैर्मुनिभिस्तथा॥७०॥त्यक्त्वाप्राणान्महीपुत्रःसारूप्यमगमद्धरेः॥ततोदेवगणाःसर्वेहर्षनिर्भरमानसाः ॥७१ ॥ ववृ
षुःपुष्पवर्षाणितुष्टुवुश्चमहर्षयः ॥ प्रविश्यनगरंतस्यकृष्णःकमललोचनः ॥ ७२ ॥ बलात्तेनगृहीतानिरत्नानित्रिदिवौकसाम् ॥ कुण्डलेदेवमातुश्चतथै
वोच्चैःश्रवोहयम् ॥ ७३ ॥ ऐरावतंगजश्रेष्ठंप्रदीप्तंमणिपर्वतम् ॥ सर्वमेतद्यदुश्रेष्ठोददौशक्रायवज्रिणे ॥७४॥पार्थिवान्सर्वराष्ट्रेभ्योजित्वासौनरकोबली॥
कन्याषोडशसाहस्रंहृतवान्नरकस्तदा ॥ ७५ ॥ सन्निरुद्धास्तुताःसर्वानरकान्तःपुरेतदा ॥ दृष्ट्वाकृष्णंमहावीर्यंकन्दर्पशतसन्निभम् ॥ ७६ ॥ भर्तारंव
व्रिरेसर्वाःपतिंविश्वस्यसर्वगम् ॥ एतस्मिन्नेवकालेतुगोविन्दोऽनन्तरूपवान् ॥ ७७ ॥ तासांकरग्रहंचक्रेविधिनापुरुषोत्तमः ॥ नरकस्यसुताःसर्वे
पुरस्कृत्यमहींतदा ॥ ७८ ॥ गोविन्दंशरणंजग्मुस्तानरक्षद्घृणानिधिः ॥ तद्राज्येस्थाप्यतान्सर्वान्पृथिव्यावाक्यगौरवात् ॥७९॥ ऐन्द्रंविमानमारोप्य
ताश्चसर्वावरस्त्रियः ॥ देवदूतैर्महाभागैर्द्वारवत्यांन्यवेशयत्॥८०॥ वैनतेयंसमारुह्यसत्ययासहकेशवः॥स्वर्लोकंप्रययौतूर्णंद्रष्टुंतांदेवमातरम् ॥८१॥प्रवि
श्यनगरींतत्रदेवराजोजनार्दनः॥अवरुह्यद्विजश्रेष्ठात्पत्न्यासहमहाबलः॥८२॥ववन्देमातरंदेवीमदितिंत्रिदिवौकसाम् ॥ संपरिष्वज्यबाहुभ्यामदितिःपु
त्रवत्सला ॥ ८३ ॥ निवेश्यासनमुख्येतुपूजयामासभक्तितः॥ आदित्यावसवोरुद्राःशतक्रतुपुरोगमाः ॥ ८४ ॥ तत्रसंपूजयामासुर्यथार्हंपरमेश्वरम् ॥
शचीगृहंसमागम्यसत्यभामायशस्विनी ॥८५॥तयासमार्चितादेव्यासमासीनासुखासने॥तस्मिन्कालेसुपुष्पाणिपारिजातस्यकिङ्कराः ॥८६ ॥शच्यैदे
व्यैददुःप्रीत्यासहस्राक्षेणचोदिताः॥प्रगृह्यतानिपुष्पाणिशचीदेवीसुमध्यमा॥८७॥नीलनिर्मलकेशेचबबन्धस्वयमूर्धनि ॥अवमान्यशचीतत्रसत्यभामां
यशस्विनीम् ॥८८॥ अनर्हामानुषीचेयंदेवार्हंकुसुमंशुभम्॥इतिकृत्वामतिंतस्यैनददौकुसुमानिसा॥८९॥विनिष्क्रम्यपुरात्तस्मात्सत्याकोपसमन्विता॥
समेत्यकृष्णंभर्त्तारमुवाचकलेक्षणा॥९०॥सत्योवाच ॥एषाशचीयदुश्रेष्ठपारिजातेनगर्विता॥अदत्त्वाममगोविन्दबबन्धस्वस्यमूर्द्धनि ॥९१॥ महादेव
उवाच ॥ सत्यायाभाषितंश्रुत्वावासुदेवोमहाबलः॥उत्पाटयपारिजातंतुनिवेश्यगरुडोपरि॥९२॥आरुह्यसत्ययातूर्णंवैनतेयंमहाबलम्॥प्रययौद्वारकां
रम्यांनगरींदेवकीसुतः ॥ ९३ ॥ ततःकोपसमाविष्टोदेवराजःशतक्रतुः ॥ रुद्रैर्वसुभिरादित्यैःसाध्यैश्चमरुतांगणैः ॥९४॥ ऐरावतंसमारुह्यययौयुद्धाय
केशवम् ॥ ततोदेवगणाःसर्वेपरिवार्यजनार्दनम् ॥ ९५ ॥ ववृषुःशस्त्रवर्षाणिमेघाइवमहाचलम् ॥ कृष्णश्चिच्छेदचक्रेणतान्यस्त्राणिदिवौकसाम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥९६॥ वैनतेयस्तुसंक्रुद्धःपक्षपातेनवीर्यवान् ॥ पातयामासतान्देवांस्तालानिवमहानिलः ॥९७॥ ततःक्रुद्धःसहस्राक्षोदेवानामीश्वरःप्रभुः ॥ मुमोच
सहसादीप्तंवज्रंकृष्णजिघांसया ॥ ९८ ॥ जग्राहकृष्णस्तंवज्रंहस्तेमैकेनलीलया ॥ ततोभीतःसहस्राक्षोनागेन्द्रादवरुह्यसः ॥ ९९ ॥ प्राञ्जलिःपुरतः
स्थित्वानमस्कृत्यजनार्दनम् ॥ प्राहगद्गदयावाचास्तुत्वास्तुतिभिरेवच ॥ १००॥ इन्द्रउवाच ॥ देवयोग्यमिदंकृष्णपारिजातंत्वयापुरा ॥ दत्तंमम
सुराणांचकथंस्थास्यतिमानुषे ॥ १ ॥ महादेवउवाच ॥ ततःप्रोवाचभगवान्सहस्राक्षमुपस्थितम् ॥ शच्यावमानितासत्यातवगेहेसुरेश्वर ॥ २ ॥
अदत्त्वापारिजातानिसत्यायैसापुलोमजा ॥ स्वयमेवस्वशिरसिधारयामासतेप्रिया ॥ ३ ॥ अस्यानिमित्तंदेवेन्द्रपारिजातोहृतोमया ॥ अस्यैप्रति
श्रुतंदातुंमयासुरगणेश्वर ॥ ४ ॥ तवगेहेपारिजातंस्थापयामीतिवासव ॥ तस्माद्द्यनदातव्यःपारिजातःसुरेश्वर ॥ ५ ॥ देवतानांहितार्थायप्राप
यिष्यामिभूतले ॥ तावत्तिष्ठतुदेवेन्द्रपारिजातोममालये ॥ मयिस्वर्गगतेशक्रगृहाणत्वंयथेच्छया ॥ ६॥ महादेवउवाच ॥ एवमुक्त्वायदुश्रेष्ठस्तस्मै
वज्रंददौस्वयम् ॥ एवमस्त्वितिगोविन्दंनमस्कृत्यसवज्रभृत् ॥ ७ ॥ प्रययौस्वपुरंदिव्यंसहदेवगणैर्वृतः ॥ कृष्णोऽपिसत्ययादेव्यागरुडोपरिसंस्थितः॥
॥ ८ ॥ संस्तूयमानोमुनिभिर्द्वारवत्यांविवेशह ॥ सत्यायानिकटेस्थाप्यपारिजातंसुरद्रुमम् ॥ ९ ॥ रमयामासभार्याभिःसर्वाभिःसर्वगोहरिः ॥
निशासुतासांसर्वासांगृहेषुमधुसूदनः ॥ विश्वरूपधरःश्रीमानुवाससस्सुखप्रदः ॥ ११० ॥इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०उमामहेश्वरसंवादेश्रीकृष्ण
चरितेश्रीवासुदेवविवाहकथनंनामैकोनपञ्चाशदधिकद्विशततमोऽध्यायः ॥२४९॥ श्रीरुद्रउवाच ॥ रुक्मिण्यांकृष्णस्यप्रद्युम्नोमदनांशेनजज्ञे ॥ असौ
मदनसंभूतोमहाबलःशम्बरंजघ्निवान् ॥ तस्यरुक्मिणःसुतायामनिरुद्धोजज्ञे ॥ सोऽपिबाणपुत्रीमुषांनामकन्यामुपयेमे ॥ सातुस्वप्नेनीलोत्पलदल
श्यामंपुण्डरीकनिभेक्षणंमहाबाहुंविचित्राभरणोपेतंषोडशसमवयस्कंरक्तारविन्दवक्त्रंयथावदुपभुज्य प्रबुध्यतंपुरतोनदृष्ट्वा मदनेनपीडिताभ्रान्तचित्ता
मांतुत्यक्त्वाक्वासिकयासीतिबहुधाविललाप ॥ ततस्तस्याःसखीचित्रलेखेतिनामकन्यांतादृशीमवस्थांगतांविलोक्यकिंनिमित्तंविभ्रान्तचित्तासीति
पप्रच्छ ॥ सापिस्वप्नलब्धंपतिंयथावदाचष्ट ॥ सापिसकलदेवमानुषादिश्रेष्ठान्पटेविलिख्यतस्यैदर्शयामास ॥ यदुवंशसंभूतान्कृष्णसंकर्षण ॥२६८॥
प्रद्युम्नानिरुद्धादीनपिसम्यङ्निवेदयामास॥सातेषांकृष्णमनुमान्यप्रद्युम्नानन्तरमनिरुद्धंदृष्ट्वासइत्येषइत्यालिलिङ्ग ॥ अथचित्रलेखाबह्वीभिर्मायावती
भिर्दैत्यस्त्रीभिर्द्वारवतींगत्वारात्रावन्तःपुरेसुप्तमनिरुद्धंदृष्ट्वागृहीत्वामोहयित्वामाहिष्मत्यांबाणस्यान्तः पुरेचैत्यप्रासादादियुक्तेतस्याबाणपुत्र्याःशय्या
यांचिक्षेप ॥ सोऽपिप्रबुद्धोऽतिरम्येश्लक्ष्णेपर्यङ्केसंस्थितामुषांसर्वलक्षणलक्षितांविचित्राभरणवसनगन्धमाल्यालङ्कृतांकाञ्चनवर्णांसुकेशींसुजातस्तनीं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दृष्ट्वागाढमालिङ्ग्यकरिण्यागन्धहस्तीवतयातिप्रीतिसंयुक्तयायथासुखंरमयामास ॥ एवंमासमात्रंनिरन्तरतयानिरुद्धंरममाणंकदाचिदन्तःपुरनिवासि
न्योवृद्धादैत्यस्त्रियोज्ञात्वाराज्ञेनिवेदयामासुः ॥ सराजाक्रोधताम्राक्षःपरंविस्मयंगत्वातमिहानयतेतिपुरःकिङ्करान्प्रेषयामास ॥ तेऽपितूर्णंनृपप्रासाद
मारुह्यराजपुत्र्याःशयनेसंस्थितमनिरुद्धंग्रहीतुमाजग्मुः ॥ सतान्समारब्धान्दृष्ट्वाप्रासादस्तम्भमेकंहेलयोत्पाट्यनियुतसङ्ख्याकान्किङ्करान्मुहूर्तमा
त्रेणैवस्तम्भेनचूर्णितगात्रांश्चकार ॥ अथदैत्यपतिर्निहतान्किङ्करान्दृष्ट्वाकौतूहलंगत्वाअसौश्रीकृष्णपौत्रइतिदेवर्षिणाप्रोक्तोधनुरादायस्वयमेवानिरुद्धं
ग्रहीतुंतत्समीपमाजगाम ॥ अनिरुद्धोऽपियोद्धुमायान्तंसहस्रबाहुंराजानंदृष्ट्वातत्परिघं भ्रामयित्वाबाणस्योपरिचिक्षेप ॥ सतु स्वचापनिर्मुक्तेन
बाणेनतंपरिघंचिच्छेद ॥ अनन्तरमुरगास्त्रेणअनिरुद्धंनिबिडंबद्ध्वास्वान्तःपुरेनिवेशयामास ॥ अथकृष्णोऽप्येवंविधमेवदेवर्षिणाज्ञात्वाबल
देवप्रद्युम्नसहितःस्वसेनयाविहङ्गमेन्द्रमारुह्यतस्यबाणस्यभुजवनंछेत्तुमाजगाम ॥ बलिपुत्रेणपुराशङ्करोर्चितःप्रसन्नोवरंवृणीष्वेत्युवाच ॥ तमी
श्वरंबाणोममपुरद्वारिरक्षार्थंसर्वदोपविश्यसमागतंपरसैन्यंजहीत्येवंवरमयाचत ॥ तंतथेत्युक्त्वाशङ्करोऽपितस्यपुरद्वारिसायुधःसपुत्रःसगणः
समासीनस्तस्मिन्नेवकालेरुषास्वसेनयासमागतंवासुदेवंदृष्ट्वावृषमारुह्यसर्वायुधोपेतःस्वपुत्रगणसंवृतोयोद्धुंनिश्चक्राम ॥ कृष्णोऽपितंभूतपतिंगजचर्म
कपालभस्मधरंज्वलितोरगाकल्पंपिङ्गलंत्रिलोचनंत्रिशूलधरंसर्वभूतगणसंहृतिकर्त्तारंसर्वभूतभयावहं संवर्त्ताग्निप्रभं पुत्रद्वयसमन्वितंसमस्तगणावृतंत्रि
पुरान्तकंदृष्ट्वा सेनांसुदूरेपृष्ठतोनिवेश्यबलभद्रप्रद्युम्नसहितस्तेनरुद्रेणसहप्रहसन्निवयोद्धुमारेभे ॥ प्रथमंतदभूद्घोरंकृष्णशङ्करयोस्तयोः ॥ पिनाक
शार्ङ्गनिर्मुक्तैर्बाणैःसंवर्त्तकोपमैः ॥ १ ॥ रामोऽपिगजवक्त्रेणप्रद्युम्नःषण्मुखेनच ॥ युयुधातेमहावीर्यौसिंहाविवबलोत्कटौ ॥ २ ॥
॥ विनायकःस्वदन्ताभ्यांजघानोरसियादवम् ॥ रामोमुशलमादायतस्यदन्तमताडयत ॥ ३ ॥ निर्भिन्नदन्तःसहसाप्रदुद्रावाखुवाहनः ॥
तदाप्रभृतिलोकेऽस्मिन्हतदन्तोगणेश्वरः ॥४॥ देवदानवगन्धर्वैरेकदन्तइतीरितः ॥ प्रद्युम्नेनसमंयुद्धंचकारशिखिवाहनः ॥ ५ ॥ गणान्विद्रावयामास
मुशलेनहलायुधः ॥ कृष्णेनसुचिरंकालंयुद्ध्वासौनीललोहितः ॥ ६ ॥ तापज्वरंमहादीप्तमस्मिन्संयोज्यसायके ॥ कोपान्मुमोचतदसौभृशंसंरक्त
लोचनः ॥ ७ ॥ तदस्त्रंवारयामासकृष्णःशीतज्वरेणतु ॥ ताभ्यांहरिहराभ्यांतुविसृष्टौताविमौज्वरौ ॥ ८ ॥ विशतुर्मानुषेलोकेतयोरेवाज्ञयाभृशम् ॥
हरिशङ्करयोर्युद्धंयेतुशृण्वन्तिमानवाः ॥ ९ ॥ तेसर्वेज्वरनिर्मुक्ताःप्राप्नुवन्तिनिरामयम् ॥ ततःसतुहृषीकेशोमोहनास्त्रंदुरासदम् ॥१०॥ नियुज्यबाणं
भूतेशेमुमोचमधुसूदनः ॥ मुहुर्मुहुर्व्यजृंभद्धैतेनास्त्रेणविमोहितः ॥११॥ पपातमूर्च्छितोभूमौशङ्करस्त्रिदशेश्वरः ॥ पितरंमोहितंदृष्ट्वाशक्तिमुद्यम्यवीर्यवान्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥१२॥ योद्धुमभ्याययौकृष्णंषण्मुखःशिखिवाहनः॥हुंकारेणैवतंकृष्णश्चकारात्रपराङ्मुखम् ॥१३॥ एवंजित्वायदुश्रेष्ठःशूलपाणिंत्रिलोचनम्॥महास्व
नंपाञ्चजन्यंशङ्खंदध्मौप्रतापवान् ॥ १४ ॥ कृष्णेननिर्जितंश्रुत्वासात्मजशङ्करंतदा ॥ बाणःस्यन्दनमास्थायययौयुद्धायकेशवम् ॥ १५ ॥ सदृष्ट्वासह
साकृष्णंगरुडोपरिसंस्थितम्॥छादयामासगोविन्दंबहुशस्त्रास्त्रवृष्टिभिः॥१६॥गदाभिःपरिघैःशूलैःशक्तिभिस्तोमरैरपि॥ भिण्डिपालैश्चखड्गैश्चचक्रैर्बाणै
र्निरन्तरम्॥१७॥तानिसर्वाणिचिच्छेदचक्रेणैवजनार्दनः॥ससर्जतस्यबाहूनांछेदनार्थंसुदर्शनम् ॥१८॥मुक्तंदनुजराजस्यसहस्रारंसुदर्शनम्॥तद्बाहुकाननं
तूर्णंछिन्नंचक्रेसहस्रधा ॥१९॥ एतस्मिन्नन्तरेदेवीपार्वतीसंशितव्रता ॥ हरेःसमीपमागत्यकृताञ्जलिरभाषत ॥२०॥ पार्वत्युवाच॥कृष्णकृष्णजगन्नाथ
नारायणदयानिधे ॥ दास्यस्मितवदेवेशपूर्वंभावेयदूत्तम ॥ २१ ॥ त्वयादत्तंवरंमह्यंतदाकौशलपर्वते॥ सौभाग्यंशाश्वतंसौम्यप्रसन्नेनमहात्मना ॥२२॥
तवमुख्यंसहस्रस्यनाम्नामन्यतमंविभो ॥ गौरीसौभाग्यदातेतिमुनिभिःपरिकीर्तितम् ॥ २३ ॥ तत्सत्यंकुरुगोविन्दगरुडारूढशाश्वत ॥ तस्मान्मम
पतिंदेवत्वंजीवयितुमर्हसि ॥ २४ ॥ रुद्रउवाच ॥ एवमुक्तस्ततोदेव्याकृष्णःकमललोचनः ॥ अस्त्रंसंहारयामासयेनासौमोहितःपतिः ॥ २५ ॥
कृष्णास्त्रेणविनिर्मुक्तःसर्वभूतपतिःशिवः ॥ उत्थायप्राञ्जलिर्भूत्वातुष्टावजगतांपतिम् ॥ २६ ॥ शङ्करउवाच ॥ कृष्णकृष्णजगन्नाथजानेत्वांपुरुषोत्त
मम् ॥ परेशंपरमात्मानमनादिनिधनंपरम् ॥२७॥ अवतीर्णंमनुष्येषुशरीरग्रहणात्मिका ॥ लीलेयंसर्वलोकस्यतवचेष्टोपलक्षणा ॥ २८॥ प्रसीदमेनम
स्तुभ्यंप्रसीदममशाश्वत ॥ प्रसीदमेजगत्स्वामिन्प्रसीदाच्युतकेशव॥२९॥ त्वमेवजगतांस्रष्टाधाताहर्त्ताजगद्गुरुः ॥ त्वमेवचिदचिद्वस्तुरूपंब्रह्मसुरेश्वर
॥ ३० ॥ त्वमादिस्त्वमनादिस्त्वमीश्वरःशेषएवच ॥ त्वंमहत्त्वंपरंब्रह्मप्रत्यगात्मात्वमेवहि ॥ ३१ ॥ समस्तामरवर्यस्त्वममर्त्यस्त्वंसुरेश्वर॥त्वं
मर्त्त्येनसमानश्चसौशील्येनतवप्रभो॥३२॥तौशाश्वतौविषूचीनौपरजीवौसनातनौ॥तथापश्चापिभूतानितववात्सल्यगौरवात् ॥३३॥ क्षराक्षरेपरेधाम्निरु
चोनित्यंसुराश्रये ॥ अधिविश्वेनिधेषित्वंदास्यकर्मणिनान्यथा॥३४॥यस्त्वांनवेदलोकेऽस्मिन्समूढःसर्वभावनः॥परावरेश्वरंधामविदुर्दास्येमनीषिणः
॥३५॥तेवैसमासतेयुक्तास्तत्पदेत्रिदशैःसमम् ॥ सामान्योभजतेदूरेनन्तुंनित्यंपदंतव ॥३६॥ तस्थतुर्जागरूकेऽस्मिन्स्वसारौयुवतीइव ॥ मिथुनानि
तवाध्यक्षन्नुवतेयदुशाश्वत ॥३७॥ तवनामानिकर्माणिगुणानिशाश्वतानिच ॥ ऐश्वर्याणिगुणातीतन्नुवतेचोत्तमेइमे ॥ ३८ ॥कर्मज्ञानमयेरूपेइमेपूर्वोत्तरे
श्रुते ॥ स्वसारौयुवतीप्रोक्तेस्तोतारौतवकेशव ॥ ३९ ॥ त्वंप्रज्ञानंपरंब्रह्मत्वयाप्राज्ञेनशाश्वत ॥ जीवयैतेनप्राज्ञेनपरेणैवात्मनात्वया ॥ ४० ॥
तस्माच्छरीरादुत्क्रम्यकृपयातवकेवलम् ॥ आमुष्मिकेपरेस्वर्गेत्वयादत्तात्मबोधवान् ॥४१॥ प्रज्ञानंचैवविज्ञानंमेधांदृष्टिंतथाधृतिम्॥ सर्वान्कामानवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्नोतिअमृतंसभवेत्तदा ॥४२॥ एतत्संज्ञानमात्मानंयदेतद्धृदियन्मनः ॥ मनीषाचैवयुक्तिश्चस्मृतिःसंकल्पएवच ॥४३॥ तपश्चक्रतवःकामोवशइत्यादिते
प्रभो ॥ भवन्तिनामधेयानिप्रज्ञानस्यघृणानिधे ॥४४॥एषत्वंपरमंब्रह्मएषत्वंवैप्रजापतिः॥एषत्वमिन्द्रोरुद्रश्चएषत्वंसर्वदेवताः ॥४५॥एतानिसर्वभूतानि
त्वमेवपमेश्वर ॥ सुतमित्राणिजीवायुस्तथान्यानिसनातन ॥ ४६ ॥ जरायुजाण्डजातानिस्वेदजान्युद्भिजानिच ॥ अश्वागावश्चपुरुषाहस्तिनश्चेतरा
णिच ॥ ४७ ॥ यत्किंचित्प्राणिजातंचजङ्गमाश्चैवजन्तवः ॥ स्थावरायेचवैनाथसर्वेत्वत्तोभवन्तिच ॥ ४८॥ त्वांहिसर्वगतंचेत्थंवदन्तिश्रुतयो
हरिम् ॥ त्वयैवप्रेरितालोकाश्चेष्टन्तेसाध्वसाधुषु ॥४९॥ तस्मान्मयाकृतंयच्चअपराधमिदंप्रभो ॥ क्षमस्वकरुणासिन्धोगुणैःशुभतमैस्तव ॥५०॥ नम
स्तेपुण्डरीकाक्षगोविन्दाच्युतमाधव ॥ वासुदेवजगद्वन्द्यनारायणनमोऽस्तुते॥५१॥नमस्यामिजगत्स्वामिन्नृसिंहकरुणाकर॥ श्रीशसर्वगतश्रीमन्परमा
त्मन्नमोऽस्तुते ॥५२॥ निजावसथवैकुण्ठनित्यमुक्तार्चितप्रभो ॥ त्रयीनाथनमस्तुभ्यंरामराजीवलोचन॥ ५३ ॥ भूभारकविनाशायकृष्णानन्दस्व
रूपिणे ॥ विष्णवेजिष्णवेतुभ्यंनमस्तेयदुनन्दन ॥ ५४ ॥ एवंस्तुत्वाथगोविन्दंप्रणिपत्यउमापतिः ॥ प्राञ्जलिःप्राहभूतेशोवाक्यंगंभीरयागिरा
॥५५॥रुद्रउवाच ॥ मयादत्तवरोह्येषबाणोबलिसुतःप्रभो ॥ अहंचदत्तवांस्तस्मैपुरानेनार्थितोवरम्॥५६॥अमरत्वंयदुश्रेष्ठसर्वकर्तुंत्वमर्हसि॥ तस्मादेनं
बलिसुतंत्रातुमर्हसिमेप्रियम्॥५७॥तथेत्युक्त्वाचभगवान्बाणंबलिसुतंतदा ॥ प्राणसंशयमापन्नंच्छिन्नबाहुमसृक्चितम्॥५८॥संहृत्यचक्रंगोविन्दोमुमो
चकरुणानिधिः॥मोचयित्वाबलिसुतंशंकरःसंशितव्रतः॥५९॥वृषभेन्द्रंसमारुह्यपार्वत्यासहितःप्रभुः॥ययौचवसतिस्थानंकैलासंधरणीधरम्॥६०॥सतु
बाणोनमस्कृत्यरामकृष्णौमहाबलौ ॥ ताभ्यांवैनगरींगत्वामुमोचमदनात्मजम् ॥ ६१ ॥ वस्त्रैराभरणैर्दिव्यैःपूजयित्वायथार्हतः ॥ उषांसंप्रददौ
तस्मैकृष्णपौत्रायशौरये ॥ ६२ ॥ उद्वाह्यरामकृष्णौतमनिरुद्धंयथाविधि ॥ बाणेनपूजितौतत्रप्रद्युम्नसहितौतदा ॥ ६३ ॥ उषयासहितंतत्रानिरुद्धंवै
जनार्दनः॥आरोप्यस्यन्दनेदिव्येययौद्वारवतींतदा॥६४॥रामप्रद्युम्नसहितस्सेनयासहितोहरिः ॥प्रविवेशपुरींरम्यांत्रिदशैर्मघवानिव॥६५॥अनिरुद्धोबा
णपुत्र्यानानारत्नमयेगृहे ॥ अनिशंरमयामासनानाभोगैर्मुदान्वितः ॥६६ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप० उत्तर० उमामहेश्वरसंवादेबाणासुरसङ्ग्रा
मकथनंनामपञ्चाशदधिकद्विशततमोऽध्यायः ॥२५०॥ श्रीरुद्रउवाच ॥ अथपौण्ड्रकवासुदेवःकाशिराजोवाराणस्यांविविक्तेद्वादशवर्षंमहेशमर्चयन्नि
राहारःपञ्चाक्षरंजजाप॥पौरश्वरणिकान्तेशङ्करंस्वनेत्रकमलेनपूजयामास ॥ततःशूलपाणिरुमापतिःप्रसन्नोवरंवृणीष्वेतितमाह॥असौपञ्चवक्त्रंसर्वभूतपतिं
शिवंप्रसन्नंवरदममवासुदेवसमानरूपंप्रयच्छेत्युवाच ॥ शिवस्तस्मैशङ्खचक्रगदापद्मयुतचतुर्भुजंपुण्डरीकदलनिभलोचनंवासुदेवसमानकिरीटललितकु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्तलंपीतवस्त्रकौस्तुभाभरणादिचिह्नान्यपिमह्यंदेहीतियाचितःशिवःसर्वमपितस्मैप्रददौ ॥सतुवासुदेवोऽहमितिसर्वलोकान्मोहयामास ॥ कदाचित्स्वर्ग
तोमदबलोत्कटंतंकाशिपतिंनारदोऽभ्येत्यवसुदेवसुतंकृष्णमजित्वावासुदेवत्वंनविद्यतइत्युवाच ॥सतुतस्मिन्नेवक्षणेकृष्णंजेतुंगरुडपताकायुतंरथमारुह्य
चतुरङ्गाक्षौहिणीबलेनद्वारकामवाप ॥ तत्रपुरद्वारिस्वर्णयानेसंस्थितोवासुदेवोऽहंयुद्धार्थंसंप्राप्तोऽस्मिमामजित्वातववासुदेवत्वंनास्तीतिदूतंप्रेषयामास॥
विष्णुरपितच्छ्रुत्वावैनतेयमारुह्यपौण्ड्रकेणयोद्धुंपुरद्वाराद्विनिष्क्रम्याक्षौहिणीबलेनस्यन्दनेसमासीनंशङ्खचक्रगदापद्महस्तंपौण्ड्रकंददर्श॥ कृष्णोऽथशा
र्ङ्गमादायसंवर्ताग्निप्रभैर्बाणैस्तस्यरथाश्वगजपदातियुक्तंमहदक्षौहिणीबलंमुहूर्तमात्रेणनिःशेषंददाह ॥ शरेणैकेनतस्यहस्तावसक्तशङ्खचक्रगदादिहेतीर
पिलीलयैवचिच्छेद॥पवित्रेणसुदर्शनेनकिरीटकुण्डलयुतंतस्यशिरःकमलंछित्त्वावाराणस्यामन्तःपुरेनिपातयामास ॥ तद्दृष्ट्वासर्वेकाशीनिवासिनःकिमे
तदित्याशङ्क्यविस्मिताबभूवुः ॥ तस्यपौण्ड्रकस्यसुतोदण्डपाणिरितिवासुदेवेनभगवतानिहतंस्वपितरंश्रुत्वामहतामन्युनासमाविष्टःस्वपुरोहितेनाभियु
क्तोमाहेश्वरेणक्रतुनाशङ्करमियाज ॥सतुप्रसन्नःकृष्णजिघांसायांसमर्थांमाहेश्वरींकृत्यांतस्मैसंप्रीत्याचदत्तवान् ॥ सकाशिराजस्तांमाहेश्वरींज्वालाकुलो
पचितविग्रहांसंदीप्तसटाकलापांपिङ्गलनेत्रांज्वलत्करालवदनांत्रिशूलहस्तांभस्माङ्गरागलिप्तांनरमुण्डमालाविभूषितांसर्वदेवभयङ्करींरुद्रदत्तांनग्नांकृत्यां
समीक्ष्यपुत्रदारबान्धवसहितंकृष्णंजहीतिप्रेरयामास ॥ सातुसर्वलोकभयावहासर्वांपृथ्वींस्वतेजसानिर्दहन्तीप्रलयाशनिनिर्भरस्वनंनदन्तीद्वारकाम
वाप॥तत्रत्याःसर्वेजनास्तांदृष्ट्वामहाप्रलयोऽयमितिमत्वाहाहाकारंकुर्वन्तःकृष्णंनिवेदयामासुः ॥ कृष्णोऽपितान्सर्वान्नभेतव्यमित्युक्त्वाप्राकारतोरणे
स्थितांमहारौद्रांकृत्यांतथाविधांदृष्ट्वासकलशस्त्रास्त्रनिवारणसमर्थंसहस्रारंसुदर्शनंतस्यांकृत्यायांसहसामुमोच ॥ सातुकल्पान्तार्ककोटिसमवर्चसाशत
योजनोद्गतं सकलदीप्तास्त्रयुतंहिरण्मयंप्रभापूर्णंसकलजगत्प्रलयस्थितिसमर्थंसहस्रारंसर्वदेवनमस्कृतंजगच्छरणभूतंमहासुदर्शनंविलोक्यविनष्टतेजाभ
यार्ताक्रोशन्तीवाराणसींप्रतिदुद्राव ॥सुदर्शनोऽपितांकृत्यांभृशमन्वगात् ॥ सापिभयार्ताक्रोशन्तीकाशिपतेस्तस्यान्तःपुरंप्रविवेश ॥सुदर्शनोऽपितांवा
राणसींपुरींप्राप्यसभृत्यबलवाहनंपौण्ड्रकसुतंदण्डपाणिनामकाशिराजंबहुप्रासादहर्म्यमालिनींपुरींमाहेश्वरीमपिभस्मावशेषांकृत्वा सकलदेवमहर्षिभिः
पूज्यमानःपुनरेवद्वारवत्यांकृष्णहस्तंसुसौम्यंकल्पमिवआविवेश ॥ अत्रचश्लोकागीयन्ते ॥ शस्त्रास्त्रमोक्षमजरंदग्ध्वातद्बलमोजसा ॥ कृत्यांभस्मा
वशेषांतांततोवाराणसींपुरीम् ॥ १ ॥ प्रभूतरथमातंगांसाश्वांपुंस्त्रीसमन्विताम् ॥ साशेषकोषकोष्ठांतांदुर्निरीक्ष्यांसुरैरपि ॥ २ ॥ द्वारोपलक्षिताशेष
गृहप्राकारचत्वराम् ॥ प्रददाहहरेश्चक्रंसकलामेवतांपुरीम् ॥ ३ ॥ अक्षीणगतिसामर्थ्यमसाध्यकृतसाधनम् ॥ तच्चक्रंप्रस्फुरद्दीप्तंविष्णोरभ्याय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यौकरम् ॥ ४ ॥ इति श्रीपाद्मेमहापुराणेपञ्चप०उत्तर०उमामहेश्वरसंवादेश्रीकृष्णचरितेपौण्ड्रकपुत्रकृत्याविध्वंसनंनामैकपञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५१ ॥ श्रीरुद्रउवाच ॥ अथमगधाधिपःकंसवधानन्तरंद्विषन्नेवयादवान्सदापीडयामास॥तेदुःखिताःकृष्णमूचुः ॥ सचभीमार्जुनावाहूयसंमन्त्रयामास॥कृष्णोऽनेनरुद्रःपूजितस्तत्प्रसादाच्छस्त्रैरवध्यःपरंकेनापिप्रकारेणहन्तव्यइति॥ अथविचार्यभीममाहएनंप्रतिमल्लयुद्धंकुरुतत्तेनप्रतिज्ञातम् ॥ अथसकलचराचरजगद्वन्द्योवासुदेवोभीमार्जुनसहितोजरासन्धस्यपुरींगत्वाविप्रवेषेणतस्यान्तःपुरमवाप ॥ सोऽपिमहावीर्यान्क्षत्रियान्युद्धेनिर्जित्यबलाद्गृहीत्वास्ववेश्मनिनिरुध्यमासिमासिकृष्णचतुर्दश्यामेकैकंहत्वातद्रक्तेनैवबालिंभैरवायाकरोत्॥एवंविधंसकलजनपार्थिववधंकुर्वतोजरासन्धस्यवधेसमुद्यच्छन्भीमार्जुनसहितस्तस्यगृहेविप्रवेषेणैवप्रविवेश॥सतुतान्दृष्ट्वादण्डवत्प्रणतोभूत्वायथोचितासनेषुनिवेश्यमधुपर्कविधानेनसंपूज्यधन्योऽस्मिकृतकृत्योऽस्मिकिमर्थंभवन्तोमेसमीपआगतास्तद्वक्तव्यमहंतत्सर्वंभवद्भ्योदास्यामीत्युवाच ॥ तेषांवासुदेवःप्रहसन्पार्थिवंतमुवाच॥कृष्णभीमार्जुनायुद्धार्थमागताःस्मोऽस्माकमन्यतमंद्वन्द्वयुद्धार्थंवृणीष्वेत्यवदत्॥सोऽपितथेत्यवदत्ततोद्वंद्वयुद्धार्थमारुतिंवरयामास॥ततोभीमजरासन्धयोरभितोभयङ्करंमल्लयुद्धंनिरन्तरंपञ्चविंशतिवासरमभूत् ॥ ततःकृष्णेनैवसंचोदितोवायुपुत्रस्तस्यशरीरंद्विधाकृत्यभूमौनिपातयामास ॥ एवंजरासन्धंपाण्डुपुत्रेणहत्वाताञ्जरासन्धनिरुद्धान्वासुदेवोऽपिपार्थिवान्मोचयामास ॥ अत्रश्लोकौभवतः॥निहत्यवायुपुत्रेणजरासन्धंयदूद्वहः ॥ तद्गृहेसन्निरुद्धांस्तुमोचयामासपार्थिवान् ॥१॥ तेचतत्रनमस्कृत्यस्तुत्वाचमधुसूदनम् ॥ स्वान्स्वाञ्जनपदान्सर्वेजग्मुःकृष्णेनरक्षिताः ॥ २ ॥ अथताभ्यामिन्द्रप्रस्थंगत्वावासुदेवस्तत्रमहाक्रतुंराजसूयंयुधिष्ठिरंकारयामास ॥ तत्रसमाप्तेक्रतौअग्रपूजांभीष्मानुमतेनकृष्णायदत्तवान् ॥ तत्रशिशुपालःकृष्णंबहून्याक्षेपवाक्यान्युक्तवान् ॥ कृष्णोऽपिसुदर्शनेनतस्यशिरश्चिच्छेद ॥ असौजन्मत्रयावसानेहरेःसारूप्यमगमत् ॥ अथशिशुपालंनिहतंश्रुत्वादन्तवक्रःकृष्णेनयोद्धुंमथुरामाजगाम ॥ कृष्णस्तुतच्छ्रुत्वारथमारुह्यतेनयोद्धुंमथुरामाययौ ॥ दन्तवक्रवासुदेवयोरहोरात्रंमथुरापुरद्वारियमुनातीरेसंग्रामःसमवर्त्तत ॥ कृष्णस्तुगदयातंजघान ॥ सतुचूर्णितसर्वाङ्गोवज्रनिर्भिन्नमहीधरइवगतासुरवनितलेपपात ॥ सोऽपिहरेःसायुज्यंयोगिगम्यंनित्यानन्दसुखंशाश्वतंपरमंपदमवाप ॥ इत्थंजयविजयौसनकादिशापव्याजेनकेवलंभगवतोलीलार्थंसंसृताववतीर्यजन्मत्रयेऽपितेनैवनिहतौजन्मत्रयावसानेमुक्तिमवाप्तौ ॥ कृष्णोऽपितंहत्वायमुनामुत्तीर्यनन्दव्रजंगत्वाप्राक्तनौपितरावभिवाद्यआश्वास्यताभ्यांसाश्रुकण्ठमालिङ्गितःसकलगोपवृद्धान्प्रणम्याश्वास्यरत्नाभरणादिभिस्तत्रस्थान्संतर्पयामास ॥ कालिन्द्याःपुलिनेरम्येपुण्यवृक्षसमावृते ॥ गोपनारीभिरनिशंक्रीडयामासकेशवः

Nepal-Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥३॥रम्यकेलिसुखेनैवगोपवेषधरोहरिः।बद्धप्रेमरसेनात्रमासद्वयमुवासह।४।अथतत्रस्थानन्दगोपादयः सर्वेजनाः पुत्रदारसहिताः पशुपक्षिमृगादयश्चवासु देवप्रसादेनदिव्यरूपधराविमानमारूढाः परमंवैकुण्ठलोकमवापुः ॥ कृष्णस्तुनन्दगोपव्रजौकसांसर्वेषांपरमंनिरामयंस्वपदंदत्त्वादिविदेवगणैःसंस्तूयमा नोद्वारवतींश्रीमतींविवेश। तत्रवसुदेवोग्रसेनसंकर्षणप्रद्युम्नानिरुद्धाक्रूरादिभिःप्रत्यहंसंपूजितःषोडशसहस्रभार्याभिरष्टाभिर्दिव्यमहिषीभिश्चविश्वरूपधरो दिव्यरत्नमयनानागृहान्तरेषुसुरतरुकुसुमाञ्चितश्लक्ष्णतरपर्यङ्केषुरमयामास॥ अथरामकृष्णसतीर्थ्योविप्रोबालसखासदात्यन्तदारिद्र्यपीडितःकुचेलोमु ष्टिमात्रान्याचनाप्तपृथुकाञ्जीर्णवाससिनिबध्यवासुदेवंद्रष्टुंश्रीमतींद्वारकानगरीमाजगाम ॥ सतुरुक्मिण्यन्तःपुरद्वारिक्षणंतूष्णींतस्थौ ॥ कृष्णोऽपिसमा गतंब्राह्मणंज्ञात्वाप्रत्युद्गम्यनमस्कृत्यकरंगृहीत्वागृहान्तरेस्वासनेनिवेश्यभयाद्वेपमानंतंरुक्मिणीहस्तगतसुवर्णकलशजलेनपादौप्रक्षाल्य मधुपर्केणपूज यामास ॥ सुधामृतोपमैरन्नपानाद्यैस्तर्पयित्वातस्यजीर्णवस्त्रान्तरेयाचनाप्तपृथुकान्स्वयमेवहस्तेनगृहीत्वाप्रहसन्नश्नात्स ॥ कृष्णेनपृथुकेभक्षितेतस्मि न्नेवक्षणेतस्यबहुधनधान्यवस्त्राभरणसंभृतंमहदैश्वर्यमभूत् ॥ सतुकृष्णेनविसृष्टोममकिंचिद्वस्त्रंवाधनंवाकृष्णेननदत्तमितिमन्यमानःस्वपुरंविवेश॥अथ बहुधनधान्ययुतंस्वगृहंदृष्ट्वातत्प्रसादादिदंलब्धमितिवदन्प्रहृष्टेनान्तरात्मनादिव्यवस्त्राभरणादिनाभार्ययासहसर्वान्कामान्भुक्त्वाहरिसंतुष्टयैबहुयज्ञा निष्ट्वातत्प्रसादेनपरमंनित्यंस्वर्गसुखमवाप॥अथधृतराष्ट्रतनयोदुर्योधनःपाण्डुतनयान्कपटद्यूतव्याजेनराज्यमपहृत्यस्वराष्ट्राद्विवासयामास ॥ तेतुयुधि ष्ठिरभीमार्जुननकुलसहदेवाःस्वपत्न्याद्रौपद्यासहमहारण्यंगत्वातत्रद्वादशाब्दान्स्थित्वा संवत्सरपर्यन्तमज्ञाताः सर्वेमत्स्यदेशाधिपतेर्विराटस्यनिवेश नेस्थित्वावासुदेवेनसहायेनधार्तराष्ट्रान्योद्धुमाजग्मुः ॥ तेषांधार्तराष्ट्रपाण्डुपुत्राणांनानादेशाधिपनृपैःकुरुक्षेत्रेमहापुण्येदेवानामपिभयङ्करोमहान्सङ्ग्रा मोऽभवत् ॥ अथश्रीकृष्णोऽप्यर्जुनसारथ्यंकुर्वन्नर्जुनेस्वशक्तिमावेश्यतेनदुर्योधनभीष्मद्रोणप्रमुखान्सर्वान्पार्थिवानेकादशाक्षौहिणीबलसहितान्कुरु क्षेत्रेहत्वापाण्डवान्राज्येस्थापयित्वानिःशेषेणसर्वभूभारमपास्यस्वांपुरींप्रविवेश ॥ कस्यचित्त्वथकालस्यकतिपयाहनिवैदिकोब्राह्मणोमृतंपञ्चवार्षिकं बालमादायराजद्वारिनिधायबहुशोविलपन्बहून्याक्रोशवाक्यानिकृष्णंजगाद ॥ कृष्णस्तमाक्रोशंश्रुत्वातूष्णीमुवास ॥ सतुममपञ्चपुत्राःपूर्वंहता अयंतुषष्ठःएनंकृष्णोनजीवयिष्यतितार्हिराजद्वारिमरिष्यामीत्युवाच ॥ तस्मिन्कालेअर्जुनःकृष्णंद्रष्टुमागतस्तथाविधंतंपुत्रशोकेनविलपन्तं ददर्श॥ ॥ २७१ ॥
अर्जुनोऽपिकालधर्ममुपागतंपञ्चवार्षिकंबालकंदृष्ट्वाकृपयाविष्टस्तवपुत्रमहंजीवयिष्यामीतिब्राह्मणायाभयंदत्त्वाप्रतिश्रुतवान् ॥ ब्राह्मणस्तुतेना श्वासितोहृष्टवान् ॥ अथैतंब्राह्मणशिशुंबहुभिःसंजीवनास्त्रैरभिमन्त्र्यअलब्धजीवितंदृष्ट्वावृथाप्रतिज्ञामवाप्यबहुशोकसमन्वितस्तेनैवप्राणांस्त्यक्तुमै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्छत् ॥ कृष्णस्तुतत्सर्वंज्ञात्वान्तःपुराद्विनिष्क्रम्यतंवैदिकंप्राहतवपुत्रान्सर्वानहंदास्यामीत्युक्त्वाश्वास्यवैनतेयमारुह्यार्जुनसहितोवैष्णवंलोक
माजगाम ॥ तत्रदिव्यमणिमण्डपोद्देशेदेव्यासहसमासीनंनारायणंदृष्ट्वाकृष्णार्जुनौनमश्चक्रतुः ॥ सतौबाहुभ्यांपरिष्वज्यकिमर्थमागतावित्यु
वाच ॥ कृष्णश्चभगवन्वैदिकस्यतनयान्ममदेहीत्युवाच ॥ सतुनारायणस्तादृग्वयसिसंस्थितान्ब्राह्मणपुत्रान्कृष्णायसंददौ ॥ श्रीकृष्णोऽपि
तान्वैनतेयस्कन्धेसमारोप्य हर्षसमन्वितोऽर्जुनसहितःस्वयमप्यारुह्यदिविदेवगणैःसंस्तूयमानोद्वारवतीमाविवेश ॥ तस्मैब्राह्मणायपञ्चव
र्षवयःस्थान्षट्पुत्रान्ददौ ॥ सोऽप्यत्यन्तहर्षसमन्वितःकृष्णंवर्द्धस्वेत्याशिषंप्रायच्छत् ॥ अर्जुनस्तुसफलांप्रतिज्ञामवाप्यकृष्णंनमस्कृत्य
युधिष्ठिरपालितांस्वांपुरीमाजगाम ॥ कृष्णस्यषोडशसहस्रभार्यास्वयुतसाहस्रपुत्राजज्ञिरेतेषांपुत्रपौत्रसङ्ख्यांवक्तुंनशक्यते ॥ अत्रापिश्लोकः ॥
अष्टौशतानिपुत्राणांसहस्राण्ययुतंतथा ॥ प्रद्युम्नःप्रथमस्तेषांसर्वेषांरुक्मिणीसुतः ॥ ९ ॥ असङ्ख्यैस्तैर्यादवैरियंपृथिवीसंवृताभवत् ॥ पुनर
प्यवनीभारशङ्कयाकृष्णस्तुतानृषिशापव्याजेनसंहर्तुमैच्छत् ॥ कदाचित्सर्वेकुमारानर्मदायांविहर्तुमाजग्मुः ॥ तत्रतपन्तंकण्वंमहर्षिंदृष्ट्वाजाम्ब
वत्याःपुत्रंयोषिद्वेषंकृत्वातस्योदरेकार्ष्णायसंमुसलंबद्ध्वाऋषेःसमीपमागत्यसर्वेनमस्कृत्यपत्नीरूपंसाम्बंकुमारंतस्यपुरतोनिधायअस्यागर्भेस्त्रीवापुरु
षोवाभविष्यतीतिब्रूहीत्यूचुः ॥ सतुमनसातद्विज्ञायतानमर्षमाणःसर्वाननेनमुसलेनयूयंसर्वेनिहताभवतेत्युवाच ॥ सर्वेसमुद्विग्नमनसःकृष्णंसमेत्य
महर्षिणोक्तंतत्कर्मनिवेदयामासुः॥ कृष्णोऽपितदायसंमुसलंचूर्णीभूतंह्रदेनिपातयामास ॥ तदयश्चूर्णीभूतबीजसमुद्भूतावज्रसन्निभामहाकाशाःसंबभूवुः
॥तत्रतंमुसलावशिष्टंकनिष्ठाङ्गुलिमात्रंमत्स्योजग्रास॥तंमत्स्यंनिषादोगृहीत्वातदुदरस्थंमुशलखण्डमादायबाणाग्रेफलकमकरोत् ॥ कदाचित्सर्वेयादवा
रामकृष्णप्रद्युम्नादयोमहाबलास्तिस्रःकोटयोमहोत्सवयात्रांकर्तुंतन्महाह्रदसमीपंजग्मुः॥तत्रचबहुमद्यमांसानिभुक्त्वासर्वेमत्ताःक्रीडार्थंतन्महाह्रदसमुद्भू
तान्महाकाशानुत्पाट्यतैर्वज्रधारासन्निभैःपरस्परंजघ्नुः ॥ तेनसर्वेप्रद्युम्नादयोयादवानिश्शेषंत्यक्तजीविताबभूवुः॥तेसर्वेस्वान्स्वांस्त्रिदशान्प्रतिपेदिरे॥
एवंमुशलेनसंहृत्यसर्वंस्वयमेकोदेवोबहुगुल्मसमाकीर्णमहाद्रुमच्छायायांसुप्तश्चतुर्विधव्यूहगतंवासुदेवात्मकमात्मानंचिन्तयञ्जानूपरिपदंनिधायात्मनो
मानुषंवपुस्त्यक्तुमनुनिषसाद ॥एतस्मिन्नन्तरेमृगयाजीविकोहरेःसतदाकालप्रभावेनचक्रवज्रध्वजांकुशादिचिह्नितमतिरक्ततमंहरेःपादकमलंदृष्ट्वा तन्मृ
गपोतंमत्वासकलयदुवंशहरमुसलशकलनिर्मितसायकेनजघान ॥तदनन्तरंश्रीकृष्णंज्ञात्वासुमहाभयार्तःप्रवेपमानःकृताञ्जलिपुटोमहापराधो मयाकृत
इतिवदंस्तंप्रणनाम॥श्रीकृष्णस्तथाभूतंदृष्ट्वासुधामयकराभ्यांतमुत्थाप्यभवतानापराधःकृतइतिवदन्महाभयपीडितमाश्वासयन्नुवाच ॥ ततोयोगिग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

म्यमपुनरावृत्तिशाश्वतंसर्वोपनिषन्मयंवैष्णवंलोकंप्रददौ ॥ असौतस्मिन्नेवमुहूर्तेमानुषंरूपंविहायपञ्चोपनिषन्मयंसकलपुत्रदारसहितोदीप्तिमयंवैष्णवं
लोकंदिव्यंविमानमास्थायसहस्रार्कद्युतिसदृशंदिव्याप्सरोगणाकीर्णंहिरण्मयंवासुदेवलोकंजगाम॥तस्मिन्कालेदारुकोरथमारुह्यविष्णोःसपीपंविवेश॥
कृष्णोपिमत्स्वरूपमर्जुनंपूर्वमानयस्वेतिप्रेषयामास ॥ सतुमनोजवस्यन्दनमारुह्यार्जुनसमीपमाजगाम ॥ एतस्मिन्नन्तरेदेव्यर्जुनस्तदारुह्यपरिणीय
नमस्कृत्यकिंकरोमीतिपुटाञ्जलिरुवाच ॥ कृष्णस्तुतमाहपार्थोहंस्वलोकंयास्यामित्वंतुद्वारवतींगत्वातत्रस्थारुक्मिण्याद्यष्टभार्याआनीयममशरीरे
प्रेषय ॥ सदारुकेणसहितोनगरीमाजगाम ॥ एतस्मिन्नन्तरेदेवाविमानस्थानभसिसंस्थिताःस्वलोकंयियासन्तंकृष्णंदृष्ट्वाऋषिभिःसार्द्धंस्तुत्वापुष्प
वर्षाणिववृषुः ॥ कृष्णोऽपिमानुषदेहंसंन्यस्यसकलजगत्स्थितिसंहारहेतुभूतंसकलक्षेत्रज्ञान्तर्यामियोगिध्येयमनामयंवासुदेवात्मकंदेहंधृत्वावैनतेय
मारुह्यमहर्षिभिःस्तूयमानोजगाम ॥ अर्जुनोवसुदेवोग्रसेनाभ्यांरुक्मिण्यादिमहिषीभ्यस्तत्सर्वंकथयामास ॥ तच्छ्रुत्वासर्वेपौरजनाःस्त्रियश्चद्वारवती
मुत्सृज्यान्तःपुराद्बहिर्निष्क्रम्यसर्वास्ताःकृष्णवल्लभावसुदेवोग्रसेनसहिताःशीघ्रमेवहरेःसमीपंजग्मुः ॥ तेसर्वेवसुदेवोग्रसेनाक्रूरादयोयदुवृद्धास्तान्नि
हतान्रामकृष्णप्रद्युम्नानिरुद्धादीन्सर्वान्यादवान्दृष्ट्वामहताशोकेनसन्तप्ताःस्वदारसहितामहान्तमग्निंप्रज्वाल्य तस्मिन्प्रविश्यनिर्दग्धास्त्यक्तजीविता
बभूवुः ॥ तत्सुरतरुचन्दनागरुकाष्ठैश्चितिंकारयित्वातस्मिन्वैदिकाग्निंप्रज्वाल्यतस्मिन्कृष्णस्यशरीरंनिक्षिप्यवेदोक्तविधिनासंस्कारमर्जुनश्चकार ॥
कृष्णपत्न्योरुक्मिणीसत्यभामाकालिन्दीमित्रविन्दाजाम्बवतीनाग्नजित्सुशीलासुलक्षणाएताःसर्वामहिष्यस्तमग्निंप्रविश्य चभर्तृशरीरंपरिष्वज्यतेना
ग्निनानिर्दग्धाःस्वान्स्वानंशान्समेत्यदिव्यविमानाधिरूढाःसकलदेवगणसंपूज्यमानादिव्याप्सरोगणसंकुलावासुदेवलोकमाजग्मुः ॥ रेवतीचबलभद्र
शरीरंपरिष्वज्याग्निंप्रविश्यतस्मिन्देहंत्यक्त्वादिव्यंदेहंप्राप्यदिव्यविमानारूढाभर्तुःस्थानंसंकर्षलोकंदिव्यमवाप ॥ तथैवप्रद्युम्नेनसहरुक्मिपुत्रीतथानि
रुद्धेनोषापि सर्वाश्चयादवस्त्रियःस्वस्वभर्तुःशरीराणिपरिष्वज्याग्निप्रवेशंचक्रुः॥ तेषांसर्वेषामर्जुनऔर्द्ध्वदैहिकंकृतवान्॥तस्मिन्कालेदिव्यवाजिसमायुक्तं
सुग्रीवाख्यकंसर्वरत्नोपेतंदिव्यंस्यन्दनमारुह्यदारुकोऽपिवैष्णवंलोकंजगाम॥पारिजाततरुर्देवसभासुधर्माचत्रिदशेन्द्रलोकमयाताम् ॥ तस्मिन्समयेद्वा
रवतीपुरीमहोदधौनिमग्नाभूत् ॥ ततःसर्वाःषोडशसहस्रस्त्रियःकृष्णभार्याअर्जुनोगृहीत्वास्वांपुरीमगच्छत् ॥ तस्मिन्नध्वनिएकेनार्जुनेनसमानीतंस्त्री
धनंदस्यवोदृष्ट्वातदपहर्तुंसत्वरमाययुः॥तान्समारब्धान्म्लेच्छान्दृष्ट्वाऽर्जुनोपितैर्योद्धुंधनुरादायतज्ज्यारोपितुमपिशक्तोनाभूतधनुर्ग्रहणेऽप्यशक्तमर्जुनं
दस्यवोदृष्ट्वासर्वायोषितोजगृहुः ॥ ताःपूर्वंदेवगन्धर्वयोषितोह्यष्टावक्रंमहामुनिंदृष्ट्वाजहसुस्ततस्तेनशप्तावेश्याभविष्यथेतिततस्ताभिःप्रसादितःपूजित

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्चतत्प्रसादात्सर्वलोकैश्चनमस्कृतंवासुदेवंभर्तारमवाप्यापितेनैवदस्युहस्तंगताअभवन् ॥ अर्जुनोऽपिदस्युभिर्निर्जितःशोकसमाविष्टोममभुजबलंस
वीर्यंकृष्णेनैवसहसर्वमैश्वर्यंनिर्यातमितिमत्वाअद्यममभाग्यक्षयइतिवदन्सायंसन्ध्यारविरिवनिःशेषविनष्टतेजाःस्वांपुरींसमाजगाम॥एवंहितार्थायसर्व
देवानांसमस्तभूभारविनाशायचयदुवंशेऽवतीर्यसकलराक्षसविनाशंकृत्वामहान्तमपिचोर्वीभारंनाशयित्वानन्दव्रजद्वारकामथुरानिवासिनः सर्वान्स्था
वरजङ्गमान्कालभवबन्धैर्मोचयित्वापरमैश्वर्येशाश्वतेयोगिगम्येहिरण्मयेरम्येसात्त्विकेसंस्थाप्यनित्यंदिव्यमहिष्यादिसंसेव्यमानो वासुदेवउवास ॥
अत्रश्लोकाः ॥ अन्येसर्वेऽवताराःस्युःकृष्णष्यचरितंमहत् ॥ भूभारकविनाशायप्रादुर्भूतोरमापतिः ॥ ६ ॥ एतत्कृष्णस्यचरितंदुष्टानांनाशहेतवे ॥
श्रीकृष्णःकरुणासिन्धुर्वैकुण्ठेमोदतेसदा ॥ ७ ॥ अत्यद्भुतमिदंदेविकृष्णस्यचरितंशुभम् ॥ संग्रहेणमयैवोक्तंतवसर्वफलप्रदम् ॥ ८ ॥ वासु
देवस्यचरितंयःपठेद्धरिसंनिधौ ॥ स्मरेद्वाशृणुयाद्भक्त्यासयातिपरमंपदम् ॥ ९ ॥ महापातकयुक्तोवातथोपपातकसंयुतः ॥ बालकृष्णस्यचरितंश्रुत्वा
पापैःप्रमुच्यते ॥ १० ॥ द्वारवत्यांसमासीनंरुक्मिणीसहितंहरिम् ॥ स्मरन्वैमहदैश्वर्यमनेनाप्नोत्यसंशयम् ॥ ११ ॥ संग्रामेसङ्कटेदुर्गेशत्रुभिःपरि
वेष्टिते ॥ नेतारंसर्वदेवानांध्यात्वासुविजयीभवेत् ॥ १२ ॥ यःस्मरेद्गोपकन्याभिःक्रीडन्तंगोव्रजेशुभे ॥ सर्वकामानवाप्नोतिसौभाग्यंचैवविन्दति
॥ १३ ॥ महोपसर्गरोगाद्यैर्युक्तोयस्तुसनातनम्॥जेतारंचमहारौद्रींकृत्यांकाशीपुरेस्थिताम् ॥१४॥ किमत्रबहुनोक्तेनसर्वकालेषुचाप्युमे ॥ कृष्णायनम
इत्येवंमन्त्रमुच्चारयेद्बुधः ॥ १५ ॥ कृष्णायवासुदेवायहरयेपरमात्मने ॥ प्रणतक्लेशनाशायगोविन्दायनमोनमः ॥ १६ ॥ इमंमन्त्रंजपन्देवि
भक्त्याप्रतिदिनंनरः ॥ सर्वपापविनिर्मुक्तोविष्णुलोकमवाप्नुयात् ॥ १७ ॥ सर्वेषामेवदेवानामीश्वरोऽसौजनार्दनः ॥ रक्षणायचलोकानामवस्थान्तर
मेतिवै ॥ १८ ॥ त्रिपुरंहन्तुकामेनमयासंपूजितोहरिः ॥ बुद्धरूपधरःश्रीमान्मोहयामासतद्रिपून् ॥१९॥ मोहितास्तेनशास्त्रेणसर्वधर्मविवर्जिताः ॥
नारायणास्त्रेणमयानिहतादेवशत्रवः ॥ २० ॥ अवतीर्यकलावन्तेब्राह्मणस्यनिवेशने ॥ हनिष्यतितथारौद्रान्म्लेच्छान्सर्वाञ्जनार्दनः ॥ २१ ॥
तैस्तैर्भावैर्मयावस्थाःसर्वाःप्रोक्ताजगत्पतेः ॥ किमन्यच्छ्रोतुकामासितद्ब्रूहिमिशुभानने ॥ २२ ॥ इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चा०उत्तर०उमाम
हेश्वरसंवादेश्रीकृष्णचरितेश्रीकृष्णस्वधामगमननिरूपणंनामद्विपञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५२ ॥ श्रीपार्वत्युवाच ॥ भगवन्सर्वमाख्यातंवै
भवावस्थितंहरेः ॥ एतस्मिन्रामकृष्णाभ्यांचरित्रमतिविस्मितम् ॥ १ ॥ अहोरामस्यचरितंकृष्णस्यचमहात्मनः ॥ शृण्वन्त्याममदेवेशकल्पा
न्तरशतैरपि ॥२॥ तृप्तिर्नैवैतिभूतेशचेतोहरिकथामृतम् ॥ अधुनाश्रोतुमिच्छामिविष्णोर्माहात्म्यमुत्तमम्॥तत्पूजनविधिंदेवश्रोतुमिच्छाम्यहंतथा ॥३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

श्रीरुद्रउवाच ॥ शृणुदेविप्रवक्ष्यामिहरेश्वसुमहात्मनः ॥ स्थापनंचस्वयंव्यक्तंद्विविधंतत्प्रकीर्तितम् ॥ ४ ॥ शिलामृदारुलोहाद्यैःकृत्वा प्रतिकृतिंहरेः ॥
श्रौतस्मार्तागमप्रोक्तक्रियासंस्थापनंहियत् ॥५॥ तत्स्थापनमितिप्रोक्तंस्वयंव्यक्तंहिमेशृणु ॥ यस्मिन्संनिहितोविष्णुःस्वयमेवनृणांभुवि ॥ ६ ॥
पाषाणदार्वोरात्मेशःस्वयंव्यक्तंहितत्स्मृतम् ॥स्वयंव्यक्तंस्थापितंवापूजयेन्मधुसूदनम् ॥७ ॥ देवतानांमहर्षीणामर्चनार्थेसनातनः॥ स्वयमेवजगन्नाथः
सान्निध्यंयातिकेशवः ॥ ८ ॥ यस्ययद्विग्रहेभोग्यंतदेवाविरभूद्भुवि ॥ तदेवपूजयेन्नित्यंतस्मिन्नेवरमेत्सदा ॥ ९ ॥ श्रीरङ्गशायीदेवेशोविधिनार्च्यः
सुरोत्तमः ॥ सएवेक्ष्वाकुनाथानांतपसाविरभूद्भुवि ॥ १०॥ ममापिकाश्यांसंपूज्योमाधवःकलुषापहः ॥ यत्रयत्रगृहेरम्येस्वयंव्यक्तःसनातनः ॥११॥
तत्रतत्रसमागम्यरमेऽहंसंव्यवस्थितः ॥ नाष्टाङ्गयोगेयज्ञेशस्त्वर्चायांविन्दतेनृणाम् ॥१२ ॥ चक्षुषोर्विषयंप्राप्यददातिवरमीप्सितम् ॥ सर्वावस्थासुसौ
लभ्यमर्चायांलभ्यतेजनैः ॥ १३ ॥ अज्ञानामपिसान्निध्यंसर्वदापृथिवीतले ॥ जम्बूद्वीपेमहापुण्येवर्षेवैभारतेशुभे ॥ १४ ॥ अर्चायांसंनिधौविष्णुर्ने
तरेषुकदाचन ॥ तत्तस्माद्भारतेवर्षेमुनिभिस्त्रिदशैरपि ॥ १५ ॥ सेवितःसततंदेवितपोयज्ञक्रियादिभिः ॥ भारतेऽस्मिन्महावर्षेनित्यंसंनिहितोहरिः॥
॥ १६ ॥ ऐन्द्रद्युम्नेतथाकौर्मेसिंहाद्रौकरवीरके॥ काश्यांप्रयागेसौम्येचशालग्रामाचलेतथा ॥ १७॥ द्वारवत्यांनैमिषेचतथाबदरिकाश्रमे ॥ कृतशौचेहरे
त्पापंपौण्डरीकेचदण्डके ॥१८॥ माथुरेवेङ्कटाद्रौचश्वेताद्रौगरुडाचले ॥ कांच्यामानन्तशयनेश्रीरङ्गेवासवाचले ॥१९॥ नारायणाचलेसौम्येवाराहेवा
मनाश्रमे ॥ एवमाद्याःस्वयंव्यक्ताःसर्वकामफलप्रदाः ॥ २० ॥ स्वयमेवहिसान्निध्यंयस्मिन्यातिजनार्दनः ॥ तस्मिन्नेवस्वयंव्यक्तंवदन्तिमुनयःशुभाः
॥ २१ ॥ महाभागवतश्रेष्ठोविधिनास्थाप्यकेशवम् ॥ मन्त्रेणकुर्यात्सांनिध्यंस्थापनंतद्विशिष्यते ॥ २२ ॥ तस्मिन्संपूजयेद्देवंग्रामेषुचगृहेषुच ॥ शा
लग्रामशिलायांतुगृहार्चासद्भिरिष्यते ॥ २३ ॥ अर्चनंमन्त्रपठनंयागयोगोमहात्मनः ॥ नामसंकीर्तनंसेवातच्चिह्नैरङ्कनंतथा ॥ २४ ॥ तदीयारा
धनंचस्यान्नवधाभिद्यतेशुभे ॥ नवकर्मविधानेज्याविप्रस्यसततंस्मृता ॥ २५ ॥ महाभागवतश्रेष्ठोब्राह्मणोवैगुरुर्नृणाम् ॥ सर्वेषामेवलोकानामसौ
पूज्योयथाहरिः ॥ २६ ॥ तापादिपञ्चसंस्कारीनवेज्याकर्मकारकः ॥ अर्थपञ्चकविद्विप्रोमहाभागवतःस्मृतः ॥ २७ ॥ नवकर्मविधानेज्याक्षत्रियस्य
विधीयते ॥ तच्चिह्नैरङ्कनंसेवातदीयानांचपूजनम् ॥ २८ ॥ मन्त्रवर्णस्यजपनंनामसंकीर्तनंहरेः ॥ वन्दनंचविशांप्रोक्तंषट्कर्मेज्याविधानतः ॥
॥ २९ ॥ नामसंकीर्तनंसेवापूजनंवन्दनंतथा ॥ अर्चनंचतदीयानांपञ्चेज्याशूद्रजन्मनः ॥३०॥ साधारणेनसर्वेषांमानसेज्यानृणांप्रिये॥ स्वाधिका
रानुरूपंचकार्याचेज्याजगत्पतेः ॥ ३१ ॥ अनन्यदेवताभक्तैरनन्यफलसाधकैः ॥ वेदविद्ब्रह्मतत्त्वज्ञैर्वीतरागैर्मुमुक्षुभिः ॥ ३२ ॥ गुरुभक्तिसमायु

CC-0. In Public Domain. Digitization by eGangotri

क्तैःसुप्रसन्नैःसुसाधुभिः ॥ ब्राह्मणरितरैश्चापिपूजनीयोहरिःसदा ॥ ३३ ॥ यथोचिताचवर्णस्यकार्याइज्याहरेर्नृणाम् ॥ वर्णाश्रमानुरूपंचकर्त्तव्यं
वैष्णवैःशुभैः ॥ ३४ ॥ श्रुतिस्मृत्युदितंसम्यङ्नित्यमत्रसमाचरेत् ॥ श्रुतिस्मृत्युक्तकर्माणिनातिक्रामेतबुद्धिमान् ॥ ३५ ॥ श्रुतिस्मृत्युक्तमाचारं
योनसेवेतवैष्णवः ॥ सचपाखण्डमापन्नोरौरवेनरकेवसेत् ॥३६॥ तस्माद्वर्णानुरूपांवैकुर्यादिज्यांजगत्पतेः ॥ तस्मात्स्मृत्युक्तमाचारंकुर्याद्वैमानवःसदा
॥ ३७ ॥ साधारणंहिसर्वेषांमानसेज्याशुभनृणाम् ॥ स्वाधिकारंनिरीक्ष्यैवकर्मकुर्यादतन्द्रितः ॥ ३८ ॥ शमोदमस्तपःशौचंसत्यमामिषवर्जनम् ॥
अस्तेयमेवाहिंसाचसर्वेषांधर्मसाधनम् ॥ ३९ ॥ तस्माद्वर्णानुरूपेणपूजयेन्मधुसूदनम् ॥ रात्रावन्तेसमुत्थायउपस्पृश्ययथाविधि ॥ ४० ॥ नम
स्कृत्यगुरून्स्वस्यसंस्मरेदच्युतंहृदि ॥ सहस्रनामभिर्भक्त्याकीर्तयेद्वाग्यतः शुचिः ॥ ४१ ॥ बहिर्ग्रामात्समुत्सृज्यमलमूत्रंयथाविधि ॥ शौचंकृत्वा
यथान्यायमाचम्यप्रयतःशुचिः ॥ ४२ ॥ दन्तधावनपूर्वंतुस्नानंकुर्याद्यथाविधि ॥ आदायतुलसीमूलमृदंतत्पत्रसंयुताम् ॥ ४३ ॥ मूलमन्त्रे
णाभिमन्त्र्यगायत्र्याचशुभानने ॥ मन्त्रेणैवानुलिप्ताङ्गःस्नायात्कृत्वाघमर्षणम् ॥ ४४ ॥ हरिपादोद्भवांगङ्गांतत्रावाह्यसुनिर्मले ॥ निमज्ज्या
शुजपेत्सूक्तमघमर्षणमुत्तमम् ॥ ४५ ॥ आचम्यमार्जनंकुर्यात्पौरुषोक्तक्रमादथ ॥ पश्चादप्सुनिमज्ज्याथमूलमन्त्रंजपेद्बुधः ॥ ४६ ॥
अष्टाविंशतिवारंवाशतमष्टोत्तरंचवा ॥ प्रार्थयेदभिमन्त्र्याथजलंमन्त्रेणवैष्णवः ॥ ४७ ॥ आचम्यतर्पयेद्देवानृषींश्चैवपितॄंस्तथा ॥
निपीडयवस्त्रमाचम्यधौतवस्त्रेणवेष्टितः ॥ ४८ ॥ विमलांमृत्तिकांरम्यामादायद्विजसत्तमः ॥ मन्त्रेणैवाभिमन्त्र्याथललाटादिषुवैष्णवः ॥ ४९ ॥
धारयेदूर्द्ध्वपुण्ड्राणियथासंङ्ख्यमतन्द्रितः ॥ उपास्यविधिवत्सन्ध्यांसावित्रींचजपेद्बुधः ॥ ५० ॥ संयतात्मागृहंगत्वापादौप्रक्षाल्यवाग्यतः ॥ आच
म्यैकाग्रमनसापूजामण्डपमाविशेत् ॥ ५१ ॥ रम्येशुभ्रतरेपीठेपुष्पोपचयशोभिते ॥ तस्मिन्निवेश्यदेवंतंलक्ष्मीनारायणंप्रभुम् ॥ ५२ ॥ पूजयेद्विधि
नासम्यग्गन्धपुष्पाक्षतादिभिः ॥ स्थापनेवास्वयंव्यक्तेगृहार्चायांविधानतः ॥ ५३ ॥ श्रौतस्मार्तागमोक्तानामर्चनंविधिनाद्विजः ॥ कुर्य्याद्भक्त्या
यथार्हंचविष्णोःप्रयतमानसः ॥ ५४ ॥ यथोपदिष्टंगुरुणातथाकुर्वीतवैष्णवः ॥ श्रौतंवैखानसंप्रोक्तंवासिष्ठंस्मार्तमुच्यते ॥ ५५ ॥ पाञ्चरात्रविधानंच
दिव्यागममितीरितम् ॥ क्रियालुप्तंनकर्त्तव्यंविष्णोराराधनंपरम् ॥ ५६ ॥ आवाहनासनार्घ्याद्यैर्गन्धपुष्पाक्षतादिभिः ॥ धूपैर्दीपैश्चनैवेद्यैस्ताम्बूलाद्यैर्न
मस्कृतैः ॥ ५७ ॥ कुर्यादाराधनंविष्णोर्यथाशक्तिमुदान्वितः ॥ प्रत्यृचंपुरुषसूक्तेनमूलमन्त्रेणवैष्णवः ॥ ५८ ॥ मन्त्रद्वयेनकुर्वीतषोडशैरुप
चारकैः ॥ भूयःप्रत्युपचारेषुदद्यात्पुष्पाञ्जलिंततः ॥ ५९ ॥ आवाहयेज्जगन्नाथंमुद्रयाचैववैष्णवः ॥ आसनंतुयथादद्यात्पुष्पकेणचमुद्रया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ ६० ॥ दीपार्घ्याचमनंस्नानंपात्रस्थैर्विमलैर्जलैः ॥ मङ्गलद्रव्यसंयुक्तस्तुलसीदलमिश्रितैः ॥ ६१ ॥ दद्यात्प्रत्युपचारंतुमूलमन्त्रद्वयेनच ॥ सुवा
सितेनतैलेनकुर्यादभ्यञ्जनंततः ॥ ६२ ॥ कस्तूर्य्याचन्दनेनापिकुर्यादुद्वर्त्तनादिकम् ॥ सुगन्धवासितैस्तोयैःस्नाप्यमन्त्रयुतैःशुभैः ॥ ६३ ॥ वस्त्रैरा
भरणैर्दिव्यैरलङ्कृत्ययथाविधि ॥ मधुपर्कंततोदद्याद्गन्धंदद्यात्सुवासितम् ॥ ६४ ॥ सुरभीणिसुपुष्पाणिभक्त्यासम्यङ्निवदेयेत् ॥ धूपंदशाङ्गमधाङ्गं
दीपंचसुमनोहरम् ॥ ६५ ॥ नैवेद्यंविविधंदद्यात्पायसापूपमिश्रितम् ॥ कर्पूरंतुसताम्बूलंभक्त्याचैवनिवेदयेत् ॥ ६६ ॥ दीपैर्नीराजनंकृत्वापुष्प
मालांसमर्पयेत् ॥ परिणीयप्रणम्याथस्तुत्वास्तोत्रैरनुत्तमैः ॥ ६७ ॥ गरुडाङ्केशाययित्वामङ्गलार्घ्यंनिवेदयेत् ॥ संकीर्त्यनामभिःपुण्यैःपश्चाद्धोमं
समाचरेत् ॥ ६८ ॥ हरेर्नैवेद्यशेषेणजुहुयाद्वह्निमण्डले ॥ प्रत्यृचंपौरुषंसूक्तंश्रीसूक्तंमङ्गलाह्वयम् ॥ ६९ ॥ होतव्यमाज्यसंमिश्रंहविषावैदिका
नले ॥ प्रोक्तेनमन्त्ररत्नेनजुहुयाद्भक्तिसंयुतम् ॥ ७० ॥ अष्टोत्तरशतवारमष्टाविंशतिमेवच ॥ यज्ञरूपंमहाविष्णुंध्यायन्वैजुहुयाद्धविः ॥ ७१ ॥
शुद्धजाम्बूनदनिभंशङ्खचक्रगदाधरम् ॥ समस्तवेदवेदान्तसाङ्गोपाङ्गयुतंप्रभुम् ॥ ७२ ॥ देव्याश्रियासमासीनंध्यात्वाहोमंसमाचरेत् ॥ एकैकामाहु
तिंपश्चान्नामभिर्जुहुयाद्धविः ॥ ७३ ॥ नित्यान्भक्तान्समुद्दिश्यमहाभागवतोत्तमः ॥ भूनीलाविमलाद्याश्चशक्तयःप्रथमंक्रमात् ॥ ७४ ॥ अनन्त
विहगेन्द्रादिदेवतास्तदनन्तरम् ॥ वासुदेवादयःपश्चात्तथाशक्त्यादिदेवताः ॥ ७५ ॥ मूर्त्तयःकेशवाद्याश्चतथासंकर्षणादयः ॥ मत्स्यकूर्मादयश्चैवत
थाचक्रादिहेतयः ॥ ७६ ॥ कुमुदादयश्चत्रिदशास्तथाचन्द्रादिदेवताः ॥ इन्द्रादिलोकपालाश्चतथाधर्मादिदेवताः ॥ ७७ ॥ होतव्याःक्रमशस्तस्मि
न्संपूज्याश्चविशेषतः ॥ एतद्वैकुण्ठहोमंतुमहाभागवतोत्तमः ॥७८॥ नित्यार्चनविधौनित्यंकुर्वीतसुसमाहितः ॥ गृहार्चनेगृहद्वारिपश्चयज्ञविधानतः ॥
॥ ७९ ॥ दत्त्वाबलिंविधानेनपश्चादाचमनंचरेत् ॥ उपविश्यासनेशुभ्रेकृष्णाजिनकुशोत्तरे ॥ ८० ॥ मन्त्रयोगंप्रकुर्वीतभोगार्थंसुखमात्मनः ॥ सम्य
क्पद्मासनासीनोभूतशुद्धिंसमाचरेत् ॥ ८१ ॥ प्राणायामत्रयंकुर्यान्मन्त्रेणविजितेन्द्रियः ॥ उदङ्मुखंततःकृत्वाहृत्पङ्कजमनुत्तमम् ॥ ८२ ॥ विकासं
तस्यकुर्वीतविज्ञानरविणाहृदि ॥ तत्कर्णिकायांवह्न्यर्कशशिबिम्बान्यनुक्रमात् ॥ ८३ ॥ त्रयंत्रयीमयेतस्मिंश्चिन्तयेद्वैष्णवोत्तमः ॥ नानारत्नमयंपीठं
तेषामुपरिचिन्तयेत् ॥ ८४ ॥ तस्मिन्हृत्पद्ममूलान्तेबालार्कसदृशद्युति ॥ अष्टैश्वर्यदलंपद्मंमन्त्राक्षरमयंचरेत् ॥ ८५ ॥ तस्मिन्देव्यासमासीनंकोटि
शीतांशुसंनिभम् ॥ चतुर्भुजंसुन्दराङ्गंशङ्खचक्रगदाधरम् ॥ ८६ ॥ पद्मपत्रविशालाक्षंसर्वलक्षणलक्षितम् ॥ श्रीवत्सकौस्तुभोरस्कंपीतवस्त्रधरंप्रभुम् ॥
॥ ८७ ॥ विचित्राभरणैर्युक्तंदिव्यमण्डनमण्डितम् ॥ दिव्यचन्दनलिप्ताङ्गंदिव्यपुष्पोपशोभितम् ॥ ८८ ॥ तुलसीकोमलदलवनमालाविभूषितम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बालार्ककोटिसदृशंकान्त्यादेव्याश्रियासह ॥ ८९ ॥ सर्वलक्षणलक्षण्यासमाश्लिष्टतनुंशिवम् ॥ एवंध्यात्वाजपेन्मन्त्रंसमाहितमनाःशुचिः ॥ ९० ॥
सहस्रंशतवारंवायथाशक्त्यथवापिच ॥ मनसैवार्चनंकृत्वाविरमेत्तत्रभक्तितः ॥ ९१ ॥ तदीयानर्चयेद्भक्त्यातस्मिन्कालेसमागतान् ॥ तर्पयित्वा
न्नपानाद्यैरनुव्रज्यविसर्जयेत् ॥ ९२ ॥अर्चयित्वापितॄन्देवांस्तर्पयेच्चविधानतः ॥ संपूज्यातिथिभृत्यांश्चभुञ्जीयातांचदम्पती ॥ ९३ ॥ यक्षराक्षसभूता
नामर्चनंवर्जयेत्सदा ॥ योमोहात्कुरुतेविप्रःसचाण्डालोभवेद्ध्रुवम् ॥ ९४ ॥ यक्षाणांचपिशाचानांमद्यमांसभुजांतथा ॥ दिवौकसांतुभजनंसुरापान
समंस्मृतम् ॥ ९५ ॥ ब्रह्मराक्षसवेतालयक्षभूतार्चनंनृणाम् ॥ कुम्भीपाकमहाघोरनरकप्राप्तिसाधनम् ॥ ९६ ॥ कोटिजन्मकृतंपुण्यंयज्ञदानक्रिया
दिकम् ॥ सद्यःसर्वंलयंयातियक्षभूतादिपूजनात् ॥ ९७ ॥ नारीवापुरुषोवापियक्षभूतादिकार्चनात् ॥ कल्पकोटिसहस्राणिकल्पकोटिशता
निच ॥ ९८ ॥ क्रिमिर्भूत्वाथविष्ठायांपितृभिःसहमज्जति ॥ यक्षाणांचपिशाचानांतामसानांदिवौकसाम् ॥ ९९ ॥ निवेदितान्नंयोऽश्नातिपूयशोणित
भुग्भवेत् ॥ यक्षान्भूतगणांश्चान्यान्क्रूरान्वैब्रह्मराक्षसान् ॥ १०० ॥ उद्दिश्यभुङ्क्तेयोविप्रःसद्यश्चाण्डालएवसः ॥ यानारीपूजयेद्यक्षान्पिशाचोरगराक्षसा
न् ॥ १ ॥ सायातिनरकंघोरंकालसूत्रमधोमुखी ॥ पतिनासहकल्पान्तमुषित्वातत्रदारुणे ॥ २ ॥ लिह्यान्मूत्रपुरीषंवैकृच्छ्रात्सूचिमुखैस्तथा ॥ कृमि
भिर्भक्ष्यमाणाङ्गायावदाभूतसंप्लवम् ॥ ३ ॥ पश्चाद्भूमौदशाहेषुजायतेशतसंख्यया ॥ तस्माद्यक्षादिकानांचदेवानामर्चनंत्यजेत् ॥ ४ ॥ स्वतन्त्रपूजनं
यत्रवैदिकानामपित्यजेत् ॥ अर्चयित्वाजगद्वन्द्यंदेवंनारायणंहरिम् ॥ ५ ॥ तदावरणसंस्थानंदेवस्यपरितोऽर्चयेत् ॥ हरेर्भुक्तावशेषेणबलिंतेभ्योविनि
क्षिपेत् ॥ ६ ॥ होमंचैवप्रकुर्वीततच्छेषेणैववैष्णवः ॥ हरेर्निवेदितंसम्यग्देवेभ्योजुहुयाद्धविः ॥ ७ ॥ पितृभ्यश्चापितद्दद्यात्सर्वमानन्त्यमाप्नुयात् ॥
प्राणिनांपीडनंयत्तद्विदुषांनिरयायवै ॥ ८ ॥ अदत्तंचैवयत्किञ्चित्परस्वंगृह्यतेनरैः ॥ स्तेयंतद्विद्धिगिरिजेनरकस्यैवकारणम् ॥ ९ ॥ लशुनंमद्यपाना
दिमूलकंगृञ्जनंतथा ॥ तिलपिष्टंशिग्रुबिल्वंतथाकोशातकींतथा ॥ ११० ॥ अलाबुंचैववार्ताकंबीजालींकवचानिच ॥ एवमन्यान्यभक्ष्याणिशास्त्र
दृष्टानिवैनरः ॥ ११ ॥ खादन्नरकमाप्नोतिविचित्रमशिवंतथा ॥ अवैष्णवानांयच्चान्नंपतितानांतथैवच ॥ १२ ॥ अनर्पितंतथाविष्णोःश्वमांससदृशं
भवेत् ॥ यक्षराक्षसभूतान्नंसुरामद्यंचगृञ्जनम् ॥ १३ ॥ योऽश्नातिनिरयंयातिपूयशोणितभोजनम् ॥ एतैःसंस्थापनस्पर्शसहवासादिभिर्नरः ॥
॥ १४ ॥ तेऽपियान्त्येवनिरयंविण्मूत्रकृमिभोजनम् ॥ पतितानांचसंसर्गात्पाखण्डानांतथैवच ॥ १५ ॥ सर्वयज्ञस्यभोक्तारंपुराणंपुरुषोत्तमम् ॥ ज्ञात्वा
सर्वंप्रकुर्वीतनित्यनैमित्तिकाःक्रियाः ॥ १६ ॥ यक्षराक्षसभूताश्चकूष्माण्डगणभैरवाः ॥ नार्चनीयाःसदादेविस्वर्गलोकमभीप्सुभिः ॥ १७ ॥ यक्ष

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राक्षसभूतानामर्चनंवर्जयेद्द्विजः ॥ पैशाचत्वमवाप्नोतिकल्पकोटिशतत्रयम्॥ १८॥ तस्माद्राक्षसभूतानामर्चनंप्रतिषिध्यते ॥ कल्पकोटिसहस्राणिकल्प
कोटिशतानिच ॥१९॥ रौरवंनरकंयातियक्षभूतगणार्चनात् ॥ शङ्खचक्रोर्ध्वपुण्ड्रादिचिह्नैःप्रियतमैर्हरेः ॥१२०॥ रहितःसर्वधर्मेभ्यःप्रच्युतोनरकंव्रजेत्॥
अगम्यागमनाद्धिंसापरद्रव्यापहारणात् ॥ २१ ॥ अभक्ष्यभक्षणात्सद्योनरकंसमवाप्नुयात ॥ यस्तुपाणिगृहीतांचहित्वान्यांयोषितंव्रजेत् ॥ २२ ॥
अगम्यागमनंतद्धिसद्योनरककारकम् ॥ पतितानांचसंसर्गात्पाखण्डानांतथैवच ॥ २३ ॥ विकर्मस्थानांचतथायात्येवनिरयंनरः ॥ संसर्गिणांच
संसर्गंतत्संसर्गमपित्यजेत् ॥ २४ ॥ वैष्णवःकुलमेकंतुवर्जयेत्पापसंयुतम् ॥ एकान्तीसंत्यजेद्ग्रामंमहापातकमिश्रितम् ॥ २५ ॥ तथैवपरमे
कान्तीतद्देशमपिवर्जयेत् ॥ स्वकर्मज्ञानभक्त्यादिसाधनंवैष्णवंस्मृतम् ॥ २६ ॥ हरेराज्ञानुरूपेणकर्मज्ञानादियश्चरेत् ॥ सएकान्तीभवेद्विप्रो
वासुदेवपरायणः ॥ २७ ॥ अकृत्यंवैष्णवःपापबुद्ध्यासम्यक्परित्यजेत ॥ एकान्तीसंत्यजेच्छास्त्रंदूषणान्मनसापिच ॥ २८ ॥ तथैवपरमैका
न्तीहेयबुद्ध्यापरित्यजेत् ॥ नित्यंनैमित्तिकंकाम्यंकृत्यंतुत्रिविधंस्मृतम् ॥ २९ ॥ ज्ञानंतथैवलोकेऽस्मिन्मुनिभिःसंप्रकीर्तितम् ॥ कृत्याकृत्यविवे
कंचपरलोकस्यचिन्तनम् ॥ १३० ॥ तत्प्राप्तिसाधनंविष्णोःस्वरूपज्ञानमेवच ॥ भक्तियुक्तोभवेद्भक्तोनवधासाप्रकीर्तिता ॥ ३१ ॥ सुदर्शनोर्द्ध्व
पुण्ड्रादितच्चिह्नैरङ्कनंशुभम् ॥ सद्गुरोर्मन्त्रपठनमर्चनंविधिनाहरेः ॥ ३२ ॥ स्मरणंकीर्तनंविष्णोःसेवाचपरमात्मनः ॥ प्रणामस्तस्यपुरतस्तदी
यानांचपूजनम् ॥ ३३ ॥ प्रसादतीर्थसेवाचभक्तिर्नवविधास्मृता ॥ यस्मात्प्रपद्यतेदेवंशरणंवैष्णवोहरिम् ॥ ३४ ॥ प्रपत्तिःसातुविज्ञेयात्रिवि
धासंप्रकीर्तिता ॥ तामसीराजसीचैवसात्त्विकीत्रिविधास्मृता ॥३५ ॥ सापित्रिधाकृतासिद्धिःसामान्यासर्वदेहिनाम् ॥ एतच्चतुष्टयंदेविहेयंसंत्यज्य
वैष्णवः ॥ ३६ ॥ उपायभूतंब्रह्मैवमवलम्बेतवैष्णवम् ॥ उपायभावात्संत्यज्यकर्मज्ञानादिकंनरः ॥ ३७ ॥ कुर्वीतभगवत्प्रीत्यैमहाभागव
तोत्तमः ॥ त्रिकालमर्चयेद्विष्णुंभक्त्यावैपुरुषोत्तमम् ॥ ३८ ॥ नैमित्तिकेविशेषेणपूजयेद्विधिनाशुभे ॥ प्रत्यहंकार्त्तिकेमासिजातीपुष्पैःसमर्च
येत् ॥ ३९ ॥ दद्यादखण्डदीपंचनियतात्माहढव्रतः ॥ ब्राह्मणान्भोजयित्वान्तेहरिसायुज्यमाप्नुयात् ॥ १४० ॥ धनुष्युषसिदेवेशंमास
मेकंनिरन्तरम् ॥ अर्चयेदुत्पलैर्देविकरवीरैःसितासितैः ॥ ४१ ॥ धूपदीपैश्चनैवेद्यैर्यथाशक्त्यानिवेदयेत् ॥ समाप्तौभोजयेद्विप्रान्महाभागवतो
त्तमान् ॥ ४२ ॥ अश्वमेधसहस्रस्यफलमाप्नोत्यसंशयम् ॥ तपोमास्युदितेभानौस्नात्वानद्यांविशेषतः ॥ ४३ ॥ अर्चयेन्माधवंपुष्पै
रुत्पलैश्चशुभानने ॥ पायसंसघृतंदिव्यंभक्त्यातत्रनिवेदयेत् ॥ ४४ ॥ स्नात्वासंपूजयेद्विष्णुंमासमेकंनिरन्तरम् ॥ शर्कराम्बुयुतंनित्यमु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्यानंविनिवेदयेत् ॥ ४५ ॥ वैष्णवान्पूजयेद्भक्त्यामासान्तेशुभदर्शने ॥ मधुमासितथानित्यंबकुलैश्चम्पकैरपि ॥ ४६॥ पूजयेज्जगतामीशंगुडान्नंच निवेदयेत् ॥ मासान्तेवैष्णवान्विप्रान्भोजयेत्सुसमाहितः ॥ ४७ ॥ सहस्रवार्षिकींपूजांप्रतिनित्यमवाप्नुयात ॥ माधवेपूजयेद्देवंशतपत्रैर्महोत्पलैः ॥ ॥ ४८ ॥ पूजयित्वाविधानेनदध्यन्नंफलसंयुतम् ॥ गुडोदकंचभक्त्यावैतस्मिन्देविनिवेदयेत् ॥ ४९ ॥ लक्ष्म्यायुक्तोजगन्नाथःप्रीतोभवतिपार्वति ॥ शुक्रेतुशुक्लकमलैःपाटलैःकुमुदोत्पलैः ॥ १५० ॥ अर्चयित्वाहृषीकेशमन्नंचूतफलैर्युतम् ॥ निवेदयित्वाभक्त्यावैगवांकोटिप्रदोभवेत् ॥ ५१ ॥ वैष्णवान्भोजयित्वाथसर्वमानन्त्यमाप्नुयात् ॥ आषाढेदेवदेवेशंलक्ष्मीभर्तारमच्युतम् ॥ ५२ ॥ श्रीपुष्पैरर्चयेन्नित्यंपायसान्नंनिवेदयेत् ॥ मासान्तेभोजयेद्विप्रान्महाभागवतोत्तमान् ॥ ५३ ॥ षष्टिवर्षसहस्रस्यपूजांप्राप्नोत्यसंशयम् ॥ नभोमास्यर्चयेद्विष्णुंपुन्नागैःकेतकीदलैः ॥ ॥ ५४ ॥ अर्चयित्वाच्युतंभक्त्यानभूयोजन्मभाग्भवेत् ॥ दद्यादपूपान्भक्त्याथशर्कराघृतमिश्रितान् ॥ ५५ ॥ ब्राह्मणान्भोजयेत्तद्वत्सर्वमानन्त्यमाप्नुयात् ॥ नभस्येऽप्यर्चयेदीशंकुन्दैःकुरबकैरपि ॥५६॥ क्षीरान्नंगुडसंमिश्रंभक्त्यातत्रनिवेदयेत्॥ गवांकोटिप्रदानस्यप्रत्यहंफलमाप्नुयात ॥५७॥ नीलोत्पलैरिषेमासिपूजयेन्मधुसूदनम् ॥ भक्त्यानिवेदयेत्तस्मिन्क्षीरमापूपमिश्रितम् ॥ ५८ ॥ कल्पकोटिसहस्राणिकल्पकोटिशतानिच ॥ वैष्णवंलोकमाप्नोतिमुदितःस्वजनैर्वृतः ॥ ५९ ॥ ऊर्जेमासितथादेविकोमलैस्तुलसीदलैः ॥ पूजयित्वाच्युतंभक्त्यातत्सायुज्यमवाप्नुयात् ॥१६०॥ क्षीराज्यशर्करोपेतमन्नंवैपायसंतथा ॥ अपूपंचक्रमेणैवभक्त्यासम्यङ्निवेदयेत् ॥६१ ॥ अमायांमन्दवारेचवैष्णवर्क्षेतथैवच ॥ रविसंक्रमेव्यतीपातेग्रहणेचन्द्रसूर्ययोः ॥ ६२ ॥ विशेषेणार्चयेद्विष्णुंयथाशक्त्यावरानने ॥ गुरोरुत्क्रान्तिदिवसेजन्मर्क्षेषुतथाहरेः ॥ ६३ ॥ इष्टिंचवैष्णवींकुर्याच्छक्त्यावैद्विजसत्तमः ॥ दद्यात्पुष्पाञ्जलिंतत्रप्रत्यृचंवेदसंमितम् ॥ ६४ ॥ पारणंचापिकुर्वीतचरुणापायसेनवा ॥ वैष्णवान्भोजयेद्विप्राञ्छक्त्यादद्याच्चदक्षिणाम् ॥ ६५ ॥ कुलकोटिंसमुद्धृत्यवैष्णवंपदमाप्नुयात् ॥ सर्ववेदैरशक्तश्चेद्यष्टुंभागवतोत्तमः ॥ ६६ ॥ वैष्णवैरनुवाकैर्वासप्तरात्रंनिरन्तरम् ॥ पुष्पाञ्जलिसहस्रंतुहोमंचप्रत्यहंचरेत् ॥ ६७ ॥ प्रीतयेवाभगवतःप्रतिश्लोकंयजेद्बुधः ॥ अथवामन्त्ररत्नंहिसप्तरात्रंनिरन्तरम् ॥ ६८ ॥ अष्टोत्तरसहस्रंतुजुहुयाद्धविषायजेत् ॥ विशेषेणार्चयेद्विद्वान्महाभागवतोत्तमान् ॥ ६९ ॥ अन्तेचावभृथंकुर्याद्यथाविभवसारतः ॥ वैष्णवैरनुवाकैश्चकुर्यादवभृथंद्विजः ॥ १७० ॥ अत्रस्नात्वाविधानेनयथाशक्त्याद्विजोत्तमः ॥ शुभेपात्रान्तरेरम्येपादौप्रक्षाल्यभक्तितः ॥ ७१ ॥ अर्चयेद्गन्धपुष्पाद्यैर्वस्त्रैराभरणादिभिः ॥ ताम्बूलेनफलैर्वापियथाशक्त्यासमर्चयेत ॥ ७२ ॥ भोजयित्वान्नपानाद्यैःप्रणम्यचपुनःपुनः ॥ आसीमान्तमनुव्रज्यनमस्कृत्यविसार्जे

CC-0. In Public Domain. Digitization by eGangotri

तम् ॥ ७३ ॥ पुनःप्रणम्यभक्त्याथशनैस्तत्रनिवर्त्तितः ॥ गृहंप्रविश्यदेवेशंपूजयेत्प्रयतात्मवान् ॥ ७४ ॥ एवमभ्यर्चयेद्विष्णुंयावज्जीवमतन्द्रितः ॥
तदीयांश्चविशेषेणपूजयेत्सर्वदाशुभे ॥ ७५ ॥ आराधनानांसर्वेषांविष्णोराराधनंपरम् ॥ तस्मात्परतरंदेवितदीयानांसमर्चनम् ॥ ७६ ॥ अर्चयित्वा
पिगोविन्दंतदीयान्नार्चयेत्पुनः ॥ नसभागवतोज्ञेयःकेवलंदाम्भिकःस्मृतः ॥ ७७ ॥ पुमांस्तस्मात्प्रयत्नेनवैष्णवान्पूजयेत्सदा ॥ सर्वंतरतिदुःखौ
घंमहाभागवतार्चनात् ॥७८॥ एवमुक्तंमयादेविविष्णोराराधनंपरम्॥नित्यनैमित्तिकंचैवतदीयानांचपूजनम्॥७९॥पौरुषंतस्ययाथात्म्यंफलसाधनमे
वच॥तस्यावसथभेदंचकर्माद्यपिचतुष्टयम्॥तवप्रोक्तंमयादेविकिमन्यच्छ्रोतुमिच्छसि ॥ १८० ॥ इतिश्रीपाद्मेमहापुराणेपञ्चप०उत्तर०उमामहेश्वर
संवादेविष्णुपूजाविधानवैष्णवाचारकथनंनामत्रिपञ्चाशदधिकद्विशततमोऽध्यायः ॥२६३॥ वसिष्ठउवाच ॥ एवमुक्तातुसादेवीपतिनाशूलपाणिना॥
प्रणिपत्यमहात्मानमुवाचप्राञ्जलिस्तदा ॥ १ ॥ पार्वत्युवाच ॥ साधूक्तंहित्वयानाथवैष्णवंधर्ममुत्तमम् ॥ गुह्याद्गुह्यतमंविष्णोःस्वरूपंपरमात्मनः
॥ २ ॥ धन्यास्मिकृतकृत्यास्मिसर्वदेवनमस्कृत ॥ तवप्रसादाद्देवेशमर्चयामिसनातनम् ॥ ३ ॥ वसिष्ठउवाच ॥ ततस्तद्वचनंश्रुत्वासभवस्त्रिपुरान्त
कः ॥ समाश्लिष्यावदद्देवींप्रहृष्टेनान्तरात्मना ॥ ४ ॥ रुद्रउवाच ॥ साधुसाधुमहादेविसाधुसाधुवरानने ॥ अर्चयस्वहृषीकेशंलक्ष्मीभर्त्तारमच्युतम्
॥ ५ ॥ कृतकृत्योऽस्म्यहंभद्रेवैष्णव्याभार्ययात्वया ॥ गुरुणातवचार्वङ्गिवामदेवेनधीमता ॥ ६ ॥ अनुज्ञातार्चयस्वेशंपुराणंपुरुषोत्तमम् ॥ गुरूपदेश
मार्गेणपूजयित्वैवकेशवम् ॥ प्राप्नोतिवाञ्छितंसर्वंनान्यथाभूधरात्मजे ॥ ७ ॥ वसिष्ठउवाच ॥ एवमुक्तातदादेवीवामदेवान्तिकंनृप ॥ जगामसहसाहृ
ष्टाविष्णुपूजनलालसा ॥ ८ ॥ समेत्यतंगुरुंदेवीपूजयित्वाप्रणम्यच ॥ विनीताप्राञ्जलिर्भूत्वाउवाचमुनिसत्तमम् ॥ ९ ॥ पार्वत्युवाच ॥ भगवंस्त्व
त्प्रसादेनसम्यगाराधनंहरेः ॥ करिष्यामिद्विजश्रेष्ठत्वमनुज्ञातुमर्हसि ॥ १० ॥ वसिष्ठउवाच ॥ इत्युक्तस्तुतयादेव्यावामदेवोमहामुनिः ॥ तस्यैमन्त्र
वरंश्रेष्ठंददौसविधिनागुरुः ॥ ११॥ नाम्नांसहस्रंविष्णोश्चप्रोक्तवान्मुनिसत्तमः ॥ निवेदयित्वापूजायाविधानमपिदेशिकः ॥ उवाचपरमप्रीत्यापार्वतीं
संशितव्रताम् ॥ १२ ॥ वामदेवउवाच ॥ अर्चयित्वाहृषीकेशंप्रातर्नित्यंवरानने ॥ सहस्रनामपठनंकुरुष्वतदनन्तरम् ॥१३॥ वसिष्ठउवाच ॥ इत्युक्ता
तेनगुरुणाप्रहृष्टेनान्तरात्मना ॥पूजयित्वानमस्कृत्यपुनरायात्स्वमालयम्॥१४॥शिक्षितागुरुणातेनवामदेवेनपार्वती॥ तथासमर्चयामासनित्यंभक्त्या ॥ २७६ ॥
सनातनम्॥१५॥जपन्तीनामसाहस्रंप्रतिनित्यमतन्द्रिता॥ उवास सुसुखेनैवपतिनासंशितव्रता॥१६॥ततःकतिपयाहस्सुद्रष्टुंदर्श्यांवृषभध्वजः॥ कैलास
शिखरेरम्येविष्णुमाराध्यशङ्करः ॥ उपविष्टस्ततोभोक्तुंपार्वतींशङ्करोऽब्रवीत् ॥ १७ ॥ शङ्करउवाच ॥ पार्वत्येहिमयासार्द्धंभोक्तुंभुवनवन्दिते ॥१८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वसिष्ठउवाच ॥ तमाहपार्वतीदेवीजस्वानामसहस्रकम् ॥ ततोभोक्ष्याम्यहंदेवभुज्यतांभवताप्रभो ॥ ततस्तांपार्वतींप्राहप्रहसन्परमेश्वरः ॥ १९ ॥
शङ्करउवाच ॥ धन्यासिकृतकृत्यासिविष्णुभक्तासिपार्वति ॥ दुर्लभावैष्णवीभक्तिर्भागधेयंविनेश्वरि ॥२०॥ रमन्तेयोगिनोऽनन्तेसत्यानन्दचिदा
त्मनि॥तेनरामपदेनासौपरंब्रह्माभिधीयते॥२१॥रामरामेतिरामेतिरमेरामेमनोरमे॥सहस्रनामतत्तुल्यंरामनामवरानने॥२२॥ रकारादीनिनामानिशृण्व
तोममपार्वति ॥ मनःप्रसन्नतांयातिरामनामाभिशङ्कया ॥ रामेत्युक्त्वामहादेविभुंक्ष्वसार्धंमयाधुना ॥ २३॥ वसिष्ठउवाच ॥ ततोरामेतिनामोक्त्वा
सहभुक्त्वाथपार्वती ॥ रामेत्युक्त्वामहादेवीशम्भुनासहसंस्थिता ॥ पप्रच्छशङ्करंदेवंप्रीतिप्रणवमानसा ॥ २४ ॥ पार्वत्युवाच ॥ सहस्रनामभि
स्तुल्यंरामनामत्वयोदितम् ॥ तस्यापराणिनामानिसन्तिचेद्रावणद्विषः ॥ कथ्यन्तांममदेवेशतत्रमेभक्तिरुत्थिता ॥ २५ ॥ श्रीमहादेवउवाच ॥
शृणुनामानिवक्ष्यामिरामचन्द्रस्यपार्वति ॥ लौकिकावैदिकाःशब्दायेकेचित्सन्तिपार्वति ॥ २६ ॥ नामानिरामचन्द्रस्यसहस्रंतेषुचाधिकम् ॥
तेषुचात्यन्तमुख्यंहिनाम्नामष्टोत्तरंशतम् ॥ २७ ॥ विष्णोरेकैकनामैवसर्ववेदाधिकंमतम् ॥ तादृङ्नामसहस्राणिरामनामसमानिच ॥ २८ ॥ यत्फलं
सर्ववेदानांमन्त्राणांजपतःप्रिये ॥ तत्फलंकोटिगुणितंरामनाम्नैवलभ्यते ॥ २९ ॥ नामानिशृणुरामस्यमुख्यानिशुभदर्शने॥ऋषिभिःपरिगीतानि
तानिवक्ष्यामितेप्रिये ॥३०॥ ॐश्रीरामोरामचन्द्रश्चरामभद्रश्चशाश्वतः॥ राजीवलोचनःश्रीमान्राजेन्द्रोरघुपुङ्गवः ॥३१॥ जानकीवल्लभोजैत्रोजितामि
त्रोजनार्दनः ॥ विश्वामित्रप्रियोदान्तःशरणागतवत्सलः ॥ ३२ ॥ वालिप्रमथनोवाग्मीसत्यवाक्सत्यविक्रमः ॥ सत्यव्रतोव्रतफलःसदाहनुमदाश्रयः
॥३३॥ कौशलेयःखरध्वंसीविराधवधपण्डितः ॥ विभीषणपरित्रातादशग्रीवशिरोहरः ॥३४॥ सप्ततालप्रभेत्ताचहरकोदण्डखण्डनः ॥ जामदग्न्यमहा
दर्पदलनस्ताडकान्तकृत् ॥ ३५ ॥ वेदान्तपारोवेदात्माभवबन्धैकभेषजम् ॥ दूषणत्रिशिरोरिश्चत्रिमूर्तिस्त्रिगुणात्मकः ॥ ३६ ॥ त्रिविक्रमस्त्रिलो
कात्मापुण्यचारित्रकीर्त्तनः ॥ त्रिलोकरक्षकोधन्वीदण्डकारण्यवासकृत्॥३७॥अहल्यापावनश्चैवपितृभक्तोवरप्रदः ॥ जितेन्द्रियोजितक्रोधोजितलोभो
जगद्गुरुः ॥ ३८ ॥ ऋक्षवानरसङ्घातीचित्रकूटसमाश्रयः ॥ जयन्तत्राणवरदःसुमित्रापुत्रसेवितः ॥ ३९ ॥ सर्वदेवाधिदेवश्चमृतवानरजीवनः ॥ माया
मारीचहन्ताचमहाभागोमहाभुजः ॥ ४० ॥ सर्वदेवस्तुतःसौम्योब्रह्मण्योमुनिसत्तमः ॥ महायोगीमहोदारःसुग्रीवस्थिरराज्यदः ॥ ४१ ॥ सर्वपुण्या
धिकफलःस्मृतःसर्वाघनाशनः ॥ आदिपुरुषोमहापुरुषःपरमःपुरुषस्तथा ॥ ४२ ॥ पुण्योदयोमहासारःपुराणपुरुषोत्तमः ॥ स्मितवक्त्रोमितभा
षीपूर्वभाषीचराघवः ॥ ४३ ॥ अनन्तगुणगम्भीरोधीरोदान्तगुणोत्तरः ॥ मायामानुषचारित्रोमहादेवाधिपूजितः ॥४४॥ सेतुकृज्जितवारीशःसर्वतीर्थ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मयोहरिः॥ श्यामाङ्गः सुन्दरः शूरः पीतवासाधनुर्द्धरः ॥४५॥ सर्वयज्ञाधिपोयज्ञोजरामरणवार्जितः ॥शिवलिङ्गप्रतिष्ठातासर्वाघगणवर्जितः ॥४६॥ परमात्मापरब्रह्मसच्चिदानन्दविग्रहः ॥ परंज्योतिः परंधामपराकाशः परात्परः ॥ ४७ ॥ परेशः पारगः पारः सर्वभूतात्मकः शिवः ॥ इतिश्रीराचन्द्रस्यनाम्नामष्टोत्तरंशतम् ॥ ४८ ॥ गुह्याद्गुह्यतरंदेवितवस्नेहात्प्रकीर्तितम् ॥ यः पठेच्छृणुयाद्वापिभक्तियुक्तेनचेतसा ॥ ४९ ॥ सर्वैः प्रमुच्यतेपापैः कल्पकोटिशतोद्भवैः ॥ जलानिस्थलतांयान्तिशत्रवोयान्तिमित्रताम् ॥५०॥ राजानोदासतांयान्तिवह्नयोयान्तिसौम्यताम् ॥ आनुकूल्यंचभूतानिस्थैर्यंयान्तिचलाः श्रियः ॥ ५१ ॥ अनुग्रहंग्रहायान्तिशान्तिमायान्त्युपद्रवाः ॥ पठतोभक्तिभावेननरस्यगिरिसंभवे ॥ ५२ ॥ यः पठेत्परयाभक्त्यातस्यवश्यंजगत्रयम् ॥ यंयंकामंप्रकुरुतेतंतमाप्नोतिकीर्त्तनात् ॥५३॥ कल्पकोटिसहस्राणिकल्पकोटिशतानिच ॥ वैकुण्ठेमोदतेनित्यंदशपूर्वैर्दशापरैः ॥५४॥ रामंदूर्वादलश्यामंपद्माक्षंपीतवाससम् ॥ स्तुवन्तिनामभिर्दिव्यैर्नतेसंसारिणोजनाः ॥ ५५ ॥ रामायरामभद्रायरामचन्द्रायवेधसे ॥ रघुनाथायनाथायसीतायाः पतयेनमः ॥५६॥ इमंमन्त्रंमहादेविजपन्नेवदिवानिशम् ॥ सर्वपापविनिर्मुक्तोविष्णुसायुज्यमाप्नुयात् ॥ ५७ ॥ इतितेरामचन्द्रस्यमाहात्म्यंवेदसंमितम् ॥ कथितंवैमयासुभ्रूस्तवप्रीत्याशुभाह्वयम् ॥ ५८ ॥ वसिष्ठउवाच॥ तच्छ्रुत्वाशङ्करेणोक्तंमाहात्म्यंपरमात्मनः ॥ प्रहर्षमतुलंलेभेआनन्दाश्रुजलाप्लुता ॥ प्रणम्यप्राहदेवेशंभर्तारंवृषभध्वजम् ॥५९॥ पार्वत्युवाच ॥ अहोमाहात्म्यमतुलंरामस्यपरमात्मनः ॥ श्रोत्रतृप्तिर्हिमेनस्यात्कल्पायुतशतैरपि ॥ ६० ॥ धन्याहंकृतकृत्यास्मिसर्वमुक्तंत्वयानघ ॥ त्वत्प्रसादाद्धरेर्भक्तिर्जन्मजन्मनिचास्तुमे ॥ ६१ ॥ वसिष्ठउवाच ॥एवमुक्त्वास्वभर्तारंगौरीभागवतोत्तमा ॥६२॥ रामायरामभद्रायरामचन्द्रायवेधसे ॥ रघुनाथायनाथायसीतायाः पतयेनमः ॥६३ ॥ जपन्तीमंमन्त्ररत्नंसर्वावस्थासुपार्वती ॥ उवासचसुखेनैवकैलासेशम्भुनासह॥६४॥एतत्तेसर्वमाख्यातंगुह्याद्गुह्यतमंनृप॥साक्षाद्रुद्रेणकथितंशुद्धसत्त्वतरंमहत्॥६५॥रुद्रप्रोक्तानिशास्त्राणितामसान्येवपार्थिव ॥ संमोहनार्थंलोकानांप्रोक्तवान्वृषभध्वजः ॥ ६६ ॥ रहसिप्रोक्तवान्देव्याइदमेकंहरः प्रभुः ॥ यथार्थमर्थंगुह्यंचसारंमन्त्रस्यभूपते ॥६७॥देव्याः प्रीत्यैमहादेवः कथयामासतत्परः ॥औमामहेश्वरंराजन्संवादमिममद्भुतम् ॥६८॥ यः पठेच्छृणुयाद्वापिभक्तियुक्तेनचेतसा॥ ससर्ववन्द्यः सर्वज्ञोमहाभागवतोभवेत् ॥ ६९ ॥ सर्वधर्मविनिर्मुक्तः प्राप्नोतिपरमंपदम् ॥ धन्यः खलुभवाँल्लोकेपार्थिवेन्द्रमहाबल ॥ ७० ॥ त्वदन्वयेहरिः श्रीमान्पुराणः पुरुषोत्तमः ॥ उत्पत्स्यतेदाशरथिः सर्वलोकहितायवै ॥ ७१ ॥ तस्मादिक्ष्वाकवः पूज्याः सुराणामपिपार्थिव ॥ येषांजातोहिभगवान्रामोराजीवलोचनः ॥७२॥ इतिश्रीपाद्मेमहापुराणेपञ्चप० उत्तर० उमामहेश्वरसंवादेरामचन्द्राष्टोत्तरशतनामकथनंनामचतुष्पञ्चाशदधिकद्वि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शततमोऽध्यायः ॥ २९४ ॥ दिलीपउवाच ॥ कथितंभवताब्रह्मन्सर्वधर्ममशेषतः ॥ सामान्यंचविशिष्टंचस्वरूपंपरजीवयोः ॥ १ ॥ स्वर्गापवर्गौ कथितौ साधनंचतयोरपि ॥ धन्योऽस्म्यहंद्विजश्रेष्ठत्वत्प्रसादात्सदागुरो ॥ २ ॥ एकस्तुसंशयश्चित्तेममास्तिद्विजसत्तम ॥ कथामन्यांद्विजश्रेष्ठपृच्छा मित्वांकुतूहलात् ॥३॥ कथयस्वयथातथ्यमपिवात्सल्यगौरवात् ॥ महाभागवतश्रेष्ठोरुद्रस्त्रिपुरघातकः ॥४॥ कस्माद्विगर्हितंरूपंप्राप्तवान्सहभार्यया॥ योनिलिङ्गस्वरूपंचकथंस्यात्सुमहात्मनः ॥ ५ ॥ पञ्चवक्त्रश्चतुर्बाहुःशूलपाणिस्त्रिलोचनः ॥ कथंविगर्हितंरूपंप्राप्तवान्द्विजपुङ्गव ॥ एतत्सर्वं समाचक्ष्वमित्रावरुणनन्दन ॥ ६ ॥ वसिष्ठउवाच ॥ शृणुराजन्प्रवक्ष्यामियन्मांपृच्छसिगौरवात् ॥ विशुद्धेहृदयेपुंसांबुद्धिःश्रेयसिजायते ॥ ७ ॥ स्वायम्भुवोमनुःपूर्वंमन्दरेपर्वतोत्तमे ॥ जगाममुनिभिःसार्द्धंदीर्घसत्रमनुत्तमम् ॥८॥ तस्मिन्समागताःसर्वेमुनयःसंशितव्रताः ॥ नानाशास्त्रविदःश्रेष्ठा बालसूर्यानलप्रभाः ॥ ९ ॥ सर्ववेदविदोविप्राःसर्वधर्मपरायणाः ॥ वर्तमानेमहासत्रेमुनयःक्षीणकल्मषाः ॥ १० ॥ अन्वेष्टुंदेवतातत्त्वंमिथःप्रोचुस्त पोधनाः ॥ विप्राणांवेदविदुषांकःपूज्योदेवतावरः ॥ ११ ॥ ब्रह्मविष्णुमहेशानांकःस्तुतोमुक्तिदोनृणाम् ॥ कस्यपादोदकंसेव्यंभुक्तोच्छिष्टंचपावनम् ॥ १२ ॥ कोऽव्ययःपरमंधामपरमात्मासनातनः ॥ कस्यप्रसादतीर्थंचपितॄणांतृप्तिदंभवेत् ॥ १३ ॥ तेषांसमुपविष्टानामितिवादोमहानभूत् ॥ रुद्र एक इतिप्रोचुःकेचिदत्रमहर्षयः ॥ १४ ॥ ब्रह्मैवपूज्यइत्यन्येवदन्तिमुनिसत्तमाः ॥ सूर्यएवात्मनांपूज्यइत्यन्येप्राहुरुत्तमाः ॥ १५ ॥ योऽसौसर्वगतः श्रीमाञ्छ्रीपतिः पुरुषोत्तमः ॥ अव्ययः पुण्डरीकाक्षो वासुदेवः परात्परः ॥ १६ ॥ अनादिनिधनो विष्णुः सएवपरमेश्वरः ॥ संपूज्योदेवताश्रेष्ठ इत्यन्येचोचिरेद्विजाः ॥ १७ ॥ तेषांविवदतांतत्रमनुःस्वायम्भुवोऽब्रवीत् ॥ शुद्धसत्त्वमयोयोऽसौ कल्याणगुणवान्प्रभुः ॥ १८॥ पुण्डरीकेक्षणःश्रीमाञ्छ्रीपतिःपुरुषोत्तमः ॥ विप्राणांवेदविदुषामेकएवार्चितःप्रभुः ॥ विप्राणांनेतरेपूज्याराजस्तमोवि मिश्रिताः ॥१९॥ वसिष्ठउवाच॥ इतितस्यवचःश्रुत्वासर्वएवमहर्षयः॥भृगुंतपोनिधिंविप्रंप्रोचुःप्राञ्जलयस्तथा ॥२०॥ ऋषयऊचुः॥अस्माकंसंशयंछेत्तुं त्वंसमर्थोऽसिसुव्रत ॥ ब्रह्मविष्णुमहेशानामन्तिकंव्रजसुव्रत ॥ २१ ॥ गत्वातेषांसमीपंतुतथादृष्ट्वातुविग्रहान् ॥ शुद्धसत्त्वगुणंतेषांयस्मिन्संवि द्यतेमुने ॥ २२ ॥ सएवपूज्योविप्राणांनेतरस्तुकदाचन ॥ शुद्धसत्त्वमयःसाक्षाद्ब्रह्मण्यःसभविष्यति ॥ २३ ॥ तीर्थप्रसादवाँल्लोकेविप्राणांसभवि ष्यति ॥ देवतानांपितॄणांचतस्योच्छिष्टंसुपावनम् ॥ २४ ॥ तस्माद्याहिमुनिश्रेष्ठविबुधानांनिवासनम् ॥ क्षिप्रंकुरुमुनिश्रेष्ठसर्वलोकहितंप्रभो ॥२५॥ वसिष्ठउवाच ॥ एवमुक्तोभृगुस्तूर्णंकैलासंमुनिसत्तमः ॥ जगामवायुमार्गेणयत्रास्तेवृषभध्वजः ॥२६॥ गृहद्वारमुपागम्यशङ्करस्यमहात्मनः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शूलहस्तंमहारौद्रंनन्दिनंचाब्रवीद्द्विजः ॥ २७ ॥ संप्राप्तोऽहंभृगुर्विप्रोहरंद्रष्टुंसुरोत्तमम् ॥ निवेदयस्वमांशीघ्रंशङ्करायमहात्मने ॥ २८ ॥ तस्यतद्व
चनंश्रुत्वानन्दीसर्वगणेश्वरः ॥ उवाचपरुषं वाक्यंमहर्षिममितौजसम् ॥ २९ ॥ असांनिध्यंप्रभोस्तस्यदेव्याक्रीडतिशङ्करः ॥ निवर्त्तस्वमुनि
श्रेष्ठयदिजीवितुमिच्छसि॥३०॥ वसिष्ठउवाच॥एवंनिराकृतस्तेनतत्रातिष्ठन्महातपाः ॥ बहूनिदिवसान्यस्मिन्गृहद्वारिमहेशितुः ॥ ततक्रोधसमाविष्टो
भृगुःशापमदान्मुनिः ॥३१॥ भृगुरुवाच॥ निविष्टस्तमसामूढोमांनजानातिशङ्करः ॥नारीसंगममत्तोऽसौयस्मान्मामवमन्यते ॥३२॥योनिलिङ्गस्वरू
पंवैतस्मात्तस्यभविष्यति ॥ ब्राह्मणंमावजानातितमसासमुपागतः ॥ ३३ ॥ अब्रह्मण्यत्वमापन्नोह्यपूज्योऽसौद्विजन्मनाम् ॥ तस्माद्न्नंजलंपु
ष्पंतस्मैदत्तंहविस्तथा॥निर्माल्यमस्यतत्सर्वंभविष्यतिनसंशयः॥३४॥वसिष्ठउवाच॥एवंशप्त्वामहातेजाःशङ्करंलोकपूजितम्॥उवाचगणमत्युग्रंनन्दिनं
शूलपाणिकम्॥३५॥भृगुरुवाच॥रुद्रभक्ताश्चयेलोकेभस्मलिङ्गास्थिधारिणः॥तेपाखण्डत्वमापन्नावेदबाह्याभवन्तुवै॥३६॥वसिष्ठउवाच॥इतितस्यवचः
श्रुत्वारुद्रस्त्रिपुरघातकः॥भृगुंहन्तुंसमारेभेमहतातमसावृतः॥३७॥शूलंहस्तेप्रगृह्याथपार्वतीविनयान्विता।न्यवर्तयन्महादेवंप्रणिपत्यकृताञ्जलिः।३८॥
ततोललाटनयनंकोटिसूर्याग्निसन्निभम् ॥ भृगुःपश्यन्महातेजाःस्थितोगौर्यानिवारितः ॥३९॥ मुनिस्तुपादेनयनंप्रदर्श्यप्रहसन्ययौ ॥ अमोघोममशा
पस्तुकुरूपीत्वंनसंशयः॥४०॥ततःप्रभृतिविप्राणांतस्यपादोदकादिकम्।अग्राह्यमभवद्राजन्सर्वभूताधिपस्यतु॥४१॥पाषण्डैःपूज्यमानस्तुलिङ्गरूपधरः
शिवः ॥ एवंशप्त्वामुनिस्तत्ररुद्रंत्रिपुरघातकम् ॥४२॥ जगामब्रह्मलोकंवैसर्वलोकनमस्कृतम् ॥ तत्रदेवैःसहासीनंब्रह्माणंपरमेष्ठिनम् ॥ ४३॥दृष्ट्वाप्राञ्ज
लिनादेवंप्रणनाममहामतिः ॥ प्रणम्यपुरतस्तस्यतूष्णीमास्तमहातपाः ॥४४॥ तंदृष्ट्वामुनिशार्दूलंरजोगुणसमावृतः ॥ नार्चयामासधातासौमहर्षिं
समुपागतम्॥४५॥प्रत्युत्थानंप्रियंवाक्यंनकृतंतस्यवेधसा॥ऐश्वर्येणैवमहतातस्थौतत्राम्बुजासनः ॥४६॥ तंदृष्ट्वारजसोद्रिक्तंमहर्षिःपङ्कजासनम् ॥ व्या
जहारमहातेजावाक्यंलोकपितामहम्॥४७॥भृगुरुवाच॥रजसामहतोद्रिक्तोयस्मान्मामवमन्यसे॥तस्मात्त्वंसर्वलोकानामपूज्यत्वंसमाप्नुहि॥४८॥वसिष्ठ
उवाच॥एवंशप्त्वामहात्मानंब्रह्माणंलोकपूजितम् ॥ जगामसहसाविप्रोभगवन्मन्दिरंभृगुः ॥४९॥ तस्माद्देवैर्मनुष्यैश्चराक्षसैर्मुनिसत्तमैः ॥ अपूज्यत्व ॥ २७८ ॥
मवाप्यैवस्थितवान्सपितामहः।५०।प्रविश्यवैष्णवंलोकंक्षीराब्धेरुत्तरेतटे।तत्रस्थितैर्महाभागैःपूज्यमानोयथार्हतः॥५१॥ तत्रानिवार्यमाणस्तुप्रविष्टोन्तः
पुरंद्विजः॥प्रविश्यतस्मिन्विमलेविमानेरविसन्निभे॥५२॥शयानंनागपर्यङ्केददर्शकमलापतिम्॥लक्ष्मीकरसरोजाभ्यांमृज्यमानपदद्वयम्॥५३॥तंदृष्ट्वामु
निशार्दूलोभृगुःकोपसमन्वितः ॥ सव्यंपादंप्रचिक्षेपविष्णोर्वक्षसिशोभने ॥ ५४ ॥ तूर्णमुत्थायभगवान्धन्योऽस्मीतिवदन्मुदा ॥ हस्ताभ्यांचरणं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यपीडयामासहर्षितः ॥ ५५ ॥ शनैर्मृदित्वातत्पादंमधुरंवाक्यमब्रवीत् ॥ धन्योऽस्म्यद्यैवविप्रर्षेकृतकृत्योऽस्मिसर्वदा ॥ त्वत्पादस्पर्शनाद्देहे
मङ्गलंमेभविष्यति ॥५६॥ समस्तसंपत्समवाप्तिहेतवःसमुत्थितापत्कुलधूमकेतवः ॥ अपारसंसारसमुद्रसेतवःपुनन्तुमांब्राह्मणपादपांसवः ॥ ५७ ॥
विप्रपादरजोयस्यदेहेतिष्ठतिसर्वदा ॥ गङ्गादिसर्वतीर्थानितस्यतिष्ठन्त्यसंशयम् ॥ ५८ ॥ इत्युक्त्वासहसोत्थायदेव्यासार्धंजनार्दनः ॥ भक्त्यासमर्च
यामासदिव्यस्रक्चन्दनादिभिः ॥५९॥ तंदृष्ट्वामुनिशार्दूलोहर्षपूर्णाश्रुलोचनः ॥उत्थायासनमुख्यात्तंप्रणनामदयानिधिम्॥कृताञ्जलिपुटोभूत्वाहर्षात्प्राह
महातपाः ॥ ६० ॥ श्रीभृगुरुवाच ॥ अहोरूपमहोशान्तिरहोज्ञानमहोदया ॥ अहोसुनिर्मलाशान्तिरहोसत्त्वगुणंहरेः ॥ ६१ ॥ नैसर्गिकं
शुभंसत्त्वंतथैवगुणवारिधेः ॥ नान्येषांविद्यतेकिञ्चित्सर्वेषांत्रिदिवौकसाम् ॥ ६२ ॥ ब्रह्मण्यश्चशरण्यश्चत्वमेवपुरुषोत्तमः ॥ ब्राह्मणानांत्वमेवेशो
नान्यःपूज्यःसुरःक्वचित् ॥६३॥ येऽचर्यन्तिसुरानन्यांस्त्वांविनापुरुषोत्तम ॥ तेपाखण्डत्वमापन्नाःसर्वलोकविगर्हिताः ॥ ६४ ॥ विप्राणांवेदवि
दुषांत्वेमेवेज्योजनार्दनः ॥ नान्यःकश्चित्सुराणांतुपूजनीयःकदाचन ॥ ६५ ॥ अनर्च्याब्रह्मरुद्राद्याराजस्तमोविमिश्रिताः ॥ त्वंशुद्धसत्त्वगुणवान्पू
जनीयोऽग्रजन्मनाम् ॥६६॥ त्वत्पादसलिलंसेव्यंपितॄणांचदिवौकसाम् ॥ सर्वेषांभूसुराणांचमुक्तिदंकल्मषापहम् ॥६७॥ त्वद्भुक्तोच्छिष्टशेषंवैपितणां
चदिवौकसाम् ॥ सर्वेषांभूसुराणांचमुक्तिदंकल्मषापहम् ॥ भूसुराणांचसेव्यंस्यान्नान्येषांतुकदाचन ॥६८॥ इतरेषांतुदेवानामन्नंपुष्पंजलंतथा ॥ अस्पृ
श्यंतुभवेत्सर्वंनिर्माल्यंसुरयाससमम् ॥६९॥ तस्माद्वैब्राह्मणोनित्यंपूजयित्वासनातनम् ॥ त्वत्तीर्थंभुक्तमन्नंचभजेतैवानिशंबुधः ॥७०॥ नान्यंदेवंतुवीक्षे
तब्राह्मणोनचपूजयेत् ॥ नान्यप्रसादंभुञ्जीतनान्यस्यायतनंविशेत् ॥ ७१ ॥ नददातीहयोविप्रःपितॄणांश्राद्धकर्मणि ॥ त्वद्भुक्तमन्नंतीर्थंचतत्सर्वंनिष्फलं
भवेत् ॥७२॥ कल्पकोटिसहस्राणिकल्पकोटिशतानिच ॥ पतन्तिपितरस्तस्यनरकेपूयशोणिते॥७३॥निवेदितंतवविभोयोजुहोतिददातिवा॥ देवतानां
पितॄणांचतृप्तिरानन्त्यमश्नुते॥७४॥तस्मात्त्वमेवविप्राणांपूज्योनान्योऽस्तिकश्चन॥मोहाद्यःपूजयेदन्यान्सपाखण्डीभविष्यति ॥७५॥ त्वंहिनारायणः
श्रीमान्वासुदेवःसनातनः॥विष्णुःसर्वगतोनित्यःपरमात्मामहेश्वरः॥७६॥त्वमेवसेव्योविप्राणांब्रह्मण्यःशुद्धसत्त्ववान् ॥ पूज्यत्वाद्ब्राह्मणानांवैशुद्धसत्त्व
गुणादपि॥७७॥सर्वेषामेवदेवानांब्राह्मणत्वमवाप्नुहि॥त्वामेवहिसदाविप्राभजन्तिपुरुषोत्तमम्॥७८॥ब्राह्मणास्तेबभूवुस्तुनान्येतत्रनसंशयः॥ब्रह्मण्योदेव
कीपुत्रोब्रह्मण्योमधुसूनः ॥ ७९ ॥ ब्रह्मण्यःपुण्डरीकाक्षोब्रह्मण्योविष्णुरच्युतः ॥ ब्रह्मण्योभगवान्कृष्णोवासुदेवोऽच्युतोहरिः ॥ ८० ॥ ब्रह्मण्योनार
सिंहःस्यात्तथानारायणोऽव्ययः॥ब्रह्मण्यःश्रीधरःश्रीशोगोविन्दोवामनस्तथा ॥८१॥ ब्रह्मण्योयज्ञवाराहःकेशवःपुरुषोत्तमः॥ब्रह्मण्योराघवःश्रीमान्रामो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राजीवलोचनः ॥ ८२ ॥ ब्रह्मण्यःपद्मनाभःस्यात्तथादामोदरःप्रभुः ॥ ब्रह्मण्योमाधवोयज्ञस्तथात्रिविक्रमःप्रभुः ॥ ८३ ॥ ब्रह्मण्यश्चहृषीकेशःपीतवा
साजनार्दनः ॥ नमोब्रह्मण्यदेवायवासुदेवायशार्ङ्गिणे ॥ ८४ ॥नारायणायश्रीशायपुण्डरीकेक्षणायच ॥ नमोब्रह्मण्यदेवायवासुदेवायविष्णवे ॥८५॥
कल्याणगुणपूर्णायनमस्तेपरमात्मने। नमोब्रह्मण्यदेवायसर्गस्थित्यन्तहेतवे॥८६॥वाराहवपुषेनित्यंत्रयीनाथायतेनमः॥नमोब्रह्मण्यदेवायनागपर्यङ्कशा
यिने ॥ ८७ ॥ राजीवदलनेत्रायराघवायनमोनमः ॥ माययामोहिताःसर्वेदेवाश्चऋषयस्तव ॥८८॥ नजानन्तिमहात्मानंसर्वलोकेश्वरंप्रभो ॥ त्वांन
जानन्तिभगवन्सर्ववेदविदोऽपिहि ॥ ८९ ॥ नामरूपगुणैः श्रीशचारित्रैरपिदुष्कृतैः ॥ परत्वसूचकंसत्त्वंतववेदितुमीश्वरः ॥ ९० ॥ महर्षिभिःप्रेषितो
ऽहमागतोऽस्मितवान्तिकम् ॥ तवशीलगुणाञ्ज्ञातुंचरणंममकेशव ॥९१॥ दत्तंवक्षसिगोविन्दतत्क्षन्तव्यंकृपानिधे ॥ एवमुक्त्वाभृगुर्देवंप्रणम्यचमुहुर्मु
हुः॥९२॥दिव्यैर्महर्षिभिस्तत्रपूज्यमानोमहात्मभिः॥पुनर्जगामहृष्टात्मायज्ञभूमिंशुभाह्वयाम् ॥९३॥समागतंमहात्मानंतत्रदृष्ट्वामहर्षयः॥प्रत्युत्थायनम
स्कृत्यपूजांचक्रुर्विधानतः॥९४॥तेषांविज्ञापयामासतत्सर्वंमुनिपुङ्गवः॥रजस्तमोगुणोद्रिक्तौविधीशानौसुरोत्तमौ ॥९५॥ शप्तौमयानपूज्यौतौविप्राणा
मृषिसत्तम॥अब्रह्मण्यत्वमापन्नोगर्हितंरूपमास्थितः॥९६॥शप्तःकैलासशिखरेशङ्करस्तमसावृतः॥शुद्धसत्त्वमयोविष्णुःकल्याणगुणसागरः॥९७॥ नारा
यणःपरंब्रह्मविप्राणांदैवतंहरिः॥ब्रह्मण्यःश्रीपतिर्विष्णुर्वासुदेवोजनार्दनः॥९८॥ब्रह्मण्यःपुण्डरीकाक्षोगोविन्दोहरिरच्युतः॥सएवपूज्योविप्राणांनेतरःपुरुष
र्षभाः॥ ९९ ॥ मोहाद्यःपूजयेदन्यंसपाखण्डीभविष्यति॥स्मरणादेवकृष्णस्यविमुक्तिःपापिनामपि॥१००॥तस्यपादोदकंसेव्यंभुक्तोच्छिष्टंचपावनम्॥
स्वर्गापवर्गदंनृणांब्राह्मणानांविशेषतः ॥ १ ॥ विष्णोर्निवेदितंनित्यंदेवेभ्योजुहुयाद्धविः ॥ पितृभ्यश्चैवतद्द्यात्सर्वमानन्त्यमश्नुते ॥ २ ॥
योनदद्याद्धरेर्भुक्तंपितॄणांश्राद्धकर्मणि ॥ अश्नन्तिपितरस्तस्यविण्मूत्रंसततंद्विजाः ॥ ३ ॥ तस्माद्विष्णोः प्रसादोवैसेवितव्योदिजन्मनाम् ॥ इत
रेषांतुदेवानांनिर्माल्यंगर्हितंभवेत् ॥ ४ ॥ सकृदेवहियोऽश्नातिब्राह्मणोज्ञानदुर्बलः ॥ निर्माल्यंशङ्करादीनांसचाण्डालोभवेद्ध्रुवम् ॥ ५ ॥ कल्पको
टिसहस्राणिपच्यतेनरकाग्निना ॥ निर्माल्यंभोद्विजश्रेष्ठारुद्रादीनांदिवौकसाम् ॥६॥ रक्षोयक्षपिशाचान्नंमद्यमांससमंस्मृतम् ॥ तद्ब्राह्मणैर्नभोक्तव्यंदेवा
नामर्पितहविः ॥ ७ ॥ तस्मादन्यंपरित्यज्यविष्णुमेवसनातनम् ॥ पूजयध्वंद्विजश्रेष्ठायावज्जीवमतन्द्रिताः ॥ ८ ॥ तद्विष्णोःपरमंधामयास्य
न्त्येवन संशयः ॥ तापादिपञ्चसंस्कारैरन्विष्टाःशुभचेतसः ॥९॥ अप्राकृतंहरिंसम्यगर्चयध्वंद्विजर्षभाः ॥ चक्राङ्कितभुजाविप्राभवन्त्यप्राकृताःशुभाः
॥ ११० ॥ चक्रलाञ्छनहीनास्तुप्राकृतास्तामसाःस्मृताः ॥ तस्मात्प्राकृतसंसर्गपापौघदहनंहरेः ॥ ११ ॥ प्रततंबिभृयाच्चक्रंशङ्खंचभुजमूलयोः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उर्द्धपुण्ड्राणिचाङ्गेषुधृत्वाशास्त्रोक्तमार्गतः ॥ १२ ॥ अर्चयेन्मन्त्ररत्नेनविधिनापुरुषोत्तमम् ॥ तस्यप्रसादसेवांचकुर्यान्नित्यमतन्द्रितः ॥ ॥ १३ ॥ तस्यावरणपूजायांत्रिदशानर्चयेत्सदा ॥ तमेवसर्वयज्ञानांभोक्तारंपरमेश्वरम् ॥ ज्ञात्वावैजुहुयाद्दद्याज्जपेद्वैसततंद्विजाः ॥ १४ ॥ वसिष्ठउवाच ॥ एवमुक्तास्तुतेसर्वेऋषयःक्षीणकल्मषाः ॥ नमस्कृत्यभृगुंसम्यगूचुःप्राञ्जलयस्तदा ॥ १५ ॥ ऋषयऊचुः ॥ भगवन्संशयच्छेत्ता त्वमेव द्विजसत्तम॥अन्धेतमसिमज्जन्ति ब्राह्मणास्तमसावृताः॥१६॥त्वत्प्रसादाद्वयंविष्णुं जानीमःपुरुषोत्तमम्॥सर्वेसनाथास्सुखिनोभवेमद्विजसत्तम ॥१७॥ त्वंवैलोकगतिर्ब्रह्मंस्त्वमेवपरमागतिः ॥ त्वमेवपरमोधर्मस्त्वमेवपरमंतपः ॥ त्वत्प्रसादाद्वयंविप्रभविष्यामोहिनान्यथा ॥ १८ ॥ वसिष्ठउवाच ॥ एवंस्तुत्वाभृगुंविप्रंसर्वएवमहर्षयः ॥ तस्मात्संप्राप्तमन्त्रावैपूजयामासुरच्युतम् ॥ १९ ॥ एतत्तेसर्वमाख्यातंप्रसङ्गात्पार्थिवोत्तम ॥ भृगुशापान्महेशस्य योनिलिङ्गस्वरूपता॥२०॥रामस्यहस्तकमलस्पर्शनाद्वैनृपोत्तम ॥ भविष्यत्यमलंतच्चरूपंलोकविगर्हितम्॥राघवः सर्वदेवानांपावनःपुरुषोत्तमः ॥ २१ ॥ स्पृष्टाद्दष्टाश्चतेनैवविमलाःशङ्करादयः ॥ सर्वेषामपिदेवानांपितामाताजनार्दनः॥ २२ ॥ त्राताचसर्वलोकानां वात्सल्यगुणसागरः ॥ तमेवशरणंगच्छयदीच्छसिपरंपदम् ॥ २३ ॥ एतत्तेसर्वमाख्यातंपुराणंवेदसंमितम् ॥ ब्रह्मणाकथितंराजन्मनोःस्वायम्भुवोऽन्तरे ॥ २४ ॥ विष्णुभक्तिविनीतस्यशुद्धसत्त्वस्यनान्यथा ॥ तस्यसंश्रावयेन्नित्यंविमुक्तासाहरेःकथा ॥ २५ ॥ शङ्खचक्रोर्द्धपुण्ड्रादिविहितोवाचकःपुमान् ॥ तन्मुखाच्छ्रूयतांनित्यंपुत्रीभवसिनान्यथा ॥ २६ ॥ यस्त्विदंश्रावयेन्नित्यंपठेद्वासुसमाहितः ॥ अनन्यभक्तिःश्रीशस्यजायतेतस्यसर्वदाः ॥ २७ ॥ विद्यार्थीलभतेविद्यांधर्मार्थीधर्ममाप्नुयात् ॥ मोक्षार्थीलभतेमोक्षंकामार्थीलभतेसुखम् ॥ २८ ॥ द्वादश्यांश्रवणार्केचसंक्रान्तौग्रहणेतथा ॥ अमायांपौर्णमास्यांचपठेद्भक्तिसमन्वितः ॥२९॥ श्लोकार्द्धंश्लोकपादंवापठेद्यस्तुसमाहितः ॥ अश्वमेधसहस्रस्यफलं प्राप्नोत्यसंशयम् ॥ ३० ॥ इत्येतत्कथितंगुह्यंपुराणंसंहितात्मकम्॥अर्चयस्वहृषीकेशंयदीच्छसिपरंपदम् ॥३१॥ सूतउवाच ॥ एवमुक्तोवसिष्ठेनगुरुणानृपसत्तमः ॥ प्रणम्यचगुरुंराजा पूजयित्वा यथार्हतः॥३२॥तस्मात्संप्राप्तमन्त्रोऽसौविधिनाद्विजसत्तमात्॥अर्चयित्वाहृषीकेशंयावज्जीवमतन्द्रितः॥कालेहरिपदं प्रापयोगिगम्यंसनातनम् ॥३३॥

इतिश्रीपाद्मेमहापुराणेपञ्चपञ्चाशत्साहस्र्यांसंहितायांवैयासिक्यामुत्तरखण्डेभृगुपरीक्षाकथनंनामपञ्चपञ्चाशदधिकद्विशततमोऽध्यायः॥२५५॥

समाप्तमिदं षष्ठमुत्तरखण्डम् ।

Nepal Sanskrit University, Balmeeki Campus, Kalamandir

CC-0. In Public Domain. Digitization by eGangotri

इदं पाद्ममहापुराणं क्षेमराज-श्रीकृष्णदासश्रेष्ठिना मुम्बय्यां (खेतवाड़ी ७ वीं गली खम्बाटा लेन)
स्वकीये "श्रीवेङ्कटेश्वर"-(स्टीम्) मुद्रणयन्त्रालये स्वीयार्थं मुद्रयित्वात्रैव प्रकाशितम्।
संवत् १९८४, शके १८४९, सन् १९२७.

पुस्तक मिलनेका ठिकाना—

खेमराज श्रीकृष्णदास,
"श्रीवेङ्कटेश्वर"-स्टीम्-प्रेस-
बम्बई.

गंगाविष्णु श्रीकृष्णदास,
"लक्ष्मीवेङ्कटेश्वर"-प्रेस-कल्याण-
बम्बई.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ अथ श्रीपाद्मे महापुराणे सप्तमं क्रियाखण्डं प्रारभ्यते ॥

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

क्रियाखंडाचीं चित्रें·



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ अथक्रियायोगसारखण्डमारभ्यते ॥ लक्ष्मीनाथपदारविन्दयुगलंब्रह्मेश्वराद्यामरश्रेणीनम्रशिरोलिमालममलंवन्दामहेसन्ततम् ॥
भक्त्यायोगिमनस्तडागसुषमासन्दोहपुष्यत्तमंगङ्गाम्भोमकरन्दबिन्दुनिकरंसंसारदुःखापहम् ॥ १ ॥ योमूर्तीर्बहुधाविधायभगवान्रक्षत्यशेषंजगद्य
त्पादार्चनतत्परानहिपुनर्मज्जन्तिविश्वार्णवे ॥ सर्वप्राणिहृदम्बुजेषुवसतिर्यस्यप्रभोःसन्ततंरम्यक्रोडवपुर्धरायहरयेदेवायतस्मैनमः ॥ २ ॥ वेदेभ्य
उद्धृत्यसमस्तधर्मान्योऽयंपुराणेषुजगाददेवः ॥ व्यासस्वरूपेणजगद्धितायवन्देतमेतंकमलासमेतम् ॥ ३ ॥ एकदामुनयःसर्वेसर्वलोकहितैषिणः ॥
सुरम्येनैमिषारण्येगोष्ठींचक्रुर्मनोरमाम् ॥ ४ ॥ तत्रान्तरेमहातेजाव्यासशिष्योमहायशाः ॥ सूतःशिष्यगणैर्युक्तःसमायातोहरिंस्मरन् ॥ ५ ॥
तमायान्तंसमालोक्यसूतंशास्त्रार्थपारगम् ॥ नेमुःसर्वेसमुत्थायशौनकाद्यास्तपोधनाः ॥ ६ ॥ सोऽपितान्सहसाभक्त्यामुनीन्परमवैष्णवान् ॥ ननाम
दण्डवद्भूमौसर्वधर्मविदांवरः॥७॥वरासनेमहाबुद्धिस्तैर्दत्तेमुनिसत्तमैः॥उवासहमुनिर्मध्येसर्वैःशिष्यगणैर्वृतः॥८॥तत्रोपविष्टंतंसूतंशौनकोमुनिसत्तमः ॥
बद्धाञ्जलिरिमांवाचमुवाचविनयान्वितः ॥ ९ ॥ शौनकउवाच ॥ महर्षेसूतसर्वज्ञकलिकालेसमागते ॥ केनोपायेनभगवन्भूरिभक्तिर्भवेन्नृणाम् ॥१०॥
कलौसर्वेभविष्यन्तिपापकर्मरताजनाः ॥ वेदविद्याविहीनाश्चतेषांश्रेयःकथंभवेत् ॥ ११ ॥ कलावन्नगताःप्राणालोकाःस्वल्पायुषस्तथा ॥ निर्धना
श्चभविष्यन्तिनानादुःखप्रपीडिताः ॥ १२ ॥ प्रयाससाध्यंसुकृतंशास्त्रेषुक्रियतेद्विज ॥ तस्मात्केऽपिकरिष्यन्तिकलौनसुकृतंजनाः ॥ १३ ॥ सुकृ
तेषुविनष्टेषुप्रवृत्तेपापकर्मणि ॥ सवंशाःप्रलयंसर्वेगमिष्यन्तिदुराशयाः ॥ १४ ॥ स्वल्पश्रमैरल्पवित्तैरल्पकालैश्चसत्तम ॥ यथाभवेन्महापुण्यंतद्व
कथयसूतनः ॥ १५ ॥ यस्योपदेशतःपुण्यंपापंवाकुर्वतेजनाः ॥ सतद्भागीभवेन्मर्त्यइतिशास्त्रेषुनिश्चितम् ॥ १६ ॥ पुण्योपदेशःसदयःकैतवै
श्चविवर्जितः ॥ पापमार्गविरोधीचचत्वारःकेशवोपमाः ॥ १७ ॥ ज्ञानंसम्प्राप्यसंसारेयःपरेभ्योनयच्छति ॥ ज्ञानरूपीहरिस्तस्मैप्रसन्नइव
नेक्षते ॥ १८ ॥ ज्ञानरत्नैश्चरत्नैश्चपरसन्तोषकृन्नरः ॥ सज्ञेयःसुमतिर्नूनंनररूपधरोहरिः ॥ १९ ॥ त्वमेवमुनिशार्दूलवेदवेदाङ्गपारगः ॥
त्वद्दतेनहिवक्तान्योयतस्त्वंव्यासशासितः ॥ २० ॥ सूतउवाच ॥ धन्योऽसित्वंमुनिश्रेष्ठत्वमेववैष्णवाग्रणीः ॥ यतःसमस्तलोकानांहितंवाञ्छसि
सर्वदा ॥ २१ ॥ शृणुशौनकवक्ष्यामियत्त्वयाश्रोतुमिच्छितम् ॥ सर्वलोकहितार्थायवैष्णवानांविशेषतः ॥ २२ ॥ पृष्टोजैमिनिनासर्वं
यदुवाचशृणुष्वतत् ॥ महर्षिर्जैमिनिर्नामयोगाभ्यासरतःसदा ॥ २३ ॥ प्रणम्यशिरसाव्यासंपप्रच्छमुनिसत्तमः ॥ २४ ॥ जैमिनिरुवाच ॥
भगवन्सर्वधर्मज्ञव्याससत्यवतीसुत ॥ कलौकस्माद्भवेन्मोक्षस्तन्ममाचक्ष्वमूलतः ॥ २५ ॥ सूतउवाच ॥ जैमिनेर्वचनंश्रुत्वाव्यासःसन्तुष्ट

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मानसः ॥ प्रारेभेमुनिशार्दूलकथांमङ्गलसंयुताम् ॥ २६ ॥ व्यासउवाच ॥ जैमिनेमुनिशार्दूलधन्योऽसित्वंमहामते ॥ नारायणकथांश्रोतुंयतो
वाञ्छसिसर्वदा ॥ २७ ॥ सत्कथाश्रवणेबुद्धिर्यस्ययस्यप्रवर्तते ॥ तस्यतस्यभवेज्ज्ञानंज्ञानंमोक्षप्रदंविदुः ॥ २८ ॥ नवैष्णवकथायस्मैरोचतेपापिने
भुवि ॥ वृथैवसृष्टाविधिनाभूमिर्भारवतीकृता ॥ २९ ॥ कथायैजगतीवकुंश्लाघ्यतेवैष्णवैर्जनैः ॥ तांमिथ्यामिवयोवक्तिसज्ञेयःपापिनांवरः ॥ ३० ॥
यस्मिन्दिनेमुनिश्रेष्ठश्रूयतेनहरेःकथा ॥ तद्दिनंदुर्दिनंमन्येघनच्छन्नंनदुर्दिनम् ॥ ३१ ॥ यत्रयत्रमहीभागेवैष्णवीवर्ततेकथा ॥ सान्निध्यंतत्रभगवान्न
जहातिकदाचन ॥ ३२ ॥ योवैष्णवकथारम्भेविघ्नकृन्मानवोभवेत् ॥ तमेवशप्त्वाभगवान्दैवतैःसहगच्छति ॥३३॥ प्रभावंवासुदेवस्यश्रुत्वाह्रष्यन्ति
येजनाः ॥ ज्ञेयास्तएवदेवांशाःपूज्याद्दश्याश्चसत्तमाः ॥ ३४ ॥ नारायणप्रभावंयेश्रुत्वाचोपहसन्तिवै ॥ तेविज्ञेयादानवांशानरानरकभागिनः ॥३५॥
तत्रतीर्थानिसर्वाणिगङ्गादीनिद्विजोत्तम ॥ देवर्षयश्चदेवाश्चमुनयश्चतपोधनाः ॥ ३६ ॥ शृण्वतांलोकसङ्घानांपापव्याधिविनाशनी ॥ नारायणकथा
यत्रवर्ततेप्रतिवासरम् ॥ ३७ ॥ मुनेक्रियायोगसारंवह्वर्थंपापनाशनम् ॥ नारायणकथोपेतंसेतिहासंनिशामय ॥ ३८ ॥ इतिश्रीपाद्मेमहापुराणेक्रिया
योगसारेजैमिनिव्याससंवादेप्रथमोऽध्यायः ॥ १ ॥ व्यासउवाच ॥ सृष्टेरादौमहाविष्णुःसिसृक्षुःसकलंजगत् ॥ स्रष्टापाताचसंहर्तात्रिमूर्ति
रभवत्स्वयम् ॥ १ ॥ सृष्ट्यर्थमस्यजगतःससर्जब्रह्मसंज्ञकम् ॥ दक्षिणाङ्गतआत्मानमात्मनाश्रेष्ठपूरुषः ॥ २ ॥ ततस्तुपालनार्थायजगतो
जगतीपतिः ॥ विष्णुंससर्जवामांशान्निजांशंकेशवंमुने ॥ ३ ॥ अथसंहरणार्थायजगतोरुद्रमव्ययम् ॥ मुनेससर्जमध्याङ्गात्कृतपद्मालयःप्रभुः ॥ ४ ॥
रजःसत्त्वंतमश्चेतिपुरुषंत्रिगुणात्मकम् ॥ वदन्तिकेचिद्ब्रह्माणंविष्णुंकेचिच्चशङ्करम् ॥५॥ एकोविष्णुस्त्रिधाभूत्वासृजत्यत्तिचपातिच ॥ तस्माद्भेदोन
कर्त्तव्यस्त्रिषुलोकेषुसत्तमैः ॥ ६ ॥ आद्याप्रकृतिरेतस्यमहाविष्णोःपरात्मनः ॥ निदानंभूतविश्वस्यविद्याविद्येतिगीयते ॥ ७ ॥ भावाभाव
स्वरूपासाजगद्धेतुःसनातनी ॥ ब्राह्मीलक्ष्मीरम्बिकेतित्रिमूर्तिःसहसाभवत् ॥ ८ ॥ सृष्टिस्थितिविनाशेषुयांनियोज्यततोमुने ॥ आद्यांचैवाद्य
पुरुषस्तत्रैवान्तरधीयत ॥ ९ ॥ यस्याज्ञयाततोब्रह्मामहाभूतान्ससर्जह ॥ पृथिव्याकाशवाय्वम्बुवह्नीन्पञ्चसमाधिना ॥ १० ॥ भूर्भुवःस्वस्तथा
चैवमहश्चैवजनस्तथा ॥ तपश्चसत्यमित्यादीन्सृष्टवान्कमलासनः ॥ ११ ॥ अतलंसृष्टवान्ब्रह्माततोऽधोवितलंद्विज ॥ ततोऽधःसुतलंचैवततोऽधश्च ॥ १ ॥
तलातलम् ॥१२॥ महातलमधस्तस्मात्ततोऽधश्चरसातलम् ॥ तस्मादधश्चपातालंलोकानेवंयथाक्रमम् ॥ १३ ॥ देवतानांनिवासार्थंरत्नसानुंमहागि
रिम् ॥ सृष्टवान्पृथिवीमध्येजाम्बूनदसमुज्ज्वलम् ॥ १४ ॥ मन्दरंचरमंचैवत्रिकूटमुदयाचलम् ॥ अन्यांश्चपर्वतांश्चैवसृष्टवान्विविधानपि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १५ ॥ लोकालोकस्ततश्चैवतन्मध्येसप्तसागराः ॥ सप्तद्वीपाश्चविप्रेन्द्रपरमेशस्वयम्भुवा ॥ १६ ॥ जम्बूद्वीपोद्विजश्रेष्ठद्वीपश्चप्लक्षसंज्ञितः ॥
विज्ञेयोद्विगुणस्तस्माच्छाल्मलोद्विगुणस्ततः ॥ १७ ॥ तेचप्लक्षादयोद्वीपाःसर्वभागसमन्विताः ॥ समस्तगुणसंयुक्तादेवदेवार्षिभूषिताः ॥ १८ ॥
सप्तद्वीपाइमेविप्रसप्तसागरवेष्टिताः ॥ तेषांनामानिवक्ष्यामिसागराणांनिशामय ॥ १९ ॥ लवणेक्षुसुरासर्पिर्दधिदुग्धजलान्तकाः ॥ एतेसमुद्रा
देवर्षेपूर्वस्माच्चपरःपरः ॥ २० ॥ विज्ञेयाद्विगुणाःसर्वआलोकालोकपर्वतात् ॥ द्वीपेद्वीपेततोब्रह्मावृक्षगुल्मलतादिकान् ॥ २१ ॥ तिर्यग्योनिगता
ञ्जतून्सृष्टवान्द्विजसत्तम ॥ अथदेवान्मनुष्यांश्चनागान्विद्याधरांस्तथा ॥ २२ ॥ क्रमात्ससर्जपुत्रांश्चततोदक्षादिकान्मुनीन् ॥ ब्रह्मक्षत्रियविट्छूद्रान
न्यांश्चैवान्त्यजांस्तथा ॥ तेषांचवर्तनादीनिसृष्टवान्सप्रजापतिः ॥ २३ ॥ हिमाद्रिदक्षिणंयद्वैविन्ध्याद्रेरुत्तरंतथा ॥ आहुस्तद्भारतंवर्षंशुभाशुभ
फलप्रदम् ॥ २४ ॥ आसाद्यभारतेवर्षेयेजन्मतुनरोत्तमाः ॥ धर्मकर्माणिकुर्वन्तितेसर्वेकेशवोपमाः ॥ २५ ॥ कर्मभूमौकृतंकर्मशुभंवाशुभ
मेववा ॥ तत्फलंभुञ्जतेलोकाभोगभूमिषुसत्तम ॥ २६ ॥ कर्मभूमिंसमागत्ययोधर्मकर्मसूद्यतः ॥ नचतेनसमःकोऽपित्रिषुलोकेषुविद्यते ॥
॥ २७ ॥ तस्यस्यात्सफलंजन्मजीवितंचसुजीवितम् ॥ श्रीनारायणसेवायांमतिर्यस्यचविद्यते ॥ २८ ॥ जन्मकोट्यर्जितैःपुण्यैःसंसारैकाधि
नायके ॥ नारायणेदेवदेवेभक्तिःस्यात्सुदृढानृणाम् ॥ २९ ॥ समस्तसुखदश्चापिसश्लाघ्योनिर्भयोऽपिच ॥ त्याज्यःसदेशःसहसानतिष्ठेद्यत्र
वैष्णवः ॥ ३० ॥ जन्मान्तरार्जितंपापंस्वल्पंवायदिवाबहु ॥ तत्क्षणात्क्षयमाप्नोतिभगवद्भक्तदर्शनात् ॥ ३१ ॥ वैष्णवाङ्घ्रिजलंयस्तुसमस्त
पातकापहम् ॥ वहेत्स्वशिरसाभक्त्यागङ्गास्नानेनतस्यकिम् ॥ ३२ ॥ मुहूर्तमपियःकुर्यात्सङ्गंभागवतैःसह ॥ समुच्यतेसर्वपापैर्ब्रह्महत्यामुखै
रपि ॥ ३३ ॥ धमकर्माणिविप्रेन्द्रक्रियन्तेयानिकानिच ॥ भगवद्भक्तपुरतस्तानिस्युरक्षयाणिच ॥ ३४ ॥ मुहूर्त्तंवामुहूर्तार्द्धंयत्रतिष्ठन्ति
वैष्णवाः ॥ सत्यंसत्यंपुनःसत्यंतत्तीर्थंतत्तपोवनम् ॥ ३५ ॥ अन्नंवासलिलंवापिफलंवावैष्णवायच ॥ यत्किञ्चिद्दीयतेविप्रतद्दानमक्षयंभवेत् ॥ ३६ ॥
समस्तदेवतारूपोवैष्णवःपरिकीर्तितः ॥ सचेत्सन्तोषितस्तेनतोषिताःसर्वदेवताः ॥ ३७ ॥ संसारेऽस्मिन्महाघोरेनानादुःखसमन्विते ॥ भग
वद्भक्तपुरुषःकदाचिन्नावसीदति ॥ ३८ ॥ तस्मात्त्वमपिविप्रेन्द्रक्रियायोगेनकेशवम् ॥ समाराध्यसदाभक्त्याव्रजविष्णोःपदंपरम् ॥ ३९ ॥
सूतउवाच ॥ तदेतद्वचनंश्रुत्वाकानीनस्यमहात्मनः ॥ शिरस्यञ्जलिमाधायजैमिनिःपर्यपृच्छत ॥ ४० ॥ जमिनिरुवाच ॥ भगवद्भक्त
माहात्म्यंत्वयाप्रोक्तंपुनःपुनः ॥ गुरोर्किलक्षणंतेषांतत्सर्वंब्रूहिसाम्प्रतम् ॥ ४१ ॥ कथंवावैष्णवालोकाज्ञातव्यामुनिसत्तम ॥ आदितोब्रूहितत्सर्वं

CC-0. In Public Domain. Digitization by eGangotri

यदितेमय्यनुग्रहः ॥ ४२ ॥ व्यासउवाच ॥ मधुकैटभयोःपूर्वंहतयोर्वैधसास्वयम् ॥ पृष्टोयदाहभगवांस्तन्निशामयवेद्म्यहम् ॥ ४३ ॥
कल्पान्तेरुद्ररूपेणसंहृत्यसकलंजगत् ॥ स्वयमेकश्चभगवान्सुष्वापयोगमायया ॥ ४४ ॥ सुप्तेतस्मिन्भगवतियोगनिद्राविमोहिते ॥ अभ
वत्पृथिवीसर्वासलिलौघपरिप्लुता ॥ ४५ ॥ अतोब्रह्माजगत्स्रष्टातन्नाभिकमलोपरि ॥ तमादिपुरुषंध्यात्वातस्थौतद्गतमानसः ॥ ४६ ॥
तस्मिन्कालेमहाघोरेविष्णोःकर्णमलाद्द्विज ॥ जातौमहासुरौघोरौमधुकैटभसंज्ञितौ ॥ ४७ ॥ अन्तरिक्षभ्रमन्तौतौदानवावतिदारुणौ ॥ श्रीविष्णो
र्नाभिकमलेब्रह्माणंसमपश्यताम् ॥ ४८ ॥ तंहन्तुमथदैत्यौतौमहाबलपराक्रमौ ॥ उद्यमंचक्रतुर्विप्रक्रोधसंरक्तलोचनौ ॥ ४९ ॥ ततोब्रह्मा
जगत्स्रष्टाविचिन्त्यतद्वधंहृदा ॥ योगनिद्रांभागवतींतुष्टावश्लक्ष्णयागिरा ॥ ५० ॥ तस्यस्तवंसमाकर्ण्यब्रह्मणःपरमेष्ठिनः ॥ उवाचेति
वचःप्रीत्याकिंतेऽभिमतमुच्यताम् ॥ ५१ ॥ ब्रह्मोवाच ॥ अत्युग्रौदानवावेतौहन्तुंमांकृतनिश्चयौ ॥ माययामोहयक्षिप्रंत्रातारमच्युतंत्यज
॥ ५२ ॥ ततोभागवतीनिद्रामहाविष्णुंतमत्यजत् ॥ दानवाभ्यांततस्ताभ्यामन्तरिक्षेकृपामयः ॥ ५३ ॥ युयुधेबाहुयुद्धेनशरणागतवत्सलः ॥
पञ्चवर्षसहस्राणिकृत्वायुद्धंसुदारुणम् ॥ ५४ ॥ विजयंनागमत्कोऽपिनचकोऽपिपराभवम् ॥ अथतौदानवौतत्रमहामायाविमोहितौ ॥ ५५ ॥
वरंवृणिवतिचास्मत्तोऽगदतांकेशवंप्रति ॥ ततःप्रहस्यदेवेशउवाचेतिवचोद्द्विज ॥ ५६ ॥ यदितुष्टौयुवांदैत्यौमद्वध्यौभवतंद्रुतम् ॥ ततस्तौ
दानवौघोरौभगवन्तंजनार्दनम् ॥ ५७ ॥ इत्यूचतुर्महामायौमहामायाविमोहितौ ॥ अयमेववरोदत्तोभवतेनात्रसंशयः ॥ ५८ ॥ मारयावांविना
वारिमहीयत्रजनार्दन ॥ महासुरौततस्तौतुआनीयजघनंप्रति ॥ ५९ ॥ निहतौसहसाविप्रचित्रयाचक्रधारया ॥ चक्रिणानिहतौदृष्ट्वादानवौ
मधुकैटभौ ॥ तुष्टावदेवदेवशंब्रह्माविगतसाध्वसः ॥ ६० ॥ ब्रह्मोवाच ॥ नमोनमस्तेपरमेश्वरायप्रपन्नसर्वार्तिविनाशनाय ॥ नमोनमस्त
त्रिगुणात्मकायनारायणायामितविक्रमाय ॥ ६१ ॥ त्वत्पादपाथोजयुगंप्रपन्नाजनाःक्वचिन्नोविपदंप्रपन्नाः ॥ एतन्मयाज्ञातमनन्तकीर्तेसद्यो
ह्यतेयंमहतीममापत् ॥ ६२ ॥ योगेश्वरोऽसिसदयोऽसिजगत्त्रयेशत्वंदेवदेवशरणागतपालकेश ॥ त्वंनिर्दयोऽरिनिकरस्यविनाशनेषुयद्रक्षितो
ऽहमसुरौनिहतौत्वयैतौ ॥ ६३ ॥ यद्यप्यतीवकठिनौमधुकैटभौतौमन्येतथापिस्वजनाविहचेतसाहम् ॥ यस्मात्स्वजीवनविनाशवरप्रदानैःसन्तो
षितोऽखिलशुभप्रदईश्वरस्त्वम् ॥ ६४ ॥ रम्यंजगत्त्रयमिदंपुरुषस्यतस्यनश्यन्तिसर्वरिपवःस्वकुलैःसमेताः ॥ वृद्धिंव्रजन्तिसुहृदोऽखिलबान्धवा
श्चयंपश्यसित्वममरेशदयाभिरत्र ॥ ६५ ॥ लक्ष्मीमुखाम्बुजमधुव्रतदेवदेवसंसारिलोकभयशोकविनाशकारिन् ॥ त्वच्चारुपादकमलद्वयमाश्रयन्तं ॥२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मांपाहिनाथकृपयासततंनमस्ते ॥ ६६ ॥ प्रसीदपुण्डरीकाक्षप्रसीदकमलेश्वर ॥ प्रसीदसर्वभूतेशाविश्वम्भरनमोऽस्तुते ॥ ६७ ॥ नमस्ते
भक्ततुष्टायनमस्तेभक्तिदायिने ॥ नमस्तेज्ञानरूपायशरणंमेभवानघ ॥ ६८ ॥ नमस्तुभ्यंनमस्तुभ्यंनमस्तुभ्यंनमोनमः ॥ परित्राहिपरित्राहिपरित्राहि
जगन्मय ॥ ६९ ॥ व्यासउवाच ॥ एतैरन्यैरपिस्तोत्रैर्ब्रह्मणालोककारिणा ॥ स्तुतःसदेवोभगवान्परमांप्रीतिमाययौ ॥ ७० ॥ श्रीभगवानुवाच ॥
स्तोत्रेणानेनतेभक्त्यातुष्टोऽस्मिकमलासन ॥ किमस्त्यभिमतंब्रूहितत्तेदास्याम्यहंभुवि ॥ ७१ ॥ ब्रह्मोवाच ॥ यदितुष्टोऽसिदेवेशकरुणाब्धे
जगन्मय ॥ नापदस्तवभक्तानांभवन्त्वितिवरोमम ॥ ७२ ॥ श्रीभगवानुवाच ॥ एवमस्तुसुरश्रेष्ठदत्तोऽयंतेमयावरः ॥ मद्भक्तस्यकदाप्यापन्न
भवेत्क्षितिमण्डले ॥ ७३ ॥ वैष्णवानांशरीरेषुसततंनिवसाम्यहम् ॥ लभन्तेनापदस्तस्मात्कदाचिद्वैष्णवानराः ॥ ७४ ॥ ब्रह्मोवाच ॥ सर्व
मेवजगन्नाथत्वयादत्तंनसंशयः ॥ यदेतौचमहादैत्यौसङ्ग्रामेविनिपातितौ॥७५ ॥कियत्कालंसमासाद्यस्तोत्रेणानेनवैप्रभो ॥ स्तौतित्वांपरयाभक्त्या
तस्यत्राताभविष्यसि ॥७६॥ अहोध्यानैरपिध्यातुंदेवैस्त्वंनहिशक्यसे ॥सत्वंवैष्णवदेहेषुभ्रमसीत्यद्भुतंमहत् ॥७७॥ क्षणमात्रमपिस्वामिंस्त्वयितुष्टेन
किंभवेत् ॥ सत्वंवैष्णवसङ्गेनभ्रमसीत्यद्भुतंमहत् ॥ ७८ ॥ केवैष्णवाःकैटभारेकिंवातेषांचलक्षणम् ॥ कथंज्ञेयास्तुतेसर्वेतन्मेकथयकेशव ॥ ७९ ॥
श्रीभगवानुवाच ॥ वैष्णवानांलक्षणानिकल्पकोटिशतैरपि ॥ सम्यग्वक्तुंनशक्तोऽस्मिसंक्षेपाच्छृणुसत्तम ॥ ८० ॥ संसारोवैष्णवाधीनोदेवावैष्णव
पालिताः ॥ अहंचवैष्णवाधीनस्तस्माच्छ्रेष्ठाश्चवैष्णवाः ॥८१॥ क्षणमात्रमपिब्रह्मन्विहायवैष्णवंजनम् ॥ तिष्ठामिनाहमन्यत्रवैष्णवाममबान्धवाः॥
॥ ८२ ॥ कामक्रोधविहीनायेहिंसादम्भविवर्जिताः ॥ लोभमोहविहीनाश्चज्ञेयास्तेवैष्णवाजनाः ॥ ८३ ॥ अमत्सरादयायुक्ताःसर्वभूताहितैषिणः ॥
सत्योक्तिभाषिणश्चैवविज्ञेयास्तेचवैष्णवाः ॥८४॥ धर्मोपदेशिनश्चैवधर्माचारपरास्तथा ॥ गुरुशुश्रूषिणश्चैवविज्ञेयास्तेचवैष्णवाः ॥ ८५ ॥ समानं
येचपश्यन्तित्वांचमांचमहेश्वरम् ॥ कुर्वन्तिपूजामतिथेर्ज्ञेयास्तेवैष्णवाजनाः ॥ ८६ ॥ वेदविद्यानिरुक्तायेविप्रभक्तिरताःसदा ॥ नपुंसकाःपरस्त्रीषु
ज्ञेयास्तेवैष्णवाजनाः ॥ ८७ ॥ एकादशीव्रतंयेचभक्तिभावेनकुर्वते ॥ गायन्तिममनामानिज्ञेयास्तेवैष्णवाजनाः ॥ ८८ ॥ देवायतनकर्तारस्तुलसी
माल्यधारकाः ॥ पद्माक्षधारिणोयेचज्ञेयास्तेवैष्णवाजनाः ॥८९॥ शङ्खचक्रगदापद्मैरङ्कितानिममायुधैः ॥ ब्रह्मन्येषांशरीराणिज्ञेयास्तेवैष्णवाजनाः॥
॥ ९० ॥ धात्रीफलस्रजोयेषांगलेषुकमलासन ॥ मांपूजयन्तितत्पत्रैर्ज्ञेयास्तेवैष्णवाजनाः ॥ ९१ ॥ तुलसीमूलमृद्भिश्चतिलकानिनयन्तिये ॥
तुलसीकाष्ठपङ्कैश्चज्ञेयास्तेवैष्णवाजनाः ॥९२॥गङ्गास्नानरतायेचगङ्गानामपरायणाः॥गङ्गामाहात्म्यवक्तारोज्ञेयास्तेवैष्णवाजनाः ॥९३॥ शालग्राम

CC-0. In Public Domain. Digitization by eGangotri

शिलायषांगृहेवसतिसर्वदा ॥ शास्त्रंभागवतंचैवज्ञेयास्तेवैष्णवाजनाः ॥९४ ॥ संमार्जयन्तियेनित्यंममस्थानानिसत्तम ॥ दीपंयच्छन्तितत्रैवज्ञेयास्ते
वैष्णवाजनाः ॥९५॥ शीर्णंमन्मन्दिरंयेचकुर्वन्तिनूतनंपुनः ॥तत्रायतनशोभांचज्ञेयास्तेवैष्णवाजनाः ॥९६॥अभयंयेचयच्छन्तिभीरुभ्यश्चतुरानन॥
विद्यादानंचविप्रेभ्योज्ञेयास्तेवैष्णवाजनाः ॥ ९७ ॥ मत्पादसलिलैर्येषांसिक्तानिमस्तकानिच ॥ ममनैवेद्यमश्नन्तिज्ञेयास्तेवैष्णवाजनाः ॥ ९८ ॥
क्षुत्तृट्प्रपीडितेभ्यश्चयेयच्छन्त्यन्नमम्बुच ॥ कुर्युर्येयोगशुश्रूषांज्ञेयास्तेवैष्णवाजनाः ॥ ९९ ॥ आरामकारिणोयेचपिप्पलारोहिणोऽपिच ॥
गोसेवांयेचकुर्वन्तिज्ञेयास्तेवैष्णवाजनाः ॥ १०० ॥ अत्यन्तभक्तायेब्रह्मन्पितृयज्ञंप्रकुर्वते ॥ कुर्वन्तिदीनशुश्रूषांज्ञेयास्तेवैष्णवाजनाः ॥ १ ॥
तडागग्रामकर्तारःकन्यादानरताश्चये ॥ सेवन्तेपितरौयेचज्ञेयास्तेवैष्णवाजनाः ॥ २ ॥ सेवन्तेज्येष्ठभगिनींज्येष्ठभ्रातरमेवच ॥ परनिन्दांनकुर्वन्ति
ज्ञेयास्तेवैष्णवाजनाः ॥ ३ ॥ वैष्णवेषुगुणाःसर्वेदोषलेशोनविद्यते ॥ तस्माच्चतुर्मुखत्वंचवैष्णवोभवसाम्प्रतम् ॥ ४ ॥ समाराधयमांनित्यंक्रिया
योगैःप्रजापते ॥ सर्वमेवाशुभद्रंतभविष्यतिनसंशयः ॥ ५ ॥ देवस्वंब्राह्मणद्रव्यंपरस्वंचचतुर्मुख ॥ पश्यन्तिविषवद्येचज्ञेयास्तेवैष्णवाजनाः ॥ ६ ॥
बहुनात्रकिमुक्तेनभाषितेनपुनःपुनः ॥ ममार्चांयेचकुर्वन्तिविज्ञेयास्तेचवैष्णवाः ॥ ७ ॥ भूयःपूर्वस्थितमिवसृज्यतांसकलंजगत् ॥ इत्युक्त्वान्तर्दधे
देवस्तत्रैवपरमेश्वरः ॥ ८ ॥ ततस्तुपूर्ववद्ब्रह्मासृष्टवान्सकलंजगत् ॥ क्रियायोगैर्हरिंचेष्ट्वाजगामपरमंपदम् ॥ ९ ॥ येपठन्तीममध्यायंभक्त्यानारा
यणाग्रतः ॥ सर्वपापविनिर्मुक्ताअन्तेयान्तिहरेर्गृहम् ॥ ११० ॥ इतिश्रीपाद्मेमहापुराणेक्रियायोगसारेद्वितीयोऽध्यायः ॥ २ ॥ जैमिनिरुवाच ॥
क्रियायोगस्यतत्त्वंमेब्रूहिव्यासमहामते ॥ क्रियायोगमहंज्ञातुमिच्छामिभवतोमुखात् ॥ १ ॥ व्यासउवाच ॥ शरीरंमानुषंविप्रदुर्लभंचात्रभूतले ॥
धीरःशरीरमासाद्यमोक्षार्थंयोगमभ्यसेत् ॥ २ ॥ क्रियायोगध्यानयोगावुभौयोगौप्रकीर्त्तितौ ॥ तयोराद्यःक्रियायोगःकुर्वतांसर्वकामदः ॥ ३ ॥ गङ्गा
श्रीविष्णुपूजाचदानानिद्विजसत्तम ॥ ब्राह्मणानांतथाभक्तिर्भक्तिरेकादशीव्रते ॥ ४ ॥ धात्रीतुलस्योर्भक्तिश्चतथाचातिथिपूजनम् ॥ क्रियायोगाङ्गभूता
निप्रोक्तानीतिसमासतः ॥ ५ ॥ क्रियायोगादृतेविप्रध्यानयोगान्नसिद्ध्यति ॥ क्रियायोगरतोयातितद्विष्णोःपरमंपदम् ॥ ६ ॥ जैमिनिरुवाच ॥
क्रियायोगाङ्गभूतानियानिप्रोक्तानिभोःप्रभो ॥ तन्माहात्म्यानिकथययदिभोमय्यनुग्रहः ॥७॥ गङ्गायाःकेगुणाब्रह्मन्विष्णुपूजाफलंचकिम् ॥ श्रेष्ठानि
कानिदानानिकावाभक्तिर्द्विजन्मनाम् ॥ ८ ॥ एकादश्याःफलंकिंवाधात्रीभक्तिश्चकीदृशी ॥ तुलस्याःकीदृशीभक्तिःकिंवाचातिथिपूजनम् ॥ ९ ॥
एतत्सर्वंमुनेब्रूहिश्रोतुमस्तिममादरः ॥ त्वत्तोऽन्यःकथितुंकोऽपिनशक्नोतिजगत्त्रये ॥ १० ॥ व्यासउवाच ॥ साधुसाधुद्विजश्रेष्ठमनस्तेविमलंध्रुवम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यतोगुह्यकथामेतांश्रोतुंश्रद्धाचकौतुकम् ॥ ११ ॥ भागीरथ्यागुणंसम्यक्कथितुंनहिशक्यते ॥ तस्मात्समासतोवक्ष्येश्रूयतामेकचेतसा ॥ १२ ॥
गङ्गेत्यक्षरयुग्मंचजपत्यत्यन्तकोमलम् ॥ मन्येत्रजेत्तथाप्येनोमहन्नास्त्यत्रसंशयः ॥ १३ ॥ सर्वत्रसुलभागङ्गात्रिषुस्थानेषुदुर्लभा ॥ गङ्गाद्वारे
प्रयागेचगङ्गासागरसङ्गमे ॥ १४ ॥ सवासवाःसुराःसर्वेगङ्गाद्वारंमनोरमम् ॥ समागत्यप्रकुर्वन्तिस्नानदानादिकंमुने ॥ १५ ॥ दैवयोगान्मुनेतत्रये
त्यजन्तिकलेवरम् ॥ मनुष्यपशुकीटाद्यालभन्तेपरमंपदम् ॥ १६ ॥ अत्रेतिहासंविप्रर्षेकथ्यमानंमयाशृणु ॥ सम्यक्छ्रवणमात्रेणसर्वपापैःप्रमुच्यते ॥
॥ १७ ॥ मनोभद्रोनामराजासोमवंशसमुद्भवः ॥ पूर्वमासीज्जगत्यस्मिन्बलवान्सर्वधर्मवित् ॥ १८ ॥ तस्यहेमप्रभानाममहिषीप्रियवादिनी ॥
पतिव्रतामहाभागासर्वलक्षणसंयुता ॥ १९ ॥ सराजासमरेहत्वासकलानेवशात्रवान् ॥ शशासपृथिवींकृत्स्नांसाब्धिद्वीपांमहाबलः ॥ २० ॥ स
एकदामहीपालःसमाहूयस्वमन्त्रिणः ॥ उवाचेदंवचःप्रीत्यासभामध्येमहायशाः ॥२१॥ मनोभद्रउवाच॥ अमात्याःपृथिवीसर्वामयेयंपरिपालिता॥
निहतारिपवःसर्वेसपुत्रबलवाहनाः ॥ २२ ॥ पालितानिस्वगोत्राणिदानैर्विप्राश्चतोषिताः ॥ शिष्टाश्चत्रिदशाःसर्वेसपुत्रबलवाहनाः ॥ २३ ॥ पालि
तानिस्वगोत्राणियज्ञैःसर्वैःसदक्षिणैः॥इदानींजरयासर्वंमहत्यामेबलंहृतम् ॥ २४ ॥ कर्माणिकानिचित्कर्तुंनहिशक्नोमिदुर्बलः ॥ सामर्थ्यहीनेपुरुषे
राजश्रीर्नहिशोभते ॥ २५ ॥ सर्वाभरणसंयुक्ताजराजीर्णेवकामिनी ॥ तावद्भिभ्यतिसर्वेऽपिशत्रवःपृथिवीतले ॥ २६ ॥ यावद्विगतसामर्थ्यंनेच्छन्ति
चारुचक्षुषा ॥ समस्तगुणसम्पन्नमपितद्गतमानसम् ॥ २७ ॥ पृथ्वीत्यजेन्नृपंवृद्धंस्वैरिणीपालितायथा ॥ भक्तिलभ्यागुणाःसर्वेगुणलभ्यंमहद्यशः ॥
॥ २८ ॥ निःश्रेयसंदानलभ्यंबललभ्यातुमेदिनी ॥ सामर्थ्यहीनःकृपणोनिश्चितोरिपुशासने ॥ २९ ॥ मूर्खमात्रवचोग्राहीसनृपःशत्रुनन्दनः ॥ ततो
ऽहंसकलंराज्यंविभज्यवरमन्त्रिणः ॥ दातुमिच्छामिपुत्राभ्यांयुष्माभिर्यदिमन्यते ॥३०॥ मन्त्रिणऊचुः ॥ यदेतद्वचनंप्रोक्तंत्वयानीतिविदानृप ॥ तदे
वमतमस्माकंसन्देहोनात्रविद्यते ॥३१॥ अथायातौनपादेशात्संसदंप्रतिसत्तमौ॥वीरभद्रयशोभद्रनामानौतनयावुभौ ॥३२॥ तौचसर्वगुणोपेतौकुमारौ
प्रियवादिनौ ॥ पितृभक्तौसदाशान्तौबलिनौधर्मतत्परौ ॥ ३३ ॥ ततःसभूपःसहसाराजनीतिविदांवरः ॥ विभज्यसकलंराज्यंददौताभ्यां
कुतूहलात् ॥ ३४ ॥ अत्रान्तरेगृध्रएकःस्वकीयस्त्रीसमन्वितः ॥ आगत्यतत्सभामध्येउपविष्टोद्विजोत्तमाः ॥ ३५ ॥ तावागतौसमालोक्यपक्षिणा
वतिहर्षितौ ॥ राजाहयुवयोःकस्माच्छुभागमनमुच्यताम् ॥३६॥ गृध्रउवाच ॥ गृध्रोऽहंपृथिवीपालममेयंस्त्रीपरन्तप ॥ आगतोऽस्मिमुदाद्रष्टुंसम्पदं
पुत्रयोस्तव ॥ ३७ ॥ एतयोर्महतीदृष्टाविपत्तिःपूर्वजन्मनि ॥ इहजन्मनिसम्पत्तिंद्रष्टुमावांसमागतौ ॥ ३८ ॥ तस्यैतद्वचनंश्रुत्वागृध्रस्यपरमाद्भुतम् ॥

CC-0. In Public Domain. Digitization by eGangotri

राजोवाचपुनर्विप्रविस्मयाविष्टमानसः ॥३९॥ राजोवाच ॥ अत्यद्भुतंवचोगृध्रत्वत्तःश्रुतमिदंमया ॥ एतयोःपूर्ववृत्तान्तोभवताज्ञायतेकथम् ॥४०॥
यदिजानासितत्त्वेनपूर्ववृत्तान्तमेतयोः ॥ ब्रूहितर्हिखगश्रेष्ठसर्वमेतदशेषतः ॥४१॥ गृध्रउवाच ॥ नृपतेविषलावेतौयुगेद्वापरसंज्ञके ॥ गरसङ्गरनामानौ
सत्यवोपसुतौस्थितौ ॥ ४२ ॥ एककालेचभूपालमृतौनिजगृहान्तरे ॥ ततोनेतुमिमौभूपदंष्ट्रिणोयमकिङ्कराः ॥ ४३ ॥ पाशहस्ताःसमायाताः
कोटिकोटिसहस्रशः ॥ बबन्धुश्चर्मपाशेनद्वावेतौतुमदोद्धतौ ॥४४॥ निन्युश्चनिलयंमृत्योरतिदुर्गमवर्त्मना ॥ इमौदृष्ट्वाधर्मराजश्चित्रगुप्तमुवाचह॥४५॥
एतयोःसकलंवृत्तंचित्रगुप्तविचार्यताम् ॥४६॥ गृध्रउवाच ॥ तस्याज्ञयाचित्रगुप्तःसर्वंकर्मशुभाशुभम् ॥ मूलाद्विचारयामासततइत्याहचान्तकम्॥४७॥
॥ चित्रगुप्तउवाच ॥ सत्यमेतौमहाबाहोपुण्यव्रतमहाशयौ ॥ अस्तिचेद्दुष्कृतंकिञ्चित्सर्वंकर्मविलोकितम् ॥ ४८ ॥ स्वयंदानंसमुत्सृज्यनहिदत्तंद्विजा
तये ॥ तेनैवकर्मणाराजन्निमौनरकगामिनौ ॥ ४९ ॥ दातादानंसमुत्सृज्ययोनदद्याद्द्विजातये ॥ सयातिनरकंघोरंसर्वभूतभयावहम् ॥ ५० ॥
दाताहिनस्मरेद्दानंप्रतिग्राहीनयाचते ॥ उभयोर्नरकेवासोयावच्चन्द्रदिवाकरौ ॥ ५१ ॥ तस्मादिमौमहापापौब्रह्मस्वाहारिणौप्रभो ॥ नयन्तुकिङ्कराः
शीघ्रंनरकंप्रतिदारुणम् ॥ ५२ ॥ यमाज्ञयाततोदूताःसन्दष्टौष्ठपुटाःक्रुधा ॥ चिक्षिपुर्नरकेघोरेतावेतौपृथिवीपते ॥५३॥ तस्मिन्नेवदिनेराजन्ननयाभा
र्ययासह ॥ यमदूतैःसमागत्यनीतोऽहंयममन्दिरम् ॥५४॥ मयापियत्कृतंकर्मतदाकर्णयभूपते ॥ मूलात्सर्वंप्रवक्ष्यामिशृण्वतांविस्मयप्रदम् ॥५५॥
पुरासंसर्वगोनामब्राह्मणोऽहंमहाकुलः॥ सौराष्ट्रदेशवासीचवेदवेदाङ्गपारगः॥५६॥ इयंमञ्जूकषानाममममपत्नीयशस्विनी ॥ पतिव्रतामहाभागापवित्र
कुलसम्भवा ॥ ५७ ॥ प्रमत्तोऽहंमहाभागविद्ययावयसाधनैः ॥ अवज्ञांमनसापित्रोश्चकाराहंयुवैकदा ॥ ५८ ॥ अहंभूरिसभाश्लाघ्योवनस्थःसर्व
कर्मकृत् ॥ धनवान्सुन्दरोज्ञनीज्ञातिपोषणतत्परः ॥ ५९ ॥ ममैवपुंसःपितरौतौचपापपरायणौ ॥ मुखरौदययाहीनौपाखण्डिसङ्गलोलुपौ ॥ ६० ॥
पौरुषंजीवनंचैवधनंचैवकुलंतथा ॥ विद्याकीर्तिश्चसर्वस्वंपितृभ्यांविफलीकृतम् ॥ ६१ ॥ एतद्विचिन्त्यमनसामयानृपमुहुर्मुहुः ॥ अवज्ञयापरित्यक्ता
पित्रोःसेवाशुभप्रदा ॥६२॥ अनेनकर्मणाराजन्सदारोऽहंयमाज्ञया ॥ विक्षिप्तोनरकेदूतैर्यत्रतौपापिनांवरौ ॥६३॥ एताभ्यांसहपापाभ्यांसदारेणमया
नृप ॥ स्थितंचनरकेघोरेयावत्कालंशृणुष्वतत् ॥ ६४ ॥ युगकोटिसहस्राणियुगकोटिशतानिच ॥ अनुभूतंमहादुःखंनरकस्यनृपोत्तम ॥ ६५ ॥ नर
कान्तेततःसोऽहंकान्ताचममभूपते ॥ गृध्रपक्षिकुलेजातौमृतमांसाशनौतथा ॥ ६६ ॥ एतावपिचतौराजन्नरकान्तगतैषिणौ ॥ जातौशलभयोर्वंशेफलं
भोक्तुंस्वकर्मणः ॥६७॥ यदेताभ्यांकृतंकर्मराजञ्छलभजन्मनि ॥ तदाकर्णयवक्ष्यामिश्रोतृणांविस्मयप्रदम् ॥ ६८ ॥ एकादासुमहान्वायुःसमायातो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महीपते ॥ उड्डीयपातितौतेनगङ्गागर्भेसुनिर्मले ॥ ६९ ॥ निपत्यगङ्गासलिलेकोमलाङ्गाविमौतथा ॥ जग्मतुःपञ्चतांसद्यःसमस्तकलुषापहम्॥७०॥
ततोनेतुमिमौदूताआयाताश्चारुचक्षुषः ॥ आयातानिविमानानिसर्वभोगान्वितानिच॥७१॥विमुक्तौसर्वपापेभ्यस्तुलसीमाल्यशोभितौ ॥ दिव्यंविमा
नमारुह्यगतौविष्णुपुरंप्रति ॥ ७२ ॥ तावत्कालंस्थितौराजन्ब्रह्मणोऽव्यक्तजन्मनः ॥ ब्रह्माज्ञयासमायातौततइन्द्रपुरंप्रति ॥ ७३ ॥ भुक्तवन्तौ
सुखंतत्रदुर्लभंयत्सुरैरपि ॥ तावत्कालंस्थितौराजन्भोक्तुंकृच्छ्रांवसुन्धराम् ॥ ७४ ॥ पवित्रेभवतोवंशेजातावेतौमहाशयौ ॥ गङ्गायांत्यजतोदेहं
भूयोजन्मनविद्यते ॥७५॥ तथापिवसुधांभोक्तुंजातौपुण्यतमाविमौ ॥ चिरंभुक्त्वामहींकृत्स्नांपुत्रपौत्रसमन्वितौ ॥७६॥गङ्गामरणमासाद्ययोगिनामपि
दुर्लभम् ॥ नारायणस्यसायुज्यमिमौभूपगमिष्यतः ॥ ७७ ॥ एतत्सर्वंमयाप्रोक्तंपूर्ववृत्तान्तमेतयोः ॥ जातिस्मरप्रभावेणनृपवर्गशिरोमणी ॥
॥ ७८ ॥ गङ्गामरणमासाद्यगतावेतौदशामिमाम् ॥ आवयोःकःपरित्राणंकरिष्यतिदुरात्मनोः ॥ ७९ ॥ मित्रावज्ञामनुष्याणांनरकक्लेश
दायिनी ॥ ममैवपृथिवीपालदृष्टाकेवलमेवतत् ॥ ८० ॥ पितृभक्तिर्द्विजश्रेष्ठइहामुत्रचदुःखदा ॥ इहसम्पद्विनाशायपरत्रनरकायच ॥ ८१ ॥ वरं
मन्येमहीपालब्रह्महत्यादिपातकम् ॥ कदाचिन्निष्कृतिस्तस्मादियंभवतिशाश्वती ॥ ८२ ॥ दुःखार्जितंपुण्यवृक्षंसर्वक्लेशविनाशनम् ॥ पित्रवज्ञाकुठा
रेणच्छिन्दन्तिभुविमानवाः ॥ ८३ ॥ यत्किञ्चिद्दीयतेराजन्पित्र्येवक्रेपरन्तप ॥ तदश्नातिस्वयंविष्णुःपितृरूपोहरिर्यतः ॥८४॥ प्रत्यक्षदेवौपितरौसे
वन्तेयेत्वहर्निशम् ॥ सर्वसिद्धिर्भवेत्तेषांप्रसादाज्जगतीपतेः ॥८५॥ पितृभक्तिविहीनायेदिनंतिष्ठन्तिमानवाः ॥ तावत्कल्पसहस्रंतुतिष्ठन्तिनरकेजनाः
॥८६॥तस्मादिदंमहादुःखंबभूवममसाम्प्रतम्॥मोक्षंकदागमिष्यामिसदारोऽहंनवेद्मितत्॥८७॥व्यासउवाच ॥ एतत्तस्यवचःश्रुत्वाप्रगृह्यद्विजसत्तम ॥
बभूवहर्षितोराजाविस्मितश्चपुनःपुनः ॥ ८८ ॥ राजोवाच ॥ आश्चर्यंहिवचोगृध्रश्रुतमेतन्मुखात्तव ॥ ममचैषांचहृदयेप्रतीतिर्नहिजायते ॥ ८९ ॥
अथान्तरिक्षेवागुच्चैरितिजातानृपोत्तम ॥ सत्यंसत्यंसत्यमिदंसन्देहोनात्रविद्यते ॥ ९० ॥ ततःसपक्षीविप्रर्षेसहसाभार्ययासह ॥ गङ्गामाहात्म्य
कथनात्पूर्वस्थितइवाभवत् ॥ ९१ ॥ दिविदुन्दुभयोनेदुर्जगुर्गन्धर्वसत्तमाः ॥ ननृतुश्चाप्सरोवर्गाह्यपतत्पुष्पवर्षणम् ॥ ९२ ॥ विमानमागतंदिव्यंसर्व
भोगसमन्वितम् ॥ समायातादूतगणाःप्रेषिताःकैटभद्विषा ॥ ९३ ॥ अथासौसर्वगोविप्रप्रिययासहभार्यया ॥ सद्योविमानमारुह्यजगामभवनं
हरेः ॥ ९४ ॥ एतच्छुत्वाद्भुतंकर्मसराजाद्विजसत्तम ॥ सपुत्रदारःसेवायांगङ्गायास्तत्परोऽभवत् ॥ ९५ ॥ भागीरथ्यासमंतीर्थंनास्तिवैभुवन
त्रये ॥ यन्नामोच्चरणादेवसर्वगोमोक्षमाप्तवान् ॥ ९६ ॥ गङ्गाद्वारस्यमाहात्म्यंकथितंतेद्विजोत्तम ॥ समस्तपापविध्वंसिकिमन्यच्छ्रोतुमिच्छसि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ९७ ॥ अध्यायमेतत्परमादरेणपठन्तियेदेवगृहेमनुष्याः ॥ शृण्वन्तियेचद्विजवर्गभक्तानश्यन्तितेषांदुरितानिसद्यः ॥ ९८ ॥ इतिश्रीपाद्मे
महापुराणेक्रियायोगसारेतृतीयोऽध्यायः ॥ ३ ॥ जैमिनिरुवाच ॥ गङ्गाद्वारस्यमाहात्म्यंत्वत्प्रसादाच्छ्रुतंमया ॥ प्रयागस्यचमाहात्म्यमिदानीं
श्रोतुमिष्यते ॥ १ ॥ गङ्गाब्धिसङ्गमस्यापिमाहात्म्यंकथ्यतांमुने ॥ नसम्यक्कथितुंकोऽपिशक्नोतित्वदृतेक्षितौ ॥ २ ॥ व्यासउवाच ॥
प्रयागस्यफलंवत्सगङ्गाब्धिसङ्गमस्यच ॥ सम्यग्वक्तुंनशक्नोमिसंक्षेपाच्छ्रूयतांद्विज ॥ ३ ॥ कोटिब्रह्माण्डमध्येषुयानितीर्थानिवैमुने ॥ प्रयान्ति
तानिसर्वाणिप्रयागप्रतिमांतुकिम् ॥ ४ ॥ गङ्गायायमुनायाश्चसरस्वत्याश्चसङ्गमम् ॥ प्रशंसन्तिसुराःसर्वेब्रह्मविष्णुशिवादयः ॥ ५ ॥ मकरस्थे
रवौमाघेस्नानंयेतत्रकुर्वते ॥ तेषामागमनंनास्तिविष्णुलोकात्कदाचन ॥ ६ ॥ गवांकोटिसहस्राणिवाजिमेधमुखाध्वराः ॥ मेरुतुल्यसुवर्णानि
दानान्यन्यानिचद्विज ॥ ७ ॥ कुरुक्षेत्रेपुष्करेचप्रभासेचगयासुच ॥ हुत्वादत्त्वाचविप्रेभ्योयत्फलंप्राप्यतेबुधैः ॥ ८ ॥ माघेस्नात्वाप्रयागेतु
तस्मात्कोटिगुणंभवेत् ॥ तस्मात्समस्ततीर्थानांप्रयागःपरमःस्मृतः ॥ ९ ॥ सिंहराशिस्थितेसूर्येगोदावर्यांद्विजोत्तम ॥ चिरमुग्रंतपस्तप्त्वास्नान
दानव्रतादिभिः ॥ १० ॥ वेदागमपुराणोक्तंयत्पुण्यमक्षयंभवेत् ॥ माघेस्नात्वाप्रयागेतुतत्पुण्यंनात्रसंशयः ॥ ११ ॥ फाल्गुनेकृष्णपक्षेतुचतुर्दश्या
मुपोषितः ॥ काश्यांयत्फलमाप्नोतितन्मेनिगदतःशृणु ॥ १२ ॥ कोटिजन्मार्जितैःपापैर्विमुक्तःसर्वरूपधृत् ॥ उद्धृत्यकोटिपुरुषाञ्छिवेनसहमो
दते ॥ १३ ॥ माघेमासेप्रयागेतुस्नात्वासकृदपिद्विजः ॥ कल्पकोटिशतंविष्णुंसम्पूज्यान्यत्रयत्फलम् ॥ १४ ॥ एकाहमपिसम्पूज्यमकरस्थे
दिवाकरे ॥ सत्यंसत्यमहंवच्मिसर्वमेवाक्षयंभवेत् ॥ १५ ॥ यावद्दिनंमाघमासेतत्रतिष्ठतिमानवः ॥ तावत्कल्पशतंविप्रमोदतेविष्णुनासह॥
॥ १६ ॥ गङ्गायमुनयोस्तोयेस्नानंयेनकृतंसकृत् ॥ सद्यस्तद्दर्शनात्पापैर्मुच्यतेसर्वपातकैः ॥ १७ ॥ ततुंयदीच्छन्तिजनाःसंसाराब्धिसुदु
स्तरम् ॥ गङ्गायमुनयोःस्नात्वाभक्त्यापश्यन्तुमाधवम् ॥ १८ ॥ त्यजन्तिमानवास्तत्रयदिच्छन्तःकलेवरम् ॥ सद्योलभन्तेविप्रर्षेतत्तदेवन
संशयः ॥ १९ ॥ इतिहासमिहैवाहंकथयामिनिशामय ॥ यच्छ्रुत्वासर्वपापेभ्योमुक्तोभवतिमानवः ॥ २० ॥ प्रणिधिर्नामतत्रासीद्वैश्यएको
महाधनी ॥ विप्रभक्त्येकनिरतोदेवतातिथिपूजकः ॥२१ ॥ तस्यपद्मावतीनामधर्मपत्नीपतिव्रता ॥ चार्वङ्गीशीलयुक्ताचकुलजाप्रियवादिनी ॥२२॥
स्त्रीणांयोग्यागुणायेयेसृष्टाःश्रीपरमेष्ठिना ॥ तच्छरीरेगुणास्तेतेनिवसन्तिद्विजोत्तम ॥ २३ ॥ अथासौप्रणिधिर्वैश्यःसमादायधनंबहु ॥ वाणिज्यार्थं
गतोविप्रशुभेलग्नेशुभेतिथौ ॥२४ ॥ धनाद्धर्मःप्रभवतिधनाच्चविपुलंयशः ॥ धनात्कुलमवाप्नोतिभवेत्किंवाधनादृते ॥ २५ ॥ धनहीनंजनंदृष्ट्वासखा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पिवापलायते ॥ मेघःशरद्यम्बुहीनःखण्डंखण्डंनयेन्महत् ॥२६॥ खादितुंप्राप्यतेयावत्तावदेवहिबान्धवाः ॥ धनंयस्यकुलंतस्यबुद्धिस्तस्यसपण्डितः ॥
॥ २७ ॥ अर्थैर्विहीनःपुरुषोजीवन्नपिमृतोपमः ॥ धर्मार्थविद्यार्जनतोमतिर्यस्यनिवर्तते ॥ २८॥ ज्ञेयःसमूर्खःसुतरामधिकस्याधिकंफलम् ॥ कर्त्तव्यः
सततंधर्मश्चार्जितव्यंसदाधनम् ॥२९ ॥ शिक्षितव्यासदाविद्यापुम्भिरेवंविचक्षणैः ॥ दानाद्धनंचविद्याचवर्धतेप्रतिवासरम् ॥ ३०॥ धर्मस्तुवर्धतेदाना
न्नधनेनविनानृणाम् ॥ काष्ठंतृणंतुषंवापिसम्प्राप्यनपरित्यजेत् ॥ ३१ ॥ पुमान्सञ्चयशीलोहिकदाचिन्नावसीदति ॥ ततोऽसौप्रणिधिर्वैश्यो
नियोज्यस्त्रियमालये ॥ ३२ ॥ गृहव्यापारनिष्णातोवाणिज्येनजगामह ॥ अथैकदातस्यपत्नीगृहीत्वोद्वर्तनादिकम् ॥ ३३ ॥ सखीभिःसहविप्रर्षे
जगामस्नानहेतवे ॥ ततोधनुर्ध्वजोनामस्वयंचपातकाश्रयः ॥ ३४ ॥ निजेच्छयाप्रकुर्वन्तींस्नानकर्मददर्शताम् ॥ विकसत्स्वर्णपुष्पाब्ज्यांप्रफुल्लकम
लाननाम् ॥ ३५ ॥ मृगशावदृशंचारुपीनोन्नतपयोधराम् ॥ तांवैश्यपत्नीमालोक्यश्वपचोऽसौस्मरातुरः ॥ ३६ ॥ उवाचप्रहसन्वाणींनिजमूर्ति
मचिन्तयन् ॥ ३७ ॥ धनुर्ध्वजउवाच ॥ कासिकल्याणिसुश्रोणिचारुहासिनिसुन्दरि ॥ मनोहरसिमेकस्मात्सुयौवनरसैःप्रिये ॥ ३८ ॥
विशालजघनेतन्विमयागुणवतासह ॥ गुणवत्यात्वयासर्वंसुखमत्यनुभूयताम् ॥ ३९ ॥ धनुर्ध्वजवचःश्रुत्वातस्याःसख्यस्ततोद्विज ॥ ऊचुर्वाक्यं
तथाक्रुद्धाःसन्दष्टदशनच्छदाः ॥४०॥ सख्यऊचुः ॥ अरेमूढदुराचारदुराचारकुलोद्भव ॥ पादनिष्प्रेक्षणमपिनैतस्यास्तेप्रदीयते ॥४१॥ इयंपतिव्रता
नारीधर्मकर्मपरायणा ॥ आत्मनःसुखमिच्छद्भिःपापदृष्ट्यानदृश्यते ॥ ४२ ॥ परस्त्रीमुखसौन्दर्यंपरद्रव्यंचसर्वदा ॥ दृष्ट्वाकामाग्निसङ्क्लिन्नादह्यन्तेमूढ
मानसाः ॥ ४३ ॥ याहिपापमतेदूरंमावदोक्तिंसुदुःसहाम् ॥ वयमेवभवन्तंनस्पृशामश्चरणैरपि ॥ ४४ ॥ धनुर्ध्वजउवाच ॥ धिगस्त्वमुंजाति
शब्दंसम्पन्नोऽप्यखिलैर्गुणैः ॥ सम्भावितोनयुष्माभिःश्वपचत्वेयतोऽधुना ॥ ४५ ॥ सौवर्णंमदिरापूर्णाभ्यन्तरंकलशंस्थितम् ॥ सम्प्राप्यकोन
गृह्णातितद्गुणग्रामवित्पुमान् ॥ ४६ ॥ अतोऽहंयुवतीमेनांयथाप्राप्नोमिसाम्प्रतम् ॥ तथाकुरुतहेसख्यःशरणंभोगतोऽस्मियत् ॥ ४७ ॥ इतिब्रुवन्तं
तंमूढंभूयोभूयोद्विजोत्तम ॥ ऊचुर्वाक्यमिदंतास्तुजातात्यन्तकुतूहलाः ॥ ४८ ॥ सख्यऊचुः ॥ यद्येतांरमणींनूनमिच्छसित्वंसुदुर्मते ॥ गङ्गायमु
नयोःशीघ्रंशरीरंसङ्गमेत्यज ॥ ४९ ॥ मिथःकृतमुखालोकाहसन्त्यस्तास्ततोद्विज ॥ तांसाधुपत्नीमादाययुर्निजगृहान्तरम् ॥५०॥ ततोऽसौश्वपचो
मोहाद्ब्रह्महत्यासहस्रकृत् ॥ गङ्गायमुनयोस्तोयेतामिच्छन्पञ्चतांगतः ॥ ५१ ॥ तत्स्वामिसदृशाकारःसमस्तगुणवान्बली ॥ सएवचश्वपाको
ऽसौस्त्ववृत्तान्तंस्मरन्नभूत् ॥ ५२ ॥ ततोऽसौप्रणिधिर्वैश्यस्तस्मिन्नेवदिनेशुभे ॥ कृत्वावाणिज्यमायातःस्वकीयंनिलयंप्रति ॥ ५३ ॥ श्वपाको

Nepal Sanskrit University/ Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽपिततोविप्रस्तस्यावासंविवेशह ॥ प्रणिधेःसदृशोरूपैर्वयोभिश्चगुणैरपि ॥ ५४ ॥ एकाकारौसमालोक्यपुरःस्थौतौगुणाकरौ ॥ कस्याहंदयि
ताकोवाममभर्त्तेत्यचिन्तयत् ॥ ५५ ॥ ततःसाविस्मितासाध्वीविलोक्यतत्पतिद्वयम् ॥ तुष्टावमाधवंदेवंवचनैःकोमलाक्षरैः ॥ ५६ ॥ पद्मा
वत्युवाच ॥ नमामिगोविन्दमनन्तमूर्तिंशक्रादिदेवार्चितपादपद्मम् ॥ योगेश्वरंयोगविदांशरण्यंयोगप्रदंयोगिभिरर्चनीयम् ॥५७ ॥ नमोऽस्तुतेकैटभ
मर्दनायनमोमधुध्वंसकरायतुभ्यम् ॥ नमोऽस्तुकंसासुरनाशनायनमोऽस्तुचाणूरनिपातनाय ॥ ५८ ॥ नमोऽस्तुवेदोद्धरणायनित्यंनमोऽस्तु
भूम्युद्धरणायतुभ्यम् ॥ नमोऽस्तुपृथ्वीधरणक्षमायनमोऽस्तुदैत्यान्तकरायतुभ्यम् ॥ ५९ ॥ गङ्गाम्बुधौताङ्घ्रियुगायतुभ्यंनमोऽस्तुराजन्यकुलान्त
काय ॥ नमोऽस्तुतेरावणवंशहन्त्रेनमोऽस्तुदैत्यान्तकरायतुभ्यम् ॥ ६० ॥ नमोऽस्तुतेचासुरनाशकायनमोऽस्तुतेम्लेच्छकुलान्तकाय ॥ नमो
ऽस्तुतेहृत्कमलासनायनमोऽस्तुतेसर्परिपुध्वजाय ॥६१॥ प्रसीदगोपीजनवल्लभप्रभोधृतैकहस्ताचलदेवदेव ॥ प्रसीदलक्ष्मीमुखपद्मभृङ्गप्रसीदविष्णो
सततंनमस्ते ॥ ६२ ॥ प्रसीदपद्मेक्षणचक्रपाणेकौमोदकीहस्तगदाधरत्वम् ॥ प्रसीदविष्णोधृतपाञ्चजन्यनमोऽस्तुतेपद्मधरायनित्यम् ॥ ६३ ॥ संसार
कौतूहलमन्दिरेतेमोहान्धकारेचविवेकदीपे ॥ संमोहिताकेशवमाययाहित्वदीययानित्यमहंभ्रमामि ॥ ६४ ॥ विरिञ्चिसेन्द्रार्कमुखाःसुरेन्द्रामायां
नजानन्तितवासुरारे ॥ मानुष्यहंकिंतववेद्मिमायांपुरोभ्रमंमेहरसानुकम्पम् ॥ ६५ ॥ व्यासउवाच ॥ तस्याःस्तवंसमाकर्ण्यभगवान्माधवःप्रभुः ॥
समालोक्यजगन्नाथश्चतुर्वर्गफलप्रदः ॥ ६६ ॥ आविर्बभूवसहसासूर्यकोटिसमप्रभः ॥ सामूर्ध्नाभूमिमालोक्यववन्देतत्पदद्वयम् ॥ ६७ ॥
नमस्तेकमलाकान्तभुक्तिमुक्तिफलप्रद ॥ हरमेज्ञानहीनायाःस्वकीयमतिविभ्रमम् ॥ ६८ ॥ श्रीभगवानुवाच ॥ भ्रमंजहीहिचार्वङ्गिद्वावेतौहिपतीतव॥
एकभावेनसुश्रोणिकुरुसेवांतयोःसदा ॥ ६९ ॥ यश्चतेप्रणिधिःस्वामीमद्भक्तस्तरुणःसुधीः ॥ भोक्तुंसुखफलंसाध्विसोऽभवद्द्विविधःस्वयम् ॥
॥ ७० ॥ अनन्तरूपिणीलक्ष्मीर्यथाक्रीडन्मयासह ॥ तथात्वमपिसुश्रोणिभुङ्क्ष्वताभ्यांसुखंसदा ॥ ७१ ॥ पद्मावत्युवाच ॥ एकस्याद्रौपतीदेव
नप्रशंसन्तिमानवाः ॥ मग्नांलज्जाब्धिकल्लोलेमामुद्धरदयामय ॥ ७२ ॥ श्रीभगवानुवाच ॥ यदापकीर्तितःसाध्विबिभेषित्वंध्रुवंभुवि ॥ तदा
मत्पुरमागच्छताभ्यांसहवरानने ॥७३॥विमानमागतंसद्यस्ततोभगवदाज्ञया ॥ तौसमादायवैकुण्ठंसागन्तुमुपचक्रमे ॥ ७४॥अथसापथिगच्छन्तीभर्तृ
भ्यांसहजैमिने ॥ ददर्शैकंमहात्मानंरथस्थंस्त्रीसमन्वितम् ॥ ७५ ॥ धृतंकमलपत्राक्षैरतसीकुसुमप्रभैः ॥ चतुर्भुजैर्दूतगणैरासीनैर्गरुडोपरि ॥ ७६ ॥
विष्णुदूतांस्ततस्तांस्तुविष्णुरूपान्वराङ्गना ॥ कोऽयंरथस्थःपुरुषइतिपप्रच्छसासती ॥ ७७ ॥ केवायूयंमहात्मानःपुण्डरीकनिभेक्षणाः ॥ सर्वे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽपिविष्णुसदृशाःशङ्खचक्रादिपाणयः ॥ ७८ ॥ ततस्तेभगवद्दूताविष्णुतुल्यपराक्रमाः ॥ विहस्योच्चुर्मुहुःसर्वेपरमामोदसंयुताः ॥ ७९ ॥
विष्णुदूताऊचुः ॥ विष्णुदूतावयंसाध्विपुण्यात्मानमिमंजनम् ॥ समादायपदंयामउदारंलोकमुत्तमम् ॥ ८० ॥ पद्मावत्युवाच ॥ केनपु
ण्यप्रभावेणगतोऽयमीदृशींगतिम् ॥ विष्णुदूतामहात्मानःकथ्यतामित्यहोमम ॥ ८१ ॥ विष्णुदूताऊचुः ॥ अयंवृहद्ध्वजोनामराक्षसोलोकशो
ककृत् ॥ अरण्यादिनिवासीचमहाबलपराक्रमः ॥ ८२ ॥ परदारपरद्रव्यहारकःप्राणिघातुकः ॥ गोमांसाशीनिष्ठुरोक्तिभाषीचदेवनिन्दकः ॥ ८३ ॥
यद्यत्पापरतंकर्मतदनेनकृतंसदा ॥ स्वप्नेऽपितुकृतंकर्मशुभंनचपतिव्रते ॥८४ ॥ अयंरथंसमारुह्यसततंकामपीडितः ॥ परस्त्रीहरणार्थायसुश्रोणिनभसि
भ्रमन् ॥ ८५ ॥ यांयांसुयौवनांनारींयत्रयत्रायमीक्षते ॥ बलाच्चालिङ्गितस्तांतुतत्रतत्रस्मरातुरः ॥ ८६ ॥ अथैकदाभीमकेशनाम्नोनरपतेःप्रियाम् ॥
ददर्शक्रीडामध्यस्थांसुन्दरींनवयौवनाम् ॥ ८७ ॥ अथासौतांसमालोक्यसुवर्णकुसुमप्रभाम् ॥ इत्युवाचवचःप्रेम्णाकात्वमत्रकरोषिकिम् ॥ ८८ ॥
साचोवाचततःकान्ताभीमकेशस्यभूपतेः ॥ अहंसुरतशास्त्रज्ञाकेशिनीनामभूषिता ॥ ८९ ॥ अपिसर्वगुणज्ञांमांप्रेमहृष्टांनभूपतिः ॥ स्ववंशजांदोष
हीनांपश्यतिक्षणमप्यसौ ॥ ९० ॥ स्थीयतेनित्यमत्रैवभर्त्राखण्डितचर्चया ॥ मयास्वकर्मशोचन्त्याविरहानलतप्तया ॥ ९१ ॥ कस्त्वंकथमिदं
प्रातमुद्यानंप्रतिसत्तम ॥ समायातोऽसितत्सर्वंप्रसन्नोवक्तुमर्हसि ॥९२॥ अथायमित्याहवचःपूर्णचन्द्रनिभानने ॥ मायावीराक्षसोऽहंत्वामालिङ्गितुमि
हागतः ॥ ९३ ॥ जहीहिरुष्टंभर्त्तारंसर्वदादोषदर्शिनम् ॥ तन्विमांभजसर्वंतेदास्यामिसुखमुत्तमम् ॥ ९४ ॥ ततोविहस्यसाध्वीयंराक्षसेन्द्रमिमंमुदा॥
बबन्धबाहुलतयाविन्यस्यवदनेमुखम् ॥ ९५ ॥ सतामालिङ्ग्ययुवतींविवेकोद्वेगविह्वलाम् ॥ अनयासहसुश्रोणिदिव्यमारूढवान्रथम् ॥ ९६ ॥
दम्पतीभावमाश्रित्यतौजातावतिकौतुकम् ॥ वायुवेगरथारूढौयातौगगनवर्त्मनि ॥ ९७ ॥ अथैनामयमित्याहपश्यतन्विवरानने ॥ त्वद्भर्तृदेशादा
यातौगङ्गासागरसङ्गमे ॥ ९८ ॥ ततोरथस्थनारीयमधिगङ्गाब्धिसङ्गमम् ॥ जगामपञ्चतांसद्यःसन्दृश्यात्यन्तसाध्वसैः ॥ ९९ ॥ विलप्यबहुधा
साध्वींतत्रायमपिराक्षसः ॥ गतप्राणांसमालोक्यसद्योमृत्युंजगामह ॥ १०० ॥ वैनतेयध्वजादेशादिमौगलितकल्मषौ ॥ नयामःपुण्यकर्माणौवैकुण्ठं
प्रतिसम्प्रति ॥१॥ जलेस्थलेचान्तरिक्षेगङ्गासागरसङ्गमे ॥ देहंसन्त्यज्यगच्छन्तिपापिनोहिपरांगतिम् ॥२ ॥ त्रैलोक्यदुर्लभंतीर्थंगङ्गासागरसङ्गमे ॥
माघेतपसिशुक्लायामेकादश्यामुपोषितः ॥ ३ ॥ तत्रशुद्धिमवाप्नोतिब्रह्महापिनसंशयः ॥ गङ्गाब्धिसङ्गमेस्नात्वाहरिंदृष्ट्वाचमाधवम् ॥ ४ ॥ कार्त्तिके
यमुखंदृष्ट्वापुनर्जन्मनविद्यते ॥ कार्तिकेयोहरिःसाक्षादित्यभेदःकृतःसदा ॥५॥ येकार्त्तिकेयंपश्यन्तितेसर्वेमोक्षगामिनः ॥ सर्वतीर्थाधिकंतीर्थंगङ्गाब्धि

CC-0. In Public Domain. Digitization by eGangotri

सङ्गमंशृणु ॥६॥ जलेस्थलेचान्तरिक्षेमृतोमोक्षमवाप्नुयात् ॥७॥ व्यासउवाच॥ इत्युक्त्वाविष्णुदूतास्तेतौसमादायजैमिने ॥ जग्मुर्विष्णुगृहंसर्वेसहसा
काशवर्त्मनि ॥ ८ ॥ याचपद्मावतीसाध्वीभर्तृद्वयसमन्विता ॥ गतासारूपतांविष्णोश्चतुर्वर्गप्रदायिनः ॥ ९ ॥ तत्रभुक्त्वाखिलान्भोगान्दुर्लभान्द्विज
सत्तम ॥ परमंज्ञानमासाद्ययथुःसारूप्यतांहरेः ॥११०॥ सर्वतीर्थमयीगङ्गासर्वतीर्थमयोहरिः ॥ गङ्गायाश्चहरेश्चैवतस्माद्भक्तिर्विधीयते ॥ ११ ॥ गङ्गा
व्धिसङ्गमेपूर्वंमाधवोनामभूपतिः ॥ तप्त्वातपश्चिरंतत्रसदारोमोक्षमाप्तवान् ॥१२॥ जैमिनिरुवाच ॥ त्वयोक्तोमाधवःकोऽसौकिंकर्मसचकारह ॥ कथं
तेपेतपस्तन्मेसर्वंकथयसत्तम ॥ १३ ॥ व्यासउवाच ॥ चरितंतस्यविप्रर्षेमाधवस्यमहात्मनः ॥ आकर्णयप्रवक्ष्यामिसमासेनमहामते ॥ ११४ ॥
इतिश्रीपाद्मेमहापुराणेक्रियायोगसारेव्यासजैमिनिसंवादेप्रयागवर्णनंनामचतुर्थोऽध्यायः ॥ ४ ॥ व्यासउवाच ॥ अस्तितालध्वजानामनगरी
त्रिदिवोपमा ॥ सर्वलोकेषुविख्याताप्रकीर्णागुणिनांगणैः ॥ १ ॥ तत्रासीद्विक्रमोनामाराजाशुद्धकुलोद्भवः ॥ धार्मिकःसत्यवादीचप्रजापालन
तत्परः ॥ २ ॥ तस्यहारावतीनामवल्लभासुविदुर्लभा ॥ आसीत्स्वकीयवदनप्रभाजितशशिप्रभा ॥ ३ ॥ तस्यसैवप्रियाराज्ञःस्त्रीगणेऽपिचतिष्ठति ॥
गङ्गेवसरितांभर्त्तुस्तिष्ठत्यपिसरिद्गणे ॥ ४ ॥ भूदेवदेवकृपयाकालेनकियताद्विज ॥ व्यजायतसुतस्तस्यांसर्वलक्षणसंयुतः ॥ ५ ॥ शास्त्रोक्त
विधिनातस्यसराजासर्वशास्त्रवित् ॥ माधवेतिततोनामचक्रवर्तीचकारह ॥ ६ ॥ ततोऽसौमाधवोविप्रकालेनकियताबली ॥ सर्वविद्यासरित्पारंगतः
सद्गुणसङ्गतः ॥ ७ ॥ अथसौयौवराज्येनराज्येनरपतिःसुतम् ॥ सिक्तवांस्तंमहीदेवसर्वदेवगणार्चकम् ॥ ८ ॥ एकस्मिन्दिवसेविप्रचतुरङ्गबलै
र्वृतः ॥ जगामकौतुकेनासौमृगयायैमहद्वनम् ॥ ९ ॥ तत्रहत्वाबहूञ्जतून्मध्याह्नेसमयेततः ॥ कृतवान्नगरंगन्तुमुद्यमंविपिनादसौ ॥ १० ॥
नगरंस्वकमागच्छत्ससैन्योमाधवोमुदा ॥ ददर्शयुवतीमेकांसरसिस्नानतत्पराम् ॥ ११ ॥ स्नानार्हद्रव्यवसनैर्व्यक्तीकृतकलेवराम् ॥ स्वकीयमुख
सौन्दर्यजितपूर्णनिशाकराम् ॥ १२ ॥ सुवर्णकुण्डलद्वन्द्वविभ्राजद्गण्डमण्डलाम् ॥ सुदीर्घकेशकैश्छन्ननितम्बांचारुहासिनीम् ॥ १३ ॥ सुवर्णपद्म
कलिकाचारून्नतपयोधराम् ॥ मृगारिकृशमध्यांचवसन्तेकोकिलस्वराम् ॥१४॥ यूनांमनोहराराज्येकन्दर्पेणमहात्मना ॥ आरोपितापताकेवसुन्दरीसा
व्यराजत ॥ १५ ॥ तादृशींतांसमालोक्यप्रान्तरेसङ्गवर्जिते ॥ कःकामवशगोनस्यात्क्षितौप्राणान्वहन्पुमान् ॥ १६ ॥ अथविक्रमपुत्रोऽसौतामालोक्य
वराननाम् ॥ कन्दर्पबाणव्रणितहृदयश्चेत्यचिन्तयत् ॥ १७ ॥ एतस्याःसदृशीकापिनदृष्टाक्षितिमण्डले ॥ एतामिहसमालिङ्ग्यसफलंजन्मचेष्यते ॥
॥१८॥ श्रेष्ठोऽस्मिसर्वलोकानांवयस्तेजोगुणैरहम् ॥ यद्यपीन्द्राङ्गनेयंस्यान्नेतव्याद्यतथापिच ॥१९॥ परस्त्रीहरणेयोवादोषोभवतिसाम्प्रतम् ॥ कोवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शक्नोतितदृक्कुंयतोराजापितामम॥२०॥इतिसञ्चिन्त्यमनसाहृढंकामवशंगतः॥दूरेसंस्थाप्यसैन्यानिययौसास्नातियत्रह ॥२१॥ ऐश्वर्यंचमदश्चैवकाम श्चैवमहीतले॥त्रयएतेविवेकस्यतेजोघ्नन्तिकिमद्भुतम्॥२२॥पितास्यदुरितध्वंसीधर्मरक्षाकरोनृणाम्॥धिक्स्वयंकामदेवोऽसौमोहयत्यखिलंजगत्॥२३॥ तमायातंसमालोक्यवेगेनमहतातातः॥ एकाकिनीसारमतेभृशंचिन्ताकुलाभवत्॥२४॥एकाकिनींसमालोक्यकान्तारस्थांसयौवनाम्॥अयंधावतिवेगेन तन्मेमनसिवर्तते ॥ २५ ॥ जल्पन्तिमुनयःसर्वेधर्मोरक्षतिरक्षितः ॥ नचज्ञातव्यमत्रैवकिमत्रचभविष्यति ॥ २६ ॥ सहायहीनंयत्स्थानंपुरोधावन्ति शत्रवः ॥ श्लाघ्यंपलायनंतत्रनिवासःप्राणनाशकः ॥२७ ॥ इत्यालोच्यवरारोहासव्यकच्छेघटंततः ॥ कृत्वापलायनेभीत्यामनश्चक्रेसरोवरात् ॥२८॥ ततःसमाधवश्चापिजवेनमहताद्विज ॥ एवंतस्याःपुरोगत्वाप्रसारितकरःस्थितः ॥ २९ ॥ श्रीमाधवउवाच ॥ वराङ्गनेचारुदेहेसुयौवनबलान्मम ॥ पलायसेमनोहृत्वाहतोऽस्म्यहमचेतनः ॥ ३० ॥ किंनामचञ्चलापाङ्गिचार्वङ्गितवकःपतिः ॥ स्वर्गात्किंवागतासित्वंत्वत्तुल्यानास्तिभूतले ॥ ३१ ॥ सुन्दरित्वमिहश्रेष्ठासर्वलक्षणसंयुता ॥ कथंवहसिपानीयंदासीवकमलानने ॥ ३२ ॥ पयोधरौशातकुम्भौसदावहसिवक्षसि ॥ कक्षेणजलकुम्भंच कोमलाङ्गीदमद्भुतम् ॥ ३३ ॥ दिवाकरकरात्यन्तसन्तप्तपथिलोहिताः ॥ पादाङ्गुल्यन्तराभान्तिजपानांकलिकाइव ॥ ३४ ॥ सुश्रोणिभजमांप्रीत्या त्यजकुम्भंवरानने ॥ तवदुःखावसानोऽभून्ममदर्शनमात्रतः ॥३५॥ श्रीमद्विक्रमभूभर्त्तुःपुत्रोऽहंमाधवाह्वयः ॥ सर्वभावैर्भविष्यामिवराङ्गस्तवसुन्दरि॥ ॥ ३६ ॥ ममस्त्रीगणमध्येतुसुभगात्वंभविष्यसि ॥ सुपुष्पवल्लीमध्येतुद्विरेफस्येवमालती ॥ ३७ ॥ अथवाममवाक्यंत्वंगर्वाल्लङ्घितुमिच्छसि ॥ नत्यक्ष्यामितथापित्वांयतोऽहंनृपतेःसुतः ॥ ३८ ॥ व्यासउवाच ॥ तेनोक्तंवचनंश्रुत्वापन्थानंप्रविहायसा ॥ तस्थावधोमुखीविप्रप्राहेतिचशनैः शनैः ॥ ३९ ॥ कदापिचपरःकोऽपिनशृणोतिवचोमम ॥ तथापिलज्जांसन्त्यज्यवक्ष्याम्येवतवाग्रतः ॥ ४० ॥ तथाह्यहंमहावीरसुबाहुक्षत्त्रियाप्रिया ॥ नयामिदेवपूजार्थंजलंचन्द्रकलाह्यहम् ॥ ४१ ॥ यद्वचोभवताप्रोक्तंनचतत्त्वत्कुलोचितम् ॥ त्वद्वंशप्रभवाःसर्वेपरस्त्रीषुनपुंसकाः ॥ ४२ ॥ अहमेकाकिनीनारीवीराणांप्रभवोभवान् ॥ बलादालिङ्ग्यमामत्रयशःकिंतेभविष्यति ॥ ४३ ॥ परस्त्रियंसमालिङ्ग्यक्षणमात्रसुखंभवेत् ॥ इहापकीर्तिः शेषंचदुःखंकल्पशताधिकम् ॥ ४४ ॥ कर्मभूमिरियंशूरपुण्यमत्रविधीयताम् ॥ परस्त्रीहरणेचित्तंकदाचिदपिमाकुरु ॥ ४५ ॥ लोभात्प्रवर्त्तते कामःकामात्पापंप्रवर्त्तते ॥ पापान्मृत्युर्मृतेऽपिस्याद्दुस्तरेनरकेस्थितिः ॥४६॥ सर्वेऽपित्वद्गुणाव्यर्थास्त्वज्जन्मापिचनिष्फलम् ॥ कामस्यवशतांगत्वा रन्तुमिच्छेःपरस्त्रियम् ॥ ४७ ॥ मांसमूत्रपुरीषास्थिनिर्मितंमेकलेवरम् ॥ एतदेवसमालोक्यस्मरस्यवशतांगतः ॥४८॥ भूपालवंशोत्पत्तित्वात्पौरेभ्यो

CC-0. In Public Domain. Digitization by eGangotri

नबिभेषिकिम् ॥ मस्तकोपरिगर्जन्तंनेक्षसेसमवर्त्तिनम् ॥ ४९ ॥ ग्रसन्तेबडिशंमत्स्यास्तेसर्वेज्ञानवर्जिताः ॥ ज्ञानीचेत्प्राप्यबडिशंभवान्कस्माद्रसि
ष्यसि ॥ ५० ॥ विवेकस्त्रिषुलोकेषुसम्पदांपरमंपदम् ॥ अविवेकोहिलोकानामापदांपरमंपदम् ॥ ५१ ॥ तयोक्तंवचनंश्रुत्वामाधवःकाममोहितः ॥
उवाचजैमिनेवाचंविनयावनतःपुनः ॥ ५२ ॥ तवोद्वीक्षणनाराचधाराजर्जरमानसम् ॥ प्रियेमांत्राहित्राहीतित्वामस्मिशरणंगतः ॥ ५३ ॥ तावत्प्रिय
तमानारीयावत्तिष्ठतियौवनम् ॥ मृणालकोशांनलिनींहेमभृङ्गोनगच्छति ॥ ५४ ॥ प्रसीदहरिणीनेत्ररक्षमांसेवकंस्वकम् ॥ त्वद्वाचंनीरसांश्रुत्वाभिद्यते
हृदयंमम ॥ ५५ ॥ चन्द्रकलोवाच ॥ त्यजदुःखंमहावीरश्शृणुमद्वचनंशुभम् ॥ प्रवक्ष्यामिमनोदुःखंहन्तुंयद्भवतःक्षमाम् ॥ ५६ ॥ समुद्रपारे
विख्यातापुरन्दरपुरोपमा ॥ प्लक्षद्वीपेऽस्तिदीप्यन्तीविख्यातासंज्ञयापुरी ॥ ५७ ॥ गुणाकराह्वयस्तत्रराजाश्रेष्ठोमहायशाः ॥ आस्तेसर्वगुणैर्युक्तः
प्रतापेऽग्निसमोबली ॥ ५८ ॥ सुशीलानामतद्भार्यासर्वलक्षणसंयुता ॥ सेवावशीकृतस्वामिहृदयासदयाजनैः ॥ ५९ ॥ सुलोचनाख्यातत्कन्यावीर
तत्कुक्षिसम्भवा ॥ सदूहरूपैरजयत्सकलान्सुन्दरीगणान् ॥६०॥ तस्यारूपंगुणौघंचवर्णितुंभुविकःक्षमः ॥ तद्रूपदर्शमालोक्यासृजदन्यांस्वयंविधिः॥
॥ ६१ ॥ अहमासंमहावीरतस्यादासीनृपात्मज ॥ समागतास्मिदैवेनत्वद्देशंप्रतिसुन्दरी ॥ ६२ ॥ तत्समासुन्दरीनास्तित्वत्समोनास्तिसुन्दरः ॥
गृहाणतांविवाहेनस्वर्गभोगंयदीच्छसि ॥ ६३ ॥ जम्बुकींबलवान्सिंहोविहायाङ्गतामपि ॥ हस्तिनींनहिकिंधत्तेयत्नतःप्रतिपत्तये ॥ ६४ ॥ उद्योगी
पुरुषोलोकेलभतेपरमांश्रियम् ॥ उद्योगेनविनाब्रूहिकिंकार्यंभुविविद्यते ॥ ६५ ॥ व्यासउवाच ॥ तस्यास्तद्वचनंश्रुत्वामाधवोमाधवार्चकः ॥ दूरी
कृत्यस्मरोद्भावंतामित्याहवराननाम् ॥ ६६ ॥ माधवउवाच ॥ केनचिह्नेनतांकन्यांज्ञास्यामिकमलानने ॥ तन्मेकथयसुश्रोणियदितेमय्यनुग्रहः ॥
॥ ६७ ॥ सिन्धुपारप्रतीपाज्ञःकथंयास्यामिमानुषः ॥ भविष्यतितयासार्धंकथंसन्दर्शनंमम ॥ ६८ ॥ चन्द्रकलोवाच ॥ तस्यास्तुवामजघनेतिलकं
तिलसन्निभम् ॥ अस्तितद्दर्शनेनैवज्ञास्यसित्वंसुलोचनाम् ॥ ६९ ॥ उच्चैःश्रवससंज्ञस्यतुरगस्यमहात्मनः ॥ त्वन्मन्दुरायांपुत्रोऽस्तिसर्वगामीहयो
त्तमः ॥ ७० ॥ तमश्वश्रेष्ठमारुह्यजवेनपवनोपमम् ॥ गमिष्यसिसमुद्रान्तंसुखसाध्यामहीयतः ॥ ७१ ॥ ततोभूपालपुत्रोऽसौससैन्योगृहमागतः ॥
सापिचन्द्रकलासाध्वीसुप्रीतास्वगृहंगता ॥ ७२ ॥ विचिन्त्यवचनंतस्यामाधवोऽतित्वरान्वितः ॥ चिन्ताकुलितचित्तोऽसौसहसामन्दुरांययौ ॥
॥ ७३ ॥ तत्रबद्धाञ्जलिर्भूत्वावैक्रमिर्विक्रमान्वितः ॥ तुरङ्गमान्निति प्राहगुणयुक्तान्महाबलान् ॥ ७४ ॥ माधवउवाच ॥ यूयंसर्वेमहात्मानः
सर्वलक्षणसंयुताः ॥ समुद्रपारेमांनेतुंकःशक्नोतितुरङ्गमः ॥ ७५ ॥ अथतेतुरगाःसर्वेश्रुत्वातद्वचनंभिया ॥ परस्परंक्षितिमुखास्तस्थुर्नोनेतुमुद्यताः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ७६ ॥ अथैकस्तुरगस्तत्रसमस्तैर्लक्षणैर्युतः ॥ माधवस्यपुरोगत्वावाचमेतामुवाचह ॥ ७७ ॥ अहंभवन्तंनेष्यामिसिन्धुपारंनसंशयः ॥
किन्त्वाकर्णयदुःखानिमदीयानिनृपात्मज ॥ ७८ ॥ अन्यभुक्तावशिष्टंयत्तत्तृणंममभक्षणम् ॥ ग्रन्थिकोटिप्रयुक्ताभीरज्जुभिर्ममबन्धनम् ॥ ७९ ॥
स्वप्नेऽपिव्रीहयोवीरनदृष्टाबलिनामया ॥ अन्येषामपिभोगानांकाकथात्रनृपात्मज ॥ ८० ॥ गौरवेणविनावीरनसतांविक्रमोभवेत् ॥
ज्वलिष्यतिकथंवह्निर्विनाकाष्ठघृतादिभिः ॥ ८१ ॥ अहमीदृगिमेसर्वेनानाभूषासमन्विताः ॥ नतुसिंहसमाःश्वानःसर्वाभरणभूषिताः ॥ ८२ ॥
प्रदक्षिणाकारतयासशैलद्वीपसागराः ॥ क्षणमात्रेणपृथिवींशक्नोमिभूपतेप्रभो ॥ ८३ ॥ माधवउवाच ॥ क्षमस्वदोषंसकलंमत्पित्राविहितंहय ॥
अद्यप्रभृतिमुख्योऽसिमन्दुराभ्यन्तरेमम ॥ ८४ ॥ परेणदत्तःसन्तापःसदातिष्ठतिनोत्तमे ॥ सलिलंवह्निसन्तप्तंक्षणाच्छीतलतांव्रजेत् ॥ ८५ ॥
स्वमाधुर्यैर्भवेदिक्षुःक्षणमपिहितृप्तये ॥ इत्युक्त्वातंनमस्कृत्यतुरङ्गंनृपनन्दनः ॥ ८६ ॥ ततःशुभेक्षणेतस्यपृष्ठमारुह्यवाजिनः ॥ प्रचेष्टाख्येनभृत्ये
नविलङ्घ्यजलधिंययौ ॥ ८७ ॥ पुरींसर्वगुणैर्युक्तांपुरन्दरपुरोपमाम् ॥ जगाममाधवोभ्राजन्सौधावलिभिरुज्ज्वलाम् ॥ ८८ ॥ तत्रोपस्थांच
युवतींगन्धिनींमाधवोद्विजः ॥ दृष्ट्वास्मितमुखोवाक्यमुवाचेतिचकोमलम् ॥ ८९ ॥ वृद्धेमातरहंपान्थोदिनमेकंतवालये ॥ स्थातुमिच्छामिका
ऽऽज्ञातेधनवान्माधवाह्वयः ॥ ९० ॥ आतिथेयीगन्धिनीसातमादायातिथिंततः ॥ हृष्टातुस्वगृहंतत्रजगामात्यन्तभक्तितः ॥ ९१ ॥ यथोक्त
विधिनाविप्रतयातस्यार्हणाकृता ॥ माधवस्तांनिशांनिन्येचिन्ताव्याकुलमानसः ॥ ९२ ॥ अथप्रभातेविमलेगन्धिन्याःपुरतोद्विज ॥ माधवः
सकलंकार्यंकथयामासभूसुरः ॥ ९३ ॥ देव्यास्सुलोचनायाश्चतस्मिन्नेवदिनेशुभे ॥ गन्धाधिवासनंकर्मरचयामाससाचतत् ॥ ९४ ॥
श्रुत्वाधिवासनंकर्मराजपुत्र्यास्ततोद्विज ॥ शोकसागरकल्लोलनिकरोमाधवोऽभवत् ॥ ९५ ॥ यदर्थंराज्यवसतिर्मयात्यक्तातदिच्छुना ॥ यदर्थं
बान्धवास्त्यक्तालङ्घितश्चमहोदधिः ॥ ९६ ॥ अद्यैवतस्यादैवेनभविष्यत्यधिवासनम् ॥ निष्फलाःसकलाएवयावन्तोविहिताःश्रमाः ॥९७ ॥
किंतुलोकानजल्पन्तिमाध्व्यामुग्धोगतोऽखिलम् ॥कोऽपिभग्नोद्यमोनस्यात्प्रज्ञायकार्यनिश्चयम् ॥९८॥ एतद्विचिन्त्यमनसामाधवोऽसौपुनःपुनः ॥
मालापुष्पादिकेकार्यंलिलेखप्रेमवर्णितम् ॥ ९९ ॥ कन्येमाधवनामाहंकुमारोधरणीपतेः ॥ तालध्वजाधिराजस्यविक्रमस्यमहात्मनः ॥ १०० ॥
त्वच्चेटीतत्रकाप्यस्तिकन्येचन्द्रकलाह्वया ॥ तयातवगुणग्रामःकथितोमेपुराकिल ॥१॥ त्वद्गुणग्रामसँल्लग्नचित्तोऽहंनिम्नसागरम् ॥विलङ्घ्यतुरगारूढः
समायातःपुरींतव ॥ २ ॥ अधुनामांवरत्वंनवृणुकन्येसुलोचने ॥ यतःसंसारमध्येऽस्मिंस्तवास्मिशरणंगतः ॥ ३ ॥ यथागुणवतींत्वांहिनान्यो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जानातितत्पुमान् ॥ सरोजिनीगुणंवेत्तिभृङ्गएवनदर्दुरः ॥ ४ ॥ शुभ्रस्यजलदस्यापिगगनैकस्यनोदयः ॥ तथापिनभजेदन्यंविनाचन्द्रंकुमुद्वती ॥
॥ ५ ॥ अथतल्लेखनंवीरोमालाकारप्रियाकरे ॥ स्वर्णाङ्गुलीयसहितंददौसविनयोनृपः ॥ ६ ॥ पुष्पमालान्तरेकृत्वातंलेखंसाङ्गुलीयकम् ॥ राजपुत्री
समीपेसागन्धिनीतरसाययौ ॥ ७ ॥ पुष्पमालांबलिंतस्यैदत्त्वासागन्धिनीततः ॥ तस्थौबद्धाञ्जलिर्भूत्वादूरंगत्वाभियाकियत् ॥ ८ ॥
ततःसाराजतनयालिखितंसाङ्गुलीयकम् ॥ विलोक्यसकलंमूलात्पपाठात्यन्तपण्डिता ॥ ९ ॥ सापितत्पृष्ठपत्रेतुतद्योग्यमुत्तरंद्विज ॥ अलि
खद्विस्मिताकन्यायद्यच्चसर्वमुच्यते ॥ ११० ॥ राजपुत्रमहाबाहोत्वद्वाक्यमखिलंश्रुतम् ॥ शृणुसत्तमवाक्यंमेयथोचितमिदंवचः ॥ ११ ॥ अद्या
धिवासनंकर्मश्वोविवाहोममध्रुवम् ॥ पितुर्यत्संमतंकार्यंपृथिव्यांकोऽपिनत्यजेत् ॥ १२ ॥ कार्येतुदुःखसाध्येतुकार्योनातिश्रमोजनैः ॥ कार्येसिद्धे
श्रमोनस्यादसिद्धेश्रमएवहि ॥१३॥ तथापिशृणुवक्ष्यामियेनप्राप्नोतिमांभवान् ॥ यदर्थोभवताचैवसमुद्रोऽपिचलङ्घितः ॥१४॥ मयाप्रदक्षिणीकार्यो
वरोविद्याधरोह्ययम् ॥ तत्पुरोऽहंगमिष्यामिनानाभरणभूषिता ॥ १५ ॥ वामबाहूर्ध्वंकृत्वाचवीरःस्यान्ममसंमुखः ॥ येनमांशक्यतेनेतुंसमेभर्ता
भविष्यति ॥ १६ ॥ सत्यंसत्यमिदंसत्यंपत्रेऽस्मिंल्लिखितंमया ॥ अन्यथासुदृढंकार्यंलङ्घितुंनहिशक्यते ॥ १७॥ एतद्विलिख्यसाकन्यातस्याएव
करेददौ ॥ सापितत्पत्रमादायगतामाधवसन्निधिम् ॥१८॥ तयायल्लिखितंपत्रेतत्पठित्वातुमाधवः ॥ भूयोऽपिलिखितंविप्रलिलेखात्यन्तकौतुकैः ॥
॥ १९ ॥ त्वयायदुक्तंहेकन्येधन्येधन्यकुलोद्भवे ॥ तदेवमन्मतंसर्वंकोऽपिनास्त्यत्रसंशयः ॥१२० ॥ ततस्तुगन्धिनीभूयोगत्वातन्निकटेद्विज ॥ ददौ
सुलोचनायैसालेखनंसुन्दराक्षरम् ॥ २१ ॥ अथतल्लेखनंज्ञात्वाकुमाराङ्गीकृतंद्विज ॥ बभूवात्यन्तसंहृष्टाविस्मिताचपुनःपुनः ॥ २२ ॥ तस्मिन्नसंशयं
कार्यंयदासौस्वीकृतंददौ ॥ तदाकिंस्वयमिन्द्रोवायन्मायामाधवःपुमान् ॥ २३ ॥ इहलोकेपरत्रास्तिस्नेहभूमिःपतिःसदा ॥ विनासन्दर्शनेनापिनवर
त्वेहृतोमया ॥ २४ ॥ इतिसञ्चिन्त्यसासाध्वीनिःश्वस्यचपुनःपुनः ॥ स्नानव्याजाद्गतावासंगन्धिन्याश्चसहालिभिः ॥ २५ ॥ हस्तेविधृत्यतांकन्यां
गन्धिनीसापुरन्ध्रिका ॥ माधवंदर्शयामासशयानंमञ्चकोपरि ॥ २६ ॥ तंसमालोक्यसाकन्याकन्दर्पसदृशंततः ॥ रोमाञ्चितंसमस्ताङ्गमुदात्तंपश्यति
क्रमात् ॥ २७ ॥ तन्नेत्रयुगलंतस्मिन्यत्रयत्रनिमज्जति ॥ कष्टदृष्ट्याचनान्यत्रतस्मान्नामात्रगच्छति ॥ २८॥ साक्षादयंवाकन्दर्पोदेवकीनन्दनोऽपिवा॥
शर्वोवाविषयाधीशःसाक्षाद्वापार्वतीपतिः ॥२९॥ रूपैरेतैर्जगन्मध्येमानुषोनहिजायते॥अनेनस्वामिनाजन्मसफलंहरिणीदृशः॥१३०॥यद्भक्तिवशगो
भूत्वाविधातात्यन्तयत्नतः ॥ यदाहंकन्यकाजातातदैनंकिंससर्जह ॥ ३१ ॥ अद्यप्रभृतिनाथोऽयंस्वयंनास्त्यत्रसंशयः ॥ इत्युक्त्वासामतिं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चक्रेगन्तुंनिजगृहंप्रति ॥ ३२ ॥ गन्धिर्युवाच ॥ कन्येयुक्तिरियंभद्रेत्वयापिहृदिसेव्यताम् ॥ यथासुमूर्तिःपुरुषोनतथाभातिनिन्दया ॥
॥ ३३ ॥ उह्लासोगात्रभङ्गश्चमन्ददृष्टिश्चविस्मितम् ॥ सर्वाणिविष्णुचिह्नानिनिद्रायांमृगलोचने ॥ ३४ ॥ सन्दष्टौष्ठपुटाक्षेपात्प्रोक्तोनो
त्तिष्ठतिध्रुवम् ॥ शनैःशनैःकरंतस्यस्वकराभ्यामदर्शयत् ॥ ३५ ॥ त्वांद्रष्टुंराजकन्यायाःसन्धृत्यागमनंशृणु ॥ श्रुत्वैतत्सोऽपिचोच्चस्थौ
सम्भ्रमाक्रान्तमानसः ॥ ३६ ॥ विनयावनतोवाक्यंमाधवश्चेत्युवाचताम् ॥ ३७ ॥ माधवउवाच ॥ कन्येमज्जन्मसफलंश्रमश्चसफलोमम ॥
त्वच्चारुवदनाम्भोजंसाक्षादेवमयेक्षितम् ॥ ३८ ॥ सफलंयौवनंकन्येत्वंवरत्वेनमांवृणु ॥ त्वद्योग्योऽस्तिवरोनान्योमांविनाभुविसुन्दरि ॥ ३९ ॥
सुलोचनोवाच ॥ सुमतेत्वंममस्वामीभाग्येनमहताभवेः ॥ मयायद्वचनंप्रोक्तंतदेवसुदृढंखलु ॥ आज्ञांकुरुमहाभागगच्छामिनिजमन्दिरम् ॥१४० ॥
माधवउवाच ॥ तिष्ठेतियदिवावच्मिकन्येगर्वस्तदाभवेत् ॥ गच्छेतिवचनंवक्तुंनायातिवदनान्मम ॥ ४१ ॥ स्वयंविचार्यचार्वङ्गियद्युक्तंतद्वि
धीयताम् ॥ यदुक्तंवचनंतस्मिन्भविष्यसिसुतत्परा ॥ ४२ ॥ इत्युक्तातेनसाकन्याहर्षितास्वगृहंगता ॥ तत्रैवमाधवस्तस्थौवृतोबहुपरिच्छदैः॥
॥ ४३ ॥ चारुविद्याधरएवंस्थितोविद्याधरोवरः ॥ तत्रस्थाश्चजनाःसर्वेस्रक्चन्दनविभूषिताः ॥ ४४ ॥ दिव्याम्बरपरीधानारेजुर्देवगणाइव ॥
क्वचिद्गीतंक्वचिन्नृत्यंक्वचित्कोलाहलध्वनिः ॥ ४५ ॥ क्वचिच्चापिप्रदीपालिस्तत्पुरेसमवर्तत ॥ हेषितैःसप्तिवृन्दानांहस्तिनांचैवबृंहितैः ॥ ४६ ॥
हषस्वनैश्चपत्रिणांपूरिताःककुभोदश ॥ नानापताकानिवहैर्धवलैर्नृपसद्मभिः ॥ ४७ ॥ समन्ताद्गगनंसर्वंव्याप्तंतत्रद्विजैमिने ॥ केऽपिशङ्खान्स
मादध्मुर्ढक्काडिण्डिमझर्झरान् ॥ ४८ ॥ वादयाञ्चक्रिरेकेऽपिसाधुकाहलकादिकम् ॥ ततोयुवतयःसर्वाःसरोजकोरकस्तनाः ॥४९ ॥ ललितानिसुगी
तानिजगुश्चन्द्रनिभाननाः ॥ परस्परंयौवनतोघर्षणच्युतमालया ॥ १५० ॥ प्रस्वेदाम्बुगलद्गन्धैर्बभौकन्येवतत्रभूः ॥ गम्भारीकाष्ठरचितंपीठमारुह्य
सुन्दरी ॥५१॥ ज्ञातिभिर्वेष्टितायातावरस्थानंसुलोचना ॥५२॥ अत्रान्तरेविक्रमपुत्रएषशय्योपरिद्याात्किललब्धनिद्रः ॥ नवेददैवेनविवाहकार्यंसुलोच
नायाश्चसुलोचनायाः ॥५३॥ विधातृमायाशतमोहितानांकदापिनस्याद्भुवनेसुखाप्तिः॥ततःस्वसङ्केतविधिंजनोऽयंविस्मृत्यनिद्रामभजत्सुखेन ॥५४॥
वनंपरित्यज्यकृशानुभीत्याजलंप्रविष्टानलिनीसुखार्थम् ॥ सन्दह्यतेतत्रहिमानलेनयद्यस्यकर्मनतदन्यथास्यात् ॥ ५५ ॥ वेदादिशास्त्रमखिलंप्रपठन्तु
लोकाःकुर्वन्तुनामसततंक्षितिपालसेवाम्॥उग्रंतपःप्रतिदिनंप्रतिसाधयन्तुनश्रीस्तथापिचभजत्यतिभाग्यहीनम् ॥५६॥मस्तकोपरितिष्ठन्तिदुःखानिच
सुखानिच॥अन्यकालेसमायान्तिहठादन्यानिसत्तम ॥५७ ॥ निद्रावन्तंसमालोक्यमाधवंदुःखभागिनम् ॥ प्रचेष्टश्चिन्तयामाससजानन्सङ्केतमेतयोः

CC-0. In Public Domain. Digitization by eGangotri

॥५८॥धिगस्त्वमुंराजपुत्रंदैवमायाविमोहितः ॥ विस्मृत्यानिजसङ्केतंनिद्रांसम्प्राप्यसेवते ॥५९॥ असौदुःखागताकन्यावरस्यनिकटेऽधुना ॥ किंभवे
न्नयनेतादृक्सङ्केतंयातिनिष्फलम्॥१६०॥तिष्ठत्वंवैपापकर्मन्निद्रांसंसेव्यमस्तके ॥ मयाहयंसमारुह्यनेतव्यासावराङ्गना॥६१॥ कन्यारत्नंचरत्नंचमुदा
प्राप्नोतिदुर्लभम्॥तदाकिंसेवयाकार्यंमाधवस्यास्यदुर्मतेः ॥६२॥ धनार्थंक्रियतेसेवासर्वभावेनभूभुजाम् ॥ तच्चेन्मुदास्वयंप्राप्तंसेवादुःखेनकिंतदा॥६३॥
प्रचेष्टइतिसञ्चिन्त्यसमारुह्यतुरङ्गमम् ॥ साराजकन्यायत्रास्तेययौतत्रनभःपथा ॥६४॥वरंप्रदक्षिणीकृत्यस्मरन्तीसमयंस्वकम् ॥ वामहस्तंसमुद्धृत्य
तस्थौविद्याधराग्रतः ॥६५॥हस्तेविधृत्यतांकन्यांप्रचेष्टोऽतिजवेनसः॥पृष्ठेनिमेषयामाससप्तेस्तस्यमहाबलः॥६६॥तांराजपुत्रीमादायपुरींकाञ्चींजगाम
च ॥ तामथासौसमालोक्यप्रचेष्टोऽतित्वरान्वितः ॥ उवाचप्रवहन्पाणिंनष्टमानससाध्वसः ॥ ६७ ॥ प्रचेष्टउवाच ॥ समुद्रान्तरतीरस्थांकाञ्चीं
नामपुरीमिमाम् ॥ पश्यसर्वत्रविख्यातांसर्वलोकसुखप्रदाम् ॥ ६८॥ अत्रमाधववीरस्यतस्यविद्याधरस्यवा ॥ कस्यापिचभयंनास्तिपश्यचन्द्रनिभा
नने ॥ ६९ ॥ मच्चित्तेन्धनसँल्लग्नांकामानलशिखावलिम् ॥ कुचकुम्भकरैःसिद्धंनिर्वाणंदेहिसुन्दरि ॥ १७० ॥ त्वच्चारुमुखपद्मेऽस्मिन्मन्मुखभ्रमरो
ऽधुना ॥ इच्छेत्पातुंमधून्यत्रकाऽऽज्ञातेतिष्ठतिप्रिये ॥ ७१ ॥ त्वच्चारुगात्रसंस्पर्शाच्छरैस्तुदतिमांस्मरः ॥ त्राहित्राहिप्रियेत्राहितवास्मिशरणंगतः ॥
॥ ७२ ॥ इतिब्रुवन्तंतंमूढमभिवीक्ष्यवराङ्गना ॥ शोकाग्नितप्तसर्वाङ्गीचिन्तयामासचेतसा ॥ ७३॥ अयंमूढोदुष्टचेष्टःप्रचेष्टोनामवेधसा ॥ लिखितः
किंललाटेमेयन्मयाहाहतास्म्यहम् ॥ ७४ ॥ क्कमाताक्कचमेतातःक्कचविद्याधरोवरः ॥ अनेनाहंसमानीताधिगस्तुघटनांविधेः ॥ ७५ ॥अलंलोकाः
प्रकुर्वन्तिगर्वंजगतिसर्वदा ॥ वेत्तिच्छेत्तुंगर्ववृक्षंविधाताघटनासिना ॥ ७६ ॥ तथापिविपदेधैर्यंनिर्भयत्वंचतत्परम् ॥ उपायाश्चेतिचत्वारःप्रशस्या
दीर्घदर्शिभिः ॥ ७७ ॥ इत्यालोच्यहृदाकन्यावचोभिःकोमलाक्षरैः ॥ प्रचेष्टंप्रत्युवाचासौसर्वकार्यविचक्षणा ॥७८॥ सुलोचनोवाच॥दृढंकुरुमनोवीर
कन्याहमविवाहिता ॥ मांसमालिङ्ग्यमोहेनकथंयास्यसिदुर्मते ॥ ७९ ॥ शास्त्रोक्तविधिनावीरविवाहेनगृहाणमाम् ॥ तवसेवांकरिष्यामिदासीवत्को
ऽत्रसंशयः ॥१८०॥ त्वंमेप्राणाश्चमित्रंचभूषणंबान्धवस्तथा ॥ अनन्यगतयोनार्योभवान्नीतिमवैतिकिम् ॥८१॥ विवाहयोग्यवस्तूनिविवाहार्थंसमा
नय ॥ मत्पाणिग्रहणंशीघ्रंकुरुजाड्यंजहीतिच ॥ ८२ ॥ अन्तर्दृढंबहिःश्लक्ष्णंबदरीफलवद्वचः ॥ आकर्ण्यतस्यामूढोऽसौपरमांप्रीतिमाययौ ॥८३॥ ॥ १० ॥
तुरङ्गमंचतांकन्यांसंस्थाप्यैकत्रदुर्मतिः ॥ करकङ्कणमादायतस्यास्तत्पुरमाययौ ॥८४॥ ततःसाचिन्तयामासविधिंनूनंप्रशस्यतम् ॥ यतआवांपरि
त्यज्यमूढोऽसौहार्पितोययौ ॥८५॥ ।किंकर्तव्यंक्कगन्तव्यंक्कस्थातव्यंमयाधुना ॥ अतिसङ्कटकार्येऽस्मिन्निस्तारोमेभवेत्कथम्॥८६॥ यदाहमत्रतिष्ठामि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंवदिष्यन्तितेतदा॥पुण्यतीर्थंसमासाद्यपरत्रजन्मकाम्यया॥८७॥ पञ्चतांप्रतियास्यामिसापिश्रेयस्करीयतः॥मद्वियोगादयंमूढोनविद्याधरमाधवौ॥
॥ ८८ ॥ जीविष्यन्तित्रयोऽप्येतेक्षणमात्रमपिस्मरन् ॥ मयिस्थितायामेतेषांभवेज्जीवनरक्षणम् ॥८९॥ मृतायामपियास्यन्तित्रयोऽप्येतेतुपञ्चताम् ॥
मामुद्दिश्ययदाप्राणांस्त्यक्ष्यन्तेतेऽत्रमेजनाः॥१९०॥भविष्यामितदानूनमहंतद्वधभागिनी॥इदानींपुण्यतीर्थेषुयद्ध्येयोभगवान्हरिः॥९१॥तस्मिन्प्रसन्ने
भद्रंमेसर्वमेवभविष्यति ॥ प्राणेषुचविनष्टेषुसर्वमेवविनश्यति ॥९२॥ तेषुस्थितेषुसकलंस्तोकस्तोकेनसिध्यति ॥९३॥ निशावशिष्टानलिनीहिमाकरे
दूरीकृतेचण्डकरेणभास्वता ॥ सुगन्धपुष्पप्रकरोऽतिसुन्दरीनाप्नोतिकिंभृङ्गवरस्यसङ्गमम् ॥ ९४ ॥ हृदाविचिन्त्येतिवराङ्गनासासत्तिसमारुह्यमहा
जवंतम् ॥ तप्तुंतपःसागरविष्णुपत्न्योर्जगामविज्ञोत्तमसङ्गमाय ॥ ९५ ॥ तस्मिन्क्षेत्रवरेपुण्येगङ्गासागरसङ्गमे ॥ अभूद्राजासुषेणाख्यःसोम
वंशसमुद्भवः ॥ ९६ ॥ गन्तुंतस्यसभांराज्ञश्चेतसासाव्यचिन्तयत् ॥ मयायुवत्याकर्तव्यंकथंभूपालदर्शनम् ॥ ९७ ॥ अधिवासनसूत्राणिसदूर्वाणि
भुजेमम ॥ कन्याहंतुरगारूढायुवतीसङ्गवर्जिता ॥ ९८ ॥ चारित्रंमामकंनूनंमनोविस्मयकारकम् ॥ आत्मानंगोपयित्वाहंयास्यामिनृपतेःसभाम्
॥ ९९ ॥ इन्द्रजालप्रभावेणसाभूत्वापुरुषाकृतिः ॥ प्रविवेशसभांराज्ञःसुधर्मामिवजैमिने ॥ २०० ॥ तंसम्पन्नमिवायान्तंशक्तिहस्तंहयासनम् ॥
स्वयंपप्रच्छभूपालःकस्त्वंकुतइहागतः ॥ १ ॥ तस्यैतद्वचनंश्रुत्वासाकन्यापुरुषाकृतिः ॥ प्रणम्योवाचराजानंसुहृदंसज्जनाश्रयम् ॥ २ ॥ देववीरवरो
नामपुत्रोऽहंपृथिवीपतेः ॥ वर्तनायसमायातस्त्वद्राज्यंप्रतिसम्प्रति ॥ ३ ॥ यद्यत्कार्यमसाध्यंस्यात्तद्देवसाधयाम्यहम् ॥ मयिस्थितेनमद्भर्तुःकुत्रा
पिस्यात्पराजयः ॥ २०४ ॥ इतिश्रीपाद्मेमहापुराणेक्रियायोगसारेवीरवरप्रदर्शोनामपञ्चमोऽध्यायः ॥ ५ ॥ राजोवाच ॥ तिष्ठात्रैवमहाबाहोममराज्ये
सुशोभने ॥ कर्तव्यातेमयावृत्तिःसंशयोनात्रविद्यते ॥ १ ॥ ततोवीरवरस्तस्यसन्निधौधरणीपतेः ॥ उवाससततंविप्रतत्सेवागतमानसः ॥ २ ॥ अथैक
दातस्यपुरंजैमिनेसकलाःप्रजाः ॥ भीमनादोनामखड्गःक्षोभयामाससन्ततम् ॥ ३ ॥ तद्वधायततोराजाप्रेषयामासतंरुषा ॥ ततोऽसौगण्डकंहन्तुं
ययौवीरवरोजनैः ॥४ ॥ ददर्शपर्वताकारंसुप्तंतंधरणीतले ॥ दंष्ट्राकरालवदनंखड्गिनंतंसशक्तिधृत् ॥५॥ नभसिभ्रामयन्सत्तिंसचवीरवरोरुषा ॥ खड्गिनं
तमितिप्राहमेघगम्भीरयागिरा ॥ ६ ॥ उपार्जितास्त्वयायेयेदुरात्मन्पापपादपाः ॥ बभूवुःफलिनस्तेतऋतुंप्राप्ययथाद्रुमाः ॥ ७ ॥ खादिताःप्राणिनो
येयेराज्येऽस्मिन्पापिनात्वया ॥ यमालयेसमस्तैस्तैःसङ्गमस्तेभविष्यति ॥ ८ ॥ मुञ्चनिद्रामरेदुष्टमांपश्यान्तकरंस्थितम् ॥ अनयानिद्रयांकिते
महानिद्राभविष्यति ॥ ९ ॥ ततःसोऽपिसमुत्तस्थौक्रोधसंरक्तलोचनः ॥ धूलिधूसरसर्वाङ्गस्त्यक्तनिद्रोमहाबलः ॥ १० ॥ भीमनादउवाच ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गर्वंमाकुरुदुर्बुद्धेतवायुःशेषतांगतम् ॥ मद्दृष्टिपथमायातःपुमान्कोनुविमुच्यते ॥ ११ ॥ ज्वलदग्निशिखाश्रेणींप्रविशेच्छलभोयथा ॥ मत्कोपानल
राशौत्वंतथैवनिपतिष्यसि ॥ १२ ॥ इतिब्रुवन्तंतंशक्त्याजघानशितयातया ॥ सजज्वालमहाकोपात्कृत्वाहुङ्कारनिःस्वनम् ॥ १३ ॥ सपपातमही
पृष्ठेगतायुर्गण्डकस्ततः ॥ चालयन्पृथिवींसर्वांशोणितौघपरिप्लुतः ॥ १४ ॥ खड्गिनंपतितंदृष्ट्वागङ्गाब्धिरोधसिद्विज ॥ समीपंतस्यभूपस्यसगन्तु
मुपचक्रमे ॥ १५ ॥ सगच्छन्पथिविप्रर्षेददर्शैकंमहाशयम् ॥ जाज्वल्यमानंतेजोभिर्द्वितीयमिवभास्करम् ॥ १६ ॥ विष्णुदूतगणैर्युक्तंतुलसीमाल्य
भूषितम् ॥ दिव्याम्बरधरंदिव्यंरथारूढंस्मिताननम् ॥ १७ ॥ पप्रच्छेतिततोभक्त्यासचवीरवरश्चतम् ॥ कस्त्वंकुतइहायातःक्वगच्छसिवदस्वनः॥
॥ १८॥ पुरुषउवाच ॥ कन्येविधृतपुंवेषेमद्वृत्तान्तंनिशामय ॥ कथयामिसमासेनश्रोतुमिच्छसिचेन्मुदा ॥ १९ ॥ अहमासंपुराराजाचौरवंशवना
नलः ॥ धर्मबुद्धिरितिख्यातःसर्वधर्मपरायणः ॥ २० ॥ मयायज्ञाःकृताःसर्वेदानानिसकलानिच ॥ चतुर्वर्षसहस्राणिपालिताचवसुन्धरा ॥ २१ ॥
पाखण्डजनवाक्येनमयाभूमिर्द्विजन्मनः ॥ आहृताकोपमासाद्यपुनर्दत्तानकुत्रचित् ॥ २२॥ ममतेनापराधेनस्वयमेवविधिस्ततः ॥ जहारतत्क्ष
णादेवसर्वांराजश्रियंरुषा ॥ २३ ॥ अथाहंगतसम्पत्तिःशोकाग्निदग्धमानसः ॥ कियद्भिर्दिवसैःसाध्वियमराजवशंगतः ॥ २४ ॥ मांदृष्ट्वाचित्रगुप्ते
नतत्कर्मप्रकटीकृतम् ॥ उक्तश्चभास्करिर्देवश्चारुहासगतिःप्रभुः ॥ २५ ॥ धर्मबुद्धिरयंराजाकृतपुण्यक्रियःसदा ॥ अस्त्यस्यदुरितंकिञ्चित्तन्निशामय
वच्म्यहम् ॥ २६ ॥ पाखण्डैर्बोधितोऽयंतुद्विजभूमिंजहारवै ॥ तेनैवकर्मणास्थानंनरकेचास्यदुस्तरे ॥ २७ ॥ वृत्तिच्छेदःसूर्यपुत्रयस्ययेन
विधीयते ॥ सतेनवधमाप्नोतिशास्त्रेष्वितिसुनिश्चितम् ॥ २८ ॥ तस्मादयंपापकर्माब्रह्महापृथिवीपतिः ॥ एतस्यनिरयेस्थानंकल्पकोटिशतावधि ॥
॥ २९ ॥ आत्मदत्तांहरेद्यस्तुपरदत्तांचमेदिनीम् ॥ सकोटिकुलसंयुक्तःप्रयातिनरकंविभो ॥ ३० ॥ योहरेच्चमहींतावद्देवस्यब्राह्मणस्यच ॥ नतस्य
निष्कृतिर्दृष्टाकल्पकोटिशतावधि ॥ ३१ ॥ परदत्तांक्षितिंयस्तुधरानाथोऽभिरक्षति ॥ सकोटिगुणमाप्नोतिपुण्यंदातुस्तुयद्भवेत् ॥ ३२ ॥
ततोऽहंशमनादेशाद्भुक्त्वावैपूतिमृत्तिकाम् ॥ अनन्तजन्मसुप्राणिहिंसासदामयाकृता ॥ ३३ ॥ गावश्चब्राह्मणाश्चैवतथैवान्येऽपिजीविनः ॥ मयादुष्टेन
निहताःकोटिकोटिसहस्रशः ॥ ३४ ॥ कालेनचाद्यमांसाध्विसर्वप्राणिविहिंसकम् ॥ खड्गयोनौसमुत्पन्नंभवतीप्रजघानह ॥ ३५ ॥ गङ्गाब्धिसङ्गमं ॥ ११
तीर्थंदुर्लभंदैवतैरपि ॥ स्थलेऽपिमृत्युमासाद्ययत्रेयंममसद्गतिः ॥३६॥ गच्छसुश्रोणिभद्रंतेभविष्यतिनसंशयः ॥ अचिरेणैवचपतिदर्शनंतेभविष्यति॥
॥३७॥ व्यासउवाच ॥ तस्यैतद्वचनंश्रुत्वासाकन्यापरमाद्भुतम् ॥ ववन्देचरणौतस्यधर्मबुद्धिर्महीपतिः ॥३८॥ ततोरथंसमारुह्यसराजात्रिदिवंययौ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सोऽपिवीरवरोविप्रजगामनृपतेःसभाम् ॥३९॥ राजाचतंमृतंश्रुत्वाखड्गिनंभीमविक्रमम् ॥ तस्यैददौविवाहेनजयन्तींनिजकन्यकाम् ॥ ४० ॥ जयन्तीं
तांसमादायसाकन्यापुरुषाकृतिः ॥ तपस्तप्तुंमनश्चक्रेगङ्गासागरसङ्गमे ॥ ४१ ॥ गङ्गाब्धिसङ्गमेस्नात्वाप्रभातेद्विजसत्तम ॥ गीतैर्वाद्यैश्चनृत्यैश्चयजे
न्नारायणंप्रभुम् ॥४२॥ निरामिषंहविष्यंचफलाहारंद्विजोत्तम ॥ कदाचिदुपवासंसाकुरुतेचवराङ्गना॥४३॥एकाकिनींमांदृष्ट्वात्रधर्षयिष्यन्तिदुर्जनाः॥
दुर्बलामितिमत्वासौसमारुह्यचवाजिनम् ॥ ४४ ॥ भूयएवनिजंराज्यंसाजगामवराङ्गना ॥ माधवस्यवियोगेनतस्यविद्याधरस्यवा ॥ ४५ ॥ मृतासा
राजतनयायतोऽन्यंनभजत्यपि ॥ तस्यांमृतायांभृत्योऽसौनिर्जगामयदृच्छया ॥ ४६॥ विलप्यबहुधातत्रप्रचेष्टोऽत्यन्तशोकभाक् ॥ जगाममरणार्था
यगङ्गासागरसङ्गमम् ॥ ४७ ॥ गङ्गाब्धिसङ्गमेस्नात्वातुलसीमृद्भिभूषितः ॥ कृताञ्जलिरितिप्राहप्रचेष्टोभीष्ममातरम् ॥४८॥ पवित्रेत्वज्जलेमातस्त्य
जाम्यत्रकलेवरम् ॥ सुलोचनामेकान्तास्याद्यथातत्त्वंकरिष्यसि ॥ ४९ ॥ भूयोभूयोब्रुवन्तंतमितितस्याश्चकिङ्कराः ॥ बद्धापाशेनतंनिन्युर्निरुक्तां
तत्सभांप्रति ॥ ५० ॥ क्रुद्धावीरवरादेशात्किङ्करास्तेसुदारुणाः ॥ कारायांस्थापयामासुःप्रचेष्टमनुविह्वलम् ॥ ५१ ॥ एतस्मिन्नेवकालेतुदृष्ट्वा
तत्कार्यमद्भुतम् ॥ हाहाकारोमहानासीत्तद्राज्येद्विजसत्तम ॥ ५२ ॥ एतच्छ्रुत्वाद्भुतंकर्मसचराजागुणाकरः ॥ आयातोऽत्यन्तसन्तप्तोवदती
तिद्विजोत्तम ॥ ५३ ॥ निषङ्गिणश्चरथिनश्चर्मिणःखड्गिनस्तथा ॥ धानुष्काश्चकौन्तकाश्चकोटिकोटिसहस्रशः ॥ ५४ ॥ स्थानेस्थानेपुरेतस्मि
न्राजावैशोकविह्वलः ॥ नियोजयामासतदारक्षायैद्विजसत्तम ॥ ५५ ॥ तेनाज्ञप्तास्ततःसर्वेयोद्धारोऽमितविक्रमाः ॥ सत्वराःपतिरक्षासुतस्थुस्त
स्मिन्पुरेरुषा ॥ ५६ ॥ गीतानिगायकैःसर्वैर्नृत्यानिनर्तकैस्तथा ॥ वाद्यानिवादकैश्चैवतत्रत्यक्तानिसाध्वसात् ॥ ५७ ॥ ततःसराजाविप्रर्षेसमा
हूयस्वमन्त्रिणः ॥ किमेतदितिपप्रच्छशोकोपहतमानसः ॥५८॥ मन्त्रिणऊचुः ॥ देवाद्भुतमिदंकर्मनदृष्टंनश्रुतंक्वचित् ॥ एतावतांनृणांमध्येपश्यतां
क्वजगामसा ॥ ५९ ॥ कोऽपिजल्पतिसालक्ष्मीःशापेनागत्यभूतले ॥ त्वदीयंसौधमेतर्हिस्वयमन्तरधीयत ॥ ६० ॥ मायामयीसारमणी
माययात्वद्गृहेस्थिता ॥ दर्शयित्वातुमायांस्वांगतेत्यन्येवदन्तिवै ॥ ६१ ॥ केचिद्वदन्तिरमणीसर्वलक्षणसंयुता ॥ आगमिष्यतिभूयोऽपिभगाङ्गो
मघवायतः ॥ ६२ ॥ तन्मुखंचन्द्रवन्मत्वाविचिन्त्यात्मानमात्मना ॥ केचिद्वदन्तिचन्द्रेणनीतासुप्रतिपत्तये ॥ ६३ ॥ वदन्तिकेऽपिसाक
न्यासद्गुणादीर्घवासना ॥ भ्रान्त्याचन्द्रमसाग्रस्तापूर्णचन्द्रनिभानना ॥ ६४ ॥ दिग्गजैर्नलिनीभ्रान्त्याप्रफुल्लकमलानना ॥ विषदण्डप्रहस्ता
चनीरजाकलिकाकुचा ॥ ६५ ॥ केचिद्वदन्तिसृष्ट्वातांस्रष्टुमन्यांस्त्रियंनृप ॥ तद्रूपदर्शनार्थायनीतारूपगुणास्थिता ॥ ६६ ॥ केचिद्वदन्तिभूपाल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वयासर्वदिशोजिताः ॥ रूपैर्दैवाङ्गनाजेतुंगतासात्रिदिवंप्रति ॥ ६७ ॥ अथतेमन्त्रिणोऽन्योन्यमालोक्यविमुखश्रियः ॥ स्तब्धाइवाभवन्सर्वेनिरु
त्साहाःससाध्वसाः ॥ ६८ ॥ भूपःसुलोचनेपुत्रिक्कगतासिविहायमाम् ॥ इत्युक्त्वासमहीपालःपृथिव्यांमूर्च्छितोऽपतत् ॥ ६९ ॥ राजानंपतितं
दृष्ट्वाशोकेनमहताततः ॥ जज्ञेहाहारवस्तस्मिन्नगरेद्विजसत्तम ॥ ७० ॥ तत्क्रन्दनध्वनेस्तत्रदिक्षुजाताप्रतिध्वनिः ॥ उत्प्रेक्षेतेतत्रलोकःक्रन्दन्ति
ककुभोदश ॥ ७१ ॥ धूलिधूसरिताङ्गंतुनृपतिंमुक्तकेशकम् ॥ विधृत्यमन्त्रिणःसर्वेतरसासौधमाययुः ॥ ७२ ॥ अथविद्याधरस्तत्रश्रीविक्रमतनूद्भवः॥
तस्याःपीठंसमालिङ्ग्यरुरोदकरुणस्वनैः ॥ ७३ ॥ हाप्रियेचञ्चलापाङ्गिसुवर्णकुसुमप्रभे ॥ शोकाब्धौपातयित्वामांक्वगतासिवरानने ॥ ७४ ॥
ममकिंदूषणंदृष्टंत्वयानिर्दोषयाप्रिये ॥ नददासिकथंभद्रेदर्शनंकमलानने ॥ ७५ ॥ नजीविष्याम्यहंभद्रेक्षणमात्रंत्वयाविना ॥ अतोमेदर्शनं
दत्त्वाक्रियतांप्राणरक्षणम् ॥ ७६ ॥ किंधनैःकिंजनैःकिंमेमित्रैःकिंवाधनैर्गृहैः ॥ नाप्नोमियदिभद्रेत्वांप्राणेभ्योऽपिगरीयसीम् ॥ ७७ ॥ एतच्चान्यच्च
विप्रर्षेसकृत्वाकरुणंमहत् ॥ शोकान्मृत्युंविनिश्चित्ययययौगङ्गाब्धिसङ्गमम् ॥ ७८ ॥ तत्रगङ्गाम्भसिस्नात्वासमुद्रजलमिश्रिते ॥ निवेद्यभास्क
रायार्घंगङ्गांनत्वाहमातरम् ॥ ७९ ॥ गङ्गेदेविजगन्मातस्त्वज्जलेविमलेतनुम् ॥ त्यजामितांयथाभूयःप्राप्नोमितत्करिष्यसि ॥ ८० ॥ इति
ब्रुवन्तंतंविप्रतत्किङ्करवरास्ततः ॥ विधिंविनिन्युःसहशंकुद्धावीरवरस्यच ॥ ८१ ॥ ततोवीरवरःप्राहकस्त्वंभोःकुतआगतः ॥ कथमत्रतनुत्यागं
कुरुषेतद्वदस्वमे ॥ ८२ ॥ तद्वाक्यमेतदाकर्ण्यततोविद्याधरोऽखिलाम् ॥ तांकथांकथयामासशृण्वतांविस्मयप्रदाम् ॥ ८३ ॥ अथत्वंमूर्ख
लोकानांप्रवरोऽसिनसंशयः ॥ गान्धर्वीराक्षसीवापिपन्नगीवापिकिन्नरी ॥ ८४ ॥ शापागतेवसाकन्यातस्मादन्तर्हितास्वयम् ॥ सादेवरूपिणी
कन्यादेवानांनिलयंगता ॥ ८५ ॥ कथंतयासमंभूयोदर्शनंतेभविष्यति ॥ चकोरपेयंपीयूषंगगनेरोहिणीपतेः ॥ ८६ ॥ किंशक्नुवन्तितं
पापावायसाबलिनोऽपिच ॥ यदप्राप्यंनतत्प्राप्यंप्राप्यंयत्तच्चलभ्यते ॥ ८७ ॥ जानन्तितज्जनंकश्चिन्मोहंप्रतिनगच्छति ॥ केनापिदीयते
कन्याकन्याकेनापिगृह्यते ॥ ८८ ॥ पूर्वजन्मनियाकन्यातांकन्यांलभतेपतिः ॥ पुत्रप्रयोजनाभार्यापुत्राःपिण्डप्रयोजनाः ॥ ८९ ॥ कुर्वन्ति
दारग्रहणमतएवमनीषिणः ॥ यथेहदीयतेनार्यातथानारीसमश्नुते ॥ ९० ॥ कन्दप्रजन्यामप्येषभृङ्गःकुमुदिनींसहेत् ॥ सद्रूपोऽपिपतिःस्त्रीणांसन्तो
षायभवेन्नहि ॥ ९१ ॥ रवौस्थितेऽपिपद्मिन्यामधूनिभ्रमरःपिबेत् ॥ नारीषुसततंचित्तंविष्णुभक्तावनादरः ॥ ९२ ॥ शोकैःकैश्चित्तनुत्यागस्तिस्रः
पुंसांविडम्बनाः ॥ दाराःपुत्रास्तथाभ्रातादेशाश्चबान्धवास्तथा ॥ ९३ ॥ पुनर्लभ्याइमेसर्वेपुनर्लभ्यानचासवः ॥ नमुक्तोविषयोधर्मोनचकर्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृतंत्वया ॥ ९४ ॥ वर्तमानेगतेमूढभविष्यंजन्मदुर्लभम् ॥ ममम।ताममपिताभार्याभ्राताधनंमम ॥ ९५ ॥ निष्फलंयातिवैजन्मनृणांमम
तयातया ॥ एवंप्रबोधितःसम्यक्तेनधीरवरेणसः ॥ ९६ ॥ दौर्मनस्यंपरित्यज्यतस्थौतत्रैवजैमिने ॥ ततस्तुगन्धिनीप्रीत्याहसन्तीस्वगृहंगता ॥
गत्वाचमाधवंमञ्चेस्वपन्तंसाददर्शह ॥ ९७ ॥ गन्धिन्युवाच ॥ उत्तिष्ठोत्तिष्ठदुर्बुद्धेश्रमस्तेऽविफलोऽभवत् ॥ विवाहकालेसाकन्याबभूवान्त
र्हितास्वयम् ॥ ९८ ॥ एवंतस्यावचःश्रुत्वासमुत्तस्थौसमाधवः ॥ विललापाकुलःशोकैर्महद्भिःक्ष्मातलेलुठन् ॥ ९९ ॥ कन्यायादूषणंनास्तिनास्ति
विद्याधरस्यवा ॥ ममैवदूषणंसर्वंयतोहीनस्यसङ्गभाक् ॥ १०० ॥ नीचसङ्गेकृतेपुंसासुखंयच्छतिनोविधिः ॥ एतदेवमयाज्ञातंयतोगतिरियंमम ॥
॥ १ ॥ नप्राप्नोतिसुखंकिञ्चिन्नीचसङ्गान्महानपि ॥ प्रेतसङ्गान्महादेवोनग्नोभग्नविभूषणः ॥ २ ॥ प्रविश्यनिलयंनीचःस्त्रीधनादिकमीक्षते ॥
किञ्चित्प्रसङ्गमासाद्यषड्ङ्क्रःसषडाननः ॥ ३ ॥ सतांश्रुत्वाग्गुणंनीचःसद्यएवविषीदति ॥ दोषंसंश्रोतुमाप्नोतिशतरूपोभवेत्तदा ॥ ४ ॥ शुभमिच्छ
न्निजंप्राज्ञोनीचेभ्योनहिनिश्चयेत् ॥ क्षणमेकमपिप्राज्ञोनीचेभ्योनहिनिश्चयेत् ॥ ५ ॥ पादमेकमपिप्राज्ञोनीचैःसहनगच्छति ॥ विश्वासवच
नंनीचःसद्यएवविषीदति ॥६॥ दोषंसाश्रोतुमाप्नोतिश्रोतुमायातियत्नतः ॥ततःसमयमासाद्यप्रकाशयतिचोद्धसन् ॥७॥ मनस्येकंवचस्येकंकर्मण्येकं
यतात्मनाम् ॥ मनस्यन्यद्वचस्यन्यत्कर्मण्यन्यद्दुरात्मनाम् ॥ ८ ॥ यदाकरिष्यत्साकन्याविवाहंसानृपात्मजा ॥ नाभविष्यत्तदाशोकःस्वल्पोऽपि
हृदयेमम ॥ ९ ॥ स्वर्गंगताचेत्साकन्यासर्वलक्षणसंयुता ॥ नीतानीचेनशोकोऽयंहृदयेदुःसहोऽभवत् ॥ ११० ॥ लिखितामिवसर्वत्रतांपश्यामि
वराननाम् ॥ विस्मर्तुंनहिशक्नोमिजीवतानेनचात्मना ॥ ११ ॥ नीचक्रोडगतासाध्वीनजीविष्यतिसाक्षणम् ॥ विद्याधरोऽपितच्छोकैर्नजी
विष्यतिदारुणैः ॥ १२ ॥ यथामातापितात्यक्तोदेशस्तत्प्राप्तयेमया ॥ तथैवसम्प्रतिप्राणास्त्यक्तव्यानात्रसंशयः ॥ १३ ॥ पुनस्तत्प्राप्तयेप्राणा
न्गङ्गासागरसङ्गमे ॥ त्यक्ष्यामीतिदृढंकृत्यसगन्तुमुपचक्रमे ॥ १४ ॥ एतस्मिन्नेवकालेतुनारदान्मुनिसत्तमात् ॥ पादलेपंमहाबुद्धिरभिगम्यसमा
धवः १५ ॥ ययौकियद्भिर्दिवसैर्गङ्गासागरसङ्गमम् ॥ गङ्गाब्धितोयेस्नात्वाचपूजयामासचाच्युतम् ॥१६॥ तुलसीपत्रमालाभिर्भूषितोमाधवस्तदा ॥
बद्धाञ्जलिरितिप्राहजह्नुकन्यांसरिद्वराम् ॥ १७ ॥ माधवउवाच ॥ देवित्वत्सलिलेदेहंप्राप्तशोकस्त्यजाम्यहम् ॥ भाविजन्मनितांकन्यांमह्यंदास्यसि
शोभनाम् ॥ १८ ॥ इत्युक्त्वातांनमस्कृत्यगङ्गांत्रैलोक्यमातरम् ॥ ततस्तत्सलिलेनिम्नेप्रवेष्टुमुपचक्रमे ॥ १९ ॥ अथवीरवरःपृष्ठेतंविधृत्यनृपा
त्मजम् ॥ तत्सभांप्रतिविप्रर्षेजवेनागत्यतज्जनैः ॥ १२० ॥ ततःसमालोक्यनृपात्मजंतंप्रीतिंसमासाद्यअनिन्द्यशोभाम् ॥ कस्त्वंत्यजस्यत्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथंशरीरंब्रूहीतितंवीरवरंजगाद ॥ २१ ॥ माधवउवाच ॥ अहंविक्रमराजस्यपुत्रोमाधवसंज्ञकः ॥ मृगयायैवनंघोरंससैन्योऽगममेकदा ॥ २२ ॥
अस्त्येकानगरोपान्तेसरसीपद्मशोभना ॥ नारीमेकाकिनींरम्यामपश्यंतत्रकामुकः ॥ २३ ॥ साचचन्द्रकलानामभामिनीमांस्मरातुरम् ॥ सुलो
चनायाःप्रस्तावंकथयामासभूतले ॥ २४ ॥ ततस्तुरगमारूढोविलङ्घ्यसरितांपतिम् ॥ प्रचेष्टाख्येनभृत्येनगतस्तस्याःपुरंप्रति ॥ २५ ॥ तस्मि
न्नेवदिनेतस्याअधिवासनमुत्तमम् ॥ तथाकर्ण्यमयातत्रप्रेरितंसाङ्गुलीयकम् ॥ २६ ॥ ममपत्रंसमालोक्यसाङ्गुलीयकमुत्तमम् ॥ सापितत्पृष्ठ
पत्रेषुयल्लिलेखतदुच्यते ॥ २७ ॥ श्रीत्रिविक्रमदेवस्यपुत्रोविद्याधराह्वयः ॥ पितातस्मैविवाहेनमांप्रदास्यतिसत्तम ॥ २८ अद्याधिवासनं
कर्मश्वोविवाहोममध्रुवम् ॥ तथाप्युपायंवक्ष्यामियेनप्राप्नोतिमांभवान् ॥ २९ ॥ वामबाहुंसमुद्धृत्यस्थिताहंवरसंमुखी ॥ यस्तुशक्नोतिमां
नेतुंसमेभर्तानसंशयः ॥ १३० ॥ विलिख्यपत्रंसाकन्यागन्धिन्यास्तत्करेददौ ॥ गन्धिन्याचतयादत्तंतत्पत्रंमह्यमुत्तमम् ॥ ३१ ॥ तत्सङ्केतं
प्रचेष्टेनसंश्रुत्यममसंमुखे ॥ हयमारुह्यसानीतातत्राहंनिद्रयाजितः ॥ ३२ ॥ अनयाव्यथयातत्रपुनस्तत्प्राप्तिहेतवे ॥ तदाद्यजागरंभद्रश्शृणु
ष्वात्रविधानतः ॥ ३३ ॥ इत्युक्ताचास्यरक्षायैनियुज्यपदगान्बहून् ॥ विहस्यान्तःपुरंगत्वासाकन्यापुरुषाकृतिः ॥ ३४ ॥ ततोविधृत्यस्त्री
वेषंनानालङ्कारभूषिता ॥ स्वदासींप्रेषयामासतमानेतुंनृपात्मजम् ॥ ३५ ॥ तदाज्ञयासमागत्यततोनृपतिनन्दनः ॥ ईक्षांचक्रेचतांसाध्वींलक्ष्मीं
मूर्तिमतीमिव ॥ ३६ ॥ साचकन्यासमुत्थायसुवर्णासनतोद्विज ॥ ववन्देचरणौतस्यपुलकाञ्चितविग्रहा ॥ ३७ ॥ ततोगान्धर्वविधिनास
राजतनयःसुधीः॥अङ्गीचकारतांकन्यांतत्रैवप्रातकौतुकः ॥३८॥ तत्प्रेमवारिधाराभिःसंसिक्तोनृपनन्दनः ॥ तत्रैवतांनिशांनिन्येकुर्वन्केलिंतयासह ॥
॥ ३९ ॥ अथप्रभातेविमलेसामृगीलोचनासती ॥ आदितःसर्ववृत्तान्तंकथयामाससमाधवम् ॥ १४० ॥ ततःसुलोचनासाध्वीजयन्तींतांनृपा
त्मजाम् ॥ माधवंचसमादायसुषेणस्यसभांययौ ॥ ४१ ॥ तांकन्यांसनृपःश्रुत्वाहर्षितोमाधवायवै ॥ सुलोचनांजयन्तींचविवाहेनददौततः ॥
॥ ४२ ॥ तस्मैतुयौतुकत्वेनसराजाधर्मतत्परः ॥ सुप्रीतोनिजराज्यार्धंददौस्वर्णशतानिच ॥ ४३ ॥ ततोविचित्रमावासंनिर्मायसनृपात्मजः ॥
तस्मिन्पुण्यतमेतीर्थेचकारवसतिंद्विज ॥ ४४ ॥ तत्रान्तरेप्रचेष्टंतंकारागारनिवासिनम् ॥ सभांसमानीयततश्चिन्तयामाससमाधवः ॥ ४५ ॥ ॥ १३ ॥
अयंपापमतिःक्रूरःस्वामिविश्वासघातकः ॥ शत्रूणांप्रवरोमूढोरक्षणीयोमयानहि ॥ ४६ ॥ पालितोऽपिमुहुर्नित्यंप्रसादधनभोजनैः ॥

१ इति वीरवरेण पृष्टः माधवः तं वीरवरं जगादेति योजना।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शत्रुकर्मकरोत्येवसमयंप्राप्यनिर्दयः ॥ ४७ ॥ विपत्त्यांयेनहस्तेननयेत्पादरजःखलु ॥ शिरःकृन्ततितेनैवस्वामिनंप्राप्यसम्पदम् ॥ ४८ ॥
नूनमेवप्रभुंघ्नन्तिवशगानृपराजयः ॥ तत्तमप्युदकंवह्निंसद्योनिर्वाणतांनयेत् ॥ ४९ ॥ इतिसञ्चिन्त्यमनसातेनक्ष्मापतिसूनुना ॥ प्रचेष्टोनष्ट
चेष्टोऽसौनिरस्तोद्विजसत्तम ॥ १५० ॥ ताभ्यांस्त्रीभ्यांतदाविप्रसुखेनसनृपात्मजः ॥ किञ्चित्कालंतत्रतस्थौशोकव्याधिविवर्जितः ॥ ५१ ॥
तस्यांसुलोचनायांतुमाधवस्यमहात्मनः ॥ शतंपुत्राजयन्त्यांचद्वेशतेजज्ञिरेसुताः ॥ ५२ ॥ माधवस्यसुतास्तेऽपिशस्त्रशास्त्रविदुत्तमाः ॥ बभूवुः
सर्वलोकानांप्रीतयेधर्मतत्पराः ॥ ५३ ॥ जन्मान्तरोपार्जितयाविष्णुभक्त्त्याचसङ्गतः ॥ एकदाचिन्तयामासमनसासचमाधवः ॥ ५४ ॥
कोऽहंकस्मात्समायातःकस्यवाकेननिर्मितः ॥ भूयःक्वचगमिष्यामिकुत्रवास्थास्यतेमया ॥ ५५ ॥ विषयंभुञ्जतोजन्मविनापुण्येनमेगतम् ॥
तस्माद्विघ्नार्णवेमग्नंकोऽत्रमामुद्धरिष्यति ॥ ५६ ॥ संसारेस्मिञ्जनुःप्राप्ययेननाराधितोहरिः ॥ आत्मघातीसविज्ञेयःसर्वधर्मबहिष्कृतः ॥
॥ ५७ ॥ भूयोभूयोभवेज्जन्मभूयोभूयोऽपिपञ्चता ॥ संसारोऽयमतःसर्वःक्लेशदोभैरवोमहान् ॥ ५८ ॥ विष्णुभक्तिंविनानस्याज्जन्ममृत्युनिवार
णम् ॥ अतोऽद्यसकलंत्यक्त्वाकरिष्याम्यर्चनंहरेः ॥५९॥ एतद्विचिन्त्यमनसाविश्वस्यचमुहुर्मुहुः ॥ विश्वकर्माणमाहूयसवाक्यमिदमब्रवीत् ॥१६०॥
विश्वकर्मन्महाबाहोमह्यंविष्णोःशिलामयीम् ॥ प्रतिमांदेहिनिर्मायसर्वकामफलप्रदाम् ॥ ६१ ॥ तस्यादेशात्ततोविप्रशिल्पिनाविश्वकर्मणा ॥
प्रतिमारचितातेनमहाविष्णोःशिलामयी ॥ ६२ ॥ नवीननीरदश्यामापुण्डरीकनिभेक्षणा ॥ शङ्खचक्रगदापद्मधारिणीचचतुर्भुजा ॥ ६३ ॥
लक्ष्मीसरस्वतीयुक्तावनमालाविभूषिता ॥ समस्तलक्षणैर्युक्ताभूषितासर्वभूषणैः ॥ ६४ ॥ विचित्रमण्डपेतांचसंस्थाप्यप्रतिमांहरेः ॥ सपूजांकर्तु
मारेभेकामदांचक्रपाणिनीम् ॥६५॥ तस्मिन्नेवालयेविप्रघृतदीपंद्विजोत्तम ॥ दीपंप्रतिदिनंयच्छेदविच्छिन्नशिखंसच ॥६६॥ प्रातःस्नायीस्वयंभूत्वा
कुर्यात्संमार्जनादिकम् ॥ मार्गशोभांचविप्रर्षेतत्रोपलेपनंपुनः ॥ ६७ ॥ स्नात्वागङ्गाब्धिसलिलेकृत्वापञ्चमहाध्वरान् ॥ त्रिसन्ध्यंपूजयेद्विष्णुमुपहारै
रनुत्तमैः ॥ ६८ ॥ गन्धैर्धूपैश्चनैवेद्यैस्ताम्बूलैर्धूपदीपकैः ॥ गीतवाद्यैःप्रबन्धैश्चस्तवपाठैःसुशोभनैः ॥ ६९ ॥ प्रदक्षिणैर्नमस्कारैरध्वरैश्चसदक्षिणैः ॥
निरामिषैर्हविष्यैश्चफलाहारैश्चसत्तम ॥१७०॥नमोनारायणायेतिजपेत्प्रणवपूर्वकम् ॥ अष्टाक्षरंमहामन्त्रंसर्वकामफलप्रदम् ॥७१॥ एवमब्दसहस्राणि
महाविष्णोःपरात्मनः ॥ चकारपरयाभक्त्त्यासपूजांसर्वकामदाम् ॥ ७२ ॥ तस्यभक्त्त्याततस्तुष्टःसर्वदेवशिरोमणिः ॥ आविर्बभूवभगवांस्तुलसी
कुसुमप्रभः ॥ ७३ ॥ आविर्भूतंहरिंदृष्ट्वासदारोमाधवस्ततः ॥ शिरसाभूमिमालिङ्ग्यववन्देचरणौहरेः ॥ ७४ ॥ माधवउवाच ॥ नमस्तेदेवदेवाय

CC-0. In Public Domain. Digitization by eGangotri

नमस्तेपरमात्मने ॥ परेशायसुरेशायनमस्तज्ज्ञानदायिने ॥ ७५ ॥ नमस्तेपरमानन्दपुरुषोत्तमकेशव ॥ नमस्तेपद्मनेत्रायकमलापतयेनमः ॥ ७६ ॥
नमस्तेबहुरूपायनीरूपायनमोनमः ॥ विचिन्त्यायाविचिन्त्यायदृश्यादृश्यायवैनमः ॥ ७७ ॥ नमस्त्रैलोक्यनाथायलोकपित्रेनमोनमः ॥
नमस्तेज्ञानगम्यायनमस्तेसर्वशाखिने ॥ ७८ ॥ कंसारयेनमस्तुभ्यंनमस्तेकैटभारये ॥ मधुहर्त्रेनमस्तुभ्यंविधात्रेचनमोनमः ॥ ७९ ॥ येनत्वयोद्धृ
तावेदामीनरूपधरेणवै ॥ गम्भीराम्भोनिधेरम्भोऽभ्यन्तरात्तमहंभजे ॥ १८० ॥ येनत्वयोद्धृतापृथ्वीसशैलवनकानना ॥ कूर्मरूपधरेणेयंतस्मैतुभ्यं
नमोनमः ॥ ८१ ॥ वाराहमूर्तिनायेनधरणीधरणीपते ॥ उद्धृतानिजदन्तेनतस्मैतुभ्यंनमोनमः ॥ ८२ ॥ नृसिंहमूर्तिनायेनत्वयादैत्योविदारितः ॥
हिरण्यकशिपुःक्रुद्धस्तस्मैतुभ्यंनमोनमः ॥ ८३ ॥ बलियज्ञस्तथाध्वस्तोयेनवामनरूपिणा ॥ तस्मैतुभ्यंनमोदेवकाश्यप्यादानकारिणे ॥ ८४ ॥
पितरस्तर्पितायेनत्वयाक्षत्रियशोणितैः ॥ कार्तवीर्योहतोयेनतस्मैरामायतेनमः ॥ ८५ ॥ रावणोनिहतोयेनकौसल्यासूनुनात्वया ॥ मारीचःकुम्भ
कर्णश्चतस्मैरामायतेनमः ॥ ८६ ॥ प्रलम्बोनिहतोयेनरेवतीपतिनात्वया ॥ कालिन्दीभेदिनेतुभ्यंतस्मैरामायतेनमः ॥ ८७ ॥ वेदाविनिन्दितायेन
विलोक्यपशुहिंसनम् ॥ सकृपेनत्वयायेनतस्मैबुद्धायतेनमः ॥ ८८॥ म्लेच्छाश्चविहितायेनयुगान्तेकल्किमूर्तिना ॥ सर्वलोकहितार्थायतस्मैतुभ्यं
नमोनमः ॥ ८९ ॥ हरेविष्णोदैत्यजिष्णोनारायणकृपामय ॥ संसारसागरेघोरेपतितंमांसमुद्धर ॥ १९० ॥ ततोहर्षान्माधवोऽसौप्रक्षाल्यचरणौहरेः॥
भूमौनिपात्यसर्वाङ्गंजगादमाधवोहरिम् ॥ ९१ ॥ माधवउवाच ॥ गोविन्दपरमानन्दमुकुन्दमधुसूदन ॥ त्राहिमांपापिनंकृष्णयतस्त्वंसर्वपापहा ॥
॥ ९२ ॥ इतिस्तोत्रंतस्यश्रुत्वाभगवान्भक्तवत्सलः ॥ परमांप्रीतिमासाद्यतमित्याहवचःस्वयम् ॥ ९३ ॥ श्रीभगवानुवाच ॥ वरंवरयभोवत्समाधव
क्षत्रियर्षभ ॥ ब्रह्मत्वंवाशिवत्वंवाशक्रत्वंवाकिमिच्छसि ॥ ९४ ॥ माधवउवाच ॥ सर्वमेवमयाप्राप्तंजगदीशनसंशयः ॥ देवैरप्यदृश्यंत्वांपश्यामि
वरदंप्रभुम् ॥ ९५ ॥ भुक्तिमुक्तिधनैश्वर्यंदातुंसर्वंभवान्क्षमः ॥ प्रभोनभक्तियोग्योऽस्मिभक्तिमेवप्रयच्छमे ॥ ९६ ॥ श्रीभगवानुवाच ॥ तवभक्त्या
नयावत्सप्रीतोऽहंनात्रसंशयः ॥ किमस्तिवस्तुयद्दत्त्वातवानृण्यंभजाम्यहम् ॥ ९७ ॥ सूतउवाच ॥ इत्युक्त्वापरमप्रीतःप्रसार्य्यचतुरोभुजान् ॥ तमा
लिङ्गितवान्विष्णुःपितापुत्रमिवद्विज ॥ ९८ ॥ श्रीभगवानुवाच ॥ आलिङ्गनप्रभावेणतवानृण्यंगतोऽस्म्यहम् ॥ सर्वमेवशुभंभद्रंभविष्यतिनसंशयः ॥ ॥ १४ ॥
॥ ९९ ॥ कामिनाप्रतिमावत्सक्रियायोगेनसर्वदा ॥ पूजितामम तेनत्वांनेष्याम्यहंतनुंप्रति ॥ २०० ॥ व्यासउवाच ॥ इतिदत्त्वावरंतस्मैचतुर्भिर्दीर्घ
बाहुभिः ॥ भूयःप्राणैःसमालिङ्ग्यतत्रैवान्तरधीयत ॥१॥ ततस्तांप्रतिमांविष्णोःसदारोमाधवस्तदा ॥ आराधयामासभक्त्याक्रियायोगैरनुत्तमैः ॥२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सम्भुक्त्वासकलान्भोगान्पुत्रपौत्रसमन्वितः ॥ गङ्गायांमृत्युमासाद्यसदारोमोक्षमाप्तवान् ॥ ३ ॥ पठतिहरिचरित्रैर्युक्तमध्यायमेतंसकलदुरित राशिध्वंसिभिःसर्वभक्त्या ॥ इहजगतिसभुक्त्वासर्वभोगांस्ततोऽन्तेव्रजतिभगवतःश्रीवासुदेवस्यधाम ॥ २०४ ॥ इतिश्रीपाद्मेमहापुराणेक्रिया योगसारेगङ्गासागरसङ्गममाहात्म्यवर्णनंनामषष्ठोऽध्यायः ॥ ६ ॥ श्रीव्यासउवाच ॥ भूयएवप्रवक्ष्यामिगङ्गामाहात्म्यमुत्तमम् ॥ यच्छ्रुत्वा मानवाःसर्वेसर्वान्कामानवाप्नुयुः ॥ १ ॥ येननाचरितंस्नानंगङ्गायांलोकमातरि ॥ आलोक्यतन्मुखंसद्यःकर्त्तव्यंसूर्यदर्शनम् ॥ २ ॥ प्रभातेयः स्मरेद्भक्त्यागङ्गाइत्यक्षरद्वयम् ॥ तस्यनश्यन्तिपापानितमोवदरुणोदये ॥ ३ ॥ नदृष्टायेनसरितांप्रवराजह्नुकन्यका ॥ तस्याग्राह्याणिसर्वाणि अन्नादिसलिलानिच ॥ ४ ॥ शरीराणिपरित्यज्यगङ्गास्नानंप्रकुर्वताम् ॥ गात्राण्यायान्तिपापानिगङ्गास्नानमकुर्वताम् ॥ ५ ॥ अहोचित्रमहोचित्रमहोचित्रमिदंपुनः ॥ पतन्तिनरकेमूढागङ्गानाम्निस्थितेसति ॥ ६ ॥ शिरसायोवहेद्भक्त्यागङ्गाम्भःकणिकामपि ॥ समुच्यतेमहापापैर्ब्रह्महत्यादिभिर्द्विजः ॥ ७ ॥ ललाटेदृश्यतेयस्यगङ्गासैकतमुत्तमम् ॥ सपुण्यात्माजगत्सर्वंपुनातिनात्रसंशयः ॥ ८ ॥ गङ्गातीरात्समायान्तंयःपश्येत्परमादरात् ॥ सोऽश्वमेधसहस्रस्यफलंप्राप्नोतिमानवः ॥ ९ ॥ गङ्गातीरमहंयामित्वमागच्छेतिवक्तियः ॥ तस्यविष्णुः प्रसन्नात्मासर्वान्कामान्प्रयच्छति ॥ १० ॥ गङ्गेतिनामसंस्मृत्ययस्तुकूपजलेऽपिच ॥ करोतिमानवःस्नानंगङ्गास्नानफलंलभेत् ॥ ११ ॥ गङ्गाम्भः शीकरंयस्तुसंमितंसर्षपस्यच ॥ प्राप्नोतिमृत्युकालेतुसगच्छेत्परमंपदम् ॥ १२ ॥ अत्रैवशृणुविप्रर्षइतिहासंपुरातनम् ॥ यस्यश्रवणमात्रेणगङ्गादेवी प्रसीदति॥१३॥आसीत्त्रेतायुगेविप्रोधर्मस्वोनामधार्मिकः ॥ शान्तोदान्तोदयायुक्तोवेदवेदाङ्गपारगः॥१४॥सत्यवादीक्रोधहीनोहिंसाहीनोजितेन्द्रियः ॥ सर्वभूतहितैषीचयोगाभ्यासरतःसदा ॥१५॥ संसारसागरंतर्तुंसविप्रोवैष्णवोजनः ॥ पूजयामासदेवेशंक्रियायोगेनकेशवम् ॥१६॥ कदाचित्प्राप्य पुण्याहंसचविप्रर्षभोद्विज॥जगमाजाह्नवीतीरंमुमुक्षुःस्नानहेतवे॥१७॥ तत्रगङ्गाम्भसिस्नात्वाकृत्वाचतर्पणादिकम् ॥ गृहंगन्तुंमनश्चक्रेगङ्गाम्भःकर्करीं वहन्॥१८॥तस्मिन्कालेततोविप्रवैश्योरत्नकराह्वयः॥कृत्वावाणिज्यमायातिसकलैःकिङ्करैर्वृतः॥१९॥तस्यैकःकिङ्करोविप्रःकालकल्पइतिस्मृतः॥दण्ड हस्तःसमायातोविहिताखिलपातकः ॥ २०॥ अथवर्त्मश्रमश्रान्तस्तस्यरत्नकरस्यच ॥ सुष्वापैकोबलीवर्दःपथिब्राह्मणसत्तम ॥ २१ ॥ पथिस्वपन्तंतं दृष्ट्वाकालकल्पोवृषंततः ॥दण्डेनताडयामासबहुधात्यन्तनिर्दयः ॥ २२ ॥ तद्दण्डाघातजनितक्रोधेनवृषभेणसः ॥ विषाणाभ्यांसुतीक्ष्णाभ्यांसमुत्थाय विदारितः ॥२३॥ तच्छृङ्गद्वयनिर्भिन्नवक्षाःसगतलोचनः ॥ तत्सन्निधिंदयायुक्तोधर्मस्वस्त्वरितोययौ ॥२४॥ ततःकर्णात्समादायतुलसीपत्रमुत्तमम्॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

गङ्गाम्भःशीकरैर्दिव्यैःसिक्तोऽसौतेनधीमता ॥२५॥ गतप्राणंसमालोक्यसविप्रःपरमार्थवित् ॥ विस्मितःस्वगृहंगन्तुंमनश्चक्रेद्विजोत्तम ॥ २६॥ अथ
गच्छन्पथिप्राज्ञोगङ्गानामानिकीर्तयन् ॥ यमदूतान्ददर्शाग्रेकोटिकोटिसहस्रशः॥२७॥छिन्नैकपादाःकेचिच्चकेचिच्छिन्नैकपाणयः ॥ केऽपिकेऽपिच्छिन्न
कर्णाःकेऽप्येकनयनास्तथा॥२८॥केचिच्चच्छिन्ननासाश्चच्छिन्नजिह्वाश्चकेचन॥भग्नदन्ताःकेऽपिकेऽपिकेऽपिदन्तविवर्जिताः ॥२९॥ केऽपिशोणितधारा
भिर्लिप्तसर्वकलेवराः॥विमुक्तकेशिकाःकेऽपिकेऽपिवक्त्रविवर्जिताः ॥३०॥केऽपिकेऽपितथानग्नाःकेऽपिनिर्भिन्नवक्षसः॥केऽपिजर्जरिताङ्गाश्चमहातीक्ष्णैः
शिलीमुखैः॥३१॥निबद्धाङ्गुलिहस्तश्चदृढपाशैस्तथापरे॥ क्रन्दन्तोव्यथयाकेऽपिपलायनपरायणाः॥३२॥एवंभूतान्यमप्रेष्यान्सविलोक्यद्विजोत्तमः॥
सकम्पहृदयोभीत्याततःस्तब्धइवाभवत् ॥३३॥ अवलम्ब्यततोधैर्यंसविप्रोहरिभक्तिकृत् ॥ इत्यपृच्छन्मधुरयागिरातान्यमकिङ्करान् ॥३४॥ धर्मस्व
उवाच॥केयूयंविकृताकाराःपाशमुद्गरपाणयः ॥दंष्ट्राकरालवदनाअङ्गारसदृशप्रभाः॥३५॥यूयंसर्वेमहावीराज्वलत्पावकलोचनाः ॥ कृतातथापियुष्मा
कमियंकेनापिदुर्गतिः ॥३६॥ यमदूताऊचुः॥यमदूतावयंसर्वेयमाज्ञाहारिणःसदा ॥ सदण्डोऽयंद्विजास्माकंसुमहान्कदनोदयः ॥३७॥ धर्मस्वउवाच॥
अकस्मादागतायूयंमहाबलपराक्रमाः ॥एतावतइयंकेनकथंवादुर्गतिःकृता ॥३८॥यमदूताऊचुः॥भयंमुञ्चद्विजश्रेष्ठवृत्तान्तंसकलंशृणु ॥यथास्माकमिदं
दुःखबभूवात्यन्तदुःसहम्॥३९॥योऽसौवृषेणशृङ्गाभ्यांकालकल्पोविदारितः॥तंनेतुंधर्मराजेनप्रेरिताःकिङ्करावयम् ॥४०॥ तेनाज्ञप्तावयंसर्वेसमस्तायुध
पाणयः॥बद्ध्वातंपापिनांश्रेष्ठंनेतुमत्रसमागताः ॥४१॥ अथासौप्राप्तकालश्चकालकल्पोदुराशयः॥वृषेणहेतुभूतेनविषाणाभ्यांविदारितः॥४२॥सदयेनत्वं
यातत्रगङ्गापानीयसीकरैः ॥ सिक्तःपातकिनांश्रेष्ठोगङ्गानामानिजल्पता ॥४३॥ गङ्गाम्भःकणिकासेकैर्गतकल्मषमप्यमुम्॥बद्ध्वापाशैर्दृढंनेतुमुद्यताहि
यदावयम् ॥४४॥ नेतुंतमपिदेवेशःशरणागतिपालकः ॥ स्वदूतान्प्रेषयामासमहाबलपराक्रमान् ॥ ४५ ॥ केऽपिदूताःसमागत्यततोनारायणाज्ञया ॥
सकोपाःप्राहुरित्यस्मान्पथिब्राह्मणसत्तम ॥४६॥ विष्णुदूताऊचुः ॥ केभवन्तोमहात्मानःकथमेनंमहाशयम् ॥ बद्ध्वानयथपाशेनयूयंवाकस्यकिङ्कराः
॥ ४७ ॥ विहायैनंमहात्मानंपलायध्वंयथासुखम् ॥ नचेच्छिरांसियुष्माकंछेत्स्यामश्चक्रधारया ॥ ४८ ॥ तेषामेतानिवाक्यानिगर्वितानिद्विजोत्तम॥
संश्रुत्याच्युतदूतानांतेऽस्माभिरितिजल्पिताः ॥ ४९ ॥ दण्डपाणेर्वयंदूताःसर्वप्राणाधिपस्यवै ॥ गृहीत्वापापिनांश्रेष्ठंप्रयामःशमनालयम् ॥ ५० ॥ ॥ १९ ॥
यूयंसर्वेमहात्मानस्तुलसीमाल्यभूषिताः ॥ स्फुटपद्मपलाशाक्षावलिनोगरुडध्वजाः ॥ ५१ ॥ दिव्याम्बरधरायूयंमयूरगलसुन्दराः ॥ शङ्खचक्रगदा
पद्मधारिणश्चचतुर्भुजाः ॥ ५२ ॥ केयूयमीदृशाःसर्वेसर्वलक्षणसंयुताः ॥ इमंपातकिनांश्रेष्ठंकथंवानेतुमिच्छथ ॥ ५३ ॥ विष्णुदूताऊचुः ॥ वयंसर्वे

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विष्णुदूताः पुण्यात्मानमिमंनरम् ॥ नेतुमत्रसमायातावैकुण्ठंप्रतिसम्प्रति ॥५४॥ इमंश्रीभगवद्भक्तंस्वजनंगतकल्मषम्॥मुञ्चताशुयमप्रेष्यायदिजीवितु
मिच्छथ ॥ ५५ ॥ भूयस्तेषामिदंवाक्यंश्रुत्वासर्वंगतंद्विज ॥ कोपाद्यदुक्तमस्माभिस्तदाकर्णयकथ्यते ॥५६॥ अयंपापीदुराचारोब्रह्महत्यासहस्रकृत्॥
कृतघ्नश्चैवगोघ्नश्चमित्रघ्नश्चदुराशयः ॥५७॥ मेरुप्रमाणहेमानिहृतानिसुबहूनिच ॥ परदाराहृतानित्यमनेनातिदुरात्मना ॥५८॥ कोटिकोटिसहस्राणि
जन्तूनांविष्णुकिङ्कराः ॥ कृताश्चबहुधाहत्याःस्त्रीहत्याचतथैवच ॥५९॥ अयंन्यासापहरणंस्वमातृगमनंतथा ॥ गोमांसभक्षणंचैवचकारप्रतिवासरम्
॥ ६० ॥ परहिंसाकृतानेनदाहश्चपरवेश्मनः ॥ सभायांपरनिन्दांचविधवागर्भपातनम् ॥६१॥ गृहमायान्तमतिथिंधनलोभेनसत्तमाः ॥ अहन्सुनि
शितैःखड्गैर्निशायांयवनोपमः ॥ ६२ ॥ एतान्यन्यानिपापानिमहान्त्यगणितानिच ॥ चकारनीचोमूढोऽसौनाल्पमात्रंशुभावहम् ॥६३॥ तस्मादयं
महापापीनीयतेयातनागृहम् ॥ ज्ञेयाहिपापिनोदण्ड्याधर्मराजस्यसत्तमाः ॥ ६४ ॥ यूयंवैदेवदेवस्यदूताभगवतोयदि ॥ तदाकथमिमंनेतुंपापिनंश्रेष्ठ
मिच्छथ ॥ ६५ ॥ विष्णुदूताऊचुः ॥ भवद्भिःसत्यमेवोक्तंकोऽपिनास्त्यत्रसंशयः ॥ दण्ड्याःपातकिनःसर्वेजीविताधिपतेःसदा ॥ ६६ ॥ अयंपाप
विनिर्मुक्तोगङ्गाशीकरसेचनात् ॥ तस्मादेनंवयंसर्वेनेष्यामोहरिमन्दिरम् ॥६७॥ तावत्तिष्ठन्तिदेहेषुपातकानिशरीरिणाम् ॥ गङ्गाम्भःशीकरायावन्न
स्पृशन्तिसुदुर्लभाः ॥ ६८ ॥ चन्द्रैककलयासर्वंतिमिरंहन्यतेयथा ॥ गङ्गाम्भःशीकरेणापिपातकंहन्यतेतथा ॥ ६९ ॥ गङ्गानामानिसंस्मृत्य
पापीमुच्येतपातकात् ॥ साक्षात्तत्सलिलंस्पृष्ट्वामुच्यतेऽत्रकिमद्भुतम् ॥७०॥ शीतमप्युदकंगाङ्गंवह्निवत्पापकानने ॥ यथाग्निवत्पद्मवनेशीतंतोयंच
दाहकृत् ॥७१॥ तस्मादयंपुण्यकर्माद्वितीयइवकेशवः ॥ गच्छध्वंशमनप्रेष्यायदिकल्याणमिच्छथ ॥७२॥ तेषांकेशवदूतानांश्रुत्वास्माभिरिदंवचः॥
भूयएवनिरुक्तंयद्विहस्योच्चैःशृणुष्वतत् ॥ ७३ ॥ अहोचित्रमहोचित्रमयंकल्मषमन्दिरम् ॥ गङ्गाम्भःसेचनादेवविमुक्तःसर्वपातकैः ॥ ७४ ॥
स्वहस्तोपार्जितंकर्मशुभंवायदिवाशुभम् ॥ नाभुक्त्वामुच्यतेमर्त्यःकल्पकोटिशतैरपि ॥७५॥ यमाज्ञयानेतुमिमंवयंसर्वेसमागताः ॥ कस्यायंवच
सास्माभिस्त्यज्यतेपापिनांवरः ॥ ७६ ॥ विष्णुदूताऊचुः ॥ यूयंपापधियोनूनंविवेकपरिवर्जिताः ॥ युष्माभिर्जह्नुकन्यायानज्ञायन्तेयतोगुणाः ॥
॥ ७७ ॥ कार्यंवेदेनिषिद्धंयत्तत्पातकमितिस्मृतम् ॥ यद्वेदसंमतंकार्यंतदेवधर्म्यमुच्यते ॥ ७८ ॥ देवोनारायणःसाक्षात्स्वयम्भूरितिशुश्रुम ॥ यथा
विष्णुस्तथागङ्गागङ्गैवसर्वपापहा ॥ ७९ ॥ हरौप्रसन्नेपापानिकुत्रतिष्ठन्तिदेहिनाम् ॥ जन्मान्तरार्जितैःपापैर्गतायूयमिमांगतिम् ॥ ८० ॥ अद्यापि
पापकर्माणःकिमर्थंपापमिच्छथ ॥ गङ्गानिन्दाकरायूयंविष्णुनिन्दाकरास्तथा ॥ ८१ ॥ अतोयुष्मान्हनिष्यामःपापिनश्चक्रधारया ॥ इत्युक्त्वा

CC-0. In Public Domain. Digitization by eGangotri

विष्णुदूतास्तेकोपादरुणलोचनाः ॥ ८२ ॥ चक्रिरेसमरारम्भमस्माभिःसहसत्तम ॥ जीवेशदूताहन्यन्तामितिप्रोचुश्चतेरुषा ॥ ८३ ॥ भूयोभूयो
वदन्तोऽस्मान्निजघ्नुश्चक्रधारया ॥ इत्युक्त्वाविष्णुदूतास्तेसङ्ग्रामेऽत्यन्तदारुणाः ॥ ८४ ॥ सर्वेशङ्खान्समादध्मुःसहसाहृष्टमानसाः ॥ ततोऽस्माकं
सिंहनादैःपयोदस्तनितैरिव ॥ ८५ ॥ कोदण्डानांचविस्तारैर्व्याप्तंविप्रजगत्त्रयम् ॥ अथवृक्षैःशिलाभिश्चतथापर्वतवृष्टिभिः ॥ ८६ ॥ अस्माभिर्वि
ष्णुदूतास्तेबाणैश्चविदलीकृताः ॥ ऋष्टिभिर्भिन्दिपालैश्चबाणैश्चपरिघैस्तथा ॥ ८७ ॥ कुठारैश्छुरिकाभिश्चदण्डैश्चशङ्कुभिस्तथा ॥ खड्गैश्चशक्तिभिश्चैव
निशितैश्चशिलीमुखैः ॥ ८८ ॥ गदाभिश्चक्रधाराभिर्नाराचैश्चसुभीषणैः ॥ एतैरन्यैश्चविषमैरस्त्रैस्तेविष्णुकिङ्कराः ॥ ८९ ॥ निजघ्नुर्बहुधाकोपाद्ब्रज
कल्पैर्महार्णवे ॥ तदास्त्रजर्जराःसर्वेवयंभीत्यापलायिताः ॥ ९० ॥ निपेतुःकेऽपिसङ्ग्रामेगतप्राणाःसहस्रशः ॥ ततोऽस्मांस्तेसमालोक्यपलायनपरा
यणान् ॥ ९१ ॥ मुदाकम्बून्समादध्मुर्बलिनोविष्णुकिङ्कराः ॥ अथच्छित्त्वाद्विजश्रेष्ठकालकल्पस्यबन्धनम् ॥ ९२ ॥ विमानेतंसमारोप्य
जग्मुर्भगवतःपुरम् ॥ गङ्गाशीकरसेकस्यप्रभावेणैवसत्तम ॥ ९३ ॥ जगामहरिसालोक्यंकालकल्पोऽतिपातकी ॥ स्थित्वाकल्पशतंतत्रभुक्त्वा
भोगान्मनोहरान् ॥९४॥ ज्ञानमासाद्यतत्रैवपरंमोक्षंगमिष्यति ॥ गङ्गाप्रभावैरस्माकमेतद्दुःखंगतंप्रभो ॥९५॥ गच्छब्राह्मणभद्रंतेसुप्रीतोनिजमन्दिरम्॥
इत्युक्त्वायमदूतास्तेययुर्यमपुरंद्विज ॥ ९६ ॥ भूयएवसधर्मस्वःप्रीतोगङ्गातटंययौ ॥ गङ्गायांस्नानमाचर्यसर्वलोकस्यमातरि ॥ ९७ ॥ बद्धाञ्जलिः
सविप्रस्तांतुष्टावपरमेश्वरीम् ॥ ९८ ॥ धर्मस्वउवाच ॥ गङ्गेसमस्तजगदम्बचलत्तरङ्गेऽनङ्गादिचारुतरमस्तकपुष्पमाले ॥ कंसारिचारुचरणद्वयरेणु
हन्त्रिभक्त्यानमामिदुरितक्षयकारिणींत्वाम् ॥ ९९ ॥ मातःस्मस्तसुखदेप्रवरेनदीनांव्यासादिविप्रचयगीतगणेगुणाढ्ये ॥ संसारभैरवमहार्णवमध्य
नौकेवन्देतवाङ्घ्रियुगलंदुरितापहारि ॥ १००॥ यस्यास्तवाम्बुकणिकामपिजह्नुकन्येसौदासनामनृपतिर्द्विजकोटिहन्ता ॥ सम्प्राप्यमुक्तिमगमत्त्रिसुरै
रलभ्यांतांत्वांनमामिशिरसावरदेप्रसीद ॥ १ ॥ नारायणाच्युतजनार्दनकृष्णरामगङ्गादिनामगदतोममदेविमातः ॥ संसारपातकनिवारिणिदेहपात
स्त्वद्वारिणीहभवतुत्वदनुग्रहेण ॥ २ ॥ किंवातपोभिरखिलेश्वरिकिंजपैर्वादानैश्चकिंतुरगमेधमुखैश्चकिंवा ॥ त्वन्नीरशीकरमवाप्यसुरैरलभ्यांमुक्तिं
व्रजन्तिमनुजाअतिपापिनोऽपि ॥३ ॥ स्वाहात्वमेवपरमेश्वरियास्वधात्वंगीर्वाणवृन्दपितृलोकसुतृप्तिहेतोः ॥ सत्त्वंरजस्तमइतित्रिगुणस्वरूपांसृष्टिस्थि ॥ १६ ॥
तिप्रलयकारिणिनौमितांत्वाम् ॥ ४ ॥ धत्तेललाटफलकेतवसैकतंयःपुण्ड्रंचदेवितवतीरमृदासदैव ॥ त्वन्नामसर्वरसधामवदेच्चभक्त्यातत्पादरेणु
रखिलोऽस्तुममैवमूर्ध्नि ॥ ५ ॥ त्वद्रोधसित्रिपथगेवसतिंविधायपीत्वाचवारितवपातकनाशकारि ॥ स्मृत्वाचनामतववीचिरसंचदृष्ट्वासंसारबन्धन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हरेममयातुजन्म ॥ ६ ॥ नाकंशुभेसुमहदुद्धसितामनुष्याःकुर्वन्तिभीतिरतिदुर्गमवर्त्ममत्वा ॥ व्यर्थैवसाकिलयतोऽमृतदेत्वदीयंसोपानभूतमुदकं
त्रिदिवप्रयाणे ॥ ७ ॥ पापानिरोगनिकराश्चशरीरदेहेतिष्ठन्तितावदखिलेश्वरिमुक्तिदात्रि ॥ कुर्वन्तियावदमलेषुतवोदकेषुस्नानंनहित्रिपथगेसरितां
प्रधाने ॥ ८ ॥ यस्यास्तवाच्युतविरिञ्चिशिवादयोऽपिशक्रादिदेवनिकरान्नजितुंमहिम्नाम् ॥ पारंपरेपरममोक्षपदप्रदात्रींतांत्वांवदन्तितटिनीमिति
केऽपिमोहात् ॥ ९ ॥ गङ्गेसमस्तसुखदायिनिकिञ्चिदेवजानातितेपशुपतिभर्गवान्महत्त्वम् ॥ यस्मादसौसुमनसांप्रवरोऽतिभक्त्याधत्तेसदैवशिरसा
जगदीश्वरींत्वाम् ॥११० ॥गङ्गेदेविजगन्मातःप्रसीदपरमेश्वरि ॥परिपाहिनमस्तुभ्यंरक्षमांसेवकंस्वकम् ॥११॥परब्रह्मस्वरूपांत्वांसर्वलोकैकमातरम् ॥
शक्नोमिकिमहंस्तोतुंभ्रान्तचित्तोऽत्रमोक्षदे ॥१२॥ व्यासउवाच ॥ इतिस्तुताजगद्धात्रीतेनविप्रेणधीमता ॥ आविर्बभूवसहसागङ्गामूर्तिमतीद्विज ॥
॥ १३ ॥ ददर्शपुरतोगङ्गांद्विभुजांमकरासनाम् ॥ कुन्देन्दुशङ्खधवलांसर्वालङ्कारभूषिताम् ॥ १४ ॥ तांदृष्ट्वापुरतोगङ्गेगङ्गागङ्गेति
कीर्तयन् ॥ ववन्देचरणौतस्याःशिरसालिङ्ग्यमेदिनीम् ॥ १५ ॥ मोहयन्तीस्मितालोकैःसुप्रीतापरमेश्वरी ॥ तमुवाचततोविप्रवरंवृण्विति
जैमिने ॥ १६ ॥ धर्मस्वउवाच ॥ मातस्त्वत्सलिलस्पर्शाद्ब्रह्महापिचमोक्षभाक् ॥ मयात्वंदृश्यतेसाक्षात्साध्यंकिमपरंमम ॥ १७ ॥
तथाप्येकंवरंयाचेत्वत्तीरेपरमेश्वरि ॥ मृत्युर्भवतुमेदेवित्वन्नामस्मरतोमम ॥ १८ ॥ मयाकृतेनस्तोत्रेणयस्त्वांस्तौतिसदेश्वरि ॥ सोऽपिभुक्त्वा
खिलान्कामानन्तेयास्यतिसद्गतिम् ॥ १९ ॥ गङ्गोवाच ॥ अनयाभवतोभक्त्यासन्तुष्टास्मिद्विजोत्तम ॥ शीघ्रंतेकुशलंसर्वंभविष्यतिनसंशयः ॥
॥१२०॥ त्वयाकृतमिदंस्तोत्रंत्रिसन्ध्यंयःपठेन्नरः ॥ तस्याहमपिसन्तुष्टादास्यामिमुक्तिमुत्तमाम् ॥२१॥ व्यासउवाच ॥ इतिदत्त्वावरंतस्मैसादेवीभक्त
वत्सला ॥ धर्मस्वनाम्नेविप्रेन्द्रतत्रैवान्तरधीयत ॥ २२ ॥ सचविप्रोवरंप्राप्यकृतकृत्यइवाभवत् ॥ गङ्गारोधसितत्रैवतस्थौविप्रमनोरमे ॥ २३ ॥ ततः
कालेनमहताविमलेजाह्नवीजले ॥ सुखमृत्युंसमासाद्यजगामपदमुत्तमम् ॥ २४ ॥ कालकल्पोऽपिपापात्मासिक्तोगङ्गाम्बुशीकरैः ॥ प्राप्तवा
नुत्तमंमोक्षमन्येषांकाकथाद्विज ॥ २५ ॥ अनिच्छयापिगाङ्गेयंजलंस्पृष्ट्वाफलंभजेत् ॥ स्पृशतांभक्तिभावेनकिंभवेन्नहिवेद्मितत् ॥ २६ ॥ गङ्गा
समंनास्तितीर्थंभूयोभूयोमयोच्यते ॥ यदम्बुकणिकांस्पृष्ट्वापरमंधामलभ्यते ॥ २७ ॥ येभक्तिभावेनसरिद्वरायाःस्पृशन्तिपाथःकणिकामपीह ॥
तेयान्तिनूनपदमच्युतस्यपापैर्विमुक्ताःसकलैर्महोग्रैः ॥ १२८ ॥ इतिश्रीपाद्मेमहापुराणेक्रियायोगसारेगङ्गाशीकरमाहात्म्येसप्तमोऽध्यायः ॥ ७ ॥
व्यासउवाच ॥ पुनर्वक्ष्यामिविप्रेन्द्रगङ्गामाहात्म्यमुत्तमम् ॥ गङ्गाकथासुधापानंकुरुमुक्तिंयदीच्छसि ॥ १ ॥ दानंदत्तंतेनसर्वंतेनसर्वेमखाःकृताः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तेनप्रपूजितोविष्णुर्यद्भक्तिर्भीष्ममातरि ॥ २ ॥ गङ्गायांधर्मकर्माणिक्रियन्तेयानिकानिच ॥ अक्षयानिभवन्त्यस्यतानिसर्वाणिजैमिने ॥ ३ ॥ वहन्तं
जनमालोक्यगाङ्गेयानिजलानियः ॥भक्त्यागच्छेत्समुत्थायसोऽश्वमेधसहस्रकृत् ॥४॥ गङ्गाजलेष्वागतेषुयोनोत्तिष्ठतिभक्तितः ॥पशुताशाश्वतीतस्य
जन्मजन्मनिजैमिने ॥ ५ ॥ गाङ्गेयंजलमासाद्ययोनगृह्णातिभक्तितः ॥ जन्मकोट्यर्जितंपुण्यंक्षणादेवतुनश्यति ॥६ ॥ गङ्गातीरंजिगमिषुंयस्तुवारयते
द्विज ॥ सकोटिकुलसंयुक्तोरौरवंनरकंव्रजेत् ॥७॥ मूत्रंवाथपुरीषंवागङ्गातीरेकरोतियः ॥ नदृष्टानिष्कृतिस्तस्यकल्पकोटिशतैरपि ॥८॥ श्लेष्माणंवापि
निष्ठीवंदूषिकांवाश्रुवामलम् ॥ गङ्गातीरेत्यजेद्यस्तुसनूनंनारकीभवेत् ॥ ९ ॥ उच्छिष्टंकफकंचैवगङ्गागर्भेचयस्त्यजेत् ॥ सयातिनरकंघोरंब्रह्महत्यां
चविन्दति ॥ १० ॥ गङ्गारोधसियःपापंकुरुतेमूढधीर्नरः ॥ तदक्षयंभवेन्नूनंनान्यतीर्थेषुशाम्यति ॥११॥ अन्यतीर्थेकृतंपापंगङ्गायांचविनश्यति ॥ ग
ङ्गायांयत्कृतंपापंतत्कुत्रापिनशाम्यति ॥ १२ ॥ तस्मात्पापंनकर्तव्यंगङ्गायांशास्त्रकोविदैः ॥ कर्मणामनसावाचाकर्तव्योधर्मसङ्ग्रहः ॥ १३ ॥
नतेदेशानतेशैलानचतानिवनानिच ॥ पापविध्वंसिनीयत्रनतिष्ठत्सुरनिम्नगा ॥ १४ ॥ गङ्गातीरंपरित्यज्यमुहूर्तमपिजैमिने ॥ नचस्थातव्यमन्यत्र
यदिकार्यशतान्यपि ॥१५॥ भिक्षान्नमपिभुक्त्वाचस्थातव्यंजाह्नवीतटे ॥ नचान्यत्रक्षणमपिप्राप्यभूपालतामपि ॥१६॥ सन्त्यज्यदेहंगङ्गायांब्रह्महापि
विमुच्यते ॥ अन्यत्रमुक्तयेनस्यादश्वमेधसहस्रकृत् ॥ १७ ॥ गङ्गातीरेवसन्यस्तुहरिपूजापरोभवेत् ॥ जन्मजन्मान्तरेयेनकदाचिन्नार्चितो
हरिः ॥ १८ ॥ भक्तिर्भवतिनैतस्यगङ्गायांलोकमातरि ॥ श्रूयतांमानवाःसर्वेभूयोभूयोब्रवीम्यहम् ॥ १९ ॥ स्नानंविधायगङ्गायांगम्यतां
परमंपदम् ॥ मृत्युकालेवदेद्यस्तुगङ्गागङ्गेतिमानवः ॥ २० ॥ विमुक्तःपातकैःसर्वैर्दिविदेवयुगान्वसेत् ॥ यस्यगङ्गाकथारम्भोमृत्युकालेभवेद्द्विज॥
॥ २१ ॥ सगच्छेद्विष्णुभवनंगलिताखिलकल्मषः ॥ यस्तुस्मरतिवैप्राज्ञोमृत्युकालेद्विजोत्तम ॥ २२ ॥ गङ्गेतिमुक्तिदंनामतस्यतुष्टोभवेद्धरिः ॥
मृत्युकालेभवेद्यस्तुगङ्गामृत्पुण्ड्रधारकः ॥ २३ ॥ गङ्गास्नायिनमालोक्यत्यजेद्यस्तुकलेवरम् ॥ श्मशानेऽपिद्विजश्रेष्ठसगङ्गामरणंलभेत् ॥२४ ॥
तिष्ठन्त्यस्थीनिगङ्गायांयावत्कालंशरीरिणः ॥ तावत्कल्पसहस्राणिविष्णुलोकेमहीयते ॥ २५ ॥ यस्यमज्जन्तिगङ्गायांभस्मास्थीनिनखानिच ॥
शिरोरुहाण्यपिप्राज्ञःसविष्णोर्भवनेवसेत् ॥ २६ ॥ स्थितेष्वस्थिषुगङ्गायांयत्फलंलभतेनरः ॥ ब्रवीमितत्फलंसर्वंशृणुनान्यमनाद्विज ॥ २७ ॥
एकदाभगवाञ्छक्रोनानालङ्कारभूषितः ॥ क्रीडागृहंययौकामीयुवत्यापद्मगन्धया ॥ २८ ॥ पद्मगन्धारसज्ञासासम्प्राप्तनवयौवना ॥ नानारसप्रदा
नेनचकारसुरसंप्रति ॥ २९ ॥ सपत्न्याःस्वर्णपर्यङ्केतस्याःशिशुमृगीदृशः ॥ प्रीतःपादतलेजिष्णुरुवासस्मरमोहितः ॥ ३० ॥ अथतस्यैस्वयंशक्रो

CC-0. In Public Domain. Digitization by eGangotri

निर्मायस्वर्णवीटिकाम् ॥ ददातिपरमप्रीतस्तद्गुणाकृष्टमानसः ॥ ३१ ॥ एतस्मिन्नेवकालेतुपौलोमीवरसुन्दरी ॥ भूषणैर्भूषितासर्वैःस्वयंतद्गृहमा ययौ ॥ ३२ ॥ दृष्ट्वातथाविधंशक्रंसर्वदेवाधिपंप्रभुम् ॥ भृशंचुकोपपौलोमीप्राहेतिचसुलक्षणा ॥ ३३ ॥ शच्युवाच ॥ देवकिंकुरुषेकान्त त्वंसमस्तसुराधिप ॥ ममदासीस्वरूपायैददासिस्वर्णवीटिकाम् ॥ ३४ ॥ स्पृशन्तित्रिदशाःसर्वेशिरसाचरणौतव ॥ त्वंकथंपद्मगन्धायादास्याः पादतलेप्रभो ॥ ३५ ॥ सुन्दरीकोटिभर्त्तात्वंसमस्तरसवित्प्रभो ॥ कथमेवंविधंकर्मकरोष्यत्यन्तकुत्सितम् ॥ ३६ ॥ निर्गुणेपद्मगन्धेहे दासिदूरंपरिव्रज ॥ त्वमीश्वरीचपर्यङ्केशक्रःपादतलेतव ॥ ३७॥ व्यासउवाच ॥ तयानिर्भर्त्सितासाध्वीपौलोम्याबहुधाततः ॥ उवाचपद्मगन्धा साक्रोधादितिवराङ्गना ॥ ३८ ॥ पद्मगन्धोवाच ॥ गुणंचममदोषंचस्वयंस्वाम्येववेत्तिवै ॥ केनाधिकारेणागत्यत्वंमांनिन्दसिनिर्गुणे ॥ ३९ ॥ अन्येनेत्रद्वयेनापिपश्यन्तिगुणदोषकौ ॥ सहस्रनेत्रैरप्येषनपश्येत्किंदुराशये ॥ ४० ॥ यथादोषोहिलोकानांप्रचरेन्नगुणंतथा ॥ आदौकलङ्कश्चन्द्रस्य दृश्यतेगुणवर्जनैः ॥ ४१ ॥ अनर्थभाषिणीक्रूराकुमूर्तिर्गुणवर्जिता ॥ यदाहंनास्मिगुणिनीभजतुत्वांतदापतिः ॥ ४२ ॥ व्यासउवाच ॥ इत्युक्त्वा पद्मगन्धासाक्रोधात्कोकनदेक्षणा ॥ उत्तस्थौस्वर्णपर्यङ्कात्कुर्वन्तीकरुणंमहत् ॥ ४३ ॥ इन्द्रउवाच ॥ प्रियेप्राणेश्वरिश्रेष्ठेमांविहायक्क गच्छसि ॥ मयाकिमपराद्धंतेममतद्वदसुन्दरि ॥४४॥ कान्तेदासोऽस्म्यहंनूनंदासकर्मकरोमिते ॥ दासपत्नीभवेद्दासीवाक्यंत्वंनश्रृणोषिकिम् ॥४५॥ समुत्थायततःशक्रस्तन्मोहाकुलमानसः ॥ अङ्केनिवेशयामासभूयस्तांवरसुन्दरीम् ॥ ४६ ॥ शच्युवाच ॥ क्रौञ्चित्वञ्जीवनंधन्यंव्यर्थमज्जीवनं ध्रुवम् ॥ त्वंस्वामिसुभगानित्यंदुर्भगाहंवराङ्गने ॥ ४७ ॥ यावत्पुण्यक्षयंक्रौञ्चितत्पुण्यंयास्यतेक्षयम् ॥ क्रौञ्चिवंशसमुत्पन्नादुःखंभूयोऽपि भोक्ष्यसि ॥ ४८ ॥ देवेन्द्रेणसमंतावत्कुरुकेलिंयथासुखम् ॥ कियद्भिर्दिवसैःक्रौञ्चिनभवेत्तवनिर्गुणे ॥ ४९ ॥ अत्यद्भुतंवचस्तस्याःपद्मग न्धानिशम्यसा ॥ द्वन्द्वभावंपरित्यज्यप्रणम्योवाचतांसतीम् ॥ ५० ॥ पद्मगन्धोवाच ॥ पुलोमजेवरारोहेचित्रमेतत्त्वयोदितम् ॥ क्रौञ्चीकथ महंब्रूहिश्रोतुमिच्छामियत्नतः ॥ ५१ ॥ काहंकुत्रस्थिताचापिकथमत्रागतासती ॥ कालैःकियद्भिर्मत्पुण्यंक्षीणत्वंप्रतियास्यति ॥ ५२ ॥ शच्युवाच ॥ पद्मगन्धेपुरात्वंहिक्रौञ्चीपक्षिसमुद्भवा ॥ अमेध्यमामिषंकीटान्भक्षयन्तीक्षितौस्थिता ॥ ५३ ॥ न्यग्रोधतरुरेकोऽस्तिगङ्गातीरेमनो रमे ॥ तत्रनीडंविनिर्मायभवत्यावसतिःकृता ॥ ५४ ॥ एकदाकृष्णसर्पेणतस्मिन्न्यग्रोधपादपे ॥ नीडंप्रविश्यदष्टात्वंसहसापञ्चतांगता ॥ ५५ ॥ क्रव्याणितवसर्वाणिससर्पोऽभक्षयत्क्रुधा ॥ स्थितानितत्रवास्थीनिनिर्मांसानिवरानने ॥ ५६ ॥ कदाचित्पवनैर्भद्रेमहद्भिःसचपातितः ॥ भग्नः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पपातगङ्गायांसमूलोऽपिवराङ्गने ॥ ५७ ॥ गङ्गायांपतितेतस्मिन्न्यग्रोधेधरणीरुहे ॥ गङ्गाजलैःप्लावितानितान्यस्थीनितवोत्तमे ॥ ५८ ॥
यावदस्थीनिगङ्गायांतवतिष्ठन्तितानिच ॥ तावत्त्वंस्वामिसुभगाभविष्यसिसदैवहि ॥ ५९ ॥ इतितेकथितंसर्वंपद्मगन्धेमयाधुना ॥ येनपुण्य
प्रभावेणशक्रोऽपिवशगस्तव ॥ ६० ॥ धन्यातुजाह्नवीदेवीकौश्चीयस्याःप्रसादतः ॥ त्वमस्पृश्यापिचाण्डालैरङ्केस्वपिषिवज्रिणः ॥ ६१ ॥ तेना
पमानितासाध्वीशक्रेणापिपुलोमजा ॥ परिम्लानमुखाम्भोजासाजगामयथागता ॥ ६२ ॥ शक्राङ्कएवसातस्थौपद्मगन्धावराङ्गना ॥ तद्वाक्यं
हृदयेतस्याजागरूकमिवस्थितम् ॥ ६३ ॥ अथैकदासुराधीशःसुप्रीतस्तद्गुणैर्द्विज ॥ वरंवरयसुश्रोणिस्वयंतामित्युवाचह ॥ ६४ ॥ पद्मगन्धो
वाच ॥ त्वंसर्वदेवताधीशोनारीकोटिपतिस्तथा ॥ तथाप्यसिममाधीनःस्वामिन्किमपरैर्वरैः ॥ ६५ ॥ तथापित्वंवरंदित्सुर्यदानूनंसुरोत्तम ॥
कर्मणामनसावाचाप्रतिज्ञांकुरुमत्पुरः ॥ ६६ ॥ इन्द्रउवाच ॥ जीवितंचधनंचैवराज्यंचैवपरिच्छदम् ॥ आज्ञापयकिमेतद्वैतुभ्यंदास्यामिसुन्दरि ॥
॥ ६७ ॥ सत्यंसत्यंपुनःसत्यंसन्देहोनात्रविद्यते ॥ यदीच्छसिमृगीनेत्रेतत्तेदास्याम्यहंध्रुवम् ॥ ६८ ॥ पद्मगन्धोवाच ॥ नूनमेवप्रसन्नोऽसि
यदित्वंत्रिदशेश्वर ॥ जन्ममेहस्तियोनौचभूयोदेहीतिमेवरम् ॥ ६९ ॥ इन्द्रउवाच ॥ कृतप्रतिज्ञःसुश्रोणिवरंतेऽहंददामिवै ॥ किंतुदुःखानि
यातानिवहूनिहृदयेमम ॥ ७० ॥ त्वामदृष्ट्वावरारोहेप्रीतिर्नप्राप्यतेक्षणम् ॥ कथंतेचिरविच्छेदंसोढुंशक्नोमिदुःसहम् ॥ ७१ ॥ यदामय्यनुकम्पास्ति
तवपीनपयोधरे ॥ तदाकियद्दिनंतिष्ठमयासहवराङ्गने ॥ ७२ ॥ ततोदेवाधिराजस्यवदन्तीबहुसम्पदम् ॥ वर्षाणामयुतंतस्थौसादेवनिलयेसती ॥
॥ ७३ ॥ पद्मगन्धोवाच ॥ आज्ञांदेहिसुराधीशसाधितुंसुमनोरथम् ॥ व्रजाम्यहंकर्मभूमिंवन्देपादद्वयंतव ॥ ७४ ॥ इन्द्रउवाच ॥ त्वत्प्रेम
सिन्धुमानेनमयाचन्द्रनिभानने ॥ स्थित्वाकतिदिनंपश्चाद्गमिष्यसियथासुखम् ॥ ७५ ॥ ततस्तुकौतुकागारेतेनसार्धमहर्निशम् ॥ क्रीडन्ती
पद्मगन्धासातस्थौवर्षायुतत्रयम् ॥ ७६ ॥ सुराधीशंततःसेतितदाप्राहमुदान्विता ॥ आदेशंकुरुगच्छामिपृथिवींप्रतिसम्प्रति ॥ ७७ ॥ इन्द्र
उवाच ॥ जाड्यंजहीहिसुश्रोणितिष्ठात्रैवमयासह ॥ त्वांत्यक्तुंनहिशक्नोमिप्राणेभ्योऽपिगरीयसीम् ॥ ७८ ॥ पद्मगन्धोवाच ॥ पुण्यक्षयेसुराधीश
यदायास्याम्यहंध्रुवम् ॥ तदाचिरंतेविच्छेदोभविष्यतिमयासह ॥ ७९ ॥ इच्छाम्यहंगन्तुमद्यपुण्योपार्जनहेतवे ॥ कर्मभूमिमहंगत्वायेनोपायेन
वासव ॥ ८० ॥ तत्करिष्यामिविच्छेदःकदाचित्स्यात्त्वयानमे ॥ ८१ ॥ इन्द्रउवाच ॥ भद्रेत्वयायदानूनंकर्मेदंकर्तुमिच्छितम् ॥ तदा
गच्छपुनःशीघ्रमागमिष्यसिसुन्दरि ॥ ८२ ॥ सहस्रनेत्रविगलद्बाष्पसिक्ततनुस्ततः ॥ दोर्भ्यामालिङ्गयतांशक्रोगच्छेत्याहप्रियंवदन् ॥ ८३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदादेशात्ततःसाध्वीकर्मभूमिंसमागता ॥ जाताचहस्तिनीयोनौभूत्वाजातिस्मराद्विज ॥ ८४ ॥ स्मरन्तीनिजवृत्तान्तंसाक्रियद्भिर्दिनैस्ततः ॥
जगामजाह्नवीतीरंहस्तियोनिसुसम्भवा ॥ ८५ ॥ गङ्गायांस्नानमासाद्यगङ्गाकर्दमभूषिता ॥ गङ्गागङ्गेतिजल्पन्तीह्रदंनिम्नंविवेशसा ॥ ८६ ॥ तस्मि
न्गङ्गाह्रदेगत्वाहस्तिनीपर्वताकृतिः ॥ निजांजातिंस्मरन्तीसाजगामपञ्चतांपुनः ॥ ८७ ॥ तस्याःसाहसमालोक्यहस्तिनींसर्वदेवताः ॥ ववर्षुः
पारिजाताद्यैःकुसुमैरुत्तमैर्मुदा ॥ ८८ ॥ तामानेतुंततःशक्रःसर्वदेवगणैर्वृतः ॥ वेगात्तच्चिरविच्छेदात्कृष्णाङ्गीसुमनाययौ ॥ ८९ ॥ पुष्पकेतां
समालोक्यदिव्यदेहांसुराधिपः ॥ कथयन्निजदुःखानिनिजावासंजगामह ॥ ९० ॥ पुलोमजाचरम्भाचप्रम्लोचाचोर्वशीतथा ॥ सुन्दर्योऽन्याश्च
युवतीस्तस्यास्त्यक्त्वामुदागताः ॥ ९१ ॥ शक्रस्यहृदयोत्साहंतन्वन्तीसावराङ्गना ॥ पुरन्दरपुरेतस्थौसुभगाप्रीतिवल्लभा ॥ ९२ ॥ यस्या
स्तिष्ठन्तिगङ्गायांयावदस्थीनिजैमिने ॥ कुलकोटिशतंतावत्तस्यावासस्सुरालये ॥ ९३ ॥ राजानोदिविराज्येषुयेयेभूतास्तपोबलात् ॥ तेषांतेषां
स्नेहभूमिर्भवत्यमरसुन्दरी ॥९४॥ गङ्गास्थिमज्जनादेवजैमिनेफलमीदृशम् ॥ गङ्गायांत्यजतोदेहंफलंवक्तुंनशक्यते ॥९५॥ मृतंशरीरंगङ्गायांयावद
स्थीनिजैमिने ॥कल्पकोटिशतंतावत्तस्यावासःसुरालये ॥९६॥मृतंशरीरंगङ्गायांस्रोतोभिश्चलितंद्विज ॥ दृश्यतेदेहिनस्तस्यतत्फलंशृणुजैमिने ॥९७॥
स्वर्गेदेवाङ्गनात्रस्तचारुचामरवायुभिः॥वीजितःस्वर्णपर्यङ्केसुप्तस्तिष्ठतिकौतुकी ॥९८॥जाह्नवीसैकतेयस्यशरीरंदृश्यतेमृतम्॥दिवाकरकरैस्तत्तंफलंतस्य
वदाम्यहम् ॥९९॥सुगन्धैश्चन्दनैर्दिव्यैर्लिप्तसर्वकलेवरः ॥दिव्याङ्गनाभिःसहितोदिविक्रीडतिसर्वदा ॥१००॥काकैर्गृध्रैश्चकङ्कैश्चशकुन्तैर्भीष्ममातरि ॥
वपुर्विदलितंयस्यदृश्यतेतत्फलंशृणु ॥ १ ॥ दिविदिव्याङ्गनापीनप्रोत्तुङ्गरुचिरस्तनैः ॥ श्लिष्टवक्षाश्चपर्यङ्केनिद्रातिनित्यमेवसः ॥ २ ॥ पिपीलिका
वेष्टितानिमाक्षिकाभिश्चकीटकैः ॥गङ्गायांयस्यदृश्यन्तेअस्थीनिपतितानिच॥३॥तस्याक्षयंफलंविप्रवदतोमेनिशामय ॥ प्रणमत्त्रिदशव्यूहशिरोमुकुट
भूषणैः ॥ ४ ॥ हतपादरजाःस्वर्गेसचशक्रायतेचिरम् ॥ अनिच्छयापिगङ्गायांयदेहपतनंभवेत् ॥ ५ ॥ सविमुक्तोऽखिलैःपापैर्नरोनारायणो
भवेत् ॥ यस्याङ्गाराश्चदृश्यन्तेगङ्गायांचलिताजलैः ॥ ६ ॥ अङ्गारसङ्ख्ययास्वर्गेतिष्ठेत्कल्पशताधिकम् ॥ सर्वेषामेवपुण्यानांकदाचित्क्षय
ईक्ष्यते ॥ ७ ॥ गङ्गायांपतितेदेहेभवेत्पुण्यक्षयोनहि ॥ बहुनात्रकिमुक्तेननिश्चितंकथ्यतेऽधुना ॥ ८ ॥ गङ्गायांत्यक्तदेहस्यमहिमाज्ञायतेनहि
॥९॥ विषमदुरितराशिनाशिगाङ्गंस्पृशतिनरोभुविभक्तितोजलंयः ॥ जगदुदधिजलंविलङ्घ्यघोरंव्रजतिसपारमपारतुष्टिनावा ॥११०॥ इतिश्रीपाद्मे
महापुराणेक्रियायोगसारेगङ्गामाहात्म्येऽष्टमोऽध्यायः ॥ ८ ॥ जैमिनिरुवाच ॥ भूयएवगुरोब्रूहिगङ्गामाहात्म्यमुत्तमम् ॥ गङ्गाकथामृतंपातुंमाधुर्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्पुनरिष्यते ॥ १ ॥ व्यासउवाच ॥ तदप्यहंब्रवीमित्वागङ्गाभक्तोयतोभवान् ॥ तौपादौसफलौनॄणांजाह्नवीतटगामिनौ ॥ २ ॥ गङ्गाकल्लोल
निनदश्राविणौश्रवणौचतौ ॥ साजिह्वायाचजानातिस्वादुभेदंतदम्भसः ॥ ३ ॥ तेनेत्रेजाह्नवीचारुतरङ्गदर्शनेचये ॥ तल्ललाटमितिप्रोक्तंगङ्गामृत्पुण्ड्र
धारियत् ॥ ४ ॥ तौहस्तौजाह्नवीतीरेहरिपूजापरायणौ ॥ शरीरंसफलंतच्चविमलेजाह्नवीजले ॥ ५ ॥ पतितंयद्द्विजश्रेष्ठचतुर्वर्गफलप्रदे ॥
स्वर्गस्थाःपितरःसर्वेगच्छन्तोजाह्नवीतटे ॥ ६ ॥ सन्दृश्यहृष्टाःशंसन्तिवदन्तइतिजैमिने ॥ तत्पुण्यंकृतमस्माभिःसद्गतिप्राप्तयेपुरा ॥ ७ ॥
भविष्यत्यक्षयंतच्चयतःपुत्रोऽयमीदृशः ॥ अनेनगाङ्गैःसलिलैर्वयंसम्प्रतितर्पिताः ॥ ८ ॥ यास्यामःपरमंधामदुर्लभंयत्सुरैरपि ॥ गङ्गायांयानि
द्रव्याणिदास्यत्यस्माकमात्मजः ॥ ९ ॥ अस्मभ्यंतानिसर्वाणिभविष्यन्त्यक्षयाणिवै ॥ नरकस्थाश्चपितरःसर्वदुःखसमन्विताः ॥ १० ॥ वदन्तीति
सुतंदृष्ट्वागच्छन्तंजाह्नवीतटम् ॥ कृतानियानिपापानिनरकक्लेशदानिवै ॥ ११ ॥ यास्यन्तिसंक्षयंतानिपुत्रस्यापिप्रसादतः ॥ विमुक्तानरकक्लेशै
र्वयंसर्वेसुदुःसहैः ॥ १२ ॥ अथपुत्रप्रसादेनयास्यामःपरमांगतिम् ॥ यात्रांविधाययोमर्त्योगृहमोहान्निवर्तते ॥ १३ ॥ निराशाःपितरस्तस्ययान्ति
सर्वेयथागताः ॥ आमिषंमैथुनंचैवदोलामश्वंगजंतथा ॥ १४ ॥ उपानहंचातपत्रंगङ्गायात्रासुवर्जयेत् ॥ अध्वश्रमोद्भवंदुःखंदुष्करंनहिमन्यते ॥
॥ १५ ॥ गृहेपद्मसुखंतत्रगङ्गास्नानेस्मरेन्नच ॥ असत्यभाषणंचैवपाखण्डसङ्गमेवच ॥ १६ ॥ द्विर्भोजनंचकलहंगङ्गायात्रासुवर्जयेत् ॥ परनिन्दां
चलोभंचगर्वंचक्रोधमत्सरौ ॥ १७ ॥ अत्यन्तहास्यंशोकंचगङ्गायात्रासुवर्जयेत ॥ मञ्चसुप्तमिवात्मानंचिन्तयेद्भूमिशायिनम् ॥ १८ ॥ गङ्गा
नामसुनामानिवदेद्गच्छन्नरःपथि ॥ माहात्म्यंजाह्नवीदेव्याःसर्वपापप्रणाशनम् ॥ १९ ॥ सुखदंमोक्षदंचैवकथयन्पथिगच्छति ॥ गङ्गेदेविजग
न्मातर्देहिसन्दर्शनंमम ॥ २० ॥ वचोभिःकोमलैरेभिःकुर्याच्छ्रमनिवारणम् ॥ हाकथंसदनंत्यक्तमागतंवाकथंमया ॥ २१ ॥ श्रमैरितिवदेद्यस्तु
संपूर्णंतत्फलंनहि ॥ क्वपर्यङ्कःक्वमेपत्नीक्वचमेचसुहृद्गृहम् ॥ २२ ॥ स्वपिमिप्रान्तरेभूमौकथंवाहंसमागतः ॥ धनधान्यादिवस्तूनांकागतिर्वा
गृहेमम ॥ २३ ॥ कियद्भिर्दिवसैर्भूयोगमिष्याम्यहमालयम् ॥ इतिचिन्ताकुलायेचपथिगच्छन्तिमानवाः ॥ २४ ॥ गङ्गास्नानफलंतेषां
सम्पूर्णंनभवेद्द्विज ॥ २५ ॥ गङ्गेगन्तुंप्रतीतीरेयात्रेयंविहितातव ॥ निर्विघ्नांसिद्धिमाप्नोमित्वत्प्रसादात्सरिद्वरे ॥ २६ ॥ इमंमन्त्रंसमुच्चार्य ॥ १९ ॥
यात्राकालेविशेषतः ॥ हर्षितोनिलयाद्गच्छेद्वैष्णवैःसहजैमिने ॥ २७ ॥ नातिवेगेनगन्तव्यंनतथाचशनैःशनैः ॥ गङ्गायात्रासुकर्त्तव्यंनान्यत्कर्म
विचक्षणैः ॥ २८ ॥ गङ्गातीरेप्रयागेतुवाणिज्यप्रमुखानिच ॥ कार्याणिकुरुतेयस्तुतत्पुण्यार्धंविनश्यति ॥ २९ ॥ जन्मजन्मार्जितंपापंस्वल्पंवायदिवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बहु ॥ गङ्गादेवीप्रसादेनसर्वंमेयास्यतिक्षयम् ॥३०॥ इत्युक्त्वापरमप्रीतःप्राज्ञोगङ्गातटंव्रजेत् ॥ दृष्ट्वाचमातरंगङ्गामिमंमन्त्रमुदीरयेत्॥३१॥अद्य मेसफलंजन्मजीवितंचसुजीवितम् ॥ साक्षाद्ब्रह्मस्वरूपांत्वामपश्यमितिचक्षुषा ॥ ३२ ॥ देवित्वद्दर्शनादेवमहापातकिनोमम ॥ विनष्टमभवत्पापं जन्मकोटिसमुद्भवम् ॥३३॥इत्युक्त्वासकलंदेहंनिपात्यपृथिवीतले ॥ प्रणमेज्जाह्नवींदेवींभक्तिभावसमन्वितः ॥३४॥ ततःस्रोतःसमीपेचबद्धाञ्जलिरिमं पुनः॥ पठेन्मन्त्रंभक्तिभावैःसुप्रीतोद्विजसत्तम ॥३५॥ गङ्गेदेविजगद्धात्रिपादाभ्यांसलिलंतव ॥ स्पृशामीत्यपराधंमेप्रसन्नाक्षन्तुमर्हसि ॥३६॥ स्वर्गारोहणसोपानंत्वदीयमुदकंशुभे ॥ अतःस्पृशामिपादाभ्यांगङ्गेदेविनमोनमः॥३७॥ततस्तुमस्तकेधृत्वागाङ्गेयंवारिभक्तितः ॥स्नानार्थंप्रविशेत्स्रोतः प्राज्ञोगङ्गेतिकीर्तयन् ॥ ३८ ॥ त्वत्कर्दमैरतिस्निग्धैःसर्वपापप्रणाशनैः ॥ मयासंलिप्यतेगात्रंमातर्मेहरपातकम् ॥३९॥गङ्गाकर्दमलिप्ताङ्गोगङ्गागङ्गेति कीर्तयन् ॥ सर्वकल्मषनाशिन्यांगङ्गायांस्नानमाचरेत् ॥४०॥ भूयःपूर्वोक्तमन्त्रेणगृहीत्वामृत्तिकांततः ॥ वक्ष्यमाणेनमन्त्रेणगृहीत्वामृत्तिकांपुनः ॥ वक्ष्यमाणेनमन्त्रेणभक्तितःस्नानमाचरेत् ॥ ४१ ॥ ब्रह्मस्वरूपेहेगङ्गेस्नानमाचर्यतेमया ॥ त्वदीयेनिर्मलेतोयेयथोक्तफलदाभव ॥ ४२ ॥ ततो निजेच्छयाविप्रगङ्गायांलोकमातरि ॥ स्नानंसमाचरेत्प्राज्ञोगङ्गांनारायणंस्मरन्॥४३॥एवंस्नात्वातुगङ्गायांगात्रंवस्त्रेणमार्जयेत्॥ परिधेयाम्बराम्बूनि गङ्गास्रोतसिनत्यजेत् ॥ ४४ ॥ नदन्तधावनंकुर्याद्गङ्गागर्भेविचक्षणः ॥ कुर्याच्चेन्मोहतःपुण्यंनगङ्गास्नानजंलभेत् ॥ ४५ ॥ प्रभातेऽन्यत्रतांकृत्वा दन्तकाष्ठादिकक्रियाम्॥रात्रिवासंपरित्यज्यगङ्गायांस्नानमाचरेत् ॥४६॥ बाह्यभूमिमगत्वायोगङ्गायांस्नानमाचरेत्॥गङ्गास्नानफलंसोऽपिसम्पूर्णंचलभेन्नहि ॥ ४७॥ स्नात्वाचगङ्गामृत्पुण्ड्रंस्थानेस्थानेनयेद्बुधः ॥ ततःस्थिरमनाःकुर्याद्विधिनातर्पणादिकम्॥४८॥गाङ्गेयैरुदकैर्यस्तुकुरुतेपितृतर्पणम् ॥ पितरस्तस्यतृप्यन्तिवर्षकोटिशतावधि ॥ ४९॥ गङ्गायांकुरुतेयस्तुपितृश्राद्धंद्विजोत्तम ॥ पितरस्तस्यतिष्ठन्तिसन्तुष्टास्त्रिदशालये ॥ ५० ॥ समाप्य स्नानकर्माणिगाङ्गायांसमुपोषितः ॥ दानंदेवार्चनंचैवजपोऽन्याश्चक्रियास्तथा ॥ ५१ ॥ कृतास्तुयास्तुगङ्गायांक्षयस्तासांनविद्यते ॥ समाप्यस्नान कर्माणिगङ्गायांसमुपोषितः ॥५२॥कृतपञ्चमहायज्ञोगङ्गापूजांसमाचरेत् ॥ गङ्गायाःप्रतिमांदेव्याःश्रीविष्णोःप्रतिमांतथा॥५३॥नालिकेरोदकैर्दिव्यैः स्नापयेद्भक्तितोबुधः ॥जाह्नवीप्रतिमाभावेनालिकेरोदकानिवै॥५४॥निक्षिपेज्जाह्नवीतोयेजाह्नवींहृदिसंस्मरन्॥ दिव्यैर्गन्धैश्चदीपैश्चघृतपूर्णसमुज्ज्वलैः ॥ ५५ ॥ धूपैःसुवासितैश्चैवनानापुष्पैर्मनोहरैः ॥ नानाफलैःसुपक्वैश्चनैवेद्यैरुत्तमैस्तथा ॥ ५६ ॥ पाद्यार्घाचमनीयैश्चताम्बूलैःखादिरान्वितैः ॥ अन्यैरप्युपहारैश्चविशिष्टैर्निजभक्तितः ॥ ५७ ॥ स्तवैर्नानाविधैश्चैवगङ्गांविष्णुंचपूजयेत् ॥ ततःसम्पूजितांदेवींविष्णुंचपरमेश्वरम् ॥ ५८ ॥ अङ्ग

CC-0. In Public Domain. Digitization by eGangotri

प्रदक्षिणंकुर्याद्भक्त्यावारत्रयंबुधः ॥ अथस्थित्वानिराहारोऽपरेऽहनिसरिद्वरे ॥ ५९ ॥ भोक्ष्यामिजह्नुतनयेशरणंमेभवानघे ॥ एवंसङ्कल्प्यमतिमान्क
र्मणामनसागिरा ॥ ६० ॥ रात्रौजागरणंकुर्याज्जितनिद्रोऽतिहर्षितः ॥ अशक्त्याचद्विजश्रेष्ठफलाहारोभवेदधः ॥ ६१ ॥ अन्नमात्रंनभुञ्जीतनचकुर्याद्द्वि
भोजनम् ॥ प्रातर्गङ्गांचविष्णुंचपुनरभ्यर्च्यजैमिने ॥ ६२ ॥ विप्रायदक्षिणांदद्याद्विभवस्यानुरूपतः ॥ अर्चनंजागरंचैवयत्कृतंपुरतस्तव ॥ ६३ ॥
अच्छिद्रमस्तुतत्सर्वंत्वत्प्रसादात्सरिद्वरे ॥ इत्युक्त्वातांनमस्कृत्यकृतनित्यक्रियोद्विजः ॥ ६४ ॥ ततःसबन्धुभिःसार्धंपारणंस्वयमाचरेत् ॥
तीर्थोपवासमेवंयःकुरुतेजाह्नवीतटे ॥ ६५ ॥ तस्यपुण्यफलंवत्सवदतोमेनिशामय ॥ जन्मान्तरार्जितैःपापैर्विमुक्तोविष्णुरूपधृत् ॥ ६६ ॥ विष्णोः
पुरंसमासाद्यविष्णुनासहमोदते ॥ कल्पकोटिसहस्राणिकल्पकोटिशतानिच ॥ ६७ ॥ स्थित्वाविष्णुपुरेसर्वंसुखंभुङ्क्तेसुदुर्लभम् ॥ ततोनारायणादे
शाद्ब्रह्मलोकंसगच्छति ॥ ६८ ॥ ब्रह्मलोकेसुखंभुङ्क्तेदुर्लभंयत्सुरैरपि ॥ तावत्कालंब्रह्मलोकेस्थित्वाब्रह्मक्षयात्ततः ॥ ६९ ॥ महादेवंततोगच्छेद्रथ
मारुह्यशोभनम् ॥ सुखंनानाविधंतत्रभुङ्क्तेऽत्यन्तसुदुर्लभम् ॥ ७० ॥ गाणपत्यमवाप्नोतिकिमन्यैर्बहुभाषितैः ॥ तावत्कालंशिवपुरेस्थित्वावैपुण्यवा
न्नरः ॥ ७१ ॥ इन्द्रलोकंततोगच्छेद्द्वितीयइववासवः ॥ तेनपुण्यात्मनासार्धंवसेदेकासनेततः ॥ ७२ ॥ तत्रभुक्त्वाखिलान्कामान्कल्पकोटिशतावधि ॥
सूर्यलोकंततोगच्छेद्द्वितीयइवभास्करः ॥ ७३ ॥ उषित्वातत्रसुचिरंचन्द्रलोकंततोव्रजेत् ॥ तत्रामृतानिभुक्त्वावैचिरंचन्द्रस्यसन्निधौ ॥ ७४ ॥ पुनरा
गत्यपृथिवींचक्रवर्तीनृपोभवेत् ॥ पालयित्वाचिरंपृथ्वींजित्वावैसकलान्रिपून् ॥ ७५ ॥ आयुषोऽन्तेचगङ्गायांसुखंमृत्युमवाप्नुयात् ॥ भूयःसएवमारुह्य
विमानंसुमहायशाः ॥ ७६ ॥ पुरंभगवतोयातिदैवतैरपिदुर्लभम् ॥ तत्रभुक्त्वाखिलान्भोगान्मन्वन्तरचतुष्टयम् ॥ ७७ ॥ परमंज्ञानमासाद्यदुर्लभं
मोक्षमाप्नुयात् ॥ जाह्नवीतीरयात्रायांदैवाद्यस्यभवेत्पथि ॥ ७८ ॥ पञ्चतासोऽपिपरमंधामगच्छेन्नसंशयः ॥ सत्यधर्मोनामराजाधार्मिकश्चप्रियंवदः ॥
॥ ७९ ॥ त्रेताद्वापरसन्धौचबभूवक्षितिमण्डले ॥ विजयानाममहिषीतस्यभूमिपतेरभूत् ॥ ८० ॥ सुन्दरीशीलयुक्तासापतिसेवापरायणा ॥ सप्तवर्ष
सहस्राणिभुक्त्वावसुमतीमिमाम् ॥ ८१ ॥ कदाचित्प्राप्तकालोऽसौसदारःपञ्चतांगतः ॥ ततोयमभटैर्बद्धौदम्पतीतौभयङ्करैः ॥ ८२ ॥ दुःखप्रदेन
मार्गेणजग्मतुर्यममन्दिरम् ॥ तौदृष्ट्वाधर्मराजोऽपिचित्रगुप्तमुवाचह ॥ ८३ ॥ एतयोःसर्वकर्माणिचित्रगुप्तविचारय ॥ तेनाज्ञप्तश्चित्रगुप्तस्तयोःकर्माणि
जैमिने ॥ मूलाद्विचारयामासप्राहचेतिकृताञ्जलिः ॥ ८४ ॥ चित्रगुप्तउवाच ॥ एतयोःसकलंकर्मशृणुराजन्वदाम्यहम् ॥ शुभंवाप्यशुभंकर्मय
देताभ्यांकृतंभुवि ॥ ८५ ॥ किंचिदस्यानयोपायंवदामितदहंशृणु ॥ एकदात्रासितोव्याघ्रैःकश्चिदेकोमृगःप्रभो ॥८६॥ वनाज्जीवनरक्षार्थमागतोऽस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सभांप्रति ॥ तमायान्तंसमालोक्यभूपोऽयंप्राप्तकौतुकः ॥ ८७ ॥ जघानस्वयमुत्थायखड्गेनतरसामृगम् ॥ जघानहमृगंराजाशरणागतमप्यमुम् ॥
॥ ८८ ॥ तस्मात्सदारोभूपोऽयंदण्डनीयस्त्वयाप्रभो ॥ यावन्तितस्यरोमाणिसंस्थितानिकलेवरे ॥ ८९ ॥ मन्वन्तरसहस्राणिमन्वन्तरशतानिच ॥
कोटिकोटिकुलैर्युक्तोनारकीस्यान्नसंशयः ॥ ९० ॥ शरणागतरक्षांयःप्राणैरपिधनैरपि ॥ कुरुतेयोनरोज्ञानीतस्यपुण्यंनिशामय ॥ ९१ ॥ सर्वपापै
र्विनिर्मुक्तोब्रह्महत्यासुखैरपि ॥ आयुषोऽन्तेव्रजेन्मोक्षंयोगिनामपिदुर्लभम् ॥ ९२ ॥ यमाज्ञयाततोदूतैःसदारोऽसौमहीपतिः ॥ असिपत्रवनेघोरे
स्थापितोऽत्यन्तदुःखदे ॥ ९३ ॥ असितुल्यानिपत्राणियतस्तेषांचशाखिनाम् ॥ असिपत्रवनंप्राहुरतस्तद्वैमनीषिणः ॥ ९४॥ स्थित्वासिपत्रविपिने
युगकोटिशतानिच ॥ सदारोनरकंभेजेव्याघ्रभक्ष्याह्वयंततः ॥ ९५ ॥ निरयंतंप्रविशतिसर्वोपद्रवसंयुतम् ॥ भवेच्चभक्ष्योव्याघ्रेणव्याघ्रभक्ष्यस्ततः
स्मृतः ॥ ९६ ॥ युगकोटिसहस्राणिस्थित्वातत्रसभूपतिः ॥ सदारोऽजनिपापान्तेभेकयोनिंगतःक्षितौ ॥ ९७ ॥ जातिस्मरौततस्तौतु
भेकीभकौसुदुःखितौ ॥ तीरेतस्थतुरेकस्मिन्सततंकीटभोजिनौ ॥ ९८ ॥ अथैकदातेनपथापुण्याहंप्राप्यमानवाः ॥ गच्छन्तिजाह्नवीतीरंतां
स्तौददृशतुर्द्विज ॥ ९९ ॥ भेकउवाच ॥ वर्षाभ्विमोहाद्यत्सर्वंपापंकर्मकृतंमया ॥ अद्यापिकर्मणातेनदुःखमावांनमुञ्चति ॥ १०० ॥
त्यक्त्वाशरीरंगङ्गायांमुक्ताःस्युःपापिनोऽपिच ॥ तथाप्येवंविधंदुःखमनुभूयावहेकथम् ॥ १ ॥ गङ्गायांत्यक्तुमिच्छामिसम्प्रत्येतत्कलेवरम् ॥
कायुक्तिर्ब्रूहितांकान्तेतितीर्षुर्दुःखसागरम् ॥ वर्षाभ्वीतद्वचःश्रुत्वाप्राहेतिविनयान्विता ॥ २ ॥ वर्षाभ्व्युवाच ॥ दुःखंनशक्यतेसोढुंस्वामिन्नेत
द्द्रुतंकुरु ॥ ततस्तौदम्पतीविप्रस्मृत्वागङ्गांशुभप्रदाम् ॥ ३ ॥ सहसाचक्रतुर्यात्रांमरणायोपहर्षितौ ॥ अथैतौपथिगच्छन्तौचिरकालं
बुभुक्षितौ ॥ ४ ॥ अपश्यत्पापकृत्क्ष्वेडःकालसर्पोभयङ्करः ॥ ५ ॥ कालसर्प्पउवाच ॥ दर्दुरौपापिनौचापिप्राप्तकालौयुवांततः ॥
अथनूनंभक्षितव्यौक्षुधितेनमयायुवाम् ॥ ६ ॥ ततस्तावतिसन्त्रस्तौदम्पतीदुःखभागिनौ ॥ इत्यूचतुर्वचोभक्त्त्याकालसर्पंपुरोगतम् ॥ ७ ॥ नास्ति
मृत्युभयंसर्पस्वल्पमप्यावयोर्हृदि ॥ अहमासंपुराराजासत्यधर्माह्वयःक्षितौ ॥ ८ ॥ इयंचविजयानाममहिषीसंस्थितामम ॥ मयादुरात्मनामोहान्नि
हतःशरणंगतः॥९॥ तेनैवकर्मणाभुक्तंचिरंदुःखंयमालये ॥ भोक्तुंस्वकर्मणःशेषंभेकयोनौस्त्रियासह ॥११०॥ सोऽहंजातोऽस्मिपापेनकृतंकर्मनमुञ्चति॥
सत्यमावांजिगमिषूपरमंधामपन्नग ॥११॥ व्रजावोजाह्नवीतीरंशरीरत्यागहेतवे ॥ त्यजाविवेकितांसर्पनरकक्लेशदायिनीम् ॥१२॥ आवांसद्भाद्यभवतो
भविष्यतिसुखंकियत् ॥ आवयोर्हृदयेविष्णुस्तवापिहृदयेहरिः ॥ १३ ॥ अतएवत्वयासार्द्धंशत्रुताकाभुजङ्गम ॥ प्राणिहिंसानकर्तव्याकदापिच

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विचक्षणैः ॥१४॥ क्रियतेऽपिचतद्धिंसांविदधातिस्वयंविधिः ॥ आयुःपुत्राश्चदाराश्चसम्पदश्चयशांसिच ॥१५ ॥ हिंसांदत्त्वामनुष्याणांहरेद्दुष्टोविधिः
स्वयम् ॥ किंजपैःकिंतपोभिर्वाकिंदानैःकिमुचाध्वरैः ॥ १६ ॥ हिंसेतिवर्णद्वितयंयस्यास्तिहृदयेसदा ॥ यःप्राणिहिंसकोमर्त्यःसएवहरिर्हिंसकः ॥
॥ १७ ॥ सर्वप्राणिशरीरस्थोभगवान्कमलापतिः ॥ आत्मानंबहुधासृष्ट्वाभगवान्भूतभावनः ॥ १८ ॥ संसारकौतुकागारेक्रीडेच्छिशुरिवस्वयम् ॥
शरीरिणःशरीरंहिनिलयःपरमात्मनः ॥ १९ ॥ परमात्मास्वयंविष्णुरतोहिंसांविवर्जयेत् ॥ परप्राणविनाशेनचात्मतुष्टिर्विधीयते ॥ १२० ॥
क्षणंस्यादात्मनस्तुष्टिरन्यस्यप्राणसङ्क्षयः ॥ चरित्रमेतल्लोकानामत्यद्भुतमिवक्षितौ ॥ २१ ॥ आत्मतृप्तिंप्रकुर्वन्तिपरंहत्वातियत्नतः ॥
धीमान्नात्मपरिज्ञानंकदाचित्कुरुतेनहि ॥२२॥ अहंविष्णुरसौविष्णुरितिचेतसिभावयेत् ॥ परदुःखेनयोदुःखीसुखीयश्चपरश्रिया ॥२३॥ संसारेऽस्मि
न्सविज्ञेयःसाक्षादेवहरिःस्वयम् ॥ धिगस्तुतत्सुखंनृणांमोहवञ्चितचेतसाम् ॥ २४ ॥ परहिंसाविधानेनसुखंयत्स्याद्भुजङ्गम ॥ सुखानिवापि
दुःखानिदीयन्तेयानिजन्तवे ॥ २५ ॥ अचिरेणैवतानिस्मलभन्तेभुविमानवाः ॥ तस्माद्धिंसांपरित्यज्यभुजङ्गमसुरवीभव ॥ २६ ॥ त्वयि
प्रपन्नेगच्छावःपारंदुःखमहोदधेः ॥ २७ ॥ सर्पउवाच ॥ यदिस्यात्परहिंसायांनूनंमेनातिपातकम् ॥ तदाकथमहोसृष्टौवेधसाभक्ष्यभक्षकौ ॥ २८ ॥
परहिंसानकर्तव्यासत्यमेतत्त्वयोदितम् ॥ किंतुसर्वेषुभक्ष्येषुहिंसासम्भाव्यतेनहि ॥ २९ ॥ नारायणोविश्वरूपःसत्यमेतन्नसंशयः ॥ भक्ष्यभक्षक
भावेनस्वयमेवससर्जह॥१३०॥ सृजतिस्वयमात्मानमात्मानंरक्षतिस्वयम् ॥ आत्मानंस्वयमेवात्तिसृष्टिरेवंविधाहरेः॥३१॥शक्तोऽहंकिंयुवांहन्तुंकाल
रूपीस्वयंविधिः ॥ सम्प्रतिप्रेषयामासकार्येऽस्मिन्मांस्वयंहरिः ॥ ३२ ॥ युवांससर्जयोदेवोयश्चरक्षतिवांसदा ॥ कालरूपीसएवाद्यहन्तिहेतुंविधाय
माम् ॥ ३३ ॥ व्यासउवाच ॥ ततस्तेनभुजङ्गेनभक्षितौतौचदम्पती ॥ गङ्गागङ्गेतिजल्पन्तौमहत्याक्षुधयापथि ॥ ३४ ॥ जाह्नवीतीरयात्रायांपादे
पादेचताविमौ ॥ अश्वमेधाख्ययज्ञानांप्राप्तवन्तौमहाफलम् ॥ ३५ ॥ तस्मादेनौमहात्मानौबह्वश्वमेधधारिणौ ॥ एतयोःसदृशोनास्तिशत
क्रतुरहंयतः॥३६॥निजाधिकारेणैवान्यमवलम्ब्यपुरन्दरः॥अर्घ्यहस्तःपादचारीवृतोदेवैःसमाययौ ॥३७॥ अथरम्भोवर्शीचैवसुन्दर्योऽन्याश्चहर्षिताः॥
अन्योन्यंकथयामासुर्निजयौवनगर्विताः ॥ ३८ ॥ अयंपुण्यात्मनांश्रेष्ठोरसज्ञोऽत्यन्तसुन्दरः ॥ आयातोऽमुंकरिष्यामिस्ववशंसेवितैःस्वकैः ॥३९॥ ॥ २१ ॥
काचित्कांचिद्वदत्येतज्जानामिसकलांकलाम् ॥ अतएवभविष्यामिकान्ताहमस्यभूपतेः ॥१४०॥ काचित्कांचिदितिब्रूयात्तेशक्रोऽपिवशोमम ॥ कि
मत्रचित्रंवशगोभूपालोऽयंभविष्यति॥४१॥ भर्त्तामभायंचपतिर्ममायंस्वामीममायंममनाथएषः॥ इतीवसर्वाःपरमप्रमोदैर्वदन्तिनार्योऽखिलसद्गुणज्ञाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ४२॥ उच्चावचंविप्रनिशम्यतासांजगादकाचिद्गुणिनीरसज्ञा ॥ सौदास्यकान्तांनृपतिःस्वयंयांभजत्ययंकिंकलहेननार्यः ॥४३ ॥ सुन्दर्यस्तास्ततः
सर्वाःसन्त्यज्यकलहंद्विज ॥ आजग्मुर्हृदयोत्साहैःसर्वाभरणभूषिताः ॥ ४४ ॥ अथतंनृपतिश्रेष्ठंसदारंगतकल्मषम् ॥ पाद्याद्यैःपूजयामासुःप्राहेतिच
पुरन्दरः ॥ ४५ ॥ रथेनिवेशयामासपुष्पकेस्त्रीसमन्वितम् ॥ भेरीमृदङ्गधुरीडिण्डिमानकनिस्वनैः ॥ ४६ ॥ करकङ्कणनादैश्चकरतालस्वनैस्तथा ॥
जयशब्दैश्चदेवानांनाकःशब्दमयोऽभवत् ॥ ४७ ॥ देवाङ्गनाचारुहस्तश्वेतचामरमारुतैः ॥ विजितःसरथारूढःसदारस्त्रिदिवंययौ ॥ ४८ ॥ ततःशक्रः
स्वयंतस्मैसत्यधर्मायभूभुजे ॥ दत्तवान्निजासनार्धंशुभोवैक्षयशङ्कया ॥ ४९॥ शक्रेणसहभूपोऽसौवसन्नेकासनेसदा ॥ शक्रत्वमकरोत्स्वर्गेकेशवस्यानु
कम्पया ॥१५०॥ युगकोटिसहस्राणिदिविभुक्त्वाखिलंसुखम् ॥ रथमारुह्यवैकुण्ठंययौभगवदाज्ञया ॥५१॥ तत्रमन्वन्तरंभुक्त्वासर्वभोगंमनोरमम्॥
परमंज्ञानमासाद्यसदारोमोक्षमाप्तवान् ॥ ५२ ॥ जाह्नवीतीरयात्रायांशरीरंत्यजतःपथि ॥ फलमेवंविधंविप्रमयासर्वंप्रकीर्तितम् ॥ ५३ ॥
जाह्नवीतीरगमनेमुनिभिस्तत्त्वदर्शिभिः ॥ नकालनियमःप्रोक्तोनारदाद्यैर्महर्षिभिः ॥५४ ॥ यदायदाद्विजश्रेष्ठगङ्गायांस्नानमाचरेत ॥ तदातदाऽक्षयं
पुण्यंलभतेमानवोध्रुवम् ॥५५॥ गङ्गासर्वाणिपापानिनाशयेदितिनिश्चयः ॥ कुर्यात्पुनःपुनःपापंनचगङ्गापुनातितम्॥५६॥पापबुद्धिंपरित्यज्यगङ्गा
यांलोकमातरि ॥ स्नानंकुरुतहेलोकायदिसद्गतिमिच्छथ ॥५७॥ यत्पुण्यंगङ्गास्नानात्तुमानवानांभवेद्द्विज ॥ तत्पुण्यंप्राप्यतेविप्रकर्मभिःकैःसुदुस्तरैः
॥ ५८॥ आसाराणांभूमिरेणोःसङ्ख्यांकर्तुंतुशक्यते ॥ भागीरथीगुणास्तेनशक्यावक्तुंनचद्विज ॥ ५९ ॥विचार्यसर्वशास्त्राणित्वदीयानिमयोच्यते॥
गङ्गाम्भसिसकृत्स्नात्वामोक्षमाप्नोतिमानवः ॥ १६० ॥ स्नानंकूपजलेऽपियस्तुकुरुतगङ्गाविचिन्त्यप्रभुंदेवानांसकलार्तिशोकदुरितत्रासौघविध्वं
सिनीम् ॥ मुक्तःसोऽपिसमस्तपातकचयैर्गोविप्रहत्यादिभिर्गच्छेद्विष्णुपुरंसमस्तसुखदंगङ्गाप्रसादाद्द्विज ॥ १६१ ॥ इतिश्रीपाद्मेमहापुराणेक्रियायोग
सारेगङ्गामाहात्म्येनवमोऽध्यायः॥९॥ जैमिनिरुवाच ॥माहात्म्यमेतद्गङ्गायास्त्वत्प्रसादाच्छ्रुतंमया ॥ इदानींश्रोतुमिच्छामिविष्णुपूजाफलंगुरो ॥१॥
व्यासउवाच ॥ शृणुलक्ष्मीपतेर्वत्ससपर्याफलमुत्तमम् ॥ यच्छ्रुत्वामानवाःसर्वेलभन्तेज्ञानमुत्तमम् ॥ २ ॥ विप्रद्वादशमासेषुमाघादिषुसनातनः ॥
पूजितव्योविधानैर्यैःशृणुतानिवदाम्यहम् ॥ ३॥ माघेमासिसमायातेसर्वमासोत्तमेशुभे ॥ आमिषंमैथुनंचैवसन्त्यजेद्वैष्णवोत्तमः ॥ ४ ॥ प्रातःस्नायी
भवेन्नित्यंतैलान्यपिचवर्जयेत् ॥ द्विर्भोजनंपरान्नंचमाघेमासिपरित्यजेत् ॥ ५ ॥ प्रातःशुक्लाम्बरधरःकृतपञ्चमहाध्वरः ॥ सपर्यामारभेद्विष्णोः
स्थिरचित्तोहिमानवः ॥ ६ ॥ ईषदुष्णजलैःशुद्धैःस्नापयेद्विष्णुमव्ययम् ॥ अतिश्लक्ष्णैश्चन्दनैश्चविष्णोरङ्गानिलेपयेत् ॥ ७ ॥ पूजयेज्जगदीशस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवदेवस्यचक्रिणः ॥ प्रक्षालितानिपात्राणिजलहीनानिकारयेत् ॥ ८ ॥ स्नापयित्वाजगन्नाथमीषदुष्णेनवारिणा ॥ प्रोक्षितव्यंतच्छरीरंदिव्यवस्त्रेण
यत्नतः ॥ ९ ॥ सलिलैरीषदुष्णैश्चप्रस्नापयतिकेशवम् ॥ माघेमासिद्विजश्रेष्ठफलंतस्यमयोच्यते ॥ १० ॥ विमुक्तःपातकैःसर्वैर्जन्मजन्मान्तरा
जितैः ॥ इहभुङ्क्तेसुखंसर्वंशेषेयातिहरेर्गृहम् ॥ ११ ॥ यत्नात्प्रक्षाल्यपात्राणिकृत्वाशुद्धानिवारिभिः ॥ यःपूजयेज्जगन्नाथंतस्यपुण्यंनिशामय ॥१२ ॥
इहभुक्त्वाखिलान्कामान्सर्वव्याधिविवर्जितः ॥ अन्तेयुगसहस्राणितिष्ठेत्केशवमन्दिरे ॥ १३ ॥ प्रभातेविश्वसन्ध्यायांपुरतश्चक्रपाणिनः ॥ ज्वलन्तं
स्थापयेद्वह्निंनिर्धूमंवैष्णवोजनः ॥ १४ ॥ शीतस्यवारणर्थायसायंप्रातश्चवैष्णवः ॥ माघेविष्णवग्रतोवह्निंज्वालयेत्तत्फलंशृणु ॥ १५ ॥ इह
भुक्त्वाखिलान्कामान्पुत्रपौत्रसमन्वितः ॥ अन्तेविष्णुपुरंयातिदेवतैरपिदुर्लभम् ॥ १६ ॥ यथैवात्मातथाविष्णुःसन्देहोनात्रविद्यते ॥ स्वपश्च
देवदेवस्यपर्यङ्केकेशवस्यनु ॥१७ ॥ यथात्मनस्तथामर्त्यःकुर्याच्छीतनिवारणम् ॥ क्षीरेणस्नापयेद्यस्तुमाघेमासिजनार्दनम् ॥ १८॥ तस्मैदेवोत्तमो
विष्णुःसन्तुष्टोनददातिकिम् ॥ तथाशीतक्षयंकुर्याद्दिव्यवस्त्रेणचक्रिणः ॥ १९ ॥ यःपूजयेत्सकृन्माघेस्नापयित्वाचतुर्भुजम् ॥ नालिकेरोदकैर्दुग्धैः
फलंतस्यवदाम्यहम् ॥ २० ॥ नरकाब्धौमज्जमानान्दुस्तरेस्वेनकर्मणा ॥ उद्धृत्यकोटिपुरुषान्सयातिचक्रिणःपदम् ॥ २१ ॥ माघेमासेचशुक्लायां
पञ्चम्यांद्विजसत्तम ॥ एकादश्यांचसप्तम्यांहरिपूजाविशेषतः ॥ २२ ॥ दातव्योदेवदेवायसपद्मायमुरारये ॥ पायसोधूपसहितोमाघेमासिदिनेदिने॥
॥ २३ ॥ सधूपपायसंयस्तुमाघेयच्छतिचक्रिणे ॥ तस्यपुण्यफलंवच्मिशृणुवैष्णवजैमिने ॥ २४ ॥ अन्तेविष्णुपुरंगत्वामन्वतरचतुष्टयम् ॥ भुङ्क्ते
मनोरमान्भोगान्प्रसादाच्चक्रपाणिनः ॥ २५ ॥ पुनरागत्यधरणींचक्रवर्तीनृपोभवेत् ॥ भुङ्क्तेचभोगंसुचिरंमृतोयातिहरेर्गृहम् ॥ २६ ॥ पञ्चम्यां
वापिसप्तम्यामेकादश्यांचजैमिने ॥ अशक्तोवैष्णवोदद्यात्परमान्नंमुरारये ॥ २७॥ कृष्णपक्षाद्द्विजश्रेष्ठशुक्लपक्षेविशेषतः ॥ शुक्लपक्षेतिथिष्वेषु
दद्यादन्नंमुरारये ॥ २८ ॥ एकाहमपियोमाघेविष्णवेदैत्यजिष्णवे ॥ सापूपंपायसंदद्यान्नतस्यदुर्लभोहरिः ॥ २९ ॥ यत्किञ्चिद्द्विजतुष्ट्यर्थंमाघे
मासिप्रदीयते ॥ तदक्षयंभवेत्पुंसःकोऽपिनास्त्यत्रसंशयः ॥ ३० ॥ माघेमासिकृतंकर्मशुभंवाशुभमेववा ॥ तस्यनास्तिक्षयंविप्रमन्वन्तरशतै
रपि ॥३१॥ माघेचम्पकपुष्पेणयोऽर्चयेत्कमलापतिम् ॥ सगच्छेत्परमंधामविमुक्तःसर्वपातकैः ॥३२॥ यावन्तिस्वर्णपुष्पाणिदीयन्तेचक्रपाणये॥
तावद्युगसहस्राणिस्थीयतेविष्णुमन्दिरे ॥ ३३ ॥ मेरुतुल्यसुवर्णानिदत्त्वाभवतियत्फलम् ॥ एकेनस्वर्णपुष्पेणहरिंसंपूज्यतत्फलम् ॥ ३४ ॥ सुवर्ण
पुष्पंविप्रेन्द्रसर्वदाकेशवप्रियम् ॥ माघेमासिविशेषेणपवित्रंकेशवप्रियम् ॥ ३५ ॥ सुवर्णकुसुमैर्दिव्यैर्येननाराधितोहरिः ॥ रत्नैर्हीनःसुवर्णाद्यै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सभवेज्जन्मजन्मनि ॥ ३६ ॥ फलंचम्पकपुष्पस्यब्रवीम्यहंविशेषतः ॥ आकर्णयद्विजश्रेष्ठसेतिहासंमनुत्तमम् ॥ ३७ ॥ सुवर्णोनामभूपालोबलवान्सर्व
शास्त्रवित् ॥ आर्यावर्तेषुसर्वेषुबभूवविप्रवर्चसा ॥ ३८ ॥ राजश्रियाविद्ययाचवयसाचसभूपतिः ॥ अतिप्रमत्तोविप्रर्षेसदापापरतोऽभवत् ॥
॥ ३९ ॥ पाखण्डमन्त्रिणांवाक्यैर्विनादोषैरपिद्विज ॥ धनलोभात्तेनराज्ञादण्डयन्तेसाधवोजनाः ॥ ४० ॥ अन्यायोपार्जितंवित्तंगीतवाद्यादि
भिर्वृतः ॥ समस्तंनाशयामासयज्ञदानविवर्जितः ॥ ४१ ॥ नज्ञातिपोषणंचक्रेनदेवद्विजभोजनम् ॥ नचयाचकसन्तुष्टिंसर्वदापापमोहितः ॥ ४२ ॥
नचकारातिथेःपूजांसदापापपरायणः ॥ ययौचमन्दिरान्नित्यंसभूपःपापमन्दिरः ॥ ४३ ॥ कृतानितेनपापानियान्यन्यान्यविवेकिनाम् ॥ अपिवर्ष
शतैःशक्तःसङ्ख्यातुंजनितानिकिम् ॥ ४४ ॥ एकदासमहीपालःकामेनपरिमोहितः ॥ जगामवेश्यानिलयंनिशीथेदुरिताशयः ॥ ४५ ॥ तमायान्तं
ततोदृष्ट्वाभूपालमुज्ज्वलाह्वया ॥ सहसोत्थायपर्यङ्काच्चक्रेतत्पादवन्दनम् ॥ ४६ ॥ प्रक्षाल्यतत्पादयुगंभृङ्गारसलिलैश्चसा ॥ मञ्चेनिवेशयामास
दोर्भ्यामालिङ्ग्यतंनृपम् ॥ ४७ ॥ तत्प्रेमामृतधाराभिःसिक्तोऽसौपृथिवीपतिः ॥ तस्मिन्नुवासपर्यङ्केतयासहकुतूहली ॥ ४८ ॥ ततःसागणिका
प्रीत्याहसन्तीनवयौवना ॥ ददौचम्पकपुष्पाणितस्मैभूमिभुजेस्वयम् ॥ ४९ ॥ पुष्पमालापुष्पमेकंतस्माद्भूपतिहस्ततः ॥ पपातधरणीपृष्ठे
गन्धव्याप्तदिगन्तरम् ॥ ५० ॥ तच्च्युतंकुसुमंदृष्ट्वासराजात्यन्तसम्भ्रमात् ॥ नमोनारायणायेतिजगादोङ्कारपूर्वकम् ॥ ५१ ॥ नारायणायेति
वाक्यात्सर्वाणिपातकानिच ॥ स्वर्णपुष्पप्रदानेनतस्यनष्टानिभूभुजः ॥ ५२ ॥ ग्रामीणाअथसर्वेऽपिसमागत्यातिदुर्जये ॥ तस्यामेवनिशायांतं
जघ्नुर्वेश्यागृहेस्थितम् ॥ ५३ ॥ नेतुंतमथभूपालंसर्वपातकिनांवरम् ॥ किङ्करान्प्रेषयामासक्रुद्धोवैवस्वतोभृशम् ॥ ५४ ॥ तेनाज्ञप्तास्ततोदूता
पाशमुद्गरपाणयः ॥ अतिवेगात्समायाताःक्रोधसंरक्तलोचनाः ॥ ५५ ॥ उद्यमंचक्रिरेनेतुंयमदूताःस्वमालयम् ॥ ततोनारायणप्रेष्याःशङ्ख
चक्रगदाधराः ॥ ५६ ॥ आयातागरुडारूढास्तंनेतुंपृथिवीपतिम् ॥ पाशेनयन्त्रितंदृष्ट्वातंभूपंविष्णुकिङ्कराः ॥ ५७ ॥ जघ्नुश्चक्रैर्गदा
भिश्चयमदूतान्महाबलाः ॥ समारोप्यरथेदिव्येशङ्खान्दध्मुरनुत्तमान् ॥ ५८ ॥ तथाराजारथारूढस्तुलसीमाल्यभूषितः ॥ पीतकौशेयवासाश्चस्वर्णाल
ङ्कारभूषितः ॥ ५९ ॥ स्तूयमानोमुनिगणैर्वेदवेदाङ्गपारगैः ॥ विष्णुदूतैःपरिवृतोहरेःसालोक्यमाययौ ॥ ६० ॥ अथोत्थायस्वयंविष्णुश्चतुर्भिर्दीर्घ
बाहुभिः ॥ तमालिङ्गितवान्भूपंप्रोक्तवांश्चद्विजोत्तम ॥ ६१ ॥ श्रीभगवानुवाच ॥ नृपतेकुशलंब्रूहिसर्वपुण्यात्मनांवर ॥ किमस्तिसाध्यंभवतस्तदाज्ञापय
संप्रति ॥ ६२ ॥ नमोनारायणायेतिवारैकमपियोवदेत् ॥ नित्यंतस्यानुपाल्योऽहंसमेभ्रातासमेपिता ॥ ६३ ॥ नारायणेतिमन्त्रामकदाचिद्यःस्मरेन्नरः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साधयाम्यखिलंतस्यपितुःपुत्रइवेप्सितम् ॥ ६४ ॥ भक्तोऽसिनृपतिश्रेष्ठतस्मान्निजमनोरथम् ॥ प्रकाशयाद्भुतंतातकिंतेदास्यामिचाधुना ॥ ६५ ॥
राजोवाच ॥ सर्वमेवदयासिन्धोत्वयादत्तंनसंशयः ॥ पापिनापिमयाप्राप्तंतवस्थानंसुदुर्लभम् ॥ ६६ ॥ तस्यानेनतुवाक्येनप्रसन्नःकमलापतिः ॥
स्नेहान्निवेशयामासभूपालंतन्निशामय ॥६७ ॥ ततःसुवर्णालङ्कारैर्विश्वकर्मविनिर्मितैः ॥ चकारमण्डलंतस्यस्वयमेवदयामयः ॥ ६८ ॥ अथनाना
विधैर्भक्ष्यैर्दिव्यैरपिसुदुर्लभैः ॥ तोषितःसमहीपालोविष्णुनातिसहिष्णुना ॥ ६९ ॥ एवंप्रतिदिनंतस्थौसराजाविष्णुमन्दिरे ॥ मन्वन्तरसहस्राणि
नववर्षशतानिच ॥ ७० ॥ प्रजानांपालनंचक्रेसराजाधर्मतत्परः ॥ .पूजयामाससततंभक्त्यापरमयाहरिः ॥ ७१ ॥ चारुचम्पकपुष्पैश्चनैवेद्यैर्विवि
धैश्चसः ॥ आयुःशेषेसभूपालोमरणंजाह्नवीजले ॥ ७२ ॥ समासाद्ययौमोक्षंप्रसादाच्चक्रपाणिनः ॥ ७३ ॥ व्यासउवाच ॥ विप्रचम्पकपुष्पस्यप्रभा
वोऽयंप्रकीर्तितः ॥ चम्पकैर्हरिमभ्यर्च्यमुक्ताःस्युःपापिनोजनाः ॥ ७४ ॥ स्फुटचम्पकपुष्पेणपूजितोभगवान्हरिः ॥ अचिरेणैवविप्रर्षेददाति
परमंपदम् ॥ ७५ ॥ येयजन्तिपरात्मानमिच्छयावाप्यनिच्छया ॥ तेऽपियान्तिपरंधामविमुक्ताःसर्वपातकैः ॥ ७६ ॥ हरौप्रसन्नेदुरितीनकोऽपि
यतःसराजाकृतपातकोऽपि ॥ जगाममोक्षंकृपयामुरारेर्विश्वार्णवंनिम्नमिमंवितीर्य ॥ ७७ ॥ दिव्यैःसुगन्धैःकनकप्रसूनैर्नारायणंपद्मदलायताक्षम् ॥
भक्त्यायजेद्यःपरमादरेणमर्त्योव्रजेत्तंतुविहायपापम् ॥ ७८ ॥ इतिश्रीपाद्मेमहापुराणेक्रियायोगसारेचम्पकपुष्पमहिमानामदशमोऽध्यायः ॥ १० ॥
व्यासउवाच ॥ जैमिनेविधिनायेनपूजितव्योहरिःसदा ॥ तमहंवच्मिविप्रर्षेशृणुवत्ससमाहितः ॥ १ ॥ कल्यउत्थायपर्यङ्काद्गृहीत्वापात्रमम्भसाम् ॥
बहिर्देशंव्रजेत्प्राज्ञःशीर्षमाच्छाद्यवाससा ॥ २ ॥ तत्रोदीच्यांदिशिमौनीयज्ञसूत्राणिकर्णयोः ॥ कृत्वोपविष्टःप्राज्ञस्तुमलमूत्रंविसर्जयेत् ॥ ३ ॥ देवता
यतनेमार्गेगोष्ठेषुचत्वरेषुच ॥ रथ्यायांकृष्टभूमौचदर्भमूलेतथाङ्गणे ॥ ४ ॥ तटिनीपुलिनेचैत्यवृक्षमूलेतथावने ॥ तडागवापीगर्भेषुमलंमूत्रंचनत्य
जेत् ॥ ५ ॥ रविंचन्द्रमसंचैवद्विजान्गाश्चदिशोदश ॥ मलंमूत्रंत्यजेद्यावत्तावत्प्राज्ञोनपश्यति ॥ ६ ॥ खनितांमूषिकाद्यैश्चबिलाभ्यन्तरवार्तिनीम् ॥
फालकृष्टांमृदंचैवनगृह्णीयाच्छौचहेतवे ॥ ७ ॥ जलाज्जलंसमानीयशौचंकुर्याद्विचक्षणः ॥ पादंजलेषुवैदत्त्वानशौचंकुरुतेबुधः ॥ ८ ॥ दक्षिणाभिमु
खोरात्रौकुर्यात्प्राज्ञोबहिःक्रियाम् ॥ शिरःप्रावृत्यवस्त्रेणततःशौचंसमाचरेत् ॥९॥मृत्तिकैकाप्रदातव्यालिङ्गेतिस्रस्तुवैगुदे ॥ सप्तसव्येकरेप्राज्ञैर्हस्तयोरु
भयोर्दश ॥ १० ॥ पादयोःषट्प्रदातव्यामृत्तिकाचविचक्षणैः ॥ कृतशौचक्रियःप्राज्ञःकुर्याद्दन्तस्यधावनम् ॥ ११ ॥ जिह्वापामार्जनंचैव
दशनाच्छादनादिभिः ॥ दक्षिणाभिमुखोभूत्वापश्चिमाभिमुखस्तथा ॥ १२ ॥ नदन्तधावनंकुर्यात्कुर्याच्चेन्नारकीभवेत् ॥ मध्यमानामिकाभ्यांचवृद्धा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ङ्गुष्ठेनचद्विज ॥ १३॥ दन्तस्यधावनंकुर्यान्नतर्जन्याकदाचन ॥ अश्वत्थवटवृक्षाणांधात्र्याकैथिकयाबुधः ॥१४॥ नदन्तधावनंकुर्यात्तथेन्द्रस्यसुरस्य
च ॥ नित्यंक्रियाफलंतस्यसर्वमेवविनश्यति ॥ १५ ॥ यःस्नानसमयेकुर्याज्जैमिनेदन्तधावनम् ॥ निराशाःपितरोयान्तितस्यदेवाःसुरर्षयः ॥ १६ ॥
दन्तस्यधावनंकुर्याद्योमध्याह्नापराह्णयोः ॥ तस्यपूजांनगृह्णन्तिदेवताःपितरोजलम् ॥ १७ ॥ स्नानकालेपुष्करिण्यांयःकुर्याद्दन्तधावनम् ॥
ततोऽन्त्यःसचाण्डालोयावद्गङ्गांनपश्यति ॥ १८ ॥ भगवत्युदितेसूर्येयःकुर्याद्दन्तधावनम् ॥ तद्दन्तकाष्ठंपितरोभुक्त्वागच्छन्तिदुःखिनः ॥१९॥
उपवासदिनेविप्रपितृश्राद्धदिनेतथा ॥ नतत्फलमवाप्नोतिदन्तधावनकृन्नरः ॥ २० ॥ प्रभातेमार्जयेद्दन्तान्वाससारसनांतथा ॥ कुर्याद्द्वादश
विप्रेन्द्रकञ्छोलानिजलैर्बुधः ॥ २१ ॥ उपवासेपितृश्राद्धेविधिनाऽनेनजैमिने ॥ दन्तधावनकृन्मर्त्यःसंपूर्णंलभतेफलम् ॥ २२ ॥ अनेन
विधिनाकृत्वादीर्घदर्शीबहिष्क्रियाम् ॥ ततोनिजगृहंगत्वारात्रिवस्त्रंपरित्यजेत् ॥ २३ ॥ ततोदेवगृहद्वारेचोपविष्टोबुधःशुचिः ॥ स्मरेन्नारायणं
देवमनन्तंपरमेश्वरम् ॥ २४ ॥ रामश्यामतनोविष्णोनारायणदयामय ॥ जनार्दनजगद्धामपापंमेहरकेशव ॥ २५ ॥ पीताम्बरधरानन्तपद्म
नाभजगन्मय ॥ वामनप्रणतस्येशविभोत्वंशरणंभव ॥ २६ ॥ दामोदरयदुश्रेष्ठश्रीकृष्णकरुणार्णव ॥ कमलेक्षणदेवेन्द्रवासुदेवकृपांकुरु ॥ २७ ॥ गरु
डध्वजगोविन्दविश्वम्भरगदाधर ॥शङ्खपाणेचक्रपाणेपद्महस्तहरापदः ॥२८॥लक्ष्मीविलासवैकुण्ठहृषीकेशसुरोत्तम॥ पुरुषोत्तमकंसारेकैटभारेभयंहर॥
॥ २९ ॥ श्रीपतेश्रीधरविभोश्रीदश्रीकरमाधव ॥ परंब्रह्मपरंधामशरणंमेभवाव्यय ॥ ३० ॥ इत्थंकृत्वाद्विजश्रेष्ठश्रीविष्णुस्मरणंबुधः ॥ बद्धाञ्जलिरिति
ब्रूतेप्रविश्यनिलयंगतः ॥३१॥ ईश्वरश्रीपतेकृष्णदेवकीनन्दनप्रभो ॥ निद्रांमुञ्चजगन्नाथप्रभातसमयोऽभवत् ॥३२॥ अथोत्स्थितमिवप्राज्ञःपर्यङ्केदेवकी
सुतम् ॥ निद्रांत्यक्त्वासलक्ष्मीकंचिन्तयेन्निजचेतसा ॥३३॥ ततःकृतच्छदंदिव्यंपात्रंचजलपूरितम् ॥ मुखप्रक्षालनार्थायदद्यात्कृष्णायवैष्णवः॥३४॥
ईश्वरंवर्तनार्थायसेवन्तेसेकायथा ॥ तथैवमतिमन्तोऽपिसेवन्तेपरमेश्वरम् ॥३५ ॥ यस्तुसेवकरूपेणसेवतेजगदीश्वरम् ॥ अचिरेणैवविप्रर्षेतस्यसिध्यति
वाञ्छितम् ॥३६॥ यथेश्वरस्यसभयाःसेवांकुर्वन्तिचेटकाः ॥ प्राज्ञास्तथैवसेवन्तेसर्वदैवहरिंप्रभुम् ॥ ३७ ॥ निजेच्छयानयाविष्णुंनिर्भयःपूजयेन्नरः ॥
कुसेवकःसएवास्तितदानहिभवेद्द्विज ॥ ३८ ॥ अतएवद्विजश्रेष्ठत्वरयाकमलापतेः ॥ कर्त्तव्यासर्वदासेवापुंसाकैवल्यमिच्छता ॥ ३९ ॥ निर्माल्यं
रात्रिवस्त्रंचगन्धंपर्युषितंतथा ॥ हरेरुत्तारयेदङ्गात्प्रभातेवैष्णवोजनः ॥ ४० ॥ ततोदेवालयेतस्मिन्स्वयमेवहिमार्जयेत् ॥ कुर्याच्छनैःशनैःप्राज्ञः
संमार्जन्यापरिष्क्रियाम् ॥ ४१ ॥ यावन्तोनिलयात्तस्माद्गच्छन्तिरेणवोबहिः ॥ तावन्मन्वन्तरशतंतिष्ठेद्विष्णुगृहेनरः ॥ ४२ ॥ यस्तुसंमार्जनं

Nepal Sanskrit University/Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कुर्याद्ब्रह्महापिहरेर्गृहे ॥ सोऽपियातिपरंधामकिमन्यैर्बहुभाषितैः ॥ ४३॥ तथोपलेपनंकुर्यादूर्णकैर्गोमयैर्द्विज ॥ तस्मिन्विष्णुगृहेप्राज्ञःस्मरेन्नारायणं
प्रभुम् ॥ ४४ ॥ यस्तूपलेपनंकुर्यात्केशवस्यचमन्दिरे ॥ तस्यपुण्यमहंवच्मिसंक्षेपाच्छृणुजैमिने ॥ ४५ ॥ रजांसितत्रयावन्तिविनश्यन्तिद्विजोत्तम ॥
तावत्कल्पसहस्राणितिष्ठेद्विष्णुगृहेसुखी ॥ ४६ ॥ संमार्जनंविष्णुगृहेजनःकृत्वोपलेपनम् ॥ लभतेपरमंधामकिंपूजाफलवित्प्रभोः ॥ ४७ ॥
देशकालविरोधेननशक्नोतियदास्वयम् ॥ तदाविष्णुगृहेचापिधर्मपत्नींनियोजयेत् ॥ ४८ ॥ अथवातनयंभक्तंसुचरित्रंतथात्मनः ॥ भ्रातरंभगिनीं
वापिदेवागारेनियोजयेत् ॥ ४९ ॥ हरेःसपर्यावस्तूनिसप्तधाशुद्धवारिभिः ॥ प्रक्षालयेत्त्रिधावापिस्वयमेवातियत्नतः ॥ ५० ॥ अम्लेनताम्रपात्राणि
कांस्यपात्राणिभस्मना ॥ वह्निनालोहपात्राणिशुध्यन्तिनात्रसंशयः॥५१॥धनाढ्योलोहपात्रस्थैर्यःस्नापयतिवारिभिः ॥नारायणंजगन्नाथंतस्यतुष्टोन
केशवः ॥ ५२ ॥ अज्ञानाद्वापिचेत्तर्हिगङ्गास्नानेनशुद्ध्यति ॥ संपदिब्राह्मणश्रेष्ठकर्त्तव्योनियमःसदा ॥ ५३ ॥ विपत्त्यांनियमोनास्तिशास्त्रेष्विति
विनिश्चयः ॥ यत्नात्प्रक्षालितःशङ्खोयदाभूमिंस्पृशेत्पुनः॥५४॥तदासशङ्खोविप्रेन्द्रशतधौतेनशुध्यति ॥ इत्थंप्रक्षाल्ययत्नेनपूजाद्रव्याणिचक्रिणः
॥ ५५ ॥ गृहीत्वास्नानवस्तूनिस्नानार्थंसरसींव्रजेत् ॥ अकृत्वास्नानकर्माणिगृहमायातियःपुनः ॥ ५६ ॥ तस्मिन्दिनेपितृगणस्तस्यनाप्नोति
तर्पणम् ॥ स्नानार्थंभोजनार्थंवागच्छतोविघ्नकृद्भवेत् ॥ ५७ ॥ यस्तुमोहाद्द्विजश्रेष्ठसनूनंनारकीभवेत् ॥ स्नानार्थंसरसींगत्वामलमूत्रंकरोतियः ॥
॥ ५८ ॥ पितरस्तस्यविण्मूत्रभोजिनःस्युर्नसंशयः ॥ ततःकृत्वाविधानेनस्नानंचतर्पणादिकम् ॥ ५९ ॥ स्वकीयंगृहमागच्छेत्स्मरन्नारायणंबुधः ॥
ततश्चप्राङ्गणेविप्रप्रक्षाल्यचरणद्वयम् ॥ ६० ॥ प्रविशेद्देवतागारंशुचिर्ब्राह्मणसत्तमः ॥ अप्रक्षालितपादोयःप्रविशेन्निलयंजनः ॥ ६१ ॥ संवत्सर
कृतंपुण्यंतस्यनश्यतितत्क्षणात् ॥ स्नानंकृत्वासमागत्यप्राङ्गणेषुविचक्षणः ॥ ६२ ॥ तस्मात्प्रक्षाल्यचरणौप्रविशेद्देवतागृहम् ॥ उपविश्यपादयुग्मं
बुधःसव्येनपाणिना ॥ ६३ ॥ यत्नात्प्रक्षालयेद्विप्रतथापाणिद्वयंपुनः ॥ पादेनपादंविप्रेन्द्रतथादक्षिणपाणिना ॥ ६४ ॥ यश्चप्रक्षालयेन्मूढ
स्तंलक्ष्मीस्त्यजतिध्रुवम् ॥ अथोपविष्टोमतिमान्केशवार्चनमारभेत् ॥ ६५ ॥ अनन्यमानसोभूत्वासर्वकामफलप्रदम् ॥ मृगचर्मासनेशुद्धेव्याघ्र
चर्मासनेऽपिवा ॥ ६६ ॥ वस्त्रासनेकेवलेचतथाकुशमयासने ॥ पुष्पासनेचोपविष्टःपूजयेत्कमलापतिम् ॥ ६७ ॥ काष्ठासनेद्विजोविद्वान्नकुर्याद्विष्णु
पूजनम् ॥ विष्णुनात्वंधृतापृथ्विसर्वेलोकास्त्वयाधृताः ॥ ६८॥ अतःसर्वंसहेदेहिवस्तुमेस्थानमुत्तमम् ॥ इत्युक्त्वासनमास्तीर्यवसेन्नारायणार्चकः॥
॥ ६९ ॥ दक्षिणाभिमुखोभूत्वानकुर्याद्विष्णुपूजनम् ॥ शङ्खेकृत्वातुपानीयंमन्त्रपूतंसुवासितम् ॥ ७० ॥ स्नापयेत्कमलाकान्तंकमलासहितं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रभुम् ॥ शङ्खेनस्नापयेद्यस्तुभगवन्तंजनार्दनम् ॥ ७१ ॥ तत्फलंतस्यवक्ष्यामिशृणुविप्रेन्द्रजैमिने ॥ विप्रगोस्त्रीभ्रूणहत्यासुरापानादिपातकैः ॥ ७२ ॥
विमुक्तोयातिवैकुण्ठंभुङ्क्तेहिसकलंसुखम् ॥ यदिदृष्ट्वाहृषीकेशंपूजयेन्मानवोद्विज ॥ ७३ ॥ लभतेतत्तदेवाशुप्रसादात्कमलापतेः ॥ शङ्खाभावेतुविप्रेन्द्र
सुगन्धितोयकंबुधः ॥ ७४ ॥ कृत्वाचतुलसींपात्रेस्नापयेत्केशवंबुधः ॥ ततोदेवंस्नापयित्वासंस्थाप्यचवरासने ॥ ७५ ॥ सुगन्धैश्चन्दनैस्तस्य
कुर्यात्सर्वाङ्गलेपनम् ॥ तुलसीकाष्ठपङ्केनचक्रिणोदेहलेपनम् ॥ ७६ ॥ यःकरोतिजनस्तस्यप्रसन्नःसततंहरिः ॥ तुलसीपत्रमालेयंनिजगन्धसुख
प्रदा ॥ ७७ ॥ दीयतेतेजगन्नाथसुप्रीतोभवसर्वदा ॥ मन्त्रेणानेनविप्रेन्द्रतुलसीपत्रमालया ॥ ७८ ॥ अलङ्कृतोमहाविष्णुःप्रसन्नोनददातिकिम्॥
ततस्तुवैदिकैर्मन्त्रैःकर्तव्यंस्वस्तिवाचनम् ॥ ७९ ॥ दिग्बन्धनंचकर्तव्यंमन्त्रैःपौराणिकैर्बुधैः ॥ कृष्णोरक्षतुपूर्वस्यामाग्नेय्यांदेवकीसुतः ॥
॥ ८० ॥ याम्यांरक्षतुदैत्यारिर्नैर्ऋत्यांमधुसूदनः ॥ विदिक्षुरक्षतुश्रीमानूर्ध्वंचश्रीधरःप्रभुः ॥ ८१ ॥ अधोरक्षतुविश्वात्माकूर्ममूर्तिःकृपामयः ॥
येविघ्नकारकाःसर्वेपूजाकालेभवन्तिह ॥ ८२ ॥ दूरंगच्छन्तुतेसर्वेहरिनामास्त्रताडिताः ॥ इत्थंदिग्बन्धनंकृत्वाततःप्रह्वःकृताञ्जलिः ॥ ८३ ॥
वक्ष्यमाणेनमन्त्रेणसंकल्पंकुरुतेदृढम् ॥ मयारब्धामिमांपूजांदेवदेवजनार्दन ॥ ८४ ॥ सिद्धिंप्रापयनिर्विघ्नांप्रसीदपरमेश्वर ॥ ततस्तुकृतसंक
ल्पोवैष्णवःसर्वतत्त्ववित् ॥ ८५ ॥ अङ्गन्यासादिकंकृत्वाध्यायेन्नारायणंहृदा ॥ नवीनमेघसङ्काशंपुण्डरीकनिभेक्षणम् ॥ ८६ ॥ पीताम्बर
धरंदेवंस्मितचारुतराननम् ॥ कदम्बपुष्पमालाभिर्भूषितंसुमहाभुजम् ॥ ८७ ॥ बर्हिबर्हश्रेणिबद्धशिखण्डधृतकुण्डलम् ॥ वंशीमधुरनादेन
मोहयन्तंदिशोदश ॥ ८८ ॥ आवृतंगोपनारीभिश्चारुवृन्दावनेस्थितम् ॥ एवंसंचिन्त्यदेवेशंगोविन्दंसर्वकामदम् ॥ ८९ ॥ ततश्चावाहनं
कुर्याद्भक्तिभावेनवैष्णवः ॥ आवाहितायकृष्णायचतुर्वर्गप्रदायिने ॥ ९० ॥ पाद्यार्घ्याचमनीयानितत्रदद्याद्विचक्षणः ॥ कोमलैस्तुलसीपत्रै
रम्यैर्वाकुसुमैर्बुधः ॥ ९१ ॥ पूजयेत्सर्वदेवेशंश्रीकृष्णंदेवकीसुतम् ॥ नमोमत्स्यायकूर्मायवराहायनमोनमः ॥ ९२ ॥ नमोऽस्तुहरयेतुभ्यंवामनाय
नमोनमः ॥ नमोरामायरामायरामायबलिनेनमः ॥ ९३ ॥ नमोबुद्धायशुद्धायसकृपायनमोनमः ॥ नमोऽस्तुकल्किनेतुभ्यंनमस्तेबहुमूर्तये ॥
॥९४॥नारायणायकृष्णायगोविन्दायचशार्ङ्गिणे॥दामोदरायदेवायदेवदेवायतेनमः ॥९५॥ हृषीकेशायशान्तायव्योमपादायवैनमः॥ नमोऽस्तुपद्मा
पतयेनमस्तेपद्मचक्षुषे ॥ ९६ ॥ अनन्तायनमस्तुभ्यंगदाहस्तायवैनमः ॥ तार्क्ष्यध्वजायवैतुभ्यंनमस्तेचक्रपाणये ॥ ९७॥ पद्महस्तायवैतुभ्यमच्यु
तायनमोनमः ॥ नमोदैत्यारयेतुभ्यंसर्वकामप्रदायिने ॥ ९८ ॥ माधवायसुरेशायविष्णवेपरमात्मने ॥ किरीटिनेकुण्डलिनेनमोऽस्तुहरयेसदा ॥९९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नमोभगवतेतुभ्यंवाहनंगरुडाह्वयम् ॥ ॐनमोगरुडायेतिमन्त्रेणैवविचक्षणः ॥ १०० ॥ नमःशङ्खायचक्रायगदायैचनमोनमः ॥ नमःपद्मायखड्गाय
नन्दकायनमोनमः ॥ १ ॥ इतिसंपूज्यदेवेशंसदारंचसवाहनम् ॥ सायुधंचततोमन्त्रंजपेदष्टाक्षरंबुधः ॥ २ ॥ निजभक्त्याततोजस्वामन्त्रमष्टाक्षरं
बुधः ॥ गोविन्दायततोदद्यान्नानानैवेद्यमुत्तमम् ॥ ३ ॥ धूपंदीपंचताम्बूलंदेवदेवायविष्णवे ॥ अन्यान्यप्युपहाराणिप्रदद्याद्वैष्णवोजनः ॥ ४ ॥
यस्तुधूपंद्विजश्रेष्ठचन्दनागरुवासितम् ॥ दद्यान्मुराररयेतस्यद्रुतंसिध्यतिवाञ्छितम् ॥ ५ ॥ धूपंयच्छतियोविप्रहरयेघृतवासितम् ॥ सगच्छे
द्विष्णुभवनंविमुक्तःपापकोटिभिः ॥ ६ ॥ नारायणाययोधूपंदद्याद्गुग्गुलुवासितम् ॥ सयातिपरमंधामदुर्लभंयत्सुरैरपि ॥ ७ ॥ घृतेनदीपंयो
दद्यात्तिलतैलेनवापुनः ॥ निमेषात्सकलंतस्यपापंहरतिकेशवः ॥ ८ ॥ कर्पूरवासितंयस्तुताम्बूलंचक्रपाणये ॥ दद्यात्तस्यद्विजश्रेष्ठमुक्तिर्भवति
जैमिने ॥ ९ ॥ यस्तुयच्छतिताम्बूलंखदिरेणसमन्वितम् ॥ इहभुक्त्वाखिलान्भोगानन्तेयातिहरेःपदम् ॥ ११० ॥ षष्ठीमधुरिकायुक्तंतथा
जातिफलादिभिः ॥ ताम्बूलंहरयेदत्त्वास्वर्गमाप्नोतिमानवः ॥११॥ शङ्खेकृत्वातुपानीयंकुर्याद्विष्णुप्रदक्षिणम् ॥ वक्ष्यमाणेनमन्त्रेणजैमिनेवैष्णवो
जनः ॥ १२ ॥ जनार्दनजगद्वन्धोशरणागतपालक ॥ त्वद्दासदासदासत्वंदासस्यदेहिमेप्रभो ॥ १३ ॥ मन्त्रेणानेनयःकुर्यान्नारायणप्रदक्षि
णम् ॥ तस्यपुण्यफलंवच्मिसंक्षेपाच्छृणुजैमिने ॥ १४॥ ब्रह्महत्यादिपापानियानियानिमहान्तिच ॥ तानितानिप्रणश्यन्तिप्रदक्षिणपदेपदे ॥ १५ ॥
यावत्पादंनरोभक्त्यागच्छेद्विष्णुप्रदक्षिणे ॥ तावत्कल्पसहस्राणिविष्णुनासहमोदते ॥ १६ ॥ हरिप्रदक्षिणेयावत्पदंगच्छेच्छनैःशनैः ॥ पदेपदेऽश्वमे
धस्यफलंप्राप्नोतिमानवः ॥१७॥ प्रदक्षिणीकृत्यसर्वंसंसारेयत्फलंभवेत् ॥ हरिंप्रदक्षिणीकृत्यतस्मात्कोटिगुणंफलम् ॥ १८ ॥ अङ्गप्रदक्षिणंकुर्याद्य
स्तुनारायणाग्रतः ॥ सोऽपितत्फलमाप्नोतिकिमन्यैर्बहुभाषितैः ॥१९॥ नलङ्घयेत्सोमसूत्रंधीमाञ्शम्भुप्रदक्षिणे ॥ लङ्घितंयदितद्विप्रसापूजानिष्फला
भवेत् ॥ १२० ॥ प्रदक्षिणाकारतयावारैकंयोहरिंव्रजेत् ॥ जन्मजन्मनिविप्रेन्द्रंसार्वभौमोभवेद्ध्रुवम् ॥ २१ ॥ यस्तुवारद्वयंविप्रकुर्याद्विष्णुप्रदक्षि
णम् ॥ ऐन्द्रंपदमवाप्नोतित्रिदिनेनात्रसंशयः ॥ २२ ॥ विष्णुप्रदक्षिणंयस्तुकुर्याद्वारद्वयंजनः ॥ विमुक्तःसकलैःपापैःप्रविशेन्माधवींतनुम् ॥ २३ ॥
भ्रामयेत्सोदकंशङ्खंकेशवोपरिजैमिने ॥ अन्तेदेवालयंगत्वासभवेत्सुरवन्दितः ॥२४॥ प्रणमेद्दण्डवद्भूमौसप्तधायस्तुकेशवम् ॥ पातकंतच्छरीरस्थं
भस्मीभवतितत्क्षणात् ॥ २५ ॥ शिरस्यञ्जलिमाधायप्रणमेद्योजनार्दनम् ॥ तस्मैलक्ष्मीपतिर्विष्णुर्ददातिपरमंपदम् ॥ २६ ॥ भूमौनिपात्यसर्वाङ्गं
हरिंप्रणमतांनृणाम् ॥ पुण्यप्रभावंविप्रर्षेवदतोमेनिशामय ॥ २७॥ यावद्धूरेणुभिर्नृणांभूषितंस्यात्कलेवरम् ॥ तावत्कल्पसहस्राणितिष्ठन्तिह

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रिसंन्निधौ ॥ २८ ॥ ततःकेशवनिर्माल्यंवैष्णवेभ्यःप्रदीयते ॥ वैष्णवांस्तान्प्रवक्ष्यामिशृणुसत्तमजैमिने ॥ २९ ॥ शुकःसूतस्तथाव्यासो
नारदःकपिलोमुनिः ॥ प्रह्लादश्चाम्बरीषश्चतथाक्रूरोद्धवावपि ॥ १३० ॥ विभीषणोहनूमांश्चतथैवान्येऽपिवैष्णवाः ॥ निर्माल्यंवासुदेवस्यगृह्णन्तु
सर्वकामदम् ॥३१॥इत्युक्त्वाविष्णुनिर्माल्यंनिक्षिपेद्धुविवैष्णवः ॥ ततस्तुहरिनिर्माल्यंस्वयंगृह्णातिभक्तितः ॥३२॥ मस्तकेदृश्यतेयस्यहरिनिर्माल्य
मुत्तमम् ॥ सविज्ञेयोद्विजश्रेष्ठसाक्षादेवहरिःस्वयम् ॥ ३३ ॥ दुर्लभंविष्णुनैवेद्यंनिर्माल्यंपापनाशनम् ॥ गृह्णन्तित्रिदशाःसर्वेमनुष्याणांचका
कथा ॥ ३४ ॥ जैमिनेतुलसीपत्रंयस्तुजिघ्रतिवैष्णवः ॥ तस्यदेहान्तरस्थंहिसर्वपापंविनश्यति ॥ ३५ ॥ तुलसीपत्रगन्धस्तुप्रविशेद्यस्य
नासिकाम् ॥ आपदस्तच्छरीरस्थाःसद्योगच्छन्तिसंक्षयम् ॥ ३६ ॥ तुलसीदलगन्धंयस्समाघ्रायाभिनन्दति ॥ तस्यालयेभवेन्नित्यमानन्दो
द्विजसत्तम ॥ ३७ ॥ स्तवैःस्तुत्वाजगन्नाथंकमलाप्रियमच्युतम् ॥ कृताञ्जलिस्ततःप्राज्ञइमंमन्त्रमुदीरयेत् ॥ ३८ ॥ नारायणजगद्रूपगच्छ
धामजगत्पते ॥ गच्छदेवनिजस्थानंप्रसन्नोभवसर्वदा ॥ ३९ ॥ येयंस्वशक्त्यादेवेन्द्रतवपूजाकृतामया ॥ अच्छिद्रास्तुजगन्नाथत्वत्प्रसादाज्जग
न्मय ॥ १४० ॥ ततःपादोदकंप्राज्ञोमहाविष्णोःपरात्मनः ॥ समस्तपातकध्वंसिगृह्णीयाद्भक्तिभावतः ॥ ४१ ॥ कणमात्रंवहेद्यस्तुविष्णोः
पादोदकंशुभम् ॥ सस्नातःसर्वतीर्थेषुजैमिनेसत्यमुच्यते ॥ ४२ ॥ स्पृशेत्पादोदकंविष्णोर्गङ्गास्नानफलंभवेत् ॥ गाङ्गेयंसलिलंविप्रविष्णुपादोदकं
यतः ॥ ४३ ॥ अकालमरणंनास्तिनास्तिव्याधिभयंतथा ॥ यःस्पृशेत्पादसलिलंकेशवस्यमहात्मनः ॥ ४४ ॥ पापव्याधिविनाशार्थंविष्णु
पादोदकौषधम् ॥ पापिनोऽपिनरास्तेचपिबन्तुप्रतिवासरम् ॥ ४५ ॥ विष्णुपादोदकंविप्रयःपिबेद्वैष्णवोजनः ॥ पातकंतच्छरीरस्थंक्षणादेव
तुनश्यति ॥ ४६ ॥ यथौषधेनरोगास्तुहन्यन्तेदेहिनोभृशम् ॥ तथैवपातकंसर्वंविष्णुपादोदकेनच ॥ ४७ ॥ विष्णुपादोदकंशुद्धंतुलसीपत्र
संयुतम् ॥ योवहेच्छिरसाविप्रतस्यपुण्यंवदाम्यहम् ॥ ४८ ॥ ब्रह्महत्यादिभिःपापैर्विमुक्तोविष्णुरूपधृत् ॥ अन्तेविष्णुपुरंगत्वाविष्णुनासह
मोदते ॥ ४९ ॥ मेरुप्रमाणहेमानिदत्त्वाभवतियत्फलम् ॥ विष्णुपादोदकंस्पृष्ट्वातद्भवेदधिकंफलम् ॥ १५० ॥ अश्वकोटिप्रदानेनतत्फलं
प्राप्यतेजनैः ॥ सप्तद्वीपांमहींदत्त्वाद्विजेभ्योयत्फलंलभेत् ॥ ५१ ॥ तत्फलंलभतेमर्त्योविष्णुपादोदकंस्पृशन् ॥ अश्वमेधसहस्राणिकृत्वाभव
तियत्फलम् ॥ ५२ ॥ विष्णुपादोदकंस्पृष्ट्वातद्भवेदधिकंफलम् ॥ दीर्घिकाशतदानेनयत्पुण्यंपरिकीर्तितम् ॥ ५३ ॥ तस्मादप्यधिकंपुण्यं
लभेत्पादोदकंस्पृशन् ॥ बहुनात्रकिमुक्तेनसंक्षेपादुच्यतेमया ॥ ५४ ॥ विष्णुपादोदकस्पर्शान्मुक्तोभवतिमानवः ॥ भूयोभूयोऽपिविप्रेन्द्रसुदृढंकथ्यते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मया ॥ ५५ ॥ पुनर्नलभतेजन्मस्पृशन्पादोदकंहरेः ॥ विष्णुनैवेद्यशेषंयःसर्वपापविनाशनम् ॥ ५६ ॥ अश्नातिभक्तिभावेनसगच्छेत्परमंपदम् ॥
दुर्लभंविष्णुनैवेद्यंभुञ्जतोद्विजसत्तम ॥ ५७ ॥ देहंत्यजन्तिपापानिब्रह्महत्यामुखान्यपि ॥ भुञ्जतोहरिनैवेद्यंदासीववशगाभवेत् ॥ ५८ ॥ मुक्तिर्भूमिः
सुरश्रेष्ठदैवतैरपिदुर्लभा ॥ संपूज्यकमलाकान्तयोऽद्यान्नैवेद्यमत्यजन् ॥ ५९ ॥ अचिरेणैवतंविष्णुर्नयतिस्वांतनुंप्रति ॥ नैवेद्यस्यमहाविष्णोर्गुणंकिं
कथयाम्यहम् ॥ १६० ॥ यद्भुञ्जतःकेशवोऽपिस्यादधीनोद्विजप्रभो ॥ यजेदनेनविधिनाप्रतिमासंजनार्दनम् ॥ ६१ ॥ विधिहीनामपिश्रेष्ठांपूजांश्रीक
मलापतेः ॥ यःकुर्याद्भक्तिभावेनसोऽपिस्यात्केशवप्रियः ॥ ६२ ॥ विधिज्ञोविधिनाविष्णुमभ्यर्च्यलभतेफलम् ॥ यथोक्तविधिनाविप्रनैवेद्यैर्बहुभिः
प्रभो ॥ ६३ ॥ पूजितोऽपिनतुष्टःस्याद्यदिभक्तिर्नतिष्ठति ॥ यस्यवैयावतीभक्तिर्देवदेवेजनार्दने ॥ ६४ ॥ तावदेवफलावाप्तिस्तस्यनास्त्यत्रसंशयः ॥
अभक्त्यायाहरेःपूजाक्रियतेभुविमानवैः ॥ ६५ ॥ सापूजाब्राह्मणश्रेष्ठपूजाकालेभवेत्किल ॥ ज्ञानमूलंहरेर्भक्तिर्भक्तिमूलंजगत्पतेः ॥६६ ॥ पूजामोक्ष
द्रुमोत्पत्तौमूलमाराधनंहरेः ॥ अल्पमात्रमपिप्राज्ञश्रद्धयाकुरुतेहियत् ॥ ६७ ॥ तदक्षयंभवेत्सर्वंश्रद्धायुक्ताखिलाक्रिया ॥ भक्त्यायःपूजयेद्विष्णुमपि
वावारिमात्रतः ॥ ६८ ॥ संस्थानंलभतेविष्णोर्यतोभक्तवशोहरिः ॥ ६९ ॥ असारमेतद्भुवनंसमस्तंसारंहरेःपूजनमेवविप्र ॥ तस्मान्मनुष्योनिज
मङ्गलैषीभक्त्यायजेत्कृष्णमनन्तमूर्तिम् ॥ १७० ॥ इतिश्रीपाद्मेमहापुराणेक्रियायोगसारेहरिपूजाविधिर्नामैकादशोऽध्यायः ॥ ११ ॥ व्यास
उवाच ॥ फाल्गुनेब्राह्मणश्रेष्ठश्रीकृष्णंसुरवन्दितम् ॥ पूजयेद्भक्तिभावेनप्रत्यहंवैष्णवोजनः ॥ १ ॥ फाल्गुनेस्नापयेद्यस्तुसर्पिषादेवकीसुतम् ॥ फलं
तस्यप्रवक्ष्यामियतःसम्यङ्निशामय ॥ २ ॥ सर्वयज्ञफलंप्राप्यसर्वदानफलंतथा ॥ अन्तेयातिहरेःस्थानंसर्वपापविवर्जितः ॥ ३ ॥ युगकोटिसहस्राणि
भुक्त्वाभोगंहरेर्गृहे ॥ तत्रैवमोक्षमाप्नोतिसंप्राप्यज्ञानमुत्तमम् ॥ ४ ॥ यस्तुयच्छतिकृष्णायशिशिरेगोपमूर्तये ॥ तिलानांमोदकंदिव्यंसगच्छेद्धरि
मन्दिरम् ॥ ५ ॥ योदुग्धलड्डुकान्दद्यात्केशवायमहात्मने ॥ सपिबेदमृतंस्वर्गेमन्वन्तरशतावधि ॥ ६ ॥ हरयेललितंखण्डंयस्तुयच्छतिजैमिने ॥
तस्यविष्णुःप्रसन्नात्माछिनत्तिभवबन्धनम् ॥ ७ ॥ विचित्रंफलितंदिव्यंदद्याद्भगवतेद्विज ॥ अन्तेशक्रपुरंगत्वासभवेत्सुरवन्दितः ॥ ८ ॥ निर्मलां
शर्करांयच्छेद्यस्तुकृष्णायभक्तिमान् ॥ सकिंनलभतेविप्रवासुदेवप्रसादतः ॥ ९ ॥ सुपक्वंफाल्गुनेमासिमधुरंबदरीफलम् ॥ यस्तुयच्छतिकृष्णायफलं ॥ २६ ॥
तस्यनिशामय ॥ १० ॥ इहभुङ्क्तेसुखंसर्वंपुत्रपौत्रसमन्वितः ॥ अन्तेहरेर्गृहंयातिरथमारुह्यशोभनम् ॥ ११ ॥ नदद्याद्गुडसंयुक्तंहरयेबदरीफलम् ॥
अज्ञानाद्ब्राह्मणश्रेष्ठदद्याचेन्नारकीभवेत् ॥ १२ ॥ फाल्गुनेमासियोदद्याद्धरयेदाडिमीफलम् ॥ सुपक्वंतत्फलंविप्रवदतोमेनिशामय ॥१३॥ तत्रयावन्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बीजानितिष्ठन्तिदाडिमीफले ॥ तावन्मन्वन्तरंविष्णोर्गृहेतिष्ठतिभाग्यवान् ॥ १४ ॥ फाल्गुनेमासियोदद्याद्धरयेगुडपिष्टकम् ॥ सविज्ञेयोद्विजश्रेष्ठवा
जिमेधसहस्रकृत् ॥ १५ ॥ चैत्रेमासिद्विजश्रेष्ठमधुनामधुसूदनम् ॥ स्नापयेल्लभतेमर्त्यस्तद्विष्णोःपरमंपदम् ॥ १६ ॥ मधुनास्नापयेद्यस्तुनारायणम
नामयम् ॥ नचर्चाक्रियतेतस्यकदाचिद्रविसूनुना ॥ १७ ॥ चैत्रेकिंशुकपुष्पेणयोऽर्चयेत्कमलापतिम् ॥ तन्नामचित्रगुप्तेनपञ्जिकायांनलिख्यते ॥
॥ १८ ॥ चैत्रकेजगतामीशंकृष्णंतिलकपुष्पकैः ॥ अर्चतोनास्तिवैजन्मपुनरस्मिन्महीतले ॥ १९ ॥ कृष्णवञ्जुलपुष्पेणसर्वदेवशिरोमणिम् ॥ पूज
यन्मनुजोविप्रलभतेनापदंक्वचित् ॥ २० ॥ वासन्तीभिःसुगन्धीभिर्वसन्तेयस्तुपूजयेत् ॥ भगवन्तंप्रसन्नात्मासदेवैरपिपूज्यते ॥ २१ ॥ तथाकिसलयै
र्दिव्यैरखण्डैर्योऽर्चयेद्धरिम् ॥ तंवन्दतेसमुत्थायस्वयंपीठासनोऽपिच ॥ २२॥ धात्रीपत्रैर्नवैर्यस्तुकोमलर्हरिमर्चयेत् ॥ अचिरेणवलभतेसकलंवाञ्छितं
जनः ॥ २३ ॥ शाण्डिल्याखण्डपत्रैश्चधत्तूरैश्चार्कपुष्पकैः ॥ योऽर्चयेद्विष्णुमीशंचससंसाराब्धिपारगः ॥ २४ ॥ योदद्याद्विष्णवेविप्रकदलीफल
मुत्तमम् ॥ शक्राद्यास्त्रिदशाःसर्वेवन्दन्तेतमहार्निशम् ॥ २५ ॥ योदद्याच्चैत्रकेमासिभक्त्यागोपालरूपिणे ॥ गोधूमपिष्टकंविप्रसर्वपापैःप्रमुच्यत ॥
॥ २६ ॥ आयातेमाधवेमासिपवित्रेमाधवप्रिये ॥ आमिषंमैथुनंतैलंविष्णुभक्तःपरित्यजेत् ॥ २७ ॥ प्रातःसमाचरेत्स्नानंमाधवेमासिवैष्णवः ॥
परित्यजेत्परान्नंचनकुर्याच्चद्विभोजनम् ॥ २८ ॥ प्रभातेपूजयेद्विष्णुंपूर्वोक्तविधिनाद्विज ॥ वैशाखेस्नापयेद्विष्णुंपुष्पवासितवारिणा ॥ २९ ॥
स्नापयच्छीततोयेषुसन्ध्यापर्यन्तमच्युतम् ॥ त्रिसन्ध्यंपूजयेद्भक्त्यानैवेद्यैर्विविधैःप्रभुम् ॥ ३० ॥ वैशाखेदमनस्रग्भिर्लक्ष्मीपतिरलङ्कृतः ॥
नकिंददातिविप्रर्षेप्रसन्नःपरमेश्वरः ॥ ३१ ॥ वैशाखेमासियोदद्याद्यवान्नंचक्रपाणये ॥ तस्यपुण्यानिसङ्ख्यातुंकःसमर्थोऽस्तिपण्डितः ॥ ३२ ॥
यत्किंचिन्माधवेमासिमाधवप्रीतिहेतवे ॥ दीयतेमाधवायैवतत्सर्वमक्षयंभवेत् ॥ ३३ ॥ यदन्यत्सुकृतंकर्मक्रियतेमासिमाधवे ॥ माधवप्रीत
येविप्रक्षयस्तस्यनविद्यते ॥ ३४ ॥ वैशाखेमासियःकुर्यात्प्रपांमाधवतुष्टये ॥ दिनेदिनेऽश्वमेधस्यफलमाप्नोतिमानवः ॥ ३५ ॥ वैशाखो
दुर्लभोमासःसर्वकर्मफलप्रदः ॥ पूजितव्योहरिस्तत्रहित्वाकर्मशतान्यपि ॥ ३६ ॥ एकाहमपियःपूजांवैशाखेकुरुतेहरेः ॥ षड्वर्षंहरिंपूजित्वायत्फलं
लभतेसतत् ॥ ३७ ॥ वैशाखेमासियोनित्यंविष्णुमश्वत्थरूपिणम् ॥ चतुर्वर्गफलप्राप्तिहेतवेवैष्णवोजनः ॥ ३८ ॥ गण्डूषमात्र
तोयेनकुर्याद्योऽश्वत्थसेवनम् ॥ सोऽपियातिपरंस्थानंविमुक्तःकोटिपातकैः ॥ ३९ ॥ अश्वत्थमूलंविप्रर्षेयोबध्नातिशिलादिभिः ॥
अश्वत्थरूपीभगवान्किंकिंतस्मैनयच्छति ॥ ४० ॥ अश्वत्थद्रुममालोक्यप्रणामंकुरुतेयदि ॥ सोऽपियातिपरंस्थानमायुर्वृद्धिर्नसंशयः ॥ ४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदश्वत्थतलेविप्रधर्मकर्मकरोतियः ॥ न्यूनातिरिक्ततानस्यात्तस्मिन्कर्मणिजैमिने ॥ ४२ ॥ तत्रतीर्थानिसर्वाणित्रिस्रोतःप्रभृतीनिच ॥ यत्राश्वत्थतरु
स्तिष्ठेदेकोऽपिशाखिनांवरः ॥ ४३ ॥ अश्वत्थंपूजयेद्यस्तुसएवविष्णुपूजकः ॥ अश्वत्थमूर्तिर्भगवान्स्वयमेवयतोद्विज ॥ ४४ ॥ अवज्ञानाद्द्विजश्रेष्ठ
योऽश्वत्थंहन्तिमूढधीः ॥ संसारेनास्तितत्कर्मयत्कृत्वासचशुध्यति ॥ ४५ ॥ अश्वत्थोवृक्षराजोऽयंहरिमूर्तिःप्रकीर्तितः ॥ तस्मादश्वत्थहन्तणां
त्राताकोऽपिनविद्यते ॥४६॥अश्वत्थंपश्यतोविप्रस्पृशतःपरतस्तथा॥ देहस्थंपातकंसवहरेत्प्रणमतोहरिः ॥४७॥ विलोक्याश्वत्थहन्तारंयःशक्तोननिवा
रयेत्॥तन्नेत्रयुग्मंबडिशैर्यमेनोत्पाट्यतेस्वयम् ॥ ४८ ॥ अश्वत्थच्छेदनंमूढोमाकुर्वितिवदेन्नयः ॥ तस्यजिह्वांछुरिकयास्वयंकृन्ततिप्रेतराट् ॥ ४९ ॥
अश्वरथशाखामेकांयःस्वल्पामपिनिहन्तिवै ॥ सकोटिब्रह्महत्यानांफलमाप्नोतिमानवः ॥५०॥ यत्पापंब्रह्महत्यायांगुरुस्त्रीगमनेनच ॥ सुरापानेतथा
स्तेयेन्यासापहरणेऽपिच ॥ ५१ ॥ यत्पापंभ्रूणहत्यायांगोहत्यायांद्विजोत्तम ॥ स्त्रींहत्यायांचयत्पापंपरस्त्रीगमनेतथा ॥ ५२ ॥ शरणागतहत्यायां
हत्यायांसुहृदस्तथा ॥ विश्वासवाक्याकथनेपतिहिंसाविधौचयत् ॥ ५३ ॥ यत्पापंपरनिन्दायांहरिवासरभोजने ॥ अश्वत्थच्छेदनाद्घोरंतत्पापं
प्राप्यतेजनैः ॥ ५४ ॥ विष्णुमूर्त्तेर्जनोमोहादश्वत्थस्यनिहन्तियः ॥ तत्तुल्यःपातकीकोऽपिनश्रुतःक्षितिमण्डले ॥ ५५ ॥ वदाम्यश्वत्थमाहा
त्म्यंसर्वपापविनाशनम् ॥ सेतिहासंद्विजश्रेष्ठशृणुवत्ससमाहितः ॥ ५६ ॥ पूर्वंधनञ्जयोनामब्राह्मणोहरिभक्तिकृत् ॥ आसीत्त्रेतायुगेविप्रसर्वप्राणिहिते
रतः ॥ ५७ ॥ ज्ञातिपूजारतोनित्यंदीपदानेरतःसदा ॥ सत्यवादीजितक्रोधोहिंसादम्भविवर्जितः ॥ ५८ ॥ मुमुक्षुःसद्द्विजश्रेष्ठसर्वदापरमेश्व
रम् ॥ पूजयामासपरयाभक्त्यानारायणंप्रभुम् ॥ ५९ ॥ तस्यभक्तिततोज्ञात्वामहतींसुदृढांप्रभुः ॥ जहारसकलंवित्तंहेतुमात्रेणकेनचित् ॥ ६० ॥
तथापिसद्द्विजश्रेष्ठःकेशवस्यमहात्मनः ॥ पूजामनुदिनंचक्रेभक्त्यापरमयासुधीः ॥६१॥ दुःखेनोपार्जितंवित्तंविनष्टंसकलंद्विज॥ दृष्ट्वापितस्यविप्रस्यन
दुःखेनाचलंमनः ॥ ६२ ॥ भुजेस्तुमर्जनंचक्रेसविप्रःपरमार्थवित् ॥ महाविष्णुसपर्यायांदृढंबद्धामनोनिजम् ॥ ६३ ॥ भूयोऽपितस्यविप्रस्य
भक्तिंज्ञात्वाजनार्दनः ॥चकारबन्धुविच्छेदंसुदृढःशमदस्ततः ॥६४॥ बान्धवास्तस्यविप्रस्यविष्णुमायाविमोहिताः ॥ हिंसामागेभिरेकर्तुंसर्वदैवद्विजो
त्तम ॥ ६५ ॥ ततोविप्रोहिनिर्वृत्तोनिर्बन्धैःपुरुषोत्तमम् ॥ पूजयामाससततंप्रीतःप्रचुरभक्तितः ॥ ६६ ॥ परिकल्प्यचभूदेवोधनंकेशवपूजने ॥
माधवंचजगन्नाथंसबन्धुशुचमत्यजत् ॥ ६७ ॥ भूयएवमहाविष्णुःकौतुकीतस्यजैमिने ॥ जहारसानुकम्पोऽपिपुत्रानपिदिनेदिने ॥ ६८ ॥
तथापिसद्द्विजश्रेष्ठःकेशवंक्लेशनाशनम् ॥ पूर्वंद्विगुणयाभक्त्यानित्यंविष्णुमपूजयत् ॥ ६९ ॥ तस्यपत्नीततोविप्रदुःखशोकातिदुःखिता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पितृगेहंगताविष्णोर्माययापरिमोहिता ॥ ७० ॥ अथैकाकीसभूदेवोविष्णुभक्तिपरायणः ॥ विपदंचिन्तयामासनकदापितुचेतसा ॥ ७१ ॥ एक
दासद्विजश्रेष्ठविष्णुभक्तिमतांवरः ॥ स्कन्धेपरशुमादायकाष्ठार्थंविपिनंययौ ॥ ७२ ॥ वनात्काष्ठंसमादायनित्यमेवचसद्विजः ॥ हिमागमेवस्त्र
हीनःकुरुतेशीतवारणम् ॥ ७३ ॥ कदाचिद्विपिनंगन्तुंनाशक्नोद्विजसत्तमः ॥ जघानप्राङ्गणस्थस्यशाखामश्वत्थशाखिनः ॥ ७४ ॥ अत्रान्तरेमहा
विष्णुस्तस्मादश्वत्थपादपात् ॥ निश्चक्रामसुरश्रेष्ठोव्यथाव्यथितमानसः ॥ ७५ ॥ ददर्शविष्णुंपुरतःसविप्रश्चतुर्भुजंपद्मदलायताक्षम् ॥ पीताम्बरं
कुण्डलिनंसुकेशंदधानमब्जादिनिजायुधानि ॥ ७६ ॥ परिस्रवद्भिस्तररक्तधारासन्ध्यासुशोणीकृतनव्यमेघम् ॥ विभावसुंचैवसुखंपरेशंसंदृश्य
तंदेवगणैरदृश्यम् ॥ हर्षाश्रुधारारुचिराक्षियुग्मस्तुष्टावविप्रोमृदुलैर्वचोभिः ॥ ७७ ॥ ब्राह्मणउवाच ॥ हरेमुरारेजगदेकनाथगोविन्ददामोदर
माधवेति ॥ लक्ष्मीपतेकेशवकेशिशत्रोनारायणानन्तविभोप्रसीद ॥ ७८ ॥ तवावतारंकिमहंब्रवीमित्वयाविनानास्तिभुवीहकोऽपि ॥ किंवागुण
व्याप्तसमस्तलोकंकिंवादयांमित्रपरैकतुल्याम् ॥ ७९ ॥ दत्त्वास्वीयांकस्यचिदीशविष्णोभक्तिंहरस्यच्युतदेहसंस्थाम् ॥ श्रियंसमादायमुदंप्रदास्ये
भक्तिःप्रदत्तामहतःसुधन्या ॥ ८० ॥ मन्येमहात्मानमनन्तमूर्तेपापात्मनांश्रेष्ठमिवानिशंयत् ॥ तदर्थमेवाङ्घ्रियुगंत्वदीयंनपातकीपश्यतिदैव
चिन्त्यम् ॥ ८१ ॥ यद्यप्यहंदुःखवतांवरिष्ठोमन्येतथापीन्द्रमिवाद्यविष्णो ॥ आत्मानमात्माजगतांभवन्तंसाक्षात्समीक्षेयतईक्षणाभ्याम्
॥ ८२ ॥ पूजांतवाल्पामपिवेद्मिनाहंद्रव्यंकदापिनददामितुभ्यम् ॥ तथापिचाग्रेममसूर्तिमांस्त्वंदृष्टोऽसिमेकेशवएकपूज्यः ॥ ८३ ॥ दत्त
स्त्वयायंममभक्तिवृक्षोधर्मार्थकामत्रयएवसोऽयम् ॥ त्वद्दर्शनाम्भोमयवृद्धिसिक्तःप्रभोऽद्यकैवल्यफलंदधार ॥ ८४ ॥ मूर्धामदीयोऽखिललोक
मूर्धश्रेष्ठोभवेत्केशवविश्वमूर्ते ॥ त्वत्पादपाथोजयुगेमनोमेसंयातिवैसम्प्रतिदेवदेव ॥ ८५ ॥ व्यासउवाच ॥ इत्थंस्तुत्वाजगन्नाथंनारायण
मनामयम् ॥ कृताञ्जलिःपुनःप्राहभक्त्यातमितिसद्विजः ॥ ८६ ॥ ब्राह्मणउवाच ॥ देवदेवजगन्नाथलोकानुग्रहकारक ॥ कशाप्रहरणैरेतद्गात्रंतेरुधि
रोक्षितम् ॥ ८७ ॥ सर्वेषामेवदैत्यानांयुधिवंशास्त्वयाहताः ॥ त्वांहन्तुंकःक्षमःपृथ्व्यांप्रभोऽद्भुतमिदंमहत् ॥ ८८ ॥ भगवानुवाच ॥
वत्ससत्यमिदंप्रोक्तंत्वयानास्त्यत्रसंशयः ॥ दानवोराक्षसोवापिमांहन्तुंकोऽपिनक्षमः ॥ ८९ ॥ अश्वत्थमूर्तिरेवाहंकुठारेणहतस्त्वया ॥ अतो
ऽजनिशरीरेमेरक्तपातोऽधुनाद्विज ॥ ९० ॥ व्यासउवाच ॥ तस्यवाक्यमिदंश्रुत्वासविप्रोभयविह्वलः ॥ निनिन्दस्वयमात्मानमात्मनाबहुधा
द्विजः ॥ ९१ ॥ धिगस्तुतत्त्वतोऽभाग्यंसर्वपातकिनांवरम् ॥ त्रैलोक्याधिपतेर्दाताहृदयेमहतींव्यथाम् ॥ ९२ ॥ सर्वपापहरोविष्णुः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समयाव्यथितःकृतः ॥ एतत्पापंमयापारंकतुनैकेनशक्यते ॥ ९३ ॥ यस्मिंस्तुष्टेपापिनोऽपिभवन्तिसुरवन्दिताः ॥ मद्दत्तंयासव्यथयाव्यथितो
ह्यहतोऽस्म्यहम्॥९४॥प्रसादयन्तियंदेवाब्रह्माद्याअतिभक्तितः॥अहोमयापापवतातस्यदत्ताहृदिव्यथा॥९५॥किंतपोभिर्जपैःकिंवाकिंगृहैर्जीवनैश्रमे॥
धर्मार्थकाममोक्षाणांदातैकोऽयंव्यथातुरः॥९६॥ इत्युक्त्वासद्विजश्रेष्ठतमेवपरशुंनिजे ॥ दातुंकण्ठेमनश्चक्रेविष्णुप्रीणनहेतवे ॥ ९७ ॥ तस्यभक्तिंदृढां
ज्ञात्वादयालुःकमलापतिः ॥ तद्धस्तात्तत्परंनिन्येजवेनभक्तवत्सलः ॥ ९८ ॥ श्रीभगवानुवाच ॥ कथंत्वमेवकुरुषेवत्सकर्मातिदारुणम् ॥ आत्महत्या
कृतांपुंसांतुष्टोऽस्मिनकदाप्यहम् ॥ ९९ ॥ तवभक्त्यातितुष्टोऽस्मिभीतिंमाकुरुसत्तम ॥ वरंवरयविप्रेन्द्रयत्तेमनसिवर्तते ॥ १०० ॥ ब्राह्मणउवाच ॥
मयाव्यथाप्रदत्तेयंमहतीपरमेश्वर ॥ मातिष्ठतुशरीरेतेयाचेवरमिमंप्रभो ॥ १ ॥ श्रीभगवानुवाच ॥ अज्ञानाद्भवतावत्सकर्मेदंविहितंद्विज ॥ अतोऽप
राधोनेतव्योमहानपिनतेयथा ॥ २ ॥ नित्यंतवानुपाल्योऽस्मिभक्तश्रेष्ठोयतोभवान् ॥ भवदीयानहंमन्येदोषान्वत्सदिनेदिने ॥ ३ ॥ तथापिमयि
भक्तिस्तेववृधेमहतीसदा ॥ तस्माद्वत्सतवानृण्यंगन्तुमिच्छामिसम्प्रति ॥ ४॥ विहायसकलांभीतिंवरंवृणुममाग्रतः ॥५ ॥ ब्राह्मणउवाच ॥ त्वयिसर्वे
सुरश्रेष्ठममजन्मनिजन्मनि ॥ तिष्ठतांसुदृढाभक्तिर्हरेकिमपरैर्वरैः ॥६॥ व्यासउवाच ॥ श्रुत्वावाक्यमिदंतस्यकेशवंप्रणयोदितम् ॥ निजकण्ठस्थितां
मालांप्रीतस्तस्मैददौततः ॥ ७ ॥ समालिङ्ग्यततोविप्रंपितापुत्रमिवप्रभुः ॥ चतुर्भिर्बाहुभिर्दीर्घैरुवाचमृदुलंवचः ॥ ८ ॥ श्रीभगवानुवाच ॥ मद्भ
क्तोऽसियदाविप्रतथातेमत्प्रसादतः ॥ अचिरेणैवसकलंभद्रंविप्रभविष्यति ॥ ९ ॥ अश्वत्थरूपंमांनित्यंक्रियायोगेनसत्तम ॥ समाराधयसर्वंतेसाध
यिष्यामिवाञ्छितम् ॥ ११० ॥ इत्युक्त्वातंद्विजश्रेष्ठंभूयोऽप्यालिङ्ग्यकेशवः ॥ अभवत्सहसादृश्यस्तत्रैवकरुणालयः ॥ ११ ॥ विष्णोः
कण्ठस्रजंप्राप्यसविप्रोवैष्णवोत्तमः ॥ कृतकृत्यमिवात्मानंमत्वातस्थौनिजेगृहे ॥ १२ ॥ ततःकुबेरोविप्रर्षेतस्यविप्रस्यसद्मनि ॥ स्वयंववर्षवित्ता
निबहूनिकेशवाज्ञया ॥ १३ ॥ प्रासादोरचितस्तस्यशिल्पिनाविश्वकर्मणा ॥ नारायणाज्ञयातत्रवैजयन्तइवोत्तमः ॥ १४ ॥ दासदासीसमायुक्तोना
नावस्तुविभूषितः ॥ गजाश्वकोटिसंकीर्णंविबभौतस्यमन्दिरम् ॥ १५ ॥ बभूवुःसंगतास्तस्यनष्टाअपिचबान्धवाः ॥ कृतावज्ञाचतत्पत्नीस्वयंतद्गृह
मायया ॥ १६ ॥ मृतपुत्रापितत्पत्नीकेशवस्यानुकम्पया ॥ स्थिरप्रजाभवद्विप्रस्वामिभक्तिपरायणा ॥ १७ ॥ चिरंभुक्त्वाखिलान्भोगान्पुत्रपौत्रसम
न्वितः ॥ आयुषोऽन्तेययौमोक्षंसदारोविप्रसत्तमः ॥ १८ ॥ व्यासउवाच ॥ साक्षादेवस्वयंविष्णुरश्वत्थोवृक्षसत्तमः ॥ तद्भक्तिंकुर्वतांपुंसांविद्यतेनाशुभं
क्वचित् ॥ १९ ॥ अश्वत्थंसेवतेयस्तुविष्णुंध्यात्वानरोत्तमः ॥ तस्यप्रसन्नोभगवान्ददातिपरमंपदम् ॥ १२० ॥ इतिश्रीपाद्मेमहापुराणेक्रिया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योगसारेऽश्वत्थमाहात्म्येद्वादशोऽध्यायः ॥ १२ ॥ व्यासउवाच ॥ ज्येष्ठेमासिद्विजश्रेष्ठभगवन्तंजनार्दनम् ॥ पूजयेद्भक्तिभावेनजलैःसंस्नाप्य
शीतलैः ॥ १ ॥ उद्वर्तनंचदातव्यंसुगन्ध्यामलकंतथा ॥ तैलंसुगन्धंहरयेग्रीष्मकालेदिनेदिने ॥ २ ॥ सुवासितेशीतलेचमन्दिरेऽतिमनोरमे ॥
प्रत्यहंकमलाकान्तंस्थापयेज्जनमण्डपे ॥ ३ ॥ नरौद्रदेशेविप्रेन्द्रसधूमेरन्धनालये ॥ नसूतिकागृहेचैवस्थापयेत्कमलापतिम् ॥ ४ ॥ चामरैर्वी
जयेच्छ्वेतैःसुदीर्घैःकमलापतिम् ॥ ज्येष्ठेमासिद्विजश्रेष्ठसुप्रीतःकिंनयच्छति ॥ ५ ॥ मयूरपुच्छव्यजनैर्निदाघेवीजितोहरिः ॥ ददात्यभिमतं
सर्वमचिरेणैवसत्तम ॥ ६ ॥ तालवृन्तकवातेनपवित्राम्बरवायुना ॥ यैर्ग्रीष्मेवीज्यतेविष्णुस्तेसर्वेस्वर्गगामिनः ॥ ७ ॥ योगात्रलेपनंकुर्या
त्सुगन्धीयैश्चकर्दमैः ॥ ग्रीष्मेहरिंचन्दनैश्चसविशेन्माधवींतनुम् ॥ ८ ॥ उष्मागमेद्विजश्रेष्ठसमुक्तोनात्रसंशयः ॥ प्रफुल्लकुसुमोद्यानेतुलसी
काननेतथा ॥ ९ ॥ सन्ध्यायांस्थापयेद्विष्णुंदेशेधीरसमीरणे ॥ स्रग्भिःपाटलपुष्पाणांयेनविष्णुरलङ्कृतः ॥ १० ॥ ज्येष्ठेमासिसविज्ञेयोह्यश्वमेध
सहस्रकृत् ॥ यस्तुमुक्तावलिंदद्याद्ग्रीष्मेवैश्रीपतेर्जनः ॥ ११ ॥ भूपालस्त्वंहरिस्तस्मैयच्छेज्जन्मनिजन्मनि ॥ यस्तुमण्डयतिग्रीष्मेश्रीकृष्णंमणि
मालया ॥ १२ ॥ तस्यपुण्यफलंविप्रवदतोमेनिशामय ॥ यावद्ब्रह्मासृजत्येतज्जैमिनेसकलंजगत् ॥ १३ ॥ तिष्ठेद्विष्णुपुरेतावन्मणिमालाविभूषितः ॥
सुवर्णाभरणैर्यस्तुरजताभरणैस्तथा ॥ १४ ॥ कृष्णंमण्डयतिग्रीष्मेसोऽपितत्फलमाप्नुयात् ॥ विचित्रंयस्तुपर्यङ्कंसगण्डूकंप्रयच्छति ॥
॥ १५ ॥ हरयेदेवदेवायनसदुःखीकदाचन ॥ ग्रीष्मकालेनदेयानिगुरूणिवसनानिच ॥ १६ ॥ हरयेब्राह्मणश्रेष्ठदेयंतन्वंशुकंशुचि ॥
यस्त्वच्युतफलैर्दिव्यैःसुगन्धैःपूजयेद्धरिम् ॥ १७ ॥ अन्तेशक्रपुरंगत्वासपिबेदमृतंमुदा ॥ प्रियालानांफलैर्दिव्यैर्योऽर्चयेत्कमलापतिम् ॥ १८ ॥
सोऽपितत्फलमाप्नोतिकिमन्यैर्बहुभाषितैः ॥ निदाघेहरयेयस्तुयवाम्रमतिशीतलाम् ॥ १९ ॥ नानाव्यञ्जनसंयुक्तामर्पयेद्वैष्णवोजनः ॥
आषाढेमासिविप्रेन्द्रदेवदेवंजगद्गुरुम् ॥ २० ॥ दधिभिःस्नापयित्वाचपूजयेद्भक्तितोबुधः ॥ मातुःपयोधरपयःपुनस्तेननपीयते ॥ २१ ॥ घनागमेघन
श्यामंकदम्बकुसुमैर्हरिम् ॥ आराधयतिविप्रर्षेपरांगतिमवाप्नुयात् ॥ २२ ॥ कदम्बपुष्पमालाभिर्मण्डपंमण्डयेन्नरः ॥ यस्तस्यब्राह्मणश्रेष्ठवाजि
मेधफलंभवेत् ॥ २३ ॥ सुगन्धैःकेतकीपुष्पैःपूजितःकमलापतिः ॥ सर्वदुःखंहरत्येवमानवानांद्विजोत्तम ॥ २४ ॥ पनसानांफलैर्दिव्यैः
सुपक्वैर्घृतमिश्रितैः ॥ पूजितोभगवान्विष्णुर्दद्यादैश्वर्यमुत्तमम् ॥ २५ ॥ आषाढेमासिदध्यन्नंहरयेप्रतिवासरम् ॥ श्रद्धयावैष्णवोदद्यान्मुक्तिमिच्छन्द्वि
जोत्तम ॥ २६ ॥ कृष्णायनवनीतंयोददातिवैष्णवोजनः ॥ विशुद्धःसकलैःपापैर्ब्रह्मलोकंसगच्छति ॥ २७ ॥ शेफालिकाप्रसूनैश्चयूथिकाकुसुमैस्तथा ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योऽर्चयेत्परमात्मानंसगच्छेत्परमंपदम् ॥ २८ ॥ प्रफुल्लमालतीपुष्पैःसुगन्धैर्योऽर्चयेद्धरिम् ॥ तत्पुण्येनसमंपुण्यंनकिञ्चिद्भविताद्विज ॥ २९ ॥
कदम्बपुष्पैर्बकुलैर्जगद्वन्द्युंजनार्दनम् ॥ अर्चयन्सकलंकामंप्राप्नोतिभुविमानवः ॥ ३० ॥ महामहाप्रसूनैश्चतथाकुरुबकैर्हरिम् ॥ प्रफुल्लैःपूजयेद्य
स्तुतस्यतुष्टःसदाहरिः ॥ ३१ ॥ सैरीयकैश्चयोविष्णुंप्रसूपुष्पैश्चयोऽर्चयेत् ॥ करवीरप्रसूनैश्चसयातिहरिसन्निधिम् ॥ ३२ ॥ श्रावणेचैवयोदद्याल्ला
जान्घृतसमन्वितान् ॥ हरयेतस्यविप्रर्षेगृहेश्रीःसर्वतोमुखी ॥ ३३ ॥ भाद्रेमासिद्विजश्रेष्ठनारायणमनामयम् ॥ श्रद्धयापूजयेत्प्राज्ञश्चतुर्वर्ग
प्रदायकम् ॥ ३४ ॥ निर्मितेनूतनागारेसर्वोपद्रववर्जिते ॥ स्थापयेत्पुण्डरीकाक्षंभगवन्तंजनार्दनम् ॥ ३५ ॥ दंशैश्चमशकैश्चापिप्रकीर्णेमक्षि
कादिभिः ॥ हरिंपुरातनागारेस्थापयेन्नहिमानवः ॥ ३६ ॥ सकर्दमेपतद्वारेगलद्भित्तौगृहेतथा ॥ हरिंनस्थापयेत्प्राज्ञोवर्षासुपरमेश्वरम्
॥ ३७ ॥ विष्णवालयेद्विजश्रेष्ठप्रकुर्याद्यस्तुमानवः ॥ चन्द्रातपंविचित्रंचचन्द्रलोकंसगच्छति ॥ ३८ ॥ रात्रौनानाविधैर्धूपैर्मन्दिरेजगतीपतेः ॥
दंशांश्चमशकांश्चैवपूजाकालेनिवारयेत् ॥॥३९॥ मसारिकाभिःप्रावृत्यमञ्चशायिनमच्युतम् ॥ प्रावृषिस्थापयेद्विष्णुंनिशायांदिव्यमन्दिरे ॥ ४० ॥
कह्लारपत्रैर्देवेशंसुगन्धैर्नूतनैस्तथा ॥ मुमुक्षुःपूजयेन्मर्त्योभाद्रेमासिदिनेदिने ॥ ४१ ॥ नभाद्रेकेतकीपुष्पैःपूजितव्योजनार्दनः ॥ यतोभाद्रपदेमा
सिकेतकीस्यात्सुरासमा ॥ ४२ ॥ पक्वैस्तालफलैर्दिव्यैर्योऽर्चयेद्यदुनन्दनम् ॥ गर्भवासमहादुःखंसभूयोलभतेनच ॥ ४३ ॥ संयुक्तंघृतदुग्धा
भ्यांपक्वतालंमुरारये ॥ योदद्याच्छ्रद्धयामर्त्यःसगच्छेन्मन्दिरंहरेः ॥ ४४ ॥ भाद्रेमासिद्विजश्रेष्ठहरयेतालपिष्टकम् ॥ सघृतंवैष्णवोदद्यात्के
वल्यप्राप्तिहेतवे ॥ ४५ ॥ मासिभाद्रपदेविप्रनकुर्याच्छाकभक्षणम् ॥ नरात्रौभोजनंकुर्यान्मुमुक्षुर्वैष्णवोजनः ॥ ४६ ॥ आश्विनेमासिविप्रेन्द्र
केशवंक्लेशनाशनम् ॥ पूजयेन्मधुरैस्तोयैःपवित्रैश्चसुगन्धिभिः ॥ ४७ ॥ यत्तोयंदीयतेविप्रपूर्वाह्णेहरयेजनैः ॥ पीयूषमिवतत्तोयंगृह्णातिकमलापतिः
॥४८॥ मध्याह्नेदीयतेयच्चतोयंवैचक्रपाणये ॥ तत्तोयमिववेत्तव्यंतद्गृह्णातिद्विजोत्तम ॥४९॥ अपराह्णेचयत्तोयंगोविन्दायप्रदीयते ॥ तत्तोयंरक्ततुल्यं
स्यान्नगृह्णातिततोहरिः ॥ ५० ॥ अतएवद्विजश्रेष्ठपूर्वाह्णेहरिमर्चयेत् ॥ समस्तंलभतेकामंकेशवस्यानुकम्पया ॥५१॥एकवस्त्रेणविप्रेन्द्रनकुर्यात्पूजनं
हरेः ॥ कुर्याद्वापितथापूजांनगृह्णातिचकेशवः ॥ ५२ ॥ अधौतेनचवस्त्रेणयःपूजांकुरुतेहरेः ॥ विफलासाचपूजास्यान्नचविष्णुःप्रसीदति ॥
॥ ५३ ॥ यैस्त्वबद्धशिखैःपूजाक्रियतेचक्रिणोजनैः ॥ पूजाफलंनाप्नुवन्तिबलिग्राह्याचसाभवेत् ॥ ५४ ॥ असंस्कृतगृहेपूजाक्रियतेजगतीपतेः ॥
सापूजाब्राह्मणश्रेष्ठबलिग्राह्याभवेत्खलु ॥ ५५ ॥ स्नानंदेवार्चनंचैवदानंचपितृपूजनम् ॥ तिलकेनविनाविप्रकुरुतेनविचक्षणः ॥ ५६ ॥ तिलका

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न्यगृहीत्वायत्पुण्यकर्मविधीयते ॥ भस्मीभवतितत्सर्वंकर्ताचनारकीभवेत् ॥५७॥शङ्खचक्रगदापद्मैरङ्कितंयस्यदृश्यते॥शरीरंब्राह्मणश्रेष्ठविज्ञेयःसोऽच्यु
तःस्वयम् ॥५८॥ योलिखेद्दक्षिणेबाहौशङ्खपद्मेचवैष्णवः ॥ सव्येचक्रंगदांचैवसविष्णुर्नात्रसंशयः ॥ ५९ ॥ पङ्कजंदक्षिणेबाहौशङ्खस्योपरियोलि
खेत्॥पातकंसकलंतस्यक्षणादेवतुनश्यति ॥ ६० ॥ चक्रोपरिगदांयस्तुलिखेत्सव्येभुजेद्विज ॥ तंवन्दन्तेद्विजश्रेष्ठशक्राद्याअपिनिर्जराः ॥ ६१ ॥
मुरारिपादयुग्मंचस्वललाटेलिखेद्बुधः॥पापात्मापिचतंदृष्ट्वामुक्तोभवतिपातकात् ॥६२॥ अष्टाक्षरंमहामन्त्रंमत्स्यंकूर्मंचयोहृदि॥ लिखेत्सवैष्णवश्रेष्ठः
पुनातिभुवनत्रयम्॥६३॥कृष्णायुधाङ्कितंयस्यशरीरंस्याद्दिनेदिने ॥तस्यकृष्णोजगन्नाथोददातिपरमंपदम्॥६४॥कृष्णायुधाङ्कितननुर्यत्कर्मकुरुतेनरः॥
शुभंवाप्यशुभंवापितत्सर्वमक्षयंभवेत् ॥ ६५ ॥ दानवाराक्षसाश्चैवभूतवेतालकास्तथा ॥ पिशाचाःपन्नगाश्चापियक्षविद्याधरास्तथा ॥ ६६ ॥ किन्नरा
गुह्यकाश्चैवग्रहाबालग्रहास्तथा ॥ कूष्माण्डाश्चैवडाकिन्यस्तथान्येविघ्नकारकाः ॥६७॥ सर्वेभीत्यापलायन्तेदृष्ट्वाकृष्णायुधाङ्कितम् ॥ द्वीपाश्चद्वीपिन
श्चैवतथान्येवनवासिनः ॥६८॥ दृष्ट्वैवप्रपलायन्तेभयात्कृष्णायुधाङ्कितम् ॥ कामलाद्यामहारोगादेहदेहावपातिनः ॥६९॥ कृष्णायुधाङ्कितननुंभक्त्या
पश्यतियोजनः ॥ कृष्णदर्शनतुल्यंतुफलंप्राप्नोतिमानवः ॥७०॥त्रिपदीकृतदूर्वाभिराश्विनेयोऽर्चयेद्धरिम् ॥ दूर्वावत्सन्ततिस्तस्यअविच्छिन्नाप्रवर्तते
॥७१॥आश्विनेमासियोदद्याद्धरयेकर्कटीफलम् ॥ शोकोनजायतेतस्यकदाचिद्धृदयेद्विज ॥७२॥ कार्तिकेचसमायातेसर्वमासोत्तमेशुभे॥दामोदरंदेवदेवं
भक्त्याप्राज्ञःप्रपूजयेत ॥ ७३ ॥ कार्त्तिकेमसिविप्रेन्द्रविष्णुप्रीणनहेतवे ॥ यथोक्तविधिनाप्राज्ञःप्रातःस्नानंसमाचरेत् ॥ ७४ ॥ आमिषंमैथुनंचैवका
र्तिकेमासियस्त्यजेत् ॥ जन्मान्तरार्जितैःपपैर्मुक्तोयातिपरांगतिम् ॥ ७५ ॥ तुलाराशिगतेसूर्येप्रातःस्नानंद्विजोत्तम ॥ हविष्यंब्रह्मचर्यंचमहापात
कनाशनम् ॥ ७६ ॥ आमिषंमैथुनंचैवकार्तिकेमासिसेवते॥ जन्मजन्मनिविप्रेन्द्रसभवेद्ग्रामसूकरः ॥ ७७ ॥ द्विर्भोजनंपरान्नंचतैलंचवैष्णवोजनः ॥
आयातेकार्त्तिकेमासियत्नादपिपरित्यजेत् ॥ ७८ ॥ दामोदरायनभसिदीपंयस्तुप्रयच्छति ॥ फलंतस्यप्रवक्ष्यामिसमासेनशृणुद्विज ॥ ७९ ॥
ब्रह्महत्यादिभिःपापैर्विमुक्तःक्लेशदायकैः ॥ दामोदरपुरंगत्वातिष्ठेत्कोटियुगावधि ॥ ८० ॥ दीपंज्वलन्तंनभसित्रिदशावासवादयः ॥
विलोक्यहर्षिताःसर्वेवदन्तीतिपरस्परम् ॥ ८१ ॥ असौपुण्यात्मनांश्रेष्ठःकेशवार्चनतत्परः ॥ प्रदीपंकार्तिकेमासियतोयच्छतिचक्रिणे ॥
॥ ८२ ॥ कार्तिकेमासिविप्रेन्द्रतस्यतुष्टःसदाहरिः ॥ दद्यादक्षयदीपंयःकार्त्तिकेहरिमन्दिरे ॥ ॥ ८३ ॥ दिनेदिनेऽश्वमेधस्यफलंप्राप्नोति
मानवः ॥ तुलसीदललक्षैर्यःकार्तिकेपूजयेद्धरिम् ॥ ८४ ॥ लक्षैकवाजिमेधस्यमानवोलभतेफलम् ॥ बिल्वस्यदललक्षेणयोऽर्चये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विष्णुमव्ययम् ॥ ८५ ॥ परमंमोक्षमाप्नोतिप्रसादाज्जगतीपते ॥ यत्किञ्चित्कार्तिकेमासिविष्णुमुद्दिश्यदीयते ॥ ८६ ॥ तदक्षयंभवेत्सर्वंसत्य
मेतन्मयोच्यते ॥ घृताक्तंसुरपत्रंयःकार्तिकेमासिविष्णवे ॥ ८७ ॥ दद्याद्दिनेदिनेविप्रतस्यविष्णोःपुरेस्थितिः ॥ प्रफुल्लपद्मपत्रेणसितेनाप्यसिते
तेनवा ॥८८॥ योऽर्चयेत्कमलाकान्तंतस्यकिंभुविदुर्लभम् ॥ द्विजाग्र्यःकार्तिकेमासिहरयेयेनपङ्कजम्॥८९॥नदत्तंतेनकिंविप्रविष्णवेदैत्यजिष्णवे ॥
एकमेवाम्बुजंदत्वाददातिकैटभारये ॥ ९० ॥ तस्मैकिंभगवान्विष्णुर्नददातिश्रियःपतिः ॥ कमलैःकार्तिकेमासियेननाराधितोहरिः ॥ ९१ ॥ जन्म
जन्मनितद्गेहेकमलानहितिष्ठति ॥ पद्मबीजानियोदद्यात्केशवायमहात्मने ॥ ९२ ॥ सजायतेविप्रकुलेशुद्धेचप्रतिजन्मनि ॥ ब्राह्मणस्यकुलेजातश्चतु
र्वेदसुहृद्भवेत् ॥ ९३ ॥ धनवान्बहुपुत्रश्चकुटुम्बानांचपोषकः ॥ नास्तिपद्मसमंपुष्पंजैमिनेसत्यमुच्यते ॥ ९४ ॥ येनसंपूज्यगोविन्दंपापात्मापि
चमोक्षभाक् ॥ पद्मपुष्पस्यमाहात्म्यंविशेषादुच्यतेमया ॥ ९५ ॥ सेतिहासंद्विजश्रेष्ठसावधानंनिशामय ॥ आसीदेकःप्रजानामब्राह्मणःसर्वशास्त्र
वित् ॥ ९६ ॥ हरिपादाम्बुजेयस्यमनोभृङ्गसदास्थितिः ॥ देवानांब्राह्मणानांचगुरूणांचवसर्वदा ॥ ९७ ॥ कृतापूजाद्विजश्रेष्ठत्यक्त्वाकार्यशता
न्यपि ॥ परद्रव्यंविषंतस्यपरस्त्रीचस्वमातृवत् ॥ ९८ ॥ अभूच्चमानसंतस्यसमंमित्रेचशात्रवे ॥ अत्यान्तमतिथिंदृष्ट्वासविप्रःपरमार्थवित् ॥ ९९ ॥
भृशमानन्दमाप्नोतियाचकंचद्विजोत्तमम् ॥ सर्वयज्ञाःकृतास्तेनव्रतानिसकलानिच ॥ १०० ॥ संसारसागरंघोरमपारंचतितीर्षुणा ॥ एकदास
द्विजश्रेष्ठोहरिभक्तिपरायणः ॥ १ ॥ स्वमृत्युंचनिजांजातिंचिन्तयामासचेतसा ॥ अहंपूर्वंस्थितःकोवाकिंवाकर्मकृतंपुरा ॥ २ ॥ कथंवाजन्मसं
प्राप्तंगमिष्यामिक्वपुनः ॥ इतिसंचिन्त्यविप्रोऽसौनिःश्वस्यचपुनःपुनः ॥ ३ ॥ विज्ञातुंपूर्ववृत्तान्तंशिवक्षेत्रंजगामह ॥ तत्रबद्धाञ्जलिर्विप्रो
भक्त्यापरमयायुतः ॥ तुष्टावशङ्करंदेवंवाचामधुरयाशिवम् ॥ ४ ॥ ब्राह्मणउवाच ॥ नमस्तुभ्यंमहादेवनमस्तेपरमेश्वर ॥ नमस्तेशङ्करेशाननमस्ते
वरदप्रभो ॥ ५ ॥ नमस्तेज्ञानरूपायनमस्तेज्ञानदायिने ॥ नमस्तेसर्वभूतानांहृदम्बुजनिवासिने ॥ ६ ॥ जगत्स्रष्ट्रेनमस्तुभ्यंजगत्पित्रेनमोनमः ॥
नमःसंहारकर्त्रेचपशूनांपतयेनमः ॥ ७ ॥ नमस्तेऽस्तुत्रिनेत्रायनमस्तेवह्निचक्षुषे ॥ नमस्तेचन्द्रनेत्रायसूर्यनेत्रायवैनमः ॥ ८ ॥ नमस्तेभस्म
भूषायनमस्तेकृत्तिवाससे ॥ नमोऽस्थिमालिनेतुभ्यंनीलकण्ठायवैनमः ॥ ९ ॥ नमस्तेपञ्चवक्त्रायनमस्तेशूलपाणये ॥ कन्दर्पदर्पविध्वंसकारिणे
भीममूर्तये ॥ ११० ॥ नमस्तेदेवदेवायनमस्तेत्रिपुरारये ॥ पार्वतीपतयेतुभ्यंनमस्तेभीममूर्तये ॥ ११ ॥ बाणभक्त्यातिसंतुष्टमानसायनमो
ऽस्तुते ॥ बहुरूपायवैतुभ्यंविश्वरूपायवैनमः ॥ १२ ॥ गङ्गाधरायवैतुभ्यंदक्षयज्ञविनाशिने ॥ प्रेतानांपतयेतुभ्यंनमस्तुभ्यपिनाकिने ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईशानायनमस्तुभ्यंमनीषायनमोनमः ॥ तुभ्यंनमोऽस्तुदृश्यायअदृश्यायनमोनमः ॥ नमश्चिन्त्यायवैतुभ्यमचिन्त्यायनमोनमः ॥ १४ ॥
ब्रह्मात्वमेवत्रिदशैकनाथस्त्वमेवविष्णुस्तपनस्त्वमेव ॥ त्वमेवसोमःसकलार्तिहारीनमोनमस्तेपरमेश्वराय ॥ १५ ॥ तस्यस्तवंसमाकर्ण्यशङ्करो
लोकशङ्करः ॥आविर्बभूवसहसाप्रसन्नःपरमेश्वरः ॥ १६ ॥ आविर्भूतंसमालोक्यसर्वदेवनमस्कृतम् ॥ ववन्देचरणौतस्यसविप्रोऽत्यन्तभक्तिमान् ॥
॥ १७ ॥ भूयोऽपिसद्विजश्रेष्ठोहर्षनिर्भरमानसः ॥ कृताञ्जलिर्महादेवंतुष्टाववरदंप्रभुम् ॥ १८ ॥ ब्राह्मणउवाच ॥ यंनपश्यन्तिदेवेशंदेवाअपिसवा
सवाः ॥ पश्यामितमहंसाक्षान्महाभाग्यमिदंमम ॥ १९ ॥ ध्यानावस्थितचित्तेनयोदृश्यःपरमेश्वरः ॥ पश्यामितमहंसाक्षात्साध्यंकिमपरंमम ॥
॥ १२० ॥ यन्नामस्मरणादेवमहापातकिनोऽपिच ॥ गच्छन्तिपरमंस्थानंसमीक्षेतमहंप्रभुम् ॥ २१ ॥ कृतार्थोऽस्मिकृतार्थोऽस्मिकृतार्थोऽस्मिच
भाग्यवान् ॥ नमस्तुभ्यंनमस्तुभ्यंप्रसीदपरमेश्वर ॥२२॥ महादेवउवाच ॥ भवतोऽनेनवाक्येनतुष्टोऽस्मिद्विजसत्तम ॥ वरंवृणुमहाभागवरंदित्सुरहं
खलु ॥ २३ ॥ ब्राह्मणउवाच ॥ भवन्तंपरमात्मानमदृश्यंदैवतैरपि ॥ साक्षात्पश्याम्यहंनाथकिंकार्यमपरैर्वरैः ॥ २४ ॥ तथापित्वंमहादेववरं
दित्सुःकृपामयः ॥ पृच्छामियदहांकचित्तद्ब्रूहिपरमेश्वर ॥ २५ ॥ कोऽहंतस्थौपुरादेवकिंवाकार्यंकृतंपुरा ॥ संसारसागरेनाथपतितोऽस्मिकथंप्रभो॥
॥ २६ ॥ कर्मणाप्राप्यतेदेहोदेहीपापेनलिप्यते ॥ पुनःपापप्रभावेणप्राप्यतेविषमागतिः ॥ २७ ॥ प्रभावैःकर्मणांकेषांजन्मप्राप्तमिदंमया ॥
नानादुःखप्रदंनाथप्रसन्नोब्रूहिशङ्कर ॥ २८ ॥ पापमूलमिदंजन्मजन्मदुःखस्यकारणम् ॥ ज्ञातुमिच्छाम्यहंतस्मात्पूर्ववृत्तान्तमात्मनः ॥ २९ ॥
स्थितोऽहंजननीकुक्षौजठरानलतापितः ॥ मूत्रविष्ठाप्रकीर्णेचविपाकेनचकर्मणाम् ॥१३०॥ गर्भवाससमंदुःखंसंसारेनहिमन्यते ॥कथंमयानुभूतंतत्प्रभो
भक्तार्तिनाशन ॥ ३१ ॥ संसारेऽस्मिन्महाघोरेनानादुःखसमन्विते ॥ असारेमाययाविष्णोर्मोहितेपातकाश्रये ॥ ३२ ॥ दुस्तरेबन्धुहीनेच
कामक्रोधादिसंयुते ॥ शोकरोगप्रदेचैवजन्ममृत्युप्रदेतथा ॥ ३३ ॥ अपारेजगतामीशपतितोऽस्मिकथंशिव ॥ एतत्सवविभोब्रूहियदितेमय्यनुग्रहः ॥
॥ ३४ ॥ महादेवउवाच ॥ यद्यप्येतद्द्विजश्रेष्ठगुह्याद्गुह्यतरंमहत् ॥ अप्रकाश्यंतथापित्वांभक्तंप्रतिवदाम्यहम् ॥ ३५ ॥ पुरात्वंब्राह्मणश्रेष्ठशबरान्वय
संभवः ॥दण्डपाणिरितिख्यातःस्थितःसँल्लोकदुःखदः॥३६॥परलोकभयंत्यक्त्वाविवेकैःपरिवर्जितः ॥दस्युवृत्तिंप्रपन्नोभूःसर्वेषांक्लेशदायिनीम् ॥३७॥
दस्युवृत्तिगतंदृष्ट्वाभवन्तमतिनिर्दयम् ॥ अपरेभ्रातरःसर्वेबभूवुस्तेचदस्यवः ॥ ३८ ॥ तेषांनामानिविप्रेन्द्रभ्रातॄणांनिगदाम्यहम् ॥ यैःसार्द्धंभवतापूर्वं
भ्रातृभिर्दस्युताकृता ॥३९॥ दण्डीदण्डायुधश्चैवदत्तवान्दत्तभृत्तथा ॥ सुदण्डोदण्डकेतुश्चभ्रातरःषट्प्रकीर्तिताः ॥ १४०॥ तैर्भ्रातृभिर्महाघोरैर्दयाभिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परिवर्जितः ॥ दण्डेनभवतानित्यंसर्वेव्यग्रीकृताजनाः ॥ ४१ ॥ धनलोभेनभवतादुष्टैस्तैर्भ्रातृभिःसह ॥ अरण्यप्रान्तरेविप्रहताःशतसहस्रशः ॥
॥ ४२ ॥ हत्वाचसायकैस्तीक्ष्णैर्वनस्थेनत्वयासदा ॥ गवांक्रव्याणिभुक्त्वाचमदिराभिःसहद्विज ॥ ४३ ॥ ततोयानविधिंसर्वेवणिजस्त्वद्भयात्तथा ॥
तत्यजुर्विपिनेतस्मिन्ननर्थःपतितःसदा ॥४४॥ यस्यवित्तंनतद्वित्तंगृहंयस्यनतद्गृहम् ॥ यस्यभार्यानतद्भार्यात्वयिदस्युत्वमागते ॥४५॥ एवंस्वभ्रातृभि
स्तैस्तुतस्मिन्नेवमहावने ॥ गतोवर्त्मश्रमश्रान्तःस्नानार्थंसरसींप्रति ॥ ४६ ॥ तत्रस्नानंसमाचर्यक्षुधितेनद्विजोत्तम ॥ भक्षितानिमृणालानिभ्रातृभिस्तै
र्जलानिच ॥ ४७ ॥ अथत्वयाद्विजश्रेष्ठकौतुकात्तत्रसत्तम ॥ भुक्तानिपद्मपुष्पाणिप्रफुल्लानिबहूनिच ॥४८॥ तस्मिन्नेवततःकालेब्राह्मणोविपिनेचरः॥
सर्ववेदाइतिख्यातस्तत्रस्नानार्थमागतः ॥ ४९ ॥ तत्रस्नात्वासधर्मात्माभगवन्तंजनार्दनम् ॥ यष्टुंत्वामेकमम्भोजंययाचेविनयान्वितः ॥ १५० ॥
अथत्वयाचविप्रेन्द्रपद्ममेकंसुनिर्मलम् ॥ दत्तंपरमयाभक्त्यापूजार्थंकमलापतेः ॥ ५१ ॥ त्वयादत्तेनपद्मेनसचप्रीतोद्विजोत्तमः ॥ पूजयामास
तत्रैवविष्णुंसकलकारकम् ॥ ५२ ॥ विष्णुपूजापरंदृष्ट्वातंविप्रंसर्ववेदसम् ॥ त्वमपिप्रहसन्विष्णुंननन्थचसुकामदम् ॥ ५३ ॥ अथाभ्यर्च्यपरात्मानं
चतुर्वर्गफलप्रदम् ॥ यथोक्तविधिनाविप्रसजगामयथागतः ॥ ५४ ॥ तेनाम्बुजप्रदानेनप्रणामेनचसत्तम ॥ विष्णुपूजादर्शनेनननष्टंतेसर्वपातकम्॥
॥ ५५ ॥ ततःकियद्भिर्दिवसैस्तस्मिन्नेवमहावने ॥ संप्राप्तकालःपञ्चत्वंगतोऽसित्वंद्विजोत्तम ॥ ५६ ॥ तेनैवकर्मणातुष्टोभगवान्करुणालयः ॥
ददौतुभ्यंपरंस्थानंदेवैरपिसुदुर्लभम् ॥ ५७ ॥ मन्वन्तरसहस्राणिमन्वन्तरशतानिच ॥ भुक्तंनानासुखंतत्रकृपयाकमलापतेः ॥ ५८ ॥ ततःकर्मा
वसानेतुकर्मभूमिमिमांद्विज ॥ आगत्यतैःपुण्यफलैर्जातोऽसिद्विजसन्ततौ ॥ ५९ ॥ ब्राह्मणस्यकुलेशुद्धेजन्मसंप्राप्यसत्तम ॥ सर्वगुणाश्रया
लब्धाहरिभक्तिरचञ्चला ॥ १६० ॥ आराधितोमहाविष्णुःक्रियायोगैस्त्वयाप्रभुः ॥ तुभ्यंदास्यतिविज्ञानंज्ञानान्मुक्तोभविष्यसि ॥ ६१ ॥ गच्छ
ब्राह्मणभद्रंतेसुप्रीतोनिजमन्दिरम् ॥ मद्दर्शनंत्वयाप्राप्तंमुक्तोऽसिभवबन्धनात् ॥ ६२ ॥ व्यासउवाच ॥ इत्युक्त्वान्तर्दधेविप्रतत्रैवजगदीश्वरः ॥
कृतार्थोब्राह्मणःसोऽपिजगामभवनंस्वकम् ॥ ६३ ॥ अथसत्रिदिनंविष्णुंपद्मपुष्पैर्मनोरमैः ॥ यत्नादाराधयामासतुष्ट्यर्थंपरमेश्वरम् ॥ ६४ ॥ विष्णुं
समाराध्यचिरंप्रसुतःपद्मप्रसूनैर्विचित्रैःसुपुष्पैः ॥ ज्ञानंसमासाद्यजगाममोक्षंप्रसादतःश्रीगरुडध्वजस्य ॥ ६५ ॥ अनिच्छयापिकमलंयच्छन्तःफल
मीदृशम् ॥ विष्णवेयच्छतोभक्त्यानजानेकिंभवेदिति ॥ ६६ ॥ सत्यंसत्यंपुनःसत्यंसत्यमेवमयोच्यते ॥ कमलैर्हरिमभ्यर्च्यप्राप्यतेपरमंपदम्
॥ ६७ ॥ एकमेवारविन्दंयःप्रददातिमुरारये ॥ तस्यनास्तिपुनर्जन्मसंसारेतुभयावहे ॥ ६८ ॥ नारायणंयेचप्रफुल्लवारिजैर्दयामयंकामदमर्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यन्ति ॥ एकाहमप्युत्कटपापयुक्तास्तेयान्तिमुक्तिंह्यतिपापिनोऽपि ॥ १६९ ॥ इतिश्रीपाद्मेमहापुराणेक्रियायोगसारेत्रयोदशोऽध्यायः ॥ १३ ॥
व्यासउवाच ॥ मार्गशीर्षेद्विजश्रेष्ठमहालक्ष्म्यासमन्वितम् ॥ पूजयेदव्ययंविष्णुंभक्तिभावेनवैष्णवः ॥ १ ॥ म्लेच्छदेशेचविप्रेन्द्रतथैवपतितालये ॥
दुर्गन्धैश्चपरिव्याप्तेस्थानेविष्णुंनपूजयेत् ॥ २ ॥ पाखण्डानांसमीपेचमहापातकिनांतथा ॥ असत्यभाषिणांचैवनकुर्याद्विष्णुपूजनम् ॥ ३ ॥
क्रन्दतांसन्निधौचापिकलहानपिकुर्वताम् ॥ तथोपहसतांस्थानेनकुर्यात्पूजनंहरेः ॥ ४ ॥ प्रतिग्रहरतानांचस्थानेविष्णुंनपूजयेत् ॥ कृपणानां
गृहेचैवपरवित्ताभिलाषिणाम् ॥ ५ ॥ तथाकपटवृत्तीनांनकुर्याद्विष्णुपूजनम् ॥ नारायणार्चनेविप्रपरंभक्तिपरायणः ॥ ६ ॥ अन्य
चित्तंपरित्यज्यहरिध्यानपरोभवेत् ॥ हाहाकारंचनिश्वासंविस्मयंचद्विजोत्तम॥७॥पाखण्डजनसंभाषंनकुर्याद्धरिपूजने ॥ अनन्यमानसोभूत्वाभक्त्या
विष्णुंयजेद्बुधः ॥ ८ ॥ भ्रान्तचित्तेनयत्कर्मक्रियतेतच्चनिष्फलम् ॥ सर्वंकर्ममनोऽधीनंमनोऽधीनंजगत्त्रयम् ॥ ९ ॥ तस्मान्मनोदृढीकृत्यपूजयेत्कमला
पतिम् ॥ पूजान्यत्रमनोऽन्यत्रभवेद्यस्यद्विजोत्तम ॥ १० ॥ नचतस्यफलेत्कार्यंकल्पकोटिशतैरपि ॥ यत्नाद्विहितशौचोऽपिविष्णुपूजापरो
ऽपिच ॥ ११ ॥ मनःशुद्धिविहीनश्चेच्चाण्डालइवसस्मृतः ॥ अभक्त्यायत्तपस्तप्तंसुचिरंविधिनाद्विज ॥ १२ ॥ भवेन्निरर्थकंसर्वंकेवलंकायशोधनम्॥
मेरुप्रमाणकंस्वर्णंब्राह्मणायकुटुम्बिने ॥ १३ ॥ अभक्त्यादत्तमप्यर्थनाशायैवतुकेवलम् ॥ तस्मादेकमनाभूत्वाभक्तिश्रद्धासमन्वितः ॥ १४ ॥
सवास्तुकादिशाकंवादद्यात्सदसिवैष्णवे ॥ नारङ्गस्यफलंदिव्यंसुपक्वंयस्तुयच्छति ॥ १५ ॥ केशवायद्विजश्रेष्ठसोऽस्माभिरभिपूज्यते ॥ यत्नेननूतनं
वस्तुप्रियंभगवतोहरेः ॥ १६ ॥ तदेवाग्रयणेमासिभक्त्यादद्यान्मुरारये ॥ पौषेमासिसमायातेश्रीकृष्णंवरदंप्रभुम् ॥ १७ ॥ देवमिक्षुरसैर्दिव्यैः
स्नापयेद्वैष्णवोजनः ॥ यःस्नापयतिविप्रेन्द्रविष्णुमिक्षुरसैःप्रभुम् ॥ १८ ॥ इहभुङ्क्तेसुखंसर्वंमृतोयातीक्षुसागरम् ॥ योदद्यादिक्षुनैवेद्यंदेवदेवाय
विष्णवे ॥ १९ ॥ सोऽपितत्फलमाप्नोतिकिमन्यैर्बहुभाषितैः ॥ सुदुग्धपृथुकंपौषेदधिभिर्वासमन्वितम् ॥ २० ॥ दत्त्वामुरारयेमर्त्यःसर्वान्का
मानवाप्नुयात् ॥ सर्वंपुरातनंवस्त्रंदूरीकृत्यमुरारये ॥ २१ ॥ शीतस्यवारणार्थायदद्याद्वस्त्रंचनूतनम् ॥ पौषसंक्रमणेविप्रसलक्ष्मीकायविष्णवे॥
॥ २२ ॥ दद्यान्मुमुक्षुर्मनुजोदशवर्णंचपीठकम् ॥ यस्तुशङ्खध्वनिंकुर्यात्संपूज्यकमलापतिम् ॥ २३ ॥ तस्यपुण्यफलंवच्मिश्रृणुवत्ससमाहितः ॥
अगम्यागमनाद्यैश्चविमुक्तःसर्वपातकैः ॥ २४ ॥ अन्तेविष्णुपुरंगत्वाविष्णुनासहमोदते ॥ वैनतेयाङ्कितांघण्टांयस्तुवादयतेहरेः ॥ २५ ॥ पूजा
कालेद्विजश्रेष्ठतस्यपुण्यंवदाम्यहम् ॥ अभक्ष्यभक्षणाद्यैश्चविमुक्तःसर्वपातकैः ॥ २६ ॥ प्रयातिमन्दिरंविष्णोरथमारुह्यशोभनम् ॥ तत्रभुक्त्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

खिलान्कामान्कल्पकोटिशतावधि ॥२७॥ पुनरागत्यधरणींचतुर्वेदीद्विजोत्तमः ॥ तत्रभुक्त्वाखिलान्कामान्कल्पकोटिशतावधि ॥ २८ ॥ पुनर्विष्णु
पुरंगत्वामोक्षंप्राप्नोत्यनुत्तमम् ॥ वीणांवादयतेयस्तुपूजाकालेजगत्पतेः ॥ २९ ॥ पण्डितानामग्रणीःस्यात्समर्त्यःप्रतिजन्मनि ॥ मृदङ्गवाद्यकृद्यस्तु
पूजायांकैटभद्विषः ॥ ३० ॥ तस्यप्रसन्नोभगवान्ददात्यभिमतंफलम् ॥ डमरुंडिण्डिमंचैवझर्झरींमधुरींतथा ॥ ३१ ॥ पटहंदुन्दुभिंचैवकाहलंसिन्धु
वारकम् ॥ कांस्यंचकरतालंचवेणुंवादयतेतुयः ॥ ३२ ॥ पूजाकालेमहाविष्णोस्तस्यपुण्यंनिशामय ॥ स्तेयाद्यःपातकैर्मुक्तोमन्दिरंयातिचक्रिणः ॥
॥ ३३ ॥ परमंज्ञानमासाद्यतत्रैवपरिमुच्यते ॥ कलशब्दंचयःकुर्यात्पूजाकालेजगद्गुरोः ॥ ३४ ॥ मुखवाद्यंचविप्रेन्द्रतस्यपुण्यंमयोच्यते ॥ कोटि
कोटिकुलैर्युक्तःप्रयातिमन्दिरंहरेः ॥ ३५ ॥ ज्ञानमासाद्यतत्रैवमोक्षमक्षय्यमाप्नुयात् ॥ विष्णोरायतनेयस्तुभक्तियुक्तःप्रनृत्यति ॥ ३६ ॥ सयाति
ब्राह्मणश्रेष्ठतद्विष्णोःपरमंपदम् ॥ यस्तुगायतिगीतानिभक्त्यानारायणाग्रतः ॥ ३७ ॥ सनृपत्वमवाप्नोतिगन्धर्वाणांपुरेषुच ॥ स्तौतिस्तोत्रैर्जगन्नाथं
भक्त्याचवैष्णवोजनः ॥ ३८ ॥ तस्यप्रसन्नोभगवान्सर्वान्कामान्प्रयच्छति ॥ मासेमासेहरिंयस्तुविधिनानेनपूजयेत् ॥३९ ॥ अचिरेणैवविप्रर्षेप्रसाद
यतिसोऽच्युतम् ॥ ४० ॥ जगदुदधिमिमंयेतर्तुमिच्छन्तिमर्त्याःप्रचुरतरगभीरंसर्वदुःखप्रदंच ॥ परमपुरुषपादाम्भोजयुग्मंमनोज्ञंत्रिदशनिवहसेव्यंते
चसर्वेयजन्तु ॥ ४१ ॥ इतिश्रीपाद्मेमहापुराणेक्रियायोगसारेभगवत्पूजामाहात्म्यंनामचतुर्दशोऽध्यायः ॥ १४ ॥ व्यासउवाच ॥ नारायण
स्यमाहात्म्यंपुनर्वच्मिशृणुद्विज ॥ यच्छ्रुत्वासर्वपापेभ्योमुक्तोभवतिमानवः ॥ १ ॥ विष्ण्वंशभूतंसकलंजगदेतद्द्विजोत्तम ॥ तस्माद्विष्णुमयंधीराः
पश्यन्तिपरमार्थिनः ॥ २ ॥ ब्रह्मशङ्कररुद्राद्याविष्ण्वंशाःसकलाःसुराः ॥ तस्मात्समस्तदेवार्चाविष्णुमेकंप्रपद्यते ॥ ३ ॥ स्मरतांविष्णुनामानिसर्व
पापहराणिच ॥ येनकेनाप्युपायेनविद्यतेनाशुभंक्वचित् ॥ ४ ॥ सर्वमेवद्विजश्रेष्ठकर्मपापमयंभवेत् ॥ अनपायित्विदंविष्णोःस्मरणंपापनाशनम् ॥
॥ ५ ॥ स्वपन्भुञ्जन्वदंस्तिष्ठन्नुत्तिष्ठंश्चव्रजंस्तथा ॥ स्मरेदविरतंविष्णुंमुमुक्षुर्वैष्णवोजनः ॥६॥ उत्तुङ्गैर्मुनिभिःसर्वैःस्मरणेकमलापतेः ॥नकालनियमः
प्रोक्तःसर्वदुःखविनाशनः ॥ ७ ॥ नामप्रभावंविप्रर्षेकेशवस्यमहात्मनः ॥ ब्रवीम्यहंसमासेनसेतिहासंनिशामय ॥ ८ ॥ आसीत्सपरशुर्नामपूर्वंकृतयुगे
शुचिः ॥ वैश्योवैश्यकुलश्रेष्ठःसमस्तगुणपारगः ॥ ९ ॥ सवैश्योदैवयोगेनप्रथमेवयसिद्विज ॥ जगामवशतांमृत्योःकासश्वासगदार्दितः ॥ १० ॥ ॥ ३२ ॥
जीवन्तीनामतत्पत्नीसुमध्यानवयौवना ॥ मृतेभर्तरितातस्यजगामनिलयंततः ॥ ११ ॥ साजीवन्तीद्विजश्रेष्ठनवयौवनगर्विता ॥ गतिंचकारजारेषु
बोध्यमानापिबान्धवैः ॥ १२ ॥ व्रतस्यनियमंवापिगृहव्यापारमेवच ॥ जारानुरक्तचित्तासातत्याजनवयौवना ॥ १३ ॥ अन्धीकृतासाकामेनसुश्रोणी

CC-0. In Public Domain. Digitization by eGangotri

पीवरस्तनी ॥ धर्ममार्गंद्विजश्रेष्ठनकदाचिद्ददर्शह ॥ १४ ॥ दुःशीलांचैवतांदृष्ट्वाततपिताधर्मतत्परः ॥ अपकीर्तिभयाद्भीरुरित्याहात्यन्तकोपवान् ॥
॥ १५ ॥ दुष्टेपापिनिमद्वंशेसर्वदोषविवर्जिते ॥ आसाद्यजन्मकिमितिक्रियतेपातकंत्वया ॥ १६ ॥ यदितेपातकेचित्तंनेहिभोक्तुंगृहंमम ॥ अभद्रेगच्छ
सदनाज्जहीहिममन्दिरम् ॥ १७ ॥ तातेनेतिनिरुक्तासाक्रोधारुणितलोचना ॥ पितुर्गेहंपरित्यज्यसाजगामयथासुखम् ॥१८॥ अथसास्वेच्छयानारी
भ्रमन्तीजारकाङ्क्षया ॥ वेश्यावृत्तिंसमाश्रित्यतस्थौलज्जाविवर्जिता ॥ १९ ॥ पुलिन्दःशबरोवापिचाण्डालोवापितद्गृहम् ॥ आयातितस्यास्तेनापि
मुदाक्रीडतिसाऽसती ॥ २० ॥ परलोकभयंविप्रकदाचिदपिचेतसा ॥ नचिन्तयामासचसावारनारीयथाक्रमात् ॥ २१ ॥ कदाचिद्ब्राह्मणश्रेष्ठकश्चि
द्व्याधस्तदालये ॥ शुकशावंसमादायविक्रयार्थंसमाययौ ॥२२॥ सापिवाराङ्गनातंचशुकशावकमुत्तमम् ॥ जगृहेपरमप्रीत्याधनैःसंपूज्यलुब्धकम् ॥
॥ २३ ॥ तद्योग्याहारदानेनवारस्त्रीनित्यमेवसा ॥ शुकस्यपोषणंचक्रेतस्यजातकुतूहला ॥ २४ ॥ वाराङ्गनानपत्यासातमेवशुकशावकम् ॥ मत्वा
पुत्रमिवात्मानंचक्रेतत्प्रतिपालनम् ॥ २५ ॥ सोऽपिपक्षीद्विजश्रेष्ठनित्यमेवतदाज्ञया ॥ ज्ञातिवच्चित्तवात्सल्यव्यवहारंकरोतिच ॥ २६ ॥ ततोऽसौ
लब्धभावश्चशुकोगणिकयातदा ॥ रामेतिसततंनामपाठ्यतेसुन्दराक्षरम् ॥ २७ ॥ रामनामपरंब्रह्मसर्ववेदाधिकंमहत् ॥ समस्तपातकध्वंसिसशुक
स्तुसदापठन् ॥ २८ ॥ रामोच्चारणमात्रेणतयोश्चशुकवेश्ययोः ॥ विनष्टमभवत्पापंसर्वमेवसुदारुणम् ॥२९॥ कदाचिद्वारमुख्यासाशुकोऽपिचद्विजो
त्तमः ॥ उभावपिचपञ्चत्वमेककालेगतौततः ॥ ३० ॥ समानेतुंततस्तौतुविहिताखिलपातकौ ॥ किङ्करान्प्रेषयामासचण्डाद्यान्धर्मराट्ततः ॥
॥ ३१ ॥ ततस्तेकिङ्कराःसर्वेचण्डाद्याअतिवेगिनः ॥ यमाज्ञयासमायाताःपाशमुद्गरपाणयः ॥ ३२ ॥ आनेतुंतौसमायाताःसर्वेविष्णोस्तुकिङ्कराः
पाशबद्धौतुतौदृष्ट्वापतितौविष्णुकिङ्कराः ॥ ३३ ॥ ऊचुर्वाक्यमिदंक्रुद्धायमदूतान्दुरासदान् ॥ ३४ ॥ विष्णुदूताऊचुः ॥ अहोचित्रमिदंवाक्यंयम
दूतमुखाच्छ्रुतम् ॥ भक्तावपिहरेरेतौदण्ड्यौभास्करसूनुना ॥ ३५ ॥ अहोचरित्रंदुष्टानांकदाचिदपिनोत्तमम् ॥ यत्नादपियतोहिंसांकुर्वन्तिसततं
सताम् ॥ ३६ ॥ दुष्टानांकृतपापानांचरित्रमिदमद्भुतम् ॥ निष्पापमपिपश्यन्तिपुण्यात्मानोऽखिलंजगत् ॥३७॥ पापिनस्तुप्रपश्यन्तिकृतपापमिवा
खिलम् ॥ श्रुत्वापुण्यात्मनांपुण्यमभितृप्यन्तिधर्मिणः ॥ ३८ ॥ तृप्यन्तिपातकंश्रुत्वापापिनांपापिनोजनाः ॥ पापचर्चांसमाकर्ण्ययथातृप्यन्ति
पापिनः ॥ ३९ ॥ नतृप्यन्तितथाप्राप्यस्वर्णभारशतान्यपि ॥ अहोबलवतीमायामहाविष्णोर्महात्मनः ॥ ४० ॥ आत्मपीडाकरमपिपापंकुर्वन्तिते
द्विज ॥ ४१ ॥ व्यासउवाच ॥ इत्युक्त्वाविष्णुदूतास्तेविष्णुभक्तिपरायणाः ॥ छिन्नवन्तस्तयोर्विप्रबन्धनंचक्रधारया ॥ ४२ ॥ ततस्तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शमनप्रेष्याःक्रुद्धास्तेवह्निसन्निभाः ॥ ववर्षुःसहसातत्रज्वलदङ्गारसंचयान् ॥ ४३ ॥ दण्डउवाच ॥ विहितंचमयाप्येवंशुकंवेश्यांचपापिनीम् ॥
नेतुंयूयंसमायाताइत्यद्भुतमिवाभवत् ॥ ४४ ॥ नूनमेतौयदानेतुंयूयमिच्छथसत्तमाः ॥ तदाकुरुतसङ्ग्राममस्माभिःसहसम्प्रति ॥ ४५ ॥
इत्युक्त्वायमदूतास्तेबलिनोविधृतायुधाः ॥ सिंहनादैर्दिशःसर्वेपूरयामासुरुद्धताः ॥ ४६ ॥ विष्णुदूतामहात्मानःसुप्रतीकादयस्तथा ॥
शङ्खनादैःसुललितैश्चक्रुःशब्दमयंजगत् ॥ ४७ ॥ याम्यैस्ततोमहादूतैर्धनुर्मुक्तैःशिलीमुखैः ॥ छादिताविष्णुदूतास्तेसङ्ग्रामेऽत्यन्त
दारुणे ॥ ४८ ॥ शूलानिचिक्षिपुःकेचिच्छक्तिंकेचिन्महारणे ॥ केचिच्छरसहस्राणिकेचिच्चक्राणितेरुषा ॥ ४९ ॥ तैर्मुक्तानिमहास्त्राणि
विष्णुदूतामहामराः ॥ बाणान्विचूर्णयामासुर्गदाप्रहरणादिभिः ॥ ५० ॥ ततोभागवतैरेतैर्याम्यानांचक्रधारया ॥ केषांचिच्चरणाश्छिन्नाः
केषांचिद्बाहवस्तथा ॥ ५१ ॥ केचिद्द्विच्छिन्नशिरसःकेचिन्निर्भिन्नवक्षसः ॥ अत्यद्भुतक्षताःकेचिद्व्यास्याःपेतुर्गतासवः ॥ ५२ ॥ छिन्नै
कचरणाःकेचित्केचिच्छिन्नैकपाणयः ॥ संत्यज्यसहसायाम्याःसङ्ग्रामाच्चप्रदुद्रुवुः ॥ ५३ ॥ तानालोक्यततोदूतान्पलायनपरायणान् ॥ प्रविवे
शरुषाचण्डःसङ्ग्रामंधृतमुद्गरः ॥ ५४ ॥ यमदूतगणश्रेष्ठश्चण्डोऽत्यन्तप्रतापवान् ॥ ताडयामासशतशोमुद्गरैर्विष्णुकिङ्करान् ॥ ५५ ॥ अथभाग
वतादूतानिशितायुधवर्षणैः ॥ ववर्षुस्तरसाक्रुद्धास्तंचण्डंचण्डविक्रमम् ॥ ५६ ॥ मुद्गरेणततश्चण्डोविष्णुदूतान्पृथक्पृथक् ॥ ताडयामासविगलद्रक्त
संसिक्तविग्रहः ॥ ५७ ॥ चण्डेनताडितास्तेनदूताभगवतोयुधि ॥ त्यक्तसत्त्वाःपृष्ठभागंसुप्रकाशस्ययेयुः ॥ ५८ ॥ सुप्रकाशस्ततःक्रुद्धो
जपापुष्पनिभेक्षणः ॥ प्रविवेशरणेयुद्धंगदापाणिर्महाबलः ॥ ५९ ॥ ताडयामाससंक्रुद्धोविष्णुतुल्यपराक्रमः ॥ मुद्गराच्चण्डहस्ताच्चप्रेक्ष्यजनभय
प्रदात् ॥ ६० ॥ समुत्तस्थौमहानग्निःसधूमःपूतिगन्धवान् ॥ समुद्गरेणचण्डेनताडितस्तेनवेगिना ॥ ६१ ॥ स्फुलिङ्गवर्षणंसद्योमुमोचात्यन्त
भीतिदम् ॥ ततःक्रुद्धेनचण्डोऽसौतेनैवमुद्गरेणच ॥ ६२ ॥ ताडयामासविप्रर्षेसुप्रकाशंमहाबलम् ॥ सुप्रकाशस्ततोविप्रव्यथांविस्मृत्यकोपवान् ॥
॥ ६३ ॥ गदयाताडयामासचण्डंशमनकिङ्करम् ॥ तनप्रताडितश्चण्डस्तत्ररक्तपरिप्लुतः ॥ ६४ ॥ पपातमूर्च्छितोभूमौबालार्कइवजैमिने ॥ याम्य
दूतास्ततस्तेचचण्डमादायमूर्च्छितम् ॥ ६५ ॥ हाहाकारंप्रकुर्वन्तोयुद्धाद्भीताःप्रदुद्रुवुः ॥ विष्णुदूतास्ततोविप्रसर्वेचातिप्रहर्षिताः ॥ ६६ ॥
अथशङ्खान्समादध्मुर्जैमिनेद्विजसत्तम ॥ यमदूतास्ततस्तेचशोणितौघपरिप्लुताः ॥ ६७ ॥ यमस्यसन्निधिंजग्मुःक्रन्दन्तोभयविह्वलाः ॥ ६८ ॥
यमदूताऊचुः ॥ सूर्यपुत्रमहाबाहोतवाज्ञाकारिणोवयम् ॥ तथापिविष्णुदूतैर्नःकृतादुर्गतिरीदृशी ॥ ६९ ॥ महापातकिनांश्रेष्ठौप्रभोयद्यपितौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

खलु ॥ रामनामप्रभावेणगतौनारायणालयम् ॥ ७० ॥ भवतादण्डनीयायेदुरात्मानःकृतैनसः ॥ तेऽपिविष्णुपुरंयान्तिप्रभुत्वंतवकिंतदा ॥
॥ ७१ ॥ नास्माकंविष्णुदूतैस्तैःकृतःपरिभवस्त्वयम् ॥ तवैवकेवलंनाथयतोवैकिङ्करावयम् ॥ ७२ ॥ यमउवाच ॥ दूताःस्मरन्तौतौरामरामना
माक्षरद्धयम् ॥ तदानमेदण्डनीयौतयोर्नारायणःप्रभुः ॥ ७३ ॥ संसारेनास्तितत्पापंयद्रामस्मरणैरपि ॥ नयातिसंक्षयंसद्योदृढंशृणुतकिङ्कराः ॥
॥ ७४ ॥ येमानवाःप्रतिदिनंमधुसूदनस्यनामानिघोरदुरितौघविनाशनानि ॥ भक्त्यास्मरन्तिविबुधप्रवरार्चितस्यतेपापिनोऽपिहिभटाममनैव
दण्ड्याः ॥ ७५ ॥ गोविन्दकेशवहरेजगदीशविष्णोनारायणप्रणतवत्सलमाधवेति ॥ भक्त्यावदन्तिपुरुषाःसततंक्षितौयेदण्ड्यानतेममभटाअति
पापिनोऽपि ॥ ७६ ॥ भक्तार्तिनाशनसुरेश्वरदीनबन्धोलक्ष्मीपतेसकलपापविनाशकारिन् ॥ एतद्वदन्तिसततंभुवियेमनुष्यास्तेपापिनोऽपिन
भटाममदण्डनीयाः ॥ ७७ ॥ दामोदरेश्वरमुखामरवृन्दसेव्यश्रीवासुदेवपुरुषोत्तममाधवेति ॥ येषांभवन्तिवदनेषुसदैवशब्दादूतानमाम्यहमपि
प्रतिवासरंतान् ॥ ७८ ॥ नारायणस्यजगदेकपतेर्मुरारेश्चर्चासुचित्तमतिहार्दिनृणांचयेषाम् ॥ तेषामहंचसततंसुभटाह्यधीनोयेतेप्रफुल्लकमलेक्षण
रूपभाजः ॥ ७९ ॥ येविष्णुपूजनरताहरिभक्तभक्ताएकादशीव्रतरताःकपटैर्विहीनाः ॥ येविष्णुपादसलिलंशिरसावहन्तितेपापिनोऽपिनभटामम
दण्डनीयाः ॥ ८० ॥ येभुञ्जतेभगवतोमधुसूदनस्यनैवेद्यशेषमखिलौघविनाशकारि ॥ येकर्णयोश्चशिरसिच्छदनंतुलस्यानित्यंवहन्तिचभटाः
प्रणमाम्यहंतान् ॥ ८१ ॥ येकृष्णपादकमलार्चनतत्पराश्चयेब्राह्मणार्चनरतागुणसेविनश्च ॥ येदीनलोकहृदयातिसुखप्रदाश्चतेषामहंसततमेवभटा
अधीनः ॥ ८२ ॥ येसत्यवाक्यकथनेषुसदानुरक्तालोकप्रियाश्चशरणागतलोकपालाः ॥ पश्यन्तियेचसततंविषवत्परस्वंतेमानवाममभटानहिदण्ड
नीयाः ॥ ८३ ॥ येचान्नदाननिरताःसलिलप्रदाश्चभूमिप्रदानिखिललोकहितैषिणश्च ॥ येवृत्तिहीनजनतृप्तिकराःप्रशान्तादूतानतेखलुकदापिच
दण्डनीयाः ॥ ८४ ॥ येज्ञातिपोषणरताःप्रियवादिनश्चयेदम्भकोपमदमत्सरहीनचित्ताः ॥ येपापदृष्टिरहिताविजितेन्द्रियाश्चतेषामहंनविदधामि
कदापिचर्चाम् ॥ ८५ ॥ व्यासउवाच ॥ एवंप्रबोधितास्तेनयमेनयमकिङ्कराः ॥ ज्ञातवन्तोजगद्भर्तुःप्रभावमतुलंहरेः ॥ ८६ ॥ विष्णोर्नामानि
विप्रेन्द्रसर्वदेवाधिकानिवै ॥ तेषांमध्येतुतत्त्वज्ञारामनामवरंस्मृतम् ॥ ८७ ॥ रामेत्यक्षरयुग्मंहिसर्वमन्त्राधिकंद्विज ॥ यदुच्चारणमात्रेणपापीयाति
परांगतिम् ॥ ८८ ॥ रामनामप्रभावंहिसर्वदेवप्रपूजनम् ॥ महेशएवजानातिनान्योजानातिजैमिने ॥८९॥ विष्णोर्नामसहस्राणांपठनाल्लभतेफलम् ॥
तत्फलंलभतेमर्त्योरामनामस्मरन्नपि ॥ ९० ॥ अहोचित्रंमनुष्याणांचरित्रमिदमुच्यते ॥ रामेतिमुक्तिदंनामनस्मरन्तिदुराशयाः ॥ ९१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वक्तुंश्रमोनचाल्पोऽपिश्रोतुमत्यन्तसुन्दरम् ॥ तथापिरामरामेतिनवदन्तिदुराशयाः ॥ ९२ ॥ अत्यन्तदुःखलभ्यापिसुक्तिर्जगतिमानवैः ॥ लभ्यते रामनाम्नैवकर्मास्तिकिमतःपरम् ॥ ९३ ॥ तावत्तिष्ठन्तिपापानिदेहेषुदेहिनांवर ॥ रामरामेतियावद्वैनस्मरन्तिसुखप्रदम् ॥ ९४ ॥ श्राद्धेच तर्पणेचैवबलिदानेतथोत्सवे ॥ यज्ञेदानेव्रतेचैवदेवताराधनेऽपिच ॥ ९५ ॥ अन्येष्वपिचकार्येषुवैदिकेषुविचक्षणः ॥ स्मरेद्यस्तत्फलप्रेप्सूरामरामे तिभक्तितः ॥ ९६ ॥ नमोरामायेतिविप्रेन्द्रमन्त्रमोङ्कारपूर्वकम् ॥ षडक्षरंजपेद्यस्तुसायुज्यंप्राप्यतेहरेः ॥ ९७ ॥ षडक्षरेणमन्त्रेणहरिपूजनकृन्नरः ॥ सर्वान्कामानवाप्नोतिप्रसादाच्चक्रपाणिनः ॥ ९८ ॥ मृत्युकालेद्विजश्रेष्ठरामरामेतियःस्मरेत् ॥ सपापिष्ठोऽपिपरमंमोक्षमाप्नोतिमानवः ॥ ॥ ९९ ॥ रामेतिनामयात्रायांयेस्मरन्तिमनीषिणः ॥ सर्वसिद्धिर्भवेत्तेषांयात्रायांनात्रसंशयः ॥ १०० ॥ अरण्यप्रान्तरेवापिस्मशानेयो भयानके ॥ रामनामस्मरेत्तस्यविघ्नन्तेनापदोद्विज ॥ १ ॥ राजद्वारेतथादुर्गेविदेशेदस्युसंमुखे ॥ दुःस्वप्नदर्शनेचैवग्रहपीडासुजैमिने ॥ २ ॥ औत्पातिकेभयेचैववातरोगभयेतथा॥रामनामस्मरन्मर्त्योलभतेनाशुभंक्वचित् ॥३ ॥ रामनामद्विजश्रेष्ठसर्वाशुभनिवारणम्॥कामदंमोक्षदंचैवस्मर्तव्यं सततंबुधैः ॥४॥रामरामेतिविप्रर्षेयस्मिन्नस्मर्यतेक्षणे ॥ क्षणःसएवव्यर्थःस्यात्सत्यमेवमयोच्यते ॥५॥ स्मरन्तोहरिनामानिनावसीदन्तिमानव ॥ ६ ॥ जन्मकोटिदुरितक्षयमिच्छुःसंपदंचलभतेभुविमर्त्यः ॥ विष्णुनामसततंभुविभक्त्यामोक्षदातिमधुरंस्मरतिस्म ॥ १०७ ॥ इतिश्रीपाद्मेमहापुराणे क्रियायोगसारेपञ्चदशोऽध्यायः ॥ १५ ॥ व्यासउवाच ॥ भूयएवद्विजश्रेष्ठमहाविष्णोःपरात्मनः ॥ ब्रवीमिशृणुमाहात्म्यंसर्वदुःखविनाश नम् ॥ १ ॥ ब्राह्मणाःक्षत्रियावैश्याःशूद्राश्चान्येऽन्त्यजास्तथा ॥ हरिभक्तिंप्रपन्नायेतेकृतार्थानसंशयः ॥ २ ॥ हरेरभक्तोविप्रोऽपिविज्ञेयः श्वपचाधिकः ॥ हरिभक्तःश्वपाकोऽपिविज्ञेयोब्राह्मणाधिकः ॥ ३ ॥ सकथंब्राह्मणोयस्तुहरिभक्तिविवर्जितः ॥ सकथंश्वपचोयस्तुभगवद्भक्ति मानसः ॥ ४ ॥ अव्याजेनयदाविष्णुःश्वपाकेनापिपूज्यते ॥ तदापश्येत्तमप्येवंचतुर्वेदद्विजाधिकम् ॥ ५ ॥ पुरासीच्चक्रिकोनामशबरोलोककं र्षकृत् ॥ सुजातिवृत्तिहीनश्चयुगेद्वापरसंज्ञके ॥ ६ ॥ विप्रवादीजितक्रोधःपरहिंसाविवर्जितः ॥ दयालुर्दम्भहीनश्चपितृमातृपरायणः ॥ ७ ॥ नकृतोवैष्णवालापोमोक्षशास्त्रंनचश्रुतम् ॥ तथापिजातातच्चित्तेहरिभक्तिरचञ्चला ॥ ८ ॥ हरेकेशवगोविन्दवासुदेवजनार्दन ॥ इत्यादीनि स्मरन्नित्यंसचनामानिचक्रिणः ॥ ९ ॥ वन्यंफलंचयत्किञ्चित्प्राप्नोतिद्विजसत्तम ॥ आदौददातितद्भक्तेनिजेशबरवंशजः ॥ १० ॥ तन्मा धुर्यंततोज्ञात्वावक्रान्निष्कास्यततपुनः ॥ ददातिहरयेभक्त्यासुप्रीतःप्रतिवासरम् ॥ ११ ॥ उच्छिष्टंवाप्यनुच्छिष्टंद्वयमेवनवेत्तिसः ॥ निजजा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिस्वभावोहिसततंमूर्ध्निवर्तते ॥ १२ ॥ कदाचित्सद्विजश्रेष्ठकाननाभ्यन्तरेभ्रमन् ॥ फलमेकंप्राप्यपक्वंप्रियालस्यतुशाखिनः ॥ १३ ॥
अथासौहर्षितस्तस्यफलमासीत्तुदुर्लभम् ॥ ससंरम्भेणतल्लब्ध्वानिजवक्त्रान्तरेददौ ॥ १४ ॥ सददौतत्फलंयावन्निजवक्त्रान्तरेद्विज ॥ प्रविवेशगलं
तावत्तत्फलंशृणुजैमिने ॥ १५ ॥ तावत्सव्येनहस्तेनगलरन्ध्रंबबन्धसः ॥ यत्नाद्विधृत्यसव्येनपाणिनासकलंद्विज ॥ १६ ॥ चक्रिकश्चिन्तयामासहरि
भक्तिपरायणः ॥ फलमेतद्यदातस्मैनददामिमुरारये ॥ १७ ॥ नजातःकोऽपिसंसारेतदाहमिवपातकी ॥ हरिंसंचिन्त्यबहुधासचकारमतिंततः ॥१८॥
तथापितत्फलंतस्यननिष्क्रान्तंगलाद्विज ॥ हरेरेकान्तभक्तोऽसौछित्त्वापरशुनागलम् ॥ १९ ॥आनीयतत्फलंपक्वंददौदेवायविष्णवे ॥ तत्सन्निधिंस
मायातस्तमेवहृदिचिन्तयन् ॥२०॥ रुधिरोक्षितसर्वाङ्गःपतितःक्षितिमण्डले ॥ तंदृष्ट्वाभगवान्विष्णुर्गतासुंव्यथितोऽभवत् ॥२१॥ एतस्यसदृशोभक्तो
ममकोऽपिनविद्यते ॥ यतोनिजगलंछित्त्वाममसंतोषणंकृतम् ॥ २२ ॥ यथाभक्तिमतानेनसात्त्विकंकर्मवैकृतम् ॥ यद्दत्त्वानृण्यमाप्नोमितथाव
स्तुकिमस्तिमे ॥२३ ॥ धन्योऽयमतिधन्योऽयंधन्योऽयंनात्रसंशयः ॥ प्राणानपिपरित्यज्यममसंतोषणंकृतम् ॥२४॥ ब्रह्मत्वंवाशिवत्वंवाचक्रित्वंवा
पिदीयते ॥ तदाप्यानृण्यमेतस्यभक्तस्यनहिगम्यते ॥ २५ ॥ इत्युक्त्वात्यन्तसंतुष्टोभगवान्गरुडध्वजः ॥ स्वहस्तकमलेनास्यततोमस्तकमस्पृशत् ॥
॥ २६ ॥ तद्धस्तकमलस्पर्शाच्छबरोऽसौगतव्यथः ॥ समुत्तस्थौमहासत्त्वोनारायणपरायणः॥२७॥ व्यासउवाच ॥ ततोऽस्यभक्तश्रेष्ठस्यनिजवस्त्रेण
केशवः ॥ पुत्रस्येवपितागात्ररजोमार्जितवान्द्विज ॥ २८ ॥ चक्रिकस्तंसमालोक्यमूर्तिमन्तंजनार्दनम् ॥ वाचामधुरयाऽस्तौषीत्प्रह्वमस्तःकृता
ञ्जलिः ॥ २९ ॥ ॥ चक्रिकउवाच ॥ गोविन्दकेशवहरेजगदीशविष्णोजानामियद्यपिनतेस्तुतियोग्यवाक्यम् ॥ स्तोतुंतथापिरसनाममवा
ञ्छतित्वांस्वामिन्प्रसीदहरदोषमिमंप्रवृद्धम् ॥३०॥ त्यक्त्वाभवन्तमखिलेश्वरचक्रपाणेह्यन्यंयजन्तिमनुजाजगतीहयेवै ॥ मूढास्तएवदुरितप्रकरैकधाम
सानुग्रहस्त्वमसिमय्यपिदेवयस्मात् ॥ ३१ ॥ जानातिदेवभवतोभुवनैकनाथभक्त्यैवयद्यपिनृणांभवबन्धनाशः ॥ एकान्तपापशबरान्वयलब्ध
जन्माविष्णोस्तथापिभगवान्मयिसुप्रसन्नः ॥ ३२ ॥ यस्यप्रभोतवमनोज्ञकरारविन्दस्पर्शंचतुर्मुखमुखाअपिदेववृन्दाः ॥ नप्राप्नुवन्तिविदितस्य
मयाद्यलब्धंत्वत्तोनकोऽपिसदयोनिजसेवकेषु ॥ ३३ ॥ येनत्वयाविनिहतस्त्रिदशाद्यवैरीकंसासुरोनिमिसुतःकृतसर्वपापः ॥ सेन्द्रामरप्रकर
मर्त्यहितायपूर्वंतस्मैनमःपरममङ्गलदायतुभ्यम् ॥ ३४ ॥ येनत्वयातिबलिनायमलार्जुनौतौदेवोत्तमेननिहतौवसुदेवजेन ॥ दुष्टश्चकालयवनो
युधिधेनुकश्चतस्मैनमोऽस्तुनवमेघनिभायतुभ्यम् ॥ ३५ ॥ श्रीकृष्णमाधवयदूत्तमभोह्यनन्तयेनत्वयामरपतेरचलाविभूतिः ॥ पूर्वंकृताभगवता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रपमेश्वरेणतस्मैनमोऽस्तुयदुवंशपरायतुभ्यम् ॥ ३६ ॥ पारिजातोहृतोयेनजितश्चाखण्डलस्त्वया ॥ लीलाजितमहेशायतस्मैतुभ्यंनमोनमः ॥३७॥
कृत्वावृकोदरंहेतुंजरासन्धोनिपातितः ॥ बाणासुरस्यविच्छिन्नाबाहवश्चत्वयापुरा ॥ ३८ ॥ शिशुपालोहतोयेनतस्मैनित्यंनमोनमः ॥ भूमेरपहृतो
भारस्त्वयायेनमहात्मना ॥ ३९ ॥ क्षत्रियान्माययाहत्वातस्मैनित्यंनमोनमः ॥ ४० ॥ व्यासउवाच ॥ इतितेनस्तुतोविष्णुश्चक्रिकेणमहात्मना ॥
उवाचपरमप्रीतोवरंवृण्वितिजैमिने ॥ ४१ ॥ चक्रिकउवाच ॥ परंब्रह्मपरंधामपरमात्मन्कृपामय ॥ पश्यामित्वामहंसाक्षाद्वरैःकिमपरै
र्द्विज ॥ ४२ ॥ नध्याताभवतीमूर्तिःपूजाचनकृतातव ॥ नैवेद्यैर्दिव्यपुष्पैश्चदिव्यधूपैःप्रदीपकैः ॥ ४३ ॥ नतेस्मृतानिनामानिकदाचिद्भग
न्मया ॥ त्वत्पादसलिलंस्वामिन्विधृतंनहिमूर्धनि ॥ ४४ ॥ नभुक्तंतवनैवेद्यंत्वद्व्रतंनमयाकृतम् ॥ तथाप्यहमपश्यंत्वांकिंकरोम्यपरैर्वरैः ॥
॥ ४५ ॥ शबरान्वयजन्मास्मिसर्वधर्मबहिष्कृतः ॥ तथापिपादपद्मंतेदैवतैरपिदुर्लभम् ॥ ४६ ॥ तदेवाद्यमयाप्राप्तंवरैःकिमपरैर्मम ॥
तथापिकमलाकान्तवरदित्सुर्यदाभवान् ॥ त्वयितिष्ठतुमेचित्तंसदापित्वदनुग्रहात् ॥ ४७ ॥ श्रीभगवानुवाच ॥ वचनामृतवर्षेणत्व
दीयेनमहाशय ॥ संप्राप्तामहतीतुष्टिर्मयासेवकसत्तम ॥ ४८ ॥ यदिदंवत्समेदत्तंत्वयाफलमनुत्तमम् ॥ अनेनात्यन्ततुष्टोऽस्मिभक्ति
गृह्णामिहर्षितः ॥ ४९ ॥ व्यासउवाच ॥ इत्युक्त्वाभगवान्विष्णुर्भक्तिग्राहीदयामयः ॥ तमालिङ्गितवान्भक्तंचतुर्भिर्दीर्घबाहुभिः ॥ ५० ॥
श्रीभगवानुवाच ॥ तुष्टोऽस्मिभवतोभक्त्यावत्सचक्रिकसत्तम ॥ यदिदंप्रार्थितंवत्सतत्तथैवभविष्यति ॥ ५१ ॥ इत्युक्त्वातंपुनर्भ
क्तमालिङ्ग्यचपरमेश्वरः ॥ तत्रैवान्तर्दधेविप्रविश्वात्माविश्वपालकः ॥ ५२ ॥ सचक्रिकोऽतिसंतुष्टोहरिभक्तिपरायणः ॥ पुत्रदारादिकंत्यक्त्वाजगाम
द्वारकांपुरीम् ॥ ५३ ॥ तत्रैचैवंसमासाद्यकृपयाकमलापतेः ॥ आयुषोऽन्तेययौमोक्षंदेवानामपिदुर्लभम् ॥ ५४ ॥ तस्माद्भक्तवशोदेवोभक्तिमात्रेण
तुष्यति ॥ नचस्तोत्रैर्नवित्तैश्चनतपोभिर्जपेनच ॥ ५५ ॥ फलंयद्यपिचोच्छिष्टंदत्तंतेनद्विजोत्तम ॥ तथापितुष्टवान्विष्णुर्ज्ञात्वाभक्तिमचञ्चलाम् ॥
॥५६॥ तस्मान्नारायणोदेवःपूजनीयोमुमुक्षुभिः ॥५७॥ येयजन्तिदृढयाकिलभक्त्यावासुदेवचरणाम्बुजयुग्मम् ॥ वासवादिविबुधप्रवरेज्यंतेव्रजन्ति
मनुजाःकिलमोक्षम् ॥ ५८ ॥ इतिश्रीपाद्मेमहापुराणेक्रियायोगसारेषोडशोऽध्यायः ॥ १६ ॥ जैमिनिरुवाच ॥ पुनरेवगुरोब्रूहिमाहात्म्यंकमला
पतेः ॥ हरेःकथामृतंपीत्वातृप्तिर्वैकस्यजायते ॥ १ ॥श्रीव्यासउवाच ॥ त्वत्तुल्यःकोऽपिसंसारेसुकृतीनहिविद्यते ॥ यतःकेशवमाहात्म्यंश्रोतुमिच्छसि
भक्तितः ॥२॥ नारायणकथारम्यापुनात्येवंजगत्त्रयम् ॥ श्रोतारंपृच्छकंचैववक्तारंचद्विजोत्तम ॥३॥ शृणुलक्ष्मीपतेर्वत्समाहात्म्यंपापनाशनम् ॥ कथ

CC-0. In Public Domain. Digitization by eGangotri

यामिसमासेनचतुर्वर्गफलप्रदम् ॥ ४ ॥ भक्त्यापरमयाविष्णुमेकाहमपियोऽर्चयेत् ॥ जन्मकोटिकृतंपापंसद्यस्तस्यहरेद्धरिः ॥ ५ ॥ पुण्यात्मासकथं
मर्त्योयेननाराधितोहरिः ॥ सकथंपातकीयस्यभक्तिर्नारायणेप्रभौ ॥ ६ ॥ अस्तिसर्वपुरश्रेष्ठंपुरुषोत्तमसंज्ञकम् ॥ पुरंसर्वगुणैर्युक्तंसर्वदेवगणाश्रयम् ॥
॥ ७ ॥ सर्वेषामेवतीर्थानांवरिष्ठंतन्निगद्यते ॥ यतस्तस्मिन्पुरेरम्येसाक्षाद्वसतिकेशवः ॥ ८ ॥ तत्रभद्रतनुर्नामपूर्वमेकोऽभवद्द्विजः ॥ सुन्दरःप्रियवादी
चपवित्रकुलसंभवः ॥ ९ ॥ सम्प्राप्तयौवनोविप्रःसुन्दरःकाममोहितः ॥ परलोकभयंत्यक्त्वावारस्त्रीनिरतोऽभवत् ॥१० ॥ नवेदाध्ययनंचक्रेपुराणानि
चसर्वशः ॥ तत्याजोत्तमसंज्ञांचपाखण्डजनसङ्गमात् ॥११॥अयाज्यदानग्राहीचपरद्रव्यापहारकः ॥ अभवद्धर्मनिन्दीचसविप्रःपापतत्परः ॥ १२ ॥
तत्याजब्राह्मणाचारंतथैवसत्यभाषणम् ॥ गुरुणामतिथीनांचपूजनंब्राह्मणाधमः॥१३॥यद्यत्पापतरंकर्मतत्तदेवविधीयते ॥ नचपुण्यतमंकर्मकदाचित्तेन
जैमिने ॥ १४ ॥ एकदाकृतपापोऽसौलोकलज्जाभयान्वितः ॥ श्राद्धंचकारविप्रोवैश्राद्धभक्तिविवर्जितः ॥ वारनारीमितिप्राहगतःसनिशितद्गृहम् ॥
॥ १५ ॥ ब्राह्मणउवाच ॥ एतद्विशालजघनेपितृश्राद्धदिनंमम ॥ आयातस्त्वद्गुणैर्बद्धस्तथापिनिलयंतव ॥१६॥ पश्यरात्रीमिमांकान्तेसर्वलोकभया
वहाम् ॥ स्रवदम्बुदसङ्घातपरिव्याप्तंनभःस्थलम् ॥ १७ ॥ नवाम्बुप्लुतमार्गायांत्वद्गुणाकृष्टमानसः ॥ अस्यामपिविभावर्यांतवाहंगृहमागतः॥
॥ १८ ॥ मेघविद्युत्प्रदीपेनकामेनार्थोपदेशिना ॥ त्वद्गुणाध्यानविश्वासआगतोऽहंनिशिप्रिये ॥ १९ ॥ त्वामदृष्ट्वाक्षणमपिप्रीतिर्मेनहिजायते ॥
अपिदुःखेनहेतन्वित्वांद्रष्टुमहमागतः ॥ २० ॥ तीर्थतोयाभिषेकेणकान्तेकिंमेप्रयोजनम् ॥ त्वत्प्रेमतीर्थतोयेनसिक्तःप्राप्तोऽस्म्यहंदिवि ॥२१ ॥ परत्र
सुखदान्देवानाराध्यममकिंफलम् ॥ जीवतैवमयास्वर्गःप्राप्यतेत्वत्प्रसादतः ॥ २२ ॥ अपकीर्तिभयात्कान्तेश्राद्धकर्मकृतंगृहे ॥ अस्मिञ्छ्राद्धेममश्रद्धा
स्वल्पापिनहिविद्यते ॥२३॥ त्वंमेजपस्तपस्त्वंमेत्वंमेनीतिश्चसुन्दरि ॥ त्वामेकामेवसंसारेसर्वभावेनसुन्दरि ॥२४॥ प्रपन्नोऽस्मिसदाहंतेआज्ञाकारीक
रोमिकिम्॥२५॥सुमध्यमोवाच ॥ त्वयापुत्रेणतातस्तुपुत्रहीनइवाभवत् ॥ पितृश्राद्धदिनेऽपित्वंमैथुनंकर्त्तुमिच्छसि॥२६॥दुर्मतेमैथुनंयस्तुकुरुतेपितृ
वासरे ॥ रेतोभोजिनएवस्युःपितरस्तस्यसोऽपिच॥२७॥कुरुतेमैथुनंमूढोमोहात्पितृदिनेयदि॥तच्छ्राद्धंराक्षसग्राह्यंभवेन्नास्त्यत्रसंशयः ॥ २८ ॥ मय्य
द्यागदितंयत्तेयथास्नेहेनमानसम् ॥ तथायदिभवेद्विष्णौतदाप्राप्नोतिकिंनहि ॥२९॥ यमदण्डान्तरस्थायिजीवितंचशरीरिणाम् ॥ तथापिपातकंमूढ
कुरुषेनिर्भयःसदा ॥ ३० ॥जलबुद्बुदवन्मूढक्षणविध्वंसिजीवतम् ॥ किमर्थंशाश्वतधियाकुरुषेच्छुरितंसदा ॥ ३१ ॥ ललाटेलिखितंयस्यमृत्युरित्य
क्षरद्वयम् ॥ सकथंकुरुतेपापंसमस्तक्लेशदायकम् ॥ ३२ ॥ अहोमायामहाविष्णोरेकाबलवतीक्षितौ ॥ यतःपापंप्रकुर्वाणःसततंहर्षितोद्विज ॥ ३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्थानंपापायमेदेहिनिजदेहेदुराश्रये ॥ दहत्याश्रममेघोहिवीतिहोत्रइवज्वलन् ॥ ३४ ॥ व्यासउवाच ॥ दैवप्रेरितयातत्रतयेत्युक्तंसुवेश्यया ॥
मनसाचिन्तयामासब्राह्मणःकृतपातकः ॥ ३५ ॥ धिग्धिङ्मांचमहापापंमूढंपातकिनांवरम् ॥ वेश्यायाएवयज्ज्ञानंतन्मेनास्तिदुरात्मनः ॥ ३६ ॥
ब्राह्मणस्यकुलेशुद्धेजन्मसंप्राप्यवैमया ॥आत्मघातकरंपापंनित्यमेवकृतंमहत्॥३७॥ जातोयदाध्रुवोमृत्युर्मृतेस्वामीयदायमः॥ अविवेकतयापापंकथं
तर्हिकरोम्यहम् ॥ ३८ ॥ जपस्तपस्तथाहोमोवेदाध्ययनमेवच ॥ विप्राचारोऽतिथिःपूजागुरुभक्तिर्द्विजार्चनम् ॥३९॥ पितृयज्ञादिकंकर्मपूजाचकमला
पतेः ॥ मयानचक्रेकस्माद्वैभविष्यत्युत्तमागतिः ॥ ४० ॥ मार्कण्डेयंमहात्मानंसर्वधर्मविदांवरम् ॥ तुष्टावसद्विजोवाचाप्रणम्यभुविदण्डवत् ॥ ४१ ॥
॥ ब्राह्मणउवाच ॥ नमस्तुभ्यंद्विजश्रेष्ठदीर्घजीवनमोऽस्तुत ॥ नारायणस्वरूपायनमस्तुभ्यंमहात्मने ॥४२ ॥ नमोमृकण्डपुत्रायसर्वलोकहितैषिणे ॥
ज्ञानार्णवायवैतुभ्यंनिर्विकारायवैनमः॥४३॥स्तुतस्तेनेतिविप्रेणमार्कण्डेयोमहातपाः ॥ उवाचपरमप्रीतःसर्वशास्त्रार्थपारगः॥४४॥मार्कण्डेयउवाच ॥
तवभक्त्यातितुष्टोऽस्मिमहाभागवरंवृणु ॥ तवाभिलषितंसद्यःसाधयिष्यामिनान्यथा ॥ ४५ ॥ ब्राह्मणउवाच ॥ अहंपापात्मनांश्रेष्ठोद्विजाचार
विवर्जितः ॥ परहिंसान्वितोनित्यंपरस्त्रीनिरतःसदा॥४६॥मायामूढेनविप्रेन्द्रसदापापंकृतंमहत ॥नाल्पंवापिकृतंपुण्यंकदाचिदपिसादरम्॥४७॥संसार
सागरेघोरेदुःखदेऽत्यन्तभैरवे ॥ कथंभवतिनिस्तारोमहापातकिनोमम॥४८॥मार्कण्डेयउवाच ॥ कृतपापोऽपिविप्रेन्द्रत्वंहिपुण्यात्मनांवरः॥यतोबुद्धि
रियंजातात्वयिसंसारदुर्लभा ॥ ४९ ॥ पुण्यात्मनांपुण्यवृद्धिर्वर्धतेप्रतिवासरम् ॥ पापात्मनांपापवृद्धिर्वर्धतेतुदिनेदिने ॥ ५० ॥ पापात्मना
पिभवतापापवृद्धिर्निवार्यते ॥ अतस्तुभ्यंजगन्नाथःप्रसन्नइवलक्ष्यते ॥ ५१ ॥ पापंकृत्वापियोमर्त्यःपापाद्भूयोनिवर्तते ॥ तमुत्तमंनरंप्राहुःपूर्व
जन्मार्चिताच्युतम् ॥ ५२ ॥ निजभक्तंमहाविष्णुर्दृष्ट्वापापरतंप्रभुः ॥ ददातिविपुलांबुद्धिंयथाभवतिसद्गतिः ॥ ५३ ॥ अतस्त्वंब्राह्मणश्रेष्ठप्रतिजन्मा
च्युतार्चकः ॥ अचिरेणैवभद्रंतेभविष्यतिनसंशयः ॥ ५४ ॥ यद्यत्पृष्टंत्वयाविप्रमत्तःश्रोष्यसितंनहि ॥ यतोनित्यक्रियाकालोममसंप्रतिवर्तते ॥
॥ ५५ ॥ दान्तोनामद्विजःकश्चिदस्तिसर्वार्थतत्त्ववित् ॥ कथयिष्यतितत्सर्वंसचतस्याश्रमंव्रज ॥ ५६ ॥ तेनोपदिष्टोऽसौविप्रोमार्कण्डेयेन
धीमता ॥ दान्ताश्रमंययौक्षिप्रंपवित्रमतिसुन्दरम् ॥ ५७ ॥ अश्वत्थैश्चम्पकैश्चैवबकुलैःप्रियकैस्तथा ॥ अन्यैश्चपुष्पितैर्वृक्षैःशोभितंसुमनोहरम्॥ ॥ ३६ ॥
॥ ५८ ॥ प्रफुल्लकुसुमामोदपरिव्याप्तदिगन्तरम् ॥ गुञ्जद्भ्रमरसङ्घातंफलशब्दातिशब्दितम् ॥ ५९ ॥ मन्दंमन्दंवहद्वायुशीतलंचैववारिच ॥ शत
श्वापदसंकीर्णंशिष्योपशिष्यसङ्कुलम् ॥ ६० ॥ तस्याश्रमंततोविप्रःप्रविश्यातिमनोहरम् ॥ ददर्शदान्तंतत्त्वज्ञंसर्वशिष्यगणैर्वृतम् ॥ ६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्तुत्वातंब्राह्मणश्रेष्ठदान्तंनारायणात्मकम् ॥ ववन्देचरणौतस्यशिरसासद्विजोत्तमः ॥ ६२ ॥ दान्तउवाच ॥ कस्त्वंभद्रसमायातः किमस्त्यत्र
प्रयोजनम् ॥ ब्रूहितत्त्वंतुमांस्तौषिहेतुनाकेनसाम्प्रतम् ॥ ६३ ॥ भद्रतनुरुवाच ॥ ब्राह्मणोऽहंमहाभागब्राह्मणाचारवर्जितः ॥ नाम्नाभद्रतनुः
ख्यातोविहिताखिलपातकः ॥ ६४ ॥ संसारपापविच्छेदःकथंमेपापिनोभवेत् ॥ एतन्मेकथयब्रह्मन्यतस्त्वंसर्वतत्त्ववित् ॥ ६५ ॥ दान्तउवाच ॥
शृणुविप्रपरंगुह्यंतवस्नेहान्मयोच्यते ॥ येनसंसारपाशस्यविच्छेदोभवतेनृणाम् ॥ ६६ ॥ त्यजपाखण्डसंसर्गंसङ्गंभजसतांसदा ॥ कामंक्रोधंच
मोहंचलोभंचदर्पमत्सरौ ॥ ६७ ॥ असत्यंपरहिंसांचत्यजयत्नादपिद्विज ॥ स्मरन्नामानिसततंमहाविष्णोर्महात्मनः ॥ ६८ ॥ संमार्जनंद्विजश्रेष्ठ
तथोपलेपनंपुनः ॥ मार्गशोभांचदीपंचकेशवायतनेकुरु ॥६९॥ कुरुब्राह्मणसेवांचज्ञातिसेवांचसर्वदा ॥ कुर्वन्नतोयदानंचनित्यंपञ्चमहाध्वरान् ॥७०॥
कथांशृणुहरेर्मन्त्रंजपत्वंद्वादशाक्षरम् ॥ कर्माण्येतानिसर्वाणिकुर्वतस्तवसत्तम ॥ ७१ ॥ भविष्यत्युत्तमंज्ञानंज्ञानान्मोक्षमवाप्स्यसि ॥ ७२ ॥
ब्राह्मणउवाच ॥ यान्येतानित्वयाब्रह्मन्प्रोक्तानिशुभदानिवै ॥ तेषांविवरणंब्रूहिकोमोहोदम्भमत्सरौ ॥ ७३ ॥ किमसत्यंचकाहिंसादयाशान्तिर्दम
श्चकः ॥ समदृष्टिश्चकाप्रोक्ताकापूजाकमलापतेः ॥ ७४ ॥ अहोरात्रश्चकःप्रोक्तःकिंविष्णुस्मरणंतथा ॥ केवापञ्चमहायज्ञाःकोमन्त्रोद्वाद
शाक्षरः ॥ ७५ ॥ एषांविवरणंसर्वंब्रूहिब्राह्मणसत्तम ॥ तथातवप्रसादेनप्राप्नोमिपरमंपदम् ॥ ७६ ॥ दान्तउवाच ॥ येवेदसंम
तंकार्यंत्यक्त्वान्यत्कर्मकुर्वते ॥ निजाचारविहीनायेपाखण्डास्तेप्रकीर्तिताः ॥ ७७ ॥ निजाचारग्राहिणोयेकुर्वतेवेदसंमतम् ॥ पापाभि
लाषरहिताःसज्जनास्तेप्रकीर्तिताः ॥ ७८ ॥ योऽभिलाषःसदास्त्रीषुविभवोपार्जनादिषु ॥ वर्त्ततेब्राह्मणश्रेष्ठसकामइतिकथ्यते ॥ ७९ ॥
समाकर्ण्यात्मनोनिन्दांयस्तापोहृदिजायते ॥ सक्रोधइतिविज्ञेयःसर्वधर्मावघातकः ॥ ८० ॥ परवित्तादिकंदृष्ट्वानेतुंयोहृदिजायते ॥ अभिलाषो
द्विजश्रेष्ठसलोभइतिकीर्तितः ॥ ८१ ॥ ममर्मातामर्मापितामर्मेयंगृहिणीगृहम् ॥ एतदन्यन्ममत्वंहिसमोहइतिकीर्तितः ॥ ८२ ॥ अहं
महात्माधनवान्नतुल्यःकोऽपिभूतले ॥ इदंयज्जायतेचित्तेमदःप्रोक्तःसकोविदैः ॥ ८३ ॥ निन्दन्तिमांसदालोकाधिगस्तुममजीवनम् ॥ इत्या
त्मानंवदेद्यस्तुधिक्कारःसचमत्सरः ॥ ८४ ॥ यथार्थकथनंयच्चसर्वलोकसुखप्रदम् ॥ तत्सत्यमितिविज्ञेयमसत्यंतद्विपर्ययम् ॥ ८५ ॥ ऐश्वर्यं
दारपुत्राद्यायान्त्यमुष्यकदाक्षयम् ॥ इतियाजायतेचित्तेसाहिंसापरिकीर्तिता ॥ ८६ ॥ यत्नादपिपरक्लेशंहर्तुंयद्धृदिजायते ॥ इच्छाभूमि
द्विजश्रेष्ठसादयापरिकीर्तिता ॥ ८७ ॥ यातुष्टिर्जायतेचित्तेशान्तिःसागद्यतेबुधैः ॥ कुत्सितात्कर्मणोऽन्यत्रयच्चित्तविनिवारणम् ॥ ८८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

संकीर्तितोदमःप्राज्ञैःसंमतस्तत्त्वदर्शिभिः ॥ दुःखेसुखेचविप्रेन्द्रयातुष्टिर्वर्ततेसदा ॥ ८९ ॥ तथाशत्रौचमित्रेचसमदृष्टिर्हिसास्मृता ॥ नैवेद्यग
न्धपुष्पाद्यैःश्रद्धयापुरुषोहरेः ॥ ९० ॥ योऽर्चनंकुरुतेविप्रसापूजापरिकीर्तिता ॥ मध्याह्नेचैवरात्रौचलङ्घनंयद्विधीयते ॥ ९१ ॥ तद्विज्ञेय
महोरात्रंपूर्वापरदिनाशनम् ॥ आत्मनःकेशवस्यापिद्वयोरपिचसत्तम ॥ ९२ ॥ यदेकीकरणंतच्चविष्णुस्मरणमुच्यते ॥ ब्रह्मयज्ञोनृयज्ञश्चदेवयज्ञ
श्चसत्तम ॥ ९३ ॥ पितृयज्ञोभूतयज्ञःपञ्चयज्ञाःप्रकीर्तिताः ॥ नमोभगवतेवासुदेवायोङ्कारपूर्वकम् ॥ ९४ ॥ महामन्त्रमिमंप्राहुस्तत्त्वज्ञाद्वादशाक्षरम् ॥
इतितेकथितंसर्वंपृष्टंब्राह्मणसत्तम ॥ ९५ ॥ यज्ज्ञात्वामानवाःसर्वेलभन्तेज्ञानमुत्तमम् ॥ ततःप्रतिदिनंविप्रनाम्नामष्टोत्तरंशतम् ॥ ९६ ॥ पठित्वा
कमलाभर्तुर्दुर्लभंमोक्षमाप्स्यसि ॥ ९७ ॥ भद्रतनुरुवाच ॥ ब्रूहिलक्ष्मीपतेर्विष्णोर्नाम्नामष्टोत्तरंशतम् ॥ ९८ ॥ दान्तउवाच ॥ शृणुविप्र
प्रवक्ष्यामिनाम्नामष्टोत्तरंशतम् ॥ सहस्रनाम्नामाकृष्यसारंविष्णोःपरात्मनः ॥ ९९ ॥ अष्टोत्तरशतंनाम्नांमहापातकनाशनम् ॥ पठितव्यंयथाध्यात्वा
शृणुध्यानंमयोच्यते ॥ १०० ॥ अतसीकुसुमाकारंप्रफुल्लकमलेक्षणम् ॥ गवांचरणधूलीभिर्भूषिताखिलविग्रहम् ॥ १ ॥ गोपुच्छवालपाशेनमण्डितो
त्तमसस्तकम् ॥ वंशीरन्ध्रपरिन्यस्तरुचिरौष्ठपुटंप्रभुम् ॥ २ ॥ गोगोष्ठवासिभिःस्निग्धैःशिशुभिःपरिवारितम् ॥ पीताम्बरंस्मेरमुखंध्यायेत्कृष्णास्य
मुत्तमम् ॥ ३ ॥ ॐ नमोऽस्यकृष्णाष्टोत्तरशतनामस्त्रोत्रस्यवेदव्यासऋषिरनुष्टुप्छन्दः ॥ श्रीकृष्णोदेवताश्रीकृष्णप्रीत्यर्थेजपेविनियोगः ॥ नमः
कृष्णःकेशवश्चकेशिशत्रुःसनातनः ॥ कंसारिर्धेनुकारिश्चशिशुपालरिपुःप्रभुः ॥ ४ ॥ देवकीनन्दनःशौरिःपुण्डरीकनिभेक्षणः ॥ दामो
दरोजगन्नाथोजगत्कर्ताजगन्मयः ॥ ५ ॥ नारायणोबलिध्वंसीवामनोऽदितिनन्दनः ॥ विष्णुर्यदुकुलश्रेष्ठोवासुदेवोवसुप्रदः ॥ ६ ॥ अनन्तः
कैटभारिश्चमल्लजिन्नरकान्तकः ॥ अच्युतःश्रीधरःश्रीमाञ्छ्रीपतिःपुरुषोत्तमः ॥ ७ ॥ गोविन्दोवनमालीचहृषीकेशोऽखिलार्तिहा ॥ नृसिंहोदैत्यशत्रु
श्चमत्स्यदेवोजगन्मयः ॥ ८ ॥ भूमिधारीमहाकूर्मोवराहःपृथिवीपतिः ॥ वैकुण्ठःपीतवासाश्चचक्रपाणिर्गदाधरः ॥ ९ ॥ शङ्खभृत्पद्मपाणिश्चनन्दकी
गरुडध्वजः ॥ चतुर्भुजोमहासत्त्वोमहाबुद्धिर्महाभुजः ॥११०॥ महोत्सवोमहातेजामहाबाहुप्रियःप्रभुः ॥ विष्वक्सेनश्चशार्ङ्गीचपद्मनाभोजनार्दनः ॥
॥ ११ ॥ तुलसीवल्लभोऽपारःपरेशःपरमेश्वरः ॥ परमक्लेशहारीचपरत्रसुखदःपरः ॥ १२ ॥ हृदयस्थोऽम्बरस्थोयोमोहदोमोहनाशनः ॥ समस्त ॥ ३७ ॥
पातकध्वंसीमहाबलबलान्तकः ॥ १३ ॥ रुक्मिणीरमणोरुक्मिप्रतिज्ञाखण्डनोमहान् ॥ दामबद्धःक्लेशहारीगोवर्धनधरोहरिः ॥ १४ ॥ पूतनारिर्मुष्टिका
रिर्यमलार्जुनभञ्जनः ॥उपेन्द्रोविश्वमूर्तिश्चव्योमपादःसनातनः ॥१५॥परमात्मापरब्रह्मप्रणतार्तिविनाशनः ॥त्रिविक्रमोमहामायोयोगविद्विष्टरश्रवाः ॥

CC-0. In Public Domain. Digitization by eGangotri

॥ १६ ॥ श्रीनिधिःश्रीनिवासश्चयज्ञभोक्तासुखप्रदः ॥ यज्ञेश्वरोरावणारिःप्रलम्बघ्नोऽक्षयोऽव्ययः ॥ १७ ॥ सहस्रानाम्नांचैतत्तेनाम्नामष्टोत्तरंशतम् ॥
विष्णुप्रीतिकरंसर्वंसर्वपापविनाशनम् ॥ १८ ॥ दुःस्वप्ननाशनंचैवग्रहपीडाविनाशनम् ॥ सर्वरोगक्षयकरंपरमैश्वर्यदंतथा ॥ १९ ॥ सर्वोपद्रवविध्वंसि
सर्वकर्मफलप्रदम् ॥ मयाप्रोक्तंद्विजश्रेष्ठवैष्णवप्रीतिहेतवे ॥ १२० ॥ त्रिसन्ध्यंयःपठेन्नित्यंभक्तितःपुरतोहरेः ॥ शतमष्टोत्तरंनाम्नांतस्यतुष्टःसदाहरिः॥
॥ २१ ॥ श्राद्धेचयःपठेदेतद्भक्तिमान्वैष्णवोजनः ॥ संतुष्टाःपितरस्तस्यप्रयान्तिपरमंपदम् ॥ २२ ॥ यज्ञकालेपठेद्यस्तुदेवताराधनेतथा ॥ दानकाले
चयात्रायांसवैतत्फलमाप्नुयात् ॥२३॥ अपुत्रोलभतेपुत्रंधनार्थीलभतेधनम् ॥ विद्यार्थीलभतेविद्यांस्तवस्यास्यप्रकीर्तनात् ॥२४॥ येपठन्तिहरेर्भक्त्या
नाम्नामष्टोत्तरंशतम् ॥ नाशुभंविद्यतेतेषांकदाचिदपिभूतले ॥ २५ ॥ दान्तउवाच ॥ गच्छब्राह्मणभद्रंतेप्रोक्तेनविधिनामया ॥ समाराध्यहरिंभक्त्या
परमंक्षेममाप्स्यसि ॥२६॥ एवंप्रबोधितस्तेनदान्तेनपरमार्थिना ॥ तस्मिन्क्षेत्रवरेपुण्येहरिपूजापरोऽभवत् ॥२७॥ नित्यंतुभक्त्याविप्रोऽसौपञ्चाहानि
चजैमिने ॥ दान्तप्रोक्तेनविधिनाचकारहरिपूजनम् ॥ २८ ॥ ज्ञात्वाभक्तिंहरिस्तस्यसुदृढांकरुणामयः ॥ आविर्बभूवसहसाकोटिसूर्यइवांशुमान् ॥
॥ २९ ॥ तंदृष्ट्वाजगतामीशंकमलाप्रियमच्युतम् ॥ ववन्देशिरसाविप्रस्तत्पादकमलद्वये ॥ १३० ॥ अथासौब्राह्मणश्रेष्ठोहर्षनिर्भरमानसः ॥ कृताञ्जलि
र्जगन्नाथमस्तौषीत्कमलापतिम् ॥ ३१ ॥ दृष्टिंहरेदुरितगामपिमेकृपालांभक्तिंनिजांप्रतिविभोशुभदामनैषीः ॥ तस्मादहंविहितविस्तरपातकोऽपिप्राम्य
स्त्वयाकारिपुमानिवाद्य ॥ ३२ ॥ रुष्टेत्वयित्रिदशवन्दितपादयुग्मेदृष्टिःप्रयातिदुरितंखलुमानवस्य ॥ तुष्टेचयातिसुकृतंप्रतिसैवदृष्टिर्ज्ञातंमयैवपरमे
श्वरकेवलंच ॥ ३३ ॥ त्वांवच्मिनाथभवतःस्मरणंप्रभावंयस्माद्व्रजामिनिखिलार्जितपातकोऽपि ॥ स्थानंजगामपरमंत्रिदशैकलभ्यमारुह्यशुद्धकनक
च्छुरितंविमानम् ॥ ३४ ॥ त्वत्पादपद्मसलिलस्यसदागुणाढ्योव्याधःसवेत्तिकनिकःकृतसर्वपापः ॥ त्वद्वेश्ममार्जनफलंजगदेकनाथयज्ञध्वजःक्षिति
पतिःसुरवन्दितश्च ॥ ३५ ॥ वेश्मोपलेपनफलंभवतोमुरारेसृष्टिस्थितिप्रलयकारणईश्वरस्य ॥ जानातिपन्नगरिपुध्वजयज्ञमालीभ्राताचतस्यकृतपाप
भयःसुमाली ॥ ३६ ॥ हरिंप्रदक्षिणीकृत्यभवन्तंयत्फलंभवेत् ॥ धर्मएवसजानातिनान्यःकश्चिज्जगत्त्रये ॥ ३७ ॥ तवचित्तंदयानाथगदितुंभुविकः
क्षमः ॥ त्वांविद्धापिशरैर्व्याधोजगामपरमंपदम् ॥३८॥ निन्दित्वापिजगन्नाथभवन्तंत्रिदशेश्वरम् ॥ शिशुपालोययौमोक्षंतवभक्तस्यकाकथा ॥३९ ॥
ब्रह्मरूपेणयेनासौत्वयासृष्टमिदंजगत् ॥त्वयितस्मिन्महाविष्णोरमतांममममानसम् ॥१४०॥ सर्वोविष्णोत्वयानेनक्रियतेजगतःक्षयः ॥ रुद्ररूपेणसंसारे
तस्मैतुभ्यंनमोऽस्तुमे ॥ ४१ ॥ यस्मादल्पतमंनास्तियस्मान्नास्तिमहत्तमम् ॥ येनव्याप्तंजगत्सर्वंत्वयातस्मैनमोऽस्तुते ॥ ४२ ॥ नेत्राभ्यांयस्यदेवस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सूर्योऽजनिदिवाकरः ॥ मुखादग्निश्चजायेततवतस्मैनमोऽस्तुते ॥ ४३ ॥ यस्यश्रोत्राद्वायवोऽपिजाताःप्राणाश्चकेशव ॥ तवतस्मैसुरश्रेष्ठनमो
ऽस्तुममसर्वदा ॥ ४४ ॥ लक्ष्मीर्यस्यसदाक्रोडेश्यामाङ्गस्यसुनिर्वृता ॥ सौदामिनीवमेघस्यतवतस्मैनमोऽस्तुते ॥ ४५ ॥ गन्तुंमहिम्नांसीमानंब्रह्माद्या
अपिनिर्जराः ॥ नशक्नुवन्तिवैयस्यतवतस्मैनमोऽस्तुते ॥ ४६ ॥ धर्माणांस्थापनार्थायविनाशायचपापिनाम् ॥ युगेयुगेयःप्रभवेत्तस्मैतुभ्यंनमोऽस्तु
मे ॥ ४७ ॥ माययामोहितंयेनजगदेतन्महात्मना ॥ क्षिणोतिमाययाशम्भुर्यस्तस्मैतेनमोऽस्तुमे ॥ ४८ ॥ भक्तिमात्रेणयस्तुष्टोनधनैर्नस्तवैस्तथा ॥
नदानैर्नतपोभिश्चतस्मैतुभ्यंनमोऽस्तुमे ॥ ४९ ॥ गवांचब्राह्मणानांचसाधूनांचहितंतथा ॥ कृपांचकुरुतेयस्तुतस्मैतुभ्यंनमोऽस्तुमे ॥ १५० ॥
अनाथानांचबन्धूनांयोगिनांदुःखिनांतथा ॥ दुःखंहरतियोदेवस्तस्मैतुभ्यंनमोऽस्तुमे ॥ ५१ ॥ मनुष्येषुचदेवेषुगजेषुसकलेषुच ॥ वर्ततेयः
समत्वेनतस्मैतुभ्यंनमोऽस्तुमे ॥ ५२ ॥ यस्मिंस्तुष्टेपर्वतोऽपिसद्यएवतृणायते ॥ शैलायतेतृणंरुष्टेतस्मैतुभ्यंनमोऽस्तुमे ॥ ५३ ॥ पुण्यानां
चयथापुण्येनिजेपुत्रेयथापितुः ॥ यथापत्यौसतीनांचतथात्वयिममास्तुवै ॥ ५४ ॥ यूनांचित्तंयथास्त्रीषुलुब्धानांचयथाधने ॥ क्षुधितानां
यथाचान्नेतथात्वयिममास्तुवै ॥ ५५ ॥ घर्मार्तानांयथाचन्द्रेशीतार्तानांरवाविति ॥ तृषार्तानांयथातोयेतथात्वयिममास्तुवै ॥ ५६ ॥
यन्मयाबुद्धिहीनेनगुरुस्त्रीगमनंकृतम् ॥ तत्पातकंक्षयंयातुभवन्तंपश्यतोमम ॥ ५७ ॥ अवध्यानांवधोयस्तुमयामोहवताकृतः ॥
तत्पातकंक्षयंयातुभवन्तंपश्यतोमम ॥ ५८ ॥ अपेयपानंचमयाविहितंपरमेश्वर ॥ तत्पातकंक्षयंयातुभवन्तंपश्यतोमम ॥ ५९ ॥
अप्सुयोनौतथातोयेयद्रेतःसेचनंकृतम् ॥ तत्पातकंक्षयंयातुभवन्तंपश्यतोमम ॥ १६० ॥ भ्रूणहत्याकृतायाचरेतसांसेचनंभुवि ॥ तत्पातकंक्षयं
यातुभवन्तंपश्यतोमम ॥ ६१ ॥ विश्वासघातकंयच्चअज्ञात्वामाययाकृतम् ॥ तत्पातकंक्षयंयातुभवन्तंपश्यतोमम ॥ ६२ ॥ असत्यवचनं
यच्चमयाप्रोक्तंक्षणेक्षणे ॥ तत्पातकंक्षयंयातुभवन्तंपश्यतोमम ॥ ६३ ॥ सतांनिन्दाकृतायाचपरहिंसाचसर्वदा ॥ तत्पातकंक्षयंयातुभवन्तंपश्यतो
मम ॥ ६४ ॥ श्लेष्माचकफकंचैवयद्वक्त्रेचमयाकृतम् ॥ तत्पातकंक्षयंयातुभवन्तंपश्यतोमम ॥ ६५ ॥ वनस्पतिगतेसोमेयत्कृतंतरुघातनम् ॥
तत्पातकंक्षयंयातुभवन्तंपश्यतोमम ॥ ६६ ॥ पथिदेवालयेगोष्ठेमलंमूत्रंचयत्कृतम् ॥ तत्पातकंक्षयंयातुभवन्तंपश्यतोमम ॥ ६७ ॥ अभक्ति
र्विततायाचपितुर्मातुश्चकेशव ॥ तत्पातकंक्षयंयातुभवन्तंपश्यतोमम ॥६८॥ स्नानार्थंभोजनार्थंचगच्छन्यस्तुनिवारितः ॥ तत्पातकंक्षयंयातुभवन्तं
पश्यतोमम ॥ ६९ ॥ एकादश्यांसुरश्रेष्ठयन्मयाभोजनंकृतम् ॥ तत्पातकंक्षयंयातुभवन्तंपश्यतोमम ॥ १७० ॥ अतिथिर्गृहमागच्छन्पूजितोन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मयाप्रभो ॥ तत्पातकंक्षयंयातुभवन्तंपश्यतोमम ॥ ७१ ॥ द्वादश्यांचदशम्यांचकृतंयच्चद्विभोजनम् ॥ तत्पातकंक्षयंयातुभवन्तंपश्यतोमम ॥ ७२ ॥ निवारणंचपानार्थंयान्तीनांयद्गवांकृतम् ॥ तत्पातकंक्षयंयातुभवन्तंपश्यतोमम ॥ ७३ ॥ असमाप्यपरित्यक्तंव्रतमारभ्ययन्मया ॥ तत्पातकंक्षयंयातुभवन्तंपश्यतोमम ॥ ७४ ॥ कूटसाक्ष्यंनिरुक्तंयन्मित्रवात्सल्यतोमया ॥ तत्पातकंक्षयंयातुभवन्तंपश्यतोमम ॥ ७५ ॥ ऋतुकालाभिगमनंनिजपत्न्यांकृतंनयत् ॥ तत्पातकंक्षयंयातुभवन्तंपश्यतोमम ॥ ७६॥ असंस्कृतेगृहेयच्चभोजनंविहितंमया ॥ तत्पातकंक्षयंयातुभवन्तंपश्यतोमम ॥ ७७ ॥ ग्रामयाजकवृत्तिश्चयामयानृहरेकृता ॥ तत्पातकंक्षयंयातुभवन्तंपश्यतोमम ॥ ७८ ॥ दण्ड्यमानेमयाभूपेप्रभुत्वंयत्कृतंप्रभो ॥ तत्पातकंक्षयंयातुभवन्तंपश्यतोमम ॥ ७९ ॥ पौराणिककथामध्येयोविघ्नोविहितोमया ॥ तत्पातकंक्षयंयातुभवन्तंपश्यतोमम ॥ १८० ॥ आदरेणमयायाचपरपाककथाश्रुता ॥ तत्पातकंक्षयंयातुभवन्तंपश्यतोमम ॥ ८१ ॥ अश्वत्थच्छेदनंयच्चधात्र्याश्चच्छेदनंकृतम् ॥ तत्पातकंक्षयंयातुभवन्तंपश्यतोमम ॥ ८२ ॥ दधिदुग्धघृतानांचविक्रयोयःकृतोमया ॥ तत्पातकंक्षयंयातुभवन्तंपश्यतोमम ॥ ८३ ॥ आशांदत्त्वापरेभ्यश्चकृतासानिष्फलामया ॥ तत्पातकंक्षयंयातुभवन्तंपश्यतोमम ॥ ८४ ॥ द्विजाश्चयाचकाश्चैवकोपदृष्ट्यामयेक्षिताः ॥ तत्पातकंक्षयंयातुभवन्तंपश्यतोमम ॥ ८५ ॥ जीवनोपायदातारःकोपान्निर्भर्त्सितामया ॥ तत्पातकंक्षयंयातुभवन्तंपश्यतोमम ॥ ८६ ॥ बहुनात्रकिमुक्तेनबहुजन्मार्जितानिच ॥ क्षयंगतानिपापानिभवन्तंपश्यतोमम ॥८७॥कृतार्थोऽस्मिकृतार्थोऽस्मिकृतार्थोऽस्मिनसंशयः ॥ नमस्तुभ्यंनमस्तुभ्यंनमस्तुभ्यंजगत्पते॥८८॥इत्युक्त्वासौद्विजोभक्त्यापुलकाञ्चितविग्रहः ॥ पपातजैमिनेविष्णोश्चारुपादाम्बुजद्वये ॥८९॥ श्रीभगवानुवाच ॥ उत्तिष्ठोत्तिष्ठतेविप्रतुष्टोऽस्मितवभक्तितः ॥ किंतेऽभिलषितंब्रूहितत्तेदास्याम्यहंध्रुवम् ॥ १९० ॥ भद्रतनुरुवाच ॥ परमेश्वरगोविन्ददयालोपरमाच्युत ॥ यत्सम्प्रतिमयाप्राप्तंतत्केनभुविलभ्यते ॥ ९१ ॥ तथाप्येकंवरंयाचेमुरारेतवसन्निधौ ॥ जन्मजन्मनिमेभक्तिस्त्वय्यस्तुसुदृढाप्रभो ॥ ९२ ॥ मयाकृतमिदंस्तोत्रंयःपठेद्भक्तितोनरः ॥ तस्याभिलषितंसर्वंप्रसन्नस्त्वंप्रदास्यसि ॥ ९३ ॥ श्रीभगवानुवाच ॥ दत्तोऽयंतेवरःकोऽपिविप्रनास्त्यत्रसंशयः ॥ किंतुत्वयासहप्राज्ञसख्यंकर्तुंमयेष्यते ॥ ९४ ॥ नमन्सेवकतायोग्योभवानहमिहद्विज ॥ अतःसख्यंप्रविवृतंत्वयासहमयाधुना ॥ ९५ ॥ व्यासउवाच ॥ ततोनारायणोदेवोदयालुर्भक्तवत्सलः ॥ चकारजैमिनेसख्यंतेनपुण्यात्मनासह ॥ ९६ ॥ निजकण्ठगतांमालांददौतस्मैमुदाहरिः ॥ सोऽपिविप्रोददौभक्त्याहरेस्तुलसिकास्रजम् ॥ ९७ ॥ प्रसार्यचतुरोबाहूंस्तमालिङ्गितवान्हरिः ॥ सविप्रोऽपिमुदाविष्णुंतमालिङ्गितवान्प्रभुः ॥ ९८ ॥ इत्थंकृत्वाहरिःसख्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेनाग्रजन्मनासह ॥ भक्तिग्राहीदयालुःसतत्रैवान्तरधीयत ॥ ९९ ॥ ततःप्रतिदिनंतत्रक्षेत्रेचपुरुषोत्तमे ॥ आरेभेकन्दुकक्रीडांहरिस्तेनाग्रजन्मना ॥
॥ २०० ॥ कदाचिद्दुर्बलंदृष्ट्वातंविप्रंकरुणामयः ॥ उवाचवाचंविप्रर्षेमित्रवात्सल्यतोहरिः ॥ १ ॥ श्रीभगवानुवाच ॥ सखेकथंदुर्बलस्त्वंहृतं
केनधनंतव ॥ हृदिकावाचतेचिन्तासखेतद्वक्तुमर्हसि ॥ २ ॥ भद्रतनुरुवाच ॥ त्वत्प्रीतयेजगन्नाथनित्यमेवमयातपः ॥ क्रियतेतेनमेगात्रं
यातिदुर्बलतांप्रभो ॥ ३ ॥ श्रीभगवानुवाच ॥ यथात्वयिप्रसन्नोऽस्मिकस्मिंश्चनतथासखे ॥ कायक्लेशंपुनःकस्मात्करोषिद्विजसत्तम
॥ ४ ॥ दुर्बलंत्वांसमालोक्यहृदिमेजायतेव्यथा ॥ कायक्लेशमतःसर्वंजहीहिद्विजसत्तम ॥ ५ ॥ निजोत्तरीयैर्निजवस्त्रभूषणैःसुचारुचा
मीकरकुड्मलाभ्याम् ॥ स्वहस्तराजद्वलयैश्चविप्रःस्वयंसुरेशेनचमण्डितोऽसौ ॥ ६ ॥ किरीटमानीयनिजाल्ललाटात्पादाच्चपादाङ्गद
युग्ममीशः ॥ सुवर्णहारंनिजकण्ठदेशात्तस्मैददौविप्रवरायकृष्णः ॥ ७ ॥ तैर्भूषणैःश्रीहरिणाप्रदत्तैर्विभूषितोऽयंसुकृतीद्विजन्मा ॥ क्रीडत्सदा
कन्दुककेलिवेत्ताकृष्णेनकृष्णाम्बुजसुन्दरेण ॥ ८ ॥ तमेकदाभूषणभूषिताङ्गंताम्बूलरागारुचिरोष्ठयुग्मम् ॥ दिव्याम्बरंचारुतरोत्तरीयंस्मेराननंतत्र
ददर्शदान्तः ॥ ९ ॥ दान्तउवाच ॥ भद्रभद्रतनोऽद्यापिपापदृष्टिंनमुञ्चसि ॥ दृष्ट्वापिभवतःकार्यंनिन्दितंसकलैर्जनैः ॥ २१० ॥ शिष्यःकृत
स्त्वंयस्मान्मेसर्वमेवहिभूषणम् ॥ अहंगुरुश्चापिदुःशीलोनिर्दयःपापतत्परः ॥ ११ ॥ गुरुकीर्तिविनाशीचपञ्चैतेशिष्यपांसुलाः ॥ अभक्तोबहुभाषीच
तथाचञ्चलमानसः ॥ १२ ॥ परोक्षगुरुनिन्दाकृत्प्रोक्ताःशिष्याधमाइमे ॥ चरित्रमुत्तमंज्ञात्वाशिष्यःकार्योविचक्षणैः ॥ १३ ॥ यतोदुर्जनगाविद्यागुरूणां
चापिदुःखदा ॥ कीर्तिदास्तैश्चयाविद्यानिरुक्तास्तत्त्वदर्शिभिः ॥ १४ ॥ तावैदुर्जनगाःसद्योगुरोर्घ्नन्तियशस्तरुम् ॥ पापेभ्यःपुण्यकर्माणिनरोचन्ते
कदापिच ॥ १५ ॥ नरोचतेमक्षिकाभ्यःसुगन्धिचन्दनंयथा ॥ यथामिष्टान्नपानेननहितृप्यन्तिगर्दभाः ॥ १६ ॥ दुर्जनानहितृप्यन्तियथाधर्मस्यचिन्तया
अपकीर्तिभयाल्लक्ष्मीर्धर्मश्चसर्वकामदः ॥ १७ ॥ कदाचिन्नभजेद्दुष्टंभजेद्द्रागच्छतिक्षयम् ॥ प्रतिजन्मनियाविद्याभाग्येनलभ्यतेपरा ॥ १८ ॥
कदाचिल्लभतेवापितदात्वंतरतेविधिः ॥ १९ ॥ भद्रतनुरुवाच ॥ सत्यंब्रवीषिविप्रर्षेनास्मिशास्त्रविशारदः ॥ मयाशिष्येणतेक्वापिनापकीर्तिर्भवि
ष्यति ॥ २२० ॥ त्वत्प्रसादाद्द्विजश्रेष्ठसर्वाभिलषितंमम ॥ सिद्धिंप्रतिगतंयस्मात्त्वमेकोभुविदुर्लभः ॥ दान्तउवाच ॥ २१ ॥ किंतेऽभिलषितंविप्र
सिद्धिंप्रतिगतंवद ॥ अचिरेणैवतपसांकथमुद्यापनंकृतम् ॥ २२ ॥ भद्रतनुरुवाच ॥ स्वल्पश्रमैरपिप्राप्तंमयासंदर्शनंहरेः ॥ यस्याज्ञयागुरो
त्यक्तंमयानित्यक्रियादिकम् ॥ २३ ॥ निजोत्तरीयंवस्त्रंचसुवर्णकलशद्वयम् ॥ स्वहस्तवलयंचापिस्वललाटकिरीटकम् ॥ २४ ॥ निजपादतुला

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कोटिंनिजमुक्तावलींददौ ॥ तथामेभगवान्विष्णुःसुप्रीतोद्विजसत्तम ॥ २५ ॥ मयासहसकृत्वास्तेसख्यंसेवकदुःखहा ॥ करोमिकन्दुकक्रीडां
गुरोतेनसहानिशम् ॥ २६ ॥ एतन्मेवचनंश्रुत्वासन्देहस्तेभविष्यति ॥ प्रतीत्याचमयाप्रोक्तंतथापितवसन्निधौ ॥ २७ ॥ दान्तउवाच ॥
सप्तवर्षसहस्राणिभक्त्यापरमयामया ॥ आराधितोऽपिमेविष्णुर्दर्शनंनददौविभुः ॥२८॥ अहोविष्णुंसमाराध्यपश्चाहान्येवसत्तम ॥ त्वयासंदर्शनंप्राप्तं
दैवतैरपिदुर्लभम् ॥ २९ ॥ धन्योऽसित्वंकृतार्थोऽसिसाक्षाद्देवस्त्वमुच्यते ॥ यतस्त्वयासहस्वामीप्रेम्णासख्यंचकारह ॥ २३० ॥ यदामयितवस्नेहो
विद्यतेद्विजसत्तम ॥ कथंकथयमेविप्रदुर्लभंविष्णुदर्शनम् ॥ ३१ ॥ व्यासउवाच ॥ इत्युक्तोगुरुणाविप्रोविपिनेनिजमाश्रमम् ॥ जगामविस्मितो
धीमान्विष्णुभक्तिपरायणः ॥३२॥ अथान्यस्मिन्दिनेगत्वाकन्दुकक्रीडनंकृतम् ॥ उवाचेतिजगन्नाथंदयालुंविनयान्वितः ॥ ३३ ॥ भद्रतनुरुवाच ॥
गुरुर्हिममदेवेन्द्रतवदर्शनमिच्छति ॥ काज्ञातेवर्ततेब्रूहिदयालोकमलापते ॥ ३४ ॥ एकान्तभक्तोविप्रोऽसौतवपद्मनिभेक्षण ॥ अतस्तस्मैसुरश्रेष्ठ
दर्शनंदातुमर्हसि ॥ ३५ ॥ श्रीभगवानुवाच ॥ बहुजन्मसुविप्रेन्द्रभक्त्यापरमयात्वया ॥ पूजितोऽहमतोदत्तंदर्शनंतेमयाधुना ॥ ३६ ॥ कतिचि
द्दिवसानेवमामभ्यर्च्यद्विजःसच ॥ मांद्रष्टुमिच्छतिप्राज्ञस्त्वद्दृश्यंदैवतैरपि ॥ ३७ ॥ ममसोऽपिमहाभक्तोमत्सपर्यापरायणः ॥ ममसंदर्शनंतस्मात्क
दाचिद्द्विजलप्स्यति ॥ ३८ ॥ व्यासउवाच ॥ इतितस्यवचःश्रुत्वासविप्रःकमलापतिम् ॥ इत्युवाचपुनर्भक्त्याकेशवंक्लेशनाशनम् ॥ ३९ ॥ भद्र
तनुरुवाच ॥ अनुग्रहोऽस्तिदेवेशयदामयिजगत्पते ॥ तदामेसंमुखेदेहिदर्शनंभक्तवत्सल ॥ २४० ॥ अयाचतगुरुर्देवतवदर्शनदक्षिणाम् ॥ अहोमे
गुरवेदत्त्वादर्शनंपाहिमांप्रभो ॥ ४१ ॥ श्रीभगवानुवाच ॥ यदानूनंत्वयोत्सृष्टामत्संदर्शनदक्षिणा ॥ तदागुरुंसमानीयदर्शनंममकारय ॥ ४२ ॥
इत्याज्ञप्तस्ततस्तेनगुरोराश्रममुत्तमम् ॥ ययौभद्रतनुःप्रीत्यापुनःस्वगुरुरागतः ॥ ४३ ॥ तस्मिन्विप्रेसमायातेदान्तेदातृवरेहरिः ॥ आत्मानंदर्श
यामाससर्वलक्षणसंयुतम् ॥ ४४ ॥ ततोहरिंसमालोक्यसविप्रोहरिभक्तिकृत् ॥ बद्धाञ्जलिस्तमस्तौषीद्धर्षबाष्पविलोचनः ॥ ४५ ॥ दान्त
उवाच ॥ दयालोकमलाकान्तशरणागतपालक ॥ नमस्तुभ्यंनमस्तुभ्यंनमस्तुभ्यंनमोनमः ॥४६॥ अद्यमेसफलंजन्मअद्यमेसफलंतपः ॥ अद्यमेसफ
लंसर्वंप्राप्तंत्वद्दर्शनंमया ॥ ४७ ॥ पूर्वमालोचितंयद्यद्वचनंश्रीपतेप्रभो ॥ सिन्धुकोटिगभीरस्यप्रसृतंपुरतस्तव ॥ ४८ ॥ स्तोत्रंतन्नास्तिसंसारेवागीश
स्यजगत्पतेः ॥ येनस्तोत्रेणतेप्रीतिंजनयिष्यामिचेतसि ॥ ४९ ॥ रक्षरक्षप्रभोरक्षमांप्रसीदजगत्पते ॥ त्वद्दासदासदासानांदासत्वेनापिमांवृणु ॥
॥ २५० ॥ व्यासउवाच ॥ ततःप्रहस्यदेवेशोभक्तिग्राहीदयामयः ॥ करारविन्दंतन्मूर्ध्निदत्त्वाप्राहेतिजैमिने ॥ ५१ ॥ श्रीभगवानुवाच ॥ भद्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्तोऽसिद्विजश्रेष्ठप्राप्तंमद्दर्शनंत्वया ॥ मत्प्रसादेनभद्रंतेसर्वमेवभविष्यति ॥ ५२ ॥ व्यासउवाच ॥ तमालिङ्ग्यततोदान्तंप्रेम्णाभद्रतनुंचतम् ॥
तत्रैवान्तर्दधेविप्रसहसापरमेश्वरः ॥ ५३ ॥ तस्मिन्क्षेत्रवरेपुण्येदुर्लभेपुरुषोत्तमे ॥ क्रियायोगैर्हरिंदृष्ट्वादान्तोधामपरंययौ ॥ ५४ ॥ सोऽपिभद्रतनु
र्विप्रोहरिभक्तिपरायणः ॥ आयुषोऽन्तेययौमोक्षंदेवानामपिदुर्लभम् ॥ ५५ ॥ एकाहमपियोभक्त्यापूजयेत्परमेश्वरम् ॥ बहुजन्मकृतंपापंनश्ये
त्प्रीतिर्हरौभवेत्॥५६॥अद्यापित्रिदशाःसर्वेब्रह्माद्याअपिजैमिने ॥ प्रभावंनहिजानन्तिहरिभक्तस्यभूतले॥५७॥ कर्मभूमिरियंविप्रस्वर्गादपिचदुर्लभा ॥
यत्रविष्णुंसमभ्यर्च्यमर्त्याःस्युःसुरवन्दिताः ॥ ५८ ॥ शक्राद्यास्त्रिदशाःसर्वेसुपुण्यक्षयभीरवः ॥ अन्योन्यमपिजल्पन्तोऽनिशंचद्विजसत्तम ॥
॥ ५९ ॥ भूयएवगमिष्यामःकर्मभूमिंकदावयम् ॥ कदातत्रकरिष्यामःपूजांश्रीकमलापतेः ॥ २६० ॥ अतिधन्याइमेलोकाअस्मत्तोऽपिमहत्तराः ॥
दुर्लभेभारतेवर्षेपूजयन्तिहरिंप्रभुम् ॥ ६१ ॥ अहोभारतवर्षस्यकःशक्तोगुणभाषणे ॥ यत्राराध्यहरिंपूर्वंवयंदेवत्वमागताः ॥ ६२ ॥ इत्थंदेवग
णाःसर्वेवासवाद्याद्विजोत्तम ॥ नित्यंभारतभूभागंप्रशंसन्तिशुभप्रदम् ॥६३ ॥ तत्रजन्मसमासाद्ययेननाराधितोहरिः ॥ तत्तुल्यःकोऽपिसंसारेनचदृष्टः
श्रुतोनच॥६४॥ सत्यंसत्यंपुनरपिगद्यतेसत्यमेवतत् ॥ विश्वात्मानंसकृदपिमानवायेऽर्चयन्तिच ॥ मुक्ताःपापैःस्वरचितैर्यातिकैवल्यमाशुमे॥२६५॥
इतिश्रीपाद्मेमहापुराणेक्रियायोगसारेपुरुषोत्तमक्षेत्रेभद्रतनुवरप्रदानंनामसप्तदशोऽध्यायः ॥ १७ ॥ जैमिनिरुवाच ॥ तीर्थश्रेष्ठमितिप्रोक्तंयत्त्वयापुरु
षोत्तमम् ॥ तन्माहात्म्यंगुरोब्रूहियदितेमय्यनुग्रहः ॥ १ ॥ व्यासउवाच ॥ पुरुषोत्तमस्यमाहात्म्यंसमासेनशृणुद्विज ॥ सम्यग्वक्तुंजगत्यस्मि
न्कःशक्तोविष्णुनाविना ॥ २ ॥ लवणाम्भोनिधेस्तीरेपुरुषोत्तमसंज्ञितम् ॥ पुरंतद्ब्राह्मणश्रेष्ठस्वर्गादपिचदुर्लभम् ॥ ३ ॥ स्वयमस्तिपुरेतस्मि
न्यतःश्रीपुरुषोत्तमः ॥ पुरुषोत्तममित्युक्तंतस्मात्तन्नामकोविदैः ॥ ४ ॥ क्षेत्रंतद्दुर्लभंविप्रसमन्ताद्दशयोजनम् ॥ तत्रस्थदेहिनोदेवैर्दृश्यन्तेचचतुर्भु
जाः ॥ ५ ॥ प्रविशन्तस्तुतत्क्षेत्रंसर्वेस्युर्विष्णुमूर्तयः ॥ तस्माद्विचारणातत्रनकर्त्तव्याविचक्षणैः ॥ ६ ॥ चाण्डालेनापिसंस्पृष्टंग्राह्यंतत्रान्नमग्रजैः ॥
तत्रान्नपाचिकालक्ष्मीःस्वयंभोक्ताजनार्दनः ॥७ ॥ तस्मात्तत्रौदनंविप्रदैवतैरपिदुर्लभम् ॥ हरिभुक्तावशिष्टंयत्पवित्रंभुविदुर्लभम् ॥ ८ ॥ अन्नंयेभुञ्जते
लोकास्तेषांमुक्तिर्नदुर्लभा ॥ ब्रह्माद्यास्त्रिदशाःसर्वेतदन्नमतिदुर्लभम् ॥ ९ ॥ भुञ्जतेनित्यमागत्यमानुषाणांचकाकथा ॥ नयस्यरमतेचित्तं
तस्मिन्नन्नेसुदुर्लभे ॥ १० ॥ तमेवविष्णुद्वेष्टारंप्राहुःसर्वमहर्षयः ॥ पवित्रंभुविसर्वत्रयथागङ्गाजलंद्विज ॥ ११ ॥ तथापवित्रंसर्वत्रतदन्नंपाप
नाशनम् ॥ तदन्नंकोमलंदिव्यंयद्यपिद्विजसत्तम ॥ १२ ॥ क्रकचस्योदरप्रायंतथाप्यघविदारणे ॥ पूर्वार्जितानिपापानिक्षयंयास्यन्तियस्यवै ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १३ ॥ भक्तिःप्रवर्ततेतस्यतस्मिन्नन्नेसुदुर्लभे ॥ बहुजन्मार्जितंपुण्यंयस्ययास्यतिसंक्षयम् ॥ १४ ॥ तस्मिन्नन्नेद्विजश्रेष्ठतस्यभक्तिर्नजायते ॥
इन्द्रद्युम्नस्यसरसिमार्कण्डेयह्रदेतथा ॥ १५ ॥ रोहिण्यांचसमुद्रेचश्वेतगङ्गाजलेषुच ॥ स्नानंयेकुर्वतेमर्त्याभक्तिभावसमन्विताः ॥ १६ ॥ तेषां
नविद्यतेजन्मपुनरस्मिन्महीतले ॥ लवणाम्भोनिधेस्तोयैःपितरस्तर्पिताद्विज ॥ १७ ॥ सर्वदुःखविनिर्मुक्ताव्रजन्तिहरिमन्दिरम् ॥ तीर्थराजः
समुद्रोऽसौकीर्तितस्तत्त्वदर्शिभिः ॥ १८ ॥ तस्मात्तत्रकृतंकर्मसर्वमेवाक्षयंभवेत् ॥ पित्रर्चनंतथादानंभगवच्चरणार्चनम् ॥ १९ ॥ जपयज्ञंत
थान्यचतस्मिन्क्षेत्रेमनोरमे ॥ यत्कर्मकुरुतेमर्त्योविष्णुप्रीणनहेतवे ॥ २० ॥ सर्वमेवाक्षयंतच्चभवेन्नास्त्यत्रसंशयः ॥ बलभद्रंसुभद्रांचकृष्णंच
कमलेक्षणम् ॥ २१ ॥ येमानवाःप्रपश्यन्तितेषांकिंचिन्नदुर्लभम् ॥ अदृष्ट्वाश्रीजगन्नाथंसुभद्रांचबलंतथा ॥ २२ ॥ मोक्षंनलभतेमर्त्यःकुर्वन्पुण्य
शतान्यपि ॥तत्रवेत्रप्रहारेणशरीरंयस्यलोहितम् ॥२३॥ तंवन्दन्तेद्विजश्रेष्ठदेवाःशक्रादयोऽखिलाः ॥स्थित्वान्तरिक्षेशक्राद्याःसर्वदेवगणाद्विज ॥२४॥
विमानचारिणोऽन्योन्यंप्रवदन्तीतिहर्षिताः ॥ कदामानुष्यमस्मभ्यंदास्यतेकमलापतिः॥२५॥ मनुष्यवच्चगच्छामस्तदाद्रष्टुंहरिंप्रभुम् ॥ कदावेत्रप्रहा
रेणक्षेत्रेश्रीपुरुषोत्तमे ॥ २६ ॥ भविष्यन्त्यस्मदीयानिलोहितानिवपूंषिच ॥ वासवाद्याःसुराःसर्वेतस्मिन्क्षेत्रेवरप्रदे ॥२७॥ सदावेत्रप्रहारांश्चवाञ्छन्ति
द्विजसत्तम ॥तत्राक्षयवटंयेतुभक्त्यापश्यन्तिमानवाः ॥ २८ ॥ कोटिजन्मार्जितैःपापैर्मुक्तायान्तिपरांगतिम् ॥ सुभद्रांबलभद्रंचजगन्नाथमनामयम् ॥
॥ २९ ॥ श्वेतंमाधवदेवेशंमार्कण्डेयह्रदंतथा ॥ ज्यामेश्वरंहनूमन्तन्तत्राक्षय्यंवटंद्विज ॥३० ॥ पश्यन्तिभक्त्यायेमर्त्यास्तेषांमुक्तिर्हिशाश्वती ॥ दोला
यमानंगोविन्दंफाल्गुनेमासितत्रये ॥ ३१ ॥ पश्यन्तिमानवाभक्त्यातेषांपुण्यंनिशामय ॥ विमुक्ताःसकलैःपापैरन्तेयान्तिहरेर्गृहम् ॥ ३२ ॥ ज्ञानं
संप्राप्यतत्रैवमोक्षंयान्तिसुदुर्लभम् ॥ चैत्रकेमासिवारुण्यांयोजगन्नाथमीक्षते ॥ ३३ ॥ समृतःप्रविशेद्देहंजगन्नाथस्यजैमिने ॥ वैशाखेचैव
शुक्लायामेकादश्यांजगत्पतिम् ॥ ३४ ॥ तृतीयायांचयःपश्येन्मुक्तएवसमानवः ॥ प्रविशेद्यस्तुमनुजोमहास्नानंजगत्पतेः ॥ ३५ ॥ तस्यसिध्यन्ति
विप्रर्षेसर्वएवमनोरथाः ॥ ब्रह्माद्यास्त्रिदशाःसर्वेस्थित्वाकाशेजगत्पतेः ॥३६॥ महास्नानंप्रपश्यन्तिभक्तिभावसमन्विताः ॥ महाज्येष्ठ्यांचविप्रर्षेजग
न्नाथमनामयम् ॥३७॥ आलोक्यलभतेमर्त्योविष्णोस्तत्परमंपदम् ॥ गुण्डिकामण्डपंयान्तमाषाढेकमलापतिम् ॥ ३८ ॥ बलभद्रंचयःपश्येत्समुक्तो
नात्रसंशयः ॥ यःपश्यतिजगन्नाथंरथस्थंकमलेक्षणम् ॥३९॥ तस्यनास्तिपुनर्जन्मसंसारेसर्वदुःखदे ॥ रथारूढांसुभद्रांचभक्त्यापश्यन्तिमानवाः ॥
॥४०॥ छिनत्तिभगवांस्तस्यदुःखदंभवबन्धनम् ॥ अपुत्रामृतपुत्राचयासुभद्रांप्रपश्यति ॥४१॥ बह्वपत्याजीववत्सासानारीभवतिद्विज ॥ दुर्भगावाथ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वन्ध्यावासुभद्रांयाप्रपश्यति ॥४२॥ सास्वामिसुभगानारीबह्वपत्याभवेत्खलु ॥ गुण्डिकामण्डपस्थंचकृष्णंपश्यतियःपुमान् ॥४३॥ बलभद्रंसुभद्रां
चसयातिपरमंपदम् ॥ रोगीदुःखीचयःपश्येद्गुण्डिकामण्डपेहरिम् ॥४४॥ रोगाच्छोकाच्चसहसाजैमिनेसप्रमुच्यते ॥ यस्त्वपुत्रोजगन्नाथंगुण्डिकामण्ड
पेस्थितम्॥४५॥पश्येत्सचद्विजश्रेष्ठपुत्रंप्राप्नोतिवैष्णवम् ॥ विद्यार्थीलभतेविद्यांधनार्थीलभतेधनम्॥४६॥दारार्थीलभतेदारान्मोक्षार्थीमोक्षमाप्नुयात्॥
भ्रष्टराज्योनृपोयस्तुहरिंपश्यतिभक्तितः॥४७॥गुण्डिकामण्डपेविप्रनिजराज्यंलभेतसः ॥ शत्रुभिर्विजितोयस्तुगुण्डिकामण्डपेहरिम् ॥४८॥भक्त्यापश्य
तिविप्रर्षेतस्यनश्यन्तिशत्रवः ॥ गुण्डिकामण्डपेपश्येद्योराजपीडितोभृशम्॥४९॥ सस‌द्यएवराजानंस्वकीयंवशमानयेत् ॥ सर्वासामेवायात्राणांगुण्डि
काप्रवरामता ॥ ५० ॥ तस्मात्सामानवैःकार्यात्यक्त्वाकार्यशतान्यपि ॥ शयनेचतथोत्थानेतस्मिन्क्षेत्रेमनोरमे ॥५१॥ हरिंपश्यतियोमर्त्यःसदेवै
रपिपूज्यते॥पुरुषोत्तममाहात्म्यंवक्तुंशक्नोतिकःक्षितौ॥५२॥यस्यप्रवेशमात्रेणनरोनारायणोभवेत्॥बहुनात्रकिमुक्तेनसंक्षेपादुच्यतेमया ॥ ५३ ॥ सर्वेषा
मेवतीर्थानांवरिष्ठंपुरुषोत्तमम्॥५४॥संसारसिन्धुमतिनिम्नमिमंतितीर्षुःक्लेशप्रदंविषमपापगणाश्रयंयः ॥ क्षेत्रेसमस्तसुखदेपुरुषोत्तमाख्येपश्येदमुंवरंसुर
पुरुषोत्तमंच॥५५॥इतिश्रीपाद्मेमहापुराणेक्रियायोगसारेपुरुषोत्तममाहात्म्यंनामाष्टादशोऽध्यायः॥१८॥व्यासउवाच॥ नारायणेप्रपन्नायेनराभक्तिसम
न्विताः ॥ कदाचिदशुभंतेषांविद्यतेनद्विजोत्तम॥१॥पुनरेवप्रवक्ष्यामिमाहात्म्यंकमलापतेः ॥ यच्छ्रुत्वामानवाःसर्वेलभन्तेपरमंपदम् ॥२॥ वासुदेवस्य
माहात्म्यंश्रुत्वातृप्यन्तिवैष्णवाः॥पाखण्डानहितृप्यन्तिनरकेक्लेशभागिनः॥३॥पाखण्डानांसमीपेतुविष्णुमाहात्म्यमुत्तमम् ॥ नवक्तव्यंद्विजेश्रेष्ठवक्त
व्यंवैष्णवाग्रतः ॥४॥पूर्वंत्रेतायुगेविप्रउर्वीशुर्नामजैमिने ॥ आसीत्पापरतोनित्यंधर्मनिन्दापरायणः॥५॥ब्रह्मस्वहारीविप्रेन्द्रपरस्त्रीगमनोद्यतः॥गोमांसा
शीसुरापीचवेश्याविभ्रमलोलुपः ॥६॥ शरणागतहन्ताचपरनिन्दकरःसदा ॥ विश्वासघातीमित्रघ्नोज्ञातिपीडाकरस्तथा॥७॥असत्यभाषीक्रूरश्चपाखण्ड
जनसङ्गभाक् ॥ वृत्तिच्छेदीद्विजातीनांन्यासापहारकस्तथा ॥ ८ ॥ तादृशंतंसमालोक्यदुष्टंपापपरायणम् ॥ आजग्मुर्ज्ञातयःसर्वेक्रुद्धास्तस्यनिजं
गृहम् ॥ ९ ॥ ज्ञातयऊचुः ॥ प्रतिष्ठोपार्जितापूर्वैरस्माकंविमलेकुले ॥ साप्रतिष्ठात्वयामूढविनाशंप्रतिनीयते ॥ १० ॥ धर्ममार्गंपरित्यज्यकुरुषे
पातकंसदा ॥ मद्वंशकीर्तिहन्तात्वंजातोऽसिज्ञातिदुःखदः ॥ ११ ॥ अतिविस्मयदासृष्टिर्विधातुर्मन्यतेत्वयि ॥ यस्मिन्सिन्धौशशीजातस्तत्रक्ष्वे
डोद्भवोऽपिच ॥ १२ ॥ अहोशक्तिःकुपुत्राणांसङ्ख्यातुंनचशक्यते ॥ अनेकैःपुरुषैःकीर्तिंसंचितांघ्नन्तितत्क्षणात् ॥ १३ ॥ जातेपुत्रोत्तमेवंशःश्रेष्ठः
स्यादधमोऽपिच ॥ पुत्रेऽधमेतुश्रेष्ठोऽपिवंशोगच्छतिहीनताम् ॥ १४ ॥ व्यासउवाच ॥ इत्युक्त्वाज्ञातयस्तेचतंसर्वेपापिनांवरम् ॥ अपकीर्तिभया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्क्रुद्धास्तत्यजुःसहसाद्विज ॥ १९ ॥ ज्ञातिभिःसपरित्यक्तोजनैःसर्वैश्चधिक्कृतः ॥ प्रपेदेदस्युतांदुःखीविभ्रष्टाखिलवैभवः ॥१६ ॥ तंदस्युकर्मकुर्वन्तं
निर्दयंपरहिंसकम् ॥ धृत्वाजानपदाःसर्वेभूपालायन्यवेदयन् ॥ १७ ॥ तेनभूमिभुजातस्यपितृस्नेहाद्द्विजोत्तम ॥ नहतोऽसौदुराचारोनिजदेशाद्बहि
ष्कृतः ॥ १८ ॥ ततोऽसौवनमाश्रित्यदस्युभिःसहनिर्दयः ॥ पान्थस्वहरणार्थायतस्थौबहुभिरुद्धतैः ॥ १९ ॥ कदाचित्तटिनीतीरंदस्युभिःसह
जैमिने ॥ वनपर्यटनेश्रान्तोजगामस्नानहेतवे ॥ २० ॥ तस्यांतटिन्यांभगवत्परिचर्यापरायणान् ॥ असौददर्शदुष्टात्माब्राह्मणाकृतिनोबहून् ॥२१ ॥
अथतेब्राह्मणाःसर्वेसमाराध्यजनार्दनम् ॥ अन्योन्यंकथयामासुर्विहितान्यतिकौतुकात् ॥ २२ ॥ अद्यचम्पकपुष्पाणिमयात्यक्तानितानिवै ॥ कश्चि
द्ददतिताम्बूलंमयादत्तंमुरारये ॥ २३ ॥ नखादितव्यंताम्बूलंकदाचिदपिजन्मनि ॥ मयाद्यहरयेदत्तंकदलीफलमुत्तमम् ॥ २४ ॥ जन्मजन्मनि
चमयाभक्ष्यंनकदलीफलम् ॥ कोऽपिवक्तिमयादत्तंहरयेदाडिमीफलम् ॥ २५ ॥ कोऽपिवक्तिमयादत्तंरसालफलमुत्तमम् ॥ अन्योऽन्यमेतद्ददतांतेषांश्रु
त्वावचांसिच ॥२६॥ उर्वीशुश्चिन्तयामासकिंप्रदास्यामिविष्णवे ॥ संसारेयानिवस्तूनिभक्ष्याणिसन्तितान्यहम् ॥ २७॥ नहिशक्नोमिसंत्यक्तुंकिंदा
स्यामिमुरारये ॥ नित्यंवनान्तरस्थोऽहंचौरोराजभयाकुलः ॥ शकटारोहणेनास्तिह्यधिकारःकदापिमे ॥ २८ ॥ व्यासउवाच ॥ इत्युक्त्वादस्युना
तेनभूयोभूयोद्विजोत्तम ॥ शकटंहरयेदत्तंचतुर्वर्गप्रदायिने ॥ २९ ॥ अथतेब्राह्मणाःसर्वेजग्मुर्विप्रयथागताः ॥ सोऽपिदस्युर्दस्युभिश्चजगामनिजमा
श्रयम् ॥ २० ॥ एकदागुडकण्डोलंतेनैवखलुवर्त्मना ॥ गृहीत्वापथिकःकश्चित्काकीमण्डलमागतः ॥ ३१॥ ततोऽसौसहसादस्युर्निर्भयःपरहिंसकः॥
जहारगुडकण्डोलमध्वनीनस्यतस्यच ॥ ३२ ॥ अथतेदस्यवश्चक्रुर्गुडकण्डोलभञ्जनम् ॥ उर्वीशुश्चापतद्वागेशकटंगुडनिर्मितम् ॥ ३३ ॥ उर्वीशुः
शकटंगौडंसमासाद्यद्विजोत्तम ॥ मनसाचिन्तयामासवचःस्मरणपूर्वकम् ॥ ३४ ॥ अनोमयापुरादत्तंस्वयमेवमुरारये ॥ तस्मादनोनमेग्राह्यंकदा
चिदिहजन्मनि ॥३५ ॥ विचिन्त्येतिहृदादातुंतदनोगुडपूरितम् ॥ दत्तंविप्रायकस्मैचिन्माधवप्रीतिहेतवे ॥ ३६॥ तांभक्तितस्यविज्ञायमहापातकिनो
द्विज ॥ जहारसकलंपापंसद्यःप्रीतोजनार्दनः ॥ ३७ ॥ तस्मिन्नेवदिनेविप्रप्रविश्यचमहावनम् ॥ हतःपौरजनैःसर्वैरथक्रुद्धैःसउर्वीशुः ॥ ३८ ॥
भगवानथतंनेतुंविमानंस्वर्णनिर्मितम् ॥ दूतांश्चप्रेषयामासनानाभरणभूषितान् ॥ ३९ ॥ अथतेभगवद्दूतास्तमुर्वीशुंगतैनसम् ॥ समारोप्यविमानेत
सद्योजग्मुःपुरंहरेः ॥ ४० ॥ ततोऽसौहरिसान्निध्यंप्राप्यपुण्यात्मनांवरः ॥ पुनर्मन्वन्तरशतंस्थित्वाकेशवसन्निधौ ॥४१॥ परमंज्ञानमासाद्यसविवेश
तनुंहरेः ॥४२॥ व्यासउवाच ॥ येनकेनाप्युपायेनहरिभक्तिकरोनरः ॥ संसारजलधेःपारंराजहंसइवव्रजेत् ॥४३॥ क्षणमेवहरेर्भक्तिर्वर्ततेयस्यचेतसि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्पदंपरमंयातिसपापात्मापिगच्छति ॥ ४४ ॥ एकमप्युत्तमंवस्तुदत्त्वासौतन्मुरारये ॥ स्वयमेवहिभोक्तव्यंपश्चात्पापोपशान्तये ॥ ४५ ॥
यद्वस्तुहरयेदत्तंतच्चदद्याद्विजातये ॥ किंचिच्छेषंनभोक्तव्यंतस्यावश्यंस्वयंबुधैः ॥ ४६ ॥ वस्तूनिब्राह्मणश्रेष्ठमिष्टानियानिकानिच ॥ अदत्त्वाविष्णवे
तानिनभोक्तव्यानिवैष्णवैः॥४७॥ विष्णुनैवेद्यमाहात्म्यंसर्वपापप्रणाशनम्॥ सेतिहासंपुनर्वच्मिशृणुविप्रसमाहितः॥४८॥आसीत्सर्वजनिर्नामब्राह्मणः
शुद्धवंशजः ॥ शान्तोदान्तोदयायुक्तोगुरुब्राह्मणपूजकः ॥४९॥ हरेःपूजापरश्चैवहरिस्मरणतत्परः ॥ प्रपन्नक्लेशविध्वंसीसत्यवादीजितेन्द्रियः ॥५०॥
प्रातःकालेनिजाचारग्राहीहिंसाविवर्जितः ॥ एकादशीव्रतरतोज्ञातिपूजापरायणः ॥ ५१ ॥ कदाचित्सद्विजश्रेष्ठःस्वप्नेऽपश्यच्चकेशवम् ॥ श्यामंवि
रजपद्माक्षंस्मेरास्यंपीतवाससम् ॥ ५२ ॥ स्वर्णकुण्डलमञ्जीरकिरीटोज्ज्वलविग्रहम् ॥ कौस्तुभोद्भासितोरस्कंवनमालाविभूषितम् ॥ ५३॥ चतुर्बाहुं
शङ्खचक्रगदापद्मधरंप्रभुम् ॥ समस्तैर्लक्षणैर्युक्तंस्वर्णयज्ञोपवीतिनम् ॥५४॥ संप्राप्यदर्शनंस्वप्नेसविप्रोजगतीपतेः ॥ कृताञ्जलिस्तमस्तौषीद्रोमाञ्चित
तनुर्मुदा ॥ ५५ ॥ तुभ्यंनमोऽस्तुजगतःसकलस्यभर्त्रेसह्लोकशोकभयरोगविनाशनाय ॥ नारायणायकमलाहृदयप्रियायधर्मार्थकामपरमामृतदाय
तुभ्यम् ॥५६॥ पापानिचैवसकलानिमयाकृतानिमत्तेनमोहवशगेनसदामुरारे ॥ तस्माद्बिभेमिजगदम्बुनिधेर्गभीरान्मामुद्धरस्वनिजभक्तितरींप्रदाय॥
॥ ५७ ॥ जानामियद्यपिहरेदुरितंमनुष्योव्यामोहमाशुचलभेमुविकैटभारे ॥ पापंतथापिचमुदासततंकरोमितस्मान्नकोऽप्यहमिवास्तिजनोविमूढः॥
॥ ५८ ॥ पुण्यद्रुमःसुखफलंसहसैवधत्तेकिंवेद्मिनेतिनृहरेकृतपातकोऽहम् ॥ पुष्पद्रुमार्पणविधौनममास्तिवित्तंनाथप्रसीदभगवन्किमहंकरोमि॥५९॥
त्वत्पादपद्मयुगलंपरमामृतस्यस्थानंविहायममचित्तमधुव्रतोऽयम् ॥ नारीमुखंव्रजतिदेवसृतिप्रदंयच्छ्लेष्मप्रकीर्णमनिशंकमलभ्रमेण ॥६०॥ पाणिःप्रदा
नरहितोऽनृतभाषिवक्त्रंकर्णौचपापश्रवणायसदैवदक्षौ ॥ दोषानिमान्ममहरेहरसेवकस्ययस्मात्त्वनाथशरणागतदोषहन्ता ॥६१॥ संसारघोरजलधौनृहरे
कदाचित्त्वद्भक्तिनौरिहमयासुदृढाचलब्धा ॥ तत्रापिदैववशगोऽहमहोदुरात्मावर्ततएवसततंममदुःखकालः ॥६२॥ संसारपारगमनायलसत्पथोऽस्ति
किंसर्वदुःखरहितःसदयःप्रसन्नः ॥ अन्धीकृतस्यमममोहमहातमिस्रैर्दृष्टिस्त्वयीहनकदापिचयातिविष्णो ॥ ६३ ॥ पापात्मनोऽपिममचित्तमिदं
मुरारेनष्टंविनष्टजनकष्टविनष्टिकारि ॥ यस्त्वांसमस्तसुरवन्दितपादपद्मस्वप्नेऽपिकेशिमथनाद्यविभोसमीक्षे ॥ ६४ ॥ व्यासउवाच ॥ इतितेनस्तुतो
देवोभगवान्कमलापतिः ॥ उवाचवाक्यंवाक्यज्ञःसंसारार्णवतारकः ॥ ६५ ॥ श्रीभगवानुवाच ॥ भक्तिभिस्तवविप्रेन्द्रतुष्टोऽहंनित्यमेवच ॥
तस्मात्तवाचिरेणैवसर्वंभद्रंभविष्यति ॥ ६६ ॥ पापिनोऽपितवोद्धारोमयापूर्वंकृतोद्विज ॥ अधुनाममभक्तोऽसिनविपत्तिर्भविष्यति ॥ ६७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्राह्मणउवाच ॥ कोऽहंतस्थौपुराविष्णोकिंवापापंमयाकृतम् ॥ पापिनोऽपिममोद्धारःकथंपूर्वंत्वयाकृतः ॥ ६८ ॥ संसारेऽस्मिन्कथंजातोजनि
तोऽहंकथंत्वया ॥ एतत्सर्वंविभोब्रूहियतस्त्वंसदयःसदा ॥ ६९ ॥ श्रीभगवानुवाच ॥ अप्रकाश्यमिदंगुह्यंयद्यपिद्विजसत्तम ॥ तथापितववा
त्सल्यान्निगदामिनिशामय ॥ ७० ॥ पुरात्वंब्राह्मणश्रेष्ठपक्षिवंशसमुद्भवः ॥ भूतोऽसिभूमिभागेषुनिजकर्मविपाकतः ॥ ७१ ॥ क्षुधयातृषयावा
पिसततंव्याकुलोभवान् ॥ बभ्रामभक्षयन्कीटान्निर्झरोष्णोदकंतथा ॥ ७२ ॥ नानादुःखंसदाभुञ्जन्पक्षियोनिसमुद्भवः ॥ चतुर्वर्षसहस्राणि
स्थितोऽसित्वंपुराक्षितौ ॥ ७३ ॥ एकदाकुलभद्राख्योब्राह्मणःसर्वतत्त्ववित् ॥ पूजयामासमांभक्त्यानैवेद्याद्यैर्नदीतटे ॥ ७४ ॥ समभ्यर्च्यसविप्रेन्द्रो
ममनैवेद्यतण्डुलम् ॥ ययौतत्रैवनिक्षिप्यभूयएवनिजंगृहम् ॥ ७५ ॥ ततोवृक्षात्समागत्यक्षुधितेनविनात्वया ॥ ममनैवेद्यसंबन्धिभक्षितंसर्वतण्डु
लम् ॥ ७६ ॥ भुक्त्वैवसद्योमुक्तोऽसिपातकैरतिदारुणैः ॥ कदाचित्प्राप्तकालस्त्वंकालधर्मंगतोद्विज ॥ ७७ ॥ त्वामानेतुंमयादूताःप्रेषिताःस
र्वथानिजाः ॥ ततोरथेसमारोप्यभवन्तंनष्टकल्मषम् ॥ ७८ ॥ सद्योदूतगणाःसर्वेसमायाताःपरंपदम् ॥ युगकोटिसहस्राणिस्थितोऽसिममसन्निधौ
॥ ७९ ॥ भुञ्जन्सुखानिसर्वाणिदुर्लभानिसुरैरपि ॥ ततोयातोऽसिविप्रेन्द्रविशुद्धेब्राह्मणान्वये ॥ ८० ॥ तत्रापिमयिभक्तिस्तेजातातिसुदृढा
पुनः ॥ क्रियायोगेनमांनित्यंसमाराध्यद्विजोत्तम ॥ ८१ ॥ आयुषोऽन्तेमत्प्रसादान्मामकंपदमाप्स्यसि ॥ यस्यतुष्टोऽस्म्यहंविप्रसपापात्मा
पिभुक्तिभाक् ॥ ८२ ॥ कदाचिद्यस्यरुष्टोऽस्मिपुण्यात्मापिचपापभाक् ॥ तस्माद्ब्राह्मणभद्रंतेभक्तोऽसिममसुव्रत ॥ ८३ ॥ दास्यामितेपरं
स्थानंयदलभ्यंसुरैरपि ॥ ८४ ॥ ब्राह्मणउवाच ॥ त्वत्प्रसादाच्छ्रुतंनाथपूर्ववृत्तान्तमात्मनः ॥ इदानींश्रोतुमिच्छामियत्किञ्चिद्ब्रूहितत्प्रभो ॥
॥ ८५ ॥ कस्यतुष्टोऽसिदेवेन्द्रकस्यरुष्टोऽसिवाप्रभो ॥ महत्याकृपयासर्वमेतन्मेवक्तुमर्हसि ॥ ८६ ॥ श्रीभगवानुवाच ॥ कर्मणायेनविप्रे
न्द्रतुष्टिर्मेहृदिजायते ॥ क्रोधश्चतत्समस्तंचकथयामिसमासतः ॥ ८७ ॥ योदयावान्द्विजश्रेष्ठसर्वभूतेषुसर्वदा ॥ अहङ्कारविहीनश्चतस्यतुष्टो
ऽस्म्यहंसदा ॥ ८८ ॥ कर्मकुर्यान्मदर्थंयोधर्मभक्तिसमन्वितः ॥ ब्रूतेमदर्थंयःशान्तंतस्यतुष्टोऽस्म्यहंसदा ॥ ८९ ॥ मिष्टवस्तुसमासाद्यदद्यान्मे
यश्चमानवः ॥ मानापमानेसदृशस्तस्यतुष्टोऽस्म्यहंसदा ॥ ९० ॥ सर्वभूतशरीरस्थंयोमांजानातिमानवः ॥ परहिंसाविहीनोयस्तस्य
तुष्टोऽस्म्यहंसदा ॥ ९१ ॥ कर्माणिकुरुतेयस्तुसुविचार्यपुनःपुनः ॥ गोब्राह्मणहितैषीयस्तस्यतुष्टोऽस्म्यहंसदा ॥ ९२ ॥ स्वयंनिरुक्तंवचनं
यत्नाद्यःपरिपालयेत् ॥ प्रपन्नंपातियत्नाद्यस्तस्यतुष्टोऽस्म्यहंसदा ॥ ९३ ॥ ददात्यनुपकारिभ्योदानानिद्विजसत्तम ॥ मयिचित्तंसदायस्यतस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तुष्टोऽस्म्यहंसदा ॥ ९४॥ कर्मणायेनतुष्टोऽस्मिनिरुक्तंतत्समासतः ॥ रुष्टोऽस्मिकर्मणायेनविप्रवच्मिश्शृणुष्वतत् ॥९५ ॥ परहिंसारतोयस्तुनिर्दयःसर्व जन्तुषु ॥ अहंयुःसर्वदाक्रुद्धःसमांनयतिशत्रुताम् ॥ ९६ ॥ असत्यभाषीक्रूरश्चपरनिन्दापरस्तुयः ॥ कविवर्तनविध्वंसीसमांनयतिशत्रुताम् ॥ ९७ ॥ अदृष्टदोषौपितरौस्त्रीभ्रातृभगिनीस्तथा ॥ मोहात्त्यजतियोमूढःसमांनयतिशत्रुताम् ॥ ९८ ॥ पित्रोस्तुभर्त्सनंयश्चकुरुतेमूढधीर्नरः ॥ गुर्ववज्ञाकरो विप्रसमांनयतिशत्रुताम् ॥ ९९ ॥ आरामच्छेदिनोयेचजलाशयविलायिनः ॥ ग्रामनाशकरायेचतेमांनयन्तिशत्रुताम् ॥ १०० ॥ परस्त्रियंस मालोक्यविषादंयान्तियेजनाः ॥ शृण्वन्तिपापचर्चांचतेषांरुष्टोऽस्म्यहंसदा ॥ १ ॥ द्विषन्तिनाथंयेमूढाअनाथस्वंहरन्तिये ॥ विश्वासघातिनो येचतेषांरुष्टोऽस्म्यहंसदा ॥ २ ॥ येचगोवीर्यहन्तारोवृषलीपतयश्चये ॥ अश्वत्थघातिनोयेचतेषांरुष्टोऽस्म्यहंसदा ॥ ३ ॥ ब्रह्मविष्णुमहेशानां मध्येयेभेदकारिणः ॥ परदारातिरक्तायेतेषांरुष्टोऽस्म्यहंसदा ॥ ४ ॥ एकादश्यांभुञ्जतेयेलोभात्पापधियोनराः ॥ वेदनिन्दाकरायेचतेषांरुष्टोऽस्म्यहं सदा ॥ ५ ॥ पापबुद्धिरतायेचमित्रद्रोहरतास्तथा ॥ धात्रीतरुंचयेघ्नन्तितेषांरुष्टोऽस्म्यहंसदा ॥६॥ दिवसेमैथुनंयेचकुर्वतेकाममोहिताः ॥ रजस्वला स्त्रियांचैवतेषांरुष्टोऽस्म्यहंसदा ॥ ७ ॥ येचादृष्टार्तवांनारींमोहाद्गच्छन्तिसत्तम ॥ व्रतस्थांचसदाजाल्मास्तेमांनयन्तिशत्रुताम् ॥ ८ ॥ अमावास्याति थौयेचकुर्वतेनिशिभोजनम् ॥ भोजनद्वयमेवार्केतेषांरुष्टोऽस्म्यहंसदा ॥ ९ ॥ आमिषंमैथुनंतैलममावास्यादिनेद्विजाः ॥ नयेत्त्यजन्तिविप्रेन्द्रतेषांरुष्टो ऽस्म्यहंसदा ॥ ११० ॥ बहुनात्रकिमुक्तेनसंक्षेपात्तेवदाम्यहम् ॥ निन्दन्तिवैष्णवान्येचतेषांरुष्टोऽस्म्यहंसदा ॥११॥ व्यासउवाच ॥ इत्युक्त्वाभगवा न्विष्णुरदृश्यःसहसाभवत् ॥ सचविप्रःसमुत्तस्थौत्यक्तनिद्रस्तुमश्चतः ॥ १२ ॥ केशवोक्तेनवाक्येनसविप्रोहरिभक्तिकृत् ॥ संत्यज्यसकलंकार्यं क्रियायोगरतोऽभवत् ॥१३॥ नारायणस्यनैवेद्यंभुञ्जतोऽपिफलंत्विदम् ॥ हरिपूजाकृतांपुंसांनजानेकिंभवेदिति ॥१४॥ समासेनब्रवीमित्वांशृणुसत्तम जैमिने ॥ सकृत्कृत्वाहरेःपूजांप्राप्यतेपरमंपदम् ॥ १५ ॥ मानुष्यंदुर्लभंलोकेपूजातत्रापिचक्रिणः ॥ भक्तिस्तत्रापिविप्रेन्द्रदुर्लभापरिकीर्तिता ॥ ॥ १६ ॥ संसाराब्धिसर्वदुःखप्रपूर्णंकर्तुंवाञ्छायस्यचित्तेऽस्तिपुंसः ॥ भक्त्यानित्यंवासुदेवस्यपूजांकुर्यादार्यःकर्मणांसोऽखिलानाम् ॥ ११७ ॥ इतिश्रीपाद्मेमहापुराणेक्रियायोगसारएकोनविंशतितमोऽध्यायः ॥ १९ ॥ व्यासउवाच ॥ विष्णुपूजाफलंविप्रसंक्षेपात्कथितंमया ॥ इदानींवच्मि दानानिनिशामयसमाहितः ॥ १ ॥ दानंतपोद्वयोर्मध्येदानमेकंपरंस्मृतम् ॥ तपसापापमित्युक्तंनपापोदानकर्मणि ॥ २ ॥ ततःकृतयुगेश्रेष्ठंत्रेता यांध्यानमेवच ॥ सपर्याद्वापरेश्रेष्ठादानंश्रेष्ठंकलौयुगे ॥ ३ ॥ तस्मात्कलियुगेदानंप्रीतयेकमलापतेः ॥ कर्तव्यंसततंप्राज्ञैरिच्छद्भिःपरमंपदम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ४ ॥ कलयाकलयाचन्द्रकलासंवर्धतेतथा ॥ दानस्यसागतिःप्रोक्तातपसश्चमनीषिभिः ॥ ५ ॥ पलादपिद्विजश्रेष्ठकर्तव्योवित्तसंग्रहः ॥ संचितंतु
धनंप्राज्ञोदानकर्मणिसंक्षिपेत् ॥ ६ ॥ धनेस्थितेऽपियोमर्त्योनाश्नातिनददातियः ॥ दरिद्रःसचविज्ञेयोदानभोगविवर्जितः ॥ ७ ॥ वित्तंकेनसहाया
तियातितेनतुकोद्विज ॥ आयातितत्पुरादत्तमिहपञ्चत्वमागते ॥ ८ ॥ दत्त्वादत्त्वासदादानंमानवायेदरिद्रति ॥ नतेदरिद्राविज्ञेयाःपरलोकेमहेश्वराः
॥ ९ ॥ धनंरक्षन्तिकार्पण्यांद्येतेज्ञेयाःसुदुःखिताः ॥ अन्तेत्यक्त्वाचतत्सर्वंनिराशायान्तिजैमिने ॥ १० ॥ परलोकेद्विजश्रेष्ठःसाधुसद्बलवर्जितः ॥
निर्धनेबन्धुहीनेचनादत्तमुपतिष्ठते ॥ ११ ॥ स्तोकंस्तोकंचविप्रेन्द्रभक्तिश्रद्धासमन्वितः ॥ नित्यंदेयानिदानानिवैष्णवैर्निजभक्तितः ॥ १२ ॥
सर्वेषामेवदानानामन्नदानंद्विजोत्तम ॥ जलदानंचतत्त्वज्ञैरतिश्रेष्ठंप्रकीर्तितम् ॥ १३ ॥ विनान्नेननतिष्ठन्तिप्राणादेहेषुदेहिनाम् ॥ अन्नदःप्राणदोज्ञेयः
प्राणदःसकलप्रदः ॥ १४ ॥ तस्मात्समस्तदानानामन्नदोलभतेफलम् ॥ अन्नदानसमंदानंजलदानंचजैमिने ॥ १५ ॥ विनातोयेननान्नंस्यादतस्तोयं
प्रदीयते ॥ क्षुधातृषापिविप्रेन्द्रद्वेतुल्येतुप्रकीर्तिते ॥ १६ ॥ तस्माद्दत्त्वाचतोयंचश्रेष्ठंप्रोक्तंमनीषिभिः ॥ जीवनंजीवनंनॄणांजीवनंनचजीवनम् ॥
॥ १७ ॥ अतोजीवनरक्षार्थंजीवनंप्राज्ञउत्सृजेत् ॥ अन्नंतोयंचविप्रेन्द्रदत्तंयेनमहीतले ॥ १८ ॥ तेनसर्वाणिदानानिकृतानिनात्रसंशयः ॥ अन्न
दानस्यमाहात्म्यंजलदानस्यवैशृणु ॥ १९ ॥ बभूवहास्तिनपुरेकुबेरइववित्तवान् ॥ तस्मिन्नेवपुरेवेश्याबभूवसुरसुन्दरी ॥ २० ॥ ख्यातारतिवि
दग्धेतिसर्वलक्षणसंयुता ॥ तत्रक्षेमङ्करीनामब्राह्मणीश्रेष्ठवंशजा ॥ २१ ॥ समस्तगुणसम्पन्नाविधवासीद्द्विजात्मजा ॥ साब्राह्मणीद्विजश्रेष्ठजारा
नुरक्तमानसा ॥ २२ ॥ निषिद्धंकर्मकुर्वन्तीत्यक्त्वायात्यविवेकताम् ॥ तयासंनिहिताविप्रवेश्यापिब्राह्मणीचसा ॥ २३ ॥ चकारसख्यंस्नेहेन
वेश्यावृत्तिमुपेत्यसा ॥ सावेश्याब्राह्मणीचापिद्वेचैकत्रदिनेदिने ॥ २४ ॥ पापानिचक्रतुःप्रीत्याअसङ्ख्यातानिजैमिने ॥ ततोरतिविदग्धासावृद्ध
भावमुपागता ॥ २५ ॥ ब्राह्मणीचापिविप्रेन्द्रदुःशीलात्यन्तपापिनी ॥ कदाचिद्वारमुख्यासाजरतीतांनिजांसखीम् ॥ २६ ॥ प्राहेतिविस्मिता
विप्रवचनंविनयान्विता ॥ २७ ॥ रतिविदग्धोवाच ॥ सखित्वयासहानेकंदारुणंपातकंकृतम् ॥ अद्यापिपातकेदृष्टिर्महतीवर्ततेमम ॥ २८ ॥
सौन्दर्यंचबलंचैवसर्वंमेजरयाहृतम् ॥ इत्थमस्वास्थ्यकृन्नित्यमाशात्यक्तुंनशक्यते ॥ २९ ॥ स्थाविरंसुमहत्प्राप्तंकृतपातकयामया ॥ समागत
मिवैतर्हिसमीक्ष्यमरणंगतम् ॥ ३० ॥ उपार्जितानिपापेनयानिवित्तानिवैमया ॥ रक्षिष्यन्त्यनपत्यायांमृतायांमयितानिके ॥ ३१ ॥ तस्मात्सर्वाणिवित्ता
निअन्यायोपार्जितानिच ॥ दातुमिच्छामिविप्रेभ्योयदित्वंमन्यसेसखि ॥ ३२ ॥ ब्राह्मण्युवाच ॥ मयायावन्तिवित्तानिपश्येतिसंचितानिच ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

असत्पात्रेषुदत्तानितानिसर्वाणिनित्यशः ॥३३ ॥ तस्मादहंधनैर्हीनाकिंदास्यामिद्विजातये ॥ अस्तिचेद्यदिवित्तंतेदानमाशुतदाकुरु ॥ ३४ ॥ तस्या
एवंवचःश्रुत्वासावेश्यात्यन्तहर्षिता ॥ वित्तेनसकलेनैवअन्नदानंचकारह ॥ ३५ ॥ हरिशर्माचविप्रेन्द्रोधनवानतिभक्तितः ॥ पूजयामाससततं
भगवन्तंजनार्दनम् ॥ ३६ ॥ जितेन्द्रियोजितक्रोधोहिंसादम्भविवर्जितः ॥ प्रीतयेकमलाभर्तुःसतेपेसुमहत्तपः ॥ ३७ ॥ गन्धपुष्पैश्चबलिभिर्घृत
धूपैःप्रदीपकैः ॥ पूजयामासदेवेशंनित्यमेवजनार्दनम् ॥ ३८ ॥ धनवानपिविप्रोऽसौवित्तस्यक्षयशङ्कितः ॥ पिपीलिकामूषिकाश्चतथान्येऽपिच
जन्तवः ॥ ३९ ॥ कृपणस्यद्विजश्रेष्ठगृहेनित्यंबुभुक्षिताः ॥ उपार्जितंधनंसर्वंस्वयमेवदिनेदिने ॥ ४० ॥ बुभुजेब्राह्मणश्रेष्ठदानकर्मविवर्जितः ॥
सुहृदांब्राह्मणानांचबान्धवानांकदापिसः ॥ ४१ ॥ चकारनचसंभाषामर्थप्रार्थनशङ्कया ॥ विगणय्यस्ववित्तानिसुबहूनिनिजालये ॥ ४२ ॥ मत्वाश्रेष्ठ
मिवात्मानंमोदतेऽसौद्विजोत्तम ॥ कदाचित्प्राप्तकालोऽसौब्राह्मणोऽत्यन्तवित्तवान् ॥ ४३ ॥ गणिकाब्राह्मणीसाचएककालेमृताद्विज ॥ अथदूताः
समायातास्तान्नेतुमतिभीषणाः ॥ ४४ ॥ धर्मराजस्यदेवस्यपाशमुद्गरपाणयः ॥ तेचचण्डादयोदूतास्तान्समादायजैमिने ॥ ययुर्धर्मपुरंसद्योदुर्ग
मेनपथाततः ॥ ४५ ॥ चण्डउवाच ॥ आनीतोहरिशर्माचवेश्याचब्राह्मणीचसा ॥ तवाज्ञयाजीवितेशपश्यैतान्पुरतःस्थितान् ॥ ४६ ॥ तान्स
मालोक्यजीवेशःप्रहस्यद्विजसत्तम ॥ चित्रगुप्तमितिप्राहसर्वकार्यविचक्षणम् ॥ ४७ ॥ यमउवाच ॥ एतेषांसर्वकार्याणिशुभदान्यशुभानिच ॥
मूलाद्विचारयप्राज्ञचित्रगुप्तमहामते ॥ ४८ ॥ यमादेशात्ततस्तेषांचित्रगुप्तोविचक्षणः ॥ सर्वंविचारयामासशुभकर्माशुभंतथा ॥ ४९ ॥ चित्रगुप्त
उवाच ॥ देवाकर्णयवक्ष्यामिपुण्यंचपातकंतथा ॥ इयंवेश्याब्राह्मणीचहरिशर्माचकारयत् ॥ ५० ॥ एषारतिविदग्धाख्यागणिकाति
दुराशया ॥ चकारयानिपापानिवक्तुंतानिनशक्यते ॥ ५१ ॥ अन्यायोपार्जितैर्वित्तैरखिलैरेवसूर्यज ॥ अन्नदानंचकारेयंगणिकागतयौवना॥
॥ ५२ ॥ अन्नदानप्रभावेणयातनागृहवासदे ॥ त्यक्तेयंपातकैःसर्वैःकोटिजन्मार्जितैरपि ॥ ५३ ॥ अन्नदानंमहाराजयेकुर्वन्तिजनाः
क्षितौ ॥ तेपापिनोऽपिगच्छन्तितद्विष्णोःपरमंपदम् ॥ ५४ ॥ यावन्त्यन्नानियच्छन्तिमानवाःक्षितिमण्डले ॥ तावन्त्योब्रह्महत्याश्चतस्यन ॥ ४४ ॥
श्यन्त्यसंशयम् ॥ ५५ ॥ अन्नानियच्छतांत्यक्त्वाशरीराणिचपातकम् ॥ गृह्णतामेवपात्राणिसहसायातिसूर्यज ॥ ५६ ॥ अन्नानिपापिनांतस्मा
न्नगृह्णन्तिविचक्षणाः ॥ मोहाद्गृह्णन्तियेमूढास्तएवपापभागिनः ॥ ५७ ॥ शुभकर्माशुभंवापिवेश्यायाःकथितंप्रभो ॥ ब्राह्मण्याःशृणुकर्माणिशुभानि
चाशुभानिच ॥ ५८ ॥ इयंक्षेमङ्करीनामब्राह्मणीशुद्धवंशजा ॥ भद्रकीर्तिप्रियासर्वंचकारदुरितंप्रभो ॥ ५९ ॥ त्यक्त्वानिजाश्रमाचारंनिजयौवन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गर्विता ॥ बभूवात्यन्तपापिष्ठाजारसङ्गमलोलुपा ॥ ६० ॥ कदाचिच्छैशवेराजन्खेलन्तीशिशुभिःसह ॥ रथ्यायांखननंचक्रेचतुष्कोणसमन्वित म्॥
॥ ६१ ॥ तस्मिन्नेवदिनेमेघउदकानिववर्षच ॥ पूरितंतज्जलैःखातंतया विनिर्मितंप्रभो ॥६२॥ ततोमध्याह्नसमयेगौरेकातृषितानृप ॥ अपिबत्तत्रपानीयं
तापितातपनातपैः ॥ ६३ ॥ तेनैवसर्वपापानिविनष्टानिमहान्तिवै ॥ तस्याःसूर्यसुतप्राज्ञजलदानप्रभावतः ॥ ६४ ॥ विमुक्तासकलैःपापैर्व्रजे
न्नारायणालयम् ॥ कृतपापाहिदेवेशब्राह्मणीयंदुराशया ॥ ६५ ॥ विमुक्तासकलैःपापैर्जलदानप्रभावतः ॥ अयंविप्रोमहाभक्तोदेवदेवस्यचक्रिणः॥
ततोऽस्योपरिजीवेशप्रभुरेकोऽच्युतःस्मृतः ॥ ६६ ॥ व्यासउवाच ॥ चित्रगुप्तस्यतद्वाक्यंसमाकर्ण्यसदण्डभृत् ॥ तांवेश्यांब्राह्मणींचापिववन्दे
ब्राह्मणंचतम् ॥ ६७ ॥ दिव्यैःसुवर्णालङ्कारैर्वस्त्रैर्नानाविधैस्तथा ॥ तेषांपूजांयमःकृत्वाकुटुम्बिनांचजैमिने ॥ ६८ ॥ उवाचप्रहसन्वाक्यंसुप्रीतो
मृदुलाक्षरम् ॥ ६९ ॥ यमउवाच ॥ यूयंसर्वेमहात्मानोविनष्टाखिलपातकाः ॥ समस्तसुखदस्थानंगच्छतश्रीपतेःप्रभोः ॥ ७० ॥ तानारोप्य
ततोदिव्येयमःकाञ्चननिर्मिते ॥ राजहंसयुतेस्थानेप्रेषयामासचक्रिणः ॥ ७१ ॥ ततोदिव्यरथारूढाःसर्वाभरणभूषिताः ॥ पुरंभगवतोजग्मु
स्तेसर्वेगतपातकाः ॥ ७२ ॥ गणिकाब्राह्मणीसाचविनष्टाखिलकल्मषा ॥ सान्निध्यंप्राप्यदेवस्यतस्थौविप्रचिरंसुखम् ॥ ७३ ॥ हरिशर्माणमालोक्य
समायान्तंजनार्दनः ॥ ददौवरासनंतस्मैस्नेहात्कनकनिर्मितम् ॥ ७४ ॥ पाद्यार्घ्याचमनीयैश्चतमभ्यर्चद्द्विजोत्तमम् ॥ वरासनोपविष्टंचपप्रच्छेतिमुदा
हरिः ॥ ७५ ॥ श्रीभगवानुवाच ॥ द्विजन्मन्कुशलंब्रूहिमद्भक्तप्रवरोऽसियत् ॥ चिरंमेमन्दिरेतिष्ठसर्वोपद्रववर्जिते ॥ ७६ ॥ ब्राह्मणउवाच ॥
त्वांस्मृत्वापिक्षितौदेवलभतेकुशलंप्रभो ॥ त्वत्सान्निध्यंमयाप्राप्तंकुशलंकिमतःपरम् ॥ ७७ ॥ व्यासउवाच ॥ एतस्यवचनंश्रुत्वाभगवान्प्रणयोदि
तम् ॥ दत्तवान्निजसारूप्यंप्रीतस्तस्मैद्विजन्मने ॥ ७८ ॥ ददौतस्मैसुखंसर्वंदुर्लभंकमलापतिः ॥ आहारमात्रंनददौतत्कार्पण्यंस्मरन्प्रभुः ॥ ७९ ॥
दिनद्वयान्तरेविप्रोनिराहारःक्षुधाकुलः ॥ प्रोवाचविष्णुंदेवेशंविनयावनतःस्थितः ॥ ८० ॥ ब्राह्मणउवाच ॥ प्रभोप्राप्तंतवस्थानमनेकतपसां
फलम् ॥ अत्रापिक्षुधयानित्यंविफलोऽस्मिकथंप्रभो ॥ ८१ ॥ देवकन्यागणैर्दिव्यैःसंप्राप्तनवयौवनैः ॥ श्वेतचामरवातेनमञ्चेष्वपिनिवीजितः ॥
॥ ८२ ॥ सुगन्धानांप्रसूनानांमहास्रग्भिरलङ्कृतः ॥ चन्दनैर्लिप्तसर्वाङ्गोराजश्रेष्ठइवप्रभो ॥ ८३ ॥ चार्वङ्गीभिःकामिनीभिर्नित्यंमत्पुरतःप्रभो ॥
गीतेननृत्यतेचापिनारायणतवाज्ञया ॥ ८४ ॥ वासवाद्याःसुराःसर्वेरजांसिममपादयोः ॥ शिरःकिरीटशोभीनिनित्यमेववहन्तिवै ॥ ८५ ॥ देवदेव
र्षयश्चापिमुनयश्चजगत्पते ॥ स्तुवन्तिमांस्तवैर्नित्यंकिङ्कराइवसर्वदा ॥ ८६ ॥ चतुर्बाहुरहंश्यामःशङ्खचक्रगदाब्जभृत् ॥ प्रफुल्लपुण्डरीकाक्षःपीत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वासाःसुकुण्डलः ॥ ८७ ॥ स्वर्णयज्ञोपवीतीचकिरीटीकुण्डलीतथा ॥ दृश्येत्वमिवदेवाद्यैर्द्वितीयोगरुडध्वजः ॥ ८८ ॥ सुखान्येतानिदत्तानिदुर्लभा
नित्वयाप्रभो ॥ ददासिकथमाहारंनमह्यंपरमेश्वर ॥ ८९॥ क्षुधाग्निनाचसुमहच्छरीरंममदह्यते ॥ यथैवज्वलितोवृक्षःकोटरस्थेनवह्निना ॥ ९० ॥ सुख
मेतत्त्वयादत्तंहरेमह्यंनरोचते ॥ प्रज्वलज्जठराग्नौतुविह्वलाङ्गायकेशव ॥ ९१ ॥ कर्मणामनसावाचात्वांविनाजगदीश्वरम् ॥ नपूजितोमयाकश्चिद्देवदेव
गणार्चितः ॥ ९२ ॥ स्वप्नेनापिजगन्नाथतस्यभक्तिःकृतानहि ॥ आहारंकेनदोषेणददासिनहिमेप्रभो ॥ ९३ ॥ व्यासउवाच ॥ अथासौभगवान्विष्णुः
कौतुकीसमुवाचतम् ॥ गच्छब्राह्मणभद्रंतेब्रह्माणंप्रतिसत्वरम् ॥ ९४ ॥ इतिश्रुत्वावचोविप्रःशीघ्रंब्रह्माणमाययौ ॥ ब्रह्मातंप्रतिप्रोवाचकार्पण्यंतस्यदर्श
यन् ॥ ९५ ॥ ब्रह्मोवाच ॥ दुःखादुपार्जितंद्रव्यंदीयतेयन्नभूसुरे ॥ स्वयंनभुज्यतेतच्चनष्टमेवनसंशयः ॥ ९६ ॥ कारणंतवदुःखस्यसर्वमेवमयोदि
तम् ॥ गच्छब्राह्मणभद्रंतेनिःसंदेहोऽयमागतः ॥ ९७॥ ब्राह्मणउवाच ॥ निजकर्मविपाकोऽयंत्वत्प्रसादाच्छुतोऽखिलः ॥ इदानींब्रूहिदानानिकानि
देयानिमानवैः ॥ ९८ ॥ ब्रह्मोवाच ॥ बहूनिसन्तिदानानितानिवक्तुंनशक्यते ॥ संक्षेपात्कथ्यतेविप्रनिशामयसमाहितः ॥ ९९ ॥ भूमिदानंद्विज
श्रेष्ठसर्वदानोत्तमोत्तमम् ॥ कृतंपुण्यात्मनायेनसज्ञेयःसर्वदानकृत् ॥ १०० ॥ गोचर्ममात्रांभूमिंयोददातिद्विजसत्तम ॥ सगच्छेत्परमंस्थानं
विमुक्तःसर्वपातकैः ॥ १ ॥ भूमिंसस्यसमेतांयोदरिद्रायद्विजातये ॥ ददातिब्राह्मणश्रेष्ठतस्यपुण्यंनिशामय ॥ २ ॥ सर्वपापविनिर्मुक्तो
नारायणपुरंव्रजेत् ॥ तत्रभुङ्क्तेसुखंसर्वंयावदिन्द्राश्चतुर्दश ॥ ३ ॥ भूयोभूमिंसमासाद्यसार्वभौमोनृपोभवेत् ॥ चिरंभुक्त्वामहींकृत्स्नांनरो
नारायणोभवेत् ॥ ४ ॥ यस्माद्भूमिर्द्विजैर्ग्राह्यात्यक्त्वादानशतान्यपि ॥ भूमिदोभूमिनेताचद्वावपिस्वर्गगामिनौ ॥ ५ ॥ मन्दबुद्धिर्द्विजो
यस्तुभूमिदानंपरित्यजेत् ॥ प्रतिजन्मनिविप्रेन्द्रसभवेदतिदुःखितः ॥ ६ ॥ अन्येभ्योऽपिसमादायभूमिदानंयआचरेत् ॥ तस्यविष्णुरति
प्रीतोददातिपरमंपदम् ॥ ७ ॥ ग्रामंयच्छतियोविप्रदरिद्रायद्विजातये ॥ दापयत्यपिवातस्यपुण्यंवापिनिशामय ॥ ८ ॥ यावन्तो
रेणवोभूमौयावन्तोवृष्टिबिन्दवः ॥ मन्वन्तराणितावन्तिविष्णुलोकेवसेत्सुधीः ॥ ९ ॥ धेनुंपयस्विनींयस्तुसवत्सांयच्छतिद्विज ॥
तस्यब्रवीम्यहंपुण्यमाकर्णयमहात्मनः ॥ ११० ॥ सप्तद्वीपांमहींदत्त्वाससस्यांयत्फलंलभेत् ॥ तत्फलंलभतेमर्त्योधेनुंयच्छन्द्विजातये ॥ ॥ ४९ ॥
॥ ११ ॥ ददातिवृषभंयस्तुब्राह्मणायकुटुम्बिने ॥ विमुक्तःपातकैस्सर्वैरुद्रलोकंसगच्छति ॥ १२ ॥ तस्ययावन्तिरोमाणिशरीरेवृषभस्यच ॥ ताव
त्कल्पसहस्राणिरुद्रेणसचमोदते ॥ १३ ॥ यस्तुवेदविदेधेनुंदद्यादुभयतोमुखीम् ॥ नतस्यपुनरावृत्तीरुद्रलोकात्कदाचन ॥ १४ ॥ वृषंतिलसमायुक्तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ष्णंयस्तुप्रयच्छति ॥ सरुद्रभवनेतिष्ठेद्द्विजेन्द्रतिलसङ्ख्यया ॥ १५॥ तिलप्रमाणमपिचस्वर्णंदद्याद्द्विजातये ॥ सयातिविष्णुभवनंकुलकोटिसमन्वितः ॥ १६ ॥ योभक्त्यारजतंयच्छेद्दरिद्रायद्विजातये ॥ चन्द्रलोकंसमासाद्यसुधापानंकरोतिसः ॥ १७ ॥ हीरकंमौक्तिकंचापिप्रवालंचमणिंतथा ॥ योददातिद्विजश्रेष्ठशक्रलोकंसगच्छति ॥ १८ ॥ अश्वदानंद्विजश्रेष्ठयःकरोतिमहाशयः ॥ गन्धर्वराजराजत्वंसप्राप्नोतिनसंशयः ॥ १९ ॥ ददातिवारणंयस्तुयुवानंदोषवर्जितम् ॥ देवराज्येविभागीसभवेदिन्द्रइवद्विज ॥ १२०॥ नरदोलांचयोदद्याद्ब्राह्मणायसदक्षिणाम् ॥ सोऽपीन्द्रपदमासाद्यवसेत्कल्पचतुष्टयम् ॥ २१ ॥ शालग्रामशिलादानंयोददातिद्विजातये ॥ तस्यपुण्यंप्रवक्ष्यामिसमासेनशृणुद्विज ॥ २२ ॥ सप्तद्वीपांमहींदत्त्वासशैलवनकाननाम् ॥ यत्फलंतच्चलभतेशालग्रामशिलाप्रदः ॥ २३ ॥ तुलापुरुषदानेनयत्फलंप्राप्यतेनरैः ॥ शालग्रामशिलांयच्छंस्तस्मात्कोटिगुणंलभेत् ॥ २४ ॥ शालग्रामशिलायेनप्रदत्ताद्विजसत्तम ॥ नूनंतेनप्रदत्तानिभुवनानिचतुर्दश ॥ २५ ॥ तुलापुरुषदानंयःप्रकरोतिनरोत्तम ॥ दिविदिव्याम्बरधरश्चिरंसचमहीपतिः ॥ २६ ॥ जननीजठरेभूयस्तस्यजन्मनविद्यते ॥ ददातियस्तुवैकन्यांसालङ्कारांनरोत्तमः ॥ २७ ॥ सगच्छेद्विष्णुभवनंपुनरावृत्तिवर्जितः ॥ यःकन्याविक्रयंमूढोमोहात्प्रकुरुतेनरः ॥ २८ ॥ सगच्छेन्नरकंघोरंपुरीषह्रदसंज्ञकम् ॥ विक्रीतायाश्चकन्यायायःपुत्रोजायतेद्विज ॥ २९ ॥ सचाण्डालइवज्ञेयःसर्वधर्मबहिष्कृतः ॥ कन्याविक्रयिणःपुंसोमुखंपश्येन्नशास्त्रवित् ॥ १३० ॥ पश्येदज्ञानतोवापिकुर्याद्भास्करदर्शनम् ॥ यत्किंचित्क्रियतेकर्मकन्याविक्रयिणःपुरः ॥ ३१ ॥ शुभंतत्सकलंकर्मगच्छेद्विफलतांद्विज ॥ कन्याविक्रयिणोनास्तिनरकान्निष्कृतिःपुनः ॥ ३२ ॥ कन्यादानकृतोनास्तिस्वर्गादागमनंपुनः ॥ बहुनात्रकिमुक्तेनसङ्क्षेपेणब्रवीमिते ॥ ३३ ॥ हीरकक्षितिकन्यानांफलंस्याच्चशताधिकम् ॥ उपानहंचातपत्रंयस्तुयच्छतिभूतले ॥ ३४ ॥ शृणुतस्यतुवैपुण्यंसंक्षेपेणब्रवीमिते ॥ इहवर्षशतंजीवेत्सर्वसंपत्समन्वितः ॥ ३५ ॥ मृतःशक्रपुरंप्राप्यशतकल्पचतुष्टयम् ॥ ददातिनूतनंवस्त्रंसयातिपरमांगतिम् ॥ ३६ ॥ वस्त्रंपुरातनंयच्छेद्धेनुंचजरतींतथा ॥ कन्यांरजस्वलांयस्तुससदानरकंव्रजेत् ॥ ३७ ॥ फलदोमानवोविप्रगच्छतित्रिदशालयम् ॥ भुङ्क्तेकल्पसहस्राणिफलंतत्रामृतोपमम् ॥ ३८ ॥ शाकप्रदोयातिविप्रशम्भोर्भगवतःपदम् ॥ तत्रकल्पद्वयंभुङ्क्तेपायसंदुर्लभंसुरैः ॥ ३९ ॥ दुग्धदोदधिदश्चैवघृतदस्तक्रदस्तथा ॥ प्राप्नोतिवैसुधापानंपुरोभगवतोहरेः ॥ १४० ॥ पुष्पदोमनुजोविप्रगन्धदश्चसुरालये ॥ तिष्ठेद्युगसहस्राणिपुष्पगन्धविभूषितः ॥ ४१ ॥ शय्यादानंद्विजश्रेष्ठयःकरोतिद्विजोत्तम ॥ सब्रह्मलोकमागत्यपर्यङ्कशयनश्चिरम् ॥ ४२ ॥ दीपदःपीठदश्चैवसर्वपापविवर्जितः ॥ दिव्यसिंहासनस्थश्चजलदीपावलीवृतः ॥४३॥ताम्बूलदोनरोराजन्भुविभुङ्क्तेऽखिलंशुभम् ॥ दिविदेवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ङ्गनाक्रोडेसुतस्ताम्बूलमत्तिवै ॥४४॥ विद्यादानंद्विजश्रेष्ठयःकरोतिनरोत्तम ॥ संप्राप्यसंनिधिंविष्णोस्तिष्ठेद्युगशतद्वयम् ॥४५॥ ततोज्ञानंसमासाद्यत
त्रैवद्विजसत्तम ॥ प्राप्नोतिदुर्लभंमोक्षंप्रसादात्कमलापतेः ॥ ४६ ॥ अनाथंब्राह्मणंयस्तुपाठयत्यतिदुःखितम् ॥ सयातिविष्णुभवनंपुनरावृत्तिदुर्ल
भम् ॥ ४७ ॥ कुलीनोऽपिद्विजश्रेष्ठोनभातिविद्ययाविना ॥ तस्माद्विजंपाठयन्तःप्रयान्तिपरमंपदम् ॥ ४८ ॥ भुविप्रत्यक्षदेवोऽपिब्राह्मणोदेवताश्रयः॥
सर्ववर्णगुरुर्नैवविद्याहीनोविराजते ॥ ४९ ॥ संसारेयानिदानानिसन्तिहेमादिकानिच ॥ तानितेनप्रदत्तानिब्राह्मणोयेनपाठितः ॥ १५० ॥ कुर्यात्पुस्त
कदानंयोनरोभक्तिसमन्वितः ॥ तस्यपुण्यंद्विजश्रेष्ठसंक्षेपात्तेवदाम्यहम् ॥ ५१॥ तत्राक्षराणियावन्तिपत्रेपत्रेचपुस्तके ॥ प्रत्यक्षरेलभेत्पुण्यंकपिलाको
टिदानजम् ॥ ५२ ॥ यावद्दिनंपुस्तकंतत्प्रपठन्तिद्विजातयः ॥ तावन्मन्वन्तरंतिष्ठेद्वैकुण्ठेपुस्तकप्रदः ॥५३॥ एवमादीन्यनेकानिसन्तिदानानिभूसुर॥
सम्यग्वक्तुंजगत्यस्मिन्कःशक्तोद्विशतैरपि ॥ ५४ ॥ ब्रह्महत्यादिपापानिक्रियन्तेयानिमानवैः ॥ हन्यन्तेतानिपापानितस्माद्दानंसमाचरेत् ॥ ५५ ॥
आत्मपुण्येनयद्दानंदीयतेचत्रिभिर्जनैः ॥ यावद्द्रव्यंफलंतस्मात्तस्यदानस्यलभ्यते ॥ ५६ ॥ प्रीतयेकमलाभर्तुर्यद्दानंदीयतेजनैः ॥ तस्यकोटिगुणंपुण्यं
लभतेनात्रसंशयः ॥ ५७ ॥ तस्मान्नारायणप्रीतिहेतवेमतिमान्नरः ॥ दानंसमाचरेद्विप्रभक्तिकर्मसमन्वितः ॥ ५८ ॥ तपसोऽपिपरंदानंनिरुक्तंतत्त्वदर्शि
भिः ॥ अतोयत्नादपिप्राज्ञोदानकर्मसमाचरेत् ॥ ५९ ॥ दानंतपोद्वेअपियःप्रकरोतिनरोत्तमः ॥ तस्यतुल्योजगत्यस्मिन्विद्यतेनहिभूसुर ॥ १६० ॥
इतिश्रीपाद्मेमहापुराणेक्रियायोगसारेसर्वदानमाहात्म्यंनामविंशोऽध्यायः ॥ २० ॥ व्यासउवाच ॥ ब्रह्मणोवचनंश्रुत्वाहरिशर्माद्विजोत्तमः ॥ भूयो
ऽपितंनमस्कृत्यभक्त्याप्राहेतिजैमिने ॥ १ ॥ हरिशर्मोवाच ॥ प्रोक्तानियानिदानानिसुबहूनित्वयाप्रभो ॥ कस्मैदेयानिदानानितन्मेगदितु
मर्हसि ॥ २ ॥ ब्रह्मोवाच ॥ सर्वेषामेववर्णानांब्राह्मणःपरमोगुरुः ॥ तस्मैदेयानिदानानिभक्तिश्रद्धासमन्वितैः ॥ ३ ॥ सर्वदेवाश्रयोविप्रःप्रत्यक्ष
स्त्रिदशोभुवि ॥ सतारयतिदातारंदुस्तरेविश्वसागरे ॥ ४ ॥ ब्राह्मणउवाच ॥ सर्ववर्णगुरुर्विप्रस्त्वयाप्रोक्तःसुरोत्तम ॥ तेषांमध्येतुकःश्रेष्ठःकस्मैदानं
प्रदीयते ॥ ५ ॥ ब्रह्मोवाच ॥ सर्वेऽपिब्राह्मणाःश्रेष्ठाःपूजनीयाःसदैवहि ॥ स्तेयादिदोषतप्तायेब्राह्मणाब्राह्मणोत्तम ॥ ६ ॥ अस्माकंद्वेषिणस्तेचपरे
भ्योनकदाचन ॥ अनाचाराद्विजाःपूज्यानचशूद्राजितेन्द्रियाः ॥ ७ ॥ अभक्ष्यभक्षकागावोलोकानांमातरःस्मृताः ॥ माहात्म्यंभूमिदेवानांविशेषा
दुच्यतेमया ॥ ८ ॥ तवस्नेहाद्विजश्रेष्ठनिशामयसमाहितः ॥ क्षत्रियाणांचवैश्यानांशूद्राणांगुरवोद्विजाः ॥ ९ ॥ अन्योन्यंगुरवोविप्राःपूजनीयाश्च
भूसुराः ॥ ब्राह्मणंपूजयेद्यस्तुविष्णुबुद्ध्यानरोत्तम ॥१०॥ आयुःपुत्रश्चकीर्तिश्चसंपत्तिस्तस्यवर्धते ॥ संचिनोतिद्विजंयस्तुमूढधीर्मानवोभुवि ॥११॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुदर्शनेनतच्छीर्षंहन्तुमिच्छतिकेशवः ॥ पुष्पहस्तंपयोहस्तंदेवहस्तंचजैमिने ॥ १२ ॥ ननमेद्ब्राह्मणंप्राज्ञस्तैलाभ्यक्तस्वविग्रहम् ॥ जलस्थंदेववे
श्मस्थंध्यानमज्जितचेतसम् ॥ १३ ॥ देवपूजांप्रकुर्वन्तंननमेद्ब्राह्मणंबुधः ॥ बहिष्क्रियांप्रकुर्वन्तंभुञ्जानंचद्विजोत्तम ॥ १४ ॥ तथासामानिगायन्तं
ननमेद्ब्राह्मणंबुधः ॥ ब्राह्मणायत्रतिष्ठन्तिबहवोद्विजसत्तम ॥ १५ ॥ प्रत्येकंतुनमस्कारस्तत्रकार्योनधीमता ॥ कृताभिवादनंविप्रंभक्त्यायोनाभिवाद
यत् ॥ १६ ॥ सचाण्डालसमोज्ञेयोनाभिवाद्यःकदाचन ॥ कृतप्रणामंतनयंनमेतांपितरौनच ॥ १७ ॥ कृतप्राणामाःसर्वेऽपिनमस्कार्याद्विजैर्द्विजाः ॥
कृतदोषान्द्विजान्गाश्चनद्विषन्तिविचक्षणाः ॥ १८ ॥ द्विषन्तिवापिमोहेनतेषांरुष्टःसदाहरिः ॥ याचकान्ब्राह्मणान्यस्तुकोपदृष्ट्याप्रपश्यति ॥१९॥
सूचिप्ररोपणंतस्यनेत्रयोःकुरुतेयमः ॥ विप्रनिर्भर्त्सनंमूढायेनवक्त्रेणकुर्वते ॥ २० ॥ तस्मिन्वक्त्रेयमस्तप्तंलोहदण्डंददातिवै ॥ ब्राह्मणोयद्गृहेभुङ्क्तेतद्गृहे
केशवःस्वयम् ॥ २१ ॥ देवताःसकलायेचपितरश्चसुरर्षयः ॥ विप्रपादोदकंयस्तुकणमात्रंवहेद्बुधः ॥ २२ ॥ देहस्थंपातकंतस्यसर्वमेवाशुनश्यति ॥
कोटिब्रह्माण्डमध्येषुसन्तितीर्थानियानिवै ॥ २३ ॥ तीर्थानितानिसर्वाणिविप्रपादेतुदक्षिणे ॥ विप्रपादोदकैर्नित्यंसिक्तंस्याद्यस्यमस्तकम् ॥ २४ ॥
सस्नातःसर्वतीर्थेषुसर्वयज्ञेषुदीक्षितः ॥ सर्वपापानिघोराणिब्रह्महत्यादिकानिच ॥ २५ ॥ सद्यस्तस्यविनश्यन्तिविप्रपादाम्बुधारणात् ॥ क्षयाद्या
व्याधयःसर्वाःपरमक्लेशदायिकाः ॥ २६ ॥ गच्छन्तिविलयंसद्योविप्रपादाम्बुधारणात् ॥ पित्रर्थंयानितोयानिदीयन्तेविप्रपादयोः ॥ २७ ॥
तैस्तृप्ताःपितरःस्वर्गेतिष्ठन्त्याचन्द्रतारकम् ॥ प्रक्षाल्यविप्रचरणौदूर्वाभिर्योऽर्चयेद्बुधः ॥ २८ ॥ तेनार्चितोजगत्स्वामीविष्णुःसर्वसुरोत्तमः ॥
विप्राणांपादनिर्माल्यंयोमर्त्यःशिरसवाहेत् ॥ २९ ॥ सत्यंसत्यमहंवच्मितस्यमुक्तिर्हिशाश्वती ॥ विप्रंप्रदक्षिणीकृत्यवन्दतेयोनरोत्तमः ॥ ३० ॥
प्रदक्षिणीकृतातेनसप्तद्वीपावसुन्धरा ॥ प्राप्यन्तेसर्वकामास्तुविप्राणांपादसेचनात् ॥ ३१ ॥ रोगीरोगात्प्रमुच्येतपापीमुच्येतपातकात् ॥ मुच्यतेब
न्धनाद्बद्धोविप्राणांपादसेचनात् ॥ ३२ ॥ अनपत्याश्चयानार्योमृतपत्याश्चयाःस्त्रियः ॥ बह्वपत्याजीववत्साविप्रपादस्यसेचनात् ॥ ३३ ॥ माहा
त्म्यंशृणुविप्रेन्द्रसर्वपापप्रणाशनम् ॥ द्विजाङ्घ्रिसेचनस्याहंसमासेनब्रवीमिते ॥ ३४ ॥ पूर्वंभद्रक्रियोनामपवित्रकुलसंभवः ॥ बभूवब्रह्मणोविष्णोः
परिचर्यापरायणः ॥ ३५ ॥ वेदवित्सदयःशान्तःपितृभक्तिपरायणः ॥ अतिथीनांपूजकश्चज्ञातिपूजाकरस्तथा ॥ ३६ ॥ एकदासद्विजश्रेष्ठस्तैलाभ्य
क्तस्वविग्रहः ॥ जगामसरसींस्नातुंगृहीतस्नानवस्त्रकः ॥ ३७ ॥ कृतस्नानःसविप्रेन्द्रोविधिनातर्पणादिकम् ॥ चकारसर्वशास्त्रज्ञःसर्वलोकहितेरतः ॥
॥ ३८ ॥ समाप्यस्नानकर्माणिहरिनामानिकीर्तयन् ॥ आजगामस्वकेगेहेहरिपूजापरोऽभवत् ॥ ३९ ॥ पादौप्रक्षालयामासपानीयैरतिशीतलैः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रक्षालिताङ्घ्रिहस्तोऽसौब्राह्मणोब्राह्मणार्चकः ॥ ४० ॥ स्थापयामाससर्वाणिस्नानोपकरणानिच ॥ द्वारदेशेद्विजश्रेष्ठनिदाघतपनातपैः ॥ ४१ ॥
तपितोभषकःकश्चिदग्निकल्पैःसमागतः ॥ विप्रपादोदकेतस्मिन्प्रसुप्तोऽत्यन्तशीतले ॥ ४२ ॥ विप्रपादोदकस्पर्शाद्भषकोऽत्यन्तपातकी ॥ विमुक्तः
पातकैःसर्वैःकोटिजन्मकृतैरपि ॥ ४३ ॥ ससुप्तोमन्दिरद्वारिभषकोविकलस्तृषा ॥ पानीयंयाचयामासताडितोद्विजकिङ्करैः ॥ ४४ ॥ जगामप
ञ्चतांसद्योबभूवभषकोद्विजः ॥ द्विजाङ्घ्रिसेचनस्पर्शाद्भषकोवीतकल्मषः ॥ ४५ ॥ तमालोक्यमहात्मानंमूर्तिमन्तमिवेश्वरम् ॥ विनयावनतःप्राह
ब्राह्मणोऽसौतपोधनः ॥ ४६ ॥ ब्राह्मणउवाच ॥ कस्त्वंब्रूहिमहाभागकेनदुःखीतुकर्मणा ॥ भषकस्यकुलेजातोनानादुःखसमाकुले ॥ ४७ ॥ वचनं
तस्यविप्रर्षेःसमाकर्ण्यमहयशाः ॥ कथयामासवृत्तान्तंमूलकःसर्वमात्मनः ॥ ४८ ॥ अहमासंसावभौमःशङ्खनामामहावलः ॥ चतुर्वर्षसहस्राणि
महींकृत्स्नामपालयम् ॥ ४९ ॥ मयाज्ञायांकृताःसर्वेजिताश्चरिपवोयुधि ॥ दत्तानिसर्वदानानिपालिताज्ञातयोनिजाः ॥ ५० ॥ एकदाहंमहाभाग
ताडितःस्मरसायकैः ॥ बलाज्जनवधूंकांचिज्जहारभृशसुन्दरीम् ॥ ५१ ॥ तेनपापप्रभावेणममश्रीःसंशयंगता ॥ ततःसमस्तैर्लोकैश्चनिरस्तोऽहंमहा
बलः ॥ ५२ ॥ ततस्तुभ्रष्टराज्योऽहंकाननाभ्यन्तरेस्थितः ॥ क्षुधातृषापरिश्रान्तःकदाचित्पञ्चतांगतः ॥ ५३ ॥ अन्तकस्यपुरंगत्वादुःखंभुक्तं
मयाचिरम् ॥ तदाकर्णयविप्रेन्द्रशृण्वतांचित्तदुःखदम् ॥५४॥ संतप्तलोहशस्त्रौघांतप्तांताम्रमयींमहीम् ॥ प्रापितोऽहंज्वलद्वह्निशिखातिसुभीषणाम् ॥
॥ ५५ ॥ ततस्तुशमनादेशाल्लोहस्तम्भंसुभीषणम् ॥ ज्वलतावह्निनातप्तंसमालिङ्ग्यस्थितोऽस्म्यहम् ॥ ५६ ॥ अतिशीताम्बुधाराभिःसक्तोऽहंयम
किङ्करैः ॥ दुःखमन्यच्चसुमहद्भुक्तंतत्रयमालये ॥५७॥ ततोनरकशेषेचजन्मासाद्यमुहुर्मुहुः ॥ पापयोनौमयादुःखमनुभूतंचिरंमहत् ॥ ५८ ॥ त्वत्पाद
जलसंसर्गान्मुक्तोऽहंपापरज्जुना ॥ गच्छामिपरमंधामदुर्लभंयोगिनामपि ॥ ५९ ॥ त्वंमेगुरुर्द्विजश्रेष्ठनमस्तेऽस्तुमहात्मने ॥ त्वत्प्रसादाद्विमुक्तो
ऽहंपापैर्यामिपुरंहरेः ॥ ६० ॥ भद्रक्रियउवाच ॥ पूर्वजन्मकथाराजन्मनुष्योनकदाचन ॥ अतस्त्वविनयंत्यक्त्वासर्वदानीतिमाचरेत् ॥ ६१ ॥ नीति
ग्राहीनृपोयस्तुविपत्तिर्नास्तितस्यवै ॥चिरंभुनक्तिपृथिवींकण्टकैःपरिवर्जिताम् ॥ ६२ ॥ यस्मैनरोचतेनीतिर्भूपालायदुरात्मने ॥ भ्रष्टश्रीरचिरेणापि
सभवेन्नात्रसंशयः ॥६३॥ आयुर्बलंयशोमित्रंविजयंसुखमिच्छता ॥ मन्त्रिणःपण्डिताराज्ञानियोज्याःसर्वदैवहि ॥६४॥ अवज्ञायमहीभर्तुस्त्यजन्ते
सभांबुधाः ॥ सभायांबुधहीनायांनीतिर्बलवतीनहि ॥ ६५ ॥ ततोनीतौविनष्टायांसहसाधरणीपतेः ॥ राजश्रियोविनश्यन्तिसकोशबलवा
हनाः ॥ ६६ ॥ ब्राह्मणान्गणकांश्चैववैद्यांश्चबान्धवांस्तथा ॥ नपाःकल्याणमिच्छन्तोनद्विषन्तिकदाचन ॥ ६७ ॥गतश्रीर्गणकद्वेष्टावैद्यद्वेष्टायुर्वर्जितः॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञातिद्वेष्टा निष्कुलः स्याद्विजद्वेष्टाखिलार्तिभाक् ॥ ६८ ॥ राजानः पितरः प्रोक्ताः पुत्रा जानपदास्तथा ॥ ततो भूपाः पालयन्ति प्रजाः पुत्रमिवौ
रसान् ॥ ६९ ॥ पौरलोके तथा कुर्याद्यथा स्नेहो निजात्मजे ॥ प्रजापीडाकरा ये च भूपाला अतिपापिनः ॥ ७० ॥ शिरःस्था विपदस्तेषां विज्ञेया दीर्घ
दर्शिभिः ॥ विवेकिनो महीपालाः पालयन्ति यथा प्रजाः ॥ ७१ ॥ तथा तानपि देवेशः पालयत्यनिशं हरिः ॥ प्रजानां पालनं दण्डं द्वे च राज्ञः शुभावहे ॥
॥ ७२ ॥ द्वाभ्यां विवर्जिता भूपास्ते विज्ञेया नृपाधमाः ॥ दुष्टानां शासनं चव शिष्टानां प्रतिपालनम् ॥ ७३ ॥ प्रकुर्वन्तो महीपालाश्चिरं नन्दन्ति भूतले ॥
न्यायेनोपार्जितं वित्तं यत्नाद्रक्षेन्महीपतिः ॥ ७४ ॥ दुर्वृत्तो हि महीपालो विपत्तौ न हि विस्तरेत् ॥ नृपाः कल्याणमिच्छन्तो निजराज्यशुभाशुभम् ॥ ७५ ॥
पश्यन्ति नित्यं विप्रेन्द्र सत्वराश्चारचक्षुषा ॥ परचक्रभयं यावन्नायाति चिन्तयेद्भयम् ॥ ७६ ॥ आगते तु भये भूप आचरेन्निर्भयोऽपि च ॥ ज्ञातौ वापि
च मित्रे वा पुत्रे वापि च मन्त्रिणि ॥ ७७ ॥ कुर्यान्मुखेन गाम्भीर्यं मनसा प्रेम केवलम् ॥ मन्त्रिणो ज्ञातयः पुत्राः प्रजाश्च भ्रातरस्तथा ॥ ७८ ॥ गाम्भीर्यं
हीनं भूपालं मन्यन्ते न हि भूपवत ॥ तिष्ठन्ति प्रथमं दूरे न सन्ति पुरतस्तथा ॥ ७९ ॥ लोकाश्रयं न हीच्छन्ति त्यक्तगाम्भीर्यभूपतेः ॥ एकश्च मन्त्री राज्ञा वै
चिरं राजत्वमिच्छता ॥ ८० ॥ कर्तव्यः सकले राज्ये वृद्धये न हि भूसुर ॥ अत्यन्तबुद्धिवृत्तीनां भृत्यानां सपदं हरेत ॥ ८१ ॥ तस्मात्संसदि भूपालो भृत्यमन्यं
नियोजयेत् ॥ मूर्खस्त्रीविजितो राजा गीतवाद्यरतः सदा ॥ ८२ ॥ तुरङ्गवाहनैर्हीनः सहसा विपदं व्रजेत् ॥ आचारग्रहणं सत्यं स्ववाक्यप्रतिपालनम् ॥
॥ ८३ ॥ गाम्भीर्यं चेति भूपानां लक्षणानि द्विजोत्तम ॥ स कथं नृपतिर्यस्तु प्रतापेन विवर्जितः ॥ ८४ ॥ स कथं नृपतिर्येनाऽनिर्जिता परमेदिनी ॥
जितायां परमेदिन्यां यावत्पादं व्रजेन्नृपः ॥ ८५ ॥ प्रतिपादेऽश्वमेधस्य फलं प्राप्नोति चाक्षयम् ॥ परभूमिजयाकाङ्क्षी हतो नृपतिर्युधि ॥ ८६ ॥ तदा
सत्त्वं पलायनपरायणम् ॥ ८८ ॥ योद्धारं यदि यो हन्ति स भूपो यात्यधोगतिम् ॥ पलायनपरो युद्धे तद्धन्ता च द्विजोत्तम ॥ ८९ ॥ तावुभावपि तिष्ठतां
गच्छेत्परं स्थानं विमुक्तः सर्वपातकैः ॥ युधि प्राप्तजयो राजा प्राप्नोति परमं पदम् ॥ ८७ ॥ सङ्ग्रामे प्राप्तमृत्युर्वा दिवीन्द्रसंपदं लभेत ॥ त्यक्तशस्त्रं त्यक्त
नरकेऽत्यन्तदुःसहे ॥ युध्येत्साहसवान्योद्धा तद्धन्ता च द्विजोत्तम ॥ ९० ॥ तिष्ठेतां तावपि स्वर्गे यावच्चन्द्रदिवाकरौ ॥ बहुनात्र किमुक्तेन संक्षेपादुच्यते
मया ॥ प्रजापालनकृद्राजा कदाचिन्नावसीदति ॥ ९१ ॥ ब्रह्मोवाच ॥ इति ब्रुवति भूपाले तस्मिन्गलितकल्मषे ॥ पुष्पवृष्टिरभूत्तस्मिन्महती
गगनाद्द्विज ॥ ९२ ॥ अथ दूताः समायाताः केशवस्य महात्मनः ॥ राजहंसयुतं दिव्यं रथमादाय सुन्दरम् ॥ ९३ ॥ रथं स तं समारुह्य दिव्यं कनक
निर्मितम् ॥ जगाम विष्णुभवनं स राजा गतकल्मषः ॥ ९४ ॥ विप्रपादोदकस्यैतन्माहात्म्यं ते प्रकीर्तितम् ॥ यच्छ्रुत्वा भक्तिभावेन नरो निर्वाणमाप्नुयात् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ९५ ॥ इतितेकथितंसर्वंश्रोतुंयद्वाञ्छितंत्वया ॥ गच्छब्राह्मणभद्रंतेचक्रिणोनिलयंप्रति ॥ ९६ ॥ हरिशर्मोवाच ॥ क्षुधानलेनमहताशरीरं
ममदह्यते ॥ केनोपायेनभगवन्क्षुधाशान्तिर्भवेन्मम ॥ ९७ ॥ एतन्मेवददेवेशभक्तस्यभक्तवत्सलः ॥ प्राप्नोमिसुमहद्दुःखंनित्यंदग्धक्षुधानलैः ॥
॥ ९८ ब्रह्मोवाच ॥ यच्छरीरंत्वयापुष्टंसततंभोजनैःकृतम् ॥ भुङ्क्ष्वतस्यशरीरस्यमांसानिद्विजसत्तम ॥ ९९ ॥ आत्मतृप्तिंप्रकुर्वन्तिभोजनेन
परस्ययं ॥ मांसानिस्वशरीराणांभुञ्जतेतेपरत्रहि ॥ १०० ॥ व्यासउवाच ॥ ब्रह्मणोवचनंश्रुत्वानिष्ठुरंद्विजसत्तमः ॥ पुनस्तुष्टावतंदेवंवचनैःकोम
लाक्षरैः ॥ १ ॥ ब्राह्मणउवाच ॥ प्रसीददेवदेवेशशरणागतपालक ॥ क्षमस्वसकलंदोषंसुरश्रेष्ठनमोऽस्तुते ॥ २ ॥ मलमूत्रप्रकीर्णानिवपूंषि
वहतांनृणाम् ॥ सर्वएवप्रभोदोषाःसन्तिकेचिद्गुणानच ॥ ३ ॥ कृतंमयामोहवतादूषणंक्षन्तुमर्हसि ॥ शरणापन्नलोकानांसद्भिर्दोषोनचेक्ष्यते ॥
॥ ४ ॥ आत्मदेहस्यमांसानिभोक्तुंब्रह्मन्नशक्यते ॥ देहिनांवदयद्योग्यंसंतुष्टिर्जायतेयतः ॥ ५ ॥ इत्येवमुक्तंवचनंभक्त्यातेनाग्रजन्मना ॥
उवाचसदयोब्रह्मासर्वज्ञोब्राह्मणप्रियः ॥ ६ ॥ ब्रह्मोवाच ॥ शोकंमाकुरुविप्रेन्द्रशृणुमेवचनंशुभम् ॥ आहारोलभतेयेनप्रकारेणात्रसम्प्रति ॥
॥ ७ ॥ आत्मनोजायतेपुत्रोयथैवात्मातथासुतः ॥ तस्मात्पुत्रकृतंकर्मलभन्तेपितरःखलु ॥ ८ ॥ चिरंतिष्ठसिदेवस्यभवनेऽत्यन्तशोभने ॥
एवमुक्तस्ततस्तेनसविप्रःक्षुधयाकुलः ॥ स्वप्नेसंदर्शनंदत्त्वापुत्रंवचनमब्रवीत् ॥ ९ ॥ ब्राह्मणउवाच ॥ दीक्षितोऽसिसुतश्रेष्ठतथास्तुपरमंशिवम् ॥
तवास्मिजनकःसौम्यममदुःखंनिशामय ॥ ११० ॥ तपःप्रभावैःपरमंधामप्राप्तंमयासुत ॥ क्षुधानलेनसंतप्तस्तत्रसीदाम्यहंसदा ॥ ११ ॥
यदामयिपितृस्नेहस्तवास्तिसुतसम्प्रति ॥ तदान्नमुदकंचापिमदर्थंदीयतांद्विज ॥ १२ ॥ यत्किंचिद्दीयतेपुत्रैःपित्रर्थंक्षितिमण्डले ॥ लभन्ते
पितरस्तच्चयत्पुत्राःपितृदेहजाः ॥ १३ ॥ पुरापरमयाभक्त्यापूजितोभगवान्मया ॥ गीतैर्वाद्यैश्चनृत्यैश्चस्तवपाठैश्चशोभनैः ॥ १४ ॥ गन्धैर्धूपै
श्चनैवेद्यैर्घृतपूर्णप्रदीपकैः ॥ पाद्यार्घ्याचमनीयैश्चध्यानैरावाहनादिभिः ॥ १५ ॥ नदत्तंजगदीशायकृपणेनमयात्मज ॥ अन्नमात्रमपिक्वापि
नैवेद्यंपापहारिणे ॥ १६ ॥ अतिथेर्नकृतापूजातोयैरन्यैःकदाचन ॥ ज्ञातीनांयाचकानांचसंतुष्टिर्नकृतामया ॥ १७ ॥ तेनैवकर्मगापुत्रनारायण
गृहेऽपिच ॥ क्षुधानलेनसंतप्तःसीदामिप्रतिवासरम् ॥ १८ ॥ अतोऽन्नतोयदानानिदरिद्रायद्विजातये ॥ दत्त्वाक्षिप्रंद्विजश्रेष्ठप्राणरक्षांकुरुष्व
भोः ॥ १९ ॥ अथवानकरोषित्वंनिष्ठुरत्वादिदंयदि ॥ स्वमांसान्येवभोक्ष्यामितदावैविष्णुमन्दिरे ॥१२० ॥ अथासौक्षुधितोविप्रःशुष्ककण्ठोष्ठ
तालुकः ॥ इत्युक्त्वादीक्षितंपुत्रमदृश्यःसहसाभवत् ॥२१॥ ततःप्रभातेविमलेप्रादुर्भूतेदिवाकरे ॥ स्वप्नेयदुक्तंपित्रातुचिन्तयामासदीक्षितः ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मनःकर्मदोषेणपरलोकेऽपिमत्पिता॥ क्षुधयादग्धसर्वाङ्गःसीदतिप्रतिवासरम् ॥२३॥ धिगस्तुमांमन्दधियंकृपणप्रवरंजनम् ॥ मयापिपितृपुण्येन
नकिञ्चिदपिदीयते ॥ २४॥ इतिसंचिन्त्यबहुधादीक्षितोऽपिद्विजोत्तम ॥ ददौदानानिविप्रेभ्यःश्रद्धाभक्तिसमन्वितः ॥ २५ ॥ तेनपुण्यप्रभावेणतृ
षयारहितःक्षुधा ॥ तस्थौनारायणागारेयावत्कालंशृणुष्वतत् ॥ २६ ॥ चतुर्युगसहस्राणिब्रह्मणोऽहःप्रकीर्तितम् ॥ भवन्तितस्मिन्नेवाह्निमनवश्चचतु
र्दश ॥ २७ ॥ इन्द्राश्चतुर्दशप्रोक्तास्तस्मिन्नेवदिनेचते ॥ भुञ्जतेब्राह्मणश्रेष्ठविषयान्स्वान्पृथक्पृथक् ॥ २८ ॥ एकस्मिन्ब्रह्मदिवसेभुक्त्वास्वान्विषया
न्छुभान् ॥ इन्द्राश्चमनवश्चैवविनश्यन्तिचतुर्दश ॥ २९ ॥ विष्णुलोकेस्थितेतस्मिन्हरिशर्मणिभास्वरे ॥ समस्तसुखदेरम्येब्रह्मणोदिवसोगतः॥३०॥
तत्रासौकालमेतावद्भुक्त्वाभोगान्मनोरमान् ॥ परमंज्ञानमासाद्यप्रविवेशहरेस्तनुम् ॥ ३१ ॥ व्यासउवाच ॥ अन्नतोयसमंदानंसंसारेनास्तिजैमिने ॥
सर्वदानफलान्येवअन्नतोयप्रदानतः ॥३२ ॥ नचपात्रपरीक्षाचनकालनियमःक्वचित् ॥ अन्नतोयप्रदानेषुनिरुक्तस्तत्त्वदर्शिभिः ॥ अन्नतोयप्रदानानि
कर्तव्यानिसदैवहि ॥ ३३ ॥ एतत्पठन्तिमनुजाःपरमादरेणमाहात्म्यमन्नजलयोश्चतथाद्विजानाम् ॥ तेप्राप्यचान्नजलदानफलंततोऽन्तेनारायणस्यनि
लयंसुखदंप्रयान्ति ॥१३४॥ इतिश्रीपाद्मेमहापुराणेक्रियायोगसारेऽन्नदानजलदानमाहात्म्यंनामैकविंशतितमोऽध्यायः ॥ २१ ॥ जैमिनिरुवाच ॥
गङ्गायाःशुभमाहात्म्यंविष्णुपूजाफलंतथा ॥ अन्नदानस्यमाहात्म्यंजलदानस्यचोत्तमम् ॥१ ॥ विप्रपादोदकस्यापिमाहात्म्यंपापनाशनम् ॥ त्वत्प्र
सादाच्छ्रुतंसर्वंसेतिहासंगुरोमया ॥ २ ॥ इदानींमुनिशार्दूलश्रोतुमिच्छामिसादरम् ॥ एकादश्याःफलंसर्वंसर्वपातकनाशनम् ॥ ३ ॥ कस्मादेकाद
शीश्रेष्ठातस्याःकोवाविधिःस्मृतः ॥ कदाचक्रियतेकिंवाफलंतस्यावदस्वमे ॥ ४ ॥ कावापूज्यतमातत्रदेवतासद्गुणार्णव ॥ अकुर्वतःस्यात्कोदोषस्त
न्मेवक्तुमिहार्हसि ॥ ५ ॥ व्यासउवाच ॥ एकादश्याःफलंसर्ववक्तुंनारायणादृते ॥ शक्नोतिनान्योविप्रर्षेतस्माद्वच्मिसमासतः ॥ ६ ॥ सृष्ट्वादौपुरु
षश्रेष्ठःसंसारंसचराचरम् ॥ सर्वेषांदमनार्थायसृष्टवान्पापपूरुषम् ॥ ७ ॥द्विजातिहत्यामूर्धानंमदिरापानलोचनम् ॥ स्वर्णस्तेयंचवदनंगुरुतल्पगतिः
श्रुतिः ॥ ८ ॥ स्त्रीहत्यानासिकंचैवगोहत्यादोषबाहुकम् ॥ न्यासापहरणग्रीवंभ्रूणहत्यागलंतथा ॥९॥ परस्त्रीगतिवुक्षाग्रंसुहृल्लोकवधोदरम्॥ शरणा
पन्नहत्यादिनाभिगर्ताविधिकटिम् ॥ १० ॥ गुरुनिन्दासक्थिभागंकन्याविक्रयशेफसम् ॥ विश्वासवाक्यकथनपायुंप्रीतिवधाङ्घ्रिकम् ॥ ११ ॥ उप
पातकरोमाणंमहाकायंभयङ्करम् ॥ कृष्णवर्णंपिङ्गनेत्रंस्वाश्रयात्यन्तदुःखदम् ॥ १२ ॥ तंदृष्ट्वापापपुरुषमत्युग्रंपुरुषोत्तमः ॥ सदयश्चिन्तयामासप्रजा
क्लेशहरःप्रभुः ॥ १३ ॥ सृष्टोऽयंदुर्जनःक्रूरःस्वाश्रयक्लेशदायकः ॥ प्रजानांदमनार्थायसृजाम्येतस्यकारणम् ॥ १४ ॥अथासौभगवान्विष्णुर्बभूवस्वय

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मन्तकः ॥ ससर्जरौरवादींश्चनिरयान्पापिदुःखदान् ॥१५॥ पापंयःसेवतेमूढोनयातिपरमंपदम् ॥ यमाज्ञयाव्रजेत्तत्रनरकंरौरवादिकम् ॥ १६॥ एक
दाभगवान्विष्णुःप्रजानांदुःखनाशनः ॥ वैनतेयंसमारुह्यजगामयममन्दिरम् ॥ १७ ॥ तंदृष्ट्वाजगतामीशंनारायणमनामयम् ॥ धूपाद्यैःपूजयामास
भास्करिस्तुष्टमानसः ॥१८॥ यमेनाभ्यर्चितोविष्णुःसर्वलोकैकनायकः ॥ उवासद्विजशार्दूलपीठेकनकनिर्मिते ॥ १९ ॥ तत्रोपविष्टोभगवान्यमेनसह
दैत्यहा ॥ शुश्रावक्रन्दनध्वानंदक्षिणस्यांदिशिप्रभो ॥ २० ॥ अथासौकमलाकान्तोविस्मयाविष्टमानसः ॥ उवाचेतियमंकेषांकुतोऽयंक्रन्दनध्वनिः
॥२१॥ यमउवाच ॥ देवपातकिनोमर्त्यानिरयेऽत्यन्तदुःखदे ॥ स्वहस्तार्जितदोषेणसीदन्तिचममालये ॥२२॥ पापवृक्षफलंविष्णोभोक्तुमत्यन्तदुःख
दम् ॥ रुदन्तिपापिनस्तस्मात्तेषांध्वनिरसौमहान् ॥ २३ ॥ इत्युक्तःसूर्यपुत्रेणकृष्णःकमललोचनः ॥ जगामसहसायत्रपापवन्तोरुदन्तिते ॥ २४ ॥
तान्दृष्ट्वापापिनोमर्त्यान्रौरवादिषुसंस्थितान् ॥ भगवांश्चिन्तयामासहृदिजातदयःप्रभुः ॥ २५ ॥ मयासृष्टाःप्रजाःसर्वादोषेणनिजकर्मणाम् ॥ मयि
स्थितेऽपिनरकेसीदन्त्येकान्तदुःखदे ॥ २६ ॥ एतच्चान्यच्चविप्रेन्द्रविचिन्त्यकरुणामयः ॥ बभूवसहसातत्रस्वयमेकादशीतिथिः ॥ २७ ॥ ततस्ता
न्पापिनःसर्वान्कारयामासतच्छुतम् ॥ तेचसर्वेपरंधामययुर्गलितकल्मषाः ॥ २८ ॥ तस्मादेकादशींविष्णोमूर्तिंविद्धिपरात्मनः ॥ समस्तदुष्कृतिध्वं
सिव्रतानांव्रतमुत्तमम् ॥ २९ ॥ एकादशींतिथिंकृत्वापावयन्तींजगत्त्रयम् ॥ शङ्कितःपापपुरुषोविष्णुंस्तोतुमुपाययौ ॥ ३० ॥ ततोबद्धाञ्जलिर्भक्त्या
सपापपुरुषोद्विज ॥ तुष्टावकमलाकान्तंभगवन्तंजनार्दनम् ॥ ३१ ॥ तस्यस्तवंसमाकर्ण्यप्रसन्नःपरमेश्वरः ॥ उवाचाहंप्रसन्नोऽस्मिकिंतेऽभिमतमु
च्यताम् ॥ ३२ ॥ पापपुरुषउवाच ॥ सृष्टोभगवताविष्णोनिजानुग्रहदुःखदः ॥ एकादश्याःप्रभावेणक्षयंप्राप्नोमिसाम्प्रतम् ॥ ३३ ॥ मृतेमयिजगत्य
स्मिन्सर्वेतेचशरीरिणः ॥ भविष्यन्तिविनिर्मुक्ताभवबन्धैःशरीरिणः ॥ ३४ ॥ सर्वेषुचविमुक्तेषुदेहिश्रेष्ठेषुपूरुष ॥ संसारकौतुकागारेकैस्त्वंक्रीडिष्य
सेप्रभो ॥ ३५ ॥ क्रीडितुंयदितेवाञ्छाजगत्कौतुकमन्दिरे ॥ एकादशीतिथिभयात्तदामांत्राहिकेशव ॥ ३६ ॥ अन्यैःपुण्यसहस्रैस्तुमांहन्तुंनहिश
क्यते ॥ शक्नोत्येकादशीपुण्यामांहन्तुंवरदोभव ॥ ३७ ॥ मनुष्यपशुकीटेषुतथान्येषुचजन्तुषु ॥ पर्वतेषुचवृक्षेषुस्थानेषुचजलेषुच ॥ ३८ ॥
नदीषुचसमुद्रेषुवनेषुप्रान्तरेषुच ॥ स्वर्गेमर्त्येचपातालेदेवगन्धर्वपक्षिषु ॥ ३९ ॥ एकादशीतिथिभयाद्भूयान्विष्णोपलायितः ॥ कुत्रापिनिर्भय
स्थानंनचतेनचकुत्रचित् ॥ ४० ॥ कोटिब्रह्माण्डमध्येषुदेवदेवसनातन ॥ एकादश्यांतिथौस्थातुंमयास्थानंनलभ्यते ॥ ४१ ॥ एकाद
श्यामहंकुत्रवत्स्यामिनिर्भयःप्रभो ॥ तन्मेकथयदेवेशत्वयासृष्टोऽस्म्यहेतुकः ॥ ४२ ॥ व्यासउवाच ॥ इत्युक्त्वापापपुरुषःक्लेशनाशनम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्युतम् ॥ भूमौनिपत्यचक्रन्दस्रवद्बाष्पविलोचनः ॥ ४३ ॥ ततःप्रहस्यभगवान्मधुकैटभमर्दनः ॥ एकादशीभयात्रस्तमुवाचपाप
पूरुषम् ॥ ४४ ॥ श्रीभगवानुवाच ॥ उत्तिष्ठपापपुरुषत्यजशोकंमुदंकुरु ॥ एकादश्यांतिथौयत्रतवस्थानंवदामिते ॥ ४५ ॥ एकादश्यांसमा
यान्त्यांप्रपुनन्त्यांजगत्त्रयम् ॥ स्थातव्यमन्नमाश्रित्यभवतापापपूरुष ॥ ४६ ॥ अन्नमाश्रित्यतिष्ठन्तंभवन्तंपापपूरुषम् ॥ नहनिष्यतिमन्मूर्तिरियमे
कादशीतिथिः ॥ ४७ ॥ ततोदेवोऽपिविप्रर्षेतत्रैवान्तार्हितोऽभवत् ॥ कृतार्थःपापपुरुषोययौचसयथागतः ॥ ४८ ॥ तस्मादन्नंनभोक्तव्यंकदा
चिदपिसत्तमैः ॥ आत्मनोहितमिच्छद्भिःसंप्राप्तेहरिवासरे ॥ ४९ ॥ संसारेयानिपापानितान्येवैकादशीदिने ॥ अन्नमाश्रित्यतिष्ठन्तिश्रीमन्नारायणा
ज्ञया ॥ ५० ॥ कुर्वतांसर्वपापानिनरकान्निष्कृतिर्भवेत् ॥ यचान्नंभुञ्जतेऽत्रापितेज्ञेयाःपापिनांवराः ॥ ५१ ॥ भूयोभूयोदृढंवच्मिश्रूयतांश्रूयतां
जनाः ॥ नभोक्तव्यंनभोक्तव्यंनभोक्तव्यंकदाचन ॥ ५२ ॥ ब्रह्मक्षत्रियविट्छूद्रैरन्यैश्चद्विजसत्तम ॥ सर्वैरेकादशीकार्याचतुर्वर्गफलप्रदा॥ ५३ ॥
अष्टादशनिमेषास्तुकाष्ठाप्रोक्तामनीषिभिः ॥ त्रिंशत्काष्ठाभिरुक्ताचकलासर्वार्थदर्शिभिः ॥ ५४ ॥ क्षणंत्रिंशत्कलाभिःस्यान्मुहूर्तोद्वादशक्षणैः॥
त्रिंशन्मुहूर्तालोकानामहोरात्रःप्रकीर्तितः ॥ ५५ ॥ तैःपञ्चदशभिःपक्षोविज्ञेयोद्विजसत्तम ॥ पक्षाभ्यांशुक्लकृष्णाभ्यांमासस्तुपरिकल्पितः॥५६॥
तस्मिन्मासेद्विजश्रेष्ठपक्षयोःशुक्लकृष्णयोः ॥ महापातकयुक्तोऽपिकरोत्येकादशींयदि ॥ ५७ ॥ सर्वपापविनिर्मुक्तोविष्णुलोकमवाप्नुयात् ॥
मातानप्रोच्यतेमातामाताह्येकादशीतिथिः ॥ ५८ ॥ इहैवपालयेन्मातासर्वत्रैकादशीतिथिः ॥ एकादशीव्रतंत्यक्त्वाव्रतमन्यत्करोतियः ॥ ५९ ॥
स्वकरस्थंमणिंत्यक्त्वालोष्टंगृह्णातिमूढधीः ॥ एकादशीव्रतंयैस्तुकृतंभक्तिसमन्वितैः ॥ ६० ॥ तैस्तुयज्ञाःकृताःसर्वेव्रतानिसकलानिच ॥ एका
दश्यांचभुञ्जन्तियेमोहात्पापिनोनराः ॥ ६१ ॥ शुक्लायांवापिकृष्णायांतेषांरुष्टःसदाहरिः ॥ तेनाधर्माःकृताःसर्वेलङ्घितायेनसातिथिः ॥ ६२ ॥
यथासमस्तदेवानांश्रेष्ठोविष्णुःप्रकीर्तितः ॥ तथासर्वव्रतानांचश्रेष्ठमेकादशीव्रतम् ॥ ६३ ॥ आदित्यानांयथासूर्योनक्षत्राणांयथाशशी ॥ तथा
सर्वव्रतश्रेष्ठंप्रोक्तमेकादशीव्रतम् ॥ ६४ ॥ वृक्षाणांचयथाश्वत्थोवेदानांसामकीर्तितम् ॥ तथासर्वव्रतश्रेष्ठंप्रोक्तमेकादशीव्रतम् ॥ ६५ ॥ कवीना
मुशनाःश्रेष्ठोवर्णानांब्राह्मणोयथा ॥ तथासर्वव्रतश्रेष्ठंप्रोक्तमेकादशीव्रतम् ॥ ६६ ॥ व्यासःश्रेष्ठोमुनीनांचदेवर्षीणांचनारदः ॥ तथाव्रतानांसर्वेषां
श्रेष्ठमेकादशीव्रतम् ॥ ६७ ॥ यथासमस्तदानानामन्नदानंवरंस्मृतम् ॥ तथासर्वव्रतश्रेष्ठंप्रोक्तमेकादशीव्रतम् ॥ ६८ ॥ यथापुण्यसमंमित्रंनास्ति
शास्त्रसमोगुरुः ॥ तथैवैकादशीतुल्यंव्रतंनास्तिजगत्त्रये ॥ ६९ ॥ इन्द्रियाणांयथाश्रेष्ठंमनःप्रोक्तंमनीषिभिः ॥ मासानांकार्तिकःश्रेष्ठःपाण्डवानां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथार्जुनः ॥ ७० ॥ यथासमस्तशास्त्राणांश्रेष्ठावेदाःप्रकीर्तिताः ॥ तथाव्रतानांप्रवरंस्मृतमेकादशीव्रतम् ॥ ७१ ॥ वेदागमपुराणेषुशास्त्रेष्वन्ये
षुचद्विज ॥ कुत्राप्येकादशीतुल्यंव्रतंप्रोक्तंनकोविदैः ॥ ७२ ॥ निर्भयामानवाःसर्वेतिष्ठन्तिक्षितिमण्डले ॥ एकादशीव्रतंकृत्वाकिंकरिष्यति
भास्करिः ॥ ७३ ॥ एकामेकादशींसम्यक्कुर्वतांकिङ्करोयमः ॥ एकादशीव्रतंतस्मात्कर्तव्यंहिशुभप्रदम् ॥ ७४ ॥ एकादशीव्रतविधिंसंक्षेपात्कथ
याम्यहम् ॥ समाहितमनाभूत्वाशृणुसत्तमजैमिने ॥७५॥ दशम्यांप्रातरुत्थायकर्तव्यंदन्तधावनम् ॥ ततस्तैलादृतेस्नानंकर्तव्यंमन्त्रवज्जलैः ॥ ७६ ॥
ततोविष्णुंसमभ्यर्च्यपाद्याद्यैर्जगदीश्वरम् ॥ हरिध्यानपरोभूत्वाएकभोजनमाचरेत् ॥ ७७ ॥ आमिषंलवणंचैवतथामांसंमसूरकम् ॥ बृहन्माषं
तथाशाकंदशम्यांपरिवर्जयेत् ॥ ७८ ॥ द्विर्भोजनंपरान्नंचमधूनिमैथुनंतथा ॥ भोजनंकांस्यपात्रेषुदशम्यांपरिवर्जयेत् ॥ ७९ ॥ निम्बपत्रंच
वृन्ताकंदग्धंजम्बीरमेवच ॥ घृतहीनंतथागव्यंदशम्यांपरिवर्जयेत् ॥ ८० ॥ अत्यन्तभोजनंचैवअत्यन्ताशनभोजनम् ॥ ताम्बूलभक्षणंचैवदश
म्यांपरिवर्जयेत् ॥ ८१ ॥ दशम्यांयानिवस्तूनिनिषिद्धानिद्विजोत्तम ॥ द्वादश्यामपितान्येवनिषिद्धानिनसंशयः ॥ ८२ ॥ दशम्यांविप्रशार्दूल
द्वादश्यामपिवैष्णवः ॥ सम्यग्व्रतफलप्रेप्सुर्नकुर्यान्निशिभोजनम् ॥ ८३ ॥ अतोहविष्यंकृत्वातुदशम्यांसत्वरोव्रती ॥ अपराह्णेपुनःकुर्याद्विधिना
दन्तधावनम् ॥ ८४ ॥ सायंदेवालयंगत्वागृहीत्वाकुसुमाञ्जलिम् ॥ केशवंमनसाध्यायन्मन्त्रमेतमुदीरयेत् ॥ ८५ ॥ एतद्गृहीतंगोविन्दमयात्व
त्पुरतोव्रतम् ॥ सिद्धिंगच्छतुनिर्विघ्नंतवपादानुकम्पया ॥ ८६ ॥ अतिचञ्चलचित्तोऽहंलोभमोहमयोनरः ॥ शक्तोम्येतद्व्रतंकर्तुंकिंतवानुग्रहादृते
॥ ८७ ॥ इमौमन्त्रौपठित्वातुतमेवकुसुमाञ्जलिम् ॥ दत्त्वानारायणायाथदण्डवत्प्रणमेद्भुवि ॥ ८८ ॥ तस्मिन्नेवगृहेविष्णोर्विष्णुस्मरणतत्परः ॥
कुशेनशय्यामास्तीर्यभूमौशयनमाचरेत् ॥ ८९ ॥ ततःप्रभातेविमलेनकुर्याद्दन्तधावनम् ॥ गण्डूषैर्मुखशुद्धिंतुकुर्याद्द्वादशभिर्बुधः ॥ ९० ॥
नित्यक्रियांप्रकुर्वीतविष्णुपूजादिकक्रियाम् ॥ ततोनिशायांविप्रेन्द्रसकलैर्व्रतिभिर्जनैः ॥ ९१ ॥ एकत्रजागरंकुर्यात्पुरतोजगतांपतेः ॥ समातृकः
सभार्यश्चसभ्रातासपितातथा ॥ ९२ ॥ तथासपुत्रमित्रश्चकुरुतेजागरंहरेः ॥ सतिष्ठेद्विष्णुभवनेचिरंव्रतकरोद्विज ॥ ९३ ॥ शङ्खचक्रादिकंचित्रंयो
लिखेद्विष्णुमन्दिरे ॥ बहुजन्मकृतंपापंहरेत्तस्यजनार्दनः ॥ ९४ ॥ तण्डुलचूर्णपङ्केनविष्णोरायतनेषुच ॥ अन्यैर्वन्यैश्चवाचित्रंलिखेत्तस्यफलं ॥ ६० ॥
शृणु ॥ ९५ ॥ पुत्रपौत्रप्रपौत्रैश्चभुङ्क्तेचसकलंशुभम् ॥ शेषेविष्णुपुरंगत्वातत्रमोक्षमवाप्नुयात् ॥ ९६ ॥ वासरेकमलाभर्तुर्ध्वजारोपणकृन्नरः ॥
उद्धृत्यकोटिपुरुषान्नारायणपुरंव्रजेत् ॥ ९७ ॥ पताकावह्निभिर्युक्तंविष्णोरायतनंजनः ॥ मण्डयत्यवनीपालःसभवेत्परजन्मनि ॥ ९८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पताकाप्रचलन्तीचयावद्भवतिवायुना ॥ तत्कर्तुःपातकंसर्वंतावदेवविनश्यति ॥ ९९ ॥ पताकावलयाःप्राज्ञैर्नानावर्णाहरेर्गृहे ॥ स्थापित
व्याःपरंस्थानमिच्छद्भिर्हरिवासरे ॥ १०० ॥ विष्णोःशिरसियच्छत्रंधत्तेचारुतरंजनः ॥ परजन्मनिविप्रर्षेछत्रीभवतिसक्षितौ ॥ १ ॥
वासरेवासुदेवस्यपुष्पमण्डपकृन्नरः ॥ प्रतिपुष्पंलभेत्पुण्यंवाजिमेधशतोत्तरम् ॥ २ ॥ वासुदेवदिनेपुष्पैःसुगन्धैर्मण्डनंबुधैः ॥ यत्नादपिच
कर्तव्यंचतुर्वर्गफलाप्तये ॥ ३ ॥ योवस्त्रगृहनिर्माणंकुरुतेहरिवासरे ॥ ससौधवासीविप्रर्षेभवतित्रिदशालये ॥ ४ ॥ निर्मायवस्त्रभवनंतत्रबध्नाति
मानवः ॥ श्वेतंवालोहितंवापिकृष्णंवासोऽच्युतप्रियः ॥ ५ ॥ शालग्रामशिलांतत्रप्रतिमांवाश्रियःपतेः ॥ पञ्चामृतेनसंस्नाप्यस्थापयेद्भक्तितो
व्रती ॥ ६ ॥ आदौस्वस्त्ययनंकुर्यात्संकल्पंचतथाबुधः ॥ यत्नादपिचकर्तव्यंचतुर्वर्गफलाप्तये ॥ ७ ॥ भूतशुद्धिंनिजांविप्रविधिनाशास्त्र
भाषितैः ॥ ततश्चैकमनाभूत्वागृहीत्वापुष्पमुत्तमम् ॥ ८ ॥ ध्यायन्नारायणंदेवंहृदयाम्भोजवासिनम् ॥ आसीनंहेमपीठेचतथामणिमयेऽपिच
॥ ९ ॥ आसीनंहेमपीठेमणिमयज्वलनालङ्कृतंक्रीडवेशंबिभ्रद्धेखोज्ज्वलाभ्रद्युतिरुचिरतनुंदीर्घदोर्भिश्चतुर्भिः ॥ नित्यंविभ्राजमानंसकलकरलयैः
सायुधैःपद्मनेत्रैःपश्यन्तंश्रीमुखंतच्छूमनुदमनिशंतंभजेऽपाङ्गदृष्ट्या ॥ ११० ॥ आगच्छभगवन्देवसहितःश्रीपतेःप्रिय ॥ कर्तव्याहिमयाभक्त्यासप
र्यास्मिन्व्रतेतव ॥ ११ ॥ सर्वलक्षणसंपन्नलक्ष्म्यासहजगद्गुरो ॥ अस्मिन्वरासनेतिष्ठयावत्पूजांकरोमिते ॥ १२ ॥ समस्तलोकविख्यात
कीर्तेनारायणप्रभो ॥ कच्चित्तेकुशलंसर्वंसर्ववदसुरार्चित ॥ १३ ॥ पाद्यंगृहाणदेवेशनारायणसुवासितम् ॥ पादद्वयरजोहारिपवित्रमतिशीतलम्
॥ १४ ॥ अर्घ्यंददामितेविष्णोदूर्वापल्लवसंयुतम् ॥ अखण्डतण्डुलोपेतंपुण्डरीकनिभेक्षण ॥ १५ ॥ इदमाचमनीयंतेसुपवित्रंददाम्यहम् ॥ गृहाण
परमानन्दपरमानन्दवर्धनम् ॥ १६ ॥ मयादत्तेनगन्धेनजरासन्धविनाशन ॥ तवास्तुभूषितंगात्रंलक्ष्मीनाथसुगन्धिना ॥ १७ ॥ ददाम्यहंपवित्रा
र्थंजगतामादिकारक ॥ इदमाचमनंदेवतद्गृहाणसुरेश्वर ॥ १८ ॥ सृष्टोऽयंविधिनापूर्वंदेवानांतुष्टिवृद्धये ॥ अतस्तुभ्यंसुरश्रेष्ठधूपोऽयंदीयतेमया ॥
॥ १९ ॥ तमसःस्तोमसंहर्ताघृतपूर्णोजनार्दन ॥ तवास्तुप्रीतयेदेवएषदीपोजनार्दन ॥ १२० ॥ सोत्तरीयमिदंवस्त्रंबस्तिश्रोणिसुशोभनम् ॥ ददाम्य
हंतेदेवेशसोपवीतंजगद्गुरो ॥ २१ ॥ अन्नंचतुर्विधंस्वादुरसैःषड्भिःसमन्वितम् ॥ मयानिवेदितंभक्त्यागृहाणपरमेश्वर ॥ २२ ॥ मुखदुर्गन्धहरणं
कर्पूरखदिरान्वितम् ॥ गृहाणविष्णोताम्बूलंकैवल्यदमहामते ॥ २३ ॥ विधिनानेनगोविन्दमुपहारैरनुत्तमैः ॥ पूजयेत्संवृतोभक्त्याप्रहरेषुचतुर्ष्वपि
॥ २४ ॥ नानोपहारान्हरयेयोयच्छेद्धरिवासरे ॥ वित्तशाठ्यंनकर्तव्यंकर्मणांफलमिच्छता ॥ २५ ॥ ततस्तुव्रतिभिःसर्वैर्नारायणपरायणैः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

निशिजागरणंकार्यंनृत्यगीतस्तवादिभिः ॥ २६ ॥ प्रदक्षिणंद्विजश्रेष्ठनामानिकमलापतेः ॥ सर्वपापविनाशीनिस्मर्तव्यानिव्रतेरतः ॥ २७ ॥
स्फुरन्तंप्रतिवक्रेभ्योहरिनामध्वनिंजनाः ॥ शृण्वन्तितेविमुक्ताःस्युर्महद्भिःपापसंचयैः ॥ २८ ॥ नपाखण्डजनालापःकर्तव्योहरिवासरे ॥ पाखण्डा
लापमात्रेणसर्वधर्मोविनश्यति ॥ २९ ॥ नारायणयशोगीतंप्रतिकण्ठंविनिःसृतम् ॥ श्रुत्वामूढानतृप्यन्तिश्वानोवीणाक्वणंयथा ॥ १३० ॥
सन्तोहर्षंसमायान्तिश्रुत्वागीतंजगत्पतेः ॥ समस्तपापविध्वंसिवीणाक्काणंयथामृगाः ॥ ३१ ॥ गायन्तंहरिगीतानिनृत्यन्तिनृत्यमुत्तमम् ॥
तृप्यन्तिव्रतिनोदृष्ट्वातृप्यन्तिकमलापतेः ॥ ३२ ॥ व्रतिनोयेनतृप्यन्तिविष्णोरायतनेद्विज ॥ प्रतिजन्मनिवैतेषांपशुताशाश्वतीभवेत् ॥ ३३ ॥
नयेगीतानिगायन्तिव्रतिनोहरिवासरे ॥ विहीनावचनैस्तेचभ्रमन्तिप्रतिजन्मनि ॥ ३४ ॥ मृदङ्गादीनिवाद्यानिकर्तव्यानिहरेःपुरः ॥ यतोवाद्यैर्भवे
त्तुष्टोभगवान्मधुसूदनः ॥ ३५ ॥ कुर्वद्भिर्जागरंविष्णोर्वेदाध्ययनमुत्तमम् ॥ पुराणपठनंवापिकर्तव्यंवैष्णवैर्जनैः ॥ ३६ ॥ रामायणंभागवतं
भारतंव्यासभाषितम् ॥ अन्यानिचपुराणानिपाठ्यानिहरिवासरे ॥ ३७ ॥ येपठन्तिपुरोविष्णोर्येशृण्वन्तिहरेर्दिने ॥ प्रत्यक्षंरंलभन्तेतेकपिलादान
जंफलम् ॥ ३८ ॥ निशिजागरणंकुर्यात्सानन्दोवैष्णवोजनः ॥ जितनिद्रोभवेत्सम्यग्ध्यायतेकेशवंहृदा ॥ ३९ ॥ प्रदक्षिणाकारतयाभूयोभूयो
हरेर्दिने ॥ निपत्यदण्डवद्भूमौप्रणमेच्चजनार्दनम् ॥ १४० ॥ ततःप्रभातेविमलेकृतपञ्चमहाध्वरः ॥ हरिंसंस्नाप्यदुग्धेनपूजयेद्भक्तिमान्व्रती ॥ ४१ ॥
व्रतस्यदक्षिणांदद्यान्निजशक्त्याद्विजन्मने ॥ ततस्तुद्वादशीमध्येव्रतीपारणमाचरेत् ॥ ४२ ॥ पारणंकुरुतेयस्तुविलङ्घ्यद्वादशीतिथिम् ॥ जन्म
कोट्यर्जितंपुण्यंतस्यचैवविनश्यति ॥ ४३ ॥ द्वादशीतिथिमध्येतुकर्तव्यंपारणंबुधैः ॥ नकदाचित्त्रयोदश्यांव्रतस्यफलमिच्छुभिः ॥ ४४ ॥ उपवास
दिनेविप्रनिशायामपिवैष्णवः ॥ उपवासफलप्रेप्सुर्यत्नात्स्वापंविवर्जयेत् ॥ ४५ ॥ विनाजागरणंनूनमुपवासोनिरर्थकः ॥ अतोजागरणंकार्यमु
भयोरपिपक्षयोः ॥ ४६ ॥ एकादशीव्रतंयेविधिनानेनकुर्वते ॥ सत्यंसत्यंद्विजश्रेष्ठसर्वेतेमोक्षगामिनः ॥ ४७ ॥ जन्ममृत्युहरणैकनिदानं
सेन्द्रदेवनिकरैरपिकार्यम् ॥ वासुदेवदिवसव्रतसारंजैमिनेत्वमनिशंकुरुयत्नात् ॥ १४८ ॥ इतिश्रीपाद्मेमहापुराणेक्रियायोगसारएकादशी
माहात्म्येद्वाविंशोऽध्यायः ॥ २२ ॥ व्यासउवाच ॥ पूर्वकीचरशोनामराजाभूत्क्षितिमण्डले ॥ शान्तःपरमधर्मज्ञोराजनीतिविदांवरः ॥
॥ १ ॥ सत्यवादीजितक्रोधोजितवैरिसमुच्चयः ॥ नारायणार्चनपरोहरिसेवारतःपरः ॥ २ ॥ सुप्रज्ञानाममहिषीतस्यासीत्प्रियवादिनी ॥
सर्वलक्षणसंपन्नापतिसेवापरायणा ॥ ३ ॥ एकादशीव्रतरतासर्वप्राणिहितैषिणी ॥ जातिस्मरामहाभागासुशीलावरवर्णिनी ॥ ४ ॥ सराजा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दशमींकृत्वासदारःपरमार्थवित् ॥ एकादशींनिशीथिन्यांजागरंकर्तुमुद्यतः ॥ ५ ॥ तत्रान्तरेद्विजःकश्चिच्छौरिर्नाममहीपतेः ॥ आजगाम
महातेजास्तस्यजागरमण्डपम् ॥ ६ ॥ तमायान्तंसभूपालोनारायणपरायणः ॥ पाद्यार्घैःपूजयामाससदारोऽत्यन्तहर्षितः ॥ ७ ॥ तेषां
मध्येसूपविष्टःसविप्रोऽखिलतत्त्ववित् ॥ विष्णुपूजापरांस्तत्रददर्शव्रतिनोबहून् ॥ ८ ॥ पूजयन्तिहरिंकेचिन्नानापुष्पैर्मनोरमैः ॥ गन्धैर्धूपैस्तथादीपै
रुपहारैरनुत्तमैः ॥ ९ ॥ गङ्गामृद्भूषिताःकेचित्तुलसीपत्रमालया ॥ अलङ्कताहरेरग्रेनृत्यन्तिव्रतिनोमुदा ॥ १० ॥ केचिद्गायन्तिगीतानिललितानि
हरेःपुनः ॥ करतालंसमादायव्रतिनोभगवत्प्रियाः ॥ ११ ॥ स्तवैरनुत्तमैःकेचिन्नारायणमनामयम् ॥ स्तुवन्तिजगतामीशंदिव्यार्थैर्मृदुलाक्षरैः ॥
॥ १२ ॥ श्वेतचामरवातेनशीतलेनजगत्पतिम् ॥ वीजयन्तिहरेःप्रीताःकेचिच्चव्रतिनस्तदा ॥ १३ ॥ केचिद्वीणादिकंवाद्यंललितंशुचिमङ्गलम् ॥
वादयन्तोमहात्मानःकेचिद्गायन्तिकेशवम् ॥ १४ ॥ सराजाराजमहिषीद्वावप्यत्यन्तहर्षितौ ॥ गायतोललितंगीतंनृत्यतोनृत्यमुत्तमम् ॥ १५ ॥
तौदम्पतीमहात्मानौनृत्यगीतादिकारिणौ ॥ वाचामधुरयाप्राहसशौरिर्ब्राह्मणोत्तमः ॥१६॥ शौरिरुवाच ॥ धन्योऽसित्वंमहीपालधन्याचमहिषीतव॥
चरित्रंयुवयोरेतन्मङ्गलंभुविदुर्लभम् ॥ १७ ॥ त्वांवक्ष्यामियतःकश्चिन्नदृष्टोवैष्णवोत्तमः ॥ त्वयाभूमिभुजापृथ्वीधन्येयंनात्रसंशयः ॥ १८ ॥ एका
दशीव्रतमिदंपवित्रंभगवत्प्रियम् ॥ सदारःकुरुषेनृपतस्मात्त्वंवैष्णवाग्रणीः ॥ १९ ॥ सप्तद्वीपैकनाथश्चसदारस्त्वंनृपोत्तम ॥ नारायणाग्रतःप्रीत्या
यतोनृत्यसिगायसि ॥ २० ॥ चरित्रंयुवयोरेतद्दम्पत्योर्दृष्टमद्भुतम् ॥ कस्माद्बुद्धिरियंजातायुवयोरतिनिर्मला ॥ २१ ॥ व्यासउवाच ॥ तस्येदंवा
क्यमाकर्ण्यशौरिनाम्नोद्विजन्मनः ॥ ईषद्धास्यमुखीप्राहसुप्राज्ञातमथोद्विजम् ॥ २२ ॥ सुप्राज्ञोवाच ॥ एकादशीप्रभावेणपूर्वमावांद्विजोत्तम ॥
अतिपातकिनौमुक्तौसूर्यजेनमहात्मना ॥ २३ ॥ जातिस्मृतिप्रभावेणदिव्यमेकादशीव्रतम् ॥ कुर्वःसम्प्रतिविप्रेन्द्रपरमस्थानकाङ्क्षया ॥ २४ ॥
शौरिरुवाच ॥ यदिनूनंवरारोहेपूर्वांजातिंत्वमात्मनः ॥ वेत्सिमेब्रूहितांश्रोतुंजायतेकौतुकंहृदि ॥२५ ॥ पूर्वंस्थिताकाभवतीपतिर्वाकःस्थितस्तव॥
कथंभास्करिणात्यक्तौयुवांपातकिनावपि ॥ २६ ॥ सुप्राज्ञोवाच ॥ अप्रकाश्यमिदंवाक्यंयद्यपिद्विजसत्तम ॥ स्थितास्मिवारमुख्याहंरतिशास्त्रविशा
रदा ॥ २७ ॥ तस्मिञ्जन्मनिपापानिघोराणिसुबहूनिच ॥ मयाकृतानिविप्रेन्द्रनरकक्लेशदानिवै ॥ २८ ॥ अयंनित्योदयोनामशूद्रःस्वाचारव
र्जितः ॥ परदारहरःक्रूरःपरद्रव्यापहारकः ॥ २९ ॥ सुरापोमित्रहन्ताचभ्रूणहापरहिंसकः ॥ अत्यहङ्कारयुक्तश्चधर्मनिन्दाकरःसदा ॥ ३० ॥
एकदाज्ञातिभिःसर्वैःपरित्यक्तोहिसद्व्रतैः ॥ आजगाममागारंवेश्याविभ्रमलोलुपः ॥ ३१ ॥ युवानंसुन्दरंदृष्ट्वातमेनंद्विजसत्तम ॥ मयापिप्रीतिमत्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ऽयंतोषितःसुरतैरपि ॥ ३२ ॥ ततोऽनुभूयसुरतंमयासहतपोधन ॥ अयमाहचमांप्रेम्णाविनयावनतोवचः ॥ ३३ ॥ अहंसुरतशास्त्रज्ञःपरित्यक्तःस्व
बन्धुभिः ॥ यदित्वंमन्यसेतस्मिंस्तिष्ठाम्यत्रत्वयासह ॥ ३४ ॥ विनयोपनतंवाक्यमिदंश्रुत्वात्वहंद्विज ॥ दम्पतीभावमासाद्यसहानेनस्थितास्म्य
हम् ॥ ३५ ॥ कदाचिद्विजशार्दूलएकादश्यांतिथौहरेः ॥ रोगेणपीडिताहंचसर्वदेहावघातिना ॥ ३६ ॥ तस्मिन्नेवद्विजश्रेष्ठज्वरजर्जरदेहया ॥
नपीतमुदकंनान्नंभुक्तंचपरयाभिया ॥ ३७ ॥ मयिस्नेहादयंचापितस्मिन्नेवदिनेहरेः ॥ तत्याजान्नंचतोयंचविषण्णइवजन्मना ॥ ३८ ॥
अथरात्रौद्विजश्रेष्ठदीपंप्रज्वाल्यसर्पिषा ॥ मयाकृतंजागरणंज्वरापहतचेतसा ॥ ३९ ॥ नारायणहरेकृष्णरक्षमामितिजल्पता ॥ मुहुर्मुहुरनेनापिकृतं
जागरणंनिशि ॥ ४० ॥ उपवासप्रभावेणकेशवोच्चारणेनच ॥ आवयोःसकलंपापंविनष्टमभवद्द्विज ॥ ४१ ॥ ततःप्रभातेविमलेभगवत्युदितेरवौ ॥
ज्वरार्दिताहंपञ्चत्वंगताब्राह्मणसत्तम ॥ ४२ ॥ संप्राप्तपञ्चतांदृष्ट्वामामयंचसुदुःखितः ॥ सहैवमरणंभेजेनिन्दितःसकलैर्जनैः ॥ ४३ ॥ सूर्य
जस्यततःप्रेष्यैर्ज्वलदग्निनिभेक्षणैः ॥ बद्ध्वादृढेनपाशेननीतौदुर्गमवर्त्मना ॥ ४४ ॥ शुभकर्माशुभंवापिचित्रगुप्तोयमाज्ञया ॥ सर्वंविचारयामासमूला
त्सतुविचक्षणः ॥ ४५ ॥ चित्रगुप्तउवाच ॥ यद्यप्येतौमहाबाहोमहापातकिनांवरौ ॥ तथापिपातकैर्मुक्तौह्येकादश्यामुपोषणात् ॥ ४६ ॥ अनि
च्छयापियःकुर्यात्पुण्यमेकादशीव्रतम् ॥ सोऽपिगच्छेत्परंस्थानंसर्वपापविवर्जितः ॥ ४७ ॥ इत्युक्तश्चित्रगुप्तेनधर्मराजोमहायशाः ॥ आसनात्सहसो
त्थायववन्देमाममुंचसः ॥ ४८ ॥ सुगन्धैश्चन्दनैर्दिव्यैर्धूपैःपुष्पैश्चमृत्युना ॥ सुवर्णाभरणैरेवमण्डितौपापवर्जितौ ॥ ४९ ॥ फलैर्नानाविधैस्तत्रमधु
रैरमृतोपमैः ॥ भास्करिःकारयामासप्रीत्याभोजनमावयोः ॥ ५० ॥ अथस्तुत्वास्तवैर्दिव्यैःस्वयमावांयमःप्रभुः ॥ समारोप्यरथेदिव्येप्रोवाचे
तिकृताञ्जलिः ॥ ५१ ॥ यमउवाच ॥ युवांपुण्यवतांश्रेष्ठौसर्वपापविवर्जितौ ॥ यत्रास्तेभगवान्विष्णुर्गच्छतंतत्रसम्प्रति ॥ ५२ ॥ इत्युक्तौधर्म
राजेनविनयावनतेनवै ॥ अथैतदुक्तमावाभ्यांनत्वातत्पादपङ्कजे ॥ ५३ ॥ गन्तव्यंनान्यथादेवतद्विष्णोःपरमंपदम् ॥ किंत्वस्तिनरकंद्रष्टुंत्वद्गृहस्थं
स्पृहावयोः ॥ ५४ ॥ यमाज्ञयाततोविप्ररथमारुह्यशोभनम् ॥ दुष्प्रेक्ष्यानिरयादृष्टाआवाभ्यांतत्रविस्तराः ॥ ५५ ॥ ब्राह्मणउवाच ॥ तत्रावस्था
पापवतांयायादृष्टाःपतिव्रते ॥ विस्तरेणसमाख्यातुंतास्ताःसर्वास्त्वमर्हसि ॥ ५६ ॥ पुण्यात्मानःपथायेनव्रजन्तियममन्दिरम् ॥ पापात्मान
श्चसुश्रोणितन्मेकथयविस्तरात् ॥ ५७ ॥ पुण्यात्माकीदृशंपश्येत्तत्रवैवस्वतंप्रभुम् ॥ पुण्यात्मनांपापिनांचपन्थानंसुखदुःखदम् ॥ ५८ ॥ सुप्राज्ञो
वाच ॥ आदौब्रवीमिपन्थानंनृणांपुण्यवतामहम् ॥ शृणुष्वद्विजशार्दूलशृण्वतांप्रीतिवर्धनम् ॥ ५९ ॥ प्रस्तरैर्विस्तरैर्बद्धोदिव्यवस्त्रैःसमावृतः ॥

CC-0. In Public Domain. Digitization by eGangotri

भातिपुण्यवतांपन्थाःसर्वोपद्रववर्जितः ॥ ६० ॥ क्वचिद्गन्धर्वकन्याभिर्गीयतेगानमद्भुतम् ॥ क्वचिन्मञ्जुशरीराभिरप्सरोभिश्चनृत्यते ॥ ६१ ॥ क्वचि
द्वीणाक्वणंनानावाद्यंचक्रुर्मनोरमम्॥ क्वचित्कुसुमवृष्टिश्चक्वचिद्वायुश्चशीतलः ॥६२॥क्वचित्प्रपाशीततोयाक्वचिच्चभुक्तिशालिकाः ॥क्वचिद्देवाश्चगन्धर्वाः
पठन्तिस्तवमुत्तमम् ॥ ६३ ॥ क्वचित्क्वचिद्दीर्घिकाश्चफुल्लपद्माःसुशोभनाः ॥ सुच्छायाःपादपाःक्वापिपुष्पितावञ्जुलादयः॥६४॥ततस्तुसुखसम्पन्नाः
पथिगच्छन्तिमानवाः ॥ पुण्यात्मानोद्विजश्रेष्ठसुखमृत्युमवाप्यच ॥६५॥ केचित्तुरङ्गमारूढानानालङ्कारभूषिताः ॥ उद्दण्डधवलच्छत्रैर्गच्छन्त्यावृत्य
मस्तकम् ॥ ६६ ॥ केचिद्यान्तिगजारूढारथारूढाश्चकेचन ॥ यानारूढाजनाःकेचित्सुखेनयममन्दिरम् ॥ ६७ ॥ केचिद्देवाङ्गनाहस्तन्यस्त
चामरवायुभिः ॥ गच्छन्तिर्वीजितामर्त्याःस्तूयमानाःसुरर्षिभिः ॥ ६८ ॥ केचिद्दिव्यायुधधराःस्रक्चन्दनविभूषिताः ॥ भुञ्जन्तोयान्तिताम्बूलं
पुण्यात्मानोयमालयम् ॥ ६९ ॥ निजगात्रत्विषाकेचिज्ज्वालयन्तोदिशोदश ॥ व्रजन्तिशमनागारंजलग्रहनिवासिनः ॥ ७० ॥ केचिच्चपायसं
दिव्यंभुञ्जन्तोयान्तिसत्तम ॥ सुभक्षणंप्रकुर्वन्तःपथियान्तःसुखेनच ॥ ७१ ॥ केचिद्दुग्धंपिबन्तश्चकेचिदिक्षुरसंतथा ॥ केचित्तक्रंपिबन्तश्चगच्छन्ति
यममन्दिरम् ॥७२॥ केचिद्दधीनिभक्षन्तःकेचिन्नानाफलानिच ॥ केचिन्मधुपिबन्तश्चपुण्यवन्तोव्रजन्तिवै ॥७३॥ तानागतांस्ततोदृष्ट्वाबहून्धर्मपराय
णान् ॥ भास्करिःप्रीतिमासाद्यस्वयंनारायणोभवेत् ॥ ७४ ॥ चतुर्बाहुःश्यामवर्णःप्रफुल्लकमलेक्षणः ॥ शङ्खचक्रगदापद्मधारीगरुडवाहनः ॥ ७५ ॥
स्वर्णयज्ञोपवीतीचस्मरचारुमहाननः ॥ किरीटीकुण्डलीचैववनमालाविभूषितः ॥ ७६ ॥ चित्रगुप्तोमहाप्राज्ञश्चण्डाद्यायमकिङ्कराः ॥ सर्वेनारा
यणाकाराबभूवुर्मधुरोक्तयः ॥ ७७ ॥ ततःस्वयंधर्मराजस्तान्सर्वान्मनुजोत्तमान् ॥ परमांप्रीतिमासाद्यमित्रवच्चार्चयेद्द्विज ॥ ७८ ॥ दिव्य
गन्धैःफलैश्चैवतेषांपुण्यवतांनृणाम् ॥ भोजनंकारयित्वातुतानुवाचाथभास्करिः ॥ ७९ ॥ यमउवाच ॥ यूयंसर्वेमहात्मानोनरकक्लेशभीरवः ॥
निजकर्मप्रभावेणगम्यतांपरमंपदम् ॥ ८० ॥ संसारेजन्मसंप्राप्यपुण्यंयःकुरुतेनरः ॥ समेपितासमेभ्रातासमेबन्धुसमःसुहृत् ॥ ८१ ॥
इत्युक्ताधर्मराजेनतेसर्वेद्विजसत्तम ॥ दिव्यंरथंसमारुह्यनारायणपुरंगताः ॥ ८२ ॥ पुण्यात्मनांगतिःप्रोक्तासमासेनद्विजोत्तम ॥ पापात्मनां
शृणुगतिंविस्तरेणवदाम्यहम् ॥ ८३ ॥ षडशीतिसहस्राणियोजनानिदुरात्मनाम् ॥ प्रोक्तोमार्गस्यविस्तारःसर्वदुःखान्वितःसच ॥ ८४ ॥
क्वचित्क्वचिद्द्विजश्रेष्ठसंततंतप्तवालुकम् ॥ ८५ ॥ क्वचित्क्वचित्तीक्ष्णशिलाःक्वचित्तप्तशिलास्तथा ॥ क्वचित्क्वचिच्छस्त्रवृष्टिःक्वचिदङ्गारवर्षणम् ॥ ८६ ॥
क्वचिदग्निरिवातीवसंतप्तावान्तिमारुताः ॥ गम्भीरान्धकराःक्वापितृणावर्तमुखाद्विज ॥ ८७ ॥ क्वचित्कण्टकवृष्टिश्चनाराचमयकण्टकैः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पापाणश्रेणयःक्कापिदुःखरोहाःसपन्नगाः ॥ ८८ ॥ गच्छन्तिपापिनस्तत्रशुष्ककण्ठोष्ठतालुकाः ॥ एवंबहुविधक्लेशेछायाजलविवर्जिते ॥ ८९ ॥
तस्मिन्मार्गेद्विजश्रेष्ठपापिनोयान्तिदुःखिताः ॥ नग्नाविमुक्तकेशाश्चप्रेताकाराभयङ्कराः ॥ ९० ॥ रुधिरौघप्लुताःकेचित्केचित्कर्दमभूषिताः ॥
केचित्केचिच्चकृष्णाङ्गाःपथिगच्छन्तिपापिनः ॥ ९१ ॥ क्रन्दन्तोव्यथयाकेचित्स्रवद्बाष्पाकुलेक्षणाः ॥ शोचन्तःस्वानिकर्माणिकेचिद्गच्छन्ति
पापिनः ॥९२॥ कस्यचिच्चर्मपाशस्यबन्धनंपापिनांगले ॥ कङ्कालेकस्यचिद्बद्धाःकस्यचिच्चपदद्वये ॥ ९३ ॥ गलेसूचीसमुत्कीर्णेपाशंदत्त्वादृढंरुषा॥
आकृष्यन्तेयमप्रेष्यैःकेषांचिच्चकृतैनसाम् ॥ ९४ ॥ वर्त्मस्थान्गुरुपाषाणान्वहन्तःकर्णरन्ध्रकैः ॥ अयोभारांश्चशीर्षाग्रैर्व्रजन्तिपथिपापिनः ॥
॥ ९५ ॥ पाशबद्धभुजान्कांश्चिन्नयन्तियमकिङ्कराः ॥ ग्रीवासुपापिनःकेचित्करप्रहरणैर्दृढैः ॥ ९६ ॥ क्षितक्षितायमप्रेष्यानयन्तियम
किङ्कराः ॥ यान्त्यधःशिरसःकेचिदूर्ध्वपादास्तथापरे ॥ ९७ ॥ गच्छन्तिबाहुभिःकेचिदेकपादाश्चकेचन ॥ इत्येवंविकृताकाराआर्तराव
विरावणाः ॥ ९८ ॥ यमदूतैस्ताडयमानाःपापिनोयान्तितत्पथे ॥ तेष्वागतेषुसर्वेषुपापात्मसुरुषायमः ॥ ९९ ॥ दिव्यांमूर्तिंपरित्यज्य
बभूवात्यन्तभैरवः ॥ त्रिंशद्योजनदीर्घाङ्गोवापीसदृशलोचनः ॥ १०० ॥ धूम्रवर्णोमहातेजाःप्रलम्बोघर्घरध्वनिः ॥ सुदीर्घदशनश्रेणिःशूर्पो
पमनखावलिः ॥ १ ॥ प्रचण्डमहिषारूढःसंदष्टदशनच्छदः ॥ दण्डहस्तश्चर्मपाशोभ्रुकुटीकुटिलाननः ॥ २ ॥ चित्रगुप्तोमहामायःक्रोधारुणित
लोचनः ॥ अट्टाट्टहासंकुर्वाणःसमवर्तीविराजते ॥ ३ ॥ चण्डाद्याःकिङ्कराःसर्वेपाशमुद्गरपाणयः ॥ बभूवुर्भैरवाःक्रुद्धागर्जन्तोजलदाइव ॥ ४ ॥
जहिजह्याशुपापिष्ठान्भिन्धिच्छिन्धिविदारय ॥ समन्तादेवधावन्तोवल्गन्तियमकिङ्कराः ॥ ५ ॥ तानाहपततःसर्वान्पापिनोधर्मराट्प्रभुः ॥
तर्जयेत्कालदण्डेनत्यजन्हुङ्कारनिःस्वनम् ॥ ६ ॥ यमउवाच ॥ रेरेपापादुराचारायुष्माभिरविवेकिभिः ॥ अहोकृतानिपापानिआत्मपीडाकराण्यपि
॥ ७ ॥ मस्तकोपरितिष्ठन्तंनेक्षध्वंसमवर्तिनम् ॥ ज्ञात्वापिमांजीवितेशंयुष्माभिःपातकंकृतम् ॥ ८ ॥ पुण्यात्मनामहंबन्धुरहंपापात्मनां
रिपुः ॥ इतिकुत्रापियुष्माभिर्नश्रुतंश्रवणैःस्वकैः ॥ ९ ॥ निरयादुःसहाःसन्तिनानादुःखसमन्विताः ॥ पापिनोभुञ्जतेतांश्चयुष्माभिर्नेतिविश्रुतम् ॥
॥ ११० ॥ मत्वामिथ्यैवयुष्माभिश्चर्चाममदुराशयाः ॥ अद्यसैवस्वकैर्नेत्रैर्दृश्यतांकृतपातकाः ॥११॥ वित्तान्ध्येनवचोमत्तायूयंसर्वेसदैवहि ॥ चक्रिरे
पापजालानियुष्माभिःसततंयथा ॥ तथापापफलंदुष्टाभुज्यतांक्रन्दनेनकिम् ॥१२॥ सुप्राज्ञोवाच ॥ इत्युक्त्वाभास्करिर्देवश्चित्रगुप्तमुवाचह ॥ एतेषां
पापकर्माणिमहाभागविचारय ॥ १३ ॥ धर्मराजवचःश्रुत्वाचित्रगुप्तोमहत्तदा ॥ तेषांयावन्तिपापानितावन्तिप्राहचोदितः ॥१४॥ ततस्तपापिनःसर्वे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्रन्दन्तिद्विजसत्तम॥ इत्यूचुःशमनंभीताश्चर्मपाशेनियन्त्रिताः ॥१५॥पापिनऊचुः॥अस्माभिर्यानिपापानिकृतानिभास्करात्मज ॥केस्थिताःसाक्षिण
स्तत्रकैर्वायूयंनिवेदिताः ॥ १६ ॥ अशुभंवाशुभंवापियतोऽस्माभिःकृतंपुरा ॥ तथाचदृष्टंकेनात्रपुरोऽस्माकंनिगद्यताम् ॥ १७ ॥ ततःप्रहस्य
भगवान्कोपेनमहताद्विज ॥ आहूयसाक्षिणःसर्वानिदंवचनमब्रवीत् ॥ १८ ॥ यमउवाच ॥ यूयंसर्वेयथावृत्तंसंनिधौसाक्षिणस्तथा ॥ आकाशं
पृथवींचैवजलंचतिथयस्तथा ॥ १९ ॥ दिनंरात्रिरुभेसन्ध्येधर्मश्चेतेतुसाक्षिणः ॥ तेषांपापात्मनामूचुःसर्वंकर्मशुभाशुभम् ॥ १२० ॥ यस्यांयस्यांच
वेलायांकर्मयद्यच्चवैकृतम् ॥ ससप्तसाक्षीतस्यतस्यजगादयमसन्निधौ ॥ २१ ॥ तच्छ्रुत्वापापिनःसर्वेसाध्वसाःक्लिष्टमानसाः ॥ सकम्पहृदयास्तस्थु
र्मेघंदृष्ट्वामृगाइव ॥ २२ ॥ ततस्तुदन्तावलिभिःकुर्वन्कडकडध्वनिम् ॥ धर्मराट्कालदण्डेनताञ्जघानपृथक्पृथक् ॥ २३ ॥ ताडिताधर्मराजेनतेसर्वे
कृतपातकाः ॥ क्रन्दन्तिनिजकर्माणिशोचन्तःप्राप्तसाध्वसाः ॥ २४ ॥ ततस्तान्पापिनःसर्वान्दूताश्चण्डादयोरुषा ॥ नरकेषुयमादेशाद्रौरवादिषु
चिक्षिपुः ॥२५ ॥ तपनेचिक्षिपुःकांश्चिदवीचौकृतपातकान् ॥ सङ्घातेकालसूत्रेचमहारौरवकेतथा ॥ २६ ॥ संतप्तेवालुकाकुण्डेकुम्भीपाकेतथापरान् ॥
निरुच्छ्वासेमहाघोरेचिक्षिपुश्चप्रमर्दने ॥ २७॥ असिपत्रवनेघोरेनानाभक्षेषुपापिनः ॥ वैतरण्यांतथाकांश्चिच्चिक्षिपुर्यमकिङ्कराः ॥ २८ ॥ घोरेविष्ठाह्रदे
कांश्चित्तुषाङ्गारास्थिकण्टकैः ॥ पूर्णेनितान्तसंतप्तेचिक्षिपुर्यमकिङ्कराः ॥ २९ ॥ पुरीपलेपनेचैवपुरीषभोजनेतथा ॥ स्वमांसभोजनेचैवस्थापितायम
किङ्करैः ॥ १३० ॥ श्लेष्माणंभुञ्जतेकेचित्केचिद्वीर्यंचभुञ्जते ॥ पिबन्तिकेचिन्मूत्राणिकेचिद्रक्तानिपापिनः ॥ ३१ ॥ केषांचिद्वदनेष्वेवजलौकाःपन्न
गोपमाः ॥ पूर्यन्तेपन्नगाश्चैवयमदूतैर्भयङ्करैः ॥ ३२ ॥ उत्पाद्यन्तेऽतिसंतप्तैर्जिह्वाश्चद्विजसत्तम ॥ केषांचित्कर्णरन्ध्रेषुमुखेषुचकृतैनसाम् ॥ ३३ ॥
तप्ततैलानिपूर्यन्तेनिर्दयैर्यमकिङ्करैः ॥ केषांचित्खड्गधाराभिर्बाहुंचचरणंतथा ॥ ३४ ॥ कर्णादिनासिकाश्चैवच्छिन्दन्तिचदुरात्मनाम् ॥ शयनंकुर्वते
केचिज्ज्वलदङ्गारसंचये ॥ ३५ ॥ केचिन्नाराचतुल्येषुशयनंकण्टकेषुच ॥ कर्दमेषुचतप्तेषुकांश्चिच्छमनकिङ्कराः ॥ ३६ ॥ पातयन्तिद्विजश्रेष्ठकेशे
ष्वाकृष्यपापिनः ॥ वमनेषुचकेषांचिन्नखसन्धिषुपापिनाम् ॥ ३७ ॥ तप्तसूचीसहस्राणिप्रक्षिपन्तिमुहुर्मुहुः ॥ संतप्तलोहशूलाग्रेकांश्चिदारोपयन्ति
वै ॥३८ ॥क्रदन्तिकण्टकैस्तीक्ष्णैःकेषांचिन्मस्तकानिवै ॥ गृहीत्वाहस्तपादेषुशालमलिद्रुमकण्टकैः ॥३९॥ निष्कुषन्तिरुषाकांश्चिदार्तरावविराविणः॥
बद्धागलेषुपाषाणंकांश्चिच्छमनकिङ्कराः ॥ १४० ॥ रक्तगर्तेपयोगर्तेपातयन्तिपुनःपुनः ॥ क्रूराःकेषांचिदन्येषांशिरांसिपापिनांनृणाम् ॥ ४१ ॥
चूर्णयन्त्युपलैर्याम्यामुहुर्मुहुरतिक्रुधा ॥ वक्षोमध्येषुकेषांचिल्लोहकीलकसंचयान् ॥ ४२ ॥ आरोपयन्तिलोकानांक्रन्दतांदुरितात्मनाम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चक्षूंपिबडिशैःकेपासुत्पाटयन्तेकृतैनसाम् ॥ ४३ ॥ केषांचिन्नास्तिकाएवपूर्यन्तेवृश्चिकैर्द्विज ॥ केषांचिद्वृक्षशाखायांबद्धापादांश्चपाशकैः ॥ ४४ ॥
ज्वलयन्तितलेवह्निंसधूमंयमकिङ्कराः ॥ धूमपानंप्रकुर्वन्तितेतत्रकृतकिल्बिषाः ॥ ४५ ॥ अधोमुखाऊर्ध्वपादास्तस्थुराचन्द्रतारकम् ॥ मुसलैर्मुद्गरैः
केचित्ताड्यमानाःपुनःपुनः ॥ ४६ ॥ याम्यैर्दूतैरुद्गिरन्तिशोणितानिव्यथाकुलाः ॥ अन्धकारमयेगेहेपूतिगन्धवतिद्विज ॥ ४७ ॥ दंशैश्चमशकैश्चैवके
चित्सीदन्तिपापिनः ॥ भस्मानिभुञ्जतेकेचित्कृमीन्केचिच्चभुञ्जते ॥ ४८ ॥ केचिद्दुर्गन्धमांसानिकेचिच्चपूतिमृत्तिकाम् ॥ श्वभिर्व्याघ्रैःशृगालैश्चवज्र
दन्तनखैस्तथा ॥४९॥ऋक्षैःकेचिद्भक्ष्यमाणाःक्रन्दन्तिरुधिराप्लुताः ॥ नितान्तोग्रविषैःसर्पैर्भक्ष्यमाणास्तथापरे ॥१५०॥अन्येमहिषशृङ्गाग्रनिर्भिन्न
वक्षसोद्विज ॥ पतन्तिमूर्छिताःपृथ्व्यांसिञ्चन्तोरुधिरैर्महीम् ॥ ५१ ॥ यमदूतधनुर्मुक्तैश्शरैराशीविषोपमैः ॥ जर्जराखिलदेहाश्चलुठन्त्यन्येमहीतले ॥
॥ ५२ ॥ तप्तायःपिण्डनिलयंतप्तपाषाणमेवच ॥ दंशशस्त्रेणकेषांचित्कुष्णन्तिवदनेषुच ॥ ५३ ॥ नासारन्ध्रेषुकेषांचिद्यमदूतामुखेषुच ॥ श्वासानिल
निरोधार्थंनासारन्ध्रंवयन्तिवै ॥ ५४ ॥ केषांचित्तीक्ष्णधाराभिर्यमशक्तिभिरुद्धतैः ॥ उत्पाटयन्तेऽङ्गचर्माणियमदूतैर्महाबलैः ॥ ५५॥ कांश्चिद्गृहीत्वा
केशेषुनिपात्यपृथिवीतले ॥ कीलैःपादादिभिर्घातैस्ताडयन्तिसदैवहि ॥ ५६ ॥ केचित्क्षाराम्बुधाराभिःसंतप्ताःकृतपातकाः ॥ क्षाराम्बुपानंकुर्वन्ति
क्रन्दन्तोबहुधाद्विज ॥५७॥ पित्तपानंमहाभागकेचित्कुर्वन्तिपापिनः ॥ स्नुहीक्षीराणिकेचिच्चपिबन्तिपापिनांवराः॥५८॥केषांचित्स्वपतांभूमौवक्षःसु
यमकिङ्करैः ॥ दीयन्तेगुरुपाषाणाःसंतप्ताःपर्वतोपमाः ॥ ५९ ॥ काष्ठखण्डद्वयंदत्त्वाग्रीवायांचगलेतथा ॥ उदग्रमुखंबध्नन्तिकेषांचिद्दृढपाशकैः
॥ १६० ॥ आरोप्यवृक्षशाखायांकांश्चिद्भूमौक्षिपन्तिच ॥ उत्थापयन्तिभूमौचप्रक्षिपन्तिपुनःपुनः ॥६१॥ एवंतेपापिनःसर्वेक्षुधितास्तृषितास्तथा ॥
त्राहित्राहीतिजल्पन्तोरुदन्तियातनागृहे ॥ ६२ ॥ युगकल्पान्तपर्यन्तंभुक्त्वानिरययातनाम् ॥ नातिभुक्त्वापापशेषेजायन्तेपापयोनिषु ॥
॥ ६३ ॥ पापयोनौसमुत्पन्नाभवन्तिव्याधिपीडिताः ॥ हीनाङ्गाअधिकाङ्गाश्चदुःखिनःपापसेवकाः ॥६४॥ अपुत्राअतिमूर्खाश्चपरहिंसापरायणाः ॥
अल्पायुषोऽल्पमतयःकुभार्यापतयस्तथा॥६५॥नित्यंपापानिकुर्वन्तिकर्मणामनसागिरा ॥पुनःपापप्रभावेणनिरयंयान्तिपूर्ववत् ॥६६ ॥ तस्मात्पापं
नकर्तव्यंकदाचिदपिसत्तमैः ॥ नराणांकृतपापानांनरकान्नास्तिनिष्कृतिः ॥ ६७ ॥ संक्षेपात्पापिनांदुःखंनिरुक्तंद्विजसत्तम ॥ सम्यग्वक्तुंकःक्षमोऽस्ति ॥ ९४ ॥
वर्षायुतशतैरपि ॥ ६८ ॥ दुर्गतीनांततोदृष्ट्वामनुजानांकृतैनसाम् ॥ आवांविमानमारुह्यनारायणपुरंगतौ ॥ ६९ ॥ कल्पकोटिसहस्राणिभुक्त्वाभोगा
न्हरेर्गृहे ॥ जातौवैराजवंशेऽस्मिन्विशुद्धेद्विजसत्तम ॥ १७० ॥ अत्रभुक्त्वाखिलान्भोगान्सर्वसंपत्समन्वितान् ॥ सुखमृत्युंसमासाद्यगन्तव्यं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परमंपदम् ॥ ७१ ॥ एकादशीव्रतसमंव्रतंनास्तिजगत्त्रये ॥ अनिच्छयापियत्कृत्वागतिरेवंविधाऽऽवयोः ॥ ७२ ॥ एकादशीव्रतंयेतुभक्तिभावेन
कुर्वते ॥ नजानेकिंभवेत्तेषांवासुदेवानुकम्पया ॥ ७३ ॥ इतितेकथितंसर्वंपृष्टंब्राह्मणसत्तम ॥ विष्णोर्दिवसमाहात्म्यंकिमन्यच्छ्रोतुमर्हसि ॥ ७४ ॥
व्यासउवाच ॥ तस्यैतद्वचनंश्रुत्वासविप्रःपरमार्थवित् ॥ एकादशीव्रतेचित्तंचकारसुदृढंनिजम् ॥ ७५ ॥ सराजाराजमहिषीचिरंभुक्त्वा
वसुन्धराम् ॥ अन्तेविष्णुपुरंगत्वाप्राप्तवन्तौपरंपदम् ॥ ७६ ॥ व्रतराजस्यमाहात्म्यंयेशृण्वन्तिपठन्तिच ॥ पापजालैर्विनिर्मुक्तालभन्तेहरिस
न्निधिम् ॥ १७७ ॥ इतिश्रीपाद्मेमहापुराणेक्रियायोगसारेएकादशीमाहात्म्येत्रयोविंशतितमोऽध्यायः ॥ २३ ॥ सूतउवाच ॥ एकादश्याः
फलंश्रुत्वासुप्रीतोजैमिनिस्ततः ॥ कृताञ्जलिरुवाचेदंकृष्णद्वैपायनंप्रभुम् ॥ १ ॥ जैमिनिरुवाच ॥ विष्णोर्दिनस्यमाहात्म्यंत्वत्प्रसादाच्छ्रुतं
मया॥तुलस्याब्रूहिमाहात्म्यंशृण्वतांपापनाशनम् ॥ २ ॥ व्यासउवाच ॥ इन्द्राद्यैर्दैवतैःसर्वैस्तुलसीभगवत्यसौ ॥ संसेव्यासर्वदाविप्रचतुर्वर्ग
फलप्रदा ॥ ३ ॥ स्वर्गेमर्त्येचपातालेतुलसीदुर्लभासताम् ॥ चतुर्वर्गफलप्राप्तिंतस्यांभक्तिःकरोतिवै ॥ ४ ॥ यत्रैकस्तुलसीवृक्षस्तिष्ठत्यपिचसत्तम ॥
तत्रैवत्रिदशाःसर्वेब्रह्मविष्णुशिवादयः ॥ ५ ॥ केशवःपत्रमध्येचपत्राग्रेचप्रजापतिः ॥ पत्रवृन्तेशिवस्तिष्ठेत्तुलस्याःसर्वदैवहि ॥ ६ ॥ लक्ष्मीःसरस्वती
चैवगायत्रीचण्डिकातथा ॥ सर्वाश्चान्यादेवपत्न्यस्तत्पत्रेषुवसन्तिच ॥ ७ ॥ इन्द्रोऽग्निःशमनश्चैवनैर्ऋतिर्वरुणस्तथा ॥ पवनश्चकुबेरश्चतच्छाखायां
वसन्त्यमी ॥ ८ ॥ आदित्यादिग्रहाःसर्वेविश्वेदेवाश्चसर्वदा ॥ वसवोमुनयश्चैवतथादेवर्षयोऽखिलाः ॥ ९ ॥ कोटिब्रह्माण्डमध्येषुयानितीर्थानि
भूतले ॥ तुलसीदलमाश्रित्यतान्येवनिवसन्तिवै ॥ १० ॥ तुलसींसेवतेयस्तुभक्तिभावसमन्वितः ॥ सेवितास्तेनतीर्थाश्चदेवाब्रह्मादयस्तथा
॥ ११ ॥ छिन्दन्तितृणजालानितुलसीमूलजानिये ॥ तद्देहस्थांब्रह्महत्यांक्षिणत्तितत्क्षणाद्धरिः ॥ १२ ॥ ग्रीष्मकालेद्विजश्रेष्ठसुगन्धैःशीतलैर्जलैः ॥
तुलसीसेचनंकृत्वानरोनिर्वाणमाप्नुयात् ॥ १३ ॥ चन्द्रातपंवाछत्रंवातस्यैयस्तुप्रयच्छति ॥ विशेषतोनिदाघेषुसमुक्तःसर्वपातकैः ॥ १४ ॥
वैशाखेऽक्षतधाराभिरद्भिर्यस्तुलसींजनः ॥ सेचयत्सोऽश्वमेधस्यफलंप्राप्नोतिनित्यशः ॥ १५ ॥ प्रसृतोदकमात्रेणतुलसींयस्तुसेचयेत् ॥ सोऽपि
स्वर्गमवाप्नोतिसर्वपापविवर्जितः ॥ १६ ॥ कदाचित्तुलसींदुग्धैःसेचयेद्योनरोत्तमः ॥ तस्यवेश्मनिविप्रर्षेलक्ष्मीर्भवतिनिश्चला ॥ १७ ॥
गोमयैस्तुलसीमूलेयःकुर्यादुपलेपनम् ॥ संमार्जनंचविप्रर्षेतस्यपुण्यफलंशृणु ॥ १८ ॥ रजांसितत्रयावन्तिदूरीभूतानिजैमिने ॥ तावत्कल्पसहस्राणि
मोदतेविष्णुनासह ॥ १९ ॥ प्रदीपंयस्तुसन्ध्यायांस्थापयेत्तुलसीतले ॥ सयातिमन्दिरंविष्णोःकुलकोटिसमन्वितः ॥ २० ॥ गोभ्यःश्वभ्यः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

खरेभ्यश्चमनुष्येभ्यश्चरक्षति ॥ शिशुभ्यस्तुलसींयस्तुतंरक्षेत्केशवःसदा ॥ २१ ॥ तुलस्यारोपणंयस्तुभक्तितःकुरुतेनरः ॥ समृतःपरमंमोक्षं
प्राप्नोत्येवनसंशयः ॥ २२ ॥ प्रभातेतुलसींपश्येद्भक्तिमान्योनरोत्तमः ॥ सविष्णुदर्शनस्यैवफलंप्राप्नोतिचाक्षयम् ॥ २३ ॥ तुलसींप्रणमेद्यस्तु
नरोभक्तिसमन्वितः ॥ आयुर्बलंयशोवित्तंसन्ततिस्तस्यवर्धते ॥ २४ ॥ तुलसीस्मरणेनैवसर्वपापंविनश्यति ॥ तुलसीस्पर्शनेनैवनश्यन्तिव्याधयो
नृणाम् ॥ २५ ॥ योऽश्नातितुलसीपत्रंसर्वपापहरंशुभम् ॥ तच्छरीरान्तरस्थायिपापंनश्यतितत्क्षणात् ॥ २६ ॥ तुलसीकाष्ठसंभूतांमालां
वहतियोनरः ॥ तद्देहेपातकंनास्तिसत्यमेतन्मयोच्यते ॥ २७ ॥ तुलसीपत्रगलितंयस्तोयंशिरसावहेत् ॥ गङ्गायाःस्नानजंपुण्यंलभतेनात्रसंशयः
॥ २८ ॥ दूर्वाभिरक्षतैःपुष्पैर्नैवेद्यैस्तुलसींशुभाम् ॥ समाराध्यनरोभक्त्याविष्णुपूजाफलंलभेत् ॥ २९ ॥ येनार्चिताभगवतीतुलसीकदाचि
न्नैवेद्यपुष्पवरधूपघृतप्रदीपैः ॥ धर्मार्थकामपरमामृतदायिविप्राःकिंतस्यविष्णुचरणापचितिप्रयोगैः ॥ ३० ॥ स्थानेषुदोषरहितेषुसुरौघसेव्यामा
रोपयन्तितुलसींहरितुष्टिकर्त्रीम् ॥ तुष्टोहरिस्त्रिजगतामधिपोमुरारिस्तेभ्योददातिपरमंपदमाशुविप्र ॥ ३१ ॥ यज्ञंव्रतंचपितृपूजनमच्युतार्चांदानंय
दन्यदपिकर्मशुभंमनुष्याः ॥ कुर्वन्तिदोषरहितेतुलसीतलेचतान्यक्षयाणिसकलानिभवन्तिनूनम् ॥ ३२ ॥ यद्धर्मकर्मकुरुतेमनुजःपृथिव्यांना
रायणप्रियतमांतुलसींविनाच ॥ तत्सर्वमेवविफलंभवतिद्विजेन्द्रपद्मेक्षणोऽपिनहितुष्यतिदेवदेवः ॥ ३३ ॥ यात्रासुपश्यतिशुभांतुलसींपवित्रांयो
भक्तिभावसहितोमनुजोहिनूनम् ॥ यात्राफलंसकलमेवहरिप्रसादात्तस्याशुसिध्यतिवचःसुदृढंममैतत् ॥ ३४ ॥ त्यक्त्वासुगन्धिकुसुमंभुवनैक
नाथोमन्दारकुन्दनलिनादिकमप्यनन्तः ॥ गृह्णातिसद्गुणमयींतुलसीप्रमोदैःशुष्कामपिप्रचुरपापविनाशदक्षाम् ॥३५॥ उत्पाटयचैवतुलसींभुविनिक्षि
पन्तिपापाशयामृतलताभनिदानभूताम् ॥ अज्ञानतोनरहरिस्तुलसीप्रियोऽसौतेषांश्रियंहरतिसन्ततमेवसत्यम् ॥३६॥ मूत्रंपुरीषंतुलसीतलेषुकुर्वन्तिये
वैसततंमनुष्याः ॥ देवाश्रयेसंचितपातकानांतेषांहरत्याशुहरिर्धनानि ॥ ३७ ॥ नारायणस्यपूजार्थंचिनोमित्वांनमोऽस्तुते ॥ कुसुमैःपारिजाताद्यै
र्गन्धाद्यैरपिकेशवः ॥ ३८ ॥ त्वयाविनानैतितृप्तिंचिनोमित्वामतःशुभे ॥ त्वयाविनामहाभागेसमस्तंकर्मनिष्फलम् ॥ ३९ ॥ अतस्तुतुलसी
देविचिनोमिवरदाभव ॥ चयनोद्भवदुःखंतयद्देविहृदिजायते ॥ ४० ॥ तत्क्षमस्वजगन्नाथेतुलसित्वांनमाम्यहम् ॥ ४१ ॥ कृताञ्जलिरिमा
न्मन्त्रान्पठित्वावैष्णवोजनः ॥ करतालद्वयंदत्त्वाचिनोतितुलसीदलम् ॥ ४२ ॥ यथानकम्पतेशाखातुलस्याद्विजसत्तम ॥ पत्रस्यचयनेदेवीभग्न
शाखायदाभवेत् ॥ ४३ ॥ तदाहृद्व्यथाविष्णोर्जायतेतुलसीपतेः ॥ शाखाग्रात्पतितंभूमौपत्रंपत्रंपुरातनम् ॥ ४४ ॥ तेनापिपूज्योगोविन्दो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मधुकैटभमर्दनः ॥ कोमलैस्तुलसीपत्रैर्योऽर्चयेदच्युतंप्रभुम् ॥ सर्वंसलभतेशीघ्रंयद्यदिच्छतिचेतसा ॥ ४५ ॥ जैमिनिरुवाच ॥ तुलसीवृक्ष
सदृशःकोवृक्षोऽस्तिद्विजर्षभ ॥ तमहंज्ञातुमिच्छामिब्रूहिसत्यवतीसुत ॥ ४६ ॥ व्यासउवाच ॥ यथाप्रियतमाविष्णोस्तुलसीसततंद्विज ॥
तथाप्रियतमाधात्रीसर्वपापप्रणाशिनी ॥ ४७ ॥ तुलसीवृक्षमासाद्ययायास्तिष्ठन्तिदेवताः ॥ आमलक्यास्तलेतास्तानिवसन्तिद्विजोत्तम ॥
॥ ४८ ॥ गङ्गादीनिचतीर्थानितत्रैवद्विजसत्तम ॥ विष्णुप्रियतमाधात्रीपवित्रायत्रतिष्ठति ॥ ४९ ॥ अशुभंवाशुभंवापियत्कर्मामलकीतले ॥
क्रियतेमानवैर्विप्रभवेत्तत्सत्यमक्षयम् ॥ ५० ॥ पवित्रैर्नूतनैःपत्रैर्धात्र्यायःपूजयेद्धरिम् ॥ समुक्तःपापजालेनसायुज्यंलभतेहरेः ॥ ५१ ॥ धा
त्रीचतुलसीदेवीनतिष्ठेद्यत्रजैमिने ॥ स्थानंतदपवित्रंस्यान्नचक्रियाफलंलभेत् ॥ ५२॥ नतिष्ठत्याश्रमेयस्यधात्रीचतुलसीशुभा ॥ तेनकर्मकृतंसर्वंनूनं
भवतिनिष्फलम् ॥ ५३ ॥ धात्र्यातुलस्याहीनंचनिलयंयस्यभूसुर ॥ अलक्ष्मीःपातकंसर्वंकलिश्चतेनतोषिताः ॥ ५४ ॥ स्थानेयस्मिन्द्विजश्रेष्ठन
धात्रीतुलसीनच ॥ श्मशानतुल्यंस्थानंतद्विज्ञेयंतत्त्वदर्शिभिः ॥ ५५ ॥ धात्रीचतुलसीयत्रतिष्ठेत्तत्राखिलाःसुराः ॥ नधात्रीतुलसीपत्रंतत्रैवाखिलपात
कम् ॥ ५६ ॥ धात्रीफलस्रजंयस्तुपापहर्त्रींवहेद्बुधः ॥ तस्याश्रित्यतनुंविष्णुःसदातिष्ठेच्छ्रियासह ॥ ५७ ॥ धात्रीकाष्ठस्यमालांचयोवहेन्मतिमान्नरः॥
तस्यदेहंसमाश्रित्यतिष्ठन्तिसर्वदेवताः ॥ ५८ ॥ धात्रीफलस्रजंगृह्णन्यत्कर्मकुरुतेनरः ॥ तत्सर्वमक्षयंप्रोक्तंशुभंवायदिवाशुभम् ॥ ५९ ॥ यस्तुधात्री
फलंभुङ्क्तेमानवोऽखिलतत्त्ववित् ॥ तद्देहाभ्यन्तरस्थायिसर्वंपापंविनश्यति ॥ ६० ॥ धात्रीफलमयींमालांयोवहेद्द्विजसत्तम ॥ ब्रवीमिश्रृणुमाहात्म्यं
सर्वपापहरंपरम् ॥ ६१ ॥ श्मशानेऽपियदामृत्युस्तस्यस्याद्दैवयोगतः ॥ गङ्गामरणजंपुण्यंसंप्राप्नोतिनसंशयः ॥ ६२ ॥ तंदृष्ट्वापापिनःसर्वेपाप
जालैःसुदारुणैः ॥ सद्यएवप्रमुच्यन्तेजन्मकोटिकृतैरपि ॥६३॥ नित्यंगृह्णातिविप्रेन्द्रयोधात्रीफलकर्दमम् ॥ दिनेदिनेलभेत्पुण्यंसंप्राप्नोतिनसंशयः॥
॥ ६४ ॥ धात्रीतरुंचयोहन्तिसर्वदेवगणाश्रयम् ॥ सदद्दातिहरेरङ्गेघातंनास्त्यत्रसंशयः ॥ ६५ ॥ सर्वदेवमयीधात्रीविशेषात्केशवप्रिया ॥ सम्य
ग्वक्तुंगुणंतस्याब्रह्मणापिनशक्यते ॥ ६६ ॥ धात्र्यास्तुलस्याविदधातिभक्तिंयोमानवोज्ञातसमस्ततत्त्वः ॥ भुक्त्वाचभोगान्सकलांस्ततोऽन्तेसमुक्ति
माप्नोतिहरेःप्रसादात् ॥ ६७ ॥ इतिश्रीपाद्मेमहापुराणेक्रियायोगसारेतुलसीमाहात्म्यंनामचतुर्विंशोऽध्यायः ॥ २४ ॥ जैमिनिरुवाच ॥ भूयएव
महाभागतुलस्याःपापनाशनम् ॥ अतिथेःपूजनस्यापिमाहात्म्यंब्रूहिविस्तरात् ॥ १ ॥ सूतउवाच ॥ ततोव्यासोमहातेजास्तुलस्याद्विजसत्तम॥
माहात्म्यंवक्तुमारेभेश्रृण्वतांपापनाशनम् ॥ २ ॥ व्यासउवाच ॥ इयंसाक्षान्महालक्ष्मीस्तुलसीभगवत्प्रिया ॥ तस्मादिमांनपश्यन्तिवृक्षज्ञानेन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जैमिने ॥ ३ ॥ सदैवतुलसींमर्त्योयथैवप्रभुविसेवते ॥ तथैवसेन्द्राविबुधाःसेवन्तेतंसुरालये ॥ ४ ॥ परब्रह्मस्वरूपेयंतुलसीयत्रतिष्ठति ॥ तत्रैव
कुशलंसर्वंसुदृढंप्रोच्यतेमया ॥ ५ ॥ प्राप्नोतिमृत्युकालेयस्तोयंपातकवानपि ॥ तुलसीपत्रगलितंसयातिहरिसन्निधिम् ॥ ६ ॥ तुलसीमृत्तिका
पुण्ड्रयोमृत्युसमयेवहेत् ॥ समुक्तःसकलैःपापैःपुरंगच्छतिचक्रिणः ॥ ७ ॥ यस्यस्यात्तुलसीपत्रंमुखेशिरसिकर्णयोः ॥ मृत्युकालेद्विजश्रेष्ठतस्यस्वामी
नभास्करिः ॥ ८ ॥ पवित्रनामासुमतिर्बभूवपरमार्थवित् ॥ बभूवब्राह्मणीतस्यबहुलानामधारिणी ॥ ९ ॥ सद्वंशप्रभवासाध्वीपतिसेवापरायणा ॥
अनपत्यपतिर्नामतत्रैकोऽस्तिद्विजोत्तमः ॥ १० ॥ सख्यंतेनपवित्रोऽसौचकारद्विजसेविना ॥ ततोऽनपत्यपतिनाकथालोभेनसत्तम ॥ ११ ॥ उप
विष्टःपवित्रोऽसौस्नेहादेकवरासने ॥ तत्रान्तरेमहातेजालोमशोनामसद्विजः ॥ १२ ॥ कथयन्तौकथाश्चित्राःसमागत्यददर्शतौ ॥ अथतंलोमशंविप्रं
विप्रावुत्थायपीठतः ॥ १३ ॥ पाद्यार्घ्याचमनीयाद्यैःपूजयामासतुश्चतौ ॥ सुप्रीतोलोमशस्ताभ्यांनारायणपरायणः ॥ १४ ॥ उवासब्राह्मणश्रेष्ठ
आसनेकीर्तयन्हरिम् ॥ आसनस्थंमहात्मानंलोमशंतंकृताञ्जलिम् ॥१५॥ पवित्रानपत्यमुनीभक्त्याप्राहतुर्लोमशम् ॥ भगवन्सर्वधर्मज्ञत्वत्पादयुगला
म्बुभिः ॥ १६ ॥ सद्भिर्गार्हस्थ्यैराश्रमोऽयंपूतोऽभून्नूनमावयोः ॥ कृतानियानिपापानिआवाभ्यांमोहतःपुरा ॥ १७ ॥ तानिसर्वाणिनष्टानित्वत्पादयुग
दर्शनात् ॥ भवान्नारायणःसाक्षात्पूजनीयोऽमरैरपि ॥ १८ ॥ सम्यक्तेपूजनंकर्तुंकिमावांमानुषौक्षमौ ॥ अतिथेर्याकृतापूजातेऽस्माभिर्निजशक्तितः ॥
॥ १९ ॥ अनयाभवसुप्रीतःक्षमस्वदोषमावयोः ॥ इत्युक्त्वातौमहात्मानौतस्यागन्तोःपदद्वये ॥ निपेततुर्द्विजश्रेष्ठवयस्यौगृहमेधिनौ ॥ २० ॥
व्यासउवाच ॥ तयोर्भक्त्यासुसंतुष्टोलोमशोमुनिरब्रवीत् ॥ युवांविनयिनांश्रेष्ठौद्विजाग्र्यौधर्मतत्परौ ॥ २१ ॥ आप्यायितोऽस्मिसुतरांयुवयोर्विन
योक्तिभिः ॥ साक्षाद्ब्रह्माशिवोविष्णुरतिथिःप्रोच्यतेबुधैः ॥ २२ ॥ तस्मिन्नेतावतीभक्तिर्युवयोरस्तुमङ्गलम् ॥ आराधितोऽस्म्यहंसम्यगतिथिर्भूरि
भोजनैः ॥ २३ ॥ व्यासउवाच ॥ ततउत्थायतौविप्रौतत्पादकमलद्वये ॥ भूयोऽपितंनमस्कृत्यप्राहतुर्लोमशंमुनिम् ॥ २४ ॥ ब्राह्मणावूचतुः ॥ ब्रह्मन्न
तिथिपूजायामाहात्म्यंवक्तुमर्हसि ॥ यांकृत्वाप्राप्यतेमुक्तिर्दुःखलभ्यापिमानवैः ॥ २५ ॥ कोऽतिथिःप्रोच्यतेलोकेतस्यपूजाचकीदृशी ॥ आतिथेयो ॥ ५६ ॥
ऽतिथिश्चैमौलभेतेकामुभौगतिम् ॥ २६ ॥ लोमशउवाच ॥ वानप्रस्थोब्रह्मचारीभिक्षुश्चैषांप्रपूजनात् ॥ निरुच्यतेगृहंश्रेष्ठमाश्रमेषुचतुर्ष्वपि ॥ २७ ॥
चतुराश्रमसध्येतुप्रधानागृहिणोमताः ॥ तैश्चातिथीनांकर्तव्यापूजाभक्तिसमन्वितैः ॥ २८ ॥ गृहिणांपरमोधर्मःप्रोक्तश्चातिथिपूजनम् ॥ आश्र
माचारतोऽभ्रष्टास्ततस्तेगृहिणोमताः ॥ २९ ॥ वहन्त्यतिथिपूजायांदक्षतांगृहिणोयदि ॥ तदाप्रयोजनंतेषांकिमन्यैःपुण्यकर्मभिः ॥ ३० ॥ यस्यन

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रूयतेनामनचगोत्रंनचस्थितिः ॥ अकस्माद्गृहमागच्छेत्सोऽतिथिःप्रोच्यतेबुधैः ॥ ३१ ॥ ब्राह्मणाःक्षत्रियावापिवैश्यावावृषलास्तथा ॥ गृहागताः
पूजिताश्चविष्णुवत्तत्त्वदर्शिभिः ॥ ३२ ॥ चाण्डालप्रमुखायेऽन्येहीनवर्णसमुद्भवाः ॥ विष्णुवत्पूजितव्यास्तेपाद्यार्घ्यैर्भूरिभोजनैः ॥ ३३ ॥
समागतेष्वतिथिषुप्रयाणंकुरुतेगृही ॥ अपिसत्वरयादद्यात्पाद्यार्घ्यादीनिचद्विजः ॥ ३४ ॥ कुर्याच्चकुशलप्रश्नंवचनैःकोमलाक्षरैः ॥ कारये
द्भोजनंवापिदिव्यैरन्नैर्मुदागृही ॥ ३५ ॥ सुखदेमन्दिरेतस्यशयनंकारयेद्बुधः ॥ प्रातर्जिगमिषुंदृष्ट्वातंग्रामान्तेविवर्जयेत् ॥ ३६ ॥ यदिकर्म
विपाकेनवित्तशून्योगृहीभवेत् ॥ आतिथ्येनातिथिःपूज्यस्तदहंवच्मिसत्तमौ ॥ ३७ ॥ समागतेष्वतिथिषुभक्त्यादद्यात्तृणादिकम् ॥ तृणाभावेन
वैब्रूयाद्भूमौतिष्ठेतिभक्तितः ॥ ३८ ॥ पादप्रक्षालनार्थंतुदद्यादुदकमुत्तमम् ॥ अतोमधुरयावाचापृच्छेच्चकुशलादिकम् ॥ ३९ ॥
फलादिकंततोदद्याद्भक्त्याभोजनहेतवे ॥ तदभावेनमतिमान्मुदाविप्रप्रकाशयेत् ॥ ४० ॥ वदेच्चाहंमहापापीदरिद्रप्रवरोऽतिथे ॥ कर्त्तुमिच्छामि
भक्तिंतेदैवंतत्रविरोधकम् ॥ ४१ ॥ अनेनविधिनादीनःसकृत्वातिथिपूजनम् ॥ स्वाचारापतितोभूत्वायथोक्तंफलमाप्नुयात ॥४२॥ अनर्चितोऽतिथि
र्यस्यगच्छेद्दैगृहिणोगृहात् ॥ जन्मकोट्यर्जितंपुण्यंतस्यगच्छतिसंक्षयम् ॥ ४३ ॥ एकएवातिथिर्येनभक्तिभावेनपूज्यते ॥ हरेत्तस्यहरिःसद्यःपातकं
कोटिजन्मजम् ॥ ४४ ॥ सत्यंवच्मिहितंवच्मिदृढंवच्मिप्रयत्नतः ॥ विनातिथिसपर्याभिर्गृहिणोनास्तिवैगतिः ॥ ४५ ॥ सत्यंसत्यंपुनःसत्य
मागन्तुपूजयाविना ॥ गतिर्नास्त्येवनास्त्येवनास्त्येवगृहिधर्मिणाम् ॥ ४६ ॥ ज्ञातिधर्मइतिख्यातोवह्लभोद्वापरेयुगे ॥ बभूवसर्वधर्मज्ञःपत्नीश्रीवह्ल
भाह्वया ॥ ४७ ॥ तेनसर्वाणिकर्माणिकृतानिज्ञातिसेविना ॥ सौराष्ट्रेवसतिंचक्रेतयासहसभार्यया ॥ ४८ ॥ तत्रदुर्ग्रहसंचाराद्द्वादशाब्दंचवासवः ॥
नववर्षाम्बुतेनासीद्दुर्भिक्षंसुमहद्विज ॥ ४९ ॥ तस्मिन्महतिदुर्भिक्षेलोकास्तद्देशवासिनः ॥ बभूवुर्दुःखिताःसर्वेमर्यादामपितत्यजुः ॥ ५० ॥ ज्ञान
भद्रोमहायोगीयुगेद्वापरसंज्ञके ॥ दुर्भिक्षहृतसंपत्तिर्बभूवात्यन्तदुःखितः ॥ ५१ ॥ क्षुधाकुलान्सुतान्दृष्ट्वादारांश्चद्विजसत्तमौ ॥ फलमूलादनार्थाय
जगामोपत्यकांगिरेः ॥५२॥ गिरेरुपत्यकाप्रान्तेचिरायुःसबुभुक्षितः ॥ कूष्माण्डफलमेकंचलेभेब्राह्मणसत्तमौ ॥५३॥ समादायफलंतच्चहर्षितोऽसौनि
जालयम् ॥ जवैर्जगामविप्रेन्द्रोज्ञानभद्रोमहायशाः ॥ ५४ ॥ एतस्मिन्नन्तरेविप्रमेघैर्नीलपदैरिव ॥ आवृतेगगनेवृष्टिर्महासारैर्बभूवह ॥ ५५ ॥ समुनि
श्चतयावृष्ट्याप्लाविताखिलविग्रहः ॥ वनाद्वनचरःकश्चिच्छीतार्तश्चाययौगृहम् ॥ ५६ ॥ दृष्ट्वातिथिंतुशीतार्तंववन्देशिरसाततः ॥ ददौतृणासनं
भक्त्यातस्मैपाद्यादिकंततः ॥ ५७ ॥ ततोमधुरयावाचातेनैवातिथिनासह ॥ तस्थौस्वस्थेनमनसाप्रज्ञालापंप्रकुर्वता ॥ ५८ ॥ गृहिण्यासहगोपेनस्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मिसेवासुदक्षया ॥ ततःकूष्माण्डकंनव्यंपक्कमत्यन्तयत्नतः ॥ ५९ ॥ संप्राप्यहर्षितासाध्वीददौभागंविधायसा ॥ अथासौदुर्बलोगोपोदिनविंश
मुपोषणात् ॥ ६० ॥ आतिथेयोमहाभागंददौचातिथयेमुदा ॥ ततस्तद्गृहिणीसाध्वीस्वामिभक्तिपरायणा ॥ ६१ ॥ ददौसापतितंभागंतस्मैचाति
थयेमुदा ॥ अथातिथेस्तयोस्तत्रदम्पत्योःसुमहात्मनोः ॥ ६२ ॥ अभूद्भागद्वयंभुक्त्वासुप्रीतोद्विजसत्तम ॥ विष्णुवत्पूजितस्ताभ्यांसोऽतिथिर्दृढ
भक्तितः ॥६३॥ विश्राम्यरात्रौतत्रैवप्रातःस्नात्वाचिरंययौ ॥ गतैवमुपवासेनदिनानामेकविंशतिः ॥ ६४ ॥ दम्पतीतौमहात्मानौपञ्चतांययतुस्ततः ॥
तेनपुण्यप्रभावेणदम्पतीतौमहाशयौ ॥ ६५ ॥ प्रापतुर्विष्णुसायुज्यंदुर्लभंयोगिनामपि ॥ तयोःपुण्यप्रभावेणविहितातिथिपूजया ॥ ६६ ॥
तस्मिन्राज्येतुदुर्भिक्षंविनष्टमभवत्ततः ॥ अत्यन्तसुखिनोलोकाःशोकव्याधिविवर्जिताः ॥ ६७ ॥ धनधान्यादिसम्पन्नाबभूवुर्धर्मतत्पराः ॥ विनष्टा
दस्यवस्तत्रनृपोऽभूल्लोकपालकः ॥ ६८ ॥ निजाचाररतालोकाजलदाःकामवर्षिणः ॥ पूर्वजाःकोटिपुरुषास्तथैवापरजास्तयोः ॥ ६९॥ तेनैवकर्मणा
मुक्तिंजग्मुःपापविवर्जिताः ॥ निर्दोषाधनसंपन्नाःसर्वलोकैकपूजिताः ॥ शोकव्याधिविहीनाचववृधेसन्ततिस्तयोः ॥ ७० ॥ लोमशउवाच ॥
आगन्तुपूजामाहात्म्यंसेतिहासंमयोदितम् ॥ युवयोःप्रीतयोर्विप्रौकिमन्यच्छ्रोतुमिच्छथ ॥ ७१ ॥ व्यासउवाच ॥ इतिब्रुवतिवैतस्मिँल्लोमशे
तपसांधने ॥ कालग्रस्तःकृष्णआखुस्तत्रोत्तस्थौबिलान्निजात् ॥ ७२ ॥ तमुत्थितंबिलात्कृष्णमूषकंक्रोधविह्वलः ॥ पवित्रस्तत्रचोत्तस्थौवद
न्नितिमुहुर्मुहुः ॥ ७३ ॥ अयंपापाशयोदुष्टोमूषकोनिशिचाश्रमम् ॥ खनतेतीक्ष्णदन्तौघैर्गृहद्रव्यंचकृन्तति ॥ ७४ ॥ सर्वेषामेववर्णानां
कृपाश्रेष्ठाप्रकीर्तिता ॥ साचसर्वेषुकर्तव्यानचदुष्टेषुजन्तुषु ॥ ७५ ॥ इत्युक्त्वासौमूषिकंतंद्विजश्रेष्ठकृतैनसम् ॥ नाराचेनातितीक्ष्णेनप्राप्त
कालंजघानह ॥ ७६ ॥ स्रवच्छोणितधाराभिःप्लाविताङ्गःसमूषकः ॥ पपातभूमौविप्रर्षेव्यथयाहतचेतनः ॥ ७७ ॥ आखौनिपतितेतस्मिन्दयालु
र्द्विजसत्तमः ॥ हाहाकारंततःकृत्वासमुत्तस्थौजवेनसः ॥ ७८ ॥ निजकर्णात्समानीयतुलसीपत्रमुत्तमम् ॥ तस्याखोर्वदनेशीर्षेकर्णयोश्चप्रदत्त
वान् ॥ ७९ ॥ मातस्तुतुलसीदेविगोविन्दाह्लादकारिणि ॥ अस्याखोःकृतपापस्यकुरुत्वंगतिमुत्तमाम् ॥ ८० ॥ इत्युक्त्वासद्विजश्रेष्ठसर्व
लोकोपकारकः ॥ हरेनारायणानन्तइत्युच्चैरकरोद्ध्वनिम् ॥ ८१ ॥ तुलसीपत्रसंस्पर्शान्मूषकोवीतकल्मषः ॥ श्रवणाद्धरिनाम्नश्चमुक्तोऽभूद्भवबन्ध ॥ ५७ ॥
नात् ॥ ८२ ॥ ततोदूतामहाविष्णोःसर्वलक्षणसंयुताः ॥ आजग्मुःसुरथैःशीघ्रंनेतुंतंगतकल्मषम् ॥ ८३ ॥ समारुह्यरथंदिव्यंविष्णुदूतगणैर्वृतः ॥
जगामपरमंस्थानंमूषकोद्विजसत्तम ॥ ८४ ॥ युगकोटिसहस्राणिस्थित्वानारायणाश्रमे ॥ ज्ञानमासाद्यतत्रैवमोक्षमाखुर्जगामसः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ८५ ॥ व्यासउवाच ॥ माहात्म्यंतुलसीदेव्याःकथितंतेद्विजोत्तम ॥ इदानींब्रूहिकिंश्रोतुंमहाभागत्वमिच्छसि ॥ ८६ ॥ इतिश्रीपाद्मे
महापुराणेक्रियायोगसारेपञ्चविंशोऽध्यायः ॥ २५ ॥ जमिनिरुवाच ॥ कलौयुगेमहाभागसमायातेसुदारुणे ॥ भविष्यन्तिजनाःसर्वेकीदृशा
स्तद्वदस्वमे ॥ १ ॥ व्यासउवाच ॥ आद्यंसत्ययुगंप्राहुस्तत्रविप्रादयोजनाः ॥ नारायणार्चनपराःशोकव्याधिविवर्जिताः ॥ २ ॥ सत्योक्ति
भाषिणःसर्वेसदयादीर्घजीविनः ॥ धनधान्यादिसम्पन्नाहिंसादम्भविवर्जिताः ॥ ३ ॥ परोपकरणाश्चैवसर्वशास्त्रविदस्तथा ॥ एवंविधाःसत्ययुगे
सर्वेलोकाद्विजोत्तम ॥ ४॥ राजधर्मग्राहिणश्चभूपालाजनपालनाः ॥ अहोसत्ययुगस्यास्तिकोव्याख्यातुंगुणंक्षमः॥५॥अधर्मोच्चारणंयत्रजनाःकेऽपिन
कुर्वते ॥ त्रेतायुगेसमायातेधर्मःपादोनतांगतः ॥६॥ अल्पशोकान्वितालोकाःकेचित्केचिदघाश्रयाः॥ विष्णुध्यानरतालोकायज्ञदानपरायणाः ॥ ७॥
वर्णाश्रमाचाररताःसुखिनःस्वस्थचेतसः ॥ क्षेत्रभूमिकृतःशूद्राःसर्वेब्राह्मणसेविनः ॥ ८ ॥ ब्राह्मणाश्चमहात्मानोवेदवेदाङ्गपारगाः ॥ प्रतिग्रहनिवृत्ताश्च
सत्यसन्धाजितेन्द्रियाः ॥९॥ तपोव्रतरतानित्यंदातारोविष्णुसेविनः ॥ त्रेतायुगस्यावसानेद्वापरेयुगआगते ॥१०॥ द्विपादहीनोधर्मःस्यात्सुखदुःखा
न्वितानराः ॥ केचित्केचित्पापरताःकेचित्केचिच्चधर्मिणः॥११॥केचित्केचिद्गुणैर्हीनाःकेचित्केचिन्महागुणाः॥अत्यन्तदुःखिनःकेचित्केचिच्चसुखिन
स्तथा॥१२॥प्रतिग्रहेब्राह्मणश्चकदाचित्कुरुतेस्पृहाम् ॥ भूभुजैर्धनलोभेनकदाचित्पीडयतेप्रजा॥१३॥विष्णुपूजापराविप्राःशूद्राश्चद्विजसेविनः ॥ यदा
युगेयुगेधर्मःपादोनतांगतोद्विज ॥ १४ ॥ तदाव्यासोविष्णुरूपीवेदभागंचकारह ॥ कलौयुगेचविप्रेन्द्रसर्वपापैकमन्दिरे ॥ १५ ॥ एकपादोभवेद्धर्मः
सर्वेपापरताजनाः ॥ ब्राह्मणाःक्षत्रियावैश्याःशूद्राःपापपरायणाः ॥ १६ ॥ अत्यन्तकामिनःक्रूराभविष्यन्तिकलौयुगे ॥ वेदनिन्दाकराश्चैवद्यूतचौर्य
करास्तथा॥१७॥विधवासङ्गमग्राश्चभविष्यन्तिकलौयुगे ॥ वृत्त्यर्थंब्राह्मणाःकेचिन्महाकपटधर्मिणः॥१८॥सर्वेस्त्रैणाभविष्यन्तिमादकद्रव्यसेविनः ॥
सदास्त्रीयोनिनिरताःपरद्रव्यंहरन्तिच ॥१९॥ परान्नलोलुपानित्यंतपोव्रतपराङ्मुखाः ॥ पाखण्डसङ्गबद्धाश्चभविष्यन्तिकलौयुगे ॥२०॥ रक्ताम्बरा
भविष्यन्तिब्राह्मणाःशूद्रधर्मिणः ॥ कलौयास्यन्तिनिर्वृत्ताउत्तमाअतिनीचताम्॥२१॥ नीचाश्चधनसम्पन्नायास्यन्त्युच्चपदंप्रति ॥ प्रदास्यन्त्युपका
रिभ्योदानानिसकलाजनाः ॥ २२ ॥ यत्नादपिचनेष्यन्तिवृषलाविप्रवर्त्तनम् ॥ मित्रस्नेहाद्वदिष्यन्तिकूटसाक्ष्यंकलौजनाः॥२३॥अधर्मबुद्धिलपना
धर्मबुद्धिविलासिनः ॥ परोक्षनिन्दकाःक्रूराःसंमुखेप्रियवादिनः॥२४॥साध्वीवादंवदिष्यन्तिभर्तारंपुंश्चलीस्त्रियः ॥ परस्त्रीहिंसकाश्चैवगोत्रविक्रयिणो
द्विजाः ॥ २५ ॥ कन्याविक्रयिणश्चैवभविष्यन्तिकलौयुगे ॥ स्त्रीजिताःपुरुषाःसर्वेस्त्रियोऽप्यत्यन्तचञ्चलाः ॥२६॥ कलौयुगेभविष्यन्तिकलौमर्त्या
दुराशयाः ॥ अल्पसस्यावसुमतीमेघाःस्वल्पोदकास्तथा ॥ २७ ॥ अकालवर्षिणश्चापिभविष्यन्तिकलौयुगे ॥ कलौविड्भोजिनोगावःस्वल्पक्षीरा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्वजैमिने ॥ २८ ॥ घृतहीनंचतत्क्षीरंभविष्यतिनसंशयः ॥ आत्मस्तुतिपरालोकाःपरनिंदापरायणाः ॥ २९ ॥ भविष्यन्तिचखर्वाङ्गाबालावह्वन्न
भोजनाः ॥ पितृयज्ञंकरिष्यन्तिदम्भार्थंब्राह्मणाःकलौ ॥ ३० ॥ सर्वेवचःस्नेहिनःस्युर्यावत्कार्यंनसिध्यति ॥ नरान्धर्मपरान्दृष्ट्वासर्वेचोपहसन्तिवै ॥
॥३१॥वर्धन्तेऽधर्मतोलोकास्तस्मात्पापरताजनाः ॥ दशद्वादशवर्षेचसमूलोऽप्येतिसंक्षयम् ॥ ३२ ॥ जलस्येवभविष्यन्तियथावर्षासुवृद्धयः ॥ ततो
लोकाभविष्यन्तिकलौगलितयौवनाः ॥३३॥ पञ्चमेवापिषष्ठेवावर्षेस्त्रीगर्भधारिणी ॥ बह्वपत्याश्चपुरुषाभविष्यन्त्यतिदुःखिनः ॥३४॥ नेतुकामाश्च
सर्वेऽपिदातुकामानकेऽपिच ॥ कलौम्लेच्छाभविष्यन्तिराजानःपापतत्पराः॥३५॥एकवर्णाभविष्यन्तिविषयार्थंकलौजनाः॥कलेःप्रथमसन्ध्यायांहरिं
निन्दन्तिमानवाः॥३६॥कलेर्मध्येनपश्यन्तिहरेर्नामानिकेवलम् ॥ ब्राह्मणाःक्षत्रियावैश्यावृषलाश्चकलौयुगे ॥३७॥ एकवर्णाभविष्यन्तिवर्णाश्चत्वारए
वच॥यदायदाद्विजश्रेष्ठहानिःसुकृतिनांभवेत्॥३८॥वृद्धिश्चपापिनांनृणांज्ञेयावृद्धिस्तदाकलौ ॥ यद्यप्ययंकलिर्घोरोमयाप्रोक्तोद्विजोत्तम॥३९॥तथाप्य
स्तिमहानस्यगुणोगुणवतांवर ॥ सत्येद्वादशभिर्वर्षैर्भवेत्पुण्यस्यसाधनम् ॥ ४० ॥ तदर्धेनचत्रेतायांमासेनद्वापरेभवेत् ॥ अहोरात्रेणैवविप्रभवेत्तच्च
कलौयुगे ॥ ४१ ॥ तस्मात्कलियुगेनृणांदिनेनैवोत्तमागतिः ॥ द्वादशाब्दैर्युगेऽन्यस्मिन्हरिमभ्यर्च्ययत्फलम् ॥ ४२ ॥ तत्फलंलभतेमर्त्योहरिमुच्चा
र्यैवकलौ ॥ हरेर्नामैकमप्यत्रकलौवदतियोनरः ॥ कलिर्नबाधतेतंचसत्यंसत्यंनसंशयः ॥ ४३ ॥ जैमिनिरुवाच ॥ मनःशुद्धिविहीनत्वात्समस्तं
कर्मनिष्फलम् ॥ इतिपूर्वंत्वयाप्रोक्तंमनोविस्मयदंमम ॥ ४४ ॥ कलौसर्वेभविष्यन्तिमनःशुद्धिविवर्जिताः ॥ तेषांयथाभवेत्कर्मसकलंब्रूहितद्गुरो ॥
॥ ४५ ॥ व्यासउवाच ॥ यत्किंचित्कुरुतेकर्ममर्त्योधर्मंकलौयुगे ॥ तदर्पयेन्महाविष्णौभक्तिभावसमन्वितः ॥ ४६ ॥ विष्णौसमर्पितंकर्मसर्वमेवा
क्षयंभवेत् ॥ ४७॥ व्यासउवाच ॥ इतितेकथितंसर्वंवृत्तंब्राह्मणसत्तम ॥ यच्छ्रुत्वाभक्तिभावेननरोमोक्षमवाप्नुयात् ॥४८॥ सूतउवाच ॥ एवंप्रबोधित
स्तेनजैमिनिःपरमात्मना ॥ क्रियायोगरतोभूत्वाजगामपरमंपदम् ॥ ४९ ॥ इमंक्रियायोगसारंव्यासेनोक्तंमहात्मना ॥ येपठन्तिजनाभ
क्त्याशृण्वन्तिचमुमुक्षवः ॥ ५० ॥ तेसर्वेपातकैर्घोरैर्बहुजन्मार्जितैरपि ॥ विमुक्ताःपरमांमुक्तिंलभन्तेनात्रसंशयः ॥ ५१ ॥ यद्यदिष्टंपठन्त्ये
तच्छृण्वन्तिचमुमुक्षवः ॥ लभन्तेतत्तदेवाशुप्रसादात्कमलापतेः ॥ ५२ ॥ श्लोकार्धश्लोकमेकंवाश्लोकपादमथापिवा ॥ नरःपठित्वाश्रुत्वाचलभतेवा
ञ्छितंफलम् ॥ ५३ ॥ लिखित्वालेखयित्वावायःशास्त्रमिदमर्चयेत् ॥ सविष्णुपूजनस्यैवफलंप्राप्नोतिमानवः ॥ ५४ ॥ इदमतिशयगुह्यंनिःसृतंव्या
सवक्त्राद्रुचिरतरपुराणंप्रीतिदंवैष्णवानाम् ॥ चिरममरवराद्यैर्वन्दिताङ्घ्रेर्मुरारेःसकलभुवनभर्तुश्चक्रिणःप्रीतयेऽस्तु ॥ ५५ ॥ इतिश्रीपाद्मेमहापुराणे
क्रियायोगसारखण्डेव्यासजैमिनिसंवादेयुगधर्मनिरूपणपूर्वकंपुराणमाहात्म्यवर्णनंनामषड्विंशतितमोध्यायः॥२६॥शुभंभवतु॥श्रीवेङ्कटेश्वरार्पणमस्तु॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाप्तमिदं क्रियायोगसारखण्डम् ।

इदं पाद्ममहापुराणं क्षेमराज-श्रीकृष्णदासश्रेष्ठिना मुम्बय्यां (खेतवाड़ी ७ वीं गली खम्बाटा लेन)
स्वकीये "श्रीवेङ्कटेश्वर"-(स्टीम्) मुद्रणयन्त्रालये स्वीयार्थं मुद्रयित्वात्रैव प्रकाशितम् ।
संवत् १९८४, शके १८४९, सन् १९२७.

पुस्तक मिलनेका ठिकाना--

खेमराज श्रीकृष्णदास.
"श्रीवेङ्कटेश्वर"-स्टीम् प्रेस-
बम्बई.

गंगाविष्णु श्रीकृष्णदास,
"लक्ष्मीवेङ्कटेश्वर"-प्रेस-कल्याण-
बम्बई.

११०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ इति पाद्ममहापुराणं समाप्तम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अष्टादश महापुराणग्रन्थाः ।

नाम पुस्तक.	कीमत.
१ ब्रह्मपुराण	७)
२ पद्मपुराण	२०)
३ { वैष्णवमहापुराण–सम्पूर्ण–२३००० ग्रन्थ, पूर्वभाग और उत्तरभाग समेत	१७)
वैष्णवमहापुराण–६ अंशमात्र,--"विष्णुचित्ती" और "श्रीधरी" टीकाद्वयसमेत	७)
विष्णुधर्मोत्तरपुराण--केवल मूलमात्र, यह एक भाग ही १७००० है	१०)
४ शिवपुराण–२४०००मूल सातो संहिता सम्पूर्ण.... ...	१०)
५ श्रीमद्भागवत पुराण–श्रीधरी टीकासहित	२०,
६ नारदपुराण	८)
७ मार्कण्डेयपुराण–दुर्गा शांतनवी टीकासहित	४)
८ आग्निपुराण–	६)
९ भविष्यपुराण	१२)
१० ब्रह्मवैवर्तपुराण–सम्पूर्ण	१०)
११ लिङ्गपुराण–सटीक	८)
१२ वाराहपुराण	६)
१३ स्कान्दमहापुराण–संपूर्ण सातो खण्ड ग्रंथसंख्या एक लक्ष है	४०)
१४ वामनपुराण	३)

नाम पुस्तक.	कीमत.
१५ कूर्मपुराण	३॥)
१६ मत्स्यपुराण	७)
१७ गरुडपुराण–बड़ा सम्पूर्ण	७)
१८ ब्रह्माण्डपुराण	७)

उपपुराण-ग्रन्थाः।

आदिपुराण–मूल	१)
,, तथा केवल भाषा	१।॥)
,, तथा भाषाटीकासहित	२॥)
कल्किपुराण–भाषाटीकासहित	२॥)
,, तथा केवल भाषा	॥।)
कालिकापुराण–मूल–शाक्तलोगोंको परमोपयोगी, अवश्य संग्राह्य है	५)
वायुपुराण–मूल	६)
श्रीमद्देवीभागवत--नीलकण्ठी टीकासहित	१०)
,, ,, ,, तथा भाषाटीकासहित	१६)
,, ,, ,, तथा केवल भाषा	१०)

पुस्तकें मिलनेका ठिकाना—

खेमराज श्रीकृष्णदास,
" श्रीवेंकटेश्वर " स्टीम्-प्रेस,
बंबई.

गंगाविष्णु श्रीकृष्णदास,
" लक्ष्मीवेंकटेश्वर " प्रेस,
कल्याण–बंबई.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

॥ इति श्रीपाद्मं महापुराणं समाप्तम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu